This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M635 विषय पुराण
नाव. भागवत महापुराण (मुद्रित)
लेखक/लिपीकार श्रीधरी टीका, वंशीधरशर्मकृत भावार्थदीपिका टीका
पृष्ठ 1460 काळ शके १८३० पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीमद्भागवतं श्रीधरीयटीकया नाभेशाश्रित पं. वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया चोपेतम् ॥

महाराजनाभाधीशश्री १०८ श्रीहीरासिंहजीत्यस्य साहाय्येनेदं मुद्रितम् ।

अस्य ग्रन्थस्य पुनर्मुद्रणाद्यधिकारः आंग्लराजकीय १८६७ तमसांवत्सरिक २५ तमनियमानुसारेण प्रकाशकाधीनः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिष्य-दुर्गादत्त.

पुत्र-पं०श्रीलक्ष्मी
नारायणजी.

राजमान्य श्री १०८ श्री पंडित श्रीवंशीधरजी महाराज,
भावार्थदीपिकाप्रकाशटीकाकर्ता ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्तावना ।

अथ खलु भूयानानन्दो बोभवीति मदीये मनसि सकलविद्वज्जनोपासनापरकतिपयशुभसमाचारसंवेदनायेति समुत्सहे किंचिद्वक्तुम् ।

विदितमेव भवेद्भव्यजनानाम्, यच्छ्रीमद्भागवतं नाम श्रीव्यासमहामुनिप्रणीतं महापुराणमैहिकामुष्मिकचतुर्विधपुरुषार्थसाधनैकधुरीणमाबालमापण्डितं समस्तवैदिकधर्मावलम्बिभिः परमपवित्रतया समाद्रियमाणं वेदार्थरहस्यसिद्धांतशुद्धांतायमानं शश्वद्भक्तजनैः पापठ्यमानं शोश्रूयमाणं च वरीवर्ति सकलमहापुराणमूर्धन्यभागे । यत्र किल नरीनृतीति श्रीव्यासमहर्षिवर्यस्य विविधपदविन्यासपेशला सरस्वती । यत्पठनपाठनश्रवणसमर्चनादिभिस्तरीतर्ति सेतुशीताचलमध्यवर्ती भक्तजनः । यत्सत्तया दरीधर्ति धर्मो धरित्रीम् । यच्च संजरीहर्ति तापम् । चरीकर्ति च सकलसत्कामनासिद्धिमिति समंततः प्रसिद्धमेव ।

तत्र चैतच्छ्रीमद्भागवतं नाम महापुराणं यथास्वरूपं यादृग्विधं वेत्यत्र प्रायो बहूनां व्यामोह आपतति । यद्धचेतन्महापुराणं वाऽन्यत्किंचिदिति । अत्रार्थे यथामति बहून्ग्रंथान्समालोच्य बहुलविद्वज्जनकृततद्विषयकविचारपुरःसरस्वाभिमताभिप्रायदिग्दर्शनमुखेन परामर्शः प्रस्तूयते—

तत्रादौ पंडितवरश्रीवंशीधरमतमनूद्यते । तच्चेत्थम्—न हि भागवतं श्रीव्यासदेवेन रचितं किं तु पूर्वं सदेवाविष्कृतमन्यथा तस्य "इदं भागवतं नाम पुराणं ब्रह्मसम्मितम्" इति वाक्येन ब्रह्मरूपत्वाद्ब्रह्मणोप्यनित्यता स्यात् 'पिबत भागवतं रसमालयम्' इत्यग्रे वक्ष्यमाणत्वादप्यस्यानागताख्यानेनैव प्रवृत्तेः । पुराणांतरे प्रशंसाश्रवणादपि नित्यत्वमेवास्य सिध्यति । तथाच गरुडपुराणे—"अर्थोयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यभूतोसौ वेदार्थपरिबृंहितः ॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसम्मितः । पठनात्पाठनाद्ध्यानात्स्पर्शनादर्चनाद्दृशेः । सर्वपापहरः कृष्णरूपी चैव न संशयः ॥" इति । ब्रह्मवैवर्तेपि—'पुराणेषु भागवतम्' इति विभूतिषु श्रीभागवतस्य गणितत्वादपि ब्रह्मरूपतास्य सिद्धेत्यतो नित्यमेवेदं पुराणम् ॥ अथाग्रेऽस्य वैभवं वक्ष्यामः—

अत्र श्रीमद्भागवते त्रयाणां कर्मोपासनाज्ञानकाण्डानां यथावत्प्रतिपादनाद्वेदरूपत्वमेव साक्षादिति हि निश्चितम् ॥ तत्र **कर्मकांडमाह** ॥ स च विधिनिषेधात्मकः । तत्र संक्षिप्य विधिभेदास्त्वित्थमवधेयाः—अप्राप्तं फलवंतं चार्थं यः स्वसामर्थ्येन प्रकाशयति स विधिरुत्पत्त्यादिधर्मैर्युक्तः ।स चोत्पत्तिविधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिश्चेति चतुर्द्धा भवति । तत्र कर्मस्वरूपमात्रबोधको विधिः प्रथमः, यथाऽग्निहोत्रं जुहोतीति । अंगसंबंधबोधको विधिर्विनियोगविधिः, यथा दध्ना जुहोतीति । स हि तृतीयाप्रतिपन्नांगभावस्य दध्नो होमसंबंधं विधत्ते 'दध्ना होमं भावयेत' इति । दध्यादीनामंगत्वं नाम परोद्देश्यप्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम्, तच्चानेन विधिना ज्ञाप्यते । प्रयोग आशुभाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बोधको विधिः प्रयोगविधिः । स चांगवाक्यैक्यतामापन्नः प्रधानविधिरेव सांगं प्रधानमनुष्ठापयन्विलंबे मानाभावादविलंबापरपर्यायं प्रयोग आशुभावं विधत्ते । न च विलम्ब
वदविलम्बेपि मानाभावः; विलम्बेंगप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तेः । न हि विलम्बेन कृतयोः पदार्थयोः सहकृतमिति साहित्यं व्यवहरंति । स चाविलम्बो
नियते क्रम आश्रियमाणे भवति । अन्यथा किमेतदनंतरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः । अतः प्रयोगविधिरेव स्वविधेयप्रयोग आशुभावसिद्ध्यर्थं नियतं
क्रममपि पदार्थविशेषणतया विधत्ते । तत्र क्रमो नाम विततिविशेषः, पौर्वापर्यरूपो वा । फलस्वाम्यबोधको विधिरधिकारविधिः । फलस्वाम्यं च कर्मजन्यफलभोक्तृत्वम्।स च
"यजेत स्वर्गकामः" इत्येवंरूपः । अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं बोध्यते।तच्च स्वाम्यं तस्यैव योऽधिकारविशेषणविशिष्टः।अधिकार
विशेषणं च तदेव यत्पुरुषविशेषणत्वेन श्रुतम् । अत एव—"राजा राजसूयेन स्वाराज्यकामो यजेत" इत्यनेन स्वाराज्यमुद्दिश्य राजसूयं विदधतापि न स्वाराज्यकाममात्रस्य
तत्फलभोक्तृत्वं बोध्यते, किन्तु राज्ञः सतस्तत्कामस्य । किंचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारविशेषणं भवति, यथाध्ययनविधिसिद्धा विद्या । अग्निसाध्येषु च कर्मस्वाधान
सिद्धाऽग्निमत्ता । एवं सामर्थ्यस्याप्यधिकारिविशेषणत्वम्।'आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी'इति न्यायात, 'अर्थी समर्थो विद्वान्यजेत्'इत्यसमर्थं प्रति विध्यप्रवृत्तेश्च।
एवमर्थितादेरपि बोध्यमिति दिक्।तत्सिद्धफलस्वाम्यबोधको विधिरधिकारविधिरिति तदेवं निरूपितो विधिभेदश्चतुर्द्धेति॥चतुर्धाप्ययम्पुनः प्रकारांतरेण त्रिविधः।स च—"विधिर्वा
स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम्१।२।१९।" । उदकत्वं चापूर्वत्वात्३।४।१३।" । "विधिस्तु धारणेऽपूर्वत्वात्३।४।१५।" । "नियमार्थो वा पुनः श्रुतिः४।२।२४।"।"परि
संख्या १।२।४२।" इत्येवमादिषु भगवतो जैमिनेः सूत्रेष्वभिहितः॥भट्टपादैश्चान्योन्यासंकीर्णतया सलक्षणो विशिष्टमुपपादितः—"विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥" इति । अस्यार्थः—यस्य यदर्थत्वं मानांतरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोपूर्वविधिः, यथा "यजेत स्वर्गकामः" . "व्रीही
न्प्रोक्षति" इत्यादिनाऽत्र यागस्य स्वर्गार्थताया व्रीहीणां प्रोक्षणस्य च संस्कारकर्मणो विधिं विना न कथमपि प्राप्तिरस्त्यतोऽयमपूर्वविधिः । पक्षप्राप्तस्याप्राप्तांशपरिपूरणफलो
विधिर्नियमविधिः, यथा 'व्रीहीनवहंति' इति । अत्र विध्यभावेपि पुरोडाशप्रकृतिद्रव्याणां तंडुलनिष्पत्त्याक्षेपादेवाहननाप्राप्तांशसम्भवात्तदंशपरिपूरणफलः । उभयत्रैकस्यो
भयोर्वैकत्र युगपत्प्राप्तावन्यतरनिवृत्तिफलो विधिः परिसंख्याविधिः, यथा चयने अश्वगर्दभरशनयोर्ग्रहणे युगपदनुष्ठेये सामर्थ्यविशेषात्प्राप्तस्य "इमामगृभ्णन् रशनामृतस्य"इति
मंत्रस्य "अश्वाभिधानीमादत्ते" इति गर्दभरशनाग्रहणव्यावृत्तिमात्रफलको विधिः । एवम् " पंच पंचनखा भक्ष्याः " इत्यपि परिसंख्याविधिः । इदं हि न भक्षणपरं, तस्य
रागतः प्राप्तत्वात् । किन्तु पंचेतरपंचनखभक्षणनिवृत्तिपरमिति । न च नियमपरिसंख्ययोः फलतो न विशेषः, यतो नियमस्य विधेयावघातनिष्ठत्वात्सन्निहितमप्राप्तांशपूरणमेव
फलम् , नखविदलनादिनिवृत्तिस्त्वार्थिकीति विधिपक्षे वक्तव्यं बह्वस्ति तदन्यत्रानुसंधेयम् । विधेर्यथा विधेयार्थपरिच्छेदकत्वेनार्थवत्त्वं तथानर्थहेतुकर्मणः सकाशात्पुरुषस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवृत्तिकरणत्वेन निषेधस्यापि पुरुषार्थानुबंधित्वं बोध्यम् । तथाहि—विधयो यथा प्रवर्तनामभिदधतः स्वनिर्वर्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयःसाधनत्वमाक्षिपंतः पुरुषं तत्र प्रवर्तयंति, एवम् "न कलंजं भक्षयेत्" इत्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिर्वर्तकत्वनिर्वाहार्थं निषेधस्य कलंजभक्षणादेरनर्थहेतुत्वमाक्षिपंतः पुरुषं ततो निवर्तयंतीति । किंच—निषेधस्य क्रतुवैगुण्यप्रतिपादकत्वेन हेयतया यागार्थतापि सिद्धा । अर्थवादवाक्यं हि स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषिध्यमानयोः प्राशस्त्य निंदितत्वे लक्षणया प्रतिपादयति । तल्लक्षणं तु—प्राशस्त्यानिंदान्यतरपरं वाक्यमर्थवादः । स द्विधा—विधिशेषो निषेधशेषश्चेति । तत्र "वायव्यं श्वेतमालभेत भूतिकामः" इत्यादिविधिशेषस्य "वायुर्वै क्षेपिष्ठा देवता" इत्यादेर्विधेयार्थप्राशस्त्यबोधकतयार्थवत्त्वम् । "बर्हिषि रजतं न देयम्" इत्यादिनिषेधशेषस्य "सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्" इत्यादेर्निषेध्यनिंदितत्वबोधकतयार्थवत्त्वम् । न च प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वेन नार्थवादस्यार्थवत्त्वमिति वाच्यम्, आलस्यादिनाऽप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात् । स पुनस्त्रेधा । तदुक्तम्—"विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादतद्धानादर्थवादस्त्रिधा मतः ॥" इति । प्रमाणांतरविरोधे सत्यर्थवादो गुणवादः । यथा—"आदित्यो यूपः" इति यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते । प्रमाणांतरावगतार्थबोधकोऽनुवादः, यथा "अग्निर्हिमस्य भेषजम्" इत्यादि । हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् । प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः, यथा—"इन्द्रो वृत्राय वज्रमुदयच्छत" इत्यादि । न ह्यत्र प्रमाणांतरविरोधतत्प्राप्ती स्तः । एवं सर्वः कर्मकाण्डो विधिनिषेधांतर्गत एव । अत्रैव धर्मशास्त्रमपि गतार्थं तत्प्रतिपादकमिति बहुवक्तव्यत्वादत्रोपरम्यते ॥ उपासनाकाण्डमाह ॥ उपासनास्वरूपन्तु—वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रतंत्रं मानसं प्रवाहरूपमुपासनम्, यथा—"यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्" इत्यादिरूपम् । उपासना हि परमेशस्य कार्या । तत्र च परमेशोऽनेकधा यथामति दार्शनिकैः स्वीकृतस्तस्य चोपासना कर्तुमशक्याऽतः सर्वाविरुद्ध एवोपास्यः । स चौपनिषदाभिमतः । कथं तदुपगमे सर्वाविरोध इति चेदत्र पातंजलमतमाह—क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, सोपि जीववदसंगश्चिद्रूपश्च परश्च जीवेभ्यस्तन्नियंतृत्वात "प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति श्रुतेः । ननु नियंतृत्वं नाम कारयितृत्वं तच्चासंगस्यानुपपन्नम्, यः कारयति स करोत्येवेति न्यायेन कर्तृत्वस्य दुर्वारत्वात् । दृश्यते हि योधयितृषु नृपेषु दानादिकर्तृत्वं स्वयं योद्धृत्वं च । लोहचुंबकन्यायेनासंगस्यापि प्रेरकत्वोपपत्तेः । न च तन्निष्प्रमाणम् "भीषास्माद्वातः पवते" इत्यादिश्रुतिसिद्धत्वात् । बंधमोक्षादिव्यवस्था पृथिव्यवस्थित्यनुपपत्तिसिद्धत्वाच्च । जीवानामपि स्वतः क्लेशादिराहित्येपि बुद्ध्या सह विवेकाग्रहेण क्लेशादिसत्त्वांगीकारात् । ईशस्तु सदा तैरसंसृष्ट इति विशेषः । एतेन सेश्वरसांख्यवादोपि व्याख्यातः, एतत्तुल्ययोगक्षेमत्वात् ॥ तार्किकास्त्वसंगस्य नियंतृत्वमसहमाना नित्यबुद्धीच्छाकृतिमान्पुरुषविशेष ईश्वरः । पुंविशेषत्वमप्यस्य नित्यबुद्ध्यादिगुणकत्वादेव नान्यथा, नित्यज्ञानादिमत्त्वात् । अनित्यज्ञानादिमज्जीवेभ्यस्तद्वैलक्षण्यमपि सिद्ध्यति । क्षित्यादि सकर्तृकं कार्यत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दित्यनुमानं तत्र मानम् । स च लाघवादेकः सर्वत्र कार्योपलब्धेर्विभुश्च । ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यंगीकार्यो बाधकाभावादिति न्यायेन ष्वाद्युपादानसर्वसूक्ष्मदर्शित्वात्सर्वज्ञश्च सत्यकामः सत्यसंकल्पः । ‘ यः सर्वज्ञः सर्ववित् ’ इत्यागमोपि तत्र मानमित्याहुः ॥ यद्यप्यकामकर्माद्यभावाज्जन्यं सुखमीश्वरे न सम्भवति, तथापि नित्यसुखांगीकारे बाधकाभावात् “ आनंदं ब्रह्मणो विद्वान् ” इत्यादिश्रुतेश्च नित्यसुखाश्रयत्वमपीशस्यान्यत्सर्वं समानमिति तदेकदेशिनः ॥ नित्यज्ञानादिमत्त्वे सदा सर्गप्रसंगा न्नित्यजिहीर्षावत्त्वे सदा प्रलयापत्तेश्च नैतन्मतं साधु । अतो लिंगदेहसमष्ट्युपहितो हिरण्यगर्भ ईशः । न च देहयोगे जीवत्वं शंक्यम्, तत्समनियताविद्या द्यभावेन तस्यासंभवात् । कथं तर्हि शरीरपरिग्रहः । लीलयैवेति गृहाण । न च तदीश्वरत्वे मानाभावः, उद्गीथब्राह्मणस्य तत्र मानत्वादिति हैरण्यगर्भाः ॥ स्थूलदेहं विना सूक्ष्मस्यानुपलब्धेः स्थूलसमष्ट्युपहितो विराडेवेशः । स च सर्वतो मस्तकादिमान् “ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ” इत्यादि श्रुतेः, “ सर्वतः पाणिपादं तत् ” इत्यादिस्मृतेश्च । सदेहत्वेपि जीवत्वाभावादिकं पूर्ववदिति वैराजाः ॥ विधिमुपासीनास्तु—बहुपाणिपादत्वं नेशत्वप्रयोजक मन्यथा कृमिविशेषस्य सहस्रपदादेरपीशत्वप्रसंगात् । तस्माच्छ्रुतिस्मृत्यादिसर्ववाङ्मयशरीरया सरस्वत्या सदोपासितः सत्यलोकाधिपो ब्रह्मैवेशः । “यतो वा” इत्यादिसा मान्यवाक्यान्यपि “ आग्नेयं चतुर्द्धा करोति” इति विशेषवाक्येन पुरोडाशचतुर्द्धाकरणवाक्यवत् “प्रजापतिः प्रजा असृजत्” इत्यादिविशेषवाक्यात्तत्परतयैव नेयानि । स च रुद्रस्य ललाटादाविष्कर्त्ता हरेरप्यसुरवधार्थमवतारेषु नियोजकः । क्वचित्तयोः स्तुत्यादौ प्रवृत्तिस्तु लोकसंग्रहाय । सा च विधेः स्वीयैव तयोः स्वांशत्वादित्याहुः ॥ श्रीविष्णुनाभ्युद्भूतपद्मोत्पन्नो हि विधिः, स चैतत्क तिष्ठतीति विचारितवान् “सोऽपश्यत्पुष्करपर्णे तिष्ठन्सोऽमन्यत अस्ति चैतद्यस्मिन्निदमधितिष्ठति” इति श्रुतेः । ततो यदस्याधि ष्ठानं तन्मे मूलमिति तन्निश्चयार्थं चिरं भ्रमन्नपि नापश्यत् । पश्चात्समाधावपश्यत्तदाज्ञप्तश्चिरं तप्त्वा प्रजासृष्टौ समर्थो बभूव, तत एव वेदानवाप्य सार्वज्ञ्यमापेति सर्वमग्रे वक्ष्यति । अतो विष्णुरेवेशः । स च स्वकृतमर्यादावनाय स्वेच्छयाऽवतरति ‘यदा यदा हि धर्मस्य’ इत्यादिस्मृतेः । महोपनिषद्यपि—“एको ह वै नारायण आसीन्न ब्रह्मा नेशानः” इत्या दिना । “पुनरेव नारायणः सोन्यत्कामो मनसाध्यायत तस्य ललाटात्त्र्यक्षः शूलपाणिः । पुरुषोऽजायत” इत्यादिना च ब्रह्मरुद्रयोस्तत्स्रष्टृत्वोपवर्णनं दृश्यते, तस्माद्विष्णु रेवेश इति वैष्णवाः ॥ शैवास्तु— “ब्रह्माद्याः स्थावरांताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्यंते संसारवशवर्तिनः ॥ तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः । मल मायादिभिः पाशैः स बध्नाति पशून्पतिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः ॥ ” इत्यादिशिवधर्मे । अथर्वशिरसि—“यो वै रुद्रः स भगवान्भूर्भुवः स्वर्यश्च ब्रह्मा यश्च विष्णुः ” इत्यादिना तस्य सर्वात्मत्वं दर्शितम् । “शिव एको ध्येयः शिवंकरोन्यत्सर्वं परित्यज्य” इति श्रुतेरित्याहुः ॥ गाणपत्यास्तु—तुरीयः परमशिवः श्रीगणेश एव स एव वैष्णवैर्महाविष्णुरित्युच्यते । तथाच श्रुतिः—“ नमस्ते गणपतये त्वमेव प्रत्यक्षं ब्रह्मासि ” इत्यादिका । अत्र विशेष्यसंबद्धत्वादन्ययोगव्यवच्छेदेनैवकारेण पार्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एव धनुर्धर इत्यत्रैवकारेण पार्थादन्यत्र धनुर्द्धरस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगो व्यवच्छिद्यते । सूर्याद्याराधनफलारोग्यादिमोक्षांतकथनानंतरम् 'सर्वमिच्छेद्गणाधिपात्' इति स्मृतेरन्याराधने प्रयोजनाभावात् "अनधीते महाभाष्ये व्यर्था स्यात्पदमञ्जरी । अधीतेपि महाभाष्ये व्यर्था स्यात्पदमञ्जरी ॥" इति न्यायात्कृतेऽकृतेप्यन्यदेवाराधने गणेशार्चा सर्वार्थदेति भावः । न चैतावताऽन्यदेवार्चननिषेधः शंक्यः, प्रयाजादिषु कृतेषु ज्योतिष्टोमादीनामप्यननुष्ठानापत्तेः, इतरोपासनाविधायकशास्त्राप्रामाण्यापत्तेश्च । सर्वमिच्छेदिति वाक्यं तु परंपरया गणेशार्चनस्य सर्वत्रोपयोगपरं, न त्वितरनिषेधपरम्, तद्विधिविरोधादित्याहुः ॥ भैरवमुपासीनास्तु—शिवशंकरशंभ्वादिनामा त्रिनेत्रेंदुशेखरादिलिंगो विधेरपि शास्ता हरेरपि वरदः श्रीकालभैरव एव वेदांतप्रतिपाद्यो मुमुक्षुभिराराध्यः । एतत्सर्वं कूर्मपुराणे काशीखंडे च स्फुटम् । स एव मल्लारिनाम्ना विख्यातः । तदुक्तम्—"ध्यायेन्मल्लारिदेवं कनकगिरिनिभं म्हालसाभूषितांकं श्वेताश्वं खड्गहस्तं विबुधबुधजनैः सेव्यमानं कृतार्थैः । युक्तांघ्रिं दैत्यमूर्ध्नि डमरुविलसितं नैशचूर्णाभिरामं नित्यं भक्तेषु तुष्टं श्वगणपरिवृतं नित्यमोंकारगम्यम् ॥" इत्यत्र नित्यपदेन प्रागभावाप्रतियोगित्वविशिष्टध्वंसाप्रतियोगित्वार्थकेन तस्य न कुतश्चिदुत्पत्तिर्न वा कुत्र च लय इति प्रतिपादनात्सर्वकारणत्वं सूचितमित्याहुः ॥ श्रीकार्त्तिकेयोपासकास्तु- सर्वगतत्वाद्भक्तानां सविलासाज्ञानशोषणाच्च स्कंदपदाभिधेयः सर्वबुद्धिरूपा गुहा विद्यते आधारत्वेनास्येति व्युत्पत्त्यार्शआद्यजंतगुहपदाभिधेयश्च सर्वांतरात्मा सद्भजनीयानंतकल्याणगुणो ब्रह्मादिविभूतिस्तन्नियंता परमशिवः "सनत्कुमारो भगवान्भोगमोक्षप्रदायकः" इति स्कान्दोक्तेर्मोक्षप्रदाता सुब्रह्मण्य इतीत्याहुः ॥ सौरास्तु—"ब्रह्मेंद्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः" इति भविष्यवाक्यात् "एष ब्रह्मा शिवश्चैव रुद्रश्चैव" इति ब्रह्मादिविभूतिकः सूर्य एवोपास्यः, "सूर्य आत्मा जगतस्तस्थुषश्च" इति, "सूर्याद्वै खल्विमानि भूतानि जायंते" इति च श्रुतेरित्याहुः ॥ केचित्तु—मार्कंडेयपुराणांतर्गतसप्तशतीप्रतिपाद्या महालक्ष्मीः सर्वोत्तमा, ब्रह्मादयो भारत्यादयश्च तद्विभूतयः । सैव सर्गादिहेतुर्बंधमोक्षादिहेतुश्चेति "तया विसृज्यते विश्वं जगदेतच्चराचरम् । सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी । सृष्टिस्थितिविनाशानां हेतुभूते सनातनि ॥ विष्णुः शरीरग्रहणमहमीशान एव च । कारितास्ते" इत्यादिवचनात् । तत्रैव 'हंसयुक्तविमानस्थे' इत्यादिना 'वृत्रप्राणहरे चैंद्रि' इत्यंतेन सप्तमातॄणां तद्विभूतित्वं दर्शितम् । एतेषां ब्रह्मादीनां तदंशत्वात्तदभिन्नत्वेन्योन्यमप्यभेदः, 'तदभिन्नाभिन्नस्य तदभिन्नत्वम्' इति न्यायादित्याहुः ॥ केचित्तु—स्वस्वप्रीतिगोचरान् यक्षराक्षसभूतप्रेतपिशाचादीन्नृपनापितपुत्रन्यायेनायमेव सर्वोत्तमोऽयमेव सर्वोत्तम इति मन्यंते । तेभ्यश्च स्वयं तत्तत्स्वाभिलषितार्थतृष्णाग्रस्तेभ्योपि "स्वांगुष्ठमपि चुंबंतमिक्षुदंडमयाचत" इति न्यायेन स्वाभिलषितान्याचंते ॥ अन्ये च-–वटाश्वत्थचैत्यार्कवंशादीनि स्वस्वकुलदैवतानि मत्वा स्थावरयोनिप्राप्त्यातिदुःखितेभ्यः 'महिषीप्रसवोन्मुख्ये महिषो मदनातुरः' इति न्यायेनेष्टं याचंते । अंधचटकन्यायेनाकस्माल्लब्धं चार्थं तद्दत्तं मन्यंते ॥ अघटनघटनापटीयस्या माययोपहितं जगतामभिन्ननि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्तोपादानं परं ब्रह्म परमेश्वरः तस्यांशैरिवांशैरीश्वरकोटिभिर्ब्रह्मादिभिर्जीवकोटिभिश्च सूत्रविराडादिभिर्जगद्व्याप्तमित्यौपनिषदाः ॥ क्वचिच्छिवविष्णवादीनां परस्परमुपास्योपासकभावो भारतादिषु श्रुतः । स च लीलामात्र एवान्योन्यमतभेदबोधतात्पर्यकः। न हि बहव ईश्वराः सम्भवन्ति। सत्त्वे च सुन्दोपसुन्दन्यायेन स्वयमेव बाधिताः सर्वे स्युरत एक एव परमेशः। स च—ब्रह्माद्यनन्तदेवार्थनयाविष्कृतलीलाविग्रहो माथुरमंडले श्रीनन्दराजवेश्मनि शेषावतारबलदेवसहितो रोमकूपाधिष्ठितानेकब्रह्माण्डः श्रीकृष्ण एव, स एव श्रुतिषु परब्रह्मपदेनोक्तः । तथाहि—"कृषिर्भूवाचकश्शब्दो नश्च निर्वृतिवाचकः । तयोरैक्यं परब्रह्म कृष्ण इत्यभिधीयते ॥"इति,"मुनयो ह वै ब्राह्मणमूचुः—कः परमो देवः, कुतो मृत्युर्बिभेति, कस्य विज्ञानेनाखिलं विज्ञातं भवति, केनेदं विश्वं संसरतीति।तदुहोवाच—ब्राह्मणो वै परमं दैवतं, गोविंदान्मृत्युर्बिभेति " इत्यादिपूर्वतापनीयोक्तेश्च "कृष्णमेनमवेहि त्वं स्वात्मानमखिलात्मनाम् । जगद्धिताय सोप्यत्र देहीवाभाति मायया ॥"इति वक्ष्यति च । किञ्च—"सर्वेषामेव वस्तूनां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम्॥"इत्यप्यग्रे श्रीदशमे प्रकटीभविष्यति । श्रीगीतायामपि—" अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते" इति स्वयमेवाह । किंच—"अहमात्मा गुडाकेश सर्वभूताशयस्थितः । अहमादिश्च मध्यं च भूतानामंत एव च॥"इत्यपि । "यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" इति । किंच—"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव । " इति ।"सर्वस्य चाहं हृदि सन्निविष्टो मत्तः" इत्यादिबहूनि तस्य परमेशत्वे मानानि संति॥ यत्तु विष्णुपुराणे—"एवं संस्तूयमानस्तु भगवान्परमेश्वरः । उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य भुवो भारं क्लेशहानिं करिष्यतः ॥" इत्युक्तम्, तस्यायं भावः—"सुराः समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम् । आज्ञापयाज्ञाः परिपालयंतः सदैव तिष्ठाम ह्यपास्तदोषाः ॥"इति सुरैरुक्तो भगवान् मम दुष्करं चेत्तदा साहाय्यं कार्यं स्यान्न त्वेवमस्ति, भूभारहरणादौ कर्त्रंतरापेक्षया महत्यपि कार्य्ये मत्केशयोरपि शक्तत्वादिति । न तु केशमात्रावतार इति भ्रमितव्यम्।"ततः क्षयमशेषास्ते दैतेया धरणीतले । प्रयास्यंति न संदेहो मद्दृक्पातविचूर्णिताः॥ कृष्णाष्टम्यामहं भाद्र उत्पत्स्यामि न संशयः।" इत्यादिषु तत्रैव स्वावतारत्वोक्तेर्विरोधात्।'कृष्णस्तु भगवान्स्वयम्'इति वक्ष्यमाणविरोधाच्च । अजरामरस्येशस्यार्द्धपलितत्वासम्भवादेककेश ईशेच्छया रामस्य श्वेतरूपज्ञापनार्थम् । तदेव श्वेतोऽभूदिति गम्यते । 'जयंति कृष्णस्य दशावताराः' इति मुकुटेनापि श्रीकृष्णस्यावतारित्वमन्येषां नृसिंहादीनामवतारत्वं ध्वनितम् । यत्तु—श्रीदशमे 'कृष्णावतारोत्सवसंभ्रमोस्पृशत्'इति श्रीकृष्णेप्यवतारप्रयोगः, स चाविर्भावपरो बोध्यः । किंच—विष्णुनामान्युक्त्वा 'वसुदेवोऽस्य जनकः' इत्यनेनामरसिंहेनापि श्रीकृष्णस्यैव विष्णुपदवाच्यब्रह्मत्वं ध्वनितमिति । एतेनैव भारतवाक्यमप्येतत्तुल्यं व्याख्यातम् । ब्रह्मादौ मत्स्यादौ चांशत्वोक्तिरौपचारिकी बोध्या । तच्चांशत्वं ब्रह्मादिष्वाविष्कृतोत्पत्त्यादिहेतुत्रयाल्पोपपत्त्यायेकैकशक्तित्वमेव, न तु स्वांशित्वेनाभिमतानंतशक्तिमायीशापेक्षया । वस्तुतोऽल्पशक्तित्वं संख्यातशक्तित्वेनानीशत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्त्या तदनंतशक्तिबोधकानंतवाक्यानामप्रामाण्यापत्तेः । तस्मात्त्रिगुणमायोपहित एक एवेशः । किं बहुना वाग्जालेन । श्रीकृष्णोपासनैव मोक्षहेतुः । तदुक्तं श्रीमुखेनैव "अनन्यचेताः सततं यो मां स्मरति नित्यशः । तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥" इति श्रीगीतोपनिषदाचार्येणार्जुनं प्रतीति । श्रीकृष्णोपासने रतिस्तु पूर्वकृतसुकृतानामेव नान्येषाम् । तदपि तत्रैव--"अवजानंति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानंतो मम भूतमहेश्वरम् ॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीं चैव प्रकृतिं मोहनीं श्रिताः ॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः । भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ " इति । किंच—"न मां दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः । माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः ॥ चतुर्विधा भजंते मां जनाः सुकृतिनोऽर्जुन । आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः ॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतः ॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् । बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः । कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः ॥ तंतं नियममास्थाय प्रकृत्या नियताः स्वया । योयो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति । तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हितान् ॥ अंतवत्तु फलं तेषां तद्भवत्यल्पचेतसाम् । देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥ " इति बहुश उक्तं श्रीभगवता । वक्ष्यत्यपि—" दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु । यत्रोपगीयते विष्णुर्देवदेवो जनार्दनः ॥ " इति । किंच—" तपंतु तापैः प्रपतंतु पर्वतादटंतु तीर्थानि पठंतु चागमान् । यजंतु यागैर्विवदंतु वादैर्हरिं विना नैव सृतिं तरंति ॥ " इति श्रीधराचार्येणाप्युक्तम् । " दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ " इत्यपि श्रीमुखेनैवोक्तम् । किंच " मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ " इत्युपांतमंत्रे श्रीगीतासु हरिणा प्रतिश्रुतम् । किंच—श्रीदशमे ब्रह्मा श्रीकृष्णं प्रति वक्ष्यति—" श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ " इति । किं बहुना, श्रीकृष्णभक्तिरेव कल्याणहेतुरित्यलमतिप्रसंगेन । किंच—' भक्तिः सिद्धेर्गरीयसी ' इति कपिलोक्तेः, " मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् " इति पञ्चमोक्तेश्च मुक्तेर्भक्तिरधिकाऽत एव भक्तैः सा मुक्तिर्नाद्रियते—"नेच्छंति ते मया दत्तं कैवल्यमपुनर्भवम् " इति भगवदुक्तेः । मुक्तौ तु तद्रूपता जायते भक्तेस्तु श्रीहरिः स्वायत्तीभवतीति रहस्यम् । न हि वशीकृतनृपनरस्येव स्वयं नृपस्य तत्सुखमिति भावः ॥ अथ ज्ञानकाण्डमाह ॥ व्यावहारिक—प्रातिभासिक—पारमार्थिकभेदाज्ज्ञानं त्रिधा । घटपटादिव्यवहारोपयोगि घटोयम्पटोयमित्यादिरूपमाद्यम् । स्वप्नादिविषयं द्वितीयम् । मोक्षोपयोगि पारमार्थिकम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्च जीवब्रह्मणोरभेदरूपमस्ति। तदधिकारि तु साधनचतुष्टयसम्पन्नः प्रमाता। साधनानि तु—नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं च।
नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्। नित्यत्वं नाम कालानवच्छिन्नत्वम्, तद्विपरीतत्वमनित्यत्वम्। ऐहिकानां स्रक्चंदन
वनितादिविषयभोगानां कर्मजन्यतया नित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविराग इति। शमादयः शमद
मोपरतितितिक्षासमाधानश्रद्धाख्या इति। शमः—श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्। निवर्तितानां च
सर्वेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः। अथवा—विहितानां कर्मणां विधिना त्यागः। तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुण
विषये च समाधिः समाधानम्। गुरुवेदांतवाक्येषु विश्वासः श्रद्धेति। मुमुक्षुत्वं मोक्षेच्छा। मोक्षो नाम विद्यानिरस्ताविद्यातत्कार्यस्यात्मनावस्थानम्। तद्विषयेच्छा
मोक्षेच्छा, तद्वत्त्वं मुमुक्षुत्वमिति। अथायमधिकारी जन्ममरणादिभवाग्नितप्तः समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसरति, स निजदयालुतयाऽध्यारोपापवादाभ्यामुपदिशति।
अध्यारोपो नाम वस्तुन्यवस्त्वारोपः। वस्तु सच्चिदानंदं ब्रह्म, तद्भिन्नमज्ञानादिसकलजडमवस्तु। अज्ञानं नाम सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं
यत्किंचिदिति। इदमज्ञानं समष्टिव्यष्टिरूपेणैकमनेकमिति च व्यवह्रियते। व्यष्टिर्विशेषः। समष्टिः सामान्यम्। यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः,
यथा जलानां समष्ट्यभिप्रायेण जलाशय इति व्यपदेशः, तथा नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः, "अजामेकां लोहि
तशुक्लकृष्णां बह्वीम्" इत्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया शुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्वादिगुणाश्रयं सदव्यक्तमंतर्यामीश्वर इत्यादि
शब्दैर्व्यपदिश्यते, सर्वज्ञानावभासकत्वात्। अज्ञानस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्च। आनन्दमयः कोशः सर्वो
परमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते। यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः, यथा वा जलाशयस्य व्यष्ट्य
भिप्रायेण जलानीति तदनेकत्वव्यपदेशः, तथा ज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः, "इंद्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतेः। इयं व्यष्टिर्निकृष्टोपाधि
तया मलिनसत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वादिगुणात्मकं प्राज्ञ इत्युच्यते, एकाज्ञानावभासकत्वादिति। अस्यापीयमहंकारादिकारणत्वात्कारणशरीरमानन्दप्रचुर
त्वादानन्दमयः कोशः सुषुप्तिः सर्वोपरमस्थानत्वात्स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते। तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः।
अनयोर्व्यष्टिसमष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिवाभेदः। एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिवाभेदः। वनवृक्षतदव
च्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिंबाकाशयोर्वाधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते। इदमेव तुरीयं शुद्धचैतन्यम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानादितदुपहितचैतन्याभ्यामविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते। अस्य ज्ञानस्यावरणविक्षेपनामकं शक्तिद्वयमस्ति। यथाल्पोपि मेघोऽनेकयोजनमायतं सूर्यमंडलं द्रष्टृनेत्रपथपिधायकतयाऽऽवृणोति, तथावरणशक्तिः परिच्छिन्नाप्यपरिच्छिन्नमात्मानमवलोकयितृबुद्धिपथपिधायकतयावृणोति । आवरणशक्त्यवच्छिन्नात्मनः कर्तृत्व भोक्तृत्वादिसंसारभावना भवति, यथा स्वाज्ञानावृतरज्जौ सर्पत्वभावना। विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति, एवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपंचमुद्भावयति । शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तंतुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानञ्च। "यथोर्णनाभिः सृजते गृह्णीते च यथा पृथिव्यामोषधयः संभवंति। तथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवति विश्वम्" इति श्रुतेः तमःप्रधान विक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते। आकाशादिषु जाड्याधिक्यात्तमःप्राधान्यं तत्कारणस्येति। तदानीं तेष्वाकाशादिषु कारणगुणप्रक्रमेण सत्त्वरजस्तमांस्युत्पद्यन्ते। एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चेत्युच्यंते। एतेभ्यः पंचीकृतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते। सूक्ष्मशरीराणि सप्तदशावयवकानि लिंगशरीराणि। ते चावयवाः—ज्ञानेन्द्रियपंचकं, बुद्धिमनसी, कर्मेंद्रियपञ्चकं, प्राणादिपञ्चवायवः, ज्ञानेंद्रियाणि, श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। एतानि पुनराकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक् क्रमेणोत्पद्यंते। बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः। मनो नाम संकल्पविकल्पात्मिकांतःकरणवृत्तिरिति। अनयोरेव चित्ताहंकारयोरंतर्भावः । एते पुनराकाशादिसात्त्विकांशेभ्य उत्पद्यंते । एषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् । इयं बुद्धिर्ज्ञानेंद्रियैः सहिता विज्ञानमयः कोशः। अयमेव कर्तृत्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते। मनस्तु कर्मेंद्रियैः सहितं मनोमयः कोशोस्ति। कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थानि। एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक् क्रमेणोत्पद्यंते । वायवस्तु प्राणापानव्यानोदानसमानाः। प्राणो नासाग्रवर्ती प्राग्गामी। अपानस्त्वधोगामी पाय्वादिवर्त्ती। व्यानोऽखिलशरीरसंचारी। उदानः कण्ठव्याप्यूर्ध्वगामी। समानोऽशितपीतादिसमीकरणकरः॥ केचित्तु—नागकूर्मकृकलदेवदत्तधनंजयाख्या अन्येपि पञ्च वायवः संतीत्याहुः। "कूर्म उन्मीलनकरो नाग उद्गिरणप्रदः। कृकलः क्षुत्करो जृंभाकरः स्याद्देवदत्तकः॥ धनंजयः पोषकरो यो मृतं न जहात्यपि॥" इति। इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणमयः कोशः। प्राणादेः क्रियात्मकत्वेन रजोंशकार्यत्वम्। एतेषु कोशेषु विज्ञानमयः कर्तृरूपः, मनोमयः करणरूपः, प्राणमयः कार्यरूपः। एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते। अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः। अनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरिति च भवति। एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इति चोच्यते, सर्वत्रानुस्यूतत्वात्, ज्ञानक्रियाशक्तिमदपंचीकृतपंचमहाभूताभिमानित्वाच्च, तदुपहितत्वाच्च। अस्यैषा समष्टिः, स्थूलप्रपंचापेक्षया सूक्ष्मत्वात्। सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते। एतद्व्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ट्युपहितं चैतन्यं तेजसो भवति, तेजोमयोंतःकरणोपहितत्वात् । अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वमः
स्थूलशरीरलयस्थानमिति चोच्यते । तदानीं सूत्रतैजसौ मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः । अत्रापि समष्टिव्यष्ट्योस्तदुपहितयोः सूत्रात्मतैजसयोश्च वनवृक्षवत्तदवच्छि
न्नाकाशवद्वा जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाभेद एव । एवं सूक्ष्मशरीरोत्पत्तिरिति । स्थूलभूतानि पञ्चीकृतानि । पञ्चीकरणं त्वाकाशादिषु पंचस्वेकैकं द्विधा समं
विभज्य तेषु दशसु प्राथमिकान्पंचभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां स्वस्वद्वितीयभागपरित्यागेन भागांतरेषु संयोजनमिति । केचित्त्रिवृत्करणमप्याहुः । तदा
नीमाकाशे शब्दोऽभिव्यज्यते । वायौ शब्दस्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्दस्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरसगंधा इति । एतेभ्यः पंचीकृतभूतेभ्यो भूर्भुवः
स्वर्महोजनस्तपस्सत्यमित्येतन्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलतलातलरसातलमहातलपातालनामकानामधोधो विद्यमानानां लोकानां ब्रह्मांडस्य तदंतर्गतानां
चतुर्विधस्थूलशरीराणामन्नपानादीनां चोत्पत्तिर्भवति । शरीराणि जरायुजांडजस्वेदजोद्भिज्जाख्यानि । जरायुजानि मनुष्यपश्वादीनि । अंडजानि पक्षिपन्नगादीनि । स्वेदजानि
यूकामशकादीनि । उद्भिज्जानि तृणवृक्षादीनि । अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवत्समष्टिर्वृक्षवद्वनवद्व्यष्टिश्च भवति । एतत्समष्ट्युपहितं
चैतन्यं वैश्वानरो विराडिति चोच्यते । सर्वनराभिमानित्वाद्विविधं राजमानत्वाद्वा । अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयः कोशः । स्थूलभोगायतनत्वाज्जाग्रदि
ति चोच्यते । एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते, सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् । अस्याप्येषा स्थूलशरीरमन्नविकारत्वादन्नमयः कोशः स्थूलभोगाय
तनत्वाच्च जाग्रदित्युच्यते । तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कप्रचेतोभिः क्रमान्नियंत्रितेन श्रोत्रादींद्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानिंद्रोपेन्द्रयमप्रजापतिभिः क्रमा
न्नियंत्रितेन वागादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्च चन्द्रचतुर्मुखशंकराच्युतैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केण क्रमात्संकल्पवि
कल्पनिश्चयाहंकार्यचैत्त्यांश्च सर्वानेतान् स्थूलविषयाननुभवतः । अत्राप्यनयोः स्थूलसमष्टिव्यष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलजलाशयव
त्तद्गतप्रतिबिंबाकाशवच्च वा पूर्ववदभेद एव । एवं पंचीकृतस्थूलभूतेभ्यः स्थूलप्रपंचोत्पत्तिरिति । एषा स्थूलसूक्ष्मकारणशरीरप्रपंचानामपि समष्टिरेको महाप्रपंचः । यथावांतरव
नानां समष्टिरेकं महद्वनं, यथा चावांतरजलाशयानां समष्टिरेको महाञ्जलाशयः, एतदुपहितं विश्ववैश्वानरादीश्वरपर्यंतं चैतन्यमवांतरवनावच्छिन्नाकाशवदवांतरजलाशयतद्गतप्रतिबिं
बाकाशवच्चैकमेव । आभ्यां महाप्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितचैतन्यम् "सर्वं खल्विदं ब्रह्म" इति वाक्यस्य वाच्यं सल्लक्ष्यमिति । एवं वस्तुन्यव ॥ ५ ॥
स्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः । इदानीं प्रत्यगात्मनि विशेतस्तमाह ॥ अतिप्राकृतस्तु–" आत्मा वै पुत्रनामासि " इति श्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रियत्वदर्श
नात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्यनुभवाच्च पुत्र आत्मेत्याह ॥ चार्वाकस्तु–"स वा एष पुरुषोन्नरसमयः" इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्शनात्स्थूलोऽहं कृशोहमित्यनुभवाच्च स्थूलशरीरमात्मेत्याह ॥ अपरश्चार्वाकस्तु—“ते ह प्राणाः प्रजापतिमेत्य ब्रूयुः” इत्यादिश्रुतेरिंद्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोहमित्याद्यनुभवाच्चेंद्रिण्यात्मेति वदति ॥ अपरश्चार्वाकः—“अन्योंतर आत्मा प्राणमयः” इत्यादिश्रुतेः प्राणाभावे इंद्रियादिचलनायोगादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेत्याह ॥ अन्यश्चार्वाकस्तु—“अन्योंतर आत्मा मनोमयः” इतिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं संकल्पविकल्पवानित्याद्यनुभवाच्च मन आत्मेत्याह ॥ बौद्धस्तु—‘अन्योंतर आत्मा विज्ञानमयः’ इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्तेरभावादहं कर्ताहं भोक्तेत्यनुभवाच्च बुद्धिरात्मेत्याह॥प्रभाकरतार्किकौ तु—“अन्योंतर आत्मा आनंदमयः” इतिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहं ज्ञानीत्यनुभवाच्चाज्ञानमात्मेति वदतः ॥ भाट्टस्तु—“प्रज्ञानघन एवानंदमयः” इतिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्यनुभवाच्च ज्ञानोपहितचैतन्यमात्मेति वदति॥ अपरो बौद्धः—“असदेवेदमग्र आसीत्” इतिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ एतेषां पुत्रादीनां शून्यपर्यंतानामनात्मत्वमुच्यते । एतैरिति प्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव । किंच—“प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्त्ता चैतन्यं चिन्मात्रं सत्” इत्यादिप्रबलश्रुतिविरोधात्। अस्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वात्पुत्रादिशून्यपर्यंतमखिलमनात्मैव । अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावप्रत्यक्चैतन्यमेवात्मतत्त्वमिति विद्वदनुभव एवमध्यारोप इति ॥ अथापवादमाह ॥ अपवादो नाम अतात्त्विकोऽन्यथाभावो विवृतिः, यथा रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादिप्रपंचस्य वस्तुमात्रत्वमिति । कार्यस्य कारणमात्रावशेषणं कारणस्वरूपव्यतिरेकेण कार्यस्यासत्तावधारणं वापवाद इति यावत् । तथाहि—एतद्भोगायतनं चतुर्विधं सकलशरीरजातं भोग्यरूपान्नादिकमेतदाश्रयभूरादिचतुर्दशभुवनान्येतदाश्रयभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणभूतं पंचीकृतभूतमात्रं भवति । एतानि शब्दादिविषयसहितानि पंचीकृतभूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापंचीकृतभूतमात्रं भवति । एतानि सत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैवैतत्कारणभूतज्ञानोपहितचैतन्यमात्रं भवति । एतदपि तत्सर्वमज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यतुरीयब्रह्ममात्रं भवति । आभ्यामध्यारोपापवादाभ्यां तत्त्वं पदार्थशोधनमपि सिद्धं भवति । तथाहि—अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितचैतन्यं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितचैतन्यं तत्पदलक्ष्यार्थो भवति । अज्ञानादिव्यष्टिरेतदुपहितात्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्यं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति ॥ अथ महावाक्यार्थः ॥ इदं तत्त्वमसीति वाक्यं संबंधत्रयेणाखण्डार्थबोधकं भवति । संसर्गानवगाहियथार्थज्ञानजनकत्वम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खण्डत्वम् । तदुक्तम्–"सामानाधिकरण्यं च विशेषणविशेष्यतः। लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनाम्" इति । भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः सामानाधिकरण्यम्। यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्पर्यसंबंधः, तथा तत्त्वमसीति वाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः । विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः, तथा तत्त्वमसीति वाक्येपि तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । व्यावर्त्तकं विशेषणं, व्यावर्त्यं विशेष्यम् । तथा च–सोऽयं देवदत्त इति वाक्य एवायंशब्दवाच्यो योऽसावेतत्कालैतद्देशसंबंधविशिष्टो देवदत्तपिंडः, अयं स इति तच्छब्दवाच्यात्तत्कालतद्देशसंबंधविशिष्टाद्देवदत्तपिंडाद्भिन्नो नेति यदा प्रतीयते, तदा तच्छब्दार्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वम् । अयंशब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम् । यदा च स इति तच्छब्दवाच्यस्तत्कालतद्देशविशिष्टो देवदत्तपिण्डः सोयमितीदंशब्दवाच्यादेतत्कालैतद्देशसंबंधविशिष्टाद्देवदत्तपिडान्न भिद्यत इति यदा प्रतीयते, तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वम् । तच्छब्दार्थस्य व्यावर्त्यत्वाद्विशेष्यत्वम् । अयमेव स एवायमित्यन्योन्यभेदव्यावर्त्तकतया सोऽयंशब्दार्थयोः परस्परं विशेषणविशेष्यभाव इत्यर्थः । लक्ष्यलक्षणभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वा परस्परविरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः । तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वादिविशिष्टत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः । इयमेव जहदजहल्लक्षणापरपर्याया एकांशपरित्यागेनैकांशस्य ग्रहणाद्भागत्यागलक्षणेत्युच्यते । असाधारणधर्मप्रतिपादकं वाक्यं लक्षणम् । तत्प्रतिपाद्यमविशिष्टवस्तु लक्ष्यमिति विवेकः । एवमन्येषामपि महावाक्यानामर्थो ग्रंथांतरादवसेयः । एतेनाभेदज्ञानमेव ज्ञानकांडप्रयोजनमिति सिद्धम् । तज्ज्ञानं मोक्षहेतुः । इह च श्रुतिस्मृत्यादिरूपाणि बहूनि मानानि संति । ननु जगज्जीवादेर्ब्रह्मणो भेदोऽस्ति, न वा । आद्ये, ब्रह्मणोऽसत्त्वाज्जाड्यदुःखरूपत्वं बलादायातम् । द्वितीये, कथमैक्यमिति । किञ्च–अभेदे मानमस्ति, न वा । आद्ये, घटरूपस्य चाक्षुषत्वे घटस्येव जगज्जीवब्रह्मनिष्ठाभेदस्य प्रमाणविषयत्वे जीवब्रह्मणोरपि प्रमाणविषयत्वावश्यंभावेन जाड्यं तदवस्थमेव । प्रमाणेनाभेदाविषयीकरणे प्रमाणसत्त्वांगीकरणमेव नास्ति चेच्छशशृंगवदसत्त्वापात इति चेन्न, यदि मानेनैव वस्तुसिद्धिरिति ते मतं, तर्हि माने मानमस्ति, न वा । आद्ये, ततो भिन्नमभिन्नं वा । द्वितीये, मानं विषयीकरोति, न वा । आद्ये, त्वात्माश्रयः स्वसिद्धौ स्वस्यापेक्षणमात्माश्रयः । द्वितीये, तद्दूरीकरणस्य कैमर्थ्यम् । ततो भिन्नमिति पक्षश्चेत्–तत्रापि मानसत्वात्सत्त्वविकल्पे पूर्ववदात्माश्रयोऽनवस्था च । इतरेतरसाधकत्वे त्वन्योन्याश्रयः । किञ्च–मानस्य मानविषयत्वे प्रमेयत्वापत्त्या मानत्वमेव व्यालुप्येत । माने मानं नास्तीति पक्षे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानरहितस्य शशश्रृंगतुल्यतायास्त्वयैवाभ्युपगतत्वान्मानस्यैव शून्यता । किंच—सति प्रमेये प्रमाणं प्रवर्तते, असति वा । आद्ये, न प्रमाणप्रयोजनं पश्यामः, तत्प्रवृत्तेः प्रागेव
प्रमेयस्य स्वतः सिद्धत्वात् । अंत्येपि, न प्रमाणप्रयोजनं; न हि प्रमाणमसत्सत्कर्तुमलम्, अन्यथा बंध्यातनुजमपि प्रकटयेत् । किंच—प्रमाणं स्वयं प्रमेयं भवति, न वा ।
आद्ये, तस्य घटादिसदृक्षतया न प्रमाकरणत्वम् । द्वितीये तु, सतमरसवदवाच्यतैव, अभिधेयत्वप्रमेयत्वयोः साहचर्यनियमात् । तस्माज्जड एव प्रमाणापेक्षा, न स्वयंप्रकाशे
तन्निष्ठे धर्मे वा प्रमाणमवश्यमपेक्षणीयम् । वस्तुतस्तु श्रुतिरूपं प्रमाणं तत्रास्त्येव । ननु श्रुतिः सच्चिदानंदं विषयीकरोति, न वा । अंत्ये, किं तदंगीकारेण । आद्ये, प्रमे
यत्वेन जडत्वं, तत्सहचारितत्वेनाभिधेयत्वेन वाग्विषयत्वम्, "यतो वाचो निवर्तंते" इतिश्रुतिबाधश्च स्यादिति चेन्न, श्रुतिरपि यथाकथंचिदविषयतयैव लक्षणावृत्त्या ज्ञापयति,
नाऽभिधावृत्त्या । तथाप्रवृत्तौ श्रुतेरेवाप्रमाणता स्यादिति न कोऽपि दोषः । तदुक्तं पुष्पदन्तेन—" अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितम
भिधत्ते श्रुतिरपि " इति । ननु न प्रमाणमुत्पादकं ब्रूमः किंतु साधकमिति चेच्चिरंजीव, अस्मदिष्टस्यैव त्वया कथनात् । साधकमपि प्रमाणं स्वतःसिद्धिहीनं जडं साधयतु,
न तु स्वयंप्रकाशं परमात्मानम्, तस्य स्वतःसिद्धत्वात् । " तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुत्या सर्वस्य सिद्धेस्तदधीनत्वनिरूपणात्।कथं तर्हि
लक्षणयापि श्रुतिविषयत्वमिति चेदज्ञानावृतस्यैव, अनावृते तु न श्रुतिरपि प्रवर्तत इति रहस्यम्।ननु पारमार्थिकभेद एवास्थीयतां,किमनया क्लिष्टकल्पनया। अन्यथा सेव्यसेवक
भावो जीवानां परस्परं भेदे गुरुशिष्यबद्धमुक्तसुखदुःखजन्मव्यवस्था च न स्यात् । तथा सति द्वयोरपि जाड्यापत्त्यानात्मत्वानित्यत्वादिदोषप्रसंगात् । तथाहि—जीवो
जडो, ब्रह्मभिन्नत्वात, घटादिवत् । ब्रह्मभिन्नत्वजडत्वयोर्व्याप्तेः संप्रतिपन्नत्वात् । एवं ब्रह्मापि जडं, जीवभिन्नत्वात्पाषाणादिवत् । तथा च जडत्वपरिच्छिन्नत्वानात्मत्वा
नित्यत्वादयो दोषा न निवारयितुं शक्याः । न च परमाण्वाकाशादौ व्यभिचार इति वाच्यम्, परमाणूनामप्रामाणिकत्वेनानभ्युपगमादाकाशादेश्चास्मन्मते जन्यत्वेनानि
त्यत्वान्न क्वापि व्यभिचारः । तथात्वे च कस्य ज्ञानेनाविद्यातत्कार्यबाधः, को वा श्रवणाद्यनुष्ठाता स्यात् । तथाहि—जडस्य " ब्रह्मणोऽभिज्ञानमानंदं ब्रह्म " इतिश्रुत्यु
क्तज्ञानरूपत्वाभावेन व्यापकज्ञानविषयत्वानुपपत्तेः । अज्ञानविषयत्वेनाज्ञातस्यैव च ज्ञानविषयत्वनियमाज्ज्ञानगोचरतापि न । तथा जीवस्यापि जडत्वादज्ञानाश्रयावच्छि
न्नचैतन्यता न संभवति, जडे स्वत एवाप्रकाशे तत्र ज्ञानकृत्यभावात् । न च जडमेवाज्ञानमाश्रयतु विषयि करोतु वा घटादिषु दृष्टत्वादिति वाच्यम्, घटादिनिष्ठाज्ञानस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घटाद्यवच्छिन्नचैतन्यविषयत्वांगीकारेण तत्रापि घटादिविषयत्वानुपपत्तेर्न क्वचिज्जडाश्रयत्वमज्ञानस्य संभवति । एतदभिप्रायेणोक्तं सर्वज्ञसूक्तौ–" आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला । पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नैव गोचरः॥" इति । तथा च जडयोर्जीवब्रह्मणोरज्ञानाश्रयत्वविषयत्वाभावे कस्य ज्ञानेन मोक्षः, कस्य वा साधनानुष्ठायित्वम् । किंच–जातेऽपि तत्त्वज्ञाने द्वयोरपि जडतया बाधावश्यंभावेन शून्यवादप्रसंगः । ततो न जीवब्रह्मणोर्वास्तवो भेदः, नापि जीवानां परस्परं भेदः, पूर्ववज्जाड्यापत्त्या दोषस्य तादवस्थ्यात् । न च व्यवहारसंकरः, कुंभाद्यनुगतरविशशिनभसां प्रातीतिकभेदवदाविद्यकांतःकरणभेदवशाज्जीवानामपि तादृशभेदाभ्युपगमात् । तेन व्यवहारे सिद्धे किं परमार्थभेदाभ्युपगमेन । न च पारमार्थिकभेदं विना व्यवहारसिद्धिरिति वाच्यम्, स्वप्नादौ तं विनापि निखिलव्यवहारदर्शनात् । प्रत्युत भेदे वस्तुत्वे " एकमेवाद्वितीयं ब्रह्म " " अजो ह्येकः " "क्षेत्रज्ञं चापि मां विद्धि" इत्याद्यभेदपरश्रुतिस्मृतिवाक्यानामप्रामाण्यमनिर्मोक्षप्रसंगस्तदर्थं श्रवणाद्यनुष्ठानवैयर्थ्यं च स्यादतोऽभेद एव न्याय्यो न भेद इति । तथा च सर्वाभिन्नात्मज्ञानं श्रवणादिभिः स्यात् । श्रवणादीनां श्रुतिविहितत्वात्तद्विधायिकां श्रुतिमाह–" आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः "इति । अत्र " अग्निहोत्रं जुहोति, यवागूः पचति " इतिवत्पाठक्रमादर्थक्रमो बलीयानिति ध्येयोऽन्यथा द्रष्टव्यपदस्यांते पाठः स्यादिति । श्रवणं नाम न्यायैर्निर्णीततात्पर्यकश्रुत्यादिभिरात्मनिर्णयः । ततोऽप्युक्तवादिदुस्तर्कजालैरसंभावनाविपरीतभावनोत्पत्तेस्तन्निवारकन्यायानुसन्धानं मननम् । ततश्च व्यासंगत्यागेन देहातिरिक्तात्माकारमनोनुसंधानं निदिध्यासनम् । ततो यथाभूतदेहाद्यतिरिक्तात्मसाक्षात्कारस्तत्त्वज्ञानात्मको जायते, यः समूलं मिथ्याज्ञानमुन्मूलयति । विशेषदर्शनजन्यलौकिकसाक्षात्कारत्वेन भ्रमनिवर्तकत्वदर्शनात् । श्रुतिरप्येवमाह–"तरति शोकमात्मवित्"इति । मिथ्याज्ञाननाशः शोकतरणं, तद्धेतुरात्मदर्शनं, तद्धेतवः श्रवणादीनीति विवेकः । नन्वात्मसाक्षात्कारस्यैव मिथ्याज्ञाननाशकत्वेन्यपदार्थनिरूपणं व्यर्थमिति चेन्न, तत्तत्त्वज्ञानमंतरेण तद्भिन्नत्वेनात्मज्ञानासम्भवात्परंपरोपयोगेन सार्थक्यात् । तच्चात्मज्ञानं भगवत्प्रसादेनैव न तद्विनेति । अतः सोपि ज्ञेय उपास्यश्चेति पूर्वमुपपादितमेतद्बहुशः । अत्रैवान्येषां सांख्याद्यभिमतज्ञानानामंतर्भावो यथा कथंचिद्बोध्यः । 'सर्वे पदा हस्तिपदे निमग्नाः'इति न्यायेनेति संक्षेपतो निरूपितः कांडत्रयविभागः । एवं कांडत्रयात्मकवेदोपबृंहकतया श्रीमद्भागवतमपि वेदतुल्यमेवादरणीयताकोटिनिविष्टमिति निष्कण्टको घण्टापथः ।

अथेदानीं श्रीमद्भागवतस्यान्यकृतत्वशंका निराक्रियते । ननु भागवतं न व्यासदेवकृतं किंतु बोपदेवादिभिः कृतं स्यादिति प्रायः पुष्कलाः शंका भवंति । तदेतदत्र समा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धानकदंबकमवधेयम्—बोपदेवेन भागवतं यदि कृतं तर्हि व्यासनाम समाप्तौ किमिति लिखितं,ग्रंथकर्तुर्नाम्नि यदि संदेहस्तर्हि महाभाष्यादिग्रंथेष्वपि संदेहो दुर्वारः। किंच—बोपदेवात्प्रागुत्पन्नैश्चित्सुखाचार्यैर्भागवते टीका कृता, विजयध्वजेनापि भागवते टीका कृता, तत्रादा अष्टौ टीका अवलोक्य इत्युक्तम्, 'हनुमट्टीकां शंकराचार्यटीकां दृष्ट्वा' इति वर्णितं, तत्कथं संगच्छेत।शंकराचार्याणां सप्तशतसंवत्सराणां व्यतीतौ बोपदेवस्य तु पंचशती व्यतीतेति रामाश्रमेण लिखितम्।अन्यच्च भट्टोजिदीक्षितैर्बहुप्रकारैर्भागवतं स्तुतम्। शिवतत्त्वविवेकादौ संमतित्वेन च गृहीतम्।मधुसूदनसरस्वतीभिः भक्तिरसायनग्रंथे भागवतं व्याख्यातम्। विद्यारण्यगुरुभिरपि सूतसंहितादिटीकादौ भागवतं संमतित्वेन गृहीतम्। शंकराचार्यैर्गोविंदाष्टके 'मृत्स्नामत्सि' इत्याद्युक्तं, तच्च भागवतादन्यत्र नास्ति। एवमेकनाथप्रभृतिभिः प्राकृतग्रंथकारैरपि स्वीकृतम्। एतदधिकः को वा पंडितो यो भागवतं निन्देत्। किंच—भागवतं वाममार्गिणो निंदंति, ते निन्दन्तु नाम, तेषामपि भागवते निंदितत्वात्। चोराश्चंद्रमिव, उपपतयो मुख्यपतिमिव, पाखंडिनो वेदमिव, चैद्यः कृष्णमिव, रजको राममिव, गतश्रीर्गणकमिव, गतायुश्चिकित्सकमिव, उभयवर्जितो ब्राह्मणमिव, तादृशाः सर्वपुरुषार्थभ्रष्टा निन्दंतु भागवतं, न नः किंचिच्छिद्यते। किंच—महाभागवतमेव सर्वपुराणप्रसिद्धमिति दामोदरशास्त्रिभिरपि निर्णीतम्। तद्यथा—"अष्टादशपुराणानां कर्ता सत्यवतीसुतः" इति। अष्टादशपुराणानि तु—'ब्राह्मं पाद्मं वैष्णवं च' इत्यादिवाक्येषु भागवतं नाम पुराणमेकमेव गणितम्। लोके तु श्रीमद्भागवतदेवीभागवताख्यौ द्वौ ग्रंथौ प्रसिद्धौ। तत्र कतरो व्यासकृताष्टादशपुराणांतर्गत इति जिज्ञासायां श्रीमद्भागवताख्य एव तथेति पुराणवाक्यैर्निर्णीयते। तथाहि स्कांदे—"परीक्षिच्छुकसंवादो योसौ व्यासेन वर्णितः। ग्रंथोऽष्टादशसाहस्रः सोसौ भागवताभिधः॥" इति। नारदीये—"मरीचे शृणु वक्ष्यामि वेदव्यासेन यत्कृतम्। श्रीमद्भागवतं नाम पुराणं वेदसंमितम्॥"। पाद्मे तु—"चकार संहितामेतां श्रीमद्भागवतीं पराम्" इति।"स्कंधा द्वादश एवात्र कृष्णेन मुनिना कृताः" इति देवीभागवतोक्त्या देवीभागवतमपि व्यासकृतमिति न वाच्यम्, द्वयोर्व्यासकृतत्वे व्यासकृतपुराणानामष्टादशत्वचतुर्लक्षश्लोकत्वयोर्हानिप्रसंगात्। न चैवं देवीभागवतवचनाप्रामाण्यप्रसंगः, तस्य शिष्यद्वारा व्यासकृतत्वमित्यर्थांतरपरताया एवागत्या स्वीकार्यत्वात्। भारतोत्तरमसंतुष्टो व्यासो भागवतं चकारेत्यादिश्रीमद्भागवतवचनेनाविरुद्धत्वायार्थांतरपरत्वमुपनेतुमुचितत्वात्। किंच—पाद्मे श्रीमद्भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसंगे—"वेदान्तानि च वेदाश्च मंत्रास्तंत्राणि संहिताः। दशसप्तपुराणानि सहस्राणि तदाऽऽययुः॥" इत्युक्तम्। तत्र व्यासकृतपुराणानामष्टादशत्वादष्टादशेति वक्तव्ये सप्तदशत्वोक्तिः श्रोतव्यस्य श्रीमद्भागवतस्याष्टादशत्वं गमयति, तस्याष्टादशांतर्गतत्वे देवीभागवतस्याष्टादशांतर्गतत्वे वाऽष्टादशानां श्रोतृत्वसंभवेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रोतुभागतानां पुराणानामष्टादशत्वानुगतेर्निर्बीजत्वप्रसंगात् । एवं पाद्मे—"दश सप्त पुराणानि कृत्वा सत्यवतीसुतः । नाप्तवान्मनसस्तोषं भारतेनापि भामिनि ॥ चकार संहितामेतां श्रीमद्भागवतीं पराम् ।" इति सप्तदशत्वोक्तिरपि श्रीमद्भागवतस्यैव 'एतां संहिताम्' इति निर्दिष्टस्याष्टादशत्वं गमयति । देवीभागवतस्याष्टादशत्वे 'अष्टादश पुराणानि' इत्युक्तेर्निर्बीजत्वप्रसंगात् । किंच—नारदीये ब्राह्मादीन्यष्टादशपुराणानि प्रदर्श्य क्रमेण तेषामनुक्रमण्यो दर्शिताः । तत्र—"विरिंचे शृणु वक्ष्यामि वेदव्यासेन यत्कृतम् । श्रीमद्भागवतं नाम पुराणं वेदसंमितम् ॥ तदाष्टादशसाहस्रं कीर्तितं पापनाशनम् । सुरपादपरूपोयं स्कंधैर्द्वादशभिर्युतः ॥ भगवानेव विप्रेंद्र विश्वरूपी समाहितः । तत्र तु प्रथमे स्कंधे सूतर्षीणां समागमे । व्यासस्य चरितं पुण्यं पांडवानां तथैव च॥ "इत्यादिना द्वादशानां स्कंधानामनुक्रमणी प्रोक्ता।सा च श्रीमद्भागवत एवोपलभ्यमाना तस्यैवाष्टादशांतर्गतत्वं गमयति, न तु देवीभागवतस्य, तत्र तस्याऽनुपलंभात् । एवं दामोदरशास्त्रिभिः श्रीमद्भागवतमष्टादशमहापुराणांतर्गतमिति निर्णीतम्। अर्थात्—देवीभागवतमुपपुराणमिति च॥ अस्माकं त्वेवं भाति—श्रीमद्भागवतं देवीभागवतमित्युभयमपि महापुराणांतर्गतं,सर्गविसर्गादिदशलक्षणलक्षितत्वात,शुकप्रोक्तत्वादिबहुलक्षणसमन्वयाच्च।तर्ह्यष्टादशमहापुराणानीत्युक्तं, तद्व्याकुप्येतेति तु न वाच्यम्, कल्पभेदेन तद्व्यवस्थाकरणस्यौचित्यात् । तथाहि—स्कांदे नागरखंडे-त्रिंशत्कल्पा उक्ताः । मात्स्येपि-श्वेतकल्पादिपितृकल्पांतास्त्रिंशत्कल्पा उक्ताः । तत्राग्नेयकल्पे लिंगपुराणमुक्तम्, मानवकल्पे वाराहपुराणमुक्तम्, तत्पुरुषकल्पे स्कांदमुक्तम्, लक्ष्मीकल्पे कौर्ममुक्तम्, अघोरकल्पे भविष्यम्, वाराहे वैष्णवम्, भविष्ये भागवतमित्यादि । प्रभासखंडेपि—"पुरातनस्य कल्पस्य पुराणेषु विदुर्बुधाः । इतिहासपुराणानि भिद्यंते कालगौरवात् ॥ स्कांदं तथा च ब्रह्मांडं पुराणं लैंगमेव च । वाराहकल्पे विप्रेंद्रास्तेषां भेदः प्रवर्तते ॥ अष्टादशप्रकारेण ब्रह्मांडं विश्वभावनम् । अष्टादशपुराणानि तेन जातानि भूतले ॥ लिंगमेकादशविधमभिन्नं द्वापरे शुभम् । स्कांदं तु सप्तधा भिन्नं वेदव्यासेन धीमता ॥ " इति । अस्तु वा यथाकथंचिद्व्यवस्था, श्रीमद्भागवतं तु महापुराणं व्यासकृतमिति तु सिद्धमेव । पद्मपुराणे तल्लक्षणमुक्तम्—"ग्रंथोऽष्टादशसाहस्रो द्वादशस्कंधसंयुतः । परीक्षिच्छुकसंवादः श्रीमद्भागवताभिधः ॥ पुराणेषु च सर्वेषु श्रीमद्भागवतं परम् । यत्र प्रतिपदं विष्णुर्गीयते बहुधर्षिभिः ॥ इति संकल्य मनसा श्रीमद्भागवतं परम् । जन्माद्यस्य यतश्चेति धीमह्यंतमुपावदत्॥ " इति । ननु "यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः " इति मात्स्योक्तं लक्षणन्तु भागवते नास्तीति चेन्न, गायत्रीपदेन गायत्र्यर्थस्य ग्राह्यत्वात्, "गायत्रीभाष्यरूपोयं द्वादशस्कंधसंयुतः । ग्रंथोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः ॥ " इति गौरीतंत्रोक्तेः । गायत्र्यर्थश्च विष्णुध्यानं, तच्च प्रथमश्लोक एवास्ति । ननु पद्मपुराणे—' द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः ' इति भागवतस्य द्वात्रिंशदधिकशतत्रयसंख्या अध्यायाः प्रतीयंते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीधरैस्तु त्र्यधिका व्याख्याताः, केचिदघासुरकथात्मकाध्यायत्रयं प्रक्षिप्तमिति मन्यंते, अतो विरोध इति चेन्न, "ग्रंथोऽष्टादशसाहस्रः श्रीमद्भागवताभिधः । पंचत्रिंशोत्तराध्यायस्त्रिशतीयुक्त ईश्वरि ॥ " इति गौरीतंत्रवचनप्रामाण्यात । द्वात्रिंशत्त्रिशतमित्यादेर्व्याख्यानं पूर्वोक्तं ग्राह्यम् । शंकांतराणि तु तत्रतत्र व्याख्यातानीत्युपरम्यते ।

ननु भागवतं यदि व्यासकृतं तर्हि शारीरकविरुद्धाः पदार्थाः कथं भागवते प्रतिपादिताः । शारीरके हि—"तेषां चानुपलब्धेः" इत्यादिसूत्रैः कापिलाः पदार्थाः खंडिताः । भागवते तु महत्तत्त्वमहंकारश्च त्रिविधो राजसानींद्रियाणि इत्यादिकं प्रतिपादितमतो विरोध इति तु न वाच्यम्,प्रधानांशाविरोधात्।शारीरे ब्रह्मैव जगत्कारणमुक्तम्।तदेव भागवतेऽपि—'जन्माद्यस्य यतः' इत्युभयत्रापि समानम्। शारीरक आकाशादिक्रमेण सृष्टिक्रमो वर्णितो महत्तत्त्वादिकं नोक्तं,भागवते तूक्तं तथापि न विरोधः, सृष्ट्यादिकस्याऽर्थवादत्वेन तत्रादराभावात।तत्र श्रुत्याद्यविरुद्धार्थस्य ग्राह्यत्वोक्तेः। वेदांतसांख्यं भागवते गृहीतं न कापिलं,वेदांतसांख्यं तु मन्वादिभिरपि गृहीतं तच्च प्रथमप्रकरणे दर्शितमतो न विरोधः ।

ननु कथं तर्हि भागवतस्य ज्योतिःशास्त्रस्य च विरोधः—भागवते लक्षयोजनपरिमिता जंबूद्वीपभूमिर्वर्णिता, ज्योतिःशास्त्रे तु पंचसहस्रयोजनपरिमितैवाखिलेति चेदस्य समाधानं गोलदर्पणे विस्तरेण दत्तं, तदनुरोधेन सारतः किंचिदुच्यते—पृथिव्या आकारद्वयमस्ति । एको महापरिमाणको विशेषाकारः, द्वितीयो ज्योतिःशास्त्रोक्तस्वल्पपरिमाणको गोलाकार एव । एवमेव परीक्षिता पृष्टं पंचमे शुकेनाप्युत्तरं दत्तम्—" भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः " इति । भूगोलकपदेन ज्योतिःशास्त्रोक्तो गोलाकारो मार्त्तिकोंडः, विशेषपदेन मंडलाकारः पुराणोक्तो हिरण्मयोंडः । उक्तं च योगिनिर्याणे द्वितीयस्कन्धे—' ततो विशेषं प्रतिपद्य निर्भयः ' इति । पंचमेप्युक्तम्—" कांचनी ततोन्याऽऽदर्शतलोपमा " इत्यादि । तृतीयेप्युक्तम्—" एतदंडं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः " इत्यादि । " यस्येदं क्षितिमंडलं भगवतोनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते " इति । सिद्धार्थदृष्टांतेन गोलाकारत्वं प्रतीयते । " प्रेक्षयित्वा भुवो गोलं यावद्यद्वै स्वसंस्थया " इति कर्दमविहारेऽप्युक्तम् । दशमेऽष्टमाध्यायेऽपि—" सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः । साद्रिद्वीपाब्धिभूगोलम् " इत्यादिप्रामाण्यात्पृथिवीद्वयमंगीकार्यम् । ननु स्वल्पा पृथिवीयम्, महती कुत्रास्ति परेति चेदुच्यते—महती तु नक्षत्रकक्षाया ऊर्ध्वं प्रतिबिंबरूपा । तन्मानं तु पंचमे—" लक्षोत्तरसार्धनवकोटियोजनं परिमंडलं भूवलयस्य " इति । स्थूलदृष्ट्या भकक्षोर्ध्वभाग एवायाति । अथ कथं प्रतिबिंबवत् । कथमेतदाकारा सा । तद्यथा—समंतात् पंचसहस्रयोजनात्मकस्य समंतायोजनांतरितोऽनलगोलस्तेन दूरकांतवत्स्वल्पाया अप्यस्या नक्षत्रकक्षाया उपरि या कांचनी भूमिर्निर्मलाख्या, तत्तेजोव्यवधानकारी तत्र महाप्रतिबिंबः समंताद्यथा दूरकांते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकत्र महतोल्पत्वं दृश्यते, परत्राल्पस्य महत्त्वम्, एवं बाह्यांगानां चंद्रादीनामल्पत्वम्, अंतर्गतस्य भूगोलस्य महत्त्वम् । नन्वनलगोले किं प्रमाणम्, उच्यते–सवासनं प्रमाणं भूपृष्ठतः खगकक्षापर्यंतमष्टौ पवना आवहादयः संति, उभयोर्योगे जलगोलः । तदुक्तं पुलिशसिद्धांते–" भूवातोद्वहयोर्योगे जलगोलोस्ति काचवत् । दृश्यंते येन संलग्ना भिन्नाः सूर्यादिरश्मयः ॥" इति । सूर्यसिद्धांतेपि–" अत्यासन्नतया तेन ग्रीष्मे तीव्राः करा रवेः "इति । अत्यासन्नत्वदूरत्वं चानलगोलप्रतिबिंबतारकेण विना न संभवति । श्रीशुकैस्तु पुराणानुगैर्महाप्रमाणमेव व्याख्यातं, स्वल्पप्रमाणं तु सूचितमेव ॥ इति भूगोलविरोधपरिहारः ।

अथ खगोलस्य विरोधपरिहारः–" एतेन दिवो मानं तद्विद उपदिशंति " । अस्यार्थः–एतेन भूगोलकेंद्रेण दिवो मंडलानां ग्रहनक्षत्रादिकक्षाणामौच्च्यपरिध्यादीनामिति । " यथा द्विदलयोर्निष्पावादीनामंतरेणांतरिक्षमुपसाधितम् " । अस्यार्थः–भूगोलद्युमंडलयोः संधितः अंतरिक्षमंतरेण मानं विना । अंतरिक्षं तु मानशून्यमित्यर्थः । यथा द्विदलयोर्निष्पावादीनां मानं नास्ति तद्वत्।"यन्मध्यगतं भगवांस्तपतां पतिः" इति।अस्यार्थः–यस्यांतरिक्षस्य मध्यमिव मध्यं जलगोलः,यथांतरिक्षस्य मध्याभावस्तथा गोलरूपत्वाज्जलगोलस्यापि, तत्र गतः प्रतिबिंबरूपेण संस्थित इत्यर्थः । बिंबस्वरूपेण तु भूकेंद्रात्सपादलक्षयोजनेष्वस्ति । "एवं नव कोटय एकपंचाशल्लक्षाणि मानसोत्तरपरिवर्तनस्योपदिशंति " इति । अस्यार्थः–मानसश्चंद्रस्तदपेक्षया उत्तरः परः शनिस्तन्मंडलस्य मानं ज्यौतिषोक्तकरणार्थं शन्यंशयुतं जातं द्वादशकोटिमितमष्टषष्टिलक्षमिति । "सूर्यांडगोलयोर्मध्ये कोटयः स्युः पंचविंशतिः" । अस्यार्थः–सूर्यस्य बिंबितार्कस्यांडगोलो हिरण्मयोंडपरिधिस्तयोर्मध्येंतः पंचविंशतिकोटयः स्युरिति । " अंडमध्यगतः सूर्यो द्यावाभूम्योर्यदंतरम्"इति।अस्यार्थः–द्यावाभूम्योर्नक्षत्रकक्षाभूम्योर्यदंतरं तदेवांडस्य हिरण्मयांडस्य तत्रांतः सूर्यो जलगोलप्रतिबिंबितार्को भवतीति ज्ञेयम्।एवमादिसमाधानमुक्तं गोलदर्पणे।तत्तद्रीत्या ज्ञेयम्।अनेन यथार्थसार्थसमर्थनेन निःसंशयं श्रीमद्भागवतमाप्तवाक्यत्वात्सर्वथा प्रमाणमेवाप्रतिहतं सकलशास्त्रसिद्धान्तसाद्गुण्यादिति हि निर्विवादमिति ।

तदेतच्छ्रीमद्भागवतमहापुराणस्य वैष्णवतोषिणी–पदरत्नावली–सारार्थदर्शिनी–सुबोधिनी–बालप्रबोधिन्यादयो बहव्यष्टीका विविधसिद्धान्तानुकूलार्थाववोधनसमर्थाः सुप्रसिद्धाः सन्त्येव।तन्मध्ये खलु श्रीमन्नृसिंहभगवत्पदसरोजामन्दमकरन्दमिलिन्दायमानमानसतया परमपुरुषार्थसाधनसंपन्नानां श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीश्रीधराचार्यस्वामिनां व्यासोक्तिभावार्थप्रदर्शनैकधुरीणा भावार्थदीपिकाख्यव्याख्यैव सर्वोत्तमाऽद्वैतसिद्धातानुकूला जागर्तितमां सर्वविद्वज्जनमनोमंदिर इति न कस्यापि कोविदस्याऽविदितचरम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र च सम्प्रति श्रीमत्खरडपत्तनवास्तव्याः, श्रीमद्गौडवंशाऽमलकमलोद्घाटनैकोष्णमयूख—पाण्डित्यसदाचारसौशील्याद्यनेकगुणगणागारायितात्मानः, उपनतोपनयनानेहः प्रभृतिब्रह्मचर्य्याधिष्ठानपुरस्सराप्तवेदवेदाङ्गन्यायवेदान्तसाहित्याद्यनेकविषयापारपाथोधिपारदृश्वत्वाः, भवान्तरीयसत्कर्मजनितातिदुरूहागम्यविषयासीमप्रसृमरशेमुषीविलासाः, श्रीमन्नन्दनन्दनपादारविन्दामन्दमकरन्दमानससरोवरविहारिमानसमरालाः, श्रीमदाखण्डलाद्यखिलाशापाललोकपालगन्धर्वकिन्नरचारणाद्यनल्पदेवावलिसाञ्जलिजेगीयमान—परमभक्तशिरोमणिभव्यभगवद्गुणगानप्रसक्तमानसाऽमरर्षिश्रीनारदोपवीणित—स्वाविर्भूतानुपमज्ञानविज्ञानसन्तानश्रीमद्ब्रह्मर्षिप्रवरवाल्मीक्याद्युपश्लोकित—श्रीमन्महर्षिप्रवरवेदव्यासानेकलक्षप्रमाणग्रन्थगीताऽप्राप्तपार—श्रीमत्परमात्मस्वरूपपरमपावनश्रीकृष्णचन्द्राऽनेकावतारचरितव्यूहगानैकतानमानसाः, अस्मन्मुद्रणालयमुद्रयिष्यमाण—नित्यकर्मप्रकाशिका (स्वल्पाह्निकबोधिनी) नामकस्वरचितग्रन्थानुबोध्यमानयथाशास्त्रविध्यनुष्ठयिमानाह्निककृत्यततयः, परमकारुण्योत्साहानालस्यपुरस्सरव्याकरणन्यायवेदान्तसाहित्यज्योतिषपुराणाद्यधीत्यन्तेवासिव्रजाध्यापनपटीयोव्यापाराः, श्रीमद्भागवताद्यपद्यव्याख्याशतक—श्रीमद्भागवतलीलाकल्पद्रुम—श्रीमद्भागवतसप्ताहवाचनपरमोपयोगिगोलार्थदीपिकानामकतट्टीका—न्यायसिद्धान्तमुक्तावलीदीप्तिमालानामकटीका—शीघ्रबोधटीका—चतुर्युगीयनृपचरिताद्यनेकग्रन्थनिर्माणाविर्भाविताऽतनुपरोपकाराकूपाराः, करालकलिकालकवलायमाननिगमागमबोधितकर्म्मानुष्ठानहरिस्मरणसद्विचारप्रचारादिदुस्समयवेगाऽविगणनपुरस्सरसंरक्षितवाडवधर्म्मकर्म्माङ्कुराः, श्रीमच्छ्रीवंशीधरशर्मापाह्वपण्डितप्रवराः; श्रीमदखिलमहीमण्डलाऽऽखण्डलानाम्, समनुष्ठितनिगमागमबोधितबाहुजोरुकर्त्तव्यस्मर्त्तव्यसच्चरित्राणाम्, अनवरताऽऽराधितेन्दिरानाथपादपाथोजाप्तपुरुषार्थचतुष्टयप्रष्ठतमानाम्, परमनिरपेक्षयजनयाजनादिस्वधर्मपरिपालनपरिवृढमहेच्छाच्छयशोविभूषितविद्वद्वृन्दसम्प्रदानकसततप्रचारितदानवारिधाराप्रऽरीकृताऽनुभावितयाचनव्रीडार्थिजनार्थवितरणशालिस्वभावामरपादपवितततकीर्तिततीनाम्, द्वितीयरसावतारायमाणाऽद्वितीय—रसापालनाभिवर्द्धितप्रबलबलाऽबलायमानारिबह, लवाह्निनीकानाम्, परमोच्चसच्चरितराजन्यवर्याणामन्वये गृहीतजनुषाम्, स्वपूर्वजाधिष्ठितसरण्यनुसरणप्रसक्तमानसानाम्, स्वप्रबलदानपञ्चाननविदारितदरिद्रदारिद्र्यदन्तावलानाम्, आङ्ग्लसार्वभौमात्तविशेषसम्मानपदवीमहितमहामहसाम्, ‘श्री—हिज़ हाइनेस फरज़न्द अरजुमन्द अकीदत पैवन्द दौलते इंगलिसिया वरारवंशसरमौर राजयराजगान सर हीरासिंह मालवेन्द्र बहादुर जी. सी. एस. आई. जी. सी. आई. ई.’ एवंरूपवर्णावलिबोध्यमानसोपाध्यभिधानभूपालानां शुभाश्रयेण नाभापत्तनमलंकुर्वाणाः (पूर्वोक्तपण्डिताः) परमकारुणिकतया श्रीमद्भागवतनिगूढार्थं बुभुत्सूनामुपकारकृते माथुरब्राह्मणैरन्यैरपि बहुकृत्वःकृतप्रार्थनाः श्रीश्रीधराचार्यस्वामिव्याख्यानाभिप्रायप्रकाशनद्वारा श्रीमद्भागवतं व्याचिख्यासवः श्रीमद्भागवतस्य श्रीमच्छ्रीधरस्वामिविरचितभावार्थदीपिकानामटीकायास्तद्भावार्थप्रकाशनेनान्वर्थनाम्नीं भावार्थदीपिकाप्रकाशाख्यां टीकां निरमासिषुः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा चेयम्—श्रीधरस्वाम्यभिप्रायप्रकाशनव्रतगृहीतदीक्षापि 'क्वचिच्च श्रीधरत्यक्तपदानामपि वर्णनम्' इत्युपक्रमोक्तरीत्या श्रीधरस्वामित्यक्तपदानामप्यभिप्रायप्रकटने बद्धादरा, सर्वोत्तमापूर्वार्थाविष्करणगरीयसी, अथ च—श्रीजीवगोस्वामिकृत—वैष्णवतोषिणी—बृहत्क्रमसन्दर्भ—क्रमसन्दर्भ,—विजयध्वजतीर्थकृत—पदरत्नावली,—विश्वनाथचक्रवर्तिकृत—सारार्थदर्शिनी,—वल्लभाचार्यकृत—सुबोधिनी,—वीरराघवाचार्यकृत—भागवतचन्द्रचन्द्रिका,—सुदर्शनसूरिकृत-शुकपक्षी,—शुकदेवकृत—सिद्धान्तप्रदीप,-राधारमणदासगोस्वामिकृत—दीपिकादीपिनी, —श्रीसनातनगोस्वामिकृत—बृहद्वैष्णवतोषिणी,—बालप्रबोधिनी—प्रेममञ्जरी—गणदीपिका-विशुद्धरसदीपिकाद्यनेकटीकाग्रन्थार्णोधिमन्थनोत्थितसारसन्दृब्धाङ्गशोशुभा, बह्वाचार्योऽनवरतहरिगुणगणस्मरणपरमपवित्रान्तःकरणोहितश्रीमद्भागवतसारार्थनिबद्धप्रत्ययघनतया स्वगौरवेण ह्येकैकाचार्योहितश्रीमहर्षिव्यासगूढार्थसार्थारब्धाङ्गा अन्यास्सर्वा अपि टीका उपहसन्तीव विराजमाना—

अथ च—श्रीधरगुणगणप्रकाशनैकप्रवीणा, अवाहिन्यपि त्रिचतुःस्कन्धवाहिनी, अकृष्णिताऽभिधानाऽपि ह्यघासुरवधानुबद्धप्रबलप्रवृद्धव्यापारावतारा, अतरणिरपि तरुणतरश्रीमद्भागवतार्थसार्थसमुद्रोत्तरणसाधनैकधुरीणा, अदूत्यपि श्रीकृष्णगोपिकात्मनायिकानायकसंघटनान्योन्याभिप्रायप्रबोधनैकसम्बध्यमानानुसन्धाना, अद्वादशात्मापि भवाभावकभव्यभगवद्भावानुभावकभागवतार्थानुसन्धानानषक्तभागवतजनमानसकुशेशयोद्घाटनपटीयोऽद्वितीयद्वाशात्मा निखिलविद्वज्जनानन्दानुभावनायोज्जृम्भतेतराम् ।

अस्यां च—यथाप्रयोजनमृग्यजुःसामाथर्वचतुर्वेदाः, वाजसनेयसंहिता,—सामवेदीय—तलवकार,—यजुर्वेदीय—कठा,—ऽथर्ववेदीय—प्रश्न—मुण्डक—माण्डूक्य,—यजुर्वेदीय—तैत्तिरीय,—ऋग्वेदीयैतरेय,—सामवेदीय—च्छान्दोग्य,—कृष्णयजुर्वेदीय—श्वेताश्वतर,—कैवल्य—जाबाल—गर्भ—नारायण—बृहज्जाबाल—गोपालतापन्याद्युपनिषदः, सांख्य—योग—वेदान्त—मीमांसा—न्याय—वैशेषिकात्मषड्दर्शनानि, शिक्षा—कल्प—व्याकरण—निरुक्त—ज्योतिषच्छन्दो—रूपवेदाङ्गानि, अत्रि—विष्णु—हारीतौ—शनसा—ऽऽङ्गिरस—यमा—ऽऽपस्तम्ब—संवर्त्त—कात्यायन—बृहस्पति—पाराशर—व्यास—शंख—लिखित—दक्ष—गौतम—शातातप—वसिष्ठादिस्मृतयः, ब्राह्म—पाद्म—मात्स्य—वामन—नारदीय—शैवा—ऽऽग्नेय—वायवीय—मार्कण्डेय—ब्रह्मवैवर्त—ब्रह्माण्ड—वाराह—भविष्य—लैङ्ग—कौर्म—स्कान्दादिपुराणान, भारतादीतिहासाः, वाल्मीक्यादिप्रणीतरामायण—कालिदासादिप्रणीतकाव्यादयः, अमरकोश—विश्व—शाश्वत—हैम—यादव—मेदिनी—द्विरूपादयः कोशाः, अन्येपि बहवो ग्रन्थाः प्रमाणत्वेन गृहीताः सन्ति ।

अथ च—प्रायः सर्वत्रैव श्रीधरस्वाम्यभिप्रायमनुवर्ण्य विश्वनाथाद्यनेकटीकाकर्तृणामप्याशयमभिगृह्य ग्रन्थकर्त्रा स्वाशयः प्रदर्शितो वर्तते । श्रीमद्भागवते च यत्रयत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थले विद्वांसः सन्दिहते, तत्रतत्रानेकप्रमाणप्रदर्शनेनार्थविशदीकरणेन च तथा शंकोद्धारः कृतो यथा च तदवलोकनेन निश्शंकमानसा विद्वांसः परमोपकृतिं मन्यमाना निःशंकं धन्यवादमन्तरा नैवान्यादृशवागवसरं मन्येरन् ।

दशमस्कन्धे च—कंसप्रेरितानां पूतना—तृणावर्त—शकटादीनां येषांयेषां वधो व्यधायि धृतार्भकलीलेन परमात्मना श्रीकृष्णेन; तत्तद्विषये तत्तदर्थप्रतिपादिकाः श्रुतयोऽपि प्रमाणत्वेनात्रोपन्यस्ता इति परमो विशेषः । चतुर्दशाध्याये, अष्टाविंशाध्यायमारभ्य षष्टितमाध्यायपर्यन्तं च प्रतिपद्यं श्रीधरस्वाम्यभिप्रायमनुवर्ण्यैत ॥ ❀ ॥ चिह्नोत्तरं जीवगोस्वामिकृत—वैष्णवतोषिणी,—विजयध्वजतीर्थकृत—पदरत्नावली,—जीवगोस्वामिकृत—क्रमसन्दर्भाद्यभिप्रायमभिगृह्य नन्दनन्दनपादारविन्दानुग्रहलब्धविचारचातुर्या ब्रह्मस्तुति—युगलगीत—रासोपक्रमा—ऽन्तर्धान—रासमण्डलरचनादिप्रकरणे महर्षिप्रवरश्रीव्यासविरचितपदानामाशयाविष्करणपुरःसरं तेषां सहेतुकानुपूर्वीकत्वप्रदर्शनेन तादृशं व्याख्यानमकारि, यदवलोकनेन “अब्धिर्लंघित एव वानरभटैः किन्त्वस्य गम्भीरतामापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ” इति मुरारिकवेरुक्तिर्झटित्येव मनस्यारूढा भवति । अनुसृतलोकविडम्बनस्य भगवतस्साग्रजस्य श्रीसान्दीपनिगुरुभ्यो विद्याभ्यासस्य वर्णनप्रसङ्गे ‘ अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ’ इत्यत्र श्रीधरस्वामिना शैवतन्त्रोक्ता याश्चतुष्षष्टिः कलाः प्रदर्शितास्तासामुदाहरणादिप्रदर्शनपुरस्सरं तद्भेदादयोऽपि परमहृदयङ्गमाः प्रदर्शिताः ।

सप्ताऽशीतितमवेदस्तुत्यध्याये तु—पञ्चप्रकारकं तादृशं व्याख्यानमस्ति, यदवलोचनत एव परमाऽगम्यविषयावगाहनसारार्थसञ्चयनपरिश्रमोऽतिचकितचेतसाऽनुमीयते विद्वद्भिः । श्रीमन्नीलकण्ठाचार्यप्रणीतव्याख्यानमप्यत्र पूर्णरूपेण विन्यस्तम् । तथाऽष्टाशीतितमाध्यायमारभ्य दशमस्कन्धसमाप्तिपर्यन्तमपूर्वतरव्याख्यानं द्विधा विन्यस्तम् । अथ चैकादशस्कन्धे—सर्वत्रैव श्रीधरोक्ति व्याख्यायैत ॥ ❀ ॥ चिह्नोत्तरं वेदान्तप्रचुरव्यासाशयप्रदर्शनार्थं विश्वनाथाद्यनुसारि व्याख्यानमन्तर्वाणिहृदयङ्गमं कीदृगिति नाभिधातुं शक्यते, किन्तु स्वयमेव विद्वांसो ज्ञास्यन्तीति । प्रतिस्कन्धान्ते च—तत्तत्स्कन्धश्रवणमाहात्म्यमपि विन्यस्तमस्तीत्यलमगण्यगुणगणार्णवाया अशक्यकथनास्मदीयाऽपटीयोरसनायास्तन्महिमवर्णनप्रवृत्तिचाञ्चल्येन ।

अथ च—निखिलसद्धर्म्माऽऽचारप्रचारप्रचुरप्रसक्तचेतोभिः, आनन्दितशास्त्राध्ययनाध्यापनहरिस्मरणादिप्रवृत्तवाडवकदम्बैः, श्रीमन्नृपतिकुलतिलकश्रीहीरासिंहबहादुरपदविभूषिताभिधानमहाशयैर्द्रव्यादिप्रदानपुरःसरं सत्कृत्य बहुधैतद्ग्रन्थप्रकाशनाय प्रोत्साह्यमाना अन्यैरपि बहुभिर्माथुरब्राह्मणादिभिरभ्यर्थमानाः पूर्वोक्तपण्डितप्रवरश्रीवंशीधरशर्माभिधानमहात्मान इमां श्रीमद्भागवतभावार्थदीपिकाप्रकाशनाम्नीं टीकां सर्वप्रकारकाधिकारसहितां मुद्रणाय मह्यं प्रायच्छन् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा चेयम्–मिर्जापुर–मण्डलान्तर्गत–कोंढ–संस्थाननिवासि–त्रिपाठ्युपनामक–पण्डितमहेशदत्तशर्मात्मज–छोटूपतिशर्मशास्त्रिद्वारा संशोध्य विषयभेदप्रदर्शकनानाविधचिह्नप्रदान–टीकाकारान्तराङ्गीकृतपाठस्वरूपबोधार्थटिप्पण्यादिप्रदानादिभिर्बहुधा संस्कार्य च प्रकाशाभिलाषिभावार्थदीपिकया समयोजि ।

तदिदं–पं॰वंशीधरशर्मविरचित–भावार्थदीपिकाप्रकाशसहित–श्रीस्वामिश्रीधराचार्यप्रणीत–भावार्थदीपिकोपेतं श्रीमद्भागवतमहापुराणं सटीकपद्मपुराणोक्तमाहात्म्येन, कौशिकसंहितोक्तमाहात्म्येन, पं॰वंशीधरशर्मविरचित–सप्ताहादिकथाश्रवणपद्धत्या च समलङ्कृत्य मया मुम्बय्यां स्वकीये "श्रीवेङ्कटेश्वर"–स्टीम्मुद्रणालये परमोत्तमशीशकाक्षरैः स्वच्छमसृणपुष्टपत्रेषु सम्मुद्रय स्वकार्यालयमुद्रिताऽष्टादशमहापुराणचूडामणिरिव प्रकाश्यते ।

तदधुना शास्त्रविचारचारुचरिता हरिस्मरणानुषक्तमानसाः श्रीमद्भागवतपठनपाठनकथावाचनपरायणचेतसो विद्वांसः, श्रीमद्भागवतकथाश्रवणपुस्तकप्रदानागण्यपुण्योपलब्धिसंबद्धमनसो भूपाल–भूपालकल्पश्रेष्ठिप्रभृतयः, तत्तद्देशवासिनिखिलजनपुस्तकप्रापणसत्कर्मप्रवृत्तव्यापारा व्यापारिणश्च परमामूल्यस्याप्यस्याल्पमूल्येन लाभाय समयमनपेक्षमाणा आत्मानं माञ्च शीघ्रं कृतार्थयन्त्विति भृशमभ्यर्थयते--

---

श्रीकृष्णदासात्मज–क्षेमराजः "श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालयाध्यक्षः, मुंबई–स्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धन्यवादाः ।

सन्तु किलानेकधा साभिवादं धन्यवादाः परमात्मपरब्रह्मणे श्रीमन्नारायणाय, येन च दयार्द्रचेतसा संसारार्णवनिमग्नानां, कामक्रोधाद्यतिक्रूरमकरादिभिर्भूयोभूयोभक्ष्यमाणान्तःकरणाङ्गानां, मोहादिबृहत्तरतरङ्गपरिचालनपरिक्लिश्यमानमानवानामुपकारकृते स्वाज्ञारूपाश्चत्वारो वेदाः प्रादुर्भावयामासिरे, यत एव च पुराणादीनामप्याविर्भाव इति ।

ततश्च--परश्शताः सन्तु धन्यवादा महर्षिप्रवराय परमदयोदयाय श्रीमद्वेदव्यासाय, येन च महात्मना कालकलोपनतबुद्धिह्रासालस्यादिभिर्वेदार्थज्ञानतद्बोधितकर्मानुष्ठानासमर्थशक्तीनामल्पीयःप्रयासैर्भवाब्धेरुत्तितीर्षूणामुपकृतये भगवदवतारादिसच्चरितसद्धर्मप्रपूरितानि मित्रवदुपदेशप्रचुरसत्कथागुम्फितान्यष्टादशमहापुराणानि भारतादीतिहासा अन्येऽपि बहवो ग्रन्था प्राणायिषतेति ।

अथ च--सन्त्वनन्तानन्ता धन्यवादाः श्रीकरुणावरुणालयाय परमपुरुषार्थसाधनसम्पन्नाय श्रीमत्परमहंसपरिव्राजकाचार्यश्रीधरस्वामिने, येन च सकलविद्वज्जनोपकारकश्रीमद्भागवतमहापुराणगूढार्थप्रकटनायाद्वैतसिद्धान्तानुकूला परमोत्तमा विज्ञजनमानसाह्लादकारिणी भावार्थदीपिकानाम्नी टीका व्यधायीति ।

अथ च--सन्त्वविश्रान्तमनेकशो धन्यवादा वेदशास्त्रपरिशीलनशालिशेमुषीकाय, परोपकारप्रचुरनिखिलव्यापाराय, श्रीमद्भगवल्लीलाचरितस्मरणापसारिताखिलसंसारप्रपञ्चाय पण्डितप्रवरश्रीवंशीधरशर्ममहाशयाय, येन च खलु 'श्रीमद्भागवताद्यपद्यव्याख्याशतक'--'श्रीमद्भागवतलीलाकल्पद्रुम'--न्यायसिद्धान्तमुक्तावलीटीका--'दीप्तिमाला'--'मातृकाविलास '--श्रीमद्भागवतसप्ताहकथावाचनोपयोगितट्टीका--'गोलार्थदीपिका'--'शीघ्रबोधटीका'--'चतुर्युगीयनृपचरिता ' द्यनेकग्रन्थनिर्माणेन विद्वज्जनतातीवोपकृता । सम्प्रत्यप्येतद्ग्रन्थनिर्मित्या तथोपाकारि सा, यथैतद्ग्रहणेनैव श्रीमद्भागवतगूढार्थनिश्चयाय नान्यटीकाग्रन्थापेक्षावशिष्यत इति ।

अथ च--सन्तु परस्सहस्रास्ससम्मदं धन्यवादास्तस्मै गोब्राह्मणपरिपालनपरायणाय, सौशील्यौदार्याद्यनेकसद्गुणार्जितयशोधवलीकृतदिङ्मण्डलाय श्रीमन्नृपतिकुलतिलकश्रीहीरासिंहबहादुरमहोदयाय, येन च विश्वजनीनकर्मानुष्ठानप्रसक्तचेतसा ह्येतद्ग्रन्थकर्तृमहात्मने द्रव्यादिप्रदानादिविविधसत्कारकरणैतद्ग्रन्थप्रकाशनप्रोत्साहनोत्तमाश्रयप्रदानादिभिर्महत्तरा कीर्तिरुपलब्धेति किमनल्पजल्पेनेति शम् ।

श्रीमतामनन्तानन्तोपकारस्मर्ता--श्रीकृष्णदासात्मज--क्षेमराजः, "श्रीवेंकटेश्वर" स्टीम्--मुद्रणालयाध्यक्षः--मुम्बई--स्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धन्यवादः ।

सन्तु चाविश्रान्तमनेकशो धन्यवादाः श्रीमद्भगवते तस्मै श्रीवेङ्कटेश्वराय, यस्य च परमानुकम्पाकटाक्षतोऽस्मदीयसूचीपत्रसूचितेषु नानाविषयकनानाग्रन्थेषु मुद्रितेष्वपि परमोत्कण्ठतया चिराय मुद्रयितुमुपक्रान्तानां १०००० स्नात्मक[1]ब्राह्ममहापुराण,–५५००० स्नात्मक[2]पाद्ममहापुराण,–२३००० स्नात्मक[3]वैष्णवमहापुराण,–२४००० स्नात्मक[4]शैवमहापुराण,–(२४००० स्नात्मकवायवीयमहापुराण,–) १८००० स्नात्मक[5]श्रीमद्भागवतमहापुराण,–२५००० स्नात्मक[6]नारदीयमहापुराण,–९००० स्नात्मक[7]मार्कंडेयमहापुराण,– १५४०० स्नात्मक[8]आग्नेयमहापुराण,--१४५०० स्नात्मक[9]भविष्यमहापुराण,--१८००० स्नात्मक[10]ब्रह्मवैवर्त्तमहापुराण,--११००० स्नात्मक[11]लैंगमहापुराण,--२४००० स्नात्मक[12]वाराहमहापुराण,--८११०० स्नात्मक[13]स्कान्दमहापुराण,–१०००० स्नात्मक[14]वामनमहापुराण,–१७००० स्नात्मक[15]कौर्ममहापुराण,–१४००० स्नात्मक[16]मात्स्यमहापुराण,–१९००० स्नात्मक[17]गारुडमहापुराण,–१२००० स्नात्मक[18]ब्रह्माण्डमहापुराणानामष्टादशानामपि मुद्रणपरिपूर्त्त्यां सम्प्रति महानेवानन्दः समजनीति ।

श्रीमद्भगवतः परमानुग्रहस्मर्त्ता--श्रीकृष्णदासात्मज-क्षेमराजः " श्रीवेंकटेश्वर " स्टीम्-मुद्रणालयाध्यक्षः, मुम्बई-स्थः, ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीमद्भागवतकथाश्रवणपद्धतिः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ अथ श्रीमद्भागवतकथाश्रवणपद्धतिः प्रारभ्यते ॥ धर्मार्थकाममोक्षाणां सुगमोपायं जिज्ञासुरुद्धवः कदाचिद्बृहस्पतिम्पप्रच्छ—गुरो ! मन्दमत्यल्पायुषां नृणां कलौ चतुर्वर्गफलदं ह्यनायाससाध्यं किं ? तत्कृपया वदेति । तदेत्थमुद्धवेन प्रार्थितो बृहस्पतिः श्रीमद्भागवतश्रवणादि तदुत्तरत्वेनोक्तवान् । उक्तञ्च—" धर्मार्थकाम मोक्षेषु यद्यदिच्छेत्तु मानवः । तत्तत्सर्वमवाप्नोति श्रीभागवतसेवनात् ॥ " इति । किञ्च—" श्लोकं वा श्लोकमर्द्धं वा नित्यं भागवतोद्भवम् ॥ यः शृणोति पठेद्वापि सोऽश्वमेध फलं लभेत ॥ " इति, " वक्तुः कीर्तिः श्रियो लाभस्तथा श्रोतृगणस्य च । श्रीमद्भागवतेनेह फलं किंकिं न जायते ॥ " इति, " विद्याप्रकाशो विप्राणां राज्ञां शत्रुजयो विशाम् । धनं स्वास्थ्यञ्च शूद्राणां श्रीमद्भागवताद्भवेत् ॥ योषितामपरेषाञ्च सर्ववाञ्छितपूरणम् । " इति, " ऋते कृष्णप्रकाशन्तु स्वात्मबोधो न जायते । तत्प्रकाशस्तु जीवानां श्रीमद्भागवताद्भवेत् ॥ " इति क्रमेण श्लोकैरेतैश्चतुर्वर्गफलदत्वं सूचितमस्येति स्कांदादौ श्रूयते । सेवनमप्यस्य—"राजसं सात्त्विकं वापि तामसं निर्गुणन्तथा । चतुर्विधन्तु विज्ञेयं श्रीभागवतसेवनम् ॥ " इति तत्रैवोक्तम् । " सप्ताहं राजसं प्रोक्तं शोभित्वाद्बहुपूजनैः । मासर्तुना वा विंशाहैरेकाढ्यैः सात्त्विकं शुभम् ॥ समस्तानन्दहेतुत्वाद्थ तामसमुच्यते । वर्षेण तामसं प्रोक्तमालस्यात्स्मृतिरोधकृत् ॥ निर्गुणं तु यथेच्छं स्यात्कलौ सप्ताहकं वरम् ॥ " इत्युक्तेरवश्यं तच्छ्रवणादि कार्य्यम् । श्रवणञ्च धनसाध्यम् । सत्येकस्मिन्नसमर्थे बहुभिर्मिलित्वा कार्य्यम् " बहूनामपि श्रोतृणां प्रेत्य तुल्यं फलं भवेत् " इत्युक्तेः । श्रवणारम्भस्तु सुमुहूर्ते कार्य्यः । तन्मुहूर्तं तु—" धर्मक्रियामुहूर्ते च श्रोतृवक्त्रोर्विधोर्बले । विद्यारम्भमुहूर्ते वा गाथारंभः प्रकीर्तितः॥ "इति मुहूर्तविवेकोक्तेर्ज्ञेयम्। आद्यं तु—"धर्मक्रिया मित्रमृगांत्यचित्राश्रुतित्रये स्वात्यदितौ कराश्वे । पुष्ये च सौम्येषु दिनेषु शस्तेत्याहुर्मुहूर्त्तागमकोविदेन्द्राः ॥ " इति मञ्जर्य्याम् । द्वितीयन्तु—" मृगात्कराच्छ्रुतेस्त्रयेऽश्विमूलपूर्विकात्रये गुरुद्वयेऽर्कजीवविसितेऽह्नि षट्शरत्रिके । शिवार्कदिग्द्विके तिथौ ध्रुवांत्यमित्रभे परैः शुभैरधीतिरुत्तमा त्रिकोणकेन्द्रगैः स्मृता ॥ " इति मुहूर्तचिंतामणौ । एतदुक्तमुहूर्तदिवसे । यद्वा—" हस्तादिपञ्चके पुष्ये रेवतीद्वितये मृगे । श्रुतित्रये शुभारम्भो धर्मशास्त्रपुराणयोः ॥ " इति गणपत्युक्तमुहूर्ते गुर्वादित्यमलिम्लुचाब्जेज्यभार्गवास्तविष्ट्यादिदोषरहितेऽवनिजागरणयुते यथोदितकालकृतचराभ्युदयिके वक्तृश्रोतृविधुबलाढ्ये पापेक्षणयुतिविधुरे शुभयुतदृष्टे शीर्षोदयादिलग्ने च धनायस्थशुभे पूर्वकृतसंवित्स्वहितैषिजनैः संभूय गीतवाद्यादिमहोत्सवपूर्वकं छत्रचामरोपशोभितं कौशेयाद्यम्बराच्छादितं शिबिकादिषु स्थापितं स्वशिरसि वा; श्रीकृष्णाराधनतत्परसौशील्यगाम्भीर्य्यानसूयादिगुणाढ्यपरानिंदादिदोषरहितसुकुलीनज्ञातवासाचारपित्रादिसर्वशास्त्रकुशलदृष्टांतप्रदर्शनपूर्वकश्रोतृबोधनदक्षयथाविधिनिजकुटुम्बपालनपरविप्रोत्तमवक्तृसहितं श्रीमद्भगवद्रूपं श्रीभागवतपुस्तकं नद्युपकण्ठोपवनदेवागारनिजागारादिरूपे गाथास्थले सुधाधवलद्रव्योपलिप्तभित्तिके नीलीरागरहितवस्त्रोल्लोचाच्छादितोपरिभूमिके गोमयगौरमृत्सोपलिप्ताधस्थले निःसारितानुपयोगिपदार्थेऽनीलवस्त्रतृणोर्णापरिष्कृतभूमिके पश्चिमदक्षिणदिक्कृतयजमानषोडशहस्तमितमण्डपान्तर्गतकदलीस्तंभहारिद्वर्णत्वक्सारनिर्मितमंगलसूत्रग्रथिताम्रपत्रतोरणपताकाखजूं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवस्त्रचंद्रोदयाच्छादितमनोज्ञयथोक्तवेदीयुते गाथापीठादन्यस्मिन्शिंशपावरुणादिशुभदारुनिर्मितेऽश्वत्थपालाशाऽनिर्मिते पीठे समानीय स्थापयेत् । ततः शुक्लांबरधरः कृतनित्यक्रियाभ्युदयिको यजमानो ब्रह्मादिसहितगणेशनवग्रहषोडशमातृसप्तचिरजीविकलशार्चनपूर्वकनरनारायणगुरुवायुसरस्वतीशेषकुमारसांख्यायनपराशरबृहस्पतिमैत्रेयोद्धवानर्चयेत् । नारदं च पृथक्पीठे सुवस्त्राच्छादितेऽर्चयेत् । ततः पीठं पुस्तकं वक्तारं च यथालब्धोपचारैरर्चयेत् । गाथानिर्विघ्नताप्तये गणेशस्तवादिजपगायत्रीद्वादशाक्षरजपकरणार्थं सप्त पञ्च त्रीनेकं वा यथाशक्ति ब्राह्मणान्वृणुयात् । स्थंडिले यथोक्तरूपान् ग्रहादीन् स्थापयेत्।पैत्तलादिनिर्मितस्थालादौ शुभाक्षतपुंजरूपान्वा स्थापयेत् । ततः संकल्पार्थं कुशत्रयजलादिताम्रादिपात्रेण हस्तेन वाऽऽदाय ॐतत्सदद्य श्रीमहाभगवतो विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे जंबूद्वीपे भारतखंडे आर्यावर्ते विष्णुप्रजापतिक्षेत्रे वैवस्वतमनुभोग्यैकसप्ततियुगचतुष्टयांतर्गताष्टाविंशतितमकलिप्रथमचरणे बौद्धावतारेऽमुकवत्सरायनर्तावमुकराशिस्थितरवावमुकमास्यमुकपक्षेऽमुकवासरनक्षत्रमुहूर्तकरणादियुतावमुकतिथावमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहमतीतानेकजन्मसञ्चिताखिलदुष्कृतनिवृत्तिपुरस्सरैहिकाध्यात्मादित्रिविधतापकायिकादित्रिविधपापापनोदार्थं दशाश्वमेधयज्ञजन्यपुण्यसम्यगिष्टराजसूययज्ञसहस्रपुण्यसमपुण्यचंद्रसूर्यग्रहणकालिकबहुब्राह्मणसंप्रदानकसर्वसस्यपूर्णसर्वरत्नोपशोभितमहीदानपुण्यप्राप्तये एतत्पुस्तकावस्थिताक्षरसंख्यवर्षसहस्रावच्छिन्नस्वर्गाधिकरणकवासतदुत्तरैतत्पुस्तकावस्थिताक्षरपंक्तिसमसंख्यकुलजनरकोद्धरणपूर्वकस्वर्गमनतदुत्तरैतत्पुस्तकपत्रसमसंख्ययुगसहस्रावच्छिन्नकुलसहितात्मीयस्वर्गाधिकरणकवासतदुत्तरैतत्पुस्तकावस्थिताध्यायसमसंख्यकल्पवैकुंठैश्वर्यानुभवपुरस्सरैतत्पुस्तकस्कंधसमकल्पकोटिगोलोकवासकामोऽमुकगोत्रामुकप्रवरामुकशर्म ब्राह्मणवदनारविंदाच्छ्रीकृष्णवाङ्मयमूर्तीभूतं श्रीमद्भागवतमष्टादशपुराणप्रकृतिभूतं श्रीगोविंदप्रीत्याविर्भावकामोऽनेकश्रोतृश्रावणपूर्वकं यथासंभवदिनाद्यैः श्रोष्यामि, इति।संततीच्छया श्रवणे तु—अतीतानंतजन्मसंपादितदुष्कृतपरिपाकवशप्राप्तजन्मांगक्रूरग्रहसूचितपत्नीबंध्यात्वकाकबंध्यात्वमृतवत्सात्वस्रवद्गर्भत्वादिरूपसंततिप्रतिबंधकदोषनिवृत्तिकाम इति पाठ्यम् । पूर्वजसंबंध्यादिसद्गतीच्छया तु—स्वीयानंतदुष्कृतपरिपाकवशाप्तनानाविधदुःखक्षेत्रयोनीनां पितृणामन्यस्य वा कस्यचित्प्रेतत्वनिवृत्तिपूर्वकस्वर्गादिलोकप्राप्तिकाम इति वाच्यम् । रोगनिवृत्त्यर्थं तु—प्राग्जन्मकृतब्रह्महत्यादिपातकोपलब्धराजयक्ष्मादिरोगनिवृत्त्यर्थमिति पठेत्।ग्रहाद्यरिष्टत्वे तु—जन्मपत्राद्यनुरोधेन वर्षमासदिनविचारवशेन दशाविदशोपदशासु विषमस्थानस्थग्रहजन्यदुष्टफलदूरीकरणपूर्वकशुभस्थानस्थग्रहजन्यसत्फलावाप्तिकाम इति पठेत् । राजा तु—राज्याश्वगोशालादिसमृद्धिपुरस्सरमुद्गगोधूमव्रीहियवचणकाद्यन्नस्वर्णरूप्यमणिमुक्तादिरत्नाढ्यकोशसमृद्धिपूर्वकषड्गुणसप्तप्रकृतित्रिशक्तिसंयुतात्मनः कल्याणार्थं शत्रुजयलब्धातीवयशोधाराप्रजापालनाद्यनेकगुणावाप्त्यर्थं चेति पठेत् । ततः"—ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ १ ॥ पयः पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम ॥ २ ॥ विष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि ॥ वैष्णवमसि विष्णवे त्वा ॥ ३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥
॥ ४ ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव
शान्तिः सा मा शान्तिरेधि ॥ ५ ॥ विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ६ ॥ इमा रुद्राय तवसे कप
र्द्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ यथाशमसद्द्विपदे चतुष्पदे विश्वम्पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ७ ॥ एतन्ते देव सवितर्यज्ञम्प्राहुर्बृहस्पतये ब्रह्मणे ॥ तेन यज्ञमव तेन
यज्ञपतिं तेन मामव ॥ ८ ॥ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु ॥ विश्वेदेवास इह मादयन्तामो३म्प्रतिष्ठ ॥ ९ ॥ एष वै
प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजंते सर्वमेव प्रतिष्ठितम्भवति ॥ १० ॥ ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपति
ꣳ हवामहे वसो मम ॥ आहमजानि गर्भधमात्वमजासि गर्भधम् ॥ ११ ॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमोनमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमोनमो गृत्सेभ्यो
गृत्सपतिभ्यश्च वो नमोनमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमोनमः ॥ १२ ॥ "। इति स्वस्तिवाचनं कृत्वा तत ॐ भूर्भुवः स्वः भो गणपते इहागच्छ इह तिष्ठ मम
पूजां गृहाणेत्यावाह्य ॐ पाद्यार्घ्याचमनीयस्नानपुनराचमनीयानि समर्पयामि ॐ श्रीगणपतये नमः । इदमनुलेपनम्, इमानक्षतान्, इमानि पुष्पाणि, इदं दूर्वांकुरम्, इदं कौसुं
भसूत्रं वस्त्रार्थं, भूषणार्थं दक्षिणाद्रव्यश्च समर्पयामि ॐ श्रीगणपतये नमः । ततः प्रार्थयेत्—"ॐ लम्बोदरं परमसुंदरमेकदन्तं रक्ताम्बरं त्रिनयनं परमं पवित्रम् । उद्यद्दिवा
करकरोज्ज्वलकायकान्तं विघ्नेश्वरं सकलविघ्नहरन्नमामि ॥ त्वां देव विघ्नदलनेति च सुंदरेति भक्तप्रियेति सुखदेति फलप्रदेति । विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो
गणेश वरदो भव नित्यमेव॥"इति । तत ॐ भूर्भुवः स्वः भो ब्रह्मविष्णुशिवसहितसूर्यादिनवग्रहा इहागच्छतेहतिष्ठत मम पूजां गृह्णीत । पाद्यादीनि पूर्ववत् । ॐ ब्रह्मणे नमः ।
ॐ विष्णवे नमः । ॐ शिवाय नमः । ॐ सूर्य्याय नमः । ॐ चंद्रमसे नमः । ॐ भौमाय नमः । ॐ बुधाय० । ॐ बृहस्पतये० । ॐ भार्गवाय० । ॐ शनैश्चराय० ।
ॐ राहवे० । ॐ केतवे नमः, इति सर्वान्संपूज्य प्रार्थयेत्—" ॐ ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शांति
करा भवंतु ॥"। ततः—भो गौर्यादिषोडशमातर इहागच्छत मम पूजां गृह्णीतेत्यावाह्य पाद्यादिभिरर्चयेत् । ॐ गौर्य्यै नमः । ॐ पद्मायै नमः । ॐ शच्यै नमः । ॐ मेधायै
नमः । ॐ सावित्र्यै नमः । ॐ विजयायै नमः । ॐ जयायै० । ॐ देवसेनायै० । ॐ स्वधायै० । ॐ स्वाहायै० । ॐ मातृभ्यो नमः । ॐ लोकमातृभ्यो नमः ।
ॐ धृत्यै० । ॐ पुष्ट्यै० । ओमात्मकुलदेवतायै नमः । ततः--"गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः
पुष्टिस्तथा तुष्टिस्तथात्मकुलदेवतां । इत्येता मातरः सर्वा वृद्धिं कुर्वन्तु मे सदा ॥" इति प्रार्थयेत् । ततो भो अश्वत्थामादिसप्तचिरजीविन इहागत्य मम पूजां गृह्णीतेत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाह्यार्चयेत् । ॐ अश्वस्थाम्ने नमः । ॐ बलये० । ॐ व्यासाय० । ॐ हनुमते नमः । ॐ विभीषणाय० । ॐ मार्कण्डेयाय० । ॐ परशुरामाय० ॥ " ॐ—अश्वत्थामा बलिर्व्यासो हनूमाँश्च विभीषणः । मार्कण्डेयः पर्शुरामः सप्तैते चिरजीविनः॥ यजमानगृहे नित्यं सुखदाः सिद्धिदाः सदा ।" इति प्रार्थयेत ॥ अथ कलशस्थापनार्थे भूमिप्रार्थना—"ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्रीं पृथिवीं यच्छ पृथिवीं माहिठ्ठंसीः"। ततो भूस्पर्शः—"ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥" । ततोऽष्टदलं कुंकुमाद्यैः कृत्वा—"ॐ धान्यमसि धिनुहि देवान्प्राणायत्वोदानायत्वा व्यानायत्वा दीर्घामनुप्रसितिमायुषेधां देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वच्छिद्रेण पाणिना । चक्षुषे त्वामहीनां पयोसि" इति धान्यादिस्थापनम्।ततः—"आजिघ्र कलशं मह्या त्वा विशंत्विंदवः।पुनरूर्जानिवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारापयस्वती पुनर्माविशताद्रयिः" इति कलशं धान्योपरि स्थापयेत् । ततः "ॐ—वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद"इति शुद्धोदकेन कलशं पूरयेत्।ततः—"ॐ स्थिरो भववीड्वंग आशुर्भव वाज्यर्वन्पृथुर्भव सुखदस्त्वमग्नेः पुरीषमाहण"इति कलशं दृढीकुर्यात्। ततः पूर्वे—"ओमग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।होतारं रत्नधातमम्॥"इति मंत्रेणर्ग्वेदमावाह्यार्चयेत्।ततो दक्षिणे यजुर्वेदम्—"—ॐइषेत्वोर्ज्जेत्वा वायवस्थदेवो वः सविता प्रार्थयतु श्रेष्ठतमाय कर्मणे आप्यायध्वमघ्न्या इंद्राय भागं प्रजापतिरनमीवा अयक्ष्मामावस्तेन ईशतमाघशठ्ठं सो ध्रुवा अस्मिन गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि"। पश्चिमे सामवेदम्—"ॐमग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सदसि बर्हिषि" । उत्तरेऽथर्वणम्—" ॐ शन्नो देवीरभीष्टय आपो भवंतु पीतये । शंय्योरभिस्रवंतु नः" इति । पञ्चकलशपक्षे तु पृथक्पृथक्, कलशैकपक्षे त्वेकस्मिन्नेव चतुर्दिक्षु वेदानर्चयेत् । ततश्चूताश्वत्थन्यग्रोधोदुंबरप्लक्षाणां पल्लवान " ॐ अश्वत्थेवो निषदनं पर्णे वो वसतिः कृत्तागोभाज इत्किलासथ यत्सनवथ पुरुषम्" इति मंत्रेण क्षिपेत्। ततः—"ॐ काण्डात्काण्डात्प्ररोहंती परुषः परुषस्परि।एवानो दूर्वे प्रतनु सहस्रेण शतेन च॥" इति दूर्वाम् । ततः—"पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥" इति कुशम् । ततः-"ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चत्वठ्ठंहसः ॥" इति पूगफलम् । ततः—"ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधारपृथिवीं द्यामुतेमां कास्मै देवाय हविषा विधेम॥" इति स्वर्णम्।ततः--"ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्।दधद्रत्नानि दाशुषे॥" इति पंचरत्नम् । तच्च-"कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् । पञ्चरत्नमिदं प्रोक्तमभावे हेम निक्षिपेत्॥"। ततः—ॐ या ओषधीः पूर्वजाता देवेभ्यस्त्रियुगं पुरामनैनु बभ्रूणामहठ्ठं शतं धामानि सप्त च॥"इति सर्वौषधीः।ताश्च—"कुष्टं मांसी हरिद्रे द्वे मुरा शैलेयचंदनम् । वचा चंपकमुस्ताश्च सर्वौषध्यो दश स्मृताः॥सर्वाभावे हरिद्रां च कलशे निक्षिपेत्सुधीः।" इति । ततः—"गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥"इति गंधम् । ततः—"ॐ अक्षन्नमीमदंतह्यवप्रिया अधूषत। अस्तोषत स्वभानवो विप्रानविष्टयामती । योजान्विंद्रते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिः ॥ "इत्यक्षतान् । ततः—"श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण।"इति पुष्पाणि ततः— "ॐ धूरसि धूर्वधूर्वंतं धूर्वन्तं योस्मान्धूर्वति तं धूर्वं यं वयं धूर्वामः । देवानामसि वह्नितम ᳵ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥". इति धूपम् । ततः—ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्य्यो वर्चो ज्योतिर्वर्चः स्वाहा ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा।"इति दीपम् । ततस्तीर्थोदकम्—"ॐ पंच नद्यः सरस्वतीमपियंति सस्रोतसः । सरस्वती तु पंचधासो देशे भवत्सरित् ॥" । ततो नदीसंगमोदकम्—"ॐउपह्वरे गिरीणाᳯसंगमे च नदीनां धियाविप्रोऽजायत"। ततः समुद्रोदकम्—"समुद्राय त्वा वाताय स्वाहा सरिदाय त्वा वाताय स्वाहा अनाधृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय स्वाहा अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा"। ततः सप्तमृदः—"ॐ स्योना पृथिवि नो भवान्नृक्षरानिवेशिनि । यच्छानः शर्म सप्रथाः"। ताश्च—"अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद् ध्रदात् । राजद्वाराद्गोकुलाच्च मृदमानीय निक्षिपेत् ॥" । ततो वस्त्रेणाच्छादनम्—"ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेणशतधातरेण सुप्वा कामधुक्ष्व ॥" । ततः—ॐ पूर्णादर्विपरापत सुपूर्णा पुनरापत । वस्नेहविक्रीणावहाइषमूर्ज्जᳯ शतक्रतो ॥"इति मंत्रेण तण्डुलपूरितपात्रं कलशोपरि न्यसेत् । "कुंभोपरि न्यसेत्पात्रं कांस्यमृद्वेणुताम्रजम् । पूर्णं शुभ्रैस्तण्डुलैश्च ततः श्रीफलमाधरेत् ॥"इत्युक्तेः । ततः—"श्रीश्च ते" इति मंत्रेण श्रीफलं स्थापयेत् । ततोक्षतैः—"मनोजूतिः"इत्यारभ्य"प्रतिष्ठितं भवतु"इत्यन्तमंत्रेण प्रतिष्ठां कुर्यात । ततः कलशे तीर्थावाहनम्—"सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ॥ गायत्री चैव सावित्री शांतिः पुष्टिकरी तथा । पृथिव्यां यानि तीर्थानि कलशे संतु तानि वै ॥" । ततो गंधाद्यैः कलशं संपूज्य प्रार्थयेत्—"देवदानवसंवादे मथ्यमाने जलार्णवे । उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठंति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ ब्राह्मणैर्निर्मितस्त्वं हि मंत्रैरेवामृतोद्भवैः । प्रार्थयामि च कुम्भ त्वां वाञ्छितार्थं ददस्व मे ॥ पुरा हि सृष्टश्च पितामहेन महोत्सवानां प्रथमो वरिष्ठः । दूर्वाग्रसाश्वत्थसुपल्लवैर्युक्रोतु शांतिं कलशः सवासाः ॥" इति । ततः कलशे—"गणानां त्वा" इति मंत्रेण गणेशम्, "तत्त्वायामि"इति मंत्रेण वरुणं चावाह्यार्चयेत् षोडशोपचारैः । "ॐ तत्त्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहबोध्युरुशᳯसमान आयुः प्रमोषीः ॥"। षोडशोपचाराश्च—पाद्यार्घ्याचमनीयस्नानगंधाक्षतपुष्पधूपदीपनैवेद्यतांबूलवस्त्रोपवीतदक्षिणाप्रदक्षिणापुष्पांजलयः । ततः कलशोपरि पञ्चपलमितां तन्न्यूनां वा सौवर्णीं लक्ष्मीनारायणप्रतिमां सुवर्णपट्टोपरि कुंकुमादिलिखितस्वरूपां संस्थाप्य पुरुषसूक्तेन 'विष्णोरराट' इति मंत्रेण च षोडशोपचारैरर्चयेत् । "ब्रह्मसत्रं करिष्यामि तवानुग्रहतो विभो । तन्निर्विघ्नं भवेद्देव रमानाथ क्षमस्व मे ॥" इति प्रार्थयेत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

“सौवर्णी देवप्रतिमा पलपंचकृतोत्तमा।तदर्द्धा मध्यमा ज्ञेया कनिष्ठा तु तदर्द्धतः॥स्वर्णस्वर्णमिता वापि कर्तव्या वा स्वशक्तितः। दशमाषैः पलं ज्ञेयं सुवर्णं त्वथ षोडशैः॥” इति संहितोक्तेः।ततो नरनारायणावावाह्यार्चयेत् ‘नरनारायणाभ्यान्नमः’ इति मंत्रेण । ततः “यो मायया विरचितं निजमात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय। एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ॥ सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान्‌ सत्त्वेन नः सुरगणाननुमेयतत्त्वः । दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदम्॥”इति प्रार्थयेत्।ततो वक्तृश्रोतृजनसर्पविकारापनुत्यर्थं वायुमावाह्यार्चयेत्‘ॐ वायवे सर्वकल्याणकर्त्रे नमः’ इति मंत्रेण। ततः“अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः । अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम्॥” इति प्रार्थयेत् । ततो गुरुमर्चयित्वा प्रार्थयेत् । “ब्रह्मस्थानसरोजमध्यविलसच्छीतांशुपीठस्थितं स्फूर्ज्जत्सूर्यरुचिं वराभयकरं कर्पूरकुंदोज्ज्वलम् । श्वेतस्रग्वसनानुलेपनयुतं विद्युत्प्रभाकांतया संश्लिष्टार्द्धतनुं प्रसन्नवदनं वंदे गुरुं सादरम् ॥ ” ततः । सरस्वतीं श्वेतपुष्पाद्यैरर्चयित्वा “ ॐ—या कुन्देन्दुतुषारहारधवला या श्वेतवस्त्रावृता या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना । या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥” इति प्रार्थयेत् । ततः शेषं सनत्कुमारं सांख्यायनं पराशरं बृहस्पतिं मैत्रेयमुद्धवं षट् पौराणिकांश्च त्रय्यारुणिकादीनभ्यर्च्य प्रार्थयेत्—“शेषः सनत्कुमारश्च सांख्यायनपराशरौ।बृहस्पतिश्च मैत्रेय उद्धवश्चात्र कर्मणि॥प्रत्यूहवृंदं सततं हरंतां पूजिता मया ।”इति।“त्रय्यारुणिः कश्यपश्च रामशिष्योऽकृतव्रणः । वैशंपायनहारीतौ षड् वै पौराणिका इमे॥सुखदाः संतु मे नित्यमनया पूजयार्चिताः।” इति । ततो व्यासमावाह्यार्चयेत्। “नमस्तस्मै भगवते व्यासायामिततेजसे । यत्पुण्यज्ञानमयं सौम्या यन्मुखांबुरुहासवम् ॥ ” इति प्रार्थयेत् । ततः सप्ताहयज्ञोपदेष्टारं सूर्य्यं संस्थाप्याऽसप्तदिनपर्य्यन्तमर्चयेत् । “ लोकेश त्वं जगच्चक्षुः सत्कर्म तव भाषितम् । करोमि तच्च निर्विघ्नं पूर्णमस्तु त्वदर्चनात् ॥ ” इति संप्रार्थ्य नारदपीठं पुस्तकपीठं च युगपदेव पूजयेत् । पीठौ प्रक्षाल्याष्टदलं कमलं तदुपरि चंदनादिना कृत्वा—ओमाधारशक्त्ये नमः । ॐ मूलप्रकृतये नमः । ॐ क्षीरसमुद्राय नमः । ॐ श्वेतद्वीपाय०। ॐ कल्पवृक्षाय० । ॐ रत्नमंडपाय० । ॐ रत्नसिंहासनाय० । चतुर्दिक्षु च—धर्माय० । ज्ञानाय० । वैराग्याय० ऐश्वर्याय०।मध्ये—अनंताय०।महापद्माय०।आनंदमयकंदाय० संविन्नालाय।प्रकृतिमयपत्रेभ्यः०।विकृतिमयकेसरेभ्यः०।पंचाशद्वर्णबीजभूषितायै०।ॐ कर्णिकायै०।ॐ अं अर्कमंडलाय०। ॐ सं सोममंडलाय०। मं वह्निमंडलाय०। सं प्रबोधात्मने सत्त्वाय०। रं रजसे०। तं तमसे नमः। ततः क्रमेण विमलायै० । उत्कर्षिण्यै०। ज्ञानायै०। क्रियायै०। योगाय०। प्रह्व्यै० । सत्यायै० । ईशानायै० । मध्येऽनुग्रहायै० । ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय पद्मपीठात्मने नमः। ततः सुवस्त्रवेष्टितं श्रीमद्भागवतपुस्तकमादाय“ॐ—ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासा पर्वता इमे । ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामसि ॥” इति पीठोपरि स्थापयेद्यजमानः।“मनोजूतिः” इति मंत्रेणावाहनीस्थापिनीसंनिधापिनीसंरोधिनीसंमुखप्रार्थनाचक्रगरुडधेन्वाख्या नव मुद्राः संप्रदर्श्य पुरुषसूक्तेन षोडशोपचारैः, श्रीकृष्णमंत्रेण ‘ नमोऽस्त्वनंताय—’ इत्यनेन वा पुस्तकं पूज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत् । ततो नारदं श्वेतवस्त्राच्छादितपीठोपरि संपूजयेत् । ‘ ॐ सुरर्षिवरनारदाय नमः ’ इति मंत्रेणाभ्यर्च्य प्रार्थयेत्–“ नमस्तुभ्यं भगवते ज्ञानवैराग्यशालिने । नारदाय सर्व लोकपूजिताय सुरर्षये ॥ ” इति । ततो यजमानः पुष्पचन्दनतांबूलवस्त्रदक्षिणापूगफलडोरकान्यादाय–ॐ अद्यामुकगोत्रममुकप्रवरममुकशर्माणं ब्राह्मणमेभिर्वरणद्रव्यैः सर्वेष्टदश्रीमद्भागवतवक्तृत्वेन त्वामहं वृणे । वृतोऽस्मीति वक्ता वदेत् । पुनस्तथैव तान्यादाय--अमुकगोत्रानमुकप्रवरानमुकशर्मणो यथासंख्याकान् ब्राह्मणानेभिर्वरणद्रव्यैर्गाथा विघ्नापनोदार्थं गणेशगायत्रीवासुदेवमंत्रजपकर्तृत्वेन वो विभज्य वृणे । वृताः स्म इति जपितारो ब्रूयुः । ततः प्रथमं वक्तृकरे वरणद्रव्यमध्यतो डोरकमादाय बध्नीयात् । वक्ता च “ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ” इति पठेत् । एवं पृथक्पृथग्जपकर्तृकरेषु रक्षां बद्ध्वाः “ पूर्वे नारायणः पातु वारिजाक्षश्च दक्षिणे । पश्चिमे पातु गोविंद उत्तरे मधुसूदनः ॥ ऐशान्यां वामनः पातु चाग्नेय्यां च जनार्दनः । नैर्ऋत्यां पद्मनाभश्च वायव्यां माधवस्तथा ॥ ऊर्ध्वं गोवर्द्धनधरो ह्यधस्ताच्च त्रिविक्रमः । रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षतां हरिः ॥ ” इति पीताक्षतान्विकिरेत् । ततो यजमानकरे “ येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥ ” इति रक्षां बद्ध्वा “ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । तिलकं ते प्रयच्छंतु धर्मकामार्थ सिद्धये ॥ ” इति मंत्रेण तिलकं कुर्यात् । ततो वक्ता द्विजवृद्धाज्ञया विश्रान्तत्वा गुरुपदं ध्यात्वा ‘ ॐ व्यासासनाय नमः ’ इति मंत्रेण गंधाद्यर्चितासनोपरि उपविश्य गणेशनारदादीन्मनसा गंधाद्यैर्वार्चयेत् । ततो गंधपुष्पतुलसीदलदक्षिणाद्यैः पुनः पुस्तकमभ्यर्च्य ‘ नमः पुराणपुरुषोत्तमाय ’ इति मंत्रेण । वक्तारं गंधपुष्पाद्यैः “ जयतु पराशरसूनुः सत्यवतीहृदयनंदनो व्यासः । यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥ ” इति मंत्रेणाभ्यर्च्य “ शुकरूप प्रबो धज्ञ सर्वशास्त्रविशारद । एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥ संसारसागरे मग्ने दीनं मां करुणानिधे । कर्मग्राहगृहीतांगं मामुद्धर भवार्णवात् ॥ ” इति संप्रार्थ्य “ श्रीम द्भागवताख्यं त्वं प्रत्यक्षः कृष्ण एव हि । स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥ मनोरथो मदीयोयं सर्वथा सफलस्त्वया । निर्विघ्नेनैव कर्तव्यो दासोहं तव केशव ॥ ” इति मंत्राभ्यां श्रीफलं समर्पयेत् । ततो वृद्धेभ्यो गृहीताज्ञो नरनारायणादीन्संस्मृत्य पूर्वाभिमुख उदङ्मुखो वा “ श्रूयतां देवदेवेश नारायण जगत्पते । त्वदीयेनाभिधानेन कथयिष्ये शुभां कथाम् ॥ ” इति श्लोकञ्च पठित्वा वक्ता शनैःशनैर्गाथां कथयेत् । श्रोतारश्चैकवारं हविष्यान्नभुजः पतितदुर्जनाद्यालापसंगति मकुर्वाणाः स्वीकृतब्रह्मचर्या अधःशायिनः कथैकचित्ता वक्त्रभिमुखं यत्यादयो यथाधिकारमूर्द्धाधोभावेन पूर्वोपकल्पितसत्यादिलोकाख्यसप्तपंक्त्युपविष्टा अन्योन्यमभाषमाणाः शृणुयुः । सत्यादिकल्पना चेत्कथम्—वक्तुः संमुखं पंक्तिसप्तकं कार्यम् । तत्र प्रथमपंक्तिः सत्यलोकाख्या तस्यां संन्यासिन उपविशेयुः, द्वितीया तपो लोकाख्या तस्यां वानप्रस्थाः, तृतीया जनलोकाख्या तस्यां ब्रह्मचारिणः, चतुर्थी महर्लोकाख्या तस्यां ब्राह्मणाः, पञ्चमी स्वर्लोकाख्या तस्यां क्षत्रियाः, षष्ठी भुवर्लोका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्या तस्यां वैश्याः, सप्तमी भूर्लोकाख्या तस्यां शूद्राश्चोपविश्य शृणुयुः । स्त्रियश्च वामभागे उपविश्य शृणुयुः । अन्ये च ये गाथायां प्रवर्तमानायामागतास्ते दक्षिणपार्श्वे
स्थित्वा शृणुयुः । साधवो विरक्ताः संबंधिनो मित्रादयश्च पत्रिकाप्रेषणपूर्वकमाह्वेयाः । समागतानाञ्च तेषां यथाधिकारं सेवा कार्या । या च माहात्म्ये—"ऊर्द्ध्वं सप्तैव लोकाश्च
कल्पनीयाः प्रयत्नतः " इत्युक्तिस्तामाश्रित्य केचिन्नालिकेरैरुर्द्धाधोभागेन लोकसप्तकं कौसुंभसूत्ररचनया कुर्वंति तद्वरं न प्रतीयते, वक्तृत उच्चासने श्रोतुर्दोषश्रुतेः " समा
सनात्पुण्यहानिरुच्चाच्च निरयं व्रजेत् " इति पाद्मात् । किञ्च—अर्जुनाय गीतामुपदिशतः श्रीकृष्णादुच्चासनं ध्वजमधिष्ठितवता हनुमतापि श्रुता, श्रवणान्ते ध्वजादुत्तीर्य हनु
मानप्यर्जुन इव श्रीकृष्णं प्रणनामोवाच च–भगवन्नर्जुनवदहमपि भवच्छिष्योऽस्मि, मयाप्युपरिस्थेन श्रीमन्मुखाद्गीता श्रुतेति । तदाकर्ण्य हनुमते श्रीकृष्णो महदनुचितं कृत
वानसीत्युवाच, नं ह्ययं श्रोतृणां धर्मो यद्वक्तुरुच्चासने स्थित्वा श्रवणमित्यतस्त्वं पिशाचो भवेति तं श्रीकृष्णः शशाप । शापान्तस्तु पुनः प्रसादितश्रीकृष्णोक्त्या गीता
भाष्यकृतेर्जातः, भाष्यञ्च तत्पिशाचभाष्यनाम्ना प्रसिद्धमिति तत्रैव श्रूयते । किंच—प्रतिस्कंधसमाप्तौ गंधपुष्पनैवेद्यदक्षिणादिभिः पुस्तकमर्चयेत् । द्वादशघृतवर्तिभिर्नीरा
जनम् । " ॐ आरात्रिपार्थिव ७ रजः पितुरप्रापधामभिर्दिवः सदा ७ सिबृहतीव्यतिष्ठति अत्त्येषंविस्तृतं मम ":इति मंत्रेण कुर्यात् । शुकागमनप्रयाणश्रीकृष्णाविर्भाव
समये त्ववश्यं कुर्यात् । किञ्च—समाप्तिसमये देववस्त्रभूषामुद्रिकाद्यास्तु श्रीशुकगमनसमय एव समर्पयेत्, तत्रैव समाप्तत्वाच्छास्त्रस्य, 'कुर्यात्समाप्तिं शुकसंप्रयाणे' इति
संहितोक्तेः । स्कंधांते तु पुष्पाद्यैः पुनरर्चयेत् ; वक्तारं पुस्तकञ्च । यद्वा—सर्वं स्कंधांत एव कुर्यात् । देयसमर्पणमंत्रस्तु—" त्वदीयं वस्तु गोविंद तुभ्यमेव समर्पितम् । गृहाण
संमुखो भूत्वा प्रसीद परमेश्वर ॥" इति ॥ किञ्च—वक्तारं निकषा तत्तुल्यः कश्चिद्विद्वाञ्श्रोतृजनसंदेहापनोदनार्थमुपविशेत्, स चापि तथोत्तरं दद्याद्यथा गाथायां कोलाहलो
न भवेत् । सूर्योदयादारभ्य सार्द्धयामत्रयं मध्याह्ने मुहूर्तविरामपूर्वकं गाथां कुर्यात् । गाथामासाश्च—"चैत्रं पौषं च संत्यज्य शेषाः सप्ताहकर्मणि । शुभा मासा रुचिर्यद्वा
यत्र मासे प्रजायते ॥" इति संहितोक्तेः । पाद्मे मासोल्लेखस्तु कामनापरः—" एते मासाः कथारंभे श्रोतृणां मोक्षसूचकाः " इत्युपलक्षणीभूतमोक्षशब्देन कामश्रुतेः ।
" निष्कामस्तु सदा कुर्याच्छुभं कर्माखिलं नरः " इति स्मृतेश्च । किंच—प्रातरारम्भकाले कथोत्थाने च नीराजनं प्रत्यहं कुर्यात् , " कथारंभे कथोत्थाने नित्यं नीरा
जनं चरेत् " इति संहितोक्तेः । सायमुत्थानावसरे विविधमंगलगायनं जयध्वनिश्च कृत्वा प्रसादतुलसीपत्रादिकमादाय स्थानांतरे तत्रैव वा तिष्ठेयुः श्रोतारः । कथा
विश्रमस्त्वन्वहं यथोक्तस्थले एव कार्यः । तदुक्तं संहितायाम्—" मनुकर्दमसंवादपर्य्यंतं प्रथमेऽहनि । भारताख्यानपर्य्यंतं द्वितीयेऽहनि वाचयेत् ॥ तृतीये दिवसे कुर्यात्सप्त
मस्कंधपूरणम् । कृष्णाविर्भावपर्य्यंतं चतुर्थे दिवसे वदेत् ॥ रुक्मिण्युद्वाहपर्य्यंतं पचमेऽहनि शस्यते । श्रीहंसाख्यानपर्य्यंतं षष्ठेऽह्नि प्रवदेत्सुधीः ॥ सप्तमे तु दिने कुर्यात्पू
र्तिम्भागवतस्य वै । एवं निर्विघ्नतासिद्धिर्विपर्यय इतोऽन्यथा ॥ " इति । केचित्तु—" द्वैपायनं नमस्कृत्य शुकदेवं च भक्तितः । हिरण्याक्षवधं यावत्प्रथमेऽह्नि प्रकीर्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत् ॥ चरितं भरतस्याथ द्वीतीयेथ तृतीयके । समुद्रमथनं यावद्यत्र कूर्मः स्वयं हरिः ॥ चतुर्थे दशमे कृष्णजन्म यावत्प्रकीर्तयेत् । पंचमेऽह्निपठेद्विद्वान्रुक्मिण्या हरणावधि ॥ षष्ठे चोद्धवसंवादं सप्तमेऽह्नि समापयेत् ॥ अध्यायं पूर्य विरमेन्न तु मध्ये कदाचन । कृते विरामे मध्ये तु पठेच्च पुनरादितः॥ स्कंधस्याद्यंतपद्यं हि द्विस्त्रिरुच्चारयेत्ततः ” इति । सर्वसमाप्तौ विरक्तश्रोतॄन् गीतां श्रावयेत् । गृहस्थानां तु गृहे प्रतिश्लोकं दशमस्य जुहुयात्—पायसेन त्रिमधुरैर्वा तिलाद्यैर्वा । यद्वा—अष्टादशशताहुतीर्गायत्र्या जुहुयात्, तद्रूपत्वाद्भागवतस्य । होमाऽसंभवे हवनीयद्रव्यं तन्मूल्यं वा ब्राह्मणाय दद्यात् । सर्वच्छिद्रापनोदनार्थं विष्णुसहस्रनामस्तोत्रमंते जपेत् । “ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः । सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव ॥ ” इत्यष्टमे शुक्रोक्तेः । आभ्युदयिकं त्वेकविंशतिदिनपूर्वं कुर्यात् , “ एकविंशत्यहर्यज्ञे विवाहे दश वासराः । त्रिषट् चौलोपनयने नान्दीश्राद्धं विधीयते ॥ ” इति स्मृतिसारात् । किंच—“ पूर्वमभ्युदयश्राद्धेऽकृते मंगलकर्मणि । तत्कालमेव तत्कार्यं सर्वं संकल्परूपतः ॥ ”,“ आमेन च तथा हेम्ना दद्यादामं चतुर्गुणम् । अथ वा हेम तन्मूल्यं पुनः कर्म समारभेत् ॥ ” इत्यादिस्मृतिसारादावुक्तेः । ‘ सप्ताहयज्ञेन पुनंति सर्वे ’ इत्यादौ यज्ञत्वेनोल्लेखाद्देवगृहप्रतिष्ठादयोऽपि यागा एव । चौलोपनयनमिति सर्वसंस्कारोपलक्षणम् । किंच-ॐ तत्सदद्येति देशकालादीनुचार्य्यामुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं पूर्वाकृताभ्युदयिकजन्यदोषनिवृत्तिपुरस्सरं कृताभ्युदयिकसमफलावाप्तये इदं यथोद्दिष्टनानादेवताकनानाद्रव्ययुतमामान्नं सदक्षिणं तन्मूल्यमर्कदेवताकं हेम वान्यदमुकगोत्रायामुकशर्मणे एकस्मै बहुभ्यो वा विभज्य दातुमहमुत्सृजे, इति संकल्प्य श्राद्धं कुर्यात् । हविष्यान्नं तु हेमाद्रौ—“हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः । माषकोद्रवगौरादीन्सर्वाभावे विवर्जयेत् ॥” आग्नेये तु—व्रीहिषष्टिकमुद्गाश्च कलापाः सलिलं पयः । श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥ कूष्मांडालाबुवार्ताकपालक्यज्योत्स्निकास्त्यजेत् ।” इत्युक्तम् । धराशयनं तु—“प्रद्योतनात्पंचनगाङ्कसूर्यनवेन्दुषड्विंशति यानि भानि । शेते मही नैव गृहं विधेयं तडागवापीखननं न शस्तम् ॥” इति रत्नावल्यामुक्तम् । एतत्सर्वं प्रायः सप्ताहविषयमेव, तद्व्यतिरिक्तकथायां तु न वेदीकलशस्थापनहविष्यसेवनाद्याग्रहोऽस्ति । अन्यदा तु “मुहूर्तं द्विमुहूर्तं वा श्राव्या गाथाऽविषादिभिः” इति पुराणांतरात् । ‘विषादश्चेतसो भंगः’ इत्यमरः । शूद्रैस्तु ब्राह्मणं मुख्यं श्रोतारं प्रकल्प्य श्रोतव्यम् , “ श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः” इति स्कांदादित्यास्तां विस्तरः ॥ **अथ समाप्त्यनन्तरं होमप्रकारः** । स्नात्वाऽऽचम्य विष्णुं स्मृत्वा “अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यंतरः शुचिः ॥” इति कुशोदकेनात्मानं होमसाधनद्रव्यं च सिक्त्वा—ॐ तत्सदद्य कारितसर्वेष्टदश्रीभागवतगाथासांगतावाप्तये कर्तव्यदशमस्कन्धीयप्रतिश्लोकहोमांगत्वेन कर्त्तव्याष्टादशशतसंख्याकगायत्रीहोमांगत्वेन वा निर्विघ्नार्थं गणेशादीन्यथोपलब्धोपचारैरर्चयिष्ये । ततः स्वस्तिवाचनं कृत्वा गणेशषोडशमातृब्रह्मादियुतनवग्रहोंकारवासुकिरक्षाकलशसप्तचिरजीविसप्तर्षियोगिनीनक्षत्रादीनर्चयेत् । तत ओमद्यामुकगोत्रोऽमुकशर्माहं यथासंभवपायसादिचरुणा श्रीकृष्णप्रीतये होमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करिष्ये । ततो वरणसंभृतिमादाय ओमद्य कर्तव्यैतद्दशमस्कन्धीयप्रतिश्लोकहोमकर्मणि गायत्र्यादिहोमकर्मणि वा होमांगपाठार्यर्थमेभिर्वरणद्रव्यैरमुकगोत्रममुकशर्माणं ब्राह्मणं त्वामहं वृणे । वृतोऽस्मीति प्रतिवचनम् । एवमन्यानपि होतॄन् वृणुयात् । ततः कुशकण्डिका । तत्र हस्तमात्रपरिमितचतुरस्रभूमिं कुशैः परिसमुह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रप्रादेशमात्रमुत्तरोतरं त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य नवीनकांस्यपात्रेणाग्निकोणतोऽग्निमानीय प्रत्यङ्मुखं निदध्यात् । तत्राग्निं पूजयेत् । पुनस्तद्रक्षार्थं किंचिन्नियुज्य वरणसंभृतिमादाय--ॐ तत्सदद्य कर्तव्यगाथांगगायत्र्यादिहोमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्मकर्तुं(कुशकल्प्यमानं)ब्रह्माणमेभिर्वरणद्रव्यैर्ब्रह्मत्वेन त्वामहं वृणे । वृतोऽस्मीति ब्राह्मणो वदेत् । ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्याग्निं प्रदक्षिणं कारयित्वाऽस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय कल्पितासने उपवेशयेत् । ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम्—बर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतम् , ब्रह्मणोऽग्निपर्यंतम्, नैर्ऋत्याद्वायव्यांतम्, अग्नितः प्रणीतापर्य्यंतम् । ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं वेणीरूपकुशत्रयम्, पवित्रकरणार्थं साग्रमनंतर्गर्भकुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशाः, उपयमनार्थं वेणीरूपकुशत्रयम्, समिधस्तिस्रः, स्रुवः, आज्यम्, षट्पंचाशदुत्तरमुष्टिशतद्वयावच्छिन्नामतण्डुलपूर्णपात्रम्, पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि । अन्यदपि तदुपयुक्तमानेयं पायसत्रिमधुरादि । ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा ते च ब्रह्मग्रंथियुते कृत्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायानामिकांगुष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीं त्रिरभिषिच्य प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणम् । ततः कुशं प्रज्वाल्याज्यस्योपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तं प्रक्षिप्य स्रुवं प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य पूजितं तं स्वदक्षिणतो निदध्यात् । तत आज्यमग्नेः प्रदक्षिणं कारयित्वाऽवतार्य्याग्रे धृत्वा त्रिः प्रोक्षणीवदुत्पूयाऽवेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनः प्रोक्षणीवदुत्पूय तत उत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्तास्तिस्रः समिधोऽग्नौ प्रक्षिपेत् । उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य पवित्रे प्रणीतापात्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहुयात् । आहुतिशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ प्रजापतये स्वाहा । इदम्प्रजापतये इति मनसा। ओमिंद्राय स्वाहा । इदमिंद्राय इत्याघारौ । ओमग्नये स्वाहा। इदमग्नये । ॐ सोमाय स्वाहा । इदं सोमाय इत्याज्यभागौ। ॐ भूः स्वा० इदं भूः । ॐ भुवः स्वा० इदं भुवः । ॐ स्वः स्वा० इदं स्वः । एता महाव्याहृतयः । ॐ तन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ಆ सि प्रमुमुग्ध्यस्मत्स्वाहा " इदमग्नीवरुणाभ्याम् । " ॐ सत्वन्नो अग्नेवमोभवोतीनेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्वनो वरुण ಆ

रराणोवीहिमृडीक ठं सुहवो न एधि स्वाहा " इदमग्नीवरुणाभ्याम् । " ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाअसि । अयानोयज्ञंवहास्ययानोधेहिभेषज ७ं स्वाहा " इदमग्नये । " ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महांतः । तेभिर्न्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा " इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः । " ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम ७ं श्रथाय । अथावयमादित्यव्रते तवानागसोऽदितयेस्यामस्वाहा " इदं वरुणाय । एताः सर्वप्रायश्चित्तसंज्ञिकाः । ॐ प्रजापतये स्वाहा इदं प्रजापतये इति प्राजापत्यम् । ततो दशमस्कंधीयप्रतिश्लोकहोमं गायत्र्यादिहोमं वा कृत्वा ओमग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इति स्विष्टकृत । ततः संस्रवप्राशनमाचमनं च । तत ओमद्यैतद्गायत्र्यादिहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं सतंडुलपूगीफलदक्षिणप्रजापतिदैवतं यथानामगोत्राय ब्रह्मणे दक्षिणां दातुमहमुत्सृजे इति ब्रह्मणे दक्षिणां दद्यात् । ततः स्वस्तीति प्रतिवचनम् ! ततो ब्रह्मग्रंथिविमोकः । ततः " ॐ सुमित्रियान आप ओषधयः संतु " इति पवित्राभ्यां शिरः संमृज्य " ॐ दुर्मित्रियास्तस्मै संतु योस्मान्द्वेष्टि यञ्च वयं द्विष्मः " इति प्रणीतामैशान्यां न्युब्जीकुर्यात । ततः स्तरणक्रमेण बर्हिरुत्थाप्य घृतेनाभिघार्य्य हस्तेनैव जुहुयात । ॐ देवागातुविदो गातुं वित्वागातुमिति मनसस्पत इमं देवयज्ञ ठं स्वाहा वातेधाः स्वाहा इति मंत्रेण बर्हिर्होमः । ततः पूर्वादिदिक्षु क्रमेण ओमिंद्रायेतीन्द्रं संपूज्य भो इंद्र इमं सदीपं दधिमाषबलिं गृहाण सकुटुम्बं मां रक्ष मंगलाभ्युदयं कुरु आयुःकर्ता क्षेमकर्ता भवेतींद्राय बलिं दत्वाऽग्नये यमाय निर्ऋतये वरुणाय वायवे कुबेरायेशानाय च पूर्वोक्तरीत्या बलिं दद्यात । पूर्वैशानयोर्मध्ये ब्रह्मणे पश्चिमनैर्ऋतयोर्मध्येऽनंताय च बलिं दत्त्वा द्वारदेशे तत्रैव वा क्षेत्रपालबलिं दद्यात । ततो नारिकेलं घृतेनापूर्य कौशेयमंगलसूत्रपुष्पमालाभिरावेष्टय गंधादिनाभ्यर्च्य "ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविंठं साम्राज्यमतिथिं जनानामासन्नापात्रं जनयंतु देवाः स्वाहा "॥ इदमग्नये । पुनर्घृतधारां स्रुवेण दद्यात । "ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्त्वा कामधुक्ष" इति मंत्रेण । ततः स्रुवेण भस्मानीय दक्षिणानामिकया 'त्र्यायुषं जमदग्नेः' इति ललाटे । 'कश्यपस्य त्र्यायुषम्' इति ग्रीवायाम् । 'यद्देवेषु त्र्यायुषम्' इति दक्षिणबाहुमूले । 'तन्नो अस्तु त्र्यायुषम्' इति हृदि । आचार्यो यजमानश्च कुर्यात् । ततः "नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय । वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजाय ॥ १ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य । गोविंद गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ॥ २ ॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च । त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥ ३ ॥ त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा ॥ स्तूयमानो नदँल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्रयज्ञक्रतुः ॥ ४ ॥ स प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षय यांति तस्मै नमः॥५॥ इति पञ्चश्लोकान्पठन्नमस्कुर्यात् । तत अद्येत्याद्युक्त्वा सर्वेष्टदश्रीमद्भागवतगाथासांगतार्थंकारितयथामि
तगणेशगायत्रीगायत्रीवासुदेवमंत्रजपदक्षिणात्वेनेमाश्चंद्रदेवताका यथासंख्याकरजतमुद्रिका यथानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे। ततः स्वस्तीति प्रतिवचनम् ।
ततो होमसांगतार्थमिदं कांस्यपात्रं तंडुलाद्यन्नोपरि वर्त्तमानं छायोपहितपञ्चरत्नाढ्यघृतपूर्णं विष्णुप्रजापतिदैवतं सर्वारिष्टनिवृत्तिपूर्वकमखिलाभीष्टावाप्तयेऽमुकगोत्रायामुकशर्मणे
ब्राह्मणाय दातुमहमुत्सृजे इति । ततस्तद्दानप्रतिष्ठां दत्त्वा प्रार्थयेत–"कांस्यं ब्रह्ममयं प्रोक्तमाज्यं तेजो दिवौकसाम् । पञ्चरत्नं हरेत्पापं ततः शांतिं प्रयच्छ मे ॥१॥ दिव्यांतरि
क्षभौमाद्यैर्यन्मे किल्बिषमागतम् । तच्छायापात्रदानेन विनाशमुपगच्छतु ॥ २ ॥" इति । ततो होमदशांशतर्पणतद्दशांशमार्जनतद्दशांशब्राह्मणभोजनादि कार्यम् । तर्पणन्तु–
राधाकृष्णौ तर्पयामीति ॐ राधाकृष्णौ नमोऽभिषिंचामीति । ततः सर्वकर्मसांगतावाप्तये यथासंभवं पायसाद्यन्नेन द्वादश अधिकान्वा ब्राह्मणानहं भोजयिष्य इति संकल्प्य वह्निं
विसर्जयेत् । "गच्छगच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥"इति मंत्रेण । ततः-"यान्तु देवगणाः सर्वे पूजामादाय मामिकाम् । यजमान
हितार्थाय पुनरागमनाय च ॥ इत्यक्षतैर्देवान्विसर्जयेत् । ततः कलशजलेन सकुटुंबं यजमानम् "आपोहिष्ठा" इत्यादिमंत्रैरभिषिंचेत । पौराणिकैर्वा--" सुरास्त्वामभि षिंच
न्तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । नारदाद्या ऋषिगणा ये चान्ये च तपोधनाः । भवन्तु यजमानस्य
ह्याशीर्वादपरायणाः ॥ आखंडलोऽग्निर्भगवान्यमो वै निर्ऋतिस्तथा।वरुणः पवनश्चैव धनाध्यक्षः शिवस्तथा॥ब्रह्मा चैव तथाऽनन्तो दिक्पालाः पान्तु वः सदा।कीर्तिर्लक्ष्मीर्धृ
तिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः । एतास्त्वामभिषिंचन्तु देवपत्न्यस्समागताः ॥ आदित्यसोमौ भौमश्च बुधजीवसिता
र्कजाः । ग्रहास्त्वामभिषिंचन्तु राहुकेत च पूजिताः ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । पितरश्च प्रयच्छन्तु मंगलानि दिनेदिने ॥ द्रुमा नागास्तथा दैत्या
अप्सरश्चाप्सरोगणाः । सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचन्तु धर्मकामार्थसिद्धये । " इति । ततः "आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
तिलकं ते प्रयच्छन्तु कामधर्मार्थसिद्धये ॥ " इति मंत्रेण यजमानमस्तके तिलकं कुंकुमाद्यैः कृत्वा " येऽक्षताः क्षतहन्तारो हन्तारोऽखिलवैरिणाम् । तांस्ते मूर्ध्नि प्रयच्छामि
तेन ते शं सदा भवेत ॥" इत्यक्षतांस्तिलकमध्ये विदध्यात्। ततोऽद्येत्याद्युक्त्वा कृतैतत्कर्मणः सांगतासिद्धये इमां हिरण्यमयीमग्निदेवतां तन्मूल्योपकल्पितामन्यां रजतादिरूपां
वा दक्षिणाममुकगोत्रायामुकशर्मण आचार्याय तुभ्यमहं संप्रददे । ततः स्वस्तीति प्रतिवचनम् । ततः"यज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं यजने मम । अच्छिद्रं स्यात्तु तत्सर्वं भास्क
रस्य प्रसादतः॥" इति मंत्रं 'तद्विष्णोः' इति मंत्रं च पठेत् । "ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः । दिवीव चक्षुराततम्" इति कर्मच्छिद्रापनोदनार्थं पठेत । ततो
मंडपादीनि तदुपकरणानि च सर्वमेव पूजोपकरणादिकं । वत्के दद्यात् " तत आशिषमादाय नमेत्तं यज्ञपूर्त्तये । तस्मिंतुष्टे यज्ञपूर्तिर्जायते नात्र संशयः ॥" इति संहितोक्तेः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः कलशोपरि वर्त्तमानं श्रीफलमादाय "यद्गाथाश्रवणेन पांडवकुलोद्भूतः परीक्षिन्नृपो लेभे दिव्यगतिं तथा च विदुरो धुंध्वादिकारी द्विजः । स्थाविर्येश्च निरस्य भक्तितनयौ प्राप्तौ पुनर्यौवनं तच्छ्रीभागवतं ददातु सततं सर्वाश्च ते सम्पदः ॥" इति पठित्वा यजमानाय दद्यात् । स च स्वपत्न्यै दद्यात् । सा च पवित्रस्थले तत्स्थापयेत् । दीनानाथानपि संतोषयेद्यथाशक्ति भूयसीदक्षिणयेति ॥ " व्यरचि शुकमुनींद्रप्रोक्तपारीक्षितस्य खरडनगरवासे विप्रवंशीधरेण । नगदिनसुकथायाः पद्धतिः सुज्ञमोदा गुरुजनकृपयैव स्कांदपाद्मानुरोधात्॥" ॥ इति श्रीमद्भागवतश्रवणपद्धतिः ॥ ॥ अथास्य सामग्री प्रथमदिनस्य—वारुणादिपीठ एको १ महान् । द्वौ २ पीठावल्यौ । कौसुंभसूत्रग्रंथयः दश १०। कदलीस्तंभचतुष्टयम् ४। यष्टिकाचतुष्टयम् ४। खार्जूरवस्त्रं पञ्च ५ गजमितम् । वालुका पंचमणमिता । आम्रपत्राणि । अक्षता अर्द्धसेटकमिताः।द्विगुणं कुंकुमम् ताम्रचतुष्क ४ मितम् । श्वेतचंदनम् । नव ९ ताम्रमितं । प्रसादार्थं गुडादि । ताम्रमुद्राश्चत्वारिंश ४० न्मिताः । सरावदशकम् १०। मुद्रिका रजतस्य पञ्च ५ । महदुपधानकमेकम्, चत्वारि चाल्पानि ५ । गाथापीठार्थं खार्जूरवस्त्रतूलिकाः । पुस्तकपीठार्थं श्वेतवस्त्रं गजमितं पादाधिकम् १ । नारदपीठार्थं वस्त्रं श्वेतं तदर्द्धम् । नारिकेलषट्कम् ६ । त्रयोदश वा, द्वे वा । श्रीफलानि । कलशपञ्चकं ताम्रमयं मृन्मयं वा ५ । तदाच्छादनपात्राणि मृन्मयानि ५ । ताम्रजानि कांस्यमयानि वेणुजानि वा तण्डुलपूरितानि। तण्डुलानां दशसेटकानि १० । कौशेयवस्त्रं गजमितम् १ । सर्वौषध्यस्तदभावे हरिद्राग्रन्थयः । दूर्वाः । कुशाः । अश्वत्थाम्रप्लक्षकदंबोदुंबरपत्राणि । पंचरत्नम् । सुवर्णम् । स्वर्णमूर्तिः, पलपंचमिता । तदर्द्धा, षोडशमाषमिता वा । सप्त मृदः । पूगफलानि विंशतिमितानि । पुष्पाणि । धूपः । दीपः। तूलं दीपार्थम् । कर्पूरं नीराजनार्थम्। नीराजनपात्रम् । घंटा। शंखार्घपात्रम्, वाद्यानि च॥समाप्तिदिनसामग्री च—मुद्रिकाः सुवर्णमय्यो राजत्यो वा। पुस्तकवस्त्रम्। वक्तुर्वस्त्रभूषादि । प्रसादः, पुष्पमालाश्च॥ होमसामग्री तु—पायसाभावे अष्टसेटकपरिमिता स्तिलाः । यवाः षट्सेटकमिताः । घृतं सेटकचतुष्कमितम्।छायापात्रार्थं होमार्थं च पृथगपि घृतं सपादसेटकमितम् । तण्डुलाः सेटकद्वयमिताः । खण्डः सेटकद्वयमितः। पंचखाद्याश्च सेटकद्वयमिताः।तदभावे खण्डघृतमधुरूपत्रिमधुराः।तदभावे केवलं घृतम् । पालाशसमिधो मणद्वयमिताः।वालुका मणद्वय मिताः। प्रणीतापात्रम् । प्रोक्षणीपात्रम् । आज्यस्थाली । चरुस्थाली।पूर्णपात्रं च। सर्वाणि पात्राणि तैजसानि मृन्मयानि वा।सरावदशकम्। पूर्णपात्रार्थं तंडुलाः सार्द्धमणमिताः,पुरुषाहारमिता वा । मुद्राश्चत्वारिंशत् ४० । माषवटिका एकादश दधियुताः । दीपाः ११ । कुशपुष्पधूपदीपाः । पूगफलानि पंच ५ । नारिकेलम् १ । कौशेयवस्त्रम् । तूलम् । पुष्पमाला । कुंकुमम् । चन्दनम् । श्वेतवस्त्रम् । विप्रभोजनं दक्षिणाश्च ॥ इति सप्ताहसामग्री॥इति श्रीपंडितवंशीधरशर्मकृता श्रीमद्भागवतसप्ताहादिकथाश्रवणपद्धतिः सम्पूर्णा॥

१ श्रीमद्भागवतस्येत्याशयः ।

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मज—क्षेमराज—श्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" स्टीम—मुद्रणालये मुद्रयित्वा प्रकाशितम् । संवत् १९६५, शाके १८३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमद्भागवतकथासूचीपत्रम् ।

अध्यायाः । विषयाः ।

प्रथमः स्कन्धः ।

१ दुष्टकलेरागमनं ज्ञात्वा तत्तरणोपायं शौनकादयः सूतं पप्रच्छुः
२ एकाग्रमनसा भगवत्कथाश्रवणकीर्तनमेव कलेर्निस्तरणोपाय इति निर्णीतम्
३ भगवतः पुरुषाद्यवतारस्तच्चरितं च संक्षेपेण दर्शितं भागवतार्कोदयश्च
४ आम्नायविभागसदर्थप्रकाशनाय भारतादिपुराणकरणेनाऽपि व्यासस्यापारितोषः
५ नारदं प्रति व्यासेन चित्तापारितोषकारणे पृष्टे भगवद्गुणवर्णनाप्राचुर्यं कारणमुपदिष्टं तेन
६ व्यासप्रत्ययार्थमात्मनः पूर्वजन्मचरितं कृष्णकथोद्भवं नारदेन दर्शितम्
७ भागवतश्रोतृपरीक्षिज्जन्मप्रस्तावे सुप्तद्रौपदीपुत्रवधादिचौरकृत्यमश्वत्थाम्नः कथितम्
८ अश्वत्थाम्नोऽस्त्रात्परीक्षिद्रक्षणं कृष्णेन। तत्स्तुतिश्च कुंत्या कृता
९ धर्मस्य शोके तच्छांत्यर्थं भीष्मसंनिधिगमनं तेन तच्छोकापनोदस्तन्निर्याणं च
१० युधिष्ठिरस्य राज्याभिषेकानंतरं भगवतो द्वारकागमनम्
११ भगवतो द्वारकाप्रवेशस्तदैश्वर्यकथनम्
१२ द्रौण्यस्त्राद्रक्षितस्य परीक्षितो जन्म तज्जातकर्म च युधिष्ठिरेण कृतं वर्णितम्
१३ सस्त्रीकस्य धृतराष्ट्रस्य विदुरोपदेशेन निर्याणं परीक्षिद्राज्याभिषेकः
१४ उत्पातदर्शनेन युधिष्ठिरस्यार्जुनागमचिंतायां तदागमनम्
१५ अर्जुनाद्भगवन्निर्याणं श्रुत्वा प्रव्रजितानां पांडवानां कुन्त्या सह स्वर्गारोहणम्
१६ कलिखिन्नभूमिधर्मसंवादे परीक्षिदागमनम्
१७ उभयोः संवादात्कलिं ज्ञात्वा तन्निग्रहः परीक्षिता कृतः
१८ मृतसर्पकलेवरं शमीककंठे राज्ञा क्षिप्तं निशम्य तत्पुत्रेण शृंगिणा शापोत्सर्जनम्
१९ गंगायां प्रायोपविष्टे परीक्षिति ऋषीणामागमनं शुकप्राप्तिश्च

अध्यायाः । विषयाः ।

द्वितीयः स्कन्धः ।

१ राज्ञा पृष्टः शुकः सूक्ष्मे ब्रह्मणि चित्तस्थैर्यार्थमादौ स्थूलविराड्रूपोपासनमुपादिशत्
२ स्थूलधारणाजितस्य मनसोऽतिसूक्ष्मे ब्रह्मणि चित्तलयोपदेशः
३ विष्णुभक्तिश्रैष्ठ्यश्रवणेन तत्साधनभूतासु भगवत्कथासु परीक्षित आदरो दर्शितः
४ हरिलीलाप्रश्ने परीक्षिता कृते शुकेन नारदब्रह्मसंवादप्रस्तावो वर्णितः
५ ब्रह्मणा नारदाय विराड्रूपसृष्टिरुक्ता
६ पुरुषसूक्तार्थेन भगवतो विराड्देहवर्णनम्
७ वराहावतारादारभ्य आकृष्णावतारमवतारास्तच्चरितानि चोपवर्णितानि
८ जीवपरमात्मसंबंधाक्षेपपूर्वकं पुराणार्थप्रश्नाः
९ शुकेन परीक्षित्प्रश्नोत्तरे भगवता ब्रह्मणे प्रोक्तं चतुःश्लोकं भागवतमुपदिष्टम्
१० राज्ञः परीक्षितः प्रश्नोत्तरद्वारा पुराणलक्षणादिवर्णनम्

तृतीयः स्कन्धः ।

१ गतायुषो यदून् त्यक्त्वा गतस्योद्धवस्य विदुरेण सह संभाषणम्
२ कृष्णविरहदुःखितोद्धवः कृष्णचरितानि संक्षेपेण क्षत्त्रेऽकथयत्
३ मथुराया आगतस्य भगवतो द्वारकाक्रीडादिवर्णनम्
४ भगवदादेशादुद्धवज्ञापितो विदुरो मैत्रेयमगमत्
५ विदुरसंदेहे मैत्रेयेण तन्निरासार्थं महदादीनां स्थूलानां सृष्टिवर्णनम्
६ ईशशक्तिप्रवेशेन स्थूलभूतानां जगन्निर्माणशक्तित्वम्
७ स्वतो निर्गुणस्य भगवतो गुणमय्या मायायाः कथं संग इत्यादिविदुरप्रश्नाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः ।	विषयाः ।

८ नाभिकमलोद्भूतस्य भीतस्य ब्रह्मणो भगवत्स्तुतिः
९ ततस्तपस्तुष्टस्य भगवतो वरदानेन ब्रह्मणः सृष्टिप्रवृत्तिः
१० प्रथमं कालोत्पत्तिर्त्रिसर्गसृष्टिश्च वर्णिता
११ कल्पयुगादिकालमानवर्णनम्
१२ ब्रह्मणः सनत्कुमारादिमानससृष्टेरनंतरंद्विधा देहभेदेन स्वायंभुवस्य शतरूपायाश्चोत्पत्तिः
१३ ब्रह्मणो नासिकोद्भूतस्य यज्ञरूपवराहस्य स्तुतिः
१४ दितिप्रार्थनया कश्यपात्तस्यां गर्भसंभूतिः
१५ सनत्कुमाराद्वैकुंठस्थितयोर्जयविजययोः शापवर्णनम्
१६ कुपितस्य कुमारस्य भगवता सांत्वनं तयोरनुग्रहश्च कृत इति वर्णितम्
१७ हिरण्याक्षहिरण्यकशिप्वोर्जन्मन्युत्पातकथनं तयोः दिग्विजयश्च
१८ धरोद्धारे हिरण्याक्षवराहयोर्महाभयमायोधनम्
१९ ब्रह्मप्रार्थनांगीकारेण हिरण्याक्षवधः
२० सर्वस्थिरचरसर्गानंतरं स्वायंभुवमनोर्वंशवर्णनम्
२१ कर्दमतपस्तुष्टेन भगवता तस्य सृष्टयर्थं विवाहोपदेशः
२२ स्वायंभुवमनुना स्वयंप्रत्तया देवहूत्या सह कर्दमर्षेर्विवाहः
२३ पत्न्यै प्रसन्नेन कर्दमेन तपःसिद्धिनिर्मिते विमाने तयोर्गार्हस्थ्यवर्णनम्
२४ भगवतः कपिलस्य जन्मानंतरं कर्दमस्य प्रव्रज्योक्ता
२५ मात्रा पृष्टः कपिलो जीवस्य बंधविमोक्षणं भक्तियोगमाह
२६ पुंप्रकृत्योर्विवेकाय सर्वसूक्ष्मभावानां जन्मलक्षणम्
२७ पुंप्रकृत्योर्विवेके मोक्षप्राप्तिर्दर्शिता कपिलेन
२८ सगुणस्य भगवतो ध्यानयोग उक्तः
२९ मायाध्यासेन कालकृता जीवस्य जन्मादिघोरा संसृतिरुपदिष्टा
३० देहाध्यासेन जीवानां पापादधोगतिरुदीरिता
३१ पुण्यपापयोः साम्यान्मानुषी गतिः कथ्यते
३२ सात्त्विकैः कर्मभिरूर्ध्वगतिः । ज्ञानविहीनस्य पुनरावृत्तिर्वर्णिता
३३ कपिलोपदेशेन ज्ञानप्राप्त्या मातुर्विदेहकैवल्यप्राप्त्यनंतरं कपिलस्य योगालंबनम्

चतुर्थः स्कन्धः ।

१ स्वायंभुवमनोर्वंशकीर्तनं ब्रह्मपुत्रादत्रेर्दत्तावतारः
२ विश्वसृजां सत्रे दक्षशिवयोर्वैरकारणं परस्परशापविसर्जनं च
३ दाक्षायण्याः सत्याः पितृयज्ञदिदृक्षया गच्छन्त्याः शिवेन निषेधः कृतः
४ शिवं विहाय गतायाः सत्याः पितृकृतावमानाद् योगेन देहत्यागः
५ नारदात् पत्नीनाशश्रवणेन कुपितः शिवो वीरभद्रं निर्माय तेन दक्षयज्ञविध्वंसनं दक्षवधं च कारयामास
६ सदेवो विधिः कैलासं गत्वा यज्ञसंधानार्थं दक्षजीवितार्थं शिवं तुष्टाव
७ पुनर्दक्षयज्ञसंधानार्थमुद्भूतस्य विष्णोः सर्वदेवैः स्तुतिः कृता
८ सपत्नीमातरि कोपादरण्यं गत्वा नारदोपदेशेन ध्रुवो हरिमतोषयत्
९ ध्रुवोऽभीष्टवरान्हरेर्लब्ध्वा पित्रा समर्पितं राज्यमकरोत्
१० पुण्यजनात् भ्रातृवधं श्रुत्वा ध्रुवः पुण्यजनानलकां गत्वाऽवधीत्
११ पुण्यजनक्षयं दृष्ट्वाऽऽगतेन स्वायंभुवा ध्रुवस्य सांत्वनं युद्धात्परावर्तनं च
१२ पश्चात्कुबेरेणाभिनंदितो ध्रुवः प्रजापालनं कृत्वा यज्ञैरिष्ट्वा हरेः स्थानमारुरोह
१३ ध्रुवान्वयोत्पन्नस्यांगस्य पुत्रवेनक्रौर्याददर्शनगमनम्
१४ अंगगमनादूर्ध्वं तत्पुत्रवेनस्य राज्याभिषेके कृते तस्याधर्मवर्तित्वाद् ऋषिभिर्वधः
१५ अराजके वेनदक्षिणबाहुमथनं कृत्वा ऋषिभिरुत्पादितस्य पृथोर्जन्म
१६ ऋषिप्रेरितैर्मागधबंदिभिस्तत्स्तुतिः कृतेति
१७ क्षुत्पीडितानां शरणं प्राप्तानां प्रजानामन्नदानार्थं ग्रस्तबीजां महीं हंतुमुद्यतस्य पृथोस्तया कृता स्तुतिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः ।	विषयाः ।
१८	महीवचनाद्वत्सपात्रादिकल्पनया सर्वैर्महीदोहनम्
१९	तस्याश्वमेधे हयापहरणादिंद्रवधोद्यतस्य पृथोर्ब्रह्मणा निवारणम्
२०	तद्यज्ञोद्भूतस्य विष्णोर्वरप्रदानमुभयप्रीतिसंबंधश्च
२१	स्वप्रजाभ्यः पृथुना भगवद्धर्मशासनं कृतम्
२२	भगवदाज्ञया गतेन सनत्कुमारेण पृथवे ज्ञानोपदेशः कृतः
२३	ध्यानयोगेन त्यक्तदेहस्य सभार्यस्य पृथोर्विमानेन वैकुंठप्राप्तिः
२४	पृथोः प्रपौत्रात्प्राचीनबर्हिषो दशप्रचेतसां जन्म रुद्रगीतं च
२५	तपस्यत्सु प्रचेतस्सु तत्पित्रे नारदोऽध्यात्मपारोक्ष्यमुपादिशत्
२६	पुरंजनाय देशस्य जीवस्य समृद्धित्यागात् संसृतिरुदीर्यते
२७	प्रियापुत्रापदेशेंद्रियासक्त्या जीवस्य स्वरूपप्रच्युत्या कालक्रमेण जरारोगाद्यागमः
२८	स्त्रीसंगात् स्त्रीत्वं प्राप्तस्य पुरंजनस्य परमात्मज्ञानोपदेशान्मुक्तिः
२९	परोक्षार्थव्याख्यानेन स्त्रीसंगाद्भवे ईशसंगान्मुक्तिरितीरितम्
३०	ईशाल्लब्धवराः प्राचीनबर्हिषो वार्क्षीं कन्यां परिणीय राज्यमकुर्वन्
३१	स्वसुते दक्षे राज्यधुरं न्यस्य वनं गतानां प्रचेतसां नारदोपदेशान्मुक्तिः

पंचमः स्कंधः ।

१	प्रियव्रतस्य विरक्तत्वेपि ब्रह्मणो मनोधारणार्थं राज्यकर्तृत्वं तदनु नारदोपदेशात्परमपदप्राप्तिः
२	आग्नीध्रस्य स्त्रैणं गंधर्वलोकावाप्तिश्च तस्मान्नाभे राज्ञ उत्पत्तिः
३	पुत्रार्थं यजतो नाभेर्यज्ञे भगवताविर्भूय तत्प्रार्थनयात्मसदृशपुत्रदाने ऋषभावतारः
४	इंद्रेण वृष्टिप्रतिबंधे स्वयोगमाययर्षभस्य वर्षणादिचरितं तद्राज्ये प्रजानां परमनिर्वृतिश्चाख्याता
५	भरतादीनामुपदेश आत्मनश्च पारमहंस्यधर्माचरणम्
६	देहाभिमानत्यागान्निरभिमानत्वेन भुवं चरतस्तस्याग्निप्रवेशः
७	भरतेन यज्ञेश्वरस्य भगवतः स्तुतिः पश्चात्तस्य प्रव्रजनं तपश्च कथितम्
८	विष्णुं भजतस्तस्यैणसंगादेणत्वं वर्णितम्
९	तस्य तृतीयविप्रजन्मनि जडत्वेन गृहीतस्य चौरैर्बलिप्रदानाद्भद्रकाल्या मोक्षः
१०	रहूगणेनाक्षिप्तस्यापि तथैव शिबिकावहनं तद्वाक्यं च कथितम्
११	सिंधुसौवीरपतिना पृष्टः स योगी तस्मै ज्ञानमाचष्ट
१२	तत्संशयापाकरणेनाज्ञाननिवृत्त्या तज्ज्ञानप्राप्तिश्च
१३	अविरक्ताय ज्ञानं व्यर्थमिति प्रदर्शनार्थं भवाटव्युपदेशः
१४	भवाटवीरूपकस्य वास्तवार्थकथनम्
१५	भरतवंशस्य सुमत्यंतस्य वर्णनं समाप्तिश्च
१६	मेरोः सर्वतो विस्तरस्य वर्णनं योजनप्रमाणादि
१७	तस्माच्चतुर्दिक्षु गंगावतरणमिलावृते रुद्रेण संकर्षणस्तुतिः
१८	मेरोः पूर्वदिक्क्रमतः खंडत्रयवर्णनम्
१९	किंपुरुषभरतखंडवर्णनं भरतखंडश्रैष्ठ्यं च दर्शितम्
२०	प्लक्षादिषड्द्वीपवर्णनं षण्णां सागराणामंते लोकालोकमर्यादाविस्तारः कथितः
२१	कालचक्रेण भ्रमतो रवेरन्वहं गतिमानं तद्रथवर्णनं च
२२	सोमशुक्रादिग्रहाणामूर्ध्वस्थितिमानं तद्गतिश्च
२३	ध्रुवपदादारभ्य ज्योतिश्चक्ररूपेण भगवतो विराड्देहकल्पनम्
२४	सूर्याधस्ताद्राहोरारभ्य पातालादीनां भूविवराणां मानं लक्षणतः
२५	शेषसंस्थितिस्तन्मुखज्वालादिभ्यः प्रलयप्रवर्तनम्
२६	पापिनां यथायथं या नारक्यो गतयस्तासां कथनम्

षष्ठः स्कंधः ।

१	भगवन्नाममाहात्म्यनिरूपणार्थमजामिलकथायां विष्णुयमदूतसंवादः
२	विष्णुदूतैर्नाममाहात्म्यं याम्यांञ्श्रावयित्वा सोऽजामिलो विष्णुलोकं नीतः
३	यमेनापि वैष्णवोत्कर्षवर्णनैः स्वदूताः सांत्विताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः ।	विषयाः ।
४	प्रजासिसृक्षया दक्षेण कृतस्य तपसोंते भगवदाविर्भावः । हंसगुह्यस्तुतिश्च
५	हर्यश्वसंज्ञानां दक्षसुतानां नारदोपदेशादपुनरावर्तने नारदाय दक्षेण शापदानम्
६	दक्षस्य षष्टिकन्याप्रसवः । तद्वंशे विश्वरूपजन्म
७	बृहस्पतित्यक्तैर्देवैर्विश्वरूपः पौरोहित्याय वृतः
८	विश्वरूपेणेंद्राय नारायणवर्मदानम्
९	इंद्रेण हते विश्वरूपे तत्पित्रा वृत्र इंद्रनाशार्थमुत्पादिते भीतैर्देवैर्भगवत्स्तुतिः
१०	भगवदुपदेशेन दधीचेर्षेरस्थिभिर्निर्मितं वज्रमात्तवता सदेवेंद्रेण वृत्रस्य युद्धम्
११	वृत्रयुद्धे तस्य भक्तिज्ञानवैराग्यजुष्टा वाचो वर्णिताः
१२	विषण्णोत्साहितेनेंद्रेण वृत्रवधः
१३	वृत्रवधोत्पन्नया ब्रह्महत्यया नष्टस्य पुनरागमनमश्वमेधेन यजनं च
१४	वृत्रस्येदृग्भाक्तिकारणप्रश्ने तत्पूर्वचित्रकेतुजन्मकथनं तस्य कृच्छ्रलब्धसुते नष्टेऽतिशोकः
१५	चित्रकेतोर्नारदांगिरोभ्यां शोकापनोदः
१६	मृतपुत्रोक्तिभिस्तन्मायामपहाय नारदेन शेषतोषिणी विद्या तस्मा उपदिष्टा
१७	शेषवरदानेन ऋद्धयुन्मत्तस्येशहसनं तन्निदानेन पार्वतीशापाद्दैत्यत्वम्
१८	चतुर्थादित्यान्वयवर्णने दितिगर्भच्छेदनादिना मरुतामुत्पत्तिः
१९	कश्यपेन दित्या इंद्रहन्तृपुत्रोत्पादनसमर्थव्रतोपदेशः

सप्तमः स्कंधः ।

१	हिरण्यकशिपोर्ब्रह्मविच्छापेन विष्णुभक्ते विरोधः
२	भ्रातृवधसंतप्तानां बंधूनां कपोताद्याख्यानेन सांत्वनं हिरण्यकशिपुना
३	हिरण्यकशिपोस्तपसा तप्तानां देवानां प्रार्थनया ब्रह्मणा तस्मै वरदानम्
४	लब्धवरो दैत्यस्त्रैलोक्यं विजित्य विष्णुवरेण देवानपीडयत्
५	गुरुशिक्षितमगृह्णन्तं भगवत्स्तुतौ रतं स्वपुत्रं प्रह्लादं पितुर्विषसर्पाद्यैर्घातयितुं यत्नः

अध्यायाः ।	विषयाः ।
६	गुरौ गृहकर्मणि व्यग्रे प्रह्लादो दैत्यसुतेभ्यो विष्णुभक्तिधर्मानुपादिशत्
७	वनं प्रस्थिते पितारि स्वमातरं हंतुं प्रवृत्ते इंद्रे नारदोपदेशेन गर्भस्थ एव तदुपदिष्टं ज्ञानमहमगृह्णामिति दैत्यसुतानादिशत्
८	पिता सुतं निघ्नन् हरिणा नृहर्यवतारं कृत्वा हतः, ब्रह्मादिभिः स्तुतश्च हरिः
९	तत्स्वरूपभीतेन ब्रह्मणा प्रणोदितः प्रह्लादो हरिमस्तौत्
१०	एनमनुगृह्यांतर्हिते भगवति प्रसंगेन शिवात् त्रिपुरवध ईरितः
११	युधिष्ठिरेण पृष्टो नारदो नृणां तथा स्त्रीणां साधारणं धर्ममुपादिशत्
१२	ब्रह्मचारिवानप्रस्थयोर्धर्मप्राधान्यंन चतुर्णामाश्रमाणां साधारणा धर्मा उपदिष्टाः
१३	साधकस्य यतेर्धर्मस्तथा सिद्धस्यावधूतेतिहासेन धर्माः सिद्धावस्था च वर्णिता
१४	देशकालादिविशेषेण गृहस्थस्य श्रेयस्कृद्धर्म उपदिष्टः
१५	सर्वेषां मोक्षधर्माणां सर्ववर्णाश्रमनिबंधनं सारसंग्रहं धर्ममाचष्ट नारदः

अष्टमः स्कन्धः ।

१	यज्ञावतारस्तथा स्वायंभुवस्वारोचिषोत्तमतामसानां चतुर्णां मन्वंतराणां वर्णनम्
२	तुर्यमन्वंतरोक्तगजेंद्रमोक्षश्रवणोत्सुकस्य राज्ञस्तत्कथाप्रस्तावः
३	दुःखं प्राप्तेन गजेंद्रेण स्तुतस्तन्मन्वंतरावतारो हरिर्ग्राहग्रस्तं गजेंद्रं देवलशापतश्च ग्राहं मोचयामास
४	ग्राहाय गंधर्वतां दत्त्वा गजेंद्रं स्वपार्षदं कृत्वा तौ हरिर्निजं पदमनयत्
५	पंचषष्ठमन्वंतरवर्णनं प्रसंगाद्दुर्वासःशापान्निःश्रीकैर्देवैर्हरिः स्तुत इति
६	भगवदाविर्भावानंतरं तदुपदेशतो दैवैर्दैत्यानां संधिमभिधाय सुधोत्पादनार्थं समुद्रमंथनोद्योगः ।
७	मंथनोद्भूतविषभयेन भीतैर्देवैः स्तुतो रुद्रस्तद्विषं पपौ
८	तदुद्भूतेषु चतुर्दशरत्नेषूत्पन्नया लक्ष्म्या हरिर्वृतः । धन्वंतरेरमृते दैत्यैर्हृते भगवतो मोहिनी-रूपाविर्भावः
९	तन्मोहितैर्दैत्यैरर्पितेऽमृतभाजने तान्वंचयित्वा सुरानमृतं पाययन् स्वं रूपं हरिर्जगृहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः ।	विषयाः ।
१०	एतत्कारणादेव दैत्यैरारब्धे युद्धे दैत्यपराजितैर्देवैः स्तुतो हरिराविर्बभौ
११	नारदो ब्रह्मणो वाक्याद्दैत्यवधाद्देवान्न्यषेधत्, ते च शुक्रेण संजीविन्या जीविताः पातालं विविशुः
१२	मोहिनीरूपदर्शनोत्सुकेन हरेण हरिरात्मनो मोहिनीरूपदर्शनेन धैर्यं त्याजयित्वा तं सांत्वितवान्
१३	अवशिष्टानि सप्त मन्वंतराणि क्रमादवर्णयत्
१४	प्रतिमन्वंतरमाविर्भूतस्यावताराादिषट्कस्य प्रत्येकस्य कर्म वर्णितम्
१५	आचार्यः शुक्रो बलिं विश्वजितायाजयत्, तद्भयेन स्वर्गान्नष्टा देवा निलिल्यिरे
१६	पुत्रनाशसंतप्तयाऽदित्या स्तुतः कश्यपः पयोव्रतमुपादिशत्
१७	तत्कृतेन व्रतेन तुष्टो भगवानाविर्भूय पुत्रत्वस्वीकरणेन तामनंदयत्
१८	वामनावतारं गृहीत्वाखिलैः संभावितो बलेर्यज्ञं गतस्तं तुष्टाव, तेनच वराय नियुक्तः
१९	पदत्रये भूमेर्याचिते श्रुतदानो बलिः शुक्रेण निषिद्धः
२०	अनृताद्भीतो बलिर्गुरुणा शप्तोपि कपट ज्ञात्वा पदत्रयं ददौ । अनंतरं हरिरवर्द्धत
२१	तद्धर्मनिष्ठां प्रथयितुं तं नागपाशैर्बबंध
२२	प्रसन्नो हरिः सुतले तं प्रस्थाप्य वरान्दत्त्वा तद्द्वारपोऽभवत्
२३	याते बलावुपेंद्र इंद्रेण सह स्वर्गं गत्वा सर्वान्देवाननंदयत्
२४	प्रसंगान्मत्स्यावतारेण प्रलये मनो रक्षणम्

नवमः स्कन्धः ।

अध्यायाः ।	विषयाः ।
१	सूर्यसुतान्वये सोमवंशोद्भवार्थं मनुपुत्रसुद्युम्नस्त्रीत्वं तस्मात्पुरूरवस उत्पत्तिस्तद्राज्यप्रतिष्ठा नाभागचरितं च
२	मनोर्दशपुत्राणां मध्ये पंचानां पृषध्र–कवि–करूष–धृष्ट–नृगाणां वंशानाह
३	शर्यातेः कन्यायाः सुकन्यायाश्च यवनपरिणयः । रैवतकस्याख्यानं, तेन बलाय कन्यादानम्
४	नाभागपुत्रस्यांबरीषस्य चरिते दुर्वासःकृत्यानाशः, सुदर्शनेन दुर्वासःपलायनं, तत्पृष्ठतश्चक्रगमनम्
५	विष्णुचक्रसंतप्तं दुर्वाससमंबरीषस्तत्स्तुत्या त्रासान्मोचितवान्, मोचितस्तं संस्तुत्य दुर्वासा गतः
६	इक्ष्वाकुवंशस्य शशादस्य चरितं तत्पुत्रककुत्स्थचरितं तदन्वये यौवनाश्वस्य मांधातुराख्यानं तत्पंचाशत्कन्यकाभिर्वृतस्य सौभरेराख्यानम्
७	तदन्वयोत्पन्नस्य हरिश्चंद्रस्याख्यानं तद्यज्ञे विश्वामित्रकृपया शुनःशेपमोक्षश्च
८	तदन्वयोत्पन्नसगरयज्ञ इंद्रेण हारिताश्वानयनार्थं प्रवृत्तान्सगरसुतान् कपिलो ददाह तत्पौत्रेणांशुमता स्तुतः कपिलोऽश्वं तस्मै दत्त्वा पितॄणामुद्धरणार्थं गंगावतारणमादिशत्
९	तत्पौत्रो भगीरथो गंगामानीय स्वपितॄनुदधरत् तदन्वय ऋतुपर्णोत्पत्तिः सौदासाख्यानं तथा खट्वांगो मुहूर्ताद् ब्रह्मलोकमगमदिति
१०	तदन्वये दशरथाद्रामावतारः संक्षेपेण तच्चरितं च
११	रामराज्यवर्णनं, तद्यज्ञाः, शत्रुघ्नेन लवणासुरं हत्वा मथुरानिर्माणम्
१२	कुशादारभ्य सुमित्रांतो मनोर्वंशः कथितः
१३	ऐक्ष्वाकस्य निमेर्वंशे जनकादीनां राज्ञां वर्णनं, वसिष्ठस्य निमिशापेन परस्परं देहत्यागः
१४	इंदुना गुरुपत्न्यंगीकारे देवदैत्ययोर्युद्धोद्योगे ब्रह्मणा सांत्वितायास्ताराया बुधजन्म, तस्मात्पुरूरवस उर्वश्याख्यानं तस्याः सकाशादायुरादीनां षण्णां पुरूरवसः पुत्राणां जन्म
१५	पुरूरवसो वंशे जह्नोरुत्पत्तिः । गाधेर्विश्वामित्राख्याने परशुरामजन्म सहस्रार्जुनवधः
१६	सहस्रार्जुनसुतैर्जमदग्नेर्वधे तद्रोषात्क्षत्रियाणामेकविंशतिवारं परशुरामेण निःक्षत्रीकरणम्
१७	पुरूरवसश्चतुर्णां सुतानां वंशवर्णनम्
१८	नाहुषस्य ययातेर्देवयान्या सह विवाहः शर्मिष्ठायां च द्रुह्य्वादीनां जन्म पितृजराग्रहणम्
१९	ययातेर्वैराग्यं पूरो राज्याभिषेकानंतरं तस्य वनाश्रयणं च कथितम्
२०	पितृप्रसादादाप्तराज्यस्य पूरोर्वंशे दुष्यंतशकुंतलयोर्विवाहोत्तरं तत्पुत्रस्य भरतस्याख्यानं तद्वंशयज्ञतुष्टैर्देवैर्भरद्वाजपुत्रार्पणम्
२१	रंतिदेवाजमीढादेश्चरितं दिवोदासोत्पत्तिरहल्याख्यानं तस्याः शतानंदोत्पत्तिः
२२	दिवोदासवंशवर्णनमृक्षवंशे जरासंधपार्थदुर्योधनादीनामुत्पत्तिः
२३	द्रुह्युतुर्वसुयदूनां यावज्ज्यामघसंभवा वंशाः कथिताः
२४	यादवान्वयोत्पन्नस्य विदर्भस्य नानामुखा वंशा रामकृष्णावतारावधि वर्णिताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः । विषयाः ।

दशमः स्कन्धः ।

१ वसुदेवदेवकीविवाहे कंसः स्वमृत्युं देवकीसुताद्विज्ञाय तत्षड् गर्भानवधीत
२ कंसादीनां घाताय ब्रह्मणा प्रार्थितो देवकीगर्भगो हरिरभूत् । गर्भस्तुतिः
३ देवक्या निजरूपेणोत्पन्नो देवकीवसुदेवस्तुतो हरिर्भीतेन पित्रा गोकुलं नीतः
४ कन्यकावाक्यादतिभयाकुलः कंसो दुष्टदैत्यान् सर्वबालकवधमाज्ञापयत्
५ नंदः पुत्रानंदनिर्वृतो महोत्सवं कृत्वा मथुरां गत्वा वसुदेवसंगममकरोत्
६ वसुदेववाक्याद्गोकुलेऽनर्थागमशंकितो नंदः पूतनावधादिकं श्रुत्वा विस्मितोभूत्
७ शकटासुरस्तृणावर्तवधः । मात्रे स्वमुखे विश्वरूपदर्शनम्
८ गर्गेण कृष्णजन्मकर्मादिजातककथनं मृद्भक्षणव्याजेन विश्वरूपदर्शनम्
९ पयस्युत्सिक्ते यशोदा कृष्णकृतं भांडभंगादि दृष्ट्वोलूखले कृष्णं बबंध
१० सहोलूखलेन रिंगन् कृष्णो यमलार्जुनौ बभंज, तत्र ताभ्यां नलकूबराभ्यां स्तुतः
११ वत्सान्पालयता कृष्णेन वत्सासुरबकासुरौ हतौ
१२ महासर्पवपुर्धरमघासुरं वत्सगोपालगलं कृष्णो गले प्रविश्याहन्
१३ ब्रह्मणा वत्सगोपालहरणे तावद्रूपो हरिर्भूत्वा पूर्ववद्गोकुले चिक्रीड
१४ कृष्णं परं ब्रह्म विदित्वा कृता ब्रह्मस्तुतिः
१५ तालवने धेनुकार्दनं कालियविषमृतान्वत्सबालकानजीवयत् कृष्णः
१६ यमुनाह्रदे कालियनिग्रहः । तत्पत्न्यभिष्टुतस्तमनुजग्राह
१७ कालियं रमणके विवास्य सुतान् गोपान् दावाग्नितो ररक्ष
१८ वसंतगुणलक्षिते ग्रीष्मे बलेन प्रलंबासुरमघातयत्
१९ मुंजारण्ये दावाग्नितो गोगोपानरक्षत् इतीरितम्
२० बलरामकृष्णयोर्वर्षाशरदृतुक्रीडा
२१ शरदि भगवतो वेणुनादं श्रुत्वा गोपीभिः कृतं वेणुगीतम्
२२ कात्यायनीव्रतं कुर्वाणानां गोपकन्यानां परिहासेन वस्त्रार्पणं यज्ञपत्नीभ्यो गोपप्रेषणम्
२३ अन्नयाच्ञामिषेण यज्ञपत्नीरनुगृह्य तत्पतीनन्वतापयत्
२४ इंद्रमखाद्गोपान्निवार्य गोवर्धनमहोत्सवमकारयत्कृष्ण इत्युदीरितम्
२५ कुपितेंद्रे व्रजनाशाय वर्षति गोवर्धनमुद्धृत्य कृष्णो गोपानरक्षत्
२६ नंदः कृष्णपराक्रमशंकितान् गोपान् गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत्
२७ कृष्णैश्वर्यप्रबोधित इंद्रस्तुष्टाव कामधेन्वेंद्रेण च गोराज्येभिषिक्तः कृष्ण इति
२८ वरुणलोकगतं नंदं भगवांस्तल्लोकं गत्वा तेन स्तुतः पितरमानयत् । गोपानां वैकुंठदर्शनम्
२९ रासार्थमागताभिर्गोपीभिर्हरेः संवादानंतरं रासे गोपीभ्यो भगवदंतर्धानम्
३० विरहतप्ताभिर्गोपीभिर्मार्गणं तद्भावभावाकृतयश्च तासां वर्णिताः
३१ यमुनापुलिनमागताभिः कृतं गोपीगीतम्
३२ तद्भक्त्याकृष्टो हरिराविर्भूय ता अरीरमत्
३३ ताभिः सह कृष्णो जलस्थलवनक्रीडा अकरोत्
३४ अंगिरसः शापजातेन सर्परूपेण गंधर्वेण ग्रस्तं नंदममूमुचत् । धनदानुगं शंखचूडमवधीत्
३५ वनं याते कृष्णे युग्मगीतेन गोप्यो वासरमनयन्
३६ अरिष्टासुरवधे नारदोपदेशेन वसुदेवसुतौ रामकृष्णौ ज्ञात्वा कंसस्तावानेतुमक्रूरं प्रैषयत्
३७ केशिदैत्ये हते नारदो भाविकर्मभिर्भगवंतमस्तौत् कृष्णः क्रीडन् व्योमासुरमवधीत्
३८ अक्रूरो भगवंतं ध्यायन् गोकुलं गतो रामकृष्णाभ्यां सत्कृत्य गृहं नीतः
३९ मथुरां कृष्णे गच्छति गोपिकोक्तयः । अथ कालिंद्यामक्रूरस्य विष्णुलोकदर्शनम्
४० अक्रूरः कृष्णमीश्वरेश्वरं मत्वा सगुणागुणभेदैस्तमस्तवीत्
४१ मथुरां प्रविशन् रजकं हत्वा मालाकारेण सुदाम्नालंकृतस्तस्मै वरमदात
४२ कुब्जाचंदनालंकृतस्तामृजूकृत्य धनुर्भंगं विधाय तद्रक्षिणः कंससेवकाञ्जघान
४३ कुवलयापीडं हत्वा रंगं प्रविष्टयो रामकृष्णयोर्नवरसाविर्भावश्चाणूरमुष्टिकादिभाषणं च
४४ चाणूरवधानंतरं कंसवधः तस्य स्त्रीणामाश्वासनं ताभ्यां पितुर्जरासंधस्य दर्शनम्
४५ श्रीकृष्णेन नंदादीनां सांत्वनम् । उग्रसेनस्य राज्याभिषेकः । भगवतो गुरुकुलवासे वरार्थं तत्पुत्रं जीवंतं समर्प्य पुनर्मथुरागमनम्
४६ गोकुल उद्धवं प्रेष्य गोपीनां सांत्वनम् । यशोदानंदयोः शोकापनोदनं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः ।	विषयाः ।
४७	उद्धवः कृष्णादेशेन गोपीर्ज्ञानमुपदिश्य पुनः पुरीमगमत्
४८	कुब्जां रमयित्वाऽक्रूरगृहमागत्य तं पांडवानां क्षेमज्ञानार्थं हस्तिनापुरं प्रैषयत्
४९	गजाह्वयमक्रूरो गत्वा पांडवेषु विषमशील धृतराष्ट्रं बुद्ध्वा पुनरागमत्
५०	जरासंधं पराजित्य तद्भयादिव द्वारकां विर्माय तत्र स्वजनं रात्रावारोपयत्
५१	मुचुकुंददृशा कालयवनं दग्ध्वा तेन स्तुतस्तमनुजग्राह
५२	भयाद्धावन्निव द्वारकामागतः । द्विजमुखाद्रुक्मिण्याः संदेशमशृणोत
५३	भगवान्विदर्भान् गत्वा जरासंधादीनां मिषतां रुक्मिणीं बलादहरत्
५४	शिशुपालपक्षगान् राज्ञो जित्वा रुक्मिणं विरूपयित्वा पुरे भैष्म्याः पाणिमग्रहीत्
५५	रुक्मिण्यामुत्पन्नः प्रद्युम्नः शंबरेण हृतोपि तं हत्वा सस्त्रीको द्वारकामागमत्
५६	स्यमंतकस्यात्मनि मिथ्यारोपं परिहरन् हरिर्जांबवतो जांबवतीं प्राप, सत्राजितः सत्यभामां च प्रत्यपद्यत
५७	पुनः शतधन्वनो वधात् प्राप्तं दुर्यशः परिमार्ष्टुमक्रूरान्मणिमाजहार
५८	कालिंदी—मित्रविंदा—सत्या—भद्रा—लक्ष्मणानां पंचानां पाणीनग्रहीत्
५९	भौमं हत्वा तेनाहृताः षोडशसहस्रकन्या अवरयत् पारिजातं च दिवोऽहरत्
६०	परिहासेन रुक्मिणीं कोपयित्वा कलहे तामसांत्वयत
६१	भगवतः पुत्रपौत्रादिसंततेर्वर्णनम् । अनिरुद्धविवाहे रामतो रुक्मिणो वधः
६२	उखया सह रममाणस्यानिरुद्धस्य रोधनं बाणासुरेण कृतम्
६३	बाणयादवसंगरे माहेश्वरेण ज्वरेण भगवत्स्तुतिः कृता बाणासुरस्य बाहुच्छेदने रुद्रेण स्तुतिः हारि-स्तमनुजग्राहोखयाऽनिरुद्धविवाहश्च
६४	नृगं शापाद्विमोच्य दत्तानां राज्ञां ब्रह्मस्वहरणे दोषमदर्शयत्
६५	गोकुलमागतो रामो गोपी रमयन् यमुनां चकर्ष
६६	कृष्ण आत्मरूपधरं पौंड्रकं जित्वा तन्मित्रेण सुदक्षिणेन काशिपतिना कृतां कृत्यां तत्पुरीं काशिकां च सुदर्शनेनादहत्
६७	रैवतके पर्वते स्त्रीभिः सह रममाणो रामो द्विविदं वानरमहन्
६८	कौरवैर्युधि पराजित्य रुद्धे सांबे तन्मोक्षार्थमागतेन रामेण हास्तिनापुरकर्षणम्
६९	प्रत्येकस्त्रीगृहे भगवतो गार्हस्थ्यं दृष्ट्वा नारदो विस्मयं जगाम
७०	कृष्णस्याह्निकं जरासंधनिगृहीतानां राज्ञां दूतप्रेषणं तदैव युधिष्ठिरनिमंत्रणे कार्यमंत्रविचारणम्
७१	उद्धवमंत्रनिर्णयेनेंद्रप्रस्थं गतो भगवान्पाडवाननंदयत्
७२	युधिष्ठिरेण कर्तव्ये राजसूये निवेदिते दुर्जयं जरासंधं भगवान्भीमेनाघातयत्
७३	जरासंधनिगृहीतान् राज्ञो विमोच्य तान् सत्कृत्य स्वं स्वं राज्यं प्रैषयत्
७४	धर्मराजस्य राजसूयवर्णनं तथाऽग्र्यपूजाप्रसंगेन भगवन्निंदया चैद्यवधः
७५	यज्ञावभृथसंभ्रमे सुयोधनस्याक्षांत्या मानभंगकथनम्
७६	शाल्ववृष्णिरणे द्युमत्सेनगदया रणात्प्रद्युम्ननिर्गमः
७७	नानामायाविनं शाल्वं हत्वा कृष्णस्तद्विमानमचूर्णयत्
७८	विदूरथदंतवक्रौ कृष्णो हत्वा पुरे रेमे । प्रसंगेन रामः सूतमवधीत्
७९	द्विजतुष्ट्ये रामो बल्वलं हत्वा सूतहत्यापापशांत्यर्थं तीर्थ यात्रामकरोत्
८०	कृष्णः श्रीदामानं सतीर्थ्यं गृहागतं विधिवत् संपूज्य गुरुकुलवासकथां मुदाऽकरोत्
८१	तत्पृथुकान् भक्षयित्वा तस्य स्वतुल्यां श्रियमददात्
८२	कृष्णो यदुभिर्ग्रहणयात्रायां कुरुक्षेत्रमगमत् । तत्र यदुभिः सह राजानः कृष्णकथामकुर्वन् गोपनंद गोपीश्च भगवान् संमान्य तेषामात्मज्ञानमुपादिशत्
८३	द्रौपद्या सह जल्पंतीभिः कृष्णस्त्रीभिः स्वस्वकरग्रहाः प्रोक्ताः कृष्णपत्नीभिरिति कथ्यते
८४	वसुदेवनारदसंवादानंतरं वसुदेवयज्ञमहोत्सवं वर्णयित्वा भगवान् सर्वानागतान्स्वगृहंप्रैषयत्
८५	पित्रा संप्रार्थितौ रामकृष्णौ तस्मै ज्ञानमुपादिश्य मात्रे मृतान् पुत्रानयच्छताम्
८६	दंभात्सुभद्रामर्जुनोऽहरत् । भगवान्मिथिलां गत्वा स्वभक्तौ नृपविप्रावनंदयत्
८७	नारायणनारदसंवादप्रस्तावाद्वेदैर्गुणालंबान्निर्गुणावधिः स्तुतिः कृतेति
८८	विष्णुभक्तः कैवल्यपदभागर्वाग्देवताराधकस्तु संपदं प्राप्नोतीति
८९	को महान्देव इति निर्णये भृगुर्विष्णोरुत्कर्षमृषिभ्यः समकथयत्
९०	कृष्णकथाः संक्षेपेणोक्त्वा यादवानां कुलानंत्यं कीर्तितम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यायाः । विषयाः ।

एकादशः स्कन्धः ।

१ कपटगर्भिणीनिमित्तेन सांबादिभिः प्रेरिता ऋषयो मौसलापदेशेन यदुकुलक्षयं भगवदिच्छयाभिदधुः
२ नारदः पृच्छते वसुदेवाय निमिजायंतेयसंवादेन भागवतान्धर्मानुपादिशत्
३ निमिना माया तत्तरणं ब्रह्म कर्मेति चतुर्षु प्रश्नेषु कृतेष्वार्षभैस्तन्निर्णयः कृतः
४ अवतारकथाप्रश्ने राज्ञा कृते द्रुमिलो जायंतेयोऽवतारानकथयत्
५ भक्तिहीनानां का निष्ठेति प्रश्ने तेषां पूजाधिकारार्थं पूजाविधिरुपदिष्टः
६ ब्रह्मादिभिः स्तुतो हरिर्निजं पदं यास्यन्नुद्धवेन स्वधामनयनार्थं प्रार्थितः
७ उद्धवस्यात्मज्ञानसिद्ध्या अवधूतेतिहासेऽष्टौ गुरून् हरिरवर्णयत्
८ नवभ्यो गुरुभ्य उद्धवस्य विवेकाय शिक्षितमुपदिशत्
९ कुररादिभ्यः शिक्षितमवधूताच्छ्रुत्वा नारदः कृतार्थोऽभूत्
१० देहसंबंधादात्मनः संसृतिः स्वतो नेति मतांतरनिरासतोऽकथयत्
११ बद्धमुक्तानां साधूनां च तथा भक्तेर्लक्षणमुद्धवाय भगवानादिदेश
१२ सत्संगमहिमानमादिश्य कर्मानुष्ठातारस्तत्त्यागाधिकारिणो दर्शिताः
१३ सत्त्वगुणसेवया ज्ञानोदयः हंसेतिहासेन चित्तगुणाविश्लेषवर्णनम
१४ भक्तियोग एव परं श्रेयो नान्यत् । इति साधनैः सह ध्यानयोगः कथितः
१५ अणिमाद्याः सिद्धयः ससाधनविष्णुपदप्राप्तिविघ्नभूताः कथिताः
१६ अभिव्यक्तभगवदंशरूपा विभूतय उक्ता उपासनार्थम्
१७ स्वधर्मे भक्तिलक्षणे पृष्टे ब्रह्मचारिगृहस्थयोर्हंसोक्तं धर्ममाह
१८ सविशेषं वानप्रस्थयतिधर्ममाधिकारिविशेषेणाकथयत्
१९ पूर्वोक्तस्य ज्ञानादेर्दिङ्मोहादिवद् भ्रमकारित्वात् त्यागः
२० अधिकारिभेदेन भक्तिज्ञानक्रियात्मकं योगमुपादिशत्
२१ पूर्वोक्तयोगत्रयानधिकारिणां कामिनां द्रव्यदेशादीनां गुणदोषा दर्शिताः
२२ तत्त्वानां मतांतरेणाविरोधः पुंप्रकृत्योर्विवेको जन्ममृत्युविधा चोक्ता
२३ कदर्याख्यानेन तिरस्कारसहनोपायो भिक्षुगीतेन धिया मनसः संयम उदीरितः
२४ आत्मनः सर्वभावानामागमापायचिंतया सांख्ययोगेन मनोमोहो निवारितः
२५ आत्मनो नैर्गुण्यज्ञानलाभाय चित्तप्रभवाः सत्त्वादिवृत्तीरनेकधाऽकथयत्
२६ दुष्टसंगेन योगनिष्ठाविघातः साधुसंगेन तत्प्राप्तिरित्यैलगीतेन वर्णितम्
२७ सद्यश्चित्तप्रसादकः सर्वकामाप्तिहेतुश्च क्रियायोगः सांगः प्रोक्तः
२८ पूर्वं विस्तरेणोक्तो ज्ञानयोग एकः सौकर्यार्थं पुनः संक्षेपेण निगदितः
२९ पूर्वं विस्तरेण प्रोक्तं भक्तियोगं संक्षेपेण स्वभक्ताय हरिरकथयत्
३० स्वधाम गंतुमिच्छन् हरिर्मौसलापदेशेन स्वकुलं संजहार
३१ स्वधाम्नि प्रविष्टे हरौ तमनु वसुदेवादयो देहान् जहुरिति वर्णितम्

द्वादशः स्कंधः ।

१ मागधान्वये कलिना मलीमसांतःकरणा भाविनो राजानो निर्दिष्टाः
२ कलिदोषवृद्धौ भगवता कल्क्यवतारेणाधार्मिकाणां नाशे पुनः कृतयुगागमः
३ भूमिगीतै राज्ञां मोहादिवर्णनं तथा दोषभूयिष्ठे कलौ तद्दोषहंत्री हरेः स्तुतिर्निर्दिष्टा
४ नैमित्तिकः प्राकृत आत्यंतिको नित्य इति चतुरः प्रलयान्प्रदर्श्य तन्निस्तारे भगवत्कथेति सिद्धांतितम्
५ परीक्षितः परब्रह्मोपदेशेन तक्षकसंदंशाद्भयनिवारणम्
६ परीक्षितो मोक्षस्तत्पुत्रजनमेजयस्य तक्षकरोषात्सर्पसत्रं तथा व्यासेन वेदत्रयशाखाविभागश्च तथा गुर्वाज्ञया याज्ञवल्क्यः सूर्यमाराध्य वेदं लेभे
७ अथर्ववेदविस्तारस्तथा पुराणविभागेन तल्लक्षणादि भागवतश्रवणफलं च निगदितम्
८ तपसि तिष्ठतो मार्कंडेयस्य कामादिभिरसंमोहः, तथा तत्प्रसादार्थमागतयोर्नरनारायणयोः स्तुतिः
९ भगवन्मायादिदृक्षोर्मुनेर्मिथ्याप्रलयदर्शनेन प्रलयाब्धौ वटपत्रस्थस्य शिशुभूतस्य भगवतो मुखे प्रवेशनिर्गमौ च कथितौ
१० शिव आगत्य मार्कण्डेयाय वरमददात् तेन सह प्रीतिमकरोत्
११ उपासनासिद्ध्यै महापुरुषवर्णनं तथा रवेः प्रतिमासं पृथक् पृथक् व्यूहकथनम्
१२ भागवतोक्तार्थानां यथाक्रमं संक्षेपेण कथनम्
१३ पुराणप्रतिपाद्यं देवं नमस्यन्नष्टादशपुराणग्रंथसंख्यां चाकथयत् ॥ **इति भा० सूची समाप्ता ॥**

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ पद्ममहापुराणीयश्रीमद्भागवतमाहात्म्यं सटीकं प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ गोविंदं प्रणमामि गीष्पतिसमं वित्तं भुवि प्राग्जयं स्वाभीष्टप्रदमंघ्रियुग्ममनिशं शाकंभरीयं मुदा ॥ यद्देवाः खलु पूजयंति सततं कायाऽऽकृसंशांतये श्रीमद्भागवताख्यकल्पकुरुहो माहात्म्यटीकाकृते ॥ १ ॥ सर्वज्ञस्य कथं ज्ञेयोऽभिप्रायोऽल्पज्ञतः स्फुटम् ॥ तथापि प्रेमवशतो व्याख्यां कुर्मो यथामति ॥ २ ॥ व्याख्यातं बहुधा पूर्वैर्ऋषिभिः सागरोपमैः ॥ राधाकृष्णप्रसादेन व्याख्यामः पल्वलोपमाः ॥ ३ ॥ पाद्मयमाहात्म्यटीकर्जू राधाकृष्णवरेण हि ॥ श्रीराधाकृष्णप्रीत्यर्थं यथामति वितन्यते ॥ ४ ॥ श्रीभागवतमाहात्म्यं पाद्मोक्तं वर्वृतीति हि ॥ प्रसिद्धं षड्भिरध्यायैस्तद्व्याख्यानं समारभे ॥ ५ ॥ ग्रंथांतरं हि ग्रंथस्य टीकेति मुनयो जगुः ॥ तन्न: विज्ञायते सर्वैर्मच्छ्रमः सफलस्ततः ॥ ६ ॥ अथैतच्छास्त्रादौ पूर्वापरसंगतिमलभमानः शांडिल्यगोत्रो गौडधुरंधरो हरिद्वंशावतंसो:शेखावाट्यंतर्गतविजयपुरनिवासी ब्राजलालीरामप्रतापशर्मा बालबोधाय श्रीमद्भागवतमाहात्म्यस्य ऋजुनाम्नीं टीकां चिकीर्षुराचार्यैरुपन्यस्तां सूतोक्तिं नमस्कारात्मकमंगलनिरूपिणीं व्याख्याति ॥ यमिति—तमानतोस्मि तस्य शरणं गतोस्मि । कथंभूतं तम्—यं द्वैपायनः द्विर्गता आपो यस्मिंस्तत् द्वीपं, तदयनं स्थानं यस्य स तथा वेदव्यासो विरहकातरः पुत्रस्यात्मनश्च विरहात्कातरो विकल उद्विग्नचित्तः—हे पुत्र इति प्लुतेनाजुहावाहूतवान् । कथं तद्विरहो जात इति संशयमपनुदन् विशेषयति—प्रव्रजंतमिति । संन्यस्य प्रयांतम्, प्रपूर्वकस्य व्रजधातोः

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ १ ॥

संन्यासोर्थः ‘ मातापित्रो रुदतोः प्रव्रजति पुत्रः ’ इत्यादौ तथा दर्शनात् । वैराग्यमंतरा कथं प्रव्रजनम् “ यदहरेव विरज्येत तदहरेव प्रव्रजेत् ” इति श्रुतिगर्जनात् । तत्राह—अनुपेतं सर्वत्र लोकोपभोग्यवस्तुषु क्षयिष्णुत्वेन बंधनहेतुतया चासक्त्या दोषदर्शनेन संजाततीव्रवैराग्यात् संगरहितम्, एतेन वैराग्यं सूचितम् । सदसद्विवेचनद्वारा कीदृक् संन्यासी भवति, किं तेन करणीयमित्यपेक्षायां निष्क्रियत्वात्तस्य कृत्यं नास्तीति दर्शयति—अपेतकृत्यमिति । अपेतं त्यक्तं कृत्यं कर्त्तव्यमात्रं येन स तथा तम्, मुनिं मननशीलमिति तन्मयतया शुकरूपया वाण्या तरवो वृक्षा अभिनेदुः उत्तरं ददुः । किं तदित्यपेक्षायामाह—अयमिति । अयं त्वदभिमतः पुत्ररूपोर्थः पुत्रपदार्थो वा । सर्वभूतहृत् ब्रह्मभावनया तथाभूतः । यद्वा—सर्वाणि भूतानि हरत्यात्मसात्करोतीति तथा सर्वरूपः ‘ स सर्वनामा स च सर्वरूपः ’ इत्युक्तेः । हरतिरत्र स्वीकारार्थः । यद्वा—सर्वेषां भूतानां हृत्, अंतरात्मेत्यर्थः । यद्वा—ॐ तत्सदिति निर्देशात् तद् ब्रह्म स्वरूपमस्येति तन्मयो ब्रह्मरूपः शुकस्तस्य भावस्तत्ता तया ब्रह्मभावनयाऽयं सर्वभूतहृदित्युत्तरं वृक्षा ददुः । इदमत्राकूतम्—सृष्टिर्हि द्विविधा—स्थावरा जंगमा चेति । यथा स्थावरा वयम्—अयं मे पुत्रोहमस्य माता पितेति मोहशून्यास्तथा भवद्भिरपि भवितव्यमिति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किञ्च--पुराणांगत्वादस्य तदीयमनुबंधचतुष्टयमत्राप्युन्नेयम् । तथाहि--" सर्ववेदेतिहासानां सारं सारं समुद्धृतम् " इति वचनात्, " इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् " इत्युक्तेश्च जन्यजनकभावो बोध्यबोधकभावोऽङ्गाङ्गिभावो वा संबंधः । परया भक्त्या ब्रह्मात्मैकत्वं विषयः । निःशेषानर्थनिवृत्त्या कैवल्याख्यं प्रयोजनम् । तज्जिज्ञासुरधिकारीत्यलं विस्तरेण ॥ १ ॥ " कः प्रष्टा कोऽत्र वक्ता च संवादः कुत्र चैतयोः । एतद्वक्तुं कथाख्यानं रचयत्यादरान्मुनिः ॥ " इति भूमिकां निर्माय सूतशौनकसंवादं प्रकटयति--नैमिष इति । नैमिषे क्षेत्रे आसीनमासनोपर्यधिष्ठितं सूतं जात्या, महामतिं महती मतिर्मनीषा यस्य स तथा तम्, अगाधबुद्धिमित्यर्थः । अभिवाद्य प्रणम्य कथास्वमृतमतिमधुरं तदेव रसस्तस्यास्वादोऽवलेहनं तस्मिन् कुशलो निपुणः स तथा । कथैवामृतरसमिति वा । शौनकः शुनकस्यापत्यमब्रवीत् पृष्टवान् । एतेन सूतस्य वक्तृत्वं शौनकस्य च प्रष्टृत्वं सूचितं भवति ॥ २ ॥ शौनक उवाचेति न पुनरुक्तिदोषः, किन्तु पुराणशैलीयमिति विष्णुसहस्रनामभाष्यविवरणे आनंदगिरिणापि निरूपितमस्ति । प्रश्नमाह--अज्ञानेति । हे सूत अज्ञानमेव ध्वांतं गाढांधकारस्तस्य विध्वंसो नाशस्तदर्थं सूर्याणां कोटिरिति कोटिसूर्या तया समा तुल्या प्रभा दीप्तिर्यस्य स तथा तत्संबुद्धिरिति सांप्रदायिकाः । नव्यास्तु-कोटिश्च सूर्याश्चेति कोटिसूर्यास्तैः समा समाना प्रभा कांतिर्यस्य स तथा तत्संबोधनमिति व्याचख्युः । व्याख्यानद्वयमप्यसाधु असंभवदोषात् ।

नैमिषे सूतमासीनमभिवाद्य महामतिम् ॥ कथामृतरसास्वादकुशलः शौनकोऽब्रवीत् ॥ २ ॥ शौनक उवाच ॥ अज्ञानध्वांतविध्वंसकोटिसूर्यसमप्रभ ॥
सूताऽऽख्याहि कथासारं मम कर्णरसायनम् ॥ ३ ॥ भक्तिज्ञानविरागाप्तविवेको वर्धते कथम् ॥ मायामोहनिरासश्च वैष्णवैः क्रियते कथम् ॥ ४ ॥

"संतापनं कोटिधनुर्धराणाम् "इत्यादौ संख्यावाचककोटिशब्दस्य पूर्वं पाठः । " प्राक् पूजितो ब्राह्मणकोटिगण्यः "इत्यत्राग्रगण्य इत्यर्थादुत्तरपदे कोटिशब्दोऽग्रभागवाचीति वेदार्णवे सनत्कुमारोक्तिस्ततः प्रमाद एवायमिति । 'सूर्यकोटिसमप्रभ'इति पाठः साधुः । "आदित्यो वै यूपः" इतिवदर्थवादमात्रमेतदिति केचित् । गुरवस्तु--सूर्यस्य सूर्यकांतमणेः कोटिरग्रभाग इति कोटिसूर्यस्तेन समा सदृशी प्रभा दीप्तिर्यस्य स तथा तत्संबोधनमित्याहुः । कथासारं त्वमाख्याहि कथय । " कथा बहुविधा लोके तासु सारो निगद्यताम् " इत्युक्तेः । मम कर्णयो रसायनं प्रियम् । ' यन्नः ' इति पाठे नोऽस्माकं श्रोतृबाहुल्याभिप्रायेण बहुवचननिर्देशः । यद्यपि ' नृत्ये गीतं रसायनम् ' इति कामशास्त्रे, तथापि तस्य प्रमादहेतुत्वेनानर्थसूचकत्वान्नात्रोपयोगः । ऋषीणां नोऽस्माकं कर्णरसायनमिति विशेषणबलेन तन्निरासाच्च ॥ ३ ॥ किञ्च--पूर्वोत्तरविभागाभ्यां प्रश्नद्वयं पुनः करोति--भक्तीति । " भक्तिज्ञानविरागाणां प्रवाहो वर्द्धते कथम् " इति पाठे तु सुगमोऽर्थः । यथाश्रुतपाठे तु भक्तिज्ञानविरागाणाम् आप्तो यथार्थो विवेक इत्यर्थे स्वारस्यम् । " का भक्तिर्वास्तवी ज्ञानं वास्तवं किं विरागकम् " इति फलितार्थात् । कथं वर्द्धते, जायत इत्यर्थः । "भक्तिज्ञानविरागाणां बलं च वर्द्धते कथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्" इति पाठो गुरुसंप्रदायतः साधुरिति द्वितीयः प्रश्नः । वैष्णवैः " विष्णवर्पिताखिलाचारास्ते हि वै वैष्णवाः स्मृताः " इत्युक्तलक्षणैः मायया मोहाऽविवेकः तस्य निरासो निवृत्तिः कथं क्रियते । मायासु मोह इति केचित् । इति तृतीयः प्रश्नः ॥ ४ ॥ किञ्च–इहेति–इह भरतखंडे, युगव्यवहारस्यात्रैव परिचारादिति हनमदुक्ति र्भीमसेनं प्रति वनपर्वणि । घोरे भयंकरे कलौ कलियुगे प्राप्ते सति । ' प्रायः ' इति पाठे इहास्मिन् घोरे कलौ कलियुगे जीवो देही प्रायो बाहुल्येनासुरतामसुरभावं गतोऽस्ति। असुरभावेन च बहुतरपापकरणान्नानाक्लेशाः संभवंतीत्यतः क्लेशैर्दुःखैराक्रांतस्य व्याप्तस्य तस्यैव जीवात्मनः शोधने परायणं साधनं किमिति चतुर्थः प्रश्नः ॥ ५ ॥ पुनर प्याह–श्रेयसामिति । श्रेयसां कल्याणानां मध्ये परं यत् श्रेयो भवेत् निर्धारणात् परत्वलाभः । पावनानां पवित्रं कुर्वतां शुद्धिहेतूनां मध्ये परमं पावनं भवेत्, यच्च कृष्णस्य प्राप्तिकरं भवेत्, तत्साधनं शश्वत् नैरंतर्येणाधुनेदानीं त्वं वदेति सप्तमः प्रश्नः ॥ ६ ॥ " नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः " इति वचनात् तूष्णींभूते स्वसरलता प्रदर्शनपूर्वकं गुरुभावमाविष्कुर्वंस्तदुत्तरसामर्थ्यं सूचयति–चिंतामणिरिति । " यस्य कांतिलवस्पृष्टं कांस्यं ताम्रमयस्त्रपु । पाषाणादिकमन्यद्वा सर्वं भवति कांचनम् । चिंता

इह घोरे कलौ प्राप्ते जीवश्चासुरतां गतः ॥ क्लेशाक्रान्तस्य तस्यैव शोधने किं परायणम् ॥ ५ ॥ श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनम् ॥ कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुना ॥ ६ ॥ चिंतामणिर्लोकसुखं सुरेन्द्रः स्वर्गसंपदम् ॥ प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम् ॥ ७ ॥ सूत उवाच ॥ प्रीतिः शौनक चित्ते ते यतो वच्मि विचार्य च ॥ सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम् ॥ ८ ॥ भक्त्योघवर्धनं यच्च कृष्णसंतोष हेतुकम् ॥ तदहं तेऽभिधास्यामि सावधानतया शृणु ॥ ९ ॥

मणिः स विज्ञेयो मुनिभिः सिद्धिसाधनः ॥ " इति ब्रह्मोत्तरखंडे चिंतामणिप्रभाव उक्तः । भाषायाम् ' पारस ' इति । लोकस्य जनस्य सुखं लोके वा सुखं संपदादि प्रयच्छति ददाति । प्रपूर्वस्य दाण्धातोर्दानार्थत्वात् । सुराणामिंद्रः सुरेंद्रः प्रीतः स्वर्गसंपदं ददाति । गुरुः प्रीतः सन् ज्ञानोपदेशात् योगिभिरपि दुर्लभं दुष्प्रापं वैकुंठं निश्चलं सनातनं स्थानं ददाति । " आभूतसंप्लवं स्थानममृतं तं सनातनम् " इत्युक्तेः ॥ ७ ॥ अथ साधुभावनया पृष्टः सूत एकेनैव वस्तुना सर्वप्रश्नोत्तरं दातुं प्रति जानीते–प्रीतिरिति सार्धैस्त्रिभिः । हे शौनक ते तव चित्ते प्रीतिरस्त्यतोऽस्माद्धेतोर्विचार्य विचारं कृत्वा वच्मि अहं ब्रवीमि । च एवार्थे । सर्वेषु शास्त्रेषु ये सिद्धांताः, सर्वे च ते सिद्धांताश्चेति तथेत्येके।तेभ्यो निष्पन्नमुत्पन्नम् अर्थात् परमसिद्धांतमिति प्रथमप्रश्नोत्तरम्।तत्र हेतुः–संसारभयनाशनमिति । संसारे जगति यद्भयं शत्रुराजग्रहापदा दिभिस्तस्य नाशनमिति सगुणोपासकाः । निर्गुणोपासकास्तु–संसरति जीवोऽनेनेति संसारो मूलाज्ञानं तस्य नाशनमित्याहुरिति तृतीयप्रश्नोत्तरम्॥८॥ किञ्च–भक्तेरोघः पूरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवाह इति यावत् । तस्य वर्द्धनं वृद्धिकरम्, उपलक्षणमेतज्ज्ञानवैराग्ययोरपि । एतेन द्वितीयप्रश्नाय दत्तोंजलिः । यच्च कृष्णस्य संतोषः संतुष्टिः संप्रीतिस्तस्य हेतुकं हेतुःइति कृष्णप्राप्तिकरणसाधनोत्तरम् । चकारात् परं श्रेयः परं पावनमपीदमेवेति ध्वनितम् । तत् ते तुभ्यमहमभिधास्यामि कथयिष्यामि । सावधानतया समाहितमनसा त्वं शृणु ॥ ९ ॥ किं तदित्यपेक्षायामाह—कालेति । श्रीमद्भागवतं शास्त्रं भवति कलौ अंत्ययुगे नान्यदित्यर्थः । कृतादित्रिके ज्ञानवैराग्ययोः प्राबल्यात् । केनोक्तमिदं तत्राह—कीरेण शुकेन भाषितं कथितम् । किमर्थमित्यत आह—कालेति । काल एव व्यालः सर्पस्तस्य मुखे ग्रासो जगतो निगरणम् ‘ कालो जगद्भक्षकः ’ इत्युक्तेः । तस्मात्त्रास उद्वेगस्तस्य निर्णाशो निश्चयेन नाशः क्षयस्तस्य हेतवे तदर्थम् ॥ १० ॥ एतदेवोत्तमं सर्वत इत्याह—एतस्मादिति । एतस्माच्छ्रीमद्भागवताच्छास्त्रा दपरमन्यत् किंचित् किमपि न वियते नास्ति, इदमेवेत्यर्थतः सिद्धम् । मनःशुद्ध्या इति—मनसः शुद्ध्यै शोधनाय । पूर्वपुण्यमंतरेतत्प्राप्तिर्नास्तीत्याह—जन्मांतर इति । यदा जन्मांतरे पुण्यं भवेत् । ‘ कृतम् ’ इति पाठः साधुः । तदा भागवतं लभेत् प्राप्नुयात् ॥ ११ ॥ उक्तार्थदृढीकरणायोत्तरप्रकरणारंभ इति भणति—परीक्षित इति ।

कालव्यालमुखग्रासत्रासनिर्णाशहेतवे ॥ श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥१०॥ एतस्मादपरं किंचिन्मनःशुद्ध्यै न विद्यते ॥ जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत् ॥ ११ ॥ परीक्षिते कथां वक्तुं सभायां संस्थिते शुके ॥ सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन् ॥ १२ ॥ शुकं नत्वावदन्सर्वे स्वकार्यकुशलाः सुराः ॥ कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् ॥ १३ ॥ एवं विनिमये जाते सुधा राज्ञा प्रपीयताम् ॥ प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ॥ १४ ॥

सभायां गंगातीरे ऋषीणां मुनीनां समाजे शुके संस्थिते उच्चासनोपरिनिविष्टे सति । किमर्थम्—परीक्षिते परीक्षिदर्थं कथां वक्तुम् । सुधाया अमृतस्य कुंभं कलशं गृहीत्वा तत्र स्थाने देवाः समागमन् समायाता अभूवन् ॥ १२ ॥ ‘ लाभार्थं व्यवह्रियते ’ इति नीत्या स्वाभिप्रायं कथयंतीत्याह—शुकमिति । शुकं शुकदेवं नामैकदेशे नाममात्रस्य ग्रहणात्, नत्वा नमस्कृत्य स्वकार्ये कुशला निपुणाः सर्वे समस्ताः सुरा देवा अवदन् अब्रुवन् । किमवदन्नित्यत आह—कथासुधामिति । सुधाममृतम्, इमां कलशे स्थितां गृहीत्वात्मसात्कृत्वा । एवकारेण निश्चयार्थेन कूटव्यवहारनिषेधः सूच्यते । कथासुधां कथैवामृतं प्रयच्छस्व देहि, अस्मभ्यमिति शेषः ॥ १३ ॥ सुधया किं भविष्यतीत्यत आह—एवमिति । राज्ञा द्विजकोपप्रयुक्ततक्षकमृत्युभीतेन परीक्षिता सुधाऽमृतं प्रपीयताम् । एतेन विषनिवृत्त्या जीवनलाभः सूचितः । श्रीमद्भागवतामृतं सर्वे वयं प्रपास्याम इति । एवममुना प्रकारेण स्ववस्तुदानेन परवस्त्वादानं विनिमयः । ‘ विनियमे ’ इति पाठो भ्रांत्या लेखकप्रमादाद्बोध्यस्तदर्थस्य भिन्नत्वात् । तस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञाते सिद्धे सति ॥ १४ ॥ "धूर्त्ता इमे छलयितुमामायातास्तु कैतवात् । साधुवेषं समाश्रित्य बालवित्तहरा इव ॥ न सुज्ञः स्वधनं दत्ते निवर्त्स्यन्ति हतोद्यमाः ।" इति वचनान्महदंतरं विनिमये वस्तुनोर्बुद्ध्वाऽवहसतीत्याह—क्वेति । काचः क्व मणिः क्व, लोके द्वौ क्वशब्दौ महदंतरं सूचयतः । एतयोर्बह्वंतरं यथा लोके भवति तथैव सुधा क्व कथा क्वेति । सुधापायिनां देवानां पुण्यक्षये मर्त्यलोकागमनजन्ममरणादि भवति, हरिकथामृतपायिनां तु मोक्षानंदप्राप्त्या तदभाव इति महदंतरं विचार्य ब्रह्मरातः ब्रह्मणा दत्तः शुको देवान्प्रतारिणो जहास । तदा तस्मिन्समये । हेति स्फुटम् ॥ १५ ॥ किमुपहासेनेति देवानां धाष्टर्यं वीक्ष्य स्वार्थभ्रंशमाह—। न केवलहास्य मात्रं प्रत्युत कार्यभ्रंशोपि जात इत्याह—अभक्तानिति । अभक्तान् तांश्च देवान् भक्तिहीनान् सुधापानाऽप्सरःसंभोगादिनोन्मत्तत्वेन हरेर्विस्मृतित्वात्, विज्ञाय ज्ञात्वा स शुकः कथामृतं देवेभ्यो न ददौ । अत इति ज्ञायते—श्रीमद्भागवती वार्त्ता देवानामपि दुर्लभा दुष्प्रापा, किमु मर्त्यानामिति कैमुतिकन्यायसिद्धम् ॥ १६ ॥ न त्वेतावन्मा

क्व सुधा क्व कथा लोके क्व काचः क्व मणिर्महान् ॥ ब्रह्मरातो विचार्यैति तदा देवाञ्जहास ह ॥ १५ ॥ अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतम् ॥ श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा ॥ १६ ॥ राज्ञो मोक्षं तथा वीक्ष्य पुरा धातापि विस्मितः ॥ सत्यलोके तुलां बद्ध्वाऽतोलयत्साधनान्यदः ॥ ॥ १७ ॥ लघून्यन्यानि जातानि गौरवेण इदं महत् ॥ तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ॥ १८ ॥ मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ ॥ पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ॥ १९ ॥

त्रेऽलम्बुद्धिः करणीया परमपदप्राप्तिहेतुरपीयमित्याह—राज्ञ इति । "विद्युच्चौराग्निशस्त्राहिगजसिंहादिभिश्चितः । विषादिभिर्हेतुभूतैर्मृतो न लभते गतिम् ॥ " इतिस्मृतेः । सर्पदंशेन मृतस्य परीक्षितो गतिरेव दुर्लभा किमुतेंद्रादिपदं कुतस्तरां ब्रह्मलोकः कुतस्तमां वैकुंठप्राप्तिर्मुक्तिश्च । अपीत्यत्यंतासंभावनायाम् । राज्ञो मोक्षं तथा श्रीमद्भाग वतश्रवणेन वीक्ष्य दृष्ट्वा धाता ब्रह्मा विस्मितः कथमिदं वैपरीत्यं जातमिति व्यग्रोऽभूत् । ततः किं कृतवानित्यत आह—सत्यलोक इति । अजो ब्रह्मा सत्यलोके तुलां धटं बद्ध्वा साधनानि मोक्षोपयोगीनि षट् शास्त्राणि सांगान्येकत्र भागे न्यस्य श्रीमद्भागवतं चान्यत्र अतोलयत् ॥ १७ ॥ कथमयं विभागो ज्ञात इत्यत आह—लघूनीति । अन्यानि सर्वाणि लघूनि न्यूनानि जातानि, गौरवेण हेतुनेदं भागवतं महज्जातं तेन महापुराणमिदमिति प्रसिद्धम् । तदा तस्मिन् काले सर्वे ऋषिगणाः परमं विस्मयं ययुः प्रापुः ॥ १८ ॥ ततः किं, तत्राह—मेनिर इति । भागवतं शास्त्रं क्षितौ पृथिव्यां भगवतो विष्णो रूपं मूर्तिं मेनिरे । तदुक्तं पुराणांतरे । तथाहि—" पादौ तु प्रथम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कंधो द्वितीयो जानुनी स्मृतः ॥ तृतीयः सक्थिनी ज्ञेयश्चतुर्थः कटिरुच्यते ॥ १ ॥ नाभिं तु पंचमं विद्याद्धृदयं षष्ठ ईरितः ॥ सप्तमस्तु उरः प्रोक्तमष्टमः कंठ उच्यते ॥ २ ॥ स्कंधौ तु नवमः स्कंधो दशमो मुखमीरितम् ॥ कर्णाक्षिनासिकायुक्तं सर्वार्थपरिपूरितम् ॥ ३ ॥ एकादशस्तूत्तमांगं द्वादशो ब्रह्मरंध्रकम् ॥ एवं भागवतं शास्त्रं विष्णुमूर्तिः प्रकीर्त्तितम् ॥ ४ ॥ " इति । पाद्मे तु किंचिद्वैलक्षण्येनोक्तमिति तत्फलमाह—पठनादिति । पठनाच्छ्रवणाच्च सद्यस्तत्काले वैकुंठफलदायकं भवति ॥ १९ ॥ तत्रापि विशेषमाह—सप्ताहेति । सप्ताहे सप्तदिने श्रवणेन सर्वथा सर्वप्रकारेणापि वा मुक्तिदायकं दयापरैः कृपालुभिः सनकाद्यैर्ब्रह्मपुत्रैर्नारदाय प्रोक्तं, भाग० इति शेषः ॥ ॥ २० ॥ ततः पूर्वं नारदेनेदं पुराणं न श्रुतमिति चेन्नेत्याह—यद्यपीति । ब्रह्मणः पितुः संबंधाद्यद्यपि एतत् पुराणं सुरर्षिणा नारदेन श्रुतं तथापि सप्ताहे सप्तदिने श्रवणस्य विधिर्विधानं तस्य तस्मै नारदाय कुमारैः सनकाद्यैर्भाषितः कथितः ॥ २१ ॥ उक्तसंबंधं दुर्घटं मत्वा शौनकः पृच्छति—शौनक उवाचेति । कथमुक्तः संबंधो

सप्ताहश्रवणेनैव सर्वथा मुक्तिदायकम् ॥ सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः ॥ २० ॥ यद्यपि ब्रह्मसंबन्धाच्छ्रुतमेतत्सुरर्षिणा ॥ सप्ताहश्रवण विधिः कुमारैस्तस्य भाषितः ॥ २१ ॥ शौनक उवाच ॥ लोकविग्रहयुक्तस्य नारदस्यास्थिरस्य च ॥ विधिश्रवे कुतः प्रीतिः संयोगः कुत्र तैः सह ॥ २२ ॥ सूत उवाच ॥ अत्र ते कीर्तयिष्यामि भक्तिपुष्टं कथानकम् ॥ शुकेन मम यत्प्रोक्तं रहः शिष्यं विचार्य च ॥ २३ ॥ एकदा तु विशालायां चत्वारो ऋषयोऽमलाः ॥ सत्संगार्थं समायाता ददृशुस्तत्र नारदम् ॥ २४ ॥

दुर्घट इति जिज्ञासायामाह—लोकेति । लोकानां जनानां विग्रहो विरोधस्तस्मिन् युक्तो दैवेन नियुक्तस्तस्याऽत एवाऽस्थिरस्य एकत्र स्थातुमशक्तस्य नित्यं भ्रममाणस्य नारदस्य विधिश्रवे विधिः विधितः श्रवः श्रवणम् तस्मिन् । (अकारांतः श्रवशब्दोत्र छांदस इत्येके) । प्रीतिः प्रेम कुतः कस्माद्धेतोर्जाता । कुत्र स्थाने तैः कुमारैः सह संयोगः, जात इति शेषः ॥ २२ ॥ तत्संवादमवतारयितुं सत उवाचेति सूतोक्तिः । तथाहि—अत्रेति । अत्रास्मिन्संवादे शुकेन मम मह्यं यत् प्रोक्तं रहः एकांते शिष्यं शुश्रूषां करोतीति शिष्योयमिति विचार्य विचारं कृत्वाऽऽलोच्य वा । तत्ते तुभ्यं कीर्त्तयिष्यामि कथयिष्यामि । किं तत्तत्राह—कथानकम् आख्यानम् । कीदृशम्—भक्ति पुष्टं भक्तेः पुष्टं, पोषणहेतुरिति पुष्टं तत् ॥ २३ ॥ एतदेव विशदीकरोतीत्याह—एकदेति । एकदा एकस्मिन् काले विशालायां पुर्याम् । सामीप्यार्थे सप्तमीयम् । तेन विशालासमीपे बदर्याश्रमे इत्यर्थो बोध्योऽन्यथा पुर्य्यां जनसमुदायकोलाहलत्वेन सत्संगो दुर्घटः । वेदसंमितत्वादस्य पुराणस्य फलातिशयार्थमेतत्पाठस्य साधुत्वमिति संदर्भः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमलाः शुद्धाः, वीतरागत्वात् । सत्संगार्थं समायातास्तत्रैवाश्रमे नारदं ददृशुः । तु शब्दोऽजितेंद्रियदुर्जनव्यावृत्त्यर्थः ॥ २४ ॥ औदासीन्येन शंकिताः पप्रच्छुः । कुमारा ऊचुरिति स्पष्टार्थः । किमित्यपेक्षायामाह—कथमिति द्वाभ्याम् । हे ब्रह्मन् कथं केन प्रकारेण भवान् दीनमुखो मलिनास्यः, अस्तीति शेषः । क्रियान्तराऽभावे प्रथमपुरुष परावस्तिभवती अध्याह्रियेते, न हि क्रियाविनिर्मुक्तं वाक्यमस्तीति शिष्टोक्तेः । कुतः कस्मात्कारणात् । चिंतातुरः चिंतयाऽऽतुरो दुःखी । कुतः स्थानात्तवाऽऽगमनम्, जातमिति शेषः । त्वरितं शीघ्रं कुत्र स्थाने त्वया गम्यते ॥ २५ ॥ इदानीमिति पूर्वान्वयि पदम् । किञ्च—शून्यचित्तः शून्यं कर्त्तव्यहीनं चित्तं यस्य स तथा । तत्र दृष्टांतः—गतवित्तो गतं वित्तं धनं यस्य स तथा । 'धनहीनः श्वसन्मृतः' इत्युक्तेः । जनः पुंविशेषो यथा शून्यचित्तस्तद्वदिदं पूर्वोक्तं मुखम्लान्यादि मुक्तसंगस्य मुक्तस्त्यक्तः संगो गृहजनधनादीनां येन स तथा तस्य तव नोचितं न योग्यमस्ति । कारणमनुचितस्योत्पत्तौ हेतुं वद ब्रूहि ॥ २६ ॥ इति पृष्ट उत्तरं ददातीत्यार्थिकसंगत्या लभ्यते ।

कुमारा ऊचुः[1] ॥ कथं ब्रह्मन्दीनमुखः कुतश्चिंतापरो भवान् ॥ त्वरितं गम्यते कुत्र कुतश्चागमनं तव ॥ २५ ॥ इदानीं शून्यचित्तोऽसि गतवित्तो यथा जनः ॥ तवेदं मुक्तसंगस्य नोचितं वद कारणम् ॥ २६ ॥ नारद उवाच ॥ अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति ॥ पुष्करं च प्रयागं च काशीं गोदावरीं तथा ॥ २७ ॥ हरिक्षेत्रं कुरुक्षेत्रं श्रीरंगं सेतुबन्धनम् ॥ एवमादिषु तीर्थेषु भ्रममाण इतस्ततः ॥२८॥ नापश्यं कुत्रचिच्छर्म मनः संतोषकारकम् ॥ कलिनाऽधर्ममित्रेण धरेयं बाधिताऽधुना ॥ २९ ॥ सत्यं नास्ति तपः शौचं दया दानं न विद्यते ॥ उदरंभरिणो जीवा वराकाः कूट भाषिणः ॥ ३० ॥

एवमुत्तरत्रापीदं यथायथं योज्यम् । तेन नारद उवाचेत्युपन्यस्तं भगवता व्यासेन । स्ववृत्तांतमुपोद्घातत्वेन नारदो वर्णयति—अहमित्यारभ्य "तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः" इत्यन्तग्रंथेन ॥२७॥ किमित्यत आह—एवमिति।इत्यादिषु तीर्थेषु। इतस्ततो यत्रतत्र भ्रममाणो भ्रमन् ॥ २८ ॥ मनःसंतोषकारकं मनसः संतोषः संतुष्टिस्तस्य कारकं कर्तृ शर्म सुखं कुत्रचित्क्कापि नापश्यमहं न दृष्टवान् । तत्र कारणमाह—कलिनेति । अधर्ममित्रेण अधर्मः पापं मित्रं यस्य स तथा तेन कलिना कलियुगेन इयं धरा कर्मभूर्बाधिता धर्मकार्याद्युच्छेदेन हिंसिता ॥ २९ ॥ तत्प्रकारं दर्शयति—सत्यमित्यादिभिः षड्भिः । सत्यं नास्ति । तप आदिषु इयमेव क्रिया । तेन तपो नास्ति, शौचं

१ "कुमारा ऊचुरित्यत्र व्यवस्था प्रोच्यते बुधैः । एकदा भाषणं युक्तं सर्वेषां नेति संशयात् ॥ एकैकस्य द्विरुक्तिर्हि क्रमेण परिकल्प्यते । समूहवचनस्यायं गूढोऽभिप्राय ईरितः॥" इति गुरुसंप्रदायात् कुमारा ऊचुरिति । अन्यथा वेदस्तुत्यारंभे 'अपि चक्रुः प्रवचनमेकं शुश्रूषवो परे' इतिवद्वचनमुपलभ्येत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्तीत्यर्थः । दानं न विद्यते । जीवाः प्राणिनः उदरंभरिण उदरं भर्तुं शीलं येषां ते तथा, उदरभरणतत्परा इत्यर्थः । वराका अतितुच्छा अत एव कूटभाषिणो मिथ्यावादिनः ॥ ३० ॥ मंदा बुद्धिहीना मूर्खाः । सुमंदमतयः सुमंदा शतकृत्वः पाठनेऽपि श्लोकपादावधारणाऽसमर्था मतिर्येषां ते तथा, पाठकानुकूल्येप्यालस्यादिना तत्समीपे वासाभावात् कुवासनया तदुक्तानवधारणाच्च । मंदभाग्या राजाद्याश्रयत्वेपि निर्द्धना वृथोद्यमत्वात्, कृतोद्यमस्य वैफल्याच्च । उपद्रुताः जातेपि गुर्वादिसंबंधे विघ्नरोगादिग्रस्ताः । हि निश्चयेन । संतः सज्जनाः पाखंडनिरताः वेदबाह्यकर्मरक्ताः । विरक्ताः संन्यासिनः सपरिग्रहाः स्त्रीधनादिसंग्रहकारिणः ॥ ३१ ॥ गेहे गृहे तरुणीप्रभुता स्त्रीप्राधान्यम् । श्यालको भार्याभ्राता बुद्धिदायको मंत्री । लोभात् कन्याया विक्रयः धनेन सुताविक्रयणं, दानमित्यर्थः । दंपतीनां स्त्रीपुरुषाणां कल्कनं कलहः । च एवार्थे, पुनरर्थे वा ॥ ३२ ॥ आश्रमा ब्रह्मचार्यादिस्थानानि यवनैर्म्लेच्छै रुद्धा व्याप्ताः । अत्र भरतखंडे देवतायतनानि देवतानां श्रीरामकृष्णादीनामायतनानि स्थानानि मंदिराणि भूरिशो बहुशो दुष्टैर्धर्मनाशकैर्विवर्णैर्नीचैर्नष्टानि स्पर्शस्नानादिभिर्मूर्तीनां, भ्रष्टानि--कृतानीति शेषः ॥ ३३ ॥ न योगी योगसाधकः न नास्ति । सर्वत्रास्ति

मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ॥ पाखण्डनिरताः सन्तो विरक्ताः सपरिग्रहाः ॥ ३१ ॥ तरुणीप्रभुता गेहे श्यालको बुद्धिदायकः ॥ कन्या
या विक्रयो लोभाद्दंपतीनां च कल्कनम् ॥ ३२ ॥ आश्रमा यवनै रुद्धास्तीर्थानि सरितस्तथा ॥ देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥ ३३ ॥ न
योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः ॥ कलिदावानलेनाद्य साधनं भस्मतां गतम् ॥ ३४ ॥ अट्टशूला जनपदाः शिवशूला द्विजातयः ॥
कामिन्यः केशशूलिन्यः संभवंति कलाविह ॥ ३५ ॥ एवं पश्यन्कलेर्दोषान्पर्यटन्नवनीमहम् ॥ यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥ ३६ ॥
तत्राश्चर्यं मया दृष्टं श्रूयतां तन्मुनीश्वराः ॥ एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥ ३७ ॥

क्रियान्वयः कर्त्तव्यः । सिद्धो रसायनपुत्रादिदाता न । ज्ञानी वेदोपनिषज्ज्ञानवान् न । सत्क्रियः सती श्रेष्ठा भक्तिप्रीतिसंपन्ना क्रिया पूजादिरूपा यस्य स तथा एवंभूतो नरो न । तत्र हेतुमाह—कलीति । कलिदावानलेन कलिः कलियुगः स एव दावानलोग्निस्तेनाद्य इदानीं साधनं भस्मतां गतं भस्मीभूतम् । एतेनेदानीं लोके योग्यादयः सर्वे दंभिनो लोकवंचका एवेति फलितोर्थः ॥ ३४ ॥ जनपदा देशा अट्टशूला अन्नविक्रयिणः । द्विजातयो ब्राह्मणाः शिवशूला वेदविक्रयिणः । कामिन्यः स्त्रियः केशशूलिन्यो भगविक्रयिण्यः । इह लोके कलौ कलियुगे संभवंति । तदुक्तम्—"अट्टमन्नमिति प्रोक्तं शिवो वेदः प्रकीर्तितः । केशो भग इति ज्ञेयः शूलो विक्रय उच्यते ॥" इति ॥ ३५ ॥ ततः परं किं जातमित्यत आह—एवमिति । एवममुना प्रकारेण कलेर्दोषान् पश्यन्नीक्षमाण इमां महीं भूमिं पर्यटन् परिभ्रमन्सन् अहं नारदः यामुनं यमुनाया इदं तथा तटं तीरम् आपन्नोस्मि । यत्र यमुनातीरे हरेः श्रीकृष्णस्य लीला गोपीभिः सह रासमंडले क्रीडाकौतुकमभूत् ॥ ३६ ॥ तत्र कौतूहलं दृष्टमित्याह—तत्रेति त्रिभिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र तस्मिन् स्थाने आश्चर्यमद्भुतं मया दृष्टं, हे मुनीश्वराः तत् श्रूयताम्, भवद्भिरितिकर्तृशेषः । तथाहि--एका तरुणी युवतिस्तत्र तटे निषण्णा निविष्टा खिन्नमानसा खिन्नमुद्विग्नं मानसं मनो यस्याः सा तथा । तुना वैलक्षण्यार्थेनान्यासां तत्सहचरीणां स्वास्थ्यं सूच्यते ॥ ३७ ॥ पार्श्वे तस्या वामभागे द्वौ वृद्धौ जराग्रस्तौ पतितौ निःश्वसंतौ निश्वासं मुंचंतौ अचेतनौ जडप्रायौ चेष्टारहितत्वात् । चात्सा स्त्री चकारस्योक्तसमुच्चयार्थत्वात्, तयोर्वृद्धयोः पुरोऽग्रे रुदती रोदनं कुर्वती शुश्रूषंती सेवामाचरंती प्रबोधंती उद्बोधनं कुर्वती ॥ ३८ ॥ निजं वपुः रक्षितारम् । शीले तृन् । दशदिक्षु सर्वासु दिशासु निरीक्षंती निरीक्षमाणा । अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्याऽनित्यत्वात् । शतस्त्रीभिरत्र शतशब्दोऽनंतवाची, तेनासंख्यातनारीभिः सेव्यमानोपास्यमाना मुहुर्मुहुर्वारंवारं बोध्यमाना धैर्यं कुरु सर्वं शुभं भविष्यति हरिकृपयेत्याश्वास्यमाना ॥ ३९ ॥ ततस्तत्समीपं गतवानित्याह—दृष्ट्वेति । एकामित्यादिविशेष्यविशेषणवाचकानि पदानि, दृष्ट्वेतिपदसांनिध्यादिति संदर्भः । तामित्यध्याहार इति[1] केचित् । तथा च—तद्दृष्ट्वा

द्वौ वृद्धौ पतितौ पार्श्वे निःश्वसन्तावचेतनौ ॥ शुश्रूषन्ती प्रबोधन्ती रुदन्ती च तयोः पुरः ॥ ३८ ॥ दशदिक्षु निरीक्षन्ती रक्षितारं निजं वपुः ॥ वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥ ३९ ॥ दृष्ट्वा दूराद्गतः सोऽहं कौतुकेन तदन्तिकम् ॥ मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥ ४० ॥ बालोवाच ॥ भो भो साधो क्षणं तिष्ठ मच्चिन्तामपि नाशय ॥ दर्शनं तव लोकस्य सर्वथाऽघहरं परम् ॥ ४१ ॥ बहुधा तव वाक्येन दुःखशान्तिर्भविष्यति ॥ यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ॥ ४२ ॥ नारद उवाच ॥ काऽसि त्वं काविमौ चेमा नार्यः काः पद्मलोचनाः ॥ वद देवि सविस्तारं स्वस्य दुःखस्य कारणम् ॥ ४३ ॥ बालोवाच ॥ अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ ॥ ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ॥४४॥

दूरात् वीक्ष्य सोऽहं प्रसिद्धो नारदः कौतुकेन कुतूहलेन तदंतिकं तन्निकटं गतः । मां दृष्ट्वा । चोप्यर्थे, मामपि वीक्ष्य बाला[3] षोडशवार्षिकी स्त्री विह्वला व्याकुला सत्यं तत्तापात्, चान्माम्, उक्तपरामर्शार्थत्वात्, वचो वचनमब्रवीदवदत् ॥ ४० ॥ बालोवाचेति स्पष्टम् । स्वसुखार्थं प्रार्थयति—भोभो साधो इति । हे साधो क्षणं क्षणमात्रं तिष्ठ त्वं स्थितिं कुरु, मच्चिंतां मम शोकं संतापमपि निश्चयेन नाशय दूरीकुरु । तव साधोर्दर्शनं सर्वथा सर्वप्रकारेण लोकस्य जनस्याघहरं पापनाशनमत एव परमुत्कृष्टम् ॥ ४१ ॥ असकृन्मां बोधयेत्याह—बहुधेति । बहुधा बहुभिः प्रकारैः तव वाक्येन दुःखशांतिर्दुःखनाशो भविष्यति । यदा भूरि भाग्यं महद्भाग्यं स्यात्तदा भवतो दर्शनं भवेत् ॥ ४२ ॥ काऽसि त्वमिति प्रश्नचतुष्टयं करोति नारदः—त्वं काऽसि । इमौ च कौ । पुनः पद्मलोचनाः कमलनेत्रा इमा नार्यः काः । हे देवि सविस्तारं विस्तारेण सहितं स्वस्य दुःखस्य कारणं त्वं वद ॥४३॥ बालाऽऽह—अहमिति । अहं भक्तिरिति ख्याता नामतः प्रसिद्धा माता चानयोरिति प्रथमप्रश्नोत्तरम् । कथमिदं ज्ञातम् ।

१ न लोकेति षष्ठीनिषेधः । २ एकेत्यादिपदेषु (३७) द्वितीयान्तपाठाभिप्रायेणदोमिति भाति । ३ बालापीत्यर्थायाऽप्यर्थकचकारस्यात्रैवान्वयः शोभनः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्रिमपदसांनिध्यात् । तथाहि—इमौ पार्श्वस्थौ पुरुषौ मे मम तनयौ पुत्रौ मतौ । ज्ञानवैराग्यनामानौ ज्ञानं च वैराग्यं चेति तथा ते नामनी ययोस्तौ । तथा कालयोगेन कालस्य संवत्सरादिरूपेण परिभ्रममाणस्य संयोगेन जर्जरौ जीर्णाविति द्वितीयप्रश्नोत्तरम् ॥ ४४ ॥ इमा नार्यो गंगाद्याः सरितो नद्यः संतीति तृतीयप्रश्नोत्तरम् । एता सामागमनं कथमत्र संभूतं तत्राह—मत्सेवार्थं समागताः । स्पष्टोर्थः । एतेन यमुनायाः प्राचीनत्वं गंगादिभिर्निरुक्तं, सुसेव्यत्वेन ताभिर्महत्त्वं चेति । तथा च सुरैर्देवैरपि सेविताया मे मम श्रेयः कल्याणं सुखं च नास्ति ॥ ४५ ॥ चतुर्थप्रश्नोत्तरमाह—इदानीमित्यष्टभिः । हे तपोधन सचिंतः चिंतया सहितो मद्वृतांते दत्तचित्त इत्यर्थः । इदानीमधुना मद्वार्त्तां त्वं शृणु । मे मम वार्त्ता वितता विख्याताऽस्ति तां वार्त्तां श्रुत्वा सुखमावह कुरु ॥ ४६ ॥ द्रविडे देशेऽहमुत्पन्ना जातास्मि । द्रविडो मे जन्मभूमिरिति भावार्थः । कर्णाटके देशे वृद्धिं गता प्राप्ता । महाराष्ट्रे देशे क्वचित्क्वचित्क्वापिक्वापि स्थाने । गुर्जरे देशे जीर्णतां गता ॥ ४७ ॥ तत्कारणमाह—तत्रेति । तत्र तस्मिन्देशे पाखं

गंगाद्याः सारितश्चेमा मत्सेवार्थं समागताः ॥ तथापि न च मे श्रेयः सेवितायाः सुरैरपि ॥ ४५ ॥ इदानीं शृणु मद्वार्तां सचिन्तस्त्वं तपोधन ॥ वार्ता मे विततास्त्यस्ति तां श्रुत्वा सुखमावह ॥ ४६ ॥ उत्पन्ना द्रविडे साऽहं वृद्धिं कर्णाटके गता ॥ क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णतां गता ॥ ४७ ॥ तत्र घोरकलेर्योगात्पाखण्डैः खंडितांगका ॥ दुर्बलाऽहं चिरं जाता पुत्राभ्यां सह मदन्ताम् ॥ ४८ ॥ वृंदावनं पुनः प्राप्य नवीनेव सुरूपिणी ॥ जाताहं युवती सम्यक्प्रेष्ठरूपा तु सांप्रतम् ॥ ४९ ॥ इमौ तु शयितावत्र सुतौ मे क्लिश्यतः श्रमात् ॥ इदं स्थानं परित्यज्य विदेशं गम्यते मया ॥ ५० ॥ जरठत्वं समायातौ तेन दुःखेन दुःखिता ॥ साहं तु तरुणी कस्मात्सुतौ वृद्धाविमौ कुतः ॥ ५१ ॥

डैर्धर्मविरुद्धैर्दंभाचरितैः खंडितांगका खंडितानि त्रोटितानि अंगानि प्रेमगीतनृत्यहरिदर्शनतुलस्यारोपणादीनि यस्याः सा तथा । कुत इत्यत आह—कलेर्योगादिति, स्पष्टम् । दुर्बला बलहीना चिरं बहुकालं पुत्राभ्यां ज्ञानवैराग्याभ्यां सह मंदतां परिचयाभावाल्लघुतां याता प्राप्ताऽस्मि ॥ ४८ ॥ पुनर्मम तारुण्यं जातमित्याह—वृंदावनमिति । वृंदावनं प्राप्य पुनरहं नवीना नूतना युवतिः स्त्रीव सुरूपिणी सुष्ठुरूपवती, सम्यक्प्रेष्ठरूपा प्रकर्षेणेष्टमीप्सितं रूपं यस्याः सा तथा सांप्रतं जातास्मि । त्वाश्चर्ये ॥ ४९ ॥ तदाह—इमाविति । अत्रास्मिन्वृंदावने इमौ अंगुलिनिर्दिष्टौ सुतौ मत्पुत्रौ शयितौ सुप्तौ श्रमात् खेदात् क्लिश्यतः दुःख्यतः । अन्यत्र गंतुकामाऽहमित्याह—इदमिति । इदं स्थानं वृंदावनं परित्यज्य त्यक्त्वा विदेशं मया गम्यते, सुखार्थमिति शेषः ॥ ५० ॥ किञ्च—जरठत्वं वृद्धत्वं समायातौ सुतौ मत्पुत्रौ, तेन दुःखेन जरठत्वरूपेण दुःखेन दुःखिता । सा वृद्धाऽहं तु अपि तरुणी युवतिः कस्माद्धेतोः, इमौ वृद्धौ कुतः कस्मात्कारणात् ॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिचित्रमाह—त्रयाणामिति । त्रयाणां भक्तिज्ञानविराग्याणामस्माकं सहचारित्वात् अपृथक्त्वात् वैपरीत्यं वैषम्यं कुतो हेतोः स्थितम्, उत्पन्नं जातमित्यर्थः । तदाह—माता जरठा वृद्धा घटते संभवति, तनयौ पुत्रौ तरुणौ युवानाविति घटते ॥ ५२ ॥ अतो वैपरीत्याद्धेतोः विस्मयाविष्टमानसा विस्मयेन वैपरीत्येनाविष्टं व्याप्तं मानसं मनो यस्याः सा तथा आत्मानं शोचामि । हे धीमन् हे योगनिधे अत्रैतद्वैषम्योद्भूतौ किं कारणं भवेदिति त्वं वद ब्रूहि ॥ ५३ ॥ कारुण्येन स्वसाधुतामाविष्कुर्वन्नारदो वक्ति—ज्ञानेनेति । हे अनघे ते तव दुर्बलत्वजरठत्ववैपरीत्यदुःखाद्येतत्सर्वं ज्ञानेनात्मनि मनसि पश्यामि चिंतयामि, त्वया विषादः शोकेन संतापो न कार्यः न कर्त्तव्यः, हरिः पापदुःखादिहर्त्ता स्वनामसाफल्यार्थं ते तव शं सुखं विधास्यति करिष्यति ‘ विपूर्वो धा करोत्यर्थे ’ इत्युक्तत्वात् ॥ ५४ ॥ सूतः शौनकं प्रत्याह—क्षणेति । क्षणमात्रेण तज्ज्ञात्वा मुनीश्वरो नारदो वाक्यमूचे । नारद उवाचेति पौराणिकी शैली, एवमन्यत्राप्यूहनीयम् । हे बाले अवहिता सावधाना त्वं शृणु—अयं

त्रयाणां सहचारित्वाद्वैपरीत्यं कुतः स्थितम् ॥ घटते जरठा माता तरुणौ तनयाविति ॥ ५२ ॥ अतः शोचामि चात्मानं विस्मयाविष्टमानसा ॥ वद योगनिधे धीमन्कारणं चात्र किं भवेत् ॥ ५३ ॥ नारद उवाच ॥ ज्ञानेनात्मनि पश्यामि सर्वमेतत्तवानघे ॥ न विषादस्त्वया कार्यो हरिः शं ते करिष्यति ॥ ५४ ॥ सूत उवाच ॥ क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः ॥ नारद उवाच ॥ शृणुष्वावहिता बाले युगोऽयं दारुणः कलिः ॥ ५५ ॥ तेन लुप्तः सदाचारो योगमार्गस्तपांसि च ॥ जना अघासुरायन्ते शाठ्यदुष्कर्मकारिणः ॥ ५६ ॥ इह सन्तो विषीदन्ति प्रहृष्यन्ति ह्यसाधवः ॥ धत्ते धैर्यं तु यो धीमान्स धीरः पण्डितोऽथवा ॥ ५७ ॥ अस्पृश्यानवलोक्येयं शेषभारकरी धरा ॥ वर्षेवर्षे क्रमाज्जाता मंगलं नापि दृश्यते ॥ ॥ ५८ ॥ न त्वामपि सुतैः साकं कोऽपि पश्यति सांप्रतम् ॥ उपेक्षिताऽनुरागान्धैर्जर्जरत्वेन संस्थिता ॥ ५९ ॥

युगो दारुणः भयंकरः । अयं युगो दारुणः क इत्यतस्तन्नाम निर्वक्ति-कलिरिति ॥ ५५ ॥ तत्प्रभावं वर्णयति—तेनेति । तेन कलियुगेन सदाचारः सद्धर्मो लुप्तो नष्टः, योगमार्गो लुप्त उच्छिन्नः, तपांसि च लुप्तानि, जनाः पुरुषा अद्य सांप्रतं असुरायंते असुरा इवाचरंति । तत्र हेतुः—शाठ्यदुष्कर्मकारिणः शाठ्यं शठभावश्च दुष्कर्म च शाठ्यदुष्कर्मणी ते कर्तुं शीलमेषां ते तथा ॥ ५६ ॥ इह कलियुगे संतः साधवो विषीदंति विषादं प्राप्नुवंति, असाधवो दुर्जना दुष्टाः प्रहृष्यंति तुष्यंति । हि युक्तेऽर्थे । तु विरलत्वं सूचयति । धैर्यं यः पुमान् धत्ते धारयति स धीरोऽथवा पंडितोस्ति । ‘कृती’ इति पाठेपि स एव कुशल इति नार्थभेदः ॥ ५७ ॥ धरा भूमिः शेषभारकरी अनंतस्य भारवर्द्धिनी वर्षेवर्षे प्रतिवर्षं क्रमाज्जाता, मंगलमपि न दृश्यते, इयमस्पृश्या स्प्रष्टुमयोग्या, अनवलोक्या च, न दर्शनार्हेत्यर्थः ॥ ५८ ॥ किंच—सुतैः साकं पुत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यां सह, बहुवचनं छंदोनुरोधतः " अपि माषं मषं कुर्याच्छंदोभंगं गिरं त्यजेत् " इत्युक्तेः । त्वामपि सांप्रतं कोपि न पश्यति क्वचिदपि नेक्षते । अपिशब्दाभ्यां कर्तृकर्मणोः मदंता निरूपिता भवति, न तु स्वरूपहानिः । वस्तुतस्तु 'सुताभ्यां सह नापि त्वाम्' इति पाठः । अनुरागांधैर्विषयासक्तैर्जनैरुपेक्षिता त्यक्ताऽतो जर्जरत्वेन संस्थिता वृद्धतया संस्थिताः ॥ ५९ ॥ पुनराविर्भावकारणमाह—वृंदावनस्येति । वृंदावनसंयोगात् पुनर्भूयः नवा नवीना तरुणी युवतिस्त्वमसि तेन हेतुना वृंदावनं धन्यं श्लाघ्यं भवति । तदुक्तम्—"स्वर्गपदाद्गुरु सत्यं सत्यादपि गुरुतरं तु वैकुंठम् । वैकुंठादपि गुरुतरमवनौ धन्यं वृंदावनं मन्ये ॥" इति । यत्र वृंदावने भक्तिर्नृत्यति । एतेन भक्तेरेव प्राधान्यमत्रोक्तम् ॥६०॥ त्वत्पुत्रयोर्जर्जरत्वहेतुमाह—अत्रेति । अत्र वृंदावनेऽपि इमौ ज्ञानवैराग्यौ जरां न मुंचतः न त्यजतः । तत्र हेतुः-ग्राहकाभावात् अपेक्षितुरनुपलंभात् । किंचिल्लवमात्रमात्मसुखेनानयोः प्रसुतिर्मन्यते विद्यते, धातूनामनेकार्थत्वात् । इह वृंदावने ॥ ६१ ॥ स्वदुःखकारणं श्रुत्वा श्रीभक्तिरुवाचेत्यनेन भक्तिस्तर्कयति—कथमिति ।

वृन्दावनस्य संयोगात्पुनस्त्वं तरुणी नवा ॥ धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ॥ ६० ॥ अत्रेमौ ग्राहकाभावान्न जरामपि मुञ्चतः ॥ किंचिदात्मसुखेनेह प्रसुतिर्मन्यतेऽनयोः ॥ ६१ ॥ श्रीभक्तिरुवाच ॥ कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः ॥ प्रवृत्ते तु कलौ सर्वसारः कुत्र गतो महान् ॥ ६२ ॥ करुणापरेण हरिणाप्यधर्मः कथमीक्ष्यते ॥ इमं मे संशयं छिन्धि त्वद्वाचा सुखितास्म्यहम् ॥ ६३ ॥ नारद उवाच ॥ यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु ॥ सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ॥ ६४ ॥ यदा मुकुन्दो भगवान्क्ष्मां त्यक्त्वा स्वपदं गतः ॥ तद्दिनात्कलिरायातः सर्वसाधनबाधकः ॥ ६५ ॥

परीक्षिता राज्ञाऽशुचिः मलिनः कलिः कथं स्थापितः, मलिनत्वेन हंतुं योग्यस्य रक्षणे को हेतुरिति फलितोऽर्थ इति प्रथमः प्रश्नः । तु तर्कांतरे । प्रवृत्ते कलौ कलौ प्रवृत्ते सति महान्पूज्यः सर्वसारः सर्वेषां वस्तूनां सारः फल (कुत्रेत्याधारस्योत्तरत्रादर्शनान्महच्छब्दार्थस्याप्यनुपलंभाच्च ' कथमहो गतः ' इति वक्तुं युक्त इति संदर्भः । पंचम्यर्थे वार्षः पाठ इति केचित् । तेन कुतो गतो भवतीत्यर्थः) कुत्र गतोभूदिति द्वितीयः प्रश्नः ॥ ६२ ॥ किंच—करुणापरेण दयापरायणेन हरिणाऽधर्मः पापी कलिः पापं वा कथमीक्ष्यते दृश्यत इति तृतीयः प्रश्नः। इमं प्रश्नत्रयरूपं मे मम संशयं संदेहं त्वं छिंधि । त्वद्वाचा तव वाण्याहं सुखितास्मि ॥ ६३ ॥ नारदोक्तिः--यदि प्रेमतः प्रेम्णा त्वयाऽहं पृष्टस्तर्हि श्रवणं कुरु तस्मिन् कृते तव कश्मलं मनोग्लानिः गमिष्यति नंक्ष्यति । हे बाले ते तुभ्यं सर्वं वक्ष्यामि निरूपयिष्यामि । हे भद्रे मंगलरूपिणि ॥ ६४ ॥ सविस्तरं सर्वप्रश्नोत्तरं वर्णयति—यदेति द्वादशभिः । यदा यस्मिन्काले मुकुंदो भगवान् धरां पृथ्वीं त्यक्त्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वपदं स्वस्थानं परं पदमिति यावत् । गंतुं यातुमुद्यत उद्योगं कृतवान्, तदा तस्मिन्काले तद्दिनात्कलिरायातः आयातोऽभूत् । कीदृशः कलिरित्यत आह--सर्वसाधनबाधक इति । सर्वेषां साधनानां मोक्षोपायानां बाधको नाशकः ॥ ६५ ॥ राज्ञा परीक्षिता दिग्विजये दिशां विजये दृष्टोऽवलोकितः । कीदृगित्यत आह—दीनेति । दीनवदनाथवत् । शरणं गतः प्राप्तः । ततः किं कृतवानित्यत आह—नेति । अयं कलिर्मया न मारणीयो न हंतव्यः । कुतस्तत्राह—सारंगेति । सारं भुनक्तीति तथा सारग्राही सारंगो भ्रमर इव । एतेन वध्यस्याप्यवध्यतायां हेतुरुक्तो भवति ॥ ६६ ॥ तथाहि—स्थापने कारणमुच्यते—यदिति । यत्फलं तपसा नास्ति, योगेन नास्ति, समाधिना नास्ति, देहलीदीपकन्यायेन नास्तीत्यस्योभयत्र संबंधः । तत्फलं कलौ सम्यक् हरिकीर्त्तनात् भक्तिश्रद्धादिना हर्युच्चारणाज्जनो लभत इति ॥ ६७ ॥ एक आकारो गुणो यस्मिन्स तथा तम् "कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः" इति प्रथमस्कंधे सूतोक्तेः । 'आकारस्तु गुणे मूर्त्तौ' इति कामकल्पतरौ श्रृंगारप्रस्तावे । यद्वा—" एको विष्णुर्महद्भूतम् "

दृष्टो दिग्विजये राज्ञा दीनवच्छरणं गतः ॥ न मया मारणीयोऽयं सारङ्ग इव सारभुक् ॥ ६६ ॥ यत्फलं नास्ति तपसा न योगेन समाधिना ॥ तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ॥ ६७ ॥ एकाकारं कलिं दृष्ट्वा सारवत्सारनीरसम् ॥ विष्णुरातः स्थापितवान्कलिजानां सुखाय च ॥ ६८ ॥ कुकर्माचरणात्सारः सर्वतो निर्गतोऽधुना ॥ पदार्थाः संस्थिता भूमौ बीजहीनास्तुषा यथा ॥ ६९ ॥ विप्रैर्भागवती वार्ता गेहेगेहे जनेजने ॥ कारिता कणलोभेन कथासारस्ततो गतः ॥ ७० ॥

इतिवचनादेकस्य विष्णोर्व्यापकस्याकारः स्वकीर्त्तनकारिणां फलप्रदानरूपो यस्य स तथा तं कलिं दृष्ट्वा कलिजानां कलियुगोत्पन्नानां नराणां सुखाय सुखार्थं विष्णुरातः परीक्षित् सारवत्स्थापितवानिति प्रथमप्रश्नोत्तरमुक्तम् । केषां क इव—सारमिच्छतां कामयमानानां सारवत् सार इव । 'सारवत्सारनीरसम्' इत्येकपदपाठे सारवत्सु यः सारस्तस्य नीरसो विफलत्वं यस्मादिति स तथा तम् । साराणां नीरसो विरसत्वं यस्मात्स तथा तमिति कलिविशेषणं वा, 'धर्मसांकर्यं तीर्थवैषम्यम्' इतिवत् समासोऽत्र बोध्यः ॥ ६८ ॥ द्वितीयप्रश्नोत्तरमाह—कुकर्मेति । कुकर्माचरणात् कुत्सितकर्मणामाचरणात्सर्वतः सर्वेषाम् षष्ठ्यर्थे तसिल् प्रत्यय इति मंदाः; पूर्वापरवाक्यानामसंगतेः । तेन सर्वतः सर्वेभ्य इति पंचम्यर्थे तसिल्विधानं साधु । 'कथासारस्ततो गतः (७०) इत्याद्युत्तरवाक्येषु तथोपलंभात् । सारोऽधुनेदानीं निर्गतः निःसृतोस्ति । ततः किं, तत्राह-पदार्थाः कथादयः भूमौ भुवि । औपश्लेषिकाधारे सप्तमीयम् । बीजहीनाः कणहीनाः तुषाः स्थूलधान्यावरणा यथा तथा संस्थिताः संतीत्यर्थः ॥ ६९ ॥ एतदेव स्पष्टयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्रैरित्यादिसप्तभिः । विप्रैर्ब्राह्मणैः कणलोभेन गेहेगेहे जनेजने भागवती वार्त्ता कारिता ततस्तस्माद्धेतोः कथासारो गतः ॥ ७० ॥ रौरवात् नरकात् आगता जनाः अत्युग्राणि पापबाहुल्यानि भूरीणि कर्माणि येषां ते तथा । नरकागतानां चिह्नमेतत् । तेपि त एव तीर्थेषु तिष्ठंति वर्त्तंते ततस्तीर्थसारो गतोस्ति ॥ ७१ ॥ कामश्च क्रोधश्च महालोभश्च तृष्णा च ताः कामक्रोधमहालोभतृष्णाः, अत्र तृष्णापदसामर्थ्यान्महालोभ इतिपदस्थाने महामोद इति पाठ ऊहनीयः । ताभिर्व्याकुलं विक्षिप्तं चित्तं येषां ते तथा तेपि त एव तपसि तिष्ठंति ततः तपःसारो गतः ॥ ७२ ॥ मनसोऽजयात् अनिरोधात्, च पुनर्लोभात्, दंभात् लोकानुरंजनार्थं कर्मकरणात्, पाखंडस्य संश्रयाद्धारणात्, शास्त्राणामनभ्यसनात् अभ्यासः पुनःपुनः पठनपाठनरूपः तस्याभावात् । एव निश्चये । ध्यानयोगफलं गतम् ॥ ७३ ॥ पंडिताः कलत्रेण

अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः ॥ तेपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः ॥ ७१ ॥ कामक्रोधमहालोभतृष्णाव्याकुलचेतसः ॥ तेऽपि तिष्ठन्ति तपसि तपःसारस्ततो गतः ॥ ७२ ॥ मनसश्चाजयाल्लोभाद्दम्भात्पाखण्डसंश्रयात् ॥ शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम् ॥ ७३ ॥ पण्डितास्तु कलत्रेण रमन्ते महिषा इव ॥ पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने ॥ ७४ ॥ न हि वैष्णवता कुत्र संप्रदायपुरःसरा ॥ एवं प्रलयतां प्राप्तो वस्तुसारः स्थलेस्थले ॥ ७५ ॥ अयं तु युगधर्मो हि वर्तते कस्य दूषणम् ॥ अतस्तु पुण्डरीकाक्षः सहते निकटे स्थितः ॥ ७६ ॥ सूत उवाच ॥ इति तद्वचनं श्रुत्वा विस्मयं परमं गता ॥ भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक ॥ ७७ ॥

स्त्रिया सह रमंते क्रीडंति । के इव महिषा इव वाहद्विषंत इव । एतेन पशुसाम्यनिदर्शनेन पर्वसु दिवापि स्त्रीसंगो ध्वनितः । तु वैलक्षण्ये--द्विपदचतुष्पदशृंगपुच्छसत्त्वासत्त्वरूपेवर्त्तते । एतदेव स्पष्टयति--पुत्रस्योत्पादने दक्षाः निपुणाः कृतप्रयत्नाः, मुक्तिसाधने शमदमादौ अदक्षाः ॥ ७४ ॥ कुत्र क्वापि स्थाने संप्रदायपुरःसरा संप्रदायपूर्विका वैष्णवता न हि । एवममुना प्रकारेण वस्तुसारः स्थलेस्थले प्रलयं गतः ॥ ७५ ॥ तृतीयप्रश्नोत्तरमाह-अयमिति । अयं युगधर्मो वर्त्तते । हि युक्तम् । दूषणं कस्य, न कस्याप्य स्तीति काकुः तुशब्दार्थः । अतो हेतोर्निकटे स्थितः । तु अप्यर्थे । पुंडरीकाक्षो हरिः सहते तत्कृतमपराधं क्षमते ॥ ७६ ॥ शौनकं प्रति सूतोक्तिः--इतीति । इत्येवं तस्य नारदस्य वचनं श्रुत्वा विस्मयेनाविष्टं व्याप्तं मानसं मनो यस्याः सा तथा भक्तिर्भूयः पुनःपुनर्वचनमूचे उवाच । तच्च वचनं हे शौनक त्वं शृणु ॥ ७७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे सुरर्षे नारद त्वं धन्योसि साधुत्वात् । मद्भाग्येन समागतोसि सम्यक् आयातोसि । किमागमनेनेत्यत आह–लोके साधूनां दर्शनं सर्वसिद्धिकरं भवति । अत एव परं श्रेष्ठं कामनापूरकं वा ॥ ७८ ॥ तथाहि--जयतीति । यस्य ते तव केवलं पक्षपातरहितमेकं वचनरचनं रामनामोच्चारणमहिमात्मकम् आकलय्य विचार्य कायाधवः कयाधोरपत्यमिति स तथा प्रह्लादो जगति मायां ममेयं माता पितायमित्येवंरूपां मोहमयीं जयति जितवान् 'त्यजति' इति पाठे मायां संसारबीजभूतामविद्यां जहातीत्यर्थः । परां भक्तिमंतरेण तज्जयस्य दुर्घटत्वात् । किंच–यत यस्य कृपातः कृपयाऽयं नेत्रवृत्तिगोचरो ध्रुव उत्तानपादपुत्रो ध्रुवपदं निश्चलस्थानं वैकुंठद्वारं यातः प्राप्तोस्ति । सकलकुशलपात्रं सकलानां सर्वेषां कुशलानां मंगलकर्मणां पात्रं भाजनम् आधारत्वात 'योग्यभाजनयोः पात्रम्' इत्यमरोक्तेः । ब्रह्मणः पुत्रं नारदं नतास्मि प्रणमामि ॥ ७९ ॥ इति श्रीशेखावाट्यंतर्गतविजयपुरनिवासिव्राजलालिपंडितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां प्रथमोऽध्यायः ॥ १ ॥ आश्वास्य

॥ श्रीभक्तिरुवाच ॥ सुरर्षे त्वं च धन्योऽसि मद्भाग्येन समागतः ॥ साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ॥ ७८ ॥ जयति जयति मायां यस्य कायाधवस्ते वचनरचनमेकं केवलं चाकलय्य ॥ ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं सकलकुशलपात्रं ब्रह्मपुत्रं नताऽस्मि ॥ ७९ ॥ इति श्रीपद्मपुराण उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये भक्तिनारदसंगमो नाम प्रथमोऽध्यायः ॥ १ ॥ नारद उवाच ॥ वृथा खेदयसे बाले अहो चिन्तातुरा कथम् ॥ श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥ १ ॥ द्रौपदी च परित्राता येन कौरवकश्मलात् ॥ पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ॥ २ ॥

भक्तिं तत्सून्वोर्बोधनाय कृतोद्यमः ॥ श्रुत्वाकाशगिरोक्तं सत्कर्म प्रष्टुं गतो मुनिः ॥ १ ॥ "न विषादस्त्वया कार्यो हरिः शं ते विधास्यति" इत्युपदेशकरणात् पूर्वाध्याये नास्य संगतिं योजयन्नारदो वदति–वृथेति । हे बाले त्वं वृथा खेदयसे मुधा खेदं करोषि । कथं केन प्रकारेण चिंतातुरासि । अहो आश्चर्यम् । श्रीकृष्णस्य चरणांभोजं पादपद्मं त्वं स्मर चिंतय । ततः दुःखं गमिष्यति प्रयास्यति ॥ १ ॥ ननु तच्चरणकमलस्मरणेन दुःखहानिः पूर्वं कस्य जातेत्यपेक्षायामाह–द्रौपदीति । येन श्रीकृष्णेन कौरवकश्मलात्कौरवाणां दुर्योधनदुःशासनसौबलादीनां कश्मलं सभायां केशाकर्षणचीरहरणादिदुःखप्रदानं तस्मात् । यद्वा–कौरवैर्यत्कश्मलं दुःखं तस्मादिति । द्रौपदी द्रुपदस्य सुता परित्राता रक्षिता । चात् ग्राहपाशाद्गजो रक्षितः । गोपसुंदर्यः गोपानां नार्यः, शंखचूडादिवधात् पालिताः । स कृष्णः क्वापि कुत्रापि नो गतो न प्रयातः व्यापकत्वात्तस्य

१ भूतार्थे लट् । २ स्मरणात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गमनागमने यद्यपि न स्तस्तथापि भक्त्युद्रेकेणाविर्भावतिरोभावावुन्नेयाविति विवेकः ॥ २ ॥ प्रेयस्या दुःखहरणं तूचितं तद्वश्यत्वात्तस्येत्याह—त्वमिति । हे भक्ते तस्य कृष्णस्य प्राणतोऽधिका प्रिया त्वमसि । तुशब्दः पूर्वतो वैलक्ष्यण्यद्योतकः । सततं निरंतरम् । तदेवाह त्वयेति—त्वयाऽऽहूतः कृताऽऽह्वानो भगवान् षड्गुणपरिपूर्णो हरिर्नीच गृहेषु नीचानां धर्मव्याधशबरीविदुरादीनां गेहेषु याति गच्छति । हि युक्तमेतत् । अपिशब्दस्तु प्राणत इत्यनेनान्वेति ॥ ३ ॥ अथ युगानुसारेण स्थितिमाह—सत्यादीति । सत्यमादिर्यस्य तत् सत्यादि, तच्च त्रियुगं चेति सत्यादित्रियुगं तस्मिन् कृतत्रेताद्वापरयुगे बोधवैराग्यौ ज्ञानवैराग्यौ मुक्तिसाधकौ मुक्तेः सिद्धिकरौ । कलौ कलियुगे तु केवलं भक्तिरेव ब्रह्मसायुज्यकारिणी, ब्रह्मणः सायुज्यं संयोगं कर्तुं शीलं यस्याः सा तथा भवति ॥ ४ ॥ ततो निश्चयपूर्वकं कृत्यमाह—इतीति द्वाभ्याम् । इत्येवं निश्चित्य निश्चयं कृत्वा त्वां ससर्ज सृष्टवान् । चिद्रूपः प्रशस्तचित्सर्वज्ञत्वादीश्वरः। कीदृशीं त्वां—सरूपाम् अत्मना समानरूपाम्।चिद्रूपिणीमिति विशिष्टाद्वैतवादिनस्तदविचार चारु, दुःखाद्यनुपलंभात् । ततः सरूपां मूर्त्तिमिति गुरवः । तथात्वे विक्रियादिसंभवात् । हेति स्फुटम् सुंदरीं । कमनीयां कृष्णस्यात्मनः वल्लभां प्रियाम् "विदुषां परिपाटीयं

त्वं तु भक्ते प्रिया तस्य सततं प्राणतोऽधिका ॥ त्वयाहूतस्तु भगवान्याति नीचगृहेष्वपि ॥ ३ ॥ सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ ॥ कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥ ४ ॥ इति निश्चित्य चिद्रूपः सरूपां त्वां ससर्ज ह ॥ परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम् ॥५॥ बद्ध्वाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा ॥ त्वां तदाज्ञापयत्कृष्णो मद्भक्तान्पोषयेति च ॥ ६ ॥ अंगीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा ॥ मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ ॥ ७ ॥

संतमाह परं यथा " इति संतं विद्यमानमित्यर्थः । एतेन 'ये च कंसमनुव्रताः' इति कंसं प्रति नारदोक्तिः, " अनंतदैवज्ञसुतः स रामो मुहूर्त्तचिंतामणिमातनोति " इत्यादि च संगच्छते । परमयोत्कृष्टशोभया आनंदश्चासौ चिन्मूर्त्तिश्चेति स तथेति केचित्।तन्मंदम्, परमशोभायाः सुषमेति नामतः 'सुषमा परमा शोभा' इत्यमरसिंहोक्तेः। वस्तुतस्तु—परमश्चासौ आनंदश्चेति परमानंदः, स चासौचिन्मूर्त्तिश्चेति समासो युक्तः, शुद्धबुद्धमुक्तस्वभाव इतिवत् ॥ ५ ॥ एकदा एकस्मिन्काले अंजलिं बद्ध्वा हस्तयोः संयोजनं कृत्वाऽहं किं करवाणीति त्वया यदा पृष्टं तदा त्वां कृष्ण आज्ञापयत् आज्ञां दत्तवान् । तदाह—मद्भक्तान् त्वं पोषय पुष्टान् कुर्विति । च एवार्थे ॥ ६ ॥ स्वाम्याज्ञास्वीकारे फलमाह—अंगीकृतमिति । तद्धरेः वचो यदा त्वयांगीकृतं करिष्यामीति स्वीकृतं तदा वै निश्चयेन हरिः प्रसन्नस्तुष्टोऽभूत् । तस्मिन्प्रसन्ने को लाभस्तत्राह—तुभ्यं मुक्तिं दासीं ददौ । इमौ पुरःस्थितौ ज्ञानवैराग्यकौ ज्ञानं च वैराग्यं च ज्ञानवैराग्यौ अल्पौ ज्ञानवैराग्यावित्यल्पार्थे कन्प्रत्यये तथा शिशुरूपावित्यर्थः । पुत्रत्वेन ददौ, एतेन वस्तुतस्त्वत्पुत्रौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेति सूचितम् ॥७॥ त्वदुक्तं संपादितमित्याह–पोषणमिति । वैकुंठे लोके पोषणं भक्तानां पुष्टित्वेन रूपेण चिन्मूर्त्या त्वं करोषि । च एवार्थे । भूमौ पृथिव्यां भक्तिविपोषाय भक्तानां विशेषेण पोषणार्थं छायारूपं त्वया कृतमस्ति॥८॥ मुक्त्यादित्रिकेण तवागमनं जातमित्याह–मुक्तिमिति । मुक्तिं मोक्षं ज्ञानं तत्प्रदं, च पुनः विरक्तिं वैराग्यं तत्साधनं सह कृत्वा भुवि त्वमागतासि । कृतादिद्वापरस्यांतं सत्ययुगादिद्वापरस्यान्तमिति, नैरंतर्ये द्वितीया । द्वापरसमाप्तिमिति यावत् । महानंदेन पूर्णसुखेन संस्थिता ॥९॥ कलिना मुक्तिनाशो जात इत्याह–कलाविति । कलौ कलियुगे पाखंडामयपीडिता पाखंड एवामयो रोगस्तेन पीडिताऽऽक्रांता मुक्तिः क्षयं नाशं प्राप्ता । यद्वा–क्षयं वैकुंठस्थानं प्राप्ता । तदेव स्पष्टयति–त्वदाज्ञया तव प्रेरणया शीघ्रमेव सा वैकुंठं पुनर्गतास्ति॥१०॥किञ्च त्वया स्मृताऽऽहूता मुक्तिः अत्रैव भूतले आयाति, च पुनः यात्यपि गच्छत्येव, इमौ ज्ञान वैराग्यौ पुत्रीकृत्य धात्रीवदात्मपुत्राविति कृत्वा स्वस्यात्मनः पार्श्वे रक्षितौ त्वया संस्थापितौ ॥ ११ ॥ तयोर्वृद्धत्वे कारणमाह–उपेक्षात इति । किं ज्ञानवैराग्याभ्यामित्युपेक्षा

पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि च ॥ भूमौ भक्तिविपोषाय च्छायारूपं त्वया कृतम् ॥ ८ ॥ मुक्तिं ज्ञानं विरक्तिं च सह कृत्वा गता भुवि ॥
कृतादिद्वापरस्यान्तं महानन्देन संस्थिता ॥ ९ ॥ कलौ मुक्तिः क्षयं प्राप्ता पाखण्डामयपीडिता ॥ त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा ॥ १० ॥
स्मृता त्वयापि चात्रैव मुक्तिरायाति याति च ॥ पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ॥ ११ ॥ उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव ॥
तथापि चिन्तां मुञ्च त्वमुपायं चिन्तयाम्यहम् ॥ १२ ॥ कलिना सदृशः कोपि युगो नास्ति वरानने ॥ तस्मिंस्त्वां स्थापयिष्यामि गेहेगेहे जनेजने ॥
॥ १३ ॥ अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान् ॥ तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ॥ १४ ॥ त्वदन्विताश्च ये जीवा भविष्यन्ति कला
विह ॥ पापिनोऽपि गामिष्यंति निर्भयाः कृष्णमन्दिरम् ॥ १५ ॥

तोऽनिच्छया मंदौ परिचाररहितौ अत एव वृद्धौ चतुर्थीमवस्थां गतौ तव सुतौ जातौ स्तः । कलौ कलियुगे,यद्यप्येवं तथापि त्वं चिंतां मुंच जहीहि,अहम् उपायं सुखोपायं चिंतयामि विचारयामि ॥ १२ ॥ चिंतितमाह–कलिनेति । हे वरानने सुंदरमुखि कलिना सदृशस्तुल्यः कोपि युगो नास्ति । तस्मिन् उक्तयुगे त्वां गेहेगेहे प्रतिगेहं, जनेजने प्रतिजनं स्थापयिष्यामि प्रवर्तयिष्यामि॥१३॥किं कृत्वा–अन्यधर्मान्वर्णाश्रमादिविहितशौचस्नानसंध्याग्निहोत्रयज्ञदानादिधर्मान् तिरस्कृत्याऽवज्ञाय महोत्सवान् हरिमंदिरमार्जनलेपनालंकरणगीतनृत्यादीन् पुरस्कृत्य अग्रे विधायेति पूर्वान्वयि । प्रतिश्रुतकरणं प्रतिजानीते–तदेति सार्द्धैः सप्तभिः । यदा लोके त्वां न प्रवर्त्तये तदा हरेर्दासो नास्मीति ॥ १४ ॥ भक्तिप्रवर्त्तने फलमाह–इह लोके कलौ कलियुगे पापिनोऽपि असत्कर्मकारिणो जीवा जंतवः प्राणिन इति यावत् त्वदन्विता । त्वया भक्त्याऽन्विता युक्ता ये भविष्यंति ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्भया भयरहिताः संतः कृष्णमंदिरं वैकुंठं परं पदं वा गमिष्यंति प्राप्स्यंति । च एवार्थे ॥ १५ ॥ येषां पुंसां चित्ते प्रेमरूपिणी आनंदाश्रुकला हृदयार्द्रता वाग्गद्गदरूपा भक्तिर्वसेत् तिष्ठेत्, ते पुमांसोऽमलमूर्तयः शुद्धदेहाः स्वप्नेपि स्वप्नावस्थायामपि कीनाशं यमम् ' कीनाशो मृत्युरर्कजः ' इत्यमरोक्तेः । न पश्यंति नेक्षंते, किमुत सांप्रतमिति कैमुतिकन्यायसिद्धम् ॥ १६ ॥ किञ्च—भक्तियुक्तमनस्कानां भक्त्या युक्तं मनो येषां पुंसामिति तथा तेषां स्पर्शने धर्षणे प्रेतः स्थूलदेहरहितो दुर्गतिकः प्रभुः समर्थो न भवेत् । एवं पिशाचः प्रभुर्न, राक्षसः प्रभुर्न, असुरो वापि प्रभुर्न ॥ १७ ॥ हरिः पापहंता भगवान् तपोभिः पंचाग्निरूपैर्न साध्यते । च पुनः । वेदैर्ऋग्यजुःसामार्थवाख्यैर्न साध्यते, ज्ञानेनात्मानात्मविवेकादिसाधनजन्येन वेदांतप्रसिद्धेन न साध्यते, कर्मणापि श्रौतेन स्मार्तेन वापि न साध्यते । ननु सर्वसाधनानां निरासः कथं क्रियते, तत्राह—तत्र तपआदिसाधनानामकिंचित्करत्वे गोपिका गोप्यः । अत्रानुकंपायां कन्प्रत्ययः । प्रमाणमस्ति ॥१८॥ एतद्दुर्लभमित्याह—नृणामिति । नृणां नराणां जन्मनां सहस्रेण भक्तौ नृत्यगीतादिरूपायां प्रीतिः प्रेम जायते उत्पद्यते । एतदेव स्थूणानिखननन्यायेन द्रढयति—कलौ भक्तिःकलौ भक्तिरिति वीप्सयाऽन्येषां निरासः। तथाहि—भक्त्या कृष्णः पुरः

येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ॥ न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः ॥ १६ ॥ न प्रेतो न पिशाचो वा राक्षसो वाऽसुरोऽपि वा ॥
भक्तियुक्तमनस्कानां स्पर्शने न प्रभुर्भवेत् ॥ १७ ॥ न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा ॥ हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥ १८ ॥
नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते ॥ कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः ॥ १९ ॥ भक्तिद्रोहकरा ये च ते सीदन्ति जगत्त्रये ॥
दुर्वासा दुःखमापन्नः पुरा भक्तिविनिन्दकः ॥ २० ॥ अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ॥ अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥ २१ ॥ सूत उवाच ॥ इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा ॥ सर्वांगपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥ २२ ॥

स्थितोऽग्रेचरोऽस्ति ॥ १९ ॥ विपक्षे दोषमाह—भक्तीति । ये च हिरण्यकशिप्वादयो जना भक्तिद्रोहकरा भक्त्यै द्रोहं कुर्वंतीति तथा ते जगत्त्रये त्रैलोक्ये सीदंति दुःख्यंति । तथाहि—पुरा पूर्वसमये भक्तस्यांबरीषस्य विनिंदकः पैशुन्यकृत् दुर्वासाः शंकरांशो मुनिर्दुःखमापन्नो दुःखं प्राप्तोऽभूत् । यद्वा—भक्तस्य प्रह्लादस्य विनिंदको हिरण्यकशिपुः दुःखमापन्नः । यद्वा—भक्तस्य विभीषणस्य विनिंदको रावणो दुःखमापन्नः । यद्वा—भक्तस्य विदुरस्य, भक्तानां पांडवानां वा विनिंदको दुर्योधनो दुःखमापन्नः ॥ २० ॥ अथ व्रतादीनां न साक्षान्मुक्तिसाधनत्वमित्याह—अलमिति । व्रतैः कृच्छ्रचांद्रायणादिभिरलं पर्याप्तम् । तीर्थैः पुष्करादिभिरलम् । योगैः आसनाद्यष्टांगसंपन्नैरलम् । मखैरग्निहोत्राश्वमेधादिभिरलम् । ज्ञानकथालापैर्बहिर्मुखानाम् "केवलमयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि" इति ज्ञानकथानामालापैराभाषणैः 'स्यादा भाषणमालापः' इत्यमरोक्तेः, अलम् । एका भक्तिरेव मुक्तिदा । अन्ययोगव्यवच्छेदार्थ एवकारः ॥२१ ॥ अथ सूतोक्तिः शौनकं प्रति—इतीति । इत्येवंप्रकारेण नारदेन निर्णीतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धांतितं स्वमाहात्म्यं मह्यते पूज्यते लोके इति महान्, अतति सातत्येन गच्छतीत्यात्मा, महांश्चासावात्मा च महात्मा, तस्य भावो माहात्म्यं स्वस्य माहात्म्यं स्वमाहात्म्यं निशम्य श्रुत्वा सा भक्तिः सर्वैरंगैः पुष्टया च संपन्ना संयुक्ता सती नारदं प्रति वाक्यं वचनमब्रवीत् ॥ २२ ॥ भक्तिरुवाचेति—नारदं श्लाघयंतीत्याह—अहो इति द्वाभ्याम् । अहो इत्याश्चर्यम् । हे नारद त्वं धन्योसि, मयि । विषये सप्तमीयम् । ते तव निश्चला चलनरहिता प्रीतिरस्ति । कदापि कस्मिंश्चित् कालेऽपि अहं त्वां न विमुंचामि, अतः सर्वदा सर्वस्मिन्काले ते चित्ते हृदये स्थास्याम्यहं स्थितिं करिष्यामि, वत्स्यामीत्यर्थः ॥ २३ ॥ हे साधो कृपालुना दयावता त्वया क्षणात् क्षण मात्रेण मद्बाधा मत्पीडा ध्वंसिता नाशिता । इदानीमेतत् त्वया कर्त्तव्यमित्याह—पुत्रयोरिति । पुत्रयोर्ज्ञानवैराग्ययोः चेतना ज्ञप्तिर्नास्ति ततोऽचेतनाद्धेतोः बोधय बोधय । एता विति कर्माध्याहरणीयम् । एतयोश्चैतन्यं कुरु कुर्विति तात्पर्यार्थः ॥ २४ ॥ सूतः कारुण्यान्नारदोद्योगं प्रपंचयति—तस्या इति पंचभिः। तस्या भक्त्या वचो वचनं समाकर्ण्य सम्यक् श्रुत्वा नारदो नारं ज्ञानं ददातीति तथा सः, अमरकोशटीकायां रामाश्रमेणाप्येवमेवोक्तत्वात् । कारुण्यं करुणाया भाव इति तथा तत्र गतः प्राप्तः तयोर्ज्ञानवैराग्ययो

श्रीभक्तिरुवाच ॥ अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला ॥ न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा ॥ २३ ॥ कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् ॥ पुत्रयोश्चेतना नास्ति ततो बोधय बोधय॥२४॥सूत उवाच ॥ तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः ॥ तयोर्बोधनमारेभे कराग्रेण विमर्दयन् ॥ २५ ॥ मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन् ॥ ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम् ॥ २६ ॥ वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः ॥ बोध्यमानौ तदा तेन कथञ्चिच्चोत्थितौ बलात् ॥ २७ ॥ नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसावुभौ ॥ बकवत्पलितौ प्रायः शुष्ककाष्ठसमांगकौ ॥ २८ ॥

र्बोधनं जागरणोपायमारेभे आरब्धवान् । किं कुर्वन् सन्—कराग्रेण करयोर्हस्तयोरग्रेण जात्यभिप्रायेणैकवचननिर्देशः, तेन नखैरित्यर्थो बोध्यः । विमर्दयन् विशेषेणांगपरिवर्तन माचरन् ॥ २५ ॥ कर्णांते कर्णस्य समीपे मुखमास्यं संयोज्य कृत्वा उच्चैः उदात्तस्वरेण शब्दं समुच्चरन् सम्यक्त्वेनोच्चारणं कुर्वन् । किं तत्- हे ज्ञान भवान्प्रबुद्धयतां जागृयात्, रे वैराग्य भवान् प्रबुद्धयतामिति पूर्ववत् कर्त्तरि प्रत्ययोत्र। शीघ्रमाशु॥ २६ ॥कृतमुद्योगं विफलं दृष्ट्वा महाप्रयत्नमकरोदिति तं दर्शयति-वेदवेदांतघोषैः वेदाः प्रसिद्धाः वेदांता उपनिषदस्तेषां घोषैः शब्दैः पठनैर्वा, गीतापाठैः च पुनः भगवद्गीतायाः पठनैर्मुहुर्मुहुः भूयोभूयस्तेन नारदेन यदा बोध्यमानौ चेतनां कार्यमाणौ तदा कथंचित् अशक्त्वेपि बलाद्धेतोः उत्थितौ अभूताम् ॥ २७ ॥ नेत्रैरक्षिभिरनवलोकंतौ अपश्यंतौ जृंभंतौ मुखोत्फालनं कुर्वंतौ । अत एवोभौ द्वौ सालसौ आलस्येन सहितौ । बकवत्पलितौ धवलकेशौ 'पलितं जरया शौक्ल्यम्' इत्यमरोक्तेः । तत्र दृष्टांतः बकवदिति स्पष्टम् । प्रायो बाहुल्येन शुष्ककाष्ठसमांगकौ शुष्के नीरसे काष्ठे ताभ्यां समानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगानि ययोस्तौ तथा ॥ २८ ॥ क्षुत्क्षामौ क्षुधा क्षीणौ तौ ज्ञानवैराग्यौ पुनः भूयः आवां स्वपिव इति स्वापपरायणौ स्वापे तत्परौ दृष्ट्वा ऋषिर्नारदश्चिंतापरो जातः । मया किं विधेयमिति चिंतापरत्वम् ॥ २९ ॥ चिंताप्रकारमाह—अहो इति । अनयोर्निद्रा कथं याति अपगच्छति । अहो इत्याश्चर्ये । च पुनः वृद्धत्वं महत्तरम् अत्युत्कटं कथं याति इति हेतोः गोविंदं स्वेष्टदेवं चिंतयन्सन् चिंतां कुर्वन् सन्-हे भार्गव हे शौनक स्ववृत्तांतं स्मारयामास हरिं विज्ञापयांबभूव । गुरवस्तु—चौरादिकस्मृधातोः स्वार्थे णिच् प्रत्ययोत्रेत्याहुः । तेन गोविंदं सस्मारेत्यर्थः ॥ ३० ॥ तदा तस्मिन्समये व्योमवाणी आकाशवाक् अभूत्-हे ऋषे नारद मा खिद्यतां खेदो मा क्रियतामिति । ते तव उद्यमः पुरुषार्थः सफलो भविष्यति न संशयः संशयो नास्ति । तु एवार्थे ॥ ३१ ॥ उत्पन्नस्य विषादस्य कथं निवृत्तिः स्यादिति चिंतयंतं प्रत्याह—एतदर्थमिति । 'त्वंताथादि न पूर्वभाक्' इत्यमरोक्तेः त्वर्थमाह—हे सुरर्षे एतदर्थम् एतयोर्ज्ञानवैराग्ययोरर्थाय बोधनहेतवे सत्कर्म त्वं समाचर संकुरु । किं सत्कर्मेति ध्यायन्तं प्रत्याह—तत्कर्म

क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ ॥ ऋषिश्चिन्तापरो जातः किं विधेयं मयेति च ॥ २९ ॥ अहो निद्रा कथं याति वृद्धत्वं च महत्तरम् ॥ चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ॥ ३० ॥ व्योमवाणी तदैवाभून्मा ऋषे खिद्यतामिति ॥ उद्यमः सफलस्ते तु भविष्यति न संशयः ॥ ३१ ॥ एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर ॥ तत्ते कर्माभिधास्यन्ति साधवः साधुभूषणाः ॥ ३२ ॥ सत्कर्मणि कृते तस्मिन्सनिद्रा वृद्धताऽनयोः ॥ गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति ॥३३॥ इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतम् ॥ नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ॥ ३४ ॥ नारद उवाच ॥ अनयाकाशवाण्यापि गोप्यत्वेन निरूपितम् ॥ किं वा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ॥ ३५ ॥ क्व भविष्यंति संतस्ते कथं दास्यंति साधनम् ॥ मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया ॥ ३६ ॥

तुभ्यं साधुभूषणाः साध्वलंकाररूपाः । यद्वा—साधून् भूषयंति शोभयंतीति तथा ते साधवोऽभिधास्यंति कथयिष्यंति ॥ ३२ ॥ ततः किं, तत्राह—सत्कर्मणीति । तस्मिन् गगनगिरोक्ते सत्कर्मणि कृते सति अनयोर्ज्ञानवैराग्ययोः सनिद्रा निद्रया सहिता वृद्धता वृद्धभावस्तत्क्षणादेव गमिष्यति प्रयास्यति । भक्तिः प्रेमानंदरूपिणी सर्वतः चतुर्दिक्षु प्रसरिष्यति फलिष्यति ॥ ३३ ॥ असंभावयति—इतीति । इत्येवंप्रकारेण तदाऽऽकाशवचः आकाशोत्पन्नः शब्दः स्पष्ट यथा स्यात्तथा सर्वैर्जनैः श्रुतम् । इदं सत्कर्म मया न ज्ञातमिति ब्रुवन् वदन्सन् नारदो विस्मयं लेभे प्राप ॥ ३४ ॥ विस्मयमेवाह नारदः—अनयेति । नन्वाकाशवाण्या उत्पन्नविनाशित्वादनयेति कथनं दुर्घटं, तथापि तच्छब्दरूपायास्तस्या मूर्त्तैर्मद्बुद्धा संस्थितत्वादिदंतया निर्देशो युक्तः । अनयाकाशवाण्या गोप्यत्वेन निरूपितं, न तु स्पष्टत्वेनेत्यर्थः । किं वा तत्साधनं मया कार्यं कर्त्तव्यं, येन साधनेन तयोर्ज्ञानवैराग्ययोः कार्यं भवेत ॥ ३५ ॥ "तत्ते कर्माभिधास्यंति साधवः साधुभूषणाः (३२)" इत्यप्यसंगतं प्रतिभातीत्याह—क्वेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते पूर्वोक्ताः संतः साधवः क्व कुत्र स्थाने भविष्यंति तिष्ठंति । तत्समागमः कथं भविष्यतीति फलितोर्थः । जातेपि संगमे साधनप्राप्तिर्दुःसंभाव्येत्याह—कथं केन प्रकारेण साधनं दास्यंतीति स्वचित्तवैक्लव्यम् । व्योमभाषया वियद्वाचाऽत्र यदुक्तं तत्र मया किमभिधेयमिति ॥ ३६ ॥ सूतोक्तिः शौनकं प्रति—तत्रेति । तत्र यमुनातटे तावपि ज्ञानवैराग्यौ एवं संस्थाप्य स्थापयित्वा नारदो मुनिः निर्गतस्तत्स्थानात प्रचलितोऽभूत् । तथाहि—तीर्थमिति । तीर्थंतीर्थं प्रतितीर्थं विनिष्क्रम्य संभ्रम्य मार्गे पथि मुनीश्वरान्—किं नाम सत्कर्मेति पृच्छन्सन् ॥ ३७ ॥ तत्प्रचयमाह—वृत्तांत इति । सत्कर्म किमिति वृत्तांतः सर्वैर्ऋष्यादिभिः श्रूयते, किंचित किमपि तदेकदेशं निश्चित्य निश्चयं कृत्वा नोच्यते । समस्तार्थापरिज्ञानाभावेनोपहास्यभिया केचन ऋषयः असाध्यमेतदिति प्रोचुः । अपरे दुर्ज्ञेयमिति प्रोचुः ॥ ३८ ॥ किंच—अन्ये निकृष्टास्तु तथा तेन प्रकारेण मूकीभूता वाग्व्यापाररहिता बभूवुः । कियंतस्तु कियंतो जना आगच्छंतं नारदं दृष्ट्वा दूरादेव पलायिताः, तन्मार्गमुत्सृज्य सव्यापसव्यभागे याताः । हाहाकारो महानासीत महान्मह

सूत उवाच ॥ तत्र तावपि संस्थाप्य निर्गतो नारदो मुनिः ॥ तीर्थंतीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान् ॥ ३७ ॥ वृत्तांतः श्रूयते सर्वैः किंचिन्निश्चित्य नोच्यते ॥ असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे॥३८॥मूकीभूतास्तथान्ये तु कियन्तस्तु पलायिताः ॥ हाहाकारो महनासीत्रिलोकी विस्मयावहः॥३९॥ वेदवेदांतघोषैश्च गीतापाठैर्विबोधितम्॥भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा॥४०॥उपायो नापरोऽस्तीति कर्णेकर्णेऽजपञ्जनाः॥ योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ॥ ४१ ॥ तत्कथं शक्यते वक्तुमितरैरिह मानुषैः॥ एवं चर्षिगणैः पृष्टैर्निर्णीयोक्तं दुरासदम् ॥ ४२ ॥

त्तरो हाहाकारः कोलाहल आसीत् । स कीदृशोऽभूदिति तं विशिनष्टि—त्रिलोकीविस्मयावहः त्रयाणां लोकानां समाहारस्त्रिलोकी तस्या विस्मयावहः विस्मयकर्त्ता ॥३९॥ तमेव विशदयति—वेदेति । वेदवेदांतघोषैर्वेदवेदांतानां शब्दैः च पुनः गीतायाः पाठैश्च बोधितं सत् भक्तिज्ञानविरागाणां त्रिकं यदा नोदतिष्ठत् नोत्थितम् ॥ ४० ॥ अत्र कर्त्तव्यतामसंभावयति—उपाय इति । योगिना योगवता नारदेनापि स्वयं यत् न ज्ञायते न बुद्ध्यते तत्रापरोऽन्य उपायः कर्त्तव्यः विधिर्नास्ति इति कर्णेकर्णे जना अजपन् जल्पनमकुर्वन् ॥ ४१ ॥ अर्वाचीनैरेतदवाच्यमित्याह—तदिति । तत नारदाज्ञातम् इतरैर्भक्तिहीनैरयोगिभिर्मानुषैः कथं केन प्रकारेण वक्तुं कथयितुं शक्यते, न कथमपीति काकुः । प्रश्नोत्तरं न लब्धमित्याह—एवमिति । एवममुना प्रकारेण पृष्टैर्ऋषीणां गणैः शाखाभेदभिन्नैर्निर्णीय निर्णयं कृत्वा दुरासदं दुष्प्रापमित्युक्तम् ॥ ४२ ॥

१ न साधनार्हम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रश्नार्थगनुपलभमानो नारदश्चिंताव्यग्रोऽभूदित्याह—ततः प्रष्टव्यार्थानुपलब्धेर्हेतोश्चिंतातुरश्चिंतया आतुरः दुःखी स नारदः मदागमनं प्रतीक्षमाणां भक्तिं परावृत्य किमहं वक्ष्यामि।अकृतकृत्योहं तस्यै कथं मुखं प्रदर्शयिष्य इति लज्जार्थमथशब्दो मध्ये प्रक्षिप्तः।बदरीवनम् आगतःप्राप्तः। अत्र बदरीवने तदर्थं तस्यै, ताभ्यां वा, तेभ्यो वा, तपः शरीर शोषणम् अहं चरामि करिष्यामि इति कृतनिश्चयः कृतो निश्चयो येन स तथाऽभूत्॥ ४३॥ तत्र सनकादिदर्शनं जातमित्याह—तावदिति । तावत् तपःसाधनसंपत्तेः प्राक् सन कायान्मुनीश्वरान् पुरतोऽग्रभागे स नारदः ददर्श । कीदृशान्—कोटिसूर्यसमाभासान् ईश्वरावतारत्वात् बीजे वटप्ररोह इव एतत् संभाव्यते।अथानंतरमुवाच मुनीनां सत्तमः मुनिषु सत्तम इति वा ॥४४॥ "सर्वार्थसाधका यूयं कृपां कृत्वा ममोपरि । दीने कुरुत तत्सिद्धिं यदहं प्रष्टुमुद्यतः॥ "इति तन्माहात्म्यं प्रकटयति—इदानीमिति षड्भिः। इदानीमधुना भूरिभाग्येन महाभाग्येन भवद्भिर्युष्माभिः सह संगमः समागमः स्थितो जातः । हे कुमाराः कुत्सितो मारः कामो येषां ते तथा निष्प्रियत्वात्, परिग्रहशून्यत्वाद्वा,जितेंद्रियत्वेन, समाधिनिष्ठत्वाद्वा, प्रथमावस्थाविशिष्टत्वाद्वा, तथोक्तिः । असह्यं ममेदं दुःखमतः शीघ्रं क्षिप्रं ममोपरि कृपां कृत्वा कुमारा इति कर्तृपदमत्र योज्यम् । वदतामित्यार्षः प्रयोगः,

ततश्चिंतातुरः सोऽथ बदरीवनमागतः ॥ तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः ॥ ४३ ॥ तावद्ददर्श पुरतः सनकादीन्मुनीश्वरान् ॥ कोटिसूर्यसमा भासानुवाचमुनिसत्तमः ॥ ४४ ॥ नारद उवाच ॥ इदानीं भूरिभाग्येन भवद्भिः संगमः स्थितः ॥ कुमारा वदतां शीघ्रं कृपां कृत्वा ममोपरि ॥ ४५ ॥ भवंतो योगिनः सर्वे बुद्धिमंतो बहुश्रुताः ॥ पंचहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ॥४६॥ सदा वैकुंठनिलया हरिकीर्तनतत्पराः ॥ लीलामृतरसोन्मत्ताः कथामात्रैकजीवनाः ॥ ४७ ॥ हरिः शरणमेवं हि नित्यं येषां मुखे वचः ॥ अतः कालसमादिष्टा जरा युष्मान्न बाधते ॥ ४८ ॥

वदंत्वित्यर्थः गुरवस्तु 'गद्यताम्' इति पाठमाहुः । तत्र भवद्भिर्गद्यतामित्यन्वयः । भण्यतामित्यर्थः ॥४५॥ सर्वे चत्वारो भवंतः योगिनः प्रशस्तो योगोस्त्येषामिति । प्राशस्त्येर्थे । मत्वर्थीयः । ते तथा । बुद्धिमंतः मनीषिणः । बहुश्रुताः बहु भूरि श्रुतं येषां ते तथा । पंचहायनसंयुक्ताः पंच च तानि हायनानि वर्षाणि चेति पंचहायनानि तैः संयुक्ताः, पंचवर्षा इति यावत् । पूर्वेषामपि पूर्वजाः पूर्वं जाताः ॥ ४६ ॥ सदा सर्वस्मिन्काले वैकुंठनिलया वैकुंठं निलयः स्थानं येषां ते । तथा हरिकीर्त्तनत त्पराः हरेः कीर्त्तनं तस्मिन् तत्पराः परायणाः । लीला मत्स्यकच्छपनृसिंहवराहरामकृष्णादीनां चरित्राणि तान्येवामृतरसाः तैरुन्मत्ता विवशाः । कथामात्रैकजीवनाः— विशेष्यविशेषणवाचकपदानां सति विशेषणपदसमवधाने विशेष्यमात्रपरत्वम् । तेनात्र कथामात्रजीवना इत्यर्थो बोध्यः, 'स कीचकैर्मारुतपूर्णरंध्रैः' इति रघुवंशे कालि दासोक्तिवत्, "जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः" इति दशमे व्यासोक्तिवच्च, "अयुतयोजनसाहस्रीं शातकौंभीमात्मयोनिपुरीं वदंति" इतिवच्च, कथामात्रमेवैकं जीवनं येषां ते तथा । यद्वा—कथा एव कथामात्रं तदेकं प्रति जीवितुं शीलं येषां ते इति ताच्छील्यार्थे णिनिप्रत्यये जीविन इति पाठांतरं वा ॥ ४७ ॥ हरिर्हि एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येषां शरणमस्ति, येषां मुखे हरिरिति वचो नित्यमस्ति । यद्वा—'हरिः शरणम्' एवं वचः येषां मुखे नित्यमस्ति । अतः अस्मात्कारणात् हरेः शरणगत्या संततकीर्त्तनाद्धेतोः कालसमादिष्टा कालेनाज्ञप्ता जरावस्था युष्मान् भवतो नो बाधते, विकारं न करोतीत्यर्थः ॥ ४८ ॥ हरेर्द्वारपालौ जयविजयनामानौ पुरा पूर्वं येषां भ्रूभंगमात्रेण भ्रुकुटिपरिवर्त्तनेन सद्यः तत्क्षणमेव भूमौ पृथिव्यां निपतितौ । येषां कृपातः कृपयैव परं वैकुंठस्थानं गतौ त्रिभिर्जन्मभिः प्राप्तावित्येतदाख्यानं श्रीमद्भागवततृतीयस्कंधे स्पष्टमस्ति ॥ ४९ ॥ भाग्यस्य प्रारब्धस्य योगेन भवताम् इह लोके दर्शनं जातम् । अहो इति आश्चर्यम् । इह बदरीस्थाने । दीने अनाथे मयि दयापरैः कृपापरैर्भवद्भिरनुग्रहः कर्त्तव्यः ॥ ५० ॥ किमर्थमस्मान्स्तौषीत्यत आह—अशरीरेति द्वाभ्याम् । अशरीरगिरा खवाचा यदुक्तं सत्कर्मेति तत्साधनं किम् ? इत्युच्यताम् । तावत् प्रथमं कथं केन प्रकारेणानुष्ठेयम् अनुष्ठातुं योग्यम्, तदनुष्ठानं च किमिति फलितोर्थः । सविस्तरं यथा स्यात्तथा भवन्तः प्रब्रुवंतु प्रणिगदंतु ॥ ५१ ॥

येषां भ्रूभंगमात्रेण द्वारपालौ हरेः पुरा॥ भूमौ निपतितौ सद्यो यत्कृपातः परं गतौ॥४९॥अहो भाग्यस्य योगेन दर्शनं भवतामिह॥अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ॥५०॥ अशरीरगिरोक्तं यत्तत्किं साधनमुच्यताम् ॥ अनुष्ठेयं कथं तावत्प्रब्रुवंतु सविस्तरम् ॥ ५१ ॥ भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम् ॥ स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥ ५२ ॥ कुमारा ऊचुः ॥ मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह ॥ उपायः सुखसाध्योऽत्र वर्तते पूर्व एव हि ॥ ५३ ॥ अहो नारद धन्योसि विरक्तानां शिरोमणिः ॥ सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः ॥ ५४ ॥ त्वयि चित्रं न मन्तव्यं भक्त्यर्थमनुवर्तिनि ॥ घटते कृष्णदासस्य भक्तेः स्थापनता सदा ॥ ५५ ॥ ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः ॥ श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः ॥ ५६ ॥

भक्तिज्ञानविरागाणां कथं केन प्रकारेण सुखमुत्पद्यते जायते । सर्ववर्णेषु ब्राह्मणादिषु प्रेमपूर्वं प्रयत्नतस्तेषां स्थापनं कथमुत्पद्यते भवेत् ॥ ५२ ॥ कुमारकर्तृकनारदाऽऽश्वासनमाह--मा चिंतामिति । हे देवर्षे हे नारद चिंतां मा कुरु, चित्ते मनसि हर्षं प्रमोदं समावह त्वमाप्नुहि । अत्र अस्मिन् विषये पूर्वोऽनादिरुपायः सुखेन साध्यो वर्त्तते । हि युक्तम् ॥५३॥ त्वमपि धन्योऽसीत्याह--अहो इति । हे नारद त्वं धन्योसि विरक्तानां मध्ये शिरोमणिः चूडामणिरसि । श्रीकृष्णदासानां सदाऽग्रणीर्मुख्यः, अग्रेचरत्वात् । योगभास्करः योगस्य भास्करः सूर्य इव प्रकाशकोऽसि ॥५४॥ किंच—भक्त्यर्थं भक्तेरर्थाय अनुवर्त्तिनि अनुवर्त्तनशीले त्वयि परदुःखेनात्मनो दुःखित्वमिति चित्रमाश्चर्यं न मंतव्यं न मननीयं, परोपकारित्वात्त्वया युक्तं कृतमित्याह—घटत इति । कृष्णदासस्य श्रीकृष्णभक्तस्य सदा सर्वस्मिन्नेव काले भक्तेः स्थापनता स्थापनत्वं घटते संपद्यते ॥ ५५ ॥ तथाहि—ऋषिभिर्विश्वामित्रादिमरीच्यादिभिर्वा लोके जगति बहवः पंथानो मार्गाः प्रकटीकृताः उत्पादिताः, ते सर्वे क्रियाया बाहुल्यात् श्रमसाध्याः खेदेन सिद्ध्यर्हाः,प्रायो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाहुल्येन स्वर्गफलप्रदाः स्वर्गमेव फलं स्वर्गफलं तत् प्रकर्षेण ददतीति तथा ॥ ५६ ॥ पूर्वतो वैलक्षण्यमाह—वैकुंठेति । " यच्छब्देन तु तच्छब्दो बोद्धव्यः सततं बुधैः " इति याज्ञवल्क्यवचनेन यत्तच्छब्दयोः परस्परं नित्यसापेक्षत्वादत्र 'स' इति तच्छब्दस्य प्रयुज्यमानत्वाद्यच्छब्दाध्याहारः कर्त्तव्यः । तथा च—यः पंथा मार्गो वैकुण्ठसाधकः वैकुण्ठस्य सिद्धिहेतुः स तु गोप्यो वर्त्तते गुप्तोऽस्ति । तस्य गुप्तस्य उपदेष्टा उपदेशकर्त्ता पुरुषो हरिभक्तः प्रायो बाहुल्येन भाग्येन लभ्यते ॥ ५७ ॥ 'उपायः सुखसाध्योऽत्र' इति प्रतिज्ञातं वर्णयति—सत्कर्मेति । व्योमवाचा विष्णुपदवाण्या यत्सत्कर्म तव निर्दिष्टं कथितम् । पुरा पूर्वम् । तु पादपूर्त्तौ । तन्मया उच्यते । अद्य इदानीम् । स्थिरं चित्तं यस्य स तथा एकाग्रमनाः, प्रसन्नधीः प्रसन्ना दोषरहिता शुद्धा धीर्यस्य स तथा एवंभूतस्त्वं शृणुष्व श्रवणं कुरु ॥ ५८ ॥ ऋष्युक्तं मार्गबाहुल्यं दर्शयति—द्रव्येति । द्रव्ययज्ञा द्रव्यैश्चरुपुरोडाशादिभिः संपाद्या यज्ञा अग्निहोत्रादयः । तपोयज्ञाः कृच्छ्रातिकृच्छ्रपराकसांतपनचांद्रायणादिरूपाः । तथाऽपरे योगयज्ञाः योगः चित्तवृत्तिनिरोधः तेन साध्या यज्ञाः ध्यानसमाध्यादयः । स्वाध्यायः " स्वाध्यायोऽध्येतव्यः " इति वेदाभ्यासः, ज्ञानमात्मनिदर्शनम्, ताभ्यां संपाद्या यज्ञाः । तथेति चार्थः । ते

वैकुण्ठसाधकः पन्थाः स तु गोप्यो हि वर्तते ॥ तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥ ५७ ॥ सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा ॥
तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः ॥ ५८ ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथाऽपरे ॥ स्वाध्यायज्ञानयज्ञाश्च ते तु कर्मविसूचकाः ॥५९॥
सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः ॥ श्रीमद्भागवतालापः स तु गीतः शुकादिभिः ॥ ६० ॥ भक्तिज्ञानविरागाणां तद्घोषेण बलं महत् ॥
व्रजिष्यति द्वयोः कष्टं सुखं भक्तेर्भविष्यति ॥ ६१ ॥ प्रलयं हि गमिष्यंति श्रीमद्भागवतध्वनेः ॥ कलिदोषा इमे सर्वे सिंहशब्दाद्वृका इव ॥ ६२ ॥

सर्वे कर्मविसूचकाः कर्माणि विसूचयंतीति तथा ते संति ॥५९॥ इष्टार्थमाह—सदिति । सत्कर्मसूचकः सत्कर्मणः सूचक उद्बोधको ज्ञानयज्ञो नूनं निश्चयेन बुधैर्विवेकिभिः स्मृत उक्तः । स्पष्टार्थं तं विशिनष्टि—श्रीमदिति । को हि ज्ञानयज्ञ इति संशयनिरासार्थं तद्विशेषणं—श्रीमद्भागवतालाप इति । श्रीमद्भागवतस्य शास्त्रस्य आलापः कथनमिति मन्दमतीनां देवीभागवतभाषणादिशंकां निरस्यति--स तु गीतः शुकादिभिरित्यनेन । स तु स एव श्रीमद्भागवतालापः शुकादिभिर्गीतः । एतेन इदमेव भागवतं शास्त्रमिति सिद्धांतितम् । तत्र प्रमाणमव्यभिचारि "परीक्षिच्छुकसंवादं विद्धि भागवतं हि तत्" इति ॥ ६० ॥ तेन त्वन्मनोरथं सेत्स्यतीत्याह—भक्तीति । तद्घोषेण श्रीमद्भागवतशास्त्रशब्देन भक्तिज्ञानविरागाणां भुवि महत् बलं सामर्थ्यं भविष्यति । द्वयोर्ज्ञानवैराग्ययोः कष्टं व्रजिष्यति गमिष्यति । भक्तेः सुखं भविष्यति ॥ ६१ ॥ एतद्ध्वनेरग्रे कलेर्दोषा न तिष्ठंतीत्याह--प्रलयमिति । श्रीमद्भागवतध्वनेः श्रीमद्भागवतस्य ध्वनेर्नादात् सर्वे इमे कलिदोषाः प्रलयं नाशं गमिष्यंति । हि निश्चये । कस्मात्के इव—सिंहशब्दात् वृका इव ॥६२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नाशे फलमाह—ज्ञानेति । प्रेमरसावहा प्रेमैव रसस्तम् आवहतीति तथा । ज्ञानवैराग्याभ्यां संयुक्ता भक्तिः ततस्तदनंतरं प्रतिगेहं प्रतिजनं क्रीडां करिष्यति । सर्वत्र प्रसरिष्यतीति भावार्थः ॥ ६३ ॥ तच्छ्रुत्वा संदिहानो नारदः स्वाभिप्रायं प्रकाशयन्नाह—वेदेति त्रिभिः । वेदानां वेदांतानां घोषैः शब्दैश्च पुनः गीतापाठैः प्रबोधितं भक्तिज्ञानविरागाणां यत् त्रिकं नोदतिष्ठत् नोत्थितमभूत् । तु पादपूरणे ॥ ६४ ॥ तत त्रिकं श्रीमद्भागवतालापात् श्रीमद्भागवतस्यालापात् भाषणात् बोधं ज्ञानं कथमेष्यति प्राप्स्यति । एतदेव स्पष्टयति—तदिति । तत्कथासु श्रीमद्भागवतगाथासु वेदार्थः वेदानामर्थः । तु एव । श्लोकेश्लोके प्रतिश्लोकं, पदेपदे प्रतिपदं भवति ॥ ६५ ॥ अमोघदर्शनाः न मोघं विफलं दर्शनं येषां ते तथा भवंतो हि एनं संशयं छिंदन्तु । शरणागतवत्सलाः शरणम् आगतस्तत्र वत्सलाः दयालवः, यत एवंभूता अतोत्र विलंबो न कर्त्तव्यः । भवद्भिरिति शेषः ॥ ६६ ॥ तदुत्तरदानार्थं कमारोक्तिः नारदं प्रति—श्रीमद्भागवतं शास्त्रं किं वेदबाह्यम्, उत—वेदांतर्गतम् । नाद्यः'

ज्ञानवैराग्यसंयुक्ता भक्तिः प्रेमरसावहा ॥ प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ॥६३॥ नारद उवाच ॥ वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम् ॥
भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं तु यत् ॥ ६४ ॥ श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति ॥ तत्कथासु तु वेदार्थः श्लोकेश्लोके पदेपदे ॥
॥ ६५ ॥ छिन्दन्तु संशयं ह्येनं भवंतोऽमोघदर्शनाः ॥ विलम्बो नात्र कर्तव्यः शरणागतवत्सलाः ॥६६॥ कुमारा ऊचुः ॥ वेदोपनिषदां साराज्जाता
भागवती कथा ॥ अत्युत्तमा ततो भाति पृथग्भूता फलोन्नतिः ॥ ६७ ॥ आमूलाग्रं रसस्तिष्ठन्नास्ते न स्वदते यथा ॥ संभूय स पृथग्भूतः
फले विश्वमनोहरः ॥ ६८ ॥ यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते ॥ पृथग्भूतं हि तद्दिव्यं देवानां रसवर्धनम् ॥ ६९ ॥

अप्रमाणत्वात् । न द्वितीयः, वेदपाठैस्तदनुत्थानादिति नात्र संदेहावसर इत्याह—वेदेति । वेदोपनिषदां वेदाः प्रसिद्धाः, उपनिषदोपि दश एव मुख्या बृहदारण्यछंदोग्यादयस्तेषां सारात् भागवती कथा जातोत्पन्ना । ततः तस्मात्कारणात् पृथग्भूता भिन्नाकृतितः फलोन्नतिः फलेन उन्नतिरौन्नत्यं यस्याः सा, तथात्युत्तमा सर्वतः श्रेष्ठा भाति प्रकाशते ॥६७॥ फलमूलयोर्गुणतो भेदोस्तीति सूचयति—आमूलाग्रमिति त्रिभिः । आम्रादिवृक्षेषु सोमलतादिवल्लीषु च आमूलाग्रं मूलत आरभ्य अग्रभागपर्यंतं रसः तिष्ठन् वर्तमान आस्ते, यथा येन प्रकारेण न स्वदते नास्वाद्यते । स एव सर्वव्यापी रसः संभूय सारांशतः मिलित्वा पिंडाकारेण आम्रादिजे फले पृथग्भूतः पृथक्कृतः जातः (सन्) विश्वमनोहरः विश्वस्य सर्वस्य मनो हरतीति तथा भवति ॥ ६८ ॥ स्पष्टीकरणाय दृष्टांतः-दुग्धे स्थितं वर्त्तमानं सर्पिर्घृतं स्वादाय यथा नोपकल्पते न योग्यं भवति,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथग्भूतं दध्याकारेण परिणामं प्राप्तात् दुग्धात् मंथनविलोडनतो पृथक् संजातं तत् (घृतम्) देवानां रसं वर्द्धयतीति तथा भवति । हि लोकप्रसिद्धमेतत्॥६९॥उक्तार्थंदृढीकरणाय पुनर्दृष्टांतः—इक्षूणाम् आदिमध्यांतं सर्वांगं व्याप्य शर्करा यथा तिष्ठति, सा शर्करा पृथग्भूता इक्षुदंडान्निष्पीड्य पृथक्कृता सती मिष्टा भवति, तथा तेनैव प्रकारेण भागवती कथा वेदवेदान्तेभ्योऽऽत्युत्तमा भवतीत्यर्थः ॥७०॥ उक्तार्थें हेतुमाह—इदमिति । इदं भागवतम्।नामेति पादपूर्त्यावव्ययम्। यद्वा-नामेति प्रसिद्धौ प्रसिद्धं भागवतमित्यर्थः पुराणम्—ब्रह्मसंमितम् ब्रह्मभिः चतुर्भिर्वेदैः संमितं तुल्यमस्ति । परं प्रयोजनमस्याह-भक्तीति । भक्तिज्ञानविरागाणां स्थापनाय स्थापनार्थं प्रकाशितं व्यासेन ॥ ७१ ॥ तवायमविवेको भ्रांत्या जात इति संस्मारयन् पूर्ववृत्तांतमाह- वेदांतेति त्रिभिः । वेदांतेषु वेदेषु च सुस्नाते निपुणे । गीताया इत्युपलक्षणम्, इतिहासपुराणानां सर्वशास्त्रमय्या गीताया अपि कर्त्तरि स्रष्टरि व्यासे परितापवति परितापो मानसं दुःखं तद्वति अज्ञानसागरे अविद्यासागरे मुह्यति सति मोहं प्राप्ते सति ॥ ७२ ॥ तदा तस्मिन्काले चतुःश्लोकसमन्वितं श्लोकचतुष्टयसंपन्नं मूलं श्रीमद्भागवतं त्वया पुरा पूर्वं व्यासाय प्रोक्तम् । तदीयश्रवणात् तदीयानां पदार्थानां श्रवणात् बादरायणो व्यासः सद्यस्तत्कालं

इक्षूणामादिमध्यान्तं शर्करा व्याप्य तिष्ठति ॥ पृथग्भूता च सा मिष्टा तथा भागवती कथा ॥ ७० ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥ ७१ ॥ वेदान्तवेदसुस्नाते गीताया अपि कर्तरि ॥ परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥ ७२ ॥ तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितम् ॥तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ॥ ७३ ॥ तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् ॥ श्रीमद्भागवतश्रावे शोकदुःखविनाशनम् ॥ ७४ ॥ नारद उवाच ॥ यद्दर्शनं च विनिहन्त्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवार्दितानाम् ॥ निःशेषशेषमुखगीतकथैकपानाः प्रेमप्रकाशकृतये शरणं गतोऽस्मि ॥ ७५ ॥

निर्बाधः बाधारहितो जातः, मनःसंतुष्टः ॥ ७३ ॥ तत्र तस्मिन् श्रीमद्भागवते शास्त्रे केन हेतुना ते तव वेदवेदांतगीतापाठैर्भक्त्यादित्रिकं नोत्थितं तत् श्रीमद्भागवतालापात्कथं बोधमेष्यतीति विस्मयोऽस्ति, यतो हेतोः भवान् प्रश्नकरो भवति । निश्चितमेतस्य फलमाह—श्रीमदिति । श्रीमद्भागवतस्य श्रावे श्रवणे शोकदुःखयोर्विनाशनमिति ॥ ७४ ॥ तदुपदेशेन विस्मृतमणिलाभजातानंदो नारदो वक्ति-यदिति । भवदुःखदवार्दितानां भवे जन्मादिरूपे संसारे दुःखानि असंख्यातानि वसिष्ठसारादौ निदर्शितानि तान्येव दवोऽग्निस्तेनार्दितानां पीडितानां पुंसाम्, यद्दर्शनं येषां दर्शनं सद्यस्तत्क्षणे अशुभानि दुःखानि विनिहंति निःशेषतो नाशयति, च पुनः श्रेयो मंगलं तनोति विस्तारयति । हे निःशेषशेषमुखगीतकथैकपानाः निःशेषाणि समग्राणि सहस्रसंख्यापरिमितानि शेषस्य मुखानि तैः गीता याः कथाः तासामेकं पानं येषां त तथा । अहं शरणं गतोऽस्मि प्राप्तोऽस्मि । भवतामिति शेषः । किमर्थं, तत्राह-प्रेमप्रकाशकृतये प्रेम्णः प्रकाशकरणार्थम् ॥ ७५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्संगफलमाह—भाग्येति । बहुजन्मसमार्जितेन बहुषु जन्मसु समार्जितेन संपादितेन भाग्योदयेन यदा यस्मिन्काले पुरुषः सत्संगं लभते प्राप्नोति । एव निश्चये । तदा तस्मिन्काले विवेको ज्ञानमुदयते उत्पद्यते । किं कृत्वेत्यपेक्षायामाह—अज्ञानेति । अज्ञानमेव हेतुः कारणं तेन कृतो यो मोहः स एव महांधकारो गाढं तमस्तस्य नाशं विधाय कृत्वा । हि युक्तोऽयमर्थः ॥ ७६ ॥ ॥ इति श्रीशेखावाटयंतर्गतविजयपुरनिवासिब्राजलालिपंडितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां द्वितीयोऽध्यायः ॥ २ ॥ श्रद्धाय सनकाद्युक्तं ज्ञानयज्ञविधानकम् ॥ संपृच्छय नारदश्चक्रे श्रवणं तन्मुखेन वै ॥ १ ॥ “ सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः ” इति सनकादिवाक्यं श्रद्धाय तेनैवोत्तरग्रंथस्य संगतिं सूचयन् ब्रवीति नारदः—ज्ञानमिति । भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः प्रकृष्टेन यत्नेन ज्ञानयज्ञमहं करिष्यामि । वेदांतविचारनिरासाय कर्म विशिनष्टि—शुकेति । शुकस्य शास्त्रं श्रीमद्भागवतं तस्य कथा तयोज्ज्वलं प्रकाशितम् ॥ १ ॥ तद्विधानं पृच्छति—कुत्रेति द्वाभ्याम् ।

भाग्योदयेन बहुजन्मसमार्जितेन सत्संगमेव लभते पुरुषो यदा वै ॥ अज्ञानहेतुकृतमोहमदान्धकारनाशं विधाय हि तदोदयते विवेकः ॥ ७६ ॥ इति श्रीपद्मपुराण उत्तरखण्डे श्रीभागवतमाहात्म्ये कुमारनारदसंवादो नाम द्वितीयोऽध्यायः ॥ २ ॥ नारद उवाच ॥ ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्ज्वलम् ॥ भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः ॥ १ ॥ कुत्र कार्यो मया यज्ञः स्थलं तद्वाच्यतामिह ॥ महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः ॥ २ ॥ कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा ॥ को विधिस्तत्र कर्तव्यो ममेदं वदतामितः ॥ ३ ॥ कुमारा ऊचुः ॥ शृणु नारद वक्ष्यामो विनम्राय विवेकिने ॥ गंगाद्वारसमीपे तु तटमानन्दनामकम् ॥ ४ ॥ नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितम् ॥ नानातरुलताकीर्णं नवकोमलवालुकम् ॥ ५ ॥

यज्ञो ज्ञानयज्ञः कुत्र कस्मिन्स्थाने मया कार्यः कर्त्तव्यः, तत्स्थलं स्थानं भवद्भिर्वाच्यताम् । निवृत्तैषणत्वादुच्यतामित्यर्थः । इह लोके । किञ्च—वेदस्य पारगैः पारं गतैः शुकशास्त्रस्य श्रीमद्भागवतस्य महिमा माहात्म्यं वक्तव्यः ॥ २ ॥ श्रीमद्भागवती कथा कियद्भिः किंप्रमाणैर्दिवसैर्दिनैः श्राव्या श्रोतुं योग्या । अत्र ‘सेव्या’ इति पाठो युक्तः, प्रक्रमोपसंहारयोरैक्यात । तत्र श्रवणे को विधिः किं विधानं कर्त्तव्यः, मम मह्यम् इतः एतस्मात्कारणात इदं वदताम् उच्यताम्, संप्रसारणाद्यभाव आर्षः ॥ ३ ॥ कुमारा नारदं प्रति स्थलनिरूपणपूर्वकं ज्ञानयज्ञकरणं तत्फलं च निरूपयंति—शृण्वित्यादिषड्भिः । हे नारद पृष्टं स्थलादिकं त्वं शृणु, विनम्राय विशेषेण नम्रीभूताय विवेकिने विवेको विचारस्तद्वते तुभ्यं वयं वक्ष्यामः । तथाहि—गंगाद्वारस्य समीपे आनंदनामकं तटमस्ति ॥ ४ ॥ तद्विशेषणानि—नानाऋषि ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गणैर्जुष्टं सेवितं देवैः सिद्धैश्च निषेवितं नाना बहुप्रकारास्तरवो वृक्षास्तेषां लताभिराकीर्णं व्याप्तं, नवा नूतना मृदुला वालुका यस्मिंस्तत्तथा ॥ ५ ॥ रम्यं रमणीयम् एकांतदेशस्थम् एकांतदेशे वर्त्तमानम् । हैमानि स्वर्णमयानि पद्मानि कमलानि तैः सुशोभितमतिसुंदरम् । तत्प्रभावमाह—यदिति । यस्य समीपे स्थितानां जीवानां चेतसि मनसि वैरं विरोधः न स्थितम्, न वर्त्तत इत्यर्थः ॥ ६ ॥ तत्र तस्मिन्स्थाने ज्ञानयज्ञस्त्वया कार्यः, अप्रयत्नतः प्रयत्नं विनैवेति तन्महिमा । हि युक्तम् । तत्रोक्तस्थले अपूर्वा नवीना रसरूपा रसप्रधाना कथा भविष्यति प्रवर्त्तिष्यते ॥ ७ ॥ तत्रैव भक्तिरागमिष्यति । किं कृत्वा—तद्द्वयं तयोर्ज्ञानवैराग्ययोर्द्वयं पुरस्कृत्य अग्रे कृत्वा । कीदृशं तदित्यपेक्षायामाह—पुरःस्थमिति,--स्वाग्रे स्थितम् । निर्बलं बलरहितम् । जराजीर्णकलेवरं जरया जीर्णे उत्थानाद्यसमर्थे कलेवरे शरीरे यस्य तत्तथा ॥ ८ ॥ "श्रीरामचरितोच्चारे वायुसूनोः समागमः । महाभारतसंश्रावे ह्यश्वत्थामागमस्तथा ॥ विरामे निर्गमो वित्तः किंवदंतीति निश्चितम् ।" तद्वदत्रापि भक्त्यादेरागमो मुनिभिः स्मृत

रम्यमेकांतदेशस्थं हैमपद्मसुशोभितम् ॥ यत्समीपस्थजीवानां वैरं चेतसि न स्थितम् ॥ ६ ॥ ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः ॥ अपूर्वा रसरूपा च कथा तत्र भविष्यति ॥ ७ ॥ पुरःस्थं निर्बलं चैव जराजीर्णकलेवरम् ॥ तद्द्वयं च पुरस्कृत्य भक्तिस्तत्रागमिष्यति ॥ ८ ॥ यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत् ॥ कथाशब्दं समाकर्ण्य तत्त्रिकं तरुणायते ॥ ९ ॥ सूत उवाच ॥ एवमुक्त्वा कुमारास्ते नारदेन समं ततः ॥ गंगातटं समाजग्मुः कथापानाय सत्वराः ॥ १० ॥ यदा यातास्तटं ते तु तदा कोलाहलोऽप्यभूत् ॥ भूर्लोके देवलोके च ब्रह्मलोके तथैव च ॥ ११ ॥

इति लोकप्रसिद्धिं सूचयन्नाह—यत्रेति । यत्र स्थाने भागवती वार्त्ता भवेत्, तत्र स्थाने भक्त्यादिकं व्रजेदागच्छेत् । तत्त्रिकं भक्त्यादीनां त्रयं तरुणायते तरुण इवाचरति । किं कृत्वा—कथाशब्दं कथोच्चारं समाकर्ण्य संश्रुत्य ॥ ९ ॥ ततस्तेषामागमनमाह—एवमिति । एवं पूर्वोक्तप्रकारेणोक्तास्ते प्रसिद्धाः कुमाराः सनकादयः नारदेन समं सह ततो बदरीस्थानात् सत्वराः त्वरया सहिताः शीघ्रगामिनो गंगातटं समाजग्मुः स्वर्णद्यास्तटं समायाताः । किमर्थमित्यपेक्षायामाह—कथेति । कथापानाय लोकानां कथारसपानार्थम् । तादर्थ्ये चतुर्थी[1] । अत्र वर्णद्वयलोपविधिः शिक्षायां शौनकोक्तः । तद्वाक्यम्—"यथा वर्णस्य वर्णयोर्लोपो बहूनां वा कदाचन" । विराटपर्वण्युत्तरं प्रति विराटोक्तिः—'अत्र मध्ये यथार्कस्य' इति तट्टीकायां सोदाहरणं नीलकंठेन निरूपितं द्रष्टव्यम् ॥ १० ॥ तद्वृत्तं सर्वत्र प्रविस्तृतमित्याह—यदेति । यदा

१ अथवा—"क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इत्यप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी । कथारसपानं कर्त्तुमित्यर्थः । २ वस्तुतस्तु कथापानायेत्यत्र पाधात्वर्थः सप्रेमश्रवणरूपः । तत्र रसशब्दानयनाय विशेषाऽऽयासो नावश्यक इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्काले ते सनारदाः सनकादयस्तटम् । गंगाया इति शेषः । याताः प्राताः, तदा तस्मिन्काले भूर्लोके पृथिव्याम् । च पुनः । देवलोके स्वर्गे । तथैव च तेनैव विधया ब्रह्मलोके सत्यलोके कोलाहलः कलकलध्वनिरप्येवाऽभूत् ॥ ११ ॥ तच्छ्रुत्वा श्रोतॄणामागमनं निरूपयति–श्रीभागवतेति त्रिभिः । प्रथममादौ रसलंपटाः रसास्वादिनो ये वैष्णवा जनाः ते सर्वे धावंतः शीघ्रतां कुर्वंतः तत्रानंदनामाख्ये तटे अपि निश्चयेनाययुराजग्मुः । किमर्थम्–श्रीभागवतस्य पीयूषस्यामृतरूपस्य पानाय पानार्थम् ॥ १२ ॥ तान्नामभिर्निर्दिशति–भृग्वाद्याश्चत्वारः प्रसिद्धाः।मेधातिथिः बलिवैश्वदेवकर्मांते आगते–अतिथौ मेधा विष्णुरूपा बुद्धिर्यस्य स तथा[1] । देवलः प्रसिद्धः, देवरातो याज्ञवल्क्यः । रामः परशुरामः । तथा तेनैव प्रकारेण गाधिसुतो विश्वामित्रः । शाकलो मुनिः । मृकंडपुत्रो मार्कंडेयः । अत्रिजो दत्तात्रेयः । पिप्पलादाः, बहुत्वं गोत्राभिप्रायेण ॥ १३ ॥ योगेश्वरो[2] वामदेवः । व्यासपराशरौ प्रसिद्धौ । छायाशुको व्यासमोहनिरासाय छायया रचितः । जाजलिर्जह्नुश्च मुख्यौ प्रधानौ येषां ते तथा । सर्वेऽप्येवामी पूर्वोक्ता मुनि

श्रीभागवतपीयूषपानाय रसलम्पटाः ॥ धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्णवाः ॥ १२ ॥ भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ ॥ रामस्तथा गाधिसुतश्च शाकलो मृकण्डपुत्रोऽत्रिजपिप्पलादाः ॥ १३ ॥ योगेश्वरो व्यासपराशरौ चच्छायाशुको जाजलिजह्नुमुख्याः ॥ सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्याः स्वस्त्रीभिराययुरतिप्रणयेन युक्ताः ॥ १४ ॥ वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः ॥ दश सप्त पुराणानि षट् शास्त्राणि तथाऽऽययुः ॥ १५ ॥ गंगाद्याः सरितस्तत्र पुष्करादिसरांसि च ॥ क्षेत्राणि च दिशः सर्वा दण्डकादिवनानि च ॥ १६ ॥

गणा मुनीनां गणाः समूहाः सहपुत्रशिष्याः पुत्रैः शिष्यैश्च सहिताः स्वस्त्रीभिः समं स्वनारीभिः सहातिप्रणयेनातिप्रेम्णा युक्ताः संतः आययुः । स्त्रीपुत्रशिष्याणामानयनम् " यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः " इति सत्संप्रदायमार्गोपदेशार्थमिति बोध्यम् ॥ १४ ॥ श्रीमद्भागवतस्य सर्वतः श्रैष्ठ्यं निरूपयति–वेदेति सार्द्धाभ्यां द्वाभ्याम् । तदा तस्मिन्नेव काले वेदांतानि दशोपनिषदः, वेदा ऋगाद्याः, च पुनः मंत्राः संजीवनादयः । तंत्रा ब्रह्मयामलोक्ताः रावणादिकृतडामरोक्ता वेति केचित् । गुरवस्तु नारदपं चरात्रोक्ता इत्याहुः । ननु जडानां तेषां कथमागमनं घटेतेत्यत्राह–समूर्त्तयः मूर्तिमंतः, तदधिष्ठातृदेवानां चेतनत्वात् । एवमग्रेपि । दश सप्त पुराणानि सप्तदशसंख्यानीत्यर्थः। षट् शास्त्राणि–गौतम–कणाद–कपिल–पतञ्जलि–व्यास–जैमिनि–प्रणीतानि तस्मिन्नेवावसरे आययुः आजग्मुः ॥ १५ ॥ गंगाद्याः गंगा आद्या प्रधाना यासां तास्तथा। अतद्गुणसंविज्ञानबहुव्रीहिणात्र यमुनाद्या बोध्याः, गंगायास्तत्रैव विद्यमानत्वात् । सरितो नद्यः । च पुनः । पुष्करादिसरांसि, क्षेत्राणि कुरुक्षेत्रादीनि, दिशः पूर्वाद्याः, सर्वा

१ " वाऽऽहिताग्न्यादिषु " इति मेधाशब्दस्य पूर्वनिपातः, दण्डपाण्यादिवत् । २ केचन योगीश्वराविति पठित्वा याज्ञवल्क्यजैगीषव्याविति व्याचक्षते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशैव । चतस्रो वेति केचित् । दंडकादीनि वनानि । स्पष्टोऽर्थः ॥ १६ ॥ नगादयो मेर्वाद्या हिमालयाद्या वा तत्रोक्तस्थाने ययुः । देवाश्च गंधर्वाश्च किन्नराश्चेति ते तथा । गृहाद्यासक्तान् पामरान् भृगुरबोधयदित्याह—गुरुत्वादित्यर्द्धेन । तत्रोक्तस्थाने धनतृष्णया नायातान् अनागतान् भृगुरानयत् । किं कृत्वा—संबोध्य,—रे रे मंदाः किमर्थं नो व्रजथ अयं समागमो देवानामपि दुर्लभ इति विज्ञाप्य । ननु "प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्त्तते" इति वचनाद्विनार्थं भृगुपारिश्रमो व्यर्थ इति चेदुच्यते—गुरुत्वादिति प्रसिद्ध्या शिष्योपदेशो युक्त इत्यर्थः ॥ १७ ॥ ततः परं किं जातमित्यत आह—दीक्षिता इति । दीक्षा संजाता येषां ते तथा भूताः कुमाराः सनकादयः पूर्वैरागतैः सर्वैर्वंदिताः नमस्कृताः कृष्णतत्पराः कृष्णपरायणाः नारदेन दत्तमासनं निषेदुरधिष्ठिता बभूवुः । दीक्षितेति नारदविशेषणे आर्षोऽ वर्णलोपः "विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे" इत्युक्तेः ॥ १८ ॥ इदानीं श्रोतॄणामासनप्रकारमाह—वैष्णवा इति । वैष्णवा विष्णूपासकाः

नगादयो ययुस्तत्र देवगन्धर्वकिन्नराः ॥ गुरुत्वात्तत्र नायातान्भृगुः संबोध्य चानयत् ॥ १७ ॥ दीक्षिता नारदेनाथ दत्तमासनमुत्तमम् ॥ कुमारा वन्दिताः सर्वैर्निषेदुः कृष्णतत्पराः ॥ १८ ॥ वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः ॥ मुख्यभागे स्थितास्ते च तदग्रे नारदः स्थितः ॥ १९ ॥ एकभागे ऋषिगणास्तदन्यत्र दिवौकसः ॥ वेदोपनिषदोऽन्यत्र तीर्थान्यत्र स्त्रियोऽन्यतः ॥ २० ॥ जयशब्दो नमः शब्दः शंखशब्दस्तथैव च ॥ चूर्णलाजाप्रसूनानां निक्षेपः सुमहानभूत् ॥ २१ ॥ विमानानि समारुह्य कियंतो देवनायकाः ॥ कल्पवृक्षप्रसूनानां[1] सर्वांस्तत्र समाकिरन् ॥ २२ ॥

च पुनः विरक्ता वीतरागाः, च पुनः न्यासिनः संन्यासिनः, ब्रह्मचारिणोपि मुख्यभागे सर्वाग्रे स्थिता निषण्णाः । तदग्रे तेषामग्रे पुरो नारदः स्थितः, मुख्यश्रोतृत्वात्समागमसंपादकत्वाद्वा ॥ १९ ॥ अन्येषां स्थितिं पृथक्पृथगाहुः—एकभाग इति । ऋषीणां गणा एकभागे एकत्र, दिवौकसो देवाः तदन्यत्र ऋषिस्थानादन्यत्र, वेदोपनिषदोऽन्यत्र अन्यस्थाने, अन्यत्र भिन्नस्थाने तीर्थानि, तीर्थान्यन्यत्रेति वाच्ये वर्णलोप आर्षः, छन्दोऽनुरोधात् । स्त्रियः अन्यतः—सप्तम्यर्थे तसिल्प्रत्ययादन्यत्रेत्यर्थः । स्थिता बभूवुरिति शेषः ॥ २० ॥ ततो मंगलध्वनिरभूदित्याह—जयेति । पूर्वार्द्धं स्पष्टम् । चूर्णानि कुङ्कुमतैलालवंगकर्पूरादिसुगंधिद्रव्याणि, लाजा भर्जितास्तण्डुलाः 'खील' इति भाषायाम् । 'लाजा भृष्टयवे स्त्रियाम्' इत्यमरोक्तेः । अत्र यवशब्दोऽक्षतपरः 'अक्षतास्तु यवाः प्रोक्ताः' इति वचनात् । प्रसूनानि पुष्पाणि, तेषां निक्षेपः पातनं सुमहान् भूयानभूत् ॥ २१ ॥ तत्राप्यौत्सुक्यमाह—विमानानीति । कियंतः कतिपयाः देवनायकाः देवप्रणेतारः विमानानि सप्तनवभूमिकानि स्थानानि विमानानी

[1] प्रसूनानीति द्वितीयान्तपाठे तु समागतान् सर्वान्प्रति कल्पवृक्षप्रसूनानि समाकिरन्नित्यन्वयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्युच्यंते तानि समारुह्य समारोहणं कृत्वा कल्पवृक्षप्रसूनानां कल्पवृक्षपुष्पैः । तृतीयार्थे षष्ठीयम् । "नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः" इतिवत् । तत्र स्थाने सर्वान्न्श्रोतुमागतान्समाकिरन् समाच्छादयन्, समावृण्वन्निति यावत् ॥ २२ ॥ सूतः शौनकं प्रति कथारंभमाह—एवमिति । एवमुक्तविधया तेषु श्रोतृषु एकचित्तेषु एकस्मिन्नकथारसपाने चित्तं येषां ते तथा तेषु । यद्वा—एकम् एकाग्रं चित्तं येषां त इति वा, वर्णलोपोऽत्र छान्दसो विज्ञेयः । एवंभूतेषु सत्सु श्रीमद्भागवतस्य माहात्म्यं महिमानं स्पष्टं यथा स्यात्तथा माहात्मने पूज्याय नारदाय सनकाद्या ऊचिरे वर्णयांचक्रुः ॥ २३ ॥ कुमारोक्तिः नारदं प्रति । तत्प्रकारमाह—अथेति । अथेति मंगलं प्रारंभे । शुकशास्त्रतः इत्यत्र षष्ठ्यर्थे तसिल्प्रत्ययः तेन शुकशास्त्रस्येत्यर्थः । महिमा महिमानं ते तुभ्यं संप्रवक्ष्यामो वयं संवर्णयिष्यामः, यस्य श्रवणमात्रेण श्रवणादेव निष्कामाणां मुक्तिः; सकामानां साधनसंपत् करतले स्थिता, हस्तगता भवेदित्यर्थः । अपरे तु 'महित्वं शुकशास्त्रजम्' इति पाठमाहुः । गुरवस्तु—'अथ ते वर्ण्यतेऽस्माभिः' इति सम्प्र

सूत उवाच ॥ एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च ॥ माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने ॥२३॥ कुमारा ऊचुः ॥ अथ ते संप्रवक्ष्यामो महिमा शुकशास्त्रतः ॥ यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता ॥ २४ ॥ सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा ॥ यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ॥ २५ ॥ ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसंमितः ॥ परीक्षिच्छुकसंवादः शृणु भागवतं च तत् ॥ २६ ॥ तावत्संसारचक्रेऽस्मिन्भ्रमते ऽज्ञानतः पुमान् ॥ यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम् ॥ २७ ॥ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः ॥ एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥ २८ ॥

दायानुसारेण वदंति; तद्युक्तम् ॥ २४ ॥ कियद्भिर्दिवसैः श्राव्येति दिननियममपाकुर्वन्नाह—सदेति । श्रीमद्भागवती कथा सदा सेव्या सदा सेव्येति वीप्सया यावज्जीवं सेवनीयेत्यर्थः । एतेन दिनानां नियमो नास्तीति ध्वनितम् । तत्फलमाह—यस्याः कथायाः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् मनः संयायात् ॥ २५ ॥ किंप्रमाणं भागवतं, कतिविभागास्तस्य, कियंतोऽध्याया इत्यपेक्षायामाह—ग्रंथ इति । ग्रंथः शास्त्रम् अष्टादशसाहस्रः अष्टादशसहस्रश्लोकात्मकः द्वादश स्कंधास्तैः संमितः प्रमितः, परीक्षिच्छुकसंवादः परीक्षिते शुकस्य संकथनं यस्मिन्नित्यर्थो बोध्यः, द्वंद्वे दोषोत्पत्तेः[1] । तत् भागवतं शास्त्रं त्वं शृणु ॥ २६ ॥ किं तच्छ्रवणेनेत्यत आह—तावदिति । अस्मिन्संसारचक्रेऽज्ञानतः पुमान् तावत् भ्रमते शुकशास्त्रस्य श्रीमद्भागवतस्य कथा क्षणं क्षणमात्रं कर्णगता श्रोत्रं प्राप्ता यावन्नास्तीति योजना ॥ २७ ॥ "विचित्रशास्त्रसंश्रुत्या जायते

१ परीक्षित्कर्तृककथनभ्रान्त्येत्यादिः । वस्तुतस्तु संवदतेः परस्परकथन एव शक्त्या प्रश्नविभागस्य परीक्षितोक्तत्वादपि द्वन्द्वेऽपि न दोष इति भाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निश्चित्तं भ्रमः । सर्वशास्त्रफलाधिक्यान्मुक्त्यै भागवतं वरम् ॥ " इत्याह षड्भिः—किंश्रुतैरित्यादिभिः । श्रुतैर्बहुभिः शास्त्रैः किं, पुराणैः किं, न किमपि, यतो भ्रमावहैः भ्रमप्राप्तिकरैः । भागवतमेकं शास्त्रं श्रोतृभ्यो मुक्तिदानेन गर्जति शब्दं करोति ॥ २८ ॥ यद्गृहे यस्य गेहे श्रीमद्भागवतस्य कथा भवति, तद्गृहं तीर्थरूपम् । तीर्थसममिति मंदाः । प्रशस्तं तीर्थमिति गुरवः । वसतां तद्गृहे वसतां निवासकर्तॄणां पुंसां पापनाशनं पापानां नाशकर्तृ । हि युक्तोऽयमर्थः ॥ २९ ॥ अश्वमेधाख्यस्य यज्ञस्य सहस्राणि, च पुनः वाजपेयाख्यस्य यज्ञस्य शतानि, शुकशास्त्रकथायाः श्रीमद्भागवतगाथायाः षोडशीं कलां नृपसंख्यासंमितं विभागं नार्हंति, षोडशकलातुल्यतां न प्राप्नुवन्तीत्यर्थः ॥ ३० ॥ हे तपोधनाः हे शौनकादयः । नरैः पुंभिः श्रीमद्भागवतं न श्रूयते भागवतशास्त्रस्य श्रवणं न क्रियते यावत् तावदेवाऽस्मिन् शरीरे पापानि निवसंति तिष्ठंति ॥ ३१ ॥ च पुनः शुकशास्त्रकथायाः फलेन समतां तुल्यतां गंगा भागारथी न नयेत् न प्राप्नुयात् । एवं गयादयोपि समतां न प्राप्नुयु

कथा भागवतस्यापि नित्यं भवति यद्गृहे ॥ तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥२९॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम् ॥ ३० ॥ तावत्पापानि देहेऽस्मिन्निवसान्ति तपोधनाः ॥ यावन्न श्रूयते सम्यक्छ्रीमद्भागवतं नरैः ॥ ३१ ॥ न गंगा न गया काशी पुष्करं न प्रयागकम् ॥ शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥ ३२ ॥ श्लोकार्द्धं श्लोकपादं वा नित्यं भागवतोद्भवम् ॥ पठस्व स्वमुखेनैव यदिच्छसि परां गतिम् ॥ ३३ ॥ वेदादिर्वेदमाता च पौरुषं सूक्तमेव च ॥ त्रयी भागवतं चैव द्वादशाक्षरमेव च ॥ ३४ ॥ द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः ॥ ब्राह्मणाश्चाग्निहोत्रं च सुरभिर्द्वादशी तथा ॥ ३५ ॥

रिति भावार्थः । खंडान्वये तु गंगावदन्वयः ॥ ३२ ॥ भागवतोद्भवं भागवताद्रुत्पन्नमिति व्याख्यानेऽन्यस्य प्रतीतिर्जायतेऽतः भागवते उद्भव उत्पत्तिः, वर्तमानतेति यावत् । यस्येति सप्तमीतत्पुरुषो युक्तः । श्लोकार्द्धं श्लोकस्यार्द्धं पादद्वयम् । श्लोकस्य पादं चतुर्थांशं वा नित्यं प्रतिदिनं नियमेन स्वमुखेन स्वकीयास्येन पठस्व त्वं पठनं कुरु इति नारदं प्रत्युक्तिः । यदि परां गतिमिच्छसि वांछसि तदा, एतेनैतत्पठनमेव मुक्तिहेतुरिति सूचितम् ॥ ३३ ॥ किंचान्येषामपि तद्वन्माहात्म्यमिति सूचयति—वेदेति त्रिभिः। वेदादिरोंकारः, च पुनः वेदमाता गायत्री, पौरुषं सूक्तम् "सहस्रशीर्षा" इति षोडशमंत्ररूपम् । एवं चेति निश्चितम् । त्रयी वेदत्रयी ऋग्यजुःसामात्मिका, भागवतमिदम् । चैवेति पूर्ववत्पादपूरणार्थं वा । द्वादशाक्षरम्—'ॐ नमो भगवते वासुदेवाय' इति मंत्रः ॥ ३४ ॥ द्वादशात्मा मासभेदेन द्वादशमूर्त्तिः श्रीसूर्यः, प्रयागस्तीर्थराजः, संवत्सरात्मकः कालः प्रसिद्धः, ब्राह्मणाः ब्रह्ममुखोद्भवा विप्राः । च पुनः । अग्निहोत्रम् "यावज्जीवमग्निहोत्रं जुहोति" इत्यभिहितम् । द्वितीयश्चकारः पादपूरणार्थः । सुरभिः कामधेनुः, द्वाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शी तिथिः ॥ ३५ ॥ तुलसी प्रसिद्धा, च पुनः वसंतऋतुः, पुरुषोत्तमः श्रीनारायणः । एव चेत्युक्तवत् । एतेषामुक्तानां षोडशपदार्थानां प्राज्ञैः पंडितैः तत्त्वतः याथार्थ्येन पृथग्भावः भिन्नत्वं न इष्यते न वांछयते । मूढानां भेदव्यपदेश इति फलितोर्थः ॥ ३६ ॥ अर्थत एतद्वाचने फलमाह–यश्चेति । यश्च पुण्यात्मा महाभागो वाऽनिशमहो रात्रं प्रतिदिनं वा श्रीमद्भागवतं शास्त्रमर्थतो वाचयेत् तस्य जन्मकोटिकृतं जन्मनां कोटयस्तत्कृतं पापं नश्यते नष्टं भवति । अत्रार्थे संशयो नास्ति ॥ ३७ ॥ किंच–एतत्प ठनस्य महत्पुण्यमित्याह–श्लोकेति । भागवतं भागवतांतर्गत । मंचाः क्रोशंतीतिवल्लक्षणया बोध्यम् । श्लोकार्द्धं श्लोकपादं वेति पूर्वं व्याख्यातमेव । यः सुकृती पठेत्, नित्यं सदा राजसूयाश्वमेधयोर्यज्ञयोः पुण्यं फलमवाप्नोति प्राप्नोति ॥ ३८ ॥ अन्येषामपि साम्यं निरूपयति–उक्तमिति । उक्तं कथितं भागवतं, नित्यं कृतं संपादितं हरि चिंतनं हरेर्ध्यानं, तुलसीपोषणं तुलस्याः पोषणं जलसेचनादिना पुष्टीकरणं, च पुनः एव निश्चितं धेनूनां सेवनं गवां सेवा तृणजलयवान्नादिभिस्तदुपकरणं, समम् ।

तुलसी च वसन्तश्च पुरुषोत्तम एव च ॥ एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव इष्यते ॥ ३६ ॥ यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम् ॥ जन्मकोटिकृतं पापं नश्यते नात्र संशयः ॥ ३७ ॥ श्लोकार्द्धं श्लोकपादं वा पठेद्भागवतं च यः ॥ नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ॥ ३८ ॥ उक्तं भागवतं नित्यं कृतं च हरिचिन्तनम् ॥ तुलसीपोषणं चैव धेनूनां सेवनं समम् ॥ ३९ ॥ अन्तकाल तु येनैव श्रूयते शुकशास्त्रवाक् ॥ प्रीत्या तस्यैव वैकुण्ठं गोविन्दोऽपि प्रयच्छति ॥ ४० ॥ हेमसिंहयुतं चैतद्वैष्णवाय ददाति च ॥ कृष्णेन सह सायुज्यं स पुमाँल्लभते ध्रुवम् ॥ ४१ ॥ आजन्ममात्रमपि येन शठेन किंचिच्चित्तं विधाय शुकशास्त्रकथा न पीता ॥ चाण्डालवच्च खरवद्बत तेन नीतं मिथ्या स्वजन्म जननी जनिदुःखभाजा ॥ ४२ ॥

अर्थतस्तुल्यमेव ॥ ३९ ॥ मरणकालेऽप्येतन्मुक्तिप्रदमित्याह–अंतकाल इति । अंतकाले प्राणोत्क्रमणसमये येनैव पुण्यात्मना शुकशास्त्रवाक् श्रीमद्भागवतध्वनिः श्रूयते, तस्य तस्मै एव पुरुषाय गोविंदः श्रीहरिः प्रीत्या प्रेम्णा वैकुंठं लोकं प्रयच्छति प्रकर्षेण ददाति । अपि निश्चितम् ॥ ४० ॥ अथ श्रीमद्भागवतदानफल माह–हेमेति । हेमसिंहयुतं हेम्नः सुवर्णस्य सिंहाः पट्टाभिषेकप्रकरणेऽभिहिता अष्टौ यस्मिंस्तद्धेमसिंहम् आसनं तेन युतम् । सिंहशब्दो लक्षणया सिंहासनपर इत्येके । नामैकदेशन्यायेन सिंहशब्दः सिंहासनपर इत्यपरे । एतच्छास्त्रं श्रीमद्भागवतं वैष्णवाय यः सुकृती धनी ददाति स पुमान् कृष्णेन सह सायुज्यं मुक्तिविशेषं लभते प्राप्नोति । पादपूर्त्तौ चकारः ॥ ४१ ॥ एतच्छ्रवणं विना धिग्जीवितमित्याह–आजन्मेति । येन शठेन आजन्ममात्रं जन्मत आरभ्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचित् अल्पमपि यथा स्यात्तथा शुकशास्त्रकथा न पीता न श्रुता, कथारसो न पीत इति भावार्थः । किं कृत्वा—चित्तं विधाय मनो लगयित्वा । धातूनामने कार्थत्वाद्विपूर्वस्य धा--धातोः संलगनार्थता । तेन पुंसा स्वजन्माऽऽत्मोत्पत्तिः वृथा मिथ्या नीतम्, निष्फलं कृतमित्यर्थः । तत्र दृष्टांतद्वयम्—चांडालवत् चांडालेन तुल्यम् १ । खरवत् रासभतुल्यम् २ । बतेति खेदे । जननी माता निजदुःखभाजा निजस्य स्वस्य दुःखं गर्भपीडाप्रसूतिक्लेशपालनादिरूपं भजतीति[1] तथा, कृतेति शेषः। मिथ्या पदमत्रान्वेतीति गुरवः ॥ ४२ ॥ तदेव द्रढयति—जीवन्निति । येन पुरुषेण किंचित्प्रकरणैकदेशमपि श्लोकैकदेशमपि शुककथावचनं न श्रुतं, स तु स एव पापकर्मा पापं कर्म यस्य स तथा जीवन् श्वसन् शवो मृतको निगदितः कथितः । स जीवन्नेव मृत इति भावार्थः । पशुसमं पशुभिस्तुल्यं भुवि पृथिव्यां, औपश्लेषिकाधारे सप्तमीयम् । भाररूपं तं नरं धिक् । एवमित्थं दिवि स्वर्गलोके देवसमाजमुख्या देवानां समाजः संगरूपस्तत्र मुख्या दिविषदा वदंतीति गुरवः । क्वापि 'देवसरोजमुख्याः' इति पाठो बालिशैः

जीवञ्छवो निगदितः स तु पापकर्मा येन श्रुतं शुककथावचनं न किञ्चित् ॥ धिक्तं नरं पशुसमं भुवि भाररूपमेवं वदन्ति दिवि देवसमाजमुख्याः ॥ ४३ ॥ दुर्लभैव कथा लोके श्रीमद्भागवतोद्भवा ॥ कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥ ४४ ॥ तेन योगनिधे धीमञ्छ्रोतव्या सा प्रयत्नतः ॥ दिनानां नियमो नास्ति सर्वदा श्रवणं मतम् ॥ ४५ ॥ सत्येन ब्रह्मचर्येण सर्वदा श्रवणं मतम् ॥ अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया ॥ ॥ ४६ ॥ मनोवृत्तिजयं चैव नियमाचरणं तथा ॥ दीक्षां कर्तुमशक्यत्वात्सप्ताहश्रवणं मतम् ॥ ४७ ॥

प्रमादतो धृतोऽर्थासंगतेरित्युन्नेयम् ॥ ४३ ॥ महापुण्येनैतत्प्राप्यत इत्याह—दुर्लभेति । श्रीमद्भागवतोद्भवा श्रीमद्भागवतादुत्पन्ना कथा लोके दुर्लभा दुष्प्रापैव कोटिजन्मसमुत्थेन कोटिजन्मोद्भवेन पुण्येन लभ्यते प्राप्यते । एवकारोऽन्यसाधननिवृत्त्यर्थः ॥ ४४ ॥ यावज्जीवमेतच्छ्रवणं कर्त्तव्यमित्याह—तेनेति । तेन पूर्वोक्तेन हेतुना योगनिधे हे नारद हे धीमन् सा पूर्वोक्ता कथा प्रयत्नतः कष्टाद्युपायतः श्रोतव्या श्रोतुं योग्या । दिनानां नियमो नास्तीति स्पष्टम् । सर्वदा सर्वस्मिन्काले श्रवणं मतं संमतम् ॥ ॥ ४५ ॥ विधितः श्रवणं दुष्करमतो विशेषमाह—सत्येनेति चतुर्भिः । सत्येन यथार्थभाषणेन ब्रह्मचर्येण युवतिसंसर्गपरिगत्यागपूर्वकभूमिशयनेन सर्वदा सदा श्रवणं मतम् । अशक्यत्वात् उक्तसाधनानि कर्तुमसामर्थ्यात्कलौ कलियुगेऽत्र श्रवणे शुकाज्ञया शुकस्य नियोगेन विशेषः भेदो बोध्यो ज्ञेयः ॥ ४६ ॥ तद्यथा—मनोवृत्तिजयं मनसो

---

[1] "भजो ण्विः" इति ण्विप्रत्ययान्ताद्भागुरिमते टाप् । क्वचित्तु 'जननीजनदुःखभाजा' इति पाठः । तत्र दुःखं भाजयतीति दुःखभाक्, जननी एव जनः जननीजनः, तस्य दुःखभाक् तेनेति 'तेन' इत्यस्य विशेषणम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृत्तिः चांचल्येन बहिरागमनरूपा तस्या जयो निरोधस्तम्, तथा तेनैव प्रकारेण नियमाचरणं नियमाः षष्ठाध्याये वक्ष्यमाणास्तेषामाचरणं संपादनम्, दीक्षां विष्णुदीक्षां कर्त्तुमाचरितुमशक्यत्वादप्रभुत्वात् सप्ताहश्रवणं सप्तदिनमध्ये श्रवणं मतम् आज्ञप्तम्, ज्ञप्तौ श्रुतिकर्माऽन्वयः कर्त्तव्यः ॥ ४७ ॥ तावत्साकल्येन माघे माघमासे श्रद्धातः श्रद्धया प्रातःस्नानदानादिना नित्यं श्रवणे यत्फलं भवति। केचन—'श्रावणे' इति पाठमुरीकृत्य श्रावणे श्रावणमासि, माघे च नित्यं श्रद्धया देवपूजन—प्रातःस्नानादिना तावद्यत्फलं भवति, तत्फलमित्यादिपूर्ववदिति व्याचक्षते। तदेव हि फलं शुकदेवेन सप्ताहश्रवणे कृतमस्तीति भावः। गुरवस्तु—यथाश्रुतपाठमंगीकृत्यैवं व्याचख्युः—नित्यं प्रतिदिनं नित्यकथायाः श्रवणे श्रद्धातो यत्फलं भवति, माघे माघमासे श्रवणे श्रीमद्भागवतश्रुतौ यत्फलं भवति तत्फलमित्युत्तरार्द्धं पूर्ववदित्याहुः ॥४८॥ मनसोऽजयादनिरोधात, रोगात् ज्वराद्युत्पत्तेः, च पुनः पुंसां नराणामायुषः क्षयात् नाशत्, कलेर्युगस्य दोषबहुत्वाद्दोषबाहुल्याच्चेति चतुर्भिर्हेतुभिः सप्ताहश्रवणं मतम् ॥ ४९ ॥ सर्वत एतत्फ

श्रद्धातः श्रवणे नित्यं माघे तावद्धि यत्फलम् ॥ तत्फलं शुकदेवेन सप्ताहश्रवणे कृतम् ॥ ४८ ॥ मनसश्चाजयाद्रोगात्पुंसां चैवायुषः क्षयात् ॥ कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतम् ॥ ४९ ॥ यत्फलं नास्ति तपसा न योगेन समाधिना ॥ अनायासेन तत्सर्वं सप्ताहश्रवणे लभेत् ॥ ५० ॥ यज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् ॥ तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति ॥ ५१ ॥ योगाद्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति ॥ किं ब्रूमो गर्जनं तस्य रेरे गर्जति गर्जति ॥५२॥ शौनक उवाच ॥ साश्चर्यमेतत्कथितं कथानकं ज्ञानादिधर्मान्विगणय्य सांप्रतम् ॥ निःश्रेयसे भागवतं पुराणं जातं कुतो योगविदादिसूचकम् ॥ ५३ ॥

लाधिक्यमाह—यदिति त्रिभिः। तपसा यत्फलं नास्ति, योगेन यत्फलं नास्ति, समाधिना यत्फलं नास्ति, तत्सर्वमनायासेन खेदमंतरा सप्ताहश्रवणे लभेत् प्राप्नुयात् ॥ ॥ ५० ॥ सप्ताहः श्रीमद्भागवतपारायणारंभसमाप्तिरूपो यज्ञाद्राजसूयादेः गर्जति उत्कर्षं करोति, सप्ताहः व्रतात् एकादश्युपवासादेः गर्जति, तपसः पंचाग्नितापरूपात्स्वधर्माचरणाद्वा प्रोच्चैर्गर्जति अत्युत्कटं शब्दं करोति, तीर्थान्नित्यं गर्जति। हि एव ॥ ५१ ॥ सप्ताहः योगात् चित्तवृत्तिनिरोधात् गर्जति, ध्यानादीश्वरचिंतनात्मकात् गर्जति, च पुनः ज्ञानात् ब्रह्मज्ञानात् गर्जति। तस्य सप्ताहरूपस्य गर्जनं किं ब्रूमो वयं किं वर्णयामः, रे रे मूढा गर्जति गर्जति वीप्सयाऽस्मादधिकं किमप्यन्यन्नास्तीति ध्वनितम् ॥ ५२ ॥ आश्चर्यं श्रुत्वा शौनकः पृच्छति—साश्चर्यमिति। एतत्कथानकं सनत्कुमारनारदसंवादपूर्वकशुकशास्त्रमहित्वं साश्चर्यम् आश्चर्येण सहितमिति तथा तत्र त्वया कथितमुक्तम्। सांप्रतमिदानीम्। किं कृत्वा—ज्ञानादिधर्मान् विगणय्य ज्ञानं शास्त्रीयम्, आदिना वैराग्यब्रह्मचर्यादिसंग्रहः,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्माश्चतुर्वर्णधर्मान् विगणय्य तिरस्कृत्य । योगविदादिसूचकं योगो मनोनिग्रहरूपः, विज्ञानम् वेदनं विदिति व्युत्पत्तेः, आदिशब्देन वैराग्यादिसाधनानां संग्रहः, तेषां सूचकं निंदकं, निःश्रेयसे कल्याणार्थं, निश्चितं श्रेयो मोक्षाख्यमिति तदर्थं वा, भागवतं पुराणं कुतः कस्माद्धेतोः जातमुत्पन्नम् ॥ ५३ ॥ सूतः शौनकं प्रति सकारणं तद्वृत्त माह—यदेति । यदा धरां पृथिवीं त्यक्त्वा कृष्णो वासुदेवः स्वपदं स्वस्थानं वैकुंठाख्यं गंतुं यातुमुद्यतः कृतप्रयत्नोऽभूत् तदा एकादशम् एकादशस्कंधज्ञानं परिश्रुत्य सर्वतः श्रुत्वा उद्धवो वाक्यं वचनमब्रवीत् ॥५४॥ उद्धवः श्रीकृष्णं प्रति स्वसंदेहमाविष्करोति—त्वमिति पंचभिः । हे गोविंद त्वं तु त्वं हि यास्यसि स्वपदं गमिष्यसि । ननु कार्यार्थं कृतावतारस्य मम कथं गमनमित्यत आह—भक्तकार्यं भक्तानां कार्यं विधाय कृत्वा । मच्चित्ते मम मनसि महती बृहती चिंता जातेति शेषः । तां चिंता, श्रुत्वा । चस्योक्त समुच्चयार्थत्वान्ममेति लभ्यते । सुखं मम कल्याणमावह कुरु ॥ ५५ ॥ तथाहि—अयं घोरो दारुणः कलियुग आगत आयातः, पुनर्भूयः खला दुष्टाः पापिनो जना भविष्यंति, तत्संगेन तेषां खलानां संगेन संगत्या संतः साधवोपि यदा उग्रतां क्रूरतां गमिष्यंति प्राप्स्यंति । एव निश्चितम् ॥ ५६ ॥ तदा गोरूपा सूर्यजारूपा गोभूता

सूत उवाच ॥ यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः ॥ एकादशं परिश्रुत्याऽप्युद्धवो वाक्यमब्रवीत् ॥ ५४ ॥ उद्धव उवाच ॥ त्वं तु यास्यसि गोविन्द भक्तकार्यं विधाय च ॥ मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह ॥ ५५ ॥ आगतोऽयं कलिर्घोरो भविष्यन्ति पुनः खलाः ॥ तत्संगेनैव सन्तोऽपि गमिष्यंत्युग्रतां यदा ॥ ५६ ॥ तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् ॥ अन्यो न दृश्यते त्राता त्वत्तः कमललोचन ॥ ५७ ॥ अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज ॥ भक्तार्थं सगुणो जातो निराकारोऽपि चिन्मयः ॥५८॥ त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले ॥ निर्गुणोपासने कष्टमतः किञ्चिद्विचारय ॥ ५९ ॥ इत्युद्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः ॥ भक्तावलम्बनार्थाय किं विधेयं मयेति च ॥ ६० ॥

इयं धरा भूमिः कमाश्रयेत् रक्षार्थं कं पालकं व्रजेत् । हे कमललोचन हे पद्मनेत्र त्वत्तो भवतोऽन्यो भिन्नो द्वितीयस्त्राता रक्षको न दृश्यते नावलोक्यते ॥ ५७ ॥ अतो हेतोः सत्सु महात्मसु । वैषयिकाऽऽधारे सप्तमीयम् । तेन साधूनां विषय इत्यर्थः । दयां कृपां कृत्वा हे भक्तवत्सल मा व्रज त्वं गमनं मा कुरु, न तत्करणमुचितम् । निराकार आकाररहितः चिन्मयश्चिद्रूपोपि भक्तार्थं सगुणो जातः गुणैः सहित इति तथा, लीलाशरीरी जात इत्यर्थः ॥ ५८ ॥ त्वद्वियोगेन तव विरहेण ते तव भक्ताः सेवका भूतले कथं स्थास्यंति, स्वामिनं विना सेवकानां स्थितेर्दुःखहेतुत्वात् । निर्गुणोपासने " निष्कलं निष्क्रियं शांतम् " इति, " अव्रणमलोहितमच्छायम् " इति, " अस्थूलमनण्वदीर्घम् " इति वेदांतप्रसिद्धं निर्गुणं ब्रह्म, तस्योपासने सेवायां कष्टं दुःखम्, आलंबनमंतरा मनसः स्थितेर्दुर्घटत्वात्, अतोस्मात्कारणात् किंचित् किमपि भक्तार्थं विचारय त्वं चिंतय ॥ ५९ ॥ श्रुत्वैतद्धरिरचिंतयदित्याह—इतीति । इत्येवम् उद्धववचः उद्धववाक्यं श्रुत्वा प्रभासे प्रभासाख्ये तीर्थे हरिरचिंतयत ध्यानमकरोत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं तदित्याह--भक्तावलंबनार्थाय भक्तानामाधारार्थं मया किं विधेयमिति ॥ ६० ॥ स्वज्योतिषः स्थापनं श्रीमद्भागवते कृतमित्याह--स्वकीयमिति । स्वकीयमात्मीयं यत्तेजः सर्वावभासकम् "यद्भासा भासते जगत" इति श्रुतेः । तत्तेजो भागवतशास्त्रेऽदधात धृतवान् । वा एव । तिरोधाय अंतर्धाय अयं श्रीकृष्णचंद्रः परमात्मा श्रीमद्भागवतार्णवं श्रीमद्भागवतमेवार्णवः समुद्रस्तं प्रविष्टः । गूढार्थत्वेन गांभीर्यत्वात्समुद्रसाम्यम् ॥ ६१ ॥ तन्मूर्त्तिरियमित्याह--तेनेति । तेन पूर्वोक्तेन हेतुना हरेः श्रीकृष्णस्य प्रत्यक्षा सांप्रतमियं वाङ्मयी मूर्त्तिर्वर्त्तते, सा किंफलेत्यत आह—सेवनाच्छ्रवणात्पाठाद्दर्शनादिति हेतुचतुष्टयं स्पष्टमतो न व्याख्यातम् । पापनाशिनी पापनाशकर्त्री ॥ ६२ ॥ तेन कारणेन सप्ताहश्रवणं सप्तदिनमध्ये श्रीमद्भागवतश्रवणं सर्वेभ्यः साधनेभ्योऽधिकं कृतं तदेवाह—साधनानि तिरस्कृत्य पराभूय कलौ कलियुगेऽयं सप्ताहयज्ञो धर्म ईरितः कथितः ॥ ६३ ॥ तदेव पुनर्द्रढयति—दुःखेति । दुःखं शरीरे व्याधिरूपं बद्धत्वेष्टवियोगजं वा, दारिद्र्यं धनाद्यभावः,

स्वकीयं यद्भवेत्तेजस्तद्भागवतेऽदधात ॥ तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ॥ ६१ ॥ तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ॥ सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ॥ ६२ ॥ सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम् ॥ साधनानि तिरस्कृत्य कलौ धर्मोयमीरितः ॥ ६३ ॥ दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च ॥ कामक्रोधजयार्थं हि कलौ धर्मोऽयमीरितः ॥ ६४ ॥ अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा ॥ कथं त्याज्या भवेत्पुंभिः सप्ताहोऽतः प्रकीर्तितः ॥ ६५ ॥ सूत उवाच ॥ एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायाम् ॥ आश्चर्यमेकं समभूत्तदानीं तदुच्यते संशृणु शौनक त्वम् ॥ ६६ ॥

दौर्भाग्यं कृतेप्युद्यमे फलाभावः, पापं कायवाङ्मनोभिः कृतं, तेषां प्रक्षालनाय दूरीकरणाय । च पुनः । कामक्रोधजयार्थम् कामः 'कामोभिलाषस्तर्षश्च' इत्यमरोक्त्याऽप्राप्तवस्तुरूपोत्र बोध्यः, क्रोध इष्टप्राप्तिविघातजः, तयोर्जयार्थम् । हि एव । 'कलौ धर्मोयमीरितः' इति तु प्राग्वत् ॥ ६४ ॥ एनमंतरा वैष्णवी माया न निवर्त्तेत इत्याह—अन्यथेति । अन्यथा प्रकारांतरेण वैष्णवी विष्णोरियं माया देवैः इंद्रादिभिरपि सुदुस्त्यजा त्यक्तुमशक्या—पुंभिरभक्तैः कथं केन प्रकारेण त्याज्या त्यक्तुयोग्या भवेदिति "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इतिभगवद्वचनात् । अतः अस्मात्कारणात्सप्ताहः प्रकीर्त्तितः कथितः ॥ ६५ ॥ अथ सप्ताहयज्ञोत्कर्षवर्णने आश्चर्यमुत्पन्नमित्याह—एवमिति । एवममुना प्रकारेण नगाहश्रवणोरुधर्मे सप्ताहदिनमध्ये श्रवणमेवोरुर्महान्धर्मस्तस्मिन् सभायां ऋषिभिः प्रकाश्यमाने सति एकमाश्चर्यं तदानीं तत्समये समभूत्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातम्, हे शौनक तदेवाश्चर्यं मयोच्यते त्वं संशृणु सम्यक् श्रवणं कुरु ॥ ६६ ॥ ससुताया भक्तेस्तत्राविर्भावमाह–भक्तिरिति । "यत्र भागवती वार्त्ता तत्र भक्त्यादिकं व्रजेत्" इत्युक्त्या सप्ताहमहित्वसूचनारंभे भक्त्यादित्रिकस्यागमनं जातमिति प्रतीयते । तच्छ्रवणात् तयोर्वृद्धत्वनिरासपूर्विका चेतनताभूदित्यभिप्रायेणाह–तरुणौ युवानौ तौ प्रसिद्धौ ज्ञानवैराग्यौ सुतौ गृहीत्वा संगृह्य भक्तिः सहसाऽकस्मात् आविरासीत् प्रकटाऽभूत् । हे श्रीकृष्ण, हे गोविंद, हे हरे, हे मुरारे, हे नाथ, इति नामानि मुहुर्वारंवारं वदंती उच्चारयंती ॥ ६७ ॥ सभ्यास्तां दृष्टवंत इत्याह–तामिति । आगतामायातां भागवतार्थभूषां भागवता भक्तास्तेषामर्थभूषां द्रव्यालंकाररूपाम्, सुचारुवेषामतिसुंदरवेषां तां सदस्याः सभापालका ददृशुः । किं कुर्वंतः–इयं कथमागता, मुनीनां मध्ये कथं प्रविष्टा, इत्येवं तर्कयंतः ॥ ६८ ॥ तदुत्तरमाह–ऊचुरित्यर्द्धेन । तदानीं तदा कुमारा वचनम् ऊचुः । किमूचुः–इयम् अधुना कथार्थतः कथार्थं निष्पतिताऽऽविर्भूता । भक्तिः सनत्कुमारमाहेत्याह–एवमिति । एवंगिर इत्थंभूता वाणीः श्रुत्वाऽऽकर्ण्य ससुता

भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैपाकरू सहसाविरासीत् ॥ श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥ ६७ ॥ तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः ॥ कथं प्रविष्टा कथमागतेयं मध्ये मुनीनामिति तर्कयन्तः ॥ ६८ ॥ ऊचुः कुमारा वचनं तदानीं कथार्थतो निष्पतिताऽधुनेयम् ॥ एवंगिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ॥ ६९ ॥ भक्तिरुवाच ॥ भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रनष्टाऽपि कथारसेन ॥ क्वाहं तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मया इदं तां गिरमूचिरे ते ॥ ७० ॥ भक्तेषु गोविन्दसुरूपधर्त्री प्रेमैककर्त्री भवरोगहन्त्री ॥ सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसानि ॥ ७१ ॥ ततोऽपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोऽपि लोके ॥ एवं तदाज्ञावसरेऽपि भक्तिस्तदा निषण्णा हरिदासचित्ते ॥ ७२ ॥

पुत्राभ्यां सहिता सा भक्तिः नम्रा कृतप्रणामा सती सनत्कुमारं निजगाद ववाद ॥ ६९ ॥ तद्वाक्यं यथा–भवद्भिरिति । युष्माभिरहमद्यैवेदानीमेव पुष्टाऽप्यायितास्मि । केनेत्यत आह–कथारसेनेति । कथंभूताहं–कलिप्रनष्टा कलियुगेन प्रनष्टा, अपिशब्दात् खंडितांगा । मह्यं स्थानं निर्दिश्यतामित्याह–अहं क्व कुत्र तिष्ठामि, अधुना अद्येदं, ब्रुवंतु भवंतो गदंतु । तुशब्देन पुत्रयोरपि स्थानपृच्छा बोध्या । ब्राह्मया ब्रह्मपुत्रा ते तां भक्तिम् इमां वक्ष्यमाणां गिरं वाचमूचिरे जगदुः । ब्रूञो द्विकर्मत्वात् कर्मद्वयम् ॥ ७० ॥ तत्प्रभावानुवर्णनपूर्वकं स्थानं निर्दिशति–भक्तेष्विति । भक्तेषु हरिदासेषु गोविंदस्य सुरूपं धरतीति तथा, प्रेमैककर्त्री प्रेम्णः संपादनकर्त्री, भवरोगहंत्री भवः संसारो जन्ममरणरूपः स एव रोगः तं हंतीति तथा, सुधैर्यसंश्रया सुष्ठु शोभनो धर्मो हरितोषणरूपस्तं संश्रयतीति तथा, सा लोके प्रसिद्धा त्वं निरंतरम् अन्तरं यथा न भवति तथा वैष्णवमानसानि भक्तचित्तानि तिष्ठस्व निवस । आत्मनेपदमार्षम् ॥ ७१ ॥ तत्र स्थितौ फलमाह–तत इति । ततः तस्मात्कारणात्कलिजाः कलेर्जाताः पार्श्व

डादय इमे दोषा लोके प्रभवोऽपि स्वप्रभावं प्रवर्त्तयितुं समर्था अपि त्वां द्रष्टुमवलोकयितुं न शक्ता न समर्थाः, भवेयुरिति शेषः । एवमित्थं तदाज्ञावसरे तेषां सनकादीनाम् आज्ञावसरे नियोजनसमये तदा तत्क्षणे हरिदासचित्ते स्थानविशेषे निषण्णा भक्तिः कृताश्रयाऽभूत् ॥ ७२ ॥ भक्तिवैभवमाह–सकलेति । सकलभुवनमध्ये सकलानि भुवनानि चतुर्दशसंख्यानि तेषां मध्ये निर्धनाः निःस्वा ये पुरुषास्तेपि धन्याः अहो भाग्यवन्तः । ते के इत्यपेक्षायामाह--येषां हृदि हृदये मनसि वा 'स्वांतं हृन्मानसं मनः' इत्यमरोक्तेः । श्रीहरेर्लक्ष्मीपतेश्चैका मुख्या भक्तिर्निवसति निवासं करोतीति । अतोऽस्माद्धेतोः हरिरपि नारायणोपि निजलोकं वैकुंठं सर्वथा सर्वप्रकारेण विहाय त्यक्त्वा भक्तिसूत्रोपनद्धः भक्तिरेव सूत्रं रशनारूपं तेनोपनद्धो बद्धः तेषां हृदि स्वांते प्रविशति प्रवेशं करोति॥ ७३ ॥श्रीमद्भागवतोत्कर्षं वर्णयन्नध्यायं पूरयति--ब्रूम इति।भागवतमित्यभिधा नाम यस्येति तथा तस्य ब्रह्मात्मकस्य वेदरूपस्य अधिकं महिमानं वयं किं ब्रूमः वदामः । एवमित्थं भुवि भूमौ यत्संश्रयात् यस्य भागवतस्य संश्रयाच्छ्रवणात्

सकलभुवनमध्ये निर्धनास्तेऽपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका ॥ हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥ ७३ ॥ ब्रूमोऽद्य ते किमधिकं महिमानमेवं ब्रह्मात्मकस्य भुवि भागवताभिधस्य ॥ यत्संश्रयान्निगदनाल्लभते सुवक्ता श्रोतापि कृष्णसमतामलमन्यधर्मैः ॥ ७४ ॥ इति श्रीपद्मपुराण उत्तरखण्डे श्रीभागवतमाहात्म्ये भक्तिकष्टनिवर्तनं नाम तृतीयोऽध्यायः ॥ ३ ॥ सूत उवाच ॥ अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम् ॥ निजलोकं परित्यज्य भगवान्भक्तवत्सलः ॥ १ ॥

निगदनात् नितरां कथनात्सुवक्ता शोभनव्याख्याता श्रोताऽपि कृष्णसमतां लभते–इति प्रत्येकमन्वेतव्यम् । अन्यधर्मैः अलं पर्याप्तम् । अन्यधर्मैः प्रयोजनं नास्तीति भावार्थः । 'यत्संश्रयान्निगदिते' इति पाठे यस्य संश्रयात्संबंधात् यस्मिन् भागवते निगदिते सति वाच्यमाने इत्यर्थः ॥ ७४ ॥ इति श्रीशेखावाट्यंतर्गतविजयपुरनिवासिव्रजलालिपण्डितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां तृतीयोऽध्यायः ॥ ३ ॥ भक्तानां हृदये स्थानं भक्त्यै दत्तं महात्मभिः ॥ दृष्ट्वा तामेव तत्रस्थां स्वलोकाद्धरिराययौ ॥ १ ॥ सूतोक्तिः शौनकं प्रति । पूर्वाध्यायांते 'तदा निषण्णा हरिदासचित्ते' इति भक्तेः स्थानं निगदितं, तदादायैवोत्तराध्यायः प्रारभ्यत इति संगतिं सूचयंस्ततः किं वृत्तमित्यत आह–अथेति । आनंतर्योर्थोऽथशब्दः । वैष्णवचित्तेषु भक्तमनस्सु अलौकिकीं लोकेऽलभ्यां भक्तिं दृष्ट्वा निजलोकं वैकुण्ठं परित्यज्य त्यक्त्वा भगवान् षड्गुणैश्वर्ययुक्तः, अमलानि शुद्धानि पापाद्यैः कामक्रोधादिसंग्रहैरसंस्पृष्टानि स्वभक्तानां हृदयानि आविवेश, इति चतुर्थेनान्वयः । तं विशिनष्टि पंचदशभिर्विशेषणैः–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तवत्सलः भक्तेषु कृपालुः ॥ १ ॥ वनमाली वनमाला च—“आपादलंबिनी माला वनमाला प्रकीर्त्तिता” इत्युक्तलक्षणा, तद्वान् । घनश्यामः घन इव नीलमेघ इव श्याम इति तथा “उपमानानि सामान्यवचनैः” इति समासः । पीतवासाः पीते वाससी यस्य स तथा । मनोहरः पश्यतां नरनारीणां मनांसि हरतीति तथा । कांचीकलापरुचिरः कांची क्षुद्रघंटिका तस्याः कलापः कटिवेष्टनरूपस्तेन रुचिरः सुंदरः । लसन्मुकुटकुंडलः लसत् मणिप्रवेकैः शोभमानं मुकुटं कुंडले च यस्य स तथा।उल्लसदिति पाठांतरे समस्तमेकं पदम् ॥ २ ॥ त्रिभंगललितः त्रयो भंगा उदरे रेखाविशेषास्तैर्ललितो मनोहरः । चारुः सुरूप इति पृथक् पदमित्येके । चारु शोभनः कौस्तुभो मणिस्तेन विराजितः प्रकाशित इत्येकं पदं वा । कोटिः (संख्याविशेषः) मन्मथा मनो मथ्नंतीति मन्मथा कामदेवास्तेषामिव लावण्यमतिसुंदरता रूपगुणविशेषो यस्य स तथा । हरिचंदनं श्रीखंडं तेन चर्चितः पूजितः ॥ ३ ॥ परमः प्रकृष्टः सर्वोत्तम आनंदः, चित् चैतन्यं च मूर्त्तिः शरीरं यस्य स तथा । मधुरः प्रियः । मुरलीधरः मुरली वाद्यविशेषः ‘वंशी’

वनमाली घनश्यामः पीतवासा मनोहरः ॥ काञ्चीकलापरुचिरो लसन्मुकुटकुंडलः ॥ २ ॥ त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः ॥ कोटिमन्मथलावण्यो हरिचन्दनचर्चितः ॥ ३ ॥ परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः ॥ आविवेश स्वभक्तानां हृदयान्यमलानि च ॥ ४ ॥ वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः ॥ तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ॥ ५ ॥ तदा जयजयारावो रसपुष्टिरलौकिकी ॥ चूर्णप्रसूनवृष्टिश्च मुहुः शंखरवोऽप्यभूत् ॥ ६ ॥ तत्सभासंस्थितानां च देहगेहात्मविस्मृतिः ॥ दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ॥ ७ ॥ अलौकिकोऽयं महिमा मुनीश्वराः सप्ताहजन्योद्य विलोकितो मया ॥ मूढाः शठा ये पशुपक्षिणोऽत्र सर्वेऽपि निष्पापतमा भवन्ति ॥ ८ ॥

इति प्रसिद्धा तां धरतीति तथा ॥ ४ ॥ श्रवणलोभेन उद्धवाद्या आगता इत्याह—वैकुंठेति । वैकुंठवासिनः वैकुण्ठे वस्तुं शीलं येषां ते तथा उद्धवादयो ये वैष्णवाः, ते च तत्कथाश्रवणार्थं भागवतगाथाश्रुतये गूढरूपेण गुप्तरूपेण संस्थिताः तत्रोपविष्टाः ॥ ५ ॥ तदा परममंगलं जातमित्याह—तदेति । तदा तस्मिन्काले जयजयारावो जयजयशब्दः । अलौकिकी लोकेऽप्रसिद्धा रसपुष्टिः रसैः पोषणम् । चूर्णानि प्रसूनानि पूर्वं व्याख्यातानि तेषां वृष्टिर्वर्षणम् । च पुनः । मुहुः पुनःपुनः शंखरवः शंखध्वनिः अभूदिति क्रियापदं प्रतिपदमन्वेतव्यम् ॥ ६ ॥ अतिचित्रमप्याह—तदिति । तत्सभासंस्थितानाम् सा चासौ सभा चेति तत्सभा तस्यां संस्थितानां देवर्षिसंघानां देहगेहात्मविस्मृतिः देहगेहे प्रसिद्धे, आत्मा सोहमिति प्रतीतिविषयस्तेषां विस्मृतिर्विस्मरणमभूत् । चात्पूर्वोक्तैव क्रिया बोध्या । तन्मयावस्थां तद्रूपावस्थां दृष्ट्वा नारदो मुनिर्वाक्यमब्रवीत् ॥ ७ ॥ स्वानुभूतं वर्णयति-अलौकिक इति । हे मुनीश्वराः सनकादयः सप्ताहजन्यः सप्तभिरहोभिः साध्यो यज्ञविशेषः ‘सप्ताह’ इत्युच्यते तस्माज्जन्य उत्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमानोऽलौकिको हरिलोकं विनाऽन्यलोकेष्वसंभवरूपो महिमा प्रभावोऽद्य मया विलोकितो दृष्टः । तमाह—मूढा अविवेकिनः, शठा देहाद्यहंबुद्धयः, पशुपक्षिणः प्रसिद्धाः, ते सर्वेऽपि निष्पापतमा अतिशयेन पापरहिता भवंति । 'निष्पापतया विभांति' इति पाठांतरम् ॥८॥ एतत्कथातुल्यमन्यन्नास्तीत्याह—अत इति । अतो हेतोः नृलोके मर्त्यलोके । नन्विति निश्चये । चित्तस्य शोधाय मनसः शुद्ध्यै कलौ कलियुगे पवित्रं शुद्धिकरं नास्ति । तथैव तेन प्रकारेणैव । अघौघविध्वंसकरं पापौघविनाशनं नास्तीति । भुवि धरायां कथासमानं कथातुल्यमन्यन्नास्ति ॥९॥ केषां केषां पापिनां शुद्धिर्भवतीति पृच्छन्नाह—केके इति । कथामयेन कथारूपेण सप्ताहयज्ञेन केके जना विशुद्ध्यंति शुद्धा भवंति इति भवंतो मह्यं ब्रुवंतु गदंतु। कृपालुभिर्दयालुभिः लोकहितं लोका जनास्तेषां हितं विचार्य कोऽप्यश्रुतपूर्वः नवीनमार्गो नूतनः पंथाः प्रकाशितः ॥ १० ॥ कुमारोक्तिः नारदं प्रति । शुद्धिहेतुसहितानि पापिनां नामान्याह—ये मानवा इति चतुर्भिः । सर्वदा सर्वस्मिन्काले पापकृतः।तु एव । सदा दुराचाररता आजीवं दुष्टाचारपरायणाः,

अतो नृलोके ननु नास्ति किञ्चिच्चित्तस्य शोधाय कलौ पवित्रम् ॥ अघौघविध्वंसकरं तथैव कथासमानं भुवि नास्ति चान्यत् ॥ ९ ॥ केके विशुध्यन्ति वदन्तु मह्यं सप्ताहयज्ञेन कथामयेन ॥ कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोपि नवीनमार्गः ॥ १० ॥ कुमारा ऊचुः ॥ ये मानवाः पापकृतस्तु सर्वदा सदा दुराचाररता विमार्गगाः ॥ क्रोधाग्निदग्धाः कुटिलाश्च कामिनः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ ११ ॥ सत्येन हीनाः पितृमातृदूषकास्तृष्णाकुलाश्चाश्रमधर्मवर्जिताः ॥ ये दाम्भिका मत्सरिणोऽपि हिंसकाः सप्ताहयज्ञेन कलौ पुनंति ते ॥ १२ ॥ पंचोग्रपापाश्छलछद्मकारिणः क्रूराः पिशाचा इव निर्दयाश्च ये ॥ ब्रह्मस्वपुष्टा व्यभिचारकारिणः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १३ ॥

विमार्गगाः कुपथचारिणः, क्रोधाग्निदग्धाः कोपानलेन ज्वलिताः, कुटिलाः वक्राः । च पुनः । कामिनः परदाराभिलाषिणो ये मानवाः संति ते सर्वे सप्ताहयज्ञेन कलौ पुनंति शुद्ध्यंति॥ ११ ॥ किंच—सत्येन हीनाः मिथ्याभाषिणः, पितृमातृदूषकाः पित्रा सहिता माता पितृमाता तस्याः दूषका इति समासो न द्वंद्वः, द्वंद्वे "आनङ् ऋतो द्वन्द्वे" इति पूर्वपदस्याऽऽनङ् स्यात् । तृष्णाकुलाः—इदं मे स्यादिदं मे स्यादिति चिंताव्याप्ताः, च पुनः आश्रमधर्मवर्जिताः आश्रमा ब्रह्मचर्याद्यास्तेषां धर्माः स्मृतिप्रसिद्धास्तैर्वर्जिता रहिताः, दांभिका लोकानुरंजनार्थं विहितकर्मानुष्ठानं दंभस्तेन जीवंतीति तथा, मत्सरिणः परोत्कर्षाऽसहनं मत्सरः सोऽस्ति येषां ते तथा, हिंसकाः जीवघातका अपि ये ते सप्ताहयज्ञेन कलौ पुनंति पूता भवंति ॥ १२॥ पंचोग्रपापाः—"ब्रह्मघ्नश्चैव गोघ्नश्च स्वर्णस्तेयी च मद्यपः । तत्संसर्गी पंचमश्च ह्युग्रपापाः प्रकीर्त्तिताः॥' इति वचनात् । पंच उग्राणि—गोहत्या—ब्रह्महत्या—मद्यपान—सुवर्णचौर्य—तत्संसर्गरूपाणि पापानि येषां ते । छलछद्मकारिणः न्यूनाधिक्येन वस्तुप्रदर्शनं छलम्, अन्यथा प्रदर्शनमित्येके । छद्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कपटं, ते कर्त्तुं शीलं येषां ते तथा । क्रूराः क्रूरस्वभावाः। पिशाचा राक्षसजातयः, तद्वन्निर्दयाः। तथा ब्रह्मस्वपुष्टाः ब्रह्मणो ब्राह्मणस्य स्वं धनं तेन पुष्टाः स्थूलाः । व्यभिचार कारिणः व्यभिचारोऽन्यस्त्रीसंसर्गरूपस्तं कर्त्तुं शीलं येषां ते । ये एवंभूताः ते सप्ताहयज्ञेन कलौ पुनंति शुद्धाः भवन्ति ॥१३॥ कायेन शरीरेण, वाचा वाण्या, मनसा संकल्प विकल्पात्मकेन पातकं हठेन आग्रहेण ये शठा मूर्खाः नित्यं प्रकुर्वंति, परस्वपुष्टाः परधनेनाप्यायिताः, मलिना मलं कुवासनात्मकं तदस्त्येषामिति ते तथा, दुराशयाः दुर्दुष्ट आशयोंतःकरणं येषां ते तथा,सप्ताहयज्ञेन कलौ पुनंति निष्पापा भवंतीत्यर्थः ॥ १४ ॥ उक्तार्थं द्रढयति–अत्रेति । अत्र सप्ताहयज्ञेन पापनिरासे ते तुभ्यं पुरातनं पुराभवमितिहासम्–इति एवं, ह स्फुटम्, आस बभूवेति तथाभूतं कीर्त्तयिष्यामो वर्णयिष्यामः । व्यर्थं तदिति न शंकनीयम्, यस्येतिहासस्य श्रवणमात्रेण पापहानिः पापनाशः प्रजायते ॥१५॥ तत्स्थानं निर्दिशति–तुंगभद्रेति । तुगभद्रा नदी दक्षिणदेशे प्रसिद्धा तस्यास्तटे तटोपरि पूर्वं पुरा उत्तमं पत्तनं नगरमभूदासीत् । यत्र यस्मिन्नगरे वर्णाः ब्राह्

कायेन वाचा मनसापि पातकं नित्यं प्रकुर्वन्ति शठा हठेन ये ॥ परस्वपुष्टा मलिना दुराशयाः सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १४ ॥ अत्र ते कीर्तयिष्याम इतिहासं पुरातनम् ॥ यस्य श्रवणमात्रेण पापहानिः प्रजायते ॥ १५ ॥ तुंगभद्रातटे पूर्वमभूत्पत्तनमुत्तमम् ॥ यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः ॥ १६ ॥ आत्मदेवः पुरे तस्मिन्सर्ववेदविशारदः ॥ श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः ॥ १७ ॥ भिक्षुको वित्तवाँल्लोके तत्प्रिया धुन्धुली स्मृता ॥ स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा ॥ १८ ॥ लोकवार्तारता क्रूरा प्रायशो बहुजल्पिका ॥ शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥ १९ ॥

णाद्याः स्वधर्मेण सत्यसत्कर्मतत्पराः--सत्यं हितभाषणं, सत्कर्म शुभकर्म, तयोः तत्पराः परायणाः, आसन्निति शेषः ॥१६॥ तद्वासिविप्रं नामतो गुणतश्च निर्दिशति--आत्मदेव इति सपादेन । तस्मिन्नुत्तमे पुरे आत्मदेवोनाम्ना सर्ववेदविशारदः सर्वेषु वेदेषु विशारदो निपुणः, चतुर्वेदतत्त्वज्ञ इत्यर्थः । श्रौतस्मार्तेषु श्रुतिर्वेदः तत्प्रतिपाद्या धर्माः श्रौताः, स्मृतिर्धर्मशास्त्रं तन्निरूपिता धर्माः स्मार्त्ताः, ते च ते चेति तथा, तेषु निष्णातो निपुणः, द्वितीयोऽन्यो भास्कर इव सूर्य इव ॥१७॥ भिक्षुको भिक्षावृत्तिः। वित्तवान् धनी । लोके जगति । तद्भार्यां वर्णयति–तत्प्रियेति सत्रिपादेन । तत्प्रिया तस्य प्रिया भार्या धुंधुली नाम्ना स्मृता । धुंधुलीति वदति घर्घररावात्।तां विशिनष्टि–स्ववाक्यस्थापिकेति। नित्यम् आत्मवचनसिद्धिकर्त्री, सुंदरी प्रशस्तरूपा, सुकुलोद्भवा सुष्ठु शोभने कुले उद्भवो जनिर्यस्याः सा तथा ॥ १८ ॥ लोकवार्त्तारता लोकानां जनानां वार्त्ता–साधुर्दुष्टो पापो निन्द्योऽसावित्येवंरूपा तस्यां रता निरता, क्रूरा क्रूरस्वभावा, प्रायशो बाहुल्येन बहुजल्पिका बहुभाषिणी, गृहकृत्येषु गृहकार्येषु शूराऽनलसा । च पुनः कृपणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आगतायातिथये किंचिदपि अन्नादिकं दातुमसमर्था, कलहप्रिया कलहो झकटनं प्रियो यस्याः सा तथा ॥ १९ ॥ तयोर्वृत्तांतमनुवदति—एवमिति त्रिभिः । एवमुक्त विधया प्रेम्णा प्रीत्या गृहे निवसतोः निवासं कुर्वतोः दंपत्योः जायापत्योः अनपत्ययोः न पतंति पित्रादयो नरके यस्मादित्यपत्यं पुत्रस्तद्रहितयोस्तयोर्द्वयोः अर्था धनादिप दार्थाः कामा अभिलाषाः गृहादिकं सुखाय नासन् नाभूवन् ॥ २० ॥ ताभ्यां स्त्रीपुंसाभ्यां पश्चात् कियत्कालानन्तरं । संतानहेतवे पुत्रप्राप्त्यर्थं धर्माः समारब्धाः कृताः । कीदृशाः धर्मा इत्याह—दीनेभ्यो याचकेभ्यो गोभूहिरण्यवासांसि गौः सूर्यसुता, भूरिला, हिरण्यं सुवर्णं, वासांसि सूत्रोर्णानिर्मितानि तानि सदा यच्छतो दत्तः, ताविति कर्तृपदमध्याहार्यम् ॥ २१ ॥ ताभ्यां जंपतीभ्यां धनार्द्धं स्वगृहे यावद्धनमासीत्तदर्द्धं धर्ममार्गेण नीतं क्षपितं व्ययीकृतमिति यावत् । तथापि च पुत्रो नाभूत, कन्यापि वा नाभूत् । तत उद्यमवैफल्याद्धेतोः भृशमतिशयेन चिंतातुरौ चिंतया दुःखितौ, अभूतामिति शेषः ॥ २२ ॥ किंच—एकदेति—एकदा एकस्मिन्काले स द्विज आत्मदेवाख्यो विप्रो दुःखात्पुत्रा

एवं निवसतोः प्रेम्णा दंपत्यो रममाणयोः ॥ अर्थाः कामास्तयोरासन्न सुखाय गृहादिकम् ॥ २० ॥ पश्चाद्धर्माः समारब्धास्ताभ्यां संतानहेतवे ॥ गोभू
हिरण्यवासांसि दीनेभ्यो यच्छतः सदा ॥ २१ ॥ धनार्धं धर्ममार्गेण ताभ्यां नीतं तथापि च ॥ न पुत्रो नापि वा पुत्री ततश्चिन्तातुरौ भृशम् ॥ २२ ॥
एकदा स द्विजो दुःखाद्गृहं त्यक्त्वा वनं गतः ॥ मध्याह्ने तृषितो जातस्तडागं समुपेयिवान् ॥ २३ ॥ पीत्वा जलं विषण्णस्तु प्रजादुःखेन कर्शितः ॥
मुहूर्तादपि तत्रैव संन्यासी कश्चिदागतः ॥ २४ ॥ दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदन्तिकम् ॥ नत्वा च पादयोस्तस्य निःश्वसन्संस्थितः पुरः ॥ २५ ॥
यतिरुवाच ॥ कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी ॥ वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम् ॥ २६ ॥ ब्राह्मण उवाच ॥ किं ब्रवीमि
ऋषे दुःखं पूर्वपापेन संचितम् ॥ मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते ॥ २७ ॥

भावरूपाद्दुःखाद्धेतोः गृहं त्यक्त्वा वनं गतः मध्याह्ने काले तृषितः पिपासितस्तडागम् मानुषखातो जलाश्रयः तडाग इत्युच्यते तं समुपेयिवान् प्राप्तवान् ॥ २३ ॥ 'पीत्वे' इत्वा रभ्य 'विप्रस्तु गृहमागतः' इत्यंतेन प्रकारेण सोपपत्तिकं तत्संवादमाह—जलं पीत्वा प्रजादुःखेन कर्शितः प्रजा पुत्ररूपस्तस्या दुःखमसंभवरूपं तेन कर्शितः कृशः विषण्णः स्थितोऽभूत्। तत्रैव वने मुहूर्त्ताद्घटिकाद्वयात्मकात् कश्चित् अनिर्द्धारितनामगोत्रः संन्यासी आगतः आगमत् ॥ २४ ॥ पीतजलं पीतं जलं येन स तथा तं संन्यासिनं दृष्ट्वाऽवलोक्य विप्रः तदंतिकं तस्य संन्यासिनः समीपं यातः प्राप्तः, तस्य पादयोश्चरणौ नत्वा 'कर्मादीनामपि संबंधमात्रविवक्षायां षष्ठ्येव' इति पादयोरिति कर्मणिषष्ठी । पुरस्तादग्रे निःश्वसन् निःश्वासं मुंचन् संस्थितः स्थितोऽभूत् ॥ २५ ॥ संन्यासी आत्मदेवं दुःखितं दृष्ट्वा पृच्छति—कथमिति । हे विप्र त्वं कथं केन कारणेन रोदिषि, ते तव बलीयसी बलिष्ठा का चिंता, स्वस्यात्मनः दुःखस्य कारणं हेतुं सत्वरं शीघ्रं मह्यं वद ब्रूहि ॥ २६ ॥ ब्राह्मणः संन्यासिनं प्रति सकारणं दुःखमाह—किमिति । हे ऋषे पूर्वपापेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राक्तनेनाघेन संचितं संपादितं दुःखं किं ब्रवीमि वक्तुमशक्यमित्यर्थः । तथाहि–मदीयाः पूर्वजाः पित्रादयः तोयं तर्पणादौ दत्तं जलं कवोष्णम् ईषदुष्णम् उपभुंजते पिबन्ति ॥ २७ ॥ मया दत्तमपि प्रीतितोऽग्राह्यमित्याह–मदत्तमिति । प्रीत्यापि प्रेमतोपि मद्दत्तं देवा द्विजातयो ब्राह्मणादयो नैव गृह्णंति नांगीकुर्वंति । किं कारणमित्यत आह–प्रजेति । प्रजादुःखेन पुत्राऽभावजदुःखेन शून्यः गतसत्त्व इव प्राणांस्त्यक्तुमिहागत इहाहमागतोऽस्मि ॥ २८ ॥ लोके पुत्रं विना सर्वं निष्फलमित्याह–धिगिति । प्रजाहीनं पुत्ररहितं जीवितं धिक्, षष्ठ्यर्थे द्वितीयेयम् । प्रजां विना गृहं गेहं धिक् । च पुनः अनपत्यस्य सुतहीनस्य धनं द्रव्यादिसंपत्तिं धिक् । संततिं विना संतानमंतरेण कुलं च धिक् ॥ २९ ॥ आत्मनो दौर्भाग्यं सूचयन्नाह–पाल्यत इति द्वाभ्याम् । या धेनुः प्रत्यब्दं प्रसूयमाना गौः मया पाल्यते तृणयवादिना पोष्यते सापि गौः सर्वथा सर्वप्रकारेण बंध्या पुत्राऽभाववती भवेत् भवति । यो वृक्ष आम्रादिः मयाऽऽरोपितः भवेत् स वृक्षो घृतदुग्धाभ्यां सिक्तोपि बंध्यत्वं फलाऽप्रदर्शनरूपम् आश्रयेत् लभेत ॥ ३० ॥

मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः ॥ प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः ॥ २८ ॥ धिग्जीवितं प्रजाहीनं धिग्गृहं च प्रजां विना ॥ धिग्धनं चानपत्यस्य धिक्कुलं संततिं विना ॥ २९ ॥ पाल्यते या मया धेनुः सा बन्ध्या सर्वथा भवेत् ॥ यो मया रोपितो वृक्षः सोऽपि बन्ध्यत्वमाश्रयेत् ॥ ३० ॥ यत्फलं मद्गृहायातं शीघ्रं तच्च विशुष्यति ॥ निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ॥ ३१ ॥ इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः ॥ तदा तस्य यतेश्चित्ते करुणाऽभूद्गरीयसी ॥ ३२ ॥ तद्भालाक्षरमालां च वाचयामास योगवान् ॥ सर्वं ज्ञात्वा यतिः पश्चाद्द्विजमूचे सविस्तरम् ॥ ३३ ॥ यतिरुवाच ॥ मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः ॥ विवेकं तु समासाद्य त्यज संसारवासनाम् ॥ ३४ ॥

यत्फलम् आम्रपिचुमंदबीजपूरादिफलं मद्गृहायातं मम गृहं मद्गृहं तदायातम् आगतं भवति, तच्च शीघ्रं तत्क्षणमेव विशुष्यति । एतेन पूर्वं फलं सरसमित्यर्थतः सिद्धम् । अत अस्मात्कारणात् निर्भाग्यस्य भाग्यहीनस्य अनपत्यस्य अपुत्रस्य मे मम जीवितेन किं, न किमपि प्रयोजनम् ॥ ३१ ॥ तद्दुःखाक्रोशं वीक्ष्य तस्य करुणोत्पन्नेत्याह–इतीति । इत्येवमुक्त्वा गदित्वा स विप्रो दुःखपीडितः तत्पार्श्वे तस्य यतेः समीपे उच्चैः स्वरेण यदा रुरोद रोदनं चकार, तदा तस्य यतेः संन्यासिनश्चित्ते हृदि गरीयसी गुरुतरा करुणा दयाऽभूत्, जातेत्यर्थः ॥ ३२ ॥ योगबलेन तत्प्रारब्धं विलोक्याब्रवीदित्याह–तदिति । योगवान् योगी तद्भालाक्षरमालां तस्य विप्रस्य भाले ललाटपट्टे अक्षरमालां विधात्रा लिखितां वर्णमालां जन्मतो मरणावधिसूचिकां वाचयामास । सर्वं ज्ञात्वा पश्चात् सविस्तरं यथा स्यात् तथा विप्रम् ऊचे ॥ ३३ ॥ संन्यासी ब्राह्मणं वैराग्यं प्रदर्शयन्नाह–मुंचेति । प्रजारूपं पुत्ररूपम् अज्ञानमविद्यां मुंच त्वं त्यज । किमित्यत आह–कर्मणो गतिर्बलिष्ठा बलवत्तरा । एतेन संततिकरं त्वद्भाग्यं नास्तीति सूचितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं मया कर्त्तव्यमित्यपेक्षायामाह—तु उक्तार्थतो वैलक्षण्ये वर्त्तते । विवेकं ज्ञानं समासाद्य संप्राप्य संसारवासनां पुत्रो मे भूयादितीच्छारूपां त्यज ॥ ३४ ॥ मद्भाग्ये किं विधिना पुत्रो न लिखितः, किं वा पापेन प्रतिबद्धः, ग्रहदोषैर्वेति संदेहं निराकरोति—शृण्विति । हे विप्र अद्य इदानीं ते तव प्रारब्धं मया विलोकितं दृष्टम्, तुशब्दो योगबलसूचकः । सप्तजन्मावधि सप्तजन्मपर्यंतं तव पुत्रो नैव च नैव च नास्ति नास्तीति वीप्सा पुत्रेच्छां मा कुरु इति सूचनार्था ॥ ३५ ॥ पुत्रात् सुखं स्यादिति मा निश्चिनुहीत्याह—संततेरिति । दैवमंतरा योगप्रभावात् दत्तायाः संततेः सगरो राजा यथा येन प्रकारेण दुःखमवाप प्राप, तथाङ्गोपि नृपतिः । अविसर्ग पाठे अंगेति संबोधनम् । यथा यथावदिति गुरवः । पुरा पूर्वम् । रे इति अवज्ञया संबोधयति । कुटुंबाशां मे संततिरविच्छिन्ना भूतले तिष्ठतु चिरायेतीच्छामद्य मुंच परिहर । संन्यासे वासनात्यागे सर्वथा सर्वप्रकारेण सुखमस्ति ॥ ३६ ॥ विप्रो भाषते—विवेकेनेति । विवेकेन ज्ञानेन मे मम किं भवेत् किं स्यात्, न किमपि । बला

शृणु विप्र मया तेऽद्य प्रारब्धं तु विलोकितम् ॥ सप्तजन्मावधि तव पुत्रो नैव च नैव च ॥ ३५ ॥ संततेः सगरो दुःखमवापांगः पुरा तथा ॥ रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ॥ ३६ ॥ ब्राह्मण उवाच ॥ विवेकेन भवेत्किं मे पुत्रं देहि बलादपि ॥ नो चेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्छितः ॥ ३७ ॥ पुत्रादिसुखहीनोऽयं संन्यासः शुष्क एव हि ॥ गृहस्थः सरसो लोके पुत्रपौत्रसमन्वितः ॥ ३८ ॥ इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः ॥ चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात् ॥ ३९ ॥

द्दैवं निवर्त्यापि योगबलतः मे पुत्रं त्वं देहि । विपक्षे दोषं प्रदर्शयति—नो चेत् चेयदि नो ददासि तर्हि त्वदग्रे तव पुरतः शोकमूर्छितः शोकेन मूर्छितः कर्त्तव्याकर्त्तव्यविचारशून्योहं प्राणांस्त्यजामि मरिष्यामि । वर्त्तमानसामीप्ये भविष्यति लट् ॥ ३७ ॥ स्वाचिंतितमाह—पुत्रादीति । पुत्रः प्रसिद्धः, आदिना पौत्रादिसंग्रहः, तस्य सुखेनानंदेन हीनो रहितोऽयं संन्यासः शुष्को विरसः, एव हीति निश्चयार्थकनिपातद्वयेनोक्तोर्थो दृढीकृतः । पुत्रपौत्रसमन्वितः पुत्रपौत्रैर्युक्तो गृहस्थः गृही लोके जगति सरसः रसवान् ॥ ॥ ३८ ॥ सूतोक्तिरियम् । इतीति—इत्येवं विप्राग्रहं विप्रस्य आग्रहं हठं दृष्ट्वाऽवलोक्य स तपोधनो मुनिः प्राब्रवीत् प्रावदत् । मम प्रारब्धे न पुत्रस्तथापि योगबलेन संततिं देहीत्याग्रहवंतं प्रति विधिलेखनिवारणेन पुत्रदानेपि दुःखमेव प्रत्युत न सुखमित्याह—चित्रकेतुरिति । विधिलेखविमार्जनात् विधिर्विधाता तस्य लेखो लेखनं कर्मानुसारेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्णावलिस्तस्य विमार्जनात् विलायनात् चित्रकेतुर्नृपः कष्टं गतः ॥ ३९॥ किंच–नेति । पुत्रात्सुखं त्वं न यास्यसि न प्राप्स्यसि। तत्र दृष्टांतः–दैवहतोयमः दैवेन "पूर्वजन्म जनितं पुराविदः कर्म दैवमिति संप्रचक्षते" इत्युक्तलक्षणेन हतो नष्ट उयमः पुरुषार्थो यस्य स यथा सुखं नैति । अतोस्माद्धेतोः त्वं हठेन युक्तोसि पुत्राग्रहवानसि । हि युक्तोयमर्थः । अर्थिनं पुत्रेच्छावंतं त्वां किं वदामि ॥ ४० ॥ स्वदर्शनफलं विख्यापयन् तस्मै एकं फलं प्रदत्तवानित्याह–तस्येति । तस्य विप्रस्य आग्रहं हठं समालोक्य दृष्ट्वा एकं फलम् (आम्रस्येति शेषः) स संन्यासी तस्मै विप्राय दत्तवान् । किमेतेन स्यादिति ध्यायन्तं प्रत्याह–इदमिति । इदं फलं पत्न्या स्त्रिया त्वं भक्षय खादय,ततः फलभक्षणा द्धेतोः पुत्रो भविष्यति उत्पत्स्यते ॥ ४१ ॥ नियमाचरणात् पुत्रोपि निर्मलो भविष्यतीत्याह–सत्यमिति । सत्यं यथार्थभाषणम् । शौचं शरीरशुद्धिः । दया परस्य दुःखास हिष्णुत्वम् । दानं दीनेभ्योऽन्नादेः । एकभक्तं सकृद्भोजनम् । वर्षावधि वर्षपर्यंतं स्त्रिया गृहिण्या कार्यं कर्त्तव्यम् । तेन हेतुनाऽतिनिर्मलोऽतिशुद्धः पुत्रः, स्यादिति शेषः ॥

न यास्यसि सुखं पुत्राद्यथा दैवहतोयमः ॥ अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ॥ ४० ॥ तस्याग्रहं समालोक्य फलमेकं स दत्तवान् ॥ इदं भक्षय पत्न्या त्वं ततः पुत्रो भविष्यति ॥ ४१ ॥ सत्यं शौचं दया दानमेकभक्तं तु भोजनम् ॥ वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽतिनिर्मलः ॥ ४२ ॥ एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः ॥ पत्न्याः पाणौ फलं दत्त्वा स्वयं यातस्तु कुत्रचित् ॥ ४३ ॥ तरुणी कुटिला तस्य सख्यग्रे च रुरोद ह ॥ अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ॥ ४४ ॥

॥ ४२ ॥ एवमिति–एवमित्थम् उक्त्वा कथयित्वा योगी संन्यासी ययौ । विप्रो गृहमागतः, तुरविलंबार्थः । पत्न्याः भार्यायाः पाणौ हस्ते फलं दत्त्वा समर्प्य स्वयं कुत्र चित् क्वापि यातः, कार्यार्थं गतवानित्यर्थः ॥ ४३ ॥ दुर्ज्ञेयं स्त्रीचरितं प्रदर्शयंस्तज्जायाचेष्टानाह–तरुणीति सप्तभिः । तस्यात्मदेवस्य तरुणी युवतिः कुटिला कौटिल्ययुक्ता– जातिगुणरूपगृहैश्वर्यैरस्माकं तुल्या भवसि, पुत्रप्रदफलभक्षणेन न्यूनतां पूरयेति सखीभिरुच्यमानाया अपि हठेन तदभक्षणाग्रहवत्त्वं कुटिलत्वम् । सख्यग्रे सखीनां पुरतो रुरोद रोदनं चकार । ह इति खेदे । चोप्यर्थे । किमर्थं रोदिषीति पृष्टाह–अहो अकस्मादेव मम चिंता शरीराच्छोषणहेतुरुत्पन्नाऽऽविर्भूता । का चिंतेति श्रोतुकामाः सखीः फलं प्रदर्शयन्ती तद्भक्षणं निराकरोति–पुत्रार्थं पत्या दत्तं फलं न भक्षये नाद्म्यहम् ॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कौटिल्यं सूचयंस्तत्र कारणमाह-फलभक्षेण खादनेन गर्भः स्यात्, गर्भेण उदरस्थमांसपिंडेन उदरवृद्धिता जठरवर्धनं, ततस्तदनंतरं स्वल्पभक्षणमल्पभोजनशक्तिः । तत इति पुनर्योज्यम् । ततोऽल्पभक्षणादशक्तिः शरीरशैथिल्यं, ततो देहशैथिल्यात् गृहकार्यं मार्जनलेपनादि कथं भवेत् केन प्रकारेण स्यात् ॥ ४५ ॥ दैवात् प्रारब्धतः धाटी चौराद्यागमरूपा व्रजेत् ग्रामे प्राप्नुयात् तदा गर्भिणी स्त्री कथं पलायेत केन प्रकारेणापसरणं विदध्यात् । 'वाटीं-वाहाटीं' वेति वदंतो भ्रांताः । किंच-गर्भः शुकवत् व्यासपुत्रवत् निवसेत स्थिरो भवेत, तस्य षोडशवर्षपर्यंतं बहिरनिर्गमात् । तं गर्भं कुक्षेः सकाशात् कथमुत्सृजेत केन प्रकारेण परित्यजेत ॥ ४६ ॥ किंच-चेद्यदि गर्भस्तिर्यक् वक्रत्वमागतः प्राप्तो भवेत् तदा मे मरणं भवेत । प्रसूतौ जन्मसमये दारुणमसह्यरूपं दुःखं सुकुमारी कोमलांगी बालाऽहं कथं केन प्रकारेण सहे ॥ ४७ ॥ किंच-मयि प्रसूतिकागारे मंदायां गर्भजदुःखेन कार्यासमर्थायां सत्यां सर्वस्वं ममाखिलं धनं तदा तस्मिन्नवसरे ननांदा भर्तुर्भगिनी संहरेत् । किंच-ननांद्रनाह्वाने धात्र्या कार्यसंपत्तौ सिद्धायामपि

फलभक्षेण गर्भः स्याद्गर्भेणोदरवृद्धिता ॥ स्वल्पभक्ष्यं ततोऽशक्तिर्गृहकार्यं कथं भवेत् ॥ ४५ ॥ दैवाद्धाटी व्रजेद्ग्रामे पलायेद्गर्भिणी कथम् ॥
शुकवन्निवसेद्गर्भस्तं कुक्षेः कथमुत्सृजेत् ॥ ४६ ॥ तिर्यक्चेदागतो गर्भस्तदा मे मरणं भवेत् ॥ प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे ॥ ४७ ॥
मन्दायां मयि सर्वस्वं ननान्दा संहरेत्तदा ॥ सत्यशौचादिनियमो दुराराध्यः स दृश्यते ॥ ४८ ॥ लालने पालने दुःखं प्रसूतायाश्च वर्तते ॥ बन्ध्या
वा विधवा नारी सुखिनी चेति मे मतिः ॥ ४९ ॥ एवं कुतर्कयोगेन तत्फलं नैव भक्षितम् ॥ पत्या पृष्टं फलं भुक्तं भुक्तं चेति तयेरितम् ॥ ५० ॥
एकदा भगिनी तस्यास्तद्गृहे स्वेच्छयाऽऽगता ॥ तदग्रे कथितं सर्वं चिन्तेयं महती हि मे ॥ ५१ ॥

सत्यशौचादिनियमः सत्यशौचादीनां पूर्वोक्तानां नियमः स प्रसिद्धो दुराराध्यः मया कर्तुमशक्यो दृश्यते ॥ ४८ ॥ किंच-प्रसूतायाः प्रसववेदनासहनेपि शिशोर्लालने दुःखं वर्त्तते । तर्हि किं तेऽभीष्टमिति पृष्टा स्वाभिप्रायं प्रकाशयति-बंध्याऽप्रसूता, विधवा पतिहीना नारी स्त्री सुखिनी सुखभागनीति मे मतिः मे बुद्धिः ॥ ४९ ॥ एवमित्थं कुतर्कयोगेन विपरीततर्कयोगतः तत्फलं धुंधुल्या नैव भक्षितं नात्तम् । पत्या पृष्टं फलं भुक्तं त्वयेति तया भुक्तं मयेति ईरितं कथितम् ॥ ५० ॥ सखीसंवादं समाप्येदानीं भगिन्योर्मिथो दुर्मंत्रं निरूपयति-एकदेति। एकदा एकस्मिन्काले तस्या धुंधुल्या भगिनी सहोदरा तद्गृहं तस्या भवनं स्वेच्छया विनैव कार्यं गताऽऽगता तदग्रे तस्याः कनिष्ठभगिन्या अग्रे सर्वं-पत्या पुत्रार्थं फलं मद्धस्ते दत्तं मया न भुक्तं पतिवंचनार्थं भुक्तमित्युक्तम्, इयं पतिवंचनरूपा फलाऽभक्षेण चिंता शरीरशोषणरूपा महती मे मम, वर्त्तत इति शेषः ॥ ५१ ॥

१ अत्र केचन फलशब्देनाम्रफलं, भक्षधातुप्रयोगेणोत्तमजातिकं तदिति च व्याचक्षते । तत्राऽम्रफलनिश्चायकवाक्याऽनुपलब्धेराम्रेतरभक्षणार्हाऽनेकफलसत्त्वाच्च नैतत्कल्पना युक्तियुक्तेति भाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो दुर्बलाहमस्मीत्याह—दुर्बलेति । तेनोक्तेन दुःखेन हे अनुजे पश्चाज्जाते दुर्बलाऽल्पवीर्याऽस्मि हि यतोऽतः किं करवाणि । सा अनुजा ज्येष्ठां भगिनीमाश्वासयन्त्याह—मम गर्भोऽस्ति, प्रसूतितः सप्तममासे तं बालं दास्यामि, तुभ्यमिति शेषः। "आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः।अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकी भवेत् ॥" इतिस्मृतेः प्रसूतिशब्दोत्र सप्तममासवाचक उन्नेयः, न तु जन्मसूचकोऽग्रिमवचनेनासगतेः ॥५२॥ तावत्कालपर्यंतं कूटगर्भवती सुगुप्ता भवेत्याह । तावदिति—तावत्कालं सप्तमासिकबालकप्रदानपर्यंतम्, नैरंतर्ये द्वितीयेयम् । सगर्भा इव गर्भवती यथा तिष्ठति तथा गुप्ताऽलक्षिता गृहे स्वभवने सुखं यथा स्यात्तथा त्वं तिष्ठ स्थिरा भव । स्वपुत्रस्य परस्मै दानं दुर्घटं मन्वानां प्रत्याह—मत्पतेर्मम भर्त्रे वित्तं धनं त्वं यच्छ देहि,स धनलोभी ते तुभ्यं बालकं स्वपुत्रं दास्यति'द्रव्येण सर्वे वशाः'इत्युक्तेः॥५३॥क्व ते पुत्र इति लोकैः पृष्टाऽहं मृतं विज्ञापयामीति श्रुत्वा लोकोपि तथा वदिष्यतीत्याह—षाण्मासिक इति । षट् च ते मासाश्च षण्मासाः तत्र भवः षाण्मासिको बालो मृत इति लोको जनो वदिष्यति कथयि

दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम् ॥ साऽब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः ॥ ५२ ॥ तावत्कालं सगर्भैव गुप्ता तिष्ठ गृहे सुखम् ॥
वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम् ॥ ५३ ॥ षाण्मासिको मृतो बाल इति लोको वदिष्यति ॥ तं बालं पोषयिष्यामि नित्यमागत्य ते गृहे ॥ ५४ ॥ फलमर्पय धेन्वै त्वं परीक्षार्थं तु सांप्रतम् ॥ तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः ॥ ५५ ॥ अथ कालेन सा नारी प्रसूता[1] बालकं तदा ॥ आनीय जनको बालं रहस्ये धुन्धुलीं ददौ ॥५६॥ तया च कथितं भर्त्रे प्रसूतः सुखमर्भकः॥ लोकस्य सुखमुत्पन्नमात्मदेवप्रजोदयात्॥५७॥

ष्यति । कृतेप्येवं बालरक्षणं मातरमंतरा दुर्घटमिति चिंतयंतीं प्रत्याह—ते तव गृहे नित्यमागत्य तं बालम् अहं पोषयिष्यामि पुष्टं करिष्यामि ॥ ५४ ॥ फलभक्षेण पुत्रः स्यादिति सत्यं वा मृषा वेति निर्द्धारयितुं गवे तत्समर्पितमित्याह—फलमिति । फलमिदं धेन्वै गवे परीक्षार्थं परीक्षणाय सांप्रतमद्य त्वमर्पय, भक्षणार्थमिति शेषः । खादयेति भावार्थः । तदा तस्मिन्नेव काले स्त्रीस्वभावतः 'स्त्रीणां दोषाः स्वभावजाः' इतिवचनात् तथैव तत्सर्वमाचरितं कृतम्॥ ५५ ॥ सकुतर्कं दुश्चेष्टितं निरूप्य प्रकृतमनुसरति—अथेति । अथ दुर्मंत्रणानंतरं सा कनिष्ठा भगिनी बालकं प्रसूता अजीजनत् । कालेन यथोक्तसमयेन जनकस्तत्पिता बालं शिशुम् आनीय गृहीत्वा तदा सप्तमे मासि रहसि एकांते धुंधुलीं धुंधुल्यै ददौ ॥ ५६ ॥ पुनः स्त्रीचरितं दुर्ज्ञेयमित्याह—तयेति । तया धुंधुल्या भर्त्रे पत्ये अर्भको बालः प्रसूतो जातो ममेति कथितम् । दुःखाक्रोशो न श्रुतोऽस्माभिरथ च धात्र्यानयनमपि न कृतं कथमित्यत आह—सुखमिति । श्रुत्वैतत् सर्वस्यापि सुखमुत्पन्नमित्याह—लोकस्येति । आत्मदेवप्रजोदयात् आत्मदेवस्य ब्राह्मणस्य

१ प्रासूतेति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजा पुत्रस्तस्योदयात् जन्मतः लोकस्य सुखमुत्पन्नम् ॥ ५७ ॥ "पुत्रजन्मव्यतीपाते दत्तं भवति चाक्षयम्" इतिधर्मशास्त्रात सोपि दानं चकारेत्याह—ददाविति । द्विजातिभ्यो ब्राह्मणादिभ्यः दानं ददौ । आत्मदेव इति कर्तृपदमत्रोन्नेयम् । किं कृत्वा—जातकर्म विधाय संपाद्य । च पादपूर्त्तौ । तद्वारे तस्यात्मदेवस्य द्वारे गीतवादित्रघोषः गीतानि च वादित्राणि चेति गीतवादित्राणि तेषां घोषो नादोभूत् । बहु मंगलं चाभूत् ॥ ५८ ॥ मम स्तनयोर्दुग्धं नास्तीति पतिं विज्ञापयति—भर्तुरिति । भर्तुः पत्युरग्रे पुरतः वाक्यं वचनमब्रवीत । किमित्यपेक्षायामाह—मम कुचे स्तन्यं स्तने भवं स्तन्यं दुग्धं नास्तीति । कुचयोरिति वक्तव्ये कुचे इति पाठश्छंदोऽनुरोधेन । पयोर्थं धात्री मानयिष्यामि इति वदंतं प्रत्याह—निर्दुग्धा निर्गतं दुग्धं यस्याः सा तथाभूताहम् अन्यस्तन्येन अन्यस्त्रीजनदुग्धेन बालकमल्पशिशुं कथं केन प्रकारेण पुष्णामि पालयामि ॥ ५९ ॥ तर्हि किं कर्त्तव्यमित्यत आह—मदिति । मत्स्वसा मम कनिष्ठभगिनी या वर्तते तस्याः प्रसूतायाः प्रसववत्या बालो मृतः, अभूदिति शेषः । तां मद्भगिनीम्

ददौ दानं द्विजातिभ्यो जातकर्म विधाय च ॥ गीतवादित्रघोषोभूत्तद्वारे मंगलं बहु ॥ ५८ ॥ भर्तुरग्रेऽब्रवीद्वाक्यं [1]स्तन्यं नास्ति कुचे मम ॥
अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम् ॥ ५९ ॥ मत्स्वसायाः प्रसूताया मृतो बालस्तु वर्तते ॥ तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति ॥
॥ ६० ॥ पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे ॥ पुत्रस्य धुन्धुकारीति नाम मात्रा प्रतिष्ठितम् ॥ ६१ ॥ त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम् ॥
सर्वांगसुन्दरं दिव्यं निर्मलं कनकप्रभम् ॥ ६२ ॥

आकार्य आनीय गृहे रक्ष स्थापय । 'आकार्यम्' इति पाठे कार्यपर्यंतं तां गृहे रक्षेति योजना । सा ते तव अर्भं बालं पोषयिष्यति ॥ ६० ॥ स्वामिना तथा कृतमित्याह—पतिनेति । पतिना पत्या तत्सर्वं कृतं संपादितम् । किमर्थं—पुत्ररक्षणहेतवे पुत्रस्य पालनार्थम् । "द्वादशेऽह्नि पिता नाम कुर्यात" इतिविधिमुल्लंघ्य मात्रा पुत्रनाम व्यधायीत्याह—पुत्रस्य धुंधुकारीति नाम मात्रा प्रतिष्ठितं प्रतिष्ठापितम् ॥ ६१ ॥ तत्राश्चर्यमुत्पन्नमित्याह—त्रिमास इति । त्रिमासे इति पाठात् भगिनीसंकेतान्मासत्रये व्यतीते धेन्वै फलमर्पितमिति प्रतीयते । केचित्तु—विजातीयसंततिप्रभावतो गौर्द्वादशे मासे प्रसूतेत्याहुः । धुंधुकारीजन्मतः त्रिमासे निर्गते सति सा धेनुः अर्भकं बालं सुषुवे जनयामास । कीदृशम्—सर्वांगसुंदरं सर्वैरंगैर्मनोहरम् । दिव्यं वीर्यसंपर्काभावात्फलमहिम्ना वा । निर्मलं शुद्धम् । कनकप्रभं सुवर्णस्य प्रभा इव प्रभा यस्येति तम् ॥ ६२ ॥

१ यावद्बालस्य स्तनन्धयत्वं, यावद्वा तस्याः सदुग्धत्वमित्याशयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दृष्ट्वा हर्षितो विप्र इत्याह—दृष्ट्वेति । दृष्ट्वा गोप्रसूतं बालं निरीक्ष्य प्रसन्नस्तुष्टो विप्रः स्वयं संस्कारान् जातस्य जातकर्मादीनादधे चकार। सर्वे जना नागरिका दिदृक्षार्थं तद्दर्शनकाम्यया समागताः समाययुः । तत्र हेतुः—आश्चर्यं मत्वेति ॥ ६३ ॥ धन्योऽयं विप्र इति लोको वक्तीत्याह—भाग्योदय इति । आत्मदेवस्य विप्रस्याधुनेदानीं भाग्योदयो जातः । देवरूपी बालो धेन्वा प्रसूत इति कौतुकं यूयं पश्यत आलोकयत ॥ ६४ ॥ तद्धेतुर्न ज्ञातः कैश्चिदित्याह—नेति । तत् रहस्यं संन्यासियोगप्रभावदत्तफलभक्षणरूपं केनापि न ज्ञातम् । अज्ञाने हेतुः—विधियोगतः दैवबलात् । गोकर्णं गोः कर्णाविव कर्णौ यस्य स तथेति तं सुतं पुत्रं दृष्ट्वा गोकर्णं नामाऽकरोत् तस्य गोकर्ण इति नाम व्यदधादित्यर्थः । अत्रात्मदेवेति कर्तृपदमध्याहार्यम् । चौ प्रसिद्धिद्योतकौ ॥ ६५ ॥ कारणवैचित्र्यं कार्यविचित्रतायां कारणमित्याह—कियदिति । तावुभौ द्वौ तनयौ बालकौ कियत्कालेन तरुणौ जातौ युवानावभूताम् । तयोश्चेष्टाभेदमाह—गोकर्णः पंडितः सदसद्विवेकिनी बुद्धिः पंडा सा सं जाताऽस्येति तथा, ज्ञानी ज्ञान

दृष्ट्वा प्रसन्नो विप्रस्तु संस्कारान्स्वयमादधे ॥ मत्वाऽऽश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ॥ ६३ ॥ भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत ॥ धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकम् ॥ ६४ ॥ न ज्ञातं तद्रहस्यं तु केनापि विधियोगतः ॥ गोकर्णं च सुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ॥ ६५ ॥ कियत्कालेन तौ जातौ तरुणौ तनयावुभौ ॥ गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः ॥ ६६ ॥ स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधसंयुतः ॥ दुष्परिग्रहकर्त्ता च शवहस्तेन भोजनः ॥ ६७ ॥

मस्यास्तीति तथा । धुंधुकारी महाखलोऽतिदुष्टो महापापकरणात्॥६६॥तद्दुष्टतां निरूपयति सार्द्धैस्त्रिभिः। स्नानेति—"स्नानं तु द्विविधं प्रोक्तं मंत्रमुसळभेदतः । इत्युक्तलक्षणं स्नानं। शौचं च द्विविधं स्मृतम्॥ बाह्याभ्यंतरभेदेन क्रिया नानाविधाः स्मृताः ।" इतिवचनान्निरुक्ताभिः स्नानशौचक्रियाभिर्हीनो रहितः । दुर्भक्षी अपरीक्षितान्नभोक्ता । क्रोधसंयुतः क्रोधयुक् दुराचारनिवारणार्थसदुपदेशात । दुष्प्रतिग्रहकर्त्ता च दुष्टा ये प्रतिग्रहाः ब्रह्मांडपुराणोक्तास्तेषां कर्त्ता । तथाहि—"तिलधेनुर्गजो वाजी प्रेतान्नमजिनं मणिः । सुरभिः सूयमाना च दुष्टाः सप्त प्रतिग्रहाः॥" । मणिः शालिग्रामः । गौरुभयतोमुखी । शवहस्तेन भोजनः शवस्य मृतस्य जंतोर्देहस्य हस्तेन साधनेन स्मशाने भुंक्ते इति स तथेति देशांतरीयव्यवहारः । वस्तुतस्तु शवं मृतं हंति वहंतीति शवहणस्तेनाः चौराः तैः सह भोजनं यस्येति स तथा । हंतिरत्र प्रापणार्थः । यद्वा—शववहनचौर्याभ्यां भोजनं यस्येति स तथेति केचित् । 'सव्यहस्तेन भोजनः' इति पाठोपि कुत्रचित् । "वामहस्तेन यद्भुक्तं मांसतुल्यं स्मृतं बुधैः" इतिस्मृतौ वामहस्तभोजननिषेधात् ॥६७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चोरः परधनमोषकः । सर्वजनद्वेषी सर्वैरात्मीयैः परकीयैर्वा जनैः सह द्वेष्टुं शीलमस्येति स तथा । परवेश्मप्रदीपकः परेषां वेश्मानि तार्णगृहाणि वह्निना प्रदीपयतीति तथा । लालनाय विलासार्थम् अर्भकान् बालकान्धृत्वा गृहीत्वा सद्यः तत्कालं कूपे न्यपातयत प्रक्षिप्तवान् ॥ ६८ ॥ हिंसको जीवघाती । शस्त्रधारी शस्त्राणां धारकः । दीनांधानां प्रपीडकः, दीनाः—"सर्ववस्तुविहीना ये ते दीनाः परिकीर्त्तिताः। क्षयार्थकात्तु दीङ्धातोर्निष्ठायां नत्वदर्शनात्॥"इत्युक्ताः, अंधा नेत्रहीनाः, तेषां दुःखदः । चांडालेषु अभिरतोऽनुरक्तः । नित्यं सदा पाशहस्तः पाशो हस्ते यस्य स तथा । श्वसंगतः श्वभिः कुक्कुरैः संगतः सहितः ॥ ६९ ॥ वेश्यानां प्रसंगतः संसर्गात् तेन धुंधुकारिणा पित्र्यं पितृसंबंधि वित्तं धनं नाशितम् । 'त्वंताथादि न पूर्वभाक्' इत्यमरोक्तेः । तु वैलक्षण्ये । तद्यथा—एकदा एकस्मिन् काले पितरौ माता च पिता चेति तथा तौ "पुमान् स्त्रिया" इत्येकशेषः । ताड्य ताडयित्वा । समासे ल्यब्विधानात ताडयेति छांदसं रूपम् । पात्राणि स्थालीकमंडल्वादीनि स्वयमाहरत् हृत्वा अन्यत्रानयत, वेश्यागृहं प्रापयदि

चोरः सर्वजनद्वेषी परवेश्मप्रदीपकः ॥ लालनायार्भकान्धृत्वा सद्यः कूपे न्यपातयत् ॥६८॥ हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः ॥ चाण्डालाभिरतो नित्यं पाशहस्तश्च संगतः ॥ ६९ ॥ तेन वेश्याप्रसंगेन पित्र्यं वित्तं तु नाशितम् ॥ एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् ॥ ७० ॥ तत्पिता कृपणः प्रोच्चैर्धनहीनो[1] रुरोद ह ॥ बन्ध्यत्वं तु समीचीनं कुपुत्रो दुःखदायकः ॥ ७१ ॥ क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् ॥ प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम् ॥ ७२ ॥

त्यर्थतः सिद्धम् ॥ ७० ॥ धननाशं कुमार्गेण दृष्ट्वा शोचति तत्पितेत्याह—तदिति । कृपणः कृच्छ्रात्तधनस्यान्यायतो व्ययमकारीति । तदुक्तम्—" धनस्य रक्षणार्थाय प्राणहानिं करोति यः । बुभुक्षितोपि नो भुंक्ते कृपणः स विधीयते ॥ " इति । तत्पिता तस्य धुंधुकारिणः पिता जनकः धनहीनः निर्धनः प्रोच्चैरुदात्तस्वरेण रुरोद विललाप । हेति स्पष्टम् । निःसत्त्वं मरणमेव । तथाहि—उद्योगपर्वणि श्रीकृष्णं प्रति युधिष्ठिरवचनम्—" लोभः प्रज्ञानमाहंति प्रज्ञा हंति हता ह्रियम् ॥ ह्रीर्हता बाधते धर्मं धर्मो हंति हतः श्रियम् ॥ १ ॥ श्रीर्हता पुरुषं हंति पुरुषस्याधनं वधः ॥ अधनाद्विनिवर्तंते ज्ञातयः सुहृदो द्विजाः ॥ २ ॥ अपुष्पादफलाद्वृक्षाद्यथा कृष्ण पतत्रिणः ॥ " । तमेवाह सार्द्धेन । बंध्यत्वं तु समीचीनम् " अपुत्रत्वं वरं मन्ये कुपुत्राद्दुःखदायकात् " इति विवर्णरूपमत्रोन्नेयम् ॥ ७१ ॥ क्व कुत्र स्थाने अहं तिष्ठामि स्थितिं करोमि " दुःखेन सह संवासः सर्वथा दुःखकृन्मतः " इत्युक्तेः क्व कुत्र गच्छामि स्वगेहस्य त्यक्तुमशक्यत्वात् । मे मम दुःखं कुपुत्रधननाशाभ्यां

१ 'धनहानौ' इति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातं को व्यपोहयेत् को विनाशयेत । दुःखेन हेतुना प्राणान् अहं त्यजामि । इत्याक्रोशे । कष्टं मम संस्थितं जातम् ॥ ७२ ॥ " तदानीं प्राप्य गोकर्णः पितरं पर्यबोधयत् । अवस्तुत्वं हि जगतो वैराग्येण निरूपयन् ॥ " इत्याह—तदानीमिति । तदानीं तर्हि समागत्य गृहमागत्य ज्ञानेन संयुतः ज्ञानी गोकर्णो जनकं पितरं बोधयामास ज्ञापयांचक्रे 'पिता पुत्रेण संबोध्यो न पाठ्य इति संमतेः' । गोप्रजातस्य तस्य कथं पितृत्वमस्येति न भ्रमितव्यम्, " अन्नदाता भयत्राता यश्च कन्यां प्रयच्छति । विद्याप्रदो मंत्रदश्च पंचैते पितरः स्मृताः ॥ " इति नीत्युक्तेः, " तावेव पितरौ तस्य यौ पुष्णीतः स्वपुत्रवत " इति व्यासवचनाच्च तथा व्यवहारात् । वैराग्यं परिदर्शयन् । तथाहि—" यः पूर्वमपिबत्स्तन्यं निष्पीड्य च पयोधरान् । यस्मिञ्जातो भगे पूर्वं तस्मिन्नेव भगे रमेत् ॥ १ ॥ या माता सा पुनर्भार्या या भार्या जननी हि सा । यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिता ॥ २ ॥ एवं संसारचक्रेण कूपचक्रघटा इव " इत्यादि ॥ ७३ ॥ तत्प्रकारमाह—असार इति । संसारो मोहतः संसृतिरूपो विचारतो असारः । खलु निश्चये । दुःखरूपी दुःखाकरत्वात् । विमोहकः विशेषेण मोहकर्त्ता । कस्य सुतः पुत्रः, कस्य धनं, न कस्यापीत्यर्थः । स्नेहवान् अनुरक्त अनि

तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः ॥ बोधयामास जनकं वैराग्यं परिदर्शयन् ॥ ७३ ॥ असारः खलु संसारो दुःखरूपी विमोहकः ॥ सुतः कस्य धनं कस्य स्नेहवाञ्ज्वलतेऽनिशम् ॥ ७४ ॥ न चेन्द्रस्य सुखं किञ्चिन्न सुखं चक्रवर्तिनः ॥ सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः ॥ ७५ ॥ मुञ्चाज्ञानं प्रजारूपं मोहतो नरके गतिः ॥ निपतिष्यति देहोऽयं सर्वं त्यक्त्वा वनं व्रज ॥ ७६ ॥ तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिताऽब्रवीत् ॥ किं कर्तव्यं वने तात तत्त्वं वद सविस्तरम् ॥ ७७ ॥ अन्धकूपे स्नेहपाशैर्बद्धः पंगुरहं शठः ॥ कर्मणा पतितो नूनं मामुद्धर दयानिधे ॥ ७८ ॥

शमहोरात्रं ज्वलते परितपति ॥ ७४ ॥ वस्तुतस्तु न कोपि सुखीत्याह—न चेति । इंद्रस्य स्वर्गपतेः किंचित अल्पमपि सुखं न च नास्ति । चक्रवर्त्तिनः सार्वभौमस्य नृपस्य न सुखम् । ननु 'सुखं दुखं भवोऽभवः' इत्यादौ किमिति सुखनिरूपणं, तत्राह—सुखमिति । विरक्तस्य विरागिणो मुनेर्मननशीलस्य एकांतजीविनः एकांते निर्जनस्थाने कंदमूलफलैर्जीवितुं शीलं यस्य तस्य सुखमस्ति ॥ ७५ ॥ अथ कर्त्तव्यमाह—मुंचेति । प्रजारूपं पुत्ररूपमज्ञानं त्वं मुंच त्यज । तत्र हेतुः—मोहतो नरके गतिः गमनम् । अयं देहः पांचभौतिकः निपतिष्यति आरब्धकर्मसमाप्तौ मरिष्यति । अतः सर्वं गृहपुत्रधनादिकं त्यक्त्वा वनं व्रज गच्छ ॥ ७६ ॥ सुतोक्तं हितं मन्वानः पिताह—तद्वाक्यमिति । तस्य पुत्रस्य वाक्यं वचनं समाकर्ण्य संश्रुत्य वने गंतुकामो यातुकामः पिताऽऽत्मदेवोऽब्रवीत्—हे तात पुत्र मया किं कर्त्तव्यं, तत्तत्कार्यं सविस्तरं यथा स्यात्तथा त्वं वद ब्रूहि ॥ ७७ ॥ स्वयं विचार्य कुरुतां किं मत्कथनेनेत्यत आह—अंधकूपे तत्तुल्ये संसारकूपे कर्मणा पतितः स्नेहपाशैर्मोहरज्जुभिर्बद्धो यंत्रितः पंगुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादहीनः शठो मूर्खोऽहमस्मि । नूनं निश्चयेन । हे दयानिधे कृपासागर मामुद्धर बहिर्निःसारय ॥ ७८ ॥ गोकर्णः पितरं संसारादुद्दिधीर्षुस्तत्प्रकारमाह—देह इति द्वाभ्याम् । अस्थिमांसरुधिरे अस्थ्ना सह मांसरुधिरे यस्मिन्स तथेति केचित्, अस्थिमांसाभ्यां सह रुधिरं यस्मिन्नित्यपरे तन्मंदम्, अस्थि च मांसं च रुधिरं चेत्यस्थिमांसरुधिराणि तानि विद्यंते यस्मिन्नित्यस्थिमांसरुधिरः । अर्शआद्यच् । तस्मिन्निति सुगमोपायसत्त्वे क्लिष्टाऽप्रशस्तकल्पनाया अन्याय्यत्वात् । एतेन अस्थिमांसरुधिरात्मके इत्यर्थो लभ्यते । ईदृशे देहे शरीरे अभिमतिं ममायमात्मेत्यभिमानं त्वं त्यज परिहर । जायासुतादिषु स्त्रीपुत्रादिषु । आदिना धनगृहादिसंग्रहः । ममतां ममेयं स्त्री ममायं सुतो ममेदं गृहमित्यादिरूपं ममत्वं सदा सर्वस्मिन् काले विमुंच त्वं त्यज, तत्र ममेत्याग्रहं मा कुर्विति भावार्थः । इदं जगत् क्षणभंगनिष्ठं क्षणेन भङ्गे नाशे निष्ठा स्थितिर्यस्य तत् । 'क्षणभङ्गुरत्वम्' इति पाठेऽपि नार्थे विशेषः । अनिशम् अहोरात्रं पश्य त्वमवलोकय । वैराग्यभावरसिकः वैराग्ये भावो

गोकर्ण उवाच ॥ देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं जायासुतादिषु सदा ममतां विमुञ्च ॥ पश्यानिशं जगदिदं क्षणभंगनिष्ठं वैराग्यभावरसिको[1] भव भक्तिनिष्ठः ॥ ७९ ॥ धर्मं भजस्व सततं त्यज लोकधर्मान्सेवस्व साधुपुरुषाञ्जहि कामतृष्णाम् ॥ अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा सेवा[2]कथारसमहो नितरां पिब त्वम् ॥ ८० ॥ एवं सुतोक्तिवशतोऽपि गृहं विहाय यातो वनं स्थिरमतिर्गतषष्टिवर्षः ॥ युक्तो हरेरनुदिनं परिचर्ययाऽसौ श्रीकृष्णमाप नियतं दशमस्य पाठात् ॥ ८१ ॥ इति श्रीपद्मपुराण उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये विप्रमोक्षो नाम चतुर्थोऽध्यायः ॥ ४ ॥

भक्तिः तस्य रसिकः, वैराग्यप्रिय इत्यर्थः । भक्तिनिष्ठः भक्तौ निष्ठा स्थितिर्यस्य स तथा । 'योगनिष्ठः' इति पठांतरम् ॥ ७९ ॥ धर्मं स्वधर्मं सततं निरंतरं भजस्व सेवस्व । लोकधर्मान् काम्यधर्मान् त्वं त्यज । 'भूतहिंसाम्' इति पाठांतरं रम्यमिति गुरवः । साधुपुरुषान् सज्जनान् त्वं सेवस्व भजस्व । 'कामतृष्णाम्' इत्यपपाठः, 'कामोऽभिलाषस्तर्षश्च' इत्यमरोक्तेः कामतृष्णयोरेकार्थत्वात् । वस्तुतस्तु—'कामशत्रुम्' इति पाठो रम्यः, संप्रदायानुरोधात् । कामशत्रुं कामरूपं शत्रुं त्वं जहि । "जहि शत्रुं महाबाहो कामरूपं दुरासदम्" इति गीतायां श्रीकृष्णोक्तौः कामस्य महाशत्रुत्वप्रसिद्धेः । अन्यस्य परस्य दोषगुणचिंतनं दोषाश्च गुणाश्च दोषगुणास्तेषां चिंतनमाशु शीघ्रं मुक्त्वा त्यक्त्वा भगवत्सेवाकथयोः रसं त्वं नितरामतिशयेन पिब । अहो इत्यलभ्यलाभोक्तिस्तव महाभाग्यत्वसूचनार्था ॥ ८० ॥ स [illegible]मिति प्रतिश्रुत्य तथाऽचरणान्मुक्तिमापेत्याह—एवं

१ 'रागरसिकः' इति पाठान्तरम् । २ अत्र 'विष्णोः कथारसम्' इति पाठान्तरं शोभनम् । केचित्तु 'शैवीकथारसम्' इति पठित्वा हरिहरयोरभेदान्वयेन पूर्वापरविरोधं समादधुः, तच्च न रम्यं, 'प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरम्' इति न्यायात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुतोक्तिवशतः,—उक्तविधा या पुत्रस्योक्तिः कथनं तस्या वशतः अपि एव गृहं विहाय त्यक्त्वा स्थिरमतिः स्थिरा निश्चला मतिर्बुद्धिर्यस्य स तथा। गतषष्टिवर्षः गतानि षष्टिर्वर्षाणि यस्य स तथा वनं यातः प्राप्तः । असावात्मदेवः हरेः पापहंतुर्भगवतः परिचर्यया सेवया युक्तः संपन्नोऽनुदिनं प्रतिदिनं दशमस्य स्कंधस्य पाठात् श्रीकृष्णमाप प्राप । नियतमिति निश्चितम्, क्रियाविशेषणमित्येके ॥ ८१ ॥ इति श्रीशेखावाट्यंतर्गतविजयपुरनिवासिव्राजलालिपंडितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ तातस्य तातवाक्येन गतिमुक्त्वात्मघाततः ॥ मातुर्मृतिः कुसंगेन प्रेतभावो निरूप्यते ॥ १ ॥ धुंधुकारिण आहोस्विद्गोकर्णाद्गतिरुच्यते ॥ श्रीमद्भागवतस्यात्र सप्ताहश्रवणे विधिः ॥ २ ॥ पूर्वाध्याये "एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् (७०)" इत्यत्रोभयोस्ताडनमुक्त्वा धननाशाद्रुदतः पितुर्गोकर्णोपदेशेन गतिरुक्ता । अत्र तु तत्संगतिनिरूपणाय तन्मातृवृत्तं निरूपयति सूतः—पितरीति द्वाभ्याम् । पितरि उपरते उपरामं गते सति तेन धुंधुकारिणा जननी धुंधुली भृशमत्यर्थं ताडिता पीडिता । वित्तं धनं क्व तिष्ठते कुत्र स्थापितमस्ति निधिरूपेण इति ब्रूहि वद, चेद्यदि नो वदसि तदा लत्तया हनिष्ये त्वां हनिष्यामि ॥

सूत उवाच ॥ पितर्युपरते तेन जननी ताडिता भृशम् ॥ क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत् ॥ १ ॥ इति तद्वाक्यसंत्रासाज्जनन्या पुत्रदुःखतः ॥ कूपे पातः कृतो रात्रौ तेन सा निधनं गता ॥ २ ॥ गोकर्णस्तीर्थयात्रार्थं निर्गतो योगसंस्थितः ॥ न दुःखं न सुखं तस्य न वैरी नापि बान्धवः ॥ ३ ॥ धुन्धुकारी गृहेऽतिष्ठत्पञ्चपण्यवधूवृतः ॥ अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः ॥ ४ ॥

॥ १ ॥ इत्येवं तद्वाक्यसंत्रासात् तस्य धुंधुकारिणो वाक्यं तद्वाक्यं तस्मात्संत्रास उद्वेगस्तस्मात् पुत्रदुःखतः पुत्राद्दुःखं ताडनादिकं तस्मात् जनन्या मात्रा रात्रौ निशि कूपे पातः कृतः । तेन पातेन हेतुना सा माता निधनं गता मृतिं प्राप्ता । "आत्मघातकरा ये च ते वै निरयगामिनः" इतिस्मृतेर्धुंधुल्या नरकप्राप्तिर्जातेति ध्वनितम् ॥ ॥ २ ॥ "खलेन सह संवासः साधोः शांताय नेष्यते" इतिवचसा गोकर्णनिर्गममाह—गोकर्ण इति । "योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय । सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥" इति गीतायां श्रीकृष्णोक्तेः योगे संस्थितो वर्त्तमानो युक्तो वा गोकर्णस्तीर्थयात्रार्थं निर्गतः निःसृतः 'तीर्थानामटनं पुण्यम्' इत्युक्तेः । तस्य गोकर्णस्य दुःखं नास्ति, सुखं नास्ति, वैरी शत्रुर्नास्ति, बांधवो भ्राता नास्ति ॥ ३ ॥ पुनः सिंहावलोकन्यायेन मंडूकप्लुत्या वा धुंधुकारिचेष्टितमाह—धुंधुकारीति । धुंधुकारी "परप्रियाधनं हर्तुं यतो धुंधु करोत्यसौ। धुंधुकारीति लोकेस्मिन्सर्वत्र ख्यातिमागतः॥" इत्युक्ताभिधावान्, पंचपण्यवधूवृतः पणितुम् आत्ममूल्येन पुंमात्रैः सह व्यवहर्तुं रंतुं वा योग्याः पण्याः, पण्याश्च ता वध्वश्च पण्यवध्वः, पंच च ताः पण्यवध्वश्चेति तथा तास्ताभिर्वृतः संयुतः । गृहे पितृनिर्मिते । अवसत् अतिष्ठत् । कथंभूतः—अत्युग्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंसात्मकानि कर्माणि तेषां कर्त्ता । च पुनः तत्पोषणं तासां वेश्यानां पोषणं तेन विमूढा धीर्यस्य स तथा ॥ ४ ॥ " स्त्रीवशो जायते कामी न चोल्लंघयति तद्वचः " इत्युक्तेस्तस्य तद्धीनतां दर्शयति—एकदेति । एकदा एकस्मिन् काले नर्मवेलावसरे ताः कुलटा वेश्या भूषणानि चूडामणिकुंडलहारादीनि अभिलिप्सव अभिलब्धुं प्राप्तुमिच्छंतीति तथाभूतास्ता अभवन् । तदर्थं तन्निमित्तं गेहात् निर्गतः निरगात् । तं विशिनष्टि—कामांधः कामेन पिहितनेत्रः मृत्युम् अस्मरन्नविचारयन्सन् । तदुक्तम्—'कामातुराणां न भयं न लज्जा' इति ॥ ५ ॥ "अहमाभिर्गृहस्थोस्मि ह्यकार्यकरणोद्यतः । अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्॥" इत्युक्तेराह—यत इति । यतस्ततः यस्मात्तस्मात्स्थानात् वित्तं धनं संहृत्य आहृत्य पुनर्भूयो वेश्म स्वगृहं गत आयातः ताभ्यः पंचभ्यो वेश्याभ्यः कियंति सुवस्त्राणि पट्टांबराणि भूषाणि पूर्वोक्तानि चाऽयच्छत् अददात् ॥ ६ ॥ " धूर्त्तेन धनमानीतं चौर्येणात्र न संशयः । शतं चौरस्य समया एक एव हि स्वामिनः ॥" इति नीत्या तासां वितर्कोभूदित्याह—बह्विति सार्द्धद्वा

एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः ॥ तदर्थं निर्गतो गेहात्कामान्धो मृत्युमस्मरन् ॥ ५ ॥ यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः ॥ ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि कियन्ति च ॥ ६ ॥ बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो व्यचारयन् ॥ चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति ॥ ७ ॥ वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितम् ॥ अतोऽर्थगुप्तये गूढमस्माभिः किं न हन्यते ॥ ८ ॥ निहत्यैनं गृहीत्वाऽर्थं यास्यामो यत्रकुत्रचित् ॥ इति ता निश्चयं कृत्वा सुप्तं संबध्य रश्मिभिः ॥९॥ पाशं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः ॥ त्वरितं न ममारासौ चिन्तायुक्तास्तदाऽभवन् ॥१०॥

भ्याम् । बहुं वित्तचयं धनसंचयं दृष्ट्वा रात्रौ नार्यो वेश्या व्यचारयन् । विचारं दर्शयति—असौ धंधकारी नित्यं प्रतिदिनं चौर्यं करोति, अतश्चौर्यकरणाद्धेतोः राजा ग्रहीष्यति, धनमिति शेषः ॥ ७ ॥ वित्तं चौर्यार्जितं धनं हृत्वाऽऽकृष्य पुनर्भूयः एनं चौर्यकर्त्तारं निश्चितं ध्रुवं मारयिष्यति । अतो हेतोर्गूढमप्रकाशं यथा स्यात्तथाऽर्थगुप्तये धनरक्षणार्थम् अस्माभिः किं न हन्यते, किमिति न वध्यते ॥ ८ ॥ एनं धुंधुकारिणं निहत्य निश्चयेन हत्वाऽर्थं धनं गृहीत्वाऽऽदाय यत्र कुत्रचित् अलक्षिते देशे यास्यामो वयं गमिष्याम इत्येवं निश्चयं कृत्वा ता वेश्याः सुप्तं धुंधुकारिणं रश्मिभिः रज्जुभिः संबध्य बंधयित्वा ॥ ९ ॥ अस्य धुंधुकारिणः कंठे गले पाशं निधाय कृत्वा तन्मृत्युं तस्य मृत्युम् उपचक्रमुः कर्तुमुद्यता बभूवुः । असौ धुंधुकारी महापापित्वात् त्वरितं शीघ्रं न ममार । यदा न ममार तदा ताश्चिन्तायुक्ता अभवन् ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्मुखे तस्यास्ये तप्तांगारसमूहान् तप्तानामंगाराणां संघान् विचिक्षिपुः निक्षिप्तवत्यः । हि युक्तम् । सोऽपि अग्नेर्ज्वाला तया अतिदुःखं महाकष्टं तेन व्याकुलो व्यग्रचित्तो निधनं मृत्युं गतः प्राप्तः ॥ ११ ॥ तं देहं मृतशरीरं गर्त्ते भूविवरे मुमुचुः निचिक्षिपुः। प्रायो बाहुल्येन स्त्रियः साहसिकाः 'साहसो हठः' इति चरके । तेन प्रवर्त्तन्त इति "ओजस्सहोऽम्भसा वर्त्तते" इति ठकि ङीबभाव आर्षः । तदुक्तं गुणसंग्रहे-"कुर्वंति सहसा कार्यं निर्विचारं प्रकुर्वते । अतः साहसिका लोके नार्यः प्रख्यातिमागताः॥" इति। तद्रहस्यं तस्य निदानं केनापि न ज्ञातं न बुद्धम् । इदं स्त्रीचरितं तथैवाऽलक्षितमेव । च पादपूर्त्तौ ॥ १२ ॥ "पप्रच्छुर्हि हनूंः पौरा अपश्यंतोऽनुरागिणम् । संसर्गी भवतीनां किं धुंधुकारी न दृश्यते॥" इत्यादिवचनाल्लोकैर्जनैर्धुंधुकारी क्व गत इति पृष्टास्ता वदन्ति स्म प्रोचुः । किं प्रोचुरित्याह—दूरमिति। नोऽस्माकं प्रियो वल्लभो वित्तलोभविकर्षितः वित्तस्य लोभो बहुवृद्धिरूपः तेन विकर्षित आकृष्टः दूरं देशांतरं यातो गतः । कदाऽऽगमिष्यति इत्यत आह—अस्मिन् वर्षे आगमिष्यति । एतेन मासनिर्णयोऽपाकृतः ॥

तप्तांगारसमूहांश्च तन्मुखे हि विचिक्षिपुः ॥ अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः ॥ ११ ॥ तं देहं मुमुचुर्गर्ते प्रायः साहसिकाः स्त्रियः ॥
न ज्ञातं तद्रहस्यं तु केनापीदं तथैव च ॥ १२ ॥ लोकैः पृष्टा वदन्ति स्म दूरं यातः प्रियो हि नः ॥ आगमिष्यति वर्षेऽस्मिन्वित्तलोभविकर्षितः ॥ १३ ॥
स्त्रीणां नैव तु विश्वासं मृतानां कारयेद्बुधः ॥ विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते ॥ १४ ॥ सुधामयं वचो यासां कामिनां रसवर्धनम् ॥
हृदयं क्षुरधाराभं प्रियः को नाम योषिताम् ॥ १५ ॥ संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः ॥ धुन्धुकारी बभूवाऽथ महान्प्रेतः कुकर्मतः ॥१६॥

॥ १३ ॥ स्त्रीमात्रमविश्वसनीयमित्याह सूतः—स्त्रीणामिति । तु अप्यर्थे । मृतानामपि प्राणरहितानामपि स्त्रीणां युवतीनां विश्वासं बुधो विवेकी न कारयेन्न कुर्यात् । तदुक्तं कृष्णखंडे-"न विश्वासो हि नारीषु सततं कुलटासु च । मोक्षमार्गाऽर्गलास्वेव भ्रममायासुभूमिषु ॥ " इति । "अभ्रच्छाया तृणस्याग्निर्नीचसेवा स्थले जलम् । वेश्यासंगः कुमित्रं च षडेते बुद्बुदोपमाः॥" इत्युक्तेः । "कृते तु महती हानिः स्वयं वापि विनश्यति" इत्याह—यो मूढोऽविवेकी विश्वासे स्थितः स दुःखैः परिभूयते तिरस्क्रियते ॥ १४ ॥ तदेव विशदयति—सुधेति । यासां वचो वचनं सुधामयममृतरूपम् । रूपार्थे मयडत्र । तत्र हेतुः—कामिनां रसवर्द्धनं रसवृद्धिकरम् । हृदयमंतःकरणं क्षुरधाराभं क्षुरो नापितशस्त्रं तस्य धाराया आभेव आभा यस्येति तथा तत् । योषितां को नाम प्रियः न कोपि । नामेति पादपूर्त्त्यावव्ययं प्रसिद्ध्यर्थे वा ॥ १५ ॥ प्रकृतमनु

१ 'हनुर्हट्टविलासिन्याम्' इति मेदिनी । २ प्रायोग्रहणात्कुलवत्यो नैतादृश्यो भवन्तीति सूचितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृत्य वदति--संहृत्येति।ताः कुलटा बहुभर्तृकाः बहवो भर्त्तारो यासां ता वेश्या वित्तं धनं संहृत्य याताः देशांतरं गताः। "स्वर्गः सुकृतिनां स्थानं पापिनां दुर्गतिर्भवेत्"इत्याह—धुंधुकारीति द्वाभ्याम् । धुंधुकारी कुकर्मतः निंदितेन कर्मणा महान् प्रेतो बभूव । तदुक्तं गारुडे—" पांथानामागमं दृष्ट्वा भवेद्रौद्रवपुर्धरः । अस्फुटार्थां वदन् वाचं महाप्रेतः स उच्यते॥" इति । यद्वा—महान् पूज्य उत्कृष्टो वा ब्राह्मणत्वात् । अथेति प्रकरणांतरसूचनार्थः ॥ १६ ॥ कीदृशः—वात्यारूपधरः वातानां समूहो वात्या तद्रूपधारी नित्यं प्रतिदिनं दशदिशः दश च ता दिशश्चेति तथा ताः।अंतरं मध्यम्, उपस्थितत्वाद्दिशामिति लभ्यते। धावन् भ्राम्यन्'दशदिशो भृशम्' इति पाठः साधुः। तत्र दशदिशो भृशमत्यर्थं धावन्नित्यर्थः।शीतातपपरिक्लिष्टः शीतं हिममातपो घर्मः ताभ्यां परिक्लिष्टोऽतिदुःखितः, निराहारः निर्गत आहारो भोजनं यस्य सः। तथा पिपासितः पातुमिच्छा पिपासा सा संजातास्येति तथा, तृषित इत्यर्थः ॥ १७ ॥ हे दैव हा कष्टमिति मुहुर्वारंवारं वदन् जल्पन्सन् कुत्र कस्मिन्नपि स्थाने शरणमाश्रयं न लेभे न प्राप। तीर्थयात्रायां तन्मरणं

वात्यारूपधरो नित्यं धावन्दशदिशोऽन्तरम् ॥ शीतातपपरिक्लिष्टो निराहारः पिपासितः ॥ १७ ॥ न लेभे शरणं कुत्र हा दैवेति मुहुर्वदन् ॥
कियत्कालेन गोकर्णो मृतं लोकादबुध्यत ॥ १८ ॥ अनाथं तं विदित्वैव गयाश्राद्धमचीकरत् ॥ यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धमवर्तयत् ॥ १९ ॥
एवं भ्रमन्स गोकर्णः स्वपुरं समुपेयिवान् ॥ रात्रौ गृहाङ्गणे स्वप्तुमागतोऽलक्षितः परैः ॥ २० ॥

गोकर्णः श्रुतवानित्याह—कियदिति । गोकर्णः कियत्कालेन अनिर्धारिताहर्गणेन मृतं धुंधुकारिणं लोकात्स्वपुरवासिजनात् अबुध्यत ज्ञातवान् ॥१८॥ "अनाथप्रेतसंस्कारे कोटियज्ञफलं विदुः" इतिस्मृतेर्बलात् तच्छ्राद्धमकरोदित्याह—अनाथमिति । अनाथं नास्ति नाथः स्वामी यस्य स तथा तं धुंधुकारिणं विदित्वा ज्ञात्वा एव निश्चयेन गयाश्राद्धं तस्य अचीकरत्, अकार्षीदित्यर्थः । स्वार्थे णिच् । अन्यतीर्थेष्वपि तच्छ्राद्धं कृतवानित्याह—यस्मिंस्तीर्थे गोकर्णः संयाति गतवान् । भूते लट् । तुशब्दो विधेः संततानुवृद्ध्यर्थः । तत्र श्राद्धमवर्त्तयत् अकरोत् । एतेन "गयाश्राद्धोत्तरं श्राद्धं न कर्त्तव्यं पुनःपुनः" इति वदंतः परास्ताः ॥ १९ ॥ "जन्मभूमिः परं तीर्थमित्या यांति हि साधवः" इति नीत्या स्वपुरागमनं तेन कृतमित्याह सूतः—एवमिति । एवमनेन प्रकारेण स गोकर्णः भ्रमन् भूमंडलमटन्सन् स्वपुरं स्वनगरं समुपेयिवान् समागतः । ॥ २९ ॥
एतेन जन्मभूमेर्माहात्म्यं सूचितं भवति । तदुक्तं चाणक्ये—"जननी जन्मभूमिश्च जाह्नवी च जनार्दनः । जनकः पंचमश्चैव जकाराः पंच दुर्लभाः ॥" इति । रात्रौ गृहां

१ 'पाशादिभ्यो यः' इति यप्रत्ययः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गणे स्वप्तुं दिवापरिश्रमापनोदार्थं परैरन्यैर्जनैरलक्षितोऽज्ञातः सन्नागतः आयातोऽभूत् ॥ २० ॥ "भूतप्रेतपिशाचाद्या रात्रौ क्रीडंति नित्यशः" इतिवचनात्प्रेताविर्भावो जात इत्याह—तत्रेति । तत्र गृहांगणे सुप्तं स्वबांधवं गोकर्णं स धुंधुकारी विज्ञाय ज्ञात्वा निशीथेऽर्द्धरात्रे महारौद्रतरं महाभयंकरं वपुः शरीरं दर्शयामास॥ २१ ॥ततो नानाविधं प्रेतकौतुकं कृतवानित्याह—सकृदिति।सकृत् एकवारं मेषोऽभवत्।एवं सर्वत्र योज्यम्।हस्ती गजः। महिषः सैरिभः"लुलायो महिषो वाहद्विषत्कासरसैरिभाः"इत्यमरोक्तेः।इंद्रः स्वर्पतिः। अग्निः अंगाररूपः । पुनः पुरुषनः राकृतिरभूत्॥ २२ ॥तद्दृष्ट्वा दुर्गतिकोयमिति निश्चित्याह—वैपरीत्यमिति । इदं वैपरीत्यं विपरीतभावं दृष्ट्वाऽवलोक्य धैर्यसंयुतः स्थिरचित्तो गोकर्णः कोप्ययं दुर्गतिकः दुर्दुष्टा गतिर्यस्य स तथेति निश्चित्याथानंतरं तमब्रवीत्॥ २३ ॥'कस्त्वं पापेन केनेमां दशां प्राप्तो वदेति भोः'इति पृच्छति—कस्त्वमिति।रात्रौ निशि

तत्र सुप्तं स विज्ञाय धुन्धुकारी स्वबांधवम् ॥ निशीथे दर्शयामास महारौद्रतरं वपुः ॥ २१ ॥ सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् ॥ सकृदिन्द्रः सकृच्चाग्निः पुनश्च पुरुषोऽभवत् ॥ २२ ॥ वैपरीत्यमिदं दृष्ट्वा गोकर्णो धर्यसंयुतः ॥ अयं दुर्गतिकः कोऽपि निश्चित्याथ तमब्रवीत् ॥ २३ ॥ गोकर्ण उवाच ॥ कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमाम् ॥ किं वा प्रेतः पिशाचो वा राक्षसोऽसीति शंस नः ॥ २४ ॥ सूत उवाच ॥ एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनःपुनः ॥ अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह ॥ २५ ॥ ततोऽञ्जलौ जलं कृत्वा गोकर्णस्तमुदैरयत् ॥ तत्सेकाद्गतपापोऽसौ प्रवक्तुमुपचक्रमे ॥ २६ ॥

उग्रतरः अतिशयेन उग्र इति तथा क्रूरतरस्त्वं कः कोसि। इमां वैपरीत्यरूपां दशामवस्थां कुतः कस्मात्पापकर्मणो यातः प्राप्तः। मूकीभूतं प्रत्याह—किंवा प्रेतः, किंवा पिशाचः, किंवा राक्षसोऽसीति त्वं नोऽस्मान् शंस कथय। "भूतः क्रियाविहीनः स्यात्प्रेतस्तु महतो ह्यघात । पिशाचः सूतिकास्पर्शी राक्षसो जीव[1]हिंसकः ॥" इतिकर्मविपाकोक्तेः ॥ ॥ २४ ॥ ततः परं किमभूदित्याह—एवमिति द्वाभ्याम् । यदा यस्मिन्काले तेन गोकर्णेन एवमनेन प्रकारेण पृष्टस्तदा उच्चैरुदात्तस्वरेण पुनःपुनः मुहुर्मुहू रुरोद रोदनं चकार । प्रेत इति कर्तृपदम् । कीदृशः—वचनोच्चारे भाषणे अशक्तः असमर्थः । तदा संज्ञामात्रं ध्वनिं चकार "अज्ञातार्था तु या वाणी संज्ञामात्रं तदुच्यते" इति । हेति स्फुटम् ॥ ॥ २५ ॥ ततस्तदनंतरमंजलौ जलं कृत्वा तं प्रेतं गोकर्णः उदैरयत् प्रौक्षीत् । तत्सेकात् तस्य जलस्य सेकात् बिंदुस्पर्शाद्गतपापः गतं पापं यस्य स तथाऽसौ प्रवक्तुं प्रभाषि

---

१ 'बहुहिंसकः' इति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुम् उपचक्रमे प्रारंभं कृतवान् ॥ २६ ॥ बंधुभावनया सहेतुकं स्वात्मवृत्तं प्रणिगदति—अहमिति चतुर्भिः । अहं त्वदीयस्तव भ्राता बंधुरस्मि । न च स्त्रीजातस्य तस्य गवोद्भवेन तेन सह कथं भ्रातृत्वव्यवहार इति शंक्यम्, भविष्यदुपकारेण तद्व्यवहारोपपत्तेः । तदुक्तं नीत्याम्—" स बंधुर्यो हिते युक्तः स पिता यश्च पोषकः । तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥ " इति । किंनामासीत्यत आह—नामतः धुंधुकार्यहमिति । एतेन ' कस्त्वमुग्रतरो रात्रौ ' (२४) इत्युत्तरितम् । कथमीदृशी व्यवस्था तव संजातेत्यत्राह—स्वकीयेनैव दोषेण स्वेनैव पाप्मना ब्रह्मत्वं ब्राह्मणत्वं मया नाशितम् ॥ २७ ॥ महाज्ञाने महच्च तदज्ञानं चेति तथा तस्मिन् निबिडतमोरूपायामविद्यायां विवर्त्तिनः विवर्त्तितुं शीलमस्येति तथा तस्य मम कर्मणो संख्या नास्ति । जात्यभिप्रायेणैकवचनम्, तेन कर्मणामित्यर्थः । यो लोकानां जनानां हिंसको घातकः सोऽहं स्त्रीभिर्वेश्याभिर्दुःखेन ज्वलदंगाराणां मुखे प्रक्षेपणरूपकष्टेन मारितः ॥ २८ ॥ अतोऽस्माद्धेतोः प्रेतत्वं प्रेतभावमापन्नः प्राप्तो दुर्दशां दुःखरूपिणीं दशां वहामि

प्रेत उवाच ॥ अहं भ्राता त्वदीयोऽस्मि धुन्धुकारीति नामतः ॥ स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया ॥ २७ ॥ कर्मणो नास्ति संख्या मे महाऽज्ञाने विवर्तिनः ॥ लोकानां हिंसकः सोऽहं स्त्रीभिर्दुःखेन मारितः ॥ २८ ॥ अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम् ॥ वाताऽऽहारेण जीवामि दैवाधीनफलोदयात् ॥ २९ ॥ अहो बन्धो कृपासिंधो भ्रातर्मामाशु मोचय ॥ गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाऽब्रवीत् ॥ ३० ॥ गोकर्ण उवाच ॥ त्वदर्थं तु गयापिण्डो मया दत्तो विधानतः ॥ तत्कथं नैव मुक्तोऽसि ममाश्चर्यमिदं महत् ॥ ३१ ॥ गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विह ॥ किं विधेयं मया प्रेत तत्त्वं वद सविस्तरम् ॥ ३२ ॥

प्राप्नोमि । च एवार्थे । दैवाधीनफलोदयात दैवस्य भाग्यस्य अधीनं यत्फलं तस्य उदयात अहं वाताहारेण वायुभक्षेण जीवामि प्राणान् धारयामि । एतेन ' कुतो यातो दशामिमाम् ' इत्युत्तरितम् ॥ २९ ॥ अहो इति संबोधनम् । हे बंधो हे कृपासिंधो हे भ्रातः आशु शीघ्रं मां त्वं मोचय प्रेतभावात मुक्तं कुरु । एतेन प्रेतयोनौ दुःखस्यास ह्यतोक्ता । प्रेतोक्तं वचनं श्रुत्वा गोकर्णः तस्मै प्रेताय वाक्यं वचनमब्रवीत् ॥ ३० ॥ " मृतानां मुक्तिदाने तु गयाश्राद्धं प्रगर्जति " इत्युक्त्या " यन्नाम्ना दीयते पिंडः स वै मुक्तिमवाप्नुयात " इतिगयामाहात्म्यवचनाच्च कथमेतस्य मुक्तिर्न जातेत्याश्चर्यं मन्वानः पृच्छति—त्वदर्थमिति । त्वदर्थं त्वन्निमित्तं गयापिंडो गयायां पिंडो विधानतः शास्त्रोक्तविधितो मया दत्तः । तत्तस्मात्पिंडदानात कथं त्वं न मुक्तोऽसि केन प्रकारेण मुक्तिं न प्राप्तोऽसि । एवेति निश्चये । इदं मम महदाश्चर्यम् । तुशब्दो दुर्गतिनिवारणार्थः ॥ ३१ ॥ तस्य वैफल्ये उपायांतरं नास्तीत्याह—गयाश्राद्धादिति । चेद्यदि गयाश्राद्धात मुक्तिर्न मोक्षो न जातस्तर्हि

१ ' दैवाधीनफलोदयः ' इति पाठान्तरम् । तत्र दैवाधीनः प्राक्तनकर्मानुसारी शुभाऽशुभफलोदयो यस्य स तथेत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपरोऽन्य उपाय इह लोके न विद्यत इति । मया किं विधेयं किं करणीयं तत् हे प्रेत सविस्तरं यथा स्यात्तथा त्वं वद कथय ॥ ३२ ॥ उपायांतरेण मुक्तिर्भावनीयेत्याह—गयेति । त्वया तु सकृत् गयाश्राद्धं कृतं मे मम मुक्तिः गयाश्राद्धशतेनापि न भविष्यति । तत्तस्मात्कारणात् सांप्रतमधुना अपरं द्वितीयमुपायं किंचित त्वं विचारय चिंतय ॥ ३३ ॥ असाध्यं मत्वेत्याह—इतीति । इत्येवं तद्वाक्यं तस्य प्रेतस्य वचनमाकर्ण्य श्रुत्वा गोकर्णो विस्मयम् "अन्यथोद्भूतमाश्चर्यं नृणां विस्मयकारणम् । अतर्क्यमपरे प्राहुर्दुर्विज्ञेयमथापरे ॥" इत्यादिरूपं गतः प्राप्तः । चेयदि शतश्राद्धैर्न मुक्तिस्तर्हि तव मोचनं मोक्षणं प्रेतयोनेरसाध्यं न पुरुषार्थक्षमम् ॥ ३४ ॥ प्रेतमाज्ञापयन्नाह—इदानीमिति । हे प्रेत इदानीमधुना त्वं निर्भयो गतभयः निजस्थानं स्वनिवासं गच्छ याहि । त्वन्मुक्तिसाधकं तव मुक्त्युपायं किंचित विचार्य अहमाचरिष्ये, विचारतः करिष्यामीति फलितोऽर्थः । धैर्येण स्थितोऽप्यहं बिभेमि अतस्त्वद्गमनान्निर्भयोऽहमाचरिष्य इति स्वस्यं

प्रेत उवाच ॥ गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति ॥ उपायमपरं किंचित्तद्विचारय सांप्रतम् ॥ ३३ ॥ इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः ॥ शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥ ३४ ॥ इदानीं तु निजस्थानमातिष्ठ प्रेत निर्भयः ॥ त्वन्मुक्तिसाधकं किञ्चिदाचरिष्ये विचार्य च ॥ ॥ ३५ ॥ धुंधुकारी निजस्थानं तेनादिष्टस्ततो गतः ॥ गोकर्णश्चिंतयामास तां रात्रिं न तदध्यगात् ॥ ३६ ॥ प्रातस्तमागतं दृष्ट्वा लोकाः प्रीत्या समागताः ॥ तत्सर्वं कथितं तेन यज्जातं च यथा निशि ॥ ३७ ॥ विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः ॥ तन्मुक्तिं नैव पश्यन्ति पश्यन्तः शास्त्रसंचयान् ॥ ३८ ॥

विशेषणं वा ॥ ३५ ॥ "तथेति गतवान्प्रेतो गोकर्णश्चिंतयान्वितः । न निद्रां लब्धवान्रात्रौ चिंतयन्स उपायकम्" इत्याह सूतः—धुंधुकारीति । तेन गोकर्णेनादिष्ट आज्ञप्तो धुंधुकारी निजं स्थानं संवासं गतः प्राप्तः । ततस्तदनंतरं तां रात्रिं तद्रात्रावित्यर्थः । गोकर्णः कथमेतस्य मुक्तिः स्यादिति चिंतयामास दध्यौ । तन्मुक्तिहेतुकं नाध्यगात् न प्रापत ॥ ३६ ॥ "पिहितं प्रेतभयतो द्वारमुद्घाटितं कुतः । केनेदमिति चागत्य गोकर्णं ददृशुर्जनाः ॥" इत्याह—प्रातरिति । तं गोकर्णमागतमायातं दृष्ट्वा लोका जनाः प्रातः प्रभाते समागता मेलितुमायाताः । निशि रात्रौ यथा येन प्रकारेण यद्धस्तिमेषादिदर्शनं जातं तत्सर्वं तेन गोकर्णेन कथितम् । तदग्र इति शेषः ॥ ३७ ॥ इदं कर्त्तव्यमिति केऽपि न विजज्ञिर इत्याह—विद्वांस इति । विद्वांसः सामान्यज्ञानिनः, योगनिष्ठाः योगिनः, ज्ञानिनो विशेषज्ञानवंतोऽतिपंडिताः, ब्रह्मवादिनः वेदांतिनः, शास्त्रसंचयान्

---

१ "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीयाविधानाच्चिन्तननैरन्तर्य्यं सूचितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शास्त्राणां समूहान् पश्यंतोऽवलोकयंतस्तन्मुक्तिं तस्य प्रेतस्य मोक्षं नैव पश्यंति न निरीक्षंते । "अपमृत्युहतानां वै कुर्यान्नारायणं बलिम्" इतिवचनस्य प्रसिद्धत्वात् किमिति तैर्न ज्ञातमिति न शंकनीयम्, सामान्यवाक्यस्यैतस्य गयाश्राद्धविधिना विशेषतो बाधात् ॥ ३८ ॥ तेषामैकमत्यमाह--तत इति । ततः तन्मुक्तिकारणाऽज्ञानानंतरं तन्मुक्तौ तस्य धुंधुकारिणः प्रेतस्य मोक्षे सूर्यवाक्यं सूर्यस्य वचनं परमुत्कृष्टं यदा सर्वैः स्थापितं स्वीकृतं तदा गोकर्णः तपःप्रभावात् योगबलतो वा सूर्यवेगस्य वै निश्चयेन स्तंभनं चक्रे । अन्यथाऽतिवेगशालिनो रवेः स्थित्यसंभवः ॥ ३९ ॥ स्वेप्सितं वरयन्नमस्करोति--तुभ्यमिति । हे जगत्साक्षिन् तुभ्यं नमः मे मह्यं मुक्तिहेतुकं मुक्तेः कारणं ब्रूहि कथय ॥ ४० ॥ सूर्यस्तत्कारणमुपादिशदित्याह--तदिति । तत्पूर्वोक्तं श्रुत्वा दूरतः दूरादेव सूर्यः स्फुटं स्पष्टम् इत्यभ्यभाषत । इति किं, तदाह--श्रीमद्भागवतात्

ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परम् ॥ गोकर्णः स्तम्भनं चक्रे सूर्यवेगस्य वै तदा ॥ ३९ ॥ तुभ्यं नमो जगत्साक्षिन्ब्रूहि मे मुक्तिहेतुकम् ॥
॥ ४० ॥ तच्छ्रुत्वा दूरतः सूर्यः स्फुटमित्यभ्यभाषत ॥ श्रीमद्भावतान्मुक्तिः सप्ताहं वाचनं कुरु ॥ ४१ ॥ इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतम् ॥
सर्वेऽब्रुवन्प्रयत्नेन कर्तव्यं सुकरं त्विदम् ॥ ४२ ॥ गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः ॥ तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः ॥ ४३ ॥
पंग्वन्धवृद्धमन्दाश्च तेऽपि पापक्षयाय वै ॥ समाजस्तु महाञ्जातो देवविस्मयकारकः ॥ ४४ ॥

शास्त्रान्मुक्तिः स्यात् सप्ताहे सप्तदिनमध्ये वाचनं कुरु ॥४१॥ श्रुत्वेति सवितुर्वाक्यं तत्करणे संमतिं ददुरित्याह--इतीति । इत्येवं सूर्यवचः सूर्यस्य वचनं धर्मरूपं सर्वैर्विश्रुतं स्पष्टतया श्रुतम् । स्पष्टार्थे त्वव्ययम् । श्रुत्वैकमत्येनाहुः--सर्वेऽब्रुवन् सामान्यविशेषज्ञानवद्योगिवेदांतिनोऽवदन् प्रयत्नेन यत्नत इदं सूर्योक्तं सप्ताहे श्रीमद्भागवद्वाचनं सुकरं सुखेन करणीयं, संपाद्यमिति यावत् 'सुकरं सुंदरे सुखे' इतिभट्टोक्तेः ॥४२॥ ओमित्युक्त्वा गोकर्णस्तथा कृतवानित्याह--गोकर्ण इति । एतेन प्रेतस्य मुक्तिर्भाव्येति निश्चयं कृत्वा गोकर्णो वाचनार्थं श्रीमद्भागवतकथावाचनाय प्रर्वर्त्तितः उद्यतोभूदिति सतोक्तिः । तत्र स्थाने संश्रवणार्थाय सम्यक् श्रवणार्थं देशग्रामात् देशाद्ग्रामाच्च जनाः तत्तद्वासिनो नरा ययुराजग्मुः ॥४३॥ अन्येपि पापिनो जीवाः समागता इत्याह--पंग्वंधेति । पंगुश्चरणहीनः, अंधो नेत्ररहितः, वृद्धो जराग्रस्तः, मंदो मूर्खः, तेऽपि पापक्षयाय पापनाशार्थं

१ तत्रत्यैः सर्वैः प्रवार्त्तितः । २ अस्मिन्नर्थ त्विडार्षः । निवृत्तप्रेषणत्वाण्णिजन्तादेव वा क्तो बोध्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समागता इति चस्यार्थः । वै निश्चये । समाजस्तु जनसमुदायस्तु देवविस्मयकारकः देवानां विस्मयं करोतीति तथा महान् अतिदीर्घः पूज्यो वा जातः ॥ ४४ ॥ किंच—यदेति । यदा यस्मिन्काले आसनं सर्वोत्कृष्टं व्यासपीठमास्थाय संस्थित्य गोकर्णः कथामकथयत्, तदा तस्मिन्नवसरे स प्रसिद्धो धुंधुकारी प्रेतोपि इतस्ततः यत्र तत्र स्थानम् आत्मनिवासार्थं स्थित्यर्हपदं पश्यन् निरीक्षमाण आयात आगतः ॥४५॥ 'किं स्थानं तेन संदृष्टं कुत्र वासमकल्पयत'इत्याह-सप्तेति । तत्र कथास्थाने सप्तग्रंथियुतं सप्तभिर्ग्रंथिभिर्युक्तम् उच्छ्रितमत्युच्चं कीचकं वेणुमपश्यत् ऐक्षत । एतेनारामे वाटिकायां वा नद्यास्तीरे वा कथारंभः कृत इति सूचितं भवति । तन्मूलच्छिद्रं तस्य कीचकस्य मूलच्छिद्रं मूलस्थविवरमाविश्य प्रविश्य श्रवणार्थं कथाश्रवणार्थमसौ प्रेतः स्थितः । हि निश्चये ॥४६॥ निश्चलासनं विना कथाश्रवणं न संभवत्यतो वंशप्रवेशः कृत इत्याह—वातरूपीति । वातरूपी वायुरूपः स्थितिं कर्तुम् अचलं निवासं संपादयितुमशक्तोऽसमर्थो वंशमाविशत् वेणुं प्रविष्टवान् । श्रोतारमंतरा कथावाचनं व्यर्थमतस्तत्पूर्वकं कथारं

यदैवासनमास्थाय गोकर्णोऽकथयत्कथाम् ॥ स प्रेतोऽपि तदाऽऽयातः स्थानं पश्यन्नितस्ततः ॥ ४५ ॥ सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम् ॥
तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ ॥ ४६ ॥ वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् ॥ वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः ॥
॥ ४७ ॥ प्रथमस्कन्धतः स्पष्टमाख्यानं धेनुजोऽकरोत् ॥ दिनान्ते रक्षिता गाथा तदा चित्रं बभूव ह ॥ ४८ ॥

भमाह—वैष्णवमिति । वैष्णवं विष्णुभक्तं ब्राह्मणं जात्या विप्रं मुख्यं प्रधानं श्रोतारं श्रवणकारिणं परिकल्प्य संपाद्य ॥ ४७ ॥ प्रथमदिनकथावृत्तमाह—प्रथमेति । प्रथमस्कंधतः प्रथमस्कंधात् स्पष्टं सर्वज्ञानानुरूपम्, यद्वा—सर्वेषां बुद्ध्यारूढं यथा स्यात्तथा आख्यानं कथनं स प्रसिद्धो धेनुजो गोकर्णोऽकरोदित्यन्वयः। एतेन पाठस्तत्पूर्वकं कथारंभं प्रति जानीते ।"पूर्वं तु पठनं कार्यं व्याख्यानं तदनंतरम्।कथायाः परिपाटीति नियमः शिथिलीकृतः॥"सप्ताह इति सूचितं भवति।तदुक्तं विधानमंजर्याम्-"पाठस्तु प्रथमं कार्यो व्याख्यानं तदनंतरम्।इति नियमस्तु सप्ताहे व्याख्यानेन विखंडितः॥" अन्यथा-"परीक्षिते कथां वक्तुं सभायां संस्थिते शुके"इत्यत्र"सभायां संस्थिते कीरे पाठं वक्तुं परीक्षिते"इति किमिति नोक्तम्। एवमग्रेऽपहरणीयम्, 'सप्ताहे वाचनं कुरु'इत्यत्रापि 'सप्ताहे पाठनं कुरु'इति।पुनः—'श्रावांते सर्वेषाम्' इत्यत्र च 'पाठांते सर्वेषाम्' इति।'कथाभंगनिवृत्तये' इत्यत्र च 'पाठभंगनिवृत्तये' इति । सप्ताहश्रवणविधौ ब्राह्मणमित्युल्लेखात ब्राह्मणं विना कथा न वाचनीया । श्रीमद्भागवतस्य सर्ववेदरूपस्य ब्राह्मणानुसरणेनैवान्येषां कथाश्रवणाधिकार

१ 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इतिकोशाद्वायुपूर्णच्छिद्रशब्दायमानवेणुविशेषस्यात्र ग्रहणम् । अत एव सच्छिद्रत्वात्प्रवेशोऽपि घटते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तं भवति, "श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः" इतिशिष्टोक्तेः । प्रत्यहं कथावसाने चित्रमभूदित्याह—दिनांत इतिसार्द्धद्वाभ्याम् । दिनांते सायंकाले गाथा रक्षिता निवृत्तिं गता । तत्प्रमाणमुक्तं पाद्मे—"नारद उवाच ॥ कत्यध्याया वाचनीयाः सप्ताहे प्रत्यहं पितः ॥ नारदेनेति पृष्टोऽसौ तदा ब्रह्माऽब्रवीदिदम् ॥ १ ॥ ब्रह्मोवाच ॥ प्रथमेह्नि वराहांतं द्वितीये भरतांतकम् ॥ तृतीये श्रीनृसिंहांतं चतुर्थे वंशवर्णनम् ॥ २ ॥ पंचमे गुरुलीलांतं षष्ठे लीलासमापनम् ॥ सप्तमे शुकपूजांतं सप्ताहक्रम ईरितः ॥ ३ ॥" । गुरुभिस्तु विशेष उक्तः । तथाहि—"द्वैपायनं नमस्कृत्य शुकदेवं च भक्तितः ॥ हिरण्याक्षवधं यावत्प्रथमेह्नि प्रकीर्त्तयेत् ॥ १ ॥ चरितं भरतस्यापि द्वितीयेऽथ तृतीयके ॥ समुद्रमथनं यावद्यत्र कूर्मः स्वयं हरिः ॥ २ ॥ चतुर्थे दिवसे चैव दशमे हरिजन्म च ॥ पंचमेह्नि पठेद्विद्वान् रुक्मिण्या हरणावधि ॥ ३ ॥ षष्ठे चोद्धवसंवादं सप्तमेऽह्नि समापयेत् ।" इति । तदा चित्रम् आश्चर्यं बभूव संजज्ञे । हेति स्फुटम् ॥४८॥ किं तदित्याह—सतां पश्यतां निरीक्षमाणानां सतां सशब्दं यथा स्यात्तथा वंशैकग्रंथि

वंशैकग्रन्थिभेदोऽभूत्सशब्दं पश्यतां सताम् ॥ द्वितीयेह्नि तथा सायं द्वितीयग्रन्थिभेदनम् ॥ ४९ ॥ तृतीयेऽह्नि तथा सायं तृतीयग्रन्थिभेदनम् ॥
एवं सप्तदिनैर्वंशसप्तग्रंथिविभेदनम् ॥ ५० ॥ प्रेतोपि[1] द्वादशस्कंधश्रवणात्प्रेततां जहौ ॥ दिव्यरूपधरो जातस्तुलसीदाममण्डितः ॥ ५१ ॥

भेदः वंशस्यैकग्रंथेर्भेदः । द्वितीयेह्नि द्वितीयदिवसे सायं सायंसंध्यायां तथा तेनैव प्रकारेण द्वितीयग्रंथिभेदनमभूदिति शेषः ॥ ४९ ॥ तृतीयेऽह्नि तृतीयघस्रे शेषं स्पष्टम्, एवममुना प्रकारेण सप्तदिनैः सप्ताहोभिर्वंशस्य सप्तग्रंथीनां विभेदनम्, अभूदिति शेषः॥५०॥ इदानीमुद्योगसिद्धिमाह—प्रेत इति । प्रेतः धुंधुकार्यपि द्वादशस्कंधश्रवणात् द्वादशस्य स्कंधस्य श्रवणम् । यद्वा—द्वादश च ते स्कंधाश्चेति तथा तेषां श्रवणं तस्मात्प्रेततां प्रेतभावं जहौ तत्याज । अत्रायमभिसंधिः—गयाश्राद्धस्य वैयर्थ्ये किमद्य करणीयमिति गोकर्णपृष्टैः सर्वविद्भिः शास्त्रावलोकने कृतेऽपि तदुपायाऽनिरीक्षणे "अंतरिक्षमृतानां तु वेदपारायणं चरेत्" इति बलवत्स्मृतिवचनं किं नो निवेदितमित्याक्षेपे—तद्विधेः केवलांतरिक्षमरणमात्रपरतया "कर्मणां नास्ति संख्या मे महाज्ञाने विवर्त्तिनः" इतिवचनादेतत्कृतानां बालहत्याद्यनंतमहापातकानां विद्यमानत्वान्न तेन कार्यसिद्धिरिति विचार्य "श्रीमद्भागवतान्मुक्तिः सप्ताहे वाचनं कुरु" इतिसूर्योक्तसमाधानस्य समीचीनत्वम् । वेदपारायणादपि श्रीमद्भागवतपारायणस्याधिक ॥ ३२ ॥

१ 'कृत्वाऽपि द्वादशस्कन्धश्रवणम्' इति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तायाः पूर्वमेवोक्तत्वात् । " वेदोपनिषदां साराज्जाता भागवती कथा " इत्यनेन कथासमाप्तावत्र प्रेतभावनिवृत्तेः, प्रक्रमोपसंहारयोरप्येकवाच्यत्वाच्च युक्तमुक्तमिति सुधीभिर्भावनीयम् । ततो दिव्यरूपावाप्तिर्जातेति सूचयंस्तद्वाक्यमाह—दिव्येतिसार्द्धेन । दिव्यरूपधरः दिवि भवा दिव्यास्तेषां रूपस्य धरो धारकः । यद्वा—दिव्यरूपस्य धरो धारको जातः । तुलसीदाममंडितः तुलस्या दामभिर्गुच्छैर्मंडितोऽलंकृतः ॥ ५१ ॥ पीतवासाः पीतं वासो यस्य स तथा । घनश्यामः घन इव श्यामः श्यामलः । मुकुटी मुकुटमस्यास्तीति तथा । कुंडलाभ्यामन्वितो युक्तः, शोभमान इत्यर्थः । भ्रातरं गोकर्णं सद्यस्तदानीं ननाम । नमनानंतरमित्यब्रवीदुवाच च ॥ ५२ ॥ भ्रातृकृतमुपकारं स्मरञ्छ्रीमद्भागवतकथां श्लाघते—त्वयेति । हे बंधो कृपया करुणया प्रेतकश्मलात प्रेतदुःखात त्वयाहं मोचितः मुक्तिं गमितः । भागवती वार्ता श्रीमद्भागवतसंबंधिनी कथा धन्या प्रशस्या । तत्र हेतुः—प्रेतपीडाविनाशिनी प्रेतदुःखनाशकारिणी ॥ ५३ ॥ सप्ताहोपि परमपुण्य इत्याह—सप्ताह इति । सप्ताहः सप्त

पीतवासा घनश्यामो मुकुटी कुण्डलान्वितः ॥ ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत् ॥५२॥ त्वयाहं मोचितो बन्धो कृपया प्रेतकश्मलात् ॥
धन्या भागवती वार्ता प्रेतपीडाविनाशिनी ॥ ५३ ॥ सप्ताहोऽपि तथा धन्यः कृष्णलोकफलप्रदः ॥ कंपन्ते सर्वपापानि सप्ताहश्रवणे स्थिते ॥ ५४ ॥
अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति ॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्मभिः कृतम् ॥ श्रवणं विदहेत्पापं पावकः समिधो यथा ॥ ५५ ॥
अस्मिन्वै भारते वर्षे सूरिभिर्वेदसंसदि ॥ अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम् ॥ ५६ ॥ किं मोहतो रक्षितेन सुपुष्टेन बलीयसा ॥ अध्रुवेण
शरीरेण शुकशास्त्रकथां विना ॥ ५७ ॥

दिनसाध्यो यज्ञविशेषोपि धन्यः । तत्र हेतुः—कृष्णलोकफलप्रदः कृष्णस्य लोको वैकुंठः स एव फलं सुखप्राप्तिहेतुत्वात् तत्प्रददातीति तथा । सप्ताहश्रवणे सप्तघस्रांतराले एतत्कथाश्रवणे स्थिते जाते सति, पुरुषे वा स्थिते प्रवृत्ते सति सर्वाणि पापानि कंपंते ॥ ५४ ॥ तदुक्तिमाह—अस्माकमित्यर्द्धेन । इयं च भागवतसंबंधिनी कथा अस्माकं प्रलयं नाशं सद्योऽद्य करिष्यति । किंच—आर्द्रं ज्ञानतः कृतं पापं, शुष्कम् अज्ञानतः कृतं, लघु स्वल्पकीटपतंगघातादि, स्थूलं चतुष्पदवधादि, वाङ्मनःकर्मभिः वाचा मनसा कर्मणा वा कृतं पापं कर्म । श्रवणं कर्तृ । विदहेत् भस्मींकुर्यात् । तत्र दृष्टांतः—पावकोऽग्निः समिधः काष्ठानि यथा दहति तथा ॥ ५५ ॥ कथाश्रवणादृते मानुषं जन्म वृथेत्याह—अस्मिन्निति द्वाभ्याम् । अस्मिन् भारते वर्षे भरतखंडे अकथाश्राविणां न कथां श्रोतुं शीलं येषां ते तथा तेषां पुंसां देवसंसदि ब्राह्मणसभायां सूरिभिः पंडितैः, देवानां संसदीति व्याख्याने सूरिभिर्बृहस्पत्यादिभिर्जन्म वृथा कीर्तितं कथितम् ॥ ५६ ॥ मोहतः स्नेहात् रक्षितेन पालितेन सुपुष्टेन स्थूलीकृतेन बलीयसाऽतिबलवता अध्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेण विनाशिना शरीरेण देहेन शुकशास्त्रकथां श्रीमद्भागवतकथां विना किम्, न किमपि प्रयोजनमित्यर्थः ॥५७॥ एतदेव स्पष्टयति—अस्थीति चतुर्भिः । अस्थीनि अस्थ्नां वा स्तंभा यस्मिंस्तत् । स्नायुभिर्नसाजालैर्बद्धं दृढीकृतम् । मांसं च शोणितं च मांसशोणिते ताभ्यां लेपितं लिप्तम् । चर्मणाऽवनद्धमाच्छादितम् । दुष्टो गंधो यस्मिंस्तत् । मूत्रपुरीषयोः पात्रं विष्ठामूत्रयोः स्थानम् ॥ ५८ ॥ जरा च शोकश्च जराशोकौ, तयोर्विपाकः फलं तेनार्तं युक्तम् । रोगमंदिरं रोगस्य गृहम् । आतुरं दुःखितम् । दुष्पूरमपूरणम् । दुर्धरं दुःखेन धार्यम् । दुष्टं निंदितम् । सदोषं दोषैर्वातपित्तकफैः सहितम् । क्षणभंगुरं क्षणेन भंगुरं नाशवत् ॥ ५९ ॥ कृमिविड्भस्मसंज्ञांतं कृमयश्च विट् च भस्म च कृमिविड्भस्मानि तान्येव संज्ञा सा अन्ते यस्य तत्तथा, इत्येवंभूतं शरीरं वर्णितमुक्तम् । अयं प्राणी अस्थिरेण चलस्वभावेन देहेन स्थिरं कर्म धर्मादिकार्यं कुतो न साधयेत् कस्माद्धेतोः नोपार्जयेत् । हि युक्तमेतत् ॥ ६० ॥ प्रातः प्रभातसमये अन्नमोदनादि भक्ष्यं

अस्थिस्तम्भं स्नायुबद्धं मांसशोणितलेपितम् ॥ चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः ॥ ५८ ॥ जराशोकविपाकार्तं रोगमन्दिरमातुरम् ॥ दुष्पूरं दुर्धरं दुष्टं सदोषं क्षणभंगुरम् ॥ ५९ ॥ कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम् ॥ अस्थिरेण स्थिरं कर्म कुतोऽयं साधयेन्न हि ॥ ६० ॥ यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति ॥ तदीयरससंपुष्टे काये का नाम नित्यता ॥ ६१ ॥ सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः ॥ अतो दोषनिवृत्त्यर्थमेतदेव हि साधनम् ॥ ६२ ॥ बुद्बुदा इव तोयेषु मशका इव जन्तुषु ॥ जायन्ते मरणायैव कथाश्रवणवर्जिताः ॥ ६३ ॥ जडस्य शुष्कवंशस्य यत्र ग्रन्थिविभेदनम् ॥ चित्रं किमु तदा चित्तग्रंथिभेदः कथाश्रवात् ॥ ६४ ॥

यत् संस्कृतं भुक्तं तच्च सायं संध्यासमये विनश्यति, तस्य भुक्तान्नस्याऽयं तदीयः, तदीयश्चासौ रसश्चेति तथा तेन संपुष्टे स्थूले काये शरीरे का नाम नित्यता, न कापि, विकारमात्रस्याऽनित्यत्वादिति भावः ॥ ६१ ॥ पारायणश्रवणं हरिप्राप्तिकरमित्याह—सप्ताहेति । सप्ताहश्रवणाद्धेतोः लोके जगति निकटे समीपमेव हरिः पापहंता विष्णुः प्राप्यते । अतोऽस्मात्कारणात् दोषनिवृत्त्यर्थं पापानां निराकरणाय एतत्पुराणश्रवणमेव साधनमस्ति । हि उपायांतरव्यावृत्त्यर्थः ॥ ६२ ॥ तद्धीना[1]स्तुच्छा इत्याह—बुद्बुदा इति । कथाश्रवणवर्जिताः कथा हरिसंबंधिनी न तु लौकिकी, तस्याः श्रवणं तेन वर्जिता रहिता जना मरणार्थमेव जायंते उत्पद्यंते, न तु मोक्षार्थम् । ॥ ३३ ॥
तत्र दृष्टांतद्वयम्—तोयेषु जलेषु बुद्बुदा फेना इव, जंतुषु प्राणिषु मशका दंशा इव, नरजन्मवैफल्यसूचनाय दृष्टांतद्वयमेतदिति चिंतनीयम् ॥ ६३ ॥ सांप्रतं तत्प्रभावं द्रढय

१ तेन कथाश्रवणेन हीनाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नाह—जडस्येति । जडस्याऽचेतनस्य शुष्कस्य विरसस्य वंशस्य वेणोर्यत्र यस्यां कथायां ग्रंथिविभेदनं ग्रंथिविपाटनमभूत् । तदा कथाश्रवात् कथायाः श्रवणात् चित्तग्रंथिभेदः चित्ते मनसि ग्रंथयः वासनारूपास्तेषां भेदः भेदनं किमु चित्रं, न किमपि । यत्रेत्यस्य यदेत्यर्थ इत्याहुर्गुरवः ॥ ६४ ॥ मुक्तिसाधनमप्येतदित्याह—भिद्यत इति । सप्ताहश्रवणे सप्तदिनमध्ये कथाश्रवणे कृते सति अस्य श्रोतुर्हृदयग्रंथिर्भिद्यते भिन्नो भवति । सर्वसंशयाः असंभावनाविपरीतभावनारूपाः छिद्यंते छिन्ना भवंति । कर्माणि पूर्वसंचितानि क्रियमाणानि च क्षीयंते नश्यंति । नच प्रारब्धकर्मणस्तु भोगादेव क्षयः " नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि " इत्युक्तेरिति वाच्यम्, भगवत्कथामहिम्नोऽचिंत्यशक्तित्वात् ॥ ६५ ॥ किंच—संसारेति । संसार एव कर्दमः पंकस्तस्यालेप आलेपनं तस्य प्रक्षालनं मलनिराकरणेन शुद्धिकरणं तस्मिन् पटीयसि अतिशयेन पटुनि कथातीर्थे कथैव तीर्थं कथातीर्थं तस्मिन् चित्ते स्थिते सति मुक्तिरेव मोक्ष एव स्मृता बुधैः पंडितैः कथिता ॥ ६६ ॥ तत्समये विमानं प्राप्तमित्याह—एवमिति । एवमित्थं तस्मिन्

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ क्षीयन्ते चास्य कर्माणि सप्ताहश्रवणे कृते ॥ ६५ ॥ संसारकर्दमालेपप्रक्षालनपटीयसि ॥ कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ॥ ६६ ॥ एवं ब्रुवति वै तस्मिन्विमानमगमत्तदा ॥ वैकुण्ठवासिभिर्युक्तं प्रस्फुरद्दीप्तिमंडलम् ॥ ६७ ॥ सर्वेषां पश्यतां भेजे विमानं धुन्धुलीसुतः ॥ विमाने वैष्णवान्वीक्ष्य गोकर्णो वाक्यमब्रवीत् ॥ ६८ ॥ गोकर्ण उवाच ॥ अत्रैव बहवः सन्ति श्रोतारो मम निर्मलाः ॥ आनीतानि विमानानि न तेषां युगपत्कुतः ॥ ६९ ॥ श्रवणं समभागेन सर्वेषामिह दृश्यते ॥ फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः ॥ ७० ॥

दिव्यदेहधारिणि धुंधुकारिणि ब्रुवति वदति सति तदा तत्क्षणमेव विमानमगमत् । तद्विशिनष्टि—वैकुंठवासिभिर्विष्णुपार्षदैर्युक्तम्, प्रस्फुरत् अतिप्रकाशशालिदीप्तीनां मंडलं यस्मिंस्तत्तथा । यद्वा—प्रस्फुरंत्यश्च ता दीप्तयश्च प्रस्फुरद्दीप्तयस्तासामिति ॥ ६७ ॥ तदारूढं धुंधुकारिणं दृष्ट्वा गोकर्णः पृष्टवानित्याह—सर्वेषामिति । सर्वेषां जनानां पश्यतां सतां धुंधुलीसुतः धुंधुल्याः पुत्रो विमानं भेजे आरुरोह । विमाने विमानोपरि वैष्णवान् विष्णुसेवकान् वीक्ष्य दृष्ट्वा गोकर्णो वाक्यमब्रवीत् ॥ ६८ ॥ बहूनां श्रोतॄणामत्र विद्यमानत्वात्कथमेकं विमानमानीतम्, अन्येषाञ्च किमिति तदारोहणं न जातमित्यौत्सुक्येन पृच्छति—अत्रेति द्वाभ्याम् । अत्र स्थाने मम कथायाः श्रोतारो निर्मलाः शुद्धा बहवः संति । एव निश्चये । तेषामर्थे चतुर्थ्यर्थे षष्ठीयम् । युगपत् एतत्समकालमेव विमानानि कुतः कस्मात्कारणान्नानीतानि ॥ ६९ ॥ इहात्र श्रवणं समभागेन तुल्यतया सर्वेषा

१ शुद्धिहेतुत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनानां दृश्यते, अस्माभिरिति शेषः। फलभेदः फले भेदो वैषम्यं कुतः कस्माद्धेतोः जात उद्भूतः। हे हरिप्रियाः हे पार्षदाः प्रब्रुवंतु भवंतो वदंतु ॥ ७० ॥ 'कारणभेदात् कार्यभेदः' इति न्यायमाश्रित्योत्तरयंति–श्रवणस्येति सार्द्धैश्चतुर्भिः। श्रवणविभेदेन हेतुना फलभेदः फले फलस्य वा भेदोपि संस्थितो जातः। सर्वैः श्रवणं कृतं परन्तु तथा तेन प्रकारेण मननं विचारो न कृतम्। तुशब्दो भेदे ॥ ७१ ॥ हे मानद। ततस्तस्मात्कारणात् भजनात् गुरुरूपिभगवदनुग्रहपूर्वकभजनात् फलभेदो जातः 'भोजनात्' इति पाठांतरं साधु। तथाहि–सप्तरात्रं यावत्। नैरंतर्ये द्वितीया। उपोष्य उपवासं कृत्वैव प्रेतेन यथा श्रवणं कृतम् ॥ ७२ ॥ तथा तेन प्रेतेन स्थिरचित्ते निश्चलचित्ते सति। भृशमत्यर्थम्। मननादि कृतम्। आदिना निदिध्यासनसंग्रहः। तत्र हेतुः–अदृढं शिथिलं ज्ञानं हतम्, भवतीति क्रियान्वयः। एवमग्रेऽपि। श्रुतं शास्त्रा-

हरिदासा ऊचुः ॥ श्रवणस्य विभेदेन फलभेदोपि संस्थितः ॥ श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम् ॥ ७१ ॥ फलभेदस्ततो जातो भजनादपि मानद ॥ सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम् ॥ ७२ ॥ मननादि तथा तेन स्थिरचित्ते कृतं भृशम् ॥ अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् ॥ ७३ ॥ संदिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः ॥ अवैष्णवो हतो देशो हतं श्राद्धमपात्रकम् ॥ ७४॥ हतमश्रोत्रिये दानमनाचारहतं कुलम् ॥ विश्वासो गुरुवाक्येषु स्वस्मिन्दीनत्वभावना ॥ ७५ ॥

दीनां श्रवणं, शास्त्रमेव वा प्रमादेन हतम् ॥ ७३ ॥ संदिग्धः इत्थमनित्थं वेति संदेहास्पदीभूतः गुरुसंप्रदायरहितो वा मंत्रो हतः। व्यग्रचित्तः विविधम् अग्रं वृत्तिविशेषो यस्मिंस्तथाभूतमसावधानं चित्तं यस्मिन् स तथा जपो मंत्रादिर्हतः। नास्ति वैष्णवो विष्णुभक्तो यस्मिन् स तथा देशो हतः। नास्ति पात्रं धर्मशास्त्रोक्तलक्षणसंपन्नं ब्रह्म यस्मिन् तत्तथा। श्राद्धं पार्वणादि हतम् ॥ ७४ ॥ अश्रोत्रिये वेदपाठरहिते ब्राह्मणे दानं हतम्। नास्ति आचारो यस्मिंस्तत् कुलं हतम्, 'आचारः प्रथमो धर्मः' इति वचनात्तद्विहीनस्याऽधर्महेतुत्वात्। श्रवणस्य साफल्यसाधनान्याह–विश्वास इति सार्द्धेन। गुरुवाक्येषु गृणाति हिताहितमिति गुरुः। यद्वा–"गुकारस्त्वंधकारः स्याद्रुकारस्तद्विनाशकृत् ॥ अंधकारविनाशित्वाद्गुरुरित्यभिधीयते ॥" इत्युक्तलक्षणो वा तस्य वाक्यानि वचनानि तेषु विश्वासः। अत एव निश्चलबुद्धिः। स्वस्मिन्नात्मनि दीन-

१ ब्राह्मणः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वभावना दीनोहमिति धारणा, न तु कौटिल्याहंकारादिभिरौन्नत्यम् ॥ ७५ ॥ च पुनः, एव निश्चयेन, मनोदोषजयः मनसो दोषाः कामक्रोधादयस्तेषां जयः । कथायां निश्चला मतिः स्थिरा बुद्धिः । एवमादि साधनं चेद्यदि कृतं स्यात्तदा श्रवणे फलं भवेत् ॥ ७६ ॥ सर्वेषां मुक्तिर्मया संपादनीयेति चिंतयानं प्रत्याहुः—पुनरिति । पुनश्श्रवस्य भूयःकथाश्रवणस्यान्ते सर्वेषां श्रोतॄणां वैकुंठलोके ध्रुवं निश्चयेन वसतिर्वासः, भविष्यतीति शेषः । हे गोकर्ण गोविंदो भगवान् तव तुभ्यं स्वयमेव आत्मनैव गोलोकं दास्यति ॥ ७७ ॥ पार्षदा वैकुंठं ययुरित्याह—एवमिति । एवमित्थं ते सर्वे हरिकीर्त्तनाः हरिं कीर्त्तयंतीति तथा ते पार्षदा वैकुंठं ययुः विष्णुभवनं गताः । "पुनः श्रवांते सर्वेषां वैकुंठे वसतिर्ध्रुवम्" इति यथा विष्णुपार्षदैरुक्तं तथा श्रावणे मासि गोकर्णः पुनर्भूयः कथामूचे जगाद । तदुक्तम्—"आषाढे धेनुजः पूर्वमुवाच धुंधुकारिणे । श्रावणे सर्वमुक्त्यर्थमाश्विने तूद्धवाय च ॥ मैत्रेय आह सौम्ये च माघे भक्तजना दधुः ॥ ततःप्रभृति सर्वेषु मासेषु श्रवणं मतम् ॥ प्रत्यहं शृणुयाद्यो वै तस्य मुक्तिश्च निश्चयात् ॥ नात्र मासादिनियमः सर्वदा श्रवणं मतम् ॥" इति ॥ ७८ ॥ पुनश्श्रवणात्ते कृतार्था इत्याह—सप्तेति । सप्तरात्रवर्तीं सप्तानां रात्रीणां समाहारः सप्तरात्रं, तद्विद्यते यस्या

मनोदोषजयश्चैव कथायां निश्चला मतिः ॥ एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम् ॥ ७६ ॥ पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम् ॥
गोकर्ण तव गोविंदो गोलोकं दास्यति स्वयम् ॥ ७७ ॥ एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः ॥ श्रावणे मासि गोकर्णः कथामूचे तथा पुनः
॥ ७८ ॥ सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः ॥ कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद ॥ ७९ ॥ विमानैः सह भक्तैश्च हरिराविर्बभूव ह ॥ जय
शब्दा नमःशब्दास्तत्रासन्बहवस्तदा ॥ ८० ॥ पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः ॥ गोकर्णं तु समालिंग्याकरोत्स्वसदृशं हरिः ॥ ८१ ॥

मिति तथा तां कथामिति पूर्वान्वयि । भूयः पुनः तैः श्रोतृभिः श्रवणं कृतम् । 'सप्तरात्रं व्रतीभूय' इति पाठः साधुरिति गुरवः । तत्र सांप्रदायिकाः पूर्वश्लोके गोकर्णेन सहान्वयमाहुः । हे नारद कथासमाप्तौ कथावसाने, पूर्त्ताविति यावत् । यदाश्चर्यं जातं तत श्रूयताम् । च प्रसिद्ध्यर्थः ॥ ७९ ॥ हरिराविर्भूय श्रोतॄणां वैकुंठानयनं कृतवानित्याह—विमानैरिति । विमानैः च पुनः भक्तैः सह यदा हरिराविर्बभूव प्रादुरास । हेति स्फुटम् । तदा जयशब्दा नमःशब्दा बहवोऽसंख्यातास्तत्रासन्नभवन् ॥ ८० ॥ हर्षेण शंखं वादयित्वा गोकर्णं चालिंग्य स्वसदृशं हरिरकरोदित्याह—पांचजन्येति । "समुद्रचारी यः पूर्वमासीत्पंचजनोऽसुरः । गुरोः सुतस्यानयने समुद्रवचनाद्धरिः । हत्वा तदुदरे बालमपश्यन्यममागमत् । तदंगप्रभवं शंखं नामतः पांचजन्यकम् । दध्मौ भीतो यमं प्राप्य गुरुपुत्रमथाददात् ॥ " इति पुराणांतरे प्रसिद्धम् । पांचजन्यः शंखस्तस्य ध्वनिं नादं तत्र कथास्थाने स्वयमात्मनैव हरिर्हर्षाच्चक्रे चकार । तुशब्द उक्तादधिकफलसूचनार्थः । गोकर्णं समा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंग्य मिलित्वा स्वसदृशं स्वेन समं हरिरकरोत् ॥ ८१ ॥ अन्यानपि स्वपार्षदांश्चक्रुरित्याह—श्रोतॄनिति। हरिर्विष्णुः तथा तेनैव प्रकारेण क्षणात् तत्क्षणमेव अन्यान् श्रोतॄन् घन इव मेघ इव श्यामान् श्यामलान्, पीतकौशेयवाससः पीतानि कौशेयानि पट्टनिर्मितानि वासांसि येषां ते तथा तान्, किरीटमस्ति येषां ते तथा तान्, कुंडलमस्ति येषां ते तथा तान् चक्रे चकार॥८२॥भक्तिपारवश्येनातिचित्रं कृतमित्याह—तदिति सार्द्धेन।आ समंततः श्वचांडालजातयः।'श्वचांडालश्वपचादयः'इति पाठे आदिशब्दोंतार्थो बोध्यः, स्तंभादयो गृहा इतिवत्, 'अधीतवान् द्वापरादौ'इति व्यासो क्विवच्च । जातिपर्यंता ये जीवाः तद्ग्रामे तस्मिन्ग्रामे स्थिता आसंस्ते सर्वेपि तदा तस्मिन्काले हरिणा विमाने स्थापिताः । केन हेतुनेत्यत आह—गोकर्णकृपया ॥ योगिनो यत्र योगबलेन गच्छंति तस्मिन् हरिलोके वैकुंठे ते सर्वे प्रेषिताः प्रस्थापिताः ॥८३॥ गोकर्णाय गोलोकं दत्तवानित्याह—गोकर्णेनेति । स गोपालः गां पालयतीति गोपालः, गां वेदलक्षणां वाणीं पालयतीति वा । कथाश्रवणतः कथाश्रवणात् प्रीतः प्रसन्नः गोकर्णेन सह गोपवल्लभं गोपागां

श्रोतॄनन्यान्घनश्यामान्पीतकौशेयवाससः॥ किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात् ॥८२॥ तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः॥ विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा ॥ प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः ॥८३॥ गोकर्णेन स गोपालो गोलोकं गोपवल्लभम् ॥ कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः ॥ ८४ ॥ अयोध्यावासिनः पूर्वं यथा रामेण संगताः ॥ तथा कृष्णेन ते नीता गोलोकं योगिदुर्लभम् ॥ ८५ ॥ यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा ॥ तं लोकं हि गतास्ते तु श्रीमद्भागवतश्रवात् ॥ ८६ ॥ ब्रूमोऽद्य ते किं फलवृन्दमुज्ज्वलं सप्ताहयज्ञेन कथासु संचितम् ॥ कर्णेन गोकर्णकथाक्षरं यैः पीतं च ते गर्भगता न भूयः ॥ ८७ ॥

प्रियं गोलोकं निर्ययौ निर्जगाम। यतो भक्तवत्सलः भक्तेषु वत्सलः कृपालुः । यद्वा—भक्तान् वत्सवत् पुत्रवत् लाति गृह्णाति स्वीकरोतीति तथा ॥ ८४ ॥ परोपकारकरणे श्रीकृष्णस्य श्रीरामचंद्रेण समतां सूचयति—अयोध्येति।अयोध्यावासिनः अयोध्याम् वस्तुं शीलं येषां ते तथा पूर्वं पुरा रामेण संगता रामेण सह वैकुंठं यथा प्राप्ताः तथा योगिदुर्लभं योगिभिर्दुष्प्रापं गोलोकं ते सर्वे कृष्णेन नीताः प्रापिताः॥८५॥श्रीमद्भागवतस्य श्रवणं मुक्तिदायकं यत्तदर्थं दृढीकुर्वन्नाह—यत्रेति। यत्र यस्मिँल्लोके सूर्यस्य रवेः,सोमस्य चंद्रस्य, सिद्धानां देवानां गतिः कदा कस्मिन्नपि काले न भवति।गतिशब्दोऽत्र पक्षांतरे प्रकाशवाची।तं लोकं परमधामाख्यं श्रीमद्भागवतश्रवात् श्रीमद्भागवतस्य श्रवणतस्ते सर्वे गताः प्राप्ताः । हि निश्चयेन । तुशब्दस्तत्र गतानां पुनरागमननिषेधार्थः । तदुक्तं गीतायां श्रीकृष्णेन " न तद्भासयते सूर्यो न शशांको न पावकः । यद्गत्वा न निवर्त्तंते तद्धाम परमं मम ॥" इति ॥८६॥ एतदधिकमन्यन्नास्तीति सनत्कुमारो नारदायाऽऽह—ब्रूम इति । उज्ज्वलमतिशुद्धं सप्ताहयज्ञेन सप्ताह एव यज्ञो यागस्तेन कथासु संचितं नानाख्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेषु एकीकृतं कथाभिः सुसंचितमिति वा । फलवृंदं फलसमूहं किमद्य ब्रूमो वयं वदामः । तदेवाह—कर्णेन श्रोत्रेण दक्षिणस्यैव कर्णस्यात्र प्राधान्यादेकत्वमिति गुरवः। जात्यभिप्रायेणेति केचित् । गोकर्णकथाक्षरं गोकर्णेन निरुक्ता कथा गोकर्णकथा तस्या अक्षरं पदमात्रं लक्षणयाऽक्षरशब्दस्य पदमात्रे शक्तिः "तत्कथायां तु वेदार्थः श्लोकेश्लोके पदेपदे"इत्युक्तेः । यैः पुंभिः पीत आदरेण श्रुतः, ते पुरुषाः भूयः पुनर्गर्भगता जन्मभाजो न भवन्ति, अर्थान्मुक्ता भवंति। एतेन 'ऋते ज्ञानान्न मुक्तिः' इति वेदान्तडिंडिमो भग्नः। ॥८७॥ एतदेव कैमुतिकन्यायेन द्रढयति—वातेति।सप्ताहगाथाश्रवणेन यां गतिं मोक्षाख्यां श्रोतारो यांति प्राप्नुवंति तां गतिं वातांबुपर्णाशनदेहशोषणैः वातो वायुश्चांबु च जलं पर्णानि शुष्कपत्राणि च वाताम्बुपत्राणि तेषामशनं भोजनं तेन देहस्य शोषणानि शुष्कीकरणानि तैः साधनैः, उग्रैरतिकष्टसाध्यैः तपोभिः, चिरकालेन बहुकालेन संचितैः संपादितैः योगैरष्टांगसंपन्नैश्च न संयांति न गच्छंति ॥८८॥ प्रकरणार्थमुपसंहरति—इतीति।इममधुनोक्तं पुण्यं पवित्रमितिहासं शांडिल्यो मुनीश्वरः मुनीनामीश्वरोपि ब्रह्मानंदपरिप्लुतः ब्रह्मण

वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः ॥ योगैश्च संयांति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम् ॥ ८८ ॥ इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः ॥ पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ॥८९॥ आख्यानमेतत्परमं पवित्रं श्रुतं सकृद्वै विदहेदघौघम् ॥ श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं च ॥ ९० ॥ इति श्रीपद्मपुराणे श्रीभागवतमाहात्म्ये गोकर्णवर्णनं नाम पञ्चमोऽध्यायः॥ ५ ॥

आनंदस्तस्मिन् परिप्लुतो निमग्नः, तेन व्याप्तो वा । अभेदार्थे षष्ठी, राहोः शिर इतिवत् । ब्रह्माऽऽनन्दयोरभेदे "आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" इति श्रुतिःप्रमाणम्।चित्रकूटस्थः चित्राणि कूटानि शिखराणि यस्य स तथा तत्र तिष्ठतीति तथा स नित्यं पठते॥८९॥फलमाह—आख्यानमिति।एतदाख्यानं परममुत्कृष्टम्,पवित्रं पूतं शुद्धिकरं वा,सकृदेकवारं श्रुतम् (कर्तृपदमेतत) अघौघं पापसमूहं विदहेत् भस्मीकुर्यात।श्राद्धे पार्वणादौ प्रयुक्तं पठितं पितृतृप्तिं पितॄणामानंदमावहेत् संपादयेत, कुर्यादित्यर्थः । नित्यं प्रतिदिनं सुपाठात शोभनपाठात् । एतेन ह्रस्वदीर्घव्यत्यासास्पष्टाक्षरोच्चारणेन न सम्यक् फलावाप्तिरिति सूचितम् । अपुनर्भवं नास्ति पुनर्भवो जन्म यस्मात् स तथा तं मोक्षञ्चावहेत् ॥ ९० ॥ इति श्रीशेखावाट्यंतर्गतविजयपुरनिवासिव्राजलालिपंडितरामप्रतापविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां पंचमोऽध्यायः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीमद्भागवतश्रावाद्धुंधुकारी विमुक्तवान्। प्रेतयोनेः पुनः सर्वे वैकुंठपदमागताः ॥ १ ॥ पूर्वाध्याये श्रीमद्भागवतसप्ताहश्रवणफलमुक्तं, तत्र तत्प्रकारस्याविवक्षितत्वात्तद्विधानार्थमुत्तरा ध्याय आरभ्यते "सांविधानात्फलं पूर्णं तद्धीने तु तदल्पता । अंगांगीभावसंबंधोऽनयोरध्याययोः स्फुटम् ॥" । तत्र सप्ताहश्रवणविधिं विवक्षुः "मंगलादीनि मंगलमध्यानि मंगलां तानि च शास्त्राणि प्रथंते" इत्यादिमहाभाष्योल्लेखादन्तिमाध्यायादौ मङ्गलमाचरति–अथेति । अथेति मंगले।सप्ताहश्रवणे विधिं विधानं ते तुभ्यं वयं संप्रवक्ष्यामः सम्यक् कथयिष्यामः । तत्रादौ कतिसाधकैर्विधिः साध्य इति निर्णीयते–वसुभिः अष्टभिः सहायैः प्रायो बाहुल्येन विधिः इतिकर्त्तव्यतासाध्यः स्मृत एव ॥ १ ॥ कदा प्रारंभः कार्य इति कालनिर्णयार्थं दैवज्ञाह्वानमाहुः–दैवज्ञमिति । दैवज्ञं ज्योतिर्विदं ब्राह्मणम्।तत्र तस्यैवाधिकारात्। समाहूय पाद्यार्घ्याचमनासनानि निवेद्य इति संशब्दार्थः,आदरपर्यायत्वात् । मुहूर्त्तं पृच्छ्य संपृच्छ्य, आर्षो ल्यबत्र समासाभावात् । विवाहे यादृशं चित्तं प्रमोदमानं तादृशं चित्तं कथायामपि परिकल्पयेत् विदध्यात। 'वित्तम्'इति पाठे विवाहे यादृशं वित्तं वस्त्राभूषणगोशय्यादानादिरूपं संपाद्यते तादृशमत्रापि परिकल्पयेदित्यर्थः । ननु " गत्वा स्नानं प्रकर्त्तव्यं गत्वा पृच्छेच्छुभाशुभम् । समाहूय तु यः पृच्छेत्तदर्द्धफलदं

कुमारा ऊचुः ॥ अथ ते संप्रवक्ष्यामः सप्ताहश्रवणे विधिम् ॥ सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ॥ १ ॥ दैवज्ञं तु समाहूय मुहूर्तं पृच्छ्य यत्नतः ॥ विवाहे यादृशं चित्तं तादृशं परिकल्पयेत् ॥ २ ॥ नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः ॥ एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः ॥ ३ ॥

भवेत ॥" इति पाद्मोक्त्या समाहूय पृच्छायाः फलार्द्धप्रदत्वात्कथं सयाहूयेत्युक्तं, तत्र नृपाभिप्रायेणेति गुरवः । " वसिष्ठं तु समाहूय यौवराज्याभिषेचनम् । एकांते जनकोऽपृच्छत्" इतिरामायणोक्तेः । केचित्तु–विवाहयात्रा।दिमंगलं शुभम्, अशुभं कष्टरोगोत्पातादिकं च गत्वा पृच्छेदिति विधिः, एतत्कार्यस्य च परमार्थसाधकत्वादाह्वानं न दोषदमित्याहुः । अन्यत्रापि–"गत्वा नत्वा च दत्त्वा च परिपृच्छेत्सदक्षिणम् ॥ ब्राह्मणं मंगलं यश्च तस्य कार्यं सुसिद्धिदम् ॥ १ ॥ संतोष्य च वचो ग्राह्यं ब्राह्मणस्य तु सर्वथा ॥ असंतोष्य वचो गृह्णन् कायकर्त्ता विनश्यति ॥ २ ॥" । कीदृशं तन्मुहूर्त्तं, कुत्र लिखितमिति केपि न जानंति, ज्योतिःशास्त्रेऽदृष्टत्वात् । अतस्तन्मुहूर्त्तं स्वयमेव व्यासोवददिति । तथाहि–"भौमार्किवर्जिता वारा भानि ध्रुवमृदूनि च ॥ शुभयोगे तिथौ लग्ने कथारंभः प्रशस्यते ॥ १ ॥ नित्यायां च कथायां च पुराणानां मुनीश्वर ॥ द्वादशीं वर्जयेत्प्राज्ञः सूतसूतकसंभवात् ॥ सप्ताहे न निषेधोस्ति प्राहुरेवं पुराविदः ॥ २ ॥" इति पाद्मे ॥ २ ॥ मासानाह–नभस्य इति । नभस्यो भाद्र

१ ओंकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभौ ॥" इतिमहदुक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदः । आश्विनोर्जौ आश्विनकार्त्तिकौ 'बाहुलोर्जौ कार्त्तिकिकः' इत्यमरोक्तेः । मार्गशीर्षः प्रसिद्धः । शुचिराषाढः । नभाः श्रावणः ' नभः । खं श्रावणो नभाः ' इत्यमरोक्तेः । एते मासाः कथारंभे श्रोतॄणां जनानां मोक्षसूचकाः मोक्षं सूचयंतीति तथा ते, मोक्षदायका इत्यर्थः । चात् माघफाल्गुनवैशाखज्येष्ठानां ग्रहणम् । "सर्वे मासाः शुभाः प्रोक्ताः पौषचैत्रविवर्जिताः" इतिविशेषोक्तेः सप्ताह एव एतयोर्निषेधो नान्यत्र । " सर्वदा वाचयेद्गाथां पारायणमृते विधिम् " इतिवचनात् । तदुक्तमन्यत्रापि—"नभस्यः कार्त्तिको मार्गशीर्षो माघस्तथैव च ॥ श्रीमद्भागवतं श्राव्यं चातुर्मास्ये महत्फलम् ॥ १ ॥ तत्र कारणमाख्यास्ये श्रूयतां भवतोऽनघाः ॥ इमे मासाः कथायोग्याः श्रुतौ भागवतस्य च ॥ मोहयुक्तं तु ब्रह्माणं मासे नभस्यसंज्ञिते ॥ शुद्धपक्षे शुभे वारे ह्युवाच भगवान्हरिः ॥ ३ ॥ युक्तं श्लोकैश्चतुर्भिश्च सर्वथा मुक्तिदायकम् ॥ नवमीदिनमारभ्य पूर्णमासी यदा भवेत् ॥ ४ ॥ वैष्णवैः सह भो विप्राः श्रोतव्यं कामदं शुभम् ॥ श्रुत्वा हरिमुखं भोजाद्ब्रह्मा मोहाद्विमुक्तवान् ॥ ५ ॥ अतो मासे नभस्ये च श्रोतव्यं च नरैः सदा ॥ कार्त्तिके नारदो व्यासं कथामेतां जगाद ह ॥ ६ ॥ तस्मात्तु कार्त्तिके मासे सप्ताहश्रवणं मतम् ॥ श्रीशुकं पाठयामास मासे स मार्गशीर्षके ॥ ७ ॥ अतः सप्ताहश्रवणं मार्गशीर्षे शुभं मतम् ॥ एकदा तु मुनिर्धीरो गंगातीरमुपेयिवान् ॥ ८ ॥ विष्णुरातेन संपृष्टो महाभागवतो

मासानां विग्रहे यानि तानि त्याज्यानि सर्वथा ॥ सहायाश्चेतरे चात्र कर्तव्याः सोद्यमाश्च ये ॥ ४ ॥ देशेदेशे तथा सेयं वार्ता प्रेष्या प्रयत्नतः ॥
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः ॥ ५ ॥ दूरेहरिकथाः केचिद्दूरेचाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ॥ ६ ॥

मुनिः ॥ माघमासे सिते पक्षे नवमीगुरुवासरे ॥ ९ ॥ प्रारभत्प्रथमस्कंधाद्वैकुंठपदमाप सः ॥ माघमासोऽतिधन्योऽयं सप्ताहश्रवणे मतः ॥ १० ॥ " ॥ ३ ॥ किञ्च—मासानामिति । मासानां विग्रहे शरीरे त्रिंशद्दिनात्मके "समासे च विरोधे च वपुषि विग्रहः स्मृतः" इत्युक्तेः । यानि त्याज्यानि तानि वस्तूनि सप्ताहे सर्वथा सर्वप्रकारेण त्याज्यानि । यथा—"श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ॥ आश्विने तु त्यजेद्दुग्धं द्विदलं कार्त्तिके तथा ॥ १ ॥ मार्गशीर्षे त्यजेत्कंदं पौषे च गृंजनं तथा ॥ पलांडुमपि केप्याहू रक्तं मूलं च माघके ॥ २ ॥ जंबीरं फाल्गुने मासे चैत्रे चित्रान्नमेव च ॥ कूष्मांडनालिकां राधे ज्येष्ठे पानं च मादकम् ॥ ३ ॥ कुलित्थं तुरमाषाढे वर्जनीयं प्रयत्नतः ॥" इति । यद्वा—'मासानां विप्र हेयानि' इति पाठः । तत्र विप्रेति नारदं संबोधयति । शेषं स्पष्टम् । ये सोद्यमा उद्यमेन सहिता इति । ' जीवन्मृतकस्तु निरुद्यमोयम् ' इति निरुद्यमानां त्याज्यत्वात् । ते अत्र सप्ताहयज्ञे इतरे अन्येपि सहायाः कर्त्तव्याः ॥ ४ ॥ कथावृत्तांतपत्रमन्यदेशेष्वपि सुहृत्संबंधिबांधवान्प्रति प्रेषणीयमित्याह—देशेदेश इति । तथा तेन प्रकारेण देशेदेशे प्रतिदेशं सा प्रसिद्धा इयं वार्त्ता कथासंबंधिनी प्रेष्या प्रेषणीया दूतादिद्वारा प्रयत्नतः प्रकर्षेण यत्नात् । अत्र देशे कथा श्रीमद्भागवतगाथा भविष्यति भाविनी अतः कुटुंबिभिः गृहस्थैरागंतव्यम् ॥ ५ ॥ ननु येषां श्रवणेच्छा स्यात्ते स्वयमेवागमिष्यंतीत्यत आह—दूर इति । केचित् केचन दूरे दूरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरेः कथा येषां ते तथा। केचित् दूरे च अच्युतस्य कीर्त्तनं येषां ते तथा संति। ये च शूद्रादयो नीचजातयः, च पुनः स्त्रियः शौचाचारहीनाः 'स्त्रीशूद्राश्च सधर्माणः' इतिवचनात्। तेषां बोधो ज्ञानं यतः कथाश्रवणात् भवेत् अतो वार्त्ताप्रेषणं युक्तम् ॥ ६ ॥ वैष्णवान्प्रति पत्रं प्रेषणीयमित्याह–देशेदेश इति। देशेदेशे ये वैष्णवा विरक्ताः विषयाभिलाषरहिताः कीर्त्तनोत्सुकाः कीर्त्तनं हरिनामोच्चारणपूर्वकलीलावर्णनं तस्मिन्नुत्सुकाः तेषु। अप्यर्थे एवकारः। तेष्वपीत्यर्थः। पत्रं प्रेष्यं प्रेषणीयम्। तल्लेखनं तस्य पत्रस्य लेखनम् इति एवं वक्ष्यमाणप्रकारेण ईरितम् उक्तम्। च प्रसिद्धम् ॥ ७ ॥ तथाहि–सतामितिसार्द्धैस्त्रिभिः। सप्तरात्रं यावत् सतां सज्जनानां सुदुर्लभः अत्यलभ्यः समाजः समुदायो भविता भविष्यति। अत्र समाजे अपूर्वरसरूपा अद्भुतरसवर्त्तिनी कथा भविष्यति। एवेति निश्चये ॥ ८ ॥ श्रीभागवतमेव पीयूषममृतं तस्य पानाय पानार्थं रसलंपटाः रसलुब्धाः प्रेमतत्पराः प्रेमपरायणाः भवंतो यूयं शीघ्रमायात आगच्छत ॥ ९ ॥ कदाचित्कार्यावरोधेन चेद्यदि सप्तरात्रं नाऽवकाशस्तथापि दिनमात्रम् एकदिनार्थमागमनं

देशेदेशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः ॥ तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम् ॥ ७ ॥ सतां समाजो भविता सप्तरात्रं सुदुर्लभः ॥ अपूर्वरसरूपेव कथा चात्र भविष्यति ॥ ८ ॥ श्रीभागवतपीयूषपानाय रसलम्पटाः ॥ भवन्तश्च तथा शीघ्रमायात प्रेमतत्पराः ॥ ९ ॥ नावकाशः कदाचिच्चेद्दिनमात्रं तथापि तु ॥ सर्वथागमनं कार्यं क्षणोऽत्रैव सुदुर्लभः ॥ १० ॥ एवमाकरणं तेषां कर्तव्यं विनयेन च ॥ आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत् ॥ ११ ॥ तीर्थे वापि वने वापि गृहे वा श्रवणं मतम् ॥ विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलम् ॥ १२ ॥ शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम् ॥ गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् ॥ १३ ॥ अर्वाक्पञ्चाहतो यत्नादास्तरणानि प्रमेलयेत् ॥ कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्डमण्डितः ॥ १४ ॥

सर्वथा सर्वप्रकारेण कार्यम्। अत्र सप्ताहरूपे सतां समाजे क्षण एव क्षणोऽपि सुदुर्लभोस्ति। तु अलभ्यलाभं सूचयति ॥ १० ॥ एवममुना प्रकारेण तेषामाकरणमाह्वानं कर्त्तव्यं करणीयम्। विनयेन नम्रतया। आगमनात्पूर्वमेव वासस्थानानि कल्पनीयानीत्याह–आगंतुकानामित्यर्द्धेन। आगंतुकानाम् आगमिष्यतां सर्वेषां वासस्थानानि वासार्थं स्थानानि कल्पयेत् रचयेत् ॥ ११ ॥ कथा कुत्र वाच्येति चेत्तत्राह–तीर्थ इति। तीर्थे वा पुष्करादौ, वने वापि वृंदावनादौ, गृहे वा श्रवणं मतम् इष्टम्। यत्र मंदिरादौ विशाला विस्तृता वसुधा भूमिरस्ति तत्र कथास्थलं कर्त्तव्यम् ॥ १२ ॥ तत्र स्थानशुद्धिमाह-शोधनमिति। भूमेर्वसुधायाः शोधनं पंचगव्यादिना शुद्धिः। मार्जनं मलाद्युत्सारणम्। गोमयादिना लेपनम्। धातुर्गैरिकादिस्तेन मंडनमलंकरणम्। गृहोपस्करं गृहस्य उपस्करम् उपकरणं खट्वापीठपेषणीपट्टादिकमुद्धृत्य पूर्वस्थानादुत्थाप्य गृहकोणे गृहस्य कोणे एकदेशे निवेशयेत्स्थापयेत् ॥ १३ ॥ अन्यदपि पूर्वमेव संपादनीयमित्याह–अर्वागिति। पंचाहतः पंचदिनार्वाक् पूर्वम् आस्तरणानि भूम्याच्छादनानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कटादीनि प्रमेलयेत्व संपादयेत् । ततो मंडपः कार्य इत्याह—कर्त्तव्य इति सार्द्धेन । प्रोच्चैः प्रकर्षेणोच्चतरः कदलीखंडमंडितः कदल्याः खंडानि स्तंभशाखादीनि तैर्मंडितो भूषितो मंडपः कर्त्तव्यः ॥ १४ ॥ विष्वक् परितः फलपुष्पदलैः फलं बिंबादीनाम्, पुष्पं केतक्यादीनाम्, दलमाम्रबिल्वादीनाम्, तैः वितानेन मंडपस्य उपर्य्याच्छादनेन "पंचवर्ण वितानं स्यान्मंडपाच्छादनाय च" इत्युक्तेः । विराजितः शोभितः । चतुर्दिक्षु चतसृषु दिशासु ध्वजारोपः ध्वजानाम् आरोपः, कर्त्तव्य इति पूर्वेणान्वयः । बहुसंपद्विराजितः बह्वयश्च ताः संपदस्ताभिर्विराजितः विशेषेण प्रकाशितः ॥ १५ ॥ तत्र लोककल्पनं कार्यमित्याह—ऊर्ध्वमिति । ऊर्ध्वं मंडपोपरीति केचित् । तदसंगतं, तत्र स्थानां क्काप्यदर्शनादश्रुतेश्च । वस्तुतः ऊर्ध्वं सप्त लोका भूरादयः सुविस्तरं यथा स्यात्तथा कल्पनीयाः प्रकल्प्याः । एवावधारणे । तेषु सप्तसु लोकेषु विरक्ता विरागिणो विप्रा ब्राह्मणाः प्रबोध्य—भो भगवन् अत्रेहीत्यभिमुखीकृत्य स्थापनीयाः ॥ १६ ॥ स्थापनमुत्तरोत्तरक्रमेणासनेष्वित्याह—पूर्वमिति । तेषां विरक्तानां श्रोतृणाम् उत्तरोत्तरक्रमेण पूर्वमासनानि कर्त्तव्यानि तदा तस्मिन्काले पूर्वकाल इत्यर्थः । वक्तुः वाचकस्य दिव्यं सर्वतः श्रेष्ठमासनं सिंहासनं परिकल्पयेत् । अथ प्रसंगाद्वक्तुः श्रोतुश्च गुणनिरू

फलपुष्पदलैर्विष्वग्वितानेन विराजितः ॥ चतुर्दिक्षु ध्वजारोपो बहुसंपद्विराजितः ॥ १५ ॥ ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सुविस्तरम् ॥ तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च ॥ १६ ॥ पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम् ॥ वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत् ॥ १७ ॥ उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा ॥ प्राङ्मुखश्चेद्भवेद्वक्ता श्रोता चोदङ्मुखस्तदा ॥ १८ ॥ अथ वा पूर्वदिग्ज्ञेया पूज्यपूजकमध्यतः ॥ श्रोतृणामागमे प्रोक्ता देशकालादिकोविदैः ॥ १९ ॥ विरक्तो वैष्णवो विप्रो वेदशास्त्राभिशुद्धिकृत् ॥ दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः ॥ २० ॥

पणम् । तथाहि—"वक्ता व्याससमासवित्प्रियकथः प्रस्ताववित्सत्यवाक् संदेहच्छिदशेषशास्त्रकुशलो नाख्यानविच्छेदकृत् । अव्यंगो जनरंजको जितसभो नाहंकृतो धार्मिकः संतोषीति चतुर्दशोत्तमगुणा वक्तुः प्रणीता इमे ॥ भक्तो वक्तुरगर्वितः श्रुतरुचिश्चांचल्यहीनः पटुः प्रश्नज्ञश्च बहुश्रुतोप्यनलसो निद्रोज्झिताक्षः सुधीः । दाता त्यक्तकथांतरः शुचिवपुर्दभोज्झितः सर्वथा श्रोतुः पुंस इमे चतुर्दश गुणाः सद्भिर्निरुक्ताः स्फुटाः ॥" इति । अन्यच्च—" गीती शीघ्री शिरःकंपी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकंठश्च षडेते पाठकाधमाः ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थश्च षडेते पाठके गुणाः ॥ १७ ॥ वक्तुः श्रोतुश्च मुखनियममाह—उदङ्मुख इति । उदीच्याम् उत्तरदिशायां मुखं यस्य स तथा वक्ता वाचको यदा भवेत्, तदा श्रोता प्राङ्मुखः प्राच्यां पूर्वदिशायां मुखं यस्य स तथा स्यात् । च पुनः वक्ता प्राङ्मुखो यदा तदा श्रोता उदङ्मुखः ॥ १८ ॥ प्रकारांतरमाह—अथेति । पूज्यपूजकमध्यतः पूजितुं योग्यः पूज्यो मुख्यः, पूजयतीति पूजको गौणस्तयोर्मध्यतो मध्ये पूर्वदिक् ज्ञेया पूर्वदिशा बोध्या । सा कुत्र, कैः, केषां प्रोक्तेत्यत आह—देशकालादिकोविदैः देशकालादिनिपुणैः, आगमे शास्त्रे, श्रोतृणां प्रोक्ता ॥ १९ ॥ वक्तृलक्षणमाह—विरक्त इति । विरक्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनाद्यभिलाषशून्यः । वैष्णवो विष्णुभक्तः । वेदशास्त्रविशुद्धिकृत् वेदानां शास्त्राणां च विशुद्धिं करोतीति तथा अपशब्दनिरासेन । दृष्टांतकुशलः दृष्टांते निपुणः धीरः धैर्यवान्, अतिनिःस्पृहः सर्वथा संग्रहरहितः, विप्रो ब्राह्मणो वक्ता कार्यः कर्त्तव्यः, " वक्तारं ब्राह्मणं कुर्यान्नान्यवर्णजमादरात् " इतिपाद्मोक्तेः । " विस्पष्टमद्रुतं शांत स्पष्टाक्षरपदं तथा । कलस्वरसमायुक्तं रसभावसमन्वितम् ॥ ब्राह्मणादिषु सर्वेषु ग्रंथार्थं चार्पयेन्नृप । य एवं वाचयेद्राजन्स विप्रो व्यास उच्यते ॥" इत्यपि तत्रैव । यत्तु—"नक्षत्रजीविनं पापं भिषजं शुल्कजीविनम् । तादृक्पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत् ॥" इति वचनं, तदभक्तलुब्धविषयम् ॥ २० ॥ 'सदोषाः पंडितास्त्याज्याः श्रीभागवतवाचने' इत्याह—अनेकेति । न एके अनेके ते च ते धर्माश्च अनेकधर्मास्तैर्विभ्रांताः चलितबुद्धयः, स्त्रैणाः स्त्रीलंपटाः, पाखंडं वदितुं शीलं येषां ते तथा यदि पंडिताः विवेकिनस्तथापि ते शुकशास्त्रकथोच्चारे शुकस्य शास्त्रं श्रीमद्भागवतं तस्य कथोच्चारे कथावाचने त्याज्याः ॥ २१ ॥ वक्तुः पार्श्वे अन्योपि तादृशः स्थाप्य इत्याह—वक्तुर्वाचकस्य पार्श्वे सहायार्थं तथाविधः वक्तृसदृशोन्यो द्वितीयः स्थाप्यः स्थापनीयः । कीदृशस्तत्राह—पंडितो ज्ञानी, संशयच्छेत्ता शीघ्रतरवाचनेन लोकानां यः संदेहः तस्य छेत्ता छेदकः,

अनेकधर्मविभ्रान्ताः स्त्रैणाः पाखण्डवादिनः ॥ शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः ॥ २१ ॥ वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः ॥ पण्डितः संशयच्छेत्ता लोकबोधनतत्परः ॥ २२ ॥ वक्त्रा क्षौरं प्रकर्तव्यं दिनादर्वाग्व्रताप्तये ॥ अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥२३॥ नित्यं संक्षेपतः कृत्वा संध्याद्यं संप्रयत्नतः ॥ कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ॥ २४ ॥ पितॄन्संतर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥ मण्डलं च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा ॥ २५ ॥

वक्तुरनवकाशात् । लोकानां बोधनं ज्ञानं तत्र तत्परः परायणः ॥ २२ ॥ वक्तृनियममाह—वक्त्रेति सार्धद्वाभ्याम् । दिनात्प्रारंभदिनात् अर्वाक् पूर्वं वक्त्रा वाचकेन क्षौरं क्षुरकर्म प्रकर्त्तव्यम् । किमर्थम्—व्रताप्तये व्रतस्य प्राप्त्यर्थम् । असौ वक्ता शौचं मूत्रपुरीषोत्सर्गपूर्वकदंतधावनं निर्वर्त्य कृत्वेति यावत् । अरुणोदयवेलायाम् 'सूरसूतोरुणोनूरुः' इत्यमरोक्तेः अरुणः सूर्यसारथिस्तस्य उदयः सूर्योदयाद्घटिकाद्वयात्पूर्वं तस्मिन् काले स्नानं समाचरेत् कुर्यात् ॥ २३ ॥ नित्यं कर्म संध्याद्यं संक्षेपतः संक्षेपात् कृत्वा संप्रयत्नतः सम्यक्प्रयत्नात् गणनाथं श्रीगणेशं प्रपूजयेत् । किमर्थम्—कथाविघ्नविघाताय कथायां विघ्नाः चंडवाताद्युपद्रवरूपास्तेषां विघाताय विनाशार्थम् ॥२४ ॥ पितॄन्संतर्प्य पितॄणां तर्पणं कृत्वा शुद्ध्यर्थं शरीरपावनाय प्रायश्चित्तं समाचरेत् । मंडलं च विधेयमित्याह—मंडलमिति । मंडपमध्ये मंडलं च सर्वतोभद्राख्यं प्रकर्त्तव्यम् । तथा तेन प्रकारेण तत्र मंडलमध्ये हरिः स्थाप्यः ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचयितृकृत्यमाह—कृष्णमितिद्वाभ्याम् । कृष्णमुद्दिश्य लक्षीकृत्य मंत्रेण तस्यैव मंत्रेण पूजाविधिं क्रमात् चरेत् कुर्यात् । "सहस्रशीर्षा" इति षोडशर्ग्भिर्वा पूजनम् । तथा प्रदक्षिणानमस्कारानाचरेत् । पूजांते पूजाया अंते स्तुतिम् आचरेत् ॥ २६ ॥ स्तुतिमंत्रमाह—संसारसमुद्रे मग्नं ब्रुडितं, कर्मग्राहगृहीतांगं कर्माण्येव ग्राहास्तैः गृहीतान्यंगानि यस्य स तथा तं दीनं मां हे करुणानिधे त्वं भवार्णवात् संसाराब्धेः उद्धर पृथक् कुरु, ऊर्ध्वं नयेति वा, मोक्षं संपादयेति यावत् ॥ २७ ॥ ततः शास्त्रपूजा कार्येत्याह—श्रीमदिति । ततस्तदनंतरं श्रीमद्भागवतस्य शास्त्रस्यापि प्रयत्नतो विधिना विधानतः प्रीत्या भक्तिभावेन धूपेन दीपेन च संयुक्ता पूजा प्रकर्त्तव्या ॥ २८ ॥ ततः किं कर्त्तव्यमित्यत आह—तत इति । ततः पूजानंतरं श्रीफलं धृत्वा समर्प्य नमस्कारं समाचरेत् कुर्यात् । तदा तस्मिन्काले प्रसन्नचित्तेन हृष्टेन मनसा केवलं स्तुतिः कर्त्तव्या ॥ २९ ॥ तन्मंत्रमाह—श्रीमदिति द्वाभ्याम् । श्रीमद्भागवतम् आख्या नाम यस्य स तथा अयं ग्रंथः प्रत्यक्षः सांप्रतं मूर्त्तिमान् कृष्ण एव । हे नाथ मया भवसागरे संसारसमुद्रात्,

कृष्णमुद्दिश्य मन्त्रेण चरेत्पूजाविधिं क्रमात् ॥ प्रदक्षिणानमस्कारान्पूजान्ते स्तुतिमाचरेत् ॥ २६ ॥ संसारसागरे मग्नं दीनं त्वं[1] करुणानिधे ॥ कर्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात् ॥ २७ ॥ श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः ॥ कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥ २८ ॥ ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् ॥ स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा ॥ २९ ॥ श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ॥ स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे॥ ३० ॥ मनोरथो मदीयोऽयं सफलः सर्वथा त्वया ॥ निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥ ३१ ॥ एवं दीनवचः प्रोक्त्वा वक्तारं चाथ पूजयेत्॥ संभूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तुयात्॥ ३२ ॥ शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद॥ एतत्कथाप्रकाशेन मदज्ञानं विनाशय ३३॥

पञ्चम्यर्थे षष्ठीयम् । मुक्त्यर्थं मुक्तये स्वीकृतोसि ॥ ३० ॥ हे केशव तवाहं दासोस्मि, अतोयं मदीयो मनोरथः त्वया सर्वथा सर्वप्रकारेण निर्विघ्नेन सुखेनैव सफलः कर्त्तव्यः ॥ ३१ ॥ ततो वक्तृपूजनधनादिदानसंतुष्टिस्तवनं च कार्यमित्याह—एवमिति । एवमुक्तप्रकारेण दीनवचः दीनवत् वचः प्रोक्त्वा प्रोच्य । प्रोच्येत्यपहाय प्रोक्त्वेति पदन्यासो वैदिकत्वसूचनार्थः । तदुक्तम्—"पुराणं मानवो धर्मः सांगो वेदश्चिकीर्षितम् । आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः ॥" इति । अथानंतरं वक्तारं पूजयेत् । वस्त्रभूषाभिः वस्त्रालंकारादिभिः संभूष्य अलंकृत्य पूजांते तं वक्तारं संस्तुयात् संस्तुवीत ॥ ३२ ॥ तन्मंत्रमाह—शुकेति । हे शुकरूप शुकमूर्त्ते, हे प्रबोधज्ञ प्रबोधनचतुर, हे सर्वशास्त्रविशारद सर्वशास्त्रनिपुण एतत्कथाप्रकाशेन एषा चासौ कथा च एतत्कथा तस्याः प्रकाशेन उद्दीपनेन मदज्ञानं मम अज्ञानं विनाशय । अन्यत्र

१ 'माम्' इति पाठान्तरे द्विरुक्तिर्दुष्परिहरा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्ता हरिरेवेत्युक्तम् । तद्रूपेण स्तुतिवाक्यं सूतसंहितायाम् । तथाहि—" पुराणसंहितावक्ता हरिरित्यभिधीयते । यो वदेत्सततं भक्त्या पुराणानि द्विजोत्तमः । आत्मार्थं वा परार्थं वा स हरिर्नात्र संशयः ॥ पुराणश्रवणे भक्तिर्गंगास्नानसमा स्मृता । तद्वक्तरि च या भक्तिः सा प्रयागोपमा स्मृता ॥" इति ॥ ३३ ॥ वक्तुरग्रे नियमः कर्त्तव्य इत्याह—तदिति । पश्चात तदनन्तरं तदग्रे तस्य वक्तुरग्रे पुरतः मुदा हर्षेण श्रेयसे कल्याणार्थं नियमः कर्त्तव्यः । स एव नियमः सप्तरात्रं यावत् यथाशक्त्या शक्त्यनुसारेण धारणीयः धार्यः । एव हीति गृहीतनियमस्य मध्येऽहेयतां सूचयतः ॥ ३४ ॥ ब्राह्मणवरणमपि कार्यमित्याह—वरणमिति । पंचविप्राणां वरणं कर्त्तव्यम् । किमर्थम्—कथाभंगनिवृत्तये कथाया भंगो रोगाद्युपद्रवजन्यो नाशस्तस्य निवृत्तये निरासाय । तैः किं कार्यं, तदाह-तैर्हरेर्जाप्यः कार्यः । कया—द्वादशाक्षरविद्यया द्वादशाक्षरमंत्रेण । तत्प्रकारो गुरुभिः प्रदर्शितः । यथा—"नमः पूर्वं प्रकर्त्तव्यं पश्चाद्भगवते ननु । ततः श्रीऋषिभिः प्रोक्तं कृष्णचंद्राय खल्वतः ॥ एष श्रीकृष्णदेवस्य द्वादशाक्षरसंज्ञकः । मंत्रो जप्यो मया प्रोक्तो विश्वस्योद्धरणे क्षमः ॥ द्वादशाक्षरमंत्रस्य ऋषिः प्रोक्तश्च नारदः । छंदोनुष्टुप् च विज्ञेयं कृष्णो वै देवता स्मृतः ॥ भगवानिति बीजं

तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा ॥ सप्तरात्रं यथाशक्त्या[1] धारणीयः स एव हि ॥ ३४ ॥ वरणं पञ्चविप्राणां कथाभंगनिवृत्तये ॥ कर्तव्यं तैर्हरेर्जाप्यो द्वादशाक्षरविद्यया ॥ ३५ ॥ ब्राह्मणान्वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः ॥ नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥ ३६ ॥ लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च ॥ कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम् ॥ ३७ ॥

च शक्तिश्च श्रीरुदाहृता । कीलकं चर्षिभिः प्रोक्तं चंद्रायेति न संशयः ॥ प्राणायामत्रयं कुर्यान्मंत्रेणानेन सर्वदा । अंगन्यासादिकं कुर्याद्ध्यायेच्छ्रीकृष्णमच्युतम् ॥ कृष्णं भास्वत्किरीटांगदवलयकलाकल्पहारोदरांघ्रिं शोणीभूतं स्ववक्षोमणिमकरमहाकुंडलामंडितास्यम् । हस्तोद्यच्छङ्खचक्रांबुजगदममलं पीतकौशेयवासं विद्युद्भासं समुद्यद्दिनकरसदृशं पद्मसंस्थं नमामि ॥ एवं ध्यात्वा च देवेशं जपेन्मंत्रमुदारधीः ।" इति जपविधिः ॥ ३५ ॥ पूजनपूर्वकमन्यानपि अनुज्ञाप्य श्रोतोपविशतीत्याह—ब्राह्मणानिति । ब्राह्मणान् प्रसिद्धान् वैष्णवान् विष्णुसेवकान्, तथा तेनैव प्रकारेण कीर्त्तनकारिणः हरिचरितगायकानन्यांश्च संपूज्य समर्च्य नत्वा प्रणम्य तैर्दत्ताज्ञः दत्ता आज्ञा यस्मै स तथा स्वयं श्रोता आसनमाविशेत् आसनोपरि तिष्ठेत् ॥ ३६॥ फलप्राप्तिहेतुमाह—लोकेति । लोकाः सुहृज्जनाः, वित्तं मणिसुवर्णादिकं, धनं पश्वादिरूपम्, अगारो गृहं, पुत्रो वंशकरस्तेषां चिंता चिंतनं तां व्युदस्य दूरीकृत्य, त्यक्त्वेति यावत् । कथाचित्तः कथायां चित्तं यस्य स तथा, शुद्धमतिः शुद्धा रागाद्यकलुषीकृता पवित्रा वा मतिर्बुद्धिर्यस्य स

१ यथाशक्तीति तु शोभनः पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा एवंभूतो यःस्यात, यत्तदोर्नित्यसंबंधात् स श्रोता उत्तमं फलं लभेत्प्राप्नुयात् ॥ ३७॥ कालनियममाह—आसूर्येति । आशब्दस्ताराानिवृत्त्यर्थः । सूर्योदयं रवेराविर्भावमारभ्य सार्द्धम् अर्द्धेन सहितं त्रिप्रहरांतकं त्रयाणां प्रहराणामंतकमवसानपर्य्यंतं कथा सम्यक्प्रकारेण वाचनीया वाच्या । धीरकंठं यथा स्यात्तथा सुधीमता। एकपदे तु धीरः स्वरविशेषः कंठे यस्य स तथा, स चासौ सुधीमांश्च तथा तेनैवेति व्याख्यानम् । तदुक्तं वाचनिकायाम्—"उच्चस्वरो विघ्नकरः कथायां दुःखस्य हेतुः पुनरेव वक्तुः। नीचस्वरः श्रोत्रनुरंजने न स्वस्यैव वा मानधनापहारी ॥ धीरस्य पर्य्यायतया स्वरेण सांद्रेण प्रोक्ता च कथा सुखाय । " इति ॥ ३८ ॥ मध्याह्ने मुहूर्त्तं विश्रमणीयमित्याह—कथेति । मध्याह्ने दिनार्द्धे घटिकाद्वयं मुहूर्त्तं यावत्कथाविरामः कथोपरतिर्यदा कर्त्तव्यः तत्कथामनु सा चासौ कथा च तत्कथा तामनु तस्याः पश्चात् तदा तस्मिन्काले वैष्णवैर्भक्तैः कीर्त्तनं हरि लीलागायनं कार्यम् ॥ ३९ ॥ श्रोतॄणां भोजनादिनियममाह—मलेति । मलं विष्ठा 'पुरीषं च मलं विष्ठा' इत्यागमात् । मूत्रं पीतजलपरिणामजं, तयोर्जयार्थं वशीकरणाय

आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तिकम् ॥ वाचनीया कथा सम्यग्धीरकण्ठं सुधीमता ॥ ३८ ॥ कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयम् ॥ तत्कथामनु कार्यं वै कीर्तनं वैष्णवैस्तदा ॥ ३९ ॥ मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः ॥ हविष्यान्नेन कर्तव्यो ह्येकवारं कथार्थिना ॥ ४० ॥ उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा ॥ घृतपानं पयःपानं कृत्वा वै शृणुयात्सुखम् ॥ ४१ ॥ फलाहारेण वा श्राव्यमेकभुक्तेन वा पुनः ॥ सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् ॥ ४२ ॥ भोजनं तु वरं मन्ये कथाश्रवणकारकम् ॥ नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि ॥ ४३ ॥ सप्ताहव्रतिनां पुंसां नियमाञ्छृणु नारद ॥ विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥ ४४ ॥

लघ्वाहारोऽल्पं भोजनं सुखावहः सुखप्रापकः । कथाम् अर्थितुं प्रार्थयितुं शीलं यस्य स तथा तेन श्रोत्रा हविष्यान्नेन तंडुलश्यामाकादिना एकवारं यथा स्यात्तथा आहारः कर्त्तव्यः ॥ ४० ॥ शक्तिविशेषे भुक्तविशेषमाह—उपोष्येति । चेत् यदा शक्तिः स्यात्तदा सप्तरात्रमुपोष्य उपवासं कृत्वा शृणुयात, घृतस्य पानं कृत्वा, पयसो दुग्धस्य वा पानं कृत्वा सुखं यथा स्यात्तथा शृणुयात्। वै निश्चयेन ॥ ४१ ॥ किंच—फलाहारेण फलभक्षणेन श्राव्यं श्रोतुं योग्यं, पुनरेकभक्तेन सकृद्भोजनेन वा । यत्तु भोजनं सुखसाध्यं भवेत् तच्छ्रवणाय श्रवणार्थं कर्त्तव्यम् ॥ ४२ ॥ उपवासाद्वरा भुक्तिरित्याह—भोजनमिति । सूतोक्तिरियमिति केचित् । वस्तुतस्तु—सनकाद्यन्यतमोक्तिः, पूर्वोक्तव्यवस्थायां प्रवचन एकस्यैवाधिकारात् । यतः कथाश्रवणकारकं कथायाः श्रवणं कथाश्रवणं तस्य कारकं कारणमतो भोजनमेव वरं श्रेष्ठमहं मन्ये। यदि कथाविघ्नकरः कथायां विघ्नहेतुस्तदोपवासो वरः श्रेष्ठो न प्रोक्तः ॥ ४३ ॥ सप्ताहव्रतिनां नियमानाह—सप्ताहेति द्वाभ्याम् । हे नारद सप्ताहं व्रतमस्ति येषामिति सप्ताहव्रतिनस्तेषां पुंसां नियमान् शृणु । विष्णोर्या दीक्षा तया विहीना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रहिता विष्णुदीक्षाविहीनास्तेषां कथाश्रवे कथायाः श्रवणे नाधिकारः अधिकारो नास्ति ॥ ४४ ॥ कथाव्रती पुमान् ब्रह्मचर्यं स्त्रीसंसर्गायनाचरणम् अधःसुप्तिं भूमौ शय्यां च पुनः पत्रावल्यां भोजनम् । तत्रापि तुशब्दो विशेषं सूचयति ॥ ४५ ॥ वर्जनीयान्याह—द्विदलमिति सप्तभिः । द्विदलं चणकादि । तदुक्तम्—"माषमुद्गमसूराश्च चणकाश्च कुलित्थकाः । निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतम् ॥ " । अन्यच्च—"नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत" इति स्कांदे । अन्यच्च—"शिलायां भिद्यमानस्य द्विदलं जायते यदि । तदेव द्विदलं धान्यं व्रतादौ च विवर्जयेत् ॥ " इति । मधु क्षौद्रं, तैलं तिलादीनाम्, गरिष्ठान्नं तैलगुडमिश्रितमन्नम्, भावदुष्टं मनसा दूषितम्, पर्युषितं पूर्वेद्युः पाचितं कथाव्रती नित्यं जह्यात् त्यजेत् ॥४६॥ वृंताकम् "वार्त्ताकी हिंगुली सिंही भंटाकी दुष्प्रधर्षिणी " इति कोशोक्तं (भांटा) इति प्रसिद्धम् । कलंजं लंबायमानफलविशेष इति केचित्—" विषलिप्तेन बाणेन यौ हतौ मृगपक्षिणौ । तौ कलंजाविति ख्यातौ तद्भक्षे चैंदवं व्रतम् ॥ " इति गुरवः । दग्धमन्नमग्निना ज्वलितमन्नम्, मसूरिका प्रसिद्धा । निष्पावः—"निष्पावः शूकशिंबिः स्याद्वलकः श्वेतशिंबिकः" इति भावप्रकाशोक्तः । भाषायाम् 'शाम्मचुला', तदादि । आमिषं मांसं चेति ।

ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां च भोजनम् ॥ कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥ ४५ ॥ द्विदलं मधु तैलं च गरिष्ठान्नं तथैव च ॥ भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥ ४६ ॥ वृंताकं च कलंजं च दग्धमन्नं मसूरिका ॥ निष्पावाद्यामिषं चैव वर्जयेद्यः कथाव्रती ॥ ४७ ॥ पलांडुं लशुनं हिंगुं मूलकं गृंजनं तथा ॥ नालिकामूलकूष्मांडं नैवाद्याद्यः कथाव्रती ॥ ४८ ॥ द्विपाचितं सूतकान्नं भूमिजं लवणं तथा ॥ मत्स्यमांसमजादुग्धं पल्वलोदं च वर्जयेत् ॥ ४९ ॥

शेषं पूर्ववत ॥४७॥ 'पलांडुस्तु सुकंदकः' इत्यमरोक्तेः । लशुनम्—"लशुनस्तु रसोनः स्यादुग्रगंधो महौषधम्" इति भावप्रकाशे । हिंगु रामठम् । मूलकम्—"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् । शालामर्कटकं विस्रं शालेयं मरुसंभवे ॥ चाणक्यमूलकं तीक्ष्णं तथा मूलकपोतिका । नैपालमूलकं चान्यद्भवेत्कुंजरदंतवत् ॥" इति । तत्रैव—"मंगल्यश्च मसूरः स्यान्मंगल्या च मसूरिका" इति । गृंजनम्—"गाजरं गृंजनं प्रोक्तं तथा नारिंगवर्णकम्" इति । तथा नालिका—"नालिका कालशाकं च श्राद्धशाकं च कालकम्" इति । मूलं रक्तकंदविशेषः । कूष्मांडम्—"कूष्मांडः स्यात्पुष्पफलं पीतपुष्पबृहत्फलम्" तत्र समाहारैकत्वम्, तद्वर्जयेत् ॥ ४८ ॥ द्विवारं पाचितम् । यस्य सूतकं भवेत्तस्यान्नम् । तथा तेनैव प्रकारेण भूमिजं लवणम् । मत्स्यं मांसम् अजायाश्छाग्या दुग्धम् च पुनः पल्वलोऽल्पजलाशयस्तस्य उदकं वर्जयेत् । "तद्भक्षणे तु दोषः स्याद्ब्रह्महत्या न स्मरेद्धरिम् । पटोले तु न वृद्धिः स्याद्बलहानिश्च मूलके ॥ कलंकी जायते बिल्वे तिर्यग्योनिश्च निंबके । कांस्ये शरीरनाशः स्यान्नालिकायां तु ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूर्खता ॥ तुंबी गोमांसतुल्या स्याद्गोवधः स्यात्कलिंजके । शिंबिः पापकरा प्रोक्ता पूतिका ब्रह्मघातिका ॥ वृंताके सुतनाशः स्याच्चिररोगी तु मांसके । ” इति । अनुक्तानां चशब्देन ग्रहणात्तदनुक्तिर्न दोषायेति भावः ॥ ४९ ॥ काममभिलाषम् । क्रोधं रजोगुणेन मनःक्षोभम्, इष्टविघातजं वा । मदं गर्वम् । मानमहंकारम्, सर्वोत्तमत्वं वा । मत्सरं परोत्कर्षासहनम् । लोभं बहुधनापेक्षत्वम् । दंभं लोकानुरंजनाय कर्मानुष्ठानम् । तथा तेनैव प्रकारेण मोहं ममतारूपम् । च पुनः कथाव्रती द्वेषं विरोधं दूरयेत त्यजेत । एव चेति—स्पष्टमित्यर्थः ॥ ५० ॥ वेदवैष्णवविप्राणां वेदा ऋगाद्याः, वैष्णवा नारदाद्या भक्ताः, विप्रा ब्राह्मणास्तेषाम् । तथा गुरुगोव्रतिनां गुरुर्हितोपदेष्टा, गौः प्रसिद्धा, तयोर्व्रतमस्त्येषामिति तथा तेषाम् । स्त्रीराजमहतां स्त्री पतिव्रता नारी, राजा देशपतिः, महान् पूज्यः योगतपःप्रभावतोऽर्चनीयस्तेषां निंदां यः कथाव्रती स वर्जयेत ॥ ५१ ॥ रजस्वलां रजोयुक्तां स्त्रीं त्यजेत, तथा म्लेच्छपतितव्रातकैः म्लेच्छाः चांडालादयः, पतिता गोब्रह्मघ्नादयः, व्रातकाः संस्कारहीनास्तैः सह, द्विजाद्विट् ब्राह्मण

कामं क्रोधं मदं मानं मत्सरं लोभमेव च ॥ दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥ ५० ॥ वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा ॥ स्त्रीराजमहतां निन्दां वर्जयेद्यः कथाव्रती ॥ ५१ ॥ रजस्वलान्त्यजम्लेच्छपतितव्रातकैस्तथा ॥ द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥ ५२ ॥ सत्यं शौचं दयामौनमार्जवं विनयं तथा ॥ उदारमानसं तद्वदेवं कुर्यात्कथाव्रती ॥ ५३ ॥ दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान् ॥ अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम् ॥ ५४ ॥ अपुष्पा काकबन्ध्या च बन्ध्या या च मृतार्भका ॥ स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः ॥ ५५ ॥

द्वेषी, वेदबाह्या जैना लोकायतिका वा नास्तिकास्तैः सार्द्धमपि यः कथाव्रती स न वदेत् संभाषणं न कुर्यात ॥ ५२ ॥ पुनर्नियमानाह—सत्यमिति । कथाव्रती सत्यं कुर्यात धातोरनेकार्थत्वात वदेत् । शौचं शुद्धिम् । दयां दीनेषु । मौनं मितभाषणम् । आर्जवम् ऋजोर्भावं सरलताम् । तथा विनयं नम्रताम् । तद्वत्तथैव उदारमानसं चित्तमुदारं कुर्यात् । एवमिति शुभगुणग्रहणं सूचयति ॥ ५३ ॥ यैरवश्यं कथा श्रोतव्या तान्निर्दिशति—दरिद्र इति । दरिद्रो मंदभाग्यः । च पुनः क्षयी क्षयरोगी । निर्भाग्यः भाग्यहीनः । पापकर्मवान् पापिष्ठः । अनपत्यः संतानहीनः । मोक्षकामः मोक्षार्थी च इमां कथां शृणुयात् ॥ ५४ ॥ याभिः स्त्रीभिः श्रोतव्या ता आह—अपुष्पेति । अपुष्पा अरजस्का । काकबंध्या सकृत्प्रसूता । च पुनः बंध्या सामान्यपुत्राभाववती । या च मृतार्भका मृताऽपत्या । च पुनः स्रवद्गर्भा गलितगर्भा या नारी स्त्री तया प्रयत्नतोऽतिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्नात् श्राव्या श्रोतुं योग्या । इयं कथेति शेषः ॥ ५५ ॥ विधानतः श्रावे फलं स्यादित्याह—एतेनेति । एतेनोक्तेन विधिना श्रावे श्रवणे कृते सति तच्छ्रवणमक्षय्यतरम् अनंतं भवेत् । इयं कथा दिव्या ईश्वरप्रणीतत्वादत्युत्तमा सर्वतीर्थयज्ञादेः श्रेष्ठा । तत्र हेतुः—कोटियज्ञफलप्रदा कोटियज्ञानां फलं प्रददातीति तथा ॥ ५६ ॥ उद्यापनमंतरा संपादितव्रतस्य फलमपूर्णमतस्तदुद्यापनं कर्त्तव्यमित्याह—एवमिति । एवममुना प्रकारेण व्रतविधिं व्रतस्य विधानमादौ कृत्वाऽथानंतरं पश्चादुद्यापनमाचरेत्कुर्यात् । किमिव—जन्माष्टमीव्रतमिव फलेप्सुभिः कर्त्तव्यम् ॥ ५७ ॥ गृहस्थविषयोऽयं विधिः, न तु विरक्तविषय इत्याह—अकिंचनेष्विति । न किंचन वस्तुमात्रं येषां तेऽकिंचनास्तेषु निष्परिग्रहेषु भक्तेषु हरिजनेषु उद्यापनस्याऽग्रहः प्रायो बाहुल्येन नास्ति । तत्र हेतुः—यतो वैष्णवा निष्कामास्ततस्ते श्रवणेनैव पूताः शुद्धाः ॥ ५८ ॥ समाप्तौ कर्त्तव्यमाह—एवमिति । एवमित्थम् अस्मिन्नगाहयज्ञे सप्ताहयज्ञे समाप्ते पूर्णे सति तदा श्रोतृभिः पुस्तकस्य शास्त्रस्य वक्तुर्वाचकस्य च अतिप्रेम्णा पूजा कार्या । तदुक्तं पाद्मे—"समाप्तेषु पुराणेषु शक्त्या तं तर्पयेन्नृप । वाचकः पूजितो येन प्रसन्नास्तस्य देवताः ॥ गोभूहिरण्यरजतं वासांसि विविधानि च । दीयते वाचकायैव यदीच्छेत्सफलं श्रुतम् ॥ वाचके पूजिते चैव विष्णुर्भवति पूजितः। नारायणादिदेवाश्च वाचके निवसंति वै॥ यो व्यासरूपी कृष्णाग्रे कथां वै वाचयेत् सुधीः।सर्वसौख्यमिह प्राप्य सोंते विष्णुपुरीं व्रजेत्॥ दर्शनात्पूजनात्स्पर्शान्नमस्करात्स्तवादपि । अश्वमेधसहस्रस्य फलं तेषां न दुर्लभम् ॥ तस्मिन्नित्यं पूजिते हि हरिः पूज्यो हि वाचके ॥ श्राद्धे यस्य द्विजो भुंक्ते वाचकः श्रद्धयार्चितः । भवंति पितरस्तस्य तृप्ता वर्षशतं नृप॥" इति ॥ ५९ ॥ ततः कर्त्तव्यमाह—प्रसादेति द्वाभ्याम् । प्रसादो मोदकादिः । तुलसी प्रसिद्धा । माला पुष्पादिस्रक् एताः श्रोतृभ्योऽथ दीयतां दीयन्तामित्यर्थः । एकत्वमार्षम् । ततस्तदनंतरं मृदंगतालललितं मृदंगेन तालेन ललितं मनोहरं कीर्त्तनं कर्त्तव्यम् ॥ ६० ॥ जयशब्दान् जयेति वचनानि । नमः शब्दान् नमस्कारान् । च पुनः शंखशब्दान् शंखनादान् कारयेत् । विप्रेभ्यः च पुनः याचकेभ्यः भिक्षार्थिभ्यः वित्तं धनम् अन्नं च दीयताम् ॥ ६१ ॥

एतेन विधिना श्रावे तदक्षय्यतरं भवेत् ॥ अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥ ५६ ॥ एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत् ॥ जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ॥ ५७ ॥ अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः ॥ श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥ ५८ ॥ एवं नगाहयज्ञेऽस्मिन्समाप्ते श्रोतृभिस्तदा ॥ पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः ॥ ५९ ॥ प्रसादतुलसीमालाः श्रोतृभ्यश्चाथ दीयताम् ॥ मृदङ्गतालललितं कर्तव्यं कीर्तनं ततः ॥६०॥ जयशब्दान्नमःशब्दाञ्छङ्खशब्दांश्च कारयेत् ॥ विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम् ॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्कामसकामपरत्वेन समाप्तौ विशेषमाह—विरक्त इति । चेद्यदि विरक्तः कलत्राद्यसंसर्गी श्रोता भवेत्तदाऽपरेऽहनि अष्टमदिवसे गीता वाच्या वाचनीया । गृहस्थश्चेत्तर्हि कर्मशांतये कर्मणः शांत्यर्थं होमः कर्त्तव्यः ॥ ६२ ॥ तद्विधिमाह—प्रतिश्लोकमिति । प्रतिश्लोकंश्लोकं श्लोकं प्रति दशमस्य स्कंधस्य विधिना विधानतो जुहुयात् । विधानं तंत्र उक्तम् । यथा—"ब्रह्मस्तुतिं समुच्चार्य पूर्वार्द्धहवनं चरेत । वेदस्तुतिं पठित्वादावुत्तरार्द्धाहुतिं चरेत् ॥ प्रत्यध्यायं समाप्तौ च मंत्राष्टकमुदीरयेत् ।" इति । ॐ विष्णवे नमः । ॐ नारायणाय नमः । ॐ ब्रह्मणे नमः । ॐ शिवाय नमः । ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः । ॐ संकर्षणाय नमः । इत्यष्टाहुतयो देयाः । पायसं पयसि शृतं तंडुलम् । मधु क्षौद्रम् । सर्पिर्गोघृतम् । च पुनः तिलान्नादिकसंयुतं तिलाः कृष्णतिलाः, अन्नं यवादिः आदिना शर्करादिग्रहः, तैः संयुतं जुहुयात् ॥ ६३ ॥ प्रकारांतरमाह—अथवा यद्वा सुसमाहित एकाग्रचित्तः सन् गायत्र्या गायत्रीमंत्रेण हवनं कुर्यात । तत्र हेतुः—परमस्योत्कृष्टस्य पुराणस्य श्रीमद्भागवताख्यस्य तत्त्वतः तन्मयत्वात् गायत्रीस्वरूपत्वात् ॥ ६४ ॥ अशक्तश्चेत्थं कुर्यादित्याह—

विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि ॥ गृहस्थश्चेत्तदा होमः कर्तव्यः कर्मशांतये ॥ ६२ ॥ प्रतिश्लोकं च जुहुयाद्विधिना दशमस्य च ॥
पायसं मधु सर्पिश्च तिलान्नादिकसंयुतम् ॥ ६३ ॥ अथवा हवनं कुर्याद्गायत्र्या सुसमाहितः ॥ तन्मयत्वात्पुराणस्य परमस्य च तत्त्वतः ॥ ६४ ॥
होमाशक्तौ बुधो हौम्यं दद्यात्तत्फलसिद्धये ॥ नानाच्छिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥ ६५ ॥ दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम् ॥ तन
स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ॥ ६६ ॥

होमेति । होमाशक्तौ होमे अशक्तिरसामर्थ्यं तस्यां सत्यां बुधो विवेकी हौम्यं होमाय योग्यं द्रव्यं तत्फलसिद्धये होमफलनिष्पत्त्यर्थं दद्यात् । नानाच्छिद्राणि नानांतरायाः विघ्नरूपाः तेषां निरोधार्थं निरोधाय न्यूनताधिकताख्ययोः न्यूनता लिखितार्थस्य अपूर्णता, अधिकता मूलवचनप्रसङ्गादधिकान्यप्रसंगकथनं, ते आख्ये ययोरित्युत्तरश्लोकेनान्वेतव्यम् । हौम्यद्रव्याणि आश्वलायनसूत्रभाष्य उक्तानि । यथा—"पयो दधि यवागूश्च सर्पिरोदनतंदुलाः । सोमो मांसं तथा तैलमापो हौम्यं प्रकीर्त्तितम् ॥" इति । "कलौ निषेधान्मांसस्य तत्र देयं तु तद्विधम् । लवणं पयसा युक्तं मांसमित्युच्यते बुधैः ॥ पृथक् पृथक् तु तद्द्यान्माहिष्यं माषसंयुतम् ॥" इति । वस्तुतस्तु श्लोकोत्तरार्द्धे " तैलमापश्च सोमश्च व्रीहयश्च यवास्तिलाः" इति पाठो युक्तः । हरिनामतः सर्वं संपूर्णं स्यादित्याह—दोषयोरिति । न्यूनताधिकताख्ययोर्दोषयोः प्रशमार्थं निवृत्त्यर्थं च पुनः नामसहस्रकं विष्णोः सहस्रं नामानि पठेत् । तेन नामसहस्रपठनेन सर्वं सफलं स्यात् । अस्मात् हरिनाम्नः अधिकमन्यद्यतो यस्मात्कारणान्नास्ति । तदुक्तम्—"यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥” इतिवचनात् ॥६५॥६६॥ होमांते ब्राह्मणभोजनं कर्त्तव्यमित्याह—द्वादश इति । पश्चात् होमानंतरं द्वादश रविसंख्याकान्ब्राह्मणान् मधुपायसैः मिष्टान्नादिभिर्भोजयेत् । व्रतपूर्णत्वहेतवे व्रतस्य समाप्त्यर्थं सुवर्णं कांचनं, धेनुं पयस्विनीं, चात्सवत्सां दद्यात ॥ ॥ ६७ ॥ अतिधनाढ्ये श्रीमति च श्रोतरि कर्त्तव्यविशेषमाह—शक्ताविति चतुर्भिः । शक्तौ सामर्थ्ये सति पलत्रयमितम् ‘स्वर्णं षोडशमाषकम्’ इत्युक्त्या स्वर्णशब्दः षोडशमाषसंख्यावाचकः, ‘पलं सुवर्णाश्चत्वारः’ इति चतुष्षष्टिमाषात्मकं पलमित्युच्यते । तस्य त्रयं द्विनंदचंद्रमाषात्मकम् । तन्मितं तत्प्रमाणं सिंहं सिंहासनं सिंहस्य प्राधान्यात्तन्निर्देशः। तदुक्तम्—“विजयो जयदो जेता रिपुहंता शुभंकरः । दुःखहा धर्मदः शांतः सर्वारिष्टविनाशकः ॥ एते वै संनिधौ यस्मात्तव सिंहा महाबलाः । तेन सिंहासनेति त्वं वेदैर्मंत्रैश्च गीयसे ॥ त्वयि स्थितः शिवः शांतस्त्वयि सिंह सुरेश्वरः। त्वयि स्थितो हरिर्देवस्त्वदर्थं तप्यते तपः॥ नमस्ते सर्वदो भद्र भद्रदो भव भूपतेः। त्रैलोक्यजयसर्वस्व सिंहासन

द्वादश ब्राह्मणान्पश्चाद्भोजयेन्मधुपायसैः ॥ दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वहेतवे ॥ ६७॥ शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ॥ तत्रास्य पुस्तकं स्थाप्यं लिखितं ललिताक्षरम् ॥ ६८ ॥ संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ॥ वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥ ६९ ॥ आचार्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ॥ एवं कृते विधाने च सर्वपापनिवारणे ॥ ७० ॥ फलदं स्यात्पुराणं तु श्रीमद्भागवतं शुभम् ॥ धर्मार्थकाममोक्षाणां साधनं स्यान्न संशयः ॥ ७१ ॥ कुमारा ऊचुः ॥ इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥ श्रीमद्भागवतेनैव भुक्तिमुक्ती करे स्थिते ॥ ७२ ॥

नमोस्तु ते ॥” इति । विधाय कृत्वा तत्र तस्मिन् सिंहासने अस्य श्रीमद्भागवतस्य ललिताक्षरं यथा स्यात्तथा लिखितं पुस्तकं स्थाप्यम्। ‘ललिताक्षरैः’ इत्यपि पाठः । एतेन सीसकशिलाक्षरैरंकितानां पुस्तकानां दानं परास्तमिति गुरवः ॥ ६८ ॥ आवाहनाद्यैः आवाहनमाद्यं मुख्यं प्रधानं येषु ते तथा तैरुपचारैः षोडशभिस्तत्पुस्तकं संपूज्य वस्त्रभूषणगंधाद्यैः पूजिताय अर्चिताय यतात्मने यतो वशीकृत आत्मा मनो येन स तथा तस्मै ॥ ६९ ॥ आचार्याय ब्राह्मणाय सदक्षिणं दक्षिणायुतं दत्त्वा सुधीः सुबुद्धिमान् नरो मनुष्यभवबंधनैः संसारबंधैर्मुक्तः स्यात । एवं प्रकारेण विधाने कृते सति । कीदृशे—सर्वपापनिवारणे सर्वपापविनाशके । च पूर्तौ ॥ ७० ॥ धर्मार्थकाममोक्षाणां चतुर्वर्गाणां साधनं सिद्धिहेतुकं स्यात, शुभं मङ्गलरूपं श्रीमद्भागवतं फलदं स्यात, न संशयः संशयो नास्ति ॥ ७१ ॥ प्रकरणमुपसंहरति—इतीति । इत्येवं ते तुभ्यं सर्वं कथितं, भूयः पुनः किं श्रोतुमिच्छसि । श्रीमद्भागवतेन शास्त्रेण । एव निश्चये । भुक्तिमुक्ती करे हस्ते स्थिते स्तः ॥ ७२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोगमोक्षप्रदायिनी कथेयमित्याह—इतीति । इत्येवमुक्त्वा ते कुमारा महात्मान उदारचित्ताः पूज्या वा सर्वपापहरां सर्वपापहंत्रीं पुण्यां पुण्यरूपां पुण्यवर्द्धिनीं वा भुक्तिमुक्तिप्रदायिनीं भोगमोक्षप्रदात्रीं भागवतीं कथां प्रोचुः ॥ ७३ ॥ केषामित्याह—शृण्वतामिति । नियतात्मनां नियतः वशीकृत आत्मा मनो यैः ते तथा तेषां सप्ताहं शृण्वतां सर्वभूतानां सर्वप्राणिनामग्रे कथां प्रोचुरिति पूर्वपद्यस्थेनान्वयः।ततस्तदनंतरं यथाविधि विधिमनतिक्रम्य पुरुषोत्तमं देवं श्रीनारायणं तुष्टुवुः॥ ७४ ॥स्तुत्यंते सपुत्राया भक्तेः परा तुष्टिरभूदित्याह—तदंत इति । तदंते स्तुत्यंते ज्ञानवैराग्यभक्तीनां परा श्रेष्ठा पुष्टता अभूत् । च पुनः सर्वभूतमनोहरं परमम् उत्कृष्टं तारुण्यं तरुणस्य भावोऽभूत् ॥ ७५ ॥ नारदस्य कृतकृत्यता जातेत्याह—नारद इति । नारदश्च कृतार्थः कृतो जातोऽर्थः प्रयोजनं यस्य स तथाऽभूत् । क्व सति—स्वीये आत्मीये मनोरथे मनईप्सिते सिद्धे सति । अत एव पुलकीकृतसर्वांगः पुलकीकृतानि सरोमांचितानि सर्वाणि अंगानि यस्य स तथा । परमः सर्वोत्तमश्चासौ आनंदश्च परमानंदस्तेन संभृतः पूर्णः ॥ ७६ ॥ कथां

सूत उवाच ॥ इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथाम् ॥ सर्वपापहरां पुण्यां भुक्तिमुक्तिप्रदायिनीम् ॥ ७३ ॥ शृण्वतां सर्वभूतानां सप्ताहं नियतात्मनाम् ॥ यथाविधि ततो देवं तुष्टुवुः पुरुषोत्तमम्॥७४॥तदन्ते ज्ञानवैराग्यभक्तीनां पुष्टता परा॥ तारुण्यं परमं चाभूत्सर्वभूतमनोहरम् ॥७५॥ नारदश्च कृतार्थोऽभूत्सिद्धे स्वीये मनोरथे ॥ पुलकीकृतसर्वांगः परमानन्दसंभृतः ॥ ७६ ॥ एवं कथां समाकर्ण्य नारदो भगवत्प्रियः ॥ प्रेमगद्गदया वाचा तानुवाच कृताञ्जलिः॥७७॥ नारद उवाच ॥ धन्योऽस्म्यनुगृहीतोस्मि भवद्भिः करुणापरैः॥ अद्य मे भगवाँल्लब्धः सर्वपापहरो हरिः॥७८॥ श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः ॥ वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते ॥ ७९ ॥ सूत उवाच ॥ एवं ब्रुवति वै तत्र नारदे वैष्णवोत्तमे ॥ परिभ्रमन्समायातः शुको योगेश्वरस्तदा ॥ ८० ॥

श्रुत्वा नारद आहेत्याह—एवमिति।एवं प्रकारेण कथां समाकर्ण्य श्रुत्वा भगवत्प्रियः भगवतः प्रियः,भगवान् प्रियो यस्येति वा स नारदः कृतांजलिः कृतः अञ्जलिर्येन स तथा प्रेमगद्गदया प्रेम्णा गद्गदरूपया वाचा वाण्या तान्सनकादीन् उवाच ॥ ७७ ॥ नारदः स्वस्याहोभाग्यतां मन्यमानस्तद्गुणवर्णनपूर्वकं श्रीहरेः प्राप्तिमाह—धन्य इति । अहं धन्योऽस्मि महाभाग्योऽस्मि यतः करुणापरैर्दयापरायणैः भवद्भिरनुगृहीतः कृपापात्रीकृतोऽस्मि । अद्य इदानीं सर्वपापहरः हरिर्भगवान् मे मया लब्धः प्राप्तः, इत्यनुग्रहफलं सूचितम् ॥ ७८ ॥ श्रवणश्रैष्ठ्यं निरूपयति—श्रवणमिति । हे तपोधनाः सर्वधर्मेभ्यः श्रवणं वरं श्रेष्ठमहं मन्ये । यतः यस्माद्धेतोः वैकुंठस्थो वैकुंठलोकस्थायी कृष्णो यस्यास्य श्रीमद्भागवतस्य श्रवणात् लभ्यते प्राप्यते॥ ७९ ॥ इत्थं नारदस्य वदतः सतः शुकागमनं जातमित्याह—एवमिति । तत्र समाजे वैष्णवोत्तमे नारदे एवं ब्रुवति सति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा तस्मिन्नवसरे योगेश्वरो महायोगी शुकः शुकदेवः परिभ्रमन्पर्यटन्समायातः ॥ ८० ॥ सिंहासनसमीपे तदागमनं जातमित्याह—तत्रेति । व्यासात्मजः व्यासपुत्रः, सदा योगमहिम्ना षोडशवार्षिकः षोडशवर्षवयाः ज्ञानमेव महाब्धिर्महोदधिस्तस्मिंश्चंद्रमाः कथावसाने कथांते निजलाभपूर्णः आत्मानंदप्राप्त्या पूर्णः प्रेम्णा प्रेमतः शनैःशनैः मंदं मंदं भागवतं पठन्सन् तत्र कथास्थाने आययौ प्राप्तः ॥ ८१ ॥ निरीक्ष्योत्थिता जनास्तं सत्कृतवंत इत्याह—दृष्ट्वेति । सदस्याः सभ्याः परमोरुतेजसं परमम् अत्युत्कृष्टं उरु महत् तेजो यस्य स तथा तम् आगतं प्राप्तं तं शुकदेवं दृष्ट्वा सद्यस्तत्क्षणमेव समुत्थाय स्वासनेभ्य उत्थानं कृत्वा तस्मै प्रीत्या महासनं सर्वोत्तमासनं ददुः दत्तवंतः । सुरर्षिर्नारदस्तम् अपूजयत् । सुखं यथा स्यात्तथा स्थितः महासनोपविष्टः शुकः अमलां शुद्धां गिरं वाचं यूयं संशृणुत इत्यवदत ॥ ८२ ॥ "वेदवृक्षसमुद्भूतं श्रीमद्भागवतं फलम् । शुकमुखाद्गलितं भूमौ पिबंतु रसिका अहो ॥" इत्याह—निगमेति । निगमो वेदः स एव कल्पतरुः कल्पवृक्षस्तस्य फलं श्रीमद्भागवताख्यं रसं रसरूपं हेयांशहीनत्वात् । शुकमुखात्

तत्राययौ षोडशवार्षिकः सदा व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः ॥ कथावसाने निजलाभपूर्णः प्रेम्णा पठन्भागवतं शनैःशनैः ॥ ८१ ॥ दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददुर्महासनम् ॥ प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितोऽवदत्संशृणुतामलां गिरम् ॥ ८२ ॥ श्रीशुक उवाच ॥ निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ८३ ॥ धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥ श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ ८४ ॥

भुवि गलितं पृथिव्यां पतितम्, अमृतद्रवसंयुतम् अमृतद्रवेण संयुतं, पक्षे अमृतस्य मोक्षस्य द्रवः प्रवाहस्तेन संयुतं, लयो मोक्षस्तमभिव्याप्य मुहुः पुनःपुनः यूयं पिबत, हे रसिकाः भावुकाः हे रसविशेषभावनानिपुणाः । अहो इति अलभ्यलाभं सूचयति ॥ ८३ ॥ "कर्मभक्तिज्ञानभेदाद्वेदाः काण्डत्रयात्मकाः ॥ तेभ्यः श्रेष्ठतरा चेयं सुखमोक्षप्रदायिनी ॥" इत्याह—धर्म इति । अत्र श्रीमद्भागवते सतां सज्जनानां निर्मत्सराणां शांतानां परमो धर्मोऽस्ति । कीदृशः—प्रोज्झितकैतवः प्रकर्षेण उज्झितं त्यक्तं कैतवं कपटं यस्मात्स तथा । 'अत्रपरम' इत्येकपदे अपगता त्रपा लज्जा येषां ते अपत्रपा नास्तिका धूर्ता वा तान्प्रमते आकर्षतीति तथा धातूनामनेकार्थत्वात् । एतेन वेदबाह्यानामपि रुचिकरमिदं शास्त्रमिति कर्मकांडतः श्रेष्ठतोक्ता । अत्र वस्तु उपास्यं परमार्थरूपं तापत्रयोन्मूलनं तापत्रयम् उन्मूलयतीति तथा । अत एव शिवदं कल्याणप्रदमित्युपासनाकांडतोऽप्याधिक्यं सूचितम् । वास्तवं पारमार्थिकम् अविनाशि ब्रह्म वेद्यं ज्ञातुं योग्यमिति ज्ञानकांडतः श्रैष्ठ्यमुक्तम् । महामुनिकृते 'वेदव्यासो महामुनिः' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वचनान्महामुनिर्वेदव्यासः तेन कृते अत्र अस्मिञ्छ्रीमद्भागवते शास्त्रे शुश्रूषुभिः श्रोतुमिच्छद्भिः पुरुषैस्तत्क्षणादेव हृदि ईश्वर अवरुध्यते प्राप्यते । कृतिभिः पुण्यजनैः अपरैः शास्त्रैः सद्यः अवरुध्यते किं वा, अर्थान्नावरुध्यत इति कर्तृतोप्युत्कर्षः सूचितः ॥ ८४ ॥ पुराणोत्तमस्यैतस्य ज्ञानाद्याश्रयस्य श्रवणादितो मुक्तिर्भवतीत्याह—श्रीमदिति । श्रीमद्भागवतं पुराणतिलकं पुराणानां तिलकं शोभाकरं मुख्यमित्यर्थः । वैष्णवानां यदेव धनमस्ति । यस्मिन् शास्त्रे पारमहंस्यं परमहंसैः प्राप्यं "ब्रह्माहमस्मि" इति महावाक्येनानुभूतम् अमलं शुद्धं परं ज्ञानं ब्रह्मात्मैक्यरूपं गीयते । यत्र यस्मिन् शास्त्रे ज्ञानविरागभक्तिसहितं नैष्कर्म्यम् ईश्वरार्पणेनांतःकरणशुद्धिद्वारा कर्मादीनां मोक्ष साधनत्वम् आविष्कृतं प्रकटीकृतम् । तच्छास्त्रं भक्त्या शृण्वन् प्रपठन् विचारणपरो भवन् नरो विमुच्यते विशेषेण मुक्तो भवति ॥ ८५ ॥ दुर्लभं रसं पातव्यमेवेत्याह—स्वर्ग इति । अयं कथामृतरसः स्वर्गे नास्ति । च पुनः सत्ये सत्यलोके नास्ति । कैलासे नास्ति । वैकुंठे नास्ति । अतोऽस्मात्कारणात् हे सद्भाग्या यूयं पिबत कर्हिचित्

श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं यस्मिन्पारमहंस्यमेवममलं ज्ञानं परं गीयते ॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्प्रपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥ ८५ ॥ स्वर्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः ॥ अतः पिबत सद्भाग्या मामा मुञ्चत कर्हिचित् ॥ ८६ ॥ सूत उवाच ॥ एवं ब्रुवाणे सति बादरायणौ मध्ये सभाया हरिराविरासीत् ॥ प्रह्लादबल्युद्धवफाल्गुनादिभिर्वृतः सुरर्षिस्तमपूजयच्च तान् ॥ ८७ ॥ दृष्ट्वा प्रसन्नं महदासने हरिं ते चक्रिरे कीर्तनमग्रतस्तदा ॥ भवो भवान्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ॥ ८८ ॥

कदापि मा मुंचत मा मुंचत । वीप्सा हेयत्वनिरासार्था ॥ ८६ ॥ इति वदति शुके हरिरागत इत्याह—एवमिति । बादरायणौ बदरीणां समूहो बादरं तदयनं स्थानं यस्य स बादरायणो व्यासस्तस्यापत्यं बादरायणिः तस्मिन् बादरायणौ श्रीशुके एवं ब्रुवाणे इत्थं वदति सति सभाया मध्ये प्रह्लादबल्युद्धवफाल्गुनादिभिः प्रह्लादः प्रसिद्धः, बलिर्विरोचनपुत्रः, उद्धवो देवभागसुतः, फाल्गुनोऽर्जुनस्तदादिभिर्भक्तैर्वृतः संयुक्तो हरिः श्रीनारायण आविरासीत प्रकटोभूत् । सुरर्षिर्नारदस्तं हरिं तान्प्रह्लादादींश्चापूजयत् ॥ ८७ ॥ तुष्टस्य हरेरग्रे कीर्तनं ते चक्रुरित्याह—दृष्ट्वेति । महदासने महासिंहासनोपरि स्थितं प्रसन्नं हरिं दृष्ट्वा तदा ते प्रह्लादादयस्तदग्रतः हरेः पुरतः कीर्तनं चक्रिरे "कीर्तनं मुनिभिः प्रोक्तं हरेर्लीलाप्रगायनम्" इति । भवान्या पार्वत्या सह भवो महादेवः तत्रागमत्तस्मिन्स्थान आगतः । कमलासनो ब्रह्मा तु अप्यर्थे । आगमत् ।

१ आत्माभाव आर्षः, महतामासनमिति वा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमर्थम्—कीर्त्तनदर्शनाय कीर्त्तनदर्शनार्थम् ॥ ८८ ॥ कीर्तनेऽधिकारविशेषेण गायकवादकान्निरूपयति—प्रह्लाद इति द्वाभ्याम्। प्रह्लादः तालधारी तालं धर्तुं शीलमस्येति तथा। च एनः तरलगतितया शीघ्रगतित्वेन उद्धवः कांस्यधारी 'कांस्यतालादिकं घनम्' इत्यमरोक्तेर्झल्लर्यादिधारी। सुरर्षिः नारदो वीणाधारी। स्वरकुशलतया स्वरे कुशलता नैपुण्यं तया रागकर्त्ताऽर्जुनः,। अभूदिति क्रिया सर्वत्रान्वेतव्या। इंद्रः मृदंगमवादीत्। यत्र कीर्त्तने जयजयसुकराः जयजयशब्दोच्चारिणः ते कुमाराः सनकाद्या अभूवन्। अग्रे सर्वेषामग्रभागे रसविरचनया रसानां विरचनया विवेचनेन भाववक्ता व्यासपुत्रो बभूव। रसा दशधा। तदुक्तम्—"रौद्राद्भुतश्च शृंगारो हास्यं वीरो दया तथा। भयानकश्च बीभत्सः शांतः सप्रेमभक्तिकः॥" इति ॥ ८९ ॥ सुतेजसां तारुण्येन सुदीप्तिभाजां भक्त्यादिकानां भक्तिज्ञानवैराग्याणां त्रिकं तत्र तस्मिन्काले मध्ये सभामध्ये नटवत् ननर्त्त। अलौकिकं दिव्यम् एतत् कीर्त्तनमीक्ष्य आर्ष मिदम्, ईक्षित्वा प्रसन्नस्तुष्टो हरिरपि तत्तदा वच अब्रवीत ॥ ९० ॥ तदाह—मत्त इति। हे भागवता मत्तः सकाशात् यूयं वरं वृणुध्वं स्वीकुरुत। सांप्रतम् अद्य कथाकीर्त्त

प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्ताऽर्जुनोऽभूत् ॥ इन्द्रोऽवादीन्मृदंगं जयजयसुकराः कीर्तने ते कुमारा यत्राग्रे भाववक्ता रसविरचनया व्यासपुत्रो बभूव ॥ ८९ ॥ ननर्त मध्ये त्रिकमेव तत्र भक्त्यादिकानां नटवत्सुतेजसाम् ॥ अलौकिकं कीर्तनमेतदीक्ष्य हरिः प्रसन्नोऽपि वचोऽब्रवीत्तत् ॥ ९० ॥ मत्तो वरं भागवता वृणुध्वं प्रीतः कथाकीर्तनतोऽस्मि सांप्रतम् ॥ श्रुत्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते ॥ ९१ ॥ नगाहगाथासु च सर्वभक्तैरेभिस्त्वया भाव्यमतिप्रयत्नात् ॥ मनोरथोऽयं परिपूरणीयस्तथेति चोक्त्वान्तरधीयताच्युतः ॥ ९२ ॥

नतोऽहं प्रीतोस्मि। इत्येवं तद्वाक्यं तस्य हरेर्वचनं श्रुत्वाऽऽकर्ण्य प्रेमार्द्रचित्ताः प्रेम्णा आर्द्रं द्रवीभूतं चित्तं येषां ते तथाऽतिप्रसन्ना अत्यानंदयुक्ताः ते प्रह्लादाद्या हरिमूचिरे जगदुः ॥ ९१ ॥ तद्वाक्यमाह—नगाहेति। नगाहगाथासु सप्ताहकथासु एभिः सर्वभक्तैः सहातिप्रयत्नात् अतिप्रयत्नेन त्वया भाव्यं स्थातव्यम्। अयं मे मम मनोरथः भवता पूरणीयः। तथास्तु एवमस्तु इत्युक्त्वाऽच्युतो हरिरंतरधीयत अदृश्योऽभवत्। अत्रांते गाथाशब्देन प्रक्रमोपसंहारयोः कथायामेव तात्पर्यमस्ति न तु पाठे सप्ताहे इति सूचितं भवति। तदुक्तम्—"उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम्। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ॥" इति। प्रक्रमे 'परीक्षिते कथां वक्तुम्' इत्युक्तम्। "वेदोपनिषदां साराज्जाता भागवती कथा। श्रीमद्भागवतान्मुक्तिः सप्ताहे वाचनं कुरु" ॥ "धन्या भागवती वार्त्ता प्रेतपीडाविनाशिनी" इत्युपसंहारः। अभ्यासः—"गयाश्राद्धशतेनापि न मे

१ द्वौ एकं लिंगं वा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तिर्भविष्यति" इति प्रसंगे । "कंपंते सर्वपापानि सप्ताहश्रवणे स्थिते । अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति ॥" इत्यपूर्वता । "किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः । श्रीमद्भागवतं शास्त्रं मुक्तिदाने प्रगर्जति॥"इति फलम् । "सर्वेषां पश्यतां भेजे विमानं धुंधुलीसुतः । द्वादशात्मा प्रयागश्च" इत्याद्यर्थवादः। "परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने" इत्युपपत्तिरिति विरोधपरिहारः । 'नगाहगाथासु च सर्वभक्तैः' इत्युपसंहारश्च तात्पर्यनिर्णये लिंगं हेतुरित्यर्थः ॥ ९२ ॥ ततः किं वृत्तमित्यत आह—तत इति । ततो हरेरंतर्धानानंतरं तच्चरणेषु तस्य हरेः चरणेषु पादेषु, बहुत्वं छंदोनुरोधात् । नारदः अनमत् प्रणतोऽभूत् । वस्तुतस्तु 'तच्चरणारविंदयोर्ऋषिः' इति पाठः। तथा तेनैव प्रकारेण शुकादींस्तापसांश्चाप्यनमदिति । समाप्तौ मंगलार्थोऽथ शब्दः । पीतकथामृताः पीतं कथाऽमृतं यैस्ते तथा अत एव प्रहृष्टाः प्रसन्नाः परिनष्टमोहाः परिनष्टो सर्वतो नाशं यातो मोहो येषां ते तथा ते शुकाद्याः सर्वे ययुः ॥ ९३ ॥ "शुकेन ससुता भक्तिः स्वशास्त्रे रक्षिता ध्रुवम्" इत्याह—भक्तिरिति । तदा निर्गमसमये

ततोऽनमत्तच्चरणेषु नारदस्तथा शुकादीनपि तापसांश्च ॥ अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथामृतास्ते ॥९३॥ भक्तिः सुताभ्यां सह रक्षिता सा शास्त्रे स्वकीयेऽपि तदा शुकेन॥ अतो हरिर्भागवतस्य सेवनाच्चित्तं समायाति हि वैष्णवानाम् ॥ ९४ ॥ दारिद्र्यदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानाम् ॥ संसारसिन्धौ परिपातितानां क्षेमाय वै भागवतं प्रगर्जति ॥ ९५ ॥ शौनक उवाच ॥ शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः ॥ सुरर्षये कदा ब्राह्मैश्छिंधि मे संशयं त्विमम् ॥ ९६ ॥

सुताभ्यां ज्ञानवैराग्याभ्यां सह सा प्रसिद्धा भक्तिः स्वकीये शास्त्रे श्रीमद्भागवताख्ये शुकेन रक्षिता स्थापिता । अतोऽस्माद्धेतोः भागवतस्य सेवनात् वैष्णवानां चित्तं मनो हरिः समायाति समागच्छति । हि निश्चयेन ॥ ९४ ॥ अनाधाराणामाधारभूतमिदं शास्त्रमित्याह--दारिद्र्येति । दरिद्रस्य भावो दारिद्र्यं निर्धनता, दुःखं रोगादिजं, ज्वरस्तापस्तैर्दाहितानां दग्धानां, माया कपटादिरूपा सैव पिशाची तया परिमर्दितानां व्याकुलानाम् "मायाया द्वादशार्थो वै पुराणे आत्मपूर्वके द्रष्टव्या अथ संग्राह्या विबुधैश्च प्रयत्नतः ॥" संसारसिंधौ संसारसागरे परिपातितानां प्रारब्धकर्मभिः निमग्नानां क्षेमाय कल्याणार्थं वै निश्चयेन भागवतं प्रगर्जति उच्चैस्तरां शब्दायते ॥ ९५ ॥ "कस्मिन्कस्मिंस्तु काले वै नृपादिभ्यः शुकादिभिः । प्रोक्तं भागवतं सूतं परिपृच्छति शौनकः ॥" इत्याह–शुकेनेति । राज्ञे परीक्षिते शुकेन भागवतं कदा प्रोक्तम्, पुनः गोकर्णेन कदा प्रोक्तम्, सुरर्षये नारदाय ब्राह्मैः सनकादिभिः कदा उक्तम्, इमं मे मम संशयं संदेहं त्वं छिंधि अपाकुरु ॥९६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उत्तरयति—आकृष्णेति त्रिभिः । आकृष्णनिर्गमात् कृष्णस्य स्वधामगनं मर्यादीकृत्य त्रिंशद्वर्षाधिकगते त्रिंशद्वर्षेभ्यः अधिकं कालं गतः तथाभूते कलौ सति नभस्ये भाद्रपदे मासे नवमीतः कथारंभं शुकः अकरोत्कृतवान् ॥ ९७ ॥ परीक्षिच्छ्रवणांते परीक्षिच्छ्रवणांतात् । पंचम्यर्थे सप्तमीयम् । तथा पाठ एव इति गुरवः । च पुनः वर्षशतद्वये वर्षाणां शतं वर्षशतं तस्य द्वयं यस्मिन्स तथा तस्मिन्कलौ गते सति शुचौ आषाढमासे शुद्धे शुक्लपक्षे नवम्यां च तिथौ धेनुजो गोकर्णः कथामकथयत् ॥ ९८ ॥ तस्मादपि कालात् त्रिंशद्वर्षगते त्रिंशद्वर्षाणि गतानि यस्मिन्स तथा तस्मिन् एवंभूते कलौ प्राप्ते सति ऊर्ज्जे कार्त्तिकमासे सिते पक्षे शुक्ले पक्षे नवम्यां तिथौ ब्रह्मणः सुताः सनकाद्या ऊचुः ॥ ९९ ॥ प्रकरणं समाप्तमित्याह—इतीति । हे अनघ यत्त्वयाऽहं पृष्टः एतदित्येवं ते तुभ्यं समाख्यातं कथितम् । कलौ युगे भागवती भागवतसंबंधिनी वार्त्ता कथा भवरोगविनाशिनी संसाररोगहंत्री ॥ १०० ॥ सद्भिरिदं पेयमित्याह—कृष्णेति । कृष्णप्रियं कृष्णस्याभीष्टं सकलकश्मलनाशनं सकलपापविनाशनं च पुनः मुक्त्येक

सूत उवाच ॥ आकृष्णनिर्गमात्त्रिंशद्वर्षाधिकगते कलौ ॥ नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत् ॥ ९७ ॥ परीक्षिच्छ्रवणान्ते च कलौ वर्षशत द्वये ॥ शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथाम् ॥ ९८ ॥ तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते सति ॥ ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ॥ ९९ ॥ इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयाऽनघ ॥ कलौ भागवती वार्ता भवरोगविनाशिनी ॥ १०० ॥ कृष्णप्रियं सकलकश्मलनाशनं च मुक्त्यैकहेतुमिह भक्तिविलासकारि ॥ सन्तः कथानकमिदं पिबतादरेण लोके हितार्थपरिशीलनसेवया किम्॥१०१॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ॥ परिहर भगवत्कथासु मत्तान्प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ १०२ ॥ असारे संसारे विषयविषसंगाकुलधियः क्षणार्धं क्षेमार्थं पिबत शुकगाथाऽतुलसुधाम् ॥ किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्येककथने ॥ १०३ ॥

हेतुं मुक्तेरेककारणम् इह लोके भक्तिविलासकारि भक्तेर्विलासं क्रीडारूपं कर्त्तुं शीलमस्येति तथा तत् इदं कथानकं हे संतः आदरेण यूयं पिबत पानं कुरुत । लोके जगति हितार्थपरिशीलनसेवया हितो वांछितश्चासौ अर्थश्च हितार्थः तस्य परिशीलनं चिंतनं तस्य सेवया किं, न किमपि ॥ १०१ ॥ वैष्णवेभ्यो यमोपि बिभेतीत्याह—स्वपुरुषमिति । पाशहस्तं पाशो हस्ते करे यस्य स तथा तं स्वपुरुषं स्वदूतं वीक्ष्य दृष्ट्वा तस्य दूतस्य कर्णमले यमः वदति—भगवत्कथासु मत्तान्प्रमादिनः त्वं परिहर मा आनय, अन्यनृणां हरिविमुखानां नृणामहं प्रभुः स्वाम्यस्मि । किल निश्चयेन वैष्णवानां प्रभुः—दंडकर्त्ता न, अप्येव तेषां ममापि पूज्यत्वात् ॥ १०२ ॥ असारे सारभूते यमित्याह—असार इति । असार साररहिते संसारे विषयविषसंगाकुलधियः विषयाः शब्दादयः "रूपं शब्दो गंधरसस्पर्शाश्च विषया अमी" इत्यमरोक्तेः । ते एव विषं तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संगस्तेन आकुला व्याप्ता धीर्बुद्धिर्येषां ते तथा क्षणार्द्धम् अर्द्धक्षणमपि शुकगाथातुलसुधां शुकस्य गाथा श्रीमद्भागवती कथा सा एव अतुलसुधा अनुपमाऽमृतरूपा तां क्षेमार्थं कल्याणार्थं यूयं पिबत । कुत्सितकथे कुत्सिता निंदिता कथा यस्मिन्स तथा तस्मिन् कुपथे कल्सितः पंथा मार्गः कुपथस्तस्मिन्कुमार्गे व्यथ निष्फलं यथा स्यात्तथा किमर्थं कस्मै प्रयोजनाय ययं व्रजत गच्छत । ययतः श्रवणगतमुक्त्येककथने श्रवणाद्गता प्राप्ता मुक्तिस्तस्या एककथने मुख्यप्रवचने 'एके मुख्यान्यकेवलाः' इत्य मरोक्तेः । परीक्षित्साक्षी भवति । 'श्रवणगतमुक्त्युक्तिकथने' इति पाठे मुक्तिश्च भुक्तिश्च इति मुक्त्युक्ती । 'वर्णस्य वर्णयोर्लोपः' इति शिक्षायां शौनकोक्तेर्भलोपात् श्रवणगत मुक्त्युक्ती तयोः कथने इति केचित् । तत्र दोषः, श्रवणादेः परीक्षितो मुक्तिः, भोगानुक्तेस्तन्मंदं, दिव्यभोगानामपि लाभात् । गुरवस्तु विशेष्यवाचकपदानां सति विशेषणपदसंनिधाने विशेष्यमात्रपरत्वमिति युक्त्या श्रवणगतमुक्तिकथने इत्येवार्थो यक्त इत्याहुः ॥१०३॥ "कथा कंठस्थिता चेयं वैकुंठपतिरेव सः" इत्याह—रसेति । रसप्रवाहसंस्थेन रसः प्रेमरूपः शांतरूपो वा तस्य प्रवाहस्तस्मिन् संतिष्ठते इति तथा स तेन श्रीशुकेन ईरिता कथिता कथा येन पुंसा कंठे संबध्यते धार्यते स पुमान् वैकुंठप्रभुः वैकुंठस्वामी

रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा ॥ कण्ठे संबध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥ १०४ ॥ इति च परमगुह्यं सर्वसिद्धान्तसिद्धं सपदि निगदितं ते शास्त्रपुंजं विलोक्य ॥ जगति शुककथा तो र्मलं नास्ति किञ्चित्पिब परसुखहेतोर्द्वादशस्कंधसारम् ॥ १०५ ॥ एतां यो नियततया शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे ॥ तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्न हि भुवने किमप्यसाध्यम् ॥ १०६ ॥ इति श्रीपद्मपुराण उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये श्रवणविधिकथनं नाम षष्ठोऽध्यायः ॥६॥ श्रीकृष्णार्पणमस्तु ॥ समाप्तमिदं श्रीमद्भागवतमाहात्म्यम् ॥

स्यात् ॥ १०४ ॥ परं रहस्यं नान्यदस्तीत्याह—इतीति । इति च इदमेव परमं गुह्यम् उत्कृष्टं गोप्यं रहस्यं सर्वसिद्धांतसिद्धं सर्वेषु सिद्धांतेषु सिद्धं प्रसिद्धं सपदि शीघ्रं शास्त्रपुंजं शास्त्रसंघं विलोक्य दृष्ट्वा ते तुभ्यं मया निगदितमुक्तम् । जगति संसारे शुककथातः श्रीमद्भागवतकथातो निर्मलं शुद्धिकरं किंचिदन्यन्नास्ति । परसुखहेतोः परं सुखं मोक्षाख्यं तस्य हेतोर्द्वादशस्कंधसारं द्वादश स्कंधा एव सारः, द्वादशस्कंधेषु वा सारः सारांशस्तं त्वं पिबेति सूतोक्तिः॥ १०५॥ श्रोतृवक्त्रोः कृतकृत्यतामाह—एतां कथां नियततया नियमेन भक्त्या यः शृणोति, एतां कथां शुद्धवैष्णवाग्रे यश्च कथयति तौ द्वौ सम्यक् विधिकरणाद्विधानकरणेन सम्यक् फलं लभेते प्राप्नुयाताम् । याथार्थ्यात् वास्तवार्थत्वात् भुवने 'विष्टपं भुवनं जगत्" इति कोशात् । जगति असाध्यं किमु, अपि तु न किमपि ॥ १०६ ॥ रामपूर्वप्रतापेन ऋजुटीका कृता त्वियम् । राधाकृष्णमुदे भूयाज्जयपत्तनवासिना ॥ १ ॥ इति श्रीशेखावाट्यंतर्गतविजयपुरनिवासिव्राजलालिपंडितरामप्रतापशर्मविरचितायां श्रीमद्भागवतमाहात्म्यटीकायामृजुनाम्न्यां षष्ठोऽध्यायः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गजाब्धिगोभूसंख्याते वैक्रमीये सुवत्सरे ॥ बाहुले शुद्धपंचम्यां टीकेयं पूर्णतामगात् ॥ १ ॥ पठंतु बालकाः सर्वे विवदंतां विवादिनः ॥ मनीषिणः शोधयंतु दुष्टा नश्यंतु मत्सरात् ॥ २ ॥ यथामति कृता चेयं दृश्यतां शुद्धभावतः ॥ परिशोध्या बुधैः प्रेम्णा श्रमचिंताविचारतः ॥ ३ ॥ "अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम्" इत्यारभ्य "धावंतो प्याययुः सर्वे प्रथमं ये च वैष्णवाः" "विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे" इति च मध्ये " यश्चैनां कथयति शुद्धवैष्णवाग्रे " इत्यंते चोक्तत्वाद्वैष्णवानां श्रेष्ठत्वमुक्तम्, तेषां च शालग्रामपूजनं तुलसीमंजर्याद्यर्पणं गोपीचंदनधारणं च मुख्यो धर्मोऽस्ति, तदर्थं तेषां निरूपणं पुरश्चरणविधिश्च । तथाहि पाद्मे—"मस्तके धारणं कार्यं कर्णयोश्च तथैव च ॥ कंठदेशे च विपुलं बाह्वोश्च मणिबंधके ॥ १ ॥ लसीमञ्जरीश्चैव पंचांगे धारयेन्नरः । आजन्मपातकं धूय विष्णुलोके स गच्छति ॥ २ ॥ " "गोपीचंदनमाहात्म्ये इतिहासः पुरातनः । कांबोजसंज्ञिते देशे वैश्योभूद्वैष्णवोत्तमः ॥ सुशीलो विष्णुभक्तश्च कामक्रोधविवर्जितः । तस्य द्वार्य्येकदा मार्गी ह्यावेद्य संस्थितो बहिः ॥ न ज्ञातो वैष्णवेनैव रात्रौ सुप्तोऽभवद्द्विजः । निद्रायुक्तस्तु पांथः सोप्यहिना दंशितो भृशम् ॥ मृतमात्रस्य तस्यैव मूषकः स्पर्शतां गतः । क्षुधया पीड्यमानोपि कृत्वा सुविवरं महत् ॥ गोपीचंदनार्द्रमुखो तद्देहं संस्पृशन्खलु । गोपीचंदनसंयोगाद्गतोसौ विष्णुमंदिरम् ॥ अत एव मनुष्यैस्तु कर्त्तव्यं तिलकं शुभम् ॥ गायत्र्याः पुरश्चरणे यत्फलं प्राप्यते द्विजैः । तत्फलं प्राप्यते विप्र श्लोकार्द्धश्रवणेन वै ॥ आश्रुत्वा भगवद्वार्त्तां यो भुंजीत गृहेषु वा । अन्नं पीयेत पानं वा पापभुक् सोऽधमो मतः ॥ तदन्नं पापरूपं च तज्जलं मदिरासमम् । अत एव मनुष्यैस्तु विष्णुधर्मपरायणैः ॥ श्रोतव्यं च प्रयत्नेन नित्यं भागवतं शुभम् ॥ ब्राह्मणानां यथा संध्या वैष्णवानां तथा द्विजाः । श्रीमद्भागवतं शास्त्रं सत्यं सत्यं वदामि ते ॥ अष्टोत्तरशतं चास्य कार्यं पारायणं शुभम् । केदारे उदकं पीत्वा पुनर्जन्म न विद्यते ॥ नरस्यैव तथा तस्य पुनर्जन्म न विद्यते । स एव वैष्णवो धन्यः पारायणशताधिकृत ॥ श्रीभागवतमंत्रस्य ऋषिः प्रोक्तश्च नारदः । ब्रह्म बीजं तथा प्रोक्तं छंदश्च बृहती स्मृतम् ॥ गुणातीतोऽव्ययश्चैव श्रीकृष्णो देवता स्मृतः । भवरोगहारिणी चैव भक्तिः शक्तिरिहोच्यते ॥ ज्ञानं तथा च वैराग्यं कीलकं वै तथा स्मृतम् । इदं मंत्रार्थविधिवज्जाप्यं मंत्रफलप्रदम् ॥ ॐकारं पूर्वमुच्चार्य शिवेनोत्कीलयेन्नरः । गायत्रीशतमुच्चार्य ततः पठनमाचरेत् ॥ " इति विधिः । "अष्टोत्तरशतैः पाठैः पुरश्चरणमिष्यते । परात्परतरं ज्ञानमनेनैव हि जायते ॥ विना वेदांतसेवाभिर्विना चांद्रायणादिभिः । विना काशीनिवासाद्यैर्विना गंगानिषेवणैः ॥ महापापौघनाशाय पुण्योपायो महानयम् । पुरश्चरणमेतस्य कुरु पारायणं यथा ॥ " ॥ इति श्रीमद्भागवतपुरश्चरणविधिः ॥ समाप्तश्चायं ग्रन्थः ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजेन क्षेमराजेन स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालयेऽङ्कयित्वा प्रकाशितम् । संवत् १९६५, शके १८३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया
चोपेते श्रीमद्भागवते प्रथमस्कन्धः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमस्कन्धः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीमद्भागवतं श्रीधरीयटीकया वंशीधरशर्मकृत तद्भावार्थदीपिकाप्रकाशटीकया चोपेतम् ॥

❀ महाराजनाभाधीशश्री १०८ श्रीहीरासिंहजीकस्य साहाय्येनेदं मुद्रितम् ❀

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ स्वस्ति श्रीगणेशाय नमः ॥ श्रीकृष्णं राधिकानाथं वृन्दावननिकुंजगम् ॥ बल्लवीगणसंवीतमाश्रये सर्वकारणम् ॥ १ ॥ ॐ स्वस्ति श्रीगणेशाय नम इत्यस्य व्याकृतिम् ॥ श्रीवंशीधरशर्माहं करोमि विदुषां
मुदे ॥ २ ॥ अथ सर्वशास्त्रारंभ इयमेव दशाक्षरी विद्या स्मर्यते तत्कथमन्येषां श्रीमहाविष्ण्वादीनां स्मरणस्यापि "मंगलानाञ्च मंगलम्" इत्यादिवाक्यैर्मंगलस्यापि मंगलत्वान्न स्मर्यत इति चेत्तत्रेदमवधेयम् ॥ अस्यामेव दशाक्षर्यां
स्मृतायां सर्वदेवस्मरणसंभवादियमेव स्मर्य्या ॥ किंचास्या दशाक्षर्याः सर्वदेवतानां मूलमंत्रत्वादप्यादौ जपो न्याय्यः । मूलमंत्रलक्षणस्य गरुडोक्तस्यात्र सत्त्वात् । तथा हि । "प्रणवादिनमोंतं च चतुर्थ्यंतं च सत्तम ॥
देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्त्तितः" इति ॥ देवपूजायां जपरूपपूजाया एव श्रैष्ठ्यं "यज्ञानां जपयज्ञोऽस्मि" इति श्रीमुखोक्तेः । कथमत्र सर्वदेवतास्मरणामिति चेत्तद्दर्शयन्नाह । तथा हि । "कार्यारंभे
गणेशश्च पूजनीयः प्रयत्नतः ॥" इति स्मृतेस्तस्यैवादिपूज्यत्वं विघ्ननाथत्वेन विघ्नवारकत्वात् । श्रीगणेशाय नमः । नमआदियोगे चतुर्थी सर्वत्र बोध्या गण्यंते दुःखप्रदत्वेनेति गणा विघ्नाः । "समूहे भगणे विघ्ने प्रमथेंद्रियदैवते ।
यमसैन्ये स्तवार्हेषु पार्षदे च गणः स्मृतः ॥" इत्यनेकार्थध्वनिवाग्विलासे । गण संख्याने धातोः कर्मण्यप्रत्ययः । ईष्टे उपद्रवनाशकत्वेन द्योतत इतीशः । ईश ऐश्वर्येऽतः कर्त्तरीगुपधात्कः । "ईशः स्वामिनि शंकरे" इति
वामनः । गणानां विघ्नानां प्रमथानां वेशः स्वामी गणेशो हेरंबः । "रुद्रे विनायके विष्णौ विश्वक्सेने विधातरि । मुख्याधिष्ठातृसैन्येषु गणेशः परिकीर्तितः ॥" इत्यप्यनेकार्थध्वनिवाग्विलासे । श्रिया कीर्त्या दीप्त्या
ऋद्धिसिद्धिभ्यां वा सहितो गणेशः श्रीगणेशस्तस्मै तथा । "ऋद्धिश्रीकीर्त्तिदीप्त्याशीर्गिगासु श्रीरितीरितः ।" इत्यपि तत्रैव । स्वस्त्यस्तु नमस्कर्त्तुरिति शेषः । ओमित्यंगीकारे ब्रह्मणि चेत्यव्ययपाठात् । एतत्सर्वैः कार्यादावं
गीकार्यमिति भावः । "अनाराध्य गणाध्यक्षं यत्कर्म क्रियते नरैः । तन्न सिद्धिमवाप्नोति ह्यत आदौ तमर्चयेत्" इति पुराणात् । यद्वा कथंभूताय श्रीगणेशाय ॐ । कोर्थः ब्रह्मरूपिणे । अव्ययत्वादेव चतुर्थ्या लुक् ।
सत्यपि लुकि विभक्त्यर्थानपायस्योपविष्णु देहीत्यादिप्रयोगेषु दर्शनादव्ययस्य तत्तद्विभक्त्यंतविशेषणत्वे न दोष इत्यवधेयमत्र ॥ तथा च श्रुतिः । "नमस्ते गणपतये । त्वमेव प्रत्यक्षं ब्रह्मासि" इति । अत्र विशेष्यसं
बद्धत्वादन्ययोगव्यवच्छेदकेनैवकारेण "पार्थ एव धनुर्द्धरः" इत्यत्र च पार्थादन्यत्र धनुर्द्धरत्वस्येव गणपतेरन्यत्र साक्षाद्ब्रह्मत्वस्य योगो व्यवच्छिद्यते अतः श्रेयस्कामैः सर्वैरपि स एवाराध्यस्तत्पूजां विनान्यपूजाया वैयर्थ्यस्मरणेन
फलजनकत्वायोगात् । अवश्यापेक्षितानपेक्षितयोरपेक्षितं समर्पणीयमिति न्यायेन तदाराधनस्यावश्यकत्वात्कृते च तस्मिन् "विद्यार्थी लभते विद्यां धनार्थी लभते धनम् । पुत्रार्थी लभते पुत्रं मोक्षार्थी परमं पदम् ॥"
इत्यादिवचनेभ्यः सर्वेष्टलाभसंभवे "अनधीते महाभाष्ये व्यर्था स्यात्पदमंजरी । अधीतेपि महाभाष्ये व्यर्था स्यात्पदमंजरी" इति न्यायेनान्याराधने प्रयोजनाभावात् । सूर्याद्याराधनफलारोग्यादिमोक्षांतकथनानंतरं
"सर्वमिच्छेद्गणाधिपात्" इति स्मरणमप्यत्र मानम् । तस्मादेव ब्रह्माद्युत्पत्तिस्तत एव तेषां सृष्ट्यादिसामर्थ्यलाभश्च । अथ च गणपतेस्तत्त्वेन वर्णनमुपासनार्थं वास्तवाभेदबोधनार्थञ्च । न चैतावतान्यदेवानाराधनापत्तिः ।
प्रयाजादिषु कृतेष्वपि ज्योतिष्टोमादीनामननुष्ठानापत्तेः, इतरोपास्तिविधायकवाक्याप्रामाण्यापत्तेश्च । 'सर्वमिच्छेत् इति'तु विनायकाराधनस्य परंपरया सर्वत्रोपगमोपयोगवर्णनपरं नत्वितरनिषेधपरं तद्विधिविरोधात् । प्रयाजादयों
गानि ज्योतिष्टोमो ह्यंगी । न ह्यंगैकदेशे कृते सर्वांगिनो यथा सिद्धिस्तथा श्रीगणेशार्चनस्य यज्ञादिकर्मप्रारंभरूपैकांगत्वान्न तत्कृते सर्वयज्ञसिद्धिरिति गणेशपक्षः ॥ १ ॥ विष्णुपक्षेऽप्यस्य व्याख्या ॥ ॐ नमः । कोर्थः । ब्रह्मणे नमः ।
"ॐमित्येकाक्षरं ब्रह्म" इति ब्रह्मोपनिषदि श्रीगीतायां चाव्ययपाठेपि । ॐमित्यंगीकारे ब्रह्मणि च । अव्ययत्वादेव विभक्तिलुक् । किंभूताय ॐ । श्रीगणेशाय । श्रयति विष्णुचरणमिति श्रीर्लक्ष्मीः क्विबत्र कर्तरि ।
"कटप्रुज्वि" त्यादिना दीर्घः । "कमला श्रीर्हरिप्रिया" इत्यमरात् । श्रिया लक्ष्म्या गणाः पार्षदा इंद्राद्यास्तेषामीशः प्रेरकस्तस्मै । "इंद्राद्याः पार्षदा यस्याः सा लक्ष्मीर्वरदास्तु मे" इति पुराणांतरोक्तेः । यः श्रीपतिः स एव
तदीयगणानां पतिः । पुरुषस्य स्त्रीपतित्वात्तत्संबंधिनिखिलोपकरणपतित्वस्य प्रथितत्वादतो लक्ष्मीगणानां पतिर्विष्णुरेवेति । किंभूताय ॐ । स्वस्ति कल्याणरूपिणे । स्वस्तीति कल्याणेऽर्थेऽव्ययम् । अत एवात्रापि पूर्ववच्च
तुर्थ्या लुक् । "मंगलं भगवान्विष्णुः" इत्याद्युक्तेः ॥ "नमस्ते कमलाकांत सर्वकल्याणरूपिणे" इति पुराणाच्च । ॐमित्यत्रोंशब्दस्य ब्रह्मवाचित्वं स्वीकृतम् । तच्च सगुणस्यैवेति ज्ञेयम् । "द्वे वाव ब्रह्मणो रूपे मूर्त्तं चामूर्त्तं
च" इति श्रुतेर्ब्रह्मणो द्वैविध्यप्रसिद्धेर्मूर्त्तं सगुणममूर्त्तं च निर्गुणम् । निर्गुणस्य लक्ष्म्यादिपतित्वममूर्त्तत्वादेव न संगच्छते । सगुणस्य तु "लक्ष्मीकांतं कमलनयनम्" इत्यादिवाक्यात् ॥ "श्रियः पतिर्यज्ञपतिर्ध रापतिः"
इति द्वितीयस्कंधोक्तेः । "श्रियः पतिः श्रीमति शासितुं जगत्" इत्यादिमहाकविप्रयोगाच्च तत्संगच्छत एवेति ॥ २ ॥ श्रीविष्णोः सर्वदेवाधिपत्येनोत्कृष्टत्वात्तत्पक्षेऽन्योप्यर्थः । ॐ ज्ञानं तदेव स्वं धनं येषां ते ॐस्वाः योगिनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

''भक्तिर्धनं भक्तिमतां ज्ञानं हि योगिनां धनम् ॥ विद्याधनं च विदुषां शीलं हि योषितां धनम् ॥''इत्यभियुक्तोक्तेः ।''महेशे ब्रह्मणि विष्णौ त्रिगुण्यां प्रणवेऽपि च । ॐकारः शब्द्यते शुद्धौ ज्ञाने त्रय्यां च कोविदैः ॥'' इत्यनेकार्थध्वनिवाग्विलासोक्तेः । ''स्वः स्वीयात्मधनेषु च'' इति हलायुधः । ॐस्वा ज्ञानयोगिनस्तैः स्तीर्य्यते ध्यायत इति ॐस्वस्तिर्विष्णुः । स्तृञाच्छादन इत्यस्मादौणादिको डिप्रत्ययस्ततष्टिलोपे रूपसिद्धेः । धातूनामनेकार्थत्वाद्ध्यानार्थतापि स्तृणातेर्युक्तैव ।''धातवश्चोपसर्गाश्च निपाताश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम्'' इति वैयाकरणराद्धांतात् । अत एवोक्तं ''योगिभिर्ध्यानगम्यं'' ''ध्यायंति यं योगिनः''इति च । श्रिया सर्वोत्कृष्टकीर्त्या गण्यते संख्यायते स्तूयते वेति श्रीगणः '' सर्वोत्कृष्टा यस्य कीर्त्तिस्स श्रीगण उदाहृतः '' इति निरुक्तेः । न हि विष्णोरधिका कस्यचिदपि कीर्त्तिरस्ति । '' न त्वत्समोस्त्यभ्यधिकः कुतोन्यः'' इति श्रीगीतास्वर्जुनोक्तेः । स चासावीशः सर्वनियंता चेति श्रीगणेशः । सर्वस्येशानः सर्वस्य वशी चेति श्रुतेः । पुनरोंस्वस्तिशब्देन कर्मधारयः । ॐस्वस्तिश्चासौ श्रीगणेशश्चेति । तथा । कोर्थः । विष्णवे नमः । ''विष्णुरेव परं ब्रह्म '' इति स्कांदोक्तेः ॥३॥ परब्रह्मध्यानस्य परमानंदहेतुत्वात्पुनर्विष्णुपक्ष एव व्याख्यायते । ''यदुवंशेऽवतीर्णस्य विष्णोर्वीर्याणि शंस नः '' इति श्रीदशमोक्तेर्विष्णुशब्दः श्रीकृष्ण एव मुख्यया वृत्त्या वर्तते अत एवामरसिंहेन जैनेन प्रतिपक्षीभूतेनापि विष्णुनामकथनोत्तरं 'वसुदेवोऽस्य जनकः' इत्युक्त्या बस्यैव विष्णुत्वं व्याख्यातम् । अत एव श्रीव्यासदेवेनाप्युक्तम् ''एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् '' इति । ॐविष्णुशब्दवाच्यः कृष्णस्तेन स्वस्ति कल्याणं यस्य तदोंस्वस्ति व्रजमंडलं '' व्रजभूमिविहारी च व्रजमंडलस्वस्तिकृत् '' इति व्रजमाहात्म्योक्तेः । तस्योंस्वस्तिनो व्रजमंडलस्य श्रीः शोभा गण्यते येन स ॐस्वस्तिश्रीगणः श्रीकृष्णः ''शोभा कल्याणलक्ष्मीषु श्रीशब्दः सेवने श्रुतौ'' इति मार्त्तंडः । ''व्रजाभा कृष्णचंद्रेण गण्यते सर्वदा प्रभो'' इत्यपि व्रजमाहात्म्ये । पुनरीशशब्देन पूर्ववत्कर्मधारये पूर्ववत् ॥४॥ अपरोप्यर्थः कृष्णपक्ष एव । ॐ कृष्णस्तेन स्वस्ति कल्याणं यासां ता ॐ स्वस्तयो गोप्यः । ''सख्यस्स्वस्तिकृदस्माकं न हि नंदात्मजं विना'' इति व्रजमाहात्म्येन्योन्यं गोप्युक्तेः । ''व्रजजनार्तिहंन्वीरयोषिताम् '' इति । श्रीदशमोक्तेश्च । ॐस्वस्तीनां गोपीनां श्रीः शोभा कल्याणं वा यया सा ॐस्वस्तिश्रीः राधा '' राधा गोपीकदंबस्य शोभा सृष्टेह चात्मना '' इति । आत्मना श्रीकृष्णेन स्ववामांगतः सर्वगोपीनां समूहस्य शोभा राधैव सृष्टेति निरूपितं ब्रह्मवैवर्त्ते । सा गण्यते पत्नीत्वेन येन स ॐस्वस्तिश्रीगणः सचासावीशश्चेति तथा । यद्वा ॐस्वस्तिश्रिया गणा गोपीसमूहास्तेषामीशस्तथा राधापतये गोपीनाथाय वा कृष्णाय नम इत्यर्थः ॥ ५ ॥ ॐ शुद्धिस्तां सूत इति ॐसूराचारः ''शुद्धिराचारमाश्रिता'' इत्युक्तेः । तेनासंति दीप्यंत इत्योंस्वस्तय ऋषयः अस गतिदीप्त्यादानेषु भौवादिकस्ततस्तिप्रत्ययः । तान्श्रीणाति हिनस्तीति ॐस्वस्तिश्री रावणः । धातूनामनेकार्थत्वादत्र श्रीणातिर्हिंसार्थकः प्रत्ययोत्र क्विप् तस्य गणा राक्षसास्तेषामीः संपत्तिः ॐस्वस्तिश्रीगणेस्तां शमयति रावणादिवधेन नाशयतीति ॐस्वस्तिश्रीगणेशो रामचंद्रस्तस्मै नमः । अत्र ण्यन्ताच्छमेर्डप्रत्ययः ॥ ६ ॥ अथवा ''ज्ञानं महेश्वरादिच्छेत् '' इत्युक्तेर्ज्ञानकामनया शिवपक्षेऽपि व्याख्यास्यामः । अवति पालयति विश्वमित्योम् औणादिकप्रयोगः । ॐविष्णुस्तस्यैव पालकत्वात् । सुष्ठु दुष्टादितिजनाशकत्वेन साधुत्राणार्थमस्तिर्भवनमवतारो यस्य स स्वस्तिर्विष्णुः । ''संरक्षणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगेयुगे ॥ '' इति श्रीमुखोक्तेः । '' स्वस्तिदः स्वस्तिकृत्स्वस्ति '' इति विष्णुसहस्रनामस्वपि स्वस्तिशब्दो विष्णुवाचको दृश्यते । ॐ चासौ स्वस्तिश्चेति ॐस्वस्तिः । यद्यपि स्वस्तिशब्दोऽव्ययेषु पठितः ॥ तथापि '' न तु शब्दनिर्देशे ' इत्युक्तेर्विभक्तेर्लुङ्नेति ज्ञेयम् ॥ ॐस्वस्ति श्रयति सेवत इति ॐस्वस्तिश्रीर्महादेवः । ''यमामपृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै । स एव साक्षात्पुरुषः पुराणः '' इति पार्वतीं प्रति स्वयं शिवेनाष्टमस्कंधे मोहिन्युपाख्याने उक्तत्वात् । '' तव वरदवरांघ्रावाशिषेहाखिलार्थे यदि रचितधियं मां विद्यलोकोपविद्धम् '' इति दक्षोपाख्याने च।''अतो महेशोऽपि विहाय भेदबुद्धिं सदा सेवत एव विष्णुम्'' इति विद्वन्मोदतरंगिण्यां चिरंजीवभट्टोक्तेश्च । गणाः प्रमथास्तेषामीशो गणेशः 'गणः संघे च प्रमथे' इत्यभिधानात् । ॐस्वस्तिश्रीश्चासौ गणेशश्चेति तथा शिवाय नम इत्यर्थः ॥ ७ ॥ नन्वयमपि पक्षो विष्णोरेव । ॐस्वस्तिं श्रयतीत्यनया निरुक्त्या विष्णोः प्राधान्यस्य शिवस्य च सेवकत्वस्योक्तत्वात् । यस्य पक्षो यत्र वर्ण्यते तत्र तस्यैव महत्त्वं वर्ण्यते अतो मृडमहत्त्वसूचकोऽपरः पक्षोत्र विरच्यते । ॐमा शुद्ध्या स्वस्ति कल्याणं येषां ते ॐस्वस्तयो विप्राः '' शुद्ध्या ब्राह्मणतावृद्धिरशुद्ध्या शूद्रता भवेत् '' इत्यादिपुराणात् । तैः श्रीयते सेव्यत इति ॐस्वस्तिश्रीर्महादेवः '' त्वंहि भगवन्देवेषु ब्राह्मणोहं मनुष्येषु ब्राह्मणः ब्राह्मणो हि ब्राह्मणमुपधावति '' इति जाबालोपनिषदुक्तेः ''शिवो विप्रो हरिः क्षत्री '' इत्यादिपराशरपुराणोक्तेश्चेशस्य ब्राह्मणदेवत्वाद्ब्राह्मणसेव्यत्वमस्तीति । ई लक्ष्मीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गच्छतीतीगो विष्णुः 'लक्ष्मीरीकार उच्यते' इत्येकाक्षरात् । ईगेन नम्यत इतीगणः शिवः । निपातनान्नस्य णः । प्रत्ययश्चात्र डः । स चासावीशश्चेतीगणेशः यद्वा ॐ ज्ञानं सूते इति ॐसूर्वेदः "वेदो वै ज्ञानकारणम्" इत्युक्तेः । ॐसुवो वेदस्याविराविर्भावो यस्मात्स ॐस्वस्तिर्महादेवः । "त्वं शब्दयोनिर्जगदादिरात्मा" इति "सांख्यात्मनः शास्त्रकृतस्तवेक्षा" इति चाष्टमस्कंधे महादेवं प्रति लोकपालोक्तेः । "शास्त्रयोनित्वात्" इति सूत्राच्च । श्रीं गणयति भार्यात्वेनेति श्रीगणो विष्णुस्तस्येशश्श्रीगणेशः "सदाहं शंकरं सेवे वैकुंठेशोऽपि भोः सुराः ॥" इति पाद्मपुराणात् । ॐस्वस्तिश्चासौ श्रीगणेशश्चेति ॐस्वस्तिश्रीगणेशस्तस्मै तथा शिवाय नम इत्यर्थः ॥८॥ "आरोग्यं भास्करादिच्छेत्" इति स्मृतेर्वक्तृश्रोत्रोरारोग्यतातये श्रीसूर्यं प्रणमति । ॐशब्देन ब्रह्मविष्णुरुद्राणां बोधो भवति । "अकारो वासुदेवः स्यादुकारः शंभुरुच्यते । मकारो विधिवाचकः" इत्येकाक्षरात् । स्वर् स्वर्गे तप्यते सर्वोत्कृष्टत्वेनेष्ट इति स्वस्तिरिंद्रः स्वरव्ययोपपदात्तप ऐश्वर्येऽस्माद्दिवादिकात्कर्त्तरि डिप्रत्यय औणादिकः । श्रिया धनसंपत्या गण्यत इति श्रीगणः कुबेरः 'कुबेरः श्रीगणः श्रीदः शिवमित्रो धनाधिपः ।' इत्यभिधानात् । स्वस्तिश्च श्रीगणश्चेति स्वस्तिश्रीगणौ इंद्रकुबेरौ ॐमा विष्णुरुद्रब्रह्मणा सहितौ स्वस्तिश्रीगणौ ॐस्वस्तिश्रीगणौ तयोरीश ॐस्वस्तिश्रीगणेशस्तस्मै तथा तदुक्तं भविष्योक्तादित्यहृदये "ब्रह्मेंद्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः" इति । ईश एव वंद्यते न त्वनीशः । यतः सर्वैर्ब्रह्मादिदेवैः सूर्यो वंद्यतेऽतः स एव तेषामीश इति भावः । तथा च सूर्याय नमः अस्त्वित्यध्याहार्य्यम् । "नहि क्रियाविनिर्मुक्तं वाक्यं भवती" त्युक्तेः । "कर्तृकर्मक्रियादीनां यदि स्थानं न लभ्यते । अध्याहारं तदा कुर्यान्मुख्यार्थप्रतिपत्तये ॥" इत्यभियुक्तोक्तेश्च अपेक्षितपदानयनमध्याहारः । इति सूर्यपक्षः ॥ ९ ॥ चंद्रस्य "सोमोस्माकं ब्राह्मणानां राजा" इति सर्ववेदाधिकरणब्राह्मणकुलस्याधीशत्वात्सर्वकर्मारंभेऽनुकूलचंद्रस्यैव शुभं भवति । "कुर्याच्चंद्रबले सर्वम्" इति ज्योतिःशास्त्रोक्तेश्च प्रथमं तं नमति । श्रिया दीप्त्या विशिष्टा गणा भगणास्तेषामीशः श्रीगणेशः यद्वा श्रिया शास्त्रसंपत्त्या विशिष्टो गणः श्रीगणः ब्राह्मणसमूहस्तस्येशस्तस्मै । किंभूताय श्रीगणेशाय ॐ । कोर्थः ब्रह्मरूपिणे । "नक्षत्राणामहं शशी" इति श्रीमुखोक्तेः । पुनः स्वस्ति कल्याणकारिणे "पितृदेवमनुष्याणां स्वस्तिकर्त्ता निशाकरः ।" इत्यादिपुराणात् । इह स्वस्तिपदं स्वस्तिकर्त्तरि लाक्षणिकम् । लक्षणा हि मुख्यार्थबाधे गौणार्थकल्पनम् । सा चानेकविधा । मंचाः क्रोशंति शोणो धावतीत्याद्युदाहरणैरुदाहृता ग्रंथेषु यथेह मंचपदं मंचस्थे शोणपदं रक्तवर्णवत्पश्वादौ लाक्षणिकं तथात्रापि स्वस्तीति स्वस्तिकर्त्तारं । लक्षणाबीजं त्वन्वयानुपपत्तिः । क्वचित्क्वचिच्च तात्पर्यानुपपत्तिः । इह च तात्पर्यानुपपत्तिरेवेऽत्यलमतिप्रसंगेनेति चंद्रपक्षः ॥ १० ॥ अथोंकारस्य "ओंकारो वै सर्वा वाग्" इत्यादिश्रुतेः सर्ववाग्रूपत्वात्तद्ध्यानस्य च "कामदं मोक्षदं चैव" इत्युक्तेः सर्वाभीष्टहेतुत्वाच्चादौ तदेवाह । ॐ स्वस्ति श्रीगणेशाय नमः । अत्र षट् पदच्छेदाः कार्याः । हे श कोऽर्थः हे वरेण्य "शश्च शोभावरेण्ययोः" इति वामनः । ननु हेशब्दः संबुद्धिद्योतको भवत्यत्र तदभावात्कथं हेशेत्युक्तं तत्रोच्यते । "हेशब्देन विनापि स्यात्क्वचिदंतेऽपि हेपदम् । यथा राम प्रसीद त्वं राम हे त्वां भजाम्यहम्" इति प्रबोधचंद्रिकोक्तेर्हेशब्देन विनापि संबुद्धिर्न विरुद्धेति । अथ प्रकृतम् । त्वमों कोर्थ ॐकारमक्षरं ब्रह्मस्वरूपमय ध्याय । अय गताविलयस्य धातूनामनेकार्थत्वाद्ध्यानार्थतापि । "अनुक्तमप्यूहति पंडितो जनः" इत्यादिप्रयोगदर्शनादनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति बहुधा प्रपञ्चितं शाब्दिकैरतोऽयतेः परस्मैपदप्रयोगोपि न विरुद्ध इति । नन्वोंकारस्य ध्यानं न कोऽपि करोतीति चेत्तत्राह । "ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायंति योगिनः । कामदं मोक्षदञ्चैव ॐकाराय नमोनमः" इति मंत्रात्तद्ध्यानं तु योगिनोपि कुर्वंत्यन्येषां तु का कथेति भावः । किंभूतम् ॐ । नमः । सर्वोत्कृष्टत्वेन नमस्काराहम् णम् प्रह्वत्वे इत्यस्मादौणादिकोऽसुप्रत्ययः । सर्वोत्कृष्टत्वञ्च प्रणवस्य ब्रह्मविद्योपनिषदि व्याख्यातम् "ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः । शरीरं तस्य वक्ष्यामि स्थानं कालं लयं तथा ॥ तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः । तिस्रो मात्रार्द्धमात्राश्च अक्षरस्य शिवस्य च ॥ ऋग्वेदो गार्हपत्यश्च पृथिवी ब्रह्म एव च । अकारस्य शरीरं तु व्याख्यातं ब्रह्मवादिभिः॥ यजुर्वेदोंतरिक्षञ्च दक्षिणाग्निस्तथैव च । विष्णुश्च भगवान्देव उकारः परिकीर्त्तितः ॥ सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च । ईश्वरः परमो देवो मकारः परिकीर्तितः ॥ सूर्यमंडलमाभाति अकारः शंखमध्यगः । उकारश्चंद्रसंकाशस्तस्य मध्ये व्यवस्थितः ॥ मकारश्चाग्निसंकाशो विधूमो विद्युतोपमः । तिस्रो मात्रास्तथा ज्ञेयाः सोमसूर्याग्नितेजसः ॥ शिखा च दीपसंकाशा यस्मिन्नुपरिवर्त्तते । अर्द्धमात्रा तथा ज्ञेया प्रणवस्योपरि स्थिता । पद्मसूत्रनिभा सूक्ष्मा शिखा या दृश्यते परा । सा नाडी सूर्यसंकाशा सूर्यं भित्त्वा तथापरम् ॥ द्वासप्ततिसहस्राणि सूर्यं भित्त्वा तु मूर्द्धनि । वरदः सर्वभूतानां सर्वं व्याप्यैव तिष्ठति ॥ कांस्यघंटानिनादस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा लीयति शांतये ॥ ॐकारस्तु तथा योज्यः शांतये सर्वमिच्छता ॥ यस्मिन्संलीयते शब्दस्तत्परं ब्रह्म गीयते । ध्रुवं हि चिंतयेद्ब्रह्म सोऽमृतत्वाय कल्पते ॥ " इति । कस्मै स्वस्ति । कोऽर्थः । स्वस्तये मोक्षाय । अत्र चतुर्थी त्वव्ययत्वादेव न । " कल्याणे भवने मोक्षे स्वस्तीत्युक्तस्तथा हरौ " इत्यभिधानात् । यद्वा किंभूतमों स्वस्ति मंगलरूपम् । " सर्वेषां मंगलानां च बीजं प्रणव एव हि " इत्यादिसंहितोक्तेः । च पुनः श्रीगणे कामाख्ये श्रीयंते स्पृहयालुभिरिति श्रियः कामाः गण्यते प्राप्यत इति गण् गणनं प्रापणमित्यर्थः । धातूनामनेकार्थत्वादार्प्त्यर्थाद्गणभावे क्विपि रूपम् । श्रियां गण् श्रीगण् तस्मै तथा । तथा च "ॐकारं बिन्दुसंयुक्तम्" इति मंत्रार्थोऽत्र ध्वनित इत्योंकारपक्षः ॥ ११ ॥ अथ च शास्त्रज्ञानस्य " गुरुमूलमिदं सर्वं शास्त्रज्ञानं सुरेश्वरि" इति शंभुवाक्यात् । "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः " इति श्वेताश्वतरश्रुतेश्च गुरुभक्तिजन्यत्वादादौ गुरुनतिरेव कार्यातो गुरुपक्षेपि दशाक्षरीं योजयति । ॐज्ञानं तदेव स्वं धनमोंस्त्रं तेन ज्ञानधनेन स्तभ्नाति विकर्मप्रवृत्त्या संसारे भ्रमन्तं शिष्यं रुणद्धीत्योंस्वस्तिर्गुरुः । " गिरतीह पाप्मानम् " इतिश्रुतिप्रतिपादितो गुरुपदार्थोनेन ध्वनितः । स्तंभुरोधनेऽस्मात्क्रैय्यादिकादौणादिको डिप्रत्ययः कर्त्तरीति । अत्र दृष्टांतः । यथा कृतापराधं नरं गृहीत्वा राजपार्श्वे गच्छंतं तत्प्रियः कश्चिद्धनं दत्त्वा ततस्तं मोचयति एवं गुरुरपि ज्ञानधनं दत्त्वा कर्मणः सकाशान्मोचयति शिष्यमिति ध्येयः । न हि गुरूपदेशं विना संसारः शाम्यतीति भावः । श्रीर्लक्ष्मीस्तां गच्छति प्राप्नोतीति श्रीगोविष्णुस्तं नमतीति श्रीगणः । साधनमस्य शिवपक्षे वर्णितम् । ॐस्वस्तिश्रीगणपदाभ्यामत्र " श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुत्यर्थोऽपि ध्वनितः । ॐस्वस्तिश्चासौ श्रीगणश्चेति ॐस्वस्तिश्रीगणः । पुनरीशपदेन कर्मधारयः पूर्ववत् । किञ्च " आचार्यवान्पुरुषो वेद " इति श्रुतेर्भगवत्स्वरूपज्ञानमपि गुरुप्रसादादेव भवतीत्यलं विस्तरेणेति गुरुपक्षः ॥ १२ ॥ इंद्रस्य सर्वदेवराजत्वात्सोपि शास्त्रादौ ध्येय एवेत्यत इंद्रपक्षेप्यस्य योजनामाह ॥ ओमा विष्णुना वामनरूपेण स्वस्ति कल्याणं यस्य स ॐस्वस्तिरिन्द्रः श्रिया समेधिता गणाः श्रीगणा देवाः " श्रिया समेधिताः सर्वे उपारमत विग्रहात्" इति ब्रह्मप्रेषितनारदस्य देवासुरसंग्रामे देवान्प्रत्युक्तेः । अत्र मध्यमपदलोपी समासः तेषामीशः ॥ श्रीगणेश ॐस्वस्तिश्चासौ श्रीगणेशॐस्वस्तिश्रीगणेशस्तस्मै इंद्राय नमः ॥ १३ ॥ अथ शेषस्य सर्वाधारत्वात्सर्वसर्पगणमुख्यत्वेन सर्पादिभीतिवारणाय तमप्यत्र नमस्करोति । शाय नमः । कोऽर्थः शेषाय नमः । "शं वदंति बुधाः शेषम् " इत्येकाक्षरात् । किंभूताय शाय । ॐस्वस्तिश्रीगणे । ॐशब्देन सत्त्वादिगुणत्रयमुच्यते " त्रिगुण्यां प्रणवेपि च " इत्यभिधानात् । तथा च ओमा गुणत्रयेण सुष्ठु अस्ति भवनं यस्य तदोंस्वस्तिभवनमत्र स्थितिसंहारयोरप्युपलक्षणम् । तच्च ब्रह्मांडं तस्य श्रीः शोभा गण्यतेऽनेनेत्योंस्वस्तिश्रीगण् तस्मै तथा गणसंख्यानेऽतोऽधिकरणे क्विप् । सहस्रशिरसश्शेषस्य कस्मिंश्चि च्छिरोमुकुटैकदेशे सिद्धार्थ इव शोभा ब्रह्मांडस्येति पञ्चमस्कंधादौ विशेषतः प्रपंचितम् । वाक्यानि च विस्तरभियेह न लिखितानीति शेषपक्षः ॥ १४ ॥ "अनाराध्य जगद्धात्रीं विष्णुभक्तिर्न जायते।" इति ब्रह्मवैवर्त्ते प्रकृतिखंडोक्तेः। किञ्च "आराधिता सैव नृणां भोगस्वर्गापवर्गदा" इति मार्कंडेयोक्तेश्चैहिकामुष्मिकफलार्थिभिरवश्यं दुर्गा सेव्या । अतस्तत्पक्षेप्यस्यायोजनां कुर्मः । ॐभ्यो वासुदेवादिभ्यः सुष्ठु अस्ति भवनं यस्यास्सा ॐस्वस्तिः । "यद्भूच्छां भवं तेजस्तेनाजायत तन्मुखम् । ब्रह्मणस्तेजसा पादौ " इत्याद्युक्तेः । ॐभ्य इति बहुवचनं सप्तशतीस्तवप्रसिद्धदेवग्रहणार्थमन्यथा ब्रह्मादित्रयाणामेव ग्रहणं स्यादिति । यद्वोंभ्यो विष्ण्वादिभ्यः सुष्ठु अस्तिराविर्भावो यासां ता ॐस्वस्तयो वैष्णव्याद्याः शक्तयः तदुक्तम् "ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः । शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः " इति मार्कंडेयोक्तेः । ताभिः श्रीर्द्युतिर्यस्याश्चंडिकायाः सा ॐस्वस्तिश्रीस्तस्या गणो महाकाली महासरस्वतीमहालक्ष्मीरूपस्तस्येशो मूलप्रकृतिरूपस्तस्मै नमः । अत्र पुंस्त्वं तु " नागं लिंगं च योनिं च बिभ्रती नृपमूर्द्धनि " इति रहस्योक्तेस्तस्याः पुंरूपत्वं स्त्रीरूपत्वञ्चास्तीति न विरुद्धम् । पुंस्त्वं नास्ति शंभुविधिकृष्णे स्त्रीत्वं नास्ति तथैव भवान्याम् ॥ कमलायां च तथैव च वाण्याम् " इति रघुनाथतीर्थोक्तेश्च । यद्वा ॐस्वस्तिश्रिया गणा भैरवादयस्तेषामीशा यद्वा "निश्वासान्मुमुचे यांश्च युध्यमाना रणेंबिका । त एव सद्यः संभूता गणाः शतसहस्रशः ॥ " इत्युक्तेर्गणा निःश्वासोद्भूतास्तेषामीशा तस्यै नमः । अस्या आर्षत्वाद्वाबाडागमाद्यभावेन पुंस्त्वम् । ऋषिरत्र वेदः । वैदिकत्वं चास्य सर्ववाङ्मयादित्वेनापौरुषेयत्वादिति । " अपौरुषेयं वाक्यं वेदः " इति पूर्वमीमांसायां वेदलक्षणोक्तेः । न हि केनचित्पुरुषेणैतद्रचितमनादित इत्थमेवेयं दशाक्षरी विद्येति प्रसिद्धेरिति दुर्गापक्षः ॥ १५ ॥ अथ "वाय्वधीनमिदं जगत्" इत्यादिपुराणात्सर्वचेष्टाहेतुत्वाद्वायुमप्यत्र नमस्करोति ॥ ॐभि स्सत्त्वरजस्तमोभिस्सुष्ठु अस्ति भवनं स्थित्युत्पत्तिसंहृतिरूपं यस्य तद्ब्रह्मांडमोंस्वस्ति तस्य श्रीः कल्याणं येन स ॐस्वस्तिश्रीर्वायुः " त्वं वायो सर्वब्रह्मांडे स्वस्तिकृत्प्राणदः सदा । त्वदधीनमिदं सर्वं जगतश्चेष्टितं विभो ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतीव कश्मलो देहस्त्वत्संयोगात्परः शुचिः। त्वत्त्यक्तस्तु पवित्रोऽपि विप्रदेहोऽशुचिर्भवेत् ॥ पवित्राणां पवित्रस्त्वं मंगलानां च मंगलम्''इत्यादि संहितोक्तेः । गण्यंते ज्ञानकर्मोपकारकत्वेनेति गणाः इंद्रियाणि तेषामीशः प्रवृत्ति
हेतुत्वात्स्वामी गणेशः । प्राणवायुं विना किमपि कर्तुमिन्द्रियगणैर्न शक्यते तेषां तदधीनत्वात् । प्राणेंद्रियसंवादोपि श्रूयते शास्त्रे । तथाहि इंद्रियैरुक्तं वयं शरीरधारकाणि प्राणैरुक्तं वयमिति परस्परं विवादकत्वा
त्तन्निर्णयाय ब्रह्मपार्श्वं गताः ब्रह्मणोक्तं शरीरान्निर्गत्य पृथक्पृथक् प्रवेशः पुनः शरीरे क्रियतां यत्प्रवेशेन शरीरमुत्तिष्ठते तदेव महदिति श्रुत्वा सर्वाणींद्रियाणि प्रविष्टानि शरीरे चेष्टापि नागता पुनर्ब्रह्मणा वायुं प्रत्युक्तं
त्वं प्रविश ततः प्रविष्टे वायौ शरीरमुत्थितमभूत्ततो ब्रह्मणोक्तमयमेव शरीरधारकः सर्वेभ्यो महान्सर्वेषां भवतां स्वामीति तथा च श्रुतिः ''अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति'' इति । अत एव वक्ष्यते ।
''उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा'' इति प्रथमपंचदशाध्याये । अथ प्रकृतमनुसरामः । ॐस्वस्तिश्रीश्चासौ गणेशश्चेति तथा तस्मै प्राणरूपाय वायवे नम इति वायुपक्षः ॥ १६ ॥ ''ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवा
त्मनो मुखम्'' इति स्मृतेः । ''अग्निमीळे पुरोहितम्'' इति श्रुतेश्च पुरोऽग्रेऽग्निमहमीळे ईडे ऽळयोरैक्यात् । किंभूतं हितं सर्वहितकरम् ''अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः
प्रजाः ॥'' इति । तथा च पूर्वमग्निरेव हितेप्सुभिः सेव्योऽतोऽग्निपक्षेऽपि दशाक्षरीं योजयति । ॐमा ज्ञानेन स्वस्ति कल्याणं येषां ते ॐस्वस्तयो जीवाः । ''ऋते ज्ञानान्न मुक्तिः'' इति श्रुतेः । ''कषायपक्तिः कर्माणि
ततो ज्ञानं प्रवर्त्तते । ज्ञानान्मोक्षमवाप्नोति'' इति स्मृतेश्च । ताञ्जीवाञ्श्रयत्याश्रयतीत्योंस्वस्तिश्रीः संसारस्तस्य गणो लोभादयः । ''न विद्यते तेग्रहणानुबंधः कुतो नु तद्धेतव ईश तत्कृताः । लोभादयो येबुधलिंगभावाः ॥''
इति गोवर्द्धनधारिणं प्रतींद्रोक्तेः । अग्रहणानुबंधः संसारस्तद्धेतवः संसृतिहेतवः तत्कृता अज्ञानकृता इत्यर्थः । अत्र संसारस्य लोभादीनां चाज्ञानकार्यत्वेन समानत्वाद्गणगणिभावो ध्येयः । तस्य संसारगणस्य लोभादेरीशो
निवर्त्तकः । अत्रायमाशयः । अग्नेर्यज्ञादिकर्मणो मुख्यसाधनत्वात्तत्साध्या चांतःकरणशुद्धिः सा च लोभादिनिवृत्तिरूपैवातः शुद्धेंतःकरणे ज्ञानमुदेति अत एवोक्तम् ''कर्मणा ज्ञानमातनोति ज्ञानेनामृती भवति अथामृतानि कर्मा
णि'' इति श्रुत्या कर्मणाऽग्निसाध्येन यागादिनेत्यर्थः । तथा चाग्नये नम इत्यग्निपक्षः ॥ १७ ॥ श्रीधर्मराजस्य सर्वरोगाधिपत्वाद्धर्माधर्मविवेचकत्वेन सर्वलोकहिताय प्रवृत्तत्वाच्च शास्त्रादौ वक्तृध्येतॄणां रोगादिभयापनुत्तये ध्येयत्वा
न्नमस्करोति । ॐविष्णुः स च गदाधरो गयाक्षेत्राधीशरूपोऽत्र ग्राह्यस्तेन स्वस्तिर्मुक्तिर्येषां ते ॐस्वस्तयः पितरः । ''गदाधरो गयाक्षेत्रे पितॄणां मोक्षदायकः ॥'' इति बृहन्नारदीयोक्तेः । तैः श्रीयते सेव्यते इत्योंस्वस्तिश्री
धर्मराजः । ''यस्यामग्निष्वात्तादयः पितृगणाः'' इत्यादिपंचमस्कंधोक्तेः । गणा निजसैनिकास्तेषामीशो गणेशः 'यमः सैन्येस्तुल्यनरे इति कोशात् । पुनरोंस्वस्तिश्रीश्चासौ गणेशश्चेति तथा तस्मै । यद्वा ओमा ज्ञानेनार्थात्तत्सद
शेन गयापिंडप्रदानेन स्वस्ति येषां त ॐस्वस्तयः पितरः श्रिया पितृलोकलक्ष्म्या विशिष्टा ये गणा एकत्रिंशत्संख्याः ''विश्वो विश्वभुगाराध्य'' इत्यादिना मार्कंडेयोक्तास्ते श्रीगणा ॐस्वस्तीनां पितॄणां श्रीगणा ॐस्वस्तिश्री
गणास्तेषामीशः स्वामी धर्मराजस्तस्मै नमः ''वाराणस्यां च यो वासो हरिभक्तिस्तथैव च । गयापिंडप्रदानं च ब्रह्मज्ञानं च तत्समम्'' इति बृहन्नारदीयादिति धर्मराजपक्षः ॥ १८ ॥ अथ च कुबेरस्य सर्वधनाधिपत्वात्तदाप्तये
सोऽपि नमस्कार्य इति । ओमा शंकरेण स्वस्ति कल्याणं यस्य स ॐस्वस्तिः कुबेरस्तस्य शिवसखत्वप्रसिद्धेः । सखा हि सख्युः कल्याणं करोत्येवेति भावः । श्रीणां धनानां रक्षका गणाः श्रीगणा यक्षास्तेषामीशश्श्री
गणेशः ॐस्वस्तिश्चासौ श्रीगणेशश्चेति तथा तस्मै कुबेराय नम इत्यर्थः इति कुबेरपक्षः ॥ १९ ॥ वरुणस्य जलाधीशत्वेन जलभीनिवृत्तये तमपि नमस्करोति । ॐ ज्ञानं तदेव स्वमोंस्वं तत्स्तृणंत्याच्छादयंत्योंस्वस्तीनि रत्नानि
मुक्ताहीरकादीनि ''न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः । श्रीमदादाभिजात्यादिर्यत्र स्त्रीद्यूतमासवः'' इति दशमे नारदोक्तेः । अत्र स्तृणातेर्डिः । तैश्श्रीर्यस्य स ॐस्वस्तिश्रीर्वरुणः । ''मुक्तावैदूर्यहीरकैः । अलंकृत
शरीराय वरुणाय नतोस्म्यहम्'' इति मंत्रात् । गणानां यादोगणानामीशो गणेशः । ''यादोगणानामृषभं प्रचेतसम्'' इति तृतीयस्कंधोक्तेः । ॐस्वस्तिश्रीश्चासौ गणेशः ॐस्वस्तिश्रीगणेशस्तस्मै वरुणाय नम इत्यर्थ इति
वरुणपक्षः ॥ २० ॥ अथ वागधिष्ठातृदेवीमप्रतिबद्धवाग्व्यापाराय नमति । ॐज्ञानं सूत इत्योंसूः सरस्वती ''बुद्धिप्रदां शारदाम्'' इत्युक्तेः । अस्ति श्रीरनयेत्यस्तिश्रीः ''धनं शोभां सर्वमानं लभते वाक्प्रसादतः ॥'' इत्यादि
पुराणात् । ॐसूश्चासावस्तिश्रीरित्योंस्वस्तिश्रीः । गणानां छात्रादिसमूहानामीशोऽनयेति गणेशा ॐस्वस्तिश्रीश्चासौ गणेशा ॐस्वस्तीश्रीगणेशा तस्यै तथा यथा पुंस्त्वमत्र तथा व्याख्यातमधस्तात् सरस्वत्यै नमः इत्यर्थः ॥ २१ ॥
श्रीभागवतपक्षेपि व्याख्यायते । तथाहि । ''व्यासो नारायणः स्वयम्''इत्युक्तेरोंव्यासस्तस्य स्वस्ति स्वास्थ्यं येन तदोंस्वस्ति श्रीभागवतं श्रीः कीर्तिर्गण्यते संख्यायते येन तत् ''विद्यावतां भागवते परीक्षा''

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय ॥ भक्तजनमानसनिवासाय श्रीरामचंद्राय ॥ १ ॥

इत्याद्युक्तेः । यद्वा श्रिया सर्वोत्कृष्टकीर्त्या गण्यते यत्तच्छ्रीगणम् " क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा । तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥ " तथा " राजंते तावदन्यानि पुराणानि सतां गणे । यावन्न श्रूयते साक्षाच्छ्रीमद्भागवतं परम् । तथा भागवतं नाम पुराणं ब्रह्मसंमितम् " इति चोक्तेः । ॐस्वस्ति च तच्छ्रीगणं चेति ॐस्वस्तिश्रीगणं तच्चेशं ब्रह्मरूपत्वात् । ॐस्वस्तिश्रीगणेशं तस्मै श्रीमद्भागवताय नम इत्यर्थः । अत्र विशेषापेक्षा चेत्तर्हि आद्यपद्यव्याख्याशत्यां श्रीभागवतपक्षो दृश्यः ग्रंथविस्तरभियात्र बहु वक्तव्यमप्युज्झितमिति :। अथ व्याख्यातां दशाक्षरीं विद्यां पुनरुल्लिख्य श्रीमद्भागवतं श्रीवंशीधरशर्मा दशाक्षरीनमस्कृतदेवानुकंपया टीकांतरसम्मत्या व्याकरोति ॥ २ २॥ ॐस्वस्तिश्रीगणेशाय नमः ॥ गणेशं गिरिजासूनुं श्रीस्कंदं श्रीशिवं गुरून् ॥ भारतीं बुद्धिदां देवीं मातरं पितरं तथा ॥१॥ नमस्कृत्याखिलान्कुर्वे टीकाकारांश्च भक्तितः ॥ श्रीधरस्वामिभावार्थदीपिकायाः प्रकाशनम् ॥ २ ॥ हरिंविधिंवसिष्ठशक्तिपराशरव्यासशुकदेवान् ॥ वैशंपायनमुग्रश्रवसं च नुमः पुराणगुरुमुख्यान् ॥ ३ ॥ त्रय्यारुणिं कश्यपञ्च सावर्णिमकृतव्रणम् ॥ रोमहर्षणहारीतौ मैत्रेयञ्च मृकंडजम् ॥४॥ शेषं सांख्यायनं चाथ चतुरः सनकादिकान् ॥ श्रीमहाभारतं वेदान्कणादं जैमिनिं मुनिम् ॥ ५ ॥ पतंजलिमक्षपादं व्यासञ्च कपिलं हरिम् ॥ छन्दःकृतः कोशकृतः साहित्यकृतिनोऽखिलान् ॥ ६ ॥ श्रीनृसिंहं प्रणम्यैव श्रीधरस्वामिनः कृतेः ॥ विवृतिं श्रीधरस्यैव प्रसादादधुना ब्रुवे ॥ ७ ॥ श्रीधरस्वाम्यभिप्रायं श्रीधरो वेत्ति सर्वथा ॥ भविष्यति तत्कृपया तदभिव्यक्तिराशु मे ॥८॥ क्वचिच्च श्रीधरत्यक्तपदानामपि वर्णनम् ॥ यथामति माथुराणां प्रेरणातो मुहुर्मुहुः ॥९॥ करिष्यामि विदां प्रीत्यै क्षमंतां ते मम त्वराम् ॥ पूर्वाचार्यानुग्रहान्मे सर्वेर्थाः प्रतिभांतु वै ॥ १० ॥ वृंदारण्यांतर्गते नंदजेन सेवाकुंजे संयुतां कीर्त्तिजाताम् ॥ नत्वा तस्याः प्राप्य चाज्ञां स्वबुद्ध्या कुर्वे व्याख्यां श्रीधरस्वामिवृत्तेः :॥ ११ ॥ वंशीधरः कौशिकगोत्रगौडवंश्यः कृती श्रीधरवृत्तिवृत्तिम् ॥ करोमि तत्त्यक्तपदव्रजस्य :तथा गुरूणामनुकंपयैव ॥ १२ ॥ येषां न चेतो हरिभक्तिमध्ये मग्नं न षट्शास्त्रसमुद्रमध्ये ॥ ते नैव ज्ञास्यंति मम प्रयासानंधा यथा वारवधूविलासान् ॥१३॥ विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् ॥ नहि वंध्या विजानाति गुर्वीं प्रसववेदनाम् ॥ १४॥ तथापि क्रियते ग्रंथः संति यद्यपि दुर्जनाः ॥ न हि दस्युभयाल्लोको दैन्यवानेव वर्त्तते ॥१५॥ किञ्च ॥ वंदेहं दुर्जनान्पूर्वं सज्जनांश्च ततः परम् ॥ मुखप्रक्षालनात्पूर्वं पायुप्रक्षालनं यथा ॥१६॥ लोके गरीयसी माता मातृतोप्यधिकः खलः ॥ माता पुनाति हस्ताभ्यां खलास्तु जिह्वया मलम् ॥१७॥ अतिविशदहृदयाधिगम्ये काव्ये खिद्यति नरो न जाड्ये स्वे ॥ निंदति कंचुककारं प्रायः शुष्कस्तनी नारी ॥१८॥ किञ्च । खलो मृगयते दोषं गुणपूर्णेषु वस्तुषु ॥ वने पुष्पफलाकीर्णे पुरीषमिव सूकरः॥१९॥यदत्र स्खलितं किञ्चिद्विद्वांसः पूरयंतु तत्॥ यदत्र सौष्ठवं किंचित्तद्गुरोरेव मे न हि॥यदत्रासौष्ठवं किंचित्तत्सर्वं मे गुरोर्नहि ॥२०॥अल्पं गुणं परेषां प्रथितं कुर्वंति साधवो लोके ॥ तेषामेष स्वभावस्तृप्ताः स्युस्ते परोदयेनैव॥२१॥ इति ॥ न मे शास्त्रबलं किञ्चिन्न च बुद्धिबलं क्वचित्॥प्रवृत्तो बलमाश्रित्य गुरूणां केवलं कृतौ ॥२२॥तरणज्ञानहीनो ना यथा तरति नौकया॥नदीं प्रबलदुस्तीर्य्यामयत्नेन तथा ह्यहम्॥२३॥ श्रीगुरूणां बलेनैव तरिष्यामि न संशयः ॥ शास्त्रसिन्धुं विज्ञजनैर्दुस्तीर्य्यमपि सर्वथा ॥२४॥ यशोदात्मज गोपीश यथा प्रेरयसीह माम् ॥ तथा ब्रवीमि मे नाथ दोषो :मास्तु कदाचन ॥ २५:॥ श्रीविश्वनाथविजयध्वजजीवगोस्वामी चित्सुखश्वसनजादिभिरीरितायाः ॥ टीका अतीवगहनाः सुविलोक्य शास्त्रं श्रीभारतं च रचितोयमपि प्रबंधः ॥ २६ ॥ अथ माथुरविद्वज्जनप्रेरणया श्रीवंशीधरशर्मा माथुरमण्डलावतीर्णश्रीकृष्णप्रीतये श्रीधरस्वामिभावार्थदीपिकारंभकृतश्रीरामप्रणतिलक्षणं मंगलं व्याकरोति ।"ॐनमःश्रीपरमहंसे " ति ॥ हंसपरमहंसश्रीपरमहंसभेदात्त्रिधा हंसा भवंति । तत्र हंसा हि दुग्धजलविभेदनिपुणाः संति । येषां चंचुस्पर्शाज्जलाद्दुग्धं पृथग्भवति ते च दुग्धं पीत्वांबु त्यजंति परमहंसास्तु चिज्जडविभेदनिपुणा भवंति ते च जडांशं प्रधानं चिदंशं पुरुषरूपमात्मानं पृथग्वर्णयित्वा स्वशिष्येभ्यो ज्ञापयंति । श्रीपरमहंसा हि चैतन्यैकनिष्ठाः प्रकृतिं सर्वथा विचारेण त्यक्त्वा कदापि तां न स्मरंति किन्तु सर्वदा चैतन्यरूपमेव परमात्मानं भावयंति ते च शुद्धप्रेमभक्ताः श्रीविष्णुमेवान्येभ्योऽप्युपदिशंति प्रकृतिं तच्छक्तित्वात्ततो भिन्ना नेच्छंति प्रकाशशक्तिः रवेरिव तैः श्रीपरमहंसैः श्रीनारदादिशुद्धभक्तैरास्वादितः सेवितश्चासौ चरणकमलयोश्चिदेव मकरंदो यस्य तस्मै भक्तजनानां मानसे चेतसि निवासो यस्य तस्मै श्रयति सेवते सदा रामचरणमिति श्रीः । रमन्ते यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वागीशा यस्य वदने लक्ष्मीयस्य च वक्षसि ॥ यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ॥ २ ॥
विश्वसर्गविसर्गादिनवलक्षणलक्षितम् ॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमाम तत् ॥ ३ ॥

गिनो ध्यानेन क्रीडन्त्यत्रेति रामः । यद्वा राति कुक्षौ विश्वं गृह्णाति प्रलये इति रः । यद्वा रापयति प्रकाशयत्ति सर्वमिति रः । रा दीप्त्यादानयोस्तः पक्षे केवलात्पक्षेंतर्भावितण्यर्थाड्डः । अम्यते प्राप्यते भक्त्या
दिनेत्यमः । अम गत्यादौ । रश्चासावमश्चेति रामः । जगज्जन्मादिहेतुर्मुक्तप्राप्य इत्यर्थः । चंदत्यानंदयति त्रैलोक्यं रावणादिवधेनेति चन्द्रः । रामश्चासौ चंद्रश्चेति रामचंद्रः श्रिया सहितो रामचंद्रः श्रीरामचंद्र
स्तस्मै । रात्यखिलं यद्वा राजते रघोः कुले वा रामः । यद्वा राणां राक्षसानां मरणं येनेति वा राम इति । अत्राथर्वणीयरामतापनीयोपनिषत्प्रमाणम् । " चिन्मयेऽस्मिन्महाविष्णौ जाते दाशरथे हरौ । रघोः कुलेखिलं
राति राजते यो महीस्थितः ॥ स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः । राक्षसा येन मरणं यांति स्वोद्रेकतोथ वा ॥ रामनाम भुवि ख्यातमभिरामेण वा पुनः । राक्षसान्मर्त्यरूपेण राहुर्मनसिजं यथा ॥ प्रभा
हीनांस्तथा कृत्वा राज्यार्हाणां महीभृताम् । धर्ममार्गं चरित्रेण ज्ञानमार्गेण नामतः ॥ यथा ध्यानेन वैराग्यमैश्वर्यं यस्य पूजनात् । तथा रात्यस्य रामाख्या भुवि स्यादथ तत्त्वतः ॥ रमंते योगिनोनंते नित्यानंदे
चिदात्मनि । इति रामपदेनासौ परब्रह्माभिधीयते ॥ चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थे ब्रह्मणो रूपकल्पना " इत्यादि । ननु श्रीमद्भागवतशास्त्रे:आदिमध्यावसानेषु श्रीकृष्णस्यैव प्रतिपाद्यत्वं
मुख्यत्वेनास्त्यतस्तन्मंगलमेवादौ विधेयमस्ति यद्वा श्रीधरस्वामिनो हीष्टदेवः श्रीनृसिंहोस्ति तन्मंगलं वा विधेयम् । वस्तुतस्तु "कार्यारंभे गणेशश्च पूजनीयः प्रयत्नतः" इति स्मृतेर्गणेशमङ्गलस्याप्यावश्यकत्वमस्ति तत्कुतः
श्रीरामचंद्रमंगलं कृतमिति चेदत्रेदमवधेयम् । यद्यपि श्रीभगवतः सर्वावताररूपाणां वस्तुतस्तुल्यतैव तथापि श्रीरामचंद्रं विना समुद्रे सेतुर्न कुत्राप्यवतारे कृतोस्त्यतस्तत्कृपया ममापि श्रीभागवतार्णवटीकारूपसे
तुकरणं भूयादिति विमृश्यैव श्रीरामनतिरूपं मंगलं कृतमिति प्रतीयते यद्वा बालगोपालानां श्रीराम एव परमेश्वरत्वेनावसितोतः सर्व प्रसिद्धपरेशनतिरेवादौ युक्तेति ॥ १ ॥ रसाकारब्रह्मभजनेनैवाभीप्सितचतुर्वर्गसिद्धिरिति
श्रीमद्भागवतसिद्धांतं सूचयन्निजेष्टस्मरणमंगलमाह वागीशेति । वाचामीशा सरस्वती । यद्वा ईशा विधिनिषेधयोर्जीवान्नियमयंती वेदलक्षणा वागिति । अनेन वदनस्मरणेनापरविद्यावाप्तिर्ध्वनिता । श्रीर्हेमरेखारूपे
णास्ते इति अनेनोरःस्मरणेनेष्टसंपल्लाभो ध्वनितः । तदेवमपरविद्यालक्ष्म्यवाप्त्या त्रिवर्गसिद्धिः सूचिता । संवित्परविद्या अनेन हृदयस्मरणेन मोक्षावाप्तिश्च सूचिता । तदुक्तं "या वै साधनसंपत्तिः पुरुषार्थचतु
ष्टये । तया विना तदाप्नोति नरो नारायणाश्रयः ॥ " इति । वक्ष्यति च । "धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः । एकमेव हरेस्तत्र कारणं पादसेवनम्" इति । न्रियते विक्षिप्यते चेतस्त्रैलोक्यं वाऽनेनेति ना
विषयसमूहो हिरण्यकशिपुश्च तं हिनस्तीति नृसिंहस्तम् । यद्वा नृणां सिंहः श्रेष्ठतमो वीर्यवत्तरश्चेति नृसिंहः तदुक्तं नृसिंहतापनीये " अथ कस्मादुच्यते नृसिंहमिति । यस्मात्सर्वेषां भूतानां सिंहो वीर्यतमः श्रेष्ठतमश्च
तस्मान्नृसिंह आसीत्परमेश्वरो जगद्धितं वा एतद्रूपमक्षरं भवति । प्रतद्विष्णुस्तवते वीर्येण मृगो नभीमः कुचरोगिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ तस्मादुच्यते नृसिंहमिति " ॥ २ ॥
विश्वसर्गेति ॥ कृष्णाख्यमिति नामरूपोक्त्यापि मायातत्कार्यरहितमित्याह परं धाम मुक्तप्राप्यमित्यर्थः । इत्थमेव "वेत्ता च वेद्यं च परं च धाम" इति भाष्यकृद्भिर्व्याख्यातं जगतो धामेति लक्ष्यरूपतोपपादनम् ॥
श्रीदशमे व्याख्यातव्यमपीहौत्सुक्याच्छ्रीकृष्णं प्रणौति स्वामी ॥ विश्वसर्गेति ॥ वयं तदनिर्वचनीयमियत्तया गुणरूपादि वेयदीदृगिति वक्तुमशक्यं धाम तेजोरूपं ब्रह्म नमाम । बहुत्वं शिष्याभिप्रायम् । नमतेः "विधि
निमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । लोट् च " इति प्रार्थनायां लोट् । नमनेन प्रार्थयाम इत्यर्थः । ननु यत्तदोर्नित्यसंबंधादत्र यच्छब्दोपादानं कथं न कृतमिति चेत्तत्राह तत्त्वमसीति श्रुतौ । तदिति ब्रह्मणो नामेति
श्रुतौ च तच्छब्दस्य ब्रह्मवाचकत्वदर्शनात्तच्छब्दोत्र ब्रह्मवाचकः । सोहं हंस इत्यत्र च ततश्चात्र यच्छब्दोपादानं नापेक्षते " प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" इति काव्यप्रकाशोक्तेः । यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माधवो माधवावीशौ सर्वसिद्धिविधायिनौ ॥ वंदे परस्परात्मानौ परस्परनुतिप्रियौ ॥ ४ ॥

कुमारसंभवे " कला च सा कांतिमती कलावतः " इत्यत्रेति ॥"गृहदेहत्विट्प्रभावा धामानि" त्यमरः । किं भूतं श्रीयते सेव्यते ब्रह्मादिभिः श्रीकृष्णेन वेति श्री राधा "सर्वैराप्ूज्यते देवै राधा वृन्दावने वने" इति; ब्रह्मांडे ब्रह्मोक्तेः " यच्चिंत्यमखिलेश्वरैः " इति तत्रैव नारदोक्तेश्च । " राधैवाराध्यते मया " इति श्रीकृष्णोक्तेश्च । "राध्यते सा भगवता राधा इत्यभिधा स्फुटम् ।" इत्यादिपुराणोक्तेश्च श्रीशब्दो राधार्थकः । यद्वा श्रयत्याराध्नोति सर्वदा वृन्दावननिकुंजगं श्रीनंदनंदनमिति निरुक्त्यापि श्रीराधैव । " वृंदावने निकुंजस्थो राध्यते सर्वदा यया । नन्दसूनुरतो राधा सोच्यते मुनिसत्तम " इति नारदीयात् । कृषति निजसमीपमाकर्षति वेणुरवेण बल्लवीगणमिति कृष्णो यशोदानंदनः । ननु मधुरगीतादिना त्वन्येपि प्रमदागणमाकर्षति तत्र को विशेष इत्यरुच्याह । कृषति विलिखति निजानां संसारमिति कृष्णः । सदानन्दरूपो भक्तजनपापौघनाशकश्च । " कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इति तापनीयश्रुतेस्सदानंदरूपः । " कोटिजन्मकृतं पापं कृषिरित्युच्यते बुधैः । तन्नाशनकरो देवः कृष्ण इत्यभिधीयते ॥ " इति ब्रह्मवैवर्तोक्तेः । पापौघनाशकश्च कृष्णपदार्थः । श्रिया राधया सहितः कृष्णः श्रीकृष्णः । यद्वा " श्रीश्च ते लक्ष्मीश्च ते पत्न्यौ " इति श्रुतौ श्रीपदेन राधा लक्ष्मीपदेन चाभ्यां तुलसीसरस्वत्यौ ग्राह्ये । " लक्ष्मी सरस्वती विष्णोस्तुलसी च तृतीयिका । गंगा चतुर्थी विज्ञेया भार्या वैकुंठवासिनः ॥" इति प्रकृतिखंडे बहुधोक्तेः । श्रीशब्देनैव गंगाया अपि ग्रहणम् । तथा च श्रीश्च श्रीश्च श्रीश्च श्रीश्चेत्येकशेषसमासेन श्रिय इति स्यात् । तथा च श्रीभी राधारमागंगागीर्भिस्सहितः कृष्णः श्रीकृष्णः स आख्याऽभिधा यस्य तच्छ्रीकृष्णाख्यम् । गोस्त्रियोरितिह्रस्वः । एतेनैताभिस्सह श्रीकृष्णनत्या प्रेमसंपत्पावित्र्यवाग्वैभवाश्च नमस्कर्त्तुरवश्यं भाविन इति ध्वनितम् । पुनः सर्गश्च विसर्गश्च सर्गविसर्गौ विश्वस्य सर्गविसर्गौ विश्वसर्गविसर्गौ तावादी येषां स्थानादीनां तानि च नवलक्षणानि विश्वसर्गविसर्गादिनवलक्षणानि तैर्नवभिर्लक्षितं लक्ष्यत्वेन ज्ञापितं यद्यपि " अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः । मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः ॥ " इति लक्षणानि दशोक्तानि । तथापीहाश्रयरूपस्य दशमस्य लक्ष्याभिप्रायेण नवेत्युक्तिर्बोध्या । पुनः परं सर्वेभ्यः परतरम् " इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥ " इति श्रुतेः । यद्वा परं निर्भयम् । " भीषास्माद्वातः पवते " इत्यादिश्रुतेः " यद्बिभेति स्वयं भयम् " इत्युक्तेश्चास्मात्सर्वेषां भयं न त्वस्य कस्यचिदपि तदित्यर्थः । अन्येषां देवानां गृहीतशस्त्रत्वेन सभयत्वप्रतीतेः श्रीकृष्णस्य वंशीविभूषितकरत्वान्निर्भयत्वं स्फुटमिति । पुनर्जगतामनेकब्रह्मांडानां धामेति तत्पुरुषेणाश्रयरूपलक्ष्यत्वञ्च स्फुटमेव । " ईदृग्विधाविगणितांडपराणुचर्या वाताध्वरोमविवरस्य च ते महित्वम्" इति परमेष्ठ्युक्तेः । जगंति स्थावरजंगमात्मकानि सर्वाणि धामानि यस्येति समासस्तु सर्वांतर्यामितामाह । अत एव वक्ष्यति " कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् " इति । ननु " तस्मा इदं भागवतं पुराणं दशलक्षणम् " इत्युक्तेः सर्गादीनि दश महापुराणलक्षणानि श्रीमद्भागवतस्यैव संति कथं तानि श्रीकृष्णस्य संजाघटतीति तत्रेदमवधेयम् । "इदं भागवतं नाम पुराणं ब्रह्मसंमतम्" इत्युक्तेः " तेनेयं वाङ्मयी मूर्त्तिः श्रीकृष्णस्य न संशयः " इति पाद्मोक्तेश्च :श्रीकृष्णश्रीभागवतयोर्भेदाभावेनैक्यात्तत्रापि तानि न विरुद्धानीति । किञ्चैतानि च सर्गादीनि सर्वमहापुराणसाधारणानि श्रीभागवतस्य लक्षणान्युक्तानि यच्चासाधारणं लक्षणं तदिहैव मात्स्याद्युक्तं वक्ष्यति " ग्रंथोष्टादशसाहस्र " इत्यादिना । लक्षणञ्च लक्ष्यतावच्छेदकसमनियतत्वम् । लक्ष्यं च यदुद्दिश्य लक्षणं प्रवर्त्तते इति । इह च महापुराणं लक्ष्यं तत्र लक्ष्यतावच्छेदकं महापुराणत्वं तत्समनियतत्वं सर्गादिदशकस्येति समन्वयः । श्रीभागवतस्य महापुराणत्वं तु द्वादशे वक्ष्यति । " श्रीमद्भागवतं नाम सर्गादिदशलक्षणम् । महापुराणमल्पञ्च पंचलक्षणमिष्यते ॥ " इति । यत्वमरसिंहेन ' पुराणं पंचलक्षणम् ' इत्युक्त्वा पंचलक्षणस्यैव पुराणत्वं प्रतिपादितं तदल्पपुराणविषयमेवान्यथा " दशलक्षणसंयुक्तं पुराणं कवयो विदुः । केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया । " इति व्यासोक्तिर्व्याकुप्येतेति ॥ ३ ॥ अथ हरिहरयोरभेदज्ञानान्निर्बाधेष्टसिद्धिरिति बोधयन्नेतौ स्मरति ॥ माधवेति ॥ माया लक्ष्म्या धवः पतिर्मधुवंशे भवो वा मां मायां धुनोति " विलज्जमानया यस्य स्थातुमीक्षापथेमुया । " इत्युक्तेर्द्रावयतीति वा माधवो विष्णुः, उमायाः पार्वत्या धव उमाधवः स च स च माधवोमाधवौ । ' मा मायालोकमात्रोः ' इति ' धवः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्प्रदायानुरोधेन पौर्वापर्यानुसारतः ॥ श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ॥ ५ ॥ काहं मंदमतिः केदं मंथनं क्षीरवारिधेः ॥ किं तत्र परमाणुर्वै यत्र मज्जति मंदरः ॥ ६ ॥ मूकं करोति वाचालं पंगुं लंघयते गिरिम् ॥ यत्कृपा तमहं वंदे परमानंदमाधवम् ॥ ७ ॥

पतिर्धवो भीरुः ' इति च धरणिः । ' उमा कात्यायनी गौरी' इत्यमरः । सशक्तिकनतिस्तु वर्णनशक्त्याधिक्यलाभायेति ध्येयम् । ईशाविति ईश्वरद्वयासंभवादभेद एव तयोः पर्यवस्यतीत्याह । नामरूपादिभेदस्तु तत्तद्भक्त प्रीतिवशाज्जात इति । तदुक्तं " हरहर्योः प्रकृत्यैक्यं साधनैक्यं तथापि तौ । प्रत्यये भजतां रुच्यां संप्राप्तौ भिन्नरूपताम् ॥ " इति हरिहरशब्दयोस्तदर्थभूतविष्णुशिवयोश्च प्रकृतिश्चिद्रूपतास्वभावो हृञ् हरण इति धातुश्च साधनं भजनादिकं कर्त्राद्यर्थप्रत्ययगुणोत्पादनञ्च प्रत्ययः प्रतीतिः अकारेकारौ च रुचिरिच्छा मेघश्यामकर्पूरगौरकांतिश्च रूपं चतुर्भुजपंचमुखत्वादि अकरांतेकारांतशब्दरूपं च । भजतां नामसेविनाम् इच्छयाऽकारेकारादिप्रत्यये कृते सतीत्यन्वयः । अथ भक्तानां प्रत्यये प्रतीतौ कांत्या भिन्नरूपतामिति च । सर्वाश्च ताः सिद्धयो जन्मौषधितपोमंत्रयोगजरूपास्तासां विधायिनी कर्त्तारौ । जन्मसिद्धयः पक्ष्यादीनां वियद्गमनाद्याः औषधिसिद्धयो रसायनादिना वलीपलितादिनाशनादयस्ताम्रादेः स्वर्णरूप्यादिसंपादनाद्याश्च तपःसिद्धयो यथा कर्दमादीनां विमानसंपादनाद्याः मंत्रसिद्धयो वृश्चिकसर्पादेर्विषहरणाद्याः योगसिद्धयोऽणिमाद्या इति विवेकः । परस्परमात्माऽभेदो ययोस्तौ परस्परात्मानौ परस्परैकस्वरूपौ 'शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः । ईषदप्यंतरं कृत्वा रौरवं नरकं व्रजेत्" इत्यादिपुराणात् । "यो हरिः स शिवः साक्षाद्यः शिवः स हरिः स्मृतः" इति हरिवंशाच्च " मम रुद्रस्य यः कश्चिदंतरं परिकल्पयेत् । तस्य पुण्यक्रियाः सर्वा निष्फलाः स्युर्न संशयः " इति पाद्मे सत्यां प्रति श्रीकृष्णोक्तेश्च । पुनः परस्परं या नुतिः स्तुतिस्सा प्रिया ययोस्तौ । शिवस्तुत्या विष्णुः प्रीणाति विष्णुस्तुत्या च शिवः प्रीणातीति । नतिप्रियाविति पाठे तु परस्पराणामन्योन्यभक्तानां या नतिस्सा प्रिया ययोस्तौ तथा वैष्णवो भूत्वा यदि शिवं नमति तदा विष्णुः प्रीणाति शैवो भूत्वा यदि विष्णुं नमति तदा शिवः प्रीणातीति । "शैवो भूत्वा नमेद्विष्णुं तेन शंभुः प्रसीदति । वैष्णवश्चेन्नमेच्छंभुं तेन विष्णुः प्रसीदति ॥ " इति संहितोक्तेः । किञ्च लंकाविजयावसरे श्रीरामचन्द्रेणब्धितटे शिवलिंगं संस्थाप्य तस्य 'रामेश्वर' इति नाम कृतं तदाकर्ण्य मुनिभिः श्रीरामः पृष्टो भगवन्कोस्य पदस्यार्थस्तदा श्रीरामेणोक्तं रामस्येश्वरो रामेश्वरः पुनश्च संशयाकुलितैः श्रीशिवः पृष्टो भगवन्नब्धितटश्रीरामस्थापितरामेश्वराख्यलिंगस्य कोर्थस्तदा श्रीशिवः प्राह राम ईश्वरो यस्येति रामेश्वरः पुनर्मुनिभिर्विमृष्टमेतौ परस्परनुतिप्रियत्वाद्वस्तुत एकस्वरूपावेवेति तदुक्तं "रामस्तत्पुरुषं ब्रूते बहुव्रीहिं महेश्वरः ॥ रामेश्वरपदे प्राते मुनयः कर्मधारयम्" इति ॥ ४ ॥ संप्रदायेति ॥ संप्रदायो ब्रह्मादिपरंपरागताद्वैतरूपस्तदनुवर्त्तनेऽपि पौर्वापर्यस्मरणमावश्यकमन्यथा " कृष्णस्तु भगवान्स्वयम् " इत्यादिपूर्वापरवा यानालोचने । ' अथाहमंशभागेन ' इत्यादावंशावतारत्वादिव्याख्यानं स्यात् । अथवा संप्रदायः श्रीमद्भागवतव्याख्यानपद्धतिः सा यथा ब्रह्मणा नारदं प्रति "त्वमेतद्विपुलीकुरु"इत्युक्त्वा "यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय " इत्यादिरूपा । हरिलीलाप्राधान्येन श्रीभागवतं वर्णय न तु भक्तिरसविघातेन केवलं तत्त्वमिति । यथा भगवत्पादैः "मामेव ये प्रपद्यंते " इत्यादिपदानां भगवदेकशरणाद्यर्थं विहाय ब्रह्मात्म्यैक्यज्ञानार्थतादिव्याख्यातं तथात्र भक्तिप्राधान्यविधौ " भक्तिः सिद्धेर्गरीयसी । भक्त्याहमेकया लभ्यः " इत्यादौ भक्तिरसविघातकं ज्ञानादिप्राधान्यतया व्याख्यानं न कार्यमिति ब्रह्मणा पद्धतिर्विहिताऽत एव " नंदगोपकुमाराय" इत्यादौ नंदयतीति नंदः गां वेदलक्षणाम् वाणीं पातीति गोपः कुमविद्यां मारयतीति कुमारः नन्दश्चासौ गोपश्चासौ कुमारश्चेत्येवं भागवतं व्याचिकीर्षुः कश्चिद्विपश्चिद्यतिः श्रीकृष्णेनैव वारित इति महाजनप्रसिद्धेः । तथा च ब्रह्मोपदिष्टसंप्रदायानुरोधेनेत्यर्थः । तदनुरोधेपि पौर्वापर्यानालोचने कृष्णेंशतया व्याख्यानं मायाप्रतिबिंबत्वं मायिकविग्रहत्वं मध्वाद्यभिप्रेतकेवलभेदादिव्याख्यानं च स्यात् । स्वरसतः पौर्वापर्यालोचने नैतदिति ध्येयम् । अक्षरार्थपदार्थवाक्यार्थास्तु श्रीभागवतस्य दुर्ज्ञेया इति मत्वाह । श्रीभागवतस्य भावार्थानां निर्गलितानां यद्वा श्रीभागवते श्रीकृष्णे यो भावो भक्तिः स एवार्थः प्रयोजनं यस्यास्सा चासौ दीपिका चेति तथा वितन्यते विस्तार्यते ॥ ५ ॥ वस्तुतो नाहं भावार्थप्रकाशनेऽपि शक्त इत्याह । केति । द्वौ कशब्दौ महदंतरं द्योतयतः । यत्र क्षीराब्धौ मंदरोऽयुतयोजनप्रमाणो गिरिभेदः मज्जत्यधोगच्छति तत्रैव क्षीराब्धौ परमाणुर्जालांतर्गतदृश्यत्रसरेणुषष्ठो भागः । तदुक्तं " जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः । तस्य षष्ठतमो भागः परमाणुः स उच्यते ॥ " इति ॥ ६ ॥ मूकमिति ॥ वाचालं भूषितं पर्याप्तं वा । लंघयते । इह लंघनफलस्यानात्मगामित्वादात्मनेपदं नेष्टमिति न ध्येयम् " ततान सोपानपरंपरामिव " इत्यादौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गों मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥

श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः सज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः ॥ द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्ट दशेष्टदोऽतिसुलभो वर्वर्ति सर्वोपरि ॥ ८ ॥ अथ नानापुराणशास्त्रप्रबंधैश्चित्तप्रसत्तिमलभमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणानुवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रत्यूहनिवृत्त्यादिसिद्धये तत्प्रतिपाद्यपरदेवतानुस्मरणलक्षणं मंगलमाचरति जन्माद्यस्येति ॥ परं परमेश्वरं धीमहि । ध्यायतेर्लिङि छांदसं ध्यायेमेत्यर्थः । बहुवचनं शिष्याभिप्रायम् । तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति । तत्र स्वरूपलक्षणं सत्यमिति । सत्यत्वे हेतुः । यत्र यस्मिन्ब्रह्मणि त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेन्द्रियदेवतारूपोऽमृषा सत्यः यत्सत्यतया मिथ्यासर्गोऽपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः । अत्र दृष्टान्तः । तेजोवारिमृदां यथा विनिमय इति । विनि

कालिदासादिभिस्तन्मर्यादाया अनादृतत्वात् । अत्र परमानंदमाधवेति गुरुनामेति संप्रदायविदस्तेन गुरुवंदनमपि फलितम् । “ एका क्रिया द्व्यर्थकरी प्रसिद्धा रसालसेकः पितृतर्पणञ्च ” इति न्यायात् । मूकोत्र शास्त्राभ्यासरहितो ज्ञेयः । इह ध्रुवो दृष्टांतः । पंगुः पादरहितः । अत्र दृष्टांतो गरुडाग्रजः । यद्वा यत्कृपा यत्सामर्थ्यं वाचालमपि मूकं करोतीति । अत्र दृष्टांतः कात्यायनः । कात्यायनो हि शंकरदत्तसूत्रव्याख्याप्रवृत्तपाणिनिं पराजिग्ये स च रुद्रं प्रति वृत्तं श्रावयामास रुद्रेणोक्तं मदभिमुखं शास्त्रार्थे तं योजय पुनस्तमहं शासिष्यामीति स तथैव कृतवान्पुनः खंडनप्रवृत्तं कात्यायनं शंकरोहमित्युक्त्वा मूकं चकार पुनः स रुद्रं ध्यानेनाराध्य वाग्व्यापारं लेभे रुद्राज्ञया पाणिनिन्यूनतां स्ववार्त्तिकैः पूरयामासेत्यैतिह्यात् । इहापि विष्णुशिवयोरभेद एवाभिप्रेतः ॥ ७ ॥ भक्तिभक्तभगवन्माहात्म्यप्रतिपादकं शास्त्रमपि श्रवणपठनपूजनवंदनादिभिः काममोक्षादिप्रदं किमुत भक्ताभक्तिर्भगवांश्चेति व्यंजयितुं श्रीमद्भागवतशास्त्रं स्तौति । श्रीमदिति ॥ श्रीमद्भागवतमिति षडक्षरमभिधा यस्य “ श्रीमद्भागवते महामुनिकृते ” इति मूले व्यवहारात् । भागवतमिति । व्यवहारस्तु भामा सत्येति वत् । “तारः प्रणव ओंकार” इति विश्वः । स ब्रह्मैव जनिर्बीजं यस्य सः । स्कन्धैः प्रकांडैः ततो विस्तृतः । तनोतेः क्तः । प्रविलसंती देदीप्यमाना या भक्तिः सैवालवालः परितः कृतजलस्थित्यर्थं मध्यपरिमाणः खातस्तत्रोदयोऽत्र स्थितिर्यस्य सः । द्वात्रिंशच्च त्रयश्च शतानि चेति त्रिपदद्वंद्वः । ‘ कपिंजलानालभेत ’ इतिवदनिर्द्धारितविशेषं बहुत्वं त्रित्वे पर्यवस्यति तेन पञ्चत्रिंशदधिकशतत्रयसंख्याकाः शाखा इत्यर्थः । समाहारोत्तरद्वंद्वे तु त्रिशतीति स्यादिति । एतेनाघासुरवधाद्यध्यायाभिप्रायं द्वात्रिंशत्पदमिति कस्यचिदुत्प्रेक्षितं प्रत्युक्तम् । हरिलीलाग्रंथे बोपदेवेन “ निरोधो दशमस्कंधे नवत्यध्याय ईरित ” इत्युपक्रम्य “ वधश्च वत्सवकयोस्तथाघासुरभोगिनः । वत्सचोरब्रह्ममोहो ब्रह्मणा स्तवनं हरेः ॥” इत्युक्तत्वेन तद्विरोधापत्तेः । अष्ट दश च सहस्राणीति पृथक्पदेनान्वयः । समासे त्वष्टादशेति स्यात् । इष्टं सकामानां त्रिवर्गं निष्कामानामपवर्गश्च ददातीतीष्टदः । अतिसुलभो नृणां कल्पवृक्षापेक्षया । सुरतरुर्हि स्वर्गं गत्वा लभ्यतेऽयं त्वत्रैव लभ्यते इत्यत उक्तमतिसुलभ इति । सर्वेभ्यः पुराणेतिहासादिशास्त्रेभ्य उपर्युपरिष्टादलौकिकफलदत्वादतिशयेन वर्त्तते ॥ ८ ॥ तदेव दर्शयितुं ग्रंथावतरणिकामाह अथेति । नानापुराणानां श्रीमद्भागवतेतराणां शास्त्राणां धर्मशास्त्रवेदांतशास्त्राणाञ्च प्रबंधै रचनाभिः । चित्तस्य प्रसत्तिं प्रसादम् । तत्रतत्र पुराणेतिहासादिप्रबंधेषु श्रीमद्भागवतः श्रीकृष्णस्य गुणानां लीलानां वर्णनं प्रधानं मुख्यं यत्र तद्भागवतशास्त्रं प्रारिप्सुः प्रारंभं कर्तुमिच्छन् । तस्मिञ्शास्त्रवर्णनादौ ये प्रत्यूहा विघ्नास्तेषां निवृत्त्यादिसिद्धये आदिना पुंनर्विघ्नाभावसिद्धये तस्मिन्भागवते प्रतिपाद्या या परदेवता परब्रह्मरूपा तस्या यदनुस्मरणं मुहुः स्मरणं तदेव लक्षणं स्वरूपं यस्य तत्तथा । “ मंगलादीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथंते वीरपुरुषका आयुष्मत्पुरुषकाश्चाध्येतारो भवंति” इति भाष्यात् । यद्यपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयो व्यत्ययोऽन्यस्मिन्नन्यावभासः । स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः । तत्र तेजसि वारिबुद्धिर्मरीचितोये प्रसिद्धा । मृदि काचादौ वारिबुद्धिर्वारिणि च काचादिबुद्धिरित्यादि यथातथमूह्यम् । यद्वा । तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तम् । यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति । यत्रेत्यनेन प्रतीतमुपाधिसंबंधं वारयति । स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं मायालक्षणं यस्मिंस्तम् । तटस्थलक्षणमाह । जन्मादीति । अस्य विश्वस्य जन्मस्थितिभंगा यतो भवंति तं धीमहीति तत्र हेतुः । अन्वयादितरतश्च । अर्थेष्वाकाशादिकार्येषु परमेश्वरस्य सद्रूपेणान्वयादकार्येभ्यश्च खपुष्पादिभ्यस्तद्व्यतिरेकात् । यद्वा अन्वयशब्देनानुवृत्तिरितरशब्देन व्यावृत्तिः । अनुवृत्तत्वात्सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् । व्यावृत्तत्वाद्विश्वं कार्यं घटकुंडलादिवदित्यर्थः । यद्वा । सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य

शास्त्राणि "कपिलस्य कणादस्य गातमस्य पतंजलेः । व्यासस्य जैमिनेश्चापि शास्त्राणि षड्विदुर्बुधाः॥" इत्याभियुक्तोक्तेः षडेव संति । तथापीह सर्वधर्मादिपुरुषार्थशासनान्मुख्यं शास्त्रत्वं श्रीव्यासप्रणीतत्वाच्च षडंतर्वर्त्तित्वमपीति । किञ्च प्रकरणप्रतिपाद्यार्थानां कात्स्न्र्येन प्रतिपादको ग्रंथः शास्त्रमेतस्य शास्त्रलक्षणस्यापि यथाकथंचिदत्र घटनादप्यस्य शास्त्रत्वमेवेत्यलम्॥ जन्मादीति॥ परं परमेश्वरं बिंबभूतमीश्वरमित्यर्थः । तेन मायाप्रतिबिंबितेश्वरव्यावृत्तिः। द्वेधात्र प्रक्रिया । तत्राद्या यथाऽविद्याप्रतिबिम्बो जीवः मायाप्रतिबिम्ब ईश्वरः । स चोपाधिभूतमायायास्त्रैगुण्यात्तत्तद्गुणाविशिष्टमायाप्रतिबिम्बभेदेन ब्रह्मविष्णुशिवरूपो बिम्बभूतस्तु परमेश्वरो निरुपाधिकं ब्रह्मैव।स चादिनारायणः श्रीकृष्ण इत्यादिपदैर्व्यवह्रियते । शिवपुराणादौ शिवादिपदैश्च । स च न स्वांशमायाप्रतिबिम्बितेश्वरधर्मैः सृष्ट्यादिकर्त्तृत्वादिभिरभिलिप्यते । द्वितीया यथा । अविद्या माया च एकैव तत्प्रतिबिम्बो जीवः बिम्बभूतं चैतन्यमीश्वरो निरुपाधिक एक एव सृष्ट्याद्यारोपितधर्मैर्ब्रह्मविष्ण्वादिभेदव्यवहारभाक् । बिम्बत्वप्रतिबिम्बत्वाभ्यामनाक्रांतं शुद्धचैतन्यं निर्द्धर्मकं ब्रह्मेति द्विधैव प्रक्रियात्र शास्त्रे ह्युपलभ्यते । सर्वथैतच्छास्त्रपरमतात्पर्यगोचरो बिम्बभूतपरमेश्वरो निर्गुणं ब्रह्मैव तत्रोपलभ्यमानगुणानां चिन्मयत्वेन प्रकृतिपरिणामभूतगुणाश्रयत्वाभावात् । स्पष्टं चेदम् " मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं प्रियमात्मानं साम्याः संगादयो गुणाः ॥ " इत्यादौ । तमेव परमेश्वरमेव ॥ स्वरूपतटस्थेति ॥ यत्स्वरूपांतर्गतं सदितरव्यावृत्ततया लक्ष्यं बोधयति । तत्स्वरूपलक्षणं यथा गोः सास्नाशृंगादियावल्लक्ष्यकालमनवास्थितत्वेन स्वरूपानंतर्गतं यल्लक्ष्यमितरव्यावृत्तं बोधयति तत्तटस्थलक्षणम् । यथा गोविशेषस्यालंकारविशेषादि देवदत्तगृहस्य काकादि वा । प्रकृते सत्यं ज्ञानमानंदश्च परमेश्वरस्वरूपमेव सत् । असज्जडदुःखप्रपञ्चव्यावृत्ततया बोधयतीति स्वरूपलक्षणं संपद्यते । जगज्जन्मादिकारणत्वं तु तटस्थलक्षणम्। न हि तत्सर्वदास्ति । प्रलयादिकाले तत्तदभावात् । अतः स्वरूपानंतर्गतं सदाकाशादिव्यावृत्तमीश्वरं लक्षयतीति तटस्थलक्षणमिति त्रयाणामहंकारसंवलितानां तमोरजःसत्त्वानां सर्गो भूतेंद्रियदेवतारूपस्तामसाहंकाराद्भूतसर्गो राजसादिंद्रियसर्गस्सात्त्विकादिंद्रियाधिष्ठातृदेवतासर्ग इति विवेकः । यत्र परमेश्वरे इत्यर्थ इति । मृत्तिकेत्येव सत्यमित्यादावन्यत्रापि सत्यशब्दप्रयोगस्त्वापेक्षिक एव । परमसत्यत्वं तु परमेश्वरस्यैवेति भावः । अत्रान्यसत्तयांऽन्यस्य सत्यत्वे इत्यर्थ इति । न हि परसत्तया परस्य सत्यत्वं वास्तवं भवतीति भावः । तत्रेति वाक्यालंकारे यथायथेति यथायथम् । यथास्वे यथाशब्दस्य द्वित्वमूह्यमिति । वारिणि समुद्रजले दूरत्वदोषेण नीलशिलाबुद्धिः कामलया शंखे पीतबुद्धिश्च । यथा सदसि दुर्योधनस्य स्थलभ्रमः यथा वान्धकारस्थरत्नरूपमृदि खदिरांगारभ्रम इत्यादिपदाद्ग्राह्यम् । मिथ्यापदार्थस्यामिथ्यात्वसाधनं न शोभनमिति॥चेत्तत्राह॥यद्वेति आधाराधेयभावेन सोपाधिकत्वमाक्षिप्यापाकरोति यत्रेत्यादिना । कुहकमज्ञानम् । अनावृतसंविद्रूपे बिम्बभूत ईश्वरेऽज्ञानाश्रयत्वासंभवात् । अज्ञानविषयमात्रेण भ्रमाधिष्ठानता ।न च तावतैश्वर्यहानिः अज्ञानविषये मण्यादौ कपर्दिकाद्यारोपेपि स्वरूपप्रकाशादेर्बाधादर्शनात् जन्मादि यस्य स्थितिभंगस्य तथा तद्गुणसंविज्ञानः यत इत्यव्ययनिर्देशः कारणस्याविकृतत्वमाह । तत्र परमेश्वरस्य कारणत्वे सद्रूपेण घटः सन्पटः सन्नित्येवं रूपेण यत्सत्त्वे यत्सत्त्वं सोन्वयः घटादिसत्त्वे सत्तासत्त्वस्य दृश्यमानत्वादन्वयः । आदिना वंध्यात्मजादिग्रहः । यदभावे यदभावः स व्यतिरेकः । खपुष्पाद्यभावे तत्र सत्ताया अप्यभावात्खपुष्पं सदिति प्रयोगादर्शनाद्व्यतिरेकः । अत्र न केवलं सत एवान्वयव्यतिरेकौ विमृश्यौ । किं तु मृदादिविशिष्टस्यैव सतस्तौ । तथा च मृदादिविशिष्टसत्ताव्यतिरेकाधिकरणं तु तंत्वादिभावरूपमपि प्रसिद्धं तत्कथमलीकस्य खपुष्यादेस्तदधिकरणतेत्यपरितोषादाह॥ यद्वेति ॥ अनुवृत्तिस्तादात्म्येन प्रतीतिः व्यावृत्तिर्भेदः कार्येषु कार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मादि तद्यतो भवतीति संबंधः । तथा च श्रुतिः । " यतो वा इमानि भूतानि जायंते । येन जातानि जीवंति । यत्प्रयंत्यभिसंविशंति " इत्याद्या । स्मृतिश्च " यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये " इत्याद्या । तर्हि किं प्रधानं जगत्कारणत्वाद्ध्येयमभिप्रेतं नेत्याह । अभिज्ञो यस्तम् । " स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत " इति श्रुतेः । " ईक्षतेर्नाशब्दम् " इति न्यायाच्च । तर्हि किं जीवो ध्येयः स्यान्नेत्याह । स्वराट् स्वेनैव राजते यस्तं स्वतः सिद्धज्ञानमित्यर्थः । तर्हि किं ब्रह्मा ध्येयः । "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्" इति श्रुतेः नेत्याह । तेन इति । आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यस्तेने प्रकाशितवान् । " यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तꣳह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये " इति श्रुतेः । ननु ब्रह्मणो

णस्यानुवृत्तिर्यथा सुवर्णकटकं सुवर्णमिति तादात्म्येन प्रतीतेः । कार्यस्य कारणावस्थायां नानुवृत्तिः । यथा सुवर्णे कुंडलं कटकं वेति प्रतीत्यभावात् । ननु मीमांसकैर्जगज्जन्माद्यनंगीकारात् । कथं जन्मादिकारणत्वं भगवत इति चेदाह ॥ यद्वा सावयवत्वेत्यादि ॥ घटादिष्वात्मनि च गृहीतान्वयव्यतिरेकव्याप्तिकस्य सावयवत्वादिहेतोरस्य पदवाच्यजगति पक्षे परामर्शादिसामग्रीबलाद्यजन्मादि निश्चितं तद्यतो भवतीति सम्बन्धः । हेतुपुरस्सरान्वयव्याप्तिः साध्याभावपुरस्सरा व्यतिरेकव्याप्तिरिति भेदः । तथा च इदं विश्वं जन्मादिमत्सावयत्वात् । यत्र सावयवत्वं घटादौ तत्र जन्मादिमत्त्वं यत्र जन्माद्यभाव आत्मनि तत्र सावयवत्वाभाव इति तटस्थलक्षणप्रतिपदिकां श्रुतिमाह । तथा चेति ॥ यतः परेशात् इमानि चराचराणि भूतानि जीवानि प्रयंति प्रलयं प्राप्नुवंति यद्यमभिसंविशंति सर्वतः प्रविशंतीति श्रुतिपदार्थः । एतदर्थिका स्मृतिरप्यस्तीत्याह ॥ स्मृतिश्चेति ॥ आदौ सृष्ट्यारम्भे यो युगस्यागमस्तत्र चान्तध्ये यत्र तिष्ठंतीत्यप्यनुसंधेयम् "अव्यक्तादीनि भूतानि" इत्यादिश्रीगीतोक्तेरव्यक्तशब्दवाच्यप्रधानमत्र भगवच्छ्रीव्यासस्य ध्येयं प्रतीयत इत्याशंक्य समाधत्ते नहीति॥तर्हि शास्त्रारंभे प्रधानं प्रकृतिः अभितो जानातीत्यभिज्ञः सर्वज्ञानवान् स परमेशः ऐक्षत विचारयामास अहं लोकान्नु इति वितर्के सृजै रचयानि।इमान्सर्वान् श्रुत्यर्थनिर्णायको न्यायः न्यायाच्छारीरिकसूत्रादित्यर्थः।सांख्याभिमतं प्रधानं जगत्कारणं न तत्र हेतुरशब्दमिति ।अशब्दत्वाद्वेदाप्रतिपाद्यत्वात् नहि वेदो जडं प्रतिपादयति तत्र हेतुःईक्षतेःस ऐक्षतेत्यत्र जगत्कर्त्तरीक्षणश्रवणात् । नन्वीश्वरस्य कर्तृत्वादिकं वैषम्यादिदोषाप्रसंगार्थं जीवकर्मापेक्षं जीवश्च धर्मादिकर्त्ता कर्मद्वारेश्वरस्य सृष्ट्यादिप्रयोजकत्वेन कारणताजयकर्तृयोधप्रयोजके जेतृत्वश्रुतेः । तथा च जीवो ध्येय इति नेति।अविद्यावृत्तज्ञानैश्वर्यस्य जीवस्य ध्याने फलाभावात् । इत्यर्थ इति अल्पज्ञानजीवध्याने प्रयोजनाभावात्स्वतः सिद्धज्ञानमेव वयं धीमहीति । ननु समष्टिजीवस्य हिरण्यगर्भस्य"हिरण्यगर्भः"इत्यादिश्रुतेस्तदैश्वर्यस्यान्यतः प्राप्त्यश्रवणात्तन्निदानज्ञानस्यापि तथात्वावगतेरनावृत्तत्वमिति श्रुत्यर्थः स्पष्ट एव॥नेति॥नानाविधस्तोत्रैस्तुष्टस्तस्मै वेदं ददाविति व्यंजयति कविपदम्।यः परेशःविदधाति उत्पादयति प्रहिणोति ददाति तस्मै ब्रह्मणे तं देवं देदीप्यमानं ह स्फुटं स्वबुद्धिप्रकाशकमहं मुमुक्षुः शरणं संसाराद्रक्षकमित्यर्थः अत्राक्षिपति ॥ नन्विति ॥ स्वानि शिक्षादियुक्तानि लक्षणानि यस्याः स्वा स्वलक्षणा । ऋषीणां ज्ञानदानामृषभः श्रेष्ठः विशेषत इदं पद्यं द्वितीयस्कंधे व्याख्यास्यते।पुनराक्षिपति।।नन्विति ॥ इह लोकेष्वतिप्रसिद्धोर्थो न्यायः यथा पूर्वेद्युराचार्याद्वेदमधीत्य सुप्त्वा परेद्युः प्रबुद्ध आचार्यनिरपेक्ष एव पठति तद्वद्दैनंदिनकल्पेपि । महाकल्पादौ तु जातिस्मरवदद्दृष्टविशेषात्कल्पांतरानुष्ठितकर्मोपासनबललब्धब्रह्मत्वाधिकारः कल्पांतरस्थवेदं स्मरावित्यर्थः । सूरयोपि कपिलादयोऽपि । अतएव स्वतः सिद्धज्ञानत्वादेव । असतः प्रपञ्चस्य गायत्र्या सर्वगायत्रीमंत्राव्यभिचारि धीमहीतिपदसंवलितगायत्र्यर्थेन प्रारंभेणेत्यर्थः । चतुर्विंशत्यक्षरत्रिपाच्छंदसा प्रारंभ इत्यर्थो न युक्तः । चतुर्वेदैकगोचरतादृशच्छन्दोविशेषस्य क्वाप्यदर्शनेनैकस्मिन्नस्मिन्नेव पुराणे तदसंभवात् । गायत्र्यर्थतास्येत्थम् । सवितृपदं जगत्प्रसवकारणपरं तदर्थो जन्माद्यस्य यत इत्यनेन पालनादिक्रीडार्थकदेवपदार्थोप्यनेनैव जन्मादीत्यादिपदेन पालनादिग्रहात् । वरेण्यपदार्थः परपदेन परत्वोपपादकानि सत्यादिपदानि भर्गपदार्थों धामपदेन।धीमहीतिपदं स्वरूपेणैव तृतीयपादार्थः । तेने ब्रह्महृदेत्यादिना समष्टिगर्भबुद्धिप्रेरकत्वोक्तेः सर्वव्यष्टिबुद्धिप्रेरकता त्वर्थसिद्धेति । गायत्रीमंत्रेण पदेन वा यां ब्रह्मविद्या ख्यायते सारूप्यते प्रतिपाद्यते येन तद्रूपं प्रतिपाद्यप्रतिपादकाभेदविवक्षया श्रीमद्भागवतमित्यर्थः । ब्रह्मविद्यापदेनात्र सगुणनिर्गुणविद्ययोर्ग्रहणम् । अत्र प्रमाणमाह यथोक्तमित्यादि । गायत्रीं गायत्र्यर्थं धर्मस्य धर्मः प्रोज्झितकैतव इत्युक्तलक्षणभागवतधर्मादेर्विस्तरः वृत्रासुरस्यपरमभागवतत्वात्तद्वधचारितस्यापि भागवतल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणत्वम्। अत्र सिंहपदेन सिंहासनं लक्ष्यते । भीमभीमसेनादिवत् । प्रौष्ठपद्यां भाद्रशुक्लपूर्णायाम्। अष्टादशसहस्राणि तत्पुराणं वेदाः प्रमाणमितिवद्व्यधिकरणसंबंधः । पुराणांतरे वामनपुराणे इत्यर्थः । हयग्रीवेणाश्वशिरोयुक्तेन दधीचिमुनिना प्रवर्तिता नारायणवर्माख्या ब्रह्मविद्येत्यर्थः । नारायणवर्मणो ब्रह्मविद्यात्वञ्च "एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतौ सत्यशंकितः" इत्यत्र टीकोत्थापितवचनेन गम्यते शुकाय प्रोक्तं शुकप्रोक्तम्। केचित् शुकं प्रीणातीति शुकप्रो व्यासस्तेन प्रोक्तमित्याहुः । यद्वा शुकेन परीक्षिते प्रोक्तमिति चास्य शास्त्रस्यानागताख्यानेनैव प्रवृत्तेर्वक्ष्यमाणत्वात् । अत एव ॥ लक्षणोक्तिपूर्वकं पाठादिविधानादेवेत्यर्थः । अयं भावः । न लक्षणोक्तिं विना भागवतं दद्यादित्येवं दानादिविधाने भगवता प्रोक्तं भागवतमिति समाख्यां विचार्य च "एवं चकार भगवान्व्यासः कृपणवत्सलः" इत्युक्त्या भगवद्व्यासप्रणीतत्वेन पुराणमात्रस्य भागवतत्वसंभवात् शिवविष्ण्वादिदेवपाणिन्यादिमुनिष्वपि भगवच्छब्दप्रयोगात्तत्प्रतिपादकशिवविष्णुब्रह्मपुराणादेरष्टाध्याय्यादेश्च भागवतत्वसंभवाच्च न सामंजस्येन पदार्थनिर्णयस्तथा च भागवतं नामान्यच्छिवविष्णुपुराणादिकमेव स्यादित्यतिव्याप्तिशंका स्याल्लक्षणोक्तौ विशेषनिर्णये न शंकनीयं न शांकितुं योग्यं भवति सर्वत्र लक्षणोक्तेरतिव्याप्त्यादिनिरासार्थायाः सत्त्वात् । इत्यपि न शंकनीयमित्यत्रेत्यपीत्युक्त्या ब्रह्मविद्यारूपत्वोक्तेः कर्मविद्यावन्मुमुक्षुभिरसेव्यमित्यपि न शंकनीयमिति बोध्यते । आलयमित्यादौ मुक्तादिसेव्यत्वस्य वक्ष्यमाणत्वाच्च गरुडपुराणेप्यस्य प्रशंसा । "अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यभूतोसौ वेदार्थपरिबृंहितः ॥ पुराणानां सामरूपः साक्षाद्भगवतोदितः । ग्रंथोष्टादशसाहस्रः श्रीमद्भागवताभिधः" इति ब्रह्मसूत्राणामर्थोऽकृत्रिमो भाष्यभूत इत्यर्थस्तस्मात्तद्भाष्यभूते स्वतः सिद्धे तस्मिन्सत्यर्वाचीनमन्यद्भाष्यं स्वस्वकपोलकल्पितं तदनुगतमेवादरणीयमिति गम्यते । भारतार्थस्य विनिर्णयो यत्र स एतेन भारतेनास्य कथाविरोधो हि प्रातीतिको न वस्तुतः पदार्थानां दुर्ज्ञेयत्वात्। भारतस्यापि तात्पर्यं भागवतवद्भगवत्येवेत्यर्थः । यद्वा भारतस्यार्थविनिर्णयो वेदार्थतुल्यत्वेन विशिष्य निर्णयो यत्रेति गायत्रीभाष्यभूतोसाविति । यत्तु द्वादशे ओं नमस्त इत्यादिगद्येषु तदर्थत्वेन सूर्य्यः स्तुतस्तत्परमात्मदृष्ट्यैव न तु स्वातंत्र्येणेत्यदोषः । तथैवाग्रे शौनकवाक्यम् "ब्रूहि नः श्रद्दधानानां व्यूहं सूर्य्यात्मनो हरेः" इति । न चास्य भर्गस्य सूर्यमंडलमात्राधिष्ठानत्वम् मंत्रे वरेण्यशब्देनात्र च ग्रंथे परशब्देन पारमैश्वर्यपर्यंतताद‍र्शितत्वात् । तदेवमग्निपुराणेऽप्युक्तं "ध्यानेन पुरुषोयं च द्रष्टव्यः सूर्यमंडले । सत्यं सदाशिवं ब्रह्म तद्विष्णोः परमं पदम् ॥" इति । भविष्येपि "ध्येयः सदा सवितृमंडलमध्यवर्त्ती नारायणः सरसिजासनसंनिविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥" इति । श्रीमद्भागवताभिध इति ॥ भागवतत्वं तु भगवत्प्रतिपादकत्वं श्रीमत्त्वं भगवन्नामादेरिव तादृशस्वाभाविकशक्तिमत्त्वम् नित्ययोगे मतुप् । अतः समस्ततयैव निर्दिश्य नीलोत्पलवद्भगवन्नामत्वमेव बोधितमन्यथा त्वविमृष्टविधेयांशतादोषः स्यात् । "अविमृष्टविधेयांशः समासपिहिते विधौ । विशंति विशिखप्रायकटाक्षाः कामिनां हृदि" इति चंद्रालोकोक्तेः । अत्र विशंतीवद्विशंतीति विधेयं तच्च प्रकृतसमासेन प्राप्यते । विशिखकटाक्षयोः साम्यमात्रं तु प्राप्यत इति । अत एवोक्तम् । श्रीमद्भागवते महामुनिकृते इति ॥ अष्टादशसहस्रसंख्यागणनाप्रकारस्त्वित्थम् । दीर्घवृत्तगद्यानुष्टुप्छन्दस्समूहे ग्रंथे द्वात्रिंशदक्षरात्मिकानुष्टुप्परिमाणेन गणनायां पंचोनद्विशत्युत्तरषोडशसहस्रसंख्या १६१९५ संपद्यते उवाचमंत्राः सप्तत्यधिकद्वादशशतसंख्याकाः १२७० अर्द्धश्लोकाः शतद्वयसंख्याः २०० इति श्रीमद्भागवतेऽमुकस्कंधे प्रथमादिरध्याय इति वाक्यानामपि व्यासविरचितत्वेन ग्रंथसंख्यांतर्गतत्वेन तत्संख्या ३३५ पञ्चत्रिंशदुत्तरत्रिशती संकलनयाष्टादशसहस्रसंख्या १८००० संपत्तिः । यद्वा चंडीसप्तशतीन्यायेन मंत्रविभागेनापीयं संख्या संभाव्यते । तथाहि अनुष्टुप्श्लोकगद्यार्यारूपमंत्रा एकादशसहस्राणि द्विसप्तत्युत्तरे द्विशती च ११२७२ दीर्घवृत्तश्लोकानां षट्पंचाशदधिकसप्तविंशति २७५६ संख्याकानामर्धकानि मंत्रा द्वादशाधिकसार्द्धपञ्चसहस्राणि ५५१२ अनुष्टुबर्द्धकान्येकादशाधिकद्विशती २११ उवाचमंत्राणां सप्तत्यधिकद्वादशशतसंख्यानां मध्ये पञ्चषष्ट्युत्तरद्विशतानामनुवादरूपाणां पुरोवादशेषतया तावतो विहायावशिष्टा उवाचमंत्राः पंचोत्तरसहस्रं १००५ सर्वसंकलनयाष्टादशसहस्राणि १८०० आपातत एव संख्या तेन तत्तदध्यायेषु तत्तन्मंत्रगणनया संख्यानाधिक्यसंकलनमूह्यम् हेमाद्रिप्रभृतिधर्मशास्त्रग्रंथेषु कालखंडादौ 'कलिं सभाजयंत्यार्याः' इत्यादिश्रीमद्भागवतवचनोदाहरणेन कलिधर्मादिनिर्णयात् । कर्मादिकांडत्रयरूपत्वेन सकलवेदादिसाररुपत्वं 'सर्ववेदेतिहासानां सारंसारं समुद्धृतम्' इति वक्ष्यमाणत्वाच्च। किञ्च मुमुक्षूपकाराय हेमाद्रिप्रेरितबोपदेवेन कृते मुक्ताफलग्रंथे पुराणांतरं विहाय श्रीमद्भागवतश्लोकानामेवोदाहरणादेतस्यैव मोक्षैकफलरूपत्वेन मुमुक्षुसेव्यत्वं व्यज्यते। तथा च ग्रंथांतरे तत्पद्यं "विद्वद्धनेशशिष्येण भिषक्केशवसूनुना । हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत् ॥" इति । अत एव स्वाम्युदाहृतं यदीच्छासि भवक्षयमित्युक्तम् । अत्र शुकप्रोक्तमितिविशेषणेन विष्णुपुराणादीनां योगवृत्त्या भागवतत्वनिरासः । शुकाय प्रोक्तं शुक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोक्तं “शुकमध्यापयामास निवृत्तिनिरतं मुनिः” इत्युक्तेश्चतुर्थीतत्पुरुषः । किञ्च योगवृत्त्या पुराणांतरस्यापि भागवतत्वे हेमाद्रिमाधवमधुसूदनस्वामिकमलाकरभट्टानंतदेवपर्यंतैर्महानिबंधकारैर्निरुपपदं भागवतमुच्चार्य्यैव पुराणस्यास्य वचांसि नोदाह्रियेरन् किंत्वन्यभागवतव्यावर्तकविशेषणमुपादीयेत भागवत इत्युक्त्वान्यपुराणवाक्यमप्युदाह्रियेत । न चैवं क्वाप्युपलभ्यते तस्मादिदमेव भागवतं न त्वन्यत् । किं च श्रीनारदपुराणे पुराणसूत्रेषु मरीचये ब्रह्मणा भागवतसूत्राण्यप्युक्तानि तथा हि “ ब्रह्मोवाच ॥ मरीचे शृणु वक्ष्यामि वेदव्यासेन यत्कृतम् । श्रीमद्भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ तदाष्टादशसाहस्रं कीर्तितं पापनाशनम् ।सुरपादपरूपोयं स्कंधैर्द्वादशभिर्युतः ॥भगवानेव विप्रेंद्र विश्वरूपी सनातनः । तत्र तु प्रथमे स्कंधे सूतर्षीणां समागमे ॥ व्यासस्य चरितं पुण्यं पांडवानां तथैव च । पारीक्षितमुपाख्यानमितीदं समुदाहृतम् ॥परीक्षिच्छुकसंवादे सृष्टिद्वयनिरूपणम् । ब्रह्मनारदसंवादे देवताचारितामृतम् ॥ पुराणलक्षणं चैव सृष्टिकारणसंभवः । द्वितीयोयं समुदितः स्कंधो व्यासेन धीमता ॥ चरितं विदुरस्याथ मैत्रेयेणास्य संगमः । सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः ॥ कापिलं सांख्यमप्यत्र तृतीयोयमुदाहृतः । सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः ॥ पृथोः पुण्यं समाख्यानं ततः प्राचीनबर्हिषः । इत्येष तुर्यो गदितो विसर्गस्कंध उत्तमः ॥ प्रियव्रतस्य चरितं तद्वंश्यानां च पुण्यदम् । ब्रह्मांडांतर्गतानां च लोकानां वर्णनं ततः ॥ नरकस्थितिरित्येष संस्थाने पंचमो मतः । अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् ॥ वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् । षष्ठोयमुदितः स्कंधो व्यासेन परिपोषणे ॥ प्रह्लादचरितं पुण्यं वर्णाश्रमानिरूपणम् । सप्तमो गदितो वत्स वासनाकर्मकीर्तनं ॥ गजेंद्रमोक्षणाख्यानं मन्वंतरनिरूपणे । समुद्रमंथनं चैव बलिवैभवबंधनम् ॥ मत्स्यावतारचरितमष्टमोयं प्रकीर्तितः । सूर्यवंशसमाख्यानं सोमवंशनिरूपणम् ॥ वंश्यानुचरिते प्रोक्तो नवमोयं महामते । कृष्णस्य बालचरितं कौमारं च व्रजस्थितिः ॥ कैशोरे मथुराख्यानं यौवने द्वारकास्थितिः । भूभारहरणं चात्र निरोधे दशमः स्मृतः ॥ नारदेन तु संवादो वसुदेवस्य कीर्तितः । यदोश्च दत्तात्रेयेण श्रीकृष्णेनोद्धवस्य च ॥ यादवानां मिथोन्तश्च मुक्तावेकादशःस्मृतः । कलिनृपकथापूर्वं कलिधर्मास्ततो हरेः ॥ अवतारश्च कल्क्याख्यो युगधर्मास्ततो लयः । चतुर्द्धा वर्णितो मोक्षः परीक्षिन्नृपतेस्ततः ॥ वेदशाखाप्रणयनं पुराणस्य च लक्षणम् । मार्कंडेयकथा प्रोक्ता सूर्यव्यूहस्ततः परम् ॥ पुराणसंख्याकथनमाश्रये द्वादशो ह्ययम् । इत्येवं कथितं वत्स श्रीमद्भागवतं तव ॥ श्रोतुर्वक्तुश्चोपदेष्टुरनुमोदितुरेव च । साहाय्यकर्त्तुर्गदितं मुक्तिभक्तिविमुक्तिदम् ॥ प्रौष्ठपद्यां पूर्णिमायां हेमसिंहसमन्वितम् । देयं भागवतायेदं द्विजाय प्रीतिपूर्वकम् ॥ संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता । योप्यनुक्रमणीमेतां श्रावयेच्छृणुयात्तथा स पुराणश्रवणजं फलमाप्नोति निश्चितम् ॥” इति यत्तु शारीरके भागवतमतनिरसनं तद्धयग्रीवपंचरात्रे गणितभागवताख्यतंत्रस्यैवेति तत्रैव स्पष्टम् । वासनाभाष्यसंबंधोक्तिविद्वत्कामधेनुहनुमद्भाष्यतत्त्वभावार्थदीपिकापरमहंसप्रियाशुकहार्दमनोहरातोषिणीसिंदार्भिण्याद यष्टीकाग्रंथाश्चित्सुखाचार्यगौडाचार्यवल्लभाचार्यशंकराचार्यविजयध्वजादिभिः कृता बहुतरा विराजंते तथापि श्रीधरस्वामिकृतटीकाया भगवत्प्रियत्वेन सर्वसंमतत्वात्सर्वत्र प्रसिद्धत्वाच्च व्याख्यातुमुत्सहे । भगवत्प्रियत्वं चास्याः काश्यां प्रसिद्धम् । कदाचिद्द्वैतवादिवैष्णवैरुक्तं श्रीधरस्वामिकृतटीकायामद्वैतस्य हठाद्वर्णनमतो व्यासाभिप्रायबोधिकास्त्वन्या एव टीकाः संति ततः काशीस्थविद्वज्जनैरुक्तं श्रीमदिष्टदेवः श्रीजगन्नाथो यद्येवं वदिष्यति तदैतदंगीकुर्मः । तदर्थं सर्वटीकानामंकितपत्राणि श्रीकाशीस्थश्रीजगन्नाथाख्यविष्णुमंदिरे स्थापितानि । कश्चिद्ब्राह्मणबालस्तदानयनार्थं प्रेषितः श्रीभगवदग्रस्थापितसंकलितपत्रेभ्य एकं पत्रमानयेत्युक्त्वेति । तत्र तैः श्रीधरीयटीकापत्रमधः स्थापितमपि भगवता ततो निष्कास्य “व्यासो वेत्ति शुको वेत्ति शेषमैत्रेयनारदाः । पराशरोद्धवो वायुपुत्रश्चैव बृहस्पतिः ॥ एतेषां निखिलाः शिष्याः श्रीमद्भागवतं विदुः । श्रीधरः सर्वथा वेत्ति श्रीनृसिंहप्रसादतः ॥” इति तत्र लिखित्वा बालाय दत्तमेवं त्रिर्दत्तं ततः सर्वैरुक्तमियमेव भगवत्प्रिया श्रीव्यासाभिप्रायबोधिका टीकेति ॥ अत्र निराकारब्रह्मपरतया व्याख्यातमपि श्रीकृष्णलीलाया अत्र प्राधान्येन प्रतिपादनात्साकारब्रह्मपक्षेपि व्याख्यायते । तत्र परं परिपूर्णावतारित्वेनांशावतारेभ्य उत्कृष्टं श्रीकृष्णं धीमहीत्यन्वयः अस्य स्वरूपलक्षणमाह ॥ धाम्ना स्वेनेति ॥ आत्मीयेन माथुराख्येन धाम्ना स्थानेन तन्निवासिनां सदा निरस्तं कुहकं मायाकार्यं संसारलक्षणं येन तं लीलामाह ॥ जन्मेति ॥ आद्यस्य जन्मादिविकाररहितस्यापि यतः यत्र वसुदेवगृहे सतम्यथे तासिः । तस्मादितरत् इतरत्र नंदगृहेपि योन्वयादन्वगच्छत् परेणैव य इति पदेनान्वयः।कस्माद्धेतोरन्वगात्तत्राहं अर्थेषु कंसवंचनादिप्रयोजनेषु । अभिज्ञ इति । यद्बाललीलारासलीलादिलोकोत्तरविलासरूपेष्वर्थेष्वभिज्ञस्तादृशार्थसंपादननिपुण इत्यर्थः । ततः स्वराट् स्वैर्गोकुलवासिगोपालादिभिरेव राजत इति गोपाललीलस्याप्यव्याहतैश्वर्यमाह ॥ तेन इति ॥ यो ब्रह्मणे ब्राह्माणं विस्मापयितुं हृदा संकल्पमात्रेण ब्रह्म सत्यज्ञानानंतानंदमात्रैकरसमूर्तिमयं वत्सपालादिरूपं वैभवं विस्तारितवान् यत् यत्र सूरयो बलरामचतुर्मुखादयो मुह्यंति तत्त्वं ज्ञातुं न शक्नुवन्ति “केयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा कुत आयाता सत्या वा कत्तरे न'' इत्याद्युभयोक्तेः । यद्वा यल्लौकिकालौकिकतादृशलीलाभिः सूरयो लीलातत्त्वज्ञा भक्ता मुह्यंति प्रेमातिशयोदयेन विवशा भवंति यदित्युत्तरत्राप्यन्वेति यद्यान्यो लीलाम्यस्तेजोवारिमृदां यथा
यथावत् विनिमयो भवति तन्मुखकांत्या चंद्रादेर्निस्तेजस्त्वं तन्निकटवस्तूनां तत्तेजसा चंद्राधिकतेजोवत्त्वं वेणुनादलीलया वारिणः कठिनत्वं मृदः पाषाणादेर्द्रवत्वमिति यत्र श्रीकृष्णे निमित्ते सति त्रिसर्गः त्रिषु गोकुलमथुरा
द्वारवतीपुरेषु सर्गः गोपालराधिकादेरक्रूरोद्धवादेरुक्मिण्यादेश्च प्रादुर्भावः अमृषा तेषां गोलोकवैकुंठादिवासित्वेन तद्विग्रहाणाञ्च भगवदवतारतुल्यत्वादिति काशीनाथः । विश्वनाथस्तु इह खलु निखिलकल्याणगुणमाधुर्य्य
वारिधौ महैश्वर्यसम्राजि स्वयं भगवति परमभास्वत्यधिवराणि यथासमयं विलस्यांतर्हिते नानाशास्त्रपुराणेतिहासादीनां सर्वजननिकायत्रायकत्वरूपेष्वर्थेषु यामिकेष्विव कालेन दैवाद्वैगुण्योदयादालस्येनेव केषुचित्प्रसुप्तेषु
तेष्वेव मध्ये कैश्चित्कैश्चित्प्रत्युत जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान्व्यतिक्रम इत्यादितोवगतैरनर्थाकारैश्चौरैरिवोद्भूय तत्तत्प्रणेतृपर्यंतानां सर्वेषां चित्तप्रसादरूपेषु महाधनेष्वपहृतेषु "यदा यदा हि धर्मस्य
ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" इति "परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥" इति श्रीगीतोक्तनिमित्तलब्धक्षणतया यादस्सुमहामीन इव विहंगेषु श्रीहंस
इव नृषु स्वयं भगवान् श्रीकृष्ण इव देवेषूपेन्द्र इव वेदेषु श्रीमद्भागवताख्यं शास्त्रचूडामणिः ॥ "कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह । कलौ नष्टदृशामेष पुराणार्कोधुनोदितः ॥" इति वचनव्यं
जितश्रीकृष्णप्रतिमूर्तिकत्वेन ममाहमेवाभिरूपः कैवल्यादितिनिरस्ततद्भिनान्यसादृश्यतया श्रीशुकपरीक्षिद्भ्यां श्रीकृष्ण एव ज्योतिषु सहस्रांशुरिव पुराणेषु भास्वान्द्वादशस्कंधात्मकोऽष्टादशसहस्रच्छदनो
महाजनवांछितार्थकल्पतरुरिवावततार । तत्प्रणेता प्रथमत एवाचार्यचूडामणिः श्रीकृष्णद्वैपायनः स्वाभीष्टदैवतध्यानलक्षणमंगलमाचरति ॥ जन्माद्यस्येति ॥ परमतिशयेन सत्यं सर्वकालदेशवर्तिनं परमेश्वरं
धीमहि ध्यायेम बहुवचनेन कालदेशपरंपराप्राप्तान्सर्वानेव जीवान्स्वांतरीकृत्य स्वशिक्षया तान्ध्यानमुपदिशन्नेव क्रोडीकरोति । अनेन "अथातो ब्रह्मजिज्ञासा" इति सूत्रार्थः फलतो विवृतः ध्यानस्यैव जिज्ञासायाः फलत्वात्तस्य
परमैश्वर्यमाह अस्य जगतो जन्मादि जन्मस्थितिभंगं यतो भवति तम्।तर्हि किं कालं ध्यायथ न । अन्वयादितरतश्च अन्वयव्यतिरेकाभ्यां घटे मृदन्वयः मृदि घटव्यतिरेक इवेत्युपादानकारणमित्यर्थः । चकारात्स एव निमित्तकारणं
च कालस्य तत्प्रभावरूपत्वात् । यद्वाऽन्वयात्प्रलये विश्वस्य परमेश्वरेनुप्रवेशात् इतरतश्च सर्गे ततो विभागाच्च पृथिव्या जलमिव जलस्य तेज इव योऽधिष्ठानकारणमित्यर्थः । यद्वाऽन्वयात्कारणत्वेन यत्कर्तृकानुप्रवेशाज्जन्म
कर्मफलदातृत्वेन यत्कर्तृकानुप्रवेशात्स्थितिः संहारकत्वेन रुद्ररूपेण यत्कर्तृकानुप्रवेशाद्भंगश्च यतो भवति तम् । अत्र कारणस्य कार्यसमन्वितत्वमेव कार्यानुप्रवेशो ज्ञेयः । तत्कार्यस्य विश्वस्य तत्स्वरूपत्वं वारयन्विशिनष्टि । इतरत
इति । सृज्यपाल्यसंहार्याद्विश्वतः स्वरूपशक्त्याभिन्नात् चकारान्मायाशक्त्या तदभिन्नाच्च एवं "जन्माद्यस्य यतः" इति "तत्तु समन्वयात्" इति सूत्रद्वयमुक्तम् । ननु च परमेश्वरस्योपादानत्वे विकारो दुर्वा
रस्तस्मात्प्रकृतिरेवोपादानं परमेश्वरस्तु निमित्तमित्युच्यताम् ।मैवं "यः सर्वज्ञः सर्ववित्" इति "स ऐक्षत लोकान्तुसृजा" इति "तदैक्षत बहुस्यां प्रजायेय" इत्यादिभिश्श्रुतिभिश्चेतनस्यैव जगत्कारणत्वप्रतिपादनात्परमेश्वर एव जगत
उपादानं निमित्तं च । तत्र प्रकृतेस्तच्छक्तित्वाच्छक्तिशक्तिमतोरभेदात् प्रकृतिद्वारकमेव तस्योपादानत्वं स्वरूपेण तु प्रकृत्यतीतत्वात्तस्य निर्विकारत्वमेव । यथोक्तं भगवता "प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतो
भिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥" इति । प्रकृतेः स्वातंत्र्येणोपादनत्वमेव शास्त्रासंमतम् तस्मात्परमेश्वरः सर्वज्ञ एव स्वातंत्र्येण जगत्कारणमुच्यते न तु जडा प्रकृतिरित्याह ॥ अर्थेषु ॥ सृज्यासृज्यवस्तुमात्रेष्वभिज्ञो
यस्तामित्यर्थः । अनेन "ईक्षतेर्नाशब्दम्" इति सूत्रार्थ उक्तः । स चायं प्रक्रांतं ब्रह्म जगत्कारणं भवति कुत ईक्षतेः ईक्षणात् जगत्कारणत्वप्रतिपादकश्रुतिवाक्येषु तस्यैव विचारविशेषात्मकेक्षणश्रवणात् अतो
ब्रह्म नाशब्दं शब्दप्रमाणकं न भवति। किन्तु शब्दप्रमाणकमेवेति । तत्र श्रुतयः "तदैक्षतेति सदेव सौम्येदमग्र आसीत्" इति "आत्मा वा इदमेक एवाग्र आसीदिति तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत इति 'यतो वा इमानि"
इत्याद्याः॥स्मृतिश्च "यतः सर्वाणि भूतानि भवंत्यादियुगागमे" इत्याद्या । ननु तदानीं महदाद्यनुत्पत्तेस्तस्य क्षणादिसाधनं न संभवतीत्यत आह ॥ स्वराडिति ॥ स्वस्वरूपेणैव तथा तथा राजत इति "न तस्य कार्यं करणं च
विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबला क्रिया चेति" श्रुतेः । ननु जगत्सृष्टौ ब्रह्मणः स्वातंत्र्यमैश्वर्यञ्चावगम्यते "हिरण्यगर्भः समवर्त्ततात्रे भूतस्य जातः पतिरेक आसीत्" इति श्रुतेः स एव ध्येयोस्त्वित्यत आह ॥ तेन
इति ॥ ब्रह्मस्वतत्त्वं वेदं वा अतो ब्रह्मणोपि पारतंत्र्यं सूरीणामपि तत्र मोहाद्ब्रह्मणोपि न स्वतः शक्तिरिति । अनेन "नेतरोऽनुपपत्तेः" इति सूत्रार्थो विवृतः । ननु धीमहीति ध्यानविषयत्वेन तस्य साकारत्वमभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रेतमाकारणाञ्च त्रिगुणसृष्टत्वम् तथात्वे चानित्यत्वं प्रसज्येतेत्यत आह ॥ तेज इति ॥ यथाऽज्ञानां तेजसि वारीदमिति वारिणि च स्थलमित्यादिबुद्धिस्तथैव पूर्णचिन्मयाकारे त्रिसर्गस्त्रिगुणसर्गोऽयमिति बुद्धिर्मृषैवे। ''तमेकं गोविंदं सच्चिदानंदविग्रहं वृन्दावनसुरतरुतलासीनम्'' इति गोपालतापिनीश्रुतेः। '' अर्द्धमात्रात्मको रामो ब्रह्मानंदैकविग्रहः '' इति रामतापिन्याश्च '' ऋतं सत्यं परं ब्रह्म पुरुषं नृकेशरिविग्रहम् '' इतिनृसिंहतापिन्याश्च ''निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो निश्चेतनात्मकशरीरगुणैश्च हीनः आनन्दमात्रमुखपादसरोरुहादिरि तिध्यानबिंदूपनिषदश्च । '' नन्दव्रजजनानंदी सच्चिदानंदविग्रहः '' इति ब्रह्मांडपुराणात् '' सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः।हानोपादानरहिता नैव प्रकृतिजाः क्वचित्'' इति महावाराहाच्च ''स्वेच्छामयस्य न तु भूतमयस्य'' इति च ''बबंध प्राकृतं यथा'' इति '' त्वय्येव नित्यसुखबोधतनौ'' इति शाब्दं ब्रह्म वपुर्दधदिति '' सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः'' इत्यादिश्रीभागवतादावपि तदाकारस्यामायिकत्वावगमात् ''अनिंद्रिया अनाहारा अनिष्पन्नाः सुगंधिनः । एकांतिनस्ते पुरुषाः श्वेतद्वीपनिवासिनः॥'' इति नारायणीयात्।''देहेंद्रियासुहीनानां वैकुंठपुरवासिनाम् '' इति सप्तमस्कंधाच्च तद्भक्तानामपि श्वेतद्वीपवैकुंठपुरवासित्वेन साकारत्वे लब्धेऽनिंद्रिया इत्यादिभिर्मायिकाकारत्वनिषेधात्तदाकारस्यामायिकत्वे कः संशयः । यत्तु '' माययोपात्तविग्रहम्'' इति नवमे वक्ष्यति तत्र च मायया कृपयेत्यर्थः तत्रैव विशेषतो व्याख्यास्यामः।ननु तदप्यत्र केचिद्विवदन्त इत्यतआह।धाम्नेति॥ धाम्ना स्वरूपशक्त्या स्वभक्तनिष्ठस्वानुभवप्रभावेण वा प्रतिपदसमुच्छलन्माधुर्यैश्वर्यभ्राजि श्रीविग्रहेण वा स्वेनासाधरणेन सदा कालत्रय एव निरस्ताः कुहका कुतर्कनिष्ठा येन तम्। ''तर्काप्रतिष्ठानात्'' इति सूत्रार्थः सूचितः । अत्र ''यमेवैष वृणते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्'' इति श्रुत्या स्वशब्देन तनोः स्वरूपभूतत्वे लब्धे तथा प्रकृतिक्षोभात्पूर्वमेव ' बहुस्याम् ' इति '' स ऐक्षत '' इत्यादिश्रुतिभिस्तदीयमनोनयनोदरमायिकत्वेवगमिते '' परास्य शक्तिर्बहुधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च '' इति श्रुत्या स्वाभाविकत्वे प्रकटमुक्ते '' अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिंत्यस्य लक्षणम् ॥ '' इत्यत्र न योजयेदिति लिङा परदारान्न गच्छेत् इतिवत्तत्र कुतर्कयोजना या निषिद्धत्वेऽपि यद्यसुरास्तदीयश्रीविग्रहं लक्षीकृत्य युक्तिशरानादित्सवो निरयेपि पतिष्यंति तदा पतंतु तैरलं संलापेन । अथात्र शास्त्रे '' दशमस्य विशुद्ध्यर्थं नवानामिहलक्षणम् '' इति दशमस्याश्रयतत्वस्यैवांगित्वे तस्य च श्रीकृष्णरूप एव मुख्यत्वे तदसाधारणधर्मप्रस्तुतावप्यस्य प्रथमपद्यस्यौचितीभवत्यतस्तदेकपरस्य व्याख्यांतरस्यावकाशः । तद्यथा । ''सत्यव्रतं सत्यपरम्'' इत्यादौ '' सत्यात्मकं त्वां शरणं प्रपन्नाः '' इति श्रीकृष्णजन्मारंभोक्तेः ''सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम् । सत्यात्सत्यञ्च गोविंदस्तस्मात्सत्यो हि नाम ते'' इत्युद्योगपर्वणि सञ्जयकृतकृष्णनाम्नां निरुक्तेश्च सत्यं श्रीकृष्णं धीमहि । ''नराकृति परं ब्रह्म'' इति ब्रह्मांडपुराणात्तस्मात्कृष्ण एव तं ध्यायेदिति गोपालतापिनीभ्यश्च परं स्वेन धाम्ना श्रीमथुराख्येन सर्वत्र तदानीं कृपया दर्शितेन श्रीविग्रहेण च सदा निरस्तं कुहकं जीवानामविद्या येन तं ''मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा । तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते ॥'' इति गोपालतापनीप्रसिद्धेः ''श्रवणात्कीर्तनाद्ध्यानात्पूयंतेन्तेवसायिनः । तव ब्रह्ममयेशस्य किमुतेक्षाभिमर्शिनः ॥'' इति दशमोक्तेश्च 'गृहदेहत्विट्प्रभावा धामानि' इत्यमरः । ननु तद्विग्रहस्य प्रापंचिकलोकदृश्यत्वाद्यद्यदृश्यं तदनित्यं घटवदिति न्यायेनानित्यत्वं प्रसज्येतेत्यत आह ॥ तेजोवारिमृदामिति ॥ त्रयाणां दृश्यभूतानां यथा यथावद्विनिमयः परस्परमिलनं यत्र तथाभूतास्त्रिसर्गस्त्रिगुणसृष्टो देहो मृषा मिथ्यैव येन तत्रितयसृष्टस्तद्विग्रह उच्यते तेन मृषैवोच्यत इत्यर्थः । प्रपंचातीतस्यापि तस्य यत्प्रापंचिकैरसुरैर्दर्शनं तत्खलु विचित्रलीलासाधिकया तदिच्छया दुस्तर्क्यस्वरूपयैव पित्तदूषितरसनैर्नरैर्मत्स्यंडिकाचर्वणमिव तन्माधुर्यानुभवहीनं तदन्यैश्च दुस्तर्क्यतत्कृपाप्रभावात्तन्माधुर्यानुभवसहितमेव । तदुक्तम् '' अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः । तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशञ्च यच्छन् ॥'' इत्यतोऽदृश्यस्यापि यद्दृश्यत्वं तत्कृपाया एव महैश्वर्यं ज्ञापयतीति ज्ञेयम् । अत एव भागवतामृतधृतं नारायणाध्यात्मवचनं '' नित्याव्यक्तोपि भगवानीक्ष्यते निजभक्तितः । तामृते परमानंदं कः पश्येत्तमिनं प्रभुम्'' इति तत्रत्या कारिका । अतः स्वयं प्रकाशत्वशक्त्या स्वेच्छाप्रकाशया सोभिव्यक्तो भवेन्नेत्रे न नेत्रविषयः कृत इति एवमेव ''तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी'' इत्यादिश्रुतेर्ब्रह्मभूतानामपि तद्धामादीनां दृश्यत्वं ततश्च यद्यद्दृश्यं चिद्भिन्नं तत्तद्भिन्नं घटवदित्यनुमिमते भागवताभिज्ञाः । एवमेव सारमूलकारणं कृपामुक्त्वा तस्य लीलामाह । अस्य यतो यत्र वसुदेवगृहे जन्मादि जन्मैश्वर्यप्रकटनपूर्ववृत्तकथनादि ततं इतरतश्चेतरत्र नंदगृहे अनु अयादयमेवागच्छत् । किमर्थमयात् । अर्थेषु कंसवंचनादिषु व्रजसंबंधिवात्सल्यादिप्रेमप्रकाशरूपेषु वाऽभिज्ञः न त्वन्यपरतंत्र इत्याह ॥ स्वेनैव राजते इति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्वा स्वैः पित्रादिभिः श्रीनंदाद्यैर्विराजमानत्वार्थमित्याभिप्रायः । न च तत्रतत्र तत्तत्प्रेमाधीनतया तादृशलीलाविशिष्टत्वेऽपि तस्य मौग्ध्यमेव प्रत्येतव्यमित्याह ॥ आदिकवये ॥ ब्रह्मणेऽपि ब्रह्म ब्रह्मात्मकं वत्सबालकादि तेने प्रका
शयामास । तच्च हृदा संकल्पमात्रेणैव यत्र योगमायावैभवे सूरयो भवनारदादयोपि मुंह्यंति यद्वादिकवे स्वकुलस्यादिपुरुषः कविर्विज्ञश्च यस्सत्यव्रतमनुस्तस्मै ब्रह्म निर्विशेषं स्वरूपं तेने स्वांशमत्स्यदेवोक्त्या प्रकाशयामास
तदुक्तिर्यथा''मदीयं महिमानं च परं ब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ।'' इति व्याख्यातं च श्रीधरस्वामिचरणैः । मे मयाऽनुगृहीतं प्रसादीकृतं ब्रह्मापरोक्षीकृतं वेत्स्यसीति ब्रह्मणस्तत्प्रसादीकृतत्वं
च वेदस्तवारंभे व्याख्यास्यते । अथ तस्यापि शांतदास्यादिरसपरिकरविशिष्टत्वेपि । ''तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः ॥'' इत्यादिभ्यो वंजदेवीसाहित्येन परममाधुर्योदयात्तदीयरसस्यातिशयेनोपादेयतां दर्शयन्पुन
रप्यर्थांतरमत्रावकाशते । तद्यथा । आद्यस्य श्रृंगाररसस्य जन्म यतस्तं धीमहि पूर्वं तस्य परमार्थदर्शिभिः सद्भिर्विगीतत्वेन सतोपि नाश एवासीदिति भावः । अन्वयात्संयोगात् इतरतश्च विप्रलंभात् संयोगविप्रलंभा
भ्यामेव श्रृंगाररसः सपरिकरः संपद्यत इति भावः । भीमसेनो भीम इतिवदाद्यरसोप्याद्यशब्देनोच्यते । यद्वात्र पिबत भागवतं रसमित्युक्तेः शास्त्रस्यास्य रसरूपत्वादाद्यस्येत्यनेनार्थप्रत्यासत्त्यै रसस्येत्यस्यैव विशेष्यपदस्यो
पस्थितेः किं वा संयोगविप्रयोगाभ्यां निष्पत्तिः स्वप्रतियोगिनं रसमेवोपस्थापयत्यतो न्यूनपदता नाशंकनीया । प्रत्युत तथा प्राप्तत्वेनादिरसस्य रहस्यत्वमेव द्योतितं तत्रालंबनविभावत्वे तस्यान्यतो वैशिष्ट्यमाह । अर्थेषु
चतुःषष्टिकलादिरसोपयोगिसमस्तवस्तुषु अभिज्ञो विदग्धः । न च प्राकृतनलादिनायकवत्कालकर्मादिग्रस्त इत्याह ॥ स्वराट् । किञ्च रसो ह्यन्यत्र नैव प्रसज्येतेत्याह ॥ य आदिकवये ॥ आदिरसस्य कवये भरताय हृदैव
तदीयमनसैव ब्रह्म आदिरसस्य तत्त्वं तेने । रसस्यैकतानत्वोद्घाटनार्थमित्यर्थः । 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः । तदपि यत्र तत्त्वे सूरयः कवयो मुह्यंति प्राकृतनलादिनायकनिष्ठतया वर्णनात् । तत्र दृष्टांतः॥ तेज इति ॥
तेजआदिषु वार्यादिबुद्धिरिव भगवदेकनिष्ठे रसे प्राकृतजननिष्ठत्वबुद्धिरित्यर्थः । यत्र कृमिविड्भस्मांतनिष्ठेषु प्राकृतनायकेष्वतिनश्वरेषु रसो न भवति विचारतो विभाववैरूप्यात् तद्विपरीतं घृणामयं वैरस्यमेवोत्पद्यते तत्रैव रसं
वर्णयंतीत्यर्थः । किं च त्रयाणां वाच्यलक्ष्यव्यंग्यानामर्थानां ध्वनिगुणालंकारणां वा सर्गो निर्माणप्रपंचः अमृषा सत्य एव भवन्नलौकिकत्वेन चमत्कारी स्यात् । अन्यत्र प्राकृतनायके कविप्रौढोक्तिमात्रप्राणो मिथ्यैवेत्यर्थः ।
ननु रसं केचिन्न मन्यन्ते तत्राह ॥ धाम्ना ॥ माधुर्य्यास्वादसाक्षात्कारचमत्कारप्रकारेण स्वेनासाधारणेन निरस्ताः कुहका जरन्मीमांसका येन तम् । अथ तासामपि मध्ये ''कस्याः पदानि चैतानि याताया नंदसूनुना ।
अनया राधितो नूनं भगवान्हरिरिश्वरः ।'' इत्यादिभिः परममुख्यायाः श्रीवृंदावनेश्वर्यास्साहित्येन परम एव माधुर्योत्कर्षो भवत्यतस्तत्प्रदर्शकोप्यर्थोस्मिन्नादिमे पद्येऽन्वेष्टव्यः । स यथा । यतो याभ्यामेवाद्यस्य रसस्य जन्म
प्रादुर्भावः । यावेवादिरसविद्यायाः परमनिधानमित्यर्थः । तत्र यश्च इतरत इति ल्यब्लोपे पंचमी । इतरां कांतां परित्यज्यान्वयात् । ''अत्रावरोपिता कांता पुष्पहेतोर्महात्मना । अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः'' इत्यादिदृष्ट्या
अनुगतेर्हेतोः अर्थेषु रसोपयोगिधीरललितेत्यादिमयमुख्यरसेष्वज्ञः । या च तत एव हेतोः स्वेन कांतेनैव राजत इति स्वराट् स्वाधीनकांतेत्यर्थः । यश्च तत्तत्प्रकाशनार्थमादिकवये आदितो जन्मारभ्यैव कवये तत्त्वज्ञाय
श्रीशुकदेवाय ब्रह्म श्रीभागवतं मूर्द्धन्यरसमयं रासपञ्चाध्यायिकं हृदा तेने । '' इदं भागवतं नाम पुराणं ब्रह्मसंमितम् '' इति '' शुकमुखादमृतद्रवसंयुतम् '' इति '' शुकवागमृताब्धिन्दुः'' इत्यादिभ्यः । यद्यतः श्रीभाग
वतात् यत्र रासे सति सूरयो मुह्यंति रसास्वादजनितामानंदमूर्च्छां प्राप्नुवंति यद्वा सूरयो भक्ताः किं वा याभ्यां श्रवणनयनादिविषयीभूताभ्यां सूरयस्तत्परिकरभूता भक्ता मुह्यंति महाविज्ञा अपि मूढा भवन्तो धर्मविपर्ययं प्राप्नु
वंतीत्यर्थः । तत्र दृष्टान्तेनापरानपि संगृह्णाति तेजोवारिमृदां यथा विनिमयः स्वस्वधर्मव्यत्ययः तत्र तेजसां चंद्रादीनां तदीयरासलीलादर्शनात्स्तंभेन स्वीयचलत्वधर्मव्यत्ययः । वारिणां तन्मुरलीवाद्यादिना स्तंभेन मृद्धर्मः
मृदामपि पाषाणादीनां द्रवेण वारिधर्मश्च यथेति यत्र ययोः स्वेन धाम्ना प्रभावेण तिसृणां श्रीभूलीलानां गोपीमाहिषीलक्ष्मीणां वांतरंगा बहिरंगातटस्थानां वा शक्तीनां सर्गोऽमृषा सत्य एव सदा तासां तद्धाममयत्वात्
यत्रेत्यधिष्ठानकारणत्वात् । याभ्यां सृष्टाः श्र्यादयः स्वमहसा सदा वर्तत एवेत्यर्थः । यत्तदोर्नित्यसंबंधात् । तौ निरस्तकुहकं निष्कपटं यथा स्यात्सत्यं यथार्थस्वरूपं यथा स्यात्परं सर्वोत्कृष्टं यथा स्यात्तथा धीमहीति शास्त्रस्यास्य
विषयो दर्शितः । अथ तथाभूतमप्याश्रयत्वं येनैव लभ्यते स शास्त्रस्याभिधेयो भक्तियोगस्तथा स एव परमकाष्ठामापद्य श्रीभगवदाकर्षको भवन्प्रेमाभिधः प्रयोजनं च अनेन श्लोकेन स भक्तियोगोऽवश्यं माननीय इत्यतोऽ
र्थांतरमत्र तंत्रेणांतर्भवति । तद्यथा सत्यं तदेव सत्यं ''तदुहैव मंगलं यदुत्तमश्लोकयशोनुगीयते'' इति द्वादशोक्तेः । तत्रापि परं श्रेष्ठं परं वास्तववस्तुरूपत्वात् त्रिगुणातीतं तथा सत्यं सद्भ्यो हितं परमकल्याणगुणमयं भक्तियोगं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धीमहि यदुक्तं "लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥ " इति । "न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि । मयानुमोदितः सम्यङ्निर्गुणत्वादनाशिषः ॥ " इति च श्रुतिश्च गोपालतापिनी " विज्ञानघनानंदघना सच्चिदानंदैकरसे भक्तियोगे तिष्ठति" इति तस्य प्रभावमाह यत एवाद्यस्य परमेश्वरस्य जन्म उपासकेषु भगवत्वेन प्रादुर्भावः । तथा इतरतः इतरेष्वर्थेषु निष्कामकर्मयोगज्ञानयोगेष्वन्वयात् । यत्साहित्याच्चाद्यस्य जन्म उपासकेषु परमात्मत्वेन ब्रह्मत्वेन च साक्षात्कारो भवेदित्यन्वयः । ननु ज्ञानेन केवलेनैव ब्रह्मसाक्षात्कारः प्रसिद्धस्तत्राह । योभिज्ञः अभि सर्वतो भावेन ज्ञा ज्ञानं यतः ज्ञानस्य सात्त्विकत्वाद्गुणातीताया भक्तेस्तत्रान्वयं विना परमात्मनो ब्रह्मत्वज्ञानमेव न भवेदित्यर्थः । " नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् " इत्याद्युक्तेः "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इत्यादेश्च । ननु ब्रह्मसाक्षात्कारार्थो ज्ञानयोगो यथा भक्तिमपेक्षते तथैव भगवत्साक्षात्कारार्थमपि भक्तियोगो ज्ञानयोगमपेक्षतामिति चेत्तत्राह । स्वराट् स्वेनैव राजत इति सः । सम्राडिव स्वतंत्रो न कस्याप्यधीन इत्यर्थः । " अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ " इति विधिवाक्यान्मेधाद्यमिलितेन केवलेन सौरकिरणेनेव ज्ञानाद्यमिश्रेणेति तीव्रेणेत्यस्यार्थः । तथा " यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । सर्वं तद्भक्तियोगेन मद्भक्तो लभतेंजसा । " इत्यादिवाक्याच्च । प्रत्युत "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥" इति तत्साहित्यनिषेधश्रवणाच्च । किं चैतादृशो भक्तियोगो भक्तानुग्रहं न लभत इत्याह । तेने इति । ब्रह्म हृदि यस्य तेन ब्रह्महृदा नारदेनादिकवये व्यासाय तेने प्रकाशितः । ननु सर्वज्ञस्य व्यासस्यापि भक्तियोगज्ञानमन्याधीनं कथं प्रतीमस्तत्राह मुह्यंतीति । सूरयो वसिष्ठादयोपि यद्यस्मिन्मुह्यन्ति गुणातीतभक्तियोगे गुणजन्यानां बुद्ध्याद्यंतःकरणानां स्वतः प्रवेशाशक्तेर्मोहमज्ञानमेव प्राप्नुवंतीत्यर्थः।"यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति । कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने।।" इति हंसगुह्योक्तेः । ननु भक्तियोगो न केवलं गुणातीत एव तस्यापि तृतीयस्कंधे गुणमयत्वदर्शनादित्यत आह । यत्रत्रिसर्गस्त्रिगुणसृष्टत्वं मृषाऽवास्तव इत्यर्थः । यथा तेजोवारिमृदां विनिमयो मेलनं निस्तेजो निर्जलमपि निर्धूलिकमपि दुग्धं तप्तमिति जलवदिति मलिनमिति तत्तन्मेलनाद्भवति यथा तथैव त्रिगुणातीतोपि भक्तियोगः।।पुरुषवर्त्तिसत्त्वादिगुणयोगात्सात्त्विको राजसस्तामसश्चोच्यते । ननु भक्तियोगस्य त्रिगुणातीतत्वे बहवो विवदंते तत्राह धाम्नास्वेनेति । स्वस्वरूपेणालौकिकमाधुर्यमयेन भवगोचरीभूतेनैव निरस्ताः कुहकाः कुतर्कवंतो येन तम् । न ह्यनुभूयमानेर्थे प्रमाणापेक्षेति भावः । इह किल "अध्यात्मदीपमतितितीर्षतां तमोन्धम् इति"।"कस्मै येन विभासितोयमतुलो ज्ञानप्रदीपः" इत्याभ्यां श्रीभागवतस्य प्रदीपत्वं "पुराणार्कोधुनोदितः" इत्यनेनार्कत्वं "निगमकल्पतरोर्गलितं फलं रसम्" त्यनेनः रसमयफलत्वं " हरिलीलाकथाव्रातामृतानंदितसत्सुरम् " इत्यनेन मोहिनीत्वं च दृश्यते । तत्रास्मिन्पद्ये प्रथमेन व्याख्यानेन दीपत्वं द्वितीयेनार्कत्वं तृतीयचतुर्थपंचमेन रसमयफलत्वम् । किंच पञ्चानामेवैषामर्थानां परमदुर्लभातिस्वादुत्वेनामृतत्वाद्भक्तानामेव तत्संप्रदानभूतत्वेन देयत्वात् तत्तद्वाचकस्य शास्त्रस्यास्य तत्परिवेष्टत्वेन मोहिनीत्वं च ज्ञेयम् । एवं च यद्यपि सर्वस्य द्वादशस्कंधस्यैव शास्त्रस्यास्य रसमयफलत्वार्कत्वदीपत्वादीनि तदपि भूम्ना व्यपदेशा भवंतीति न्यायेन सर्गनिरोधे च क्वाचित्तादृशस्तुत्यादौ चाध्यात्ममात्रप्रकाशत्वेन दीपत्वं विसर्गस्थानपोषणादिषु धर्मार्थकाममोक्षाणामन्येषाञ्चाशेषविशेषाणां प्रवृत्तनिवृत्तविहितनिषिद्धसाधनफलानामपि प्रकाशकत्वेनार्कत्वमाश्रयतत्त्वस्य भगवतस्तत्तद्भक्तानां च जन्मकर्मादिलीलाभक्तिप्रेमादौ च प्रस्तुते रसमयफलत्वं तत्र तत्रैव भक्तानुकूलेनार्थेन स्वभक्तवर्गानंदनार्थं तत्प्रतिकूलेनार्थेनासुरसंघव्यामोहनार्थं मोहिनीत्वं च ज्ञेयम् । न चास्य शास्त्रस्य साक्षाद्भक्तिरसमयस्य तत्तत्प्रतिकूलार्थप्रस्तुतिरसंगतेति वाच्यम् । सर्वशक्तिपरिपूर्णस्य साक्षाद्भगवत इवास्यापि विविधाधिकारिस्वस्वहृदयानुरूपार्थं सर्वशक्तिलिंगप्रकाशकत्वमौचित्यात् " मल्लानामशनिः" इत्यत्र "विराडविदुषाम्" इति वत्सर्वं समंजसम् १ अत्र विजयध्वजः ॥ पर गुणैः पूर्णमिति पॄपालनपूरणयोरिति धातोः । द्विविधा हि देवता ग्रंथारम्भे नमस्कारादि मंगलक्रियामर्हति आधिकारिकी अभीष्टाचेति । यथा ज्योतिःशास्त्रे सूर्यादिग्रहलक्षणा देवताधिकारिकी नमनादिक्रियापि वरप्रेमादिविषयाद्यभीष्टा तथा भगवांस्तूभयरूप इत्यभिप्रेत्याह परमिति परमात्मा हि सर्वप्राणिनां संसारोन्मूलनायात्र शास्त्रे प्रतिपाद्यते "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोन्यस्मात्सर्वस्मादंतरंतरं यदयमात्मा" इति श्रुतेः । स एव परमप्रेमविषय परोपि नारायण एव नान्यः कश्चिदिति "तदेतत्परमं ब्रह्म वेदवादेषु पठ्यते । स देवः पुंडरीकाक्षः स्वयं नारायणः परः" इति हरिवंशे नारायण एव परशब्देनोक्तः । "ब्रह्मविदाप्नोति परम्" इति श्रुतेश्च । धीमहि । ध्यायेम जन्माद्यस्य यत इत्यादिविशेषणैः परशब्दोक्तान्गुणान्विशिनष्टि पालनपूरणाभ्यां यथासंभवं सृष्ट्यादयो वाच्या इत्यूहनीयम् । अलौकिकवस्तुनो लक्षणोपदेशमंतरेण ज्ञातुमशक्यत्वाच्छशविषाणतुल्यं तदित्यतो लक्षणमाह ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्माद्यस्येति । अस्य प्रत्यक्षस्य जगतो जन्मादि यस्य तज्जन्मादि तद्गुणसंविज्ञानो बहुव्रीहिः यतो यस्माद्भवतीतिशेषः आदिशब्देन स्थितिसंहारानियमनज्ञानाज्ञानबंधमोक्षा गृह्यंते न केवलस्थितिसंहारौ। श्रुतिस्मृतिविरोधात्। यथा
सास्नादिमान् गौरिति वृद्धोपदिष्टः सास्नादिमंतं पदार्थमश्वादिभ्यो व्यावृत्तं गोशब्दवाच्यं प्रत्येति तथा जन्मादिकारणं परमिति श्रुत्याचार्योपदिष्टं जन्मादिकं प्रत्येकं परब्रह्मलक्षणतया ज्ञातव्यम् । वेदांतशास्त्रेषु प्रतिपादितत्वात् ननु
परस्य जन्मादिकारणत्वं कुत इति तत्राह।अन्वयादिति।''यतो वा इमानि भूतानि जायंते येन जातानि जीवंति''इत्यादिश्रुतीनाम्।''अहं सर्वस्य प्रभवो मत्तःसर्वं प्रवर्तते।स्रष्टा पाता तथैवात्ता निखिलस्यैक एव हि''इत्यादिस्मृतीनां जग
त्कारणे हरावन्वयात् उपक्रमोपसंहारादितात्पर्यलिंगात्परब्रह्मैव जगत्कारणं नान्यदिति भावः।ननु रुद्रादीनामपि जगत्कारणत्वं श्रूयते कथं परस्यैवेत्यवधार्यते उच्यते यद्यपि रुद्रादीनां वेदैकदेशप्रतिपाद्यत्वमस्ति तथाप्यनंतवेदपदकदम्ब
प्रतिपादितत्वं विष्णोरेव ''सर्वे वेदा यत्पदमामनंति वेदैश्च सर्वैरहमेव वेद्यः'' इत्यादिश्रुतिस्मृतिभ्यः । ननु श्रुत्यादेः पिपीलिकादिलिपिवदप्रमाणत्वान्माणवकदष्टशार्दूलकल्पेन तेन तन्निश्चयाभावादतः परमाणुपुंजस्यैव कारणत्व
मिति तत्राह ॥ इतरत इति ॥ प्रत्यक्षागमाभ्यामनुगृहीतादितरस्मात्तर्कात्परब्रह्मणः कारणत्वं ज्ञायते। समुदाय उभयहेतुकेपि तदप्राप्तिरिति भगवता कृष्णद्वैपायनेन निरस्तत्वात् अस्यार्थः वैशेषिकस्तावत्परिमाणभेदेन देहादेराशु
तरविनाशित्वांगीकारादात्मनः स्थायित्वांगीकाराच्चार्द्धवैनाशिकः । सर्वक्षणिकत्ववादिनस्तु पूर्णवैनाशिका इत्यर्द्धवैनाशिकवैशेषिकमतनिराकरणानंतरं पूर्णवैनाशिकमतं बुद्धिस्थमिदानीं निराक्रियते इत्यवांतरसंगतिर्द्रष्टव्या। तत्र ताव
द्बुद्धमुनिनाऽऽगम उपदिष्टः । स चागमो वैभाषिकसौत्रांतिकविज्ञानवादिसर्वशून्यवाद्याख्यचतुर्विधशिष्यप्रतिपत्तिवैचित्र्याय चतुर्विधो भवति । तत्र वैभाषिकसौत्रांतिकयोर्ज्ञानं तदतिरिक्तपदार्थाश्च सर्वे क्षणिकाः सत्यभूताः
संति इयान्परमभेदः वैभाषिकस्य घटादिपदार्थाः प्रत्यक्षाः सौत्रांतिकस्य तु ज्ञाने घटाद्याकारे उत्पन्ने तेनाकारेणाप्रत्यक्षघटादयोऽनुमीयंत इति । तत्रादौ वैभाषिकसौत्रांतिकयोर्बाह्यार्थास्तित्वाविशेषात् तयोर्मतमेकीकृत्य
तन्मतं प्रमाणमूलं भ्रांतिमूलं वेति संदेहे प्रमाणमूलमिति प्राप्तं तथा हि पृथिव्यप्तेजोवायवश्चत्वारि भूतानि चतुर्विधपरमाणुपुंजस्वरूपाणि एवं भौतिकानि रूपादिविषयेंद्रियाणि परमाणुपुंजस्वरूपाणि न हि परमाणुसमूहव्यतिरेके
णावयविभूतं किंचित्कार्यमस्तीति परमाणहेतुक एव पृथिव्यादिसमुदायो बाह्यः । आध्यात्मिकश्च समुदायस्कंधहेतुकः । तथाहि रूपविज्ञानवेदनासंज्ञासंस्काराश्च पंच ते स्कंधास्तत्र रूपस्कंधः सविषयेंद्रियाणि विषयाणां
रूपादीनामाध्यात्मिकत्वमाध्यात्मिकेंद्रियसंबंधाद्द्रष्टव्यम् । अहमित्यालयविज्ञानप्रवाहो विज्ञानस्कंधः सुखादिप्रत्ययो वेदनास्कंधः । गौरश्व इत्यादिशब्दादिविशिष्टवस्तुविषयकसाविकल्पकप्रत्ययः संज्ञास्कंधः रागद्वेषमोहधर्माधर्माः
संस्कारस्कंधः । तत्र विज्ञानस्कंधश्चित्तमित्यात्मेति च गीयते इतरे स्कंधाश्चैत्ता एतेषां चित्तचैत्तानां स्कंधानां समुदायः सर्वव्यवहारास्पद आध्यात्मिकश्च स्कंधहेतुक इति सर्वक्षणिकत्त्ववादिनोर्वैभाषिकसौ
त्रांतिकयोर्मतं तन्निराकरोति । समुदाय उभयहेतुकेपि तदप्राप्तिरिति । उभयहेतुकेपि समुदाये परमाणुहेतुके बाह्यसमुदाये स्कंधहेतुके चाध्यात्मिकसमुदाये तदप्राप्तिस्तस्य समुदायस्याप्राप्तिरित्यर्थः । अचेतनानां परमाणूनां
स्कंधानां च स्वतः समुदायायोगादन्यस्य च स्थिरस्य समुदायकर्तुश्चेतनस्यानभ्युपगमादिति सूत्रवाक्यशेषः । अत्र श्रुत्याद्यनुगृहीततर्काभावात् केवलतर्कस्याप्रतिष्ठितत्वात् । ननु कार्यं कारणपूर्वकं कार्यत्वादिति कारणसामान्यमात्रं
सिद्धं विशेषतः कुतः सिद्धिरिति चेत्सत्यम् । प्रधानादेरचेतनत्वेन बुद्धिपूर्वककर्तृत्वानुपपत्तेरस्वातंत्र्याच्च क्षित्यादेश्चेतनकर्तृकत्वं परिशेषसिद्धं चेतनाद्धि पित्रादेः पुत्राद्युत्पत्तिदर्शनात्तद्दृष्टांतेन ब्रह्मादिचेतनजातं परमचेतनाद्विष्णो
रुत्पद्यत इति शुष्कोयं तर्कः समुत्तिष्ठते। चशब्दः समुच्चये वेदानामपौरुषेयत्वेन कर्तृप्रसिद्ध्यभावादसंदिग्धप्रमाणत्वेन तदनुगृहीततर्कस्यापि प्रतितर्कपराहतिर्नाशंकनीयेत्यस्मिन्नर्थे वा अनेन''अथातो ब्रह्मजिज्ञासा। जन्माद्यस्य यतः ।
शास्त्रयोनित्वात् । तत्तु समन्वयात् ।'' इति चतुःसूत्री च व्याख्याता । जिज्ञासैव धीमहीत्यनेनोच्यते । वेदविचारनिर्णेतृगुणोपसंहाररूपत्वात् । इयानेव विशेषः । ध्यानमेव ज्ञानसाधनं न कर्मादिकमित्यतो धीमहीतिपदं
कर्मणा शुद्धांतःकरणस्य ध्यानसंभवात् । यस्तु श्रुतिस्मृती अनादृत्य केवलतर्केण ब्रह्मणो जन्मादिकारणत्वं घटयितुं प्रत्यवतिष्ठति सोन्वयव्यतिरेकात्मकतर्केणापहस्तितव्य इत्यतो वा आह । अन्वयादितरतश्चेति ॥ अन्वयात्
अन्वयानुमानात् इतरतो व्यतिरेकानुमानात्तौ च दर्शितौ । चशब्दस्तु परोक्ततर्कस्य केवलस्य व्याप्तिशून्यत्वादस्य च प्रत्यक्षगृहीतव्याप्तिकत्वेन बलीयस्त्वादप्रतिहतः स्वार्थं साधयतीत्येतस्मिन्नर्थे वर्त्तते । यथांबादेरचेतनस्य
स्पंदनादिप्रवृत्तिदर्शनेन प्रधानस्य कारणत्वं किं न स्यात्तत्राह ॥ अर्थेष्विति ॥ अर्थेषु पटादिषु अभिज्ञः सर्वतोशेषविशेषाकारं जानातीत्यभिज्ञः । प्रधानस्य जडत्वेन ज्ञानाश्रयत्वलक्षणासंभवान्नितरां न सर्वज्ञत्वं विष्णोस्तु सर्वज्ञत्वं
श्रुतिस्मृतिसिद्धम् ''यः सर्वज्ञः सर्ववित् । तान्यहं वेद सर्वाणि नत्वं वेत्थ परंतप'' इत्यादिना । नन्वस्य हेतोः सर्वज्ञे रुद्रादावपि वृत्तेरसाधकत्वमिति तत्राह । स्वराडिति । स्वयमेव राजत इति स्वराट् । स्वस्य स्वयमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजा नान्योधिपतिरिरिति च । अयं भावः । "यं कामये तमुग्रं कृणोमि" इति रुद्रादीनां श्रीप्रसादायत्तज्ञानादिगुणवत्त्वदर्शनाद् "मम योनिरप्स्वान्तरः" इति । श्रियश्च विष्ण्वनुगृहीतज्ञानादिमत्त्वदर्शनाद्विष्णोश्चानन्याधीनज्ञानादिगुणवत्त्वात्तद्गतानां विशेषाणामनंतानां तैरज्ञातत्वान्न तेषां निरुपमचरितसर्वज्ञत्वमतो न तेषु तस्य हेतोर्व्यभिचार इति स एव कर्त्तेति । "न ते विष्णो जायमान एष भूताधिपतिः" इत्यादिश्रुतिरनन्याधिपतित्वे सर्वाधिपतित्वे च मानं स्रष्टुराज्ञांतररहित इति वा स्वराट् । स्वात्मानं स्वयमेव राजयति वा प्रकाशयति न परेच्छयेति वा । ननु श्रुतीनामनंतत्वादेकत्र हरेरनन्याधीनत्वकथनसंवादतः कुतो निश्चयः परोऽनन्याधीनस्तत्राह ॥ तेन इति ॥ यः पर आदिकवये चतुर्मुखाय ब्रह्म सांगं वेदं हृदा स्नेहेन तेने विस्तारितवान् । तस्य सकृदुपदेशमात्रेणाशेषग्रहणसामर्थ्येऽपि विस्तारितमिति "वक्तव्यं ब्रह्म गुरुणा चतुर्वारमथापि वा" इत्युपदेशशास्त्रमनुसृत्य तेन इत्युक्तं शिष्यशिक्षायै तथोपदेशसंभवात् । चतुर्मुखस्य वेदोपदेशेन हरेरनन्याधिपत्वे किमायातमिति चेन्न । "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव" इति श्रुतौ चतुर्मुखस्य निरतिशयमाहात्म्यकथनात्तदुपदेष्टृत्वात्तस्यानन्याधिपतित्वसिद्धेः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः सकलवेदविद्योपदेशोपि सिद्धः । आदिकवित्वं च ब्रह्मणः "कविर्यः पुत्रः स इमा विकेत" इत्यादिश्रुतिसिद्धम् ।"ब्रह्मा वेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः" इति । हृत्स्नेहे मनसि स्निग्धे सुहृद्बंधौ हरावपीत्यभिधानम् । न प्रहेलिकावदुपदेश इति द्योतनाय हृदेत्युक्तम् । तेने ब्रह्मेति सर्वज्ञत्वे हेत्वंतरं वा सकलचेतनराश्युत्तमस्य चतुराननस्योपदेष्टुः शार्ङ्गपाणेः सर्वज्ञत्वं न्यायप्राप्तमिति भावः । "वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्मादित्" इति श्रुतौ नारायणविषयज्ञाने स्वातंत्र्यकथनात्तदुपदिष्टज्ञानेनैव तज्ज्ञानं कथं संगच्छत इत्याशंक्य "यमेवैष वृणुते तेन लभ्यः" इतिश्रुतेस्तत्प्रसादायत्तं तज्ज्ञानं न तु स्वप्रतिभयान्यथा ज्ञानमेव न स्यादुक्तहेतोरित्यभिप्रेत्याह ॥ मुह्यंति यत्सूरय इति । भूतभविष्यद्वर्त्तमानब्रह्मादयो यत्प्रसादमंतरेण मुह्यंति मुह वैचित्त्ये इति धातोश्चितिर्ज्ञानं न जानंति क्वचिदन्यथा च जानंतीत्यर्थः । तस्माद्ब्रह्मादिचेतनराश्यचिंत्यमहिमामहीधर इति प्रतीयते।नन्वीश्वरः सृष्ट्यादौ प्रवर्तमानः प्रयोजनार्थी सृजत्यन्यथा वा न प्रथमः।यत्प्रयोजनार्थं प्रवर्त्तते पूर्वं तदभावादपूर्णत्वेनाशक्तत्वात्सृष्ट्यनुपपत्तेः । न द्वितीयः । प्रवृत्तिमात्रस्य स्वप्रयोजनोद्देशेन दृष्टत्वाद्वृथा तदनुपपत्तेरतो मायामयी सृष्टिरेष्टव्येत्यत आह ॥ तेजोवारीति ॥ तेजोवारिमृदां विनिमयो यथा तथा त्रिसर्गो यत्र भगवति मृषैव पूर्वाप्राप्तप्रयोजनप्रापको नेत्यर्थः । कथं तर्हि प्रवृत्तिरिति चेदुच्यते "देवस्यैष स्वभावोयमाप्तकामस्य का स्पृहा । लोकवत्तु लीलकैवल्यम्" इति श्रुतिसूत्रबलादाप्तसमस्तप्रयोजनस्य हरेर्लीलयैव प्रवृत्तिरिति भावः । जीवेश्वरजडानां सर्गस्त्रिसर्गः । यथैकमेव मूलं तेजः स्वकार्येषु पार्थिवादिपदार्थेषु बहुधा भूत्वा प्रविशति बहिश्च मथनादिनाविर्भवति तथेश्वरोऽपि जगत्सृष्ट्वा बहुरूपीभूय जगदंतः प्रविशति बहिश्च भक्तानुकंपया वासुदेवादिबहुरूप आविर्भवति अयमीश्वरसर्गः दीपाद्दीपांतरोत्पत्तिर्यथा तथेश्वरसर्ग इति वा यथा सूर्यादितेजसां जलाद्युपाधिनिमित्तैर्बहूनि प्रतिबिम्बानि जायन्ते तथैव सूक्ष्मस्थूलशरीराद्युपाधिनिमित्तैः प्रतिबिंबभूता जीवा हरेरुत्पद्यंते एष जीवसर्गः । यथा कुलालो मृदमुपादानीकृत्य घटादीन्सृजति तथेश्वरो जडप्रकृतिमुपादाय महदहंकाराद्यशेषजडपदार्थान्सृजतीत्येष जडसर्गः । अनेन मायामयी सृष्टिरित्यस्यकिमायातमिति चेदुच्यते यत्रेश्वर इति । विशेषणादन्यत्र जगत्यमृषा मिथ्या न भवति । तथा च योजना यथा तेजो वारिमृदां विनिमयः ॥ कार्यमर्थक्रियायोग्यत्वात्सदसद्विलक्षणो न भवति तथा यत्र यदाधारतया क्रियमाणस्त्रिसर्गो मृषा न भवति अतोर्थक्रियोपपत्तिरेव मिथ्यात्वबाधिकेति भावः । ननु तेजःकार्यं स्फुलिंगादि वारिकार्यं फेनादि मृत्कार्यं घटादि यथा मिथ्या तथा यत्र जगन्मृषेत्यर्थः स्यात् तथा च श्रुतिः " वाचारंभणं विकारः " अनुमानं च विमतं मिथ्या दृश्यत्वादित्यतो मायामयी सृष्टिरित्यत आह ॥ धाम्नेति ॥ स्वेन धाम्ना स्वरूपज्ञानमहिम्ना सदा निरस्तं कुहकमिंद्रजालादिमाया येन यस्य वा स तथा तं यः सर्वज्ञः । "अथैनमाहुः सत्यकर्मेति विश्वं सत्यम्" इत्यादिश्रुतिविरोधादुदाहृतश्रुतेरर्थांतरत्वसंभवान्नित्यनिरस्तेंद्रजालो विष्णुर्मायामयीं सृष्टिं न विदधाति किंतु सत्यामेव लोके चासमर्थः सन्निंद्रजालादिकं सृजति न तु समर्थः । विष्णुस्तु नित्यपरिपूर्णशक्तिः किमर्थं तत्करोतीत्यर्थः मुक्तव्यावृत्तये सदेत्युक्तं तेषां मुक्तेः पूर्वं बन्धनात्केन कुहकत्वसंभवात् । ननु विष्णोः सदानिरस्तकुहकत्वे मुक्तव्यावृत्तिर्घटेत । तदेव कुत इति तत्राह ॥ सत्यमिति ॥ सत्यं निर्दुःखनित्यनिरतिशयानंदाद्यनुभवरूपं " सच्छब्द उत्तमं वक्ति ह्यानंदंतीति वै वदेत् । येन ज्ञानं समुद्दिष्टाम्" इति वचनान्नित्यनिरस्तकुहकत्वेन मुक्तव्यावृत्तिर्युज्यते इति भावः । एतदुक्तं भवति उपक्रमादितात्पर्ययुक्त्युपेतसर्वश्रुतिस्मृतितात्पर्यपर्यालोचनया सर्वजगत्सृष्ट्यादिकर्तृत्वात्सर्वज्ञत्वाच्चतुर्मुखज्ञानोपदेष्टृत्वात्स्वानुग्रहमंतरेण दुर्ज्ञेयत्वात्स्वप्रयोजनानुद्देशेन केवललीलयैव जगत्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्जनादिप्रवृत्तिमत्त्वात्स्वत एव निरस्तनिरस्तेंद्रजालत्वेन सत्यमहिमत्वान्नित्यनिर्दुःखनिरतिशयानंदानुभवस्वरूपत्वाच्च सर्वगुणपूर्णो विष्णुः सर्वैश्वर्येय इति तात्पर्यार्थः । ननु धीमहीतिच्छान्दसः प्रयोगः कस्मात्कृतः । उच्यते
गायत्रीप्रतिपाद्यं नारायणाख्यं परं ब्रह्मैव न तु सूर्यः " चक्षोः सूर्यो अजायत "इति श्रुत्या तदंगजननोक्तेरिति दर्शयितुं यथा वेदाध्ययनोपक्रमे गायत्र्यभिधीयते विशिष्टफलहेतुत्वात्तथा भागवतोपक्रमे इति वा
गायत्र्याशेषवेदप्रतिपाद्यो नारायण एव भागवते प्रतिपाद्यते इति वा इतरेषां भगवत्कृतत्वेन तत्परत्वेपि तद्व्यावृत्तये वा इतरेभ्योप्यस्य माहात्म्याधिक्यप्रकटनायेति वा धीमहीति छांदसं पदं प्रायुंक्त भगवान्बादरायण इति ।
अथौपनिषदव्याख्यानमाह । तं परं सत्यं वयं धीमहीति संबंधः । सत्यमबाध्यं तत्र किंचिद्व्यवहारमात्राबाध्यं तद्व्यावर्त्तयन्नाह परमिति । परमार्थसत्यमत्यंताबाध्यमित्यर्थः । तथा च श्रुतिः " सत्यस्य सत्यम् " इति
"प्राणा वै सत्यं तेषामेष सत्यम् " इति प्राणशब्दोदितानां स्थूलसूक्ष्मभूतानां व्यवहारतः सत्यानामधिष्ठानभूतं परमार्थसत्यमात्मानं दर्शयति । एवं " सत्यं ज्ञानमनंतं ब्रह्म ऐतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि" इत्यादि
श्रुतिरपि ब्रह्मात्मशब्दोदितं परं तत्त्वमबाध्यं दर्शयति । सर्वभ्रमाधिष्ठानत्वात्सर्वबाधावधित्वाच्च परमार्थसत्यत्वम् । नहि निरधिष्ठानो भ्रमोस्ति न वा निरवधिबाधः। तत्र सर्वभ्रमाधिष्ठानत्वं जन्माद्यस्येत्यादिना दर्शितं सर्वबाधावधि
त्वं च तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषेत्यादिना तं परं सत्यं सर्वाधिष्ठानसन्मात्रमखंडवाक्यार्थभूतंश्रुत्वा मत्वा च वयं मुमुक्षवो ध्यायेम निदिध्यासेम । ध्यानमत्र निदिध्यासनरूपमेवाभिप्रेतं न तूपासनम्
निदिध्यासनं हि वस्तुस्वरूपापेक्षप्रत्ययानंतरितशाब्दज्ञानसंततिरूपम् । " आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः " इति श्रुत्या " ततस्तु तं पश्यंति निष्कलं ध्यायमानः " इत्यादिश्रुत्या चात्म
साक्षात्कारसाधनत्वेन विहितम् । उपासनन्तु वस्तुस्वरूपानपेक्षं पुरुषेच्छामात्रतंत्रं मानसक्रियाप्रवाहरूपं यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्नित्यादि । इदं च वस्तुस्वरूपानपेक्षमपि तदविरोधि किं
चिद्विरोध्यपि यथा वाचं धेनुमुपासीतेत्यादि । द्विविधमप्युपासनं श्रुत्या च ब्रह्मणि निषिद्धम् । " तदेव ब्रह्म त्वं विद्धि नेदं यादिदमुपासते " इति शुद्धगोचराया वृत्तेरुपानिषन्मात्रकरणकत्वात्" तं त्वौपनिषदम्" इति श्रुते
स्तस्या एव चावर्त्यमानाया निदिध्यासनरूपत्वाद्युक्तं शुद्धगोचरत्वम् ।एतावन्मात्रपर्यवसानाच्च सर्वसाधनविधीनां धीमहीत्युक्तम् । एतस्य च मंगलत्वं "सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् । येषां हृदिस्थो भगवान्मंगलायत
नोहरिः"इत्यादिशास्त्रसिद्धम् एवं शुद्धस्य ब्रह्मणो निदिध्यास्यमानस्य परमार्थसत्यतामुपपादयितुं तत्पदार्थरूपतामाह जन्माद्यस्येत्यादिना अस्य प्रत्यक्षादिसकलप्रमाणसांनिधापितस्य जगतो जन्मादि जन्मस्थितिभंगं यतो
भवति तं सत्यं धीमहीति संबंधः । तथा च श्रुतिः " यतो वा इमानि भूतानि जायंते । येन जातानि जीवंति । यत्प्रयंत्यभि संविशंति " इत्याद्याः " आनंदो ब्रह्मेति व्यजानात् । आनंदादेव खल्विमानि भूतानि जायंते"
इत्याद्या जगज्जन्मलयस्थितिकारणतां ब्रह्मणो दर्शयति । यत इति प्रकृतौ पंचमी । "जनिकर्तुः प्रकृतिः" इति पाणिनिस्मरणात् जन्मादिति तद्गुणसंविज्ञानो बहुव्रीहिः। "सर्वादीनि सर्वनामानि" इतिवत् । जन्मनश्चादित्वंश्रु
तिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च ननु " असद्वा इदमग्र आसीत् " इति श्रुत्याकार्येष्वनुस्यूतत्वाच्छून्यमेव जगत्कारणमस्तु नेत्याह ॥ अन्वयादिति । इदं सदिदं सदिति सद्रूपस्यैव कार्येष्वनुस्यूतत्वात् । इतरतश्च
असतोनन्वयात् शून्यमिदमिति प्रतीत्यभावात् । " कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेत " इति वाक्येनासतः कारणताप्रतिषेधाच्च सद्रूपं ब्रह्मैव जगदुपादानमित्यर्थः । " सदेव सोम्येदमग्र
आसीत्" इति श्रुतिवाक्यान्वयात् । इतरतश्च "असद्वा इदमग्र आसीत्" इत्यसतः सत्तानन्वयाच्चेति वा तथा चासत्पदं सूक्ष्मत्वेन गौण्या वृत्त्या सत्येव योजनीयमेतच्च समाकर्षादिति समन्वयाध्याये चतुर्थपादे चतुर्थाधि
करणे प्रकृतस्यैव सत्यज्ञानादिलक्षणस्याकर्षणम् प्रतिपादनमाकर्षः नामरूपादिराहित्यं सूत्रेण व्याख्यातम् । इतरतश्चेत्यत्र चकारादसतोऽन्वयलाभः । अथ वा कार्यान्वयाद्ब्रह्मकारणमित्युक्तेः कार्यान्वयात्कार्यविनाशे
तस्य विनाशमाशंक्योक्तमितरतश्चेति । तथा हि । घटनाशेपि तदन्विता मृन्न नश्यति । तत्कस्य हेतोर्घटे भिन्ने शरावादौ तस्या अन्वयात् ।.एवं सदपि इतरत इतरत्र कार्यांतरेतदुपलंभान्वयादित्यर्थः । वाक्यार्थानुपपत्त्या
दिदोषाच्च नासतो जगत्कारणतेत्याह ॥ अर्थेष्वभिज्ञ इति ॥ न हि सतोप्यर्थानविदित्वा कश्चिद्रचितुं शक्यते किं पुनरवस्तुनेति भावः । तथा च श्रुतिः ।"यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं
च जायते " इति "सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् । तदैक्षत बहुस्यां प्रजायेय" इत्याद्या च । स्वरूपसाधनप्रयोजनादिविज्ञानवत एव जगत्कारणत्वं दर्शयति अभितः सर्वप्रकारेण । सामान्यतो विशे
षतश्च सर्वं वस्तु जानातीत्यभिज्ञः सर्वज्ञः सर्वविदिति पदद्वयार्थौ दर्शितः अर्थानामभिज्ञ इति दर्शिते अर्थेष्विति सप्तमी सर्वत्रैकरूपैवावृत्त्या कल्पितत्वरूपा विषयतेति सूचयति । अथवान्वयादितरतश्चार्थे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्विति पूर्वेणैव संबंधः । एवं च सर्वज्ञत्वोपादानत्वेन परमाणुकारणवादः प्रधानकारणवादश्च निराकृतः । ननु माभूत्कारणता परमाणूनां प्रधानस्य तु भविष्यति सत्त्वपरिणामेन सर्वज्ञत्वसंभवात्
ब्रह्मणश्च निर्द्धर्मकत्वेन सर्वज्ञानाभावेनाकर्तृत्वादित्यत आह । स्वराडिति । स्वयमेव राजते प्रकाशत इति स्वराट् अन्यानपेक्षप्रकाशरूप इत्यर्थः । तथा च सविता प्रकाशत इत्यादिवत्कर्तृत्वौपचारिकत्वेन
सर्वविषयज्ञानस्वरूपत्वस्य विवक्षितत्वात् न प्रधानस्याचैतनस्य कारणता प्रसंग इत्यर्थः । एवं चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञा समर्थिता भवति । अन्यथा प्रधानविज्ञाने तत्कार्यज्ञानसंभवेपि तत्कार्याणां ज्ञानासंभवात् ब्रह्म
णि विदिते तु पुरुषाणां स्वत एव तद्रूपत्वात् इतरेषां च तत्र कल्पितत्वेन तदव्यतिरेकात् ''येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'' इत्यादिश्रुत्या ''कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति'' इत्याद्यया
''आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञातमिदं सर्वं विदितम्'' इत्याद्यया च प्रतिपादितैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः । ननु । ब्रह्मकारणत्वेऽप्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा नोपपद्यते वेदस्यापौरुषेयत्वेन स्वतंत्र्याभ्युपगमात्
तस्य ब्रह्मकार्यत्वेन पौरुषेयत्वेनाप्रामाण्यप्रसंगात् । किं बलाद्ब्रह्मकारणतापि व्यवस्थाप्येत तस्मात्संकोचितायां प्रतिज्ञायां स्वकार्यापेक्षया प्रधानमपि लब्धप्रसरमित्याशंक्याह । तेन इत्यादि । ब्रह्म वेदं यस्तेने विस्तारितवान् श्वासप्र
श्वासादिवल्लीलयाविर्भावितवान् । तथाच श्रुतिः ''अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः'' इत्याद्या वेदस्यापि ब्रह्मोपादानतां दर्शयति । न च ब्रह्मकार्यत्वे सति तस्य पौरुषेयत्वं पुरुषमात्रजन्यत्वेपि पौरुषेयत्वे वर्णाना
नित्यत्वेप्यानुपूर्वीविशेषस्य पुरुषजन्यत्वान्मीमांसकं मन्यस्यापि वेदाप्रामाण्यप्रसंगः।वर्णनित्यत्वमात्रेणैवापौरुषेयत्वव्यवस्थापने लौकिकवाक्यस्यापि तत्प्रसंगः । तस्मान्मानांतरेणार्थमुपलभ्य रचितत्वं पौरुषेयत्वं सापेक्षत्वलक्षणाप्रामाण्य
प्रयोजकम् । तच्च न वेदे वेदार्थस्य मानांतरागोचरत्वात् । इदमेव श्रुत्या निःश्वसितदृष्टांतेन दर्शितम् । यथा हि निश्वासः पुरुषाज्जायमानोपि न पुरुषचिकीर्षाजन्यः सुषुप्तावपि तद्दर्शनात् । एवं वेदो ब्रह्मणः सकाशाज्जायमानोपि
न ब्रह्मचिकीर्षाजन्यस्तदर्थस्य वेदातिरिक्तमानाविषयत्वात् । तथा च वेदतदर्थज्ञानयोस्तुल्यकालत्वान्न ब्रह्मणः सार्वज्ञ्यव्याघातो न वा वेदस्य पौरुषेयत्वम् एवं च सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा न संकोचनीया बाधकाभावात् ।
अत्र चेदृशमनुमानं सूचितम् । वेदनिष्ठा सर्वार्थप्रकाशनशक्तिः सदुपादाननिष्ठा कार्यगतप्रकाशनशक्तित्वात् । वह्न्युपादानकदीपगतप्रकाशनशक्तिवत् अतो वेदोपादानत्वेनापि ब्रह्मणः सार्वज्ञसिद्धिः केचित्तु हिरण्यगर्भ एव
वेदवक्ता जगत्कारणञ्चेत्याहुः तान्निराकरोति हृदा आदिकवय इति । आदिकविर्हिरण्यगर्भस्तस्मै हृदा सह यो ब्रह्म तेने अंतःकरणं सूक्ष्मपंचभूतकार्यमुत्पाद्य तदुपाधेर्हिरण्यगर्भस्य वेदतदर्थज्ञानं कारितवानित्यर्थः । तथा च
श्रुतिः ''यो ब्रह्माणं विदधाति'' इत्याद्या हिरण्यगर्भतद्वेदाविर्भावयोः परमेश्वराधीनतां दर्शयति तदपि हृदा मनसैव तेने न तु मुखेनाध्यापितवानिति वा अनेन सर्वांतर्यामित्वं दर्शितम् । तथा च श्रुतिः ''यः सर्वेषु भूतेषु
तिष्ठन्सर्वभूतेभ्योंतरात्मा यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यंतरो यमयत्येष त आत्मांतर्याम्यमृतः'' इत्याद्या सर्वांतर्यामित्वेन परमात्मानं प्रतिपादयति । ननूदाहृतश्रुतीनां ब्रह्मणि प्रामाण्यं
न संभवति ब्रह्मणः सिद्धत्वेन मानांतरायोग्यत्वात् अंततः स्वरूपचैतन्यस्यैव मानान्तरत्वात् । तथा च तत्संवादे[1] श्रुतीनां नाज्ञातज्ञापकत्वलक्षणं प्रामाण्यं विसंवादे[2] तु बाधितविषयत्वात्सुतरामप्रामाण्यम् । तथा च प्रधानपरमाण्वा
दिकारणताबोधकमनुमानं लब्धावकाशं भविष्यतीत्यत आह मुह्यंतीति । यद्यत्र यस्मिन्विषयेऽखंडानंदाद्वयस्वरूपचिन्मात्रलक्षणे सूरयस्तार्किकादयो मुह्यंति मोहमज्ञानमनुभवंति । मोहो हि द्विविधः । आवरणरूपो विक्षेपरूपश्च ।
तत्रावरणरूपोप्यसत्त्वावरणरूपो भानावरणरूपश्चेति द्विविधः । तत्र नास्ति शुद्धं ब्रह्म न भासते वेति द्विविधो मोहो वेदांतशास्त्रविचारपराणां तु परोक्षज्ञानेनासत्त्वावरणनिवृत्तावप्यभानावरणमनुवर्तत एव । नास्ति ब्रह्मेति प्रतीत्यनुद
येपि मम न भाति ब्रह्मेति तेषां प्रतीतेः । अत एव ते तदभानावरणनिवर्तकस्य साक्षात्कारस्य साधनान्यनुतिष्ठंति । एवं च विक्षेपोप्यावरणकार्यभ्रमविशेषरूपः प्रत्यक्ष एव । यतो जीवाद्भिन्न एवेश्वरो जगतो निमित्तकारणमात्रमे
वेति तार्किकवैशेषिकपातंजलपाशुपतादयो व्यवहरंति । सांख्यमीमांसकादयस्तु जगन्निमित्तकारणत्वेनापीश्वरन्नोपयंति किं तु प्रधानपरमाण्वाद्येव तेन रूपेणोपास्यमाहुः । तस्माद्ब्रह्मविषयकमोहस्यापरोक्षत्वात्स्वरूपचैतन्यस्य
च तत्साधकत्वेन तदनिवर्त्तकत्वात्तन्निवर्त्तकवृत्त्युत्पादनेन वेदांतानां प्रामाण्यमव्याहतमेव सिद्धत्वेपि ब्रह्मणो मानांतरायोग्यत्वं रूपादिहीनत्वेन व्युत्पादितं भाष्यकारप्रभृतिभिः । एवं पूर्वार्द्धेन तत्पदवाच्यार्थमुक्त्वा
परार्द्धेन तल्लक्ष्यं वक्तुमारभते ''अध्यारोपापवादाभ्यां निःप्रपचं प्रपंच्यते ॥'' इति न्यायेन तेजोवारीत्यादिना । यत्र ब्रह्मणि त्रयाणां तेजोबन्नानां सर्गस्त्रिसर्गः स मृषा मिथ्यैव शुक्तौ रजतवत् । छांदोग्ये सृष्टि

१ तस्य ब्रह्मणः संवादे सिद्धत्वे । २ तदसिद्धत्वे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽन्यतो वेदाध्ययनमप्रसिद्धम् । सत्यम् । तत्तु हृदा मनसैव तेने विस्तृतवान् । अनेन बुद्धिवृत्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः । वक्ष्यति हि । "प्रचोदिता येन पुरा

प्रकरणे त्रयाणां तेजोबन्नानां साक्षात्पठितत्वात्रिसर्ग इत्युक्तं वियदधिकरणन्यायेन तु पंचभूतसर्ग इति द्रष्टव्यम् । तथाहि "न वियदश्रुतेः" वियदाकाशो नोत्पद्यते कुतः छांदोग्ये तदुत्पत्तेरश्रवणात् यद्यपि "आत्मन आकाशः संभूत" इति श्रुतिरस्ति । तथापि सा गौणीति गूढोभिसंधिः तथा चाकाशोत्पत्तेरनभ्युपगमादेव न विरोधः । गूढाभिसन्धिमजानानः शंकते । अस्ति तु १ तुशब्दो वियतोनुत्पत्तिवारणार्थः कुतः । छांदोग्ये वियदुत्पत्त्यभावेपि सा श्रुतिस्तैत्तिरीयकेऽस्तीत्यर्थः । तथा च विरोधस्तदवस्थ इति शंकितुरभिप्रायः २ एकदेशी स्वाभिप्रायं प्रकटयति गौण्यसम्भवात् ३ न ह्याकाशोत्पत्तिश्रुतिर्मुख्या किन्तु गौणी । कुतः असंभवात् । आकाशोत्पत्तौ समवायिकारणादिसामग्र्यभावाद्विभुत्वेन नित्यत्वानुमानाच्चाकाशोत्पत्तेरसंभवादित्यलं प्रसक्तानुप्रसक्त्या । स्त्रीकृतेपि पांचभौतिकसर्गे त्रिवृत्सर्गस्तु सर्वथास्त्येवेति ज्ञेयम् । तन्मिथ्यात्वे दृष्टांतमाह । तेजोवारिमृदां विनिमयो व्यत्यासः व्यामिश्रीभावोऽन्यस्मिन्नन्यावभासरूप इति यावत् तथा च श्रुतिः "यदग्ने रोहितं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्" इत्यादिना । कृत्स्नस्यापि विकारस्यानृततां दर्शयति न ह्यारंभवादो वा परिणामवादो वा संभवति तथा हि परमाणुः परमाण्वंतरेण पूज्यमानो द्व्यणुकमारभते इत्युपेयते तत्र द्व्यणुकासमवायिकारणीभूतः संयोगः परमाण्वोः कार्त्स्न्येन वा समवाय्येकदेशेन वा आद्ये प्राथिमानुपपत्तिः । द्वितीये सावयवत्वापत्तिः । एवं परिणामोऽपि प्रधानस्य कार्त्स्नेन वैकदेशेन वा । आद्ये कारणविनाशापत्तिः । द्वितीये सावयवत्वापत्तिः । न चेष्टमेवैतत् । सावयवत्वे तस्यापि जन्यत्वेन मूलकारणविनाशापत्तिः । एवं कार्यमपि कारणव्यापारात्प्रागसत् सद्वा । आद्ये कार्यकारणभावाग्रहः । नहि खपुष्पेण समं कस्यचित्सम्बधो गृह्यते उत्पन्नघट इव प्रागभावप्रतियोगित्वेनासतोपि कार्यत्वं भविष्यतीति चेत् हंत प्रागभावप्रतियोगित्वं निराश्रयं साश्रयं वा । आद्ये शशविषाणतुल्यता द्वितीये सत्कार्यवादापत्तिः प्रागभावप्रतियोगित्वाश्रयत्वेनैव कार्यसत्त्वांगीकारात् नच सत्कार्यवादोऽपि घटते । अविद्याकारकव्यापारवैयर्थ्यापातात् आविर्भावतिरोभावयोरपि सदसत्त्वविकल्पग्रासात् तस्मात्सदसद्विलक्षणत्वेनानिर्वचनीयतैव कार्यकारणयोरिति विवर्तवादोवशिष्यते । तथा चाविद्यावशाच्छुद्धे ब्रह्मणि द्वैताभासो मिथ्येत्यर्थः । नन्वविद्याकार्याणामसत्त्वेप्यविद्यायाः सत्यत्वमस्तु । अनादिभावत्वात् ब्रह्मवत् कल्पकशून्यत्वाच्च । नहि द्वैतप्रपञ्चकल्पनाहेतोरविद्यायाः कल्पकांतरमस्ति स्वस्या एव कल्पकत्वे आत्माश्रयात् । अविद्यांतराभ्युपगमे चानवस्था स्यात् । तथा चैकविज्ञानेन सर्वविज्ञानव्याघातोऽनिर्मोक्षापत्तिश्चेत्यत आह धाम्ना स्वेन । सदा निरस्तं नित्यनिवृत्तं कुहकं कपटमविद्याख्यं यस्मिंस्तत्तथा तत्र हेतुः । स्वेन धाम्नेति । अखंडानंदाद्वितीयचैतन्यरूपत्वादित्यर्थः । तथा च श्रुतिः "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिः अन्यथानुपपद्यमानैरेकाद्वितीयशब्दैरखंडमेव वस्तु प्रतिपादयति दृग्दृश्यसंबंधानुपपत्त्या कल्पितत्वेनैवाविद्यायाश्चैतन्यभास्यत्वनियमाच्च एकस्या एव च स्वपरसाधारणकल्पनामूलत्वान्नाविद्यांतराभ्युपगमः । उत्पत्त्यनंगीकारेण ज्ञप्तेश्च नित्यत्वेन नात्माश्रयादिदोषः । अनादिभावत्वं चात्मनो नित्यत्वे प्रयोजकं न भवति किंतु परमार्थसत्यत्वमविद्यायाश्च सदसद्विलक्षणत्वाज्ज्ञाननिवर्त्यत्वोपपत्तेः । तथा च मायातत्कार्यहीनः परमात्मा तत्पदलक्ष्यो दर्शितः एतेनैव त्वंपदलक्ष्योपि दर्शितः । तस्यापि मायातत्कार्यशरीरादिहीनत्वात् । जाग्रत्स्वप्नसुषुप्तिसाक्षिणस्तद्धर्म्भावात् । एवं च पदार्थज्ञानपूर्वकवाक्यार्थबोधे सति तदावृत्तिरूपं निदिध्यासनमुपपन्नम् अथ जन्माद्यस्य यत इत्यनेनानंदरूपत्वं दर्शितम् "आनंदादेव खल्विमानि भूतानि जायंते" इत्यादिश्रुतेः । अन्वयादित्यनेन सद्रूपत्वं नित्यत्वं विभुत्वं च सर्वदेशकालान्वयबोधनात् । स्वराडित्यनेन स्वप्रकाशज्ञानरूपत्वं धाम्ना स्वेन निरस्तकुहकमित्येनाद्वितीयत्वं सत्यमित्यनेन परमार्थत्वमिति सत्यं ज्ञानमनंतं ब्रह्मेत्यादिना वाक्यार्थो दर्शितः । अथ च त्वं पदार्थोपि शक्यतेऽनेन श्लोकेन दर्शयितुं श्लेषालंकारस्यात्यंतचारुत्वात् । तथाहि । यो जीवोऽस्य देहेंद्रियादेर्जन्मादि विकारजातमन्वयादनुगतवान् अविद्ययात्मन्यारोपितवांस्तं परं सत्यं धीमहीति संबंधः । अस्य कीदृशस्य यतः गच्छतः सर्वदा परिणममाणस्येत्यर्थः । जन्मादि गच्छत इति वा जातो देवदत्तो मृतो देवदत्त इत्यादिप्रतीतेः । तद्यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमस्मादात्मनः सर्व एव आत्मानो व्युच्चरंतीति जन्मश्रुतेश्च । स्वत एव जन्मादिमाङ्गीवो स्तु नेत्याह इतरतश्चेति । जन्माद्ययोगत्वादित्यर्थः । तथाच श्रुतिः "न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् । अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इत्याद्या स्मृतिश्च भगवद्गीता जीवस्य जन्मनाशौ वारयति कृतहान्यकृताभ्यागमादिदोषप्रसंगादुपाध्युत्पत्तिमात्रेणैव व्युच्चरन्तीत्यादिश्रुत्युपपत्तेस्तद्गुणसारत्वादित्यादिन्यायाच्चेति चकारार्थः । तद्गुणसारत्वात्तु व्यपदेशः प्राज्ञवत् । अस्यार्थः । तुशब्दः पूर्वपक्षनिरासाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि । स्वलक्षणा प्रादुरभूत्किलास्यतः स मे ऋषीणामृषभः प्रसीदताम् । '' इति ॥ ननु ब्रह्मा स्वयमेव सुप्तप्रतिबुद्धन्यायेन वेदमुपलभ

अणुर्जीवः किं ब्रह्मणस्तत्त्वांतरमुत विकारः आहोस्विद्ब्रह्मणो भिन्नः । नाद्यः । एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाबाधात् । न द्वितीयो निर्विकारत्वात् । तस्मात्सर्वश्रुत्यनुसारी तृतीयः पक्षः परिशिष्यते । तथा च ब्रह्मणो नव धिकमहत्त्वावगमाज्जीवोप्यनवधिकमहत्त्ववान् ''स वा एष महानज आत्मा योयं विज्ञानमय'' इति विज्ञानमयस्य जीवस्य स्वतो महत्त्वावगमाच्च''एषोणुरात्मा चेतसा वेदितव्य'' इत्येतन्न जीवविषयं वेदितव्यत्वश्रवणात् । किन्तु चक्षुराद्यविषयत्त्वेन दुर्विज्ञेयब्रह्मविषयं बालाग्रशतभागस्येति वाक्यं। तु जीवस्यौपाधिकमणुत्वमनूद्य स चानंत्याय कल्पत इति वाक्यशेषेणानंत्यमपरिछिन्नत्वं बोधयति।किञ्चात्मनोणुत्वे देहव्याप्युपलंभो न स्यात् न च चंदनबिंदुदृष्टांतः। तस्य सावयवत्वेनावयवद्वारा व्यापित्वसंभवात् । नापि व्याप्यज्ञानाद्व्याप्तिकार्यसंभवः।गुणिव्यतिरेकेण गुणावस्थानां योगेन व्यापिज्ञानस्यासम्भवात्।न च गंधन्यायेन गुणस्य ज्ञानस्य गुणिव्यतिरेकसंभवः गंधस्यापि गुणत्वेन साश्रयस्यैवा गमनांगीकारात् । अन्यथा गुणत्वव्याहतेर्गंधस्य द्रव्यत्वेन तद्दृष्टांतो भवेत् । प्रज्ञया शरीरमारुह्येत्येतदपि प्रज्ञया बुद्ध्याख्यांतःकरणेनेति व्याख्येयम् । कथं तर्हि जीवेणुत्वव्यपदेशस्तद्गुणसारत्वादिति ब्रूमः । तस्या बुद्धेर्गुणा अणु त्वोत्क्रांतिगत्यागतिसुखदुःखादयस्ते गुणाः सारं प्रधानं यस्य जीवस्य स तथा तस्य भावस्तत्वं तस्मात्तद्व्यपदेशोणुत्वादिव्यपदेशो न तु स्वाभाविकः प्राज्ञवत् प्राज्ञस्य परमात्मनः सगुणेषूपासनेषु ''दहरोस्मिन्नंतराकाशः अणीयान् व्रीहेर्यवाद्वे''त्यादिषूपाधिवशाद्यथाणुत्वादिकं व्यपदिश्यते तद्वदित्यर्थः । किं च देहमिंद्रियं मनः प्राणं च केचिदात्मत्वेन प्रतिपन्नास्तान्निराकरोति । अर्थेष्वभिज्ञ इति।न हि भौतिकानां देहेंद्रियप्राणमनसां ज्ञातृत्वं संभवति घटादाव पि तत्प्रसङ्गात्।एतेषां चानित्यत्वादात्मनित्यत्वस्य च व्यवस्थापितत्वात्।एतेन विभुत्वमपि व्याख्यातम्।नित्यत्वं हि मध्यमपरिमाणत्वेऽनुपपद्यमानं परमाणुत्वे वा परममहत्त्वे वा व्यवतिष्ठत तत्र परमाणुत्वे सकलशरीरव्यापिसुखदुःखानु पलंभप्रसंगात्सकलदेहव्यापिकार्योपलब्धेश्च परममहत्त्व एव नित्यत्वं व्यवतिष्ठेत । एतेन देहाद्यतिरिक्तोपि देहपरिमाण एवात्मेति क्षपणकपक्षो निरस्तः । अस्तु तर्हि देहेंद्रियातिरिक्तो विभुरेवात्मा ज्ञानाश्रयो न तु ज्ञानरूप इति मतं तत्राह । स्वराडिति । स्वयमेव राजत इति स्वराट् । स्वप्रकाशज्ञानरूप इत्यर्थः । ''अत्रायं पुरुषः स्वयं ज्योतिर्भवति'' इत्यादि श्रुतेः संदेहविपर्ययाद्यविषयत्वे सदाभासमानत्वात् । स्वजन्यज्ञानविषयत्वे च कर्तृकर्मविरोधात् । ज्ञोऽत एवेति न्यायाज्ज्ञानरूप एवा [1]त्मेत्यर्थः । अविरोधाध्याये तृतीयपादे द्वादशाधिकरणे ज्ञो नित्यचैतन्यरूपोऽयमात्मा अत एवोत्पत्त्यसंभवादेव परमात्मवदिति न्यायार्थः । ननु जीवस्य स्वप्रकाश ज्ञानरूपत्वे जन्मादिशून्यत्वे च ब्रह्मणो भेदकाभावात्स्वत एव च ब्रह्माभिन्नत्वे शास्त्रारंभो निरर्थकः । ब्रह्मावबोधस्य सर्वदा विद्यमानत्वादित्यत आह । तेनेऽब्रह्महृदा य आदिकवय इति । हृदा मनसा उपाधिना तादात्म्या पन्नः सन्नब्रह्म ब्रह्मविपरीतं कर्तृत्वभोक्तृत्वादिलक्षणं संसारसंचरणरूपं विस्तारितवान् । तथा च श्रुतिः । ''समासमानः सन्नुभौ लोकावनु संचरति ध्यायतीव लेलायतीव सधीः स्वप्नो भूत्वा'' इत्याद्या धीसंबंधाद संसारिणोऽसंसारितां दर्शयति । तथा च तन्निवृत्तये ब्रह्मात्मतोपदेशो युक्त इत्यर्थः । संसारस्य मोक्षहेतुतां दर्शयति । आदिकवय इति । आदिभूतं च यत्कं सुखं ब्रह्मानंदरूपो मोक्ष इत्यर्थः । तस्य वयः प्राप्तिस्तदर्थ मयवयगताविति स्मरणात् । निमित्तात्कर्मयोगे चेयं सप्तमी । चर्मणि द्वीपिनं हंतीतिवत् । न हि संसाराभावे श्रवणमननादिसाधनानुष्ठानं संभवति । न च तदभावे तत्त्वज्ञानोदयः । न च तमंतरेणानाद्यविद्यानिवृत्ति रिति मोक्षार्थमेव संसारं विस्तारितवानित्यर्थः । तथा च श्रुतिः । ''रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इंद्रो मायाभिः पुरुरूप ईयते'' इति च ''ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवत् । '' इति च । संसारद्वाराऽविद्यानिवृत्तिरूपं मोक्षं दर्शयति । ननु तर्हि भवतु स्वप्रकाशज्ञानरूप आत्मा किं तु नानंदरूपः प्रतिशरीरं भिन्नश्चेति सांख्यमतं तत्राह । मुह्यंति यत्सूरय इति । यत्र यस्मिञ्जीव स्वरूपे सूरयस्तार्किकाद्यपेक्षया सुधियोपि मुह्यंति भ्राम्यंति शुद्धस्वरूपं जानाना अपि आनंदरूपत्वं प्रतिदेहमेकत्वं ब्रह्माभिन्नत्वं चाजानंतः । तथा च श्रुतयः ''एष एव परमानंद'' इति ''एको देवः सर्वभूतेषु गूढः'' इति ''अयमात्मा ब्रह्म'' इति तादृग्रूपतां जीवस्य बोधयंति । ''तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मादन्तरं यदयमात्मा'' इति श्रुत्यंतराच्च परमप्रेमास्पदत्वादानंदरूपत्वं नानात्वे भोगव्यवस्थानुपपत्तेश्च प्रतिदेहमेकत्वम् ।

१ ज्ञानसंभवः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताम् । नेत्याह । यद्यस्मिन्ब्रह्मणि सूरयोऽपि मुह्यंतीति तस्माद्ब्रह्मणोपि पराधीनज्ञानत्वात्स्वतः सिद्धज्ञानः परमेश्वर एव जगत्कारणम् । अत एव सत्योऽसतः सत्ताप्रदत्वाच्च

न हि विभूनामात्मनां सर्वदेहसंबंधित्वाविशेषे कर्मप्रदेशानां भिन्नदिक्त्वमपि भोगानियामकं भवितुमर्हति अविशेषात् । एकात्मवादे तु तत्तदंतःकरणावच्छिन्नप्रदेशानां भिन्नत्वादुपपद्यत एव व्यवस्था देहभेदादेव च प्रतिसंधानाभावः । एवं च भेदकशून्यत्वाद्ब्रह्मभिन्नत्वमसिद्धम् । तदभिन्नत्वं तु सिद्धमेव लक्षणैक्यात् । एवं त्वंपदवाच्यार्थं पूर्वार्द्धेन प्रतिपाद्य तल्लक्ष्यमुत्तरार्द्धेन वक्तुमध्यारोपापवादन्यायेनारभते । तेजोवारिमृदां यथा विनिमय इत्यादिना । यत्रात्मनि त्रयाणां स्थूलसूक्ष्मकारणोपाधीनां जाग्रत्स्वप्नसुषुप्त्यवस्थाहेतूनां सर्गः संसर्गो मृषा मिथ्यैव । न तु परमार्थतः । ''स यत्तत्र न किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष'' इत्यादिश्रुतिभ्यः साक्ष्यस्य साक्षिधर्मानुपपत्तेर्भास्यस्य घटादेर्भासकदीपादिधर्मत्वादर्शनात् । मिथ्यात्वे दृष्टांतः । तेजोवारिमृदां यथा विनिमय इत्यादिना । वारिणि करकारूपे मृद्बुद्धिः । एवं काचादिरूपायां मृदि तेजोबुद्धिरित्युदाहार्यम् । तथा चेदमनुमानं सूचितम् । आत्मनि जाग्रदादिबुद्धिर्मृषा तदभाववति तद्बुद्धित्वात् । तेजसि वारिबुद्धिवत् । तदभाववत्त्वं चात्मनः श्रुतिस्मृतिन्यायैर्निश्चितमिति नासिद्धिः । एवं लक्षणैक्येन ब्रह्माभिन्नत्वं दर्शयति । धाम्ना स्वेन सदा निरस्तकुहकमिति । तदेवं तत्पदार्थत्वं पदार्थतदैक्यकथनद्वारेण शास्त्रस्य विषयो दर्शितः । श्रवणमननयोस्तृतीयश्च निदिध्यासनमिह प्रतिपाद्यते श्रवणमननवतो विजातीयप्रत्ययनिवारणस्य मनोनिग्रहद्वारा व्युत्पाद्यमानत्वात् । चतुर्लक्षणमीमांसारूपत्वं चास्य सूचितम् । तथाहि । पूर्वार्द्धेन ''जन्माद्यस्य यतः'' इति न्यायः साक्षादेव दर्शितः । अन्वयादित्यनेन ''तत्तु समन्वयात्'' इति । अर्थेष्वभिज्ञ इत्यनेन ''ईक्षतेर्नाशब्दम्'' इति । तेने ब्रह्महृदेत्यादिना ''शास्त्रयोनित्वाद्'' इति । मुह्यंति यत्सूरय इत्यनेन ''एतेन सर्वे व्याख्याताव्याख्याता'' इत्यंतो न्यायकलापः सूचित इति समन्वयाध्यायो व्याख्यातः १ तेजोवारिमृदामित्यादिना ''तदनन्यत्वमारंभणशब्दादिभ्यः'' इत्यादिन्यायसूचनादविरोधाध्यायार्थः २ धीमहीत्यनेन ''सहकार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवद्'' इत्यादि न्यायसूचनात्साधनाध्यायार्थः ३ धाम्ना स्वेन सदा निरस्तकुहकं परं सत्यमिति फलाध्यायार्थः ४ अविद्यातत्कार्यनिवृत्त्युपलक्षितपरमानंदरूपावशेषात् । पूर्वोक्तन्यायार्थस्तु अस्य जगतो यतो जन्मादि तद्ब्रह्मेत्यर्थः । तद्ब्रह्मैव साक्षाद्वेदांतप्रतिपाद्यं कुतः समन्वयात् । सम्यगन्वयः समन्वयस्तस्मात् । अन्वयस्य सम्यक्त्वं तात्पर्यवत्त्वं वेदांता न कर्त्रादिप्रतिपादका भिन्नप्रकरणस्थत्वात् । तुशब्दोऽवधारणे इति । अशब्दं प्रधानं न जगत्कारणम् । कुतः । ईक्षतेः । जगत्कर्त्तरीक्षितृत्वश्रवणादिति । शास्त्रं वेदस्तद्योनित्वं तत्कर्तृत्वं तस्माद्ब्रह्म सर्वज्ञमित्यर्थः । एतेन प्रधानवादनिराकरणेन ये हेतवोऽशब्दत्वाचेतनत्वैकविज्ञानप्रतिज्ञानुपपत्त्यादयस्तेषामण्वादिपक्षेपि साम्येन सर्वेऽणुस्वभावासत्कारणवादा निराकृतत्वेन व्याख्याताः । अभ्यासोऽध्यायसमाप्त्यर्थः । तस्माद्ब्रह्मणः प्रपंचस्यानन्यत्वं पृथक्सत्ताराहित्यं कुतः आरंभणशब्दादिभ्य एकविज्ञानात्सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं दृष्टांत उपन्यस्तः । ''यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इति ज्ञानफलभूतसाक्षात्कारे श्रवणाद्यपेक्षया सहकार्यं तदस्य मौनस्य निदिध्यासनाख्यस्य विधिरित्यर्थः । ननु गार्हस्थ्यमाचार्यकुलं वानप्रस्थं मौनमित्यत्र मौनशब्दस्य पारिव्रज्ये प्रयोगात्कथमत्र मौनं निदिध्यासनं स्यादतः । आह । तृतीयमिति । श्रवणमननद्वयापेक्षया तृतीयं निदिध्यासनमेवात्र मौनं विधेयमित्यर्थः । तत्रेतराश्रमसमभिहारबलान्निदिध्यासनप्रधानपारिव्रज्यं मौनशब्देन लक्ष्यते इतिभावः । कस्यायं मौनविधिस्तत्राह । तद्वत इति । ब्रह्मपरोक्षज्ञानवतः पूर्ववाक्ये प्रकृतस्य संन्यासिन इत्यर्थः । ननु सूक्ष्मवस्तुसाक्षात्कारनिदिध्यासनस्य प्राप्तत्वान्न विधेयत्वमत आह । पक्षेणेति । यस्मिन्पक्षे भेददर्शनप्राप्तिस्तस्मिन्पक्षे प्राप्त्यभावाद्विधिरर्थवानित्यर्थः । ननु ब्रह्मपरवाक्ये कथं मौनविधिरित्याशंक्य दृष्टांतमाह । विध्यादिवदिति । यथा दर्शपूर्णमासप्रधानपरे वाक्येऽन्वाधानादेरंगजातस्य विधिस्तद्वदित्यर्थः । प्रधानमारभ्यांगपर्यंतो विधिस्तदादिर्विध्यादिः प्रधानमिति यावत् । अत एव प्रयाजादिर्विध्यंत इत्यर्थः । ब्राह्मण्यस्य फलत्वान्न विधिकल्पना त्रिफलेत्यर्थः । अथ प्रकृतमनुसरामः । एवं सति परमहंससंहितेति समाख्योपपद्यते । परमहंसानां वेदांतवाक्यार्थनिदिध्यासननिष्ठत्वात् । अत्रत्योपाख्यानां तत्तात्पर्यकत्वात् । अत्र गायत्र्यर्थसूचनाद्गायत्रीवदनिशं जप्तव्या गायत्र्यधिकारिभिरेव पठितव्या चेति दर्शितम् । अत्र च सर्गादीन्यपि दशलक्षणान्यनेन पद्येन सूचितानि । जन्माद्यस्य यत इत्यनेन सर्गविसर्गस्थानानि तृतीयचतुर्थपंचमस्कंधव्युत्पाद्यानि सूचितानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमार्थसत्यः सर्वज्ञत्वेन च निरस्तकुहकस्तं धीमहीति । गायत्र्या प्रारंभेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितम् । यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे ।

तेने ब्रह्म हृदा य आदिकवय इत्यनेन भक्तानुग्रहलक्षणं षष्ठस्कंधव्युत्पाद्यम् मुह्यंति यत्सूरय इत्यनेन कर्मवासनारूपा गतिः सप्तमस्कंधव्युत्पाद्या । मन्वन्तरेशानुकथेऽष्टमस्कंधप्रमेये स्थानमध्य एवांतर्भूते । तेजोवारिमृदां यथा विनिमय इत्यनेन निरोधो दशमस्कंधार्थो दर्शितः । धाम्ना स्वेन सदा निरस्तकुहकमित्यनेन मुक्तिरेकादशस्कंधार्था दर्शिता । सत्यं परमित्यनेनाश्रयो द्वादशस्कंधार्थो दर्शितः । धीमहीत्यात्मनेपदोत्तमपुरुषप्रयोगाद धिकारी प्रथमस्कंधार्थस्तेनैव च ध्यानोपलक्षितसाधनानुष्ठानरूपो द्वितीयस्कंधार्थ इति कृत्स्नभागवतार्थसूचनमिति । अस्मिन्नेव पद्ये विशेषतो द्वादशस्कन्धकथासूचको लीलाकल्पद्रुमाख्यो ग्रंथोपि मया वंशीधरशर्मणैव संदब्धस्तत्र सर्वाः कथाः स्फुटाः प्रतीयंत इति । व्याख्यानं चैतदौपनिषदेभ्यो रोचते । सात्वतास्तु वर्णयंति पंचीकृतपंचमहाभूतोपहितं शुद्धचैतन्यं तदभिमानिविराडन्तर्यामिरूपमौतमित्यनिरुद्ध इति चाख्यायते । एवमपंचीकृत महाभूतोपहितं शुद्धचैतन्यं तदभिमानिहिरण्यगर्भान्तर्यामिरूपमनुज्ञातेति प्रद्युम्न इति चाख्यायते । एवं स्थूलसूक्ष्मभूतकारणीभूतं यन्मायात्मकमव्याकृतं तदुपहितं शुद्धचैतन्यं तन्निष्ठचिदाभासोपलक्षितमनुज्ञेति संकर्षण इति चाख्यायते । अनुपहितं तु चैतन्यं सर्वानुस्यूतं सन्मात्रं सर्वसाक्षिपरमानंदघनोऽविकल्प इति वासुदेव इति चाख्यायते । संकर्षणप्रद्युम्नानिरुद्धानामपि वासुदेवत्वं वर्त्तत एव । उपाधिकृतः केवलं विशेषः । एतच्च नृसिंहतापनीयोत्तरभागे व्याख्यातम् । औतानुज्ञात्रनुज्ञाविकल्पैः स्थूलसूक्ष्मबीजसाक्षिभिरिति बहुकृत्वोऽभ्यासेन । अत्र च वासुदेवः परमात्मा संकर्षणो जीवः प्रद्युम्नस्तु मनोऽनिरुद्धोऽहंकार इति पाञ्चरात्रिक प्रक्रिया नादरणीया तद्वचनविरोधाच्चेत्याद्युत्पत्त्यसंभवादित्यधिकरणे व्याख्यातम् । केवलं परमात्मैवानुपहितो वासुदेवः कारणोपहितः संकर्षणः सूक्ष्मभूतोपहितः प्रद्युम्नः स्थूलभूतोपहितोऽनिरुद्ध इति यथाव्याख्यानमे वादरणीयं श्रौतत्वादुपपन्नत्वाच्च एवं स्थिते योजना चेत्थम् । परं सत्यं वासुदेवाख्यं धीमहि उपास्महे । ध्यानमत्रोपासनमेवाभिप्रेतम् । चतुर्व्यूहरचनाया उपासनार्थत्वात् । नन्वनुपहितस्य वासुदेवस्य बुद्धावनारोहात्कथ मुपास्यत्वं सत्यमनिरुद्धादिरूपमप्यविवक्षितोपाधिसंबंधवासुदेवात्मकमेव क्षेत्रकूपद्वारादिकमिवाविवक्षिततत्तदुपाधिसंबंधमाकाशात्मकमेव विवक्षितोपाधिसंबंधं तु पृथग्व्यपदेशभेदं लभते न तु तावता वस्त्वन्यता भवति । तथा च तया द्वारा वासुदेवे मनोवृत्तिः कार्येति वक्तुमारभते । जन्माद्यस्येत्यादिना । अस्य जगतश्चतुर्दशभुवनरचनात्मकस्य ब्रह्मांडस्य जन्मादिविकारजातं यतो भवति तं धीमहीति संबंधः । तस्य जगद्विरचनयोग्यतामाह अर्थेष्वभिज्ञ इति । ब्रह्मांडाभिमानिविराडपेक्षया वैक्षलण्यमाह । स्वराडिति । ब्रह्मांडावच्छिन्नचिदाभासोहि विराड् जीवः अयं तु तद्बिम्बभूतस्तदंतर्यामी स्वयमेव राजत इति स्वराट् । बिम्बभूतत्वेनान्यानपेक्षत्वात् । एवमनिरुद्धमोतमुक्त्वा प्रद्युम्नमनुज्ञातारमाह । तेने ब्रह्म हृदा य आदिकवय इति । आदिकवये सूक्ष्मभूतावच्छिन्नचिदाभासाय हिरण्यगर्भसूत्रादिसंज्ञकाय ब्रह्म वेदं तदंतर्यामिरूपेण बिंबभूतो यस्तन्मनसैव तेने हिरण्य गर्भवैलक्षण्यं स्वयमेवोक्तं संप्रति संकर्षणमनुज्ञामाह । ननु हिरण्यगर्भाय कारणोपाधिः संकर्षणो वेदमुपदिशतामिति चेदत्राह । मुह्यंतीति । यस्मिन्वेदे सूरयः कपिलादयोपि संकर्षणस्यापि कारणोपहितत्वान्मोहोस्ति न तद्बिंबभूते परमात्मनीति । अथाविकल्पं वासुदेवमाह । यत्र वासुदेवे त्रिसर्गोऽनिरुद्धप्रद्युम्नसंकर्षणरूपो भेदो मृषैव । मिथ्यात्वे दृष्टांतः । तेजोवारीति । धाम्ना स्वरूपस्फूर्त्या निरस्तमपास्तं कुहकं विराडाद्युपाधिरूपं यत्र तत्तथा । एतेनानिरुद्धादयो वासुदेवानतिरिक्ता एव तद्रूपेणैवोपास्या न पृथक्त्वेन । अन्वयादितरतश्चेति हेतुद्वयं जन्मादीत्यत्र ध्येयम् । निजाभासरूपेण विराडादावन्वयाद्बिम्बरूपेण तेभ्यो व्यतिरेकादिति १२ अथ श्रीभागवतप्रतिपाद्यार्थो भगवानवतारी श्रीकृष्ण एतदवतारगुणवर्णनप्राचुर्यमन्यत्प्रासंगिकमिति स्थितं तत्र तावच्छ्रीवेदव्यासो नानाशास्त्रप्रबंधेन निरूपितश्रीकृष्णचारित्रोऽपि तत्रतत्र निरूपणाभावाच्चित्तस्वास्थ्यमलभ मानो नारदोपदेशेन विदिततत्स्वरूपभक्तियोगः संस्तद्गुणप्रधानं श्रीमद्भागवतमारब्धुकामः । परममंगलमेव श्रीकृष्णं ध्यायति जन्माद्यस्येति । परं परमेश्वरं श्रीकृष्णं हृदा मनसा धीमहि ध्यायेम । कथंभूतं सत्यं सर्व प्रकारेण । सत्यम् । तदुक्तं गर्भस्तुतौ ब्रह्मादिभिः "सत्यव्रतम्" इत्यादि । इत्यनेन सत्यशब्दवाच्यः श्रीकृष्ण एव दर्शितः । ननु तस्यापि देहसंबंधात्कथं सत्यत्वमित्याशंक्याह । यत्र त्रिसर्गो मृषेति । यत्र श्रीकृष्णे त्रयाणां तमआदिगुणानां सर्गो भूतेंद्रियदेवतारूपोऽर्थाद्देहो मृषैव । आत्मनामप्यात्मत्वात् । तदुक्तं श्रीदशमे "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥ गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् । योंतश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक्" । तस्माद्योगमायया परब्रह्मणो नराकृतित्वम् । अत्र दृष्टांतः । तेजोवारिमृदामिति । धाम्ना स्वरूपप्रकाशेन निरस्तः स्वयोगमायाकृतः कुहकः कपटो यस्य तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

“यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः । वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् । प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम् ॥

सूतीगृहे निजरूपेणाविर्भावात् । तत्रैव योगमायया नरबालकत्वं तत्तु श्रीवत्सकौस्तुभादिचिह्नैः पूतनाशोषणविश्वदर्शनाद्यैश्वर्यप्रकाशैश्च सदैव निरस्तमिति । एवं तावत्स्वरूपलक्षणेन ध्यात्वा तटस्थलक्षणेन च तमेव ध्यायति ॥ जन्माद्यस्येति ॥ यतो यस्य । सार्वविभक्तिकतसिरूपम् । यस्यान्वयादन्वयप्रवर्त्तकरूपाद्गुणावताराद्ब्रह्मविष्णुरुद्रादस्य विश्वस्य जन्मादि तम् अग्रे वक्ष्यति“सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः” इति तटस्थलक्षणेन जगत्कारणमुक्त्वा ब्रह्मादीनां कारणत्वं तस्याह । इतरत इति । यतो यस्येतरस्माद्व्ययात् श्रीनारायणात्स्वराट् ब्रह्मा बभूव कथंभूतः स्वराट् अर्थेषु सृष्टिकार्येष्वभिज्ञो निपुणः श्रीकृष्णस्यैव मूर्तिर्नारायण इति ब्रह्मापि वक्ष्यति “नारायणोंगं नरभूजलायनात्तच्चापि सत्यं न तवैव माया” इत्यादिना ब्रह्मेत्युपलक्षणं तस्यैव महाविष्णुरूपाद्ब्रह्मादि त्रयाणामपि ज्ञेयम् । तदुक्तं बृहन्नारदीये नारदेन सनत्कुमारं प्रति “सृष्ट्यर्थमसृजद्देवो दक्षिणांगात्प्रजापतिम् । मध्ये रुद्राख्यमीशानं जंगदतंकरं मुने । पालनायास्य जगतो वामांगाद्विष्णुमव्ययम् । आदिसर्गे महाविष्णुरेवं त्रित्वमवाप्तवान् ॥ ” इति ब्रह्मसंहितायाञ्च “ वामांगादसृजद्विष्णुं दक्षिणांगात्प्रजापतिम् । ज्योतिर्लिंगमयं शंभुं कूर्चदेशादवासृजत् ॥ ” तस्माद्यस्य गुणावताराद्विश्वस्य जन्मादि भवति इतरस्माद्गुणावताराणां जन्म तं श्रीकृष्णाख्यं परं ब्रह्म परमेश्वरं धीमहीति । अथ वाऽन्वयव्यतिरेकाभ्यामस्य विश्वस्य जन्मादि भवति यतस्तं “ यतो वा इमानि भूतानि ” इत्यादिश्रुतेः “ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ” इत्यादिस्मृतेश्च । एक एव सृष्ट्यादि करोतीत्येतद्वत्साहरणप्रस्तावे व्यक्तीभूतं “यावद्वत्सपवत्सकालपकवपुः” इत्यादिना केवलात्सृष्टिर्दर्शिता । “ एवमात्मात्मनात्मानं वत्सपालमिषेण सः । पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः ॥” इत्यनेन पालकत्वं दर्शितम् । तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यब्रह्माद्वयं परमनंतमगाधबोधम् । वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ॥” इत्यनेन स्वयमेव संहारकत्वं च दर्शितमिति । किं च परमगुरुत्वं च तस्य दर्शयति । तेन इति। आदिकवये ब्रह्मणे ब्रह्मरूपमात्मानं तेने । तथाहि द्वितीये ब्रह्माणं प्रति स्वयं वदति “अहमेवासमेवाग्रे नान्यत्” इत्यादि। तथोद्धवाग्रे स्वयमेव वदति तृतीये“पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय”इत्यादि। तथा हंसावतारे यदुक्तं तत्सर्वमर्जुनोद्धवादिभ्यः कथितवान् अखंडज्ञानाप्रच्युतस्वरूपत्वाच्च। तदुक्तम् “एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्” इति। नन्वेवंभूतः परमेश्वरश्चेत्तर्हि तस्य गोपबालकैः सह यथेच्छभोजनादि उग्रसेनादीनां कैंकर्यं वर्णाश्रमादिधर्माचरणमिति सत्यं तस्य ककर्यं केपि न जानंतीत्याह मुह्यंतीति यद्यस्मिन्कृष्णे सूरयो ब्रह्मरुद्रादयो मुह्यंति तत्त्वं न जानंति । तदुक्तं दशमे “शक्रशर्वपरमेष्ठिपुरोगाः कवय आनतकंधरचित्ताः । कश्मलं ययुरनिश्चिततत्त्वा” इति । तस्मादेवं सर्वभूतस्वरूपं परं ब्रह्म परमेश्वरं नारायणं पुरुषाद्यवतारकारणं सर्वांतर्यामिणं सर्वसेव्यं श्रीकृष्णं धीमहीति । अतस्तस्मिन्नेव परब्रह्मत्वाद्याविर्भावात् । तथाहि । अघासुरशिशुपालदंतवक्रादीनां जीवतत्त्वं तस्मिन्नेव प्रविष्टं परब्रह्मत्वात् ब्रह्मत्वं यशोदाबंधने व्यक्तीभूतं ब्रह्ममहेश्वरयमवरुणेंद्रकंदर्पा लीलयैव पराजिताः परमेश्वरत्वात् । नारायणस्वरूपं ब्रह्महृदेऽक्रूरेण दृष्टं सर्वकारणत्वमर्जुनेन विश्वरूपदर्शने दृष्टमंतर्यामित्वं परीक्षिता गर्भे दृष्टं सर्वसेव्यत्वं राजसूये दृष्टम् एवं सर्वावतारकार्याणि तत्तत्समये व्यक्तीभूतानीति दिक् । एवं स्वामिचरणैः संप्रदायविशुद्ध्यर्थं कथितं तदेव स्पष्टतया दर्शितम् । इदानीं तदवशिष्टानर्थानेकी करोति । तत्र तावत्कर्मयोगज्ञानयोगभक्तियोगाः सम्यक्सर्वत्र निरूपितास्तन्मध्ये भक्तियोगेनैव भगवाञ्छ्री कृष्णो लभ्यते नान्यैरिति भागवते वक्तुंतमपि स्मरति।जन्माद्यस्येति। तं सत्यं भक्तियोगं धीमहि कथंभूतं परं कर्मज्ञानाभ्यां परं श्रेष्ठम्। येन विना तयोरसिद्धेः । तदुक्तं बृहन्नारदीये “अश्वमेधसहस्रं वा कर्म वेदोदितं कृतम्। तत्सर्वं निष्फलं ब्रह्मन्यतो भक्तिविवर्जितम् ॥ धर्मार्थकाममोक्षाख्याः पुरुषार्था द्विजोत्तम। हरिभक्तिपराणां वै संपद्यंते न संशयः ॥”इत्यादिनाऽतो धर्मादीनां तदाश्रयत्वात्सत्यत्वमित्याह। यत्रेति । यत्र भक्तियोगे त्रिसर्गो धर्मार्थकामानां सर्गः पुनः पुनरुद्भवोऽमृषा सत्यः। आश्रयस्य सत्यत्वेनाश्रितानां सत्यतेति भावः । यथा तेजोवारिमृदां विनिमयस्तद्वत् । तदुक्तं बृहन्नारदीये “यथा भूमिं समाश्रित्य सर्वे जीवंति जंतवः । तथा भक्तिं समाश्रित्य सर्वकार्याणि साधयेत्” इत्यादिना । स्वयं तु धर्मादिभ्यः पृथगित्याह । धाम्नेति । स्वेन धाम्ना प्रकाशेन निरस्तं ज्ञानकर्मांगत्वादि कुहकं येन तस्मात् ज्ञानकर्मसंसर्गरहितया भक्त्यैव भगवत्प्राप्तिरिति दर्शितम्। वक्ष्यत्येकादशे “भक्त्याहमेकया ग्राह्य” इति । एवं भक्तिद्वारा कर्मयोगसिद्धिमुक्त्वा ज्ञानयोगस्यापि तद्द्वारा सिद्धिमाह । जन्माद्यस्येति । जन्म आद्यं यस्य षड्भावविकारस्य स जन्माद्यस्तस्य जन्माद्यस्य जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति षट् योजनिकेयम् । अर्थेषु मायाकार्य्येषु देहेषु जन्माद्यस्याभिज्ञस्तत्त्वज्ञो जनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम् ॥ " पुराणांतरे च " ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभस्तद्वै

यतो भक्तियोगात्स्वराट् स्वरूपस्थं ब्रह्मान्वयात्प्राप्तवान् । तदुक्तं दशमे "पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया । विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते परां गतिम् ॥" इति भक्तियोगं विना मोहं प्राप्य स्वार्थाद्भ्रश्यंतीत्याह । इतरत इति । यद्यस्मादितरतः केवलाज्ज्ञानयोगाच्चकारात्कर्मयोगात्सूरयः सम्यगभिज्ञा अपि मुह्यंति स्वार्थाद्भ्रश्यंति तदुक्तं "येन्येरविन्दाक्ष विमुक्तमानिनः" इत्यादि । अत्र स्वानुभवमाह । तेन इति । यो भक्तियोगः कवये मह्यमादि आद्यं यद्वस्तु श्रीकृष्णाख्यं तद्धृदा तेने विस्तीर्य प्रकाशितवान् । अत्रैव वक्ष्यति "भक्तियोगेन मनसि सम्यक्प्रणिहितेमले । अपश्यत्पुरुषं पूर्णं मायाञ्च तदुपाश्रयाम् ॥" इति तस्मादेवंभूतं भक्तियोगं धीमहीति भक्तियोगपक्षः ॥ अथ देहात्मपक्षः । एवंभूतो भक्तियोगो देहातिरिक्तशुद्धात्मज्ञाने सति संभवति अत एव देहत आत्मा पृथक् आत्मनश्च देहोपि पृथगिति तृतीयस्कंधादौ वक्तुमुभावपि युगपत्स्मरति । जन्माद्यस्येति । तं सत्यमात्मानं सत्यात्परिभिन्नं देहं धीमहि । उभयोः प्राधान्याच्चकारादिनिर्देशो न कृतः । कोसौ देहस्तत्राह । यत्रेति । यत्र देहे त्रिसर्गः त्रयाणां मायागुणानां सर्गश्चतुर्विंशतितत्त्वसमूहः अमृषा सत्यः । कथंभूतः सर्गः । तेजोवारिमृदां यथा यथावत्परिणामो यत्र सः तत्र तेजसा रुधिरत्वं वारिणा क्लिन्नत्वं श्लेष्मत्वं वा मृदा मांसत्वमिति विनिमयः । वाय्वाकाशयोर्विकाराभावान्न निर्देशः । आत्मनि तु त्रिसर्गो मृषैव ज्ञेयः देहादात्मनः पृथक्त्वात् । ननु देहात्मनोः पृथक्त्वे सति कथं देहस्य जडस्य जन्मादिकम् । आत्मनोपि चिदंशस्य भोक्तृत्वमित्याशंक्याह । जन्माद्यस्येति । यतो यस्यात्मनोऽन्वयात्संबंधादस्य देहस्य जन्ममरणादि तथा देहस्यान्वयादस्यात्मनोपि जन्ममरण सुखदुःखभोक्तृत्वादि भवति न तु स्वतस्तं च तं च । तत्र प्रकृतिपरिणामो देहः पुरुषांश आत्मा तस्मादुभयसंयोगादेवोभयोर्जन्मादि नान्यथेति । तदुक्तं वेदस्तुतौ "न घटत उद्भव" इत्यादिना । किंचात्मनोऽन्वयाद्यो देहः अर्थेषु विषयेष्वभिज्ञो निपुणो भवति आत्मा तु इतरतो देहाहंकाराभावात्स्वराट् स्वरूपस्थो विराजते येः तं च तं च । किंच तेन इति । आत्मान्वयाद्देहः आदिकवये परमेश्वराय तं प्रातुं ब्रह्ममयं यज्ञं विस्तारितवान् । "तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्" इति गीतोक्तेः । यथा देहान्वयादात्मापि यदा गर्भस्थः सन्ब्रह्मज्ञानं तेने तं च तं च । तदुक्तं तृतीये जीवस्तुतौ "ज्ञानं यदेतददधात्कतमः स देवः" इत्यादिना । नन्वेवं चेत्तर्हि कथं मिथ्याभूते देहे विवेकिनामप्यात्मत्वेनाभिनिवेशो दृश्यते । सत्यम् । आत्मतत्त्वस्य दुर्ज्ञेयत्वादित्याह । मुह्यंतीति । यद्यस्मिन्नात्मनि सूरयस्तत्त्वज्ञा अपि मुह्यंति । तदुक्तं गीतासु "आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति । तथैव चान्यः । आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् " इति । नन्वेवंभूतश्चेदात्मा कथं तर्हि तस्य विकारित्वं कथं वा बंध इत्याशंक्याह । धाम्नेति । स्वेन धाम्ना स्वरूपस्फुरणेन निरस्तो दूरीकृतो माया कृताज्ञानदेहसंबंधविकारादिकपटो यस्य तम् । आत्मा सदैव निर्विकारो देहात्पृथक्स्थतुरीयावस्थायां योगिभिर्लभ्यते । तदुक्तमेकादशे "सन्ने यदेंद्रियगणेऽहमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः" इति तथा देहात्मवादिनामपि या देहात्मबुद्धिः सा निरस्ता । तद्यथा । धाम्ना स्वाश्रयेण मिथ्यात्वं दृश्यत एव । अत एवोभावपि सत्यासत्यत्वेन धीमहीति देहात्मपक्षे व्याख्यानम् । एतद्भक्तियोगपक्षे देहात्मपक्षव्याख्याद्वयं विद्वज्जनविनोदाय कृतमपि पारमार्थिकं ज्ञातव्यम् । प्रतिपदं प्रमाणवत्त्वात् । अथेदानीं मथुरामंडलवासिनां प्रीतये व्याख्यांतरमारभते । तत्र यस्तु तपोयोगसमाधिभिरप्यदृश्यो भगवान्स तु मथुरामंडल आविर्भूतोऽतस्तमपि स्मरति । तं सत्यं मथुरामंडलं धीमहि अत्र "मंडलं त्रिषु" इत्यमरोक्तेः पुल्लिंगत्वेन निर्देशोऽप्युचित एव । कथं भूतं परं सर्वतीर्थपुरीणां श्रेष्ठं चतुर्धामोक्षप्रदत्वात् । तदुक्तं वाराहे "काश्यादयो यद्यपि संति पुर्यस्तासां तु मध्ये मथुरैव धन्या । या जन्ममौंजीव्रतमृत्युदाहैर्नृणां चतुर्द्धा विदधाति मुक्तिम् ॥" इति । न केवलं चतुर्द्धामोक्षप्रदत्वेनैव तस्य परत्वमपि तु परमेश्वरनित्यसबंधादपीत्याह । जन्मेति । यत इति । सार्वविभक्तिकस्तसिरूपं सप्तम्यंतम् । यतो यस्मिन्मथुरामंडले आद्यस्यादिपुरुषस्य श्रीकृष्णस्य जन्म तम् । कुतोऽन्वयात् नित्यसंबंधात् "मथुरा भगवान्यत्र नित्यं सांनिहितो हरिः" इत्युक्तेः । हेत्वंतरमितरतो ब्रह्मादिप्रार्थनातश्च । किं च यः अर्थेषु योग्यायोग्यदानपात्रेषु अभिज्ञो वेत्ता तं "त्रिवर्गदा कामिनां या मुमुक्षूणां च मोक्षदा । भक्तीच्छोर्भक्तिदा या तु मथुरां को न तां वसेत् ॥" इति वाराहोक्तेः । यः स्वराट् स्वप्रकाशो ज्योतिर्मयस्तम् । किं च य आदिकवये विवेकिने जीवाय मृत्युकाले हृदा हृदि ब्रह्म मंत्रं तारकं तेने तम् । तस्मिन्काले कविश्चेत्स्वयमेव जानातु । नेत्याह । मुह्यंतीति यद्यस्मिन्मृत्युकाले सूरयो विवेकिनोऽपि मुह्यंति व्यामोहं गच्छंति । अत एव संन्यासिनोपि विविक्तक्षेत्रमाश्रयंते । ननु ज्योतिर्मयश्चेत्कथं लोकैरन्यथा दृश्यते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतं विदुः " ॥ पद्मपुराणेंऽबरीषं प्रति गौतमोक्तिः । " अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु ॥ पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् " इति । अत एव भागवतं

सत्यमविवेकिनामन्यस्मिन्नन्याभास इत्याहुः । तेज इति । तेजसि धातुरत्नाभासः यमुनामृते वारिबुद्धिः चिंतामणौ मृत्तिकाप्रतीतिरिति साधारणी दृष्टिरज्ञाततत्त्वानां भवति "भूमिश्चिंतामणिस्तोयममृतम्" इत्याद्युक्तेः । मथुरामाहात्म्ये तु "मथुरायां प्रकुर्वंति पुरीसाधारणीदृशम् । ते नराः खलु विज्ञेयाः पापराशिभिरन्विताः ॥" इति । नन्वेवं चेत्कथमत्रोच्चनीचादीनां जन्म तत्राह । यत्रेति । यत्र मथुरायां त्रिसर्गस्त्रयाणामुच्चनीचमध्यभानां सर्ग उत्पत्तिर्मृषैव ज्ञेया । यत्र सर्वेषां लक्ष्मीविष्णुरूपत्वात्तदुक्तं संहितायां "स्त्री लक्ष्मीः पुरुषो विष्णुः" इत्यादिना यद्वा त्रयाणां नरतिर्यक्स्थावराणां सर्गो जन्म मृषा सर्वेषां भगवज्जनत्वात् । "अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणैः" इत्यादिना "हंतायमद्रिरबले" त्यादिना स्थावराणां पार्षदत्वमुक्तम् "प्रायो बतांग विहगा मुनयो वनेऽस्मिन्" इति तिरश्चां भागवतत्वमुक्तम् । "स्त्री लक्ष्मीः पुरुषो विष्णुरि" त्यादिना मनुष्याणां तत्स्वरूपत्वमुक्तं तस्मादत्र स्थावरादिजन्म मृषैव ज्ञेयम् । नन्विदमेव मथुरामंडलमिति कथं ज्ञायते तत्राह । धाम्नेति । धामाश्रयः श्रीकृष्णः स्वेन धाम्ना स्वाश्रयेण श्रीकृष्णेन केशवगोविंदगोपालादिना स्वमूर्तिभेदेन निरस्तं लोकानां कुहकं भ्रांतिज्ञानं यस्मिंस्तं तस्मादेवंभूतं द्वादशारण्यसहितं श्रीमथुरामंडलं धीमहीति मथुरामंडलपक्षः ४ अथ सर्वोत्सवानां मध्ये रासोत्सवः प्रेष्ठतमः स तु मथुरामंडलांतर्वर्त्तिनि श्रीवृंदावने नित्यं वर्त्तते तं दशमे पञ्चाध्याय्या निरूपयितुमत्र स्मरति । जन्माद्येति । यतो यस्माद्रासोत्सवाद्धेतोरन्वयात्क्षत्रियकुलादितरतो वैश्यकुलादाद्यस्य श्रीकृष्णस्य जन्माविर्भा वस्तं परमोत्कृष्टं रासोत्सवं हृदा मनसा धीमहि । वसुदेवगृहान्नंदगृहे यशोदात्मजत्वेन तस्याविर्भाव इत्यर्थः । किमर्थं धीमहि तत्राह । आदिकवये श्रीकृष्णं प्राप्तुमित्यर्थः । "तुमर्थाच्चे" ति चतुर्थी स्नानाय व्रजतीत्यादिवत् । कथंभूतं सत्यं सत्यानुष्ठानात् । पुनश्च धाम्नेति । स्वेन धाम्ना सदैव निरस्तो दूरीकृतः श्रीकृष्णगोपकन्यानामन्योन्यसंभवः कपटो येन तं तस्माच्छ्रीकृष्णस्य यत्कापट्यं सर्वाः स्त्रियो विहायैकां गृहीत्वा पलायनं तामपि त्यक्त्वांतर्द्धानादिकं तथा गोपकन्यानामपि यत्कापट्यमन्योन्यवंचनादिकं श्रीकृष्णेऽपि कृतघ्नोयमित्यसूयया यदंतःकोपादिकमेतत्सर्वं रासस्य महिम्ना निरस्तमित्यर्थः । तद्यथा " न पारयेहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः" इत्यादिना स्वस्य निष्कापट्यमुक्तमिति । ननु कोऽयं रासोत्सवो यस्यायं महिमा तत्राह तेज इति । यत्र रासे तेजोवारिमृदां यथा विनिमयः यथायोग्यं विनिमयो विपरिवर्त्तनं तद्यथा तेजसां चंद्रादीनां गतिविस्मरणात्स्थगितत्वं वारिणां यमुनादिजलानां स्रोतसां परिवर्तनं मृद्भूमिस्तस्या विनिमय उच्छूनत्वं रोमांचितत्वमिति । तदुक्तं तत्रैव " कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः । कामार्दिताः शशांकश्च सगणो विस्मितोऽभवत् " इत्यनेन । तेजसां गतिविस्मरणत्वमुक्तं " नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्त्तलक्षितमनोभवभग्नवेगाः" इत्यादिना वारिणां गतिवैपरीत्यमुक्तं "किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि" इत्यादिना मृत्तिकाया विनिमय उक्त इति । किंच यत्र त्रिसर्गोऽमृषा त्रयाणां नृत्यगीतवाद्यानां सर्गः संभवोऽमृषा सत्यः । यतस्तेन सर्वं जगदावृतं तदुक्तम् " उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः । कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम्" इति । नन्वेवंभूतो रासः कथं नंदादिभिर्न दृष्टस्तत्राह । अर्थेष्विति । अर्थेषु दर्शनयोग्यविषयेष्वेव स्वराट् विराजमानो नान्यत्र । यतोऽभिज्ञः विचक्षणः । अय मर्थः । नंदादीनां गोपानां लज्जाविषयत्वाद्दर्शनायोग्यत्वमन्येषां मर्त्यानां मांसचक्षुष्ट्वाद्दर्शनायोग्यत्वं गंधर्वादीनां तदभावात्तैर्दृष्टः इति । तदुक्तं "नभस्तावद्विमानशतसंकुलम् । दिवौकसां सदाराणाम्" इति । जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽमलम् " इति " कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः" इत्यादिना । ननु रासो नामोत्सवधर्मविशेषोऽमूर्त्तः कथं तस्य स्वराट्त्वमभिज्ञत्वञ्चेति चेदाह । रासकर्तॄणां ये गुणास्ते रासोत्सवे उपचर्यंते मंचाः क्रोशंति, सभा भाति, स्थाली पचतीतिवत् । अतो रासकर्तणां या शोभा भुजविधुतादिभिरुक्ताऽभिज्ञत्वादिकं च सर्वं रासस्येत्युपचर्यते । अहो रासस्थानां महिमानं पश्यतेत्याह । तेन इति । यद्यस्मिञ्छ्रीकृष्णे सूरयो ब्रह्मादयोऽपि मुह्यंति तद्ब्रह्म श्रीकृष्णाख्यमेकमपि यो रासस्तेने विस्तारितवान् तं धीमहीति । तदुक्तं "रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः । योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः । कृत्वा तावंतमात्मानं यावतीर्गोपयोषित" इत्यादिनाऽतः सर्वोत्कृष्टं रासोत्सवं धीमहीति रासमंडलपक्षः । अत्र व्याख्याशतकमपि मया पृथगेव रचितं विस्तरभियेह नो निक्षिप्तम् । तथा श्रीभागवतस्य सर्वकथाप्रदर्शकलीलाकल्पद्रुमाख्यनिबंधोपि सपादशतव्याख्यात्मकोप्यत्र मया संबद्धः सोऽपि विस्तरभियैवेह नो निक्षिप्तः ॥ अत्र श्लोके "सूर्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्" इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ २ ॥

नामान्यदित्यपि न शंकनीयम् ॥ १ ॥ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति । अत्र श्रीमति सुंदरे भागवते परमो धर्मो निरूप्यते । परमत्वे हेतुः । प्रकर्षेणोज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन्सः । प्रशब्देन मोक्षाभिसंधिरपि निरस्तः । केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति । अधिकारितोऽपि धर्मस्य परमत्वमाह । निर्मत्सराणां परोत्कर्षासहनं मत्सरस्तद्रहितानाम् । सतां भूतानुकंपिनाम् । एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तम् ।

लक्षणवत्त्वाच्छार्दूलविक्रीडितं छंदः ॥१॥ कांडत्रयं हि देवताकांडकर्मकांडज्ञानकांडरूपं विषयो येषां शास्त्राणां तेभ्यः परमः सर्वोत्कृष्टः ननु वैशेषिकादिशास्त्रस्याऽप्यंततस्तात्पर्यं वास्तववेदने एव सर्वपदार्थनिरूपणं विना तद्भिन्नत्वेन तत्स्वरूपस्य दुर्ज्ञेयत्वात्तदर्थमेव तेन पदार्थविवेचनं कृतमिति चेत्तत्राह यद्वेति । इत्यर्थ इति । शास्त्रांतरोक्तसाधनानां दुःसंपाद्यत्वादिति भावः । ततः ततो भगवतो न पृथक् । वास्तववस्तुवेदनात् ॥ परम सुखं श्रीकृष्णप्रेमादितत्प्रदम् । किं तु तद्रूपमेव तदुक्तं ''मनसा वचसा चैव गृह्यतेऽन्यैरपींद्रियैः । अहमेव न मत्तोन्यदिति बुध्यध्वमंजसा'' इत्येकादशे श्रीहंसावतारेण सनकादीन्प्रतीति । द्रव्यगुणादीनामवास्तवत्वं पराशरपुराणे खंडनादौ बहुधा प्रपंचितमेव । अवास्तववस्तुचिंतनेन युगसहस्रेणापि पुरुषार्थसिद्धिर्न भवेत् । अतस्तत्ररातिं त्यक्त्वेदमेवानवरतं मुमुक्षुभिश्चिंत्यमिति भावः॥ततो वास्तववस्तुचिंतनेन किं स्यादत आह।किञ्चेति । आधिदैविकाध्यात्मिकाधिभौतिकभेदेन तापस्त्रिधा तथाहि आत्मानं शरीरमंतःकरणं वाधिकृत्य यज्जायते तदाध्यात्मिकं वातपित्तादिकोपजन्यं कामादिजन्यञ्च । तत्र भूतानि प्राणिनोऽधिकृत्य यज्जायते तदाधिभौतिकं व्याघ्रचौराद्युत्थम् । देवा अग्न्यादयस्तानधिकृत्ययज्जायते तदाधिदैविकं दाहशीतादिकृतं यक्षराक्षसग्रहाद्यावेशनिबंधनं चेति विवेकः । अनेन तापत्रयोन्मूलनपूर्वकपरमशिवाप्तिकथनेन । संक्षेपतश्चतुश्श्लोकीरूपेण । स मुनिर्भूत्वा समचिंतयदिति श्रुतेः । यद्वा कस्मै येन विभासितोयमतुल '' इत्युक्तन्यायेन संपूर्ण एव कृते अन्यशास्त्रश्रवणादिना देवतांतरस्यैव हृदि वासो भवत्यस्य श्रवणादिना तु साक्षाद्धरेरेवेत्याह । देवताकांडविषयगतमिति । अत्राक्षिपति । नन्विति । इत्यर्थ इति । ''जन्मांतरे यदा पुण्यं तदा भागवतं लभेदि'' ति पाद्मोक्तेः अयं भावः । यत इदमेव सर्वशास्त्रेभ्यश्श्रेष्ठम् । किञ्च कांडत्रयार्थोप्यत्र यथावत्तत्तत्स्थले प्रतिपादितस्ततोपीदमेव सेव्यमिति संदर्भेण धर्मस्य परमत्वं हरिभक्त्युत्पादकत्वेनैव । ''स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे'' इत्युक्तं तदुक्तमेव विजयध्वजस्तु श्रीमत्त्वं नाम श्रूयमाणरमणीयतयाऽर्थपर्यालोचनतया वाऽन्येतरेभ्यः श्रैष्ठ्यं ''राजंते तावदन्यानि पुराणानि सतां गणे । यावन्न श्रूयते साक्षाच्छ्रीमद्भागवतं परम् ॥ इति । ध्रियतेऽधः पतन्पुरुषोऽनेनेति धर्मः । धारयतीति धरो भगवान्समीयते ज्ञायतेऽनेनेति वा । दधाति कर्त्तारं रमयति मिनुते हिनस्ति पापमिति भगवत्प्राप्तिसाधनभूतः । ''धरति यस्मादधो यांतं ज्ञायते येन वा हरिः । कर्त्तारं यो मोदयति हंति पापं सदाऽखिलम् । तेन धर्म इति प्रोक्तो रूपसिद्धिर्निपपाततः'' इतिशब्दार्थनिर्णयोक्तेः । ननु धर्मोऽन्यत्रापि प्रतिपाद्यते किमत्रैवेति तत्राह । प्रोज्झितकैतवः । कितवस्य भावः कैतवं प्रकर्षेणोज्झितं कैतवं येन स तथोक्तः । कितवो नाम लोके मनस्यन्यदभिसंधायान्यदभिवक्ति अन्यदेवाभिचरति तद्वदत्रापि भगवत्प्रीतिमंतरेण स्वर्गादिफलं मनस्यनुसंधाय भगवद्गुणप्रतिपादनलोलुपनिरासार्थमन्यथा वदन्स्वात्मनो देहेंद्रियागामीश्वराधिष्ठितत्वमीश्वरनियम्यत्वं निगूह्य हरेः कारयितृत्वं फलदातृत्वमप्यगणय्याहमेवेदं करिष्येऽर्थी समर्थो विद्वानहमेव स्वतंत्र इति बुद्ध्या कितवेन क्रियमाणो धर्मः कैतव इत्युच्यते । अतोऽफलकामनयैव धर्मः कर्त्तव्य इत्ययमर्थोत्र प्रतिपाद्यत इत्यर्थः । ''तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये''इति विष्णुपुराणोक्तेः। तर्ह्येतावता पूर्यत इति चेत्तत्राह परम इति''यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्॥ इति स्मृतेर्भगवदर्पणतः परमो भवतीत्यर्थः ॥ परः परमात्मा मीयतेऽनेनेत्येतदभिप्रायेण परम इत्यभ्यधायि''परोऽरिपरमात्मनोः''इतित्यभिधानात्परः शत्रुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानकाण्डविषयेभ्योऽपि श्रैष्ठ्यमाह । वेद्यमिति । वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकाणामिव द्रव्यगुणादिरूपम् । यद्वा वास्तवशब्देन वस्तुनोंऽशो जीवो वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति वेद्यम् । अयत्नेनैव ज्ञातुं शक्यमित्यर्थः । ततः किमत आह । शिवदं परमसुखदम् । किं च आध्यात्मि

संसाराख्यो मीयते प्रलीयते इति वा । 'भीञ्हिंसायाम्' । किं च यतोन्योधिकतमः सुखहेतुर्न भवति स परमो धर्मः । स च भक्तियोगलक्षण एव । तथा च भारते भीष्मयुधिष्ठिरसंवादे "को धर्मः सर्वधर्माणां धर्मोधिकतमो मतः । यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा" इति । किं च "एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः । भक्तियोगो भगवति तन्नामग्रहणादिभिः॥त्रिंशल्लक्षणवान्साक्षात्सर्वात्मा येन तुष्यति" इति सप्तमोक्तेः । केषामधिकारः कश्च साक्षाद्विषय इति तत्राह निर्मत्सराणामिति ॥ भावप्रधानो निर्देशः।निर्गतं मात्सर्यं येषां ते तथोक्तास्तेषां प्रशस्तकर्मणां सतामपि क्वचिन्मात्सर्यं स्यात्।अत उक्तं निर्मत्सराणामिति वेद्यं ज्ञेयम् ॥ कृयोगे षष्ठी । सतामिति वा वास्तवं नित्यनिरस्तदोषं वस्तु अप्रतिहतनित्यवसनशीलं दुःखनिवृत्तिसुखप्राप्तिलक्षणस्य पुरुषार्थत्वात्तदभाववत्त्वात्किमनेनेति तत्राह शिवदमिति। परमानंदं ददातीति वा । आध्यात्मिकादिसकलदुःखनिवर्तकत्वं च "वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृतः" इत्यभिधानान्मुनयो ब्रह्मादयस्तेभ्योप्यतिशयितसर्वज्ञत्वान्महामुनिर्व्यासः साक्षान्नारायणः।"कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ॥" इति भारतोक्तेः । तेन कृते ननु किमितीश्वरतुष्टिकरो भक्तियोगलक्षणो धर्म ईश्वरश्चात्र प्रतिपाद्यो न धर्मादिरिति तात्राह ।किं वेति।भक्तियोगलक्षणधर्मस्य हरेरपरोक्षज्ञानमुत्पाद्य तत्प्रसादांतरंगसाधनत्वेनापवर्गलक्षणानश्वरफलहेतुत्वाद्बहिर्मुखमनोरंजकत्वेन स्वर्गादिक्षयिष्णुफलमुत्पाद्य संसारावृत्तिहेतुत्वाद्धर्मादिकथनैः किं वा प्रयोजनं न किमपीत्यतस्तानंतरेण भक्तियोगलक्षणधर्मस्तद्विषय ईश्वरश्चात्र प्रतिपाद्यत इत्यर्थः। ननु दृष्टफलस्य प्रवृत्तिहेतुत्वात्किमत्र दृष्टफलमिति तत्राह । ईश्वर इति । अस्मिञ्छ्रीमद्भागवते शास्त्रे सम्यगम्यस्यमाने कृतिभिः शिक्षितबुद्धिभिः शुश्रूषुभिः मनोवाक्कर्मभिर्गुर्वादिपरपुरुषपरिचर्याकरणकुशलैः साधनसामग्र्युपेतैरेभिः । ईश्वरो लक्ष्मीशादिचेतनगणादृर उत्तमः तत्प्रवर्त्तनशीलो वा परमात्मा हृदि हृदयकमले सद्यः शीघ्रं तत्क्षणात्कालव्यवधानमन्तरेणावरुध्यते भक्तिशृंखलया बद्धो दृश्यत इत्यर्थः। अत्र सद्यस्तत्क्षणशब्दावधिकारिविशेषद्योतकतया प्रयुक्तौ ये साधनसामग्रीमंतस्तेषां यस्मिन्क्षणे ग्रंथोपक्रमस्तस्मिन्नेव क्षणे भगवान्दृश्यते तदुक्तं "शनकैर्भगवल्लोकान्नृलोकं पुनरागतः" इति । ये भविष्यत्साधनसंपत्तिसंपादनयोग्यास्तेषामपि सद्यः साधनसामग्र्यां सत्यां दृश्यते । किं च भक्तियोगलक्षणधर्मे ईश्वरविषयतया निर्मत्सरसदाधिकारिभिः प्राप्यं निर्दुःखपरमानंदाख्यं प्रयोजनमित्येतात्त्रियमत्र प्रतिपाद्यते इत्यभिप्रायेणात्रेति त्रिशः कथितः कर्मदेवब्रह्मकांडार्थोप्यत्रैव निर्णीयते इति विशेषणं भिन्नत्वबोधनाय वा धर्म इति कर्मकाण्डार्थः निर्मत्सराणां सतामिति देवताकांडार्थः देवानामेव मात्सर्यराहित्येन मुख्यसत्त्वेनोत्तमाविकारित्वाच्च वेद्यमिति ब्रह्मकांडार्थः । तस्मान्नारायणावतारेण सर्वज्ञतमेन कृष्णद्वैपायनेनात्युत्तमेन प्रणीतत्वात्प्रमाणतममिदं श्रीमद्भागवतं सर्वहितैषुभिरभ्यसनीयमिति सिद्धम् । ब्राह्मणपक्षेप्यस्य योजनास्ति । ब्राह्मणा एव सर्वथा शास्त्रप्रवर्त्तकत्वेन शास्त्रादौ ध्येया इति मनसि निधाय व्यासदेवः स्वशिष्येभ्यो वदति मत्कृतव्याख्याशतके जन्माद्यस्येत्यस्य ब्राह्मणसंघे योजितत्वादत्रेत्यनेन ब्राह्मणपरामर्शः : त्यदादीनां बुद्धिस्थपरामर्शकत्वात् । भोशिष्याः अत्र विप्रसंघे धरति नरके पतंतमिति धर्मोस्ति। किंभूतः प्रकर्षेणोज्झितं कैतवं पाखंडलक्षणं यस्मिन्स तथा । वेदविहित इत्यर्थः । तत्र हेतुः, पर उत्कृष्टा मा यस्मात्स परमः सर्वोत्कृष्टः श्रीकृष्णभक्तिलक्षणस्तं विना मोक्षासिद्धेः । तद्वक्ष्यति श्रीदशमे ब्रह्मा "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनामिति ।" सतां सदाचारपराणां वास्तवं परमार्थभूतं वस्तु ब्रह्मात्रैव वेद्यं ब्रह्मकुलादेव वेद्यं ज्ञातुं योग्यं पंचम्यर्थे त्रल्प्रत्ययः ब्रह्मकुलस्यैवाचार्यत्वात् । "आचार्यत्वमाद्यवर्णे मया संस्थापितं धरे ।" इति वाराहोक्तेः "तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेः । श्रोत्रियत्वं हि ब्राह्मण एव पर्यवस्यति । "जन्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियशब्दभाक्" इति वारतांतविस्मृतेः ॥ "ब्रह्मिष्ठं ब्राह्मणं गुरुमुपासीत" इति श्रुतौ तु स्फुट एवायमर्थ उक्त इति । आधुनिकैर्विप्रद्विड्भिस्तु "जन्मना जायते शूद्रः" इति पाठः कल्पितः । स चानादरणीय एव । न हि ब्राह्मणाच्छूद्रो ब्राह्मण्यां जायते गोर्गर्दभोत्पत्तिप्रसंगात् "ब्राह्मण्यां ब्राह्मणाज्जातः स हि ब्राह्मण ईरित" इति जातूकर्ण्यस्मृतेर्बाधप्रसंगाच्च यच्च कैश्चिदुक्तं ब्रह्म जानातीति ब्राह्मणः । तथात्वे गच्छतीति गौरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कादितापत्रयोन्मूलनं च । अनेन ज्ञानकांडविषयेभ्यः श्रेष्ठयं दर्शितम् । कर्तृतोऽपि श्रेष्ठयमाह । महामुनिः श्रीनारायणस्तेन प्रथमं संक्षेपतः कृते । देवताकांडविषयगतं श्रेष्ठयमाह । किं वेति । परैः शास्त्रैस्तदुक्तसाधनैर्वेश्वरो हृदि किं वा सद्य एवावरुद्ध्यते स्थिरी क्रियते । वाशब्दः कटाक्षे । किं तु विलंबेन कथंचिदेव । अत्र तु शुश्रू

निरुक्तेः यूकाया अपि गोत्वं स्यात् । अतस्तदपि नादरणीयम् । लक्षणस्यैव वस्तुनिर्णायकत्वं न निरुक्तेः । किंभूतानां सताम् । परोत्कर्षासहनं मत्सरस्तद्रहितानाम् । पाखंडानुगा हि विप्रोत्कर्षं न सहंते ते चेत्थं वदंति यथान्ये प्राणिनस्तथा विप्रा न तेषु किंचिदाधिक्यं किमर्थं वयं तानाश्रयाम इति ये मत्सरिणस्तद्भिन्नानां शास्त्रमार्गानुयायिनामित्यर्थः । किंभूतं वस्तु । शिवं परमानंदं ददातीति शिवंदं मोक्षदमित्यर्थः । प्रकाशरूपस्य रवेः प्रकाशदत्ववच्छिवरूपस्यापि ब्रह्मणः शिवदत्वं न विरुद्धमिति । पुनः अध्यात्माधिदैवाधिभूतरूपतापत्रयाणामुन्मूलनमुत्पाटनकरम् । अध्यात्मतापाः कामादयः अधिदैवा वाय्वग्नितडित्पातादिजन्या अधिभूतास्सर्पव्याघ्रादिजन्या इति विवेकः । किंभूते विप्रसंघे श्रीमद्भागवते " ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्" इति श्रुतेर्वेदाभ्यास एव श्रीः सा विद्यतेऽस्यास्मिन्वेति श्रीमान् "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतींगते " इति स्मृतेर्भगः षड्विधमैश्वर्यं सोस्यास्तीति भगवान्कृष्णस्तं भगवंतमुपास्त इति भागवतः । अत्र कारकादण् श्रीमांश्चासौ भागवतश्चेति श्रीमद्भागवतस्तस्मिंस्तथा । श्रोत्रिये ब्रह्मनिष्ठे चेत्यर्थः । पुनर्महते पूज्यते सर्वैरिति महान् । मन्यते जानाति सर्वमिति मुनिः । महतेरतृ, मन्यतेरिश्च प्रत्ययः । महांश्चासौ मुनिर्महामुनिः महावंद्यो महामुनिः इति गोपालसहस्रनामसु पठितत्वान्महामुनिः श्रीकृष्णस्तेन कीर्त्यते स्तूयते इति महामुनिकृतस्तस्मिंस्तथा " कृत संशब्दे" इत्यतः कर्मणि कः । धातोरुपधाया ह्रस्वश्च निपातनादुणादौ बोध्यः । "ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम् । बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः ॥ " इत्यादिना हरिणा विप्राः स्तुता दृश्यंते । अन्यत्रापि "इयं ब्राह्मणनौ राजन्विपरीता भवार्णवे । तरन्त्यधोगता यस्या मज्जन्त्युपरिवर्तिनः" इत्यादिना श्रीमद्भागवत इत्यत्र ब्राह्मणा विष्णोरुपासका उक्ताः महामुनिकृत इत्यत्र च विष्णुर्ब्राह्मणोपासक उक्त इतश्च विरोधः प्रतीयते । न हि स्तोतैव स्तुत्यः तुत्यश्च स्तोता लोके कुत्रचिद्दृश्यते इति चेदत्रेदमवधेयम् । "ब्रह्मा विष्णुः शिवो विप्राः सर्वदेवैः प्रपूजिताः । परस्परं स्तुवंत्येते लीलया भेदभावनात् " इत्यादिपुराणात् । किञ्च परैर्वैप्रादिड्भिः किमीश्वरो हृद्यवरुध्यते किं तु न कदापि । अत्र विप्रसंघे शुश्रूषुभिः शुश्रूषां कुर्वद्भिस्तत्क्षणादेवावरुध्यते स्थिरी क्रियते । किंभूतो हरिः । द्येनाब्धिना शयनार्थं वर्तते इति सद्यः । "द्योब्धिर्द्यौः स्यात्त्रिविष्टपाम्" इति' सौभरीनाममालायाम् । " विप्रद्विषं नरं दृष्ट्वा हरिर्दूरात्पलायते । विप्राणां सेवनादाशु हरिरायाति मानसे । " इति संहितोक्तेः । " सर्वं सहे महाराज विप्रद्वेषं न वै क्वचित् । विप्रा मे देवदेवस्य सदोपास्या न संशयः " इत्यादिनारदपुराणाच्च । तर्हि सर्वे विप्रानेव कथं न सेवन्ते तत्राह । कृतिभिर्जन्मांतरे कृतपुण्यपुञ्जैर्जन्मांतरीयपुण्यं विना तत्र विश्वासो न जायते । तदुक्तं " तीर्थे देवे गुरौ विप्रे ईशनाम्नि च पार्थिव । स्वल्पपुण्यवतां लोके विश्वासो नैव जायते ॥ " इतिपुराणांतरे युधिष्ठिरं प्रति श्रीकृष्णोक्तेरिति ब्राह्मणपक्षः २ । एतच्छास्त्रस्य श्रीकृष्णभक्तिप्रतिपादकत्वाद्भक्तियोगेऽप्येनं योजयति । भोः शिष्या इति संबोध्य व्यासो वदति । भागवते । भगवतो विष्णोरयं भागवतो भक्तियोगस्तस्मिन्धर्मोऽस्ति । तत्र श्रीविष्णुपूजनादिरूपधर्मस्य विद्यमानत्वात् किंभूतो धर्मः । न विद्यते त्रपा नामोच्चारणदंडवत्प्रणत्यादिषु येषां तेऽत्रपा वैष्णवास्ते रमंते क्रीडंत्यत्रेत्यत्रपरमः । यद्वा न विद्यते त्रपा स्त्र्यादिदर्शनादिषु येषां तेऽत्रपाः शुकादयस्ते रमंतेऽत्रेत्यत्रपरमः । वैष्णवेतरास्तु हरिनामोच्चारणादौ लज्जंते मृषाभाषणपरस्त्र्युपरि पतनादौ तु न लज्जंते । तदुक्तं "नामोच्चारेथ साष्टांगप्रणतौ श्रीहरेर्नृणाम् । अभक्तानां यथा लज्जा जायते न तथा ध्रुवम् ॥ मृषोक्तौ व्यभिचारादौ भक्तानां त्वन्यथा ततः" इत्यादिना बहु प्रपञ्चितं श्रीहरिभक्तिप्रदीपे । इत्यभिप्रेत्यैव भगवंतं कुंती वक्ष्यति "जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् । नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरम्" इति । एकादशेऽपि भगवानुद्धवं वक्ष्यति 'रजःसत्त्वतमोनिष्ठाः' इत्यारभ्य 'मानिनां चातिस्तब्धानां मद्वार्त्तापि न रोचते' इत्यंतेन।पुनः प्रोज्झितं प्रकर्षेण त्यक्तं कैतवं फलाभिसंधिलक्षणं यत्र स तथा।"फलेच्छा यत्र जायेत स स्याद्धर्मः सकैतवः । निष्कामो यो भवेद्धर्मः स शुद्धः परिकीर्त्तितः ॥" इति स्मृतेः । यद्वा प्रकर्षेणोज्झितं कैतवं लक्षणं यत्रेति तथा । तद्वक्ष्यति चित्रकेतूपाख्याने "जितमजित तदा भगवता यदाह भागवतं धर्ममनवद्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥ ३ ॥

षुभिः श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुद्ध्यते । इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह । कृतिभिरिति । श्रवणेच्छा तु पुण्यैर्विना नोत्पद्यत इत्यर्थः । तस्मादत्र कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठमतो नित्यमेतदेव श्रोतव्यमिति भावः ॥ २ ॥ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीय तेऽपि तु सर्वशास्त्रफलरूपमिदमतः परमादरेण सेव्यमित्याह । निगमेति । निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात्तस्य फलं भागवतं नाम तत्तु वैकुंठगतं नारदेना

निष्किञ्चना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति यदन्यत्र । विषमाधिया रचितो यः सह्यविशुद्धः क्षयिष्णुरधर्मबहुलः'' इति ॥ इत्यभिप्रेत्यैवोद्धवं प्रति भगवताप्युक्तं ''कर्मशुद्धिर्मदर्पणम्'' इति । सतां सदाचारतत्पराणां वास्तवं सत्यभूतं वस्तु परमात्मात्र भक्तियोग एव वेद्यः ''भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः'' इति श्रीमुखोक्तेः ''ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी'' इति शिष्टोक्तेश्च । '' न युज्यमानया भक्त्या भगवत्यखिलात्मनि । सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये'' इति श्रीकपिलोक्तेश्च । '' भक्त्याहमेकया ग्राह्य'' इत्यादि बहुश उक्तेश्च ''सत्यं ज्ञानमनंतं ब्रह्म '' ॥ इति श्रुतेः परमात्मैव सत्यं वस्त्विति । किंभूतं वस्तु निर्मत्सराणां शिवदं मोक्षफलदम् । सासूयानां जातमपि ज्ञानं न फलपर्यवसायि । '' निःश्रेयसकरं ज्ञानं सुवृत्तानां प्रजायते । दुर्वृत्तानां कथमपि जातमप्यन्यथा भवेत् ॥ '' इति पुराणांतरात् । पुनः किंभूतं तापयंति क्लेशयन्तीतीति तापाः कामक्रोधलोभास्त एव त्रयस्तापत्रयास्तेषामुत्पाटनकरम् । ''तपंति विविधांस्तापानैतान्मद्गतचेतस '' इति कपिलोक्तेः । पुनः श्रीमत् । श्रीशब्दोदिता राधा तद्युतमित्यर्थः । एतेन श्रीराधाकृष्ण एव परमार्थभूतं वस्तु तद्भिन्नं सर्वमवस्त्वेव । ''यस्मिन्सर्वं विलीयेत वस्तु तत्परमार्थकम् ॥ एतादृशं परं ब्रह्म राधाकृष्णो न संशयः'' इति गोस्वाम्युक्तेः । ''कृष्णात्परं किमपि तत्त्वमहं न जाने'' इति मधुसूदनस्वाम्युक्तेश्च । ''सर्वेषामेव भावानां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमु तद्वस्तु रूप्यताम् '' इति वक्ष्यमाणत्वात्स एव सर्वं परमार्थभूत इत्यादिबहुश उक्तेश्च । किंभूते भागवते महामुनयो नारदादयस्तैः कृते प्रवर्त्तिते । यद्वा महामुनिर्विष्णुरेव तेन प्रवर्त्तिते उद्धवादिभ्य उपदिष्ट इत्यर्थः । परैर्भक्तियोगेतरैः सांख्ययोगादिसाधनैरीश्वरः । किं सद्यो हृद्यवरुध्यते स्थाप्यते वेति विलंबेन । अत्र शुश्रूषुभिर्भक्तियोगं सेवमानैस्तत्क्षणादेवावरुध्यते। ''नसाधयाति मां योगो न सांख्यं धर्म्म उद्धव । न स्वाध्यायस्तपस्त्यागो यथाभक्तिर्ममोर्जिता ॥ '' इति भगवदुक्तेः । अत्र विशेषो हि मत्कृताद्यपद्यव्याख्याशत्युत्तारपद्यद्वयव्याख्यायां च द्रष्टव्यः । अत्रानेकजन्मानुष्ठितसुकृतत्वेन मत्सरादिदोषरहितः शुद्धांतःकरणोऽधिकारी साधनतया श्रवणादिधर्मस्तत्प्राप्यतया सच्चिदानंदात्मको भगवांश्च विषयः । निखिलदुःखनिवृत्तिपूर्वकपरमानंदावाप्तिश्च फलापरपर्यायं प्रयोजनं ग्रंथस्य विषयेण प्रतिपाद्यप्रतिपादकभावः । प्रयोजनेन साध्यसाधनभावश्च संबंध इत्यनुबंधचतुष्टयं बोध्यम् । पूर्वोक्तं छन्दः ॥२॥ कल्पितं संकल्पितं राति ददातीति कल्पतरुः । पृषोदरादित्वादार्षत्वाद्वा कल्पितपदस्थेकारस्याकारः । यद्वा कल्पमतीव समर्थं चतुर्वर्गं तरति ददातीति कल्पतरुः । तस्य स्वाश्रितेभ्यो वांछितविविधपुरुषार्थरूपफलदायित्वेपि यत्साहजिकं तदिदं भागवतं फलं श्लेषेण भगवत्स्वामिकमिदं तेनैव स्वभक्तेभ्यो दत्तमिति तान्विना न कस्याप्यत्र स्वत्वारोपे शक्तिरिति भावः । गलितमिति । वृक्षपक्वतया स्वयमेव पतितं न तु बलात्पातितमिति । स्वादु संपूर्णत्वं न चोच्चनिपातेन स्फुटितमित्यर्थ इति । नाप्यनतिमधुरं चेत्याह । शुकेति । परमोर्द्ध्वचूडातः श्रीनारायणाद्ब्रह्मशाखायां ततोऽधस्तान्नारदशाखायां ततोऽधस्ताद्व्यासशाखायां ततः शुकमुखं प्राप्यातपान्मध्विवामृतद्रवं संयुतं शुकेनैव तेन स्वचंच्वाऽमृतनिष्क्रमणार्थं द्वारमपि कृतम् । अथ च तेन स्वादितत्त्वादतिमधुरं ततः सूतादिशाखातः शनैः शनैः पतनादखंडितं तेन गुरुपरंपरां विना स्वबुद्धिबलेनास्वादने श्रीभागवतस्याखंडितत्वे पानाशक्तिश्च सूचिता । अनागताख्यानमनादित्वं तेनैवेदं शास्त्रं प्रवृत्तं न तु व्यासदेवेन रचितं व्यासस्य प्राकट्यकर्तृत्वमेव नतूत्पादकत्वं कल्पितत्वे तु प्राकृतगाथावत्संसारानिस्तारकत्वमप्यस्य न सेत्स्यति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीय मह्यं दत्तम् । मया च शुकस्य मुखे निहितम् । तच्च तन्मुखाद्भुवि गलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरया शनैरखंडमेवावतीर्णम् । न तूच्चनिपातेन स्फुटितमित्यर्थः। एतच्च भविष्यदपि भूतवन्निर्दिष्टम् । अनागताख्यानेनैवास्य शास्त्रस्य प्रवृत्तेः । अत एवामृतरूपेण द्रवेण संयुतम् । लोके हि शुकमुखस्पृष्टं फलममृतमिव स्वादु भवतीति प्रसिद्धम् । अत्र शुको मुनिः। अमृतं परमानंदः । स एव द्रवो रसः। "रसो वै सः । रस ँ ह्येवायं लब्ध्वानन्दी भवति" इति श्रुतेः। अतो हे रसिका हे रसज्ञास्तत्रापि भावुका

"कृतवान्द्वापरस्यांते" इत्यादौ करणं प्राकटयकरणमित्येवं व्याख्येयम् । श्रीभगवतापि सृष्ट्यादौ ब्रह्मणे स्वस्मिन्नित्यस्थितमेवोपदिष्टं न तु कल्पयित्वा साक्षाद्वेदरूपत्वादस्य "पुराणं ब्रह्मसंमितम्" इत्याद्युक्तेर्ब्रह्मसंमितत्वं ब्रह्मण एव संपनीपद्यते । न त्वन्यवस्तुनस्तथात्वे रंगस्य हेमसाम्यं शूद्रस्य ब्राह्मणसाम्यं वैश्वामित्रवर्तुलाकारचरहीत्याख्यातस्य गोधूमसाम्यञ्च स्यादतोऽनाद्येतत्पुराणमेतच्च विशेषत आद्यपद्यव्याख्याशत्यां मत्कृतायां भागवत पक्षव्याख्याने वर्णितमस्तीत्युपरम्यते किंञ्च "पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् । अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीत्तदा कल्पांतरेऽनघ । त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥ अंगानि चतुरो वेदाः पुराणन्यायविस्तरम् । मीमांसा धर्मशास्त्रञ्च प्रतिगृह्य मया कृतम् ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः । कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ॥ व्यासरूपमहं कृत्वा संहरामि युगेयुगे । चतुर्लक्षप्रमाणेन द्वापरेद्वापरे सदा ॥ तथाष्टादशधा कृत्वा भूर्लोकेस्मिन्प्रकाश्यते । अद्यापि देवलोकेस्मिञ्शतकोटिप्रविस्तरम् ॥ तदर्थोत्र चतुर्लक्षं संक्षेपेण प्रकीर्तितम्" ॥ इति मात्स्यपञ्चाशत्तमाध्याये मनुं प्रति श्रीमत्स्योक्तेः पुराणानामनादित्वमेव । अत्राक्षिपति । नन्विति । अष्टिः सावरणबीजम् । आदिना तदंतस्तृणादिग्रहः । अतो रसरूपत्वात् । तादात्म्यं ताद्रूप्यम् । ननु रसवदिति मतुपा भाव्यं रूपवान्घट इतिवत् । अन्यथा फलसामानाधिकरण्यं न स्यात्तत्राह । अत्र चेति । अत्र प्रकृते रसवत्त्वस्याविवक्षितत्वान्मतुपः प्राप्तिरेव नास्तीति तं मतुपं विनैव रसतादात्म्यविवक्षया फलसामानाधिकरण्यमित्यर्थः । ननु मतुपो लोपेनापि तद्वत्त्वविवक्षया नीलो घट इतिवत्सामानाधिकरण्यसंभवात्किमर्थं मतुपः प्राप्त्यभाव उच्यतेऽत आह । अगुणवचनेप्रीति । गुणं मुक्त्वा गुणिनि ये पर्यवस्यंति शब्दास्तेभ्यो मतुपो लोपो भवति । रस शब्दस्तु गुणवाची न तु गुणिनि पर्यवसायी रसः शर्करेत्यादिप्रयोगदर्शनात् । मतुपो लोपेन सामानाधिकरण्यासंभवात्साधुत्वार्थं मतुपो प्राप्तिरेवेत्यर्थः । भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति । अगुणं गुणभिन्नं वक्तीत्यगुणवचनस्तस्मिंस्तथा । तत्र स्वीकृतेपि सामानाधिकरण्ये हेयांशः त्वगादिः । तन्निवृत्यर्थं हेयांशानिवृत्तये । भागवतामृतपानस्य सदा सेव्यत्वमाह । न चेति । मोक्षः सालोक्यादिर्जीवन्मुक्तत्वं वा तमभिव्याप्य तत्र तत्र भगवल्लीलागानप्रसिद्धेः । यद्वा लयः रसास्वादजनितः प्रलयोऽष्टमः सात्त्विकस्तत्पर्यंतम् । पिबतेत्यनेन पाने स्तंभाद्याः सात्त्विका भवंतीति ज्ञेयम् । तत्र प्रलये सति पानस्यास्पष्टत्वात् । यद्यपि विरामस्तदपि पुनः प्रबोधे सति पुनरपि प्रलयपर्यंतं पिबत नतु त्यजतेति मुहुरिति पदम् । यद्वा मुहुरिति पीतस्यापि पुनः पाने स्वादाधिक्यमेवेत्यहो इत्यतिविस्मये । रसिकाः हे रसज्ञा इति भक्तानामेव जातरतित्वाद्रतेरेव स्थायि भावत्वात्स्थायिन एव रस्यमानत्वान्नात्र ज्ञानिकर्मियोगिनां कोपि दाय इति भावः । हे भावुकाः तत एव यूयमेव कुशलिनोऽन्येऽमंगला एवेति भावः। भावका इति पाठे भावकत्वव्यापारवंतः । तथा हि भावकत्वव्यापारेण भाव्यमानः स्थायी भुज्यते इति भट्टनायकमतम् । अत्र श्लेषेण भगवतः स्वरूपं रस एव भवति तथाहि तैत्तिरीयकोपनिषदि "ब्रह्मविदाप्नोति परम्" इत्युक्त्वा ब्रह्मणः सकाशादाकाशादिक्रमेणान्नमयविराट्पुरुषपर्यंतां सृष्टिमुक्त्वा तस्य चांतरतः क्रमेण "तस्माद्वा एतस्मात्" इत्यादिनान्नमयप्राणमयमनोमयविज्ञानमयानंदमया आम्नायंते । तेष्वप्यानंदमयस्यैवानन्दमयोऽभ्यासात्" इत्यनेन ब्रह्मत्वं मतभेदे च तत्पुच्छस्यैव । "आनंद आत्मा ब्रह्मपुच्छं प्रतिष्ठा" इत्यनेन ब्रह्मत्वं ब्रह्मण एव प्रतिष्ठात्वं च प्रतिपादितम् । तदनंतरं च "रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति" इति श्रुतेः । तत्र श्रुतौ च स इत्यनेन प्रक्रांत आनंदमयो वा तत्पुच्छं ब्रह्म वा न परामृश्यते पृथक्पृथगुत्तरोत्तरार्थप्रकर्षप्रतिपादिकास्वन्नमयादिश्रुतिष्वंते तस्याः पाठाप्रक्रमभंगापत्तेः । ततश्च तस्या अयमर्थः । स प्रसिद्धो वै निश्चितं रस एव आनंदमयात्तथा ब्रह्मतोऽप्यांतरं प्रकृष्टं "ब्रह्मणो हि प्रतिष्ठाहम्" इत्यनेन श्रीकृष्णस्यैव ब्रह्मतः प्रकृष्टत्वं "मल्लानामशनिः" इत्यत्र तस्मिन्नेव यौगपद्येन सर्वरसस्य साक्षादुपलब्धेस्तत्र च श्रृंगारादिसर्वरसकदम्बमूर्त्तिर्भगवांस्तदभिप्रायेण बभाविति श्रीस्वामिचरणानां व्याख्यानाच्च तस्यैव सर्वरसरू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे रसविशेषभावनाचतुराः । अहो भुवि गलितमित्यलभ्यलाभोक्तिः । इदं भागवतं नाम फलं मुहुः पिबत । ननु त्वगष्ट्यादिकं विहाय फलाद्रसः पीयते कथं फलमेव पातव्यं तत्राह । रसं रसरूपम् । अतस्त्वगष्ट्यादेर्हेयांशस्याभावात्फलमेव कृत्स्नं पिबत । अत्र च रसतादात्म्याविवक्षया रसवत्त्वस्य विवक्षितत्वाद्गुणवचनेऽपि रसशब्दे मतुपः

पत्वंचातः श्रीगीताश्रीभागवताभ्यामेव रसशब्देन श्रीकृष्णो व्याख्यातः।तमेवायं विज्ञानमयो लब्धांनदपरावधिकाष्ठां प्राप्नोति "सैषानंदस्य मीमांसा भवति" इति तदुत्तरश्रुत्या रस एव तस्मिन्नानंदविचारपर्यवसानज्ञापनात् यद्वाऽयमानंदम योपि "द्विजात्मजा मे युवयोर्दिदक्षुणा" इति "विस्मापनं स्वस्य च सौभगर्द्धेः इति" इत्यादिभ्यस्तमेव लब्ध्वानंदी भवतीति । ततश्च तं रसं श्रीकृष्णं फलं निगमकल्पतरोः सकाशाद्गलितम्।न तु तत्र साक्षात्स्थितमिति तदर्थं निगमो नान्वेष्टव्यः किन्तु शुकमुखमेवेत्याह।शुकमुखादिति फलमिदमतिस्वादु ज्ञात्वा तत आकृष्य व्यासेन स्नेहात्स्वपुत्रमुख एव निहितमिति संभाव्यत इति भावः । किंवा शुकमुखादिति हेतौ पंचमी । येषामहं प्रिय आत्मेत्यादि शुकवाक्य प्रामाण्याद्भुविव्र जभूमावुत्पद्य हेभावुका रसिकाः प्रियाः सत्यः भागवतं भगवत्स्वरूपभूतं रसमाधुर्यं पिबत । यद्वा भगवतः श्रीकृष्णस्य रसमालयं लयः श्लेषालिंगनमिति यावत् । 'ली श्लेषण' इति धातुपाठात् । तमभिव्याप्य एतदभि प्रायेण न्यायरत्नाकरेऽप्युक्तं "परमिममुपदेशमाद्रियध्वं निगमवनेषु नितान्तखेदखिन्नाः।।विचिनुत भवनेषु बल्लवीनामुपनिषदर्थमुलूखले निबद्धम्" इति । अमृतोऽनश्वरो योद्रवो मनोनयनद्रौत्यं तत्संयुतं यथा स्यात्तथा पिबतेत्यधरपानं सूचितमिदमेव निगमकल्पतरोर्गलितं परिपक्वं फलमिति फलतो गोपीजनानुगतिमयी रागानुगाख्या भक्तिरादिष्टा । यतो निगमोपि तल्लोभादेव बृहद्वामनदृष्टां तादृशीं भक्तिं विधाय व्रजभूमावुत्पद्य शतसहस्रशो गोप्यो भूत्वा तदधरामृतरसं पपाविति वेदस्तुतौ दृष्टमिति अतिरहस्योर्थः । "ब्रह्मणो हि प्रतिष्ठाहम्" इत्येतत्केचिदन्यथा व्याचक्षते सत्यं तदप्राकरणिकत्वात्काल्पितत्वादयुक्तमेव:मंतव्यं किं त्वेवमेव युक्तम् । तथाहि "मां च योव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते।।ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च" इति ।अनयोरर्थः।ननु त्वद्भक्त्या कथं निर्गुणब्रह्मप्राप्तिः सा तु अद्वितीयतदेकानुभवेन भवेत्तत्राह । ब्रह्मणो हीति । हि यस्मात्परमप्रतिष्ठात्वेन प्रसिद्धं श्रुतौ यद्ब्रह्म तस्याप्यहं प्रतिष्ठा प्रतिष्ठीयतेऽस्मिन्निति प्रतिष्ठाश्रयः । अन्नमयादिषु श्रुतिषु सर्वत्रैव प्रतिष्ठापदस्य तथार्थत्वात् । अत एवामृतस्य मोक्षस्याप्यहं प्रतिष्ठा । तस्य लक्षणया स्वर्गादिपरत्वं वारयति । अव्ययस्येति । तथा शाश्वतस्य साधनफलदशयोरपि स्थितस्य धर्मस्य भक्त्याख्यस्याहं प्रतिष्ठा तथा तत्प्राप्यस्यैकांतिकस्य सुखस्य प्रम्णश्च प्रतिऽष्ठातः सर्वस्यापि मदधीनत्वात्कैवल्यकामनया कृतेन मद्भजनेन ब्रह्मणि लीयमानो ब्रह्मधर्ममपि प्राप्नोतीति । अत्र श्रीविष्णुपुराणमपि प्रमाणम् । "शुभाश्रयः सचित्तस्य सर्वगस्य तथात्मनः" इति । व्याख्यातं च तत्रापि स्वामिचरणैः सर्वगस्यात्मनः परब्रह्मणोप्याश्रयः प्रतिष्ठा । तदुक्तं भगवता "ब्रह्मणो हि प्रतिष्ठाहम" इति । यथा विष्णुधर्मेपि नरकद्वादशीप्रसंगे "प्रकृतौ पुरुषे चैव ब्रह्मणोपि च स प्रभुः । यथैक एव सर्वात्मा वासुदेवो व्यवस्थितः" इति । तत्रैव मासर्क्षपूजाप्रसंगे "यथाच्युतत्वं परतः परस्मात्स ब्रह्मभूतात्परतः परात्मा । तथाच्युतत्वं कुरु वांछितं तन्ममापदं चापहराप्रमेय ॥" इति । तथाहि हरिवंशेपि विप्रकुमारानयनप्रस्तावेऽर्जुनं प्रति भगवद्वाक्यं "तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥" इति । ब्रह्मसंहितापि "यस्य प्रभा प्रभवतो जगदंडकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नम् । तद्ब्रह्म निष्कलमनंतमशेषभूतं गोविंदमादिपुरुषं तमहं भजामि ॥" इति । अत एव श्रुतिश्च गोपालतापिनी "योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्यातीतो गोपालस्तस्मै वै नमो नमः" इति । संदर्भस्तु त्रिकांडतोपि श्रैष्ठ्ये तदीयावयवसारत्वनिर्देशेन दोषपरिहारपूर्वकं कारणांतरं योजयन्पूर्वतोपि वैशिष्ट्यमाह । निगमेति । हेभावुकाः परममंगलायनाः ये रसिका भगवत्प्रीतिरसज्ञा इत्यर्थः । ते यूयं वैकुंठात्क्रमेण भुवि पृथिव्यामेव गलितमवतीर्णं निगमकल्पतरोः सर्वफलोत्प त्तिभुवः शाखोपशाखाभिर्वैकुंठमप्यध्यारूढस्य वेदरूपतरोर्यत्खलु रसरूपं श्रीभागवताख्यं फलं तद्भुव्यपि स्थिताः पिबत आस्वाद्यांतर्गतं कुरुत । श्रीभागवताख्यं यच्छास्त्रं तत्खलु रसवदपि रसस्यैकमयताविवक्षया रसशब्देन निर्दिष्टं भागवतशब्देनैव तस्य रसस्यान्यदीयत्वं व्यावृत्तं भागवतस्य तदीयत्वाक्षेपात् । शब्दश्लेषेण च भगवत्संबंधिरसमिति गम्यते । स च रसो भगवत्प्रीतिमय एव । "यस्यां वै श्रूयमाणायाम्" इत्यादिफलश्रुतेः । यन्म यत्वेनैव श्रीभगवति रसशब्दः प्रयुज्यते "रसो वै स" इति स एव च प्रशस्यते "रसं ह्येवायं लब्ध्वानंदी भवति" इति । अत्र रसिका इत्यनेन प्राचीनार्वाचीनसंस्काराणामेव तद्विज्ञत्वं दर्शितम् । गलितमित्यनेन रसस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राप्त्यभावात्तेन विनैव रसं फलमिति सामानाधिकरण्यम् । तत्र फलमित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं रसमित्युक्तेऽपि गलितस्य रसस्य पातुमशक्यत्वात्फलमिति द्रष्टव्यम् । नच भागवतामृतपानं मोक्षेऽपि त्याज्यमित्याह । आलयं लयो मोक्षः अभिविधावाकारः लयमभिव्याप्य । नहीदं

सुपाकिमत्त्वेनाधिकस्वादुत्वमुक्ता शास्त्रपक्षे सुनिष्पन्नार्थत्वेनाधिकस्वादुत्वं दर्शितं रसमित्यनेन फलपक्षे हेयांशरहितत्वम् ॥ भागवतमित्यनेन सत्स्वपि फलांतरेषु निगमस्य परमफलत्वेनोक्त्या तस्य पुरुषार्थत्वं दार्शितम् । एवं तस्य रसात्मकस्य फलस्य स्वरूपतोऽपि वैशिष्ट्ये सति परमोत्कर्षबोधनार्थं वैशिष्ट्यांतरमाह शुकेति । अत्र फलपक्षे कल्पतरुवासित्वादलौकिकत्वेन शुकोप्यमृतमुखोभिप्रेयते । ततस्तन्मुखं प्राप्य यथा तत्फलं विशेषतः स्वादु भवति यथा परमभागवतमुखसंबंधं भगवद्गुणमपि ततस्तादृशपरमभागवतवृंदमहेंद्रश्रीशुकदेवमुखसंबंधं किमुतेति भावः । अत एव परमस्वादुपरमकाष्ठाप्राप्तत्वात्स्वतोऽन्यतश्च तृप्तिरपि न भविष्यतीत्यालयं मोक्षानंदमभिव्याप्य पिबतेत्युक्तम् । तथा च वक्ष्यते परिनिष्ठितोपीत्यादि । अनेनास्वाद्यांतरवन्नेदं कालांतरेप्यास्वादकबाहुल्येपि व्ययिष्यतीति दर्शितम् । यद्वा तत्र तस्य रसस्य भगवत्प्रीतिमयत्वेपि द्वैविध्यं तत्प्रीत्युपयुक्तत्वं तत्प्रीतिपरिणामत्वं चेति । यथोक्तं द्वादशे "कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम् । वैराग्यविज्ञानविवक्षया विभो वचोविभूतीर्न तु पारमार्थ्यम् ॥ यत्तूत्तमश्लोकगुणानुवादः संगीयतेभीक्ष्णममंगलघ्नः । तमेव नित्यं श्रृणुयादभीक्ष्णं कृष्णेमलां भक्तिमभीप्समानः ॥" इति । ततः सामान्यतो रसत्त्वमुक्त्वा विशेषतोऽप्याह अमृतेति । अमृतं तल्लीलारसः हरिलीलाकथाव्रातामृतानंदितसत्सुरं इति द्वादशे श्रीभागवतविशेषणात् । लीलाकथारसनिषेवणमिति तस्यैव रसत्वनिर्देशाच्च । सत्सुरमिति । संतोऽत्रात्मारामाः इत्थं सतां ब्रह्मसुखानुभूत्येत्यादिवत् त एव सुरा अमृतमात्रस्वामित्वात् । अत्रामृतद्रवपदेन लीलारसस्य सार एवोच्यते । तस्मादेवं व्याख्येयम् । यद्यपि प्रीतिमयरस एव श्रेयांस्तथाप्यस्त्यत्र विवेकः । रसानुभविनो यत्र द्विविधाः । पिबतेत्युपदेश्याः स्वतस्तदनुभविलीलापरिकराश्च । अत्र लीलापरिकरा एव रससारमनुभवंति अंतरंगत्वात् । परे तु यत्किंचिदेव बहिरंगत्वात् । यद्यप्येवं तथापि तदनुभवमयरससारं स्वानुभवमयेन रसेनैकतया विभाव्य पिबत । यतस्तादृशतया तादृशशुकमुखाद्गलितं प्रवाहरूपेण वहंतमित्यर्थः । तदेवं भगवत्प्रीतेः परमरसतापत्तिः शब्दोपात्तैव । अन्यत्र च सर्ववेदांतसारमित्यादौ तद्रसामृततृप्तस्येत्यादि । एवमेवाभिप्रेत्य भावुका इत्यत्र रसविशेषभावनाचतुरा इति स्वामिचरणैर्व्याख्यातम् । "तथास्मरन्मुकुन्दांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो जनः". इत्यादि । अत्र वैकुंठस्थितकल्पतरुफलस्य रसमात्ररूपत्वं च यथा हयशीर्षपंचरात्रे पञ्चतत्त्वनिरूपणे "द्रव्यतत्त्वं श्रृणु ब्रह्मन्प्रवक्ष्यामि समासतः । सर्वभोगप्रदा यत्र पादपाः कल्पपादपाः ॥ गंधरूपं स्वादुरूपं द्रव्यं पुष्पादिकं च यत् ॥ हेयांशानामभावाच्च रसरूपं भवेच्च तत् ॥ त्वग्बीजं चैव सर्वेषां हेयांशं किल यद्भवेत् ॥ सर्वं तद्भौतिकं विद्धि न ह्यभूतमयं हि तत् ॥ रसवद्भौतिकं द्रव्यमत्र स्याद्रसरूपकम्" इति । अत्र वैकुंठे इति तत्प्रकरणलब्धम् । "द्रुतविलंबितमाह नभौ भरौ" इति लक्षणवत्वादिदं छंदो द्रुतविलंबितं नामेति ॥ हे भावुकाः कल्याणेप्स्वः "भावुकं भविकं भव्यम्" ॥ इत्यमरः। भावुकमस्ति प्राप्यत्वेन येषां ते भावुकाः । मत्वर्थीयोच्।पुनर्हे रसिका रसज्ञाः।यूयं भुवि अमृतं मोक्षस्तस्य द्रवः प्राप्तिस्तेन संयुतं युक्तं विप्रकुलं पिबत आदरेण सेवध्वं यद्वा "वन संभक्तौ"इति धातुरार्षत्वाददादिकोत्र बोध्यस्तस्य लोटो मध्यमपुरुषबहुवचनेऽपि पूर्वमिदं रूपं अनुनासिकस्य लोपः।इह सूत्रे वनतेरपि गृहीतत्वात्।।"वष्टि भागुरिः" इति अप्युपसर्गाकारलोपः ।"भूत्वा द्विजवरस्त्वं वैमामुपेष्यासि केवलम्" इति श्रीकृष्णेन मुचुकुंदं प्रत्युक्तेः । विप्रदेहस्यैव मोक्षहेतुत्वात्।किंभूतम् अमृतद्रवसंयुतं शुकः श्रीशुकः मुखं प्रधानं येषु ते शुकमुखा योगीश्वरा नारदादयः तैरत्यते सातन्येन प्राप्यते इति शुकमुखात् "अत सातत्यगमने" अतः क्विप् । नारदेन कदाचित्सत्यभामादत्तः कृष्णः सदा ब्राह्मणदेहो मे भवत्विति प्रार्थितस्ततस्तथेत्युच्चारयित्वा मुक्त इति प्रसिद्धं हरिवंशे । पुनः निगमो वेदः स एव कल्पतरुस्तस्य फलं फलमस्त्यामिन्निति फलम्।मत्वर्थीयोच्।वेदफलं चाध्ययनाध्यापनादि।तद्विप्रकुलेऽस्त्येवेति भावः ।पुनः किंभूतं भगवन्तमुपास्ते इति भागवतस्तं "किमुमत्कलया पुनः" इति श्रुतदेवं प्रति श्रीमुखोक्तेः । पुनः किम्भूतं रस आनंदो मीयते प्राप्यतेऽनयेति रसमा सरस्वती तस्या आलयं स्थानम् । पुनः किंभूतं "गॄ विज्ञाने" गीर्य्यते ज्ञायते परतत्त्वमनेनेति गरो ज्ञानं तज्जातमस्येति गारितं रलयोरैक्याद्गलितमिति।अहोद्भुतेऽव्ययं तथा च "श्रोतियं ब्रह्म

॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैमिशेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

स्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एव । वक्ष्यति हि । "आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः" इति ॥ ३ ॥ तदेवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिवैशिष्ट्येन सुखसेव्यत्वेन च श्रोतॄनभिमुखीकृत्य शास्त्रमारभते । नैमिश इति । ब्रह्मणा विसृष्टस्य मनोमयस्य चक्रस्य नेमिः शीर्यते कुंठीभवति यत्र तन्नेमिशं नेमिशमेव नैमिशम् । तथा च वायवीये । "एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते । यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयम् । प्रणिपत्य महादेवं विससर्ज पितामहः ॥ तेऽपि हृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् । प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम् ॥" इति । नैमिष इति पाठे वराहपुराणोक्तं द्रष्टव्यम् । तथाहि गौरमुखमृषिं प्रति भगवद्वाक्यम् । "एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा । उवाच निमिषेणेदं निहतं दानवं बलम् ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् । भविष्यति

निष्ठम्" इति श्रुत्यर्थो ध्वनितोत्रेति।इति ब्राह्मणपक्षेप्ययं योज्यः।"ब्रह्मिष्ठं ब्राह्मणं गुरुमुपासीत" इति श्रुत्यर्थश्च ॥३॥भागवतारंभे पुनर्मंगलमाचरति।ॐ मिति॥"ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा।कण्ठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ।" इति।ननु कंठभेदनात्कुतो मांगलिकत्वमिति चेन्न।महतां दूषणं भूषणमिति न्यायेन नीलकंठवत्। किञ्च शास्त्रस्यास्य प्रणवार्थविवृतिरूपत्वञ्च सूचयति ॥ नैमिश इति॥निरुक्तौ प्रमाणमाह।तथाचेति। मूर्द्धन्यषांतपाठे प्रमाणांतरमाह। नैमिष इति।विशेषकं वैशिष्ट्यापादकम्। अत्रेदं विवक्षितम्।यत्र कामादीञ्शत्रूञ्शीघ्रमेव हं तुं प्रभवेत्तत्र वसेदिति भावः । इत्यर्थ इति। "तुमोप्रयुक्तस्य" इति कर्मणि चतुर्थी बोध्यात्रेति भावः।प्रथमं शौनकादीनां सकामकर्मपरत्वमेवासीद्रोमहर्षणसंगेन ततो नानापुराणादिशास्त्रश्रवणमननादिभिर्जिज्ञासुत्वमिति प्रासिद्धिः । ततश्च साधोरुग्रश्रवसः संगेन भक्तिरसे स्पृहा । तदुक्तं "कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान्। आपाययति गोविंदपादपद्मासवं मधु" इति । ततश्च जिज्ञासुत्वमपि शिथिलं कुर्वतां तेषां भक्तौ प्रवेशे स्वर्गार्थकं सत्रं तच्च मिषमेवाभूत् । तदुक्तं "कथायां सक्षणा हरेः" इति।एतच्च श्रीभागवतश्रोतृषु तेषु कर्मिषु कर्मनिष्ठाव्यवधानेन भक्तेः प्रभावद्योतनं तथैवं श्रीभागवतवक्तरि श्रीशुकदेवेपि "परिनिष्ठितोपि नैर्गुण्ये" इत्यादिभिर्ब्रह्मनिष्ठाव्यवधानेनेति।यद्वा स्वः स्वर्गे गीयत इति स्वर्गायो हरिः उरुगाय इति वत् । तस्य लोको वैकुंठस्तस्मै। ये ऋत्विजस्त एव यजमानाः । यत्र बहुकर्तृकयागस्तत्र सत्रशब्दः प्रयुज्यते यद्वा "बहुभ्यो दीयते यत्र तृप्यंति प्राणिनो बहु ॥ कर्तारो बहवो यत्र तत्सत्रमभिधीयते" ॥ इति नीलकंठः । ननु सहस्रसममित्युक्तेः "शौनकस्य कुलपतेः सत्रे द्वादशवार्षिके" इति भारतविरोधस्तु द्वाभ्यां बिंदुभ्यामधिका दशेति द्वादश।दशसंख्याकांकोपरि बिंदुद्वयपातनेन सहस्रं भवतीति समासेन परिहरणीयः । कल्पांतरापेक्षया वा द्वादशेति पाठो भारतेऽस्तीति । यद्वा "यो मासः स संवत्सर" इति श्रुतेः । सहस्रमासिको वा यागो ज्ञेयः।एतद्वनपर्वणि पंचत्रिंशाध्यायेऽस्ति "मासः प्रतिनिधिः" इत्यत्र नीलकंठेनोक्तम्।उद्दिश्येत्यध्याहारे तु गौरवमेव प्रतिभाति।तं विनाप्यर्थसिद्धेः। "कर्तृकर्मक्रियादीनां यदि स्थानं न लभ्यते।अध्याहारं तदा कुर्यान्मुख्यार्थप्रतिपत्तये" इत्यभियुक्तोक्तेरत आह । यद्वेति। इत्यर्थ इति "सर्वेषामेव धातूनामंतर्भूतकृञर्थता ।सा वाच्या प्रत्ययार्थेन द्वेवं भाट्टादयो जगुः" इत्युक्तेरिति भावः । तत्तद्धात्वर्थस्तत्र तत्र न संभवतीति धातुं विना केवलप्रत्ययोच्चारणं न युज्यते।"न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययश्च।" इत्युक्तेः।प्रत्ययस्य तिबादेरुच्चारणमेवर्थः प्रयोजनं यत्र तादृशतया धात्वर्थस्याविवक्षितत्वात्। "कृञर्थानुगतकर्तृवाचि प्रत्यये न कृञर्थस्तु समर्प्यते" इति।तथाहि "अग्निष्टोमीयपशोरालभनमालभते,अमावास्यायां पितृभ्यः श्राद्धं निर्वपति,अष्टवर्षायाः परिणयनमुपयंति" इति । इहालभते,कुरुते,निर्वपति,करोति,उपयंति,कुर्वंतीत्यर्थो विधेयःकृञर्थानुगतप्रत्यार्थस्यैव कर्तृरूपस्य विवक्षा।न तु धात्वर्थस्येति "वायव्यं श्वेतमालभेत, अग्नये चरुं निर्वपति,प्रतितिष्ठंति ह वा एते य एता रात्रीरुपयंति" इत्यादीनामादिपदाद्ग्रहः।रात्रीः सत्राणि "शौनः सर्वविवेकः स्यात्" इति लीलावत्याम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः ॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषय ऊचुः ॥
त्वया खलु पुराणानि सेतिहासानि चानघ ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥

यथार्थं वै ब्राह्मणानां विशेषकम्॥" इति । अनिमिषः श्रीविष्णुरलुप्तदृष्टित्वात्तस्य क्षेत्रे । तथा चात्रैव शौनकादिवचनम् "क्षेत्रेऽस्मिन्वैष्णवे वयम्" इति । स्वः स्वर्गे गीयत इति स्वर्गायो हरिः स एव लोको भक्तानां निवासस्थानं तस्मै तत्प्राप्तय इत्यर्थः । सहस्रं समाः संवत्सरा अनुष्ठानकालो यस्य तत्सत्रं सत्रसंज्ञकं कर्मोद्दिश्यासत उपविविशुः । यद्वा।आसताकुर्वतेत्यर्थः।आलभेत निर्वपति उपयंतीत्यादिवत्प्रत्ययोच्चारणमात्रार्थत्वेनास्तेर्धात्वर्थस्याविवक्षितत्वात्॥ ४ ॥प्रातःकाले हुता एव हुता अग्नयो यैस्ते।अनेन नित्यनैमित्तिकहोमसाकल्यं दर्शितम् । इदं वक्ष्यमाणमादरात्पप्रच्छुः ॥ ५ ॥ विविदिषितानर्थान्प्रष्टुं सूतस्य सर्वशास्त्रज्ञानातिशयमाहुः । त्वयेति त्रिभिः श्लोकैः । इतिहासो महाभार

सर्वो विवेको यस्य सः सर्वविवेकः स एव शौनकः सर्वविवेकोपि भगवद्भक्तानामेव भवति सर्वव्यापिनो भगवतो याथार्थ्येन ज्ञातत्वात् । भगवद्भावरसिकोमु निवरः स आदिर्येषां ते तथा । यद्वा शुनकस्यापत्यं शौनकः ।"शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः" इति नवमस्कंधे वक्ष्यमाणत्वात् । विजयध्वजस्तु निमिषा ऋषिसेव्यफला वृक्षविशेषास्तेषां क्षेत्रं"चित्रकन्निमिषो नेमिर्वञ्जुलोऽथापुराच्छदः" इत्यभिधानात् । निमिषनाम्नर्षिणा यत्र तपश्चीर्णं तन्नैमिषम् । तत्र सतः सुजनान् त्रायत इति सत्रम् । सतो ब्रह्मणस्त्राणमनेनेति यज्ञाभावे वेद एव लुप्येतेत्यर्थः॥ ४॥ननु"ब्राह्मण्यां क्षत्रियाज्जातः सूतः" इति स्मृतेस्तस्य विलोमजातीयत्वेन शूद्रत्वात् "श्वचर्मणि यथा क्षीरमपेयं स्याद्द्विजातिभिः । तथा शूद्रमुखाच्छास्त्रं न श्रोतव्यं कदाचन" इति भारतादिस्मृतेश्च । कथमतीवविज्ञाः शौनकादयः सूतात्साक्षाद्वेदरूपं श्रीभागवतं शुश्रुवुरिति चेदत्रेदमवधेयम् । नह्ययं जातिसूतः । अस्योत्पत्तिस्तु वायुपुराणे "वैन्यस्य तु पृथोर्यज्ञे वर्तमाने महात्मनः । सुत्यायामभवत्सूतः प्रथमं वर्णवैकृतम् ॥ऐंद्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः । जुहावेंद्राय दैवेन ततः सूतो व्यजायत । शिष्यहव्येन संपृक्तमभिभूतं गुरोर्हविः । अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतम् ॥" इति । किंच"अग्निकुंडसमुद्भूत सूत निर्मलमानस" इति पुराणांतराच्च । रोमहर्षणो "ब्राह्मण्यां क्षत्रियाज्जातः सूत" इत्युक्तलक्षणो न जातिसूतः किं त्वग्निजः । ब्रह्मासनार्हता त्वस्य ब्राह्मणसंकल्पादेव धृष्टद्युम्नस्य क्षत्रियत्ववत् । यद्वा"अग्निर्वै ब्राह्मणः"इति श्रुतेरग्निजत्वेन ब्राह्मणत्वादेव ब्रह्मासनं मुनिभिर्दत्तमन्यथा"व्यासासनोपवेशाच्च शूद्रश्चांडालतां व्रजेत् । विप्रस्यैवाधिकारोस्ति व्यासासनसमाक्रमे ॥ धर्माणां श्रुतिगीतानामुपदेशे तथा द्विज॥" इति संहितोक्तिर्व्याकुप्येत । किंच ब्रह्मासनं वैशंपायनहारीतशांतव्रतमार्कंडेयादिसमानस्तत्सजातीय एवार्हति न हीनः। न महांतः शौनकादयो हीनात्परं रहस्यं जगृहुरिति वक्तुं युक्तम् । "न हनितः परमभ्याददीत"इति श्रुतेः।"नीचादप्युत्तमा विद्या ग्राह्या"इति त्वापत्परं वृत्त्युपयोगिविद्यापरं वा । अत एव तद्वधाद्बलरामेण ब्रह्महत्याव्रतं चीर्णमिति स्मर्यते।"यद्येतद्ब्रह्महत्यायाः पावनं लोकपावन । चरिष्यत" इति दशमे बलदेवं प्रति शौनकोऽपिवक्ष्यति च । सूतशब्दस्तु तत्र कथाप्रवक्तृसाम्यादेव पुराणानां प्रवक्तृत्वे"वरयेद्ब्राह्मणं गुरुम्"इति पुराणांतरेपि स्मर्यते । जातिसूतेषु पौराणिकपदप्रयोगः प्राचीनराज्ञामुत्साहौदार्यादिगुणवर्णनादेवेति। यद्यपि"मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात्"इत्युक्तिस्तु जातिसूतविषयैव तथापि त्वयि सूतशब्दप्रयोगात्त्वय्युपचर्य्यतेऽन्यथा "पुराणं ब्रह्मसंमितम्" इत्युक्तेः श्रीभागवतवक्तृत्वमपि न संभवतीति रहस्यम् ॥ सत्कृतं तद्योग्यसत्कारैः पूजितम् आसीनं सुखोपविष्टम् । अनेन हुतहुताग्नय इत्युच्चारणेन ॥ ५ ॥ अनघेति ॥ त्वयि सूतपदप्रयोगो हि हविर्षोर्वैपरीत्येनैव न तु जात्यभिप्रायेणातोहं विलोमजो ब्राह्मणेभ्यः कथमुपदिशामीति शंकां मा कार्षीर्यतस्त्वमनघोसीति भावः।पुराणानि मात्स्यादीनि भारतादीतिहासादिना वाल्मीकीयादिग्रहः।चादुपपुराणान्यपि धर्मशास्त्राणि मनुयाज्ञवल्क्यादिप्रणीतस्मृतयः "मन्वाद्याः स्मृतयो धर्मशास्त्रमित्यभिधीयते"इति संग्रहोक्तेः ।अधीतानीत्युक्त्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानि वेदविदां श्रेष्ठो भगवान्बादरायणः ॥ अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात् ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्रतत्रांजसायुष्मन्भवता यद्विनिश्चितम् ॥ पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥ १० ॥ भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः ॥ अतः साधोत्र यत्सारं समुद्धृत्य मनीषया ॥ ब्रूहि नः श्रद्दधानानां येनात्मा संप्रसीदति ॥ ११ ॥

तादिस्तत्संहितानि । न केवलमधीतान्यपि त्वाख्यातान्यपि व्याख्यातानि च।उत अपि।यानि धर्मशास्त्राणि तान्यपि॥६॥किंच यानीत्यादि । विदां विदुषां मध्ये श्रेष्ठो व्यासो यानि वेद । परावरे सगुणनिर्गुणे ब्रह्मणि विदंतीति तथा ॥७॥ वेत्थ जानासि । सौम्य हे साधो तेषामनुग्रहात् । तत्त्वतो ज्ञाने हेतुमाह । ब्रूयुरिति । स्निग्धस्य प्रेमवतः । उत एव । गुह्यं रहस्यमपि ब्रूयुरेव ॥८॥ अंजसा ग्रंथार्जवेन । एकांततः श्रेयोऽव्यभिचारि श्रेयःसाधनम् ॥९॥ अन्येपि बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चिन्वंतु नेत्याहुः।प्रायेणेति।हे सभ्य साधो अस्मिन्युगे कलावल्पायुषो जनास्तत्रापि मंदा अलसास्तत्रापि सुमंदमतयस्तत्रापि मंदभाग्याः विघ्नाकुलास्तत्राप्युपद्रुताः रोगादिभिः ॥१०॥ न च बहुशास्त्रश्रवणेऽपि तावतैव फलसिद्धिरित्याहुः । भूरीणीति । भूरीणि कर्माण्यनुष्ठेयानि येषु तानि । समुद्धृत्य यथावदुद्धृत्य येनोद्धृतवचनेनात्मा बुद्धिः संप्रसीदति

वेदवत्तासां गुरुमुखादेव पठनं न्याय्यमिति सूचितम्।उतेति पादपूरणेप्यर्थे वा।उतापि॥६॥ अन्यदाह किञ्चेति॥भगवान्साक्षान्नारायणत्वात्। "व्यासो नारायणः स्वयम्"इत्यादिपुराणात् । बदरीणां समूहो बादरं तदुपलक्षितमय नं निवासस्थानं "तस्मिन्स्व आश्रमे व्यासो बदरीखंडमण्डिते"इति वक्ष्यमाणत्वात् । यद्वा वादाननीश्वरवादादीन् रिणाति हिनरतीति बादरायणः। 'री गतिरेषणयोः' रेषणं हिंसा कार्येयुण् वृद्ध्यायौ । अन्ये श्रीवसिष्ठप्रभृतयः । हे सूतेति । पौराणिकरत्वमसीति भावः ।"सूताः पौराणिकाः प्रोक्ताः पुराणं सर्वसंग्रहः"इति धरणिदेवः॥७॥हे सौम्येति । सौम्यस्वभावत्त्वात्त्वयि गुरुप्रसादोऽवश्यमिति भावः । गुह्यं चेत्कथं ब्रूयुस्तत्राह।स्निग्धस्येति। ब्रूयुरिति विधिलिङेव । त्वयि स्निग्धे शिष्ये तेषामवश्यमेव रहस्यप्रकाशकत्त्वं तव च सर्वरहस्यविज्ञत्वमवगम्यते । अतस्तानपि प्रति स्वमतमेवोत्कृष्य ब्रुवतो मुनीनपहाय सर्वमतवक्ता त्वमेवास्माभिः पृच्छ्यस इति भावः ॥ ८ ॥ तर्हि तत्सर्वमेव ब्रवीमीति किं तत्राह॥ तत्रेति ॥ आयुष्मन्निति ॥ त्वया बहुकालं व्याप्य तान्यधीत्य विचारितानीति भावः । यद्वा वयं ब्राह्मणाः स्वोपकारकेभ्योप्याशिषमेव दद्म इत्यतएवमायुष्मान्भविष्यसीति भावः । अंजसा शीघ्रं तत्र तत्र झटित्यर्थबोधकवाक्येष्वित्यर्थः।एकांतत एकांतेन सर्वथेत्यर्थः।यद्वा प्रथमान्तात्तसिः।एकमद्वितीयञ्च तारतम्यगणनायामंतर्भूतञ्च यतोऽन्यदधिकं श्रेयो नास्तीत्यर्थः । तच्च प्रेमैव । ननु स्वर्गापवर्गादिकं ब्रह्मपरमात्मभगवन्सु मुख्यस्य भगवत्स्वरूपस्यापि वशीकारकत्वादित्यग्रिमग्रंथे व्यक्तीभविष्यति"तत्रतत्रांजसा"इत्यादिना"अतः साधो" इत्यंतेन सर्वशास्त्रसारोद्धारप्रश्नः प्रथमः।तत्रोत्तरं"स वै पुंसाम्" इत्यादिना"वासुदेवे" इत्यंतेन॥९॥ननु मन्मु खात्तत्सर्वं श्रुत्वा युष्मदादय एव श्रेयो निश्चिन्वंतु । हे सभ्येति देशकालपात्रज्ञोसीति भावः । अस्मिन्कलौ प्रायेणाल्पायुषस्तत्राप्यल्पायुष्ट्वेपि तत्रापि सालसत्वेपि तत्रापि मंदमतित्वेपि तत्रापि विघ्नाकुलत्वेपि अत्र चक्रवर्ती यदि कथंचिद्दीर्घायुषस्तर्हि मंदाः परमार्थेष्वलसाः।यदिकेचिन्निरलसा अपि तर्हि।निर्बुद्धयः।यदिसुबुद्धयोपि स्युस्तदा मंदभाग्यास्त्वादृशसाधुसंगहीनाः यदि लब्धसुसंगा अपि तदोपद्रुताः रोगाद्युपद्रववशात्त्वन्मुखाच्छ्रोतुं श्रुत्वा वा स्वश्रेयो निश्चित्य तत्तदनुष्ठातुं नावकाशं लभंत इति ॥ १० ॥ तावतैव बहुशास्त्रश्रवणेनैव।किंच तादृशस्य श्रेयसः साधनेषु मध्ये यन्मुख्यं कलिकालवार्त्तिभिर्जनैः सुशकयं च तत्साधनं वदेति पृच्छति श्रोतव्यानि शास्त्राणि । प्रसीदति

१ योः "युवोरनाकौ"इति सूत्रेणानादेशः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत जानासि भद्रं ते भगवान्सात्वतां पतिः ॥ देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया ॥ १२ ॥ तन्नः शुश्रूषमाणानामर्हस्यंगाऽनुवर्णितुम् ॥ यस्याऽवतारो भूतानां क्षेमाय च भवाय च ॥ १३ ॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम् ॥ ॥ १४ ॥ यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥ १५ ॥

सम्यगुपशाम्यति ॥ ११ ॥ प्रश्नान्तरं सूत जानासीति पंचभिः । भद्रं ते इत्यौत्सुक्येनाशीर्वादः । भगवान्निरतिशयैश्वर्यादिगुणः । सात्वतां सच्छब्देन सत्त्वमूर्तिर्भगवान्स उपास्यतया विद्यते येषामिति सत्वंवो भक्ताः । स्वार्थेऽण् राक्षसवायसादिवत् । तस्य चाश्रवणमार्षम् । तदेवं सात्वंत इति भवति । तेषां पतिः पालकः । यस्यार्थविशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां जातः ॥ १२ ॥ अंग हे सूत तन्नोऽनुवर्णयितुमर्हसि । सामान्यतस्तावद्यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥ १३ ॥ तत्प्रभावमनुवर्णयंतस्तद्यशःश्रवणौत्सुक्यमाविष्कुर्वंति । आपन्न इति त्रिभिः । संसृतिमापन्नः प्राप्तः विवशोऽपि गृणन् । ततः संसृतेः । अत्र हेतुः । यत् यतो नाम्नो भयमपि स्वयमेव बिभेति ॥ १४ ॥ किं च यस्य पादः संश्रयो येषामत एव प्रशमः अयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः सन्निधिमात्रेण सेविताः सद्यः पुनंति । स्वर्धुनी

निर्मलीभवति । तच्च श्रवणकीर्तनादिकमेवेत्यग्रे ज्ञास्यते । साधो इति सारग्राहिणः परोपकारनिरता एव साधवो भवंतीति भावः । अत्र श्रोतव्येषु 'श्रद्धालवे नित्यमनुव्रताय' वाच्यम् ॥ इति वक्ष्यमाणत्वात् ॥ ११ ॥ 'सूत जानासि' इत्यारभ्य 'कलिमलापहम्' इत्यंतो द्वितीयः प्रश्नः।सूतेति।अहो सूत त्वय्येते महानुभावा अपि सूतान्मत्तः पृच्छतीति विमृश्य झटिति वाच्यमिति भावः । यथा रक्ष एव राक्षसः वय एव वायसस्तथा सत्वंत एव सात्त्वता इति तस्याण्प्रत्ययस्य तदेवमण्प्रत्ययाश्रवणे । अत्र संदर्भः । नानावतारावतारिष्वपि सत्सु महापुराणप्रारंभ एव श्रीशौनकादीनां श्रीकृष्णैकतात्पर्यम् । यथात्र पूर्वं सामान्यतोऽस्माभिरेकांतश्रेयस्त्वेन सर्वशास्त्रसारत्त्वेना त्मप्रसादहेतुत्वेन च यत्पृष्टं तदेतदेवास्माकं भवति यच्छ्रीकृष्णलीलावर्णनमित्यभिप्रेत्याहुः । भद्रं त इति । श्रीकृष्णलीलाप्रश्ने महादरौत्सुक्यादाशीर्वादः । सात्वतां यादवानां वा । जातो जगद्दृश्यो बभूव । यद्वा "सातिः सुखे" सौत्रो धातुर्ण्यंतात्तस्मात्क्विपि सात्परमात्मा स सेव्यतयास्त्येषामिति मतुपि सात्त्वंतो भक्तास्तेषां पतिरिति । यस्य।चिकीर्षया तच्च स्वयशःख्यापनमेव न तु भूभारहरणादेश्चिकीर्षया । वस्तुतः सिद्धांतसिद्धश्रवणस्मरणार्हाणि करिष्यन्निति कुंतीवाक्यपर्यवसानात् देवक्यां यशोदायां "द्वे नाम्नी नंदभार्याया यशोदा देवकीति च ।" वसुना गोधनेन "वसु धने सुवर्णादौ गोष्वग्नौ गणदैवते" इति कोशात् । दीव्यति द्योतते इति वसुदेवः । वसुषु दीव्यति द्योतत इति वा वसुप्रवर इत्यर्थः । यद्वा वसुश्चासौ देवश्चेति वसुदेवो नंदः "द्रोणो वसूनां प्रवरो धरया सह भार्यया । जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ।" इति श्रीदशमोक्तेः । यथाश्रुतार्थस्तु प्रसिद्ध एव एतेन कृष्णावतारद्वयमास्ति नंदगृहे वसुदेवगृहे च । तयोर्द्वयोरेव लीलायाः प्रश्न इति ध्येयं सुमतिभिः । एवमग्रेऽपि ॥ १२ ॥ तस्य जिज्ञासया किं फलमिति चेच्छुत्वात्मानं कृतार्थीकरिष्याम इत्याहुः । यस्यावतार एव क्षेमायेत्यादि । किं पुनः स इत्यर्थः ॥ १३ ॥ विवशोपि विशेषण पराधीनः सन्नपि यस्य श्रीकृष्णस्य नाम । तस्य सर्वावतारित्वादवतारनाम्नामपि तत्रैव पर्यवसानात् । अत एव साक्षाच्छ्रीकृष्णादपि तत्तन्नामप्रवृत्तिः प्रकारान्तरेण श्रूयते श्रीविष्णुपुराणे । तत्र तु "अखिलानामेव भगवन्नाम्नां कारणान्यभवन्" इति गद्यं तदिदं च वासुदेवदामोदरगोविंदकेशवादि नाम ज्ञेयम् । ततः संसृतेः अत्र घोरामिति विवश इति सद्य इति पदत्रयेणाजामिलादयः सूचिताः । स्वयं भगवानितिवत् । मूलभूतं भयं महाकाल एव बिभेति किं पुनर्मृत्युर्यमश्च किमुततरां यमदूता इति ॥ १४ ॥ अन्यदाधिक्यमाह ।

१ अयं वल्लभसिद्धान्तानुसारी विचार इति प्रतिभाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

को वा भगवतस्तस्य पुण्यश्लोकेड्य कर्मणः ॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥ १६ ॥
तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १७ ॥

गंगा तस्याः आपस्तु तत्पादान्निसृताः न तु तत्रैव तिष्ठंति अतस्तत्संबंधेनैव पुनंत्योऽपि अनुसेवया पुनंति न तु सद्य इति मुनीनामुत्कर्षोक्तिः ॥ १५॥ पुण्यश्लोकैरीडयानि स्तव्यानि कर्माणि यस्य तस्य यशः कलिमलापहं संसारदुःखोपशमनम्॥ १६॥ प्रश्नांतरम् । तस्येति । उदाराणि महांति विश्वसृष्टयादीनि । सूरिभिर्नारदादिभिः । कलाः

किश्चेति ॥ यस्य श्रीकृष्णस्य । पाद इत्येकत्वं सामान्याभिप्रायम् । पादावित्यर्थः । "प्रशमो भगवन्निष्ठबुद्धिता शमो मन्निष्ठता बुद्धेः" इति स्वयं श्रीभगवद्वाक्यात्स एव । प्रकृष्टः प्रशमः साक्षात्पूर्णभगवच्छ्रीकृष्णलीलाकृष्टचित्त मुनयः श्रीशुकदेवादयः सद्यः पुनंति सवासनपापेभ्यः शोधयंति । स्वर्धुनी गंगा । "योऽसौ निरंजनो देवश्चित्स्वरूपो जनार्दनः । स एव द्रवरूपेण गंगांभो नात्र संशयः" इति । स्वयं तथाविधरूपा अपि साक्षाच्छ्री वामनदेवचरणनिस्सृता अपि अनुसेवया साक्षात्सेवाभ्यासेनैव शोधयंति न तु सन्निधानमात्रेण । साक्षात्सेवयापि न सद्य इति । तस्या अपि श्रीकृष्णमाश्रितानामुत्कर्षादुत्कर्षः । एवमेव तद्यशसोप्याधिक्यं वर्ण्यते । "तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वः सारित्पादशौचम्" इति । टीका च । इतः पूर्वं स्वस्सरिदेव सर्वतोधिकं तीर्थमित्यासीत् । इदानीं तु यदुषु यदजनि जातं तीर्थं श्रीकृष्णकीर्त्तिरूपमेतत्स्वःसारिद्रूपं पादशौचं तीर्थमूनमलं चक्रे इत्येषा । विश्वनाथस्तु यत्पादावेव संश्रित्यैव वर्त्तमानाः सद्य इति स्मृतिमात्र एव पुनंति अविद्यामालिन्यानि शोधयंति किं पुनर्दृष्टाः स्पृष्टाः सेविता वेति व्याख्येयम् । "येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः । किं पुन र्दर्शनस्पर्शपादशौचासनादिभिः" इत्यनेनैकार्थप्राप्तेः।स्वर्धुन्या आप इत्यत्रापि तस्याः सकाशाद्दूरदेशं नीता इत्येव व्याख्येयम् । "मुक्तिस्त्वद्दर्शनादेवं न जाने स्नानजं फलम्" इति वाक्यार्थविरोधात् । किंच । स्वर्द्धुन्या दर्शनादेव साधूनां तु स्मरणादपि मुक्तिरिति तदपि साधूनामेवोत्कर्षो ज्ञेयः । ततश्च तास्तु तत्पादान्निसृता एवातस्तत्संबंधेन पुनन्त्योपि उपर्युपरि स्पृष्टाः सत्यः पुनंति । नुर्विकल्पे सेवया प्रणत्यादिना वा दता वा। स्वर्द्धुन्याप इति समासां ताभावस्त्वार्षः ॥१५॥ शुद्धिरात्मप्रसादः । "येनात्मा सुप्रसीदति" इति पूर्वोक्तेः । यशः ब्रह्मरुद्रेंद्रजयादिकं रासक्रीडादिकं चासाधारणमेव । "पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोकस्तु वैदेहः पुण्य श्लोको जनार्दनः ॥ पुण्यश्लोकः शांतनवः पुण्यश्लोको बलिः स्मृतः ॥ पुण्यश्लोको व्यासदेवः पुण्यश्लोकाः सनादयः" ॥ इत्यादि पुराणोक्तेः । पुण्यश्लोकैर्युधिष्ठिराद्यैः । यद्वा पुण्यश्लोकश्चासावीड्यकर्मा चेति कर्मधारयः । कलेर्युगसंबंधानि मलानि कलिं स्वांगावेशेन दुष्कृतप्रवर्त्तकत्त्वरूपं मलानि कायिकादिपापान्यपहंतीति । तथा को वेत्युक्त्या सर्वैः स्वांतःकरणशोधनार्थं कृष्णयश एव श्राव्यमिति भावः । सूत जानासत्यारभ्य कोवेत्यंतेन कृष्णावतारप्रयोजनतच्चरितयोः प्रश्नाविति ज्ञेयम् । "तस्य कर्माण्युदाराणि" इत्यादिना विश्वसृष्ट्यादिलीलाप्रश्नः । तस्योत्तरं "स एवेदं ससर्जाग्रे" इत्यादिना । उदाराणि भक्ताभीष्टप्रदानि परमानंददानि वा "उदारो दातृमहतोः" इत्यमरः । दधदिति वर्त्तमानकालेन तदवताराणां नित्यत्वं तस्य च परिपूर्णत्वं कलाः पुरुषादिरूपा दधतस्तत्तदंशानभ्यादाय तस्यावतीर्णस्य सत इति संदर्भः ॥ १६ ॥ "अथाख्याहि" इत्यादिनावतारांतर कथाप्रश्नस्तस्योत्तरं तृतीयाध्यायः । श्रीकृष्णस्य तावन्मुख्यत्वेन कथय । अथ तदनंतरमानुषंगिकतयैवेत्यर्थः । हरेः श्रीकृष्णस्य प्रकरणबलात् अवताराः पुरुषावतारा गुणावतारा लीलावताराश्च तेषां कथाः लीलाः सृष्ट्यादि कर्मरूपा भूभारहरणादिरूपाश्च आत्ममायया निजेच्छया शक्त्या "आत्ममाया तदिच्छा स्याद्गुणमाया जडात्मिका" इति महासंहितातः ॥ शुभा अमायिकीः । दधत इति वर्त्तमानकालेन लीलानां नित्यत्वं आत्ममायया योगमाय येति विश्वनाथः । अथावतारनिर्णयः । सर्वप्रधानानन्यापेक्षिमहैश्वर्यमाधुर्य्यः श्रीकृष्ण एव स्वयंरूपः प्रायस्तस्य तुल्यशक्तिधारी यः स तस्य विलासः । यथा वैकुंठनाथः न्यूनशक्तिधारी यः स स्वांशः यथा मत्स्यकूर्मादिः । यत्रै कशक्तिसंचारमात्रं स आवेशः यथा पृथुनारदादिः । पुरुषावतारगुणावतारलीलावतारभेदादवतारास्त्रिधा । महत्स्रष्टा कारणोदशायी प्रकृत्यंतर्यामी संकर्षणांशः पुरुषः प्रथमः । गर्भोदशायी समष्टिविराडंतर्यामी प्रद्युम्नांशो द्वितीयः पुरुषः । क्षिरोदशायी व्यष्टिविराडंतर्याम्यनिरुद्धांशस्तृतीयः पुरुष इति पुरुषावताराः । सत्वगुणेन विष्णुः पालनकर्त्ता क्षीरोदनाथ एव । रजोगुणेन ब्रह्मा सृष्टिकर्त्ता गर्भोदशायिनाभिपद्मोद्भवः । कचित्कल्पे तु तादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाऽऽख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ लीला विदधतः स्वैरमीश्वरस्याऽऽत्ममायया ॥ १८ ॥

ब्रह्मरुद्रादिमूर्तीः ॥ १७ ॥ अथेति प्रश्नांतरे । अवतारकथाः स्थित्यर्थमेव तत्तदवसरे ये मत्स्याद्यवतारास्तदीयाः कथाः । स्वैरं लीलाः कुर्वतः । श्रीकृष्णावतारप्रयोजन
पुण्यकारी जीव एव ब्रह्मा । तदा तत्रेश्वरस्य सृष्टिशक्तिसंचारेणावेशादावेशावतार एव।रजोगुणयोगाद्गुणावतारत्वमपि विष्णुना तस्य साम्यं तु कचित्कल्पे स्वयमेव ब्रह्मा भवति।यथा यज्ञः स्वयमेवेंद्रो जात इति।पातालादिस
त्यलोकांतः समष्टिविराट्स्थूलो ब्रह्मण एव विग्रहः प्राकृतः । सोपि ब्रह्मा शुद्धो जीवः हिरण्यगर्भस्तस्यांतर्यामी तु गर्भोदशायीश्वर एव । अथ तमोगुणेन रुद्रः संहारकर्त्ता कचिद्विष्णुरेव सदाशिवः । किञ्च सदाशिवः
स्वयं रूपांगविशेषस्वरूपो निर्गुण एव सगुणः शिवश्चांशः । ब्रह्मा तु शिवान्नाधिकः सगुणत्वेप्यस्य विष्णुना साम्यमेवेति गुणावताराः । लीलावतारास्तु चतुःसननारदवाराहमत्स्ययज्ञनरनारायणकपिलदत्तहयग्रीवहंसपृश्निगर्भ
र्षभपृथुनृसिंहकूर्मधन्वंतरिमोहिनीवामनपरशुरामरघुनाथव्यासबलभद्रकृष्णबुद्धकल्कीत्यादय एते प्रतिकल्पं प्रादुर्भवंति।मन्वंतरावतारास्तु यज्ञविभुसत्यसेनहरिवैकुंठजितवामनसार्वभौमविष्वक्सेनर्षभधर्मसेतुसुधामयोगेश्वरबृहद्भानवः ।
युगावतारास्तु शुक्लरक्तपीतकृष्णाः । एषां मध्ये केचिदावेशाः केचित्प्रभावाः केचिद्वैभवाः केचित्परावस्थाः । चतुःसननारदहरिविष्णुपृथुप्रभृतय आवेशाः । ततोधिकशक्तिमंतः प्रभावा मोहिनीधन्वंतर्यृषभव्यासदत्तशुकादयः।
ततोधिकशक्तिप्रकाशा वैभवा मत्स्यकूर्मनरनारायणवराहहयग्रीवपृश्निगर्भबलदेवयज्ञादयः । ततोप्यधिकशक्तिमंतः परावस्था उत्तरोत्तरश्रेष्ठास्त्रयः नृसिंहरामकृष्णाश्च । कृष्ण एव स्वयं भगवान्न ततोधिकः को
ध्यस्ति । तस्य वासस्थानानि पूर्वपूर्वमुख्यानि चत्वारि।व्रजमधुपुरद्वारावतीगोलोकाख्यानि । सपरिवारो बलदेवसहितो व्रजे पूर्णतमः, मथुरायां पूर्णतरः । द्वारकायां प्रद्युम्नानिरुद्धसहितः सपरिवारः पूर्णः । गोलेके पूर्णकल्पोपि
वृंदावनीयलीलत्वात्पूर्णतमसजातीयः।पूर्वपूर्वेषु माधुर्याधिक्यतारतम्यादैश्वर्याच्छादनतारतम्यम् । उत्तरोत्तरेषु माधुर्यह्रासतारतम्यादैश्वर्यप्रकाशतारम्यम्। यस्या जलेऽनेककोटिब्रह्मांडानि महाविष्णुरोमकूपगतानि तस्या विरजाया
महावैकुंठलोकपरिखीभूताया उपरि महावैकुंठलोकः । तदूर्द्ध्वभागे गोलोकस्तत्र गोलोकनाथः श्रीकृष्णो देवलीलः सपरिवारो वर्त्तते । तस्य विलासो महावैकुंठनाथः परव्योमनाथनामा । तस्य विलासो वासुदेवस्तस्य विलासः
परमात्मा । ब्रह्म च निर्विशेषरूपम्। गोलोकनाथस्य द्वितीयव्यूहो बलदेवस्तस्य विलासो महावैकुंठे संकर्षणस्तस्यांशः कारणार्णवशायी । तस्य विलासो गर्भोदशायी ब्रह्मांडांतर्यामित्वेन प्रद्युम्नांशस्तस्य विलासः क्षीरोदशायी ।
अनिरुद्धांशः तस्य विलासोंतर्यामी । मत्स्याद्यवतारास्तु गर्भोदशायिविलासाः । द्वारकामथुरावृंदावनाख्ये धामत्रये श्रीकृष्णस्य नरलीलत्वादैश्वर्याधिक्यतारतम्याक्रमेण माधुर्याधिक्यतारतम्यम् । सा लीला द्विधा । प्रकटाऽ
प्रकटा च । या बाल्यपौगण्डविलाससहस्रस्य सपरिकरस्य श्रीकृष्णस्यानंतप्रकाशेन नित्यमेवाप्रकटलीला वर्त्तन्ते ता एवैकेनैव प्रकाशेन सपरिकरेण कृष्णेन यदा प्रपंचे क्रमात्प्रकाश्यन्ते तदा प्रकटा इति । गमनागमने तु
तत्तद्धामतः प्रकटलीलायामेवेति विशेषः।एकमेव वृंदावनमेकैव मथुरा एकैव द्वारवती ब्रह्मांडसमूहकोटिमध्यगतभारतभूमौ तत्तदंडवासिजनैर्दृश्यते।प्रकटलीला च जन्मादिमौशलांता प्रत्येकब्रह्मांडसमूहे क्रमेण तत्रतत्रस्थैर्दृश्या।यथा
ज्योतिश्चक्रस्थ एव सूर्ये किरणावलीति।यथा ज्योतिश्चक्रस्थ एव सूर्य एकस्मिन्वर्षे पूर्वाह्णादिकं समाप्यान्यस्मिन्वर्षे प्रकाशयति एवमेव कृष्णः प्रकटप्रकाशो निजधामस्थ एव एकस्मिन्ब्रह्मांडे बाल्यादिलीलाः समाप्य प्रकटयति ।
अन्यस्मिन्किमपि न प्राकटयेत । बाल्यादिलीला नित्या एव सच्चिदानंदरूपाः । मौशलमहिषीहरणलीलास्तु कृत्रिमा एवेंद्रजालवत् । लीलांतरस्थनित्यत्वसंगोपनार्थत्वमेतयोरुपासकाभावात् । किञ्च प्रकटलीलायामपि
श्रीवृंदावनस्य मणिमयभूम्यादिकल्पवृक्षादिमत्त्वं तत्परिवारेण केनचिदपि न दृश्यते दृश्यते च केनचित्तदिच्छावशात् । प्रकटलीलासमाप्त्यनंतरं तु तत्रस्थजनेन भजनाधिक्येनात्युत्कंठायां जातायामेव दृश्यते।तत्रापि स्ववासना
तदिच्छानुसाराभ्यामिति विवेकः । एवं च सर्वरूपेभ्यो व्रजेंद्रनंदनस्य मुख्यत्वम्।सर्वधामतो गोकुलस्य मुख्यत्वम्।तत्रापि "चतुर्द्धा माधुरी तस्य व्रज एव विराजते। ऐश्वर्यक्रीडयोर्वेणोस्तथा श्रीविग्रहस्य च" भागवतास्तु "मार्क
डेयोंबरीषश्च वसुर्व्यासो विभीषणः । पुंडरीको बलिश्शंभुः प्रह्लादो विदुरोद्धवौ॥दाल्भ्यः पराशरो भीष्मो नारदाद्याश्च वैष्णवाः ॥१७॥ एषु प्रह्लादः श्रेष्ठस्ततोऽपिपांडवास्तेभ्योपि केचिद्यादवास्तेष्वप्युद्धवस्तस्मादपि व्रजदेव्यस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादुस्वादु पदेपदे ॥ १९ ॥ कृतवान्किल वीर्याणि सह रामेण केशवः ॥
अतिमर्त्यानि भगवान्गूढः कपटमानुषः ॥२०॥ कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयम् ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥२१॥

प्रश्नेनैव तच्चरितप्रश्नोऽपि जात एवेति ज्ञातव्यम् ॥ १८ ॥ अत्यौत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छन्तस्तत्रात्मनस्तृप्त्यभावमावेदयंति । वयं त्विति । योगयागादिषु तृप्ताः स्मः । उद्गच्छति तमो यस्मात्स उत्तमस्तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः अलमिति न मन्यामहे । तत्र हेतुः । यद्विक्रमं शृण्वताम् । यद्वा । अन्ये तृप्यंतु नाम वयं तु नेति तुशब्दस्यान्वयः । अयमर्थः । त्रेधा ह्यलंबुद्धिर्भवति । उदरादिभरणेन वा रसाज्ञानेन वा स्वादुविशेषाभावाद्वा । तत्र शृण्वतामित्यनेन श्रोत्रस्याकाशत्वादभरणमित्युक्तम् । रसज्ञानमित्यनेन चाज्ञानतः पशुवत्तृप्तिर्निराकृता । इक्षुभक्षणवद्रसांतराभावेन तृप्तिं निराकरोति । पदेपदे प्रतिक्षणं स्वादुतोऽपि स्वादु ॥ १९ ॥ अतः श्रीकृष्णचरितानि कथयेत्याशयेनाहुः । कृतवानिति । अतिमर्त्यानि मर्त्यानतिक्रांतानि गोवर्धनोद्धरणादीनि । मनुष्येष्वसंभावितानीत्यर्थः । ॥ २० ॥ ननु याजनाध्यापनादिव्यग्राणां कुतः एतच्छ्रवणावकाशः स्यादत आहुः । कलिमिति । कलिमागतं ज्ञात्वा तद्भिया विष्णुपदं गन्तुकामाः दीर्घसत्रेण निमि

भ्योपि राधेति । तदुक्तं "त्रैलोक्ये पृथिवी धन्या यत्र वृंदावनं वनम् । यत्र राधासखीवर्गस्तत्र राधा प्रिया मम" इति कृष्णवाक्यं भागवतामृतेस्तीत्यलं प्रसक्तानुप्रसक्त्या ॥ १८ ॥ वयं त्वित्यादिद्वयं सूत जानासीत्येतत्प्रश्नानुवाद एव । अत्रोभयत्रोत्तरं "भावयत्येष सत्वेन इति लोकपालनं तच्चरितमप्युक्तम् ॥ एवं षट्प्रश्नाः द्वितीयाध्याये चत्वार्युत्तराणि ॥ तत्र श्रवणे उत्तमैः श्लोक्यते कीर्त्यत इति उत्तमश्लोकः । अलमिति न मन्यामहे । एतेन योगयागादिषु तृप्ताः स्म इति भावः । तत्रातृप्तौ बहुश्रवणे कथं तृप्तिर्नेति चेत्तत्राह । यद्वेति । अत्राशयमाह । अयमर्थ इति । तत्र त्रिधालंबुद्धिमध्ये आकाशत्वादिति । "कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्" इति तल्लक्षणात् । विक्रमस्य चामूर्तत्वान्न भरणम् । पदे पदे प्रतिसुतिङंतमेव स्वादुस्वादुचर्वितस्येक्षुदंडादेरिव न नीरसत्वेन हेयत्वं प्रत्युतातिस्वादुत्वेन परमोपादेयत्वमिति ॥ १९ ॥ यतस्तत्रालंबुद्ध्यभावः अतो हेतोः । इत्यर्थ इति न हि बलयुतेनापि नरेण पर्वतश्चालयितुमपि शक्यते कुत उद्धर्तुमिति भावः । ननु मानुषः कथमतिमर्त्यानि कृतवांस्तत्राह । कपटमानवः । अत एव गूढः । स्वतस्तु तद्रूपतयैव भगवान् । अत एव स्यमंतकाहरणे 'पुरुषं प्राकृतं मत्वा' इत्यतेन जांबवतोऽन्यथाज्ञानव्यंजकेन वाक्येन तस्य प्राकृतत्वं निषिद्ध्य पुरुषत्वं स्थाप्यते । एवं "मायामनुष्यस्य वदस्व विद्वन्" इत्यादिष्वपि ज्ञेयम् ।यस्मात्कपटमानुषस्तस्माद्गूढः । विश्वनाथः नराकृतिपरब्रह्मत्वान्मर्त्योप्यतिमर्त्यानि तात्कालिकमनुष्येष्वसंभावितानि । तदपि गूढः । तत्र हेतुः कपटं भक्तहितार्थं ब्रह्मवेशादिना प्रार्थनलक्षणं मानुषेषु प्राकृतेषु जरासंधादिषु यस्य तथा । कपटं प्रेमविलासार्थं धर्मोपदेशादिलक्षणं मानुषेषु वेणुनादाकृष्टगोपीजनेष्वप्राकृतेषु यस्य सः सप्तम्याः परनिपातः । गड्वादित्वात् । तेषांतेषां मायया मोहनात् प्रेम्णा मोहनाच्चैवं कपटो नेश्वरो भवितुमर्हतीति प्रत्यायनाद्गूढ इत्यर्थः ॥ २० ॥ ननु याज्ञिकानां युष्माकमीदृशं कृष्णयशःश्रवणौत्सुक्यमतिचित्रमित्याक्षिपति । नन्विति । सत्यं संप्रत्यस्माकं याज्ञिकत्वं प्रथमात्रमेव जातमिति जानीहीत्याहुः । कलिमिति । लब्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ॥ कलिं सत्त्वहरं पुंसां कर्णधार इवार्णवम् ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥ २३ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां प्रथमस्कंधे नैमिषेयोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ व्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥ १ ॥ सूत उवाच ॥ यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥ २ ॥

त्तेनात्र वैष्णवे क्षेत्रे आसीनाः हरेः कथायां सक्षणाः लब्धावसराः ॥ २१ ॥ अस्मिंश्च समये त्वद्दर्शनमीश्वरेणैव संपादितमित्यभिनंदंति । त्वमिति । कलिं संसारं निस्तर्तुमिच्छताम् । अर्णवं तितीर्षतां कर्णधारो नाविक इव ॥ २२ ॥ पुनः प्रश्नांतरम् । ब्रूहीति । धर्मस्य वर्मणि कवचवद्रक्षके स्वां काष्ठां मर्यादां स्वस्वरूपमित्यर्थः । अस्य चोत्तरम् । "कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह" इत्ययं श्लोकः ॥ २३ ॥ इति श्रीमद्भागवते प्रथमस्कंधे भावार्थदीपिकायां टीकायां प्रथमोऽध्यायः ॥ १ ॥ तदेवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः ॥ द्वितीये तूत्तरं सूतश्चतुर्णामाह तेष्वथ ॥ १ ॥ विप्राणामित्येवंभूतैः सम्यक्प्रश्नैः सम्यग्हृष्टो रोमहर्षणस्य पुत्रः उग्रश्रवास्तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे उपक्रांतवान् ॥ १ ॥ प्रवचनस्योपक्रमो नाम गुरुदेवतानमस्कार इति तमाह । यमिति त्रिभिः । तत्र स्वगुरोः

त्सवाः । क्षण उत्सवे कालविशेषेऽवकाशे च ॥ २१ ॥ सत्त्वहरं धैर्यहरम् 'सत्वं धैर्ये गुणे सत्ये' इत्याभिधानात् ॥ २२ ॥ योगेश्वर इति सामर्थ्यं ब्रह्मण्य इति दयालुत्वं स्वां कांष्ठां स्वीयां स्थितिं मर्यादाम् । सा च साविर्भावात्सपादशतवर्षान्ते प्रापञ्चिकजनदृष्टयविषयतैव "काष्ठोत्कर्षे स्थितौदिशि" इति "मर्यादा धारणा स्थितिः" इति चामरः । धर्मो भक्तिज्ञानलक्षणः । तत्र पुंसामेकांततः श्रेय इति साधनविषयः १ सर्वशास्त्रसारं "ब्रूहि नः श्रद्दधानानां येनात्मा सुप्रसीदति" इति २ देवक्यां किमर्थं जातः "तन्नः शुश्रूषमाणानामर्हस्यंगानुवार्णितुम्" इति ३ तस्य कर्माणि "ब्रूहि नः श्रद्दधानानां ललिया दधतः कला" इति ४ "अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा" इति ५ ब्रूहि योगेश्वरे कृष्णे धर्मः कं शरणं गत" इति ६ षडेव प्रश्नाः एतत्प्रत्युत्तराण्येव सप्रसंगानि श्रीभागवतमिति विवेचनीयम् ॥ २३ ॥ इति भावार्थदीपिकाप्रकाशे बंशीधरशर्मसंदब्धे प्रथमस्कंधे प्रथमोऽध्यायः॥ १ ॥तदेवं पूर्वोक्तरीत्या तेषु षट्सु चतुर्णां शास्त्रसारवीर्यकर्मपालनरूपाणाम् ॥ १ ॥ "रोमाणि हर्षयांचक्रे श्रोतॄणां यः स्वभाषणैः । कर्मणा प्रथितस्तेन रोमहर्षणसंज्ञया" इति कौर्मोक्तेरन्वर्थनामैव सूतो न तु डित्थादिवदर्थशून्यनामेति । उग्रस्य नृसिंहतापनीयोपनिषत्प्रतिपाद्यस्य वस्तुनः श्रवः श्रवणं यस्य स उग्रश्रवा अपि तथाविधनामा ॥ १ ॥ तत्र त्रिषु । अनुपनीतस्य प्रव्रजनाऽनर्हत्त्वादाह । यद्वेति ।

---

१ ननु श्रीशुकोऽनुपनीतः कथं वेदमधीतवान् । "शूद्रो वाऽनुपनीतो वा पठेद्वा शृणुयाच्च यः । वेदवाक्यं स कांक्षेत यब्धुं स्वां मातरं हठात् ॥ यस्तात्पर्यमविज्ञाय व्याख्यां कुर्यान्निजेच्छया । श्रुतेः स मात्रा यभति तं दृष्ट्वा स्नानमाचरेत् ॥" इति वरतन्तुसंहितोक्तेस्तत्राह–"तं महात्मा स्वयं प्रीत्या देव्या सह महाद्युतिः । जातमात्रं मुनेः पुत्रं विधिनोपानयत्तदा ॥" इत्युक्तेस्तं महादेवस्तदैवोपनीतवानिति । श्रीस्वामिचरणैरप्यनुपेतं मामुपनयस्वेत्युपनयनार्थमनुपसन्नामीति व्याख्यातम् । तेनेति ज्ञायत इत्येवं कथनं विनैव स्वयं श्रीमहादेवेनोपनीतम् । अत एव यद्वेति। केनाप्यननुगतमुपनयनसत्त्वमेव बोधयतीति पक्षः । ननु "ब्राह्मणेन वेदविदा ह्युपनेया द्विजातयः" इत्युक्तेः कथं शिव उपनेताऽभूत्तत्राह–"त्वं हि भगवो देवेषु ब्राह्मणः" इति जाबालश्रुतेः श्रीशिवो ब्राह्मण एवेति । वस्तुतस्तु श्रीशुकबुद्धौ स्वयमेव वेदाः प्रादुर्बभूवुः "उत्पन्नमात्रं तं वेदा उपतस्थुः ससंग्रहाः ॥ सरहस्या महाराज यथास्य पितरं तथा । बृहस्पतिं च वव्रे स वेदवेदांगभाष्यवित् । उपाध्यायं महाराज धर्ममेवानुचिन्तयन् ॥" इति । ननु "अष्टवर्षं ब्राह्मणमुपनयेत्" इति श्रुतेश्च का गतिः । तस्या मनुष्याधिकारपरत्वेन श्रीशुकस्य साक्षान्नन्दनन्दनरूपत्वात्तत्रेयं शंकैव नोदेति । "नन्दनन्दनरूपो हि श्रीशुको व्यासनन्दनः ।" इति स्कान्दीयभागवतमाहात्म्योक्तेः ॥ किं च ब्रह्मवैवर्तोक्तरीत्या गर्भस्याब्दसंख्यया वा समाधेयम् । "गर्भाज्जनेर्वाष्टमे" इति ज्योतिःशास्त्रात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुकस्यैश्वर्यं तच्चरितेनैव द्योतयन्नाह । यमिति । यं प्रव्रजंतं संन्यस्य गच्छंतम् अनुपेतं मामुपनयस्वेत्युपनयनार्थमाचार्यमनुपसन्नम् । यद्वा केनाप्यनुपेतमननुगतमेकाकि
नमित्यर्थः । तत्र हेतुः अपेतकृत्यं कृत्यशून्यं कर्ममार्गे अप्रवर्तमानं नैष्ठिकत्वात् । द्वैपायनो व्यासो विरहात्कातरो भीतः सन्पुत्र ३ इति प्लुतेन आजुहाव आहूतवान्।दूरादाह्वा
ने प्लुते सत्यपि संधिरार्षः । तदा तन्मयतया शुकरूपतया तरवोऽभिनेदुः प्रत्युत्तरमुक्तवंतः । पितुः स्नेहानुबंधपरिहाराय यो वृक्षरूपेण उत्तरं दत्तवानित्यर्थः । तं मुनिमान

इत्यर्थ इति । उप समीपमितः प्राप्त उपेतः न उपेतोऽनुपेतोऽसंग इति भावः । तत्रासंगत्वे द्विर्गता अंतर्गता वाऽऽपोऽत्रेति द्वीपः "ऋक्पूः"इत्यः समासांतः । "द्व्यंतरुपसर्गेभ्योऽप ईत्" द्वीप एवायनं स्थानं यस्य स तथा
सत्यवत्या तत्र लज्जया स्थापितत्वादिति महाभारतादवसेयम् । केचित् "पुलिनं द्वीपमुच्यते" इत्याहुस्तन्मते पुलिनं जलादचिरनिर्गतं क्षेत्रं तदेवायनं तपोभूमिरस्येति तथा । ततः स्वार्थिकाणि द्वैपायनः । प्लुतेन त्रिमात्र
स्वरांतेन । पुत्र इत्येवं रूपेण "अप्लुतवदितौ" इति सूत्रे इतिशब्दे प्लुतोऽप्लुतवदित्यत्रावैदिक इतिशब्दो गृहीतोऽस्य शास्त्रस्य साक्षाद्वेदरूपत्वादत्राप्लुतत्वं न भवति। किंतु प्लुतत्वमेवेत्यभिप्रेत्यस्वामिचरणैर्व्याख्यातं संधिरार्षइति ।
इत्यर्थ इति । यथास्मासु जन्यजनकभावे विद्यमानेपि पितृपुत्रव्यवहारो नास्ति तथा त्वय्यपि नास्त्यतः पुत्रेत्याह्वानं व्यर्थमित्यर्थः । यद्वाऽयं सर्वभूतानि हरति प्राप्नोत्यंतर्यामितयेति सर्वभूतहृत् । अतोपि पुत्रेत्याह्वानं सर्वांतर्यामि णि
न युज्यत इति भावः । अत्र संदर्भः। अथोपक्रमे स्वगुरुं नमस्कुर्वंस्तस्मागुद्ण्यं स्मरति द्वाभ्याम् । तत्र यमित्यत्र तन्मयतयेति तच्छब्देन तत्तादात्म्यापन्नः परमात्मोच्यते। स हि तदानीं ध्यानावेशेन प्राप्तसर्वांतर्या.मितादात्म्यः ।
'दृष्टानुयांतम्' इत्यादेर्वक्ष्यमाणत्वात् । यत एव तस्य तदुत्तरदानानुसंधानराहित्ये सति तत्पक्षपातेनांतर्यामिणैव स्वयं तरूणामपि द्वारा तदुत्तरं दत्तमिति । यद्वा न केवलं सर्वात्मब्रह्मनिष्ठत्वान्निरपेक्षेपि तस्मिन्पितैव स्निग्धो
जातः अपि तु तरवोपि जाता इत्याह । तन्मयतया तद्वत्स्नेहमयतया तरवोपि अभि तदाभिमुख्येन नेदुः । किमुतान्ये जीवा इत्यर्थः।एतच्च तत्प्रभावदेव ज्ञेयम्।अत एव सर्वभूतानां हृदयं यस्मिंस्तम्।अनपेतमिति चित्सुखपा
ठांतरम् । विश्वनाथस्तु अत्रैवं सूतस्य परामर्शः। एतत्प्रश्नस्योत्तरं सर्वशास्त्रसारं किमपि वस्त्वहं ब्रवीमि।तेन चेदेषामात्मा न प्रसीदेत्तर्हि किं भविष्याति 'येनात्मा सुप्रसीदतीत्युक्तत्वात्।ततश्च सारेष्वपि मध्ये यस्यात्मप्रसादकत्वं
भव्यैर्निरूपितं सोऽन्वेषणीयः । तत्रापि केषांचिन्मते सांख्यस्यैव केषांचिन्मीमांसादेः केषांचिदुपनिषदामेव केषांचित्तदर्थतात्पर्यनिर्णायकानां वेदांतसूत्राणामेवात्मप्रसादकत्वमस्ति यद्यपि तदपि न तत्प्रत्येतव्यं तेषामपि
मुख्यस्य तत्तत्सर्वमतविदुषोपि कृतवेदांतसूत्रस्य श्रीकृष्णद्वैपायनस्यापि चित्ताप्रसाददृष्टेः।ततश्च यदाविर्भावेन तस्याप्यात्मा प्रसीदतिस्म परीक्षिन्महासदसि तस्थुषामेव तेषां सर्वसारवादिनां महाज्योतिषामत्र एव परीक्षयोत्तीर्णं
शुद्धं जांबूनदमिवात्मप्रसादकत्त्वे निर्विवादमेव ।यत्स्थिरं व्यराजत तदेव श्रीभागवतं मम वक्तव्यमभूदिति ततस्तद्वक्तारं श्रीशुकदेवं शरणं यामीति तं प्रणमति।।यमिति।। प्रव्रजंतं संन्यस्य गच्छंतम्। अनुपेतं निकटमप्राप्तम् ।
अपेतकृत्यमुपनयनादिरहितम् । हे पुत्रेति प्लुतेनाजुहाव । न केवलं परमनिरपेक्षेपि तस्मिंस्तत्पितैव स्निग्धोभूदपि तु "येनार्चितो हरिस्तेन तर्पितानि जगंत्यपि । रज्यंति जंतवस्तत्र स्थावरा जंगमा अपि ।" इति पाद्मोक्तेः
स्तरवोपीत्याह । तन्मयतया शुकमयतया तरवोपि आभिमुख्येन हेतुना हे पुत्रेति प्रतिध्वनिमिषेण व्यासवदाजुहुवुः।'यो हि यस्मिन्नासज्जति स तन्मय उच्यते । यथा स्त्रीमयः कामुकः'इति। ततश्च सर्वेषां.भूतानां हृदयं मनो
यस्मिंस्तम् । तेन सर्वमनोहरे भगवद्विग्रह इव तस्मिन्स्नेहोयं न प्राकृतमोह इति व्यासस्याप्यविवेकोयमिति दोषः पराहतः । यद्वा तदा तन्मयतया शुकरूपतया तरवोभिनेदुः प्रतिध्वनिमिषेग हे पुत्रेति प्रत्युत्तरं ददुः । यादि
तवाहं पुत्रस्तदा त्वमपि मे पुत्र इत्यतः "कस्य के पितृपुत्राद्या मोह एव हि कारणम्" इति तत्त्वमविज्ञाय किमिति मुह्यसीति व्यंजयामासुः । तन्मयत्वोपपादनाय सर्वभूतानां हृत् मनोऽयते योगबलेन प्रविशतीति
सर्वभूतहृदयस्तम् । तेन स एव ममाप्यंतः प्रविश्य मन्मुखेनैव श्रीभागवतं वदतु । यो हि जडानपि वृक्षान्प्रविश्य प्रत्युत्तरेण पितरमपि समादधौ स एव चेतनं मां प्रविश्य श्रीभागवतेनैवैषां श्रोतृगामात्मानं प्रसादयत्विति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः स्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽन्धम् ॥
संसारिणां करुणयाऽऽह पुराणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनाम् ॥ ३ ॥

तोऽस्मि । तन्मयत्वोपपादनाय विशेषणम् । सर्वभूतानां हृत् मनः अयते योगबलेन प्रविशतीति सर्वभूतहृदयस्तम् ॥ २ ॥ तत्कृपालुतां दर्शयन्नाह । य इति । अंधं गाढं तमः संसाराख्यमतितर्तुमिच्छताम् । पुराणानां मध्ये गुह्यं गोप्यम् । तत्र हेतुत्वेन चत्वारि विशेषणानि । स्वो निजोऽसाधारणोऽनुभावः प्रभावो यस्य तत्स्वानुभावम् । अखिलश्रुतीनां सारम्।एकमद्वितीयमनुपममित्यर्थः।आत्मानं कार्यकारणसंघातमधिकृत्य वर्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकम्।उपयामि शरणं व्रजामि।।३।।

प्रवचनकाले श्रीभागवतस्य वक्तान्योपि ध्यायेदिति सूचितम् ॥२॥ तद्वृत्तिस्तादितरावृत्तिरसाधारणः यः श्रीमद्भागवतशास्त्रस्य प्रभावः सोन्यत्र नास्तीत्यर्थः संदर्भः।अतो य एवं साक्षाच्छ्रीकृष्णद्वैपायनेपि स्वपितर्यनुसंधानरहित आसीत्स एव श्रीभगवल्लीलावर्णनमयश्रीमद्भागवतनामैतद्ग्रंथावेशेनेदृशोपि जात इत्याह।य इति तदेतच्छ्रीसूतस्य शास्त्रोपक्रमाय श्रीगुरुप्रणतिरूपं वाक्यं'स्वसुखनिभृतचेता' इत्यादिना तदुपसंहाराय तद्रूपेण वाक्येनैकीकृत्य व्याख्यायंते । यः खलु "हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः । मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ" इत्यनुसारेण पुराणगुह्यमिदं श्रीभागवताख्यमाह गिरा प्रकाशयामास तं "तत्राभवद्भगवान्व्यासपुत्रः" इत्येस्य पूर्वोत्तरं प्रवक्तृकानुसारेण मुनीनां गुरुमुपयामि शरणमाश्रये । कीदृशं तत् तत्राह । किं वा परैरीश्वर इत्याद्यनुसारेणासाधारणप्रभावम् ।पुनः कीदृशं तत् । तत्राह "स्वसुखनिभृतचेताः" इत्याद्यनुसारेणात्मानं स्वचित्तमधिकृत्य वर्त्तते यत्परमरहस्यमजितरुचिरलीलाख्यं तत्त्वं तस्य दीपकं प्रकाशकम्। नन्वेवंचेत्तर्हि कथं प्रकाशयते तत्राह । अंधंकरणं यत्तमः सर्वाविरकमज्ञानं तर्त्तुमिच्छतां संसारिणां करुणया तेषु यत्कारुण्यं तेन प्रीत्यर्थः । यद्यप्यजितरुचिरलीलारहस्यं न ते जानंति तथापि तत्पर्यंतप्रकाशकं तत्प्रकाशयामासेत्यहो करुणाया गारिमा दृश्यतामिति भावः । सेयञ्च तस्य करुणा तल्लीलानुभवेन तत्स्वभावलाभाज्जाता केवलात्मारामत्वे"भजतोपि न वै केचिद्भजन्त्यभजतः कुतः । आत्मारामा आत्मकामा अकृतज्ञा गुरुद्रुहः" इति श्रीभगवद्वाक्यविरोधादसौ न स्यादेवेति च।विश्वनाथस्तु अस्मिन्नर्थे तस्य कृपालुत्वमेव हेतुरस्त्येवेत्याह।यइति।संसारिणां करुणयाहेति न केवलमयं परीक्षिदेव तारयितव्यः किं त्वग्रेपि जनिष्यमाणास्संसारिणोऽनेनैव तरंत्विति तदैव सर्वानर्वाचीनान्सस्मारेति भावः । अंधं गाढं तमोऽविद्यामतिशयेन सुखेनैव तरीतुमिच्छतामात्मन्यधिष्ठितानि तत्त्वानि महदादीनि तेषां दीपं प्रकाशकमिति मुमुक्षूणामविद्याक्षयोऽनुसंहितं फलमुक्तं शुद्धभक्तानां त्वखिलानां श्रुतीनामुपनिषदां सारं श्लेषेण श्रुतीनां श्रवणानां श्रोत्रेंद्रियास्वाद्यानां सारमिति । अतः पूर्वोक्तं निगमकल्पतरुफलत्वमेवास्य सूचितम् । अपूर्वोक्तव्याख्यानङ्गीकारे "स संहितां भागवतीम्" इति "यत्रैषा सात्वती श्रुतिः" इत्यादिवाक्यैर्वेदवाचकसंहिताश्रुतिपदाभ्यां श्रीभागवतस्योक्तत्वेन साक्षाद्वेदाविर्भावकर्तृश्रीहयग्रीवभगवत्प्रेरितसरस्वतीप्रसादलब्धसूत्रसारस्वतव्याकरणप्रणेतृपरमाप्तश्रीस्वरूपान्तानुभूत्यादिमस्कारिणा कारकप्रक्रियायां छान्दसप्रयोगोदाहरणे " दध्ना जुहोति" "पुनन्तु ब्रह्मणस्पतिः" इति वाक्यसमभिव्याहृतेन श्रीदशमस्कन्धीयेन "व्रजतीर्विरेजुः" इत्युदाहरणेनोपबृंहितसाक्षाद्वेदरूपत्वेन चास्य प्रश्नोऽपि श्रीशौनकर्षेर्न संभाव्येत । शौनकनामान्वर्थताव्याघातापत्तेः ॥ "शोनः सर्वविवेकः स्यात्" इति लीलावतीकोशात्सर्वविवेकवत एव शौनकत्वम्अद्विजातिसूतं प्रति तत्कृतप्रश्ने तन्नसेत्स्यतीति तत्त्वम् । त एव स्वः स्वत एवानुभावो रसोत्कर्षप्रभावज्ञापको यस्य तत् । स्वसुखनिभृतचेता इत्यत्राजितरुचिरलीलाकृष्टसार इति हरेर्गुणाक्षिप्तमतिराख्यानं यदधीतवानित्यादिभ्यः । यद्वा स्वस्यानुभावः प्रभावो यस्मात् । यद्व्याख्यानादेव शुकस्य सर्वमुनिभ्योप्युत्कर्षोभूदितिभावः । एकमनुपममद्वितीयमित्यर्थः । मुनीनां परीक्षित्समोपविष्टानां नारदव्यासादीनामपीदमश्रुतचरमिव जातमिति तानपि श्रीशुकदेव उपदिदेश । देश्यमिति ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥ मुनयः साधु पृष्टोऽहं भवद्भिर्लोकमंगलम् ॥ यत्कृतः कृष्णसंप्रश्नो येनाऽऽत्मा सुप्रसीदति ॥ ५ ॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययाऽऽत्मा संप्रसीदति ॥ ६ ॥

जयत्यनेन संसारमिति जयो ग्रंथः तमुदीरयेदिति स्वयं तथोदीरयन्नन्यान्पौराणिकानुपशिक्षयति ॥ ४ ॥ तेषां वचः प्रतिपूज्येति यदुक्तं तत्प्रतिपूजनं करोति। हे मुनयः साधु यथा भवति तथाहं पृष्टः। यतो लोकानां मंगलमेतत्। यद्यतः कृष्णविषयः संप्रश्नः कृतः। सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापि कृष्णे पर्यवसानादेवमुक्तम्॥ ५॥ तत्र यत्प्रथमं पृष्टं सर्वशास्त्रसारमैकांतिकं श्रेयो ब्रूहीति तत्रोत्तरम्। स वै पुंसामिति। अयमर्थः। धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः

गुरुं नत्वा। देवतादीन्प्रणमति। नारायणमिति। देशाधिकारित्वेन नरनारायणावस्थाधिष्ठातृदेवते निर्दिष्टे। नरोत्तममिति। पुरुषोत्तमः श्रीकृष्णोऽस्य देवता सरस्वती शक्तिश्वकाराद्व्यास ऋषिः। व्यासमिति पाठे स्पष्ट एव। बीजं तु प्रणवो ज्ञेयः। छंदोत्र प्राधान्येन गायत्र्येव ज्ञेया। तयैवारब्धत्वात्। तान्नमस्कृत्य। जयेति क्रियापदमाक्षेपलब्धं श्रीकृष्णसंबोधनकमुदीरयेदिति। स्वयं तथोदीरयन्नन्यानपि पौराणिकानुपशिक्षयति। अत्र क्त्वाप्रत्ययेनैवानंतर्ये सिद्धे तत इति कर्तृविशेषणं तन्यते विस्तार्यते स्वबुद्ध्यनुरूपो ग्रंथोऽनेनेति ततः।केचित्तु नरशब्दोत्र गुरुपरो ग्राह्यः। नृणाति नयोपदेशेन शिष्यं संसारादुद्धरतीति नर इति व्युत्पत्तेः। नरोत्तमशब्देन वायुर्ग्राह्यः नरेषूत्तमो नरा उत्तमा येनेति वा नरोत्तमस्तं विना देहस्यास्पृश्यत्वदर्शनात्। प्राणेंद्रियसंवादेषूपनिषत्कथायां वायोरेवोत्कर्षस्य श्रवणाच्च।वायोर्नतिस्तु वक्तुः शरीरादिस्वास्थ्यार्थं श्रोतॄणामपि तथात्वार्थं चेति ज्ञेयम्॥ श्रुतौ तु साक्षाद्ब्रह्मैवोक्तः"ॐ नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतं वदिष्यामि सत्यं वदिष्यमि तन्मामवतु तद्वक्तारमवतु अवतु मामवतुवक्तारम्" ॥ जयति संसारमनेनेति जयः पुराणमहाभारतादिः। तदुक्तम् "अष्टादशपुराणानि रामस्य चारितं तथा। कार्ष्णं वेदं पञ्चमञ्च यन्महाभारतं विदुः। तथैव विष्णुधर्माश्च शिवधर्माश्च शाश्वताः। जयेति नाम तेषां च प्रवदंति मनीषिणः॥" इति भविष्ये॥ ४॥ हे मुनय इति। मननशीला एवैतादृशप्रश्नान्कुर्वन्तीति भावः। अत एवोत्तरेष्वपि पद्येष्वधोक्षजवासुदेवसात्वताम्पतिकृष्णशब्दास्तत्प्राधान्यविवक्षयैव पठिताः। अत्र श्रेयः प्रश्नस्याप्युत्तरं लोकमंगलमित्येतावतैव दत्तं भवति। तथाप्यात्मप्रसादहेतोश्च 'येनात्मा सुप्रसीदति' इत्यनेन ये नव प्रश्नास्तत्र प्रश्नेषु अत्राशयमाह। अयमर्थ इति।तत्र द्वयोर्मध्ये। अत्र विश्वनाथः "सर्वशास्त्रसारमैकांतिकं श्रेयो ब्रूहि"इति प्रश्नद्वयस्योत्तरमाह।स वा इति। पुंसां पुम्मात्राणामेव धर्मः परः परमः श्रवणकीर्त्तनादिलक्षणः। यदुक्तं " एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामश्रवणादिभिः " इत्यतः परशब्दविशेषो धर्मो भक्तियोग एव भवेदिति। तथात्र वतुप्प्रत्ययेनैवकारेण चैतदन्यस्य परधर्मत्वं च निषिद्धं यतो भक्तिः प्रेम लक्षणा भवेत्। अहैतुकीं हेतुं विनैवोत्पद्यमानातिसगुणा व्यावृत्ता। ननु महानयमपलापः क्रियते। मैवं श्रवणकीर्त्तनादिरूपो यो धर्मः स भक्तिरेव साधननाम्नी सैव पाकदशायां प्रेमनाम्नी ते द्वेऽपि भक्तिशब्देनैवोच्येते। 'भक्त्या संजातया' 'भक्त्या बिभ्रत्युत्पुलकां तनुम्' इति "यतो भक्तिरधोक्षजे" इत्यादिषूत्तरस्या भक्तेः पूर्वा भक्तिः कारणं पक्वाम्रस्य कारणमामाम्रमितिवत्। स्वादभेदनिबंधनमेव तस्य कारणत्वं बालबोधनार्थं काल्पनिकमेव न तु वास्तवम्। न ह्येकस्यैव पुरुषस्य बाल्ययौवनाद्यनेकावस्थावतो हेतुहेतुमद्भावस्तात्विक इति घटपटौदनादिषु मृत्तन्तुतंडुलादीनां नामरूपलोप इवेति। न तादृशत्वमत्र व्याख्यातुं शक्यमित्यवसेयम्। न च भक्तेः प्रसिद्धो हेतुः साधुसंग एवास्तीति वाच्यम्। तस्याप्यादौ श्रद्धा ततः साधुसंगोथ भजनक्रिये तत्रादौ भक्तेर्द्वितीयभूमिकात्वेनोक्तत्वात्। भक्तित्वमेव 'स्यान्महत्सेवया विप्रा' इत्यग्रेपि व्याख्यास्यमानत्वाच्च। किञ्च दानव्रततपोहोमादिनिष्कामकर्मयोगश्च ज्ञानांगभूतायाः सात्विक्या एव भक्तेः कथंचिद्धेतुर्भवति न तु निर्गुणायाः। "यन्न योगेन सांख्येन दानव्रतपोध्वरैः। व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि" इत्येकादशोक्तेः। न च निर्गुणाया भक्तेर्भगवत्कृपैव हेतुरिति वाच्यम्।तस्यापि हेतावन्विष्यमाणेऽनवस्थानात्। न च सा निरुपाधिरेव केवला हेतुरिति वाच्यम्।तस्या असार्वत्रिकत्वेन भगवति वैषम्यप्रसक्तेः।किंच भक्तकृपैव हेतुरित्युक्तेर्न किंचिदसामंजस्यम्। उत्तमभक्तानां वैषम्याभावेपि

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ ७ ॥
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ॥ नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ ८ ॥

सोऽपरः । यतस्तु धर्माच्छ्रवणादरादिलक्षणा भक्तिर्भवति स परो धर्मः स एवैकांतिकं श्रेय इति । कथंभूता । अहैतुकी हेतुः फलानुसंधानं तद्रहिता अप्रतिहता विघ्नैरनाभिभूता ॥ ६ ॥ ननु "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा नाशकेन" इत्यादिश्रुतिभ्यो धर्मस्य ज्ञानांगत्वं प्रसिद्धं तत्कुतो भक्तिहेतुत्वमुच्यते ? । सत्यम् । तत्तु भक्तिद्वारेणेत्याह । वासुदेव इति । अहैतुकं शुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः ॥ ७ ॥ व्यतिरेकमाह । धर्म इति । यो धर्म इति प्रसिद्धः स यदि विष्वक्सेनस्य कथासु रतिं नोत्पादयेत्तर्हि स्वनुष्ठितोऽपि सन्नयं श्रमो ज्ञेयः । ननु मोक्षार्थस्यापि धर्मस्य श्रमत्वमस्त्येवात आह । केवलं विफलः श्रम इत्यर्थः । नन्वस्ति तत्रापि स्वर्गादि फल

"प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः" इति मध्यमभक्तलक्षणे वैषम्यस्य दर्शनात् । ततश्च भगवतो भक्तयधीनत्वात् । भक्तकृपानुगामिनी भगवत्कृपा हेतुरिति सिद्धांतः । ननु तर्हि कथं भक्तेरहैतुकत्वमभूत् । उच्यते । भगवत्कृपाया भक्तकृपांतर्भूतत्वाद्भक्तकृपायाश्च भक्तसंगांतर्भूतत्वाद्भक्तसंगस्य भक्त्यंगत्वादहैतुकत्वमेव सिद्धम् । किंच भक्तकृपाया हेतुर्भक्तस्यैव तस्य हृदयवर्तिनी भक्तिरेव । तां विना कृपोदयसंभवाभावात्सर्वप्रकारेणापि भक्तेर्भक्तिरेव हेतुरिति निर्हेतुकत्वं सिद्धं भक्तिमते । भक्तिभक्तभजनीयतत्कृपादीनां न पृथग्वस्तुत्वमिति भक्तेः स्वप्रकाशकत्वेन भक्तिप्रकाद्यत्वेपि भगवतः स्वप्रकाशकत्वं नानुपपन्नमिति । अप्रतिहता केनापि निवारयितुमशक्या । तथा हि तल्लक्षणे "मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ" इति वक्ष्यते । उक्तं च श्रीरूपगोस्वामिचरणैः "सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे" इति।ज्ञानकर्मादिभिरनावृतेति वा । यया भक्त्यात्मा मनः सम्यगेव प्रसीदतीति । कामनामालिन्ये सति मनः प्रसादहेतुत्वासंभवादस्या भक्तेर्निष्कामत्वं स्वत एवागतम् ॥९॥६॥ अत्राक्षिपति । नन्विति॥ वेदानुवचनं वेदाभ्यसनम् । अनाशकेन जीवाभयप्रदानेनेत्यर्थः । इत्यर्थ इति । "यदा तदेवासत्तर्कैस्तिरो धीयेत विप्लुतम्।" इत्युक्तेस्तर्कस्य विरोधित्वात्तदविषयमिति भावः । अत्र विश्वनाथः।ननु स एव किमाकार आत्मप्रसाद इत्यपेक्षायां सर्वदुर्विषयवैमुख्यापादकभगवद्रूपगुणमाधुर्यानुभवज्ञानमय एवायमित्याह । वासुदेव इति । प्रकर्षेण योजितस्संबद्धो दाससख्यादिसंबंधयुक्तः कृत इति यावत् । श्लेषेण प्रयोजनीकृतः। भक्तियोगस्य भक्तियोग एव प्रयोजनं नान्य इत्येवं विचारित इत्यर्थः।जनयतीति । ज्ञानवैराग्यार्थं पृथग्यत्नो भक्तैर्न कर्त्तव्य इति भावः। आशु शीघ्रं तत्काल एवेत्यर्थः । यद्वक्ष्यते " भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एक कालः । प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् " इति । ननु तर्हि ज्ञानान्मोक्ष एव भावीति तत्राह । अहैतुकम् । अन्नस्य हेतोर्वसतीतिवद्धेतुः प्रयोजनं तदत्र सायुज्यं तन्नार्हतीति । तेन भगवद्रूपगुणमाधुर्यानुभवमयमेव ज्ञानमायातम् । एवमेव चतुर्थेपि वक्ष्यते "वासुदेवे भगवति भक्तियोगः समाहितः । सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति" इति । तत्र सध्रीचीनप्रकारं खलु मोक्षादिफलांतराभिसक्तिराहित्यमेवेति व्याख्यास्यते । "सोचिरादेव राजर्षे स्यादच्युतकथाश्रयः । शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः" इत्यनंतरवाक्ये च तत्कारणं स एव दृष्ट इति । एवं च भक्तेः कारणं प्रयोजनं च भक्तिरेवेति व्यवस्थितम् । यद्वाऽकारो वासुदेवः स एव हेतुः प्रयोजनं यस्य तत्तथा भगवत्प्रसादजनकमित्यर्थः ॥ ७ ॥ वासुदेवभक्तिजनकत्वे धर्मस्य परत्वमन्यथा श्रमत्वमित्येवं व्यतिरेकमाह । विष्वक्सर्वव्यापिनी सेनेव सेना भक्तिलक्षणा भक्तसंसारदुःखजेतृत्वादस्य स विष्वक्सेनः । अत्राक्षिपति । नन्विति । इत्यर्थ इति । तस्य तु मोक्षाख्यं फलमपि । स तु सर्वथा श्रम एवेति भावः। पुनराक्षिपति नन्विति । तत्रापि मोक्षसाधनेतरधर्मेपि तत्फलं यन्न नश्यतीत्युक्तेस्तस्य नाशशीलत्वादफलत्वमेवेति भावः।पुनराक्षिपति । नन्विति । चातुर्मास्यो यागविशेषः सुकृतं पुण्यफलमक्षय्यमविनाशीत्यर्थः।कर्मणा चितः संपादितः कर्माचितो घटादिः पुण्यचितः स्वर्गादिः । अत्र विश्वनाथः । ननु वर्णाश्रमाचारलक्षणो धर्मः परः कथं न तत्राह । धर्म इति । यः पुंसां विप्रादीनां सुष्ठ्वनुष्ठितो धर्मः स विष्वक्सेनकथासु रतिं नोत्पादयेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ॥ नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः ॥ ९ ॥

मित्याशंक्यैवकारेण निराकरोति । क्षयिष्णुत्वान्न तत्फलमित्यर्थः । ननु " अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति " इत्यादिश्रुतेर्न तत्फलस्य क्षयिष्णुत्वमि त्याशंक्य हिशब्देन साधयति । " तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इति तर्कानुगृहीतया श्रुत्या क्षयिष्णुत्वप्रतिपादनात् ॥ ८ ॥ तदेवं हरिभक्तिद्वारा तदितरवैराग्यात्मज्ञानपर्यंतः परो धर्म इत्युक्तम् । अन्ये तु मन्यंते धर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेंद्रियप्रीतिस्तत्प्रीतेश्च पुनरपि धर्मार्था

"कर्मणा पितृलोक" इति श्रुतेः।कर्मणां रत्यनुत्पादकत्वं च "कर्मभिर्वा त्रयीप्रोक्तैः" इत्यादौ न। "यत्रात्मप्रदो हारिः" इति चतुर्थे नारदोक्तेरेव व्यक्तम् । यदा च रतिं नोत्पादयेत्तर्हि केवलं श्रम एव पितृलोकादेर्नश्वरत्वात्। तस्मात्स्वधर्मं त्यक्त्वा श्रवणकीर्त्तनादिलक्षणः पूर्वोक्तः परो धर्म एवानुष्ठेय इति भावः । यद्वा ननुच "अस्मिँल्लोके वर्त्तमानः स्वधर्मस्थोनघः शुचिः । ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया" इति श्रीभगवदुक्तेर्निष्कामभ क्तियोग एव भक्तेर्हेतुरस्ति तत्कथं भक्तिरहैतुकीत्युच्यते । सत्यम् । तत्र कर्मयोगस्य ज्ञानजनकत्वमिव न साक्षाद्भक्तिजनकत्वं व्याख्यातुं शक्यम् । मध्ये यदृच्छयेति पदोपादानात् । ततश्च तत्र पुंसि भक्त्यैर्यदृच्छा स्वैरिता यदि स्यादैवादस्य निरपेक्ष एव शुद्धभक्तेः प्रवेशः स्यात्तदा तामपि स प्राप्नोतीति तत्रार्थः । 'यदृच्छास्वैरिता' इत्यभिधानात् । कष्टकल्पनया व्याख्यांतरे भक्तेः स्वप्रकाशत्वं न सिध्येदिति तदनादृतमित्यतो निष्कामोपि कर्मयोगो न भक्तेर्हेतुरित्याह । धर्म इति । य इति । "स बै पुंसां परो धर्मः" इति पद्योक्तात्परमधर्मादन्यो वर्णाश्रमाचारलक्षणः स्वनुष्ठितो निष्कामोपि धर्मो विष्वक्सेनकथासु रतिं प्रीतिं नोत्पादयेत्स केवलं श्रम एव । यदीति गर्हायाम् । श्रमजनकत्वाद्गर्हित इत्यर्थः । 'यदि गर्हाविकल्पयोः' इति मेदिनी। यद्वाऽसंदेहेपि संदेहवचनं "यदिवेदाः प्रमाणम्"इतिवत्।"धत्ते पदं त्वमविता यदि विघ्नमूर्द्ध्नि"इत्यत्र यदीतिशब्दो निश्चये इति श्रीस्वामिचरणानां व्याख्या नाच्च।यद्वा ननु प्रसिद्धधर्मादपि कचिद्धरिकथासु रतिरुत्पद्यते इति श्रूयते । सत्यम्।तया विनां धर्मफलाप्राप्तेः।सा खल्वौपाधिक्येव न तात्त्विकीत्याह । धर्म इति । य इति।स प्रसिद्धो धर्मः काम्यो नित्यो वा, स विष्वक्सेनकथा सु रतिं यदि नोत्पादयेत्तदा श्रम एव । अयमर्थः । यथा कर्षकाणां नृपे प्रीतिं कृषिरेवोत्पादयत्यन्यथा तस्याः फलाप्राप्तेरेवमेव धर्मोपि विष्वक्सेनप्रीतिं विना स्वस्य वैफल्यदर्शनायैव तत्र विवेकिनां प्रीतिमुत्पादयेदेव । स यद्यविवेकिनां नोत्पादयेत्तदा श्रम एव । यथा नृपे प्रीतिं विना कृषिफलस्यालाभाच्छ्रम एव । तथा हरौ भक्तिं विना प्रवृत्तनिवृत्तधर्मफलयोः स्वर्गादिज्ञानयोरलाभाच्छ्रमः । तदुक्तं "कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ।" इति।यथा च कृषौ प्रीत्यनुरोधादेव नृपे प्रीतिर्न तु वस्तुतस्तथैव धर्मप्रीत्यनुरोधादेव तत्कथासु प्रीतिर्न तु तत्र वस्तुत इति विवेचनीयम्। अत एव प्रह्लादेनोक्तं"नान्यथेहावयोरर्थो राजसेवकयोरिव"इति। संदर्भस्तु "निर्णीते केवलम्" इत्यमरः । केवलमित्यव्ययेन निमित्तमात्रलक्षणधर्मफलस्य ज्ञानस्य साध्यत्वं सिद्धस्यापि नश्वरत्वं तत्रापि तेनैव हिशब्देन "यस्य देवे परा भक्तिः" इत्यादिश्रुतिप्रमाणत्वं "नैष्कर्म्यमप्यच्युतभा ववार्जितम् ।" इत्यादि"श्रेयः स्रुतिं भक्तिमुदस्य ते"इत्यादि।"आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यतोनादृतयुष्मदंघ्रयः" इत्यादिवचनप्रमाणत्वं च सूचितं श्लोकद्वयेन। भक्तिर्निरपेक्षा । ज्ञानवैराग्ये तु तत्सापेक्षे इति लभ्यते॥ ॥ ८ ॥ तदितरो हरिभक्तीतरः स्वर्गादिऽस्तत्र वैराग्यं जिहासात्मज्ञानं पर्यंतः फलं यस्य स परो धर्म इति । विश्वनाथस्तु । किञ्चात्र चतुर्विधा जनाः कार्मिणो ज्ञानिनो योगिनो भक्ताश्च । तत्र "धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते" इति दृष्ट्या धर्मस्यार्थः फलं तस्य कामस्तस्येंद्रियप्रीतिरिन्द्रियप्रीतौ च सत्यां तदर्थं पुनरपि धर्मादिपरंपरा । यथा कार्मिणां न तथोत्तरेषां त्रयाणामित्याह । धर्मस्य शमदमादेर्यमनियमादेश्च श्रवणकीर्त्तनादे श्चार्थः सर्वथा भवन्नप्यर्थाय फलत्वाय न कल्पते तमनुसंधाय तत्तदप्रवृत्तेः । यतः आपवर्ग्यस्यापवर्गप्रयोजनकस्य तदस्य प्रयोजनमित्यर्थे "स्वर्गादिभ्यो यः" इति स्वार्थिकाणंताद्यः प्रत्ययः । तेनापवर्ग एवा नुसंहितं फलमिति भावः । ज्ञानियोगिनोर्मतेऽपवर्गो मोक्षः भक्तमते प्रेमभक्तिः । यथा वर्णविधानमपवर्गश्च भवति । योसौ भगवति वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंग इति पञ्चमस्कंधे वक्ष्यमाणत्वात् । "येनापवर्गाख्यमदभ्रबुद्धिः" "इत्यादौ"खगेंद्रध्वजपादमूलम्" इत्यस्मिन्नेव स्कंधे वक्ष्यमाणत्वाच्च "निश्चला त्वयि भक्तिर्या सैव मुक्तिर्जनार्दन।मुक्ता एव हि भक्तास्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥
वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥

दिपरंपरेति । यथाहुः "धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते" इत्यादि तन्निराकरोति धर्मस्येति । द्वाभ्याम् । आपवर्ग्यस्य उक्तन्यायेनापवर्गपर्यंतस्य धर्मस्यार्थाय फलत्वायार्थो नोपकल्पते योग्यो न भवति। तथार्थस्याप्येवंभूतधर्माव्यभिचारिणः कामो लाभाय फलत्वाय नहि स्मृतो मुनिभिः ॥९॥ कामस्य च विषयभोगस्येंद्रियप्रीतिर्लाभः फलं न भवति किं तु यावता जीवेत तावानेव कामस्य लाभः । जीवनपर्यात एव कामः सेव्य इत्यर्थः । जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः सोऽर्थो न भवति किंतु तत्त्वजिज्ञासैवेति ॥ १० ॥ ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित्तत्राह । तत्त्वविदस्तु तदेव तत्त्वं वदंति।

तव विष्णो यतो हरे ॥" इति स्कांदरेवाखंडाच्च । तथाऽर्थस्य धनादेः कामो विषयभोगः लाभाय फलत्वाय न । यतो धर्म एवैकांतं मुख्यफलं यस्य तस्य धर्म एवानुसंहितं फलामिति भावः । तथा ज्ञानियोगिनां शमदमादियमनियमाद्यनुकूले कर्मणश्च धर्मविशेषेऽर्थस्य विनियोगः । भक्तस्य तु भगवतो भागवतानां वा सेवायां स्पष्ट एव ॥ ९ ॥ इत्यर्थ इति "सत्यां क्षितौ किं" इत्यादि "चीराणि किं पथि न संति" इत्याद्युक्त न्यायेनेति भावः । अत्र ज्ञानिनां योगिनां चार्थकामेंद्रियप्रीतयो ज्ञानयोगयोरानुषंगिकफलानि कर्मफलत्वेनैव व्यपदिश्यंते । ज्ञानयोगयोस्तयोर्निष्कामकर्मपरिणामत्वादतो ज्ञानिनां योगिनां च दृष्टे सुखदुःखे कर्मफले एवोच्येते भक्तानां त्वर्थकामेंद्रियप्रीतयो भक्तेरेवानुषंगिकफलानीति भक्तेः कर्मपरिणामत्वाभावान्न तेषां कर्मफलत्वव्यपदेशः । अतो भक्तानां दृष्टं सुखं भक्तिफलमेव । दुःखं तु "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः । अतोऽधनं त्यज्यंत्यस्य स्वजना दुःखदुःखितम्" इत्यादिभगवद्वचनाद्भगवदुत्थं भक्त्यपराधफलञ्च यथायोगं विवेचनीयम्।अग्रे स्वामिव्याख्यानमेव॥१०॥अत्राक्षिपति । नन्विति । पुनराक्षिपति । विगीतवचना विरुद्धवचनाः।अत्र विश्वनाथः तत्त्वमेव किं तत्राह। यदद्वयं ज्ञानं तत्तत्त्वम् । ज्ञानमेव किं तत्राह । ब्रह्मेति । शब्द्यते ब्रह्मेतिपदेन यदुच्यते ज्ञानिभिस्तज्ज्ञानं तन्मते ज्ञानं निराकारं ज्ञातृज्ञेयादिविभागशून्यं चित्सामान्यं । चिद्विशेषाणां भगवद्धामादीनां तदनन्यत्वमननात्। जीवमाययोस्तच्छक्तित्वेन तदैक्यादिदंकारास्पदस्य कार्यस्य विश्वस्य कारणमात्रात्मकत्वादद्वैतम्।तथा परमात्मेति योगिभिर्यदुच्यते न तज्ज्ञानम्।एतन्मते परमात्मनश्चिदेकरूपत्वाज्ज्ञानमात्रत्वम्।ज्ञानमात्रत्वेपि साक्षित्वादे र्ज्ञानविशेषस्याश्रयत्वमपि द्युमणिदीपादेर्ज्योतीरूपत्वेपि ज्योतिष्मत्वमिव नानुपपन्नम् । केचित्स्वदेहांतर्हृदयावकाशे "प्रादेशमात्रं पुरुषं वसंतम्" इत्यादेः साकारत्वञ्च मायायाः शक्तित्वान्मायिकानां च तदन्यत्वाज्जीवस्य तद्विभिन्नांशत्वात्ततो द्वितीयत्वाभावादद्वयत्वम्।तथा भगवानिति भक्तैर्यदुच्यते तज्ज्ञानमेतन्मते पूर्ववत् ज्ञानमात्रत्वेपि भगशब्दवाच्यषडैश्वर्यस्याप्यप्राकृतत्वेन चिन्मात्रत्वात्तद्रूपत्वम्। तदुक्तं । विष्णुपुराणे "ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥ " इति।तथैव द्विभुजत्वचतुर्भुजत्वादिभिर्विविधचिद्घनाकारैर्बहिरंतर्वर्तित्वेपि 'न च्यवंते च यद्भक्ता महत्यां प्रलयापदि' इति स्कांदादिवाक्यैः सदैव सेव्यसेवकादिविभागेप्यद्वयत्वं पूर्ववत्तच्छक्तीनां चिदादीनां तद्विलासानां च वैकुंठादीनां तदभिन्नत्वमननात्।ततो भिन्नत्वभावनैवाद्वयपदेन व्यावृत्ता ।एवं च भगवतः सामान्यस्वरूपमात्रस्योपादेयत्वे ज्ञानिन्यधिकारिणि ब्रह्मेति अंतर्यामित्वादिद्वित्रधर्मवत्वस्योपादाने योगिन्यधिकारिणि परमात्मेति अचिंत्यानंतचिदानंदमयस्वरूपरूपगुणलीलाद्यनेकधर्मवत्त्वस्य ग्रहणयोग्यतायां भक्तेधिकारिणि भगवानिति स एवैको भाति । किंच "यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम्"इति "कृष्णाय परमात्मने" इति "मदीयं महिमानं च परं ब्रह्मेति शब्दितम्॥" इति "ब्रह्मणो हि प्रतिष्ठाहम्॥" इति "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इत्यादिवचनेभ्यस्तथा भगवदुपासकानां मोक्षप्राप्तेरपि दर्शनात् । ब्रह्मपरमात्मोपासकानां तु प्रेमप्राप्त्यदर्शनाद्भगवत एव ब्रह्मत्वपरमात्मत्वे इत्यतो भगवत्त्वमेव मूलमिति द्रष्टव्यम्।अत्र ब्रह्मोपासकेभ्यो ज्ञानिभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यंत्यात्मनि चात्मनं भक्त्या श्रुतगृहीतया ॥ १२ ॥
अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम् ॥ १३ ॥

किं तत् यज्ज्ञानं नाम अद्वयमिति क्षणिकविज्ञानपक्षं व्यावर्तयति । ननु तत्त्वविदोऽपि । विगीतवचना एव । मैवम् । तस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह । औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानित्यभिधीयते ॥ ११ ॥ तच्च तत्त्वं सपरिकरया भक्त्यैव प्राप्यत इत्याह । तच्चेत्यन्वयः । ज्ञानवैराग्ययुक्तयेत्यत्र ज्ञानं परोक्षम् । तच्च तत्त्वमात्मनि क्षेत्रज्ञे पश्यंति । किं तत् आत्मानं परमात्मानम् । श्रुतेन वेदांतादिश्रवणेन गृहीतया प्राप्तयेतिभक्तेर्दार्ढ्यमुक्तम् ॥ १२॥ धर्मस्य फलं भक्तिर्नार्थ

सकाशात्परमात्मोपासको योगी श्रेष्ठः । तेभ्यो योगिभ्योपि भगवदुपासकः श्रेष्ठ इति तारतम्यं गीतासु दृष्टं यथा "तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः । कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ योगिनामपि सर्वेषां मद्गतेनांतरात्मनां। श्रद्धावान्भजने यो मां स मे युक्ततमो मतः " इति । योगिनामिति पंचम्यर्थे षष्ठी संदर्भस्तु विगीतवचना इति। स्वामिव्याख्याने परस्परमिति शेषः। तत्त्वस्य नामांतरैरभिधानादिति धार्मिणि सर्वेषामभ्रमाद्भ्रमे एव तु भ्रमादिति । यद्वा किं तत्त्वमित्यपेक्षायामाह वदंतीति । ज्ञानं चिदेकरूपमद्वयत्वं चास्य स्वयंसिद्धतादृशातादृशतत्त्वांतराभावात्स्वशक्त्येकसहायत्वात्परमाश्रयं तं विना तासामसिद्धत्वाच्च । तत्त्वमिति परमपुरुषार्थताद्योतनाय परमसुखरूपत्वं तस्य ज्ञानस्य बोध्यतेऽत एव तस्य नित्यत्वं च दर्शितम् । अत्र श्रीमद्भागवताख्य एव शास्त्रे क्वचिदन्यत्रापि तदेकं तत्त्वं त्रिधा शब्द्यते क्वचिद्ब्रह्मेति क्वचित्परमात्मेति क्वचिद्भगवानिति च । किं त्वत्र श्रीव्याससमाधिलब्धाद्विदाजीव इति च शब्द्यत इति। नोक्तमिति । तत्र शक्तिवर्गलक्षणतद्धर्मातिरिक्तं केवलं ज्ञानं ब्रह्मेति शब्द्यते । अंतर्यामित्वमयमायाशक्तिप्रचुरचिच्छक्त्यंशविशिष्टं परमात्मेति, परिपूर्णसर्वशक्तिविशिष्टं भगवानिति एवमेवोक्तं श्रीजडभरतेन "ज्ञानं विशुद्धं परमात्ममेकमनंतरं त्वबहिर्ब्रह्म सत्यम् । प्रत्यक्प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदंति" इति "तस्मै नमो भगवते ब्रह्मणे परमात्मने ॥ " इत्यत्र वरुणकृतस्तुतौ टीका च 'परमात्मने सर्वजीवनियंत्रे' इत्येषा । ध्रुवं प्रति मनुना च"त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ" इति । अत्रानंदमात्रं विशेष्यं समस्ताः शक्तयो विशेषणाति विशिष्टो भगवानित्यायातम् । भगवच्छब्दार्थश्च विष्णुपुराणे प्रोक्तः " ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ " इति ॥ ११ ॥ तत्प्राप्तिसाधनमाह । तज्ज्ञानं त्रिरूपं मुनयो मननशीला ज्ञानिनो योगिनो भक्ताश्च पश्यंति । तत्र ब्रह्मेति मते आत्मनि च तत्पदार्थे ईश्वरे आत्मानं त्वंपदार्थं जीवं पश्यंत्यनुभवंति । परमात्मेति मते आत्मन्यंतर्हृदये आत्मानमंतर्यामिणं पश्यंति ध्यानेनालोकयंति । भगवानिति मते आत्मनि मनसि चकाराद्बहिश्च स्फुरंतमात्मानं भगवंतं स्वलोचनाभ्यामेव तन्माधुर्यमास्वादयंति । भक्त्येति । आदौ गुरुमुखात् श्रुत्वा पश्चाद्गृहीता तया भगवद्विषयिण्येव श्रवणकीर्तनादौ भक्तिशब्दस्य रूढेर्ब्रह्मोपासकैः परमात्मोपासकैश्च स्वस्य साध्यसिद्ध्यर्थं भगवति भक्तिः कर्त्तव्यैव । ज्ञानवैराग्ये पृथगेव । तेषामुभे येषां साधने ज्ञेये । भक्तमते भक्त्योत्थ एव ते भक्तेः प्रेमत्वव्यंजके ज्ञेये । "तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इति शुद्धभक्तानां पृथक्तयोर्निषेधात् । अथवा तच्च त्रिरूपं ज्ञानं भक्तास्तु भक्त्यैवानुभवितुं शक्नुवंतीत्याह । तच्छ्रद्दधानाः केचित्तद्विरूपमप्यनुभवितुं साभिलाषा भवंतीत्यर्थः । तदा भक्त्यैव पश्यंति । तेन ब्रह्मपरमात्मनोः साधने ज्ञानयोगौ भक्त्यै वसिद्धौ स्यातामिति भावः ॥ १२॥ तदेवं धर्मः स्वनुष्ठित इत्यादिना कर्मणः श्रमत्वमेव ज्ञानयोगयोरपि" श्रेयःसृतिं भक्तिमुदस्य ते विभो"इति॥ "नैष्कर्म्यमप्यच्युतभाववर्जितम् " इति । "पुरेह भूमन्बहवोपि योगिनः" इत्यादिभ्यो भक्त्या विना श्रमत्वमेव । भक्तेश्च कर्मयोगज्ञानादौ मिश्रिताया एव शुद्धाया आत्मप्रसादकत्वं प्रकरणतोऽवगतम्। तत्रैव शंकते। ननु ज्ञानयोगयोरप्रवृत्तौ न काचिच्चिंता । कर्मणां तु नित्यानामकरणे महान्प्रत्यवायो दुर्गतिहेतुस्तत्र का वार्त्तेत्यत आह । अतः पुंभिरिति । यत उक्तन्यायेनोत्कृष्टावपि ज्ञानयोगौ भक्त्येव सिद्धौ भवेतां भक्तिश्च ताभ्यां विनापि स्वयं सिद्ध्यति अतो हे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादेकेन मनसा भगवान्सात्वतां पतिः ॥ श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ १४ ॥
यदनुध्याऽसिना युक्ताः कर्मग्रंथिनिबंधनम् ॥ छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिम् ॥ १५ ॥

कामादिकमितीममर्थमुपपाद्योपसंहरति । अत इति । हे द्विजश्रेष्ठाः हरितोषणं हरेराराधनम् । संसिद्धिः फलम् ॥ १३ ॥ यस्माच्च भक्तिहीनो धर्मः केवलं श्रम एव तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह । तस्मादिति । एकेनैकाग्रेण मनसा ॥ १४ ॥ भक्तिरहितो धर्मः केवलं श्रम एवेति प्रपंचितम् । इदानीं तु भक्तेर्मुक्तिफलत्वं प्रपंचयति । यदिति । यस्यानुध्या अनुध्यानं सैवासिः खड्गस्तेन युक्ताः विवेकिनो ग्रंथिमहंकारं निबध्नाति यत्कर्म तच्छिदंति तस्य कथायां रतिं को न कुर्यात् ॥ १५ ॥

तोर्हरितोषणं भक्त्यैव जातं चेत्तदा धर्मस्य संसिद्धिः । यो यत्नादनुष्ठितोपि कार्मिणां सांगोपांगतया प्रायः सिद्धो न भवनि सोपि भक्तिमतामननुष्ठितोपि सम्यगेव सिद्धो भवति । " यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्" इत्यादौ "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा" इति भगवदुक्तेः । तेन कर्माकरणजनितप्रत्यवायो भक्तानां पराहतः । ननु यदि भक्त्या धर्म्मः संसिद्धस्तर्हि धर्मफलमपि तैर्लभ्यताम् । सत्यम् । सकामत्वे सति लभ्यत एव निष्कामत्वे सति तेषां नैष्कर्म्यमेव भवति । तथा च गोपालतापनीयश्रुतिः "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यम् " इति । तदेवं "यथा तरोर्मूलनिषेचनेन" इति न्यायेन भक्त्यैव धर्म्माः संसिद्धा एवातो भक्तानां कर्मण्याधिकार एव दूरीकृतो भगवता । तदुक्तम् । "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" इति । "धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः" । इति । "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति । तदपि यत्प्राच्यादिभक्तानामनन्यानामपि कार्मिकुलसंघट्टगतत्वेनैव तदनुरोधवशादीषत्कर्मकरणं तत्कर्माकरणमेव श्रद्धाराहित्यात् । "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" इति भगवदुक्तेः । संदर्भस्तु तदेवं श्रुतगृहीतया मुनयः श्रद्दधाना इति पदत्रयेण तस्या एव भक्तेर्दौर्लभ्यं दर्शितम् । यद्गुरोः सकाशाद्वेदांताद्यखिलशास्त्रार्थविचारद्वारा यदि स्वावश्यकपरमकर्त्तव्यत्वेन जायते।पुनश्च"भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया। तदध्यवस्यत्कूटस्थो रतिरात्मन्यतोभवेत्"इति यत् । यदि विपरीतभावनात्याजकौ मननयोग्यताममताभिनिवेशौ स्यातां ततः श्रद्दधानैः सा भक्तिरुपासनाद्वारा लभ्यत इति । अतः श्रुतिरपि तदर्थमागृह्णाति । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः" इति । अत्र निदिध्यासनमुपासनं दर्शनं साक्षात्कार उच्यते । सा चैवं दुर्लभा भक्तिः श्रीहरितोषणे प्रयुक्तात्स्वाभाविकधर्मादपि लभ्यते ।तस्माद्धरितोषणमेव तस्य परमं फलमित्याह । अत इति । स्वनुष्ठितस्य बहुप्रयत्नेनाच्छिद्रमुपार्जितस्येति तुच्छे स्वर्गादिफले तत्प्रयोगोऽतीवायुक्त इति भावः ॥ ॥ १३ ॥ भक्तिहीनो भक्तिः श्रवणादिरुचिस्तद्विहीनस्तदनुत्पादक इत्यर्थः तस्माद्भक्तिप्रधान इति ॥ यद्वा यद्येवं श्रीहरिसंतोषकस्यापि धर्मस्य श्रवणादिलक्षणा भक्तिरेव फलं तत्प्रवार्त्तिताश्च ज्ञानवैराग्यादिगणास्तदा साक्षाच्छ्रवणादिरूपा भक्तिरेव कर्त्तव्या किं तत्तदाग्रहेणेत्याह तस्मादिति । एकेन धर्माद्याग्रहशून्येन श्रवणं नामगुणादीनां तथा कीर्त्तनञ्च ॥१४॥ ननु च"मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" इति। " श्रद्धालुर्मे कथां शृण्वन् ', इति "जातश्रद्धो मत्कथाम्" । इत्यादिभगवदुक्तेः कथायां श्रद्धावानेव भक्तावधिकारीत्यतः श्रद्धा कथं स्यादित्यत आह।यदन्विति । स्वसञ्चितधनेभ्यः पृथक्कृत्य किंचिन्मात्रमेकैकादिनभोजनार्थं जनाः स्वग्रंथौ निबध्नंति यथा तथैव ग्रंथिनिबंधनं वर्तमानजन्मयोग्यं प्रारब्धं कर्म तदपि छिंदंति । तस्य कथायां रतिं प्रीतिं को न कुर्यादिति तत्कथायां प्रीतिरपि सहसा जायते किं पुनरधिकारव्यंजिका श्रद्धेति भावः । युक्ताः संयतचित्ता वा ॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥ १६ ॥ शृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यंतःस्थो ह्यभद्राणि विधुनोति सुहृत्सताम् ॥ १७ ॥ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥ १८ ॥ तदा रजस्तमोभावाः कामलोभादयश्च ये ॥ चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥ १९ ॥ एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्त्व विज्ञानं मुक्तसंगस्य जायते ॥ २० ॥

ननु सत्यमेव कर्मनिर्मूलनी हरिकथारतिः तथापि तस्यां रुचिर्नोत्पद्यते किं कुर्मः तत्राह । शुश्रूषोरिति । पुण्यतीर्थनिषेवणान्निष्पापस्य महत्सेवा स्यात् तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥ १६ ॥ ततश्च । शृण्वतामिति । पुण्ये श्रवणकीर्तने यस्य सः । सतां सुहृत् हितकारी । हृदि यान्यभद्राणि कामादिवासनास्तानि । अंतःस्थो हृदयस्थः सन् ॥ १७ ॥ ततश्च नष्टप्रायेष्विति । सर्वाभद्रनाशस्य ज्ञानोत्तरकालत्वात्प्रायग्रहणम् । भागवतानां भागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेपकाभावात् ॥ १८ ॥ रजश्च तमश्च ये च तत्प्रभवाः भावाः कामादयः एतैरनाविद्धमनभिभूतम् । प्रसीदत्युपशाम्यति ॥ १९ ॥ भगवद्भक्तियोगतः प्रसन्नमनसः अत

अत्राक्षिपति नन्विति । इत्यर्थ इति । रुच्युत्पादनार्थमियमेव पद्धतिर्ग्राह्येति भावः । अत्र संदर्भः । “ पुण्यतीर्थनिषेवणादिभिः ” इति अय मध्येको मार्गः स्यात् । “ ते पुनंत्युरुकालेन ” इत्यादिना । “सद्यः पुनंत्युपस्पृष्टाः” इत्यादिना च ऋजुमार्गोप्यस्ति । यद्वा नन्वेवमपि तस्य कथारुचिर्मंदभाग्यानां न जायते इत्याशंक्य तत्र सुगमोपायं वदंस्तामारभ्य नैष्ठिकभक्तिपर्यंतां भक्तिमुपदिशति पञ्चभिः । शुश्रूषोरिति ॥ “ भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदा ” इत्याद्यनुसारेण प्रायस्तत्र महत्संगो भवतीति तदीयटीकानुमत्या च पुण्यतीर्थ तीर्थ निषेवणाद्धेतोर्लब्धा यदृच्छया महत्सेवा तया वासुदेवकथा रुचिः स्यात्कार्यांतरेणापि तीर्थे भ्रमतां महतां प्रायस्तत्र भ्रमतां तिष्ठतां वा दर्शनस्पर्शनसंभाषणादिलक्षणसेवा स्वत एव संपद्यते । तत्प्रभावेण तदीयाचरणे श्रद्धा भवति तदीयस्वाभाविकपरस्परभगवत्कथायां किमेते संकथयंतीति तच्छृणोमीति तदिच्छा जायते।तच्छ्रवणेन च तस्यां रुचिर्जायत इति।तथा च महद्भय एव श्रद्धा झटिति कार्यंकरोति भावः । तदुक्तं श्रीकपिलेन “सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः । तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति”।विश्वनाथस्तु कथायां प्रीतेराविर्भावप्रकारं श्रुणुतेत्याह । शुश्रूषोरिति । महत्सेवया यादृच्छिकमहत्कृपाजनितया महतां सेवया जातश्रद्धस्य पुंसः पुण्यतीर्थं सद्गुरुस्तस्य निषेवणं चरणाश्रयणं स्यात् “निपानागमयोस्तीर्थमृषिजुष्टेजले गुरौ” इत्यमरः।तस्माच्च शुश्रूषोः सेवमानस्य वासुदेवकथारुचिः स्यादित्यन्वयः । यद्वा पुण्यतीर्थानां श्रीमद्भागवतादिशास्त्राणां गंगादिनदीव्रजभूम्यादि क्षेत्राणां सेवयेत्यर्थः ॥ १६ ॥ ततश्च रुचेरनंतरमंतस्थः कथाद्वारा भावनापदवीं गतः ॥ १७ ॥ नष्टप्रायेष्विति । नामापराधलक्षणस्याभद्रस्य कश्चनकश्चन प्रबलो भागः क्षीणत्वं गच्छन् रतिपर्यंतोपि भवतीति भावः ॥ निष्ठा चित्तैकाग्र्यं तां प्राप्ता ॥ १८ ॥ रजस्तमोभ्यां भाव उत्पत्तिर्येषांते चित्तविक्षेपलयादयः । आदिशब्दात् क्रोधमोहमात्सर्याणि । अनाविद्धमविकृतं भवति।तेन विषयेष्वरुच्या श्रवणकीर्तनादिषु स्वादुत्व भानलक्षणा रुचिर्भवतीत्यायातम् । तेन पूर्वदशायां कामलोभाद्यैस्तीक्ष्णशरायितैराविद्धं चेतः कथं प्रसीदतु, कथं वा कीर्तनादेः सम्यगास्वादं लभताम् । न हि व्याध्या जर्जरितायान्नादिकं सम्यग्रोचते इति भावः । ततश्च सत्वे शुद्धसत्वमूर्तौ भगवति स्थितमासक्तम् । तदैव त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरित्याद्युक्तरीत्या सर्ववासनानाशाच्चित्तं शुद्धसत्वमयं सद्भगवत्तत्त्वसाक्षात्कारयोग्यं भवतीति भावः ॥ १९ ॥ एवं पूर्वोक्तप्रकारेणासक्तिपूर्वकं प्रतिक्षणं भगवतः कृष्णस्य भजनं कुर्वतः प्रसन्नमनस उत्पन्नरतेरित्यर्थः । रत्या विना सर्वथा विषयासंस्पर्शस्यानुत्पत्तेस्तेन विना च मनःप्रसादासंभवादिति । ततश्च भगवति भक्तियोगः प्रेमा तस्माच्च भगवत्तत्त्वस्य स्वरूपगुण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि दृष्ट एवात्मनीश्वरे ॥ २१ ॥ अतो वै कवयो नित्यं भक्तिं परमया मुदा ॥ वासुदेवे भगवति कुर्वंत्यात्मप्रसादनीम् ॥ २२ ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहाऽस्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ २३ ॥

एव मुक्तसंगस्य ॥ २० ॥ ज्ञानफलमाह । भिद्यत इति । हृदयमेव ग्रंथिश्चिज्जडग्रथनरूपोऽहंकारः । अत एव सर्वे संशयाः असंभावनादिरूपाः । कर्माण्यनारब्धफलानि । आत्मनि स्वरूपभूते ईश्वरे दृष्टे साक्षात्कृते सति । एवकारेण ज्ञानानंतरमेवेति दर्शयति ॥ २१ ॥ तत्र च सदाचारं दर्शयन्नुपसंहरति । अत इति । आत्मनः प्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वंतीति भजनीयविशेषो दर्शितः ॥ २२ ॥ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेऽपि वासुदेवस्याधिक्यमाह । सत्त्वमिति । इह यद्यप्येक

लीलैश्वर्यमाधुर्यस्य विज्ञानमनुभव इत्यनुसंहितं भक्तेः फलमुक्तम् । "जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् ।" इति यत्पूर्वमुक्तं तदिदमेव ज्ञेयम् । मुक्तसंगस्योत्पन्नवैराग्यस्य त्यक्तकामादिवासनस्येति यावत् ॥ २० ॥ अविद्या वा हृदयग्रंथिः भिद्यत इति कर्मकर्तरि प्रयोगेणाविद्याध्वंसो भक्तानामननुसंहितं फलम् । अत एवाहंकारादिध्वंसादेव । आदिपदाद्विपरीतभावनादिग्रहः । आत्मनीतीश्वरविशेषणम् । यद्वात्मन्येव मनस्येव दृष्टे किं पुनः साक्षात् दृष्टे सतीति स्फूर्तिसाक्षात्कारावुक्तौ "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः । भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः । निष्ठा रुचिरथासक्ती रतिः प्रेमाथ दर्शनम् । हरेर्माधुर्यानुभव इत्यर्थाः स्युश्चतुर्दश" इति विश्वनाथः । संदर्भस्तु तस्य च परमानंदैकरूपत्वेन स्वतः फलरूपस्य साक्षात्कारस्यानुषंगिकफलमाह । भिद्यंत इति । श्रवणमननादिप्रधानानामपि तस्मिन्द्रष्टर्येव सर्वे संशयास्समाप्यंत इत्यर्थः । अतः श्रवणेन तावज्ज्ञेयगता संभावना छिद्यते । मननेन तद्गतविपरीतभावनासाक्षात्कारेण आत्मयोग्यतागतासंभावनाविपरीतभावने इति ज्ञेयम् । क्षीयंते तदिच्छामात्रेणैव तदाभासः किञ्चिदेव तेष्ववशिष्यत इत्यर्थः ॥ २१ ॥ तत्र चात्मसाक्षात्कारेण दुःखनिवृत्तिरूपहेतोर्भक्तिमार्गे च अतो निःशेषदुःखनिवृत्तबुद्धिगोचरसुखानुभवलक्षणमोक्षाख्यपुरुषार्थलाभात् । परमया मुदेतिकर्मानुष्ठानवन्नसाधनकाले साध्यकाले वा भक्त्यनुष्ठानं दुःखरूपं प्रत्युत सुखरूपमेवेत्यर्थः ॥ आत्मप्रसादिनीं विष्णुप्रसादजननीं वा ॥ २२ ॥ तदेव वासुदेवभजनमेव । संदर्भस्तु तदेवं कर्मज्ञानवैराग्ययत्नपरित्यागेन भगवद्भक्तिरेव कर्तव्येति मतम् । कर्मविशेषरूपं देवतांतरभजनमपि न कर्तव्यमित्याह सप्तभिः । तत्रान्येषां का वार्त्ता । सत्यपि श्रीभगवत एव गुणावतारत्वे श्रीविष्णुवत्साक्षात्परब्रह्मत्वाभावात्सत्वमात्रोपकारकाभावाच्च । प्रत्युत रजस्तमोबृंहणत्वाच्च । ब्रह्मशिवावपि श्रेयोर्थिभिर्नोपास्यावित्याह । सत्वमिति द्वाभ्याम् । इह यद्यप्येक एव पुमानस्य विश्वस्य स्थित्यादये स्थितिसृष्टिलयार्थं तैः सत्वादिभिर्युक्तः पृथक्पृथक् तदधिष्ठाता तथापि परस्तत्तदसंश्लिष्टः सन् हरिविरिंचिहरेति संज्ञा भिन्ना धत्ते तत्तद्रूपेणाविर्भवतीत्यर्थः । तथापि तत्र तेषां मध्ये श्रेयांसि धर्मार्थकाममोक्षाख्यानि शुद्धफलानि सत्वतनोरधिष्ठितसत्वशक्तेः श्रीविष्णोरेव स्युः । अयम्भावः । उपाधिदृष्ट्या तौ द्वौ सेवमाने रजस्तमसोर्घोरमूढत्वात् । भवंतोपि धर्मार्थकामा नातिसुखदा भवंति। तथोपाधित्यागेन सेवमाने भवन्नपि मोक्षो न साक्षान्न च झटिति । किं तु कथमपि परमात्मांश एवायमित्यनुसंधानाभ्यासेनैव परमात्मन एव भवति। तत्रतत्र साक्षात्परमात्माकारेणाप्रकाशात् । तस्मात्ताभ्यां श्रेयांसि न भवंतीति । अथोपाधिदृष्ट्यापि श्रीविष्णुं सेवमाने सत्वस्य शांतत्वाद्धर्मार्थकामा अपि सुखदाः । तत्र निष्कामत्वेन तु तं सेवमाने " सत्वात्संजायते ज्ञानम्" इति चोक्तेर्मोक्षश्च साक्षात् । अत उक्तं स्कांदे "बंधको भवपाशेन भवपाशाच्च मोचकः । कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥" इति । उपाधिपरित्यागेन तु पंचमः पुरुषार्थो भक्तिरेव भवति । तस्य परमात्माकारेणैव प्रकाशात् । तस्माच्छ्रीविष्णोरेव श्रेयांसि स्युरिति । अत्र विश्वनाथः । एवं कर्मज्ञानादिकमतिक्रम्य भक्तेरेव यथा कर्त्तव्यत्वमुक्तं तथैव देवतांतरोपासनामप्यपहाय भगवानेवोपास्य इत्युच्यते । स च भगवानेक एवापि क्रीडयाऽवतरन्ननेकोपि भवति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एव परः पुमानस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं हरिविरिंचिहरेति संज्ञाः केवलं भिन्नाः धत्ते । 'हरिविरिंचिहरा इति' इति वक्तव्ये संधिरार्षः । तत्र तेषां मध्ये श्रेयांसि

''बहुमूर्त्त्येकमूर्तिकम्'' इति दशमात् । तस्यावतारा द्विविधाश्चिच्छक्त्या मायाशक्त्या च । चिच्छक्त्या मत्स्यकूर्मादयो भजनीया एव । मायाशक्त्या च ये सत्वरजस्तमोभिर्विष्णुब्रह्मरुद्रास्तेषु विष्णुरेव भजनीय इत्याह । सत्वमिति । यद्यप्येक एव पुमानादिपुरुषः अस्य विश्वस्य स्थित्याद्यर्थं तैस्सत्वादिभिर्युक्तो हर्यादिसंज्ञा धत्ते । संधिरार्षः । पर इति । गुणैर्युक्तोप्यचिंत्यशक्त्या तेभ्यो बहिः पृथक् स्थित्यैव तेषामस्पर्शनात्परोऽयुक्त इत्यर्थः । तदपि श्रेयांसि भक्तानामभीष्टानि तत्र तेषु मध्ये सत्वतनोः ''भेजिरे मुनयोऽथाग्रे भगवंतमधोक्षजम् । सत्वं विशुद्धं क्षेमाय कल्पंते ये तु तानिह''इत्युत्तरश्लोकदृष्ट्या.विशुद्धसत्वात्मकशरीराद्धरेरेव स्युः।''साक्षीचेताः केवलो निर्गुणश्च'' इति ''सत्वादयो न संतीशे यत्र च प्राकृता गुणाः'' इति ''हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः'' इत्यादिश्रुतिस्मृतिविरोधाद्धरौ मायागुणस्य सत्वस्य युक्तत्वेपि तस्या योग एव । सत्वस्य प्रकाशरूपत्वादौदासीन्याच्च । तेन सच्चिदानंदवस्तुनो महाप्रकाशकस्योपरागासंभवात्प्राकृतसत्वस्य न हि हरिशरीरारंभकत्वम् । रजस्तमसोस्तु विक्षेपरूपत्वावरणरूपत्वाभ्यामुपकारकत्वापकारकत्वाभ्यां च ताभ्यामानंदस्य विक्षिप्तत्वमावृतत्वमित्युपरागसंभवात् । ब्रह्मरुद्रयो रजस्तमस्तनुत्वमेवेति तयोः सगुणत्वं हरेर्निर्गुणत्वञ्च युक्तिसिद्धमेव । निर्गुणत्वेपि प्राकृतसत्त्वस्य प्रकाशरूपेण तत्समीपवर्त्तितया तत्र स्थितत्वाद्विश्वपालनलक्षणस्तद्धर्म औदासीन्येन हरौ प्रतीयते । न च तेन तस्य निर्गुणत्वं व्याहतमिति वाच्यम्।। संयोगसमवायसंबंधाभ्यां प्राकृतसत्वस्य तत्रासंभवात्सामीप्यसंबंधेनैव तत्र स्थितत्वादिति।स्वभक्तिज्ञानस्फूर्तिसाक्षात्कारादिदानेनैवासत्त्यैव । स्वभक्तपालनं तु स्वरूपभूतस्य शुद्धसत्वस्य धर्मो ज्ञेयः । किञ्चात्र ब्रह्मणो हिरण्यगर्भत्वात् ''नेतरोनुपपत्तेः'' इति न्यायेन तस्येश्वरत्वाभावात् । जीवत्वेन तद्वति रजसि परमेश्वरस्य योगात्तत्रावेशादेवावतारत्वम् । तदुक्तं ब्रह्मसंहितायाम्—''भास्वान्यथाश्मशकलेषु निजेषु तेजः स्वीयं कियत्प्रकटयत्यपि तद्वदत्र । ब्रह्मा य एव जगदंडविधानकर्ता गोविंदमादिपुरुषं तमहं भजामि'' इति । शिवस्य तु जीवत्वाभावाद्गुणयुक्तेश्वरत्वमेव । तदुक्तं तत्रैव ''क्षीरं यथा दधिविकारविशेषयोगात्संजायते न तु ततः पृथगस्ति हेतोः । यः शंभुतामपि तथा समुपैति कार्याद्गोविंदमादिपुरुषं तमहं भजामि'' इत्यतो ब्रह्मशिवयोर्मध्ये शिवस्येश्वरत्वमिति केचिदाहुः । केचित्तु तैर्युक्त इति नियामकसंबंधेन संयोगसंबंधेन सामीप्यसंबंधेन च योगो ज्ञेयः । तत्र सत्वादीनां नियामकतासंबंधेन सति पुरुषः स्वस्वरूपेण स्थितो निर्गुण एव भवति । रजसि तमसि च संयोगसंबंधेन योगे स एव पुरुषो ब्रह्मा रुद्रश्च सगुण एव भवति । सत्वे सामीप्यसम्बन्धेन योगे स एव पुरुषो विष्णुस्वरूपेण स्थितो निर्गुण एव भवतीत्याचक्षतेऽत एव योगो नियामकतया गुणैः संबंध उच्यतेऽतः स तैर्न युज्यते । तत्र स्वांशपरस्य य इति भागवतामृतकारिकार्थ उपपद्यत इति । अत्र च शास्त्रांतरविचारतो वस्तुतो ब्रह्मादित्रयाणामभेद एव । ''त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मन ब्रह्मन्स शांतिमधिगच्छति'' इति चतुर्थस्कंधोक्तरभेदस्यैव शांतिपदवाच्यमोक्षहेतुत्वात्स एवात्र विचार्य्यते । तथा हि । एक एवेशः स्वोपाधिमायागुणत्रयप्रयुक्तसर्गादिकर्मभेदेन ब्रह्मविष्णुरुद्रशब्दैरुच्यते । यथैक एव क्षेत्रे बीजवापं कुर्वन्नावापकः सस्योपेतं तदेव क्षेत्रं जलसेकादिनापालयन् पालकोन्ते दात्रादिना तदुपसंहँरल्लावक इत्युच्यते । तत्र कारणीभूतरजोगुणग्रहणेन सर्वप्रपंचस्य स्रष्टा सन्स एव ब्रह्मेत्युच्यते । हिरण्यगर्भस्तु यद्यप्यपंचीकृतस्रष्टृत्वाभावान्न ब्रह्मा । तथापि पंचीकृतभूतभौतिकस्रष्टृत्वात्क्वाचिद्ब्रह्मेत्युपचर्यते । स च जीवः कल्पांतरीयसूत्रात्माहंग्रहोपासनया तद्भावं प्राप्त इति प्रसिद्धमितिहासादिषु । अतस्तदीशत्वबोधका वाचस्तदंतर्यामिपरा एव । एवं विराड्वह्नीन्द्रसूर्यादीशत्वबोधका अपीति बोध्यम् । तदंतर्यामिणश्च वस्तुतस्तदभेदेपि भेदव्यपदेशाच्चान्य इत्यादिसूत्रेभ्यः ''यश्चादित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमंतरो यमयति । भीषास्माद्वातः पवते'' इत्यादिश्रुतिभ्यश्च व्यावहारिकभेदोपि स्वीक्रियते । कारणीभूतसत्वगुणमादाय सर्वचराचरप्रपञ्चं पालयन्स विष्णुरित्युच्यते । तादृशतमोगुणमादाय उपसंहरन्स एव रुद्र इति कथ्यते । एवञ्चैकस्यैव वस्तुनः परब्रह्मपरमशिवमहाविष्णुवासुदेवादिशब्दगोचरस्य चतुर्मुखचतुर्भुजपंचमुखरूपाः पुमाकारा वाणीरमोमारूपास्त्र्याकाराः लीलाविग्रहाः । ननु चतुर्मुखाकारो विधेश्चतुर्भुजाकारो हरेः पंचमुखाकारो हरस्य वाण्याकारो विधे रमाकारो हरेरुमाकारो हरस्य विग्रह इति विशिष्य वक्तव्यम् । गुणत्रयभेदेन तदवच्छिन्नानां भेदात् । तथा च कथमेकस्येत्युक्तमिति चेच्छृणु । चतुर्भुजशरीरिणः पालकत्वप्रयोजकं विष्णुत्वमेवेति वक्तुमशक्यं दैत्यसंहारादिरूपस्य तमोऽवच्छिन्नरुद्रकार्यस्य दर्शनात् । तस्य सुरादिरक्षणफलकत्वेपि तमःकार्यत्वेन तदवच्छिन्नरुद्रकार्यत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं पंचमुखाकारावच्छिन्नस्येशस्य त्रिपुरादिदैत्यसंहर्तृत्वेपि न केवलरुद्रत्वरूपनिर्णयः । संहारस्य देवादिपालनफलकत्वेन विष्णुकार्यत्वात् । "शिव एको ध्येयः शिवंकरः । प्रज्ञा च तस्मात्प्रसृता पुराणी" इत्यादि
श्रुत्या "स मोचयति सुप्रीतः । मोचयामि श्वपाकं वा" इत्यादिस्मृत्या च मुक्तिदानादिरूपस्य सत्वावच्छिन्नविष्णुकार्यस्य प्रतीतेश्च ।"तमूचुर्भ्रातरो रुद्रः सेवितः सात्विकैर्जनैः । मोचयेत्सत्वसंयुक्तः पूजयेशमतो हरम् ।"
इति । कौर्मे तु रुद्रे साक्षादेव सत्वयोगः प्रतिपादितः । एतेन तामसत्वेन रुद्रस्यापकर्षत्वप्रलापो मूर्खाणां निरस्तः । निरंतरं दुःखमयसंसारपारिवृत्तिश्रांतानां जीवानां कंचित्कालं विक्षेपविगमसमुल्लसदात्मानंदानुभवेन विश्रांतिं
संपादयितुकामस्य तस्य संहाराय तमोग्रहणस्य दुश्चिकित्सव्रणपीडितानां व्रणं शिशमयिषोः शस्त्रग्रहणन्यायेन "निदानज्ञस्य भिषजो रुग्णाहिंसां प्रयुंजतः । न किंचिदपि नैर्घृण्यं घृणैवात्र प्रयोजिका" । इति शिवपुराण
व्याख्यानेन निरतिशयकरुणांबुधित्वलिंगात् । ब्रह्मकोटौ गुणवश्यत्वासंभवात् । निद्रालस्यादेस्तमःकार्यस्य तत्राप्रसिद्धेश्च । तमोयोगमात्रेण तत्पारवश्यस्य शंकितुमशक्यत्वात् । अन्यत्राप्यतिप्रसंगादुत्कर्षापकर्षाभावे श्रुतिस्मृतिविगीति
वस्य प्रतिपिपादयिष्यमाणत्वाच्च "सत्वोद्रिक्तस्ततो ब्रह्मा" इति विष्णुपुराणादौ ब्रह्मणोपि सत्वगुणयोगेन विष्णुत्वं प्रतीयते । भारते चातिवृद्धानां प्रजानां विधेः कोपाग्निनोपसंहर्तृत्त्वस्य स्मरणेन रुद्ररूपत्वं चावगम्यते ।
वासिष्ठे तु "सत्वं देवा हरादयः" इति साम्येन सर्वेषां शुद्धसत्वप्रधानमायोपाधित्वमुक्तम् । एवं भवान्या दैत्यादिसंहर्तृत्वेपि पालनरूपविष्णुकार्यप्रतीतेः ।"नृणां भवति मुक्तये" इति मार्कंण्डेयोक्तेर्मोचकत्वरूपसत्वावच्छि
न्नविष्णुकार्यप्रतीतेश्च । महिषासुरयुद्धेऽसंख्यगणोत्पादकत्वरूपरजोवच्छिन्नब्रह्मकार्यप्रतीतेश्च न केवलरुद्ररूपत्वनिर्णयः । ननु मोक्षप्रदत्वादिकमिदं महालक्ष्म्या उक्तं "सा चान्यैव समष्टिरूपा" इति मार्कण्डेयप्राधानिकरहस्य
गततन्माहात्म्यालोचनेन बुध्यते । तथा च कथमनेन पार्वत्या मोचकत्वाद्युक्त्या विष्ण्वादिरूपतोच्यते इति चेत् । सत्यम् । एवं प्रतीयतेऽल्पश्रुतानाम् । बहुश्रुतैस्तूमावतार एव सेति निर्द्धार्य्यते । तथाहि । मार्कण्डेये तस्य
महिषशुंभादिहंतृत्त्वं नंदपुत्रीत्वादिकं च यदुक्तं तत्सर्वं हरिवंशे गौर्या उक्तम् । तत्र तावत्प्रद्युम्नशंबरयुद्धे "हतायां सर्वमायायां शंबरोऽचिंतयत्पुनः । अस्ति मे कालदंडाभो मुद्गरो हेमभूषितः । पुरा यो मम पार्वत्या दत्तः
परमतुष्टया ॥ गृहाण शंबरेमं त्वं मुद्गरं हेमभूषितम् । मायांतकरणं नाम सर्वासुरविनाशनम् । अनेन दानवौ रौद्रौ बलिनौ कामरूपिणौ । शुंभश्चैव निशुंभश्च सगणौ सूदितौ मया" इति पार्वत्या एव ससैन्यशुंभहंतृत्व
मुक्तम् । ततः शक्रप्रेषितनारदेन मुद्गरवृत्तांतं तस्य शांत्यै गौर्युपासनं चोपदिश्य गते सति दैत्येन तस्मिन्गृह्यमाणे सति तदुपादानाद्द्वादशादित्योत्थान्महोत्पातान्दृष्ट्वा प्रद्युम्नः शंभुप्रियां हृदि स्मृत्त्वा भूमौ शिरसा प्रणम्य तुष्टाव
"ॐनमः कात्यायन्यै गुहस्य जनन्यै नमः । नमस्त्रैलोक्यमायायै कात्यायन्यै नमोनमः॥ नमस्ये शुंभमथिनीं निशुंभहृद्विदारिणीम्॥ विंध्यवासिनीं दुर्गघ्नीं रणदुर्गां रणप्रियाम्॥ त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम् । सिंहवा
हां नमस्यामि" इत्यादिना मध्यमोत्तमचरितोक्तं सर्वं गुप्तमत्र विषयमुपपादितम्। प्रथमचरितदेवता तु योगनिद्रारूपा तामसी शक्तिः । सा च रुद्रांतर्भूतैवेति न विवादः । यद्यपि तत्र शुंभनिशुंभयोः शूलखड्गाभ्यां हननमत्र तु
मुद्गरेणेति विरोधस्तथापि स कालभेदेनापास्तुं शक्यः । "वैवस्वतेन्तरे" इत्यादिभगवत्युक्तेः । हरिवंश एवानिरुद्धविष्णुकृते भीष्मपर्वणि पार्थकृते च स्तवे पुराणांतर्गतोमामाहात्म्यवचनेष्वयमेवार्थः स्पष्टः । ग्रन्थविस्तरभि
या वाक्यानि नेह लिख्यंते । यानि तूमादेर्महालक्ष्मीविभूतित्त्ववचांसि तानि विष्णवादेर्नृसिंहविभूतित्वबोधकवचांसीवोपासनार्थस्तुतिपराणि । वस्तुतस्तु गौरीत्वमेवेत्यादीनि साक्षादभेदपराण्येव । अन्यथा "त्वमक्षरं ब्रह्म"
इत्यादेरपि तादृशवाक्यगणे पठितस्य तथात्वप्रसंगेनाक्षरस्य परब्रह्मणोपि स्तुत्यश्रीरामादिविभूतित्वप्रसंगः । अवतारावतारिणोश्चात्यंताभेद एव । किञ्च "न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मायाहं परं ब्रह्म स
विष्णुः परमेश्वरः" इति कौर्मे शिवयैव स्वस्या विष्णुरूपत्वमुक्तम् । "सदाशिवांकमारूढा शक्तिरिच्छाह्वया शिवा । महालक्ष्मीः" इति शैवे साक्षान्महालक्ष्मीरूपतो माया इत्युक्ता । लक्ष्मीतन्त्रे लक्ष्म्याः काल्यादेः स्वा
वतारत्वोक्तेरपि सोभयोरभेदपरैव "हिरण्यगर्भरुचिरौ स्त्रींपुंसौ कमलासनौ" इत्यादि प्राधानिकरहस्ये रमाया रजोवच्छिन्नब्रह्मरूपत्वं प्रतीयतेतोस्या न केवलविष्णुरूपत्वनिश्चयः । न चैतेनास्याः केवलं विधिरूपत्वमस्तु ।
कौर्मे "इयं सा परमा शक्तिर्मन्माया ब्रह्मरूपिणी" इति विष्णूक्त्या विष्णुपुराणादिवचनैश्चास्या विष्णुरूपत्वस्यापि प्रतीतेः । एवम् । "मोक्षदे मुक्तिमार्गे"इत्यादिरुद्रयामलोक्त्या सरस्वत्या मोक्षादिरूपसत्वावाच्छिन्नकार्यप्रतीतेः ।
"सत्वाख्येनातिशुद्धेन गुणेनेंदुप्रभं दधौ" इति प्राधानिकरहस्ये श्वेतरूपत्वात्साक्षात्सत्वयोगोक्तेश्च न केवलब्रह्मरूपत्वनिर्णयः । एतच्च शिवेऽपि तुल्यम् । तस्मात्सर्वेषां सर्वे देहा इति सिद्धम् । तथा च एकरूपत्वमेव सर्वेषां पर्य
वसन्नम् । तदुक्तं हरिवंशे । "यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामहः । एकमूर्तिस्त्रयो देवा रुद्रविष्णुपितामहाः ॥ वरदा लोककर्त्तारो लोकनाथाः स्वयंभुवः । अर्द्धनारीश्वरास्ते तु व्रतं तीव्रं समास्थिताः ॥"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ॥ तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनम् ॥ २४ ॥

शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः ॥ २३ ॥ उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह । पार्थिवात्स्वतःप्रवृत्तिप्रकाशरहिताद्दारुणः काष्ठात्सकाशाद्धूमः प्रवृत्तिस्वभावः

इत्यादि । एतेन "रुद्रो नारायणश्चैवेत्येकं सत्वं द्विधा कृतम्" इत्यादिभारतादिवचनमाश्रित्य शिवविष्णू एव सत्वावच्छिन्नेशरूपौ । ब्रह्मा तु जीव एवेशाविष्टःस्रष्टा भवतीति ब्रुवाणा निरस्ताः । यस्तु हरादिषु क्वचित्कस्माच्चित्कस्यचित्कदाचित्केनचिन्निमित्तेन लीलया वाविर्भाव उच्यते । सोपि विचार्य्यमाण ऐक्य एव पर्यवस्यति । तथाहि । क्वचिद्विधेरुभयोराविर्भाव उच्यते । यथा "यथा यजुर्भ्योथ विष्णुम्" इत्यादिश्रुता बष्टमूर्त्तिब्राह्मणे चान्यत्रापि पुराणादिषु क्वचिक्वचिद्रुद्रात् । तथा च श्रुतिः "अण्डं हिरण्मयं रुद्रस्य वीर्यात्प्रथमं संबभूव तत्र ब्रह्मा विष्णुर्जातः" इत्यादि । हरिवंशे च हरं प्रति हरिवचनम् "अहं ब्रह्मा कपिलोथाप्यनंतः पुत्राः सर्वे ब्रह्मणश्चातिवीर्याः । त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीड्यः ॥" इति क्वचिद्धरेर्यथा "नारायणाद्ब्रह्मा जायते नारायणादिन्द्रो जायते नारायणाद्द्वादशादित्या रुद्राः सर्वे देवताः" इत्यादिश्रुतौ । यथा च भारते "त्वद्विस्तारो यतो ब्रह्मा अहं भूतपतिस्तथा" इति एवमन्यान्यपि शैववैष्णवादिमतेषूदाहृतानीदृशानि वचांसि स्मर्तव्यानि । एतानि कल्पभेदेन व्यवस्थितानि एतद्व्यतिविस्तरेण श्रीवसिष्ठो वासिष्ठे श्रीरामं प्रति कथयामास । तत्रैवेशश्चाह वसिष्ठं प्रति "एवं सर्गे हि कस्मिंश्चित्प्रथमोथ सदाशिवः । कस्मिंश्चिद्विष्णुरित्युक्तो नाभ्युत्पन्नपितामह ॥ पितामहस्स कस्मिंश्चित्कस्मिंश्चिदपि चेतरः ॥" इति । इतरो दुर्गाभैरवविनायकादिः । तेषामपि तन्माहात्म्यबोधकपुराणादिभागेषु ब्रह्माद्युद्भवहेतुत्वसिद्धेः । भगवान्वायुश्चाह "ब्रह्मनारायणौ पूर्वं रुद्रः कल्पांतरेसृजत् । कल्पांतरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः ॥ विष्णुश्च भगवांस्तद्वद्ब्रह्माणमसृजत्पुनः । नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनः शिवः । एवं कल्पेषुकल्पेषु ब्रह्मविष्णुमहेश्वराः । परस्परस्माज्जायंते परस्परजयैषिणः । ततत्कल्पांतवृत्तांतमाधिकृत्य महर्षिभिः । प्रभावः कथ्यते तेषां परस्परसमुद्भवात् ॥" इति । कौर्मे च " क्वचिद्रुद्रः क्वचिद्ब्रह्मा क्वचिद्विष्णुः प्रशस्यते । नान्येन तेषामाधिक्यं न्यूनत्वं वा कथंचन ॥ ततत्कल्पांतवृत्तांतमाधिकृत्य महर्षिभिः । तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति" इत्युक्तं । मार्कंडेयेपि "विष्णुः शरीरग्रहणमहमीशान एव च । कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥"इत्यादिना दुर्गाया विष्ण्वाद्युदयमुक्त्वा यस्तेद्देहेभ्योऽस्या उद्भव उक्तः सोपि कालभेदेन व्यवस्थितः । एवं गणेशपुराणादौ विनायकादेर्ब्रह्माद्याविर्भाव उक्तः सोपि समाधातुं शक्य इति न कुत्रापि विरोधः । इत्थं सर्वेषां सत्वतनुत्वात्सत्वतनुत्वेन या विध्यादेरप्युपासना सापि श्रेयोहेतुरिति सिद्धम् । अत्र बहु वक्तव्यमस्ति ग्रन्थाविस्तराभिया नोक्तमित्यलम् ॥ २३ ॥ ईषत्कर्मप्रत्यासत्तेर्धूमदर्शने सत्यधुनाग्निरप्याविर्भवति । जातश्चाधुना होमनैकव्यमिति ज्ञानात् । इतिभाव इति । उपाधिरेव वैशिष्ट्यवैशिष्ट्येहेतुस्स्वतस्त्वेकरूपतैवेत्याशयः । अत्र संदर्भः।अत्र यत्त्रयाणामभेदवाक्येनोपजतमतयो विवदंते । तत्रैदं ब्रूमः । यद्यपि तारतम्यमिदमधिष्ठानगतमेव । अविष्ठाता तु परः पुरुष एक एवेति भेदासंभवात्सत्यमेवाभेदवाक्यम्। तथापि तस्य तत्रतत्र साक्षात्त्वासाक्षात्वभेदेन प्रकाशेन तारतम्यं दुर्निवारमेवेति सदृष्टांतमाहपार्थिवादिति । पार्थिवान्न तु धूमवदंशेनाग्नेयात् । तत्रतत्र वेदोक्तकर्मणः साक्षात्प्रवृत्तिप्रकाशरहितात्दारुणः यज्ञियात् मंथनकाष्ठात्सकाशादंशेनाग्नीयो धूमस्त्रयीमयः पूर्वापेक्षया वेदोक्तकर्माधिक्याविर्भावास्पदं तस्मादपि स्वयमग्निस्त्रयीमयः साक्षात्तदुक्तकर्माविर्भावास्पदम् । एवं काष्ठस्थानीयात्सत्वगुणविदूरात्तमसः सकाशाद्धूमस्थानीयं किंचित्सत्वसंनिहितं रजो ब्रह्मदर्शनं वेदोक्तकर्मस्थानीयस्य ब्रह्मणस्तु तत्तदवतारिणः पुरुषस्य प्रकाशद्वारम् । यदग्निस्थानीयं सत्वं साक्षाद्ब्रह्मणो दर्शनं साक्षादेव सम्यक्तत्तद्गुणरूपाविर्भावद्वारम् । अतो ब्रह्मशिवयोरसाक्षात्त्वं सिद्धमिति भावः । तथा च श्रीवामनपुराणे "ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोर्महात्मनः । ब्रह्मणि ब्रह्मरूपः स शिवरूपः शिवे स्थितः । पृथगेव स्थितो देवो विष्णुरूपी जनार्दनः ॥" इति श्रीदशमे च शिवः शक्तियुतः "शश्वत्त्रिलिंगोगुणसंवृतः" इत्यादौ "हरिर्हि निर्गुणः साक्षादीश्वरः प्रकृते परः । स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥" अत एव श्रीविष्णोरेव परमपुरुषेण साक्षादभेदोक्तिः "सृजामि तन्नियुक्तोहम्" त्यादिना द्वितीये तदुक्तं स एव विष्णुरीति । श्रुतिश्च "पुरुषो ह वै नारायणोऽकामयत अथ नारायणादजो जायते यतः प्रजाः सर्वाणि भूतानि । नारायणः परंब्रह्म तत्वं नारायणः परः । ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलमिति" "एको नारायण आसीन्न ब्रह्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयीमयो वेदोक्तकर्मप्रचुरः ईषत्कर्मप्रत्यासत्तेः । तस्मादप्यभिन्नत्रयीमयः साक्षात्कर्मसाधनत्वात् । एवं तमसः सकाशाद्रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकम् । तुशब्देन लयात्मकात्त
मसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं विक्षेपकत्वात् । यत्सत्त्वं तत्साक्षाद्ब्रह्मदर्शनम् अतस्तद्गुणोपाधीनां
नं च शंकरः । स मुनिर्भूत्वा समचिंतयत् । तत एवैते व्यजायंत । विश्वे हिरण्यगर्भोऽग्निर्वरुणरुद्रेंद्रा'' इति च । एवं त्रिदेवीपरीक्षायामपि श्रीविष्णोरेवाबाध्यत्वं स्पष्टम् । एवं भगवदवतारानुक्रमणिकासूत्राणां भेदमंगी
कृत्यैव केवलश्रीदत्तस्य गणना सोमदुर्वाससोस्त्वगणना । तदेवं श्रीविष्णोरेव सर्वोत्कर्षे स्थिते यदन्यत्र विष्णुशिवयोर्भेदे नरकः श्रूयते । तदनैकान्तिकवैष्णवशास्त्रत्वादनैकान्तिकवैष्णवपरमेव । तद्विपरीतं हि
श्रूयते पाद्मोत्तरखंडादौ ''यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनैव वीक्षेत स पाखंडी भवेद्ध्रुवम् ॥'' इत्यादि । तथा च विष्णुधर्मोत्तरांते लिंगस्फोटनृसिंहोपाख्यानम् । विष्वक्सेननामा विप्रः
कश्चिदेकान्ते विष्णुभक्त आसीत्तस्य पृथिवीं भ्रमतो दैवात्केनचिद्ग्रामाध्यक्षपुत्रेण मिलनमभूत् । तयोः संकथा चेयम् ''देवकर्मण्यशक्तिर्मे तात पूजय शंकरम् । देवतायतनं गत्वा तत्र तात प्रतिष्ठि
तम् । लिंगमस्ति सुरेशस्य महादेवस्य निर्मलम् । एवमुक्तः प्रत्युवाच वयमेकांतिनः श्रुताः । चतुरात्मा हरिः पूज्यः प्रादुर्भावगतोथवा । पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ मा चिरम्'' इत्यादिका । ततो ग्रामाध्यक्ष
पुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते तद्धस्तेन मृत्युमनभीप्सन्स इदं विचारयामास भवतु तत्रैव गच्छाम इति ततो लिंगसमीपं गत्वा तस्मिन्नधिष्ठाने श्रीनृसिंहाय नम इति पुष्पांजलौ विक्षिप्ते तच्छ्रुत्वा पुनः शिरश्छेत्तु
मुद्यतस्य तल्लिंगं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य शिरांसि छिन्नानीति । तदेतदुक्तं स्कांदे '' शिवशास्त्रेषु तद्ग्राह्यं भगवच्छास्त्रयोगि यत् '' इति । मोक्षधर्मे नारायणीयोपाख्याने ''सांख्यं
च योगश्च सनातने द्वे वेदाश्च सर्वे निखिलेपि राजन् । सर्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणम्'' इति । महाभारते ''यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते । स हेमराशिमुत्सृज्य पांशुमुष्टिं जिघृ
क्षति ॥ '' इति । अत एवोक्तं नारदेन ''अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन शमं प्रशांतम् । विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्त्ति सिंधुम् ॥ '' श्रीहरिवंशे ''हरिरेव सदा ध्येयो भवद्भिः सत्वसंस्थि
तैः । विष्णुमंत्रं सदा विप्राः पठध्वं ध्यात केशवम् ॥ '' इति । अत एव विष्णुमंत्रजापकस्याधिक्यं श्रीनृसिंहतापिन्यां श्रुतौ ''अनुपनीतशतमेकमेकेनोपनीतेन तत्सममुपनीतशतमेकमेकेन गृहस्थेन तत्समम् गृहस्थ
शतमेकमेकेन वानप्रस्थेन तत्समम् वानप्रस्थशतमेकमेकेन यतिना तत्समम् यतीनां शतं पूर्णमेकेन रुद्रजापेन तत्समम् रुद्रजापकशतमेकमेकेनाथर्वांगिरसशिखाध्यापकेन तत्समम् । अथर्वांगिरसशिखाध्यापकशतमेकमेकेन
मंत्रराजाध्यापकेन तत्समम्'' इति । मंत्रराजः श्रीनृसिंहमंत्र एव । अत एवोक्तं वाराहे ''जन्मांतरसहस्रेषु समाराध्य वृषध्वजम् । वैष्णवत्वं लभेद्धीमान्सर्वपापक्षये सति'' इति।यत्तु श्रीभागवत एव ''त्रयाणामेकभावानां यो न
पश्यति वै भिदाम् । सर्वभूतात्मतां ब्रह्मन्स शांतिमधिगच्छति'' इत्यादि । तत्खलु श्रीविष्णोः सकाशादन्यास्वातंत्र्यापेक्षयैव । तदुक्तं श्रीब्रह्मणा '' सृजामि तन्नियुक्तोहं हरो हरति तद्वशः । विष्णुः पुरुषरूपेण
परिपाति त्रिशक्तिधृक्'' इति । श्रीसंकर्षणेन च ''ब्रह्मा हरोहमपि यस्यकलाः कलायाः'' इति । ''यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्'' इति च । एतदभिप्रेत्यैवोक्तं पाद्मेपि ''शिवस्य
श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्येत्स खलु हरिनामाहितकरः'' इति । अत्र श्रीविष्णुनेति तृतीयाया निर्देशादत्रैव श्रीशब्ददानाच्च श्रीमतः सर्वशक्तियुक्तविष्णोः सर्वव्यापकत्वेन तन्नाम्नस्तस्माद्यः शिव
स्य गुणनामादि सकलं धिया भिन्नं स्वतंत्रं पश्येदित्यर्थः । अतो मार्कण्डेयं प्रति श्रीशिववाक्यं चेदमेव । ''न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते । नात्मनश्च परस्यापि तद्युष्मान्वयमीमहि ॥'' तत्तेभ्योपि सर्वसम
दृष्टिभ्यो वयं युष्मानेव ईमहि प्रियत्वेन जानीम इति । ''अथ भागवता यूयं प्रियाः स्थ भगवान्यथा । न मद्भागवतानां च प्रेयानन्योस्ति कर्हिचित्'' इति चतुर्थे तस्यैवोक्तेः । अत एव तत्पूर्वं ''नैवेच्छत्याशिषः क्वापि
ब्रह्मर्षिर्मोक्षमप्युत । भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ॥ '' इति । श्रीशिवोक्तमहिमभक्त्या भगवति समाधिस्थस्य तस्य देव्यै महिमदर्शनार्थं हृदि छलेन स्वयं शिवे प्रविष्टे विरतिर्जाता । यथोक्तं ''किमिदं कुत एवेति
समाधेर्विरतो मुनिः'' इति । '' तच्चान्यथा न संभवति'' इति । श्रुतौ च श्रीविष्णोरेव सर्वोत्कर्षत्वमुक्तम् । '' यः कामये तमुग्रं कृणोमि तं ब्रह्माणं तं सुधाम् '' इत्यादिना । तस्मात्तदयित्वेनैव ब्रह्मरुद्रभजने न दोषः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेजिरे मुनयोऽथाग्रे भगवंतमधोक्षजम् ॥ सत्त्वं विशुद्धं क्षेमाय कल्पंते येऽनु तानिह ॥ २५ ॥

ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः ॥ २४ ॥ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति । भेजिर इति । अथातो हेतोरग्रे पुरा विशुद्धं सत्त्वं सत्त्वमूर्तिं भगवंतमधोक्षजम् । "स आदिदेवो जगतां परो गुरुः" इति, "वैष्णवानां यथा शंभुः" इत्याद्यंगीकारात् । यथानुष्ठितं श्रीप्रह्लादेन "ततः संपूज्य शिरसा ववंदे परमेष्ठिनम् । भवं प्रजापतीन्देवान्प्रह्लादो भगवत्कलाः ॥" इति । युधिष्ठिरेण च "क्रतुराजेन गोविन्द राजसूयेन पावनीः । यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो ॥" इति। "स्वतन्त्रेण तु भजने भृगुशापो दुरत्यय" इति। तथा चतुर्थे "भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययम् । भवव्रतधरा ये च ये च तान्समनुव्रताः ॥ पाखंडिनस्ते भवंतु सच्छास्त्रपरिपन्थिनः ॥" इत्यादि । वेदविहितमेवात्र भवव्रतमनूद्यतेऽन्याविहितत्वे पाखंडिविधानायोगः स्यात् । पूर्वत एव पाखंण्डित्वसिद्धेः । तस्मात्स्वतंत्रत्वेनैवोपासनायामयं दोषः । यतश्च तत्रैव तेन श्रीजनार्दनस्यैव वेदमूलत्वमुक्तम् । "अत एव हि लोकानां शिवः पन्थाः सनातनः । यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ॥" इति । एष वेदलक्षणः । यत्प्रमाणं यत्र मूलमित्यर्थः । स्वतन्त्रोपासनाया तत्प्राप्तिः श्रीगीतोपनिषत्स्वेव निषिद्धा । "येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेपि मामेव कौंतेय यजन्त्यविधिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ यान्ति देवव्रता देवान्पितॄन्यान्ति पितव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोपि माम्" इति । अवज्ञानादिकं तु सर्वथा परिहरणीयम् । यथा पाद्मे "हरिरेव सदाराध्यः सर्वदेवेश्वरेश्वरः । इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन ।" श्रीभगवद्वाक्यं च "यो मां समर्चयेन्नित्यमेकान्तं भावमास्थितः । विनिंदन्देवमीशानं स याति नरकं ध्रुवम् ॥" गौतमीये च "गोपालं पूजयेद्यस्तु निंदेद्यद्यन्यदेवताः । अस्तु तावत्परो धर्मः पूर्वधर्मो विनश्यति॥" "हयशीर्षा मां पथि देवहेलनात्" इति नारायणवर्मणि तदागःप्रायश्चित्तं चतुर्थे नंदीश्वरशापश्च "संसरन्त्विह ये चामुमनु शर्वावमानिनम्" इति । अत्र विशेषजिज्ञासा चेत्परमात्मभक्तिसंदर्भो दृश्यौ । विश्वनाथस्तु आवरणविक्षेपप्रकाशधर्माणां तमोरजःसत्त्वानां यथोत्तरं श्रैष्ठ्यम् । तथा सत्त्वस्य शुद्धसत्त्वे प्रातिकूल्याभावं च सदृष्टांतमाह । पार्थिवात्स्ववृत्तिप्रकाशप्रवृत्तिरहिताद्दारुणः काष्ठाद्धूमः प्रवृत्तिस्वभावः श्रेष्ठस्ततोऽप्यग्निः प्रवृत्तिप्रकाशधर्मकः वेदोक्तकर्मसाधनत्वात्त्रयीमयः । एवं तमसो लयात्मकत्वाद्रजोविक्षेपकं श्रेष्ठम्।ततोपि सत्त्वं लयविक्षेपशून्यं ब्रह्मदर्शनं "सत्त्वात्संजायते ज्ञानम्" इत्युक्तेः । शुद्धसत्त्वे तस्य प्रातिकूल्याभावेनोपरागाभाव उक्तः । तेन ब्रह्मदर्शने तस्य व्यवधायकत्वाभाव एव साधकत्वमौपचारिकं भक्त्या विना ब्रह्मदर्शनासंभव इत्यग्रिमग्रंथे प्रतिपादनात् । एवं च "आनन्दो ब्रह्मणो रूपम्" इति परमेश्वरस्यानन्दरूपत्वात् "मायापरैत्यभिमुखे च विलज्जमाना" इत्यादेर्मायागुणानां रजःसत्त्वतमसां परमेश्वरस्पर्शे स्वतः सामर्थ्याभावात्परमेश्वरेणैव स्वेच्छया तत्स्पर्शे स्वीकृतेपि ब्रह्मणि विक्षेपविशिष्टो विष्णौ प्रकाशविशिष्टः शिवे आवरणविशिष्ट आनन्द इत्यत आनन्दस्य प्रकाशयुक्तत्वे न क्षतिरिति विष्णुरेवोपास्य इति विवेकः । अत्र दारुणि शुद्धतेजस उपलब्धेर्धूमे त्वनुपलब्धेर्धूमस्थानीयाद्रजसः सकाशाद्दारुस्थानीयं तमः श्रेष्ठं तत्कार्यसुषुप्तावपि केवलात्मानुभवादिति रजस्तमोवतोर्ब्रह्मरुद्रयोर्मध्ये रुद्र एव श्रेष्ठ इति केचिदाहुः । अतो भगवदवतारत्वे त्रयाणां साम्यम्।गुणोपरागानुपभ्यामसाम्यं चेत्यभेदभेदप्रतिपादकानि पौराणिकवाक्यानि संगमनीयानि।अत्र "असंगो ह्ययं पुरुषः" इति श्रुतेः परमात्मा जीवात्मा च यद्यपि स्वरूपतो गुणसंगरहित एव भवति तदपि परमात्मनश्चिन्महोदधित्वात्परमेश्वरत्वात्स्वातंत्र्यात्स्वैरलीलत्वाच्च स्वेच्छयैव स्वकर्तृकेण गुणस्पर्शेन शंभुत्वे सति गुणकार्यक्रोधादिमत्त्वेप्यात्मारामत्वमसंसारित्वं स्वाज्ञानापचयश्च भवति । जीवात्मनश्च चित्कणत्वादल्पप्रकाशकत्वादीशितव्यत्वादस्वातंत्र्यादल्पबलत्वाच्च गुणकर्तृक एव तत्स्पर्शे सति स्वज्ञानलोपः संसारश्च भवतीति विवेचनीयम् ॥ २४ ॥ अत इति । अथ शब्दार्थः । यतः सत्त्वतनोरेव श्रेयांसि अत इत्यर्थः । विश्वनाथस्तु विशुद्धं सत्त्वं स्वरूपभूताचिच्छक्तिरेव तन्मयम् । "विद्याविद्याभ्यां भिन्नः ।" इति गोपालतापनीश्रुतेः "छायातपौ यत्र न गृध्रपक्षौ" इति स्मृतेश्च । "सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तयः" इति दश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ ॥ नारायणकलाः शांता भजंति ह्यनसूयवः ॥२६॥ रजस्तमःप्रकृतयः समशीला भजंति वै ॥ पितृभूतप्रजेशादीञ्छ्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥ वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥ वासुदेवपरं ज्ञानं वासुदेवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥

अतो ये ताननुवर्तंते त इह संसारे क्षेमाय कल्पंते ॥२५॥ नन्वन्यानपि केचिद्भजंतो दृश्यंते । सत्यम् । मुमुक्षवस्त्वन्यान्न भजंति किं तु सकामा एवेत्याह । मुमुक्षव इति द्वाभ्याम् । भूतपतीनिति पितृप्रजेशादीनामुपलक्षणम् । अनसूयवो देवतांतरानिंदकाः संतः ॥ २६ ॥ रजस्तमसी प्रकृतिः स्वभावो येषां ते । अत एव पितृभूतादिभिः समं शीलं येषाम् । श्रिया सहैश्वर्यं प्रजाश्चेप्संतीति तथा ते ॥ २७ ॥ मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तम् । सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह । द्वाभ्याम् । वासुदेव एव परस्तात्पर्यगोचरो येषां ते । ननु वेदा मखपरा दृश्यंते इत्याशंक्य तेऽपि तदाराधनार्थत्वात्तत्परा एवेत्युक्तम् । मखा इति । योगा योगशास्त्राणि । तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तम् ॥ २८ ॥ ज्ञानं ज्ञानशास्त्रम् । ननु च तज्ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तम् । तपोऽत्र ज्ञानम् । धर्मो धर्मशास्त्रं दानव्रतादिविषयम् । ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं साऽपि तदानंदांशरूपत्वात्तत्परैवेत्युक्तम् । यद्वा । वेदा इत्यनेनैव तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तम् । तत्र ननु तेषां मखयोगक्रियादिनानार्थपरत्वान्न तदेकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमाच ।

विष्णुवपुषो मायातीतत्वात् । मायाशक्तिवृत्तिविचैव विशुद्धसत्त्वशब्दवाच्येति न व्याख्येयम् । क्षेमाय मोक्षाय ॥ २५ ॥ अत्राक्षिपति नन्विति । अन्यान्भैरवादीन् । अथातो हेतोर्विशुद्धसत्वरूपत्वादित्यर्थः ॥ २६ ॥ ॥ २७ ॥ ननु वेदैरेव पित्रादयो भजनीयत्वेनोच्यंते तेषां को दोषस्तत्राह वासुदेव एव परस्तात्पर्यगोचरस्तात्पर्यविषयो येषां ते "कालेन प्रलये नष्टा वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥" इति "किं विधत्ते किमाचष्टे" इत्यतो "मां विधत्तेऽभिधत्ते माम्" इत्यादिभगवदुक्तेश्च । "ब्रह्मावधार्यात्मगुणानुवादम्" इतिवाराहचरितोक्तेश्च "वेदैश्च सर्वैरहमेव वेद्यः" इति गीतोपनिषद्येवकारेणान्ययोगव्यवच्छेदाच्च । वेदतात्पर्यमनवबुद्ध्यैव पित्रादीन्भजंतीति भावः । पुनराक्षिपति नन्विति । मखादिपरत्वं दृश्यते सत्यम् । "स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः । आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥" इति श्रीनारदोक्तेर्मखादौ वेदस्य तात्पर्याभावात् "धर्मो यस्यां मदात्मकः" इति भगवदुक्तेः । "तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते" इति श्रीदेवहूत्युक्तेः । "यथा तरोर्मूलनिषेचनेन" इति नारदोक्तेश्च । वासुदेव एव वेदतात्पर्यावगमाच्च सर्ववेदार्थः केवलभगवद्भक्तिरेवेति । यद्वा मखस्य वासुदेवभुजाद्यंगविभूतींद्रादिदेवताराधनमयत्वेन वासुदेवपरत्वमादिभरतचरिते प्रसिद्धम् । "संप्रचरत्सु नानायागेषु विरचितांगक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिंगानामर्थनियामकतया साक्षात्कर्त्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु यजमानो ये यज्ञभाजो देवास्तान्पुरुषावयवेष्वभ्यध्यायत्" दित्याद्युक्तेः । योगस्यापि कापिलेये भगवद्ध्यानादिपरत्वं प्रसिद्धम् । कर्मणामपि तत्समर्पणं विना फलासिद्धेस्तत्परत्वम् ॥ २८ ॥ ज्ञानशास्त्रं वेदान्तशास्त्रम् । अत्राक्षिपति नन्विति । तत्परत्वं ज्ञानशास्त्रेणापि वासुदेव एव ज्ञेयत्वेन प्रतिपाद्यतेऽतस्तस्यापि तत्परत्वमेव । "यस्य ज्ञानमयं तपः" इति श्रुतेस्तपो ज्ञानम् । येन ज्ञेयसाक्षात्कारस्तज्ज्ञानम् "ज्ञानं ज्ञेयं परं ब्रह्म" इति स्मृतेर्ज्ञानस्य वासुदेवस्वरूपत्वात्तदपि तत्परमेव । यत्र दानानां व्रतानाञ्च महिमा वर्ण्यते तच्छास्त्रं महाभारतादि । अत्राक्षिपति । नन्विति । तद्धर्मशास्त्रम् । आदिना कुबेरादिलोकपालग्रहः । तस्य परमात्मन आनन्दांशरूपत्वात् "तस्यैवानन्दस्य मात्रामुपजीवन्त्यन्यानि" इत्यादिश्रुतेः । अत्र हस्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एवेदं ससर्जाग्रे भगवानात्ममायया ॥ सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥ ३० ॥
तया विलसितेष्वेषु गुणेषु गुणवानिव ॥ अंतः प्रविष्ट आभाति विज्ञानेन विजृंभितः ॥ ३१ ॥
यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ॥ नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३२ ॥
असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः ॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ॥ ३३ ॥

मित्युक्तमिति द्रष्टव्यम् ॥ २९ ॥ ननु जगत्सर्गतत्प्रवेशनियमनादिविलासयुक्ते वस्तुनि सर्वशास्त्रसमन्वयो दृश्यते । कथं वासुदेवपरत्वं सर्वस्य । तत्राह । स एवेति चतुर्भिः । ऐतैरेव श्लोकैस्तस्य कर्माण्युदाराणि ब्रूहीति प्रश्नस्योत्तरमुक्तम् । सदसद्रूपया कार्यकारणात्मिकया अगुणश्चेत्यन्वयः । स्वतो निर्गुणोऽपि सन्नित्यर्थः ॥ ३० ॥ भगवतो जगत्कारणत्वमुक्तं प्रवेशनियमनलक्षणां लीलामाह । तयेति । विलसितेषूद्भूतेषु गुणेष्वाकाशादिष्वंतः प्रविष्टः सन्गुणवानिव मदधीना एते गुणा इत्यभिमानवानिव न तु वस्तुतस्तथा । यतो विज्ञानेन चिच्छक्त्या विजृंभितोऽत्यूर्जितः ॥ ३१ ॥ बहुलीलारूपत्वमाह । यथेति । स्वयोनिषु स्वाभिव्यंजकेषु । अवहितो निहितः । विश्वात्मा पुमान्परमेश्वरः । भूतेषु प्राणिषु । अंतर्यामिणोऽपि प्रतियोनिनानात्वेन नानात्वमिवोच्यते । क्षेत्रज्ञरूपेण वा ॥ ३२ ॥ भोगरूपां लीलामाह । असाविति । असौ हरिर्भूतसूक्ष्माणि चेंद्रियाणि चात्मा मनश्च तैः स्वयं निर्मितेषु भूतेषु चतुर्विधेष्विति भोगे स्वातंत्र्यं द्योत्यते । तद्गुणांस्तत्तदनुरूपान्विषयानिच्छया भुंक्ते भोजयतीति णिजर्थो वा

पदन्यायेन वेदस्य सर्वमूलत्वाद्भिन्नत्वेन कथनमनुचितमिति चेत्तत्राह-यद्वेति । तत्र पूर्ववाक्ये ॥२९॥ पुनराक्षिपति।नन्विति । सर्गः सृष्टिः प्रवेशः ''तत्सृष्ट्वा तदेवानुप्राविशत्'' इति श्रुत्युक्तः प्रवेशः । नियमनं''यः पृथिवीमंतरा यमयति''इत्याद्यन्तर्यामिब्राह्मणोक्तम्। आदिना पालनादिग्रहः।वस्तुनि सत्यरूपे ब्रह्मणि''सर्वे वेदा यत्पदमामनन्ति''इत्यादिश्रुतेः।सर्वशास्त्राणां समन्वयस्तात्पर्यम्।तत्राह-यस्मिन्सर्वशास्त्रसमन्वयः स एव परमात्मा भगवान्वासुदेवः ''वेदैश्च सर्वैरहमेव वेद्यः''इति गीतोक्तेः। ब्रह्मण एवापरपर्यायो भगवच्छब्दवाच्यो वासुदेवो नान्य इति''ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'' इत्युक्तेः । इत्यर्थ इति । वस्तुतो निर्गुण एव मायया सगुण इव स आभातीति भावः ॥ ३० ॥ प्रतियोगिनोत्रांतःकरणानि देहा वा तेषां नानात्वेन सांख्यादिमतमादायाह-क्षेत्रज्ञरूपेणेति । अवस्थितः सदा स्थितो यथा तथा विश्वात्मांतर्यामी भूतेषु प्राणिषु । यदि तेष्वेवाग्निर्मथनेन प्रकटीकृतः स्यात्तदा तान्येव दहति।एवमेव श्रवणादिभिः साधनैः साक्षात्कृतः परमात्मा मायिकमुपाधिं जीवस्य दूरीकरोतीति भावः॥३१॥३२॥भुंक्ते इति॥जीवानां भोक्तृत्वमंतर्यामिणा विना न सिद्ध्यतीति जीवस्य तदीयतटस्थशक्तित्वाद्वा जीवद्वारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावयत्येष सत्त्वेन लोकान्वै लोकभावनः ॥ लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे द्विती
योऽध्यायः ॥ २ ॥ सूत उवाच ॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः ॥ संभूतं षोडशकलमादौ लोकसिसृक्षया ॥ १ ॥

ज्ञेयः । पालयतीति वा । तदा त्वात्मनेपदमार्षम् । "भुजोऽनवने" इति स्मरणात्॥ ३३॥इदानीं सूत जानासीति प्रश्नस्योत्तरमाह । भावयति पालयति । एतत्तु सर्वावतार
साधारणं प्रयोजनम्। विशेषतः कृष्णावतारस्य कुंतीस्तुतौ वक्ष्यते। लोकभावनो लोकभर्ता । देवादिषु ये लीलावतारास्तेष्वनुरतोऽनुरक्तः॥ ३४॥इति श्रीमद्भागवते महापुराणे
प्रथमस्कंधे भावार्थदीपिकायां टीकायां द्वितीयोऽध्यायः ॥ २ ॥ अवतारकथाप्रश्ने तृतीये तूत्तराभिधा ॥ पुरुषाद्यवतारोक्त्या तत्तच्चारित्रवर्णनैः ॥ १ ॥ यदुक्तम् 'अथा
ख्याहि हरेर्धीमन्नवतारकथाः शुभाः' इति तदुत्तरत्वेनावतारानतुक्रमिष्यन्प्रथमं पुरुषावतारमाह । जगृह इति पंचभिः । महदादिभिर्महदहंकारपंचतन्मात्रैः संभूतं सुनिष्प
न्नम् । एकादशेंद्रियाणि पंच महाभूतानीति षोडश कला अंशा यस्मिन् । यद्यपि भगवद्विग्रहो नैवंभूतस्तथापि विराड्जीवांतर्यामिणो भगवतो विराड्रूपेणोपासनार्थमे

स्वयमंतर्यामी भुंक्त इति युज्यत इति । जीववदीशस्य गुणभोक्तृत्वं सर्वथानुचितमेवेति मन्वानं प्रत्याह-भोजयतीति । णिजर्थोन्तर्भावितणिजर्थ इत्यर्थः । धातोः पालनार्थमादायाह-पालयतीति । तदा पालनार्थांगीकारेऽनवने
ऽपालने भुजेरात्मनेपदं भवतीति । स्मरणात्पाणिनिसूत्रात् ॥ ३३ ॥ लोकान्भावयत्युत्पादयति ब्रह्मद्वारेति तथाभूतो विष्णुः । एतत् विश्वपालनलक्षणम् । आदिशब्दात्स्तंभाच्छ्रीनृसिंहाविर्भावश्रवणात्तत्रापि लीलावतारानुगत
इति ज्ञेयम् ॥ ३४ ॥ इति श्रीमद्भागवते प्रथमस्कन्धे भावार्थदीपिकाप्रकाशे द्वितीयोध्यायः ॥ २ ॥ अवतारकथानां प्रश्ने या उत्तराभिधा उत्तरकथनं सा तृतीयेऽध्याये तत्तदवतारचारित्रवर्णनपूर्वकमुच्यते (१)
अत्र "कलाश्च पञ्चभूतानि ज्ञानकर्मेंदियाणि च । पंचपंच मनश्चेति षोडशोक्ता महर्षिभिः" इति तर्थिः । "यस्मिन्नेताः षोडशकलाः प्रविशन्ति" इति श्रुतेः । अत्र संदर्भः । तत्र ब्रह्मेति परमात्मेत्यत्र यो भगवान्निर्दिष्टः
स एवेदमित्यादौ च यस्यैवाविर्भावा महत्स्रष्ट्रादयो विष्णुपर्यंता निर्दिष्टाः स भगवान्स्वयं श्रीकृष्ण एवेति पूर्वदर्शितशौनकाद्यभीष्टनिजाभिमतस्थापनाय परमात्मनो विशेषानुवादपूर्वकं दर्शयितुं तत्प्रसंगेनान्यानवतारान्कथ
यितुं तत्रैव ब्रह्म च निर्देष्टुमारभते । जगृहे इति । यः श्रीभगवान्पूर्णषडैश्वर्यत्वेन पूर्णो निर्दिष्टः स एव पौरुषं रूपं पुरुषत्वेनाम्नायते । यद्रूपं तदेवादौ सर्गारम्भे जगृहे प्राकृतप्रलये स्वस्मिँल्लीनं सत्प्रकटतया स्वीकृतवान् ।
किमर्थं तत्राह-लोकसिसृक्षया तस्मिन्नेव लीनानां लोकानां समष्टिव्यष्ट्युपाधिजीवानां प्रादुर्भावनार्थमित्यर्थः। कीदृशं सत्तद्रूपं लीनमासीत्तत्राह-महदादिभिः संभूतं मिलितम् अंतर्भूतमहदादितत्त्वमित्यर्थः।"सभूयांबोधिमभ्येति
महानद्या नगापगाः"इत्यादौ हि संपूर्वो भवतिर्मिलनार्थः । अत्र हि महदादीनि लीनान्यासन्निति । तदेवं"विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। एकन्तु महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥ तृतीयं सर्वभूतस्थं
तानि ज्ञात्वा विमुच्यते ॥" इति नारदीयतन्त्रादौ महत्स्रष्टृत्वेन प्रथमं पुरुषाख्यं यद्रूपं श्रूयते "तस्मिन्नाविरभूल्लिंगे महाविष्णुर्जगत्पतिः" इत्यादि । "नारायणः स भगवानापस्तस्मात्सनातनात् । आविरासन्कारणार्णो
निधिः संकर्षणात्मकः ॥ योगनिद्रां गतस्तास्मिन्सहस्रांशुः स्वयं महान्" इत्यादिब्रह्मसंहितादौ कारणार्णवशायिसंकर्षणत्वेन श्रूयते । तदेव जगृहे इति प्रतिपादितम् । पुनः कीदृशं षोडशकलं तत्सृष्ट्यु
पयोगिपूर्णशक्तिरित्यर्थः । तदेवं यस्तद्रूपं स भगवान् । यत्तु तेन गृहीतं तत्तु स्वसृज्यानामाश्रयत्वात्परमात्मेति पर्यवसितम् । विश्वनाथस्तु पूर्वाध्यायान्ते लीलावतारानुरत इत्युक्तं तत्र कास्तस्य लीलाः केऽवतारा
इत्यपेक्षायां प्रथमं पुरुषावतारमाह-जगृह इति पंचभिः । पौरुषं पुरुषाकारं पुरुषसंज्ञं वा । ननु जगृह इति चेदुच्यते तर्हि तद्रूपं पूर्वं नासीदित्यवगत्या तद्रूपस्याऽनित्यत्त्वं प्रसक्तमित्यत आह सम्यग्भूतं
परमसत्यं पूर्वपूर्वमपि सदैव स्वरूपेण स्थितमेव तज्जगृहे । लोकसृष्ट्यर्थमुपादत्त । ग्रहणस्य विद्यमानवस्तुविषयत्वात् । घटस्याविद्यमानत्वे घटं जग्राहेति प्रयोगादर्शनाच्च । राजा सेनान्यं दिग्विजिगीषया स्वसंगे जग्राहे
तिवत् । "युक्तेक्ष्मादावृते भूतं प्राण्यतीते समेषु"इत्यमरः।इतरत्रापि 'स एव प्रथमं देव' इत्यादौ सर्वत्र संभूतमिति पदमनुवर्त्तनीयम् । महदादिभिर्महत्तत्त्वाहंकारादिभिर्लोकानां समष्टिव्यष्टीनां भुवनानां वा स्रष्टुमिच्छा तया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यांभसि शयानस्य योगनिद्रां वितन्वतः ॥ नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः ॥ २ ॥
यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ॥ तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥ ३ ॥

वमुक्तमितिद्रष्टव्यम् ॥ १ ॥ कोऽसौ भगवानित्यपेक्षायां तं विशिनष्टि । यस्यांभसि एकार्णवे शयानस्य विश्रांतस्य तत्र च योगः समाधिस्तद्रूपां निद्रां विस्तारयतो नाभिरेव ह्रदस्तस्मिन्यदंबुजं तस्मात्सकाशाद्ब्रह्मासीदभूत्पाद्मे कल्पे स पौरुषं रूपं जगृहे ॥ २ ॥ कीदृशं रूपं तदाह । यस्येति । ननु कीदृशो विग्रहस्तस्य योंभसि

षोडशैव कला यस्मिन्राकाचन्द्रमिव मत्स्यकूर्माद्यवतारानपेक्ष्य परिपूर्णमित्यर्थः । "कला तु षोडशो भागः" इत्यमरः । अत्र योयं भगवान्स परव्योमनाथस्तेन गृहीतं यत्षोडशकलं रूपं स महाविष्णुः प्रकृतीक्षणकर्त्ता संकर्षणांशः कारणार्णवशायी प्रथमः पुरुषो भागवतामृतोक्तयुक्त्या ज्ञेयः ॥ यद्वा "ताः षोडशकलाः प्रोक्ता वैष्णवैः शास्त्रदर्शनात्" शक्तित्वेन ता भक्तिविवेकादिषु संमताः "श्रीभूः कीर्तीरिलाकान्तिर्लीलाविद्येति सप्तकम् । विमलाद्या नवेत्येता मुख्याः षोडश शक्तयः ॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा तथैव च । प्रह्वी सत्या तथेशानाऽनुग्रहेति नव स्मृताः ॥" इति ॥१॥ तत्र चैकार्णवे पाद्मे ब्राह्मे । विश्वनाथस्तु यस्य पुरुषस्यांभसि स्वरोमकूपस्थे ब्रह्माण्डान्तरे एकैकप्रकाशेन प्रविश्य स्वसृष्टे गर्भोदे शयानस्य यस्यावयवानां संस्थानैः प्रदेशविशेषैर्लोकविस्तरः पातालादिसत्यांतभुवनविन्यास इत्ययं प्रथमः । पद्मनाभोऽनिरुद्धांशो गर्भोदशायी द्वितीयो ज्ञेयः।यस्तु पूर्वाध्याये "हरिविरिंचिहरेतिसंज्ञा" इत्यत्र हरिरिति पठितः स क्षीरोदशायीअनिरुद्धांशस्तृतीयः पुरुषो ज्ञेय इति पुरुषत्रयम् । अत्र प्रथमः प्रकृतेरंतर्यामी द्वितीयः समष्टिविराजस्तृतीयो व्यष्टीनामिति त्रय एवांशेनान्तर्यामिणः । तदुक्तं "एकं तु महतः स्रष्टृ" इत्यादिना । एवं चैतत्प्रकरणव्यंजिका महाविष्णोर्लीलाकथापरिपाटी चेयं यदैव तस्य पुनरपि प्रदेशविशेषे शयनेच्छाऽजनिष्ट तदा कारणार्णवे शयान एव स्वनिश्वासनिष्क्रमणप्रथमक्षणे स्वशक्तिं मायामैक्षिष्ट । तया च तदिंगितज्ञया तदिच्छाबलालब्धसामर्थ्यया महत्तत्त्वादितत्त्वानि स्वत एव निष्कास्य ब्रह्माण्डं तैः सृष्ट्वा स्वप्रभुर्विज्ञाप्यते स्म। हे नाथ शयितुमागच्छेति । ततोसौ तत्र गत्वा निमेषमात्रं शयित्वा यदैव पुनरागतवांस्तदैव तद्ब्रह्माण्डं शयनमंदिरं निर्माल्यमिव माययैव स दूरी चकार । पुनरपि नवीनमंदिरे तं शाययितुमेवं च ब्रह्मणः परार्द्धद्वयं गच्छति स्म। तदुक्तं तृतीये "निमेष उपचर्यते" इति । संदर्भस्तु यस्य च तादृशत्वेन तत्र शयानस्य अवयवसंस्थानैः साक्षाच्छ्रीचरणादिसन्निवेशैः लोकस्य विस्तरो विस्तारो विराडाकारः प्रपञ्चः कल्पितः यथा तदवयवसन्निवेशास्तथैव "पातालमेतस्य हि पादमूलम्" इत्यादिना नवीनोपासकान्प्रति मनःस्थैर्याय प्रख्यापितः न तु वस्तुतस्तदेव तस्य रूपमित्यर्थः।यद्वा"चन्द्रमा मनसो जातः""इत्यारभ्य "पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयत्" इत्यादिश्रुतेस्तैस्तैर्हेतुभूतैर्लोकविस्तारो रचित इत्यर्थः । तथा च मोक्षधर्मे नारायणीये गर्भोदके शयानस्य रूपांतरेण श्वेतद्वीपपतेर्वाक्यम् "अस्मन्मूर्तिश्चतुर्थी या सासृजच्छेषमव्ययम् । स हि संकर्षणः प्रोक्तः प्रद्युम्नं सोप्यजीजनत् ॥ प्रद्युम्नादनिरुद्धोहं सर्गो मम पुनः पुनः । अनिरुद्धात्तथा ब्रह्मा तत्रादिकमलोद्भवः ॥ ब्रह्मणः सर्वभूतानि स्थावराणि चराणि च ।"तत्रैव वेदव्यासः "परमात्मेति यं प्राहुः साङ्ख्ययोगविदो जनाः । महापुरुषसंज्ञां स लभते स्वेन कर्मणा ॥ तस्मात्प्रभूतमव्यक्तं प्रधानं यद्विर्बुधाः । अव्यक्ताद्व्यक्तमुत्पन्नं लोकसृष्ट्यर्थमीश्वरात् ॥ अनिरुद्धो हि लोकेषु महानात्मेति कथ्यते । योऽसौ व्यक्तत्त्वमापन्नो निर्ममे च पितामहम्" इति । तदेवं संकर्षणस्य वैभवमुक्त्वाऽनिरुद्धस्याप्याह–अनिरुद्धो हीति । लोकेषु प्रत्येकब्रह्माण्डेषु महानात्मा परमात्मा व्यक्तत्वं प्राकट्यं प्रद्युम्नादिति शेषः । सूतेन त्वभेदविवक्षया प्रद्युम्नः पृथङ्नोक्तः । "विष्णोस्तु त्रीणि रूपाणि" इतिवत् । सेयं प्रक्रिया द्वितीयस्कन्धस्य षष्ठे दृश्यते । यथा "स एष आद्यः पुरुषः" इत्यादिग्रंथे टीका । स एवाद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादिकं करोतीत्येषा । एवम् "आद्योऽवतारः पुरुषः परस्य" इत्यस्य टीका परस्यभूम्नः पुरुषः प्रकृतिप्रवर्त्तकः यस्य सहस्रशीर्षेत्याद्युक्तो लीलाविग्रहः स आद्योवतार इत्येषा । तथा तृतीयस्य विंशे "दैवेन" इत्यादिकं "सोनु" इत्यन्तं सटीकं प्रकरणमत्रानुसंधेयम् । तस्माद्विराट्त्वेन तद्रूपं न व्याख्येयं तस्माच्च वासुदेवस्थानीयो भगवान्पुरुषादन्य एवेत्यायातम् ॥२॥ अथ तस्य पुरुषस्य सामान्यत एकत्वेन स्वरूपमाह-तदिति ।तत् श्रीभवतः पौरुषं रूपं वै प्रसिद्धौ।विशुद्धोर्जितसत्त्वादिभिर्व्यक्तत्वाच्छक्तिस्वरूपयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् ॥ सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ॥ ४ ॥ एतन्नानावताराणां निधानं बीजमव्ययम् ॥ यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ॥ ५ ॥ स एव प्रथमो देवः कौमारं सर्गमास्थितः ॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितम् ॥ ६ ॥ द्वितीयं तु भवायाऽस्य रसातलगतां महीम् ॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥ ७ ॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥ ८ ॥

शेते स्म तदाह । तत्तस्य भगवतो रूपं तु विशुद्धं रजआद्यसंभिन्नमत एवोर्जितं निरतिशयं सत्त्वम् ॥ ३ ॥ एतच्च योगिनां प्रत्यक्षमित्याह । पश्यंतीति । अदभ्रमनल्पं ज्ञानात्मकं यच्चक्षुस्तेन । सहस्रमपरिमितानि यानि पादादीनि तैरद्भुतम् । सहस्रं मूर्धादयो यस्मिंस्तत् । सहस्रं यानि मौल्यादीनि तैरुल्लसच्छोभमानम् ॥ ४ ॥ एतत्तु कूटस्थं नत्वन्यावतारवदाविर्भावतिरोभाववदित्याह । एतदिति । एतदादिनारायणरूपम् । निधीयतेऽस्मिन्निति निधानम् । कार्यावसाने प्रवेशस्थानमित्यर्थः । बीजमुद्गमस्थानम् । बीजत्वेऽपि नान्यबीजतुल्यं किंत्वव्ययम् । न केवलमवताराणामेव बीजं किंतु सर्वप्राणिनामपीत्याह । यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ॥ ५ ॥ सनत्कुमाराद्यवतारं तच्चरित्रं चाह । स एवेति । कौमार आर्षः प्राजापत्यो मानव इत्यादीनि सर्गविशेषनामानि । यः पौरुषं रूपं जगृहे स एव देवः कौमाराख्यं सर्गमास्थितः सन्ब्रह्मा ब्रह्मणो भूत्वा ब्रह्मचर्यं चचार । प्रथमद्वितीयादिशब्दा निर्देशमात्रापेक्षया॥६॥वराहावतारमाह । द्वितीयमिति । अस्य विश्वस्य भावायोद्भवाय । महीमुद्धरिष्यन्निति कर्मोक्तिः । एवं सर्वत्रावतारस्तत्कर्म चोक्तमित्यनुसंधेयम् ॥ ७ ॥ नारदावतारमाह । तृतीयमिति । ऋषिसर्गमुपेत्य तत्र च देवर्षित्वमुपेत्येत्यर्थः । सात्वतं वैष्णवं

रभेदाच्च तद्रूपमेवेत्यर्थः । उक्तं च द्वितीयं पुरुषव्यूहमधिकृत्य स्वरूपत्वं तद्रूपस्य "नातः परं परम यद्भवतः स्वरूपम्" इत्यत्र विशुद्धं जात्यंशेनापि रहितम् । स्वरूपशक्तिवृत्तित्वात् । ऊर्जितं सर्वतो बलवत् । परमानन्दरूपत्वात् । "को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्" इति श्रुतेः । तस्मात्साक्षाद्भगवद्रूपे तु कैमुत्यमेवायातमिति ॥३॥ तदेव पुरुषस्य द्विधा स्थानकर्मणी उक्त्वा स्वरूपवदाकारं त्वेकप्रकारमाह-पश्यन्तीति । अदः पौरुषं रूपमदभ्रचक्षुषा भक्त्याख्येन "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।"इत्युक्तेः । "भक्तिरेवैनं नयति भक्तिरेवैनं दर्शयति" इत्यादिश्रुतेश्च । प्रथमपुरुषस्य सहस्रपादादित्वं परमात्मसंदर्भे व्यंजितम् । तृतीयस्याष्टमं तु द्वितीयं पुरुषव्यूहमुपलक्ष्य "वेणुभुजांघ्रिपांघ्रेः" इति "दोर्दण्डसहस्रशाखम्" इति"किरीटसाहस्रहिरण्यशृंगम"इति च । तथा नवमस्य चतुर्दशे"सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् । जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः" इति ॥४॥ कूटस्थं लयविक्षेपशून्यम् । इत्यर्थ इति । अंशीभूतमिति भावः॥५॥ अथ प्राचुर्येण तदवताराः कथयंस्तदैक्यविवक्षया तदंशांशिनामप्याविर्भावमात्रं गणयति विंशत्या ।तत्र स एवेति योम्भसि शयानो यश्च सहस्रपादादिरूपः स एव पुरुषाख्यो देवः । "एते चांशकलाः सर्वे कृष्णस्तु भगवान्स्वयम्" इत्युपसंहारस्यापि संवादात् ।"ब्रह्मा विप्रो विधाता च" इत्यभिधानात् । निर्देशः कथनं तन्मात्रापेक्षया "निर्देशः शासनेऽपि स्यात्कथनोपान्तयोः"इति मेदिनी॥६॥सूकरस्येदं सौकरम्।।७॥तत्र च ऋषिसर्गेपि इत्यर्थ इति ।देवत्वे सति ऋषित्वं ब्रह्मपुत्रर्षित्वमिति भावः।"ये जाता ब्रह्मणो देहात्ते देवर्षय ईरिताः।सृष्ट्यादौ कर्दमाद्या वै देवता अपि ते स्मृताः" इत्युक्तेः । निष्कर्मशब्दे कर्मशब्दो भावप्रधानो ज्ञेयोऽत उक्तं निर्गतं कर्मत्वम् । इत्यर्थ इति ।"एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पन्ते कल्पिताः परे" इत्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्ये धर्मकलासर्गे नरनारायणावृषी ॥ भूत्वाऽऽत्मोपशमोपेतमकरोद्दुश्चरं तपः ॥ ९ ॥ पंचमः कपिलो नाम सिद्धेशः कालविप्लुतम् ॥ प्रोवाचाऽऽसुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥ १० ॥ षष्ठे अत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ॥ आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरम् ॥ १२ ॥ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः ॥ दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतम् ॥ १३ ॥ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः ॥ दुग्धेमामौषधीर्विप्रास्तेनायं स उशत्तमः ॥ १४ ॥

तंत्रम् । पंचरात्रागमप्राचष्टोक्तवान् । यतस्तंत्रान्निर्गतं कर्मत्वं बंधहेतुत्वं येभ्यस्तानि निष्कर्माणि तेषां भावो नैष्कर्म्यम् । कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः ॥ ८ ॥ नरनारायणावतारमाह । तुर्ये इति । तुर्ये चतुर्थेऽवतारे । धर्मस्य कलांशो भार्येत्यर्थः । "अर्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः । तस्याः सर्गे । ऋषी भूत्वेत्येकावतारत्वं दर्शयति ॥ ९ ॥ कपिलावतारमाह । पंचम इति । आसुरये तन्नाम्ने ब्राह्मणाय । तत्त्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिन् शास्त्रे तत्सांख्यम् ॥ १० ॥ दत्तात्रेयावतारमाह । षष्ठमिति । अत्रेरपत्यत्वं तेनैव वृतः सन्प्राप्तः । "अत्रेरपत्यमभिकांक्षत आह तुष्टः" इति वक्ष्यमाणत्वात् । कथं प्राप्तः । अनसूयया मत्सदृशापत्यमिषेण मामेवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः । आन्वीक्षिकीमात्मविद्याम् । प्रह्लादादिभ्यश्च । आदिपदाद्यदुहैहयाद्या गृह्यंते ॥ ११ ॥ यज्ञावतारमाह । तत इति । स यज्ञो यामाद्यैः स्वस्यैव पुत्रा यामा नाम देवास्तदाद्यैः सह स्वायंभुवं मन्वंतरं पालितवान् । तदा स्वयमिंद्रोऽभूदित्यर्थः ॥ १२ ॥ ऋषभावतारमाह । अष्टम इति । सर्वाश्रमनमस्कृतमंत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन्नाभेराग्नीध्रपुत्रादृषभो जातः ॥ १३ ॥ पृथ्वव‍तारमाह । ऋषिभिरिति पार्थिवं वपुः राजदेहं पृथुरूपम् । पाठांतरे

त्वन्यायेन बंधकानामपि मोचकत्वमिति भावः ॥ ८ ॥ यद्यपि कलांशकः षोडशांशे वर्त्तते तथाप्यत्रार्द्धे एव ज्ञेयः । दायविभागप्रकरणे "कला ज्येष्ठाय दातव्या कलायामितरे सुताः" इति कलाऽर्द्धं ज्येष्ठाय पुत्राय दायाद्भागो देयः कलायामपरार्द्धभागे इतरे पुत्रा भागिन इत्यर्थः । "काला स्यादंशमात्रके" इति मेदिन्युक्तेर्वा कलाशब्दोऽर्धपरः । अत उक्तं भार्येत्यर्थ इति । वक्ष्यमाणश्रुतिप्रामाण्याद्भार्यैवार्धमिति भावः । यत्पत्नीति लोके कथ्यते एष आत्मनो देहस्यार्धोऽर्धभागः । यद्यपि समेंशकेऽर्धशब्दस्य क्लीबत्वं भवति तथाप्यत्रार्षत्वात्पुंस्त्वमिति भावः । "पुंस्यर्धोऽर्धं समेंऽशके" इत्यमरः । भूत्वेति व्यक्तिद्वयत्वेऽप्येकावतारतामाह ॥ ९ ॥ सिद्धेशः योगीश्वरः । "तत्त्वानां प्रकृत्यादीनां ग्रामः संघ"ग्रामः संघे चावसथे" इति कोशात् । "ऋषिं प्रसूतं कपिलम्" इति श्रुतावपि कपिलावतारो वर्णितः ॥ १० ॥ इत्यर्थ इति । भक्तवात्सल्येन भक्ताभीष्टसंपादकत्वादिति भावः । यद्वाऽनसूययाऽत्रिपत्न्या वृतः । तदुक्तं ब्रह्माण्डे पतिव्रतोपाख्याने "अनसूयाब्रवीन्नत्वा देवान्ब्रह्मेशकेशवान् । यूयं यदि प्रसन्ना मे वरार्हा यदि चाप्यहम् ॥ प्रसादाभिमुखाः सर्वे मम पुत्रत्वमेष्यथ" इति । श्रीविष्णोरेवावतारोयमिति । श्रुतिरपि "यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः । अत्र यस्तमन्वविंदन्न ह्यन्येऽशक्नुवन्" इति सूर्यमात्मानं स्वर्भानुर्मायां तमसा विपर्ययेणाविध्यत् जीवत्वमनयत् । अत्रेरपत्यान्यात्रेयो दत्तात्रेयः बहुत्वं पूजार्थम् । तमात्मानं साक्षादीश्वरं ज्ञानवन्तम् । ईश्वरावतारत्वेन मायावशत्वाभावादित्यर्थः । अन्ये त्वविद्यावृतत्वान्न विदुरिति श्रुतिपदार्थः । अलर्काय राज्ञे । आदिना यदुग्रहः ॥ ११ ॥ ततस्तदनु आकूत्यां स्वायंभुवपुत्र्यां रूचेः प्रजापतेः यज्ञो नाम "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे" इति श्रुतेः । इत्यर्थ इति । तदान्यस्य देवपालनासमर्थत्वात्स्वयमेवेंद्राधिकारं शिष्टवानिति भावः ॥ १२ ॥ मेरुदेवी नाभिनृपपत्नी तस्यां धीराणां ब्रह्मविचारतानाम् ॥ १३ ॥ पाठांतरे पार्थवमिति पाठे उप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे ॥ नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥ १५ ॥ सुरासुराणामुदधिं मथ्नतां मंदराचलम् ॥ दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥१६॥ धान्वन्तरं द्वादशमं त्रयोदशममेव च ॥ अपाययत् सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥१७॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितम् ॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा ॥१८॥ पंचदशं वामनकं कृत्वाऽगादध्वरं बलेः ॥ पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपम्॥१९॥अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम्॥२०॥ ततः सप्तदशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥२१॥ नरदेवत्वमापन्नः सुरकार्यचिकीर्षया॥समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम्॥२२॥

पृथोरिदं पार्थवम् । ओषधीरित्युपलक्षणम् । इमां पृथ्वीं सर्वाणि वस्तूनि दुग्ध अदुग्ध अडागमाभावस्त्वार्षः । हे विप्रास्तेन पृथ्वीदोहनेन । सोऽयमवतार उशत्तमः कमनीयतमः । वशकांतावित्यस्मात् ॥ १४ ॥ मत्स्यावतारमाह । रूपमिति । चाक्षुषमन्वंतरे य उदधीनां संप्लवः संश्लेषस्तस्मिन् यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौतुकेन सत्यव्रताय माया प्रदर्शिता यथाकांडे मार्कण्डेयायेति द्रष्टव्यम् । महीमय्यां नावि । नौकारूपायां मह्यामित्यर्थः । अपाद्रक्षितवान् । वैवस्वतमिति भाविनी संज्ञा ॥ १५ ॥ कूर्मावतारमाह । कमठः कूर्मस्तद्रूपेणैकादशेऽवतारे विभुर्दध्रे दधार ॥ १६ ॥ धन्वंतर्यवतारमाह । धान्वंतरं धन्वंतरिरूपम् । द्वादशमादिप्रयोगस्त्वार्षः । त्रयोदशतममेव रूपं तच्चरितेन सह दर्शयति । अपाययदित्यत्र सुधामित्यध्याहारः । मोहिन्या स्त्रिया तद्रूपेणान्यानसुरान्मोहयन् धन्वंतरिरूपेणामृतमानीय मोहिन्याऽपाययदित्यर्थः ॥ १७ ॥ नृसिंहावतारमाह । नारसिंहं रूपं बिभ्रत् । एरकां निर्ग्रंथितृणम् ॥ १८ ॥ वामनावतारमाह । पंचदशमिति । दुष्टानां मदं वामयतीति वामनकं रूपम् । ह्रस्वं वा प्रत्यादित्सुस्तस्मादाच्छिद्य ग्रहीतुमिच्छुः ॥ १९ ॥ परशुरामावतारमाह । अवतार इति । त्रिस्त्रिगुणं यथा भवति तथा सप्तकृत्वः सप्तवारानेकविंशतिवारानित्यर्थः ॥ २० ॥व्यासावतारमाह । तत इति । अल्पमेधसोऽल्पप्रज्ञान्पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥ २१ ॥ रामावतारमाह । नरेति । नरदेवत्वं राघवरूपेण

लक्षणं काकदधिरक्षणन्यायः । यथा तत्र न हि काकेभ्यो दधि रक्षित्वा वानरेभ्यो दीयते किं तु काकपदेन सर्वेभ्यो रक्षणमुक्तं तथात्रापीत्यर्थः ॥ १४ ॥ इत्यर्थ इति । भगवदिच्छया भूरेव नौकाभूदिति भावः । विष्णुधर्मोत्तरे तु "मन्वन्तरे परिक्षीणे कीदृशी द्विज जायते" इत्यादिवज्रप्रश्नांते मार्कण्डेयोत्तरम् "ऊर्मिमाली महावेगः सर्वमावृत्य तिष्ठति । भूर्लोकमाश्रितं सर्वं तदा नश्यति यादव॥न विनश्यन्ति राजेन्द्र विश्रुताः कुलपर्वताः।नौर्भूत्वा तु मही देवी" इत्यादिः। एवमेव "मन्वन्तरे तु संहारः"इत्यादिप्रकरणमत एव भागवतामृते प्रतिमन्वन्तर एव प्रलय उक्तः । श्रीहरिवंशे तदीयटीकासु च ।तदप्यत्र चाक्षुष एवेत्युक्तिः।सत्यव्रतस्य मनोर्मत्स्यदेवपरमभक्तत्वाद्भक्तोत्कर्षादेव भगवत्प्रादुर्भावस्याप्युत्कर्षस्याप्युत्कर्षात् । "भक्तेच्छोपात्तदेहाय" इत्यादिभिर्युक्तिसिद्धात् । सर्वमन्वन्तराण्युपलक्षयति ॥१५॥ अमृतोत्पादनार्थमिति शेषः पातालं विशन्तं मन्दरगिरिम् ॥ १६ ॥ बिभ्रदिति शेषः । इत्यर्थ इति । अवतारद्वयकर्म चेत्थं ज्ञेयमिति भावः ॥ १७ ॥ निर्ग्रन्थिर्ग्रन्थिरहितोतिलंबायमानस्तृणाविशेषः । कटस्तृणास्तरणम् । ऊर्जितमतिबलिनम् ॥ १८ ॥ अध्वरो यागः ॥ १९ ॥ त्रयो वारा इति त्रिः । सुच्प्रत्ययः । सप्तवारान् इति सप्तकृत्वः । इत्यर्थ इति । त्रिगुणिताः सप्तैकविंशतिर्भवन्तीति भावः ॥ २० ॥ ततः सर्वव्यापी ॥ २१ ॥ समुद्रनिग्रहस्याद्यापि सेतुबन्धरूपेण दृश्यमानत्वात्तत्रैव च महैश्वर्यस्याविष्काराच्च । तस्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भरम् ॥ २३ ॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ॥ बुद्धो नाम्नाऽजनसुतः कीकटेषु भविष्यति ॥ २४ ॥ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥२५॥ अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ॥ यथाऽविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषयो मनवो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् ॥ इंद्रारिव्याकुलं लोकं मृडयंति युगेयुगे ॥ २८ ॥

प्राप्तः सन् । अतः परमष्टादशे ॥ २२ ॥ रामकृष्णावतारमाह । एकोनेति । विंशतितम इतिवक्तव्ये तकारलोपश्छंदोनुरोधेन । रामकृष्णावित्येवं नामनी जन्मनी प्राप्य ॥ २३ ॥ बुद्धावतारमाह । तत इति । अजनस्य सुतः । जिनसुत इति पाठे जिनोऽपि स एव । कीकटेषु मध्ये गयाप्रदेशे ॥ २४ ॥ कल्क्यवतारमाह । अथेति । युगसंध्यायां कलेरंते विष्णुयशसो ब्राह्मणात्सकाशाज्जनिता जनिष्यते ॥ २५ ॥ अनुक्तसर्वसंग्रहार्थमाह । अवतारा इति । असंख्येयत्वे दृष्टांतः । यथेति । अविदासिन उपक्षयशून्यात् । दसु उपक्षय इत्यस्मात् । सरसः सकाशात्कुल्याः क्षुद्रप्रवाहाः ॥ २६ ॥ विभूतीराह । ऋषय इति ॥ २७ ॥ तत्र विशेषमाह । एते चेति । पुंसः परमेश्वरस्य केचिदंशाः केचित्कला विभूतयश्च । तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वेऽपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणम् । कुमारनारदादिष्वाधिकारि

प्राधान्येन निर्देशः समुद्रनिग्रहादीनीति ॥ २२ ॥ भगवानिति । साक्षाच्छ्रीभगवत एवाविर्भावोऽयं न तु पुरुषसंज्ञस्यानिरुद्धस्येति विशेषप्रतिपत्त्यर्थम् । तत्र तस्य साक्षाद्रूपत्वात्कृष्णरूपेण निजांशरूपत्वाद्रामरूपेणापि भारहारित्वं भगवत एवेत्युभयत्रापि भगवानहरद्भरमिति श्लिष्टमेव । अतो रामस्याप्यनिरुद्धावतारत्वं प्रत्याख्यातम् । श्रीकृष्णस्य वासुदेवत्वाच्छ्रीरामस्य संकर्षणत्वात् युक्तमेव च तदिति ॥ २३ ॥ सुरद्विषां त्रिपुरवासिनां दैत्यानामयोग्यानां वेदमार्गे प्रवर्त्तमानानां संमोहाय मोहनाय कीकटेषु मगधेषु "निन्द्ये नीयवृति कीकट" इत्यभिधानात् । नीवृद्देशः स च " अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च । तीर्थयोगं विना गत्वा पुनः संस्कारमर्हति" इत्यादिस्मृत्युक्तः ॥ २४ ॥ युगादावंशः युगाते संध्या च भवति । तच्च तृतीयस्कन्धे वक्ष्यति "संध्यांशयोरन्तरेण" इत्यादिना । कलिं युगं जनानां क्लेशं वा कृणोति हिनस्तीति कल्किः । कृ हिंसायामत औणादिकडिप्रत्यये कलेरिकारलोपे रूपसिद्धेः ॥ २५ ॥ अथ श्रीहयग्रीवहरिहंसपृश्निगर्भविभुसत्यसेनवैकुण्ठाजितसार्वभौमविष्वक्सेनधर्मसेतुसुधामयोगेश्वरबृहद्भान्वादीनां शुक्लादीनां चानुक्तानां संग्रहार्थमाह—अवतारा इति । असंख्याताः सहस्रशः संभवंति । हि प्रसिद्धौ । असंख्येयत्वे हेतुः। सत्त्वनिधेः सत्त्वस्य स्वप्रादुर्भावशक्तेः शेवधिरूपस्य। तत्रैव दृष्टांतः यथेति । कुल्यास्तत्स्वभावकृतानिर्वारा अविदासिनः सहस्रशः संभवन्तीत्यर्थः । अत्र येंशावतारास्तेषु चैव विशेषो ज्ञेयः । श्रीकुमारनारदादिष्वाधिकारिकेषु ज्ञानशक्त्यंशावेशः श्रीपृथ्वादिषु क्रियाशक्त्यंशावेशः । क्वचित्तु स्वयमेवावेशस्तेषां भगवानेवाहमिति वचनात् । अथ श्रीमत्स्यदेवादिषु साक्षादंशत्वमेव । तत्रांशत्वं नाम साक्षाद्भगवत्त्वेप्यव्यभिचारितादृशतदिच्छावशात्सर्वदैवैकदेशतया वानभिव्यक्तशक्त्यादिकत्वमिति ज्ञेयम् । तथैवोदाहरिष्यते । रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोदित्यादि । विश्वनाथस्तु सत्त्वानां शुद्धसत्त्वचिदंशानां निधेः । श्लेषेण तु पुरुषाद्या अवताराः ख्याता अन्ये तु न सम्यक्ख्याता वर्त्तंत एवेति ज्ञाप्यते। तदुक्तं प्रह्लादेन "इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् । धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्त्वम् ।" इति । छन्नत्वादेवासंख्यात इत्यर्थः ॥ २६ ॥ अल्पशक्तेः प्रकाशत्वाद्विभूतित्वम् ॥ २७ ॥ तत्र तेषु अंशः शक्तिसमावेशः । कला ज्ञानप्रबोधनम् । "सर्वेश्वरोहमत्रैव राधिकाप्राणवल्लभः" इति नन्दिनीं सखीं प्रति श्रीकृष्णवाक्यमादिपुराणीयवृन्दावनमाहात्म्ये । अत्र संदर्भः । तदेवं परमात्मानं सांगमेव निर्द्धार्य प्रोक्तानुवादपूर्वकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केषु यथोपयोगमंशकलावेशः तत्र कुमारादिषु ज्ञानावेशः । पृथ्वादिषु शक्त्यावेशः । कृष्णस्तु भगवान्साक्षान्नारायण एव आविष्कृतसर्वशक्तित्वात् । सर्वेषां प्रयोजनमाह ।

श्रीभगवन्तमप्याकारेण निर्द्धारयति॥ एत इति एते पूर्वोक्ताः चादनुक्ताश्च प्रथममुद्दिष्टस्य पुंसः पुरुषस्यांशकलाः । केचित्स्वयमेवांशाः साक्षादंशत्वेनांशांशत्वेन द्विविधाः । केचिदंशाविष्टत्वादंशाः।केचित्तु कलाविभूतयः।इह यो विंशतितमावतारत्वेन कथितः कृष्णस्तु भगवान् एष पुरुषस्याप्यवतारी भगवानित्यर्थः । अत्र''अनुवादमनुक्त्वैव न विधेयमुदीरयेत्''इति दर्शनाच्छ्रीकृष्णस्यैव भगवत्त्वलक्षणो धर्मः साध्यते।न तु भगवतः श्रीकृष्णत्वमित्याया तम् । ततः श्रीकृष्णस्यैव भगवत्त्वलक्षणधर्मत्वे सिद्धे मूलत्वमेव सिध्यति न तु ततः प्रादुर्भूतत्वम् । एतदेव व्यनक्ति स्वयमिति । तत्र च स्वयमेव भगवान्न तु भगवतः प्रादुर्भूतत्वेन, न तु वा भगवत्त्वाध्यासेनेत्यर्थः । न चावतारप्रकरणे पठित इति संशयः । पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति न्यायात् । यथा ''अतिष्टोमे यद्युद्गाता विच्छिद्याद्दक्षिणेन यजते यदि प्रतिहर्त्ता सर्वस्वदक्षिणेन'' इति श्रुतेः । तयोश्च कदाचिद्द्वयोरपि विच्छेदे प्राप्ते विरुद्धयोः प्रायश्चित्तयोः समुच्चयासंभवं च प्रायश्चित्तं सिद्धांतितं तद्वदिहापीति । अथवा ''कृष्णस्तु भगवान्स्वयम्'' इति श्रुत्या प्रकरणस्य बाधः । यथा शंकरशारीरिकभाष्ये ''श्रुत्यादिबलीयस्त्वाच्च न बाधाः'' इति सूत्रे ''ते हैते विद्याचित एव'' इति श्रुतिर्मनश्चिदादीनामग्नीनां प्रकरणप्राप्तं क्रियानुप्रवेशलक्षणमस्वातंत्र्यं बाधित्वा विद्यात्वेनैव स्वातंत्र्यं स्थापयति तद्वदिहापि इति । अत एतत्प्रकरणमप्यत्र क्वचिदपि भगवच्छब्दमकृत्वा तत्रैव भगवानिति भगवानहरद्भरमिति कृतवान् । ततश्चास्यावतारेषु गणना तु स्वयं भगवानप्यसौ स्वरूपस्थ एव निजपरिजनवृन्दानामानन्दविशेषचमत्काराय किमपि माधुर्य्यं निजजन्मादिलीलया पुष्णन् कदाचित्सकललोकदृश्यो भवतीत्यपेक्षयैवेत्यागतम् । यथोक्तं ब्रह्मसंहितायां ''रामादिमूर्त्तिषु कलानियमेन तिष्ठन्नानावतारमकरोद्भुवनेषु किन्तु । कृष्णः स्वयं समभवत्परमः पुमान्यो गोविंदमादिपुरुषं तमहं भजामि'' इति । अवतारश्च प्राकृतवैभवेऽवतरणमिति कृष्णसाहचर्याद्रामस्यापि पुरुषांशतात्पर्यो ज्ञेयः । अत्र तुशब्दोंऽशकलाभ्यः पुंसश्च सकाशाद्भगवतो वैलक्षण्यं बोधयति । यद्वानेन तुशब्देन सावधारणा श्रुतिरियं प्रतीयते । ततश्च सावधारणा श्रुतिर्बलवतीति न्यायेन श्रुत्यैव श्रुतमप्यन्येषां महानारायणादीनां स्वयं भगवत्त्वं गुणीभूतमापद्यते । एवं पुंस इति भगवानिति च प्रथममुपक्रमोद्दिष्टस्य तस्य शब्दद्वयस्य तत्सहोदरेण तेनैव चशब्देन प्रतिनिर्देशात्तावेव खल्वेताविति स्मारयति । उद्देशप्रतिनिर्देशयोरप्रतीतिः स्थगितता तन्निरसनाय विद्वद्भिरेक एव शब्दः प्रयुज्यते तत्समो वा । यथा ज्योतिष्टोमाधिकारे ''वसन्ते ज्योतिषा यजेत'' इत्यत्र ज्योतिःशब्दो ज्योतिष्टोमविषयो भवतीति । इंद्रारीतिपद्यार्द्धं तत्र नान्वेति । तुशब्देन वाक्यस्य भेदात् । तच्च तावतैवाकांक्षापरिपूर्तेः । एकवाक्यत्वे तु चशब्द एवाकारिष्यत।ततश्चेंद्रारीत्यत्रार्थात एव पूर्वोक्ता मृडयंतीत्यायातिः। अत्र विशेषजिज्ञासायां कृष्णसंदर्भो दृश्यः । अत्र विश्वनाथः । नन्वेषां सर्वेषां तुल्यत्वमेवास्ति वा तारतम्यमित्यपेक्षायामाह—एते चेति । एते पूर्वोक्ताः चादनुक्ताश्च पुंसः प्रथमनिर्दिष्टस्य पुरुषस्यांशकलाः । केचिदंशा मत्स्यकूर्मवराहाद्याः केचित्कलाः कुमारनारदाद्याः आवेशाः तदुक्तं भागवतामृते ''ज्ञानशक्त्यादिकलया यत्राविष्टो जनार्दनः । त आवेशा निगद्यन्ते जीवा एव महत्तमाः ॥ वैकुंठेऽपि यथा शेषो नारदः सनकादयः॥'' तथा पाद्मे ''आविष्टोभूत्कुमारेषु नारदे च हरिर्विभुः । '' तथा तत्रैव''आविवेश पृथुं देवः शंखी चक्री चतुर्भुजः'' इति । ''एतत्ते कथितं देवि जामदग्नेर्महात्मनः । शक्त्यावेशावतारस्य चरितं शार्ङ्गिणः प्रभोः'' इति । ''कलेरन्ते च संप्राप्ते कल्किनं ब्रह्मवादिनम्।अनुप्रविश्य कुरुते वासुदेवो जगत्स्थितिम्'' इति । अत्र कुमारनारदादिषु ज्ञानभक्तिशक्त्यंशावेशः । पृथ्वादिषु क्रियाशक्त्यंशावेशः । ते चावेशा महाशक्त्याऽल्पशक्त्या चेति द्विविधाः । प्रथमाः कुमारनारदाद्या अवतारशब्देनोच्यन्ते । द्वितीया मरीचिमन्वाद्या विभूतिशब्देनेति भेदो ज्ञेयः । इह यो विंशतितमावतारत्वेन कथितः स कृष्णस्तु भगवान्न त्वंशो न चांशी पुरुषः किं तु भगवान् । ''जगृहे पौरुषं रूपं भगवान्महदादिभिः'' इति पद्योक्तो यः पुरुषस्यावतारी भगवान्स एवेत्यर्थः।''अनुवादमनुक्त्वैव न विधेयमुदीरयेत्''इति दर्शनात्कृष्णस्यैव भगवल्लक्षणो धर्मः साध्यते।न तु भगवतः कृष्णत्वं तेन कृष्ण एव भगवान्मूलभूत इति तदेव पुनः स्पष्टीकुर्वन्नाह-स्वयमिति।तेन पुरुषावतारिणो भगवतो महानारायणादपि कृष्णस्योत्कर्षः साधितः । अत एव छान्दोग्ये पंचमप्रपाठके ''ज्यायांश्च पुरुषः सर्वं खल्विदं ब्रह्म यत्प्राणा आदित्याः'' इत्याद्युक्त्वा पश्चादुपसंहृतं ''कृष्णाय देवकीपुत्राय''इत्यादिना । तेनात्र पुरुषादिभ्योऽपि श्रेष्ठो देवकीपुत्र एव ज्ञेयः । तदप्यवतारमध्ये तस्य गणनं तु भूर्लोकस्थमथुरादिधामविलासित्वान्नरलीलत्वात्प्रापंचिकलोकेषु करुणाधिवयादाविर्भावतिरोभावाभ्याञ्च । तथा च गोपालतापनीश्रुतिः ''सहोवाचाब्जयोनिरवताराणां मध्ये श्रेष्ठोऽवतारः को भविता येन लोकास्तुष्यंति देवास्तुष्टा भवंति यं स्मृत्वा मुक्ता अस्मात्संसाराद्भवंन्ति'' इति । ननु ''तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः'' इति । ''दिष्ट्यांब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवायनः'' इति ''ताविमौ वै भगवतो हरेरंशाविहागतौ'' इत्यादिबहुवाक्यविरोधे ''कृष्णस्तु भगवान्स्वयम्'' इत्येकेनैव वाक्येन कृष्णस्य पूर्णत्वं कथं व्यवतिष्ठताम्। अत्रोच्यते । श्रीभागवतशास्त्रारंभे जन्मगुह्याध्यायोयं सर्वभगवदवतारवाक्यानां सूचकत्वात्सूत्रम्। तत्र च ''एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्'' इति परिभाषासूत्रम् । यत्रयत्रावताराः श्रूयन्ते तत्रान्यान्पुरुषांशत्वेन जानीयात् । कृष्णस्तु स्वयं भगवत्त्वेनेति प्रतिज्ञारूपमिदं सर्वत्रोपतिष्ठेत। परिभाषा ह्येकदेशस्था सकलं शास्त्रमभिप्रकाशयति यथा वेश्मप्रदीप इति प्राञ्चः। सा च शास्त्रे सकृदेव पठ्यते । न त्वभ्यासेनेति वाक्यानां कोटिरप्यनेनैकेनापि महाराजचक्रवर्त्तीनेव शासनीया भवेदित्येतद्विरुद्धायमानानां तेषां वाक्यानामेतदनुगुणार्थतैव तत्रतत्र व्याख्येया। किं च तेषां वाक्यानां प्राकरणिकत्वेन दुर्बलत्वात्। अस्य तु श्रुतिरूपत्वेन प्रबलत्वात् ''श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्'' इति न्यायेन तान्येवार्थांतरतया संगमनीयानि न तु तदनुरोधेनैतदित्यतः श्रीधरस्वामिपादैरपि तत्रतत्र तथैव समाहितमिति । ननु मत्स्यकूर्माद्यवताराणां कृष्णस्य च द्विभुजत्वचतुर्भुजत्वबालत्वकिशोरत्वाद्याकाराणां च सर्वेषां च नित्यत्वश्रवणादनेकेश्वरत्वप्रसक्तिः । मैवम् ''बहुमूर्त्यैकमूर्त्तिकम्'' इति दशमात्। यथैकस्यैव जीवस्य कालभेदेनाल्पशक्तिकबहुशक्तिकत्वेन नश्वरस्वभिन्नविग्रहधारित्वं प्रतीयते । एवमेकस्यैवेश्वरस्य सर्वव्यापकस्याचिंत्यशक्त्या यौगपद्येनैवानन्तानित्यस्वाभिन्नविग्रहधारित्वम् जीवानामनन्तानामानन्त्यमीश्वरस्य चैकस्यैवानंत्यमिति जीवदृष्ट्यैव तद्विलक्षण ईश्वरश्च प्रत्येतव्य इति। नन्वानन्दमात्रस्य चिद्वस्तुनो व्यापकस्य परमेश्वरस्य किं नामांशित्वमंशत्वं वा परिच्छिन्नस्यैव वस्तुनो भागविभागादिसंभवात् । तदुक्तं महावाराहे ''सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥ परमानन्दसंदोहाज्ज्ञानमात्राश्च सर्वतः । सर्वे सर्वगुणैः पूर्णाः सर्वे दोषविवर्जिताः'' इति । सत्यम्। तदपि तस्य माधुर्यैश्वर्यकारुण्यादिशक्तिप्राकट्यतारतम्येनैवांशत्वपूर्णत्वव्यवस्था । आविर्भावितपूर्णसर्वशक्तित्वं पूर्णत्वम् । आविर्भावितयथाप्रयोजनाल्पशक्तित्वमंशत्वम् । तदुक्तं भागवतामृते ''शक्तेर्व्यक्तिस्तथाव्यक्तिस्तारतम्यस्य कारणम्'' इति । ''शक्तिः समापि पुर्य्यादिदाहे दीपाग्निपुञ्जयोः । शीताद्यार्त्तिक्षये चाग्निपुंजादेव सुखं भवेत् ॥'' इति । एवं च पूर्णत्वांशत्वाभ्यामुत्कर्षापकर्षौ महानुभावमुनीनामप्यनुभवसिद्धौ ज्ञेयौ । यथा तृतीये ''आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठधिष्ण्यम् । विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोन्वपृच्छन् ॥ स्वमेव धिष्ण्यं बहु मानयंतं यं वासुदेवाभिधमामनन्ति'' इति । अतश्चिद्वस्तुनोंशांशित्वभेदो न विरुद्धः । तदुक्तं वाराहे ''स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते'' इत्यादि । तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्कारणं कुमारनारदादिष्वधिकारिकेषु यथोपयोगमंशकलावेश इति श्रीधरस्वामिपादाः । अत्र प्राचां कारिकाः ''नृसिंहो जामदग्न्यश्च कल्की पुरुष एव च । भगवत्त्वे च तत्रादेरैश्वर्यस्य प्रकाशकाः ॥ नारदोथ तथा व्यासो वाराहो बुद्ध एव च । धर्माणामेव वैविध्यादमी धर्मप्रदर्शकाः ॥ रामो धन्वन्तरिर्यज्ञः पृथुः कीर्त्तिप्रदर्शिनः । बलरामो मोहिनी च वामनः श्रीप्रधानकाः ।'' श्रीरत्र सौन्दर्यम् ''दत्तात्रेयश्च मत्स्यश्च कुमारः कपिलस्तथा । ज्ञानप्रदर्शका एते विज्ञातव्या मनीषिभिः ॥ नारायणो नरश्चेति कूर्मश्च ऋषभस्तथा । वैराग्यदर्शिनो ज्ञेयास्तत्तत्कर्मानुसारतः ॥ कृष्णः पूर्णषडैश्वर्यमाधुर्याणां महोदधिः । अंतर्भूतसमस्तावतारो निखिलशक्तिमान् ॥'' इति । गर्गसंहितायां तु ''अंशांशोंशस्तथावेशः कला पूर्णः प्रकथ्यते । व्यासाद्यैश्च स्मृतः षष्ठः परिपूर्णतमः स्वयम् ॥ अंशांशस्तु मरीच्यादिरंशो ब्रह्मादयस्तथा । कलाः कपिलकूर्माद्या आवेशा भार्गवादयः ॥ पूर्णो नृसिंहो रामश्च श्वेतद्वीपाधिपो हरिः । वैकुंठोपि तथा यज्ञो नरनारायणः स्मृतः ॥ परिपूर्णतमः साक्षाच्छ्रीकृष्णो भगवान्स्वयम् ॥ असंख्यब्रह्मांडपतिर्गोलोके धाम्नि राजते । कार्याधिकारं कुर्वंतः सदंशास्ते प्रकीर्त्तिताः ॥ तत्कार्यभारं कुर्वतस्तेंशांशा विदिताः प्रभोः ॥ येषामंतर्गतो विष्णुः कार्यं कृत्वा विनिर्गतः । तानावेशावतारांश्च विद्धि राजन्महामते ॥ धर्मं विज्ञाप्य कृत्वा यः पुनरन्तरधीयत । युगेयुगे वर्तमानं सोवतारः कला हरेः ॥ चतुर्व्यूहो भवेद्यत्र दृश्यंते च रसा नव । अतः परं च वीर्याणि स तु पूर्णः प्रकथ्यते ॥ यस्मिन्सर्वाणि तेजांसि विलीयन्ते स्वतेजसि । तं वदन्ति परं ज्ञानं परिपूर्णतमं स्वयम् ॥'' इति । किञ्च ''अंशांशेभ्यः समुन्मील्य पूर्णरूपकलायुतः । श्रीकृष्णचन्द्रो भगवान्'' इति सम्मोहनतन्त्रे श्रीशङ्करोक्तेश्च । श्रीकृष्ण एव परिपूर्णतमः । सर्वेषां साधारणं प्रयोजनमाह—इंद्रारीति । यद्वा ''इंद्रो मायाभिः पुरुरूप ईयते'' इह श्रुतावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मगुह्यं भगवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते ॥ २९ ॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ॥ मायागुणैर्विरचितं महदादिभिरात्मनि ॥ ३० ॥ यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥ ३१ ॥ अतः परं यदव्यक्तमव्यूढगुणव्यूहितम् ॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः ॥ ३२ ॥

इंद्रारयो दैत्यास्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति ॥ २८ ॥ एतत्कीर्तनफलमाह । जन्मेति । गुह्यमतिरहस्यं जन्म । प्रयतः शुचिः सन् दुःखग्रामात्संसारात ॥ २९ ॥ विमुच्यत इति यदुक्तं तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिरित्याशंक्य देहद्वयसंबंधस्य भगवन्मायोत्थाविद्याविलसितत्वादेतच्छ्रवणादिजनितविद्यया तन्निवृत्ति रुपपद्यत इत्याशयेनाह । एतदितिपंचभिः । अरूपस्य चिदेकरसस्यात्मनो जीवस्यैतत्स्थूलं रूपं शरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितम् । क्व । आत्मनि आ त्मस्थाने शरीरं कृतमित्यर्थः ॥ ३० ॥ कथमित्यपेक्षायां स्वरूपावरणेन तदध्यासत इति सदृष्टांतमाह । यथेति । यथा वाय्वाश्रितो मेघौघो नभस्याकाशेऽबुद्धिभिरज्ञैरारो पितः । यथा वा पार्थिवो रेणुस्तद्गतं धूसरत्वाद्यनिले एवं द्रष्टर्यात्मनि दृश्यत्वं दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः॥ ३१ ॥ किंच । अतः स्थूलाद्रूपात्परमन्यदपि रूप मारोपितमित्यनुषंगः । कथंभूतं तत् । यदव्यक्तं सूक्ष्मम् । तत्र हेतुः । अव्यूढगुणव्यूहितं व्यूहः करचरणादिपरिणामः न तथा अव्यूढा अपरिणताः ये गुणास्तैर्व्यूहितं रचि

द्रपदमात्मपरं दृश्यते । तथाचेंद्र आत्मा तदरयः कामादयस्तज्ज्ञानप्रतिबन्धकत्वात्तैरुपद्रुतं लोकं विश्वं ज्ञानोपदेशेन मृडयन्ति स्वदत्तज्ञानेन संसारात्तारयन्तीत्यर्थः । एतच्च सर्वावतारैः कृतमित्यनुसंधेयं तत्तच्चरिते ॥ २८ ॥ जन्मान्याविर्भावाः गुह्यान्यनधिकारिजनाद्गूहितुं योग्यानि यस्मिन्नध्याये स जन्मगुह्यस्तं "पवित्रः प्रयतः पूतः" इत्यमरः । गृणन्भवेदिति शेषः ॥ २९ ॥ तत्रेति वाक्यालंकारे तद्विमुक्तिर्दुःखग्रामाद्विमुक्तिः । "विद्याविद्ये मम तनू मायया मे विनिर्मिते" इत्युक्तेरविद्यापि भगवन्मायात एवोत्तिष्ठते । एतच्छ्रवणादिना जन्मगुह्याध्यायश्रवणादिना जनिता या विद्या तया तन्निवृत्तिः संसारनिवृत्तिः । आदिना पाठविचारादिग्रहः । इत्यर्थ इति । स्थूलरूपस्यारोपितत्वादवास्तवमेव । तदिति तन्निवृत्तिरपि संपत्स्यत इति भावः । अत्र विश्वनाथः । ननु "पातालमेतस्य हि पादमूलम्" इत्यादिना द्वितीयस्कंधे योयं विराड्रूपी भगवान्प्रथममुपास्यत्वेनोक्तः स कथमवतारमध्ये न गणितस्तत्राह—एतत्समष्टिव्यष्टिविराडात्मकं जगच्चिदात्मनश्चिन्मयविग्रहस्य अत एवारूपस्य प्राकृतरूपरहितस्य भगवतो रूपं स्थूलशरीरम् । किं तु मायागुणैर्महदादिभिः पृथिव्यंतैस्तत्त्वैर्विरचितमात्मनि स्वस्मिन्नंतर्यामिण्यधिष्ठाने स्थितमित्यर्थः । अतो विशुद्धसत्त्वरूपमत्स्यकूर्माद्यवतारमध्ये मायिकरूपी विराडेष न पठित इति भावः । संदर्भस्तु तदेवमेतानि साक्षाद्रूपाण्याविष्टरूपा णि चोपदिश्योपासनार्थं शास्त्रेण भगवत्यारोपितं रूपमुपदिशति । एतद्रूपमिति । अरूपस्य प्राकृतरूपासंबद्धस्य मायागुणैर्विरचितमेवेतज्जगदाकारं रूपम् तच्चात्मनि जीवे एव विरचितं तत्संबंधतयैव कल्पितं न तु परमेश्वरसंबंधतयेत्यर्थः । आसंगादनासंगाच्चेति भावः ॥ ३० ॥ इत्यर्थ इति । अज्ञानेनारोपितत्वादज्ञाननिवृत्तौ तन्निवृत्तिरपि संगच्छत एवेति भावः ॥ विश्वनाथस्तु । कस्मिन्किमिवेत्यपेक्षायामाह—यथेति । एतद्वि राड्रूपमिति पूर्वेणान्वयः । तेन यथा मंचस्थः पुरुषो मंच उच्यते तथा भगवति स्थितो विराडपि भगवानुच्यते । एवमेवाधिष्ठितधर्मो दृश्यत्वमपि द्रष्टरि भगवत्यदृश्येप्यारोपितमित्यर्थः । अबुद्धिभिरल्पबुद्धिभिः यथाऽदृश्ययोरपि नभोनिलयोर्नीलं नभ इति धूसरोऽनिल इति मेघरेणुधर्मो नीलिमधूसरत्वलक्षणं दृश्यत्वमारोपितम् । ततश्च भगवानयं विराट् दृश्यः प्रथमदशास्थैर्योगिभिराराध्य इत्युपपन्नम् ॥ ३१ ॥ अन्यदाह किं चेति ॥ पूर्ववाक्यस्थपदानुवर्तनमनुषंगः । तत्र सूक्ष्मत्वे । इत्यर्थ इति । आकारवद्वस्त्वेव व्यक्तं भवति । तस्य तद्राहित्वात्तथात्वमुचितमेवेति भावः । एतदेवाव्यक्तत्वमेव । इत्यर्थ इति । संभाव्यत एव न तु दृश्यत इति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ॥ अविद्ययाऽऽत्मनि कृते इति तद्ब्रह्मदर्शनम् ॥ ३३ ॥

तम् । आकारविशेषरहितत्वादव्यक्तमित्यर्थः । एतदेव कुतस्तत्राह । अदृष्टाश्रुतवस्तुत्वाद्यच्चाकारविशेषवद्वस्तु तदस्मदादिवद्दृश्यते श्रूयते वा इंद्रादिवत् । इदं तु न तथा । तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह । सजीवः जीवोपाधिः । जीवो जीवेन निर्मुक्तो जीवो जीवं विहायेत्यादौ जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात् । जीवोपाधितया कल्प्यत इत्यर्थः । ननु स्थूलमेव भोगायतनत्वाज्जीवस्योपाधिरस्तु किमन्यकल्पनयेत्यत आह । यद्द् यस्मात्सूक्ष्मात्पुनर्भवः पुनर्जन्म उत्क्रांतिगत्यागतीनां तेन विनासंभवादितिभावः ॥ ३२॥ तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह । यत्रेति । यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा श्रवणमननादिभक्त्या स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः । ज्ञानेन प्रतिषेधार्हत्वे तमेव हेतुमाह । अविद्ययात्मनि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः । कथंभूतम् । दर्शनं

अत्राक्षिपति नन्विति । इति भाव इति । स्थूलदेहस्तु न कुत्रापि परलोकादौ गमनागमनं करोति । तस्यात्रैव स्थितिदर्शनात् । अतस्तदेव यातनादेहादौ प्रविष्टं गमनागमनादिमदिति तात्पर्यम् । अत्र संदर्भः । तस्य यथा स्थूलं रूपं तथां सूक्ष्ममपीत्याह--अतः परमिति । अतः स्थूलात् । सूक्ष्मत्वे हेतुः अदृष्टेति । अदृष्टत्वादश्रुतमित्यन्यतोऽप्यश्रुतत्वाच्चेत्यर्थः । तत्र हेतुः अव्यूढेति । अस्पष्टशब्दादिगुणमित्यर्थः । यद्यस्मा देकरूपाद्धेतोः यदंशावेशेनैवेत्यर्थः । स जीवन् पुनर्भवो भवति पुनःपुनर्जन्मादिकं लभत इत्यर्थः । तदपि मायागुणैर्विरचितमिति पूर्वेणानुषंगः । पूर्ववदुपासनार्थमेवेदं रूपमारोपितमिति भावः । वक्ष्यते च " अमुनी भगवद्रूपे मया ते अनुवर्णिते । उभे अपि न गृह्णंति मायासृष्टेर्विपश्चितः " इति । विश्वनाथस्तु । यथा स्थूलं रूपं भगवद्रूपत्वेनोक्तमपि योगिभिरुपास्यमपि मायागुणैर्विरचितं तथैव सूक्ष्ममपि रूपम् । "अमुनी भगवद्रूपे" इत्यनेन भगवद्रूपत्वेन प्रयुक्तमपि "कर्णौ दिशः श्रोत्रममुष्य शब्दः" इति । "सर्वात्मनोन्तःकरणं गिरित्रम्" इत्याद्युक्तेर्योगिभिरुपास्यमपि मायिकमेवेत्याह—अतः स्थूलादित्यादि सर्वं स्वामिवद्व्याख्यातम् । तेन च समष्टिव्यष्टिविराजां जीवत्वात्तत्स्थूलसूक्ष्मरूपयोर्मायिकत्वात्तत्र चेश्वरत्वमारोपितमेव न तु साहजिकमिति भावः । यदुक्तं "विराट् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्प्रचक्षते" इति । अत्रापि वक्ष्यते "अमुनी भगवद्रूपे" इत्यादिना ॥ ३२ ॥ तमेव मायागुणैर्विरचितमेव । इत्यर्थ इति । उपाधिनिवृत्त्या निरुपाधि शुद्धं ब्रह्मैव जायत इति भावः । अत्र विश्वनाथः । नन्वेवं चेदिदं सर्वं वस्तुतो मायादर्शनमेव ब्रह्मदर्शनं किमित्यपेक्षायामाह। यत्र भगवति मे सदसद्रूपे उक्तलक्षणे मायिके स्थूलसूक्ष्मरूपे प्रतिषिद्धे भवतः । तेनामायिकं रूपं तस्य न प्रतिषिद्धं भवतीति भावः । केन स्वेषां भक्तानां संविदाऽनुभवेन । ते कथं भगवति न स्त इत्यत आह । अविद्ययाऽऽत्मनि जीव एव कृतेऽध्यस्ते न त्वीश्वरे । तदुक्तं "देहाहंकरणाद्देहाध्यासो जीवे ह्यविद्यया । न तथा जगदध्यासः परमात्मनि युज्यते " इति । तत् ततश्च तस्य ब्रह्मणो दर्शनं साक्षात्कारः स्यात् । यद्येषा माया देवी उपरता स्यात् । तथा वैशारदी विशारदो भक्तानां हिते निपुणो भगवानेव तदीया मतिर्मामयं पश्यत्विति कृपामयी तादिच्छा यदि प्रवृत्ता स्यात्तदैव नान्यथा "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्" इति श्रुतेः । यद्वा वैशारदी भगवद्विषयिणी पुरुषस्य स्यादिति । संदर्भस्तु "यत्र स्वसंविदा" इत्युक्त्या जीवस्वरूपज्ञानमपि तदाश्रयमेव भवतीति । तथा केवलस्वसंविदा ते न निषिद्धे भवत इति च ज्ञापितम् । ततश्च जीवत एवाविद्याकल्पितमायाकार्यसंबंधमिथ्यात्वज्ञापकजीवस्वरूपसाक्षात्करणतादात्म्यापन्नब्रह्मसाक्षात्कारो जीवन्मुक्तिविशेष इत्यर्थः । ईदृशमेव तन्मुक्तिलक्षणं कापिलेये "मुक्ताश्रयं यर्हि" इत्यादिचतुष्टये दर्शितम् । तस्मादस्य प्रारब्धकर्ममात्राणामनभिनिवेशेनैवोपभोगः । एवमेवोक्तं "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" इति । स्वामिचरणास्तु यद्यप्यविद्यानिवृत्तौ ब्रह्मत्वमुक्तं तथापीति । अत्राशयमाह—अयं भात्र इति । यावन्मायाऽविद्यारूपेण । विश्वनाथस्तु संपन्न एव तन्मतिमानेव पुरुषः संपन्नोऽन्यस्तु दरिद्र इत्यर्थः । विदुस्तज्ज्ञाः स्वे महिम्नि स्वीये माहात्म्ये वर्तमानः स महीयते पूज्यतेऽन्यथा स्वमाहात्म्याद्भ्रष्टः स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्येषोपरता देवी माया वैशारदी मतिः ॥ संपन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥ एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥ स वा इदं विश्वममोघलीलः सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥ ३६ ॥

ज्ञानैकस्वरूपम् ॥ ३३ ॥ तथापि भगवन्मायायाः संसृतिकारणभूताया विद्यमानत्वात्कथं ब्रह्मता तत्राह । यदीति । यदीत्यसंदेहे संदेहवचनम् । यदि वेदाः प्रमाणं स्युरितिवत् । वैशारदी विशारदः सर्वज्ञः ईश्वरस्तदीया देवी संसारचक्रेण क्रीडन्ती एषा माया यद्युपरता भवति । किमित्युपरता भवेत्तत्राह । मतिर्विद्या। अयं भावः । यावदेषाविद्यात्मनावरणविक्षेपौ करोति तावन्नोपरमति यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवत्स्वयमेवोपरमेदिति तदा संपन्नो ब्रह्मस्वरूपं प्राप्त एवेतिविदुस्तत्त्वज्ञाः । किमतः यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते पूज्यते । विराजत इत्यर्थः ॥ ३४ ॥ यथा जीवस्य जन्मादिमाया एवमीश्वरस्यापि जन्मादिमायेत्याह । एवमिति । अकर्तुः कमाणि अजनस्य जन्मानि । हृत्पतेरंतर्यामिणः ॥ ३५ ॥ तर्हि जीवादीश्वरस्य को विशेषः स्वातंत्र्यमेव

निन्द्यत इति भावः ॥३३॥ संदर्भस्तु अथांतिमां ब्रह्मसाक्षात्कारलक्षणां मुक्तिमाह–यदीति । एषां जीवन्मुक्तिदशायां स्थिता विशारदेन परमेश्वरेण दत्ता देवी द्योतमाना मतिर्विद्या तद्रूपमायास्वरूपशक्तिवृत्तिभूतविद्याविर्भाव द्वारलक्षणा सत्त्वमयी मायावृत्तिः सा यदि उपरता निवृत्ता भवति तदा व्यवधानाभासस्यापि राहित्यात्संपन्ना लब्धपरमानन्दसंपत्तिरेवेति विदुर्मुनयः । ततश्च तत्संपत्तिलाभात्स्वे महिम्नि स्वरूपसंपत्तावपि महीयते पूज्यते प्रकृष्टप्रकाशो भवतीत्यर्थः ॥ ३४ ॥ संदर्भः । एवं भगवत्त्वं दर्शयित्वा ब्रह्मत्वं दर्शितम् । ननु ब्रह्मानुभवेनैव यदि मुक्तिः स्यात्तर्हि कथं जन्मगुह्यमित्यादिना तत्कीर्त्तनमात्रेण संसारविमोक्ष उक्तस्तत्राह एवमिति । यथै वाव्यवहितपूर्वोक्ताविद्या मायोपरतावेव ब्रह्मानुभवसंपत्ती भवतः । एवं प्राकृतजन्मकर्मरहितस्य हृत्पतेः सर्वबुद्ध्यगोचरस्य जन्मानि कर्माणि च कवयो वर्णयन्ति । तत्तदुपरतावेव तज्जन्मकर्मानुभवसंपत्ती साधकानां भवत इति मन्यन्त इत्यर्थः । संपत्तिरत्र साक्षाल्लब्धिः । अत एव वेदगुह्यानीति । तथोक्तं भगवता "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः । त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन" इति। तथैव तेषु श्रीशुकदेवादीना मपि ब्रह्मनिष्ठापरित्यागेनापि रागतः प्रवृत्तिर्वर्णयिष्यते द्वादशे "स्वसुखनिभृतचेताः" इत्यादौ । अतो ब्रह्मवत्तन्निदिध्यासनेनैव संसारदुःखोपक्षयः स्यात्तदनुभवसंपत्ती च भवत इत्यर्थः । पृथगर्थस्त्वेवमित्यस्य व्यव हितवाक्यार्थेनान्वयायोगात्कष्टाय संपद्यते च । विश्वनाथस्तु एवमनेनोक्तलक्षणप्रकारेण मायिकशरीरद्वयप्रतिषेधेनेत्यर्थः । अजनस्य जन्मानि "अजायमानो बहुधा विजायते" इति श्रुतेः । अकर्त्तुः कर्माणि "न चास्य कार्यं करणं च विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः । ननु जीवस्यापि वस्तुतोऽजनस्यैवाकर्त्तुरेव जन्मानि कर्माणि च दृश्यन्ते । सत्यम् । तस्य तानि मायासंबंधेन, अस्य तु मायाप्रतिषेधेने त्येष एव भेद इत्याह । वेदेषु वेदैर्वा गुह्यानि रहस्यत्वेन परमोपादेयत्वेन च संवृत्य स्थापितानि तात्विकानि । जीवस्य तु तानि मायिकत्वेन हेयान्येवावास्तवानीत्यर्थः । तदुक्तं श्रीगीतोपनिषदि "जन्म कर्म च मे दिव्यम्" ॥ ३७ ॥ इत्यादि । हृत्पतेरंतर्यामिणः विराड्रूपस्यैवंभूतत्वाभावादवतारमध्ये गणना तस्य न कृतेति प्रकरणार्थः ॥३५॥ अथ प्राकृतासंगरहितस्यानन्दैकलीलत्वमाह–सवा इति । षड्भिरैश्वर्यादिभिर्गुणैर्भगाख्यैरीष्टे यः स षड्गुणेशः षाड्वर्गिकं जिघ्रति । तेषु नानाभेदत्वाद्वर्गात्मकेषु चरति। यद्भक्तानां भक्तिसुखं यद्वा "तत्तेऽर्हत्तम नमःस्तुतिकर्मपूजाकर्मस्मृतिश्चरणयोः श्रवणं कथायाम् ॥संसेवया त्वयि विनेति षडंगया।किं भक्तिं जनः परमहंसगतौ लभेत" इति श्रीप्रह्लादसंमत्या षड्वर्गसंसेवातः संजातं यत्प्रेम भक्तिसुखं तदेव जिघ्रति अन्विष्यास्वादयतीत्यर्थः । ततश्च न चास्येति तादृशतल्लीलानभिज्ञानां कुमनीषत्वे स वेदेति तादृशतल्लीलातत्त्वस्य भक्त्येकानुभवनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चास्य कश्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः॥नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाऽज्ञः॥३७॥स वेद धातुःपदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः॥योऽमायया संततयाऽनुवृत्त्या भजेत तत्पादसरोजगंधम् ॥३८॥ अथेह धन्या भगवंत इत्थं यद्वासुदेवेऽखिललोकनाथे ॥ कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः ॥३९॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ उत्तमश्लोकचरितं चकार भगवानृषिः॥४०॥

विशेष इत्याह । स वा इति । षाडर्गिकमिंद्रियषडर्गविषयं जिघ्रति दूरादेव गंधवद्गृह्णाति न तु सज्जत इत्यर्थः । कुतः । षड्गुणेशः षडिंद्रियनियंता ॥ ३६ ॥ ननु किमी श्वरस्य सृष्टचादिकर्मभिर्विषयभोगैर्वा तत्राह । न चेति । धातुः जगद्विधातुरीश्वरस्य ऊतीर्लीलाः कुमनीषः कुबुद्धिः निपुणेन तर्कादिकौशलेन नावैति न जानाति । मनसा रूपाणि वचसा नामानि संतन्वतः सम्यग्विस्तारयतः वचोभिरिति बहुत्वं श्रुत्यभिप्रायेण मनोवचोभिः सहेति वा ॥ ३७ ॥ भक्तस्तु कथंचिज्जानातीत्याह । स वेदेति । अमाययाऽकुटिलभावेन संततया निरंतरया अनुवृत्त्या आनुकुल्येन भजेत ॥ ३८ ॥ भक्तिमार्गे प्रवृत्तानृषीनभिनंदति । अथेति । यतो भक्त एव भगवत्तत्त्वं जानाति । अथ अतो भगवंतः सर्वज्ञाः भवंतो धन्याः कृतार्थाः । कतः । यद्यस्मादित्थं प्रश्नैर्वासुदेवे आत्मभावं मनोवृत्तिं कुर्वंति । सर्वात्मकमैकांतिकम् । यत्र यस्मिन्भावे सति भूयः उग्रो गर्भवासादिदुःखरूपः परिवर्तो जन्ममरणाद्यावर्तो न भवति ॥ ३९ ॥ सूत किमेतच्छास्त्रमपूर्वं कथयसि तत्राह । ब्रह्मसंमितं सर्वज्ञतुल्यम् । उत्तमश्लोकस्य चारितं

यत्वे संगमनीयम् । अत एव "अथेह धन्या" इत्यादीनि सुष्ठु संगतानि स्युरिति संदर्भः । विश्वनाथः भगवतस्त्वन्यानि ततो वैलक्षण्यानि बहूनि संन्ति, तत्र प्रथमं निरंकुशमैश्वर्यमाह-सवा इति । षाड्वर्गिकमिन्द्रिय षड्वर्गविषयमित्यादि स्वामिवत् ॥ ३६ ॥ अत्राक्षिपति-नन्विति । "लीलावासनयोरूतीस्तंतूनां तननेपि च" इति निरुक्तिः । आदिना शास्त्रकौशलादिग्रहः । श्रुत्यभिप्रायेण "यतो वाचो निवर्त्तन्ते" इति श्रुत्यभिप्रा येण । क्वचिद्वृत्त्यभिप्रायेणेत्यपि पाठः । अत्र सहार्थस्य गम्यमानत्वात्तृतीयेयं तृतीयेत्याह-मनोवचोभिः सहेति । स्वीयं मनोपि भक्ताभिलषितपूरणे वाचश्च विस्तारयत इति मनसा संचिन्त्य वाचापि वदतीत्यर्थः । विश्वनाथः ज्ञानागम्यत्वमाह-निपुणेन ज्ञानयोगादिनैपुण्येन ऊतीर्लीलानामानि रूपाणि च मनो वचोवृत्तिभिर्नावैति । मनोवचसोरगम्यत्वादिति भावः । "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति श्रुतेः । कुमनीष इति । जन्तुरिति । यो हि भक्तिहीनो ज्ञानी नामरूपवद्वस्तुमात्रं मिथ्येत्याचष्टे तं प्रत्ययमाक्षेपः । संतन्वतः अवतीर्य्यावतीर्य कृपयातांनि विस्तारयतः । अज्ञाने दृष्टांतः । नटस्य चर्या पाण्यादिभिरभिनीयमानस्य गीतपदा र्थस्य चंद्रकमलादेर्नामरूपादिप्रदर्शनां यथाऽज्ञो नावैति अतो नास्वादं लभते ततश्च रसममूलकं ब्रूते । विज्ञः सम्यस्तु सकलसहृदयसाक्षिकं रसं साक्षादेवानुभवतीत्यर्थः । यद्वा नटपदेन वंशस्तंभबद्धरज्ज्वादिषु नर्त्तको ज्ञेयः । स यथा पादयोर्महिषशृंगे सित्वां ते च कांस्यस्थाल्यादिषु निधाय हस्ताभ्यामतिदीर्घवंशं गृहीत्वाकाशबद्धरज्जूपरि चलंस्तन्मार्गागतमन्यं नटं चाण्डालोहमिति मां मा स्पृशेति वदंस्तमस्पृश्यैव लंघते तच्चर्यां यथा तद्विद्याऽनभिज्ञो न जानाति तद्वदित्यर्थः ॥ ३७ ॥ ननु यदि कोपि न जानाति तर्ह्यनिर्मोक्षप्रसंगः स्यादित्यत आह--भक्तस्त्विति । धातुः सर्वपालकस्य पदवीं स्वरूपं "स्वरूपेऽध्वनि पादुके पदवी स्थानमात्रके" इति निरुक्तिः ॥ ३८ ॥ उग्रो गर्भवासादिदुःखप्रदः । यद्वा उग्रं रुद्रमपि ग्रसतीत्युग्रः । ग्रसतेर्डप्रत्ययः ॥३९॥ सर्ववेदतुल्यम् । अनेन "वेदाक्षराणि यावंति पठितानि द्विजोत्तमैः । तावंति हरिनामानि कीर्त्तितानि न संशयः" इति शौनकस्मृतेः प्रत्यक्षरं हरिनामोच्चारणफलदमिति ध्वनितम् । यद्वा नराकृतिपरब्रह्मणा श्रीकृष्णेन तुल्यमिति । "कृष्णे स्वधामोपगते" इत्याद्युक्तेः । धन्यं सर्वपुरुषार्थावहम् । अत एव स्वस्त्ययनं सर्वमंगलावहं महत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ॥ तदिदं ग्राहयामास सुतमात्मवतां वरम् ॥ ४१ ॥ सर्ववेदेतिहासानां सारंसारं समुद्धृतम् ॥ स तु
संश्रावयामास महाराजं परीक्षितम् ॥ ४२ ॥ प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥४३॥ अहं चाध्य
गमं तत्र निविष्टस्तदनुग्रहात् ॥ सोऽहं वः श्रावयिष्यामि यथाऽधीतं यथामति ॥ ४४ ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ कलौ
नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥४५॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः ॥ ३ ॥

यस्मिंस्तत् । ऋषिर्व्यासः ॥ ४० ॥ तत्संप्रदायप्रवृत्तिमाह । तदिदमिति । सुतं शुकम् ॥ ४१ ॥ प्रायेण मृत्युपर्यंतानशनेनोपविष्टमिति परमवैराग्योक्तिः ॥ ४२ ॥ हे विप्राः विप्रर्षेः सकाशात् ॥ ४३ ॥ अध्यगमम् ज्ञातवानस्मि तत्र कर्तियतस्तत्र निविष्ट इति चान्वयभेदात्तत्रपदावृत्तिरदोषः । यथाधीतं न तु स्वमतिविलसितम् । तत्रापि यथामति स्वमत्यनुसारेण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ॥४४॥४५॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे टीकायां तृतीयोऽध्यायः॥ ३॥

सर्वतः श्रेष्ठम् ॥४०॥ तदिदं तल्लीलामयं महापुराणं ब्रह्मानुभविगुरुणा श्रीशुकेनाप्युपादेयत्वेन गृहीतमित्येव जन्मानि कर्माणीत्यस्योदाहरणत्वेनाह-तदिदमिति । वक्ष्यते च परिनिष्ठितोपीत्यादि "हित्वा स्वशिष्यान्पैलादीन्" इत्यादि च।तस्मात्तज्जन्मकर्मलीलामयेनानेन दुःखग्रामाद्विमुच्यते।इत्येतावन्मात्रं किं वक्तव्यं किं तु तद्विधानामपि परमपुरुषार्थ इति भावः।अत एवाह सर्ववेदेतिहासानां समुद्धृतो यः सारस्तद्रूपमिति।किं च यद्द्रव्यमतीव गुह्यं तत्खलु पुत्राय सुवृत्ताय दीयते इति विमृश्य व्यासदेवेन वेदांस्तु पैलादीन्पाठयित्वापि ततोऽप्यस्यातीव रहस्यत्वात्तान्विहायैवात्मजायेदं श्रीभागवतं दत्तम्।तत्र हेतुः आत्मवतां सुबुद्धीनां मध्ये वरं मुख्यम् ॥४१॥ नवनीतवत्सारम्।तेनान्यच्छास्त्रं तक्रादिवच्छ्रीभागवतवन्न सरसमिति भावः ॥४२॥ "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः" इति मेदिनी। तत्र गंगातटस्थपरमर्षिसभायाम्। हे विप्रा इति।यूयमेव विप्रत्वात्पुराणेतिहासश्रावणयोग्या नाहमिति भावः। यद्वा विशेषेण प्रांति सेवकमनोरथान्पूरयंतीति विप्राः "समीहितार्थार्पणकामधेनवो विपद्गणध्वान्तसहस्रभानवः । अपारसंसारसमुद्रसेतवः पुनंतु मा ब्राह्मणपादरेणवः" इत्यादिपुराणाद्विप्राणामतीव पूज्यतमत्वेन श्रीमत्सु कथाश्रावणायोग्योपि भवदाज्ञयैव श्रावयिष्यामि । "इदमेव परं श्रेयो यदाज्ञापालनं गुरोः" इत्युक्तेरिति भावः । विप्रर्षेः सर्वाभीष्टप्रदज्ञानवतः श्रीशुकदेवात् ॥ ४३ ॥ तत्र परीक्षिदर्थमिलितर्षिसमाजे । तदनुग्रहाच्छ्रीशुकानुग्रहात् । "एतां वक्ष्यत्यसौ सूतः" इति द्वादशोक्तेः । यथामतीति । सर्वमर्थजातं तु स श्रीशुकदेव एव वेत्तीति भावः॥४४॥ तदिदं पुराणं न तु शास्त्रांतरतुल्यं किं तु श्रीकृष्णप्रतिनिधिरूपमेवेत्याह-कृष्ण इति।स्वस्य कृष्णस्य धाम नित्यलीलास्थानमुपगते सति श्रीकृष्णे तत्र च "धर्मः प्रोज्झितकैतवोऽत्र" इति "नैष्कर्म्यमप्यच्युतभाववर्जितम्" इति चानुसृत्य परमप्रकटतयाऽवगते भगवद्धर्मभगवज्ज्ञानादिभिरपि सह स्वधामोपगते सति कलौ नष्टदृशां तादृशधर्मज्ञानविवेकरहितानां कृते तदिदं पुराणमेवार्कः न तु शास्त्रांतरवद्दीपस्थानीयं यत्तथाविधोयं पुराणार्क उदितः । तादृशधर्मज्ञानप्रकाशनात्तत्प्रतिनिधिरूपेणाविर्बभूव । अर्कवत्तत्प्रेरिततयैवेति भावः । विश्वनाथस्तु किं बहुना यद्युष्माभिः पृष्टं "धर्मः कं शरणं गत" इति तदिदमेव बुद्ध्यस्वेत्याह-कृष्ण इति। स्वधाम्नो द्वारकातः सकाशात् उपसमीपं प्रभासं गते धर्मज्ञानादिभिः षड्भिरैश्वर्यैः तत्रांतर्धाने सतीत्यर्थः । तल्लीलाया भक्तक्षोभकारित्वात्स्पष्टतयानुक्तिः । नष्टदृशां लुप्तज्ञानानाम् । अत्र दृक्पदेन तत्र चैकदेशांते "दृष्टिः प्रणष्टा तमसि प्रविष्टा" । इति प्रयुक्तेन कृष्णस्य सूर्यत्वं मथुराया उदयशैलत्वं प्रभासस्यास्ताचलत्वं शिष्टानां चक्रवाकत्वं दुष्टानां नीहारत्वं पापानां तमस्त्वं भक्तानां कमलवनत्वं च बोधितम् । अतस्तृतीये "कृष्णद्युमणिनिम्लोचे" इति स्पष्टतया सूर्योक्तिः । एष पुराणार्क इति । कृष्णसूर्येऽस्तमिते सति पुराणसूर्योयमुदित इति सूर्यस्य प्रतिमूर्त्तिस्सूर्य एव भवेदिति भावः ॥४५॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कधे भावार्थदीपिकाप्रकाशे तृतीयोऽध्यायः ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यास उवाच ॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणाम् ॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥ १ ॥ शौनक उवाच ॥ सूतसूत महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥ २ ॥ कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना ॥ कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ॥ ३ ॥ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः ॥ एकांतमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ दृष्ट्वाऽनुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रम् ॥ तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ॥ ५ ॥

तुर्यं भागवतारंभकारणत्वेन वर्ण्यते ॥ व्यासस्यापरितोषस्तु तपःप्रवचनादिभिः ॥ १ ॥ इत्येवं प्रसन्नतया श्रावयिष्यामीति ब्रुवाणम् । मुनीनां बहूनां मध्ये एकेन वक्तव्ये यो वृद्धो वृद्धेष्वपि बहुषु यः कुलपतिर्गणमुख्यस्तेष्वपि बहुषु यो बह्वृचः ऋग्वेदी तेन वक्तव्यम् । अत एवंभूतत्वाच्छौनकोऽब्रवीत् ॥ १ ॥ यत् यां कथामाह ॥ ॥ २ ॥ कस्मिन्वा स्थाने केन हेतुनेति । महाभारतादिधर्मशास्त्राणि कृतवतः पुनरेतत्संहिताकरणे किं कारणमित्यर्थः । कुत इति । सार्वविभक्तिकस्तासिः । केन प्रवर्तित इत्यर्थः । कृष्णो व्यासः ॥ ३ ॥ यदुक्तम् 'स तु तं श्रावयामास' इति तच्छुकस्य व्याख्यानादिकं कथं घटितमिति प्रष्टुं तस्यासंगोदासीनतामाह द्वाभ्याम् । तस्येति । समदृक् समं ब्रह्म पश्यति । अतो निर्विकल्पकः स्वार्थे कः । निरस्तभेदः । किं च एकस्मिन्नेवांतः समाप्तिर्यस्यास्तथाभूता मतिर्यस्य सः यत उन्निद्रो मायाशयनादुद्बुद्धः । "या निशा सर्वभूतानां तस्यां जागर्ति संयमी" इति स्मृतेः । अत एव गूढोऽप्रकटः मूढ इव प्रतीयते ॥ ४ ॥ निर्विकल्पकत्वं प्रपंचयति । दृष्ट्वेति । आत्मजं शुकं प्रव्रजंतमनुगच्छंतमृषिं व्यासमनग्नमपि दृष्ट्वा जले क्रीडंत्यो देव्योऽप्सरसो ह्रिया लज्जया परिदधुर्वस्त्रपरिधानं कृतवत्यः । अनग्नमपीत्यनेनार्थात्तत्सुतो नग्न इत्युक्तम् । नग्नस्य पुरतो

प्रवचनं वेदाभ्यासः।आदिना ग्रन्थनिर्माणादिग्रहः । तपआदिभिः श्रीव्यासदेवस्य चेतसि योऽपरितोषः स एव भागवतारंभे कारणमित्यर्थः (१) "एको दशसहस्राणि योन्नदानादिना भरेत्। स वै कुलपतिः प्रोक्तः" इति श्रीभारतटीकायां नीलकण्ठोक्तेः कुलपतिर्बहुपालकः ॥१॥ सूतसूतेति । वीप्सादरे ज्ञेया । सुवति प्रेरयति शुभे कर्मणि व्यासशिक्षया लोकानिति सूत इत्यभिप्रेत्याह-महाभागेति । श्रीकृष्णकथावक्तृश्रोत्रनुमन्तार एव महाभागा भवन्ति "ते धन्यास्ते महाभागा येषां कृष्णकथारतिः" इत्याद्युक्तेः । वदतां कथयतां वर श्रेष्ठ । तथा च कृष्णकथावक्तैव श्रेष्ठवाग्भवति "सा वाग्यया तस्य गुणान्गृणीते" इत्युक्तेः । भगवान्सर्वज्ञः "उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥" इत्युक्तलक्षणवान् शुकः । शोचयति हरिविमुखान्निजशास्त्रश्रावणेनेत्यन्वर्थनामा श्रीशुकदेवः । अत एवोक्तं "यैर्न श्रुतं भागवतं पुराणं नाराधितो यैः पुरुषः पुराणः ॥ हुतं मुखे नैव धरामराणां तेषां वृथा जन्म गतं नराणाम्" इति संहितायाम् ॥२॥ संहितां वेदरूपाम् । "सम्यग्हितं या वदति संहिता सा प्रकीर्त्तिता । हितं वेदानुगमनमहितं च तदन्यथा" इति वारतंत्रेः । इत्यर्थ इति । तृतीयार्थे तसिरत्रेति भावः ॥३॥ तस्य व्यासस्य "निर्दोषं हि समं ब्रह्म" इत्युक्तेर्मया लक्ष्म्या वा सह वर्तते इति सममिति निरुक्तेश्च समपदं ब्रह्मवाचकमस्तीति। अतः समदर्शित्वात् । न स केवलं निरस्तभेद एवापि तु भगवत्समर्पितधीश्चेत्याह-किं चेति । उद्बुद्धः ब्रह्मसाक्षात्कारवान् । सर्वभूतानामज्ञजनानां या निशेव निशा ब्रह्मविचारस्तस्यां ब्रह्मनिष्ठायां संयमी यमादिसाधनसंपन्नः । अत एव ब्रह्मनिष्ठत्वादेव प्रतीयते मूढैरेव न तु विज्ञैस्तल्लक्षणज्ञा अपि गूढवर्चसमिति वक्ष्यमाणत्वात् ॥ ४ ॥ तच्चित्रम् अहो युवानं तत्रापि मग्नं तत्रापि सर्वत्र स्पष्टं विलोकयत । मत्पुत्रं वीक्ष्यैता न लज्जिताः । मां तु वृद्धं सवसनम् । इतो युवतयः खेलन्तीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान् ॥ उन्मत्तमूकजडवद्विचरन्गजसाह्वये ॥ ६ ॥ कथं वा पांडवेयस्य राजर्षेर्मुनिना सह ॥ संवादः सम भूत्तात यत्रैषा सात्वती श्रुतिः ॥ ७ ॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम् ॥ अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमम् ॥ ८ ॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम् ॥ तस्य जन्म महाश्चर्यं कर्माणि च गृणीहि नः ॥ ९ ॥ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्धनः ॥ प्रायोपविष्टो गंगायामनादृत्याऽधिराट्श्रियम् ॥ १० ॥ नमंति यत्पादनिकेतमात्मनः शिवाय हाऽऽनीय धनानि शत्रवः ॥ कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ॥ ११ ॥

गच्छतः सुतस्य तु ह्रिया न परिदधुः तच्चित्रं वीक्ष्य । इयं स्त्री अयं पुमानिति भिदा भेदस्तवास्ति । विविक्ता पूता दृष्टिर्यस्य॥५॥ एवं भूतोऽसौ कथमालक्षितो ज्ञातः। कुरवो जांगलाश्च देशविशेषास्तान्संप्राप्तः प्रथमम् । ततो गजसाह्वये विचरन् गजेन सहित आह्वयो नाम यस्य तस्मिन्हस्तिनापुरे । हस्ती नाम राजा तेन निर्मितत्वात् ॥ ६ ॥ सः एवंभूतेन मुनिना सह । यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता ॥ ७ ॥ एतद्व्याख्यानं बहुकालावस्थानापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह । स इति । गोदोहनमात्रं कालं प्रतीक्षते तदपि न भिक्षार्थं किंतु तेषामाश्रमं गृहं तीर्थी कुर्वन्पवित्रीकुर्वंस्तस्मादेवंभूतोऽत्र वक्तेत्याश्चर्यम् ॥ ८ ॥ श्रोतुस्तु चरितमतीवाश्चर्यमतः कथयेत्याह । अभिमन्युसुतमिति पंचभिः । गृणीहि कथय ॥ ९ ॥ सम्राट् चक्रवर्ती । वेति वितर्के । कस्य वा हेतोः कस्मात्कारणात् । अधिराट्श्रियम् अधिराजां श्रियं संपदमनादृत्य ॥ १० ॥ यस्य पादनिकेतं चरणपीठम् । ह स्फुटम् । धनानि आनीय शत्रवः नमंति । अंग हे सूत । युवा तरुण एव । ऐषत ऐच्छत् । अत्रा

तद्दिशि दृशमप्याददानं विलोक्य लज्जंते स्म तदिमा एवार्जवेन कारणं पृच्छामीति मुनौ पृच्छति सति जगदुः। पूता द्वैतमलरहिता कामादिमलरहिता वा दृष्टिर्यस्य स तथा । वयं युवतिजनाः कलाभिज्ञाः स्त्रीपुंसयोर्नयनदर्शनेनैव तदंतस्तत्त्वं सर्वं ज्ञातुं प्रभवाम इति भावः ॥ ५ ॥ जडः कार्यविवेकशून्यः । लोकविपरीतचेष्टावैशिष्ट्ये उन्मत्तवदिति दृष्टान्तः । लोकरञ्जकव्यापाररािहत्ये मूकवदिति, सर्वथोद्यमराहित्ये जडवदिति भेदः ॥ ६ ॥ मुनिना श्रीशुकेन ॥ ७ ॥ पवित्रीकुर्वन् "येषां संस्मरणात्पुंसां सद्यः शुध्यन्ति वै गृहाः" इति वक्ष्यमाणत्वात् । गृहपदेनात्र गृहस्था ग्राह्याः । मंचाः क्रोशन्तीतिवत् । यद्वा तत्रत्यजीवमात्रेभ्योपि सद्गतिं दातुमिति भावः ॥ ८॥ अभिमन्युसुतं न भीर्येषां तेऽभयो ह्रस्वस्त्वत्र पृषोदरादित्वात्। ते च द्रोणकर्णादयस्तैरपि मन्यते शूरत्वेन श्लाध्यत इत्यभिमन्युस्तस्य सुतं परीक्षितम्॥९॥ "येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राडिति कथ्यते" इत्यभिधानात्॥ १० ॥ ननु "परिश्रान्तो वयस्थश्च षष्टिवर्षो जरान्वितः । क्षुधितः स महारण्ये ददर्श मुनिसत्तमम्" इति महाभारतविरोधाद्युवेति कथमुक्तं तत्राह-भारतवाक्यस्य त्वयमर्थः । "आचत्वारिंशद्यौवनमाषष्टि मध्यमं वयः" इत्युक्तेर्यद्यपि षष्टिवर्षो मध्यवया भवति तथापि यौवनस्य तत्प्राग्वर्तित्वेन तत्संबद्धत्वात्तदपि यौवनमेव न स्थाविर्यं सशक्तिदेहत्वात्। "तथा च षष्टिवर्षोपि वयस्थस्तरुणो युवा" इत्युक्तेर्युवैव "वार्द्धक्यं षष्टितः परम्"इत्युक्तेः । अन्यथाऽत्र वयस्थपदमयुक्तं स्यादिति भावः । जराजीर्ण इत्यस्य त्वयमर्थः । जीर्य्यतेम्बुपानेनेति जरा तृषा तदन्वितः क्षुधित इत्यग्रे दर्शनात् । एवं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरम् ॥ १२ ॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् ॥ १३ ॥

षमात्मनेपदम् । असुभिः प्राणैः सह ॥ ११ ॥ विरक्तस्य किं धनादिभिरिति चेत, तत्राह । शिवायेति । लोकस्य शिवाय सुखाय, भवाय समृद्ध्यै, भूतये ऐश्वर्याय च ते जीवंति न त्वात्मार्थम् । एवं सति असौ राजा निर्विद्य विरज्यापि परेषामाश्रयं कलेवरं कुतो हेतोः मुमोच । न हि परोपजीवनं स्वयं त्यक्तुमुचितमित्यर्थः ॥ ॥ १२ ॥ यत्किंचन पृष्टोऽसि तत्सर्वं नः अस्मभ्यं समाचक्ष्व यत् यस्माद्वाचां विषये गिरां गोचरेऽर्थे स्नातं पारंगतं त्वां मन्ये, छांदसादन्यत्र वैदिकव्यतिरेकेण । अत्रैवर्णि

"क्षुधितस्तृषितो भृशम् " इति वक्ष्यमाणेन " युवैपतोत्स्रष्टुमहो सहासुभिः " इत्यनेन च समानार्थकतया विरोधोत्र न सेत्स्यतीति ध्येयम् ॥ ११ ॥ इत्यर्थ इति । परोपकृतियुक्तदेहस्त्वकृत्येनापि रक्षणीय इति भावः ॥ १२ ॥ सूतजातेस्त्रैवर्णिकत्वाभावात् । अत्र क्रमसंदर्भः । वेदपुराणयोर्ब्राह्मणपरिव्राजकवद्भेदाभेदव्यवस्थयोक्तम् । माध्यंदिनश्रुतौ च वेदपुराणेतिहासानामपौरुषेयत्वेनाभेदनिर्देशः कृतः । यथा "एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः" इत्यादिना ब्रह्मयज्ञाध्ययनेपि विनियोगो दृश्यतेमीषाम् "यद्ब्राह्मणानितिहासपुराणानि" इति । अनेन च प्रणवादिमयं छंदः सुपर्णं यद्वाक्यमत्रास्ति तत्रापि तस्याधिकारित्वं दर्शितम् । किं त्वत्र कश्चिदुच्चारो भेदगम्यः यः खलु स्वरप्लुतादिवैशिष्ट्यमयो वैदिकस्तदभावात् तदज्ञानात् । तच्च सूतेन नावगत मित्यत उक्तं छान्दसादन्यत्रेति । हे छान्दस त्वामहमत्र जगति वाचां वाग्रूपाणां शास्त्राणां विषये स्नातं मन्ये किंभूतं स्नातमनि इति योज्यम् । "छन्दो वेदे च पद्यादाविच्छाह्लादनदीप्तिषु" इति निरुक्तिकोशा च्छन्दोभिर्वेदैः स्तुतश्छान्दसोऽग्निः "ॐमूर्द्धानं दिवो अरति पृथिव्यां वैश्वानरमृतमाजातमग्निम् । कविंसम्राजमतिथिं जनानाम्" इत्याद्यानन्तश्रुतेः । तमतति सातत्येन गच्छति तदुद्भूतत्वेन प्राप्नोतीति छांदसात् । यद्वा छन्दसां मात्रावर्णभेदादिनार्यानुष्टुभादीनां समूहश्छान्दसं तमतति सामस्त्येन जानातीति छांदसात् । क्विबत्र कर्त्तरि । गत्यर्थानां ज्ञानार्थतानियतत्वात् । "यानि वेदविदां श्रेष्ठो भगवान्बादरायणः । अन्ये च मुनयः सूत परावरविदो विदुः ॥ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वतस्तदनुग्रहात्" इत्यादेः । अ कोर्थ आदौ निकोर्थो नीत्यक्षरं यस्य तत् अनि स्नातशब्दतः पूर्वभागे नीति लिखिते निष्णांतं स्यात्तथा च तत्पदं कौश लार्थकं जातम् "निनदीभ्यांस्नातेः सस्यषः कौशले" इति शाब्दिकोक्तेः । "अ आदावधिक्षेपवर्जनामन्त्रणेषु च" इति कोशात् । तर्हि "स्नातस्य मे न्यूनमलं विचक्ष्व" इति व्यासोक्तेः । का गतिरिति चेद्वातूनामने कार्थत्वैवेत्यवेहि । सात्र कथं नाश्रिता पूर्वोक्तयोजनाया इह गतित्वात्तत्र त्वगतिकत्वादेव स्नातेः कुशलार्थतेति। यद्वाऽव्ययानां यथेष्टयोगित्वान्न्यूनमिह नि ऊनमित्यवग्रहेण निकारस्नातस्येत्यनेन युज्यते । तथा च निष्णातस्येति स्यात्तेन "निनदीभ्याम्" इति सूत्रसार्थक्यं च । यद्वाऽन्यान्संसृतितप्तांस्त्राति हरिकथामृतपायनेन जीवयतीत्यन्यत्रस्तत्संबुद्धौ हे अन्यत्र । त्वामहं वाचां विषये स्नातं मन्ये । अत्र हेतुगर्भितसंबोधनमाह-हे छंदसादिति । "तव कथामृतं तप्तजीवनम्" इत्यादिश्रीगोपीवाक्यमन्यरक्षकत्वे मानम् । स्वामिचरणैस्तु "वृद्धानुवृत्त्यापि विलोमजाता" इति "दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगे" इति यदुक्तं तेन तदाश्रित्यैवापाततोऽत्रैवर्णि कत्वादिति व्याख्यातम् । वस्तुतस्तु तत्रापि विगतानि लोमानि सलोम्नो दहनावसरे प्रथमं यस्मात्स विलोमाग्निः तदुद्भूतत्वाद्विलोमजाता इत्युक्तम् । किञ्च महतामभिधानं नामोच्चारणं तेनापि योगः संबंधो दौष्कुल्यमाधिं विधुनोति । अहं दुष्कुलजो नास्मि यतो महन्नामोच्चारितम् । यद्वा मां महान्त आहूय पृच्छन्ति दौष्कुलजेन तेन संभाषणं कुर्वंति। सोपि तन्नामादि नो वक्ति । ततोयमाधिर्न कार्य इति । तथाच पूज्यानां नामो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये ॥ जातः पराशराद्योगी वासव्यां कलया हरेः ॥ १४ ॥
स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचि ॥ विविक्तदेश आसीन उदिते रविमंडले ॥ १५ ॥

कत्वात् ॥ १३ ॥ कस्मिन्युगे इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तरमाह । द्वापर इति । द्वापरे समनुप्राप्ते । कदेत्यपेक्षायामाह । तृतीये युगस्य पर्यये परिवर्ते । वासव्यामुपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः ॥ १४ ॥ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः । आसीनः । बभूवेति शेषः । विविक्ते

च्चारणादियोगो यदि मानसीं व्यथामपाकरोति तर्हि किं महत्तराणां किंतरां महत्तमानाञ्च । स यदि तमपाकरोति । तदुक्तं ''महान्तो जन्मना विप्रा विद्यावन्तो महत्तराः । महत्तमा विष्णुभक्तास्तत्संबन्धो महत्त्वकृत्'' इति संहितोक्तेः । प्रकृतमनुसरति । किं चास्य पुराणस्य ''स सहितां भागवतीम्'' इत्यत्र ''यत्रैषा सात्वती श्रुतिः'' इत्यत्र च वेदवाचकसंहिताश्रुतिशब्दाभ्यामुपात्तत्वात्साक्षाद्वेदत्वमेव ध्वनितमतोऽत्रैवर्णिके सूते शौनकादिकृतानुयोगोपि न संगच्छेत । किं च तैरेवोक्तं श्रीबलदेवं प्रति सूतवधोत्तरं ''यदेतद्ब्रह्महत्यायाः पावनं न करिष्यसि'' इति । तदपि न संगच्छेत । तथा च यद्वा ''श्रीधरस्वाम्यभिप्रायं श्रीधरो वेत्ति सर्वथा'' इति शिष्टोक्तिरपि संगतैव । न चैवं सूताधिकारात्पुराणादीनां न्यूनत्वमाशंक्यम् । सकलनिगमवल्लीसत्फले श्रीभगवन्नाम्नि सर्वेषामधिकारात्सर्वयज्ञाद्यधिकश्रीभगवद्भक्त्यन्तरवत् । श्रीभागवते त्वात्मारामशिरोमणेः श्रीशुकस्यापि सर्वस्वत्वदावेशात् ॥ १३ ॥ युगानां सत्यादीनां बहूनां पर्ययोऽतिक्रमो यत्र तस्मिन् ''पर्ययोतिक्रमस्तस्मिन्नतिपात उपात्ययः'' इत्यमरः । बहुयुगातिक्रमे । यद्वा परं तस्मिंस्तच्च कृष्णावतारसंबंध्येव ज्ञेयम् । तदवतारश्च वैवस्वतमन्वंतरीयाष्टाविंशतितमे द्वापरे व्याख्यास्यते । कीदृशे तृतीये संध्यांरूपयुगरूपसंध्यांशरूपाणीति सर्वयुगानि त्रिरूपाणि भवन्त्यतस्तृतीये संध्यांशरूपे इति विश्वनाथः । तीर्थस्तु कृतयुगापेक्षया तृतीये द्वापरे समनुप्राप्ते किंभूते युगस्य पर्ययोऽवसानं यत्र तस्मिन् । द्वापरान्त इत्यर्थमाह । अत्रेयं भारताद्युक्ता कथानुसंधेया । उपरिचरवसुनामा चेदिपो राजा शक्रसेवया विमानं लब्ध्वा तेनोपरितनलोकेषु गच्छति यतोऽतस्तन्नामोपरिचरवसुरिति जातः । स कदाचित्पित्राज्ञया मृगयां गतः स्वपत्नीं गिरिकाख्यामृतुस्नातां स्मृत्वा तद्रूपस्मरणेन रेतस्त्यक्त्वा बटपर्णपुटे क्षिप्त्वा श्येनाय दत्त्वा स्वपत्न्यै प्रेषितवान् । मार्गे यान्तं तं श्येनं तदन्यो मांसभ्रांत्या तेन युयुधे । ततस्तद्रेतः कालिंद्यां पपात । तच्च जलेऽघमर्षणं जपता केनचिन्मुनिना पादग्रहणाच्छप्ताद्रिकाप्सरा मत्स्यीभूता जगार । सा च गर्भवती सती केनचिन्मत्स्यजीविना दाशेन गृहीत्वा तद्देशराज्ञे दत्ता विदारितोदरायास्तस्या मिथुनं बहिर्गर्भात्पपात । यश्च पुत्रः स तु तेन राज्ञा गृहीतो मत्स्यनामा राजाभूत् । या च कन्या सा दाशेन गृहीता वासवी काली मत्स्योदरीति नामभिः प्रसिद्धाभूत् । मत्सी तु देहान्ते स्वर्गं ययौ । वासवीं दाशः पालितवान् । अथ कदाचित्तीर्थयात्राप्रसंगेन तत्रागतः पराशरमुनिस्तं दाशमाह । मां शीघ्रं पारं नयस्व । स च भोजनं कुर्वाणस्तां स्वपुत्रीभूतां वासवीं त्वमुडुपेनर्षिं पारं प्रापयेत्युवाच । सा च पितुराज्ञया तथा चकार । तामतीव सुन्दरीं वीक्ष्य कामार्त्तो मुनिर्मैथुनाय ययाचे । सा च नैतत्त्वादृशामृषीणामुचितं कर्मेति बहुशो बोधयामास तं किं च दुर्गंधाहं कन्याहं लोकः पिता देवाश्च पश्यन्तीत्याद्युवाच । स च प्रसह्य तां ययाभ । वरं च दत्तवान् । योजनगंधा भविष्यसि । पुत्रस्ते विष्णोरंशः पुराणाचार्यो भविष्यति चेत्युक्त्वा स्नात्वार्षिस्तु स्वाश्रमं गतः । सा च सद्यो गर्भं धृत्वा कर्णतो वीर्यग्रहणात्कर्णत एव पुत्रं प्रासूत । तं च द्वीपे स्थापयित्वा पालयामास । कंचित्कालमतो द्वैपायन इति नाम तस्य जातम् । स च मातरमामंत्र्य ततः स्वपितरमवधार्य कार्यकाले स्मरणादेव तव पार्श्वमागमिष्यामीत्युक्त्वा पित्राश्रमं जगामेति भारताद्युक्तेः ॥ १४ ॥ इत्यर्थ इति । ''उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि'' इति मेदिन्युक्तेरयं भावः । अनेन विविक्तासीनत्वकथनेन सूचितमिति चिंत्यम् । तत्र सरस्वत्याः श्रवणात् शम्याप्राश इत्येव तस्य नाम वक्ष्यत इति संदर्भः । स्वामिचरणैर्हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परावरज्ञः स ऋषिः कालेनाऽव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगेयुगे ॥ १६ ॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतम् ॥ अश्रद्दधानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः ॥ १७ ॥ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा ॥ सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥ ॥ १८ ॥ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकम् ॥ व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधम् ॥ १९ ॥ ऋग्यजुःसामाऽथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इति हासपुराणं च पंचमो वेद उच्यते ॥ २० ॥ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ॥ वैशंपायन एवैको निष्णातो यजुषामुत ॥ ॥२१॥ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः ॥ इतिहासपुराणानां पिता मे रोमहर्षणः ॥ २२ ॥ त एते ऋषयो वेदं स्वंस्वं व्यस्यन्ननेकधा ॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् ॥२३॥ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा ॥ एवं चकार भगवान्व्यासः कृपणवत्सलः ॥२४॥

देशे इत्यादि । चित्तैकाग्र्यार्थमुक्तम् । अनेनैव बदरिकाश्रमस्थानं सूचितम् ॥ १५ ॥ तत्र च स ऋषिः युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां यत् हितं तत् दध्याविति तृतीयेनान्वयः । परावरज्ञः अतीतानागतवित् । अव्यक्तं रंहः वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य । तथा भुवि युगेयुगे ॥ १६ ॥ भौतिकानां शरीरादीनाम् । तत्कृतं कालकृतम् । निःसत्त्वान्धैर्यशून्यान् । दुर्मेधान् मंदमतीन् ॥ १७ ॥ १८ ॥ ततश्च होत्रोपलक्षिताः चत्वार ऋत्विजः चतुर्होतारः तैः अनुष्ठेयं कर्म चातुर्होत्रम् । शुद्धं शुद्धिकरम् । यज्ञसंतत्यै यज्ञानामविच्छेदाय ॥ १९ ॥ चातुर्विध्यमेवाह । ऋगिति । उद्धृताः पृथक्कृताः ॥ २०॥२१॥ दारुणः क्रूरः अथर्वोक्ताभिचारादिप्रवृत्तेः ॥ २२ ॥ व्यस्यन् विभक्तवंतः ॥ २३ ॥ वेदविभागप्रयोजनमाह । त एवेति । ये पूर्वमतिमेधाविभिर्धार्यंते स्म ते एव ॥ २४ ॥

न गंधमादनस्थबदरिकाश्रमोऽभिप्रेतः । किं तु सिंधुवनस्थोभिप्रेतस्तत्रैवादिबदरिकाश्रमप्रसिद्धेस्तत्र सरस्वतीबदरीखंडयोरपि सत्त्वादिति ज्ञेयं सुज्ञैः ॥ १५ ॥ तत्र चाश्रमे आदिना शक्तिह्रासादिग्रहः ॥ १६ ॥ १७ ॥ दुर्भगान्मंदभाग्यान् । दिव्येन तपोजन्ययोगचक्षुषा ॥ १८ ॥ चत्वारो होत्रध्वर्यूद्गातृब्रह्माणो होतारो यत्र तस्मिन्यद्वा दर्शहोत्रादिचातुर्होत्रपर्यंतैर्मंत्रैः प्रकाश्यं वाऽग्निष्टोमादिकं प्रजानां वैदिकीनां यज्ञसंतत्यै यज्ञानामग्निष्टोमादीनां परंपराप्रवर्तनायैकमविभक्तं वेदमृगादिभेदेन चतुर्विधमकरोत् ॥ १९ ॥ मूलवेदसिंधोरुद्धृता न तु कृताः । तदर्थज्ञानाय कृतमितिहासपुराणं च वेदार्थविदकत्वात्पंचमो वेद इत्युच्यते । पञ्चमो वेद इत्युक्तेरितिहासादीनामर्थतो रचनाभाव एव सूचितः । वेदवत्तेषामप्याविर्भाव एव व्यासेन कृतो न तु रचना तेषामपि नित्यत्वादिति भावः ॥ २० ॥ तत्र तेषां वेदानां मध्ये ऋग्वेदप्रवर्तकः पैलस्तन्नामर्षिः साम गायति स्वशिष्येभ्यो गमयतीति सामगः । कविः सूक्ष्मदर्शी । एवकारेण मनुष्येषु तत्प्रवर्तकः स एव देवेषु सूर्य इवेत्युक्तम् । यजुषां यजुर्वेदानां निष्णातः कुशलः प्रवर्त्तकतयेति शेषः ॥ २१ ॥ अथर्वांगिरसामथर्ववेदानां निष्णात इति योज्यमत्र ॥ एवमितिहासपुराणानां निष्णात इति ''आर्षादिबहुधाख्यानं देवर्षिचरिताश्रयम् । इतिहासमिति प्रोक्तं भविष्यद्भूतधर्मयुक् ॥'' केचित्तु ''धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् । पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते।''किंच''वर्ण्यंते यत्र सर्गाद्याः पञ्च वा दश वा च तत्। पुराणं प्रोच्यते वेदखिलार्थानां प्रपूरणात्॥''इति विष्णुपुराणटीकोक्तेः॥२२॥शाखिनः शिष्यप्रशिष्यादिभिस्तत्तन्नामपूर्वशाखावंतोऽभवन्नित्यर्थः॥२३॥ व्यासनामनिर्वचनमाह-दुर्मेधैरल्पमतिभिरपि धार्यंतेपठित्वाऽवधृतार्थाः क्रियंते । तथा शिष्यप्रशिष्यादिभिः शाखोपशाखाभेदेन चकार व्यसत्तस्माद्व्यास इति भगवान् ''व्यासो नारायणः स्वयम्'' इत्यादिपुराणात् ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥ इति भारतमाख्यानं कृपया मुनिना कृतम् ॥ २५ ॥ वेदार्थं च समुद्धृत्य भारते प्रोक्तवान्मुनिः ॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥ २६ ॥ सर्वात्मकेनापि यदा नाऽतुष्यद्धृदयं ततः ॥ २६ ॥ नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥ वितर्कयन्विविक्तस्थ इदं प्रोवाच धर्मवित् ॥२७॥ धृतव्रतेन हि मया छंदांसि गुरवोऽग्नयः ॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनम् ॥ २८ ॥ भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥ २९ ॥ अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ॥ असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ॥ ३० ॥

किंच । स्त्रीशूद्रेति । द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषाम् । कर्मरूपे श्रेयसि श्रेयःसाधने । एवं भवेत् अनेनैव प्रकारेण भवतु । इति अतएव । तेषां कृपया भारताख्यानं मुनिना कृतम् ॥ २५ ॥ एवम् अनेन प्रकारेण । भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा ॥२६॥ न अतिप्रसीदत् हृदयं यस्य सः । चित्ताप्रसत्तौ हेतुं वितर्कयन् इदम् उवाच स्वगतम् ॥२७॥ निर्व्यलीकेन निष्कपटबुद्ध्या । मानिताः पूजिताः ॥२८॥२९॥ दैह्यः देहे भवः आत्मा जीवः वस्तुतो विभुः परिपूर्ण एव आत्मना स्वेन रूपेणासंपन्नः तादात्म्यमप्राप्त इवाभाति । ब्रह्मवर्चसं वेदश्रवणाध्यापनोत्कर्षजं तेजः तत्र साधवः ब्रह्मवर्चस्याः तेषु सत्तमः अतिश्रेष्ठोऽपि । यद्वा न केवलमसंपन्न इव

एवं त्रैवर्णिकानां वैदिककर्मानुष्ठानेन शुद्धान्तःकरणानामधोक्षजोपासनाजनितज्ञानेन मुक्तिस्स्यादिति व्यासदेवेन स्थापितम् । तदनधिकारिणां स्त्रीशूद्रादीनां कथं सा स्यादित्याकांक्षायामाह-स्त्रीशूद्रेति । वेदोक्तकर्माख्यश्रेयसि पुरुषार्थसाधने मूढानामयोग्यानां त्रयी त्रयो वेदाः श्रोतुमप्ययोग्याः कुतोऽध्येतुमिति भावः । इति यस्मादत एवं मया करिष्यमाणभारतशास्त्रोक्तविधिना इह स्त्रीशूद्रजने श्रेयो भवेदिति कृपया मुनिना सर्वज्ञेन श्रीव्यासेन भारताख्यानं कृतमित्यन्वयः । अत्रायं भावः । स्त्रीशूद्रादिकृपया भगवता भारताख्यानस्य कृतत्वात्तेषामेव तत्राधिकारो नान्येषामिति न ध्येयम् । "इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत्" इति वचनाद्ब्राह्मणादीनामपि वेदार्थज्ञानायावश्यं भारताद्यभ्यासस्योक्तत्वादुभयत्राधिकारो युज्यते । तेषां स्त्रीशूद्रादीनां वेदाक्षरोच्चारणाच्च "शूद्रश्चांडालतां व्रजेत्" इति स्मृतेः । "सावित्रीं लक्ष्मीं यजुः प्रणवं यदि जानीयात्स्त्री शूद्रः स मृतोऽधो गच्छति । तस्मात्सर्वदा नाचष्टे । यद्याचष्टे स आचार्यस्तेनैव मृतोऽधो गच्छति" इति नृसिंहतापनीयोक्तेश्च । सर्वथा साक्षाद्वेदाध्ययनश्रवणादिनिषेधेन गत्यन्तराभावाद्भारताद्युक्तानुष्ठानेन मुक्तिरिति "मूढो योग्ये यथाजाते विचित्ते विकलेऽपि च" इति निरुक्तिः । त्रैवर्णिकेष्वधमाः कुण्डगोलव्रात्यादिरूपाः ॥२५॥ साक्षाद्भगवदवतारस्यापि दुर्जनमोहनाय लोकानुकरणमाह—एवमिति हे द्विजा इति । यूयं तु द्विजत्वात्साक्षाद्वेदाधिकारिण एव कथमस्माकं भद्रं स्यादिति भीर्भवतां नास्तीति भावः । ततः सर्वभूतहितप्रवृत्तेरपि यदा हृदयं नातुष्यत्तदेदं प्रोवाचेत्यग्रिमेणान्वयः । धर्मवित्सर्वधर्मज्ञो व्यासः ॥ २६ ॥ २७ ॥ धृतव्रतेन लौकिकाचारापेक्षया वेदव्रतधारणावता मया छंदांसि वेदाः गुरवोऽध्यापकाः त्रेताग्नयः मानिताः सत्कृताः अनुशासनमाज्ञा । हि शब्देन विप्रादिभिर्वेदे व्रतादि वैदिकं कर्मावश्यं कर्त्तव्यमित्यसूचि ॥ २८ ॥ आम्नायतेऽभ्यस्यते त्रिवर्णैरित्याम्नायः । यद्वाम्नायते पुरुषार्थचतुष्टयमनेनेत्याम्नायो वेदः "श्रुतिः स्त्री वेद आम्नायः" इत्यमरः । यत्र भारते आदिनांत्यजादिग्रहः । अपि नो । तेन च न केवलं स्त्रीशूद्रादिभिरेवापि तु ब्राह्मणादिभिरपीत्युच्यते ॥ २९ ॥ अथापि एवं सत्यपि भूतश्रेयसि प्रवृत्तस्यापीत्यर्थः । तादात्म्यं ताद्रूप्यम् वस्तुत इवेन प्राप्तिरेवोक्तेति स्वगुणाविष्क्रियादोष इत्युक्तेः स्वात्मश्लाघाभयोग्यांमत्वाह-यद्वेति । पाठान्तरे

॥ ४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं वा भागवता धर्मा न प्रायेण निरूपिताः ॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥३१॥ तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥
कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतम् ॥ ३२ ॥ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितम् ॥३३॥
इति श्रीमद्भागवते म० प्रथमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ सूत उवाच ॥ अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः ॥ देवर्षिः प्राह विप्रर्षिं
वीणापाणिः स्मयन्निव ॥ १ ॥ नारद उवाच ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥

आभाति, प्रत्युत ब्रह्मवर्चसी ब्रह्मवर्चसवानपि असत्तम इव आभाति । पाठांतरे कमनीयतमोऽपीति ॥ ३० ॥ असंपत्तौ हेतुं स्वयमेवाशंकते । किं वेति । प्रायेण भूयस्त्वेन हि यस्मात् ते एव धर्माः अच्युतस्य प्रियाः ॥ ३१ ॥ खिलं न्यूनम् । खिद्यतः खेदं प्राप्नुवतः । कृष्णस्य व्यासस्य । प्रागुदाहृतं सरस्वतीतीरस्थम् ॥ ३२ ॥ तं नारदम् आगतम् अभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास । सुरपूजितमिति । ब्रह्मलोकादागतमित्यर्थः ॥ ३३ ॥ इति प्रथम० टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे सर्वधर्मेभ्यो हरिकीर्तनगौरवम् ॥ व्यासचित्तप्रसादाय नारदेनोपदिश्यते ॥ १ ॥ उप समीप आसीनं विप्रर्षिं व्यासं बृहच्छ्रवाः महायशाः । स्मयन् ईषद्धसन्निवेत्यनेन मुखप्रसत्तिर्द्योत्यते यद्वा इवेत्यनधिकारार्थम् । अहो महानपि मुह्यतीति स्मयमानः ॥ १ ॥ शारीरः शारीराभिमानी आत्मा आत्मना तेन शरीरेण कच्चित् किं परितुष्यति मानसः

ब्रह्मवर्चस्युशत्तम इति पाठे॥३०॥असंपत्तौ तादात्म्याप्राप्तौ । अत्र भागवतधर्मपदेन ज्ञानं व्याख्यातुं न शक्यते किन्तु भक्तिरेव “नामान्यनन्तस्य यशोंकितानि” इति “भवतानुदितप्रायो यशो भगवतोऽमलम्” इत्यादेः । ततश्च परमहंसपदेनाप्यत्र भक्ता एव ग्राह्याः । सारग्राहित्वात् “सारोत्र श्रीहरेर्भक्तिस्तदन्योऽसार एव हि” इत्युक्तेः । अतः पारमहंसी संहितेयं श्रीभागवतमिति ज्ञानिभिरेवात्र स्वत्वं नारोपणीयमिति ॥३१॥ “कृष्णः श्रीवासुदेवे च सत्यवत्याः सुतेऽर्जुने”इत्यभिधानात् । अत्र भगवदवतारत्वादसंभाविनावप्यसर्वज्ञताचित्ताप्रसादौ व्यासस्य स्वयं भगवता श्रीकृष्णेनैव स्वसदृशस्य सर्वशास्त्रशिरोमणेः श्रीभागवतस्य प्रादुर्भावार्थमेव बलादुपपादिताविति व्यवसीयते । यथा ब्रह्ममोहनप्रस्तावे स्वलीलासौंदर्यार्थं श्रीबलदेवस्याप्यसर्वज्ञता कल्पिता । नारदोपदेशात्प्रादुर्भूते च यस्मिन् “ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा” इति। “किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः” इति वाक्याभ्यां सर्वार्थमुख्यो मोक्षोपि भक्त्यैव लभ्यते न तु साधनान्तरेणेति सर्वशास्त्रविलक्षणार्थः सर्वैरेव दृष्टो भवतीति ज्ञेयः ॥३२॥ विधिवत् विधिं ब्रह्माणमिव । “इव वद्वा च सादृश्ये” इत्यभिधानादत्र वच्छाब्देन सह समासः । यथा विधातुः पूजा क्रियते तद्वन्नारदमपूजयदित्यर्थः । यद्वा यथा स्वाश्रमागतमहतां पूजा विहिता तथा पाद्यार्घ्यादिभिरर्चयामासेत्यर्थः ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥ सर्वधर्मेभ्यो यज्ञदानादिभ्यः गौरवमाधिक्यम् (१) अथाश्रमप्राप्तेरनंतरम् । उपासीनमातिथ्यार्थमासनार्घ्यपाद्यादिभिरुपासनां कुर्वन्तमेवाह । स्मयन्निवोष्ठाधराभ्यां स्मितं निष्क्रमयन्निव सर्वज्ञतया तं प्रत्यन्तः प्रसादं नानाप्रश्नकौतुकार्थमवहित्थया गोपायितुमशक्नुवन्नित्यर्थः । स्वामिचरणैस्तु न हि स्मितेन केवलं प्रसक्तिरेव द्योत्यते किं त्वयोग्यतापीत्यभिप्रायेणोक्तं यद्वेति। अहो महानयं मुग्धीभवितुं नार्हतीति सूचनार्थं स्मयं चकारेत्यर्थः ॥ १ ॥ मोहायोग्यतां सूचयन्नामंत्रयति-महाभागेति । न हि महाभाग्यस्य तवायं विषादो युक्तः । अत्र हेतुत्वेन संबुद्ध्यन्तरमाह-पाराशर्येति । नहि सर्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिज्ञासितं सुसंपन्नमपि ते महदद्भुतम् ॥ कृतवान् भारतं यस्त्वं सर्वार्थपरिबृंहितम् ॥ ३॥ जिज्ञासितमधीतं च यत्तद्ब्रह्म सनातनम् ॥ अथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ व्यास उवाच ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वाऽऽत्मभवात्मभूतम् ॥ ५ ॥ स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥ परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥७॥ नारद उवाच ॥ भवतानुदितप्रायं यशो भगवतोऽमलम् ॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम् ॥ ८॥

आत्मा मनोभिमानी तेन मनसा परितुष्यति कच्चित् किं वा ॥ २ ॥ ते जिज्ञासितं ज्ञातुमिष्टं धर्मादि यत् तत्सर्वं सुसंपन्नं सम्यग्ज्ञातम् । अपिशब्दादनुष्ठितं चेत्यर्थः । अयीति पाठे संबोधनम् । सुसंपन्नत्वे हेतुः । महदद्भुतमित्यादि । सर्वैः अर्थैः धर्मादिभिः परिबृंहितं परिपूर्णम् ॥ ३ ॥ किं च यत्सनातनं नित्यं परं ब्रह्म तच्च त्वया जिज्ञासितं विचारितमधीतमधिगतं प्राप्तं चेत्यर्थः । अथापि शोचसि । तत्किमर्थमिति शेषः ॥ ४ ॥ आत्मा शारीरो मानसश्च । तन्मूलं तस्य अपरितोषस्य कारणमव्यक्तमस्फुटम् हे नारद त्वा त्वां पृच्छामि । आत्मभवो ब्रह्मा तस्य आत्मनः देहादुद्भूतः तम् अत एवागाधोऽतिगंभीरो बोधो यस्य तम् ॥ ५ ॥ अगाधबोधतां प्रपंचयन्नाह । स वा इतिद्वाभ्याम् । सर्वगुह्यज्ञाने हेतुः । यद्यस्मात् पुराणः पुरुष उपासितस्त्वया । कथंभूतः । परावरेशः कार्यकारणनियंता । मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ किं च । त्वं त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन प्राणवायुरिव सर्वप्राणिनामंतश्चरः सन्नात्मसाक्षी बुद्धिवृत्तिज्ञः अतः परे ब्रह्मणि धर्मतो योगेन निष्णातस्य । तदुक्तं याज्ञवल्क्येन । "इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्" इति । अवरे च ब्रह्मणि वेदाख्ये । व्रतैः स्वाध्यायनियमैर्निष्णातस्य मेऽलमत्यर्थं यन्न्यूनं तद्विचक्ष्व वितर्कय ॥ ७ ॥ अनुदितप्रायमनुक्तप्रायम् । विमलं भगवद्यशो विना येनैव धर्मादिज्ञानेनासौ

ब्रह्ममुन्यात्मजस्यापरं बोधयितुं समर्थस्य तव सर्वथा मोहो योग्य इति भावः॥२॥ न च तव शास्त्रज्ञानं किंचिदपेक्षितव्यं तदलब्धिमूलकोयं विषाद इति वाच्यम् । यतो जिज्ञासितमिति कृतवान्भारतमित्यस्य यद्विरोधि मात्स्ये "अष्टादशपुराणानि कृत्वा सत्यवतीसुतः । भारताख्यानमखिलं चक्रे तदुपबृंहितम्" इति । अत्र "स संहितां भागवतीं कृत्वा" इति सप्तमाध्यायवाक्येन समाधानं दृश्यते । प्रथमतः सामान्यतः कृत्वा पश्चान्नारदोपदेशतोनुक्रम्य तत्संमत्यानुक्रमेण विशेषतः कृत्वेत्यविरोधः । नारदेनापि "भवतानुदितप्रायम्" इत्युक्तेः सामान्यतस्तूक्तमेवेति सूचितम् । न केवलं भारतमेव कृतमपि तु सनातनं ब्रह्म वेदः परमात्मा च "शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू" इति श्रीमुखोक्तेरुभे एवाधिगते त्वयेति अहो पुनरपि शोकः ॥३॥ इत्यर्थ इति । अनुभवगोचरीकृतमित्याशयः । अहो कृतावतारकार्योपि पुनः कथं त्वं शोचसीति हे प्रभो इति । भगवदवतारस्य तव शोकोनुचित इति भावः ॥४॥ हे इति संबुद्ध्यर्थेऽव्ययम्।तेन हे नारदेति लब्धम् । अत एव ब्रह्मपुत्रत्वादेव ॥५॥ अत्राशयमाह-पराशरपुत्रत्वेन महाभागत्वेन चतुर्वेदज्ञत्वेन ब्रह्मानुभवित्वेन च त्वयाहमुक्तस्त्वं तु ब्रह्मपुत्रोऽगाधबोधः सर्वज्ञो भगवदुपासक इति मत्तः सर्वथैव विशिष्ट इति भावः । यः परावरेशः स त्वया यद्यत उपासितोऽतोभवान्समस्तगुह्यं वेदेत्यन्वयः । असंगः गुणसंगरहितः ॥ ६ ॥ न्यूनं नितरामुर्वरितम् ॥ ७ ॥ भगवतो यशः सर्वस्वरूपेभ्यो भगवत्स्वरूपोत्कर्षः सर्वोत्कर्षद्योतिनी तस्य लीला भक्तिश्च । ननु मया ब्रह्ममीमांसाशास्त्रं वेदान्तदर्शनं कृतं तत्राह-येनेति । तद्दर्शनं दर्शनशास्त्रमपि खिलं न्यूनमेव मन्ये तद्दर्शनकर्तुरेव तवापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥ ९ ॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः ॥ १० ॥

भगवान्न तुष्येत तदेव दर्शनं ज्ञानं खिलं न्यूनं मन्येऽहम् ॥ ८ ॥ ननु भगवद्यश एव तत्रतत्रानुवर्णितं तत्राह । यथेति । चशब्दाद्धर्मादिसाधनानि च । तथा धर्मादिव त्प्राधान्येन वासुदेवस्य महिमा न ह्युक्त इत्यर्थः ॥ ९ ॥ वासुदेवव्यतिरिक्तान्यविषयज्ञानवदेवान्यविषयं वाक्चातुर्यं च खिलमेवेत्याह । नेति । चित्रपदमपि यद्वचो हरे र्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानमुशंति मन्यंते । कुतः । मानसाः सत्त्वप्रधाने मनसि वर्तमाना हंसा यतयो यत्र न निरमंति कर्हिचिदपि नितरां न रमंते । उशिक्क्षयाः उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते । यथा प्रसिद्धा हंसा मानसे सरसि चरंतः कमनीयपद्मखंडनिवासास्त्यक्तविचित्रान्नादिषु

चित्ताप्रसदाश्चेत्तर्ह्यधीत्याधीत्य तद्दर्शनाभ्यासिनामपि कथं चित्तं प्रसीदत्वित्यत्र भवानेव प्रमाणमिति भावः । स्वामिचरणोक्तेरपि तदेव दर्शनं खिलं मन्ये भगवद्यशसोऽप्राधान्येन वर्णनकरशास्त्रवर्णनमेवेत्यर्थः ॥ ८ ॥ अत्रा क्षिपति नन्विति । तत्र तत्र पाद्मब्रह्माण्डादिपुराणेषु । इत्यर्थ इति । पुरुषार्थशिरोमणिरपि वासुदेवमहिमा पुरुषार्थत्वेनापि न वर्णितः किं तु मोक्षसाधनत्वेन वर्णितोऽतोऽत्यादरणीयवस्तुन आदराभावश्चित्तस्याप्रसादमपि किं न करोत्विति भावः । ननु अन्यत्र पुण्यतीर्थेषु मुक्तिरेव महाफलम् । "मुक्तैः प्राथ्र्या हरेर्भक्तिर्मथुरायां च लभ्यते" इति । "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इत्यादिभि स्तत्रतत्र क्वचिन्मोक्षोपर्य्यपि भक्तिरुक्तेत्यत आह-अन्विति । अन्वनु पौनःपुन्येन न वर्णितः । "आनन्दमयोऽभ्यासात्" इत्यत्राभ्यासस्यैव शास्त्रतात्पर्यज्ञापकत्वेनोक्तत्वात् । अतो भगवन्महिम्न एव फलत्वेनोत्कर्षं पौनःपुन्येन यदा वर्णयिष्यसि तदैव ते चित्तप्रसादो भावीति भावः ॥ ९ ॥ चित्राणि गुणालंकारयुक्तानि पदानि यत्र श्लेषेण चित्रस्य विस्मयस्य स्थानमपि यथा मंत्रशास्त्रादि झटिति फलप्रदर्शकतया विस्मयकारि । कीदृशं जगदपि पवित्रयति स्वश्रोतृवक्त्राद्यात्मकं सर्वं जगदपि पुनाति किं पुनः स्वमिति जीवतुल्येन तद्यशसा विना कविवचोऽलंकारादियुक्तमपि मृतशरीरमिवापवित्रं भवतीति भावः । वायसं वयसो देहावस्थाया निर्वाहकं जीवनोपयोगिगणि तायुर्वेदादिरूपं वा । यद्वा।वायसं वयो हंतीति वायसं कर्मकारकादत्र हननेऽर्थेऽण्प्रत्ययः। "किमन्यैरसदालापैरायुषो यदसद्व्ययः" इत्युक्तेः। मानसा हरेर्मनसि स्थिता भक्ताः "स त्वं हरेरनुराध्यातः"इत्युक्तन्यायेन यत्र न नितरां रमन्ते सर्वथैव न रमन्ते इत्यर्थः । यद्वा "यमकश्लेषचित्रेषु शसयोर्बवयोर्न भित्" इत्यालंकारिकोक्तेः।वा निश्चयेन आयशमयशस्करं तीर्थं शास्त्रमित्यर्थः । न यशो यस्मात्तदयशम् । समासान्तो डः । पुनः स्वार्थिकाण्ययश मिति "निपानागमयोस्तीर्थम्"इति कोशः।तच्चानंगरंगादिकामशास्त्रमिति ध्येयम्।यद्वा मानसाः सनकादय इत्युशन्तीत्यस्य कर्तृपदं कमनीयं सरो ब्रह्म वा।वशकात्तावत औणादिकः किच्प्रत्ययः।कित्त्वात्संप्रसारणे प्रतिपदिकसंज्ञोत्तरं "चोः कुः" इति कुत्वे रूपमुशगिति । यद्वा। जगदेव पविर्वज्रं "कुलिशं भिदुरं पविः"इत्यमरोक्तेस्तस्मात्त्रायत इति । यद्वा।जगत्पिबति संहरतीति जगत्पः कालस्तस्माद्वित्रायत इति तथा "जगदघभिदलं स्याच्छ्रावयेद्वा मुरारेः" इति श्रीदशमोक्तेः । यद्वा।जगत्पान्ति तत्त्वोपदेशादिनेति जगत्पाः शुकसनकादयस्तैर्विशेषेण त्रायते वर्ध्यत इति जगत्पवित्रम् । अत्र वचःशब्देन वाक्येऽभिधीयमाने "नाभागा नभगापत्यं यतंतं भ्रातरः कविम् ॥ यविष्ठं व्यभजन्दायं ब्रह्मचारिणमागतम्" इत्यादीनां श्रीभागवतीयानामपि पृथग्वाक्यानां वायसतीर्थत्वं प्रसज्येत शास्त्रेऽभिधीयमाने व्यासादिकृतेषु पुराणादिषु न कुत्रापि हरियशः।सामान्याभाव इति न कस्यापि वायसतीर्थत्वं स्यात् । तस्मात् "कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम् । इह तु पुनर्भगवानशेषमूर्त्तिः परिपठितोनुपदं कथाप्रसंगैः" इति द्वादशोक्तेरत्र वचःशब्देनोत्तरत्र वाग्विसर्गपदेन च कथाप्रसंग एवोच्यते । एवं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वाग्विसर्गो जनताऽघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ॥ ११ ॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् ॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ १२ ॥ अथो
महाभाग भवानमोघदृक्छुचिश्रवाः सत्यरतो धृतव्रतः ॥ उरुक्रमस्याखिलबंधमुक्तये समाधिनाऽनुस्मर तद्विचेष्टितम् ॥ १३ ॥

केऽप्युच्छिष्टगर्ते काकक्रीडास्थाने न निरमंत इति श्लेषः ॥ १० ॥ विनापि पदचातुर्यं भगवद्यशःप्रधानं वचः पवित्रमित्याह । तदिति । तद्वाग्विसर्गः स चासौ वाग्विसर्गो वाचः प्रयोगः । जनानां समूहो जनता तस्या अघं विप्लावयति नाशयतीति तथा सः । यस्मिन्वाग्विसर्गे अबद्धवत्यप्यपशब्दादियुक्तेऽपि प्रतिश्लोकमनंतस्य यशसांकितानि नामानि भवंति । तत्र हेतुः । यद्यानि नामानि साधवो महांतो वक्तरि सति शृण्वंति श्रोतरि सति गृणंति अन्यदा तु स्वयमेव गायंति कीर्तयंति ॥ ११ ॥ भक्तिहीनं कर्म शून्यमेवेति कैमुत्यन्यायेन दर्शयति । नैष्कर्म्यमिति । निष्कर्म ब्रह्म तदेकाकारत्वान्निष्कर्मतारूपं नैष्कर्म्यम् । अज्यतेऽनेनेत्यंजनमुपाधिस्तन्निवर्तकं निरंजनम् । एवंभूतमपि ज्ञानमच्युते भावो भक्तिस्तद्वर्जितं चेदलमत्यर्थं न शोभते । सम्यगापरोक्ष्याय न कल्पत इत्यर्थः । तदा शश्वत्साधनकाले फलकाले चाभद्रं दुःखरूपं यत्काम्यं कर्म यदप्यकारणमकाम्यं तच्चेति चकारस्यान्वयः । तदपि कर्म ईश्वरे नार्पितं चेत्कुतः पुनः शोभते बहिर्मुखत्वेन सत्त्वशोधकत्वाभावात् ॥ १२ ॥ तदेवं भक्तिशून्यानि ज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव यतोऽतो हरेश्चरितमेवानुवर्णयेत्याह । अथो अतः कारणात् । अमोघा यथार्था दृक् धीर्यस्य शुचि शुद्धं श्रवो यशो

सत्यत्रत्यानि सर्वाण्येवोपाख्यानानि हरियशोलंकृतान्येवान्यत्र पुराणादौ बहून्येवोपाख्यानानि हरियशोरहितानि वायसतीर्थान्येवेति संगतिः॥ १०॥ व्यतिरेकेणोक्त्वाऽन्वयेनाह-विनापीत्यादिना । "अबद्धं स्यादनर्थकम्" इत्यमरः। प्रतिश्लोकं श्लोकमात्रे प्रतीतसांकेतादित्वादसम्यगर्थबोधकेपि यस्मिन्यशउपाख्याने यद्यशोपाख्यानं तत्र जनताघविप्लवत्वे हेतुरिति स्वामिचरणानाम् । शृण्वन्ति श्रुत्वापि गायंति गीत्वापि गृणन्ति न तृप्यंतीति भावः ॥ ११॥ इत्यर्थ इति । "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी" इति वाक्यात् । "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये।तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्" इति ब्रह्मवाक्याच्चायं भावः । यद्वा नैष्कर्म्यं ज्ञानमत्र वेदान्तशास्त्राभ्यासः।निष्कर्मतापादकं गीतोक्तम् "अभयं सत्त्वसंशुद्धिः"इत्यादिरूपं वा।अत्र विश्वनाथः।न केवलं वचोमात्रमेव भक्तिरहितं व्यर्थमपि तु श्रौतवचसापि प्रतिपाद्यमपरोक्षं ज्ञानमपि भक्तिरहितं व्यर्थं किमुत परोक्षं ज्ञानं किमुततरां निष्कामकर्म किमुततमां सकामकर्म व्यर्थमित्याह।नैष्कर्म्यरूपम् ।अच्युतभावश्चिदानंदविग्रहत्वभावनया या भक्तिस्तद्वर्जितं चेज्ज्ञानं न शोभते। तेन तस्मिन्मायाशबलतालक्षणापकर्षभावनया मोक्षसाधकं न भवतीत्यर्थः । अलमतिशयेन । निरञ्जनम् अंजनमविद्या तद्रहितमपरोक्षमपि किं पुनः परोक्षमित्यर्थः । न च वाच्यमुपाध्यभावे मोक्षस्यासंभावना नास्तीति । भगवतोऽचिंत्यशक्त्या नष्टस्याप्युपाधेः पुनःपुनः प्ररोहात् । तथा हि वासनाभाष्यधृतं परिशिष्टवचनं "जीवन्मुक्ता अपि पुनर्बंधनं यान्ति कर्मभिः । यद्यचिंत्यमहाशक्तौ भगवत्यपराधिनः" इति । तत्रैवान्यत्र च "जीवन्मुक्ताः प्रपद्यन्ते क्वचित्संसारवासनाम् ॥ योगेन न विलिप्यंते कर्मभिर्भगवत्पराः" इति । तथा "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति। ज्ञानकार्य्यं नैष्कर्म्यमपि न शोभते । तथाहि । रथयात्राप्रसंगे विष्णुभक्तिचन्द्रोदयधृतं पुराणान्तरवाक्यं "नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् । ज्ञानाग्निदग्धकर्मापि स भवेद्ब्रह्मराक्षसः" इति । अत एवाग्रे वक्ष्यते "आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः" इति । ज्ञानस्याप्यच्युतभाववर्जितत्वे तस्मिन्भगवति मायामयत्वभावनादिलक्षणोऽपराधो दुर्निवारण एव । एवं च यदि तादृशभक्तिहीनं ज्ञानमपि विफलं तदा कुतः पुनरिति स्वामिवत् ॥ १२ ॥ इत्यर्थ इति । स्मरणे प्रयोजकता मत्कर्तृका सा वर्णनायैवेति भावः । विश्वना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः ॥ न कुत्रचित्क्वापि च दुःस्थिता मतिर्लभेत वाताहतनौरिवास्पदम् ॥ १४ ॥ जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः ॥ यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥

यस्य सत्ये रतो धृतानि व्रतानि येन स भवानेवं महागुणस्तावत् । अत उरुक्रमस्य विविधं चेष्टितं लीलां समाधिना चित्तैकाग्र्येणाखिलस्य बंधमुक्तये त्वमनुस्मर स्मृत्वा वर्णयेत्यर्थः । एतच्च वाक्यांतरमिति मध्यमपुरुषप्रयोगो नानुपपन्नः ॥ १३ ॥ विपक्षे दोषांतरमाह । तत इति । तत उरुक्रमचेष्टितात्पृथग्दृशोऽत एवान्यथा प्रकारांतरेण यत्किंचिदर्थांतरं विवक्षतस्तया विवक्षया कृतैः स्फारितै रूपैर्नामभिश्च वक्तव्यत्वेनोपस्थितैर्दुःस्थितानवस्थिता सती मतिः कदाचित्क्वापि विषये आस्पदं स्थानं न लभेत वातेनाहताघूर्णिता नौरिव । तदुक्तं गीतासु । "व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्" इत्यादि ॥ १४ ॥ तदेवं हरियशो विना भारतादिषु कृतं धर्मादिवर्णनमकिंचित्करमित्युक्तं प्रत्युत विरुद्धमेव जातमित्याह । जुगुप्सितमिति । जुगुप्सितं निंद्यं काम्यकर्मादि स्वभावत एव रक्तस्य तत्र रागिणः पुरुषस्य धर्मकृते धर्मार्थमनुशासतस्तव महानयं व्यतिक्रमोऽन्यायः । कुत इत्यत आह । यस्य वाक्यतोऽयमेव मुख्यो धर्म इति स्थित इतरः प्राकृतो जनः

थस्तु—सत्यं तर्ह्यच्युतभाव एव सर्वोत्कृष्टत्वेन तवाभिमतः । स च तन्नामलीलाकीर्त्तनश्रवणादिभिरेव भवति । तत्र नाम रामकृष्णादि प्रसिद्धमेव । लीला कीदृशी तवाभिमता तामुपदिशेत्यपेक्षायामाह—अथो इति । अमोघदृक् अव्यर्थज्ञानः।लीला हि भक्तिमति शुद्धे चित्ते स्वयमेव स्फुरति।तस्याः स्वप्रकाशत्वादनन्तत्वादतिरहस्यत्वादन्यथा केनापि वक्तुं गृहीतुं चाशक्यत्वादिति भावः । स्मृत्वा च वर्णय तदेव शुद्धयशस्त्वममोघदृक्त्वमन्यथा नैवेति । यद्वाऽमोघे दृशौ नेत्रे यस्य शुचिनी श्रवसी कर्णौ यस्येति काचिल्लीला नेत्राभ्यां दृष्टा काचित्कर्णाभ्यां श्रुता च । तथा सत्यरत इति धृतव्रत इति आसक्तिनिश्चयसूचिताभ्यां मनोबुद्धिभ्यामदृष्टाऽश्रुताप्यवकलितैव सा।संप्रति चित्तैकाग्र्येण स्मर्यतां स्मृत्वा च वर्ण्यतामिति स्वामिचरणोक्तमेतच्चेतिपदम् । तदर्थस्तु एतदुरुक्रमस्येत्यादि । अथो महाभाग इत्यतः पृथग्वाक्यमिति । तत्र व्रतानि शरणागतपालनादीनीति ज्ञेयम् । महाभागेति । महस्यात्युत्सवरूपस्याप्रासिद्धं भागोंशो महाभा गस्तदवतार इति यावत् । अत एवामोघदृगिति । तीर्थस्तु समाधिना दर्शनगुह्यसमाधिभेदेन त्रिधाभिन्नानां भाषाणां मध्ये यथास्थितवस्तुकथनलक्षणया समाधिभाषयाऽनुस्मर । श्रीभगवन्महिमप्रतिपादकश्रीभागवताख्यं ग्रन्थं कुरु । तेन न्यूनता नंक्ष्यतीत्याह ॥१३॥ विपक्षे भगवद्यशो विहाय काम्यकर्मादिवर्णने तद्बुद्धेरनवस्थानमुक्तं भगवतेत्यर्थः । व्यवसायात्मिकात्मतत्त्वनिश्चयात्मिका बुद्धिरेकैव चतुर्णामाश्रमाणां साध्या विवक्षिता । सांख्य विषया योगविषया च बुद्धिरेकफलत्वादेका व्यवसायात्मिका सर्वविपरीतबुद्धीनां बाधिका। निर्दोषवेदवाक्यसमुत्थत्वादितरास्त्वव्यवसायात्मिका बुद्धयो बाध्या इति भगवत्पादाः। परमेश्वराराधनेनैव संसारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयोगे भवतीत्यन्ये।कर्मकांडे पुनर्बहुशाखा अनंतभेदाः कामानामानन्त्यादनन्ताश्च।तत उरुक्रमचेष्टितादन्यथा यत्किंचनापि किं पुनर्बहु विवक्षतो वक्तुमिच्छतोपि किं पुनर्वदतोपि किं पुनस्तन्मुखाच्छ्रुत्वा तदनुतिष्ठतः सर्वत्र हेतुः पृथग्दृशः तच्चेष्टितात्पृथग्वस्तुन्येव दृग्दृष्टिस्तात्पर्यं यस्य तस्य अतस्तत्कृतै रूपैर्निरूपणीयैरर्थैर्नामभिस्तद्वाचकैः शब्दैश्चानवस्थिता मतिः कदाचिदपि काले क्वापि देशे वा तेन घूर्णयित्वा नानास्थानं नीत्वाऽऽहता व्याहता ततो निमज्जत एव यथा तथा तैर्ज्ञानकर्मकाव्यकौशलादिभिरपीति विश्वनाथः॥१४॥ प्रत्युत वाक्यालंकारे ।तव तु का वार्त्ता साक्षाद्वेदेनोक्तमपि न मनुत इत्याह—यद्वेति। तत्प्रवृत्तिमार्गानधिकृतविषयत्वमेव। भट्टैर्मीमांसकैः । यत्रान्धपंग्वादयस्संन्ति तत्रेत्यर्थः । विश्वनाथस्तु—ननु मया भगवद्यश एव ग्राहयितुं भारतादिशास्त्रं कृतं किं तु कामिलोकानां भगवद्भक्तिमनिच्छूनां शास्त्रे प्रवर्त्तनार्थमेव प्रथमं ग्राम्यसुखप्रक्षेपो दत्तः न तु मे तत्र तात्पर्यं "मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः । यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम्" इति विदुरोक्तिरेव प्रमाणमिति चेत्सत्यम् । उपकारे प्रवृत्तास्त्वत्त एव लोकानामपकार एवाभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विचक्षणोऽस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखम् ॥ प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्शय चेष्टितं विभोः ॥ १६ ॥

तस्य काम्यकर्मादेरन्येन तत्त्वज्ञेन क्रियमाणं निवारणं स्वयमेव वा त्वया क्रियमाणं यद्वा " न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः " इति श्रुत्या क्रियमाणं निवारणं यथार्थमेतदिति न मन्यते । किंतु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयति । तदुक्तं मतांतरोपन्यासे भट्टैः । " तत्रैवं शक्यते वक्तुं येऽन्धपंग्वादयो नराः । गृहस्थत्वं न शक्ष्यंति कर्तुं तेषामयं विधिः ॥ नैष्ठिकब्रह्मचर्यं वा परिव्राजकतापि वा । तैरवश्यं ग्रहीतव्या तेनादावेतदुच्यते॥ " इत्यादि ॥ १५ ॥ ननु यद्येवं प्रवृत्तिमार्गो निंद्यते तर्हि निवृत्तिमार्गे सर्वक्रियात्यागेनैव पारमेश्वरसुखस्वरूपानुभूतेः किं तद्यशःकथनेनापि तत्राह । विचक्षण इति । विचक्षणो निपुणः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्यास्य विभोः सुखं निर्विकल्पकसुखात्मकं स्वरूपं वेदितुं ज्ञातुमर्हति । न पुनरविचक्षणः प्रवृत्तिस्वभावः । विभुत्वे हेतुः अनंतः कालतो देशतश्च पारं न

दित्याह—जुगुप्सितमिति । धर्मकृते विदुरोक्तन्यायेन भगवद्धर्मग्रहणार्थमेव जुगुप्सितमनुशासतः काम्यधर्माद्युपदिशतस्त्वत्तः सकाशादेव स्वभावरक्तस्य विषयेषूत्पत्तित एव रागिणो लोकस्य महान्व्यतिक्रम उपप्लवो जातः । कुत इत्यत आह—यद्वाक्यतो वेदव्यासवाक्यतो धर्म इति । इतरः प्राकृतो जनः "देवान्पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्" इत्यादिविधावेव स्थितस्तस्य धर्मस्य निवारणं "सर्वधर्मान्परित्यज्य मामेव शरणं व्रज" इत्यादिवाक्येन क्रियमाणं न मन्यते किं तु प्रवृत्तिमार्गानधिकृतविषयमेतद्वाक्यमिति कल्पयति तदुक्तमित्यादि स्वामिवत् । अत्र संदर्भस्तु तदेवं हरियशो गौणीकृत्य भारतादिषु कृतं जुगुप्सितकाम्यकर्मादिवर्णनप्राचुर्य्यं लोकानां तदेकनिष्ठत्वाय जातमित्याह--जुगुप्सितमिति । स्वभावरक्तस्यानादिविषयवासनया स्वभावत एव कामनापरस्य पुरुषस्य धर्मकृते भगवद्धर्मपर्यंतस्य निष्कामस्य धर्मस्य कृते भगवद्धर्ममेव तत्र पर्यवसायितुमनु निरन्तरमेव निन्द्यं काम्यं कर्म शासत उपदिशतो न तु वेदे प्रवर्तनार्थं तत्प्ररोचनया यत्किंचिदनूद्य मुहुरपवदतः कस्यचिदन्यस्यापि महान्व्यतिक्रमो वेदतात्पर्यलंघनेनान्यायः स्यात्, भवतः स्यादिति तु कथं ब्रवाणीति भावः । ननु वेदेपि तादृक्काम्यकर्मकथनस्य निरंतरता दृश्यते तत्राह-यद्वाक्यत इति । यस्य तद्विधस्य वाक्यतो दुरूहवेदार्थनिर्णायकाद्वाक्याद्वचनमात्रात् । किमुत ब्रह्मलोकप्रसिद्धशतकोटिविस्तरपुराणेतिहासतः स्वेच्छया येन संगृहीतात्तत्तद्वाक्यादितरो जनस्तदेव कर्त्तव्यमिति परामृशन्स्थितो यंत्र निश्चलस्तस्य स्यात्तद्विधस्य निवारणमन्यथावक्तृतया चिन्तनं तव स्वल्पतमवाक्येनान्यस्य प्रचुरतमवाक्येनापि न मन्यते यस्मात्तव शिष्याणामपि जैमिन्यादीनां प्रतिपत्तिर्दृश्यते तस्मात्प्रवृत्तञ्च परित्यज्य "निवृत्ततर्षैरुपगीयमानात्" इत्यादिरीत्या सर्वेषां सर्वापच्छमकं काम्यञ्च यद्भगवद्यशस्तदेव वर्ण्यतामिति भावः । अतो "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥" इति श्रीगीतावाक्यं ज्ञानाद्युपदेष्टृविषयमेव न तु भगवद्धर्ममहिमत्वतादृशविषयम् । तदुक्तं श्रीमदजितेन "स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि । न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः" इति तादृशोपदेशे सर्वेषामेव परमविश्वासास्पदत्वादिति भावः ॥ १९ ॥ अत्राक्षिपति--नन्विति । इत्यर्थ इति । भवच्छब्दयोगे मध्यमपुरुषप्रयोग आर्षः । पाठान्तरे भवान्निति पाठे हे भवन्निति सर्वदा विद्यमानत्वेन त्वं साक्षादीशत्वात्समर्थोसीति भावः । विश्वनाथस्तु किञ्च तदपि धर्मान्तरं विनिंद्य भगवद्यशः एव वर्णयेत्याह--विचक्षण इति । इतरः प्राकृतो विवेकशून्यो जनः स्थित इत्युक्तं विचक्षणो विवेकी जनस्तु अस्य विभोः सुखं निवृत्तितस्तदितरग्राम्यसुखनिवृत्त्या वेदितुमर्हति । तत्र हेतुः । अनंतपारस्य । तेन साक्षादल्पप्रमाणाच्च विषयसुखान्निवृत्त्य अनन्तमपारप्रमाणं च विभोः सुखं विदित्वा तदर्थं भक्तिमेव कर्तुमर्हतीति भावः । ततश्च विचक्षणजनस्य भक्तौ प्रवृत्तिमालोक्य "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायेनाविचक्षणोपि तत्रैव प्रवर्त्तेतेत्यतस्तदर्थमपि भगवच्चरितं वर्णयेत्याह । गुणैः प्रवर्तमानस्यात एवानात्मनो बुद्धिविवेकशून्यस्य जनस्य बन्धमुक्तये चेष्टितं लीलां दर्शय । हे विभो तत्र समर्थः । यतोऽसावपि सर्वतो निवृत्य शुद्धां भक्तिं कृत्वा तदीयं सुखं लभतामिति भावः । यद्वा एवमवतारणीयम् । ननु यदि निवारणं जनो न मन्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्कोऽथ पतेत्ततो यदि ॥ यत्र क्क वाभद्रमभूदमुष्य किं को वाऽर्थ आप्तोऽभजतां स्वधर्मतः ॥ १७ ॥

यस्य तस्य विभोश्चेष्टितम् । ततः कारणात् हे विभोऽनात्मनो देहाद्यभिमानिनोऽत एव गुणैः सत्वादिभिः प्रवर्तमानस्य जनस्य दशय। भवानिति। त्वमित्यर्थः । पाठांतरे हे भव न्निति संबोधनम् ॥ १६ ॥ एवं तावत्काम्यधर्मादेरनर्थहेतुत्वात्तं ।विहाय हरेर्लीलैव वर्णनीयेत्युक्तमिदानीं तु नित्यनैमित्तिकस्वधर्मनिष्ठामप्यनादृत्य केवलं हरिभक्तिरेवोपदेष्टव्ये त्याशयेनाह । त्यक्त्वेति । ननु स्वधर्मत्यागेन भजन् भक्तिपरिपाकेन यदि कृतार्थो भवेत्तदा न काचिच्चिंता यदि पुनरपक्क एव म्रियेत ततो भ्रश्येद्वा तदा स्वधर्मत्यागनिमि त्तोऽनर्थः स्यादित्याशंक्याह।ततो भजनात्कथंचित्पतेद्भ्रश्येन्म्रियेत वा यदि तदापि भक्तिरसिकस्य कर्मानधिकारान्नानर्थशंका। अंगीकृत्याप्याह । वा शब्दः कटाक्षे।यत्र क्क वा नीचयोनावप्यमुष्य भक्तिरसिकस्याभद्रमभूत्किं नाभूदेवेत्यर्थः।भक्तिवासनासद्भावादितिभावः।अभजाद्भिस्तु केवलं स्वधर्मतःको वा अर्थ आप्तः।अभजतामिति षष्ठी तु संबंधमात्र

तर्ह्यधुना त्वदुपदेशेनाप्यारब्धेन तत्तत्सर्वमतनिवर्त्तकभक्तिमात्रप्रवर्त्तकेन शास्त्रेणालम्।मैवम् ।न ह्यस्मिज्जगति सर्व एवाविवेकिनो विवेकिनोऽपि सन्तीत्याह-विचक्षण इति। विभोः कथंभूतस्यानन्तपारस्य।तत्र कालतोन्ताभावमाह । प्रकर्षेणाधुनापि वर्त्तमानस्य । तेन तस्य तच्चेष्टितस्य भूतपूर्वमात्रत्वं न ज्ञेयमिति भावः । प्रमाणतोन्ताभावमाह । गुणैः सत्त्वादिभिर्न भवत्यात्मा देहो यस्य चिदानन्दमयविग्रहस्येत्यर्थः । न हि घनचिद्वस्तु केनापि प्रमातुं शक्यत इति भावः । संदर्भस्तु पूर्वमभिप्रेतं यशोवर्णनमेवोपदिशति । विचक्षणो भवानित्यन्वयः । हे विभो यतो विचक्षणो भवान् सर्वतो निवृत्तिपूर्वकमस्य विभोः श्रीभगवतः संबंधि सुखं भक्तिरूपं वेदितुमर्हति योग्यो भवति ततो हेतोरनात्मनः पारमार्थिकबुद्धिहीनस्यात एव गुणैर्विषयैस्तत्सुखेन प्रवर्त्तमानस्यापि जनस्य कृते तस्य चेष्टितं लीलामेव त्वं वर्णय "निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात्" इति तस्याप्यनायासेन सुखप्राप्त्युपपत्तेः । ततो निवृत्तानां तु सुतरामेव तदुद्भूतं भवतीति भावः । ततश्च विचक्षणो यो भवति स एव सर्वविषयनिवृत्त्या भजनान्तरेण यदस्य भक्तिरूपं सुखं तद्वेदितुमर्हति। अतो यद्यपि "स संहितां भागवतीं कृत्वानुक्रम्य चात्मजम् । शुकमध्यापयामास निवृत्तिनिरतं मुनिम्" इति । तथा"हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः । मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ" इति तस्यैव मुख्याधिकारित्वमुक्तम् ।तथापि "निवृत्ततर्षैः" इत्यादिन्यायेन गुणैः प्रवर्त्तमानस्यापि हितार्थं तस्य चेष्टितमेव वर्णयेत्यादि पूर्ववत् ॥ १६ ॥ अत्राक्षिपति-नन्विति । इत्यर्थ इति । तस्यांतस्यां स लभते पौर्वदैहिकम् इत्याशयः । अत्र विश्वनाथः । ननु "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्" इति श्रीगीतोपनिष द्वाक्येन कर्मत्याजनं निषिद्धम् । सत्यम्।तज्ज्ञानोपदेष्टृविषयमेव ज्ञानस्यान्तःकरणशुद्ध्यधीनत्वात्तच्छुद्धेस्तु निष्कामकर्माधीनत्वात् । भक्तेस्तु स्वतः प्राबल्यादन्तःकरणशुद्धिपर्यन्तानपेक्षकत्वान्न भक्त्युपदेष्टृविषयम् । तदुक्तं श्रीमदजितेन "स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ।न राति रागिणोऽपथ्यं वांछतोऽपि भिषक्तमः" इति ।तस्मात् "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति "धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः" इत्यादिभगवद्वाक्यबलान्नित्यनैमित्तिकस्वधर्मनिष्ठाया अपि त्याजनयैव केवलैव हरिभक्तिरुपदेष्टव्येत्याशयेनाह-त्यक्त्वेति । क्त्वाप्रत्ययेन भजनारम्भदशायामपि कर्मानुवृत्तिर्निषिद्धा । "स्वधर्मं त्यक्त्वा यो भजन्स्यादमुष्याभद्रं तावन्न भवेदेव देवर्षिभूताप्तनृणां पितॄणाम्"इत्यादेः । यदि पुनरपक्को भगवत्प्राप्त्ययोग्यो म्रियेत जविन्नेव कथंचिदन्यासक्तस्ततो भजनाद्दुराचारतया वा पतेत्तदपि कर्मत्यागनिमित्तमभद्रं संभवेदेव । भक्तिवासनाया अनुच्छित्तिधर्मत्वात्सूक्ष्मरूपेण तदापि सत्त्वात्, कर्मानधिकारादित्याह-यत्र क्क वा जन्मनि किमभद्रमभून्नाभूदेव । वाशब्दस्य कटाक्षार्थकत्वात् "तुष्यतु दुर्जनः" इति न्यायेनैव पाताद्युपगमः न तु वस्तुतः पातस्तद्धेतुकं नीचयोनित्वं च । "न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि" इति श्रीभगवद्वाक्यादमोघभक्त्यंकुरस्यावश्यभाव्यपत्रपुष्पफलादित्वादिति भावः । तत्र भवेदित्यनुक्त्वा भूतनिर्देशस्तु वादिनं प्रत्याक्षेपं सूचयति । संदर्भस्तु यदि भगवत्प्राप्त्ययोग्यः स्यादायुःक्षयेण चित्रकेतुवदपराधेन वा देहान्तरं प्राप्नुयात् । भरतवत्तस्मिन्नेव देहेपि बाल्याद्याविष्टः स्यात्तदा तस्य भक्त्यभावसम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ॥ तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥ १८ ॥ न वै जनो जातु
कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिम् ॥ स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ॥ १९ ॥

विवक्षया॥१७॥ ननु स्वधर्ममात्रादपि "कर्मणा पितृलोकः" इति श्रुतेः पितृलोकप्राप्तिः फलमस्त्येव तत्राह।तस्यैवेति।तस्यैव हेतोस्तदर्थं यत्नं कुर्यात्।यदुपरि ब्रह्मपर्यंतमधः
स्थावरपर्यंतं च भ्रमद्भिर्जीवैर्न लभ्यते । षष्ठी तु पूर्ववत् । तत्तु विषयसुखमन्यत एव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्यते दुःखवत् यथा दुःखं प्रयत्नं विनापि लभ्यते
तद्वत्।तदुक्तम् "अप्रार्थितानि दुःखानि यथैवायांति देहिनाम् । सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यते" इति॥१८॥ यदुक्तं यत्र क्व वाभद्रमभूदिति तदुपपादयति ।
न वा इति । मुकुंदसेवी जनो जातु कदाचित्कथंचन कुयोनिगतोऽपि संसृतिं नाव्रजेन्नाविशेत् । अंग अहो अन्यवत्केवलकर्मनिष्ठवदिति वैधर्म्ये दृष्टांतः । कुत इत्यत आह ।
मुकुंदांघ्रेरुपगूहनमालिंगनं पुनः स्मरन्विहातुं नेच्छेत् । यतोऽयं जनो रसग्रहः रसेन रसनीयेन गृह्यते वशीक्रियते यद्वा रसे रसनीये ग्रह आग्रहो यस्य । तदुक्तं भगवता ।

येपि यः स्वधर्मत्यागस्तेनापि नाभद्रं भवेद्भक्तिवासनाया अनुच्छित्तिधर्मत्वात् । ततश्च यत्र क्वाप्यवस्थायां तस्याभद्रं न स्यादेव । अभक्तानां तु कोवाऽर्थः सततमव्यभिचारी स्यादपि तु सर्वोपि व्यभिचार्येव स्यादिति भावः
॥ १७ ॥ अत्राक्षिपति-नन्विति । "अपाम सोमममृता अभूम" इत्यादयोऽदृष्टस्वर्गादिसुखे तथा कृषिवाणिज्यादयो दृष्टसुखे च जनान्प्रवर्त्तयंते तत्तत्सुखमनपेक्ष्य स्वधर्मं त्यक्त्वा कथं भक्तौ जनाः प्रवर्त्तंतामिति चेत् ।
सत्यम् । कोविदस्तु नैवं तैः प्रतारितः स्यात्कर्मणा यो योर्थ आभासते स पुनरर्थाभास एव नार्थ इति विमृश्येत्याह-तस्यैवेति । यत्स्वरूपसाक्षात्कारपूर्वकं परमानन्दसुखं भगवद्विग्रहध्यानादिभक्तिसुखं वा तस्यैवेत्यर्थः। पूर्ववत्
अभजतामित्यत्र यथा तृतीयार्थे षष्ठी तथात्रापीत्यर्थः । नरकादौ इहादिनाशूकरादिग्रहः । तत्प्रयत्नं विना दुःखादिप्रापणमुक्तं भारतादावित्यर्थः । अत्र यत्नकरणे दैन्यमात्राधिक्यमिति भावः । अत एव ग्रन्थान्तरेप्युक्तम् ।
"आयू रक्षति मर्माणि त्वायुरन्नं प्रयच्छति । अर्जुनस्य प्रतिज्ञे द्वे न दैन्यं न पलायनम्" इति। तस्मादैहिकार्थं सुतरां कर्म न कर्त्तव्यमिति भावः । कालोत्र प्राचीनकर्मभोगावसरः॥१८॥संसृतिं कर्मफलभोगमयीं नाव्रजेत् ।
तस्य भगवदुत्थशुभाशुभफलभोगवत्त्वात्तदुत्थशुभाशुभयोः कर्मजन्यत्वाभावादिति भावः । "त्वदवगमी न वेति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयात्" इति श्रुत्युक्तेः । "न कर्मबन्धनं जन्म वैष्णवानां च विद्यते" इति
पाद्मोक्तेश्च । ततश्च पूर्वाभ्यासादेव मुकुन्दस्यांघ्र्योरुपगूहनं मनसा परिष्वंगं स्मरन्पुनरत्यक्तुं नेच्छेत्। "अत्रांघ्री स्मरन्" इत्यनुक्त्वा "तदुपगूहनम्" इति पुनरिति पादाभ्यामेकद्वित्रिवारं स्वेच्छयैव दुरभिनिवेशवशाद्भजनं त्यक्त्वापि
कियतः समयादनन्तरं स्वपूर्वापरदशयोस्तत्स्मरणसुखमस्मरणदुःखं च स्मृत्वा कृतानुतापो हन्तहन्त दुर्बुद्धिरहं किमकरवम्।भवतु नामातः परं तु न प्रभोर्भजनं हास्यामीति पुनरपि भजनमारभत एवेत्यर्थः । अत्र विजह्यादि
त्यनुक्त्वा विहातुं नेच्छेदित्यनेन तस्य गर्वराहित्यं सूचितम् । भजनं न हास्यामीतीच्छामात्रं मया क्रियते । तन्निर्वाहस्त्वीश्वरस्यैव पाणाविति तदाशयः।तत्र हेतुः । रसे ग्रहः आग्रहो यस्य रस एव ग्रह इव यं न हास्यतीति वा।
अयमर्थः--भजनमेव निष्ठारुच्यशक्त्यंते रतिदशायां साक्षादेव रसो भवेदतो भजनस्य प्रथमारम्भदिनेऽपि प्रच्छन्नतया रसांशत्वमस्त्येव तदुक्तं "भक्तिः परेशानुभवे विरक्तिः" इत्यत्र "तुष्टिः पुष्टिः क्षुदपायोनुघासम्" इति। स
च स्वादविशेषो भक्तेन दुस्त्यजस्तेन च भक्त इति।ततश्च भजनस्याविच्छेद उत्पद्यमाने भजनीयस्य मुकुन्दस्याचिरादेव प्राप्तिरित्यत्र कः संदेह इति भावः । संदर्भस्तु तर्हि किं संसारध्वंस एव पुरुषार्थ इत्याशंक्य तत्राप्यस्ति
वैशिष्ट्यमित्याह-स्मरन्निति । यस्तु तद्भक्तिरसग्रहः स पुनारित्यन्वयः । वक्ष्यते च "त्रिभुवनविभवहेतवेप्यकुण्ठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् । न चलति भगवत्पदारविन्दाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः" इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः ॥ तद्धि स्वयं वेद भवांस्तथाऽपि वै प्रादेशमात्रं भवतः प्रदर्शितम् ॥ २० ॥
त्वमात्मनात्मानमवेह्यमोघदृक्परस्य पुंसः परमात्मनः कलाम् ॥ अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोऽधिगण्यताम् ॥ २१ ॥
इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धदत्तयोः ॥ अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम् ॥ २२ ॥

'यतते च ततो भूयः संसिद्धौ कुरुनंदन । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः'' इति ॥ १९ ॥ तदेवं भगवल्लीलां प्राधान्येन वर्णयेत्युक्तं तत्र को भगवान् काश्च तस्य लीला इत्यपेक्षायामाह । इदं विश्वं भगवानेव । स त्वस्माद्विश्वस्मादितरः । ईश्वरात्प्रपंचो न पृथगीश्वरस्तु प्रपंचात्पृथगित्यर्थः । तत्र हेतुः । यतो भगवतो हेतोर्जगतः स्थित्यादयो भवंति । अनेनैव लीला अपि दर्शिताः । यद्वा । इदं विश्वं भगवान् । इतर इव यः स जीवोऽपि भगवान् । चेतनाचेतनः प्रपंचस्तद्व्यतिरेकेण नास्ति स एवै कस्तत्त्वमित्यर्थः हिशब्देन "सर्वं खल्विदं ब्रह्म" इत्यादि प्रमाणं सूचितम् । तद्धि स्वयमेव भवान्वेद । प्रादेशमात्रमेकदेशमात्रमाचार्यवान्पुरुषो वेदेत्यादिश्रुत्यर्थसंपादनाय प्रदर्शितम् ॥ २० ॥ न च तवाचार्यापेक्षा ईश्वरावतारत्वादित्याह । त्वमिति । हे अमोघदृक् त्वमात्मना स्वयमात्मानमजमेव संतं जगतः शिवाय प्रजातमवेहि । कुतः । परस्य पुंसः कलामंशभूतम् । तत्तस्मान्महानुभावस्य हरेरभ्युदयः पराक्रमः अधि अधिकं गण्यतां निरूप्यताम् ॥ २१ ॥ अनेनैव तपआदि सर्वं तव सफलं स्यादित्याह ।

''न पारमेष्ठ्यं न महेन्द्रधिष्ण्यम्'' इत्यादि ॥१९॥ तत्र भगवल्लीलयोर्मध्ये । इत्यर्थ इति । कारणाद्धि कार्यं न पृथगस्ति मृदो घटवत्कारणं हि कार्यात्पृथगस्त्येव घटान्मृदिवेति भावः । तदेवाह-तत्रेति । तत्र: प्रपञ्चात्पृथक्त्वे अनेनैव विश्वस्थानादिकथनेन श्रीनारदेन श्रीव्यासदेवाय सर्गादिदशलक्षणवच्छ्रीमद्भागवतं सूत्ररूपेण सूचितं स्थानपदेन स्थानं तु प्रत्यक्षत एव दृश्यते । पोषणमन्वंतरवंशवंश्यानुचरितोक्तीनामपि स्थित्यन्तर्गतत्वमेव विमर्शत आयाति । संभवपदेन सर्गविसर्गावुक्तौ । निरोधपदेन मुक्तिराश्रयश्चोक्ताविति । आत्यंतिकलयेऽवधित्वेन हरिरेवाश्रय आत्यन्तिकलय एव हि मोक्षः।यद्वेदं हि विश्वमिति पूर्वार्द्धेन जीवन्मुक्तिरप्युक्ता। तस्याः सर्वत्रात्मदृष्टिभावनारूप त्वादित्यर्थः । पूर्वव्याख्याने विश्वपदेन केषांचिन्मते जडप्रपञ्च एव गृह्यते जीवस्य चेतनत्वात् । तेन तद्ग्रहणं न स्यादित्यस्वारस्यादाह-यद्वेति । श्रुतिर्व्याख्यातप्रायैवेति । अत्र विश्वनाथः । एवं भक्तिमुपदिश्य भजनीयेश्वरस्यै तावदेव ज्ञानं भक्तेः प्रथममपेक्षितव्यमिति तदुपदिशति-इदं दृश्यमानं विश्वं भगवानिव सदिव चेतनमिवानंदरूपमिव । न तु साक्षात्सच्चिदानंदरूपो भगवानेवेत्यर्थः । भगवतः सत्त्वादीनां सार्वकालिकत्वाद्विश्वस्य सत्त्वादीनां काचित्कत्त्वादिति भावः।यतोऽसौ भगवानितरः विश्वस्मादस्मादन्यः कथं विश्वं भगवानिव कथं भगवान्विश्वस्मादितरस्तत्राह-यत इति।यस्मान्मायाशक्तिमतो भगवतः सकाशाज्जगतःस्थाननिरोधसंभवा इति विश्वस्य कार्यरूपत्वा त्केनचिदंशेनैव तद्रूपत्वं निरूप्यते।भगवतस्तत्कारणत्वात्तदितरत्वमित्यतः''सर्वं खल्विदं ब्रह्म''इत्यादिश्रुतिभिरपि ब्रह्मकार्यत्वादेव ब्रह्मत्वातिदेशो ज्ञाप्यते।तत्सर्वं भगवदवतारत्वात्त्वं वेद एव तथापि''आचार्यवान्पुरुषो वेद''इति न्यायेन प्रादेशमात्रं दिङ्मात्रं कोटिपरार्द्धादप्यधिकप्रमाणस्य भगवतस्तद्भक्तेश्च तदैश्वर्यज्ञानस्य च प्रादेशमात्रं दशांगुलमात्रे प्रदर्शितम् । ''प्रादेशतालगोकर्णस्तर्जन्यादियुते ततः'' इत्यमरः॥२०॥स्वयं वेदेति यदुक्तं तदुपपादय ति त्वमिति।अमोघा लोककल्याणकरा दृग्दृष्टिर्ज्ञानमिति यावत्।यस्य हि एतादृक्''सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक्''इत्युक्तेः।अत्र विश्वनाथः।तदेवं धर्मान्परित्यज्य भक्त्यैव कृतार्थीभवतीत्युक्तम् ॥२१॥ इदानीं कस्यचिद्व त्तस्य केषुचित्कर्मसु यदि स्पृहा स्यात्तदा ते धर्मा अपि भक्त्यैव भवन्तीत्याह-अविच्युतोऽव्यभिचारी अर्थो हेतुः।''अर्थो विषयार्थनयोर्धनकारणवस्तुनि।अभिधेये च शब्दानां निवृत्तौ च प्रयोजने'' इति मेदिनी। ''यत्कर्मभि र्यत्तपसा'' इत्यादिभगवदुक्तेस्तपआदिफलानामपि सिद्धिर्भवेत्किं पुनस्तेषाम्।''स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः'' इत्यादिवाक्यतः सर्वेषामपि धर्माणां किं पुनस्तपआदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनाम् ॥ निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षताम् ॥ २३ ॥
ते मय्यपेताखिलचापलेऽर्भके दांतेऽधृतक्रीडनकेऽनुवर्तिनि ॥ चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥ २४ ॥
उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥

इदं हीति । श्रुतादयो भावे निष्ठा । इदमेव हि तपःश्रवणादेरविच्युतो नित्योऽर्थः फलम् । किं तत् उत्तमश्लोकस्य गुणानुवर्णनमिति यत् ॥ २२ ॥ सत्संगतो हरिकथाश्रवणादिफलं स्ववृत्तांतेन प्रपंचयति । अहमिति । अहं पुरा पूर्वकल्पेऽतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशादभवं जातोऽस्मि । निरूपितो नियुक्तः । क्व । योगिनां शुश्रूषणे । प्रावृषि वर्षोपलक्षिते चातुर्मास्ये निर्विविक्षतां निर्वेशमेकत्र वासं कर्तुमिच्छताम् ॥ २३ ॥ अपेतानि गतान्यखिलानि चापलानि यस्मात्तस्मिन् । दांते नियतेंद्रिये । अधृतक्रीडनके त्यक्तक्रीडासाधने । अनुवर्तिन्यनुकूले ॥ २४ ॥ उच्छिष्टस्य लेपान्पात्रलग्नांस्तैर्द्विजैरनुज्ञातः सन् भुंजे स्म । तेन भोज

मात्राणामिति । यद्वा तपस इति तपःश्रुतादिविधायकश्रुतिवाक्यानां भगवद्भक्तिविधान एव तात्पर्याद्धरिकीर्त्तनमेवाविच्युतोऽर्थोऽभिधेयः "धर्मो यस्यां मदात्मकः" इति भगवदुक्तेः । सर्वशास्त्रवाक्यानां श्रीभगवत्येव तात्पर्यमिति मधुसूदनसरस्वतीव्याख्यानाच्च । तपः कायक्लेशलक्षणं व्रतादि श्रुतं शास्त्रश्रवणं स्विष्टमुत्तमकल्पतया यजनं सूक्तमध्ययनं बुद्धिर्ज्ञानं दत्तं दानम् । बुद्धमिति पाठः प्रशस्तः । निष्ठेति क्तप्रत्ययसंज्ञा पाणिनीयनये ॥ २२ ॥ यादृच्छिकी भगवद्भक्तकृपैव शुद्धाया उक्तलक्षणाया भक्तेर्हेतुर्नान्यत्तपआदिकमिति वक्तुं स्वपूर्ववृत्तांतमाह-अहमिति । योगिनां "तत्रान्वहं कृष्णकथाः प्रगायताम्" इत्यग्रे वक्ष्यमाणत्वाद्भक्तियोगवता निरूपितो नियुक्तोऽस्मि ॥ २३ ॥ त्यक्तक्रीडासाधने बाल्योचितं क्रीडनमप्यकुर्वति यद्यपि ते तुल्यदर्शनाः सुशीलेषु दुःशीलेषु च सत्कुर्वत्सु तिरस्कुर्वत्सु च सदाचारेषु दुराचारेषु च जगज्जनेषु यद्यपि समदृष्टयः को वा तेषामनुग्राह्यः को वा निग्राह्यस्तदपि मयि कृपां चक्रुः । सर्वत्र साम्येपि महत्सु भरतप्रल्हादादिषु कृपाया वैषम्यदर्शनादिति भावः । अत्र मत्सौशील्यानुवृत्त्यादिकमनपेक्ष्यैव प्रथमं कृपां चक्रुः । ततश्च तत्कृपाजन्यसौशील्यानुवृत्त्यादिकं पुनरपि तेषां कृपातिशयस्यैव कारणमभूदिति तेषां निरुपाधिकरुणत्वमप्यवश्यमेव व्याख्येयम् । ते यद्यपि तुल्यदर्शनास्तदपि अचापल्यादिगुणविशिष्टे मयि कृपां चक्रुरिति व्याख्याने गुणदोषदर्शनप्रसक्त्या तेषां तुल्यदर्शनत्वं व्याहन्येत । प्रथमकृपायाश्च निरुपाधित्वं न स्यादिति न तथा व्याख्येयम् । कृपा हि द्विविधा गुणमयी निर्गुणा च । तत्राद्या सर्वेषां सांसारिकाणामपि सर्वत्र गुणोपाधिका यथासंभवं भवेत् । गुणापाये तदपायश्च दोषद्वेषादयश्च । द्वितीया तु निस्तीर्णसंसाराणां तादृशानां परमभक्तिमतां निरुपाधिकैव सर्वत्र साम्येन मायिकं कमपि गुणमनपेक्ष्य "गिरयो मुमुचुर्यं क्वचिन्न मुमुचुः शिवम् । यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा" इति शुकोक्तन्यायेन कदाचित्कमपि जनं विषयीकरोति । सा ह्यन्तःकरणस्य गुणकृतायाः कठोरताया भगवद्भक्त्यैव ध्वंसे सति तयैव द्रवीभावमापादिते तत्रैवान्तःकरणे आविर्भवेत् । तदुक्तं "रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते" इति । एवं "सतां कृपा महत्सेवा श्रद्धा गुरुपदाश्रयः" इति भूमिकाचतुष्टयं सूचितम् ॥ २४ ॥ ननु "न शूद्राय मतिं दद्यान्नैवोच्छिष्टं कदाचन" इति मनूक्तिस्तु गृहस्थशूद्रपरैव तदुक्तं व्याघ्रमुनिना "उच्छिष्टमन्नं दातव्यं शूद्रायागृहमेधिने । गृहस्थाय तु दातव्यमनुच्छिष्टं दिनेदिने" इति । अतो मम तदा गृहस्थाभावादुच्छिष्टभुजो न दोषः । किं च "शूद्रस्तु ब्राह्मणोच्छिष्टभोजनान्नाशुचिर्भवेत्" इति पुराणान्तरात् । ब्राह्मणेन तु कदाचिदपि कस्यचिदप्युच्छिष्टं नादनीयं तदुक्तं "ब्राह्मणो यश्च लोभेन स्वादेनाद्याच्च कस्यचित् । उच्छिष्टं तस्य सततं नरकाः क्रमशो नृप" इत्युक्तेः । स्वयमपि ब्राह्मणायोच्छिष्टं न दद्यात् । "आत्मोच्छिष्टं तु मिष्टान्नं पयो दधि घृतं मधु । ब्राह्मणाय न दातव्यं दत्त्वा निरयमाप्नुयात्" इति स्मृतेः । यच्च "गुरुमूर्तेः सदा ध्यानं गुरोरुच्छिष्टस्य भोजनम्" इत्युक्तं तद्भक्षितावशिष्टं भोजनपात्रस्थमन्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ॥ ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यंऽग ममाभवद्रुचिः ॥ २६ ॥ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥२७॥ इत्थं शरत्प्रावृषिकावृतूहरे र्विशृण्वतो मेऽनुसवं यशोऽमलम्॥संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ताऽऽत्मरजस्तमोपहा ॥२८॥ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः॥ श्रद्दधानस्य बालस्य दांतस्यानुचरस्य च ॥ २९ ॥ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम् ॥ अन्ववोचन्गमिष्यंतः कृपया दीनवत्सलाः ॥३०॥

नेनापास्तकिल्बिषो जातोऽस्मि । तेषां धर्मे परमेश्वरभजने एवात्मनो मनसो रुचिः प्रजायते स्मेत्यनुषंगः ॥ २५ ॥ अशृणवं श्रुतवानस्मि । मे श्रद्धया ममैव स्वतःसिद्धया न त्वन्येन बलाज्जनितया । अतो ममेत्यस्यापौनरुक्त्यम् । अनुपदं प्रतिपदम् । प्रियं श्रवो यशो यस्य तस्मिन् ॥ २६ ॥ प्रियं श्रवो यस्य तस्मिन्भगवति लब्धरुचेर्ममास्खलिताऽप्रतिहता मतिरभवदित्यनुषंगः । यया मत्या परे प्रपंचातीते ब्रह्मरूपे मयि सदसत्स्थूलं सूक्ष्मं चैतच्छरीरं स्वमायया स्वाविद्यया कल्पितं नतु वस्तुतोऽस्तीति तत्क्षणमेव पश्यामि ॥ २७ ॥ एवं शुद्धे त्वंपदार्थे ज्ञाते देहादिकृतविक्षेपनिवृत्तस्तत्कारणभूतरजस्तमोनिवर्तिका दृढा भक्तिर्जातेत्याह । इत्थमिति । हरेर्यशः । अनुसवं त्रिकालम्॥ ॥ २८ ॥ यस्येति तस्य ज्ञानशुद्धत्वंपदार्थस्य दृढभक्तिमतो मे प्रश्रितस्य विनीतस्य ॥२९॥ गुह्यतममिति । साधनभूतधर्मतत्त्वज्ञानं गुह्यं तत्साध्यं विविक्तात्मज्ञानं गुह्यतरं

न वक्ति, किन्तु पाकभांडस्थमेव गुरुभोजनतोवशिष्टमिति अन्यथा ''उच्छिष्टभोजिनश्श्वानः'' इत्युक्तिर्विरुध्येत । यद्वा निषेधो हि विहितेतरपरो बोध्यः । विहितास्तु निर्णयसुधाकरे उक्ताः । ''पितुर्ज्येष्ठस्य भ्रातुर्हि भोज्यमुच्छिष्टमेव हि । गुरुवद् गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोजनात् ॥'' इत्यादिना । यद्वा प्राणाहुत्यनन्तरं भोजनस्य समाप्तत्वादतिप्रेमवते शिष्याय किंचिदन्नं देयमित्यभिप्रायिका चेयमुक्तिरिति ''प्राणस्याहुतिपर्यन्तं भोजनं परिकीर्त्तितम् । पश्चाज्जठरपूर्त्यर्थमन्नं प्राशायते जनैः'' इति । ''गुरोरुच्छिष्टं वा भुञ्जीत'' इति श्रुतिर्हि सामयिकं तदशनं वदति न सार्वकालिकमित्यलम् । यद्वा उच्छिष्टस्य लेपो मार्जनं पात्रपक्षे भस्मना भूमिपक्षे गोमयादिना बहुत्वं द्विजापेक्षया उच्छिष्टमार्जनं प्रति द्विजैरनुमोदित आज्ञप्तः तैः सह सकृदेकवारं भुञ्जे स्म । यथा ते प्रत्यहं सकृदेव भुञ्जते तथाहमपीत्यर्थः । द्विजा अत्र सनकादयो ज्ञेयाः । तदुक्तं ब्रह्मवैवर्त्ते ''एकस्मिन्नन्तरे विप्रा आययुर्विप्रमन्दिरे । शिशवः पंचवर्षीया महतां च महीयसः ॥ फलमूलादिकं काले चत्वारो मुनिपुंगवाः । विप्रदत्तं बुभुजिरे तच्छेषं बुभुजे शिशुः ॥'' इति । अत्रापि शेषभुजिरेवोक्ता न तूच्छिष्टभुजिरिति । तेनार्षिभोजनावशिष्टभोजनेन तदुच्छिष्टपात्रादिमार्जनेन वा निरस्तपाप्माहं जातोस्मि । एवं भजनेषु स्पृहा भक्तिरनर्थापगमस्तथा निष्ठा रुचिरिति पंच भूमिकाः अनेन श्लोकार्धेन सूचिताः । ''लेपो लेपनवृद्धयोश्च शोधनाशनयोरपि'' इति कोशात् ॥ २५ ॥ तत्र तदा विप्राश्रमे वा कृष्णकथा नन्दनन्दनस्य जन्मादिलीला अन्वहं प्रत्यहं । श्रद्धयेति । श्रद्धापदेनासक्तिर्दशमी भूमिका सूचिता । प्रतिपदं प्रतिक्षणं प्रतिसुप्तिङन्तं वा । प्रियश्रवसि कृष्णे । कृष्णे रतिमित्येकादशी ॥ २६ ॥ लब्धरुचेर्लब्धास्वादविशेषस्य स्खलनशून्या मतिरभूत् । अत्र विश्वनाथः । स्वमायया हेतुना मयि वर्त्तमानं यदेतत्स्थूलं सूक्ष्मं च शरीरं तत् यया मत्या परे ब्रह्मणि श्रीकृष्णे विषये एव कल्पितं पश्ये पश्यामि कल्पितं कृतीकृतं स्थापितमिति यावत् । तथाहि । स्थूलं शरीरं भगवज्जलकलशवहनदण्डवत्प्रणत्यादौ न तु स्वीये व्यावहारिके क्वापि कृत्ये सूक्ष्मं श्रवणनयनमनोबुद्ध्यादिकं तदीयगुणरूपमाधुर्यास्वादादावेव कल्पितं न तु वैषयिके क्वापि स्वभोग्ये वस्तुनीति पश्ये इति यत्पूर्वं बह्वायासेनापि भगवति कृतं नासीत् तदेव मनोनयनादिकं रतौ जातायां स्वस्वं बहुकालाभ्यस्तमपि विषयं त्यक्त्वा तत्रैव क्लृप्तमिति साक्षादनुभवामीत्यर्थः॥२७॥ऋतू ऋतुद्वयं व्याप्य''कालाध्वनोरत्यंतसंयोगे'' द्वितीया॥ भक्तिः प्रेमा॥ आत्मनां जीवमात्राणामपि रजस्तमसी अपहंतीति सा तदा तां भगवद्भक्तिं पृष्टवतामन्येषामपि रजस्तमसोर्नाशोऽभूदित्यर्थः॥ भूमिकेयं द्वादशी॥ ततो दर्शनसाक्षान्माधुर्यानुभवावुत्तराध्याये वक्ष्येते॥२८॥ ननु सद्गुरूपदेशमंतरेण केवलयशःश्रवणेनैव कथं ज्ञानोदय इति चेत्तत्राह-तस्येति युग्मेन । एवंभूतस्य मे ममोत्पन्नप्रेमभक्तेः साक्षाद्भगवता देवकीनन्दनेनोदितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येनैवाहं भगवतो वासुदेवस्य वेधसः ॥ मायानुभावमविदं येन गच्छंति तत्पदम् ॥ ३१ ॥ एतत्संसूचितं ब्रह्मन् तापत्रयचिकित्सितम् ॥
यदीश्वरे भगवति कर्म ब्रह्मणि भावितम् ॥ ३२ ॥ आमयो यश्च भूतानां जायते येन सुव्रत ॥ तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥ ३३ ॥
एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ॥ त एवात्मविनाशाय कल्पंते कल्पिताः परे ॥ ३४ ॥

तत्राप्येश्वरज्ञानं गुह्यतमम् । भगवतोदितं भागवतं शास्त्रमन्ववोचन्ननुपदिष्टवंतः ॥ ३० ॥ तदेव ज्ञानं पूर्वोक्तत्वंपदार्थज्ञानाद्विवेकेन दर्शयति । येनैवेति । अविदं ज्ञातवानहम् ॥ ३१ ॥ तत्साधनधर्मरहस्यं च सूचितमित्याह । एतदिति । तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्तकं तत्त्वशोधकमिति यावत् । किं तत् । भगवति । भावितं समर्पितं यत्कर्म तत् । कथंभूते भगवति ईश्वरे सर्वनियंतरि । एवमपि च ब्रह्मण्यप्रच्युतवर्णरूपे ॥ ३२ ॥ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वम् । सामग्रीभेदेन घटत इति सदृष्टांतमाह द्वाभ्याम् । य आमयो रोगो येन घृतादिना जायते तदेव केवलमामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्तयतीत्यर्थः । किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत्पुनात्येव यथा ॥ ३३ ॥ तथात्मविनाशाय कर्मनिवृत्तये कल्पंते समर्था भवंति । परे ईश्वरे कल्पिता अर्पिताः संतः । अत्र च प्रथमं महत्सेवा ततश्च तत्कृपा ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिस्तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिस्ततो भगवत्तत्त्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणाविर्भाव इति

ज्ञायतेऽनेनेति ज्ञानं ज्ञानशास्त्रम्।तच्च केवलज्ञानप्रधानात् भक्तिमिश्रज्ञानप्रधानं शास्त्रगुह्यं ततोपि ज्ञानमिश्रभक्तिप्रधानं गुह्यतरं ततोपि केवलभक्तिप्रधानं गुह्यतमं यदुद्धवं ब्रह्माणं च प्रति श्रीभागवतमर्जुनं प्रति श्रीगीताभिधं च गमिष्यंतः श्वो वयं यास्याम इति विभाव्यान्ववोचन्।संदर्भस्तु ज्ञानं ज्ञानविज्ञानादिसारं चतुःश्लोकीरूपं तदर्थरूपं न तु साक्षाच्छ्लोकात्मकं तत्रानधिकारादित्यर्थः।तस्य रहस्याख्यभक्त्येकतात्पर्यादिति भावः।साक्षाद्भगवतोदितमिति "पुरा मया प्रोक्तमजाय इनाम्य"इत्यादिकं स्मारयति।गुह्यतमं ब्रह्म ज्ञानादपि रहस्यतममित्याह॥२९॥३०॥येनैव श्रीभागवतेन भगवतो मायायाश्चिच्छक्तेरैश्वर्यमाधुर्यज्ञानस्य कृपाशक्तेस्त्रिगुणमायाशक्तेश्चानुभावं कार्यं प्रभावं वाऽविदं ज्ञातवानस्मि"त्रिगुणात्मिकाथ ज्ञानं च विष्णुशक्तिस्तथैव च।मायाशब्देन भण्यंते कृपालीलार्थवेदिभिः॥"इति शब्दमहोदधिः "माया च वयुनं ज्ञानम्"इति निघण्टुः।"माया स्याच्छाम्बरीबुद्ध्योः"इति त्रिकाण्डशेषः। "माया दम्भे कृपायां च"इति विश्वः।अत एव स्वरूपभूतया नित्यशक्त्या मायाख्यया युतम्। "अतो मायामयं विष्णुं प्रवदन्ति सनातनम्"इति माध्वभाष्यप्रमाणिता श्रुतिश्च।एवमग्रिमेषु ग्रंथेष्वपि मायाशब्देन यथासंभवं चिच्छक्तित्रिगुणशक्त्यादयो व्याख्येयाः । यद्वाऽविदं हेयत्वेन ज्ञातवानस्मि । स्वमते मायाशब्दस्य चिच्छक्तिवाचित्वे तूपादेयत्वेन तत्पदं तस्य चरणारविन्दं गच्छन्ति परमप्रीत्या साक्षात्कुर्वन्ति इमं स्वनिगममित्यादि श्रीनारदत्वप्राप्तौ तत्फलपराकाष्ठादर्शनाच्च ॥ ३१ ॥ एवं च शुद्धां निर्गुणां भक्तिं मयि प्रेमपर्यंतां प्रवर्त्यानुभाव्य च भक्तेः साक्षाद्वाचकं श्रीभगवदुक्तं श्रीभागवतं चोपदिश्य ज्ञानकारणं ज्ञानं च मोक्षप्रयोजनकमजिज्ञासवेपि मह्यं संप्रति बालस्यास्य बयोवृद्धावायत्यां कदाचिज्जिज्ञासा जनिष्यते वेति विभाव्य नैरपेक्षार्थभंग्या ज्ञापितमित्याह--एतदिति । संसूचितं नं तु साक्षादुक्तं मत्प्रयोजनाभावादिति भावः । किं तत् तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्त्तकम् । तदेव किं यत्स्वस्वभावानुसारेणेश्वरे परमात्मनि वा भगवति षडैश्वर्यवति वा ब्रह्मणि तदीयनिर्विशेषस्वरूपे वा कर्म भावितं समर्पितम् ॥३२॥ अत्राक्षिपति नन्विति। इत्यर्थ इति । पवनं पवित्रीकरणमिति पूञ्धातोरर्थः । तच्च मलापकर्षणमेव मलदूरीकरणमित्ति यावत् । अत उक्तं निवर्त्तयतीति ॥३३॥सर्वे इत्युक्त्या शुभकर्मणामपि "सत्त्वं सुखे संजयति"इत्युक्तेस्संसृतिहेतुत्वेन बंधकत्वमेव न हि सुवर्णशृंखलाबंधिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदत्र क्रियते कर्म भगवत्परितोषणम् ॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥३५॥ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयाऽसकृत् ॥ गृणंति गुणनामानि कृष्णस्यानुस्मरंति च ॥ ३६ ॥ नमो भगवते तुभ्यं वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ ३७ ॥

क्रमो दर्शितः ॥ ३४ ॥ ननु च ज्ञानेनाज्ञाननाशात्कर्मनाशस्तच्च ज्ञानं भक्तियोगाद्भवति कथं कर्मणा कर्मनाशः स्यात्तत्राह । यदत्रेति ॥ ३५ ॥ भगवदर्पणेन क्रियमाणं कर्म भक्तियोगं जनयतीति सदाचारेण दर्शयति । यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवंति तदा श्रीकृष्णस्य गुणनामानि गृणंत्यनुस्मरंति च कृष्णमित्यर्थः । इयं च भगवच्छिक्षा । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्" इति ॥ ३६ ॥ कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्तं

नायस्येव बन्धिकेति युक्तं सौवर्ण्यमौल्यमात्रमेवाधिकं बन्धकत्वं तुल्यमेवास्येति । तथा च शुभकर्मणोऽपि सुखासक्तिजनकत्वेन बन्धकत्वमेवेत्यर्थः।संसृतिहेतवो बन्धनहेतवः।।३४।।अत्राक्षिपति । नन्विति । भक्तियोगसमन्वितं यज्ज्ञानं तत् हि निश्चितमत्र लोके भगवत्परितोषणं यत्कर्म पुरुषैः क्रियते तदधीनमित्यन्वयः।भगवदर्पितकर्मणा भगवद्भक्तियुक्तं ज्ञानमुत्पद्यते।तथा च कर्मनिवर्त्तकभक्तियुक्तज्ञानोत्पादनद्वारा कर्मणा कर्मनाशकत्वमिति भावः । चक्रवर्त्तिनापीत्थमेव व्याख्यातम् । तथा हि तदेवेश्वरार्पितं कर्म सत्त्वशोधकत्वाज्ज्ञानसाधनं भवतीत्याह ।भगवदर्पितत्वाद्भगवत्परितोषणं निष्कामं यत्कर्म तदधीनं ज्ञानं तज्जन्यत्वादित्यर्थः।"कर्मणा ज्ञानमाप्नोति ज्ञानेनामृती भवति अथामृतानि कर्माणि" इति श्रुतेः । कर्मणा ज्ञानं जायते हि यतोऽतः कर्मज्ञानद्वारा बन्धनिवर्त्तकमिति भावः । कादृशं यत् भक्तियोगसमन्वितम् । अन्यस्य भक्तिरहितस्य ज्ञानस्य तु मोक्षसाधकत्वाशक्तेः "नैष्कर्म्यमप्यच्युत भाववार्जितम्" इत्यादिना तिरस्कार एव दृष्टः । भक्तियोगोऽत्र श्रवणकीर्त्तनादिरूपः ॥ ३५ ॥ एवं भक्तिमिश्रेण कर्मणा भक्तिमिश्रं ज्ञानं मोक्षसाधनं भवतीत्युक्तम् । इदानीं भक्तिमिश्रनिष्कामकर्मवतां तादृशभक्तसंगभाग्येन केषांचित्कदाचित्कर्ममिश्रा भक्तिरपि भवेदित्याह-कुर्वाणा इति । यत्र भक्तिमिश्रकर्मणि स्थिता अकस्माद्भक्तसंगभाग्येन भगवच्छिक्षया कर्माणि कुर्वाणाः संतः केचित्कृष्णस्य गुणनामानि गृणंति स्मरंति च कीर्त्तनस्मरणाद्यात्मिकां भक्तिं कुर्वंतीत्यर्थः । भगवच्छिक्षाया यत्करोषीत्यादिकाया भक्तिप्रकरणपठितत्वान्न कर्मिविषयतया व्याख्या युक्ता । कर्मिणो हि कर्मवैफल्याभावार्थं वैदिकमेव कर्मार्पयन्ति । भक्तास्तु भगवत्स्वामिकत्वेनैवात्मानं जानन्तः स्वकर्त्तव्यं वैदिकं लौकिकं दैहिकं च कर्म स्वप्रभुप्रवर्त्यमानं प्रतियंतः सर्वमेव तस्मिन्समर्पयन्तीति महान्भेदः । अत एवात्र यदश्नासीत्युक्तम् ॥३६॥ तदेवं भक्तिरहितानां ज्ञानकर्मादीनां नैष्कर्म्यमित्यादिना विनिंद्य सर्वथा "हेयत्वमुक्त्वासु" त्यक्त्वा स्वधर्मं इत्यादिश्लोकत्रय्या परमोपादेयां शुद्धां निर्गुणां भक्तिं स्तुत्वा अहं पुरातीतभवे" इत्यादिश्लोकषट्केन तस्या एव भक्तेराविर्भावप्रकारं प्रेमपर्यंतां वृद्धिं चोक्त्वाऽधिकारिविशेषे पुनरुपादेयं भक्तिमिश्र ज्ञानं ततोऽधिकां कर्ममिश्रां भक्तिं चोक्त्वेदानीं "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत"इत्युक्तेः श्रीगुरोः प्राप्तं स्वमंत्रमपि तमुपदिदिक्षुस्तत्र श्रद्धामुत्पादयन्नाह द्वाभ्याम्। ॐ नम इति । त्रयस्त्रिंशदक्षरात्मको मंत्रः चतुर्व्यूहात्मको भगवानत्र देवता संकर्षणादिक्रमविपर्ययेणात्र निर्देशस्तु श्रीकृष्णचतुर्व्यूहत्वं बोधयितुं तत्पुत्रपौत्रत्वेन प्रद्युम्नानिरुद्धयोस्तन्निकटपाठात् । यद्वा प्रद्युम्नानिरुद्धसंकर्षणानां क्रमेण सृष्टिस्थितिसंहारकारणत्वात्तथोक्तिः । नमो धीमहि नमस्कारं ध्यायेम । मनसा नमनं कुर्वीमहीत्यर्थः । भगवते षडैश्वर्यपूर्णाय । सर्वत्र वसति दीव्यति चेति वासुदेवः । सर्वान्तर्यामी सर्वप्रकाशकस्तस्मै प्रकृष्टं द्युम्नं वित्तं हिरण्यं तद्रूपाय। "हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात्सर्व एव सुवर्णः" इति श्रुतेः । यद्वा प्रकृष्टं द्युम्नं बलं यस्य कामदेवरूपत्वात् "कामो हि बलवत्तमः" इत्याद्युक्तेः । स तथा । "द्युम्नं वित्ते बलेपि च" इति मेदिनी। न केनापि स्वेच्छां विना निरुद्धोऽनिरुद्धः । अनो मुख्यप्राणः सोऽस्ति जितत्वेनास्येत्यनी तेन मुख्यप्राणजयवता रुद्धो वशीकृत इति वा । न निरुद्ध्यंते विषयैर्नाव्रियंते इत्यनिरुधो विवेकिनस्तान्दधाति पोषयति धारयति वेत्यनिरुद्धस्तस्मै अनिरस्तमुदाख्यं नाम धत्त इति वा "तस्योदिति नाम" इति श्रुतेः । सम्यक्पापकर्षणशीलत्वात्संकर्षणः । सम्यक्करं हस्तं ददाति निजप्रियगोपेभ्य इति वा "हास्यहस्तग्रहादिभिः" इत्युक्तेः । करशब्दाकारलोपस्तु पृषोदरादित्वाद्बोध्यः । मंत्रश्चायं पञ्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकम् ॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्॥३८॥इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम्॥अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः॥३९॥त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम्॥प्रख्याहि दुःखैर्मुहुरर्दितात्मनां यत्क्लेशनिर्वाणमुशंति नान्यथा॥४०॥ इति श्रीमद्भा० प्रथ० व्यासनारदसं० पंचमोऽध्यायः ॥ ५ ॥ सूत उवाच ॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च ॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः॥१॥व्यास उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ वर्तमानो वयस्याद्ये ततः किमकरोद्भवान्॥२॥

ज्ञानहेतुत्वमाह द्वाभ्याम् । नम इति । नमो धीमहि मनसा नमनं कुर्वीमहि ॥ ३७ ॥ अमूर्तिकं मंत्रोक्तव्यतिरिक्तमूर्तिशून्यम् । यजते पूजयति स पुमान्सम्यग्दर्शनो भवति ॥ ३८ ॥ एवं कृतवति मयि हरिः स्वसदृशं ज्ञानादिकं दत्तवानित्याह । इमं स्वनिगमं स्वोपदेशं मदनुष्ठितं मयानुष्ठितमवेत्य ज्ञात्वा । भावं च प्रीतिं च ॥ ३९ ॥ अतस्त्वमप्येवं कुर्वित्याह । त्वमिति । अदभ्रमनल्पं श्रुतं यस्य । हे अदभ्रश्रुत विभोर्विश्रुतं यशः प्रख्याहि कथय । येन विश्रुतेन बुद्धेन विदां विदुषां बुभुत्सितं बोद्धुमिच्छा समाप्यते यद्यतो दुःखैः पीडितानां क्लेशशांतिं प्रकारांतरेण न मन्यंते ॥ ४० ॥ इति प्रथमे टीकायां पंचमोऽध्यायः ॥ ५ ॥ व्यासस्य प्रत्ययार्थं च षष्ठे प्राग्जन्मसंभवम् ॥ स्वभाग्यं नारदः प्राह कृष्णसंकथनोद्भवम् ॥ १ ॥ १ ॥ स्वयमपि तथा चिकीर्षुर्गुरूपदेशानंतरभावि तच्चरितं पृच्छति । भिक्षुभिरिति । विप्रवसिते दूरदेशगमने कृते सति विज्ञानस्यादेष्टृभिरुपदेशकर्तृभिः ॥ २ ॥

रात्रवक्तुः श्रीनारायणादेव लब्धो ब्रह्मपुत्रजन्मन्येव न तु पूर्वजन्मनीति संदर्भः ॥ ३७ ॥ इति मूर्त्तीनां वासुदेवादीनामभिधानेन नामचतुष्टयेन यजते पञ्चरात्रोक्तविधिना वासुदेवाय नमः प्रद्युम्नाय नम इत्येवं षोडशोपचारैर्यः पूजयेन्मत्रध्यानोक्तमूर्त्तिं मंत्रेणैव जपितेनाविर्भवति मूर्त्तिः शरीरं यस्येति वा। यद्वा "मंत्रेण चत्वारि शृंगा त्रयो अस्य पादा" इत्यादिमंत्रेण प्रतिपादिताकारं यज्ञ पुरुषम् "यज्ञो वैं विष्णुः" इति श्रुतेः यज्ञ एव पुरुषोऽन्तर्यामीत न्मूर्त्तिकं प्राकृतमूर्त्तिरहितम् कठिनं कृपार्द्रमिति वा । मूर्त्तिः काठिन्यकाययोः" इत्यमरः । स सम्यग्दर्शनः तं दृष्ट्वाऽन्योपि कृतार्थी भवतीत्यर्थः । यद्वा दर्शनं ज्ञानं यद्वा दृश्यतेऽनेनेति दर्शनं शास्त्रं भक्तिप्रतिपादकं पञ्चरात्रादि सम्यग्धन्यमात्मप्रसादकत्वात् । नतु "येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलम्" इत्युक्तलक्षणं भक्तिरहितं शास्त्रमेव खिलमित्यर्थः । ततश्च कृते वेदान्तदर्शनस्यापि तवायमात्मा न वै परितुष्टः मम तु कृतपंचरात्रशास्त्रस्यात्मा सदा प्रसन्न एवेति भावः ॥ ३८ ॥ स्वनिगमं निजांतरंगवेदोक्तं ज्ञानं प्रथमतः स्वानुभवं तत ऐश्वर्यं स्वाणिमादिरूपं ततस्तत्र ममानासक्तिमभिप्रेत्य भावं स्वमहाप्रमाणं चादात् ततश्च मह्यमपीमं मंत्रं कृपयोपादिशेति प्रार्थितेन श्रीनारदेन व्यासस्तमेव मंत्रमुपदिष्ट इति सुधीभिर्बोद्धव्यम् ॥ ३९ ॥ अदभ्रश्रुत सर्वज्ञेत्यर्थः । "दभ्रो दम्भवदल्पयोः" इति निरुक्तिः । येन विश्रुतेन यशसा समाप्यते तद्यशोमृतास्वादनिमग्नानां सदा तदेकभक्तिगतां ज्ञानाय स्पृहैव न भवेदित्यर्थः ॥४०॥ इति श्रीभा० श्रीभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे पंचमोध्यायः ॥५॥ प्रत्ययार्थं विश्वासार्थं कृष्णसंकथनेन कृष्णकीर्त्तनेनोद्भवो यस्य तत्स्वभाग्यम् (१)॥इदं व्यासनारदसंवादोपाख्यानं सूतः शौनकादिभ्योऽब्रवीदिति विज्ञापयितुमाह-एवमिति । हेब्रह्मन्निति । त्वं तु सर्वं जानास्येव परं तु ब्राह्मणानां परोपकृतिस्वभावत्वादयमपि हरियशोवर्णनेन शुद्धो भवत्विति कृपया मां पृच्छसीति भावः । अत्र ब्रह्मशब्दो ब्राह्मणजातिपरो ज्ञेयः ॥ "व्यासः सत्यवतीसुतः" इत्यनेनाहो ब्रह्मवीर्यमहत्त्वं दासावितमत्स्युदरजातकन्योद्भूतोपि वेदविभाजकत्वाद्व्यास इति नामा विप्रर्षिरभूदिति ध्वनितम् । तथा चिकीर्षुरहमपि नारदशिष्यत्वान्नारदाचरितमेव ग्रहीष्यामीतीच्छावान् । विप्रवसित इह संप्रसारणाभाव आर्षः ॥ १ ॥ ततः भिक्षुप्रवासानंतरं तेषां गृहस्थेतरत्वाद्भिक्षुत्वम् गृहस्थेतरके । "भिक्षुराश्रमे ब्राह्मणेऽपि च" इति निरुक्तिः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः ॥ कथ चेदमुदस्राक्षीः काले प्राप्ते कलेवरम् ॥ ३ ॥ प्राक्कल्पविषयामेतां स्मृतिं ते सुरसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥ नारद उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याद्ये तत एतदकारषम् ॥५॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेऽनन्यगतौ चक्रे स्नेहानुबंधनम् ॥ ६ ॥ साऽस्वतंत्रा न कल्पाऽऽसीद्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको योषा दारुमयी यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुल ऊषिवांस्तदवेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ॥ ८ ॥ एकदा निर्गतां गेहाद्दुहंतीं निशि गां पथि ॥ सर्पोऽदशत्पदास्पृष्टः कृपणां कालचोदितः ॥ ९ ॥ तदा तदहमीशस्य भक्तानां शमभीप्सतः ॥ अनुग्रहं मन्यमानःप्रातिष्ठं दिशमुत्तराम् ॥१०॥ स्फीतान्जनपदांस्तत्र पुरग्रामव्रजाकरान् ॥ खेटखर्वटवाटीश्च वनान्युपवनानि च ॥११॥

परं वय उत्तरमायुस्ते त्वया वर्तितं नीतम् । इदमिति दासीपुत्रभूतं कलेवरमुदस्राक्षीरुत्सृष्टवानसि ॥ ३ ॥ एष कल्पांतलक्षणः कालस्ते स्मृतिं कथं न व्यवधान्न खंडितवान् । अडागमाभावस्त्वार्षः । हि यत एष सर्वस्य निराकृतिरपलापो यस्मात्सः ॥ ४ ॥ अकारषं कृतवानहम् । रेफषकारयोर्विश्लेषश्छंदोऽनुरोधेन ॥ ५ ॥ तत्र तावत्कंचित्कालं तत्रैव मातृस्नेहयंत्रितो न्यवसमित्याह त्रिभिः । एक एवअहमात्मजः यस्याः सा । योषिदिति मूढेति च स्नेहानुबंधे हेतुः ॥ ६ ॥ किंकरीत्यस्यार्थं प्रपंचयति । सेति । अस्वतंत्रा सा अतो न कल्पा न समर्था आसीत् । दारुमयी योषेत्यतिपारवश्ये दृष्टांतः ॥ ७ ॥ तदेवं सा स्नेहं चक्रेऽहं च दिगादिष्वनभिज्ञोऽतस्तत्रैव न्यवसमित्याह । अहं च तस्मिन्ब्रह्मकुले तस्याः मातुः स्नेहानुबंधस्यावेक्षया कदा विरमेदिति प्रतीक्षयेत्यर्थः । ऊषितवान्वासं कृतवान् । पंचहायनः पंचवर्षः ॥ ८ ॥ गेहान्निर्गतां गां दुहंतीम् । हेतौ शतृप्रत्ययः । दोग्धुं निर्गतामित्यर्थः । पदा पादेनास्पृष्टः ईषदाक्रांतोऽदशदखादत् ॥ ९ ॥ तन्मातुर्मरणं भक्तानां शं कल्याणमभीप्सतः ईशस्यानुग्रहं मन्यमानः प्रातिष्ठं प्रस्थितोऽस्मि ॥ १० ॥ स्फीतान् जनपदादीनतियातः सन्महद्विपिनमद्राक्षमिति चतुर्थेनान्वयः । जनपदा

स्वयंभुवो ब्रह्मणः सकाशाद्योनिव्यवधानं विना भवतीति स्वायंभुवस्तत्संबुद्धौ तथा।अत्रोवङादेशस्त्वार्षः । ब्रह्मपुत्रत्वात्तव त्रिकालज्ञत्वमस्तीत्यत एतद्वृत्तं वदेति भावः। उत्तरं बाल्यावस्थापश्चिमम्॥३॥अपलापो नाशः॥४॥ एतद्वक्ष्यमाणम् । छन्दोनुरोधेन छंदोभंगभयात् । तदुक्तम् "मूर्द्धरेफा विकल्प्यंते छन्दोभंगभयादिह" इति विश्वनाथेन ॥ ५ ॥ तत्र तावदिति वाक्यालंकारे तत्रैव विप्राश्रम एव । योषितां मूढानां च पुत्रादिषु स्नेहाधिक्यात् । योषितां मध्ये मूढेति वाऽत एव किंकरी दास्यमापन्ना । नान्या गतिराश्रयो यस्य तस्मिन्मयि स्नेहस्यानुबंधनं चक्रे । "अनुबंधस्तु बन्धे स्यात्" इत्यभिधानात् । अत्रानूपसर्गो धात्वर्थानुगाम्येवातः स्नेहबंधनं चक्र इत्यर्थः ॥ ॥ ६ ॥ अतोऽस्वतंत्रत्वात् अलब्धलाभो योगः लब्धस्य परिरक्षणं क्षेमः । मत्पुत्रस्य सुखमुद्वाहादि भवतु यदधुनास्य सुखाद्यस्ति तदन्वहमेधतामित्येवं सदैवेयेषेत्यर्थः । ईशस्य स्वामिनो वशे लोकः सेवकजन इति वा । दारुमयी योषा काष्ठपुत्तलिका यथा प्रवर्त्तकपुरुषाधीना तथेत्यर्थः ॥ ७ ॥ अतो दिगाद्यभिज्ञत्वात् । ब्रह्मकुले ब्राह्मणगृहे । "कुलं वंशे गृहे सार्थे जातिसांकर्ययोरपि"इत्यभिधानात् । इत्यर्थ इति । कदेयं मां त्यक्ष्यति मरिष्यतीति प्रतीक्षां कुर्वाणस्तत्रैवावसमिति भावः । पञ्च हायनाः परिच्छेदका यस्य स तथा "हायनोस्त्री शरत्समाः" इत्यमरः ॥ ८ ॥ इत्यर्थ इति । "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्यये दोहनार्थं गृहाद्गोशालां गच्छंती मार्गे कृपणामनाथामदशदिति भावः ॥ ९ ॥ तदा मातृमरणोत्तरावसरे मातैव ममबन्धनमासीत्तन्मरणान्मम बंधननिवृत्त्येशानुग्रहो जात इति भावः ॥१०॥ 'नीवृज्जनपदो देश" इत्यमरः । "अटव्यरण्यं विपिनम् "च । तत्र तेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् ॥ जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः ॥ १२ ॥ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ नलवेणुशरस्तंबकुशकीचकगह्वरम् ॥ १३ ॥ एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥ घोरं प्रतिभयाकारं व्यालोलूकशिवाऽजिरम् ॥ १४ ॥ परिश्रांतेंद्रियात्माऽहं तृट्परीतो बुभुक्षितः ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ १५ ॥ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आस्थितः ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयम् ॥ १६ ॥

दिषु नानागुणदोषयुक्तेषु समदृष्टिः सन्गतोऽहमिति तात्पर्यार्थः । स्फीतान्समृद्धान् जनपदान्देशान् । तत्र तस्यां दिशि । पुरग्रामव्रजाकरान् । तत्र पुराणि राजधान्यः । ग्रामाः भृगुप्रोक्ताः "विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति ते । स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च" इति । व्रजाः गोकुलानि । आकराः रत्नाद्युत्पत्तिस्थानानि तान् । खेटाः कर्षकग्रामाः । खर्वटाः गिरितटग्रामाः भृगुप्रोक्ता वा "एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम् । मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयम्" इति । वाट्यः पूगपुष्पादीनां वाटिकास्ताः । वनानि स्वतःसिद्धवृक्षाणां समूहाः । उपवनानि रोपितवृक्षाणां समूहास्तानि च ॥ ११ ॥ चित्रैर्धातुभिः स्वर्णरजताद्यैर्विचित्रानद्रींश्च । इभैर्भग्नाः भुजाः शाखाः येषां ते द्रुमाः येषु तान् । शिवानि भद्राणि जलानि येषां तान् । नलिनीः सरसीः ॥ १२ ॥ चित्राः स्वनाः येषां तैः पत्ररथैः पक्षिभिस्तन्नादप्रबुद्धैरित्यर्थः । विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः नलिनीरतियातोतिक्रम्य गतः सन्महद्विपिनं वनमद्राक्षम् । कीदृशम् । नलवेणुशराणां स्तंबैः कुशैः कीचकैश्च गह्वरं दुर्गमम् । तत्र वेणुजातय एव विपुलांतरालगर्भाः कीचकाः ॥ १३ ॥ घोरं दुःसहं प्रतिभयाकारं भयंकररूपं व्यालादीनामजिरं क्रीडास्थानम् ॥ १४ ॥ परिश्रांतानींद्रियाण्यात्मा देहश्च यस्य तृषा परीतो व्याप्तः उपस्पृष्टः आचांतः ॥ १५ ॥ पिप्पलोपस्थे अश्वत्थमूले आश्रितः उपविष्टः । आत्मना बुद्ध्या मनसा वात्मस्थं हृदिस्थमात्मानं परमात्मानम् ॥ १६ ॥

मध्ये अग्रे स्पष्टम् ॥ ११ ॥ "इभः स्तंबेरमः पद्मी" इत्यमरः ॥ १२ ॥ "पत्री पत्ररथः पक्षी" इत्यभिधानात् ॥ इत्यर्थ इति पक्षिशब्दं श्रुत्वा जागरीमैतैर्द्विरेफैरिति भावः ॥ नलाः पोटगला वेणवोऽसुषिरवंशाः शरास्तेजनकास्तेषां स्तंबास्तृणसंघाः कुशा दर्भाः कीचकाः शुष्कवंशाः वायुनोद्धतस्वना वेणवो वा तैर्गह्वरं निबिडम् । "नलः पोटगले राज्ञि पितृदेवे कपीश्वरे । कमलेपि कुनद्यां च क्रमेण क्लीबयोषितोः" इति मेदिनी । "वेणुर्नृपांतरे त्वक्सारेपि" इति च । "शरस्तेजनके बाणे दध्यग्रे ना शरं जले" इति "ना दर्भेऽस्त्री कुशं जले" इति । "स्तंबो गुच्छे समूहे च" इति धरणिः । "कीचका वेणवस्ते स्युर्ये स्वनंत्यनिलोद्धताः" इत्यमरः । "कीचको दैत्यभेदे च शुष्कवंशे नृपान्तरे" इति विश्वः । गह्वरो गुहागहनदंभेषु निकुंजे तु पुमानयम्" इति मेदिनी ॥ १३ ॥ व्याला दुष्टगजा उलूका घूकाः शिवाः शृगाल्यः "व्यालो दुष्टगजे सर्पे श्वापदे नान्यवत्सले" इति मेदिनी "शिवा गौर्यभवा फेरुभार्या चामलकी तथा" इति च । "अजिरं प्रांगणे वाते" इति च तेषुतेषु बहुविस्मयास्पदेषु भीत्यास्पदेषु च दृष्टेष्वपि न मे विस्मयो नापि भीतिरभूत् । तदा मन्मनसो भगवन्माधुर्यास्वादमात्राविष्टत्वादिति भावः ॥ १४ ॥ "ह्रदो घट्टे गाधजले" इति धरणिः । नद्या घट्टे उपस्पृष्टः पादप्रक्षालनादिपूर्वकमाचांतः स्नात्वा पीत्वा च गतश्रमो भूत्वा तस्मिन्नरण्ये आत्मानं परमात्मानमचिंतयमित्यग्रिमेणान्वयः ॥ १५ ॥ निर्मनुजे मनुष्यसंचाररहिते यथाश्रुतं भिक्षुद्विजैर्यथोपदिष्टं "पिप्पलं सलिले क्लीबमश्वत्थे ना पतत्रिणि । निरंशुके वस्त्रभेदे कणायां पिप्पली मता" इति कोशात् ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यायतश्चरणांभोजं भावनिर्जितचेतसा ॥ औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥ १७ ॥ प्रेमातिभरनिर्भिन्नपुलकांगोऽतिनिर्वृतः ॥ आनंदसंप्लवे लीनो नापश्यमुभयं मुने ॥ १८ ॥ रूपं भगवतो यत्तन्मनःकांतं शुचाऽपहम् ॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥ १९ ॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥ २० ॥ एवं यतंतं विजने मामाहाऽगोचरो गिराम् ॥ गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २१ ॥ हंताऽस्मिञ्जन्मनि भवान्न मा द्रष्टुमिहार्हति ॥ अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनाम् ॥ २२ ॥ सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ ॥ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् ॥ २३ ॥

भावेन भक्त्या निर्जितं वशीकृतं यच्चेतस्तेन । औत्कंठ्येनाश्रुकलायुक्ते अक्षिणी यस्य ॥ १७ ॥ प्रेम्णोऽतिभरेण निर्भिन्नपुलकान्यंगानि यस्य । आनंदानां संप्लवे महापूरे परमानंदे । उभयमात्मानं परं च ॥ १८ ॥ मनसः कांतमभीष्टम् । शचा शोकस्तामपहंतीति तथा तत् उत्तस्थे व्युत्थितोऽस्मि ॥ १९ ॥ हृदि मनः प्रणिधाय स्थिरीकृत्यावितृप्तोहमातुर इव अभवमिति शेषः ॥ २० ॥ गिरामगोचरः संवेदनस्याविषयभूत ईश्वरः ॥ २१ ॥ हंतेति सानुकंपसंबोधने । मेति । मां द्रष्टुं नार्हति । यतो न विपक्वाः दग्धाः कषायाः मलाः कामादयो येषां तेषां कुयोगिनामनिष्पन्नयोगानाम् ॥ २२ ॥ कतस्तर्हि दृष्टोसि तत्राह । सकृद्दर्शितं मयेति यदेतत्कामाय मय्यनुरागाय ।

हृदि मनस्येव ध्यायतो मम हरिः क्रमेणासीदागत्याग्रे बभूव। यद्वा शनैः प्रथमं हृद्याविर्बभूव ततो हृद्वृत्तिषु तिसृषु नासिकाश्रोत्रचक्षुष्वपि स्वांगसौरभान् पुरु सौस्वर्यमुखसौन्दर्यग्राहणार्थमाविर्बभूव। किंभूतस्य औत्कंठ्येनाश्रूणि कलयतो धारयतोऽक्षिणी यस्य तस्य॥ १७॥ निर्भिन्नानि अतिभिन्नानि पुलकानि रोमांचा यस्य स तथा। "पुलकः कृमिप्रभेदे प्रस्तरभेदे च मणिदोषे। रोमांचे हरिताले गजान्नपिंडे च गंधर्वे" इति मेदिनी। हे मुने इति। मुनित्वाद्भगवद्ध्यानानंदं त्वं जानस्येवेति भावः ॥ १८ ॥ ततः किं वृत्तं तत्राह-रूपमिति । शुचेति । भागुरिमतेन हलंताट्टावन्तः । वैक्लव्याद्वैकल्यात् । यथा प्राप्तच्युतनिधिर्जनो दुर्मना भवति तथैवेत्यर्थः ॥ १९ ॥ रोगीवासंतुष्टोऽभवमित्यर्थः ॥ २० ॥ विजने जनसंचाररहिते वन इत्यर्थः । गिरामगोचरः । "यतो वाचो निवर्त्तंते" इति श्रुतेः । सर्वैरेव वचनगोचरीकर्त्तुमशक्योपि भगवान्मामाह स्वीयवचनसौस्वर्यं श्रवणाभ्यामनुभावयामास । एवं नारदस्य वैधभक्तिमत्त्वाद्भगवत्सौरभ्यसौस्वर्यसौन्दर्याणां त्रयाणामेव माधुर्याणामनुभवः साधकदेहे अन्येषां सर्वेषां सिद्धदेह एव तन्माधुर्याणामनुभवो भावीति ज्ञेयम् । शुचस्तद्दर्शनोद्भूतदुःखशोकान्प्रशमयन्नपाकुर्वन् । अत्र वियोगौत्कठ्यवतः प्रेम्णा सर्वथा तृप्त्यभावधर्मत्वादिवशब्दः ॥ २१ ॥ किमाहत्येत आह-हन्तेति । अस्मिञ्जन्मनि साधकदेहे तुभ्यं तु दर्शनं दत्तमेवेति त्वं तु कुयोगी न भवसीति भावः । संदर्भस्तु "भक्तिः प्रवृत्तात्मरजस्तमोपहा" इत्युक्तेः कषायोत्र सात्त्विकोत्त्वनवासाद्याग्रहः "वनं तु सात्त्विको वासः" इत्याद्युक्तेः । उत्कंठावर्द्धनार्थमेतत् ॥ २२ ॥ तर्हि हाहा पुनरप्येकवारं दर्शनं देहीत्यत आह-सकृदिति । एतदेकवारदर्शनं ते कामाय त्वन्मनोरथं साधयितुं योग्यमित्यर्थः । न तु मुहुर्दर्शनम् औत्कंठ्यस्यानतिवृद्धया प्रेम्णोऽप्यनतिवृद्धेस्तस्य तारुण्यं न स्यादिति भावः । अत एव जातप्रेम्णे भक्ताय साधकदेहे एकवारमेव दर्शनं ददामीति मम नियमः यथा बालभूतः साधकदेहे प्रेमा वियोगौत्कंठ्येन लब्धातिवृद्धिः सिद्धदेहे तरुणः सन्स्वाधारं भक्तं मुहुरपि मां दर्शयति साक्षात्सेवयति च स्वभक्तमनोरथपूर्त्तिप्रकारमहमेव जानामि न तु मे स्वभक्त इति भावः । मत्कामः यो हि मां कामयते मात्रं मद्दर्शनालाभेपीत्यर्थः । हृच्छयान् विषयवासनाः तत्रापि "सर्वान्मोक्ष्यसि हृच्छयान्" इत्युक्तेर्नारदं प्रति नेदं वाक्यं किन्तु स्वभक्तेः स्वभावं तं ज्ञापयामासेत्येवात्र तत्त्वं सर्वमिदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्सेवयादीर्घया ते जाता मयि दृढा मतिः ॥ हित्वावद्यमिमं लोकं गंता मज्जनतामासि ॥ २४ ॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् ॥ प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् ॥२५॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरम् ॥ अहं च तस्मै महतां महीयसे शीर्ष्णा ऽवनामं विदधेऽनुकंपितः ॥ २६ ॥ नामान्यनंतस्य हतत्रपः पठन्गुह्यानि भद्राणि कृतानि च स्मरन् ॥ गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन्विमदो विमत्सरः ॥ २७ ॥ एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ॥ कालः प्रादुरभूत्काले विद्युत्सौदामनी यथा ॥ २८ ॥

त्वत्कामेन किमित्यत आह । मत्कामः पुमान् । हृच्छयान्कामान् ॥ २३ ॥ अदीर्घयाऽपि सतां सेवयावद्यं निंद्यमिमं लोकं देहं मज्जनतां मत्पार्षदतां गंतासि ॥ २४ ॥ प्रजानां सर्गे सृष्टौ निरोधे संहारेऽपि । प्रजासर्गस्य निरोध इति वा ॥ २५ ॥ तत्प्रसिद्धं महद्भूतम् । "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः" इत्यादिश्रुतेः । कीदृशम् । ईश्वरं सर्वनियंतृ नभसि लिंगं मूर्तिर्यस्य तन्नभोलिंगं संनिहितमपि न लिंग्यते इत्यलिंगं तस्मै अदृष्टायावनामं प्रणामं विदधे कृतवानहं तेनानुकंपितः सन् ॥ २६ ॥ अनंतस्य नामानि पठन्ननवरतं गृणन् हतत्रपस्त्यक्तलज्जो विमत्सर जात इति शेषः ॥ २७ ॥ काले स्वावसरे कालो मृत्युः प्रादुरभूदाविर्बभूव । अकस्मात्प्रादुर्भावे दृष्टांतः तडिदिति । सौदामनीति । विशेषणं स्फुटत्वप्रदर्शनार्थम् । तथा हि । सुदामा माला तत्र भवा सौदामनी मालाकारेत्यथः । यद्वा सुदामा नाम कश्चित्स्फटिकपर्वतः । ततः " तेनैक

दैन्यवर्द्धनार्थमित्येके॥२३॥देहं दासीपुत्रकलेवरम् यद्वा निंद्यं लोकं सांसारिकजनावासं त्रिभुवनमेव त्यक्त्वेत्यर्थः॥२४॥ननु यद्यंतरेव सा नश्येत्तदा किं कार्यं तत्राह-मतिरिति । स्मृतिश्चैतज्जन्मविषया।सर्गे हि मतेर्नाशो न सर्वथेति चेत्तत्राह-प्रजासर्गस्येति यतो मयि निबद्धा स्थापिता प्रेम्णाऽतो न विपद्येत न नश्येत्।मम नित्यत्वान्मतिरपि नित्यैव स्यादिति भावः॥२५॥महद्भूतमिति।भगवतो नामैवात एवं क्लीबत्वम्।यस्य निःश्वसितमेव चत्वारो वेदास्तस्य वचनं तु ततोप्यतिप्रमाणमिति भावः । ईश्वरम् अतिनिकृष्टाय दासीपुत्रायापि मह्यं तथा वरप्रदानं यदिदमपि तस्यैकमीश्वरत्वमिति भावः।नभसि हार्द्दाकाशे लिंग्यते ज्ञायते इति वा । यद्वा नभो लिंगं दृष्टांतत्वेन गमकं यस्य तत्तथा "आकाशवत्सर्वगतश्च नित्यः" इति । नभोलिंगं शरीरं यस्येति वा तथा "आकाशशरीरं ब्रह्म" इति श्रुतेः ॥ २६ ॥ स्मरन्नेव न तु प्रकाशयन् । तत एव तुष्टमनाः स्पृहाशून्यश्च सन् पूर्वत एव विमदो वि मत्सरश्च सन् केवलं कालं तत्कृपावसरं प्रतीक्षमाणोहं बभूवेति संदर्भः । कालं प्रतीक्षन्स कालो मे कदा भविष्यति यत्र तत्पार्षदतां यास्यामीति भगवत्पार्षदो भविष्यमि । कोन्यो वराको मत्सम इत्येवं मदमत्सरौ मम नाभू ताम् ॥ २७ ॥ कालस्तत्कृपावसरः प्रादुरभूत् । यथावग्रहक्षये तडित्सौदामनीति गोबलीवर्दन्यायेन चेयमुक्तिरिति संदर्भः । स्वामिचरणास्तु भवार्थप्रत्ययस्यैवार्थाप्रसिद्धेराहुः । यद्वेति । सुदाम्नाऽद्रिणा एका दिक् सौदामनी सर्वव्यापिन्यास्तस्या नियतमेकदिक्त्वं न संभवती तिपुनराह-यद्वेति । इत्यर्थ इति । तडिदित्यव्ययमपीति भावः । नैरुक्तस्मरणान्निरुक्तिकारवचनात् । विश्वनाथस्तु काले मम स्थूलदेहभंगसमये कालः प्रादुरभूत् । यं कालं प्रतीक्षमाणः पूर्वं चिरादभूवं स इत्यर्थः । राज्ञो गमनसमये तस्य गमनसमयामितिवत् । बुद्धिर्हि भगवति अभेदेपि भेदं जनयतीत्यनुन्यासः । कालयोस्तयोरकस्माद्युगपदेवाधाराधेयभावेन प्रादुर्भावे दृष्टांतः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् ॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः ॥ २९ ॥ कल्पांत इदमादाय शयानेंऽभस्युदन्वतः ॥ शिशयिषोरनुप्राणं विविशेंतरहं विभोः ॥ ३० ॥ सहस्रयुगपयत उत्थायेदं सिसृक्षतः ॥ मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे ॥ ३१ ॥

दिक्" इति सूत्रेणाण् । स्फटिकादिमयपर्वतप्रांतभवा हि विद्युदतिस्फुटा भवति तद्वदित्यर्थः । यद्वा तडिदित्यंतिके इत्यथः ॥ "तडिदित्यंतिकबंधयोः" इति नैरुक्तस्मरणात् ॥ २८ ॥ प्रयुज्यमाने मयि तामिति । अयमथः । 'हित्वावद्यमिमं लोकं गंता मज्जनतामसि' इति या भागवती भगवत्पार्षदरूपा शुद्धा सत्त्वमयी तनुः प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्य । आरब्धकर्मणो निर्वाणमेव निर्वाणं यस्येति वा स पंचभूतात्मको देहोन्यपतत् । अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितं भवति ॥२९॥ इदं त्रैलोक्यमादायोपसंहृत्योदन्वत एकार्णवस्यांभसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोर्विभोर्ब्रह्मणोंऽतर्मध्यमनुप्राणं निःश्वासेन सह विविशे प्रविष्टोऽहम् । "ततोऽवतीय विश्वात्मा देहमाविश्य चक्रिणः । अवाप वैष्णवीं निद्रामेकीभूयाथ विष्णुना" इति कौर्मोक्तेः । स्वायनेंभसीति पाठे स्वायने स्वस्यायने आश्रयेंभसि शिशयिषोर्ब्रह्मण इति श्रीनारायणेनाभेदविवक्षयोक्तमित्यवगंतव्यम् ॥ ३० ॥ प्राणेभ्य इंद्रियेभ्योऽहं मरीचिमिश्रास्तन्मुख्याः

तडिति विद्युति सौदामनी यथा एकस्यां सौदामन्यां तथैवान्या सौदामनी कदाचिद्यथा भवति तथैव मम पांचभौतिकदेहभंगकाले एव पार्षददेहप्राप्तिकालोभूदित्यर्थः ॥ २८ ॥ नीयमाने सति न्यपतदिति गोषु दुह्यमानासु गत इतिवत् । यथा गोदोहनगमनयोरतुल्यकालत्वं तथा मम भौतिकदेहत्यागचिन्मयदेहप्राप्त्योरपीति भावः । "हित्वावद्यमिमं लोकम्" इति भगवदुक्तौ क्त्वाप्रत्ययस्तुल्यकाल एव । तदुक्तं "क्वचित्तुल्यकालेपि । उपविश्य भुंक्ते, झणत्कृत्वा पतति, चक्षुः संमील्य हसति, मुखं व्यादाय स्वपितीत्यादिकमुपसंख्येयम्" इति । भाष्यवृत्तौ । अनेन वृत्तेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितं भवतीति स्वामिचरणाः । अत्रारब्धानां कर्मणां नायकत्वादग्नितुल्यानां निर्वाणो नाशो यत्र स इति बहुव्रीहिणा न केवलं तदानीमेव प्रारब्धनाश इति लभ्यते । देहपातात्पूर्वकालेपि तन्नाशे तत्प्रयोगासिद्धेः । न च जातप्रेम्णो भक्तस्यापि प्रारब्धं तिष्ठतीति शुद्धभक्तानां मतं साधनदशायामेव तन्नाशात् । यद्वक्ष्यते प्रियव्रतकथायां "नैवं विधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम् । चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति तन्वम्" इति । अस्यार्थः । एवंविधं पौरुषं न चित्रम् । चित्रंखल्वेतदेव किं तदित्य आह । विदूरविगतोंत्यजोपि यन्नामधेयं सकृदाददीत यः सः अधुना नामग्रहणकाल एव तन्वं तनूं जहाति । अत्र नामग्रहणसमकाले तनुत्यागादर्शनात् । तन्वारंभकं प्रारब्धकर्मैव तनूशब्देन लभ्यते इत्येके प्राहुरपरे तु भक्तिसंपर्कात्स्पर्शमणिन्यायेन त्रिगुणमयतनूरेष त्रिगुणातीता भवति । ध्रुवादौ तथा दर्शनात् । अत्र तस्यास्त्रैगुण्यत्याग एव तनुत्याग उच्यते । एतच्च रासारंभे "जहुर्गुणमयं देहम्" इत्यत्र प्रपंचयिष्यते चक्रवर्तिना । क्वचित्त स्वभक्तानां देहत्यागोपि भगवता दर्श्यते इत्याहुः । यथा जातप्रेम्णोपि नारदस्य देहत्यागस्तदपि प्रारब्धकर्मनाशो भक्त्यारंभ एव व्याख्येयरतदुक्तं श्रीरूपगोस्वामिचरणैः । "यद्ब्रह्म साक्षात्कृतिनिष्ठयापि विनाशमायाति विना न भोगैः । अपैति नामस्मरणेन तत्ते प्रारब्धकर्मेति विरौति वेदः" इति । प्रारब्धनाश एव देहपातमित्याभिप्रायेण "प्रारब्धकर्मनिर्वाणेन्यपतत्पांचभौतिकेः" इति सप्तम्यंतमेव पदं प्रयुज्यत इत्यवधेयम् । तदप्रयुज्य बहुव्रीहिप्रयोगेण भक्तानां प्रारब्धकर्मनिर्वाणाधिकरणीभूत एव देहः पतेन्न तु ततोन्य इति ज्ञापितम् ॥ २९ ॥ ननु तव नित्यतनुत्वे कथमस्मिन्कल्पे स्वायंभुवे मन्वतरे । "उत्संगान्नारदो जज्ञे" इति ब्रह्मणः सकाशात्तव जन्मप्रसिद्धिः । सत्यं नित्यतनोरेव भगवतो लीलाविशेषार्थं देवक्यादिगर्भे प्रवेश इव ममापि ब्रह्मपुत्रत्वलीलार्थं पूर्वकल्पांत एव ब्रह्मणोभूदित्याह-कल्पान्त इति ॥ ३० ॥ सहस्रयुगेति । युगशब्दोत्र चतुर्युगपरः । जज्ञिमह इति वक्तव्ये जज्ञिर इत्यार्षम् । मरीचिमिश्रा इत्यस्यायं भावः । यथा मरीच्यादीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्बहिश्च लोकांस्त्रीन्पर्यैम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥ ३२ ॥
देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् ॥ मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम् ॥ ३३ ॥

ऋषयश्च जज्ञिरे ॥ ३१ ॥ ये कर्मिणस्ते बहिर्न यांति । ये तपआदिभिर्ब्रह्मलोकं गतास्तेंतर्न यांति । अहं तु महाविष्णोरनुग्रहादखंडितब्रह्मचर्यव्रतः सन्नंतर्बहिश्च पर्यैमि पर्यटामि । क्वचिदप्यविघाताप्रतिहता गतिर्यस्य सः ॥ ३२ ॥ किमिति पर्यटसि ईश्वराज्ञया लोकमंगलार्थमित्याह चतुर्भिः—देवेन ईश्वरेण दत्ताम् । स्वराः " निषादर्षभगांधारषड्जमध्य

ब्रह्मकल्पादनुवृत्तानां संप्रति सुप्तप्रबुद्धतैव जन्मोच्यते तथेति ज्ञेयम् । अत्रेदं विवेचनीयम् । सर्वेषु वैकुण्ठेषु सर्वेषु कालेषु च श्रीनारदस्य नित्यता श्रूयते । यद्यप्येतन्न घटते तथापि नित्यश्रीनारदस्य रूपादिकं प्राप्तं महाभागधेयं जीवविशेषमवलंब्य घटेतेति ॥ ३१ ॥ न च मरीच्यादयः प्राकृताः स्वस्वकर्मपतिता इवाहं क्वापि कर्मणि । नापि सनकाद्या इव ज्ञानेपि नियुक्तः । किं त्वहं प्रवृत्तिनिवृत्तिधर्मातीतो हरिं भजन्नेव स्वच्छंदेन वर्ते इत्याह—अंतरिति । मे कार्मिणस्ते त्रिलोक्या बहिर्न यान्ति । "अंतस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रत" इत्युक्तेः । ये तपआदिभिर्ब्रह्मलोकं गतास्ते त्रिलोक्या अंतर्न यांति कर्मबंधभीतेः । अहं त्वखंडितस्वभक्तिनिष्ठः सन्नंतर्बहिश्च पर्यैमि पर्यटामि। यद्वा बहिर्ब्रह्मांडान्महावैकुंठेपि।अत एवोक्तं नारसिंहेपि "सनकाद्या निवृत्त्याख्ये ते च धर्मे नियोजिताः । प्रवृत्त्याख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम्"इति॥३२॥ स्वर्गापवर्गविलक्षणाः सर्वैरन्यै र्दुर्लभा मम भोगसामग्री तु सदा सर्वत्रेत्याह । देवेन श्रीकृष्णेन दत्ताम् । तथोक्तं लिंगपुराणे उपरिभागे तेनैव तस्य वीणाग्रहणं प्रसिद्धं "श्रीकृष्णदेवो भगवान्स्वरब्रह्मविभूषिताम् । कल्पादौ दत्तवान्वीणामृषये नारदाय वै" इति । स्कांदीयकेदारखण्डे तु "रागज्ञानं तथा वीणां नारदाय महेश्वरः । प्रादात्तत्तपसा प्रीतः पार्वतीपतिशंकरः"इत्युक्त तत्कल्पांतरापेक्षमिति ध्येयम् ।"स्वरब्रह्मणि निर्भातहृषीकेशपदांबुज" इत्युक्तेः ।स्वराणां निषादादीनां साक्षाद्ब्रह्मानंद इव श्रवणेनानन्दजनकत्वाद्ब्रह्मत्वमित्युक्तम् । स्वराणामारोहणावरोहणक्रमो मूर्च्छा तद्वतीं वीणां कृत्वेति भावः । अथ स्वरादिकथनं संगीतार्णवात् । "सामवेदात्स्वरा जाताः स्वरेभ्यो ग्रामसंभवः । ग्रामेभ्यो जातयो जाता जातिभ्यो रागसंभवः ॥ सप्तस्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः । द्वाविंशतिश्च श्रुतय एतेभ्यो रागसंभवः ॥ षड्जर्षभकगांधारमध्यपञ्चमधैवताः । निषादश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः ॥ षड्जादयः स्वराः सप्त ग्रामौ च षड्जमध्यमौ । केचिद्गांधारमप्याहुः स तु नेहास्ति भूतले ॥ चतुर्दशैव श्रुतयस्तावन्मानाश्च मूर्च्छनाः । गीयंते मानवैर्भूमावन्यास्तु त्रिदशालये ॥ स्वयं यो राजते नादः स स्वरः परिकीर्तितः । स्वरैश्च निखिलं व्याप्तं तद्विज्ञेयं पृथक्पृथक् ॥उच्चैर्निषादगांधारौ नीचैर्ऋषभधैवतौ । शेषास्तु स्वरिता ज्ञेयाः षड्जपञ्चममध्यमाः ॥ षड्जं वदेन्मयूरो हि ऋषभं चातको वदेत् । अजा वदति गांधारं क्रौञ्चो वदति मध्यमम् ॥ पुष्पसाधारणे काले कोकिलः पंचमं वदेत् । दर्दुरो धैवतं चैव निषादं च वदेद्गजः ॥ हास्यशृंगारयोः कार्यौ स्वरौ पञ्चममध्यमौ । षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे ॥ गांधारश्च निषादश्च कर्तव्यौ करुणारसे । धैवतश्चैव कर्तव्यो बीभत्से च भयानके ॥ चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च चतुःश्रुतिः । चतुःश्रुतिस्त्रिश्रुतिश्च द्विःश्रुतिश्चेतिभेदकाः ॥ " श्रुतिश्च स्वरारंभकः शब्दविशेषः । लक्षणं चास्या आद्यपद्यव्याख्याशतकांतर्गत नारदपक्षव्याख्याने उक्तम् । अथ प्रसंगाद्रागनामानि "भैरवः पंचमो नाटो मल्लारो गौडमालवः । देशाखश्चेति षड्भागाः प्रोच्यंते लोकविश्रुताः॥ बंगपालो गुणकरी मध्यमादिर्वसंतकः । धन्या श्रीश्चेति पंचैते रागा भैरवसंश्रयाः।। ललिता गूर्जरी देशी वराठी रामकृत्तथा । मता रागार्णवे रागाः पंचैते पञ्चमाश्रयाः॥ नटो नारायणः पूर्वं गांधारः सालगस्तथा । ततः केदारकर्णाटौ पंचैते नाटसंश्रयाः॥मेघमल्लारिका मालकौशिकः प्रतिमंजरी । आसावरी च पंचैते रागा :मल्लारसंश्रयाः ॥ हिंदोलस्त्रिगुणाधालीगौडीकोलाहलास्तथा । पंचैते गौडनामानं रागमाश्रित्य संस्थिताः ॥ भौपाली हरिपालश्च कामोदी धोरणी तथा । वेलावली च पंचैते रागा देशाखसंश्रयाः ।

१ प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रतः । सा श्रुतिः संपरिज्ञेया इति । श्रुत्यनंतरभावी यः स्निग्धोऽनुरणनात्मकः । स्वरो रंजयति श्रोतुश्चित्तं स स्वर उच्यते ॥ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः ॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥ ३४ ॥ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ॥ भवसिंधुप्लवो दृष्टो हरिचर्याऽनुवर्णनम् ॥ ३५ ॥ यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथात्माऽद्धा न शाम्यति ॥ ३६ ॥ सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयाऽनघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम् ॥ ३७ ॥

मधैवतपंचमाः" इति सप्त। त एव ब्रह्म । ब्रह्माभिव्यंजकत्वात् तेन विभूषिताम् । स्वतःसिद्धसप्तस्वरामित्यर्थः मूर्च्छयित्वा मूर्च्छनालापवतीं कृत्वा ॥ ३३ ॥ स्वप्रयोजनमाह प्रगायत इति ॥ ३४ ॥ परप्रयोजनमाह—एतद्धीति । मात्रा विषयाः तेषां स्पर्शाः भोगाः तेषामिच्छया आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं यद् एतदेव भवसिंधौ प्लवः पोतः । न केवलं श्रुतिप्रामाण्येन, किंत्वन्वयव्यतिरेकाभ्यां दृष्ट एवेत्यर्थः ॥ ३५ ॥ एतदेवेत्युक्तमवधारणमनुभवेन द्रढयति—यमादिभिरिति । यमादिभिः तथा न शाम्यति, यद्वत् मुकुंदसेवया अद्धा साक्षादात्मा मनः शाम्यति कथंचिन्मुकुंदसेवामात्रेण शाम्यति, किं पुनस्तद्गुणवर्णनेनेति भावः ॥ ३६ ॥ भवतो मनःपरितोषकं मम जन्म कर्म रह

अन्येऽपि बहवो रागा जाता देशविशेषतः । मारूप्रभृतयो लोके ते च भद्रेशिकाः स्मृताः ॥ न रागाणां न तालानामंतः कुत्रापि विद्यते । संतोषाय शिवस्यैते ज्ञेया बुधजनैः सदा ॥ तथा नयति कैलासं न गंगा न सरस्वती । यथा नयंति रागास्ते नरं गायनकोविदम्॥ अपि ब्रह्मपरानंदादिदमप्यधिकं ध्रुवम् । जहार नारदादीनां चित्तानि कथमन्यथा॥" इह तालतान ध्रुवकादि बहु वक्तव्यमस्ति। तच्च संगीतार्णवादिभ्योऽवसेयम् । रागाणामन्यथागुणप्रधानभावेन क्वचित्कथनं तु वक्तुरिच्छयैवेति ध्येयम्॥३३॥ पोतः"यानपात्रं तु पोत" इत्यमरः । "प्लवो भेकेर्भके पोते मृगपक्षिविशेषयोः"इति निरुक्तिः । इत्यर्थ इति। साक्षात्प्रत्यक्षीकृतो नात्र प्रमाणापेक्षेति भावः । तीर्थवच्छोधकौ पादौ तीर्थं गंगाख्यं पादे वा यस्य स तथा ॥ ३४ ॥ यत्र हरिचर्यानुवर्णनं ध्रुवप्रह्लादादिषु तत्र संसारतरणमपि दृष्टं यत्र वेनादौ तदभावस्तत्र संसारतरणस्याप्यभाव इत्यन्वयव्यतिरेकावत्र ज्ञेयौ ॥ ३५ ॥ भक्तिसद्भाव एव निस्तार इति निर्द्धारेपि यथा केवलया भक्त्यात्मा साक्षाच्छाम्यति न तथा भक्तिमिश्रैर्योगज्ञानादिभिरत्याह-यमादिभिस्तथा न शाम्यति यद्वन्मुकुंदसेवयाऽद्धा साक्षादेव । अत्र पुरेह भूमन्नित्यादिना नैष्कर्म्यमित्यादिना च योगादीनां भक्तिराहित्ये वैयर्थ्याद्भक्तिमिश्रैरेव यमादिभिरिति लभ्यते । अतस्तैरात्मा यद्यपि शाम्यति तदपि यद्वन्मुकुंदसेवया यमादिविनाभूतत्वात्केवलयेत्यर्थः । अत्र भवतानुदितप्रायामित्यादिना तथात्माद्धा न शाम्यतीत्यंतेन ग्रंथेन भक्तेरेव निस्तारोपायत्वेनोक्तेपि तस्यास्त्रैविध्यं दृश्यते । केवलत्वं प्राधान्यं गुणभावश्च "त्यक्त्वा स्वधर्मम्"इत्यादिषु "अहं पुरातीतभवे" इत्यादिषु केवलत्वं"कुर्वाणा यत्र कर्माणि भगवच्छिक्षया सकृत् गृणंति गुणनामानि कृष्णस्यानुस्मरंति च" इत्यादिषु प्राधान्यं "यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्"इत्यत्र गुणभावः ।तत्र केवलत्वे निष्कामाधिकारिणो भक्तिरनन्या शुद्धा निर्गुणोत्तमाऽकिंचनेत्यादिनाम्नी प्रेमफला भवति । प्राधान्ये कर्ममिश्रा ज्ञानमिश्रा योगमिश्रेत्यादिनाम्नी भक्तिः शांताधिकारिणोरतिफला कस्यचिन्मोक्षफलापि भवति । दास्यादिभाववत्साधुसंगवशात्कस्यचिद्दास्याद्यभिलाषिणो भक्तेरतिप्राधान्ये सत्यैश्वर्यप्रधानदास्यादिभावप्रदा प्रेमफलापि भवति।गुणभावे तु स्वीयं नाम फलं चप्रकाशयंति कर्मज्ञानयोगादीनां तया विना प्रतिस्वफलं सम्यक्साधयितुमसमर्थानां तत्र साहाय्यमात्रं कुर्वती स्वयं तटस्थैव भवति।ततश्च भक्तिमिश्रं कर्म ज्ञानं योगश्च मोक्षं साधयतीत्यतोत्र शास्त्रे भक्तिर्द्विविधैव। केवला प्रधानीभूता चेत्येतत्सर्वं नारदेनोपदिष्टो व्यासो द्वादशसु स्कंधेषु प्रपंचयिष्यतीति ज्ञेयम् ॥३६॥ सर्वे भक्तेराविर्भा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ एवं संभाष्य भगवान्नारदो वासवीसुतम् ॥ आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ॥ ३८ ॥ अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ॥३९॥ इति श्रीभा०म०प्रथम० व्यासनारदसंवादे षष्ठोऽध्यायः ॥६॥ शौनक उवाच ॥ निर्गते नारदे सूत भगवान्बादरायणः ॥ श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः ॥ १ ॥ सूत उवाच ॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे ॥ शम्याप्रास इति प्रोक्त ऋषीणां सत्त्रवर्धनः ॥२॥ तस्मिन्स्व आश्रमे व्यासो बदरीषंडमंडिते ॥ आसीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयम् ॥ ॥ ३ ॥ भक्तियोगेन मनसि सम्यक्प्रणिहितेऽमले ॥ अपश्यत्पुरुषं पूर्वं मायां च तदुपाश्रयाम् ॥ ४ ॥

स्यं च आख्यातम् ॥ ३७ ॥ आमंत्र्यानुज्ञाप्य । यादृच्छिकः स्वप्रयोजनसंकल्पशून्यः ॥ ३८ ॥ हरिकथागायकनारदभाग्यं श्लाघते—अहो इति । माद्यन् हृष्यन् । तंत्र्या वीणया ॥ ३९ ॥ ॥ इति भा० प्रथम० टीकायां षष्ठोऽध्यायः ॥ ६ ॥ ॥ अथ भागवतश्च तुर्जन्म वक्तं परीक्षितः ॥ सुतबालवधाद्द्रौणेर्दंडः सप्तम उच्यते ॥ १ ॥ तस्य नारदस्य अभिप्रेतं श्रुतवान्सन् ॥ १ ॥ ब्रह्मनद्यां ब्रह्मदैवत्यायां ब्राह्मणैराश्रितायां च । सत्त्रं कर्म वर्धयतीति तथा ॥ २ ॥ बदरीणां षंडेन समूहेन मंडिते मनः प्रणिदध्यौ स्थिरी चकार "समाधिनाऽनुस्मर तद्विचेष्टितम्" इति नारदोपदिष्टं ध्यानं कृतवानित्यर्थः ॥ ३ ॥ प्रणिहिते निश्चले । अत्र हेतुः—भक्तियोगेन अमले ।

वप्रकारो वृद्धिः फलं तद्वतो जनस्य चेष्टाप्रारब्धकर्मनाशः साधकदेहत्यागप्रकारोऽकर्मारब्धचिन्मयदेहप्राप्तिश्च।रहस्यं वेदांतदर्शिभिरप्यगम्यम् ॥ ३७ ॥ यदृच्छया चरतीति यादृच्छिकः । हेतुशून्यगमनादिक्रियः तेन च भक्तिर्यादृच्छिकी भक्तोऽपि यादृच्छिकस्तत्संगोपि व्यासस्य यादृच्छिक इति भक्तिमतां यादृच्छिकत्रयी जीवतु ॥ ३८ ॥ नरे परमेश्वरे सदा तिष्ठतीति नारं ज्ञानं तद्ददाति व्यासादिभ्य इति नारदः । यद्वा नरेषु जीविषु तिष्ठतीति नारमज्ञानं द्यति खण्डयतीति नारदः । अरदो दोषदो न भवतीति वा । यद्वाऽऽरः शस्त्रभेदस्तद्वदायुः खंडको न भवतीति । यद्वा । नारं नरसमूहं दयते पालयति ज्ञानदानेनेति नारदः । छन्दो भंगस्त्वार्षः "श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्" इत्युक्तिविरोधात् । यस्तंत्र्याऽऽतुरं संसारक्लेशाक्रांतं जगद्रमयत्यानंदयति अयं देवर्षिर्धन्य इत्यन्वयः ॥ ३९ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथम स्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ अथ नारदजन्मादिवर्णनानंतरं द्रौणेरश्वस्थाम्नः (१) ततो नारदाभिप्रायश्रवणानन्तरम् । विशेषेण भाति वेदविभागादिषु इति विभुः ॥ १ ॥ ब्रह्मानद्यां वेदानां विप्राणां तपतां परमेश्वरस्य वा संबन्धिन्यां नद्यां "वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः" इत्यमरः । सतस्त्राति सदाचारपरान्रक्षतीति सत्त्रो हरिस्तेन वर्द्धते स्वस्थित्या जगति ख्याप्यत इति सत्त्रवर्द्धनः । शम्यायुगकीलाः प्राप्स्यंते प्रक्षिप्यंते परिध्यर्थेऽस्मिन्निति शम्याप्रासः लकुटीकृतशम्या नाम यज्ञियतरुशाखापातितस्थले कृतशालांतर्यज्ञकरणाच्छम्याप्रास इति तीर्थः । यद्वा । शम उपशमोऽस्त्येषामिति शामिनः । शम इत्युपलक्षणं दमोपरत्यादेः । तेन शमादियुक्ता आसमन्तात्प्रकर्षेणासते तिष्ठन्त्यत्रेति शम्याप्रासः ॥ २ ॥ इत्यर्थ इति । अयं चाश्रमः सिन्धुवनांतर्गत एव न गंधमादनग इति शिष्टास्तत्रैवादिबदरिकाश्रमोयमिति प्रसिद्धेः । सरस्वत्यपि तत्रास्त इति । इत्यर्थ इति । ध्यानस्यैव प्रणिधिपदार्थत्त्वादिति भावः । उपस्पृश्य स्नानादि कृत्वा ॥ ३ ॥ अत्र निश्चलत्वे । अत्र संदर्भः । भक्तियोगेन प्रेम्णा "अस्त्येवमंग भजतां भगवान्मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् " इत्यादौ "भक्त्या संजातया भक्त्या" इत्यादौ च प्रसिद्धेः । प्रणिहिते समाहिते "समाधिनानुस्मर तद्विचेष्टितम्" इति तं प्रति नारदोपदेशात् । पूर्णपदस्य मुक्तप्रग्रहया वृत्त्या "भगवानिति शब्दोयं तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ॥ ५ ॥

पूर्वं प्रथमं पुरुषम् । ईश्वरम् अपश्यत् । पूर्णमिति वा पाठः । तदुपाश्रयाम् । इश्वराश्रयां तदधीनां मायां च अपश्यत् ॥ ४ ॥ ईशमायाकृतां च जीवानां संसृतिमपश्यदित्याह

पुरुष इत्यपि । निरुपाधिश्च वर्तन्ते वासुदेवेखिलात्मनि " इति पाद्मोत्तरखंडवचनावष्टम्भेन तथा "कामकामो यजेत्सोममकामः पुरुषं परम् । अकामः सर्वकामो वा " इत्यादौ "यजते पुरुषं परम्" इत्यस्य वाक्यद्वयस्य पूर्ववाक्ये पुरुषं परं प्रकृत्यै कोपाधिमुत्तर वाक्ये पुरुषं पूर्णं निरुपाधिमिति टीकानुसारेण पूर्णः पुरुषोत्र स्वयं भगवानेवोच्यते । पूर्वमिति पाठे पूर्वमेवाहमिहासमिति "तत्पुरुषस्य पुरुषत्वम्" इति श्रौतानिर्वचनविशेषपुरस्कारेण स एवोच्यते । तमपश्यच्छ्रीवेदव्यास इति स्वरूपशक्तिमंतमेवेत्येतत्स्वयमेव लब्धम् । पूर्णचंद्रमपस्यदित्युक्ते कांतिमंतमपश्यदिति हि लभ्यत एव । वक्ष्यते च "त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः । मायां व्युदस्य चिच्छक्त्या कैवल्ये पर आत्मानि" इति अत एव "मायाञ्च तदपाश्रयाम्" इत्यनेन तस्मिन् अप अपकृष्ट आश्रयो यस्याः निलीय स्थितत्वादिति मायाया न स्वरूपभूतत्व मित्यपि लभ्यते । वक्ष्यते च "माया परैत्यभिमुखे च विलज्जमाना" इति । स्वरूपशक्तिरियमत्रैव व्यक्ती भविष्यति । "अनर्थोपशमं साक्षात्" इत्यनेन "आत्मारामाश्च मुनयः" इत्येनेन च पूर्वत्र हि भक्तियोगप्रभावः खल्वसौ मायाभिभावकतया स्वरूपशक्तिवृत्तित्वेनैव गम्यते । परत्र ते च गुणाः ब्रह्मानंदस्याप्युपरिचरतया स्वरूपशक्तेः परमवृत्तितायामेवार्हंति ॥ मायाधिष्ठातृपुरुषस्तु तदंशत्वेन । ब्रह्म च तदीयनिर्विशेषाविर्भावरूपत्वेन । तदंतर्भावणापृथग्दृष्टत्वात् पृथङ् नोक्त इति ज्ञेयम् । तदेतच्च द्वितीयतृतीयसंदर्भयोः प्रतिपादितमस्ति । अत्र विश्वनाथः । पुरुषं पुरुषाकारं श्रीकृष्णमित्यर्थः । " कृष्णे परमपूरुषे" इत्यग्रिमोक्तेः । पूर्णमिति पदेन तस्य स्वरूपभूतं चिच्छक्तिमंशकलावतारान् पूर्तीलिंगेन ब्रह्म चापश्यदिति गम्यते । पूर्णं चंद्रमपश्यदित्युक्त चंद्रस्य कांतेरंशककलानां च पूर्त्तेच दर्शनं स्वत एव भवेदित्यर्थः । किं तु तस्य बहिरंगायाः शक्तेर्मायाया स्तद्विपरीतधर्मवत्यास्तद्दर्शनेन दर्शनं न भवतीति तां पृथग्लिखति । मायां चेति । तस्या यम् अपरं पश्चिमभाग एवाश्रयो यस्यास्ताम् " विलज्जमानया यस्य स्थातुमीक्षापथेमुया" इत्यनेन तस्या भगवत्पृष्ठदेशाश्रयत्वे नोक्तेः ॥ ४ ॥ अभिधेयस्य प्रयोजनस्य च स्थापकं जीवस्य स्वरूपत एव परमेश्वराद्वैलक्षण्यमपश्यदित्याह-ययेति । यया मायया संमोहितो जीवः स्वयं चिद्रूपत्वेन त्रिगुणात्मकाज्जडात्परोऽपि आत्मानं त्रिगुणात्मकं जडं देहादिसंघातं मनुते तन्मननकृतमनर्थं संसारव्यसनं चाभिपद्यते तदेवं जीवस्य चिद्रूपत्वेपि यया संमोहित इति मनुते इति स्वरूपभूतज्ञानशालित्वं व्यनक्ति । प्रकाशैकरूपस्य तेजसः स्वपरप्रकाशनशक्तिवत् ॥ "अज्ञानेनावृत्तं ज्ञानं तेन मुह्यन्ति जन्तवः" इति गीतादिभ्यः तदेवमुपाधेरेव जीवत्वं तन्नाशस्यैव च मोक्षत्वमिति मतांतरं परिहृतवान् । अत्र यया संमोहित इत्यनेन तस्या एव तत्र कर्तृत्वं भगवतस्तु तत्रोदासीनत्वं मतम् । वक्ष्यते च "विलज्जमानया यस्य स्थातुमीक्षापथेमुया ।विमोहिता विकत्थन्ते ममाहमिति दुर्धियः" इति । अत्र विलज्जमानयेत्यनेनेदमायाति । तस्या जीवसंमोहनं कर्म श्रीभगवते न रोचते इति यद्यपि सा स्वयं जानाति तथापि भयं "द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययस्मृतिः" इत्यादिदिशा जीवानामनादिभगवदज्ञानमयवैमुख्यमसहमाना स्वरूपास्फुरणमस्वरूपावेशं च करोति । श्रीभगवांश्चानादित एव भक्तायां प्रपंचाधिकारिण्यां तस्यां दाक्षिण्यं लंघितुं न शक्नोति । तथा तद्भयेनापि जीवानां स्वसांमुख्यं वांछन्नुपदिशति "दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति। "सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः । तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति" इति च । लीलया श्रीमद्व्यासरूपेण तु विशिष्टतया तदुपदिष्टवानित्यनंतरमेवायास्यति । अनर्थोपसमं साक्षाद्भक्तियोग इति तस्माद्वयोरपि तत्तत्समंजसं ज्ञेयम् ननु माया खलु शक्तिः शक्तेश्च कार्यक्षमत्वं तच्च धर्मविशेषः तस्य कथं लज्जादिकम् । उच्यते । एवं सत्यपि भगवति तासां शक्तीनामधिष्ठातृदेव्यः श्रूयन्ते । यथा केणोपनिषदि महेन्द्रमाययोः संवादः । तदास्ताम् । प्रस्तुतं प्रस्तूयते । तत्र जीवस्य तादृशचिद्रूपत्वेपि परमेश्वरतो वैलक्षण्यं तदपाश्रयमिति यया संमोहित इति च दर्शयति । यद्यैव यदेकं चिद्रूपं ब्रह्म मायाश्रयतावलितं विद्यामयं तद्यैव तन्मायाविषयतापन्नमविद्यापरिभूतं चेत्ययुक्तमिति जीवेश्वरविभागोऽवगतः । ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद्द्वितयं मिथो विलक्षणस्वरूपमेवेत्यागतम् । न चोपाधितारतम्यमयपरिच्छेदप्रतिबिंबत्त्वादिव्यवस्थया तयोर्विभागः स्यात् । तत्र यद्युपाधेरनाविद्यक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ ६ ॥

ययेति । यया संमोहितः स्वरूपावरणेन विक्षिप्तः परोऽपि गुणत्रयातिरिक्तोऽपि तत्कृतं त्रिगुणत्वाभिमानकृतमनर्थं च कर्तृत्वादिकं प्राप्नोति ॥ ५ ॥ अनर्थम् उपशमयति यः अधोक्षजे साक्षाद्भक्तियोगः तं च अपश्यत् । एतत्सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्य अर्थे सात्वतसंहितां श्रीभागवताख्यां चक्रे । तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः । एतदुक्तं भवति–विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः तन्मायया संमोहितः तिरोभूतस्वरूपः तद्विपरीतधर्मा जीवः तस्य च

त्वेन वास्तवत्वं तर्ह्यविषयस्य तस्य परिच्छेदविषयत्वासंभवः । निर्द्धर्मकस्य व्यापकस्य निरवयवस्य च प्रतिबिंबत्वायोगोऽप्युपाधिसम्बन्धाभावाद्बिम्बप्रतिबिम्बभेदाभावाद्दृश्यत्वाभावाच्च । उपाधिपरिच्छिन्नाकाशस्थज्योतिरंशस्यैव प्रतिबिंबो दृश्यते नत्वाकाशस्य दृश्यत्वाभावादेव तथा वास्तवपरिच्छेदादौ सति समानाधिकरणज्ञानमात्रेण न तत्त्यागश्च भवेत् । तत्पदार्थप्रभावस्तत्र कारणमिति चेदस्माकमेव संमतम् । उपाधेराविद्यकत्वे तत्र न तत्परिच्छिन्नत्वादेरप्यघटमानत्वादाविद्यकत्वमेवेति । घटाकाशादिषु वास्तवोपाधिमयतद्दर्शनया न तेषामवास्तवस्वप्नदृष्टांतोपजीविनां सिद्धांतः सिद्ध्यति । घटमानाघटमानयोः संगतेः कर्त्तुमशक्यत्वात् । ततश्च तेषां सर्वमविद्याविलास एवेति स्वरूपमप्राप्तेन तेन तत्तद्व्यवस्थापयितुमशक्यमिति ब्रह्माविद्ययोः पर्यवसाने सति यदेव ब्रह्म चिन्मात्रत्वेनाविद्यायोगस्यात्यंताभावास्पदत्वाच्छुद्धं तदेव तद्योगादशुद्धया जीवः पुनस्तदेवाविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येति तथा विद्यावत्त्वेपि मायित्वमित्यसमंजसा च कल्पना स्यादित्याद्यनुसंधेयम् । किं च यद्यत्राभेदवाद एव तात्पर्यमभविष्यत्तर्ह्येकमेव ब्रह्माऽज्ञानेन भिन्नं ज्ञानेन तु तस्य भेदमयदुःखं विलीयते इत्यपश्यदित्येवावक्ष्यत् । तथा भगवल्लीलादीनां वास्तवत्वाभावे सति शुकहृदयविरोधश्च जायते। तस्मात्परिच्छेदप्रतिबिम्बत्वादिप्रतिपादकशास्त्राण्यपि कथंचित्सादृश्येन गौण्यैव वृत्त्या प्रवर्त्तेरन् । अंबुवद्ग्रहणान्न तथात्वं वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवमिति पूर्वोत्तरपक्षमयन्यायाभ्यां तत एवाभेदशास्त्राण्युभयोश्चिद्रूपत्वेन जीवसमूहस्य दुर्घटघटनापटीयस्याः स्वाभाविकतदचिंत्यशक्त्याः स्वभावत एव तद्रश्मिपरमाणुगणस्थानीयत्वात्तद्व्यतिरेकेऽव्यतिरेकेण च विरोधं परिहृत्यैवाग्रे मुहुरपि तदेतद्व्याससमाधिलब्धसिद्धांतयोजनाय योजनीयानि । तदेवं मायाश्रितत्वमायामोहितत्वाभ्यां स्थिते तयोर्भेदे तद्भजनस्याभिधेयत्वमायातम् । अतः श्रीभगवत एव सर्वहितोपदेष्टृत्वात्सर्वदुःखहरत्वाद्रश्मीनां सूर्यवत्सर्वेषां परमस्वरूपत्वात्सर्वाधिक्यगुणशालित्वात्परमप्रेमयोग्यत्वामिति प्रयोजनं च स्थापितमिति संदर्भः ॥ विश्वनाथस्तु ननु भगवद्रूपगुणलीलामाधुर्यवर्णनार्थं भगवद्दर्शनमपेक्षणीयमेव व्यासस्य मायादर्शनं किमर्थं तत्राह-यया संमोहित इति । अयमर्थः । यदर्थं श्रीभागवतम्प्रारीप्सितं स जीवो मायारोगग्रस्तः कथं स्वयं स्वादयतु तन्माधुर्यम् । अतस्तस्य रोगदर्शनं विना चिकित्सा न भवति । तयां च विना रोगिणस्तस्य कथमौषधपथ्ययोर्व्यवस्थेति मायाजीवावपि द्रष्टुमवश्यमेवापेक्षणीयाविति यया संमोहितः स्वरूपावरणविक्षेपाभ्यां भ्रमितः परोपि तस्या मायाया गुणत्रयातिरिक्तोपि तत्कृतं गुणकृतमनर्थं तदभिमानेन प्राप्नोति ॥ ५ ॥ श्लोकत्रयेण भक्तियोगेनेत्यादिवृत्तत्रयेण । अत्राशयं द्योतयति-एतदुक्तं भवतीति । तज्जीवेश्वरस्वरूपम् । ह्लादिन्या तदाख्यया संविदा ज्ञानशक्त्या य आश्लिष्टः सर्वदा युक्तः स सच्चिदानंद ईश्वर इत्यर्थः । यस्तु स्वाविद्यया स्वरूपाज्ञानेनाच्छादितः स जीवः क्लेशसमूहखनिः अर्दितः स्वाधीनीकृतः स्वस्मिन्नाविर्भूतः परानंदो यस्य स तथेतीशविशेषणम् । स्वस्मिन्नाविर्भूतानि यानि सुदुःखान्यात्यंतिकदुःखानि तेषां भूः क्षेत्रमिति जीवविशेषणम् । स्वस्यादृशाऽऽदर्शनेनोत्थो यो विपर्यासो देहाद्यात्मधीस्तस्माद्भवंत्युद्भवंतीति स्वादृगुत्थविपर्यासभवाः ताश्च भेदजभीशुचश्चेति स्वादृगुत्थविपर्यासभवभेदजभीशुचस्ता जुषन्यन्मायया तिष्ठति भेदाद्भयं शोकश्च भवत्येव "द्वितीयाद्वै भयं भवति" "अनीशया शोचति मुह्यमानः" इत्यादि श्रुतिभ्यामिति । अत्र संदर्भः । तत्राभिधेयं च तादृशत्वे दृष्टवानपि यतस्तत्प्रवृत्त्यर्थं श्रीभागवताख्यामिमां संहितां प्रवर्त्तितवानित्याह-अनर्थोपशममिति । भक्तियोगोत्र कीर्त्तनश्रवणादिलक्षणः । साधनभक्तिर्न तु प्रेमलक्षणः । अनुष्ठानं ह्युपदेशापेक्षं प्रेम तु तत्प्रसादापेक्षमिति । तथापि तस्य तत्प्रसादहेतोस्तत्प्रेमफलगर्भत्वात्साक्षादेवानर्थोपशमनत्वं नत्वन्यसापेक्षत्वेन "यत्कर्मभिर्यत्तपसा"इत्यादेः। ज्ञानादेस्तु भक्तिसापेक्षत्वमेव"श्रेयःसृतिं भक्तिमुदस्य"इत्यादेः । अथवाऽनर्थस्य संसारव्यसनस्य तावत्साक्षादव्यवधानेनोपशमनमिति । विश्वनाथस्तु-तस्य यदौषधं तदपि दृष्टमित्याह । अनर्थमुपशमयाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे ॥ भक्तिरुत्पद्यते पुंसः शोकमोहजरापहा ॥ ७ ॥ स संहितां भागवतीं कृत्वाऽनुक्रम्य चात्मजम् ॥
शुकमध्यापयामास निवृत्तिनिरतं मुनिः ॥ ८ ॥ शौनक उवाच ॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः ॥ कस्य वा बृहतीमेतामात्मारामः
समभ्यसत् ॥ ९ ॥ सूत उवाच ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे ॥ कुर्वंत्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥ १० ॥

ईश्वरभक्त्या लब्धज्ञानेन मोक्ष इति । तदुक्तं विष्णुस्वामिना—"ह्लादिन्यासंविदाश्लिष्टः सच्चिदानंद ईश्वरः । स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः" तथा—"स ईशो यद्वशे माया स जीवो यस्तयार्दितः । स्वाविर्भूतपरानंदः स्वाविर्भूतसुदुःखभूः ॥ स्वादृगुत्थविपर्यासभवभेदजभीशुचः । यन्मायया जुषन्नास्ते तमिमं नृहरिं नुमः" इत्यादि॥ ६॥ संहितायाः अनर्थोपशामकत्वं दर्शयति—यस्यामिति । यस्यां वै श्रूयमाणायामेव किं पुनः श्रुतायामित्यर्थः ॥ ७ ॥ अनुक्रम्य शोधयित्वा ॥ ८ ॥ कस्य वा हेतोः । बृहतीं वितताम् ॥ ९ ॥ निर्ग्रंथाः ग्रंथेभ्यो निर्गताः । तदुक्तं गीतासु—"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च"

यस्तं भक्तियोगमपश्यत् । अत्र दर्शनेऽयं क्रमः । प्रथमं भगवन्तमपश्यत् । पूर्णोतिपदप्रयोगादंशान्विना कथं पूर्णत्वमिति तदंशान्पुरुषावतारगुणावतारादनिपश्यत् । पूर्त्तिमत्वं पूर्णत्वमिति पूर्त्तिरूपं ब्रह्मापश्यत् ।तत्कांतिभूतां विमलोत्कर्षिण्याद्यनेकप्रभेदवतीं चिच्छक्तिमपश्यत् । पृष्टे बहिरंगां मायां शक्तिमपश्यत् । तया मोहितां जीवशक्तिं तदनंतरमपश्यत् । तस्यास्तन्मोहनिवार्त्तिकां सर्वतोपि महतीं चिच्छक्तिमुख्यां भक्तिरूपां शक्तिमनुग्रहशक्तिविलासभूतां भगवतो वशयित्रीं भगवत्येवापश्यत् । तदेतत्सर्वं स्वयं दृष्ट्वा जानतो लोकस्यार्थे सात्वतसंहितामेतत्सर्वतत्त्वप्रकाशिकां श्रीभागवताख्यां चक्रे । "ईशः स्वतंत्रश्चित्सिंधुः सर्वव्याप्येक एव हि । जीवोधीनश्चित्कणोपि स्वोपाधिव्यापिशक्तिकः ॥ अनेकोऽविद्ययोपात्तस्त्यक्ताविद्योपि कर्हिचित् । मायात्वचित्प्रधानं चाविद्या विद्येति सा द्विधा ॥" ईश्वरजीवजगतां स्वरूपशक्तेर्भक्तेश्च स्वरूपलक्षणप्रमाणादिकं वेदस्तुतिव्याख्यायां व्यक्तीभविष्यति ॥ ६ ॥ इत्यर्थ इति । श्रोतुमुद्यतस्य चेद्भक्तिरुत्पद्येत । श्रुतायां तस्यां चेद्भक्तिः स्यात्तर्हि किमु वक्तव्यमिति भावः । संदर्भः । अथ प्रयोजनं स्पष्टयितुं पूर्वोक्तस्य पूर्णपुरुषस्य च श्रीकृष्णरूपत्वं व्यञ्जयितुं ग्रंथफलनिर्देशद्वारा तत्र तदनुभावांतरं प्रतिपादयन्नाह-यस्यामिति । भक्तिः प्रेमा श्रवणरूपया साधनभक्त्या साध्यत्वात् उत्पद्यत आविर्भवति । तस्यानुषंगिकं गुणमाह—शोकेति । अत्रैषां संस्कारोपि नश्यतीति भावः । "प्रीतिर्न यावन्मयि वासुदेवे नं मुच्यते देहयोगेन तावत्" इति ऋषभदेवोक्तेः । परमपुरुषे पूर्वोक्ते पूर्णपुरुषे किमाकारे इत्याकांक्षायामाह-कृष्ण इति । "कृष्णस्तु भगवान्स्वयम्" इत्यादिशास्त्रसहस्रसंभावितांतःकरणानां परंपरया तत्प्रसिद्धमध्यपातिनां चासंख्यलोकानां तन्नामश्रवणमात्रेण यः प्रथमप्रतीतिविषयः स्यात्तथा तन्नाम्नः प्रथमाक्षरमात्रं मंत्राय कल्पमानं यस्याभिमुख्याय स्यात्तदाकारामित्यर्थः । आहुश्च नाम कौमुदीकाराः । कृष्णशब्दस्य तमालश्यामलत्विषि श्रीयशोदास्तनंधये परब्रह्मणि रूढिरिति । विश्वनाथस्तु संहितायाः श्रेयःसाधनत्वमाह। यस्यां श्रूयमाणायां किं पुनः श्रुतायां किंतरां कीर्त्यमानायां किंतमां कीर्त्तितायां भक्तिः प्रेमा ईश्वरः सद्यो हृद्यवरुध्यते। अत्र कृतिभिरित्युक्तेरीश्वरावरोधस्य फलस्य प्रेम्ण एव लिंगात् भक्तानामननुसंहितं फलं संसारनिवृत्तिः । सा च भक्तानामेव भवतीत्याह—शोकेत्यादि ॥ ७ ॥ अथ तस्यैव प्रयोजनस्य प्रेम्णो ब्रह्मानंदानुभवादपि परमत्वमनुभूतवानेव यतस्तादृशं शुकमपि प्रेमानंदस्य वैशिष्ट्योपलंभनाय तामध्यापयामास । लोके हि स्वादितापूर्वमिष्टवस्तुकः पित्रादिरवश्यमेव पुत्रादिकं तत्तदास्वादयितुं प्रयतते इत्याह-स संहितामिति । कृत्वानुक्रम्य चेति प्रथमतः स्वयं संक्षिप्तभक्तिकं कृत्वा पश्चान्नारदोपदेशादनुक्रमेण श्रीभगवदुक्त्यैकप्रधानतयाऽनुक्रम्य संशोध्येत्यर्थः । स च नारदोपदेशः श्रीकृष्णांतर्द्धानानंतरं परीक्षित्कर्तृककलिनिग्रहात्पूर्वं ज्ञेयस्तदैव कलिना स्वाधिकारारंभे स्वप्राबल्यप्रकटनाद्धार्मिकाणामपि शास्त्रदर्शिनामप्यधर्मे प्रवृत्तेः ।यत एव व्यासस्य चित्ताप्रसादः । तदुक्तं "जुगुप्सितं धर्मकृतेनुशासतः" इत्यत्र "न मन्यते तस्य निवारणं जनः" इति कलियुगात्पूर्वमेव चित्ताप्रसादे न संस्यत इति प्रयुज्येत अतस्तदैव पूर्वनिर्मितस्यैव श्रीभागवतस्यानुक्रमणम् । तदुक्तं "कृष्णे स्वधामोपगते" इत्यत्र "पुराणार्कोधुनोदितः" इति । अत एवेदं श्रीमद्भागवतं भागवतानंतरं यदत्र श्रूयते यच्चान्यत्राष्टादशपुराणानंतरं भागवतमिति तद्द्वयमपि संगतं स्यात् । निवृत्तिनिरतं ब्रह्मानुभवितमपि ॥८॥ स शुकः उपेक्षत औदासीन्येन वर्त्तत इत्युपेक्षकः । ग्रंथेभ्य इत्युक्ते ॥९॥ श्रीभागवतस्यापि हेयत्वं प्रसक्तमित्यत आह-यद्वेति । इत्यर्थ इति । "भिद्यते हृदयग्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥ ११ ॥
परीक्षितोऽथ राजर्षेर्जन्मकर्मविलायनम् ॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयम् ॥ १२ ॥

इति । यद्वा ग्रंथिरेव ग्रंथः । निवृत्तहृदयग्रंथय इत्यर्थः । ननु मुक्तानां किं भक्त्येत्यादिसर्वाक्षेपपरिहारार्थमाह—इत्थंभूतगुण इति ॥ १० ॥ ननु भक्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमिति । अत आह—हरेरिति । अध्यगात् अधीतवान् । विष्णुजनाः प्रियाः यस्येत्यर्थः । व्याख्यानादिप्रसंगेन तत्संगतिकाम इति भावः । एतेन "तस्य पुत्रो महायोगी" इत्यादिना शुकस्य व्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तम् ॥ ११ ॥ यदन्यत्पृष्टं परीक्षितः प्रायोपवेशेन श्रवणं कथमिति "तस्य जन्म महाश्चर्यम्" इत्यादिना तस्योत्तरं वक्तुमाह—परीक्षित इति । विलायनं मुक्तिं मृत्युं वा । संस्थां महाप्रस्थानम् । श्रीकृष्णकथानाम् उदयो यथा भवति तथा ॥१२॥

थिः" इत्युक्तेरयं भावः । अत्राक्षिपति-नन्विति । यद्वा निर्ग्रंथा विधिनिषेधग्रंथातीता इति । तदुक्तं "चरेदविधिगोचरः" इति । ननु मुक्तानां किं भक्त्या, निर्ग्रंथानां किं भक्तिग्रंथेन श्रीभागवतेन, निरभिमानानां किं पुनः सेव्यसेवकलक्षणाभिमानेन, विधिनिषेधातीतानां किं पुनः श्रीभागवतोक्तेन भक्तेर्विधिनेत्यादि सर्वाक्षेपपरिहारार्थमाह—इत्थंभूता आत्मारामाणामप्याकर्षणशीला गुणा यस्य सः । तेन मूलत एव भक्तिप्राधान्याभ्यासेन वा मद्गुणानुभव एषामस्त्विति सनकादिषु भगवत्कृपयैव श्रीकृष्णगुणानुभवो मत्सुतस्यास्त्विति श्रीशुके व्यासस्येव भगवतो भक्तानां वा कृपया यैरात्मारामैस्तद्गुणानुभवयोग्यता लब्धा त एवाहैतुकीं भक्तिं कुर्वंति। अन्ये त्वात्मारामाः सायुज्यार्थी भक्तिं कुर्वंतीत्यहैतुकीपदव्यावृत्तिरनुसंधेया । तदुक्तं "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति ॥१०॥ अत्राशंकते—नन्विति । इति भाव इति । "संसारेस्मिन्क्षणार्द्धोपि सत्संगः शेवधिर्नृणाम्" इत्येकादशोक्तेः । सत्समाजो हि विना शास्त्रश्रवणाद्यर्थं न भवतीत्याशयः । श्रीभगवदाज्ञया वै तच्छास्त्रमधीतवांस्तदुक्तंनारदपुराणे सनत्कुमारेण नारदाय सुमेरुपर्वते "आकल्पांतं तपःसंस्थौ नरनारायणावृषी । तयोर्निदेशतो व्यासो जनकस्तव सुव्रत । कर्त्ता भागवतं शास्त्रं तदधीष्व भुवं व्रज । स तप्यति तपस्त्वद्य पर्वते गंधमादने । त्वद्वियोगेन खिन्नात्मा तं प्रसादय मत्प्रियम् ॥ एवमुक्तः शुको विप्र नमस्कृत्य चतुर्भुजम् । यथागतो निवृत्तोसौ पितुरंतिकमागमत् । पुत्रं प्राप्य प्रहृष्टात्मा नारायणनियोगतः । चकार संहितां दिव्यां नानाख्यानसमन्विताम् ॥ वेदतुल्यां भागवतीं हरिभक्तिविवर्द्धिनीम् । निवृत्तिनिरतं पुत्रं शुकमध्यापयच्च ताम् ॥ त्वन्मुखेन समावाप्तामष्टादशसहस्रिकाम् ॥" इति । अत्र विश्वनाथः । नारदकृपया व्यासस्येव व्यासकृपया शुकस्यापि तद्गुणमाधुर्यानुभवो विशेषत एवाभूदित्याह-हरेरिति । हरेर्गुणेनाक्षिप्ता आक्षेपविषयीकृता मतिर्ब्रह्मानंदो येन सः धिग्मे मतिं यत ईदृशे भगवद्गुणमाधुर्ये सत्यपि एतावान्कालो ब्रह्मानुभवेन मया वृथैव यापित इति।ततश्च तत्कथासौहार्देन विष्णुजना एव।न तु केवला आत्मारामाः प्रिया यस्य सः षष्ठीसमासो वा । अत्र व्यास एव भगवद्गुणाभिव्यंजकाञ्छ्रीभागवतीयान्कांश्चन श्लोकाँश्लोकद्वारा विविक्तारण्ये सदा समाधिस्थमपि शुकं श्रावयामास । ततस्तच्छ्रुत्यैव भग्नसमाधिस्तन्माधुर्याकृष्टचित्तस्तादृशं समाधिमप्याक्षिप्य सर्वज्ञतया ताञ्छ्लोकाञ्छ्रीभागवतीयाञ्ज्ञात्वा तत्प्रकाशकं च स्वपितरं ज्ञात्वा तदंतिकमागत्य श्रीभागवतमध्यैष्टेति ब्रह्मवैवर्त्तानुसारेण कथा ज्ञेया । तदेवं व्यासशुकौ पितापुत्रौ ब्रह्मानुभविचूडामणी अपि विजित्य भक्तिरेकछत्रामिव सर्वजगंतीं चक्रे। तदपि ये तां तथा न मन्यंते कुपथगामिनश्चौरास्ते यमेनैव दंड्या इति । संदर्भस्तु । तमेवार्थं श्रीशुकस्याप्यनुभवेन संवादयति हरेरिति। श्रीव्यासादेव श्रुतेन यत्किंचिद्गुणेनाक्षिप्ता मतिर्ब्रह्मानंदानुभवो यस्य स पश्चादध्यगात् । महद्विस्तीर्णमपि । ततश्च तत्सत्कथासौहार्देन नित्यं विष्णुजनाः प्रिया यस्य तथाभूता वा तेषां प्रियो वा स्वयम भवमित्यर्थः । अयं भावः । ब्रह्मवैवर्त्तानुसारेण पूर्वं तावदयं गर्भमारभ्य श्रीकृष्णस्य स्वैरितया मायानिवारकत्वं ज्ञातवान् । ततः स्वनियोजनया श्रीव्यासदेवेनानीतस्य तस्य दर्शनात्तन्निवारणे सति कृतार्थमन्यतया स्वयमेकान्तमेव गतवांस्तत्र श्रीव्यासदेवस्तं वशीकर्तुं तदनन्यसाधनं श्रीभागवतमेव ज्ञात्वा तद्गुणातिशयप्रकाशमयांस्तदीयपद्यविशेषान्कथंचिच्छ्रावयित्वा तेनाक्षिप्तमतिं कृत्वा तदेव पूर्णमध्यापयामासेति श्रीभागवतमहिमातिशयः प्रोक्तः ॥ ११ ॥ विलापनं विपूर्वाल्लिङ्ण्येर्ण्यंताल्ल्युट् । श्रीभागवतकथावाचनमित्यर्थः । कृष्णकथोदयमित्यनेन श्रीभागवतस्य तत्रैव तात्पर्यात् । किञ्चानेन मुख्यतया तेन पृष्टानां कृष्णकथानामारंभोपि सूचितः ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥ १३ ॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन्कृष्णासुतानां स्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य तज्जुगुप्सितं कर्म विगर्हयंति ॥ १४ ॥ माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ॥ तदाऽरुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीटमाली ॥ १५ ॥ तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबंधोः शिर आततायिनः ॥ गांडीवमुक्तैर्विशिखैरुपाहरे त्वाक्रम्य यत्स्नास्यसि दग्धपुत्रा ॥ १६ ॥ इति प्रियां वल्गुविचित्रजल्पैः स सांत्वयित्वाऽच्युतमित्रसूतः ॥ अन्वाद्रवद्दंशित उग्रधन्वा कपिध्वजो गुरुपुत्रं रथेन ॥ १७ ॥

तत्र परीक्षितो जन्म निरूपयिष्यन् आदौ तावद्गर्भस्थ एव अश्वत्थाम्नो ब्रह्मास्त्रात् कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति—यदेत्यादिना । यदा द्रौणिः अश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांसि उपाहरत्—तदा तन्माता अरुदत् । तां च सांत्वयन्किरीटमाली अर्जुन आहेति तृतीयेनान्वयः । किमिति बालानां शिरांस्यानीतवानित्यपेक्षायामाह । मृधे युद्धे । यद्यपि पांडवा अपि कौरवा एव । तथापि सृंजयवंशजः धृष्टद्युम्नः पांडवानां सेनापतिरिति सृंजयानामित्युक्तम् । वीरगतिं स्वर्गम् । अथो अनंतरम् । वृकोदरेण आविद्धायाः क्षिप्तायाः गदायाः । अभिमर्शेन अभिघातेन भग्नौ ऊरुदंडौ यस्य तथाभूते धृतराष्ट्रपुत्रे दुर्योधने सति ॥ १३ ॥ भर्तुः दुर्योधनस्य । स्मेति वितर्के । इति एवं प्रियं स्यादिति पश्यन् । तस्य तद्विप्रियमेवेति वाक्यांतरम् । विप्रियत्वे हेतुः । जुगुप्सितमिति ॥ १४ ॥ घोरं दुःसहं यथा भवति । बाष्पस्य कलाभिः बिंदुभिः अकुले अक्षिणी यस्याः । किरीटस्यैकत्वेऽपि तदग्राणां बहुत्वात् किरीटमालीत्युक्तम् ॥ १५ ॥ शुचः शोकाश्रूणि प्रमृजामि परिमार्जयामि यद् यदा ब्रह्मबंधोः ब्राह्मणाधमस्य । आततायिन इति । "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः" इति स्मरणादत्र आततायी शस्त्रपाणिः तेन च पुत्रहंतृत्वं लक्ष्यते गांडीवात् धनुषः मुक्तैः विशिखैः बाणैः उपाहरे त्वत्समीपम् आनयामि यत् शिरः आक्रम्य आसनं विधाय दग्धपुत्रा सती ॥ १६ ॥ वल्गवः रम्याः विचित्राः जल्पाः भाषणानि तैः स अर्जुनः । अच्युत एव मित्रं सूतश्च यस्य । दंशितो बद्धकवचः । उग्रं धनुश्चापं यस्य । कपिः हनुमान् ध्वजे यस्य सः । गुरोः पुत्रं रथेन अन्वाद्रवद्

वीरगतिम्मुक्तिं "यमिह निरीक्ष्य हता गताः सरूपम्" इति भीष्मोक्तेः ॥१३॥ तस्य दुर्योधनं तद्बालहननम् । विप्रियमप्रियमेव । वस्तुतः प्रथमं शत्रुवधश्रवणेन हर्षोदयात्पश्चात्स्पर्शेन भीमादीनां स्वशत्रूणामवधश्रवणाद्बालवधाच्च कुरुवंशलोपश्रवणाच्च विषादोत्पत्तेर्हर्षविषादाभ्यां च तन्मृत्युप्राप्तेरिति भावः ॥ १४ ॥ किरिटे माला पुष्पस्रगस्येति वा किरीटमाली ॥ १५ ॥ "शुक्छोकेश्रुणि शुद्धौ च" इति निरक्तिः । भद्र इति । मां तद्वधप्रवृत्तमपि त्वं भद्रस्वभावत्वाद्वारयिष्यसीति भावः ॥ १६ ॥ "वल्गु । स्याच्छगले पुंसि सुंदरे त्वाभिधेयवत्" इति मेदिनी । "दंशितमपि जातदंशितेपि स्यात्कवचान्विते" इति च । उग्रो महादेवस्तत्प्रसादलब्धं धनुरस्येत्युग्रधन्वा । यद्वा उं रुद्रं ग्रसतीत्युग्रं तद्धनुरस्येति । एतच्च भारते किरातीयोपाख्याने वनपर्वणि सर्वशरक्षयेऽर्जुनेन किरातरूपरुद्रकंठे धनुः क्षिप्त्वा पुनस्स आकृष्ट इति । यद्वोग्रं भयंकरं धनुरस्येति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमापतंतं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन ॥ पराद्रवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथा कः ॥ १८ ॥ यदाऽशरणमात्मानमैक्षत श्रांतवाजिनम् ॥ अस्त्रं ब्रह्मशिरो मेन आत्मत्राणं द्विजात्मजः ॥ १९ ॥ अथोपस्पृश्य सलिलं संदधे तत्समाहितः ॥ अजानन्नुपसंहारं प्राणकृच्छ्र उपस्थिते ॥ २० ॥ ततः प्रादुष्कृतं तेजः प्रचंडं सर्वतोदिशम् ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥ २१ ॥

अन्वधावत् ॥ १७ ॥ आपतंतम् आधावंतं सः द्रौणिः । कुमारहा बालघाती । उद्विग्नमनाः कंपितहृदयः । प्राणपरीप्सुः प्राणान् लब्धुमिच्छुः न तु कीर्तिम् । यावद्गमं यावद् गंतुं शक्यं तावद् उर्व्यां पराद्रवत्पलायत । को ब्रह्मा मृगो भूत्वा सुतां यब्धुमुद्यतः सन् रुद्रस्य भयाद्यथा पलायते स्म । अर्क इति पाठे वामनपुराणकथा सूचिता । तथा हि । विद्युन्माली नाम कश्चिद्राक्षसो माहेश्वरः तस्मै रुद्रेण सौवर्णं विमानं दत्तम् । ततोऽसौ अर्कस्य पृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् । ततोऽर्केण निजतेजोभिः द्रावयित्वा तद्विमानं पातितम् । तच्छ्रुत्वा कुपिते रुद्रे भयादर्कः पराद्रवत् । ततो रुद्रस्य क्रूरदृष्ट्या दंदह्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यात इति ॥ १८ ॥ अशरणं रक्षकरहितम् । ननु पलायनमेव रक्षकमस्ति न तस्यापि कुंठितत्वादित्याह—श्रांताः वाजिनो यस्य तम् । ब्रह्मशिरोऽस्त्रं ब्रह्मास्त्रम् । द्विजात्मज इति अदीर्घदर्शितामाह ॥ १९ ॥ तद् ब्रह्मास्त्रम् । समाहितः कृतध्यानः । उपसंहारमजानतोऽपि संधाने हेतुः- प्राणकृच्छ्र इति ॥ २० ॥ ततः अस्त्रात् सर्वतोदिशं प्रादुष्कृतं

स तथा ॥ १७ ॥ तमर्जुनम् । केचित्तु रुद्रभयाद्यथार्किरिति समागतं शनैश्चरं दृष्ट्वा कुपितेन रुद्रेण तृतीयनेत्राद्वह्निरुद्भावितः । तं दृष्ट्वा यथा शनैश्चरः पलायतेति पुराणांतरे ॥ १८ ॥ ब्रह्मेति पदं शिरस्य ग्रभागे यस्यास्त्रस्य तद्ब्रह्मशिरो ब्रह्मास्त्रमित्यर्थः । यदपि स्वामिचरणैर्व्याख्यातमित्थं तथापि ब्रह्मशिरोस्त्रं ब्रह्मास्त्रात्पृथगप्यस्तीत्युक्तं स्कान्दे । अथ प्रसंगादन्यान्यप्यस्त्राणि कथ्यंते "अथास्त्राणि प्रवक्ष्यामि सावधानोऽवधारय । ब्रह्मास्त्रं प्रथमं प्रोक्तं द्वितीयं ब्रह्मदंडकम् ॥ १ ॥ ब्रह्मशिरस्तृतीयं च तुर्यं पाशुपतं मतम् । वायव्यं पञ्चमं ज्ञेयमाग्नेयं षष्ठकं स्मृतम् ॥ २ ॥ नारासिंहं सप्तमं च तेषां भेदा ह्यनंतकाः । ससंहारं सविक्षेपं शृणु द्रोण यथातथम् ॥ ३ ॥ वेदमात्रा सर्वशस्त्रं गृह्यते क्षिप्यतेऽथ वा । तत्प्रयोगं शृणु प्राज्ञ ब्रह्मास्त्रं प्रथमं शृणु ॥ ४ ॥ दादिदंताञ्च सावित्रीं विपरीतां जपेत्सुधीः । जह्वा पूर्वं निखर्वं चाभिमंत्र्य विधिवच्छरम् ॥ ॥ ५ ॥ क्षिपेच्छत्रुषु सहसा नश्यंति सर्वजातयः । बाला वृद्धाश्च गर्भस्था ये च योद्धुं समागताः ॥ ६ ॥ सर्वे ते नाशमायांति मम चैव प्रसादतः । यथाक्रमं दादिदंतं जपेत्संहारसिद्धये ॥ ७ ॥ ब्रह्मदण्डं प्रवक्ष्यामि प्रणवं पूर्वमुच्चरेत् । ततः प्रचोदयाज्ज्ञेयं ततो नो यो धियः क्रमात् ॥ ८ ॥ ततो धीमहि देवस्य ततो भर्गोवरेणियम् । सवितुस्तच्च योक्तव्यममुकशत्रूंस्तथैव च ॥ ९ ॥ ततो हनहनहुंफट् जह्वा पूर्वं द्विलक्षकम् । अभिमंत्र्य शरं तद्वत्प्रक्षिपेच्छत्रुषु द्रुतम् ॥ १० ॥ नश्यंति शत्रवः सर्वे यमतुल्या अपि ध्रुवम् । एतदेव विपर्यस्तं जपेत्संहारसिद्धये ॥ ११ ॥ ब्रह्मशिरः प्रवक्ष्यामि प्रणवं पूर्वमुच्चरेत् ॥ धियो यो नः प्रचोदयाद्भर्गो देवस्य धीमहि ॥ १२ ॥ तत्सवितुर्वरेणियं शत्रून्मे हनहनेति च । हुं फट् चैव प्रयोक्तव्यं क्षिपेद्ब्रह्मशिरस्ततः ॥ १३ ॥ पुरश्चर्यां पुरः कृत्वा त्रिलक्षं नियतः शुचिः । नश्यंति सर्वे रिपवः सर्वे देवासुरा अपि ॥ १४ ॥ इदमेव विपर्यस्तं प्रयोक्तव्यं विकर्षणे । अतः परं प्रवक्ष्यामि शस्त्रं पाशुपतं मम ॥ १५ ॥ यस्य विज्ञानमात्रेण नश्यंति सर्वशत्रवः । दादिदंतां च सावित्रीं प्रोच्य प्रणवमेव च ॥ १६ ॥ श्लींप शु हुंफट् अमुकशत्रून्हनहनहुंफट् । जह्वा पूर्वं द्विलक्षं च ततः पाशुपतं क्षिपेत् ॥ १७ ॥ पुनस्तदेव व्यस्तं स्यात्संहारे तां न योजयेत् । एतत्पाशुपतं शस्त्रं सर्वशत्रुनिवारणम् ॥ १८ ॥ वच्मि वायव्यमस्त्रं ते येन नश्यंति शत्रवः । ॐ वायव्ययावायव्ययाण्यौर्वायियावा तथा ॥ १९ ॥ अमुकशत्रुन्हनहनहुंफट् चैव प्रकीर्त्तयेत् । पूर्वमेव तथा जप्त्वा नियुतद्वितयं तथा ॥ २० ॥ पुनः संहाररूपेण संहारं च प्रकल्पयेत् ॥ अस्त्रं वायव्यकं नाम देवानामपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्जुन उवाच ॥ कृष्णकृष्ण महाभाग भक्तानामभयंकर ॥ त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥ २२ ॥
त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ २३ ॥

प्रकटीभूतं तेजः अभिप्रेक्ष्य समंताद्विलोक्य ततः प्राणापदं च अभिप्रेक्ष्य अर्जुनः कृष्णमुवाच ॥ २१ ॥ प्रस्तुतं विज्ञापयितुं प्रथमं स्तौति । कृष्णेति चतुर्भिः । संसृतेर्हेतोः दह्यमानानां तस्याः अपवर्ग अपवर्जयिता नाशक इत्यर्थः ॥ २२ ॥ यतः त्वमीश्वरः साक्षात् । कुतः यतः प्रकृतेः परः पुरुषः । तत्कुतः यतः आद्यः कारणम् ।

वारणम् ॥२१॥आग्नेयं संप्रवक्ष्यामि यतः परभयं ददेत् । ॐ अग्निस्त्यता हृदुभूं च शिवं वनाश्वाविणि च ह्रगादुतिदशरूपनः सदवेति ततः क्रमात् ॥ हादतितोयतिरामतथामसोहिवावानसुसेदवेदया च वदेदमुकादींस्ततो वदेत् ॥२२॥ पूर्वोक्तां च पुरश्चर्यां कृत्वा शस्त्रेभियोजयेत् । इमं मंत्रं पुनर्व्यस्तं संहारे चैव योजयेत् ॥२३॥ ॐ वज्रनखवज्रदंष्ट्रायुधाय महासिंहाय हुंफट् । पूर्वं जप्त्वा च लक्षं हि नारासिंहं च योजयेत् ॥:२४॥ सिंहरूपा स्तथा बाणाः पतंति शात्रवे वने । पूर्वोक्तेन प्रकारेण संहारं च प्रकल्पयेत् ॥२५॥ संक्षेपतो महाभाग तवोक्तानि महामते । भेदास्त्वेषां धनुर्वेदे ह्यनंताः परिकीर्तिताः ॥२६॥'' इति केदारखंडे द्रोणं प्रति श्रीशिवेनोक्तम् ॥ ॥ १९ ॥ अथेक्षणानंतरम् । उपस्पृश्याचम्य ॥ २० ॥ ततस्तेजसः । जिष्णुरर्जुनः । ''अर्जुनः फाल्गुनो ।जिष्णुः सव्यसाची धनंजयः । बीभत्सुर्विजयः कृष्णः किरीटी श्वेतवाहनः ॥ कपिध्वजश्च गांडीवी शिवाशिष्यश्च कर्णहा । '' इत्यभिधानात् । सर्वत इति द्वितीयार्थे तसिः । सर्वा दिशमित्यर्थः । ''अभिसर्वतसोः '' इत्याद्युक्तेर्द्वितीया । एकत्वं जात्यभिप्रायम् । सर्वत्र दिक्ष्वित्यर्थः ॥ २१ ॥ अत्र संभ्रमे वीप्सा कृष्ण कृष्णेति । यद्वा प्रवृत्तिनिमित्तभेदाभिप्रायेण द्विरुक्तिः । एकत्र सदानंदत्वमपरत्र प्रपन्नापन्नाशकत्वमिति विवेकः । न हि सदानंदस्वरूपस्य निजक्लेशाकर्षकस्य च तव पार्श्वे ममैतद्दुःखमुचितमिति भावः । ननु त्वमपि कृष्णोसि कथं मामेव कृष्णकृष्णेति ब्रूषे इति चेत्तत्राह–हे महाभागेति । मह्यंते पूज्यंते सर्वैरिति महाः । इंद्रदायो देवास्तैरासमंताद्भज्यते सेव्यते इति महाभागस्तत्संबुद्धौ तथा । तथा च नाममात्रेणैवाहं कृष्णो न तु महा भागोस्मीति भावः । त्वमपि पांडुराजपुत्रत्वान्महाभाग एवेति चेत्तत्राह–हे भक्तानामभयंकरेति। मया तु स्वभयमपि नापाकर्त्तुं शक्यते किमुतान्यस्यातस्त्वमेव संबुद्धिचतुष्टयो नाहमिति भावः। इत्यर्थ इति। ''वृजी वर्जने ''इत्यतो घञि रूपमेतदिति यतस्त्वमपवर्गरूपोसि तेनास्माकं संसृतेर्मोक्षमपि दास्यसि किमुतास्मादग्नेस्त्राणमात्रमिति भावः ॥ २२ ॥ तत्प्रकृतिपरत्वम् । अत्र संदर्भः । मायाहेतुकायाः संसृतेर्नाशकत्वेन मायातो विलक्षणं शक्तिं दर्शयति । त्वं साक्षात्पुरुषो भगवान् तथा य ईश्वरो अंतर्याम्याख्यः पुरुषः सोपि त्वमेव। तदेवमुभयास्मिन्नपि प्रकारे प्रकृतेः परस्तदसंगी । ननु कथं केवलानुभवानंदस्यापि तदनुभवित्वं यतो भगवत्त्वमपि लक्ष्यते। कथं वेश्वर त्वात्प्रकृत्यधिष्ठातृत्वेपि तदसंगित्वं तत्राह–मायां व्युदयस्येति । अव्यभिचारिण्या स्वरूपशक्त्या तामाभासशक्तिं दूरे विधाय तयैव स्वरूपशक्त्या कैवल्ये ''परावराणां परम आस्ते कैवल्यसंज्ञितः । केवलानुभवानन्दसंदोहो नि रुपाधिकः'' इत्येकादशोक्तरीत्या कैवल्याख्ये केवलानुभवानन्दे आत्मनि स्वरूपे स्थितः अनुभूतस्वरूपसुख इत्यर्थः । तदुक्तं षष्ठे देवैरपि ''स्वयमुपलब्धनिजसुखानुभवो भवान्'' इति । संदोहशब्देन चैकादशे वैचित्री दर्शिता । सा च शक्तिवैचित्र्यादेव भवतीति । अत एव सत्येव स्वरूपशक्तिः प्रकृतिर्नामात्र मायायास्त्रैगुण्यम् । एवमेव शक्तित्रयविवृत्तिः श्रीस्वामिभिरेव दर्शिता । ''परं प्रधानं पुरुषम् '' इत्यादिदेवहूति वाक्ये तत्र पुरुषस्यापि मायांतःपातित्वं तदधिष्ठातृतयोपचर्यते । एवं वस्तुतः तस्य तु तस्याः परत्वं यथा श्रीकपिलवाक्ये ''अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः । प्रत्यग्धामा स्वयं ज्योतिर्विश्वं येन समन्वितम् ॥ इति । त्रिशक्तिनिरूपणे विशेषजिज्ञासा चेद्भगवत्संदर्भो दृश्यः । अथवा श्रीवैकुंठे मायां निषेधन्नपि साक्षात्स्वरूपशक्तिमेवाह–त्वमिति । कैवल्ये मोक्षाख्ये श्रीवैकुंठलक्षणे आत्मनि स्वांश एव स्थितः । किं कृत्वा तत्रातिविराजमानया चिच्छक्त्या मायां दूरस्थितामपि तिरस्कृत्यैव । मतं चैतन्मायादिकं निषेधता श्रीशुकदेवेन ''प्रवर्त्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः । न यत्र माया किमुतापरे हरेरनुव्रता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एव जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥२४॥ तथाऽयं चावतारस्ते भुवो भारजिहीर्षया ॥ स्वानां चानन्यभावानामनुध्यानाय चासकृत् ॥२५॥ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहम् ॥ सर्वतोमुखमायाति तेजः परमदारुणम् ॥२६॥ श्रीभगवानुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितम् ॥ नैवासौ वेद संहारं प्राणबाध उपस्थिते॥२७॥न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्शनम् ॥ जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा॥२८॥सूत उवाच॥श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा॥स्पृष्ट्वाऽपस्तं परिक्रम्य ब्राह्मं ब्राह्माय संदधे॥२९॥

कारणत्वेप्यविकारितामाह। मायां व्युदस्य अभिभूय कैवल्यरूपः आत्मन्येव स्थितः ॥ २३ ॥ त्रिवर्गदातापि त्वमेवेत्याह। स इति। यस्त्वं मायामभिभूय स्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् विधत्से। वीर्येण प्रभावेण ॥ २४ ॥ तथा चानेनावतारेण तव साधुपक्षपातो लक्ष्यत इत्याह। तथेति। किं भूभारहरणं मदिच्छामात्रेण न भवति तत्राह। स्वानां ज्ञातीनाम् अनुध्यानाय च तथा अनन्यभावानाम् एकांतभक्तानां च ॥ २५ ॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति—किमिति। किमात्मकमिदं कुतो वा आयातीति। स्विद्वितर्के ॥ २६ ॥ इदं द्रोणपुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तत्प्रयोगे कुशल इत्यर्थः। यतः असौ उपसंहारं न वेद। एतच्च त्वं तु वेत्थ जानासि ॥ २७ ॥ प्रत्यवकर्शनं कृशत्वकरं निवर्तकमित्यर्थः। अतः तदस्त्रतेजः उन्नद्धमुत्कटम् ब्रह्मास्त्रतेजसैव जहि घातय। त्वत्प्रयुक्तं चास्त्रं तदुपसंहृत्य स्वयमुपशाम्येत—यतः त्वमस्त्रज्ञोऽसि ॥ २८ ॥ परे शत्रवः त एव वीराः तान् हंतीति तथाविधः फाल्गुनः अर्जुनः अपः स्पृष्ट्वा आचम्य तं

यत्र सुरासुरार्चिताः'' इति। ''मोक्षं परं पदं लिंगममृतं विष्णुमंदिरम्'' इति पाद्मोत्तरखंडे वैकुण्ठपर्यायाः। विश्वनाथः। ननु त्वन्मातुलेयोहं त्वत्सम एव। मैवं वादीरित्याह-त्वमिति। ननु त्वं प्रकृतेः पर इति किं प्रकृतिशब्देनाविद्यां मायां वा ब्रूषे तत्राह। चिच्छक्त्या स्वरूपभूतया शक्त्या सुभगया पद्ममहिष्येव मायां विद्याविद्येति वृत्तिद्वयवतां दुर्भगामिव स्वशक्तित्वात्प्राप्तां व्युदस्य दूरीकृत्य तया शक्त्या सहित एव त्वमात्मनि चिन्मये स्वरूपे स्थितः। ननु चिच्छक्त्येत्यस्याः कारणत्वेन मत्तो भिन्नतया स्थितत्वं कथं ममात्मनि स्थितत्वमित्यत आह-कैवल्य इति। केवलस्य भावः कैवल्यं तस्मिन्निति तया सहितत्वेपि तव कैवल्यमेव तस्याः स्वरूप शक्तित्वात्। तस्मिंश्च सति त्वमात्मनि स्थितो वस्तुत एवेति भावः। अतः स्वरूपभूता चिच्छक्तिः सा त्वत्तः सदाऽभिन्नैव त्वद्देहेंद्रियपरिकरादिरूपेण तिष्ठति ''परास्य शक्तिर्बहुधैव श्रूयते स्वाभाविकी ज्ञानबल क्रिया च'' इति श्रुतेः। माया तु छायेव त्वदस्वरूपत्वात् ज्ञानाज्ञानगुणमयजगद्रूपेण वर्तत इति त्वत्तो भेद एव तस्या मायायास्त्वच्छक्तित्वात्कचिदभेदोपीति भिन्नाभिन्नरूपा सा शक्तिरित्यर्थः। मायैव शक्तिरेका नान्येति मतं परास्तम्। पुरुषपदं तीर्थेन प्रकारांतरेण व्याख्यातम्। पापान्यौषददहदिति पुरुषः ''सर्वान्पाप्मन औषत्तस्मात्पुरुषः'' इति श्रुतेः। पुरु बहु सरतीति वा पुरुषः। ''स भगवान्कस्मिन्प्रतिष्ठित इति स्वे महिम्नि'' इति श्रुतिर्हि कैवल्ये स्थित इह प्रमाणम् ॥ २३ ॥ आदिनाऽर्थकामग्रहः ॥ २४ ॥ यथा भगवतस्तवान्येवतारा: पुंसामनुध्यानादिना मोक्षहेतवस्तथायमप्यवतारः प्राकट्यं परमभक्ताया भुवो भारजिहीर्षया जातोऽप्यन्येषां स्वानां भक्तानामसकृदनुऽध्यानाय स्यादित्यतो मोक्षं साधयतस्तव भक्तैहिकदुःखनिवारकत्वं किं वर्णनीयमिति भावः ॥ २५ ॥ यत्तेजः परमदारुणं सर्वतोमुखं सर्वदिङ्मुखं तदिह किं स्वित्कुतो वेति पृष्टे भगवानुवाच। कंचिद्देवं पृच्छ किमिदमिति चेत्तत्राह--हे देवदेवेति। त्वं तु देवानामपि देवः। न हि त्वत्तः परः कश्चिद्देवोस्तीति भावः ॥ २६ ॥ द्रोणपुत्रस्याश्वत्थाम्नः। इत्यर्थ इति। प्राणसंकटे कार्याकार्यज्ञानं नश्यतीति भावः ॥ २७ ॥ इत्यर्थ इति। कृशो भूत्वा स्वयमेव नश्यतीति भावः। यतोऽस्यास्त्रस्यान्यदस्त्रं निवर्त्तकं नास्त्यतो हेतोः ॥ २८ ॥ फाल्गुनः फाल्गुनीनक्षत्रजातोऽर्जुनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संहत्याऽन्योऽन्यमुभयोस्तेजसी शरसंवृते ॥ आवृत्य रोदसी खं च ववृधातेऽर्कवह्निवत् ॥ ३० ॥ दृष्ट्वाऽस्त्रतेजस्तु तयोस्त्रींल्लोकान्प्रदहन्महत् ॥
दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत ॥३१॥ प्रजोपप्लवमालक्ष्य लोकव्यतिकरं च तम् ॥ मतं च वासुदेवस्य संजहाराऽर्जुनो द्वयम् ॥३२॥
तत आसाद्य तरसा दारुणं गौतमीसुतम् ॥ बबंधाऽमर्षताम्राक्षः पशुं रशनया यथा ॥ ३३ ॥ शिबिराय निनीषंतं दाम्ना बद्ध्वा रिपुं बलात् ॥
प्राहार्जुनं प्रकुपितो. भगवानंबुजेक्षणः ॥ ३४ ॥ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि ॥ योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥
॥ ३५ ॥ मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ॥ प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ॥ ३६ ॥

श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य आज्ञाय ब्रह्मास्त्रं निवर्तयितुम् ॥ २९ ॥ ततश्च उभयोर्ब्रह्मास्त्रयोः तेजसी शरैः संवृते संवेष्टिते परस्परं मिलित्वा ववृधाते अवर्धेताम् । किं कृत्वा रोदसी द्यावापृथिव्यौ खमंतरिक्षं च आवृत्य । यथा प्रलये संकर्षणमुखाग्निः उपरि स्थितोऽर्कश्च संहत्य वर्धेते तद्वत् ॥ ३० ॥ तयोः द्रौणिफाल्गुनयोः । तेन दह्यमानाः सांवर्तकं प्रलयाग्निम् अमंसत मेनिरे ॥ ३१ ॥ लोकानां व्यतिकरं व्यत्ययं नाशमित्यर्थः । वासुदेवस्य मतं च आलक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान् ॥ ३२ ॥ गौतमवंशजा गौतमी कृपी तस्याः सुतम् । अमर्षेण कोपेन ताम्रे अक्षिणी यस्य सः । निष्कृपत्वे दृष्टांतः—पशुं यथेति । तस्य बंधनं धर्म इत्यत्र दृष्टांतः—यथा याज्ञिकः पशुमिति । रशनया रज्वा बध्नाति ॥ ३३ ॥ शोकरोषादियुक्तस्यापि अर्जुनस्य धर्मनिष्ठाख्यापनाय श्रीकृष्णवाक्यं—तदाह षड्भिः—शिबिराय राजनिवेशाय नेतुमिच्छं तमर्जुनं प्रकुपित इवेति ॥ ३४ ॥ अनागसो निरपराधान् ॥ ३५ ॥ रिपोरपि सुप्तस्य बालस्य च वधो न धर्म इत्यन्यार्थैर्दर्शयति—मत्तमिति । मत्तं मद्यादिना ।

ततश्चार्जुनकृतब्रह्मास्त्रप्रयोगोत्तरञ्च ॥२९॥३०॥ दृष्ट्वेति । प्रदहत् प्रदग्धुमारभमाणम् । दह्यमाना दग्धुमारभमाणाः । ''वर्त्तमानसामीप्ये वर्त्तमानवद्वा'' इति लट् ॥ ३१ ॥ इत्यर्थ इति । ''अथ व्यतिकरः पुंसि व्यसनव्यतिषंगयोः । समूहनाशयोर्देशे योगराजकरे कुधि'' इति कोशाद्व्यतिकरेण नाशो ग्राह्य इति भावः । मतं चेति । प्रथमं भगवतास्त्रप्रतिघातनमात्रं समादिष्टं न तु संहरणम् । तच्च नूनं परास्त्रं न संहर्त्तुं शक्यमिति स्वशस्त्रेणैक्यं विधाय संहरणाभिप्रायेण । तत्तु तदाज्ञामात्रेण कृत्वापि पश्चात्प्रत्युत ताभ्यां वृद्धाभ्यामुपद्रवे सति स्थगितायमानमर्जुनं प्रति संहारोनुमत इति भावः ॥ ३२ ॥ ततोऽस्त्रद्वयसंहारोत्तरम् । ''रज्ज्वां वै रशना क्षुद्रघण्टिकाजिह्वयोरपि'' इति कोशात् ॥ ३३ ॥ ''स्कंधावारे तु शिबिरम्'' इत्यभिधानात्सेनानिवेशस्थानं स्कंधावारः । अरुणेक्षण इत्यनुक्त्त्वांबुजेक्षण इत्युक्ते बहिरेव प्रकुपित इत्यभिप्रायेण स्वामिचरणैः प्रकुपित इवेत्युक्तम् ॥ ॥ ३४ ॥ पार्थेति । पृथाया मत्पितृभगिन्याः पुत्रत्वात्तव ममापि तव दुःखेन दुःखमत इमं मा रक्षेति भावः । यद्वा पृथाया अस्मद्वंशजायाः पुत्रेण त्वया ब्रह्महत्या कर्त्तुं नोचितेति गूढोभिप्रायः ॥ शयाना भुंजते यवना इतिवत्सुप्तानीति । न हि शयानैर्निद्राग्रस्तैर्भोक्तुं शक्यते किं तु शयनोद्यता एव भुंजत इत्यर्थः । तथा सुप्तान् स्वप्तुमुद्यतान् सुप्तमस्ति कर्त्तव्यत्वेन येषामिति मत्वर्थीयाच्चायमर्थो लभ्यः । अन्यथा महाभारतश्रुततत्कर्तृकयुद्धश्रुतिविरोधस्स्यात् । बालकानिति । शिष्यपुत्रत्वेन बालकवत्पालनीयान्न वधार्हानित्यर्थः । न तु ते बालका महाभारते तेषामतिशौर्यत्वश्रवणात् । यद्वा बलमेव बालं तेन कायान्ति युद्धे गर्जंतीति बालकाः । यद्वा बलानां सेनानां समूहो बालं तत्किरंति विक्षिपंति कृण्वंति हिंसंतीति वा बालकाः । ''कॄ विक्षेपे कृ हिंसायां'' चेत्युभयोर्डप्रत्यये रूपम् । तेन महारथा इत्यर्थः । अत्र तीर्थेन ''अनागसं प्रसुप्तं च बालकं हन्ति यो नरः। स खंडशो विधातव्य इत्येवं मनुरब्रवीत् '' इति श्लोकोपि प्रमाणितः ॥ ३६ ॥ मद्यादिना धत्तूरकादिग्रहः । अनवहितमसावधानम् । ग्रहः पिशाचादिवार्तो रोगः । आदिनेष्टवियोगादिग्रहः । बालं दिग्देशादि ज्ञानशून्यम् । जडं विवेकशून्यं वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥ ३७ ॥ प्रतिश्रुतं च भवता पांचाल्यै शृण्वतो मम ॥ आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥ ३८ ॥ तदसौ वध्यतां पाप आतताय्यात्मबंधुहा ॥ भर्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ॥ ३९ ॥ एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः ॥ नैच्छद्धंतुं गुरुसुतं यद्यप्यात्महनं महान् ॥ ४० ॥ अथोपेत्य स्वशिबिरं गोविंदप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान्हतान् ॥ ४१ ॥ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन ॥ निरीक्ष्य कृष्णाऽपकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥ ४२ ॥

प्रमत्तम् अनवहितम् । उन्मत्तं ग्रहवातादिना । जडम् अनुद्यमम् । प्रपन्नं शरणागतम् । विरथं भग्नरथम् ॥ ३६ ॥ तद्वधो दंडरूपः तस्यैव श्रेयः पुरुषार्थः । यद्यतः दंडप्रायश्चित्तरहितात् दोषात् स पुमानधो यातीति । तथा च स्मरंति—"राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः । विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथा॥" इति ॥ ३७ ॥ ३८ ॥ ३९ ॥ यद्यपि चोदितः । तथापि हंतुं नैच्छत् । आत्महनं पुत्रहंतारमपि । यतः महान् ॥ ४० ॥ गोविंदः प्रियः सारथिः यस्य सः । आत्मजान् शोचंत्यै ॥ ४१ ॥ तथा परिभवेन आहृतमानीतम् । कर्मणः जुगुप्सितेन दोषेण अवाङ्मुखम् । अपकृतम् अपकारिणम् । कृपया निरीक्ष्य । वामः शोभनः

भीतं युद्धमार्गादपसृतम् ॥ ३६ ॥ खल इंद्रियारामः अघृणो निर्दयः । दंडस्य श्रेयस्त्वे प्रमाणमाह-तथा चेति । स्मरंति भृग्वादय इति शेषः । स्पष्टार्थो स्मृतिः ॥ ३७ ॥ प्रतिज्ञा च रक्षणीयेत्याह-प्रतिश्रुतं चेति । प्रतिश्रुतं प्रतिज्ञातम् । पांचाल्यै द्रौपद्यै । हे मानिनीति । यथा त्वं प्रसन्ना स्यास्तथा ते मानं करिष्यामीति भावः॥३८॥यद्यतोसौ पापस्तत्तस्माद्वध्यतामित्यन्वयः । आत्मबंधुहा पुत्रहा "आत्मबंधुः सुतस्तोको राजीवोंगज आत्मजः" इत्यभिधानात् । वीरेति । न हि वीरैर्ब्राह्मणो हन्यत इति गूढोभिप्रायः । यद्वा वीरेणैव वैरनिर्यातनं कर्तुं शक्यो नान्येनेति भावः । कुलपांसनः कुलनिंदाहेतुः ॥ ३९ ॥ धर्मं परीक्षमाणेन यद्यपि चोदितस्तदपि हंतुं नैच्छत् । आत्महनं पुत्रहन्तारमपि । "आत्मा वै पुत्रनामासि" इति श्रुतेः । यतो महान् कृष्णस्य स्वभावाभिज्ञः । तस्य चायं स्वभावः । स्वयं सर्वज्ञोपि धर्मादिनिष्ठाख्यापनाय तद्वतो भक्तान्परीक्षत इति । तत्र "मैनं पार्थार्हसि त्रातुम्" इत्यादिना वीररौद्ररसं प्रदर्श्य धर्मवन्तमर्जुनं यथा परीक्षते स्म तथा "भर्तुः शुश्रूषणं स्त्रीणां परो धर्मः" इत्यादिना "भवतीनां वियोगो मे न हि सर्वात्मना क्वचित्" इत्यादिना "अहं हि सर्वभूतानामादिरंतोन्तरं बहिः" इत्यादिना च कर्मज्ञानयोगौ प्रदर्श्य प्रेमवतीर्गोपीः "वरं च मत्कंचन मानवेंद्र वृणीष्व" इत्यादिना "वरं वृणीष्व भद्रं ते कामपूरोऽस्म्यहम्" इत्यादिना च भोगैश्वर्यादीन्प्रदर्श्य भक्तिमतः पृथुप्रह्लादादीन् "दीयमानं न गृह्णन्ति" इत्यादिनाऽन्यानपि भक्तान्परीक्षांचकारेवेति । तदीयसिद्धभक्ता अपि तथा परीक्षन्ते । तथा हि शुक एव षष्ठस्कंधे पापनिस्तारार्थं पृष्टः प्रायश्चित्तमात्रमुक्त्वा परीक्षितः सिद्धांन्ताभिज्ञतां नवमे श्रीकृष्णलीलां संक्षेपेणोक्त्वा लीलौत्सुक्यं द्वादशे ब्रह्मज्ञानमुपक्षिप्य भक्तिनिष्ठां परीक्षां चक्रे इति न तत्रतत्र स्पष्टेर्थे तात्पर्यम् ॥ ४० ॥ अथ कृष्णवाक्यश्रवणोत्तरं तमश्वत्थामानं न्यवेदयत्प्रादर्शयत् ॥ ४१ ॥ कृष्णा द्रौपदी ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उवाच चाऽसहंत्यस्य बंधनानयनं सती ॥ मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥४३॥ सरहस्यो धनुर्वेदः सविसर्गोपसंयमः ॥ अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ४४ ॥ स एष भगवान्द्रोणः प्रजारूपेण वर्तते ॥ तस्याऽऽत्मनोऽर्धं पत्न्याऽऽस्ते नान्वगाद्वीरसूः कृपी ॥४५॥ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलम् ॥ वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ॥ ४६ ॥ मारोदीदस्य जननी गौतमी पतिदेवता ॥ यथाऽहं मृतवत्साऽऽर्ता रोदिम्यश्रुमुखी मुहुः ॥४७॥ यैः कोपितं ब्रह्मकुलं राजन्यैरकृतात्मभिः ॥ तत्कुलं प्रदहत्याशु सानुबंधं शुचाऽर्पितम् ॥४८॥ सूत उवाच ॥धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं समं महत् ॥ राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः॥४९॥नकुलः सहदेवश्च युयुधानो धनंजयः भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः॥५०॥तत्राहाऽमर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः ॥ न भर्तुर्नात्मनश्चार्थे योऽहन्सुप्ताञ्छिशून्वृथा॥५१॥

स्वभावः यस्याः सा ॥ ४२ ॥ ननाम चोवाच चेति चकाराभ्यां संभ्रमः सूचितः । बंधनेनानयनमसहमाना ॥ ४३ ॥ सरहस्यः गोप्यमंत्रसहितः । विसर्गः अस्त्रप्रयोगः उपसंयमः उपसंहारः ताभ्यां सहितः अस्त्रसमूहश्च ॥ ४४ ॥ किं च तस्य द्रोणस्य आत्मा देहः तस्या अर्धं कृपी आस्ते । अर्धत्वे हेतुः—पत्नी । 'अर्धो वा एष आत्मनो यत्पत्नी' इति श्रुतेः 'जायापती अग्निमादधीयाताम्' इतिश्रुतेरुभयोरेकाकारत्वावगमाच्च । ननु भर्तरि मृते सा कथं जीवति तत्राह—नान्वगात् भर्तारं—यतः वीरसूः पुत्रवती ॥४५॥ तत् तस्माद्गौरवं गुरोः कुलं भवद्भिः कर्तृभिः वृजिनं दुःखं प्राप्तुं नार्हति, किं तु पूज्यं वंद्यं च ॥४६॥ मृतवत्सा मृतपुत्रा ॥४७॥ विपक्षे,दोषमाह—यैरिति । तेषां राजन्यानां कुलं कर्म कथं भूतं ! सानुबंधं सपरिवारम् । शुचा शोकेन अर्पितं व्याप्तं च ब्रह्मकुलं कर्तृ प्रदहति ॥ ४८ ॥ धर्म्यमित्यादयो वचसः षड्गुणाः पूर्वश्लोकषट्के द्रष्टव्याः । तत्र धर्म्यं धर्मादनपेतं मुच्यतांमुच्यतामिति । न्याय्यं न्यायादनपेतं—सरहस्य इत्यादि । सकरुणं तस्यात्मनोऽर्धमिति । निर्व्यलीकं तद्धर्मज्ञेति । समं मा रोदीदिति दुःखसाम्योक्तेः । महद्यैः कोपितमिति निष्ठुरोक्त्या हितोपदेशात् । एवं भूतं राज्ञ्याः वचो हे द्विजाः प्रत्यनंदनुमोदितवान् ॥ ४९ ॥ नकुलादयश्च प्रत्यनंदन् । युयुधानः सात्यकिः ॥ ५० ॥ तस्य तथाविधस्य द्रौणेः वध एव श्रेष्ठः । अन्यथास्य नरकपातप्रसंगात् । तदाह—न भर्तुरिति । अहन् जघान ॥ ५१ ॥

अस्याश्वत्थाम्नः। सती तद्बंधनासहत्वादियं भगवता परीक्षितादर्जुनादपि धार्मिकत्वे साधुत्वव्रती । एष यतः सर्वेषां वर्णाश्रमाणां गुरुरस्माकं तु नितरामतिशयेन गुरुः। अहो गुरोर्बन्धनमतीवानुचितं कृतवानस्यातो मुच्यतामिति संभ्रमे वीप्सा ॥ ४३ ॥ यदनुग्रहाद्यत्कृपातः ॥ ४४ ॥ प्रजारूपेण "आत्मा वै जायते पुत्रः" इति श्रुतेः । भगवान् तद्वत्पूज्यः । स्वसाध्वीत्वमुद्भावयति-किं चेति । श्रुतिः स्पष्टार्था । आदधीयातामाधानं कुर्वीयाताम् । एककारकत्वमत्राग्न्याधाने कर्तृत्वं तस्यावगमाद्दर्शनात् । अत्राक्षिपति-नन्विति। पुत्रहीना तु भर्त्तारं विना स्वयोगक्षेममपश्यंत्यनुगमनं कुर्यात्समर्थपुत्रायास्तन्नोचितमित्याह—वीरसूरिति । ब्राह्मण्या अनुगमनं वैकल्पिकमिति भरतोपाख्याने पञ्चमस्कंधे व्याख्यास्यामः ॥४५॥ यतोऽयं गुरुपुत्रस्ततो हेतोः । हे धर्मज्ञेति। त्वं तु धर्मं गुरुसेवातदपराधसहनादिलक्षणं जानास्येवेति भावः । पुनरैहिकामुष्मिकभयं द्योतयंत्याह—हे महाभागेति । एतादृशकर्मणा महाभागत्वं न स्थास्यतीति भावः । "वृजिनं कल्मषे दुःखे केशे ना कुटिले त्रिषु" इत्यभिधानात् । अभीक्ष्णशः मुहुर्मुहुः पूज्यम् ॥ ४६ ॥ "वत्सः पुत्रे प्रिये चाल्पे वक्षस्तर्णकयोरपि" इति धरणिः ॥ ४७ ॥ विपक्षे पूर्वोक्ताकरणे । अकृतात्मभिरशिक्षितबुद्धिभिः ॥ ४८ ॥ हे द्विजाः शौनकादयः । यूयं हि द्वितीयजन्मवत्त्वादुपनयनोत्तरं शास्त्राभ्यासबलेनैतज्जानंत्येवेति भावः ॥ ४९ ॥ ५० ॥ तत्र तदाऽमर्षितो जातक्रोधः । तथाविधस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ॥ आलोक्य वदनं सख्युरिदमाह हसन्निव ॥ ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः ॥ मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥५३॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियाम् ॥ प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च ॥ ५४ ॥ सूत उवाच ॥ अर्जुनः सहसाऽऽज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ॥ ५५ ॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभम् ॥ तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥ ५६ ॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबंधूनां वधो नान्योऽस्ति दैहिकः ॥ ५७ ॥

चतुर्भुजोक्तेरयं भावः—भीमे तं हंतुं प्रवृत्ते द्रौपद्यां च सहसा तन्निवारणे प्रवृत्तायाम् उभयोः संवरणाय आविष्कृतचतुर्भुज इति । संदिहानस्य सख्युरर्जुनस्य ॥ ५२ ॥ वधार्हणः वधार्हः । मयैव शास्त्रकृता "ब्राह्मणो न हंतव्यः"तथा—"आततायिनमायांतमपि वेदांतपारगम् । जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत्॥" इति च वदता । तदुभयमपि अनुशासनं परिपालय ॥ ५३ ॥ तव च प्रतिज्ञां पूरयेत्याह—कुर्विति । प्रियां सांत्वयता त्वया यत् प्रतिश्रुतं हननं तच्च सत्यं कुरु, प्रियं च कुरु । मह्यं मम । तत्र वधे भीमस्य प्रियं भवति, अवधे द्रौपद्याः, द्वये श्रीकृष्णस्य॥ ५४॥ हार्दमभिप्रायमाज्ञाय ज्ञात्वा न ह्यशक्यमुभयं विदध्यादतोऽस्यायमभिप्राय इति ज्ञात्वेत्यर्थः । असिना खड्गेन । मूर्धन्यं मूर्धनि जातम्। सहमूर्धजं सकेशम्॥ ५५॥ मणिना च हीनं निरयापयन्निःसारितवान्॥ ५६॥ अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह । वपनमिति ॥ ५७॥

बालहंतुस्तत्तथाविधत्वम् । भर्तुर्दुर्योधनस्य आत्मनः स्वस्य च । श्यंति तनूकुर्वंति शत्रुबलानीति शिशवस्तान् । "श्यतेः कुः सन्वच्च" इति सूत्रेण रूपसिद्धेः । महाबलानित्यर्थः । यद्वा शिशूनिति । पित्रपेक्षयाऽशीतिवर्षोऽपि शिशुरेवेति भावः । "शिशुर्वर्षत्रयो बाल" इति यथा श्रुतार्थांगीकारे महाभारतश्रुततत्पुरुषार्थविरोधः स्यात्॥ ५१ ॥ हसन्निवेति।अद्य सखे ते बुद्धेः स्सौक्ष्म्यमहं परीक्षिष्ये इत्येतद्व्यंजकं स्मितमात्रमाविष्कुर्वन्न तु हास्यमिति भावः ॥ ५२ ॥ जिघांसाऽस्यास्तीति जिघांसी जिघांसंतमियाद्धच्छेदित्यर्थः । आयांतमुद्यतम् । अत एवोद्यतस्य द्रोणस्य वधोऽनुमतो न तु बद्धस्यास्येत्यर्थः । ब्रह्मबंधुत्वमप्याततायित्वादेवास्य विवक्षितं न वस्तुतः ॥ ५३ ॥ ५४ ॥ उभयं वधावधं विदध्यादयं कुर्यात् । एतदशक्यं न हि । अतो हेतोरस्य भगवतोऽयमभिप्रायः । इत्यर्थ इति । "आहरिष्ये शिरस्तस्य" इति मया प्रतिज्ञातोऽस्य शिरश्छेद एव "कुरु प्रतिश्रुतं सत्यम्" इति वदता भगवताप्यभिप्रेतः । पुनश्च पांचाल्याः प्रियं कुर्विति वदता शिरसो न च्छेदश्च विहितोऽतो मयेत्थमुभयमेव कर्त्तव्यमिति निश्चित्येति भावः । तेन शिरस्थमपि वस्तु लक्षणया शिरःशब्देनोच्यते इति शिरश्छेद एव अभिधया तु न शिरश्छेद इत्यश्वत्थाम्नो वधोऽवधश्च कृत इत्याशयः । यत्तु भारते सौप्तिकपर्वणि व्यासेनोक्तमश्वत्थाम्ने "मणिं चैव प्रयच्छाद्य यस्ते शिरसि तिष्ठति । एतदादाय ते प्राणान्प्रतिदास्यंति पांडवाः ॥" इत्याकर्ण्याश्वत्थाम्ना बहूनि वाक्यान्युक्त्वा "प्रदायाथ मणिं द्रौणिः पांडवानां महात्मनाम्" इत्यत्राप्ययमेवार्थो लभ्यते । न ह्यत्र स्वहस्तेन तेन मणिर्दत्त इत्युक्तं किं तु प्रदायेति । तथा च तेनोक्तं मम शिरसो मणिर्गृह्यतामित्युक्तेऽर्जुनेन सहजो मणिरसिनोद्धृतस्सकेश इति । यद्वाऽसिना सह मणिं सकेशं जहार स्वीकृतवान् । तेन शिरस उत्पाद्य सकेशो मणिरसिश्च दत्तः । अत एव द्रौपद्यै भीमेनोक्तं तत्रैव "वियोजितश्च मणिना भ्रंशितश्चायुधं भुवि" इति । द्विजस्येत्युक्त्यायमेव ब्राह्मणवध इति ध्वनितम् ॥ ५५ ॥ तेजसा तेजोवता मणिना । यद्वा तेजसा शरीरकांत्या मणिना च ॥ ५६ ॥ अनेन मणिग्रहणादिना वपनं मुंडनं द्रविणस्य हिरण्यादेरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ॥ ५८ ॥ इति श्रीभा० म० प्रथ० सुतबालघातिद्रौणि निग्रहो नाम सप्तमोऽध्यायः ॥ ७ ॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छताम् ॥ दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः ॥ १ ॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम् ॥ गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥ ३ ॥ सांत्वयामास मुनिभिर्हतबंधूञ्छुचार्पितान् ॥ भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम् ॥४॥ साधयित्वाऽजातशत्रोः स्वं राज्यं कितवैर्हृतम् ॥ घातयित्वाऽसतो राज्ञः कचस्पर्शक्षतायुषः ॥ ५ ॥

निर्हरणं दाहार्थं नयनम् ॥ ५८ ॥ इति श्रीमद्भागवते प्रथमस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे कुपितद्रौणेरस्त्राद्रक्षा परीक्षितः ॥ श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते ॥१॥ ते पांडवाः संपरेतानां मृतानां गंगायामुदकं दातुं सकृष्णा श्रीकृष्णेन सहिताः स्त्रियः स्त्रीः पुरस्कृत्याग्रतः कृत्वा । तस्मिन्कार्ये स्त्रीपुरःसरत्व विधानात् ॥ १ ॥ निनीय दत्वा । हरिपादाब्जरजोभिः पूता या सरिद्गंगा तस्या जले । पुनर्ग्रहणादादावपि स्नाता इति गम्यते ॥ २ ॥ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितम् । पुत्रशोकार्तामिति तिसृणां विशेषणम् ॥ ३ ॥ मुनिभिः सहितः ॥ ४ ॥ कितवैर्धूर्तैर्दुर्योधनादिभिः । द्रौपद्याः कचग्रहणादिना क्षतं नष्टमायुर्येषां तान् ॥ ५ ॥

दानं ग्रहणं स्थानान्निर्यापणं देशान्निष्कासनम् । दैहिकः शिरश्छेदशूलारोपणकर्णनासादिकर्त्तनरूपो वधो ब्राह्मणस्य नास्तीत्यर्थः । सहमूर्द्धजमित्युक्त्या वपनं मण्यादानेन द्रविणादानं, शिबिरान्निर्यापणेन स्थानान्निर्यापणं चेति त्रयमेवात्र संपादितमिति । महाभारते हि भीमसेन एव तद्वधार्थं गतः । ''मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने'' इत्यश्वत्थामोक्तेः '' तमभ्यधावत्कौंतेयः प्रगृह्य सशरं धनुः । भीमसेनो महाबाहुः'' इत्यतः पूर्वमुक्तेश्च । यद्य पीत्थं तथापि श्रीकृष्णाज्ञयाऽर्जुनोपि गतस्तेनैवास्त्रं प्रतिसंहृतमिति ज्ञेयम् । ''अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते । द्रोणोपदिष्टं तस्यायं कालः संप्रति पांडव ॥'' इति श्रीकृष्णोक्तिमाकर्ण्यास्त्रवारणार्थमस्त्रमर्जुन एव युयुज इति सर्वं सौप्तिकपर्वणि विस्तृतमस्तीत्युपरम्यते ॥५७॥ कृष्णया द्रौपद्या । आदिना जलपिंडदानादिग्रहः ॥५८॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे सप्तमोऽध्यायः ॥७॥ श्रीकृष्णेन परीक्षितो रक्षेत्यन्वयः ॥(१)॥ अथ निर्हरणाद्यनंतरम् ॥ १ ॥ २ ॥ तत्र गंगातटे । पुत्रशोकार्त्तामिति तिसृणां विशेषणम् । गांधार्या दुर्योधनादयः, पृथायाः कर्णः, कृष्णाया द्रौपद्याः प्रतिविंध्यादयः । कृष्णापदेन सुभद्रापि गृह्यते तस्या अभिमन्युरिति नामानः पुत्रास्तेषां तस्य तस्य च शोकेनार्ताम् ॥ ३ ॥ मुनिभिर्द्वारभूतैः । यद्वा तैः सह सांत्वयामास तत्तच्छास्त्रादिवाक्यैर्बोधयामास । हता बंधवो येषां तान्युधिष्ठिरादीन् । अप्रतिक्रियां दुर्निवार्याम् । ''नांतकस्य क्रिया कापि नापराधो न च त्रपा । न गौरवं भयं प्रीतिर्भूतसंघातमश्नुते ॥'' इत्यादिवाक्यात् । ''समुद्रा यद्रथाघातजाताः सोपि प्रियव्रतः । अदर्शनं गतो भागीरथ्या नेता भगीरथः ॥ येन ग्रामादिरचना कृता सोपि पृथुर्नृपः । कालेनादर्शनं यातः । का कथान्यनृणामिह ॥'' इत्यादिबहुविधवाक्यैः सांत्वनं चकारेत्यर्थः ॥ ४ ॥ कचानां द्रौपदीकेशानां स्पर्शेन हतमायुर्येषां दुःशासनदुर्योधनादीनां तान् । अत्र तीर्थेन सुयोधनादीनामजातसंज्ञावत्वे ''सुयोधनादयः सर्वे त्वजाता जज्ञिरे घटात् । व्यासेनानंतवीर्येण मार्त्तण्डाधिकतेजसा'' इति ग्रंथांतरीयश्लोकः प्रमाणत्वेन न्यस्तः । तथा चाजाता दुर्योधनदुःशासनाद्याः शत्रवो यस्य स तथा । तस्य युधिष्ठिरस्य स्वं पितृपितामहक्रमात्प्राप्तम् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याजयित्वाऽश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥ ७ ॥ गंतुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः ॥ उपलेभेऽभिधावंतीमुत्तरां भयविह्वलाम् ॥ ८ ॥ पाहिपाहि महायोगिन्देवदेव जगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परम् ॥ ९॥ अभिद्रवति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् ॥ १० ॥ सूत उवाच ॥ उपधार्य वचस्तस्या भगवान्भक्तवत्सलः ॥ अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ ११ ॥ तर्ह्येवाऽथ मुनिश्रेष्ठ पांडवाः पंच सायकान् ॥ आत्मनोऽभिमुखान्दीप्तानालक्ष्या स्त्रानुपाददुः ॥ १२ ॥

याजयित्वेत्यादि भाविकथसंक्षेपः । शतमन्योः शतक्रतोरिव ॥ ६ ॥ शैनेयः शिनेर्नप्ता सात्यकिस्तेन चोद्धवेन च संयुतः ॥ ७ ॥ रथमास्थितः सन्नुत्तरां परीक्षिन्मातरं भयेन विह्वलां व्याकुलां अभिमुखं धावंतीमुपलेभे ददर्श ॥ ८ ॥ उत्तरा श्रीकृष्णं प्रार्थयते । पाहिपाहीति द्वाभ्याम् । अन्यस्तु प्रार्थनायोग्यो नास्तीत्याह । त्वत् त्वत्तोऽन्यमभयं भयरहितं न पश्यामि यत्र लोके । परस्परमन्योऽन्यम् । मृत्युर्भवति ॥ ९ ॥ तत्र प्रस्तुतं भयमावेदयति । अभिद्रवत्यभिमुखमायाति । तप्तमायसं लोहमयं शल्यं यस्य सः । अतिकार्पण्येनाह । काममिति । कामं यथेच्छम् ॥ १० ॥ पराभवेनातिकुपितस्य द्रौणेरपांडवं पांडवशून्यमिदं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्यत ॥ ११ ॥ अत एव

उत्तमाः कल्पकाः सामग्र्यो यद्वोत्तमा व्यासादयः कल्पकाः कारयितारो येषु तैरश्वमेधैः त्रिभिरिति एकस्मिन्नेव यागे त्रिगुणदक्षिणदानोदकस्यैव यागस्य त्रियागत्वं जातमिति महाभारतेऽश्वमेधपर्वणि विवृतम् । वाक्यानि चह विस्तृतिभयान्नोदाहृतानि । तस्य युधिष्ठिरस्य यशः शतं मन्यवो यज्ञा यस्य स तथा तस्य । ''मन्युर्यज्ञे हरेः क्रुधि'' इत्यभिधानात् । यथा वामन इंद्रयशो विस्तृतवांस्तथा श्रीकृष्णोपि युधिष्ठिरस्येत्यर्थः ॥६॥ आदिना धौम्यादिग्रहः ॥ ७ ॥ हे ब्रह्मन्निति मत्कथनात्पूर्वमपि त्वं तपोबलेनैतज्जानासीति भावः ॥ ८ ॥ वीप्सात्र संभ्रमे । किं यामीति चेत्तत्राह-हे महायोगिन्निति । योगिनः ''अनागतमतीतं च वर्त्तमानमतींद्रियम् । विप्रकृष्टं व्यवहितं सम्यक्पश्यन्ति योगिनः'' इति वाक्यात्सर्वज्ञाः संति । त्वं तु महायोग्यतां जानास्येवेति भावः । तर्हि रक्षासमर्थास्तु देवाः संतीति चेत्तत्राह-हे देवदेवेति । त्वं तु देवानामपि देव इति भावः । ननु देवदेव इंद्रो महादेवो वास्ति नाहमिति चेत्तत्राह-हे जगत्पते इति । स्तां तौ देवदेवौ जगत्पाता त्वमेवासि । तथा च सर्वजगत्पातुस्ते मद्गर्भरक्षणं त्वल्पतरमेवेति भावः। यत्र जगति परस्परमेकस्य मृत्युरन्यस्तस्यापरस्तंस्याप्यन्य इत्येवं मृत्युरस्ति । तत्र त्वत्त्वतोऽन्यमभयं भयनिवर्त्तकं न पश्यामीत्यर्थः । ''यद्विभेति भयं स्वयम्'' इत्यादेः ॥ ९ ॥ तत्र तदा तद्वारणे सर्वथा भगवतस्सामर्थ्यं द्योतयंत्याह-हे ईशेति । त्वमीशत्वान्ममाभिलषितपूरणे समर्थोसीति भावः । अभिलषितदानेऽन्येपि देवाः समर्थाः संतीति चेत्तदाह—विभो इति । ते तु परिछिन्नत्वान्न त्वादृशास्त्वमेव विभुरसीति भावः । अभिद्रवतीति । यान्प्रति शरः प्रयुक्तस्त एव तं पश्यन्ति नान्य इति सूचयति । नन्वभिमन्युना तेन पत्या विनापि जीवितं प्रार्थयंती न लज्जसे तत्राह-कामं यथेच्छम् । हे नाथेति । सर्वविधैश्वर्ययुक्तस्य तव मद्धननेऽपि मद्गर्भरक्षणसामर्थ्यमस्तीति भावः ॥ १० ॥ तस्या उत्तरायाः । उपधार्य श्रुत्वा । यतो भगवानतोऽबुध्यत ॥ ११ ॥ अत एवं अपांडवजगत्करणाद्धेतोरेव । पांडवा इति । योयो हि पांडुवंशजः स एव पश्यति नान्य इति ज्ञेयम् । तर्ह्येव तदानीमेव साययंत्यंतं कारयंतीति सायकाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम् ॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः ॥ १३ ॥ अंतस्थः सर्वभूतानामात्मा योगेश्वरो हरिः॥
स्वमायया ऽवृणोद्गर्भं वैराटयाः कुरुतंतवे ॥ १४ ॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् ॥ वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥ १५ ॥
मामंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यऽवति हंत्यजः ॥ १६॥ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया ॥ प्रयाणा
भिमुखं कृष्णमिदमाह पृथा सती ॥१७॥ कुंत्युवाच ॥ नमस्ये पुरुषं त्वाऽऽद्यमीश्वरं प्रकृतेः परम् ॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितम् ॥१८॥

बहुमुखं तदागतमित्याह । तर्ह्येवेति । तर्ह्येव तदानीमेव ॥ १२ ॥ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात्तदुष्परिहरं व्यसनं वीक्ष्य । अनन्यविषयः आत्मा येषां स्वैकनिष्ठानामि त्यर्थः ॥ १३ ॥ वैराट्या उत्तराया अंतस्थः सन् गर्भमावृतवान् । तत्र हेतुः । यतः आत्मांतर्यामी । योगेश्वर इति बहिष्ठस्यापि प्रवेशघटनार्थमुक्तम् । कुरूणां तंतवे संता नाय । पांडवानामपि कुरुवंशजत्वादेवमुक्तम् ॥ १४ ॥ अमोघमप्रतिक्रियं च समशाम्यत् संशांतमासीत् ॥ १५ ॥ एतद्ब्रह्मास्त्रशमनमाश्चर्यं मा मंस्था न मन्यस्व । इदं जगत् ॥ १६ ॥ कृष्णया सह ॥ १७ ॥ त्वा त्वां नमस्ये नमस्करोमि ननु कनिष्ठं मां कथं नमस्करोषि कथं तत्राह । आद्यं पुरुषं कुतः । प्रकृतेः परम् । तत्कुतः । ईश्वरं

यद्वा स्यन्त्यन्तं कुर्वंतीति सायकाः । षोंतकर्मणि ण्वुल् ॥ १२ ॥ एकेन ब्रह्मास्त्रेण पूर्ववदर्जुनप्रयुक्तेनापि प्रतिजनाभिमुखमागतस्य पृथक्पृथक् ब्रह्मास्त्रस्य दुर्निर्वारत्वात्तत्प्रयोगादिकालविलंबासहत्वाच्च दुष्परिहरं वीक्ष्य विचार्य न्यस्तशस्त्रोपि सुदर्शनेनेत्यादि । तेन स्वप्रतिज्ञाभंगेनापि भक्तवात्सल्यनामानं स्वधर्ममसाधारणं ररक्षेति भावः । अस्त्राणि शस्त्राणि "व्यसनं विपदि भ्रंशे" इति कोशात् । विपदं भ्रंशं वा । इत्यर्थ इति । श्रीभगवंतं विना स्वरक्षकमन्यमनन्यमानानामिति भावः ॥ १३ ॥ अंतस्थः सन्नंतर्यामितया स्थितोऽपि योगेश्वरः योगबलेन हरिरिति कृष्णरूपेण गर्भमावृणोत् आवृत्य स्थितो ररक्षेत्यर्थः । स्वमायया योगमाययेति। वैराटया तु तथाभूतत्वेनाज्ञात इत्यर्थः । तीर्थस्तु स्वमायया स्वसामर्थ्येन तथा वृणोद्यथा ब्रह्मास्त्रं न दहेदात्मना गूहितमकरोदित्याह । ब्रह्मास्त्रप्रभावं क्षयं नीतवानिति भावः । "माया तु ज्ञानसामर्थ्यकृपेच्छावञ्चना स्वपि" इत्याभिधानात् ॥ १४ ॥ भगवत्सामर्थ्यं सर्वतः प्रबलतममित्याह-यद्यपीति । हे भृगूद्वहेति । संबुद्धिर्दृष्टांतगर्भेति ज्ञेयम् । भृगुं तद्गोत्रमुद्वहति धारयतीति भृगूद्वह इति । यथा सर्वविधविप्रेषु भृगुस्तपसाती व समर्थोभूद्येन भगवानपि पदा ताडितस्तथा सर्वदेवेषु भगवानेवातीव समर्थो नान्य इति प्रदर्शनार्थमुक्तं हेभृगूद्वहेति । "प्रधाने च परिणये उद्वाहो धारकेऽपि च" इति धरणिः । भृगुकुलमुख्यत्वादेव त्वामिदं ब्रवीमीति वाभिप्रायः ॥ १५ ॥ सर्वाश्चर्याणि स्वरूपं यस्येति । स्वरूपेप्यमृतमय इतिवन्मयट्प्रत्ययो भवतीत्यर्थः । तदेवाह-यदेदमिति । माययेच्छया देव्या देदीप्यमानया । अच्युते विनाशशून्ये ॥ १६ ॥ ब्रह्मपदमत्र ब्रह्मास्त्रपरमेकदेशन्यायेन । तथा च ब्रह्मास्त्रादभिनिर्मुक्तैरित्यर्थः ॥ १७ ॥ अत्राक्षिपिति नान्विति । तत्प्रकृति परत्वम् । अत एव प्रकृतिनियंतृत्वादेव । तथाप्यंतर्बहिष्ठेपि । अत्र विश्व नाथः । ज्ञाततात्कालिकश्रीकृष्णसर्वज्ञत्या कुन्ती ह्युदितस्य तन्महैश्वर्यस्य वेगं सोढुमपारयान्ती स्तौति—नमस्य इति । किं भ्रात्रेय मां नमस्यति । तत्राह-पुरुषं न तु पुरुष एवास्मि कोत्र संदेहस्तत्राह-आद्यम् । ननु देहानामेवागमापायित्वं पुरुषो जीवस्त्वाद्य एव सर्वस्तत्राह-ईश्वरम् । ननु स्वर्गे इंद्रचंद्राद्या भूमौ राजानोऽपीश्वरा उच्यंते तत्राह-प्रकृतेः परम् । किमहमंतर्यामी पुरुषः न । अलक्ष्यम् । अंतर्यामी बुद्ध्यादिप्रकाशलक्ष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९ ॥ तथा परमहंसानां मुनीनाममलात्मनाम् ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥ २० ॥ कृष्णाय वासुदेवाय देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय नमोनमः ॥ २१ ॥ नमः पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥ २२ ॥

प्रकृतेरपि नियंतारम् । अत एव सर्वभूतानामंतर्बहिश्च पूर्णत्वेनावस्थितं तथाप्यलक्ष्यम् ॥ १८ ॥ तत्र हेतुः । मायैव जवनिका तिरस्करिणी तयाच्छन्नं प्रतिच्छन्नम् । अतोऽहमज्ञा भक्तियोगानभिज्ञा केवलं नमस्यामि । अधोक्षजमिंद्रियजं ज्ञानं यस्मात्तम् । अव्ययमपरिच्छिन्नम् । तत्प्रपंचः । मूढदृशा देहाभिमानिना पुंसा न त्वं लक्ष्यसे ॥ १९ ॥ किं च परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि ततश्चामलात्मनां निवृत्तरागादीनामपि तथा तेन निजमहिम्ना न लक्ष्यसेऽतो भक्तियोगं विधातुं त्वां वयं स्त्रियः कथं हि पश्येम यद्वा परमहंसादीनामपि भक्तियोगविधानार्थं त्वाम् आत्मारामाणामप्यचिंत्यनिजगुणैराकृष्य भक्तियोगं विधातुं कारयितुमवतीर्णमित्यर्थः ॥ २० ॥ ज्ञानभक्त्योरशक्यत्वमुक्त्वा पुनः केवलं नमस्करोति । कृष्णायेति द्वाभ्याम् ॥ २१ ॥ पंकजं नाभौ यस्य पंकजानां माला

एव किं ब्रह्म न । अंतर्बहिश्चावस्थितम् । यस्मादंतरुत्तरागर्भस्थो बालकं च रक्षितवानासि बहिश्चास्मांश्च रक्षन्समीपे तिष्ठसीति ॥ १८ ॥ किं त्वं परिच्छिन्नोसि व्यापको वेति त्वामहं ज्ञातुं न शक्नोमीत्याह-मायैव जवनिका तिरस्करिणी तया च्छन्नं पश्यामीत्यर्थः । किं माया मामावृणोति तत्राह—अज्ञा मेघाच्छन्नं सूर्यमहं न पश्यामीतिवन्मायया मद्दृष्टयाच्छादनात्त्वात्त्वा मय्याच्छन्नं पश्यामीत्यर्थः । यतोधोक्षजमधःस्थितमक्षजमिन्द्रियजं ज्ञानं यस्य तम् । इंद्रियजं ज्ञानं यन्न स्प्रष्टुं प्रभवतीत्यहमैन्द्रियिकज्ञानवत्यज्ञैव । न च मादृशनिकृष्टजनाज्ञेयत्वे तव कापि क्षतिरित्याह-अव्ययमिति । ननु मां साक्षात्पश्यसि स्तौषि प्रकृतेः परत्वेन जानासि तदप्यज्ञास्मीत्यात्मानं किमिति निंदसीत्यत आह-न लक्ष्यस इति । नाट्यधरः गीयमानगीतपदार्थाभिनयरसानुरूपनृत्यतालादिविशिष्टो नटो मूढदृशा संगीतशास्त्रानभिज्ञेन नटोयं नटतीत्येवं दृष्टोपि यथा न लक्ष्यते न ज्ञाततत्त्वो भवति तथैव त्वं मया दृष्टोपि न लक्ष्यसे इति तथेत्यस्य पूर्वेणैवान्वयः । पांडवान्पालयन्नपि सर्वांतर्याम्यपि मुहुरश्वत्थामादीन्पांडववधार्थं मंत्रं ग्राहयसि । स्वयं न्यस्तशस्त्रोप्यस्त्रं गृह्णासि शिष्टपालनप्रवृत्तोपि भीष्मादीन्संहारयासि । द्रौपदीसुभद्रयोरतिस्निह्यन्नपि तत्पुत्रान्घातयसीत्येवमादिका लीला तव किंतत्त्वेत्यहं न जानामीति भावः ॥ १९ ॥ स्त्रींजातेर्मम का वार्ता सर्वज्ञा मुनयः परमहंसा अपि न जानंतीत्याह-किं चेति । तेन दुर्ज्ञेयेन यतो न लक्ष्यसेऽतो हेतोः तव भक्तिं कर्तुं वयं त्वां कथं पश्येमेत्यर्थः । त्वां भजंतोऽपि लीलामाधुर्याकृष्टचित्तास्तव तत्त्वं न जानंति यतोऽतस्तेषां भक्तियोगे प्रवर्त्तयितुं स्वीकृतविग्रहं वयं कथं जानीम इत्याह यद्वेति । इत्यर्थ इति । अमलात्मनां गुणमयमालिन्यान्निष्क्रांतानां जीवन्मुक्तानामित्यर्थः । तेषामपि भक्तियोगविधानमेवार्थः । प्रयोजनं यस्य तम् । "आत्मारामाश्च मुनयः" इत्याद्युक्तेरयं भावः ॥ २० ॥ तदेवं भूतस्त्वमहो अस्माकमित्थं सुखदस्तापहारी च संवृत्तोसीति तत्तत्स्मृत्वा नमस्करोति । सर्वावतारेष्वयमेव तवावतारो धन्योऽतोहं कृष्णाय नमस्करोमीति । तत्रापि यांस्त्वं स्वीकरोषि तेष्वपि प्रेमवत्सु धन्येषु मध्ये मद्भ्रातापि धन्यो यस्ते पितेत्याह-वासुदेवायेति । ततोप्यधिकप्रेमवती देवकी धन्या या ते मातेत्याह-देवकीं नन्दयसि तदीयगर्भे स्थित्वा तां सर्वतोपि समृद्धिमतीं करोषीत्यर्थः । ततोप्यधिकप्रेमवान्नंदो धन्य इत्याह-नन्दगोपस्य कुमाराय । कौमारलीलामाधुर्यं स एवास्वादितवानिति भावः । ततोपि प्रेमवती धन्या यशोदेत्यग्रिमपद्ये वक्ष्यते । कौमारलीलातोपि व्रजस्थस्य नवकैशोरलीलामाधुर्यमधिकमित्याह-गोविंदायेति । कैशोरारंभ एव अभिषेकानंतरं गोविंदनामख्यातेः । तदैव गाः सर्वेषां सर्वेन्द्रियाणि विंदत्याकृष्य प्राप्नोषीत्यर्थः ॥ २१ ॥ तदेवमेव सुखदत्वतापहारित्वरूपं निजस्वभावं प्रकटयन्निव पंकजाभैर्निजांगैर्विराजस इत्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा हृषीकेश खलेन देवकी कंसेन रुद्धाऽतिचिरं शुचार्पिता ॥ विमोचिताऽहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥२३॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ॥ मृधेमृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ २४ ॥ विपदः संतु नः शश्वत्तत्रतत्र जगद्गुरो ॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ २५ ॥ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् ॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरम् ॥ ॥ २६ ॥ नमोऽकिंचनवित्ताय निवृत्तगुणवृत्तये ॥ आत्मारामाय शांताय कैवल्यपतये नमः ॥ २७ ॥

अस्ति यस्य पंकजवत्प्रसन्ने नेत्रे यस्य पंकजांकितावंघ्री यस्य तस्मै ॥ २२ ॥ तत्कृतोपकाराननुस्मरति । यथेति द्वाभ्याम् । अयमर्थः । मातृतोऽपि मय्यधिका तव प्रीतिः । तथा हि । हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया विमोचिता अहं च तथैव ।किं विमोचितेति काक्का महान्विशेष उक्तः । तं दर्शयति । साऽतिचिरं रुद्धा सती तस्मा देव सकृद्विमोचिता । तथा शुचार्पिता च सती । न च तस्याः पुत्रा रक्षिताः । अस्ति चान्यो नाथस्तस्याः । अहं तु विपद्गणात्तत्रापि मुहुः शीघ्रं च सात्मजा च त्वयैव च नाथेनेति ॥ २३ ॥ विपद्गणमेव दर्शयति । विषाद्भीमस्य विषमोदकदानात् । महाग्नेर्जतुगृहदाहात्।पुरुषादाः हिडिंबादयो राक्षसास्तेषां दर्शनात् । असत्सभायाः द्यूतस्थानात् । अभितो रक्षिता आस्म अभवाम ॥ २४ ॥ यत् यासु विपत्सु कीदृशं दर्शनं नास्ति पुनरपि भवदर्शनं यस्मात् ॥ २५ ॥ संपदस्तु श्रेयःपरिपंथिन्य इत्याह । जन्म सत्कुले जन्मादिभिरेधमानो मदो यस्य सः । अभिधातुं श्रीकृष्ण गोविंदेति वक्तुमपि । अकिंचनानां गोचरं विषयभूतम् ॥ २६ ॥ प्रस्तुतमनोरथपूरणाय पुनः प्रणमति । अकिंचना भक्ता एव वित्तं सर्वस्वं यस्य तस्मै । ततः किम् । निवृत्ताः गुणवृत्तयो धर्मार्थकामविषया यस्मात्तस्मै । तत्कुतः आत्मारामाय । तत्कुतः

नम इति । पंकजाकारं भगवल्लक्षणं नाभौ यस्य तस्मै इति सन्दर्भः । तव नाभिमालानेत्रादिषु पतिता मे दृष्टिः शीतली भवतीति भावः ॥ २२ ॥ तत्कृतोपकारैः स्वतापहारित्वं दर्शयन्ती दीनाहं त्वया स्वमातृवत्पालितेत्याह-हे हृषीकेशेति । मदंतःकरणं त्वमेव जानासीति भावः । अहं तु तथा न मोचिता ।किं तु सहात्मजेति मयि विशेषेण तव दया । तत्र हेतुः । शुचार्पिता । शुचायां शोक एव मत्कर्मणा ऽहमर्पितेति तस्याः सकाशादप्यहमतिदुःखिनीत्यर्थः । किं च त्वयैव नाथेनेति । तस्यास्तु नाथो विद्यत इत्यपत्यांतरोत्पत्तिसंभावनाया विद्यमानत्वात् । त्वं चापत्यचूडामणिरभूरेव किमन्यैरपालितैर्निकृष्टैः षड्गर्भैरिति भावः । किञ्चाहं मुहुः पुनःपुनरपि यो विपदां गणस्तस्मान्मोचिता । सा तु सकृदेव कंसहेतुको यो विपद्बंध एव तस्मान्मोचिता । तत्रापि मद्गर्भे परमेश्वरो जनिष्यत इति मनोनुलाप सुखाभिमानवत्याः कुतो विपद्बंधोपि तदनंतरं विपत्कापि तस्या नाभूदेवेति ।अहमेव सर्वतोप्यतिदीनेति मयि तव दीनबंधुत्वादेव दया। न त्वहं देवकीव त्वयि प्रेमवती भाग्यवती चेति भावः । स्वामिचरणैरयमेवार्थः स्फोटितः अयमर्थ इत्यादिना । त्वयैवेत्येवकारेण बलदेवस्याप्यन्यत्र पक्षपातदर्शनमसूचीति ॥ २३ ॥ आदिना बककिर्मिरादिग्रहः । अनेके द्रोणभीष्मकर्णशल्याद्या ये महारथास्तेषामस्त्रेभ्यः ॥ २४ ॥ भगवत्स्मरणविरोधिसंपत्परंप रातो भगवद्दर्शनकारिविपत्परंपरैव श्रेयसीत्याह । विपदः तत्रतत्र सांसारिकव्यापारेषु अपुनर्भवो मोक्षस्तस्य दर्शनं यस्मात् । हे जगत्पते इति विपदंजनप्रदानेन संपन्मदान्धजगतां हितकारी त्वमसीति भावः ॥ २५ ॥ परिपंथी विरोधी प्रतिपक्षीति पर्यायाः । ऐश्वर्यं प्रभुत्वं श्रुतं शास्त्रं श्रीधनं श्रीकृष्णादन्यन्न किंचनोपादेयं येषां तेऽकिञ्चना भक्ताः ॥ २६ ॥ न विद्यते किंचिन्मात्रं प्राकृतं वस्तु, अपि तु त्वल्लक्षणं पूर्णचिदानंदस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्ये त्वां कालमीशानमनादिनिधनं विभुम् ॥ समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः ॥ २८ ॥ न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनम् ॥ न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणाम् ॥ २९ ॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनम् ॥ ३० ॥

शांताय रागादिरहिताय । किं च कैवल्यपतये कैवल्यं दातुं समर्थाय ॥ २७ ॥ ननु देवकीपुत्रं मां कथमेवं स्तौषि तत्राह । मन्ये त्वां कालं न तु देवकीपुत्रम् । तत्र हेतवः ईशानं नियंतारम् । अनादिनिधनम् आद्यंतशून्यम् । विभुं प्रभुम् । समं यथा भवति तथा सर्वत्र चरंतम् । ननु पार्थसारथेः कथं मम साम्यं तत्राह । यद्यतस्त्वत्तो निमित्तभूताद्भूतानामेव मिथः कलिः कलहो भवति न तु स्वतस्त्वयि वैषम्यम् ॥ २८ ॥ ननु निग्रहानुग्रहरूपं मयि प्रसिद्धं वैषम्यमत आह । न वेदेति । नृणां विडंबनमनुकरणमीहमानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिरनुग्रहनिग्रहरूपा भवति ॥ २९ ॥ तेऽजस्य जन्म । अकर्तुः कर्म । तिर्यक्षु वराहादिरूपेण । नृषु रामादिरूपेण ।

रूपं वस्त्वस्ति येषां त एकांतभक्ता एव वित्तानि धनानीवातिप्रेमास्पदानि सर्वतः संगोपनीयाश्च यस्य तस्मै तेषां वित्तायेति वा । नन्वकिञ्चना दरिद्रा उच्यंते । सत्यम् । भगवद्भक्तानां मायागुणवृत्त्याख्याः संपदो न संतीत्याह–निवृत्ता गुणवृत्तयो विषयभोगा यस्मात्तस्मै । यद्वा । निवृत्ता गुणागुणकार्यभूता रागद्वेषादयो येषां ते निवृत्तगुणा जीवन्मुक्तास्तेषु वृत्तिर्वर्त्तनं यस्य । यद्वा तेषां वृत्तिर्यस्मिन् स निवृत्तगुणवृत्तिस्तस्मै । यद्वा गुणैर्वृत्तिर्येषां ते गुणवृत्तयो लंपटाः निवृता गुणवृत्तयो यस्मात्तस्मै । अकिंचनेष्वासक्तोप्यन्यत्रोदासीन एवेत्याह–आत्मारामाय स्वानंदमग्नाय । तदात्मारामत्वम् । यद्वा भक्तानामपराधे सत्यपि न त्वं कुप्यसीत्याह-शांताय स्वभक्तेष्वनुग्रहाय । मुमुक्षुभक्तेषूपकारकत्वमाह-कैवल्येति ॥ २७ ॥ अत्राक्षिपति नान्विति । तत्र कालत्वे । पुनराक्षिपति । न चासक्त्यौदासीन्योपकारापकारकत्वैरपि त्वयि वैषम्यमित्याह-सममिति ः। यद्यत्र मिथः कलिः कलहः ईश्वरो दुःखदः सुखदः समो विषमो निर्घृणः सघृण इत्यादि । यद्वा येषु भावेषु भूतानां मिथः कलिर्भवति तेषु समं चरन्तमित्यर्थः ॥ २८ ॥ पुनराक्षिपति-नन्विति । अत्र विश्वनाथः । ननु तत्र कलहे तत्त्वीनश्चयकः को भवेत्तत्र न कोपीत्याह–न वेदेति द्वाभ्याम् । नृणां शास्त्रविवादिनां तेषां विडंबनं ज्ञानवैफल्यमीहमानस्येच्छतः । यद्वा । रामकृष्णाद्यवतारे स्वीयेन नरत्वेन नृणां नरमात्राणामेव विडंबनमीहमानस्य तादृशसौन्दर्यसाद्गुण्यचीरत्वाद्यदर्शनादन्येन वा विडंबिता एव भवंतीति भावः । नृणां नरमात्राणां विषमा मातिरीति । यथा सूर्यस्य सूर्यकांतशिलायां स्वतुल्यधर्मत्वप्रदानेनासक्तौ अंधेष्वौदासीन्ये चक्रवाकेषूपकारित्वे घूकतस्करांधकारादिष्वपकारित्वे लक्ष्यमाणेपि न तस्य वैषम्यम् । किं तु तत्रतत्र वस्तुसाद्गुण्यवैगुण्याद्येव कारणमिति ज्ञेयम् ॥ २९ ॥ किं च तदपि तव साम्यवैषम्यकर्तृत्वाकर्तृत्वजन्मवत्त्वाजत्वादिषु सिद्धांतान्निर्विद्य लीलैवास्वादनीयेत्याह–जन्मेति द्वाभ्याम् । अजस्य जन्माकर्तुः कर्म तत्रापि तिर्यगादिषु तच्च तच्च तव सर्वोत्कृष्टस्येश्वरस्यात्यंतविडंबनं तत्तज्जातीयार्थेनात्मना न्यूनत्वांगीकारात् । तथाहि वाराहजन्मनि "घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्" इत्यादिना सर्वज्ञत्वेपीश्वरत्वेऽपि वास्तवशूकर एवाभूर्यमवलोक्य "जहास चाहो वनगोचरो मृगः" इत्येव न तत्त्वज्ञास्त्वां कर्माधीनं जीवमेव मन्यंत इति भावः । अत्राजत्वकर्तृत्वयोरेव सत्यत्वे जन्मकर्मलक्षणयोर्लीलयोर्मिथ्यात्वं तथात्वे च तया शुकदेवाद्यात्मारामगणीचित्ताकर्षणत्वासंगतिः । "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः" इति भगवदुक्तेश्च । जन्मकर्मणां सत्यत्वेऽजत्वाकर्तृत्वयोरसंगतिरिति । तस्मादचिंत्यानंतशक्तिमतो भगवतः को वेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

: गोप्याददे त्वयि कृतागसि दाम तावद्या ते दशाऽश्रुकलिलांजनसंभ्रमाक्षम् ॥ वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति ॥ ३१ ॥ केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ॥ यदोः प्रियस्याऽन्ववाये मलयस्येव चंदनम् ॥ ३२ ॥ अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् ॥ अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥ ३३ ॥ भारावतरणायाऽन्ये भुवो नाव इवोदधौ ॥ सीदंत्या भूरिभारेण जातो ह्यात्मभुवाऽर्थितः ॥ ३४ ॥ भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः ॥ श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥ ३५ ॥

ऋषिषु वामनादिरूपेण । यादस्सु मत्स्यादिरूपेण ॥ ३० ॥ नरविडंबनमत्याश्चर्यमित्याह । गोपीति । गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दाम रज्जुमाददे जग्राह तावत्तत्क्षणमेव या ते दशाऽवस्था सा मां विमोहयति । किंभूतस्य । अश्रुभिः कलिलं व्यामिश्रमंजनं ययोस्ते च ते संभ्रमे व्याकुले अक्षिणी यस्मिं स्तद्वक्त्रं निनीयाधःकृत्वा ताडयिष्यतीति भयस्य भावनया स्थितस्य । यद्यतस्त्वत्तोभीरपि स्वयं बिभेति तस्य ते दशा ॥ ३१ ॥ अत एव जगन्मोहनतया दुर्ज्ञेयत्वात्तव जन्मादि बहुधा वर्णयंतीत्याह । केचिदिति चतुर्भिः । पुण्यश्लोकस्य युधिष्ठिरस्य कीर्तये यदोरेव कीर्तये इति वा मलयस्य कीर्तये वंशे वा चंदनं यथा ॥ ३२ ॥ तथा वसुदेवस्य भार्यायां देवक्यामज एव त्वमभ्यगात् । पुत्रत्वमिति शेषः । प्रथमपुरुषस्त्वार्षः । अर्भत्वमिति पाठः सुगमः । ताभ्यामेव पूर्वं सुतपःपृश्निरूपाभ्यां याचितः सन् । अस्य जगतः क्षेमाय ॥ ३३ ॥ आत्मभुवेति ब्रह्मप्रार्थनस्य प्राधान्यविवक्षया ॥ ३४ ॥ मतांतरम् । परमानंदस्वरूपाज्ञानमविद्या ततो देहाद्यभिमानात्कामस्ततः कर्मा

तत्त्वमिति भावः । ''अतर्क्येन कृतौ दीर्घलंबने च विडंबनम् । हासास्पदे निविष्टे च'' इति धरणिः ॥ ३० ॥ तस्मात्तव लीलामेवास्वादयामीत्याह-गोपीति । एतेन नंदगोपादप्यतिप्रेमवती श्रीयशोदा धन्या यया तवै तादृशो वशीकार इति सूचितम् । तत्र ''भीरपि यद्बिभेति'' इत्युक्त्यैव कुन्त्या ऐश्वर्यज्ञानं व्यक्तीकृतं भयभावनया स्थितस्येत्यन्तर्भयस्य च तया सत्यत्वमेवाभिमतम् । अनुकरणमात्रत्वे ज्ञाते तस्य मोहो न संभवेदिति ज्ञेयम् । अत एवेहमानस्य नृणां विडंबनमित्यादौ विडम्बनमनुकरणमिति व्याख्यान्तरं पराहतम् ॥ ३१ ॥ यतस्तव कर्मातवर्यमत एवेत्यर्थः । एवं त्वं च न चेन्नटवत्प्रादुरभविष्यस्तदा जगन्मोहनीयं लीला केन वास्वादयि ष्यतेति प्रादुर्भावकारणमेव मतभेदेन बहुधाह—केचिदिति । पुण्यश्लोकस्य युधिष्ठिरस्य ''पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः'' इति पुण्यश्लोकत्वेन तदानीं तस्यैव प्रसिद्धेः ॥ ३२ ॥ अर्भत्वं बालत्वम् ॥ ३३ ॥ अन्ये इत्याहुः सीदंत्या आसन्नमज्जनायाः ॥ ३४ ॥ ततोऽविद्यातः ततः कामात् । क्लिश्यमानानां सांसारिकाणामपि प्रेमभक्तिसिद्ध्यर्थमेव कर्माणि करिष्यन् । ''जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः । लीलावतारैः स्वयशःप्रदीपकं प्राज्वालय त्वां तमहं प्रपद्ये । '' इति दशमे श्रीनारदोक्तेः ॥ ''ततः स कीर्तिं सुश्लोक्यां वितत्य ह्यंजसा नु कौ । तमोनया तरिष्यंतीत्यगात्स्वं पदमीश्वरः ॥'' इति चैकादशोक्तेश्च । क्लेशानिवृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः ॥ त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजम् ॥ ३६ ॥ अप्यद्य नस्त्वं स्वकृतेहितप्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः ॥ येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांहसाम् ॥३७॥ के वयं नामरूपाभ्यां यदुभिः सह पांडवाः ॥ भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३८ ॥ नेयं शोभिष्यते तत्र यथेदानीं गदाधर ॥ त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ॥ ३९ ॥

णि तैः क्लिश्यमानानां तन्निवृत्तये श्रवणाद्यर्हाणि कर्माणि करिष्यन् ॥ ३५ ॥ अस्य पक्षस्य सिद्धांततामभिप्रेत्य श्रवणादिफलमाह । शृण्वंतीति । नंदंत्यन्यैः कीर्त्यमानमभिनंदंति ये जनाः ईहितं चारितं तावकं त्वदीयं पदांबुजं त एव पश्यंत्येवाचिरेणैवेति च सर्वत्रावधारणम् । कीदृशम् । भवप्रवाहस्य जन्मपरंपराया उपरमो यस्मिंस्तत् ॥ ३६ ॥ इदानीं तवास्मत्परित्यागोऽनुचित इत्याशयेनाह । अपीति चतुर्भिः । हे प्रभो सुहृदोऽतिस्निग्धाननुजीविनश्च नाऽद्यापि स्वित्किंचित्त्वं जिहाससि येषामस्माकमन्यत्परायणं नैवास्ति । तत्कुतः । राजसु योजितमंहो दुःखं यैस्तेषां स्वानां कृतमीहितमपेक्षितं येन तस्य संबोधनम् । विसर्गांतपाठे त्वंपदविशेषणम् ॥ ३७ ॥ ननु तव बंधवो यदवः पुत्राश्च पांडवाः शूराः समर्थाश्च तत्किं कार्पण्यं भाषसेऽत आह । के वयमिति । यर्हि भवतो दर्शनं यदा त्वमस्मान्न पश्यसि तदा नामरूपाभ्यां नाम्ना विख्यात्या रूपेण समृद्ध्या च यदुभिः सहिता पांडवा नाम के वयं न केऽपि । अतितुच्छा इत्यर्थः । हृषीकाणामिंद्रियाणामीशितुर्जीवस्यादर्शने यथा न किंचिन्नाम च रूपं च तद्वत् ॥ ३८ ॥ किं च यथेदानीमियमस्मत्पाल्या भूमिः स्वैरसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरंकिता सती भाति तत्र तदा त्वयि निर्गते

त्तिस्त्वानुषंगिकी । इतरश्लोके पदांबुजदर्शनस्यैव श्रवणादिफलत्वोक्तेः । तद्दर्शनं तु प्रेमलभ्यमेव ॥ ३६ ॥ शृण्वंतीति । भवेस्मिन्नित्यस्य पूर्वपद्यस्यैवोपोद्बलकत्वेनोक्तं न तु तस्यैव स्वमतत्वेन श्रीयुधिष्ठिरादीनां परमभक्तानां संबंधेनैव तत्तल्लीलाश्रवणादिकमन्येषां भवतीति प्रत्युत तत्रतत्रैव मुख्यत्वमवसीयते । तदेवं तत्तन्मतसमाहारेण समुदायस्य कारणत्वेऽप्यवांतरतारतम्यंविवेचनीयम् । मम तु "गोष्पादद" इति वर्णिता यशोदैव सर्वोत्तमत्तया भातीति कुंतीदेव्यभिप्रायः । चक्रवर्तिनात्रार्थसौंदर्यार्य षडवधारणानि सूचितानि । त एव न त्वन्ये, पश्यंत्येव न तु न पश्यंति, अचिरेणैव न तु चिरेण, तावकमेव न तु त्वदंशस्य कस्यचित्, भवप्रवाहोपरममेव न तु संसारानिवर्त्तकं, पदाम्बुजमेव न तु तव निर्विशेषं स्वरूपमिति ॥ ३६ ॥ अस्माकं सुखदुःखे तु त्वद्दर्शनादर्शने एव नान्ये । तत्र सुखसमयो गतः संप्रति दुःखसमयोऽयमायादित्याह-अप्यद्येति । अद्य त्वं नोऽस्मानपि स्विज्जिहाससि यतोऽद्य द्वारकां यातुमिति भावः । ननु बहुदिनमत्रावसं संप्रति द्वारकां याम्येव तत्रावश्यं मम किञ्चित्कृत्यमस्तीत्यनुज्ञां देहीत्यत आह-स्वकृते हितः स्वेनैव कृतं निष्पादितमीहितं चिकीर्षितं यस्य सः त्वं कृतकर्त्तव्योऽसीति भावः । यद्वा । हे प्रभो इति त्वमत्रत्योपि तत्रत्यकृत्यकरणसमर्थोऽस्यतो मास्मांस्त्यजेति भावः । निर्विसर्गपाठे संबुद्धिरियम् । तस्य चायमभिप्रायः । त्वदनुजीविनो मत्पुत्रानधुनापि रक्षन्नत्रैव तिष्ठेत्यर्थः ॥ ३७ ॥ अत्राक्षिपति-नन्विति । इत्यर्थ इति । त्वद्वियोगोऽस्माकं मरणकल्प इति भावः ॥ ३८ ॥ अन्यदाह-किञ्च हे गदाधरेति । त्वया शरणागतरक्षणार्थमेवास्त्राणि धृतानीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमे जनपदाः स्वृद्धाः सुपक्कौषधिवीरुधः ॥ वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः ॥ ४० ॥ अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे ॥ स्नेहपाशमिमं छिन्धि दृढं पांडुषु वृष्णिषु ॥ ४१ ॥ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ॥ ४२ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभाऽवनिध्रुग्राजन्यवंशदहनाऽनपवर्गवीर्य ॥ गोविंद गोद्विजसुरार्तिहरावतार योगेश्वराऽखिलगुरो भगवन्नमस्ते ॥ ४३ ॥

सति न शोभिष्यते ॥ ३९ ॥ अपि चेमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः संतः ॥ ४० ॥ गमने पांडवानामकुशलमगमने च यादवानामित्युभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते । अथेति । विश्वेशेत्यादिसंबोधनानि स्नेहपाशच्छेदे सामर्थ्यख्यापनाय । दृढं संतम ॥ ४१ ॥ ततः किमत आह । त्वयीति । अनन्यविषया सती मे मती रतिमुद्वहतात् । अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः । ओघं पूरम् । यथा गंगा प्रतिबंधं न गणयत्येवं मतिरपि विघ्नान्मा गणयत्विति भावः ॥ ४२ ॥ एवमभ्यर्थ्य पुनः प्रणमति । हे श्रीकृष्ण ते नमः । उपकारानानुस्मरंती बहुधा संबोधयति । कृष्णसखाऽर्जुनस्य सखे । वृष्णीनामृषभ श्रेष्ठ । अवन्यै भूम्यै द्रुह्यंति ये राजन्या

भावः । गदेत्युपलक्षणम् । यद्वा सर्वजगत्पितृतोषणं द्वारीकृत्य जगद्वृद्धिकरो गदाधररूपेण यो गयाक्षेत्रेऽतिदयावांस्तिष्ठति स एव मद्वंशवृद्धयेप्यत्रैव तिष्ठेति भावः । आदिना यवध्वजादिग्रहः ॥ ३९॥ त्वमेवस्थिरचरसुखहेतुरित्याह-इम इति ॥ ४० ॥ विश्वेशेति । संबुद्धित्रयस्य त्वमेव विश्वरूपेण तदंतर्यामिरूपेण तन्नियंतृरूपेण विदुषां भासीत्यतस्तव सर्वविश्वहितं कर्त्तुं समर्थस्य विश्वांतर्गताया एकस्या ममाभिलषितपूरणं चात्यल्पतरमेवेति भावः । दृढं गाढम् । अत्रायं भावः । यस्त्वं सर्वेषामेव विश्वेषामीशश्चेतायिता तद्रूपोपि स स्वानुवर्त्तिनां वृष्णिपांडूनां कल्याणाय कृपासिंधुस्त्वमेव सावधानस्सदैवासि । अहं किं तत्कुशलचिंतया वृथैव म्रिय इति भावः ॥४१॥ तर्हि किं ब्रह्मज्ञाने स्पृहावती भवसि वृष्णिषु स्नेहच्छेदे मय्यपि स्नेहच्छेदात्तत्र नेत्याह-त्वयि मतिर्मे धीः । इत्यर्थ इति । किं त्वनन्यविषयास्त्वद्भक्तास्त्वदभिन्ना एव तेषु प्रीतिं विना त्वय्यपि प्रीतिर्न सिध्येत् । त्वं प्रसीदसीत्यपि नेत्यहं जानाम्येवातस्त्वद्भक्तेभ्योऽन्यत्र ममत्वशून्या तदपि पांडवेषु यादवेषु त्वद्भक्तेष्वपि यत्स्नेहस्य छेदं प्रार्थये तत्त्वदवतारात्पूर्व एव देहसंबंधेन यो व्यवहारमयः स्नेहः प्रवृत्तस्तस्यैव न तु त्वत्प्रियत्वनिबंधनस्य । अत एव बंधकत्वेन मया स पाशरूपकेण प्रयुक्त इति भावः । अत एव गंगा यथोदन्वत्यखिलनदनदीनामाश्रये ओघं पूरं वहति तथा मतिरपि सर्वभक्ताश्रयणीये त्वयि रतिम् । अपरं स्वामिवत् ॥ ४२ ॥ हे श्रियाऽतसीकुसुमकान्त्या कृष्ण नीलवर्णेति वा । "अतसीकुसुमोपमेयकान्तिः" इत्याद्युक्तेः । यद्वा श्रिया स्वरूपसंपत्त्या कर्षत्याकर्षति गोपीजनप्रेमभक्तान्स्वसमीपमिति श्रीकृष्णः । श्रीप्रदः कृष्णः श्रीकृष्णः । देवब्राह्मणवत्समासः । यद्वा वृष्णिवद्वर्षन्मेघवद्वृषभश्रेष्ठ सर्वोपकारकेत्यर्थः । "वृष्णिः कुलविशेषे च वर्षन्मेघेपि कथ्यते" इति तीर्थः । "वृष्णिः पांडवचंद्रयोः । त्रिषु ना यादवे मेषे" इति मेदिन्युक्तेः । वृष्णयः पांडवा ऋषभाः प्रिया यस्य स तथा । "प्रिये श्रेष्ठे वृषेर्षभः" इत्यभिधानात् । भूमिद्रोहोत्र तदुपरि पापाचरणमेव तद्वन्तो राजानः कंसाद्यास्तेषां वंशस्य दहनो नाशकः । एवमपि दुष्टराजवंशदाहकत्वेपि अक्षीणप्रभावोऽप्राप्तश्रमः । प्राप्तं कामधेनुहेतुकं गवामैंद्रत्वरूपमैश्वर्यं येन । वस्तुतस्तु गोभिर्वेदांतवाक्यैर्विद्यते उपलभ्यत इति गोविंदः । तथा च तदनभिज्ञाहं न त्वां ज्ञातुं समर्थास्मीति भावः । त्वं भक्तजनक्लेशकर्षकोपि सामान्यतः मत्पुत्रस्यार्जुनस्य तु विशेषत इत्याह-कृष्णसखेति । न केवलमर्जुन एव तव प्रियोपि तु यदवोऽपीत्याह-वृष्ण्यर्षभेति । तत्प्रियत्वं हि तद्विरोधिनृपनाशेनैवाकृतेत्याह-अवनिध्रुग्राजन्यवंशदहनेति । तैरेकीभूयापि त्वं जेतुं न शक्य इत्याह-अनपवर्गवीर्येति । भक्तानुग्रहार्थमकर्तव्यमपि त्वं करोष्येवेत्याह-गोविंदेति । गोचारणरूपमतिनिकृष्टमपि कर्म त्वयांगीकृतं श्रीनंदयशोदानुग्रहायेति भावः । वस्तुतस्तवावतारो गोब्राह्मणामरदुःखनिवृत्त्यर्थमेव नापि तु सर्वजनदुःखहरणार्थमेव । गवादित्रिभी रक्षितैः सर्वे रक्षिताः स्युस्तथाहि-गवां ब्राह्मणानाञ्च हविर्मंत्राधारत्वेन तद्रक्षया यज्ञसिद्धेर्देवा अपि रक्षितास्स्युस्ते च सम्यग्वृष्ट्यादिना विश्वमखिलमेव रक्षंतीति "देवान्भावयतानेन ते देवा भावयंतु वः । पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ पृथयेत्थं कलपदैः परिणूताखिलोदयः ॥ मंदं जहास वैकुंठो मोहयन्निव मायया ॥४४॥ तां बाढमित्युपामंत्र्य प्रविश्य गजसाह्वयम् ॥ स्त्रियश्च स्वपुरं यास्यन्प्रेम्णा राज्ञा निवारितः ॥ ४५ ॥ व्यासाद्यैरीश्वरेहाज्ञैः कृष्णेनाद्भुतकर्मणा ॥ प्रबोधितोऽपीतिहासैर्नाऽबुध्यत शुचार्पितः ॥ ॥ ४६ ॥ आह राजा धर्मसुतश्चिंतयन्सुहृदां वधम् ॥ प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः ॥ ४७ ॥

स्तेषां वंशस्य दहन । एवमप्यनपवर्गवीर्याक्षीणप्रभाव । गोविंद प्राप्तकामधेन्वैश्वर्य । गोद्विजसुराणामार्तिहरोऽवतारो यस्येति ॥ ४३ ॥ कलानि मधुराणि पदानि येषु तैर्वाक्यैः परिणूतः स्तुतोऽखिलमुदयो महिमा यस्य सः । णुस्तुतावित्यस्मात् । परिणुतेति वक्तव्ये दीर्घश्छंदोऽनुरोधेन । मंदमीषत् । तस्य हास एव माया । वक्ष्यति हि । 'हासो जनोन्मादकरी च माया' इति ॥ ४४ ॥ त्वयि मेऽनन्यविषया मतिरिति यत्प्रार्थितं तद्बाढमित्यंगीकृत्य रथस्थानाद्गजसाह्वयमागत्य पश्चात्तां चान्याश्च सुभद्राप्रमुखाः स्त्रिय उपामंत्र्यानुज्ञाप्य स्वपुरं यास्यन् राज्ञा युधिष्ठिरेण प्रेम्णात्रैव किंचित्कालं निवसेति संप्रार्थ्य निवारितः ॥ ४५ ॥ अथ भीष्मनिर्याणोत्सवं वक्तुमुपोद्घातकथां प्रस्तौति । व्यासाद्यैः प्रबोधितोऽपि शुचा व्याप्तः सन्नाबुद्ध्यत विवेकं न प्राप । कुतः । ईश्वरेहाया अज्ञैः स्वभक्तभीष्मनिर्याणमहोत्सवाय राज्ञा सह कुरुक्षेत्रं गंतव्यं तत्र तन्मुखेनैवायं प्रबोधनीय इतीश्वराभिप्रायः कार्यद्वयविधायकस्तमजानद्भिरित्यर्थः । श्रीकृष्णेनापि प्रबोधितो नाबुध्यत । अत्र हेतुः । अद्भुतकर्मणेति । यथा कुरुपांडवसंधानार्थं गतेऽपि यथोचितमेव वदन्नपि विग्रहमेव दृढं कृतवानेवमत्रापि प्रबोधयन्नबोधमेव दृढं चकारेत्यर्थः ॥४६॥ अवबोधमेव प्रपंचयति । आहेति षड्भिः । प्राकृतेनाविवेकव्याप्ते

स्परं भावयंतः श्रेयः परमवाप्स्यथ॥'' इति श्रीगीतोक्तेः।एतेऽधुना दुःखिन इति ज्ञाने तवान्यापेक्षैव नेत्याह–योगेश्वरेति।ननु योगेश्वराणामन्यक्लेशापहरणावकाश एव नास्ति''मौनं चरंति मुनयो न परार्थनिष्ठाः' इति प्रह्लादोक्ते स्तत्राह–अखिलगुरो इति। सर्वहितकर्तुस्तव न ह्यन्ययोगेश्वरसाम्यमिति । नन्वखिलहितोपदेष्टुरपि सामर्थ्याभावे न किञ्चित्तेन कर्तुं शक्यत इति चेत्तत्राह–हे भगवन्निति । परमैश्वर्ययुक्तस्य सर्वेश्वरस्य तव न किमप्यशक्यमिति भावः । अहं तु सर्वथा तव तत्त्वमजानाना केवलं नमस्करोम्येवेत्याह–नमस्त इति ॥४३॥ ''णू स्तवने'' इति तौदादिकस्य नुवतेर्दीर्घोतस्त्वात्तस्यैवायं प्रयोग इति ध्येयम् । स्वामिचरणानामार्षत्वव्याख्यानं प्रयास एव । हासो जनोन्मादकरीत्यस्य विराड्गतत्वमेवातो मायया कृपया मोहयन् । इवशब्दो वाक्यालंकारे । ''माया दंभे कृपायां च'' इत्यभिधानात् । विश्वनाथस्तु माययेव मोहयन्न तु मायया किं तु प्रेम्णैवेत्यर्थमाह॥४४॥अत्र राज्ञःप्रेम्णातिवे वशाकरत्वं व्यंजितम्॥४५॥उपोद्घातकथां प्रस्तावावेशकारिणीं कथाम्।वर्णनीयमर्थं मनसि निधाय तदर्थमर्थांतरकल्पनमुपोद्घातः।तत्र कुरुक्षेत्रे तन्मुखेन भीष्मास्येन। इत्यर्थ इति। ''न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम्। यद्विजिज्ञासया युक्ता मुह्यंते कवयोऽपि हि॥''इत्युक्तेः।तत्राबोधे।इत्यर्थ इति।तस्य विचित्रानंतशक्तित्वात्तत्कथनाभिप्रायो दुर्ज्ञेय इति भावः।अत्र विश्वनाथः यद्यहमिदानीमिहैव स्थितोऽभूवं तर्ह्यासन्नमृत्युकालं मद्दर्शनं विना मर्तुमनिच्छंतं भीष्मं स्वभक्तमात्मानं सपरिकरमेव संदर्श्य सुखयामि।लोके तदुत्कर्षं ख्यापयितुं तन्मुखेनैव राजानं च प्रबोधयामिति भगवदभिप्रायं व्यंजयन्नाह।ईश्वरस्य श्रीकृष्णस्येहाया उक्तलक्षणाभिप्रायस्याज्ञैर्विज्ञैर्वा। अद्भुतकर्मणेति। इदमस्याद्भुतं कर्म यत्स्वयमेवास्य हृदि प्रविश्याविवेकमुत्थापितवान् । बहिश्च स्वकर्तृकेण व्यासादिकर्तृकेणापि प्रबोधेनाबोधमेव दृढीचकार। तेन च भीष्ममुखोदितेन तत्त्वेन तं प्रबोध्य व्यासादिभ्योऽपि मत्तोपि मदेकांतभक्तो भीष्म एवातिशयेन धर्मज्ञानतत्त्वज्ञ इति लोके विख्यापयामास। किञ्च युधिष्ठिरस्य तु ततोपि प्रेमाधिक्यादाधिक्यं यत्तदनुरोधेनैव द्वारकामगंच्छंस्तत्र स्थितः। तत एव तन्निकटं गत्वा तथा चक्रे इति विवेचनीयम् ॥४६॥ वस्तुतस्तु तस्यात्मा ह्यप्राकृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः ॥ पारक्यस्यैव देहस्य बह्व्यो मेऽक्षौहिणीर्हताः ॥ ४८ ॥ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ॥ ४९ ॥ नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषाम् ॥ इति मे न तु बोधाय कल्पते शासनं वचः ॥ ५० ॥ स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम् ॥ ५१ ॥ यथा पंकेन पंकांभः सुरया वा सुराकृतम् ॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥ ५२ ॥ इति श्रीमद्भा० म० प्र० कुंतीस्तुतियुधिष्ठिरानुतापो नामाष्टमोऽध्यायः ॥ ८ ॥

नात्मना चित्तेन हे विप्राः ॥ ४७ ॥ पारक्यस्य श्वसृगालाद्याहारस्य देहस्यार्थे । मे मया । अक्षौहिणीरक्षौहिण्यः । अक्षौहिणीप्रमाणं तु व्यासेनोक्तम् । "अक्षौहिणी प्रसंख्याता रथानां द्विजसत्तमाः । संख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः । शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः । गजानां च प्रसंख्यानमेतदेव प्रकीर्तितम् । ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु । नराणामपि पंचाशच्छतानि त्रीणि चैव हि । पंचषष्टिसहस्राणि तथाश्वानां शतानि च । दशोत्तराणि षट् प्राहुः संख्यातत्त्वविदो जनाः । एतामक्षौहिणीं प्राहुर्यथावदिह संख्यया" इति ॥ ४८ ॥ सुहृदः संबंधिनः । मित्राणि सखायः । पितरः पितृव्याः ॥ ४९ ॥ स्मृत्याद्यनुशासनाद्धर्मयुद्धे न दोष इति चेत्तत्राह । नैनो राज्ञ इति । द्विषां वध एनः पापं न भवतीति यच्छासनं शिक्षारूपं वचः कुतो न कल्पते यतस्तद्वचः प्रजाभर्तुरेव । अयं भावः । स्वप्रजानामन्यतो बाधे प्रसक्ते तद्वधोऽनुज्ञातः । दुर्योधनेन तु प्रजायां पाल्यमानायां मया केवलं राज्यलोभेन हतत्वात्पापमेवेदमिति ॥ ५० ॥ किं च युद्धे पुंसां वधो भवतु नाम धर्मः । स्त्रीणां तु मया हता बंधवो यासां तासां योऽसौ द्रोहोऽनुद्दिष्टोऽप्युत्थितस्तं व्यपोहितुमपाकर्तुं कल्पः समर्थो नाहं गृहमेधीयैर्गृहाश्रमविहितैः ॥ ५१ ॥ ननु "सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद" इति श्रुतेः पापमश्वमेधेन नश्येदेवेत्याशंक्याविवेकविजृंभितं हेतुवादमाश्रित्य निराकरोति । यथेति । यथा घनपंकेन पंकांभो न मृज्यते यथा वा सुरालेशकृतमपावित्र्यं बह्व्या सुरया न मृज्यते तथैव भूतहत्यामेकां प्रमादतो जातां बुद्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ॥ ५२ ॥ इति श्रीभा० म० प्रथमस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥ ॥ युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणम् ॥ कृष्णस्तुतिश्च मुक्तिश्च नवमे तस्य वर्ण्यते ॥ १ ॥

एवेति। तदपि प्राकृतत्वारोपो भगवदिच्छयोक्तप्रयोजनायैवेति ज्ञेयम् । हे विप्रा इति । यथा विप्रा अपि कर्म कृत्वातिसाहसेन पश्चाच्छोचन्त्यहो किमस्माभिः कृतं पुरैवैतन्न विचारितं तथा राजापि शोकवानभूदिति भावः ॥ ४७ ॥ व्यासेनोक्तं महाभारते ॥ २१८७० रथाः २१८७० गजाः ६५६१० अश्वाः १०९३५० पदातयः सर्वमेकीकृत्य २१८७०० अक्षौहिणी भवति इति विवेकः ॥ ४८ ॥ बाला अभिमन्युलक्ष्मणादयः । द्विजा द्रोणादयः सुहृदो धृष्टद्युम्नादयः । मित्राणि विराटप्रभृतीनि पितरो भूरिश्रवःप्रभृतयः । भ्रातरो दुर्योधनादयः । गुरवो द्रुपदादयः । एतान्द्रोहितवानिति बालद्विजसुहृन्मित्रभ्रातृगुरुध्रुक् तस्य : तथा निरयान्नरकात् अयुतायुतैः कोटिभिरित्यर्थः ॥ ४९ ॥ अत्राशयमाह-अयम्भाव इति ॥ ५० ॥ तत्पापस्य प्रायश्चित्ताभावमाह-किञ्चेति । अनुद्दिष्टः शास्त्रेणानुदितोपि ॥ ५१ ॥ अत्राक्षिपति-नन्विति । यः पुरुषः । ऊचेति निपातौ । उ वितर्के च । पुनरेनमात्मानं वेद सोपि सर्वपाप्मानं तरतीति श्रुतिभागार्थः । हेतुवादं नास्तिकताम् "नास्तिक्ये कारणोक्तौ च हे तुवादः प्रकीर्त्तितः" इति निरुक्तिः । यद्वा ज्ञानपक्षमाश्रित्यैव युधिष्ठिरेण यज्ञो निंदितो न त्वकर्त्तव्यबुद्ध्या ,'ब्रह्मार्पणं ब्रह्महविः" इत्यादौ ब्रह्मार्पणबुद्ध्या कर्त्तव्यत्वेन विहितत्वात् । "कर्मणा ज्ञानमाप्नोति" इति श्रुतेः ॥ ५२ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धेऽष्टमोध्यायः ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥ १ ॥ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभू
षितैः ॥ अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तथा ॥ २ ॥ भगवानपि विप्रर्षे रथेन सधनंजयः ॥ स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥३॥
दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरम् ॥ प्रणेमुः पांडवा भीष्मं सानुगाः सह चक्रिणा ॥ ४ ॥ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ॥ राजर्ष
यश्च तत्रासन्द्रष्टुं भरतपुंगवम् ॥ ५ ॥ पर्वतो नारदो धौम्यो भगवान्बादरायणः ॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥ वसिष्ठ
इंद्रप्रमदस्त्रितो गृत्समदोऽसितः ॥ कक्षीवान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ ७ ॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः ॥ शिष्यै
रुपेता आजग्मुः कश्यपांगिरसादयः ॥ ८ ॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥ पूजयामास धर्मज्ञो देशकालविभागवित् ॥ ९ ॥

यदर्थं तस्याविवेकः श्रीकृष्णेन संवर्धितस्तद्दर्शयति । इतीति । सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया । विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः ॥ १ ॥ संतः श्रेष्ठा अश्वा
येषु तैः रथैः ॥ २ ॥ ३ ॥ सानुगाः परिवारसहिताः ॥ ४ ॥ तत्र तदा तत्रासन् । तत्क्षणमेवागता इत्यर्थः । भरतपुंगवं भीष्मम् ॥ ५ ॥ रेणुकासुतः परशुरामः ॥
॥ ६ ॥ ७ ॥ ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ॥ ८ ॥ वसूत्तमो भीष्मः देशकालविभागविदित्युत्थातुमशक्यत्वाच्छयान एव मनसा वाचा च पूजयामास
तस्य भीष्मस्य (१) इत्युक्तरीत्या ततो हस्तिनापुरतः । विशेषेण नश्यंति पापान्यत्रेति विनशनम् । देवानामिव व्रतं सत्यसंभाषणादिनियमो देवस्य श्रीकृष्णस्येव व्रतं ब्रह्मचर्यं यस्येति देवव्रतः । ''आत्मन्यवरुद्धसौरतः''
इति श्रीदशमे वक्ष्यमाणत्वात् । ''यद्यहं ब्रह्मचर्येण न भग्नो भूतले सदा । तेनैव सत्यमानेन पार्थस्यायातु वै शिरः'' इति जैमिनीयाश्वमेधोक्तेश्च । कृष्णब्रह्मचर्यस्य प्रसिद्धत्वमस्तीति । यत्र विनशने । अयं जीवः ।
यद्ययं तवाविवेको नापयाति तदा सर्वधर्मतत्त्वज्ञं भीष्ममेव पृच्छेति युक्तिःश्रीकृष्णोक्ता सर्वसंमताभूत्तदा राजा तत्रैव ययाविति ॥ १ ॥ आदिना कश्यपांगिरसादिग्रहः ॥ २ ॥ हे विप्रर्षे इति । यथा भवान्सर्वतत्त्वज्ञोऽपि
व्यासं विहाय मद्यशोवृद्धये मां पृच्छति तथा राजापि श्रीकृष्णं विहाय भीष्मं प्रष्टुं श्रीकृष्णेच्छया ययाविति भावः । स युधिष्ठिरः । गुह्यकैर्यक्षैः ॥ ३ ॥ अमरमिव द्योतमानम् । चक्रिणा कृष्णेन । इत्यर्थ इति ।
अत्रासतेर्गत्यर्थस्य रूपमिदम् ॥ ''असगतिदीप्त्यादानेषु'' इति धातुपाठात् ॥ ४ ॥ तत्र तदा कर्मज्ञानोभयप्रधाना ब्राह्मणा ब्रह्मर्षयः कर्मगौणज्ञानप्रधानास्तु देवर्षयः तपश्चर्यापुरस्सरं यथाशास्त्रं प्रजाविता रो राजर्षय
इति विवेकः । '' कर्मज्ञानोभयपरा विप्रा ब्रह्मर्षयः स्मृताः । कर्मगौणा ज्ञानपरा विप्रा देवर्षयः स्मृताः ॥ तपश्चर्यां पुरस्कृत्य यथाशास्त्रं प्रजावनम् । ये क्षत्रियाः प्रकुर्वंति ते तु राजर्षयः स्मृताः'' इति संहितोक्तेः
पुंसि परमेश्वरे गौर्दृष्टिर्यस्य स पुंगवः । इदं समासांतटचि रूपम् । ''पुमाञ्जीवे परेशे च ब्राह्मणे पालकेपि च'' इति निरुक्तिः । भरतेषु पुंगवो हरिभक्त इत्यर्थः । ''दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु । भूमौ
पशौ च गोशब्दो विद्वद्भिः परिकीर्तितः'' इत्यनेकार्थमञ्जरी ॥ ५ ॥ भगवान् ''व्यासो नारायणः स्वयम्'' इत्युक्तेः ॥ ६ ॥ कौशिको विश्वामित्रः ॥७॥ हे ब्रह्मन्निति । त्वमपि त्रिकालज्ञत्वाज्जानास्येवेति भावः ॥ ८ ॥
महाभागान्महानुभावान् । उपलभ्य दृष्ट्वा । मनसा प्रतिगम्य वा देशकालयोर्विभागमौचित्यं वेत्तीति तथा । प्रत्युत्थानाभिवंदनादिपूजायामशक्तत्वान्मानसीं वाचकीमांजलिकीं वा पूजां कृतवानित्यर्थः । आपत्संपद्धर्मौ जाना
तीति धर्मज्ञः । यद्वा ''धर्मो धर्मविदुत्तमः'' इति सहस्रनामसु धर्मोपि विष्णुवाचकस्तं सर्वदेहेषु स्थितं वा जानातीति धर्मज्ञः । भीष्मस्य वसूत्तमत्वं कथमिति चेत्तत्रेयं कथानुसंधेया श्रीमन्महाभारतीया । कदाचिन्महाभि
षाख्यो राजा तपोयज्ञादिप्रभावेण ब्रह्मलोकं गतस्तत्र ब्रह्मसेवार्थमागतां स्त्रीरूपां गंगां दृष्ट्वा कामवशोऽभूत् । सापि तं दृष्ट्वा तथाविधैव जाता। तौ तादृशौ दृष्ट्वा ब्रह्मा त्वं मनुष्यो नृपो भव । त्वमपि मानुषी भूत्वास्य भार्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम् ॥ हृदिस्थं पूजयामास माययोपात्तविग्रहम् ॥१०॥ पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् ॥ अभ्याचष्टाऽनुरागास्रैरंधीभूतेन चक्षुषा ॥ ११ ॥ अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनंदनाः ॥ जीवितुं नार्हत क्लिष्टं विप्रधर्माच्युताश्रयाः ॥ १२ ॥

त्यभिप्रायः ॥ ९ ॥ हृदिस्थं संतं पुरतश्चासीनं पूजयामास ॥ १० ॥ उपासीनान् समीप उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहस्ताभ्यां संगतानुपसन्नान् । पाठांतरे ताभ्यामवनतान् । अभ्याचष्टाभ्यभाषत । अनुरागास्रैः स्नेहाश्रुभिरंधीभूतेन चक्षुषोपलक्षितो ददर्शेति वा ॥ ११ ॥ अभिभाषणमाह । अहो इत्येकादशभिः ।

भविष्यसीति शशाप । स च शप्तः प्रतीपं पितृत्वेन संचित्य तस्थौ । तदवसरेऽष्टवसवो वसिष्ठाश्रमं जग्मुस्तेषु द्यौर्नामा च पत्न्या पृष्टो धेनुं दृष्ट्वा कस्येयमिति तच्छ्रुत्वा स च तामाह । नंदिनीयं वसिष्ठस्य धेनुरस्या दुग्धपानेनायुतायुः स्थिरयौवनो भवेदिति । सा चेदं श्रुत्वाह । उशीनरनृपपुत्री मत्प्रियसखी तदर्थं धेनुमाहरेति । स चान्यैर्वसुभिः संभूय तां गां जहार ततो वनादागत्य वसिष्ठेन गोहरणाद्वसवो मनुष्या भवतेति शप्ताः येन हृता स चिरमन्येऽल्पकालमिति । स्त्रीहीनश्च स्त्र्याज्ञया हरणात् । प्रसादितो मुनिराह । ते च मार्गे गंगां ब्रह्मलोकादागतां तद्वृत्तं श्रुत्वा त्वं मानुषी भूत्वाऽस्माञ्जनय मातरिति जाताञ्जातान्स्वप्रवाहे क्षिपास्मानिति चोचुः । किञ्च स महाभिषः प्रतीपाद्राज्ञः शंतनुनाम्ना जातोऽभूत् । स च पित्रेत्थमुक्तः । पुत्र पुराहं गंगातीरं गत्वा सूर्यं सेवितवानस्मि । तदा काचित्सुंदरी जलान्निःसृत्य मद्दक्षिण ऊरावुपविष्टा स मयोक्ता किमर्थमागता । तयोक्तं पत्यर्थमिति त्वं मे पतिर्भवेति । तच्छ्रुत्वा मयोक्तं नाहं परस्त्रीगामी । किं च मद्दक्षिणांगसेवनात्त्वं मदपत्यपत्नी भविष्यसीत्यतो हे पुत्र तत्र गत्वा तां भज । सा का त्वमिति न प्रष्टव्येत्युक्त्वा पुत्राय राज्यं दत्वा प्रतीपो वनं जगामेति । अथ कदाचिच्छंतनुर्मृगयां चरन्गंगातटस्थामतीव सुंदरीं कांचिन्नारीं ददर्श । सा च तं महाभिषं मत्वा स्मितादिभिर्मोहयामास । स च राजा तां न जानाति गांगेयमिति । सा च तमाह। प्रतीपतनयं त्वामहं जानामि मत्कृतं शुभमशुभं वा यदि नो वारयिष्यसि तदा त्वां वरिष्यामीति । स च तथेत्याह । सा च काले नृपाद्गर्भं दधार । ततः सा जातमात्रं बालं गंगांभसि चिक्षेप ।एवं सप्त चिक्षेप । शंतनुर्विचारयामास । यद्येनां वारयिष्ये तदा मां त्यक्त्वा गमिष्यतीयम् । अधुना त्वष्टमो गर्भो जातस्तं कथं जीवयामीति विचार्योवाचाहं तव दासोस्मि । सप्त सुतास्तु त्वया हता एकं वंशरक्षार्थं देहि । इत्युक्त्वापि यदा तं तत्रैव क्षेप्तुमियेष । तदा स उवाच । पापिष्ठे नरकान्न बिभेषि । मत्पुत्रं दत्वा गच्छ वा तिष्ठ यथेच्छम् । सोवाच । समयलंघनादहं तु गच्छामि । तव पुत्रं वने पालयिष्येऽहं तु गंगा देवकार्यार्थं मनुष्ययोनिं प्राप्तास्मि । येंऽभसि क्षिप्ता मया ते वसिष्ठशप्ता वसव एव । तत्प्रार्थनया मानुषीभावं गतास्मीति । मातरं विना पुत्रजीवनं दुर्घटमत एनं प्राप्तयौवनं तत्रैवागतं त्वां दास्यामि । यत्राहं त्वया वृता इत्युक्त्वा सा गता । राजा तच्चिंतया दुःखं लेभे। कदाचिन्मृगयां गतस्तत्र सरित्तटे धनुरादाय क्रीडन्तं तमेव बालं शंतनुर्नृपः पप्रच्छ । कस्यात्मजोसि । स न किंचिदुवाच । तदा राजा स्वपुत्रोयमिति निश्चित्य स्थितः । गंगा च तस्मै दर्शनं दत्वोवाच । वसिष्ठाश्रमस्थेनानेन त्वदात्मजेन धनुर्वेदो जामदग्न्यादधीतस्तद्धुनेमं गृहीत्वा पुरंगच्छेति । ततः स गजाह्वयं गत्वादैवज्ञमाहूय तं यौवराज्ये स्थापयामासेतीत्थं भीष्मो वसूत्तमो ज्ञेयः ॥ ९ ॥ कृष्णमिति । सदा स्वेषां भक्तानां हृदिस्थं हृदयस्थमपि मायया कृपया उपनेत्रसमीपे आत्त आनीतो विग्रहो येन तम् । यद्वा माययोपात्तो युधिष्ठिरेण साकं प्रबोधाप्रबोधहेतुको विग्रहो विवादो येन तम् ॥ ''विग्रहः कायविस्तारे विभागे ना रणेऽस्त्रियाम् । विवादे च विरोधे च हलेऽपि परिकीर्तितः'' इत्यभिधानात् । तीर्थस्तु मायया स्वेच्छयोपात्तः पितृत्वेन गृहीतो वसुदेवदेहो येन तमित्याह ॥ १० ॥ पाठांतरे प्रश्रयप्रेमसन्नतानिति पाठे चक्षिङो दर्शनार्थतामाश्रित्याह-ददर्शेति वेति ॥ ११ ॥ हे धर्मनंदना इति बहुत्वं प्रधानापेक्षम् । यद्वा छत्रिणो यांतीतिवत् । अहो यो धर्ममाचरणेन नंदयति समर्द्धयति तस्यापि चेत्कष्टं तर्ह्यन्याय्यमेवेति भावः । विप्रादिष्वेकेपि सुखजीवनायालं ''विप्राणां सेवनं लोके विपद्ध्वान्तसहस्रपात्'' ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्थितेऽतिरथे पांडौ पृथा बालप्रजा वधूः ॥ युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः ॥ १३ ॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियम् ॥ सपालो यद्वशे लोको वायोरिव घनावलिः ॥ १४ ॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोऽस्त्री गांडिवं चापं सुहृत्कृष्णस्ततो विपत् ॥ १५ ॥ न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् ॥ यद्विजिज्ञासया युक्ता मुह्यंते कवयोऽपि हि ॥ १६ ॥

हे धर्मनंदनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ यूयमिति यदेतदहो कष्टं जुगुप्सितम् । अहो अन्याय्यं चैतत् । यतो यूयं विप्रा धर्मोऽच्युतश्चाश्रयो येषां ते ॥१२॥ किं च पांडौ संस्थिते मृते बालाः प्रजाः पुत्रा यस्याः सा । वधूश्चेति दैन्यं दर्शितम् । तोकान्यपत्यानि तद्वती । अपत्यैः सह क्लेशान् प्राप्तेत्यर्थः ॥ १३ ॥ कालकृतत्वेन शोकं वारयति । सर्वमिति द्वाभ्याम् । भवतामपि । यद्वशे यस्य वशवर्ती ॥ १४ ॥ अहो दुर्घटघटनापटुः काल इत्याह । यत्रेति । कृष्णोऽर्जुनः । अस्त्री धन्वी । ततस्तत्रापि विपत् । पुण्यशारीरबलास्त्रनैपुणशस्त्रदेवसंपत्तावपि दुर्वारा विपदित्यर्थः ॥ १५ ॥ ननु कृष्णं कथं कालोऽतिक्रमेदित्यपेक्षायामाह । न ह्यस्य श्रीकृष्णस्येत्यं

''धर्मो रक्षति कान्तारे यत्र कोऽपि न रक्षिता'' ।''हरिस्मृतिः सर्वविपद्विमोक्षणम्''इत्यादिवाक्येभ्यः । किमुत संहिता एतेऽत उक्तमहो कष्टमहोऽन्याय्यमित्याश्चर्यादप्याश्चर्यमिति द्योतनाय कष्टान्याय्योभयोपादानम् । अत्र प्रगृह्यसंज्ञाभावस्त्वार्ष एव । वस्तुतस्तु भूभारावतारायावतीर्णानां पांडवानामासुरजननिधनेन वनवासादिष्वपि नित्यसुखित्वान्नास्ति दुःखमिति ज्ञेयम् ॥ १२ ॥ अतिरथे महारथसहस्रजेतारि संस्थिते स्वर्गं गतवति सत्य तोकवती पुत्ररहिता यथा बहुक्लेशवती भवति तथा बालप्रजा युष्मन्माता पृथा पुत्रवत्यपि युष्मत्कृते युष्मत्पोषणपालनार्थाय बहून्क्लेशान्प्राप्तेति तीर्थः । स्वामिचरणातु तन्मातृक्लेशं स्मृत्वाह-किंचेति । इत्यर्थ इति । बालप्रजत्वदशायामेकाकिन्येव क्लेशान्प्राप्ता युष्माकं प्रौढवयस्त्वे तु तोकवती पुत्रैर्युष्माभिस्सहितापि कष्टान्प्राप्तेति भावः ॥ १३ ॥ ननु तर्हि कथमस्माकं क्लेशस्तत्र तत्कारणं प्राचीनार्वाचीनं किमपि पापमपश्यन्वक्तुमसमर्थ एव लोकोक्तिरीत्यैवाह-सर्वमिति । ननु कालो हि प्रारब्धसुखदुःखभोगयोरेवाधिकरणमेवेति सहकारित्वादुपचारेणैव कालकृतं मन्ये इति ब्रूषे । प्रारब्धपापकृतमिति स्पष्टं कथं न वदसीत्यत आह-भवतां चेति । युधिष्ठिरो हि साक्षाद्धर्मावतार इति प्रसिद्ध एव । धर्मस्यापि प्रारब्धं पापमस्यास्तीति चेन्मंतव्यं तर्हि कथं धर्मस्याधर्मत्वमतोऽतिप्रबलोऽतिदुर्निवारो दुस्तर्कः । काल एव कारणमित्याह-सपाल इति । क्वचित्सकाल इत्यपि पाठः । लोक इंद्रादिसहितश्चतुर्दशभुवनात्मकः ॥१४॥ ननु''न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो निमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥'' इति श्रीकपिलदेवोक्तेः । कृष्णे दास्यसख्यवात्सल्यवतः पाडवान्कथं कालोऽतिक्रमेतेत्यतोऽतिविस्मयान्वितः कारणं विनैव कर्मोत्पत्तिरूपं विभावनालंकारं भावयन्नाह-यत्रेति । राजा रंजकः सर्वेषां धर्मसुतत्वात् । यत्र च तस्य राज्ञः कनिष्ठः क्षितिभारायितदितिसुतशोणितदिग्धां गदां पाणौ बिभ्रत् भक्तिवशीकृतपरब्रह्मा वृकोदरः । वृकानतिक्रूरानप्युद्दृणाति विदारयति यः स भीमसेनः । वृकशब्दः उपलक्षणं येन विराटनगरे सिंहोपि युद्धे विदीर्ण इत्यर्थः । तथा यत्रेन्द्रावतारकृष्णार्जुनोऽस्त्री स्वीकृतद्रोणाखिलास्त्रविद्यः तस्य च करे रिपुपूयशोणितवमनकारिगांडिवाख्यं धनुर्येन शंकरोपि तोषितः सर्वसुपर्वाधिराजोऽनंतबलवीर्यादिगुणार्णवः श्रीमान्कृष्णो वासुदेवः सुहृदनिमित्तबंधुस्ततस्तत्रापि । इत्यर्थ इति । सर्वापेक्षितबलसत्वे पुनर्विपदहो कालमाहात्म्यं वर्णितुं न शक्यत इति भावः । ''विना कारणमुत्पत्तिः कार्यस्येति विभावना । अनध्ययनविद्वांसो निर्द्रव्याः परमेश्वराः'' इति वाग्भटः ॥१५॥ ननु ''योऽयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुः'' इत्युक्तेः कालस्य तच्चेष्टारूपत्वात्स कथं तमतिक्रमेतेत्याक्षिपति-नन्विति । तर्ह्यत्र किं निर्द्धारयामि । सामान्यतस्तावदयं सिद्धान्तः सर्ववादिसंमतो यत्कृष्णस्य चिकीर्षितमन्यथा कर्तुं समर्थस्तच्चिकीर्षितं किमित्यद्यापि कोपि न वेत्तीत्याह-नह्यस्येति । कर्हिचिदपि काले कोपि पुमान् ब्रह्मभवादिः कोपि न वेद । अहं को वराक इति भावः । ननु कोपि मा जानातु जिज्ञासा त्ववश्यमेव जायते । तत्र ।

॥ ६५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादिदं दैवतंत्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो ॥ १७ ॥ एष वै भगवान्साक्षादाद्यो नारायणः पुमान् ॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥१९॥ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम् ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिम् ॥ २० ॥

गुल्या निर्दिशति । विधित्सितं कर्तुमिष्टम् । यत् यस्य विधित्सितस्य जिज्ञासया ॥ १६ ॥ इदं सुखादि दैवतंत्रमीश्वराधीनं व्यवस्य निश्चित्य तस्येश्वरस्यानुविहितोऽनुवर्ती सन् । कर्तरि क्तः । हे नाथ कुलपरंपरागत स्वामिन् प्रभो अनाथा असमर्थाः प्रजाः पाहि ॥ १७॥ अनुविधेयः परमेश्वरश्च श्रीकृष्ण एवेत्याह । एष एव भगवान्सर्वेश्वरः । यत आद्यः पुमान् । तच्च कुतः । यतो नारायणः साक्षात् ॥ १८ ॥ तदुपपादयति । अस्येति । अनुभावं प्रभावम् ॥ १९ ॥ त्वमज्ञानाद्यमेवं मन्यसे । मातुलेयं देवक्याः स्वासु दुःखदानमेव किं चिकीर्षितं सुखदानमेव वा उभयदानमेव वा । तत्राद्यं न । भक्तवात्सल्यगुणस्य लोपादनौचित्यात् । द्वितीयमपि न । अदृष्टत्वादेव । तृतीयमपि न । सौहार्दलोपापत्तेः । तर्हि जिज्ञासापि नैव कर्तुमुचितेति विनिर्णयन्नाह-यद्विजिज्ञासयेति । युक्ता विवेकिनोपि कवयः सर्वशास्त्रज्ञा अपि मोहमेव प्राप्नुवंति सिद्धांतालाभादिति भावः । अत्र भीष्मस्य महाविज्ञस्योक्तौ कवय इति मुह्यंतीति पदाभ्यां युधिष्ठिरादयोपि भगवद्भक्ताः प्रारब्धं भुंजत इति मतं परास्तम् । हे राजन्निति । यत्र ब्रह्मादीनां मोहस्तत्र राज्ञस्तव का वार्त्तेति भावः । संदर्भस्तु तेषामार्त्तिद्वारेण स्वस्मिन्नावेशार्थं तत्खण्डनजनितहर्षद्वारेण च स्वस्मिन्प्रेमवर्द्धनार्थं तथा विधित्सितमिति गूढोभिप्रायः ॥ १६ ॥ तस्मादुक्तदुर्ज्ञेयत्वहेतोः । किञ्च स्वभक्ताय तत्प्रदानादिकं दुर्ज्ञेयप्रयोजनकमित्यपि निश्चित्य हे नाथेति हे भरतर्षभेति हे प्रभो इति संबुद्धित्रयस्य स्वामित्वं कुलपरंपरागतं तव तत्कर्तुं समर्थे न त्याज्यमिति भावः ॥ १७ ॥ नन्वीश्वराधीनमिति तद्विधित्सितं तु न वेदेत्यादि कथं ब्रूषे । ईश्वरः संप्रति तव साक्षाद्वर्तत्येवेत्यत इमं कृष्णमेव दृष्ट्वा कथं सर्वं तत्त्वं न वेत्सीत्यत आह-एष इति । मायया मोहयन्निति पृष्टो हि भीष्मादपि किमहमतितत्त्वज्ञ इत्यादिवाचा वंचयन्वक्ष्यति । कथंचिद्वदन्नपि मोहयिष्यत्येवेत्यसावनुवर्त्तनीय एव । न तु जिज्ञासनीय इति भावः । संदर्भस्तु न च नरलीलादृष्ट्या साधारणदृष्टिरत्र कर्तव्येत्याह-एष इति । साक्षादेव स्वयं भगवान् यः खल्वाद्यः पुमान्महत्स्रष्टा सोप्ययमेव । यश्चाद्यो नारायणः परमव्योमाधिपतिः सोप्ययमेवेति । स्वामी तु अनुविधेयोऽनुवर्त्तनीयः । तत्वादिपुंस्त्वं चेत्याह ॥ १८ ॥ तदादिनारायणत्वम् । विश्वनाथस्तु अनुभावं भावबोधकं चेष्टाविशेषं शिवो वेद न तु विधित्सितं स्वरूपं प्रभावं चेत्यर्थः । तथाहि । रसशास्त्रज्ञाः । प्रथममनुभावं स्तंभस्वेदरोमांचादिकं वेद च तेन च स्थायिभावं च अनुभावस्य वैशिष्ट्यतारतम्याभ्यां स्थायिभावस्यापि वैशिष्ट्यतारतम्यं च । तथैव यशोदादिगोपीष्वस्य दामबन्धनादिरूपमर्जुनयुधिष्ठिरोग्रसेनादिषु सारथ्यदास्यादिरूपं च पारवश्यमनुभावं वेद तेन च तस्य । सर्वेश्वरस्य सर्वनियन्तुः । सर्वेश्वरस्यापि वशीकारकः कोऽपि पदार्थविशेषस्तत्रतत्र वर्त्तमानोऽस्यापि चित्तमभीक्ष्णं विद्रुतीकुर्वन्नध्यास्ते इत्यनुमिमीते च । स च नानाविशेषवान्स्वविषयाश्रययोश्चेतोविद्रावकः परस्परवशीकारकश्च प्रेमाभिधान एव परमपुरुषार्थचूडामणिः भक्तिस्नेहानुरागादिशब्दैरुच्यमानो भवति । किञ्च तत्त जनकत्वेन प्रतिसमयदृष्टेनास्य वशीकाराधिक्यमेव दृष्टान्तेन च प्रेमाधिक्यमनुमाय सिद्धसाधकभक्तेष्वेतत्कर्तृकमेव कष्टप्रदानं भक्तिवृद्ध्यर्थमेवेति सिद्धान्तं निश्चिनोति । शिवनारद एव कपिलदेव एवेति । अत एव द्रौपद्यादिषु कष्टाधिक्यात्प्रेमाधिक्यं च दृष्टं तथा "यस्याहमनुगृह्णामि हरिष्येतद्धनं शनैः । ततोधनं त्यजंत्यस्य स्वजना दुःखदुखितम्" इत्यादि श्रीमुखवाक्येन. च भक्तकष्टस्य हितैषिणा भगवतैव दीयमानत्वान्न कर्मबद्धत्वम् । किंचैतदपि न सार्वत्रिकं कचित्कचिदकष्टेनापि स्वभक्तभक्तिं वर्द्धयतीति विधित्सितं तु न कोपि वेदेत्युक्तम् । अनुभावं तु शिवनारदादिरेव वेद । अन्ये पुनर्मंदा दामबन्धनादिकमप्यनुकरणत्वेन व्याचक्षाणा अनुभावमपि न विदुरिति ॥ १९ ॥ अस्यानुभावज्ञानसद्भाववतामपि भवतां संबन्धविशेषमयसर्वाच्छादकमाधुर्यज्ञानात्मकप्रेमविशेषेण वशीकारित्वं तु तैरपि दुर्लभमित्याह-यमिति । मातुलेयमिति । स्त्रीभ्यो दृक्सिद्ध्यर्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वात्मनः समदृशो ह्यद्वयस्याऽनहंकृतेः ॥ तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥ तथाप्यकांतभक्तेषु पश्य भूपाऽनुकंपितम् ॥ यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २२ ॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ ॥ २३ ॥ स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहम् ॥ प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥ सूत उवाच ॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे ॥ अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वताम् ॥२५॥ पुरुषस्वभावविहितान्यथावर्णं यथाऽऽश्रमम् ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥

सुतम् । प्रियं प्रीतिविषयम् । मित्रं प्रीतिकर्तारम् । सुहृत्तममुपकारानपेक्ष्योपकारकं च । सौहृदाद्विश्वासात् । अकरोः कृतवानसि । सचिवं मंत्रिणम् ॥ २० ॥ नन्वीश्वरश्चेत्कथं नीचे सारथ्यादौ प्रवृत्तस्तत्राह । सर्वेति । तत्कृतं नीचोच्चकर्मकृतं मम योग्यमयोग्यमिति मतेर्वैषम्यं क्वचिदपि नास्ति । कुतः निरवद्यस्य रागादिशून्यस्य । तत्कुतोऽनहंकृतेः । तच्च कुतोऽद्वयस्य । तदपि कुतः समदृशः । तत्रापि हेतुः । सर्वस्यात्मनः । यथेष्टं वा हेतुहेतुमद्भावः ॥ २१ ॥ तथापि समत्वेऽपि । हे भूप । अनुकंपितमनुकंपाम् ॥ २२ ॥ इदानीं स्वदेहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते । भक्त्येति द्वाभ्याम् ॥२३॥ यावदिति विलंबं द्योतयति । अहं हिनोमि त्यजामीति स्वातंत्र्यम् । इदमित्यनात्मत्वेन ज्ञातम् । प्रसन्नहासेनारुणलोचनाभ्यां चोल्लसद्रुचिरं मुखांबुजं यस्य । ध्यानस्य पंथा विषयः । योऽन्यैश्चिंत्यते केवलं सोऽग्रतः स्थितः सन्मां प्रतीक्षतामित्यर्थः ॥ २४ ॥ तत्सानुकंपं वाक्यमाकर्ण्य ॥ २५ ॥ पुरुषस्वभावेन विहितान्नरजातिसाधारणान्वर्णयामासेति तृतीयेनान्वयः । यथावर्णं वर्णधर्मान् । यथाश्रममाश्रम

देवक्याः सुतमिति व्याख्यातमन्यथा मातुलस्यापत्यं मातुलायनिरित्येव स्यात् । सर्वेश्वरस्यापि युष्मत्सचिवदूत्यादिकं प्रेमवश्यत्वानुभाव इत्यर्थः । अत्र यमित्यस्यानुभावमित्यनेन पूर्वेणैवान्वयः ॥ २० ॥ अत्राक्षिपति-नन्विति । तद्रागादिशून्यत्वं तच्चानहंकृतित्वं च तदपि अद्वयत्वमपि । तत्रापि समदृक्त्वेपि । संभवत्वाद्यथेष्टं वेत्याह । अत्र विश्वनाथः । ननु परमेश्वरस्य भक्तिवशीकृतत्वे दूत्यसारथ्यादिरपकर्ष एव तस्मिंश्च सति कथं प्रेमा परमेश्वरस्य सुखप्रद इत्यत आह-सर्वात्मन इति । निरवद्यस्य निर्दोषप्रेमवतोऽस्य कृष्णस्य तत्कृतं दूत्यादिकृतं मतिवैषम्यं न । अत्र हेतुः । सार्वकालिकं स्वतःसिद्धं महैश्वर्यमेवेत्याह-सर्वस्यात्मन इति । अर्जुनस्याप्यात्मा स एवेति स्वयमेव सारथी रथी चेत्यत एव समदृशः समं तुल्यमात्मानमेव सर्वत्र पश्यतः सर्वात्मत्वादेवाद्वयस्य द्वितीयाभावादेवानहंकृतेर्गर्वरहितस्य :। किं च महैश्वर्यहीनोप्यन्यः प्रेमी प्रेमत एव हेतोरात्मनो नीचकर्मोत्थमपकर्षं क्लेशञ्च दुःखत्वेन न मन्यते । अस्य तु महैश्वर्यादेवानन्दमात्रस्य कुतः प्रेमवतो दुःखं तस्माद्युष्माकमेवोत्कर्षो यत एतादृशोपि परमेश्वरो भवतां दूत्यादिकं करोतीत्यहो वशीकारकत्वं प्रेम्णा इति भावः ॥ २१ ॥ यद्यपि युष्मत्तुल्यो भवतुं न शक्नोमीति भावः । अनुकंपां पश्य ययाऽयमानंदमयसाक्षाद्ब्रह्मस्वरूपोप्येतादृशं बीभत्सितं मत्समीपस्थानं प्रस्थापित इत्ययमप्येकोऽनुभावोनुभूयतामिति भावः । हे भूपेति । अहो भूपे त्वयि त्वस्यानुकंपोचितैव । यतो मयि भूपत्वाभावेपि समदृक्त्वादेव सा कृतेति भावः ॥ २२ ॥ योगी समाहितांतःकरणः कामकर्मभिः कामनया कृतैः सारबंधहेतुभूतैः कर्मभिः ॥ २३ ॥ इत्यर्थ इति । प्रसन्नहासेत्यादिना तद्दर्शनबहुकालतार्थमेव शरीरत्यागे विलंबः कृत इति लभ्यते । तच्च शरीरांतराप्तौ मे कदा दर्शनं स्यादित्युत्कंठाविष्टत्वादिति गम्यत इति भावः । यद्वा प्रतीक्षतांक्षणमत्रैव तिष्ठतु । यावदहं किंचिद्विलंब्य चक्षुर्भ्यामाभ्यामेव सौंदर्यामृतं पिबन्स्वस्य मनोनुलापं प्रकाशयन्स्तौमीति भावः । ममत्वाद्ध्यानस्य पंथा विषयभूतो यः सर्वकालमेव भवेत् प्रसन्नहासेस्यादिरूपोऽस्मिन्नंतकाले साक्षान्नयनगोचर एव तिष्ठात्विति भावः । चतुर्भुज इति । भीष्मोपास्यमंत्रध्यानस्य तथात्वमवगम्यते ॥ २४ ॥ २५ ॥ यथावर्णं वर्णयोग्यधर्मान् । योग्यतायामव्ययीभावः । अयं भावः । न हि ब्रह्मचर्यादय आश्रमधर्माः सर्वे क्रमेणानुष्ठेया इति नियमः । किं तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः ॥ स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः ॥ यो योगिनश्छंदमृत्योर्वांच्छितस्तूत्तरायणः ॥ २९॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे ॥ कृष्णे लसत्पीतपटे चतुर्भुजे पुरःस्थिते मीलितदृग्व्यधारयत् ॥ ३०॥ विशुद्धया धारणया हताशुभस्तदीक्षयैवाऽऽशु गतायुधश्रमः ॥ निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम् ॥ ३१ ॥ भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि ॥ स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥

धर्मांश्च । वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातमुभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् ॥ २६ ॥ पुनस्तत्रैव विशेषमाह । दानेति । मोक्षधर्मान् शमदमादीन् । भगवद्धर्मान्हरितोषणान्द्वादशादिनियमरूपान् । समासव्यासौ संक्षेपविस्तारौ तावेव योगावुपायौ ततस्ताभ्याम् ॥ २७ ॥ धर्मादींश्च यथाधिकारं प्रतिनियतोपायसहितान् । यथा यथावत् । नानाख्यानेषु य इतिहासास्तेषु यथा संति तथा वर्णयामासेति ॥ २८ ॥ छंदेनेच्छया मृत्युर्यस्य ॥ २९ ॥ सहस्रणीर्युद्धे समीपस्थान्सहस्रं रथिनो नयति पालयतीति सहस्रणीर्भीष्मः । सहस्रिणीरिति पाठे सहस्रार्थवतीर्गिरः । लसंतौ पीतौ पटौ यस्य तस्मिन् । अमीलितदृगेव मनो व्यधारयत् ॥ ३० ॥ अनयैव विशुद्धया धारणया हतमशुभं यस्य सः । तस्य श्रीकृष्णस्येक्षया कृपादृष्ट्यैव गत आयुधश्रमो यस्य सः । अत एव निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमो विविधं भ्रमणं यस्मात्सः । जन्यं देहम् ॥ ३१ ॥ परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति । इति नानाधर्माद्युपायैर्मतिर्मनोधारणलक्षणोपकल्पिता समर्पिता । क्व । सात्वतानां पुंगवे श्रेष्ठे भगवति । वितृष्णा निष्कामा । अवितृष्णेति वा छेदः अवितृप्तेत्यर्थः । विगतो भूमा यस्मात्तस्मिन् यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः । तदेव परमैश्वर्यमाह ।

वैराग्यं चेत्सदैव भिक्षवो भवेयुः "यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति श्रुतेः । रागश्चेत्तदा गृहस्था एव भवेयुः "अविपक्वकषायोस्मादमुष्माच्च विहीयते" इत्युक्तेः । कर्मणा कषायपाकार्थं गार्हस्थ्यमेव सेवेतेति भावः । ततश्च तत्रैव दानधर्मानित्यादि सर्वांते च भगवद्धर्मान् भक्त्यंगानीति मोक्षधर्मेभ्योप्यस्य पार्थक्यं श्रैष्ठ्यं च व्यञ्जितम् । समासः संक्षेपो व्यासो विस्तरस्तयोर्योगेन युक्ततया धर्मार्थकामेत्यादि । एवञ्चोक्तास्सर्वे धर्माश्चतुर्षु वर्णेष्वेव पर्यवस्यंतीत्युक्तपोषन्यायेन तानेवाह-धर्मेति । उपाया धर्मादिसाधनानि । यथा थावदेव नानाख्यानादिषु येये इतिहासास्तेषु प्रदर्श्य प्रमाणीकृतानित्यर्थः ॥ २६ ॥ २७ ॥ २८ ॥ "छंदो वशेप्यभिप्राये पद्यैषणरतिष्वपि" इति कोशात् । एतेनोत्तरायणमरणमेव श्रेष्ठमिति न ध्येयम् । "देशे च काले च मनो न सज्जयेत्" इति वक्ष्यमाणत्वात् । किं तु स्वच्छन्दमृत्युतैवात्रासूचीति ॥ २९ ॥ तदोत्तरायणे प्राप्ते सति उपसंहृत्यान्यतः प्रत्याहृत्य अमीलितदृगेव चक्षुषी स्पष्टमुन्मील्यैव व्यधारयदानखशिखं प्रवेशयामास । काले च नेत्रसंमीलनपूर्वकमंतर्ध्येयस्य संमुखस्थत्वात्तन्मीलने प्रयोजनाभावादिति भावः ॥ ३० ॥ इति मदायुःसमाप्तौ मतिर्भगवति उपकल्पिता मत्प्रभौ मदंतकाले कृपावशतयैव मत्समीपमागते किञ्चिदुपायनं दातुमुचितम् तत्र संप्रति ममाहंतास्पदममतास्पदयोर्मध्ये समीचीनं किमप्यन्यन्नास्तीति हेतोरेषा मतिरेवोपायनत्वेन कल्पिता ॥ ३१ ॥ ननु उपायनदायिनो लोके किञ्चिज्जिघृक्षवो दृश्यंते तत्राह-वितृष्णा निष्कामा भगवति षडैश्वर्यपूर्णे किन्नारायणत्वेन प्रसिद्धे न सात्वतपुंगवे यदुकुलान्तःसत्वेन प्रसिद्धे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥ ३३ ॥ युधि तुरगरजोविधूम्र
विष्वक्कचलुलितश्रमवार्यलंकृतास्ये ॥ मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ ३४ ॥

स्वसुखं स्वस्वरूपभूतं परमानंदमुपगते प्राप्तवत्येव । क्वचित्कदाचिद्विहर्तुं क्रीडितुंप्रकृतिं योगमायामुपेयुषि स्वीकृतवति । न तु स्वरूपतिरोधानेन जीववत्पारतंत्र्यमित्यर्थः । विहर्तुमिति यदुक्तं तत्प्रपंचयति । यद्यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति ॥ ३२॥ इदानीं श्रीकृष्णमूर्तिं वर्णयन्रतिं प्रार्थयते त्रिभुवनकमनं त्रिलोक्यामेकमेव कमनीयं यत्तद्वपुर्दधाने रतिर्मेऽस्तु । कथंभूतं वपुः । तमालवन्नीलो वर्णो यस्य तत् । प्रातःकालिका रवेः करा इव स्वत एव गौरे पीते वरे निर्मले चांबरे यस्मिंस्तत् । अलककुलैरुपर्या वृतमाननाब्जं यस्मिंस्तत् । विजयसखे पार्थसारथौ । अनवद्याऽहैतुकी फलाभिसंधिरहिता रतिरस्तु ॥ ३३ ॥ विजयसखित्वमेवानुवर्णयन् रतिं प्रार्थयते । युधि युद्धे तुरगाणां खुररजस्तुरगरजस्तेन विधूम्रा धूसरास्ते च ते विष्वंच इतस्ततश्चलंतः कचाः कुंतलास्तैर्लुलितं विकीर्णं श्रमवारि स्वेदबिंदुरूपं तेन भक्तवात्सल्यद्योतकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे ममात्मा मनोऽस्तु रमतामित्यर्थः पुनः किंभूते । मदीयैर्निशितैस्तीक्ष्णैः शरैर्विभिद्यमाना त्वग्यस्य तस्मिन् । शैररेव विलसत्त्रुटयत्कवचं यस्य तस्मिन् ॥ ३४ ॥

ननु नारायणस्यैव भगवत्त्वेन महती प्रसिद्धिश्च सार्वकालिकी तत्राह–विभून्नीति । इत्यर्थ इति । सर्वेश्वर इति भावः । तदेव भूमत्वसमर्पकं "यो वा भूमा तत्सुखं नाल्पे सुखमस्ति" इति श्रुतेः । यद्वा स्वैर्यादवपांडवैरेव सह सुखं परमानंदमुपाधिक्येन प्राप्ते इत्यर्थः । स्वरूपलक्षणमुक्त्वा तटस्थलक्षणमाह–इत्यर्थ इति । प्रकृतिं मायामीक्षणेन महत्तत्त्वाद्युत्पादकतया उपेयसीति भावः । भवप्रवाह इति वदता "पुरुषादयोप्यस्यैवावतारा उक्तास्ते षामेव भवप्रवाहकत्वादिति भावः । यद्वा यतः प्रकृतेरिति । "विलीनो हि प्रकृतौ संसारमेति" इति श्रुतेः । प्रकृतिरेव जीवानां संसारहेतुः ॥ ३२ ॥ नन्विति । मतिरित्युक्ता मतिः किमाकारा तत्राह–त्रिभुवनेति । रतिः प्रेमा त्रिभुवनस्य ऊर्द्ध्वाधोमध्यलोकस्थजनसमुदायस्य कमनमभिलाषो यत्र तद्वपुर्दधाने । रवेः करैर्गौरवरेऽतिगौरीकृतेंऽबरे यत्र । तत् अर्जुनरथोपरि स्थितस्य कृष्णस्य पीतांबरद्वयं सूर्यकिरणसंपर्कादतिचाकचक्यवत्त्वेन तदानीमतिपीतं मया दृष्टं तेन पार्थसारथित्वेनोपलब्धमहासौंदर्ये कृष्णे रतिः प्रार्थनामयी मतिर्मया तस्मिन्नेवोपकल्पितेति भावः । अत्र चाग्रिमेष्वपि पद्येषु साक्षाद्वर्तिन्यपि भगवति प्रार्थनायां युष्मत्प्रयोगाभावः । आस्वादित चरे सांग्रामिकवीररसावेशमये तन्माधुर्य एव चित्तस्यासक्तिं बोधयति ॥ ३३ ॥ इत्यर्थ इति । धातूनामनेकार्थत्वादस्ते रमणार्थतापीति भावः । विभिद्यमानविलसत्पदयोर्विप्रिय इतिद्व्युपसर्गो गतार्थ एव ध्येयः । अत्र संदर्भः । अथ प्राक्तनस्वापराधं तस्मिन्दैन्येन विज्ञापयन्नपि रतिमेव प्रार्थयते युधीति । मम निशितेत्यादिकं मायिकलीलावर्णनमेव । "एवं वदन्ति राजर्षे ऋषयः केचनान्विताः" इत्यादिविरोधात् । तथाहि स्कांदे "असंगश्चाव्ययोभेद्योतिऽग्राह्योऽशोष्य एव च । विद्धोसृगार्चितो बद्ध इति विष्णुः प्रदृश्यते ॥ असुरान्मोहयन्देवः क्रीडत्येष सुरेष्वपि । मानुषान्मध्यया दृष्ट्वा न मुक्तेषु कथंचन" इति । श्रीभीष्मस्य युद्धसमये दैत्याविष्ट त्वात्तथा भानं युक्तमेव । किं त्वधुना दुःस्वप्नदुःखस्यैव निवेदनं कृतमिति ज्ञेयम् । किञ्च 'युधि तुरंग इत्यादि 'मम निशित' इत्यंतैर्विशेषणैस्तथाप्यर्जुनसाहाय्यापरित्यागात्तस्य भक्तवात्सकल्यं दर्शितम् । स्वस्यापराधित्वेऽपि सांप्रतं तदनुगृहीतत्वञ्च । विश्वनाथस्तु अलककुलेत्यादि यदुक्तं तन्माधुर्यमेव त्यक्तुमसमर्थः । पुनरपि विशिष्यास्वादयति । युधीति । तुरगरज इति । "सुंदरे किमसुंदरम्" इति न्यायेन विष्वंच इत्यावेगसूचकं श्रमवारीति भक्तवा त्सल्यद्योतकं निशितेत्यादि कंदर्परसाविष्टस्य पुंसः प्रगल्भकांतादंताघातैः सुखमेवेतिवद्युद्धरसाविष्टस्य महावीरस्य कृष्णस्य मद्बलसूचकशराघातैः सुखमेवेति नात्र मम युद्धरसोन्मत्तस्यापि प्रेमशून्यत्वं मंतव्यम् । न हि स्वप्राणकोटयाधिकप्रेयसि सुरतसमरौद्धत्यकृतनिर्भरनखरदशनाघाता वनिता प्रेमशून्या कथ्यते इति भावः । अत्र तु विभिद्यमानत्वचि न तु विभिन्नत्वचि यतो विलसद्विराजमानंकवचं यस्मिन्तास्मिन्नितीषद्भेदमात्रमुक्तम् ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥ स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ ३५ ॥
व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या ॥ कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥ ३६॥ स्वनिगम
मपहाय मत्प्रतिज्ञामृतम धिकर्तुमवप्लुतो रथस्थः ॥ धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हंतुमिभं गतोत्तरीयः ॥ ३७ ॥

किं च । सपदीति । " सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत । यावदेतांन्निरीक्षेऽहं योद्धुकामानवस्थितान् "इति सख्युरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव स्वपरयोर्बलयोः सैन्ययोर्मध्ये रथं निवेश्य स्थिते पार्थसखे मम रतिरस्तु । तत्र स्थित्वा कृतं सख्यं दर्शयति । परस्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति । असौ द्रोणोऽसौ भीष्मोऽसौ कर्ण इति तत्तत्प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुराकृष्यार्जुनस्य जयं कृतवति ॥ ३५ ॥ न केवलमर्जुनस्य सपत्नायुर्हरणेनैव जयमावहात्किं त्वाविद्याहरणेनापीत्याह । व्यवहिता दूरे स्थिता या पृतना तस्या मुखमिव मुखमग्रे स्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः । स्वजनवधाद्विमुखस्य निवृत्तस्य । तदुक्तं गीतासु । "एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् । विसृज्य सशरं चापं शोकसंविग्नमानसः॥"इति । कुमतिमहं हंतेत्यादिकुबुद्धिम् ॥ ३६॥ मम तु महांतमनुग्रहं कृतवानित्याह द्वाभ्याम् । स्वनिगममशस्त्र एवाहं साहाय्यमात्रं करिष्यामीत्येवंभूतां स्वप्रतिज्ञां हित्वा श्रीकृष्णं शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञामृतं सत्यं यथा भवति तथा अधि अधिकां कर्तुं यो रथस्थः सन्नवप्लुतः सहसैवावतीर्णः सन् योऽभ्ययादभिमुखमधावत् । इभं हंतुं हरिः सिंह इव किंभूतः धृतो रथचरणश्चक्रं येन सः तदा च संरंभेण मानुष्यनाट्यविस्मृतेरुदरस्थसर्वभूतभुवनभारेण प्रतिपदं चलद्गुश्चलती गौः पृथ्वी यस्मात्सः । तेनैव संरंभेण पथि गतं पतितमुत्तरीयं वस्त्रं यस्य स मुकुंदो मे गतिर्भवत्वित्युत्तरेणान्वयः ॥ ३७ ॥

आयुर्हरणं तु तेषां मोक्षार्थमेव । "यमिह निरीक्ष्य हता गताः सरूपम्" इत्युक्तेः ॥ ३५ ॥ इत्यर्थ इति । तेषामेवाग्रे स्थितत्वादिति भावः । कुमातिं सांप्रतिकीं युधिष्ठिरस्येव तदानींतनीमर्जुनस्यापि स्वयं भगवतैवोत्थापितां तस्य नित्यपार्षदत्वान्नरावतारत्वाच्च कुमतेरसंभवाच्च । जगदुद्धारकस्वतत्त्वज्ञापकश्रीगीताशास्त्रमाविर्भावयितुमिति भावः । आत्मविद्यया स्वतत्त्वज्ञानेन ॥३६॥ स्वस्मादपि स्वभक्तमुत्कर्षयतीति यच्छ्रुतं तन्मया स्वस्मिन्नेवानुभूतमित्याह—द्वाभ्यम् । स्वनिगमेति । यद्वा ऋतमित्यजहल्लिंगम् । "ऋतं च सूनृता वाणी" इति भगवदुक्तेः।रथस्थःसन्नेवावप्लुत इत्यतिलाघवेनावप्लुतिमतस्तस्य रथाद्विश्लेषः केनापि न लक्षित इति भावः।अलक्षितप्रकारेणैकेन रथरक्षार्थं स्थित एवेति वा । ऋतमिति । सा लीला तव स्वाभाविक्येव न तु मदनुरोधेनैव कृतेति भावः । अत्र कृष्णेन स्वभक्तवात्सल्यगुणस्य दुस्त्यजत्वादर्जुनस्य युद्धासामर्थ्ये सति स्वप्रतिज्ञामपि त्यक्त्वा स्वयमेवार्जुनस्य रक्षार्थं शस्त्रेण योत्स्यत एव । तच्चार्जुनस्यासामर्थ्यप्रापणमन्यैर्दुःशक्यामित्यतः क्षणमर्जुनं पराभूयास्य युद्धं भक्तवात्सल्यद्योतकं द्रक्ष्यामीति भीष्मस्य मनोरथसिद्ध्यर्थैव प्रतिज्ञेत्यतः स्वप्रतिज्ञाभंगेनार्जुने स्वप्रेमाणं तं दर्शयित्वा भीष्मं प्रमोद्य तस्योत्कर्षं च लोके विख्यापयामासेति तत्त्वम् । यच्चोक्तं विस्मृतमनुष्यनाट्यत्वमिति तच्च भगवतो विस्मृतेरसंभवादित्थं समाधेयम् । भगवतः प्रतिज्ञाहानिं निरीक्ष्याहो अयं मद्धारहणप्रतिज्ञामपि हास्यतीति भूः कंपिता । तदाश्वासनाय भगवता स्वोत्तरीयं तत्र पातितं त्वं माभैरिति शिरसि हस्तनिधानमिव वस्त्रं तदुपरि न्यस्तमिति ध्येयम् । अत्र निगमो वाणिजे पुर्यां कटे वेदे प्रतिश्रुतौ" इत्यभिधानात् ॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे ॥ प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुंदः ॥३८॥ विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥ भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः सरूपम् ॥ ३९ ॥ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतवत्य उन्मदांधाः प्रकृतिमगन्किल यस्य गोपवध्वः ॥ ४० ॥

एवं यदाभ्ययात्तदास्मयमानस्याततायिनो धन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्हतोऽतो विशीर्णदंशो विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतो व्याप्तः सन्प्रसभं बलाद्वारयंतमर्जुनमप्यतिक्रम्य मद्वधार्थमभिससाराभिमुखं जगाम । एवं यो लोकप्रतीत्यार्जुनपक्षपातीव लक्षितो वस्तुतस्तु ममैवानुग्रहं कृतवान्यन्मद्भक्तेनोक्तं वचो मा मृषास्त्विति । स भगवान्मे गतिर्भवत्वित्यर्थः ॥ ३८ ॥ तदेवमन्यायैरपि भृत्यरक्षाव्यग्रे कृष्णे रतिमाशास्ते । विजयोर्जुनस्तस्य रथ एव कुटुंबमकृत्यशतैरपि रक्षणीयो यस्य तस्मिन् । आत्तं तोत्रं प्रतोदो येन तस्मिन् । धृताश्च ते हयानां रश्मयः प्रग्रहास्ते संति यस्य तस्मिन् "व्रीह्यादिभ्यश्च" इत्यनकारांतादपि रश्मिशब्दादिनिः ॥ तच्छ्रिया तया सारथ्यश्रियेक्षणीये शोभमाने । मुमूर्षोर्मर्तुमिच्छोः । नन्वन्यायवर्तिनि किमिति रतिः प्रार्थ्यतेऽत आह । भगवत्यचिंत्यैश्वर्ये तदाह । इह युद्धे हताः सर्वे यं निरीक्ष्य सरूपं तत्समानं रूपं गताः प्राप्ता इति दिव्यदृष्ट्या पश्यन्नाह ॥ ३९ ॥ क्षत्रधर्मेण युध्यमानास्तत्सरूपं प्रापुरित्येतन्न चित्रं यतो मदांधा अपि प्रापुरित्याह । ललितगतिश्च

किञ्च यदैव रथाद्भूमाववप्लुतस्तदैव क्षतजै रुधिरैः परिप्लुतः सांग्रामिकरुधिरनद्या बिंदुव्याप्तः । ननु कवचस्य विद्यमानत्वात्कथं तथात्वं तत्राह—मम शितविशिखैस्तीक्ष्णशरैर्हतस्य संरंभसुखवर्द्धनार्थं तदपि मया हन्यतेस्मेवति भावः । यतो विशीर्णकवचः प्लवनात्प्रागेवाभवादित्यर्थः । प्रसभमद्य स्वहस्तेनैव भीष्मं वधिष्यामीत्यभिप्रायेणेत्यर्थः । अभिससारेत्यत्राभिशब्देनाभिसरंतं नायकमालोकितवत्या नायिकाया इव तदानीं मम सुखमपारमेवाभूदिति द्योत्यते । सोऽन्येषां मुकुन्दो मुक्तिप्रदोऽपि मम तु गतिस्तथाभूतत्वेनैव प्राप्यो भवतीत्यर्थ इति । हे कृष्ण त्वामहमेतदेव प्रार्थये इति भावः ॥ ३८ ॥ ईक्षणीये वामहस्तेऽश्वधारणरज्जुर्दक्षिणहस्ते प्रतोदः मुखारविंदे हुंहुमिति तन्नोदनशब्द इति शोभया यन्माधुर्य्यमीक्षणीयं तन्मयैव तदा स्वचक्षुर्भ्यामीक्षितम् । न त्वर्जुनेनापीति भावः । मुमुर्षोरिति । अत एवाहं संप्रति मर्त्तुमिच्छामि । यन्मृत्वा तदेव माधुर्यं मुहुः द्रक्ष्यामः । जीवंस्तु कथं तद्द्रष्टुं प्राप्स्यामः । प्रकटप्रकाशे तस्या लीलाया भगवता समाप्तीकृतत्वादिति भावः । अत्र म्रियमाणस्येत्यनुक्त्वा सन्प्रत्ययेनेच्छाधीनमृत्योर्भीष्मस्य भगवतः सकाशादपि तल्लीलायामतिलोभो व्यज्यते । तेन च सा युद्धलीलापि नित्येत्यन्यस्या लीलाया नित्यत्वे कैमुत्यमानीतम् । सत्यं तस्यामेव मे सारथ्यलीलायां त्वमत्यासक्तो यत्प्रतिपद्यमेव तामास्वादयंस्तामेवोद्गिरंस्तल्लीलाविशिष्ट एव मयि रतिं प्रार्थयसे । किं तु संप्रति मृत्वैवं तल्लीलाप्राप्तौ तत्र किं प्रमाणमित्यत्र "मरणे या मतिः सा गतिः" इति प्रसिद्धात्प्रमाणादपि तव दर्शनमेव परं प्रमाणमित्याह—यमिति । यं निरीक्ष्य हता युद्धेऽन्येनापि हताः संत आसुरस्वभावा अपि तादृशज्ञानहीना अपि स्वरूपं सायुज्यमुक्तिं प्राप्ताः । अहं तु भक्तस्तत्रापि मरणकाले तादृशमतिमांस्त्वां साक्षाद्दृष्ट्वा मृत्वा कथं न तां लीलां प्राप्स्यामीति । अत्र नरसारथ्यमनधिकारिभ्योपि सायुज्यदायित्वमिति युगपदेवानैश्वर्यमहैश्वर्यस्वीकारलक्षणं महामाधुर्यं सर्वभगवत्स्वरूपासाधारणमेव तदानीमुदितमिति ज्ञेयम् । संदर्भस्तु । मर्यादातिक्रमेप्यदोषाय सामर्थ्यमाह-भगवतीति । "यथारुद्रोऽब्धिजं विषम्" इति न्यायात् तदतिक्रमे च स्वाभाविकं कारुण्यमेव कारणमिति दर्शयति । रथे कुटुंबत्वारोपस्तु सर्वथा रक्षणतात्पर्यक एव । "वृद्धौ च मातापितरौ भार्या साध्वी शिशुः सुतः । अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥" इति स्मृत्युक्तन्यायेनेत्यर्थः ॥ ३९ ॥ अतः प्राप्तोरुमानत्वात् । अत एवोन्मदांधत्वादेव अत्र विश्वनाथः । ननु मत्सारथ्यसंबंधिन्यै लीलायै सर्वतत्त्वज्ञोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनिगणनृपवर्यसंकुलेंऽतःसदसि युधिष्ठिरराजसूय एषाम् ॥ अर्हणमुपपेद ईक्षणीयो मम दृशि गोचर एष आविरात्मा ॥ ४१ ॥ तमिममहमजं शरीरभाजां हृदिहृदि धिष्ठितमात्मकल्पितानाम् ॥ प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोहः ॥ ४२ ॥

विलासश्च वल्गुहासादिश्च मंजुगत्यादिभिरात्मीयैस्तदीयैर्वा कल्पित उरुमानः पूजा यासां ताः । अत उत्कटेन मदेनांधा विवशाः । अत एव तदेकचित्तत्वेन तस्य कृतं कर्म गोवर्धनोद्धरणादिकमनुकृतवत्यो गोपवध्वो यस्य प्रकृतिं स्वरूपमगन्नगमन् । मकारलोपस्त्वार्षः । किल प्रसिद्धम् । तस्मिन्मे रतिरस्त्विति पूर्वेणैवान्वयः ॥ ४० ॥ जगत्पूज्यतामनुस्मरन्नाह । मुनिगणैर्नृपवर्यैश्च संकुले व्याप्तेंऽतःसदसि सभामध्ये युधिष्ठिरस्य राजसूये एषां मुनिगणादीनामीक्षणीयोऽहो रूपमहो महिमेत्येवमाश्चर्येण विलोकनीयः सन्नर्हणमुपपेदे प्राप । एष जगतामात्मा मम दृशि गोचरो दृष्टिविषयः सन्नाविः प्रकटो वर्तते । अहो मे भाग्यमिति भावः ॥ ४१ ॥ सोऽहं कृतार्थोऽस्मीत्याह । तमिममजं सम्यगधिगतः प्राप्तोऽस्मि । सम्यक्त्वमाह । विधूतभेदमोहः । तदर्थं भेदस्यौपाधिकत्वमाह । आत्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदिहृदि प्रतिहृदयं धिष्ठितमधिष्ठितमधिष्ठाय स्थितमिति यावत् । अकारलोपस्त्वार्षः । नैकधाऽनेकधा । अधिष्ठानभेदादनेकधा भांतमित्यर्थः । अत्र दृष्टांतः । सर्वप्राणि

त्वं स्पृहयसे सोऽर्जुन एव तर्हि मम सर्वेषु प्रेमवत्परिकरवृंदेष्वेको मुख्य इति निर्द्धार्य्यते । मैवम् । ततोऽर्जुनादप्यतिमुख्यतमाः । सर्वतोपि प्रेमोत्कर्षवंतो ये तव प्रियजना वर्त्तंते न तेषां पदवीं प्रार्थयितुमपि कोपि साहसं धत्ते । भवतु तदपि तदुद्देशेनाप्यस्मिन्नंतकाले कृतार्थी भवामीत्याह—ललितगतिश्च रासनृत्यादिवैदग्धी कायिकी विलासश्च धीरलालित्यादिवैदग्धी मानसवल्गुहासश्च परिहासवैदग्धी वाचिकी प्रणयनिरीक्षणं च प्रेममयसर्वभावव्यंजककटाक्षवैदग्धी चाक्षुषी च तैरुपकल्पितो दत्त उरुमान आदरः पूजा याभ्यस्ताः । तेन स्वस्मिंस्ताः प्रसादयितुं स्वीयानसाधारणान्सर्वानेव साद्गुण्यं भवांस्तास्तु विनियुक्तवान् ।अतस्तासां निरुपाधिकस्य प्रेमातिशयस्य फलं यत्स्वसाद्गुण्यसर्वस्वार्पणपूर्वकत्वत्कर्तृकानुरंजनप्राप्तिः साह्ययंत्रणैवोभयतः सुखमयमहावशीकारव्यंजिका । अर्जुनस्य तु प्रेम्णः फलं वशीकारव्यंजिका सरथ्यदूत्यादिमात्रप्राप्तिर्या सा तूभयतो यंत्रणामयीति न तत्समकक्षतां प्राप्तुमर्हत्यर्जुन इति भावः । अत्रैव तृतीयान्यपदार्थे बहुव्रीहौ । ताभिरपि स्वीयसाद्गुण्यसर्वस्वार्पणेन सोऽनुरंजित इति परस्परानुरंजनसुखमयं सरव्यं व्यंजितम् । तत एवासाधारणसौभाग्यप्रदानमाह । कृतं रासे नृत्यं गीतं वादनानि च यथा तथैव ता अप्यनुकृतवत्यः तत्साहित्येनैव रासे तासां तथा नृत्याद्युक्तेः । न च तासां तत्तच्छिक्षणाभ्यासकोऽप्यासीदित्याह-उन्मदेन महाप्रेमोत्थेनान्वा व्यवहारमात्रमदृष्टवत्यः। अतः किलेत्याश्चर्ये । यस्य प्रकृतिं स्वभावमेवागच्छन् ।भगवतो नृत्यगीतादिवैदग्ध्यादयः स्वाभाविकाः असाधारणा । अनंता एव ये गुणास्तान्सर्वानपि तेन दत्तान्प्रापुरित्यर्थः । अर्जुनाय तु स्वमसाधारणं तदपेक्षितं बलिष्टत्वमपि भगवता न दत्तमिति । यद्वा कृतं गोवर्द्धनधारणादि उन्मद उन्माद इति विरहश्च दार्शितः। एवं चातिमदास्तावत्सायुज्यं प्रापुः। अत्युत्कृष्टप्रेम्णाः परां काष्ठाम् । अहं तूभयमध्यवर्त्ती स्वाभीप्सितां तव सारथ्यलीलां कथं न प्राप्स्यामीति भावः । अत्र संदर्भः । यत एतावतोऽपि प्रेम्णो जनकत्वं दृश्यते इत्याह—ललितेति । अत्र कृतानुकरणं नाम लीलाख्ये नायिकानुभावः । तदुक्तं "प्रियानुकरणं लीला" इति । "प्रकृतिं स्वामवष्टभ्य" इति न्यायात् । "प्रकृतिश्च स्वभावश्च रूपं च" इत्यादयमरकोशाच्च । प्रकृतिं स्वभावं तादृशः प्रेमावेशो जातो .येन तत्स्वभावनिजस्वभावयोरैक्यमेव तासु जातमित्यर्थः । यथोज्वलनीलमणौ महाभावोदाहरणम् ।"राधाया भवतश्च चित्तजतुनी स्वेदैर्विलाप्य क्रमाद्युञ्जन्नद्रिनिकुञ्जकुञ्जरपते निर्धूतभेदभ्रमम् । चित्राय स्वयमन्वरञ्जयदिह ब्रह्मांडहर्म्योदरे भूयोभिर्नवरागहिंगुलभरैः शृंगारकारुः कृती" इति ॥ ४० ॥ इति भाव इति । अहो भाग्यवशात्सर्वथाऽदृश्यरूपोप्यात्मा मे दृश्यतां गत इति तात्पर्यम् ॥ ४१ ॥ इत्यर्थ इति । उपाधेरनेकत्वे एकोपि जलचंद्रादिन्यायेन बहुधा प्रतीयत इति भावः। तत्रैकस्यानेकधा भाने

सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्य सोंतःश्वास उपारमत् ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥

नां दृशंदृशं प्रत्येकमेवार्कमनेकधा प्रतीतमिवेति ॥ ४२ ॥ मनोवाग्दृष्टीनां वृत्तिभिः । परमात्मनि श्रीकृष्णे । अंतरेव विलीनः श्वासो यस्य सः ॥ ४३ ॥ निष्कले

चक्षुरभिमानित्वेन प्रतिदृशं दृशंदृशं प्रति नैकधा चक्षुरिन्द्रियनियामकतयाऽनेकरूपं स्थितमर्कं यथैकमेव समधिगच्छति । ज्ञानी तथाहमपीति भावः । अत्र विश्वनाथः । ननु कथं तर्हि त्वयि मे रतिरस्त्वित्येकवारमपि युष्मत्प्रयोगेण न ब्रूषे किं तु प्रतिपद्यमेव विजयसखे विजयरथकुटुंबे मे रतिरस्तु। "चरणरतिः परमस्य तस्य मेस्तु स भवतु मे भगवान्गतिः" इति तच्छब्दप्रयोगेणैवेति तत्राह—तमिति। तं पार्थसारथिं प्रग्रहप्रतोदालंकृतवामदक्षिणकरं मम हृदि स्फुरन्तमेवमममधिगतोस्मि । न त्विममेव तं तस्यैव हृदि प्रविष्टत्वादभ्यासेन तदीयस्फूर्त्तिव्याप्ते हृदि अयं प्रवेष्टुं न शक्नोतीति भावः । तं कीदृशमजं न जायत इत्यजस्तम् । न केवलं तदानीं युद्धकाल एव तादृशस्वरूपो मच्चक्षुषोरग्रे स जातोऽपि युद्धात्पूर्वमपि तु स्वाभाविकेन मनोरथेन मम हृदि तथा भात आसीदेवेति भावः । तेनात्र न मम दोषः किं तु हृदिस्थः परमेश्वरो यथायथा यंयं स्फोरयति स तथा तथैवाशास्त इत्याह—शरीरभाजां जीवानां हृदिहृदि धिष्ठितम् । अकारलोपश्छांदसः । आत्मना स्वयमेव कल्पितानाम् । "यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति" इति श्रुतेः । न चाहं हृदिस्थं तत्पदवाच्यं पार्थसारथिमन्यं तथा पुरस्थमिदं पदवाच्यं चतुर्भुजमन्यं जानामीत्याह—प्रतीति । आकाशस्थमेकमर्कमपि जनानां प्रतिदृशमवलोकनं प्रति नैकधाऽनेकधाऽयं मन्मूर्द्धोपरि अर्क इति प्रतिमूर्द्धोपरिस्थमर्कं तत्तद्दृष्टिभेदादनेकधा भातमिवेति । विधूतो दुरीकृतो भेदरूपो मोहो येन सः । अयमर्थः । : मम हृदि तथा युधिष्ठिरादीनां वसुदेवादीनामुद्धवादीनां नंदादीनां गोपिकानां च हृदि भावभेदेन प्रेमतारतम्येन च पृथक्पृथग्लीलतयैव यद्यपि स्फुरति तदप्येक एव कृष्ण इति जानामि । तथा तेषां तत्तत्प्रेम्णां तत्तद्भावानां चोत्कर्षतारतम्यं सर्वमहं जानाम्येव । तदपि पार्थसारथावेव स्वाभाविक्यासक्तिस्तां त्यक्तुं नैव शक्नोति । पुरःस्थितेऽस्मिंश्चतुर्भुजे रूपे धारणापि कृता । साप्यकिंचित्कर्यैवाभूदिति । संदर्भस्तु परमात्मत्वस्थापनाय तत्र विभुत्वं दर्शयन्स्वमत्युपकल्पनमेवोपसंहरति—तमिति । तमिममग्र एवोपविष्टं श्रीकृष्णं व्यष्ट्यंतर्यामिरूपेण निजांशेन शरीरभाजां हृदि हृदि धिष्ठितं केचित्स्वदेहांतर्हृदयावकाशे "प्रादेशमात्रं पुरुषं वसंतम्" इत्युक्तदिशा भिन्नमूर्त्तिमत्सु वसंतमप्येकमभिन्नमूर्त्तिमेव समधिगतोस्मि । अयं परमानंदविग्रह एव व्यापकः स्वांतर्भूतेन निजाकारविशेषेणान्तर्यामितया तत्रतत्र स्फुरतीति विज्ञातवानस्मि । यतोहं विधूतभेदमोहः अस्यैव कृपया विधूतः दूरीकृतः भेदमोहो भगवद्विग्रहस्य व्यापकत्वासंभावनाजनितनानात्वज्ञानलक्षणो मोहो यस्य तथाभूतोहम् । तेषु व्यापकत्वे हेतुः । आत्मकल्पितानामात्मन्येव परमाश्रये प्रादुष्कृतानाम् । अत्र दृष्टान्तः । प्रतिदिशमिति । प्राणिनां नानादेशस्थितानामवलोकनं प्रति यथैक एवार्को वृक्षकूटाद्युपारिगतत्त्वेन तत्रापि कुत्रचिदव्यवधानसंपूर्णत्वेन सव्यवधानं त्वसंपूर्णत्वेनानेकधा दृश्यते तथेत्यर्थः । दृष्टांतोयमेकस्यैव तत्रतत्रोदय इत्येतन्मात्रांशे । वस्तुतस्तु भगवद्विग्रहोऽचिंत्यशक्त्या तथातथा भासते । सूर्यस्तु दूरस्थविस्तीर्णात्मना स्वभावेनेति शेषः । अथवा तं पूर्ववर्णितस्वरूपमिममग्रत एवोपविष्टं समधिगतोस्मि । यद्यप्यंतर्यामिरूपं तस्माद्रूपादन्याकारं तथाप्येतद्रूपमेवाधुना तत्रतत्र पश्यामि॥ सर्वतो महाप्रभावस्यैव तस्य रूपस्याग्रतोऽन्यस्य रूपस्य स्फुरणाशक्तेरिति भावः । अत्र दृष्टांतो देशभेदेप्यभेदबोधनाय । न तु पूर्णत्वविवक्षायै । अमीलितदृग्व्यधारयदिति । कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिरित्युपक्रमोपसंहारादिभिरत्र श्रीविग्रह एव प्रस्तूयते । अतो नेदं पद्यं ब्रह्मपरतया व्याख्येयमिति ॥ ४२ ॥ अंतरेव लीनः श्वासो यस्य "न तस्य प्राणा उक्रामंति ह्यत्रैव समलीयंते" इति श्रुतेः । अत्र विश्वनाथः । एवमात्मनि हृदि स्थिते पार्थसारथावित्यर्थः । ॥ ४३ ॥ एवं भीष्मः स्वाभिलषितं पार्थसारथिं प्राप । लोकास्तु तदविद्वांसो भीष्मो ब्रह्मणि लीनो बभूवेति जानंति स्मेत्याह—संपद्येति । अज्ञाने दृष्टांतः । वयांसि पक्षिणः दिनस्यात्ययेवसाने सति दिनं नष्टमिति दिनस्य स्वरूपध्वंसमेव ज्ञात्वा यथा तूष्णीं भवंति न शब्दायंत इत्यर्थः । न तु वस्तुतो दिनं नश्यति तत्क्षणेपि वर्षांतरे तस्य स्थितेरवगमात् । यामचतुष्टयानंतरं तत्रापि पुनरागमात् । एवं भीष्मस्याप्यत्यये भीष्मो मुक्त इत्यज्ञा विदंति । विज्ञास्तु तदैवाप्रकटप्रकाशे । रथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र दुंदुभयो नेदुर्दैवमानववादिताः ॥ शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥ ४६ ॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीम् ॥ ४८ ॥ पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥ ४९ ॥ इति श्रीभा० प्रथ० युधिष्ठिरराज्यप्रलंभनो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ शौनक उवाच॥ हत्वा स्वरिक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकारषीत्ततः ॥ १ ॥

निरुपाधौ । संपद्यमानं मिलितमाज्ञायालक्ष्य । वयांसि पक्षिण इव ॥ ४४ ॥ देवैर्मानवैश्च वादिताः राज्ञां मध्ये ये साधवोऽनसूयवः ॥ ४५ ॥ निर्हरणादीनि दाहसंस्कारादीनि सम्यक्परेतस्य मुक्तस्यापीत्यर्थः ॥ ४६ ॥ तस्य गुह्यनामभिर्वेदोक्तैः कृष्ण एव हृदयं येषां ते कृष्णहृदयाः ॥ ४७ ॥ पितरं धृतराष्ट्रम् । तपस्विनीं संतापवतीम् ॥ ॥ ४८ ॥ राजा युधिष्ठिरः अनुमतोऽनुज्ञातः ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे टीकायां नवमोऽध्यायः ॥ ९ ॥ दशमे कृतकार्यस्य हस्तिनापुरतो हरेः ॥ स्त्रीभिः संस्तूयमानस्य वर्ण्यते द्वारकागमः ॥ १ ॥ राज्यं चकारेत्युक्तं तत्र पृच्छति । हत्वेति । स्वस्य रिक्थे धने स्पर्धंते स्म ये ते तथा । यद्वा । स्वरिक्थाय स्पृत्संग्रामो येषामत एव धनादिहरणादाततायिनस्तान्हत्वा । प्रत्यवरुद्धभोजनो बंधुवधदुःखेन संकुचितभोगो राज्यलाभेन प्राप्तभोगो वा । कथं राज्ये प्रवृत्तः प्रवृत्तो वा

चरणपाणिना कृष्णेन भूमौ धावता सह भीष्मो युद्ध्यत एवेति पुनरागामिकृष्णावतारे तेन सह भीष्म आविर्भविष्यत्येवेति जानंति । यद्वा निष्कं पदकं लातीति तास्मिन्ब्रह्मणि श्रीकृष्ण इत्यर्थः । ब्रह्मसायुज्यप्राप्तिस्तु न व्याख्येया । नित्यपार्षदभीष्मेण फलाभिसंधिरहिताया रतेर्वांच्छितत्वात् । मोक्षस्याकामितत्वात् । भगवतोपि बलादकामितफलदानानौचित्यात् । संदर्भस्तु निष्कलब्रह्मशब्देन मायातीतो नराकृतिपरब्रह्मरूपः श्रीकृष्ण एवोच्यते । तस्मिन्संपद्यमानता च तत्संगतिरेव । तथोक्तं सप्तमे "अधोक्षतालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् । तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् " इति । अत्र भीष्मस्य वसुत्वात् "यावदधिकारमवस्थितिरधिकारिणाम्" इत्यधिकरणाविरोधः स्यादिति चेन्न । लीलया स्वांशेन तत्राप्यवस्थितेः संभवात् । "भवद्भिरंशैर्यदुषूपजन्यताम् " इति ब्रह्मप्रोक्तेरंशेनैव सर्वे देवा अवतेरुर्न तु सर्वात्म्येनेति "तस्य सर्वेषु लोकेषु कामचारो भवति" इति श्रुतेर्ज्ञानियोगिवद्देवानामपि सर्वसमर्थत्वमस्तीत्यवधेयम् ॥ ४४ ॥ तत्र भीष्मनिर्याणसमये पुष्पवृष्टयो भीष्ममूर्ध्नि पेतुः ॥ ४५ ॥ तस्य भीष्मस्य । इत्यर्थ इति । सम्यक् परं परमात्मानं श्रीकृष्णमितस्य प्राप्तस्येति भावः । यद्यपि सांपरायिकं परलोकहितार्थं क्रियते श्रीभीष्मस्य भगवत्पार्षदत्वेनाविकारित्वसुत्वेन च तन्न संगच्छते । तथापि युधिष्ठिरस्य साक्षाद्धर्मावतारत्वेन धर्मप्रवर्तकत्वात् । "श्रुत्युक्तं न त्यजेत्क्वचित्" इति स्मृतेः । "कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः" इति प्रह्लादं प्रति श्रीनृसिंहवाक्याच्च । जीवन्मुक्तविदेहमुक्तानामपि सांपरायिकमवश्यं कार्यमिति वर्णयिष्यामो विशेषतः सप्तमस्कंधे । दुःखित इति लोकदृष्ट्योक्तम् ॥ ४६ ॥ गुह्यनामभिर्दुस्तर्क्यमहिमकृष्णगोविंदेत्यादिभिः । हे कृष्ण भक्तवत्सल प्रेमाधीन नमस्त्वच्चातुर्यायेति तुष्टुवुः । ततो भीष्मनिर्याणोत्तरम् ॥४७॥ ततः मुनिजनगमनोत्तरम् ॥४८॥ पित्रा धृतराष्ट्रेण।पितृपितामहादागतं पितृपैतामहम् । अत्र परपदवृद्धिरार्षः॥४९॥इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे नवमोऽध्यायः॥९॥कृतं कार्यं युधिष्ठिराय राज्यदानरूपं येन तस्य (१) स्वस्य युधिष्ठिरस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥२॥ निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशास गामिंद्र इवाऽजिताश्रयः परिध्युपांतामनुजानुवर्तितः ॥ ३ ॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ॥ सिषिचुः स्म व्रजान्गावः पयसोधस्वतीर्मुदा ॥ ४ ॥ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ॥ फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ॥ ५ ॥ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः ॥ अजातशत्रावभवञ्जंतूनां राज्ञि कर्हिचित् ॥ ६ ॥ उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः ॥ सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥ ७ ॥ आमंत्र्य चाऽभ्यनुज्ञातः परिष्वज्याऽभिवाद्य तम् ॥ आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥ ८ ॥ सुभद्रा द्रौपदी कुंती विराटतनया तथा ॥ गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ ९ ॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः ॥ न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः ॥ १० ॥

ततः किमकार्षीत् ॥ १ ॥ राज्यप्रवृत्तौ श्रीकृष्णस्य प्रीतिं पर्यालोच्य प्रवृत्त इत्याशयेनोत्तरमाह । वंशं कुरोः संरोहयित्वा परीक्षिद्रक्षणेन संरोह्यांकुरितं कृत्वा । कथंभूतम् । वंशदवाग्निनिर्हृतं वंश एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोऽग्निस्तेन निर्हृतं दग्धम् । निजराज्ये निवेश्य च ॥२॥ प्रवृत्तौ हेतुमुक्त्वा किमकार्षीदित्यस्योत्तरमाह । प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्न स्वतंत्रमित्येवंभूतं तेन विधूतो विभ्रमोऽहंकर्तेत्येवंभूतो मोहो यस्य सः । अनुजैरनुवर्तितः सेवितः सन् । अजितः श्रीकृष्ण एवाश्रयो यस्य सः । परिधिः समुद्रस्तत्पर्यंतां गां पृथ्वीं पालयामास ॥ ३ ॥ तस्य राज्यमनुवर्णयति । काममिति त्रिभिः मही सर्वकामदोग्ध्री बभूव । व्रजान् गोष्ठानि । ऊधस्वतीरूधस्वत्यः ऊधः क्षीराशयस्तद्वत्यः । स्थूलोधस इत्यर्थः । सिषिचुरभ्यषिंचन् ॥ ४ ॥ अन्वृतु ऋतावृतौ ॥ ५ ॥ आधयो मनोव्यथाः । व्याधयो रोगाः । क्लेशाः शीतोष्णादिकृताः । दैवं च भतानि चात्मा च हेतुर्येषामाधिदैविकादीनां ते जंतूनां नाभवन् ॥ ६ ॥ इदानीं द्वारकागमनं निरूपयितुमाह । उषित्वेति । स्वसुः सुभद्रायाः ॥ ७ ॥ तं युधिष्ठिरम् ॥ ८ ॥ युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः । गौतमः कृपः । यमौ नकुलसहदेवौ ॥ ९ ॥ अन्याश्च स्त्रियः । मत्स्यसुतोत्तरा तस्याः

स्पर्द्धकानां प्रायो हननं नोचितमित्यत आह—यद्वेति । अत एव स्वरिक्थस्पृहत्वादेव भोगानामाधिक्यदर्शनात्संकोचो न संभवतीति पक्षांतरमाह राज्यलाभेनेत्यादि ॥ १ ॥ भक्तानां भवमुदयं भावयत्युत्पादयतीति भवभावनः । यद्वा भवं रुद्रमपि भावयति स्वलीलां ध्याययतीति भवभावनः ॥ २ ॥ उपेंद्रवज्रावंशस्थयोरुपजातिः । गां पृथ्वीं स्वर्गं च अजितः कृष्ण उपेंद्रश्च परिधिः समुद्र ऊर्द्धगादि ङ्मंडलं च ।अनुजेनोपेंद्रेणानुवृत्तिं प्रापितः पुनरिंद्रपदं प्रापितः विजयध्वजस्तु प्रणिध्युपात्तामिति पपाठ । तत्र "अमात्या मंत्रिणो दूताः श्रेणयश्च पुरोहिताः । पुरं जनपदं चैव सप्त प्रणिधयः स्मृताः" इत्युक्तेः । प्रणिधिभिः सहोपात्तामित्यर्थः ॥ ३ ॥ कामं यथेष्टं पर्जन्यो मेघाभिमानी देवः । इत्यर्थ इति । अत्र भूमार्थे मतुप्प्रयत्यय इति भावः ॥ ४ ॥ नदीनां फलं देशस्य नदीमातृकत्वसंपादनेन व्रीह्यादिसमृद्धिः।समुद्राणां रत्नादिसंपत्तिः । गिरिवनस्पतिवीरुधां धातुफलपुष्पादिसमृद्धिः ।ओषधीनां यवगोधूमादिसमृद्धिः । तस्य युधिष्ठिरस्य काममिच्छानुसारेण सर्वा इत्युक्त्या न कस्याश्चिदपि वंध्यत्वं भवतीत्यसूचि॥५॥अधिदैवहेतुरनावृष्ट्यादिः । अधिभूतहेतुरुन्मादादिरध्यात्महेतुः लोभादिरिति ॥६॥७॥ आमंत्र्य द्वारकां गमिष्यामीति युधिष्ठिरायोक्त्वा शिष्टाचाररक्षणाय तं परिष्वज्यालिंग्याभिवाद्य वाचा नमस्कृत्य च॥८॥९॥ पुनरुक्तिर्यद्यपि पुराणादौ न दुष्टा तथाप्यृजुमार्गेण सिद्ध्यतोऽर्थस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः ॥ कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् ॥११॥ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथम्॥ दर्शनस्पर्शसंलापशयनासनभोजनैः ॥ १२ ॥ सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः ॥ वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥ १३ ॥ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते ॥ निर्यात्यगारान्नोभद्रमिति स्याद्बांधवस्त्रियः ॥ १४ ॥ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः ॥ धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा ॥ १५ ॥ प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥ ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥ १६ ॥ सितातपत्रं जग्राह मुक्तादामविभूषितम् ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥ १७ ॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि ॥ १८ ॥ अश्रूयंताऽऽशिषःसत्यास्तत्रतत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥ १९ ॥

पुनर्ग्रहणं गर्भरक्षककृष्णविरहे मोहाधिक्यात् । यद्वा मत्स्यसुता सत्यवती ॥ १० ॥ तेषां कृष्णविरहासहनं कैमुत्यन्यायेनाह । सत्संगादिति । द्वाभ्याम् । सतां संगाद्धेतोर्मुक्तः पुत्रादिविषयो दुःसंगो येन सः । सद्भिः कीर्त्यमानं रुचिकरं यस्य यशः सकृदप्याकर्ण्य सत्संगं त्यक्तुं न शक्नोति ॥ ११ ॥ दर्शनादिभिस्तस्मिन् श्रीकृष्णे न्यस्ता अध्यस्ता धीर्येषां ते ॥ १२ ॥ अत एवानिमिषैर्नेत्रैस्तमेव वीक्षमाणास्तत्रतत्राऽर्हणानयनाद्यर्थं चलंति स्म । यतः स्नेहेन सम्यग्बद्धाः । अत एव तमनुद्रुतानि गतानि चेतांसि येषां ते ॥ १३ ॥ अगारान्निर्याति निर्गच्छति सति । औत्कंठ्यादासक्त्यतिशयाद्धेतोरुद्गलत्स्रवद्बाष्पमश्रु न्यरुंधन्नेत्रेष्वेव स्तंभितवत्यः । तत्र हेतुः । अभद्रं नो स्यादमंगलं मा भूदित्येतदर्थम् ॥ १४ ॥ मृदंगादयो दश वाद्यभेदाः ॥ १५ ॥ प्रेमव्रीडास्मितपूर्वकमीक्षणं यासां ताः ॥ १६ ॥ गुडाका निद्रा तस्या ईशो जितनिद्रोर्जुनः ॥ १७ ॥ व्यजने चामरे जगृहतुः । मधुपतिः श्रीकृष्णः ॥ १८ ॥ सत्याः श्रीकृष्णे तासामव्यभिचारात्किं तु नानुरूपाश्चानुरूपाश्च । निर्गुणस्य परमानंदस्य

क्षेणं दर्शनायोगादाह—यद्वेति । मत्सीभूताद्रिकाप्सरस उद्भूतत्वान्मत्स्यसुतेति ॥ १० ॥ तेषां पूर्वोक्तानां युधिष्ठिरादीनां किमुत साक्षादेतत्संगमिति भावः ॥ ११ ॥ सत्संगं विना दुःसंगो मदमत्सरादिहेतुर्नापयाति । तदपगमेन विना भगवद्यशो रोचकं न भवतीत्युक्तं सत्सङ्गान्मुक्तदुःसंग इति विशेषणेन ॥ १२ ॥ अत एव तत्रार्पितबुद्धित्वादेवानिमिषैः पक्ष्मव्यापाररहितैः । “अक्षो ज्ञानार्थशकटव्यवहारेषु पाशके । रुद्राक्षेंद्राक्षयोः सर्पे विभीतकतरौ दृशि । चक्रे कर्षे पुमान्क्लीबं तुत्थे सौवर्चलेंद्रिये” इति मेदिनी । तमनुद्रुतेति । यावद्यावद्दूरं गतस्तावत्तावदुत्तुंगंभूपृष्ठमारुह्य वीक्ष्यमाणास्तस्थुरदर्शनं याते तस्मिश्चेतसा तमनुदुद्रुवुरिति भावः ॥ १३ ॥ अगारात् न गारो निगरणं यस्य सोगारः । अगा वृक्षा एवाराणीव वंशवंश्यस्थूणादिलक्षणानि यस्येति वा । अगमगमनमारस्य पित्तलस्य यस्मादिति । आरपदमुपलक्षणं कांस्यादेरपि । अगानां स्वर्णाद्यात्मकपर्वतानामारः प्रवेशो यस्मिन्निति वा । तत्रास्रवस्तंभने । इत्यर्थ इति । गमनागमने रोदनं त्वमंगलमेवेति शाकुनिकाः ॥ १४ ॥ भेरीनाम चर्मपिहितो दीर्घमहदाकृतो वाद्यविशेषः । दुंदुभिस्तिरश्चीनवाद्यविशेषः ॥ १५ ॥ “प्रसादो देवभूभुजाम्” इत्यमरः ॥ १६ ॥ “निद्रा गुडाका संप्रोक्ता प्रमीला मृत्युतंद्रिका” इत्यभिधानात् । यदेंद्रकीले विनिद्रेण तपस्ततं तदा पशुपतिना गुडाकेशोयमित्युक्तमिति पुराणांतरे । गुडा कुटिला गुडवद्रक्ता वा केशा यस्य स इति वा । दीर्घश्छांदसः । “गुडः कौटिल्यगुडयोः” इति च ॥ १७ ॥ १८ ॥ ब्रह्मण्यत्वप्रेमवश्यत्वाद्यप्राकृतगुणमयस्य तस्यानुरूपाश्च युष्माकमाशीर्भिरेव मम सदा सुखमिति प्रतिवचनस्य मिथ्यात्वानर्हत्वात् । तस्य दास्यसख्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसाम् ॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥ २० ॥ स्त्रिय ऊचुः ॥ स वै किलायं पुरुषः पुरातनो य
एक आसीदविशेष आत्मनि ॥ अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥ २१ ॥ स एव भूयो निजवीर्यचोदितां स्वजी
वमायां प्रकृतिं सिसृक्षतीम् ॥ अनामरूपात्मनि रूपनामनी विधित्समानोनुससार शास्त्रकृत् ॥ २२ ॥

सुखी भवेत्यादयो नानुरूपा गुणात्मनो मानुष्यनाट्यावतारेनुरूपाश्चेत्यर्थः । संधिरार्षः ॥ १९ ॥ सर्वासां श्रुतीनां मनोहरः । उपनिषदोपि मूर्तिमत्यः सत्यस्तं संजल्पम
भ्यनंदन्नित्यर्थः ॥ २० ॥ तत्र तेजःसौंदर्याद्यतिशयेन विस्मिताभ्यः सखीभ्योऽन्याः स्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति । स वा इति चतुर्भिः
वै स्मरणे । किलेति प्रसिद्ध्या प्रमाणद्योतकम् । य एक एवाद्वितीयः पुरुषः आसीत्स एवायं श्रीकृष्णः । कुत्रासीत् । अविशेषे आत्मनि निष्प्रपंचे निजस्वरूपे । कदा ।
अग्रे गुणेभ्यो गुणक्षोभात्पूर्वम् । तथा निशि प्रलये च तस्य लक्षणं जगतामात्मनि जीवे निमीलितात्मनि निमीलितात्मन्निति लुप्तसप्तम्यंतं पदम् । जातावेकवचनम् ।
ईश्वरे लीनरूपेषु जीवेषु सत्स्वित्यर्थः । ननु जीवानां ब्रह्मत्वात्कथं लयस्तत्राह । सुप्तासु शक्तिषु सतीषु जीवोपाधिभूतसत्त्वादिशक्तिलय एव जीवलय इत्यर्थः ॥ २१ ॥
तदेवं सृष्टेरादौ प्रलयानंतरं च निष्प्रपंचावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये सप्रपंचावस्थानमाहुः । स एवाप्रच्युतस्वरूपस्थितिरेव प्रकृतिमनुससाराधिष्ठितवान् । भूयः
पुनः सृष्टिप्रवाहस्यानादित्वात् । कीदृशीम् । निजवीर्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायां मोहिनीम् । अत एव सिसृक्षतीं स्रष्टुमिच्छंतीम् ।
किमर्थमनुससार । अनामरूप आत्मनि जीवे रूपनामनी विधातुमिच्छन् । उपाधिसृष्ट्या जीवानां भोगायेत्यर्थः । कर्माणि च विधातुं वेदान्कृतवानित्याहुः । शास्त्रकृ

वात्सल्यादिरसविषयाश्रयाश्रयत्वे सति तत्तद्भक्तजनसंयोगविरहाद्यलौकिकसुखदुःखादिमयत्वाच्च । यद्वा निर्गता गुणेभ्यो गुणा यस्य तस्य प्राकृतगुणातीतस्य नित्यगुणस्य नानुरूपाः नित्यं तत्परिपूर्णत्वेन लाभान्तरायोगा
दित्यर्थ इत्थं व्याख्येयमिति भावः । यद्वा दुष्टान् जहि साधून्पालयास्माननुगृहाणेत्येवंरूपा आशिषो वाक्यप्रबंधा अश्रूयंतेति ॥ १९ ॥ श्लेषेणाह—सर्वेषां श्रुतीः श्रवणानि मनांसि च हरत्याकर्षतीति सर्वश्रुतिमनोहरः ।
इत्यर्थ इति । श्रुत्यभिमानिदेवता अपि तच्छ्रुत्वा सविस्मया बभूवुरहो अस्मत्तो पीमा विशेषतो भगवत्स्वरूपज्ञा इति भावः ॥ २० ॥ तत्र तदा प्रथमं शांतिरतिमत्यस्सविस्मयमूचुः । यद्वा न विद्यते विशेषो वैशि
ष्ट्यमुत्कर्षो वा यस्मात्तथाभूत एक एवासीत् । व्यासादिमुखादस्माभिः श्रुतोभूदित्यर्थः स वै निश्चितमयमेवेति तर्जनीभिर्दर्शयामासुः । इत्यर्थ इति । न हि जीवानां स्वरूपतो नाशोऽस्ति प्रलय इति भावः । अत्रा
क्षिपति—नन्विति । इत्यर्थ इति । करणवननाशे करणो यथा लोकैर्नष्टो मन्यते तथोपाधिलये जीवोपीति भावः । एकोऽयमेव न तु ब्रह्मादिरित्यर्थः ॥ २१ ॥ अत एव मोहिनीत्वादेव । इत्यर्थ इति । स्थूलसूक्ष्मोपाधि
सृष्ट्येत्यर्थः । ननु प्रकृत्यनुगतत्वं नाम प्रकृत्यधीनत्वम् । स च दोष एव । मैवम् । निजबलेन प्रेरितां स्वस्वशक्त्या कस्मिंश्चन कृत्ये नियुक्तामित्यर्थः । कर्मज्ञानयोगभक्तिसाधनसिद्ध्यर्थं तु प्रकृत्यनुगमनात्पूर्वमेव वेदशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः ॥ पश्यंति भक्त्युत्कलितामलात्मना नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥ २३ ॥ स वा अयं सख्यऽनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः ॥ य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्रसज्जते ॥ २४ ॥ यदा ह्यधर्मेण तमोधियो नृपा जीवंति तत्रैष हि सत्त्वतः किल ॥ धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगेयुगे ॥ २५ ॥ अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनम् ॥ यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना चंक्रमणेन चांचति ॥ २६ ॥

दिति ॥ २२ ॥ अस्य दर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः ॥ स वै अयम् । अस्य पदं स्वरूपमंघ्रिं वा । निर्जितो मातरिश्वा प्राणो यैः । ह्रस्वत्वमार्षम् । ते सूरय एव पश्यंति । केन । भक्त्योत्कलित उत्कंठितोऽमलो य आत्मा बुद्धिस्तेन । 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुतेः । बुद्धिवैमल्यस्याप्ययमेव हेतुरित्याहुः । ननु हे सखि एष एव सत्त्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुमर्हति । न तु योगादय इत्यर्थः । यद्वा । नु अहो एष सत्त्वं ज्ञानं परिमार्ष्टुं नाशयितुं दूरगमनेनाप्रत्यक्षी भवितुं नार्हति । किं त्वनेन सहैव गंतव्यमित्यर्थः ॥ २३ ॥ पुण्यश्लोकतामाहुः । हे सखि यो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैरनुगीतसत्कथः अनुगीताः सत्यः कथा यस्य स एवायम् । गानप्रकारमाहुः । य एक ईश इत्यादि ॥ २४ ॥ एवंभूतस्य नानावतारे कारणमाहुः । यदा हीति । तमोव्याप्ता धीर्येषां ते नृपा यदा धर्मेण जीवंति केवलं प्राणान्पुष्णंति तत्र तदैष एव भवाय स्थित्यै सत्त्वतो विशुद्धसत्त्वेन रूपाणि दधद्गादीनि धत्ते प्रकटयति । युगेयुगे तत्तदवसरे । भगमैश्वर्यम् । सत्यं सत्यप्रतिज्ञत्वम् । ऋतं यथार्थोपदेशकत्वम् । दयां भक्तकृपाम् । यशोऽद्भुतकर्मत्वम् ॥ २५ ॥ विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयंति । अहो इति पंचभिः । यद्यस्मादेष पुरुषोत्तमः श्रियः पतिः

स्त्राणि कृतवानेवेति शास्त्रकृत् ॥ २२ ॥ योगादीनां भक्तिसापेक्षत्वान्न ते स्वतंत्रा इति भावः । सत्त्वस्यार्थांतरमाश्रित्याह—यद्वेति । इत्यर्थ इति । अस्य त्यागेन नास्माकं गतिरिति भावः । अत्र विश्वनाथः । ननु सृष्ट्यारंभे पुरुषादयोऽवतारा लक्ष्यंते न त्वेष ईदृशप्रकारः । किं तु वैवस्वतमन्वन्तरीयाष्टाविंशतिचतुर्युगस्थद्वापरे संप्रत्येवैष उपलभ्यते । सत्यमसौ भक्तिगम्यो नित्यस्वरूपो नित्यलीलोऽस्मिन्द्वापरेऽवतीर्णोऽप्यस्य भक्तिमद्भिः सदैवायमुपलभ्यते इत्याह-स वा इति । निर्जितान्मातरिश्वनः प्राणाद्धेतोर्निर्जितेंद्रियाः सर्वेन्द्रियाणां प्राणाधीनवृत्तित्वात् । प्राणजयादेव निर्जितेंद्रिया इत्यर्थः । तथाभूता अपि भक्त्या उत्कलितोऽमलो य आत्मा बुद्धिस्तेनैव यस्य पदं स्वरूपं चरणारविन्दं वा पश्यंति । अत्र सूरित्वं जितेंद्रियत्वं जितप्राणत्वं च तेषां भक्त्यैव न तु प्राणापानादिभिरिति भावः । अत्र सूरयो भक्त्युत्कंठत्वे सत्येव पश्यंतीति वर्तमाननिर्देशेन सार्वकालिकदृष्टिगोचरत्वात्तस्य सार्वकालिकलीलत्वम् । अतः "परार्द्धांते सोवबुध्यत गोपवेषो मे पुरुषः पुरस्तादाविर्बभूव" इति गोपालतापनीश्रुतौ ब्रह्मवाक्यम् । तथा ब्रह्मसंहितायां सृष्ट्यारंभे गोपवेषः कृष्ण एव दृष्टस्तुतश्च ॥२३॥ किञ्चास्य लीलाकथातिरहस्या रहस्यलेकैरेव वेद्येत्याह-अयमर्जुनसखो नराकृतिः गुह्येषूपनिषत्सु च आगमेषु पंचरात्रादिषु यः खलु एक एवेशः ईश्वरः सन्न तु साक्षादेतद्रूप इत्यर्थः । तत्र जगति न सज्जते आप्तकामत्वात् । हे सखीति । सख्यभावेनास्य सेवनं त्वतिदुर्लभम् । सख्यपालनस्य दुःशकत्वादिति भावः । रहस्यनिरूपकैरुपनिषद्विचारकुशलैः ॥ २४ ॥ साक्षादस्यावतारस्य कालदेशपात्रेषु जिज्ञास्येषु प्रथमं कालमाहुर्यदेति । नृपाः कंसादयः युगेयुगे कल्पेकल्पे वैवस्वतीयाष्टाविंशचतुर्युगीये द्वापरेद्वापरे वा ॥ २५ ॥ पात्रदेशावाहुः—अहो इति । यदोः कुलं श्लाघ्यतमं मधोर्वनं मथुरामंडलं पुण्यतमम् । तत्र श्लाघ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः ॥ पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥ ॥ २७ ॥ नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः ॥ पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः ॥ २८ ॥

स्वजन्मना यदोः कुलमंचति पूजयति सत्करोति अतः श्लाघ्यतमं तत् । चंक्रमणेन च मधोर्वनं मथुरां सत्करोत्यतस्तत्पुण्यतममिति । तमवर्थस्याप्यत्यंतातिशयेऽलमिति । तत्राप्याश्चर्यं अहो इत्युक्तम् ॥ २६ ॥ द्वारकां श्लाघंते । अहो बतात्याश्चर्यम् । किं तत् । कुशस्थली द्वारका । स्वर्ग उत्कृष्ट इति यद्यशस्तस्य तिरस्करी परिभवकर्त्री । भुवश्च पुण्ययशःकर्त्री भवति । यद्यतो यत्रत्याः सर्वाः प्रजाः स्वानुग्रहेणेषितं प्रेषितम् । स्मितपूर्वकोऽवलोको यस्य तम् । यद्वानुग्रहार्थमिषितमिष्टम् । अनुग्रहोषितमिति पाठे स्वानुग्रहार्थमुषितं कृतनिवासम् । ऐकपद्यपाठे त्वनुग्रहेणेषितं प्रेषितं यत्स्मितं तत्पूर्वकोऽवलोको यस्य तम् । स्वस्यात्मनः पतिं श्रीकृष्णं न तु पित्रादिवद्देहमात्रपतिं नित्यं पश्यंति स्म । नैतत्स्वर्गेस्तीत्यर्थः ॥ २७ ॥ हे सखि अस्य गृहीतपाणिभिः पत्नीभिरीश्वरोऽयमेव नूनं जन्मांतरेषु समर्चितः । यस्मिन्नधरामृत

तममित्यनेनैव द्वयोरुत्कर्षे सिद्धे पुण्यतममिति पृथगुक्तिर्देशस्य पुण्यदेशत्वेनैवोत्कर्षस्य प्रसिद्धेः । तत्र तस्यैवार्थस्याप्यत्यंतातिशयेलमिति तत्राप्यतिशयाश्चर्ये अहो इति । यत्स्वजन्मना चंक्रमणेन गमनेन चकारादन्यैरपि विविधाद्भुतकर्मभिरञ्चति सत्करोति । अत्रालं चेत्यनुक्त्वांचतीति वर्त्तमाननिर्देशेन जन्मादिलीलानां नित्यत्वं बोधयामासुः । उपक्रमतः य एक आसीदिति भूतनिर्देशेन तृतीयपद्ये पश्यंति भक्त्येति वर्तमाननिर्देशेन तासां तथाभिप्रायस्यावगमात् । ननु कथं जन्मकर्मणोर्नित्यत्वम् । ते हि क्रिये । क्रियात्वञ्च प्रतिनिजांशमप्यारंभपरिसमाप्तिभ्यामेव सिद्ध्यति । आरंभसमाप्ती ते विना स्वरूपहान्यापत्तिः । नैष दोषः । श्रीभगवति सदैवाकारानंत्यात् प्रकाशानन्त्यात्' जन्मकर्मलक्षणलीलानन्त्यात्, अनंतप्रपंचानंतवैकुंठगततत्तल्लीलास्थानतत्तल्लीलापरिकराणां व्यक्तिप्रकाशयोरानंत्याच्च । यत एव सत्योरपि तत्तदाकारप्रकाशगतयोस्तदारंभपरिसमाप्त्योरेकत्रैव ते जन्मकर्मणोरंशा यावत्परिसमाप्यंते न परिसमाप्यंते वा तावदेवान्यत्राप्यारब्धा भवंतीत्येवं भगवति विच्छेदाभावान्नित्ये एव जन्मकर्मणी वर्तेते । क्वचित्किंचिद्विलक्षणत्वेनारभ्येते क्वचिदैकरूप्येणेति ज्ञेयम् । विशेषभेदाद्विशेषणैक्याच्च एक एवाकारप्रकाशभेदेन पृथक्क्रियास्पदं भवतीति "चित्रं बतैतदेकेन वपुषा" इत्यादौ प्रतिपादयिष्यते । ततः क्रियाभेदात्तत्क्रियावत्सु प्रकाशभेदेष्वभिमानभेदश्च गम्यते । तथा सत्येकत्रैकत्र लीलाक्रमजनितरसोद्बोधश्च जायते । ननु कथं ते एव जन्मकर्मणी वर्त्तेते इत्युक्तं पृथगारब्धत्वादन्ये एव ते आस्ताम् । उच्यते । कालभेदेनोदितानामपि समानक्रियाणामेकत्वं यथा शंकरशारीरके "द्विर्गोशब्दोयमुच्चरितो न तु द्वौ गोशब्दाविति प्रतीतिनिर्णीतं शब्दैकत्वं तथैव द्विः पाकः कृतोनेन न तु द्वौ पाकौ" इति । ततो जन्मकर्मणोरपि नित्यता युक्तैव । अत एवागमादावपि भूतपूर्वलीलोपासनविधानं युक्तम् । तथा चोक्तं माध्वभाष्ये 'परमात्मसंबंधित्वेन नित्यत्त्वात् । त्रिविक्रमत्वादिष्वप्युपसंहार्यत्वं युज्यत' इति । अनुमतं चैतच्छ्रुत्या "यद्भूतं भवच्च भविष्यच्च" इत्यनयैव । उपसंहार्यत्वमप्युपासनायामुपादेयत्वमित्यर्थः । तत्र तस्य जन्मनः प्राकृतादस्माद्विलक्षणत्वं प्राकृतजन्मानुकरणेनाविर्भावमात्रत्वम् । क्वचित्तदनुकरणेनेति. भगवत्संदर्भः क्वचित्तु "तद्भक्तवामादीनामिवानंतप्रपञ्चनित्यधामसु जन्मकर्मणोरपि प्रकाशबाहुल्यान्नित्यत्वसिद्धेः" इत्याहुः॥२६॥ मधुवनं स्तुत्वा द्वारकां स्मरन्त्य आहुः । स्वानुग्रहेण कर्तृभूतेन संभवादर्थांतरमाह—यद्वेति । इष्टमभिमतम् । इत्यर्थ इति । स्वर्गे यद्यप्युपेन्द्रोस्त्येव तथापि श्रीकृष्णमूर्तेस्तत्रादर्शनादित्थमुक्तमिति भावः ॥ २७ ॥ ततोऽज्ज्वलरसौत्सुक्यवत्य आहुः । वयं त्वकृततादृशव्रताः संप्रत्येव सौंदर्यामृतमेव किंचिदत्र पिबाम इति भावः । किंचास्मत्तः कोटिगुणतोऽप्यधिका अपि व्रजसुंदरीभ्यः सकाशादतिन्यूना इत्याहुः । संमुमुहुः रात्रौ पीततरस्याप्यधरामृतस्य प्रातःस्मर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः ॥ प्रद्युम्नसांबांबसुतादयोऽपरा याश्चाहृता भौमवधे सहस्रशः ॥ २९ ॥ एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ॥ यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥ ३० ॥ एवंविधा गदंतीनां स गिरः पुरयोषिताम् ॥ निरीक्षणेनाभिनंदन्सस्मितेन ययौ हरिः ॥ ३१ ॥ अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ॥ परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीम् ॥ ३२ ॥ अथ दूरागताञ्छौरिः कौरवान्विरहातुरान् ॥ सन्निवर्त्य दृढं स्निग्धान्प्रायात्स्वनगरीं प्रियैः ॥ ३३ ॥ कुरुजांगलपांचालाञ्छूरसेनान्सयामुनान् ॥ ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ३४ ॥

आशयश्चित्तं यासां ताः । संमोहं प्राप्ता इति मनोहरत्वमुक्तम् ॥ २८ ॥ एतत्प्रपंचयंति । या इति द्वाभ्याम् । वीर्यं प्रभाव एव शुल्कं मूल्यं तेन शुष्मिणो बलिष्ठान् । प्रद्युम्नश्च सांबश्चांबश्च सुता यासां रुक्मिणीजांबवतीनाग्निजितीनां ता आदिर्यासां सत्यभामादीनां ताः । याश्चापराः । अस्य श्लोकस्योत्तरश्लोकेनान्वयः ॥ २९ ॥ एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते । किंभूतम् । अपास्तं गतं पेशलं भद्रं स्वातंत्र्यं यस्मात्तत् । निरस्तं शौचं शुचित्वं यस्मात्तथाभूतमपि जातु कदाचिदपि नापैति न निर्गच्छति । आहृतिभिर्व्याहारैः । यद्वा । पारिजातादिप्रियवस्त्वाहरणैः । हृदि स्पृशन्नानंदयन् ॥ ३० ॥ एवंविधा विचित्रा गिरः सस्मितेन निरीक्षणेनाभिनंदन् स हरिर्ययौ ॥ ३१ ॥ मधुद्विषोपि गोपीथाय रक्षणाय स्नेहात्परेभ्यः शत्रुभ्यः शंकितः सन् प्रायुंक्त । "हस्त्यश्वरथपादातं सेनांगं स्याच्चतुर्विधम्" इत्येवं चतुरंगिणीम् । पृतनां सेनाम् ॥ ३२ ॥ पांडोः कुरुवंशजत्वात्पांडवा अपि कौरवा एव तान् । प्रियैरुद्धवादिभिः सह॥ ३३ ॥कुरुक्षेत्रं कुरुदेशांतर्गतमेव । क्रमोऽत्र न विवक्षितः ॥ ३४ ॥

णेप्यानंदमूर्च्छां प्रापुः । न जाने पानकाले ताः कीदृशीं दशां प्रापुरिति तासां प्रेमाधिक्यादानंदाधिक्यं द्योतितम् ॥ २८ ॥ "शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम्" इति मेदिनी । "शुष्मी गोपतिमत्तयोः" इति च॥ २९॥ स्त्रीत्वं स्त्रीजातिः सा च रुक्मिण्याद्यवरतज्जातिभेदत्वेनैवात्र गृहीता । अपास्तपेशलत्वादिकं हि तज्जात्यतराश्रयं न तु रुक्मिण्याद्याश्रयं ताभिस्तासामपि साधुत्वकरणात् । ततश्चान्यां तत्तद्दोषयुक्तां स्त्रीजातिमपि या निजकीर्त्यादिना शुद्धां कुर्वंतीत्यर्थः । तासां तत्तद्दोषरहितसर्वगुणालंकृतत्वे तदवराणां साधुत्वविधाने च हेतुमाह—यासामिति । स्वयं तथाविधोऽप्याहृतिभिः प्रेयसीजनोचितगुणसमाहारैर्या एव हृदि स्पृशन्मनस्यासज्जयन्यासां गृहादपि न त्वपैतीति "पिता रक्षति कौमारे भर्ता रक्षति यौवने । सुता रक्षंति वार्द्धक्ये न स्वातंत्र्यं हि योषिताम्" इति चाणक्योक्तेः स्त्रीणां स्वातंत्र्याभावोस्तीति । "स्त्रियो मेध्यास्तु सर्वतः" इति वाक्यं तु स्त्रीणामल्पशौचपरमन्यथा तासाम् । "स्त्रीशूद्राणां तदर्द्धतः" इत्यादिस्मृतिविहितशौचोक्तिरनार्थिका स्यादिति ज्ञेयम् ॥ ३०॥ ३१ ॥ अथ राज्ञः प्रेममहिमानमाह—मधुद्विषोपि गोपीथाय "गोपीथो रक्षणे प्रोक्तो गवां पेये च गोकुले" इति निरुक्तिः । तत्र हेतुः । स्नेहादिति । अनेन भगवदैश्वर्यज्ञानस्य दुर्ज्ञेयत्वमुक्तम् ॥ ३२ ॥ ३३ ॥ अत्र पंथानमतिक्रम्य गमनं तत्तन्निजजनमेलनार्थं शूरसेनागमनं तु श्रीवृंदावनादिदिदृक्षयैव ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ॥ आनर्तान्भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ॥ ३५ ॥ तत्रतत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ॥
सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ३६ ॥ इति श्रीभा० प्र० दशमोऽध्यायः ॥ १० ॥ ॥ सूत उवाच ॥ आनर्तान्स उपव्रज्य
स्वृद्धाञ्जनपदान्स्वकान् ॥ दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥ स उच्चकाशे धवलोदरो दरोऽप्युरुक्रमस्याऽधरशोणशोणिमा ॥ दाध्मायमा
नः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः ॥ २ ॥ तमुपश्रुत्य निनदं जगद्भयभयावहम् ॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥३॥

मरुर्निरुदको देशः । धन्वोऽल्पोदकः । आनर्ताख्यो द्वारकादेशः स विभुरुपागात्प्राप्तः । हे भार्गव । मनागीषच्छ्रान्ता वाहा यस्य सः ॥ ३५ ॥ तत्रतत्र देशे तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितान्यर्हणान्युपायनानि यस्मै सः । सायमपराह्णे । पश्चाद्दिशं पश्चिमां दिशं भेजे प्राप्तः । तदा च गविष्ठः स्वर्गस्थः सूर्यो गामुदकं गतः प्रविष्टोऽस्तं गत इत्यर्थः । 'अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति' इति श्रुतेः । यद्वा । तदा सायंकाले जाते रथादवतीर्य गविष्ठो भूमौ स्थितस्ततो गां जलाशयं गतः सन्पश्चाद्दिशं संध्यां भेज उपासितवानित्यर्थः ॥ ३६ ॥ इति प्रथमस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥ आनर्तैः स्तूयमानस्य पुरीं निर्विश्य बंधुभिः ॥ एकादशे रतिः सम्यग्यादवेंद्रस्य वर्ण्यते ॥ १ ॥ उत्सवैरुच्चलत्पौरमुदंचद्ध्वजतोरणम् ॥ उल्लसद्रत्नदीपालि स्वपुरं प्रभुराविशत् ॥ २ ॥ स्वृद्धान्समृद्धान् दरवरं पांचजन्यं शंखम् । दध्मौ वादितवान् ॥ १ ॥ स इति । दरः शंखो दाध्मायमानो भगवता आपूर्यमाण उच्चकाशेऽतिशयेन शुशुभ इत्यन्वयः । कथंभूतो दरः धवलमुदरं यस्य सः । तथाप्युरुक्रमस्य कृष्णस्याधरस्य यः शोणगुणस्तेन शोणिमा यस्य सः । करकंजे करकमले तयोः संपुटे मध्ये वर्तमानः कथमुच्चकाशे अब्जखंडे रक्तकमल समूहे कलहंसो राजहंस उत्स्वन उच्चशब्दो यथा तद्वत् ॥ २ ॥ जगतो यद्भयं तस्य भयावहम् । प्रत्युद्ययुः प्रत्युज्जग्मुः भर्तुर्दर्शने लालसौत्सुक्यं यासां ताः ॥ ३ ॥

हे भार्गवेति । सर्वज्ञभृगुवंश जातत्वात्त्वमपि योगबलेन भगवन्माहात्म्यं जानास्येवेति भावः।"वाजिवाहार्वगंधर्वहयसैन्धवसप्तयः"इत्यमरः॥३५॥ इत्यर्थ इति।समुद्रतीरवासिभिर्जलादुद्गमो जले प्रवेशश्चोदयास्तमये दृश्यत इति भावः संभवत्वाच्छ्लेषेणार्थांतरमाह—यद्वेति। इत्यर्थ इति। "उत्तमा सूर्यसहिता मध्यमा लुप्ततारका।अधमा तारकोपेता सायंसंध्या त्रिधा मता" इति स्मृतेः।सूर्यास्तात्प्रागेव संध्यां चक्र इति । पुनर्निजजनसंगतः।संध्याकालातिक्रमे प्रायश्चित्तापत्तेरिति भावः । प्रायश्चित्तं च शतकृत्वो गायत्र्याभिमंत्र्य जलं पीत्वा पुनः संध्यामुपासीतेति विशेषाद्वर्णितमस्माभिर्निर्णयसुधाकरे । अत्र संदर्भः । पश्चात्तदनंतरं सायं यस्मिन्दिने चलितस्तस्यैव दिवसस्यांते । दिशं द्वारकागन्तव्यकाष्ठाम् । तेन रथस्य शैघ्र्यमुक्तम् ॥ ननु हस्तिनापुरतो द्वारकामार्गे नैते देशाः संतीत्यत आह । तत्रत्यैस्तत्तद्देशभवैर्भक्तैस्तत्रतत्र द्वारकामार्गे आगत्य प्रत्युद्यतानि निवेदितान्यर्हणान्युपायनानि स्वस्वदेशनयनार्थं यस्मै सः । तेन तत्तद्भक्तमनोरथपूरणार्थं तत्तद्देशं गत्वा गत्वैव तत्र तत्रैकैकानि दिनानि स्थित्वा पुनर्वर्त्मानुससारेति भावः । संदर्भस्तु प्रकटेन स्वप्रकाशेन । प्रकटतत्प्रकाशविशेषदर्शनं कौतुकार्थमेव । तदा तत्र गमनमित्याह ॥ ३६ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे दशमोऽध्यायः ॥ १० ॥ बंधुभिः सह (१) उच्चलंतः पौरा यस्मिंस्तत्स्वपुरम् । उदञ्चतश्चलंतो देदीप्यमाना वा ध्वजास्तैर्युतं तोरणं द्वारबाह्यभागो यत्र तत्तथा । "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः । उल्लसंती रत्नदीपानामालिर्यत्र तत्तथा (२) इवेति । साक्षाद्दर्शनं बिना विषादशांत्यनुपपत्तेः ॥ १ ॥ स दरः ॥ २ ॥ तं शंखोद्भूतं निनदं शब्दम् । "शब्दे निनादनिनदध्वनिध्वानरवस्वनाः" इत्यमरः । जगतो भयं यस्मात्कालात् येभ्यो दैत्येभ्यो वा तस्य तेषां च भयमावहति समंतात्प्रापयतीति तम् । भर्तुः श्रीकृष्णस्य ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रोपनीतबलयो रवेर्दीपमिवाऽऽदृताः ॥ आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥ ४ ॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा ॥ पितरं सर्वसुहृदमवितारमिवार्भकाः ॥ ५ ॥ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितम् ॥ परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ॥ ६ ॥ भवाय नस्त्वं भव विश्वभावन त्वमेव माताऽथ सुहृत्पतिः पिता ॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥ ७ ॥ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम् ॥ प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥८॥ यर्ह्यंबुजाक्षाऽपससार भो भवान्कुरून्मधून्वाऽथ सुहृद्दिदृक्षया ॥ तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाऽच्युत ॥ ९ ॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीम् ॥ १० ॥

तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिता बलय उपायनानि याभिस्ताः । निरपेक्षेऽपि तस्मिन्नादरेण समर्पणे दृष्टांतः । रवेर्दीपमिवेति । पितरमर्भका इव तं सर्वसुहृदमवितारं प्रोचुरित्युत्तरेणान्वयः । सुहृत्त्वेनैवावितारं न तु कामेन । अत्र हेतुः । आत्मारामम् । तत्रापि हेतुः परमानंदनिजस्वरूपलाभेनैव पूर्णकामम् ॥ ४ ॥ ५ ॥ किमूचुरिति तदाह । नताः स्मेति । विरिंचो ब्रह्मा । वैरिंच्याः सनकादयः । इह संसारे परं क्षेममिच्छतां परायणं परमं शरणम् । कुतः । परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र प्रभुर्न भवेत् ॥ ६ ॥ अतो भवायोद्भवाय नोऽस्माकं त्वं भव । हे विश्वभावन कृतिनः कृतार्था बभूविम जाता वयम् ॥७॥ कृतार्थत्वमेवाहुः । अहो भवता वयं सनाथाः स्म । यद्यस्मात्तव रूपं पश्येम । त्रैविष्टपानामपि दूरे दर्शनं यस्य तत् । देवानामपि दुर्लभदर्शनमित्यर्थः । प्रेम्णा यत्स्मितं तद्युक्तं स्निग्धं निरीक्षणं यस्मिंस्तदाननं यस्मिंस्तद्रूपम् । सर्वेषु चांगेषु सौभगं यस्मिंस्तत् ॥ ८ ॥ अर्भका इव सकरुणमाहुः । यर्हि यदा । भो अंबुजाक्ष । नो भवानिति पाठे न इत्यनादरे षष्ठी । अस्माननादृत्यापससारापहाय जगाम । कुरून्हस्तिनापुरम् । मधून्मथुराम् । वा । तत्र तदा रविं विना आंध्यादक्ष्णोर्यथैकोऽपि क्षणोऽब्दकोटिप्रतिमो भवेदेवं तव नस्त्वदीयानामस्माकमपीत्यर्थः ॥ ९ ॥ इति चैवंविधा अन्याश्चोच्चारिता वाचः शृण्वन् दृष्ट्या साभिनंदनावलोकेनानुग्रहं कुर्वन् पुरीं द्वारकां प्राविशत् ॥ १० ॥

उपायनान्युपढौकितानि अत्र कामाभावे अत्रात्मारामत्वे तेजोरूपत्वेन निरपेक्षस्यापि रवेरग्रे यथा दीपं समर्पयंति तथा निरपेक्षस्य श्रीकृष्णस्याग्रे बलिसमर्पणं स्वाभ्युदयार्थमेवेति भावः॥४॥५॥हे नाथेति।त्वमस्माकं सर्वाभीष्टदानसमर्थोसीति भावः॥६॥यतस्त्वमेव सर्वप्रभुरतो हेतोः हे विश्वभावनेति सर्वविश्वपालकस्यास्मद्रक्षणे तव न कश्चित्परिश्रमोऽस्तीति भावः॥७॥इत्यर्थ इति।तत्कार्यार्थमवतीर्णत्वाद्दर्शनाभावो न व्याख्येय इति भावः॥८॥हे अंबुजाक्षेति । तव दर्शनमस्माकं शांतिजनकं संसारतापहारकत्वादिति भावः । मथुराशब्देन तन्मन्डलं ग्राह्यं नन्दव्रजमित्यर्थः।न तु मथुरायां तदानीं तस्य सुहृदः संति । तत्र योगप्रभावेण नीत्वा सर्वजनं हरिरिह सर्वशब्दात् तेन आयास्ये इति दौत्यकैरिति । "ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इति यद्भगवता प्रतिश्रुतं व्रजं प्रत्यागमनं तत्पाद्मादिषु पुराणेषु स्पष्टं सदपि श्रीभागवते त्वस्मिन्नत्रैव ज्ञापितमिति ध्येयम् ॥ ९॥१० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुभोजदशार्हार्हैः कुकुरान्धकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ ११ ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानो पवनारामैर्वृतपद्माकरश्रियम् ॥ १२ ॥ गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ॥ चित्रध्वजपताकाग्रैरंतःप्रतिहतातपाम् ॥ १३ ॥ संमार्जितमहामार्गरथ्यापणकचत्वराम् ॥ सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः ॥ १४ ॥ द्वारिद्वारि गृहाणां च दध्यक्षतफले क्षुभिः ॥ अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः ॥ १५ ॥ निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥ ॥ १६ ॥ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः ॥ प्रहर्षवेगोच्छशितशयनासनभोजनाः ॥ १७ ॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः ॥ शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ १८ ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ लस त्कुंडलनिर्भातकपोलवदनाश्रियः ॥ १९ ॥

तां द्वारकां स्तौति पंचभिः। स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षिताम्।। ११ ॥सर्वेष्वृतुषु सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षा लताश्रमा लतामंडपाश्च येषु तैरुद्यानादि भिर्वृता ये पद्माकराः सरांसि तैः श्रीः शाभा यस्यां ताम् । उद्यानं फलप्रधानम् । उपवनं पुष्पप्रधानम् । आरामः क्रीडार्थं वनम् ॥ १२॥ गोपुरं पुरद्वारम् । द्वारं गृहद्वारम्। कृतानि कौतुकेनोत्सवेन तोरणानि यस्यां ताम्।गरुडादिचिह्नांकिता ध्वजाः जयप्रदयंत्रांकिताः पताकाः।चित्राणां ध्वजपताकानामग्रैरंतः प्रतिहत आतपो यस्यां ताम्॥ १३ ॥ संमार्जितानि निःसारितरजस्कानि महामार्गादीनि यस्यां ताम् । महामार्गा राजमार्गाः । रथ्या इतरमार्गाः । आपणकाः पण्यवीथयः चत्वराण्यंगणानि । फलादिभिरुप्तामवकीर्णाम् ॥ १४ ॥ १५ ॥ प्रेष्ठमंतरात्मानमायांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः ॥ १६ ॥ प्रहर्षवेगेनोच्छशितान्युल्लं घितानि शयनादीनि यैस्ते । शश प्लुतगतौ ॥ १७ ॥ वारणेंद्रं मंगलार्थं पुरतः कृत्वा । ससुमंगलैः सुमंगलं पुष्पादि तद्युक्तपाणिभिः । ब्रह्मघोषो मंत्रपाठः ॥ १८ ॥ प्रणयेन स्नेहेनागतं साध्वसं संभ्रमो येषां ते । वारमुख्या नटादयश्च प्रत्युज्जग्मुः । लसत्कुंडलैर्निर्भातानि यानि कपोलानि तैर्वदनेषु श्रीः शोभा यासां ताः । वारमुख्या

मध्वादयः सप्त यदूनामवांतरभेदाः । भोगवती नागानां पुरी ॥ ११॥ ऋतुषु वसंतादिषु पुण्यवृक्षा अश्वत्थाम्रादयः । पुण्यलता विष्णुक्रांताद्यास्तासामाश्रमैर्निवासैः ॥१२ ॥ “तोरणोऽस्त्री बहिर्द्वारं तथा वंदनमालिका”इति कोशात् ॥ १३॥ १४ ॥ बलिभिः पूजासाधनैर्धूपाद्यैः ॥ १५॥१६॥१७ ॥ वारणेन्द्रं करधृतमुक्तापूर्णघटमितिशेषः । “ मुक्तापूर्णघटो यस्य शुण्डादण्डे धृतः करी । स कार्योऽग्रे मंगलार्थं वेदज्ञैर्ब्राह्मणैः सह ॥” इति शकुन शास्त्रात् ॥१८॥ वारे द्वारे मुखं यासां कृतसंकेतनरागमनविलोकनार्थं ता वारमुख्याः । पृषोदरादित्वान्मुखस्य मुख्यादेशः । तस्य श्रीकृष्णस्य दर्शने उत्सुकाः सोत्कंठाः तत्पराः । “तत्परे प्रसितोत्सुकौ” इत्यमरः ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नटनर्तकगंधर्वाः सूतमागधबंदिनः ॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥२०॥ भगवांस्तत्र बंधूनां पौराणामनुवर्तिनाम् ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥ २१ ॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आश्वास्य चाऽऽश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥ २२ ॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानोऽन्यैर्वंदिभिश्चाऽविशत्पुरम् ॥ २३ ॥ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥ २४ ॥ नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् ॥ न वितृप्यंति हि दृशः श्रियो धामांगमच्युतम् ॥ २५॥ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम् ॥ बाहवो लोकपालाना सारंगाणां पदांबुजम् ॥ २६ ॥ सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥ पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥ २७ ॥

नर्तक्यो वेश्या इति यावत् ॥ १९ ॥ अद्भुतानि चेति चकारस्य बंदिनश्चेत्यन्वयः । नटा नवरसाभिनयचतुराः तालाद्यनुसारेण नृत्यंतो नर्तकाः । गंधर्वा गायकाः । " सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः " । ते सर्वे गायंति चेत्यन्वयः । उत्तमश्लोकस्याद्भुतानि चरित्राणि भक्तवात्सल्यादीनि ॥ २० ॥ यथाविधि यैः सह यथोचितं तैस्तथा समागमं कृत्वा । सर्वेषां मानमादधे कृतवानित्यर्थः ॥ २१ ॥ तदाह । प्रह्वेति । प्रह्वं प्रह्वत्वं शिरसा नतिः अभिवादनं वाचा नतिः । आश्वास्याभयं दत्त्वा । श्वपाकानभिव्याप्य वरैरभीष्टदानैश्च मानं कृतवान् ॥ २२ ॥ अन्यैश्च बंदिभिश्च ॥ २३ ॥ हे विप्र शौनक । तस्येक्षणेन महानुत्सवो यासां ताः ॥ २४ ॥ यद्यस्मान्नित्यं सदाच्युतं निरीक्षमाणानामपि दृशो नैव तृप्यंत्यत आरुरुहुः । कथंभूतम् । श्रियः शोभाया धाम स्थानमंगं यस्य तम् ॥ २५ ॥ एतदेवाभिनयेनाह । श्रियो लक्ष्म्या यस्योरो वक्षो निवासः । यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पात्रम् । यस्य बाहवो लोकपालानां निवासः । सारं श्रीकृष्णं गायंतीति सारंगा भक्तास्तेषां यस्य पदांबुजं निवासः । तं निरीक्षमाणानां दृश इति पूर्वेणान्वयः ॥ २६ ॥ सितैरातपत्रव्यजनैरुपस्कृतो मंडितः । अर्कश्चोडुपो नक्षत्रसहितश्चंद्रश्च चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजश्च तैः । अर्कश्छत्रस्योपमानम् । नक्षत्राणि पुष्पवृष्टेः । चंद्रः परिभ्रमकृतमंडलाकारयोश्चामरव्य

नवरसाः शृंगारवीरादयस्तेषामभिनयेऽनुकरणे चतुराः पौराणिकाः पुराणोक्तार्थानुसारेण स्तावकाः । वंशशंसकाः पराक्रमांकितस्तुतिकर्त्तारः । अमलप्रज्ञा मंगलपाठकाः "प्राचीनातीतराज्ञां च स्तोतारः सूतसंज्ञकाः । भविष्यन्नृपस्तोतारो मागधाः परिकीर्त्तिताः ॥ वर्त्तमाननृपाणाञ्च स्तोतारो बंदिनः स्मृताः" इत्यपि केचित् ॥ २० ॥ तत्र तदा । इत्यर्थ इति । सर्वेषां सत्कारं चकारेति भावः॥२१॥ तन्मानम् ॥ २२ ॥ स्वयं च श्रीकृष्णश्च ॥२३॥ "यस्मिन्मार्गे प्रगच्छंति पुरुषाः सचतुष्पदाः । अवारिता अहोरात्रं राजमार्गः स उच्यते॥" इति कात्यायनः । हे विप्रेति । यथा युष्माकं विप्राणां भगवद्दर्शनोत्साहस्सदा भवति तथा तासामपीति भावः ॥ २४ ॥ २५ ॥ एतदेव श्रियो धामाङ्गत्वमेव अभिनयेन व्यञ्जकवाक्येन ॥ २६ ॥ घनः कृष्णस्योपमानम् । इत्यर्थ इति । इयमभूतोपमा वर्ण्यत एव कविभिर्न तु सा दृश्यते श्रीकृष्णं विनेति । अतोतीव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥ ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ॥ २८ ॥ ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः ॥ हर्षवि
ह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ २९ ॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमम् ॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥
पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः ॥ उत्तस्थुराराात्सहसाऽऽसनाशयात्साकंव्रतैर्व्रीडितलोचनाननाः ॥ ३१ ॥
तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिम् ॥ निरुद्धमप्याऽस्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य वैक्लवात् ॥ ३२ ॥

जनयोः । चापं वनमालायाः । विद्युत्तेजः पिशंगवाससोः । अभूतोपमेयम् । यदि घनस्योपरि सूर्यबिंबमुभयतश्चंद्रौ सर्वतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजश्च भवेत्तर्हि स घनो यथा भाति तथा हरिर्बभावित्यर्थः ॥ २७ ॥ देवकीप्रमुखाः सप्त ववंद इति मातृसौदर्यादादरविशेषज्ञापनार्थमुक्तम् । अष्टादशापि वसुदेवभार्या मातृतुल्यत्वान्नमस्कृता एव ॥ २८ ॥ नेत्रजैर्जलैर्हर्षाश्रुभिः ॥ २९ ॥ स्वगृहप्रवेशमाह । अथेति सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयम् ॥ ३० ॥ प्रोष्य देशांतरे उषित्वा । आराद्दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः । आसनादाशयाच्च । आसनाद्देहेनोत्तस्थुः । आशयोऽतःकरणं तस्मादप्यात्मनोत्तस्थुः । श्रीकृष्णेनात्मनः संश्लेषेऽतःकरणव्यवधानमपि ता नासहंतेत्यर्थः । व्रीडितानि लोचनान्याननानि च यासां ताः । अपांगैरेव वीक्षणाद्व्रीडित लोचनाः अवनतमुखत्वाद्व्रीडिताननाः साकं व्रतैरिति हास्यक्रीडावर्जनादिनियमा अपि ताश्च उत्तस्थुरित्यर्थः । धृतव्रता एवोत्तस्थुरिति वा । व्रतानि च याज्ञवल्क्येनो क्तानि "क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥" इति ॥ ३१ ॥ आयांतं तं पतिं दर्शनात्पूर्वमात्मना बुद्ध्यांतर्हृदये परिरेभिरे ततो दृष्टिभिस्ततः समीपमागतमात्मजैः पुत्रैर्गृहीतकंठमालिंगयंत्य इव स्वयमालिंगितवत्य इत्यर्थः । अत्र हेतुः । दुरंतभावा गंभीराभिप्रायाः । तदा च तासां नेत्रयोर्नि

चमत्कृतिविशिष्टः श्रीकृष्णस्तदा बभाविति भावः ॥ २७ ॥ प्रवासादागत्य प्रथमं मातृपितृगृहे एव गंतव्यं जीवतोस्तयोरन्यथा तद्गृहं नमस्कृत्य पुनः स्वपत्नीगृहे गंतव्यमित्युक्तमनेन श्लोकेन ॥ २८ ॥ ता मातरः ॥ २९ ॥ अथ मातापितृवंदनोत्तरम् । सर्वे कामा अभिलषितपदार्था यस्मिंस्तत् ।। न विद्यते उत्तमं यस्मात्तत्सर्वोत्तमामित्यर्थः । यत्र भवने ॥ ३० ॥ यावत्यो महिष्यस्तावद्भिरे वप्रकारैर्युगपदेव पृथक्पृथक् तत्तन्मन्दिरं प्रविष्टमालोकमानानां मामेवायं प्रथमं प्राप्त इत्यभिमन्यमानानां तासां तात्कालिकीं चेष्टामाह–संजातो मनसो महोत्सवः परिरंभस्पृहा यासां ताः । इत्यर्थ इति । अंतःकरणममि तदाकारं चक्रुरिति भावः । ततश्च व्रीडितलोचनानना अपांगैरेव वीक्षणाद्व्रीडितलोचना अवनतमुखत्वाद्व्रीडिताननाः । अयमर्थः । आसनं परित्यज्य प्रथमं देहेनैव परिरब्धुमुत्थिताः । मध्ये लज्जया कृतं विघ्नमालक्ष्य लज्जोत्पत्तिस्थानमंतःकरणं च त्यक्त्वा केवलमात्मनैव परिरेभिरे इति केवलमुत्प्रेक्षैव । कांतमालोक्यसहसैव स्पर्शौत्सुक्यपूर्णप्रेमानंदमूर्च्छितास्ता बभूवुरिति तत्त्वम् । मूर्च्छायां सत्यामेव सुषुप्तिप्रलययोरिवांतःकरणव्यव धानाभावसिद्धेः । व्रतैः सहिता एवोत्तस्थुरिति तेषां व्रतानां पतिं दर्शयितुमनुचितानामपि सहसा त्यक्तुं शक्यत्वात्तैः साकमेवोत्तस्थुः । ततश्च तेन दृष्टानां तासामसंस्कृतशारीरपरिच्छदता स्नेहवर्द्धनायैवाभूदिति ॥ ३१ ॥ इत्यर्थ इति । अत्र सहार्थस्य गम्यमानत्वादात्मजैः सहालिंगनं चक्रुरिति भावः । यद्वात्मजैर्देहजै रोमांचादिभिः सहेत्यर्थः । अत्र पुत्रैः सहालिंगने दुरंतभावा इति वेलातीतस्नेहाः स्नेहपारवश्यात्पुत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवंनवम् ॥ पदेपदे का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित ॥३३॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसाम् ॥ विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ ३४ ॥ स एष नरलोकेऽस्मिन्नवतीर्णः स्वमायया ॥ रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ॥ ३५ ॥ उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतोऽमदनोऽपि यासाम् ॥ संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथितुं कुहकैर्न शेकुः ॥ ३६ ॥

रुद्धमप्यंबु बाष्पं वैक्लव्याद्वैवश्यादास्रवदीषत्सुस्राव । अत एव धैर्यहान्या विलज्जतीनाम् । हे भृगुवर्य चित्रं शृण्विति ॥ ३२ ॥ पार्श्वगतः समीपस्थस्तत्रापि रहोगत एकाते प्रवर्तते स्म । पदेपदे प्रतिक्षणं नवंनवमेव । अत्र कैमुत्यन्यायः का विरमेतेति । चला चंचलस्वभावापि ॥ ३३ ॥ उक्तं श्रीकृष्णचरितं संक्षिप्याह । एवमिति द्वाभ्याम् । क्षितेर्भाराय जन्म येषाम् । अक्षौहिणीभिः कृत्वा परिवृतं सर्वतः प्रसृतं तेजः प्रभावो येषाम् । श्वसनो वायुर्वेणूनामन्योन्यसंघर्षेणानलं विधाय मिथो दाहेन यथोपशाम्यति तद्वत् ॥ ३४ ॥ स्त्रीरत्नकूटस्थ उत्तमस्त्रीकदंबस्थः ॥ ३५ ॥ नन्वेवं स्त्रीसंगादिभिः संसारप्रतीतेः कथं भगवानवतीर्ण इत्युच्यते तत्राह । उद्दामेति द्वाभ्याम् । यासा

दिलज्जामपि जह्रुरिति भावः । यद्वा दुर्ज्ञेयाभिप्रायाः अस्मदालिंगनेनैवैते जाता यदि विशेषपुत्रेच्छा तर्ह्येतान्विहायास्मानेवालिंगस्वेति तासामभिप्रायः । अत एव वैवश्यादेव । श्रीकृष्णलीलामृतपानयोग्यविप्रकुलोद्भूतत्वात्तुभ्यमहमेतद्रहस्यकथां ब्रवीमीत्यभिप्रायेणाह-भृगुवर्येति । तपश्चर्यादिपरायणेभ्यो भार्गवकुलजेभ्यस्त्वमेव वर्योसि । श्रीकृष्णलीलाश्रुतिनिहितचेतस्त्वादिति भावः । “सर्वेभ्यश्चैव धर्मेभ्यः परो धर्मोयमीरितः । सर्वशास्त्रार्थतत्त्वज्ञश्रीपराशरसूनुना ॥ श्रीकृष्णलीलाश्रवणं सर्वं त्यक्त्वा व्रतादिकम्। ” इत्यादिपुराणात् । अत्र विश्वनाथः । लज्जया कृतविघ्नानामपि तासां तत्परिरंभे प्रकारमाह—तमिति । आत्मजैर्मनोभवैस्तद्दर्शनोद्दीपितैः कामैर्हेतुभिरित्यर्थः । “मकरध्वज आत्मभूः” इत्यमरः । बहुत्वं परमबलिष्ठत्वेन पूज्यत्वात् । दृष्टिभिः पररिभिर इति प्रथमं चाक्षुषः संभोग उक्तः । ततो दृष्टिभिरेव नेत्ररन्ध्रैरेवान्तःप्रवेश्यात्मनान्तर्देहेनापि यतो दुरन्तभावा दुर्ज्ञेयाभिप्रायाः । अत एव वक्ष्यते चायमेव प्रकारो भाववतीनां “तं काचिन्नेत्ररन्ध्रेण हृदि कृत्य निमील्य च । पुल्कांग्युपगुह्यास्ते योगीवानंदसंप्लुता” इति । तदपि सूक्ष्मधिया प्रेयसा स्वाभिप्रायं ज्ञातमालक्ष्य विलज्जमानानां तासां नेत्रयोरंबु निरुद्धमपीति स्वामिवत् ॥ ३२ ॥ चिरविरहानंतरमेतादृशानुरागोदययोग्यतायां तासामेव स्थलांतरं कैमुत्येन दृष्टांतयति । यदीति । असौ श्रीकृष्णः तासां श्रीपट्टमहिषीणाम् नवंनवमिति । तासां स्वाभाविकानुरागवतीनां नाश्चर्यं यतः का वान्यापि तत्पदाद्विरमेत्तदास्वादेन तृप्ता भवेत् । तत्कैमुत्येनोदाहरणम्—चलापीति ॥ ३३ ॥ ताभिः सह रमणं निष्प्रत्यूहं वक्तुं तस्य कार्यांतरव्यग्रत्वाभावमाह—केवलं पापाचरेणन भारायैव जन्म येषाम् ॥ ३४ ॥ य एवमुपरतं स एव रेमे इति योज्यम् । स्वेषु निजेषु या माया तत्सुखचिकीर्षामयप्रेमा तया लोकेऽवतीर्ण इति तस्या एव सर्वावतारप्रयोजननिमित्तत्वात्स्त्रीरत्नकूटस्थोपि तादृशरमणावेशकारिप्रेमविशेषरूपयानयैव रेमे न तु प्रसिद्धकामेनेत्यर्थः । तत्र रत्नपदेन तासामपि तद्योग्यत्वं बोधयित्वा तादृशप्रेमविशेषमयत्वं बोधितम् । एवं भाववैलक्षण्येऽपि क्रियया साम्यमित्याह—प्राकृतो यथेति । अत्र श्रीभगवतोप्यप्राकृतत्वं दर्शयित्वा तद्वत्कामविषयत्वं निराकृतम् । अत्र विश्वनाथः । स्वमाया योगमायैव स्त्रीरत्नसमूहे प्रकाशबाहुल्येन प्रत्येकमेव तिष्ठतीति सः प्राकृतो यथेत्यनेन तस्य तथा रमणकारणस्य कामस्य रमणस्य चाप्राकृतत्वान्निर्गुणत्वमुक्तमित्याह ॥ ३५ ॥ अमदनो मदनदाहकत्वेन तदनधीनः । एवं प्रभावा महादेवमोहनसमर्थाः याः यद्यहं स्त्रीकटाक्षैर्जितस्तर्हि किं तच्छेदासमर्थेनानेन धनुषेति । तत्त्यक्तवानिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमयं मन्यते लोको ह्यसंगमपि संगिनम् ॥ आत्मौपम्येन मनुजं व्यापृण्वानं यतोऽबुधः ॥ ३७ ॥
एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ॥ न युज्यतेऽसदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ३८ ॥

मुद्दामो गंभीरो यो भावोऽभिप्रायस्तस्य पिशुनः सूचकोऽमलो वल्गुः सुंदरो हासो व्रीडावलोकश्च ताभ्यां निहतोऽमदनः श्रीमहादेवोपि संमुह्य लज्जया चापं पिनाकमजहात्। एवंप्रभावा याः स्त्रिय इत्येतावद्विवक्षितम् । यद्वा । भगवतो मोहिनीरूपेण महेशोऽपि मोहित एवमेताश्च तादृग्विलासा एवेति तथोक्तम् । ताः कुहकैः कपटैर्विभ्रमैर्यस्येंद्रियं मनो विमथितुं क्षोभयितुं न शेकुर्न शक्ताः । अथ वा निहतस्ताडितो मदनोऽपि जगद्विजयी संमुह्य तत्तत्कर्तव्यतामूढः संश्चापं धनुर्लज्जयाजहाज्जहौ ताश्च प्रमदोत्तमाः कामविजयिन्योऽपीत्यादि पूर्ववत् ॥ ३६ ॥ तं श्रीकृष्णमयं प्राकृतो लोक आत्मौपम्येन स्वसादृश्येन संगिनं मनुजं मन्यते । अत्र हेतुः । व्यापृण्वानं व्याप्रियमाणम् । यतोऽयमबुधोऽतत्त्वज्ञः ॥ ३७ ॥ कुत इत्यपेक्षायामैश्वर्यलक्षणमाह । एतदिति ईशस्येशनमैश्वर्यं नामैतदेव । किं तत् । प्रकृतिस्थोऽपि तस्या गुणैः सुखदुःखादिभिः सदा

भावः । एतद्वृत्तमदृष्टचरं मत्वाह—यद्वेति । एता भगवत्पत्न्यश्च तादृग्विलासा भगवत्तुल्यप्रभावा एवेति हेतोस्तथोक्तममदनोपीत्युक्तम् । अत्र संदर्भः । पुनरपि कामानधीनत्वमाह-मदनः प्राकृतः काम उद्भटभावसूचक निर्मलमनोहराभ्यां हासव्रीडावलोकनाभ्यां निहतस्तन्महिमदर्शनेन स्वयमेवोक्तार्थीकृतवस्त्रास्वादिबलोभूत् । अत एव संमुह्य चापमजहात् । "भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण । अस्त्राणि निर्जितजगन्ति किमर्पितानि" इतिवत् । तत्र निजास्त्रप्रयोगं न कुरुत एवेत्यर्थः । तथाभूता अपि प्रमदोत्तमाः प्रमदेन प्रकृष्टप्रेमानंदविशेषेण परमोत्कृष्टास्ताः स्ववृंद एव याः स्वतोऽपि प्रेमवत्यस्तासां साम्येच्छया कुहकैस्तादृशप्रेमाभावेन कपटांशप्रयुक्तैः सद्भिः कटाक्षादिभिर्यस्येंद्रियं विमथितुं तद्विशेषेण मथितुं न शेकुः । किं तु स्वप्रेमानुरूपमेव शेकुरिति । तस्मात्प्रेममात्रोत्थायिविकारित्वात्तस्य कामुकवैलक्षण्यमिति भावः । विश्वनाथस्तु—नन्विंद्रियैर्विषयान्भुंजानस्य तस्य कथमप्राकृतत्वं तत्राह । यासाम् उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकाभ्यां कृष्णविषयकाभ्यां स्वरूपकंदर्पपीडोत्थाभ्यां निहतः अहो एता मच्छराघातं विनैव सस्पृहं कान्तमालोकयन्ते इति विचारयन्नेव तदतिमाधुर्यावलोकोत्थविस्मयवशीकृतः सन्मदनः प्राकृतकंदर्पस्तन्मोहनार्थमागतोऽपि स्वयं संमुह्य चापमजहात् । आसां भ्रूचापाकृष्टानां वीडावलोकशराणामग्रे किं मे चापेन सशरेणेति तं तत्याज । ताः प्रमदोत्तमा अपि यस्येन्द्रियं कुहकैः कपटप्रयुक्तैर्वल्गुहासादिभिर्न शेकुः । किं तु प्रेमप्रयुक्तैः शेकुरिति तासां समंजसरतिमत्वात्प्रेममया काममया अपि कटाक्षादयः संभवन्ति तत्राद्या भावपिशुनशब्देनोच्यंते । द्वितीयाः कुहकशब्देन । तत्राद्यैर्वशीकृतेन्द्रियत्वेऽपि भगवतोऽप्राकृतत्वलक्षणं नैर्गुण्यमेव तस्य प्रेमवश्यत्वात् । प्रेम्णश्च चिच्छक्तिविलासत्वात्तन्मयानां कटाक्षादीनाञ्च तदुत्थितस्य कामस्य च तत्कारणस्य च रमणस्य च चिन्मयत्वाद्विषयभोगशब्देन वक्तुमशक्यत्वान्मायिकानामेव शब्दस्पर्शादीनां विषयशब्देनाभिधानादिति । द्वितीयैः प्रेमरहितैर्वशीकारासंभवात् । "यस्येन्द्रियं विमथितुं कुहकैर्न शेकुः" इत्युक्तम् । सर्वथैव तदिंद्रियविमथनाभावे व्याख्याते "रमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा" इत्यनेन व्यंजिता रमणासक्तिश्च नोपपद्यते । किञ्चात्र कादाचित्कैस्तदीयकाममयकटाक्षादिभिर्वशीकाराभावेपि तेषां प्राकृतत्वं न वाच्यम् । पट्टमहिषीणां सर्वासां चिच्छक्तित्वात्तदीयेषु कटाक्षादिषु प्राकृतत्वप्रवेशाशक्तेः । न च स्वरूपभूतत्वेपि चिच्छक्तिसामान्यस्यैव वशो भगवान् किं तु चिच्छक्तिविशेषस्य प्रेम्ण एवेति सिद्धांतादिति सर्वमनवद्यम् ॥ ३६ ॥ अत्र संगिमनने लोको बहिर्दर्शी व्याप्रियमाणां सत्यभामायामासक्तेरेव पारिजातार्थं बहुव्यापारदर्शनादित्यर्थः । अतोऽबुधः सदसद्विवेचनशून्यः नीलमणिं काचमिव प्रेमाणमेव विषयासक्तिं निश्चिनोतीत्यर्थः ॥ ३७ ॥ अत्रासंगित्वे हेतुमाशंकते।कुत इति । आनन्दादीनां कदाचिद्वृद्धौ दर्शनादाह—वैधर्म्येति । अकारप्रश्लेषेणार्थांतरमाह—एवं वेति । अत्र विश्वनाथः । ननु भवतु नाम तासां चिच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं मेनिरेऽबला मूढाः स्त्रैणं चाऽनुव्रतं रहः ॥ अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ३९ ॥
इति श्रीमद्भा० महा० प्र० श्रीकृष्णद्वारकाप्रवेशो नामैकादशोऽध्यायः ॥ ११ ॥

न युज्यत इति यत् । यथात्मस्थैरानंदादिभिरात्माश्रयापि बुद्धिर्न युज्यते तद्वत् । वैधर्म्ये दृष्टांतो वा । आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बुद्धिर्युज्यत इति । एवं वा । असदात्मा देहस्तत्रस्थैर्गुणैस्तदाश्रया बुद्धिस्तदुपाधिर्जीवो यथा युज्यत एवं प्रकृतिस्थोऽपि तद्गुणैर्न युज्यत इति यदेतदीशनमीशस्येति ॥ ३८ ॥ तत्पत्न्योऽपि तस्य तत्त्वं न जानंतीत्याह । तं स्त्रैणमात्मवश्यं रह एकांतेऽनुव्रतमनुसृतं च मेनिरे । भर्तुरप्रमाणविदः प्रमाणमियत्तां महिमानमजानंत्य इत्यर्थः । ईश्वरं क्षेत्रज्ञं मतयोऽहंवृत्तयो यथा स्वाधीनं स्वधर्मयोगिनं मन्यंते तद्वत् । यद्वा । यथा तासां मतयः कल्पनास्तथातथा तमीश्वरं स्त्रैणादिरूपं मेनिर इत्यर्थः ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥ पुरोक्तं यत्प्रसंगाय द्रौणिदंडादि विस्तरात् ॥ द्वादशे तु तदेवाथ परीक्षिज्जन्म वर्ण्यते ॥ १ ॥

क्तित्वात्तद्रमणादेर्निर्गुणत्वं तदपि प्राकृतप्रपंचमध्ये प्राकृत एव यदुवंशेवतीर्णस्य प्राकृतानामेव जरासंधादीनामसुराणां रूपशब्दादीन्विषयान्स्वचक्षुःश्रोत्रादीन्द्रियैराददानस्य गुणसंगः खलु दुर्वार एवेत्यत आह—एतदिति । ईशस्येश्वरस्येशनमैश्वर्यं नामैतदिति यत्प्रकृतौ स्थितोपि तस्या गुणैर्न युज्यते । गुणैः कीदृशैरात्मस्थैः । अयमर्थः । स्वयं गुणेषु तिष्ठति गुणा अपि तिस्मिंस्तिष्ठंति तदपि तस्य गुणैरसंपर्क इति । वस्तुतो भगवत एव सर्वप्रपंचाधिष्ठानत्वेधिष्ठातृत्वे चापि निर्गुणत्वमेवोक्तं ''साक्षी चेता केवलो निर्गुणश्च''इति । ''सत्त्वादयो न संतीशे यत्र च प्राकृता गुणाः''इति । ''हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः'' इत्यादिभिः श्रुतिस्मृतिभिर्यथा तदाश्रया—स एवाश्रयो विषयो यस्याः सा तत्स्मरणवती परमभागवतीनां बुद्धिः प्रकृतिस्थापि संतुष्टिस्तुतिनिंदादिषु तृप्तिक्षुत्पिपासापीडादिषु जागरस्वप्नसुषुप्तिषु सत्त्वादिगुणेषु स्थितापि तेष्वौदासीन्यान्न तैर्युज्यते । तथैव प्राकृतान्विषयानाददानस्यापि तस्य तेष्वासक्तिशून्यत्वान्न तैर्योग इति।अत्र संदर्भः । प्राकृतगुणेष्वसक्तत्वे हेतुः-एतदिति । अत एवादौ प्रकृतिगुणमये प्रपंचे तिष्ठन्नपि सदैव तद्गुणैर्न युज्यत इति यत् एतदीशस्यैव मैश्वर्यम् । तत्र व्यतिरेके दृष्टांतः-यथेति । तदाश्रया प्रकृत्याश्रया बुद्धिर्जीवज्ञानं यथा युज्यते तथा नेति । अन्वये वा तदाश्रया भगवदाश्रया परमभागवतानां बुद्धिर्यथा प्रकृतिस्था कथंचित्तत्र पतितापि न युज्यते तद्वत् । एवमेवोक्तं तृतीये ''भगवानपि विश्वात्मा लोकवेदपथानुगः । कामान्सिषेवे द्वार्वत्यामसक्तः सांख्यमाश्रितः ॥ '' इति ॥ ३८ ॥ ननु तर्हि यासु तस्य सदैवासक्तिस्ताः पट्टमहिष्य एवाभिज्ञास्तस्य तत्त्वं सामस्त्येन जानंति मैवमित्याह—तत्पत्न्योपीति । रसपुष्टिसिद्ध्यर्थं तासां स्वरूपभूतानामपि योगमायया भगवतैव स्वसंपूर्णज्ञानावरणात्ता अपि तं न जानंतीत्याह—तमिति । तं स्वभर्त्तारं रहोनुव्रतं स्वप्रेमवश्यमपि स्त्रैणं स्त्रीमात्रभाववश्यं मेनिरे । यतो मूढाः भगवतैवादिरसपुष्ट्यर्थं मूढीकृताः । इत्यर्थ इति । यथा समुद्रे विहरंतोपि समुद्रस्येयत्तां न जानंति तथा भर्त्तुः प्रमाणं न विदंतीति भावः । मतीनां जडत्वात्तथा मननं न संगच्छत इति चेत्तत्राह—यद्वेति । इत्यर्थ इति । यथायथा तासां मतयः प्रेमवासनास्तथातथैव स प्रतीयत इति भावः । ''ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्''इति स्वेच्छामयस्य न तु भूतमयस्येत्यादेश्च । यद्वा मतयः शास्त्रकृतां वैशेषिकादीनां बुद्धय ईश्वरनिरूपणे प्रवृत्ताः जगदुपादानत्वमीश्वरत्वं जगन्नियंतृत्वं तथा जगन्निमित्तत्वमश्विरत्वमिति मतवैविध्यात् । किञ्चित्किञ्चिज्जानंत्योपि वस्तुतो मूढा एवेति ''याः संपर्यचरन्प्रेम्णा'' । इत्याद्युक्तेस्तासां प्रेमवत्त्वाद्भगवतश्च प्रेमवश्यत्वात्तासां प्राकृतत्वं न व्याख्येयम् ॥ ३९ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे एकादशोध्यायः ॥ ११ ॥ यत्प्रसंगाय यस्य परीक्षिज्जन्मनः प्रस्तावाय । तदेवेत्यन्वयः (१)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तरायां हतो गर्भ ईशेनाऽऽजीवितः पुनः ॥१॥ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥ २ ॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे ॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥ सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥ संपदः क्रतवो लोका महिषी भ्रातरो मही ॥ जंबुद्वीपाधिपत्यं च यशश्च त्रिदिवं गतम् ॥५॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥ ६ ॥

"परीक्षितोऽथ राजर्षेर्जन्म कर्म विलापनम् । संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयम्" इति प्रतिज्ञाय पांडवानां राज्यस्थितिरुपोद्घातरूपा सप्रसंगं सप्तमाध्यायमारभ्य निरूपिता । इदानीमौपोद्घातिकमुक्तानुवादपूर्वकं पृच्छति । अश्वत्थाम्नेति।उपसृष्टेन विसृष्टेन।तस्य जन्मादि ब्रूहीत्युत्तरेणान्वयः ॥ १ ॥ स परीक्षित् । प्रेत्य देहं त्यक्त्वा ॥ २ ॥ प्रार्थये नत्वाज्ञापयामीत्याह गदितुं यदि मन्यसेऽनुग्रहेण तर्हि ब्रूहीति । 'यस्य ज्ञानमदाच्छुकः' इति श्रवणेच्छायां कारणम् ॥ ३ ॥ निस्पृहस्यापि राज्ञः श्रीकृष्णानुग्रहात्तादृक्पौत्रः समजनीति वक्तुं तस्य श्रीकृष्णे भक्त्युद्रेकमाह अपीपलदिति त्रिभिः । पितृवदपीपलत्पालयामास ॥४॥ क्रतवस्तदुपार्जिता लोकाश्च ॥ ५ ॥ सुरस्पार्हाः सुराणां स्पृहणीयास्ते संपदादयः कामा विषया राज्ञः किं मुदं प्रीतिमधिजह्रुः कृतवंतो न कृतवंत इत्यर्थः । अत्र हेतुः । मुकुंद एव मनो यस्येति ।

"चिंतां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इत्यभिधानात् । द्रौण्यस्त्रक्षेपगर्भरक्षाकुंतीस्तवभीष्मनिर्याणभगवद्वारकायात्राद्वारकाप्रवेशपट्टमहिषीरमणादिकथामाधुर्य्येषु तत्प्रसंगोत्थितेषु मज्जंतं सूतं तदेव परीक्षिज्जन्म शुश्रूषुः शौनकः पुनर्विशेषतः पृच्छति—अश्वत्थाम्नेति।ईशेन कर्त्तुमकर्त्तुमन्यथा कर्त्तुं समर्थेन श्रीकृष्णेन हतो नाशितोपि पुनराजीवित इत्युक्त्या महाभारतसमानार्थतासूचि । तत्र हि मृतो जातः परीक्षित्पुनः सुभद्रादिप्रार्थनया श्रीकृष्णेन संजीवनमापित इत्युक्तम् । सर्वथा श्रीकृष्णदत्ततज्जीवने तात्पर्यमिति साम्यमत्र । यद्वा कल्पांतरीया श्रीभारतकथेति बोध्यम् ॥ १ ॥ तस्य परीक्षितः । गतवान् वैकुंठमिति शेषः । "भेजे खगेन्द्रध्वजपादमूलं ज्ञानेन वैयासकिशाब्दितेन" इति वक्ष्यमाणत्वात् ॥ २ ॥ तदिदं परीक्षिद्वृत्तांतं मामधिकारिणं विज्ञाय यदि वक्तुं मन्यसे श्रीशुकस्य श्रीकृष्णलीलामृतपानमग्नस्य सर्वतोनपेक्षस्यापि यदुपदेशे प्रवृत्तिरित्यद्भुततमं तद्वृत्तमिति कृपया ब्रूह्येवेति भावः ॥ ३ ॥ धर्मेणैव राजत इति । न तु राजपरिच्छद्भिरित्यन्वर्थनामा युधिष्ठिरः । धर्मावतारत्वात्स चासौ राजा चेति। "राजाहःसखिभ्यष्टच्" इति टच् अत्र च सर्वकामसेवातः कृष्णपादसेवायाः स्वादुत्वं ध्वनितम् ॥ ४ ॥ निस्स्पृहत्वमेवाह-संपद इति । संपदो धनधान्यादिसमृद्धयः। महिषी द्रौपदी । यद्रूपदर्शनक्षुभितराजन्यचक्रेण स्वयंवरेऽप्युपद्रवः कृतो यदर्थं जयद्रथोपि वने भीमसेनेनार्दितः सापि पट्टराज्ञीत्यर्थः । मही परिध्यन्तापि जंबूद्वीपस्य पुण्यक्षेत्रभारतखंडवत्त्वात्प्राधान्येन तदुक्तिस्तस्य "शास्ति सप्तार्णवां महीम्" इति पुराणान्तरोक्तेः । सार्वभौमत्वात् यथा सर्वजगदीशोपि श्रीरामचंद्रोऽयोध्याधीश इति कथ्यते तद्वादियमुक्तिः प्रतीयते यथाश्रुतं वास्त्विति ॥ ५ ॥ स्पृहा विद्यते येषु ते स्पार्हाः । अत्र मत्वर्थेऽण् । तद्धितप्रत्ययानां सर्वार्थविधानात् । इत्यर्थ इति । सर्वकामनिःस्पृहत्वस्योक्तत्वादिति भावः । अत्र मुदनधिककरणे । मुकुंदसेवापेक्षया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् ॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतम् ॥ ८ ॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलम् ॥ क्षतजाक्षं गदापाणिमात्मनः सर्वतोदिशम् ॥ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः ॥ ९ ॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥ विधमंतं संनिकर्षे पर्यैक्षत क इत्यसौ ॥१०॥ विधूय तदमेयात्मा भगवा न्धर्मगुब्विभुः ॥ मिषतो दशमास्यस्य तत्रैवांतर्दधे हरिः ॥११॥ ततः सर्वगुणोदर्के सानुकूलग्रहोदये॥जज्ञे वंशधरः पांडोर्भूयःपांडुरिवौजसा ॥१२॥

क्षुधितस्यान्नैकमनसो यथेतरे स्रक्चंदनादयो न कुर्वंति तद्वत् ॥ ६ ॥ प्रस्तुतमाह । मातुरिति । स परीक्षित् ॥ ७ ॥ पुरटं सुवर्णं स्फुरन् पुरटमौलिर्यस्यास्ति तम् । व्रीह्यादिभ्यश्चेति इनिप्रत्ययः । अपीच्यमतिसुंदरं दृश्यत इति दर्शनं रूपं यस्य तम् । तडिद्वद्वाससी यस्येति श्याममिति च पदाभ्यां विद्युद्युक्तमेघोपमा सूचिता । अच्युत मविकारम् ॥ ८ ॥ तप्तं दाहोत्तीर्णं यत्कांचनं तन्मये कुंडले यस्य । क्षतजाक्षं संरंभादत्यारक्तनेत्रम् ॥ ९ ॥ अस्त्रतेजो विधमंतं विनाशयंतम् । नीहारं हिमं गोपतिः सूर्य इव । सन्निकर्षे समीपे ददर्श । दृष्ट्वा चासौ क इति पर्यैक्षत वितर्कितवान् ॥ १० ॥ अमेयात्मा कथं तद्विधूतवानित्यवितर्क्यरूपः । धर्मं गोपायतीति धर्मगुप् । यद्वा धर्मं गोपायंतीति धर्मगुपो राजानस्तत्प्रभुस्तेषामपि पालकत्वात् । दशमासपरिच्छेद्यस्य तस्य मिषतः पश्यतो यत्र दृष्टस्तत्रैवांतर्हितो न त्वन्यत्र गतः । यतो विभुः सर्वगतः ॥ ११ ॥ उदर्क उत्तरफलम् । सर्वगुणानामुत्तरोत्तराधिक्यसूचके लग्ने । तत्र हेतुः । अनुकूलैरन्यैर्ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन् ॥ १२ ॥

तेषां तुच्छत्वादिति भावः "मधुद्विट्सेवानुरक्तमनसामभवोपि फल्गुः" इति पंचमे भरताख्यानोक्तेरिति।अत्र दृष्टांतः—क्षुधितस्येति । आदिना वीणावाद्यादिग्रहः ॥ ६॥ वीर इति।स्वाभाविकवीरत्वेनैवास्ततेजसस्तस्मादबिभ्यदिति भगवद्रूप एव स्वविषयग्रहणारंभः प्रथमतः कृत इति । हे भृगुनन्दनेति । कुलनन्दनता हि भगवद्ध्यानयशःश्रवणादिभिर्भवतीति यथा त्वमाबाल्यतो भगवत्कथाश्रवणनिष्ठत्वाद्भृगुकुलनन्दनतां प्राप्त इति भावः ॥ ७ ॥ अंगुष्ठमात्रमिति । आत्मनः सर्वतो दिक्षु गर्भे तावन्मात्रस्यैव विकारस्य स्थितत्वात् । तत्प्रमाणमेव भगवत्युपचारितम् । वस्तुतस्तु तावत्यपि देशेऽचिंत्यशक्त्या यथावत्प्रमाणमेव भगवंतं ददर्श न त्वन्यथा "गर्भे दृष्टं मनुध्यायन्परीक्षेत नरेष्विह" इत्युपरिष्टादुक्तेर्नरलोके तस्य परीक्षणान्यथानुपपत्तेः । अत एवापीच्यमन्यूनानातिरिक्तत्वात्सुंदरं दृश्यत इति दर्शनं रूपं यस्य तम् । "अपीच्यं त्वतिसुंदरे" इत्यभिधानात् । पुरटस्य हेम्नो मौलिर्यस्य तम् "दुर्वर्णं पुरटं जांबूनदकार्त्तस्वरे वसु । सुरूपं पीतलोहं च मुख्यद्रव्यं तथाग्निभूः" इति विचित्रकोशात् । व्रीह्यादित्वादिनिः । श्यामं तडिद्वाससमिति पदाभ्यां विद्युद्भूषितमेघो ब्रह्मास्त्रदावानलदह्यमानपरीक्षित्कलभत्राणाय सहसैवोत्तराकुक्षिनभसि प्रादुरभूदिति द्योतितम् ॥ ८ ॥क्षतजाक्षं ब्रह्मास्त्रं प्रति क्रोधादहो मद्भक्तस्यापि पीडने प्रवृत्तमिदमिति कोपात् ॥ ९ ॥ वितर्कितवान् कोऽसौ वीरासनेन मामंनियुक्तोपि रक्षतीति विमृष्टवानित्यर्थः ॥ १० ॥ पदविभागेनार्थान्तरमाह—धर्मं गोपायन्तीति । धर्मगुपो राजानस्तेषां प्रभू राज्ञामपि धर्मपालकत्वात् । यद्वा धर्मं भक्तवात्सल्यरूपं स्वधर्मं गोपायतीति तथा । हरिरिति । तस्य मनोऽपहृत्य तस्मिन्नवधाने सत्यन्तर्दधे । चौरस्य लक्षणमिदमेव । यद्भनवत्यवधानेन्तर्द्धत्त इति । कूटयामिकवत्तन्मनोहर्त्तुमेव तत्र प्रविष्ट आसीदित्युत्प्रेक्षात्र द्योतिता ॥ ११ ॥ ततो हरेर्दर्शनानन्तरम् । सर्वे गुणा उत्तरफलानि यस्मिन्निति । समासे फलितमाह-सर्वगुणानामिति । ग्रहाणामनुकूलत्वं स्ववर्गमित्रवर्गस्वोच्चादिस्थितत्वम् । वर्गस्तु "ग्रहं होरा च द्रेष्काणसप्तांशकनवांशकाः । द्वादशांशकत्रिंशांशौ वर्ग इत्युच्यते बुधैः " इति । मित्रत्वं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ॥ जातकं कारयामास वाचयित्वा च मंगलम् ॥ १२ ॥

जातकं जातकर्म । मंगलं पुण्याहम् ॥ १३ ॥

"रवीन्दुभौमगुरवो ज्ञशुक्रशनिराहवः । स्वस्मिन्मित्राणि चत्वारि परस्मिञ्छत्रवः स्मृताः ॥ " इति । "अजवृषमृगांगनाकर्कमीनवणिजस्त्विनादुच्चाः । उच्चात्सप्तमगो नीचो राशौ वा यदि वांशके । मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाभृतोः । बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चंद्रमाः । सिंहस्याधिपतिः सूर्यः शनिर्मकरकुम्भयोः ॥ स्यान्मीनधन्विनोर्जीवोऽधिपतिः समुदाहृतः ॥ कन्या राहुगृहं प्रोक्तं राहूच्चं मिथुनं स्मृतम् । वर्गोत्तमनवांशाश्चरादिषु प्रथममध्यांताः । होरे विषमेऽर्केन्द्वोः समराशौ चंद्रसूर्ययोः क्रमशः । द्रेष्काणपाः स्वभाज्ज्ञेयाः प्रथमेषु नवाधिपाः । ओजे सप्तांशकः स्वर्क्षात्समे सप्तमराशितः । क्रियमृगास्य तौलिकेंदुभतो नवांशविधिरुच्यते । शुक्रज्ञजीवशनिभूतनयस्य बाणशैलाष्टपंचविशिखास्समराशिमध्ये । त्रिंशांशको विषमभे विपरीतमस्मात्स्याद्वादशांशानिजराशित एव ज्ञेयः ॥ यस्मिन्राशौ भवेत्खेटस्तद्गृहं परिकीर्तितम् । तदेव लग्नमुद्दिष्टं लवत्रिंशकसंमितम् । होरापञ्चेन्दुभि (१९) र्भागैर्द्रेष्काणो दशभिर्लवैः । वेदैः (४) सप्तेन्दु (१७) भिश्चैव लवाद्यैः सप्तमांशकाः । नवांशश्च त्रिभिर्भागैस्तृतीयांशेन (२०) संयुतैः । सार्द्धद्वयांशकैः १३०) र्भागैर्द्वादशांशक उच्यते । त्रिंशांशविधिरुद्दिष्टः शुक्रज्ञेत्यादिना बुधैः । विषमे ग्रहस्य विषमो राशिः समभे त्रिंशांशके समः" इत्यलमतिप्रसंगेन । ओजसा प्रभावेण तत्राधिक्यसूचकत्वे ॥ १२ ॥ तस्य बालस्य । मंगलं पुण्यहवाचनम् । त्रिकाण्डमण्डने तद्विधिरुक्तः तथा हि । "गर्भाधानादिसंस्कारेष्विष्टापूर्त्तक्रतुष्वपि । वृद्धिश्राद्धं नरैः कार्यं कर्मादौ स्वस्तिवाचनम् ॥" व्यासः "संपूज्य गंधपुष्पाद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् ॥ धर्मकर्मणि मांगल्ये संग्रामेऽद्भुतदर्शने ॥" इति । गृह्यपरिशिष्टेपि "स्वस्तिवाचनमृद्धिपूर्तेषु तत्कर्मणाश्चायंतयोः कुर्यात् ॥" आश्वलायनः "वैदिके तांत्रिके चादौ तत्तत्पुण्याहमिष्यते ॥" तत्र रूपनारायणीये इत्थम् "त्रीनधिकान्वा ब्राह्मणान्भोजयित्वोदमुङ्मुखानुपवेश्य वस्त्रादिभिः परितोष्य"पुण्याहं भवन्तो ब्रुवन्तु"इति ब्राह्मणान्यजमानस्त्रिः श्रावयेत्।ततो ब्राह्मणाः"पुण्याहं पुण्याहं पुण्याहम्।इति त्रिर्ब्रूयुः।ततः स्वस्ति भवंतो ब्रुवंत्विति त्रिः श्रावयेत्। ॐ स्वस्ति इति त्रिर्ब्रूयुः । तत ऋद्धिं भवन्तो ब्रुवन्तु इति त्रिः श्रावयेत् । ऋद्ध्यतामिति त्रिः प्रतिवचनम् ।" एतच्च ब्राह्मणानन्नेन परितोष्य पुण्याहं स्वस्ति ऋद्धिरित्योंकारपूर्वं त्रिस्त्रिरेकैका आशिषो वाचयित्वेत्यादिना बौधायनेनोक्तम् । यमः "पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते । एतदेव निरोंकारं कुर्यात्क्षत्रियवैश्ययोः ॥" इति । बह्वृचगृह्यपरिशिष्टे तु "अवनिकृतजानुमण्डलः कमलमुकुलसदृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु । शिवा आपः सन्तु । सौमनस्यमस्तु । अक्षतं चारिष्टमस्तु । गंधाः पांतु सुमंगल्यं चास्तु । पुष्पाणि पांतु सौश्रियमस्तु । अक्षताः पांतु आयुष्यमस्तु । तांबूलानि पांतु ऐश्वर्यमस्तु । दक्षिणाः पान्तु बहुधनमस्तु । दीर्घमायुः शांतिः पुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रश्चायुष्यं चास्तु । यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्त्तंते तमहमोंकारमादिं कृत्वा ऋग्यजुः सामाशीर्वचनं बह्वृषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । वाच्यताम् । द्रविणोदा द्रविणसस्तुरस्य० सविताः पश्चातात्० नवोनवो भवति जायमान० उच्चा दिवि दक्षिणावन्तो अस्थुः० इत्येता ऋचः पुण्याहे ब्रूयात्" । व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । समाहितमनसः स्मः । प्रसीदन्तु भवन्तः । प्रसन्नास्स्मः। शान्तिरस्तु पुष्टिरस्तु तुष्टिरस्तु वृद्धिरस्तु अविघ्नमस्तु आरोग्यमस्तु आयुष्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु पुत्रलमृद्धिरस्तु । धनधान्यसमृद्धिरस्तु । इष्टसमृद्धिरस्तु । अनिष्टनिरसनमस्तु यत्पाप तत्प्रतिहतमस्तु । यच्छ्रेयस्तदस्तु । उत्तरे कर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहराभिवृद्धिरस्तु । उत्तरोत्तराः क्रियाः शुभाः शोभनाः प्रवर्त्तंताम् । तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु । तिथिकरणमुहूर्त्तत्रग्रहलग्नाधिदेवताः प्रीयंताम् तिथिकरणे मुहूर्त्तनक्षत्रे सग्रहे सदैवते प्रीयेताम् । अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । इंद्रपुरोगा मरुद्गणाः प्रीयंताम् वसिष्ठपुरोगा ऋषिगणाः प्रीयंताम् । माहेश्वरीपुरोगा उमामातरः प्रीयंताम् । अरुंधतीपुरोगा एकपत्न्यः प्रीयंताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयंताम् । ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंताम् । ब्रह्म च ब्राह्मणाश्च प्रीयंताम् । श्रद्धामेधे प्रीयेताम् । भगवती कात्यायनी प्रीयताम् । भगवती माहेश्वरी प्रीयताम् । भगवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋद्धिकरी प्रीयताम् । भगवती वृद्धिकरी प्रीयताम् । भगवंतौ विघ्नविनायकौ प्रीयेताम । सर्वा ग्रामदेवताः प्रीयंताम् । सर्वाः कुलदेवताः प्रीयन्ताम् । ब्रह्महता ब्रह्मद्विषः । हताः परिपंथिनः । हताश्च विघ्नकर्त्तारः शत्रवः पराभवं यांतु । शाम्यन्तु घोराणि । शाम्यन्तु पापानि । शाम्यन्त्वीतयः । शुभानि वर्द्धन्ताम् । शिवा आपः संतु । शिवा अग्नयः संतु । शिवा आहुतयः सन्तु । शिवा वनस्पतयः सन्तु । शिवा अतिथयः सन्तु । अहोरात्रे शिवे स्याताम् । निकामे निकामे पर्जन्यो वर्षतु । फलिन्यो न ओष धयः सन्तु । योगक्षेमो नः कल्पताम् । शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंताम् । भगवान्नारायणः प्रीयताम् । भगवान्पर्ज्जन्यः प्रीयताम् । प्रीयतां भगवान्स्वामी महासेनः । पुण्याहकालं वाचयिष्ये । वाच्यताम् । उद्गातेव शकुने साम गायसि । याज्यया यजति । यत्पुण्यं नक्षत्रं तद्बट् कुर्वीतोपव्युषम् । यदा वै सूर्य उदात । अथ नक्षत्रं नैति । यावति तत्र सूर्यो गच्छेत् । यत्र जघन्यं पश्येत्तावति कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । तानि वा एतानि यमनक्षत्राणि । यान्येव देवनक्षत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । पुण्याहं भवंतो ब्रुवंतु । ॐ पुण्याहम् । स्वस्तये वायुमुपब्रवामहै आदित्य उदयनीयः० स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पति र्दधातु । अष्टौ देवा वसवः सोम्यासः । चतस्रो देवीरजराश्रविष्ठाः ।। ते यज्ञं पांतु रजसः परस्तात् । संवत्सरीणममृतꣳ स्वस्ति ॥ स्वस्ति भवंतो ब्रुवन्तु । आयुष्मते स्वस्ति । ऋध्यामस्तोमं० सर्वामृद्धिमृध्नुयामिति०ऋद्ध्याः स्म हव्यैर्नमसोपसद्या ।मित्रं देवं मित्रधेयं नो अस्तु ।अनूराधान्हविषावर्द्धयंतः ।शतं जीवेम शरदः सवीराः । त्रीणि त्रीणि वै देवानामृद्धानि । त्रीणि च्छन्दाꣳसि । त्रीणि सवनानि । त्रय इमे लोकाः । ऋद्ध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति । ऋद्धिं भवंतो ब्रुवंतु । कर्म ऋद्ध्यताम् । ऋद्धिः समृद्धिः । श्रिये जातः श्रिय एवैनं० यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् । अमुं च लोकमिदमूच सर्वम् । तन्नो नक्षत्रमभिजिद्विजित्य । श्रियं दधात्वहृणीयमानम् । अहेर्बुध्निय मंत्रं मे गोपाय । यमृषयस्त्रयिविदो विदुः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् । श्रीरस्त्विति भवंतो ब्रुवंतु । अस्तु श्रीः ।पुण्याहवाचनसमृद्धिरस्तु । भगवान्प्रजापतिः प्रीयताम् ।इति पुण्याहवाचनम् । जातकशब्देन पितृदेवार्चनमपि गृहीतं भवति "जातकं कारयामास पितृदेवार्चनं तथा" इति श्रीदशमे नंदराजोत्सवोक्तेः । तत्र पित्रर्चनं वृद्धिश्राद्धम् । तच्च तदा पिंडहीनमेव कार्यम् । "पिंडनिर्वापरहितं यत्र श्राद्धं विधीयते । स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते । अक्षय्यदक्षिणा स्वस्ति सौमंनस्य यथास्थितम् ॥ " तत्र संक्षिप्य प्रयोगः । सत्यवसुसंज्ञका विश्वेदेवाः ॐभूर्भुवःस्वरिदं वः पाद्यम् । एवं सर्वत्र पाद्यम् । मातृपितामहीप्रपितामह्यो नांदीमुख्यो भूर्भुवः स्वरिदं वः पाद्यम् । पितृपितामहप्रपितामहा नांदीमुखा भूर्भुवः स्वरिदं वः पाद्यम् । मतामहप्रमातामहवृद्धप्रमातामहाः नांदीमुखाः सपत्नीका भूर्भुवः स्वरिदं वः पाद्यम् । आचमनम् । सत्यवसुसंज्ञकानां विश्वेषां देवानां भूर्भुवः स्वरिदमासनं सुखासनम् । नांदीश्राद्धे क्षणौ क्रियेताम् । ॐतथा । प्राप्नुवन्तु भवंतः । प्राप्नवामः । मातृपितामहीप्रपितामहीनां नांदीमुखीनां भूर्भुवःस्वरिदमासनम् । सुखासनम् । नांदीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा । प्राप्नुवंतु भवन्तः प्राप्नवामः । पितृपितामहप्रपितामहानां नांदीमुखानां भूर्भुवः स्वरिदमासनम् । सुखासनम् । नांदीश्राद्धे क्षणौ क्रियेताम् । ॐ तथा । प्राप्नवतु भवन्तः प्राप्नवामः । मातामहप्रमातामहवृद्धप्रमातामहानां नांदीमुखानां समत्नीकानां भूर्भुवः स्वरिदमासनम् । सुखासनम् । नांदीश्राद्धे क्षणौ ।क्रियेतां भवद्भिः । ॐतथा । प्राप्नुवन्तु भवंतः । प्राप्नुवामः । ततो गंधादिदानम् । सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्य इदं गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः । पितृपितामहप्रपितामहेभ्यो नांदमुखेभ्य इदं गंधाद्यर्चनंः स्वाहा संपद्यतां वृद्धिः । मातामहप्रमातामहवृद्धप्रमातामेहभ्यो नांदीमुखेभ्यः सपत्नीकेभ्य इदं गंधाद्यर्च्चनं स्वाहा संपद्यतां वृद्धिः । ततः परिवेषणं कृत्वा गायत्र्या प्रोक्ष्य पृथिवी ते पात्रमिति पात्रमालभ्य सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । मातृपितामहीप्रपितामहीभ्यो नांदीमुखीभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । पितृपितामहप्रपितामहेभ्यो नांदीमुखेभ्यो युग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा संपद्यतां वृद्धिः । मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्योयुग्मब्राह्मणभोजनपर्याप्तमन्नममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । स्वस्ति न इन्द्रो वृद्धश्रवा इत्यादिपाठः । अनेन नांदीश्राद्धेन कर्मांगदेवताः प्रीयंताम् वृद्धिः संपद्यताम् । ततः पुरुषसूक्तादिजपः । नांदीश्राद्धं संपन्नं सुसंपन्नं सुप्रोक्षितमस्तु । शिवा आपस्संतु । सौमनस्यमस्तु । अक्षतं चारिष्टमस्तु । नांदीमुख्यो मातरः प्रीयन्ताम् । नांदीमुखाः पितरः पितामाहाः प्रपितामहाः प्रीयंताम् । नांदीमुखा मातामहः । प्रमातामहवृद्धप्रमातामहाः सपत्नीकाः प्रीयंताम् । ततो गोत्रन्नो वर्द्धताम् । वर्द्धतामिति प्रत्युक्ते ।"दातारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान् ॥ प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयानतम् ॥ एष ह्यस्मिन्प्रजातंतौ पूरूणां पौरवर्षभ ॥ १५ ॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ॥ रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥ ॥ १६ ॥ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः ॥ भविष्यति न संदेहो महाभागवतो महान् ॥ १७ ॥ युधिष्ठिर उवाच ॥ अप्येष वंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः ॥ अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥ १८ ॥ ब्राह्मणा ऊचुः ॥ पार्थ प्रजाऽविता साक्षादिक्ष्वाकुरिव मानवः ॥ ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥ १९ ॥

वरान् श्रेष्ठान् । स्वन्नं शोभनमन्नं च तीर्थविज्ञानकालज्ञः । "यावन्न च्छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते" इति वचनात्ततः पूर्वं प्रादात् । आमान्नं वा । प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले । "पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्" इतिस्मृतेः "देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् । आयांति हि नृपश्रेष्ठ पुण्याहमिति चाब्रुवन्" इति च ॥ १४ ॥ हे पौरवर्षभ पूरूणां पुरुवंश्यानां शुक्ले शुद्धेऽस्मिन्प्रजातंतौ दैवेन कथंभूतेनाऽप्रतिघातेन दुर्वारेण संस्थां नाशमुपेयुषि गते सति वोऽनुग्रहार्थाय यस्मात्प्रभवनशीलेन श्रीविष्णुना रातो दत्तस्तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति महाभागवतश्च गुणैश्च महान् भविष्यति नात्र संदेह इति तं राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्वयः ॥ १५ ॥ १६ ॥ १७ ॥ महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति । अपि स्वित्किंस्वित् । साधुवादेन यशसा सत्कीर्त्या चानुवर्तिता भविष्यतीति पूर्वस्यैवातः परमप्यनुषंगः ॥ १८ ॥ प्रजानामविता रक्षकः । मानवो मनोः पुत्रः । ब्राह्मणेषु हितः सत्यप्र

नोभिवर्द्धतां वेदाः सन्ततिरेव नः।श्रद्धा च नो मा व्यगमद्बहुदेयञ्च नोऽस्तु॥अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्वं कंचन" इति संप्रार्थ्य।विप्रैः"दातारो वोभिवर्द्धतां वेदाः संततिरेव वः।श्रद्धा च वो मा व्यगमद्बहुदेयं च वोऽस्तु । अन्नं च वो बहुभवेदतिथींश्च लभध्वम्।याचितारश्च वः सन्तु मा च याचिदेढ्वं कञ्चन" इति प्रत्युक्ते द्राक्षामलकादितन्निष्क्रयं वा दक्षिणां दत्त्वा विश्वे देवाः प्रीयन्तामिति दैवे वाचयित्वा वाजेवाज इति मानपूर्वं मात्रादीन्विसृज्यामावाजस्येत्यनुजोदिति संक्षिप्तवृद्धिश्राद्धञ्च । नृपो विप्रैः कारयामास।यद्वा"हैमेन श्राद्धं कुर्वीत ग्रहणे पुत्रजन्मनि" इति स्मृतेः । हेम्नैवाद्यपुत्रोत्पत्तिसमये नांदीश्राद्धकरणजन्यफलसमफलप्राप्तये इदं स्वर्णमग्निदेवताकं विभज्याविभज्य वाऽमुकामुकगोत्रामुकामुकशर्मभ्यो विप्रेभ्योऽमुकशर्मणे वाहं दस्य इति संकल्पश्राद्धमेव कुर्यात्तेन पित्रादितृप्तिर्बालश्च चिरायुः स्यादिति पुण्याहवाचनात्पश्चात्कार्यम् । ॥ १३ ॥ शोभनमन्नं पायसादि । ननु लोकविरुद्धत्वात्तदा न कोपि भुंक्त इति चेदाह—आमान्नं वेति । किं च "अच्छिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तमाः । संस्कारेषु च पुत्रस्य तदक्षय्यं प्रकीर्तितम् ॥" इति। विष्णुधर्मे "प्रमीते गोत्रपुरुषे सूतके वा समागते। दशरात्रमनर्हः स्यात्कर्तुं दानप्रतिग्रहौ ॥ पिंडोदकादि मृतके दातुं प्रेताय युज्यते । अच्छिन्नायां तथा नाड्यां दानार्हः सुतसूतके ॥" इति वाराहोक्तेः । सत्यपि सूतकादौ तदुपयोगि कर्मावश्यं कार्यमेवेति । न तत्र दोषः । "वरो वै दक्षिणा" इति श्रुतेर्वरान्दक्षिणा वा ॥ १४ ॥ हे पौरवर्षभेति । पुरुनृपस्य पितृभक्तत्वेन "तंतु तन्वन्पितॄन्यजेत्" इत्याद्युक्तेः पितृभक्तवंशानुच्छेदादपि तद्वंशर्षभस्य तव वंशोऽनुच्छेदार्ह एवेति भावः ॥ १५ ॥ १६ ॥ बालस्य तादृशयोग्यतायामश्रद्दधानं राजानं प्रत्याहुर्न संदेह इति ॥ १७ ॥ साधुषु वादः कथनं यस्य तेन । यशसेति । अनेन धूर्तव्यसनिवंचकमूर्खगोष्ठीश्लाघ्यता निरस्ता । तत्र तादृशां श्लाघ्यत्वे प्रत्युत निंदैव जायत इति । हे सत्तमा इति । भवंतो हि यथार्थशास्त्रसंपन्नत्वेन सर्वकथनसमर्थास्तपस्वित्वेन त्रिकालज्ञाश्चेति भावः ॥ १८ ॥ तेषां सदृशो यशसेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः ॥ यशो वितनिता स्वानां दौष्यंतिरिव यज्वनाम् ॥२०॥ धन्विनामग्रणीरेष तुल्यश्चाऽर्जुनयोर्द्वयोः॥ हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥ २१ ॥ मृगेंद्र इव विक्रांतो निषेव्यो हिमवानिव ॥ तितिक्षुर्वसुधेवाऽसौ सहिष्णुः पितराविव ॥ २२ ॥ पितामहसमः साम्ये प्रसादे गिरिशोपमः ॥ आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥ २३ ॥ सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः ॥ रंतिदेव इवोदारो ययातिरिव धार्मिकः ॥ २४ ॥ धृत्या बलिसमः कृष्णे प्रह्लाद इव सद्ग्रहः ॥ आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥ २५ ॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनाम् ॥ निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥२६॥ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसार्जितात् ॥ प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः ॥ २७ ॥

तिज्ञश्च श्रीरामो यथा ॥ १९ ॥ उशीनरदेशाधिपतिः शिबिर्येन स्वमांसं श्येनाय दत्त्वा शरणागतः कपोतो रक्षितः स्वानां ज्ञातीनां यज्वनां च यशोविस्तारको दौष्यंतिर्भरत इव ॥२०॥ अर्जुनयोः पार्थकार्तवीर्ययोः ॥ २१ ॥ हिमवानिव सतां निषेव्योऽनन्यगतिकत्वेन । वसुधेव तितिक्षुः क्षंता । प्रीत्या मातापितराविव सहिष्णुः ॥ २२ ॥ पितामहो ब्रह्मा तेन समः । साम्ये समत्वे रमाश्रयो हरिः ॥२३॥ सर्वैः सद्गुणैर्माहात्म्यं यत्तस्मिन् श्रीकृष्णतुल्यः ॥२४॥ धृत्या धैर्येण । सद्ग्रहः सन्भद्रो ग्रहोऽभिनिवेशो यस्य सः आहर्ता कर्ता ॥ २५ ॥ राजर्षीणां जनमेजयादीनाम् ॥ २६ ॥ द्विजपुत्रेण प्रेरितात्तक्षकादात्मनो मृत्युमुपश्रुत्य विरक्तः सन्हरेः पदं प्रपत्स्यते

किं पृच्छयते । यैरेवैकैकैर्गुणैस्ते सर्वे एव गुणास्तस्मिन्नधुनैव संति । यथावसरमाविर्भविष्यंति तस्मादेतत्तुल्यास्ते न बभूवुरिति प्रतीयतामित्याशयेनाहुः पार्थेति । पृथापुत्रत्वेन तव भगवत्पैतृष्वस्त्रीयत्वान्न त्वां वयं प्रतारणवचो वच्म इति भावः ॥ १९ ॥ दौष्यंतिर्दुष्यंतपुत्रः ॥ २० ॥ दुर्द्धर्षः दुःसहः । दुस्तरः तर्तुमशक्यः ॥ २१ ॥ विक्रांतः शूरः । सर्वसहापि वसुधा परेषां वाक्छरज्वालां नानुभवति । अयं तु तामनुभवन्नपि न प्रतिकारिष्यतीति । अत्र दृष्टांतः । पितराविवेति चक्रवर्ती ॥ २२ ॥ पितामहो ब्रह्मा युधिष्ठिरो वा । साम्ये सर्वत्र द्वेषाभावे ॥ २३ ॥ उदार औदार्यविशिष्टस्तेन कारुण्यं लक्ष्यते । येनाष्टचत्वारिंशद्दिनपर्यंतमपश्नतापि सर्वमन्नमतिथिभ्यो दत्त्वा पानीयमपि तृट्परीताय दत्तमिति नवमे प्रथयिष्यते । ननु ययातेः प्रतिलोमोद्वाहवत्त्वात्कथं धार्मिकत्वमिति न शंक्यम् । धर्मस्य सूक्ष्मगतित्वेन दुर्ज्ञेयत्वात् । तदुक्तमपि—“कानीनस्य मुनेः स्वबांधववधूवैधव्यविध्वंसिनो नप्तारः किल गोलकस्य तनयाः कुंडाः स्वयं पांडवाः । तेऽमी पंच समानयोनिनिरताः ख्यातास्त्रिलोकीतले तेषां कीर्तनमेव पापशमकं धर्मस्य सूक्ष्मा गतिः ॥” इति “अमृते जारजः कुंडो मृते भर्तरि गोलकः” इत्यमरः । पापशमकत्वं तु “धर्मो विवर्द्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन । शत्रुर्विनश्यति धनंजयकीर्त्तनेन माद्रीसुतौ कथयतां न भवंति रोगाः” इति शिष्टगीतोक्तेः ॥ २४ ॥ २५ ॥ उत्पथगामिनामशास्त्रविहितमार्गवर्तिनाम् । भुवः पृथिव्याः धर्मस्य च कारणाद्धेतोः ॥ २६ ॥ द्विजपुत्रेण शमीकात्मजेन श्रृंगिनाम्ना हरेः पदं चरणारविंदं ज्ञानेन वैयासकिशब्दितेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ ॥ हित्वेदं नृप गंगायां यास्यत्यद्धाऽकुतोभयम् ॥ २८ ॥ इति राज्ञ उपादिश्य विप्रा जातककोविदाः ॥ लब्धापचितयः सर्वे प्रतिजग्मुः स्वकान्गृहान् ॥ २९ ॥ स एष लोकविख्यातः परीक्षिदिति यत्प्रभुः ॥ गर्भदृष्टमनुध्यायन्परीक्षेत नरेष्विह ॥ ३० ॥ स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ॥ आपूर्यमाणः पितृभिः काष्ठाभिरिवसोऽन्वहम् ॥ ३१ ॥ यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया ॥ राजा लब्धधनो दध्यावन्यत्र करदंडयोः ॥ ३२ ॥ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः ॥ धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥ ३३ ॥ तेन संभृतसंभारो धर्मपुत्रो युधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिम् ॥ ३४ ॥ आहूतो भगवान्राज्ञा याजयित्वा द्विजैर्नृपम् ॥ उवास कतिचिन्मासान्सुहृदां प्रियकाम्यया ॥ ३५ ॥ ततो राजाभ्यनुज्ञातः कृष्णया सह बंधुभिः ॥ ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिवृतः॥३६॥इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे परीक्षिज्जन्माद्युत्कर्षो नाम द्वादशोऽध्यायः ॥ १२ ॥

भजिष्यति ॥ २७ ॥ ततश्च जिज्ञासितमात्मनो याथात्म्यं येन सः । इदं शरीरं गंगायां हित्वाऽकुतोभयं पदं यास्यति । अद्धा निश्चयेन ॥ २८ ॥ लब्धापचितिः पूजा यैस्ते ॥ २९ ॥ परीक्षिदिति नाम निर्वक्ति । स एष इति । यद्यस्मात्प्रभुः समर्थः सन्गर्भे दृष्टं पुरुषमनुध्यायन्निह दृश्यमानेषु नरेषु मध्ये सर्वमपि नरं परीक्षेतायमसौ भवेन्नो वेति विचारयेदतः परीक्षिदिति विख्यातः । पूर्वदृष्टमिति वा पाठः । तदा मातृगर्भे पूर्वं दृष्टमित्यर्थः ॥ ३० ॥ शुक्ले शुक्लपक्षे स प्रसिद्ध उडुपोऽन्वहं यथा काष्ठाभिः पंचदशकलाभिरापूर्यमाणो वर्धत एवं पितृभिर्युधिष्ठिरादिभिः कामैश्चतुःषष्टिकलाभिश्चापूर्यमाणो ववृधे ॥ ३१ ॥ पूर्वमपकृष्योक्तानश्वमेधान्स्वावसरे सप्रकारं कथयति । ज्ञातिद्रोहस्य हानेच्छया यक्ष्यमाणः करदंडयोरन्यत्र ताभ्यां विना लब्धधनो दध्यौ चिंतयामास । करदंडजस्य परिजनभरणमात्रोपक्षीणत्वात् ॥ ३२ ॥ प्रहीणं मरुत्तस्य यज्ञे त्यक्तं सुवर्णपात्रादिकमानीतवंतः ॥ ३३ ॥ संभृतसंभारः संपादितयज्ञोपकरणः । भीतो ज्ञातिद्रोहात् ॥ ३४ ॥ ३५ ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे भावार्थदीपिकायां टीकायां द्वादशोऽध्यायः ॥ १२ ॥ निर्गमो धृतराष्ट्रस्य विदुरोक्त्या त्रयोदशे ॥ उक्तः पौत्राभिषेकेण वक्तुं राज्ञो महापथम् ॥ १ ॥

"भेजे खगेंद्रध्वजपादमूलम्" इत्युक्तेः ॥ २७ ॥ प्रकृतत्वादत्रात्मा हरिस्तस्य याथात्म्यम् अकुतोभयमपि तत्पदारविंदमेव । तद्वक्ष्यति श्रीदेवकी देवी "मर्त्यो मृत्युव्यालभीतः पलायन्[1]लोकान्सर्वान्निर्भयं नाध्यगच्छत् । त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥" इति श्रीदशमे ॥ २८ ॥ इतीत्थं जातको होराशास्त्रं तत्र कोविदाः । "भवेदपचितिः पूजा व्ययनिष्कृतिहानिषु" इति मेदिनी ॥२९॥ पुरुषेषु परीक्षणं हि श्रीकृष्णदर्शनात्प्रागेवातिबाल्यावस्थायामेव ज्ञेयम् ॥ ३० ॥ अत्र द्वाविवशब्दौ क्रमेण यथातथार्थे वर्तेते । "यथातथैववावैवं शब्दा एकार्थवाचकाः" इति कोशात् । अत एव स्वामिचरणैरेवं पितृभिरिति व्याख्यातम् ॥ ३१ ॥ करः षष्ठांशग्रहणं दंडो दुष्टनिग्रहजनितो धनलाभः । ज्ञातीनां भीष्मादीनाम् । द्रोहो हिंसनं तस्य जिहासया ॥ ३२ ॥ तस्य राज्ञोऽभिप्रेतं कुतश्चिद्धनप्राप्तिः कथं भवेदित्यभिप्रायं विचार्य्य अच्युतेन श्रीकृष्णेन व्यासदेवेन च प्रेरिताः ॥ ३३ ॥ तेन मरुत्तयज्ञविप्रत्यक्तस्वर्णपात्रादिरूपधनेन । "संभारः संभृतौ संघे" इति मेदिनी। "सामग्री संभृतिः समे" इति कोशांतरात् । त्रिभिस्त्रिगुणदक्षिणात एकस्य वाश्वमेधस्य त्रित्वं जातमिति महाभारतीयाश्वमेधपर्वणि विवृतम् ॥ ३४ ॥ अत्राहूत इत्यादिपद्यद्वयमपि केनचित्प्रक्षिप्तमस्ति । तच्च न स्वामिचरणसंमतम् ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे द्वादशोध्यायः ॥ १२ ॥ महापथमिति पाठो युक्तः ।

१ पलायन्-परस्मैपदमार्षम् । पलायमान इत्यपेक्षितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम् ॥ ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः ॥१॥ यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः ॥ जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥ २ ॥ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः ॥ धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा ॥ ३ ॥ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी ॥ अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः ॥ ४ ॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतम् ॥ अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः ॥ ५ ॥ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः ॥ राजा तमर्हयांचक्रे कृतासनपरिग्रहम् ॥ ६ ॥ तं भुक्तवंतमासीनं विश्रांतं सुखमासने ॥ प्रश्रयावनतो राजा प्राह तेषां च शृण्वताम् ॥ ७ ॥ युधिष्ठिर उवाच ॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् ॥ विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥८॥ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलम् ॥ तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥९॥ भवद्विधा भागवतास्तीर्थीभूताः स्वयं विभो ॥ तीर्थी कुर्वंति तीर्थानि स्वांतस्थेन गदाभृता ॥ १० ॥

इदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन्विदुरागमनेन धृतराष्ट्रप्रस्थानं ततोर्जुनागमनं ततः श्रीकृष्णांतर्धानं निशम्य पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः । गतिं हरिं तयात्मगत्यावाप्तं विवित्सितं ज्ञातुमिष्टं सर्वं येन ॥ १ ॥ तदेवाह । यावतः कर्मयोगव्रतादिविषयान् प्रश्नान्प्रथमं कृतवान् । कौषारवस्य मैत्रेयस्य पुरतः पश्चात्त्रिचतुःप्रश्नार्थज्ञानमात्रेण गोविंदे जातैकभक्तिः कृतार्थः संस्तेभ्यः प्रश्नेभ्य उपरराम । ततः परं न विजिज्ञासितवान् ॥ २ ॥ सूतः संजयः । शारद्वतः कृपः । पृथा कुंती ॥ ३ ॥ कृपी द्रोणभार्या । जामयो ज्ञातिभार्याः । अन्याश्च स्त्रियः ॥ ४ ॥ प्राणं तन्व इवेति कुतश्चिन्मूर्च्छादिदोषतः प्राणेऽवसन्ने सति तन्वः करांघ्र्यादयो निश्चेष्टा भवंति पुनस्तस्मिन्नाविर्भूते यथोत्तिष्ठंति तद्वत् ॥ ५ ॥ विरहेण यदौत्कण्ठ्यं तेन कातरा विवशाः ॥ ६ ॥ तं विदुरम् ॥ ७ ॥ पक्षिणो ह्यपत्यानि यथातिस्नेहेन पक्षच्छायया वर्धयंति तद्वद्युष्मत्पक्षपातच्छायया समेधितान्वर्धितान्नोऽस्मान् किं स्मरथ । समेधितत्वमेवाह । विपद्गणाद्यस्मान्मोचिताः स्मः ॥ ८ ॥ वो युष्माभिः कया वृत्त्या वर्तितं देहवृत्तिः कृता कानि च तीर्थादीनि सेवितानीति ॥ ९ ॥ भवतां च तीर्थाटनं न स्वार्थं किन्तु तीर्थानुग्रहार्थमित्याह । भवद्विधा इति । मलिनजनसंपर्केण

उत्तरत्रावतरणे पांडवप्रस्थानं चेति कथनात् । महोदयमिति पाठो हि न स्वामिसंमतः प्रतिभाति । तत्स्वीकारे तु महस्य स्वप्राक्तनाधिकारप्राप्त्युत्सवस्योदयो यस्मान्महापथगमनात्स महोदयस्तमित्यर्थः कार्यः (१) आत्मनो जीवस्य गातिं गम्यम् ''गतिर्गम्ये दशायात्राज्ञानोपायेषु कीर्तिता'' इति निरुक्तिः । सा च गतिर्हरिरेव । ''सोयमद्य महायोगिन्भवता करुणात्मना । दर्शितस्तमसः पारो यत्राकिञ्चनगो हरिः'' इति चतुर्थस्कंधान्ते मैत्रेयं प्रति विदुरोक्तेः । आत्मगत्या श्रीकृष्णतत्त्वज्ञानेन । यद्वात्मगतिर्हरिभक्तिस्तयावाप्तविवित्सित इति तद्वानेनैव सर्वं ज्ञातवानित्यर्थः । हस्तिपदन्यायेन तस्याः सर्वाश्रयत्वात् । तदुक्तं ''भक्त्या सिद्ध्यंति धर्माद्या भक्तिः सिद्धा स्वयं हरेः'' इति संहितायाम् । एतच्च तृतीयस्कंधानुरोधेन युद्धात्पूर्वं दुर्योधनाद्विच्छिद्य गत इति ध्येयम् ॥ १॥ तदेवाप्तविवित्सितत्वमेव ततः परस्य जिज्ञासितस्याभावात् । '' आत्मनि ज्ञाते सर्वं ज्ञातं भवति'' इति श्रुतेः । यद्वा तेभ्यः प्रश्नेभ्य उपरराम ह । तदुत्तरं श्रोतुं नैच्छद्भक्तौ जातायामन्यस्य जिज्ञास्यस्य वैयर्थ्यादिति भावः ॥ २ ॥ तं विदुरम् ॥ ३ ॥ जामिशब्दश्चवर्गादिरंतस्थादिश्च द्विधैव कोशेषु दृष्टः । ''यामिः कुलस्त्रीस्वस्रोः स्त्री'' इति मेदिनी । ''भार्यास्तु भ्रातृवर्गस्य जामयः स्युः परस्परम्'' इत्यमरश्च । क्वचित् ''यातरस्तु परस्परम्'' इति पाठः। अन्याश्चाप्रसिद्धनामवत्यः ॥ ४ ॥ ''तत्प्राणे प्रपन्ने उदतिष्ठत् ''इति श्रुतेः ॥ ५ ॥ राजा युधिष्ठिरः ॥ ६ ॥ तेषां पूर्वोक्तानाम् ॥ ७ ॥ विषाद्दुर्योधनदत्तान्महाग्नेर्जतुगृहात् । आदिना नदीतरणादिग्रहः ॥ ८ ॥ ९॥ हे प्रभो इति । पितृभ्रातृत्वेन गौरवमालक्ष्य प्रभवैस्त्वात्रनकर्तृत्वं चालक्ष्य वेयं संबुद्धि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि नः सुहृदस्तात बांधवाःकृष्णदेवताः ॥ दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमासते ॥ ११ ॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् ॥
यथानुभूतं क्रमशो विना यदुकुलक्षयम् ॥ १२ ॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितम् ॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३ ॥
कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखम् ॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥ अबिभ्रदर्यमा दंडं यथावदघकारिषु॥
यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥ १५ ॥ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरम् ॥ भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया ॥ १६॥
एवं गृहेषु सक्तानां प्रमत्तानांतदीहया ॥ अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ १७ ॥

मलिनानि तीर्थानि संतः पुनः स्वयं तीर्थी कुर्वंति । स्वांतं मनस्तत्रस्थेन स्वस्यांतःस्थितेनेति वा ॥ १० ॥ अपि किं सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा ॥ ११ ॥ १२ ॥
यदुकुलक्षयावर्णने कारणमाह । नन्विति ॥ १३ ॥ श्रेयस्कृत्तत्त्वमुपदिशन् ॥ १४ ॥ ननु शूद्रोऽसौ कथमुपदिशेत् । न ह्यसौ शूद्रः किं तु यमस्तद्रूपेणासीत् । किं तत्र कारणं
यमे चात्रागतेऽमुत्र को दंडधर इत्यपेक्षायामाह । अबिभ्रदिति । धृतवानित्यर्थः । मांडव्यस्य शापात् । तथा हि क्वचिच्चोराननुधावंतो राजभटा मांडव्यस्य ऋषेस्तपश्चरतः
समीपे तान् संप्राप्य तेन सह निबद्ध्यानीय राज्ञे निवेद्य तदाज्ञया सर्वान् शूलमारोपयामासुः । ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास । ततो मुनिर्यमं गत्वा
कुपित उवाच कस्मादहं शूलमारोपित इति । तेनोक्तं त्वं बाल्ये शलभं कुशाग्रेणाविद्ध्य क्रीडितवानिति । तच्छ्रुत्वा मांडव्यस्तं शशाप बाल्येऽजानतो मे महांतं दंडं यत
स्त्वं कारितवानतः शूद्रो भवेति ॥ १५ ॥ इदानीं राज्यस्यापकर्षं निरूपयितुमुत्कर्षं निगमयति । युधिष्ठिर इति । कुलंधरं वंशधरम् ॥ १६ ॥ तदीहया गृहव्यापारेण

रिति भावः । क्वचिद्विभो इत्यपि पाठः । सोप्येतदभिप्रायक एव । भगवतोखिलमानसस्थत्वात्सर्वे एव तादृशा भवेयुरिति चेदाह–स्वस्यांतस्थेनेति ॥ १० ॥ तांतेति । पांडौ मृतेऽस्माकं तातवद्रक्षकत्वात्त्वमेव तातोऽ
सीति भावः ॥ ११ ॥ तीर्थयात्रायां यमुनायां भगवदाज्ञया बदरीं गच्छंतमुद्धवं दृष्ट्वा तस्माद्विप्रशापाद्धेतोः षड्विंशाद्वर्षादुपरिनाशमेष्यद्यदुकुलं श्रुत्वा तन्नावर्णयदिति भावः ॥ १२ ॥ ननु निश्चये ॥ १३ ॥ १४ ॥
अत्राक्षिपति-नन्विति । इत्यर्थ इति । आर्षोऽयं प्रयोग इति भावः । उपदेशश्चायं वैराग्योत्पादनार्थमनौपनिषद एवेति ज्ञेयमन्यथा धृतराष्ट्रस्य तत्त्वज्ञानार्थं तदानीन्तनसनत्सुजातकृतौपनिषदतत्त्वोपदेशो न संगंस्यते । तच्च
महाभारतोद्योगपर्वत एवावसेयम् । तथाहि । "धृतराष्ट्र उवाच । त्वं किं न वेद तद्भूयो यन्मे ब्रूयात्सनातनः । त्वमेव विदुर ब्रूहि प्रज्ञाशेषोस्ति चेत्तव । विदुर उवाच । शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे । कुमा
रस्य तु या बुद्धिर्वेद तां शाश्वतीमहम् ॥ ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत् ॥ न तेन गर्ह्यो देवानां तस्मादेतद्ब्रवीमि ते ।" इति । ब्रह्मणो ब्राह्मणस्येयं ब्राह्मी तां ब्राह्मणजातिं देवानां गर्ह्यो न । किंतु तन्मध्ये
स्वर्ग गतः स्तुत्यो भवति । अन्यथा नरकं गच्छतीति भावः । एतत्सनातनमुन्यानयनम् । वर्षशतं वर्षाणां शते शतानि वा यस्मिन्काले तं नैरंतर्ये द्वितीया । यथाश्रुते तु पञ्चवर्षाधिकशतवर्षमवनिस्थितश्रीकृष्णज्येष्ठ
युधिष्ठिरपितृव्यस्य तस्य श्रीकृष्णांतर्द्धानानंतरदेहत्यागोक्तिर्वक्ष्यमाणा न संगंस्यते । यद्वा शतपदमत्रानियतार्थकं "शताद्या नियतानंतवाचका अर्थसंगतेः" इत्यभिधानात् । किंचिदधिकानि वर्षाणि शतं चेति संदर्भः । किं च
"शतं शतसहस्रं च सर्वमक्षय्यवाचकम् । परिमाणं शतं त्वेतन्नैतदक्षय्यवाचकम्" इति पञ्चाप्सरउपाख्याने श्रीमहाभारतादिपर्वणि । शलभस्तत्कालपूर्वकगतिमान् जीवविशेषः । यतो विना विचारं शूद्रवन्मां दंडदातस्त्वं
शूद्रो भवेति । "अर्यमा तु पुमान्सूर्ये पितृदेवांतरेपि च" इति मेदिनी । अघकारिणः पापिनस्तेषु ॥ १५ ॥ लोकपालाभैरिंद्रादिलोकपालसमानैः । श्रिया राज्यसंपत्त्या ॥ १६ ॥ एवं युधिष्ठिरपालनलब्धसुखप्रकारेण गृहेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत ॥ राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतम् ॥ १८ ॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो ॥ स एव भगवान्कालः सर्वेषां नः समागतः ॥ १९ ॥ येन चैवाऽभिपन्नोऽयं प्राणैः प्रियतमैरपि ॥ जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥ २० ॥ पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ॥ आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥ २१ ॥ अहो महीयसी जंतोर्जीविताशा यथा भवान् ॥ भीमेनावर्जितं पिंडमादत्ते गृहपालवत् ॥ २२ ॥ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥ २३ ॥ तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥ २४ ॥

प्रमत्तानाम् । अत्यक्रामदायुष्कालोऽतिक्रांतः । यद्वा तानभ्यभवदित्यर्थः ॥ १७ ॥ अभिप्रेत्य ज्ञात्वा ॥ १८ ॥ ननु तत्प्रतीकारः क्रियतां किं निर्गमनेन तत्राह । प्रतिक्रियेति । सर्वेषामिति । यैः प्रतिकर्तव्यं तेषामपीत्यर्थः ॥ १९ ॥ कथं धनादिवियोगः सोढुं शक्योऽत आह । येन चेति । अभिपन्नोऽभिग्रस्तः ॥ २० ॥ अत्रावस्थानमतिदैन्यमिति दर्शयन् वैराग्यमुत्पादयति । पितृभ्रात्रिति सप्तभिः । आत्मा च देहः ॥ २१ ॥ येन पुत्रा हतास्तेन भीमेन दत्तं पिंडं गृहपाल इव । गृहपालः श्वा ॥ २२ ॥ निसृष्टः प्रक्षिप्तः । गरो विषम् । दूषिताः अवमताः। तद्दत्तैरन्नादिभिर्लब्धैरसुभिः कियत्प्रयोजनम् । न किंचिदित्यर्थः ॥ २३ ॥ तस्यापि तवैवं दैन्यमनुभवतोऽपि परैति क्षीयतेऽत

सक्तानां जनानां न तु पांडवानाम् । "किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः । अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे" इत्युक्तेः । "येध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः" इति वक्ष्यमाणत्वाच्च। अतो विदुरोऽपि धृतराष्ट्रं प्रत्येव तथोपदिदेश न तान्प्रतीति परमदुस्तरः यौवनादिरूपस्तत्र कामाद्यैराकुली क्रियत इति भावः। "कालो न यातो वयमेव याताः" इति भर्तृहर्युक्तेः कालस्यातिक्रमणं न संगच्छते इति चेदाह—यद्वेति । इत्यर्थ इति । उपसर्गवशादत्र क्रम्यतेरभिभवोर्थ इति भावः ॥ १७॥ राजन्निति । त्वत्तः पूर्वतनराज्ञामयमेवांते धर्मोऽतस्त्वमपि तं गृहाणेति भावः । तत्कालातिक्रमणम् ॥ १८ ॥ प्रतीकारो निवृत्त्युपायः । इत्यर्थ इति । यदि कश्चिदवशिष्येत्तदा तु सोऽपि भवेदेवेति भावः । कालस्याप्रतिक्रियत्वं तु "बलेन सचिवैर्बुद्ध्या मंत्रैरोषधिभिस्तथा । सामादिभिरुपायैश्च कालं नात्येति वै जनः" इत्यष्टमस्कंधोक्तेः । "नांतकस्य क्रिया कापि" इति गारुडोक्तेश्च । हे प्रभो इति । प्रगता भा प्रतिभा यस्येति प्रभुः । पृषोदरादित्वमाश्रित्य भाशब्दस्य भुरादेशः । तव तु बुद्धिर्न स्थिरा यतोऽप्रतिक्रियस्यापि प्रतिक्रियामीहस इति भावः ॥ १९ ॥ येन कालेन प्रिया धनादयः प्रियतराः स्त्र्यादयः प्रियतमाः प्राणाः। यतोऽग्निप्रदीप्तगृहांतगर्तधनस्त्र्याद्यादानाय तत्र प्रवेशं न कश्चित्करोतीत्यतः प्राणानां प्रियतमत्वमिति ॥ २० ॥ उपाससे । शबत्रार्षः । न श्रेयस्साधनायेहसे मृतस्यापि तव परलोकसुखाप्तिर्न भविष्यतीति भावः ॥ २१ ॥ परलोके सुखं नेति चेत्तर्हीहैव दीर्घजीवनमस्त्वित्यभिप्रायश्चेत्तर्हि त्वं निरपत्रप इत्याह—अहो इति । जीविताशा बहुकालं जीवामीतीच्छा महीयसी बृहत्तमाऽहो अज्ञातिरेकः । यया जीविताशया भीमेनावर्जितं तिरश्चीनहस्तेन दत्तं पिंडमन्नमादत्ते ॥ २२ ॥ ननु भीमस्य कनिष्ठपुत्रत्वेन मत्पुत्रत्वात्तद्दत्तान्नेन शरीरपोषणं नानुचितमिति चेत् । सत्यम् । विषदानादिना त्वयापराद्धत्वात्तद्दत्तमन्नं विषोपममित्यभिप्रेत्याह—अग्निरिति । इत्यर्थ इति । तद्दत्तान्नपुष्टेर्लज्जाकरत्वान्मृतिरेव गरीयस्यतो निर्गम्यतामिति संबन्धः ॥ २३ ॥ ननु युधिष्ठिरादीनां मयि तात्पर्यत्वान्न निर्जिगमिष्यामीति चेत्तत्राह—तस्येति । कृपणस्य परान्नादननिरतस्य वाससी इव "ईदूदेद्द्विवचनं प्रगृह्यम्" । इति प्रगृह्यत्वादसंधिः । वाससी अंतरीयोत्तरीये इति दृष्टान्तस्य द्विवचनदृष्ट्या दार्ष्टान्तिकस्य देहस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः ॥ अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः ॥ २५ ॥ यः स्वकात्परतो वेह जातनिर्वेद आत्मवान् ॥ हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः ॥ २६ ॥ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् ॥ इतोऽर्वाक्प्रायशः कालः पुंसां गुणविकर्षणः ॥ २७ ॥ एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः॥ छित्त्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥२८॥ पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी ॥ हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारः ॥ २९ ॥

एव धीरो भवेति ॥२४॥ किंलक्षणो धीर इत्यपेक्षायामाह । गतस्वार्थं यशोधर्मादिशून्यं मुक्तबंधनस्त्यक्ताभिमानः क्व गत इत्यविज्ञाता गतिर्यस्य स धीरः प्राप्तदुःखस्य स्वयं सहनेन मुक्तिप्राप्तेः ॥ २५ ॥ नरोत्तमस्तु ततः प्रागेव कृतप्रतीकारः स्वकात्स्वत एव परतः परोपदेशतो वा ॥ २६ ॥ त्वं तु नरोत्तमो नाभूरत इदानीं धीरो भवेत्याह । अथेति । अर्वागर्वाचीन एष्यन्नित्यर्थः । गुणान् धैर्यदयादीन् विकर्षत्याच्छिनत्तीति तथा ॥ २७ ॥ आजमीढः अजमीढवंशजः । प्रज्ञाचक्षुरंधः । एवं बोधितः सन् । द्रढिम्नश्चित्तदार्ढ्यात् । भ्रात्रा संदर्शितोऽध्वा बंधमोक्षयोर्मार्गो यस्य सः ॥ २८ ॥ सुबलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतं पतिमनुजगाम।ननु कथं सा सुकुमारी हिमादिदुःखबहुलं हिमवंतं गता अत आह । न्यस्तदंडानां प्रहर्षो यस्मिंस्तम् । दुःखदमपि केषांचित्प्रहर्षहेतुर्भवतीत्यत्र दृष्टांतः । मनःस्विनां शूराणां युद्धे संस्तीव्रः संप्रहारो

स्थूलसूक्ष्मभेदेन द्वितयात्मकस्य जीर्णत्वं वलिपलितत्वादिकं स्थूलदेहस्यान्ध्यबाधिर्यादिकं च सूक्ष्मदेहस्य जीर्णत्वमिति ज्ञेयम् ॥ २४ ॥ ननु प्रथममेव पतिष्यतीति देहमुपेक्ष्यमाणस्यात्महननाख्यदोषानुषंग इति तत्राह--गतस्वार्थमकृतकृष्णभजनत्वेन शोकमोहजरादिव्याकुलं मुक्तबंधनस्त्यक्तधनपुत्रादिः । अविज्ञाताऽन्यजनैरनवबुद्धारण्यगतिर्यस्य स तथा सन् जह्यात् । क्वापि तीर्थे देहं त्यक्त्वैव यः तिष्ठेत्स धीर इति । तस्मात्पुरुषार्थसाधनायोग्यदेहहानौ न दोषः । निर्जनवनं गत्वा तपश्चर्यया शरीरमिदं साधितस्वार्थं कुर्वीति भावः ॥ २५ ॥ धनं हृदि कृत्वा वणिग्यातीतिवत् । हरिं हृदि कृत्वा हरिं प्राप्तुमिति भावः । जातनिर्वेद उत्पन्नवैराग्यः । आत्मवान्वशीकृतमनाः । पूर्वश्लोकेन त्वातुरसंन्यासो द्वितीये सदसद्विवेकवत्त्वेन हरिशरणतया सन्यासोऽसूचीति ॥ २६ ॥ अथ तस्माद्भवानुदीचीमुत्तराम् । स्वैरज्ञातगतिर्विविक्तगतिर्न तु स्वैः पांडवैरविज्ञातगतिः । पांडवानुज्ञयैव तस्य महाभारते वनवासाय गत्युक्तेः । स्वैरेणेच्छानुसारेण ज्ञाता गतिर्यस्य न परेच्छातः स तथोक्त इति विवरणोपपत्तेः । अन्यथाऽविज्ञातगतिरित्यपहस्तितं स्यात् । इतोऽर्वाक् प्राक्तनः कालः पुंसामधिकारिणां ज्ञानभक्त्यादिगुणसामग्र्यापादकः । अर्वागित्यस्यार्थांतरमादायाह--इत उपरितनः काल एष्यन्निति स्वामिचरणैरुक्तत्वादिति । यद्वाऽर्वागित्यव्ययं तस्यानेकार्थत्वोपपत्तेः ॥ २७ ॥ आजेन ज्ञानेन मीढः सिक्तः । मिह सेचनेऽतः क्तप्रत्यये रूपम् । प्रज्ञयाचष्टे पश्यति न तु मांसदृष्ट्येति वा अध्वा लौकिको वैदिको वा । द्राढिम्नो दृढतरान् । निर्जगाम गृहादिति शेषः ॥ २८ ॥ पत्युः शुश्रूषैव व्रतं यस्याःसा तथोक्ता । वैय्यधिकरणबहुव्रीहित्वान्मध्यमपदलोपः । चकारात्कुंती चानुजगामेत्यवधेयम् । महाभारते तथैवोक्तत्वात् । ननु सा. सुकुमारी दुःखबहुलं हिमाद्रिं कथं गते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः ॥ गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं च ॥ ३० ॥ तत्र संजयमासी
नं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः॥३१॥अम्बा च हतपुत्राऽऽर्ता पितृव्यः क्व गतः सुहृत् ॥ अपि मय्यकृतप्रज्ञे
हतबंधुः सभार्यया ॥ आशंसमानः शमलं गंगायां दुःखितोऽपतत् ॥ ३२ ॥ पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृ
व्यौ क्व गतावितः ॥ ३३ ॥ सूत उवाच ॥ कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः ॥ आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥ ३४ ॥
विमृज्याऽश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन् ॥ ३५ ॥

यथा । पाठांतरे सत्संप्रहारं युद्धं यथेति ॥ २९ ॥ कृतं मैत्रं मित्रदैवत्यं संध्यावंदनं येन । नत्वा संपूज्य । पितरौ विदुरधृतराष्ट्रौ ॥ ३० ॥ हे गावल्गणे गवल्गणस्य पुत्र
संजय ॥ ३१ ॥ अकृतप्रज्ञे मंदमतौ शमलमपराधमाशंसमान आशंकमानः । भर्यया सह ॥ ३२ ॥ यावरक्षतां तौ । इतः स्थानात् ॥ ३३ ॥ कृपया स्नेहवैक्लव्याचाति
पीडित आत्मेश्वरं धृतराष्ट्रमपश्यन् विरहकर्शितश्च सूतः संजयो न प्रत्युत्तरमाह ॥ ३४ ॥ आत्मना बुद्धयात्मानं मनो विष्टभ्य धैर्ययुक्तं कृत्वा प्रभोर्धृतराष्ट्रस्य ॥ ३५ ॥

ति चेदाह–न्यस्तदंडानां कायवाङ्मनोभिस्त्यक्तभूतद्रोहाणां प्रहर्षो यत्र तं "संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः" इत्यमरः । सत्संप्रहारमिति पाठे क्लीबत्वमार्षम् ॥ २९ ॥ तिलगोभूमिरुक्मैः संपूज्येति प्रविश
पिंडीमितिवदाक्षेपलब्धम् । गुरुवंदनाय गुरूणां धृतराष्ट्रादीनां नमस्काराय चात्कुन्तीञ्च ॥ ३० ॥ तत्र गृहे नेत्रयोरिति षष्ठी तृतीयार्थे । नेत्राभ्यामित्यर्थः । इह महाभारतविरोधस्तु कल्पांतरव्यवस्थयैव वार्य्यः ।
यद्वा राजा हि धृतराष्ट्रादीनां गमनानंतरमपि प्रतिदिनं तदुपवेशस्थानवंदनाय पितृगृहं यात्येव । "गुरौ भक्तेन कर्त्तव्यमन्वहं गुरुवन्दनम् । गुरौ मृते प्रवसिते गत्वा च गुरुमंदिरम् ॥ उपवेशभुवं तस्य पूजयित्वा नमेत्सदा ।
य एवं कुरुते विप्राः स लोकसुखमश्नुते॥" इति वारतंतवोक्तेः । एकस्मिन्दिवसे मृतधृतराष्ट्रादिगतिं निवेदितुं धृतराष्ट्रगृहागतं संजयं तत्र दृष्ट्वा पितरौ कुंतीधृतराष्ट्रौ सौबलीं गांधारीञ्च अहो अयं तैस्साकं गतोऽधुनाऽ
त्रागतोऽतस्ते मृता इति मनसा न चापश्यत् । काक्वापश्यदेवेत्यर्थः ।अत्र पितृशब्देन विदुरो न ग्राह्यः तस्य धृतराष्ट्रादिमृतेः पूर्वं तद्दर्शनार्थं वनं गतेन युधिष्ठिरेणैकीभूतत्वात् । अथ प्रकृतसंबुद्ध्यर्थमाह–हे गावल्गणेति ।
परंपरागतभृत्यानामयमेव धर्मो यदापदि प्रभुर्यावदायुर्न त्याज्यो मृते तस्मिंस्तत्पुत्रादिरपि न त्याज्य इति भावः । ततो धृतराष्ट्रः क्व कं लोकं गतः । अंबा कुंती वा हतपुत्रार्त्ता गांधारी च परत्र कं प्रति गतेति ।
पितृव्यो धृतराष्ट्रः क्व गत इति पुनः प्रश्नस्तात्पर्यातिशयात् ॥ ३१ ॥ धृतराष्ट्रस्य मरणकाले स्वस्मिन्प्रियाप्रियविवेकमस्य मरणप्रकारञ्च पृच्छति । अपीति । अकृतप्रज्ञेऽशिक्षितबुद्धौ मयि स्वभार्यया सह शमलं पापमपरा
धमाशंसमानः दुःखितः सन् गंगायामपतदपि बंधून्सर्वान्मारयित्वा स्वंय राज्यमादाय मां निष्कासितवानिति शमलबुद्धिर्नाभवत्किं तद्दुःखातिशयादेव गंगायां पतित्वा मृतो नन्विति भावः । चक्रवर्ती तु अहो युधिष्ठि
रेण ममैकोऽपि पुत्रो न रक्षितस्तत्किं मे जीवितेनेति मनसानुलपन्निर्विद्यमान इत्यर्थः । यद्वा मद्वधात्मकमपि पापं भवत्विति व्यंजयन्नित्यर्थः ॥ ३२ ॥ स्वस्याकृतप्रज्ञत्वमुपपादयति–पितरीति । नोस्माकं पितरि पाण्डौ
उपरते स्वर्गं गते सति यौ गांधारीधृतराष्ट्रौ शिशून्सर्वान् व्यसनतोऽरक्षताम् । सुहृत्त्वं शिशुत्वं च रक्षणीयत्वे हेतुः । तौ पितृव्यौ मृत्वेतोऽस्माल्लोकात्परत्र कं लोकं गतावित्यन्वयः । तयोरनवरतशुश्रूषणाभावादेवमप्य
कृतप्रज्ञत्वमिति भावः ॥ ३३ ॥ ननु आत्मनः स्वस्येश्वरं स्वामिनं धृतराष्ट्रमचक्षाणो मृतत्वादेवापश्यन् अत एव विरहेण वियोगेन कर्शितः कृशतरः कुतः स्नेहपारवश्याद्दाक्षिण्याच्च संजयो युधिष्ठिरवाक्योत्तरं वक्तुं नाशक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संजय उवाच ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलनंदन ॥ गांधार्या वा महाबाहो मुषितोऽस्मि महात्मभिः ॥३६॥ अथाजगाम भगवान्नारदः सहतुं
बुरुः ॥ प्रत्युत्थायाभिवाद्याऽऽह सानुजोऽभ्यर्चयन्निव ॥३७॥ युधिष्ठिर उवाच ॥ नाहं वेद गतिं पित्रोर्भगवन्क्क गतावितः ॥ अंबा वा हतपुत्राऽऽर्ता
क्क गता च तपस्विनी ॥ कर्णधार इवापारे भगवान्पारदर्शकः ॥ ३८ ॥ अथाबभाषे भगवान्नारदो मुनिसत्तमः ॥ मा कंचन शुचो राजन्यदी
श्वरवशं जगत् ॥३९॥ लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ स संयुनक्ति भूतानि स एव वियुनक्ति च॥४०॥ यथा गावो नसि प्रोतास्तं
त्यां बद्धाः स्वदामभिः ॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ॥ ४१ ॥ यथा क्रीडोपस्कराणां संयोगविगमाविह ॥ इच्छया क्रीडितुः
स्यातां तथैवेशेच्छया नृणाम् ॥ ४२ ॥ यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चोभयम् ॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥ ४३ ॥

गांधार्याश्च व्यवसितं निश्चितम् । यतो मुषितो वञ्चितोऽस्मीति॥ ३६ ॥एवं कंचित्कालं शोचति तस्मिन्नथ नारद आजगाम । अत्रास्ति क्वचित्पुस्तके पाठांतरं तदुल्लंघ्य यथासं प्रदायं व्याख्यायते । शोकवेगादभ्यर्चयन्निवाह राजा न त्वभ्यर्चयत् ॥ ३७ ॥ नाहं वेद वेद्मि । तपस्विनी दुःखयुक्ता । अपारे शोकार्णवे भगवांस्त्वमेव पारदर्शकः । अतो ब्रूहीति शेषः ॥ ३८ ॥ आदावेव यथावृत्तकथने शोकेन मूर्छितः पतेदिति प्रथमं तावच्छोकमुपशमयति । कंचन मा शुचो मा शोचः । न केवलं तानेव । यद्यस्मादीश्वराधीनं जगत् ॥ ३९ ॥ तदेवाह । लोका इति । संयुनक्ति संयोजयति वियुनक्ति वियोजयति च ॥ ४० ॥ गावो बलीवर्दा नसि नासिकायां प्रोतास्तंत्यां दीर्घतंत्यां दामभिर्बद्धाः स्वामिनो बलिं वहंति यथा एवं वाक्तंत्यां कर्तव्याकर्तव्यविधायकवेदलक्षणायां नामभिर्ब्राह्मणो ब्रह्मचारीत्यादिवर्णाश्रमलक्षणैर्बद्धाः परमेश्वरस्य बलिं तेन प्रेरिताः सर्वे वहंतीत्यर्थः ॥ ४१ ॥ प्रवृत्तौ पारतंत्र्यमुक्त्वा संयोगवियोगयोरप्याह । यथेति । क्रीडोपस्कराणां क्रीडासाधनानाम् ॥४२॥ ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तम् । लोकतत्त्वे च विचार्यमाणे निर्विषयोऽयं शोक इत्याह । यद्यदि लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण । न चेति । न ध्रुवं नाप्यध्रुवम् । शुद्धब्रह्मरूपेणानिर्वचनीयत्वेन वा

दित्यन्वयः । यद्वा कृपया हा वृद्धानामनाथानां का दशा भविष्यतीति चेतोद्रवेण । स्नेहस्त्वत्र संबंधहेतुक एव ॥ ३४ ॥ ३५ ॥ प्रजा रंजयित्वा कुलं नंदयतीति निरुक्त्या कुलनन्दनता त्वय्यस्तीति साक्षेपा संबुद्धिः । हे महाबाहो इति संबुद्धिरपि धन्यौ ते भुजौ यत्प्रभावेण धृतराष्ट्रादेरियं व्यवस्था जातेति भावः । मुषितोस्मि मामपीह त्यक्त्वा गतास्ते इत्यर्थः । बहुत्वं गांधार्यपेक्षया ॥ ३६ ॥ अथ युधिष्ठिरसंवादे प्रवृत्ते पाठांतरम् अभ्यर्चयन्मुनिमित्येवंरूपम् । तुंबुरुर्गंधर्वविशेषः ॥ ३७ ॥ हे भगवन्निति । श्रीनारदस्य सर्वज्ञतां द्योतयन्नाह—मृतयोः पित्रोः परलोकगतिं न वेद तां भवंतं पृच्छामि तौ मृत्वेतः कं लोकं प्रति गताविति ॥ ३८ ॥ धृतराष्ट्रादिषु कञ्चन मा शुचः । यद्यतः कर्मानुसारेण भूतानि संयोजयतीश्वरो वियोजयति च तस्मादस्ववशत्वाच्छोको वृथैवेति भावः ॥ ३९ ॥ ईश्वरजीवस्वातंत्र्यपारतंत्र्यं सोदाहरणमाह—यथेति । इत्यर्थ इति । बलिं यज्ञादिलक्षणां पूजां वहंति कुर्वन्ति । तस्मात्स एव स्वतंत्रो जीवास्तदधीना इति शोकपरिहाराय स ईशः स्वविहितकर्मणा पूज्य इति भावः ॥ ४० ॥ ननु वेदस्यानेकार्थत्वेन तात्पर्यस्य दुर्ज्ञेयत्वाद्धौरेयाणां च गोण्यादिपातनेन स्वामिकार्यविज्ञानदर्शनाद्विषमोऽयं दृष्टान्तोतो निदर्शनान्तरमाह—यथेति । तथैवेशेच्छया नृणां संयोगवियोगौ स्यातामिति । अनेन वेदस्य मुख्योऽर्थः श्रीनारायण एवेत्यसूचि । तस्मात्पराधीनत्वत्तत्व शोकोऽयुक्त इति भावः ॥ ४१ ॥ ४२ ॥ इत्यर्थ इति । अहं ममेति मोहो बुद्धिभ्रमस्तस्माज्जातात्स्नेहादन्यत्र शोककारणं नास्ति । तस्माद्भ्रमजन्यस्नेह एव हेतुरिति । तथा च भक्तिसंबंधिस्नेहोत्थशोको हि करुणारसस्थायी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः ॥ कथं त्वऽनाथाः कृपणा वर्तेरंस्ते न मां विना ॥ ४४ ॥ कालकर्मगुणाधीनो देहोऽयं पांचभौतिकः ॥
कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथा परम् ॥४५ ॥ अहस्तानि सहस्तानामपदानि चतुष्पदाम् ॥ फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥
॥४६॥तदिदं भगवात्राजन्नेक आत्माऽऽत्मनां स्वदृक् ॥ अंतरोऽनंतरो भाति पश्य तं माययोरुधा॥४७॥सोयमद्य महाराज भगवान्भूतभावनः ॥
कालरूपोऽवतीर्णोऽस्यामभवाय सुरद्विषाम् ॥ ४८ ॥ निष्पादितं देवकृत्यमवशेषं प्रतीक्षते ॥ तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः ॥ ४९ ॥

उभयं वा चिज्जडांशतः । सर्वथा चतुर्ष्वपि पक्षेषु ते पित्रादयो न शोच्याः । स्नेहादन्यत्र । स्नेह एव केवलं शोकहेतुः स चाज्ञानमूल इत्यर्थः ॥ ४३ ॥ तस्मान्मां विना कथं ते वर्तेरन्नित्यात्मनो मनसो वैक्लव्यं व्याकुलतां त्यज ॥ ४४ ॥ तत्र त्वद्देहतस्तेषां वृत्तिरेतत्तावन्नास्तीत्याह । कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणा उपादानं तदधीनः पांचभौतिको जडस्तद्विभागे नाशवांश्च सर्पग्रस्तोऽजगरगिलितो यथाऽन्यं न रक्षति तद्वत् ॥ ४५ ॥ ईश्वरेण विहिता वृत्तिश्च सर्वतः सुलभैवेत्याह । अहस्तानि पश्वादीनि । अपदानि तृणादीनि । तत्र तेष्वहस्तादिष्वपि फल्गून्यल्पानि । एवं जीवः सर्वोऽपि जीवस्य सर्वस्य जीवनं जीविका । एतेनैव सर्वतो मृत्युग्रासत्वं चोक्तम्॥ ॥ ४६ ॥ मोहनिवृत्त्यर्थं द्वैतस्यावस्तुत्वमाह । तदिदमहस्तसहस्तादिरूपं जगत् स्वदृग्भगवानेव न ततः पृथक् । स चैक एव न तु नाना ।ननु सजातीयविजातीयभेदे प्रत्यक्षे कुत एतत्तत्राह आत्मनां भोक्तृणामात्मा स्वरूपम् । अतो न सजातीयभेदः । अंतरोऽनंतरश्चान्तर्बहिश्च भोक्तृभोग्यरूपश्च भाति । अतो न विजातीयभेदोऽपि । नन्वेकः कथं तथा प्रतीयतेऽत आह । मायया बहुधा भाति तं पश्येति ॥ ४७ ॥ क्वासावस्तीदृशो महामायावी द्वारकायामित्याह । सोऽयमिति । अस्यां भूम्याम् । अभवाय नाशाय ॥ ४८॥ तर्हि श्रीकृष्णोऽत्रास्तीत्यत्रैवास्थां मा कृथा इत्याह । तच्च देवानां कार्यं तेन निष्पादितम् । केवलमवशेषं प्रतीक्षते । यदुकुलक्षयमिति हृदिस्थम् । ततो निजं धाम

भावः परमोपादेय इति भावः ॥ ४३ ॥ यतः शोकोऽज्ञानमूलकस्तस्माद्धेतो । अंगेत्यव्ययमामंत्रणे ॥ ४४ ॥ किञ्च तवायं देहः स्वाधीनः पराधीनो वा स्वाधीनत्वे भोगयोग्यदुःखनिवारणाक्षमता कथम् । न हि कश्चिद्दुःखं मे स्यादित्याकांक्षते विचक्षणस्तस्मात्पराधीन इति वक्तव्यम् । तथा च पररक्षणसामर्थ्यं न घटते इत्याह—कालेति । अतो न कोपि कंचिद्वृत्तिदानादिना विनेश्वरं रक्षितुं प्रभुरस्तीति भावः । अतः स्वामिचरणै रस्य वृत्तस्यावतरणिकायामुक्तं तत्र त्वद्देहत इत्यादि।तत्रेति वाक्यलंकारे।अतो ममायं पित्रादिर्मां विनैतान्को रक्षितेत्यभिमतिर्न कार्या "स रक्षिता रक्षति यो हि गर्भे" इत्याद्युक्तेरीशप्रेरितकालाद्यधीन एव जीवनादिरितिध्येयं सुधियेति ॥४५॥ननु भगवन्सत्यमेतत्तथापि वृद्धानामंधानाञ्चान्नादिदौस्थ्यात्तज्जीवने मम संदेह इति चेत्तत्राह—ईश्वरविहिता वृत्तिरिति। अहस्तानि शशपारावतपक्षिप्रभृतीनि सहस्तानां मनुष्यादीनां जीवनं देहधारणसाधनं तत्रापि अहस्तसहस्तेष्वपि राक्षसाद्यपेक्षया मनुष्या अप्यणव एवेति जीवस्य जीव एव साहजिकी जीविका ।अन्नादीनामजीवत्वे तद्रूपेण पुनरुत्पत्तिस्तेषां न भवेद्भर्जितक्वथितादेरप्युत्पत्तिर्भवेच्च । अतः सर्वं सजीवमेव । एवं तपस्विनामपि पत्रपुष्पादिरीश्वरकल्पितैवानिषिद्धा जीविकास्तीति किमर्थं वृथा विषीदसीतिः भावः।एतेन जीवस्य जीव एव जीविकेति कथनेन ॥४६ ॥ननु यदीश्वरवशं जगदित्यादिना यत्त्वयोक्तं:भगवदधीनं सर्वं चेत्तर्हि कथं कालकर्मगुणाधीनो देह इत्युच्यते । सत्यम् । कालकर्मादिकस्य सर्वस्य जगतो भगवच्छक्तिकार्यत्वात्सर्वं भगवानेवेत्याह—तदिदमिति। स्वरूपशक्त्यात्मनां जीवानामात्मांतर्यामिरूपेण स्वदृक् स्वयं प्रकाशः ।:अत्र स्वामिचरणैराक्षिप्तं नन्विति । सजातीयोऽश्वत्थस्याम्रः उभयत्र वृक्षत्वसत्त्वात् । विजातीयोऽश्वत्थस्य पाषाणादिरितिरीतिसजातीयादिज्ञाने । पुनराक्षिमति नन्विति । उरुधा देवतिर्यगादि रूपेण वा ॥ ४७ ॥ हे महाराजेति । यत्कृपया त्वं महाराजो जातस्सोयमिति भावः । स्वयं तु परमानंदरूपत्वेन भूतभावनोपि सुरद्विषामभावाय सोयं कालरूप इति संबंधः ॥ ४८ ॥ अवेक्षध्वमिति । कर्माश्रवणादहंतास्पदं ममतास्पदं च सर्वं लभ्यते :। तदंतर्द्धाने श्रुते सति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धृतराष्ट्रः सह भ्रात्रा गांधार्या च स्वभार्यया ॥ दक्षिणेन हिमवत ऋषीणामाश्रमं गतः ॥ ५० ॥ स्रोतोभिः सप्तभिर्या वै स्वर्धुनी सप्तधा व्यधात् ॥
सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते॥५१॥स्नात्वाऽनुसवनं तस्मिन्हुत्वा चाग्नीन्यथाविधि॥अब्भक्ष उपशांतात्मा स आस्ते विगतैषणः॥५२॥
जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः ॥ हरिभावनया ध्वस्तरजःसत्त्वतमोमलः ॥ ५३ ॥ विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम् ॥
ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ॥५४॥ ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः ॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाचलः ॥ ५५ ॥

यास्यति ततो यूयमपि गच्छतेत्यर्थः । तच्च भूतमपि विदुरवदेव नावर्णयत् ॥ ४९ ॥ तदेवं शोकमास्थां च निवार्य जिज्ञासवे तस्मै यथावृत्तं कथयति धृतराष्ट्र इति षड्भिः । हिमवतो दक्षिणे भागे ॥ ५० ॥ तदपि कुत्रेत्याह । स्रोतोभिरिति । या वै प्रसिद्धा स्वर्धुनी सा आत्मानं यत्र सप्तधा व्यधात् । किमर्थम् । नाना पृथक्सप्तभिः स्रोतोभिः प्रवाहैः सप्तानामृषीणां प्रीतये । अत एव तत्तीर्थं सप्तस्रोतो वदंति ॥ ५१ ॥ तत्र तेन कृतमष्टांगयोगमाह । स्नात्वेति चतुर्भिः । तत्र स्नानं होमोऽब्भक्षणं चेति नियमा उक्ताः भक्षस्थानेऽपां स्वीकारादब्भक्षः उपशांत आत्मा यस्य सः । विगताः पुत्राद्येषणा यस्मादिति यमा उक्ताः ॥ ५२ ॥ जितासन इत्यादिना आसनप्राणायामप्रत्याहारा उक्ताः । हरिभावनयेति धारणोक्ता । ध्वस्ता रजःसत्त्वतमोरूपा मला यस्येति फलतो ध्यानमुक्तम् ॥ ५३ ॥ समाधिमाह । विज्ञानेति द्वाभ्याम् । आत्मानं मनोऽहंकारास्पदं स्थूलदेहाद्वियोज्य विज्ञानात्मनि बुद्धौ संयोज्यैकीकृत्य तं च विज्ञानात्मानं दृश्यांशाद्वियोज्य क्षेत्रज्ञे द्रष्टरि प्रविलाप्य तं च क्षेत्रज्ञं द्रष्टृंशाद्वियोज्याधार आश्रयसंज्ञे ब्रह्मणि प्रविलाप्य घटांबरं घटोपाधेर्वियोज्य यथा महाकाशे प्रविलाप्यते तद्वत् ॥५४॥ व्युत्थानाभावमाह । ध्वस्तेति । अंतर्गुणक्षोभाद्वा बहिरिंद्रियविक्षेपाद्वा व्युत्थानं भवेत्तदुभयं तस्य नास्ति यतो ध्वस्तो मायागुणानामुदर्क उत्तरफलं वासना यस्य सः । निरुद्धानि करणानि चक्षरादीन्याशयो मनश्च यस्य सः । अत एव निवर्तितोऽखिल आहारो भोज्यमिंद्रियै

सर्वमेवोपेक्ष्यध्वमिति भावः ॥ ४९ ॥ "नाहं वेद गतिं पित्रोः" इति प्रश्नं परिहरिष्यन्धृतराष्ट्रस्य तपश्चर्याश्रमतीर्थनामाद्याह–धृतराष्ट्र इति । दक्षिणेनेति । दक्षिणस्यामित्यर्थः । निर्गमनावसरे भ्रात्रा विदुरेण चात्कुंत्या सह हस्तिनापुरान्निर्गम्य हिमवतो गिरेर्दक्षिणदिग्गतमृषीणामाश्रमं सप्तस्रोतोनाम गतोभूदित्यन्वयः ॥ ५० ॥ कस्मात्सप्तस्रोतस्त्वं तस्येति तत्राह–यत्राश्रमे । स्वामिव्याख्याने तदपि कुत्रेत्यस्य दक्षिणस्यामपि कुत्र गत इत्यर्थः । अत एव सप्तप्रवाहवत्त्वादेव॥५१॥तेन धृतराष्ट्रेण । तत्राष्टांगेषु । आदिना लोकैषणावित्तैषणाग्रहः । आस्ते इति भूते लट् । अन्यथोक्तार्थविरोधः स्यात् । अनुसवनं त्रिकालम्॥५२॥अपि मयीति मृत्युकालीननिष्ठाविषयप्रश्नं परिहरन्नाह–धृतराष्ट्र उक्तविधिना तपः कुर्वन्नभ्यासपाटवेन जितासनः स्वस्तिकाद्यासनजयवान् जितश्वासः प्राणजयवान्।विषयेभ्यः प्रत्याहृतानि निवर्त्तितानि षडिन्द्रियाणि येन स इति।प्रत्याहार उक्तः॥५३॥स्वदेहगतानि भूतानि क्रमेण कारणेषु प्रवेश्यात्मानमहंकारं विज्ञानात्मनि महत्तत्वे संयोज्य भावयित्वा । तच्च विज्ञानात्मानं क्षेत्रज्ञे जीवे प्रविलाप्य संयुक्तं विभाव्य तच्च क्षेत्रज्ञं ब्रह्मणि संयोज्यात्मानं स्वदेहस्थमन्तर्यामिणमाधार आश्रयतत्वेभगवत्यंशिनि संयुक्तं विभाव्य।नन्वन्तर्यामिभगवतोरैक्यमेव प्रसिद्धम् ।सत्यम्।ऐक्येप्यौपचारिको भेदो विवक्षित एवेति सदृष्टांतमाह–घटांबरमिवेति । उपाधिस्थमाकाशं निरुपाधावाकाश इव तयोश्च घटाकाशमहाकाशयोर्वस्तुतः सर्वव्यापकत्वादैक्यमेवेत्यर्थः ॥ ५४ ॥ अधुना स्थाणुरिवाचल आस्ते तदा मृतिकाले आसीदित्येकान्वयः । अतस्त्वयि शमलमाशंसमानो गंगायां नापतदिति भावः । ब्रह्मार्पणबुद्ध्यासंन्यस्तसमस्तकर्मणस्तस्य धृतराष्ट्रस्य त्वमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यांतरायो मैवाभूः संन्यस्ताखिलकर्मणः ॥ स वा अद्यतनाद्राजन्परतः पंचमेऽहनि ॥ कलेवरं हास्यति स्वं तच्च भस्मी भविष्यति ॥ ५६ ॥ दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे ॥ बहिःस्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति ॥ ५७ ॥ विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन ॥ हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः ॥ ५८ ॥ इत्युक्त्वाऽथारुहत्स्वर्गं नारदः सहतुंबुरुः ॥ युधिष्ठिरो वचस्तस्य हृदि कृत्वाऽजहाच्छुचः ॥ ५९ ॥ इति श्री० भा० प्र० विदुरोक्त्या धृतराष्ट्रमोक्षवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ सूत उवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥१॥ व्यतीताः कतिचिन्मासास्तदा नाऽयात्ततोऽर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥२॥

विषयाहरणं वा येन सः । स्थाणुरिव निश्चल आस्ते ॥ ५५ ॥ तथाभूतमप्यानेतुमुद्यतं प्रत्याह । तस्येति । अंतरायो विघ्नः । मैवाभूरित्यडागमश्छांदसः । दर्शनमपि तावत्कुर्यामित्युद्यतं प्रत्याह । स वा अद्यतनादह्नः परत उत्तरत्र । स्वं स्वाधीनम् । तर्हि तद्दाहार्थं गमिष्यामि नेत्याह । तच्चेति ॥ ५६ ॥ तर्हि गांधार्यानयनाय गमिष्यामि नेत्याह पत्युर्देहे सहोटजे पर्णशालासहिते योगाग्निना सह गार्हपत्यादिभिर्दह्यमाने तस्य पत्नी बहिः स्थिता सती तं पतिमन्वग्निं वेक्ष्यति प्रवेक्ष्यति ॥ ५७ ॥ तर्हि विदुरानयनार्थं गंतव्यमेव नेत्याह । विदुरस्तु तन्निशाम्य दृष्ट्वा भ्रातुः सुगत्या हर्षस्तन्मृत्युना शोकश्च ताभ्यां युक्तस्तस्मात्स्थानात्तीर्थानि सेवितुं गंता गमिष्यति ॥ ५८ ॥ शुचः शोकान् ॥ ५९ ॥ इति श्रीमद्भा० महा० प्र० टी० त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशे त्वरिष्टानि दृष्ट्वा राजा विशंकितः ॥ अश्रणोदर्जुनात्कृष्णतिरोधानमितीर्यते ॥ १ ॥ श्रीकृष्णस्य चेति चकारेणाभिप्रायं च ज्ञातुम् ॥ १ ॥ कतिचित्सप्त । तदा कालातिक्रमेऽपि ततो द्वारकातो नायान्नागतः । निमित्तान्युत्पातान् । कुरूद्वहो युधिष्ठिरः॥२॥

तपोविघ्नो माभूरिति तात्पर्यम् ॥ ५५ ॥ इदानीं तन्मृतिकालमाह–स वा इति । अद्यतनादह्नः परतः पूर्वस्मिन्पंचमेहनि कलेवरं हास्यति जहौ । भूते लृट् । तच्च भस्मी भविष्यति भस्मसादभूत् । लृट् पूर्ववत् । अत्र स्कांदीयवाक्यमपि प्रमाणम् "तांस्तदा नारदो विद्वाञ्छमयामास धर्मवित् । उक्त्वोत्तमां गतिं तेषां निष्ठां तात्कालिकीं तथा" इति । तथा च तत्कलेवरमेव भस्मी भविष्यति न तु स शून्यतामेष्यति चेतनस्य नित्यत्वात् । "परः स्यात्पूर्वपरयोरीशे शत्रौ च पालने" इति निरुक्तिः ॥ ५६ ॥ पत्युर्धृतराष्ट्रस्य पत्नी गान्धारी । साध्वीशब्देन कुंती ग्राह्या । तस्य गार्हपत्याद्यग्नयोपि वनं दग्धुं दावानले प्रवृत्ते तत्रैव मिलिता इति महाभारतीयाश्रमवासपर्वणीत्युक्तमतो न विरोधः । तस्मादुत्तमगतिं प्राप्तांस्तान्प्रति परलोकमुद्दिश्य न शोचितव्यमिति भावः ॥ ५७ ॥ ऐष्यज्ञस्य विदुरस्य धृतराष्ट्रवनप्रवेशात्पूर्वतनाचरणप्रकारमाह–विदुर इति । सर्वज्ञो विदुरो दिव्यज्ञानेन भविष्यदाश्चर्यं धृतराष्ट्रपांडवयादवानां निर्याणं निशाम्य दृष्ट्वा हरिसामर्थ्यस्मरणेन बन्धुमरणस्मरणेन च हर्ष शोकान्वितः सर्वमनित्यमीश एव नित्यस्ततस्तीर्थयात्रादितत्सेवैव पुरुषार्थप्रदेत्यतस्तीर्थनिषेवको गंता । गंगादितीर्थानां भागवतादिशास्त्राणां च सेवनाय ययौ । तुशब्दो गंतेति लुटो भूतार्थत्वभेदमाह । "तु स्याद्भेदेवधारणे" इत्यभिधानात् । स पुनर्धृतराष्ट्रपरिसरमागतोभूत् । धृतराष्ट्रादिदिदृक्षया वनं गतेषु भवत्सु भवंतं प्रविश्यैकत्वमागतो हि तस्मान्न तस्य गतिर्मया वर्णनीयेति भावः । यथाश्रुतार्थपरिग्रहे तु कल्पांतरीयव्यवस्थयैव व्यवस्था । सा चागतिकगतिरेव । ऋजुमार्गेण सिध्यतोर्थस्य वक्रेण दर्शनायोगादिदमेव व्याख्यानं कृतिजनानां दकरमिति ॥ ५८ ॥ इतीत्थम् । प्रायेण नारदतुंबुरुगंधर्वयोः सदैव संगतिरस्तीति द्योतनाय सतुंबरुरिति वक्तव्ये सहतुंबरुरित्युक्तम् ॥ ५९ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ अरिष्टानि दुर्निमित्तानि । तिरोधानमंतर्द्धानम् (१) संप्रस्थिते इति । अश्वमेधार्थे श्रीकृष्णस्य पुनरागमनं गमनानंतरं ज्ञेयम् ॥ १ ॥ अत्र तीर्थेन मासशब्देन दिनं गृहीतं तत्र च "अहस्तु मासशब्दोक्तं यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनाम् ॥ ३ ॥ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम् ॥ पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनम् ॥ ४ ॥ निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम् ॥ नृलोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥ ५ ॥ युधिष्ठिर उवाच ॥ संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितम् ॥ ६ ॥ गताः सप्ताऽधुना मासा भीमसेन तवानुजः ॥ नायाति कस्य वा हेतोर्नाहं वेदेदमंजसा ॥ ७ ॥ अपि देवर्षिणाऽऽदिष्टः स कालोऽयमुपस्थितः ॥ यदात्मनोंऽगमाक्रीडं भगवानुत्सिसृक्षति ॥ ८ ॥ यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः ॥ आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ॥ ९ ॥ पश्योत्पातान्नरव्याघ्र दिव्यान्भौमान्सदैहिकान् ॥ दारुणाञ्छंसतो दूराद्भयं नो बुद्धिमोहनम् ॥ १० ॥ ऊर्वक्षिबाहवो मह्यं स्फुरंत्यंग पुनःपुनः ॥ वेपथुश्चापि हृदये आराद्दास्यंति विप्रियम् ॥ ११ ॥ शिवैषोद्यंतमादित्यमभिरौत्यनलानना ॥ मामंग सारमेयोऽयमभिरौति ह्यभीरुवत् ॥ १२ ॥

रौद्रां घोराम् । तदेवाह । विपर्यस्ता ऋतुधर्मा यस्मिंस्तस्य वार्तां जीविकाम् । क्रोधलोभानृतैर्युक्त आत्मा येषाम् ॥ ३ ॥ जिह्मप्रायं कपटबहुलम् ॥ व्यवहृतं व्यवहारं शाठ्यं वंचनं तन्मिश्रं सौहृदं सख्यम् । पित्रादीनां स्वप्रतियोगिभिः कल्पनं कलहादि ॥ ४ ॥ अत्यरिष्टान्यत्यंतमशुभानि दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमम् ॥ ५ ॥ ॥ ६ ॥ वेति वितर्के । कस्माद्धेतोर्नायातीत्यहं न वेद्मि ॥ ७ ॥ अपि किं यदा आत्मन आक्रीडं क्रीडासाधनमंगं मनुष्यनाट्यमुत्स्रष्टुमिच्छति स कालः प्राप्तः ॥ ८ ॥ अस्माकं सर्वपुरुषार्थत्वे हेतुः श्रीकृष्णोऽतस्तद्वियोगं विनानिष्टं न स्यादित्याशयेनाह । यस्माच्छ्रीकृष्णाद्धेतोः । एतच्चोपरिष्टादर्जुनः स्पष्टी करिष्यति । लोकाश्च यज्ञकरणानुरूपा यस्यानुग्रहात् ॥ ९ ॥ अदूरात्संनिहितं नो अस्माकं शंसत उत्पातान् ॥ १० ॥ दैहिकानाह । ऊर्विति । ऊर्वादयो वामाः स्फुरंति वेपथुः कंपश्च हृदये वर्तते । एते मह्यमारात्संनिहितं विप्रियं दास्यंति ॥ ११ ॥ भौमानाह सार्धैस्त्रिभिः । शिवा क्रोष्ट्री आदित्यमभिरौत्युद्यत्सूर्याभिमुखं क्रोशति । अनलानना अग्निं मुखेन वमंती । अंग हे

चिन्तायुतं व्रजेत्'' इति प्रमाणञ्च न्यस्तम् ॥ २ ॥ पापीयसीं पापभूयिष्ठाम् ॥ ३ ॥ व्यवहारं हानोपादानादिरूपम् ॥ ४ ॥ ''अरिष्टं पापाशुभयोः'' इत्यभिधानात् ॥ ५ ॥ ६ ॥ भीमसेनेति । तदा राज्ञा तन्नामोच्चारणेन प्रीत्यतिशयो द्योतितः ॥ ७ ॥ यदात्मनोंगमिति । युधिष्ठिरस्य बंधुशोकानुरूपैवोक्तिर्न तु सिद्धांतस्पर्शिनी । सरस्वती तु तन्मुखे समुचितमेवाह ''नारायणोंऽगं नरभूजलायनात्'' इति ब्रह्मोक्तेः । यदात्मनोंगमंशरूपं नारायणमुत्सिसृक्षति ऊर्द्ध्वं वैकुंठं प्रति सिसृक्षति प्रस्थापयितुमिच्छति । कीदृशमंगम् आ ईषदेव क्रीडा यस्मिंस्तदिति । विश्वनाथः । अंगं स्वधामगमनेन विराड्रूपं त्यक्ष्यतीति संदर्भः । आत्मनः स्वस्याक्रीडं क्रीडास्थानमंगं पृथिवीम् । ''यस्य पृथिवी शरीरम्'' इति श्रुतेरिति तीर्थः ॥ ८ ॥ यस्यानुग्रहाल्लोकाश्च वशीकृता आसन्निति संदर्भः ॥ ९ ॥ हे नरव्याघ्रेति । नरकृतोपद्रवशमनसमर्थोऽप्येतान्निवर्त्तयितुं न समर्थोऽसीति भावः । बुद्धिमोहनं बुद्धिभ्रंशकम् ॥ १० ॥ नृणां शुभं दक्षिणांगस्फुरणं स्त्रीणाञ्च वामांगस्फुरणं तद्विपरीतं विपरीतफलदमिति शाकुनिकाः ॥ ११ ॥ ' देवतायतनानि कंपंते देवताप्रतिमा हसंति रुदंति स्फुटंति स्विद्यंति उन्मीलंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शस्ताः कुर्वंति मां सव्यं दक्षिणं पशवोऽपरे ॥ वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम ॥ १३ ॥ मृत्युदूतः कपोतोऽयमुलूकः कंपयन्मनः ॥ प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्यमिच्छतः ॥ १४ ॥ धूम्रा दिशः परिधयः कंपते भूः सहाद्रिभिः ॥ निर्घातश्च महानासीत्साकं च स्तनयित्नुभिः ॥१५॥ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः ॥ असृग्वर्षंति जलदा बीभत्समिव सर्वतः ॥ १६ ॥ सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ॥ ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥ १७ ॥ नद्यो नदाश्च क्षुभिताः सरांसि च मनांसि च ॥ न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति ॥१८॥ न पिबंति स्तनं वत्सा न दुह्यंति च मातरः ॥ रुदंत्यश्रुमुखा गावो न हृष्यंत्यृषभा व्रजे ॥ १९ ॥ दैवतानि रुदंतीव स्विद्यंति ह्युच्चलंति च ॥ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः ॥ भ्रष्टश्रियो निरानंदाः किमघं दर्शयंति नः ॥२०॥ मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः ॥ अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ॥२१॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेतसा ॥ राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः ॥ २२ ॥

भीम । मामभिलक्ष्य सारमेयः श्वाऽभिरौति प्लुतं भषति । अभीरुवन्निःशंकम् ॥ १२ ॥ शस्ता गवादयो मां सव्यं वामं कुर्वंति । अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति । वाहानश्वान् ॥ १३ ॥ अयं कपोतो मृत्युदूतो मृत्युसूचकः उलूको घूकः प्रत्युलूकस्तत्प्रतिपक्षो घूकः काको वा कुह्वानैः कुत्सितशब्दैर्विश्वं शून्यं कर्तुमिच्छतः ॥ १४ ॥ धूम्रा धूसरा दिशः परिधयोऽग्निमिव लोकमावृण्वंति । दिव्यानाह साधार्भ्याम् । निर्घातो निरभ्रवज्रपातः स्तनयित्नवोऽत्र गर्जितानि तैः सह ॥ १५ ॥ तमोविशेषेण सृजन् असृग् रक्तम् ॥ १६ ॥ ग्रहाणां मर्दं युद्धम् । भूता रुद्रानुचरास्तेषां गणैः संकुलैर्व्याप्तिमिश्रैः । प्राणिभिः सहितैः रोदसी द्यावापृथिव्यौ ज्वलिते प्रदीप्ते इव च पश्येति ॥ १७ ॥ पुनर्भौमानाह नद्य इति सार्धैस्त्रिभिः । प्राणिनां मनांसि च ॥ १८ ॥ दुह्यंतीति कर्मकर्तर्यार्षम् । न प्रस्नुवंतीत्यर्थः ॥ १९ ॥ दैवतानि प्रतिमाः । अघं दुःस्वप्नम् ॥ २० ॥ एतैर्महोत्पातैः कृत्वा न विद्यतेऽन्येषु पुरुषेषु श्रीर्वज्रांकुशादिशोभा येषां तैर्भगवतः पदैर्हीना भूरित्यहं मन्ये ॥ २१ ॥ तस्य राज्ञः इत्येवं दृष्टान्यारिष्टानि येन तेन चेतसा चिंत

प्रतियांति''इति सामवेदे षड्विंशब्राह्मणेऽद्भुतशांतिप्रकरणप्रोक्तमर्थमनुवदति । शांतिरपि तत्र प्रोक्ता ''इदं विष्णुर्विचक्रमे इति''स्थालीपाकं हुत्वा पंचाभिरोभिर्जुहोति विष्णवे स्वाह । सर्वभूताधिपतये स्वाहा । चक्रपाणये स्वाहा। सर्वपापशमनाय स्वाहा इति व्याहृतिभिर्जुहोति'' इति ॥ १२ ॥ संबुद्धिः पूर्ववत्पुरुषव्याघ्रेति ॥१३॥ उल्लूकः कपोतः । उल्लूकाख्यः पक्षीति योज्यम् । ''कपोतस्तु चित्रकण्ठपारावतविहंगयोः''इति मेदिनी । तत्प्रतिपक्ष उलूकशत्रुः बक इति लेखप्रमादात् । घूक इति सम्यक् । बकोलूकविरोधस्याप्रसिद्धत्वात् ।तीर्थस्तु कपोतः शिलाकणाशनपक्षी अग्नौ पदं करोति । ''यत्कपोतः पदमग्नौ करोति''इति मंत्रात् । इदं स्वप्नदर्शनमिति ज्ञातव्यम् । अत्र पक्षे कपोतो ग्नावुलूक इति पाठः ॥ १४ ॥ परिधय इवेति । मूले लुप्तोपमा ज्ञेया । तत्प्रयोजकं साधर्म्यञ्चावरकत्वेनेत्येतत्फलितम् । परिधयो ह्यत्र वेद्याः कुंडस्य च परितः क्रियन्ते । यद्वा परिधयः समिधः । ''परिधिर्नायज्ञियद्रुशाखायामुपसूर्यके । वह्निकुंडाद्यावरणे समुद्रे परिखांतके'' इति रुद्रः ॥ १५ ॥ खरस्पर्शो निष्ठुरस्पर्शः । सर्वतो दिशं बीभत्सं भीषकमिव रक्तं वर्षन्ति ॥ १६ ॥१७॥ नद्यो गंगाद्याः । अत्र न ज्ञेयाः तासां दिव्यत्वात् । नदाः शोणादयः ॥ १८ ॥ इत्यर्थ इति । धातोरर्थांतरवृत्तित्वादकर्मकत्वमपीति भावः ॥ १९ ॥ जनपदा देशाः ॥ २० ॥ २१ ॥ यदुपुर्या द्वारकायाः ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं पादयोर्निपतितमयथापूर्वमातुरम् ॥ अधोवदनमब्बिंदून्मुंचंतं नयनाब्जयोः ॥ २३ ॥ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ॥ पृच्छति
स्म सुहृन्मध्ये संस्मरन्नारदेरितम् ॥२४॥ युधिष्ठिर उवाच ॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ॥मधुभोजदशार्हार्हाः सात्वतांधकवृष्णयः
॥ २५ ॥ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाऽथ मारिषः ॥ मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः ॥ २६ ॥ सप्त स्वसारस्तत्पत्न्यो मातु
लान्यः सहात्मजाः ॥ आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयम् ॥ २७ ॥ कच्चिद्राजाऽऽहुको जीवत्यसत्पुत्रोऽस्य चानुजः ॥ हृदीकः ससुतो
ऽक्रूरो जयंतगदसारणाः ॥ २८ ॥ आसते कुशलं कच्चिद्ये च शत्रुजिदादयः ॥ कच्चिदास्ते सुखं रामो भगवान्सात्वतां प्रभुः ॥ २९ ॥ प्रद्युम्नः सर्व
वृष्णीनां सुखमास्ते महारथः ॥ गंभीररयोऽनिरुद्धो वर्धते भगवानुत ॥ ३० ॥ सुषेणश्चारुदेष्णश्च सांबो जांबवतीसुतः ॥ अन्ये च कार्ष्णिप्रवराः
सपुत्रा ऋषभादयः ॥ ३१ ॥ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः ॥ सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः ॥ ३२ ॥ अपि स्वस्त्यासते सर्वे
रामकृष्णभुजाश्रयाः ॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः ॥ ३३ ॥ भगवानपि गोविंदो ब्रह्मण्यो भक्तवत्सलः ॥ कच्चित्पुरे सुधर्मायां
सुखमास्ते सुहृद्वृतः ॥ ३४ ॥

यतः सतः ॥२२॥ अयथापूर्वं निपतितम् । तदेवाह आतुरमित्यादि । अपां बिंदूनश्रूणि नेत्राभ्यां विसृजंतमित्यर्थः ॥२३॥ उद्विग्नं हृदयं कंपितं यस्य सः विच्छायं विगतकां
तिम् ॥ २४ ॥ स्वजना बांधवाः ॥ २५ ॥ किं वक्ष्यतीति शंकया व्यवहितक्रमेण पृच्छति । शूर इत्यादिना । मारिषो मान्यो मातामहः शूरो नाम यादवः कुंत्याः पिता ।
आनकदुंदुभिर्वसुदेवः ॥ ॥ २६ ॥ स्वसारः परस्परम् । वसुदेवक्षेमेण तासामपि क्षेमं पृष्टमेव तथापि पृथक् पृच्छति । स्वयमिति ॥ २७ ॥ आहुक उग्रसेनः। असत्पुत्रो
यस्य । अत एव जीवनमात्रमेव पृष्टम् । अनुजश्च देवकः । हृदीकः । सुतः कृतवर्मा । जयंतादयः कृष्णभ्रातरः ॥ २८ ॥ २९ ॥ सर्ववृष्णीनां मध्ये महारथः । गंभीररयो
युद्धे महावेगः वर्धते मोदत इत्यर्थः ॥ ३० ॥ कृष्णस्यापत्यानि कार्ष्णयस्तेषु प्रवराः ॥ ३१ ॥ सुनंदनंदौ शीर्षण्यौ मुख्यौ येषां ते ॥ ३२ ॥ ३३ ॥ भगवति सुखमास्त

अयथापूर्वं पूर्वं यथा तथा न भवतीत्यर्थः । तदेव अयथापूर्वत्वमेव । आतुरं संभ्रांतं रोगिकल्पं वा । इत्यर्थ इति पंचम्यर्थे सप्तमीयमिति भावः ॥ २३ ॥ नारदेनेरितं "तावद्यूयमवेक्षध्वं भवेद्यावादिहेश्वरः"
इत्येवंरूपं वचनम् ॥ २४ ॥ मध्वादीनामर्हांतानां द्वंद्वो वृष्ण्यंतानां वा ॥ २५ ॥ "मारिषः शाकभिद्यार्ये" इति मेदिनी ॥ २६ ॥ २७ ॥ असन्कृष्णद्वेषी कंसः पुत्रो यस्य स तादृशपुत्रत्वादद्यापि लज्जितोसौ कदाचिदेहं
त्यक्त्वानित्यभिप्रायेणोक्तमसत्पुत्र इति । अत एवासत्पुत्रत्वादेव ॥२८॥२९॥ गंभीररयोऽगाधज्ञानः ।"रय गतौ" धातुः ॥३०॥३१॥ शौरेः कृष्णस्य ॥३२॥३३॥ भगवति कुशलप्रश्नस्यानौचित्यं मत्वाह–पुर इति । ब्रह्मणा
वेदेन गम्यत इति ब्रह्मण्यः ब्रह्मशब्दोदिताः ब्राह्मणाः प्रिया अस्येति वा ब्रह्मण्यः । भवाद्यर्थविहिततद्धितप्रत्ययानां पाक्षिकवृद्ध्यभावार्थणित्वं वैकल्पिकमेव । "ब्रह्मण्यो ब्रह्मसाधौ स्याद्ब्रह्मदारुशनैश्चरे" इति मेदिनी ॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि स्वित्पर्यभुङ्क्थास्त्वं संभोज्यान्वृद्धबालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमम् ॥४३॥ कच्चित्प्रेष्ठतमेनाऽथ हृदयेनात्मबंधुना ॥
शून्योऽस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ॥४४ ॥ इति श्रीभा०महा०प्र०युधिष्ठिरवितर्कै द्वारकाया अर्जुनस्यागमनवर्णनं नाम चतुर्दशो
ऽध्यायः ॥१४॥ सूत उवाच ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञाविकल्पितः ॥ नानाशंकाऽऽस्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥ शोकेनशुष्य
द्वदनहृत्सरोजो हतप्रभः ॥ विभुं तमेवाऽनुध्यायन्नाऽशक्नोत्प्रतिभाषितुम् ॥२॥कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽऽमृज्य नेत्रयोः॥परोक्षेण समुन्नद्धप्र
णयौत्कंठ्यकातरः॥३॥सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा॥४॥अर्जुन उवाच॥वंचितोऽहं महाराज
हरिणा बंधुरूपिणा॥येन मेऽपहृतं तेजो देवविस्मापनं महत्॥५॥यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः॥उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा॥
॥६॥यत्संश्रयाद्द्रुपदगेहमुपागतानांराज्ञां स्वयंवरमुखे स्मरदुर्मदानाम्॥तेजो हृतं खलु मयाऽभिहतश्च मत्स्यः सज्जीकृतेनधनुषाऽधिगता च कृष्णा॥७॥

असमैरधमैर्वा किं न पराजितोऽसीत्यर्थः ॥ ४२ ॥ संभोजनार्हान्वृद्धान्बालकांश्च किंस्वित्पर्यभुङ्क्थास्त्यक्त्वा भुक्तवानसि किम् । अक्षमं कर्तुमयोग्यं यत्तन्न कृतवानसि किम्
॥ ४३ ॥ नित्यं सदा प्रेष्ठतमेन हृदयेनांतरंगेण स्वबंधुना श्रीकृष्णेन रहितः शून्योऽस्मीति मन्यसेऽन्यथा ते रुक् न पीडा न घटेत ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे
प्रथमस्कंधे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ कलिप्रवेशमालक्ष्य धुरं न्यस्य परीक्षिति ॥ आरुरोह नृपः स्वर्गमिति पंचदशेऽब्रवीत् ॥ १ ॥ कृष्णोऽर्जुनः । आविकल्पित
इति छेदः । नानाशंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः । प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः । तत्र हेतवः । कृष्णविश्लेषेण कर्शितः कृशः कृतः ॥ १ ॥ शोकेन
हेतुना वदनं च हृच्च ते एव सरोजे । शुष्यती वदनहृत्सरोजे यस्य सः । हता प्रभा तेजो यस्य सः ॥ ॥ २ ॥ शुचः शोकाश्रूणि यान्युद्गच्छंति तानि नेत्रयोरेव संस्तभ्य
गलितानि च पाणिनामृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना समुन्नद्धमधिकं यत्प्रेमौत्कंठ्यं तेन कातरो व्याकुलः सन्नृपमित्याहेत्युत्तरेणान्वयः ॥ ३ ॥ सख्यं हितै
षिताम् । मैत्रीमुपकारिताम् । सौहृदं सुहृत्त्वं चात्संबंधितां च । बाष्पेण कंठावरोधाद्गद्गदया ॥ ४ ॥ येन मां वंचयता । देवान्विस्मापयति यत् ॥ ५ ॥ यस्य क्षणवियोगेने
त्यादि यच्छब्दानां तेनाहमद्य मुषित इति सप्तमश्लोकस्थेन तच्छब्देन संबंधः । प्रियस्याप्यप्रियत्वे दृष्टांतः । उक्थेन प्राणेन । एष पित्रादिः ॥ ६ ॥ श्रीकृष्णोपकाराननुस्म

इति भावः । इत्यर्थ इति । नीचजातितोपि पराभवो महतां तेजोहानिकर इति भावः ॥ ४२ ॥ अक्षमं कर्तुमशक्यं शास्त्रनिषिद्धमेकादशीभोजनस्वर्णस्तेयादि किंचिज्जुगुप्सितं कर्म कृतवानित्यर्थः ॥ ४३ ॥ किंचैता आशंका
स्त्वयि न संभवति । संभवति चेदमिति नारदोक्तिं स्मरन्नाह—कच्चिदिति । इत्यर्थ इति । प्राणहीनदेहवद्दीपहीनमंदिरवदहं प्रकाशहीनो जात इत्यात्मानं मन्यस इति भावः । किञ्च लोकशास्त्रविरुद्धा कर्तुर्विज्ञस्य तव श्रीकृष्ण
वियोगं विना विच्छायत्वं न घटत इत्याह । अन्यथा ते रुङ् मनोव्यथा नेत्यर्थः ॥४४॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे चतुर्दशोऽध्यायः ॥ १४ ॥ धुरं राज्यभारम् । न्यस्य स्थापयित्वा (१) भगवति
भक्तिविधानार्थं दुःखकथनव्याजेन तन्महिमा प्रतिपाद्यतेऽत्राध्याये । इत्यर्थ इति । एवंभूतस्त्वमेवंभूतो वेत्यनेककोटिविषयीकृत इति भावः । तत्राप्रतिभाषणे । आपदेन लक्ष्येति तदर्थत्वेन लभ्यतेऽव्ययानामनेकार्थत्वादिति
॥१॥२॥३॥४॥ महाराजेति । तवापि महाराजत्वं तत्कृतमेवेति भावः ॥५॥ "उक्थं कर्मफले प्राणे वेदभागे वचस्यपि" इति निरुक्तिः ॥६॥ द्रुपदगेहं पांचालपुरम् । राज्ञां जरासंधादीनाम् । अधिगता। वेदाध्ययनवदादरेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंगलाय च लोकानां क्षेमाय च भवाय च ॥ आस्ते यदुकुलांभोधावाद्योऽनंतसखः पुमान् ॥ ३५ ॥ यद्बाहुदंडगुप्तायां स्वपुर्यां यदवोऽर्चिताः ॥ क्रीडंति परमानंदं महापौरुषिका इव ॥ ३६ ॥ यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ॥ निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरंति वज्रायुधवल्लभोचिताः ॥ ३७ ॥ यद्बाहुदंडाभ्युदयाऽनुजीविनो यदुप्रवीरा ह्यऽकुतोभया मुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचिताम् ॥ ३८ ॥ कच्चित्तेनामयं तात भ्रष्टतेजा विभासि मे ॥ अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः ॥ ३९ ॥ कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंगलैः ॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतम् ॥ ४० ॥ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियम् ॥ शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः ॥ ४१ ॥ कच्चित्त्वं नागमोऽगम्यां गम्यां वाऽसत्कृतां स्त्रियम् ॥ पराजितो वाऽथ भवान्नोत्तमैर्नाऽसमैः पथि ॥ ४२ ॥

इति प्रश्नस्यानौचित्यमाशंक्याह । पुर इत्यादि ॥ ३४ ॥ भगवतोऽत्रावस्थाने हि लोकानां मंगलं नान्यथेत्याशयेनाह चतुर्भिः । मंगलाय शुभाय क्षेमाय लब्धपालनाय भवायोद्भवाय । अनंतसखो बलभद्रसहायः ॥ ३५ ॥ अर्चिताः सर्वैः पूजिताः परमानंदं यथा भवति तथा । महापुरुषो विष्णुस्तदीया महापौरुषिका वैकुंठनाथानुचरा इव ॥ ३६ ॥ यस्य पादशुश्रूषणमेव मुख्यं तप आदिभ्यः श्रेष्ठं यत्कर्म तेन । सत्यभामादयः । संख्ये युद्धे श्रीकृष्णबलेन त्रिदशान्देवान्निर्जित्य तदाशिषो देवभोग्यान्पारिजातादीन् वज्रायुधस्य वल्लभा शची तस्या उचिताः ॥ ३७ ॥ यद्बाहुदंडप्रभावोपजीविनः सुधर्मामंघ्रिभिरधिक्रामंति स गोविंदः सुखमास्ते इति गतपंचमश्लोकेनान्वयः॥ ३८॥ इदानीं तस्यैव कुशलं पृच्छति । कच्चिदिति षड्भिः । अनामयमारोग्यम् । न लब्धो मानो येन बंधुभ्यः सकाशात् किं वा तैः प्रत्युतावज्ञातस्तिरस्कृतः । यतश्चिरोषितो बहु कालं तत्र स्थितः ॥ ३९ ॥ अभावैरिति छेदः । प्रेमशून्यैः । अमंगलैः परुषैः शब्दादिभिर्नाभिहतो न ताडितोऽसि किम् । यद्वा । अर्थिभ्यः किमपि दास्यामीति नोक्तं किम् । यद्वा । आशया सह यथा आशा भवति तथा दास्यामीति प्रतिश्रुतं यत्तन्न दत्तं किम् ॥ ४० ॥ अन्यद्वा शरणागतं सत्त्वं प्राणिमात्रं न त्यक्तवानसि किम् । यतस्त्वं पूर्वं शरणप्रद आश्रयप्रदः ॥ ४१ ॥ अगम्यामिति छेदः । निंदितां स्त्रियं नागमः किं न गतवानासि । असत्कृतां मलिनवस्त्रादिना नागमः किम् । नोत्तमैरनुत्तमैः समैरित्यर्थः ।

मंगलाय प्रेमदानाय । क्षेमाय मुक्तये ॥ ३५ ॥ ३६ ॥ यस्य कृष्णस्य ॥ ३७ ॥ अत्र पूर्वत्राग्रे चांघ्रिशब्दस्थाने अंह्रिशब्द उपलभ्यते । प्राचीनपुस्तकेषु सोपि युक्त एव । उणादिषु चतुर्थपादे "एवंत्र्यादयश्च" इत्यनेनोभयोरपि निपातनात् । "अंह्रिरंघ्रिश्च चरणे" इति व्याख्यातत्वाच्च ॥ ३८ ॥ आदरातिशयेन संबुद्धिद्वयमत्र ॥ ३९ ॥ आदिना इंगितक्रिययोर्ग्रहः । वाचेंगितेन क्रियया वा न ताडित इत्यर्थः ॥ ४० ॥ "यस्याः पाणिर्न दत्तो वै पित्राद्यैश्च यथाविधि । सा चागम्या भवेन्नारी तां गत्वा नारकी भवेत्" इति स्मृतेः ॥ ४१ ॥ असत्कृतामित्यनेन रजोवती लक्ष्यते । तस्या एव संस्काराविधानात् । इत्यर्थ इति । नाकादित्वादत्रानादेशाभाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्संनिधावहसु खांडवमग्नयेऽदामिंद्रं च साऽमरगणं तरसा विजित्य ॥ लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्योऽहरन् नृपतयो बलिमध्वरे ते ॥ ८ ॥ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थे आर्योनुजस्तव गजायुतसत्त्ववीर्यः ॥ तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदमयन्बलि मध्वरे ते ॥ ९ ॥ पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायाम् ॥ स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यैस्त त्स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥ १० ॥ यो नो जुगोप वनमेत्य दुरंतकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः ॥ शाकान्नशिष्टमुपयुज्य यत स्त्रिलोकीं तृप्तामंमस्त सलिले विनिमग्नसंघः ॥ ११ ॥

रति । यत्संश्रयादिति दशभिः । यस्य संश्रयाद्बलात्स्मरेण कामेन दुर्मदानामतिमत्तानां तेजः प्रभावो हतं धनुर्ग्रहणेनैव पश्चात्तद्धनुः सज्जीकृतं च तेन च मत्स्यो यंत्रोपरि भ्रम न्विद्धस्ततस्तान्विजित्य द्रौपदी प्राप्ता च ॥ ७ ॥ उ इति विस्मये खांडवमिंद्रस्य वनमग्नयेऽदां दत्तवानस्मि । खांडवदाहे रक्षितेन मयेन कृता च सभा लब्धा । अद्भुतशिल्प रूपा माया यस्यां सा। तेऽध्वरे यागे राजसूये ॥८॥ अनंतरश्लोको विगीतस्तथापि व्याख्यायते नृपशिरःस्वंघ्रिर्यस्य तं जरासंधं तवानुजो भीमो मखार्थमहन् हतवान् । तन्नि र्जयं विना राजसूयमखानुपपत्तेः । गजायुतस्येव सत्त्वमुत्साहशक्तिर्वीर्यं बलं च यस्य सः।तं हत्वा प्रमथनाथो महाभैरवस्तस्य मखाय ये राजानस्तेनाहृतास्ते च यद्यस्मान्मोचि तास्तत्तस्मात्तेऽध्वरे बलिमानीतवंतः ॥ ९ ॥ यैः कितवैर्दुःशासनादिभिस्तव पत्न्याः कबरं विकीर्योन्मुच्य स्पृष्टमाकृष्टं तेषां स्त्रियो हतेशा अत एव वैधव्याद्विमुक्तकेशा अकृत चकार । कथंभूतं कबरम् । अधिमखं राजसूयमधिकृत्य क्लृप्तो रचितो यो महाभिषेकस्तेन श्लाघ्यतमम् । चारु रम्यम् । यत्स्मरणात्तदानीमेवास्मत्कृपया प्राप्तस्य श्रीकृष्णस्य नमने पादयोः पतितान्यश्रूणि मुखाद्यस्याः पत्न्याः । पदशब्दसापेक्षस्यापि पतितशब्दस्याश्रुपदेन समासो नित्यसापेक्षितत्वात् ॥ १० ॥ शिष्याणामयुतस्याग्रे तदंते भुंक्ते यस्तस्माद्दुर्वाससो हेतोररिणा दुर्योधनेन रचितं यद्दुरंतं कृच्छ्रं शापलक्षणं तस्मात्सकाशान्नोऽस्मान्वनमेत्य जगोप।किं कृत्वा।शाकमेवान्नं तस्मिन्नेव पात्रेऽवशिष्टमुपयुज्य जग्ध्वा। यत उपयोगात्सलिले विनिमग्नो मुनीनां संघस्त्रिलोकीं तृप्साममंस्त । एवं हि भारते कथा । कदाचिद्दुर्वाससो दुर्योधनेनातिथ्यं कृतम् । तेन च परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्वा ससः शापात्पांडवा नश्येयुरिति मनसि निधाय दुर्योधनेनोक्तं युधिष्ठिरोऽस्मत्कुलमुख्योऽतस्तस्यापि भवतैवमेव शिष्यायुतसहितेनातिथिना भवितव्यं किं तु द्रौपदी यथा क्षुधा न सीदेत्तथा तस्यां भुक्तवत्यां तद्गृहं गंतव्यमिति । ततश्च तथैव दुर्वाससि प्राप्ते परमादरेण युधिष्ठिरेण माध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसंघोऽघमर्षणाय जले

प्रातेत्यर्थः । "कृष्णा स्याद्द्रौपदी कालिंदी सुभद्रा कणा स्त्रियाम् । नीली द्राक्षा कृष्णपत्नी" इति निरुक्तिः ॥ ७ ॥ अद्भुतानि शिल्पानि जले स्थलप्रत्ययादीनि कौशलानि यस्यां सा माया यस्यां सा सभेति । यत्सभायामिति शेषः । नृपतयस्तेऽध्वरे बलिमहरन् ॥ ८ ॥ ९ ॥ पदयोः पतिता चासावश्रुमुखी चेति पतिताश्रुमुखी तस्या इति वा ॥ १० ॥ यः कृष्णः ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्तेजसाऽथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे ॥ अन्येऽपि चाहममुनैव कलेवरेण प्राप्तो महेंद्रभवने महदासनार्धम् ॥
॥१२॥तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः॥सेंद्राः श्रिता यदनुभावितमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना॥१३॥
यद्बांधवः कुरुबलाब्धिमनंतपारमेको रथेन ततरेऽहमतीर्यसत्त्वम्॥प्रत्याहृतं बहुधनं च मया परेषां तेजास्पदं मणिमयं च हृतं शिरोभ्यः॥१४॥यो
भीष्मकर्णगुरुशल्यचमूष्वऽदभ्रराजन्यवर्यरथमंडलमंडितासु ॥ अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आर्च्छत्॥१५॥
यद्दोष्षु मा प्रणिहितं गुरुभीष्मकर्णद्रौणित्रिगर्तशलसैंधवबाह्लिकाद्यैः॥अस्त्राण्यमोघमहिमानि निरूपितानि नो पस्पृशुर्नृहरिदासमिवाऽऽसुराणि॥१६॥

निममज्ज । तत्र चिंतातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णोंकस्थां रुक्मिणीं हित्वा तत्क्षणमेव भक्तवत्सलतया चागतः । तया चावेदिते वृत्तांते भगवतोक्तं हे द्रौपद्यहं च बुभुक्षितोस्मि प्रथमं मां भोजयेति । तया चातिलज्जयोक्तं स्वामिन् मद्भोजनपर्यंतमक्षयमप्यन्नं सूर्यदत्तस्थाल्यां मया च सर्वान्संभोज्य भुक्तमतो नास्त्यन्नमिति । तथाप्यतिनिर्बंधेन स्थालीमानाय्य तत्कंठलग्नं किंचिच्छाकान्नं प्राश्योक्तमनेन विश्वात्मा भगवान्प्रीयताम् । अथ भोक्तुं मुनिसंघमाह्वयेति भीमं प्रहितवान् । स च तावतातितृप्तो वृथापाकभयेन पलायित इति ॥ ११ ॥ गिरिजासहितो विस्मापितः सन्निजं पाशुपतमस्त्रम् । अन्येपि लोकपाला निजान्यस्त्राण्यदुः । अन्यदप्याश्चर्यमाह । अमुनेति । महत इंद्रस्यासनार्धम् ॥ १२ ॥ तत्रैव स्वर्गे क्रीडतः । गांडीवं लक्षणं चिह्नं यस्य तत् । अरातयो निवातकवचा दैत्यास्तेषां वधार्थमाश्रितवंतः । येनानुभावितं प्रभावयुक्तं कृतम् । हे आजमीढ युधिष्ठिर । तेन मुषितो वंचितोस्मि । कथंभूतेन । भूम्ना निजमहिमावस्थानेन ॥ १३ ॥ यद्बांधव इत्यादिश्लोकत्रयस्यापि तेन मुषितोहमिति पूर्वेणैव संबंधः । श्रीकृष्णबांधव एक एवाहं कौरवसैन्याब्धिं नास्त्यंतो गांभीर्येण पारं च देशतो यस्य तं ततरे तीर्णवानुत्तरगोग्रहे । अतीर्याणि दुस्तराणि सत्त्वानि तिमिंगिलादीनि भीष्मादिरूपाणि यस्मिन् । परैर्नीतं गोधनं प्रत्याहृतम् । परेषां च शिरोभ्यः सकाशात्तेजास्पदं प्रभावस्यास्पदमुष्णीषरूपं मणिमयं मुकुटरत्नरूपं च बहुधनं तान्मोहनास्त्रेण मोहयित्वा हृतं यद्बांधवेन मया ॥१४॥ अदभ्रा अनल्पा ये राजन्यवर्यास्तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथिरूपेण ममाग्रेचरः सन् हे विभो तेषां रथयूथपानामायुरादीनि यो दृशा दृष्टयैवाच्र्छेद्धृतवान् । मनांसीत्युत्साहादिशक्तिम् । सहो बलम् । ओजः अस्त्रादिकौशलम् ॥ १५ ॥ यस्य दोष्षु भुजेषु मा मां प्रणिहितं स्थापितं तैरेव गुर्वादिभि

यस्य कृष्णस्य तेजसा युधि वराहनिमित्तयुद्धे इंद्रकीलगिरौ॥१२॥हे अजमीढवंशोद्भूतेति।अजमीढस्य हरिभक्तिनिष्ठत्वाच्छोकाकुलो हि हरिं तद्भक्तांश्च सोच्छ्वासं स्मरन्नेव किंचिद्वक्ति यथा तथाऽर्जुनोपि राजानं हरिभक्तसंबंधेनामंत्रयामासेति भावः ॥१३॥ उत्तरगोग्रहे विराटनगरे । उत्तरकर्तृकपरहृतगोग्रहनिमित्तं युद्धे । ततरे तेजास्पदमिति पदद्वयमार्षम् । अत्र चेयं कथानुसंधेया । विराटे सुशर्मादिभिर्हृतगोधनार्थं भीमादिभिः सह युद्धाय गते पश्चाद्दुर्योधना दिपारिहृतगोधनार्थं बृहन्नटीभूतमर्जुनं सारथिं विधाय युद्धार्थं विराटात्मज उत्तरनामा गतः । स च तान्दृष्ट्वातीवाकुलोऽर्जुनेन सारथिः कृतः स्वयं रथी भूत्वा ताञ्जित्वा गोधनमानयामासेति निर्णेयं महाभारतविराटपर्वतः ॥ १४ ॥ हे विभो इति । अधुना त्वमपि भाहीनो जात इत्यभिप्रायः । पृषोदरादित्वाद्भाशब्दस्य भ्वादेशो ज्ञेयोत्र ॥१५॥ पाठांतरेऽमोघमहितानीति पाठे । आसुराणि हिरण्यकशिपुप्रेरितान्यस्त्राणि ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौत्ये वृतः कुमतिनाऽऽत्मद ईश्वरो मे यत्पादपद्ममभवाय भजंति भव्याः ॥ मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्त चित्ताः ॥ १७ ॥ नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽर्जुन सख कुरुनंदनेति ॥ संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य ॥ १८ ॥ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति विप्रलब्धः ॥ सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे ॥ १९ ॥ सोऽहं नृपेंद्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः ॥ अध्वन्युरुक्रमपरिग्रहमंग रक्षन्गोपैरसद्भिरबलेव विनिर्जितोऽस्मि ॥ २० ॥

निरूपितानि प्रयुक्तान्यस्त्राणि न स्पृशंति स्म । गुरुर्द्रोणः । त्रिगर्तस्त्रिगर्तदेशाधिपतिः सुशर्मा । शलः शल्यः । सैंधवः सिंधुदेशाधिपतिर्जयद्रथः । बाह्लिकः शंतनोर्भ्राता । अमोघो महिमा येषां तथाभूतान्यपि । पाठांतरेऽपि स एवार्थः । प्रतीकाराकरणेऽप्यस्पर्शे दृष्टांतः । नृहरिदासं प्रह्लादमिवेति ॥ १६ ॥ स्वापराधमनुस्मरन् संतप्यमान आह । सौत्ये सारथ्ये कुमतिना मे मया स वृतः । कुमतित्वमेवाह । आत्मद इत्यादिना । अभवाय मोक्षाय । भव्याः श्रेष्ठाः श्रांता वाहा अश्वा यस्य तं माम् । जयद्रथवधे हि जलपानं विनाश्वाः श्रांतास्ततो रथादवतीर्य बाणैर्भुवं भित्त्वा मया जलं संपादितं तदा यस्यानुभावेन निरस्तचित्ता अरयो मां न प्रहृतवंतः स सौत्ये वृतः इति कुमतित्वम् ॥ १७ ॥ हे नरदेव उदारं गंभीरं रुचिरं च यत्स्मितं तेन शोभितानि नर्माणि परिहासवाक्यानि तथा कार्यप्रस्तावेषु हे पार्थेत्यादीनि मधुराक्षराणि संजल्पितानि च हृदिस्पृशानि मनोज्ञानि माधवस्य यान्येतानि तानीदानीं स्मर्तुर्मम हृदयं लुठंति लोठयंति । क्षोभयंति । णिजभाव आर्षः ॥ १८ ॥ विकत्थनं स्वगुणश्लाघनादि । शय्यादिष्वैक्याद्व्यतिरेकाद्धेतोः कदाचिद्व्यभिचारं दृष्ट्वा हे वयस्य ऋतवान् सत्ययुक्तस्त्वमिति वक्रोक्त्या विप्रलब्धस्तिरस्कृतोऽपि ॥ ऋभुमानिति पाठे ऋभवो देवाः सेवकाः संति यस्य सः । असौ महानपि मया वयस्य इति मत्वा विप्रलब्धस्तिरस्कृत इत्यर्थः । ऋतमानितिपाठे वत्वाभाव आर्षः । मेऽघमपराधमसहत । महितया महत्त्वेन ऐकपद्येऽतिमहत्त्वेनेत्यर्थः । सख्युरघं सखेव तनयस्याघं पितेव ॥ १९ ॥ त्वया शंकितं पराजयं चापि प्राप्तोऽहमित्याह । तेन सख्या रहितोऽतो हृदयेन शून्यः। अंग हे राजन् । उरुक्रमस्य परिग्रहं षोडश

आत्मद इति । ''आत्मदा बलदा'' इति श्रुतेः ॥ १७ ॥ हे नरदेवेति । भगवत्सांनिध्ये हि त्वं देवैरपि दीव्यस्यधुना केवलं नरदेव एव जात इति भावः । यद्वा पूर्वं त्वं नरनारायणाभ्यामुभाभ्यामावाभ्यां दीव्यन्नासाधुना केवलेन मया नरेणैव दीव्यसीति भावः ॥ १८ ॥ व्यभिचारं लीलया स्वोक्तिविलंघनादिरूपम् । इत्यर्थ इति । न हि सर्वेश्वरं प्रति वयस्यादिरूपा संबुद्धिरुचितेति भावः । आदिशब्देन विरुद्धभाषणादिग्रहः । ऐकपद्ये महामहितयेत्येवमैकपद्ये । इत्यर्थ इति । महती चासौ महिता चेति तथा । सामानाधिकरण्ये महतष्टेराकारः पुंवद्भावश्च ॥ १९ ॥ हे नृपेन्द्रेति । तवापि नृपेंद्रत्वं तत्कृतमेवेति भावः । त्वया शंकितं पराजयं च प्राप्तोस्मीत्याह । तेन सख्या रहितः । अतो हृदयेन मनसा शून्यो मूर्च्छितप्राय इत्यर्थः । उरुक्रमस्य परिग्रहं षोडशस्त्रीसहस्रलक्षणम् । असद्भिर्नीचैः । वस्तुतस्तु न विद्यंते संतो येभ्यस्तैर्गो पृथ्वीं द्यां च पांतीति तैः गोपजातित्वाच्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वै धनुस्त इषवः स रथो हयास्ते सोऽहं रथी नृपतयो यत आनमंति ॥ सर्वं क्षणेन तदभूदसदीश रिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्याम् ॥ ॥२१॥राजंस्त्वयाऽभिपृष्टानां सुहृदां नः सुहृत्पुरे ॥ विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः॥२२॥वारुणीं मदिरां पीत्वा मदोन्मथितचेतसाम् ॥ अजानतामिवान्योन्यं चतुःपंचाऽवशेषिताः ॥ २३ ॥ प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितम् ॥ मिथो निघ्नंति भूतानि भावयंति च यन्मिथः ॥ ॥ २४ ॥ जलौकसां जले यद्वन्महांतोऽदंत्यणीयसः ॥ दुर्बलान्बलिनो राजन्महांतो बलिनो मिथः ॥ २५ ॥

सहस्रस्त्रीलक्षणम् । असद्भिर्नीचैः। अबला योषेव॥२०॥ श्रीकृष्णवियोग एवात्र हेतुर्नान्य इत्याह ।तदिति। यतो येभ्यो हेतुभ्यो नृपतय आनमंति । ईशेन रिक्तं शून्यमसत्कार्याक्षमं सन्मंत्रविधानैरपि भस्मनि हुतमिव । अतिप्रीतादपि कुहकान्मायाविनः सकाशाद्राद्धं लब्धं यथा असत् सम्यक्कर्षणादिनाप्यूषरभूमावुप्तं बीजमिव ॥ २१ ॥ सुहृत्पुरे त्वया पृष्टानां नः सुहृदां मध्ये चत्वारः पंच वावशेषिताः । तत्र हेतुर्विप्रशापेत्यादि । वारुणीमन्नमयीम् । अजानतामिवान्योन्यमेरकामुष्टिभिर्निघ्नताम् ॥२२॥२३॥ अवशेषिता इत्यनेनोक्तं हेतुकर्तारमाह त्रिभिः।प्रायेणेति।भावयंति पालयंति॥२४॥जलौकसां मत्स्यादीनां मध्ये महांतः स्थूला अणीयसः सूक्ष्मान्यथा अदंति भक्षयंति॥२५॥

गोपीः ताः स्वप्रेयसीव प्रकटप्रकाशो प्रवेशनार्थं तत्तद्रूपेण भगवतैव तासामाकर्षणात्। ''न वयं साध्वि साम्राज्यम्'' इत्यादौ कामयामह एतस्येत्यनेन ''व्रजस्त्रियो यद्वांछंति पुलिंदस्तृणवीरुधः। गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ।'' इति । तासां वाक्येन व्रजस्त्रीवांछित एव भगवत्स्वरूपे तासां भगवदुपभुक्तदेहानां साक्षाल्लक्ष्मीरूपाणां नीचस्पर्शो सद्य एवांतर्द्धानं स्यादित्यतः प्रकारांतरेण तासां व्रजस्त्रीत्वप्राप्तिरिति ज्ञेयम् । विष्णुपुराण ब्रह्मपुराणयोरप्यत्रैवार्थे तात्पर्यमवगम्यते । यथा तत्रतत्रार्जुनं प्रति व्यासवचनम् । ''एवं तस्य मुनेश्शापादष्टावक्रस्य केशवम् । भर्त्तारं प्राप्य ता याता दस्युहस्ता वरांगनाः'' इति पुरा देव्योऽष्टावक्रमुनिं स्तुत्वा विष्णुर्वः पतिर्भविष्यतीति तस्माद्वरं प्राप्य तदंगवक्रिमदर्शनोत्थादुपहासात् ''दस्युहस्ता भविष्यथ'' इत्यभिशापं च प्राप्य पुनः प्रसादिताच्च तस्माच्छापांतं च प्राप्येता भर्त्तारं प्राप्य दस्युहस्तं गता इति मुनेः शापप्रसादयोरमोघत्वाद्दस्युहस्तगतत्वं भर्तुः प्राप्तिश्च तासां तंत्रेणैवाभूत्स्वभर्तुः कृष्णस्यैव दस्युरूपत्वात् । अतस्तत्रैव पुनर्वचनांतरञ्च यथा ''तत्त्वया न हि कर्त्तव्यः शोकोल्पोपि हि पांडव।तेनाप्यखिलनाथेन सर्वं तदुपसंहृतम्'' इति । अखिलः पूर्ण एव नाथः पतिः कृष्णस्तेन तत्सर्वप्रियावृन्दमुपनिकट एव सम्यक् हृतमर्जुनसकशाद्गृहीतमित्येव व्याख्येयम् ॥ २० ॥ भस्मनि हुतमिति निष्फलत्वे कुहकराद्धमित्यवस्तुभूतत्वे । उप्तमिति । नश्यदवस्थत्वे च दृष्टांतः । कुहकोऽत्रैंद्रजालिकः । स यथा कपालिकां मुद्रां विधायान्येभ्यो ददाति सा चावस्तुभूतैवेति । यद्वा कुहकाय वंचकायासत्पात्राय दांभिकतपसे राद्धं दत्तं यथाऽसद्भवतीति ''दंभे स्याद्दांभिके पापे छले विस्मापके स्मये । कुहको दैत्यभेदे च'' इति निरुक्तिः । क्षणेन श्रीकृष्णवियोगाव्यवहितक्षणेनेत्यर्थः ॥२१॥ सुहृत्पुरे द्वारकायाम् । हे राजन्निति । राज्ञामावसानिकधर्मस्मरणार्थमधुना भवतापि सर्वं त्यक्त्वा गंतव्यमिति भावः । तत्र चतुःपञ्चावशेषत्वे विमूढानां कृत्याकृत्यज्ञानरहितानाम् ॥ २२ ॥ २३ ॥ प्रायेण निश्चयेन । प्रायपदमत्रावधारणार्थकमेव । यद्वा प्रायेणेति लौकिकरीत्योक्तं न तु सिद्धांतरीत्येत्यत आह–मिथ इति । यद्यतो निमित्तभूताद्भावयंति ॥ २४ ॥ जलौकसां मध्ये बलिनस्तुल्यबलास्तु मिथः परस्परमेव ये यान् शक्नुवंतीत्यर्थः । भूभारान्भूभारभूतान् यदून्संजहार इत्यर्जुनादीन्प्रति भगवता तल्लीलायास्तथैव प्रत्यायितत्वात् । तत्कारणं तत्रैवैकादशांते व्यक्ती भविष्यति । किञ्च तदपि भूभारभूतान्यदूनित्यर्जुनोक्त्या न तु भुवोलंकारभूतान् यदून् । तन्नित्यपरिकरानित्यर्थस्तूपलभ्यत एव नारी खल्वलंकाराणां भारं भारत्न मन्यते।यथा तथैव भूर्नित्यपरिकराणां यदूनां ये तु देवास्तत्रैव यदुष्वंशावतारेण प्रविश्योद्भूतास्तेषामपि रजस्तमोरहितानां भारत्वेन वक्तुमनुचितानामपि स्वस्वपदप्रापणाय तन्मिषेणैवोपसंहारार्थम् । ''अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम्''। इत्युक्तवता भगवता भारत्वारोपः कृतः॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ॥ यदून्यदुभिरन्योन्यं भूभारान्संजहार ह ॥ २६ ॥ देशकालार्थयुक्तानि हृत्तापोपशमानि च ॥ हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे ॥ २७ ॥ एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहम् ॥ सौहार्देनातिगाढेन शांताऽऽसीद्विमला मतिः ॥२८॥ वासुदेवांघ्र्यभिध्यानपरिबृंहितरंहसा ॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः ॥ २९ ॥ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्धनि ॥ कालकर्मतमोरुद्धं पुनरभ्यगमत्प्रभुः ॥ ३० ॥ विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः ॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ॥ ३१ ॥

एवं बलिष्ठैर्महद्भिः पांडवैर्दुर्योधनजरासंधादीन्निहत्य यदुभिरितरान् शाल्वादीन्निहत्य यदून्यदुभिरन्योन्यं निहत्य भगवान् भुवो भारभूतान् संहृतवान् ॥ २६ ॥ अतः परं वक्तुं न शक्नोमीति सूचयन्नाह । देशकालोचितार्थयुक्तानि मनःपीडोपशमकराणि च गोविंदस्य वचनानि स्मरतो मे मम चित्तं हरंत्याकर्षंति ॥ २७ ॥ एवमिति सूतोक्तिः । अतिदृढेन स्नेहेन कृष्णपादसरोरुहं चिंतयतोऽर्जुनस्य मतिः शांता विशोका विमला विरक्ता चासीत् ॥ २८ ॥ मतिवैमल्यफलमाह । वासुदेवांघ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्यास्तया भक्त्या निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धिर्यस्य स ज्ञानं पुनरध्यगमदित्युत्तरेणान्वयः ॥ २९ ॥ कालेन कर्मभिस्तमसा भोगाभिनिवेशेन च रुद्धमावृतं सत् ॥ ३० ॥ ज्ञानफलमाह । विशोक इति । एतदेव शोकहेत्वभावेनोपपादयति शोकस्य हि हेतुर्द्वैतभ्रमस्तस्य देहस्तस्य लिंगं तस्य गुणास्तेषामविद्या ।

एवं बलिष्ठैर्महद्भिः पांडवैर्दुर्योधनजरासंधादीन्निहत्य यदुभिरितराञ्शाल्वादीन्निहत्य यदून्यदुभिरन्योन्यं निहत्य भुवो भारभूतान्संहृतवान् ॥ २६ ॥ देशकालार्थयुक्तानि तत्तद्देशतत्तत्कालतत्तद्वस्तूचितानि । अतस्त्वमपि मा पृच्छेति भावः ॥ २७ ॥ मतिस्तद्विरहसंतप्तापि शान्ता निरंतरताच्चिंतनजनितस्फूर्तिलब्धेन तेन निर्वापितदाहत्वाच्छीतलेत्यर्थः । अत एव विमलाऽस्थैर्यलक्षणमालिन्यमपि तस्या गतमित्यर्थः ॥ २८ ॥ ननु कामादयः कषाया अपि मलशब्देनोच्यंते । सत्यम् । अर्जुनस्य भगवन्नित्यपरिकरत्वेन साक्षान्नरावतारत्वेन च तदसंभव एव । महेंद्रांशोद्भवत्वेन कषायः संभवति चेत्तदपि नेत्याह—वासुदेवेति । जन्मारभ्यैवोत्पन्नया भक्त्या प्रथमत एव निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा यस्यः तथाभूत एवार्जुनः ॥ २९ ॥ किन्तु "प्रियस्य विच्छेददवे प्रियोक्तिस्मृत्यैव संधुक्षणमातुरस्ये" इति रीत्या तन्मुखचंद्रविनिर्गतं सर्वसंतापोपशमकं श्रीगीतामृतमेव पातुमारेभे इत्याहुः--गीतमीति ॥ ३० ॥ अत्र विश्वनाथः । तत्र च "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यासि सत्यं ते प्रतिजाने प्रियोसि मे" इत्यत्र पद्ये एष्यसीति भविष्यन्निर्देशेनेदं द्योतितम् । हे कौन्तेय संप्रति त्वं मामेष्यस्येव यदा तु तव मद्वियोगो महान्भावी तदा मां प्राप्तुं यतिष्यमाणस्य तव तदुपायमहमधुनैव स्नेहेन ब्रवीमिति स्वप्राप्त्यर्थं यद्ध्यानमुक्तं संप्रति तेन मुहुरत्यंतेन ध्यानेनैव तत्पार्श्वगतमेवात्मानमभिमन्यमानस्यापि मम देह एवांतरायो यतोयं मध्येमध्ये बहिर्वृत्तिमनुभाव्य मां शोकार्णवे क्षिपति । तदस्माद्देहादात्मनः पार्थक्यमापादयितुं सर्वशास्त्रास्त्रविद्यावत्पूर्वाभ्यस्तं योगमेव रक्षणमनुशीलयामीति मनसि निश्चित्य चिन्मयशरीरोप्यात्मानं श्रीकृष्णनित्यप्रियसखत्वेन नारायणसखत्वेन वा नानुसंदधानः प्रेमवैवश्येन प्राकृतनरमेव जानंस्तद्भावापलापाय क्षणमात्रेणैव योगारूढो बभूवेत्याह-विशोक इति । ब्रह्मसंपत्त्या प्राप्तया विशोकोभूदिति । तदभिमत्यनुसारेणैव सूतोक्तिः । वस्तुतस्तु प्रपंचगतां संपत्तिं त्यक्त्वा ब्रह्मसंपत्त्याऽप्रकटप्रकाशगतया श्रीकृष्णप्रियसखत्वप्राप्त्या विशोको विगतशोकः संछिन्नो द्वैतसंशयो देहेन सह मम संबंधोस्ति नास्ति वेति संदेहो यस्य सः । वस्तुतस्तु द्वैते सख्युः श्रीकृष्णात्सकाशात्स्वस्य छिन्नत्वे सति संशयः पूर्वमावयोः परस्परसख्यादैक्यमासीत्संप्रति द्वैतं वृत्तं तदधुना स कृष्णः किं पुनरपि सख्यसुखमयाद्वैते एव मां नेष्यति । किं वा पार्थक्यलक्षणद्वैतदुःखाब्धौ निमज्जयिष्यतीति भावनामयः संदेहः संछिन्नो यस्य सः । न च तस्य प्राकृतलोकस्येव पुनः संसार आशंकनीय इत्याह—लीन इति । स्पष्टम् । वस्तुतस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च ॥ स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥ ३२ ॥ पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च ताम् ॥ एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥ ३३ ॥

तत्र ब्रह्मसंपत्त्या वेदांतश्रवणेन ब्रह्माहमिति ज्ञानेन लीना प्रकृतिरविद्या यस्मिंस्तन्नैर्गुण्यं भवति न तु सुषुप्तिप्रलययोरिवाविद्याशेषः । तस्मान्नैर्गुण्याद्गुणकार्यलिंगनाशः । अलिंगत्वाच्चासंभवः सम्यग्भोगाय भवति पुनःपुनरिति संभवः स्थूलदेहस्तद्रहितस्ततश्च तत्परिच्छेदाभावात्संछिन्नो द्वैतलक्षणः संशयो भ्रमो यस्य स विशोको जात इति ॥ ३१ ॥ भगवतो मार्गमालक्ष्य यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं चानुस्मृत्य स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चलचित्तः ॥ ३२ ॥ तां दुर्विज्ञेयाम् । वक्ष्यति ह्येकादशे । "सौदामन्या यथाकाशे यांत्या हित्वाभ्रमंडलम् । गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः॥" ॥ इति । संसृतेरुपरराम जीवन्मुक्ता बभूव । देहं जहाविति वा ॥ ३३ ॥

लीनं सुश्लिष्टं दुर्लक्ष्यं यत्प्रकृतितः स्वभावादेव नैर्गुण्यं कृष्णसखत्वेन गुणातीतत्वं तस्मादेवालिंगत्वं लिंगदेहाभावस्तत एव न सम्यग्भवः संसारो यस्य सः । यद्वा महेंद्रांशभूतोऽर्जुनस्तु जीवन्मुक्तोभूदित्याह-विशोक इति । संछिन्नो द्वैतसंशयः प्रपंचानुसंधानगतशोकमोहादिर्यस्य सः । तत्र हेतुः । लीना ईश्वरे लीनी कृता या प्रकृतिस्तत एव यन्नैर्गुण्यं तस्मात् । अत एवालिंगत्वाल्लिंगदेहापगमादसंभवः अपुनर्जन्मेत्यर्थः । अत्र संदर्भः । ब्रह्मसंपत्त्या श्रीमन्नराकारब्रह्मसाक्षात्कारेण संछिन्न इयं मच्चेतसि स्फूर्तिरेव साक्षात्कारस्त्वन्य इति द्वैतसंशयो येन सः । तदा भगवत्प्राप्तौ नान्यव्रज्जन्मांतरप्राप्तिकालसंधिरप्यन्तरायोभवदित्याह-लीनेति । लीना पलायिता प्रकृतिर्गुणकारणं यस्मादेवंभूतं यन्नैर्गुण्यं तस्माद्धेतोः गुणकारणातीतत्वादित्यर्थः । तथैवालिंगत्वात्प्राकृतशरीररहितत्वाच्चासंभवो जन्मांतररहितः तस्मादनंतरं चक्षुष्याविर्भविष्यतीत्येवं स्फूर्तिविशेष इति भावः । अत एव कालिं प्रति श्रीपरीक्षिद्वचनं "यस्त्वं कृष्णे गते दूरं सह गांडीवधन्वनः"। इति।"एवं येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः" इति श्रीमुनिवृंदवाक्यं च। तस्मात्सर्वेषां पांडवानां तदीयानां च सैव गतिर्व्याख्येया ॥ ३१॥ मार्गं पदवीं चातुर्य्यपरिपाटीमिति यावत् । संस्थां वक्ष्यमाणसिद्धांतानुसारेणाप्रकटप्रकाशगतत्वेन सम्यक्स्थितिं स्वांतर्दशायां, तद्बहिर्दशायां तु नाशं च स्वः कृष्णधाम ."येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः" इत्युक्तत्वात् । तथा संपदः ऋतवो लोका इत्यादिभ्यश्च । युधिष्ठिर इत्युपलक्षणम् । पंचैव पांडवाः स्वःपथाय श्रीकृष्णधामपथं गंतुं मतिं चक्रुः । निभृतात्माऽन्यालक्षितचित्तव्यापारः । संदर्भस्तु संस्थां श्रीकृष्णस्य नित्यसामीप्येन सम्यक्स्थितिं वितर्क्येति वास्तवोऽर्थः । स्वःपदं श्रीकृष्णधामपरमेव । " ब्रह्मादयो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः " इति भगवद्वाक्यात् ॥ ३२ ॥ पृथा हि हिमालयगमनात्पूर्वमेव स्वगृहागतान्नारदाद्भावियदुकुलसंस्थां भगवदंतर्द्धानादिकं च श्रुत्वा जीवन्मुक्तिं प्राप्यैव धृतराष्ट्रेण साकं हिमालयं गतेति ध्येयमत्र । तथाहि–धं धैर्यं नाशयतीति धनमविवेकस्तं जयति विचारेणेति धनंजयो नारदः । यद्वा धं धैर्यं नयति प्रापयतीति । धनं विवेकस्तेन जयति सर्वत्रोत्कर्षं प्राप्नोतीति धनंजयः । धशब्दोपपदादंतर्भावितणिजर्थान्नशेर्नयतेश्च उ प्रत्ययः । "धं धैर्यं धनमुच्यते" इत्येकाक्षरीनाममालोक्तेः । धनशब्दोपपदाज्जयतेः खश् तत एव पूर्वपदस्य मुम् । धनंजयेनोदितं लोकदृष्ट्या नाशं वस्तुतस्त्वदर्शनमेव । ननु जीवन्मुक्ता चेत्तर्हि कथं हिमालयं गता । "तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा । ज्ञानसंप्राप्तिसमये विमुक्तो विशदाशयः" इत्यादिस्मृतेस्तत्राह–देहं जहौ वेति । देहहेतुं लिंगदेहं न तु स्थूलम् । महाभारतविरोधात् । यथाश्रुतार्थस्वीकारे तु कल्पांतरमाद्यैव व्यवस्था ज्ञेया ॥ ३३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाऽहरद्भुवो भारं तां तनुं विजहावजः ॥ कंटकं कंटकेनेव द्वयं चापीशितुः समम् ॥ ३४ ॥

यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः ॥ भूभारः क्षपितो येन जहौ तच्च कलेवरम् ॥ ३५ ॥

तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यमबुद्ध्वा तत्साम्यं वदतो मंदमतीन्प्रति वैलक्षण्यं स्पष्टयति द्वाभ्याम् । यया यादवरूपया तन्वा भुवो भारं कंटकेन कंटकमिवाहरत् । यादवतनुर्भूभारतनुश्चेति द्वयमपीश्वरस्य संहार्यत्वेन सममेव ॥ ३४ ॥ श्रीकृष्णमूर्तेर्विशेषमाह । यथेति । तान्यपि यथा धत्ते जहाति च। तदाह। यथा नटो निजरूपेण स्थितो यादवादीनामंतिमदशाश्रवणेन विषीदतः शौनकादीनाश्वासयन्सिद्धांतरहस्यमाह—ययेति।यया यादवादितन्वा भुवः स्वपादभूताया भारं कंटकेन सूच्यग्रेण कंटकमिवाहरत् तामेव तनूं विजहौ । देवदत्तो वसनं विजहाविति वस्त्रसंगा द्विच्युती चकारेत्यर्थः । न तु यया नित्यं क्रीडति तामपीति भावः । तेनांशावतरणसमये ये देवा नित्यभूतेषु यादवेषु प्रविष्टास्त एव तेभ्यो योगबलेन निष्कास्य प्रभासं गमितास्तद्देहत्यागं लोकान्माययैव दर्शयता भगवता मधुपानानंतरं देवरूपीकृताः स्वर्गं प्रापयामासिरे इत्येकादशांतव्याख्यानुसृत्या ज्ञेयम् । नित्यलीलापरिकरा यादवास्तु प्रापंचिकलोकाऽलक्षिताः श्रीकृष्णेन समं द्वारकायामेव यथापूर्वमेव खेलंतीति भागवतामृतोक्तसिद्धान्तादव गंतव्यम् । द्वयमिति । भूभारभूता असुरा यादवादिरूपा देवाश्चेति द्वयमीशितुः परमेश्वरस्य सममेव । किं तु दृष्टांते कंटकत्वेन साम्येपि कारणभूतस्य सूच्यग्रस्योपकारकत्वेनांतरंगत्वं कर्मभूतस्य कंटकस्यापकारकत्वेन बहिरंगत्वमित्यपि ज्ञापितम् । "सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च कंटकः" इत्यमरः । संदर्भस्तु ययेति तनुरूपकलेवरशब्दैरत्र श्रीभगवतो भूभारजिहीर्षालक्षणो देवादिपिपालयिषालक्षणश्च भाव एवोच्यते । यथा तृतीये विंशतितमेऽध्याये तनुशब्दैर्ब्रह्मणो भाव एवोक्तः । यदि तत्रैव तथा व्याख्येयं तदा सुतरामेव श्रीभगवतीति ततश्च तस्य भावस्य भगवति तदाभासरूपत्वात् । कंटकदृष्टान्तस्तु सुसंगत एव । तथा द्वयमेवेशितुः साम्य मपि तत्तु तृतीयसंदर्भे विवृतमस्ति ॥ ३४ ॥ कृष्णस्त्वैन्द्रजालिक नट इव स्वदेहत्यागं मिथ्याभूतमेव प्रत्याययामासेत्याह—यथेति । भगवान्धत्ते जह्यात् । ननु धृत्वा जह्यादिति तनुत्यागकालेपि तत्तदनुधारणमस्त्येव । ननु कथमेतद्बोद्धव्यमित्यत आह—यथा नट ऐन्द्रजालिकः छेददाहमूर्च्छादिभिः स्वदेहं त्यजति तस्य त्यागं सर्वान्दर्शयति प्रत्याययति च अथ च स्वदेहं धत्त एव न तु म्रियते तथैव मत्स्यादिरूपाणि मत्स्यादिशरीराणि स्वीयानि भगवान्धत्ते जह्यात् । दधान एव जहाति तेन नटस्य शरीरधारणं सत्यमेव तत्त्यागस्तु मिथ्यैव यथा तथैव भगवतोऽपि मत्स्यादिस्वीयशरीरधारणं सत्यमेव तत्त्यागो मिथ्यैवेत्यर्थः । यथा च मत्स्यादिशरीराणि जहाति तथैव येन भूभारः क्षपितस्तच्च कलेवरं जहाविति श्रीकृष्णकलेवरत्यागो मिथ्यैवेति नराकृतिपरब्रह्मत्वादिकमपि नटरूपनरधर्ममेव भगवान्करोति न तु तत्त्वेन । स्वदेहस्याभौतिकत्वेन नाशासंभवात् । तदुक्तं महाभारते "न भूतसंघसंस्थानो देहोस्य परमात्मनः" इति । बृहद्वैष्णवेपि "यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्वस्माद्बहिः कार्यः श्रौतस्मार्त्तविधानतः ॥ मुखं तस्यावलोक्यापि सचैलः स्नानमाचरेत्" । इति । वैशंपायनसहस्रनामनि च— "अमृतांशोऽमृतवपुः" इति । अमृतं मरणवार्जितं वपुर्यस्येति तत्र श्रीशंकराचार्यव्याख्या च प्रसिद्धा । अत्र श्लेषेण जह्यादिति जहातेस्त्यागार्थत्वात्त्यागस्य च दानार्थत्वात् । वैकुंठादि धाम तेभ्यो भक्तेभ्यः स्वशरीरप्रविष्टचरं नारायणादिरूपं तेषां पालनार्थं ददावित्येकादशांते व्याख्यास्यते इति विश्वनाथः । संदर्भस्तु मत्स्यादिरूपाणि मत्स्याद्यवतारेषु तत्तद्भावान् । अथ नटदृष्टान्तेपि नटः श्राव्यरूपका भिनेता व्याख्यातं तैः प्रथमस्यैकादशे 'नटा नवरसाभिनय चतुरा' इति । ततो यथा श्राव्यरूपकाभिनेता नटः नटस्वरूपेण स्ववेशेन च स्थित एव पूर्ववृत्तमभिनयेन गायन् नायकनायिकादिभावं धत्ते जहाति च तथेति । अथ वा "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतावाक्येन "योगिभिर्दृश्यते भक्त्या नाभक्त्या दृश्यते क्वचित् । द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः" इति पाद्मोत्तरखंडनिर्णयेन "मल्लानामशनिः" इति श्रीभागवतदर्शनेन "आत्मविनाशाय भगवद्धस्तचक्रांशुमालोज्ज्वलमक्षयतेजःस्वरूपं परमं ब्रह्मभूतमपगतद्वेषादिदोषो भगवंतमद्राक्षीत्" इति शिशुपालमुद्दिश्य श्रीविष्णुपुराणगद्येन चासुरेषु यद्रूपं स्फुरितं तत्तस्य स्वरूपं न भवति किं तु मायाकल्पितमेव । स्वरूपे दृष्टे द्वेषश्चापयातीति । ततश्चासुरेषु स्फुरंत्या यया तन्वा भुवो भाररूपमसुरवृंदमहरत्तां तनुं विजहौ । पुनस्तत्प्रत्यायनं न चकारेत्यर्थः । भक्तिदृश्या तनुस्तु तस्य नित्यसि

यदा मुकुंदो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ॥ तदाहरेवाऽप्रतिबुद्धचेतसामधर्महेतुः कलिरन्ववर्तत ॥ ३६ ॥ युधिष्ठिरस्तत्प
रिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तदात्मनि ॥ विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥३७॥ स्वराट् पौत्रं विनयिनमात्मनः
सुसमं गुणैः ॥ तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ॥ ३८ ॥ मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥ प्राजापत्यां निरूप्येष्टिमग्नीनपिबदी
श्वरः ॥ ३९ ॥ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकम् ॥ निर्ममो निरहंकारः संछिन्नाशेषबंधनः ॥ ४० ॥

रूपांतराणि धत्तेंऽतर्धत्ते च तथा तदपि कलेवरं जहौ । अंतरधादित्यर्थः ॥ ३५ ॥ युधिष्ठिरस्य स्वर्गारोहप्रसंगाय कलिप्रवेशमाह । यदेति । स्वतन्वा जहौ सतनोरेव वैकुंठा
रोहात् । श्रवणार्हा सती कथा यस्य तदा यदहस्तस्मिन्नेव । अहरिति लुप्तसप्तम्यंतं पदम् । अप्रतिबुद्धचेतसामविवेकिनामिति विवेकिनां तु न प्रभुरित्युक्तम् । अन्ववर्ततेति पूर्व
मेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ॥ ३६ ॥ बुधो युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसरणं विलोक्य । कथंभूतम् । लोभाद्यधर्मचक्रं यस्मिन् । जिह्मं कौटिल्यम् ।
पर्यधात्तदुचितं परिधानमकरोत् ॥ ३७ ॥ आत्मनः स्वस्य गुणैः सुसममतिसदृशं तोयं सर्वतः स्थितं समुद्रोदकमेव नीवी परिधानविशेषो यस्यास्तस्या भूमेः पतित्वेनाभिषि
क्तवान् ॥ ३८ ॥ वज्रमनिरुद्धस्य पुत्रम् । निरूप्य कृत्वेत्यर्थः । अपिबदात्मन्यारोपयामास । ईश्वरः समर्थः ॥ ३९ ॥ संछिन्नान्यशेषाणि बंधनान्युपाधयो येन ॥४०॥

द्वैवेत्याह–अज इति । "देवक्यां देवरूपिण्याम्" इत्यादेः । "कृष्णश्च तत्र च्छन्दोभिः" इत्यत्र गोलोकाधिष्ठातृत्वनिर्देशाच्च । ततश्च यथा नट ऐंद्रजालिकः कश्चित्स्वभक्षकानां बकादीनां निग्रहाय मत्स्याद्याकारान्धत्ते स्वस्मि
न्प्रत्याययति इति तन्निग्रहे सति यथा च तानि जहाति तथा सोयमजोऽपि येन मायिकेन लक्ष्यतां प्रापितेन रूपेण भूभाररूपोऽसुरवर्गः क्षपितस्तद्वर्गं क्षपितवानित्यर्थः । तच्च कलेवरमजो जहौ अंतर्द्धापितवानित्यर्थः ।
किं तु गीतापद्ये "योगमायासमावृतः" इति सर्पकंचुकवन्मायारचितवपुरात्मा समावृत इत्यर्थः ॥ ३५ ॥ तनुत्यागस्यावास्तवत्वं स्पष्टयन्नाह–यदा स्वतन्वा जहौ स्वतनोरेव वैकुंठारोहादिति स्वामिचरणाः । त्यागोऽत्र
स्वतनुकरणक एव न तु स्वतन्वा सह महीं जहाविति कुव्याख्यावकाशः । "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात् । "प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायांतरधाद्यस्तु स्वबिम्बं
लोकलोचनम् " इत्यत्रापि लोकलोचनरूपं स्वबिंबं निजमूर्त्तिं प्रदर्श्य पुनरादायैव चान्तरधात् । न तु त्यक्त्वेति संदर्भश्च तदा यदहस्तदभिव्याप्येत्यर्थः । अप्रबुद्धचेतसामिति । चौरोहि निद्रितस्यैव धनं हरति
प्रतिबुद्धाद्बिभेति चेत्यर्थः ॥ ३६ ॥ युधिष्ठिर इत्यत्र तस्य त्यागे कलिपरिसर्पणं तूद्दीपनमात्रम् । वस्तुतस्तु भगवत्पार्श्वकामत्वमेव कारणं ज्ञेयम् । पर्यधान्निश्चितवान् । "प्रणिधानं तु निक्षेपः
परिधानं तु निश्चयः" इत्यभिधानादिति तदर्थः । आदिना परुषादिग्रहः समासे ॥ ३७ ॥ विनयो नम्रता तद्वान्विनयी तं, सुसमं सोः पूजायां षत्वनिषेधः "सुः पूजायाम्" इति कर्मप्रवचनीयविधेः । स्वराट् चक्रवर्त्ती
युधिष्ठिरः । "स्वराट् सम्राट् चक्रवर्ती सार्वभौमश्च राजराट् । सामंतेशोऽखिलेशश्च राजसूयकरो वशी" इति निरुक्तिः ॥३८॥ इत्यर्थ इति । धातूनामनेकार्थत्वादिति भावः । "प्राजापत्या भवेदिष्टिस्सर्वस्वं यत्र दक्षिणा ।
परिव्रज्याप्रक्रमे सा विहिता पूर्वसूरिभिः" इत्युक्तेः । यद्यपि "ब्राह्मणः परिव्रजेत्" इति श्रुतेर्ब्राह्मणस्यैव परिव्रज्या विहिता युधिष्ठिरस्य क्षत्रियत्वात्स कथं तां चकारेति चेत् । तत्र देवलस्मृत्यवलोकनतो व्यवस्था लभ्यते ।
तथाहि "मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् । बाहुजातोरुजातानां नायं धर्मो विधीयते" इत्यत्र हि विष्णुलिंगं दंडकमंडल्वादि तद्धारणमेव क्षत्रियवैश्ययोर्निषिद्धं न तु त्यागरूपपरिव्रज्यानिषेध इति । एतच्चाद्यपद्यव्या
ख्याशत्यां बहुधा प्रपश्चितमत उपरम्यते । समर्थो राज्यादित्यागे शक्तः ॥ ३९ ॥ तत्र गृहे । आदिना किरीटादिग्रहः ॥४०॥ तदेव संछिन्नाशेषबंधनत्वमेव । युधिष्ठिरोऽप्यर्जुनवद्बहिरनुसंधाननिवृत्त्यर्थं यतते स्मेत्याह–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचं जुहाव मनसि तत्प्राण इतरे च तम् ॥ मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ॥४१॥ त्रित्वे हुत्वाऽथ पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः ॥ सर्वमात्मन्यऽजुहवीद्ब्रह्मण्यात्मानमव्यये ॥ ४२ ॥ चीरवासा निराहारो बद्धवाङ् मुक्तमूर्धजः ॥ दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥ ४३ ॥ अनवेक्षमाणो निरगादशृण्वन्बधिरो यथा ॥ उदीचीं प्रविवेशाऽऽशां गतपूर्वां महात्मभिः ॥ हृदि ब्रह्मपरं ध्यायन्नाऽऽवर्तेत यतो गतः ॥ ४४॥ सर्वे तमनु निर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥ कलिनाऽधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ ४५ ॥ ते साधुकृतसर्वार्था ज्ञात्वाऽऽत्यंतिकमात्मनः ॥ मनसा धारयामासुर्वैकुंठचरणांबुजम् ॥ ४६ ॥

तदेव दर्शयति द्वाभ्याम् । वाचमित्युपलक्षणम् । सर्वेंद्रियाणि मनसि प्रविलापितवानित्यर्थः । तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् । तं च प्राणमितरेऽपाने तेनाकर्षणात् । अपानव्यापार उत्सर्गस्तत्सहितमपानं मृत्यौ तदधिष्ठातृदेवतायाम् । अनेनैव वागादिष्वपि तत्तत्कर्मसाहित्यं ज्ञेयम् । तं मृत्युं पंचत्वे पंचभूतानामैक्य देहे देहस्यैव मृत्युर्नात्मन इति भावितवानित्यर्थः । अजोहवीदिति यङ्लुगंताल्लुङि रूपम् ॥ ४१ ॥ त्रित्वे गुणत्रये पंचत्वं । देहम् । तच्च त्रित्वमेकत्वेऽविद्यायाम् । सर्वं सर्वारोपहेतुमविद्यामात्मनि जीवे । अजोहवीदिति वक्तव्येऽजुहवीदित्यार्षम् । एवं शोधितमात्मानं ब्रह्मण्यव्यये कूटस्थे न तस्यान्यत्र लय इत्यर्थः ॥ ४२ ॥ तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह । चीरवासा इति द्वाभ्याम् । बद्धवाङ् मौनी ॥ ४३ ॥ अनवेक्षमाणोऽनुजादिप्रतीक्षामकुर्वन् । आशां दिशम् । गतपूर्वां पूर्वं प्रविष्टाम् । महात्मभिर्विवेकवद्भिः । यतो यां दिशम् ॥ ४४ ॥ अधर्मो मित्रं यस्य तेन ॥ ४५ ॥ साधुकृताः सर्वेऽर्था धर्मादयो यैः अत एव वैकुंठस्य चरणांबुजमेवात्यंतिकं शरणं ज्ञात्वा ॥ ४६ ॥

वाचमिति । इत्यर्थ इति।मनोधीनवृत्तित्वात् । "यन्मनसा मनुते तद्वाचा वदति" इति श्रुतेरिति भावः । प्राण एव समर्पयामास जुहोतेर्दानार्थत्वात् । हे मनस्तुभ्यमेवेंद्रियाणि दत्तानि । तवैवैतानि संतु । सांप्रतं न ममैतैः प्रयोजनमिति भावयामास । तेषु स्वत्वाभावेन वस्तुतः संप्रदानाभावान्न चतुर्थी । एवमग्रेपि सर्वत्र ज्ञेयम् । नन्वहं कस्य भवामीत्यत आह–तन्मनः प्राणे : । इत्यर्थ इति । हे मृत्यो त्वं देहस्यैव भवेति भावितवान् आत्मनो नित्यत्वान्मरणं नास्तीति भावः ॥४०॥४१॥ इत्यर्थ इति । ब्रह्मणः परमावधिभूतत्वात् "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" इति श्रुतेरयंभावः ततश्च पृथिव्या भूतपंचकं क स्थास्यतीत्यत आह–त्रित्व इति । अविद्यायां व्यष्टिरूपे मायांशे । हे जीव तवैतन्मायांशकृतमुपाधित्रिकमेतरमात्त्वं पृथग्भूत एव विराजस्व । नैतस्याधीनो भवेति भावः । एवं परीक्षिति स्वराज्यभारं वज्रे च. मथुरां समर्प्य तत्संबंधमात्मनो दूरीकृत्य बहिर्निश्चिन्त इवेन्द्रियादीन्यपि तत्तद्वशायितारि योग्ये समर्प्यान्तर्निश्चिन्तो बभूव । तथा हि । ब्रह्मणः श्रीकृष्णस्यैव जीवस्यैव व्यष्टिर्माया तस्या एव गुणत्रयं गुणत्रयस्यैव पंचभूतात्मको देहो देहस्यैव मृत्युर्मृत्योरेवापानोऽपानस्यैव प्राणः प्राणस्यैव मनो मनस एवेंद्रियाणि इंद्रियाणामेव विषया राज्यादिभोगास्तेषां च भोक्ता संप्रति परीक्षिदेव न त्वहमिति विचारयामास । किं तु भगवन्नित्यपरिकरत्वान्नित्याविग्रहाणामपि तदादीनामात्मानं प्राकृतशरीरं मत्वैवायं विचारोप्यकिञ्चित्कर एवेति ज्ञेयम् ॥ ४२ ॥ तदेवं सर्वथा निश्चिन्तस्य तस्य बाह्यस्थितिमाह–चीरेति । "चीरं स्याद्गोस्तने वस्त्रभेदे चीवरवल्कयोः" इति कोशाच्चीवरवासा वल्कलवस्त्रः निराहारो मनुष्यान्नवर्जितः ॥४३॥ गता पूर्वं या सा गतपूर्वा ताम् । प्रथमार्थे बहुव्रीहिः । यद्वा पूर्वं गता गतपूर्वा । राजदन्तादित्वात्परनिपातः । महात्मभिर्विवेकवद्भिः । विश्वनाथस्तु अधुना न्यस्तसमस्तभारोहमव्यग्रः क्वापि विविक्ते देशे श्रीकृष्णप्राप्त्यर्थं "मन्मना भव मद्भक्तः" इति भगवदुपदिष्टमेवोपायं करिष्यामीति निश्चिततत्त्वस्य चेष्टामाह–उदीचीमिति । परं ब्रह्म श्रीकृष्णं ध्यायन्ध्यातुमित्याह । तीर्थस्तु यावच्छरीरपातं भुवं प्रदक्षिणीकृत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे ॥ तस्मिन्नारायणपदे एकांतमतयो गतिम् ॥ ४७ ॥ अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ॥ वि
धूतकल्मषाः स्थानं विरजेनात्मनैव हि ॥४८॥ विदुरोपि परित्यज्य प्रभासे देहमात्मवान् ॥ कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥४९॥
द्रौपदी च तदाऽऽज्ञाय पतीनामनपेक्षिताम्॥वासुदेवे भगवति ह्येकांतमतिराप तम्॥५०॥यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामिति संप्रयाणम्॥
शृणोत्यऽलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिम् ॥५१॥ इति श्री भा०म०प्रथ०पांडवस्वर्गारोहणं नाम पंचदशोऽध्यायः॥१५॥
सूत उवाच ॥ ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ॥ यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्र महद्गुणस्तथा ॥१॥

कथंभूते पदे । विधूतकल्मषाणामास्थानं निवासस्थानं यत्तस्मिन् । विरजेनात्मनैव गतिं प्रापुर्न तु षोडशकलेन लिङ्गेन । गतेर्वा विशेषणम् । विरजेनात्मनैवावस्थानरूपां गतिं ते विधूतकल्मषाः प्रापुरिति ॥ ४७ ॥ ४८ ॥ विदुरोऽपि तीर्थान्यटन्प्रभासे श्रीकृष्णावेशेन कृष्णे चित्तमावेश्य देहं परित्यज्य तच्चित्त एव संस्तदानीं नेतुमागतैः पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ॥ ४९ ॥ आत्मानं प्रत्यनपेक्षितां तदा ज्ञात्वा तमाप ॥ ५० ॥ इति एवं यत्संप्रयाणम् । अलमतिशयेन स्वस्त्ययनं मंगलास्पदम् । अलं पवित्रं च ॥ ५१ ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ ततश्च षोडशे भूमिधर्मयोः कलिखिन्नयोः ॥ संवादे वर्ण्यते प्राप्तिः पालकस्य परीक्षितः ॥ १ ॥ द्विजवर्याणां शिक्षया । सूत्यां जन्मनि । अभिजातकोविदा जातकर्मविदः । हे विप्र महतां गुणा यस्मिन्सः ॥ १ ॥

निरंतराटनमेव संकल्प्य हृदि परं ब्रह्म ध्यायन्महात्मभिः क्षत्रियैर्गतपूर्वामुत्तरां दिशं प्रविवेश । वीरगतिं गमिष्यन् यतो यां वीरगतिङ्गतो वीरसंन्यासं प्राप्तः पुनर्नायाति तामित्याह ॥ ४४ ॥ ४५ ॥ ४६ ॥ तस्मिन्निति । तच्छब्दानुरोधेन यच्छब्दाध्याहारः । अत्र पक्षे विधूतकल्मषाः स्थानमितिच्छेदः । ''खर्परे शरि'' इति पाक्षिको विसर्गलोपः । स्थानमित्यजहल्लिंगत्वात्क्लीबत्वम् । तदित्यादिपद्यद्वयस्यैकोन्वयः ॥ ४७ ॥ संदर्भस्तु विधूतकल्मषं यत् आस्थानं नित्यश्रीकृष्णप्रकाशास्पदं तदीया सभा । आत्मना स्वशरीरेणैव । तत्र हेतुः । विरजेनाप्राकृतेन । हिशब्दोऽसंभावनानिवृत्त्यर्थः । यद्वा साधुना पुण्येन कर्मणा कृताः छिन्नाः सर्वेऽर्थाश्शब्दादिविषया यैस्ते । 'कृती छेदने' धातुः ॥ ४८ ॥ विदुरस्य भूतपूर्वां धृतराष्ट्रादिदर्शनार्थवनगतयुधिष्ठिरदेहं प्रवेक्ष्यमाणस्य गतिमाह—प्रकृष्टा चासौ भा दीप्तिर्बुद्धिर्वेति प्रभा तयाऽऽस्ते सदा तिष्ठति तामसत्याददाति वेति प्रभासो युधिष्ठिरस्तस्मिन्नात्मवान् प्रवेशितनिजात्मस्वरूपः सन् कृष्णावेशेन कृष्णानुरागेण देहत्यागावसरे तच्चित्त एव श्रीकृष्णांघ्रिसमर्पितचित्तः देहं त्यक्त्वा श्रीकृष्णनित्यपारिकरत्वात्पितृभिः श्रीमैत्रेयेण बोधितः सन्स्वस्य क्षयं नित्यनिवासं श्रीकृष्णं ययौ प्राप बोधित इति शेषः । 'अस गतिदीप्त्यादानेषु' । मैत्रेयस्य ज्ञानदातृत्वात्पितृत्वं बहुत्वं गुरुत्वात् । '' एकत्वं न प्रयुंजीत गुर्वात्मनि कदाचन'' इति स्मृतेः । ''अन्नदाता भयत्राता यश्च विद्यां प्रयच्छति । जनको ह्युपनेता च पंचैते पितरः स्मृताः ॥'' इति स्मृतेश्च । यथाश्रुतार्थांगीकारे तु कल्पांतरीयैव व्यवस्थेति । संदर्भस्तु विदुरस्य यमलोकगतिः स्वाधिकारपालनार्थं लीलया कायव्यूहेनेति गम्यते । तदित्थं भारतादिविरोधोपि न स्यादिति ॥ ४९ ॥ आत्मानं प्रति अनपेक्षमाणानां तत् श्रीकृष्णसंगमनमाज्ञाय सम्यग्ज्ञात्वा वासुदेवे श्रीवसुदेवनंदने । हि प्रसिद्धौ । यस्मिन्नेकांतमतिस्तमेव प्राप्तवती । अत्रान्ये न पथा गच्छतोप्येताञ्छ्रीद्वारकानाथः स्वयं स्वभक्त्या स्वसमीपमेवानीतवानिति गम्यते । ''नित्यं संनिहितः'' इत्याद्युक्तेः । अत्र श्रीमहाभारतोक्तरीत्या मार्गे पतितां तां युधिष्ठिरादयो नाद्रिरे । सा च तदैव श्रीकृष्णावेशितचित्ता तमापेति ध्येयम् ॥ ५० ॥ ५१ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ खिन्नयोः खेदं प्राप्तवतोः (१) ततः पांडवनिर्याणानंतरम् । हे विप्रेति । ब्राह्मणा हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स उत्तरस्य तनयामुपयेम इरावतीम् ॥ जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् ॥ २ ॥ आजहाराश्वमेधांस्त्रीन्गंगायां भूरिदक्षिणान् ॥ शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥ ३ ॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् ॥ नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा ॥ ४ ॥ शौनक उवाच ॥ कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ॥ नृदेवचिह्नधृक्छूद्रः कोसौ गां यः पदाऽहनत् ॥ ५ ॥ तत्कथ्यतां महाभाग यदि कृष्ण कथाश्रयम् ॥ अथ वास्य पदांभोजमकरंदलिहां सताम् ॥६॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥ क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छताम् ॥ ॥ ७ ॥ इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥ न कश्चिन्म्रियते तावद्यावदास्त इहांऽतकः ॥ ८ ॥ एतदर्थं हि भगवानाहूतः परमर्षिभिः ॥ अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ ९ ॥ मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै ॥ निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ १० ॥

जनमेजयादीनित्यक्षराधिक्यंछांदसम् । उत्पादयन्निति पाठे हेतौ शतृप्रत्ययः।सुतानुत्पादयितुमिरावतीमुपयेम इति वाक्ययोजना॥ २॥आजहार कृतवानित्यर्थः।शारद्वतं कृपम् यत्र येष्वश्वमेधेषु देवा दृष्टिगोचरा बभूवुः॥ ३॥ निजग्राह निगृहीतवान् । कलिमेव निर्दिशति । नृपेति ॥४॥ कस्य हेतोरिति। अयमर्थः।कलिं कस्माद्धेतोः केवलं निजग्राह न तु हतवान्यतोऽसौ शूद्रः कोऽतिकुत्सितः यो गां पदाहनदहन्निति ॥ ५ ॥ अस्य विष्णोः पदांभोजयोर्यो मकरंदस्तं लिहंत्यास्वादयंति ये तेषां सतां महतां वा कथाश्रय मिति समासान्निष्कृष्टस्यानुषंगस्तर्हि कथ्यताम् ॥ ६ ॥ नो चेत्किमन्यैरसद्भिरालापैर्येर्यैरायुषो वृथा क्षयः । अस्माकमयं सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह सार्धा भ्याम् । क्षुद्रमल्पमायुर्येषाम् अतो मर्त्यानां मरणधर्मवताम् । तथाप्यमृतं सत्यं मोक्षमिच्छताम् ॥ ७ ॥ यो मृत्युः स इह सत्रे शमितुरिदं शामित्रं कर्म पशुहिंसनं तदर्थमुपहूतः। ततः किमत आह । न कश्चिदिति ॥ ८ ॥ ततोऽपि किमत आह । अहो नृलोके हरिलीलामृतं वचः पीयेतेत्येतदर्थम् । हरिलीलैवामृतं यस्मिंस्तत् ॥ ९ ॥ तदभावे वृथैवे

सर्वकल्याणहेतवस्संति । विशेषेण प्रांति पूरयंति स्वसेवकाभिलषितमिति निरुक्तेः । अतस्त्वं मदभिलषितसत्पुरुषसंगादिसंपादनार्थमेव विज्ञतरोपि सन्मां पृच्छसीति भावः । ''अभिजातः कुलीने स्यान्याय्यप ण्डितयोस्त्रिषु'' इति कोशात् । पंडितापण्डिता अत्राभिजातपदेन ग्राह्याः सर्वशास्त्रनिपुणा इत्यर्थः । यद्वाऽभितो जातके होराशास्त्रे कोविदाः । पृषोदरादित्वात्ककारलोपः ॥ १ ॥ अडभावश्चार्षः ॥ २ ॥ इत्यर्थ इति । अनेकार्थत्वादुपसर्गवशाद्वा हरतेः करणार्थतेति भावः ॥ ३ ॥ क्वचिदेकान्ते ॥ ४ ॥ शूद्रकः कुत्सार्थे कप्रत्ययः । कुत्सितत्वाद्धंतुमेवोचित इति भावः ॥ ५ ॥ तत्क लिनिग्रहरूपं कर्म । हे महाभागेति । श्रीकृष्णकथासेविन एव महाभागा इति भावः । ''ते धन्यास्ते महाभागा येषां कृष्णकथोत्सवः'' इति संहितोक्तेः । समासान्निकृष्टस्यापि ''भीष्मद्रोणप्रमु खतो ह्यन्येषां च महीक्षिताम्'' इतिवत्संबन्धो भवत्येव क्वचित् । मदं हर्षं करोतीति मकरः पृषोदरादिस्तं भावं ददातीति मकरंदः सेवनं तं लिहत्यास्वादयन्तीति तेषाम् ॥ ६ ॥ ऋतं सत्यं श्रीकृष्णं वा ॥ ७ ॥ ततो मृत्योराह्वानात् न म्रियतेति । निर्विघ्नता सूचिता ॥ ८ ॥ ततोपि मरणाभावादपि ॥ ९ ॥ तदभावे हरिलीलामृतपानाभावे । अत्र केचिदर्द्धश्लोकमाधिकं पठन्ति ।'' यस्मिन्पीते कृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ यदा परीक्षित्कुरुजांगले वसन्कलिं प्रविष्टं निजचक्रवर्तिते ॥ निशम्य वार्तामनतिप्रियां ततःशरासनं संयुगशौंडिराददे ॥११॥ स्वलं
कृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमाश्रितः पुरात् ॥ वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥ भद्राश्वं केतुमालं
च भारतं चोत्तरान्कुरून् ॥ किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिम् ॥ १३ ॥ तत्रतत्रोपशृण्वानः स्वपूर्वेषां महात्मनाम् ॥ प्रगीयमानं
च यशः कृष्णमाहात्म्यसूचकम् ॥ १४ ॥ आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः ॥ स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे ॥ १५ ॥
तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः ॥ महाधनानि वासांसि ददौ हारान्महामनाः ॥ १६ ॥ सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुग
मनस्तवनप्रणामम् ॥ स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे ॥ १७ ॥ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहम् ॥
नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥१८॥ धर्मः पदैकेन चरन्विच्छायामुपलभ्य गाम् ॥ पृच्छति स्माऽश्रुवदनां विवत्सामिव मातरम् ॥१९॥

जीवनमित्याह । मंदस्यालसस्य । नक्तं रात्रौ यद्वय आयुस्तन्निद्रया ह्रियते । दिवा अह्नि च यद्वयस्तद्व्यर्थकर्मभिरपह्रियते ॥ १० ॥ तत्र तावत्कलिनिग्रहप्रसंगमाह ।
तदेति । यदा निजचक्रवर्तिते स्वसेनया पालिते देशे कलिं शुश्राव तदा तामनतिप्रियां वार्तां किंचित्प्रियां च युद्धकौतुकसंपत्तेर्निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे । संयुगे
शौंडिर्युद्धे प्रगल्भः । पाठांतरे युद्धे शौरिः कृष्णतुल्यः ॥ ११ ॥ ततश्च दिग्विजयाय निर्गतः ॥ १२ ॥ भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः समुद्रलग्नानि वर्षाणि । मेरोः
सर्वतः इलावृतम् । तत उत्तरतो रम्यकं हिरण्मयं च दक्षिणतो हरिवर्षं किंपुरुषं च तानि विजित्य ॥ १३ ॥ प्रगीयमानं यशः । यश आदीनि शृण्वंस्तेभ्यो ददाविति तृतीये
नान्वयः ॥ १४ ॥ १५ ॥ १६ ॥ किं च स्निग्धेषु पांडवेषु विष्णोर्यानि सारथ्यादीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन् । नृपतिः परीक्षि
द्विष्णोश्चरणारविंदे भक्तिं करोति स्म । पारषदमिति रेफषकारयोर्विश्लेषश्छांदसः । तत्र पार्षदं सभापतित्वम् । सेवनं चित्तानुवृत्तिः । वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जाग
रणम् ॥ १७ ॥ वृत्तिमनुवर्तमानस्य सतः । नातिदूरे शीघ्रमेव ॥ १८ ॥ धर्मो वृषरूपः । विच्छायां हतप्रभाम् । गां गोरूपां पृथ्वीम् । विवत्सां नष्टापत्याम् ॥ १९ ॥

सर्वमिष्टापूर्त्तादिकं भवेत्'' इति ''नृलोक एतदेव सारम्'' इति मंदस्यापि प्रज्ञाबाहुल्यादनेकशास्त्रश्रवणादिना शुभं स्यादित्यत आह—मंदप्रज्ञस्येति । व्यर्थकर्मभिर्हिरण्याद्यर्थान्वेषणकर्मभिः । चो हेतौ । तस्मा
न्निद्रादिजयेन हरिकथा त्वया कथ्यतामिति भावः ॥ १० ॥ तत्र तावदिति वाक्यालंकारे । ''चक्रः कोके पुमान्क्लीबं व्रजे सैन्यरथांगयोः ॥ राष्ट्रे दंभांतरे कुंभकारोपकरणास्त्रयोः'' इति मेदिनी । शुश्रावेति शेषः ।
अनतिप्रियां राष्ट्रविप्लवरूपां दुष्टनिग्रहार्थमित्युक्त्या कलिनिग्रह एवायातीति । तस्य स्वयं दुष्टत्वादन्येषां दुष्टतापादकत्वाच्च । पाठांतरे संयुगशौरिरिति पाठे । शौरिः श्रीकृष्णः ॥ ११ ॥ ततश्च शरासनग्रहणोत्तरञ्च
मृगेन्द्रध्वजं सिंहलाञ्छनध्वजम् । चतुरंगिण्या सेनया ॥ १२ ॥ बलिं करम् । '' बलिः पूजोपहारयोः'' इति विश्वः ॥ १३ ॥ तत्रतत्र वर्षेषु स्वपूर्वेषां पांडवानाम् ॥ १४ ॥ कथं माहात्म्यं सूच्यत इति । तत्किञ्चि
दाह—आत्मानमिति । तेषामुभयेषाम् ॥ १५ ॥ क्वचित्पुस्तके—''यत्किंचिदस्य सैन्येषु वसुमात्रमनुत्तमम् । तत्सर्वमददात्प्रीतः कृष्णगाथाहृताशयः'' इति प्रक्षिप्तश्लोकोऽप्यस्ति । तेभ्य इत्यादिश्लोकात्परत्र तेभ्यो गायकेभ्यः
॥ १६ ॥ भक्तवात्सल्यमाह—किं चेति । शृण्वन्निति शेषः ॥ १७ ॥ तस्य परीक्षितः पूर्वेषां पित्रादीनां वृत्तिं वृत्तमाचरितमिति यावत् । नातिदूरेऽस्मद्दृष्टिगोचर एव । निबोध शृणु ॥ १८ ॥ धर्म इति । युगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

:धर्म उवाच ॥ कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायाऽसि म्लायतेषन्मुखेन ॥ आलक्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंचनांब ॥ २० ॥ पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणम् ॥ अथोऽसुरादीन्हृतयज्ञभागान्प्रजा उतस्विन्मघवत्यवर्षति ॥ २१ ॥ अरक्ष्यमाणाः स्त्रिय उर्वि बालाञ्छोचस्यथो पुरुषादैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥ २२ ॥ किं क्षत्रबंधून्कलिनोपसृष्टान्राष्ट्राणि वा तैरवरोपितानि ॥ इतस्ततो वाऽशनपानवासःस्नानव्यवायोन्मुखजीवलोकम् ॥ २३ ॥ यद्वांऽब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि ॥ अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबितानि ॥ २४ ॥ इदं ममाऽऽचक्ष्व तवाऽऽधिमूलं वसुंधरे येन विकर्शितासि ॥ कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमंब सौभगम् ॥ २५ ॥

ते आत्मनो देहस्य यद्यपि बहिरामयो न लक्ष्यते तथाप्यंतर्मध्ये आधिः पीडा यस्यास्तां त्वामालक्षये केन यतो विच्छायासि । अंत ईषन्म्लायता वैवर्ण्यं भजता मुखेन लिंगेन तत्र कारणानि कल्पयन्पृच्छति । दूरे बंधुमित्यादिपंचभिः । दूरे स्थितं बंधुम् ॥ २० ॥ त्रिभिः पादैर्न्यूनमत एवैकपादं मा मां मल्लक्षणं जनमित्यर्थः । वृषलैरित ऊर्ध्वं भोक्ष्यमाणम् । पुंस्त्वमात्मपदविशेषणत्वात् । हृता यज्ञभागा येषां तान् । यज्ञाद्यकरणात् ॥ २१ ॥ हे उर्वि पृथ्वि भर्तृभिररक्ष्यमाणाः स्त्रियः पितृभिररक्ष्यमाणान्बालान्प्रत्युत तैरेव पुरुषादैरिव निर्दयैरार्तान् क्लिष्टान् । वाचं देवीं सरस्वतीं कुकर्मणि दुराचारे स्थिताम् । कुलाग्र्यान्ब्राह्मणोत्तमान्सेवकान् ॥ २२ ॥ उपसृष्टान् व्याप्तान् । अवरोपिता न्युद्वासितानि । व्यवायो मैथुनम् । इतस्ततो निषेधानादरेण सर्वतोऽशनादिषून्मुखं प्रवर्तमानं जीवलोकं वा ॥ २३ ॥ हे अंब मातर्हे धरित्रि ते तव यो भूरिभारस्तस्यावतार णार्थं कृतावतारस्य कर्माणि स्मरंती तेन विसृष्टा सती शोचसि । निर्वाणं विलंबितमाश्रितं येषु तानि । पाठांतरे निर्वाणं विडंबितमुपहसितं यैः । मोक्षादप्यधिकसुखानीत्यर्थः ॥ २४ ॥ हे अम्ब

रम्भक्षणत एव धर्मपृथ्वीकलयस्तथाभूती भवंतो लोकैरदृश्या अपि दिदृक्षणीयत्वादनध्यायतः परीक्षितो योगजनेत्राभ्यां दृष्टा ज्ञेयाः । यथा काश्चिन्नष्टापत्यां स्वमातरं पृच्छति तथाऽपृच्छदित्यन्वयः ॥ १९ ॥ हे भद्रे इति । "भद्रा गौर्गोमतल्लिका" इत्यभिधानात् । भद्ररूपायास्तवैतन्नोचितमधुना तव भद्रमेवाहं कारयिष्यामीति भावः । हे अंबेति "पुत्राणां हि परो धर्मो मातुराश्वासनं सदा" इत्युक्तेरहं तव पुत्रीभूतोऽस्म्यतो मदग्रे त्वया स्वदुःखमावेद्यमिति भावः ॥ २० ॥ वृषं धर्मं लुनन्तीति वृषला राजाभासाः शूद्रम्लेच्छाद्याः ॥ २१ ॥ हे उर्वीति । दुष्टजनभराक्रांतात्वाद्बहुभारवती जाताधुनेति भावः । कुकर्मणीति । ब्रह्मकुलराजकुलयोर्द्वयोर्विशेषणम् । एकत्र दुष्प्रतिग्रहादानाभक्ष्याशनादिना दुष्कर्मत्वमन्यत्र ब्राह्मणापमानवेदापमानादिना दुष्कर्मत्वञ्च । सेवकानिति । "अज्ञानादथ वा प्रीत्या कैंकर्यं कारयेन्नरः । विप्रेण विप्रवर्जे यः स चिरं नरके वसेत् ॥" इति स्मृतेः । कुलाग्र्यामिति पाठे तु श्रेष्ठकुलार्हां देवीं द्योतमानां वाचं वेदवाणीमाचारकुलहीना अध्येष्यंतीति शोचसि किम् ॥ २२ ॥ २३ ॥ अंबेति । वर्णिताभिप्राया संबुद्धिः । धरित्रीत्याश्वासनम् । हरिकृपया पुनर्धारणसमर्था भविष्यसीति भावः । पाठान्तरे निर्वाणविडंबितानीति पाठे । इत्यर्थ इति । "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानात्" इत्याद्युक्तेरयं भावः ॥ २४ ॥ हे वसुंधरे इति । त्वं हि वसुंधरासि न हि वसुंधराणामीदृक् कार्श्यं भवतीति । किं वा वसु ते हृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धरण्युवाच ॥ भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥ २६ ॥ सत्यं शौचं दया क्षांतिस्त्यागः संतोष आर्जवम् ॥ शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ २७ ॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ॥ स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च ॥ २८ ॥ प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ॥ गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥ २९ ॥ एते चान्ये च भगवन्नित्या यत्र महागुणाः ॥ प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित् ॥ ३० ॥

ते सौभाग्यं कालेन वा हृतम् ॥ २५ ॥ भवान् जानात्येव तथापि वक्ष्यामीत्याह । येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्तसे यत्र च सत्यादयो महागुणा न वियंति तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः ॥ २६ ॥ सत्यं यथार्थभाषणम् । शौचं शुद्धत्वं । दया परदुःखासहनम् । क्षांतिः क्रोधप्राप्तौ चित्तसंयमनम् । त्यागोऽर्थिषु मुक्तहस्तता । संतोषोऽलंबुद्धिः । आर्जवमवक्रता । शमो मनोनैश्चल्यम् । दमो बाह्येंद्रियनैश्चल्यम् । तपः स्वधर्मः । साम्यमरिमित्राद्यभावः । तितिक्षा परापराधसहनम् । उपरतिर्लाभप्राप्तावौदासीन्यम् । श्रुतं शास्त्रविचारः ॥ २७ ॥ ज्ञानमात्मविषयम् । विरक्तिर्वैतृष्ण्यम् । ऐश्वर्यं नियंतृत्वम् । शौर्यं संग्रामोत्साहः । तेजः प्रभावः। बलं दक्षत्वम् । स्मृतिः कर्तव्याकर्तव्यार्थानुसंधानम् । स्वातंत्र्यमपराधीनता । कौशलं क्रियानिपुणता । कांतिः सौंदर्यम् । धैर्यमव्याकुलता । मार्दवं चित्ताकाठिन्यम् ॥ २८ ॥ प्रागल्भ्यं प्रतिभातिशयः । प्रश्रयो विनयः । शीलं सुस्वभावः । सहओजोबलानि मनसो ज्ञानेंद्रियाणां कर्मेन्द्रियाणां च पाटवानि । भगो भोगास्पदत्वम् । गांभीर्यमक्षोभ्यत्वम् । स्थैर्यमचंचलता । आस्तिक्यं श्रद्धा । कीर्तिर्यशः । मानः पूज्यत्वम् । अनहंकृतिर्गर्वाभावः ॥ २९ ॥ एते एकोनचत्वारिंशदन्ये च ब्रह्मण्यशरण्यत्वादयो

केनाचिद्यत ईदृग्जातेति भावः ॥२५॥ हे धर्मेति । त्वमेव सर्वधर्त्ता यत ईदृग्जातस्तर्हि मे कार्श्ये किमद्भुतमिति भावः । यद्यप्यहं जानामि तथापि त्वन्मुखादेव श्रोतुमिच्छामीत्यत आह-चतुर्भिरिति ॥ २६ ॥ परदुःखासहनेन शरणागतपालकत्वं भक्तसुहृत्त्वं चोक्तम् । मनोनैश्चल्योक्त्यैव सुदृढव्रतत्वमपि । तपः क्षत्रियत्वादिलीलावतारानुरूपं स्वधर्मः ॥ २७ ॥ ज्ञानं पंचविधं बुद्धिमत्त्वकृतज्ञत्वदेशकालपात्रज्ञत्वसर्वज्ञत्वात्मज्ञत्वभेदात् । विरक्तिरसद्विषयवैतृष्ण्यम् ।प्रभावेनैव प्रतापश्च स च प्रभावविख्यातिः । दक्षत्वं च दुष्करक्षिप्रकारित्वम् । धृतिरिति पाठे क्षोभकारणे प्राप्तेप्यव्याकुलत्वम् । कौशलं हि त्रिविधं क्रियानिपुणता युगपद्भूरिसमाधानकारिता लक्षणचातुरीकलाविलासविद्वत्तालक्षणवैदग्धीभेदात् । कांतिः कमनीयता । एषा चतुर्धाऽवयवस्य हस्ताद्यंकादिलक्षणस्य वर्णरसगंधस्पर्शशब्दानाम् । तत्र रसश्चाधरचरणस्पृष्टवस्तुनिष्ठो ज्ञेयः । वयसश्चेति विवेकः। एतया नारीगणमनोहरत्वमप्युक्तम् । चित्ताकाठिन्यं प्रेमार्दीचित्तत्वम् । तेन प्रेमवश्यमपि ॥२८॥ प्रतिमाशयेनैव वावदूकत्वम् । विनयेन ह्रीमत्त्वं यथोचितसर्वमानदातृत्वं चोक्तम् । सुखभावेन साधुसमाश्रयत्वं च । भगस्त्रिधा भोगास्पदत्वसुखित्वसर्वसमृद्धित्वभेदात् । गांभीर्यं दुर्बोधाभिप्रायत्वमपि । आस्तिक्यं शास्त्रचक्षुष्ट्वम् । यशः साद्गुण्यख्यातिः रक्तलोकत्वं च ॥ २९ ॥ चकाराद्ब्रह्मण्यत्वसर्वसिद्धिनिषेवितत्वसच्चिदानंदविग्रहत्वादयो ज्ञेयाः । अत्र संतोषादयः कतिचिद्गुणा भक्तसंबंधादन्यत्र ज्ञेयाः । महत्त्वमिच्छद्भिः प्रार्थ्या इति महागुणा इति च वरीस्त्वमपि गुणांतरम् । अनेन तेषां गुणानामन्यत्र :स्वल्पत्वं चलत्वं च । अत्रैव पूर्णत्वमविनश्वरत्वं चोक्तम् । अत एव सूतवाक्यं " नित्यं निरीक्षमाणानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतम् ॥ शोचामि रहितं लोकं पाप्मना कलिनेक्षितम् ॥ ३१ ॥ आत्मानं चानुशोचामि भवंतं चाऽमरोत्तमम्॥ देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाऽऽश्रमान् ॥ ३२ ॥ ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः ॥ सा श्रीः स्ववासमरविंदवनं विहाय यत्पादसौभगमलं भजतेऽनुरक्ता ॥ ३३ ॥ तस्याऽहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी ॥ त्रीनऽत्यरोच उपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदंते ॥ ३४ ॥ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः ॥ त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदंगम् ॥ ३५ ॥

महांतो गुणा यस्मिन्नित्याः सहजा न वियंति न क्षीयंते स्म ॥ ३० ॥ तेन गुणपात्रेण गुणालयेन । पाप्मना पापहेतुना ॥ ३१ ॥ ३२ ॥ तस्य विरहो दुःसह इत्याह चतुर्भिः । ब्रह्मादयो यस्याः श्रियोऽपांगमोक्षः स्वस्मिन् दृष्टिपातस्तत्कामाः संतो बहुतिथं बहुकालं तपः समचरन्सम्यक् चरंति स्म । भगवद्भिरुत्तमैः प्रपन्ना आश्रितापि सा श्रीर्यस्य पादलावण्यमलमनुरक्ता सती सेवते ॥ ३३ ॥ तस्य भगवतः श्रीमद्भिः पदैः । केतुर्ध्वजः । अब्जादयः केताश्चिह्नानि येषां तैः । यद्वा । अब्जादीनामाश्रयैः । सम्यगलंकृतमंगं यस्याः साहं ततो भगवतो विभूतिं संपदमुपलभ्य प्राप्य त्रीन् लोकानतिक्रम्यारोचे शोभितवत्यस्मि । पश्चात्तस्या विभूतेरंते नाशकाले प्राप्ते सत्युत्स्मयंतीं गर्वं कुर्वाणां मां स व्यसृजत्त्यक्तवान् ॥ ३४ ॥ किं च । यो वै आसुरो वंशो येषां तेषां राज्ञामक्षौहिणीशतरूपं ममातिभरं भारमपनीतवान् । त्वां चोनपदत्वाद्दुःस्थं संतं पौरुषेण पुरुषकारेणात्मनि स्वस्मिन् संपूर्णपदं सुस्थं संपादयन् । "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः । संपादयितुमित्यर्थः । अबिभ्रत् धृतवानित्यर्थः ॥ ३५॥

यदपि द्वारकौकसाम् । न वितृप्यंति हि दृशः श्रियो धामांगमच्युतम्' इति । तथा नित्या इति । न वियंतीति । सदा स्वरूपसंप्राप्तमपि गुणांतरम् । अन्ये च जीवा लभ्या यथा । तत्राविर्भावमात्रेऽपि सत्यसंकल्पत्वं वशीकृताचिंत्यमायत्वम् । आविर्भावविशेषत्वेप्यखंडसत्त्वे गुणस्य केवलस्वयमवलंबनत्वं जगत्पालकत्वं तथा हतारेर्गतिदातृत्वं तथात्मारामजनाकर्षित्वं ब्रह्मरुद्रादिसेवितत्वं परमाचिंत्यस्वरूपशक्तित्वम् । आनंत्येन नित्यनूतनसौंदर्याद्याविर्भाववत्वं पुरुषावतारत्वेऽपि मायानियन्तृत्वं जगत्सृष्ट्यादिकर्तृत्वं गुणावतारादिबीजत्वम् । अनंतब्रह्मांडाश्रयरोमविवरत्वं वासुदेवत्वनारायणत्वादिलक्षणभगवत्त्वाविर्भावेपि एवंभूतपरमाचिंत्याखिलमहाशक्तिमत्त्वं स्वयं भगवल्लक्षणत्वे तु हतारिमुक्तिदातृत्वं स्वस्यापि विस्मापकस्वरूपमाधुर्यवत्त्वादि । तदित्थं दिङ्मात्रदर्शनमत एवोक्तं ब्रह्मणा "गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य" इति ॥ ॥ ३० ॥ सांप्रतमधुना ॥ ३१ ॥ न केवलमात्मानमेव शोचाम्यपि तु देवादीनपीत्याह—देवानिति । कलियुगे देवपितृविप्रसाधुभक्तिरहिताः सर्वे भविष्यंतीति भावः ॥ ३२ ॥ यत्पादेति । यस्य पादयोः सर्वारविन्दजातेः शोभाधिक्यमसूचीति ॥३३॥ "केतश्चिह्ने निकेते च" इति कोशात् । द्वितीयार्थमाश्रित्याह—यद्वेति । गर्वं कुर्वाणां वैकुंठेऽपि मत्सदृशो नास्तीति गर्ववतीम् ॥३४॥ इत्यर्थ इति । संपादनार्थमिति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम यदंघ्रिविटंकितायाः ॥
॥३६॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा ॥ परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीम् ॥ ३७ ॥ इति श्रीभा॰महा॰प्रथम॰पृथिवीधर्मसं
वादो नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ सूत उवाच ॥ तत्र गोमिथुनं राजा हन्यमानमनाथवत् ॥ दंडहस्तं च वृषलं ददृशे नृपलांछनम् ॥
॥ १ ॥ वृषं मृणालधवलं मेहंतमिव बिभ्यतम् ॥ वेपमानं पदैकेन सीदंतं शूद्रताडितम् ॥ २ ॥ गां च धर्मदुघां दीनां भृशं शूद्रपदाहताम् ॥
विवत्सामश्रुवदनां क्षामां यवसमिच्छतीम् ॥ ३ ॥ पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदम् ॥ मेघगंभीरया वाचा समारोपितकार्मुकः ॥ ४ ॥
कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान्बली ॥ नरदेवोऽसि वेषेण नटवत्कर्मणाऽद्विजः ॥ ५ ॥ कस्त्वं कृष्णे गते दूरं सह गांडीवधन्वना ॥
शोच्योऽस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥ ६ ॥

तस्य विरहं का वा सहेत । प्रेमावलोकश्च रुचिरस्मितं च वल्गुजल्पश्च तैर्मधुमानिनीनां सत्यभामादीनां समानं गर्वसहितं स्थैर्यस्तब्धत्वं योऽहरत् । यस्यांघ्रिणा रजस्युत्थितेन विटंकिताया अलंकृतायाः सस्यादिमिषेण रोमोत्सवो भवति ॥ ३६ ॥ कथयतोः सतोः प्राचीं पूर्ववाहिनीं सरस्वतीं कुरुक्षेत्रे ॥ ३७ ॥ इति प्रथमे टीकायां षोडशोऽध्यायः ॥ १६ ॥ ततः सप्तदशे राज्ञः कलेर्निग्रह उच्यते ॥ तस्यैवं वीर्यभाजोऽपि वैराग्यं वक्तुमद्भुतम् ॥ १ ॥ हन्यमानं ताड्यमानम् ॥ १ ॥ मृणालं पद्मकंदस्तद्वद्धवलम् । भयान्मेहंतं मूत्रयंतम् । इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयन्निव प्रतिक्षणं क्षीयमाणांशस्तस्याप्यनिर्वाहात्कंपमान इवेति दर्शितम् ॥ २ ॥ धर्मदुघां हविर्दोग्ध्रीम् । क्षामां कृशाम् । यवसं तृणम् । अत्र सस्यादिप्रसवक्षयाद्विवत्सेव । यज्ञाद्यभावात्कृशा । अत एव यज्ञभागमिच्छंती पृथ्वीति सूचितम् ॥ ३ ॥ कार्तस्वरं सुवर्णं तन्मयः परिच्छदः परिकरो यस्य । स्वर्णनिबद्धमित्यर्थः । सज्जीकृतकार्मुकः ॥ ४ ॥ हंसि घातयसि । राजाहमिति चेत्तत्राह । नट इव वेषमात्रेण नरदेवोऽसि कर्मणा त्वद्विजः शूद्रः ॥ ५ ॥ अशोच्यान्नि

इत्यर्थ इति । आर्षत्वादत्र गुणाभावो दिपोऽडागमश्चेति भावः ॥ ३५ ॥ यद्वा मधु मद्यं तद्वन्मादको मानो यासां सौंदर्यादिगर्वितानामित्यर्थः । "अलंकारे विटंकस्स्यात्" इत्यभिधानात् ॥ ३६ ॥ तयोः पृथ्वीधर्मयोः ॥ ३७ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे षोडशोऽध्यायः ॥ १६ ॥ ततः प्राचीसरस्वतीप्राप्त्यनंतरं तस्य परीक्षितः । एवं वीर्यभाजः कलिदंडनसमर्थस्यापि ॥ १ ॥ तत्र प्राचीतटे । सत्यत्रेताद्वापरयुगमर्यादाभंगे स्वातंत्र्यमाह–नृपलाञ्छनमिति । "मृणालं बिसम्" इत्यमरः ॥ २ ॥ ३ ॥ ४ ॥ नटो ह्यनुकार्यस्यैव कर्माभिनयन्भवतीति भावः ॥ ५ ॥ ननु यथा त्वं देशस्य राजा तथाहमपि संप्रति कालस्य राजेति मयि तव विक्रमो न भविष्यतीत्याह– कस्त्वमिपि । गाण्डिवधन्वनाऽर्जुनेन सह कृष्णे दूरं गते सतीति । एतावद्दिनं त्वं क्वासीरिति भावः । नन्वासमेव किं तु ता

१ दिवयं सारस्वतव्याकरणोक्तः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन् ॥ वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ॥ ७ ॥ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते ॥ भूतले नु पतंत्यस्मिन्विना ते प्राणिनां शुचः ॥ ८ ॥ मा सौरभेयाऽनुशुचो व्येतु ते वृषलाद्भयम् ॥ मा रोदीरंब भद्रं ते खलानां मयि शास्तरि ॥ ९ ॥ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यंते साध्व्यसाधुभिः ॥ तस्य मत्तस्य नश्यंति कीर्तिरायुर्भगो गतिः ॥ १० ॥ एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः ॥ अत एनं वधिष्यामि भूतद्रुहमसत्तमम् ॥ ११ ॥ कोऽवृश्चत्तव पादांस्त्रीन्सौरभेय चतुष्पद ॥ मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनाम् ॥ ॥ १२ ॥ आख्याहि वृष भद्रं वः साधूनामकृतागसाम् ॥ आत्मवैरूप्यकर्तारं पार्थानां कीर्तिदूषणम् ॥ १३ ॥

स्वपराधान् रहसि यस्त्वं प्रहरन् प्रहरसि स शोच्यः सापराधोऽस्यतो वधमर्हसि ॥ ६ ॥ वृषं प्रत्याह । त्वं वा कः । स्वयमेव संभावयति । किं कश्चिद्देवो वृषरूपेणास्मान् परिखेदयन् वर्तसे ॥ ७ ॥ दोर्दंडैः परिरंभिते परिरंभितवत्सुरक्षिते ते शुचोऽश्रूणि विनान्येषामश्रूणि नानुपतंतीति खेदहेतुत्वं दर्शितम् ॥ ८ ॥ एवमुक्ते पुनरपि शोचंतं प्रत्याह । भो सुरभेः पुत्र मा शुचः शोकं मा कुरु । व्येत्वपयातु । गां प्रत्याह । अंब मातः शास्तारि मयि जीवति सति ते भद्रमेवातो मा रोदीः ॥ ९ ॥ मद्धितार्थमेवैनं हनिष्यामि न तवोपकारायेत्याह यस्येति द्वाभ्याम् । हे साध्वि सर्वा याः काश्चिदपीत्यर्थः । असाधुभिस्त्रस्यंते पीड्यंत इत्यर्थः । भगो भाग्यम् । गतिः परलोकः ॥ १० ॥ ॥ ११ ॥ पुनरपि शोचंतं वृषं प्रत्याह । कोऽवृश्चच्चिच्छेद । त्वादृशास्त्वद्विधा दुःखिताः ॥ १२ ॥ वो भद्रमस्तु । आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवंतं कीर्तिं दूषयतीति

भ्यां भयेन न प्राभूवमधुना तु कस्माद्बिभेमि । सत्यंसत्यं शोच्योसि । अधुना त्वं मर्तुमेवेच्छसीति भावः । संदर्भस्तु सह गांडीवधन्वनेति । अत एव तथैव प्रतिज्ञातं "मामेवैष्यति सत्यं ते प्रतिजाने प्रियोसि मे" इति । स्वर्गापवर्गौणिं तु तत्साक्षान्निर्दिष्टं "ददर्श तत्र गोविन्दं ब्राह्मेण वपुषान्वितम् । तेनैव दृष्टपूर्वेण सादृश्येनोपसूचितम् ॥ दीप्यमानं स्ववपुषा दिव्यैर्वेत्रैरुपस्कृतम् । उपास्यमानं वीरेण फाल्गुनेन सुवर्चसा ॥ यथास्वरूपं कौंतेयस्तथैव मधुसूदनम्" इति । अत्र कौंतेयो युधिष्ठिरः ॥ ६ ॥ खेदयन् वर्त्तसे नैतादृशो दुःखी कृशो मया स्वप्नेऽपि दृष्ट इति भावः ॥ ७ ॥ त्वय्येव राजनि सति वयमेव दुःखिनः सांप्रतमभूमेति चेत्तत्र सानुतापं साटोपं चाह—न जात्विति । परिरक्षिते परिरंभितवत्सुरक्षिते इति ॥ "शुक्छोकेश्रूणि शौचे च" इत्यभिधानात् ॥ ८ ॥ नन्वलीकमिदमिति स्वमिव रुदन्तीं गां दर्शयन्तं वृषं प्रत्याह-हे सौरभेयेति । अहो भूमिर्विष्णुपत्नीत्वेन स्वपतौ विष्णावंतर्हिते चेयं विधवा जाता । सा च गोरूपा तदात्मजस्त्वं विधवापुत्र इव दीनो रक्षितारं निरीक्षसे । रक्षिता चाधुनाऽहमेव स च दीनोपेक्षको नास्मि । ततस्त्वामधुनैनं दंडयित्वा रक्षामीति भावः । गां च विष्णुपत्नीत्वेनैव मातरं ज्ञात्वाश्वासयन्नाह-अंबेति । यत्र पुत्रे जीवति मातुर्दुष्टकृतार्तिर्भवेद्धिक् पुत्रमित्यतस्त्वामपि निर्दुःखां करिष्याम्येनं घातयित्वेति भावः ॥ ९ ॥ नन्वस्मत्संबंधेनैनं घातयन्नेतद्वधपापभागिनावावाम्भाकार्वीत्यत आह-यस्येति । हे साध्वीति । साधुरक्षणं विना राज्ञो मम सर्वस्वहानिस्स्यादिति भावः ॥ १० ॥ अत आर्तार्त्तिनिग्रहस्य राजधर्मत्वात् । एवं कलिम् ॥ ११ ॥ कोऽवृश्चत्तं वद ततो ज्ञात्वाहं तं हनिष्यामीति भावः । :संबुद्धिरुकार्था ॥ १२ ॥ ननु मम किमपि न विवक्षितमस्तीति चेत्तत्राह-हे वृष वो युष्माकं साधूनां निरपराधानां भद्रं सुखेपि दुःखेपि सदा भद्रमेव । किं त्वस्माकं पार्थानां कीर्तिं दूषयति यस्तमाख्याहि । तमेव कम् । आत्मनस्तव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनेऽनागस्यघंयुंजन्सर्वतोऽस्य च मद्भयम् ॥ साधूनां भद्रमेव स्यादसाधुदमने कृते ॥१४॥ अनागःस्विह भूतेषु य आगस्कृन्निरंकुशः॥ आहर्तास्मि भुजं साक्षादमर्त्यस्यापि सांगदम् ॥१५॥ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनम् ॥ शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह ॥१६॥ धर्म उवाच॥एतद्वः पांडवेयानां युक्तमार्ताभयं वचः॥ येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः॥१७॥ न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ ॥ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः ॥१८॥ केचिद्विकल्पवसना आहुरात्मानमात्मनः ॥ दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥ १९ ॥

तथा तमाख्याहि ॥ १३ ॥ ननु तदाख्याने कृते कथं भद्रं स्यादित्यत आह । यस्मादनागसि जने योऽघं दुःखं युंजन् कुर्वन् भवत्यस्यैवंभूतस्य मत्तः सकाशात्सर्वत्रापि भयं भवति ततः साधूनां भद्रं भवेदेवेति ॥ १४ ॥ एतस्य दंडेऽहमसमर्थ इति मा शंकीरित्याह । अनागःस्विति । आगस्कृदपराधकर्ता । तस्यामर्त्यस्य देवस्यापि भुजमाहर्तास्म्याहरिष्यामि । सांगदमित्यनेन मूलत उत्पाट्याहरिष्यामीति दर्शितम् ॥ १५ ॥ नन्वेकस्य निग्रहेणान्यस्यानुग्रहे तव किं प्रयोजनं तत्राह । राज्ञो हीति । अन्यानधर्मिष्ठान् । शासतो दंडयतः ॥ १६ ॥ आर्तानामभयं यस्मात्तद्वचो वो युष्माकं युक्तमुचितमेव ॥ १७ ॥ वयं तु यतः पुरुषात्प्राणिनां क्लेशहेतवो भवेयुस्तं पुरुषं न विजानीमः। यतो वादिनां वाक्यभेदैर्विमोहिताः ॥ १८ ॥ वाक्यभेदानेवाह । विकल्पं भेदं वसत आच्छादयंति ये योगिनस्ते आत्मानमेवात्मनः प्रभुं सुखदुःखप्रदमाहुः । तदुक्तम् ।

पादच्छेदेन वैरूप्यं कृतवंतम् । हे वृषेति । सर्वाभीष्टवर्षकत्वान्ममाभीष्टमपि वदेति भावः ॥१३॥ अत्राक्षिपति-नन्विति । अनागसि जनेऽघकर्त्तुः पुंसः सर्वत एव भयं न केवलं मत्त एवेति भावः ॥१४॥ ननु यदि त्वत्तोपि बली स्यात्तर्हि किं तव निवेदनेन तत्राह-साक्षादमर्त्यस्यापीति । तथा च देवासुरमनुष्येषु कोपि मत्तो बलिष्ठो नास्तीति भावः॥१५॥ पुनराक्षिपति-नन्विति । परम इति । परो मा यस्मात्स परम इत्यत उत्कृष्टधर्म एव राज्ञो नास्तीति भावः । उत्पथान् स्वधर्ममुत्सृज्यवर्तमानान् ॥ १६ ॥ पांडवेयानां पांडववंश्यानामेतत् । यथा मां प्रत्युक्तमीदृगित्यर्थः । येषां गुणगणैः प्रेमात्मकैरित्यर्थः । श्रीकृष्णस्य प्रेमैकवश्यत्वात् । तस्यार्जुनस्य पौत्रस्त्वं तत्तुल्य एवातस्तव गुणैरप्याधीन एव श्रीकृष्णो वर्तत इति तदशक्यं किमपि नास्तीति भावः ॥ १७ ॥ तत्र साक्षाद्धिंसाकर्तृगतः प्रश्नोयमिति ज्ञात्वापि सूचकता न युक्तेति मत्वा तत्प्रयोजककर्तृगतत्वेन सिद्धांतयन्नप्यनिर्द्धारितमिवाह-न वयमिति त्रिभिः । वयमीश्वरवादिनो ये च वाक्यभेदे विमोहितास्ते सर्वेऽपि तं पुरुषमीश्वरं न जानीमस्तस्य सर्वागोचरत्वात् । हे पुरुषर्षभेति । त्वं तु सूचकतादोषं पुरुषश्रेष्ठत्वाज्जानास्येव । यद्वा पुरुषो हरिः स ऋषभः प्रियो यस्येति हरिभक्तत्वात्त्वं तु जानन्नेव स्वप्रश्रयबोधनार्थं मां पृच्छसीति भावः । ननु कथमेवमपलपसि त्वत्क्लेशदायीं पुरुषोऽयं मया दृश्यत एव । सत्यम् । असौ मम क्लेशस्य बीजं किंचिद्भविष्यति यतोयं ममैव क्लेशदो नान्यस्येति । क्लेशबीजं यतो भवति तं पुरुषं न जानीम इत्यर्थः । ननु शास्त्रज्ञा यूयं कथं न जानीथ । सत्यम् । बहुशास्त्रज्ञानमेव तदनिर्द्धारणे कारणमित्याह—वादिनां वाक्यभेदैर्विमोहिता इति ॥ १८ ॥ वाक्यभेदविमोहितान् गणयति—केचिदित्येकेन । एते सर्वे वैदिका एव ग्राह्याः । वेदवाक्यस्यैव प्रामाण्यादिति संदर्भः । तदुक्तं श्रीगीतायामिति । यद्वा विकल्पं जीवेश्वरादिभेदं वसते आच्छादयति येऽद्वैतवादिनः सुखदुःखादेरात्माज्ञानविजृंभितस्य द्वैतस्य मिथ्यात्वान्नकोऽपि सुखदुःखप्रदो भवतीत्याहुः । संभवात्समासान्तरेणार्थांतरमाह-यद्वा केचित्तार्किकाः आत्मनः सुखदुःखबीजमात्मानमेवाहुः । एवं ते वदंतीति स्वामिचरणैरुक्तमेव । लोकायतिको नास्तिकावांतरविशेषः । तीर्थस्तु स्वस्य हरेर्भाव उत्पत्तिर्यस्य तं कालं प्रभुमाहुः । सर्वे "सर्वे निमिषा जज्ञिरे विद्युतः पुरुषात्" इति श्रुते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः ॥ अत्रानुरूपं राजर्षे विमृश्य स्वमनीषया ॥२०॥एवं धर्मे प्रवदति स सम्राड् द्विजसत्तम ॥ समाहितेन मनसा विखेदः पर्यचष्ट तम् ॥२१॥ राजोवाच ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक् ॥ यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥२२॥ अथवा देवमायाया नूनं गतिरगोचरा ॥ चेतसो वचसश्चापि भूतानामिति निश्चयः ॥ २३ ॥

"आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः" इति । यद्वा । विकल्पैः कुतर्कैः प्रावृता नास्तिकाः। एवं हि ते वदंति । न तावद्देवतादीनां प्रभुत्वं कर्माधीनत्वात् । न च कर्मणः स्वाधीनत्वादचेतनत्वाच्च । अतः स्वयमेव प्रभुर्न चान्यः कश्चिदिति । अन्ये दैवज्ञा दैवं ग्रहादिरूपां देवताम् । परे तु मीमांसकाः कर्म । अपरे लौकायतिकाः स्वभावम् १९ केष्वपि सेश्वरेषु मध्ये । केष्वपीति दुर्लभत्वं दर्शितम् । निश्चय इति सिद्धांतत्वम् । अप्रतर्क्यान्मनोऽगोचरादनिर्देश्याद्वचनागोचरात्परमेश्वरात्सर्वं भवतीति विमृश विचारय स्वबुद्ध्या ॥ २० ॥ विखेदो गतमोहः पर्यचष्ट प्रत्यभाषत ज्ञातवानिति वा ॥ २१ ॥ अनिर्धारितमिव ब्रुवन्घातकं जानन्नपि न सूचयेदित्येवंरूपं धर्मं ब्रवीष्यतो धर्मोऽसि । ननु घातकस्य सूचने को दोष इत्यत आह । यदिति । स्थानं नरकादि ॥ २२ ॥ यद्वा । अज्ञानादप्यकथनं भवतीत्याह । अथ वेति । देवस्य मायाया गतिर्वे

रित्याह । अत्र संदर्भस्तु अपर इत्यनेन सांख्यानाहुः । स्वस्माद्भावः स्वभावः परिणामः स च गुणनामेव गुणपरिणाम एव सुखदुःखहेतुरित्याह ॥ १९ ॥ सेश्वरेषु वैष्णवेषु । परमेश्वरात्सर्वं भवतीति निश्चयः । तद्वक्ष्यति वेदस्तुतौ "त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयान्" इति । तथा "सुखं दुःखं भवो भावो भयं चाभयमेव च । अहिंसा समता तुष्टिस्तपो दानं यशोयशः । भवंति भावा भूतानां मत्त एव पृथग्विधाः" इति भगवद्गीताभिश्च । ननु तर्हि कथं निर्देष्टुमनर्हत्वम् । सत्यम् । कालकर्मस्वभावग्रहभूतनृपसर्परोगादिभ्य एव लोके क्लेशस्य दर्शनात्तेषामेव निर्देश्यत्वात् । वस्तुतस्तु तेषामस्वातंत्र्याच्च भगवत एव सर्वं भवतीति सिद्धांतात् । भगवतः सकाशाद्दुःखं भवतीत्युपासकानां वक्तुमनौचित्याच्च । नन्वेवमपि तस्य वैषम्यनैर्घृण्ये दुर्वारे एवेत्यत आह—अप्रतर्क्यादिति । अस्मत्तर्कागोचरत्वात्तस्य तत्तदपि न वैषम्यनैर्घृण्ये इति भावः । तदुक्तं भीष्मेण "न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् । यद्विजिज्ञासया युक्ता मुह्यंते कवयोऽपि हि" इति । तदपि भक्ताभासस्य मम दैन्यवर्द्धनेन स्वविषयकस्मरणवृद्ध्यर्थं वा भक्तोत्तमस्य तव कलिनिग्रहादिकीर्तिख्यापनार्थं वेति हितायैव क्लेशदा न मूह्यत इति । नन्वेषां मतानां मध्ये कस्योपादेयत्वमित्यत्राह—अत्रानुरूपं समुचितं सिद्धांतं त्वमेव स्वमनीषया विचारय यतस्त्वं राजर्षिर्भवसीत्युक्तिभंग्या निश्चयशब्दात्सर्वांते कथनाच्च । वैष्णवमतस्य सिद्धांतत्वम् । अतः केष्वपीत्यनेन मतस्यास्य दुर्लभत्वञ्च सूचितम् । तत्र विमृशेत्ययं राज्ञो विमर्शः । न तावत्क्लेशानां मिथ्यात्वं प्रकटमनुभूयमानत्वात् । न चात्मनस्तत्कारणत्वं जीवात्मनः पारतन्त्र्यात् । न च ग्रहाणां तेषां कालाचक्राधीनत्वात् न च कर्मणः जाड्यात् । किञ्च साक्षाद्धर्मस्यास्य किं प्रारब्धमप्रारब्धं वा पापमस्ति । पापत्वे धर्मत्वस्यैवानुपपत्तेः । न च स्वभावस्य तस्यानैकांतिकत्वात् । तस्माद्भगवत एव कारणत्वं सूचितम् । तद्विधित्सितत्वं सर्वैर्दुर्ज्ञेयमेवेति भीष्मोक्तिरेव प्रमाणम् ॥ २० ॥ समाहितेन लब्धसमाधानेन ॥ २१ ॥ हे धर्मज्ञेति । स्वहंतृवृषलनामाग्रहणेन त्वमतीव सूक्ष्मं धर्मतत्त्वं जानासीति भावः । "असत्कृतम धर्मं तु वदन्नर्द्धमवाप्नुयात्" इति स्मृतिप्रोक्तधर्मग्राहित्वात् । अयं मां निरपराधमपि ताडयतीति मयि राजनि वक्तुमर्हन्नपि पृष्टोऽपि यन्न ब्रवीषि तद्धर्मं ब्रवीषि यतोऽधर्मकर्तुर्यत्स्थानं सूचकस्यापि तत्किं पुनरभिधायकस्यातः साक्षाद्धर्म एव मयानुमितस्त्वमिति ॥२२॥ अथ वेति । त्वया सर्वमुक्तमेवेत्यर्थः । देवमायेत्यादिना अप्रतर्क्यादिति तदुक्तमनुमोदिता देवस्य भगवतो मायायाः सर्वजगत्पालनसंहारकारिण्या गतिर्भूतानां चेतसोऽगोचरेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः ॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥ २४ ॥ इदानीं धर्म पादस्ते सत्यं निर्वर्तयेद्यतः ॥ तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥ २५ ॥ इयं च भूर्भगवता न्यासितोरुभरा सती ॥ श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका ॥ २६ ॥ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिताऽधुना ॥ अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति ॥ २७ ॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः ॥ निशातमाददे खड्गं कलयेऽधर्महेतवे ॥ २८ ॥ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनम् ॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥ ॥ २९ ॥ पतितं पादयोर्वीरः कृपया दीनवत्सलः ॥ शरण्यो नाऽवधीच्छ्लोक्य आह चेदं हसन्निव ॥ ३० ॥

ध्यघातकलक्षणा वृत्तिर्भूतानां चेतसो वचसश्चागोचरा सुज्ञेया न भवतीति निश्चयः ॥ २३ ॥ धर्मोऽसाविति ज्ञात्वा तस्य पादानुवादेन व्यवस्थामाह । तप इति द्वाभ्याम् । अधर्मपादैस्तव त्रयः पादास्त्रिभिरंशैर्भग्नाः । स्मयो विस्मयः ॥ २४ ॥ इदानीं कलौ हे धर्म ते पादश्चतुर्थोऽशस्तत्रापि सत्यमेवास्ति यतः सत्याद्भवानात्मानं निर्वर्तयेत्कथंचिद्धारयेत् । यद्वा । पुरुषस्त्वां साधयेत् । तमपि पादमनृतेन संवर्धितः कलिरूपोऽयमधर्मो ग्रहीतुमिच्छति । तत्रेयं स्थितिः । कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्मस्त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृतेन सत्यमित्येवं चतुर्थोऽशो हीयते । द्वापरे त्वर्धम् । कलौ चतुर्थोऽशोऽवशिष्यते सोऽप्यंते नंक्ष्यतीति ॥ २५ ॥ न्यासितोऽन्योन्यद्वारेणावतारित उरुर्भरो भारो यस्याः । कृतं कौतुकं मंगलं यस्याः सा ॥ २६ ॥ अश्रूणि कलयति मुंचतीत्यश्रुकला तेन त्यक्ता सती शूद्रा भोक्ष्यंति मामिति शोचति ॥ २७ ॥ निशातं निशितम् । अधर्मस्य हेतुर्यः कलिस्तं हंतुमित्यर्थः ॥ २८ ॥ अभिप्रेत्य ज्ञात्वा ॥ २९ ॥ शरण्य आश्रयार्हः । श्लोक्यः सत्कीर्त्यर्हः ॥ ३० ॥

अप्रतर्क्येत्यर्थः । वचसोगोचरेति अनिर्देश्येत्यर्थः । मायायास्तच्छक्तित्वात्स देवः पालनसंहारलक्षणे सुखदुःखे भूतेभ्यः कथं ददातीति ज्ञातुं वक्तुं च कः शक्नोतीत्यर्थः ॥ २३ ॥ अहं तु त्वयाऽकथितमपि तव भद्राभद्रं सर्वं जानाम्येव तत्त्वं शृण्वित्याह—तप इति द्वाभ्याम् । स्मयो गर्वः । संगः स्त्रीभिः । मदो मधुपानादिजः । उपलक्षणमेतद्धिंसादेरपि । तत्र स्मयेन तपोभंगः । स्त्रीसंगेन शौचभंगः । मदेन दयाभंगः ॥ २४ ॥ हे धर्मेति । पादावशेषत्वादेव मया त्वं धर्मोयमिति ज्ञात एवेति भावः । तत्रापि चतुर्थांशेपि प्राधान्येन व्यपदेशो भवतीति न्यायेन सत्यस्यैव प्राधान्यमाह—यद्वेति ॥ २५ ॥ "आश्चर्ये मंगले प्रोक्तमुत्सवेऽपि च कौतुकम्" इत्यभिधानात् ॥ २६ ॥ अब्रह्मण्या ब्राह्मणभक्तिरहिताः ॥ २७ ॥ इत्यर्थ इति । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति कर्मणि चतुर्थीति भावः । ननु जीवानामधर्म एव तत्तद्दोषहेतुरित्युक्तं कथं कलिं हन्यात्तत्राह—अधर्मस्य हेतवे सहायायेत्यर्थः । वक्ष्यते च "त्वमधर्मबंधुः" इति संदर्भः । खड्गादाने राज्ञोऽयमभिप्रायः—मत्पाणिस्थखड्गदर्शनादयमपि नृपचिह्नधारी मया सार्द्धं द्वंद्वशो योद्धुमायातु । ततश्चैनं शीघ्रमेव हनिष्यामीति ॥ २८ ॥ विहाय नृपलांछनमिति । कलिनाप्येवं विचारितमनेन सह योद्धुं न मे शक्तिरस्ति न च क्षत्रियस्य शरणापत्तिरुचिताऽतो नृपचिह्नं विहायैवास्य पादयोः पतिष्याम्यन्यथा वेषस्य लज्जा भविष्यति । अत्र नटयतिन्यायोनुसंधेयः । नाट्यं दर्शयता नटेन संन्यासवेषं विधाय नृपसदस्यागतं तं च राजा सत्कृत्य रजतस्थाले सहस्रदीनारं कृत्वा समर्पयामास । स चाह—नाहमेतत्स्पृशाम्यपसारय मदग्रत एतदिति । ततश्च तं वेषं विहाय किंचिन्नाट्यं कृत्वा तत्समाप्य राजानमाह—देहि मेऽश्वं काश्मीरकंबलश्च ततो राजा तमाह—अहो सहस्रदीनारांस्त्यक्त्वाधुना किमल्पं याचसे तेनोक्तं तदा तद्ग्रहणे वेषो लज्जायितो भवेदतो वेषपूर्त्यर्थं न गृहीतमिति ॥ ॥ २९ ॥ नावधीच्छ्लोक्य इति । राज्ञापि विचारितं शरणागतोयं हंतुमनर्हस्तदपि दुष्टमेनं यदि हन्मि तर्हि शरणागतवधाज्जातमधर्ममवलंब्य मय्येवासौ प्रवेक्ष्यति न मरिष्यतीति हसन्निवेति कोपानपगमात् । ईश्वरेण तादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचित् ॥ न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबंधुः ॥ ३१ ॥ त्वां वर्तमानं नरदेवदेहेष्वऽनुप्रवृत्तो यमधर्मपूगः ॥ लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥ ३२ ॥ न वर्तितव्यं तदधर्म बंधो धर्मेण सत्येन च वर्तितव्ये ॥ ब्रह्मावर्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥ ३३ ॥ तस्मिन्हरिर्भगवानिज्यमान इज्यामूर्तिर्यजतां शं तनोति ॥ कामानमोघान्स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा ॥ ३४ ॥ सूत उवाच ॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः ॥ तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतम् ॥३५॥ कलिरुवाच ॥ यत्र क्वचन वत्स्यामि सार्वभौम तवाज्ञया ॥ लक्षये तत्रतत्रापि त्वामात्तेषुशरासनम् ॥३६॥

गुडाकेशोर्जुनस्तस्य यशोधरा ये वयं तेषां तान्प्रति बद्धोंजलिर्येन तस्य ते । किं तु कथंचन केनाप्यंशेन न वर्तितव्यम् । यस्मात्त्वमधर्मस्य बंधुः ॥ ३१ ॥ तदेवाह । राजदेहेषु वर्तमानं त्वामनु सर्वतः प्रवृत्तः । अनार्यं दौर्जन्यम् । अंहः स्वधर्मत्यागः । ज्येष्ठा अलक्ष्मीः । माया कपटम् ॥ ३२ ॥ तत्तस्माद्धर्मेण सत्येन च वर्तितव्ये वर्तितुमर्हे ब्रह्मावर्त्ते देशे । यज्ञस्य वितानं विस्तारस्तत्र विज्ञा निपुणाः ॥ ३३ ॥ इज्या यागस्तद्रूपा मूर्तिर्यस्य शं क्षेमं कामांश्च । नन्विंद्रादयो देवा इज्यंते न तु हरिस्तत्राह । एष स्थावरादीनामात्मेति । तथापि जीववन्न परिच्छिन्न इत्याह । अंतर्बहिरिति । यथा वायुः प्राणरूपेणांतःस्थोऽपि बहिरप्यस्ति तद्वत्सर्वांतर्यामीश्वरोऽपीति ॥ ३४ ॥ उद्यतासिमुद्धृतखड्गम् । दंडपाणिं यमम् । उद्यतमुद्युक्तम् ॥ ३५ ॥ अत्र न वस्तव्यमिति या तवाज्ञा तया यत्र क्वापि वत्स्यामि किं तु तत्रतत्राप्यात्तो गृहीत इषुः शरासनं च येन तं त्वामेव लक्षये ॥ ३६ ॥

एव विधिर्निर्मितो यज्जिघांसोरपि हस्तात्त्वमद्य रक्षितोभूदिति मनोनुलापाच्च ॥ ३० ॥ स्वकार्यं विचार्याह—नेति । न वर्तितव्यं न स्थेयम् । देहमारभ्य राष्ट्रपर्यंतस्थानविवक्षया क्षेत्रमित्युक्तम् । श्लेषोत्रालंकारः । अधर्मस्य बन्धुः सहकारी । यद्वाऽधर्मो बंधुरिवात्याज्यो यस्येति वा ॥ ३१ ॥ तदेवाधर्मबन्धुत्वमेव । त्वत्प्रवृत्तौ बहवो दोषाः सन्तीत्याह—नराणां देवानां च देहेष्विति देवा अपि त्वदाक्रांतदेहा लोभाद्यधर्मिष्ठा भवन्ति किं पुनर्नरा इति भावः । लोभः परवित्ताभिलाषः । सद्व्यये प्राप्ते वित्तापरित्यागो वा ॥ ३२ ॥ यतस्त्वमधर्मबंधुस्तस्माद्धेतोः । ब्रह्मावर्त्ते आर्यावर्त्ते इत्यर्थः । ब्रह्मणो वेदस्यासमंताद्वर्त्तो वर्त्तनं यत्र तस्मिंस्तथा । अत एव जीव गोस्वामिनाप्युक्तम् । ब्रह्मावर्त्त इति यज्ञिय देशोपलक्षणम् । "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥" इति तल्लक्षणात् । धर्मेणेत्यनेनैव सिद्धे सत्येन चेति पृथगुक्तिः सत्यस्य धर्ममूलत्वव्यंजिका । स्कंधशाखादिकं विना केवलेन मूलेनापि न प्रयोजनसिद्धिरित्यतो धर्मेणेति चोक्तम् ॥ ३३ ॥ इज्यानामिन्द्रादिदेवानामात्ममूर्त्तिरन्तर्यामिरूपः । त आत्ममूर्त्तयो यस्येति वा त्वयि वर्त्तमाने सति तथा नैव स्यादिति भावः ॥ ३४ ॥ उद्यतासिमुच्चीकृतखड्गम् । जातवेपथुरिति । स्वरक्षणार्थं बहुतरं बुद्धिबलं प्रकाशितं तदपि मम वध एवोपस्थित इति भावः । राज्ञो ह्ययमभिप्रायः । यदिमां मदाज्ञां न पालयति तदा यदभीष्टमस्य वधमधुनैव करिष्यामि । यदि च पालयते तदास्यावधेपि मम कापि क्षतिर्नास्तीति भावः ॥ ३५ ॥ हे सार्वभौमेति । सर्वस्या अपि भूमे राजन् । लक्षये साक्षादेवमेव त्वां पश्यामि । तेन सर्वेषां स्थावरजंगमानां युष्मत्प्रजात्वात् । सर्वस्या अपि भूमेस्तवाधिकारात् । मम वस्तुं स्थानाभावात्संप्रति त्वदग्रे वर्त्तमानं त्वत्पादयोः पतितं मां प्रति स्वहस्तेनैव जहीति भावः । "राजा तु प्रणताशेषसामंतः स्यादधी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टुमर्हसि ॥ यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनम् ॥ ३७ ॥ सूत उवाच ॥ अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ ॥ द्यूतं पानं स्त्रियस्सूना यत्राधर्मश्चतुर्विधः ॥ ३८ ॥ पुनश्च याचमानाय जातरूपमदात्प्रभुः ॥ ततोऽनृतं मदं कामं रजो वैरं च पंचमम् ॥ ३९ ॥ अमूनि पंच स्थानानि ह्यधर्मप्रभवः कलिः ॥ औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥४०॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित ॥ विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥४१॥ वृषस्य नष्टांस्त्रीन्पादांस्तपः शौचं दयामिति ॥ प्रतिसंदध आश्वास्य महीं च समवर्धयत ॥ ४२ ॥

तत्तस्मात् । नियतो निश्चलः । वत्स्ये वत्स्यामि ॥ ३७ ॥ पानं मद्यादेः । सूनाः प्राणिवधाः । द्युतेऽनृतम् । पाने मदः । पूर्वं मदो दयानाशकत्वेनोक्तोऽत्र तु गर्वद्वारा तपोनाशकत्वेन । स्त्रीषु संगः । हिंसायां क्रौर्यं दयानाशकमिति ज्ञेयम् । यद्यपि सर्वं सर्वत्र संभवति तथापि प्राधान्येनानृतादीनां द्युतादिषु यथासंख्यं ज्ञेयम् । द्वादशस्कंधे तु“सत्यं दया तपो दानमिति पादा विभोर्नृप”इत्यत्र दानशब्देन शौचमेवोक्तम्। मनःशुद्धिरूपत्वाद्भूताभयदानस्य। “त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः॥अधर्मपादैरनृतहिंसासंतोषविग्रहैः”इत्यत्र चासंतोषशब्देन तस्य हेतुर्गर्वो लक्ष्यते विग्रहशब्देन च तद्धेतुः स्त्रीसंग इत्यविरोधः॥ ३८॥ चतुर्विधस्याप्येकत्रैवावस्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं दत्तवान् । ततः सुवर्णदानादनृतं मदम् । काममिति स्त्रीषु संगम् । रज इति रजोमूलां हिंसाम्। एतानि चत्वारि पंचमं वैरं चाददादिति॥ ३९॥ औत्तरेयेण परीक्षिता अमून्यमीषु स्थानेषु न्यवसदित्यर्थः ॥४०॥ अथ इति हेतोः । बुभूषुरुद्भवितुमिच्छुः । स्त्रीसुवर्णयोरसेवनं नाम तयोरनासक्तिः ॥४१॥ एवं कलिं निगृह्य वृषस्य

श्वरः” इत्यमरः॥ ३६ ॥ यतस्त्वं सार्वभौमः शरणागतं न हंसि तर्हि हे धर्मभृतां श्रेष्ठोसीति भावः । तथापि त्वदाज्ञया नियतस्थानमेव वत्स्यामीत्याह—स्थानं मे इति ॥ ३७ ॥ स्त्रियश्च विवाहितेतराः । प्राणिहिंसायां तु चतुर्विध एवाधर्मः । न हि प्राणिहंतृषु तपः शौचं दया सत्यवचनं च सन्तीत्यर्थः । परमार्थस्तु सर्वथा त्याग एवेति ॥ ३८ ॥ भो राजन्नेतद्वृत्तांतं श्रुत्वा न कोपि द्यूतादिकमनुशीलयिष्यति । किञ्च प्रथमं मनसि मत्प्रवेशस्ततो लोकः प्रायो द्यूतादिकं भजते इति । ततश्च भवता दत्तमपि स्थानचतुष्कमदत्तमेवाभूत्तस्मात्किमपि स्थानमहं प्राप्नुयां यल्लोकैर्दुस्त्यजं स्यादिति याचमानाय कलये जातरूपं स्वर्णोपलक्षितं रजतादिकं द्रव्यमात्रमेव तद्वासत्वेनादात् । तत एव हेतोर्धनं वसु अनृतं मिथ्या । मदः पानादिजा मत्तता । कामः स्त्रीसंगः । रजो गर्व इति चतुर्विधोऽधर्मः तथा पञ्चमं वैरञ्च स्यात् । मदकामयोः क्लीबत्वमार्षम् । ततः स्थानपञ्चकप्राप्तेरनंतरम् । इत्यर्थ इति । “कालभावाध्वदेशानाम्” इत्यादिकारिकाबलादत्र कर्मत्वमिति भावः ॥ ३९॥४० ॥ गुरुः स्ववृत्तेन प्रजाशिक्षयिता धर्मोपदेष्टेत्यर्थः ॥ ४१ ॥ राजा तु तस्मिन्वंचनामेव कृतवान् यतो गते तस्मिंस्तत्तत्स्थानाभावमारचितवान् । जातरूपञ्च धर्मार्थं प्रयोजितवानित्यभिप्रेत्याह—वृषस्येति । पादस्य त्रिभिस्त्रिभिरंशैस्त्रीन्प्रति संदधे श्रीकृष्णभक्तिबलेनेति शेषः । साक्षात्तन्मूर्त्तेः संधानेन सर्वत्रापि प्रतिसंहितवान् तप आदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितम् ॥ पितामहेनोपन्यस्तं राज्ञाऽरण्यं विविक्षता॥४३॥आस्तेऽ धुना स राजर्षिः कौरवेंद्रः श्रियोल्लसन्॥ गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥ ४४ ॥ इत्थंभूतानुभावोऽयमभिमन्युसुतो नृपः ॥ यस्य पालयतः क्षोणीं यूयं सत्राय दीक्षिताः ॥ ४५ ॥ इति श्रीभा०महा०प्रथमस्कंधे कलिनिग्रहो नाम सप्तदशोऽध्यायः ॥१७॥ सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ॥१॥ ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात् ॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥२॥ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः॥वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरम् ॥ ३ ॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् ॥ स्यात्संभ्रमोंऽतकालेऽपि स्मरतां तत्पदांबुजम् ॥ ४ ॥ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः ॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट् ॥ ५ ॥

पादान्प्रतिसंदधे तपआदीनि प्रवर्तितवानित्यर्थः ॥४२॥ युष्मदीयसत्रप्रवृत्तिरपि तत्प्रभावादेवेत्याह त्रिभिः । एतर्हीदानीं युधिष्ठिरेणारण्यं प्रवेष्टुमिच्छतोपन्यस्तं समर्पितमासनमध्यास्ते । अधुना आस्ते पलायत इति वर्तमानसामीप्ये वर्तमानवन्निर्देशः स्मेत्यध्याहारो वा ॥४३॥४४॥ सत्राय सत्रं कर्तुं दीक्षिता दीक्षां कृतवंतः ॥४५॥ इति प्र० टी० सप्तदशोऽध्यायः ॥ १७ ॥ राज्ञस्त्वष्टादशे तस्य ब्रह्मशापो निरूप्यते ॥ स चानुग्रह एवास्य जातो वैराग्यमावहन् ॥ १ ॥ परीक्षितो निर्याणमत्याश्चर्यं वक्तुं तत्संभावनाय जन्माश्चर्यमनुस्मारयति । यो वा इति । विप्लुष्टो निर्दग्धः सन् ॥ १ ॥ ब्रह्मकोपादुत्थितात्तक्षकाद्यः प्राणविप्लवः प्राणनाशस्तस्माद्यदुरुभयं तस्मान्न संमुमोह । तत्र हेतुर्यस्तु भगवत्येवार्पिताशय इति ॥ २॥ किं तु । उत्सृज्येति । वैयासकेः शुकस्य शिष्यः सन् । विज्ञाताऽजितस्य हरेः संस्थितिस्तत्त्वं येन सः ॥ ३ ॥ न चैतच्चित्रमित्याह। उत्तमश्लोकस्यैव वार्ता येष्वत एव नित्यं तत्कथारूपममृतं जुषतां संभ्रमो मोहो न स्यात् ॥ ४ ॥ तस्मिन् राज्ञि सुतरां तन्न चित्रमित्याशयेनाह । तावदिति । अभिमन्योः

प्रवर्त्तितवनिति भावः । सत्यं तत्प्रभावेण न तादृशं नष्टमिति तथोक्तम् ॥ ४२ ॥ अध्यास्त इति । आधिपूर्वाणां शीङ्स्थासामिति कर्मत्वम् । प्रभावेण वा स एष इति बुद्धिसन्निहितत्वात् ॥ ४३ ॥ ४४ ॥ सत्रमिदं बलदेवदृष्टादन्यज्ज्ञेयम् ॥ ४५ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कंधे सप्तदशोऽध्यायः ॥ १७ ॥ स च शापः अनुग्रहत्वे हेतुः वैराग्यमिति (१) यः परीक्षित् मातुरुदरे द्रौण्यस्त्रेण विप्लुष्टोपि दग्धोपि श्रीकृष्णस्यानुग्रहान्नमृतः किं तु पुनर्जीवितं प्राप्त इत्यर्थः । सुभद्रादिप्रार्थनया श्रीकृष्णेन मृतो जीवित इति महाभारताविरोधः । श्रीकृष्णेन कथं जीवित इत्यत्राह—अद्भुतकर्मण इति । अद्भुतकर्मत्वात्स मृतं जीवयेत् । जीवन्तं मारयेच्चेत्यर्थः ॥ १ ॥ अत्रासंमोहे भगवत्यर्पितचेतसामन्यवस्त्वनुसंधानं न भवति । अनुसंधानहेतोश्चेतसोऽन्यत्र गमनाभावादित्यर्थः ॥ २ ॥ विज्ञातोऽनुभवगोचरीकृतोऽजितो विष्णुः संस्थितौ मरणकाले येन स तथेति वा ॥ ३ ॥ उत्तमश्लोकस्य वार्त्तैव वार्त्ता जीवनहेतुर्येषां मध्यमपदलोपी बहुव्रीहिर्वा । संभ्रमो भयं न । "संभ्रमः माध्वसेपि सात्संवेगादरयोरपि" इति मेदिनी । अत एवोत्तमश्लोकवार्त्तावत्त्वादेव । तच्छब्देन बुद्धिस्थ उत्तमश्लोक एव गृह्यत इत्याह—तत्कथामृतं श्रीकृष्णलीलामृतं सेवमानानाम् ॥ ४ ॥ मदीये राष्ट्रे न वर्त्तितव्यमित्यस्याभिप्रायः । कलेः सामर्थ्यप्रकटनाभाव एव न तु प्रवेशनाभाव इति । किञ्च राज्ञा निगृहीतस्य कलेस्ततः परं कीदृक्स्थितिरभूदित्यपेक्षायामाह—तावदिति । एकराट् चक्रवर्त्ती पञ्चलक्षराजेंद्रशास्तेत्यर्थः । तदुक्तं ब्रह्मवैवर्त्ते "चतुर्योजनप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम् ॥ तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः ॥६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् ॥ कुशलान्याशु सिध्यंति नेतराणि कृतानि यत् ॥७॥ किं नु बालेषु शूरेण कलिना धीरभीरुणा ॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते ॥८॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ॥ वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥९॥ यायाः कथा भगवतः कथनीयोरुकर्मणः ॥ गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः ॥१०॥ ऋषय ऊचुः ॥ सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ॥ यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ॥११॥ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ॥ आपाययति गोविंदपादपद्मासवं मधु ॥ १२ ॥

पुत्र एकराट् चक्रवर्तीशः पतिर्यावत् ॥ ५ ॥ ननु तदा कलेरप्रवेश एवास्तु प्रविष्टोऽपि न प्राभवदिति कुतस्तत्राह । यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीमनुवृत्तः प्रविष्टः । अधर्मस्य प्रभवो यस्मिन् ॥ ६ ॥ नन्वधर्महेतुं कलिं सर्वथा किं न हतवांस्तत्राह । नानुद्वेष्टीति । सारंगो भ्रमर इव सारग्राही । सारमाह । यद्यस्मिन्कुशलानि पुण्यान्याशु संकल्पमात्रेण फलंति इतराणि पापान्याशु न सिद्ध्यंति यतस्तानि कृतान्येव सिद्ध्यंति न तु संकल्पितमात्राणीति ॥ ७ ॥ ननु दोषाधिक्याद्द्वेष एव युक्तः । न धीरेषु तस्याकिंचित्करत्वादित्याह । किं न्विति । किं नु तेन भवेत् । बालेष्वधीरेषु अप्रमत्तोऽवहितः सन्यो वृक इव वर्तते ॥ ८ ॥ पारीक्षितमाख्यानमपृच्छत पृष्टवंतो यूयम् ॥ ९ ॥ किं बहुना नरैरेतावदेव कर्तव्यमिति सर्वशास्त्रार्थसारं कथयति । याया इति । कथनीयान्युरूणि कर्माणि यस्य तस्य गुणकर्मविषयः बुभूषुभिः सद्भावमिच्छद्भिः ॥ १० ॥ पुनर्विस्तरेण कथनार्थं सूतोक्तिं तत्संगं चाभिनंदति । सूतेति त्रिभिः । शाश्वतीः समा अनंतान्वत्सरान् जीव । अत्यंतसंयोगे द्वितीया । विशुद्धं यशः कीर्तयसि । तच्चास्माकं मर्त्यानाममृतं मरणनिवर्तकम् ॥ ११ ॥ किं च । अस्मिन्कर्मणि सत्रेऽनाश्वासेऽविश्वनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् धूमेन धूम्रो विवर्ण आत्मा

र्यैतं शासिता नृप ईरितः । तस्माच्छतगुणो यो हि स ज्ञेयो मंडलेश्वरः ॥ तस्माद्दशगुणो यश्च राजेंद्रः स प्रकीर्त्तितः । राजेंद्राणां पंचलक्षं चक्रवर्ती प्रशास्ति यः ॥" इति । न प्रभवेदिति । दत्तानामपि स्थानानां तत्प्रभावेणानुद्भवात् ॥ ५ ॥ ६ ॥ अत्राक्षिपति—नन्विति । कुशलानीति । "लोको विकर्मनिरतः कुशले प्रमत्तः" इत्याद्यनुसारेण सर्वमंगलमयानि भगवत्कीर्त्तनादीनि सिद्ध्यंत्येव ।"कलिं सभाजयन्त्यार्याः" इत्यादेः "कृष्णचरितं कलिकल्मषघ्नम्" इत्यादेः "श्रुतोनुपाठितो ध्यातः" इत्यादेः "सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिः" इत्यादेः "यस्यां वै श्रूयमाणायाम् " इत्यादेश्च । इतराणि तु कृतान्यपि न सिध्यंति "अतः कलौ तपोयोगविद्यायज्ञादिकाः क्रियाः । सांगा भवंति न कृताः कुशलैरपि देहिभिः " इति ब्रह्मवैवर्त्तात् । अतो महाफलानां तत्कीर्त्तनादीनां सिद्धिश्चेन्मा सिद्ध्यंतु नाम तुच्छफलान्यन्यानीति तदभिप्रायः ॥ ७ ॥ पुनराक्षिपति नन्विति । धीरेषु विवेकिषु "धीरः स्यात्त्रिषु पंडितः" इति मेदिनी । वृक इति । लुप्तोपमा ॥ ८ ॥ ९ ॥ बुभूषुभिः सद्भावं स्वसत्तामिच्छद्भिः । अन्यथा जीवन्मृतत्वं स्यादिति भावः ॥ १० ॥ सूत इति । सुवति प्रेरयति कथाश्रावणेन भगवद्धर्मे इति सूतपदस्यान्वर्थतां द्योतयंतस्तथा सौम्येति तस्य सुहृत्तां च तस्य कथाकथने उत्साहं वर्द्धयामासुरिति भावः । अमृतं मोक्षसाधनम् ॥ ११ ॥ फलानिश्चयेन कृषिवत्त्वम् । तेन भक्तेर्विश्वसनीयत्वं ध्वनितम् । अत्र सत्रवत्कर्मांतरं यशःश्रवणवद्भक्त्यंतरं च ज्ञेयम् । तदेवं भक्तिं विना कर्मादिभिरस्माकं दुःखमेवासीदिति व्यतिरेकित्वमत्र गम्यते । तदुक्तं "यशःश्रियामेव परिश्रमः परः" इत्यादि । "अतो वै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ १३ ॥ को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य ॥ नांऽतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥ १४ ॥ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य ॥ हरेरुदारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥ १५ ॥ स वै महाभा गवतः परीक्षिद्येनाऽपवर्गाख्यमदभ्रबुद्धिः ॥ ज्ञानेन वैयासकिशब्दितेन भेजे खगेंद्रध्वजपादमूलम् ॥ १६ ॥

शरीरं येषां तानस्मान् । कर्मणि षष्ठी । आसवं मकरंदम् । मधु मधुरम् ॥ १२ ॥ भगवत्संगिनो विष्णुभक्तास्तेषां संगस्य यो लवोऽत्यल्पः कालस्तेनापि स्वर्गं न तुलयाम समं न पश्याम न चापवर्गम् । संभावनायां लोट् । मर्त्यानां तुच्छा आशिषो राज्याद्या न तुलयामेति किमु वक्तव्यम् ॥ १३ ॥ एवं सत्संगमभिनंद्य श्रवणौत्सुक्यमाविष्कुर्वंति । को नामेति । रसविद्रसज्ञः । महत्तमानामेकांतेन परमयनमाश्रयो यस्तस्य कथायाम् । अगुणस्य प्राकृतगुणरहितस्य । कल्याणगुणानामंतं ये योगेश्वरास्तेऽपि न जग्मुरेतावंत इति न परिगणयांचक्रुः । भवः शिवः पाद्मो ब्रह्मा च मुख्यौ येषां ते ॥ १४ ॥ नोऽस्माकं मध्ये भगवान्प्रधानं सेव्यो यस्य स भवान्नः शुश्रूषतां हरेश्चरितं विस्तारयतु ॥ १५ ॥ तच्च शुकपरीक्षित्संवादेन कथयेत्याहुः । स वा इति द्वाभ्याम् । वैयासकिना श्रीशुकेन शब्दितेन कथितेन येन ज्ञानेन ज्ञानसाधनेनापवर्गं इत्या

कवयो नित्यम्'' इत्यादि च । ब्रह्मवैवर्त्ते च श्रीशिवं प्रति विष्णुवाक्यम् ''यदि मां प्राप्तुमिच्छंति प्राप्नुवंत्येव नान्यथा । कलौ कलुषचित्तानां वृथायुःप्रभृतीनि च ॥ भवंति वर्णाश्रमिणां न तु मच्छरणार्थिनाम् ।'' इति । भक्तेः साक्षात्फलदत्वमाह--मकरंदरूपं मधुमादकमिति । तदितरसर्वसुखदुःखाननुभवात् । प्रतिक्षणं तदीयस्वादुत्वानुभवाच्च ॥ १२ ॥ तस्मात्तादृशसाधुसंगमहानिधेर्माहात्म्यमस्मदनुभवगोचरीकृतं कियद्ब्रूम इत्याहुः । स्वर्गं कर्मफलमपवर्गं ज्ञानफलं च । यतः साधुसंगेन परमदुर्लभाया भक्तेरंकुरो हृदि उद्भवतीति भावः । तत्र भक्तेः साधनस्यापि साधुसंगलवेनापि कर्मज्ञानादेः फलं संपूर्णमपि न तुलयाम किमुत बहुकालव्यापिना साधुसंगेन किमुततरां तत्फलभूतया भक्त्या किमुततमां भक्तिफलेन प्रेम्णेति च कैमुत्यातिशयो द्योतितो भवति । तथात्र संभावनार्थलोटा तोलने संभावनामेव न कुर्मः । न हि मेरुणा सर्षपं कश्चित्तुलयतीति द्योत्यते । बहुवचनेन बहूनां संमत्या नैषोर्थः केनचिदप्रमाणीकर्तुं शक्यत इति व्यज्यते । ''भगवत्संगिसंगस्य'' इत्यनेन ''न तथास्य भवेत्क्लेशो बन्धश्चान्यप्रसंगतः । योषित्संगाद्यथा पुंसस्तथा तत्संगिसंगतः'' इति योषित्संगादपि योषित्संगिनां यथा संगोऽतिनिंद्य उक्तस्तथैव भगवत्संगादपि भगवत्संगिनां संगोऽतिप्रशस्य इत्यभिलषणीय इति बोध्यते ॥ १३ ॥ ननु सत्यमेवं प्रशस्यते साधुसंगो यतस्तं विना श्रीकृष्णकथास्वादो न लभ्यते स युष्माभिर्लब्ध एवेति किं पुनस्तस्यैव पौनःपुन्येनेत्यत आह—क इति । कः तृप्येदिति महामाधुर्यमुक्तम् । महैश्वर्यमाह—नान्तमिति । परायाः सर्वोत्कृष्टशक्तेर्वाऽयनस्य ''परास्य शक्तिर्विविधैव श्रूयते'' इत्यादिश्रुतेः । यद्वा को ब्रह्मा नामेतिप्रसिद्धम् । तृप्येन्नेत्यर्थः । यद्वा न कोपीत्यर्थः ॥ १४ ॥ यतोऽलंबुद्धिर्नास्ति तत्तस्माद्धेतोः । हे विद्वन्निति । सर्वथा ज्ञानवानसि त्वं वक्तुं समर्थ एवेति भावः । भगवतां सौभाग्यवतां पुंसां मध्ये प्रधानो भवान् उदारं चतुर्वर्गप्रदं शुद्धं मायातीतम् । महतां ब्रह्मादीनामतिशयेन श्रेष्ठो महत्तमः एक एवान्ते प्रलये यः स एकांतः । यद्वांते एक एकांतः । राजदन्तादिवत्समासः । पराणां मुक्तानामाश्रयो विचाराधारः महत्तमश्चासावेकांतश्चेति महत्तमैकांतः स चासौ परायणश्चेति तथा तस्य । शुश्रूषतामिति स्वेषां श्रवणौत्कंठ्यमुक्तम् ॥ १५ ॥ हरेरुदारचरितानामानंत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठम् ॥ आख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभिरामम् ॥ १७ ॥ सूत उवाच ॥ अहो वयं जन्मभृतोऽद्य हास्मद्वृद्धानुवृत्त्याऽपि विलोमजाताः ॥ दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥ १८ ॥ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य ॥ योनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः ॥ १९ ॥

ख्या यस्य तत् । खगेंद्रध्वजस्य हरेः पादमूलं भेजे ॥ १६ ॥ तदसंवृतार्थं यथा तथा आख्याहि । तदेव निर्दिशंति । परीक्षिते कथितं पारीक्षितमाख्यानं श्रीभागवतं पुराणम् । परं पुण्यं सत्त्वशोधकम् । अत्यद्भुते योगे निष्ठा यस्य । अनंतास्यचरितैरुपपन्नं युक्तम् । अत एव भागवतानामभिरामं प्रियम् एतैर्विशेषणैः कर्मज्ञानभक्तियोगप्रकाशकत्वं दर्शितम् ॥ १७ ॥ श्रीभागवतव्याख्याने लब्धप्रसंगं महतामादरपात्रमात्मानं श्लाघते द्वाभ्याम् । अहो इत्याश्चर्ये । ह इति हर्षे । वयमिति । बहुवचनं श्लाघायाम् । प्रतिलोमजा अप्यद्य जन्मभृतः सफलजन्मान आजाताः । वृद्धानामनुवृत्त्या आदरेण । ज्ञानवृद्धः शुकस्तस्य सेवयेति वा । यतो दुष्कुलत्वं तन्निमित्तमाधिं च मनःपीडां महत्तमानामभिधानयोगो लौकिकोऽपि संभाषणलक्षणः संबंधो विधुनोत्यपनयति ॥ १८ ॥ कुतः पुनः किं पुनर्वक्तव्यं तस्यानंतस्य नाम गृणतः पुंसो महत्तमानामभिधानयोगो दौष्कुल्यं विधुनोतीति । यद्वा । नाम गृणतः पुनः कुतो दौष्कुल्यमिति । यद्वा । गृणतः पुंसस्तस्य नाम दौष्कुल्यं विधुनोतीति किं वक्तव्यमिति कैमुत्यन्या

तेषां मध्ये किं वक्ष्यामीति प्रश्नो माभूदिति स्वाभिलषितचरितमित्याहुः । तन्नेति । तीर्थेणेदमेव पद्यं पूर्वं पठितमित्याह—ननु ज्ञानादेव मोक्ष इति । ज्ञानाय तत्फलाय मोक्षाय च कथं न स्पृहयथेति चेदस्माकं भक्तानां भगवच्चरितास्वादनं ज्ञानं तत्फलं भगवत्पदप्राप्तिरेव मोक्ष इति परीक्षिद्दृष्टयैवाहुः । तच्चरितं भवान्वितनोतु येन स वै परीक्षित्खगेंद्रध्वजस्य भगवतः पादमूलं प्राप । ननु द्वादशस्कंधे परीक्षिदपवर्गं प्रापेति प्रसिद्धेः सत्यम् । अपवर्ग इत्याख्या यस्य तद्भक्तेर्भगत्पादमूलमेवापवर्ग इत्युच्यते । वक्ष्यते च पंचमस्कन्धे "यथावर्णविधानमपवर्गश्च भवति योऽसौ भगवति भक्तियोगः" इति । येन कथंभूतेन । वैयासकिशब्दितेन । यथैव तत्पादमूलमपवर्गशब्देनोच्यते तथैव तच्चरितमपि ज्ञानशब्देन वैयासकिनोच्यते । अतो ज्ञानेन परीक्षिदपवर्गं प्रापेति प्रसिद्धिर्नानृतेत्यर्थः । एतेन "स प्रेत्य गतवान्यथा" । इति प्रश्नस्योत्तरमुक्तम् ॥ १६ ॥ असंवृतार्थमनाच्छादितार्थं परमित्यत्रावांतरतात्पर्येण धर्मज्ञानप्रकाशकत्वेपि मुख्यतात्पर्येण भक्तेरेव प्रकाशकत्वमाह—भागवताभिराममिति । अत एव प्रागुक्तम् "स वै महाभागवतः" इत्यादि । यद्वा परं पुण्यं परमशोधकं यतोऽत्यद्भुतयोगे भक्तियोगे निष्ठा तात्पर्यं यस्य तत् । अनंतस्य हरेराचरितानि लीलास्तैरुपपन्नं युक्तम् ॥ १७ ॥ तादृशब्रह्मर्षीन्प्रति स्वयं तादृशमहापुराणमुपदेष्टुं संकुचंस्तत्र तन्महिमानमेवावलंबते । अहो इति युग्मेन । विलोमजाताः सूतशब्दप्रयोगात् । अनुवृत्त्या सेवया स्वीकारेण वा ॥ १८ ॥ महत्तमाभिधानयोगस्याधिक्यकथनेन नाम्नो न्यूनरतामाशंक्याह—यद्वेति । कर्मापेक्षया कर्तुरेव मुख्यत्वमतो नाम्नः कर्तृतामाह—यद्वेति । ननु दौष्कुल्यारंभकं पापं प्रारब्धमेव तस्य नाशं विना कथं दौष्कुल्यधूननम् । प्रारब्धस्य तु भोगेनैव नाश इति प्रसिद्धेः । नामतः कथं खण्डयतीत्यत आह—यो भगवाननंतशक्तिरिति । शक्तीनामानंत्याद्भक्तप्रारब्धखंडिन्यपि काचित्तस्य शक्तिरस्त्येवेति भावः । तथा च महत्सु स्वभक्तेषु गुणा यस्य स महद्गुणा यस्य तस्य भावस्तस्मात् । यमनंतमाहुरिति । तेन स्वभक्तेषु तदीयगुणसंक्रमात्तस्मिन्निव तद्भक्तेष्वपि प्रारब्धं न तिष्ठति महान्तोऽनंता गुणा अप्राकृता भक्तवात्सल्यादयो यस्य तस्य भावस्तत्त्वं तस्मादिति वा । अत्र महच्छब्दो ह्यानंत्ये वर्तते । "महती वल्लकीभेदे प्राज्ये तु स्यान्नपुंसकम्" इति मेदिनी । प्राज्यप्रभूताधिकबहलानंतशब्दाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावताऽलं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ॥ हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेऽनभीप्सोः ॥ २० ॥ अथापि यत्पादनखावसृष्टं जगद्विरिंचोपहृतार्हणांभः ॥ सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः ॥२१॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढम् ॥ व्रजंति यत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः ॥ २२ ॥ अहं हि पृष्टोऽर्यमणो भवद्भिराचक्षआत्मावगमोऽत्र यावान् ॥ नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चितः ॥ २३ ॥

यमेवाह । अनंताः शक्तयो यस्य । स्वतोऽप्यनंतः । किं च । महत्सु गुणा यस्य स महद्गुणस्तस्य भावस्तस्मात् । यं गुणतोऽप्यनंतमाहुः ॥१९॥ एतत्प्रपंचयति त्रिभिः । एतावतेति । तस्य यदसाम्यमनतिशायनं च गुणैस्तत्साम्यं तदाधिक्यं चान्यस्य नास्तीत्यस्यार्थस्य ज्ञानमेतावता सूचितेनालं पर्याप्तं कस्तद्विस्तरतो वक्तुं शक्नोति । तदेवाह। इतरान्ब्रह्मादीन्प्रार्थयमानान् हित्वा विभूतिर्लक्ष्मीरनभीप्सोरपि यस्यांघ्रिरेणुं सेवत इति ॥ २० ॥ अथेत्यर्थांतरे । यस्य पादनखादवसृष्टं निसृतमपि विरिंचेनोपहृतं समर्पितमर्हणांभोऽर्घोदकमीशसहितं जगत्पुनाति । विरिंचोपहृतं सेशमिति च तयोरप्युपासकत्वमुक्तम् । तस्मान्मुकुंदव्यतिरिक्तः को नाम भगवत्पदस्यार्थः स एव सर्वेश्वर इत्यर्थः ॥ २१ ॥ धीराः संतः । ऊढं धृतम् । अंत्यं परमकाष्ठापन्नम् । तदाह । यस्मिन्नहिंसोपशमश्च स्वाभाविको धर्मः ॥ २२ ॥ एवं स्वभाग्यमभिनंद्य पारीक्षितोपाख्यानं वक्तुमाह । अहं हीति । हे अर्यमणो हे सूर्यास्त्रयीमूर्तयोऽत्र यावानात्मावगमो मम ज्ञानं तावदाचक्षे प्रवक्ष्यामि । तथा हि । यथा पक्षिणो नभ आत्मसमं स्वशक्त्यनुरूपमेवो

पर्यायाः ॥ १९ ॥ एतन्महद्गुणत्वम् । ननु ते के गुणास्तत्र तान्वक्तुं कः शक्नोति किन्त्वेतावता सूचितेनालम् । तदेव सूचितमेव । अयं भावः—यद्गुणमाधुर्यमोहिता सती श्रीर्ब्रह्मादीन्महद्गुणानपीच्छतोपि त्यक्त्वा यमनिच्छन्तमपि स्वयमेव तत्पादरजो जुषते । एतेनैव विष्णुस्सर्वेभ्योधिकगुण इति ध्वनितम् ॥ २० ॥ अर्थांतरमाह—यस्य वामनावतारे पादनखाद्वामपादनखनिर्भेदनान्निःसृतं ब्रह्मद्रवं ब्रह्मणा स्वकमंडलौ धृत्वार्घीकृतं यज्जलं तदेव महादेवेन स्वशिरसि धृतं पुनर्भूम्यागतं गंगाभूदिति । तदुक्तं "आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या किल्बिषनाशिनी विजयते भागीरथी पावनी" इति भगवत्पूज्यपादैः वाल्मीकीयादौ च स्पष्टतरं प्रतिपादितमेतत् । इत्यर्थ इति । जगति सर्वोत्कृष्टा लक्ष्मी ब्रह्मशिवा एव तत्पदं सेवमानास्तस्य महोत्कर्षं सूचयंतीति वाक्यार्थः ॥ २१ ॥ अथ दृश्यमाना मनीषिणोप्यत्र प्रमाणमित्याह—यत्रेति । यत्र मुकुन्दे स्मरणादिना मुक्तिप्रदे यद्यस्य पारमहंस्यं भागवतपरमहंसत्वं "मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने" इत्युक्तेः । यस्मिन् यदर्थम् । अहिंसया मात्सर्यादिराहित्येनोपशमो भगवन्निष्ठा विधीयत इत्यर्थः । यस्मिन्यजने इति चक्रवर्ती । तीर्थस्तु धीराः विषयवार्तानिवृत्तायां धियि रताः संतो देहात्मजवित्तादिषूढं संगमासक्तिं सहसा विमर्शज्ञानेन निरस्य परमहंसाश्रमप्राप्यमन्त्यं सर्वावधिभूतं मुकुंदाख्यं ब्रह्म व्रजंति यस्मिन्परमहंसाश्रमेऽहिंसा विहितातिरिक्तहिंसावर्जनमुपरमः । उं रुद्रं पाति पिबति संहरति वेत्युपो विष्णुः सर्वाधिकस्तत्र हरौ रमो रमणं रतिर्विषयनिवृत्तिर्वा धर्मो विहित इति शेषः । एतेन मुक्तिदातृत्वेनापि सर्वोत्कर्षो हरेरेवासूचीति ॥ २२ ॥ आख्याहीति शौनकप्रश्नोत्तरं वक्ति—हे अर्यमण इति । अर्यं शुद्धधर्मं मीयते ज्ञायतेऽनेनेत्यर्यमा वेदः, अर्यं तमो मिनोति प्रक्षिपतीत्यर्यमा सूर्यो वा । "अर्यश्चंद्रे रवौ वैश्ये रजताम्नाययोरपि । तमसि स्वामिनि श्रेष्ठे पुंस्त्वाद्यस्य तु लोकतः" इति निरुक्तिः । यूयं साक्षात्सूर्यरूपा एव भवतामग्रेऽहं ज्योतिरिंगणवत्किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकदा धनुरुद्यम्य विचरन्मृगयां वने ॥ मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशम् ॥ २४ ॥ जलाशयमचक्षाणः प्रविवेश तमाश्रमम् ॥ ददर्श मुनिमासीनं शांतं मीलितलोचनम् ॥ २५ ॥ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतम् ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियम् ॥ २६ ॥ विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च ॥ विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घ्यसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमानश्चुकोप ह ॥ २८ ॥ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥ २९ ॥

त्पतंति न कृत्स्नं तथा विपश्चितोऽपि विष्णोर्गतिं लीलां समम् स्वमत्यनुरूपमेव वदंतीत्यर्थः ॥ २३ ॥ संप्रति कथामुपक्षिपति । एकदेति ॥ २४ ॥ अचक्षाणोऽपश्यन् । तं प्रसिद्धमाश्रमम् । तस्मिंश्च मुनिं शमीकम् ॥ २५ ॥ प्रतिरुद्धाः प्रत्याहृता इंद्रियादयो येन तम् । अत एवोपरतम् । स्थानत्रयाज्जाग्रदादिलक्षणात्परं तुरीयं पदं प्राप्तम् । अत एव ब्रह्मभूतत्वादविक्रियम् ॥ २६ ॥ विप्रकीर्णाभिर्जटाभिराच्छन्नम् । रुरुर्मृगविशेषस्तस्य चर्मणा चाच्छन्नम् । विशेषेण शुष्यत्तालु यस्य सः । तथाभूतं मुनिमुदकमयाचत ॥२७॥ न लब्धं तृणं तृणासनं भूम्याद्युपवेशस्थानं च येन सः । न संप्राप्तोऽर्घः सूनृतं प्रियवचनं च येन सः ॥२८॥ मत्सरस्तदुत्कर्षासहनम् ॥२९॥

प्रकाशयितुं समर्थः । यद्वा सर्वदा वेदाभ्यासतत्परत्वात्तद्रूपा यूयमहं तद्वक्तुं श्रोतुं वाप्यनधिकारित्वाद्भवदग्रे किं वदामि तथापि भवदाज्ञया गुरुप्रसादावाप्तं किंचिद्वदिष्याम्येवेति भावः । इत्यर्थ इति । भगवद्गुणानामानन्त्यात्स्वात्मना ज्ञातुं तु न कोपीशः । पक्षिणो हि स्वशक्त्यनुसारेण पतंति नभसि गच्छंति । शक्त्यभावादेवोपरमंति न नभोवसानात्तस्यानंतत्वात्तदंतं न तेऽवाप्नुवंति यथा तथा । ब्रह्मप्रभृतिज्ञानिनोपि स्वमत्यनुसारमेव विष्णुगुणगानं कुर्वंतः शक्त्यभावादुपरमंति न गुणावसानात्तेषामानंत्यादिति भावः ॥ २३ ॥ अथ भगवानेव स्वपार्श्वे नेतुं ब्रह्मशापद्वारा तं विरक्तं संपादितवांस्तत्र च श्रीभागवतं प्रकाशितवानिति वक्तुं तच्चरितांतरमाह—एकदेति । धनुरुद्यम्य सज्यं कृत्वा प्रगृह्य मृगयामुद्दिश्य वने विचरन् ॥ २४ ॥ स परीक्षित् आश्रममालस्यपरिहारकारणं स्थानं विवेशेत्यन्वयः । शांतमसंप्रज्ञातसमाधिस्थम् । समाधिर्हि द्विधा संप्रज्ञातासंप्रज्ञातभेदात् । एकरसवस्तुमात्रत्वेन चित्तस्य तदाकारवृत्तिविशेषावस्थानं संप्रज्ञानसमाधिः । स एव सविकल्पक इति चोच्यते । स च पुनर्दृश्यानुविद्धः शब्दानुविद्धश्चेति द्विविधः । दृश्यमिश्रो दृश्यानुविद्धः शब्दमिश्रः शब्दानुविद्धः । वृत्तिमप्यखंडैकरसमात्रत्वेनोपसंहृत्य वृत्तिमताश्चित्तस्य प्रयत्नपूर्वकं वस्तुमात्रत्वेनावस्थानमसंप्रसातसमाधिः । स एव निर्विकल्पक इति च गीयते । दृश्यानुविद्धशब्दानुविद्धनिर्विकल्पकसमाधय एव बाह्याभ्यंतरभेदेन षट् समाधय इति व्यवह्रियंते । सत्त्वरजस्तमोगुणात्मिकाः शांतघोरमूढवृत्तयः । तत्र शांतः सुखमौदार्यं वैराग्यञ्च, घोरस्तु कामः क्रोधो लोभस्तृष्णा मूढो मोहो भ्रांतिः । एतासां वृत्तीनां हृदये यत्स्फुरणं तद्दृश्यं तस्य द्रष्टा साक्षी अनुस्यूतोहमिति दृश्यानुविद्ध आंतरीयसविकल्पकसमाधिः १, वृत्तीनां त्रिगुणात्मकत्वादसंगोहमिति शब्दानुविद्धम् आंतरीयसविकल्पकसमाधिः २, हृदये एतयोर्विकल्पयोरस्फुरणमसंप्रज्ञातसमाधिः ३, स एव निर्विकल्प इति चोच्यते। अथ बाह्यसूर्यादिकस्य द्रष्टा साक्षी अनुस्यूतोहमिति दृश्यानुविद्धो बाह्यसविकल्पकसमाधिः ४, सूर्यादिकादसंगोहमिति शब्दानुविद्धो बाह्यसविकल्पकः ५, एतदुभयाविकल्पास्फुरणाद्बाह्यनिर्विकल्पकसमाधिरिति ६,॥२५॥ अत एव तुरीयपदप्राप्तत्वादेव अविक्रियं निश्चेष्टम् ॥ २६ ॥ आच्छन्नमिति । सापेक्षत्वात्समासांतर्गतमप्याकृष्यते रौरवेणाच्छन्नमिति । पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति न्यायस्तु न नियतस्तदपवादभूतेन व्यक्तिन्यायेन तद्बाधात् । स्वीक्रियते हि जातिविशिष्टव्यक्तौ शब्दशक्तिमुपगच्छद्भिरपि तार्किकैर्गौरनित्येत्यादौ पदार्थैकदेशस्यापि व्यक्तेरनित्यत्वाद्यन्वयः । तत्सूत्रं च "जातिव्यक्त्याकृतयः पदार्थः" इह जात्यादित्रयस्यैव पदार्थत्वं विहितं न त्वेकैकस्येति । वस्तुतस्तु साकांक्षत्वनिराकांक्षत्वे एवान्वयानन्वयप्रयोजके न तु पदार्थतदेकदेशत्वे अपत्यिलं प्रसक्तानुप्रसक्त्या । तथाभूतं पूर्वोक्तशांतादिविशेषणविशिष्टम् ॥ २७ ॥ आदिना स्वागतादिग्रहः । "तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यंते कदाचन" इति स्मृतेः ॥ २८ ॥ अभूतपूर्व इतः पूर्वं कदापि नोत्पन्नः तदुत्कर्षासहनमहो मद्राज्यस्थापि मत्प्रजा भूत्वा मां न सत्करो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा ॥ विनिर्गच्छन्धनुष्कोटया निधाय पुरमागमत् ॥३०॥ एष किं निभृताशेषकरणो मीलितेक्षणः ॥ मृषासमाधिराहोस्वित्किं न स्यात्क्षत्रबंधुभिः ॥ ३१ ॥ तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः ॥ राज्ञाऽघं प्रापितं तातं श्रुत्वा तत्रेदमब्रवीत् ॥ ३२॥ अहो अधर्मः पालानां पीव्नां बलिभुजामिव ॥ स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥ ३३ ॥ ब्राह्मणैः क्षत्रबंधुर्हि द्वारपालो निरूपितः॥ स कथं तद्गृहे द्वाःस्थः सभांडं भोक्तुमर्हति ॥ ३४ ॥ कृष्णे गते भगवति शास्तर्युत्पथगामिनाम् ॥ तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥ ॥ ३५ ॥ इत्युक्त्वा रोषताम्राक्षो वयस्यानृषिबालकान् ॥ कौशिक्याऽप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३६ ॥

गतासुं मृतम् ॥ धनुष्कोट्या चापाग्रेण ॥ ३०॥ सर्पनिधाने राज्ञोऽभिप्रायमाह । एष किं प्रत्याहृतसर्वेंद्रियः सन्मीलितेक्षणः स्थितो यद्वा क्षत्रबंधुभिरागतैर्गतैर्वा किं नु स्यादित्यवज्ञया मृषासमाधिः सन्निति जिज्ञासयेत्यर्थः ॥ ३१ ॥ तस्य पुत्रः शृंगीनामा । अतितेजस्वी तपोबलसंपन्नः । अघं दुःखम् । तत्रार्भकमध्ये ॥ ३२ ॥ पालानां राज्ञाम् । पीव्नां पुष्टानाम् । अधर्ममेव निर्दिशति स्वामिनि दासानां यदघं पापाचरणं बलिभुजां काकानामिव शुनामिव चेति ॥ ३३ ॥ दासत्वं दर्शयति । ब्राह्मणैरिति । सभांडं भांडे एव स्थितम् ॥ ३४ ॥ तत्तदनंतरम् । अहं शास्मि दंडयामि ॥ ३५ ॥ इति वयस्यानुक्त्वा रोषेण ताम्रे अक्षिणी यस्य सः । कौशिकी नदी तस्या अपः

त्ययमित्येवंलक्षणम् ॥ २९ ॥ निधायेति । भो ब्रह्मंस्त्वयाहमतिथिर्यथा साधु संमानितस्तथा त्वामप्यनया सुकुमारमालया संमानयामीति वदन्निति भावः ॥ ३० ॥ निर्गमनसमये राजापरामृशति–एष इति । निभृताशेषकरणः प्रत्याहृतसर्वेंद्रियः । अतः सत्यसमाधिकः आहोस्विन्मृषासमाधिस्तत्र हेतुः–किं न्विति । अत्र राज्ञो विकर्मेदमभाग्योत्थं न ज्ञेयं किन्तु तं शीघ्रं स्वपार्श्वे नेतुं ब्रह्मशापद्वारा विरक्तं विधाय शुकदेवेन संगतं कृत्वा तत्र श्रीभागवतस्वरूपेण स्वयमाविर्भूय जगदुद्धर्तुं च कलौ जनिष्यमाणानपि कांश्चन भक्तान्स्वकृतं रासलीलाद्यास्वादयितुं च भगवत एवेयमिच्छेति मनीषिण आहुः :। तस्यैव मेघस्येत्यादिवक्ष्यमाणत्वात् । मच्छुद्धभक्तस्य दैवाद्विकर्मापि शुभोदर्कमेवेति ज्ञापयितुम्। "यदायदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" इति श्रीभागवतरूपेण स्वाविर्भावे कारणाभासं चोत्थापयितुं भगवतैव तस्य तथा भाव उद्भावितः । न च तस्य स्वप्नेपि स स्वभावः संभवति । "अभूतपूर्वः" इत्युक्तेः। न च दैवादभाग्यविशेषोत्थोयं तात्कालिको भावस्तत्फलस्य शुकसमागममहाभाग्यस्यानुपपत्तेः । न च तस्य पिपासातिशय एव हेतुरिति वाच्यम् । तत्क्षणानंतरमेव जलमपीतवत एवानुतापशतविदीर्णमानस्य गृहागतस्य सद्य एव प्रायोपवेशादित्येवं च जन्मनि मरणे च ब्रह्मतेजसो मध्ये वयसि कालस्य च निर्जयात्तस्य राज्ञो भगवत्कृपामहाबलवत्त्वमसाधारणमेव द्रष्टव्यम् ॥३१॥ तस्य शमीकस्य ब्रह्मर्षेः । तत्र तदा पुत्रः शृंगी नामाऽतितेजस्वी । तेजास्विवीर्योद्भूतशरीरत्वाद्बालको वयसैव न तु सामर्थ्येन । अर्भकैर्बालैः सह क्रीडन्निदं वक्ष्यमाणम् ॥ ३२ ॥ स्वामिनि ब्राह्मणे दासानां दासानामिव द्वारपालानां राज्ञाम् । अयमपराधस्तदहो महानधर्मः ॥ ३३ ॥ द्वारपालः श्वा श्ववद्द्वाररक्षकः गृहं प्रविश्य सभाण्डं भाण्डस्थितं वस्तु घृतादि । तेन राज्ञां मुनीनामाश्रमे सहसा प्रवेशे तत्र जलादिप्रार्थने च का योग्यतेति भावः । तथा च दण्डोऽयमिति भावः ॥३४॥ तर्हि को दण्डकर्त्ता तत्राह–कृष्ण इति । उत्पथगामिनामनापदि विहितमार्गं परित्यज्य वर्त्तमानानां मे बलं पश्यत हे बाला इति शेषः ॥३५॥ कौशिकी कुशस्येदं कौशिकं पवित्रं तत् पाणौ विद्यतेऽस्येति कौशिकी प्रसिद्धम् अपो जलान्युपस्पृश्याचम्य वागेव वज्रं वज्रवन्नाशकं शापमित्यर्थः । यद्वा कौशिको विश्वामित्रो देवताऽस्या इति कौशिकी गायत्री तया उपस्पृश्य गायत्र्या विश्वामित्र ऋषिरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति लंघितमर्यादं तक्षकः सप्तमेऽहनि ॥ दंक्ष्यति स्म कुलांगारं चोदितो मे ततद्रुहम् ॥३७॥ ततोऽभ्येत्याऽऽश्रमं बालो गले सर्पकलेवरम् ॥ पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ॥ ३८ ॥ स वा आंगिरसो ब्रह्मन्श्रुत्वा सुतविलापनम् ॥ उन्मील्य शनकैर्नेत्रे दृष्ट्वा स्वांसे मृतोरगम् ॥ ३९ ॥ विसृज्य पुत्रं पप्रच्छ वत्स कस्माद्धि रोदिषि ॥ केन वा ते प्रतिकृतमित्युक्तः स न्यवेदयत ॥ ४० ॥ निशम्य शप्तमतदर्हं नरेंद्रं स ब्राह्मणो नात्मजमभ्यनंदत् ॥ अहो बतांहो महदद्य ते कृतं स्वल्पीयसि द्रोह उरुर्दमो धृतः ॥ ४१ ॥ न वै नृभिर्नरदेवं पराख्यं संमातुमर्हस्यविपक्वबुद्धे ॥ यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः प्रजाः ॥ ४२ ॥

संधिरार्षः । वाग्वज्रं शापम् ॥ ३६ ॥ इत्येवं सर्पनिक्षेपेण । दंक्ष्यति भक्षयिष्यति । पाठांतरे भस्मी करिष्यति । स्मेति पादपूरणे । कुलस्यांगारतुल्यं मे मया । ततेति ह्रस्वत्वमार्षम् ॥ ३७ ॥ गले सर्पकलेवरं यस्येत्यलुक्समासः । मुक्तकंठ उच्चैरित्यर्थः ॥ ३८ ॥ ३९ ॥ तं सर्पं विसृज्य केनापकारः कृतः ॥ ४० ॥ अनभिनंदन वाक्यमहो इत्यादि । बत कष्टम् । ते त्वया महत्पापं कृतम् । द्रोहेऽपराधे । दमो दंडः ॥४१॥ परो विष्णुरित्याख्या ख्यातिर्यस्य तं नरदेवं नृभिः संमातुं समं द्रष्टुम् ॥४२॥

संध्योपासनपद्धत्युक्तेः । तत्र कौशिकीनाम्नी नदी चाप्रसिद्धेति ॥ ३६ ॥ पाठांतरे धक्ष्यतीति पाठे । यतो मृतसर्पेनेन मत्पितुर्देहे निक्षिप्तस्ततो जीवन्नेव सर्पश्रेष्ठस्तक्षको दंशसमकालमेवायुस्तनूकरणसमर्थत्वेनान्वर्थनामा तं दंक्ष्यतीति भावः । सप्तमेहनीति । ननु राजा हि मृगयां गतः क्षुत्तृडार्त्तो मध्याह्ने मुनिवराश्रमं गत्वाऽलब्धार्चः कुपितो मुनेर्गले मृतसर्पं निक्षिप्य पुनर्नगरमागतोऽनुतेपे । ततस्तद्दृषिपुत्रेणार्षिबालेभ्यो नृपकृतं पितृवृत्तं श्रुत्वा तं नृपं सप्तमेऽह्नि तक्षको दंक्ष्यतीति शेपे । पुनराश्रममागत्य पितरं तथाविधं दृष्ट्वा रुरोद । तच्छ्रुत्वा मुनिरात्मजं विनिंद्य स्वशिष्यं गौरमुखनामानं नृपपार्श्वे शापवृत्तांतं कथयितुं प्रेषयामास । तच्छ्रुत्वा नृपो मंत्रिभिः संमंत्र्य पुत्रं राज्येभिषिच्य गंगातटं नगरादागत्य भूशोधनपूर्वकमृषिसमाजं कृत्वा गृहीतानशन उपविवेश ततो देशांतराच्छ्रीशुक आगत्य तं श्रीभागवतं श्रावयामासेति । एतच्चैकेन दिनेन समस्तेनापि कर्तुं न शक्यते किमुत दिनार्द्धेन । किञ्च श्रीशुकेनाप्यागत्य "सप्ताहं जीविताबधिः । उपकल्पय तत्सर्वं तावद्यत्सांपरायिकम्" इत्युक्तम् । तथा कथाश्रवणविधिरपि "आसूर्योदयमारभ्य" इत्यादिना प्रातःकालत एव । प्रथमदिने हि मनुकर्दमसंवादांता कथा कार्या सापि न संभवतीति कथमत्र यथाश्रुतार्थग्रहणे निर्वाह इति चेत् । अत्रेदमवधेयम् । सप्त च मश्चैषां सप्तमं तास्मिंस्त था । मशब्दो हि केरलमते पंचसंख्यापरो विहितस्तेन सर्वमनवद्यम् । यद्वा सप्तसु मिलितो मः सप्तमः द्वादशेत्यर्थः । मध्यमपदलोपी समासो वा कार्यः । "पाद्याः पञ्च प्रकीर्तिताः" इति केरलोक्तेः । तथा च पञ्चभिर्दिनैः सर्वं कार्यं कृत्वा षष्ठादिनमारभ्य द्वादशदिनपर्यंतं गाथा श्राविता श्रीशुकदेवेन एवञ्च "सप्ताहं जीविताबधिः" इति तदुक्तिरपि संगता स्यादिति प्रतीयते । यद्वाऽचिंत्यशक्तिमता श्रीकृष्णेन तदैकदिनभागेनैव सर्वं संपादितामि त्यवधेयम् ॥ ३७ ॥ ततो बालसमूहे शापदानोत्तरम् । इत्यर्थ इति । समाधिस्थो वाचा न बोधनीय इति विधेः कंठसंकोचे रोदनासंभवादिति भावः ॥ ३८ ॥ ३९ ॥ हे वत्सेति । त्वं वत्सलोसि मे केन तेऽपकारः कृत इति एकदेशन्यायेन वत्सपदं वत्सलार्थकमत्र ज्ञेयम् । स श्रृंगी स्वकृतं राजशापं निवेदयामास ॥ ४० ॥ हे अज्ञेति । कर्तव्याकर्तव्यानुसंधानहीनोऽसीति भावः । "दमो दंडे च ताडने" इति कोशात् ॥ ४१ ॥ हे अविपक्वबुद्धे इति । त्वमतीव बालिशोऽसि यतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलक्ष्यमाणे नरदे वनाग्नि रथांगपाणावयमंग लोकः ॥ तदा हि चौरप्रचुरो विनंक्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात ॥ ४३ ॥ तदद्य नः पापमुपै त्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात् ॥ परस्परं घ्नंति शपंति वृंजते पशून्स्त्रियोऽर्थान्पुरुदस्यवो जनाः ॥ ४४ ॥ तदार्यधर्मश्च विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः ॥ ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः ॥४५॥ धर्मपालो नरपतिः स तु सम्राट् बृहच्छ्रवाः ॥ साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् ॥ क्षुत्तृट्श्रमयुतो दीनो नैवाऽस्मच्छापमर्हति ॥ ४६ ॥ अपापेषु स्वभृत्येषु बालेनाऽपक्वबुद्धिना ॥ पापं कृतं तद्भगवान्सर्वात्मा क्षंतुमर्हति ॥ ४७ ॥ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि ॥ नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोऽपि हि ॥४८॥

अलक्ष्यमाणेऽदृश्यमाने । अविवरूथवन्मेषसंघवत् ॥ ४३ ॥ नष्टो नाथो यस्य लोकस्य तस्य वसोर्वसुनो धनस्य विलुंपकादपहर्तुश्चोरादेर्हेतोर्यत्पापं भविष्यति तदस्मन्निमित्तत्वादस्मानुपैष्यति । अनन्वयं संबंधशून्यमेव । तदेव पापं दर्शयति । परस्परमिति । शपंति परुषं वदंति । पश्वादीन्वृंजतेऽपहरंति । पुरुदस्यवश्चोरबहुलाः ॥ ४४ ॥ आर्यधर्मः सदाचारः । शुनां कपीनामिवार्थकामयोरेवाभिनिवेशितचित्तानाम् ॥ ४५ ॥ एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रस्तुते विशेषमाह धर्मपाल इति सार्धेन । हयमेधयाडश्वमेधयाजी । नन्वेवंभूतश्चेत्तत्कुतोऽपकृतवांस्तत्राह । क्षुत्तृडिति । स्वागतप्रश्नाद्यभावेनावज्ञातः प्रत्युत शापं कथमर्हतीत्यर्थः ॥ ४६ ॥ अस्य महापापस्यान्यत्प्रायश्चित्तमदृष्ट्वा पापमावेदयन् भगवंतं प्रार्थयते । अपापेष्विति ॥ ४७ ॥ राजा चेत्प्रतिशापं दद्यात्तर्हि निष्कृतिर्भवेदपि तत्तु न संभवति तस्य महाभागवतत्वादि

सर्वदेवांशविशिष्टं साक्षाद्विष्णुमूर्तिं राजानं नरसामान्यदृष्ट्या शप्तवानसीति भावः । दुर्विषहेण सोढुमशक्येन । यद्यस्य प्रजाः स्थावरजंगमात्मिकाः भद्राणि सुखानि प्राप्नुवंति ॥ ४२ ॥ हे अंगेति । हे पुत्रेति । अत्राप्यंगपदमंगजपरमिति भावः ।"अविर्नाथे द्रुमे शैले रवौ मेषे च कंबले । मूषिकस्य" इति कोशात् । केचित्तु रक्षाहीनसेनावदित्याहुः । "सेनारक्षा वरूथः स्यादवरोधो निवेशनम्" इत्यभिधानात् । अकारप्रश्लेषाभावेऽयमर्थः तदा नरपत्यभावे ॥ ४३ ॥ ४४ ॥ "आर्यः शिष्टे वैश्यवर्गे" इत्यभिधानात् । सदाचारश्शिष्टाचारः । कर्त्तव्यतांशे भ्रांतिरहिता वेदविहितकर्मकर्तारः शिष्टाः । तदेवाह । त्रयीमयः त्रय्या वेदैर्मीयते ज्ञायते प्रतिपाद्यत इति त्रयीमय इति । अत एव वर्णाचारैराश्रमाचारैश्च युतः धर्मलयपरिपाकमाह । ततो वर्णाश्रमाचारयुतवैदिकार्यधर्मनाशानंतरमर्थेषु कनकादिषु कामेषु स्रक्चन्दनवनितादिभोगेषु चाभिनिवेशित आत्मा मनो यैस्ते तथोक्तास्तेषां पुंसां शुनां कपीनां च यथा भक्षणभोगादावव्यवस्था तथा हीनजातीनामुत्तमजातिभिरुत्तमजातीनां हीनजातिभिर्भोगसंभोगादिना वर्णानां संकरः कलुषभावो भविष्यतीत्यर्थः ॥ ४५ ॥ अत्र धर्मपालादिविशेषणानि हेतुगर्भाणि । धर्मपालत्वान्महाभागवतत्वाद्राजर्षित्वाद्धयमेधयाजित्वाच्च सम्राट् न दुष्टः क्षुत्तृट्श्रमान्वितत्वेन बुभुक्षापिपासादिनास्मदाश्रमागतोर्घादिपूजायोग्यो नैवास्मत् अस्मत्तः शापमर्हति ।तस्मादनिर्वार्यमवमापन्नमिति भावः । हयमेधैरिष्टवानिति हयमेधयाट् ॥४६॥ अस्य राजशापलक्षणस्य यत्पापं कृतं तत् सर्वात्मान्तर्यामी ॥४७॥ हिशब्देन "क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा" इति प्रसिद्धिं द्योतयति ॥४८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः ॥ स्वयं विप्रकृतो राज्ञा नैवाऽघं तदचिंतयत् ॥ ४९ ॥ प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः ॥ न व्यथंति न हृष्यंति यत आत्माऽगुणाश्रयः ॥ ५० ॥ इति श्रीभा० महापु० प्रथमस्कंधे विप्रशापोपलंभनं नामाऽष्टादशोऽध्यायः ॥ १८ ॥

सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः ॥ अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् ॥ तदस्तु कामं त्वघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ॥ दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः ॥ ३ ॥

त्याह । तिरस्कृता निंदिताः । विप्रलब्धा वंचिताः । क्षिप्ता अवज्ञाताः । हतास्ताडिताः । अस्य तिरस्कारादिकर्तुः । न तत्प्रतीकारं कुर्वंति । तद्भक्ता विष्णुभक्ताः । प्रभवः समर्था अपि ॥ ४८ ॥ विप्रकृतोऽपकृतः । अघमपराधम् ॥ ४९ ॥ युक्तं चैतदित्याह । प्रायश इति । द्वंद्वेषु सुखदुःखादिषु । अगुणाश्रयः सुखदुःखाद्याश्रयो न भवति ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे टीकायामष्टादशोऽध्यायः ॥१८॥ प्रायोपविष्टे गंगायां राज्ञि योगिजनावृते ॥ शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके ॥ १ ॥ स्वकृतं तत्कर्म मुनिस्कंधे सर्पप्रक्षेपणं गर्ह्यं निंद्यं चिंतयन्सुदुर्मना जातः । चिंतामेवाह सार्धाभ्याम् । अहो इति । नीचं पापम् । अमीवमिति पाठे स एवार्थः । ब्रह्मणि ब्राह्मणे गूढं गुप्तं तेजो यस्य तस्मिन् ॥१॥ कृतं यद्देवहेलनमीश्वरावज्ञापापमित्यर्थः । तस्मान्मे व्यसनं भविष्यति तत्तु नातिदीर्घात्कालाद चिरादेवास्तु तत्राप्यद्धा साक्षान्ममैव न पुत्रादिद्वारेणेति प्रार्थना । काममसंकोचतः । एवं प्रार्थनायाः प्रयोजनमघस्य निष्कृताय प्रायश्चित्ताय यथा पुनरेवं न कुर्यामिति च ॥२॥ एवं साक्षात्स्वस्यैव व्यसनं संप्रार्थ्य ततः प्रागेव किंचित्प्रार्थयते । अद्यैव मे राज्यादि दहतु प्रकोपितं ब्रह्मकुलमेवानलः । पुनर्द्विजादीन्पीडयितुं धीर्मे माभून्न

तदघं तेन राज्ञा कृतमपराधम् । महामुनिरिति हेतुगर्भं विशेषणम् । सर्वज्ञतमत्वाच्छरीराभिमानिन एव दुःखादिप्राप्त्या कोपोत्पत्तिर्न त्वसंप्रज्ञातसमाधेस्तस्य पद्मपत्रपानीयवदश्लिष्टदुरितत्वादित्यर्थः ॥ ४९ ॥ साधूनामयं स्वभाव एवेत्याह—युक्तं चैतदिति । योजिताः संगमिताः साधवो यथास्थितवस्तुदर्शिनः कुतो व्यथाद्यभावस्तत्राह—यत इति । अकाराप्रश्लेषप्रश्लेषाभ्यां गुणस्यागुणस्य दोषस्य चाश्रयो नेत्यर्थः । अत्र नेत्यध्याहर्त्तव्यम् ॥ ५० ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे प्रथमस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ प्रायेण मरणांतानशनेनोपविष्टे । तत्र गंगातटे (१) अथ गृहागमनोत्तरम् । निरागसि निरपराधे "ब्राह्मणो नावमंतव्यो निरागास्तु विशेषतः" इति स्मृतेः गूढतेजसि अप्रकाशिततेजोलक्षणमहिम्नि ब्राह्मणे "ब्रह्मवेदस्तपस्तत्त्वं ब्रह्मा विप्रः प्रजापतिः"इत्यमरः । गूढतेजसीति । प्रतिक्रियासामर्थ्यद्योतनाय ॥ १ ॥ तच्च दुष्कृतमपरिहार्यविपत्तिकरमिति चिंतयन्नाह—ध्रुवमिति । इत्यर्थ इति । ब्राह्मणावज्ञासि "सदाहं विप्ररूपेण विचरामि महीतले" इत्याद्युक्तेर्विष्णोरवज्ञैवेति भावः । ततो देवस्य हरेर्हेलनादवज्ञानात् । ध्रुवमवश्यं दुरत्ययमत्येतुमशक्यं व्यसनं दुःखम् "व्यसनं विपदि ध्वंसे" इत्यादिकोशात् । तद्व्यसनं मनसाभ्युपगच्छन्नाह—तदिति ॥ २ ॥ ब्रह्मकुलमेवानलः बहुदाहेप्यलंबुद्धिर्नास्तीत्यनलः । मे मदीयत्वेनाभिमतम् । अद्यैव कालक्षेपमंतरेण अभूदिति । व्यत्ययो राज्ञो महानुतापसूचनायैवेति । द्विजा विप्राश्च देवताश्चेति द्वंद्वः । यद्वा । द्विजेषु सन्निहिता देवता द्विजदेवताः । "यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे संति"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥ स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥ अथो विहायेममसुं च लोकं विमर्शितो हेयतया पुरस्तात् ॥ कृष्णांघ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्याम् ॥ ५ ॥ या वै लसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्याधिकांबुनेत्री ॥ पुनातिलोकानुभयत्र सेशान्कस्तां न सेवेत मरिष्यमाणः ॥ ६ ॥

भवेदित्यर्थः ॥ ३ ॥ इत्थं चिंतयन्स राजा मुनेः सुतेनोक्तः सप्तमेहानि निर्ऋतिर्मृत्युर्यथा भविष्यति तथाशृणोत् । शमीकप्रेषितशिष्याच्छ्रुत्वा च स तक्षकस्य विषाग्निं साधु मेने । यतो विषयेषु प्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥ अथोऽनंतरमुभौ लोकौ पुरस्ताद्राज्यमध्य एव हेयतया विचारितौ विहाय श्रीकृष्णांघ्रिसेवामेवाधिमन्यमानः सर्वपुरुषार्थाधिकां जानन्प्रायमनशनं तस्मिन्नित्यर्थः । तत्संकल्पेनोपाविशादिति यावत् । यद्वा । प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ॥ ५ ॥ अमर्त्यनद्यामिति विशेषणस्य फलमाह । या गंगा लसंती श्रीर्यस्यास्तुलस्यास्तया विमिश्रा ये कृष्णांघ्रिरेणवस्तैरभ्यधिकं सर्वोत्कृष्टं यदंबु तस्य नेत्री तद्वाहिनी उभयत्रांतर्बहिश्च सेशाँल्लोकपालैः

इति श्रुतेः । अत एव ब्राह्मणस्य तप्तमुद्राधारणनिषेधः कल्पितेतरग्रन्थेषु वर्ण्यते । न विद्यते भा दीप्तिर्येषां तेऽभा निर्बुद्धयस्तान् द्राति कुत्सयतीत्यभद्रस्तस्य । एतच्च स्वकर्मापेक्षयोक्तम् । इत्यर्थ इति 'क्रियार्थोपपद–इत्यादिना चतुर्थीति भावः ॥ ३ ॥ अथेत्थं शोकानंतरम् । शिष्याद्गौरमुखात् । यथा भो राजन् अज्ञानेन बालकेन दत्तमभिशापं श्रुत्वा मुहुरनुतप्तस्तं च संतर्ज्यास्मद्गुरुः प्रतीकारमपश्यन्खिद्यंस्त्वयि कारुण्यपूर्णो मां प्राहिणोत् राजा ज्ञात्वा परलोकार्थं किमपि यततामित्येतदर्थमित्युक्त्वा गते तस्मिन्राजा स्वापराधं क्षमयंस्तत्रजिगमिषुरपि मुनेर्जनिष्यमाणं लज्जासंकोचादिकं स्वस्य च शापान्तां निष्ठां विचार्य न जगामेति ॥ ४ ॥ इत्यर्थ इति । अनशनं निमित्तीकृत्योपविवेशेति भावः । "प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः" इति मेदिनी । अथो ब्रह्मशापाकर्णनसमनंतरमेव । ममायं शापो विरक्तिहेतुत्वात्साधुरिति मन्वानः पुरस्ताच्छापात्प्रागेव उभौ लोकौ चानित्यत्वदुःखमिश्रत्वाद्धेयतया निश्चितौ इमं भूलोकममुंस्वर्लोकं च विहायास्मिन्संसारे कृष्णांघ्रिसेवैवात्यंतिकदुःखनिवृत्तिसुखसाधनत्वात्कर्त्तव्येति सर्वसाधनेभ्योऽध्यधिकां मन्यमानः परीक्षिदमर्त्यनद्यां श्रीगंगायाम् । संभवत्वादर्थांतरमाह–यद्वेति ॥ ५ ॥ प्रायोपवेशश्चायं तस्याममर्त्यनद्यामेव युक्तः । यतस्तस्यां तदभीष्टस्य श्रीकृष्णस्य संबंधः । सर्वेषां पावनत्वं च स्फुटं दृश्यते इत्यास्ताम् । तस्य ब्राह्मणापराधकल्मषभीतस्य श्रीकृष्णस्यांघ्रिसेवामेव च सर्वाधिकपुरुषार्थतया लिप्सोर्वार्त्ता सर्वस्यापि जीवस्य तत्राप्यासन्नमरणस्य सेवाश्रयितुं योग्येत्याह–या वा इति । या वैतादृशत्वेन स्वयं प्रसिद्धा पुनर्लसच्छ्रियस्तदानीं प्रचुरतया वृन्दावनजाता यास्तुलस्यस्ताभिर्विमिश्रा पूर्वं विमिश्रीकृता ऐक्यं प्राप्ता वा वृंदावनस्थिताः स्वयं भगवतः श्रीकृष्णस्यांघ्रिरेणवस्तैरभ्यधिकं यमुनारूपमंबु तस्यापि नेत्री वोढ्रीत्यर्थः । अभ्यधिकत्वं चोक्तमादिवाराहे "गंगाशतगुणा पुण्या माथुरे मम मंडले । यमुना विश्रुता देवि नात्र कार्या विचारणा" इति । जलप्रवाहरूपा गंगा ह्यत्र वोढ्री बाह्यं च तादृगंबु ततो भिन्नामेवोपपद्यत इति नेत्रीति । सदैवोन्नयनं लभ्यते इति च तथा व्याख्यातं कृष्णशब्दश्च रूढया श्रीगोपाल एवाधिकं प्रसिद्ध इति तथा व्याख्यातमेव । अभेदे हि तादृगंबुरूपेत्येवावक्ष्यदिति संदर्भः । तीर्थस्तु--गंगायामेव प्रायोपवेशोन्यत्रापि किमिति न स्यादिति तत्राह–येति । लसंती श्रीमती तुलसी ब्रह्मज्ञानेन तुलां सिनोति बध्नातीति तुलसी ब्रह्मज्ञानसदृशी । ब्रह्मज्ञानस्य संसारनिवर्त्तकत्वं यन्माहात्म्यं तदस्या अप्यस्तीति । "या दृष्टा निखिलाघसंघशमनी स्पृष्टा वपुःपावनी रोगाणामभिवंदिता निरसनी सिक्तांतकत्रासनी । प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः" इत्यादिपुराणोक्तेः । यद्वा । तनोति मोक्षादिपुरुषार्थमिति तुर्विष्णुस्तत्र लसतीति तुलसी तस्या मंजरीरजोभिर्विमिश्राः कृष्णस्यांघ्रिरेणवस्तैः सहाधिकानि यान्यम्बूनि जलानि तेषां नेत्री लसच्छ्रीतुलसीमंजरीरजोविमिश्रश्रीकृष्णचरणरेणुसमधिगतमाहात्म्याभ्यधिकसलिलप्रवाहाकुलेत्यर्थः । या चात एवाशेषाँल्लोकानुभयत्रांतर्बहिश्च पुनाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति व्यवच्छिद्य स पांडवेयः प्रायोपवेशं प्रति विष्णुपद्याम् ॥ दध्यौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः ॥ ७ ॥ तत्रोपजग्मुर्भुवनं
पुनाना महानुभावा मुनयः सशिष्याः ॥ प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनंति संतः॥८॥ अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृ
गुरंगिराश्च ॥ पराशरो गाधिसुतोऽथ राम उतथ्य इंद्रप्रमदेध्मवाहौ ॥ ९ ॥ मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः ॥ मैत्रेय
और्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च ॥१०॥ अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ॥ नानार्षेयप्रवरान्समेतानभ्यर्च्य
राजा शिरसा ववंदे ॥ ११ ॥ सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् ॥ विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेऽभिगृही
तपाणिः ॥ १२॥ राजोवाच ॥ अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ॥ राज्ञां कुलं ब्राह्मणपादशौचाद्दूराद्विसृष्टं बत गर्ह्यकर्म॥१३॥

सहिताँल्लोकान्पुनाति । मरिष्यमाण आसन्नमरणः । मरणस्यानियतकालत्वात्सर्वोऽपि तथा । अतस्तां को न सेवेत ॥ ६ ॥ इत्येवं विष्णुपद्यां गंगयाम् । प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्य । पांडवेय इति तत्कुलौचित्यं दर्शयति । नास्त्यन्यस्मिन् भावो यस्य सः । कुतः मुनिव्रत उपशांतः । तत्कुतः । मुक्तः समस्तः संगो येन सः ॥ ७ ॥ तत्र तदा तद्दर्शनार्थं मुनय उपागता न तु तीर्थस्नानार्थं कृतार्थत्वात् । ननु तादृशानामपि तीर्थयात्रा दृश्यते तत्राह । प्रायेणेति । तीर्थयात्राव्याजैः ॥ ८ ॥ ९ ॥ १० ॥ अरुणादयः कांडर्षित्वविशेषेण पृथङ् निर्दिष्टाः । नाना यान्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् शिरसा भुजं स्पृष्ट्वा ववंदे ॥ ११ ॥ विज्ञापनार्थं पुनः कृतप्रणामः । विविक्तं शुद्धं चेतो यस्य । अभिगृहीतौ संयोजितौ पाणी येन सः । स्वचिकीर्षितं प्रायोपवेशनादि युक्तमयुक्तं वेति विज्ञापयामास ॥ १२ ॥ अनुमोदनेनानुग्रहमालक्ष्यात्मानं श्लाघते । अहो इति । नृपाणां मध्ये महत्तमैरनुग्रहणीयं शीलं वृत्तं येषां ते । एतच्च राज्ञामतिदुर्लभमित्याह । ब्राह्मणानां

यद्वोभयत्रेह लोके शिष्टव्यवहारयोग्यतालक्षणां शुद्धिं परलोके नरकप्राप्त्यादिनिवर्तनरूपां च शुद्धिं करोतीति मरणस्यानियतत्वात्मदैवतां सेवेतेति भावः ॥ ६ ॥ अतो मरिष्यमाणोहं तीर्थोत्तमत्वाद्विष्णुपद्यां गंगायामनशन व्रतं करिष्ये इति प्रायोपवेशं प्रति व्यवच्छिद्य निश्चित्यानन्यभावो राज्यभारादिचिंतारहितांतःकरणो विष्ण्वेकचेता मुनीनां निवृत्तानां ज्ञानिनां व्रतमिव व्रतं नियमो यस्य स तथा वाचालत्वरहितो वाऽत एव मुक्ताः समस्तेषु पुत्रधनादिषु संगा आसक्तयो येन । मुक्ते हरौ समस्तानां श्रोत्रादींद्रियाणां संगस्तत्कथनतच्छ्रवणतद्दर्शनादिष्वादरो यस्येति वा मुक्तसंगः ॥ ७ ॥ यत्र परीक्षित्तिष्ठति तत्रोपजग्मुः । प्रायेणेति । तीर्थयात्राव्याजैः तेन तीर्थेभ्योऽपि परीक्षिद्दर्शनं ते ह्यधिकं गूढं निरणैषुरिति भावः । अकस्मादुद्भूतप्रतिस्वानंदान्यथानुपपत्त्या सर्वज्ञतया भाविवृत्तांतं ज्ञात्वा श्रीभागवतामृतपानार्थमिति भावः ॥८ ॥ मुनीन्कांश्चिन्नामतो निर्दिशति । अत्रिरिति शरद्वान्कृपाचार्यपिता गाधिसुतो विश्वामित्रः रामः परशुरामः ॥ ९ ॥ १० ॥ कांडर्षित्वं काण्डं ज्ञानकाण्डं तत्प्रधाना ऋषयः काण्डर्षयस्तेषां भावस्तत्त्वं तदेव विशेषो भेदस्तेन हेतुना पृथङ्निर्दिष्टाः कर्मोपास्तिप्रधानब्रह्मर्षि राजर्ष्यादिभ्यो भेदेन कथिताः ॥११॥ अथ प्रणत्युत्तरम् । विविक्तचेताः शुद्धमनाः ॥१२॥ धन्यतमा न जाने कस्य पुण्यस्य फलमेतदहो भाग्यंमम इत्यर्थः । एतच्च महत्तमानुग्रहणीयशीलत्वं च तैर्विप्रैस्तद्राजकुलम् । ततोपि आश्रमाद्दूरस्थपादशौचस्थलादपि आराद्दूरे तत्रापि पादशौचस्थले । इत्यर्थ इति । अननुज्ञानादितिभावः । यस्य राजकुलस्य । गर्ह्यं सर्वतोऽप्यपवित्रमित्यर्थः । अत्र संदर्भः । अहो आश्चर्यं किमाश्चर्यं तत्राह नृपाणां मध्ये वयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णम् ॥ निर्वेदमूलो द्विजशापरूपो यत्र प्रसक्तो भयमाशु धत्ते ॥ १४ ॥ तं मोपयातं प्रति यंतु विप्रा गंगा च देवी धृतचित्तमीशे ॥ द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः ॥ १५ ॥ पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु ॥ महत्सु यांयामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः ॥ १६ ॥ इति स्म राजाऽध्यवसाययुक्तः प्राचीनमूलेषु कुशेषु धीरः ॥ उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः ॥ १७ ॥

पादशौचात्पादक्षालनोदकात् ॥ दूरादुच्छिष्टविण्मूत्रपादांभांसि समुत्सृजेदिति स्मृतेर्दूरे हि तैस्तद्विसृज्यते ततोऽपि दूरादेव विसृष्टं क्षिप्तम् । तत्रापि स्थातुमयोग्यमित्यर्थः । गर्ह्यं कर्म यस्येत्यात्मानमुद्दिश्योक्तम् ॥ १३ ॥ आस्तां तावदनुग्रहो ब्रह्मशापोऽपि भगवत्प्रसादादेव जात इत्याह । तस्य गर्ह्यकर्मण एव । अतोऽघस्य पापात्मनो गृहेष्वासक्तचित्तस्य मे स्वप्राप्तये परावराणामीश एव द्विजशापतया बभूव । यत्र यस्मिन् शापे सति गृहेषु प्रसक्तो भयं धत्ते निर्विण्णो भवति । यतो निर्वेदमूलो निर्वेदो वैराग्यमूलं प्राप्तिकारणं यस्मिन् । स्वस्य वैराग्यप्राप्यत्वात्तस्य च भयमूलत्वात्तदर्थं द्विजशापं कारितवानित्यर्थः ॥ १४ ॥ तान्प्रार्थयते । तमिति द्वाभ्याम् । तं मामुपयातं शरणागतं प्रतियंतु जानंतु । देवी देवतारूपा गंगा च प्रत्येतु । वाशब्दः प्रतिक्रियानादरे । गाथाः कथाः ॥ १५ ॥ स आश्रयो येषां तेषु प्रकृष्टः संगो भूयात् । तस्यांतस्यां सृष्टौ जन्मनि ॥ १६ ॥ अध्यवसायो निश्चयः । प्राचीनानि प्रागग्राणि मूलानि येषां तेषु प्रागग्रेषु कुशेष्वास्ते स्म । स्वसुते जनमेजये न्यस्तो भारो राज्यं

पाण्डवाः महत्तमानां भवतामनुग्रहं शीलयंति ये स्वायंभुवादयस्तादृशाः सन्तो धन्यतमा जाता इतिशेषः । स्वतस्तु नृपाणां कुलमीदृशमित्याह—राज्ञामिति । यतो गर्ह्यं हिंसादिलक्षणं कर्म यस्य तादृशमित्यर्थः ॥ १३ ॥ अतो गर्ह्यकर्मत्वात् । अघस्य ब्राह्मणगले सर्पनिवेशेनावमाननात् । एवं पतितपावनत्वख्यापनार्थं द्विजशापरूपस्सन्मत्पार्श्वमागतः । मूलशब्दस्य पुंस्त्वमार्षम् । भवत्समागतादनुमीयते । यत्र भगवानायाति तत्रैव तद्भक्ताः स्वत एवायांतीत्यर्थः । यत्र परावरेशे प्रसक्त आसक्तो जन आशु शीघ्रमेवाभयं भयाभावं धत्ते इति वा । तस्य च । वैराग्यस्य च इत्यर्थ इति । स्वप्राप्तिसाधनवैराग्यकारणीभूतभयमुत्पादितवान्निजकृपयेति भावः । अत्र संदर्भः तत्रापीदमाश्चर्यमित्याह—तस्यैव भगवदनुग्रहशीलानां वंशे गणनीयस्यापि मे ममाभीक्ष्णं गृहेषु व्यासक्तचित्तस्य तत्राप्यघस्य तादृशब्राह्मणापराधकर्त्तुः परावरेशस्तु नूनं भगवदनुगृहीतवंशजोऽयमित्यामृश्य स्वयं द्विजशापरूपः तदपदेशः सन् निर्वेदोऽन्यत्रानासंग एव मूलमवष्टंभको यस्य स्वस्मिन्नासंगस्य तद्रूपोऽभवत् । तर्हि किं स्यात्तत्राह—यत्र परावरेशे प्रसक्तः शीघ्रमेवाभयं तच्चरणारविन्दप्राप्त्या भयाभावं धत्ते "मर्त्यो मृत्युव्यालभीतः पलायन्" इत्यादेः । अतोऽकस्माद्भव तामप्यागमनं तत्प्रेरणयैव जातमिति भावः । वक्ष्यते च श्रीशुकदेवमुपलक्ष्य 'अपि मे भगवान्प्रीतः' इत्यादिद्वाभ्याम् ॥१४॥ योहमेवमुत्तमानुग्रहणीयशीलस्तं मा मां द्विजोपसृष्टश्शृंगिणा प्रेरितः कुहकः वेषांतरधारी । यद्वा । सर्पजातिविशिष्टस्तक्षकः साक्षादेव दशतु भक्षयतु युष्माभिस्त्वेतत्कार्यमित्याह—अलमिति । अलं देहवियोगपर्यंतं गाथाः "गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः" इति मेदिनी । श्लोके यशसीत्यर्थः । "श्लोकः पद्ये यशस्यपि" इत्यभिधानात् । तथाच विष्णुयशांसि गायत कथयत ॥१५॥ पुनरपि जन्मांतरेऽपि । यांयां सृष्टिं जन्म प्राप्नोमि तस्यांतस्यां भगवति रतिस्तद्भक्तेषु प्रकृष्टः संगः सर्वजीवेषु मैत्री इति मद्वाञ्छितत्रयं भूयादिति प्रार्थ्य प्रणमन्नाह—नम इति । यद्वा। ब्राह्मणानादरानुतापादाह—ब्राह्मणेभ्यो नमो भूयादिति । वाञ्छितचतुष्टयञ्च ॥१६॥ "आदावन्ते च मूलं स्यात्तथांतस्तत्र वर्तते"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः ॥ प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुंदुभयश्च नेदुः॥१८॥महर्षयो वै समुपागता ये प्रशस्य
साध्वित्यनुमोदमानाः ॥ ऊचुः प्रजानुग्रहशीलसारा यदुत्तमश्लोकगुणाभिरूपम् ॥ १९ ॥ न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु ॥
येऽध्यासनं राजकिरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥ २० ॥ सर्वे वयं तावदिहास्महेऽद्य कलेवरं यावदसौ विहाय ॥ लोकं परं
विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः ॥२१॥ आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकम् ॥ अभाषतैतानभिनंद्य युक्तं
शुश्रूषमाणश्चरितानि विष्णोः ॥२२॥समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे ॥ नेहाथ वाऽमुत्र च कश्चनाऽर्थ ऋते परानुग्रहमात्मशी
लम् ॥२३॥ ततश्च वः पृच्छ्यमिमं विपृच्छे विश्रभ्य विप्रा इतिकृत्यतायाम् ॥ सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च तत्रामृषताभियुक्ताः ॥२४॥

येन सः ॥ १७ ॥ मुदा व्यकिरन् । देवसंघैर्वादिता दुंदुभयो नेदुः ॥ १८ ॥ प्रजानुग्रहे शीलं स्वभावः सारो बलं च येषाम् । उत्तमश्लोकगुणैरभिरूपं सुंदरम्
॥ १९ ॥ भवत्सु पांडोर्वंश्येषु । ये जहुरिति युधिष्ठिराद्यभिप्रायेण ॥ २० ॥ परस्परं संमंत्रयंते । सर्व इति । परं श्रेष्ठं लोकम् । तत्र हेतुः । विरजस्कं निर्मायं विशोकं च
यास्यतीति कुतस्तत्राह । अयमिति ॥ २१ ॥ आश्रुत्याकर्ण्य । समं पक्षपातशून्यम् । मधुच्युदमृतस्रावि । गुरु गंभीरार्थम् । अव्यलीकं सत्यम् ॥२२॥ त्रयाणां लोकानां
पृष्ठे उपरि सत्यलोके वेदा यथा मूर्तिधरा भवंति तत्तुल्याः । ज्ञानातिशयमुक्त्वा कृपालुतामाह । नेहेति । भवता प्रयोजनं परानुग्रहं विना नास्ति । तर्हि स एवार्थः स्यात् ।
न । आत्मशीलं स्वस्वभावम् ॥ २३ ॥ पृच्छ्यं प्रष्टव्यम् । विश्रभ्य विश्वासं कृत्वा । एवं कर्तव्यमित्यस्य भाव इतिकृत्यता तस्मिन्विषये । सर्वात्मना सर्वावस्थासु यत्कृत्यं

इत्यभिधानान्मूलशब्दोऽग्रपरः॥१७॥ प्रसूनैः प्रसूनानि॥१८॥इवशब्दः स्वामिचरणैर्वाक्यालंकारे व्याख्यात उत्तमश्लोकस्य श्रीकृष्णस्य गुणैर्भक्तवात्सल्यादिभिरभिरूपं सुंदरं राजानमूचुः । यद्वा।यदुत्तमश्लोकस्य गुणानुरूपं भवेत्तदे
वोचुः ॥१९॥ भगवत्पार्श्वकामा इत्यत्र तत्सामीप्यकामनापि व्याख्येया । तत्प्रीतिविशेषातिशयवतां हि तेषां तत्कृतार्त्तिभरेणैव तत्स्फूर्त्तावप्यतृप्तौ सत्यां तत्सामीप्यप्राप्तेश्च । तत्प्राप्तिविघातकसंसारबंधनत्रोटनस्य च प्रार्थनं दृश्यते
पितृमातृप्रीत्येकसुखिनां विदूरबद्धानां बालकानामिव एवमेवोक्तं प्रह्लादेन''त्रस्तोस्म्यहं कृपणवत्सल तेंघ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु'' इति॥२०॥विरजस्कं लोकं भगवल्लोकमेव''न तत्र माया किमुतापरे''इति द्वितीये
वक्ष्यमाणत्वात् ॥ २१ ॥ एतान्पूर्वोक्तान्मुनीन् ॥ २२ ॥ स एव परानुग्रह एवार्थः प्रयोजनं स्यात् । परानुग्रहश्च न विचारपूर्वक इत्याह—आत्मशीलमिति ॥ २३ ॥ यतो यूयं परानुग्रहशीलाः स्थ ततो हेतोः हे विप्रा
इति । यूयं विशेषेण प्रान्ति पूरयन्ति सेवकाभिलषितमित्यन्वर्थसंज्ञावन्त एवेत्यहं जानामीति भावः । इमं वो युष्माकं परानुग्रहं विपृच्छे किमाकारः स चिकीर्षितव्य इति पृच्छामि । पृच्छ्यं प्रष्टुमर्हं तत्रैवाध्यवसायार्थ
मिति भाव :। तत्रैव मे विश्वासो भावीति जानीतेति भावः । इतिकृत्या एवं कर्तव्यास्तपोयोगज्ञानादयस्तेषां भाव इति कृत्यता तस्यांसत्यां म्रियमाणैर्जनैस्तपोयोगादीनामेवं कर्तव्यत्वे सति मम यत्र शुद्धं कृत्यं तत्रामृशत
विचारयत । सर्वैकवाक्यतया निश्चित्य कर्तुमाज्ञापयतेति भावः । संदर्भस्तु--विसृम्भ्येति कृष्णांघ्रिसेवामेव त उपदेक्ष्यंतीत्यभिप्रायात् । शुद्धमिति । कनिष्ठमध्यमसाधनमिश्रतारहितं सर्वोत्तममित्यर्थः । तच्च कृष्णांघ्रिसेवारूपमेवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः ॥ अलक्ष्यलिंगो निजलाभतुष्टो वृतः स्त्रिबालैरवधूतवेषः ॥२५॥ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् ॥ चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननं कंबुसुजातकंठम् ॥ २६ ॥ निगूढजत्रुं पृथुतुंगवक्षसमावर्तनाभिं वलिवल्गूदरं च ॥ दिगंबरं वक्त्रविकीर्णकेशं प्रलंबबाहुं स्वमरोत्तमाभम् ॥ २७ ॥

विशेषतश्च म्रियमाणैस्तच्च शुद्धं पापसंपर्करहितमामृशत विचारयत ॥२४॥ तत्र तेषु यागयोगतपोदानादिभिर्विवदमानेषु सत्सु यदृच्छया गां पर्यटन्व्यासपुत्रस्तत्राभवत्प्राप्तः। न लक्ष्यमाश्रमादिलिंगं यस्य । अवधूतोऽवज्ञया जनैस्त्यक्तो यस्तस्येव वेषो यस्य सः॥ २५॥ तमित्यादीनां प्रत्युत्थिता इति तृतीयश्लोकेनान्वयः।द्विगुणान्यष्टौ वर्षाणि यस्य सुकुमारौ पादौ करावूरू बाहू अंसौ कपोलौ गात्रं च यस्य । चारुणी आयते अक्षिणी यस्मिन् उन्नता नासा यस्मिन् लंबह्रस्वादिवैषम्यं विना तुल्यौ कर्णौ यस्मिन् शोभने च भ्रुवौ यस्मिन् एवंभूतमाननं यस्य । कंबुवद्रेखात्रयांकितः सुष्ठु जातः कंठो यस्य॥ २६॥ कंठस्याधोभागयोः स्थिते अस्थिनी जत्रुणी, मांसेन निगूढे जत्रुणी यस्य । पृथु विस्तीर्णं तुंगमुन्नतं च वक्षो यस्य आवर्तवन्नाभिर्यस्य वलिभिस्तिर्यङ्निम्नरेखाभिर्वल्गु रम्यमुदरं यस्य । दिश एवांबरं यस्य । वक्रा विकीर्णाः केशा यस्य । प्रलंबौ बाहू यस्य स्वमरेषु

गूढोऽभिप्रायः हे अभियुक्ताः हे विद्वांसः "अभियुक्तः परे रुद्धे न्याय्यपंडितयोस्त्रिषु । हरिभक्ते तत्परे च निर्भये चान्यलिंगकः" इति निरुक्तिः॥२४॥तत्र तेषु सर्वेषु मुनिषु विवदमानेषु तदैव स्वस्य मनसा श्रीशुकागमनमीहमानेषु नेत्रैश्च तद्वर्त्म निरीक्षमाणेषु । यद्वा । यत्र परीक्षिता मुनिभिश्च स्थितं तत्र तस्यामवस्थायां वा व्यासपुत्रः शुको भगवान् यदृच्छया दैवेच्छयाऽभवदित्यन्वयः । पूर्वस्मात्कांतिविशेषद्योतनायाभवदित्युक्तम् । आगमनस्य तावता चरितार्थत्वात् । अटनस्य स्वाधीनताप्रकाशनायाटमान इति । शानच्प्रत्ययः । तर्ह्यर्थाभिलाषी किमटतीत्यत आह—अनपेक्ष इति । बाह्यविषयापेक्षारहितः तत्कुत इत्यस्याप्येतदेवोत्तरम् । अनिति चेष्टतेऽनेनेत्यनः प्राणस्तं पातीति अनपः प्राणनाथः श्रीविष्णुस्तस्येक्षा दर्शनं यस्य स तथा न हि करतलामलकवत्सततमपरोक्षीकुर्वाणस्य तस्य बाह्यविषयापेक्षास्तीति बाह्यपदार्थापेक्षाभावे शरीरयात्रा कथमित्यस्याप्येतदेवोत्तरम् । अनं प्राणं पिबतीत्यनपाः प्राणपदेन बाह्यवायुर्लक्ष्यते अत्र सैवेक्षा ज्ञानं यस्य स तथा । शरीरनिर्वाहार्थं बाह्यवायुपानमात्रस्यैव ज्ञानमस्ति नाधिकवस्तुग्रहणस्येत्यर्थः । श्रीप्रसादाभावादशनदारिद्र्यं किमस्येत्यस्यापीदमेवोत्तरम् । हरिपादाब्जतः शश्वदपगता न भवतीत्यनपा लक्ष्मीस्तस्या ईक्षणं यस्मिन्स तथा । तत्कटाक्षपात्रीभूत इत्यर्थः । सततगमनस्वभावेन वायुना तृप्तिः कथं स्यादिति तत्राह—निजेति । स्वरूपानंदेनालंबुद्धिमान् यदृच्छालाभेन तृप्तः किमाश्रमस्स इति तत्राह। न लक्ष्याण्याश्रमादिलिंगानि यस्य स तथा । तत्कुत इति तत्राह—अवधूत इति । अवधूतानां दिगंबराणां वेषो यस्यावधूतस्त्यक्तो वेषो ज्ञापकचिह्नं वा येन स तथाऽत एव स्त्रिबालैर्वृतः। स्त्रियो हि सौरूप्यात् स्त्रीणां मनोज्ञं रुचिरस्मितेन" इति वक्ष्यमाणत्वात् बालाश्चावधूतवेषत्वात्तेन साकं गच्छंतीति भावः । स्त्रीशब्दस्य ह्रस्वत्वं छांदसम्॥२५॥द्विगुणान्यष्टौ षोडश भवंतिगूढवर्चसमाच्छादितनिजतेजोलक्षणमहिमानमपि । सुकुमारौ कोमलौ॥२६॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्यामं सदाऽपीच्यवयोंऽगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ॥ प्रत्युत्थितास्ते मुनयः स्वासनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसम् ॥ २८ ॥ स
विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाऽऽजहार ॥ ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः ॥ २९ ॥ स
संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः ॥ व्यरोचताऽलं भगवान्यथेंदुर्ग्रहर्क्षतारानिकरैः परीतः ॥ ३० ॥ प्रशांतमासीनमकुंठमेधसं
मुनिं नृपो भागवतोऽभ्युपेत्य ॥ प्रणम्य मूर्ध्नाऽवहितः कृतांजलिर्नत्वागिरा सूनृतयाऽन्वपृच्छत् ॥३१॥ अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः॥
कृपयाऽतिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥ ३२॥ येषां संस्मरणात्पुंसां सद्यः शुध्यंति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥
॥ ३३ ॥ सान्निध्यात्ते महायोगिन्पातकानि महांत्यपि ॥ सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ॥ ३४ ॥ अपि मे भगवान्प्रीतः कृष्णः पां
डुसुतप्रियः ॥ पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ॥ ३५ ॥

श्रेष्ठदेवेषूत्तमो हरिस्तद्वदाभा यस्य तम् ॥ २७ ॥ सदा अपीच्यमत्युत्तमं यद्वयो यौवनं तेन यांगलक्ष्मीर्देहकांतिस्तया रुचिरस्मितेन च । गूढवर्चसमपि प्रत्युत्थिता तं दृष्ट्वा
प्रत्युद्गमं कृतवंत इत्यर्थः ॥ २८ ॥ शिरसैव सपर्यामाजहारात्मनिवेदनं कृतवान् । तेन सहागताः स्यादयो निवृत्ताः स चोपविवेश । संधिरार्षः ॥२९॥ स भगवान्ब्रह्मर्ष्या
दिसंघैः संवृतः सन्नलं व्यरोचत । ग्रहाः शुक्रादयः । ऋक्षाण्यश्विन्यादीनि । अन्यास्ताराः ॥३०॥ न कुंठा सर्वार्थेषु मेधा यस्य तम् । प्रणम्य प्रश्नार्थं पुनर्नत्वा॥३१॥
सूनृतां गिरमाह । अहो इति पंचभिः । सतां सेव्या जाताः । यतोऽतिथिरूपेण हेतुना तीर्थकाः योग्याः कृताः ॥ ३२ ॥ ३३ ॥ विष्णोः सान्निध्यादसुरादय इव
॥ ३४ ॥ पांडुसुतानां प्रियोऽतस्तेषां पैतृष्वसेयानां प्रीत्यर्थं तद्गोत्रस्य मे आत्तं स्वीकृतं बांधवं बंधुकृत्यं येन सः ॥ ३५ ॥

" अपीच्यं सुंदरतरे " इत्यभिधानात् । तस्य शुकस्य यानि लक्षणानि चिह्नानि तानि जानंतीति तथा ॥ २८ ॥ न विद्यते तिथिरागमनसंकेतितदिनविशेषो यस्य तस्मै यदृच्छयागताय ततो राजकृतपूजादर्शनाद नंतरं स्त्रियो युवतयस्साक्षात्स्मर एवायमिति अर्भका विक्षिप्तोयमित्यबुधा निवृत्ता मुनिभ्यस्तेभ्यो भीत्येत्यर्थः । स शुकः पूजा यथोचितप्रणामप्रश्रयप्रणयपरिष्वंगकुशलप्रश्नादिलक्षणा मुनिजनकर्तृका मुनिजन्मकर्मका च संजाता यस्येति । तारकादित्वादितच् । तेन सर्वे मुनयः प्रणेमुः । व्यासनारदाद्यास्तु सास्रं सगद्गदं प्रणयपरिष्वंगशिरोघ्राणकुशलप्रश्नादिकं चक्रुः । स च तान्प्रणनामेति द्योतितम् । महासन इति । " आज्ञा गुरूणां ह्यविचारणीया" इत्युक्तेः॥२९॥स शुकदेवः । अत्र व्यासनारदपरशुरामादिभ्यो भगवदवतारेभ्योऽपि तस्योत्कर्षो भक्त्युत्कर्षेणैवेति ज्ञेयम् । "वैयासकिश्च भगवान्वासुदेवपरायणः" इत्युक्तेः । तर्थैन तु स परीक्षित् महीयस महत्तराणां मध्ये महान् संवृतः गूढः महत्त्वप्रकाशनाय राजब्रह्मर्ष्यादिभिः परीतो व्यरोचतेत्युक्तम् । तक्षकान्मरिष्य इति मरणभिया मुखांगकांतिम्लानिर्नास्तीति यस्मात्तस्मादित्यर्थ इत्थं व्याख्यातम् ॥३०॥ सूनृतया प्रियवचसा ॥ ३१ ॥ संतः सेव्या येषां ते क्षत्रबन्धवोऽपि सत्सेवायामधिकारिणो जाता इत्यर्थः । तीर्थका इति । यद्भवन्त आयांति तन्निन्द्यस्थलमपि तीर्थं जनतापावनं भवतीति वयं निन्द्या अपि तीर्थकाः प्रशंस्ततीर्थानि । स्वार्थिकाः । प्रकृतितो लिंगवचनान्यतिवर्त्तन्त इति पुंस्त्वम् । तत्र कृपैव कारणमित्याह—कृपयेति ॥ ३२ ॥ येषां स्मरणात् यत्कर्तृकात् यत्कर्मकाद्वा । गृहा अपि शुध्यंति किं पुनः कलत्रपुत्रदेहाः । येषां स्मरणात्किं पुनर्दर्शनादिनेत्यर्थः ॥ ३३ ॥ हे महायोगिन्निति । योगिदर्शनादेव महापातकक्षयो भवति किमुत महायोगिनस्तवेति कैमुत्यद्योतिकेयं संबुद्धिरिति भावः ॥ ३४ ॥ बंधुकृत्यं स्वयं दर्शनदानादि । तस्मात्त्वेनैव त्वं मन्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यथा तेऽव्यक्तगतेर्दर्शनं नः कथं नृणाम् ॥ नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥३६॥ अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् ॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥ ३७ ॥ यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो ॥ स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययम् ॥ ॥ ३८ ॥ नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनाम् ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ ३९ ॥ सूत उवाच ॥ एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा ॥ प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः ॥ ४० ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां पारमहंस्यां संहितायां प्रथमस्कंधे शुकागमनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ श्रीकृष्णार्पणमस्तु ॥ समाप्तोऽयं प्रथमः स्कंधः ॥ १ ॥

अन्यथा श्रीकृष्णप्रसादं विना अव्यक्ता गतिर्यस्य म्रियमाणानां नितरां कथं स्यात्।वनयिता याचयिता । वनयितृतमो वनीयांस्तस्य वनीयसः । अत्युदारतया मां याचेथा इति प्रवर्तकस्येत्यर्थः ॥ ३६ ॥ सम्यक्सिद्धिर्यस्मात्तम् । कार्यं कर्तुं योग्यम् । कर्तव्यं त्वावश्यकमिति भेदः । अत एव सर्वथा म्रियमाणस्य पुरुषस्य यस्मिन्कृते संसिद्धिर्मोक्षलक्षणा सिद्धिर्भवति तत्त्वां योगिनां गुरुं पृच्छामि ॥ ३७ ॥ यच्छ्रोतव्यं यज्जाप्यं यत्कर्तव्यं यत्स्मर्तव्यं यदाराध्यं तद्ब्रूहि । विपर्ययमश्रोतव्यादि ॥ ३८ ॥ तव दर्शनस्य पुनर्दुर्लभत्वादिदानीमेव कथनीयमित्याशयेनाह । नूनमिति । गोदोहनमात्रकालमपि । अस्माकं भाग्यवशात्त्वद्दर्शनं जातमिति भावः ॥ ३९ ॥ एवमहो इत्यादिकया श्लक्ष्णया मधुरया गिरा आभाषितोऽभिमुखीकृतः पृष्टश्च ॥ ४० ॥ आर्यं धर्मजमाहृतारिमवनौ कृत्वा परीक्षिन्नृपं ब्रह्मास्त्रादभिरक्षितं कलिजयख्यातं च कृत्वा भुवि ॥ अंते यः शुकरूपतः स्वपरमज्ञानोपदेशेन तं शापादावदमुं नमामि परमानंदाकृतिं माधवम् ॥ १ ॥ ॥ इति श्रीमद्भागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां प्रथमस्कंधटीकायामेकोनविंशोऽध्यायः ॥ १९ ॥ समाप्तोऽयं प्रथमः स्कधः ॥

स्तारार्थं प्रेषितोसीत्यनुमीयत इति भावः ॥ ३५ ॥ वनीयानिति । " तुरिष्ठेमेयस्सु" इति तृशब्दस्य लोपः ततो निमित्तापाये नैमित्तिकस्याप्यपायात् टेर्लोपाच्च सिध्यति । इत्यर्थ इति । "चतुरर्थान्प्रदास्यामि याचतेति मुहुर्मुहुः । प्रेरयेद्याचकान्यो वै वनीयान्स प्रकीर्त्तितः" इत्यभिधानचिंतामण्युक्तेरयं भावः ॥ ३६ ॥ यतो भवद्दर्शनं दुर्लभमतो दैवात्प्राप्तं योगिनां ज्ञानयागभक्तियोगवतां परमं गुरुम् । सम्यक्सिद्धिः का तां पृच्छामि इह संसिद्धौ यत्सर्वथा कर्त्तव्यं साधनं तत्पृच्छामीति चक्रवर्त्ती ॥ ३७ ॥ तदेव विशेष्याह—यच्छ्रोतव्यमिति । श्रवणरसनामनोविषयीकर्तव्यं पाण्यादींद्रियविषयं किं भजनीयं चेति देवेषु को देवः उपास्य इत्यर्थः । आदिनाऽजाप्यास्मर्तव्यग्रहः ॥ ३८ ॥ हे ब्रह्मन्निति । कथनसामर्थ्यमाह—साक्षाद्वेदरूपोसीति भावः ॥ ३९ ॥ धर्मज्ञो हरिभक्तिधर्मज्ञः तस्यैव सर्वश्रेष्ठधर्मत्वात् । "एष मे सर्वधर्माणां धर्मोधिकतमो मतः । यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा" इति शांतनवोक्तेः । भगवान्सर्वज्ञः आर्यं श्रेष्ठं धर्मजं युधिष्ठिरमाह । ना अरयो यस्य तादृशमवनौ भूमौ परीक्षिन्नृपश्च भुवि बलिजयेन प्रथितं कृत्वा स्वस्य परमं ज्ञानं श्रीभागवतं तदुपदेशेन शापाच्छापजन्यतक्षकदंशजनरकादावत् रक्षितवान् । अमुं परमानन्दाकृतिं मद्गुरुरूपं माधवमहं नमामीति योज्यम् । नन्वेतच्छ्रीपरीक्षितः शापोत्तरं श्रीशुकदेवकृतश्रीभागवतश्रावणं श्रीमहाभारतविरुद्धं तत्रैतद्वृत्तस्याश्रवणात् । तथाहि श्रीमहाभारतादिपर्वण्युक्तम् "शृंग्युवाच ॥ योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य च । स्कंधे मृतं समास्राक्षीत्पन्नगं राजकिल्बिषी ॥ तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः । आशीविषस्तिग्मतेजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मद्वाक्यबलचोदितः ॥ सप्तरात्रादितो नेता यमस्य सदनं प्रति॥'' इत्यारभ्याग्रिमैकचत्वारिंशाध्यायस्थशमीकिप्रोषितगौरमुखात्स्वशापं श्रुत्वा तत्प्रतीकारार्थं सम्यैर्मंत्रयामास । तर्थाहि।''तस्मिंश्च गतमात्रेऽथ राजा गौरमुखे तदा। मंत्रिभिर्मंत्रयामास सह संविग्नमानसः॥२८॥संमंत्र्य मंत्रिभिश्चैव सं तथा मंत्रतत्त्ववित् । प्रासादं कारयामास एकस्तंभं सुरक्षितम् ॥२९॥ रक्षां च विदधे तत्र भिषजश्चौषधानि च । ब्राह्मणान्मंत्रासिद्धांश्च सर्वतो वै न्ययोजयत् ॥ ॥३०॥राजकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः । मंत्रिभिः सह धर्मज्ञः समंतात्परिरक्षितः॥३१॥न चैनं कश्चिदारूढं लभते राजसत्तमम् । वातोपि निश्चरंस्तत्र प्रवेशे विनिवार्य्यते॥३२॥'' इति।एषां पञ्चश्लोकानामयमर्थः । राजानं प्रति शृंगिदत्ततक्षकदंशलक्षणशापं कथयित्वा शमीकशिष्ये गौरमुखे गति सते राजा परीक्षिदथ मंत्रास्तत्तद्देवताराधनोपयुक्तास्त्र्यम्बकमित्याद्यास्तज्ज्ञातारो मंत्रिणः श्रोत्रियास्तैः सह संविग्नमानसो मृत्युभीतेराकुलः मंत्रयामास अधुना किं कर्त्तव्यं मयेति विचारयामास ॥ २८ ॥ स्वयमपि मंत्रेषु तत्त्वं हरिनाम ''मंत्रमुख्यं हरेर्नाम तीर्थमुख्यं च जाह्नवी'' इत्याद्युक्तेस्ताद्वित् तत्प्रभाववित् ''कलौ नामैव केवलम्'' इत्यादिशास्त्रज्ञः प्रांति पूरयत्यार्थि जनाभिलषितमिति प्राः अत्युदारः कारुणिकश्च स चात्र श्रीशुक एव 'संसिद्धस्य वर्नीयसः' इति श्रीभागवतोक्तेः । यद्वा 'नंदनंदनरूपोऽसौ श्रीशुको भगवान्मुनिः' इति स्कांदोक्तेस्तस्य श्रीनंदनंदनरूपत्वादुदारत्वकारुणिकत्वे साहजिके एवेति । प्रापूरणेऽस्मात्क्विबन्ताट्टाप्रत्यये तृतीयैकवचने ''आतो लोपः'' इत्यालोपे प्रा इति रूपं सिध्यति । सानां सप्तानां दीनां दिनानां समाहारः सदम् । समासांतोत्र डः । ''समाहारे नपुंसकम्'' इति क्लीबत्वम् । नामैकदेशोच्चारणेन सर्वनामग्रहणमिति न्यायेन सशब्देन सप्तानां दिशब्देन दिनानाञ्च ग्रहः । यद्वा यादयोष्टाविति केरलमतानुसारेण सशब्दः केवलोऽपि सप्तसंख्यां वदतीति । तथा च सदपदं सप्ताहं वक्ति सदमेव सादम् । स्वार्थिकोण् । तथा च सप्तभिर्दिनैरित्यर्थो लभ्यते । सुरक्षितं सुरेभ्यः क्षितमदत्तमर्थाच्छ्रीमद्भागवतमायाति । तदुक्तं पाद्मे ''परीक्षिते कथां वक्तुं सभायां संस्थिते शुके'' इत्यारभ्य ''श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा'' इत्यंतेन श्लोकपंचकेन । यद्वा सुरा देवाः क्षियंति निवसंत्यत्रेति सुरक्षितं गंगातटं ''जाह्नव्यास्तु तटे सर्वे वसंति देवतागणाः'' इत्यादेः । द्वितीयेयं सप्तम्यर्थे । गंगातटे श्रीशुकेन सार्द्धं सप्ताहं यथा स्यात्तथा एकस्तंभं श्रीभागवतं कारयामास वाचयामासेति तात्पर्यम् । एकं सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मार्थाच्छ्रीहरिः 'हरिरेव परं ब्रह्म'' इत्याद्युक्तेः । तत्स्तभ्नाति चित्ते रुणद्धीत्येक' स्तंभं श्रीमद्भागवतं ''सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा । यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत्'' इति पाद्मात् । ''सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्'' इत्यत्रैवोक्तेश्च ॥ २९ ॥ तत्र तदा गंगातटे वा रक्षति प्रायश्चित्तोपदेशेनेति रक्षा ब्रह्मसभा तां विदधे चक्रे भिषजश्च विषवैद्यान् औषधानि सर्पविषहरान् मंत्रैः सिद्धान् सिद्धिमतो ब्राह्मणांश्च न्ययोजयत्स्थापयामासेत्यर्थः ॥ ३० ॥ राजकार्याणि राजभिः कर्त्तुं योग्यानि सांपरायिकमहादानादीनि सर्वाण्येव तत्रस्थः श्रोत्रियसमाजगतः सहधर्मज्ञः ''हेतुर्दामोदरः सहः'' इति सहस्रनामसु सहशब्दो विष्णुपरो दृश्यते । तद्धर्मज्ञः विष्णुभक्त इत्यर्थः । मंत्रिभिः श्रोत्रियैः । समं सार्द्धमकरोच्चकारेत्यर्थः ।''ब्राह्मणान्मंत्रासिद्धांश्च'' इत्युक्तेः । ''तदिति ब्रह्मणो नाम'' इति श्रुतेः । तद्ब्रह्म परं प्राप्यं येन स तत्परोऽध्यात्मविचारस्स एव तात्परः सोऽस्यास्तीति तात्परी श्रीशुकस्तेन रक्षितस्तत्त्वोपदेशेन संसाराद्रक्षितः ॥ ३१ ॥ कश्चित्प्राकृतो जन एनं श्रीमद्भागवतविचारमारूढं न लभते प्राप्तात्मतत्त्वोऽयमिति नाजानात् । तत्रात्मविचारप्रवेशे सति वातः प्राणोऽपि निश्चरन्बहिर्निर्गच्छन्विशेषेण वार्य्यते निषिध्यते । कर्मकर्त्तरि प्रयोगः । ''न तस्य प्राणा उत्क्रामंति अत्रैव समवनीयन्ते'' इति श्रुतेः । इत्थं व्याख्याने न कदाचिदपि विरोधः संभवेदिति तत्त्वम् ॥ ३२ ॥ किञ्च वाराहेण्येतद्वृत्तं वर्ण्यते परीक्षितः शापकथनप्रसंगे ''तत्राजग्मुर्महाभागा मुनयः संशितव्रताः ॥ शुकश्च व्यासतनयो महाभागवतो मुनिः ॥ संहितां श्रावयामास राज्ञे भागवती शुभाम्'' ॥ इत्यादिकं श्रीवाराहदेवेनोक्तम् । ब्रह्मांडेऽपि ''शुकवागमृताब्धीन्दुः परीक्षित्स्वांतगं तमः । निरस्यन्दिद्युते विप्र श्रीमद्भागवताख्यया ॥'' इति शेषदेवेनोक्तमतः श्रीमहाभारतेऽपि गोपयित्वा वर्णितमेवैतद्वृत्तमिति तत्त्वम् ॥ अथ प्रथमस्कंधश्रवणफलम् ॥ ''मातृसंगमने चैवं यत्पायं प्राप्यते नरैः । प्रथमस्कन्धश्रवणात्तस्मात्पापात्प्रमुच्यते ॥ पादादिजानुपर्यंतं ममांगं प्रथमो विधे ॥ ब्रह्मोवाच ॥ मातृगाम्यभवत्को वा कस्मिन्देशे स्थितश्च सः । प्रथमस्कंधश्रवणात्कथं मुक्तो वद प्रभो ॥ हरिरुवाच ॥ अवंतीनगरे रम्ये राजासीच्छ्रीकरो महान् । तस्य भार्याद्वयं चासीत्सिंधुसौवीरदेशजम् ॥ तयोर्मध्ये च या ज्येष्ठा नाम्ना केसरिणीति च । अजा नाम्ना कनिष्ठा तु सौवीराधिपतेः सुता ॥ पतिधर्मरता ज्येष्ठा कनिष्ठा न पतिप्रिया ॥ सर्वाङ्गसुंदरी सा हि शापदोषेण दुःखिता ॥ ब्रह्मोवाच ॥ ब्रूहि विष्णो कथं शापोऽभूत्तस्याः कीदृशोथ वा ॥ हरिरुवाच ॥ पुराघौघहरं नाम तीर्थं लोकमलापहम् । तत्र विप्रः सुधर्माख्यस्तपस्वी न्यवसत्पुरा ॥ ग्रीष्मे तपति पंचाग्नीन्वर्षास्वासारषाड् जले । आकंठमग्नः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिशिरे वर्षाणामयुतायुतम् ॥ एकपाद ऊर्द्ध्वपादः पादांगुष्ठाश्रितावनिः । वायुभक्षः पर्णभक्षो वर्षाणामयुतायुतम् ॥ एवंविधो द्विजस्तत्र तताप परमं तपः । दृष्ट्वा तस्य तपो जिष्णुर्भयमापेदिवान्बहु ॥ इंद्रासने स्पृहा ह्यस्य संचिंत्येत्यब्रवीत्तदा ॥ अप्सरसं पुष्पवंतीं समाहूय पितामह ॥ इंद्र उवाच ॥ भो भो पुष्पवति देवि मम कार्यं समाचर ॥ अवीवनाशने तीर्थे सुधर्मा नामतो द्विजः ॥ तत्तपोव्याकुलीभूतं त्रैलोक्यं सचराचरम् ॥ यथा मोहो भवेत्तस्य तथा कार्यं त्वया लघु ॥ हरिरुवाच ॥ इति वाक्यं समाकर्ण्य सहस्राक्षस्य धीमतः । ऋषेः शापात्रस्तमनाश्चिन्तयामास साप्सराः ॥ गमने विप्रशापः स्यादन्यथा दण्ड इंद्रतः ॥ सा जगाम ततो दिव्यं मुनेस्तस्य तपोवनम् ॥ नानाद्रुमैः पक्षिगणैर्वृतं दृष्ट्वाच तं मुनिम् ॥ तया नृत्यं समारेभे गीतवाद्यमनोहरम् ॥ तस्या नादेन रम्येण तत्रासीन्मधुसंभवः ॥ कामो रत्या समागत्य दध्रे पुष्पमयं धनुः ॥ तच्छ्रुत्वा निनदं तस्याः प्रबुद्धो मुनिपुंगवः ॥ तां च दृष्ट्वा स धर्मात्मा वाक्यमाह वराननाम् ॥ का त्वं कस्यासि किं कार्यं ब्रूहि यन्मनसेप्सितम् ॥ पुष्पवत्युवाच ॥ देवकन्यां सुगीतज्ञां लीलया त्वत्समीपगाम् ॥ त्वं विद्धि मां च पत्नीत्वे मया सह सुखं भज ॥ विमानमिदमास्थाय देवानां पानभूमिषु ॥ एते मत्सहगा विप्र त्वां भजेयुः सुखं भज ॥ सुधर्मोवाच ॥ नाहं कामीह सुभगे सा कुरुष्व तपोव्ययम् ॥ पुनः सा प्रार्थयामास स्त्रं भजस्व सुमध्यमाम् ॥ विज्ञाय तद्हृदं विप्रस्तस्यै शापद्वयं ददौ ॥ संसारार्णवमग्नानां प्रलोभयसि मां यतः ॥ अतस्त्वं मानुषेलोके भव स्वात्मजगामिनी ॥ सौवीराधिपतेः पुत्री सा जाता मुनिशापतः ॥ तामजासंज्ञिकां राज्ञे श्रीकराय ददौ पिता ॥ कदाचिच्छ्रीकरो राजा निर्जनं वनमध्यगात् ॥ यया[1]भ च तया सार्द्धं मृगयासक्तमानसः ॥ राज्ञी पुत्रं समालेभे नृपसंगान्मनोहरम् ॥ जाते पुत्रे मृतो राजा तत्पुत्रस्तु नृपोऽभवत् ॥ सपत्नीपुत्रराज्येन सा दुःखं प्राप्य दारुणम् ॥ जगाम वणिजा सार्द्धं रत्यासक्तमतिः सदा ॥ सोपि वैश्यो मृतिं प्राप ततः सातीव दुःखिता ॥ अहो कष्टमहो दुःखं मया प्राप्तमभाग्यया ॥ श्रीकरो हि मृतो राजा जारोपि निधनं गतः ॥ एतस्मिन्नंतरे दैवान्मृते केसरिणीसुते ॥ अजापुत्रोऽभवद्राजा कीर्तिमानिति विश्रुतः ॥ तदा संचिंत्य मनसा जीवनं मे कथं त्विह ॥ बभूव नर्तकी ब्रह्मन्सा संकेतोपजीविनी ॥ तत्सुतो दिग्जये व्यग्रो दैवात्तत्र जगाम ह ॥ यत्र माता ह्यजा नाम नर्तकीभावमाश्रिता ॥ एकदा स वने राजा तया सार्द्धं यया[2]भ ह । कामार्तश्च निशापाये प्रातः स्वस्थानमाययौ ॥ द्वौ द्विजौ ज्ञानसंपन्नौ तत्रस्थौ तं समूचतुः ॥ समागतं नृपं दृष्ट्वा कृतं पापं महन्नृप ॥ राजोवाच ॥ किं कृतं हि मया पापं प्रायश्चित्तं च किं ततः ॥ विप्रावूचतुः ॥ न वक्तुं शक्यते तच्च यन्निशायां त्वया कृतम् । यया साकं कृतं पापं तामेव प्रष्टुमर्हसि ॥ त्वं तस्याः कोऽभवत्पूर्वं तव सा काभवत्पुरा ॥ इत्युक्त्वा तौ गतौ विप्रौ राजा वेश्यागृहं गतः ॥ विक्रोशमसिमादाय प्रोवाच गणिकां प्रति ॥ का त्वं दुष्टे कस्य पुत्री कस्य भार्याभवत्पुरा । सर्वमेतत्समाचक्ष्व यदि कल्याणमिच्छसि ॥ सौवीराधिपतेः पुत्री श्रीकरस्य प्रिया ह्यहम् ॥ पुत्रे जाते दशाहे तु श्रीकरः पञ्चतामितः ॥ राज्यं प्राप्तं सपत्न्याश्च पुत्रेण तेन दुःखिता । गताहं वणिजा सार्द्धं सोपि मद्दैवतो मृतः । महीपतेः पुरा चाहं पुत्ररत्नमवाप ह ॥ कीर्तिमंतमिति ख्यातं तं त्यक्त्वात्र समागता ॥ वैश्याभवं वैश्यमृतौ वृत्तमेतन्मम प्रभो ॥ राजोवाच ॥ श्रीकरो मे पिता चासीत्त्वं मे मातेति निश्चितम् ॥ धिक्त्वां मातृगमं मां धिगित्युक्त्वा निर्ययौ वनम् ॥ गते पुत्रेऽनुगा साभूत्तीर्थयात्रां प्रचक्रतुः ॥ एकदा यमुनातीरे स्नानार्थं तौ समागतौ ॥ ताभ्यां तत्र श्रुता गाथा प्रथमस्कंधसंभवा ॥ तत्पुण्येन गतौ तौ तु वैकुंठं योगिदुर्लभम्" ॥ इति पाद्मोत्तरखंडत उद्धृतम् ॥ वन्देहं राधिकानाथं यशोदानन्दनं हरिम् ॥ यत्कृपालवसंलब्धधिया चैष प्रकाशकः ॥ श्रीभागवतभावार्थदीपिकायाः कृतो मया ॥ श्रीभागवतव्याख्यानरूपां मालां कृतां गुरोः ॥ कृपया लातु गोविंदः श्रीवंशीधरशर्मणा ॥ यद्यपि लोके बह्वयः संति हि टीकाः पुरातन्यः ॥ तथापि चैनां कृपया पश्यंतु कामदां सुधियः ॥ ॥ ४० ॥ इति कौशिकगोत्रखरडनगरवासित्रंशधिरशर्मकृते श्रीधरस्वामि कृतभावार्थदीपिकाप्रकाशे प्रथमस्कंधः समाप्तिमगात् ॥ श्रीकृष्णो मे मंगलं संददातु ॥

अयं श्रीमद्भागवतभावार्थदीपिकाप्रकाशसमलंकृतश्रीभागवतभावार्थदीपिकासमेतश्रीमद्भागवतप्रथमस्कन्धः मुम्बय्यां खेमराज श्रीकृष्णदास श्रेष्ठिनः स्वकीये **"श्रीवेंकटेश्वर"** मुद्रणालये मुद्रयित्वा प्रकाश्यमानीयत ॥

---

१ वसंताविर्भावः । २ मिथुनी बभूव ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीधरीयटीकया बंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते भागवते प्रथमस्कन्धः समाप्तः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश-
टीकया चोपेते श्रीमद्भागवते द्वितीयस्कन्धः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीयस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते वासुदेवाय ॥ श्रीशुक उवाच ॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप ॥ आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः ॥१॥

श्रीगणेशाय नमः ॥ ॥ द्वितीये तु दशाध्यायैः श्रीभागवतमादितः ॥ उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते ॥ १ ॥ तत्र तु प्रथमेऽध्याये कीर्तनश्रवणादिभिः ॥ स्थविष्ठे भगवद्रूपे मनसो धारणोच्यते ॥ २ ॥ यन्नामकीर्तनं दानतपोयोगादिसत्फलम् ॥ तं नित्यं परमानंदं हरिं नर नम स्मर ॥ ३ ॥ उक्तः पूर्वमुपोद्घातः सप्रसंगः शुकागमः ॥ राज्ञा पृष्टं नृणां कृत्यमथाह शुकसन्मुनिः ॥ ४ ॥ राज्ञः प्रश्नमभिनंदति । वरीयानिति । ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रेष्ठगोचरः प्रश्नः कृत एष वरीयान् । यतो लोकहितमेतन्मोक्षहेतुत्वात् । आत्मविदां मुक्तानां च संमतो यतः ॥ १ ॥ तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन् ब्रूहि । यद्वा विपर्ययमित्यस्यो

ॐ स्वस्ति श्रीगणेशाय नमः ॥ वन्देऽहं पार्वतीसूनुं सर्वविघ्नोपशांतये ॥ श्रीगुरून्सर्वतो नत्वाऽऽरंभे टीकां मनोहराम् ॥ १ ॥ ब्रह्मर्षीणां समाजे यो राजानं च परीक्षितम् ॥ गंगातटे समुद्धर्तुं शुकरूपेण केशवः ॥ ॥ २ ॥ समाजगाम सच्छास्त्रोपदेशेन स्वयं हरिः ॥ तं वंदेऽभीप्सितार्थाप्त्यै नंदसूनुं जगद्गुरुम् ॥ ३ ॥ अधुना द्वितीयस्कंधप्रकाशः क्रियतेतराम् ॥ गिरं गुरुं च संध्याय श्रीधरस्वामिनं तथा ॥ ४ ॥ अत्र श्रीशुकागमनाह्लादविस्मृतस्वेष्टप्रणतिः श्रीधराचार्योऽध्यायगणनापुरस्सरं व्याख्यातुमारभते । द्वितीये त्विति । नाममात्रेण वस्तुसंकीर्त्तनमुद्देशः संकीर्त्तनत्वमुद्देशत्वमित्युक्ते ताल्वोष्ठपुटव्यापारेणोच्चारणं संकीर्त्तनम् । इह वंशे पाठ्यमाने दलद्वयविभागजन्यचटचटशब्देऽतिव्याप्तिवारणाय संपदम् । काकरवेऽतिव्याप्तिवारणाय नामपदम् । लक्षणवाक्येतिव्याप्तिवारणाय मात्रपदम् । वंध्यात्मजेऽतिव्याप्तिवारणाय पदार्थपदम् । असाधारणधर्मो लक्षणम् । असाधारणत्वं नाम लक्ष्यतावच्छेदकसमनियतत्वम्, लक्ष्यतावच्छेदकसमनियतत्वं नाम लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वम् यथा—गंधवत्त्वं पृथिव्या लक्षणं लक्ष्या पृथिवी लक्ष्यता पृथिव्यां लक्ष्यतावच्छेदकं पृथिवीत्वं यत्रयत्र गंधवत्त्वं तत्रतत्र पृथिवीत्वमिति कृत्वा गंधे लक्ष्यतावच्छेदकव्याप्यत्वमस्ति एवं यत्रयत्र लक्ष्यतावच्छेदकं पृथिवीत्वं तत्रतत्र गंध इति कृत्वा गंधे लक्ष्यतावच्छेदकव्यापकत्वमप्यस्तीति व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परमित्युक्तेर्गंधवत्त्वपृथिवीत्वयोर्व्याप्यव्यापकत्वमनुसंधेयम् ॥ तथा च इदं श्रीभागवतमिति कथनमुद्देशः । असाधारणधर्मोत्र सर्गादिदशकमेव न ज्ञेयस्तस्यान्यत्रापि महापुराणे विद्यमानत्वात् । किं तु हयग्रीवब्रह्मविद्यादिरेव तस्यैवासाधारणधर्मत्वात् । यद्यप्यत्र तन्नोक्तं तथापि बीजभूतभगवदुपदिष्टचतुःश्लोक्यां तदस्त्येव वटकणिकायां वट इव तच्च श्रीगुरुप्रसादं विना दुर्ज्ञेयं "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः॥'' इति श्वेताश्वतरोक्तेः । 'यथा हि भगवानेव वस्तुतः सदसच्च यत्' इत्यादि हयग्रीवब्रह्मविद्या 'अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम्' इत्यनेन यथाकथंचिदसूचि गायत्र्या ब्रह्मविद्यारूपत्वेन तेनारंभोप्यसूच्येव । तमःशब्देन वृत्रवधाद्यप्यसूचि "तमसा त्वाष्ट्रमूर्त्तिना'' इत्यत्र तमःशब्दस्य वृत्रे प्रयुज्यमानत्वात् । तमो राहुर्यथास्त्यपि न प्रतीयेतेत्यनेन तद्वधो ध्वनितः । अप्रतीतिर्हि नष्टस्यैव वस्तुनो भवतीत्यलमपूर्वविचारेण । अल्पाक्षरैर्बह्वर्थाभिधानं संक्षेपः ॥ १ ॥ तत्र दशाध्यायेषु आदिनामननग्रहः ॥ २ ॥ पुनरागतस्मृतिः श्रीधरो मंगलं वस्तुनिर्देशात्मकमाचरति । यन्नामेति । दानं च तपश्च योग आदिर्यस्य तीर्थयात्रादेस्सयोगादिश्च तेभ्यः सच्छ्रेष्ठं फलं यस्य "तत्तथा—गोकोटिदानं ग्रहणेषु काशी मकरः प्रयागो यदि कल्पवासः । यज्ञायुतं मेरुसुवर्णदानं गोविंदनामस्मरणेन तुल्यम्'' इति पाण्डवगीतोक्तेः । हे नरेति स्वात्मानमुद्दिश्योक्तं तं नम नमस्कुरु स्मर चेत्यन्वयः ॥ ३ ॥ वर्णनीयमर्थं मनासि निधाय तदर्थमर्थांतरकल्पनमुपोद्घातः उपोद्घातरूपः । अथ शुकश्चासौ सन्मुनिश्चेति तथा कृत्यमन्तकृत्यम् ॥ ४ ॥ आदिना मंतव्यादिग्रहः । श्रेष्ठः श्रीकृष्णः गोचरो विषयो यस्य स श्रेष्ठगोचरः । अत्र संदर्भः । "अपि मे भगवान्प्रीतः कृष्णः पांडुसुतप्रियः'' इत्यादिना श्रीकृष्ण एव स्वरतिं राजा म्रियमाणां श्रोतव्यादिप्रश्नेनैवांतकाले श्रीकृष्ण एव मय्युपदिश्यतामिति राजाभिप्रायानंतरं श्रीशुक उवाच—वरीयानिति ॥ ते त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रीकृष्णकथाश्रवणाभिप्रायेण परमः प्रश्नः कृत एव तु वरीयान् वर्णाश्रमसाधारणधर्मप्रश्नो हि वरः । स्वाश्रमधर्मप्रश्नो वरतरस्तत्रापि निष्कामेन तदाचरणप्रश्नो वरतमः श्रीभगवद्विषयकः प्रश्नस्तु वरीयानेवेति चतुर्थकोटी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः ॥ अपश्यतामात्मतत्त्वं गृहेषु गृहमेधिनाम् ॥ २ ॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः ॥ दिवा चार्थेहया राजन्कुटुंबभरणेन वा ॥३॥ देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥४॥

त्तरमाह श्रोतव्यादीनीति त्रिभिः । गृहेषु सक्तानामत एव गृहमेधिनां तद्गतपंचसूनापराणाम् । मेधतिर्हिंसार्थः ॥ २ ॥ तैश्च वृथैवायुर्व्ययो भवतीत्याह । नक्तं रात्रौ यद्वय आयुस्तन्निद्रया व्यवायेन रत्या वा ह्रियते । दिवा अह्नि यद्वयस्तत् अर्थेहया अर्थार्थमुद्यमेन सिद्धेऽर्थे कुटुंबपोषणेन वा चकारावनुक्तसमुच्चयार्थौ ॥ ३ ॥ ननु नश्वरकुटुंबाद्यर्थं कथमायुर्व्ययं कुर्यात्तत्राह । देहादिषु आत्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तस्तेषां पित्रादिदृष्टांतेन नाशं पश्यंस्तदपि नानुसंधत्ते ॥ ४ ॥

हीयसुन्प्रत्ययः । यः प्रश्नोपि श्रोतव्यादिषु परः यस्य प्रश्नस्यापि श्रवणादौ परमपुरुषार्थः सिध्यतीत्यर्थः । सर्वावतारावतारिप्रश्नेभ्यः परममहान् । स च लोकहितं यथा स्यात्तथैव कृतः त्वं तु तथाभूतश्रीकृष्णैकनिर्वद्धप्रेमत्वात्कृतार्थ एवेति भावः । तदुक्तम् । "वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ॥ उपधार्य मतिं कृष्ण औत्तरेयः सतीं व्यधात्" इति सती विद्यमाना श्रीकृष्णे या मतिस्तामेव विशेषेण धृतवानित्यर्थः । एतदेव व्यक्तीकरिष्यते राजा "हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः । कथयस्व महाभाग यथाहमखिलात्मनि ॥ कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरम्" इति एवमेव "कथितो वंशविस्तारः" इत्यादि । अनंतरं "सम्यग्व्यवसिता बुद्धिः" इत्यादि । पूर्वं मया नानावतारादिकथाभिरभिनंदितस्यापि या श्रीमद्वसुदेवनंदनस्यैव कथायां नैष्ठिकी स्थायिरूपा रतिर्जाता एषा बुद्धिस्तु सम्यग्व्यवसिता परमरसविदग्धेत्यर्थः । यद्वा यः प्रश्नोपि श्रोतव्यादिषु परः यस्य प्रश्नस्य श्रवणादौ परमपुरुषार्थः । विश्वनाथः—पूर्वस्कंधांते "ततः पृच्छामि संसिद्धिम्" इति "पुरुषस्येह यत्कृत्यम्" इतिवाक्याभ्यां सम्यक्सिद्धिः काऽत्र साधनं च किमिति तत्रापि श्रव्यजप्यादिकं किन्तथैवा श्रव्याजप्यादिकं च किमिति राज्ञः प्रश्नमभिनंदति । वरीयाञ्श्रेष्ठस्ते त्वया कृतः एष प्रश्न एव लोकानां हितं न चायं प्राकृतः प्रश्न इत्याह । आत्मविदामेषां युष्मत्सभोपविष्टानां संमतः एतदर्थमेवैतेषामत्रागमनादिति भावः । यतः श्रोतव्यादिष्विति सतां प्रश्नोपि श्रूयते कीर्त्यते स्मर्य्यते इत्यतः श्रोतव्यादिषु प्रश्नेषु मध्ये यः प्रश्नः पर इतोन्यस्योत्कृष्टस्याभावात्सर्वातिमः । इमं प्रश्नमेव श्रुत्वा कीर्तयित्वा स्मृत्वा पुमांसः सर्वतोप्यतिकृतार्था भवंति । पुनरेतत्प्रश्नस्योत्तरं मया दत्तं श्रुत्वा त्वं कृतार्थी भविष्यतीति भविष्यसीति भावः । इत्थमेवाग्रे वक्ष्यते "वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा" ॥ इति । नृपेति । लोकहितकरणेनैवं नृपत्वं सत्स्यतीति भावः ॥१॥ तत्र तावत् द्वितीयस्कंधे आदौ भगवच्चरणप्राप्तिरेव संसिद्धिस्तत्र कृत्यं तन्नामलीलाश्रवणकीर्त्तनाद्येव सर्वोत्कृष्टमित्यग्रे प्रतिपादयिष्यन्प्रथमं "ब्रूहि यद्वा विपर्ययम्" इत्यस्योत्तरत्वेन कर्मयोगमाह । श्रोतव्यादीनि" इति । अत्मनां तत्त्वं कवयः किं कुर्महे किमुदर्का भविष्यामः कथं निस्तारं प्राप्नुम इत्यपश्यतां किं तु गृहेषु सक्तानां 'मेधृ हिंसायाम्' । राजेन्द्रेति । राज्ञामेव बहुकार्याकुलत्वादात्मतत्त्वज्ञानं न भवति किमुत राजेंद्रस्येति भावः । पञ्चसूनास्तु । "कंडनी पेषणी चुल्ली उदकुंभी च मार्जनी ॥ पञ्चसूना गृहस्थस्य ताभिः स्वर्गं न विंदति ॥" इति स्मृतेः । सूना वधस्थानम् । यद्वात्मतत्त्वं भगवत्तत्त्वम् । तस्मादित्युपसंहारिष्यमाणत्वात् । तदपश्यतां परमश्रोतव्यत्वेनाजानतामित्यर्थः ॥ २ ॥ तैः श्रोतव्यादिभिः । रत्येति । कर्मिणां स्त्रीसंगस्यानिषिद्धत्वात् कर्मयोगे कुटुंबभरणस्य विहितत्वात् "अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्" इत्युक्तेः ॥ ३ ॥ अत्राक्षिपति । नन्विति । असत्सु जीवात्मनो देहादिसंबंधाभावान्मिथ्याभूतेष्वपि तेषु प्रमत्तः प्रसक्तः । यद्वाऽसत्स्वसाधुष्वपि बहिर्मुखत्वादसमर्थेष्वपीत्यर्थः नानुसंधत्ते । यद्वा मोहमद्यपानोन्मत्तत्वान्नानुसंधत्ते तदुक्तं भर्तृहरिणा । "आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते । दृष्ट्वा रोगजराविपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ।" इति । तेनायं कालेनैव ग्रस्यते भगवद्भक्तस्तु भगवदुन्मुखैर्देहादिभिरप्रमत्तः कालमपि जयतीति भावः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ ५॥ एतावान्सांख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥
जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥ ६ ॥ प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः ॥ नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ॥ ७ ॥
इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ॥ अधीतवान्द्वापरादौ पितुर्द्वैपायनादहम् ॥ ८ ॥

एवं विपर्ययप्रश्नोत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह । तस्मादिति।हे भारत भरतवंश्य। सर्वात्मेति प्रेष्ठत्वमाह। भगवानिति सौंदर्यम्।ईश्वर इत्यावश्यकत्वम्। हरिरिति बंधहारित्वम्। अभयं मोक्षमिच्छता ॥५॥ अतः परमन्यच्छ्रेयो नास्तीत्याह। एतावानेव जन्मनो लाभः फलम्। तमाह नारायणस्मृतिरिति सांख्यादिभिः साध्य इति। स्वातंत्र्येण तेषां लाभत्वं वारयति। सांख्यमात्मानात्मविवेकः योगोऽष्टांगः अंते तु स्मृतिः परो लाभः न तन्महिमा वक्तुं शक्य इत्यर्थः ॥६॥ तत्र सदाचारं प्रमाणयति। प्रायेणेति। विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्रह्मणि स्थिता अपि। स्म प्रसिद्धम् ॥ ७ ॥ ननु किमिदमपूर्वं कथयसि सत्यमत्यपूर्वमेवेदमित्याह। इदं भगवत्प्रोक्तं तन्नामैकप्रधानं पुराणं ब्रह्मसंमितं सर्ववेदतुल्यम्। यद्वा ब्रह्म सम्यक् मितं येन। कुतस्त्वया प्राप्तमत आह। अधीतवानिति। द्वैपायनात्पितुः कदा द्वापरादौ द्वापर आदिर्यस्य

अतःकृतार्थी भवितुं कर्मादिकमकुर्वाणा भक्तिमेव कुर्वीरन्नित्याह—तस्मादिति।भारतेति।भरतवंशस्य हरिभक्तत्वेन त्वां प्रत्यहं भगवत्तत्त्वमवश्यं वदामीतिभावः।अभयं स्वपराभवाभावं यद्वाऽभयं सर्वभयनिवारकसर्वानंदमयपुरुषार्थम् "गतवानभयं हरिम्" इति वक्ष्यमाणत्वात् "मर्त्यो मृत्युव्यालभीतः पलायन्"इत्याद्युक्तेश्चाभयं श्रीकृष्णमित्यर्थः। अत्र हरिरिति विशेष्यपदं सर्वात्मेत्यादिविशेषणत्रयेण मोक्षाभिसंधिनी रागानुगा वैधी चेति भक्तिर्व्यञ्जिता। तत्र प्रथमायामभयं मोक्षमिच्छता सर्वेषामात्मा परमात्मा हरिः श्रोतव्य इति द्वितीयायामभयं निष्कपं यथा स्यात्तथा इच्छता लोभवता पुंसा भगवानतिसुन्दरो नंदसूनुः श्रोतव्य इति। "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः। तृतीयायां न विभेत्यस्मादित्यभयो हरिरेव "मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम्" इत्यग्रिमश्लोके वक्ष्यमाणत्वात्। इच्छताऽभयमात्मत्राणमिच्छता वा ईश्वरो हरिरीशितव्येन पुंसा श्रोतव्य इत्यादि कीर्त्तितव्यश्च स्मर्तव्यश्चेति चकाराभ्यां श्रवणानंतरं कीर्त्तनश्रवणयोरेव कालत्वं विहितमिति श्रोतव्यादिप्रश्नस्योत्तरमुक्तम् ॥ ५ ॥ अतो भगवच्छ्रवणादेः। इत्यर्थ इति। 'अंते या मतिः सा गतिः' इति न्यायेन साक्षाच्छ्रीहरिप्रापकत्वादिति भावः। विश्वनाथः—ज्ञानिकर्मिप्रभृतयोन्येपि साधुसंगवशाद्यदि भक्ता भवंति न पुनः कर्मादिकं कुर्वंति तदा तेपि कृतार्था इत्याह—एतावानिति। सांख्ययोगस्वधर्मनिष्ठाभिरेतावान् जन्मनो लाभः परः श्रेष्ठः कोसावन्ते प्रत्यासत्तिन्यायेन ज्ञानकर्मयोगानामवसाने सनकादिनवयोगेश्वरप्राचीनबर्हिःप्रभृतीनामिव नारायणस्मृतिः शुद्धा भक्तिर्यदि स्यात्। अंत इति। यदि पुनरपि भक्तिं त्यक्त्वा ज्ञानादिषु निष्ठिता न भवतीत्यर्थः। अत एवमेव वक्ष्यते। "एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः" इति ॥६॥ संसिद्धिस्तु भगवद्रूपगुणमाधुर्यानुभव एव स च ब्रह्मसायुज्यादप्यतिश्रेष्ठ इति महदनुभवप्रमाणेनाह। प्रायेणेति नैर्गुण्ये स्थिता मुक्ता अपीत्यर्थः। गुणानुकथन एव रमंते न तु निर्विशेषब्रह्मसुखेपीत्यर्थः। प्रायेणान्ये जीवन्मुक्तारततो निकृष्टाः सायुज्यार्थं गुणानुकथनं कुर्वंति न तु तत्र रमंते ॥ ७ ॥ किमिदमश्रुतपूर्वं कथयसि सत्यमपूर्वमेवेदमित्याह—भागवतं भगवंतमधिकृत्य कृतं भगवता प्रोक्तं वा भगवत इदमिति वा शास्त्रमिदं युष्मदस्मत्प्रश्नोत्तरविराजि श्रीभगवल्लीलामयमंतर्भूतयुष्मदादिजन्मस्थितिसंस्थितिकथाप्रपञ्चमध्यात्मदीपं सर्वोपनिषत्साररसरूपमनादिसिद्धमेव मत्पित्रा बादरायणेनाविर्भावितम्। आधीतवानिति। शास्त्रस्यार्थो बुद्धिबलेन स्वयं प्राप्तुमशक्य इति भावः। कृष्णावतारादनतिपूर्वमेव सत्यवत्यां द्वैपायनस्य प्रादुर्भावात् द्वापरादाविति न संगच्छते। तस्माद्द्वापरशब्देनात्र द्वापरांत एव लक्ष्यते वृक्षशाखादिवत्तदग्रत्वव्यवहारेण द्वापरांते इत्यर्थः। यथा वृक्षाग्रे पक्षी खड्गाग्रं मास्पृशेत्यादावंतेऽप्यग्रव्यवहारस्तद्वदत्रापीति। यद्वा द्वापर आदिर्यस्य संध्यांशस्य स तथा ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिनिष्ठितोऽपि नैर्गुण्य उत्तमश्लोकलीलया ॥ गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ ९ ॥ तदहं तेऽभिधास्यामि महापौरुषिको भवान् ॥
यस्य श्रद्दधतामाशु स्यान्मुकुंदे मतिः सती ॥१०॥ एतन्निर्विद्यमानानामिच्छतामकुतोभयम् ॥ योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥११॥

कालस्य तस्मिन्द्वापरांत इत्यर्थः । शंतनुसमकाले व्यासावतारप्रसिद्धेः ॥ ८ ॥ सिद्धस्य तव कुतोऽध्ययने प्रवृत्तिस्तत्राह । परिनिष्ठितोऽपीति गृहीतचेता आकृष्टचित्तः ॥ ९ ॥ महापुरुषो विष्णुस्तदीयः । यस्य यस्मिन् श्रद्धां कुर्वतां सती अहैतुकी ॥ १० ॥ साधकानां सिद्धानां च नातः परमन्यच्छ्रेयोऽस्तीत्याह । एतदिति । इच्छतां

ननुत्वमतिप्रसिद्धो जन्मत एव ब्रह्मानुभवी गृहात्परिव्रज्य गतोऽनुव्रजंतं पितरममि नैव पर्यचैषीः । संप्रति कथमेवं ब्रूष इत्यभिप्रायेण शंकते—सिद्धस्येति । आकृष्टचेता इति ब्रह्मानुभवादपि लीलाया माधुर्याधिक्येऽहमेव प्रमाणमिति भावः । राजर्षे इति । एतच्च ब्रह्मर्षय एव जानंति न तु प्रायो राजर्षय इति भावः ॥ ९ ॥ तर्हीदमपूर्वं वस्त्वहमपि लभेयेत्यत आमूलचूलमेव मामेनदास्वादयेत्यपेक्षायामाह । तदहमिति । महापुरुषं कृष्णं प्राप्तुमर्हसीति महापौरुषिकः । यद्वा विनयादित्वात्स्वार्थे ठक् । उत्तरपदवृद्धिश्च । यस्य यस्मिन् श्रीभागवते यद्वा श्रद्दधतां मध्ये यस्य तव मतिः सती ततश्च जन्माद्यस्येत्यारभ्य विष्णुरातममूमुचादित्यंतं सर्वमेव श्रीभागवतं श्रावयामासेति ज्ञेयमत एव प्रथमद्वादशयोरपि शुकप्रोक्तत्वे "अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु" इति वचनं सम्यगुपपद्यते ॥ १० ॥ नन्वत्र शास्त्रे भक्तिरभिधेयेत्यवगम्यत एव तत्रापि भक्त्यंगेषु मध्ये महाराजचक्रवर्त्तिवत्किमेकं मुख्यत्वेन निर्णीयते तत्राह—नामानुकीर्त्तनमिति । सर्वेषु भक्त्यंगेषु मध्ये श्रवणकीर्त्तनस्मरणानि त्रीणि मुख्यानि तस्माद्भारतेति श्लोके नोक्तानि तेषु त्रिष्वपि मध्ये कीर्त्तनं कीर्त्तनेपि नामलीलागुणादिसंबंधिनि तस्मिन्नामकीर्त्तनं तत्रानुकीर्त्तनं स्वभक्त्यनुरूपनामकीर्तनं निरंतरकीर्त्तनं वां निर्णीतं पूर्वाचार्यैरपि न केवलं मयैवाधुना निर्णीयत इति तेनात्र प्रमाणं न प्रष्टव्यमिति भावः । कीदृशमकुतोभयं कालदेशपात्रोपकरणादिशुद्ध्यशुद्धिगतभयाभावस्य का वार्त्ता भगवत्सेवादिकमसहमाना म्लेच्छा अपि यत्र नैव विप्रतिपद्यंते इति भावः । किञ्च । साधकानां सिद्धानां च मुमुक्षूणां मुक्तानां च नातः परमन्यच्छ्रेय इत्याह । निर्विद्यमानानामर्थान्मोक्षपर्यंतसर्वकामेभ्य इति इच्छतामित्यर्थात्तानेव कामानिति प्रविश पिंडीमितिवल्लभ्यते । ततश्च निर्विद्यमानानामेकांतभक्तानामिच्छतां स्वर्गमोक्षादिकामिनां योगिनामात्मारामाणां च एतदेव निर्णीतं यथायोगं साधनत्वेन फलत्वेन चेति भावः । अत्र संदर्भः 'परिनिष्ठितोपि नैर्गुण्ये' इत्यादौ 'तदहं तेभिधास्याभि'इत्यंतेन 'यस्य श्रद्दधतामाशु स्यान्मकुंदे मतिः सती' इति श्रीभागवतस्य परममहिमानमुक्त्वा तदनंतरं श्रीभागवतमुपक्रममाण एव तस्य नानांगवतस्तन्नामकीर्त्तनमेवोपादिशति । तत्रापि सर्वेषामेव परमसाधनत्वेन परमसाध्यत्वेन चोपदिशति । 'एतन्निर्विद्यमानानाम्' इति टीका च साधकानां सिद्धानां च नातः परमन्यच्छ्रेयोस्तीत्याह । एतदिति । इच्छतां कामिनां तत्तत्फलसाधनमेतदेव, निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव, योगिनां ज्ञानिनां फलं चैतदेव नात्र प्रमाणं वक्तव्यमित्यर्थ इत्येषा नामकीर्त्तनं चेदमुच्चैरेव प्रशस्तम् 'नामान्यनंतस्य हतत्रपः पठन्' इत्याद्युक्तेः । अत्र पाद्मोक्तदिशापराधाः परित्याज्याः यथा श्रीसनत्कुमारवाक्यम् "सर्वापराधकृदपि मुच्यते हरिसंश्रयः ॥ हरेरप्यपराधान्यः कुर्याद्द्विपदपांशुलः ॥ नामाश्रयः कदाचित्स्यात्तरत्येव स नामतः ॥ नाम्नोपि सर्वसुहृदो ह्यपराधात्पतत्यधः ॥" इति । अपराधाश्चैते । "सतां निंदा नाम्नः परममपराधं वितनुते यतः ख्यातिं यातं कथमु सहते तद्विगर्हणम् (१) ॥ शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्येत्स खलु हरिनामाहितकरः (२) ॥ गुरोरवज्ञा (३) श्रुतिशास्त्रनिंदनम् (४) तथार्थवादो (५) हरिनाम्नि कल्पनम् (६) । नाम्नो बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः (७) ॥ धर्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यमपि प्रमादः (८) ॥ अश्रद्दधाने विमुखेप्यशृण्वति यश्चोपदेशः शिवनामापराधः (९) ॥ श्रुत्वापिनाममाहात्म्यं यः प्रीतिरहितोऽधमः । अहं ममापि परमो नाम्नि सोप्यपराधकृत् ॥" इति (१०) अत्र सर्वापराधकृदपीत्यादौ श्रीविष्णुयामलवाक्यमनुसंधेयम् । "मम नामानि लोकेऽस्मिञ्श्रद्धया यस्तु कीर्तयेत् ॥ तस्यापराधकोटीस्तु क्षमाम्येव न संशयः"इति । सतां निन्देत्यनेन हिंसादीनां वचनागोचरत्वं दर्शितम् । निंदादयस्तु यथा स्कांदे मार्कंडेयभगीरथसंवादे "निंदां कुर्वंति ये मूढा वैष्णवानां महात्मनाम् ॥ पतंति पितृभिः सार्द्धं महारौरवसंज्ञिते (१) ॥हंति निंदति यो द्वेष्टि वैष्णवान्नाभिनंदति । क्रुध्यते याति नो हर्षं दर्शने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामिनां तत्तत्फलसाधनमेतदेव । निर्विंद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव । योगिनां ज्ञानिनां फलं चैतदेव निर्णीतम् । नात्र प्रमाणं प्रवक्तव्यमित्यर्थः ॥ ११ ॥

पतनानि षट् ॥ इति । तन्निंदाश्रवणेपि दोष उक्तः । निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा ॥ ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः'' इति । ततोपगमश्चायमसमर्थस्यैव समर्थेनं तु निंदकजिह्वा छेत्तव्या तत्राप्यसमर्थेन तु स्वप्राणपरित्यागः कर्त्तव्यः । यथोक्तं देव्या । ''कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्माविर्तर्यसृणिभिर्नृभिरस्यमाने ॥ जिह्वां प्रसह्य रुशतीमसतां प्रभुश्चेच्छिंद्यादसूनपि ततो विसृजेत्स धर्मः'' इति । शिवस्य श्रीविष्णोरित्यत्रैवमनुसंधेयं श्रूयते हि । ''यद्यद्विभूतिमत्सत्त्वं मम तेजोंशसंभवम्'' ॥ इति । ''ब्रह्मा भवोहमपि यस्य कलाः कलायाः' इति । ''यत्पादनिस्सृतसारित्प्रवरोदकेन तीर्थेन मूर्द्ध्नि कृतेन शिवः शिवोऽभूत्' । इति । ''सृजामि तन्नियुक्तोहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥'' इति । तथा माध्वभाष्यधृतानि वचनानि । ब्रह्मांडे । ''रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः ॥ ईशानादेव चेशानो महादेवो महत्त्वतः (१) पिबंति येन वा नाकं मुक्ताः संसारसागरात् ॥ तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः (२) शिवः सुखात्मकत्वेन सर्वसंरोधनाद्धरः ॥ कृत्यात्मकामिमं देहं स्थितेरंते प्रवर्त्तयन् ॥ कृत्तिवासास्ततो देवो विरिंचिस्तु विरेचनात् ॥ बृंहणाद्ब्रह्मनामासवैश्वर्यादिन्द्र उच्यते ॥ एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः ॥ वेदेषु च पुराणेषु गीयते पुरुषोत्तमः'' इति । वामने ''न तु नारायणादीनां नाम्नामन्यत्र संशयः ॥ अन्यनाम्नां किल गतिर्विष्णुरेव प्रकीर्त्तितः'' इति स्कांदे । ''ऋते नारायणादीनि नामानि पुरुषोत्तमः ॥ अदादन्यत्र भगवान् राजेवर्त्ते स्वकं वपुः'' इति ब्राह्मे । ''चतुर्मुखः सदानंदो ब्रह्मणः पद्मभूरिति ॥ उग्रो भस्मधरो नग्नः कपालीति शिवस्य च ॥ विशेषनामानि ददौ स्वकीयान्यपि केशवः'' इति । तदेवं श्रीविष्णोः सर्वात्मकत्वेन प्रसिद्धात्तस्मात्सकाशाच्छिवस्य गुणनामादिकं भिन्नं शक्त्यंतरसिद्धमिति यो धियापि पश्येदित्यर्थः । द्वयोरभेदतात्पर्येण षष्ठ्यंतत्वे सति श्रीविष्णोश्चेत्यपेक्ष्य चशब्दः क्रियते तत्प्राधान्यविवक्षयैव श्रीशब्दश्च तत्रैव दत्तः । अत एव शिवनामापराध इति शिवशब्देन मुख्यतया श्रीविष्णुरेव प्रतिपादित इत्यभिप्रेतं सहस्रनामादौ च स्थाणुशिवादिशब्दास्तथैव ॥ अथ गुरोरवज्ञाऽनादर इति । अथ श्रुतिशास्त्रनिंदनम् । यथा पाखंडमार्गेण दत्तात्रेयर्षभदेवोपासकानां पाखंडिनाम् । अथार्थवादः स्तुतिमात्रमिदमिति मननं कल्पनं तन्माहात्म्ये गौण्यताकरणाय गत्यंतरचिंतनम् । यथोक्तं कौर्मे व्यासगीतायाम्—देवद्रोहाद्गुरुद्रोहः कोटिकोटिगुणाधिकः ॥ ज्ञानापवादो नास्तिक्यं तस्मात्कोटिगुणाधिकम्'' इति । यत्तु विष्णुपार्षदेभ्यः श्रुतनाममाहात्म्यस्याप्यजामिलस्य । ''सोहं व्यक्तं पतिष्यामि नरके भृशदारुणे'' इति वाक्यं तत्खलु स्वदौरात्म्यमात्रदृष्ट्या नाममाहात्म्यदृष्ट्यात्वग्रे वक्ष्यते । 'तथापि मे दुर्भगस्य' इत्यादिद्वयम् । नाम्नो बलादिति । यद्यपि भगवन्नाम्नो बलेनापि कृतस्य पापस्य तन्नाम्ना क्षयस्तथापि येन नाम्नो बलेन परमपुरुषार्थस्वरूपं सच्चिदानंदसांद्रं साक्षाच्छ्रीभगवच्चरणारविंदं साधयितुं प्रवृत्तस्तेनैव परमघृणास्पदं पापं विषयं साधयतीति परमदौरात्म्यम् । ततः कदर्थयत्येतन्नाम चेति ततः पापकोटिमहत्तमस्यापराधस्यापातो बाढमेव ततो यमैर्बहुभिर्यमनियमादिभिः कृतप्रायश्चित्तस्य क्रमेण प्राप्ताधिकारैरनेकैरपि दंडधरैर्वा कृतदंडस्य तस्य शुद्धभावो युक्त एव । 'नामापराधयुक्तानाम्' इत्यादिवक्ष्यमाणानुसारेण पुनरपि संततनामकीर्तनमात्रस्य तत्र प्रायश्चित्तत्वात् सर्वापराधकृदपीत्याद्युक्तानुसारेण नामापराधयुक्तस्य भगवद्भक्तिमतोप्यधःपातलक्षणभोगानियमाच्च तत्रेंद्रस्याश्वमेधाख्यभगवद्यजनबलेन वृत्रहत्या प्रवृत्तिस्तु लोकोपद्रव शांतिं तदीयासुरतावखंडनं चेच्छूनामृषीणामाज्ञाकृतत्वान्न दोष इति मंतव्यम् । अथ धर्मव्रतत्यागेति । धर्मादिभिः साम्यमननमपि प्रमादोऽपराधो भवतीत्यर्थः । अत एव '' वेदाक्षराणि यावंति पठितानि द्विजातिभिः ॥ तावंति हरिनामानि कीर्त्तितानि न संशयः'' ॥ इत्यतिदेशेनापि नाम्न एव प्राधान्यमायाति । उक्तं हि । 'मधुरमधुरमेतत्' इत्यादौ 'सकलनिगमवल्ली सत्फलम्' इति । तथा श्रीविष्णुधर्मे ''ऋग्वेदो हि यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम्'' स्कांदे पार्वत्युक्तौ । ''मा ऋचो मा यजुस्तात मा साम पठ किञ्चन ॥ गोविंदेति हरेर्नाम गेयं गायस्व नित्यशः । '' पाद्मे रामाष्टोत्तरशतनामस्तोत्रे 'विष्णोरेकैकनामापि सर्ववेदाधिकं स्मृतम्'' इति । अथाश्रद्दधाने इत्यादिनोपदेष्टुरपराधं दर्शयित्वोपदेशस्याह—श्रुत्वेतियतः अहंममादिपरमोऽहंताममताद्येकतात्पर्यत्वेन तस्मिन्ननादरवानित्यर्थः । 'नामैकं यस्य वाचि स्मरणपथगतम्' इत्यादौ देहद्रविणादिनिमित्तकपाषंडशब्देन च दशापराधा लक्ष्यंते । पाषंडमयत्वात्तेषां तथा तद्विधानादेवापराधानंतरमुक्तं पाद्मे वैशाखमाहात्म्ये ''अवमन्य च ये यांति भगवत्कीर्त्तनं नराः ॥ ते यांति नरकं घोरं तेन पापेन कर्मणा'' इति । एतेषां चापराधानामनन्यप्रायश्चित्तत्वमेवोक्तं तत्रैव ''नामापराधयुक्तानां नामान्येव हरंत्यघम् ॥ अविश्रांतिप्रयुक्तानि तान्येवार्थकराणि च'' इति । अत्र सत्प्रभृतिष्वपराधेषु तत्संतोषणार्थमेव संतत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंप्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह ॥ वरं मुहूर्तं विदितं घटेत श्रेयसे यतः ॥१२॥ खट्वांगो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः ॥ मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिम् ॥ १३ ॥ तवाप्येतर्हि कौरव्य सप्ताहं जीविताविधिः ॥ उपकल्पय तत्सर्वं तावद्यत्सांपरायिकम् ॥ १४ ॥ अंतकाले तु पुरुष आगते गतसाध्वसः ॥ छिंद्यादसंगशस्त्रेण स्पृहां देहेऽनु ये च तम् ॥ १५ ॥ गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः ॥ शुचौ विविक्त आसीनो विधिवत्कल्पितासने ॥ १६ ॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम् ॥ मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥ १७ ॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ॥ मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥ १८ ॥ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् ॥ पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ १९ ॥

मेवायुरवशिष्टं किमहं साधयेयमिति मा शुच इत्याह किमिति त्रिभिः । परोक्षैरलक्षितैर्हायनैर्वर्षैर्विदितं वृथा यातीति ज्ञातम् । यतो येन ज्ञानेन घटेत यत्नं कुर्यात् ॥१२॥ खट्वांगो हि देवपक्षे स्थित्वा दैत्यानजयत् । ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तोऽतस्तेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति । ततो देवैरुक्तं तत्तु मुहूर्तमात्रमस्तीति । ततोऽतिशीघ्रं विमानेन भुवमागत्य हरिं शरणं गत इति । यत इयं स्वर्गभूमी रजोधिका कर्मभूमिः पृथ्वी ॥१३॥ तव तु एतर्ह्यपीदानीमपि । तावदिति । तावता कालेन सांपरायिकं पारलौकिकं साधनं संपादय ॥ १४ ॥ तत्र वैराग्यं तावदाह । अंतकाल इति । गतसाध्वसो मृत्युभयशून्यः असंगो नामानासक्तिः तेन शस्त्रेण स्पृहां सुखेच्छां तं देहमनु ये पुत्रकलत्रादयस्तेष्वपि स्पृहां छिंद्यात् ॥ १५ ॥ किं च गृहात्प्रव्रजितो निर्गतः गृहे स्थितस्य पुनरप्यासक्तिसंभवात् । तत्राष्टांगयोगमाह । धीर इति ब्रह्मचर्यादियमोपलक्षणम् । पुण्यतीर्थेति स्नानादिनियमोपलक्षणम् । आसनमाह । शुचाविति । विविक्ते एकांते विधिवत्कुशाजिनचैलैः क्रमेण निर्मिते ॥ १६ ॥ जपगर्भं प्राणायामं वक्तुं जप्यमाह । त्रिवृद्ब्रह्माक्षरं त्रिवृत् त्रिभिरकारादिभिर्वर्तितं ग्रथितं ब्रह्माक्षरं प्रणवं मनसाऽभ्यसेदावर्तयेत् । मनसेंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह । मनोयच्छेद्वशी कुर्यात् । ब्रह्मबीजं प्रणवमविस्मरन्नेव जितश्वासः सन् ॥ १७ ॥ प्रत्याहारमाह । नियच्छेन्निगृह्णीयात् । अक्षानिंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः । धारणामाह । मन इति । पुनश्च कर्मभिस्तद्वासनाभिराक्षिप्तमाकृष्टं शुभार्थे भगवद्रूपे ॥ १८ ॥ ध्यानमाह । तत्रेति । एकमेकं पादाद्यवयवं अव्युच्छिन्नेन समग्ररूपादवियुक्तेन

नामकीर्तनादिकं समुचितम् ।अंबरीषचरितादौ तदेकक्षम्यत्वेनापराधानां दर्शनात् ।उक्तं च नामकौमुद्याम् ''महदपराधस्य भोग एव निवर्तकस्तदनुग्रहो वा'' इति । तस्माद्गत्यंतराभावात्साधूक्तमेतान्निर्विद्यमानानामिति ॥११॥ श्रेयसे नामकीर्तनादिरूपाय ॥ १२ ॥ अत्र खट्वांगचरितं प्रमाणयति । खट्वांग इति ॥ १३ ॥ कौरव्येति । तव तु राज्ञः सांपरायसाधनसंपादनं न दुष्करमाश्चर्यैव सर्वव्यवहारसिद्धेरिति भावः । सप्तानामह्नां समाहारः सप्ताहम् । ''रात्राह्नाहाः पुंसि'' इति त्वार्षत्वान्न ॥ १४ ॥ तत्रांतकाले म्रियमाणेन किं कर्त्तव्यमिति प्रश्ने योगेनैव स्वेच्छया देहं परित्यज्य सुखेनैव ब्रह्मपदं प्रवेष्टुं योगाभ्यास एव कर्त्तव्य इत्याचिख्यासूनां तन्महासदःस्थानां केषांचिन्मतमष्टांगयोगं स्वमतस्य शुद्धभक्तियोगस्य पुनरपि द्वितीयाध्यायांते वक्तव्यस्योत्कर्षार्थमाह । अंतकाल इति ॥ १५ ॥ आसन्नमरणस्यान्यदपि कृत्यमाह किंचेति । तत्र गृहेतरे देशे ॥ १६ ॥ ब्रह्मणो वेदस्य बीजं कारणम् । 'ॐकारप्रथमा वेदाः' इत्युक्तेः ॥ १७ ॥ आकृष्टं प्राचीनकर्मणां प्राबल्यात्प्राणायामैरपि सम्यङ्निश्चलीकर्त्तुमशक्यमित्यर्थः ॥ १८ ॥ तत्र भगवद्रूपे निर्विषयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(मानसे पूजने सक्तास्ते यांति परमं पदम्) ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ॥ यच्छेद्धारणया धीरो हंति या तत्कृतं मलम् ॥ २० ॥ यतः संधार्यमाणायां योगिनो भक्तिलक्षणः ॥ आशु संपद्यते योग आश्रयं भद्रमीक्षतः ॥ २१ ॥ राजोवाच ॥ यथा संधार्यते ब्रह्मन्धारणा यत्र संमता ॥ यादृशी वा हरेदाशु पुरुषस्य मनोमलम् ॥ २२ ॥ श्रीशुक उवाच ॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः ॥ स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥२३॥ विशेषस्तस्य देहोऽयं स्थविष्ठश्च स्थवीयसाम् ॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत्॥२४॥ आंडकोशे शरीरेऽस्मिन्सप्तावरणसंयुते ॥ वैराजः पुरुषो योऽसौ भगवान्धारणाश्रयः ॥ २५ ॥

आश्रयविशेषेण सामान्यतश्चित्तस्थिरीकरणं धारणा अवयवविभावनया तद्वार्व्यं ध्यानमिति भेदः । समाधिमाह । निर्विषयं मनो युंक्त्वा समाधाय स्थिरीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वेत्यर्थः । प्रसीदत्युपशाम्यति ॥ १९ ॥ गुणवशात्पुनरपि क्षोभे सति धारणामेव स्थिरी कुर्यादित्याह । रजसा आक्षिप्तं तमसा विमूढं स्वीयं मनो निरुंध्यात् । तत्कृतं रजस्तमोभ्यां कृतम् ॥ २० ॥ यतः यस्यां क्रियमाणायां भद्रं सुखात्मकमाश्रयं विषयं पश्यतस्तत्रैव प्रीतिर्भवति ॥ २१ ॥ यथा यत्र यादृशी चेति कर्तव्यताविषयतत्तद्विशेषाणां प्रश्नाः ॥ २२ ॥ यथेत्यस्योत्तरम् । जितासन इति ॥ विषयमाह स्थूल इति सार्धेन ॥ २३ ॥ विशेषो विराड्देहः अतिस्थूलानामपि स्थूलतरः सत्कार्यमात्रम् ॥ २४ ॥ अस्य चोपलक्षणत्वेन विषयत्वं वस्तुतस्तु विराट् जीवनियंता भगवानेव विषय इत्याह आंडकोशांतर्वर्तिनि कटाह एव पृथिव्यावरणं

विषयस्पर्शरहितं ततोऽन्यत्किञ्चन किमपि । इत्यर्थ इति । यन्मनसः परमानंदाकारता तदेव भगवतो विष्णोः परमं पदं ब्रह्मेति भावः । प्रसीदति उपशाम्यति । यत्र परमानंदे सति निजचाञ्चल्यं त्यक्त्वा स्थिरी भवतीत्यर्थः ॥ १९ ॥ या धारणा ॥ २० ॥ भक्तिरेव लक्षणं चिह्नं यस्य सः । भक्तिमिश्रस्यैव योगस्य मोक्षसाधकतोक्तेर्न तु भक्तिरहितस्येति भावः । सुखात्मकं भगवंतम् ॥ २१ ॥ राजोवाचेति भक्तिमिश्रयोगे राज्ञो जिज्ञासेव न तु चिकीर्षा शुकदेवशिष्यस्य तस्य शुकस्याभिमतायां शुद्धभक्तावेव प्रवृत्त्यौचित्यात् इति । कर्त्तव्यता तत्करणरीतिस्तस्या विषये तत्तद्भेदानां प्रश्नाः ॥ २२ ॥ यत्र संमतेत्यस्योत्तरं वदन् पूर्वोक्तस्यांतर्यामिणश्चिद्घनस्वरूपे धारणायामसमर्थानामशुद्धचित्तानां योगिनां रागद्वेषादिमालिन्यनिवृत्त्यर्थं वैराजधारणामाह स्थूल इति ॥ २३ ॥ यत्रेदं दृश्यत इत्यनेन दृश्यश्रव्यादिवस्तुमात्राणां भगवद्विभूतित्वाद्भगवद्रूपत्वेन ध्येयत्वे सति स्पर्द्धासूयादयो न क्वापि भवेयुरित्यतः स्पर्द्धाद्यभावे चित्तशुद्धिश्चित्तशुद्धौ च चिद्घनात्मकश्रीनारायणमूर्त्तौ धारणा सुकरा स्यादिति द्योतितम् ॥ २४ ॥ अस्य च विराड्देहस्य च आंडकोशस्यांतवर्ती कटाहस्तदाकारः पृथिवी देहो यत्र विश्वं स्थितं स एव पृथिव्यावरणं नं तु ततोन्यत्तंतस्तेन सहाबादयः सप्त ज्ञेया इत्यर्थः । वैराजो हिरण्यगर्भस्य देहः भगवानिति हिरण्यगर्भां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पातालमेतस्य हि पादमूलं पठंति पार्ष्णिप्रपदेरसातलम् ॥ महातलं विश्वसृजोऽथ गुल्फौ तलातलं वै पुरुषस्य जंघे ॥ २६ ॥ द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ॥ महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणंति ॥२७॥ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोऽस्य ॥ तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः ॥ २८॥ इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः॥ नासत्यदस्रौ परमस्य नासे घ्राणोऽस्यगंधो मुखमग्निरिद्धः॥२९॥द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च ॥ तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमापोऽस्य तालू रस एव जिह्वा॥३०॥छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेहकला द्विजानि ॥ हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः॥३१॥व्रीडोत्तरोष्ठोऽधर एव लोभो धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः॥कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसंघाः॥३२॥

ततोऽप्तेजोवाय्वाकाशाहंकारमहत्तत्त्वानीति सप्त ॥२५॥ विराड्देहतज्जीवतदंतर्यामिणामभेदमारोप्योपासनं कर्तव्यमित्याशयेनाह । पातालं पादमूलं पादस्याधोभागं पातालादीनां तदवयवता विधीयते पातालादीन्यतलांतान्यधस्तनादारभ्य सप्त भूविवराणि पठंति गृणंतीत्यादिप्रमाणप्रदर्शनम् । पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ ॥ २६ ॥ ऊरुद्वयस्याधोभागे वितलमुत्तरभागे अतलमिति ज्ञेयम् । नाभिरेव सरः ॥२७॥ ज्योतिरनीकं ज्योतिषां समूहं स्वर्गं महर्लोकं ग्रीवेति गृणंति तपोलोकं रराटीं ललाटं सत्यं सत्यलोकम् ॥ २८ ॥ उस्रा देवाः तेजोमयशरीरत्वात्ते बाहव इत्याहुः । दिशोऽस्मदादिश्रोत्राधिष्ठात्र्यो देवताः । कर्णौ श्रोत्रस्याधिष्ठानं शब्दस्तु श्रोत्रविषयः सः तस्य श्रोत्रेंद्रियम् । एवं नासिकादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासापुटे इद्धो दीप्तः ॥ २९ ॥ द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं पतंगः सूर्यः अहनी रात्र्यहनी पक्ष्माणि नेत्ररोमाणि परमेष्ठिधिष्ण्यं ब्रह्मपदम् । तालु अधिष्ठानं जिह्वा इंद्रियम् ॥ ३० ॥ छंदांसि वेदाः शिरो ब्रह्मरंध्रं स्नेहकलाः पुत्रादिस्नेहलेशाः द्विजानि दंताः । षंढत्वमार्षम् । दुरंतोऽपारः सर्गः इति यत्स तस्य कटाक्षः ॥ ३१ ॥ अधर्ममार्गोऽस्य पृष्ठभागः । कः प्रजापतिः । मित्रौ मित्रावरुणौ ॥ ३२ ॥

तर्यामी गर्भोदशायी । द्वितीयः पुरुषस्तत्प्रतिमात्वेनोपास्यमानो वैराजोपि भगवच्छब्देनोच्यते ॥ २५ ॥ पठंति वेदा इति । न त्वहमेव वदामीति प्रमाणप्रदर्शनम् ॥ २६ ॥ महीतलं भूतलं तज्जघनं कटितटम् । महीपते इति । एतद्ध्यानं विशेषतस्त्वया कार्यमिति भावः । अगाधत्वाद्ब्रह्मजनकपद्मनिदानत्वाद्वा नाभिसर इत्युक्तम् ॥२७ ॥ २८॥ अत्र व्यष्टिसमष्टिविराजोर्यद्यपि तुल्य एवाध्यात्म्यादिविभागस्तथापि समष्टिविराडयं हिरण्यगर्भोपासकैर्योगिभिः परमेश्वरत्वेनोपास्य इति । परमेश्वरस्य चेंद्रियेभ्य एव विराजो विषया भवंति । तदीयेंद्रियाधिष्ठानेभ्यस्त्विंद्रियाणि तदधिष्ठात्र्यो देवताश्च स्युरिति । कार्यकारणयोर्भेदोपचारादैक्येन दिक्शब्दादिभिः समष्टिविराजोऽस्य परमेश्वरत्वेन ध्येयत्वात्कर्णश्रोत्रादिकल्पना ज्ञेया ॥ २९ ॥ द्यौरंतरिक्षं तत्रत्यः सूर्यश्चाक्षिणी नेत्रगोलके । यद्वा । द्युपदेन मंचाः क्रोशंतीतिवत्सूर्यो लक्ष्यते । पतंगो रूपं चक्षुरिन्द्रियम् । अत्र पतंगपदेन तैजसं रूपं लक्ष्यते न तु सूर्य उच्यते । दिवः सूर्यस्य चाक्षिणी । इति । एतद्वै पौरुषं रूपम् । भूः पादौ । द्यौः शिरः । नभः नाभिः । सूर्योक्षिणी । नासे वायुः । कर्णौ दिशः । प्रभोरित्यग्रिमवाक्यविरोधात् अहनी रात्र्यहनी 'नपुंसकमनपुंसकेन' इति नपुंसकशेषः । लिंगसमवायन्यायेन वाहःपदेन रात्रेरपि ग्रहणम् । आपो वरुणः ॥ ३० ॥ षंढत्वं क्लीबत्वम् ॥ ३१ ॥ स्तनो दक्षिणः 'धर्मस्तनाद्दक्षिणतः' इत्युक्तेः । मेढ्रं शिश्नः ॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र ॥ अनंतवीर्यः श्वसितं मातरिश्वा गतिर्वयः कर्मगुणप्रवाहः ॥ ३३ ॥
ईशस्य केशान्विदुरंबुवाहान्वासस्तु संध्यां कुरुवर्य भूम्नः ॥ अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः सर्वविकारकोशः ॥ ३४ ॥ विज्ञानशक्तिं महि
मामनंति सर्वात्मनोंऽतःकरणं गिरित्रम् ॥ अश्वाश्वतर्युष्ट्रगजा नखानि सर्वे मृगाः पशवः श्रोणिदेशेः ॥ ३५ ॥ वयांसि तद्व्याकरणं विचित्रं
मनुर्मनीषा मुनयो निवासः ॥ गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः ॥ ३६ ॥ ब्रह्माऽऽननं क्षत्रभुजो महात्मा विडूरुरंघ्रिश्रितकृ
ष्णवर्णः ॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्मवितानयोगः ॥३७ ॥ इयानसावीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते ॥ संधार्य
तेऽस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोऽस्ति किंचित् ॥ ३८ ॥

अनंतं वीर्यं स्यय वयः कालस्तस्य गमनम् । गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा ॥ ३३ ॥ भूम्नो विभोः अव्यक्तं प्रधानम् । स प्रसिद्धश्चंद्रमास्तदीयं मनः सर्वेषां
विकाराणां कोश इवाश्रयभूतम् ॥ ३४ ॥ विज्ञानशक्तिं चित्तम्। महिं महत्तत्त्वम्। अंतःकरणमहंकारम्। गिरित्रं श्रीरुद्रम्। गर्दभाद्वडवायामुत्पन्नाश्वतरी॥ ३५॥ वयांसि पक्षिणस्तस्य
व्याकरणं "नामरूपे व्याकरवाणि" ॥ इति श्रुत्युक्तं शिल्पनैपुण्यम् । यथाहुः। "येन शुक्लीकृता हंसाः शुकाश्च हारितीकृताः । मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥"
इति । मनुः स्वायंभुवः मनीषा बुद्धिः मनुजः पुरुषः निवास आश्रयः । "पुरुषत्वे चाविस्तरामात्मा" इति श्रुतेः । गंधर्वादीनां द्वंद्वैक्यम् गंधर्वादयः । स्वरस्मृतीः षड्जादि
स्वरस्मृतयः इत्यर्थः । असुरानीकं वीर्यं यस्य सः । स्वरः स्मृतिरसुरानीकवर्य इति पाठे गंधर्वादयः स्वरः असुरसमूहश्रेष्ठः प्रह्लादः स्मृतिस्तस्येति ॥ ३६ ॥ ब्रह्मा विप्रस्त
स्याननं मुखम् । क्षत्रं क्षत्रियो भुजौ यस्य विट् वैश्यः ऊरू यस्य अंघ्रिश्रितः कृष्णवर्णः शूद्रो यस्य नानाभिधा नामानि येषां ते च तेऽभीज्या देवास्तेषां गणैर्वसुरुद्रादिभिरुप
पन्नो युक्तः द्रव्यात्मको हविः साध्यः वितानयोगो यज्ञप्रयोगः तस्य कर्म कायमावश्यकोऽभिप्रेतः इत्यर्थः ॥ ३७ ॥ इयानेतावान्सन्निवेशोऽवयवसंस्थानम् । अस्मिन्स्व

अनंतः शेषो वा वीर्यं विक्रमो यस्य स तथा । हे नृपेन्द्रेति नरपालकेषु मुख्यस्य तवैतद्ध्यानमवश्यं कार्यमिति भावः ॥ ३३ ॥ हे कुरुवर्येति शुद्धकुलोद्भूतत्वात्तुभ्यमहं योगिध्येयरूपं वदामीति भावः ॥ ३४ ॥
गिरिः कैलासः । सर्वं गिरतीति गिरिः कालो वा । गृणाति तत्त्वमिति गिरिर्वेदो वा तं तस्मात्तेन वा त्रायते इति गिरित्रो महादेवः । मृगा हरिणादयः पशवो गवादयः श्रोणिदेशे नितंबप्रदेशे उपास्या इति शेषः ॥३५॥
तस्य शिल्पनैपुण्ये प्रमाणमाह । यथाहुरिति । पुरुषत्वे मनुष्यत्वेऽतिशयेन प्रकट आत्मास्तीति श्रुतिपदार्थः । इत्यर्थ इति । प्रथमार्थे द्वितीयेति भावः ॥ ३६ ॥ अंघ्रिश्रितः अंघ्री पादौ श्रितः ॥ कृष्णवर्णत्वं शूद्रस्य
शुद्रतामसत्वात् । इत्यर्थ इति । आवश्यकं कृत्यमिति भावः॥३७॥अत्रायमर्थः स्वचांचल्यवशाद्यत्रयत्र भ्रमति तत्रतत्रैव भगवत इदममुकमंगमिति स्वबुद्ध्या विचारयेत् । एवञ्च मनसः स्वाभाविकाः सर्व एव विषया भगवदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ॥ तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां द्वितीयस्कंधे महापुरुषसंस्थानुवर्णने विराड्रूपकथनं नाम प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं पुरा धारणयाऽऽत्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ॥ तथा ससर्जेदममोघदृष्टिर्यथाऽप्ययात्प्राग्व्यवसायबुद्धिः ॥१॥ शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः ॥ परिभ्रमंस्तत्र न विंदतेऽर्थान्मायामये वासनया शयानः ॥ २ ॥

बुद्ध्या मनः संधार्यते मुमुक्षुभिः यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन् ॥ ३८ ॥ तदेवं चित्तस्थैर्यार्थं विराड्देहजीवेश्वराणामभेदेनोपासनमुक्तम् । तत्र तु देहजीवावीश्वरे प्रविलाप्य स एव ध्येय इति निर्धारयति । स इति । सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स एक एव सर्वांतर आत्मा तमेव सत्यं भजेत । अन्यत्रोपलक्षणेन सज्जेत । यत आसंगादात्मनः पातः संसारो भवति। एकस्य तत्तदिंद्रियैः सर्वानुभूतौ दृष्टांतः स्वप्नजनानामीक्षिता यथेति स्वप्ने हि कदाचिद्बहून् देहान् प्रकल्प्य जीवस्तत्तदिन्द्रियैः सर्वं पश्यति तद्वत् ईश्वरस्य तु विद्याशक्तित्वान्न बंधः ॥ ३९ ॥ इति श्रीम० भा० द्वि० स्कं० टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये तु ततः स्थूलधारणातो जितं मनः । सर्वसाक्षिणि सर्वेशे विष्णौ धार्यमितीर्यते॥ १ ॥दृश्यालंबनरूपैवमुक्तवैराजधारणा॥ इहोच्यते तु तत्साध्या सर्वांतर्यामिधारणा ॥२॥ तत्र तावत्पूर्वोक्तधारणाया अवांतरफलमाह । एवं या धारणा तया तुष्टाद्धरेः पुरा प्रलयसमये नष्टां सृष्टिस्मृतिं प्रत्यवरुद्ध्य लब्ध्वा ब्रह्मा अप्ययात्प्रागिदं विश्वं यथाऽऽसीत्तथा ससर्ज । व्यवसायात्मिका बुद्धिर्यस्य सः । अत एवामोघा दृष्टिर्यस्येति । अतस्तया धारणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥ उपासनाफलादपि विरक्तस्य शुद्धात्मधारणायामधिकारोऽतो वैराग्यार्थं सर्वं कर्मफलं निंदति । शाब्दं शब्दमयं ब्रह्म वेदः तस्य एष पंथाः कर्मफलबोधप्रकारः । कोऽसौ अर्थशून्यैरेव स्वर्गादिनामभिः साधकस्य धीर्ध्या यति तत्तदिच्छां करोतीति यत् । अपार्थत्वमेवाह । तत्र मायामये पथि सुखमिति वासनया शयानः स्वप्नान्पश्यन्निव परिभ्रमन्नर्थान्न विंदति तत्तल्लोकं प्राप्तोऽपि निरवद्यं

गान्येवेति सर्वमपि चिंतनं भगवच्चिंतनत्वेन पर्यवस्येत् । तथा स्पर्धावज्ञादयो भावा नैवोत्पद्येरन् । स्पर्द्धादिविषयानां मनुष्यगंधर्वादीनामपि भगवदंगभूतत्वेन ध्यायेदेवेति॥ ३८ ॥नन्वेवं भगवद्धारणाभ्यासस्यानुषंगिकानि फलानि भोगैश्वर्यादीन्यवश्यमुत्पद्यंत एव । योगी तानि स्वतः प्राप्तान्युपभुंजीत न वेति । आद्ये शैथिल्यप्रसंगः । तदुक्तम् । ''यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग॥अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः'' इति । द्वितीये–उपस्थितभोगत्यागस्य दुष्करत्वमिति सत्यं विवेकेनैव सर्वं सुकरमिति । विवेकप्रकारं दर्शयति । स इति । स योगी सर्वाभिर्धियां वृत्तिभिरिंद्रियलक्षणाभिः प्राचीनसहस्रसहस्रजन्मवर्त्तिनीभिरनुभूतमेव सर्वं देवेंद्रत्वनरेंद्रत्वादिकं भोगैश्वर्यादिकं येन सः । किं पुनश्चर्वितचर्वणयेति भावः । न च तस्यापि स्थिरत्वमित्यत्र दृष्टांतः । आत्मा जीवो यथा स्वप्ने जनानां शत्रुमित्रसैन्यादीनां तदुपलक्षितराज्यादिभागोनां च स्वसृष्टानामेक एवेक्षिताऽनुभविता अतस्तं सत्यं सर्वकालदेशवर्त्तिनमानंदानां निधिं भगवंतमेव भजेत न त्वन्यत्रासार्वदिक्त्वादसत्येऽनानंदनिधौ विषयसुखे इत्यर्थ इति विश्वनाथः । तत्र तु त्रयाणां मध्ये तु उपलक्षणे देहादौ विद्यया च तथेतर इत्युक्तेरीशस्य बंधो नास्तीत्यर्थ इति स्वामिचरणाः ॥ ३९ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कंधे प्रथमोऽध्यायः ॥ १ ॥ ततः पूर्वोक्तायाः ॥ (१) ॥ तया वैराजधारणया साध्या ॥ २ ॥ तत्र धारणाद्वयमध्ये अवांतरमानुषंगिकम् । व्यवसाये भगवत्प्रेरणावशात्स्रक्ष्याम्येवेति निश्चये बुद्धिर्यस्य सः । यद्वा । व्यवसायो निश्चय एवमेतत्स्रष्टव्यमित्येवं तदात्मिका निश्चिता बुद्धिर्यस्य स तथा । अत एव व्यवसायबुद्धित्वादेव अमोघा सफला अतः सफलदृष्टित्वात् ॥ १ ॥ इत्यर्थ इति ''एवं पुण्यचितो लोकः क्षीयते'' इति श्रुतेः क्षयिष्णुत्वोक्तेरिति भावः । अत्र विश्वनाथोऽवतरणिकामाह अत्र म्रियमाणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः ॥ सिद्धेऽन्य थार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः ॥ ३ ॥ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किम् ॥ सत्यंजलौ किं पुरुधाऽन्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः ॥ ४ ॥ चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥ रुद्धा गुहाः किमजितोऽवति नोपसन्नान्कस्माद्भजंति कवयो धनदुर्मदांधान् ॥ ॥ ५ ॥ एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननंतः ॥ तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र ॥ ६ ॥

सुखं न लभत इत्यर्थः ॥२॥ तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशंक्याह । अतः कविर्नामसु नाममात्रेषु भोग्येषु यावताऽर्थेनार्थो देहनिर्वाहो यस्य स तथाभूतः स्यात् । अप्रमत्तस्तावन्मात्रेप्यनासक्तः व्यवसायबुद्धिर्नेदं सुखमिति निश्चयवान् तदापि तत्र तस्मिन्नर्थेऽन्यथैव सिद्धे सति तत्र यत्ने परिश्रमं पश्यन्न यतेत ॥ ३॥ अन्यथासिद्धिमाह द्वाभ्याम् । सत्यामिति । कशिपोः शय्यायाः । स्वतःसिद्धबाहौ सति उपबर्हणैरुच्छीर्षकैः । पुरुधा बहुप्रकारयाऽन्नपात्र्या भोजनपात्रेण ॥ ४ ॥ ननु दिक्सद्भावो नाम नग्नत्वमेव वल्कलमन्नं तोयं वासः स्थानं तु याच्ञाप्रयत्नं विना कथं प्राप्येत तत्राह।चीराणि वस्त्रखंडानि। परान्बिभ्रति पुष्णंति फलादिभिर्ये ते भिक्षां फलादिरूपां न दिशंति किम्।किं वा सरितः स्यंदमाना नद्यः किमशुष्यन्।गुहाः गिरिदर्यः।ननु कदाचिदेषामलाभे किं कार्यं तत्राह । अजितो हरिरुपसन्नाञ्छरणागतान्किं नावति न रक्षति।किंशब्दस्य पूर्वत्रापि संबंधः।धनेन यो दुर्मदस्तेनांधान्नष्टविवेकान्॥५॥तदा तेन किं कर्तव्यं हरिस्तु सेव्य इत्याह । एवं विरक्तः संस्तं भजेत । भजनीयत्वे हेतवः । स्वचित्ते स्वत एव सिद्धः । यत आत्मा अत एव प्रियः प्रियस्य च सेवा सुखरूपैव । किंच अर्थः सत्यो न त्वनात्मवन्मिथ्या । भगवान् भजनीयगुणश्च अनंतश्च नित्यः य एवंभूतस्तं भजेत । नियतार्थः निश्चितस्वरूपः तदनुभवानंदेन निर्वृतः सन्निति स्वतः सुखात्मत्वं दर्शितम् । किंच । यत्र यस्मिन्भजने सति संसारहेतोरविद्याया

किं कुर्वीतेति प्रश्ने स्वर्गसाधकं यागादिकं कुर्वीतात्र सर्वो वेदः प्रमाणमित्याचिख्यासूंस्तत्रकांश्चन प्रत्याह । शाब्दस्येति ॥ २ ॥ अत्राक्षिपति तर्हीति । अर्थे देहनिर्वाहे अत्र विश्वनाथः—एवं योगप्रसंगं एव कार्मिणां मतमतिबहिरंगत्वेन स्पष्टमेव विनिंद्य कर्मफलेषु वैराग्यं भक्तज्ञानिनोरपि साधारणम् । योगारूढानामवश्यकर्त्तव्यत्वेनाह । अतो बुद्धिमान्भोगार्थं न ध्यायेत् न यतेत च । किं तु । 'कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता' इत्युक्तन्या येन नामसु भोग्यवस्तुषु यावताऽर्थेन स्वीकृतेनार्थः । स्वकृत्यनिष्पत्त्यर्थं देहनिर्वाहस्तावानर्थो ग्राह्यो यस्य तथाभूतः स्यात् । यतोऽयमप्रमत्तः स्वसाधनसिद्धौ सावधानः । किञ्च विघ्नबाहुल्यदर्शनेपि स्वयोगान्न परावर्त्तेतेत्याह । व्यवसायबुद्धिः यद्भवेत्तद्भवतु मया तु यन्निश्चितं तन्निश्चितमेवेति दृढविचार इत्यर्थः । किञ्च । यावदर्थतापि सुकुमारस्यैवोक्ता न तु स्वतः समर्थस्येत्याह । अन्यथा प्रकारांतरेणार्थे स्वदेहनिर्वाहे सिद्धे सति तत्र पिष्टपेषणन्यायेन न यतेत । यतस्तत्र यत्ने परिश्रमं धनिकजनोपासनादिकम् ॥ ३ ॥ समर्थस्यान्यथासिद्धिमाह—सत्यामिति । देवनिर्मितायां क्षितौ सत्याम् । बाहौ भुजे । उच्छीर्षकैः शिरःपीठैः ॥ ४ ॥ अत्राक्षिपति । नन्विति । पुनराक्षिपति नन्विति । विश्वनाथस्तु- ननु शीतत्राणोपायः कस्तत्र साक्षेपं क्रुध्यन्निवाह—चीराणीति । ननु ततोपि जाठरानलो दुर्वारस्तत्र तथैवाह—अंघ्रिपा अपि किं नैव भिक्षां ददति मनुष्याः खलुमा ददतु नामेति भावः । तर्हि पानार्थं जलं तु मृग्यमेवेति चेद्धिक्त्व बुद्धिमित्याह—सरितोपीति । ननु शिलावर्षात्त्राणार्थं पर्णशाला काचिदपेक्षितैवेति चेत्तत्राह—रुद्धा इति । गुहां प्रविश्य व्याघ्रादयः खादंतीति चेत्तत्राह—किमजित इति । व्याघ्रादीनामपि स एवांतर्यामी भक्तवत्सलस्तान्कथं तत्र प्रेरयिष्यतीति भावः । न ह्यजितभक्तं कोप्यभिभवितुं शक्त्यादित्यर्थः ॥ ५ ॥ तदा वनाद्येकांतदेशप्राप्तिसमये तेन विरक्तेन न केवलं सुखात्मतै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्तां त्वनादृत्य परानुचिंतामृते पशूनसतीं नाम युंज्यात् ॥ पश्यञ्जनं पतितं वैतरण्यां स्वकर्मजान्परितापाञ्जुषाणम् ॥ ७ ॥ केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् ॥ चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति ॥ ८ ॥ प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससम् ॥ लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलम् ॥ ९ ॥

उपरमो नाशो भवति ॥ ६ ॥ एतदेवान्यचिंतानिंदया द्रढयति । क इति । तां तथाभूतां परस्य हरेरनुचिंतां धारणामनादृत्य पशून्कर्मजडान्विना । "यथा पशुरेवायं स देवानाम्" इति श्रुतेः । असतीं विषयचिंतां को नाम कुर्यात् । यया चिंतया वैतरण्यां पतितम् । तत्र च स्वकर्मजानाध्यात्मिकादिक्लेशान्सेवमानं जनं पश्यन् । वैतरणी यमस्य द्वारस्था नदी तत्तुल्यत्वात्संसृतिर्वैतरणी ॥ ७ ॥ तामेव धारणां सविशेषणामाह केचिदिति षड्भिः । स्वदेहस्यांतर्मध्ये यद्धृदयं तत्र योऽवकाशस्तस्मिन्वसंतम् । प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणं तत्रोपचर्यते । कंजं पद्मम् । रथांगं चक्रम् ॥ ८ ॥ नलिनं पद्मं तद्वत्प्रसन्ने आयते दीर्घे ईक्षणे यस्य । कदंबकुसुमस्य किंजल्काः केसरास्तद्वत्पिशंगे पीते वाससी यस्य । लसंति महारत्नानि येषु तानि सुवर्णमयान्यंगदानि यस्य । स्फुरंति च तानि महारत्नानि च वान्यदप्याधिक्यमस्तीत्याह । किञ्चेति । विश्वनाथः—ननु तर्हि भजनीयेश्वरस्य तद्भजनोपकरणानाञ्चान्वेषणं तु कर्त्तव्यमेव योगिभिरिति चेत्तत्राह—स्वचित्ते स्वत एव सिद्धो यत आत्मा चित्ताधिष्ठाता वासुदेव इति । नाप्यावाहनादिश्रम इति भावः । किञ्च तस्य भजनं स्वत एव भवितुमुचितमित्याह—प्रिय इत्यादिचतुर्विशेषणैः । प्रियः स्वभावत एव प्रेमास्पदम् न च प्रेमास्पदत्वेऽपि पतिपुत्रादिरूपोऽनर्थः यतोर्थः परमवस्तुरूपः । वस्तुरूपत्वेपि न केवलमंतरात्मैव यतो भगवान्सौंदर्यादिगुणवत्त्वेन दृश्यः । न च तत्र देशनियम इत्याह । अनंतः । सर्वव्यापकत्वात्सर्वत्रैव देशे स्थितः । न च भजने श्रमः कोपीत्याह—निर्वृत्तः । भजनानंदमयः सन् नियतः प्रेमैव भक्तावनुसंहितोर्थः प्रयोजनं यस्य तथाभूतः सन् । यद्वा । नित्यमेतावंति नामानि ग्रहीतव्यानि एतावती कथा श्रोतव्या एतावत्यः प्रणतयः कार्या एतावत्कालं ध्यानं कर्त्तव्यमित्येवं नियमयुक्तानि कीर्तनश्रवणादीनि यस्य तथाभूतः सन्भजेत । यत्र भजने संसारहेतोरविद्याया उपरमश्च भवेदित्यनुसंहितं फलं भक्तमते ज्ञानियोगिनोर्मते तु संसारहेतूपरम एवानुसंहितं फलम् । चकारः पादपूरणे । नियतार्थो निश्चलरूप इत्यर्थः ॥ ६ ॥ एतदेव हरिभजनमेव । स कर्मजडः देवानां पशुरेव पशुर्यथा स्वामिव्यापारक्लिष्टः सर्वदा तिष्ठति तथा सोपीति श्रुतिपदार्थः तत्तुल्यत्वात् । वैतरणी यथा दुःखेन तीर्यते वितरणेन दानेन च तथा भवोपीति भावः ॥ ७ ॥ एवं च वैराग्यं भक्तेरन्वयव्यतिरेकौ च प्रदर्श्य पुनरपि योगिनां पूर्वोक्तधारणातोप्यतिश्रेष्ठामंतर्यामिणश्चिद्घनरूपस्य धारणामाह । केचिदिति । पूर्वोक्तवैराजधारणानिष्ठेभ्योप्यतिश्रेष्ठा इत्यर्थः । किम्वा वक्ष्यमाणवाक्यानुसारेण वैराजधारणाभ्यासेन शुद्धचित्ता एवं तदन्तर्यामिणश्चिद्घनरूपस्य धारणां कुर्युरित्यभिप्रायेणाह । केचिदिति । अत्र धारणायां चतुर्विधा योगिनः संभवंति । तत्र प्रथमा भगवद्रूपमनालंब्यमानाः प्राणमनोधारणावंतः श्रीभागवता संमता विगीता एव । द्वितीयाः पूर्वोक्तवैराजधारणया शुद्धचित्ताः 'मृणालगौरायतशेषभोग' इत्यादि तृतीयस्कंधोक्ततदंतर्यामिधारणावंतः । तृतीया वैराजधारणानंतरव्यष्टिविराडंतर्यामिचतुर्भुजरूपधारणावंतः चतुर्थाः । स्वत एव शुद्धचित्ताः । प्रथमत एव व्यष्टंतर्यामिचतुर्भुजधारणावंतस्त एवात्र केचिच्छब्देनोच्यंते । प्रादेशमात्रमिति । प्रादेशप्रमाणहृदयध्येयत्वात्पुरुषं तावन्मात्रप्रदेशेप्यचिंत्यशक्त्या पञ्चदशवर्षीयपुरुषाकारप्रमाणम् । 'संतं वयसि कैशोरे' इत्युक्तेः । अत एव स्वामिचरणैरुक्तं हृदयप्रमाणं तत्र भगवत्युपचर्यते' इति । वसंतं तत्रांतर्यामितया कृतवासम् ॥८॥ महारत्नानि पद्मरागादीनि॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालया चितम् ॥ १० ॥ विभूषितं मेखलयांऽगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलम् ॥ ११ ॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहम् ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनोधारणयाऽवतिष्ठते ॥ १२ ॥ एकैकशोंऽगानि धियाऽनुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितंजितं स्थानमपोह्य धारयेत्परंपरं शुद्ध्यति धीर्यथा यथा ॥ १३ ॥ यावन्न जायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥ स्थिरं सुखं चासनमास्थितो यतिर्यदा जिहासुरिममंग लोकम् ॥ काले च देशे च मनो न सज्जयेत्प्राणं नियच्छेन्मनसा जितासुः ॥ १५ ॥

तन्मयानि किरीटकुंडलानि यस्य ॥ ९ ॥ उन्निद्रं विकसितं यद्धृत्पंकजं तस्य कर्णिकैवालयः स्थानं तस्मिन् । योगेश्वरैरास्थापितौ पादपल्लवौ यस्य । श्रीरेव लक्ष्म चिह्नं तद्युक्तम् । पामादिविहितो मत्वर्थीयो नप्रत्ययः । कौस्तुभरत्नं कंधरायां यस्य । अम्लाना लक्ष्मीः शोभा यस्यास्तया वनमालया चितं व्याप्तम् ॥ १० ॥ स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आनने यो हासस्तेन पेशलं सुंदरम् ॥ ११ ॥ अदीनमुदारं यल्लीलाहसितं तेन यदीक्षणं तस्मिनुल्लसंतो ये भ्रूभंगा भ्रूविक्षेपास्तैः संसूचितो भूर्यनुग्रहो येन । चिंतामयं चिंतया आविर्भवंतम् । कियन्तं कालमित्यत्राह । यावत्समं मनोऽवतिष्ठते स्थिरी भवति तावत् ॥ १२ ॥ अस्यैव ध्यानमाह । एकैकश इति । अनुभावयेद्ध्यायेत् । यद्यज्जितमयत्नतः स्फुरितं पादगुल्फादि स्थानमवयवस्तत्तदपोह्य त्यक्त्वा परंपरं जंघाजान्वादि धारयेद्ध्यायेत् । शुद्ध्यति तस्मिन्निश्चला भवति ॥ १३ ॥ पूर्वोक्तवैराजधारणाया एतद्धारणांगत्वमाह । यावदिति । परे ब्रह्मादयोऽवरे यस्मात् । कुतः । विश्वेश्वरे द्रष्टरि, न तु दृश्ये चैतन्यघनत्वात् । भक्तियोगः प्रेमलक्षणः । क्रियावसाने आवश्यककर्मानुष्ठानानंतरम्, अनेन कर्मापि भक्तियोगपर्यंतमेवेत्युक्तम् । प्रयतो नियमतत्परः ॥ १४ ॥ एवं तावदासन्नमृत्योः पुंसः कृत्यमुक्तमिदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सार्धैश्चतुर्भिः । अंग हे राजन् एवंभूतो यतिर्यदेमं लोकं देहं जिहासुर्हातुमिच्छति तदा देशे पुण्यक्षेत्रे काले चोत्तरायणादौ मनो न सज्जयेत्संगं न प्रापयेत् ।

योगेश्वरेत्युक्तेस्तद्भक्तान्योगेश्वरानपिध्यायेदिति भावः । वामस्तनोर्द्ध्वलक्ष्मीरेखायुक्तमित्यर्थः । कौस्तुभरत्नं तद्ग्रथितहिरण्मयसूत्रसहितम् ॥ १० ॥ महाधनैर्बहुमूल्यैः ॥ ११ ॥ धारणया कृत्वा मनो यावदवतिष्ठते निश्चलं भवति तावदीक्षेतेत्यन्वयः ॥ १२ ॥ यद्वा यथायथा धीः शुध्यति विषयलांपट्यं त्यजति तथातथा धारयेदिति चित्तशुद्धितारतम्येनैव ध्यानतारतम्यमुक्तं तेनात्यंताशुद्धचित्तस्य नात्राधिकारः । किं तु वैराग्यधारणायामेवेति ध्वनितम् ॥ १३ ॥ अत एवाशुद्धचित्तत्वोदतद्रूपं ध्यातुं यावन्न शक्नुयात्तावद्वैराजरूपमेव ध्यायेदित्यभिप्रेत्याह । पूर्वोक्तेत्यादि । अवरेऽर्वाचीनाः । अनेन क्रियावसान इति कथनेन ॥ १४ ॥ अंगेति संबुद्ध्यर्थेऽव्ययम् । इत्यर्थ इति । प्राणायामं कुर्यादितिभावः । जितासुर्जितेंद्रियः 'असुः प्राणेंद्रियबले' इति कोशात् । अत्र विश्वनाथेन प्राणानिति पठित्वा व्याख्यातम् । तथा हि—प्राणानिंद्रियाणि मनसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनः स्वबुद्ध्याऽमलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि ॥ आत्मानमात्मन्यवरुध्य धीरो लब्धोपशांतिर्विरमेत कृत्यात् ॥ १६ ॥ न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ॥ न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्प्रधानम् ॥ १७ ॥ परं पदं वैष्णवमामनंति तद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्याऽर्हपदं पदेपदे ॥ १८ ॥

न देशकालौ योगिनः सिद्धिहेतू किं तु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुखकरं चासनमास्थितः प्राणं नियच्छेदित्यर्थः ॥ १५ ॥ तत् गृहीतविषयं मनः बुद्ध्या निश्चयरूपया नियम्य तन्मात्रं कृत्वा एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निनयेत्प्रविलापयेत् । तं च क्षेत्रज्ञमात्मनि शुद्धे, तं च शुद्धमात्मानमात्मैवाहमित्यात्मनि शुद्धे ब्रह्मण्यवरुद्ध्यैकीकृत्य लब्धोपशांतिः प्राप्तनिर्वृतिः सन् कृत्याद्विरमेत् । ततः परं प्राप्याभावात् ॥ १६ ॥ तदेवाह । न यत्रेति । यत्रात्मस्वरूपे कालो न प्रभुः किमपि कर्तुं न समर्थः । अत एव देवा न प्रभव इत्याह । अनिमिषां देवानां परः प्रभुः कालोऽपि यत्र न प्रभुस्तत्र कुतो नु देवाः प्रभवेयुः । देवनियम्यानां तु जगतां प्राणिनां का वार्तेत्याह । जगतामिति । कुतो न प्रभवंतीत्यपेक्षायां निरुपाधित्वादित्याह । न यत्रेति । यद्वा जगत्कारणान्यपि न यस्य सृष्ट्यादौ प्रभवंतीत्याह । न यत्रेति । विकारोऽहंकारः ॥ १७ ॥ निरुपाधित्वं

नियच्छेत् प्राणान्मनोनियम्यान्कुर्यादित्यर्थः । तेन नियंतरि मनसींद्रियाणि प्रविलापयेदिति द्योतितम् ॥ १९ ॥ ततस्तन्मनः स्वबुद्ध्या नियम्येति मनो बुद्धौ प्रविलापयेदिति भावः । बुद्ध्यादिद्रष्टारि जीवे शुद्धे शुद्धजीवेंतर्यामिणि वा शुद्धे शोधितत्वंपदार्थे अग्रे शुद्धे ब्रह्मणि शोधिततत्पदार्थे इति केचित् । ततः शुद्धब्रह्मणः परमन्यत् प्राप्यं नास्ति तस्यैव परमावधित्वादिति ॥ १६ ॥ तदेव ब्रह्मस्वरूपमेव । अत एव कालस्याप्रभुत्वादेव । अनिमिषामिति षष्ठ्यंतं क्विबंतमिषे रूपम् । जगतां प्राकृतजगत्स्वेवेशिरे ऐश्यं चक्रिरे । देवा इंद्राद्याः । ननु देवास्तत्त्वाभिमानिनो जगत्कारणीभूतास्तत्र कथं न प्रभवेयुरिति तत्राह । यद्वेति । अत्र संदर्भः—पूर्वोक्तधारणाफलं द्विविधं ब्रह्मकैवल्यप्राप्तिर्वैकुंठप्राप्तिश्च भक्तिसिद्धज्ञाननिष्ठत्वाद्भक्तिमयज्ञाननिष्ठत्वाच्च । अत उत्तरावस्थामजामिलादिन्यायेन तत्रैव वैकुंठाभिव्यक्तिदर्शनार्थमाह । 'न यत्रे' इति युग्मकेन । अत्र वैकुंठस्य सच्चिदानंदरूपत्वं श्रीभगवतैवोक्तम् । तद्यथा । "एवमेतान्यथादिष्टाननुतिष्ठंति मे पथः । क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदु ॥" मे पथः ज्ञानभक्तिकर्मलक्षणान् मत्प्राप्त्युपायान् ज्ञानकर्मणोरपि भक्तेषु भक्तेः प्रथमतः क्वचित् किंचित्साहाय्यकारित्वात् क्षेमं मद्भक्तिमंगलमयं मत्स्थानं परमं ब्रह्मेति जानंति । इत्थमेवोदाहरिष्यते च । " इति संचिंत्य भगवान्महाकारुणिको हरिः । दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनम् । यद्धि पश्यंति मुनयो गुणापाये समाहिताः ॥ " इति । उभयत्रापि चकाराद्यध्याहारादिना त्वर्थांतरं कष्टं भवति । तैरेव च व्याख्यातम् । तमसः प्रकृतेः परमिति । वैकुंठस्यापि विशेषणीकृत्येति ॥ १७ ॥ परं पदमिति । अतच्चिद्व्यतिरिक्तं नेतिनेतीत्येवमुत्स्रष्टुमिच्छवो दौरात्म्यं भगवदात्मनोरभेददृष्टिं विसृज्यार्हस्य श्रीभगवतः पदं चरणारविंदं पदेपदे प्रतिक्षणं हृदोपगुह्याश्लिष्य अनन्यसौहृदा नान्यस्मिन्सौहृदं येषां तथाभूताः संतो यदामनंति तदेव वैष्णवं पदं श्रीवैकुंठाख्यमिति ब्रह्मस्वरूपमेव तदिति तात्पर्य्यम् । अनेन भक्तिलक्षणसाधनलिंगेन निराकाररूपमर्थांतरं निरस्तम् । अत्र निराकारपरायणस्यापि मुक्ताफलटीकाकृतो दैवाव्यंजिता गीर्यथा तत्परं पदं वैष्णवमामनंति अधिकृताधिष्ठितराजाधिष्ठितत्ववत् । ब्रह्मादिपदानामपि विष्णुनाधिष्ठितत्वात्परमित्युक्तम् । विष्णुनैवाधिष्ठितामित्यर्थ इति । अत एव श्रुतावपि तस्य स्वमहिमैकप्रतिष्ठितत्वम् । "स भगवान्कस्मिन्प्रतिष्ठितः" इति । स्वे महिम्नीति । विश्वनाथस्तु—सत्त्वादयः कथं न संतीत्यत आह—परं प्रधानात्परम् । अत एव वैष्णवं पदं विष्णोर्निर्विशेषस्वरूपं तत्प्रसिद्धमेव । तदपि भगवद्भक्ता नारदादय एव यथा जानंति न तथा ज्ञानिनोपीत्याह । यद्ब्रह्म नेतिनेतीत्येवमतत्तद्व्यतिरिक्तं वस्तु उत्सिसृक्षवः आ सम्यगेवामनंति जानंति । किं कृत्वा दौरात्म्यं केवलं ज्ञानिनामिव निर्बुद्धित्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः॥स्वपार्ष्णिनाऽऽपीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः॥१९॥नाभ्यांस्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः॥ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत॥२०॥तस्माद्भ्रुवोरंतरमुन्नयेतनिरुद्धसप्ताऽऽयतनोऽनपेक्षः॥ स्थित्वा मुहूर्तार्धमकुंठदृष्टिर्निर्भिद्य मूर्धन्विसृजेत्परं गतः॥२१॥यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारम्॥ अष्टाधिपत्यं गुणसन्निवाये सहैव गच्छेन्मनसेंद्रियैश्च॥२२॥योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याःपवनांतरात्मनाम्॥न कर्मभिस्तां गतिमाप्नुवंति विद्यातपोयोगसमाधिभाजाम्॥२३॥ वैश्वानरं याति विहायसा गतःसुषुम्नया ब्रह्मपथेन शोचिषा॥ विधूतकल्कोऽथ हरेरुदस्तात्प्रयाति चक्रं नृपशैशुमारम्२४

कुत इत्यत आह । परमिति । यद्यस्मादेतत् आत्मव्यतिरिक्तं नेतिनेतीत्येवमुत्स्रष्टुमिच्छवो दौरात्म्यं देहाद्यात्मत्वं विसृज्यार्हस्य पूज्यस्य श्रीविष्णोः पदेपदे क्षणेक्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन्सौहृदं येषां तथाभूताः पदे संतस्तद्वैष्णवं पदमत एव परं सर्वतः श्रेष्ठमामनंतीत्यन्वयः ॥ १८ ॥ तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत् । तुशब्देन 'यदि प्रयास्यन्' इति वक्ष्यमाणात्सकामाद्विशेष उक्तः तमाह । विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जाता दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिता आशया विषयवासना यस्य सः । इदानीं तस्य देहत्यागप्रकारमाह । स्वपार्ष्णिना पादमूलेन गुदमूलाधारमापीड्य निरुध्यानिलं प्राणमुन्नमयेदूर्ध्वं नयेत् । जितः क्लमो येन । षट्सु स्थानेषु नाभ्यादिषु ॥ १९ ॥ नाभ्यां मणिपूरके स्थितं हृद्यनाहतचक्रेऽधिरोप्य उरसि कंठादधोदेशे स्थिते विशुद्धिचक्रे मनस्वी जितचित्तः स्वतालुमूलं तस्यैव चक्रस्याग्रदेशम् । ततो बहुधा गमनसंभवाच्छनकैरित्युक्तम् ॥ २० ॥ तस्माद्भ्रुवोरंतरमाज्ञाचक्रम् । निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि प्राणमार्गा येन सः। अनपेक्षश्चेत्परं ब्रह्म गतः सन् मूर्धन्मूर्धनि ब्रह्मरंध्रे निर्भिद्य देहमिंद्रियाणि च विसृजेत् ॥ २१ ॥ सद्योमुक्तिमुक्त्वा क्रममुक्तिप्रकारमाह यदीति दशभिः । यदि तु पारमेष्ठ्यं पदं प्रयास्यन् भवति उत वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानम् । कीदृशम् । अष्टावाधिपत्यान्यणिमाद्यैश्वर्याणि यस्मिंस्तदपि प्रयास्यन् । क्व । गुणसन्निवाये गुणसमुदायरूपे ब्रह्मांडे सर्वत्रेत्यर्थः । तर्हि देहत्यागावसरे मनश्चेंद्रियाणि च न त्यजेत् । किं तु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत ॥ २२ ॥ यतः कर्मगतिवन्न योगगतिः परिच्छिन्नेत्याह । योगेश्वराणां त्रिलोक्या अंतर्बहिश्च महर्लोकादिषु ब्रह्मांडाद्बहिश्च गतिमाहुः । अत्र हेतुः । पवनस्यांतः आत्मा लिंगशरीरं येषामिति । विद्या उपासना तपो भगवद्धर्मः योगोऽष्टांगः समाधिर्ज्ञानं तान्ये भजंति तेषां या गतिस्ताम् ॥ २३ ॥ तामाह वैश्वानरमित्यष्टभिः । विहायसा आकाशेन तत्र च ब्रह्मलोकपथेन गतः सन्प्रथमं

विसृज्य कीदृशा अनन्यसौहृदा विष्णुसंबंधव्यतिरिक्तवस्तुनि स्नेहाभाववंतः । अर्हस्य पूज्यस्य श्रीविष्णोः पदं चरणारविंदं पदेपदे क्षणेक्षणे हृदोपगुह्य इदमस्माकं सर्वस्वमित्यालिंग्य । अत्र तदुत्सृजंत इत्यनुक्ते यदा स्वप्रभो ब्रह्मस्वरूपं केवलमनुबुभूषंति तदाऽतत्त्यक्तुमिच्छवो भवंति सर्वथा तु भगवत्सेवोपकरणत्वात् । दृश्यं जगन्न त्यजंतीत्यर्थलभ्यते । दौरात्म्यमिति । विष्णोर्देहे मायिकत्वबुद्धिमतो दुरात्मान एव ज्ञेयाः ॥ १८ ॥ तं विशेषम् । षट्सु नाभिहृदुरस्तालुमूलभ्रूमध्यब्रह्मरंध्रेषु ॥ १९ ॥ तत्र प्रथमं नाभेरधः स्वाधिष्ठानचक्रादुपरि नाभ्यां तस्यैव चक्रस्य विशुद्धिचक्रस्य ॥ २० ॥ अनपेक्षः क्रममुक्तवत्पारमेष्ठ्यादिपदभोगकौतुकानपेक्षः ॥ २१ ॥ इत्यर्थ इति । यस्मिँल्लोके गमनेच्छा भवेत्तत्र सर्वत्रेति भावः ॥ २२ ॥ अत्र बाह्याभ्यंतरगमने ॥ २३ ॥ तां गतिम् । इत्यर्थ इति । 'हृदये नारायणः' इत्युक्तेरिति भावः । इत्यर्थ इति । शिशुमारचक्रगतानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपैति कल्पायुषो यद्विबुधा रमंते॥२५॥अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वम् ॥ निर्याति सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्ध्यं तदु पारमेष्ठ्यम् ॥ २६ ॥ न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग ऋते कुतश्चित् ॥ यच्चित्ततोऽदः कृपयाऽनिदंविदां दुरंतदुःखप्रभवानुदर्शनात् ॥ २७ ॥ ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनाऽपोनलमूर्तिरत्वरन् ॥ ज्योतिर्मयो वायुमुपेत्य काले वाय्वात्मना खं बृहदात्मलिंगम् ॥ २८ ॥

वैश्वानरमग्न्यभिमानिनीं देवतां याति । केनोपायेन सुषुम्नया नाड्या । सा च देहाद्बहिरपि विततास्तीत्याह । शोचिषा ज्योतिर्मय्या विधूतस्त्यक्तः कल्को मलो येन सः । क्वाप्यसज्जमान इत्यर्थः । उदस्तादुपरिष्टाद्वर्तमानं हरेः संबंधि तारारूपम् । नारायणाधिष्ठितमित्यर्थः । शैशुमारं चक्रं पंचमस्कंधे वक्ष्यमाणं शिशुमाराश्रयं ज्योतिश्चक्रम् । चक्र स्थान्यादित्यादिध्रुवांतानि पदानि प्रयातीत्यर्थः ॥२४॥तद्विष्णोश्चक्रं विश्वस्य नाभिं सूर्याद्याश्रयभूतम् । आविष्टलिंगत्वान्नाभिशब्दस्य न षंढत्वम् । अतिवर्त्य अतिक्रम्य परतः स्वर्गिणां गत्यभावादेक एव निर्मलेन लिंगशरीरेण ब्रह्मविदां स्थानमन्यैर्नमस्कृतं महर्लोकमुपैति । यस्मिन्विबुधा महाकल्पायुषो भृग्वादयः ॥ २५ ॥ अथो अनंतरं कल्पांते स विश्वं त्रैलोक्यमतिशयेन दह्यमानं निरीक्ष्य तत्राप्यूष्मप्राप्तेः यत् द्विपरार्धस्थायि तत्पारमेष्ठ्यं पदं प्रति निर्याति । सिद्धेश्वरैर्जुष्टानि धिष्ण्यानि विमानानि यस्मिंस्तत् । उ इति श्रैष्ठ्यं सूचितम् ॥ २६ ॥ तदेवाह । न यत्रेति । आर्तिर्दुःखम् । उद्वेगो भयम् । किंतु चित्ततो हेतोः यद्दुःखमद ऋते तदेकं विना तत्कुतो भवति अनिदंविदामिदं भगवतो ध्यानमजानतां प्राणिनां दुरंतदुःखो यः प्रभवो जन्म तस्यान्वनुदर्शनात् तेषां कृपया । यद्वा चित्ततोदो मनःपीडेति यत्तद्विना कुतश्चिदपि यत्र शोकादयो न संतीति । तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः । ये पुण्योत्कर्षेण गतास्ते कल्पांतरे पुण्यतारतम्येनाधिकारिका भवंति ये तु हिरण्यगर्भाद्युपासनाबलेन गतास्ते ब्रह्मणा सह मुच्यंते, ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्त्वा वैष्णवं पदमारुहंति ॥ २७ ॥ तत्र प्रस्तुतस्य भगवद्भक्तस्य ब्रह्मांडभेदनप्रकारमाह तत इत्यादिना । तत्रेयं प्रक्रिया । ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्त्वं भवति, तस्यांशेनाहंकारः, तस्यांशेन शब्दतन्मात्रद्वारा नभः, तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः, तस्यांशेन रूपतन्मात्रद्वारा तेजः, तस्यां

सूर्यादिस्थानानि गच्छति योगबलेनेति भावः ॥ २४ ॥ आविष्टलिंगत्वादजहल्लिंगत्वात् । षंढत्वं क्लीबत्वं नेत्यर्थः । ''नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्'' इति मेदिनी ॥ २५ ॥ तत्रापि महर्लोकेपि ऊष्मा वह्न्युत्थमौष्ण्यम् । पारमेष्ठ्यं सप्तलोकं प्रति ॥२६॥ तदेव सत्यलोकमाहात्म्यमेव उत्तानार्थमाह । यद्वेति । तत्र व्याजस्तुतौ सत्यलोकस्था महाकपालवो धन्या एवेति भावः ॥ २७ ॥ तत्र त्रिषु प्रस्तुतस्य ये तु भगवदुपासका इत्युक्तस्य । इत्यर्थ इति । तस्य लिंगदेह एव पृथिवीरूपो भूत्वा पृथिव्यां प्रविशतीति भावः । उत्तरत्रापि जलादिष्वपि । इत्यर्थ इति । घ्राणरसनादीन्द्रियैर्गंधरसादीन् विचित्रभोग्यविषयान् सेवमान एव यातीति भावः । 'खं ब्रह्मेत्युपासीत' इति श्रुतेरात्ममूर्त्तित्वम् । 'लिंगं मूर्त्तिलक्ष्मशेफज्ञापकेषु कारणे' इति कोशादर्थांतरमाह यद्वेति वेदशब्दात्मना स्गुणीभूतशब्दरूपवेदरूपेण तस्य ब्रह्मणो प्रमापकं ज्ञापकमित्यर्थः ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणेन गंधं रसनेनं वै रसं रूपं तु दृष्ट्वा श्वसनं त्वचैव ॥ श्रोत्रेण चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥ २९ ॥ स भूतसूक्ष्मेंद्रियसन्निकर्षं मनोमयं देवमयं विकार्यम् ॥ संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधम् ॥ ३० ॥ तेनाऽऽत्मनात्मानमुपैति शांतमानंदमानंदमयोऽवसाने ॥ एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंऽग ॥ ३१ ॥ एते सृती ते नृप वेदगीते त्वयाऽभिपृष्टे ह सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥ ३२ ॥

शेन रसतन्मात्रद्वारा आपः,तदंशेन गंधतन्मात्रद्वारा पृथ्वी तैश्च मिलितैश्चतुर्दशभुवनात्मकं विराट्शरीरं तस्य पंचाशत्कोटियोजनविशालस्य पृथिव्येवांडकटाहविशेषशब्दवाच्या कोटियोजनविशालं प्रथमावरणम् । पंचाशत्कोटियोजनविशालमित्येके । ततश्चाबादीनां ये परिणता अंशास्तान्येवोत्तरोत्तरं दशगुणान्यावरणानि । अष्टमं तु प्रकृत्यावरणं व्यापकमेव तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते । ततो विशेषं प्रतिपद्य लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् । निर्भयः कथं यास्यामीति शंकाशून्यः तेनात्मना पृथिवीरूपेण तन्निरंतरा आपः प्रतिपद्यात्वरंस्त्वरामकुर्वन् । तत्तदात्मत्वेन क्लेददाहादिशंकाभावाद्यथेष्टं भोगान्भुंजान इत्यर्थः । एवं ज्योतिर्मयः सन् काले भोगावसाने बृहदात्मलिंगं परमात्ममूर्तित्वेनोपासनेषूक्तम् । यद्वा । वेदशब्दात्मना तस्य प्रमापकमिति ॥ २८ ॥ इंद्रियार्थानां भूतसूक्ष्माणामऽतिक्रममाह । घ्राणेनाधिष्ठितेन गंधमुपेत्य श्वसनं स्पर्शं नभोगुणत्वं शब्दात्मतां प्राणेन तत्तत्कर्मेंद्रियेण आकूतिं तत्तत्क्रियाम् ॥ २९ ॥ तदेवं स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्त्या महदादिप्राप्तिमाह । स योगी विकार्यं संसाद्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्योऽहंकारः । स त्रिविधः तामसो राजसः सात्त्विक इति । तत्र तामसाज्जडानि भूतसूक्ष्माणि जायंते, राजसाद्बहिर्मुखानि दशेंद्रियाणि, सात्त्विकान्मन इंद्रियदेवताश्च, तेषां लयश्च तत्तदहंकारे तत्र भूतसूक्ष्माणामिंद्रियाणां च सन्निकर्षं लयस्थानम् । तामसं राजसं च मनोमयं देवमयं च सात्त्विकं प्राप्य गत्या एवं गमनेन तेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति। ततः गुणानां सन्निरोधो लयो यस्मिंस्तत्प्रधानं याति॥ ३०॥ तेनात्मना प्रधानरूपेणानंदमयः सन्नुपाधीनामवसाने शांतमविकृतमानंदं परमात्मानमुपैति । न विषज्जते नावर्तत इत्यर्थः ॥ ३१ ॥ सृती मार्गौ प्रकारावित्यर्थः । हे नृप 'अन

पृथिव्याद्यावरणेषु गंधादयः संति तेषामतिक्रमं पूर्वमनुक्तं संप्रत्याह—घ्राणेनेति ॥२९॥ तदेवमित्थं तदावरणभूतः स्थूलसूक्ष्मभूतानामावरणभूतो योहंकारस्तस्य प्राप्त्या तत्तदहंकारे यतोयतो यस्योद्भवस्तत्रतत्राहंकारे ॥३०॥ ततस्तेन प्रधानेन सहात्मना स्वस्वरूपेणात्मानं परं ब्रह्म आदिपुरुषमानंदरूपमुपैति । प्रकृत्यावरणात्परत्र कारणार्णवशायिमहापुरुषस्य स्थितेः । ततोऽवसाने आनंदमय इति तस्मिन्नेव सायुज्यं प्राप्येत्यर्थः । इत्यर्थ इति । ''मां प्राप्य न निवर्त्तंते मृत्युसंसारवर्त्मनि'' इति भगवदुक्तेरयं भावः । अत्र संदर्भः । तेनात्मना शुद्धेन स्वरूपेण प्रधानभावेशितेन पुनस्तत उत्क्रमितेन आत्मानं परमात्मानं परमवैकुंठनाथमित्यर्थः । भागवतीं गतिमित्युक्तेः । ततो विशेषमित्यत्र टीकावतारिकायां ये तु भगवदुपासकास्ते स्वेच्छया ब्रह्मांडं भित्त्वा वैष्णवं पदमारोहंतीति । तस्मात्तन्मतेपि प्रकृत्यावरणाद्बहिर्महावैकुंठलोकः प्रकृत्यावरणस्य च व्यापकत्वं चापेक्षिकमिति ॥ ३१ ॥ इत्यर्थ इति । लक्षणया सृतिपदं प्रकारपरमिति भावः । प्रकारो भेदः । 'प्रकारस्तुल्यभेदयोः' इति मेदिनी'सृतिः स्त्री गमने मार्गे 'इति च ।हे नृपेति। नृपालनासक्तेन त्वयैतत्कालपर्यंतं न ज्ञात इति भावः । तत्र द्वयोर्मध्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यतोऽन्यः शिवः पंथा विशतः संसृताविह ॥ वासुदेवे भगवति भक्तियोगो यतो भवेत् ॥ ३३ ॥ भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया॥ तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥ ३४ ॥ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥३५॥

पेक्षो निर्भिद्य मूर्धन्विसृजेत्परं गतः’ इति या सद्योमुक्तिः सैका सृतिः । ‘यदि प्रयास्यन्’ इत्यादिना क्रममुक्तिश्च द्वितीया सृतिः । एते सृती वेदेन गीते उक्ते न तु स्वोत्प्रेक्षिते तत्र “यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥ ” इति सद्योमुक्तिः । “तेऽर्चिरभिसंभवंति” इत्यादिना क्रममुक्तिश्च वेदेनोक्ता । यद्वा “न कर्मभिस्तां गतिमाप्नुवंति” इति दक्षिणमार्गस्यापि सूचितत्वादेते सृती इति द्विवचनम् । त्वयाऽभिपृष्टे ‘यच्छ्रोतव्यम्’ इत्यादिप्रश्नेनार्थान्मुक्तिविषये द्वे अपि सृती पृष्टे । ‘ब्रूहि यद्वा विपर्ययम्’ इति दक्षिणमार्गोऽप्यर्थात्पृष्टः एवं त्वया च ये पृष्टे एते सृती इत्यन्वयः ॥३२॥ संति संसरतः पुंसो बहवो मोक्षमार्गास्तपोयोगादयस्तत्र समीचीनस्त्वयमेवेत्याह । नहीति । यतोऽनुष्ठिताद्भक्तियोगो भवेदतोऽन्यः शिवः सुखरूपो निर्विघ्नश्च नास्त्येव ॥ ३३ ॥ कुत एतदत आह । भगवान्ब्रह्मा कूटस्थो निर्विकारः एकाग्रचित्तः सन्नित्यर्थः । त्रिस्त्रीन्वारान् कार्त्स्न्येन साकल्येन ब्रह्म वेदमन्वीक्ष्य विचार्य यत आत्मनि हरौ रतिर्भवेत्तदेव मनीषयाऽध्यवस्यत् निश्चितवान् ॥ ३४ ॥ नन्वननुभूतेऽर्थे रतिर्भवति । अननुभूते तु भगवति कथं रतिः स्यात्तत्राह । भगवाँल्लक्षितः दृष्टः । कथं स्वात्मना क्षेत्रज्ञांतर्यामितया कैर्दृश्यैर्बुद्ध्यादिभिः । तदेव द्वेधा दर्शयति ।

अस्य पुंसो हृदि मनसि श्रिताः स्थिता ये ते यदा न त्वविचारेण प्रमुच्यंते नश्यंति । कर्मकर्त्तरि प्रयोगः । अथ तदनंतरमेव मर्त्यो मरणधर्माप्यमृतस्तद्धर्मरहितो भवति । अत्रैव देहे ब्रह्माबाप्नोति तद्रूपो भवतीति श्रुत्यर्थः । सृतिपदस्य प्रसिद्धार्थत्यागे कारणाभावमालक्ष्याह—यद्वेति । ‘कर्मिणामेव ते धूममभिसंभवंति’ इत्यादिश्रुत्या दक्षिणमार्गस्याभिहितत्वादर्चिरादिगतिस्तेषां नास्तीत्याह—न कर्मभिस्तां गतिमिति ॥ ३२ ॥ समीचीनः—सर्वसाध्यपरमसारप्रापकः । अयं क इति चेत्तत्राह—यत इति । भक्तियोगः प्रेमा यच्छब्देनात्र भगवत्संतोषार्थं कर्मोच्यते । ‘स वै पुंसां परो धर्मः इत्युक्तेः । अत्र पूर्वमुक्तलक्षणं सृतिद्वयं यथा मोक्षप्रापकं तथाऽयं पंथा भक्तियोगप्रापक इति प्रापकस्यास्य पथः परमोत्कर्षप्रतिपादनादेतत्प्राप्यस्य भक्तियोगस्यापि सृतिद्वयप्राप्यान्मोक्षात्परमोत्कर्षो युक्तिसिद्धः । इति भक्तियोगस्यास्य प्रेमलक्षणस्य मोक्षसाधनत्वं न व्याख्यातुं शक्यमित्यवधेयम् ॥३३॥ इत्यर्थ इति । यावच्चेतो विकारवत्तावदैकाग्र्यं न जायते इति भावः । कूटस्तिष्ठतीति कूटस्थः । ‘कूटोऽस्त्री निश्चले राशौ’ इत्यादिकोशात् । विश्वनाथः—ननु त्वं मनीषया सर्वसारत्वेन स्वाभिमतत्वेन चेममेव पंथानं निश्चिनोष्यन्यं वा ? । तत्र सामान्यस्य वा का कथा भगवानेव स्वमनीषया प्रथममेव निरणैषीदेवेत्याह । भगवान्स्वप्रकाशसार्वज्ञ्यादिगुणः परमेश्वरोपि स्वनिःश्वासोद्भूतब्रह्म वेदं कार्त्स्न्येन सामस्त्येन त्रिरन्वक्षियेति।यथाऽन्ये मुनयः शास्त्रं द्वित्रिरन्वीक्ष्यैव तत्तात्पर्यं पर्यालोचयंति तथैव ‘स मुनिर्भूत्वा समचिंतयत्’ इति श्रुतेर्भगवानपि मुनिलीलत्वेनैव सर्ववेदाभिधेयसाराकर्षणलीलया वेदानां दुर्ज्ञेयत्वं लोके व्यञ्जयंस्त्रिर्विचार्येत्यर्थः ॥ कर्मभक्तिज्ञानप्रतिपादकत्वाभिप्रायेण वा त्रिरन्वीक्ष्य अनंतवैकुंठवैभवादिमयानामनंतविरिञ्चिपाठ्यभेदानां वेदानां तथेक्षणं तेनैव संभवतीत्याह कूटस्थः । ‘कालव्यापी स कूटस्थ एकरूपतयैव यः’ इत्यमरः । अत एवोक्तं स्वयमेव । ‘किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्य हृदयं लोके नान्यो मद्वेद कश्चन ॥’’ इति । स तद्वस्तु अध्यवस्यत्सर्ववेदप्रतिपाद्यत्वेन निश्चिकाय । यत आत्मनि स्वस्मिन्रतिः प्रेमा भवेत् । प्रेम्णो हि प्रथमावस्था रतिः । संदर्भस्तु—स हि भक्तियोगः सर्ववेदसिद्ध इत्याह—भगवानिति । भगवान् ब्रह्मेति स्वामिवत् । अत्राप्युपसंहारानुरोधेनात्मशब्दस्य हरिवाचकता । निरुक्तश्च । ‘आततत्वाच्च मातृत्वादात्मा हि परमो हरिः’ इति । अतोग्रे विश्वनाथवद्वितीयोर्थः । विशेषस्तु ‘निगदकृदुपजह्रे भृंगवद्वेदसारम्’ इति शुकोक्तिरेव ॥ ३४ ॥ अत्राक्षिपति—नन्विति । तदेत्र लक्षितत्वमेव । संदर्भः । अथ भगवानपि लक्षितः केन सर्वभूतेषु सर्वेषु तेषु द्रष्टृषु प्रविष्टेन स्वात्मना स्वांशरूपेणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ३६ ॥

दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना न घटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाश।तर्यामिलक्षणैः तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वात् वास्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रश्च कर्तेत्येवमीश्वरसिद्धिः ॥ ३५ ॥ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति । तस्मादिति ॥ ३६ ॥

तर्यामिणा आदौ सर्वैर्द्रष्टृभिरंतर्यामी लक्षितस्ततस्तेन भगवानपि लक्षित इत्यर्थः । स तु पूर्ववत् द्वेधैव लक्ष्यते । तथा हि कर्तृत्वभोक्तृत्वयोरस्वातंत्र्यादर्शनात् । कर्मणोपि जडत्वात्सर्वेषामपि जीवानां तत्रतत्र प्रवृत्तिरंतः प्रयोजकविशेषं विना न घटत इत्यनुपपत्तिद्वारान्तर्यामी लक्ष्यते । "एष ह्यनेन चक्षुषा दर्शयति, श्रोत्रेण श्रावयति, मनसा मानयति, बुद्ध्या बोधयति—तस्मादेतावाहुः सृतिरसृतिः" इति भाल्लविश्रुतिश्च । अतस्तस्मै चांतर्यामिरूपेण तस्यांशेन वैश्वर्याय तेषु यदि सर्वांशेनैव प्रविशति । कोपि परस्तदा स्वतः पूर्णत्वाभावादनीश्वरत्वमेव स्यादित्यनुपपत्तिद्वारांतर्यामिरूपेण तस्यांशेन भगवानपि लक्षितः । अत एव गीतोपनिषत्सु— "अथ वा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥" इति । विष्णुपुराणे च 'स्वशक्तिलेशावृतभूतसर्गः' इति । तथा जीवाः प्रयोजककर्तृप्रेरितव्यापाराः, अस्वातंत्र्यात् । तक्षादिकर्मकरजनवदित्येवमंतर्यामिणि तद्द्वेधा व्याप्तिद्वारा सिद्धे पुनस्तेनैव भगवान्साध्यते तुच्छवैभवजीवांतर्यामिस्वरूपमीश्वरतत्त्वं निजांशितत्त्वाश्रयं तथैव पर्याप्तेः । राजप्रभुत्वाश्रिततक्षादिकर्मकरप्रयोजकप्रभुत्ववदिति । अथवात्र । "यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवाञ्छास्त्रवर्त्मभिः" इत्येवोदाहरणीयम् । अनेनैवगतिसामान्यं च सिध्यतीति । विश्वनाथस्तु—सा च रतिः "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति भगवद्वाक्येनाग्रे प्रतिपादयिष्यमाणा शांतिप्रीतसख्यवात्सल्यप्रियताभिधाना पञ्चविधा भवति । तत्र प्रथमं शांत्याख्याया रतेरसावर्ण्येन प्रकारं विषयालंबनं च दर्शयति—भगवानिति । स्वात्मना स्वस्य जीवस्यात्मनान्तर्यामिणैव स्वस्मिन्निव सर्वभूतेषु सर्वव्यापकत्वात्तद्दर्शी भगवान्हरिर्लक्षितः । शांतभक्तैरनुभवगोचरीकृत इत्यर्थः । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति भगवदुक्तेः । ननु जीव एव कथं लक्ष्यत तदंतर्यामी वा येन भगवान् कृष्णो लक्षयितव्यस्तत्राह । दृश्यैर्बुद्ध्यादिभिर्हेतुभिर्द्रष्टा जीवो लक्षितो दृश्यानां जडानां बुद्ध्यादीनां दर्शनं हि चेतनं द्रष्टारं विना न संभवेदित्यनुपपत्तिमुखेन तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति व्याप्तिमुखेन चानुमितस्तथाऽनुमापयंति । यानि लक्षणानि चिह्नानि तैर्द्रष्टांतर्यामी च लक्षितः । तानि च सर्वस्यापि जीवस्य कर्तृत्वभोक्तृत्वयोरस्वातंत्र्यम् । 'केनापि देवेन हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमि' इति दुर्योधनोक्तेर्भोक्तृश्च सुखदुःखानामस्वातंत्र्यञ्च लक्ष्यत इत्येकादशस्कंधोक्तेश्च । तथा कर्मसाम्येपि फलतारतम्यं क्वचित्फलाभावश्चेत्यादीनि समुद्रमथनादौ दृष्टानि ज्ञेयानि । तथा हि—जीवाः प्रयोजककर्तृस्वामिकाः अस्वातंत्र्यात् । यथायोग्यस्वामिदत्तकर्मफलतारतम्यतदभाववत्त्वाच्च तक्षादिकर्मकरजनवदिति ॥ ३९ ॥ 'भक्तियोगो भवेत्' इत्यत्र 'रतिरात्मन्यतो भवेत्' इत्यत्र च यत्पदवाच्यं साधनमाह—तस्मादिति । यस्मात् 'नह्यतोऽन्यः शिवः पंथाः' तस्मादित्यर्थः । यस्मात् । सर्वभूतेषु भगवाँल्लक्षितः तस्मादिति वा । सर्वत्र सर्वदेति । नात्र देशकालनियमोऽपेक्षितव्य इत्यर्थः । सर्वेणैवात्मना मनसा न च क्वचन मनोवृत्तौ ज्ञानकर्माद्यपेक्षणीयमिति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतम् ॥ पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकम् ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे पुरुषसंस्थानुवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ एवमेतन्निगदितं पृष्टवान्यद्भवान्मम ॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणाम् ॥ १ ॥ ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम् ॥ इंद्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥ देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुम् ॥ वसुकामो वसून्रुद्रान्वीर्यकामोऽथ वीर्यवान् ॥ ३ ॥

श्रवणादिफलमभिनयेनाह।पिबंतीति सतामात्मन आत्मत्वेन प्रकाशमानस्य कथैवामृतम् । विषयैर्विदूषितं मलिनीकृतमाशयं पुनंति शोधयंति तस्य चरणपद्मांतिकं श्रीविष्णुपदं व्रजंति ॥ ३७॥ इति श्रीभा०म० द्वितीयस्कंधे टीकायां द्वितीयोऽध्यायः ॥२॥ छ ॥ तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं शृण्वतो मुनेः ॥ भक्त्युद्रेकेण तत्कर्मश्रवणादर ईर्यते॥ ॥ १ ॥इदानीमन्यदेवताभजनस्यापि पुत्रादिभजनवदेव तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति । एवमिति । ममेति माम् । कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि ये म्रिय माणास्तेषां विशेषत एवमेतद्धारिकथाश्रवणादिकं निगदितं विहितमित्यर्थः॥ १ ॥ब्रह्मणस्पतिं वेदस्य पतिं ब्रह्माणं यजेत । इंद्रियपाटवकामास्त्विद्रम् । प्रजाकामः प्रजापतीन्दक्षादीन् ॥ २ ॥ मायां दुर्गाम् । विभावसुमग्निम् । वसुकामो धनार्थी । वीर्यं प्रभावस्तत्कामो वीर्यवान्सन्रुद्रान् यजेत ॥ ३ ॥

“तस्मादेकेन मनसा भगवान्सात्वतां पतिः ॥ श्रोतव्यः कीर्त्तितव्यश्च ” इत्यनेनैकवाक्यत्वाच्छ्रोतव्य इति प्राधान्यात् श्रवणकीर्त्तनस्मरणान्युक्तानि पादसेवनादीन्यपि ज्ञेयानि ॥ ३६ ॥ प्रीतादिचतुर्विधाया रतेः साधारण्ये नानुभावमेव प्रेम्णः साधनं वदंस्तत्फलमपि दर्शयति । आत्मनः स्वस्य यो भगवानुपास्यस्तस्य नारायणस्य रामस्य कृष्णस्य वा कृष्णस्यापि स्वीयभावानुरूपस्य बालस्य पौगंडस्य किशोरस्य वा कथामृतं तथा तादृशस्य तस्य सतां भक्तानां नारदादीनां हनुमदादीनां नंदादीनां श्रीदामादीनां गोपालादीनां च कथामृतं पिबंतीत्यनेन तत्कर्तॄणां जातरतित्वं व्यंजितं तथात्व एव माधुर्योपलंभेन पानपदप्रयोगासिद्धेः । अजातरतीनां तु ‘तस्मात्सर्वात्मना’ इत्यनेन श्रवणकीर्त्तनादीनि रतेः साधनान्युक्तान्येव । आशयमंतःकरणं पुनंति क्षालयंतीत्यननुसंहितं फलं व्रजंति साक्षात्सेवितुमित्यनुसंहितं फलमिति । ‘अतःपृच्छामि संसिद्धिम्’ इति प्रश्नस्योत्तरमुक्तम् । संदर्भस्तु— सतामिति व्यधिकरणषष्ठ्या सतां स्वस्य यो भगवांस्तस्येत्यर्थः । तेषां भगवति स्वामित्वेन ममतास्पदत्वात् । पुनंतीत्यनेन पूर्वोक्तस्थूलधारणमार्गश्च परिहृतः भक्तियोगस्य स्वतःपावनत्वादलं तत्प्रयासेनेति । अत्र कथामृतं प्रशस्यमानं श्रीभागवताख्यमेव मुख्यं “यस्यां वै श्रूयमाणायाम्” इत्यादिकं च तथैवोक्तम् ॥३७॥इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कंन्धे द्वितीयोऽध्यायः॥२॥मुनेः सकाशाद्विष्णुभक्तेराधिक्यं शृण्वतो राज्ञो विष्णुकर्मश्रवणादरो वर्ण्यते ॥ (१) ॥ म्रियमाणानां नृणां कृत्यं यत्पृष्टं तदेतत् योगिमते सृतिद्वयं निगदितम् । तथा तेष्वेव मनुष्येषु मध्ये ये मनीषिणो म्रियमाणा भवद्विधास्तेषामेतच्छ्रवणकीर्त्तनस्मरणकथामृतादि निगदितम् ॥ १ ॥ ये च तेष्वेव मनुष्येषु मंदधियस्तेषां च कृत्यं शृण्वित्याह।यद्वा । किं वा भजनीयमिति यत्पृष्टं तत्र प्रथमं मंदधियां भजनीयानाह ‘ब्रह्मवर्चसा’इत्यादिना ‘कामकामो यजेत्सोमम्’ इत्यंतेन । प्रजाकामो जनकामः। ‘प्रजां तु जनपुत्रयोः’ इति यादवः॥२॥श्रीर्लक्ष्मीः शोभा च। ‘तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि’ इति कोशात् । प्रभावेच्छुः।वसु हिरण्यं गावश्चेति । वीर्यकामो बहुस्त्रीसंभोगार्थं शुक्राधिक्यकामः।‘वीर्यं पराक्रमे रेतस्यत्नमाहात्म्ययोरपि’ इति च॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नाद्यकामस्त्वदितिं स्वर्गकामोऽदितेःसुतान् ॥ विश्वान्देवान्राज्यकामः साध्यान्संसाधको विशाम् ॥४॥ आयुःकामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् ॥ प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ ५ ॥ रूपाभिकामो गंधर्वान्स्त्रीकामोऽप्सरउर्वशीम् ॥ आधिपत्यकामः सर्वेषां यजेत परमेष्ठिनम्॥६॥यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसम् ॥ विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीम् ॥ ७ ॥ धर्मार्थ उत्तमश्लोकं तंतुं तन्वन्पितॄन्यजेत् ॥ रक्षाकामः पुण्यजनानोजस्कामो मरुद्गणान् ॥८॥ राज्यकामो मनून्देवान्निर्ऋतिं त्वभिचरन्यजेत् ॥ कामकामो यजेत्सोममकामः पुरुषं परम् ॥ ९ ॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ १० ॥

अन्नाद्यं भोज्यं भक्ष्यं च । अदितेः सुतान्द्वादशादित्यान्।विशां देशस्थप्रजानां स्वाधीनतामिच्छन् साध्यान् यजेत् ॥४॥ इलां पृथ्वीम् । प्रतिष्ठा स्थानादप्रच्युतिः । रोदसी द्यावाभूमी॥५॥अप्सराश्चासौ उर्वशी च ताम्॥६॥यज्ञं यज्ञोपाधिं विष्णुम् । कोशो वसुसंचयः वसुकाम इत्यत्र धनमात्रमिति भेदः । दांपत्यमन्योन्यप्रीतिस्तदेवार्थो यस्य सः ॥७॥ धर्मार्थो धर्मकामः । उत्तमश्लोकोपाधिं विष्णुम् । तंतुं तन्वन्संतानवृद्धिमन्विच्छन् । रक्षा बाधानिवृत्तिस्तत्कामः पुण्यजनान्यक्षान् । ओजो बलं तत्कामो मरुद्गणान् देवान् ॥८॥ राज्यं राजत्वं तत्कामो मनून् । देवान्मन्वंतरपालकान् । राज्ञः कर्म राज्यं तत्कामो विश्वान्देवानिति विशेषः । अभिचरञ्छत्रुमरणमिच्छन्निर्ऋतिं राक्षसम् । कामकामः भोगेच्छुः अकामो वैराग्यकामः पुरुषं परं प्रकृतिव्यतिरेकोपाधिमीश्वरम् ॥९॥ अकाम एकांतभक्तः उक्तानुक्तसर्वकामो वा । पुरुषं पूर्णं निरुपाधिम् ॥१०॥

यद्दन्तैरवखंड्यावखंड्य भक्ष्यतेऽपूपादि तद्भक्ष्यम् । यत्तु केवलं जिह्वया विलोड्य निगीर्यते संयावादि तद्भोज्यमिति विवेकः।साध्यान्साध्यसंज्ञान् ॥४॥ पुष्टिर्देहपुष्टिः ॥ ५ ॥ परमेष्ठिनं ब्रह्माणम्॥६॥यज्ञं तन्नामानमिंद्रं वा॥७॥ कोशकामो निधिकामः । प्रचेतसं वरुणम्॥ ८ ॥ उत्तमश्लोकाः पुण्यश्लोका धार्मिका नलादयस्तदुपाधिं तदधिष्ठानकं विष्णुमिति संदर्भः॥९॥सर्वकाम इत्यनेनैव सकामसामान्ये लब्धे मोक्षकाम इति पृथगुपादानं तदधिकारिणां वयं निष्कामा इत्यभिमानखंडनार्थम् । किं वा । सर्वकाम इत्यपि मोक्षकामस्य सकामत्वातिशयज्ञापनार्थम् । तथा च स्वस्य दुःखहानेच्छा सुखप्राप्तीच्छा च काम उच्यते सा सा च स्वस्य तात्कालिककिञ्चिन्मात्रदुःखखंडनार्थं नश्वरस्वर्गादिसुखार्थं च प्रवृत्तेभ्यः कर्मिभ्यो देवतांतरोपासकेभ्यश्च ज्ञानाधिकारिणां स्वीयसंसारदुःखखंडने प्रवृत्तानां ब्रह्मसुखमनुबुभूषूणामधिकैव दृश्यते भक्तानां तु भजनीयपरमेश्वरसुखार्थमेव प्रवृत्तानां निष्कामता तद्वचनैरेवावसीयते । तानि च यथा ।"नाथ योनिसहस्रेषु येषुयेषु व्रजाम्यहम् । तेषुतेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि॥" इति "स्वकर्मफलनिर्दिष्टां यांयां योनिं व्रजाम्यहम् । तस्यांतस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे॥" इति । "तन्नः समादिशोपायं येन ते चरणाब्जयोः । स्मृतिर्यथा न विरमेदपि संसरतामिह॥" इति । प्रायोपवेशारंभे राज्ञोपि वचनं यथा । "पुनश्च भूयाद्भगवत्यनंते रतिः प्रसंगश्च तदाश्रयेषु । महत्सु यांयामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः॥" इति । उदारधीः सुबुद्धिः । कामराहित्ये साहित्ये वा भक्तेर्भगवद्विषयत्वमेव सुबुद्धित्वचिह्नं तदभाव एव मंदबुद्धित्वचिह्नमित्यर्थः । तीव्रेण ज्ञानकर्माद्यमिश्रेण मेघाद्यमिश्र एव सौरकिरणो यथा तीव्रः स्यात्तथेत्यर्थः । संदर्भस्तु—एवं प्राक्तनाध्यायाभ्यां कर्मयोगज्ञानेभ्यः श्रेष्ठत्वमुक्त्वा तदुत्तराध्यायेपि सर्वदेवोपासनेभ्यः श्रेष्ठत्ववचनेन भगवद्भक्तियोगस्यैवाभिधेयत्वमाह—अकाम इति । तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विघ्नानवकाशतोक्ता । कमना तु यादृच्छिकेनापि स्यात् । यथोक्तं भारते— "भक्तक्षणः क्षणो विष्णोः स्मृतिः सेवा स्ववेश्मनि । स्वभोज्यस्यार्पणं दानफलमिंद्रादिदुर्लभम्॥" इति । तदुक्तं श्रीकर्दमं प्रति श्रीक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥ ११ ॥ ज्ञानं यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ १२ ॥

॥ ११ ॥ पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह।एतावानिति । इंद्रादीनपि यजतामिह तत्तद्यजनेन भागवतानां संगतौ भगवत्यचलो भावो भक्तिर्भवतीति यदेतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयो लाभः । अन्यत्तु स्वर्गादि सर्वं तुच्छमित्यर्थः॥ ११ ॥भागवतसंगत इत्यनेन सूचितां हरिकथारतिं स्तौति । ज्ञानमिति । यत्र यासु कथासु ज्ञानं भवति । कीदृशम् । आ सर्वतः प्रतिनिवृत्तमुपरतं गुणोर्मीणां रागद्वेषादीनां चक्रं समूहो यस्मात्तत् । उत अनंतरं तद्धेतुरात्मप्रसादश्च यत्र यासु मनःप्रसाद

पिलेन । "न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम्" इति । अथ वा यत्तत्कामस्तीव्रेणैव यजेत । ततश्च शुद्धभक्तिसंपादनायैवांते पर्यवसिष्यत्यसांवित्र्यभिप्रायेण सविशेषणमुपदिष्टम् । तदनेनैकांतभक्ते मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यमपि तु सर्वकामेष्वपीति तदेव सर्वथापि निर्णीतम्।यद्वाऽकामत्वं भजनीयपरमपुरुषसुखमात्रस्वसुखत्वं भक्तिमात्रकामत्वे व्याख्याते धर्मपुरुषार्थिन्यातिव्याप्तिः स्यात्।तीव्रेण सर्वेषु साध्येषुपरमसाधकतमत्वेन॥ १० ॥किञ्च–एतावानिति इत्यर्थ इति।हरिभक्तिं विना फलांतरस्य क्षयिष्णुत्वात्तुच्छत्वमिति भावः। अत्र "इन्द्रमिंद्रियकामस्तु" इत्याद्युक्तमिंद्रियपाटवादिकं पृथक्त्वेन फलं भागवतसंयोगे तु भावः फलं खादिरयूपसंयोगे यागस्य फलवैशिष्ट्यवदिति संदर्भः ।"एकस्य तूभयत्वे संयोगपृथक्त्वम्" इति जैमिनिसूत्रम् । तदर्थस्तु एकस्य कर्मण उभयत्वेऽनेकफलसंबंधे संयोग उभयसंबंधबोधकवाक्यं तस्य पृथक्त्वे भेदः स हेतुः।यथा ज्योतिष्टोमादिकर्मणां "कर्मणा पितृलोकः"इत्यादिश्रुतेः स्वर्गादिहेतुत्वेपि "यज्ञेन"इत्यादिश्रुतेर्ज्ञानार्थत्वं तद्वदत्रेंद्रादियजनस्येंद्रियपाटवादिहेतुत्वेपि भागवतसंगतो भक्तिफलकत्वमपीत्यर्थः।'खादिरो यूपो भवति,खादिरं वीर्यकामस्य यूपं कुर्वीत' इत्युभयविधवाक्योपलब्धेः खादिरस्योभयार्थता यथा तथात्रापीत्यप्यत्रानुसंधेयम् । विश्वनाथस्तु–ननूक्तलक्षणानां देवतांतरभक्तानां लब्धं तत्तत्कामानामंते खलु का गतिः स्यादिति चेन्न कापि किन्तु याद्दच्छिकमहत्कृपा स्यात्तदैव भक्तिः स्यादित्याह–एतावानेव । यजतां देवतांतरयाजिनां निःश्रेयसोदयः कोऽसौ यद्यदि भागवतानां संगतो हेतोर्भगवति भावः सेव्यत्वकामना स्यादन्यथा न निःश्रेयसं तत्तद्देवतानामपि निःश्रेयसाभावादिति भावः । तदुक्तं भगवता "येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः । तेपि मामेव कौंतेय यजंत्यविधिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ " इति देवतांतरस्य यजनं तु न हि भगवद्भावकारणं किं तु भागवतसंग एव स च यदृच्छयैव भवेदिति प्राक्प्रतिपादितम् ॥ ११ ॥ ननु यावज्जीवनपर्यंतं यो यमाश्रितस्तस्यांते खल्वाश्रयांतरानौचित्यमेव तस्मात्सर्वकालमेव तत्तद्देवोपासकस्यांते भागवतसंगादपि भगवति भावः कथं कर्त्तुमुचित इति चेद्देवतांतरोपासकः खलु को वराको यतो ब्रह्मोपासकोपि भगवति शुद्धां भक्तिं करोतीत्यत्र क्रमरीतिं दर्शयन्नाह । ज्ञानं यदा स्यात् कीदृशं प्रतिनिवृत्तमुपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत् । तदात्मप्रसादः स्यात् यत्रात्मप्रसादे सति गुणेष्वसंगो वैराग्यम् । कीदृशः कैवल्ये संमतः पंथा अथ तदनंतरं भक्तियोगः स्यात् । भक्तियोगस्य याद्दच्छिकतायाः प्राक् प्रतिपादितत्वादसंगकार्यत्वं नाशंकनीयम् । भगवत्कृपया सनकादीनामिव भागवतकृपया शुकस्येव कीर्त्तनादिरूपः । ततः कः खलु निर्वृतो भक्तिसुखे निमग्नः । रतिमासक्तिं यो रतिं न कुर्यात्स त्वनिर्वृत इति भावः । अत्र कर्मज्ञानयोगदेवतांतरोपासनेभ्यः शुद्धभक्तेरुत्कर्ष इति तथा तत्तत्साध्यं केवलया भक्त्यैव सिध्यतीति तथा तत्तत्साधनवतामप्यंते पुनर्भक्त्यैव निःश्रेयसमिति । कर्मज्ञानादिनिरपेक्षा स्मरणकीर्त्तनश्रवणप्रधाना शुद्धा भक्तिरेव प्रेमभक्तिसाधनमिति शुकदेवस्य स्वाभिमतम् । तत्रापि नामकीर्त्तनं सर्वोत्कृष्टतममिति वस्तुपंचकं निरूपितमिति प्रकरणार्थसंक्षेपः । संदर्भस्तु–प्रपंचातीतत्वात्कैवल्यरूप एव विद्वद्भिः संमतः पंथा भगवत्प्राप्त्युपायश्चेत्यर्थः । 'एको नारायणो देवः' इत्यादौ । 'परापराणाम्परम आस्ते कैवल्यसंज्ञितः' इत्युक्तदिशा कैवल्याय श्रीनारायणं लब्धुं संमतः पंथा उपायो यो भक्तिभोगस्तत्प्रेमा स च यत्रेति वा ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनक उवाच ॥ इत्यभिव्याहृतं राजा निशम्य भरतर्षभः ॥ किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविम् ॥ १३ ॥ एतच्छुश्रूषतां विद्वन्सूत नोऽर्हसि भाषितुम् ॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवम् ॥ १४ ॥ स वै भागवतो राजा पांडवेयो महारथः ॥ बालक्रीडनकैः क्रीडन्कृष्णक्रीडां य आददे ॥१५॥ वैयासकिश्च भगवान्वासुदेवपरायणः ॥ उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥ १६॥ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ॥ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥ १७ ॥

हेतुर्गुणेषु विषयेष्वसंगो वैराग्यं च । उभयत्रेति पाठे इहामुत्र च गुणेष्वसंगः अथ कैवल्यमित्येव संमतः पंथा एतादृशो यो भक्तियोग निर्वृतः श्रवणसुखेन अन्यत्रानिर्वृत इति वा । तासु हरिकथासु को रतिं न कुर्यात् ॥ १२ ॥ अभिव्याहृतमुक्तम् । ऋषिं परब्रह्मदर्शिनम् । कविं शब्दब्रह्मनिष्णातम् ॥ १३ ॥ श्रवणेच्छायां हेतुः । हरिकथा एव उदर्क उत्तरफलं यासु ताः कथाः । सतां भागवतानां सदसि सभायां स्युः । अत एतच्छुश्रूषतां श्रोतुकामानां नः ॥ १४ ॥ एतत्प्रपंचयति स वा इति द्वाभ्याम् । कृष्ण पूजादिरूपां क्रीडां यः स्वीकृतवान् ॥ १५ ॥ उरुगायस्य गुणैरुदारा महत्यः कथाः स्युः ॥ ॥ १६ ॥ किं च । वृथैव क्षीयमाणमायुर्हरिकथया सफलं कुर्वित्याशयेनाह त्रिभिः । आयुरिति । असौ सूर्य उद्यन्नुद्गच्छन् अस्तमदर्शनं च यन्गच्छन् यत् येन क्षणो नीतस्तस्य आयुर्ऋते वर्जयित्वा अन्येषां वृथैव हरति ॥ १७ ॥

ऋषिं परब्रह्मदर्शिनम् । कविमृषिष्वपि मध्ये तद्वर्णनातिशयचतुरम् ॥ १३ ॥ श्रवणकीर्तनादीन्येव स्वकर्तव्यत्वेन ज्ञात्वापि राज्ञा यदन्यत्पृष्टं तस्मात्तेषामेव श्रवणादीनां विषयाः कृष्णकथा एव प्रष्टव्या भविष्यंतीत्याशयेनाह—एतदिति । न च सर्गविसर्गमन्वंतरनानाराजादिकथानामपि तदन्यकथात्वं वाच्यमित्याह । कथा अपि हरिकथा एवोदर्क उत्तरफलं यासु ताः सर्गादिकथानामपि कृष्णकथायामेव पर्यवसितत्वात्ता अपि श्रवणादिविषया इति भावः । सतां सदसि प्राचीनार्वाचीनेषु मध्ये हे सूतेति कथनात्सूतस्य तु राजवंशकथाज्ञत्वमस्ति न तु हरिकथाभिज्ञत्वमित्याक्षेपवारणायाह—हे विद्वन्निति । व्यासशिष्यत्वात्त्वं सर्वज्ञोसीति भावः ॥ १४ ॥ सा सभा सर्वतः श्रेष्ठा यत्र श्रोता वक्ता च सर्वतोपि विलक्षण इत्याह—स वा इति । य इति । याया श्रीकृष्णस्य वृंदावनादौ बालक्रीडा श्रुतास्ति तत्प्रेमावेशेन तत्सख्यादिभाववान् तांतामेव क्रीडां कृतवानित्यर्थः । बालानां क्रीडनकैः क्रीडासाधनैर्गोवत्सादिप्रतिकृतिभिः ॥ १५ ॥ भगवान्सर्वज्ञः सतां समागमे सति उरुभिर्वेदविद्भिर्गीयत इति उरुगायः श्रीकृष्णस्तस्य गुणा एवोदारा मनोरथप्रदातारः तत्रत्यानां जनिष्यमाणानां च जनानां ध्रुवं स्युरतस्तान् गुणानत्र प्रवर्त्तयेति । तेन कृष्णकथोदर्काः कथाश्च भक्तैरास्वादनीया इति भावः ॥ १६ ॥ नात्र विलंबः कार्य इत्याह—किं चेति । हरति वृथागामित्वाद्बलादाच्छिनत्तीव । यद्वा । क्षणोपि निमेषत्रयमपि तावतैव कालेन सर्वमायुः सफलं भवति । एकस्यामेव शाखायां फलितायां वृक्षोयं फलवानिति यथोच्यते । प्रतिशाखं फलवत्त्वे कैमुत्यमिव सर्वस्यायुषः कृष्णवार्त्तायुक्तत्वमपेक्ष्यम्। नन्वेवं चेदायुर्हरणाभावात्कृष्णवार्त्तयापि तत्क्षणे जनो न म्रियेत् । सत्यम् । सत्पात्रीकृतवित्तो जनोऽक्षयवित्तो यथोच्यते परत्र तद्भोगानंत्यप्राप्तेः "स मम ब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । अधीते शतसाहस्रमनंतं वेदपारगे ॥" इति स्मृतेः । अब्राह्मणे ब्राह्मणेतरे सत्कर्मणि लिंगिजनादौ । ब्राह्मणब्रुवे कुत्सितविप्रे । अधीते शास्त्राध्येतारि । वेदपारगे वेदार्थज्ञानवति इति । तथैव कृष्णसात्कृतस्वायुर्जनः परत्र तत्पार्षदत्वप्राप्त्या ध्रुवमक्षयायुर्भवतीति । कृष्णभक्तस्यायुर्हरणाभावो ज्ञेयः । जरामरणरोगादिकं तु भक्त्युत्कर्षवृद्ध्यर्थं मतांतरोत्थानाभावार्थं च स्वभक्तेरहस्यत्वरक्षणार्थं च भगवदिच्छयैव भवति न तु तत्र कालकर्मादेर्वस्तुतः कारणतेयु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरवः किं न जीवंति भस्त्राः किं न श्वसंत्युत ॥ न खादंति न मेहंति किं ग्रामपशवोऽपरे ॥ १८ ॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ॥ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ १९ ॥ बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ॥ जिह्वाऽसती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥ २० ॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदम् ॥ शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौ वा ॥ २१ ॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये ॥ पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥ २२ ॥ जीवञ्छवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ॥ श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गंधम् ॥ २३ ॥

ननु जीवनमेव तेषामायुषःफलमस्ति तत्राह।तरव इति।ननु तेषां श्वासो नास्ति तर्हि भस्त्राश्चर्मकोशाः।ननु तासामहारादिकं नास्ति तत्राह।न खादंति नाश्नंति न मेहंति रेतःसेकं मैथुनं न कुर्वंति किम् । उत अपि नराकारं पशुं मत्वाऽऽह । अपर इति ॥ १८ ॥ तदेवाह । श्वादिभिः संस्तुतः सदृशो निरूपितः यस्य कर्णपथं कदाचिदपि नागतः सः अवज्ञास्पदत्वाच्छ्वभिः कश्मलविषयासक्तत्वाद्विड्वराहैर्ग्रामसूकरैः कंटकवद्दुःखदविषयासक्तत्वादुष्ट्रैर्भारवाहित्वात् खरैस्तुल्य इत्यर्थः ॥ १९ ॥ तस्यांगानि च निष्फलानी त्याह बिले इति पंचभिः । बतेति खेदे । न शृण्वतोऽशृण्वतो नरस्य ये कर्णपुटे ते बिले वृथा रंध्रे । न चेदुपगायति तस्य जिह्वा असती दुष्टा दर्दुरो भेकस्तदीया जिह्वेव ॥ २० ॥ पट्टवस्त्रोष्णीषेण किरीटेन च जुष्टमपि शिरो यदि न नमेत्तर्हि केवलं भार एव । शवो मृतकस्तत्करतुल्यौ लसती कांचनकंकणे ययोस्तौ । अप्यर्थे वाशब्दः ॥ २१ ॥ ये नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हायिते मयूरपिच्छनेत्रतुल्ये । द्रुमवज्जन्म भजत इति तथा वृक्षमूलतुल्यावित्यर्थः ॥ २२ ॥ नाभिलभेत अभितो न स्पृशेन्न

पपादितं भीष्मनिर्याणाध्याये ॥ १७ ॥ अत्राक्षिपति—नन्विति ॥ मनुष्येभ्योपि तेषां तरुभस्त्राग्रामपशूनां जीवनाधिक्यश्वासाधिक्यखादनाद्याधिक्यानि संतीत्यतस्ते नराकाराः पशव एवेतिभावः ॥ १८ ॥ तदेव नराकारपशुत्वमेव । तेषां पशुत्वेप्यतिगर्हणीयत्वमाह श्वादिभिः संस्तुतः सम्यक् स्तुतः । अस्माकं चतुर्णामपि धर्मानयमेक एव धत्ते । वयं तु परस्परधर्मग्रहणेप्यसमर्था इति । तथाऽयं मनुष्योपि भूत्वा वयं तु पशवो भूत्वा पश्वंतरस्यै कस्यापि धर्मं धर्तुं न शक्नुम इति । तथायं शास्त्रादिष्टं स्वधर्ममप्युल्लंघ्यातिरागेणैव धत्ते । वयं तु नियतिकृते स्वस्वधर्मे एव पतिता इति । तथायमसद्धर्मे जनिष्यमाणं नरकं ज्ञात्वा वयं तु मूढा एवेति चतुर्द्धा स्तुतिः । तेषां श्वादीनां धर्मा निर्हेतुरोषणत्वामेध्यभोजित्वमहाभारवाहित्वस्वस्त्रीपादताडितत्वादयः । यस्य कर्णपथे जातु कदाचिदपि नोपेतो गतः गदाग्रज इति । गदस्य रोगस्याग्रे प्रतियोद्धेव जायते प्रादुर्भवतीति श्लेषेण तदैव ते क्रोधादयः पुरुषस्य रोगा नश्यंतीति भावः ॥ १९ ॥ तस्यांगिनः पुरुषस्य निंदां कृत्वा प्रत्येकतदंगानि निंदति । बिले एव ग्राम्यवार्ताभुजगगृहतुल्ये । श्लेषेणासती स्त्रीव तस्य सुकृतसर्वस्वं विप्लावयति । अत्र यद्यपि पुरुषो भुजाद्येकांगकृतयापि भक्त्या कृतार्थ एव भवति तदपि तस्यांगांतराणि तु व्यर्थान्येव भवंतीत्याशयेनांगानां निंदा ज्ञेया ॥ २० ॥ भार एव संसारसिंधौ प्रविशंतं तमधिकं निमज्जयतीति भावः । मृतककरतुल्यत्वाद्देवपित्रादयोपि तद्दत्तं जलादिकं न गृह्णंतीति भावः ॥ २१ ॥ मयूरपिच्छनेत्रतुल्ये । ताभ्यामात्मन उद्धारपदवीमपश्यंतः संसारकंटकक्षेत्र एव पतंतीति भावः । इत्यर्थ इति । यमदूतैरत्र कुठारैश्छि द्यमानौ भविष्यत इति भावः ॥ २२ ॥ एकैकान्यंगानि निंदित्वा समुदितानि निंदति—जीवन्निति । जीवञ्छवः प्रेतशरीरविशेष इव चेष्टमानः । साधून्भीषयते । तत्प्राणिकृतसपर्यादिकमपि भगवान्न गृह्णातीति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ॥ न विक्रियेताऽथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥ अथाभिधेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः ॥ यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥ २५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे श्रोतृश्रद्धानिरूपणं नाम तृतीयोऽध्यायः ॥३॥ सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ॥ उपधार्य मतिं कृष्ण औत्तरेयः सतीं व्यधात् ॥१॥

धारयेत् । श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः । न वेदेति अवघ्राय नाभिनंदेदित्यर्थः ॥ २३ ॥ अश्मवत्सारो बलं काठिन्यं यस्य । विक्रियालक्षणमाह । अथेति । गात्ररुहेषु रोमसु हर्ष उद्गमः ॥ २४ ॥ यस्मादभक्तस्य सर्वमेतद्व्यर्थम् । मनसोऽनुकूलं प्रियं च ब्रूषे । अथ अतःकारणान्नृपतिना साधु पृष्टः सन्वैयासकिर्नृपतिं प्रति यत्प्राह तदभिधेहीति ॥ २५ ॥ इति श्रीभा० म० द्वितीयस्कंधे टीकायां तृतीयोऽध्यायः ॥ ३ ॥ छ ॥ तुर्ये परीक्षिता पृष्टं सृष्ट्यादिहरिचेष्टितम् ॥ शुकेन ब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते ॥ १ ॥ राज्ञः प्रश्नं कथयितुं तस्य प्राक्तनीं स्थितिमाह चतुर्भिः । वैयासकेः शुकस्य इति एवंभूतमात्मनस्तत्त्वस्य निश्चयो यस्मात्तद्वच उपधार्याकलय्य सतीं कृष्ण एव सेव्यो

इत्यर्थ इति । यथा शवो गंधादिभिरर्चितोपि तन्नाभिनंदति तद्वत्सोपीति भावः ॥ २३ ॥ तदेवं व्यस्तसमस्ततया बाह्यमंगं प्राधान्येन निंदित्वाभ्यंतरमपि निंदति–तदश्मसारं लोहमयमेव यत् खलु गृह्यमाणैः कीर्त्यमानैरपि बहुभिर्हरिनामधेयैर्न विक्रियते विक्रियालक्षणमाह–अथेत्यादि ः। गात्ररुहेषु रोमसु हर्षः रोमांचः बहुनामग्रहणेपि चित्रद्रवाभावो नामापराधलिंगमिति संदर्भः । किञ्चाश्रुपुलकावेव चित्तद्रवलिंगमित्यपि न शक्यते वक्तुम् । तदुक्तं श्रीमद्रूपगोस्वामिचरणैः "निसर्गपिच्छिलस्वांते तदभ्यासपरेपि च । सत्त्वाभासं विनापि स्युः काप्यश्रुपुलकादयः ॥" इति । तथातिगंभीरमहानुभावभक्तेषु हरिनामभिश्चित्तद्रवेपि बहिरश्रुपुलकादयो न दृश्यंते इति । तस्मादिदमेवं व्याख्येयम् । यद्धृदयं न विक्रियेत कदा ? यदा विकारस्तदापीत्यर्थः । विकार एव कस्तत्राह–नेत्रे जलमिति । ततश्च बहिरश्रुपुलकयोः सतोरपि यद्धृदयं न विक्रियेत तदश्मसारमिति वाक्यार्थः । ततश्च हृदयविक्रियालक्षणान्यसाधारणानि क्षांतिनामग्रहणासक्त्यादीन्येव ज्ञेयानि तदुक्तम् "क्षांतिरव्यर्थकालत्वं विरक्तिर्मानशून्यता । आशाबंधः समुत्कण्ठा नामगाने सदा रुचिः ॥ आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले । इत्यादयोनुभावाः स्युर्जातभावांकुरे जने ॥" अश्रुपुलकादीनि तु साधारणान्येव । अयमर्थः । उत्तमाधिकारिणां निर्मत्सराणां नामग्रहणे सत्येव नाममाधुर्यस्यानुभवः स्यात्तस्मिंश्च सति हृदयविक्रिया च स्यात् । सत्यां च तस्यां तद्व्यंजकाः क्षांत्यादयोऽश्रुपुलकादयश्च भवंत्येव कनिष्ठाधिकारिणां समत्सराणान्तु सापराधचित्तत्वान्नामग्रहणबाहुल्येपि तन्माधुर्यानुभवाभावे चित्तं नैव विक्रियेत तद्व्यंजकाः क्षांत्यादयोपि न भवंति । तेषामेवाश्रुपुलकादिसत्त्वेप्यश्मसारहृदयतया निंदेषा । किञ्च तेषामपि साधुसंगेनानर्थनिवृत्तिनिष्ठारुच्यादिभूमिकारूढानां कालेन चित्तद्रवे सति चित्तस्याश्मसारत्वमपगच्छत्येव येषां तु चित्तद्रवे सति चित्तस्याश्मसारता तिष्ठेदेव ते तु दुश्चिकित्स्या एव ज्ञेयाः । तथा च वक्ष्यते तृतीये सबीजयोगध्याने "एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् । औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते॥" इति । अत्र द्रवद्धृदय इति चित्तद्रवः । तच्च चित्तबडिशमिति चित्तस्याश्मसारता बडिशस्य लोहमयत्वात् । अश्मसारस्य लोहपर्य्यायत्वात् । प्रतिलब्धो भावो येनेति भावोयमाभासरूप एव चित्तद्रवोपि तादृश एव ज्ञेयः इति यथार्थत्वे शनकैर्वियुंक्त इति तस्य पुरुषार्थबुद्ध्या तत्त्यागानुपपत्तेः । अत एव तादृशध्यानभक्त्याप्ययं भक्तशब्देन नाभिधीयते । किं तु योगिशब्देनैव चित्तस्य बडिशत्वेन कठोरत्वकुटिलत्वाभ्यां तद्विषयस्य भगवदंगस्य दुःखदात एव पर्यात्तीरिति । एवं च "सा वाग्यया तस्य गुणान्गृणीते करौ च तत्कर्मकरौ" इत्यादिवक्ष्यमाणवाक्यैरन्वयेन बिले बतेत्यादिवाक्यैर्व्यतिरेकेण च भक्तेरेव शास्त्राभिधेयत्वं दर्ढीकृतम् ॥ २४ ॥ तदभिधेहीति । ततोधिकमन्यत्किं वक्तव्यमस्तीति भावः ॥ २५ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे तृतीयोऽध्यायः ॥३॥ ब्रह्मपुत्रे । नारदः ॥ (१) ॥ सतीं विद्यमानामेवं मतिं विशेषेणाधात् । यत औत्तरेय उत्तराया गर्भे प्रविष्टं कृष्णं तदवधि सदा स्मरन्नेत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मजायासुतागारपशुद्रविणबंधुषु ॥ राज्ये चाविकले नित्यं विरूढां ममतां जहौ ॥ २ ॥ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥ राजोवाच ॥ समीचीनं वचो ब्रह्मन्सर्वज्ञस्य तवाऽनघ॥ तमो विशीर्यते मह्यं हरेः कथयतः कथाम् ॥५॥ भूय एव विवित्सामि भगवानात्ममायया॥ यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६ ॥ यथा गोपायति विभुर्यथा संयच्छते पुनः ॥ यांयां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ [आत्मानं क्रीडयन्क्रीडन्करोति विकरोति च] ॥७॥ नूनं भगवतो ब्रह्मन्हरेरद्भुतकर्मणः ॥ दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् ॥८॥ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपिवा ॥ बिभर्ति भूरिशस्त्वेकः कुर्वन्कर्माणि जन्मभिः ॥ ९ ॥ विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा ॥ शाब्दे ब्रह्मणि निष्णातः परस्मिंश्च भवान्खलु ॥ १० ॥

नान्य इत्येवंभूताम् ॥ १ ॥ आत्मा देहः । पशवो गजादयः ॥ २ ॥ इममेवार्थं हरिलीलालक्षणम् ॥ ३ ॥ संस्थां मृत्युं विज्ञाय । त्रैवर्गिकं धर्मार्थकामप्रधानम् । संन्यस्य त्यक्त्वा आत्मभावं परप्रेम्णा भगवदात्मत्वं गतः प्राप्तः सन्पप्रच्छ ॥४॥ मह्यं मम तमोऽज्ञानं विशीर्यते नश्यति । तव कथयतः सतः अतः समीचीनम् ॥५॥ पुनश्च वेदितुमिच्छामि । इदं दुर्विभाव्यमवितर्क्यं विश्वं यथा सृजति ॥ ६ ॥ गोपायति पालयति । संयच्छते संहरते । पुरुशक्तिर्बहुशक्तिमान् । क्रीडन् यथा करोति आत्मानं ब्रह्मादिरूपिणं क्रीडयन् विकरोति विविधं करोति ॥ ७ ॥ ८ ॥ एकः पुरुषरूपेण युगपत् जन्मभिर्ब्रह्माद्यवतारैः क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति ॥ ९ ॥ विचिकित्सितं संदि

यद्वा सतीमव्यभिचारिणीम् ॥ १ ॥ जहौ यः पूर्वमेवेति ज्ञेयम् । विमर्शितो हेयतया पुरस्तात्' इत्युक्तेः । निरूढां दृढीभूताम् ॥ २ ॥ यन्मां पृच्छथेति । 'आयुर्हरति वै पुंसाम्' इत्यादिवाक्यैर्व्यंजितां कृष्णकथां ब्रूहीति यत्पृच्छथेममेवार्थं राजा शुकं पप्रच्छेत्यन्वयः । हे सत्तमा इति । शुद्धव्यवहारप्रष्टारः संतः सामान्यतो धर्मकथाप्रष्टारः सत्तराः श्रीकृष्णकथाप्रष्टृत्वाद्यूयं सत्तमा इति भावः ॥ ३ ॥ पूर्वं सिद्धमपि तदा दृष्टं प्राप्तस्तद्दार्ढ्यं चकारेत्यर्थः ॥ ४ ॥ हे ब्रह्मन्निति । साक्षाद्ब्रह्मस्वरूप एव त्वमसीति भावः ॥ ५ ॥ भूय एवेत्यत्र राज्ञोयमभिप्रायः । म्रियमाणस्य मम कृत्यानि श्रवणकीर्त्तनस्मरणान्येवोक्तानि तेष च विषयाः कृष्णलीलारूपगुणाद्यास्तत्र प्रथमं मायाशक्तिमतस्तस्य सृष्ट्यादिलीला जिज्ञास्यास्ततश्च चिच्छक्तिमतो गोवर्द्धनोद्धरणाद्या इति भूय एव पुनरपि विवित्सामि । इडभाव आर्षः ॥ ६ ॥ पुरवो बह्वयश्चिन्मया जीवा अंतरंगा बहिरंगाः तटस्थाभिधानाः शक्तयो यस्य सः इति विश्वनाथः । क्रीडन्मायाशक्त्या सह दीव्यन्नात्मानं करोति महदहंकारादिरूपत्वेन सृजतीति सर्गप्रश्नः । तथा क्रीडयन्ब्रह्ममरीच्यादीन्देवयन्विकरोति आत्मानं देवतिर्यङ्नरादिरूपत्वेन सृजतीति विसर्गप्रश्नः ॥ ७ ॥ नन्विदं त्वं प्रायः सर्वं जानास्येव तत्किं पृच्छसीति तत्राह । नूनं निश्चितमेव भगवतश्चेष्टितमिदं सृष्ट्यादिचरितं कविभिश्चापि न्यायादिशास्त्रकृद्भिरपि दुर्विभाव्यमिव विभाति तैरपि परमाण्वादिद्वारा सृष्ट्यादिकथनाद्भवदभिप्रायाज्ञानाद्दुर्विभाव्यं दुर्ज्ञेयं ममाज्ञस्यात्र का कथेति भावः ॥ ८ ॥ यथैकः पुरुषरूपेण युगपत्प्रकृतेर्गुणान्बिभर्त्ति तत्रालिप्त एवेक्षणादिभिर्धारयति पालयति च । तथा जन्मभिर्ब्रह्ममरीच्यादिप्रादुर्भावैर्भूरिशो बहुरूपं क्रमशोपि वा बिभर्ति । कीदृशः कर्माणि कुर्वन् ॥ ९ ॥ ननु कविभिश्चापि दुर्विभाव्यमिदं चेदहं जानामीति तत्त्वं कथं जानासि तत्राह । यथा भगवान् कृष्णस्तद्भक्तो भवानपि तथेत्यर्थः । तत्रापि शाब्दे ब्रह्मणि वेदे परस्मिन्ब्रह्मणि कृष्णे चानुभवेन अपरे शास्त्रकर्त्तारस्तु श्रीकृष्णं नैवानुभवंतीति ते न जानन्ति 'किं विधत्ते किमाचष्टे' इत्यादिभगवदुक्तेर्भगवानेव वेदार्थं जानाति तत्कृपया तद्भक्ताश्च नान्य इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः ॥ हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥ श्रीशुक उवाच ॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ॥ गृहीतशक्तित्रितयाय देहिनामंतर्भवायानुपलक्ष्यवर्त्मने ॥१२॥ भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाऽखिलसत्त्वमूर्तये ॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥ नमोनमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनाम् ॥ निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः ॥ १४ ॥

ग्धम् । शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्ननुभवेन ॥ १० ॥ उपामंत्रितः प्रार्थितः । प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥ तदेवाह त्रयोदशभिः परस्मै । सर्वोत्तमाय । तत्र हेतुः भूयसेऽपरिमितमहिम्ने । तद्दर्शयति । सतः प्रपंचस्य उद्भवादिषु निमित्तभूता या लीला तया गृहीतं ब्रह्मादिरूपेण रजआदिशक्तित्रितयं येन तस्मै । अंतर्भवायांतर्यामिणे अत एव सर्वांतरत्वादनुपलक्ष्यं वर्त्म यस्य ॥ १२ ॥ विचित्रफलदातृत्वमनुस्मरन्प्रणमति । भूयः पुनश्च नमः सतां धर्मवर्तिनां वृजिनच्छिदे दुःखहंत्रे । असतामधर्मशीलानामसंभवायानुद्भवहेतवे । अखिलसत्त्वमूर्तये तत्तद्देवतादिरूपेण तत्तत्फलदात्र इत्यर्थः । समग्रसत्त्वमूर्तये इति वा । पुनरिति पूर्वोक्तोभयवैलक्षण्यमाह । पारमहंस्ये प्रत्यङ्निष्ठारूपे आश्रमे व्यवस्थितानां पुंसामनुमृग्यमतन्निरसनेन पुनः पुनर्मृग्यं यदात्मतत्त्वं तस्य दाशुषे दात्रे । दाश्व दाने इति धातुः ॥ १३ ॥ सात्वतां भक्तानामृषभाय पालकाय । कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य दुर्ज्ञेयायेत्यर्थः । तदेवं वैषम्यप्रतीतावपि निर्दोषत्वायाचिंत्यमैश्वर्यमाह । निरस्तं

भावः । इह चिच्छक्तिप्राधान्येन कृष्णरासाद्यवतारलीला इव मायाशक्तिप्राधान्येन पुरुषाद्यवतारलीला ब्रह्मांडनिर्माणाद्या अपि वैष्णवैः श्रव्या एव नात्र कटाक्षः कार्य इति श्रोतृवक्त्रोः परीक्षिच्छुकयोरभिप्रायो वेदितव्यः॥१०॥ हृषीकेशमिति । सर्वेंद्रियप्रवर्तकमिति । मद्वाचि स एव स्थित्वा प्रतिवदत्वित्यभिप्रायेण प्रचक्रमे इत्यर्थः इति । देवतैव गुरुरिति तन्नतिरूपं मंगलम् 'गुरुर्ब्रह्मा गुरुर्विष्णुः' इत्याद्युक्तेः । यद्वा गुरुर्व्यासो देवता परमात्मा तन्नतिरूपं वा मंगलं चकारेति भावः ॥११॥तदेवं मंगलमेव । तत्र सर्वोत्तमत्वे । तत् अपरिमितमहिमत्वम् । अत एवांतर्यामित्वादेव । अत्र विश्वनाथः—परस्मै पुरुषाय पुरुषोत्तमाय श्रीकृष्णाय नमः । 'यस्मात्क्षरमतीतोहम्' इत्यादि तदुक्तेः । पुरुषोत्तमत्वं तत्रैव नान्यत्रेति 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' इति महाकव्युक्तेश्च । प्रथमैश्वर्यमाह—भूयसे पुरुषाद्यवतारैरपरिमितमहिम्ने । तत्र पुरुषावतारलीलामाह । देहिनां ब्रह्मादीनां समष्टिव्यष्टीनामंतर्भवाय अनुपलक्ष्यं योगिभिरपि दुर्ज्ञेयं वर्त्म भक्तियोगलक्षणं यस्य तस्मै ॥ १२ ॥ इत्यर्थ इति । तत्तद्देवताभक्तरूपेणार्चयित्वा तत्तद्देवतारूपेण फलदातापि स एव 'योयो यांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।' इत्यारभ्य 'लभते च ततः कामान्मयैव विहितान्हितान्' इत्यंतश्रीमुखोक्तेः । श्लेषेण तमग्रसत्त्वमूर्तये शुद्धसत्त्वमूर्तय इति । विश्वनाथः—कृपामाधुर्यमाह । सद्वृजिनच्छिदे रामकृष्णाद्यवतारैः स्वभक्तदुःखच्छिदे असतां पापिनामभक्तराक्षसासुरादीनामपि स्वकर्तृकवधेनासम्यग्भवदुःखनिवर्तकाय व्यवस्थितानां विशेषतोवस्थितानां भक्तिमिश्रज्ञानिनां शुद्धभक्तानां चानुमृग्यो ब्रह्मानंदः प्रेमानंदश्च तस्य दात्रे । संदर्भः । सतां वेदानुवर्तिनामसतां तद्बहिर्मुखानां दैत्यादीनामप्यसंभवाय मुक्तिदाय पुंसां पुनरिति । तत्रानुमृग्यं भक्तियोगैकसाध्यं स्वचरणारविंदमेव ज्ञेयम् । तथा परमहंसानामिति—कुंतीवाक्यात् । परमहंसमहामुनीनाममलात्मनां भक्तियोगविधानार्थमिति । प्रथमे 'परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः' इति तृतीये च निरूपितत्वात्॥१३॥इत्यर्थ इति । 'दुराराध्यमसाधुभिः'इत्युक्तेरयं भावः ।विश्वनाथः ऐश्वर्यमाधुर्ययोः परिपूर्णत्वमाह । नमोनम इति । वीप्सया निरन्तरमेव नम इत्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणम् ॥ लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमोनमः ॥ १९ ॥ विचक्षणा यच्चरणोपसादनात्संगं व्युदस्योभयतोऽतरात्मनः ॥ विंदंति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमोनमः ॥१६॥ तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः ॥ क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमोनमः ॥ १७ ॥ किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः ॥ येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः ॥ १८ ॥

साम्यमतिशयश्च यस्य यदपेक्षयान्यस्य साम्यमतिशयश्च नास्ति तेन राधसा ऐश्वर्येण स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय ॥ १४ ॥ सर्वसाधनेभ्यो भक्तेः श्रैष्ठ्यमनुस्मरन्प्रणमति यत्कीर्तनमिति द्वाभ्याम् । अर्हणं पूजनम् । सुभद्रं मंगलं श्रवो यशो यस्य तस्मै ॥ १५ ॥ विचक्षणा विवेकिनो यस्य चरणयोरुपसादनादुपसत्तेर्भजनात् । अंतरात्मनो मनसः उभयत्रेह च परत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः ॥ १६ ॥ भक्तिशून्यानां सर्वसाधनवैफल्यं दर्शयन्नमति । तपस्विन इति । मनस्विनो योगिनः । सुमंगलाः सदाचाराः यस्मिंस्तपआद्यर्पणं विना सुभद्रश्रवस इत्यस्यावृत्तिर्यशःश्रवणादेः प्राधान्यज्ञापनाय ॥ १७ ॥ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह । किराताद्यो ये पापजातयः अन्ये च ये कर्मतः पापरूपास्ते यदुपाश्रया भागवतास्तदाश्रयाः संतः शुद्ध्यंति । असंभावनाशंकां परिहरति । प्रभविष्णवे प्रभवनशीलायेति ॥ १८ ॥

ते तुभ्यमिति । युष्मत्प्रयोगेण साक्षात्कारात्स्वेष्टदेवत्वं ध्वनितम् । सात्वतां यादवविशेषाणामृषभाय देवकीनंदनाय सात्वतां भक्तानां पालकायेत्यर्थस्तु पूर्वश्लोके व्यंजित एव । कुयोगिनां भक्तिहीनानां विदूरकाष्ठाय तेषां दूरे वा गुप्तो वा त्वं न च वर्तसे इत्यर्थः।स्वधामनि मथुरामंडले रंस्यते रममाणाय रमणोचितजनैः सहेत्यर्थतो गम्यम् । स्वधामनि कीदृशे ब्रह्मणि ब्रह्मस्वरूपे 'तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी' इति गोपालतापनीयश्रुतेः । अत्र राधसेऽत्यैश्वर्यं रंस्यत इति माधुर्यम् । यद्वा । स्वधामनि वृंदावने राधसा राधया सह रंस्यते क्रीडते कीदृशे स्वधामनि ब्रह्मणि सर्वोत्कृष्टे 'लोकेषु पृथिवी धन्या तत्र वृंदावनं महत्' इत्युक्तेः । किं भूतेन राधसा निरस्तौ साम्यातिशयौ तौल्याधिक्ये यस्य तेन ''न राधासदृशी काचिद्देवताभ्यधिका कुतः । अनेककोटिब्रह्मांडपतिर्यस्या वशो हरिः॥'' इत्यादिपुराणात् । सांतोपि राधधातुनिष्पन्नो राधःशब्दो राधावाचकः समानार्थप्रत्ययनिष्पन्नत्वात् ।द्विरूपकोशे अवर्णांतासंतयोः 'मनश्च मनसा सह' इत्यादिप्रयोगदर्शनात् । संदर्भस्तु । अंतरंगप्रयोजनमाह–सात्वतां यादवानामृषभाय तैः सह नानाविहारार्थमवतीर्णाय तथापि कुयोगिनां तद्बहिर्मुखयोगनिष्ठानाम् । पुनश्च यथावदेव स्थितिमेव दर्शयति । ब्रह्मणि ब्रह्मस्वरूपे। स्वधामनि वैकुंठे। रंस्यते तत्पश्चाद्रममाणाय ॥ १४ ॥ यदीक्षणं यत्प्रतिमादेरवलोकनम् । एतेन तत्प्राप्तिप्रतिबंधकं कल्मषं तत्कीर्त्तनादिभिरेव नश्यतीत्युक्तम् ॥ १९ ॥ गतक्लमा इत्युक्तेरन्ये त्वभजंतः श्रममेव लभंते । ''श्रेयःसृतिं भक्तिमुदस्य ते विभो'' इत्याद्युक्तेः । ब्रह्मरूपा चासौ गतिस्ताम् गतिर्गम्यो लोको वा॥१६॥ किं बहुना भक्तिं विना महात्मनोपि विफलसाधना विगीता एव भवंतीत्याह । तपस्विनो ज्ञानिनः दानपराः कर्मिणः यशस्विनः कर्मिविशेषा अश्वमेधादिकर्त्तारः मंत्रविदः आगमीयाः ॥ १७ ॥ शुध्यंति निष्पापा भवंति न तु वस्तुतस्तज्जातित्यागो भवति यत्तु वैष्णवे जातिबुद्धिरिति विष्णुधर्मोक्तिः सा हि तस्यादराधिक्यमतिरस्कार्यत्वं वक्ति अन्यथा नारदविदुरादौ विप्रक्षत्तरित्यादिसंबुद्धिश्रवणाद्व्यासमैत्रेयादीनामपि पातकित्वं स्यादिति । किराताद्युत्पत्तिस्तु मन्वादिभ्योऽवसेया विस्तरभियात्र नोक्ता । यद्वा किरातादयो विजयध्वजेनोक्ता ग्राह्याः शबरात्पराशर्व्यां जाताः किराताः आंध्रकाः । वैदेहात्पुष्कसीजाताः हूणाः । वैश्याद्ब्राह्मणीजातो वैदेहस्तत्पुत्राश्चान्ध्राः । अज्ञातविप्रादिभवा मधुपायिनः । ततः किरातीजाताः पुलिंदाः । निषादाच्छूद्राजातः पुल्कसः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एष आत्माऽऽत्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः ॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदताम् ॥ १९ ॥
श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः ॥ पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतां पतिः ॥ २० ॥
यदंघ्र्यनुध्यानसमाधिधौतया धियाऽनुपश्यंति हि तत्त्वमात्मनः ॥ वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदताम् ॥ २१ ॥
प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि ॥ स्वलक्षणा प्रादुरभूत्किलाऽऽस्यतः स मे ऋषीणामृषभः प्रसीदताम् ॥ २२ ॥
भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरुषः ॥ भुंक्ते गुणान्षोडश षोडशात्मकः सोऽलंकृषीष्ट भगवान्वचांसि मे ॥ २३ ॥

सर्वोपास्यत्वमनुस्मरन्प्रार्थयते । स एष आत्मवतां धीराणामात्मा आत्मत्वेनोपास्य इत्यर्थः । त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वं विवक्षितम् । गतव्यलीकैर्निष्कपटै र्भक्तैर्वितर्क्यमत्याश्चर्येण वीक्षणीयं लिंगं मूर्तिर्यस्य सः प्रसीदतु ॥ १९ ॥ सर्वपालकत्वमनुस्मरन्नाह । श्रिय इति । गतिश्च सर्वापत्सु रक्षकः ॥ २० ॥ ज्ञानप्रदत्वमनुस्म रन्नाह यदंघ्रीति द्वाभ्याम् । यस्यांघ्र्योरनुध्यानमेव समाधिस्तेन धौतया शोधितया धिया यथारुचं रुच्यनुसारेण सगुणनिर्गुणादिभेदैः । यद्वा रुक् प्रतिभा यथामतीत्यर्थः ॥ २१ ॥ किंच । पुरा कल्पादावजस्य हृदि सतीं सृष्टिविषयां स्मृतिं वितन्वता येन प्रचोदिता सती सरस्वती वेदरूपा वाक् तस्य मुखतः किल प्रादुर्भूता । स्वानि लक्ष णानि शिक्षाद्युक्तानि यस्याः सा । ऋषीणां ज्ञानप्रदानामृषभः श्रेष्ठः ॥ २२ ॥ इदानीं स्ववाचं श्रोतृजनाह्लादिनीं शृंगारकरुणादिशोभां प्रार्थयते । भूतैरिति । स मे वचांसि

ब्राह्मणाद्वैश्याजातोंबष्ठः । ब्राह्मणादंवष्ठ्यां जाता आभीराः । कंका अपि नीचजातय एव यवनान्नृपाद्वैश्यां जाता यवनाः श्मश्रुलाः । एवं खसादयः । आदिना कुरुविंदडोंबादयः । इति तीर्थः । असंभावना शंका कथं ते शुध्यंति विना तपश्चर्यादिनेत्येवं रूपा शंका ताम् प्रभविष्णवे कर्तुमकर्तुमन्यथा कर्तुं समर्थायेत्यर्थः ॥ १८ ॥ इत्यर्थ इति । आत्मैव भगवान्हरिर्न तु भिन्न इत्येवमुपास्य इति भावः । निष्कपटैर्मोक्षपर्यंतकामनाशून्यैः परमभक्तैः ॥ १९ ॥ तदेवं निजोपास्यविशेषं रहस्यत्वेनाभिव्यज्य परमप्रेमावेशेनैव व्यंजयन्नाह । श्रियः सर्वसंपदाधिष्ठात्र्याः पतिः स्वामी । अतो यज्ञानां सर्वश्रेयःसाधनानां च पतिः फलदाताऽतः प्रजानां सर्वासा मेव पतिरीश्वरः । यतो धियां पतिस्तासामंतर्यामी च ततस्ततश्च तासां ये लोका भोग्यभुवनानि तेषामपि पतिर्भोक्ता च य एव च धरापतिः कृपयावतीर्य धरापतित्वं लीलां च व्यजितवानित्यर्थः । कोसावित्यपेक्षा यामाह । पतिः पालको गतिर्नित्याश्रयश्च तत्र प्रमाणमाह । सतां तदनुभविनां पतिराश्रय इति । वस्तुतस्तु लोकपतिरित्युक्तेरेव सर्वपतित्वमायाति सर्वस्य श्र्यादेर्लोकांतःपातित्वात्तदपि पार्थक्येन पतित्ववर्णनं प्रेमावेशा देव हेत्वंतरानुपलब्धेरिति ध्येयम् ॥ २० ॥ स कृष्ण एव मे ज्ञानप्रदो भवत्विति प्रार्थनां व्यंजयति । यदंघ्रीति । चस्त्वर्थेः कवयः स्वपांडित्यबलेनैव यथारुचं स्वरुच्यनुरोधेनैवैतत्परमात्मनस्तत्त्वं स्वरूपं साकारं निराकारं वा जीवात्मस्वरूपमणुप्रमाणं सर्वगतं वा यद्वैतद्विश्वं मिथ्यैव सत्यमेव नित्यमेवेत्येवं वदंति युक्त्या प्रमाणयंति । न तु तेषां धीर्धौताऽत एवात्मनस्तत्त्वं न पश्यंतीत्यर्थः । अत्र पक्षे तु स्थाने नेति पाठयम् । यथारुचि कथनं हि प्रमाणं न भवतीति चेदाह—स्वामी यद्वेति । इत्यर्थ इति । अनंतमहिमत्वेन स्वमत्यनुसारेणैव वदंतीति भावः ॥ २१ ॥ अथ तद्वर्णनसामग्री मम स एव यथा ब्रह्मणो मुखाद्वेदं प्रवर्त्तयामास तथा मन्मुखात्स्वलीलाकथां स एव प्रवर्त्तयत्वित्यभिप्रेत्याह—किं चेति । स्वान्यसाधारणानि शिक्षाद्युक्तानि पाणिन्यादिप्रणीतशिक्षादिग्रंथप्रोक्तान्युदात्तादिस्वरस्थानाद्युपेतानि स्वरस्थानप्रयत्नादि युक्तेति यावत् । यद्वा स्वं श्रीकृष्णं लक्षयत्युपास्यत्वेन दर्शयति या सा स्वलक्षणा । तदुक्तं भगवतैव—"मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः" इति ॥ २२ ॥ अत्रांतर्यामित्वे पुरुषसमाख्यां पुरुषपदनिरुक्तिम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द्वि.
श्री. टी.
॥ १५ ॥

भा.दी.प्र.
टीका.
अ० ५

नमस्तस्मै भगवते व्यासायामिततेजसे ॥ यत्पुर्ज्ञानमयं सौम्या यन्मुखांबुरुहासवम् ॥ २४ ॥ एतदेवात्मभू राजन्नारदाय विपृच्छते ॥ वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः ॥ २५ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे वक्तृश्रद्धानिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ नारद उवाच ॥ देवदेव नमस्तेऽस्तु भूतभावन पूर्वज ॥ तद्विजानीहि यज्ज्ञानमात्मतत्त्वनिदर्शनम् ॥ १ ॥ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥

अलंकृषीष्टालंकरोतु । अन्यस्य वचसामन्येनालंकारासंभवमाशंक्य तस्यांतर्यामितामाविष्करोति । यो महद्भिर्भूतैरिमाः पुरः शरीराणि सृष्ट्वाऽमूषु पूर्ष्वंतर्यामितया शेते वसति अत्र पुरुषसमाख्यां प्रमाणयति यद्यस्मात्पूरुष इति । अत एव य एकादशेंद्रियपंचभूतरूपान्षोडशगुणान्कला भुंक्ते प्रकाशयति पालयतीति वा । तदा त्वात्मनेपदमार्षम् । अत्र हेतुः । यतः षोडशानामात्मा चेतयिता । स्वार्थे कः नत्वत्र जीवत्वमुच्यते प्रार्थनाविरोधात् ॥ २३ ॥ श्रीव्यासं नमस्करोति । नम इति । सौम्याः वैशंपायनादयो भक्ताः यस्य मुखांबुरुहे आसवो मकरंदस्तम् ॥ २४ ॥ इदानीं प्रश्नोत्तरतया ब्रह्मनारदसंवादं प्रस्तौति । एतदिति । उत्पत्तिसमय एव वेदा गर्भे यस्य । साक्षाद्धरिर्यदाह ॥ २५ ॥ इति श्रीभा० म० द्वितीयस्कंधे टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ पंचमे नारदेनाथ पृष्टः सृष्टयादि वक्त्यजः ॥ हरेर्लीलां विराट्सृष्टिं कालकर्मादिशक्तिभिः ॥ १ ॥ नारदाय विपृच्छते वेदगर्भोऽभ्यधादित्युक्तं तत्र नारदप्रश्नमाह । देवदेवेति । हे भूतभावन अत एव सर्वेषां पूर्वज अनादे । ज्ञायतेऽनेनेति ज्ञानं तत्साधनं यत्तद्विजानीहि विशेषेण ज्ञापयेत्यर्थः । कथंभूतम् आत्मतत्त्वं नितरां दृश्यते येन तत् ॥ १ ॥ उपलक्षणभूतं विश्वमेवात्मज्ञानसाधनमतस्तद्विशेषं पृच्छति यद्रूपं येन रूप्यते प्रकाश्यते । यदधिष्ठानं

अत एव पुरुषत्वादेव । पूरुष इह दीर्घत्वमौणादिकत्वात् । तदा तु पालनार्थे "भुजोऽनवने" इति सूत्रात् । अत्र षोडशकलाप्रकाशकत्वे अत्र श्लेषेण मद्वचसामपि गुणानास्वादयन्प्रसीदत्विति । तेन शरीराणि निरात्मकानि वस्त्रालंकारादियुक्तान्यपि सद्भिरस्पृश्यानि यथा तथा मद्वचांसि तद्विनाभूतानि मा भवंत्विति भावः ॥ २३ ॥ ज्ञानमयं ज्ञायंते भक्तितत्त्वमनेनेति ज्ञानं भक्तियोगस्तत्प्रधानं यत्र तज्ज्ञानमयं भागवतशास्त्रमित्यर्थः ॥ २४ ॥ यज्ज्ञानमयं पुराणम् । हरिः श्रीनारायणः । आत्मन इति द्वितीयार्थे षष्ठी आत्मानं स्वं ब्रह्माणं प्रति चतुःश्लोकीरूपेणाह एतदेव वेदगर्भो ब्रह्मा आत्मनः परमात्मनः सकाशाद्भवतीति तथाभूतः पृच्छते नारदायाभ्यधादभ्यभाषत । हे राजन्निति । वैराग्येण दीप्यमानस्त्वमेवास्य श्रवणाधिकारीति तुभ्यमहं वर्णयामीति भावः ॥२५॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे चतुर्थोऽध्यायः ॥४॥ सृष्टयादिरूपां हरेर्लीलां कालकर्मादिशक्तिभिर्विराट्सृष्टिञ्च प्रथमादिना स्थित्यादिग्रहः द्वितीयादिना स्वभावादिग्रहः ॥ (१) ॥ हे देवानामिंद्रादीनामपि देवः प्रकाशकस्त्वमसीति भावः । अतस्ते नमोस्तु भूतानि स्थावरजंगमानि भावयति सृजतीति हे तथाभूत अत एव भूतोत्पादकत्वादेव । हे पूर्वजेति । तत्साधनं ज्ञानसाधनम् । इत्यर्थ इति । धातूनामनेकार्थत्वाज्जानातेर्ज्ञापनार्थतापीति भावः ॥ १ ॥ यतो विश्वमेवात्मज्ञानसाधनमतो हेतोस्तद्विशेषं विश्वस्यैव विशेषं भेदं यद्रूपं यल्लक्षणं यत इति तृतीयार्थे तसिः । इत्यर्थ इति । स्वतो यत्स्वरूपं सतः कारणाद्वा यत्स्वरूपं यद्वेदं स्वत एव सत्त्वप्रतीतेः कारणतो वा कारणसत्तयावत्सदस्तीति भावः । तस्यास्य विश्वस्य तत्त्वतः परमार्थतः प्रभो

॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३ ॥ यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः ॥ एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥ आत्मन्भावयसे तानि न पराभावयन्स्वयम् ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥ नाहं वेद परं ह्यस्मिन्नापरं न समं विभो ॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ॥ ६ ॥ स भवानचरद्धोरं यत्तपः सुसमाहितः ॥ तेन खेदयसे नस्त्वं पराशंकां प्रयच्छसि ॥ ७ ॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ॥ विजानीहि यथैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥

यदाश्रयम् । यतो येन सृष्टं यत्संस्थं यस्मिन् लीयते यत्परं यदधीनं यच्चेति यदात्मकं स्वतः सत्कारणतो वेत्यर्थः । तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद ॥ २ ॥ न जानामीति नच वक्तव्यमित्याह । सर्वमिति । भूतं जातं भव्यं जनिष्यमाणं भवत् जायमानं तेषा प्रभुर्यतोऽतोविशिष्टेन ज्ञानेनावसितं निश्चितम् ॥ ३ ॥ आस्तामिदं आदौ तावत्त्वामेव कथयेत्याह । यतो यस्य विज्ञानम् । कस्तव विज्ञानद इत्यर्थः । यदाधारः कस्तवाश्रयः यत्परो यदधीनः यदात्मको यत्स्वरूपः । मम तु त्वमेव स्वतंत्रः परमेश्वर इति बुद्धिः।तव तपश्चरणेन तु परशंकया पृच्छामीत्याह सार्धैश्चतुर्भिः । एकोऽसहायः ॥ ४ ॥ आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्रापयन्नक्लमः श्रमरहितः यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजति तद्वत् ॥ ५ ॥ तस्मादहं त्वस्मिन्विश्वस्मिन्परमुत्तममपरमधमं समं मध्यमं च तत्रापि नाम मनुष्यादि रूपं द्विपदत्वादि गुणः शुक्लत्वादि तैर्भाव्यं साध्यं तत्रापि सदसत्स्थूलं सूक्ष्मं च किंचिदप्यन्यतो न वेद किंतु त्वत्त एव सर्वं भवतीति मन्ये ॥ ६ ॥ स तथाविधोऽपि भवांस्तपोऽचरदिति यत्तेन नोऽस्मान्खेदयसे मोहयसि यतः पराशंकाम् ईश्वरान्तराशंकाम् प्रयच्छसि । त्वत्तपो दृष्ट्वा त्वदपेक्षयाऽन्यो महानस्तीति शंका भवतीत्यर्थः ॥ ७ ॥ यथैवाहं त्वयानुशासितः शिक्षितः सन्बुद्ध्ये बुद्ध्येयं

इति त्वं मत्संदेहापाकरणसमर्थोसीति भावः ॥ २ ॥ "हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्" इति श्रुतौ भूतपदं भवद्भविष्ययोरप्युपलक्षणमित्यभिप्रायेणाह । भूतभव्येति । करस्थितामलकफलबाह्याभ्यंतरावयवज्ञानवत्सर्वं भवान् वेदेति । नन्वामलकस्य स्थूलांतरावयवप्रतीतावपि सूक्ष्मतरावयवाप्रतीतेर्दृष्टांते वैषम्यमिति चेत्तत्र श्लेषेणाह । अमलं निर्मलं च तत्कं जलं चेत्यमलकं करेऽमलकं करामलकं तद्वत् । यथा करस्थनिर्मलजलेऽतिसूक्ष्मरेखादेर्ज्ञानं भवति तथातिसूक्ष्ममपि वस्तु विश्वस्मिंस्तवाज्ञातं नास्तीति भावः ॥ ३ ॥ इदं विश्ववृत्तमास्तां तिष्ठतु आत्मानं त्वमेव त्वं ब्रूहीति । इत्यर्थ इति । आर्थिकोयमर्थ इति भावः । एव मग्रेऽपि ॥ ४ ॥ आत्मनि भावयसे न पराभावयन्निति च स्ववैभवाधिक्येपि सतीति शेषः । सूर्यादौ विद्यमाने दीपादेः पराभवदर्शनात् । अत उपादानकारणत्वमेव भवत आयाति सूर्यादौ विद्यमाने रश्म्यादेस्तददर्शनादिति भाव इति संदर्भः । भावयसे पालयसि तानि न पराभावयन्नन्यतः पराभवमप्रापयन् ॥ ५ ॥ यस्मात्त्वमेव सर्वेश्वरस्तस्माद्धेतोः तत्रापि उत्तमाधमादिरूपत्वेपि हे विभो इति अहो सर्वेश्वरो भूत्वाऽयमपि कंचन ध्यायतीति तव विभुत्वेपि संदेहोस्तीति भावः ॥ ६ ॥ तेन तपश्चारणेन ॥ ७ ॥ सर्वज्ञेति । सर्वज्ञत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितम् ॥ यदहं चोदितो धर्मे भगवद्वीर्यदर्शने ॥९॥ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः ॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥ येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् ॥ यथाऽर्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः॥११॥ तस्मै नमो भगवते वासुदेवाय धीमहि ॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुम् ॥ १२ ॥ विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ॥ विमोहिता विकत्थंते ममाहमिति दुर्धियः ॥ १३ ॥

तथा विजानीहि विशेषेण ज्ञापय ॥ ८ ॥ प्रश्नमभिनंदति । वत्स हे पुत्र तवेदं विचिकित्सितं संदेहः तत्पूर्वकः प्रश्नोऽयं सम्यगित्यर्थः । यतः कारुणिकस्य तवायं प्रश्नः । अत्र हेतुः। यद्यतो भगवद्वीर्यप्रकाशने धर्मे प्रवर्तितोऽस्मि अतस्त्वं जिज्ञासुरपि मयि कृपामेव कृतवानित्यर्थः ॥ ९ ॥ ननु त्वमेव भगवानित्युक्तं त्वया 'एकः सृजसि भूतानि' इत्यादिना । सत्यम् । यथा मामीश्वरत्वेन प्रभाषसे तदपि तव भाषणं नात्यंतमनृतं यतः कारणादेतावत्प्रभावस्य भाव एतावत्त्वं मेऽस्ति किंतु मत्तः परमीश्वरमविज्ञाय ब्रूषे अतः सादृश्यात्तवेयं भ्रांतिर्न तु बुद्धिपूर्वमनृतमित्यर्थः । यत ईश्वरान्ममैतावत्त्वं तमविज्ञायेति वान्वयः ॥ १० ॥ तर्हि कोऽसावीश्वर इत्यपेक्षायां भक्त्या नमस्कुर्वन्नेव तं कथयति त्रिभिः । येन स्वप्रकाशेन रोचितं प्रकाशितमेव प्रकाशयामि सृष्ट्याभिव्यक्तं करोमि । यथार्कादयश्चैतन्यप्रकाश्यमेव प्रकाशयंति । तथा च श्रुतिः । " न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥ " इति ॥ ११ ॥ तस्मै नमो धीमहि चिंतयेम मनसैव नमस्कुर्महे इत्यर्थः । यस्य मायया विमोहिताः संतो युष्मदादयो मां जगद्गुरुं जगत्कारणं वदंति तस्मै ॥ १२ ॥ यन्माययेति मायासंबंधोक्तेस्तस्य दुर्जयत्वोक्तेश्च तस्यापि किमस्ति संसारो

न्मम बुद्धिमपि जानास्येवेति भावः । सकलेश्वरेति । सकलजगतस्त्वमेव बुद्धिदाता सकलेश्वरत्वान्मम तु पुत्रस्य तद्दाने का वार्त्तेति भावः ॥ ८ ॥ हे वत्सेतिस्नेहाधिक्यद्योतनाय । तत्पूर्वकः संदेहपूर्वकः । इत्यर्थ इति । "प्रष्टव्या गुरवो नित्यं ज्ञातमर्थमपि स्वयम्" इत्युक्तेर्निःसंदेहार्थस्यापि प्रश्नविधेः संदिग्धस्य प्रश्नस्तु सर्वथैव शोभनो भवतीति भावः । कुतः सम्यगिति । तत्राह–यत इति । अत्र कारुणिकत्वे यतोहं परमधर्मे प्रवर्त्तितोस्मि अतो हेतोः इत्यर्थः इति । "वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि । वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥" इति श्रीदशमोक्तन्यायेन प्रश्नोत्तरदानेनाऽहमपि परमपावनो भविष्यामीति भावः । भगवद्वीर्यञ्च विश्वसृष्ट्यादिमयं तस्य दर्शने ॥९॥ अत्राशंकते । नन्विति । भोः पुत्र । इत्यर्थ इति । बुद्धिपूर्वकानृतसंभाषण एव दोषो न त्वबुद्धिपूर्वकेपि तस्य सत्यप्रायत्वादिति भावः । इत्यर्थ इति । एतावत्त्वमीश्वरोयं साक्षादिति भ्रांतिजनकवैभवं स्यात्तमज्ञात्वैवैतत्कथनोपपत्तेरिति भावः ॥ १० ॥ भगवानेव स्वप्रकाशस्तदितरत्सर्वं तत्प्रकाशितमेवेत्यत्र प्रमाणमाह--तथा चेति । तत्रात्मस्वरूपे तमात्मानं भांतं स्वतः प्रकाशमानमनुपश्चात्सर्वं सूर्यादि विभातीति श्रुतिपदार्थः । ऋक्षाण्यश्विन्यादीनि । ग्रहा भौमादयः । तारका ध्रुवागस्त्याद्याः ॥११॥ ननु जगद्गुरुर्ब्रह्मा विश्वं सृजतीति सर्वत्र ख्यातिस्तवास्ति तत्र स विस्मयः । सोत्प्रासमाह । तस्मा इति । यद्वा बुभूषुणा दुर्मतश्रवणापराधो भगवन्नमनेन परिहर्त्तव्य इत्यभिप्रेत्य वा भगवन्तं नमति–नम इति । तस्मै नमो वयं तं धीमहीति योज्यम् । अनेन पद्येन "ओं नमो भगवते वासुदेवाय नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् " इति द्वादशाक्षरी चतुर्विंशत्यक्षरी चेति द्वे विद्ये हिरण्यगर्भेण नित्यं सेव्ये इति दर्शितम् ॥ १२॥ अत्र विश्वनाथः--जगद्गुरुर्विश्वस्रष्टा त्वं भवस्येवेति तुभ्यमादरदायिनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः ॥ १४ ॥ नारायणपरा वेदा देवा नारायणांगजाः ॥
नारायणपरा लोका नारायणपरा मखाः ॥ १५ ॥ नारायणपरो योगो नारायणपरं तपः ॥ नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥
तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः ॥ सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ १७ ॥ सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः ॥
स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥

नैवेत्याह । मत्कपटमसौ जानातीति यस्य दृष्टिपथे स्थातुं विलज्जमानयैव तस्मिन्स्वकार्यमकुर्वत्याऽमुया मायया विमोहिता अस्मदादयो दुर्धियोऽविद्याऽऽवृतज्ञाना एव केवलं विकत्थंते श्लाघंते । अनेन यद्रूपमित्यस्य प्रश्नस्योत्तरमुक्तं भवति ॥ १३ ॥ तदेवं स्वस्मादन्यं परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादिनवप्रश्नानां स एवाधिष्ठानादिकं सर्वमित्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्त्वमाह । द्रव्यमिति । द्रव्यं महाभूतान्युपादानरूपाणि कर्म जन्मनिमित्तं कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवो भोक्ता वासुदेवात्परोऽधिकोऽन्योऽर्थो नास्ति कारणाव्यतिरेकात्कार्यस्य ॥१४॥ तत्प्रपंचयति द्वाभ्याम् । नारायणः परः कारणं येषां ते । नारायणः परः तात्पर्यविषयो येषामिति वा । अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरे प्रमाणं सर्वज्ञत्वादिकं चोक्तम् । देवाश्च तदंगाज्जाता अतो न तद्व्यतिरिक्ताः । लोकाः स्वर्गादयस्तदानंदांशाः मखास्तत्साधनभूताः ॥१५॥ योगः प्राणायामादिः तपस्तत्साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिस्तत्फलम् । अनेनैव सर्वं यदधीनमित्युक्तम् ॥१६॥ तर्हि त्वं किं करोषीत्यपेक्षायामाह । तस्य सृज्यमपि तेन सृष्टोहं सृजामि ईक्षया कटाक्षेण तत्र हेतवो द्रष्टुरित्यादयः ॥ १७ ॥ ननु कुतोऽयं जीवेश्वरविभागो यतस्त्वं प्रेर्यः स च प्रेरकः स्यादित्यपेक्षायां जीवेश्वरवि

संतः किं मायामोहिताः सत्यं भगवत्संबंधं विना ये आदरदायिनो ये च तेभ्य आदरग्राहिणश्च ते उभयेपि बहिर्दर्शिनो भगवतः पृष्ठदेशस्थया मायया मोह्यंत एवेत्याह—विलज्जेति । अत्र तद्विमुखत्वैव तत्पृष्ठदेशो ज्ञेयः । तद्वैमुख्ये सत्येव तस्याः प्रभावो न सांमुख्य इति अनेन प्रबंधेन भगवत्तैवेदं प्रकाश्यत इत्युत्तरमुक्तम् ॥ १३ ॥ अनेन कारणस्यैव कार्याधिष्ठानत्वात्सर्वस्य भगवानेवाधिष्ठानमित्युक्तम् ॥१४॥ तत्कारणानन्यत्वम् । "तस्यैवानंदस्य सर्वे मात्रासुपजीवंति" इति श्रुतेः । स्वर्गादिलोकानंदस्यापि भगवदानंदांशत्वमेव ॥ १९ ॥ आदिना यमनियमादिसप्तांगग्रहः "चित्तैकाग्र्यं परंतपः" इति स्मृतेः । तत्साध्यं चित्तैकाग्र्यसाध्यम् तत्फलं ज्ञानफलम् ब्रह्मापि तत्परमतत्सामान्याकारप्रकाशत्वेन तदधीनाविर्भावत्वात् । तदुक्तं श्रीमत्स्यदेवेन सत्यव्रतं प्रति । "मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नं विवृतं हृदि" इति । अनेनैव पद्यद्वयेन सर्वं वेदादिकं तदधीनमेवेत्युक्तमेवकारेण तदधिष्ठानत्वमप्युक्तम् ॥१६॥ तर्हीत्याक्षिपति—किं स्वेच्छया नहिनहि ईक्षया तस्याज्ञयैवेत्यर्थः।द्रष्टुरिति।मम तस्य साक्षित्वे ईश्वरत्वे सर्वांतर्यामित्वे कूटस्थत्वे सत्येव नान्यथेति स्वस्य जीवत्वं तस्य चेश्वरत्वं व्यंजितम् । तथा च श्रुतयः । "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा ॥ सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च" इति । "एष भूताधिपतिरेष लोकेश्वरो लोकपालः" इति । ब्रह्मादिपिपीलिकापर्यंतसर्वप्राणिबुद्धिष्वविशिष्टतयोपलभ्यमानः सर्वप्राणिबुद्धिस्थो यदा तदा कूटस्थ इत्युच्यते इति च॥१७॥ अत्राक्षिपति नन्विति—निर्गुणस्य सत्त्वादिगुणास्पृष्टस्यापि त्रयो गुणा भवन्ति केन प्रकारेणेत्यपेक्षायामाह । विभोर्मायया स्थित्याद्यर्थं गृहीता इति तच्छक्तिगुणत्वेन तद्गुणत्वमित्यर्थः । तत्र मायाया नित्यमेव तद्गुणरूपत्वेपि गृहीता इति प्रयोगो नित्यनरविग्रहत्वेपि कृष्णस्य "तस्येच्छयात्तवपुषः" इतिवत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥ बध्नंति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥ स एष भगवाँल्लिंगैस्त्रिभिरेभिरधोक्षजः ॥ स्वल
क्षितगतिर्ब्रह्मन्सर्वेषां मम चेश्वरः ॥ २० ॥ कालं कर्म स्वभावं च मायेशो मायया स्वया ॥ आत्मन्यदृच्छया प्रातं विबुभूषुरुपाददे ॥ २१ ॥
कालाद्गुणव्यतिकरः परिणामः स्वभावतः ॥ कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥ २२ ॥ महतस्तु विकुर्वाणाद्रजःसत्त्वोपबृंहितात् ॥ तमः
प्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥ २३ ॥ सोऽहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा ॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥ द्रव्यशक्तिः
क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥ २४ ॥

भागहेतुमाह त्रिभिः । सत्त्वमिति । निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नंतीत्युत्तरेणान्वयः । कथंभूताः । तेनैव स्वातंत्र्येण स्थित्याद्यर्थं मायया गृहीताः ॥ १८ ॥ वस्तुतः
सर्वदा मुक्तमपि मायिनं मायाविषयं पुरुषं जीवं बध्नंति । क्व । कार्यमधिभूतं कारणमध्यात्मं कर्ताधिदैवतं तेषां भावस्तत्त्वं तस्मिन् । द्रव्यं महाभूतानि ज्ञानशब्देन देवताः
क्रिया इंद्रियाणि तदाश्रयास्तेषां कारणभूतास्तत्तदभिमानेन बध्नंति ॥ १९ ॥ अतः स एष वश्यमाय एभिर्गुणैर्लिंगैर्जीवानामावरकैरुपाधिभिः सुष्ठुलक्षिता गतिस्तत्त्वं यस्य
सः स्वैर्भक्तैरेव लक्षिता गतिस्तत्त्वं यस्येति वा ॥ २० ॥ तस्य सृष्टिप्रकारमाह । कालमिति । कालं क्षोभकं सृष्टिकाल इति व्यवहारहेतुम् । कर्म जीवादृष्टम् । स्वभावं तत्प
रिणामहेतुम् । आत्मन्नात्मनि यदृच्छया स्वैरितया प्राप्तम् । विबुभूषुर्विविधं भवितुमिच्छन् ॥ २१ ॥ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपांतरा
पत्तिः महतो महत्तत्त्वस्य पुरुष ईश्वरस्तेनाधिष्ठितत्वं त्रयाणां विशेषणम् ॥ २२ ॥ महत्तत्त्वाद्विकुर्वाणाद्विक्रियमाणात् । तस्य च क्रियाज्ञानशक्तित्वात्त्रिगुणत्वेऽपि रजः
सत्त्वाभ्यामुपबृंहितत्वम् अहंकारस्य त्वावरकत्वात्तमःप्रधानत्वम् । अत एवाहंकारकार्येषु तामसमाकाशादिकं बहु राजसं सात्त्विकं चाल्पम् एवं तदुपाधिकेषु जीवेष्वपि तथैव
तामसयोन्याधिक्यम् । द्रव्यज्ञानक्रियात्मको महाभूताधिदैवतेन्द्रियात्मकः ॥ २३ ॥ स च विकुर्वन्रूपांतरं गच्छन् । त्रैविध्यमेवाह । वैकारिकः सात्त्विकस्तैजसो राजसः यद्भिदा

प्राकृतलोकोक्त्यनुकारेण ज्ञेयः ॥ १८ ॥ नित्यमुक्तं बध्नंतीति विरुद्धमुक्तं तत्राह—मायिनमिति । मायात्र मायाकृतो मोह उच्यते स चानादित एवेशविमुखस्य तस्य मायापारवश्यादेव तेन गुणावेश एव बंधः साक्षाद्बं
धाभावान्नित्यमुक्तत्वमपि युज्यत इति भावः । चित्सुखस्तु—द्रव्यं स्थलं कार्यं ज्ञानमंतःकरणं प्रमातृक्रिया इंद्रियाणि तदाश्रयाः संतो देहाध्यासेन कार्यत्वे इंद्रियाध्यासेन कारणत्वेंतःकरणाध्यासेन कर्तृत्वे निबध्नंति
निर्विकारस्यैव चितो मायाश्रयत्वेनेश्वरत्वं तथा तद्विषयत्वेनाध्यासाज्जीवत्वमिति भावः ॥ १९॥ एभिर्लिंगैः करणैः स्वैर्ज्ञानिभक्तैः कर्तृभिर्लक्षिता गतिर्यस्य । 'गुणप्रकाशैरनुमीयते भवान्' इत्याद्युक्तेः ॥२०॥ स्वमायाशक्तैर्गुणैर्ज
गत्कर्तृत्वं भगवतो वदन् यतः सृष्टमित्यस्योत्तरं प्रपंचयति—कालमिति । कालमात्मन्स्वास्मिन्प्राप्तं लीनत्वेन स्थितं स्वप्रयोजनाभावेपि स्वस्मिन्स्वमायाकल्पितं यदृच्छया स्वैरितयोपाददे सृष्ट्यर्थमंगीकृतवान् । तच्च न
स्वतः किन्तु माययैव विबुभूषुः ॥ २१ ॥ कालादीनां प्रयोजनमाह । कालादिति । अधिष्ठितत्वं तदिच्छया प्रवृत्तत्वम् ॥ २२ ॥ तमःप्रधानः पदार्थविशेषः । यद्वा य इत्यध्याहार्यं परेण स इत्यनेन योजयितव्य
त्वात् । तस्य च महत्तत्त्वस्य च अत एव तमःप्रधानत्वादेव तदुपाधिकेषु तमउपाधिकेषु ॥ २३ ॥ शक्तिरुत्पादनसामर्थ्यम् । हे प्रभो इति । ब्रह्मकर्तृका नारदं प्रति संबुद्धिस्तु त्वमेवात्र प्रभवसि विरक्तत्वान्न हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामसादपि भूतादेर्विकुर्वाणादभून्नभः ॥ तस्य मात्रा गुणः शब्दो लिंगं यद्द्रष्टृदृश्ययोः ॥ २५ ॥ नभसोऽथ विकुर्वाणादभूत्स्पर्शगुणोऽनिलः ॥ परान्वयाच्छब्दवांश्च प्राण ओजः सहो बलम् ॥ २६ ॥ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यत तेजो वै रूपवत्स्पर्शशब्दवत् ॥ ॥ २७ ॥ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकम् ॥ रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् ॥२८ ॥ विशेषस्तु विकुर्वाणादंभसो गंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ २९ ॥ वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ॥३०॥

यस्य भेदः द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि। द्रव्ये महाभूताख्ये शक्तिर्यस्य क्रियास्विंद्रियेषु शक्तिर्यस्य ज्ञानेषु देवेषु शक्तिर्यस्येति विग्रहः । हे प्रभो बोद्धुं शक्त ॥ २४ ॥ भूतादेरिति तामसस्य विशेषणम् । ननु तामसात्प्रथमं शब्दो भवतीति प्रसिद्धम् सत्यम् । स तु तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्चासाधारणो व्यावर्तको धर्मः शब्दद्वारा नभ उत्पद्यत इत्यर्थः । एवमेव स्पर्शादिष्वपि द्रष्टव्यम् । शब्दस्य लक्षणं लिंगमिति । कुड्याद्यंतरितेन केनचिद्बृंहितेर्गजो गज इत्युक्ते यो गजद्रष्टा यश्च तेन दृश्यो गजस्तयोर्लिंगं बोधकम् । लिंगविशेषणत्वाच्छब्दस्य क्लीबत्वम् ॥ २५ ॥ परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुस्तस्यैव लक्षणं प्राणो देहधारणम् । ओजः सहोबलानींद्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः ॥ २६ ॥ उदपद्यत उत्पन्नं स्वभावतो विकुर्वाणात्स्वयं रूपवत्तेजो वायुनभसोः कारणभूतयोरन्वयात्स्पर्शवच्छब्दवच्च । एवमंभसः पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यम् ॥ २७ ॥ घोषः शब्दः ॥ २८ ॥ विशेषः पृथ्वी । पृथिव्याश्च परान्वयाधिक्याद्गुणाधिक्यम् ॥ २९ ॥ मनःशब्देनैव तदधिष्ठाता चंद्रोऽपि द्रष्टव्यः । अन्ये च दश देवा वैकारिकाः सात्त्विकाहंकारकार्याः । तानाह । दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च एते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः । वह्निश्च इंद्रश्च उपेंद्रश्च मित्रश्च कश्च प्रजापतिः एते पंच वाक्पाणिपादपायूपस्थानामधिष्ठातारः ॥ ३० ॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः

गृहस्थाः प्रायस्तत्त्वविचारे प्रभवंतीत्यभिप्राया बोध्या । अत्र साम्यावस्थं गुणत्रयमेव प्रधानं तस्य कालेन सत्त्वांशस्योद्रेको महत्तत्त्वं रजोंशस्योद्रेको महत्तत्त्वभेदः सूत्रतत्त्वम् । तमोंशस्योद्रेकोहंकारतत्त्वम् अतः अहंकार कार्येषु तामसाधिक्यमस्तीत्युक्तं स्वामिचरणैः । करणं कारः कारकचेष्टाविक्षेप इति यावत् । विगतः कारो विक्षेपो यस्मात्तच्छांतस्वभावं सत्त्वं विकारस्तेन चरति प्रवर्त्तत इति वैकारिकः तेजःक्षोभकत्वाद्रजस्तत्र भवस्तैजसः । तामसस्तु स्पष्टार्थः किन्तु रजस एव विकारहेतुत्वात्सत्त्वे तमसि कार्योत्पत्तये तदंशसमवायो ज्ञेयः ॥ २४ ॥ अत्राक्षिपति । नन्विति । इत्यर्थ इति । शब्दादीनामाकाशादिसूक्ष्मरूपत्वेन कारणत्वं सत्येवाकाशे शब्दानुभवात्कार्यत्वमपीति भावः । विश्वनाथस्तुपुरावृत्तेषु परोक्षोपि यो वसुदेवदशरथादिर्द्रष्टा यश्च तेन दृश्यः कृष्णरामादिस्तयोर्द्वयोरपि यल्लिंगं य एवशब्दो ज्ञापक इत्याह ॥ २५ ॥ इत्यर्थ इति । प्राणस्य देहधारणे ओजआदीनां च कारणे लक्षणा कार्यार्थानुपपत्त्येति भावः । यद्वा प्राणादिरूपोऽनिल इत्यर्थः ॥ २६ ॥ २७॥२८॥ विशेषेण शेषाः स्वगुणगंधेतराः सर्वभूतगुणाः शब्दादयोपि यत्र सविशेषो विशिष्यते सर्वभूतगुणधारणेनोत्कर्षं प्राप्नोतीति वा विशेषः ॥ २९ ॥ वैकारिकात्सात्त्विकाहंकारात् ॥ ३० ॥ इत्यर्थ इति । अत्र तामसाहंकारकार्योप्यनिलः प्राणरू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिः प्राणस्तु तैजसौ ॥ श्रोत्रं त्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः॥३१॥ यदैतेऽसंगता भावा भूतेंद्रियमनोगुणाः॥ यदाऽऽयतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ ३२ ॥ तदा संहत्य चान्योऽन्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्व मुपादाय चोभयं ससृजुर्ह्यदः ॥३३॥ वर्षपूगसहस्रांते तदंडमुदकेशयम् ॥ कालकर्मस्वभावस्थो जीवो जीवमजीवयत् ॥ ३४॥ स एष पुरुषस्तस्मा दंडं निर्भिद्य निर्गतः ॥ सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवान् ॥३५॥ यस्येहावयवैर्लोकान्कल्पयंति मनीषिणः ॥ कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः ॥३६॥ पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ॥ ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ॥ ३७ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ हृदा स्वर्लोक उरसा महर्लोको महात्मनः ॥ ३८ ॥ ग्रीवायां जनलोकश्च तपोलोकः स्तनद्वयात् ॥ मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः॥ ३९ ॥

प्राणश्च तैजसाहंकारकार्यौ अतो ज्ञानक्रियाविशेषरूपाणींद्रियाण्यपि तैजसादभवन्नित्यर्थः । तान्याह । श्रोत्रमिति । दोः पाणिः मेढ्रमुपस्थः । क्रमस्त्वत्र न विवक्षितः ॥३१॥ एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह । यदा एते असंगता अमिलिता आसन् अत एव यदा आयतनस्य शरीरस्य निर्माणे न शेकुः ॥ ३२ ॥ तदा सदसत्त्वं प्रधानगुणभाव मुपादाय स्वीकृत्य उभयं समष्टिव्यष्ट्यात्मकं शरीरम् ॥ ३३ ॥ कालकर्मस्वभावानाधिष्ठाय स्थितो जीवयतीति जीवः परमात्माऽजीवमचेतनमजीवयच्चेतयति स्म ॥ ३४ ॥ निर्भिद्य पृथक्कृत्य स्थित इत्यर्थः ॥ ३५ ॥ तदवयवैर्लोकरचनामाह । यस्येति । कटिरित्यूरुमूलयोः पश्चाद्भागः जघनं तु पुरोभागः अधः सप्तलोकानतलादीन् । ऊर्ध्वं भूरा दीन्सप्त ॥ ३६ ॥ वर्णानां तत उत्पत्तिं दर्शयति । पुरुषस्येति । ब्रह्म ब्राह्मणो मुखमिति कार्यकारणयोरभेदविवक्षयोक्तम् । बाहव इति च क्षत्रं क्षत्रियः ॥ ३७ ॥ इदानी मुपासनार्थं लोककल्पनाभेदान्दर्शयन्सप्तलोकपक्षमाह द्वाभ्याम् । भूर्लोकः पातालमारभ्य पद्भ्यां कटिपर्यंताभ्याम् ॥ ३८ ॥ स्तनद्वयादित्युपासनार्थत्वादूर्ध्वाधोभाववैपरीत्यं

पेण तैजसाहंकारकार्योपि भवतीति भावः ॥ ३१ ॥ असंगता अमिलिताः ॥ ३२ ॥ सदसत्त्वं मुख्यगौणत्वं शरीरम् ब्रह्मांडाख्यं समष्टिः प्रतिजीवं व्यष्टिः भगवतस्तत्त्ववर्गप्रविष्टभगवदंशप्रथमपुरुषस्य शक्त्या संह ननकारिण्या चोदिताः यद्वा न्यूनाधिकभावमादाय अर्द्धमर्द्धमाकाशादेरात्मीयभागोऽर्द्धेर्द्धे त्वन्यभूतचतुष्टयाष्टमाष्टमभागमादायेति पञ्चीकरणं सूचितम् ॥ ३३ ॥ वर्षपूगैर्वर्षसमूहैर्यत्सहस्रं तदंते सहस्रवर्षांते इत्यर्थः । जीवो हिरण्यगर्भांतर्यामी पुरुषः जीवयतीति व्युत्पत्तेः । अजीवमनभिव्यक्तजीवत्वादचेतनं तदंडम् ॥ ३४ ॥ स एव हिरण्यगर्भांतर्यामी पुरुषस्तस्मादिति ल्यब्लोपे पञ्चमी । तं हिरण्यगर्भं प्रविश्य स्थितोप्यंडं निर्भिद्य निर्गतस्त द्वहिः स्थित इति भावः। इत्यर्थ इति। कीदृशः सन्नित्यपेक्षायां कारणार्णवस्थं तस्य स्वीयस्वरूपमाह । सहस्रेति । 'सहस्रशीर्षा' इति श्रुत्यंतरात् ॥ ३५ ॥ इह ब्रह्मांडाभ्यंतरे यस्य गुणमयरूपस्यावयवैर्लोकान्कल्पयंति स लोकमयः पुमान् विराट् पुरुष इति षष्ठश्लोकस्थेनान्वयः । कटिरिति ऊरुमूलयोः पश्चाद्भागो जघनं पुरोभागः ॥ ३६ ॥ "ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः" इति श्रुतेरभेद एवेति ॥ ३७ ॥ ३८ ॥ सति गत्यंतरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः ॥ जानुभ्यां सुतलं शुद्धं जंघाभ्यां तु तलातलम् ॥ ४० ॥ महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम् ॥ पातालं पादतलत इति लोकमयः पुमान् ॥ ४१ ॥ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः ॥ स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥ ४२ ॥ इति श्रीभा० म० द्विती० जननिरूपणं नाम पंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ वाचां वह्नेर्मुखं क्षेत्रं छंदसां सप्त धातवः ॥ हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च ॥ १ ॥ सर्वासूनां च वायोश्च तन्नासे परमायने ॥ अश्विनोरौषधीनां च घ्राणो मोदप्रमोदयोः ॥ २ ॥

न दोषः । यद्वा । स्तनच्छ्ऽद्वं कुर्वयदोष्ठद्वयं तस्मादित्यर्थः । ब्रह्मलोको वैकुंठाख्यः स तु सनातनो नित्यः । न तु सृज्यप्रपंचांतर्वर्तीत्यर्थः ॥ ३९ ॥ इदानीं चतुर्दशलोकपक्षं दर्शयति । तत्र जघनादिभिर्भूरादयः पूर्वोक्ता एव सप्त । कट्यादिभिरधः सप्त लोकानाह तत्कट्यामिति द्वाभ्याम् । शुद्धं हरिभक्तनिवासत्वात् ॥ ४० ॥ ४१ ॥ त्रिलोकपक्षमाह । भूर्लोकः पातालादिसहितः॥ ४२॥ इति श्रीभा० म० द्वितीयस्कंधे टीकायां पंचमोऽध्यायः॥५॥छ॥ षष्ठे विराड्विभूतिश्च प्रोक्ताध्यात्मादिभेदतः। दृढीकृतं च पूर्वोक्तं सर्वं पुरुषसूक्ततः॥ १॥ इदानीं वैराजस्य विभूतिः सप्रपंचमनुवर्ण्यते। वाचामस्मदादिवागिंद्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य मुखं क्षेत्रमुत्पत्तिस्थानम्। छंदसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवस्त्वगादयः क्षेत्रम्। हव्यं देवानामन्नं कव्यं पितॄणाम् अमृतं तदुभयशेषो मनुष्याणां तेषामन्नानां तथा सर्वरसस्य मधुरादेः षड्विधस्य चकारादस्मदादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य चैतस्य जिह्वा क्षेत्रमुत्पत्तिस्थानम्। एवं सर्वत्रानुक्तमुन्नेयम् ॥ १ ॥ सर्वासूनामस्मदादिप्राणानां तस्य नासे नासारंध्रे परमायने उत्तम

वैपरीत्यं दोषायेति । तत्राह । यद्वेति । इत्यर्थ इति । अंडमध्यवर्त्तित्वेपि भगवानिव नित्य इति भावः । ब्रह्मणो भगवतो लोको ब्रह्मरूपो वा लोक इति ॥ ३९ ॥ तत्र चतुर्दशलोकपक्षे हरिभक्ताः प्रह्लादबल्यादयस्तेषां निवासत्वात् । यत्रयत्र च मद्भक्ताः स देशः श्रेयसां पदमित्युक्तत्वात् ॥ ४० ॥ स्वर्लोकोऽप्यत्र ब्रह्मलोकपर्य्यन्तो ज्ञेयः ॥ ४१ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे पंचमोऽध्यायः ॥ ५ ॥ पुरुषसूक्तत इति । पुरुषसूक्तं 'सहस्रशीर्षा' इत्यादिषोडशमंत्रात्मको वेदभागस्तद्व्याख्यानरूपत्वादस्याध्यायस्य व्याख्येयव्याख्यानयोरभेदोक्तिरौपचारिक्येव ॥ (१) ॥ एवं मायाशक्तिसहितात्परमेश्वरात्समष्टिविराडजायतेति प्रतिपादितम् । तत्र "भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि । सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः" इत्यक्रूरोक्तेः । परमेश्वरस्य कस्मात्कस्मादंगाद्विराजः किंकिमंगमभूदित्यपेक्षायामाह— वाचामिति । सप्तमश्लोकस्थेन हरेरित्यनेन मुखमित्यादेः संबंधः । मायिकाहंकारकार्यभूता अप्यमी वाग्वह्न्यादयः सच्चिदानंदमयस्य भगवतो मुखाद्यंगानां विभूतिरूपत्वात्तेभ्यो मुखादिभ्य एवामी उत्पद्यंते इत्युच्यते मायायास्तच्छक्तित्वाच्छक्तिशक्तिमतोरभेदाच्छक्तेः कार्यं शक्तिमतोपि भवतीति न्यायात् । यथाग्निशक्तिर्दाहस्तेन दग्धोऽग्निदग्ध इत्युच्यते तद्वदत्रापीति । वैकुंठस्था वाग्वह्न्यादयस्तत्तदंशभूताश्चिन्मया नित्या एव तेषां चिद्विलासत्वात् । जगद्वर्त्तिनस्त्वमी तत्तद्विभूतयो मायिका अनित्या एवेति व्यवस्थितिः । एतस्य हरेः ॥ १ ॥ वायोर्मुख्यवायोः घ्राण इति पुंस्त्वमार्षम् । 'क्लीबे घ्राणं गंधवहो घोणा नासा च नासिका" इत्यमरः ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपाणां तेजसां चक्षुर्दिवः सूर्यस्य चाक्षिणी ॥ कर्णौ दिशां च तीर्थानां श्रोत्रमाकाशशब्दयोः ॥ तद्गात्रं वस्तुसाराणां सौभगस्य च भाजनम् ॥३॥
त्वगस्य स्पर्शवायोश्च सर्वमेधस्य चैव हि ॥ रोमाण्युद्भिज्जजातीनां यैर्वा यज्ञस्तु संभृतः ॥ ४ ॥ केशश्मश्रुनखान्यस्य शिलालोहाभ्रविद्युताम् ॥
बाहवो लोकपालानां प्रायशः क्षेमकर्मणाम् ॥ ५ ॥ विक्रमो भूर्भुवःस्वश्च क्षेमस्य शरणस्य च ॥ सर्वे कामवरस्यापि हरेश्चरण आस्पदम् ॥ ६ ॥
अपां वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः ॥ पुंसः शिश्न उपस्थस्तु प्रजात्यानंदनिर्वृतेः ॥ ७ ॥ पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद ॥
हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदः स्मृतः ॥ ८ ॥ पराभूतेरधर्मस्य तमसश्चापि पश्चिमः ॥ नाड्यो नदनदीनां तु गोत्राणामस्थिसंहतिः ॥ ९ ॥

क्षेत्रे । मोदप्रमोदयोश्च सामान्यविशेषगंधयोर्घ्राणो घ्राणेंद्रियं परमायनम् ॥२॥ रूपाणां तेजसां रूपप्रकाशकानां चक्षुरिंद्रियम् । अक्षिणी नेत्रगोलके सर्वत्र पष्ठ्यंतानां प्रथमांतं क्षेत्रं द्रष्टव्यम् । कर्णौ तस्य श्रोत्राधिष्ठाने श्रोत्रमिंद्रियं तस्य गात्रं शरीरं वस्तूनां ये सारांशास्तेषां भाजनं स्थानम् ॥ ३ ॥अस्य त्वक् स्पर्शस्य वायोश्चेत्यर्थः । सर्वस्य मेधस्य यज्ञस्य उद्भिज्जजातीनां सर्ववृक्षाणाम् । यैर्वृक्षैर्यज्ञः सम्यक् साधितस्तेषामेव वा ॥ ४ ॥ केशा मेघानां क्षेत्रं पूर्वं तथोक्तेः श्मश्रूणि विद्युतां पादकरनखानि शिलालोहाना मिति सादृश्यादूह्यम् क्षेमकर्मणां पालनकर्तॄणाम् ॥ ५ ॥ विक्रमः पादन्यासो भूरादिलोकानामास्पदमाश्रयः । भूरादिशब्दानामव्ययत्वात्षष्ठ्या लुक् । क्षेमो लब्धरक्षणं शरणं भयाद्रक्षणम् । सर्वेषां कामानां वरस्य वरणस्यापि हरेरंघ्रिरास्पदम् ॥ ६ ॥ वीर्यस्य शुक्रस्य शिश्नोऽधिष्ठानं उपस्थस्त्विंद्रियं प्रजापत्यानंदः संतानार्थः संभोगस्तेन या निर्वृतिस्तापहानिस्तस्याः ॥ ७ ॥ परिमोक्षस्य मलत्यागस्य पायुरिंद्रियं गुदस्थानम् । निर्ऋतेरलक्ष्म्याः ॥ ८ ॥ तमसोऽज्ञानस्य पश्चिमः पृष्ठभागः । गोत्राणां गिरीणाम

तीर्थानां पुष्करादीनामागमानां च ''तीर्थं मंत्राद्युपाध्यायशास्त्रेष्वंभसि पावने'' इत्यभिधानात् ॥ ३ ॥ इत्यर्थ इति । स्पर्शेण सहितो वायुः स्पर्शवायुस्तस्येति समासः कार्यः । आर्षत्वाश्रयणेन वलोपे तु गौरवमेवेति भावः । त्वगिन्द्रियाधिष्ठातृवायुरत्र ज्ञेयः । पूर्वं तु सामान्यवायुरुक्त इत्यपौनरुक्त्यम् । वृक्षैः पालाशादिभिर्जुह्वादिपात्रनिर्माणेन यज्ञसंसिद्धेः तेषामेव यज्ञसाधकानामेव वृक्षाणां क्षेत्रं नान्येषामित्यर्थः । अन्यवृक्षाणामुत्पत्तिस्तेभ्य एव वर्णसंकरन्यायेन बोध्या । यद्वा । ''याज्ञिका रोममूलस्था रोमांतस्थाश्च तत्परे''इत्यादि विजयध्वजोक्तेः । यैरुद्भिज्जजातीयैर्यज्ञः संभृतस्तेषां रोममूलत उत्पत्तिस्तदितरसर्ववृक्षाणां रोमप्रांतभागत इति ध्येयम् । वाशब्दस्य व्यवस्थार्थकत्वादिति पूर्वं तथोक्तेः । 'ईशस्य केशान्विदुरंबुवाहान्' इत्युक्तेः । क्षेमकर्मणां सर्वहितकर्तॄणाम् ॥४ ॥ यद्वा शरणं मोक्षः । 'मोक्षः शांतिश्च शरणं निर्वाणं निर्वृतिस्तथा' इत्यभिधानात् । 'भेजे खगेंद्रध्वजपादमूलम् ' इत्युक्तेर्मोक्षस्यापि पादमूलमेव क्षेत्रम् ॥ ५ ॥ ६ ॥ 'उपस्थो हि सर्वेषामानंदानामवधिः' इति श्रुतेः ॥ ७ ॥ नारदेति । एतत्कथनं मंदमतीनां सुबोधार्थमेव त्वं त्वन्येषामपि नारमज्ञानं द्यसीति भावः अत्र यद्यपि 'वह्नींद्रोपेंद्रमित्रकाः' इति क्रमप्राप्तेर्मित्रस्यैवाधिष्ठातृदेवत्वं लभ्यते तथापि 'गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट्' इति वक्ष्यमाणवाक्यप्रामाण्येन मृत्युरेवाधिष्ठातृत्वेन विवक्षितः । पायुर्यमस्य मित्रस्येत्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अव्यक्तरससिंधूनां भूतानां निधनस्य च ॥ उदरं विदितं पुंसो हृदयं मनसः पदम् ॥ १० ॥ धर्मस्य मम तुभ्यं च कुमाराणां भवस्य च ॥ विज्ञानस्य च सत्त्वस्य परस्यात्मा परायणम् ॥ ११ ॥ अहं भवान्भवश्चैव त इमे मुनयोऽग्रजाः ॥ सुरासुरनरा नागाः खगा मृगसरीसृपाः ॥ ॥ १२ ॥ गंधर्वाप्सरसो यक्षा रक्षोभूतगणोरगाः ॥ पशवः पितरः सिद्धा विद्याध्राश्चारणा द्रुमाः ॥ १३ ॥ अन्ये च विविधा जीवा जलस्थलनभौकसः ॥ ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः ॥ १४ ॥ सर्वं पुरुष एवेदं भूतं भव्यं भवच्च यत् ॥ तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥ १५ ॥ स्वधिष्ण्यं प्रतपन्प्राणो बहिश्च प्रतपत्यसौ ॥ एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान् ॥ १६ ॥

स्थिसंघातः ॥ ९ ॥ अव्यक्तं प्रधानं रसोऽन्नादिसारः सिंधवः समुद्रास्तेषां निधनस्य लयस्य उदरं पदं स्थानं विदितं ज्ञानिभिः । मनसोऽस्मदादिलिंगशरीरस्य ॥ १० ॥ तुभ्यं तव कुमाराणां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं परमयनम् ॥ ११ ॥ एवं तावत्परमेश्वराज्जातं विश्वं ततो न भिन्नम् । यथा कुंडलं सुवर्णान्न पृथक् । स तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इत्यर्थादुक्तम् । एतदेव पुरुषसूक्तार्थकथनेन द्रढयति । तत्र सहस्रशीर्षेत्यर्धर्चस्य ब्राह्मणोऽस्य मुखमासीदित्यादेश्च ऋक्त्रयस्यार्थः पूर्वाध्याय एव दर्शितः । पुरुष एवेद ७ सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्धैस्त्रिभिः । ते अग्रजा इमे सनकादयो मरीच्यादयश्च । नागा गजाः ॥ १२ ॥ १३ ॥ जलं च स्थलंच नभश्चौकांसि येषां ते । नभौकस इति संधिरार्षः । ऋक्षाणि अश्विन्यादीनि केतवो धूमकेतुप्रभृतय औत्पातिकाः ॥ १४ ॥ सर्वं पुरुष एव न ततः पृथगित्यर्थः । प्रपंचेन तस्यापरिच्छेदं वक्तुं स भूमिमित्यस्यार्थमाह । तत्पदं विभक्तिव्यत्ययेन व्याचष्टे । तेनेति । तेन पुरुषेण विश्वमिति भूमिपदस्यार्थः । वितस्तिमिति दशांगुलपदस्य अधीत्यतिशब्दस्य आवृतमिति वृत्वेत्यस्य स च वितस्तिमधिकं व्याप्य तिष्ठतीत्याधिक्यमात्रं विवक्षितं न तु परिमाणम् । अनुपयोगादपरिच्छिन्नत्वाच्च ॥ १५ ॥ एतत् सदृष्टांतमाह । असौ प्राण आदित्यः । "असौ वा आदित्यः प्राणः" इति श्रुतेः । स्वधिष्ण्यं मंडलं प्रकाशयन्यथा बहिश्च प्रकाशयति एवं विराड्देहं प्रकाशयन्न

तदुपकारकत्वमेवाभिप्रेतम् । अधिष्ठातुर्मित्रस्य पायुरिंद्रियं क्षेत्रमिति व्याख्यानं तु प्रक्रमभंगापत्तेरुपेक्षितम् । पराभूतेः पराभवस्य ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ 'नभश्च नभसा सार्द्धम्' इति द्विरूपकोशाद दंतोपि नभशब्दोस्तीति ज्ञेयम् ॥ १३ ॥ १४ ॥ संदर्भस्तु—दश दशगुणिता अंगुलिप्रमाणदेशा यस्तिंस्तत् दशोत्तरावरणकुलं तदभिप्रायेणात्यल्पत्वाद्दशांगुलशब्देन निर्देशः वितस्तिशब्दोपि तदभिप्रायकः । तदतिक्रम्य तिष्ठतीत्यर्थः ॥ १५ ॥ विराजं प्रतपन् विराट्प्रकाशत्वेन प्रस्तूयमानः पुमान् श्रीभगवत्तत्त्वमप्येवांतरंगं त्रिपाद्विभूतिरूपं बहिर्बहिरंगं पादविभूतिरूपं प्रतपति तद्विभूतयः । पाद्मोत्तरखंडे—"त्रिपाद्विभूतेर्लोकास्तु असंख्याः परिकीर्त्तिताः ॥ शुद्धसत्त्वमयाः सर्वे ब्रह्मानंदसुखाह्वयाः ॥ सर्वे नित्या निर्विकारा हेयरागविवर्जिताः । सर्वे हिरण्मयाः शुद्धाः कोटिसूर्यसमप्रभाः । सर्ववेदमया दिव्याः कामक्रोधविवर्जिताः । नारायणपदांभोजभक्ताकरसुसेविताः । निरंतरं सामगानपरिपूर्णसुखं श्रिताः । सर्वे पंचोपनिषदस्वरूपा वेदवर्चसः" इत्यादिना तत्र त्रिपाद्विभूतिशब्देन प्रपंचातीतलोकोऽभिधीयते पादविभूतिशब्देन तु प्रपञ्च इति यथोक्तं तत्रैव "त्रिपाद्व्याप्तिः परे धाम्नि पादस्येहाभवत्पुनः । त्रिपाद्विभूतिर्नित्यास्यादनित्यं पादमैश्वरम् ॥ नित्यं तद्रूपमीशस्य परे धाम्नि स्थितं शुभम् । अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितम् ॥ नित्यं संभोग्यमीश्वर्या श्रिया भूम्या च संवृतम्" इति । अत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ॥ महिमैष ततो ब्रह्मन्पुरुषस्य दुरत्ययः ॥ १७ ॥
पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः ॥ अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु ॥ १८ ॥

ब्रह्मांडमंतर्बहिश्च प्रकाशयति ॥ १६ ॥ नित्यमुक्तत्वं दर्शयितुमुतामृतत्वस्येत्यस्यार्थमाह । स इति । अभयस्येति मंत्रगतामृतपदव्याख्या । अन्नेनेतिपदं विभक्तिव्यत्ययेन व्याचष्टे । मर्त्यं मरणधर्मकमन्नं कर्मफलं यस्मादत्यगादतिक्रांतवान् । अतो न केवलं सर्वात्मकः किंतु अमृतत्वस्य निजानंदस्यापीश्वर इत्यर्थः । ननु प्रपंचात्मकस्य कुतो नित्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह । महिमेति प्रपंचात्मकस्याप्यमृतेशत्वमित्येष महिमा दुरत्ययोपारः प्रपंचानभिभूतत्वादिति भावः । मंत्रेण च एतावानस्य महिमा विभूतिः स तु ज्यायान् महत्तर इति वदताऽयमेवार्थ उक्तः ॥ १७ ॥ तदेवमीश्वरो नित्यमुक्त इत्युक्तं तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थयेति दर्शयन् पादोऽस्य विश्वा भूतानीत्यस्यार्थमाह । पादेष्विति । तिष्ठंत्यत्रेति स्थितयो भूरादिलोकास्ते पादा इव पादा अंशा यस्य स स्थितिपात्तस्य पादेष्वंशभूतेषु लोकेषु सर्वभूतानि जीवान् विदुः । मंत्रे तु पादोऽस्य विश्वा भूतानीति सामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया पाद इत्येकवचनं च सामान्याभिप्रायेणेति व्याख्यातं भवति ।

एव द्वितीयस्कंधेऽप्येवमेवोक्तम् । तथाहि सोऽमृतस्येति । अमृतादिद्वयं तु तृतीयत्वेन वक्ष्यमाणस्य क्षेमस्याप्युपलक्षणम् । श्रुतौ च''उतामृतत्वस्येशानः'' इत्यत्रामृतत्वं तद्युगोपलक्षणम् । अत्र धर्मिप्रधाननिर्देशः । श्रुतौ तु तत्र धर्ममात्रनिर्देशस्यापि तत्रैव तात्पर्यं तत्रामृतम्—'स्वदष्टवद्भिः पुरुषैरभिष्टुतम्' इति । परं न यत्परम् इत्याद्युक्तानुसारेण परमानंदः । अत एवामृतं विष्णुमंदिरमितितत्पर्यायः । 'अभयं न च कालविक्रमः' इत्याद्युक्तानुसारेण भयमात्राभावः । अत एव धर्मोऽकुतोभयमित्युक्तम् । 'क्षेमं न यत्र माया' इत्याद्युक्तानुसारेण भगवद्बहिर्मुखताकारगुणसंबंधाभावाद्भगवज्जनमंगलाश्रयत्वं ज्ञेयम् । तथा च नारदीये । ''सर्वमंगलमूर्द्धन्या पूर्णानंदमयी सदा । द्विजेंद्र तव मय्यस्तु भक्तिरव्यभिचारिणी॥''इति । अत एव । 'क्षेमं विदंति मत्स्थानम्' इत्युक्तम् । तत्र तत्तच्छब्देन लक्षणामयकल्पनया जनलोकादिवाच्यता निषेधेनहेतुं न्यस्यति।मर्त्यम्—'ब्रह्मणोऽपि भयं मत्तोद्विपरार्द्धपरायुषः' इत्यादिन्यायेन मरणधर्म्मकमन्नं कर्मादिफलं विलोक्यादिकं यस्मादत्यगात् अतिक्रम्यैव तत्र विराजत इति । एषः अमृताद्यैश्वर्यरूपो दुरत्ययः ब्रह्मचर्यादिभिः केनचिन्मनसाप्यसर्वभूतानि रोद्धुं न शक्य इति संदर्भः । विश्वनाथस्तु—स्वधिष्ण्यमित्यादिपद्यद्वयमेव व्याचख्यौ तथा हि असौ प्राणः प्राणवायुः स्वधिष्ण्यं देहांतः प्रतपन् श्वासेन प्रतापयुक्तं कुर्वन् बहिश्च प्रतपति प्रभवति एवं विराजमंतर्यामित्वेन स्थित्या प्रतपन्प्रभावंतं ज्ञानक्रियादिशक्तिमंतं कुर्वन्नंतर्बहिश्च प्रतपति प्रभवति॥ १६॥स परमेश्वरोऽमृतस्येशः प्रभुर्भोक्ता भोजयिता दाता चेत्यर्थः । स्वर्गीयसुधाव्यावृत्त्यर्थमाह—अभयस्य संसारभयरहितस्यामृतस्येशत्वे हेतुः मर्त्त्यं मरणधर्मकमन्नं वैषयिकं सुखं यद्यतोऽत्यगादतिक्रांतवान् । नं ह्यमृतभोजिने चणकचर्वणं रोचते इत्यभिप्रायः । यदि च कौतुकवशात्कदाचिच्चर्वयति तदनासक्त्यैव एवंमेवांतर्यामिणोऽपि ।''अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च'' इत्यादिदृष्टेः क्वचिद्भोक्तृत्वव्यपदेशोऽपि तदनतिक्रम एव द्रष्टव्यः । ''एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्' इति श्रुतौ निरन्नत्वं नामासक्तिराहित्यं व्याख्यातम् । एवञ्च ''उतामृतत्वस्येशानो यदन्नेनातिरोहति''इत्यस्यार्थो विवृतः ॥ अमृतत्वस्येति स्वार्थे त्वश्छांदसः ॥ ''सुपां सुपो भवंति'' इत्यन्नमित्यर्थेऽन्नेनेति पदम् अतिरोहति अत्यक्रामत् । ततो हेतोः पुरुषस्य परमेश्वरस्यैष महिमा दुरत्ययोऽपारः । एवञ्च ''एतावानस्य महिमतो ज्यायांश्च पूरुषः'' इत्यस्यार्थो विवृतः ॥ १७ ॥ तदेवममर्त्यमैश्वर्यं त्रिपात् मर्त्यमेकपादिति । तस्य चतुष्पादैश्वर्यं पुनर्विवृणोति । पादेषु सर्वभूतानी तिष्ठंत्यत्र सर्वभूतानीति स्थितयो मर्त्याद्यैश्वर्याणि तानि पदा इवाधिष्ठानभूतानि यस्य तस्य स्थितिपदश्चतुर्षु पादेष्वैश्वर्य्यभोगेषु सर्वभूतानि पार्षदपर्यंतानि पादा इवाधिष्ठानभूतानि पादान् दर्शयति । त्रयाणां सात्त्विकादिपदार्थानां मूर्द्धेव मूर्द्धा प्रकृतिस्तस्या मूर्द्धसु तदुपरि विराजमानेषु श्रीवैकुंठलोकेषु अमृतं क्षेममभयं चाधायि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः ॥ अंतस्त्रिलोक्यास्त्वपरो गृहमेधोऽबृहद्व्रतः ॥ १९ ॥

भूतेषु फलवैचित्र्यं दर्शयंस्त्रिपादस्यामृतं दिवीत्यस्यार्थमाह । अस्येश्वरस्य संबंधि त्रिपादमृतं नित्यसुखं दिव्यूर्ध्वलोकेषु न तु त्रिलोक्यामित्यर्थः । तदेव त्रिपाच्छब्दोक्तं त्रैविध्यं दर्शयन्नाह । त्रयाणां लोकानां मूर्धा महर्लोकस्तस्य मूर्धानस्तदुपरितनलोका जनस्तपः सत्यमिति तेषु यथाक्रमममृतादिकमधायि निहितम् । तत्र त्रिलोक्यां नश्वरमेव सुखम् महर्लोकस्य क्रममुक्तिस्थानत्वेऽपि कल्पांते तत्रत्यानां स्थानत्यागान्नाविनाशि सुखम् । जनलोके त्वमृतमविनाशि सुखं यावज्जीवं स्वस्थानापरित्यागात् । किंतु महर्लोकवासिनां कल्पांते त्रिलोकदाहोष्मपीडितानां तदा तत्र गमनादक्षेमदर्शनमस्ति तपोलोके तस्याभावात्क्षेममेव । वक्ष्यति हि । "त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना । यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥" इति । सत्यलोके त्वभयं मोक्षः । तत्प्रत्यासत्तेः ॥ १८ ॥ एतदेव वैचित्र्यमधिकारिभेदेनोपपादयंस्त्रिपादूर्ध्व इत्यस्यार्थमाह । न प्रजायंते पुत्रादिरूपेणेत्यप्रजा नैष्ठिकब्रह्मचारिवानप्रस्थयतयस्तेषामाश्रमास्त्रिलोक्या बहिरासन् गृहमेधस्त्वंतः यस्मादबृहद्व्रतो ब्रह्मचर्यव्रतरहितः ॥ १९ ॥

नित्यं धृतमेव तिष्ठतीत्यर्थः । ततः पूर्वस्य मर्त्यान्नमात्रात्मकत्वादेकपात्त्वमुत्तरस्यामृतादित्रयात्मकत्वात्त्रिपात्त्वमिति भावः । तदनेन "पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इत्यस्यार्थो दर्शितः । अस्य पादस्तथैवास्यैव दिवि वैकुंठे यदमृतात्मकं त्रिपात् तच्च विश्वाभूतानीत्यर्थः । अत्राधिष्ठानाधिष्ठेययोरैक्योक्तिरिति संदर्भः । विश्वनाथस्तु—अथ तस्य मायिकी रमायिकी विभूतीर्विभज्य दर्शयति द्वाभ्याम् । स्थितिः सर्वलोकपालनं पादाच्चरणारविंदाद्यस्य स स्थितिपात् तस्य पुंसः पादेष्वंशभूतेषु मायिकामायिकदेशेषु सर्वभूतानि बद्धमुक्तजीवान्विदुः । तत्र च त्रिमूर्ध्नः त्रिगुणमयस्थानानामुपरिष्टो भागो यत्प्रकृत्यावरणं तस्य मूर्ध्नसूपरितनस्थानेषुं परमव्योमस्वित्यर्थः । अमृतं मरणाभावः क्षेमं रोगाभावोऽभयं परस्परहेतुकस्य भगवदपराधहेतुकस्य च भयस्याभावः । कालहेतुकभयस्यामृतशब्देनैव वारणं ज्ञेयम् । अधायि स्थापितम् । तेन त्रिगुणमयस्थानेषु तद्विपरीतं मृतमक्षेमं भयश्च निहितंमिति । त्रिगुणप्रपंचस्यानित्यत्वं त्रिगुणातीतस्य परव्योम्नो नित्यत्वं बोधितं वक्ष्यते चाग्रे तद्धामवर्णने 'न च कालविक्रमः''न यत्र माया' इत्यादि । एवं च पादोस्येत्यादेरर्थो विवृतः । अत्र "पादास्य विश्वाभूतानि" इति सामानाधिकरण्यमधिष्ठानाधिष्ठेययोरभेदविवक्षया पाद इत्येकवचनं सामान्याभिप्रायेण दिवि सर्वस्योर्द्ध्वप्रदेशेऽमृतमस्य त्रिपात्त्रिपादविभूतिस्थमित्यर्थः इत्यर्थ इति । त्रिगुणात्मकत्वात्तस्या इति भावः । तत्र सप्तलोकेषु तत्प्रत्यासत्तेः मोक्षस्य प्रत्यासत्तेः सन्निहितत्वात् । यथा गंगातटेप्यागतो गंगागतः कथ्यते तद्वदत्रापि मोक्षसन्निहितोपि मोक्ष इति कथ्यत इति सत्यलोकगतानां स्वयंप्रभातवेदविचारेण मोक्षोस्ती त्यर्थः । यद्वा "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यांते कृतात्मानः प्रविशंति परं पदम्" इति स्मृतेरपि तेषां मोक्षश्रवणात् । अत्र संदर्भः ॥ १८ ॥ अथ चतुष्पात्त्वे त्रिलोकीव्यवस्थावत्पक्षांतरं दर्शयति । पादा इति । चशब्द उक्तसमुच्चयार्थः । प्रपञ्चाद्बहिः पादास्त्रय आसन्नेव प्रपञ्चात्मकस्यैव च चतुर्थपादस्य विभागविवक्षायां तु त्रिलोक्या बहिश्चान्ये पादास्त्रय आसन्नित्येवं मंत्रेपि तथैव पुनः शब्दः ते केऽप्रजानां ब्रह्मचारिवानप्रस्थयतीनामाश्रमाः प्राप्या ये लोकाः । अत एव धर्मत्रयप्राप्यत्वाच्चतुर्णामपि त्रिपात्त्वम् । अपरस्तु चतुर्थः पादस्त्रिलोक्या अंतारिति गृहमेधस्तत्प्राप्यः यस्मान्न बृहद्व्रतं यस्य स तथा ब्रह्मचर्यरहित इत्यर्थः । विश्वनाथः । "पादेषु सर्वा भूतानि"इत्यस्यार्थं विशिष्य दर्शयति । बहिस्त्रिमूर्द्धशब्दोक्तात्प्रकृत्यावरणात्परत्र त्रयः पादाः परमव्योमशब्देनाभिधीयमाना आसन् । चकारात्कचित्कचित्प्रपञ्चमध्यवर्त्तिनोपि मथुरायोध्यादिनामानः ये पादाः अप्रजानां न प्रकर्षेण जायंत इत्यप्रजाः संसारमुक्ता जीवास्तेषामाश्रमाः स्थानानीति । आश्रमणामाश्रमस्थानं च तेषां नित्यत्वं बोधितम् । "अमृतं क्षेममभयम्"इति पूर्वोक्तेः । त्रिलोक्यास्त्रिगुणलोकमय्याः प्रकृतेरंतस्तु अपरश्चतुर्थः पाद इत्यर्थः । यत्र गृहमेधः कर्मिजन इत्यर्थः । कीदृशोऽबृहद्व्रतः भगवद्व्रतरहितो भगवद्भक्तिरहित इत्यर्थः । तेन स चापि कदाचिद्भक्तः स्यात्तदा तस्यापि त्रिपाद्विभूतिरेव स्थानमिति भावः । एवं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृती विचक्रमे विष्वङ् साशनानशने उभे ॥ यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥ २० ॥ यस्मादंडं विराड् जज्ञे भूतेंद्रियगुणात्मकः ॥ तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् ॥ २१ ॥ यदाऽस्य नाभ्यान्नलिनादहमासं महात्मनः ॥ नाविदं यज्ञसंभारान्पुरुषावयवादृते ॥ २२ ॥ तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः ॥ इदं च देवयजनं कालश्चोरुगुणान्वितः ॥ २३ ॥ वस्तून्योषधयः स्नेहा रसलोहमृदो जलम् ॥ ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम ॥ २४ ॥

अयं चाधिकारभेद एकस्यैवावस्थाभेदेन नत्वत्यंतभिन्नविषय इति दर्शयंस्ततो विष्वङ्नित्यस्यार्थमाह । सृती इति । विविधं सुष्ठु अंचतीति विष्वङ् पुरुषः क्षेत्रज्ञः सृती मार्गौ दक्षिणोत्तरौ विचक्रमे चलति स्म । कथंभूते सृती । साशनानशने भोगापवर्गप्राप्तिसाधनभूते । अत्र हेतुत्वेन पुनर्विशेषणम् । यद्यतः अविद्याकर्मरूपा एका विद्या च तत्साधनोपासनारूपाऽन्या ॥ २० ॥ तदेवं विराडंतर्वर्तिनां फलवैचित्र्यमुक्त्वा तत्कारणस्येश्वरस्य तद्वैलक्षण्यं दर्शयितुं तस्माद्विराडजायतेत्यस्यार्थमाह । यस्मादंडं जज्ञे तत्र च भूतेंद्रियगुणात्मको विराट् च जज्ञे स ईश्वरस्तद्विश्वं विराड्देहं द्रव्यमंडं चातिक्रांतवान् । सूर्य इवेति पूर्वोक्त एव दृष्टांतः ॥ २१ ॥ नन्वेवं पुरुष एव चेत्सर्वं तर्हि यज्ञस्य तत्साधनानां चापृथग्भावाद्यज्ञैः पुरुषाराधनं न सिद्ध्येदित्याशंक्य तत्परिहाराय यत्पुरुषेण हविषेत्यादिमंत्रार्थं संगृह्य दर्शयति यदेत्यादिना।अस्येति विराडंतर्यामिणः तस्यैव प्रकृतत्वात् नाभौ भवं नाभ्यं तस्मात्कमलादहमासम् । यज्ञसंभारान् साधनानि पशुयूपादीनि पुरुषावयवं विना नापश्यम् ॥ २२ ॥ तदा तेषु संभारेषु साध्येषु सत्सु पुरुषावयवैरेते संभाराः संभृता इति चतुर्थेनान्वयः । वनस्पतयो यूपाः । देवयजनं यज्ञभूमिः । इदं चेति वचनाद्यज्ञार्हे स्थाने उपविष्टः कथयतीति गम्यते । बहुगुणान्वितो वसंतादिकालः ॥ २३ ॥ वस्तूनि पात्रादीनि ओषधयो व्रीह्यादयः । स्नेहा घृतादयः । रसा मधुरादयः । लोहानि सुवर्णादीनि । मृदश्च चातुर्होत्रं होत्रादिकं

"त्रिपादूर्द्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः" इति श्रुत्यर्थो विवृतः । स्मृतिश्च 'त्रिपाद्विभूतेः' इत्यारभ्य 'श्रिया भूम्या च संवृतम् । इत्यंता संदर्भधृताऽत्रानुसंधेया ॥ १९ ॥ उक्तलक्षणेनैकपादत्रिपाद्विभूतीर्जीव एव प्राप्नोतीत्याह विश्वमंचतीति विश्वङ् जीवः । सृती एकपादत्रिपादविभूत्योः पंथानौ विचक्रमे चलति लडर्थे लिट् । कीदृश्यौ साशनानशने भोगापवर्गप्राप्तिसाधनभूते तत्र योग्यतामाह । यद्यस्य जीवस्यैवाविद्या विद्या च अविद्यादशायामेकपादविभूतिं विद्यादशायां त्रिपाद्विभूतिं प्राप्नोति । किं तु विद्याया उपरमे लब्धया एकया भक्त्यैव 'भक्त्याहमेकया ग्राह्यः' इति भगवदुक्तेः । पुरुषः परमेश्वरस्तूभयस्याविद्याविद्यावृत्तिकमायाया आश्रय इति सृतिद्वयं तत्स्वामिकत्वात्तदधीनमेवेति भावः । एवं च "ततो विष्वङ् व्यक्रामत्साशनानशने अभि" इत्यस्यार्थो विवृतः ॥ २० ॥ तत्र त्रिपाद्विभूतिरंतरंगायाश्चिच्छक्तेर्विलास इति चिन्मय्यां तस्यमासक्त एव पादविभूतिस्तु बहिरंगाया मायाशक्तेर्विलास इति मायामय्यां तस्यामनासक्त एव परमेश्वररतां केवलमुपकरोतीत्याह । यस्मात्पुरुषादंडं विराट् च जज्ञे । कीदृशः भूतेन्द्रियगुणात्मकः स पुरुष ईश्वरः तदंडं द्रव्यं विराट्शरीरं चात्यगात् तत्प्रविशन्प्रकाशयन्नपि तत्रानासक्तत्वादतिक्रम्यागात् गत्वा च स्वांतरंगस्थाने त्रिपादविभूतावेव सदा स्थित इति भावः । तत्रानुरूपो दृष्टांतः गोभिः किरणैर्विश्वमातपन्प्रकाशयन्सूर्य इव स्वमंडले स्थितः ॥ २१ ॥ अत्राक्षिपतीत्थं पुरुष एव चेत्सर्वं तर्हि तदुपासकानां तत्पूजोपचारद्रव्याणां च ततः पृथक्त्वाभावात्तत्प्राप्तिसाधनं तत्परिचरणं कीदृगिति चेत्सत्यम् :। तं विना वस्तुतो वस्त्वंतराभावात्तस्य परिचरणस्यावश्यकत्वाच्च पार्थिवैर्गंधपुष्पादिभिः पृथिव्या आराधनमिव तदात्मकैरेव वस्तुभिस्तदाराधनं सिध्येदत्र तदाज्ञैव प्रमाणमिति प्रदर्शयन्स्वं दृष्टांतयति । यदास्येति ॥ २२ ॥ २३ ॥ सत्तमेति सत्पुरुषत्वात्तुभ्यमिदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च ॥ देवतानुक्रमः कल्पः संकल्पस्तंत्रमेव च ॥२५॥ गतयो मतयश्चैव प्रायश्चित्तं समर्पणम् ॥ पुरुषावयवैरेते संभाराः संभृतां मया ॥ २६ ॥ इति संभृतसंभारः पुरुषावयवैरहम् ॥ तमेव पुरुषं यज्ञं तेनैवायजमीश्वरम् ॥ २७ ॥ ततस्ते भ्रातर इमे प्रजानां पतयो नव ॥ अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः ॥ २८ ॥ ततश्च मनवः काले ईजिरे ऋषयोऽपरे ॥ पितरो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुम् ॥२९॥ नारायणे भगवति तदिदं विश्वमाहितम् ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥३०॥ सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ॥ विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥३१॥ इति तेऽभिहितं तात यथेदमनुपृच्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकम्॥ ॥३२॥ न भारती मेंऽग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ॥ न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कण्ठचवता धृतो हरिः॥३३॥

कर्म ॥ २४ ॥ नामधेयानि ज्योतिष्टोमादीनि । ऋगादीनामुक्तत्वान्मंत्रा इति स्वाहाकारादयः । देवतानामनुक्रम उद्देशः कल्पो बौधायनादिकर्मपद्धतिग्रंथः । अनेनाहं यक्ष्य इति संकल्पः तंत्रमनुष्ठानप्रकारः ॥ २५ ॥ गतयो विष्णुक्रमाद्याः । मतयो देवताध्यानानि । प्रायश्चित्तम् । भूर्भुवः स्वरादिकृतस्य भगवति समर्पणम् ॥ २६ ॥ संभृताः संपादिताः संभारा येन सोऽहं तेनैव यज्ञेनैव । अनेन यज्ञेनं यज्ञमयजंतेति मंत्रार्थः सूचितः ॥ २७ ॥ तेन देवा अयजंतेत्यस्यार्थं सप्रपंचं दर्शयति तत इति द्वाभ्याम् । व्यक्तमिंद्रादिरूपेण अव्यक्तं स्वतः । अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः ॥२८॥ काले स्वस्वावसरे॥ २९ ॥ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति । नारायण इति । आहितमधिष्ठितम् । भगवत्त्वे हेतुः ॥ यः स्वतोऽगुणः सर्गादौ गृहीता मायया उरवो गुणा येन सः तस्मिन् ॥ ३० ॥ यत्परस्वमित्येतत्प्रश्नोत्तरं यदुक्तं स एष भगवान्सर्वेषां मम चेश्वर इति तदुपसंहरति । सृजामीति । पालनं तु स्वयमेव करोतीत्याह । विश्वमिति । पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्माया तां धारयतीति तथा सः ॥ ३१ ॥ यच्चेदं विश्वं यदात्मकश्च त्वमित्येवमादिसर्वप्रश्नानां सामान्योत्तरम् । यदुक्तम् । "वासुदेवात्परो ब्रह्मन्न चान्योऽर्थोऽस्ति तत्त्वतः" इति । पुरुष एवेदं सर्वमिति श्रुत्या च यद्दृढीकृतं तदुपसंहरति । इतीति । सदसदात्मकं कार्यकारणात्मकं भाव्यं सृज्यं भगवतः सकाशादन्यत् पृथक् न भवतीत्यभिहितम् ॥ ३२ ॥ यदुक्तं 'एतावत्त्वं यतो हि मे' तमविज्ञाय मामीश्वरं प्रब्रवीषि । इति तदुपपाद्योपसंहरति । न भारतीति । यद्यस्मान्मे मया औत्कंठ्यं भक्त्युद्रेकस्तद्युक्तेन हृदा हरिर्धृतो ध्यातः । अंग हे नारद

कथयामीति भावः ॥ २४ ॥ २५ ॥ २६ ॥ यज्ञं विष्णुम् । "यज्ञोवैविष्णुः"इति श्रुतेः । "यत्पुरुषेण हविषा" इत्यस्यार्थो ध्वनितः ॥ २७ ॥ २८ ॥ २९ ॥ गृहीता ब्रह्मादिरूपेण गुणा येन ॥ ३० ॥ ३१ ॥ प्रकरणमुपसंहरति । इतीति । सदसदात्मकं त्रिपादेकपादात्मकञ्च भगवतः सकाशादन्यत्त्वया न भाव्यं न चिंतनीयम् ॥ हे तातेति तनोतीति । तात इति व्युत्पत्तेस्त्वयैतद्विस्तार्यमिति भावः ॥ ३२ ॥ ननु त्वम् 'अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु'इत्यादिना त्रिगुणातीतायास्त्रिपाद्विभूतेर्नित्यत्वं ब्रूषे तथा पादविभूतेस्त्रिगुणमयप्रपञ्चस्यापि भगवतो विलज्जमानयेत्यादेर्बहिरंगमायाशक्तिकार्यत्वेनानित्यत्वेप्यमिथ्यात्वमेव प्रतिपादयसि तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः ॥ आस्थाय योगं निपुणं समाहितस्तन्नाध्यगच्छं बत आत्मसंभवः ॥ ३४ ॥
नतोऽस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलम् ॥ यो ह्यात्ममायाविभवं स्म पर्यगाद्यथा नभः स्वांतमथापरे कुतः ॥ ३५ ॥

अतो मे वाङ्मनइंद्रियाणां वृत्तयः सत्यार्था न तु मत्प्रभावेनेत्यर्थः ॥ ३३ ॥ अत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्याम् । सोऽहं समाम्नायादिभिः सर्वोत्कृष्टोऽपि योगमाश्रित्यापि यत आत्मनो मम संभवो जन्म तमेव न ज्ञातवान् कुतोऽन्यस्य वार्ता । एतच्च तृतीयस्कंधे पद्मोद्भवे वक्ष्यते ॥ ३४ ॥ तदा समीयुषां शरणागतानां भवच्छिदं संसारनिवर्तकं स्वस्त्ययनं मंगलावहं सुमंगलं सुसेव्यं च तस्य चरणं नतोऽस्मि । ततोऽचिंत्यमहिमत्वेन ज्ञातवानस्मीति कैमुत्यन्यायेनाह । यो हीति स्वमायाविस्तारं यः स्वयमपि पर्यगात् । परिशब्दो निषेधे । एतावानिति न ज्ञातवानित्यर्थः । अपरे कुतो जानीयुः । तस्य चरणं नतोऽस्मीति पूर्वेण संबंधः । ननु सर्वज्ञः कथं न जानाति अंताभावादिति दृष्टांतेनाह । यथा स्वस्यांतं नभो नाप्नोति तद्वत् । नहि खपुष्पादर्शनं सार्वज्ञं विहंतीति भावः । तथाच वक्ष्यति "द्युपतय एव ते न ययुरंतमनं

मायिकवस्तूनां च तद्यागसाधनत्वेन सत्यत्वं व्यंजयसि । अन्ये शास्त्रविदस्तु सर्वमिदं मनोरथं विलसितत्वान्मिथ्यैव भगवतः खलु भगवत्त्वमपि तटस्थलक्षणत्वादनित्यमेव तद्धाम्नस्त्रिपाद्विभूतेः का वार्त्तेति व्याचक्षते तत्राहं कुत्र विश्वसिमि त्वद्वाचि तेषां वाचि वेत्यत आह । नभारतीति । ममेयं तुभ्यमुक्ता वाक् न मृषा तत्र हेतुः—न वा इति । सर्वत्र हेतुः औत्कंठ्ययुक्तेन मनसा मया हरिर्धृतं इति यत्र हरिस्तत्रैव सर्वं सत्यमिति मद्वाच्येव विश्वसिहि तैरन्यैः शास्त्रविद्भिरपि हरिर्मनसा न धृतोऽतोमनसस्तस्य मृषैव गतिरतस्तेषां वागपि मृषैव मिथ्यावादिनां तेषां मतं मांगीकुथा इति भावः । अत एव स्वामिचरणैरप्यर्थ इत्यंतं व्याख्यातं मत्सामर्थ्यं मत्प्रभावकृतं न किं तु हरिप्रभावकृतमिति भावः । हे अंगेति । अतीवप्रियत्वादेतद्गुह्यं मया प्रोक्तमितिभावः । वाण्यनुगमनावसरे त्वौत्कंठ्यवता हृदा हरिर्न धृतस्तत एवेंद्रियासत्पथानुगमनं जातमिति प्रतीयते "भगवद्ध्यानपूतेन मनसान्यांस्ततो सृजेत् इति" तत्रैव वक्ष्यमाणत्वात् ॥ ३३ ॥ अत्र वृत्तिसत्यार्थत्वे नमनादिना ध्यानस्य सत्त्वे सत्यार्थसत्त्वमन्वयः । ध्यानाभावे सत्यार्थाभावोत्र व्यतिरेकः । एतच्च भगवज्ज्ञानाभावश्च । अत्र विश्वनाथः—ननु ते वयमेव सर्ववेदशास्त्रतात्पर्यं विद्वांसः परमेश्वरस्वरूपं जानीमह इत्यभिमन्यंते तथैवान्यानपि युक्त्या बोधयंति चेति तत्राह—सोहं पूर्वश्लोकोक्तलक्षणः सोत्कंटहृदयदरीधृतहरिरप्यहम् । समाम्नायमय इति । प्रथममाम्नाया ममैव मुखेभ्यो निःसृता येषामर्थमन्यतेऽद्यापि जिज्ञासंत एवेति । तपोमय इति । "स्पर्शेषु यत्षोडशमेकविंशं निष्किचनानां नृप यद्व्रनं विदुः" इति भगवदादिष्टं तपः प्रथमं मयैव तप्तमिति स्वस्य ज्ञानविज्ञाने दर्शिते भगवद्दत्तमैश्वर्यं चाह प्रजेत्यादि । तथा योगेश्वरत्वमपि मम नास्तीति न वक्तव्यमित्याह—आस्थायेति । समाहित एकाग्रीकृतचित्तोपि तं भगवंतं नाध्यगच्छं न ज्ञातवानस्मि तत्र हेतुर्यत आत्मनो मम संभवः सृष्टिरिति हंतहंत मत्सृष्टसृष्टसृष्टा अन्ये विज्ञंमन्यास्तं कथं जानीयुर्ये तु भगवत्त्वं तटस्थलक्षणं ब्रुवते ते त्वंधा एवेति भावः ॥ ३४ ॥ अहो अर्वाचीना वराका भगवत्त्वं वयं ब्रूमहे इति प्रलपंति यतो भगवानपि स्वयं स्वतत्त्वं वेदितुं न प्रभवतीति भक्त्युद्रेकेण तं प्रणमति—नत इति । समीयुषां भवच्छिदं संसारदुःखच्छेदकमित्यननुसंहितं फलं स्वस्त्ययनं स्वप्रेमसुखदायकमित्यनुसंहितम् । सुष्ठु मंगलं यस्मात्तं सुमंगलम् । अन्येषामपि कर्मिज्ञानियोगिनां तद्भक्तिमिश्रत्वं विना मांगल्याभावादिति भावः । यो हि आत्ममायाविभवं स्वयोगविस्तारं स्वयमपि पर्यगात् । परिशब्दो निषेधे एतावानिति न ज्ञातवानित्यर्थः । अपरेऽस्मदादयः कुतो जानीयुः । अत्राक्षिपति नन्विति । नभः कर्तृ इति । भाव इति । खपुष्पसत्त्वे तदज्ञानं तु सर्वज्ञत्वनाशकमस्तीत्याशयः । स्वस्यापि स्वाज्ञाने प्रमाणमाह । श्रुतिश्चेति । यः परमेश्वरोऽस्य जीवस्याध्यक्षः साक्षी ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुताऽपरे सुराः ॥ तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे॥३६॥ यस्यावतार कर्माणि गायंति ह्यस्मदादयः ॥ न यं विदंति तत्त्वेन तस्मै भगवते नमः ॥ ३७ ॥ स एष आद्य पुरुषः कल्पेकल्पे सृजत्यजः ॥ आत्माऽऽत्म न्यात्मनाऽऽत्मानं संयच्छति च पाति च ॥ ३८ ॥ विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् ॥ सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयम् ॥३९॥

ततया त्वमपि यदंतरांडनिचया ननु सावरणाः" इत्यादि श्रुतिश्च । "यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद" इति ॥ ३५ ॥ एतत्प्रपंचयति नाह मिति द्वाभ्याम् । वामदेवो रुद्रः यस्य ऋतां गतिं परमार्थस्वरूपम् । किंतु इदं प्रपंचरूपं तस्य मायया विनिर्मितं विचक्ष्महे विद्मः । तदपि आत्मसमं स्वज्ञानानुरूपमेव न तु कृत्स्नम् । मोहितबुद्धय इत्ययं तदज्ञाने प्रपंचज्ञाने च हेतुः ॥ ३६ ॥ ननु सर्वेऽपि तं वर्णयंतो दृश्यंते तत्राह । यस्येति ॥ ३७ ॥ अवतारकर्माणि संक्षेपतो दर्श यंति । स एष आद्यो भगवान् यः पुरुषावतारः सन् सृष्ट्यादि करोति आत्मात्मन्यात्मनात्मानमिति कर्ता अधिकरणं साधनं कर्म च स्वयमेवेत्यर्थः । पुरुषावतारः सृष्ट्या दीनि च कर्माणीति संक्षेपोक्तिः ॥३८॥ न यं विदंति तत्त्वेनेत्युक्तं किं तत्तत्त्वमित्यपेक्षायामाह । ज्ञानं केवलं सत्यं तत्त्वम् । घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थं विशेषणानि। विशुद्धं विषयाकारशून्यम् । यतः प्रत्यक् सर्वांतरम् अत एव सम्यक् संदेहादिरहितम् अवस्थितम् स्थिरं यतो निर्गुणम् । गुणकार्यं हि गुणव्यतिकराच्चंचलं भवति । यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेवेति न चांचल्यादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदोषैस्तथातथा भवतीति व्यवच्छिद्यते । एभिरेव विशेषणैः सत्यत्वमपि समर्थितम् । किंच यद्विकारवत्तदसत्यं दृष्टम् । न चास्य जन्मादयः षड्विकाराः संतीत्याह । अनाद्यंतं जन्मनाशरहितम् । अत एव जन्मानंतरास्तित्वलक्षणोऽपि विकारो नास्ति वृद्धिविपरि

परमे व्योमन् तिष्ठन् अंगेति संबुद्धिर्नाचिकेतं प्रति वेदात्मानमेतावानहमिति । तर्हि ज्ञानविषयत्वमागतमिति चेदाह यदिवेति ॥ ३५ ॥ ऋतां गतिं त्रिपादेकपाद्विभूतिमिति चक्रवर्ती ॥ ३६ ॥ अत्राक्षिपति—नन्विति । तत्त्वेन शक्तिस्वरूपाभ्यां याथार्थ्येन ॥ ३७ ॥ कल्पेकल्पे प्रतिमहाकल्पारंभे । इत्यर्थ इति । कर्त्ता ईश्वरः सृज्यं पाल्यं संहार्यं विश्वं तन्निमित्ता माया तदधिष्ठानं हरिरेव सर्वं तथातथा भवतीति भावः ॥ ३८ ॥ अत एव सर्वांतरत्वादेव । अत एव जन्मनाशरहितत्वादेव । अत्र संदर्भः । पुनश्च सर्वविलक्षणां शक्तिं लक्षयितुं तस्यैकस्यैव युगपत्कर्तृत्वादिकं योजयन्स्वरूपमपि तथैव लक्षयति । विशुद्धमिति—युग्मकम् । तत्र ज्ञानमिति विशेष्यं तच्च सुखस्वरूपमेव 'विज्ञानमानंदंब्रह्म' इति श्रुतेः।तस्य जीवस्वरूपविलक्षणताज्ञापकानि विशेषणान्याह—विशुद्धं केवलं विशेषेण शुद्धमेव नत्वाविद्यकमित्यर्थः।"अयमात्माऽपहतपाप्मा" इतिश्रुतेः। "यतः:प्रत्यक्:सर्वतो प्यांतरं यः पृथिव्यां तिष्ठन्"इत्यारभ्य "य आत्मानमंतरोयमयतिति श्रुतेः। अतःसम्यगक्षुभिततयैवासमंताद्व्याप्य स्थितं नत्वावृतविक्षिप्तं न वाणुपरिमाणमित्यर्थः। 'एको देवः' इत्यादिश्रुतेः । किंच । सत्यं सर्वसत्ताप्रदस्वरू पत्वात्सत्यपदार्थानां मुख्यं न तु तदितरदित्यर्थः । "सत्यं चामृतञ्च सत्यमेवाभवत्" इति श्रुतेः। पूर्णं भगवत्तया संभृतं न तु तया हीनमित्यर्थः । अत एवानाद्यनंतस्वरूपवैभवं निर्गता गुणेभ्यस्सत्त्वादिभ्यो गुणा ऐश्वर्यादयः षट् यस्य तादृशं च मध्यमपदलोपी बहुव्रीहिः । 'नतस्य कार्यं करणं च विद्यते' इत्यादि श्रुतेः । अनेन तादृशस्वरूपवत्त्वं चायातम् । "न संदृशे तिष्ठति रूपमस्यं यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः । सर्वसत्ताप्रदस्वरूपत्वान्नित्यमेवाद्वयं पृथग्वस्तुरहितत्वाद्द्वयरहितं चेत्यर्थः । 'एकमेवाद्वयं ब्रह्म' 'द्वैताद्वै भयं भवति' इति श्रुतेः । तदेवं सर्वेषां तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषे विदंति मुनयः प्रशांतात्मेंद्रियाशयाः ॥ यदा तवेवासत्तर्कैस्तिरो धीयेत विप्लुतम् ॥ ४० ॥ आद्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ॥ द्रव्यं विकारो गुण इंद्रियाणि विराट्ट स्वराट्ट स्थास्नु चरिष्णु भूम्नः ॥४१॥ अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ॥ स्वर्लोकपाला खगलोकपाला नृलोकपालास्तललोकपालाः ॥ ४२ ॥

णामापक्षयाश्च न संति । यतः पूर्णम् । सर्वत्र हेतुः नित्यमद्वयम् । नित्यं सर्वदा द्वैतप्रतीतिसमयेऽपि परमार्थतोऽद्वयमिति ॥ ३९ ॥ अत्र विद्वदनुभवं प्रमाणयति । हे ऋषे नारद प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसो यदा भवंति तदा विदंति । अन्यदा तदज्ञाने कारणमाह । यदा तु तदेव प्रकाशमानमेवासतां तर्कैर्विप्लुतं स्यात्तदा तिरो धीयेतेति ॥ ४० ॥ कल्पेकल्पे आत्मानं सृजतीत्युक्तं के तेऽस्य सृज्यमाना अवतारास्तानवतारान् विस्तरेणाह । आद्य इत्यादि यावत्समाप्ति । परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽवतारः । वक्ष्यति हि । "भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् । स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः" । यथोक्तम् । "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितम् ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते " ॥ इति । यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालश्च स्वभावश्च सदसदितिकार्यकारणात्मिका प्रकृतिश्चैताः शक्तयः मनआदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतय इति विवेक्तव्यम् । मनो महत्तत्वं द्रव्यं महाभूतानि । क्रमोऽत्र न विवक्षितः । विकारोऽहंकारः । गुणः सत्त्वादिः । विराट् समष्टिशरीरं स्वराट् वैराजः स्थास्नु स्थावरं चारिष्णु जंगमं च व्यष्टिशरीरम् ॥ ४१ ॥ अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो य इमे प्रजेशाः तललोकपालाः पातालाधिपतयः॥ ४२॥

न्मूलत्वेप्यस्ति भिन्नं स्वरूपवैलक्षण्यमन्यथा न यं विदंति तत्त्वेनेति विशेषोक्तिर्व्यर्थी स्यात् अन्यपक्षपातितानामवेद्यत्वे हेतुमाह—प्रशांता भगवन्निष्ठा आत्मादयो येषां त एव तद्विदंति असत्तर्कैः । "योऽनादृतो नरकभाग्भिरसत्प्रसंगैः" इति वक्ष्यमाणतृतीयगतमदुक्तदिशा तादृशतद्रूपादिकुतर्कैश्च विप्लुतं सद्यत्तिरोधीयेतेति तदेवमनेन पद्यचतुष्केण तादृशस्वरूप एव भगवांस्तादृशशक्त्या तद्रूपः सन्नवतारादिकं करोति तत्र तत्तदज्ञास्तत्तद्ध्यायंतोपि न सुखं प्राप्नुवंति यतस्तत्तद्विज्ञाने चाधिकृत्य 'परिनिष्ठितोपि नैर्गुण्ये' इत्यादिकं बहुतरं गीयत इति व्यंजितम् । विश्वनाथस्तु—ननु 'न यं विदंति तत्त्वेन' इति भगवंतं युष्मदादयो न विदंति किं तु तस्य यन्निर्विशेषस्वरूपं श्रूयते तद्विदंति न वेति जिज्ञासायामाह—विशुद्धमिति । तत्र ज्ञानमिति विशेष्यं तच्च सुखरूपमेवं 'विज्ञानमानंदं ब्रह्म' इति श्रुतेः । केवलमद्वितीयमत एवोपाध्यभावाद्विशुद्धं तत एव सर्वांतरत्वात्प्रत्यक् तदपि समंताद्व्याप्यैव स्थितत्वात्सम्यगवस्थितं, व्याप्तिरपि सर्वत्र सत्तारूपेणैवेति सत्यं, तारतम्याभावात्पूर्णं, जन्मादिविकाराभावादनाद्यनंतं, सत्त्वादिगुणसंसर्गाभावान्निर्गुणं, सर्वकालमेकरूपतयैव स्थायित्वान्नित्यं, द्वितीयाभावादद्वयम्। ऋषे हे नारदेति। एतादृग्ज्ञानवत एवर्षित्वं भवतीति भावः । मुनयो मननशीला यदा प्रशांतात्मेंद्रियाशया भवंति तदा तद्विदंति अन्यथाऽसत्तर्कैर्विप्लुतं तदेव वस्तु तिरोधीयेत एतेन तस्य निर्विशेषस्वरूपं यद्ब्रह्म तत्कथंचिदपि ज्ञातुं शक्यं न तु सविशेषस्वरूपामित्युक्तम्।एवमेव 'विबोद्धुमर्हत्यमलांतरात्मभिः' इत्यादिना दशमस्कंधेपि वक्ष्यते इति॥३९॥४०॥ 'स एष आद्यःपुरुषः' इत्येकेन श्लोकेनोक्तं पुरुषावतारं तत्कर्म च विवृणोति सार्द्धैश्चतुर्भिः।परस्य परव्योमाधिनाथस्य भगवत आद्यः प्रथमोऽवतारः पुरुषः प्रकृतीक्षणकर्त्ता कारणार्णवशायी। 'जगृहे पौरुषं रूपं भगवान्' इति प्रथमोक्तेः । कालस्वभावादयश्च तस्य कर्मोच्यते 'कल्पेकल्पे सृजत्यजः।आत्मात्मन्यात्मनात्मानम्' इत्युक्तेः।स एकोपि मायाशक्त्या नाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ॥ ये वा ऋषीणामृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ॥ अन्ये च ये प्रेतपिशाचभूतकू
ष्मांडयादोमृगपक्ष्यधीशाः ॥ ४३ ॥ यत्किंच लोके भगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्व
रूपम् ॥ ४४ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥ आपीयतां कर्णकषायशोषाननुक्रमिष्ये त इमान्सुपेशान्॥४५॥
इति श्रीभा० म० द्वि० विराड्विभूतिपुरुषसूक्तार्थवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ब्रह्मोवाच ॥ ॥ यत्रोद्यतः क्षितितलोद्धरणाय बिभ्र
त्क्रौडीं तनुं सकलयज्ञमयीमनंतः ॥ अंतर्महाऽर्णव उपागतमादिदैत्यं तं दंष्ट्रयाऽद्रिमिव वज्रधरो ददार ॥ १ ॥

गंधर्वादीनामीशाः यक्षादीनां नाथाः । रक्षोरगेति संधिरार्षः । ऋषीणां पितॄणां च श्रेष्ठाः प्रेतादीनामधीशाः॥ ४३ ॥ किं बहुना यत्किंचिद्भगवदादि तत्सर्वं परमेव तत्त्वमि
त्यन्वयः । भगवदैश्वर्ययुक्तं महस्वत्तेजोयुक्तम् ओजःसहसी इंद्रियमनःशक्ती तद्युक्तं बलं दाक्ष्यं श्रीः शोभा ह्रीरकर्मजुगुप्सा विभूतिः संपत्तिः आत्मा बुद्धिस्तद्युक्तमर्णो
वर्णः अद्भुतार्णमाश्चर्यवर्णमित्यर्थः । रूपमेव स्वरूपं रूपवत्प्रशस्तरूपयुक्तम् । स्वरूपं यत्तत्सर्वं परं च तत्त्वं तद्विभूतिरित्यर्थः ॥ ४४ ॥ शुद्धसत्त्वावतारान्वक्तुमाह । प्राधान्यत
इति । असत्कथाश्रवणैर्ये कर्णयोः कषाया मलास्तान् शोषयंतीति तथा तान् । सुपेशान् सुंदरान् । सकारलोपश्चार्षः । हे ऋषे ते तुभ्यमनुक्रमिष्ये तदनुक्रमेणामृतं त्वया
पीयतामित्यर्थः । यद्वा पीयतामिति शत्रंतम् । आपिबता कर्णकषायशोषानित्यर्थः ॥ ४५ ॥ इति श्रीमद्भागवते द्वितीयस्कंधे टीकायां षष्ठोऽध्यायः ॥ ६ ॥ छ ॥
सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः । नारदाय तु तत्कर्मप्रयोजनगुणैः सह ॥ १ ॥ यत्र यदा क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत्सन्नुद्यतोऽनंतः तदा तं सुप्रसिद्धं हिर

भत्रेदित्यर्थः । सदसत्कार्यकारणात्मकं सर्वं विश्वमेव तदेव विवृणोति मन इत्यादि । क्रमोऽत्र न विवक्षितः ॥ ४१॥ ४२ ॥४३ ॥ रूपवत्साकारमस्मदादिपरम् अरूपवन्निराकारं कालादिकं चेति द्विविधं भगवद्रूपमपि अस्व
रूपं न भगवतः स्वरूपं तस्य स्वरूपशक्तिविलासत्वाभावादित्यर्थः एवं कालादीनां पुरुषावतारस्य कर्मरूपत्वेपि ते शक्तयः ब्रह्मादयो गुणावताराः प्रजापत्यादयो विभूतयोन्ये केचिज्ज्ञानिनो योगिनः कर्मिणो मूढाश्च
स्थावरजंगमाश्च सर्वे पुरुषावतारस्य सृष्ट्यादिलीलापरिकरा ज्ञेया इति विश्वनाथः । परस्य भूम्नस्स्वरूपेण शक्त्या च सर्वातिशायिनः अवतारः प्राकृतवैभवे स्वेच्छयाविर्भावः कालादयः परमेव तत्त्वमिति सार्द्धै
श्चतुर्भिरन्वयः यज्ञस्य साक्षादवतारत्वेन ब्रह्मभवयोरावेशावतारत्वेनान्येषां शक्तितत्कार्यरूपत्वेन तदवतारतारत्वमिति संदर्भः ॥ ४४ ॥ सुपेशश्शब्दे सलोपश्चार्ष इत्यर्थः । केचित्तु ललोपमार्षमाहुस्तन्मते सुपेशलशब्दोस्ती
त्यर्थः। हे ऋष इति । तवर्षित्वसंपादनायैव तुभ्यं वदामि त्रिकालज्ञस्यैवार्षिशब्दवाच्यत्वप्रसिद्धेरिति भावः। इत्यर्थ इति । पा पाने इत्यस्मात्कर्मणि लोट् संभवत्वादन्यदप्याह । यद्वेति । पीङ् पाने इति दैवादिकाच्छतृप्रत्यय आर्ष
इत्यर्थ इत्यस्यायं भावः । संदर्भः किं बहुना एतदर्थमेवास्य महापुराणस्याविर्भाव इति। 'भवतानुदितप्रायं'यशो भगवतोमलम्'इत्यादौ 'समाधिनानुस्मर तद्विचेष्टितम्'इत्यादौ च दर्शितम्।सा च भगवतो लीला द्विविधा सृष्ट्या
दिरूपा लीला विनोदरूपा च तयोरुत्तरा तु प्रशस्ततरेत्याशयेनाह। प्राधान्यतो यानृष इति । यद्यपि पूर्वम् 'आद्योवतारःपुरुषःपरस्य' इत्यादिग्रंथेन पुरुषं कालादितच्छक्तिं मनआदि तत्कार्यं ब्रह्मादि तद्गुणावतारान् दक्षादितद्वि
भूतीश्चोक्तवानस्मि तेन च सृष्ट्यादिलीलास्तथापि यान् हे ऋषे पुरुषस्य भूम्नो लीलावतारान् प्राधान्येनामनंति तानेव ते इमान्मम हृदयाधिरूढान् कर्णकषायशोषान् तदितरश्रवणरागहंतॄन् किञ्च सुपेशान् परममनोहरान्
अनुक्रमिष्ये तदनुक्रमणं सम्यक्पीयताम् ॥ ४५ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कंधे षष्ठोऽध्यायः ॥६॥ तेत्रामवताराणां कर्मगुणप्रयोजनैः ॥ (१) ॥ विरोधपरिहाराय व्याख्यांतरमाह । यद्वेति । तत्र करेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातो रुचेरजनयत्सुयमान्सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायाम् ॥ लोकत्रयस्य महतीमहरद्यदाऽऽर्तिं स्वायंभुवेन मनुना हरिरित्यनुक्तः ॥ २ ॥
जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ॥ ऊचे ययाऽत्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ॥३॥
अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः ॥ यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥४॥ तप्तं
तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ॥५॥

ण्याक्षं दंष्ट्रया ददार ॥ १ ॥ यज्ञावतारमाह । रुचेः प्रजापतेः सकाशात्तद्भार्याया आकूतेः सूनुः सुतः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमाख्यान्देवानजनयत् । स एवेंद्रः सन्यदार्तिमहरत्तदा पूर्वं सुयज्ञ इत्युक्तोऽप्यनु पश्चान्मनुना मातामहेन हरिरित्युक्तः । अनेन देवोत्पादनं लोकत्रयार्तिहरणं च तस्य कर्म दर्शितम् । एवं सर्वत्रावतारस्तत्कर्म च ज्ञेयम् ॥ २ ॥ कपिलावतारमाह । कर्दमस्य प्रजापतेर्गृहे च तद्भार्यायां देवहूत्यां जज्ञे नवभिः स्त्रीभिर्भगिनीभिः सह । स च स्वमात्रे आत्मगतिं ब्रह्मविद्यामुक्तवान् ययात्मगत्या साऽऽत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकमस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ॥ ३ ॥ दत्तात्रेयावतारमाह । मया अहमेव तुभ्यं दत्त इति यद्यत आह ततः स नाम्ना दत्तो जातः । स्वभक्तेभ्यो योगैश्वर्यदानं तच्चरितं दर्शयति । यस्य पादपंकजयोः परागस्तेन पवित्रा देहा येषां ते उभयीमैहिकीमामुष्मिकीं च भुक्तिमुक्तिरूपां वा ॥ ४ ॥ कुमारावतारमाह । मे मयादौ यत्तपस्तप्तं तस्मात्स्वतपसो मत्तपसो हेतोः स हरिश्चतुःसनोऽभूत् सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः । कथंभूतात्स्वतपसः सनादखंडितात् । यद्वा । स्वतपसः सनाद्दानात् समर्पणादित्यर्थः । षणु दाने धातुः । स च पूर्वकल्पस्य संप्लवे प्रलये विनष्टमुच्छिन्नसंप्रदायमात्मतत्वमिहास्मिन्कल्पे सम्यग्जगादोक्तवान् । सम्यक्त्वं दर्शयति । यद्गदितमात्रमेव मुनय आत्मन् आत्मनि मनस्यचक्षत साक्षा

कर्णमूलेहन्नित्यत्र चक्रवर्ती तु प्रथमं करेण ततो दंष्ट्रया च ददारेति ज्ञेयम् । वराहावतारे प्रमाणमाह। ''यस्य रूपं बिभ्रदिमामविंदद्गुहां प्रविष्टां शरीरस्य मध्यतः'' इत्याधाने वराहसंभारेण विनियुक्तान्मंत्रतः प्रतीयते । यस्य वराहस्य रूपं बिभ्रदीश्वरः इमां पृथिवीं गुहां गूढस्थाने सलिलस्य मध्ये प्रविष्टामविन्दल्लब्धवानिति श्रुतेरर्थः ॥ १ ॥ २ ॥ यथाहमपि ब्रह्मोद्भूतत्वात्तादृशोस्म्यहो श्रीकपिलो हि क्षीरशंखन्यायेन ब्राह्मणत्वे सति भगवदवतारत्वाद तीवोत्कृष्टोस्तीति संभावयमानं नारदं प्रति ब्रह्माह त्वमपि तादृशएवेति द्विजपदेन ध्वनितं यद्यपि द्विजपदं त्रिवर्णे शक्तं तथापि 'द्विजराजश्शशधरः' इत्यत्र द्विजपदस्य ब्राह्मण एव मुख्या शक्तिरस्ति ''सोमोऽस्माकं ब्राह्मणानां राजा'' इति श्रुतिबलात् ॥ ३ ॥ दत्तात्रेयावतारप्रतिपादिका श्रुतिरपि । ''यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः अत्र यस्तमन्वविंदन्न ह्यन्येशक्नुवन्'' इति । अस्या अर्थः सूर्यमात्मानं स्वर्भानुर्मायया तमसा विपर्ययेणाविध्यत् जीवत्वमनयत् । अत्रेरपत्यान्यत्रयो दत्तात्रेयः बहुत्वं पूजार्थमग्रे स्पष्टम् । तेषां मध्ये हैहयं तु प्राप्तयोगर्द्धिकमपि महापराधत एव हेतोः कुप्यंश्श्रीपरशुरामो जघानेति ज्ञेयम् ॥ ४ ॥ सनशब्दस्याखं डितार्थां प्रसिद्धिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः ॥ दृष्ट्वात्मनो भगवतो नियमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ॥
॥ ६ ॥ कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमपि ते न दहंत्यसह्यम् ॥ सोऽयं यदंतरमलं निविशन्बिभेति कामः कथं नु पुनरस्य मनः
श्रयेत ॥७॥ विद्धः सपत्न्युदितपत्रिभिरंति राज्ञो बालोऽपि सन्नुपगतस्तपसे वनानि ॥ तस्मा अदाद्ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो
यदुपर्यधस्तात् ॥८॥ यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतंतम् ॥ त्रात्वाऽर्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा
सकलानि येन ॥ ९ ॥

दपश्यन् ॥ ५ ॥ नरनारायणावतारमाह । धर्मस्य पत्न्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन जातः । कथंभूतः । स्वोऽसाधारणस्तपःप्रभावो यस्य । तदेवाह । अनंगस्य पृतना देव्योऽप्सरसो भगवतः सकाशादात्मनः स्वप्रतिरूपा उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटितुं साधयितुं न शेकुः । यद्वा । आत्मनः स्वस्य यो नियमस्तपोनाशरूपस्तस्यावलोपं तत्र दृष्ट्वा भगवतस्तं घटयितुं न शेकुरिति । एतच्चाख्यानमेकादशे भविष्यति ॥ ६ ॥ यत्र कामविजयी क्रोधोपि बिभेति तत्र कामो न प्रभवतीति किं वक्तव्यमित्याह । काममिति । कृतिनः श्रीरुद्रप्रमुखा रोषयुक्तया दृष्ट्या कामं दहंति । रोषं त्वात्मानं दहंतमपि तेऽपि न दहंति क्रोधे नाभिभूयंत इत्यर्थः । नु अहो सोऽयं रोषो यदंतरं यन्मध्यं प्रविशन्नलं बिभेति । यद्वा । यस्यांतर्मनः । कथंभूतम् । अमलं निर्मलं शुद्धसत्त्वात्मकं प्रविशन्निति ॥ ७ ॥ चारित्रेणैव कमप्यवतारं सूचयति । मातुः सपत्न्याः उदितान्युक्तानि वाक्यान्येव पतत्रिणो बाणास्तैर्विद्धो ध्रुवो राज्ञ उत्तानपदोंऽति समीपे तपसे तपस्तप्तुं ध्रुवगतिं ध्रुवपदम् । यत यामुपरि स्थितामधस्तात्स्थिताः दिवि भवा दिव्याः सप्तर्षयः स्तुवंति । यद्वा उपरि भृग्वादयः अधस्तात्सप्तर्षय इति ॥ ८ ॥ पृथ्ववतारमाह । यद्यदा ऋषिभिरर्थितः अवतरितुं प्रार्थितस्तदा वेनदेहादवतीर्णः तं त्रात्वा अन्वर्थं तत्पुत्र इति पदं नाम लेभे । "पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः॥तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा॥"

मत्वाह । यद्वेति । संदर्भस्तु–आदौ प्रथमं सनात् तन्नामाऽभवत् 'सनात्सनातनतमः' इति विष्णुसहस्रनामसु श्रवणात् ॥५॥ अवलोपमित्यत्र भागुरिमतेऽवेत्यस्याकारलोपे पुनर्नञा समासेऽवलोपमिति सिद्धम् । संभवत्वादर्थांतरमाह । यद्वेति । तत्र भगवति तं नियमावलोपम् ॥ ६ ॥ इत्यर्थ इति । क्रोधः कामाद्दुर्बलीयानिति भावः ॥ ७ ॥ अत्र विश्वनाथः–पृश्निगर्भावतारमाह । विद्ध इति । ध्रुवगतिं नित्यस्थलविशेषामित्यर्थः । मुनिशब्दो न केवलं सप्तर्षिपरमेवेति तत्राह–यद्वेति । वासुदेवावतारोयं पृश्निगर्भो ज्ञेयः । "त्वमेव पूर्वसर्गेभूः पृश्निः स्वायंभुवे सति । तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ अहं सुतो वामभवं पृश्निगर्भ इति स्मृतः" इति दशमे कर्माश्रवणादत्र तु जन्माश्रवणात् जन्मकर्मणोः परस्परसापेक्षत्वादेकत्र संगतेरौचित्यात् तदुक्तं भागवतामृते "अस्यात्र चारितानुक्त्या नामानुक्त्या च तत्र वै ॥ परस्परमपेक्षित्वाद्युक्ता चैकत्र संगतिः" इति।न चात्र ध्रुवार्थं वैकुंठान्नारायण एवागतस्तेन पृथगेवायं ध्रुवप्रियोऽवतार इति वाच्यं, तदुक्तं तत्रैव–"तत्रागमनमात्रेण यदि स्यादवतारता । अन्यत्रापि प्रसज्जेत यथेष्टं तत्प्रकल्पना" इति । केचित्तु श्रीवासुदेवोयं ध्रुवार्थमवतीर्णः यः खलु ध्रुवलोकाधिष्ठातेति गम्यते तस्य तु द्वादशाक्षरविद्योपासनया तल्लोकप्राप्तेस्तद्भक्तत्वमेव "ययोत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः" इत्याद्युक्तेरित्याहुः ॥ ८ ॥ पुद्वयः पुन्नामकेभ्यो नरकेभ्यो यतः पितरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्याम् ॥ यत्पारमहंस्यमृषयः पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः॥१०॥

इति हि पुत्रपदव्युत्पत्तिः । कथंभूतम् । द्विजानां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तम् । चरित्रांतरमाह । येन च जगति जगदर्थे वसूनि अन्नादिद्रव्याणि दुग्धा ॥ ९ ॥ ऋषभावतारमाह । असौ हरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास । नाभेर्भार्याया मेरुदेव्याः एव सुदेवीत्यपि संज्ञा । जडवद्योगेन नित्यसमाधिना चर्याम् । यदिति । याम् चर्यां पारमहंस्यं परमहंसप्राप्यं पदम् । तत्र हेतुः । समदृक् । तत्रापि हेतुः । स्वस्थः स्वस्वरूपे स्थितः। यतः प्रशांतेंद्रियः। तत्कुतः।यतः परि

त्रायतेऽतः पुत्र इति । पुन्नामकानरकाविंशतिसंख्याका वामनपुराणे प्रोक्तास्तथाहि—परदाराभिगमनं पापिसंगः पारुष्यं सर्वत्रेति प्रथमो नरकः । अत्र नरकपदं नरकसाधनपरम् । परदाराभिगमादिजन्यनरकेभ्यस्तत सूर्म्यादिभ्यः पातीति पुत्र इति भावः । एवमग्रेपि एषां पवर्गमारभ्य मातृकास्थदीर्घौकारपर्यंतगणनात्पुन्नामकत्वमिति । फलस्तेयफलहीनाटनवृक्षजातीयच्छेदनं द्वितीयः ॥२॥ वर्ज्यादानावध्यावधबंधनबांधववादस्तृतीयः ॥३॥ भूतमात्रभयदानं भूतिनाशनं भ्रंशनं निजधर्मतश्चतुर्थः ॥ ४ ॥ मारणमित्रकौटिल्यमिथ्योक्तिमिष्टैकाशनानि पञ्चमः ॥ ५ ॥ योगनाशनयवादिफलहरणयानयुग्यहरणानि षष्ठः ॥ ६ ॥ राजभागहरण—राजस्त्रीसंग—गताहितचिंतनानि सप्तमः ॥ ७ ॥ लुब्धत्व—लोलुपत्व—लब्धधर्मार्थनाशनान्यष्टमः ॥ ८ ॥ वेदब्राह्मणानिंदन—ब्रह्महरण—विप्रोत्कर्षासहन—विरुद्धाचरणानि नवमः ॥ ९ ॥ शिष्टाचारविनाश—शिष्टद्वेष—शिशुवधशास्त्रस्तेयानि दशमः ॥ १० ॥ षडंगवेदानंगीकारं—षाड्गुण्यनीतिपरित्यागावेकादशः ॥ ११ ॥ सन्निन्दा—सदाचारलंघनपुरस्सरानाचारस्वीकार—संस्कारत्यागा द्वादशः ॥ १२ ॥ हानिश्चतुर्वर्गविधेर्हेयसंग्रहादिस्त्रयोदशः ॥ १३ ॥ क्षपणकसंग—तन्मतस्वीकारः—क्षयाहत्यागक्षेत्रहरणादिश्चतुर्दशः ॥ १४ ॥ अज्ञसंगासत्योक्त्यसूयाशौचाशुभावहप्रवृत्तयः पंचदशः ॥ १५ ॥ आलस्यासत्कर्मत्यागार्यावर्त्तीयधर्मानंगीकाराचार्यासेवननिंदाश्रमधर्मत्यागादिः षोडशः ॥१६॥ इच्छा परदारधनादेः सप्तदशः ॥१७॥ ईर्ष्या शास्त्रेष्वष्टादशः ॥१८॥ उद्धतत्वमेकोनविंशः ॥१९॥ ऊर्ध्वं स्थितिर्गुरुपित्रादेरूतिवृद्धिर्विंशः ॥२०॥ एते पुन्नामकाः पुदित्यत्र तपरकरणमादिदुदित्यादिवत् ऊतिर्वासना सा चेह मंदा ज्ञेया "पुन्नामनरकं घोरं विनाशयति सर्वतः । एतत्स्मात्कारणात्साध्यस्ततः पुत्रेति गद्यते । "शेषेभ्यो रक्षणाच्छिष्यः पापेभ्यः परिकीर्त्तितः । घृतादिविक्रयो घोरश्चांडालादिपरिग्रहः ॥ स्वदोषाच्छादनं पापं परदोषप्रकाशनम् । इत्यादीनि च पापानि शेषसंज्ञानि वै विदुः ॥ यो गुरुं रक्षते तेभ्यः स शिष्यः परिकीर्त्तितः । तस्माच्छिष्यश्च पुत्रश्च विधातव्यौ प्रयत्नतः ॥ शिष्याच्छ्रेष्ठतरः पुत्रः सुमार्गनिरतो यदि । विमार्गगावुभौ त्याज्यौ यदुक्तनिरयप्रदौ ॥ विष्णुभक्तियुतौ कार्यौ प्रयत्नेन सुधीमता ॥" इति सर्वं वामनपुराणे विततमस्तीति । वाराहे तु "ऐहिकामुष्मिकं दुःखं पुदिति प्रोच्यते ततः । त्राति पुत्र इति ज्ञेयः पुद्दः प्रोक्तस्ततोन्यथा" ॥ ऐहिकं क्षुत्पिपासाशीतोष्णज्वरादि । आमुष्मिकं नरकपातादीति विवेकः । जगति भूलोके पुत्रपदं मथितवेनभुजोत्पन्नत्वात्पुत्रेण प्राप्य राज्यं लेभे इति तीर्थः । जगतीति निमित्ते सप्तमी अत आह । जगदर्थमिति । संदर्भस्तु 'भगवन्निंदया वेनो द्विजैस्तमसि पातितः' इति संप्तमस्कंधोक्तेर्वेनस्य पितुर्नारदात्कदाचिन्नरकभोगोत्तरं कुष्टिम्लेच्छत्वप्राप्तिं श्रुत्वा तमानीय कुरुक्षेत्रांतर्गतपृथूदकतीर्थे स्नपनादिना विशोध्य यातनाभोगादुद्दधारेति वामनपुराणीयकथामप्याह ॥ ९ ॥ तत्र पारमहंस्यपदत्वे । तत्रापि समदृक्त्वेपि । तत्प्रशांतेंद्रियत्वम् ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्रे ममास भगवान्हयशीरषाऽथो साक्षात्स यज्ञपुरुषस्तपनीयवर्णः ॥ छंदोमयो मखमयोऽऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतोऽस्य नस्तः ॥११॥ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ॥ विस्रंसितानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥१२॥ क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः ॥ पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिपरिवर्तकषाण कंडूः ॥१३॥ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ॥ दैत्येंद्रमाशु गदया भिपतंतमारादूरौ निपात्य विददार नखैः स्फुरंतम्॥१४॥अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजहस्त आर्तः॥आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवःश्रवणमंगलनामधेय॥१५॥

तो मुक्तसंगः ॥१०॥ हयग्रीवावतारमाह । सत्र इति । अथो इत्यर्थांतरे । स एव साक्षाद्भगवान्मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा आस । तपनीयं सुवर्णं तद्वद्वर्णो यस्य । छंदोमयो वेदमयस्तद्विधेया ये मखास्तन्मयः अमृतमय इति वा पाठः । मखैर्यजनीया अखिला देवतास्तदात्मा च । अस्य श्वसतः श्वासं मुंचतो नस्तो नासापुटादुशतीरुशत्यः कमनीया वेदलक्षणा वाचो बभूवुः ॥ ११ ॥ मत्स्यावतारमाह । मत्स्यो भाविना वैवस्वतेन मनुना दृष्टः क्षोणीमयः पृथ्वीप्रधानः तदाश्रय इत्यर्थः । अत एव निखिलजीवनिकायानामाश्रयः मे मुखाद्विस्रंसितान् गलितान्वेदस्य मार्गान्वेदानादाय तत्र युगांतसलिले विजहार । ह हर्षेण ॥ १२ ॥ कूर्मावतारमाह । क्षीरोदधौ कच्छपवपुः सन्गोत्रं मंथनार्थं मंदरगिरिं पृष्ठेन विधृतवान् । कदा अमृतलब्धये क्षीराब्धिमुन्मथ्नतां सताम् । निद्रायाः क्षणोऽवसर उत्सवो वा यस्य सः । निद्रावसरः कुतस्त्राह । अद्रेः परिवर्तः परिभ्रम एव कषाणः कषणं घर्षणं सुखप्रदो यस्यां सा कंडूर्यस्य सः । यद्वा । अद्रिपरिवर्त एव कषः कषणं तेन अणति अपयातीति कषाणा कंडूर्यस्य ॥ १३ ॥ श्रीनृसिंहावतारमाह । त्रैविष्टपा देवास्तेषामुरुभयं हंतीति तथा स भगवान् । यद्वा । त्रैविष्टपा देवास्तेषामप्युरुभयं यस्मात्तादृशो हासो यस्य तन्नृसिंहरूपम् अथवा हिरण्यकशिपो राज्यकाले त्रैविष्टपा दैत्यास्तेषामुरुभयजनको हासो यस्मिंस्तत्त्रैविष्टपोरुभयहासं तच्च तन्नृसिंहरूपं कृत्वा । कथंभूतं भ्रमंत्यौ भ्रुकुट्यौ दंष्ट्राश्च यस्मिंस्तत् करालं वक्त्रं यस्मिंस्तत् दैत्येंद्रं स्फुरंतमारात्समीप एव गदयोपलक्षितमभिपतंतं तं नखैर्विददार ॥ १४ ॥ हरिसंज्ञकावतारमाह । अंतरिति युगलेन । गजयूथस्य

'तपनीयं रूप्यहेम्नोः' इत्यभिधानात् । तद्विधेया वेदविहिताः "अस्य वै महतो भूतस्य निश्वसितं यदृग्वेदः" इत्यादिश्रुतेः ॥ ११ ॥ इत्यर्थ इति । पृथ्वीरूपनौधारणात्तदाश्रयो "नाव्यारोप्य महीमय्याम्" इत्युक्तेरिति भावः । अत एव पृथिव्याश्रयत्वादेव मृग्यंते जलेऽन्विष्यंते श्रीहरिणा मुनिभिर्वेति मार्गाः । वेदाश्च ते मार्गाश्चेति वेदमार्गास्तान् । अत एव स्वामिचरणैर्वेदानिति व्याख्यातम् । मृग्यते परमात्मा येषु ते मार्गा वेदाः "यद्दर्शनं निगम आत्मरहःप्रकाशम्" इति मार्कंडेयोक्तेः ॥ १२ ॥ निद्रावसरे हेतुं पृच्छति—कुत इति । कषणशब्दस्य सुखप्रदत्वार्थेऽप्रसिद्धेराह—यद्वेति । अपयाति नश्यति॥१३॥ श्लेषेणार्थांतरमाह । यद्वेति । ननु देवास्तु जानंत्येवास्मत्प्रार्थनयैवैतादृग्रूपं धृतं तत्राह—अथ वेति ॥ १४ ॥ आदिपुरुषेति । त्वन्तु आदित एव पुरुषाकारोहं तु पुरुषोपि संप्रति पापाद्गजाकार एवेति भावः । अखिललोकनाथस्य ते ममापि नाथत्वान्मां पातुमर्ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुत्वा हरिस्तमरणार्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ॥ चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान्कृपयोज्जहार ॥१६॥ ज्यायान्गुणैरवरजोऽप्यदितेः सुतानां लोकान्विचक्रम इमान्यदथाधियज्ञः॥क्ष्मां वामनेन जगृहे त्रिपदच्छलेन याच्ञाभृते पथि चरन्प्रभुभिर्नचाल्यः ॥१७॥ नार्थो बलेरयमुरुक्रमपादशौचमापः शिखां धृतवतो विबुधाधिपत्यम् ॥ यो वै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमंग शिरसाहरयेऽभिमेने॥१८॥ तुभ्यं च नारद भृशं भगवान्विवृद्धभावेन साधु परितुष्ट उवाच योगम्॥ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव॥१९॥

पतिः तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः हे तीर्थश्रवः। श्रवणेनैव मंगलं नामधेयं यस्य सः ॥ १५ ॥ तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते शुंडायां प्रगृह्य। किं कृत्वा नक्रस्य ग्राहस्य वदनं विनिपाठ्य विदार्य तस्मात्तद्वदनात् ॥ १६ ॥ वामनावतारमाह। अदितेः सुतानां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायाञ्ज्येष्ठः। गुणानेवाह। यद्यत इमाँल्लोकान्विचक्रमे पादन्यासैः क्रांतवान्। अथ प्रतिश्रुतानंतरमेव। तत्र हेतुः। बलेः क्ष्मां वानरूपेण जगृहे। नन्वीश्वरः स्वयं किमिति दुर्बलवत्तथा चक्रे तत्राह। याच्ञां विना धर्ममार्गे वर्तमानो न चाल्यः ऐश्वर्यान्न भ्रंशनीय इति ॥ १७ ॥ ननु तर्हि याच्ञयापि चालनमनुचितमेवेत्याशंक्य ततोऽप्यधिकं स्वसालोक्यादि दास्यामीत्याशयेन हृतवानित्याह। नार्थ इति। यद्विबुधाधिपत्यमिदानीं बलात्प्राप्तमग्रे दीयमानं चायं बलेः पुरुषार्थो न भवति। कुत इत्यंत आह। आप इति। आ अप इति छेदः। उरुक्रमस्य पादशौचं चरणक्षालनरूपाः अपः आ सर्वतो धृतवतः। क्व। शिखां शिखायां मूर्ध्नि इत्यर्थः। किं च शुक्रेण वारितः शप्तोऽपि अंग हे नारद यः प्रतिश्रुतं विनाऽन्यन्न चिकीर्षत् कर्तुं नैच्छत्। अडागमाभावस्त्वार्षः। किं तु प्रतिश्रुतं दातुमेवैच्छत्। यश्च तृतीयपादपूरणार्थं हरये आत्मानं देहमप्यभिमेनेऽङ्गीकृतवान् एवं सदेहं त्रैलोक्यं श्रद्धया दत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः ॥१८॥ हंसावतारमाह। तुभ्यमिति। भृशं विवृद्धेन भावेनात्युद्रिक्तया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथोवाच। ज्ञानं चेति ज्ञानसाधनं किं तत् भागवतं नाम कथंभूतं तत्त्वमेव सतत्त्वमात्मतत्त्वदी

सीति भावः। तीर्थं पावनं यशो यस्येति दुर्जात्यारंभकात्पापान्मामपि पवित्री कर्त्तुमर्हसीति भावः। श्रवणमंगलेति। गुरुमुखात्त्वन्नाम मयापि श्रुतमेव तदप्येतदमंगलं कथमिति भावः। यद्वा। हे तीर्थश्रव इति। तीर्थस्नानादिना यथा निवृत्तावस्य दुःखं नोचितं तथा तव यशःश्रवणादिनापि तथा च तव यशो वर्णयितुर्ममापि तन्नोचितमिति भावः। एतत्समर्थकसंबुद्ध्यंतरमाह–श्रवणेन मंगलं यस्मात्तादृङ्नामधेयं यस्य तादृशोसि श्रवणापेक्षया वर्णनस्य प्राधान्यात्तत्कर्तुर्मम तु तत्सर्वथैव नोचितामिति भावः ॥ १९ ॥ शरणार्थिनं रक्षकं प्रार्थयंतं हरिशब्दस्यार्थांतरव्यावृत्तयेऽप्रमेयः इयत्तारहितः तादृगाकाशादिरप्यस्तीति तद्वारणाय चक्रायुधः तादृग्योद्धाप्यस्ति तद्वारणाय पतगेति भुजस्कंधयोरतीव सामीप्यादेवमुक्तिः॥१६॥“इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्”इत्यादिश्रुतेः“यस्योरुषु त्रिषु विक्रमेष्वधिक्षिपति भुवनानि विश्वा”इति श्रुतेश्चार्थमाह–त्रिपदच्छलेनेति।तत्र पादन्यासे अत्राक्षिपति। नन्विति ॥ १७॥ पुनराक्षिपति। ननु तर्हीति। इत्यर्थ इति। अत्राधेयेनाधारग्रहणं समासेन शिखायां धृतवान् शिखां धृतवांस्तस्य तथा अन्यन्महत्त्वमाह। किं चेति। अन्यत् ततः परावर्त्तनं न चिकीर्षित् अत्राडागमाभावस्त्वार्षः नाचिकीर्षदित्यर्थः। इत्यर्थ इति। न हि भगवद्भक्तानां कैवल्यमपि पुरुषार्थः कुतः स्वर्गादीति भावः। अंगेति। प्रियत्वात्तुभ्यं हरिभक्तचरितमुक्तमिति भावः ॥१८॥ तुभ्यं चेति। चकारात्स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्रं च दिक्ष्वऽविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्ति ॥ दुष्टेषु राजसु दमं व्यदधात्स्वकीर्तिं सत्ये त्रिपृष्ठ उशतीं प्रथयंश्चरित्रैः ॥
॥२०॥ धन्वंतरिश्च भगवान्स्वयमेव कीर्तिर्नाम्ना नृणां पुरुरुजां रुज आशु हंति ॥ यज्ञे च भागममृतायुरवामरुन्ध आयुश्च वेदमनुशास्त्यवतीर्य
लोके॥२१॥क्षत्रं क्षयाय विधिनोपभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्तिलिप्सु॥उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्व उरुधारपरश्वधेन॥२२॥

पकम् । विवृद्धभावेनेतिविशेषणस्य फलमाह । यदिति ॥ १९ ॥ तत्तन्मन्वंतरावतारमाह । चक्रमिति । स्वतेजो निजं प्रभावमेव चक्रं सुदर्शनं बिभर्ति । चक्रवदप्रतिहतं प्रभावं बिभर्तीत्यर्थः । तदेवाह । मनुवंशपालकः सन् त्रयाणां लोकानां पृष्ठे उपरि स्थिते सत्यलोकेऽपि कमनीयां स्वकीर्तिं विस्तारयन् राजसु दंडं विधत्ते ॥ २० ॥ धन्वंतर्यवतारमाह । लोकेऽवतीर्य धन्वंतरिः सन् पुरुरुजां महारोगिणां स्वनाम्नैव रुजो रोगान् हंति । स्वयमेव कीर्तिरिति कीर्त्यतिशयोक्तिः । अमृतं मरणशून्यमायुर्यस्मात्सः । अव अवसन्नं पूर्वं दैत्यैः प्रतिबद्धं यज्ञे भागमवरुंधे लभते । अवाप रुद्धमिति पाठेऽप्ययमेवार्थः आयुर्विषयं वेदं चानुशास्ति प्रवर्तयति ॥ २१ ॥ परशुरामावतारमाह । जगतः क्षयाय विधिना दैवेनोपभृतं संवर्धितं मृत्यवे समर्पितमिति वा । ब्राह्मणेभ्यो द्रुह्यतीति तथा अतः उज्झितः पंथाः वेदमार्गो येन । अत एव नरकार्तिं लिप्सतीव

नकादिभ्यश्च । यद्वा । सनकादिद्वारा तुभ्यमपि ज्ञानसाधनं श्रीभागवतं नामेत्यर्थः । स्वार्थेत्र तत्त्वशब्दात्सप्रत्ययो बहुच्प्रत्ययवत्प्रागेव जात इति ज्ञेयम् । अत एव स्वामिचरणैर्व्याख्यातं तत्त्वमेव सतत्त्वमिति । यद्वा। तत्त्वसतत्त्वशब्दौ पर्यायौ । नारदेति । तत एवोपदेशात्त्वं नारमज्ञानं तत् द्यतिच्छेदयतीत्यन्वर्थनामासीति भावः । अत्र विश्वनाथः—विवृद्धभावेन प्रेम्णा योगं भक्तियोगं ज्ञानञ्च भक्तिविषयस्य भक्त्याश्रयस्य द्विविधं विशेषणद्वयेनाह भागवतं भगवत्सौंदर्यसौरम्यसौस्वर्यमाधुर्यसाद्गुण्याद्यनुभवरूपं प्रेमगम्यमित्यर्थः । तथात्मनो भक्त्याश्रयस्य जीवस्य यत्तत्त्वं तत्त्वमेव ज्ञानानंदादिकं तस्य दीपमविद्यावरणनिवर्तकत्वात्प्रदीपं प्रकाशकं यदिदं द्विविधं ज्ञानं वासुदेवशरणा ऐकांतिकभक्ता अंजसा सुखेनैव विदुः सर्वत्रैव शास्त्रेषु ज्ञानादिशब्दा विशेषणविशेष्यविनाभूतत्वेन प्रयुक्ता ब्रह्मज्ञानादिष्वेवरूढा यथा पंकजादिशब्दाः पद्मादिषु, अन्यथा तु यथायोगमेव वर्त्तन्ते इति यौगिका एवं यथा ''ज्ञानं परं तन्महिमावभासं यत्सूरयो भागवतं वदंति'' इति ।''ज्ञानं च यदहैतुकम्'' इति । ''यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम्'' इति। यथा च ''पंकजं वर्त्म दुर्गमम्'' इति। ''मंडपं भोजये द्विजम्'' इति विष्णुधर्मेपि हंसावतारेण नारदाय भक्तियोग एवोक्तः । यत्तु ''यदा तु सनकादिभ्यो येन रूपेण केशव। योगमादिष्टवानेतद्रूपमिच्छामि वेदितुम्'' इति सनकादिभ्यो ज्ञानोपदेष्टा हंसः स त्वन्य एव तुभ्यं चेति चकारेण तुभ्यमवतारायापि भक्तिमुवाच इत्युक्तिभंग्यैव नारदावतारोप्युक्त इति ॥ १९ ॥ इत्यर्थ इति । चक्रनाम्ना स्वासाधारणं तेज एव ''त्वं तेजः पौरुषं परम्'' इत्यंबरीषोक्तेर्धारयतीति भावः ॥ २० ॥ अमृतमिवायु र्लोके प्राकट्यं यस्य स तथा सर्वलोकनैरुज्यदानादिति विश्वनाथः । 'स्मृतमात्रार्त्तिनाशनः' इति वक्ष्यमाणत्वान्नाम्नैवं । 'ॐ श्रीधन्वंतरये नमः' इति नाममंत्रेणैवेत्यर्थः । अत एव स्वयमेव कीर्त्तिर्न तु केनचित्कृतेति भावः । आयुर्वेदमंगाष्टकयुतं तदुक्तं—''कायबालग्रहोर्द्ध्वांगशल्यदंष्ट्राजरावृषान् । अष्टावंगानि तस्याहुश्चिकित्सा येषु संश्रिता''इति हरिवंशे । तस्यायुर्वेदस्य कायचिकित्सा,बालचिकित्सा, ग्रहो भूतप्रेतादिः, ऊर्द्ध्वांगं शिरोनेत्रादि, शल्यं शस्त्रघातादि, दंष्ट्रा स्थावरजंगमात्मकं विषं तेषां चिकित्सा, जरा रसायनादिना जराया दूरीकरणं, वृषो वाजीकरणतंत्रमित्यर्थः ॥ २१ ॥ दैववर्द्धितस्य नाशाऽसम्भवादाह । मृत्यवे समर्पितमितिवेति । ''ब्रह्म सत्यतपो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ॥ तिष्ठन्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्तिमाच्छेत्॥२३॥यस्मा अदादुदधिरूढभयांगवेपो मार्गं सपद्यरिपुरं हरवद्दिधंक्षोः॥दूरे सुहृन्मथितरोषसुशोणदृष्ट्या तातप्यमानमकरोरगनक्रचक्रः॥२४॥ वक्षःस्थलस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुब्जुष ऊढहासम् ॥ सद्योऽसुभिःसह विनेष्यति दारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोऽधिसैन्ये ॥२५॥ भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः ॥ जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमोपनिबंधनानि ॥२६॥

एवंभूतमवनेः कंटकतुल्यं क्षत्रमसौ महात्मा हरिरुद्धंत्युत्पाटयति । दीर्घतीक्ष्णधारेण परशुना ॥ २२ ॥ श्रीरामावतारमाह त्रिभिः । अस्मदिति । अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया भरतादिरूपया सह कला माया तस्या ईशो गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश । यस्मिन् विरोधं कृत्वा रावणो नाशं प्राप्तः ॥ २३ ॥ यस्मै रामायोदधिमार्गं ददौ । सपदि शीघ्रं हरो यथा त्रिपुरं दिधक्षुस्तद्वदरिपुरं लंकां दग्धुमिच्छोः । षष्ठी चतुर्थ्यर्थे । यद्वा पंचमीयम् । दिधक्षोः रामाद्यद्भयं प्राप्तं तेनांगे कंपो यस्येति । कथंभूत उदधिः ऊढं प्राप्तं यद्भयं तेनांगेषु वेपः कंपो यस्य । अत्र हेतुः । दूरे वर्तमाना सुहृत्सीता तया निमित्तभूतया मथितः क्षुभितो रोषस्तेन सुशोणात्यरुणा दृष्टिस्तयात्यंतं तप्यमानं मकराणामुरगाणां नक्राणां च चक्रं यस्मिन् ॥ २४ ॥ किं च युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णा भग्ना ये महेंद्रवाहस्यैरावतस्य दंतास्तैर्विडंबिताः स्वधवलिम्ना धवलीकृताः । तत्तद्दिक्षु पतितैः प्रकाशिता इत्यर्थः । या एवंभूताः ककुभो दिशस्ताः जुषते सेवते पालयतीति वा । तथा तस्य दारहर्तू रावणस्य । अहो मत्समः कोऽन्योऽस्तीति महागर्वेणोढं प्राप्तं हासमसुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यत्यपनेष्यति । कैः । धनुषो विस्फूर्जितैष्टंकारघोषैरेव । कथंभूतस्य । अधिसैन्ये स्वपरसैन्यमध्ये उच्चरत उत्कर्षेण विचरतः ककुब्जयरूढहासमिति पाठे दंतैरुज्ज्वलितानां ककुभां जयेन यो रूढहासः संजातगर्वस्तमपनेष्यतीत्यर्थः ॥ २५ ॥ श्रीकृष्णावतारमाह । भूमेरिति दशभिः । सुरेतरा असुरांशसंभूता राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भारेण पीडितायाः कलया रामेण सह

विप्रविधातृपरमात्मसु'' इति धरणिः । अतो वैदिकशुभमार्गप्रदर्शकब्राह्मणद्रोग्धृत्वात् । अत एव त्यक्तवेदमार्गत्वादेव । उग्रः शंकरस्तत्समवीर्यः ॥ २२ ॥ चक्रवर्ती तु–कलेशः परिपूर्णः ''चिन्मयेस्मिन्महाविष्णौ जाते दाशरथे हरौ'' इतिश्रुतेः । ''नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितम्'' इति स्मृतेश्च ॥ २३॥ चतुर्थ्यर्थे षष्ठ्याः कल्पने गौरवादाह । यद्वेति । अत्रांगवेपे॥२४॥ अन्यत्प्रतापाधिक्यमाह । किञ्चेति । इत्यर्थ इति । एतेन दंतानामतिश्वैत्यं तेजोमयत्वं महत्त्वं चोक्तम् । इत्यर्थः इत्थं व्याख्येयः । ''हासः स्याद्धास्यगर्वयोः'' इति धरणिः ॥ २५॥ तयोर्द्वयोः केशयोर्मध्ये बलभद्रोस्त्याश्रयत्वेन यस्य श्वेतवर्णस्य स बलभद्रः एवं कृष्णोस्त्याश्रयत्वेन यस्य संकृष्ण उभयत्र मत्वर्थीयोप्रत्ययः । केशौ केशवन्ताविति पूर्वार्द्धेपि व्याख्येयम् । अन्यथैतद्व्याख्यानंगीकारे । तत्रैव विष्णुपुराणे भारते चापि तथा हि विष्णुपुराणे ''एवं संस्तूयमानस्तु भगवान्परमेश्वरः । उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥ उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य्य भुवो भारक्लेशहानिं करिष्यतः॥'' इत्यस्यायंभावः। 'सुरास्समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम् । आज्ञापयाज्ञाः परिपालयंतः सदैव तिष्ठाम ह्यपास्तदोषाः॥'' इति सुरैरुक्तो भगवान्मम दुष्करं चेत्तदा साहाय्यं कार्यं स्यान्न त्वेवमस्ति भूभारहरणादौ कर्त्रंतरापेक्षया महत्यपि कार्य्ये मत्केशयोरपि शक्तत्वादिति । न तु केशमात्रावतार इति भ्रमितव्यम् ''ततः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातः सन् । ननु कोऽसौ जातः । सितकृष्णौ केशौ यस्य भगवतः स एव साक्षात् । सितकृष्णकेशत्वं शोभैव न तु वयःपरिणामकृतं अविकारित्वात् । यत्तूक्तं विष्णुपुराणे । "उज्जहारात्मनः केशौ सितकृष्णौ महामुने । " इति ॥ यच्च भारते । " स चापि केशौ हरिरुच्चजहे शुक्लमेकमपरं चापि कृष्णम् ॥ तौ चापि केशावाविशेतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं च ॥ तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः ॥ कृष्णो द्वितीयः केशवः संबभूव केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ " इति

क्षयमशेषास्ते दैतेया धरणीतले । प्रयास्यंति न संदेहो मद्दक्पातविचूर्णिताः॥ कृष्णाष्टम्यामहं भाद्र उत्पत्स्यामि न संशयः॥" इत्यादिषु तत्रैव स्वावतारोक्तेर्विरोधात् । भारतेपि "अहं ब्रह्म परं धाम" इति श्रीगीतायामर्जुनं प्रति स्वस्य स्वयमेव परब्रह्मत्वोक्तेर्विरोधात् । "कृष्णस्तु भगवान्स्वयम्" इति पूर्वोक्तिविरोधाच्च । अजरामरस्येशस्यार्द्धपलितत्वासंभवादेककेश ईशेच्छया रामस्य श्वेतरूपज्ञापनार्थं तदेव श्वेतोऽभूदिति गम्यते । एतेनैव भारतवाक्यमप्येतत्तुल्यं व्याख्यातं तथा श्रीगोपालतापिन्युपनिषद्यपि "मुनयो ह वै ब्रह्माणमूचुः कः परमो देवः" इत्यादिप्रश्नेषु । "तदुहोवाच ब्राह्मणः श्रीकृष्णो वै परमं दैवतम्" इत्याद्युत्तरश्रवणाच्छ्रीकृष्णोऽवतार्येव न त्ववतारोऽन्ये नृसिंहादयोऽवतारा एव 'जयंति कृष्णस्य दशावताराः' इति मुकुटाचार्योक्तेः । यत्तु श्रीदशमे "कृष्णावतारोत्सवसंभ्रमोस्पृशत्" इति श्रीकृष्णेत्यवतारोक्तिः सा चाविर्भावपरेति ज्ञेयम् । किञ्च विष्णु नामान्युक्त्वा "वसुदेवोस्य जनकः"इत्यनेनामरसिंहेनावैदिकेनापि श्रीकृष्णस्यैव विष्णुपदवाच्यब्रह्मत्वं ध्वनितम् । अन्यथा कश्यपो ह्यस्य जनक इत्यादि वदेत् । तथा च"शत्रुश्लाघ्यो हियो योध स शूरः परिकीर्त्तितः"इति न्यायोप्यत्र मानमनुसंधेयम् । किञ्चाक्षराणां कामधेनुत्वादत्रार्थांतराश्रयणे विरोधः सर्वथैव नोदयते । तथाहि—हे कलयांशेन सित वृद्ध हे कलावतार नारद कृष्णकेशः जातः सन् कर्म्माणि करिष्यतीत्यन्वयः । को ब्रह्मा तस्येशः केशः कृष्णश्चासौ केशश्चेति तथा । यद्वा । कलया रक्षया हेतुना जात इति योज्यम् । सिता बद्धाः कृष्गाः केशा येन स तथा बद्धशिखंड इत्यर्थः । यद्वा। सितो बद्धः कृष्णो यया सा सितकृष्णका यशोदा तस्या ईश ऐश्वर्यं येन स सितकृष्णकेशः कृतयशोदानंद इत्यर्थः । यद्वाऽसितशब्दोपलक्षितोऽधर्मस्तस्य श्यामरूपत्वात्तं कर्षत्याकर्षतीत्यसितकृष्णो धर्मः स एवासितकृष्णकः स्वार्थे कः तस्येशः पालकः "संरक्षणाय धर्मस्य संभवामि युगेयुगे" इत्यादिपुराणात् । यद्वा । के जले लीयत इति कलया भूमिः "अप्सु प्रलीयते भूमिः" इति वक्ष्यमाणत्वात् । तस्यां सितो बद्धो भूषणे मणिरिव कलया सितो गोवर्द्धनस्तं कर्षत्युद्धरतीति कलयासितकृष्णः । के जले शेत इति केशः कलयासितकृष्णश्चासौ केशः कलयासितकृष्णकेशः गोवर्द्धनधरो विष्णुरित्यर्थः । यद्वा । कलया बलदेवेन सह सितकृष्णकेशः । यद्वा । कलयोपास्त्या सितोबद्धः कृष्णो येन स नारदसंबुद्धिः । कं मोक्षसुखं लाति ददातीति कला ब्राह्मणजातिः "भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम्" इति मुचुकुंदं प्रति श्रीकृष्णोक्तेः । तया तद्धेतोः हेतौ तृतीयाऽसितो मुक्तः सत्यभामार्पितः कृष्णो येन स चासौ केशो मदीश इति हरिवंशे प्रसिद्धम् । यद्वा । सितः शिवः कृष्णो विष्णुः को ब्रह्मा तेषामीशः । कृष्णं कायंति गायंति "जयतु तेधिकम्" इत्यादिनेति कृष्णका गोप्यस्तासामीशः कृष्णकेशः । वा । कृष्णेन कं सुखं येषां ते कृष्णकाः पांडवादिभक्तास्तेषामीशः।न सितः स्वीकृतः कृष्णो यैस्तेऽसितकृष्गा दैत्यास्तान् क्लिश्नाति विबाधते इत्यसितकृष्णकेशः । 'क्लिशू विबाधने' लस्य लोपेनौणादिकःकेशशब्दः । यद्वा । सिता गंगा च कृष्णा यमुना चेति सितकृष्णे ते एव सितकृष्णके स्वार्थके पुंवद्भावः तयोरीशः सितकृष्णकेशः । सितं च कृष्णञ्च सितकृष्णे सितकृष्णे के जले ययोस्ते सितकृष्णके गंगायमुने तयोरीशः सितकृष्णकेशः । यद्वा । कलया चातुर्येण सिता बद्धाः कृष्णाया राधायाः केशा येन स तथेत्यलं पल्लवितेन । अन्यथानुपपत्तिर्विनेश्वरं तद्भवनम् । आत्ममहिमेश्वरत्वम् । संदर्भस्तु कोसौ कलयांशेन सितकृष्णकेशो यः "सितकृष्णकेशौ देवैर्दृष्टौ" इति शास्त्रांतरप्रसिद्धेः । सो (ताव)पि यस्यांशेन स एव भगवान्स्वयमित्यर्थः । तदविनाभावाच्छ्रीबलदेवस्यापि ग्रहणं द्योतितम् । ननु पुरुषादपि पुराणोसौ भगवान्कथं भूभारहरणमात्रार्थं स्वयमवतरिष्यतीत्याशंक्याह—आत्मनो महिमानः परममाधुरीसंपदः उपनिबध्यंते निजभक्तैरधिकं वर्ण्यंते येषु तानि कर्माणि च करिष्यति च । यद्यपि निजांशेनैव निजेच्छाभासेनैव वा भूभारहरणमीषत्कृतं तथापि निजचरणारविंदजीवातुबन्दमानंदयन्नेव लीलाकादंबिनीनिजमाधुरीवर्षणाय विहरिष्यमाणोऽवतरिष्यतीत्यर्थः ॥ एतदेव व्यक्ती करिष्यते "तोकेन जीवहरणम्" इत्यादौ इतरथा स्वमाधुरीसंपत्प्रकाशनेच्छामंतरेण मधुरतरं लोकादिभावं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तु ।न केशमात्रावताराभिप्रायं किं तु भूभारावतारणरूपं कार्यं कियदेतन्मत्केशावेवैतत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते अन्यथा तत्रैव पूर्वापरविरोधापत्तेः । "कृष्णस्तु भगवान्स्वयम्" इत्येतद्विरोधाच्च । कथंभूतः । परमेश्वरतया जनैरनुपलक्ष्यो मार्गो यस्य । तर्हीश्वरत्वे किं प्रमाणम् । अतिमानुषकर्मा

दधताऽनेन पूतनादीनां जीवहरणादिकं कर्म न भाव्यं न संभवनीयं तदंशतादिच्छाभासादिमात्रेणैव तत्सिद्धेरिति वाक्यार्थः । तथा च "तथायं चावतारस्ते भूभार–" इत्यादौ स्वामिचरणैरपि व्याख्यातम् । किं भूभारहरणं मदिच्छामात्रेण न संभवति तत्राह स्वानामिति । "जयति जननिवासः" इत्यत्र च इच्छामात्रेणं निरसने समर्थोऽपि क्रीडार्थे 'दोर्भिरस्यन्नधर्मम्' इति । एवमादिभिः श्रीकृष्णस्यैव सर्वाद्भुततावर्णनाभिनिवेशः प्रपंचो ब्रह्मणि स्पष्ट एव । अस्तु तावत्तद्भूरिभाग्यमित्यादि सितकृष्णकेश इत्यत्र तात्पर्यं श्रीस्वामिभिरेव विवृतम् । इदमप्यत्र तात्पर्यं संभवति । ननु देवाः किमर्थं मामेवावतारयितुं भवद्भिराग्रह्यते अनिरुद्धाख्यपुरुषप्रकाशविशेषस्य क्षीरोदश्वेतद्वीपधाम्नो मम यौ केशाविव शिरोधार्यभूतौ श्रीवासुदेवसंकर्षणौ स्वयमेवावतरिष्यतः ततश्च भूभारहरणं ताभ्यामषित्करमेवेति "अथोज्जहारात्मनः केशौ" इत्यस्यैव शब्दार्थोऽपि मुक्ताफलटीकायां केशौ सुखस्वामिनौ सितो रामः आत्मनः सकाशादुज्जहारोद्धृतवानित्यादि यैर्यथाश्रुतमेवेदं व्याख्यातं ते तु न सम्यक्परामृष्टवंतः यतः सुरमात्रस्यापि निर्जरत्वं प्रसिद्धम् । अकालकलिते भगवति जरानुदयने केशशौक्ल्यानुपपत्तिर्न चास्य केशस्य नैसर्गिकासितकृष्णतेति प्रमाणमस्ति अत एव नृसिंहपुराणे श्रीकृष्णावतारप्रसंगे शब्द एव युज्यते न तु केशशब्दः "वसुदेवस्य देवक्यामवतीर्य यदोः कुले । सितकृष्णे च मच्छक्ती कंसाद्यान्घातयिष्यतः" इत्यादि । अस्तु तर्हि अंशोपलक्षणः केशशब्दः न अविप्लुतसर्वशक्तित्वेन साक्षादादिपुरुषस्यैव निश्चेतुं शक्यत्वात् । कृष्णविष्ण्वादिशब्दानामविशेषतः पर्यायप्रतीतेः । नैवमवतारांतरस्य जन्मदिनं जयंत्याख्ययाऽतिप्रसिद्धम् । अत एव महाभारते "भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः । शाश्वतं ब्रह्म परमं योगिध्येयं निरंजनम्" इति । तस्याकालकलितत्वं "योयं कालस्तस्य ते व्यक्तबंधो चेष्टामाहुः" इत्यादौ द्वारकावासिवाक्ये च प्रसिद्धं तस्मान्न केशावतारत्वेपि न तात्पर्यं, वैष्णवादिपद्यानां शब्दानामर्थं त्वेवं पश्यामः । "अंशवो ये प्रकाशंते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्मुनिसत्तम ॥ " इति सहस्रनामभाष्यस्थापितभारतवचनात्केशशब्दे नांशुरुच्यते तत्र च सर्वत्र च । केशेतरशब्दाप्रयोगान्नानावर्णांशूनां श्रीनारददृष्टतया मोक्षधर्मप्रसिद्धेश्च । तथाचांशुत्वे लब्धे तौ चांशू वासुदेवसंकर्षणावतारसूचकतया निर्दिष्टाविति तयोरेतौ स्यातामिति गम्यते । तदीययोरपि तयोरनिरुद्धरूपत्वेऽभिव्यक्तिश्च युज्यत एव । अवतारितेजोंतर्भूतत्वादवतारस्य ततश्चोज्जहारेत्यस्यायमर्थः आत्मनः सकाशात् श्रीवासुदेवसंकर्षणांशभूतौ केशावंशू उज्जहारोद्धृतवान्प्रकटीकृत्य दर्शितवानित्यर्थः । अत्रायं सुमेरुरित्येकदेशदर्शनेनैवाखंडसुमेरुनिर्देशवत्तद्दर्शनेनापि पूर्णस्यैवाविर्भावनिर्देशो ज्ञेयः । अथ स चापिकेशावित्यादिकव्याख्या उद्ववर्ह योगबलेनात्मनः सकाशांद्विच्छिद्य दर्शयामास । स चापीति चशब्दः पूर्वमुक्तं देवकर्तृकं निवेदनरूपमर्थं समुपक्षिणोति । अतिशब्दस्तदुद्धरणे श्रीभगवत्संकर्षणयोरपि हेतुकर्तृत्वं सूचयति । तौ चापीति चशब्दोऽनुक्तसमुच्चयार्थत्वेन भगवत्संकर्षणौ स्वयमेव विविशतुः पश्चात्तौ तत्तादात्म्येनापि विविशतुरिति बोधयति अपिशब्दो यत्रानुस्यूतौ चामू सोपि तदंशेपीति गमयति । 'तयोरेको बलभद्रो बभूव' इत्यादिकं तु "नरो नारायणो भवेत्, हरिरेव भवेन्नरः" इत्यादिवत्तदैक्यावाप्त्यपेक्षया । केशवः केशवनाम्ना श्रीमथुरायां केशवस्थानाख्यमहायोगपीठाधिपत्वेन प्रसिद्धः स एव कृष्ण इति । नृसिंहपुराणे तु "सितकृष्णे च मच्छक्ती" इति तद्वर्णनिर्देशेनांशवाचक एव शक्तिशब्द इति । चक्रवर्ती तु " स तं बयसि कैशोरे" इत्याद्युक्तेर्नित्यकैशोरावस्थावतः सितकेशत्वं न युज्यते । विष्णुपुराणीयवाक्यस्थकेशाविति पदस्य तु केशौ सुखरूपावीश्वरौ सितकृष्णौ उज्जहार बहुस्तुतिभिः प्रसाद्यः बार्हिरप्युद्गमयामास हे महामुने इति । मननेनैवास्यार्थस्यावगम्यतेति भावः । "सुखशीर्षजलेषु कम्" इति नानार्थवर्गात् । सर्वत्र विष्णुपुराणादौ केशशब्दप्रयोगस्तु "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इति भगवत्संमतौ स्थितानां शास्त्रकाराणामृषीणां तत्तद्वचनमाकूतमेवेति ज्ञापनार्थ एव । यद्वा । सितो रुद्रः कृष्णो विष्णुः को ब्रह्मा तेषामपीशः "स यावदुर्व्याभरमीश्वरेश्वरः स्वकालशक्त्या–" इत्युक्तेः । आत्मनः स्वस्य महिम्नि उपाधिक्येन नितरा बंधनं येभ्यस्तानि यत्कर्माणि सर्वलोकमनांसि माधुर्येण बध्नन्तीत्यर्थः । यद्वात्मनो महिमा महैश्वर्यं तस्याप्युपाधिक्येन निबंधनमावृतीकरणं येषु तानि यत्कर्मसु माधुर्य्येणावृतमेव महैश्वर्यं तिष्ठतीत्यर्थः । यद्वा । कलया नैपुण्येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः ॥ यद्रिंगतांऽतरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथाऽर्जुनयोर्न भाव्यम्॥
॥२७॥यद्वै व्रजे व्रजपशून्विषतोयपीथान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या॥ तच्छुद्धयेऽतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्ह्रदिन्याम्॥
॥ २८ ॥ तत्कर्म दिव्यमिव यन्निशि निःशयानं दावाग्निना शुचिवने परिदह्यमाने ॥ उन्नेष्यति व्रजमतोऽवसितांतकालं नेत्रे पिधाय्य सबलोऽनधिगम्यवीर्यः ॥ २९ ॥

न्यथानुपपत्तिरेवेत्याह । आत्मनो महिमोपनिबद्ध्यतेऽभिव्यज्यते येषु तानि ॥ २६ ॥ एतदेव प्रपंचयति तोकेनेत्यादिना । बालेन पूतनाया जीवहरणं यत् रिंगता जानुभ्यां गच्छतांतरगेन मध्यं प्राप्तेन दिविस्पृशोरत्युच्चयोः इतरथानीश्वरत्वे तन्न भवितव्यम् ॥ २७ ॥ विषतोयपीथान् विषमयतोयस्य पीथं पानं येषां तान् पालान् गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्रीडन्नुरगं कालियमुच्चाटयिष्यदुच्चाटयिष्यति । तच्छुद्धये तस्या ह्रदिन्या निर्विषत्वाय अतिविषवीर्येण विलोलातिचंचला जिह्वा यस्य ॥२८॥ दिव्यमलौकिकमिवेति लोकोक्तिः । उन्नेष्यत्युद्धरिष्यति । शुचिर्ग्रीष्मस्तत्संबंधिनि वने शुष्क इत्यर्थः । अतो दावाग्नेर्हेतोरवसितो निश्चितोऽतकालो यस्यतम् । सबलः सरामः अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य । तत्र निशि निःशयानमिति कालियदमने रात्र्यां यमुनातीरे नेत्रे पिधाय्य पिहिते कारयित्वेति,मुंजाटव्यामिति ज्ञेयम् ॥२९॥

सिता बद्धाः कृष्णाः श्यामा केशा येन स तथा । यद्वा । कलया वेदरक्षया हेतुना सितेन बलदेवेन सह कृष्णः केशः सुखरूप ईशः माधुर्यैश्वर्यमयः इति व्याचकार ॥ २६ ॥ एतदेव प्रपंचयति उलूकिकायाः पूतनाया यज्जीवहरणं तोकेनैव बालकेनैव रूपेण न त्वतिविकटाकाराया अतिविस्तृतस्वरूपाया अतिबलिष्ठायास्तस्या बधोपयोगिनी तादृशैश्वर्यमयी वामनावतारस्य त्रिविक्रममूर्त्तिरिव काचिन्मूर्त्तिराविष्कृतेति भावः । त्रैमासिकस्यैव पदाऽति सुकोमलेनेत्यर्थः । यत् अपवृत्तः विपर्यस्ततया पातितः न तु हिरण्यकशिपुविदारणार्था नृसिंहमूर्त्तिरिव काचित्पदस्य विकटकठोरताविष्कृतेतिभावः। रिंगता जानुभ्यां गच्छतैवांतरं तेन तयोर्मध्यंगतेनैवोलूखलनिबंधेनैवार्जुनयोर्द्वयोर्यदुन्मूलनं न तु पृथिव्युद्धरणोपयोगिना वराहरूपेणेव कोपि प्रयत्नः कृत इति भावः । तत्सर्वमात्ममहिमोपनिबंधनमेव । निजबाल्यमहामाधुर्येण स्वमहैश्वर्यस्यावृतीकरणमेवेति पूर्वेणानुषंगः । इतरथा न भाव्यमन्यथा न भाव्यमेतात्रिकेणेदृशेन भवितव्यं नाभविष्यतेत्यर्थ इति विश्वनाथः।"तोकोल्पांगे शिशौ सुते" इत्यभिधानात् । (शरीरोत्थानादिप्रवृत्तिहेतुत्वादवः प्राणस्ताँल्लुंपतीत्युलूपिका तस्या इति तीर्थः।) उलूकिकात्वमत्र बक्या अपि तस्या अरिष्टकर्तृत्वसाधारण्यात्"अहो बकीयम्" इत्याद्युक्तेस्तस्या बकीत्वं प्रसिद्धमेव । जानुघर्षणपूर्वकं गमनं रिंगणं,दिविस्पृशोः सहस्रधनुषोप्यूर्द्ध्वदेशं स्पृशतोः सहस्रधनुषस्तूर्द्ध्वं द्युशब्देनापि भण्यत इति तीर्थः । त्रयो मासा वयोलक्षणा निर्वृता यस्य स त्रैमासिकस्तस्य॥२७॥विषेण सहितं तोयं विषतोयं तदेव पीथं येषांते विषतोयपीथास्तांस्तथा यद्व्रजपश्वादीनजीवयत्तदितरथा न भाव्यमिति योज्यम् ॥२८॥ इत्यर्थ इति।ग्रीष्मर्तौ हि स्वभावतएव सूर्यतापेन सार्द्रमपि निरार्द्रं भवतीति भावः । दावाग्नितो रक्षणं हि श्रीकृष्णेन द्विः कृतं तत्र द्वयोर्मध्ये मुंजाटव्यां तु दिवैव रक्षणं कृतमिति । इवोत्रैवार्थे बोध्यः लोकोक्तिरेव न शास्त्रोक्तिः।शास्त्रं तु"जन्म कर्म च मे दिव्यम्"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृह्णीत यद्यदुपबंधममुष्य माता शुल्बं सुतस्य न तु तत्तदमुष्य माति ॥ यज्जृंभतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधिताऽऽसीत् ॥ ३० ॥ नंदं च मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च ॥ अह्न्यापृतं निशि शयानमतिश्रमेण लोकं विकुंठ उपनेष्यति गोकुलं स्म ॥ ३१ ॥ गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशून्कृपया रिरक्षुः ॥ धर्तोच्छिलींध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलम् ॥ ३२ ॥ क्रीडन्वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्च्छितेन ॥ उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ॥ ३३ ॥ ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः ॥ अन्ये च शाल्वकपिबल्वलदंतवक्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ॥ ३४ ॥ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकैकयसृंजयाद्याः ॥ यास्यंत्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयम् ॥ ३५ ॥

उपबद्ध्यतेऽनेनेत्युपबंधं तत्साधनम् । शुल्बं दाम अमुष्य माता यशोदाऽग्रहीत् अमुष्य उदरे न माति बंधनसंमितं न भवति न पूर्यत इत्यर्थः । गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजैश्वर्यं ज्ञापितासीदिति यत् तच्च कर्म दिव्यमिवेति सर्वत्र पूर्वेणैवान्वयः ॥ ३० ॥ वरुणस्य पाशाद्यद्भयं तस्मान्मोचयिष्यति मयसूनुना व्योमनाम्ना अह्नि आपृतं व्यापृतं व्यापारयुक्तं निशि शयानमिति च वैकुंठप्राप्तिसाधनानुष्ठानाभावो दर्शितः । उपनेष्यति प्रापयिष्यति गोकुलवासिनं जनम् । स्मेत्याश्चर्ये ॥ ३१ ॥ देवे इंद्रे पशून् रिरक्षुः रिरक्षिषुरित्यर्थः । अनघे श्रमरहिते एकस्मिन्नेव करे सलीलं यथा तथा महीध्रं गोवर्धनं धर्ता धारयिष्यति । उच्छिलींध्रमुद्गतं छत्राकमिव । सप्तवर्षाणि वयो यस्य सः ॥ ३२ ॥ निशि रात्रौ निशाकररश्मिभिर्गौर्यां धवलायाम् । वने क्रीडन् कलानि मंजुलानि पदानि यस्मिन् तच्च तदायतं दीर्घं मूर्च्छितमालापविशेषयुक्तं गीतं तेनोद्दीपितः स्मर एव रुक् यासां तासां गोपीनां हर्तुः शंखचूडस्य शिरो हरिष्यति ॥ ३३ ॥ ये च प्रलंबादयस्ते सर्वे हरिणा हेतुभूतेन तदीयं निलयमदर्शनं दर्शनायोग्यं वैकुंठमलं यास्यंतीत्युत्तरेणान्वयः । खरो धेनुकः । दर्दुर इव दर्दुरो बकः । इभः कुवलयापीडः । कुजो नरकः । कपिर्द्विविदः ॥३४॥ ये च मृधे आत्तचापाः

इत्याह ॥२९॥ इत्यर्थ इति । व्यापकस्य व्याप्येन बंधनं न भवतीति भावः । "शुल्बं स्याद्दामताम्रयोः" इत्यभिधानात् ॥३०॥ "ते तु ब्रह्मह्रदं नीताः" इति वक्ष्यमाणरीत्याऽक्रूरतीर्थे यद्वा नित्यमेव श्रीकृष्णप्रेमचेष्टत्वं तदर्थे नानाप्रयासानंतरं तदेकसमाधित्वं च "यद्धामार्थसुहृत्प्रियार्थतनयप्राणाशयास्त्वत्कृते" इति ब्रह्मवाक्यात्। "इति नंदादयो गोपाः कृष्णरामकथां मुदा। कुर्वंतो रममाणाश्च नाविंदन्भववेदनाम्॥" इति वाक्याच्च । ब्रह्मसमाधिपक्षे श्रीमन्नंदान्वेषणार्थ एव तद्दिने व्यापारश्रमेण निशि निद्रायामेव तद्दर्शनमिति भक्तेच्छादायित्वं दर्शितम् । अत्र सर्वांते यद्गोलोकप्रापणं तदप्यनेनैव सूचितं दावाग्निपानलीलावत् ॥ ३१ ॥ इत्यर्थ इति । वर्णलोपश्छांदसः । सर्वत्र यत्तदोरध्याहारेणान्वयः कार्यः ॥३२॥ ३३॥ बके दर्दुरसाम्यं हि नेत्रसंमीलनपूर्वकस्थितिरेव आद्यपदेन पीठादयो ग्राह्याः ॥ ३४ ॥ अत्राक्षिपति नन्विति । कालांतरे यास्यंतीति तेषां दमनमेव हरिणा कृतं न तु ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेन मीलितधियामवमृश्य नृणां स्तोकायुषां स्वनिगमो बत दूरपारः ॥ आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ॥ ३६ ॥ देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ॥ लोकान्धतां मतिविमोहमतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥ ३७ ॥ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाखंडिनो द्विजजना वृषला नृदेवाः ॥ स्वाहास्वधावषडिति स्म गिरो नं यत्र शास्ता भविष्याति कलेर्भगवान्युगांते ॥ ३८ ॥

समितौ संग्रामे शालंते श्लाघंते ते समितिशालिनः । ननु प्रलंबखरकपिबल्वलरुक्मिप्रमुखा बलभद्रेण निहताः । कांबोजादयश्च भीमार्जुनादिभिः, शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन न तु हरिणा तत्राह । बलो भीमः पार्थ इत्यादयो व्याजाह्वयाः कपटनामानि यस्य तेन सतोक्षाणस्तु दमिताः कालांतरे यास्यंतीति भावः । एतच्च सर्वमपि कर्म दिव्यमिव तच्चान्यथा न भाव्यमिति पूर्वेणैव संबंधः ॥ ३५ ॥ व्यासावतारमाह । अनुयुगं मीलिता संकुचिता धीर्येषाम् । स्तोकमल्पमायुर्येषां तेषां स्वनिगमः स्वकृतो वेदराशिः बताहो दूरे पारं यस्येति दुर्गम इत्यवमृश्य सत्यवत्यामाविर्हितः प्रादुर्भूतः सन् स एव हरिः विटपशः शाखाभेदेन ॥ ३६ ॥ बुद्धावतारमाह । देवद्विषां निगमवर्त्मनि वेदमार्गे निष्ठितानां नितरां स्थितानाम्।तद्बलेन च पूर्भिः पुरीभिः अदृश्यतूर्भिरलक्ष्यवेगाभिः मतेर्विमोहो योग्यतात्यागो यस्मात् मतेः प्रलोभश्चायुक्तस्वीकारो यस्मात्तं पाखंडवेषं विधाय तेनौपधर्म्यं पाखण्डधर्मम् । स्वार्थे ष्यञ् । बहु भाष्यत इत्यर्थः॥ ३७॥कल्क्यवतारमाह । यर्हि यदा सतामप्यालयेषु गृहेषु हरेः कथा न स्युस्त्रैवर्णिकाः पाखंडिनः स्युः शूद्राश्च राजानः स्युस्तदा कल्किरूपेण कलेः शास्ता भविष्यति । अत्र च ब्रह्मनारदसंवादात्प्राग्भाविनो वराहादयः । मन्वंतरावतारास्तु भूता भाविनश्च ।

मारिता अतो हरिस्पर्शप्रभावादेव कालांतरे देहपातेपि तेषां हरिपदप्राप्तिरेव भविष्यतीति तात्पर्य्यम् ॥ ३५ ॥ ३६ ॥ तद्बलेन वेदमार्गस्थितिबलेन । पाखण्डवेषं शास्त्राविहितवेषं वस्त्रखंडेन मुखपिधानादिलक्षणं तेन वेषेण उपधर्मस्तु पाखण्डस्स एवौपधर्म्यं वेदब्राह्मणदेवार्चनादिनिंदाप्रतिपादकं शास्त्रं तथाहि—सर्वं क्षणिकं क्षणिकं तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत्सत्तत्क्षणिकं यथा जलधरपटलं संतश्चामी भावा इत्यादि सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थिकरसंमतमन्यथा तन्निवृत्त्युपाये तेषां प्रवृत्तिर्न स्यात्तस्मात्सर्वं दुःखं दुःखमिति भावनीयम् । ननु किंत्रिदिति पृष्टे दृष्टांतः कथनयि इति चेन्मैवं स्वलक्षणानां क्षणानां क्षणिकतया सालक्षण्याभावान्नैतेन सदृशमपरमिति वक्तुमशक्यत्वात् । ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् । एवं शून्यं शून्यमित्यपि भावनीयमित्थं बुद्धमुनिना स्वशिष्येभ्यश्चतुर्द्धोपादिष्टमत्र बहुवक्तव्यमस्तीत्युपरम्यते । किञ्च "स्वर्गः कुत्र च कुत्र दैवतकुलं कुत्राथ जन्मान्तरम्" इत्यादिना चिरंजीविभट्टेनापि तन्मतं प्रदर्शितं विद्वन्मोदतरंगिण्यां ततोन्यतश्च तदवसेयम् । इत्यर्थ इति । अत्रापि वर्णलोपश्छांदस इति भावः ॥ ३७ ॥ त्रैवर्णिकाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्गे तपोऽहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमराऽवनीशाः ॥ अंते त्वधर्महरमन्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाजः ॥ ॥ ३९ ॥ विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि ॥ चस्कंभ यः स्वरहसाऽस्खलता त्रिपृष्ठं यस्मात्त्रिसाम्यसदनादुरुकंपयानम् ॥ ४०॥ नांतं विदाम्यहममी मुनयोऽग्रजास्ते मायाबलस्य पुरुषस्य कुतोऽपरे ये ॥ गायन्गुणान्दशशताननं आदिदेवः शेषोऽधुनापि समवस्यति नास्य पारम् ॥ ४१ ॥ येषां स एव भगवान्दययेदनंतः सर्वात्मनाऽऽश्रितपदो यदि निर्व्यलीकम् ॥ ते दुस्तरामतितरंति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ॥ ४२ ॥ वेदाऽहमंग परमस्य हि योगमायां यूयं भवश्च भगवानथ दैत्यवर्यः ॥ पत्नी मनोः स च मनुश्च तदात्मजाश्च प्राचीनबर्हिर्ऋभुरंग उत ध्रुवश्च ॥ ४३ ॥

धन्वंतरिपरशुरामौ तदा वर्तेते । श्रीरामादयस्तु भाविनः तत्र तु क्वचिद्भूतादिनिर्देशश्छांदस इति द्रष्टव्यम् ॥ ३८ ॥ सृष्ट्यादिकार्यभेदेन मायागुणावतारविभूतीराह । सर्ग इति । स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च मनवश्चामराश्चावनीशाश्च अंते संहारे हरो रुद्रः मन्युवशाः सर्पाः बहुशक्तिधारिणो भगवत इमा मायाविभूतयः ॥ ३९ ॥ इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं न कोऽपि समर्थ इत्याह । पृथिव्याः परमाणूनपि यो विममे गणितवांस्तादृशोपि को नु विष्णोर्वीर्यगणनां कर्तुमर्हति । कथंभूतस्य यो विष्णुस्त्रिपृष्ठं सत्यलोकं चस्कंभ धृतवान् । किमिति चस्कंभ । यस्मात्त्रैविक्रमेऽस्खलता प्रतिघातशून्येन स्वरंहसा स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादारभ्योरु अधिकं कंपयानं कंपमानम् । कंपेन यानं यस्येति वा । अतः कारणाच्चस्कंभ आत्रिपृष्ठमिति वा छेदः । सत्यलोकमभिव्याप्य यः सर्वं धृतवानित्यर्थः । तथा च मंत्रः । "विष्णोर्नु कम्० " इति । अस्यार्थः । विष्णोर्नु वीर्याणि कं प्रवोचं कः प्रवोचदित्यर्थः । यः पार्थिवानि रजांस्यपि विममे सोऽपि यो विष्णुस्त्रेधा विचक्रमाणस्त्रिविक्रमं कुर्वन्नुत्तरं लोकमस्कभायदवष्टब्धवान् । कथंभूतम् सधस्थम् । सहस्य सधादेशः । तिष्ठंतीति स्थाः तत्रस्थैर्देवैः सह वर्तमानमित्यर्थः ॥४०॥ एतत्प्रपंचयति । नांतमिति । पुरुषस्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि दशशतान्याननानि यस्य स शेषोऽप्यस्य गुणान् गायन् पारं न समवस्यति न प्राप्नोति ॥ ४१ ॥ यदि न केऽपि विदंति तर्हि कथं मुच्येरन् तत्कृपयैवेत्याह । येषामिति । दययेद्दयां कुर्यात् । ते च यदि निष्कपटमाश्रितचरणा भवंति ते दुस्तरामपि देवमायामतितरंति चकारान्मायावैभवं विदंति च । अथेति वा पाठः । प्रत्यक्षमेव तेषां मायातितरणमित्याह । नैषामिति । श्वसृगालानां भक्ष्ये देहे ॥ ४२ ॥ अंतर्ज्ञानाभावेऽपि माययमिति ज्ञानं तत्क

विप्रक्षत्रविशः ॥ ३८ ॥ ३९ ॥ संभवत्वादाह कंपेनेति । यानं गमनं पतनमिति यावत् । अतः कंपनरूपात् । इत्यर्थ इति । प्रधानावरणादारभ्य सत्यलोकपर्यंतं कंपमानं ब्रह्मांडं यः स्वपादेनैव रुरोधेति भावः । अत्र प्रमाणमाह–तथा चेति । "विष्णोर्नुकं वीर्याणि प्रवोचं पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः" इति स्वामिचरणैरेवायं मंत्रो व्याख्यातः । छंदोभंगस्त्वार्षः । स्वरंहसेति पाठ एव "रह एकांतवेगयोः" इति कोशादननुस्वारपाठोपि प्रशस्त एव तथैव बहुपुस्तकेषु दृश्यते ॥ ४० ॥ ४१ ॥ अतितरंतीत्यत्रार्थे तरंतीति पाठः ॥ ४२ ॥ हे अंगेति ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरा गयनाहुषाद्याः ॥ मांधात्रलर्कशतधन्वनुरंतिदेवा देवव्रतो बलिरमूर्तरयो दिलीपः ॥ ४४ ॥ सौभर्युतंकशिबिदेवलपिप्पलादसारस्वतोद्धवपराशरभूरिषेणाः ॥ येऽन्ये विभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ॥ ४५ ॥ ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ॥ यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥ शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम् ॥ शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना॥४७॥

पया बहूनामस्तीत्याह वेदाहमिति त्रिभिः । यूयमिति । सनकादीनंतर्भाव्य बहुत्वम् । दैत्यवर्यः प्रह्लादः मनुः स्वायंभुवः तस्य पत्नी शतरूपा च तदात्मजाः प्रियव्रतोत्तानपादौ पुत्रौ तिस्रः कन्याश्च । प्राचीनबर्हिषो विसर्गलोपश्छांदसः ॥ ४३ ॥ शतधनुः अनुश्च । संधिरार्षः । रंतिदेवा इति वा पाठः सुगमः । ऐकपद्ये एतैः सहितो देवव्रत इत्यर्थः ॥ ४४ ॥ उपेंद्रदत्तः शुकः । विभीषणादयो वर्या मुख्या येषां ते ॥ ४५ ॥ किं बहुना सत्संगेन तु सर्वेऽपि विदंतीत्याह । ते वा इति । अद्भुताः क्रमाः पादन्यासा यस्य हरेस्तत्परायणास्तद्भक्तास्तेषां शीले शिक्षा येषां ते । तथा यदि भवंति तर्हि ते स्त्रीशूद्रादयः पापजीवाः तेऽपि विदंतीत्यर्थः । तत्र श्रुते भगवतो रूपे धारणा मनोनियमनं येषां ते विदंतीति किमु वक्तव्यम् ॥ ॥ ४६ ॥ किं तद्भगवतः स्वरूपं यस्मिन्मनोधारणां विधाय मायां तरंति चेत्यपेक्षायामाह शश्वदिति द्वाभ्याम् । यद्ब्रह्मेति विदुर्मुनयस्तद्वै भगवतः पदं स्वरूपम् । किं तद्ब्रह्म तदाह । अजस्रं नित्यं च तत्सुखं च विशोकं चेति अजस्रसुखत्वे हेतुः । शश्वत्सदा प्रशांतमतो नित्यसुखरूपम् । विशोकत्वहेतु अभयम् । तत्कुतः । यतः समं भेदशून्यमतोऽभयम् "द्वितीयाद्वै भयं भवति" इति श्रुतेः । तत्कुतः । यतः प्रतिबोधमात्रं ज्ञानैकरसम् । ननु ज्ञानस्यापि नीलपीताद्याकारेण चक्षुरादिकरणभेदेन च भेदो दृश्यते । न । शुद्धं निर्मलम् । ननु दर्शितो विषयकरणोपरागरूपो मल इत्यत आह । सदसतः परं विषयकरणसंगशून्यम् । वृत्तेरेव तदुपरागो न ज्ञानस्येति भावः । ननु तथापि ज्ञात्रा सह भेदः स्यात् । न । आत्मतत्त्वमात्मनो ज्ञातुः स्वरूपमेव तन्न ततो भिन्नम् । ननु च "तं त्वौपनिषदं पुरुषं पृच्छामि"

इत्यर्थ इति । मांधातृत आरभ्य रंतिदेवदेवव्रत इत्यंतमैकपद्ये इति भावः ॥ ४४ ॥ उत्तंक इति वक्तव्ये उतंकेत्यार्षः । सारस्वतनामा कश्चिदृषिविशेषो वसिष्ठादिवत्स च सरस्वतीपुत्रस्तद्वृत्तं भारतादवसेयम् । यस्य गोत्रिणो हि सारस्वतगोत्रा एव न तु सारस्वत संज्ञा इति।सारस्वतसंज्ञका विप्रास्तु सारस्वतदेशवासिन एव "मत्स्यान्सारस्वतानथ" इति प्रथमस्कंधे सारस्वतदेशोपि पठितोस्ति क्वचित्पुस्तकेषु शारद्वतोद्धवेति पाठोप्यस्ति तत्र शारद्वतोऽपत्यं शारद्वतः कृपाचार्यः प्रतीयते "शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः" इत्युक्तेः ॥४५॥ शीले शुचौ चरिते "शुचौ तु चरिते शीलम्" इत्यमरः ॥४६॥ मायातारकं भगवद्रूपं पृच्छति किं तदिति तत्समम् । ज्ञानैकत्व आक्षिपति नन्विति।पुनराक्षिपति नन्विति।विषयो घटादिः करणं चक्षुरादि तयोरुपरागः संबंधस्तद्रूपो मलः स एव मलः इति भावः।ज्ञानवृत्तेरुपरागोस्ति तरंगस्थानीयाया न तु समुद्रस्थानीयस्य ज्ञानस्येति तात्पर्यम् । पुनराक्षिपति तथापि ज्ञानस्यापरागाभावेपि ज्ञाता यो जीवस्तेन प्रहरति नेति पुनराक्षिपति नन्विति।औपनिषदमुपनिषत्प्रतिपाद्यम्।आरोपितो यस्तस्मिन्प्रपञ्चस्तन्निवृत्तौ तदपवादे इत्यर्थ इति"अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपंच्यते"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वै पदं भगवतःपरमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् ॥ सध्यङ् नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिंद्रः॥४८॥

इति शब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह । शब्दो न यत्रेति । आरोपितनिवृत्तावेव शब्दस्य व्यापारो न तु तद्बोध इत्यर्थः । ननु च भवतु नाम निरस्तभेदज्ञानरूपत्वाद्विशोकत्वं सुखस्य तु नानाकारकसाध्यक्रियाफलत्वात्कथमजस्रसुखत्वं तस्येत्यत आह । यत्र बहुकारकसाध्यः क्रियार्थ उत्पाद्याप्यविकार्यसंस्कार्यरूपं चतुर्विधं क्रियाफलं च नास्ति इंद्रियैर्ज्ञानांशाभिव्यक्तिरिव क्रियाभिरानंदांशाभिव्यक्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः । ननूत्पत्त्याद्यभावेऽपि मायामलापाकरणेन विकार्यत्वमेव स्याद्व्रीहीणामिव तुषापाकरणेनेत्याशंक्याह । माया अभिमुखे स्थातुं विलज्जमानेव यस्मात् परैति दूरतोऽपसरति ॥ ४७ ॥ तस्मादेवंभूते भगवति नियमितमनसां कृतार्थानां न किमपि कृत्यमस्तीत्याह । सध्यंचतीति सध्यक् सहचरं मनो यं प्रति नियम्य यस्मिन् स्थिरीकृत्य यतयो यत्नशीलाः कर्तो भेदस्तन्निरासोऽकर्तस्तत्र हेतिं साधनं जह्युस्त्यजेयुः अनुपयोगात्तन्नाद्रियंत इत्यर्थः । उपयोगाभावेन साधनानादरे दृष्टांतः । निपीयतेऽस्मिन्निति निपानं कूपस्तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विराजमान इंद्रो नादत्ते तद्वदिति यद्वा स्वेनैव राजत इति स्वराट् दरिद्रः स यथा इंद्रः समृद्धः सन् कर्मकारदशायां गृहीतं निपानखनित्रं जहाति तद्वदित्यर्थः ॥ ४८ ॥

इत्युक्तेरिति भावः । पुनराक्षिपति नन्विति।नानाकारकसाध्या क्रिया यागादिरूपा तस्याः फलत्वात् तस्यात्मनः यद्भूत्वा भावि तदुत्पाद्यम्।यत्सिद्धमेव प्राप्यते तदाप्यम् । यत्र पूर्वावस्थापरित्यागेनावस्थांतरप्राप्तिस्तद्विकार्य्यम् ।यत्र गुणाधानं मलापकर्षणं क्रियते तत्संस्कार्यम् । इति भाव इति । उत्पत्तिलक्षणस्याभूत्वाभवनरूपस्य तत्रासत्त्वादयमाशयः । पुनराक्षिपति—नन्विति । नन्वत्र "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इत्यधिकारिभेदादेक एव त्रिरूपतया भातीति अत्र"अपीयतां कर्णकषायशोषान्" इत्यादिना"शास्ता भविष्यति कलेर्भगवान्" इत्यनेन भगवानशेषविशेषतयोक्तः । तदुपारुकांश्च 'येषां स एव भगवान्दययेदित्यादिना किमु शुभधारणाये' इत्यंतेनोक्ताः संप्रति परमात्मा ब्रह्म चोच्यतामित्याकाक्षयामाह सदसत उत्तमाधमस्य ब्रह्मादिस्तंबपर्यंतस्य जीववृंदस्य परमात्मतत्त्वं सममेकरसमेव तथा शश्वत्सदा प्रकर्षेण शांतं तस्य गुणवशाच्छांतघोरमूढस्यापीत्यर्थः । शश्वत्प्रशब्दाभ्यां सत्त्वगुणकार्यः शमो व्यावृत्तः तथाऽभयं तस्य सभयस्यापि प्रतिबोधमात्रं तस्याज्ञानस्य ज्ञानवतोपि प्रतिमात्रशब्दाभ्यां सत्त्वगुणकार्यबोधो व्यावृत्तः शुद्धं तस्याशुद्धस्यापि एवं परमात्मानमुक्त्वा ब्रह्माह यत्र नानाकारकवानपि तथा क्रियया सहार्थो वाच्यलक्ष्यव्यंग्या यत्र तादृशोपि शब्दो न प्रभवति तद्ब्रह्म ननु ब्रह्मशब्देनैव तद् ब्रूषे अथ च शब्दो न यत्रेति निषिध्यसि च तत्राह-मायेति।यस्याभिमुखे माया परैति पृष्ठदेशमुपैति तस्य भगवतः पदमप्राकृतविचित्ररूपगुणादिविशेषवतोपि तस्य प्राथमिकसाक्षात्कारविषयो निर्विशेषं स्वरूपं 'मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ' इति श्रीमत्स्योक्तेस्तदीयं व्यापकत्वलक्षणं बृहत्त्वमेव ।निश्चितं ब्रह्म । अयं भावः । शब्दस्याकाशगुणत्वेन मायिकत्वान्मायापि तदभिमुखे स्थातुमशक्तरमायिकरूपगुणादिमंतं भगवंतमपि शब्दोभिधातुं यद्यपि न प्रभवति तदपि " मेघश्यामः कनकपरिधिः पंकजाक्षोयमात्मा " इत्यादयः शब्दाः मेघकनकादिप्राकृतवस्तुसादृश्यारोपेणैव लोकचित्तं यथा कथंचित्तत्र प्रवेशयंति । लोकश्च चित्तैकाग्र्येणापि वस्तुतोऽस्पृष्टरूपतद्रूपाभासोपि भगवन्तं प्रभुमहं ध्यायामीत्यभिमन्यमानो हृष्यति भगवानप्यपारकृपातरंगवशादेवानेनाहं ध्यात एवेत्यभिमन्यतेऽभिमत्य च तं भक्तं स्वचरणांतिकं समानयतीति भगवत्स्वरूपस्य शब्दगम्यत्वं तत्कृपयैव सिद्धं ब्रह्मस्वरूपस्य तु प्राकृताप्राकृतविशेषराहित्यात्कथं शब्दगम्यत्वमास्त्विति शब्दो न यत्रेत्युक्तं प्रवृत्तिनिमित्तस्य वस्तुधर्मस्य जात्यादेरभावात् यत्र क्रियाकारकवान् शब्दो न प्रभवति तद्ब्रह्मेति ब्रह्मशब्दस्य पृथक्संकेत एवायं कृतः अतः शब्दगम्यत्वाभावेपि शब्दगम्यस्य भगवतो निर्विशेषं स्वरूपं तद्ब्रह्मेति भगवत्संबंधित्वेनैवोक्ते सति तत्र लोकचित्तप्रवेशो नान्यथेति भंग्या ब्रह्मणोपि शब्दगम्यत्वमुक्तमित्थमेव श्रुत्यध्यायादौ व्याख्यास्यते तथाऽजस्रमेव सुखं यतो विगतः शोको यतस्तादिति तस्य सुखरूपत्वे विशोकत्वे च कैमुत्यमानी तदिति विश्वनाथः ॥ ४७ ॥ इत्यर्थ इति । भेदनिरासायैव वेदांताभ्यासादिसाधनं क्रियते तत्सिद्धौ तत्त्यागो न्याय्य एव घटसिद्धौ दंडादित्यागवदिति भावः । इंद्रेण तु पूर्वमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स श्रेयसामपि विभुर्भगवान्यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धिः ॥ देहे स्वधातुविगमेऽनुविशीर्यमाणे व्योमेव तत्र पुरुषो न विशीर्यतेऽजः ॥ ४९ ॥ सोऽयं तेऽभिहितस्तात भगवान्विश्वभावनः ॥ समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत ॥ ५० ॥ इदं भागवतं नाम यन्मे भगवतोदितम् ॥ संग्रहोऽयं विभूतीनां त्वमेतद्विपुली कुरु ॥ ५१ ॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति ॥ सर्वात्मन्यखिलाधार इति संकल्प्य वर्णय ॥ ५२ ॥

एवं तावदजस्रसुखं विशोकं ब्रह्मैव भगवतः स्वरूपं तत्प्राप्तानां च न प्राप्यं कृत्यं वा किंचिदस्तीत्युक्तमिदानीं ततः प्राक् स एव सर्वफलदाता सर्वकर्मप्रवर्तकश्चेत्याह । स एव श्रेयसां फलानां विभुर्दाताऽपि । तत्र हेतुः । भावानां ब्राह्मणादीनां स्वभावैः शमदमादिभिर्विशेषणैर्विहितस्यास्य सतः शुभस्य कर्मणो यतः प्रवर्तकात्प्रसिद्धिः यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः कार्यस्य प्रसिद्धिः स एव स्वर्गादीनां दातेत्यर्थः । ननु कर्मकर्तुर्मृतस्य कथं स्वर्गादिफलं स्यात्तत्राह । स्वारंभकधातूना भूतानां विगमे वियोगे सत्यन्वनु विशीर्यमाणेऽपि देहे तत्रस्थं व्योमेव यस्तेन सह न विशीर्यते यतोऽजस्तेन सह न जातस्तस्य पुरुषस्य श्रेयसां प्रभुरित्यर्थः ॥ ४९ ॥ अध्यायत्रयस्यार्थमुपसंहरति । सोऽयं ते समासेन संक्षेपेणाभिहितः । तमेवाह । सदसत्कार्यं कारणं च हरेरन्यन्न भवति । ननु हरेस्तदव्यतिरेके तद्गतविकारप्रसंगः स्यात् । न । अन्यस्मात्कारणभूतो हरिः कार्याद्व्यतिरिक्त इत्यर्थः ॥५०॥ अयं च विभूतीनां संग्रह उदितः ॥ ५१ ॥ यथा वर्णितेन नृणां भक्तिर्भविष्यतीत्येवं संकल्प्य संचिंत्य

साधनानि नात्तानि तत्र तु स्वत एव त्यागोऽतोऽनुपयुक्तोयमर्थ इति तत्राह—यद्वेति । स्वेनैव न तूपकरणादिनेत्यर्थः । इति इत्यर्थव्याख्या ॥४८॥ ततः प्राग्भगवत्प्राप्तेः पूर्वम् । तत्र कर्मफलदातृत्वे । ब्राह्मणादिस्वभावास्तु— शमो दमस्तपः शौचं तितिक्षा क्षांतिरार्जवम् । ज्ञानं दयाच्युतात्मत्वं सत्यं चेति ब्रह्मस्वभावाः । शौर्यं तेजो बलं धैर्यं दाक्ष्यं दानमीश्वरभावो युद्धेऽपलायनमिति क्षत्रस्वभावाः । कृषिगोरक्ष्यवाणिज्यमिति वैश्यस्वभावाः । त्रिवर्णसेवा शूद्रस्वभावः ॥ आचार्यसेवनं वेदाध्ययनं च ब्रह्मचारिस्वभावः । अतिथिसेवनादिर्गृहस्थस्य । तपो वनौकसः । विचारो यतेरिति विवेकेनाग्रे वर्ण्यते भावशब्दस्य वर्णाश्रमवाचकत्वाप्रसिद्धिमालोच्याह यद्वेति । महादादिवाचकत्वं भावशब्दस्य "यथेमे विकृता भावाः" इति वक्ष्यत्येव । इत्यर्थ इति । कर्मफलदानार्थमेव स्वर्गादि निर्मितवान्प्रयोजनांतराभावादिति भावः । अत्राक्षिपति नन्विति । तत्रस्थं देहस्थम् । इत्यर्थ इति । "न जायते म्रियते वा कदाचित्" इत्यादिस्मृतेः कर्मफलभोक्तुर्नाशो नास्तीति भावः ॥ ४९ ॥ हरावाक्षिपति नन्विति । इत्यर्थ इति । कार्यं तु कारणादनन्यद्भवति तद्विना तदासिद्धेः कारणं तु कार्यादन्यदेव तद्विनापि तस्य सिद्धेरिति भावः । संबुद्धिरुक्ताभिप्रायैव बहुशः ॥ ५० ॥ विभोरूतयो लीलास्तासां संग्रहः "को वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतास्त्रिलोक्याम्" इत्यत्रोतिशब्दो लीला वाचको दृश्यते कोशेपि "लीलावासनयोरूतिस्तंतुवापनकर्मणि" इति । संक्षेपस्तु "द्रव्यं कर्म च कालश्च" इत्यारभ्या "आद्योवतारः पुरुषः परस्येति, सर्गे तपोहमृषय इति, यत्रोद्यतः क्षितितलोद्धरणाय" इत्यादिरूपो बोध्यः । विपुली कुरु व्यासायोपदिष्टा विस्तारयेत्यर्थः ॥ ५१॥ इत्यर्थ इति यत्केवलतत्त्वज्ञानफलं मोक्षस्तदपि भक्त्यैव भविष्यतीति भावः । "यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । तत्सर्वं मत्प्रसादेन मद्भक्तो लभतें

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[नृजन्मनि न तुष्येत कृतेन भगवान्यदि ॥ धर्मार्थकामैः किं तर्हि कार्यं सिध्यति नश्वरैः ॥१॥ कृष्णे न चोत्तमश्लोके चेद्भक्तिरनपायिनी ॥ किं स्याद्वर्णाश्रमाचारैः किं दानैः किं तपःश्रुतैः ॥२॥] मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः ॥ शृण्वतः श्रद्धया नित्यं माययाऽऽत्मा न मुह्यति ॥ ॥५३॥इति श्रीभागवते महापुराणे द्वितीयस्कंधे ब्रह्मनारदसंवादे सप्तमोऽध्यायः ॥७॥राजोवाच ॥ ब्रह्मणा चोदितो ब्रह्मन्गुणाख्यानेऽगुणस्य च ॥ यस्मैयस्मै यथा प्राह नारदो देवदर्शनः ॥ १ ॥ एतद्वेदितुमिच्छामि तत्त्वं वेदविदां वर ॥ हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः ॥ २ ॥ कथय स्व महाभाग यथाऽहमखिलात्मनि ॥ कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरम् ॥ ३ ॥ शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचेष्टितम् ॥ कालेन नातिदीर्घेण भगवान्विशते हृदि ॥ ४ ॥ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहम् ॥ धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥ ५ ॥

तथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय न तु भक्तिरसविघातेन केवलं तत्त्वमित्यर्थः ॥ ५२ ॥ ननु लीला मायाश्रया किं तद्वर्णनेनेत्यत आह । मायामिति ॥५३॥ इति श्रीभा० म० द्वितीयस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ अष्टमे देहसंबंधमाक्षिपन्नीशजीवयोः ॥ बहून्परीक्षिदापृच्छत्पुराणार्थान्बुभुत्सितान् ॥ १ ॥ त्वमे तद्विपुलीकुर्वित्युक्तं तदेव विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः । अगुणस्य च गुणातीतस्यापि । देवबद्दर्शनं यस्य सः ॥ १ ॥ २ ॥ निःसंगं मनः श्रीकृष्णे निवेश्येति स्वप्रयत्नो दर्शितः ॥ ३ ॥ सोऽपि श्रद्धया शृण्वतो नावश्यक इत्याह । शृण्वत इति । स्वप्रयत्नं विनापि भगवान् स्वयमेव हृदि विशति ॥ ४ ॥ भावसरोरुहं हृदय कमलं प्रविष्टश्च तद्गतं सर्वं मलं धुनोति । सलिलस्येति । द्रव्यांतरव्यामिश्रणादिना कुंभस्थे जले शोधिते तदेव केवलं शुद्ध्यति न तु नदीतडागादिगतम् । स च मलः

जसा" इति भगवदुक्तेर्भक्तिं प्रधानीकृत्यैवान्यद्वक्तव्यं नान्यथेति तात्पर्यम् ॥५२॥ अत्राक्षिपति नन्विति । अमुष्य ईश्वरस्येत्यसंधिरस्य वेदरूपतां द्योतयति "छंदसि सर्वे विधयो विकल्पंते" इत्युक्तेः । चेतःसन्निहितत्वाद मुष्येत्युक्तम्।मायया बंधकशक्त्या न मुह्यति बद्धो न भवतीत्यर्थः।स्ववर्णयितारं मायापि नापकुरुते स्वपालयितारमिव सिंहसर्पादिरिति भावः॥५३॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे सप्तमोऽध्यायः॥७॥ आक्षिपन्नीशस्य देहसंबंधः कथं कथं च जीवस्येत्यादिशंकां कुर्वन् । बुभुत्सितान् ज्ञातुमीप्सितान् (१) हे ब्रह्मन्निति साक्षाद्वेदरूप एव त्वमतो मत्संदेहमपाकर्त्तुं समर्थोसीति भावः । देवं सर्वत्र द्योतमानं भगवंतं दर्शयति निजसेविनां तत्त्वोपदेशेनेति देवदर्शनः । यद्वा देवस्य हरेर्दर्शनं साक्षात्कारो यस्य स तथा देवैस्तपआदिना द्योतमानैर्दृश्यत इति वा तथा अकारो वासुदेवः स एव देव उपास्यो येषांतेऽदेवा भगवद्भक्ता स्तैर्दृश्यते इति वाऽकारप्रश्लेषेऽर्थः ॥१॥ हे वेदविदां पैलादीनां मध्ये वरेति यत्तत्त्वं त्वया ज्ञायते तद्वेदविद्भिरपि ज्ञातुमशक्यमिति भावः । एतत्तत्त्वं नारदव्याससंवादोत्तरव्यासास्यांबुजोद्भूतश्रीभागवतमकरन्दपानमेव मन्मनश्च ञ्चरीकाभिमतं तत्त्वं तदेव वेदितुं पातुमिच्छामीत्यर्थः । अतो हरेः कथाः कथयस्वेत्यग्रिमेणान्वयः । तत्र हेतुः अद्भुतं मनआल्हादकरं वीर्यं यस्य तस्य ॥ २ ॥ हे महाभागेति । भजनं भाग अस्य वासुदेवस्य भागो यस्य सोऽभागः महांश्चासावभागश्चेति महाभागस्तत्संबुद्धौ तथा "वैयासकिश्च भगवान् वासुदेवपरायणः" इत्युक्तेस्त्वं श्रीकृष्णभक्तत्वान्महाभागोसि त्वत्कृपयाहमपि चंदनतरुन्यायेन तथास्यामिति भावः ॥ ३ ॥ ४ ॥ कथा रूपेण भगवानेव प्रविष्टः सन्भावसरोरुहं हृदयकमलं तत्रांतर्यामी सदा स्थितोप्युदासीन एव कर्णप्रविष्टः । कृष्णश्च जीवमामज्जयति स्वस्मिन्निति ध्वनितं भावो दास्यसख्यादिस्तद्रूपमेव कमलमिति वा शमलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति ॥ मुक्तसर्वपरिक्लेशः पांथः स्वशरणं यथा ॥६॥ यदधातुमतो ब्रह्मन्देहारंभोऽस्य धातुभिः ॥ यदृच्छया हेतुना वा भवंतो जानते यथा ॥ ७ ॥ आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणम् ॥ यावानयं वै पुरुष इयत्ताऽवयवैः पृथक् ॥ तावानसाविति प्रोक्तः संस्थाऽवयववानिव ॥ ८ ॥ अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥ ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ॥९ ॥ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ॥ मुक्त्वाऽऽत्ममायां मायेशः शेते सर्वगुहाशयः ॥ १० ॥

कुंभस्यांतस्तिष्ठत्येव नतु सर्वथा विलीयते अत एव किंचिच्चलनेन पुनः क्षुभ्यति च एवं तपोदानादिप्रायश्चित्तं न सर्वथा सर्वेषां सर्व पापं धुनोति किंतु सावशेषम् । तच्च कस्यचिदेव किंचिदेव हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वेषां सर्वं पापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति ॥ ५ ॥ ततश्च कृतार्थो भवतीत्याह । धौतात्मा निष्पापः मुक्ताः सर्वे रागद्वेषादयः परिक्लेशा येन । पांथः प्रवासादागतः स्वशरणं गृहं यथा न मुंचति तद्वत् ॥ ६ ॥ तदेवं श्रवणौत्सुक्यमाविष्कृत्य संदिग्धानर्थान् पृच्छति । अधातुमतः धातवो महाभूतानि तत्संबंधशून्यस्यास्य लौकिकस्यात्मनो जीवस्य धातुभिर्देहारंभ इति यदेतत् किं यदृच्छया निर्निमित्तं हेतुना वा कर्मादिना भवंतो यथावज्जानते अतः कथयंत्विति शेषः ॥ ७ ॥ यश्चासावीश्वरः सोऽप्येतत्तुल्यदेहवान् प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति आसीदिति सार्धेन । लोकानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्त्रैलोक्यात्मकं पद्मं यस्योदरादासीत् । असावीश्वर इयत्तायुक्तैः स्वपरिमितैरवयवैरयं लौकिकः पुरुषो यावान् यत्संख्याकावयवयुक्तस्तावान्संस्थावान्प्रोक्तः अवयववानिव च प्रोक्तः अतः को विशेषस्तस्येति ॥ ८ ॥ अवश्यं च विशेषो वाच्य इत्याह । अजो ब्रह्मा भूतानां व्यष्ट्युपाधीनामात्मा नियंता समष्ट्युपाधित्वात् येन च अनुगृह्णता तस्य रूपं ददृशे दृष्टवान् । एतच्च "तस्यापि द्रष्टुरीशस्य कूटस्थस्याखिलात्मनः । सृज्यं सृजामि सृष्टोऽहमीक्षयैवाभिचोदितः ॥ " इत्यादिनोक्तमनूद्यते । अग्रे तु स्पष्टं भविष्यति ॥ ९ ॥ प्रश्नांतरमाह । स चापीति । यत्र शेते येन रूपेणावतिष्ठते । विश्विस्य स्थित्यादयो यस्मात् एवमा

कामक्रोधादि धुनोति ननु नात्यद्भुतमिदं यतो ज्ञानयोगादयोप्येतत्कर्त्तुं प्रभवंतीत्यत आह सलिलस्येति । द्रव्यांतरमिश्रणादिना कुंभस्थे जले शोधिते तदेव केवलं शुध्यति न तु तडागादिगतं स च मलः कुंभस्यांतास्तिष्ठत्येव न तु सर्वथा विलीयतेऽत एव किंचिच्चलने क्षुभ्यति च एवमेव ज्ञानयोगतपआदयो न सर्वेषां किं तु कस्यचिदेव तस्यापि न सर्वथा किं तु किंचिदेव न तु सावशेषं कथंचिदेव हृदयमालिन्यं धुन्वंति तदुक्तं "यमादिभिर्योगपथैः कामलोभहतो मुहुः । मुकुंदसेवया यद्वत्तथाद्धात्मा न शाम्यति" इति हृदि प्रविष्टमात्रस्तु कृष्णः सर्वेषामपि सर्वमपि निःशेषमेवेति शरद्दृष्टांतः सर्वेषामेव सर्वमेव निःशेषमेव हरत्येवेत्यवधारणचतुष्टयमत्र बोध्यम् ॥ ५ ॥ ननु तस्यापि कियद्दिनानंतरं धनाद्युपार्जनाय गृहाद्गतं दृष्टमेव तत्राह मुक्तत्यक्तः सर्वधनाद्युपार्जनलक्षणः क्लेशो येन स तथा ततश्च श्रीकृष्णस्य हृदि प्रवेशाच्च "शरणं गृहरक्षित्रोः" इत्यमरः ॥ ६ ॥ दधति धारयंति सर्वमिति धातवः दधातेरौणादिकस्तु प्रत्ययः ॥ ७ ॥ अतो जीवतुल्यदेहवत्त्वात् तस्येशस्य ॥ ८ ॥ येन भगवताऽनुग्रहं कुर्वता तस्यैव भगवतः एतच्च भगवद्रूपदर्शनवृत्तं च अनूद्यतेऽनुवादः क्रियतेऽग्रे नवमाध्याये ॥ ९ ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥ ११ ॥ यावान्कल्पो विकल्पो वा यथा कालोऽनुमीयते ॥ भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः ॥ १२ ॥ कालस्यानुगतिर्या तु लक्ष्यतेऽण्वी बृहत्यपि ॥ यावत्यःकर्मगतयो यादृशीर्द्विजसत्तम ॥ १३ ॥ यस्मिन्कर्मसमावायो यथा येनोपगृह्यते ॥ गुणानां गुणिनां चैव परिणाममभीप्सताम् ॥ १४ ॥ भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम् ॥ सरित्समुद्रद्वीपानां संभवश्चैतदोकसाम् ॥ १५ ॥ प्रमाणमंडकोशस्य बाह्याभ्यंतरभेदतः ॥ महतां चानुचरितं वर्णाश्रमविनिश्चयः ॥ १६ ॥ अवतारानुचरितं यदाश्चर्यतमं हरेः ॥ युगानि युगमानंच धर्मो यश्च युगेयुगे ॥ १७ ॥ नृणां साधारणो धर्मः सविशेषश्च यादृशः ॥ श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवताम् ॥ १८ ॥

दिप्रश्नानां तत्त्वतोऽर्हस्युदाहर्तुमिति सर्वांते क्रियायाः संबंधः ॥ १० ॥ प्रश्नांतरमाह । पुरुषस्यावयवैः पूर्वं कल्पिता 'यस्येहावयवैर्लोकान्कल्पयंति' इत्यादौ 'लोकैश्चामुष्यावयवाः' इति 'पातालमेतस्य हि पादमूलम्' इत्यादौ च त्वन्मुखाच्छ्रुतवंतो वयम् ॥ ११ ॥ एवं संदेहविपर्ययाभ्यां पृष्टम् । इदानीमज्ञातान्बहूनर्थान्पृच्छति यावानित्यादिना । कल्पो महान् विकल्पोऽवांतरः भूतादिः शब्दो यस्मात् यस्य वाचक इति वा । ततः स्थूलदेहाभिमानिनो मनुष्यपितृदेवादेरायुषः प्रमाणम् ॥ १२ ॥ अनुमानप्रकारः पृष्टः विशेषं पृच्छति । कालस्येति । अनुगतिः प्रवृत्तिः कर्मगतयः कर्मप्राप्याणि स्थानानि । यादृशीः यादृश्यः ॥ १३ ॥ गुणानां सत्त्वादीनां परिणामं देवादिरूपमिच्छतां गुणिनां जीवानां मध्ये यस्मिन् परिणामे कर्मणां पुण्यपापानां समवायः समुदायः केन कर्मसमुदायेन कथं कृतेन कोऽधिकारी देवादिभावं प्राप्नोतीत्यर्थः ॥ १४ ॥ भूपातालादीनां संभवः । एतान्योकांसि येषां प्राणिनां तेषां च संभवः । यथेति सर्वत्रानुषंगः ॥ १५ ॥ वर्णानामाश्रमाणां च विनिश्चयस्तत्तत्स्वभावैर्निर्धारः ॥ १६ ॥ युगेयुगे प्रतियुगं यो धर्मो यच्च हरेरवतारानुचरितम् ॥ १७ ॥ सविशेषो वर्णाश्रमनिबंधनः श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो धर्मः राजर्षीणां प्रजापालनाधि

॥ ११ ॥ अनुमानप्रकारो भूतकालाद्यनुमानप्रकारः वस्तुतः कालस्यैकरूपत्वात्तत्र भूतादित्वं कथमनुमेयमिति पृष्टमत्रेति ॥ १२ ॥ हे द्विजसत्तमेति । ब्राह्मणेषु श्रेष्ठा विद्वांसस्तेष्वपि त्वमुत्कृष्टोसि तपोविद्यानिष्णातत्वान्मत्संदेहापाकरणे सर्वथैव समर्थोसीति । यद्वा । परोपकरणार्थायैव ब्राह्मणानां विधिनाविर्भावितत्वात्स स्वाभाविकयुष्मद्धर्म इति भावः ॥ १३ ॥ इत्यर्थ इति । "सत्त्वसंगादृषीन्देवान्रजसाऽसुरमानुषान् । तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः" इत्यादिभगवदुक्तेः केन सात्त्विककर्मणा को देवो भवति कथं वा भवतीत्यादि मत्संदिग्धमज्ञातञ्च त्वं ब्रूहीति भावः ॥ १४ ॥ एतानि भूपातालादीन्योकांसि स्थानानि "ओकः स्थानं गृहं देहम्" इत्यभिधानात् ॥ १५ ॥ एतत्स्वभाववान्विप्रादिरेतत्स्वभाववान्ब्रह्मचार्यादिश्च ज्ञेयस्तथा च तेषां स्वाभाविकधर्मान् ब्रूहीति समागतम् ॥ १६ ॥ युगानीति । संख्याप्रश्नः युगमानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वानां परिसंख्यानं लक्षणं हेतुलक्षणम्॥ पुरुषाराधनविधियोंगस्याऽऽध्यात्मिकस्य च॥१९॥योगेश्वरैश्वर्यगतिर्लिंगभंगस्तु योगिनाम् ॥ वेदोपवे
दधर्माणामितिहासपुराणयोः॥२०॥संप्लवः सर्वभूतानां विक्रमः प्रतिसंक्रमः ॥ इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः॥२१॥यश्चानुशा यिनां
सर्गः पाखंडस्य च संभवः॥आत्मनो बंधमोक्षौ च व्यवस्थानं स्वरूपतः॥२२॥यथात्मतंत्रो भगवान्विक्रीडत्यात्ममायया॥विसृज्य वा यथा माया
मुदास्ते साक्षिवद्विभुः ॥२३॥ सर्वमेतच्च भगवन्पृच्छते मेऽनुपूर्वशः ॥ तत्त्वतोऽर्हस्युदाहर्तुं प्रपन्नाय महामुने ॥२४॥ अत्र प्रमाणं हि भवान्परमेष्ठी
यथात्मभूः ॥ परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतम्॥२५॥न मेऽसवः परायंति ब्रह्मन्ननशनादमी ॥ पिबतोऽच्युतपीयूषमन्यत्र कुपिताद्द्विजात् ॥२६॥

कारिणां कृच्छ्रेषु आपत्सु जीवतां सर्वेषाम् ॥ १८ ॥ सर्वेषां तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्यालक्षणं स्वरूपं हेतुतो लक्षणं तत्तत्कार्यहेतुत्वेन च लक्षणमित्यर्थः । पुरुषाराधनस्य विधिर्देवपूजाप्रकारः अष्टांगयोगस्य च विधिः ॥ १९ ॥ योगेश्वराणामैश्वर्येणाणिमादिनाऽर्चिरादिगतिः । लिंगशरीरस्य भंगः प्रलयः । वेदा ऋग्वेदादयः उपवेदा आयुर्वेदादयः धर्मा धर्मशास्त्राणि तेषाम् इतिहासपुराणयोश्च गतिः स्वरूपम् ॥ २० ॥ संप्लवोऽवांतरप्रलयः । यद्वा सम्यक् प्लवनमुद्भवः । विक्रमः स्थितिः । प्रतिसंक्रमो महाप्रलयः । इष्टं वैदिकं कर्म पूर्तं स्मार्तम् । "वापीकूपतडागादि देवतायतनानि च ॥ अन्नप्रदानमारामः पूर्तमित्यभिधीयते" इति ॥ तत्र च काम्यानामग्निहोत्रादीनां विधिः त्रिवर्गस्य धर्मार्थकामस्य विधिरविरोधप्रकारः ॥ २१ ॥ अनुशायिनां लीनोपाधीनां जीवानाम् । आत्मनो जीवस्य व्यवस्थानं बंधमोक्षातिरिक्तस्वरूपेणाव स्थानम् ॥ २२ ॥ उदास्ते प्रलये ॥ २३ ॥ चशब्दादपृष्टमपि ॥ २४ ॥ प्रमाणं सम्यक् ज्ञाता यतस्तव ब्रह्मनारदव्यासक्रमेण संप्रदायोऽस्तीति सामान्यन्यायेनाह । परे चेति । यद्वा त्वदन्ये प्रायशो गतानुगतिका एव न तत्त्वविद इत्याह । परे चेति ॥ २५ ॥ ननु तवानशनद्विजकोपाभ्यां व्याकुलस्य कुतः श्रवणं तत्राह । नेति । न परा

वर्षैरियत्तया परिच्छेदः ॥ १७ ॥ १८ ॥ संख्यालक्षणं स्वरूपं कति तत्त्वानीति । इत्यर्थ इति । यस्मादेतत्कार्यमुत्पद्यते तदेतन्नामकं तत्त्वमिति भावः । अष्टांगयोगस्य यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपस्य लक्षणम् ॥ १९ ॥ अर्चिरादिगतिं तृतीयस्कंधे वक्ष्यामः । आदिना यजुरादिग्रहः । द्वितीयादिना धनुर्वेदादिग्रहः । धर्मशास्त्राणि मन्वाद्यष्टादश स्मृतयः । इतिहासो भारतादिः । पुराणानि मात्स्यादीनि ॥ ॥ २० ॥ संप्लवशब्दस्यावांतरप्रलयग्राहकत्वे नैयत्यं दृष्ट्वाह—यद्वेति । अग्निहोत्रादिकं वैदिकं कर्म स्मार्तं स्मृतिविहितम् । तत्रेष्टापूर्तयोर्मध्ये । "त्रिवर्गो धर्मकामार्थैः" इत्यमरः ॥ २१ ॥ २२ ॥ उदास्ते साक्षिवदुदासीन इव तिष्ठति ॥ २३ ॥ उदाहर्तुमितिहासादिपुरस्कारेण तत्त्वतो याथार्थ्येन वक्तुम् । प्रपन्नाय शरणमागताय । हे महामुने इति प्रतिवचनसामर्थ्यं सूचयति ॥ २४ ॥ परेऽपरे च पूर्वेषां मरीच्यादीनामपि पूर्वजैर्ब्रह्मवादिभिः कृतमनुष्ठितं शास्त्रार्थम् । त्वमपि तदाचरणमेवाश्रयेति चेदाह—यद्वेति । व्यवहारासक्तत्वात्तेषां तत्त्वविस्मृतिर्भविष्यति त्वं तु व्यवहारातीतत्वात्तत्त्ववित्तेभ्यः सर्वेभ्य उत्कृष्टोऽस्यतस्त्वदुक्तौ मे सर्वथैव विश्वास इति भावः । ननु त्वं त्वन्यकविमुखतोऽवगततत्त्वोपि किं पुनर्मां पृच्छसीत्यत आह—अत्रेति । अन्येषां कवीनां मध्ये हि निश्चितमेव भवान्प्रमाणम् अतस्तत्तदर्थाभिज्ञोप्यहं भवन्मुखात्कीदृगुत्तरमाविर्भविष्यतीत्याकांक्षायां पृच्छामि । परमेष्ठी यथात्मभूः परमेश्वरप्रसादात्स्वतः सिद्धज्ञानस्तथा भवानपि परेऽन्ये तु पूर्वेषां पूर्वजैर्विद्वद्भिरेव यद्यत्कृतं सर्वं दृष्ट्वा तेभ्योधीत्याधीत्यानुतिष्ठतीति विश्वनाथः ॥ २५ ॥ इत्यर्थ इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ स उपामंत्रितो राज्ञा कथायामिति सत्पतेः ॥ ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि ॥ २७ ॥ प्राह भागवतं नाम पुराणं ब्रह्मसं
मितम्॥ब्रह्मणे भगवत्प्रोक्तं ब्रह्मकल्प उपागते ॥२८॥ यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति ॥ आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे ॥२९॥ इति
श्रीभागवते महापुराणे द्वितीयस्कंधे प्रश्नविधिर्नामाऽष्टमोऽध्यायः ॥ ८ ॥

यंति नापगच्छंति न व्याकुलीभवंतीत्यर्थः । अच्युतकीर्तिपीयूषम् ॥ २६ ॥ उपामंत्रितः पृष्टः संश्वासौ पतिश्च तस्य ॥ २७ ॥ ब्रह्मकल्पे सृष्ट्युपक्रमकल्पे भागवताख्या
नेनैव प्रश्नानामुत्तरं दातुमुपक्रांतवानित्यर्थः ॥ २८ ॥ पांडूनामृषभः श्रेष्ठः आनुपूर्व्येणेति प्रस्तावक्रमोऽत्र विवक्षितो न प्रश्नक्रमः ॥ २९ ॥ इति श्रीमद्भा० म० द्वितीयस्कंधे
टीकायामष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥

अशनादप्यतिबलहेतुरसायनपानादिति भावः । कुपिताद्विजादित्यनेन द्विजकोपहेतुको मरणकालो लक्ष्यते । तथा च द्विजकोपहेतुकमरणाधिकरणसप्तमादिनरूपकालादन्यत्र कालेऽच्युतपीयूषं पिबतो मेऽसवोऽनशनान्न परायंतीत्यन्वयः । सप्तमदिने मरणस्य शापबलेनावश्यंभावित्वात्ततः पूर्वमच्युतपीयूषपानं कुर्वतोऽन्याननुसंधानाच्चोभयनिमित्तापि व्याकुलता नास्तीति भावः । यद्वाऽच्युतपीयूषं पिबतो मेऽसवोऽनशनाद्द्विजकोपाच्च न परायंति किं त्वन्यत्राच्युतपीयूषपानाभावे परायंतीत्यर्थः । बालबोधिन्यां तु—कुपितद्विजाद्धेतोर्यन्मरणं ततोन्यत्र तद्विना तस्य निवृत्तिस्तु नास्तीत्यर्थ इति व्याख्यातम् । चक्रवर्त्ती तु—कुपितद्विजात्सप्तमदिवसे तक्षकरूपो द्विज आयास्यति तस्मादन्यत्र तदागमने सत्यसवः परास्यंत्येवेति व्याचख्यौ ॥ २६ ॥ उपामंत्रितः सत्कृत्य व्यापारितोऽत एव भृशं प्रीतः सतां ब्रह्मादीनां पत्युः ब्रह्मणा श्रीकृष्णेन मुनये गर्भान्निष्कास्य रातो दत्त इति ब्रह्मरातः शुकः । "कृष्णेन ब्रह्मणा दत्तो व्यासाय मुनये स्वयम्" निष्कास्य गर्भाद्वीटाया भूत्वाथ प्रतिभूर्यतः ॥ ब्रह्मरातो ह्यतः प्रोक्तः श्रीव्यासतनयो मुनिः" इति परमब्रह्मवैवर्तादवसेयम् । "सभा संसत्सदः स्त्रियाम्" इति धरणिः ॥ २७ ॥ इत्यर्थ इति राजप्रश्नोत्तरमिषेण श्रीभागवतं यत्संक्षेपतः सृष्ट्यादौ चतुःश्लोक्या ब्रह्मणे प्रोक्तं तदेव श्रीव्यासविस्तारितं राज्ञे प्राहेति भावः ॥ २८ ॥ एवं स्वाभिमतशुद्धभक्तेः प्रथमांगीभूतकृष्णकथाश्रवणौत्सुक्यमाविष्कृत्य निर्गुणशुद्धभक्त्योर्यावत्स्वर्थेषु व्याप्तिस्संभवति तावंत एवार्थास्तत्तद्भक्त्यधिकारिणां जिज्ञासितार्थसिद्ध्यर्थं पृष्टाः । किञ्च यत्रयत्र भक्तेर्गंधोपि तत्रतत्र निरपराधतयैव स्थेयमन्यथा श्रीभक्तिदेव्या अप्रसाद एव स्वसाध्यभक्तेरभ्युदयार्थं शुद्धभक्तैरपि स्वाभीष्टश्रवणकीर्तनादिषु लब्धनिष्ठैरपि तानितानि भक्तेरुदाहरणप्रत्युदाहरणानि जिज्ञास्यान्येवेति 'यदधातुमतः' इत्यारभ्य 'शेते सर्वगुहाशयः'इत्यंतेन प्रश्नपंच कं शांतप्रीतिभक्तौ पर्याप्नोति जीवाद्विशेषब्रह्मदृष्टभगवद्रूपप्रश्नोपि प्रीतिभक्तौ पर्याप्नोति कर्मप्राप्यस्थानानि सूक्ष्मस्थूलविकल्पकल्पैरवश्यं ग्रस्यन्त इति कर्मनिर्वेदार्थं प्रश्नद्वयं शुद्धभक्तावेव पर्याप्नोति "जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु" इति भगवदुक्तेः । यस्मिन्कर्मसमावाय इत्यादिप्रश्नोपि कर्मज्ञानयोगमिश्रशुद्धभक्तिषु पर्याप्नोति । भुवादीनां बहुविधभक्तास्पदत्वात्तदौकसां च प्रायोधिकृतादिभक्तत्वात्प्रश्नोयं भक्तेषु पर्याप्नोति । प्रमाणमंडकोशस्येत्यैश्वर्यप्रधानायां भक्तौ कीदृशान्यंडानि हरिकुक्षौ संतीति जिज्ञासायां वर्णाश्रमधर्मा भक्तिमिश्रतयैव सिद्ध्यंति तदन्यथा वेति जिज्ञासायां च भक्तौ प्रश्नोयं पर्याप्नोति । युगानीति । युगावताराणां तत्प्रवर्त्तितभक्तिविशेषाणां च जिज्ञासायां नृणामंत्यजपर्यंतानामपि साधारणो धर्मो भक्तिरेव "सर्वेषां मदुपासनम्" इत्युक्तेः । विशेषधर्मस्तत्तज्जातिधर्म इति तद्धर्मवत्त्वेपि ते भक्ता भवंति किरातहूणांध्रेत्याद्युक्तेः । श्रेणिराजर्षिष्वपि भक्तिमत्सु निरपराधतयैव स्थेयमिति विवक्षायां कृच्छ्रेष्वित्यापद्धर्मप्रश्नः सर्वविधभक्तौ पर्याप्नोति।तत्त्वानामिति।पुरुषावतारलीलायां योगस्येति योगमिश्रायां योगेश्वराणां शंभुप्रभृतिमहानुभावभक्तानामैश्वर्यरूपा या गतिः लिंगभंग इति शांतभक्तौ वेदादीनां तात्पर्यमिति शेषः । तच्च भक्तिरेवेति भक्तौ संप्लवः सम्यक् प्लवः संसारसिंधोस्तरणसाधनं किं विक्रमस्तत्र शौर्यं किं प्रतिसंक्रमस्तु नाशः क इति भक्तेरनुकूलप्रतिकूलवस्तुजिज्ञासायाम् । यद्वा सृष्टिस्थितिप्रलयाः क्रमेण पृष्टाः काम्यकर्मेष्टापूर्तादीनां कर्ममिश्रायां भक्तौ अनुशायिनां महाप्रलये ईश्वरे लीनोपाधीनां सर्ग इति साधकभक्तानां साधनसिद्धिजिज्ञासायां पाषंडस्येति । भक्त्यसंभवजिज्ञासायामात्मनो मायास्पृष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ आत्ममायामृते राजन्परस्यानुभवात्मनः ॥ न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥१॥ बहुरूप इवाभाति मायया बहुरूपया ॥ रममाणो गुणेष्वस्या ममाहमिति मन्यते ॥ २ ॥ यर्हि वाव महिम्नि स्वे परस्मिन्कालमाययोः ॥ रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयम् ॥३॥ आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् ॥ ब्रह्मणे दर्शयन्रूपमव्यलीकव्रतादृतः ॥ ४ ॥ स आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत ॥ तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माणविधिर्यया भवेत् ॥ ५ ॥

राजप्रश्नोत्तरं वक्ष्यन्ब्रह्मणे हरिणोदितम् ॥ कथयामास नवमे शुको भागवतं पुनः ॥ १ ॥ तत्र यत्तावदुक्तं यदधातुमत इत्यनेन जीवस्य कथं देहसंबंध इति तत्रोत्तरमाह । आत्ममायेति । आत्मनो हरेर्मायामंतरेण अनुभवरूपस्यात्मनोऽर्थेन दृश्येन देहादिना संबंधोऽजसा तत्त्वतो न घटेत । अत्र हेतुः । परस्येति स्वप्नद्रष्टुर्यथा स्वप्नदेहसंबंधो न घटते तद्वत् ॥ १ ॥ संसारोऽपि माययैवेत्याह । बहुरूपो बाल्युवादिरूपो देवनरादिरूपश्चाभाति । गुणेषु देहादिषु ॥ २ ॥ अत एव भक्तियोगेन तन्निरासे सति मोक्षोऽपि घटत इत्याह । यर्हीति । वावशब्द एवार्थे । स्व एव महिम्नि यदा रमेत । तदेवाह । कालमाययोः पुरुषप्रकृत्योः परस्मिन् तदोभयमहंममेति च त्यक्त्वा उदास्ते पूर्णरूपेणावतिष्ठते । तदुक्तम् “यया संमोहितो जीव आत्मानं त्रिगुणात्मकम् ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते॥ अनर्थोपशमं साक्षाद्भक्तियोगमधोऽक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम् ॥ ” इति ॥ ३ ॥ यच्चोक्तम् परमेश्वरस्यापि देहसंबंधाविशेषात्कथं तद्भक्त्या मोक्षः स्यादिति ‘आसीद्यदुदरात्पद्मम्’ इत्यादिना तत्राह । आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तद्भवत्येव । किं तत् । यत्तपआदिना भजनं स्वं भजते भगवान् ब्रह्मणे आह किं कुर्वन् । ऋतं सत्यं चिद्घनं रूपं दर्शयन् । दर्शने हेतुः । अव्यलीकेन व्रतेन तपसा आदृतः सेवितः सन् । अयं भावः । जीवस्याविद्यया मिथ्यारूपदेहसंबंधः । ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इति महान् विशेषः अतस्तद्भजनान्मोक्षोपपत्तिरिति ॥ ४ ॥ भगवद्भजनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन् ब्रह्मणोऽपि तत्त्वज्ञानं तत्प्रसादादेवेति

जीवस्य बंधमोक्षाविति भक्तिमिश्रज्ञाने ज्ञानमिश्रायां वा भक्तौ स्वरूपतो व्यवस्थानम् । सदा मायास्पर्शशून्यस्य नित्यमुक्तस्य विष्वक्सेनादेर्जीवस्य नित्यभक्तौ विविधं क्रीडति । सृष्ट्यादिसमये विसृज्य महाप्रलये । त्यक्त्वा यद्वात्मतंत्रो भगवान्कृष्ण एवान्येषामवताराणामवतारिणश्चात्मतंत्रत्वेऽपि विप्रबालकहरणादौ कृष्णैकपारतंत्र्यदर्शनात् । आत्ममायया योगमायया पूतनावधादौ यथा वा विसृज्य विशेषेण सृष्ट्वा मौशलादावुदास्ते साक्षिवन्नतु साक्षीति सर्वस्य प्रश्नजातस्य भक्त्युपयोगित्वम् ॥२९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धेऽष्टमोऽध्यायः ॥८॥ तत्र प्रश्नकदंबे अंतरेण विना अनुभवरूपस्य ज्ञानरूपस्यात्मनो जीवस्य । अत्र देहासंबंधे परस्य प्रकृत्यादिसंगरहितस्य स्वप्नदेहसंबंधो यथा निद्रारूपां मायां विना न घटते तथाऽशरीरस्य जीवस्य शरीरसंबंधो भगवदिच्छारूपमायाकार्यसत्त्वोद्गुणमयीं प्रकृतिं विना न घटते इति भावः ॥ १ ॥ मायया तत्तद्देहाध्यासेन तत्तद्देहिनमात्मानं मन्यते वस्तुतस्तथात्वाभावात् ॥ २ ॥ अत एव बहुरूपाहं ममत्वादेर्मायिकत्वादेव महिम्नि ब्रह्मभावे अत्र मानमाह—तदुक्तमिति । श्लोकाविमौ प्रथमस्कंधे व्याख्यातौ ॥ ३ ॥ अव्यलीकेन निष्कपटेन अत्राशयमाह—अयं भाव इति । अतो योगमायाविलसच्चिद्घनविग्रहवत्त्वात् ॥ ४ ॥ तस्य पद्मस्याधिष्ठानमाश्रयस्तस्यान्वेषणं मार्गणं तस्मै । इत्यर्थ इति । यदाऽधिष्ठानं नाप्तवांस्तदा परावृत्येति भावः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स चिंतयन्द्व्यक्षरमेकदांऽभस्युपाशृणोद्द्विर्गदितंवचो विभुः ॥ स्पर्शेषु यत्षोडशमेकविंशं निष्किंचनानां नृप यद्धनं विदुः ॥ ६ ॥ निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्राऽन्यदपश्यमानः ॥ स्वधिष्ण्यमास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवाऽऽदधे मनः ॥ ७ ॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः ॥ अतप्यत स्माऽखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥ तस्मै स्वलोकं भगवान्सभाजितः संदर्शयामास परं न यत्परम् ॥ ८ ॥ व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतम् ॥ प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं नच कालविक्रमः ॥ ९ ॥

दर्शयितुमितिहासमाह स इत्यादिना परो गुरुर्भक्तिरहस्योपदेष्टा स्वधिष्ण्यं पद्ममास्थाय अधिष्ठाय तस्याधिष्ठानान्वेषणाय पूर्वं जले निमग्नः परावृत्य स्वधिष्ण्ये स्थित्वेत्यर्थः । ऐक्षत तत्कथं स्रष्टव्यमित्यालोचितवान् । तां दृशं प्रज्ञाम् । अत्र सृष्टिविषये संमतामव्यभिचारिणीम् । विधिः प्रकारः ॥ ५ ॥ सृष्टिं चिंतयन्कदाचिद् द्व्यक्षरं वचोंऽभसि उपाशृणोत् उप समीपे श्रुतवान् । ते अक्षरे दर्शयति । कादयो मावसानाः स्पर्शास्तेषु यत्षोडशं तकारो यच्चैकविंशं पकारः वचसो निर्देशार्थं तदर्थमाह । हे नृप निष्किंचनानां त्यक्तधनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धाः । तच्च द्विर्गदितं तपतपेति लोण्मध्यमपुरुषैकवचनम् । तस्य वीप्सां सादरविधिरूपामशृणोदित्यर्थः ॥ ६ ॥ एवं निशम्य तस्य वचसो वक्तुर्दिदृक्षया ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केनचित्प्रत्यक्षं नियुक्त इव तच्चात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः ॥ ७ ॥ ततश्च स ब्रह्माऽखिलानां लोकानां तापनं प्रकाशकं तपोऽतप्यत स्म कृतवान् । तपतपेत्येतस्य वचसोऽर्थे अमोघं दर्शनं यस्य । जितोऽनिल आत्मा मनश्च येन । विजितान्युभयेंद्रियाणि ज्ञानकर्मात्मकानि येन । तपतां तपश्चरतां मध्ये तपीयानतिशयेन तपस्वी । तस्मै ब्रह्मणे स्वलोकं वैकुंठाख्यं परं श्रेष्ठम् । न यत्परं यतः परमुत्कृष्टमन्यन्नास्ति ॥ ८ ॥ तमेव लोकमनुवर्णयति पंचभिः । व्यपेताः संक्लेशादयो यस्मात् । स्वदृष्टवद्भिः सत्पुण्यवद्भिः । यद्वा स्वस्य दृष्टं दर्शनमस्ति येषां तैः । आत्मविद्भिरि

हे नृपेति । नृपाणां तु पालनमेव धर्मस्तत्तु ब्राह्मणानामेवेति भावः। इत्यर्थ इति। द्विरुच्चारणं हि तपसो वैदिकत्वज्ञापनार्थमेव वैदिका हि मंत्रोच्चारणे प्रथमपदं द्विरुच्चरंति "सहस्रशीर्षा सहस्रशीर्षा पुरुषः" इति वदिति भावः ॥६ ॥ ततः कंजदेशात्प्रचलितः प्रचलितुं प्रवृत्तः स्थानांतरादर्शनात्पुनस्तत्रैव पद्मे स्थित्वा। इत्यर्थ इति। केनचिन्मद्धितैषिणा मह्यं हितमेवोपदिष्टमतस्तप एव करोमीति निश्चयंचकारेति भावः॥७॥ततस्तपतपेतिवाक्यश्रवणानंतरम्। ननु तपस्स्वरूपन्तु भगवता नोपदिष्टं स कथं तपः कृतवानिति चेत्तत्राह–अमोघं सर्वथा भगवदिच्छातः सफलं दर्शनं ज्ञानं यस्य स तथा परमेश्वरेच्छयैव तपसस्तदिति कृत्यताया ज्ञानमुपदेशसमकालमेव जातमिति भावः । "परांचिखानि व्यतृणत्स्वयंभूः" इति श्रुतेरुभयेंद्रियजयस्तस्य स्वाभाविक एव परांचि पराङ्मुखानि खानीन्द्रियाणि व्यतृणाद्धिंसितवान् । विषयेभ्यः परावर्तनमेवेंद्रियाणां हिंसा स एव तज्जय इत्युच्यते । सभाजितो पूजितः ॥ ८ ॥ व्यपेता नष्टाः संक्लेशा अविद्यारागद्वेषाद्याः विमोहो मौढ्यमाकुलता वा साध्वसं कालादिभयं स्वो विष्णुः स एव लोक इति पक्षमाश्रित्याह–यद्वेति । इत्यर्थ इति । आत्मविद्भिरेव स्वरूपभूतो भगवान्दृश्यते ॥ ३५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥ श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः ॥ १० ॥
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः ॥ प्रवालवैडूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः ॥ ११ ॥

त्यर्थः । तयोस्ताभ्यां मिश्रं सत्त्वं च न प्रवर्तते । किंतु शुद्धमेव सत्त्वम् । कालविक्रमो नाशः ॥ ९ ॥ अपरे रागलोभाद्यो न संतीति किमु वक्तव्यम् । अनुव्रताः पार्षदाः । श्यामाश्च ते अवदाता उज्ज्वलाश्च पद्मनेत्राः पीतांबराः सुरुचोऽतिकमनीयाः सुपेशसोऽतिसुकुमाराः ॥ १० ॥ उन्मिषंत इव प्रभावंतो मणिप्रवेका मण्युत्तमा येषु तानि निष्कानि पदकान्याभरणानि च येषां ते । सुवर्चसोऽतितेजस्विनः । प्रवालादिवद्वर्चो वर्णो येषां ते । परितः स्फुरंति कुंडलानि मौलयो मालाश्च संति येषां ते ॥ ११ ॥

नान्यैरिति भावः ॥ स्वलोकं महावैकुंठं यद्यतो लोकात्परमन्यद्वैकुंठं परं श्रेष्ठं नास्तीति अत्रार्थेनं गार्गीवाचक्नवी पप्रच्छेत्यादिकोपनिषदुदाहार्याऽत्र द्यंतरिक्षलोकादिप्रजापतिलोकपर्यंतप्रश्नानामुत्तराणि गार्ग्यै याज्ञवल्क्यो दत्त्वा ब्रह्मलोकाख्यभगवल्लोकादप्युपरि पृष्टवत्यै तस्यै मातिप्राक्षीरित्यादिना शापं दातुमुद्यतः । सा च तच्छ्रुत्वा ज्ञातविज्ञेयत्वादुपरराप्रमेति। यद्वा यद्यतो वैकुंठात्परं ब्रह्माख्यं तत्त्वं परं भिन्नं नास्ति स्वरूपशक्तिविशेषाविष्कारेण मायानावृतं तदेव तद्रूपमित्यर्थः । इदमग्रे व्यक्ती करिष्यते तादृशत्वे हेतुः व्यपेतेति, स्वदृष्टेति चाऽस्वदृष्टेति“अथ ते मुनयो दृष्ट्वा नयनानंदभाजनम्”इत्यारभ्य“शंसतो वैष्णवीं श्रियम्” इत्यंतेन तृतीयस्कंधोक्तेः॥ ॥ ९ ॥ ताभ्यां रजसस्तमोभ्यामसुरैः प्रह्लादादिभिश्चार्चितः श्लाघिता यद्वा । दुष्टानामसनादसुर्हरिस्तत्र रमंत इत्यसुराः सुराश्च तेऽसुराश्चेति सुरासुराः “महद्वै देवानामेकमसुरत्वम्” इतिश्रुतेः । तैः स्तुत्याः तयोर्मिश्रं महत्तरं जडं यत्सत्त्वं तदपि न किंत्वन्यदेव सुष्ठु स्थापयिष्यमाणामायातः परा या भगवत्स्वरूपशक्तिस्तस्या वृत्तित्वेन चिद्रूपं शुद्धसत्त्वाख्यं सत्त्वमिति तदीयप्रकरण एव स्थापयिष्यते तदेव च यत्र प्रवर्तते तदुक्तं नारदपंचरात्रीयजितंतस्तोत्रे “लोकं वैकुंठनामानं दिव्यषड्गुणसंयुतम् । अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम्” । पाद्मोत्तरखंडे तु यद् विभूतिवर्गनानंतरं “त्रिपाद्विभूतिरूपं तु शृणु भूधरनंदिनि । प्रधानपरमव्योम्नोरंतरे विरजा नदी । वेदांगस्वेदजनितैस्तोयैः प्रस्राविता शुभा । तस्याः पारे परव्योम त्रिपाद्भूतं सनातनम् । अमृतं शाश्वतं नित्यमनंतं परमं पदम् ॥ शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ॥”इत्यादिप्राकृतगुणानां परस्पराव्यभिचारित्वं तूक्तं सांख्यकौमुद्याम् । अन्योन्यमिथुनवृत्तय इति । तट्टीकायाश्च अन्योन्यसहचरा अविनाभाववृत्तय इति यावत् । भवति चात्रागमः “अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः । रजसो मिथुनं सत्त्वम्” इत्याद्युपक्रम्य.“ नैषामादिश्च संयोगो वोपलभ्यते”इति। तस्मादत्र रजसोऽसंभवादसृज्यत्वं तमसोऽसंभवादनाश्यत्वं प्राकृतसत्त्वाभावाच्च सच्चिदानंदरूपत्वं तस्य दर्शितं तत्र ‘हेतुर्न च कालविक्रमः’ इति। कालविक्रमेण हि सत्त्वादयः प्रकृतिक्षोभात्पृथक् पृथक् क्रियंते तस्माद्यत्रासौ षड्भावविकारहेतुः कालविक्रम एव न प्रवर्तते तेषां तत्राभावः सुतरामेवेति भावः । किञ्च तेषां मूल एव कुठार इत्याह—न यत्र मायेति । मायात्र जगत्सृष्ट्यादिहेतुर्भगवच्छक्तिर्न तु कापट्यमात्रं रजआदिनिषेधेनैव तद्व्युदासात् । यथा वा यत्र तयोः संबंधिसत्त्वं प्राकृतं सत्त्वं यत्तदपि न प्रवर्तते मिश्रमपृथग्भूतगुणत्रयं प्रधानं चात एवेशितव्याभावात्कालमाये अपि न स्त इति मायाप्रधानयोर्भेदोऽग्रे विवेचनीयः।कैमुत्येनोक्तमेवार्थं द्रढयति—किमुतापर इति । किञ्चिद्रजस्तमोमिश्रं सत्त्वं नेति व्याख्यातं तु पिष्टपेषणमेव। सामान्यरजस्तमोनिषेधेनैव तत्प्रतिपत्तेः। ननु गुणाद्यभावान्निर्विशेष एवासौ लोक इत्याशंक्य तत्र विशेषस्तस्याः शुद्धसत्त्वात्मिकायाः स्वरूपशक्तेरेव विलासरूप इति द्योतयंस्तमेव विशेषं दर्शयति—हरेरिति । सुराः सत्त्वप्रभावा असुराः रजस्तमःप्रभावास्तैरार्चितास्तेभ्योऽर्हत्तमा इति गुणातीतत्वादिति भावः इति संदर्भः ॥ अवदाता निर्मलाः “ अवदातः सिते गौरे शुद्धे ” इति यादवः । इंद्रनीलमणिवन्निर्मलाः “ दशदोषविनिर्मुक्तः श्याम इंद्रमणिः स्मृतः ” इत्यभिधानात् “सुष्ठु मृदुश्च पेशः स्यात्” इति च ॥ १० ॥ उन्मिषंत इव चक्षुष्मंत इव पदकानि वक्षोभूषणानि “निष्कोऽस्त्री हेम्नि दीनारे साष्टे कर्षशते पले। वक्षोविभूषणे कर्ष” इति कोशात्। अनेन सारूप्यादिभाजो मुक्ता अपि तत्र संतीत्युक्तम् । प्रवाला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मना ॥ विद्योतमानः प्रमदोत्तमाद्युभिः स विद्युदभ्रावलिभिर्यथा नभः ॥ १२ ॥ श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ॥ प्रेंखं श्रिता या कुसुमाकरानुगैर्विगीयमाना प्रियकर्म गायती ॥ १३ ॥ ददर्श तत्राखिल सात्वतां पतिं श्रियः पतिं यज्ञपतिं जगत्पतिम् ॥ सुनंदनंदप्रबलार्हणादिभिः स्वपार्षदमुख्यैः परिसेवितं विभुम् ॥ १४ ॥ भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननम् ॥ किरीटिनं कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ॥ १५ ॥ अध्यर्हणीयासनमास्थितं परं वृत्तं चतुःषोडशपंचशक्तिभिः ॥ युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्रममाणमीश्वरम् ॥ १६ ॥ तद्दर्शनाल्हादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभरा श्रुलोचनः ॥ ननाम पादांबुजमस्य विश्वसृग्यत्पारमहंस्येन पथाऽधिगम्यते ॥ १७ ॥

पार्षदाननुवर्ण्य पुनरपि लोकमनुवर्णयति । भ्राजिष्णुभिर्देदीप्यमानाभिः । प्रमदोत्तमानां दिवः कांतयस्ताभिर्विद्योतमानः सह विद्युद्भिर्वर्तमानाः सविद्युतस्ताभिरभ्रावलिभिः । तत्र विद्युत इव स्त्रियाः । अभ्रपंक्तय इव विमानावलयः । नभ इव लोकः ॥ १२ ॥ श्रीः संपत् । रूपिणी मूर्तिमती । मानं पूजाम् । विभूतिभिर्नानाविभवैः प्रेंखमांदोलं संश्रिता कुसुमाकरो वसंतस्तस्यानुगा भ्रमरास्तैर्विविधं गीयमाना स्वयं तु प्रियस्य हरेः कर्म गायंतीव भवति ॥ १३ ॥ य एवंभूतो लोकस्तत्र तस्मिन् ॥ १४ ॥ भृत्यानां प्रसादेऽभिमुखं दृगेव आसव इव द्रष्टॄणां हर्षकरी यस्य तं प्रसन्नहासमरुणलोचनं चाननं यस्य वक्षसि स्थितया च श्रिया लक्षितम् अलंकृतमित्यर्थः ॥ १५ ॥ अध्यर्हणीयं वरिष्ठं सिंहासनम् । चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः षोडश एकादशेंद्रियपंचमहाभूताख्याः पंचतन्मात्ररूपा या शक्तयस्ताभिर्वृतम् । स्वैर्भगैः स्वाभाविकैरैश्वर्यादिभिः इतरत्र योगिष्वध्रुवैरागंतुकैः साधारणैरित्यर्थः । एवं सत्यपि स्व एव धामन्स्वस्वरूप एव रममाणम् अत एवेश्वरम् ॥ १६ ॥ तस्य दर्शनेन य आह्लादस्तेन परिप्लुतं व्याप्तमां

दयो मणिभेदाः ॥ ११ ॥ सिंहावलोकन्यायेन पुनर्लोकं वर्णयति भ्राजिष्णुभिरिति ॥ १२ ॥ "प्रेंखमांदोलनम्" इति कोशात् । ब्रह्मादय एव भ्रमरीभूता ज्ञेयाः ॥ १३ ॥ तत्र वैकुंठे ॥ १४ ॥ इत्यर्थ इति । "लक्ष दर्शनांकनयोः" इति लक्षितमंकितमिति भावः ॥ १५ ॥ इत्यर्थ इति । आगंतुकत्वात्साधारणैरिति भावः । यद्वा द्रष्टा ज्ञानक्रियाबलाख्याभिः प्रह्वीसत्येशानानुग्रहाख्याभिर्वात्मांतरात्मपरमात्मज्ञानात्माख्याभिर्वा चतुःशक्तिभिर्वृतं मोचिका सूक्ष्माऽसूक्ष्मामृताज्ञानामृताव्यापिनीव्योमरूपिण्यनंताऽणिमा-महिमा-गरिमा-लघिमा-प्राप्ति-प्राकाश्येशित्वप्राकाम्याख्याभिः षोडशशक्तिभिः पञ्चभिर्विमलोत्कर्षिणीज्ञानाक्रियायोगाख्याभिश्च वृतम् यद्वा चतस्रः शक्तयः पाद्मो त्तरखंडे योगपीठवर्णनोक्ता धर्माद्याः यथा "धर्मज्ञानबलैश्वर्यवैराग्यैः पादविग्रहैः । ऋग्यजुःसामाथर्वाणरूपैर्नित्यं वृतं क्रमात्" इति षोडशशक्तयश्चंडाद्याः यथा तत्रैव "चंडादिद्वारपालैश्च कुमदाद्यैश्च रक्षिता" नगरीति पूर्वेणान्वयः । ते च "चंडप्रचंडौ प्राग्द्वारे याम्ये भद्रसुभद्रकौ । वारुण्यां जयविजयौ सौम्ये धातृविधातरौ ॥ कुमुदः कुमुदाक्षश्च पुंडरीकोऽथवामनः । शंकुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः ॥ एते दिक्पतयः प्रोक्ताः पुर्यामत्र सुशोभने" ॥ इति कुमुदादयश्च द्वौद्वावाग्नेय्यादिदिक्पतय इत्यर्थः । पञ्चशक्तयस्तु "कूर्मश्च नागराजश्च वैनतेयस्त्रयीश्वरः । छंदांसि सर्वमंत्राश्च पीठरूपत्वमाश्रिताः" इति । त्रयीश्वर इति वैनतेयविशेषणमिति संदर्भचक्रवर्त्तिकारौ एवं सत्यपि ऐश्वर्यादियुक्तत्वेपि अत एव स्वरूपविस्मरणाभावादेव ॥ १६ ॥ ज्ञानमार्गेणाहिंसादिजन्येन ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणम् ॥ बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥ १८ ॥ श्रीभगवानुवाच ॥ त्वयाऽहं तोषितः सम्यग्वेदगर्भ सिसृक्षया ॥ चिरं भृतेन तपसा दुस्तोषः कूटयोगिनाम् ॥ १९ ॥ वरं वरय भद्रं ते वरेशं माऽभिवांछितम् ॥ ब्रह्मञ्छ्रेयः परिश्रामः पुंसो मद्दर्शनावधिः ॥ २० ॥ मनीषितानुभावोऽयं मम लोकावलोकनम् ॥ यदुपश्रुत्य रहसि चकर्थ परमं तपः ॥ २१ ॥ प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते ॥ तपो मे हृदयं साक्षादात्माऽहं तपसोऽनघ ॥ २२ ॥ सृजामि तपसैवेदं ग्रसामि तपसा पुनः ॥ बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः ॥ २३ ॥

तरमंतःकरणं यस्य । हृष्यंती रोमांचिता तनुर्यस्य । प्रेमभरेणाश्रूणि लोचनेषु यस्य । विश्वसृक् ब्रह्मा । पारमहंस्येन पथा ज्ञानमार्गेण ॥ १७ ॥ तं ब्रह्माणं भगवान् बभाषे । प्रजाविसर्गकार्ये । निजशासनार्हणं स्वनियोगार्हम् । प्रजाविसर्गे समुपस्थितमिति वान्वयः । ईषत्स्मितेन शोचिर्दीप्तिः शोभा यस्यास्तया गिरा ॥ १८ ॥ सिसृक्षया हेतुना चिरं संभृतेन तपसाऽहं सम्यक् तोषितः । दुस्तोषस्तोषयितुमशक्यः ॥ १९ ॥ मा इति माम् । श्रेयसां फलानां परिश्रामः परिश्रमः साधनप्रयासः मम दर्शनमवधिर्यस्य स तथा अतोऽधिकं तु पुनः फलं नास्तीत्यर्थः ॥ २० ॥ एतच्च मत्कृपयैव त्वया प्राप्तमित्याह । मनीषितमिच्छा तुभ्यमिदं दातव्यमिति या ममेच्छा तस्यानुभावोऽयम् । कोऽसौ तमाह । मम लोकस्यावलोकनं यत् । न चेदं मयैव तपोबलेन प्राप्तमिति स्वातंत्र्यं मन्यस्व तत्प्रवृत्तेरपि मत्कृतत्वादित्याह । रहसि तपतपेति यद्वच उपश्रुत्य परमं तपश्चकर्थ कृतवानसि ॥ २१ ॥ तदपि त्वां प्रति मयैवादिष्टमुपदिष्टम् । कदा । तत्र तदा सृष्ट्यारंभे त्वयि कर्मणि कार्येऽर्थे विमोहिते सति । किं च तपो नाम ममैव शक्तिरित्याह । तपो मे हृदयमंतरंगा शक्तिः । आत्मा स्वरूपम् । "यस्य ज्ञानमयं तपः" इति श्रुतेः ॥ २२ ॥ ग्रसामि संहरामि । बिभर्मि पालयामि । वीर्यं शक्तिः ॥ २३ ॥

प्रीयमाणं हृष्यंतम् । तदा तत्यवसरे । ईषद्बभाषे इति योज्यम् । " महांतो हि प्रकृत्या मितभाषिणः" इत्युक्तेः ॥ ईषद्धासस्यैव स्मितत्वात्तेनेषत्पदं न योज्यं पुनरुक्तेः । प्रजाविसर्गे निजशासनार्हणामिति संबंधे प्रजाविसर्गेतरनिजशासनानर्हमिति प्रतीतिः स्यादतः समुपस्थितमिति वेत्युक्तम् । करस्पर्शेण हि प्रीत्यतिशयो द्योत्यते ॥ १८ ॥ वेदगर्भेति । भावि वेदगर्भत्वं स्वामंत्रणेनाहेति भावः । कूटयोगिनां योगच्छद्मना लोकवचनपराणां कलियुगे प्रायेण कूटयोगिन एव भविष्यंति ते च स्वसंगिभिः सह नरके गमिष्यंति "कलौ पाखंडपंथानो मुंडाः केशादिधारिणः । बहवः प्रचारिष्यंति वेदविप्रामरद्रुहः ॥ स्वदम्भवाचा लोकांस्ते चालयिष्यंति धर्मतः ॥ ते च तदनुगाः सर्वे यम्यदंडेन ताडिताः ॥ कुंभीपाकादिषु चिरं वत्स्यंति नात्र संशयः" इत्यादिकौशिकसंहितोक्तरलं प्रसक्तानुप्रसक्तया ॥ १९ ॥ वरेशं वरान् दातुं समर्थम् । ब्रह्मन्निति वरदानपात्रतोक्ता । इत्यर्थ इति मद्दर्शनादधिकं किञ्चिदपि जगति नास्ति वरेणैतावतैवालं "यद्भवान्मोक्षिगोचरः' इत्यादिमार्कंडेयोक्तेः । त्वद्दर्शने सर्वे वराः प्राप्ताः स्युः "सर्वे पदा हस्तिपदे निमग्नाः" इति न्यायेनेति भावः ॥ २० ॥ एतच्च मद्दर्शनं च ॥ २१ ॥ विमोहिते किं कर्त्तव्यं कथं कर्तव्यमित्यज्ञातवति सति न केवलं त्वय्येव तपसा सामर्थ्यं भविष्यति किं तु ममापि तदेव शक्तिरित्याह "किञ्चेति । तपसो भगवच्छक्तित्वे प्रमाणमाहयस्येति यस्य भगवतः ज्ञानमयं ज्ञानप्रचुरज्ञानस्वरूपं वा न तु कायक्लेशसाध्यं तप इति श्रुतिपदार्थः ॥ २२ ॥ तदेव स्फुटयति । पदार्थविषयाशेषज्ञानाभावे सर्जनाद्यनुपपत्तेस्तपसैव ज्ञानरूपेण ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मोवाच ॥ भगवन्सर्वभूतानामध्यक्षोऽवस्थितो गुहाम् ॥ वेद ह्यप्रतिरुद्धेन प्रज्ञानेन चिकीर्षितम् ॥ २४ ॥ तथापि नाथमानस्य नाथ नाथय नाथितम् ॥ परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥ यथाऽऽत्ममायायोगेन नानाशक्त्युपबृंहितम् ॥ विलुपन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना ॥२६॥ क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते॥ तथा तद्विषयां धेहि मनीषां मयि माधव ॥२७॥ भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः ॥ नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ २८ ॥ यावत्सखा सख्युरिवेश ते कृतः प्रजाविसर्गे विभजामि भोजनम् ॥ अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः ॥ २९ ॥

अध्यक्षोऽधिष्ठाता गुहां गुहायां बुद्धाववस्थितः सन्यद्यपि वेद तथापीत्युत्तरेणान्वयः ॥ २४ ॥ नाथमानस्य याचमानस्य उपतप्यमानस्येति वा । हे नाथ नाथय आशंसय प्रयच्छ नाथितं याचितम् । नाथृनाधृयाच्ञोपतापैश्वर्याशीःषु । नाथितमेवाह । परं सूक्ष्ममवरं स्थूलं च ते रूपं यथा जानीयाम् ॥ २५ ॥ यथा च त्वं क्रीडसि तद्विषया मनीषां मयि धेहीत्युत्तरेणान्वयः । नानाशक्त्युपबृंहितं नानाशक्तिभिरुपचितं विश्वं विलुंपन् संहरन् विविधं सृजन् बिभ्रत्पालयन् आत्मना स्वयमेवात्मानं ब्रह्मादिरूपं गृह्णन्ननुगृह्णन् क्रीडसि ॥ २६ ॥ ऊर्णुते तंतुभिरात्मानमाच्छादयति ॥ २७ ॥ तत्किं सृष्टेरुद्विग्न एव तत्त्वज्ञानं प्रार्थयसे नेत्याह । भगवता त्वया शिक्षितमनुशिष्टमतंद्रितोऽनलसः सन् करिष्यामि । तर्हि किमनेन तत्त्वज्ञानेन तत्राह । यस्मादेवंभूतात्तवानुग्रहात्प्रजासर्गमीहमानः कुर्वन्नप्यहंकारादिभिर्बद्धो न भवेयमिति ॥ २८ ॥ अवश्यं च मदो भविता स तु कंचित्कालं माभूदिति प्रार्थयते । यावदिति । भो ईश ते त्वया लौकिकस्य सख्युः सखेवाहंकृतः करस्पर्शनादिना ममत्वेन संमानितः सन्प्रजासर्गरूपे तव परिकर्मणि सेवायां स्थितोऽविक्लवोऽव्याकुल एव । यावज्जनं विभजाम्युत्तममध्यमादिभेदेन सृजामि तावत्त्वत्संमाननादहमप्यजः स्वतंत्र इति मानिनो मे समुन्नद्ध उत्कटो मदो माभूत् ।

हे भगवन्निति । अप्रच्युतज्ञानत्वमाह तदेवाह अप्रतिरुद्धेनेति॥२४॥नाथेति।एतेन स्वस्य शिष्यत्वं हरेर्गुरुत्वञ्चोक्तम्।"द्वे वाव ब्रह्मणो रूपे"इति श्रुतेः॥२५॥यथेति युग्मकम्।आत्मनो मायायोगो योगमाया च तयोर्द्वैक्यं तेन मायया बहिरंगशक्त्या नानाशक्त्युपबृंहितं द्रव्यज्ञानक्रियाशक्तिसमेतं विश्वं विलुंपन्संहरन् विसृजन् विविधं सृजन् बिभ्रत्पालयन् आत्मना स्वयमेवात्मानं गृह्णन्स्वस्वरूपं प्रकटयन् क्रीडसि।ऊर्णुते तंतुसंतानं करोति।योगमायापक्षे मायिकप्रपंचांतर्वर्त्तिलोके तत्रैव नानाशक्त्युपबृंहितं ह्लादिन्यादिशक्तिगणपरिपूरितमात्मानं स्वं स्वीयं च वास्तवं वस्तु अनन्यसिद्धत्वादात्मनैव गृह्णन्योगमाययांतरंगशक्त्या तच्च किञ्चिद्विलुंपन्कमपि भक्तं प्रति आवृण्वन् किञ्चिद्विसृजन् विविधं प्रकाशयन् किञ्चिद्बिभ्रत्कमपि कालं भूयान् क्रीडसि ऊर्णनाभिदृष्टांतस्तु स्थूलत उभयत्राप्यात्मैककारणत्वमात्रांशेन ज्ञेयः । मयि धेहि अहं मायां योगमायां तत्तत्प्रकाशितं वस्तु च जानीयामित्यर्थः । तत्र पररूपजिज्ञासायामुत्तरं ज्ञानमित्यादिभिः अवररूपजिज्ञासायामुत्तरं तत्रैव "ऋतेर्थम्" इत्यादिना मायामायिकयोरेकात्मकत्वात् । यथात्ममायायोगेत्यस्य समाधानं यद्रूपगुणकर्मक इत्यनेन भविष्यति । हे माधवेति मायापा कर्तृत्वेन ज्ञानदाने समर्थमिमीति भावः ॥ २६ ॥ २७ ॥ भगवच्छिक्षितमित्यत्रोपदेश एतन्मतं समातिष्ठेत्यादिना भविष्यति ॥ २८ ॥ मनोवांछितं प्रार्थयते—यावदिति । हे ईश सर्वं कर्तुं समर्थेति भावः । सखेव कृत इति सख्यभक्तिमेव प्राप्नुयामिति । किञ्च सृष्ट्वावस्थानंतरं यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायेन मुक्तिरेव भविष्यतीति भावः । संभवत्वादाह यद्वेति । इत्यर्थ इति । आत्मनेपदमार्षम् । नह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ॥ सरहस्यं तदंगं च गृहाण गदितं मया ॥ ३० ॥
यावानहं यथाभावो यद्रूपगुणकर्मकः तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ३१ ॥

यद्वा । मदो मा समुन्नद्ध मा समुन्नह्यताम् । कर्मणि लुङ् । उद्रिक्तो न भवेदित्यर्थः ॥२९॥ ज्ञानं शास्त्रोक्तम् । विज्ञानमनुभवः । रहस्यं भक्तिः । सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात् तस्यांगं साधनम् ॥ ३० ॥ ननु त्वद्दर्शनेऽप्यसमर्थोऽहं कथं ज्ञानाधिकारी स्यां तत्राह । यावानिति । यावान् । स्वरूपतः यथाभावो यादृक्सत्तावान् । यानि

धातोर्लुङि प्रथमपुरुषैकवचनं "न माङ्योगे"इत्यडभाव इति भावः ॥२९॥ अथ तत्र परमभागवताय ब्रह्मणे श्रीभागवताख्यं निजं शास्त्रमुपदेष्टुं तत्प्रतिपाद्यतमं वस्तुचतुष्टयं प्रतिजानीते ज्ञानमित्यादिषट्कम् मम भगवतो ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं मया गदितं सद्गृहाणेत्यन्यो न जानातीति भावः । यतः परमगुह्यं ब्रह्मज्ञानादपि रहस्यतमं "मुक्तानामपि सिद्धानाम्" इत्याद्युक्तेः । तच्च विज्ञानेन तदनुभवेनापि युक्तं गृहाण न चैतावदेव किन्तु सुरहस्यं तत्रापि रहस्यं यत्किमप्यस्ति तेनापि सहितं तच्च प्रेमभक्तिरूपमित्यग्रे व्यंजयिष्यते तथा तदंगं च गृहाण तच्च सति त्वपराधाख्यविघ्ने नष्टे झटिति विज्ञानरहस्ये प्रकटयेत् । तस्मात्तस्य ज्ञानस्य सहायं च गृहाणेत्यर्थः । तच्च श्रवणादिभक्तिरूपमित्यग्रे व्यंजयिष्यते । यद्वा । सरहस्यमिति तदंगस्यैव विशेषणं ज्ञेयं सुहृदाविव मिथः संवर्द्धकयोरेकत्रावस्थानादिति संदर्भः । विश्वनाथः । तत्र परावरे यथारूपे जानीयामित्यनेन तवाप्राकृतं रूपं प्राकृतं च रूपं कीदृशमिति यथात्ममायायोगेनेत्यनेन तव माया योगमाया च कीदृशीति यथा क्रीडसीति मायाधिकृतेषु योगमायाधिकृतेषु च लोकेषु तव केन प्रकारेण क्रीडेति भगवच्छिक्षितमहं करवाणि ह्यतंद्रित इत्यनेन मदभीष्टसिद्ध्यर्थं तच्छिक्षितं किं मम कर्तव्यमिति ब्रह्मणा क्रमेण दृष्टस्य वस्तुचतुष्टयस्थचतुःश्लोक्या क्रमेणैवोत्तरं दातुं भगवान्प्रतिजानीते–ज्ञानमिति । एतदेव भगवदुक्तोत्तरचतुष्टयात्मकमेव श्रीभागवतं शास्त्रं भगवत्प्रोक्तत्वेन प्रसिद्धमित्याहुः । न केवलं मद्रूपस्य ज्ञानमेव तुभ्यं ददाम्यपि तु विज्ञानेनानुभवेन समन्वितं यत्तदपि । किञ्च परमगुह्यं निर्विशेषब्रह्मज्ञानादपि श्रेष्ठत्वादिति भावः । किञ्च रहस्यं प्रेमभक्तिश्च स प्रसिद्धस्त्वं गृहाण सुगोप्यमपि वक्ष्यामीत्यादिनिर्देशात्तस्य रहस्यत्वं ज्ञेयं तस्य रहस्यस्यांगं साधनभक्तियोगस्तं चेति त्वयाऽपृष्टमप्येतत्त्रयं कृपयैव वक्ष्यामि किं वा भगवच्छिक्षितमहं करवाणीत्यनेनैवैतत्त्रिकमपि त्वया पृष्टमेवेति चतुर्थश्लोक एव रहस्यत्वाद्बहिरंगलोकागम्यतयैव वक्ष्यामि अत्र रहस्यतदंगयोरेतयोर्नामाग्रहणं प्रथमोक्ताद्ब्रह्मज्ञानादप्यतिगोप्यत्वमुत्कृष्टत्वञ्च बोधयतीति ज्ञेयं मया निगदितं गृहाणेत्यवदधानमपि ब्रह्माणं विशेषतोऽवधापयति॥३०॥ अत्राक्षिपति–नन्विति । तत्र साध्ययोर्विज्ञानरहस्ययोराविर्भावार्थमाशिषं ददाति–यावानिति । यावान्स्वरूपतो यत्परिमाणकोहं यथा भावः सत्ता यस्येति यल्लक्षणोहमित्यर्थः । यानि स्वरूपांतरंगाणि रूपाणि श्यामचतुर्भुजत्वादीनि । गुणा भक्तवात्सल्याद्याः । कर्माणि तत्तल्लीला यस्य स यद्रूपगुणकर्मकोहं तथैव तेन सर्वेण प्रकारेणैव तत्त्वविज्ञानं याथार्थ्यानुभवो मदनुग्रहात्तवास्तु । एतेन चतुःश्लोकार्थस्य निर्विशेषपरत्वं स्वयमेव परास्तम् । वक्ष्यते च चतुःश्लोकीमेवोद्दिशता भगवता स्वयमुद्धवं प्रति "पुरामया"इत्यादौ "ज्ञानं परं मन्महिमावभासम्" इति तत्त्वविज्ञानपदेन रूपादीनामपि स्वरूपभूतत्वं व्यक्तम् । अत्र विज्ञानाशीः स्पष्टा रहस्याशीश्च परमानंदात्मकतत्तद्याथार्थ्यानुभवेनावश्यप्रेमोदयादिति संदर्भः । विश्वनाथः किञ्च ज्ञानं शब्दद्वारा याथार्थ्यनिर्द्धारणं परोक्षं तच्च किञ्चिच्छुद्धचित्तानामास्तिकानां संभवेदपि विज्ञानं त्वपरोक्षानुभवो मत्स्वरूपस्य याथार्थ्येन साक्षात्कारः । स च रहस्यतदंगशब्दाभ्यां प्रेमभक्तिसाधनभक्तिभ्यां विना नैव भवतीति बोधयंस्तदर्थमाशिषं ददाति यावान्यत्प्रमाणाकारः यादृशस्थौल्यकार्श्यदैर्घ्यतुंगतावृत्ततायौचित्यसंनिवेशविशिष्टावयव इत्यर्थः । यथाभावो यादृशाभिप्रायः यानि रूपाणि श्यामत्वद्विभुजत्वचतुर्भुजत्वकृष्णरामत्वनृसिंहत्वादीनि । गुणा भक्तवात्सल्याद्याः । कर्माणि लक्ष्मीपरिग्रहगोवर्द्धनोद्धरणादीनि यस्य सः तथैवेति । येन येन प्रकारेण मम परिमाणाभिप्रायरूपगुणकर्माण्याविर्भवंति तेनैव प्रकारेण तत्त्वविज्ञानं तेषां याथार्थ्यानुभवोस्तु तत्राशीर्वादेनैवानुग्रहे व्यंजितेपि पुनर्मदनुग्रहपदोपादानं परमांतरंगमत्कृपाशक्तिवृत्तिविशेषसाधनभक्तिप्रेमभक्त्योर्वृद्धितारतम्येनैव तद्रूपगुणादिमाधुर्यानुभवतारतम्ये समुत्पत्स्यमानेप्येतस्मादपि मत्स्वरूपादधिकतममाधुर्यं परमदुर्लभं कृष्णस्वरूपं मां व्रज भूमौ त्वं साक्षादनुभविष्यसीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहमेवासमेवाऽग्रे नान्यद्यत्सदसत्परम् ॥ पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ ३२ ॥

रूपाणि गुणाः कर्माणि च यस्य ॥ ३१ ॥ एतदेव सम्यगुपदिशन् यावानित्यस्यार्थं स्फुटयति । अहमिति । अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः । नान्यत्किंचित् । यत् सत्स्थूलमसत्सूक्ष्मं परं तयोः कारणं प्रधानम् । तस्याप्यंतर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसमेव केवलं न चान्यदकरवम् । पश्चात्सृष्टेरनंतरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि । प्रलये योऽवशिष्येत सोऽप्यहमेव । अनेन चानाद्यनंतत्वादद्वितीयत्वाच्च परिपूर्णोऽहमित्युक्तं भवति ॥ ३२ ॥

सूचयति एतेन चतुःश्लोक्या निर्विशेषस्वरूपमात्रपरत्वेन व्याख्यानं परास्तम् ॥ ३१ ॥ स्वामिव्याख्यानं स्फुटार्थमेव एवं चतुःश्लोक्यादेयत्वेन ज्ञानादिकं प्रतिश्रुत्य तत्प्राप्तावाशिषैव योग्यतामापाद्य च प्रथमं ज्ञानमुपदिशन्नेव परावरे यथारूपे जानीयामिति प्रश्नस्योत्तरमाह— अहमेवाग्रे सृष्टेः पूर्वमासमिति तर्जन्या स्ववक्षः स्पृशति । एवकारेणान्ययोगव्यवच्छेदकेन मद्विजातीयं प्राकृतं वस्तु किमपि नासीदिति लभ्यते । अयमर्थः संप्रति भवंतं प्रति प्रादुर्भवन्नसौ परममनोहराकारो रूपगुणमाधुरीमहोदधिरहमेवाग्रे महाप्रलयकालेप्यासमेव "वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः इति आत्मैवेदमग्र आसीत्पुरुषविधः इति, पुरुषो ह वै नारानायण इति, एको ह वै नारायण आसीदिति, पुरुषो ह वै नारायणोऽकामयत । अथ नारायणादजो अजायत यतः सर्वाणि भूतानि नारायणः परं ब्रह्म तत्त्वं नारायणः परम् ऋतं सत्यं परं ब्रह्म पुरुषः । कृष्णपिंगलमिति, एको नारायण आसीन्न ब्रह्मा नेशानः" इत्यादिश्रुतिभ्यः "भगवानेक आसेदम्" इत्यादिस्मृतेश्च । अत्र वैकुंठतत्पार्षदादीनामपि तदुपांगत्वादहंपदेनैव ग्रहणं राजासौ प्रयातीतिवत् । अतस्तेषाञ्च तद्वदेव स्थितिर्बोध्यते तथा च राजप्रश्नः "स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः । मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः" इति श्रीविदुरप्रश्नश्च "तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः । तत्रेमं क उपासीरन्क उस्विदनुशेरते" इति स्वामिचरणानां व्याख्या च तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के उपासीरन्के वानुशेरते शयानमनु स्वपंतीत्येषा । काशीखंडेप्युक्तं "न च्यवंतेपि यद्भक्ता महत्यां प्रलयापदि । अतोच्युतोखिले लोके स एकः सर्वगोव्ययः" इति । आसमेवेत्ययोगव्यवच्छेदः । अस्तेः सत्तार्थकत्वात् तदानींतदानीं मद्विद्यमानतताया अभावः सर्वथा नाभूदित्येवार्थप्रतीतेः । अहमेवासमेव न किमप्यकरवमिति क्रियांतरव्यावृत्तिश्च वस्तुतो न घटेत अस्तेः सर्वधात्वर्थेष्वेवानुस्यूतत्वात् । पूर्वस्मिन्वर्षेऽस्मिन्ग्रामे चैत्र आसीदेवेत्युक्ते चैत्रस्य शयनाशनभोजनादिक्रिया नैव व्यावर्त्तते किंत्वभाव एवेति किं तूक्तपरिपाट्या घटते च यथा संदर्भे आसमेवेति ब्रह्मादिबहिर्जनज्ञानगोचरसृष्ट्यादिलक्षणक्रियांतरस्यैव व्यावृत्तिर्न तु स्वांतरंगलीलाया अपि यथाधुना राजासौ न किञ्चिदपि करोतीत्युक्ते राजसंबंधिकार्यमेव निषिध्यते न तु शयनभोजनादिकमपीति तत्त्वमिति दृष्टम् । ननु क्वचिन्निर्विशेषमेव ब्रह्मासीदिति श्रूयते तत्राह सत्कार्यमसत्कारणं ताभ्यां परं यद्ब्रह्म तन्न मत्तोन्यत् क्वचिदधिकारिणि शास्त्रे वा स्वरूपभूतनानाविशेषव्युत्पत्त्यसमर्थे सोयमहमेव निर्विशेषब्रह्मतया प्रतिभामीत्यर्थः । त्वं तु पूर्वश्लोकोक्तमाशीर्वादानुग्रहाभ्यां रूपगुणादिविशिष्टमेव मां जानीहीति भावः । ननु सृष्टेरनंतरं जगदेव न तु त्वमुपलभ्यसे तत्राह पश्चात्सृष्टेरनंतरमप्यहमेवास्म्येवेति वैकुंठेषु भगवदाद्याकारेण प्रपञ्चेष्वंतर्यामिरूपेण यथासमयं मत्स्याद्यवताररूपेण च ननु तर्हि पृथिव्यादिकं देवतिर्यगादिकञ्च त्वं न भवसीति तवापूर्णत्वप्रसक्तिस्तत्राह यदेतच्च व्यष्टिसमष्टिविराण्मयं विश्वं तदप्यहमेव मच्छक्तिजन्यत्वान्ममैव प्राकृतं रूपं परावरे यथारूपे जानीयामिति त्वया यदपरं रूपं पृष्टं तदेवेदं त्वं जानीहीत्यर्थः । तथा योवशिष्यते "भवानेकः शिष्यते शेषसंज्ञः" इत्याद्युक्तः परमेश्वरः सोहमस्मि तत्राहमित्यस्य त्रिरावृत्त्या निर्द्धारणस्य सूचितत्वात् एतद्रूपगुणादिविशिष्टस्य मम त्रैकालिकनित्यस्थित्या पररूपत्वं सृष्टिसंहारयोर्मध्य एव दृश्यमिदं मायिकप्रपंचजातमपरं रूपमिति परावररूपयोर्ज्ञानमुक्तम् । विज्ञानं तु पररूपस्य प्रथमस्यैव तच्च तदैव स्याद्यदा श्रवणकीर्त्तनादिजन्यप्रेमभक्त्या तद्रूपगुणादिमाधुर्यमास्वाद्यमानः स्यादिति चतुर्थश्लोके व्यक्तं भावीति विश्वनाथः । संदर्भोप्येतादृशव्याख्यः ॥ ३२ ॥

॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ॥ तद्विद्यादात्मनो मायां यथा भासो यथातमः ॥ ३३ ॥

‘यथात्ममायायोगेन’इत्यनेन मायाया अपि पृष्टत्वाद्वक्ष्यमाणोपयोगित्वाच्च मायां निरूपयति।ऋतेऽर्थं विनापि वास्तवमर्थम्।यद्यतःकिमप्यनिरुक्तमात्मन्यधिष्ठाने प्रतीयेत।सदपि च न

किञ्च जीवस्य परमात्मज्ञानविज्ञाने प्रति माया खल्वंशेनानुकूला प्रतिकूला च भवति विज्ञाते च परमात्मनि मयि योगमायैवाधिकरोति सा खल्वनुकूलैवेति ते द्वे अवश्यनिरूपणीये इति ज्ञापयन् यथात्ममायायोगेनेत्यनेन व्यंजितस्य तव माया योगमाया च कीदृशीति प्रश्नस्योत्तरं तंत्रेणैव क्रमेणाह ऋतेर्थमिति यद्यतोऽर्थं सत्यं वस्तु विना न प्रतीयते किं त्वर्थसत्यं वस्त्वेव प्रतीयते इत्यर्थः। तथा यतः अर्थं विना प्रतीयते अर्थो न प्रतीयते किंत्वनर्थः प्रतीये तेत्यर्थः।तत्ताम् आत्मनि स्वस्मिन्मुक्तो बद्धश्च जीव आत्मनो मम मायां क्रमेण विद्याविद्येति वृत्तिद्वयां मायाख्यां शक्तिं विद्यात् जानीयात् विद्याया दृष्टांतः यथा भासो दीपादिप्रकाशः दीपादिप्रकाशाद्यथा गृहे विद्यमानो घटपटादिरर्थ एव प्रतीयते न तु दीपानयनात्पूर्वं संभावितो घटपटाद्यभावस्तथा सर्पवृश्चिकादिरागंतुकश्च भयकारणमनर्थः प्रतीयते एवमेव विद्याया हेतोर्मुक्तेन जीवेन स्वस्मिन्नित्यसंबद्धं ज्ञानादिकमेव प्रतीयते नत्वविद्यादशायामिव तदभावः नापि स्वस्मिन्नसंबद्धो देहदैहिकशोकमोहादिकश्च प्रतीयते अविद्याया दृष्टांतः यथा तमोंधकारः अंधकाराद्यथा स्वगृहे विद्यमानो घटपटादिरर्थो न प्रतीयते किं त्वविद्यमानोपि संभाव्यमानः सर्पचौरादिकोभयकारणमनर्थः प्रतीयते एवमेवाविद्याया हेतोरेव बद्धेन जीवेन स्वस्मिन्नित्यसंबंधितया वर्त्तमानमपि ज्ञानानंदादिकं न प्रतीयते किंतु स्वस्मिन्नसन्नपि स्वसंबंधित्वेन वर्त्तमानो देहदैहिकशोकमोहादिरेव प्रतीयते तेन कुसुमशृंगादीनां सत्यत्वेप्याकाशशशादीनां तत्संबंधाभावादेवाकाशकुसुममलीकं शशशृंगमलीकमिति यथोच्यते तथैव देहानां तद्धर्माणां शोकमोहसुखदुःखादीनां च प्राधानिकत्वात्सत्यत्वेपि जीवस्य तत्संबंधाभावादेव जीवस्य देहादयो मिथ्याभूता इति शास्त्रेषूच्यते जीवस्य मिथ्याभूतोपि देहसंबंधः खल्वविद्यया कल्पते विद्यया लुप्यत इति विद्याऽविद्ययोर्दृष्टांतावाभासतमसी इत्यत्र“छायातपौ यत्र न गृध्रपक्षौ” इत्यष्टमस्कंधे एव प्रमाणं ज्ञेयम् केचित्तु तमो दृष्टांतोयमावरणांश एव आवरणविक्षेपयोस्तु दृष्टांताः सर्पव्याघ्रभूतावेशाद्या ज्ञेया इत्याहुस्तेपि तामसत्वात्तमःशब्देनैव ग्राह्या इत्यपरे । एवं जीवे सार्वदिकविद्यमानवस्तुप्रत्यायनमविद्यमानवस्तुप्रत्यायनं चेत्यविद्याया धर्मावावरणविक्षेपशब्दाभ्यामुच्यते । अथार्थशब्दस्य धनवाचित्वाच्छ्लेषेण भाग्यप्राप्तस्वीयबहुधनो वणिगिव विद्यालब्धज्ञानानंदो मुक्तः संपन्नत्वेन रूप्यते । तथाऽभाग्यानधिगतस्वीयधनो वणिगिवाविद्यावृतज्ञानानंदो बद्धजीवो दरिद्रत्वेनेति ज्ञेयम् । एवं विद्यया त्वंपदार्थस्य जीवात्मनोऽनुभवो भवति न तु तत्पदार्थस्य परमात्मनः तस्य निर्गुणत्वान्निर्गुणया भक्त्यैवापरोक्षानुभवः संभवेत् “ भक्त्याहमेकया ग्राह्यः ” इति भगवदुक्तेः । किं च “कैवल्यं सात्त्विकं ज्ञानम्” इति भगवदुक्तेर्देहादिव्यतिरिक्तात्मज्ञानरूपा येयं विद्या तस्याः सत्त्वगुणत्वादनया गुणातीतस्य परमात्मनो नैवानुभवः प्रत्युतास्या अप्यभाव एव तदुक्तं भगवता “द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः । श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्याः सर्व एव हि । येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते” इति । ननु तर्हि मुक्तजीवेन परमात्मनोऽपरोक्षानुभवार्थं भक्तिः कुतो लभ्यताम् । उच्यते ।ज्ञानाधिकारिणः सांख्ययोगतपआदिभिर्भक्तिमिश्रैरेव जनितया विद्ययाऽविद्यानिवार्त्तिकया प्रथमं त्वं पदार्थानुभवः ततस्तस्या विद्यातो विमुक्तस्य निरिंधनाग्निन्यायेन विद्याया अप्युपरमतारतम्येन पूर्वसिद्धभक्तिचंद्रकलायास्तदुपरागविच्युतायास्तत उद्गमतारतम्यं तथैव भक्त्या पुनःपुनरभ्यस्तया तत्पदार्थस्य परमात्मनोऽनुभवतारतम्यं तदुक्तं भगवता गीतासु “ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्” इति परां पौर्वकालिकगुणीभावराहित्यात् श्रेष्ठां केवलां वा ततश्च “भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः” इत्युक्तेर्जातिप्रमाणाभ्यामल्पीयस्या तया भक्त्या निर्विशेषब्रह्मण एवानुभवः । न त्वनंतचिद्विशेषब्रह्मणो भगवतः यथाऽल्पतेजश्चक्षुष्केण जनेन मणिमयी मूर्त्तिः सामान्यतेजोमय्येव दृश्यते । न तु मुखनासिकानेत्रकर्णादिविशेषमयी । ततश्च विद्यायाः सामरूपेणैवोपरमे सत्यद्भुतनैर्गुण्यस्य तस्य तयैव भक्त्या ब्रह्मानुभवस्यापूर्णत्वमेतदेव निर्वाणशब्दवाच्यं जीवब्रह्मैक्यं तदुक्तं तत्रैव “अतो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम्” इति ।या तु चिच्छक्तिवृत्तीनां सारभूता कृपाविलासरूपा परमोत्तमा श्रद्धा भक्तिर्जातिप्रमाणाभ्यामत्यधिका सा प्रबला परमस्वतंत्रा गुणदोषादिकमप्यगणयंती बद्धेपि जीवे राक्षसपुलिंदपुल्कसादौ दुराचारोपि यदृच्छयैवोदयते । विप्रे संन्यासिनि मुक्तेपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतीयेततदात्मनो मम मायां विद्यात्।यथा आभासो द्विचंद्रादिरित्यर्थं विना प्रतीतौ दृष्टांतः।यथा तम इति।सतोऽप्रतीतौ तमो राहुर्यथाग्रहमंडलेऽस्थितोऽपि न दृश्यते तथा॥ ३३॥

नोदयते । तयैवाविद्यापर्यंतसमस्तक्लेशध्वंसस्तदुक्तं "जरयत्याशु या कोशं निगीर्णमनलो यथा" इति । तयैवानंतचिद्विशेषस्य भगवतोप्यपरोक्ष्यानुभवो भवेत्।यथा बहुतरतेजस्विचक्षुष्केण जनेन सामान्यतस्तेजोमयी विशे
षतश्च मुखनासिकानेत्रकर्णादिसौंदर्यमयी च मूर्त्तिर्भद्रेणैव दृश्यते इति। तदेवं भक्तिर्द्विविधा निर्गुणा गुणमयी च । तत्राद्यया पाकदशायां प्रेमभक्तिसंज्ञया भगवद्वशीकारः सच्चिदानंदमयभगवद्रूपगुणलीलामाधुर्य्यानुभवश्च ।
द्वितीयया सात्त्विक्या सत्त्वगुणाद्विच्युतयैव निर्विशेषब्रह्मसुखानुभवमात्रमिति । तस्माद्ब्रह्मसुखानुभवदशातः पूर्वास्वेव दशासु जीवेषु मायाया अधिकार इति सिद्धम् "सत्यमेव प्रतीतं स्याद्यतोऽसत्यं तथा यतः । तद्विद्यादा
त्मनो मायां यथा भासो यथा तमः" इत्यनुक्तेरित्यन्यस्मिन्नर्थेप्याशय ईक्ष्यते । ऋतेर्थशब्दौ परिवृत्यसहावर्पितौ यतः स चार्थो यथा ब्रह्मानुभववत्स्वपि जनेषु नानाविधेषु या स्पष्टमधिकरोति भगवदिच्छावशात्तदीय
स्वरूपगुणलीलाप्रकाशावरणधुरंधुरा स्वरूपभूता शक्तिस्तस्या योगमायाया अपि लक्षणं तंत्रेणैवाह—ऋत इति । आत्मनि परमात्मनि मयि ऋते ज्ञाते सति अर्तेर्गत्यर्थत्वेन ज्ञानार्थत्वात्साक्षादनुभूते सतीत्यर्थः ।
यदिति "इण् गतौ" इत्यस्य शत्रंतं तत्पदेनैव यत्पदस्याक्षेपात् । यतः अर्थं यत्प्रयोजनं प्राप्तुवद्वस्तु अप्राकृतं प्राकृतं च प्रतीयते । यया प्रकाशितसत्प्रयोजनं वस्तु परमात्मसाक्षात्कारवता जनेन साक्षादनुभूयेतेत्यर्थः ।
यतः सकाशान्न प्रतीयते ययाऽऽवृतं तदेव वा समयांतरे वा न प्रतीयेतेत्यर्थः । तामात्मनो भगवतो मम मायां योगमायाख्यामंतरंगां शक्तिं विद्याज्जानीयात् । मायया प्रयोजनं विनैवाद्रियते योगमायया तु प्रयोजनमुद्दि
श्यैवेति विवेचनीयम् ।"यथा भासो यथा तमः" इति आभासेन दीपादिना प्रकाशितं घटपटादिकं यथा प्रतीयते तमसा वृतं तन्नानुभूयते च तथैव सा मदिच्छावशादाभासतमोधर्मवती योगमायेत्यर्थः । उदाहरणं तु यथा
ऐश्वर्यदर्शनेपि प्रेमसंकोचाभावज्ञापनार्थं भगवत्कुक्षौ यया प्रकाशितं प्राकृतमप्राकृतं गोकुलयशोदाकृष्णादिस्वरूपं च यया मोहिता श्रीयशोदा साक्षादनुबभूव क्षणांतरे च ययावरणान्नानुबभूव च यथा चैश्वर्य्यानुभूत्या
प्रेमसंकोचज्ञापनार्थं ययाप्रकाशितं विश्वरूपं परमात्मस्वरूपं चार्जुनः साक्षादनुबभूव तत्रैव वर्तमानमपि कृष्णस्वरूपं ययावरणान्नानुबभूव समयांतरे च ययाच्छादितं विश्वरूपादिकं नानुबभूव द्विभुजं श्रीकृष्णमेवानुबभूव अत्रैकदैवैकस्य
स्वरूपस्य प्रकाशनमन्यस्यावरणामिति पूर्वतो विशेषः यथा मंजुमहिमदर्शनया ब्रह्मण ईश्वरत्वाभिमाननिवर्तनार्थं ययाबरणाप्रकाशनाभ्यां लीलापरिकरवत्सबालाद्यदर्शनतददर्शनकृष्णस्वरूपसूतवत्सबालादिदर्शनचतुर्भुजत्वादिदर्श
नतददर्शनश्रीकृष्णस्वरूपदर्शनानि प्राप । यया मोहितः परमेष्ठी अत्रैकस्मिन्नेव परमेष्ठिनि विविधस्वरूपावरणप्रकाशनयोः पौनःपुन्यमिति विशेषः । यथा च भगवद्वपुः स्वरूपत एव परिच्छिन्नमपरिच्छिन्नं चातर्क्यमिति ज्ञापनार्थं
तथा केवलभजनश्रमस्तज्जन्या भगवत्कृपा चेत्युभाभ्यामेव भगवद्वशीकार इति ज्ञापनार्थञ्च दामबंधनलीलायां युगपदेव यशोदाकृष्णयोरभीप्सितबंधनाबंधने विभुत्वस्य युगपदेवावरणप्रकाशनाभ्यां वेष्टयंत्या किंकिण्या द्व्यगुलन्यूनदा
म्ना चावेष्टयता सूचिते दर्शयंत्यापि वस्तुतः कृष्णस्यैवाभीप्सितमबंधनं साधयंत्या यया मोहिता व्रजेश्वरी विस्मयरसं क्षणमनुबभूव पश्चात्तस्या अप्यभीप्सितं कृष्णसंमत्या साधयितुं विभुत्वं यया खल्वावृतमेवेत्यतः सा कृष्णं बबंधैव
तत्रैकदैवैकस्यैव विभुत्वस्यावरणप्रकाशने इति पूर्वपूर्वतो विशेषः।यथा च प्रतिस्वनिमंत्रणादिसिद्ध्यर्थं श्रुतदेवबहुलाश्वरुक्मिणीसत्यभामादिगृहस्थितस्य तस्य तत्तत्स्वरूपस्य ययैव युगपदेवावरणप्रकाशनाभ्यां तत्र तत्र लीलासिद्धिर्व्या
ख्यास्यते।अत्र श्रुतदेवबहुलाश्वादिव्यक्तिभेदमपेक्ष्यैवावरणप्रकाशनयोर्यौगपद्यं पूर्वत्रैकस्यां यशोदायामेवेति विशेषः।सा खलु योगमायैव न तु माया।तया मोहितानामपि तेषां परमात्मसाक्षात्कारदर्शनात्स च परमात्मसाक्षात्कारो
भक्तिमिश्रज्ञानवतामविद्याविद्ययोरुपरामे सति तथैवावतारसमये कृष्णं प्रीत्या पश्यतां तत्कृपाविषयीभूतत्वादप्रेमवतामपि । अन्यदा तु प्रेमवतामेवं कृष्णरामादिसाक्षात्कारो भागवतमतेनोच्यते । तेषु योगमायैवाधिकरोति
न तु माया । कृष्णं तदिच्छया पश्यतामपि कंसादीनां द्वेषलक्षणांतःकरणदोषादेव न परमात्मसाक्षात्कारो यथा मत्स्यंडिकां भुंजानानामपि पित्तदूषितरसनानां न मत्स्यंडिकास्वादानुभवस्तेषु मायेवाधिकरोति न तु योग
माया मायाशक्तिश्च योगमायोत्था तस्या विभूतिरेव यदुक्तं नारदपंचरात्रे श्रुतिविद्यासंवादे"अस्या आवरिका शक्तिर्महामायाखिलेश्वरी। यया मुग्धं जगत्सर्वं सर्वदेहाभिमानिनः"इति भगवता स्वस्वरूपत्वेनाभिमन्यमाना योगमाया
शक्तिश्चिदेव सैवांशेन स्वेच्छावशात्स्वस्वरूपत्वेनाभिमन्यमाना स्वस्वरूपात्पृथग्भूता सती मायाशक्तिर्जडैव । यथा सर्पस्य स्वरूपभूतापि त्वक् तेन त्यक्ता चेत्ततः पृथग्भूतं कंचुकं जडी स्यात् तथा चोक्तं श्रुतिभिः ॥
"तमुत जहासि तामहिरिव त्वचमात्तभगः" इति सा च माया त्रिविधा प्रधानमविद्या विद्या च प्रधानस्य लक्षणं जायंतेयोपाख्याने वक्ष्यते प्रधानेनोपाधयः सृज्यंते ते च सत्या एव । अविद्यया जीवेषु तदध्यासः सृष्टः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा महांति भूतानि भूतेषूच्चावचेष्वनु ॥ प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ ३४ ॥

यथाभाव इत्येतत्स्पष्टयति । यथा महाभूतानि भौतिकेष्वनु सृष्टेरंतरं प्रविष्टानि तेषूपलभ्यमानत्वात् अप्रविष्टानि च प्रागेव कारणतया तेषु विद्यमानत्वात् । तथा तेषु भूतभौति

स चासत्य एव विद्यया तदध्यासध्वंस इति तिसृणां शक्तीनां कार्यं तत्तन्मयं जगदिदमंशेनासत्यं तथा जीवानां नित्यत्वात् । भगवन्निकेतनादिभक्त्युपकरणानां निर्गुणत्वाच्चांशेन नित्यत्वमपि वादिभिर्यथा स्वमतं नानारूपतया निरूपितम् "कार्यं प्राधानिकं सत्यं कार्यमाविद्यकं मृषा । नित्यं तद्भक्तिसंबद्धमिदं तत्त्रितयात्मकम् १ प्राधानिकाः स्युर्देहास्तद्धर्मा आविद्यकाः पुनः । जीवेषु तत्तत्संबंधो भक्तिश्चेन्निर्गुणाश्च ते २ चिज्जीवमाया नित्यास्स्युस्तिस्रः कृष्णस्य शक्तयः । तद्वृत्तयश्च ताभिः स भात्येकः परमेश्वरः ३ कार्यकारणयोरैक्याच्छक्तिशक्तिमतोरपि । एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ४ भक्तानामेवसिद्धांतश्चतुःश्लोकीयमी लिता । शीलिता भवतादुक्तैस्तैरेव न किलापरैः ५ " इति विश्वनाथः । संदर्भस्तु अथ तादृशरूपादिविशिष्टस्यात्मनो व्यतिरेकमुखेन विज्ञापनार्थं मायालक्षणमाह—ऋतेर्थमिति । अर्थं परमार्थभूतं मां विना यत्प्रतीयते मत्प्रतीतौ तत्प्रतीत्यभावात् । मत्तो बहिरेव यस्य प्रतीतिरित्यर्थः । यच्चात्मनि न प्रतीयते यस्य च यदाश्रयत्वं विना स्वतः प्रतीतिर्नास्तीत्यर्थः । तथा लक्षणं वस्तु आत्मनो मम परमेश्वरस्य मायां जीवमायागुणमायेति द्वयात्मिकां मायाख्यशक्तिं विद्यात् । तत्र शुद्धजीवस्यापि चिद्रूपत्वाविशेषेण तदीयरश्मिस्थानीयत्वेन च स्वांतःपात एव विवक्षितः । तत्रास्याद्वयात्मकत्वेनाभिधानं दृष्टांतद्वैधेन लभ्यते तत्र जीवमायाख्यस्य प्रथमांशस्य तादृशत्वं दृष्टांतेन स्पष्टयन्नसंभावनां निरस्यति । यथा भास इति । आभासो ज्योतिर्बिम्बस्य स्वीयप्रकाशाद्व्यवहितप्रदेशे कश्चिदुच्छलितप्रतिच्छविविशेषः स यथा तस्माद्बहिरेव प्रतीयते न च तं विना तस्य प्रतीतिस्तथा सापीत्यर्थः । अनेन प्रतिपर्यायाभासधर्मत्वेन तस्यामाभासाख्यत्वमपि ध्वनितम् । अतस्तत्कार्यस्याप्याभासाख्यत्वं क्वचित् "आभासश्च निरोधश्च" इत्यादौ स यथा क्वचिदत्यंतोद्भटात्मास्वचाकाचिक्यच्छटापातितनेत्राणां नेत्रप्रकाशमावृणोति तमावृत्य च स्वेनात्यंतोद्भटतेजस्त्वेनैव द्रष्टृनेत्रं व्याकुलयन्स्वोपकंठे वर्णशावल्यमुद्गिरति। कदाचित्तदेव पृथग्भावेन नानाकारतया परिणमयति । तथेयमपि जीवज्ञानमावृणोति सत्त्वादिगुणसाम्यरूपां गुणमायाख्यां जडां प्रकृतिमुद्गिरति कदाचित्पृथग्भूतान् सत्त्वादिगुणान्नानाकारतया परिणमयति चेत्याद्यपि ज्ञेयम् । तदुक्तम् "एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा । परस्य ब्रह्मणो माया तथेदमखिलं जगत् ॥" तथां चायुर्वेदविदः "जगद्योनेरनिच्छस्य चिदानंदैकरूपिणः । पुंसोस्ति प्रकृतिर्नित्या प्रतिच्छायेव भास्वतः ॥ अचेतनापि चैतन्ययोगेन परमात्मनः । अकरोद्विश्वमखिलमनित्यं नाटकाकृतिम्" इति । तदेवं निमित्तांशो जीवमाया उपादानांशो गुणमायेत्यग्रेपि विवेचनीयम् । अथैवं सिद्धं गुणमायाख्यं द्वितीयमप्यंशं दृष्टांतेन स्पष्टयति । यथा तम इति । तमःशब्देनात्र पूर्वत्रोक्तं तमःप्रायं वर्णशाबल्यमुच्यते तद्यथा—तन्मूलज्योतिष्यसदपि तदाश्रयत्वं विना न संभवति तद्वादियमपीति । अथ वा मायामात्रनिरूपण एव पृथग्दृष्टांतद्वयं तत्राभासदृष्टांतो व्याख्यातः । तमोदृष्टांतश्च यथांधकारोज्योतिषोऽन्यत्रैव प्रतीयते ज्योतिर्विना च न प्रतीयते ज्योतिरात्मना चक्षुषैव तत्प्रतीतेर्न पृष्ठादिनेति तथेयमपीति ज्ञेयं ततश्चांशद्वयं प्रवृत्तिभेदेनैवोत्थं न तु दृष्टांतभेदेन प्राक्तनदृष्टांतद्वैधाभिप्रायेण तु पूर्वस्या आभासपर्यायच्छायाशब्देन क्वचित्प्रयोगः उत्तरस्यास्तमःशब्देनैव चेति यथा "ससर्ज च्छायया विद्यां पञ्चपर्वाणमग्रतः" इत्यत्र । यथा च "क्वाहं तमो महदहम्" इत्यादौ पूर्वत्राविद्याख्यनिमित्तशक्तिवृत्तिकत्वाज्जीवविषयकत्वेन जीवमायात्वम् । उत्तरत्र स्वीयतत्तद्गुणमयमहदाद्युपादानशक्तिवृत्तिकत्वं तद्गुणमायात्वं तथा ससर्जेत्यादौ छायाशक्तिं मायामवलंब्य सृष्ट्यारंभे ब्रह्मा स्वयमविद्यामाविर्भावितवानित्यर्थः । "विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । बंधमोक्षकरी आद्ये मायया मे विनिर्मिते" इत्युक्तत्वात् । अनयोराविर्भावभेदश्च श्रूयते तत्र पूर्वस्याः पाद्मे श्रीकृष्णसत्यभामासंवादीयकार्त्तिकमाहात्म्ये देवगणकृतमायास्तुतौ "इति स्तुवंतस्ते देवास्तेजोमण्डलसंस्थितम् । ददृशुर्गगने तत्र तेजोव्याप्तदिगंतरम् ॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीम् । अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः" इत्यादि । उत्तरस्याः पाद्मोत्तरखंडे "असंख्यं प्रकृतिस्थानं निबिडध्वांतमव्ययम्" इति विद्यादिति प्रथमपुरुषनिर्देशस्यायं भावः अन्यान्प्रत्येव खल्वयमुपदेशः त्वं तु मद्दत्त शक्त्या साक्षादेवानुभवन्नसीति एवं मायिकदृष्टिमतीत्यैव रूपादिविशिष्टं मामनुभवेदिति व्यतिरेकमुखेनानुभावनस्यायं भावः शब्देन निर्द्धारितस्यापि मत्स्वरूपादेर्मायाकार्यावेशेनैवानुभवो न भवति ततस्तदर्थं मायात्याजनमेव कर्त्तव्यमिति । एतेन तदविनाभावात्प्रेमाप्यनुभावित इति गम्यते ॥ ३३ ॥ इत्यर्थ इति अलौकिक्येव मम सत्तेति भावः । संदर्भः अथ तस्यैव प्रेम्णो रहस्यत्त्वं बोधयति यथेति यथा महांति भूतानि भूतेष्वप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ ३५ ॥

केषु अहं न च तेष्वहम् । एवंभूता मम सत्तेत्यर्थः ॥ ३४ ॥ साधनमाह । आत्मनस्तत्त्वजिज्ञासुना एतावत्त्वमेव जिज्ञास्यं विचार्यम् । तदेवाह । अन्वयः कार्येषु कारण विष्टानि बहिःस्थितानामप्यनुप्रविष्टान्यंतःस्थितानि भांति तथा लोकातीतवैकुंठस्थितत्वेनाप्रविष्टोप्यहं तेषु तत्तद्गुणविख्यातेषु प्रणतजनेषु प्रविष्टो हृदि स्थितोहं भामि तत्र महाभूतानामंशभेदेन प्रवेशाप्रवेशौ तस्य तु प्रकाशभेदेनेति भेदोपि प्रवेशाप्रवेशमात्रसाम्येन दृष्टांतः तदेवं तेषां तादृगात्मवशकारिणी प्रेमभक्तिर्नाम रहस्यमिति सूचितं तथा च ब्रह्मसंहितायाम्। "आनंदचिन्मयरसप्रतिभावितामिस्ताभिर्य एव निजरूपतया कलाभिः।गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामि॥प्रेमाञ्जनच्छुरितभक्तिविलोचनेन संतः सदैव हृदयेपि विलोकयंति।तं श्यामसुंदरमाचिंत्यगुणस्वरूपं गोविंदमादिपुरुषं तमहं भजामि" इति। अचिंत्य गुणस्वरूपमपि प्रेमाख्यं यदंजनच्छुरितवदुच्चैः प्रकाशमानं भक्तिरूपं विलोचनं तेनेत्यर्थः । यद्वा यथा तेषु तानि बहिःस्थितानि च भांति तथा भक्तेष्वप्यहमंतर्मनोवृत्तिषु बहिरिंद्रियवृत्ति च विस्फुरामीति भक्तेषु सर्वथानन्यवृत्तिता हेतु र्नाम किमपि स्वप्रकाशं प्रेमाख्यमानंदात्मकं वस्तु मम रहस्यमिति भावः।तथैव श्रीब्रह्मणोक्तं "न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः।न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता धृतो हरिः" इति यद्यपि व्याख्यांतरानुसारेणायमर्थोपलपनीयः स्यात्तथाप्यस्मिन्नेवार्थे तात्पर्यं प्रतिज्ञाचतुष्टयसाधनायोपक्रांतत्वात्तदनुक्रमगतत्वाच्च। किञ्चार्थे न तेष्वति छिन्नपदं व्यर्थं स्यात् दृष्टांतस्यैव क्रियाभ्यामन्वयोपपत्तेः।अपि च रहस्यं नाम ह्येतदेव यत्परमदुर्लभं वस्तु इष्टोदासीनजनदृष्टिनिवारणार्थं साधारणवस्त्वंतरेणाच्छाद्यते यथा चिंतामणेः संपुटादिना अत एव "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इति भगवद्वाक्यं तदेव च परोक्षं क्रियते यददेयं विरलप्रचारं महद्वस्तु भवति तस्यैवादेयत्वं विरलप्रचारं महत्त्वं च 'मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्' । इत्यादौ "मुक्तानामपि सिद्धानाम्" इत्यादौ "भक्तिः सिद्धेर्गरीयसी" इत्यादौ च बहुत्र व्यक्तं स्वयं चैतदेव श्रीभगवता परमभक्ताभ्यामर्जुनोद्धवाभ्यां कष्टोक्त्यैव कथितं "सर्वं गुह्यतमं भूयः शृणु मे परमं वचः" इत्यादिना "सुगोप्यमपि वक्ष्यामि" इत्यादिना च इदमेव रहस्यं श्रीनारदाय स्वयं ब्रह्मणैव प्रकटीकृतम् । "इदं भागवतं नाम यन्मे भगवतोदितम् । संग्रहोयं विभूतीनां त्वमेतद्विपुली कुरु ॥ यथा हरौ भगवति नृणां भक्तिर्भविष्यति । सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय" इति । तस्मात्साधु व्याख्यातं स्वामिचरणैरपि रहस्यं भक्तिरिति । विश्वनाथस्तु एवं च मायां योगमायाञ्च तंत्रेणैव लक्षयित्वा ताभ्यामधिकृतेषु सगुणनिर्गुणलोकेषु ब्रह्मणा पृष्टं स्वस्वप्रकारं तंत्रेणैवाह यथेति यथा महाभूतान्याकाशादीनि भूतेषु देवमनुष्यतिर्यगादिष्वनुप्रविष्टानि तेषूपलभ्यमानत्वात् । अप्रविष्टानि च पृथग्विद्यमानत्वात् । तथा तेषु भूतभौतिकेष्वहं प्रविष्टः सन्नपि पृथक्शुद्धसत्त्वात्मकस्वधामनि वर्तमानत्वादप्रविष्टश्चास्मि । किं तु महाभूतानामचेतनत्वादेव तेषु भूतेषु प्रवेश आसंगरहितः मम तु चेतनत्वेप्याकाश इवासौ स्वगृहेष्वलिप्त एव वसतीतिवत्तेषु सर्वेषु प्रवेशनियमनपालनादीन्यासंगरहितानीत्येवंभूताभूतेषु मायिकेष्वासंगरहितैव क्रीडेति भावः । तथा तेषु प्रसिद्धेषु नतेषु प्रणतभक्तजनेषु प्रविष्टोन्तःकरणेषु दर्शनं दातुं तथाऽप्रविष्टः बहिस्थितश्च तेषां नयनेषु स्वसौंदर्यमर्पयितुं नासासु स्वसौरभ्यं प्रवेशयितुं तैः सहोक्तिप्रत्युक्ती कुर्वंस्तेषां कर्णेषु स्वसौस्वर्यामृतं पूरयितुं स्पर्शनालिंगनादिदानैस्तेषामंगेषु स्वीयसौकुमार्यादिकं चानुभावयितुमिति तेषु गुणातीतभक्तेष्वंतर्बहिर्मयात्यक्तुमशक्येष्वासंगसहितैव मम क्रीडेतिभावः ॥ ३४ ॥ अथ "भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः" इति ब्रह्मणा प्रार्थितस्य स्वप्राप्तिसाधनस्यातिरहस्यत्वाद्बहिरंगजनागम्यतयैवाह एतावदेवेति । अत्र बहुतरशास्त्रानुसंधानमपि नापेक्षितव्यमिति भावः । तत्त्वजिज्ञासुना आत्मनः स्वस्य श्रेयः साधनत्वं ज्ञातुमिच्छुना जनेन जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयमित्यर्थः । त्वया तु मदनुग्रहादवगम्यत एवेति भावः । किं तत् यच्छ्रेयः साधनेषु कर्मज्ञानयोगभक्त्यादिषु मध्येऽन्वयव्यतिरेकाभ्यां स्यात् सिध्यति स्थिरीभवतीत्यर्थः । अत्र तावत्स्वर्गापवर्गादेः कर्मज्ञानयोगादिभिः केवलैरसिद्धेस्तैर्विनापि सिद्धेः । कर्मज्ञानयोगादयोऽन्वयव्यतिरेकाभ्यां नैव साधनानि स्युस्तथा हि "कोवार्थ आप्तोऽभजतां स्वधर्मतः" इति "क्लिश्यंति ये केवलबोधलब्धये" इति "पुरेह भूमन्बहवोपि योगिनः" इति "यत्कर्मभिर्यत्तपसा" इत्यादौ "कर्मादिभिर्विनापि" "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा । स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति" इति। "या वै साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्तत्साक्षितयाऽन्वयः व्यतिरेकश्च साध्यादौ एवमन्वयव्यतिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा च श्रयः'' इति मोक्षधर्मीयवचनं च । भक्त्या तु केवलयैव सर्वाणि श्रेयांसि सिद्ध्यंति तया विना तु नैव सिद्ध्यंतीत्यन्वयव्यतिरेकाभ्यां भक्तिरेव सर्वश्रेयःसाधनत्वेन स्थिरीभवति तथाहि अन्वयेन यथा''अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम्'' इति भक्तियोगस्य केवलस्यैव तीव्रत्वं निरभ्रसूर्यस्येवेति ज्ञेयम्।यथा वा 'यत्कर्मभिर्यत्तपसा' इत्यादिर्व्यतिरेकेण यथा''मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह। चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् । न भजंत्यवजानन्ति स्थानाद्भ्रष्टाः पतंत्यधः'' इति। यथा वा''तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः । क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमोनमः'' इति । अत्र देशकालविशेषाभावमाह–सर्वत्र सर्वदेशेषु सर्वाधिकारिषु च सर्वदा सर्वेष्वेव कालेषु यत्स्यात्तथाहि–शुचावेव देशे शुची तत्कालजीवी कर्म कुर्यात्, शुद्धांतःकरण एव ज्ञानं लभते, ''शुचौ देशे प्रतिष्ठाप्य सुखमासनमात्मनः ॥ योगी योगं युंजीत'' इति कर्मज्ञानादीनां न सार्वत्रिकता तथा यत्कर्म तत्संन्यासभोगप्राप्ताविधियोगः सिद्ध्यवधिः सांख्यमात्मज्ञानावधि ज्ञानं मोक्षावधीति नापि सार्वत्रिकता भक्तेश्च सार्वत्रिकतासार्वदिकते अतिप्रसिद्धे एव ''न देशनियमस्तत्र न कालनियमस्तथा । नोच्छिष्टादौ निषेधोस्ति श्रीहरेर्नाम्नि लुब्धका'' इति ''तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्चः स्मर्तव्यो भगवान्नृणाम्'' इति कर्मिज्ञानिप्रभृतिषु सर्वेष्वेवाधिकारिषु भक्तेर्व्याप्तिरुक्तैव ''किरातहूणांध्रपुलिंदपुल्कसाः'' इत्यादिना जातिचांडालकर्मचांडालादिष्वपि दृष्टा।तथा सर्वावस्थास्वपि गर्भे प्रह्लादादेर्बा ल्ये ध्रुवादेर्यौवनेंबरीषादेर्वार्द्धक्येद्धस्ये ययात्यादेर्मरणेऽजामिलादेर्नारकितायामपि यन्नाम्न्युदिते नारकोपीत्युक्तेः । ''यथायथा हरेर्नाम कीर्त्तयंति च नारकाः । तथातथा हरौ भक्तिमुद्वहंतो दिवं ययुः'' इति नृसिंहपुराणोक्ते श्चेति भक्तेरेव साधनत्वं निर्द्धारितम् । अथ प्रेमभक्तिरूपं रहस्यमपि तंत्रेणैवाह–एतावदिति । तत्त्वजिज्ञासुना पुंसा एतावदेव श्रेयस्सु स्वर्गापवर्गप्रेमसु मध्ये जिज्ञास्यं किं तत् यच्छ्रेय आत्मनः स्वस्यैवान्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा स्यात् तत्र न तावत्स्वर्गापवर्गौ स्वान्वयव्यतिरेकाभ्यां सिद्ध्यतः प्रेमा तु स्वस्यैवान्वयव्यतिरेकाभ्यां सिद्ध्यति प्रेम्णोपि भक्तिशब्दवाच्यत्वात्साधनभक्त्यैव साध्यभक्तेः प्रेम्णः सिद्धिदर्शनात् । प्रेम्णः स्वेनैव सिद्धिः तदुक्तं ''भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम्'' इत्यतो रहस्यतदंगशब्दाभ्यामुच्यमाने प्रेमभक्तिसाधनभक्ती तंत्रेणैवोक्ते ततश्च प्रेमभक्ति साधनत्वेनैव भक्तिः कर्त्तव्या न तु स्वर्गापवर्गादिसाधनत्वेनेति भगवतः शिक्षा व्यंजिता ''भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः'' इति ब्रह्मणा प्रार्थितत्वात् शुद्धसाधनभक्तिसिद्ध्या प्रेमभक्त्यैव यद्रूपगुणादिमाधुर्यरसानुभवस्तस्य प्रेमभक्त्यनुभावरूपत्वादिति विज्ञानं स्वत एव लब्धमतो रहस्यतदंगविज्ञानानि श्लोकेनानेनैवोक्तानि । किंच 'रसो वै सः' इत्यनंतरं, 'सैषा रसस्यमीमांसा भवति'' इति श्रुतेः । सर्वश्रेयोवधिरूपो रस एव मूर्त एव रंगभूमौ ''मल्लानामशनिः'' इत्याद्याकार एव दर्शितस्तस्य च विज्ञानमत्रैव श्लोके तंत्रेणोक्तिः । यथा जिज्ञास्येषु मध्ये एतावदेव जिज्ञास्यमनुबुभूषणीयं किं तत् अन्वयव्यतिरेकाभ्यां योगायोगाभ्यां संयोगविप्रलंभाभ्यां यत्स्यात्सर्वत्र सर्वब्रह्मांडवर्तिनि श्रीवृंदावनादौ दाससखिगुरुप्रेयसीषु सर्वदा नित्यमेव महाप्रलयसमयेपीति दास्यसख्यवात्सल्यशृंगाररसानामास्वादनं व्यंजितम् । एवमतिरहस्यप्रेमभक्तिरसव्यंजकः श्लोकोयं ज्ञानरूपार्थांतरेण भगवतैवाच्छादितश्चिंतामणिरिव कनकसंपुटेन बहिरंगजनाशक्यो द्घाटनेन । तथा च श्रुतिः ''नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्'' इति । तत्र ज्ञानरूपमर्थांतरं यथा स्वामिचरणैर्व्याख्यातं तथैवेति विश्वनाथः । अत्र संदर्भः । अथ क्रमप्राप्तं रहस्यपर्यंतसाधकत्वात् रहस्यत्वेनैव तदंगमुपदिशति–एतावदेवेति । आत्मनो मम भगवतस्तत्त्वजिज्ञासुना याथार्थ्यमनुभवितुमिच्छुना एतावदेव जिज्ञास्यं श्रीगुरुचरणेभ्यः शिक्षणीयं किं तत् यदेकमेव वस्तु अन्वयव्यतिरेकाभ्यां विधिनिषेधाभ्यां सदा सर्वत्र स्यादित्युपपद्यते तत्रान्वयेन यथा 'एतावानेव लोकेस्मिन्' इत्यादि ''ईश्वरः सर्वभूतानाम्'' इत्यादि 'मन्मना भव मद्भक्तः' इत्यादि च व्यतिरे केण यथा 'मुखबाहूरूपादेभ्यः' इत्यादि''ऋषयो देवयुष्मत्प्रसंगविमुखा इह संपतंति'' इत्यादि, 'न मां दुष्कृतिनो मूढाः' इत्यादि 'यावज्जनो भवति नो खलु विष्णुभक्तः' इत्यादि च कुत्रकुत्रोपपद्येत सर्वत्र शास्त्रकर्तृदेशा कारणद्रव्यक्रियाकार्यफलेषु समस्तेष्वेव तत्र समस्तशास्त्रेषु यथा स्कांदे ब्रह्मनारदसंवादे ''संसारेस्मिन्महाघोरे जन्ममृत्युसमाकुले । पूजनं वासुदेवस्य तारकं वादिभिः स्मृतम्'' इति । तत्रान्वयेन यथा ''भगवान्ब्रह्म कात्स्न्र्येन'' इत्यादि । तथा पाद्मे स्कांदे लैंगे च''आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा''इति व्यतिरेकोदाहरणं''पारंगतोपि वेदानां सर्वशास्त्रार्थविद्यदि । यो न सर्वेश्वरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तस्तं विद्यात्पुरुषाधमम्'' इत्यादिकं सर्वत्रावगंतव्यम् । तच्चांते दर्शयिष्यते एकादशे ''शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि । श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः'' इति । सर्वकर्तृषु यथा ''ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः । यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि किमु श्रुभधारणा ये'' इति । गारुडे च ''कीटपक्षिमृगाणाञ्च हरौ संन्यस्तकर्मणाम् । ऊर्द्ध्वमेव गतिं मन्ये किं पुनर्ज्ञानिनां नृणाम्'' इति । तत्रैव सदाचारे दुराचारे ज्ञानिन्यज्ञानिनि विरक्ते रागिणि मुमुक्षौ मुक्ते भक्त्यसिद्धे भक्तिसिद्धे तस्मिन्भगवत्पार्षदतां प्राप्ते तस्मिन्नित्यपार्षदे च सामान्येन दर्शनादपि सार्वत्रिकता । तत्र सदाचारे दुराचारे च तथा ''अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः'' इति । सदाचारस्तु किं वक्तव्य इत्यपेर्थः'ज्ञानिन्यज्ञानिनि च ज्ञात्वाऽज्ञात्वाथ ये वै माम्' इत्यादि ''हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः'' इति । विरक्ते रागिणि च ''बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः। प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते'' इति अबाध्यमानस्तु सुतरां नाभिभूयत इत्यपेर्थः मुमुक्षौ मुक्ते च 'मुमुक्षवो घोररूपान्' इत्यादि, 'आत्मारामाश्च मुनयः' इत्यादि भक्त्यसिद्धे भक्तिसिद्धे च 'केचित्केवलया भक्त्या वासुदेवपरायणाः' इति 'न चलति भगवत्पदारविंदाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः' इति भगवत्पार्षदतां प्राप्ते, मत्सेवया प्रतीतं च' इत्यादि । नित्यपार्षदे 'वापीषु विद्रुमतटास्वमलामृताप्सु' इत्यादिसर्वेषु वर्षेषु ब्रह्मांडेषु तेषां बहिश्च तैस्तैः श्रीभगवदुपासनायाः क्रियमाणायाः श्रीभागवतादिषु प्रसिद्धिः सिद्धैरेभिः सर्वदेशोदाहरणं ज्ञेयं सर्वेषु करणेषु यथा ''मानसेनोपचारेण परिचर्य्य हरिं मुदा । परे वाङ्मनसागम्ये तं साक्षात्प्रतिपेदिरे'' इति । एवंभूतवचने हि अस्तु तावद्बहिरिंद्रियेण मनसा वचसापि तत्सिद्धिरिति प्रासिद्धिः । सर्वद्रव्येषु यथा ''पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति'' इत्यादि । सर्वक्रियासु यथा ''श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः । सद्यः पुनाति सद्धर्मौ देवविश्वद्रुहोपि हि'' इति, 'यत्करोषि यदश्नासि ' इत्यादि, एवं भक्तभासेषु भक्ताभासापराधेष्वप्यजामिलमूषिकादयो दृष्टान्ता गम्याः । सर्वेषु कार्येषु यथा ''यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम्'' इति सर्वफलेषु यथा ''अकामः सर्वकामो वा'' इत्यादि । तथा 'यथा तरोर्मूलनिषेचनेन' इत्यादिवाक्येन हरिपरिचर्यायां क्रियमाणायां सर्वेषामन्येषामपि देवादीनामुपासना स्वत एव भवतीत्यतोपि सार्वत्रिकता यथोक्तं स्कांदे श्रीब्रह्मनारदसंवादे ''अर्चिते देवदेवशे शंखचक्रगदाधरे । अर्चिताः सर्वदेवाः स्युर्यतः सर्वगतो हरिः'' इति । एवं यो भक्तिं करोति यद्भवादिकं भगवते दीयते येन द्वारभूतेन भक्तिः क्रियेत यस्मै श्रीभगवते प्रीणनार्थं दीयते यस्माद्भवादिकात्पयआदिकमादाय भगवते निवेद्यते यस्मिन्देशादौ कुले वा कश्चिद्भक्तिमनुतिष्ठति तेषामपि कृतार्थत्वं पुराणेषु दृश्यत इति कारकगतापि एवं सार्वत्रिकत्त्वं साधितं सनातनत्वमप्याह—सर्वदेति । तत्र सर्गादौ यथा 'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता' इत्यादि, सर्गमध्ये तु बहुत्रैव चतुर्विधप्रलयेपि 'तत्रेमं क उपासीरन्' इति विदुरप्रश्ने सर्वेषु युगेषु ''कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात्'' इति किं बहुना 'सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः । यन्मुहूर्त्तं क्षणं वापि वासुदेवो न चिंत्यते'' इत्यादि वैष्णवे । सर्वावस्थास्वपि गर्भे श्रीनारदकारितश्रवणेन श्रीप्रह्लादे प्रसिद्धं बाल्ये ध्रुवादिषु यौवने श्रीमदंबरीषादिषु वार्द्धक्ये धृतराष्ट्रादिषु मरणेऽजामिलादिषु स्वर्गितायां श्रीचित्रकेत्वादिषु नारकितायामपि ''यथायथा हरेर्नाम कीर्त्तयंति स्म नारकाः । तथातथा हरौ भक्तिमुद्वहंतो दिवं ययुः'' इति नृसिंहपुराणे । अत एवोक्तं दुर्वाससा ''मुच्येत यन्नाम्न्युदिते नारकोपि'' इति । तथा 'एतन्निर्विद्यमानानाम्' इत्यादावपि सर्वावस्थोदाहृतिः । अथ तत्रतत्र व्यतिरेकोदाहरणानि च कियंति दर्श्यंते ''पारंगतोपि वेदानां सर्वशास्त्रार्थवेद्यपि । यो न सर्वेश्वरे भक्तस्तं विद्यात्पुरुषाधमम्'' इति, ''किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेवणैः । विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः'' इति ''किं तस्य बहुभिः शास्त्रैः किं तपोभिः किमध्वरैः । वाजिपेयसहस्त्रैर्वा भक्तिर्यस्य जनार्दने'' इति गरुडबृहन्नारदीयपाद्मवचनानि । तथा ''तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगलाः । क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमोनमः'' इति, ''न यत्र वैकुंठकथासुधापगा न साधनो भागवतास्तदाश्रयाः । न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न जातु सेव्यताम् ॥ यथा च आनम्य किरीटकोटिभिः'' इत्यादि, सायुज्यं सार्ष्टिसालोक्यसामीप्येत्यादि,'न दानं न तपो नेज्या'इत्यादि, 'नैष्कर्म्यमप्यच्युतभाववर्जितम्' इत्यादि, 'नात्यंतिकं विगणयंत्यपि ते प्रसादम्' इत्यादयः । अथ सर्वत्र सर्वदा यदुपपद्यत इति योजनिकार्थोपियुगपद् यथा 'तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा' इत्यादि अन्वयव्यतिरेकाभ्यां सर्वत्र सर्वदा यदुपपपद्यते इत्यत्र यथा ''स्मर्त्तव्यः सततं विष्णुः'' इत्यादि साकल्येपि यथा 'नह्यतोन्यः शिवः पंथाः' इत्युपसंहारे ''तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्त्तव्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतन्मतं समातिष्ठ परमेण समाधिना ॥ भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित ॥ ३६ ॥
श्रीशुक उवाच ॥ संप्रदिश्यैवमजनो जनानां परमेष्ठिनम् ॥ पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ॥ ३७ ॥

तदेवात्मेति ॥ ३५॥ यत्प्रार्थितं 'नेहमानः प्रजासर्गं' इति तत्प्रसादीकरोति । एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु ये विकल्पा विविधाः सृष्टयस्तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति ॥ ३६ ॥ एवं संप्रदिश्योपदिश्य । जनानां परमेष्ठिनं परमे आधिपत्ये स्थितं ब्रह्माणम् । आत्मनस्तद्रूपं न्यरुणदंतर्हितवान् ॥ ३७ ॥

भगवान्नृणाम् । जीवानामिति 'नृगतिं विवच्य कवयः इतिवत् एतदुक्तं भवति । यत्कर्म ' तत्संन्यासभोगशरीरप्राप्तावधियोगः सिद्ध्यवधिः सांख्यमात्मज्ञानत्वावधि ज्ञानमोक्षावधि तथा तत्तद्योग्यतादिकानि च सर्वाणि एवंभूतेषु कर्मादिषु शास्त्रादिव्यभिचारिता च ज्ञेया हरिभक्तिस्तु अन्वयव्यतिरेकाभ्यां सदा सर्वत्र तत्तन्महिमाभिरुपपन्नत्वात्तथाभूतस्य रहस्यस्यांगत्वं युक्तम् । अतो रहस्यस्यांगत्वेन च ज्ञानरूपार्थांतराच्छन्नतयैवे दमुक्तमिति । तथाप्यात्मविद्ययैवान्यार्थसंगोपनादसौ साधनभक्तिरपि क्वचिद्ग्राह्यं ब्रह्मज्ञानादिसाधनं स्यादिति गम्यते । अत्रेयं प्रक्रिया साधनभक्तेः सार्वत्रिकत्वात्सदातनत्वाच्च प्रथमं सा गुरोर्ग्राह्या ततस्तदनुष्ठानाद्ग्राह्यसाधनं वैराग्यपुरस्सरताशीलमात्मज्ञानमानुषंगिकं भवति । ततो भूयश्च तथाभूतत्वाद्भक्तिरनुवर्तत एव 'ब्रह्मभूतः प्रसन्नात्मा' इत्यादिभ्यः 'आत्मारामाश्च मुनयः' इत्यादिभ्यश्च तदैव 'भगवज्ज्ञानविज्ञाने च' इति । तस्माज्ज्ञानवि ज्ञानरहस्यतदंगानामुपदेशेन चतुःश्लोक्या अपि स्वयं भगवानेवोपदेष्टा अत्र तस्मै स्वलोकं भगवान्सभाजित इति भगवच्छब्देन ''ददर्श तत्राखिलसात्वतां पतिम्'' इत्यत्र 'परार्द्धांते न सोऽबुध्यत गोपवेशोमे पुरस्तादाविर्बभूवे' इतितायनश्रुतादनुकूलितश्रीकृष्णत्वालिंगेन चास्यवक्तुः श्रीभगवत्त्वमेव :स्पष्टं न जातु तदंशभूतनारायणाख्यगर्भोदशायिपुरुषत्म् । अत एवास्य महापुराणस्यापि श्रीभागवतमित्येव व्याख्या तथैवोक्तं 'कस्मै येन विभाषितोयमतुलो ज्ञानप्रदीपः पुरा' इत्यादौ पुराशब्देन भगवद्वक्तृत्वमेवोक्तम् । 'अद्योऽवतारः पुरुषः परस्य' इति द्वितीयेऽभिधानात् । अत ''इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे । स्थिताय भवभीताय कारुण्यात्संप्रकाशितम्'' इत्यत्रापि भगवच्छब्दः प्रयुक्तः श्रीनाभिपंकजे स्थितं ब्रह्माणं प्रति स्वयं भगवता तत्रैव व्यापि महावैकुंठे प्रकाश्येदं पुराणं प्रकाशितमित्यर्थः । अनुगतं चैतद्द्वितीयस्कंधेतिहासस्येति ॥ ३५ ॥ नन्वीतिगंभीरार्थं चतुःश्लोकीभागवतमिदं कथं मयावगंतुं शक्यं विवदमानानां मतवैविध्यादित्यत आह—एतन्मतं मदीयं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण विमृशेत्यर्थः। कल्पविकल्पेषु महाकल्पानुकल्पेषु इयं विश्वजनी नातिरम्याभावार्थदर्शिनी भक्तिशास्त्रमधीयानैर्ज्ञैर्दृश्या न चापरैरिति ॥ ३६ ॥ अस्य महापुराणत्वे तु सर्गादिदशलक्षणवत्त्वेन भाव्यं तच्चात्र चतुःश्लोक्यां दुर्विज्ञेयं विना श्रीनन्दनन्दनकृपयेत्येतदर्थं तदपि सूक्ष्मधिया ज्ञेयमत्रासूच्येव तथाहि मे मत्संबंधि यज्ज्ञानं वेदांतप्रतिपादितत्वादगुह्यं प्रसिद्धमेव 'विज्ञानमेतत्त्रियवस्थमंगे' इत्यादिनैकादशस्कंधे भगवदुक्तैर्विज्ञानं प्रधानं तत्सहितं मया श्रीगीतासु भारते'अहं ब्रह्म परं धाम' इत्यादिना 'दैवी ह्येषा गुणमयी' इत्यादिना च गदितमुक्तमेव स प्रार्थयिता त्वं रहस्यं रहस्येकान्ते स्थाप्यं रहस्यं सुरेभ्योपि गोपितत्वाद्वा रहस्यं पाद्म उक्तमेतत्' 'परीक्षिते कथां वक्तुं सभायां संस्थिते शुके' इत्यादिना ''गुह्यं पुत्राय शांताय परं गुह्यमिदं जगौ'' इति नवमस्कन्धे श्रीशुकोक्तेश्च परं रहस्यं श्रीभागवतमेव न वेदादि पैलादिभ्यो वेददानेप्येतददानात् ''हित्वा स्वशिष्यान्पैलादीन्'' इति तत्रैवोक्तेश्च गुह्याद्गुह्यतरं मुक्तिं ददाति''कार्हिचित्स्म न भक्तियोगम्''इत्युक्तेरति गुह्यस्यैवादानं भवति नत्वगुह्यस्यात एव भक्तिरेव रहस्यं न तु ज्ञानादीति रहस्यमस्त्यत्र प्रतिपाद्यत्वेनेति रहस्यं श्रीमद्भागवतमेव अत्र मत्वर्थीयोच् यद्वा प्रीतिपाद्यप्रतिपादकयोरभेदोपचारात् । तदंगं भक्त्यंगमेकत्वं सामान्यापेक्षं तदंगानीत्यर्थः । तानि च सत्संगादीन्येव श्रीभागवतप्राप्तिरपि सत्संगादीन्विना न भवत्यतस्तस्यापि तान्येवांगानीति ज्ञेयं सुधिया यथैव गुणकर्मकोहमस्मि तथैव तत्त्वविज्ञानं मदनुग्रहात्ते तवास्तु किं भूतोहं यच्छत्युपरमयति संसारान्निजभक्तानिति वा मोक्षादप्युपरमयति वा या वा ''मद्भक्तास्सर्वथा राजन्नैव वांछंति किंचन'' इति पुराणांतरात् ''गृहेषु दारेषु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिवस्तुषु । अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिम्'' इत्यंबरीषोपाख्यानोक्तेः ''सालोक्यादिचतुष्टयम् । ''दीयमानं न गृह्णंति विना मत्सेवनं जनाः'' इति श्रीकपिलोक्तेश्च । यम उपरमे अस्मादंतर्भावितण्यर्थात्कर्त्तरिक्विनिपि ''यमस्यात्वम्'' इति मस्यात्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजवत्साधनम् । पुनः न विद्यतेस्ति कथंभूतं रहस्यं परं सर्वोत्कृष्टमेवाहंभावो यस्य सोनहंभावः " छन्दसि परेऽपि, व्यवहिताश्च " इति यथाशब्दव्यवधानमदोषो प्राकृतवस्तुष्वस्य साक्षाद्वेदस्यापि बीजत्वात् । अत एव चतुःश्लोक्योपदेशाद्वेदा अपि चत्वार एवोद्भूता अन्यथा त्रिभिः पंचभिर्वा कथं नोपदिष्टमिति तत्त्वं तदुक्तं "चतुः श्लोकी चतुर्वेदबीजभूता न संशयः" इति संहितोक्तेर्वर्णितं चैतदाद्यपद्यव्याख्याशतके । अप्राकृते तु 'अहमादिर्हि देवानां' अहं सर्वस्यप्रभव इत्यादिभगवदुक्तेरेवाहंभावोस्त्येवेति ज्ञेयम् । यत्प्रमाणमस्येति । यावानिति विवृतौ त्वप्रमेयत्वं भगवतो विदार्येत "नां तो न चादिर्न च संप्रतिष्ठा" इति श्रीगीतोक्तेः । "अनंतं ब्रह्म" इति श्रुतेश्च भगवतः प्रमाणं नास्तीति गम्यते(३१)अथ सर्गादीनाह—'अहमेवासमे वाग्रे' इत्यनेन स्थानं ध्वनितम् यदेतच्चेत्यनेन विसर्गो ध्वनितः । नान्यद्यत्सदसत्परमित्यनेन विरोधो ध्वनितः । योवशिष्यतेत्यनेनाश्रयो ध्वनितः (३२) ऋते सत्यस्वरूपे ब्रह्मणि अर्थं प्रति भूभारहर्तिं सन्मार्गप्रवृत्त्यादिप्रयोजनं प्रति यद्रामकृष्णादिरूपं 'प्रतीयेत कार्यंते न प्रतीयेत तदात्मनो मे मायां लीलां विद्यादित्यनेनावतारानुचरितरूपेशकथा ध्वनिता । अनेनैवोतयोपि ध्वनितास्तथाहि—ऋते शुद्धे आत्मन्यंतःकरणे यत्प्रतीयेतार्थमुद्दिश्य अन्यथा न प्रतीयेत तदात्मनो जीवस्य मीयते भावि शुभाशुभमनयेति मायावासना तां विद्यात् । सा च द्विधा । शुभाऽशुभा च प्रथमायां दृष्टांतो यथा भास इति । आभासस्सूर्यादिस्तद्वत्प्रकाशकर्त्रीत्यर्थः । द्वितीयायां यथा तम इति । तमोवद्दुःखहेतुरित्यर्थः(३३)यथा महांति भूतानि भूतेषु सर्वदेहेषु प्रविष्टानि देहरक्षणार्थं तत्र स्थितानि तेषां विनिर्गमे देहे स्वधातुविगमे तु विशीर्य्यंत इत्युक्तेर्देहनाशश्रवणात्।अनेन पोषणमुक्तम्।अप्रविष्टानीति । मुख्यप्रवेशासंभवादुक्तम्।अत्र भूतपदेन भौतिकमपि ज्ञेयं कारणस्य कार्यस्यापि लक्षकत्वात्।तेन मन्वंतरं लक्ष्यते सर्वेषां मन्वादीनां भौतिकत्वात् । तथा तेषु न तेष्वहमित्यनेनासंगत्वकथनेन स्वस्य नित्यमुक्तत्वं सूचितमिति मुक्तिरुक्ता । यद्वा जीवरूपेण प्रविष्टोपि स्वरूपेणाप्रविष्ट एवेत्यर्थः (३४) 'एतावदेव जिज्ञास्यम्' इत्यनेनाश्रयश्रवण जिज्ञासादाववश्यं यतितव्यमित्युक्तम्।अन्वयव्यतिरेकाभ्यामित्यादिनाप्याश्रय एवोक्तः।"अन्वयव्यतिरेकेण जाग्रत्स्वप्नसुषुप्तिषु । मायामयेषु तद्ब्रह्मजीववृत्तिष्वपाश्रयः"इति द्वादशे वक्ष्यमाणत्वात्(३५) एतत्फलमाह—एतन्मतमिति श्रीहरिं स्वेष्टदेवं च नत्वा तस्य कृपावशात् । मूलभागवतव्याख्यां कुर्वे गुर्वनुमोदितः (१) श्रीमन्नारायणो "वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम्" इत्यादिभिः सर्ववेदकृत्सर्ववेदांतसारं श्रीमद्भागवतं ब्रह्मणे उपदिशंस्तत्र वक्तव्यार्थसंग्रहं कुर्वंस्तं ग्राहयितुं ब्रह्माणं सम्मुखी करोति । ज्ञानमिति। न च भागवतस्य वेदांतसारत्वे प्रमाणाभाव इति वाच्यम् । "सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वलक्षणम् । वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्" इति तत्रैव निर्देशात् । तत्र भागवतस्य सर्ववेदांतसारत्वं प्रतिज्ञाय तदापादनायैव हेतुगर्भितं विशेषणमाह—ब्रह्मात्मैकत्वलक्षणमिति । अत्र ब्रह्मशब्देन मायोपहितः सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिधर्मविशिष्टः परमात्मा तत्पदवाच्य आत्मशब्देन चाविद्याद्युपहितोऽल्पज्ञत्वादिगुणाविशिष्टो जीवात्मा त्वंपदवाच्यः तयोः श्रुतिसिद्धैक्यस्य विरोधेनानुपपत्तौ सोयं देवदत्त इत्यादौ तद्देशकालच्छत्रचामरादिविशिष्टस्य तद्देशकालदंडकमंडल्वादिविशिष्टेनैक्यानुपपत्त्या विरुद्धांशपारित्यागेनाविरुद्धदेवादत्तांपिंडाभेदबोधवद्विरुद्धमायाऽविद्याद्युपाधिसर्वज्ञत्वाऽल्पज्ञत्वादिधर्मरूपांशौ विहाय सच्चिदानंदस्वरूपात्मकत्वलक्षणमैक्यं जहदजल्लक्षणया लक्ष्यतीति तथा । ननु जहदजहल्लक्षणात्मैक्यसिद्धावप्युपाध्यवंशेषान्नाद्वैतपर्य्यवसानं तत्रह—वस्त्वद्वितीयं तन्निष्ठमिति । नं हि लक्षणयैक्यं बोधयञ्शास्त्रमुपाधिं पृथगवस्थाप्यैक्यं बोधयति येनैवमाशंक्येत किं तु "नेह नानास्ति किंचन" इत्यादिनोपाधींस्तंदधीनतद्धर्मादिनिखिलद्वैतमपबाध्य यदद्वितीयं वस्तु तदेकनिष्ठं भवतीति च । तथा च वेदांतेषु श्रूयमाणसर्वोपास्तीनां चित्तैकाग्र्यद्वारा ब्रह्मविद्यैकपर्य्यवसायितया ब्रह्माद्वैतविद्यैकानिरूपकश्रीमद्भागवतस्य सर्ववेदांतसारत्वमुपपन्नं विषयतः सारत्वमुक्त्वा फलतोपि सारत्वमाह—कैवल्यैकप्रयोजनमिति । ननु ब्रह्मावबोधस्य "ब्रह्मविदाप्नोति परं, ब्रह्म वेद ब्रह्मैव भवति, य एष वेद विष्णुरेव भवति" इत्यादिश्रुतौ ब्रह्मावाप्तिफलश्रवणात्कथं फलांतरोक्तिरिति चेन्न । नित्यमेव प्राप्तं ब्रह्म तस्य मायाऽविद्याद्युपाधिकल्पितभेदभ्रममंतरेणाप्राप्त्यसंभवाद्बोधेन भेदभ्रमबाधद्वारा कैवल्यमृते प्राप्त्यंतरासंभवात्कैवल्यस्यैव ब्रह्मावाप्तिशब्दोर्थत्वं यन्मे मत्स्वरूपविषयं परमगुह्यं ज्ञानं तदंगं साधनकलापं च मया गदितं गृहाणेत्यन्वयः । तत्र यज्ज्ञानं कर्मविषयं तद्वैदिकमपि न गुह्यं "ब्राह्मणो यजेत्" इत्यादौ बाह्याध्यस्तब्राह्मणत्वादिजातिमद्देहादिपुरस्कारेण तत्प्रवृत्तेः "प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म"इत्यादिभिरदृढत्वश्रवणाच्च । उपाधिविविक्तिकेव प्रत्यक्स्वरूपविषयज्ञानंमांतरत्वाद्गुह्यं ब्रह्माभेदज्ञानं तु परमगुह्यं तदप्युक्तं "कैवल्यं सात्त्विकं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम्" इति । तत्र सत्त्वस्याभानान्यथाभानप्रयोजकत्वाभावेनाध्यासानापादकत्वादुपाधिविविक्तज्ञानं सात्त्विकं ब्रह्मात्मावबोधं विना विवेकाज्ञानमात्रेण गुणबाधानुपपत्त्या न निर्गुणं मत्स्वरूपे आत्मत्वनिष्ठारूपं मन्निष्ठं तु मायागुणबाधकत्वान्निर्गुणमित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं भूतं तज्ज्ञानं तत्राह—विज्ञानसमन्वितमिति विशेषेण प्रमेयगतसंशयनिरासेन ज्ञायते स्वरूपं येन तद्विज्ञानं मननं फलोपकार्य्यंगं तेन समन्वितं रहस्यं निदिध्यासनाख्यं ध्यानं तत् द्विविधं यत्नसाध्यमयत्नसाध्यं च । तत्राद्यं
साक्षात्कारात्पूर्वं स्मरणभक्त्यंतःपातितया साधनरूपम् । द्वितीयं तु ज्ञानिनस्तस्य कार्यं न विद्यते इत्यादिना कर्तव्यप्रवृत्त्यनुपपत्त्या यत्नं विनैव स्वाभाविकजीवन्मुक्तिदशायां स्वरूपानुसाधनं "ब्रह्मभूतः प्रसन्नात्मा न शोचति
न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्" इत्यादिवाक्यसिद्धं पराभक्तिरूपं तेन सहितं तदंगं साधनजातं च । ननु भगवद्वदितज्ञानग्रहणाय नाहं समर्थस्तत्राह—यावानिति। यावान् विभुसच्चिदानंदैकरससर्वांगः
तथा यथाभावः परमार्थसद्रूपः । यद्वा यथा स्वभक्तेषु वात्सल्यादिभावो यस्य स तथा । यद्वा यथा नृत्यादौ नेत्रकरचालनादिभावो यस्य स तथा । ननु स्वरूपस्य भवतु वेद्यत्वं करचालनादिकर्म्मणां तदतिरिक्तत्वेन "अतो
न्यदार्ताम्" इत्यादिश्रुत्या वेद्यत्वाभाव इत्याशंक्याह—'यद्रूपगुणकर्मकः' इति । यस्य रूपाणि स्वरूपाण्येव गुणाः कर्म्माणि च यस्य स तथा तथा । च भगवद्गुणानां कर्म्मणा च स्वरूपात्मकत्वेनावेद्यत्वाभाव
एवेति भावः । एवं यादृक् मत्स्वरूपं तथैव तत्त्वविज्ञानं परमार्थवस्त्वपरोक्षं ते मदनुग्रहादेवास्तु "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादिश्रुतौ गुर्वीश्वरभक्तानां तयोरनुग्रहाज्ज्ञानलाभाध्यवसायेपि
तव तु गुरुरिष्टदेवश्चाहमेवेति मदनुग्रहादेवास्तु एवमनुग्रहाधीनतत्त्वज्ञानोत्पत्त्युक्त्या "वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु
मुह्यताम् । न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि" इत्यादिवाक्यशतैः "यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः" इत्यादिना स्वप्रभावलेशमात्रेण सर्वसाधनसंपादिका । "याया
साधनसंपत्तिः पुरुषार्थचतुष्टये । तया विना तदाप्नोति नरो नारायणश्रयः" इत्यादिना सर्वसाधनप्रतिरूपतयाऽभिषिक्ता साधनस्वरूपा नवधा भक्तिरनुग्रहाविर्भाविका मुख्यं ज्ञानोत्पत्तिसाधनमिति
ज्ञापितम् । "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी" इति श्रीभगवत्पूज्यपादोक्तेः । "नियुज्यमानया भक्त्या भगवत्याखिलात्मनि । सदृशोस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये" इति श्रीकपिलोक्तेश्च
एवं तत्त्वज्ञानाद्ब्रह्माण संमुखीकृत्य स्वानुग्रहात् तत्प्राप्तिं संभाव्यास्त्विति वरदानेन तस्मिंस्तद्ग्रहणशक्तिमाधाय तत्त्वमेवाह—अहमेव सच्चिदानंदविग्रहः स्वरूपात्मकधामोपकरणपरिषदादिरूपः "सत्यात्म
प्राणारामम्" इत्यादिश्रुतिसिद्धस्तवापरोक्षः सत्त्वस्य मन्नियम्योपाधेरभानान्यथाभानाप्रयोजकतया शुद्धस्वरूपभूतः सर्वाधिष्ठानात्मक एवाग्रे सर्गात्पूर्वमासं श्रूयमाणमच्छब्दस्यानुपपत्तिमंतरेणार्थांतरकल्पनानुपपत्तेः सर्गादग्रे
कार्य्यस्य कारणाव्यतिरेकेण प्रतीतेरप्यभावान्ममैव सर्वकारणत्वादहमेवासमिति भावः । "आत्मा वा इदमेक एवाग्र आसीत्" इतिश्रुतेः । न चाग्रे इति पदेन कालसद्भावप्रतीतेरेवकारानुनुपयोग इति वाच्यम्
"कालोऽस्मि लोकक्षयकृत्प्रवृत्तः" इति भगवद्वचनात्तस्य तदनतिरेकात् । किं च सुषुप्तौ अज्ञानावृतस्वरूपातिरिक्तकालाभानेऽपि समुत्थितस्य कालवासनाविष्टतया 'तदा सुखमस्वाप्सं न किमप्यवेदिषम्' इति तदाशब्दे
न कालपरामर्शस्य दर्शनवत्तदुक्त्युपपत्तेः । उक्तं च वृद्धैः "कालाभावे पुरेत्युक्तिः कालवासनया युतम् । शिष्यं प्रत्येव तेनात्र द्वितीयं न हि शंक्यते" इति । किं चाग्रे इति पदस्य पूर्वत्ववाचित्वेपि कालवाचित्वाभाव
एवेति न तच्छंकावकाशः न च पूर्वत्वाभिधाने भूतत्वप्रतीतेः कथं कालं विना भूतत्वादिव्यवहार इति वाच्यम् । कालमस्वीकुर्वतामपि सांख्यानां भूतभविष्यदादिव्यवहाराबाधात् । ननु कथं सद्रूपविष्णोरेव पूर्वसत्त्वमुच्यते
यतः "असद्वा इदमग्र आसीत्, असदेवेदमग्र आसीत् । तत्सदासीत तद्धैक आहुः, असदेवेदमग्र आसीत्" इति श्रुतिषु असत्पूर्वकत्वश्रवणात् "तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियते" इत्यत्र चाक
र्तृकैव सृष्टिः श्रूयते तत्राह—आसमेवेति । न आसमिति न न चोदाहृतश्रुतिविरोधः । "समाकर्षात्" इति सूत्रे भगवद्व्यासेन तद्विरोधपरिहारस्य दर्शितत्वात् । तथाहि—"असद्वा इदमग्र आसीत्" इति नासत्कारण
त्वविवक्षा ।"असन्नेव संभवति असद्ब्रह्मेतिवेदचेत् ॥ अस्ति ब्रह्मेति चेद्वेद संतमेनं ततो विदुः" इत्यसदपवादेन सत एव ब्रह्मणोऽन्नमयादिगुहांतःस्थत्वेन प्रत्यक्त्वमुक्त्वा "सोऽकामयत्" इति समाकृष्य ततः सृष्टिं निरूप्य
"तत्सत्यमित्याचक्षते" इत्युपसंहृत्य तत्रैवेमं श्लोकमाह--असद्वा इति अत्रासद्यद्यभिप्रेतं स्यात्तदान्यं समाकृष्यान्योक्तौ वाक्यमसंबद्धं स्यात्तस्मादव्यक्तनामरूपतया सूक्ष्मत्वेन दुर्लक्ष्यं असदित्युपचर्य्यते "असदेवेदमग्र आसीं
त्" इत्यत्रापि " तत्सदासीत्" इति समाकर्षादियमेव गतिः । "तद्धैक आहुरसदेवेदमग्र आसीत्" इत्यत्रापि न अत्यन्तासत्योक्तिर्भ्रान्तिकल्पनानुवादेन श्रौतसत्यक्षदार्ढ्यमेव "तद्धेदं तर्ह्यव्याकृतमासीत्" इत्यत्रापि नाहेतुव्या
कृतिः "सर्व एव इह प्रविष्टः" इति व्याकर्त्तुः प्रविष्टत्वेन समाकर्षात् । व्याकर्तुरभावे कमाकृष्येत चेतनस्यैवायं प्रवेशः 'पश्यंश्चक्षुः शृण्वञ्छ्रोत्रम्" इति चेतनत्वोक्तेः । अनेन जीवेनात्मनाऽनुप्रविश्य "नामरूपे व्याकर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाणि'' इति श्रुत्यंतरेपि व्याकृतेश्चेतनहेतुत्वदर्शनात् लूयते क्षेत्रं स्वयमेवेतिवद्व्याक्रियते इत्यत्रापि सत्येव कर्तर्य्युपपत्तेश्च। एवकारव्यावृत्तिमाह–नान्यदिति। ''नान्यत्किंचन मिषत्'' इति श्रुतेः। मिषादिति चलं नश्वरमित्यर्थः। अन्यच्छब्दार्थमेव विवृणोति यत्सदसत्परमिति। सत् स्थूलम् असत्सूक्ष्मं परं तयोः कारणं चेत्यर्थः। न च भवतु स्थूलसूक्ष्मयोरभावः ''नासदासीन्नो सदासीत्'' इति श्रुतेः। ''तम आसीत्'' इति श्रुतेः कथं कारणाभावोक्तिरिति वाच्यम्। 'नोसदासीत्तम आसीत्' इत्यत्र तमसः सत्त्वप्रतिषेधादासीदिति प्रयोगस्यैवानुपपत्तेः। ''सद्योगात्तमसः सत्त्वं न स्वतस्तन्निषेधनात्'' इति वृद्धोक्तेः सत्त्वनिषेधेन स्वतस्तत्प्रयोगानुपपत्तावपि सदधिष्ठानाध्यासिकसंबंधेनतत्सत्तयैवासीदिति प्रयोगसंभावनायामपि तच्छक्तित्वेनैव तदन्यत्वानन्यत्वाभ्यामनिर्वचनीयतया नान्यदितिभगवदुक्त्यनुपपत्त्यभावात्। न हि वह्नेः शक्तिस्तदन्या तात्पार्थक्येन तत्सत्तास्वरूपाभानात्। नापि वह्निरेव तच्छक्तिस्तथात्वे शक्तिशक्तिमद्भावानुपपत्तेरेकस्मिन्नाधाराधेयभावस्य वक्तुमशक्यत्वात्प्रतिबंधकमणिमंत्रादिसंनिधौ वह्निस्वरूपसमवधानेऽपि स्फोटाख्यकार्य्यादर्शनेन तत्प्रतिरोधदर्शनात्। न चान्यत्वानन्यत्व तदुभयात्मकत्वशक्तेर्विरोधात् मिथोभावः भावरूपयोस्तयोरेकाधिकरणत्वासंभवात्तस्मादन्यत्वानन्यत्वतदुभयात्मकत्वैर्निर्वक्तुमशक्यैव शक्तिः। तथैव तमोरूपासतः शक्तिरप्यनिर्वचनीयतया नं तदन्यासीत्। किं च सतः शक्तेस्तदनन्यत्वासंभवेनैव न सत्त्वं कार्य्यदर्शनेन च नासत्यं विरोधाच्च। नोभयात्मत्वमिति सत्त्वासत्त्वान्यत्वानन्यत्वतदुभयात्मत्वेभ्योनिर्वचनीयतया शक्तेर्मिथ्यात्वेन तत्कार्य्यस्याप्यनिर्वचनीयतया मिथ्यात्वात्तदा तदनुद्भवाच्च नान्यदासीदित्यभिप्रायः। नन्वनिर्वचनीयत्वेन मायाया जगतश्चानिर्वचनीयत्वोक्तौ भवन्मते ब्रह्मणोप्यनिर्वचनीयतया मिथ्यात्वापत्तिस्तथा च ब्रह्मापि मिथ्या अनिर्वचनीयत्वादिति प्रयोगापत्तिरिति चेत्। न। अत्र ब्रह्मापीत्यपिशब्देन सर्वप्रपञ्चस्यापि पक्षांतःपातितया हेतोरनुपसंहारित्वापत्तेः। अन्वयव्यतिरेकदृष्टांतरहितो ह्यनुपसंहारी सर्वस्य पक्षत्वे तदितरदृष्टांताभात्। अपिशब्दानुक्तावपि शब्दब्रह्मादाय सिद्धसाधनता चेतनविशेषणेपि ब्राह्मणाद्यादाय सिद्धसाधनत्वम्। परत्वविशेषणेपि मायोपहितकारणब्रह्मादाय सिद्धसाधनम्। न च सिद्धसाधनताया अदूषकत्वम्। अनधिगतार्थगमकस्यैव प्रमाणत्वेन सिद्धस्यानधिगतत्वाभावात्। तत्साधकस्य प्रमाणत्वानुपपत्तेः। संदिग्धसाध्यवान्हिपक्षः साध्यस्य तत्र सिद्धत्वे निश्चितसाध्यवान् स पक्ष इति तल्लक्षणापत्त्या पक्षत्वानुपपत्तेस्तैदसिद्धौ च पक्षस्यैव हेत्वाश्रयतयाहेतोराश्रयासिद्ध्यापत्तिश्च। किंचात्र ब्रह्मशब्देनास्मदभिमतस्वरूपं प्रतीयते न वा? नांत्यः पक्षस्वरूपाभानेप्याश्रयासिद्ध्या हेतुसाध्यादिसमर्थनानुपपत्तेः। नाद्यः ब्रह्मशब्देन तत्प्रतीतौ ब्रह्मशब्दगोचरत्वेनैवानिर्वचनीयत्वहेतोरसिद्ध्या शब्दोऽनित्यश्चाक्षुषत्वाद्धटवदित्यादिवत्पक्षे हेत्ववर्तनलक्षणस्वरूपासिद्ध्यापत्तेः। किं च ब्रह्मणोऽपि मिथ्यात्वं वदता किंचित्स्वीक्रियते न वा स्वीक्रियते चेत्तज्जडं चिद्वा जडं चेत्तस्य स्वतः सिद्धत्वानुपपत्त्या तत्सिद्ध्यै चित्स्वीकारापत्तेः चिच्चेत्सिद्धं न समीहितं सच्चिदेकसिद्ध्यैवाद्वैतवादिनामिष्टसिद्धेः। नाम्न्येव विवादो न वस्तुनि न स्वीक्रियते चेन्निरधिष्ठानारोपासिद्ध्या ब्रह्मणो मिथ्यात्वासिद्धिः। किं च मिथ्यात्वशब्देनासत्यत्वमभिप्रेयते सद्विलक्षणत्वं वा? । सदसद्भ्यामनिर्वचनयित्वं वा? नाद्यद्वितीयौ। तथात्वे तुच्छत्वापत्त्या प्रत्यक्षेणावभासमानशुक्तिरूप्यस्वप्नप्रपंचादौ तदसंभवेन दृष्टांते साध्यवैकल्यं ततश्च व्याप्तासिद्धिः। हेतुसत्त्वे साध्यसत्त्वमन्वयव्याप्तिः। साध्यभावे हेत्वभावो व्यतिरेकव्याप्तिः। अत्र तु यत्रयत्र स्वप्नादौ अनिर्वचनीयत्वं हेतुस्तत्र प्रत्यक्षत्वेन तुच्छत्वाभाव इति नान्यव्याप्तिस्तथा तत्रैव स्वप्नादौ तुच्छत्वसाध्याभावेप्यनिर्वचनीयत्वहेतुसवाद्भावान्न व्यतिरेकव्याप्तिः। अत एव निश्चितसाध्याभाववद्विपक्षवृत्तित्वेन साध्याभाववद्वृत्तिर्हेतुः साधारणानैकांतिक इति। सव्यभिचारपर्य्यायसाधारणासाधारणानुपसंहारित्रिविधानैकांतिकांतःपातिसाधारण्यं च शश शृंगादौ निश्चिततुच्छत्वसाध्यवर्त्ति सपक्षे चानिर्वचनीयत्वहेतोरवृत्तेः विपक्षमात्रवृत्तितयासाध्याभावता हेतुर्विरुद्ध इति। साध्याभावोपादकत्वेन विरुद्धता च तृतीये तु सदसद्भ्यामनिर्वचनीयत्वस्य साध्यत्वे तस्यैव हेतुत्वेन हेतोः साध्यावैशेष्यं तथा च साध्यस्य पक्षे संदिग्धतया हेतोरपि संदिग्धासिद्धतया स्वरूपासिद्धिरेव पक्षत्रयेऽपि तत्त्रिविधविकल्पितसाध्याभावस्य सत्यत्वस्य ब्रह्मणि पक्षे ''सत्यं ज्ञानमनंतं ब्रह्म, तदेवर्त्तं तदुसत्यमाहुस्तदेव ब्रह्म परमं कवीनाम्'' इत्यादिश्रुतिभिर्बोधनात् यस्य साध्याभावः प्रमाणांतरेण बाधितः स बाधित इति बाधलक्षणसद्भावाद्बाधश्च। किंचानिर्वचनीयत्वं किं नाम सदसद्भ्यामनिर्वचनीयत्वं वा? शब्दजन्यज्ञानाभास्यत्वं वा? आद्ये उदाहृतश्रुत्यैव पक्षे ब्रह्मणि सत्यत्वाध्यवसायात्स्वरूपासिद्धिः। द्वितीये–सर्प्परूप्यादिशब्दजज्ञानभास्ये रज्जुसर्पशुक्तिरूप्यादौ घटप

१ पक्षत्वासिद्धौ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टादिशब्दजज्ञानभास्ये स्वप्नजाग्रद्धटादौ साध्यवति सपक्षे दृष्टांते साधनवैकल्यं तथा चोक्तरूपमिथ्यात्वसाध्याभाववति तुच्छे शशशृंगादौ विपक्षे तच्छब्दजज्ञानभास्ये चावर्तमानत्वे सति पक्षमात्रवृत्तित्वेन शब्दजज्ञानाभास्यत्वरूपानिर्वचनीयत्वहेतोः सपक्षविपक्षव्यावृत्तः पक्षवृत्तिरसाधारण इति लंक्षणलक्षितासाधारण्यं च । न च शब्दजज्ञानाभास्यत्वे ब्रह्मणो वेदान्तवेद्यत्वानुपपत्तिः :। वेदांतानां तद्गताज्ञानावरणबाधकत्वेनैव तदभासकत्वेपि तत्र प्रमाणत्वस्य तस्य च तज्जन्यज्ञानप्रयुक्ताज्ञानबाधफलभाक्त्वेनैव स्वप्रकाशत्वेनैव तदभास्यत्वेपि तद्वेद्यत्वस्य चोपपत्तेः । न च हेतौ विकल्पमनुद्भाव्यानिर्वचनीयत्वशब्दमात्रेण मिथ्यात्वापादनं तथात्वे स्वर्णं तु कुंडलादिभूषणोपादानं कनकशब्दवाच्यत्वात् धत्तूरवत् । धत्तूरफलं कंटकादिबहुमूल्यभूषणोपादानं कनकत्वात् स्वर्णवत् । सूर्यगभस्तयो दुग्धदोहा गोत्वाद्धेनुवत् । धेनवो न दुग्धदोहा गोत्वाद्गभस्त्यादिवत् मंदारो जगदवभासकोऽर्कत्वात्सूर्यवत् । सूर्यो नावभासकोऽर्कत्वान्मंदारवत् । विष्णुर्न संसारतारको हरित्वात्कप्यादिवत् । कप्यादिस्तत्तारको हरित्वाद्विष्णुवदित्याद्याभाससमत्वापातात् । जडत्वपरिच्छिन्नत्वादयश्चात्रोपाधयः । साध्यव्यापकत्वे सति साधनाव्यापको हि उपाधिः यत्रयत्र हेतुस्तत्रतत्र साध्यमिति व्याप्तौ व्याप्तिनिरूपकं व्यापकं साध्यं व्याप्त्याश्रयो व्याप्यो हेतुस्तदेव लिंगं साध्यव्यापकत्वं च सर्वसाध्यवत्सु नियमेन वर्तमानत्वं साधनाव्यापकत्वं क्वचित्साधनवति वर्तमानत्वेपि सर्वत्र साधनवत्सु नियमेनावर्तमानत्वं जडत्वपरिच्छिन्नत्वादयश्च मिथ्यात्वसाध्यवति सर्वत्र व्यापकत्वेन साध्यव्यापकत्वेपि पक्षे वर्तमानत्वाऽभावात्साधनाव्यापकत्वादुपाधयः । न च स्वप्नाकाशादौ तत्र स्वप्नपुरुषेषु चापरिच्छिन्नत्वचेतनत्वाभ्यां सति मिथ्यात्वे साध्ये परिच्छिन्नत्वजडत्वयोरभावात्साध्याव्यापकत्वमिति वाच्यम् । स्वप्नाकाशादौ देशपरिच्छेदासंप्रतिपत्तावपि वस्तुपरिच्छेदसंप्रतिपत्तेः सुप्तपुरुषदेहादौ जडत्वसंप्रतिपत्तेश्च । तदात्मनश्चेतनस्य जडत्वाभावेपि तत्र ब्रह्माभेदेन मिथ्यात्वासंप्रतिपत्त्यासाध्यासत्त्वेन तदव्यापकत्वाभावात् ब्रह्म परमार्थसत्यं चिद्रूपत्वाद्व्यतिरेके मिथ्यारूप्यादिवदिति प्रतिपक्षानुमानपराहतत्वं च । न चास्य केवलव्यतिरेकिणः साध्यस्य पक्षे प्रसिद्धौ अनुमानी प्रवृत्तिरन्यत्र प्रसिद्धौ तत्र हेतुसत्त्वे अन्वयव्याप्तिसद्भावेन व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकीति लक्षणकवलव्यतिरेकित्वभंगः अप्रवृत्तौ सपक्षव्यावृत्तत्वेनासाधारण्यमिति सर्वथा साध्याप्रसिद्धिरेवेति वाच्यम् । सद्विलक्षणत्वं क्वचिदत्यंताभावप्रतियोगिधर्मत्वाद्रूपवदित्यनवधारितधर्मिकसत्यत्वसिद्धौ केवलव्यतिरेकिणा पक्षे स्थापनोपपत्तेः । न च प्रमेयत्वादिषु व्यभिचारस्तेषु धर्मत्वहेतुसत्त्वेपि क्वचिदत्यंताभावप्रतियोगित्वाभावात् सर्वं प्रमेयं सर्वमभिधेयं सर्वं व्यावृत्तमित्यंगीकारादितिवाच्यम् । “अप्रमेयमनादिं च, यतो वाचो निवर्तंते, यद्वाचा नाभ्युदितम्” इत्यादिभिस्तेषामत्यंताभावस्य ब्रह्मणि श्रुत्यैवापादनात् । किं च प्रेमयत्वं प्रमयत्वे वर्तते न वा?। आद्ये आत्माश्रयो द्वितीये—स्वस्मिन्नेवात्यंताभावप्रतियोगित्वेन केवलान्वयित्वक्षतिः । अपि च प्रत्येकप्रमाविषयत्वं प्रमेयत्वं केवलान्वयि सर्वप्रमाविषयत्वं वा नोभयथापि घटप्रमाविषयत्वस्य पटे पटप्रमाविषयत्वस्य घटे सर्वप्रमाविषयत्वस्य सर्वत्र घटपटादावत्यंताभावेन केवलान्वयित्वानुपपत्तेः । एवमभिधेयत्वादावप्यूह्यं तथा च प्रमेयत्वादिकेवलान्वयित्ववादिनां कुतार्किकाणामेव साध्याप्रसिद्ध्या केवलव्यतिरेक्यसंभवो नोपनिषदानाम् । न च साध्यव्याप्तहेतोः पक्षधर्मताज्ञानलक्षणालिंगपरामर्शस्यैवानुमानत्वेनात्र केवलव्यतिरेकिणि हेतुसाध्यव्याप्तिस्थलाभावेन तद्ग्राह्यसिद्ध्यपरामर्शासंभव इति वाच्यम् । अन्वयिन्यन्वयव्याप्तिवद्व्यतिरेकिणि व्यतिरेकव्याप्तहेतोरेव साध्यगमकत्वात् । न च हेतुना साध्यसिद्धौ साध्याभावहेत्वभावव्याप्तेरनुपयोग इति वाच्यम् । यत्र साध्याभावस्तत्र हेत्वभाव इति विपक्षे व्याप्तिमुदाहृत्य न तथा चायं तस्मान्न तथेत्यत्र तदभावोक्त्या अभावाभावस्य भावत्वेन हेतुसाध्यव्याप्तावेव तत्पर्य्यवसानात् । न चैतादृक्स्थलेऽर्थापत्तिरेव मानमिति वाच्यम् । यथोपयोगयोरुभयोरपि :मानत्वोपपत्तेः । एवं सर्गात्पूर्वं स्वसत्त्वमुक्त्वा विसर्गोपि तदाह—पश्चादिति । पश्चाद्विसर्गावसरे ब्रह्मादिरूपेणापि अहमेव तदाप्युक्तं “त्वमेक एवास्य सतः प्रसूतिस्त्वं संनिधानं त्वमनुग्रहश्च । त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये ॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः” इत्यादिना यद्वा पश्चात् प्रपंचस्य लयोत्तरमप्यहमेव “सर्वाणि च भूतानि नारायणादेव समुत्पद्यंते नारायणे प्रलीयंते” “नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु व्यक्तंव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः” इत्यादिश्रुतिस्मृतिभ्यः यच्चैतन्मध्ये परिदृश्यमानं तदप्यहमेव कार्य्यस्य कारणाव्यतिरेकात् “एतदात्म्यमिदं सर्वं नारायण एवेदं सर्वं यद्भूतं यच्च भाव्यं पुरुष एवेदं विश्वं सर्वमिदं पुराणः यस्मिन्निदं संचविचैति सर्वे यस्मिन्देवा अधिविश्वे निषेदुः तदेवभूतं तदुभव्यमाहु इदं तदक्षरे परमे व्योमन् यथा सौम्ये केन मृत्पिंडो नं सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्” इत्यादिश्रुतिभ्यः । “न यत्पुरस्तादुत्पन्नपश्चान्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्येपि तन्न व्यपदेशमात्रम् । भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ॥ सर्वेषामिह भावानां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम् ॥ आत्मैकतदिदं विश्वं सृज्यते सृज
ति प्रभुः । त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ यदिदं मनसा वाचा दृश्यतेऽन्यैरपींद्रियैः । अहमेवं न मत्तोऽन्यदिति बुद्ध्यध्वमंजसा'' इत्यादिस्मृतिभ्यः । ''तदनन्यत्वमारंभणशब्दादिभ्यः'' इति
सूत्राच्च । तथा सर्वस्वप्नप्रपंचबाधे तत्साक्षिमात्रावशेषवत् ''नेह नानास्ति किञ्चन, अथात आदेशोनेतिनेति'' इत्यादि श्रुतिभिः प्रतीतिमात्रसर्वप्रपञ्चबाधे योऽवशिष्येत सोऽहमेवास्मि ''अंतर्भवेऽनंत
भवंतमेव ह्यतत्यजंतो मृगयंति संतः । असंतमप्यंत्यहिमंतरेण संतं गुणंतं किमु यंति संतः ॥ श्रुतयस्त्वयि हि फलं त्यतन्निरसेनन भवन्निधनाः । निषेधशेषो जयतादशेषः ॥ एतावान्सर्ववेदार्थः
शब्द आस्थाय मां भिदा । मायामात्रमनूद्यांते प्रतिषिध्य प्रसादति'' इत्यादिस्मृतिभ्यः निषेधे कृते नेतिनेतीति वाक्यैः ''समाधिष्ठितानां यदाभाति पूर्णमवस्थात्रयातीतमद्वैतमेकम् । परंब्रह्म नित्यं तदेवाहम
स्मि'' इत्यादिवचनाच्च ॥ ३ ॥ ननु त्वत्स्वरूपातिरिक्तं किं चिन्नास्ति चेत्किमिति प्रपंचो भाति न भाति चानंदविग्रहो भवानित्याशंक्याह– ऋतेऽर्थमिति । यद्विश्वमर्थम् । ऋते वस्तुतो नास्ति तद्यतः
स्वरूपाज्ञानादात्मन्यधिष्ठाने प्रतीयेत यच्च सच्चिदानंदानंतविग्रहं मत्स्वरूपं तद्यतो न प्रतीयेत तदधिष्ठानस्यान्यथाभानहेतुविक्षेपशक्तिप्रधानमधिष्ठानमत्स्वरूपाभानहेतुभूतमावरणाशक्तिप्रवानमज्ञानमात्मनो मम मायां
विद्यात् । तत्रार्थाभावेपि भाने दृष्टांतो यथा भासो द्विचंद्रादिः आवरणेनाधिष्ठानभगवत्स्वरूपाभाने दृष्टांतो यथा तमो राहुर्नक्षत्रमंडले वर्तमानोऽपि न प्रतीयते । यद्वा । तस्य स्वत एवाभानात्मकस्यः नावरणकृत्यमतो यथा
अतमाः सूर्यो मेघाच्छन्नस्तन्मेघं विश्वं च भासयन्नपि स्वयं सामान्येन प्रकाशमानोऽपि न विशेषतो भाति पेचकादीनां स्वीयेनैव दिवांधत्वदोषेणावृत इव न भाति । यद्वा । यद्विश्वमर्थम् ऋते तद्यतोऽज्ञानवशादात्मनि
विश्वाधिष्ठाने प्रतीयेत अथ च सुषुप्तिप्रलयादौ कारणे लयेन स्वप्ने च कारणाज्ञानस्य प्रपंचांतराकारपरिणामेन क्षणेक्षणे चाज्ञानस्य पूर्वपूर्वभ्रमदृष्टसंस्कारोद्बोधे तत्तद्विषयांतराकारपरिणामेन ब्रह्मावबोधे तु सकारणबाधेन
यत् विश्वं न प्रतीयेत तदज्ञानं तत्कार्य्यं चात्मनो मम मायां विद्यात् । तत्र दृष्टांतो यथा भासो रज्जुसर्प्पशुक्तिरजतादि च यद्वदर्थम् ऋते प्रतीयेताथ चान्यत्र प्रवृत्तौ वा दंडमालाभ्रकरंगादिभ्रमांतरोद्बोधे वा बाधेन वा न
प्रतीयेत यथा च तमोनभोनीलिमा ऋतेर्थं प्रतीयेत तत्तद्दिक्प्रांतेऽसंनिधाने प्रतीयमानोपि तत्तद्देशगमनेन प्रतीयेत तद्वत् । यद्वा । आत्मनि स्वप्नदृशि यथा भासः स्वप्नप्रपंचो यथा तमो निद्रा ज्ञानं चार्थम् ।
ऋते प्रतीयेताथ प्रबोधेन प्रतीयेत यश्च तदधिष्ठानमात्मा स न प्रतीयेत तथात्मनि मयि यद्विभुं यतोऽज्ञानतमसः प्रतीयेताथ च लयबाधादौ न प्रतीयेत तदधिष्ठानं मत्स्वरूपं च यद्यतो न प्रतीयेत तदज्ञान
मात्मनो मम मायां विद्यात् । ''तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरु दुःखदुःखम् । त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवात्रभाति ॥ ''आत्मानमेवात्मतयाऽविजानता
तेनैव जातं निखिलं प्रपंचितम् । ज्ञानेन भूयोऽपि च संप्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा । अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् । अजस्य चित्यात्मनि केवले परे
विचार्यमाणे तरणाविवाहनी'' न च कथं मायावादोऽत्र लिख्यते मायावादस्यासद्वादत्वप्रच्छन्नबौद्धत्वयोः स्मरणादिति वाच्यम् । तद्बोधकवाक्यस्य प्रमाण्यानिश्चयात् । मायाया वादः कथनं मायावादस्तथा
च तद्वाक्येऽपि मायोक्तिदर्शनात् । स्वासद्वादत्वबौद्धत्वाऽपादकस्यात्मघातिनस्तस्यासद्वादत्वादेव शास्त्रांतरादूषकत्वापत्तेः । किं च ''मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'' इत्यादिश्रुतौ ''दैवी ह्येषा
गुणमयी मम माया दुरत्यया । संभवाम्यात्ममायया । नाहंप्रकाशः सर्वस्य योगमायासमावृतः'' इत्यादिगीतायाम् । ''एषा माया भगवतः सर्गस्थित्यंतकारिणी'' इत्यादौ श्रीमद्भागवते एवं सर्वत्र माया
शब्दप्रयोगदर्शनात्सर्वश्रुतिस्मार्तिपुराणेतिहासादिशास्त्रस्यासद्वादत्वापादनाय प्रवृत्तं स्वयमपि मायाशब्दकथनेन मायावादात्मकं तदेवासद्वादतया ''त्यजेदेकं कुलस्यार्थे'' इति न्यायेन हेयम् । न च मायया
जगत्कारणत्ववाद एव मायावाद इति वाच्यम् । उदाहृतश्रुतिस्मृत्यादौ सर्वत्र तथोपलंभात् । किं च तद्वाक्यस्य प्रामाण्येऽपि सर्वाविरुद्धोयमेव विचारो न्याय्यः । यथा ब्रह्मसत्यत्ववादिन एव ब्रह्मवादिनस्तथा मायाकारण
त्वस्य सर्वत्र श्रूयमाणस्य तत्तच्छास्त्रेभ्यो निःसारणासंभवात्सर्वप्रामाण्यास्वीकारे च नास्तिकत्वापत्तेर्ये मायायाः सत्यत्ववादिनस्त एव तत्पक्षपातितया मायावादिनस्तेषां मतस्यैव पुनर्मिथ्याभूतमायायां सत्यत्वभ्रमेणासद्वादत्व
मायातत्कार्य्यसत्यत्वापादनेन सर्ववेदांतप्रतिपाद्यस्य ''अथ नित्यो निष्कलो निराख्यातो निर्विकल्पो निरंजनः शुद्धोऽद्वितीयो नारायणो न द्वितीयोऽस्ति कश्चित्'' इत्यादि श्रुतिसिद्धाऽद्वैतस्य बाधनेनार्थात् बौद्धत्वेऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाङ्मात्रेण वेदप्रामाण्यस्वीकारोक्त्या प्रच्छन्नत्वं "यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं न प्रणश्यामि स च मे न प्रणश्यति''इति भगवतैवापरिच्छिन्नदृष्टीनां स्वनाशाभावोक्त्या परिच्छिन्नमतीनां "विष्लु
व्याप्तौ'' इत्यस्मात्सर्वव्यापकस्य विष्णोः सर्वतो नाशेनैकत्र परिच्छेदाभिमत्या स्वद्वेष्यत्वबोधनादतो मायासत्यत्ववाद एव मायावादो न तन्मिथ्यात्ववादस्तेषां तन्मिथ्यात्वापादनेन तदपवादकत्वात् ॥ ४ ॥
ननु सर्वथा द्वैतप्रपंचस्य मायामात्रत्वेन मिथ्यात्वे "यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशाति, आनंदाद्ध्येव खल्विमानि भूतानि जायंते तस्माद्वा एतस्मादात्मन आकाशः संभूत
आकाशाद्वायुः, अथ पुरुषोह वै नारायणोऽकामयत प्रजाः सृजेय नारायणात्प्राणो जायते मनः सर्वेंद्रियाणि च खं.वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणी'' इत्यादिश्रुतिभिः "जन्माद्यस्य यतः'' इति सूत्राच्च कथं तत्कार
णत्वेनैव ब्रह्म निरूप्यते "तत्सृष्ट्वा तदेवानुप्राविशत्'' इत्यादिना तत्प्रवेशोक्तिस्तत्राह–यथा महांति भूतानीति । यथा महांति भूतानि पंचीकृतमहाभूतानि उच्चावचेषु ब्रह्मादिस्तंबपर्य्यंतप्राणिदेहेषु ब्रह्माण्डादिघटांतेषु
च पटादिषु तंत्वादिवत्तत्सृष्ट्वा तदनुप्रविष्टानि प्रतीयंते तथापि वस्तुतो यथासौम्यैकेन मृत्पिंडो न सर्वं मृन्मयं विज्ञातं "स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इत्यादिश्रुतिभ्यः । पटादीनां
तंत्वादिस्वरूपातिरेकेण पृथक्–सत्त्वाभावादेव कस्मिन् प्रविष्टानि स्वीक्रियेरन्निति तदप्रवेशवत् प्राणिदेहानां ब्रह्मांडादेश्च महाभूतात्ममात्रत्वेन वस्तुतस्तत्पृथक्–सत्त्वाभावात् स्पष्टं तथानुभवात् "क्षित्यादीना
मिहार्थानां छाया न कतमापि हि । न संघातो विकारो वा न पृथक् नान्वितो मृषा'' इत्यादिवचनाच्च । अतस्तदभावादेव कुत्र प्रविष्टाः स्युरित्यप्रविष्टान्येव तथा तेषु भूतेषु सच्चिदात्मनानुप्रविष्टतया
भासमानोप्यहं सच्चिद्विवेचने तदसत्त्वाभानापत्त्या "धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना । न स्युरसत्यवच्चविन्यसन्नवयवोंततः ॥ "य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः । विनानुवादं
न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान्'' इत्यादिवचनैश्च तत्पृथक्–स्वरूपानवस्थानादेव "तेषु नाहं प्रविष्टः, 'तदनुत्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे । व्याप्यव्यापकता मिथ्या सर्वात्मेति हि शा
सनात्'' इत्यादिवचनात् । कारणत्वादिना निरूपणं तु "नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथानलमर्चिषः स्वाः । शब्दोपि बोधकनिषेधतयात्ममूलमर्थोक्तमाह यदृते न निषेधासिद्धिः ॥ यतो वा
चो निवर्त्तंते अप्राप्य मनसा सह'' इत्यादिना मनोवागगोचरस्य ब्रह्मणः साक्षाद्वक्तुमशक्यतया "अध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यते।अज्ञातजनबोधार्थे विद्वद्भिः कल्पितः क्रमः'' इति न्यायमाश्रित्य कारणत्वानुवादप्रतिषे
धाभ्यां तत्स्वरूपावबोधायैव "इत्थंभावेन कथितो भगवान् भगवत्तमः । नेत्थंभावेन हि परं ज्ञातुमर्हंति सूरयः ॥ नास्य कर्मणि जन्मादौ परस्यानुविधीयते। कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् । '' इत्यादिवचनात् ।
"न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता'' । इत्यादि श्रुत्या परमार्थसृष्ट्यादिनिषेधाच्च ॥ ५ ॥ एवं ज्ञानं परमगुह्यं निरूप्यान्वयव्यतिरेकरूपयुक्त्या मननेन भेदभ्रमबाधपूर्वकं
प्रत्यगभिन्नाद्वयब्रह्मैव जिज्ञास्यमित्याह– एतावदेवेति । आत्मनो यत्तत्त्वं परमार्थस्वरूपं तज्जिज्ञासुना पुरुषेण एतावदेव जिज्ञास्यम् । अतो "अन्यदार्तम्'' इत्यादिश्रुत्या ततोन्यस्य मृषात्वेन जिज्ञास्यत्वाभावात् किं तदित्य
पेक्षायामाह–"यत्स्यात्सर्वत्र सर्वदा'' सर्वत्राकाशवायुतेजोबन्नांडभुवनघटपटादिषु कारणतया सच्चिदानंदस्वरूपेण यदनुगतं तदुक्तं भगवत्पूज्यपादैः।"अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं
ततो द्वयम्'' ॥ इति । यदेव पुनः प्रत्यक् चैतन्यं सर्वदा जाग्रत्स्वप्नसुषुप्त्यवस्थासु तत्तत्साक्षितयाऽनुगतम् । तदन्वयव्यतिरेकाभ्यां जिज्ञास्यम्। अन्वयशब्देनात्रानुवृत्तिः । व्यतिरेकशब्देन व्यावृत्तिः । आकाशादिघटपटां
तेषु सच्चिदानंदस्वरूपब्रह्मणः सर्वत्रान्वयस्तत्तन्नामरूपयोश्च मिथो व्यतिरेकः"आकाशोस्ति तथा भाति प्रियो वायुस्तथैव सन् । भाति प्रियस्तथा तेजोबन्नं सद्भाति तत्प्रियम् । ब्रह्मांडादिघटांतेषु सत्ताभानं प्रियं ततम् ।
ब्रह्मणो नाम रूपं च नान्यस्यान्यत्र दृश्यते ॥ अस्ति भाति प्रियं नामरूपाभ्यां व्यतिरिच्यते । अनुवृत्तेर्यथा सूत्रं मणिभ्यो भिद्यते तथा ॥ नाम रूपं च सद्भानप्रियाद्भिन्नं तथेष्यते । व्यावृतत्वेन मणयो यथा सूत्रा
दिति ध्रुवम् ॥ नामरूपात्मकं विश्वमसद्भिन्नं सतो यतः । अभानं भानभिन्नत्वादप्रियं प्रियभेदतः ॥ उक्तं भागवतेऽथापि असद्दुःखात्मकं जडम् । जगत्सच्चित्परानंदविग्रहो ब्रह्म श्रीहरिः । तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् । त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवावभाति। योहं नावेदिषं किंचिदस्वाप्सं सुखतस्तदा । दृष्टवान्विविधान्स्वप्नान्सोहं जागर्मि तत्स्मरन् । साक्षिप्रत्यक्चैतन्यानुवृत्ति
रिति सर्वदा । सर्वावस्थासु तासां तु मिथो व्यावृत्तिरेवहि । स्वप्ने जागरणोऽलीकः स्वप्नो हि जागरे न हि । द्वयमेव लये नास्ति लयोपि ह्युभयोर्न च । सत्यं साक्ष्यनुवृत्तत्वात् त्रिष्ववस्थासु शुक्तिवत् । व्यावृत्तत्वान्मृषाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्था रूप्यरंगाभ्रकादिवत्॥ त्रय आवस ॥ थास्त्रयः स्वप्ना इति श्रुतीरणात् । जाग्रत्सुप्ती मृषा स्यातामवस्थात्वाद्धि स्वप्नवत् ॥जाग्रन्मृषैव जाग्रत्वासुप्तजाग्रद्यथा तथा । सुप्तिर्मृषैव सुप्तित्वात्स्वप्नदृष्टसुसुप्तिवत् ॥ जाग्रद्विश्वं मृषा सर्वं विश्वत्वात्स्वप्नविश्ववत् । बाध्यत्वं न ह्युपाधिः स्यात्पक्षे साधनव्याप्तितः ॥ 'नेह नानास्ति' श्रुतितो बाध्यत्वं तस्य निश्चितम् । स्वप्नत्वं न ह्युपाधिः स्यात्साधनव्याप्तितस्तथा ॥ त्रयः स्वप्ना इति श्रुतेस्तत्र स्वप्नत्वनिश्चयात् । तयोस्त द्व्यतिरेके वै ह्युपाधिश्चित्स्वरूपता ॥ ब्रह्मणि साध्यव्यापित्वात्पक्षे च तदसंभवात् । साक्षी तु सर्वदा सत्यं साक्षित्वात्स्वप्नसाक्षिवत् ॥ सर्वत्रानुगतं ब्रह्म सच्चिदानंदविग्रहम् । व्यावृत्तेभ्योनुवृत्तत्वाद्यन्मृषाभ्यो विवेचितम् ॥ तथा साक्ष्यनुवृत्तत्वाद्व्यावृताभ्यो विवेचितः । सर्वाभ्यो जाग्रदादिभ्यो मृषाभ्यः सर्वदैव सत् ॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा । ब्रह्म प्रत्यगभिन्नं तत्तत्वमस्यादिगोचरम् ॥ एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः । इत्येवं भगवत्पक्षः श्रीद्भागवतामृते '' ॥ ६ ॥ एवं निरूपितं स्वमतमुपसंहरंस्तदंगं निर्दिशति—एतन्मतमिति । एतन्मम मतं त्वं समातिष्ठ सम्यक् तत्र स्थिरो भव । तादृक्स्थित्यै तदंगमाह—परमेण समाधिनेति । समाधिशब्देनात्र योगः स च त्रिविधः कर्मयोगो भक्तियोगो ज्ञानयोगश्च । ''योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया । ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योस्ति कर्हिचित्'' इत्यादिवचनात् । युज्यते भगवत्स्वरूपे अनेनेति योग इति व्युत्पत्त्या सर्वापेक्षा हि विद्या यज्ञादिश्रुतेरश्ववदिति न्यायेन सर्वेषां तेषां विद्यांगतया योगत्वम् । तत्र कर्मयोगस्त्रिविधः तत्राद्यः—फलमनभिसंधाय स्ववर्णाश्रमविहितधर्मानुष्ठानरूपः ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि'' इत्यादिवचनात् । द्वितीयः—सर्वकर्मणामीश्वरेऽर्पणं ''यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्प्पणम् ॥ कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् । करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्'' इत्यादिवचनात् । तृतीय—कर्तृत्वाद्यननुसंधायानुष्ठीयमानः ''प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते'' ॥ इति वचनात् । सकामकर्मणस्तु स्वर्गादिफलपरत्वेन भगवत्स्वरूपे अयोजकत्वादेव वेदविहितकर्मत्वेपि न कर्मयोगत्वं ''परोक्षवादो वेदोयं बालानामनुशासनम् । कर्म्ममोक्षाय कर्म्माणि विधत्ते ह्यगदं यथा'' इति न्यायेन तद्वाक्यानां फलेन प्रलोभ्यवैदिकप्रवृत्त्यां भगवत्पथसंमुखीकरणतात्पर्य्यवत्त्वे तु भवतु परंपरया संमुखीकारद्वारा कर्मयोगत्वं, भक्तियोगश्च द्विविधः पराऽपरभेदात् तत्र परा तु ''सापरानुरक्तिरीश्वरे'' इति भगवता शांडिल्येन सूत्रिता ईश्वरेयानुरक्तिः सा परा भक्तिस्तु फलरूपा ''ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्'' इत्यादिवचनान्न साधनत्वेन तस्याज्ञानोत्पत्त्यावंगत्वं, द्वितीया नवधा ''श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम्'' इत्यादिवचनात् । सा तु निष्प्रत्यूहज्ञानसाधनं ''वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥ पुरेह भूमन्बहवोपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया । विबुद्ध्य भक्त्यैव कथोपनीतया प्रपेदिरेंऽजोऽच्युत ते गतिं पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥ मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् । न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि'' इत्यादिवचनात् । ज्ञानयोगोपि ज्ञानस्य बहिरंगांतरंगभावेन द्विविधो विवेकादिः श्रवणादिश्च। तत्राद्यश्चतुर्विधो नित्यानित्यवस्तुविवेको वैराग्यं शमादिषट्संपत्तिर्मुमुक्षुता च तत्रापि प्रथमं त्वात्मैव नित्यं तदितरत्सर्वमनित्यमिति''न जायते म्रियते वा विपश्चित्'' अतोन्यदार्तं तद्यथेह ''कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते'' इत्यादिश्रुतेः।''नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम्'' इति 'या निश्चिताबुद्धिर्विवेको वस्तुनः सवै' इत्याचार्योक्तेश्च ; द्वितीयमैहिकामुष्मिकविषयविरागः''परीक्ष्य लोकान् कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन''इत्यादिश्रुतेः''ब्रह्मादिस्थावरांतेषु वैराग्यं विषयेष्वनु । यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम्'' इत्याचार्य्योक्तेश्च । शमादिसंपत्तु षोढा शमो दम उपरतिस्तितिक्षा श्रद्धा समाधानता च ''शांतो दांतो उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्येत्''इति श्रुतेः। शाखांतरे 'श्रद्धान्वितोभूत्वा' इति पाठाच्च।तत्र श्रवणादीतरविषयेभ्यो मनो निरोधः शमः''सदैव वासनात्यागः शमोयमिति शब्दितः''इत्याचार्य्योक्तेः । बाह्येंद्रियाणामपि ततो निरोधो दमः 'निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते' इति तद्वचनात् । न च मनोनिग्रहेणैवालं किमिंद्रियनिग्रहेणेति वाच्यम् । ''इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः । इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ॥ तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि'' इति भगवद्वचनात् । न च तर्हि दमेनैवालं ''कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् । इंद्रियार्थान्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूढात्मा मिथ्याचारः स उच्यते''इतीश्वरोक्तेः ।निवर्तितानामिंद्रियमनसां श्रवणादीतरविषयेभ्यः स्वाभाविकापरमणमुपरतिः तदुक्तमाचार्य्यैः 'विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा' इति।परमेति परावृतेर्विशेषणं स्वभाविकीत्यर्थः।
केचिदुपरतिः संन्यास इत्याहुस्तस्य तु जनकादौ साक्षात्तदभावेपि बोधदर्शनाद्वर्णाश्रमधर्म्मादिवज्जन्मांतरीयस्यापि तस्य बोधेऽदृष्टद्वारोपकारकत्वसंभवाद्ब्राह्मणेतरेषु ''मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् । बाहुजातोरुजातानां
नायं धर्म्मः प्रशस्यते'' इत्यादिभिः तदनधिकारात्''अश्वमेधं गवालंभं संन्यासं पलपैतृकम् । देवरात्तु सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥ चत्वार्य्यब्दसहस्राणि चत्वार्यब्दशतानि च । कलेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः ॥
संन्यासश्च न कर्तव्यो ब्राह्मणेन विपश्चिता'' इत्यादिना सर्वकालिकत्वाभावाच्च । न ज्ञानांगचतुष्टयसाधनेष्वेवावश्यकांतर्भाव इत्यत्राचार्य्यैरुपेक्षितं ज्ञानसाधनप्रवृत्तौ प्रारब्धवशादागतदुःखैरनुद्वेगस्तितिक्षा 'सहनं सर्वदुःखानां
तितिक्षा सा शुभा मता' इत्याचार्य्यवचनात् । गुरुवेदांतवाक्येषु विश्वासः श्रद्धा ''गुरुवेदांतवाक्येषु भक्तिः श्रद्धेतिविश्रुता''इत्याचार्य्योक्तेः । अनेनैव ''तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्सामित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'' इति
श्रुतिसिद्धगुरुलक्षणं तदुपसदनं च सूचितं श्रोत्रियत्वञ्च याज्ञवल्क्यवाक्येन ब्राह्मण एव पर्यवसितमिति ध्येयं ''तद्विज्ञानार्थं स ब्राह्मणमेव गुरुमुपासीत''इति श्रुतेः 'जन्मना ब्राह्मणो गुरुः' इति श्रीनंदराजोक्तेर्ब्राह्मणाद्ब्राह्मण्यु
त्पन्नदेहस्यैव गुरुत्वं न ज्ञानवतः क्षत्रियादेरपीति तत्त्वम् । श्रवणादौ चित्तैकाग्र्यं समाधानता ''दृश्यते 'त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'' इति श्रुतेः । 'सत्त्वात्संजायते ज्ञानम्' इति स्मृतेः । प्रमादादितमोधर्मस्थौ
ल्यरजोधर्मचांचल्यरहितसूक्ष्मैकाग्रबुद्ध्यैव बोधसंभवात् । 'चित्तैकाग्र्यं तु संलक्ष्येत्समाधानमिति स्मृतम्'' इत्याचार्य्यवचनाच्च । प्रदीप्तशिरसो जलराशिं प्रति प्रवृत्तिवत्संसारदुःखतप्तस्य ततोऽनवरतमोक्षेच्छा
मुमुक्षुता ''संसारबंधनिर्मुक्तिः कथं स्यान्मे कदा विधे !इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता''॥ इत्याचार्य्यवचनात् । इति बहिरंगम्।द्वितीयस्तु—त्रिविधः श्रवणमनननिदिध्यासनभेदात् । ''आत्मा वा अरे द्रष्टव्यः
श्रोतव्यो मंतव्यो निदिध्यासितव्यः'' इति श्रुतेः स श्रवणादिस्त्वंतरंगं श्रवणादेर्ज्ञानांगत्वेपि मिथोप्यंगांगित्वं तत्र सर्ववेदांतानां प्रत्यगभिन्नाद्वयब्रह्मणि तात्पर्यावधारणं श्रवणं कृत्यनधीनतया विध्यनर्हत्वादात्मदर्शनस्यार्हो
र्थकतव्यप्रत्ययेनात्मादर्शनार्ह इति साक्षात्तद्दर्शनमुद्दिश्य विधानात् वेदांतप्रमाणगोचरत्वाच्च । प्राधान्येन तस्य श्रवणस्यांगित्वं नानोपपत्तिभिस्तद्विचारात्मकमननस्य तत्प्रमेयगतासंभावना निरासकत्वात्तत्प्रमेयाविषयकानवरतप्र
त्ययप्रवाहात्मकनिदिध्यासनस्य च तत्प्रमेयगतविपरीतभावनानिरासकत्वात्तत्फलोपकार्य्यंगत्वं निदिध्यासनोपमर्द्याविपरीतभावना द्विविधा द्वैतप्रपंचस्य सत्यत्वरूपा तद्भानरूपा च । तत्र प्रथमा तु सादरनैरंतर्यकियत्कालाभ्यासे
नापनीयते तदपनये एव जिज्ञासोर्विद्वद्व्यवहारः संशयविपर्य्ययाप्रतिबद्धज्ञानत्वात् । प्रपंचभानात्मकविपरीतभावनानिवृत्तौ तु तद्भानं विना भोगासंभवात्स्वफलभोगाय प्रारब्धं कर्म तत्प्रतिबध्नाति प्रारब्धकर्मणां विनश्यदव
स्थायां तत्तद्रक्षणे प्रयोजनाभावात्तत्प्रतिबंधक्षये निदिध्यासनोपकृततत्त्वज्ञानं सकारणलेशं तमपि भानाप्रयोजकं विपर्य्यासं निवर्त्तयति ''भूयश्चांते विश्वमायानिवृत्तिः'' इति श्रुतेः। तच्च निदिध्यासनं द्विविधं योगसाध्यं केवलं
च विक्षिप्तचित्तानां चित्तदर्पोपशमपूर्वकत्वाभिमुख्याय योगसाध्यं हरिगुरुभक्त्या तत्कृपालवेन स्वत एव तत्त्वाभिमुखचित्तानां तु केवलं''तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् । एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः''।
इत्यादिवचनात् । ''समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः । विक्षिप्यमाणैरुत किं नु दूषणं धनैरुपेतैर्विगतैरवेः किम्'' इत्यादिश्रीमद्भगवतोक्तेश्च । तदेतद्यावद्यत्रसाध्यं योगः समाधिरित्यादिशब्दाभिधेयं
ततश्च स्वाभाविकं तु परमः समाधिः पराभक्तिरित्यादिशब्दाभिधेयं स्यात् ''देहाभिमाने गलिते विज्ञाते परमात्मनि । यत्रयत्र मनो याति तत्रतत्र समाधयः ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः । भूतानि भगवत्या
त्मन्येष भागवतोत्तमः ॥'' इत्यादिवचनैः तत्र देहाभिमाने गलित इत्यत्र देहाभिमानशब्दो नामरूपमात्रोपलक्षणं प्रापंचिकनामरूपसत्यत्वभ्रमनिवृत्तौ परमात्मनि सर्वत्र सत्ताभानप्रियरूपेणानुगते सच्चिदानंदविग्रहे कृष्ण
ब्रह्मणि विज्ञात इत्यर्थः। श्रीमद्भागवतवाक्येपि सर्वभूतेष्वात्मनो भगवद्भावं भूतानि भगवत्यात्मनीत्युक्त्या प्रपंचस्यात्मव्यतिरेकोक्त्या बाधेनात्मभगवच्छब्दयोर्मुख्यसामानाधिकरण्याच्च। प्रत्यगभेदेनाद्वैतमेव पर्य्यवासितं तथा चैवं
विधेन परमेण समाधिनाऽऽतिष्ठत्सर्वस्यैतस्य''यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः।हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः॥'' इत्यादिवचनैः भगवद्भक्त्यधीनतया तस्याश्च''भवापवर्गो
भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युतसत्समागमः । सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः॥''इत्यादिना सत्संगाधीनतया ममापि साधूत्तमतया मत्संगलब्धया भक्त्यैवातिष्ठ । तत्फलमाह—भवानिति । तत्र स्थि
त्या भवान् कल्पविकल्पेषु कल्पस्य विविधसर्गेष्वपि मदैकात्मदृष्ट्या कर्हिचिन्न विमुह्यति तत्र ''को मोहः कः शोकः एकत्वमनुपश्यतः'' इति श्रुतेः । ''नारायणपरा राजन्न कुतश्चन बिभ्यति । ' स्वर्गापवर्गनिरयेष्वपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्हितेंद्रियार्थाय हरये विहितांजलिः ॥ सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ॥ ३८ ॥ प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ॥ भद्रं प्रजानाम न्विच्छन्नातिष्ठत्स्वार्थकाम्यया ॥ ३९ ॥ तं नारदः प्रियतमो रिक्थादानामनुव्रतः ॥ शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥ ४० ॥ मायां विविदिषन्विष्णोर्मायेशस्य महामुनिः ॥ महाभागवतो राजन्पितरं पर्यतोषयत् ॥ ४१ ॥ तुष्टं निशाम्य पितरं लोकानां प्रपितामहम् ॥ देवर्षिः परिपप्रच्छ भवान्यन्माऽनुपृच्छति ॥ ४२ ॥ तस्मा इदं भागवतं पुराणं दशलक्षणम् ॥ प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥ ४३ ॥

अंतर्हित इंद्रियार्थः प्रत्यक्षरूपं येन तस्मै । बद्धांजलिः सन् ॥ ३८ ॥ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह प्रजापतिरिति पंचभिः । प्रजानां भद्रमन्विच्छन् विमृशन् सैव स्वार्थे काम्या स्वप्रयोजनेच्छा तया यमनियमानन्वतिष्ठत् ॥ ३९ ॥ रिक्थादानां पुत्राणां मध्ये प्रियतमस्तं पितरं सेवमानः शीलादिना परितोषयामासेत्युत्तरेणान्वयः ॥ ४० ॥ किमिच्छन् । विष्णोर्मायां विविदिषन् ॥ ४१ ॥ निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः । मा माम् ॥ ४२ ॥ भगवता चतुः श्लोक्या संक्षेपेण प्रोक्तं विस्त

तुल्यार्थदर्शिनः ॥'' इत्यादिवचनैर्निरयादिष्वपि नामरूपभेददृष्टेरेव दुःखमयहेतुतया तदपबाध्यः स्वर्गापवर्गनिरयेष्वपि तुल्योर्थः सत्ताभानाद्यात्मकनारायणस्वरूपं तद्दर्शिनोऽत एव नारायणपरास्तथा च ''द्वितीयाद्वै भयं भवति''।''भयं द्वितीयाभिनिवेशतः स्यात्'' इत्यादिश्रुतिस्मृतिवर्णितप्रत्यक्षानुभूतभयहेतुद्वितीयाभावान्न बिभेतीति भावः। ''यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः । नानात्वमात्मनो यावदस्वातंत्र्यं तदैव हि ॥ यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयम् । य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः ॥'' इत्यादिभिश्च गुणवैषम्यनिमित्तनानात्वभाने एव भयशोकमोहनिर्देशात् ॥ ''भक्तिज्ञानोपदेशेन ब्रह्माणं विश्वमेव च ॥ योऽमूमुचद्धारिः स्वात्मा तं वंदे स्वात्मनो गुरुम् ॥ हृत्स्थो व्याख्यातवाञ्छ्रीशो मन्मुखात्स्वमुखोद्भवम् । वेदांबुध्यमृतं स्वेष्टं तं स्वात्मानं गुरुं भजे ७ ॥ ३६ ॥ जन्मनो रूपं न्यरुणत् अनेन वैकुंठस्याप्यात्मरूपत्वमेवांगीकृतमिति । अत्र संदर्भः तदेवं श्रीमद्भागवतं संक्षेपेणोपदेक्ष्यंतं श्रीनारदं ब्रह्मापि तथैव संकल्पं कारितवान् 'यथा हरौ भगवति नृणां भक्तिर्भविष्यति' इत्यादि श्रीनारदेनापि 'अथो महाभाग भवानमोघदृक्' इत्यादिना तन्महापुराणाविर्भावार्थं तयैवोपदिष्टम् ॥ ३७ ॥ अंतर्हितः स्वभक्तचक्षुरादीनामर्थः परमपुरुषार्थः स्वसौंदर्य्यसौस्वर्य्यसौरभ्यादिको येन तस्मै स ब्रह्मा पूर्ववत् पूर्वपूर्वस्मिन्व्यतीते कल्प इत्यर्थः । तेन ब्रह्मणः स्वकन्याभिगमरूपो मोहः पूर्वकल्पे तत्रैवाभूत् न तु चतुःश्लोकीभागवतोपदेशानंतरमपि 'भवान्कल्पविकल्पेषु न विमुह्यति' इति भगवदुक्तेः । यत्तु कृष्णावतारे ब्रह्ममोहनं तत् भगवत्कृपाविलसितमेव ज्ञेयम् ॥ ३८ ॥ तदनंतरं च ब्रह्मनारदसंवादः प्रवृत्त इत्याह पंचभिः । यमनियमानातिष्ठत्स्वाचरणेन शिक्षयन् मत्प्रजा यमनियमानातिष्ठंत्वित्येव स्वार्थकाम्या तया ॥ ३९ ॥ रिक्थं धनं पैतृकं दायप्राप्तत्वेनाददत् इति रिक्थादाः पुत्रास्तेषां मध्ये प्रियतम इति कर्मयोगज्ञानयोगभक्तियोगानां पैतृकधनानां मध्ये दक्षादयः कर्मयोगमापुः, सनकादयो ज्ञानं, नारदो भक्तिं प्रापेति नारदस्योत्कर्षात् । अनुव्रतः पितृभक्तः ॥ ४० ॥ मायां बहिरंगशक्तिं कृपां वा तस्या वैचित्र्यं ज्ञातुमिच्छन्नित्यर्थः । मायेशस्य मायाभर्तुः मायया कृपया ईष्टे सर्वं वशी करोतीति मायेशस्तस्येति वा ॥ ४१ ॥ ''शाम्यतिर्दर्शने मित्र'' इति ह्रस्वाभावः । पिता कश्यपः पितामहो मरीचिः प्रपितामहो ब्रह्मेति विवेकः ॥ ४२ ॥ इदं बुद्धिस्थं भगवदुपदिष्टं दशलक्षणमिति जन्माद्यस्येतिवच्चतुःश्लोक्यामपि तत्तदंतर्भावयितुं शक्यत्वात् । तच्च यथा कथंचित्प्रदर्शितमपि न च पूर्णमिदमुपादिदेशेति व्याख्येयं 'त्वमेतद्विपुलीकुरु' इति ब्रह्मणः प्रागुक्तिविरोधात् । केचित्तु प्रथमं संक्षेपेण चतुःश्लोक्या प्रोच्य पुनर्दशलक्षणं द्वादशस्कंधात्मकं सपूर्णमेव भगवता प्रोक्तमित्याहुः । भूतानि चराचराणि करोत्युत्पादयति भगवत्सत्तयेति भूतकृद्ब्रह्मा ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारदः प्राह मुनये सरस्वत्यास्तटे नृप ॥ ध्यायते ब्रह्म परमं व्यासायामिततेजसे ॥ ४४ ॥ यदुताहं त्वया पृष्टो वैराज्यात्पुरुशादिदम् ॥ यथाऽऽसी त्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ॥ ४५ ॥ इति श्रीभागवते म० द्वितीयस्कंधे नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः ॥ १ ॥ दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ॥ वर्णयंति महात्मानः श्रुते नार्थेन चांजसा ॥ २ ॥ भूतमात्रेंद्रियधियां जन्म सर्ग उदाहृतः ॥ ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ॥ ३ ॥ स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः ॥ मन्वंतराणि सद्धर्म ऊतयः कर्मवासनाः ॥ ४ ॥

रेण प्राह । दश लक्षणानि लक्षणीया अर्था विद्यंते यस्मिंस्तत् ॥ ४३ ॥ तत्संप्रदायतो भागवतं मया ज्ञातमित्याशयेनाह । नारद इति ॥ ४४ ॥ भागवतव्याख्यानेनैव त्वत्प्रश्नानामुत्तरं दास्यामीत्याह । यदुतेति । 'पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः' इत्यादिना वैराजात्पुरुषादिदं विश्वं कथमासीदिति यदहं त्वया पृष्टस्तद्यथावदुपा ख्यास्यामि शृण्विति ॥ ४५ ॥ इति श्रीभा० म० द्विती० टी० नवमोऽध्यायः ॥ ९ ॥ छ ॥ ततो भागवतव्याख्याद्वारैव दशमे स्फुटम् ॥ राजप्रश्नोत्तरं वक्तुमारेभे बाद रायणिः ॥ १ ॥ दशलक्षणं पुराणं प्राहेत्युक्तं तानि दश लक्षणानि दर्शयति । अत्रेति । मन्वंतराणि ईशानुकथाश्चेति द्वंद्वः । सर्गादयोऽत्र दशार्था लक्ष्यंते ॥ १ ॥ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह । दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपम् । एकस्यैव प्राधान्यान्नायं दोष इत्यर्थः । नन्वत्र नैवं प्रतीयतेऽत आह । श्रुतेन श्रुत्यैव स्तुत्यादिस्थानेष्वंजसा साक्षाद्वर्णयंति । अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥ २ ॥ सर्गादीनां प्रत्येकं लक्षणमाह । भूतान्याकाशादीनि मात्राणि च शब्दादीनि इंद्रियाणि च धीशब्देन महदहंकारौ गुणानां वैषम्यात्परिणामाद्ब्रह्मणः परमेश्वरात्कर्तुर्भूतादीनां यद्विराड्रूपेण स्वरूपतश्च जन्म स सर्गः । विसर्गमाह । पुरुषो वैराजस्तत्कृतः पौरुषश्चराचरसर्गो विसर्ग इत्यर्थः ॥ ३ ॥ वैकुंठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानम् । स्वभक्तेषु तस्यानुग्रहः पोष

एवं नारायणो ब्रह्मणे ब्रह्मा नारदाय नारदो व्यासाय व्यासो मह्यमहं तुभ्यमाख्यास्ये इति षट्संवादीया भागवतीया कथा प्रसिद्धेति नारदः प्राहेति च समाधिनानुस्मर तद्विचेष्टितमित्यनेनैवोपादिदेशेत्यर्थः । तेन ब्रह्महृदेतिवत् ब्रह्मपरमंनिर्विशेषरूपं ध्यायते इत्यनेन ततोत्युत्कृष्टता श्रीमद्भागवतस्य द्योतिता ॥ ४४ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे नवमोऽध्यायः ॥ ९ ॥ ततो राजप्रश्नानंतरम् (१) अत्र श्रीमद्भागवते ॥ १ ॥ अत्राक्षिपति—नन्विति । विशुद्धिर्वस्त्वंतरेणामिश्रितत्वं तदर्थं तत्त्वज्ञानार्थमित्यर्थः । वस्त्वंतरं चात्र सर्गादिनवकपरमेश्वरहेतुकं जीवगतमेव जीवस्यैव सृज्यत्वपाल्यत्वसंहार्यत्वदर्शनात् ॥ इत्यर्थ इति । अत एकस्यैव आश्रमस्य शास्त्रविषयत्वान्नायं दोष इति भावः । महात्मानो मैत्रेयादयः ॥२॥ पुरुषो ब्रह्मा तत्कृतश्चराचरसर्ग इति वा जीवानां यथायोगं भक्तिमुक्तिभुक्तिसाधनबुद्धींद्रियादिप्राप्तिस्तया सृष्टिरुक्ता ॥ ३ ॥ यतो वैकुंठस्य भगवतो विजयः सृष्टिकर्तुर्ब्रह्मणः संहर्तूरुद्राच्चोत्कर्षः । यद्वा । वैकुंठो हरिस्तत्कर्तृको जीवदुःखाभिभवः जयतेरभिभवार्थकत्वात् । एवं सृष्ट्यनंतरं स्थितिरुक्ता स्थितावेव केषुचित्साधकभक्तेषु दैवाद्विकर्मप रेष्वपि तस्यानुग्रहः पोषणं धर्मस्तत्तचारिते व्यक्त इति स्थितावेव केषांचित्कर्मिणां सात्त्विकजीवानामाचरणीयो धर्म उक्तः । धातूनामनेकार्थत्वमपेक्ष्याह—यद्वेति । यत्तु क्वचिदवतोरीति पाठस्तन्न सुष्ठु प्रतिभाति । तस्य संप्रसारण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ॥ पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥ निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ॥
मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥ आभासश्च निरोधश्च यतश्चाऽध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते॥७॥
योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदः पुरुषो ह्याधिभौतिकः ॥ ८ ॥

णम् । तदनुगृहीतानां सतां मन्वंतराधिपतीनां धर्मः सद्धर्मः कर्मणां वासनाः । वेञ् तंतुसंताने । ऊयंते कर्मभिः संतन्यंत इत्यूतयः । यद्वा । वृद्ध्यर्थात्संश्लेषार्थाद्वाऽवतेर्धातोरिदं रूपम् । ऊयंते कर्मभिर्बृंह्यंते संश्लिष्यंत इति वा ऊतय इत्यर्थः ॥ ४ ॥ हरेरवतारानुचरितमस्य हरेरनुवर्तिनां च सत्कथा ईशानुकथाः प्रोक्ता इत्यर्थः ॥ ५ ॥ निरोधमाह । अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चाच्छंक्तिभिश्चोपाधिभिः सह शयनं लयो निरोधः अन्यथारूपमविद्ययाऽध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥ ६ ॥ आभासः सृष्टिः निरोधो; लयश्च यतो भवत्यध्यवसीयते प्रकाशते च स परं ब्रह्मेति परमात्मेति प्रसिद्धः आश्रयः कथ्यते ॥७॥ आश्रयस्वरूपमपरोक्षानुभावेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह । योऽयमाध्यात्मिकः पुरुषश्चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकश्चक्षुराद्यधिष्ठाता सूर्यादिः तत्रैकस्मिन्नेवोभयो

भावाद्यकि प्रत्यये ऊयंत इति न साधुः । किंत्वव्यंत इति साधुः । अतो वृद्ध्यर्थात्संश्लेषार्थाद्वा वयत इत्येव पाठः प्रशस्तः । इत्यर्थ इति। प्राक्तताप्राक्तनकर्मोत्था वासनाः शुभा अशुभाश्च भाविनां सुकृतदुष्कृतानां कारणभूताः स्थितावेवोत्कृष्टापकृष्टजीवानां स्वभाव उक्त इति भावः ॥ ४ ॥ इत्यर्थ इति । स्थितावेवास्यानुवर्त्तिनामवतारपरिकररूपाणां भक्तानां च चारितम् । ईशकथास्तासां श्रवणीयत्त्वकीर्त्तनीयत्वादिभ्यः । केषाञ्चित्साधकभक्तानां श्रवणकीर्त्तनादीनि भक्त्यंगान्युक्तानि ॥ ५ ॥ ६ ॥ सर्गादीन्नवार्थानुक्त्वा दशममाश्रयमाह—आभास इति । चात्स्थितिपोषणादयः द्वितीयचान्मुक्तिश्च यतोऽध्यवसीयते निश्चीयते स आश्रयो भगवान्नारायण एव तस्मादेव सृष्ट्यादिदर्शनात्तस्यैवोपासकभेदेन संज्ञांतरमाह—परमिति । अस्य विवृतिरग्रे विधेया तथाहि-अत्र दशार्थाः प्रथमस्कन्धानुक्रमेण निरूप्यंते यथा सामान्यतो लक्षितमप्याश्रयत्वं श्रीकृष्ण एव तु वैशिष्ट्यं तदर्थमेव ह्यखंड श्रीभागवतप्रकाशः अत्र प्रथमस्कंधे श्रीशौनकसूतयोः प्रश्नोत्तरे तत्परत्वेनैव प्रतिपादिते तदनुगतावेव प्रथमद्वितीयाध्यायौ तृतीयाध्यायस्तु स्फुट एव पुनर्विशेषतस्तत्प्रस्तावाय चतुर्थाद्यध्यायाः । अत्र तदेकपरयोः श्रीशुकपरीक्षितोः संवादघटना अतो द्वितीयस्कंधे च सामान्यतो भगवत्तत्त्वं प्रशंसन्नपि तत्रैव तात्पर्यं वहति यत्र ब्रह्मणश्चतुश्श्लोकीवक्तृश्रीभगवतश्च तात्पर्यं तत्रैव दर्शितं ब्रह्मकल्पकथारंभस्तु तदर्थ एव तृतीये पाद्मकल्पकथा च गतस्य पूर्वपरार्द्धस्याद्यंतवर्णने मध्यमानामपि कल्पानां तदनुसारेण ज्ञाने सति दशमैकादशयोः प्रस्ताव्यायास्तत्कथायाः सम्यगवगमात् । एवमेव गते स्वायंभुवचाक्षुषमन्वंतरेऽपि तृतीयचतुर्थपञ्चमषष्ठसप्तमेषु निरूपितेऽष्टमे प्राचीनमिश्रवैवस्वतं नवमस्तु तत्प्रादुर्भावास्पदकेवलवैवस्वतान्वय एव द्वादशः खलु समाधिमुद्रामयः तत्रतत्र तत्तदन्यकथा तु तत्पोषिकैव विशेषतस्तत्तदवतारकथेति । तस्मात्सर्गादीनां मध्ये क्वचिदेकद्वारा क्वचिदनेकद्वारा य आश्रयो निरूप्यते स तु दशमादावीशानुकथाप्रधानतत्तद्वारा सर्वत उत्कृष्य श्रीकृष्णरूपो निरूप्यते इति स्थितम् ॥ ७ ॥ तत्रेत्यस्य विवरणमेकस्मिन्निति । तैत्तिरीयश्रुतौ देहेपि पुरुषपदप्रयोगो दृश्यते तथा हि ''स वा'' इत्यादिस्पष्टार्था श्रुतिः । अत्र संदर्भः । अथ स्वयं भगवल्लक्षणपरमरूपं तदेवाश्रयं स्तोतुं स्थितौ च तत्राश्रयस्वरूपमपरोक्षानुभवेन व्यष्टिद्वारा दर्शयितुं तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयन्नध्यात्मादिविभागमाह । देहसृष्टेः पूर्वं करणानामधिष्ठानाभावेनाक्षमतया करणप्रकाशकर्तृत्वाभिमानितत्सहाययोरपि तयोर्वृत्तिभेदानुदयेन जीवत्वमात्राविशेषात् । ततश्चोभयः करणाभिमानितदधिष्ठातृरूपद्विरूपो विच्छेदो यस्मादिति सर्वमन्यत्स्वामिवत् । चक्रवर्त्तिनात्वस्यावतरणिका प्रकारांतरेणोक्ता तथाहि अथ 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इत्युक्तेः प्रतिदेहमेवांतर्यामिरूपेण स्थितं तदेवाश्रयरूपमध्यात्मादिभ्यो विभागेन स्पष्टं दर्शयितुमाह द्वाभ्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥
पुरुषोंऽडंविनिर्भिद्य यदासौ स विनिर्गतः ॥ आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः ॥ १० ॥

द्विरूपो विच्छेदो यस्मात्स आधिभौतिकश्चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुषस्य जीवस्योपाधिः । " स वा एष पुरुषोऽन्नरसमयः " इत्यादिश्रुतेः ॥८॥ एकमेकतराभाव इत्येतेषामन्योऽन्यसापेक्षसिद्धित्वे नानात्मत्वं दर्शयति । तथाहि । दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिद्ध्यति नापि द्रष्टा नच तद्विना करणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः न च तं विना करणं प्रवर्तते न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकं नोपलभामहे तत्र तदा तत्त्रितयमालोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः तेषामपि परस्परमाश्रयत्वमस्त्येवेति तद्व्यवच्छेदार्थं विशेषणम् । स्वाश्रयोऽनन्याश्रयः स चासावन्येषामाश्रयश्चेति । तथा च भगवान् वक्ष्यति । "दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिद्ध्यति यः स्वतः खे ॥आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याऽखिलसिद्धसिद्धिः" ॥ इति । एतेनैव व्यभिचारित्वात्तेषां मायामयत्वमप्युक्तम् । अत एव । "पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ लोकैरमुष्यावयवाः सपालैः" इत्यनेनोक्तो विरोधोऽपि परिहृतः ॥ ९ ॥ उक्तमेवाध्यात्मादिविभागं प्रपंचयन् "यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदम् ॥ यथासीत्तदुपाख्यास्ये " इति यत्प्रतिज्ञातं तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना । पुरुषो वैराजोंऽडं विनिर्भिद्य पृथक्कृत्य

उभयो गोलकरूपः शब्दस्पर्शादिरूपश्च विच्छेदो यस्य सः पुरुषस्य जीवस्योपाधित्वात्सर्वत्र पुरुषपदप्रयोग इति विशेषः ॥ ८ ॥ एतेनैव श्लोकेन तेषामध्यात्मादीनां परस्परं व्यभिचारवत्त्वात् । अत एव मायामयत्वादेव विरोधो हि परमार्थयोस्तेजस्तिमिरयोरिव भवति न तु वंध्यात्मजशशशृंगयोरपरमार्थयोरपीति । अत्र संदर्भः । अत्रांशांशिनो शुद्धजीवपरमात्मनोरभेदांशस्वीकारेणैवाश्रय उक्तः अतः "परोपि मनुतेऽनर्थम् " इति । "जाग्रत्स्वप्नसुषुप्तञ्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः" इति। शुद्धो विचष्टे ह्यविशुद्धकर्तुः" इत्याद्युक्तस्य साक्षिसंज्ञिनः शुद्धजीवस्याश्रयत्वं नाशंकनीयम् । अथ वा नन्वाध्यात्मिकादीनामन्याश्रयत्वमस्त्येव । सत्यम् तथापि परस्पराश्रयित्वान्न तत्राश्रयता कैवल्यमिति । ते त्वाश्रयशब्देन मुख्यतया नोच्यंते इत्याह—एकमिति । तर्हि साक्षिण एवास्तामाश्रयत्वं तत्राह—त्रितयमिति । स आत्मना साक्षी जीवः यः स्वाश्रयोऽनन्याश्रयः परमात्मा स एवाश्रयो यस्य स तथाभूत इति वक्ष्यते च" सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडयम्"इति तस्मादाभास इत्यादिनोक्तः।परमात्मैवाश्रय इति सर्वमेतत्त्रितयं पुमाञ्जीवो वेदेति तत्रार्थः । तथा चाध्यात्मादीनां परस्पराश्रयाणां जीव आश्रयः परमात्माश्रयः परमात्मनश्च परमात्मैवाश्रय इत्याश्रयत्वं परमात्मैव तथा "विष्टभ्याहमिदं कृत्स्नम्" इत्याद्युक्तेः स्वः कृष्ण एवाश्रयो यस्य स परमात्मेति व्याख्याने श्रीकृष्णस्य मुख्यमाश्रयत्वं तदंशत्वात्परमात्मनश्च निर्विशेषस्वरूपत्वाद्ब्रह्मणश्चेत्येकमाश्रयतत्त्वमुपासकस्य भेदात्त्रिधा भासत इति ॥ ९ ॥ इत्यर्थ इति । पृथक्स्थितिरेव निर्गमपदार्थ इति भावः । अत्र विश्वनाथः—एवं दशभिर्महापुराणलक्षणैर्जीवेश्वरविभागं निरूप्य जीवानामीश्वरभक्त्यैव निस्तारमभिव्यंज्य "यदुताहं त्वया दृष्टो वैराजात्पुरुषादिदम् । यथासीत्तदुपाख्यास्ये" इति प्रतिज्ञातमर्थं वक्तुं कथां प्रस्तौति—पुरुषोंडमिति । ननु कथं मुहुरपि वैराजस्याध्यात्मादिकथैव प्रपंच्यते । भगवतोऽतिमधुरलीलावताररूपगुणादिकथाः किमल्पायस्यो दृष्टाः सत्यंताः कथा आस्वादनीयत्वेन केषु खल्वद्वेष्टव्याः ये तद्भक्तिसिद्धा नित्यसिद्धा वा महानुभावास्ते तत्सौंदर्यामृतसिंधौ स्वत एवाविरामं खेलंत्येव । ये पुनरन्ये विषयानंदतल्पे निद्रांति ये च कुकर्मफलदुःखतरंगे मूर्च्छंति ते ततः प्रबोधयितुमेवाशक्याः कथं भगवल्लीला उपदेश्यंतां यदुपदेशादेव ते साधकभक्ता भवेयुरिति महाकारुणिकः पुराणचूडामणिरयं ताः स्वतः प्रबोधयितुं भंग्या किमपि मुहुरपि यतते स्म । तत्र यथा वह्निना तप्तमंगं वह्निनैवोपशाम्यति यथा च भूताविष्टो भूतमंत्रेणैव प्रबुध्यते तथैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् ॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ ॥ द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपेक्षया ॥ १२ ॥ एको नानात्वमन्विच्छन्योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ १३ ॥ अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः ॥ यथैकं पौरुषं वीर्यं त्रिधाऽभिद्यत तच्छृणु ॥ १४ ॥

विनिर्गतः पृथक् स्थित इत्यर्थः । अयनं स्थानमन्विच्छन् विमृशन् यतः शुचिः स्वयमतः शुचीः शुद्धाः अपो गर्भोदकसंज्ञा अस्राक्षीत्ससर्ज ॥ १० ॥ अप्सु वासं नारायणनामनिरुक्त्या स्पष्टयति । तेन अप्सु वासेन यद्यस्मात् पुरुषो नरस्तस्मादुद्भवो यासां ता नारा आपोऽयनमस्येति नारायण इत्यर्थः । तदुक्तम् । “ आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ ” इति ॥ ११ ॥ तस्य प्रभावमाह । द्रव्यमुपादानम् । कर्मादीनि निमित्तानि जीवो भोक्ता यस्यानुग्रहात्संति कार्यक्षमा भवंतीत्यर्थः ॥ १२ ॥ योग एव तल्पं शय्या तस्मात् वीर्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलम् ॥ १३ ॥ तस्यैव प्रपंचः यथेत्यादिना ॥ १४ ॥

जीवानां मायानिद्रावेशो मायाकथयैवापयाति यदुक्तं “मायां वर्णयतो मुष्य ईश्वरस्यानुमोदतः । श्रृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति” इति । किञ्च । यद्यपि भागवतकृपालब्धभगवल्लीलामृतवृष्ट्यैव मायासुखनिद्राणोपि कर्मदुःखमूर्च्छितोपि जागर्त्ति अस्यति जीवति नृत्यत्यानंदेन माद्यति च तदपि तादृशमहत्कृपा यैरवलभ्यते तैरेव कृतार्थी भूयते न तु सर्वैरेवातोऽध्यात्मकथया मुहुः श्रुतया लब्धसंसारतितीर्षाणां गुरुपादाश्रयेण प्रोद्भूतयत्नानां निकृष्टजीवानामपि निस्तारो भवत्वित्येतदर्थमेवाध्यात्मकथापौनःपुन्यं भगवद्भक्तानामास्तिक्यवतां तु सर्वमेव श्रीभागवतममृतमिवास्वाद्यमेव । अपि च । शास्त्रस्यास्य न केवलं भगवंतमेवाधिकृत्य प्रवृत्तिरपि तु तन्निर्विशेषस्वरूपतदंशभूतौ ब्रह्मपरमात्मानावपि । तदुक्तं शास्त्रारंभे एव “ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते:” इति । ब्रह्मपरमात्मोपासकानामध्यात्मादिकथाभ्यासः उपयुक्त एव किञ्च शास्त्रस्यास्य महिम्ना ब्रह्मपरमात्मोपासकानामपि भक्तिप्रवर्त्तितत्वात् । अतः फलदशायामपि ‘आत्मारामाश्च मुनयः’ इत्यादेः प्रायो भक्तिरेव वरीवर्त्तीति तेन तत्साधनं तत्फलं च शुद्धभक्तैरपि न कटाक्षणीयमपि त्वनुमोदनीयमेव।तस्माद्यथा ब्रह्मत्वपरमात्मत्वमत्स्यकूर्माद्यनेकावतारत्वधर्मज्ञानबलैश्वर्यरूपगुणलीलामाधुर्यपरिपूर्णः श्रीकृष्णःसर्वविधभक्तैरेव परिचर्यते । एवमेव ब्रह्मत्वपरमात्मत्वमत्स्यकूर्माद्यवतारावतारितत्तत्सर्वमूलभूतश्रीकृष्णतदीयरूपगुणलीलामाधुर्यैश्वर्यतत्प्राप्तिसाधनभक्तिप्रेमधर्मज्ञानयोगवैराग्याद्यखिलतत्त्वप्रदर्शको ग्रंथोऽयमपि स्वरूपभूत इति सर्वं समंजसम् । संदर्भः । अथ स्वयं भगवल्लक्षणपरमरूपं तदेवाश्रयं स्थातुं तदंशभूतस्य पुरुषस्य वैभवं तादृशत्वेन दर्शयति यदासौ विनिर्गत ‘आद्योऽवतारः पुरुषः परस्य’ इत्युक्तरीत्या श्रीभगवत आविर्भूतस्तदा त्वंडमात्मनि लीनं तत्समूहं विनिर्भिद्यात्मनः पृथक्कर्तुमारम्येत्यर्थः । अथवांडं निजाविर्भावस्थानं श्रीभगवंतं विनिर्भिद्य ततः पृथग्भूत्वा विनिर्गतः अपस्तत्पर्यंतानि तत्त्वानीत्यर्थः । पृथिव्यपि तदंतर्भूतत्वेन ज्ञेयेत्याह ॥ १० ॥ इत्यर्थ इति । नारेषु स्थितत्वान्नारायण इति भावः । अत्र प्रमाणमाह—तदुक्तमिति।नरस्य भगवतः सूनवः पुत्राः ता आपः पूर्वं प्रलये यतोऽयनं वासस्थानं तेन हेतुनेति स्मृत्यर्थः ॥ ११ ॥ तस्य समष्टिविराडंतर्यामिनः उपादानं पृथिव्यादि जीवो हिरण्यगर्भः अनुग्रहादन्वयात् । इत्यर्थ इति । न हि परमात्मानं विना जीवो वा तिष्ठेदिति भावः ॥ १२ ॥ समष्टिविराडेव कथमभूदित्यपेक्षायामाह—एकः प्रलये स्वांशाञ्जीवानात्मनि विलाप्यैकत्वेन स्थितः अनु अनंतरं सृष्टिकाले “एकोहं बहुस्याम्” इति श्रुतेर्नानात्वमिच्छंस्तानेव जीवानात्मनः सकाशाद्विभक्तान् कुर्वन् योगः स्वमहिमस्थितिलक्षण एव तल्पं शय्या तस्मान्महाप्रलये रात्रिस्थानीये शयित्वा सृष्टिकाले प्रातरुत्थितः सन् देवो दीव्यन् पुरुषः मायया स्वशक्त्या महत्तत्त्वादीनि कारणानि सृष्ट्वा तैः कार्यभूतं वीर्यं हिरण्मयं कनकवर्णं प्रकाशबहुलं ब्रह्मांडं सावरणमसृजदिति महासमष्टिसृष्टिः ततश्च तेषामेव महत्तत्त्वादीनां किंचित्किंचिदंशैर्भगवच्छक्त्यैव परस्परं मिलितैः समष्टिविराट्पञ्चाशत्कोटियोजनपरिमितांडकटाहमध्यगः सृष्टोभूत्।तदैवादिपुरुषस्तदेवांडकटाहं प्रविश्य तदर्द्धं स्वसृष्टजलेनापूर्य्य तत्रस्थं समष्टिविराजं स्वजठरमध्यगतं कृत्वा सहस्रवर्षाणि तास्मिन् गर्भोद एव सुष्वाप।तदन्ते योगतल्पात्समुत्थितः सन् हिरण्मयं वीर्यं समष्टिविराजं त्रिधा व्यसृजत् ॥ १३ ॥ त्रिधैव किं तत्राह—अधिदैवमित्यादि एष एव समष्टिस्तस्य नाभिद्वारात्कमलनालात्मको भविष्यति स एव पुनश्चतुर्दशलोकात्मको वैराजसंज्ञः स्थूलो भावी सूक्ष्मं तु हिरण्यगर्भः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतः शरीर आकाशात्पुरुषस्य विचेष्टतः ॥ ओजः सहो बलं जज्ञे ततः प्राणो महानसुः ॥ १५ ॥ अनुप्राणंति यं प्राणाः प्राणंतं सर्वजंतुषु ॥
अपानंतमपानंति नरदेवमिवानुगाः ॥ १६ ॥ प्राणेन क्षिपता क्षुत्तृडंतराजायते प्रभोः ॥ पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत ॥ १७ ॥
मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते ॥ ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते ॥ १८ ॥ विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः ॥
जले वै तस्य सुचिरं निरोधः समजायत ॥ १९ ॥ नासिके निरभिद्येतां दोधूयति नभस्वति ॥ तत्र वायुर्गंधवहो घ्राणो नसि जिघृक्षतः ॥ २० ॥
यदात्मनि निरालोकमात्मानं च दिदृक्षतः ॥ निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः ॥ २१ ॥ बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः ॥
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः ॥ २२ ॥

अंतः शरीरे य आकाशस्तस्मात्क्रियाशक्त्या तत्र विविधं चेष्टमानस्य सत ओज इंद्रियशक्तिः सहो मनःशक्तिर्बलं देहशक्तिः ततः शक्त्यात्मकात्सूक्ष्माद्रूपात्प्राणः सूत्राख्यः महान् मुख्यः असुः प्राणः सर्वेषाम् ॥ १५ ॥ महत्त्वं दर्शयति । प्राणा इंद्रियाणि यं प्राणंतं चेष्टां कुर्वंतमनु पश्चात् प्राणंति चेष्टां कुर्वंति अपानं तं चेष्टां त्यजंतमनु अपानंति चेष्टां त्यजंति राजानमनु भृत्या इव ॥ १६ ॥ क्षिपता चालयता निमित्तेन क्षुत्तृडादिकं प्रभोरिति विराड्जीवाभेदेनोपासनार्थमुक्तं आजायते स्म ततो जक्षतः भक्षयितुमिच्छत इत्यर्थः । प्राक् प्रथमं निरभिद्यत विभक्तमभूत् ॥ १७ ॥ तात्वधिष्ठानं जिह्वेंद्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या । एवं सर्वत्राधिष्ठानमिंद्रियं देवता विषय इत्येतच्चतुष्टयमनुक्तमप्यूह्यम् ॥ १८ ॥ विवक्षोर्वक्तुमिच्छोः मुखत एव वह्निर्देवता वाक् इंद्रियं व्याहृतं भाषणम् । तयोरितींद्रियदेवताधीनत्वं कर्मणो दर्शयति॥ १९ ॥ नभस्वति प्राणवायौ दोधूयति दोधूयमानेऽत्यंतं प्रचलति सति तत्र च नासिकायां वायुर्देवता गंधं वहतीति तथा । अनेन गंधो विषयो दर्शितः । घ्राण इंद्रियं जिघृक्षतः गंधं ग्रहीतुमिच्छतः ॥ २० ॥ निरालोकं प्रकाशशून्यमासीदिति शेषः । निर्मक्षिकमितिवदव्ययीभावः । तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतः अक्षिणी स्थानम् । ज्योतिरादित्यो देवता चक्षुरिंद्रियम् । ततो गुणस्य रूपस्य ग्रहो ग्रहणम् । अनेन रूपं विषयो दर्शितः ॥ २१ ॥ ऋषिभिर्वेदैर्बोध्यमानस्य तदात्मनः प्रबोधनं ग्रहीतुमिच्छतः

समष्टिजीवो वैराज एव विसर्गाद्यर्थं चतुर्मुखो भावीति ब्रह्मणस्त्रैविध्यम् । अथ प्रकृतमनुसरामः । अथ इति । आधिदैवादिकाद्युक्त्वा त्रिविधादन्यदिदं त्रिविधामित्यर्थः ॥१४॥ असुर्जीवनव्यंजकः ॥ १५ ॥ जीवनव्यंजकत्वेन महत्त्वं दर्शयति अन्विति ॥ १६॥ पिपासतो जक्षतश्चेत्यनेन सुप्ततद्वासनामात्रमुच्यते यदेव स्वभावरूपं स तत्तत्कार्यं संपादयतीत्येवमुत्तरत्रापि ज्ञेयम् । मुखमिति । व्यष्टिमुखमेव तन्मुखत्वेनोपादिश्यते तत्तत्समुदायकारणमात्ररूपत्वात्तन्मुखस्य एवमुत्तरत्रापि एकत्वं समूहापेक्षया एकोपलक्षणत्वेन वा ज्ञेयम् । अंतरा उदरमध्ये प्रभोर्वैराजस्य ॥ १७ ॥ पूर्वमुपक्रांतमधिदैवादित्रैविध्यं विवृणोति मुखत इति । मुखतः मुखोत्पत्तेरनंतरमित्यर्थः । तत्राधिष्ठानविषयावधिभूतमिंद्रियमध्यात्मं देवताधिदैवमिति सर्वत्र चातुर्विध्येपि त्रैविध्यमेव द्रष्टव्यम् । तत्र तालुनि । ततो जिह्वोत्पत्तेरनंतरम् । यो नाना रसः । यद्वा मुखत इति सप्तम्यर्थे तसिः मुखे तालुनिर्भिन्नमित्यर्थः ॥ १८ ॥ भूम्न इति । भगवदभेदापेक्षयोक्तम् । तस्य विराजः यदा जले विराजो निरोधो जायत तदा श्वासचलनं विना निर्वाह इति श्वासचलनमार्गभूते नासिके अंभूतामिति भावः । तयोर्वह्निवाचोस्संबंधि तदधीनं व्याहृतमित्यर्थः । कर्मणो व्याहृतस्येति स्वामिपदविवृतिः । यद्वा । तस्य व्याहृतस्य ॥ १९ ॥२०॥ ततस्तेनं चक्षुषा अनेन गुणग्रह इति वचनेन ॥ २१ ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम् ॥ जिघृक्षतस्त्वङ्निर्भिन्ना तस्यां रोम महीरुहाः ॥ तत्र चांतर्बहिर्वातस्त्वचा लब्धगुणो वृतः ॥ २३ ॥ हस्तौ रुरुहतुस्तस्य नानाकर्माचिकीर्षया ॥ तयोस्तु बलमिंद्रश्च आदानमुभयाश्रयम् ॥२४॥ गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम् ॥ पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥२५॥ निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः ॥ उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयम् ॥२६॥

ततो गुणग्रहः शब्दस्य ग्रहणम् ॥२२॥ मृदुत्वं च काठिन्यं च लघुत्वं च गुरुत्वं च आ उष्णत्वमीषदुष्णत्वं च शीततां चेत्यर्थः । यद्यप्युष्णत्वमपींद्रियविषय एव तथापि तस्य जिघृक्षाभावादोष्णत्वमित्युक्तम् । गुर्वुष्णेति पाठे यणादेशश्छांदसः । वस्तुन एतान् धर्मान् जिघृक्षतस्त्वङ् निर्भिन्ना । त्वगिंद्रियाधिष्ठानं चर्मजातमित्यर्थः । तस्यां रोमाणींद्रियं महीरुहाश्च देवताः जाताः वस्तुनि हस्तेनातोलिते लघुत्वगुरुत्वयोर्ज्ञानाच्चयोरपि त्वगिंद्रियविषयत्वमिति पौराणिकाः ॥ तत्र त्वच्यंतर्बहिश्च वातो वृत आवृत्य स्थितः कर्तरि निष्ठा । कथंभूतः । त्वचा लब्धो गुणः स्पर्शो येन । अयमर्थः त्वगिंद्रियमेव बहिः कंडूतिसहितं स्पर्शं गृह्णल्लोमशब्देनोच्यते तत्र महीरुहाणां देवत्वम् । अंतर्बहिश्च स्पर्शं गृह्णत्तदेव त्वक्शब्देनोच्यते । तत्र वातो देवता । तथा च तृतीये वक्ष्यति । "त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः ॥ अंशेन लोमभिः कंडूं यैरसौ प्रतिपद्यते ॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ॥" इति । तत्र चर्माणीति चर्मोपलक्षिता त्वगित्यर्थः । प्राणेनांशेनेति प्राणवायुव्याप्तेन त्वगिंद्रियेणेत्यर्थः । बह्वृचश्रुतौ त्वेक एवांशो निर्दिष्टः । "त्वङ् निरभिद्यत त्वचो लोमानि लोमभ्य औषधिवनस्पतयः" इति ॥ २३॥ रुरुहतुर्निर्भिन्नौ बलमिंद्रियं इंद्रो देवता तदुभयाश्रयमादानं कर्म ॥ २४ ॥ अभिकामिकामभीष्टां विहितामित्यर्थः । पद्भ्यां सह यज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः । कर्मभिरिति गत्याख्या कर्मशक्तिरिंद्रियमुक्तम् । हव्यं क्रियत इति गतिप्राप्यं यज्ञार्थं द्रव्यं विषय इत्युक्तम् । नृभिरिति व्यष्टिजीवेष्वपीयमेव रीतिरिति दर्शयन्नराधिकारित्वं यज्ञादीनां दर्शयति ॥२५॥ प्रजा अपत्यमानंदो रतिरमृतं स्वर्गादि तदर्थिनः । शिश्नोऽधिष्ठानमुपस्थ इंद्रियं प्रजापतिश्चासीदिति ज्ञेयम् । तदुभयाश्रयं कामानां संबंधि प्रियं सुखम् ॥ २६ ॥

इत्यर्थ इति । "ईषदर्थे क्रियायोगे मर्यादाभिविधौ तथा । एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् । आकारस्तु निपातोयं ङिदङिद्भेदतो द्विधा । तत्रापि च ङिदाकारः संधिं प्राप्नोति न त्वङित्" इत्युक्तेरत्राकारस्य ङित्त्वात्संधिर्जात इति भावः । यणा देश इति। "अकः सवर्णे दीर्घः" इति दीर्घे प्राप्ते यणादेशोऽत्रार्षः । इत्यर्थ इति अत्राधिष्ठेयेनाधिष्ठानग्रहणमुपचारादिति भावः । निष्ठाक्तप्रत्ययः । अत्राशयं स्फोटयति । अयमर्थ इति । तत्र तृतीयस्कंधश्लोके इत्यर्थ इत्युभयत्रयं व्याख्येति एक एव त्वद्रूप एवेत्यर्थः ॥२३॥ उभयाश्रयमिन्द्रियदेवताधीनमित्यर्थः ॥२४॥ यज्ञो विष्णुशक्त्याविष्टो देवताविशेषः । स्वयमिति तस्याप्यन्यदेवापेक्षया प्राधान्यमाह—गतिं गमनं जिगीषत इति धात्वर्थस्याविवक्षितत्वादिच्छत इत्यर्थः । यद्यपि गुणः प्रकृत्यर्थोऽन्यत्र सात् इत्यनुभूतिना सन्नंते प्रकृत्यर्थस्यैव प्राधान्यमुक्तं तथाप्यस्य शास्त्रस्य छंदोरूपत्वात्प्रत्ययार्थस्यापि प्राधान्यमत्र न दोषायेति ॥२५॥ अत्रानंदशब्देन तद्धेतवः स्त्रिय एवोच्यंते तत्र च स्त्रीणां विषयत्वं साक्षात्तेन भोग्यत्वात् । अन्ययोस्तु तदुत्पाद्यतया भोगहेतुत्वात् । स्वर्गादिकं च गार्हस्थधर्ममयप्रजास्त्रीपरिकरतदुत्पाद्यं भवति तदुभयाश्रयं कामसुखमिन्द्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम् ॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥ आसिसृप्सोः पुरः पुर्या नाभिद्वारमपानतः ॥ तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयम् ॥ २८ ॥ आदित्सोरन्नपानानामासन्कुक्ष्यंत्रनाडयः ॥ नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥ ॥ २९ ॥ निदिध्यासोरात्ममायां हृदयं निरभिद्यत ॥ ततो मनस्ततश्चंद्रः संकल्पः काम एव च ॥ ३० ॥ त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ॥ भूम्यप्तेजोमयाः सप्त प्राणो व्योमांऽबुवायुभिः ॥ ३१ ॥ गुणात्मकानीं द्रियाणि भूतादिप्रभवा गुणाः ॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥ ३२ ॥

धातुमलं भुक्तान्नादीनामसारांशं त्यक्तुमिच्छोः गुदपायुमित्रोत्सर्गा अधिष्ठानेंद्रियदेवताविषयाः । उभयाश्रयः पायुमित्राश्रयः ॥ २७ ॥ पुर्या देहात्पुरो देहांतराण्यासिसृप्सोः सर्वतो गंतुमिच्छोः नाभिद्वारं निरभियतेत्यनुषंगः।अपानतोऽपगच्छतः पृथक्त्वं मरणम्। नाभ्यादीन्यधिष्ठादीनि नाभ्यां हि प्राणापानयोर्बंधविश्लेषे मृत्युरिति प्रसिद्धम्॥ २८॥ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्चांत्राणि च नाडयश्चासन् । तत्र कुक्षिरधिष्ठानं अंत्राण्यन्नसंग्रहे करणमिंद्रियस्थानीयं नाडयस्तु पानसंग्रहे तयोर्नाडयंत्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरुदरभरणं पुष्टिस्तु रसपरिणामतः स्थौल्यं तदाश्रये तदुभयनिमित्ते । तत्रान्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्रतुष्टय इति चतुष्टयं पेयसंग्रहेच्छोः कुक्षिनाडिनदीपुष्टय इति विवेकः ॥ २९ ॥ निदिध्यासोर्निंतरां चिंतयितुमिच्छोः कामोऽभिलाषः हृदयमनश्चंद्रसंकल्पा अधिष्ठानादयः ॥ ३० ॥ तदेवमधिदैवादिभेदं विभज्योक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्याम् । त्वक् स्थूलं चर्म तदुपरि स्थितं सूक्ष्मं त्वगादयोऽस्थ्यंता द्वंद्वैकवद्भावेन निर्दिष्टाः सप्त ये धातवस्ते भूम्यप्तेजोमयाः तेषां च पांचभौतिकत्वेऽपि वाय्वाकाशयोराहारादिरूपेण संवर्धकत्वाभावादेवमुक्तम् ॥ ३१ ॥ गुणात्मकानि गुणेषु शब्दादिष्वात्मा येषाम् । विषयाभिमुखस्वभावानीत्यर्थः । गुणाः शब्दादयः भूतादिरहंकारस्ततः प्रकर्षेण भवंतीति यथा अहंकारकल्पितशोभनस्वभावा नतु वस्तुतस्तथेति तात्पर्यम् । अत्र हेतुः । यतो मन एव सर्वविकाराणामात्मा स्व

देवताधीनम् ॥ २६ ॥ २७ ॥ ततोनंतरम् । अपानतोऽपानमार्गेण उपलक्षणमिदं प्राणमार्गेणोत्पन्नस्यापि नाभिद्वारमधिष्ठानमपान इंद्रियं मृत्युर्देवता मरणं विषयः ॥ २८ ॥ २९ ॥ मायां मायिकं वस्तु च संकल्पस्तत्तत्पदार्थचिंतनं कामस्तत्तद्विषयाभिलाषः हृदयमधिष्ठानं मन इंद्रियं चंद्रो देवता संकल्पो विषयः तत्र हृदयमेवाधिष्ठानं चित्ताहंकारबुद्धय इतींद्रियाणि तद्देवताश्च वासुदेवरुद्रब्रह्माणस्तृतीयस्कंधाज्ज्ञेयाः तदेवमष्टादशेंद्रियाणि प्रसिद्धान्येकादशैव ज्ञेयानि ॥ ३० ॥ व्योमांबुभ्यां पुष्टा वायव एव प्राण इत्यर्थः । तृतीयाबहुवचनमार्षम् ॥ ३१ ॥ इत्यर्थ इति वस्तुतः शब्दादीनां बंधकत्वाच्छोभनता नास्तीति भावः । अत्र गुणानामशोभनत्वे मन एव सर्वविकारान्संजीवयतीति भावः । तामसेष्वेव विषयेषु संकल्पविकल्पं करोति न तु हेयोपादेयाविवेकं बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी न तु परमार्थग्राहिणी अनेन बुद्धिमनसोः स्वरूपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम् ॥ ३३ ॥ अतः परं सूक्ष्मतममव्यक्तं निर्विशेषणम् ॥ अनादि
मध्यनिधनं नित्यं वाङ्मनसः परम् ॥ ३४ ॥ अमुनी भगवद्रूपे मया ते अनुवर्णिते ॥ उभे अपि न गृह्णंति मायासृष्टे विपश्चितः ॥ ३५ ॥
सवाच्यवाचकतया भगवान्ब्रह्मरूपधृक् ॥ नामरूपक्रिया धत्ते सकर्माऽकर्मकः परः ॥ ३६ ॥ प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् ॥
सिद्धचारणगंधर्वान्विद्याध्रासुरगुह्यकान् ॥ ३७ ॥ किन्नराप्सरसोनागान्सर्पान्किंपुरुषोरगान् ॥ मातृरक्षःपिशाचांश्च प्रेतभूतविनायकान् ॥३८॥

रूपं, बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी, नतु परमार्थग्राहिणीति वैराग्यार्थमुक्तम् । अनेनैव बुद्धिमनसोः स्वरूपं चोक्तम् ॥ ३२ ॥ उपसंहरति । एतदिति । प्रकृत्या सहा ष्टभिः ॥ ३३ ॥ स्थूलमुक्त्वा सूक्ष्मं समष्टिलिंगशरीरमाह । अतः परमस्य कारणभूतं सूक्ष्ममतींद्रियं यतोऽव्यक्तम् । तत्कुतः । यतो निर्विशेषणम् अनादिमध्यनिधनमुत्पत्तिस्थितिलयशून्यं नित्यं सदैकरूपं अपक्षयादिशून्यमित्यर्थः । अत एव वाक् च मनश्चेति द्वंद्वैक्यं तस्मात् परम् ॥ ३४ ॥ उपासनार्थं भगवत्यारोपितं रूपद्वयमपवदति । अमुनी इति । न गृह्णंति वस्तुतो नांगीकुर्वंति यतो मायासृष्टे ॥ ३५ ॥ यद्रूपगुणकर्मक इति यदुक्तं भगवता ब्रह्माणं प्रति तत्प्रपंचयितुं ब्रह्मादिरूपाणि तत्कर्माणि चाह स इत्यादिना इत्थंभावेनेत्यतः प्राक्तनेन ग्रंथेन । स भगवान् ब्रह्मरूपधृक् सन् वाच्यवाचकतया वाचकतया नामानि वाच्यतया रूपाणि क्रियाश्च धत्ते । सृजतीत्यर्थः । मायया सकर्मा सव्यापारः सन् वस्तुतस्त्वकर्मकः ॥ ३६ ॥ एतत्प्रपंचयति प्रजापतीनिति सार्धैस्त्रिभिः । द्वितीयांतानां धत्त इत्यनेनान्वयः । तत्र प्रजापत्यादीनि नामानि तत्तद्वा

चोक्तम् । संदर्भस्तु विकारा हर्षदुःखादयः । विज्ञानं विवेकशक्तिः । ‘बुद्धींद्रियमनःप्राणान्’ इत्याद्युक्तेः । पारमार्थिक्यपि सा भवतीति ज्ञेयम् ॥ ३२ ॥ मह्यादिभिः पृथिव्यप्तेजोवाय्वाकाशमहदहंकारप्रकृत्याख्यैः प्रत्येकं दशदशगुणोत्तरैः ॥ ३३ ॥ अतः स्थूलात् । अस्य स्थूलस्य । तदव्यक्तत्वम् । निर्विशेषणं वर्णाकारादिशून्यम् । यदेव स्थूलेन सह व्यष्टिषूत्पत्त्यादियुक्तं न भवतीत्याह । अनादीति । अतस्तदपेक्षया नित्यमपि निर्विशेषणत्वादेव वाङ्मनसात्परमत एव सूक्ष्मतममत एव चाव्यक्तं सूक्ष्मतमामित्युक्त्या सूक्ष्ममतिसूक्ष्मं चेति द्वितयं लभ्यतेऽत्र सूक्ष्मं लिंगशरीरमतिसूक्ष्मं मायारूपं निर्विशेषणमित्यादिभिश्चतुर्भिर्विशेषणैरुक्तम् ॥ ३४ ॥ अमुनीति द्विवचनं स्थूलयोः समष्टिव्यष्ट्योरैक्यात्सूक्ष्मयोरप्यैक्यात् न गृह्णंति प्राप्यत्वेन न स्वीकुर्वंति किंतूपासनार्थं प्रथमदशायामेव यतो मायासृष्टे तृतीयमतिसूक्ष्मं यत्तत्तु कारणं मायैव किन्तु विपश्चितः शुद्धभक्तिमंतः प्रथमदशायामपि नैव गृह्णंति किंतु रामकृष्णनारायणनृसिंहादिरूपं शुद्धसत्त्वमेव साध्यसाधनदशायां गृह्णंतीति ॥ ३५ ॥ अथ व्यष्टीनां स्थितिसंहारानाह—स इत्यारभ्येत्थंभावेत्यंतेन स महदादिस्रष्टा पुरुषः परः परमेश्वरः अकर्मकः प्राकृतक्रियाहीनोपि ब्रह्मरूपधृक् सन्सकर्मा सव्यापारः वक्ष्यमाणानां व्यष्टिजीवानां धत्ते सृजतीत्यर्थ इति । धातूनामनेकार्थत्वात्सर्जनेपि दधातिः प्रयुक्त इति भावः । अत्र संदर्भेण अत एव तत्संबंधिसर्वमपि भगवद्रूपत्वेनैव कल्पितमित्यवतरणिकामुक्त्वा यद्रूपगुणकर्मक इत्यत्र त्वप्राकृतानि चतुःश्लोक्यां श्रीभगवता प्रतिज्ञातानि स्वयमेव दार्शितानीति व्याख्यातमेव ॥ ३६ ॥ एतद्बहुरूपगुणकर्मकत्वम् । सार्द्धत्रिकस्यान्वयः ॥ प्रजापतीन्दक्षादीन् । मनून्स्वायुंभुवादीन् । देवानिंद्रादीन् । ऋषीन्मरीच्यादीन् । पितृगणानर्यमादीन् । सिद्धान्कपिलादीन् । चारणान्सुज्ञादीन् गंधर्वांश्चित्ररथादीन् । विद्याध्रान्सुदर्शनादीन् । असुरान्नमुच्यादीन् । गुह्यकान्कामुकादीन् ॥३७॥ किन्नरान्मर्कटादीन् । अप्सरसो मंजुघोषाद्याः । नागसर्पोरगाणामवांतरभेदो हि सर्पसिद्धांतग्रंथाज्ज्ञेयः । नागाश्शेषाद्याः । सर्पास्तक्षकाद्याः । उरगाः कुंडधाराद्याः । किंपुरुषाः वनचर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कूष्मांडोन्मादवेतालान्यातुधानान्ग्रहानपि ॥ खगान्मृगान्पशून्वृक्षान्गिरीन्नृप सरीसृपान् ॥ ३९ ॥ द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः ॥ कुशलाऽकुशला मिश्राः कर्मणां गतयस्त्विमाः ॥ ४० ॥ सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः ॥ तत्राप्येकैकशो राजन्भिद्यंते गतयस्त्रिधा ॥ यदैकैकतरोऽन्याभ्यां स्वभाव उपहन्यते ॥ ४१ ॥ स एवेदंजगद्धाताभगवान्धर्मरूपधृक् ॥ पुष्णाति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ॥ ॥४२ ॥ ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः ॥ संनियच्छति कालेन घनानीकमिवाऽनिलः ॥ ४३ ॥ इत्थंभावेन कथितो भगवान्भगवत्तमः ॥ नेत्थंभावेन हि परं द्रष्टुमर्हंति सूरयः ॥ ४४ ॥

च्यानि रूपाणित तत्कर्माणि च ज्ञेयानि पृथक् तत्तदवांतरभेदेन ॥ ३७॥ ३८॥गिरीनित्यस्यानंतरं नृपेति संबोधनम् ॥ ३९॥ द्विविधाः स्थावरजंगमरूपेण । तत्र चतुर्विधाः जरायुजांडजस्वेदजोद्भिज्जरूपेण । जलस्थलनभांस्योकांसि येषां तानपि धत्त इति पूर्वेणान्वयः । यच्च राज्ञा पृष्टं "यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम" इति तस्यापि प्रसंगादनेनैवोत्तरमाह । कुशला उत्तमाः, अकुशला नीचाः । मिश्रा इति पदांतरम् । मिश्रा मध्यमाः, कर्मणां पुण्यपापमिश्राणां गतयः फलानि ॥ ४० ॥ सत्त्वादिभेदेन कर्मगतिवैचित्र्यं प्रपंचयति सत्त्वमिति सार्धेन । सत्त्वादयस्तिस्रो गतयः सुरादिशब्दा ऋष्यादीनामुपलक्षणार्थाः । अन्याभ्यां गुणाभ्यां स्वभावो गुण उपहन्यतेऽनुविध्यते ॥ ४१ ॥ ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह । स एव भगवांस्तिर्यगाद्यवतारैरिदं विश्वं स्थापयन्पालयन्धर्मरूपेण पुष्णाति भोगैः संवर्धयति ॥ ४२ ॥ रुद्ररूपेण संहर्तृत्वमाह । तत इति । आत्मनः सकाशाद्यदिदं सृष्टं तत्संनियच्छति संहरति ॥ ४३ ॥ कर्तृत्वाद्यपवादेन दशमस्य शुद्धिमाह । इत्थंभावेन स्रष्टृत्वादिरूपेण । "तस्माद्वा एत

पुरुषाद्याः । मातरो ब्राह्म्याद्याः । रक्षांसि सुमाल्यादीनि । पिशाचा घंटाकर्णाद्याः प्रेता दुर्मरणमृताः । भूता भृंग्याद्या रुद्रगणाः । विनायका विघ्नविशेषाः॥३८॥कूष्मांडाः खलंट्वादयः।उन्मादाः।कालकर्णादयः । वेतालाः सुवेगाद्या शिवगणविशेषाः।यातुधाना रक्षोभेदा मृगकर्णाद्याः।ग्रहा बालग्रहाः पूतनाद्या वृद्धग्रहा वैरूप्याद्यास्सूर्याद्याः वा।खगा गरुडाद्याः।मृगा हरिणाद्याः।पशवो गवाद्याः।वृक्षा अश्वत्थाद्याः।गिरयो मेर्वाद्याः । सरीसृपाः सहस्रपाद्याद्याः । हे नृपेति । राज्ञां हि नृपालनप्रसंगेन सर्वं ज्ञातप्रायं भवतीति भावः ॥ ३९ ॥ ननु कथमेवं विषयान्सृजति तत्राह—इमाः कर्मणां गतयः कुशलाः पुण्यफलभूताः अकुशलाः पापफलभूता मिश्रास्तदुभयरूपाः जीवाः प्रतिस्वकर्मानुरूपाः गतीः प्राप्नुवंति स्रष्टुः को दोष इति भावः॥४०॥तत्रापि तिसृषु गतिष्वपि एकैकशो गतयस्त्रिधा भिद्यंते नवसंख्याका भवंति। अन्याभ्यां स्वभावाभ्यां तथाहि शुद्धसत्त्वा रजोमिश्रसत्त्वा तमोमिश्रसत्त्वा च एवं शुद्धराजसी तमोमिश्रराजसी सत्त्वमिश्रराजसी च तथैव शुद्धतामसी रजोमिश्रतामसी सत्त्वमिश्रतामसी चेति । यथा रजः स्वभावोपि नरःसत्त्वस्वभावमिश्रणाधिक्याद्ब्राह्मणः, रजोधिक्यात्क्षत्रियः, रजस्तमसोराधिक्याद्वैश्यः, तमोधिक्याच्छूद्र इति ॥ ४१ ॥ धर्मो विष्णुः 'धर्मो धर्मविदुत्तमः' इति सहस्रनामसु पठितत्वात् । धर्मतो रक्षाऽधर्मतो नाशः धर्माधर्माभ्यां सृष्टिरिति द्योतयति । तिर्यगादीनां स्वभावैरिति पशुपक्षिणोपि स्वसुतमित्रकलत्रादीन्पालयंति ॥ ४२ ॥ ४३ ॥ सूरयः केचिच्छुद्धभक्तिमंतस्तु परं केवलं विश्वसृष्टत्वादिरूपेण द्रष्टुं नार्हंति किन्तु वैकुंठादौ स्वधामनि चिद्विभूतौ स्वप्रेयस्यादिभिर्विहरमाणत्वेनैवेत्यर्थः ॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्य कर्माणि जन्मादौ परस्यानुविधीयते ॥ कर्तृत्वप्रतिषेधार्थं माययाऽऽरोपितं हि तत्॥४५॥अयं तु ब्रह्मणः कल्पः सविकल्प उदाहृतः॥विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ॥४६॥ परिमाणं च कालस्य कल्पलक्षणविग्रहम् ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ॥४७॥ शौनक उवाच ॥ यदाह नो भवान्सूत क्षत्ता भागवतोत्तमः ॥ चचार तीर्थानि भुवस्त्यक्त्वा बंधून्सुदुस्त्यजान् ॥ ४८ ॥

स्मादात्मन आकाशः संभूतः । सोऽकामयत बहु स्यां प्रजायेय" इत्यादिश्रुत्या प्रतिपादितः । सूरयस्तु परं केवलमेवंरूपेणैव द्रष्टुं नार्हंति ॥ ४४॥ तत् किं यतोऽस्य विश्वस्य जन्मादौ कर्माणि परस्येश्वरस्येत्थंभावः कर्तृत्वं नास्ति श्रुत्यापि तात्पर्येण न प्रतिपाद्यते किंतु अनुविधीयतेऽनुवर्ण्यते । किमर्थं कर्तृत्वप्रतिषेधार्थम् । हि यतो माययाऽऽरोपितं प्रकाशितम् । यथा च श्रुतयः । "निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनम् ॥ इंद्रो मायाभिः पुरुरूप ईयते" इत्याद्याः ॥ ४५ ॥ उक्तमर्थमुपसंहरति अयं त्विति । ब्रह्मणः संबंधी कल्पो महाकल्पः विकल्पोऽवांतरस्तत्सहित उदाहरणत्वेन संक्षेपत उक्तः । कथंभूतः । यत्र महाकल्पे प्राकृता महदादिसर्गाः अवांतरकल्पे च वैकृताः स्थावरादिसर्गा इत्ययं विधिः प्रकारः । अन्यैर्महाकल्पादिभिः साधारणः ॥४६॥ वक्ष्यमाणं विस्तरं प्रतिजानीते । परिमाणं स्थूलं सूक्ष्मं च कल्पस्य लक्षणमियानेवंरूप इति तद्विग्रहमवांतरकल्पम् । मन्वंतरादिरूपं विभागं च यथावद्विस्तरेण पुरस्तात्तृतीयस्कंधे व्याख्यास्यामि।तत्र पाद्मं कल्पमथो इति कात्स्न्र्येन व्याख्यायमानं शृणु ॥४७॥ यदर्थं सृष्ट्यादिनिरूपणं तदेव साक्षाच्छ्रोतुकामः कथांतरं पृच्छति । यदाहेति । भुवः संबंधीनि तीर्थानि । यद्वा भुवः क्षेत्राणि चेति ॥ ४८ ॥

नैतद्भगवतो वस्तुतः कर्मेत्याह—अस्य विश्वजन्मादौ जन्मस्थितिसंहारे कर्माणि परस्य परमेश्वरस्येत्थंभावः कर्तृत्वं नास्ति किं त्वनुविधियते श्रुतिस्मृत्यादिषु सर्वत्र वर्ण्यते किमर्थं कर्तृत्वप्रतिषेधार्थं हि यतो माययैवारोपितं सृष्ट्यादीनां गुणकार्यत्वाद्बहिरंगमायाया एव कर्तृत्वं परमपुरुषे आरोपितमिति मत्कृतमपीदं मत्स्वामित्वात्तेन परमेश्वरेणैव कृतं न तु वस्तुतः परमेश्वरः स्वस्वरूपेण कर्त्तेत्यर्थः । अत्र प्रमाणं तथा चेति । इंद्र आत्मा यद्यपि तत्प्रभावत एव तद्भवति तथाप्ययस्कांतवत्तत्र तस्य विकारो नास्तीतिभावः । अध्यारोपापवादावपि शुद्धस्वरूपावगत्यर्थमेव वर्णितमिति । ज्ञेयम् । "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते" इति श्रुतेः ॥ ४५ ॥ कल्पो ब्रह्मदिनं "स कल्पो यत्र मनवश्चतुर्दश विशांपते" इति वक्ष्यमाणत्वात् । कल्पवर्णना हि स्कांदे प्रभासखंडे "प्रथमः श्वेतकल्पश्च द्वितीयो नीललोहितः । वामदेवस्तृतीयस्तु ततो गाथांतरोऽपरः १ रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः । सप्तमोऽथ बृहत्कल्पः कंदर्पोऽष्टम उच्यते २ सद्योथनवमः कल्प ईशानो दशमः स्मृतः । ध्यान एकादशः प्रोक्तस्तथा सारस्वतोऽपरः ३ त्रयोदश उदानस्तु गरुडोऽथ चतुर्दशः । कौर्मः पञ्चदशो ज्ञेयः पौर्णमासी प्रजापते: ४ षोडशो नारासिंहस्तु समाधिस्तु ततोऽपरः । आग्नेयो विष्णुजः सौरः सोमकल्पस्ततोऽपरः ५ द्वाविंशो भावनः प्रोक्तः सुपुमानिति चापरः ॥ वैकुंठश्चार्ष्टिषस्तद्वद्वल्मीकल्पस्ततोऽपरः ६ सप्तविंशोऽथ वैराजो गौरीकल्पस्ततोपरः । महेश्वरस्ततः प्रोक्तस्त्रिपुरो यत्र घातितः ७ पितृकल्पस्ततश्चांते यः कुहूर्ब्रह्मणः स्मृता । त्रिंशत्कल्पाः समाख्याता ब्रह्मणो दिवसैः सदा ८ अतीताश्च भविष्याश्च वाराहो वर्त्ततेऽधुना । प्रतिपद्ब्रह्मणः प्रोक्ता द्वितीयार्द्धस्य सांप्रतम्९" अत्र श्वेतः श्वेतवाराहः स एव वाराहश्च अयमेव ब्रह्मोत्पत्तिसमये ब्राह्म उच्यते इति ज्ञेयम् । एवं पितृकल्प एव प्रथमपरार्द्धांते पद्मनिर्मितलोकत्वात्पाद्म इत्युच्यते अतः श्रीभागवतस्य सारस्वतकल्पमयत्वं तु प्रायिकमेव ॥ ४६ ॥ विस्तरेण तु यथाकालोनुमीयत इत्यस्य प्रश्नस्योत्तरं मध्य एव तस्योत्तरं दास्यमानं प्रतिजानीते परिमाणं कीदृशं कल्पानां लक्षणमेव विग्रहो वपुर्यस्य तत् कल्पादिलक्षणं विना कालपरिमाणं न सिध्यतीत्यर्थः । पाद्मं कल्पं प्रथमपरार्द्धान्तभवम् ॥ ४७ ॥ तदेवं प्रस्तुतमपि पाद्मकल्पकथनं कथांतरश्रवणोत्कंठया स्थगितीकृत्य पृच्छतीत्याह । यदर्थमित्यादि यदाहेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुत्र कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः ॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ॥ ४९ ॥ ब्रूहि नस्तदिदं सौम्य विदुरस्य विचेष्टितम् ॥ बंधुत्यागनिमित्तं च तथैवागतवान्पुनः ॥ ५० ॥ सूत उवाच ॥ राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः ॥ तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः ॥५१॥ इति श्रीमद्भागवते महापुराणे द्वितीयस्कंधे पुरुषसंस्थानुवर्णनं नाम दशमोऽध्यायः ॥१०॥ इति द्वितीयस्कंधः समाप्तः॥२॥

कौषारवेर्मैत्रेयस्य तस्य क्षत्तुश्च अध्यात्मज्ञानसंश्रितः संवादः॥ ४९॥पुनरागतवांस्तत्र च निमित्तं ब्रूहि॥ ५०॥राज्ञा पृष्ट इति । अयमर्थः । यद्यूयं पृच्छथेदमेव राजाऽपि शुकं पृष्टवान् । शुकोऽपि विदुरमैत्रेयसंवादं पुरस्कृत्य ये पूर्वं राज्ञा कृताः प्रश्नास्तदनुसारेणैव सर्वं पुराणार्थमवोचत्तदेवाहं वोऽभिधास्यामि । तथैव शृणुतेति ॥ ५१ ॥ श्रीमद्भागवतं येन स्वब्रह्ममुखतो मितम् ॥ ब्रह्मनारदयोः प्रोक्तं तं वंदे गुरुमीश्वरम् ॥ १ ॥ यत्सूत्रयंत्रितं विश्वं नरीनर्ति जगत्त्रयम् ॥ संतस्तमेव पृच्छंतु यदत्र स्खलितं मम ॥२॥ द्वितीयस्कंधसंबंधिपदभावार्थदीपिका॥उद्दीप्यतामियं सद्भिर्यथा स्यात्तत्त्वदीपिका॥ ३॥ईक्षंतामिच्छया संतः क्षमंतां मम साहसम्॥मया हि स्वीयबोधाय कृतमेतत्न्नसर्वतः॥ ४॥ इति श्रीमद्भागवतटीकायां श्रीधरस्वामिविरचितायां भावार्थदीपिकायां द्वितीयस्कंधे दशमोऽध्यायः ॥ १० ॥ इति द्वितीयस्कंधः समाप्तः ॥ २ ॥ श्रीकृष्णार्पणमस्तु ॥

"विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिम्" इत्यादिना यद्भवानवोचदित्यर्थः । भगवान्सर्वज्ञः ॥४८॥ कुत्रेति स्थानप्रश्नः । यद्वा पृष्टो यद्वा तत्त्वमुवाचेत्युभयत्र यच्छब्दान्वयत्वात्प्रश्नोत्तरयोःप्रश्नौ ॥ ४९ ॥ हे सौम्येति । श्रीव्यासदेवकृपया त्वयि सौम्यतास्तीति भावः । तव च पुनरागमने ॥ ५० ॥ अत्राशयमाह—अयमर्थ इति ॥ ५१ ॥ स्वब्रह्ममुखतः स्वश्च ब्रह्मा च स्वब्रह्माणौ तयोर्मुखं स्वब्रह्ममुखं तेन तृतीयार्थे तसिः स्वमुखेन ब्रह्मणे ब्रह्ममुखेन नारदायेत्यर्थः । मितं संक्षिप्तम् । तं परमात्मरूपं गुरुम् ॥ १॥ विश्वं सर्वं यस्य सूत्रं सूत्रमद्वेष्टनशीला माया तत्र यंत्रितं प्रोतम् । अत्र व्याख्याने स्खलितं च्युतं स एवांतर्यामी भूत्वा यथा प्रेरय्य व्याख्यापयति तथाहं व्याख्यामीति भावः ॥ २ ॥ यथातत्त्वस्य याथार्थस्य दीपिका प्रकाशिका भवेत् तथा सद्भिर्विद्वद्भिरियं लोके प्रकाश्यतां प्रकटीक्रियतामिति प्रार्थनायां लोट् ॥ ३ ॥ ईक्षंतां पश्यंतु । साहसमयथाव्याख्यानम् । स्वीयबोधाय स्वस्य स्वशिष्याणां च बोधाय विस्मृत्यलाभाय सर्वतः सर्वेषां बोधाय नन्वित्यर्थः ॥ ४ ॥ येन श्रीब्रह्मणे प्रोक्तं श्रीमद्भागवतं पुरा । संक्षेपेणैव कल्पादौ तं वंदे नंदनंदनम् ॥ १ ॥ द्वितीयस्कंधभावार्थदीपिकाविवृतिः कृता । वंशीधरेण विदुषा गौडंकौशिकगोत्रिणा ॥ २॥ इमां गृह्णन्तु विवृतिं परमानन्ददायिनीम् ॥ विदुषां कृष्णभक्तानां विद्वांसो गुणिवत्सलाः ॥ ३ ॥ इति श्रीवंशीधरशर्मकृतश्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे दशमोऽध्यायः ॥ १० ॥ समाप्तोऽयं द्वितीयस्कन्धः ॥

अयं श्रीमद्भागवतभावार्थदीपिकाप्रकाशसमलंकृतश्रीभागवतभावार्थदीपिकासमेतश्रीमद्भागवतद्वितीयस्कन्धः मुम्बय्यां खेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर": मुद्रणालये मुद्रयित्वा प्रकाश्यमानीयत ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीधरीटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते भागवते द्वितीयस्कन्धः समाप्तः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया
चोपेते श्रीमद्भागवते तृतीयस्कन्धः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीयस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ श्रीशुक उवाच ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल ॥ क्षत्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ १ ॥ यद्वा अयं मंत्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥ २ ॥ राजोवाच ॥ कुत्र क्षत्तुर्भगवता मैत्रेयेणाऽऽस संगमः ॥ कदा वा सहसंवाद एतद्वर्णय नः प्रभो ॥३॥ न ह्यल्पार्थोदयस्तस्य विदुरस्याऽमलात्मनः ॥ तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ॥ ४ ॥

श्रीगणेशाय नमः ॥ नमो भगवते वासुदेवाय ॥ ॥ तृतीये तु त्रयस्त्रिंशदध्यायैः सर्गवर्णनम् ॥ ईशेक्षया गुणक्षोभात्सर्गो ब्रह्मांडसंभवः ॥ १ ॥ तत्र तु प्रथमेऽध्याये बंधून्हित्वा गतायुषः ॥ निर्गतस्योद्धवेनादौ संवादः क्षत्तुरुच्यते ॥ २ ॥ भगवद्ब्रह्मसंप्रोक्तं संक्षिप्तं वर्णितं पुरा ॥ प्राह भागवतं शेषप्रोक्तं विस्तरतः पुनः ॥ ३ ॥ द्वेधा हि श्रीमद्भागवतसंप्रदायप्रवृत्तिः एकतः संक्षेपतः श्रीनारायणब्रह्मनारदादिद्वारेण अन्यतस्तु विस्तरतः शेषसनत्कुमारसांख्यायनादिद्वारेण तत्र द्वितीये श्रीनारायणब्रह्मसंवादेन संक्षेपतोऽहमेवासमित्यादिचतुःश्लोक्या श्रीभागवतं निरूपितम् । तदेव ब्रह्मनारदसंवादेन दशलक्षणतया किंचिद्विस्तरेणोक्तम् । तदेव शेषोक्तमतिविस्तरतो वक्तुं तृतीयायारंभः तत्र तृतीये प्रथमं क्षत्तुर्मैत्रेयसंगमश्चतुर्भिरध्यायैः ततोऽष्टभिः सविसर्गः सर्गप्रपंचः ततो विसर्गप्रस्तावेन सप्तभिर्वराहावतारः तत एकेन विसर्गसमाहारः तत्प्रसंगेन चतुर्भिः कपिलावतारः ततो नवभिः कपिलाख्यानमिति त्रयस्त्रिंशद्भिरध्यायैस्तृतीयस्कंधप्रवृत्तिः । तत्र । द्वितीयांते "परिमाणं च कालस्य कल्पलक्षणविग्रहम् ॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ।" इति प्रतिज्ञातमर्थं विस्तरेण निरूपयितुमितिहासं प्रस्तौति भगवान् शुकः । एवमिति द्वाभ्याम् । ऋद्धिमत्सर्वसंपद्भिः परिपूर्णम् ॥ १ ॥ किंच । अतिश्लाघ्यं त्यागानर्हमित्याह । यद्वै प्रसिद्धं गृहं वः पांडवानां मंत्रकृद्दौत्यकर्ता सन्नयं श्रीकृष्णः बुद्धिसन्निधानादयमिति निर्देशः पौरवेंद्रो दुर्योधनस्तस्य गृहं हित्वाऽनाहूत एव विदुरगृहं प्रविवेश । तत्र हेतुः । आत्मसात्कृतमात्मीयत्वेन गृहीतम् ॥ २ ॥ कुत्र संगम आस बभूव ॥ ३ ॥ वरीयसि श्रेष्ठेऽल्पस्यार्थस्योदयो यस्मात्त

ॐ स्वस्तिश्रीगणेशाय नमः । श्रीकृष्णं सच्चिदानन्दं बल्लवीजनवल्लभम् । वंदे स्वाज्ञानहतये ज्ञानावाप्त्यै सदोद्यतः ॥ १ ॥ इह प्रतिस्कंधकर्त्तव्यंश्रीरामचंद्रनातिरूपं मंगलमवश्यकर्त्तव्यताकत्वेन शास्त्रवर्णनीयसर्गादिदशलक्षणाद्यसर्गलक्षणास्यारब्धत्वात्प्राप्तं लेखकप्रमादादत्र नास्तीति । यद्वा । दुर्ज्ञेयसर्गविचाराकुलत्वात्तद्विस्मृतमितिज्ञेयम् । सर्गलक्षणमाह—ईशेच्छयेति ॥(१)॥तत्र त्रयस्त्रिंशत्स्वाध्यायेषु गतायुषः नष्टायुर्दायान् (॥२॥३॥) एकतः एकाप्रथमार्थे तसिः । अन्यतोऽन्या द्वितीयेति तत्र द्वयोर्मध्ये द्वितीये स्कंधे तदेव संक्षेपनिरूपितमेव तृतीयादीनां स्कंधानामारंभस्तृतीयाद्यारंभः । तत्र तृतीयादिषु स्कंधेषु ततश्चतुरध्यायोत्तरं तत्रादौ द्वितीयस्कंधाष्टमाध्याये राज्ञा कृतेषु बहुषु प्रश्नेषु श्रीशुको द्वित्रिप्रश्नोत्तरं दत्वा चेतसीति विचारयामास एतत्प्रश्नजातं प्रति एवमेव पुरा भगवांस्त्रिकालदर्शी मैत्रेयः क्षत्त्रा विदुरेण पृष्टः तत्स्वगृहं त्यक्त्वा वनं प्रविष्टेन अग्रिमपद्ये यत्पददर्शनादत्र तदित्यानेयम् ॥ १ ॥ तद्गृहस्यातीव श्रैष्ठ्यमाह—किं चेति । तत्रानाहूतप्रवेशे ॥२॥ एतत्क्षत्तृमैत्रेयसंगमादि । प्रभो स्वामिन् ॥ ३ ॥ विदुरमैत्रेयसंगमेऽन्यसंगमाश्रवणादाह—यद्वेति । इत्यर्थ इति । श्लाघ्यप्रश्नत्वात्तदुत्तरं दत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं स बहुवित्प्रीतात्मा श्रूयतामिति ॥ ५ ॥ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥ यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यम् ॥ न वारयामास नृपः स्नुषायाः स्वास्रैर्हरंत्याः कुचकुंकुमानि ॥ ७॥ द्यूते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य ॥ न याचतोऽदात् समयेन दायं तमो जुषाणो यदजातशत्रोः ॥ ८ ॥ यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ॥ न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ॥ ९ ॥ यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन ॥ अथाह तन्मंत्रदृशां वरीयान्यन्मंत्रिणो वैदुरिकं वदंति ॥ १० ॥

थाभूतो न भवति । साधुवादेन सतामनुमोदनेनोपबृंहितः संवर्धितः । यद्वा । साधोर्मैत्रेयस्य वादेनोत्तरेण श्लाघित इत्यर्थः ॥४॥५॥ त्यागानर्हस्यापि गृहस्य त्यागे हेतुत्वेन कौरवापराधानाह । यदेत्येकादशभिः । एतेषां च तदा स क्षत्ता अयादित्येकादशे क्रियासंबंधः । यविष्ठस्य कनिष्ठस्य पांडोः विबंधून् पितृहीनान् ॥ ६ ॥ कुरुदेवस्य युधिष्ठिरस्य देव्या द्रौपद्याः आत्मनः स्नुषायाः स्वीयैरस्रैरश्रुभिः स्वकुचकुंकुमानि रिपुस्त्रीणां वा तद्भर्तृवधेन हरंत्याः ॥ ७ ॥ सत्यावलंबस्य सत्याश्रयस्य समयेन पूर्वकृतेन दायमंशं याचमानस्य यद्यदा नादान्न ददौ । तमो मोहं जुषाणः पुत्रं सेवमानः अविवेकं वा ॥ ८ ॥ यानि वचनानि पुंसां भीष्मादीनाममृतायनान्यमृतस्राविणि । राजा धृतराष्ट्रो दुर्योधनो वा उरु बहु न मेने क्षतो नष्टः पुण्यलेशो यस्य सः न सुखकीर्तिर्धर्मादिहेतुः किंतु राज्यप्राप्तिमात्रहेतुः पुण्यलेश एवासीत् तस्यापि नष्टत्वादनादृतवानित्यर्थः ॥ ९ ॥ इदानीं विदुरस्यैव कृतं पराभवं दर्शयति । यदेत्यादिषड्भिः । यदा पूर्वजेन धृतराष्ट्रेण मंत्राय चोपहूतोंऽतर्गृहं प्रविष्टो मंत्रं पृष्टः सन्नथानंतरं तदाह । किम् मंत्रिणो

वानिति भावः । तस्मिन्मैत्रेये ॥ ४ ॥ स श्रीशुकः । तं परीक्षितम् । श्रूयतामित्यविवक्षितकर्मकत्वेनाकर्मकत्वाद्भावे लट् ॥ ५ ॥ विदुरस्य तीर्थयात्रानिमित्तमाह—यदा त्विति । एतेषां यदा त्वित्यादीनाम् । राजा धृतराष्ट्रः । स्वसुतान् दुर्योधनादीन् ।असाधूनन्यायवर्तिनः । लाक्षाभवने वारणावतनगरस्थे शणतृणतैलाढ्यलाक्षानिर्मिते । विबंधूनिति । विर्विष्णुर्विदुरो वा बंधुर्हितकर्त्ता येषां ते तान् एकदेशन्यायेन विपदमुभयार्थकम् । यद्वा । विशिष्टः सर्वोत्कृष्टः श्रीकृष्णो विदुरोपि कौरवपुण्यलब्ध इति वक्ष्यमाणत्वात्सर्वोत्कृष्ट एव वा बंधुर्येषां तान् अत्र तुशब्दोऽवधारणे यदातदाशब्दौ तु हेत्वर्थकौ 'यदा तदेति हेत्वर्थे कालार्थेपि च भण्यते' इति । विनष्टदृष्टिर्ज्ञानहीनः॥६॥निमित्तांतरमाह—नृपो धृतराष्ट्रः। देव्याः पट्टाभिषिक्तायाः'देवी कृताभिषेकायाम्' इत्यमरः । सुतस्य दुःशासनस्य कर्म केशाभिमर्शं कबरीभारपरामर्शं गर्ह्यं निंद्यं यदा यतः भ्रातृपुत्राणामपि स्वपुत्रत्वात्स्नुषाया इति द्रौपदीरोदनेन रोदनकारयितृवधूकुचकुंकुमान्यपि धौतानीत्युक्तं पुरस्तात्‘‘पत्न्यास्तवाधिमखकॢप्तमहाभिषेकश्लाघिष्टचारुकबरं कितवैः सभायाम् । स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यैस्तात्स्त्रियो कृतहतेशविमुक्तकेशाः’’ इति ॥ ७ ॥ तृतीयं हेतुमाह—द्यूते त्विति तुरित्यवधारणेऽधर्मेणेत्यनेन संबध्यतेऽधर्मेणैवेत्यर्थः । साधोरिति पितृधनदाययोग्यत्वमाह । साधुत्वे हेतुः । अवलंब आधारयष्टिः दायं स्वप्रातियोग्यं पितृधनं मोहं यथार्थज्ञानग्लानिकारणं पुत्रवचः जुषमाणोंगीकुर्वाण इत्यर्थः ॥ ८ ॥ चतुर्थहेतुमाह—अमृतस्राविणि मोक्षादिसकलपुरुषार्थसाधनानि । पार्थेन युधिष्ठिरेण प्रहितः प्रेषितः यानि वचनानि गुरुमात्रस्यापि वचो ग्राह्यमस्ति किमुत जगद्गुरोरिति कैमुत्यसूचनायोक्तं जगद्गुरुरिति । तस्यापि पुण्यलेशस्यापि। इत्यर्थ इति।‘‘वाक्यं शास्त्रगुरूणां न नष्टपुण्यस्य रोचते’’इत्यादिपुराणादिति भावः॥९॥ विशेषहेतुं पंचममाह इदानीमिति।मंत्राय स्वकर्त्तव्यालोचनाय ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवाऽऽगः ॥ सहानुजो यत्र वृकोदराहिः श्वसनुषा यत्त्वमलं बिभेषि ॥ ११ ॥ पार्थांस्तु देवो भगवान्मुकुंदो गृहीतवान्स क्षितिदेवदेवः ॥ आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः ॥ १२ ॥ स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो ऽयमपत्यमत्या ॥ पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय ॥ १३ ॥ इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण ॥ असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन॥१४॥ क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः ॥ तस्मिन् प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुराच्छ्वसानः ॥ १५ ॥

ऽद्यापि यद्वैदुरिकं विदुरवाक्यंमिति प्रसिद्धं वदंति॥ १०॥तदेवाह । अजातशत्रोरिति त्रिभिः । तवागोऽपराधं सहमानस्य दायं प्रति यच्छ देहि यत्रापराधेऽनुजैः सह वर्तमानो वृकोदररूपोऽहिः क्रोधेन श्वसन् वर्तते । यद्यस्मात्त्वमलमत्यर्थं बिभेषि ॥ ११ ॥ ननु मम तादृशाः पुत्रा बहवः संतीति गर्वं मा कृथा इत्याह । पार्थांस्तु मुकुंद आत्मीयत्वेन गृहीतवान् स च देवः तत्रापि भगवान्न तु प्राकृतः।किंच सह क्षितिदेवैर्विप्रैर्देवैश्चेंद्रादिभिर्वर्तमानः यतोऽसौ तत्रैव विप्रा देवाश्चेत्यर्थः ।स च स्वपुर्यामेव सुखमास्ते नत्वन्यत्र गतः । किंच यदुदेवानां देवः पूज्यः यतोऽसौ तत्रैव यदुप्रवीरा इत्यर्थः । किंच नृदेवेषु मंडलेश्वरेषु दीव्यंति प्रकाशंत इति नृदेवदेवा राजानो विनिर्जिता अशेषा नृदेवदेवा येन यतोऽसौ तत्रैव सर्वे राजानः अतः पार्थानां दायं देहीति ॥१२॥ दुर्योधनस्तन्न मन्यत इति चेदत आह । स एष मूर्तो दोष एव गृहान्प्रविष्ट आस्ते । दोषत्वे हेतुः । पुरुषद्विट् श्रीकृष्णद्वेष्टा कोऽसौ यं त्वमपत्यमत्या पुष्णासि न त्वपत्यमसा न पतत्यस्मादिति ह्यपत्यं प्राहुः । गता श्रीर्यस्मात्स त्वमित्याक्रोशति । अत एनमशैवममंगलमाशु त्यज कथं पुत्रस्त्याज्यस्तत्राह । कुलस्य कौशलाय । 'त्यजेदेकं कुलस्यार्थे 'इति हि न्यायः ॥१३॥ इत्यूचिवानेवमुक्तवान् असौ क्षत्ता विदुरः सतां स्पृहणीयं शीलं यस्य स कर्णदुःशासनशकुं निसहितेन दुर्योधनेनासत्कृतस्तिरस्कृतः ॥ १४ ॥ तिरस्कारमाह । क इति दासीसुतो ह्यत्राह्वाननार्हः । जिह्मश्च कुटिलः । जिह्मतामाह यस्य बलिनाऽन्नेन

किलेति । श्रीकृष्णे संधिकार्यमकृत्वैवोपप्लाव्यं गते सत्युपहूत इत्याह मंत्रिणो हिताहितविचारानिपुणाः ॥१० ॥ तदेव विदुरवाक्यमाह—वृकोदरो भीमः यस्माद्भीमात्॥ ११॥गर्वितं प्रत्याह—पार्थांस्त्विति । आत्मत्वेन मदीया एते इत्येवं स्वीकृतवान् । तत्रापि देवेष्वपि भगवान् सर्वशक्तियुतः प्राकृतः देवतांतरसमः कारणांतरमाह । किंचेति। क्षितिदेवा विप्राः यतो यत्रासौ कृष्णः । इत्यर्थ इति :। स्वस्वामित्वेन देवा विप्राश्चापि तमेवाश्रिता इति भावः । स कृष्णः स्वपुर्यां द्वारकायां कारणांतरमाह—किंचेति । यदुदेवानां यदुवीराणांम् । इत्यर्थ इति । यदुवंशनाथत्वादिति भावः । कारणांतरमाह । अतः सर्वथाबलित्वात् ॥ १२ ॥ तद्राज्यदानम् । अतः श्रीरक्षणाद्धेतोः । एनं दुर्योधनम् । "श्वःश्रेयसं शिवं भद्रम्" इत्यमरः । शिवमेव शैवं तद्भिन्नमशैवममंगलरूपम् । अत्राक्षिपति कथमिति :। न्यायप्रतिपादकं समग्रश्लोकं पठति "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" इति चाणक्यः ॥ १३ ॥ इति शब्दोत्र प्रकारवचनः एवं प्रकारं बहु । तत्र मंत्रप्रदानसमये । स्फुरणं संचलनम् ॥ १४ ॥ मंत्रे दासीसुतः सर्वथा नानेयस्तस्याशुचित्वात् । तदुक्तं मनुना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितो ऽपि ॥ स्वयं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः ॥ १६ ॥ स निर्गतः कौ
रवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि ॥ अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः ॥ १७ ॥ पुरेषु पुण्योपवनाद्रिकुंजे
ष्वपंकतोयेषु सरित्सरस्सु ॥ अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥ १८ ॥ गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोऽधःशयनोऽ
वधूतः ॥ अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि ॥ १९ ॥

पुष्टस्तस्मिन्नेव प्रतीपः प्रतिकूलः परेषां कार्ये वर्तते । अतः पुरान्निर्वास्यताम् । श्वसानः श्वसन् जीवमात्रशेष इत्यर्थः । पाठांतरे श्मशानवदमंगलः ॥ १५ ॥ अत्यु
ल्बणैः कर्णयोर्बाणवत्प्रविशद्भिः परुषवाक्यैर्मर्मसु ताडितोऽपि गतव्यथः । तत्र हेतुः । मायामुरु बहु मानयन्नहो मायाया माहात्म्यमिति तामेव तत्र हेतुं मन्यमानस्तान्निः
सारणात्पूर्वं स्वयमेवायान्निर्जगाम किं कृत्वा एते नूनं मरिष्यंति किं धनुषेति तस्य द्वारि धनुर्निधाय । यद्वा । भीमादिभिः संगत्यास्माभिर्योत्स्यतीति माशंकीति धनुर्निधानम्
॥ १६ ॥ ततो निर्गतस्य तीर्थाटनप्रकारमाह । स इत्यष्टभिः । स गजाह्वयान्निर्गतः सन् तीर्थे पादौ यस्य तस्य हरेः पदानि क्षेत्राणि पुण्यचिकीर्षयान्वाक्रमत् प्रत्यपद्यत ।
कौरवाणां पुण्येन लब्ध इति तेषां भाग्यमेव तेन रूपेण गतमिति सूचितम् । उर्व्यां सहस्रमूर्तिर्ब्रह्मरुद्राद्यनेकमूर्तिः संस्तीर्थपाद् यानियान्यधिष्ठाय स्थितस्तानितानि जगामे
त्यर्थः ॥ १७॥ पुण्यानि यान्युपवनादीनि तेषु कुंजं लतादिगूढस्थानं अपंकानि तोयानि येषां तेषु सरित्सरस्सु च तीर्थेष्वायतनेषु क्षेत्रेषु च कीदृशेषु अनंतस्य लिंगैर्मूर्तिभिः
सम्यगलंकृतेषु । अनन्य एकाकी ॥ १८ ॥ किंच गां पर्यटन् व्रतानि चेरे आचरत् । मेध्या पवित्रा विविक्ताऽसंकीर्णा वृत्तिर्जीविका यस्य । सदाप्लुतः प्रतितीर्थं स्नातः ।

"सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता । मंत्रयेत परं मंत्रं राजा षाड्गुण्यसंयुतम्" । किं च "अन्यानपि प्रकुर्वींत शुचीन्प्राज्ञानवस्थितान् । सम्यगर्थसमाहर्तॄनमात्यान्सुपरीक्षितान्" इति । बलिनाऽपर्वर्जितान्नेन
परेषामस्मच्छत्रूणां पांडवानाम् । अतः परकार्यवर्त्तित्वात् । इत्यर्थ इति । सर्वस्वमस्यापहृत्य निष्कास्यतामयमिति भावः । पाठांतरे श्मशान इति पाठे ॥ १५ ॥ स विदुरः । अत्युल्बणैरतीव कठोरैः । तत्र गत
व्यथत्वे । तामेव तत्र परुषोक्तौ तत्कृतनिस्सारणात् तस्य दुर्योधनस्य ननु तस्य द्वारे धनुः कुतो न्यस्तं तत्पातोऽन्यत्र कुतो न कृत इति तन्निरीक्षणेन तच्छंकापनोदार्थमेव तत्र न्यस्तवानित्याह—यद्वेति । अनेन मा शंकीति
भ्रातुः पुर इत्यनेनाधिक्षेपोत्कर्षः सूचितः ॥ १६ ॥ ततो हस्तिनापुरतः । स विदुरः । तानि जगामेत्यर्थः । यद्वा । यानीति वीक्षया व्याख्येयं यानियानि तत्तुल्ययोगक्षेमत्वात्तत्पदेपि तानितानीति ॥ १७ ॥ पुण्यानि
पवित्राणि उपपदमत्र न स्वार्थपरं तेनोपवनानि वनानि वृंदावनादीनि । पुण्याद्रयो गोवर्द्धनादयः ! पुण्यकुंजाश्च श्यामाकुंजादयो वृंदावनाद्यंतर्गताः कुंजाः अपंकानि अकर्दमानि सरितो नर्मदाद्याः सरांसि पंपासरोवरादीनि
तीर्थेषु पुष्करादिषु क्षेत्रेषु कुरुक्षेत्रादिषु । अनंतस्य हरेः अनेन हरिमूर्त्तीनामनंतभेदाः संतीत्युक्तम् ॥१८॥ अन्यदाह किंचेति । हरितोषणानीति व्रतानामुद्देश्य देवतावशीकरणसमर्थत्वेन व्रतशब्दनिर्वचनसूचितं वृञ् वरणे
इति धातोर्व्रियतेऽनेनैतदित्यस्मिन्नर्थे व्रतमिदं रूपं सिध्यति बाहुलकात्।अत एव वल्कलादिधारित्वादेव"यो विलंघ्याश्रमान्वर्णानात्मन्येव स्थितः पुमान्।अतिवर्णाश्रमो योगी अवधूतः स कथ्यते"इति शिष्टगीतोक्तेः ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान् प्रभासम् ॥ तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥२०॥ तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम् ॥ संस्पर्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगियाय तूष्णीम् ॥२१॥ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः ॥ तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे ॥ २२ ॥ अन्यानि चेह द्विजदेवदेवैः कृतानि नानायतनानि विष्णोः ॥ प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात् कृष्णमनुस्मरंति ॥ २३ ॥ ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च ॥ कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श ॥ २४ ॥ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतम् ॥ आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानाम् ॥२५॥ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलाऽवतीर्णौ ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे ॥२६॥

अधः शयनं यस्य अवधूतोऽसंस्कृतदेहः अवधूतवेषो वल्कलादिधारी अत एव स्वैरलक्षितः ॥ १९ ॥ एकस्यैव चक्रं सैन्यं यस्याम्। एकमेव राजचिह्नं श्वेतातपत्रं यस्यां ताम् । अजितेन श्रीकृष्णेन सहायेन ॥ २० ॥ तत्र प्रभासे परस्परस्पर्धया निमित्तभूतया सुहृदां कौरवाणां विनष्टिं विनाशमशृणोत् । परस्परनाशे दृष्टांतः । वेणुजं वह्निं संश्रयते यद्वनं तद्यथा दग्धं भवति तथा प्रत्यगुद्गमाभिमुखम् ॥ २१ ॥ त्रितादीनामेकादश तीर्थानि तत्तन्नाम्ना प्रसिद्धान्यासेवितवान् ॥ २२ ॥ द्विजदेवैर्ऋषिभिर्देवैश्च कृतानि अंगमंगं प्रति वर्तत इति प्रत्यंगान्यायुधानि तेषु मुख्यं चक्रं तेनांकितानि मूर्धनि हेमकुंभेषु चिह्नितानि मंदिराणि येषु तानि नानाविधानि विष्णोरायतनानि क्षेत्राणि तीर्थानि चासिषेवे । येषां चक्रांकितमंदिरवतां दर्शनाच्छ्रीकृष्णस्मरणं भवति ॥ २३ ॥ अतिव्रज्यातिक्रम्य यावदुद्धवः प्राप्तस्तावत्स्वयमपि यमुनामुपेत्य ॥ २४ ॥ स विदुरः प्राक्तनयं पूर्वशिष्यं नीतिशास्त्रे । पाठांतरे प्राप्तो नयो नीतिशास्त्रं येन तम् । प्रतीतं प्रख्यातं स्वानां ज्ञातीनां भद्रमपृच्छत् । प्रश्ने हेतुः । भगवतः प्रजानां पोष्याणाम् ॥ २५ ॥ प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति । कच्चिदिति प्रश्ने । स्वनाभौ भवः स्वनाभ्यः पाद्मो ब्रह्मा तस्यानुवृत्त्या प्रार्थनयेहावतीर्णौ कुशलमासाते वर्तेते । कृतक्षणौ

भारतमेवेति । कर्मभूमित्वादन्यत्र न गत इति सूचनायैवकारः ॥ २० ॥ अथ प्रभासगमनोत्तरम् । अथ सुहृद्विनष्ट्युत्तरम् । उद्गम आविर्भावस्तस्य संमुखं यस्मिंस्तद्यथा भवति तथा । यत्र सरस्वत्या आविर्भावो जातस्तत्र ययावित्यर्थः । तीर्थविश्वनाथौ तु प्रत्यक् सरस्वतीं पश्चिमवाहिनीं सरस्वतीमिति जगदतुः ॥२१ ॥ तस्यां सरस्वत्यां त्रितस्यर्षेः सुदासस्य राज्ञः । स विदुरः ॥२२॥ इह सरस्वतीतटे मूर्द्धन्यहेमकुंभेषु उपरिष्ठस्वर्णकलशेषु आयतनानां दर्शनात्॥२३॥ततः सरस्वतीतटात् प्रभासक्षेत्रमगात्। सुराष्ट्रो देशः ऋद्धदेशातिक्रमे तीर्थस्नेहाधिक्यहेतुः। सौवीरो देशविशेषः। यद्वा। सुवीराणां सत्पुरुषाणां समूहः सौवीरं तन्मुख्यं येषु तान्कुरुजांगलान् हरिभक्तिप्रधानपुरुषवत इत्यर्थः । तत्र यमुनातटे ॥ २४ ॥ तनोति वंशमिति तनयस्तं वंशो हि द्विधा विद्यया जन्मना च विद्यया शिष्यः जन्मना पुत्रः 'शिष्ये पुत्रे तथा वैश्ये तनयः परिकीर्त्तितः' इति निरुक्तिः । पाठांतरे प्राप्तनयमिति पाठे पोष्याणां पाल्यानाम् ॥ २५ ॥ तावद्वाक्यालंकारे पोष्यकुशलं पोषककुशलाधीनमतः प्रथमं तदेव प्रष्टव्यमित्याशयेन स्वामिचरणैरुक्तं प्रथमं तावदिति । दत्तावसरौ भूभारापाकरणेन दत्तसुखसमयौ लोकानां स्वस्वकार्याकुलत्वाद्दत्तावसरत्वासंभवमिव मन्वान आह । कृतोत्सवौ वेति तच्छत्रूणामपि वैकुंठाद्यवाप्तेः सर्वेषामित्युक्तं स्वामिना 'क्षणः पर्वोत्सवव्यापारेषु मानेप्यनेहसः' इति मेदिनी । तयो रामकृष्णयोरीश्वरत्वात्सदा कुशलत्वेपि । उक्तवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कच्चित् कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः ॥ यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन ॥ २७ ॥
कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः ॥ यं रुक्मिणी भगवतोऽभिलेभे आराध्य विप्रान्स्मरमादिसर्गे ॥ २८ ॥ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् ॥ २९ ॥ कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु सांबः ॥ असूत यं जांबवती व्रताढ्या देवं गुहं योंऽबिकया धृतोऽग्रे ॥ ३० ॥ क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः ॥ लेभेंऽजसाऽधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम् ॥ ३१ ॥

दत्तावसरौ सर्वेषां कृतोत्सवाविति वा । तयोर्नित्यकुशलत्वेऽप्युक्तविशेषणविशिष्टौ शूरसेनस्य गृहे कच्चिदासाते इति प्रश्नः ॥ २६ ॥ यदूनां कुशलं पृच्छति कच्चिदिति नवभिः । भामः पूज्यः शौरिर्वसुदेवः । यद्वा भामो भगिनीभर्ता कुंती वसुदेवस्य भगिनी अतो देवकी पांडोर्भगिनीति लोकव्यवहारः । वरानर्थान् वदान्योऽत्युदारः वराणां तत्पतीनां तर्पणेन संतर्पणेन सह ॥ २७ ॥ वरूथाधिपतिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरं कामं संतमभिलेभे पुत्रं लब्धवती ॥ २८ ॥ सात्वतादीनामधिप उग्रसेनः शतपत्रनेत्रः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परिहृत्य प्राणभयेन दूरात्स्थितमित्यर्थः ॥ २९ ॥ हे सौम्य हरेः सुतस्तेन सदृशः साधु सुखमास्ते गुहं स्वामिकार्तिकेयं अग्रे पूर्वजन्मनि यो भवान्या गर्भे धृतस्तम् ॥ ३० ॥ युयुधानः सात्यकिः क्षेमं कुशलमास्ते । फाल्गुनादर्जुनाल्लब्धं धनुषो रहस्यं येन । तदीयामधोक्षजसंबंधिनीम् ॥ ३१ ॥

शेषणविशिष्टौ सर्वलोकदत्तोत्सवत्वविशिष्टरूपेण कुशलप्रश्नः । सौहार्देन वेति मां प्रतिभाति ॥ २६ ॥ "भामस्तु भगिनीभर्ता दीप्तः पूज्यश्च क्रोधनः" इति निरुक्तिः । पूज्यत्वमन्येषामप्यस्तीति चेदाह—यद्वेति । अतो लोकव्यवहारत्वात् । एतद्व्यवहारस्याप्रसिद्धत्वात्प्रसिद्धार्थमाह । वसुदेवस्य पौरव्या रोहिण्याः पतित्वाद्भामत्वं प्रसिद्धं तदुक्तं हरिवंशे "पौरवी रोहिणी नाम बाह्लीकस्यात्मजाभवत् । ज्येष्ठा पत्नी महाराज दयिताऽनकदुंदुभेः" इति। यद्यपि रोहिण्याश्शंतनुभ्रातृबाह्लीकपुत्रीत्वेन विचित्रवीर्यभगिनीत्वमायाति तथापि पितृपुत्रयोरभेदोपचाराद्विदुरस्यापि कथंचिद्भगिनीत्वं ज्ञेयमिति तत्पतीनां स्वसृपतीनां "वरो जामातरि श्रेष्ठे दक्षिणासहजापयोः" इति सहजां पातीति सहजापः ॥२७॥ विप्रानाराध्येति नरलीलाप्रदर्शितः । स्मरमिति । स्मरस्तस्मिन्प्रविष्टो ज्ञेयोऽन्यथा तस्य साक्षाद्भगवच्चतुर्थव्यूहता न सेत्स्यति एतच्च श्रीकृष्णे नारायणप्रवेशादेव वसुदेवगृहे नारायणोऽवतीर्ण इतिवद्ज्ञेयमन्यथा 'नारायणोंगं नरभूजलायनात्' इत्युक्तिर्न सेत्स्यतीति एवं शेषवसुगुहादिप्रवेशो बलदेवोद्धवसांबादिषु ज्ञेय इति । अंशांशिनोरभेदोक्त्युपचारात्॥२८॥इत्यर्थ इति । कंसो मम प्राणान्हरिष्यतीति भयेन राज्याशां परिहृत्य दूरात्स्थितं यमुग्रसेनं कृष्णोऽभ्यषिञ्चत्स इति भावः । यद्वा । शतपत्रनेत्र एव शापभयेन स्वयं नृपासनस्याशां दिशमपि त्यक्त्वा यमभ्यषिञ्चदित्यन्वयः ॥२९॥तेन हरिणा योंऽबिकया धृत एव न तु ततो जातस्त थाहि—रतिप्रवृत्तशिवयोस्तद्वारणाय देवप्रेषिताग्निना तद्रेतो गृहीत्वा तदसह्यंमत्वा गंगायै दत्तं तयापि तथा मत्वा शरवणे क्षिप्तं तत्र स बालको भूत्वा रुरोद तदा पतित्यक्तार्षिपत्नीभिस्तन्मुखस्तनदाने कृत्तिकारूपाभिर्मतो धृतं स तदैव षण्मुखोऽभूत्तद्वृत्तं नारदाद्यैरुमायै प्रोक्तं तच्छ्रुत्वा तमानाय्य धारयामासेति साधूक्तं धृतोंबिकयाग्रे विस्तृतमेतद्वृत्तं श्रीभारतादौ ॥ ३० ॥ यतिभिर्यत्नशीलैः प्रष्टव्ये ज्ञानाधिक्यं भगवत्प्रियत्वं च हेतुरेवमोपग्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥ ३२ ॥ कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रदाया इव देवमातुः ॥ या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थम् ॥३३॥ अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः ॥ यमामनंति स्म ह शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥ ३४ ॥ अपिस्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये ॥ हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ॥ ३५ ॥

श्वफल्कपुत्रोऽक्रूरः बुधो विद्वान् अतो भगवंतं प्रपन्नोऽनुसृतः अत एवानमीवो निष्पापः । भक्तौ लिंगं योऽचेष्टत व्यलुठत् । प्रेम्णा विभिन्नं विदीर्णं धैर्यं यस्य सः स्वस्ति क्षेममास्ते ॥ ३२ ॥ देवकनामा यो भोजस्तस्य पुत्र्याः । देवक्याः विष्णुः प्रजा पुत्रो यस्यास्तस्या देवमातुरदितेरिव कच्चित् शिवम् । यज्ञवितानरूपमर्थं त्रयी यथा प्रकाशकतःया बिभर्ति तथा दधार ॥ ३३ ॥ सात्वतानामुपासकानां कामान् दोग्धि पूरयतीति कामदुघः । भगवत्त्वे हेतुः । यं शब्दस्य शास्त्रस्य योनिं कारणमामनंति वेदाः । कुतः । मनोमयं मनसः प्रवर्तकम् । तत्कुतः । सत्त्वस्यांतःकरणस्य चतुर्विधस्य तुरीयं तत्त्वं चतुर्थमधिदैवम् । चित्ताहंकारबुद्धिमनसामंतःकरणभेदानां क्रमेण वासुदेवसंकर्षणप्रद्युम्नानिरुद्धा ह्यधिष्ठातारः । मनसश्च शब्दयोनित्वं प्रसिद्धम् । "मनः पूर्वरूपं वागुत्तररूपम्" इति । तथा । "अन्योंऽतर आत्मा मनोमयः" इति प्रस्तुत्य "तस्य यजुरेव शिरः ऋग् दक्षिणः पक्षः सामोत्तरः पक्षः" इत्यादिश्रुतेः । तथा च शिक्षायाम् । "आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया ॥ मनः कायाग्निमाहंति स प्रेरयति मारुतम् ॥ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरम्" इत्यादि ॥ ३४ ॥ अपिस्वित् किंस्वित् अन्ये च स्वस्ति चरंति निजस्य देहादिव्यतिरिक्त

ज्ञेयम् ॥ ३१ ॥ अतोविद्वत्वादेव अत एव भगवदनुसृतत्वादेव । धीरस्य भावो धैर्य्यं कृष्णपादाभ्यामंकिता ये मार्गपांशवस्तेषु ॥ ३२ ॥ भोजो भोजवंश्यः देवक्या गर्भधारणं कादाचित्कं त्रय्या अर्थधारणं च सनातनं कथं तन्निदर्शनं स्याद्वैषम्यादिति चेदाह–दृष्टांतदार्ष्टांतिकयोरेकदेशस्य साम्यं यदि स्यात्तन्न दोषाय 'सर्वसाम्ये ह्यसत्यपि' इत्युक्तेः । या देवकी यथा त्रयी यज्ञवितानार्थप्रकाशिकैव न तूत्पादिका तथा देवक्यपि भगवन्मूर्त्तेः प्रकाशिकैव न तूत्पादिका स्वगर्भेण सह वायुपूरितगर्भेण सह यं चेतसा दधार 'काष्ठा यथानंदकरं मनस्तः' इति श्रीदशमे वक्ष्यमाणत्वात् उत्तानार्थस्वीकारो नोचितो यतस्तत्पत्सेविनामपि गर्भवासो नास्ति तस्य तु किमुतात एव गर्भस्थजीवस्तुतौ वक्ष्यति ' भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादितविष्णुपादः" इति ॥ ३३ ॥ तन्मनःप्रवर्त्तकत्वं मनसः शब्दयोनित्वे प्रमाणमाह–मन इति । श्रुत्यंतरं तथेति स्पष्टार्थत्वान्न व्याख्यातम् । यथा श्रुत्या मनसः शब्दकारणत्वमुक्तं तथा च तथैव । शिक्षायां पाणिनिशिक्षायां इत्यादिरित्यत्रोक्तादिपदेन "प्रातःसवनयोगं तं छंदो गायत्रमाश्रितम् । कंठे माध्यंदिनयुजं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् । सोदीर्णो मूर्द्धन्यभिहितो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पंचधा स्मृतः" इति। अस्यार्थः–आत्मा शरीरेन्द्रियमनोबुद्धिव्यतिरिक्तः बुद्ध्या सहार्थान्वाह्यान्समर्थ्य सम्यगवगम्यार्थप्रत्यायनाय यदि शब्दा उच्चार्य्यन्ते तदा नियुंक्ते मनः वक्तुमिच्छया तच्चात्मनि युक्तं मनः शरीराग्निमाभिमुख्येन हंति प्राप्नोति स च शरीराग्निर्वायुं प्रेरयति उरसि वक्षसि मंद्रं गंभीरं प्रातःसवनेन सह योगोऽस्येति तं तथा च सुयज्ञः मंद्रया वाचा प्रातःसवनमिति गायत्रं छन्दोऽस्य मंद्रस्वरस्याश्रय इति कंठे चरन्वायुर्मध्यमं स्वरं जनयति मध्यंदिनं युनक्तीति माध्यंदिनं सवनभाजं त्रिष्टुप्छंदोनुगामिनमिति । तार्तीयसवनभाजं तारं स्वरं मूर्द्धनि चरन्वायुर्जनयति जागतं छंदोऽनुगच्छतीति तथा तं शीर्षण्यं शिरसिभवं "शीर्षश्छंदसि" इति शिरसः शीर्षादेशः । स वायुरुदीर्ण ऊर्द्धगतः मूर्द्धानं यावदुपरितनां गतिमलभमानः शिरःकपालेनावष्टब्धत्वात्पुनः प्रत्यावृत्य वक्त्रमेवाभिपद्य वर्णान् जनयति तेषां वर्णानां विभागो वक्ष्यमाणरीत्या पंचधेति ॥ ३४ ॥ आत्मनो देहादिव्यतिरिक्तत्वं तु द्रष्टा हि दृश्याद्व्यतिरिक्तो भवति प्रयोजकत्वात् । बुद्ध्यादीनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम् ॥ दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या ॥३६॥ किं वा
कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् ॥ यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रम् ॥ ३७ ॥ कच्चिद्यशोधा रथयूथ
पानां गांडीवधन्वोपरतारिरास्ते ॥ अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ॥ ३८ ॥ यमावुतस्वित्तनयौ पृथायाः पार्थैर्वृतौ
पक्ष्मभिराक्षिणीव ॥ रेमात उद्दाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात् ॥ ३९ ॥

स्यात्मनो दैवं श्रीकृष्णमनन्यवृत्त्या एकांतभक्तिभावेन ये सम्यगनुव्रता अनुसृताः । हृदीकश्च सत्यभामाया आत्मजश्च चारुदेष्णश्च गदश्चादिर्येषां तेऽपि॥ ३५ ॥ इदानीं कुरूनपृच्छति षड्भिः । अपि किम् । स्वदोर्भ्यां स्वबाहुवद्वर्तमानाभ्यां विजयाच्युताभ्यामर्जुनकृष्णाभ्यां धर्ममार्गेण धर्मो युधिष्ठिरः सेतुं धर्ममर्यादां परिपाति । यस्य सभायां विजयानुवृत्त्या जयपरंपरयार्जुनस्य सेवयेति वा एवंभूतं यस्यैश्वर्यमित्यर्थः ॥ ३६ ॥ कृताघेषु स्वकर्तृकमघं दीर्घतमं बहुकालानु चिंतितमहिवदत्यमर्षी भीमः किं व्यमुंचन्नो वा । गदाया विचित्रं विविधं मार्गं चरतः ॥ ३७ ॥ रथयूथपानां मध्ये यशोधाः कीर्तिधारी यद्वा स्वीयानां तेषां कीर्तिप्रदः उपरता अरयो यस्मात् यस्य शरकूटेन बाणसमूहेन गूढ आच्छन्नः ॥ ३८ ॥ उतस्वित्किंस्वित् यमौ नकुलसहदेवौ रेमाते क्रीडात इत्यर्थः । माद्र्याः सुतावपि पृथायास्तनयौ पृथायाः पुत्रैर्वृतौ

कर्तृप्रयोज्यानि करणत्वात्कुठारवदिति प्रयोगात्।"अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यादिश्रुतेः स्वर्गादिफलसाधनानि कर्माणि श्रूयंते स्वर्गश्च । न च शरीरोपभोग्य इति तद्व्यतिरिक्त आत्मा शरीरादेः । "तस्य हैतस्य हृदयाग्रं प्रद्योतने तेन प्रद्योतते नैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः"।इति शरीरापक्रमणा च शरीरादिव्यतिरिक्त आत्मा छांदोग्येपि"एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिःस्वरूपं संपद्य स्वेन रूपेणाभिनिष्पद्यते" इति शरीराद्व्यतिरिक्त एवात्मेति बहुश उक्तं द्वितीयस्कंधेप्येतत्साधितमग्रेऽपि साधयिष्याम इति ॥ ३९ ॥ किमिति प्रश्ने महाभारते कर्णादिभ्यो युधिष्ठिरपराजयस्यापि श्रुतत्वादाह–अर्जुनस्येति । "विजयो वानरध्वजः" इत्यर्जुननामापि विजयः । इत्यर्थ इति । अहो साक्षान्नरनारायणौ यस्याज्ञाकारिणौ कस्तस्मादधिकैश्वर्यवान्न कोपीति भावः । यद्वेतरराजकर्तृकयाऽर्जुनस्य सेवयेत्यर्थः ॥३६॥ अघं रोषम् 'अघो रोषे पि कीर्तितः' इति तीर्थः । किमिति वितर्कें अत्यमर्षी अतीवक्रोधी ॥ ३७॥ कीर्तिधारी बहुरथयूथपजेतृत्वात् । बहुरथयूथपजेतारोऽन्येप्यश्वत्थामादयस्संतीति चेदाह–यद्वेति । तेषां रथयूथपानां स्वयं जित्वा यूथपजयमुद्बोधयतीत्यर्थः ॥ ३८ ॥ सुपर्णाविवेति स्वातंत्र्यमाह इत्यर्थ इति । तयोः सौभ्रात्रमस्तीति भावः । गरुड इत्याध्याहारगौरवादाह।यद्वेति । दृष्टांते द्वित्वं दार्ष्टांतिकापेक्षम् । अभूतोपमालंकारः मुखोद्धृतस्योच्छिष्टत्वेन ग्रहणायोग्यत्वेपि सिंहास्यादुद्धृत वास्त्वातिवत् । वज्रीवक्त्रादितिप्रयोगस्तु लौकिकव्यवहारापेक्षः वस्तुतस्तु इंद्रसमीपात् । यद्वा वज्रीवक्त्रं प्रधानं यत्र स वज्रिवक्त्रो देवसमूहस्तस्मात् । 'वक्त्रं मुख्यास्ययोरपि' इति धरणिः तत्कथमानीतामित्याकांक्षोपशमनायात्र भारतीयं गाथानुसंधेया तथा हि–कद्रूविनता चैते दाक्षायिण्यौ कश्यपभार्ये कश्यपाद्गर्भं गृहीत्वांडानि सुषुवाते कद्रूर्हि पूर्वमेव स्वीयांडानि विभिद्यात्मजान्सर्पाल्लालयामास विनतां प्रति कश्यपेनोक्तं तव अंडे भविष्यतस्ते च सहस्रवर्षादर्वाक्तया न भेत्तव्ये सा चैवं जानंत्यपि कद्रूपुत्रान्वीक्ष्यैकमंडं विभेद पंचशतवर्षांते तन्मध्यतोऽनूरुर्जातः स च जातमात्रो मातरं शशाप यतस्त्वयाऽपूर्णांगस्य ममांडं विभिन्नमतस्त्वं दासी भविष्यसीति । किं च द्वितीयं मम भ्रातुरंडं त्वया न भेत्तव्यमवधेः प्राक् तया तथैव कृतं ततो वर्षसहस्रांते द्वितीयांडाद्गरुडो बभूव स च महाबल्यास । किंच कदाचित्कद्रूविनतयोर्विवादोऽभूत्–सूर्याश्वपुच्छा हारिद्वर्णाः कृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधात्प्रपन्नार्तिजिहीर्षयेशो व्युपैक्षताघं भगवान्कुरूणाम् ॥४३॥ अजस्य जन्मोत्पथ नाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् ॥ नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतंत्रम् ॥४४॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥४५॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥ १ ॥

रामि । कथंभूतस्य मर्त्यविडंबनेनैश्वर्याच्छादकेन मानुष्यानुकरणेन नृणां दृशश्चित्तवृत्तीश्चालयतो भ्रामयतः ॥ ४२ ॥ ननु हरेः किमेवं लीलया येन स्वभक्तानां वनवासादि क्लेशा भवंति स्वस्य च दौत्ये बंधनोद्यमादिपराभवस्तद्वरं तेषामपराधानंतरमेव हननं नापराधोपेक्षेत्यत आह । नूनं निश्चितं त्रिभिर्मदैरुत्पथानामुद्धतानां वधाद्धेतोः प्रपन्नानामार्तिजिहीर्षयेशोघसमय एव हंतुं समर्थोऽपि कुरूणामघमुपैक्षत । तदानीमेव तेषां वधे सर्वदुष्टराजवधो न स्यादित्याशयेनेत्यर्थः । "विद्यामदो धनमदस्तथैवाभिजनो मदः ॥ एते मदा मदांधानां त एव हि सतां दमाः" इति त्रयो मदाः ॥ ४३ ॥ सर्वदुर्वृत्तवधाद्यर्थमेव भगवतो जन्मकर्माणि नान्यथेति कैमुत्यन्यायेनाह । अजस्यापि जन्म अकर्तुरपि कर्माणि पुंसां ग्रहणाय कर्मसु प्रवृत्तये अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकथा तावदास्ताम् । को वाऽन्योऽपि गुणानां परो गुणातीतो देहयोगं कर्मविस्तारं वाऽर्हतीति ॥ ४४ ॥ तस्मादेवंभूताचिंत्यमायाविनोदस्य कथां कथयेत्याह । तस्य प्रपन्ना येऽखिललोकपालास्तेषामन्येषां च स्वीयेऽनुशासने स्थितानामर्थाय प्रयोजनाय यदुषु जातस्य तीर्थं संसारतारिणी कीर्तिर्यस्येति ॥ ४५ ॥ इति श्रीभागवते तृतीयस्कंधे टीकायां प्रथमोऽध्यायः ॥ १ ॥ ॥ द्वितीये कृष्णविश्लेषादनुशोचन्नथोद्धवः ॥

प्राचीनतरपुस्तकेषु 'कुपुत्रान्' इति पाठः । समनुव्रतेन अनुसृतेन सुहृत्-प्रत्युपकारमनपेक्ष्योपकारकर्त्ता भ्रात्र इति । "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इति सम्प्रदानत्वाच्चतुर्थी ॥ ४१ ॥ तस्य धृतराष्ट्रस्यैवं दुश्चेष्टितम् । तिरस्कृतिनिष्कासनादिरूपं तस्य हरेः पदवीं चरणन्यासवर्त्मचरणौ च पश्यन्निति विश्वनाथः । हरेः पदवीं निवृत्तिमार्गमिति तीर्थः । पद्धयामवाति यतः सा पदवी माया तां "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति॥ श्रीमुखोक्तेः । भगवता मम हस्तिनापुरतो निष्कासनं धृतराष्ट्रव्यवहारावेशानिवृत्तिपूर्वकं स्वस्मिन्नावेशाय कृतमिति पश्यन् । गतविस्मयो नष्टसंदेहः प्राप्ताश्चर्यो वा ॥ ४२ ॥ उपेक्षा औदासीन्यम् । इत्यर्थ इति । एते दुर्योधनादयः । स्वसदृशान्सर्वान्स्वेषु संगमयिष्यंति ततो वधार्थं पृथक्पृथगन्वेषणापेक्षयैकत्र संगतान् हनिष्यामीति भावः आभिजनः परिजनः पुत्रभ्रातृसुहृन्मित्रसैन्यादिरिति यावत् ॥ ४३ ॥ अन्यथा लोकसंग्रहाभावे परमानंदस्वरूपस्य भगवतः कर्मकरणं न संपद्यते "यदि ह्यहं न वर्त्तेयं जातुकर्मण्यतंद्रितः । मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः" इति गीतासूक्तेः।मूले न नु इति च्छेदेन पदद्वयं बोध्यं नेत्यस्यान्यथेत्यनेनं संबंधः । वितर्कार्थस्य नुपदस्यार्थश्चेदेवं तर्हीति । यद्वा । पुंसां सर्वेषां ग्रहणाय स्वस्मिन्नाकर्षणाय "यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः" इति संदर्भकारः । विश्वनाथस्तु पुंसां मुक्तमुमुक्षुविषयिणां सर्वेषां ग्रहणाय 'निवृत्ततर्षैरुपगीयमानात्' इत्याद्युक्तेः । उत्पथानां वेदमार्गाननुयायिनां नाशनाय यद्वोत्पथो नरकादिस्तन्नाशनाय मोक्षाय गुणातीतो ब्रह्मनिष्ठः। यद्वा । न त्वन्यथेतियथा जीवानां स्वकर्माधीनो देहयोगस्तथा नेत्यर्थः।देहो उतेति वार्थे इत्यभिप्रेत्याह-कर्मविस्तारं वेति । कर्मतंत्रं देहयोगं नार्हतीत्युक्त्या वस्तुतः परमेश्वरस्य मायया योगासंभवात् । चिदानंदघनोकर्मतंत्रस्तस्य देहो युज्यत एवेति लक्ष्यते ॥ ४४ ॥ यतः श्रोतृवक्तृजनसंसारहारिणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो पृथाऽपि म्रियतेऽर्भकार्थे राजर्षिवर्येण विनाऽपि तेन ॥ यस्त्वेकवीरोऽधिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ॥ ४० ॥ सौम्यानुशोचे तमधः पतंतं भ्रात्रे परेताय विदुद्रुहे यः ॥ निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान्समनुव्रतेन ॥ ४१ ॥ सोऽहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः ॥ नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन्गतविस्मयोऽत्र ॥ ४२ ॥

सुपर्णाविव रेमाते । किं कृत्वा पराहुर्योधनात्स्वरिक्थं स्वीयं राज्यमुद्दाय आच्छिद्य वज्रिवक्रादिंद्रस्य मुखात्स्वरिक्थममृतं गरुड इवेति । यद्वा । सुपर्णाविवेति । यदि द्वौ गरुडावमृतमानयेतां तर्हि तद्वत् । अक्षिणीवेति मणीवादिगणत्वात्संधिः ॥ ३९ ॥ पृथायाः किं तु कुशलं पृच्छेयम् । यतस्तस्याः पांडुना विना प्राणधारणमेवाश्चर्यमित्याह। अहो इति । म्रियते जीवति न चात्याश्चर्यम् । यतोऽर्भकार्थे म्रियते न भोगार्थे तथापि त्वाश्चर्यमेवेत्याह । तेन तथाभूतेन विना । तदेवाह । यस्त्विति । धनुरेव द्वितीयं सहायो यस्य ॥ ४० ॥ पृथार्भकार्थे जीवतीति यदुक्तमेवेत्याह । हे सौम्य तं धृतराष्ट्रं जीवंतमनुशोचामि तत्किं अधः पतंतं तत्र हेतुः परेताय मृताय भ्रात्रे पांडवे तत्पुत्रद्रोहेण यो विदुद्रुहे द्रोहं कृतवान् । किंच जीवतोऽपि भ्रातुर्ममापकृतवानित्याह । येन सुहृद्भ्राताहं स्वपुर्याः सकाशान्निर्यापितो विवासितः ॥ ४१ ॥ अहो खलु विस्मयः जानतोपि तस्यैवं दुश्चेष्टितं यतस्त्वं साधुरपि दुःखं प्रापितोऽसीत्यत आह । सोऽहं हरेः प्रसादात्तस्य पदवीं माहात्म्यं पश्यन् गतविस्मयोऽत्र भूतले नान्योपलक्ष्यो गूढः सन् सुखं विच

वर्णा वेति तत्र विनतयोक्तं हरिद्वर्णाः।कद्र्वा चोक्तं कृष्णवर्णा इति।तच्छ्रुत्वा कद्रूरुवाच यदि कृष्णवर्णाः सूर्याश्वपुच्छास्तर्हि त्वं मे दासी भविष्यसि हरिद्वर्णाश्चेत्तर्हि तवाहं दासी भविष्यामीति ताभ्यां पणः कृतः पुनरन्योन्यं ताभ्यामुक्तं तत्र गत्वा द्रष्टव्यास्ते ततो गमनसमये कद्रूः स्वात्मजान्नागान्प्रोवाच हे पुत्रा यूयं रोमरूपा भूत्वा श्यामीभूय सूर्याश्वपुच्छेषु लग्ना भविष्यथान्यथा सर्वेऽग्नौ धक्ष्यंति मदाज्ञास्वीकारे चाहं विनतादासी न भविष्यामीति ते च तथैव चक्रुः ततस्ते उड्डीय कृष्णवर्णानेव ददृशतुः तदा च विनता कद्रूदासी जाता कदाचिद्गरुडः स्वमातरं नागान्वहंतीं स्वयं च मात्रा सह नागान्वहन् खिन्नः प्रोवाच मातस्त्वं कथं दासी जाता तया स्ववृत्तं यथावदुक्तं गरुडाय सूनवे स च श्रुत्वोवाच मातरेतां त्वमेव पृच्छ कथं मम दासीत्वं नंक्ष्यति सा च तथैव पप्रच्छ तयोक्तं यदि त्वदात्मजो गरुडः स्वर्गान्मदात्मजार्थममृतमानयेत्तदा ते दासीभावो नंक्ष्यत्यन्यथा नेति तया च तच्छ्रुत्वा गरुडायोक्तं स च स्वर्गं गत्वेंद्रादीन्निर्जित्यामृतकलशमानयामास इंद्रश्च गरुडं पप्रच्छ किमर्थं देवभोग्यममृतं मर्त्यलोकं नेष्यसि स उवाच नागार्थं तत इंद्रः प्रोवाच ते तु स्वभावत एव क्रूरा अमृताशनेन ते सर्वे निर्भया जगन्नाशयिष्यंतीति न देयमेतत्तेभ्य इति ततो गरुड आह मया तत्रामृतं नेतव्यमेव न तेभ्यो दाने हठः किं तु मातृदासीत्वापनयन एव हठोऽतस्त्वया ततः कथंचिदानेयमित्युक्त्वाऽमृतकलशं गृहीत्वा कद्रूं प्रोवाचैतदमृतकलशमानीतं मया मन्मातुर्दासीत्वं गतं तया त्रिरुक्तं गतमिति।तत इंद्रो नागानमृतपाने प्रवृत्तान्विप्रो भूत्वा प्रोवाच नेदमस्नात्वा दानाद्यकृत्वा च पेयं ते च तच्छ्रुत्वा स्नानार्थं गता इंद्रोऽमृतकलशमादाय स्वर्गं ययाविति सर्वं महाभारते प्रथितम्॥ ॥३९॥ अत्राक्षिपति न चेति । तथापि भोगार्थं विनापि अर्भकार्थे युधिष्ठिरादिबालकपालनार्थं यदि युधिष्ठिरादयो नाभविष्यंस्तदा सा मारिष्यदेवेत्यर्थः।तथाभूतेन पांडुना तदेव तथाभूतत्वमेव।रथमधिरूढोऽधिरथः "द्विती या तिथिभित्पत्न्योः पूरणे तूभये त्रिषु" इति मेदिनी । 'द्वितीया सहकारिणी' इति च कोशांतरम् । ककुभो दिशः 'दिशश्च ककुभः काष्ठाः' इत्यमरः ॥ ४० ॥ धृतराष्ट्रं न शोचामि तदधःपतनं शोचामीति । यद्वा पांडुं न शोचामि सद्गत्यर्हत्वात् । धृतराष्ट्रं शोचामि तद्वैपरीत्यादित्याह–सौम्येति । तच्छोचनं किं कुतः तत्राधःपतनेन केवलं मृतमेव भ्रातरं दुद्रुहेऽपि तु जीवंतमपि मां द्रुग्धवानित्याह–किं चेति । येन धृतराष्ट्रेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुकउवाच ॥ इति भागवतः पृष्टः क्षत्त्रा वार्तां प्रियाश्रयाम् ॥ प्रतिवक्तुं न चोत्सेह औत्कंठ्यात्स्मारितेश्वरः ॥ १ ॥ यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन्यस्य सपर्यां बाललीलया ॥ २ ॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन् ॥ ३ ॥ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशम् ॥ तीव्रेण भक्तियोगेन निमग्नः साधुनिर्वृतः ॥ ४ ॥ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः ॥ पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ॥ ५ ॥ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ॥ ६ ॥ उद्धव उवाच ॥ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह ॥ किं पुनः कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ॥ ७ ॥

क्षत्रे बालचरित्राणि कृष्णस्यावर्णयच्छ्वसन् ॥ १ ॥ तदेवं प्रियवार्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहौत्कंठ्यावेशेन प्रतिवचनासामर्थ्यमाह षड्भिः । इतीति । स्मारितः ईश्वरो यस्य ॥ १ ॥ एतदेव कैमुत्यन्यायेन प्रपंचयति । य इति द्वाभ्याम् । यः पंचवर्षोऽपि बाललीलयेति कृष्णं कंचित्परिकल्प्य कल्पितैरेव साधनैः परिचर्यां कुर्वन् प्रातर्भोजनार्थं प्रार्थितोऽपि तद्भोजनं नैच्छत् ॥ २ ॥ जरसं वृद्धत्वं गतः प्राप्तः ॥ ३ ॥ श्रीकृष्णांघ्रिसुधया साधु निर्वृतस्तस्यामेव तीव्रेण विवशत्वापादकेन भक्तियोगेन भृशं निमग्नश्च ॥ ४ ॥ पुलकैरुद्भिन्नान्युज्जृम्भितानि सर्वाण्यंगानि यस्य । मीलंत्या दृशा शुचाऽश्रूणि मुंचंस्तेन विदुरेण पूर्णार्थः कृतार्थो लक्षितः । यतो भगवति यः स्नेहस्तस्य प्रसरः पूरस्तस्मिन् संप्लुतो निमग्नः ॥५॥ भगवानेव लोकस्तस्मान्नृलोकं देहानुसंधानं प्रत्यागत उत्स्मयन् यदुकुलसंहारादि भगवच्चातुर्यस्मरणेन विस्मयं प्राप्नुवन् ॥ ६ ॥ श्रीकृष्णविरहेण संतप्यमानः प्रत्याह । श्रीकृष्ण एव द्युमणिः सूर्यस्तस्य निम्लोचेऽस्तमये सत्यजगरेण कालमहासर्पेण गीर्णेषु निगिलितेषु नो गृहेषु त्वत्पृष्टानां बंधूनां किं

तत्कथा तस्माद्धेतोः तस्याजस्य वस्तुतो जन्मरहितस्य तीर्थकीर्त्तेरिति भगवद्यशोरूपगंगाप्रवाहे मां स्नापयेति भावः ॥ ४५ ॥ इति श्रीभागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे प्रथमोऽध्यायः ॥ १ ॥
श्वसन् श्रीकृष्णविरहेण निश्वासं त्यजन् ॥ (१) ॥ अधुनाऽध्यायत्रयेण विदुरानुयोगप्रतिवाक्याय संक्षिप्य कृष्णकथा वक्ष्यति । औत्कंठ्यावेशेन भक्त्युद्रेकेण यद्वा चित्तद्रवणहेतुः भूतौत्सुक्येन स्मारितं स्मरणविषयं प्रापितः ॥१॥एतदेव प्रतिवचनादानमेव य उद्धवः बाललीलया पञ्चालिकाभिः खेलन् कंचित्पंचालिकाविशेषम् ॥२॥ वृद्धत्वं चिरसेवित्वमित्यर्थः। ''तत्र प्रवयसोप्यासन्युवानोतिबलीयसः'' इत्युक्तिविरोधात् यद्वा काले समयेपि हरिसेवाप्रभावेण जरसं न गत इत्यर्थः । भर्तुः प्रभोः॥३॥ विभक्तिविपरिणामेनावृत्त्या योजनादाह । तस्यामेवेति । स उद्धवः ॥४॥५॥ यद्वा भगवल्लोकात् भगवन्नित्यलीलामयद्वारकाख्यात् । नृलोकं विदुरादिमयं मनुष्यलोकम् । आगतोऽनुसंदधानः उत्स्मयन् तदनुभवेनोष्ठैरानंदित इत्यर्थमाह संदर्भकारः ॥६॥ अस्तमयेऽस्तं नित्यनिवासं श्रीगोलोकमये प्राप्ते सतीत्यर्थः।''अस्तं क्षिप्तेप्यवसिते वासांतद्धर्यंतपर्वतः''इति धरणिः। अजं बस्तं गिरतीत्यजगरः। महाकालपक्षे अजं ब्रह्माणं द्विपरार्द्धांते गिरतीति तथा नु वितर्के हेत्यनेन कुशलप्रश्नप्रत्युत्तरारंभो न कार्यः। विप्रशापेन सन्निकृष्टनाशस्य प्रसिद्धत्वादिति दर्शयति 'प्रत्यारंभे प्रसिद्धेह' इति यादवः । विश्वनाथस्तु शोकव्याकुलं विदुरमाश्वासयितुं सिद्धांतं ब्रुवन्बहिर्वृत्त्या तद्विरहसंतापलोकानां दुरवस्थानं च दर्शयति कृष्ण एव द्युमणिस्तस्य निम्लोचेऽस्तमये सति महासर्परूपशोकांधकारेण गीर्णेषु अनेनेति ध्वनितं यथा ज्योतिश्चक्रे स्थितस्यैव द्युमणेरश्वरथस्य रथादिसपरिकरविशिष्टस्य यस्मिन्वर्षेऽस्तसमयो दृश्यते तदन्येषु वर्षेषु तदैव तस्योदयपूर्वाह्णमध्याह्नादयो दृश्यंते तथैव गोकुलमथुराद्वारकास्थस्य सपरिकरस्य तत्तल्लीलामृतमजितजगज्जनस्यैव कृष्णस्य यस्मिन्ब्रह्मांडेंतर्द्धानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्भगो बतलोकोऽयं यदवो नितरामपि ॥ ये संवसंतो न विदुर्हरिं मीना इवोडुपम् ॥ ८ ॥ इंगितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः ॥ सात्वतामृषभं सर्वे भूतावासममंसत ॥ ९ ॥ देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः ॥ भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ॥१०॥

न कुशलं ब्रूयाम् ॥ ७ ॥ अनुशोचन्नाह । दुर्भगो भाग्यहीनः ये सह वसंतोऽपि श्रीहरिरयमिति न विदुः यथा क्षीरसमुद्रे जातमुडुपं चंद्रं तदा तत्रत्या मीनाः केवलं कमनीयः कश्चिज्जलचर इत्येवं विदुर्न त्वमृतमय इति तद्वत् यद्वा जले प्रतिबिंबितं चंद्रं यथेति ॥ ८ ॥ भाग्यहीनत्वादेव न विदुर्न तु ज्ञानसामर्थ्याभावादित्याह । इंगितं चित्तस्थं जानंतीति तथा पुरु अतिशयेन प्रौढा निपुणा एकस्मिन्नेव स्थाने आरमंतीति तथा एवंभूता अपि भूतानामावासमीश्वरं संतं सात्वतामृषभं सात्वतश्रेष्ठममन्यत ॥९॥ येकेऽपि भाग्यवंतस्तमिंगितादिनेश्वरतया जानंतोऽप्यतद्विदां प्रवृत्त्या वा मुह्येयुरिति । किं भाग्यवत्तयापि तत्राह । देवस्येति।ये यादवा देवस्य मायया स्पृष्टा व्याप्ता यादवोऽयमस्मद्बंधुरिति वदंति । ये च शिशुपालादयोऽसदेवान्यद्वैरमाश्रिता निंदंति । तेषां वाक्यैरात्मनि हरौ उप्तात्मनो निक्षिप्तचित्तस्य मादृशस्य बुद्धिर्न भ्राम्यते मोहं न प्राप्यते । अन्ये तु

दृश्यते तदन्येषु ब्रह्मांडेषु जन्मोत्सवरासोत्सवकंसवधरुक्मिण्यादिपरिणयनोत्सवाद्या लीला दृश्यंते ज्योतिश्चक्रे सूर्यस्योदयपूर्वाह्णाद्याः प्रतीयमानत्वादवास्तवाः कृष्णस्य तु जन्माद्यास्तत्र नित्यत्वाद्वास्तवा एवेति विशेषः । सर्वासां लीलानां नित्यत्वं प्रथमस्कंधे दर्शितं यथा सूर्यास्तमयसंबंधिनि वर्षे अंधकारेण कमलानि म्लायंति चक्रवाका विभिंदंति विलपंति च चोरदस्युराक्षसप्रेतोलूकाद्या हृष्यंति तथैव श्रीकृष्णांतर्द्धानसम्बान्धिनि ब्रह्मांडे दुःखाजगरग्रस्ते साधवो म्लायंति धर्मसेतवो भिद्यंते कृष्णानुरागिणो विलपंति अधार्मिका भगवद्बहिर्मुखा हृष्यंतीति ॥ ७ ॥ उद्धवेन क्षीरसमुद्रे चंद्रवासस्यादृष्टचरत्वादाह—यद्वेति । यद्वा दक्षशापनष्टस्वकलावाप्तये प्रभासे समुद्रमग्नं तपंतमुडुपं मीना यथा मधुरोज्ज्वलत्वेनैव विदुः । न तु देवोत्तमत्वेनेति संदर्भः । विश्वनाथस्तु—यथा समुद्रगा मीनाः कमनीय आस्माकीनो जलचरः कश्चिदित्येव विदुर्नतु सुधांशुर्निशापतिरिति तद्वद्यदवोपि कृष्णमाधुर्यमेव जानंति न त्वैश्वर्यमिति दुःखेन ब्रवीमि दुर्भग इत्यादि । वस्तुतस्तु—दुर्ज्ञेयो भगो माहात्म्यं यस्य स तथा ऐश्वर्यज्ञाननिष्ठेभ्योपि माधुर्य्यज्ञाननिष्ठानामुत्कर्षस्य दशमे व्याख्यास्यमानत्वात् । अत्र न विदुरिति वर्त्तमाननिर्देशेन द्वारिकावासिनां यदूनां च भगवन्नित्यसंगित्वज्ञापनाय भो विदुर त्वत्पृष्टकुशला यादवादयः संप्रति श्रीभगवता सहैव सुखेन क्रीडंति केवलं प्रष्टा त्वं पृष्टश्चाहामित्यावामेव तत्संवासविरहितत्वादकुशलिनावत आवामेवावां शोचाव इतिभावः । अत्र यदि तदानीं कृष्णेन सह तेषां संवासो नाभविष्यत्तदा नावेदिषुरित्येवावक्ष्यदिति ज्ञेयम् । केचित्तु यथा मीनास्तिमिंगिलादयो हरिं मत्स्यरूपिणमुडुपं संसारतारकं न विदुस्तथेत्याहुः । समुद्रमथनात्पूर्वं मीनाः सह वसंतोप्युडुपं हरिं संतापहारिणं न विदुस्तथेत्यन्ये ॥ ८ ॥ सर्वभूताधिवास इति श्रुतिप्रसिद्धमविशेषेण सकलजगन्निवासमीति तीर्थः । चक्रवर्त्ती तु ननु शुद्धप्रेमैकमाधुर्यभुजो गोकुलवासिन इव द्वारिकावासिनो नखल्वैश्वर्यज्ञानशून्याः संति तत्कथं न विदुरिति ब्रवीमि तत्राह—इङ्गितज्ञा इति । ''इंगितो हृद्गतो भावः'' इत्यभिधानात् । तदीयचित्तस्थमपि वस्तु जानंति किं पुनः शरीरस्थं सौंदर्य्यलावण्यादिकं तत्र हेतुः पुरुप्रौढा सूक्ष्मधियः । तदप्यैश्वर्यज्ञानाभावमाह—एकस्मिन्नेवासनशयनादावारमंत इत्येकारामाः । सात्वतां स्वेषामेव ऋषभं नित्यकुलपतित्वेन वर्तमानं कृष्णं भूतावासं सर्वभूतेष्ववसंतमंतर्यामिणमेवामंसत 'एको देवः' इत्यादौ 'सर्वभूताधिवासः' इत्यंतर्यामिश्रुतेः । न तु स्वयं भगवत्त्वेन साक्षान्नारायणस्याप्यंशिनमित्यतस्ते हरिं न विदुरित्यहमवोचमिह जगति समुचितं जानंतोऽजानंतश्च न निंद्यंते निंद्यंते तु तन्मध्यवर्त्तिनोऽर्द्धमर्द्धं जानंत इति भावः । ॥९॥ इत्यर्थ इति । शिशुपालप्रभृतयः सर्वे ज्ञानिन एव न तद्वाक्य श्रद्धेयमिति भावः । तद्वाक्यैः कृष्णः शरीरं त्यक्त्वा वैकुंठं गतस्तथा धृतराष्ट्रजरासंधादिमहाराजद्रोहेण सकुलमेव नाशं प्राप्त इत्येवंरूपैः हरौ सच्चिदानंदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ॥ आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनम् ॥ ११ ॥ यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् ॥ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणांगम् ॥ १२ ॥ यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ॥ कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥ १३ ॥

मूढा एवेत्यर्थः ॥ १० ॥ कोऽसौ हरिरित्यपेक्षायामाह । प्रदर्श्येति । न तप्तं तपो यैरतोऽवितृप्ता दृशो येषां तेषां स्वबिंबं श्रीमूर्तिमेतावंतं कालं दर्शयित्वा योंऽतर्हितवान्। लोकस्य लोचनमादायाच्छिद्य तादृशस्यान्यस्य विलोकनीयस्याभावात् ॥ ११ ॥ तदेव बिंबं वर्णयति त्रिभिः । यन्मर्त्यलीलास्वौपयिकं योग्यं स्वस्यापि विस्मयजनकम् । यतः सौभगर्द्धेः सौभाग्यातिशयस्य परमं पदं परा काष्ठा भूषणानां भूषणान्यंगानि यस्मिन् ॥ १२ ॥ दृशां स्वस्त्ययनं परमानंदकरम् । त्रिभुवनस्थो लोकः प्राणिमात्रम् अद्येदानीमिह बिंबेऽर्वाक्सृतावर्वाचीनसंसारनिर्माणे मनुष्यनिर्माणे वा यत्कौशलं नैपुण्यं तत्कार्त्स्न्येन गतमुपक्षीणं नातः परं तस्य कौशलमस्तीत्येवं मेने । तन्नू

'ओहाङ् गतौ' धातोर्हानं इति ज्ञानं 'रमु' क्रीडायाम् अतो रीत्यतिशायितसुखम्। तेन हश्चासौरिश्चेति हारिः सच्चिदानंदलक्षणः कृष्ण इति ज्ञेयम् ॥ १० ॥ नेत्यव्ययमल्पार्थेत्र ज्ञेयम् । अल्पतपसामित्यर्थः । लोकस्य लोचनं यत्र तत्स्वरूपं गृहीत्वा योंतरधात् तदुक्तं मौशलपर्वणि "कृत्वा भारावतरणं पृथिव्याः पुरुलोचनः । त्याजयित्वा तनूः कृष्णः प्राप्तः स्वस्थानमुत्तमम्" इति । मोचयित्वा भारावतरणात्त्याजयित्वा न तु मुक्त्वेत्यर्थः ॥ ॥ ११ ॥ यद्बिंबमंतरधात्तदेवेत्यर्थः । स्वयोगमायाबलं स्वचिच्छक्तिवीर्यं न च किमप्यैश्वर्यं माधुर्यं वा निह्नुत्य स्थापितमपि तु सर्वस्वमेवात्र बिंबे निक्षिप्तं नापि वैकुंठेप्येवं बलं दर्शितमिति भावः । गृहीतमिति । "स्थितिसर्गनिरोधेषु गृहीता मायया विभोः" इत्यत्र मायया गुणगृहीता इति वदभेदेपि भेदोक्तिः बुद्धिर्हि भगवती अभेदेपि भेदं जनयतीति न्यायात्। गृहीतमाविष्कृतमिति संदर्भः । यद्वा । यद्बिंबं दर्शयता दर्शयितुं स्वयोगमायाबलं गृहीतं रासमहिषीविवाहादिषु तथा प्रसिद्धं बलं द्योतयति स्वस्य च वैकुंठस्थस्य श्रीनारायणस्वरूपस्यापि विस्मापनम् । अहोरूपमहो साद्गुण्यमिति चमत्कारप्रापकम् । अस्यावताररूपगुणलीलादिदर्शिनां वैकुंठपार्षदादीनां का वार्त्तेति भावः । अत एव सौभगर्द्धेः सौभाग्यसंपत्तेः । परं पदं परावधिस्थानम् अतो वैकुंठनाथस्यापि तद्दर्शनेच्छा भवति "द्विजात्मजा मे युवयोर्दिदृक्षुणा" इत्युक्तेः । ननु तस्य भूषणं त्वस्ति सौभाग्यजनकं तत्राह—भूषणेति । भूषणानि भूषयंतीति भूषणभूषणानि तादृशान्यंगानि यस्येति परमसौंदर्यमुक्तम् । मर्त्यलीला बाल्यकौमारपौगंडादिलीला उपयातीति मर्त्यलीलोपयिकं नराकृतीत्यर्थः । उपपूर्वाद्यातेरौणादिककिकप्रत्यये रूपमुपयिकमिति ॥१२॥ अर्वाक्सृत्यंतर्ग तपश्चादिरचनकौशलमप्यस्तीति चेदाह—मनुष्येति । यद्यपि विधातृरचितत्वं तत्र नास्ति तथापीयमज्ञलोकदृष्टिरिति ज्ञेयम् ।तीर्थस्तु—इह जीवराशौ त्रिषु वेदादिषु कालेषु वा लोको ज्ञानं यस्य स त्रिलोको वेदैकप्रमाणो जनः त्रिषु लोकेषु स्थितो जनस्त्रिलोकः त्रिभिर्ब्रह्मादिभिर्वा लोक्यते स्वहृदये चिंत्यते उत्पत्त्याद्यर्थ इति वा । त्रिभिर्दानयज्ञोपासनाभिर्लोकः स्वर्गादिर्यस्य स भूमिष्ठ इत्यर्थः । धर्मसूनो राजसूये उपगतं सर्वाधिकत्वेन स्थितं यद्वपुर्निरीक्ष्य सृतौ मनुष्यसृष्टिमार्गे प्रवर्त्तमानस्य विधातुर्यत्कार्त्स्न्येन कौशलं निर्माणपाटवं तदर्वाक् नचिमित्यमन्यत श्रीकृष्णसौंदर्यस्याकृत्रिमत्वादत्युत्कृष्टत्वमुक्तमत्रेत्याह ॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः ॥ १४ ॥ स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा ॥ परावरेशो महदंशयुक्तो ह्यजोऽपि जातो भगवान् यथाऽग्निः ॥ १५ ॥ मां खेदयत्येतदजस्य जन्मविडंबनं यद्वसुदेवगेहे ॥ व्रजे च वासोऽरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनंतवीर्यः ॥ १६ ॥ दुनोति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः ॥ तातांब कंसादुरुशंकितानां प्रसीदतं नोऽकृतनिष्कृतीनाम् ॥१७॥ को वा अमुष्यांघ्रिसरोजरेणुं विस्मर्तुमीशीत पुमान्विजिघ्रन् ॥ यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिरश्चकार ॥ १८ ॥ दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः ॥ यां योगिनः संस्पृहयंति सम्यग्योगेन कस्तद्विरहं सहेत ॥ १९ ॥

तैर्विधातुः सृज्यत्वाभावेऽपि लोकदृष्टिरियमुक्ता ॥ १३ ॥ ॥ अनुरागेण प्लुतो व्याप्तो हासो रासो विनोदश्च लीलाऽवलोकश्च तैः स्वकृतहासाद्यनंतरं प्रतिलब्धो मानो याभिस्ताः । दृग्भिः सहानुप्रवृत्ता गच्छंतं तमेवानुगता धियो यासां ताः कृत्ये शेषो यासां ताः । असमापितकृत्या एव तस्थुः ॥ १४ ॥ एवंभूतबिंबप्रदर्शने कारणमाह । स्वीयान्येव शांतान्यशांतानि च रूपाणि तत्र शांतरूपेष्वितरैरशांतैर्दैत्यादिभिः पीड्यमानेष्वनुकंपितः कृतानुकंप आत्मा यस्य । अजोऽपि जात आविर्भूतः महाभूतरूपेण नित्यसिद्ध एवाग्निर्यथा काष्ठेष्वाविर्भवति तद्वत् । अजस्य जन्मनि हेतुः । महान्महत्तत्त्वमंशः कार्यलेशो यस्याव्यक्तस्य तन्महदंशं तद्युक्त इति ॥ १५ ॥ ननु कुतोऽसौ परावराणामीशः पारतंत्र्यप्रतीतेस्तत्राह । द्वाभ्याम् । मामप्येतद्दुर्वितर्क्यं दुर्घटं च खेदयति तदेवाह । वसुदेवगेहे बंधनागारे यज्जन्मनो विडंबनमनुकरणं न तु नृसिंहवदकस्मादाविर्भावः । कंसभयादिव निलीय व्रजे वासश्च कालयवनादिरिपुभयादिव पुरान्मथुराया व्यवात्सीत् पलायत ॥१६ ॥ एतच्च हरेश्चरितं स्मरतो मम चेतः कर्मभूतं दुनोति व्यथयति । तदेव दर्शयति हे तात हे अंब युवां प्रसीदतं प्रसादं कुरुतम् । न कृता निष्कृतिः शुश्रूषणं यैस्तेषां नोऽस्माकमिति बहुवचनं तु रामाद्यभिप्रायम् ॥ १७ ॥ ननु तर्ह्यनीश्वर एव किं न स्यात्तव तु श्रद्धामात्रमेतत्तत्राह त्रिभिः । को वा अंघ्रिसरोजे यो रेणुस्तमपि विजिघ्रन् सेवमानः पुमान् विस्मर्तुमीशीत शक्नुयात् । विस्फुरन् भ्रूविटपो भ्रूलता एव कृतांतस्तेन ॥ १८ ॥ न च तस्येश्वरत्वं साधनीयं भवद्भिरपि दृष्टत्वादित्याह । दृष्टेति । यां सिद्धिं सम्यग्योगेन प्राप्तुमिच्छंति ॥ १९ ॥

यस्य कृष्णस्य ॥ १४ ॥ एवं भूतोऽतीवसौंदर्ययुक्तः तत्र तेषु शांतरूपेषु भक्तेषु इतरैरशांतरूपैरसुरादिभिरभ्यर्द्यमानेषु सत्सु अविर्भवति मथनादिना तद्वद्भगवानपि भक्तजनप्रार्थनादिना । यद्वा । महांश्चासावंशैर्मत्स्यकूर्मवराहाद्यैर्भगवदवतारसमये तत्रागत्य लीनैर्युक्तः । यद्वा । महदंशो ब्रह्मा तेन युक्तो विनियुक्तः प्रार्थित इति यावत् । यद्वा । महतः स्वस्यैवांशैर्युक्तः "महांतं विभुमात्मानम्" इति श्रुतेः । 'महद्वच' इति न्यायाच्च । यद्वा । महांतो ये पुरुषादयोंशास्तैर्युक्तः लोकनाथं महद्भूतामितिवदात्वाभावः । अन्यथा महांशयुक्तः इति स्यात् ॥ १५ ॥ अत्राक्षिपति–नन्विति । तदेव दुर्वितर्क्यत्वमेव ॥ १६ ॥ रामो बलदेवः भ्रात्रादिना गदादिग्रहः ॥ १७ ॥ पुनराशंकते नन्विति तवोद्धवस्यैतत् कृष्णेशत्वादि अयं वसुदेवनंदनः परमेश इत्येवं श्रद्धैवेत्यर्थः ॥ १८ ॥ तस्येश्वरत्वं दृष्टमेवेत्याह–योगिन उपक्रमादिना वेदतात्पर्यविदः । यां

॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदम् ॥ नेत्रैः पिबंतो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य ॥ २० ॥ स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याऽऽप्तसमस्तकामः ॥ बलिं हरद्भिश्चिरलोकपालैः किरीटकोटयेडितपादपीठः ॥२१॥ तत्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनम् ॥ तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति ॥ २२॥ अहो बकीयं स्तनकालकूटं जिघांसयाऽपाययदप्य्य साध्वी ॥ लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम ॥ २३ ॥ मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ॥ ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसेसुना भायुधमापतंतम् ॥ २४ ॥

आहवे युद्धे पार्थस्यास्त्रैः पूता निष्पापाः संतः ॥ २० ॥ तदेवं परमैश्वर्ये सत्यपि यदुग्रसेनानुवर्तित्वं तत्पुनरस्मानत्यंतं व्यथयतीत्याह । स्वयं तु य एवंभूतस्तस्य तत्कैंकर्यं नोऽस्मान् विग्लापयतीत्युत्तरेणान्वयः । न साम्यातिशयौ यस्य यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः। तत्र हेतवः त्र्यधीशस्त्रयाणां पुरुषाणां लोकानां गुणानां वा ईशः स्वाराज्यलक्ष्म्या परमानंदस्वरूपसंपत्त्यैव प्राप्तसमस्तभोगः बलिं करमर्हणं वा हरद्भिः समर्पयद्भिश्चिरकालीनैर्लोकपालैः किरीटाग्रेण ईडितं स्तुतं पादपीठं यस्य प्रणमतां किरीटसंघट्टध्वनिरेव स्तुतित्वेनोत्प्रेक्ष्यते ॥ २१ ॥ अंग विदुर भृतान् भृत्यान् उग्रसेने यत्किंकरत्वं तदेवाह । परमेष्ठिधिष्ण्ये राज्यासने निषण्णमासीनं स्वयं तिष्ठन् हे देव निधारयावधारयेति न्यबोधयद्विज्ञापितवान् ॥ २२ ॥ एवमनुवृत्तिः कृपयैवेति सूचयन्नपकारिष्वपि तस्य कृपालुतां दर्शयन्नाह । अहो आश्चर्यं कृपालुतायाः हंतुमिच्छयाऽपि स्तनयोः संभृतं कालकूटं विषं यमपाययत् । बकी पूतना साध्वी दुष्टाऽपि धात्र्या यशोदाया उचितां गतिं लेभे भक्तवेषमात्रेण यः सद्गतिं दत्तवानित्यर्थः । ततोऽन्यं कं वा भजेम ॥ २३ ॥ ननु भागवतानेव भगवाननुगृह्णातीति प्रसिद्धम् । सत्यम् । असुरानप्यहं भागवतानेव मन्ये । यतो भागवता इव तेऽपि भगवद्ध्यानाभिनिवेशेन भगवंतमपरोऽक्षं पश्यंतीत्याह । संरंभः क्रोधावेशस्तेन मार्गेणाभिनिविष्टं चित्तं येषां तान् । अत एव ये संग्रामे तार्क्ष्यः कश्यपस्तस्य पुत्रं गरुडमंसे स्कंधे सुनाभायुधश्चक्रायुधो हरिर्यस्य

सायुज्यलक्षणां सम्यग्योगेन भक्तिज्ञानान्यतरेण तस्य कृष्णस्य विरहाम् ॥ १९ ॥ अस्त्रैः पाशुपताद्यैः अस्य कृष्णस्य पिबंतः सादरमवलोकयंतः ॥ २० ॥ एवंभूतः साम्याधिक्यरहितस्तस्य कृष्णस्य तत्कैंकर्यमुग्रसेनभृत्यत्वं विग्लापयति माहात्म्यविषयेऽज्ञानलक्षणं ग्लानिमुत्पादयति । इत्यर्थ इति । 'न त्वत्समोस्त्यभ्यधिकः कुतोन्यः' इति गीतोक्तेरिति भावः॥२१॥तत्रासाम्यातिशयत्वे पुरुषाणां महत्स्रष्टादीनां ब्रह्मादीनां वा देव हेमहाराजाधिराज परमेष्ठिधिष्ण्ये महाराजासिंहासने अवधारय एतत्कृत्यं निश्चिन्विति ॥ २२ ॥ संभृतं पूरितम् इत्यर्थ इति । किंपुनर्भक्तानामिति भावः । ततः कृष्णात् कं विषदेभ्योप्यमृतदमन्यमेतादृशासाधारणदयावंतम् । शरणं रक्षितारं 'शरणं गृहरक्षित्रोः' इत्यमरः । 'अम्बिका च कालिंबा च धातृके स्तनदात्रिके' इति द्वे कृष्णस्य धात्र्यौ स्तस्तदुचितां तद्योग्याम् ॥ २३ ॥ अत्राक्षिपति—अत एव अभिनिविष्टचित्तत्वादेव । इत्यर्थ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥ २५ ॥ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता ॥ एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥ २६ ॥ परीतो वत्सपैर्वत्सांश्चारयन् व्याहरद्विभुः ॥ यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे ॥ २७ ॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम् ॥ रुदन्निव हसन्मुग्धबालसिंहावलोकनः ॥२८॥ स एव गोधनं लक्ष्म्या निकेतं सितगोवृषम् ॥ चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् ॥ २९ ॥ प्रयुक्तान्भोजराजेन मायिनः कामरूपिणः ॥ लीलया व्यनुदत्तांस्तान्बालः क्रीडनकानिव ॥ ३० ॥ विपन्नान्विषपानेन निगृह्य भुजगाधिपम् ॥ उत्थाप्यापाययद्गावस्तत्तोयं प्रकृतिस्थितम् ॥ ३१ ॥

तम् । अचक्षतापश्यन् तस्मात्तेष्वप्यनुग्रहो युक्त एवेत्यर्थः । वक्ष्यति च । "तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्" इति ॥ २४ ॥ इदानीं तस्य तद्दर्शनप्रकारं वक्तुमादित आरभ्य तच्चरितं संक्षेपतः कथयति । वसुदेवस्य भार्यायां जातो भोजेंद्रः कंसस्तस्य बंधनागारे अस्याः पृथिव्याः शं सुखं स्वयं चिकीर्षुः अजेन ब्रह्मणा च याचितः सन् ॥ २५ ॥ कंसाद्बिभ्यता पित्रा हेतुभूतेन नंदव्रजमितो गतः समाः संवत्सरान् गूढार्चिर्गुप्ततेजाः ॥ २६ ॥ व्याहरदाक्रीडत् । कूजद्भिर्द्विजैः पक्षिभिः संकुलिता व्याप्ता अंघ्रिपा यस्मिन् ॥ २७ ॥ रुदन्निवेतीवशब्दस्य यथायोगं सर्वत्राप्यन्वयः । मुग्धो बालश्च यः सिंहस्तद्वदवलोकनं यस्य सः ॥ २८ ॥ स एवाधिकं वयः प्राप्तः सन् गोधनं चारयन् कथंभूतं गोधनं लक्ष्म्याः शोभादिसंपदो निकेतनं सिता गावो वृषा यस्मिन्नानावर्णे गोसंघे रणन् शब्दं कुर्वन् वेणुर्यस्य अरीरमद्रमयामास ॥ २९ ॥ व्यनुदज्जघान क्रीडनकांस्तृणादिनिर्मितान् सिंहादीन्यथा ॥ ३० ॥ विपन्नान्मृतान् गोपान् गाव इति गाश्चोत्थाप्य तदेव तोयं प्रकृतिस्थितं निर्विषम् ॥ ३१ ॥

भगवति मन आवेशो भगवदनुग्रहे हेतुर्न जात्यादिरिति भावः॥२४॥ उपोद्घातकथामाह—इदानीमिति । बंधनागारे कारागृहे ॥२५॥ ततो मथुरापुरतः । गूढार्चिरिति । यथा गुप्ततेजा अग्निः क्वचित्क्वाचित्प्राप्तं प्राप्तमिंधनं दहति तथा भगवानपि प्राप्तं प्राप्तमसुरं गोपाललीलया गुप्तप्रभावोऽदहादिति एकादश समाः इति बाल्यपौगंढानां तत्रैव समाप्तत्वात् । "बाल्यपौगंडकैशोराः पुत्राभ्यामभवन्क्वाचित्" इति वसुदेवदेवकीं प्रति श्रीमुखोक्तेः ॥ २६ ॥ कूजद्भिरव्यक्तशब्दं कुर्वद्भिः " द्विजस्स्याद्ब्राह्मणक्षत्रवैश्यदंतांडजेषु ना " इति मेदिनी ॥ २७ ॥ यथायोगमिति । रुदन्निव हसन्निव कौमारीमिव मुग्धसुंदरः ' मुग्धः सुंदरमूढयोः ' इति विश्वः । 'बालानां रोदनं चास्त्रम्' इति न्यायेन विनापि रोदनहेतुमदेयलोभ्यवस्तुप्रार्थनादौ रुदन्निव तत्प्राप्तौ च हसन्निव भीषणदैत्यागमे यथा बालेपि सिंहो घोरसत्त्वान्न बिभेति किं तु स्वपराक्रमदृष्ट्या द्योतयति तथा कृष्णोऽपीति भावः ॥२८॥ यः कौमारलीलादर्शयिता गाव एव धनं गोधनमिति व्यधिकरणकर्मधारयः। यद्वा । गवां धनं समूहो गोधनं "द्रव्ये द्वितीयभावे च धनं स्त्रीयसमूहयोः" । "धनिनि गोधनेपि" इति निरुक्तिः । लक्ष्म्या रमाया निकेतं गोशकृति लक्ष्मीर्वसतीति महाभारते प्रसिद्धं 'गोमये वसते लक्ष्मीः' इति मंत्राच्च । गोमयस्य गोदेहस्थत्वेन तदावश्यं लक्ष्मीनिकेतमिति दुग्धघृताद्युत्पादकत्वेनापि संपद्धेतुत्वात्तन्निकेतमिति । वा यच्च तीर्थेणोक्तं सिता रज्जुतंतुभिर्नसि प्रोताः ककुद्मंतो यत्रेति तन्न शोभनं प्रतिककुद्मिनं कुत्रापि बद्धत्वादर्शनात् ॥२९॥ कामरूपिणः स्वाभिलषितरूपधारिणः तत्र हेतुः मायिनः भोजराजेन कंसेन प्रयुक्तान्प्रेषितान् ॥३०॥ अपाययत्पाययामास ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः ॥ वित्तस्य चोरुभारस्य चिकीर्षन्सद्व्ययं विभुः ॥ ३२ ॥ वर्षतींद्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः ॥ गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टं मानयन्रजनीमुखम् ॥ गायन्कलपदं रेमे स्त्रीणां मंडलमंडनः ॥ ३४ ॥ इति श्रीभा० तृतीय० द्वितीयोऽध्यायः ॥२॥ उद्धव उवाच ॥ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः ॥ निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमोजसोर्व्याम् ॥ १ ॥ सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य स विस्तरम् ॥ तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात् ॥ २ ॥ समाहुता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषाम् ॥ गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥ ३ ॥

इंद्रपूजाभंगेन कृता गवांपूजैव गोसवस्तेन गोपराजं नंदं वित्तस्य चेति चकारादिंद्रस्य मानभंगं कुर्वन्नुरुभारस्यातिसमृद्धस्य॥ ३२॥कोपाद्वर्षति गोत्र पर्वत एव लीलातपत्रं तेन हे भद्र॥ ३३॥मृष्टमुज्ज्वलं स्त्रीणां मंडलं मंडयतीति तथा ॥ ३४ ॥ इति तृतीये टीकायां द्वितीयोऽध्यायः ॥ २॥ तृतीये मथुरामेत्य व्रजात्कंसवधादिकम्॥ यत्कृतं द्वारकायां च कृष्णेन तदवर्णयत् ॥ १ ॥ शमित्यव्ययम् । पित्रोः सुखस्य चिकीर्षयेत्यर्थः । तुंगाद्राजमंचात् रिपुयूथानां नाथं कंसं व्यसोरपि विकर्षणं पित्रोः सुखार्थम् ॥ १ ॥ ब्रह्म वेदं सविस्तरं षडंगादिसहितम् । पंचजनोदरविदारणद्वारा पुत्रमानीयेत्यर्थः ॥ २ ॥ भीष्मककन्यया रुक्मिण्या ये राजानः समाहूताः । ह्रस्वत्वमार्षम् । समाहुता इति

सद्व्ययामित्युक्त्या शक्रस्य समृद्धिसाभिमानत्वात्तादृशे दानव्ययस्यासद्व्ययत्वं सूचितमिति । तेन देयं शांताय विदुषे इति स्मृत्यर्थो व्याख्यातः ॥ ३२ ॥ गोत्रः शैले "गोत्रं कुलाख्ययोः" इति मेदिनी । लीलातपत्रोक्त्या परिश्रमाभावो ध्वनितस्तद्वृताविति कृष्णलीलाश्रवणचेतस्त्वाज्जन्मांतरकृतसुकृतोसीत्याह—हे भद्र कल्याणरूप ॥ ३३ ॥ 'प्रदोषो रजनीमुखम्' इत्यमरः । मानयन्स्तुवन् यद्वाऽहो स्वाधीनपतिकाया अस्या रजनीनायिकाया मुखं नायकस्य शशिनः करैरधुना मृष्टमतोऽहमप्येवं करोमीत्यभिनंदन्नित्यर्थः । कलौ ककारलकारौ पद्येते प्राप्येते यत्र तत्कलपदं कामबीजम् । मंडलं समूहं मंडयति भूषयतीति मंडलमंडनः । 'मडिभूषायाम्' ॥ ३४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वितीयस्कन्धे द्वितीयोऽध्यायः ॥२॥ अत्र व्रजान्मथुरामेत्येत्युक्तेर्व्रजमथुरयोर्ब्राह्मणपरिव्राजकन्यायेन भेदाभेद एव यद्वा व्रजाद्गोव्रजात् नाममात्रैकदेशन्यायोत्रानुसंधेयः । यत्कर्म ॥१॥ शमित्यव्ययं सुखवाचकम् । इत्यर्थ इति । अव्ययानां सार्वविभक्तिकत्वेन षष्ठ्यंततात्र व्याख्येयेति भावः । ततो व्रजात् स कृष्णः। पुरं मथुराम् । तुंगादुच्चात् 'पुन्नागागोन्नते तुंगः' इति धरणिः । रिपवस्तृणावर्त्ता दयस्तेषां यूथानां स्वामिनं हतमुच्चपातात्प्राप्ताघातं व्यसुं गतप्राणं पित्रोर्मूर्छा संभावयतोर्देवकीवसुदेवयोः देवानां वा प्रीणनार्थं कर्षणम् । यद्वा स्वपित्रोः पुरमागत्य हतं व्यसुं रिपुनाथं प्रति शंचिकीर्षया जीवतानेन राज्ञा ब्रह्मादिप्रार्थ्यस्पर्शव्रजभूरजो न स्पृष्टमतोहमेनं मृतं व्रजभूरजोगंगायां देहप्लावनेन सद्गतिं प्रापयिष्य इत्यभिसंधाय व्यकर्षदित्यर्थः ॥ १ ॥ षडंगानि शिक्षादीनि आदिना पदक्रमजटाघनादिग्रहः इत्यर्थ इति । ल्यब्लोपेपञ्चमीत्वेन पंचजनोदरं विदार्येति व्याख्येयमिति भावः । तस्मै सांदीपनये मृतमानीयेति शेषः वरं दक्षिणं।"वरो जामातरि देवाद्वृते श्रेष्ठे त्रिषु क्षमे । दक्षिणायां तथा धेनौ स्त्रियामौषधदेवयोः" इति ॥२॥ इत्यर्थ इति । उपसर्गवशादाकर्षणेपि हरतिरिति भावः । मिषतां कृष्ण इहागत्य कन्यां न हरेदिति हेतोरितस्ततः पश्यता तया रुक्मिण्या परस्परसमयरूपयाऽन्योन्यकृतसंकेतरूपया लक्ष्म्यंशत्वात् । 'मानुषत्वे च मानुषी" इति पराशरोक्तेः । तया रुक्मिण्याऽर्पितत्वाच्च । 'आत्मार्पितश्च भवतोत्र विभो विधेहि' इति दशमोत्तरार्द्धे वक्ष्यमाणत्वात् । सुपतनः शोभनागमनः सुपर्णपदस्य प्रसिद्धार्थत्यागमनर्हं मत्वाह—यद्वेति । इत्यर्थ इति । आर्षत्वादत्रोपमावाचके बलोप इति भावः । अक्षरेभ्योर्थलब्धौ क्लिष्टकल्पनया तत्साधनमयोग्यम् । "अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत्" इतिन्यायमाश्रित्याह यद्वेति । वर्णद्वयं रुक्मीत्यक्षरद्वयं तत्र तेषु राजसु । शेषं गांधर्ववृत्त्येत्याद्यवशिष्टम् ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ककुद्मतोऽविद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह ॥ तद्भग्नमानानपि गृध्यतो ऽज्ञाञ्जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः ॥ ४ ॥ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुराच्छैदद्युतरुं यदर्थे ॥ वज्र्याऽऽद्रवत्तं सगणो रुषांऽधः क्रीडामृगो नूनमयं वधूनाम् ॥ ५ ॥ सुतं मृधे खं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्माथितं धरित्र्या ॥ आमंत्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ॥६॥ तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुम् ॥ उत्थाय सद्यो जगृहुः प्रहर्षव्रीडाऽनुरागप्रहितावलोकैः ॥ ७ ॥ आसां मुहूर्त एकस्मिन्नानागारेषु योषिताम् ॥ सविधं जगृहे पाणीननुरूपः स्वमायया ॥८॥ तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः ॥ एकैकस्यां दशदश प्रकृतेर्विबुभूषया ॥ ९ ॥

पाठे आकृष्टा इत्यर्थः । केन साधनेन श्रियो लक्ष्म्याः सवर्णेन समानेन रूपेण यद्यपि तया केवलं श्रीकृष्ण एवाहूतो न सर्वे तथापि तस्या लावण्यं तेषामागमने हेतुरिति तयैवाहूता इत्युच्यते । एषां मिषतां पश्यतां मूर्ध्नि पदं दधत् तया सह गांधर्ववृत्त्या परस्परसमयरूपया बुभूषया भवितुमिच्छया जहार । कथंभूतां स्वभागं लक्ष्म्यंशत्वात्तया स्वात्मनोऽर्पितत्वाच्च सुपर्णः सुपतनः यद्वा सुपर्ण इव स्वभागं सुधामित्यर्थः । यद्वा श्रियो रुक्मिण्याः समानं वर्णद्वयं वाचकं यस्य सः श्रियः सवर्णो रुक्मी तेन समाहूताः शिशुपालादयः । किमर्थं भीष्मककन्यया सह तेषां बुभूषया भूतिर्भवत्वित्येतदर्थम् । तत्र शिशुपालस्याह्वानं वरत्वेन बुभूषया जरासंधादीनां तद्विवाहोत्सवेन शेषं पूर्ववत् ॥ ३ ॥ ककुद्मतो वृषभानविद्धनासिकान्विद्धनासिकान्कृत्वेति वा तैर्वृषभैस्तद्दमनेन च भग्नो मानो येषां तथापि तान् गृध्यतः कामयमानानत एवाज्ञान् शस्त्रभृतो राज्ञस्तच्छस्त्रैरक्षत एव जघान ॥ ४ ॥ यदादित्याः कुंडले दातुं स्वर्गं गतस्तदा प्रभुः स्वतंत्रोऽपि ग्राम्यः स्त्रीपरतंत्र इव प्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुर्द्युतरुं पारिजातमानीतवान् । यदर्थे यन्निमित्तं तं कृष्णं वज्री स्त्रीप्रेरितो योद्धुमन्वधावत् । स्वकार्यसाधकेन तेन युद्धोद्यमस्तस्यायुक्त एवेत्याह । क्रीडामृग इति । अयं वज्री ॥ ५ ॥ सुनाभेन चक्रेणोन्मथितं हतं सुतं भौमं दृष्ट्वा तस्य मात्रा धरित्र्या भूम्या आमंत्रितः प्रार्थितः संस्तस्य तनयाय भगदत्ताय हृतशेषं राज्यं दत्वा ॥ ६ ॥ तत्रांतःपुरे कुजेन भौमेन या आहृतास्ताः प्रहर्षश्च व्रीडा चानुरागश्च तैः प्रहिताः प्रेरिता येऽवलोकास्तैर्जगृहुः स्वीकृतवत्यः ॥ ७ ॥ आसां योषितां पाणींस्तत्तदनुरूपः सन्सविधं विवाहोचितप्रकारसहितं यथा भवति ॥ ८ ॥ सर्वतः सर्वैर्गुणैः स्वतुल्यानि प्रकृतेर्मायाया विविधं भवनं विस्तारस्तदिच्छया यद्वा प्रकृतेर्हेतोर्विविधं भवितुमिच्छया ॥ ९ ॥

'ककुद्वृषांके' इत्यमरः । अविद्धनासिकानां दमनासंभवादाह—विद्धनासिकेति । अतो वृषभग्नमानत्वेपि कामयमानत्वात् । यद्वा । शस्त्रैर्भृत आच्छादित इति प्रथमा ॥ ४ ॥ यद्वा 'आत्मवन्मन्यते जगत्' इति न्यायेन अयं कृष्णो वधूनां सत्यभामादीनां क्रीडामृग इति निंदन्नेवाद्रवदित्यर्थः । सगणो मरुद्गणसहितः । रुषा धनमदजातक्रोधेनांध इति । परमेशेन युद्धार्थमाद्रवणे हेतुः ॥ ५ ॥ सुष्ठु नाभिर्मध्यं यस्य स सुनाभः "अच् प्रत्यन्ववपूर्वात्सामलोम्नः" इत्यत्राजितियोगविभागात्समासान्तोऽत्राच् । तस्य नरकस्य शेषपदेनैव किञ्चिद्राज्यहरणं ज्ञायत इति । शुद्धमातृपितृकस्यापि नरकस्य बाणासुरसंगात्कुबुद्धिरुत्पन्नेति पुराणांतरकथात्र ज्ञेया । "दुष्टायाः संगदोषेण सत्याश्च मतिविभ्रमः । यथैकरात्रसंगेन काष्ठघंटा गवा धृता" इति नीतिग्रंथेप्युक्तम् ॥ ६ ॥ आहृता दिग्विजये नृपान्विजित्य तेषां कन्या आनीता यास्ता इत्यर्थः । स्वीकृतवत्यः पतित्वेन वव्रुः ॥ ७ ॥ आसां भौमगृहानीतानां पुरुरूप इति पाठे तु योगिवत्स्वचिच्छक्त्या कृतानैकरूपः ॥ ८ ॥ जडाया मायाया बहुधा भवने जाड्याधिक्यं प्रसज्येतेति चेदाह । यद्वेति । "प्रकृतिं स्वामधिष्ठाय बहुरूपो भवाम्य

॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालमागधशाल्वादीननीकै रुंधतः पुरम् ॥ अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ॥ १० ॥ शंबरं द्विविदं बाणं मुरं बल्वलमेव च ॥ अन्यांश्च दंतवक्रादीनवधीत्कांश्च घातयत् ॥ ११ ॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् ॥ चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥ १२ ॥ स कर्णदुःशासनसौबलानां कुमंत्रपाकेन हतश्रियायुषम् ॥ सुयोधनं सानुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन् ॥ १३ ॥ कियान्भुवोऽयं क्षपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम् ॥ १४ ॥

कालः कालयवनः रुंधत आवृण्वतः मुचुकुंदभीमादिभिर्निमित्तमात्रैः स्वयमेवाजीघनद्घातितवान् । तेन च स्वपुंसां तेजःप्रभावं कीर्तिं वा दत्तवान् ॥ १० ॥ शंबरद्विविदबल्वलान्यानपि कांश्चित्प्रद्युम्नरामादिभिर्निमित्तमात्रैर्घातयदघातयत । घातयन्निति वा पाठः । दंतवक्रादीन् स्वयमवधीत् ॥ ११ ॥ नृपानघातयदित्यनुषंगः । कथंभूतान् । कुरुक्षेत्रमापततां गच्छतां येषां बलैः सैन्यैर्भूः सर्वाऽपि चचाल चकंपे ॥ १२ ॥ स कृष्णः । हता श्रीरायुश्च यस्य भग्नावूरू यस्य तम् उर्व्यां शयानं पश्यन्नपि न ननंद संतोषं न प्राप ॥ १३ ॥ अनभिनंदनप्रकारमेवाह । कियानिति । द्रोणादिभिर्मूलैः कारणभूतैः । यदिति योऽष्टादशाक्षौहिणियुक्तः ह्रस्वत्वमार्षम् । क्षपितो य उरुभारो

हम्'' इत्युक्तेः ''इंद्रो मायाभिः पुरुरूप ईयते'' इति श्रुतेश्च । यद्वा । प्रकृतेः स्वरूपस्य विशेषेण बुभूषा तयेति ''प्रकृतिश्च स्वरूपं च स्वभावश्च'' इत्यमरः । पंचमे प्रकृतिं भजस्वेत्यस्य स्वरूपं भजस्वेति व्याख्या कृता प्राग्भिः । तासु भौमगृहानीतविवाहितासु ॥ ९ ॥ आदिना पौंड्रकग्रहः पौंड्रकेनापि कृष्णे कैलासं गते द्वारकाऽऽगत्य निरुद्धेति स्फुटं हरिवंशे । अत्र तु स काश्यां हतः इति विरोधः कल्पांतरविवक्षया परिहर्त्तव्य इति स्वीयशक्तिप्रवेशनेनाघातयत् । तेन तद्द्वारा घातनेन तेषां स्वपुंसां ''निमित्तं परमीशस्य विश्वसर्गनिरोधयोः । हिरण्यगर्भः शर्वश्च'' इति श्रीदशमे वक्ष्यमाणत्वान्मुचुकुंदादीनामन्येषां निमित्तमात्रतैव हनन इति भावः ॥ १० ॥ आदिना विदूरथादिग्रहः प्रद्युम्नादिभिः शंबरादीनघातयत् । मुरादीन्स्वयमवधीदिति यथासंभवं योज्यम् ॥ ११ ॥ अथ शंबरादिघातनानंतरं ते विदुरस्य भ्रात्रोः पांडुधृतराष्ट्रयोः पुत्राणां युधिष्ठिरदुर्योधनादीनां पक्षयोः पार्श्वग्रहयोर्बलयोस्सेनयोर्वा पतितान् प्राप्तान् ''पक्षो मासार्द्धके पार्श्वग्रहे साध्यविरोधयोः । केशादेः परतो वृंदे बले सखिसहाययोः'' इति मेदिनी ॥ १२ ॥ १३ ॥ यद्वा उरु यथा भवति तथा क्षपितो भुवो भार इति योज्यम् । संधिरत्रार्षः । इत्यर्थ इति । तदपेक्षयाऽधिकस्य यदुसैन्यस्य विद्यमानत्वादिति भावः । मदंशैरिति द्रोणादेरपि विशेषणं तेषामपि भगवदंशाविष्टत्वात् । ननु भूभारस्तावद्व्यक्तिबाहुल्येन न स्यात्पर्वतसमुद्रादीनां प्राचुर्य्यात् किं त्वधार्मिकप्राचुर्य्येणैव ते चाधार्मिका भगवता संहृता एव । न च यदुकुलस्याधार्मिकत्वमिति वाच्यं भगवत्परिकररूपत्वात् । ''ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् । विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसाम् । शय्यासनाटनालापक्रीडास्नानाशनादिषु । न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः'' इत्याद्युक्तिभ्यश्च । अतोऽत्रोच्यते भारो हि द्विविधः दुःखरूपः सुखरूपश्च । आद्यो दुःसहो यथा ग्रीष्मर्त्तौ परिहितवस्त्रादेः । द्वितीयस्तु सुसह एव यथा युवत्याः स्वरमणस्य भारः । यथा च वत्सलतया मात्रांकीकृतस्वपोतस्य यथा च वणिजां स्वमूर्ध्न्यारोपितस्वधनस्य । किञ्चाल्पबलेन जनेन स्वस्मादतिबलः सुखकरोपि भारो वोढुं न शक्यते यथा परमधार्मिकस्य महाभागवतस्य तपोबलाधिक्यमाविष्कुर्वतो ध्रुवस्यापि भारः पृथिव्याः तदुक्तं ''यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही । ननाम तत्रार्द्धमिभेन्द्रधिष्ठिता तरीव सव्येतरतः पदेपदे'' इति यदा च भगवतापि स्वबलमाविष्क्रियते तदा परमानंदरूपस्यापि भारो न वोढुं शक्यते यथा श्रीभीष्मस्तुतौ ''धृतरथचरणोभ्ययाच्चलद्गुः ।'' इति । नृसिंहावतारेऽपि ''प्रोत्सर्पत क्ष्मा च यदाभिपीडितः'' इति । अतोऽत्र यद्यपि यदुकुलस्य भारः पृथिव्या भारत्वेन न मन्यते । यथा सुकुमार्यापि स्त्रिया बहुस्वर्णरत्नाद्याभरणभारस्तदपि प्रेमवता तत्कांतेन तदंगेभ्यः कश्चनकश्चनोत्सवादागंतुक एवाभरणभारो निष्कास्यते स्थाप्यते च सर्वदोपयोगी तथैवांशावतरणसमये नित्यपरिकररूपेषु यादवादिषु ये देवादयोंशाः प्रविष्टास्त एव द्वारकातो निष्क्रमय्य प्रभासे नीत्वोपसंहृता इति सर्वमनवद्यम् । दुर्विषहमन्यैः सोढुमशक्यम् ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिथो यदैषांभविता विवादो मध्वामदाताम्रविलोचनानाम् ॥ नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेंऽतर्दधते स्वयं स्म ॥१५॥ एवं संचिंत्य भगवा न्स्वराज्ये स्थाप्य धर्मजम् ॥ नंदयामास सुहृदः साधूनां वर्त्म दर्शयन्॥१६॥उत्तरायां धृतःपूरोर्वंशः साध्वभिमन्युना॥स वै द्रौण्यस्त्रसंछिन्नः पुनर्भ गवता धृतः ॥ १७ ॥ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोऽपि क्ष्मामनुजैः रक्षन्रेमे कृष्णमनुव्रतः ॥ १८ ॥ भगवानपि विश्वात्मा लोकवे दपथानुगः ॥ कामान्सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः ॥ १९ ॥ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया ॥ चरित्रेणाऽनवद्येन श्रीनि केतेन चात्मना ॥ २० ॥ इमं लोकममुं चैव रमयन्सुतरां यदून् ॥ रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः ॥ २१ ॥

भुवः अयं कियानत्यल्प इत्यर्थः । यस्मान्मदंशैः प्रद्युम्नादिभिर्हेतुभूतैर्दुर्विषहं बलमास्ते ॥ १४ ॥ न चात्रान्य उपायः प्रभवति । किंतु मधुना य आमदः सर्वतो मदस्ते नाताम्रविलोचनानामेषः विवादो यदा भविष्यति तदेयानेवैषां वधोपायोऽन्यो नास्ति । एकात्मानोऽपि मय्युद्यते सति स्वयमेव विवादेनांतर्दधीरन्नित्यर्थः ॥ १५ ॥ एवं श्लोकद्वयेनोक्तं क्रमेण संचिंत्य स्वराज्ये स्थापयित्वा ॥ १६ ॥ धृतो रक्षितः ॥ १७ ॥ अनुजैः सह ॥ १८ ॥ सांख्यं प्रकृतिपुरुषविवेकम् ॥ १९ ॥ स्निग्धो यः स्मितसहितोऽवलोकस्तेन । पीयूषकल्पया सुधातुल्यया पाठांतरे सुधाप्रवाहरूपया आत्मना देहेन ॥ २० ॥ क्षणदया रात्र्या दत्तः क्षणोऽवसर उत्सवो वा यासां स्त्रीणां

अत्र यदुकुलनाशे आताम्राणि सर्वतो रक्तानि विलोचनानि येषाम् तेषाम् अतो विवादात् इत्यर्थ इति।इमान्मयि संजिहीर्षौ सति मन्मायामोहपतिमद्यजाविवादेनांतर्धास्यंत एवेति भावः।इयानेतावान् १५॥स्थाप्य स्थापयित्वा आर्ष त्वाद्विनापि समासं ल्यप् । साधूनां वेदानुयायिनाम्॥१६॥ सः गर्भः धृतो जीवयुतः कृतः।पुनरित्युत्तया भारतविरोधः परिहृतः॥१७॥स धर्मसुतोऽनपत्योऽपि 'पुत्रहीनस्य किं राज्यैः' इत्युक्तेस्तत उपरतोपि कृष्णाज्ञया पुत्रतुल्यै रनुजैः सह राज्यं चकारेत्यर्थोपि नोक्तः । त्रिभिरिति त्रिगुणदक्षिणादानेनैकस्यैव त्रित्वमभूत्तदुक्तं "सकृत्कृतकर्मणो या वे दक्षिणा विहितागमो यावंती वर्द्धयेत्तां वै तावत्कृतकर्मणः फलम्" इति नीलकण्ठाद्यैर्भारतटीकाकृद्भि रुक्तम् । नोक्तः ॥ १८ ॥ अपीत्यनेन लोकसंग्रहार्थं गृहस्थधर्मानुचरणं न तु स्वार्थं सत्यसंकल्पत्वादितीममर्थं सूचयति विषयसेवया तल्लेपो नास्तीत्याह । असक्त इति । तत्र हेतुः सांख्यं स्वात्मज्ञानं "केवलं स्वात्मविज्ञानं सांख्य मित्यभिधीयते" इति तीर्थः ।'तद्ब्रह्मावेदहं ब्रह्मास्मि' इति श्रुतेः । 'लोकवेदपथानुगः' इत्युक्तिर्लोकवेदाविरुद्धानेव कामान्सुखरूपानिंद्राद्यैरुपायनत्वेन प्रेषितान्नित्याह ॥१९॥ पाठांतरे 'पीयूषकुल्यया' इति पाठे । जीवगोस्वामि नस्तु मायाशक्तिविलास एव तस्यानासक्तिश्चिच्छक्तिविलासे त्वासक्तिरेवेत्याहुः । क्रमेणावलोकवचनलीलारूपैश्चतुर्भिर्माधुर्यैः रमयान्नित्यग्रिमेणान्वयः ॥ २० ॥ इमं लोकमत्रस्थं भक्तजनम् अमुं देवादिलोकगं तत्रापि यदून् तत्रापि स्त्रीषु रेमे अवसरदानं दिनस्याप्यस्ति तत्र स च निंद्य इत्यत आह–उत्सवो वेति । अनेन क्षणदापदार्थौ । ध्वनितः । यद्वा । क्षणेन कामोत्सवेन सौहृदं यस्य सः तीर्थस्तु पाठांतरमपि व्याख्यत् । त्रीक्षणो रुद्रस्तस्य सौहृदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैवं रममाणस्य संवत्सरगणान् बहून् ॥ गृहमेधेषु योगेषु विरागः समजायत ॥ २२ ॥ दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् ॥ को विस्रंभेत योगेन योगेश्वरमनुव्रतः ॥ २३ ॥ पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः ॥ कोपिता मुनयः शेपुर्भगवन्मतकोविदाः ॥ २४ ॥ ततः कतिपयैर्मासैर्वृष्णिभोजांधकादयः ॥ ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः ॥ २५ ॥ तत्र स्नात्वा पितॄन्देवान्नृषींश्चैव तदंभसा ॥ तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः ॥ २६ ॥ हिरण्यं रजतं शय्यां वासांस्यजिनकंबलान् ॥ यानं रथानिभान्कन्यां धरां वृत्तिकरीमपि ॥ २७ ॥ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्पणम् ॥ गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः ॥ २८ ॥ इति श्रीभागवते तृ० तृतीयोऽध्यायः ॥ ३ ॥ उद्धव उवाच ॥ अथ ते तदनुज्ञाता भुक्त्वा पीत्वा च वारुणीम् ॥ तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः ॥ १ ॥

तासु क्षणं सौहृदं यस्य सः ॥ २१ ॥ गृहमेधेषु गृहधर्मेषु योगेषु कामभोगोपायेषु विराग औदासीन्यं जातमित्यर्थः ॥ २२ ॥ यदा स्वाधीनेष्वपि भगवतो विरागस्तदा देवाधीने को विस्रंभेत विश्वासं प्रीतिं वा कुर्यात । योगेन चेद्योगेश्वरं श्रीकृष्णमनुव्रतः ॥ २३ ॥ शेपुः शापं ददुः । भगवतो मतेऽभिप्राये कोविदा अभिज्ञाः ॥ २४ ॥ ॥ २५ ॥ वयःशीलादिबहुगुणोपेता याः गावस्ताः ॥ २६ ॥ कन्याश्च । वृत्तिकरीं जीविकापर्याप्ताम् ॥ २७ ॥ भगवदर्पणं यथा भवति गोविप्रार्थाः असवो येषाम् ॥२८॥ इति श्रीमद्भागवते महा० तृतीयस्कन्धे टीकायां तृतीयोऽध्यायः ॥३॥ चतुर्थे बंधुनिधनं श्रुत्वात्मज्ञानलब्धये॥ उद्धवस्योपदेशेन क्षत्ता मैत्रेयमागमत॥ १ ॥ तैर्ब्राह्मणै

यत्रेति त्रीक्षणसौहृद इति । अनेन रुद्रगणचरणसमये स्त्रीभिस्सह रमणं कथमिति चोद्यं परिहृतम् ॥ २१ ॥ तस्य श्रीकृष्णस्य कामभोगोपायेषु रजोगुणमयकर्ममार्गेषु तदुपलक्षितकार्मिजनोपनीतभोग्यवस्तुषु च । इत्यर्थ इति । सर्वदा विरक्तस्यापि भगवतस्तदानीं लोकशिक्षार्थं स्पष्टी बभूवेति भावः ॥ २२ ॥ सा च वैराग्यलीलैतद्बोधयितुमित्याह—यदेति । न कोपीत्यर्थतो ज्ञेयम् ॥ २३ ॥ भगवन्मतं 'मिथो यथैषां भविता विवादः' इत्युक्तोक्तब्राह्मणशापजमिथोविवादेर्नैते नश्यंत्वित्येवंलक्षणं तस्यां कोविदा ज्ञातारः । अनेन मुनिशब्दार्थो ध्वनितः ॥ २४ ॥ ततो द्वारकातः सुखासक्तत्वात्कतिपयैर्मासैः देवमोहिता एव ययुः नित्यभूतास्तु प्रद्युम्नादयस्तत्रैव प्रापंचिकलोका लक्ष्यतया तस्थुरिति देवाश्च ते मोहिताश्चेति देवमोहिता वा ॥ २५ ॥ तत्र प्रभासे तदंभसा प्रभासतीर्थोदकेन अथ तर्पणोत्तरं गावो गाः ॥ २६ ॥ न केवलं गा एव ददुः किं तु परलोकसुखदमन्यदपि द्रव्यजातं ददुरित्याह—हिरण्यमिति । हिनोति दुःखं राति सुखमिति हिरण्यं रज्यति रागं तनोतीति रजतम् शय्यतेऽत्रेति शय्या वस्यंत आच्छाद्यंत एभिरिति वासांसि अजिनं नयतीत्यजिनं कं सुखं बलयति धारयतीति कंबलम् । यानं यात्यनेनेति यानं हयः । क्वचिद्धयानिति पाठः । तत्र हयति गंतव्यमनेनेति हयः 'हयगतौ,' इष्टं भावयंतीतीभा हास्तिनः कनं दीप्तिं यापयतीति कन्या रमतेत्रेति रथः ध्रियते विश्वमनयेति धरा, वृत्तिकरीं यावज्जीवं जीवनहेतुभूतां यानलक्षणम् । दिवोदासीये "देशांतरं स्वीयगत्या यद्याति यापयेच्च यत् । तद्यानं विबुधैः प्रोक्तं शकट्यादि न तद्भवेत् "इति इभानां यानत्वेपि पृथग्ग्रहणं शोभार्थं मुख्यत्वाद्वेति॥२७॥ उरुरसं षड्रसं तेभ्यो विप्रेभ्यः । असवो जीवनम् । अनेन तेषां धार्मिकत्वं व्यंजितं भगवदिच्छाधीनसंहारत्वं च भगवदिच्छा च ब्राह्मणा न कोपनीया इति लोकप्रवर्त्तनानित्यभूतया देवेभ्यो देवाद्यंशविभाजना तेषां तन्मिषेण तत्तत्पदप्रापणा स्वीयषडैश्वर्यद्योतना स्वभक्तिभक्तधामलीलापरिकरादिमाहात्म्यगोपने न बहिर्मुखलोकप्रतारणा स्वभक्तजनानुरागविस्तारणाद्या इति । प्रणामस्वरूपं हि भुवि मूर्द्धभिरिति॥२८॥२९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ (१) तेन कृष्णेन वानुज्ञाता दिवं गंतुमित्येव तत्त्वं तया वारुण्या उपलक्षणभूतया भगवतैव विभ्रंशितं ज्ञानं येषां ते पैष्टीं यवादिपिष्टोद्भूतां दुर्वचोभिः परस्परमिति शेषः । मर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां मैरेयदोषेण विषमीकृतचेतसाम् ॥ निम्लोचति रवावासीद्वेणूनामिव मर्दनम् ॥ २ ॥ भगवान् स्वात्ममायाया गतिं तामवलोक्य सः ॥ सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥ ३ ॥ अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह ॥ बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥ ४ ॥ अथाऽपि तदभिप्रेतं जानन्नहमरिंदम ॥ पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिम् ॥ श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनम् ॥ ६ ॥ श्यामावदातं विरजं प्रशांतारुणलोचनम् ॥ दोर्भिश्चतुर्भिर्विदितं पीतकौशांबरेण च ॥ ७ ॥ वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहम् ॥ अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलम् ॥ ८ ॥ तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः ॥ लोकाननुचरन्सिद्ध आससाद यदृच्छया ॥९॥ तस्यानुरक्तस्य मुनेर्मुकुंदः प्रमोदभावाऽऽनतकंधरस्य ॥ आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥ १० ॥

रनुज्ञाताः वारुणीं पैष्टीं मदिराम् ॥ १ ॥ वारुण्येव मैरेयं तस्य दोषेण । रवौ निम्लोचत्यस्तं गच्छति सति मर्दनं कदनम् ॥ २ ॥ उपस्पृश्य सरस्वत्यामाचम्य ॥ ३ ॥ अहं चोक्तः पूर्वमेव द्वारकायाम् ॥ ४ ॥ तदभिप्रेतं कुलसंहारादिकम् ॥ ५ ॥ कृतकेतं कृतावासम् । अकेतनमनाश्रयम् ॥ ६ ॥ विरजं संशुद्धंसत्त्वमयम् । विदितं लक्षितम् । कौशं कौशेयम् ॥७॥ अधिश्रित्योपारि स्थापयित्वा । अपाश्रितः पृष्ठतोऽवष्टब्धोऽर्भको बालः कोमलोऽश्वत्थो येन तं त्यक्तं पिप्पलं विषयसुखं येन तं तथाऽप्यकृशमानंदपूर्णम् ॥ ८ ॥ द्वैपायनः सुहृत्सखा च यस्य सः । स्वगुरुपुत्रत्वात् पराशरशिष्यो मैत्रेय इत्यर्थः ॥ ९ ॥ प्रमोदेन भावेन चानता

पस्पृशुरतिपीडाकराणि दुर्वाक्यान्यूचुरित्यर्थः ॥ १ ॥ तेषां यदूनाम् ॥ २ ॥ स्वात्ममायाया इति मौशललीला भगवतेन्द्रजालवदेव दर्शिता तेन च नित्यभूता लीलापरिकराः प्रद्युम्नाद्या यादवास्तु—द्वारकायामेव स्थितास्तत्प्राविष्टदेवाश्च तत्तदंगेभ्यः पृथक्कृत्य तत्तद्रूपेण प्रभासमानीय संहृताः । रामप्रद्युम्नानिरुद्धानां भगवद्व्यूहत्वात् । "एते हि यादवाः सर्वे मद्गणा एव भामिनि । सर्वदा मत्प्रिया देवि मत्तुल्यगुणशालिनः । यथा सौमित्रिभरतौ यथा संकर्षणादयः । तथा ते नैव जायंते निजलोकाद्यदृच्छया" इति पाद्मोक्तेः । 'देवानां च हितार्थाय वयं प्राप्ता मनुष्यताम्' इति हरिवंशेऽक्रूरोक्तेश्च । यादवानां नित्यलीलापरिकरत्वात् तेषु सांबादिषु प्रविष्टानां प्रह्लादीनां देवानामप्यधिकारमध्य एव नाशानर्हत्वात् मौशललीलेयं मायिक्येव मायिक्यपि सर्वमायिकसृष्ट्यभावेपि श्रीकृष्णलीलांतर्वर्तित्वादाचिंत्ययोगमायानुमोदिता नित्यैव ज्ञेया ॥ ३ ॥ प्रपन्नस्य ममार्त्तिहरेण संजिहीर्षुणां तद्व्यापयता ॥४॥ अथापि कुलसंजिहीर्षुत्वे यद्वा । प्रभुर्मां न त्यक्ष्यतीति तदाभिप्रेतम् ॥५॥६॥ कुशा जीवविशेषास्तदुद्भवं कौशम् ॥७॥ तथापि त्यक्तपिप्पलत्वेपि संदर्भस्तु—नश्वोपि तिष्ठतीति विश्वासानर्हं पांचभौतिकं ब्रह्मांडमश्वत्थपदेनाह अर्भकपदेन सर्वब्रह्मांडेष्वस्य ब्रह्माण्डस्य क्षुद्रत्वमुक्तं त्यक्तपिप्पलं समापितैतद्ब्रह्मांडलीलम्॥८॥ यद्यपि सुहृत्सख इति पाठो बहुपुस्तकेष्वस्ति तथापि बहुव्रीहौ टचोऽसंभवाद्युक्त इव प्रतिभाति। दृष्टश्च प्राचीनतमटीकासु सुहृत्सखेति पाठः । आर्षत्वाश्रयणे टचोपि न दुर्लभत्वमिति टजंतोपि श्रेयान् सिद्धो योगसिद्धः लोकान्भूरादिकान् यदृच्छया केनापि भाग्ययोगेन "यदृच्छा निर्निमित्ते स्याद्भाग्ययोगेऽपिचेष्यते" इति॥९॥ तस्य मैत्रेयस्य आशृण्वतः सतो मामेवोवाचेति तस्मादपि स्वस्मिन्ननुग्रहाधिक्यमाह । विश्रमयन् विरहश्रममपाकुर्वन् संसारक्लेशमपहृत्यानंदं जनयन्निति यावत् समीक्षया दृष्ट्या पाठांतरे प्रमोदभारानतेति पाठे ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ वेदाऽहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः ॥ सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ॥ ११ ॥ स एष भावश्चरमो भवानामासादितस्ते मदनुग्रहो यत् ॥ यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या ददृश्वान्विशदानुवृत्त्या ॥ १२ ॥ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ॥ ज्ञानं परं मन्महिमावभासं यत्सूरयो भागवतं वदंति ॥१३॥ इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोऽहम् ॥ स्नेहोत्थरोमास्खलिताक्षरस्तं मुंचञ्छुचः प्रांजलिराबभाषे ॥ १४ ॥

कंधरा यस्य । पाठांतरे प्रमोदस्य भारेण । अनुरागेण सह हासो यस्यां तया समीक्षया विश्रमयन् विगतश्रमं कुर्वन् ॥ १० ॥ हे उद्धव ते मनसीप्सितमहमंतःस्थितो वेद वेद्मि । दाने हेतुः । विश्वसृजां वसूनां च मिलितानां सत्रे हे वसो इति पुरा पूर्वजन्मनि त्वं वसुरभूस्तदा मत्प्राप्तिकामेन त्वयाऽहमिष्टोऽतस्तत्साधनं ददामि दास्यामि अन्यैर्मत्पराङ्मुखैर्दुष्प्रापम् ॥ ११ ॥ तस्य भाग्यमभिनंदति । स एष भावो जन्म ते भवानां मध्ये चरमः यद्यस्मिन् मदनुग्रह आसादितो लब्धः यत्पुनर्मां रह एकांते विशदानुवृत्त्या एकांतभक्त्या ददृश्वान्दृष्टवानसि एतद्दिष्ट्या भद्रं जातमित्यर्थः । नृलोकान् नृशब्देन जीवास्तेषां लोकानुत्सृजंतं वैकुंठं गच्छंतमित्यर्थः ॥ १२ ॥ ददामीति यदुक्तं तदेव निर्दिशति । पुरा पूर्वस्मिन्पाद्मे कल्पे आदिसर्गे सर्गोपक्रमे मम महिमा लीलाऽवभास्यते येन तत् ॥ १३ ॥ इत्येवमादृतश्चासावुक्तश्चाहं प्रतीक्षणं कृपाऽ

चं विनापि विश्वसृग्भ्यो वसूनां भिन्नत्वप्रसिद्धेरेव स्वामिचरणैर्वसूनां वेत्युक्तम् । अत्र सिद्धिपदं प्राप्तिपरं प्राप्तेरेव सिद्धित्वात् यतः पुरेष्टः पूजितोऽहमतो हेतोः तत्साधनं मत्प्राप्तिसाधनं ज्ञानं मत्पराङ्मुखैः मद्भक्तिहीनैः तत्त्वमाह नित्यलीलापरिकर उद्धवे वसोः प्रवेशान्नित्यसिद्धस्याप्युद्धवस्य साधनसिद्धत्वमेव मैत्रेयमुद्धवं च ज्ञापयामास नित्यलीलाया रहस्यत्वरक्षणार्थं केचित्तु लीलाकर उद्धवो द्वारकायामेवास्ते इत्याहुः ॥११॥ तस्योद्धवस्य । इत्यर्थ इति । विभक्तिप्रतिरूपकाव्ययमिदं कल्याणार्थे न तृतीयांतशब्द इति भावः । इत्यर्थ इति । एतेन ब्रह्मादिप्रार्थनया तत्तल्लोकं मार्गप्राप्तमुत्सृज्य निजधाम यान्तामिति भावः । यद्यपि ''भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम्'' इति मुचुकुंदं प्रति श्रीकृष्णोक्तेः ''प्रज्ञां कुर्वीत ब्राह्मणः'' इति श्रुतेश्च विप्रस्यैव ज्ञानसाधनभूतप्रव्रज्याधिकारित्वेन चरमशरीरत्वं तथापि यस्मिञ्शरीरे भगवतोऽत्यंतानुग्रहो जायेत तच्छरीरमपि चरममेवेत्याशयेनोक्तं मदनुग्रहो यदिति । अत एवोक्तं प्राक्तनपद्ये 'दुरवापमन्यैः' इति । अन्यैर्मद्भक्तेतरैः क्षत्रादिजन्मभाग्भिर्दुरवापं विप्रदेहं विनैव तद्देहप्राप्यस्य प्राप्तत्वाद्दुर्लभमित्यर्थः । यद्वा । भवानामवताराणां मध्ये एष चरमः परमकाष्ठामापन्नस्तदंशिरूप इत्यर्थः । ''एते चांशकलाः सर्वे कृष्णस्तु भगवान्स्वयम्'' इत्युक्तेः स एष भावश्चरम इति पाठे ''भावः सत्ता स्वभावाभिप्रायचेष्टात्मजन्मसु'' इत्यमरात् भावो जन्मेत्यर्थः । यद्वा । स एष चरमो भावः । प्रेमा यद्येन प्रेम्णा मदनुग्रह इत्यर्थः । विनानुग्रहमेकांतसंगो न भवतीति भावः । सदाचरणशीलत्वात्तव मद्दर्शनादि जातमित्यभिप्रेत्याह–साधो इति ॥ १२ ॥ मम नाभ्ये नाभिभवे ज्ञानं चतुःश्लोक्युपदेशरूपं परं केवलं मन्महिमावभास्यते येन तत् शुद्धभगवद्भक्तिप्रतिपादकमित्याह– भागवतमिति । यद्वा । परमिति भागवतविशेषणं परं सर्वपुराणेषु श्रेष्ठं ''क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा । तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः'' इति द्वादशे सूतोक्तेः । ज्ञायतेऽनेनेति ज्ञानं भगवज्ज्ञानसाधनं भागवतमेवेत्यर्थः । 'वेद्यं वास्तवमत्र वस्तु शिवदम्' इत्युक्तेः ॥ १३ ॥ भाजन इति पुंस्त्वमार्षम् । 'भाजनं योग्यपात्रयोः' इति मेदिनी । पाठां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोन्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह ॥ तथापि नाहं प्रवृणोमि भूमन्भवत्पदांभोजनिषेवणोत्सुकः ॥ १९ ॥ कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात् पलायनम् ॥ कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्विदामिह ॥ १६ ॥ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः ॥ पृच्छेः प्रभो मुग्ध इवाऽप्रमत्तस्तन्नो मनो मोहयतीव देव ॥ १७ ॥

वलोक एवानुग्रहस्तस्य भाजनः पात्रभूतः पाठांतरे प्रतिक्षणमनुग्रहस्य पात्रमिति शुचोऽश्रूणि मुंचन्नाबभाषे उक्तवानस्मि ॥ १४ ॥ न हि स्वाज्ञाननिवृत्तिमात्रकामोऽहं किंतु त्वन्निषेवणोत्सुकस्त्वयि चाघटमानाचरणं दृष्ट्वा मे मोहो भवत्यतस्त्वं तत्त्वज्ञानं देहीति प्रार्थयितुमाह । को न्विति । चतुर्षु धर्मादिषु । तथापि हे भूमन् भवत्पदांभोजनिषेवणोत्सुकोऽहं तान्न प्रवृणोमि ॥ १५ ॥ अघटमानाचरणं दर्शयति । कर्माण्यनीहस्य निःस्पृहस्य निष्क्रियस्य वा । अभवस्याजन्मनो भवो जन्म कालात्मनस्तवारिभया दुर्गाश्रयः पलायनं च स्वात्मनि रतिर्यस्य तस्य बह्वीभिः स्त्रीभिर्गृहस्थाश्रम इति यदिहास्मिन् संसारे विदुषाममि धीः संशयेन खिद्यति ॥ १६ ॥ किं च । मंत्रेषु च

तरे प्रतिक्षणेति पाठे । आबभाष इति । परोक्षव्यपदेशः । सर्वेंद्रियाणां भगवदेकविषयत्वेन बाह्यप्रवृत्तिशून्यतामपेक्ष्येति ज्ञायते “सुप्तोहं किल विललाप” इत्यादौ तथा दृष्टत्वात् ॥ १४ ॥ ननु तवाज्ञाननिवृत्तिरपेक्षिता चेत्तर्हिं तामप्यहं करोमीति चेदाह—न हीति । अघटमानाचरणमसंभवाचरणं मोहोऽज्ञानं यतो भवति अतो हेतोः हे ईश सर्वसंपादनसमर्थोसि त्वमित्यभिप्रायः यद्यपि त्वच्चरणारविंदसेविनां चतुर्षु धर्मार्थकाममोक्षरूपेष्वर्थेषु वर्गेषु न कोप्यतिशयेन दुर्लभस्तथापीति तानहं न वांछामि तत्र हेतुः भवत्पदांभोजेति । भूमन्निति सर्वोत्कृष्टसेवया सर्वमयत्नेनैव प्राप्यत इत्याह ॥ १९ ॥ अस्माकं दासानां त्वद्गुणरूपलीलैव दर्शनश्रवणादिभिरानंदहेतुरतो नातीव हठो ज्ञाने यत्किंचिज्ज्ञानस्य सत्त्वात्सामस्त्येन ज्ञानासंभवाच्च किं तु लीला अपि काश्चनकाश्चन विरुद्धाः संति तत्रैव मे जिज्ञासास्तत्याह द्वाभ्याम् । अनहिस्य निष्क्रियस्य कर्माणि गोवर्द्धनोद्धरणादीनि न तु विश्वसृष्ट्यादीनि तेषां हि मायागुणकृतत्वेन त्वय्यारोपितत्वेन स्वरूपतस्तावकत्वाभावात् । ‘निष्क्रियं निष्कलं शांतं निरवद्यं निरंजनम्” इति श्रुत्युक्तेन निष्क्रियत्वेन न विरोधः गोवर्द्धनोद्धरणादिकर्मणां तु त्वया स्वरूपेणैव कृतत्वात्तेषां निष्क्रियत्वेन विरोध एवेति संशयः । यद्वा । नराकृति परब्रह्म संभवः नराकृतित्वेऽप्राकृतानंतकर्मवत्त्वं ब्रह्मत्वे प्राकृताप्राकृतकर्मराहित्यं तत्रैव ब्रह्मशब्दस्य रूढेः । न च निर्विशेषस्वरूपमेव ब्रह्म सविशेषस्वरूपो भगवानिति स्वरूपभेदाद्व्यवस्थेयमिति वाच्यं स्वरूपद्वयाभावादिति षष्ठोक्तेः संशय एव यतस्ततस्तथाऽभवस्याजन्मनो जन्म तथा कालात्मनो जरासंधादिभयात्पलायनं समुद्रदुर्गाश्रयश्च तथात्मन्येव रतिर्यस्य तस्य प्रमदानामयुतेन सहाश्रमप्रयुक्तपित्रादियोगे आत्मारामस्य तव रतिः रुक्मिण्यादिप्रमदाभी रमणे तु तवात्मारामता नापगच्छेत् । तासामात्मभूतत्वादित्यहं जानाम्येव अत एव मया आश्रमशब्दः प्रयुक्तः इहास्मिन् विरोधे विदां विदुषामपि धीः समाधानानुपलब्धेः खिद्यति । न च निष्क्रियत्वाजत्वकालात्मत्वात्मारामत्वादीनामेव सत्यत्वं सक्रियत्वजन्मवत्त्वभीरुत्वग्रहाश्रमत्वानामनुकरणमात्रत्वमिति वाच्यं, तथात्वे विदुषां धीरत्र खिद्यतीति नोक्तं स्यात् । सक्रियत्वादीन्यनुकरणान्येव न तु वास्तवानीति ज्ञाने कुतः खेदः तथैवाक्रियत्वादिभिः प्राकृतक्रियादय एव निषिद्धा न त्वप्राकृत क्रियादय इति ज्ञाने कुतः खेदः । तथैव ब्रह्मत्वभगवत्वाभ्यामक्रियत्वशक्तिसक्रियत्वादिव्यवस्थेति ज्ञाने कुतः खेद इति च ततश्च सक्रियत्वादीन्यनुकरणमात्राणीति ब्रुवाणाः अक्रियत्वमप्राकृताक्रियत्वम् । अभवत्वमप्राकृतजन्मवत्त्वमिति च ब्रुवाणा ब्रह्मत्वभगवत्त्वाभ्यामेवाक्रियत्वसक्रियत्वादिव्यवस्थेति ब्रुवाणा अखिद्यद्बुद्धय एव विद्वांस इति ध्वनिः । यदुक्तं स्वयं भगवता “नमे विदुः सुरगणाः प्रभवं नो महर्षयः ” इति सुरगणा ब्रह्माद्या महर्षयो व्यासाद्या अपि मे प्रकृष्टभवज्जन्म न विदुरित्यर्थः भीष्मेणत्युक्तं “न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् । यद्विजिज्ञासया युक्ता मुह्यंते:कवयोपि हि” इति ॥ १६ ॥ अन्यदाह किंचेति । प्रस्तुतेषु जरासंध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रम् ॥ अपि क्षमं नो ग्रहणाय भर्तर्वदांऽजसा यद्वृजिनं तरेम ॥ १८ ॥ इत्यावेदितहार्दाय
मह्यं स भगवान्परः ॥ आदिदेशाऽरविंदाक्ष आत्मनः परमां स्थितिम् ॥ १९ ॥ स एवमाराधितपादतीर्थादधीततत्त्वात्मविबोधमार्गः ॥ प्रणम्य
पादौ परिवृत्य देवमिहागतोऽहं विरहातुरात्मा ॥२०॥ सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभो ॥ गमिष्ये दयितं तस्य बदर्याश्रममंडलम् ॥२१॥
यत्र नारायणो देवो नरश्चभगवानृषिः ॥ मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ ॥ २२ ॥ श्रीशुक उवाच ॥ इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं
वधम् ॥ ज्ञानेनाऽशमयत् क्षत्ता शोकमुत्पतितं बुधः ॥२३॥ स तं महाभागवतं व्रजंतं कौरवर्षभ ॥ विश्रंभादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे ॥ २४॥
विदुर उवाच ॥ ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते ॥ वक्तुं भवान्नोर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरंति ॥ २५ ॥

प्रस्तुतेषु सत्सु मामाहूय वै अहो पृच्छेरपृच्छः । अकुंठितः कालादिनाऽखंडः संततः सदात्मा संशयादिरहितो बोधो विद्याशक्तिर्यस्य । मुग्धवदज्ञवत् । अप्रमत्तोऽवहितः सन् ॥ १७ ॥ स्वात्मनस्तव रहो रहस्यं तत्त्वं तस्य प्रकाशकम् । कस्मै ब्रह्मणे सर्वनामत्वमार्षम् । नोऽस्माकं ग्रहणायापि क्षमं यदि योग्यं तर्हि वद । भर्त्तः स्वामिन् । यद्यतो वृजिनं संसारदुःखमनायासेन तरिष्यामः ॥ १८ ॥ आवेदितो हार्दो हृदिस्थितोऽभिप्रायो येन तस्मै ॥ १९ ॥ आराधितपादो भगवान् स एव तीर्थं गुरुस्तस्मादधीतोऽधिगतस्तत्त्वात्मविबोधस्य परमार्थात्मज्ञानस्य मार्गो येन सोऽहं देवं परिवृत्य प्रदक्षिणीकृत्य ॥ २० ॥ तस्य दर्शनेनाह्लादो वियोगेनार्तिश्च ताभ्यां युतो बदर्याश्रमस्थानं गमिष्यामि ॥ २१ ॥ मृदु परोपद्रवशून्यं तीव्रं दुश्चरं दीर्घमाकल्पांतं तेपाते तपश्चरत इत्यर्थः । लोकभावनौ लोकानुग्रहकारकौ ॥ २२ ॥ ज्ञानेन विवेकेन॥ २३ ॥ कृष्णपरिग्रहे परिवारे मुख्यं विश्रंभाद्विश्वासात् । कौरवर्षभ हे परीक्षित् ॥ २४ ॥ यद्यस्माद्विष्णोर्भृत्याः स्वभृत्यप्रयोजनसाधकाः संतश्चरंति न हि

वधराजसूयाद्यर्थगमनादिविचारेषु अपृच्छः । उद्धव त्वमत्र कर्त्तव्यं ब्रूहीति पृष्टवान् अत्र मुग्ध इव त्वं न तु मुग्धः मोहयतीव न तु मोहयति सर्वज्ञसदादयालुनस्तथात्वानुपपत्तेरिति ॥ १७ ॥ स्वामिनो भृत्यदुःखहरणं योग्यमेवेत्याह-भर्तारिति यद्वा कस्मै प्रोवाच न कस्मा अपीत्यर्थः तेन यज्ज्ञानं कस्मैचिदपि नोक्तं तन्नोऽस्माकं ग्रहणाय क्षमं तव भृत्यत्वाद्वयं तवोपासका ज्ञानाधिकारिण एवेति भावः । ''वृजिनं कल्मषे दुःखे'' इति मेदिनी । ''तरति शोकमात्मावित्'' इति श्रुतेः । शोकं संसृतिक्लेशम् ॥ १८ ॥ मह्यमुद्धवाय परमां चतुःश्लोकीप्रोक्ताम् । यद्वा । या स्थितिः शुकदेवेन न विवृता नापि मैत्रेयेण विदुराय च तामलौकिकीमित्यर्थः ॥ १९ ॥ ॥ २० ॥ तस्य भगवतः दयितं प्रियम् ॥ २१ ॥ यत्र बदर्य्याश्रमे इत्यर्थ इति । संलापार्थतपतेश्चरणमप्यनेकार्थत्वादर्थ इति भावः । लोकानुग्रहेत्युक्तेर्लोकसंग्रह एवार्थः ॥ २२ ॥ उत्पतितं प्राप्तं ज्ञानेन तत्त्वज्ञानेन यतो बुधः ॥ २३ ॥ स विदुरः तमुद्धवं विश्वासादयमुद्धवो मदभीष्टं वक्ष्यतीत्येवंरूपात्प्रणयाद्वा 'विस्रंभः प्रणयेऽपि च' इत्यमरात् । कृष्णपरिग्रहे कृष्णपरिचारकजने तदुक्तं वररुचिना ''महिषी च सुतो भ्राता मातुलः श्यालकस्तथा । मंत्री दलञ्च सेना च सर्वे एते परिग्रहाः'' इत्यत्रोद्देश्यविधेयभावत्वान्न लिङ्गादिनियम इति ''यत्रोद्देश्यविधेयत्वं तत्रायं नियमो न हि । रामदाराश्च संतीयं करुणाभाजनं हरिः'' इत्युक्तेः ॥ २४ ॥ स्वात्मरहः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धव उवाच ॥ ननु ते तत्त्वसंराध्य ऋषिः कौषारवोऽति मे ॥ साक्षाद्भगवताऽऽदिष्टो मर्त्यलोकं जिहासता ॥ २६ ॥ श्रीशुक उवाच ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः ॥ क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात् ॥ २७ ॥ राजोवाच ॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः ॥ स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥ २८ ॥ श्रीशुक उवाच ॥ ब्रह्मशापापदेशेन कालेनाऽमोघवांछितः ॥ संहृत्य स्वकुलं नूनं त्यक्ष्यन्देहमचिंतयत ॥ २९ ॥

कृतार्थानामन्यत्कृत्यमस्तीत्यर्थः ॥ २५ ॥ तत्त्वाय संराध्य इति । अयं भावः । भगवतैव स्मरणमात्रेण तवापि तत्त्वमुपदिष्टश्रायम् । अथ केवलमसंभावनादिनिवृत्तये ज्ञानी कश्चिदाराध्यः स च तवाराध्यो मैत्रेयो न त्वहं ममांतिक एव त्वदुपदेशे तस्यादिष्टत्वादिति ॥२६॥ प्लावितोऽपनीत उरुस्तापो यस्य सः । यमस्वसुर्यमुनायाः पुलिने तीरे तां निशां क्षणमिव समुषितः । औपगविरुद्धवः ॥ २७॥ ब्रह्मशापेन निधनं प्राप्तेषु पयस्मात्त्रयाणां ब्रह्मादीनामीशो हरिरप्याकृतिं मनुष्याकारं त्यक्तवान् ॥२८॥ ब्रह्म शापो

प्रकाशं चतुःश्लोकीरूपम् । यद्वा स्वोऽसाधारणो यो भृत्यस्यार्थः 'भवत्पदांभोजनिषेवणोत्सुकः' इत्यत्रोक्तस्तं कुर्वतीति तथा इत्यर्थ इति "नैवेह नामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलम्" इत्युक्तेरिति भावः ॥ २९ ॥ तत्त्वाय ज्ञानाय संराध्यस्ते त्वया ननु निश्चये अत्राशयमाह अयं भाव इति कौषारवो मैत्रेयः मे ममातिसमीपे ॥ २६ ॥ वृत्तान्यथात्वमार्षम् । गाथा वा छंदः उपगुरप्युद्धवपितुर्नामांतरमस्ति हरिवंशे तु तस्य महाभाग इति नामोक्तम् । "उद्धवो देवभागस्य महाभागसुतोऽभवत्" इति । ततो रात्र्यंते ॥ २७ ॥ निश्चितं धनं भगवतो नित्यधाम उपगतेषु समीपं प्राप्तेषु सत्सु इति वास्तवोर्थः । अयोद्धृत्वादवशिष्ट इति चेदाह । अविरथेति । अविरथाः प्रबलयोद्धारस्तेषां यूथपाः पुनस्तेषां यूथपास्तेष्वपि मुख्य एतेन न तत्सदृशोऽन्यो योद्धास्तीत्यर्थः यद्वेदं हरेर्विशेषणमेवं आकृतिं पृथिवीं 'भूमिरवनिराकृतिः' इति कोशात् । मर्त्यलोकं जिहासता "अस्माल्लोकादुपरते मयि" इत्याद्युक्तेः । मर्त्यलोकपरित्यागो देहत्यागोऽत्र विवक्षित इति ॥ २८ ॥ त्यक्ष्यन्देहमिति । अत्र तत्त्वमाह । यद्यपि श्रीकृष्णस्य स्वयं भगवत्त्वेन नित्यस्थितिः सिद्धापि तथापि मंदधियां भ्रांत्यपनोदार्थमेवं व्याख्यायते । भगवदाराधनवाक्येन सा सिध्यति आराध्याभावे चाराधनस्यैवासिद्धेः । तस्य च परमाप्ते शास्त्रे विना तत्कथनं न संभवति असंभवकथनस्यापुरुषार्थत्वात् । आरोपश्च परिच्छिन्नगुणरूप एव वस्तुनि कल्प्यते नानंतगुणरूपे "एतच्च धारणाध्यानमंगलम्" इत्यत्रैकादशस्कंधे स्फुटतरं व्याख्यास्यामः । भगवदाकाराणां नित्यत्वं पंचमस्कंधेपि वर्णितं "नयस्त्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तद नुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयते सन्निधानं च साक्षाद्रूपेणैवात्मना" इत्युक्तेः । नित्यत्वांगाकार एव शालिग्रामशिलादिषु नृसिंहादिभेदश्च संगच्छते तत्तदवतारसान्निध्यादेव हि तत्तद्भेदः कृष्णमधिकृत्य गोपा लतापिन्यां च "तदुहोवाच ब्रह्मणोसावनवरतं ध्यातः स्तुतः परार्द्धांते सोऽबुध्यत गोपालवेशो मे पुरस्तादाविर्बभूव" इति । "तथा गोविंदं सच्चिदानंदविग्रहं सुरभूरुहतलासीनं सततं समरुद्गणोहं तोषयामि" इति श्रुतेश्च । तथा माध्वभाष्येऽपि "श्रुतिश्च वासुदेवः संकर्षणः प्रद्युम्नोऽनिरुद्धोऽहं मत्स्यः कूर्मो वराहो नरसिंहो वामनो रामो रामो रामकृष्णौ वृद्धः कल्किरहं शतधाहं सहस्रधाहममितोहमनंतोहं नैवैते जायंते नैते म्रियंते नैषामज्ञानबंधो न मुक्तिः सर्व एवह्येते पूर्णा अजरा अमृताः परमाः परमानंदाः" इति चतुर्वेदशिखायाम् । तथा नृसिंहपुराणे "युगेयुगे विष्णुरनादिमूर्त्तिमास्थाय विश्वं परिपाति दुष्टहा" इति । तथा श्रीनृसिंह तापिन्यां "तद्वाप्यक्तद्विर्व्याख्यातम्" एतदेव नृसिंहविग्रहं नित्यमिति श्रुतिश्च सेयं "ऋतं सत्यं परं ब्रह्म नृकेसरिविग्रहम्" इति एवं च श्रीमत्स्यादीनां पृथक्पृथक् वैकुंठलोकाः श्रूयंते पाद्मोत्तरखंडे एवमेव 'जलेषु मां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयम् ॥ अर्हत्युद्धव एवाऽद्धा संप्रत्यात्मवतां वरः ॥३०॥ नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः ॥ अतो मद्वयुनं लोके ग्राहयन्निह तिष्ठतु ॥ ३१ ॥ एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना ॥ बदर्याश्रममासाद्य हरिमीजे समाधिना ॥ ३२ ॥ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः ॥ क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ॥ ३३ ॥ देहन्यासं च तस्यैवं धीराणां धैर्यवर्धनम् ॥ अन्येषां दुष्करतरं पशूनां विक्लवात्मनाम् ॥ ३४ ॥ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितम् ॥ ध्यायन्गते भागवते रुरोद प्रेमविह्वलः ॥ ३५ ॥

ऽपदेशो मिषं यस्य तेन कालेन स्वशक्तिरूपेणामोघं वांछितं यस्य न ह्यत्र शापः प्रभुः किंतु भगवदिच्छैवेत्यर्थः ॥ २९ ॥ मय्युपरते सति ज्ञानमर्हति ज्ञानयोग्यो भवति ॥ ३० ॥ मत्तः सकाशादीषदपि न्यूनो न भवति यद्यस्माद्गुणैर्विषयैर्न क्षोभितः मद्वयुनं मद्विषयं ज्ञानं लोकस्योपदिशन्निह तिष्ठतु ॥ ३१ ॥ एवमनेनाभिप्रायेण शब्दयोनिना वेदकर्त्रा ईजे पूजयामास ॥ ३२ ॥ ३३ ॥ अन्येषां पशूनां पशुतुल्यानां विक्लवात्मनामधीरचित्तानाम् ॥ ३४ ॥ मनसेक्षितं चिंतितम् ॥ ३५ ॥

रक्षतु मत्स्यमूर्त्तिः' इति नारायणवर्माद्युक्तमपि संगच्छते अत एव श्रीशुकदेवेन प्रतिपादितं 'पतिर्गतिश्चांधकवृष्णिसात्वताम्' इति विशेषस्त्वत्र कृष्णसंदर्भे :निरीक्षणीय इति ॥ २९ ॥ अस्मान्मर्त्यलोकात् उपरते गते सति ॥ ३० ॥ यद्वा गुणैरप्राकृतैर्बलबुद्धिवीर्यज्ञानवैराग्यादिभिर्नार्दितः तेषां :वेगधारणसामर्थ्यमेव तैरनार्दितत्वमत्रबोध्यं यथा कामादिवेगधारणसामर्थ्यमेव कामाद्यनर्दितत्वमुच्यते उद्धवो हि अधिरथयूथपयूथपेषु मुख्य इत्युच्यते तदपि न क्वापि तादृशस्याप्राकृतबलस्याविष्कारः कृत इति बलवेगधारणमस्यास्तत्यिवं बुद्ध्यादिवेगधारणं ज्ञेयं तदेवाहाहमिवासाधारणः प्रभुर्वशीकृतमाप इत्यर्थः । मद्वयुनं "ज्ञाने गत्या च तंतूनां विस्तारे वयुनं स्मृतम्" इति निरुक्तिः । इह बदरिकाश्रमे मुनिद्वारा लोकं ग्राहयन् ॥ ३१ ॥ संदिष्टः संदेशपत्रं दत्त्वा प्रेषित इमं संदेशं नरनारायणौ ब्रूहीत्यर्थः । स च नोद्धवो एवापि इति पद्यमेव शब्दानां वेदलक्षणानामपि योनिनोत्पादकेन अनेन वेदेष्वप्यनुपलभ्यज्ञानं भगवत्यस्तीति ध्वनितं तच्चोद्धवे न्यस्तमित्यनुध्वनिः । उद्धवमुखान्नरनारायणौ तदेव प्राप्ताविति प्रत्यनुध्वनिः । संदेशपत्रं च स्वस्तिश्रीमन्नरनारायणौ प्रति विज्ञापनं चेदम्—सपादशतवर्षपर्यंतञ्च मम प्रकाशगता लीला भवेत्तन्मर्यादा च संप्रति वृत्तेति द्वारकायां च मया सपरिकरेणांतर्द्धीयते प्रभासं च गत्वावतारिताधिकारिकदेवांस्तत्तत्पदे प्रस्थाप्य ब्रह्मप्रार्थितैनैकेनांशेन वैकुंठे सार्जुनेनांशेनालक्षितं युष्मत्पदे च गम्यते । किञ्च मत्पूर्णस्वरूपदर्शनोत्कंठानां युष्माकं कृते मत्प्रियपार्षदमुख्येऽस्मिन्नुद्धवे स्वसारूप्यसाद्गुण्येऽर्पिते यतः "नोद्धवोण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठति" इदम्॥३२॥क्रीडया लीलाशक्त्या कर्त्र्या उपाधिक्येनात्त उपात्तो गृहीतो देहो यस्य तस्य लीलाशक्तेरधीनावेव तस्याविर्भावतिरोभावाविति भावः॥३३॥देहस्य न्यासो निक्षेप इव गुप्तरक्षणंधराणांयोगिभक्तानां धैर्यवृद्धये एवान्यथाभगवद्देहत्यागं श्रुत्वा तेषामपि धैर्यं नश्यतेति भावः।यद्वा धीराणां यादवादीनां देहानां न्यासं द्वारकायामप्रकटप्रकाशेऽर्पणंप्रभासे च त्यागं श्रुत्वा कीदृशम्।धैर्यवर्द्धनं श्रुत्वैव विदुरो हृदि धैर्यमेतदनिवार्यमत्र शोको न कार्य इत्येवं धृतिं चकारेत्यर्थः। यद्वा वर्द्ध च्छेदनेपि । अहो एतादृशानां यदीत्थं गतिः किं पुनरन्येषां मादृशामिति धैर्यच्यावकमित्यर्थः। अन्येषामभक्तानां योगिनामपि एकत्र देशे देहस्यांतर्द्धापनमन्यत्र देशे त्यागत्वेन लोके ज्ञापनमिति योगिभिरपि दुष्करमतिशयेनेत्यर्थः। संदर्भस्तु । देहन्यासमप्रकटलीलावकाशे धाम्नि स्वविग्रहस्य विन्यासं प्रवेशनमित्याह—पशूनां केवलकर्ममार्गसक्तानां 'पशुर्वै स देवानाम्' इति श्रुतेः । अत एव विक्लवात्मनामेवं कर्तुं व्याकुलमनसाम् ॥ ३४ ॥ आत्मानं स्वं विदुरमिति यावत् । चिंतितं मैत्रेय त्वया मच्छ्रुतं विदुराय वाच्यमिति स्मृतं ध्यायन् अहो मद्भाग्यं श्रीकृष्णेन लोकं त्यक्तवताप्यहं स्मृत इति चिंतयन् । भागवते उद्धवे अहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालिंद्याः कतिंभिः सिद्ध अहोभिर्भरतर्षभः ॥ प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ॥ ३६ ॥ इति श्रीभा० तृतीय० चतुर्थोऽध्यायः ॥ ४॥
श्रीशुक उवाच ॥ द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् ॥ क्षत्तोपसृत्याऽच्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः ॥ १ ॥
विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः सुखं वाऽन्यदुपारमं वा ॥ विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भगवान्वदेन्नः ॥ २ ॥
जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ॥ अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जनार्दनस्य ॥ ३ ॥ तत् साधुवर्याऽऽदिश
वर्त्म शं नः संराधितो भगवान् येन पुंसाम् ॥ हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणम् ॥ ४ ॥

कालिंद्याः सकाशात् सिद्ध एव विदुरः कतिपयैर्दिनैः स्वःसरितं गंगां प्रापद्यत प्राप्तः ॥ ३६ ॥ इति भागवततृतीयस्कंधे टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे भगवल्लीलां क्षत्रा पृष्टो महामुनिः ॥ प्रोवाच महदादीनां सर्गं तैश्च हरेः स्तुतिम् ॥ १ ॥ उक्तश्चतुर्भिरध्यायैः क्षत्तुर्मैत्रेयसंगमः ॥ संवादस्तु तयोः स्कंधद्वयेनाथ निगद्यते ॥ २ ॥ द्युनद्या गंगाया द्वारि हरिद्वारे आसीनं न तु कर्मव्यग्रम् । तत्र हेतुः । अगाधोऽपरिच्छिन्नो बोधो यस्येति मैत्रेयस्य सौशील्यमार्जवादिगुणाश्च करुणादयस्तैरभितृप्तः । पाठांतरे क्षत्तुः सौशील्यादिभिरभितृप्तं संतुष्टं मैत्रेयम् ॥ १ ॥ प्रश्नानेवाह । सुखायेति पंचदशभिः । तैः कर्मभिः सुखं वान्यस्य दुःखस्योपशमं वेत्यर्थः । अथवाऽन्यद्वा न विंदेत किं तदित्यपेक्षायां तस्यैव निर्देशः उपारमं वेति ततस्तैः कर्मभिर्भूयः पुनःपुनर्दुःखमेव विंदेत । अत्रैवंविधे संसारे नोऽस्माकं यद्युक्तं कर्तुं योग्यं तत्सर्वज्ञो भगवान्वदेन्निरूपयतु ॥ २ ॥ दैवात्प्राचीनकर्मणो निमित्तभूतात्कृष्णाद्विमुखस्यातोऽधर्मशीलस्यातः सुदुःखितस्य जनस्यानुग्रहाय भव्यानि मंगलानि भूतानि चरंति भवंतः परोपकारस्वभावा एवेत्यर्थः ॥ ३ ॥ तत्तस्मात् हे साधुवर्य शं सुखरूपं वर्त्म न आदिश कथय येन वर्त्मना संराधितो हृदि स्थितः सन् तत्त्वाधिगम

विदुरो यो भगवता चिंतितः स धन्योहं तु मंदभाग्योस्मीति चिंतयानं श्रीशुकः प्रोत्साहयति त्वं तु मृत एव तेन जीवितोऽतस्तस्मादपि श्रेष्ठोसीत्याह—कुरुश्रेष्ठेति ॥ ३५ ॥ सिद्ध एव कृतकृत्य एव यत्र स्वःसरिति मित्रासुतो मैत्रेयः ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ महामुनिर्मैत्रेयः तैर्महदाद्यधिष्ठातृदेवैः ॥ (१) ॥ अथ संगमानंतरं तयोर्विदुरमैत्रेययोः ॥ (२) ॥ तत्र कर्माव्यग्रत्वे पाठांतरे द्वितीयांतपाठे ॥ १ ॥ इत्यर्थ इति । उपाङ्पूर्वाद्रमतेः शांतिरर्थ इति भावः । अत्रान्यशब्दस्य समासावस्थायां दुगागमविधायकशास्त्राभावादचारुतां समीक्ष्याह—यद्वेति । अन्यदित्यव्ययमेवान्यार्थे । तस्यैवान्यत्पदनिर्दिष्टस्यैव तत इति तृतीयार्थे तसिरित्याह—तैरिति । एवंविधे बहुदुःखाढ्ये भगवत्पदमत्र भवदर्थकं सर्वे सर्वार्थवाचका इति न्यायमाश्रित्य ॥ २ ॥ अहं न वदामीति त्वया न वाच्यं भवादृशां परोपकारस्वभावत्वादित्याह जनस्येति । अतो कृष्णविमुखत्वात् ''पापं नातः परतरं यद्वैमुख्यं जनार्दनात्''इत्युक्तेः । अतोऽधर्मशीलत्वात् सुपदमतीवार्थेत्र अतीवदुःखितस्येत्यर्थः । भावयंति चिंतयतीति भूतानि भक्ता इति यावत् । भू मिश्रीकरणचिंतनयोरतो वर्तमान औणादिकः क्तो बोध्यः । 'भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्' इत्यमरः । इत्यर्थ इति । ''परोपकाराय सतां विभूतयः'' इत्युक्तेरिति भावः ॥ ३ ॥ यद्यस्मात्साधूनामेष स्वभावस्तत्तस्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः ॥ यथा ससर्जाऽग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ॥ ५ ॥ यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ॥ योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथाऽसीत् ॥ ६ ॥ क्रीडन्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः ॥ मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ॥ ७ ॥ यैस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान्सहलोकपालान् ॥ अचीक्लृपद् यत्र हि सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः ॥ ८ ॥ येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त ॥ नारायणो विश्वसृगात्मयोनिरेतच्च नो वर्णय विप्रवर्य ॥ ९ ॥ परावरेषां भगवन्व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णम् ॥ अतृप्नुम क्षुल्लसुखावहानां तेषामृते कृष्णकथाऽमृतौघात् ॥ १० ॥

आत्मापारोक्ष्यं तत्सहितं पुराणमनादिवेदप्रमाणकम् ॥ ४ ॥ करोति कर्माणीत्यादीनां वर्णयेति पंचमश्लोके क्रियासंबंधः । यथा येन प्रकारेण पुरुषरूपेण कृतावतारः त्र्यधीशः त्रिगुणमायानियंता अतः स्वतंत्र एव यानि कर्माणि करोति । कर्माण्येव विशेषतः पृच्छति । यथेत्यादिना । निरीहो निष्क्रियो निःस्पृहो वा संस्थाप्य सुस्थितं कृत्वा । वृत्तिं जीविकाम् ॥ ५ ॥ स्वे स्वीये खे हृदयाकाशे निवेश्य स्थापयित्वा । निवृत्ता वृत्तयो यस्य । गुहायां योगमायायाम् । बहुधा ब्रह्मादिरूपेण अधीश्वरः अतश्चैश्वर्यः ॥ ६ ॥ मत्स्याद्यवतारभेदैः क्रीडन्यानि कर्माणि विधत्ते यथा पुनर्विशेषं प्रष्टुमौत्सुक्यमाविष्करोति । मन इति सुश्लोकाः पुण्यकीर्तयस्तेषां मौलिरिवाधिक्येनोपरि विराजमानस्तस्येत्यर्थः ॥ ७ ॥ अधिलोकनाथो लोकनाथाधिपतिः अलोकाँल्लोकालोकपर्वताद्बहिर्भागान् अचीक्लृपत्कल्पयामास । यत्र येषु सर्वाणि यानि सत्त्वानि तेषां निकायास्तेषां भेदः अधिकृतस्तत्तत्कर्माधिकारी आश्रित इति वा ॥ ८ ॥ उतापि च येन प्रकारेण जीवानामात्मा स्वभावस्तत्कृतं कर्म तत्कृतं रूपं तत्कृता अभिधास्तासां भेदं कृतवान् । विश्वस्रष्टा स्वयमात्मयोनिः स्वतःसिद्धः ॥ ९ ॥ ननु महाभारते त्वया सर्वं श्रुतमेव किं पुनः प्रश्नैस्तत्राह । परे त्रैवर्णिका अवरे

द्वेतोः त्वं तु साधुवर्योसीत्यवश्यं वक्तव्यमेव त्वयेत्यर्थः । यच्छति ददाति ॥ ४ ॥ अतो मायानियंतृत्वात् ईहापदस्योभयार्थत्वाद्वेति ॥ ५ ॥ एकस्यानायासेन बहुधाभवने हेतुः 'योगेश्वराधीश्वरः' इति एतादृशं सृष्ट्वानुप्रविष्ट इति ॥ ६ ॥ पुण्यकीर्त्तयः शंकरादयः इत्यर्थ इति । पुण्यश्लोकेडयकर्मणः इत्युक्तेरिति भावः । "सेशं पुनात्यन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः" इति न्यायेन सर्वोत्कृष्टत्वं हरेरेवेत्यर्थः ॥ ७ ॥ अधिश्रित इति पाठे आश्रित इति वार्थः प्रतीतः । प्रतीतिविषयः ॥८॥ तत्कृतं स्वभावकृतं पुनस्तत्कृतं कर्मकृतं तत्कृता रूपकृता अभिधा नाम स्वभावः सात्त्विकादिः कर्मयज्ञादिरूपस्वरूपं ब्राह्मणत्वादि अभिधा ब्राह्मणादि एतत्स्वभावादि भेदविधानप्रकारं कथने सामर्थ्यं द्योतयन्नाह विप्रवर्येति यद्यपि बहुपुस्तकेषु विश्वसृगात्मयोनिरिति पाठोस्ति तथापि "सृजिदृशोः" इति सूत्रस्थरज्जुसृड्भ्यामिति भाष्यप्रयोगाद्विश्वसृजः पदांते कुत्वाभावादयुक्तः प्रतिभातीति । यद्वा । कुत्वकल्पनार्षेति ॥ ९ ॥ तेषां परावरधर्माणां तत्र भारते इत्यर्थ इति । कृष्ण कथामृतौघस्य प्रतिक्षणं स्वादुतमत्वात्कृष्णकथायामलंबुद्धिर्नोदयत इति भावः । "अभीक्ष्णं मुहुरर्थेथ क्षुल्लं तुच्छे क्षुधाजिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्तृप्नुयात्तीर्थपदोऽभिधानात्सत्रेषु वः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ॥ ११ ॥ मुनिर्विवक्षुर्भगवद्गुणानां सखाऽपि ते भारतमाह कृष्णः ॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायाम् ॥ १२ ॥ सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः ॥ हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखात्ययमाशु धत्ते ॥ १३ ॥ ताञ्शोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन ॥ क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनाम् ॥ १४ ॥

शूद्रादयस्तेषां व्रतानि धर्माः मे मया अभीक्ष्णं पुनःपुनः तेषां श्रवणेनातृप्नुम तृप्ताः स्म तेषां तुच्छसुखावहत्वात् यस्तु तत्र कृष्णकथामृतौघः सूचितस्तस्माद्दते तत्र त्वलं बुद्धिर्नास्तीत्यर्थः ॥ १० ॥ तत्र हेतुः । क इति । तीर्थपदः कृष्णस्य अभिधानात्कथामृतौघात् सत्रेषु समाजेषु सूरिभिर्नारदादिभिः ॥ ११ ॥ महाभारतस्याप्यत्रैव तात्पर्यमित्याह । मुनिः श्रीकृष्णो वेदव्यासो भगवद्गुणान् मोक्षधर्मांते नारायणीयाख्याने वक्तुमिच्छुः सन्नर्थकामादिवर्णनं तु हरिकथायां मतिप्रवेशार्थमेवेत्याह । यस्मिन्निति नृणां मतिर्ग्राम्यसुखानुवादैर्द्वारभूतैर्नु निश्चितं हरेः कथायां गृहीता नीता । तदुक्तमितिहाससमुच्चये । "कामिनो वर्णयन् कामं लोभं लुब्धस्य वर्णयन् ॥ नरः किं फलमाप्नोति कूपेंऽधमिव पातयन् ॥ लोकचित्तावतारार्थं वर्णयित्वाऽत्र तेन तौ ॥ इतिहासैः पवित्रार्थैः पुनरत्रैव निंदितौ ॥ अन्यथा घोरसंसारबंधहेतू जनस्य तौ ॥ वर्णयेत्स कथं विद्वान्महाकारुणिको मुनिः" इति ॥ १२ ॥ श्रीहरिकथायां मतिप्रवेशस्य फलमाह । सा कथा मतिर्वा । अन्यत्र ग्राम्यसुखे । ततः किमत आह । हरेरिति ॥ १३ ॥ एवंभूतायां कथायां ये न रमंते तान् शोचति । शोच्या ये तेषामपि शोच्यांश्च तत्राविदो भारततात्पर्यानभिज्ञान् शोच्यान् ये तु ज्ञात्वापि हरेः कथायां विमुखास्तांस्तेषामपि शोच्यानिति योज्यम् । अनिमिषः कालो येषामायुः क्षिपति । अत्रैव हेतुः । वृथैव वादगतिस्मृतयो वाग्देहमनोव्यापारा येषाम् ॥ १४ ॥

छिक्काक्वति क्षुधाकर्तृहर्त्र्योः क्षोदयुते नरे" इति निरुक्तिः ॥ १० ॥ तत्रालंबुद्ध्यभावे 'सत्रं यज्ञे समाजे च च्छादनारण्यछद्मसु" इति निरुक्तिः । तद्धरिकथायां मत्यानयनम् । अत्र भारते तेन व्यासेन तौ कामार्थौ अत्रैव भारत एव अन्यथा कामार्थयोरेव वस्तुतस्तात्पर्ये तौ कामार्थौ विद्वदादिपदत्रयबोध्ये तस्मिन्व्यासे तद्वर्णनं न संगच्छत इति यः कृष्णकथामृतौघः कर्णरूपां नाडीं डलयोरैक्यान्नालीं प्रविश्य हृदयं गतः 'नाली कुल्याशाकभिदोः' इति कोशात् ॥ ११ ॥ यस्मिन्भारते ॥ १२ ॥ ततः ग्राम्यसुखनिवृत्तेः अतोत्र ॥ १३ ॥ शोच्या जडास्तेषामपि सर्वथा शोचनीयान् तत्रेति वाक्यालंकारे । अत्रैवायुःक्षपणे एव यद्वा । त्रिविधा जनाः संति श्रद्धधाना अश्रद्धधाना विमुखाश्चेति । भक्तौ परमपुरुषार्थत्वेन ये विश्वसंतरते श्रद्धधानाः 'तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते । जातश्रद्धो मत्कथासु" इत्यादौ परमपुरुषार्थत्वेनैव प्रतिपादयिष्यमाणत्वात् । पुरुषसाधनमात्रत्वेनैव विश्वसतोऽश्रद्धधानाः भक्त्या विनैव पुरुषार्थसाधनेच्छवो विमुखा इति तत्र प्रथमान् साभिनंदनमुक्त्वा द्वितीयानुल्लंघ्य तृतीयाञ्छोचति शुद्धभक्तैर्ये शोच्याः स्वर्गमोक्षादिसाधनरतास्तैरपि शोच्यान् भक्तिरहितकर्मज्ञानयोगादिमतोहं शोचामि । तत्र हेतुः शास्त्राण्यधीत्याधीत्यापि तत्तात्पर्यमविदुषः यतो हरेरित्यादि अघेन प्राचीनार्वाचीनमहापराधेनैव हेतुनेत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारम् ॥ उद्धृत्य पुष्पेभ्य इवाऽऽर्तबंधो शिवाय नः कीर्तय तीर्थकीर्तेः ॥ १५ ॥ स विश्वजन्मस्थि
तिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः ॥ चकार कर्माण्यतिपूरुषाणि यानीश्वरः कीर्तय तानि मह्यम् ॥ १६ ॥ श्रीशुकउवाच ॥ स एवं भगवान्
पृष्टः क्षत्रा कौषारविर्मुनिः ॥ पुंसां निःश्रेयसार्थेन तमाह बहु मानयन् ॥ १७ ॥ मैत्रेय उवाच ॥ साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता ॥
कीर्तिं वितन्वता लोक आत्मनोऽधोक्षजात्मनः ॥ १८ ॥ नैतच्चित्रं त्वयि क्षत्तर्बादरायणवीर्यजे ॥ गृहीतोऽनन्यभावेन यत्त्वया हरिरीश्वरः ॥१९॥
मांडव्यशापाद्भगवान्प्रजासंयमनो यमः ॥ भ्रातुः क्षेत्रे भुजिष्यायां जातः सत्यवतीसुतात् ॥ २० ॥ भवान्भगवतो नित्यं संमतः सानुगस्य
च ॥ यस्य ज्ञानोपदेशाय माऽऽदिशद्भगवान् व्रजन् ॥ २१ ॥ अथ ते भगवल्लीला योगमायोपबृंहिताः ॥ विश्वस्थित्युद्भवांतार्था वर्णयाम्यऽनुपू
र्वशः ॥ २२ ॥ भगवानेक आसेदमग्र आत्माऽऽत्मनां विभुः ॥ आत्मेच्छानुगतो वाऽऽत्माऽनानामत्युपलक्षणः ॥ २३ ॥

तत्तस्माद्धे कौषारवास्य विश्वस्य शिवाय कथासु सारभूतां हरेः कथामेवोद्धृत्य नः कीर्तय । यथा पुष्पेभ्यो मधु मधुप उद्धरति तद्वदुद्धृत्य॥ १५॥ विशेषतः श्रीकृष्णकथा
कथनीयेत्याशयेनाह । स इति । यो विश्वसर्गाद्यर्थं पूर्वं गृहीतशक्तिः स एव पुरुषेषु कृतावतारः सन् पुरुषानतिक्रम्य वर्तमानानि यानि कर्माणि चकार तानि विस्तराद्वद
॥१६॥ पुंसां निःश्रेयसमेवार्थः प्रयोजनं तेन हेतुना पृष्टः॥१७॥बहुमानमेवाह । साध्विति पंचभिः । अधोक्षज एवात्मा मनो यस्य तस्यात्मनः स्वस्य कीर्तिं च प्रसंगादि
तन्वता ॥ १८ ॥ हरिर्यद्गृहीत एतच्चित्रं न भवति । कुतः । बादरायणवीर्यजे ॥ १९ ॥ ननु तर्हि कथं शूद्रत्वं कथं च लोकानुग्राहकत्वं तत्राह । मांडव्यशापादिति ।
भ्रातुर्विचित्रवीर्यस्य क्षेत्रे क्षेत्रत्वेन स्वीकृतायां भुजिष्यायां दास्यां यम एव त्वं जातोऽसि ॥ २० ॥ किंच । भवानिति । कुतः यस्य तव ज्ञानोपदेशाय मामादिष्टवान् ।
चकारात्स्वयमपि स्मृत्यैवोपदिष्टवानिति ॥२१॥ विश्वस्थित्यादयोऽर्था विषया यासां ताः ॥२२॥ तत्र सृष्टिलीलां वर्णयितुं ततः पूर्वावस्थामाह । इदं विश्वमग्रे सृष्टेः पूर्वं

ननु तेपि स्वमतस्थापने नानावादनानागतिनानास्मृत्यादिमंतः सदसि प्रगल्भंते तत्र साधिक्कारमाह—वृथेति । वृथेत्युभयत्रान्वयि वा ॥ १४ ॥ यतो वृथैवायुःक्षयोऽन्यत्र तस्माद्धेतोः ॥ १५ ॥ 'मधुरेण समापयेत्' इति
न्यायमनुसंदधानो विस्तारेण कृष्णकथैव कीर्त्तनीया श्राव्या चेति तामेव पृच्छति प्रश्नांते स इति । प्रगृहीता शक्तिर्माया तद्गुणा वा येन सः । पिप्रति गाः पालयंति घृतादिविक्रयेण लोकं पूरयंति वेति पुरुषा
गोपास्तेषु यानि दावानलपानादीनि ॥ १६ ॥ यद्वा पुंसां निःश्रेयसो मुक्तिहेतुः ''श्रेयः श्रुतिं भक्तिमुदस्य' इत्याद्युक्तेर्भक्तिः :स एवार्थो यस्य तेन भगवल्लीलाश्रवणजातभक्त्या पुमांसो मुच्यन्त इति हेतोः पृष्टव
तेत्यर्थः । तं विदुरम् ॥ १७ ॥ साध्नोति परकार्यमिति साधुपदार्थमन्वर्थवन्तं तेनैव पदेनामंत्रयन्नाह—साधो इति । साधु समीचीनं यथा स्यात्तथा ''साधुर्वार्द्धुषिके चारौ सज्जने त्वभिधेयवत्'' इति मेदिनी ॥ १८ ॥
ननु बादरायणवीर्यजो धृतराष्ट्रादिरपि सत्यं परं तु त्वयि ततो विशेषं इत्याह—गृहीत इति । यादृशो हरौ भावः प्रेमा न तादृशोऽन्यस्मिन्नित्यनन्यभावः ॥ १९ ॥ अत्राक्षिपति तर्हीति ॥ २० ॥ अन्यदाधिक्यमाह—किञ्चे
ति । संमतः श्रेष्ठत्वेन मतः अनुगैरुद्धवादिभिस्सहितस्य आदिष्टवान् आज्ञप्तवान् व्रजन्नंतर्दधत् ॥ २१ ॥ २२ ॥ तत्रादौ ततः सृष्टेः नन्वसत्पुनः कथमासीदिति चेदाह—कारणात्मनेति । 'इष्टस्यार्थस्य संसिद्धौ को विद्वान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् ॥ मेनेऽसंतमिवात्मानं सुप्तशक्तिरसुप्तदृक् ॥ २४ ॥ सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥ माया नाम महाभाग ययेदं निर्ममे विभुः ॥२५॥ कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥ २६ ॥ ततोऽभवन्महत्तत्त्वमव्यक्तात्कालचोदितात् ॥ विज्ञानात्माऽऽत्मदेहस्थं विश्वं व्यंजंस्तमोनुदः ॥ २७ ॥

परमात्मा भगवानेक एवास आसीत् आत्मनां जीवानामात्मा स्वरूपं विभुः स्वामी च नान्यद्द्रष्टृदृश्यात्मकं किंचिदासीत् । कारणात्मना सत्त्वेऽपि पृथक्प्रतीत्यभावादित्याह । अनानामत्युपलक्षणो नानाद्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यत इति । तथा । यद्वा । अकारप्रश्लेषं विनैवायमर्थः यः सृष्टौ नानामतिभिरुपलक्ष्यते स तदा एक एवासीदिति । कुतः । आत्मेच्छा माया तस्या अनुगतो लये सति । यद्वा आत्मन एकाकित्वेनावस्थानेच्छायामनुवृत्तायामित्यर्थः ॥ २३ ॥ तत्र प्रथमं मायोद्भवप्रकारमाह द्वाभ्याम् । स वै एष द्रष्टा सन् दृश्यं नापश्यत् । यतः स एकराडेक एव तदा प्रकाशते आत्मानमसंतमिव मेने दृश्याभावे द्रष्टृत्वाभावात् । तदाह । सुप्ता मायायाः शक्तयो यस्य सः न त्वसंतमेव मेने यतोऽसुप्ता दृक् चिच्छक्तिर्यस्येति ॥ २४ ॥ सा वै द्रष्टृदृश्यानुसंधानरूपा सदसदात्मिका कार्यकारणरूपा । यद्वा सद्दृश्यमसद्दृश्यमात्मस्वरूपं च तयोरात्मा यस्याः तदुभयानुसंधानरूपत्वात् ॥२५॥ कालवृत्त्या कालशक्त्या गुणमय्याम् क्षुभितगुणायाम् अधोक्षजः परमात्मा आत्मांशभूतेन पुरुषेण प्रकृत्यधिष्ठातृरूपेण वीर्यं चिदाभासमाधत्त । वीर्यवान् चिच्छक्तियुक्तः ॥ २६ ॥ कालप्रेरितादव्यक्तान्मायातः तत्त्वपदं परित्यज्य महतो लक्षणमतः पुँल्लिंगनिर्देशो विज्ञानात्मेति सत्त्वप्रधानत्वात् स्वदेहस्थं विश्वमुच्छूनबीजगतमंकुरादिरूपं वृक्षमिव व्यंजन् व्यंजयन् प्रकाशयन् यतोऽसौ तमोनुदतीति तमो नुदः । तदुक्तं सात्वततंत्रे । "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः" इति न्यायमाश्रित्याह—यद्वेति । तदा सृष्टेः प्राक्काले अत्र हेतुमाशंकते कुत इति अधिष्ठानलयं विनाधिष्ठेयलयो न दृष्टचर इति चेदाह—यद्वेति । इत्यर्थ इति । सिसृक्षारिरक्षादिवदेकाकितिष्ठासापि कदाचित्तत्र जीवादृष्टवशादुदयत इति भावः ॥ २३ ॥ तत्रेति वाक्यालंकारे । 'स वै नैवरेमे तस्मादेकाकी न रेमे'' इति श्रुतेः । तदसदिव मननं चिच्छक्तिः स्वरूपभूतांतरंगशक्तिः ॥ २४ ॥ कार्यस्य प्रागभावात्सच्छब्दवाच्यत्वं कारणस्य पूर्वं सत्त्वादसच्छब्दवाच्यत्वं न घटते इति चेदाह—यद्वेति।तयोर्दृश्यादृश्ययोः स्थूलसूक्ष्मयोर्महाभूतमहदादिरूपयोरात्मा स्वरूपं विद्यते यस्या मायायाः सा सदसदात्मिका 'शैषिकः कप्' तयोरुभयोर्दृश्यादृश्ययोरनुसंधानमधिष्ठानं यत्तद्रूपत्वात् तयोस्तस्यानिर्गतत्वांदितिभावः ॥ २५ ॥ क्षुभितो विकारत्वेनोत्थितो गुणो रजो यस्यां तस्यां परमात्मा इंद्रियजज्ञानातीतः चिदाभासं चित्प्रतिबिंबं समाधत्त स्थापितवान् ॥ २६ ॥ कालप्रेरितात् तदुत्पत्त्युचितकालप्रापितविकृतेः विज्ञानात्मा चित्तस्वरूपेण सर्वदेहेषु योऽस्तीत्यर्थः । उच्छूनं धरणिसलिलसंयोगात्किंचित्स्थूलतां प्राप्तं यद्बीजं तत्र गतं तमोनुदः प्रलयकालीनाज्ञानध्वंसकर्त्ता रजोंशरूपेण क्रियाशक्तिमान्महत्तत्त्वभेदः सूत्रतत्त्वमप्यभूदिति च ज्ञेयमत्र यन्महत्स्रष्टुः पुरुषस्य महदभेदेनोपासनस्य फलं तत्सात्वततंत्रे पंचरात्रे उक्तं 'विष्णोः' इत्यादिना । यद्वा । विज्ञानात्मा सृष्ट्यनुकूलविज्ञानरूपः श्रुतावीक्षणशब्दानिर्दिष्टः कुलालस्य कार्यानुकूलपूर्वज्ञानभासमानभाविष्यद्घटादिवत्स्वस्थं विश्वं व्यंजन्नित्यर्थः । अण्डसंस्थितं विराडंतर्यामिरूपं सर्वभूतस्थं सर्वांतर्यामिरूपम् । तानि त्रीणि रूपाणि ब्रह्माभिन्नानि ज्ञात्वा ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः ॥ आत्मानं व्यकरोदात्मा विश्वस्याऽस्य सिसृक्षया ॥ २८ ॥ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत ॥ कार्यकारणकर्त्रात्मा भूतेंद्रियमनोमयः ॥ २९ ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् ॥ वैकारिकाश्च ये देवा अर्थाभिव्यंजनं यतः ॥ ३० ॥ तैजसानींद्रियाण्येव ज्ञानकर्ममयानि च ॥ तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ॥ ३१ ॥ कालमायांशयोगेन भगवद्वीक्षितं नभः ॥ नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलम् ॥ ३२ ॥ अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः ॥ ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनम् ॥ ३३ ॥ अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम् ॥ आधत्ताऽम्भो रसमयं कालमायांऽशयोगतः ॥३४॥ ज्योतिषाऽम्भोऽनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितम् ॥ महीं गंधगुणामाधात् कालमायांऽशयोगतः ॥ ३५ ॥ भूतानां नभआदीनां यद्यद्भव्यावरावरम् ॥ तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः ॥ ३६ ॥

स्यान्यथो विदुः ॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितम् ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते" इति ॥ २७ ॥ अहंकारोत्पत्तिमाह सार्धाभ्याम् । सोऽपीति । अंशश्चिदाभासो निमित्तं गुणा उपादानं कालः क्षोभकस्तदात्मा तदधीनः भगवान् सर्वाध्यक्षस्तद्दृष्टिगोचरः सन् स्वयमात्मानं व्यकरोद्रूपांतरमनयत् ॥ २८ ॥ अहंकारस्य लक्षणमाह । कार्यमधिभूतं कारणमध्यात्मं कर्तृ अधिदैवं तेषामात्मा आश्रयः । अत्र हेतुः । भूतेंद्रियमनोमयस्तद्विकारवान् मन इति देवानामप्युपलक्षणम् ॥ २९ ॥ एतदेव विभागतः प्रपंचयति । वैकारिक इत्यादिना । वैकारिकः सात्त्विकस्तैजसो राजसः देवाश्च वैकारिका सात्त्विकाहंकारकार्यभूता इत्यर्थः । यतो येभ्य इंद्रियाधिष्ठातृभ्यो देवेभ्यो हेतुभूतेभ्योऽर्थाभिव्यंजनं शब्दादिप्रकाशो भवति ॥ ३० ॥ तैजसान्येवेत्यन्वयः । ज्ञानेंद्रियाणां ज्ञानमयानां सात्त्विकत्वशंका मा भूदित्येवकारः । तामसो भूतसूक्ष्मस्य शब्दस्यादिः कारणम् । यतः शब्दात् खमाकाशो भवति आत्मनो लिंगं स्वगुणशब्दरूपेण प्रकाशकं हृदयाकाशतया वा । यद्वा लिंगं शरीरम् । "आकाशशरीरं ब्रह्म" इति श्रुतेः ॥ ३१ ॥ नभसः स्वस्मादनुसृतमुद्भूतं स्पर्शं विकुर्वद्रूपांतरं नयदनिलं वायुम् । एवं सर्वत्र तन्मात्रद्वारा भूतोत्पत्तिरिति ज्ञातव्यम् ॥ ३२ ॥ नभसा सहितः स्वयं चोरुबलान्वितः ततो ज्योतिस्तेजः लोचनं प्रकाशकम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ हे भव्य विदुर पाठांतरे भाव्यं कार्यं यद्यदवरमवरं कार्यं तेषां

सोपि महानपि स्वयमित्यात्मेत्यस्यार्थः । यद्वा । विश्वस्य जनिष्यमाणस्यात्माऽऽश्रय इति महद्विशेषणमिदम् । "आश्रयाधीनयोरात्मा" इति स्वामिचरणाः ॥ २८ ॥ अत्र कार्याद्याश्रयत्वे तद्विकारवान् भूतेंद्रियमनांसि यत उद्भूता इत्यर्थः ॥२९ ॥ एतदेव गुणभेदेन भूतेंद्रियादिविकारवत्त्वमेव ॥३०॥ इत्यर्थ इति । सत्त्वस्यैव ज्ञानहेतुत्वात्तत्कार्यभूता देवानामपि ज्ञानहेतुत्वात्सात्त्विकाहंकारकार्यत्वमिति भावः । शब्दरूपेणेति "तं त्वौपनिषदं पुरुषम्" इत्यादिश्रुतेः । हृदयाकाशेहि ब्रह्मप्रकाशो भवति तस्य तत्रस्थत्वात् । 'सर्वस्य चाहं हृदि संनिविष्टः' इति श्रीमुखोक्तेः । यद्वा "तस्माद्वा एतस्मादात्मन आकाशः" इत्यादिश्रुतेरात्मकार्यत्वात्तज्ज्ञापकं लिंगशब्दस्य शरीरवाचकत्वं विमृश्याह—यद्वेति। श्रुतिः स्पष्टार्था ॥३१॥ एवं यथाशब्दतन्मात्रद्वाराकाशोत्पत्तिरुक्ता तथा सर्वभूतोत्पत्तिर्ज्ञेयेति॥३२॥नभसाकाशेन उरुबलेन भगवद्वीक्षणरूपेणान्वितः ततो रूपतन्मात्रात् ज्योतिःतेजोऽभूदिति शेषः॥३३॥ रसमयं रसगुणम् । आधत्तासृजत् ॥ ३४ ॥ अनुसंसृष्टं संयुतमंभः ॥ ३५ ॥ पाठांतरे 'भाव्यावरावरम्' इति पाठे भाव्यं च तदवरावरं चेति कर्मधारयः । नभ आदीनां मध्ये भाव्यं कार्यं यद्यदवरमवरं बाह्यादिकं तेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते देवाः कला विष्णोः कालमायांऽशयोगतः ॥ नानात्वात्स्वक्रियाऽनीशाः प्रोचुः प्रांजलयो विभुम् ॥ ३७ ॥ देवाऊचुः ॥ नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रम् ॥ यन्मूलकेता यतयोंऽजसोरु संसारदुःखं बहिरुत्क्षिपंति ॥ ३८ ॥ धातर्यदस्मिन्न भव ईश जीवास्तापत्रयेणोपहता न शर्म ॥ आत्मह्लँभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम ॥ ३९ ॥

कार्याणां परैः कारणैरनुसंसर्गायन्वयाद्यथासंख्यं यथाक्रममुत्तरोत्तरमधिकान् गुणान् विदुः । तथाहि । नभसः शब्द एव गुणोऽन्यान्वयाभावात् वायोस्तु स्पर्शः आकाशान्वयाच्छब्दश्च एवं तेजसस्तौ च रूपं च अंभसस्तानि रसश्च मह्याः सर्वे ॥ ३६ ॥ देवा महदाद्यभिमानिनः विष्णोः कला अंशाः काललिंगं विकृतिः मायालिंगं विक्षेपः अंशलिंगं चेतना तानि विद्यंते येषु अतः समत्वेन नानात्वात्परस्परासंबंधात्स्वक्रियायां ब्रह्मांडरचनायामनीशा अशक्ताः संतो विभुं परमेश्वरं प्रोचुः ॥ ३७ ॥ "मिथः स्पर्धिष्णवो देवा न मिलंतः परस्परम् ॥ विश्वकर्मण्यनीशाना निर्विण्णा हरिमीडिरे॥" नमामेति । प्रपन्नानां तापोपशमे आतपत्रं छत्रम् । तत्र हेतुः । यस्य पादारविंदस्य मूलं तलं केत आश्रयो येषां ते संसारदुःखं बहिर्दूरत उत्क्षिपंति पीरत्यजंति । पांथाः स्वगृहं प्राप्य मार्गश्रममिव ॥ ३८ ॥ श्रमं विनिवेदयंत आहुः । हे धातः पितः यद्यस्माद्भवे संसारे आत्मन्नात्मनि संबोधनं वा शर्म सुखम् ऋते यदिति पाठे यत्पादभजनं विना शर्म न लभंते । ननु ज्ञानादज्ञानकृतस्तापो निवर्तते किं मदंघ्रिच्छा

कार्याणां परैः कारणैरनुसंसर्गात्संबंधात् तौ शब्दस्पर्शौ तानि शब्दस्पर्शरूपाणि सर्वे शब्दस्पर्शरूपरसगंधा इत्यर्थः॥३६॥यतः कालादिलिंगिनोऽतो हेतोः समत्वेन तुल्यत्वेन तुल्यानां संध्यभावात्परस्परमसंबंधोऽस्त्येव "वर्णा अपि समाना ये अ-इ-उ-ऋ-ऌ-पंचकाः।एतेऽपि यांति नो संधिं नरादीनां तु का कथा"इति न्यायेन विकृतिर्गुणक्षोभः कालाद् गुणव्यतिकरः विक्षेपः शोकहर्षादिरूपः महदादीनां भगवदिच्छयैव सहसा देहेंद्रियादिवत्त्वमिति ज्ञेयम्। निर्विण्णा निर्वेदमापन्नाः नन्वेते महदादय एव स्वगुणैर्जीवान्बद्ध्वा मुहुः स्वर्गनरकादिषु क्षिपन्तः संसारयंति तदमी निर्हेतुद्रोहिणः सर्वथा ध्वंसनीया एवेति मैवं वादीरेते हि निर्हेतूपकारिण एव तथा हि-मोक्षसाधनानि ज्ञानयोगनिष्कामकर्माणि एतैर्विना न सिध्यंति तथा प्रेमसाधनानि श्रवणकीर्त्तनस्मरणदास्यसख्यादीनि भगवत्कृपोपव्यंजितैरेभिरेव सिध्यंति । किं च । परदारपरद्रव्योपहरणगोब्राह्मणद्रोहादिविविधपातकानि नरकसाधनान्येतैरेव सिध्यंतीति नैते दूषणीयाः यथा भागीरथ्या जलं सज्जनानां स्नानपानादिभिः परमपावनममृतमेव कूलस्थेषु तृणगुल्मादिषु धान्यगोधूमादिषु पनसाम्रद्राक्षादिषु प्रविष्टं सर्वविधजनानां परमोपकारकं परमसुखदमेव विषवृक्षेषु प्रविष्टं मारकं मद्यादिप्रविष्टं पातकं च तेषामेव भवति तत्र भागीरथीजलस्य न दोषः किं तु तत्तत्पात्रस्यैव तथा"तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" इत्यादिभक्त्यनुसारेण तेषु तेषु दुर्जीवेषु स्थितानामेषामधिकृतभक्तानां को दोषः किन्तु तेषामेवेति । वस्तुतस्तु ते परमवैष्णवा एवेति तत्कृतया स्तुत्यैवाभिव्यंजयितुमाह-एते देवा इति ॥ ३७ ॥ 'प्रपन्नः शरणागतः'इत्यभिधानात् । तत्रातपत्रत्वे भक्ताभीष्टदानेन द्योतमानत्वादाह–देवेति ॥ ३८ ॥ आर्षत्वकल्पने गौरवं मत्वाह–संबोधनं वेति । अत्राक्षिपति नन्विति । तत्राक्षेपे इत्यर्थ इति । "श्रेयःश्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये । तेषामसौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मार्गेति यत्ते मुखपद्मनीडैश्छंदःसुपर्णैर्ऋषयो विविक्ते ॥यस्याऽघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः प्रपन्नाः॥४०॥यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधाय ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंऽघ्रिसरोजपीठम् ॥४१॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते ॥ व्रजेम सर्वे शरणं यदीशस्मृतं प्रयच्छत्य भयं स्वपुंसाम् ॥ ४२ ॥ यत्सानुबंधेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ॥ पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥ ॥ ४३ ॥ तान्वा असद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश ॥ अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥ ४४ ॥

याश्रयणेन तत्राहुः । सविद्यां तदाश्रयणमेवविद्याप्रापकमित्यर्थः ॥ ३९ ॥ अज्ञातस्याश्रयणा योगात्तज्ज्ञानसाधनमाहुः । मार्गेत्यन्वेषयंति यत्तत्तीर्थपदस्ते पदं वयं प्रपन्नाः । कैर्मार्गेति । छंदःसुपर्णैर्वेदपक्षिभिः तवैव मुखपद्मं नीडं येषां यथा पक्षिणो नीडादुद्गतास्ततस्ततः परिभ्रम्य पुनस्तत्रैव विशंति तथा वेदा अपि त्वत्त उद्गतास्त्व य्येव पर्यवस्यंति अतो वेदानाश्रित्य त्वत्पदं मृगयंत इति । विविक्ते असंगे मनसि किंचाघमर्षमघनाशकमुदमुदकं यासां सरितां तासु वराया गंगायाः पदमुद्गमस्थानम् । अतो गंगामनुसेवमाना अपि तदुद्गमस्थानं त्वत्पदं प्राप्नुवंतीत्यर्थः ॥ ४० ॥ ननु विषयाकृष्टचित्तानां कुतस्तदन्वेषणं, तत्राहुः । यच्छ्रद्धयेति । यद्धृदयेऽवधाय ध्यात्वा वैराग्यं बलं यस्य तेन ज्ञानेन धीरा भवंति । सरागे चित्ते ध्यानमेव कुतस्तत्राहुः श्रद्धया श्रवणपूर्विकया भक्त्या च संमृज्यमाने संशोध्यमाने ॥ ४१ ॥ भक्तानुग्रहं स्मरंत आहुः । विश्वस्येति ॥ ४२ ॥ अंतर्यामितया नित्यं सन्निहितेऽनर्थकं व्रजनमित्याशंक्याहुः । यदिति । सानुबंधे सोपकरणे असति तुच्छे पुर्यां स्वदेहे एव वसतोऽपि यत्सुदूरं दुष्प्रापम् ॥ ४३ ॥ ननु यदि हृदिस्थस्यापि पदाब्जं केषांचित्सुदूरं तर्ह्यन्येषामपि तथैव स्यादविशेषादित्याशंक्याहुः । तानिति । असद्वृत्तिभिर्बहिर्मुखैरक्षिभि रिंद्रियैः पराहृतं दूरमपहृतमंतःस्थं मनो येषां ते । अथो अत एव ते नूनं तान्न पश्यंति । वै प्रसिद्धम् । कुतः पुनस्तेषां तत्संगः स्यात् । कान् । ते तव पदन्यासो गमनं

क्लेशल एव शिष्यत'' इत्युक्तेः ''वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम्' इत्याद्युक्तेश्चेति भावः ॥ ३९ ॥ अत्रायं भावः यथा निरास्पदे देशे विश्रामार्थं स्थलं पश्यंत इतस्ततश्च रद्भिः पक्षिभिर्धावमानास्सायं स्वनीडं विशद्भिः सहैव गता विश्रामार्थं तन्नीडाधिष्ठितवृक्षतलमाश्रयंति जनास्तत्र सुखं च प्राप्नुवंति तथा वेदमार्गमाश्रिता अप्यंते त्वामेव विशंतीत्याशयः । एकविधमन्वेषणप्रकारमुक्त्वा द्वितीय माह—किञ्चेति । यतो गंगोद्भवस्थानं त्वमसि अतो हेतोः । इत्यर्थ इति । गंगाप्रणालिकया गच्छंतस्त्वामेव तदाश्रयत्वेन प्राप्नुवंतीति भावः ॥ ४० ॥ पुनरत्राक्षिपति नन्विति । तदन्वेषणं मच्चरणारविंदान्वेषणम् । अवधा येति दधातेर्ल्यपीत्वाभावात् । उपसर्गवशाद्ध्यानार्थता चात्र पुनराक्षिपति—सराग इति ॥ ४१ ॥ अभयप्रदाने सामर्थ्यं द्योतयन्त आहुरीशेति ॥ ४२ ॥ पुनराक्षिप्य समाधत्ते अंतर्यामीति । विरक्तैकलभ्यं त्वत्पदाब्ज मिति भावः ॥ ४३ ॥ पुनरत्राप्याक्षिपति—नन्विति । इत्यर्थ इति विषयाविष्टचेतसां हरिभक्तदर्शनमपि दुर्लभं तत्संगस्य तु का कथेति भावः । अथो इत्यस्य स्थाने पथ इति लक्ष्म्य इत्यस्य स्थाने च लक्ष्यानिति लक्ष्यो दर्शनयिः लक्षणास्वीकारे गौरवं मत्वाह—मार्गान्वेति । इत्यर्थ इति । विषयाविष्टचेतसां कुतः श्रवणाद्यवकाश इति भावः । प्रथमांतं लक्ष्या इत्येवं पाठं मत्वाह—यद्वेति । ये एवंभूतास्त्वत्पदन्यासविलासो लक्ष्यो येषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये॥ वैराग्यसारं प्रतिलभ्य बोधं यथांऽजसाऽन्वीयुरकुंठधिष्ण्यम् ॥४५॥ तथाऽपरें चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठाम् ॥ त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्न तु सेवया ते ॥ ४६ ॥ तत्ते वयं लोकसिसृक्षयाऽऽद्य त्वयाऽनुसृष्टास्त्रिभिरात्मभिः स्म ॥ सर्वे वियुक्ताः स्वविहारतंत्रं न शक्नुमस्तत्प्रतिहर्तवे ते ॥ ४७ ॥ यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र ॥ यथोभयेषां त इमे हि लोका बलिं हरंतोऽन्नमदंत्यनूहाः ॥ ४८ ॥

तस्य विलासो विभ्रमस्तस्य लक्ष्मीः शोभा तस्या ये । त्वल्लीलाकथादिभिः शोभमानांस्त्वद्भक्तानित्यर्थः । पथ इति लक्ष्यानीति च पाठे त्वत्पदन्यासविलासो लक्ष्यो येषां तान् पथस्त्वन्मार्गभूतान् सतो मार्गान् वा श्रवणादीन्न पश्यतीत्यर्थः । यद्वा । ये एवंभूता भागवतास्ते तानुन्मत्तान्नूनं नैव पश्यंतीत्यन्वयः । सत्संगाभावेन हरिकथाश्रवणाभावाद्धृदिस्थितमपि तेषां सुदूरमिति भावः ॥ ४४ ॥ एतदेव स्फुटयंति । पानेनेति द्वाभ्याम् । वैराग्यं सारो बलं यस्य बोधस्य तं लब्ध्वान्वीयुः प्रापुः । अकुंठधिष्ण्यं वैकुंठलोकम् ॥ ४५ ॥ आत्मनि समाधिर्मनःस्थैर्यं स एव योग उपायस्तस्य बलेन ज्ञानयोगतः श्रमेण मोक्षः सत्संगतस्त्वत्कथाश्रवणादिना त्वनायासेनैव अहंममताविष्टानां तु न कथंचिदिति भावः ॥ ४६ ॥ तदेवं स्तुत्वा प्रार्थयंते चतुर्भिः तत्तस्मात् हे आद्य ते त्वदीया वयं यस्माल्लोकानां सिसृक्षया त्वयाऽनुसृष्टाः क्रमेणोत्पादिताः । त्रिभिरात्मभिः सत्त्वादिस्वभावैरतएव विरुद्धस्वभावत्वाद्वियुक्ताः संतो यदर्थं सृष्टास्तत्स्वविहारतंत्रं त्वत्क्रीडोपकरणं ब्रह्मांडं ते तुभ्यं प्रतिहर्तवे प्रतिहर्तुं समर्पयितुं न शक्नुमोऽतस्त्वं नः स्वचक्षुः परिदेहीति त्रयाणां श्लोकानां चतुर्थेनान्वयः ॥ ४७ ॥ असामर्थ्यमेव प्रपंचयितुं कार्यस्यातिवैचित्र्यमाहुः । भो अज काले तत्तदवसरे बलिं भोगं

तादृशा इत्यर्थः । उन्मत्तान्विषयहृतेंद्रियमानसान् इति भाव इति । "कथा हारिकथोदर्कास्सतां स्युर्हि समागमे" इत्युक्तेः "हृदिस्थोऽप्यतिदूरस्थः कर्मविक्षिप्तचेतसाम्" इत्युक्तेश्चेदं तात्पर्यम्—ये तु सत्संगं हरिकथाश्रवणं च कुर्वंति तेषां हरिपदाब्जं सुंदरं नेत्यर्थतः सिद्धमत्रेति ॥ ४४ ॥ एतदेव कथाश्रवणेन भगवज्ज्ञानोद्भवनमेव यथापदं परपद्यस्थतथापदेनान्वेति स्तुतियोग्यतां द्योतयंतः प्राहुर्देवेति ॥ ४५ ॥ बलिष्ठां भगवच्छरणागतिं विना साधनशतैरपि जेतुमशक्यामित्यर्थः । "मामेव ये प्रपद्यंते मायामेतां तरन्ति ते" इत्यत्रोक्तैवकारात्—तेषां ज्ञानयोगिनां "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति श्रीमुखोक्तेः । इति भाव इति । सेवानंदमनुभवतामानुषंगिको मोक्षः श्रवणादिसाधनवतामतिक्लेशेन कथंचिन्मोक्ष उभयरहितानां न कथंचिदपीति तात्पर्यम् ॥ ४६ ॥ यस्माद्भवदाश्रयेणैव सर्वेषामुत्तमत्वं तत्तस्माद्धेतोः त्वमेवाद्योस्माकमतस्त्वमेव स्वार्थं प्रार्थयितुं योग्योसीत्याहाद्येति । अत एव त्रिभिरुत्पादितत्वादेव । प्रतिहर्त्तव इति आर्षत्वात्तुमर्थे "तुमर्थे सेसेनसेऽसेन्—" इत्यादिना छान्दसस्तवेन्प्रत्ययः । यतो वयमसमर्था अतो हेतोः तच्चक्षुस्तद्वचनज्ञानम् ॥ ४७ ॥ " प्रत्यूहः प्रतितर्के च विघ्नशीघ्रविचारयोः" इति निरुक्तेः 'स्यादूहः क्षोदतर्कयोः' इति चोक्तेरूहशब्दस्य विघ्नवाचकत्वाभावादाह—यद्वेति । इत्यर्थ इति तर्कस्याक्षेपार्थकत्वादिति भावः । तत्त्वाभिमानिदेवताभिरीशः प्रार्थित इत्यत्र प्रमाणमाह—तथा चेति । तास्तत्त्वाभिमानिदेवता एनं परमेशम् । आयतनं स्थानं नोऽस्मभ्यं प्रजानीहि आज्ञापय यस्मिन्नायतने प्रतिष्ठिताः स्थिताः स्पष्टमन्यच्छ्रुतिपदाविवरणम् ॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देवशक्त्या गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ॥ ४९ ॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमाऽऽत्मन्करवाम किं ते ॥ त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणाम् ॥ ५० ॥ इति श्रीभागवते म०तृतीयस्कंधे महदादिसर्गे सर्वदेवकृतस्तोत्रवर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥ ऋषिरुवाच ॥ इति तासां स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः ॥ १ ॥

यावत्साकल्येन ते तुभ्यं हराम समर्पयाम यथा येन प्रकारेणान्नमदाम भक्षयामेत्यनेनान्नमात्रं चास्माकमैश्वर्येण तु भोगस्तवैवेत्युक्तम् । उभयेषां तव चास्माकं च यत्र स्थित्वा इमे जीवा अनूहा अप्रत्यूहा निर्विघ्नाः । यद्वा अनूहा अवितर्का निःसंशया इत्यर्थः । तथा च श्रुतिः । "ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नम दाम" इति ॥ ४८ ॥ अवश्यं च त्वयाऽस्माकमेषां च कार्योपाधीनां जीवानां वृत्तिः परिकल्पनीया जनकत्वादित्याहुः । नोऽस्माकं सान्वयानां सकार्याणां यद्वा अन्वेतीत्यन्वयः । कारणं तत्सहितानां त्वमेवाद्यः कारकम् । अत्र हेतवः । कूटस्थोऽविक्रियः पुरुषोऽधिष्ठाता पुराणः पुरातनः । एतदुपपादयंति त्वमिति । हे देव अज एव त्वं गुणानां सत्त्वादीनां कर्मणां जन्मादीनां च योनौ कारणभूतायां शक्त्यां मायायां प्रथमं रेत आदधे निहितवानसीत्यर्थः । कीदृशम् । कविं सर्वज्ञं महत्तत्त्वरूपम् ॥ ४९ ॥ तथा हे आत्मन् देव सत्प्रमुखा महदादयो वयं यदर्थं बभूविम तत् किं ते कार्यं करवाम । सृष्टिमिति चेत्तत्राहुः । तर्हि नोऽस्माकं त्वं स्वचक्षुः स्वीयं ज्ञानं शक्त्या सह परिदेहि प्रयच्छ । यस्मात्त्वत्त एवानुग्रहो येषां ते यदनुग्रहास्तेषामस्माकं क्रियार्थे इयानेव एतावाननुग्रहो येषामित्येकं वा पदम् । त्वदीयज्ञानक्रियाशक्तिभ्यामेव वयं सृष्टौ क्षमा नान्यथेत्यर्थः ॥ ५० ॥ इति तृतीये टीकायां पंचमोऽध्यायः ॥ ५ ॥ षष्ठे तैरीश्वराविष्टैः सृष्टिमाह विराट्तनोः ॥ अधिदैवादिभेदं च तत्रैव भगवत्कृतम् ॥ १ ॥ स्वशक्तीनां महदादीनामसमेत्यामिलित्वा सतीनां स्थितानाम् । प्रसुप्तं लोकतंत्रं विश्वरचना यासाम् । यद्वा । प्रसुप्तजीवोपकरणानां गतिं स्थितिं दृष्ट्वा

भगवतोत्रावश्यकतामाहुरव श्यमिति।अन्वयशब्दोत्र संतत्युपलक्षितकार्यवाचको यद्यप्यस्ति तथाप्यत्र प्रकृतेर्महदादिकार्यत्वाभावात्तद्ग्रहणं न संभवति तदर्थमाहुर्यद्वेति।कारणं प्रकृतिस्तस्याः सर्वत्रानुगतेः प्रकृतेरपि तदिच्छारूपत्वात्तस्या अपि कारणं त्वमेवेत्याहुः।अत्र सर्वकारणत्वे अविक्रियो निर्विकार एव चिन्तामणिरिव कारणम् अधिष्ठातुः प्रकृतिपतेस्तव सृष्टिसामर्थ्यमस्ति न तु स्त्र्यादिसमानामस्माकमिति भावः।ननु ममापि कश्चित्कारणमस्त्विति चेदाह–पुरातनः कारणशून्य इत्यर्थः अन्यथानवस्थानात् । एतत्सर्वकारणत्वमज एव स्वयमजन्मैव इत्यर्थ इति । वीर्यधारकस्यैव कारणत्वमस्तीति भावः ॥ ४९ ॥ ततः प्रकृत्यां वीर्यनिक्षेपानंतरम् । अहं महान् प्रमुखे आदौ येषां ते मत्प्रमुखाः । सत्प्रमुखा इति पाठस्तु लेखकप्रमाद एवांधपरंपरया प्रतीयते तदर्थस्तु–स्वामिचरणैर्महदाद्य इति कृतस्तेन मत्प्रमुखा इत्येव शोभनः पाठः स्वामिसंमतः तत्रैवं हठे तु सति भगवति : प्रकर्षेण मुखं येषां ते तथा त्वां निरीक्षमाणा इत्यर्थः । अंतर्यामित्वात्त्वं जानास्येवेत्याहुरात्मन्निति । प्रलयेऽपि द्योतमानत्वादाहुर्देवेति । यद्वा वरदानस्वभावत्वाद्देवेति । शक्त्या चिच्छक्त्या क्रियार्थे सर्जनक्रियानिमित्तम् । इयान् स्वीयशक्तिज्ञानदानरूपमात्र एव अर्थांतरे चमत्कृतिरेव हेतुरित्येकं पदमिति । इत्यर्थ इति । :न हि जडानां चैतन्याश्रयमंतरेण किंचित्कर्तुं शक्तिरस्तीति भावः ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ तैर्महदादिभिः तत्रैव विराट्तनावेव ॥ (१) ॥ जडासु रचनासामर्थ्यस्य चेतनधर्मस्यासत्त्वं मत्वाह–यद्वेति । जीवोपकरणानींद्रियादीनि ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥ २ ॥ सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् ॥ भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥ ३ ॥ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः ॥ प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषम् ॥ ४ ॥ परेण विशता स्वस्मिन् मात्रया विश्वसृग्गणः ॥ चुक्षोभान्योऽन्यमासाद्य यस्मिँल्लोकाश्चराचराः ॥ ५ ॥ हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् ॥ आंडकोश उवासाऽप्सु सर्वसत्त्वोपबृंहितः ॥६॥ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् ॥ विबभाजात्मनात्मानमेकधा दशधा त्रिधा ॥ ७ ॥ एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः ॥ आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ॥ ८ ॥

आविशदित्युत्तरेणान्वयः ॥ १ ॥ कालेन संज्ञा उद्बोधो यस्याः कालयति क्षोभयति स्वकार्याणीति वा कालसंज्ञा प्रकृतिस्तां शक्तिं प्रकृत्या सह प्रवेशात्त्रयोविंशतितत्त्वानामित्युक्तं अंतर्यामितया प्राविशत् ॥ २ ॥ चेष्टारूपेण क्रियाशक्त्या कर्म तेषां क्रियां जीवानामदृष्टं वा ॥ ३ ॥ प्रबुद्धं कर्म क्रियाशक्तिर्यस्य स त्रयोविंशतेर्गणः दैवेनेश्वरेण प्रेरितः । मात्राभिरंशैः अधिपूरुषं विराड्देहम् ॥ ४ ॥ जननमेवाह । परेणेश्वरेण । विश्वसृजां तत्त्वानां गणः मात्रया चुक्षोभ परिणतो न सर्वात्मना यस्मिँल्लोकाः स्थिताः ॥ ५ ॥ स पुरुषोऽधिपुरुष इत्युक्तः आंडकोशे ब्रह्मांडमध्ये सर्वैः सत्त्वैरनुशायिभिर्जीवैः सहितः ॥ ६ ॥ गर्भः कार्यरूपो विराट् देवशक्तिर्ज्ञानशक्तिस्तयैकधा । हृदयावच्छिन्नचैतन्यरूपेण कर्मशक्तिः क्रियाशक्तिस्तया दशधा । प्राणरूपेण प्राणादयः पंच । "नागः कूर्मश्च कृकलो देवदत्तो धनंजयः ।" इत्येते पंचैवं वृत्तिभेदेन दशविधः प्राणः आत्मशक्तिर्भोक्तृशक्तिस्तयाऽध्यात्मादिभेदेन त्रिधाऽऽत्मानं विभक्तं कृतवान् ॥ ७ ॥ एवं विभागसामर्थ्याय तस्योत्कर्षमाह । एष हीति । अशेषस

कालयति मेलयति सर्वमिति कालो वृत्तिविशेषः स एव संज्ञा यस्यास्सा तथा । महदादीनामेव परस्परमिलनात्प्रकृतेश्च सर्वानुगतेस्त्रयोविंशतीत्युक्तमिति संदर्भः । कालेनैव महदाद्या विविधा संज्ञा यस्याः सा प्रथमं संहननकारिण्यां शक्त्यैव ततो वर्षसहस्रांतर्यमितयेत्यर्थः । महदहंकारौ पञ्च तन्मात्राणि पंचमहाभूतानि एकादशेंद्रियाणीति त्रयोविंशतिः युगपदित्यव्ययमेककाले प्रमाणं चात्र "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतिः ॥ २ ॥ संदर्भस्तु चेष्टारूपेण कालाख्येन 'योयं कालस्तस्य ते व्यक्तबंधोश्चेष्टामाहुः' इत्युक्तेः तेषां तत्त्वानां क्रियां व्यापारं व्यापारस्यापि चेतनधर्मत्वात्तत्त्वेषु तदसंभवं मत्वाह—जीवानामदृष्टं वेति॥३॥४॥महदादीनां सर्वात्मना परिणामे तत्रतत्र कार्याणां स्वस्वकारणे लयोक्तिरसंगता स्यादिति भावः । यद्वा । मात्रया पुरुषरूपेणांशेन स्वस्मिन्—तत्त्वगणे अन्योन्यमासाद्य प्रधानगणभावं प्राप्य चुक्षोभ :ब्रह्मांडरूपेण परिणतोऽभवत् यस्मिंस्तत्त्वगणे ॥ ५ ॥ हिरण्मयस्तेजोरूपः अप्सु परमेशगर्गजातोदकेषु य आंडकोशस्तत्रोवासेति ॥ ६ ॥ हृदयावच्छिन्नचैतन्यरूपेण जीवरूपेण प्राणः प्राक्क्रमणो नासाग्रवर्त्ती, अपानोऽवाक्क्रमणः पाय्वादिस्थानवर्त्ती, समानो भुक्तपीतान्नादिसमीकरणः शरीरमध्यवर्त्ती, उदान उत्क्रमणः कंठस्थानवर्त्ती, :व्यानो विष्वक्क्रमणः सकलशरीरवर्त्ती, नाग उद्गारकरः, कूर्म उन्मीलनकरः, कृकलः, क्षुत्करः, देवदत्तो जृंभाकरः धनंजयः पोषणकर इति विवेकः ॥७॥ तस्य हिरण्मयपुरुषस्य । तस्मिन् विराजि । यत्र विराजि । असौ प्रत्यक्षसिद्धः । भूतानां देवतिर्यङ्मनुष्याणां समूहः विभाव्यते यतः सत्तां प्राप्य दृश्यत इत्यर्थः । योगिनो हि तदंतर्यामिणा सहैक्यभावनया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साध्यात्मः साधिदैवश्च साधिभूत इति त्रिधा ॥ विराट्प्राणो दशविध एकधा हृदयेन च ॥ ९ ॥ स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षजः ॥ विराजमतपत्स्वेन तेजसैषां विवृत्तये ॥ १० ॥ अथ तस्याभितप्तस्य कति चायतनानि ह ॥ निरभिद्यंत देवानां तानि मे गदतः शृणु ॥ ११ ॥ तस्याग्निरास्यं निर्भिन्नं लोकपालोऽविशत्पदम् ॥ वाचा स्वांशेन वक्तव्यं ययाऽसौ प्रतिपद्यते ॥१२॥ निर्भिन्नं तालु वरुणो लोकपालोऽविशद्धरेः ॥ जिह्वयांऽशेन च रसं ययाऽसौ प्रतिपद्यते ॥ ॥ १३ ॥ निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदम् ॥ घ्राणेनांऽशेन गंधस्य प्रतिपत्तिर्यतो भवेत् ॥ १४ ॥ निर्भिन्ने अक्षिणी त्वष्टा लोक पालोऽविशद्विभोः ॥ चक्षुषांऽशेन रूपाणां प्रतिपत्तिर्यतो भवेत् ॥ १५ ॥ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलोऽविशत् ॥ प्राणेनांऽशेन संस्पर्शं येनाऽसौ प्रतिपद्यते ॥ १६ ॥ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः ॥ श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते ॥ १७ ॥ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमौषधीः ॥ अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते ॥ १८ ॥

त्वानां प्राणिनामात्मा व्यष्टीनां तदंशत्वात् अंशो जीवः अवतारत्वोक्तिस्तस्मिन्नारायणाविर्भावाभिप्रायेण ॥ ८ ॥ पूर्वश्लोकार्थं विवृणोति । साध्यात्मः अध्यात्मानींद्रियाणि तत्सहितः विराडिति सर्वत्र ॥९॥ अध्यात्मादिभेदं प्रपंचयितुमाह । स्मरन्निति । विज्ञापितम् 'यावद्बलिं तेऽज हराम' इत्यादि स्वेन तेजसा चिच्छक्त्या अतपत् एवं करिष्यामीत्यालोचितवान् । " यस्य ज्ञानमयं तपः" इति श्रुतेः । विवृत्तये विविधवृत्तिलाभाय ॥ १० ॥ मे मत्तः शृणु ॥ ११ ॥ आयतनान्येवाह । तस्याग्निरित्यादिचतुर्दशभिः । आस्यं निर्भिन्नं पृथक् जातं पदं स्वस्थानं स्वांशेन स्वशक्त्या वाचा सहाविशत् असौ जीवः वक्तव्यं प्रतिपद्यते शब्दमुच्चारयतीत्यर्थः । सर्वत्र यन्निर्भिन्नं तदधिष्ठानम् अग्न्यादि प्रथमांतमधिदैवम् । वागादींद्रियं तृतीयांतमध्यात्मम् । प्रतिपत्तव्यमधिभूतम् ॥ १२ ॥ हरेः विराजः ॥ १३ ॥ १४ ॥ त्वष्टा आदित्यः ॥ १५ ॥ प्राणेनेति । प्राणवद्देहव्यापिना त्वगिंद्रियेणेत्यर्थः ॥ १६ ॥ शब्दस्य सिद्धिं ज्ञानम् ॥ १७ ॥ त्वचं चर्म ओषधीरोषधयः त्वगिंद्रियस्यैव स्थानभेदेन विषयद्वयं कंडूः

तमपि पुरुषमवतारं विदुरिति ज्ञेयम् ॥८॥ अधिदैवानींद्रियदेवताः अधिभूतानि अधिष्ठानानि विषयाश्च हृदयेन हृदयावच्छिन्नचैतन्येन जीवेनेति यावत् । प्राणः प्राणरूपः॥९॥ अंतर्यामिरूपेण प्रविष्टस्येश्वरस्य कृत्यमाहयस्येश्वरस्य ज्ञानमयं ज्ञानस्वरूपमेव तप इति श्रुत्यर्थः । एषां महदादीनां "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्यादिश्रुतेः । कारणानुग्रहेणैव कार्यशक्तिरुद्भवतीति भावः ॥ १० ॥ अथ भगवत्कृततत्त्वविज्ञप्तिस्मृत्युत्तरं तस्य समष्टिविराजः अभितप्तस्य परमेशप्रकाशितस्य आयतनानि आस्यादिस्थानानि निरभिद्यंत पृथगभवन् देवानामग्न्यादीनाम् ॥११॥ इत्यर्थ इति । शब्दोच्चारणस्यैव वक्तव्यप्रतिपादनत्वादिति भावः । सर्वत्र वाक्येषु प्रतिपत्तव्यं प्राप्तव्यं विषय इति यावत् ॥ १२ ॥ हरेर्हरित्वेन ध्येयस्य विराज इत्यर्थः । एवमग्रे विष्ण्वादिपदेष्वपि ज्ञेयम् । यया वाचा ॥ १३ ॥ पदं स्थानम् उद्देश्यविधेयभावत्वान्नासे पदमिति योजना न दुष्टेति । विवेचितमन्यत्र । एवमग्रेऽपि यतो येन घ्राणेन ॥ १४ ॥ यतो येन चक्षुषा ॥ १५ ॥ चर्माणीति । चर्मोपलक्षिता त्वगित्यर्थस्तु द्वितीयस्कंधे उक्तः परं त्वत्र चर्माणि त्वगिंद्रियाधिष्ठानानीति ज्ञेयम् ॥ १६ ॥ अस्य विराजः येन श्रोत्रेण ॥ १७ ॥ तत्र त्वगिंद्रिये एकस्मिन्नपि स्पर्शग्राहके भेदद्वयमिदं लभ्यम् बहिराधिष्ठानं चर्म इंद्रियं लो म देवता ओषध्याधिष्ठात्र्य इत्येको भेदः । अंतर्बहिराधिष्ठानं तु त्वक् इंद्रियमपि त्वक् देवता च वायुरित्यन्यो भेदः इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् ॥ रेतसांऽशेन येनासावानंदं प्रतिपद्यते ॥ १९ ॥ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् ॥ पायुनांशेन येनाऽसौ विसर्गं प्रतिपद्यते ॥ २० ॥ हस्तावस्य विनिर्भिन्नाविंद्रः स्वःपतिराविशत् ॥ वार्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते ॥ २१ ॥ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् ॥ गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते ॥२२॥ बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् ॥ बोधेनांशेन बोद्धव्यं प्रतिपत्तिर्यतो भवेत् ॥ २३ ॥ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत् ॥ मनसांशेन येनाऽसौ विक्रियां प्रतिपद्यते ॥ २४ ॥ आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदम् ॥ कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते ॥ २५ ॥ सत्त्वं चास्य विनिर्भिन्नं महान्धिष्ण्यमुपाविशत् ॥ चित्तेनांऽशेन येनाऽसौ विज्ञानं प्रतिपद्यते ॥ २६ ॥ शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत ॥ गुणानां वृत्तयो येषु प्रतीयंते सुरादयः ॥ २७ ॥ आत्यंतिकेन सत्त्वेन दिवं देवाः प्रपेदिरे ॥ धरां रजःस्वभावेन पणयो ये च ताननु ॥२८॥ तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः ॥ उभयोरंतरं व्योम ये रुद्रपार्षदां गणाः ॥ २९ ॥ मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह ॥ यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः ॥ ३० ॥

स्पर्शश्च । तत्र चायं नामभेदो देवताभेदश्चेति द्वितीयस्कंध एव व्याख्यातम् ॥ १८ ॥ कः प्रजापतिः ॥ १९ ॥ २० ॥ स्वःपतिः स्वर्गस्य पतिः । वार्तया क्रयविक्रयादिशक्त्या । वृत्तिं जीविकाम् ॥ २१ ॥ गत्या पादेंद्रियेण ॥ २२ ॥ २३ ॥ विक्रियां संकल्पादिरूपाम् ॥ २४ ॥ आत्मानमहंकारम् । अभिमन्यतेऽनेनेत्यभिमानो रुद्रः कर्मणाऽहंवृत्त्या कर्तव्यमिति क्रियाम् ॥ २५ ॥ सत्त्वमिति बुद्धिचित्तयोरभेदेन निर्देशः । महानिति ब्रह्मा । चित्तेन चेतनया ॥ २६ ॥ त्रिलोकोत्पत्तिमाह । शीर्ष्ण इति । वृत्तयः परिणामाः ॥ २७ ॥ एतदेव प्रपंचयति द्वाभ्याम् । आत्यंतिकेनोर्जितेन पणव्यवहारे पणंते यागादिना व्यवहरंतीति पणयो मनुष्यास्ताननु एतदुपकरणभूता ये गवादयस्तेऽपि धरां प्रपेदिरे ॥ २८ ॥ तृतीयं तमस्तदीयेन तामसेन उभयोर्द्यावापृथिव्योरंतरं मध्यं व्योमांतरिक्षं तदेव भगवतो नाभिस्तामाश्रिता रुद्रपार्षदां रुद्रस्य पार्षदां भूतादीनां गणाः ॥ २९ ॥ अवर्तत प्रवृत्तम् । ब्रह्म वेदः । यस्तून्मुखत्वान्मुखोद्भवत्वाद्वर्णानां मुख्यो मुख्य इव प्रथमो गुरुश्चाभूत् सोऽपि मुखतोऽवर्ततेत्यनुषंगः ।

संदर्भः । चक्रवर्त्ती तु—तथा त्वच्यधिष्ठाने त्वक् रोमाणि चेंद्रियंद्वयम् । ओषध्यो देवताः कंडूर्विषयः तत्र त्वगिंद्रियमनिलो देवता स्पर्शो विषय इत्याह ॥ १८॥ रेतसा रेतउपलक्षितेनोपस्थेनेत्यर्थः । ''उपस्थो हि सर्वेषामानंदानां परमानंद इति श्रुतेः'' येनोपस्थेन ॥ १९ ॥ विसर्गं मलोत्सर्गादि ॥ २० ॥ 'स्वर्पतिः' इति पाठेऽहरादित्वाद्रेफः ॥ २१ ॥ गत्या गतिसाधनपादेंद्रियेण प्राप्यं प्राप्तव्यदेशम् ॥ २२ ॥ २३ ॥ २४ ॥ अहंकारमहंकारास्पदं गोलकं हृदयैकदेशम् ॥ २५ ॥ सत्त्वंबुद्धिचित्तास्पदं हृदयैकदेशम् । महानिति । विष्णुब्रह्मणोरभेदनिर्देशः । चेतनया बुद्धया च विज्ञानमध्यवसायं विशिष्टज्ञानञ्च क्वचिदत्र 'बुद्धिं चास्ये' इत्यधिकश्लोकोप्यस्ति स च न स्वामिचरणसंमतः तैस्तस्याग्निरित्यादिचतुर्दशभिरिति प्रतीकलेखनादत्र सत्त्वं चास्येति व्याख्याने बुद्धिचित्तयोरभेदनिर्देशकथनाच्च ॥ २६ ॥ द्यौः स्वर्लोकः येषु द्युप्रभृतिषु 'गुणानां वृत्तयस्तिस्रः सुरनृप्रमथादयः' इत्यादिपुराणात् । यद्वा । वृत्तयः सुखदुःखमोहात्मिकाः सुखादय इति पाठसत्त्वे ज्ञेयाः आदिना गंधर्वादिग्रहः ॥ २७ ॥ एतदेव गुणपरिणामत्वमेव ॥ २८ ॥ २९ ॥ मुखमिव यथा शरीरोत्पत्तौ प्रथमं मुखमुत्पद्यते तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः ॥ यो जातस्त्रायते वर्णान्पौरुषः कंटकक्षतात् ॥ ३१ ॥ विशोऽवर्तंत तस्योर्वोर्लोकवृत्तिकरीर्विभोः ॥ वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्तयत् ॥३२॥ पद्भ्यां भगवतो जज्ञे शुश्रूषाधर्मसिद्धये ॥ तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः॥३३॥ एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिम् ॥ श्रद्धयाऽऽत्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिः ॥ ३४ ॥ एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः ॥ कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयम् ॥ ३५ ॥ अथाऽपि कीर्तयाम्यंऽग यथामति यथाश्रुतम् ॥ कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधां सतीम्॥ ॥ ३६ ॥ एकांतलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगम् ॥ ३७ ॥

अध्यापनादिना ब्राह्मणस्य वेदो वृत्तिः तया वृत्त्या सह ब्राह्मणो मुखतो जात इत्यर्थः । एवमुत्तरत्र वर्णत्रयेऽपि ज्ञातव्यम् ॥ ३० ॥ क्षत्रं पालनरूपा वृत्तिस्तत्क्षत्रमनुव्रतोऽनुसृतः क्षत्रियोऽपि बाहुभ्योऽवर्तत इत्यर्थः । तदनुव्रतत्वमेवाह । य इति । पौरुषः पुरुषस्य विष्णोरंशः कंटकाश्चोरादयस्तेभ्यो यत्क्षतमुपद्रवस्तस्मात्त्रायते रक्षति॥ ३१ ॥ विशः कृष्यादिव्यवसायाः लोकस्य वृत्तिकरीर्जीविकाहेतवः । तस्य विभोरूर्वोः प्रवृत्ताः तदुद्भव ऊरुजो वार्तां जीविकां यः स्ववृत्त्या संपादितवान् ॥ ३२ ॥ तस्यां निमित्तभूतायां यस्य वृत्त्या हरिः स्वयमेव तुष्यते ॥ ३३ ॥ यद्यस्माज्जाता गुरुत्वाज्जनकत्वाद्वृत्तिप्रदत्वाच्च हरेराराधनं तेषां परो धर्म इत्यर्थः ॥ ३४ ॥ भो क्षत्तः दैवकर्मात्मरूपिणः कालकर्मस्वभावशक्तिमतो भगवतो योगमायाबलेनोज्जृंभितमेतद्विराड्रूपमुपाकर्तुं साकल्येन निरूपयितुं कः श्रद्दध्यादिच्छेत् । इच्छाऽप्यशक्या निरूपणं तु दूरत इत्यर्थः ॥ ३५ ॥ अंग विदुर । अथापि हरेः कीर्तिं कीर्तयामि । यथाश्रुतं गुरुमुखात्तदपि न सर्वात्मना किंतु यथामति स्वमत्यनुसारेण अन्याभिधा हरिव्यतिरिक्तार्थाभिधानं तयाऽसतीं मलिनां स्वीयां वाचं सत्कर्तुं पवित्रीकर्तुम् ॥ ३६ ॥ अज्ञात्वापि यथामति कीर्तने श्रवणे वाऽऽवश्यकं कैवल्यमित्याह । एकांततो लाभं नु निश्चित

वर्णोत्पत्तौ ब्राह्मणः मुखशब्दोऽत्र शीर्षोपलक्षकः । गुरुश्च तत्त्वोपदेशात् तत्त्वज्ञानदानेनाविद्यानिगरणाच्च । गृ–शब्दनिगरणयोरस्ति । एतेन ''गिरति ह पाप्मानम्'' इति श्रुत्युक्तगुरुशब्दार्थो ध्वनितः । ब्राह्मणेतरवर्णस्य गुरुत्वं चापास्तम् । वर्णानामित्युक्त्या वर्णसंकराणामुपदेशप्राप्तविद्यानाधिकारश्च सूचितः वर्णसंकरश्च 'ब्राह्मणेन शिष्यो न कार्यः' इत्यप्युक्तश्च एतच्चाग्रे प्रपंचयिष्यामः प्रपञ्चितमप्याद्यपद्यव्याख्याशतके इत्यर्थ इति । वृत्त्यर्थं नैव शोकः कार्यः सा तु जन्मतोप्यग्रे प्रादुर्भवति सहैव वेति भावः ॥ ३० ॥ इत्यर्थ इति । वृत्त्या सहैव जात इति भावः ॥ ३१ ॥ स्ववृत्त्या कृषिवाणिज्यादिरूपया ''आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तनजीवने'' इति ''स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः'' इत्यमरः ॥ ३२ ॥ यस्य शूद्रस्य वृत्त्या शुश्रूषया एतेन न केवलं स्वधर्मेणैव भगवत्तोषः 'त्यक्त्वा स्वधर्मं चरणांबुजं हरेः' इत्यादिना भक्तिसहितस्यैव तस्य तत्तोषहेतुत्वश्रवणात् ॥ ३३ ॥ इत्यर्थ इति । ''मातापित्रोः सेवनं च तथैवान्नप्रदस्य च । सर्वकल्याणहेतुत्वात्परो धर्मोऽयमीरितः'' इत्याद्युक्तेरिति भावः । आत्मविशुद्ध्यर्थमन्तःकरणनैर्मल्याय ॥ ३४ ॥ इत्यर्थ इति । 'भोजने यत्र संदेहो धनाशा तत्र कीदृशी' इति न्यायेन कैमुत्यमप्यत्र सूचितमिति भावः ॥ ३५ ॥ यद्यपि वर्णयितुमशक्या हरेः कीर्त्तिस्थापि तथापीत्यर्थः । तदपि गुरुमुखश्रुतमपि । सर्वात्मना साकल्येन । हरिव्यक्तिरिक्तार्था देहगेहादिविषयास्तेषामभिधानम् ॥ ३६ ॥ यथाकथंचिदपि हरिकीर्त्तनादि शुभफलमेवेत्याह । अज्ञात्वापीति एकांततोऽव्यभिचारेण सुश्लोकाः पुण्यश्लोकास्तेषां मौलेश्चूडामणेः श्रीहरेः विद्वद्भिरित्यनेन पद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनोऽवसितो वत्स महिमा कविनाऽऽदिना ॥ संवत्सरसहस्रांते धिया योगविपक्कया ॥ ३८ ॥ अतो भगवतो माया मायिनामपि मोहिनी ॥ यस्त्वयं चात्मवर्त्मात्मा न वेद किमुताऽपरे ॥ ३९ ॥ यतोऽप्राप्य निवर्तंते वाचश्च मनसा सह ॥ अहं चान्य इमे देवास्तस्मै भगवते नमः ॥ ॥ ४० ॥ इति श्रीभा० म० तृतीय० विराड्देहे ईश्वरप्रवेशवर्णनं नाम षष्ठोऽध्यायः ॥६ ॥

माहुः । श्रुतेः श्रोत्रस्य उपाकृतायां निरूपितायाम् । उपसंप्रयोगं सन्निधावर्पणम् ॥ ३७ ॥ न चातीव ज्ञाने निर्बंधः कर्तव्यो ब्रह्मणोऽपि दुर्ज्ञेयत्वादित्याह । आत्मनो हरेर्महिमा योगविपक्कयाऽपि धिया संवत्सरसहस्रांतेऽपि आदिकविना ब्रह्मणाऽपि किमवसितः किं ज्ञातः इति काकूक्त्या एतावानिति न ज्ञात एवेत्युक्तम् ॥ ३८ ॥ यद्यस्मात्स्वयमप्यात्मा हरिरात्मवर्त्म स्वमायागतिमेतावदिति न वेद अनंतत्वात् ॥ ३९ ॥ अतो दुर्ज्ञेयत्वात्केवलं नमस्करोति । यत इति । यस्य ज्ञानाय प्रवृत्ता वाचोऽपि मनसा सह तमप्राप्यैव न्यवर्तंत दुर्ज्ञेयत्वात् । न केवलं वाङ्मनसी अहमहंकारस्याधिष्ठाता रुद्रोऽपि इमे इंद्रियाधिष्ठातारो देवा अन्ये च ॥ ४० ॥ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे टीकायां षष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥

पदार्थयथार्थबोधवद्भ्य एव कथा श्राव्याऽन्यतो नेति । अविद्वान्हि यथाश्रुतार्थकथनासमर्थत्वेन शास्त्रविप्लावकोस्ति तस्माच्छास्त्रमपि बिभेति । ''बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति'' इति महाभारतोक्तेः । पुराणेतिहासानामपि ''इतिहासपुराणानि पंचमो वेद उच्यते'' इत्युक्तिबलाद्वेदत्वमेवेति''सांगोपांगश्रुतिज्ञाद्वै पुराणं शृणुयाद्बुधः । न शास्त्रं घातयेत्प्रीत्या ब्रह्महा तेन जायते । सर्वदर्शनवेत्ता यो विप्रः शुद्धान्वयः सुधीः । विप्रादधीतशास्त्रश्च स्वाचारः कृष्णवल्लभः । स्वाकारः प्रियवादी च संगीतज्ञो गृहाश्रमः । सर्वांगपूर्णः कुशलः क्रोधलोभादिवार्जितः । इतिहासपुराणानां वक्ता कार्यो विमृश्य वै । अध्यापकः काव्यकर्त्ता शुद्धदेशोद्भवस्तथा ॥ बहुधा शब्दशास्त्रज्ञः प्रीणाति तेन वै हरिः । व्यंगादेः श्रवणाद्धानिः सर्वथा जायते ध्रुवम् । वैष्णवाच्छृणुयाच्छास्त्रं शुकशास्त्रं विशेषतः । वैष्णवो द्विविधः प्रोक्तो बाह्याभ्यंतरभेदतः । बाह्यस्तु शंखचक्राद्यैर्वीतरागस्तु चांतरः । वीतो विष्णुः समाख्यातस्तद्भक्तो वीतरागकः । विः प्रोक्तो मुख्यतस्तार्क्ष्यस्तेनैति स यतः सदा । तेन वीत इति ख्यातो निष्ठाकर्त्तरि चात्र वै । विपूर्वादिण्धातोर्वै गत्यर्थान्नात्र संशय'' इति वारतांतविः । एतदभिप्रायेणैवाभियुक्तैरुक्तं ''यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र व्याकरणम् । स्वजनः श्वजनो मा भूत्सकलं शकलं सकृच्छकृत् ॥'' इत्यलं प्रसक्तानुप्रसक्त्या ॥ ३७ ॥ ज्ञाने निर्बंधं वारयितुमाह । न चेति । काकूक्त्या उक्तार्थसाधनोक्त्या 'प्रतिषेधानुवादेनोक्तार्थसाधनोक्तिः काकूक्तिः' इति साहित्यार्णवोक्तेः ॥ ३८ ॥ अपरे ब्रह्मायाः आत्मा परमेश्वरः ॥ ३९ ॥ यतः परमेशतः अन्ये कुबेरादयः ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ॥ प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥ १ ॥ विदुर उवाच ॥ ब्रह्मन्कथं भगवत श्चिन्मात्रस्याऽविकारिणः ॥ लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ॥२॥ क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषाऽन्यतः ॥ स्वतस्तृप्तस्य च कथं निवृत्तस्य सदाऽन्यतः ॥ ३ ॥ अस्राक्षीद्भगवान्विश्वं गुणमय्याऽऽत्ममायया ॥ तया संस्थापयत्येतद्भूयः प्रत्यभिधास्यति ॥ ४ ॥ देशतः कालतोयोऽसाववस्थातः स्वतोऽन्यतः ॥ अविलुप्तावबोधात्मा स युज्येताऽजया कथम् ॥ ५ ॥

सप्तमे संशयच्छेदि प्रतिनंद्य मुनेर्वचः ॥ पुनः क्षत्रा कृता नाना प्रश्नाः सम्यगुदीरिताः ॥ १ ॥ "अथ ते भगवल्लीला योगमायोपबृंहिताः" इत्यादिना मायागुणैर्लीलया भगवान् सृष्ट्यादि करोतीत्येवं ब्रुवाणं भारत्या प्रार्थनारूपया प्रीणयन्निवेत्यभिप्रायाज्ञानेनाक्षेपात् ॥ १ ॥ निर्विकारस्य क्रिया निर्गुणस्य च गुणाः कथं लीलयेत्युक्तिः प्रयोजनाभावं परिहरति न वस्तुविरोधमिति भावः ॥ २ ॥ अर्भकवल्लीलाऽपि न युज्यते वैषम्यादित्याह ॥ उद्यमयति प्रवर्तयतीत्युद्यमः प्रवर्तकः । अर्भकस्य क्रीडायां प्रवृत्तिहेतुः कामोऽस्ति अन्यतस्तु वस्त्वंतरेण बालांतरप्रवर्तनेन वा तस्य क्रीडेच्छा भवति ईश्वरस्य तु स्वतस्तृप्तस्य कथं कामोऽन्यतः सदा निवृत्तस्य चासंगाद्वितीयस्य कथ मन्यतश्चिक्रीडिषेत्यर्थः ॥ ३ ॥ यच्चोक्तम् "स्मरन् विश्वसृजामीशो विज्ञापितमधोऽक्षजः" इत्यादिनाऽविद्योपाधेर्जीवस्य भोगार्थमीश्वरः सृष्ट्यादि करोतीति तदप्याक्षेप्तु मनुवदति । अस्राक्षीदिति । गुणमयी आत्मनो जीवस्य कर्तृत्वभोक्तृत्वादिमोहोत्पादिका या माया तया सृष्टवान् । तदुक्तं प्रथमे । "यया संमोहितो जीव आत्मानं त्रिगु णात्मकम् ॥ परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते" इत्यादिना । अत्र च । "अतो भगवतो माया मायिनामपि मोहिनी" इति । संस्थापयति पालयति प्रत्यभिधास्यति प्रातिलोम्येन तिरोहितं करिष्यति । पाठांतरे प्रातिलोम्येनात्मन्यभितो धारयिष्यति ॥ ४ ॥ एतच्च जीवस्याविद्याश्रयत्वे घटेत न तु तत्संभवतीत्याह । देशत इति ।

संशयमच्छिददिति संशयच्छेदि णिनिरतीते ॥ १ ॥ इति भाव इति । लीलया कथंचित्क्रियागुणयोगसत्त्वेपि निर्गुणत्वाविकारित्वे तु गुणक्रियायोगस्तु कदापि न संभवति तेजस्तिमिरवदिति तात्पर्य्यम् । वस्तुतो लीलायामपि न कंटकेषु पादो दीयते प्रत्युत तेभ्यो ह्रियते इति चेद्बालवत्सा ज्ञेया ॥ २ ॥ तत्राह अर्भकवदिति । इत्यर्थ इति । "आप्तकामः सत्यकामः" इत्यादिश्रुतेः कामाभावात्तथा "एकमेव द्वितीयं ब्रह्म" इति श्रुतेः "असंगो ह्ययं पुरुषः" इति श्रुतेश्चासंगाद्वितीयस्य सर्वदा तदन्यवस्त्वभावाच्च लीला न संगच्छते इति भावः ॥३ ॥ आक्षेपांतरं वक्तुमाह यच्चेत्यादि । तत् मायाया जीवमोहकत्वम् । अत्र चास्मि न्स्कंधे च पूर्वाध्याये पाठांतरे 'तया संस्थापयत्येतदात्मन्प्रत्यभिधास्यति' इति पाठे ॥ ४ ॥ एतच्च विश्वसृष्ट्यादि च । तदविद्याश्रयत्वम् । तत्रेति वाक्यालंकारे दीपप्रभा हि क्वचिद्देशेऽस्ति क्वचिन्न, विद्युच्च कदाचिद्भवति कदाचिन्न, स्मृतिर्हि क्वचिदवस्थायामस्ति क्वचिन्नेति एवं स्वप्नोऽपि घटाद्यपेक्षयाऽन्यो मुद्गरप्रहारादिरस्ति विरोधाभावं स्फुटयति मायासंपादितैव शास्त्रगुर्वादिरूपा ज्ञानसामग्री तया विना तदसंभवात् । यद्वा । मायायाज्ञान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः ॥ अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ॥ ६ ॥ एतस्मिन्मे मनो विद्वान्खिद्यते ज्ञानसंकटे ॥ तन्नः पराणुद विभो कश्मलं मानसं महत् ॥ ७ ॥ श्रीशुक उवाच ॥ स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः ॥ प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ॥ ८ ॥ मैत्रेय उवाच ॥ सेयं भगवतो माया यन्नयेन विरुध्यते ॥ ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनम् ॥९॥ यदर्थेन विनाऽमुष्य पुंस आत्मा विपर्ययः ॥ प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः ॥१०॥ यथा जले चंद्रमसः कंपादिस्तत्कृतो गुणः ॥ दृश्यतेऽसन्नपि द्रष्टुरात्मनो नात्मनो गुणः ॥ ११ ॥

योऽसौ देशादिभिरविलुप्तावबोध आत्मा जीवः ब्रह्मस्वरूपत्वात् स कथमजयाऽविद्यया युज्येत । तत्र युज्येत । तत्र देशतो दीपप्रभाया इव लोपो नास्ति सर्वगतत्वात् । न कालतो विद्यत इव नित्यत्वात् । नावस्थातः स्मृतिवदविक्रियत्वात् । न स्वतः स्वप्नवत्सत्यत्वात् । नान्यतो घटादिवदद्वितीयत्वात् । एवमेतैर्यस्य बोधो न लुप्यते स कथमजया युज्येत अजा चात्राविद्यैव न माया तस्या अवबोधेन विरोधाभावात् ॥ ५ ॥ किंच ब्रह्मरूपत्वादेव जीवस्य संसारोऽपि न विद्यत इत्याक्षिपति । सर्वक्षेत्रेष्ववस्थितो भोक्ताऽपि वस्तुतो भगवानेव चिद्रूपत्वेन तद्व्यतिरेकाभावात् । एवं च सत्यमुष्य जीवस्य दुर्भगत्वमानंदादिभ्रंशः कर्मभिर्हेतुभूतैः क्लेशो वा कुतः कर्मसंबंधाभावात् । अन्यथा ईश्वरस्यापि तत्प्रसंगः स्यादिति भावः ॥ ६ ॥ अज्ञानमेव संकटं दुर्गं तस्मिन् तन्मानसं कश्मलं मोहं पराणुदापाकुरु ॥ ७ ॥ चोदित आक्षिप्तः । स्मयन्निव प्रौढिमा विष्कुर्वन्निव । वस्तुतस्तु गतस्मयः॥८॥भगवतोऽचिंत्यशक्तेरीश्वरस्य सेयं माया नयेन तर्केण विरुद्ध्यत इति यत् तर्कविरोधमेवानुवदति । विमुक्तस्यैव पुंसोऽविद्यया बंधनं कार्पण्यं चेति ॥९॥ अत्रोदाहरणमाह । यद्यथा अर्थेन शिरश्छेदादिना विनाऽप्युपद्रष्टुः स्वप्नसाक्षिणो ममेदं शिरश्छिन्नमित्यात्मविपर्ययः केवलं मृषैव प्रतीयते तद्वत्॥ १०॥ तर्हीश्वरस्यापि किं न प्रतीयेत तत्राह । यथा जले प्रतिबिंबितस्यैव चंद्रमसो जलोपाधिकृतः कंपादिधर्मो दृश्यते न त्वाकाशे स्थितस्य । तथाऽनात्मनो देहादेर्धर्मोऽसन्नपि

विरोधित्वस्वीकारे 'मायिनं तु महेश्वरम्' इति श्रुतेस्तदुपहितेश्वरस्यापि तन्न सेत्स्यतीति भावः ॥ ९ ॥ आक्षेपांतरमाह।किं चेति ।''ब्रह्मैवायमात्मा'' इति श्रुतेर्जीवस्यापि ब्रह्मत्वान्न संसारो घटत इति भोक्ता जवोपि ''कर्त्ता भोक्ताहमेवास्मि देहेस्मिन्भरतर्षभ'' इति गीतोक्तेर्भगवानेवेति व्यतिरेको भेदः । 'नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः' इत्युक्तेः कर्मसंबंधाभावात् । अन्यथा जीवस्य संसारस्वीकारे।इति भाव इति चिद्रूपत्वाविशेषा ज्जीववत् । ''समानं वृक्षं परिषस्वजाते'' इति श्रुतेः । समानाधिकरणत्वादीश्वरस्य संसारः कथं न भवेदिति तात्पर्य्यम् ॥ ६ ॥ ७ ॥ प्रौढिराधिक्यं विस्मयं प्रकटयन्निवेत्यर्थः । अनुपदमेव गतस्मयोक्तेरिवोपादानम् । गत स्मयत्वे हेतुः भगवच्चित्त इति । अचिंत्यैश्वर्ये भगवति सर्वं संपद्यत इति ज्ञानवानित्यर्थः ॥ ८ ॥ ईश्वरस्य कार्पण्यं बिमुक्तस्य बंधनं चेति वदतो व्याघातत्वाद्विरोधः परं तु मायाया अघटितघटनापटीयस्या नैतदयुक्तमिति ॥ ९ ॥ अत्राविद्यमानप्रतीतौ अर्थेन सत्येन कारणेन वा मृषैवेति न हि स्वशिरश्छेदः स्वेनानुभवितुमेकाधिकरणे शक्यः स्वस्य स्वस्कंधारोहणवत्तद्वन्मृषैव स्वरूपाज्ञानकृतं बंधनकार्पण्यादीत्यर्थः । अन्यगतमपि शिरश्छेदादिकं यथा स्वप्नमायया स्वस्मिन्नारोपयति तथात्मा ज्ञानगतं बंधकार्पण्यादिकं स्वस्मिन्नारोपयति भगवन्माययेतिभावः ॥ १० ॥ अत्राक्षिपति तर्हीति । इत्यर्थ इति । ईश्वरस्य स्वरूपज्ञानसत्त्वात्तन्न प्रतीयत इति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वै निवृत्तिधर्मेण वासुदेवाऽनुकंपया ॥ भगवद्भक्तियोगेन तिरोधत्ते शनैरिह ॥ १२ ॥ यदेंद्रियोपरामोऽथ द्रष्टात्मनि परे हरौ ॥ विलीयंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः॥१३॥ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः ॥ कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा ॥१४॥ विदुर उवाच ॥ संछिन्नः संशयो मह्यं तव सूक्तासिना विभो ॥ उभयत्राऽपि भगवन्मनो मे संप्रधावति ॥१५॥ साध्वेतद्व्याहृतं विद्वन्नात्ममायाऽयनं हरेः ॥ आभात्य पार्थं निर्मूलं विश्वमूलं न यद्बहिः॥१६॥यश्च मूढतमो लोके यश्च बुद्धेः परं गतः॥तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः॥१७॥

तदभिमानिनो द्रष्टुरात्मनो जीवस्यैव नत्वीश्वरस्येत्यर्थः ॥ ११ ॥ तन्निवृत्त्युपायमाह । स वै अनात्मनो गुणो निवृत्तिधर्मेण वासुदेवस्यानुकंपा तया च तस्मिन्भक्तियोगस्तेन तिरोधत्तेऽदृश्यो भवति । शनैरित्यनेन साधनानुसारेणेत्युक्तम् ॥ १२ ॥ तर्हि सर्वानर्थनिवृत्तिः कदेत्यपेक्षायामाह । यदेंद्रियाणामुपरामो नैश्चल्यं क्व द्रष्टर्यात्मन्यंतर्यामिरूपे । अथानंतरमेव । कृत्स्नक्लेशविलयमात्रे दृष्टांतः । संसुप्तस्येवेति । नतु पुनरुत्थाने ॥ १३ ॥ भक्तियोगेन क्लेशनिवृत्तिं दर्शयति । अशेषेति । गुणानामनुवादश्च श्रवणं च । आत्मनि मनसि लब्धा श्रवणकीर्तनापेक्षया सप्रेमध्याने किं पुनर्न्यायोक्तिः ॥ १४ ॥ उत्तरमभिनंदन्नात्मनः कृतार्थतामाविष्करोति । संछिन्न इति षड्भिः । चिद्रूपत्वाविशेषेऽपि कथमीश्वरस्य जगत्कर्तृत्वादि कथं वा जीवस्य संसार इति यः संशयो ममासीत्स तव सूक्तं सोपपत्तिकं वाक्यमेवासिः खड्गस्तेन संछिन्नः। अत इदानीं मे मन उभयत्रापीश्वरस्वातंत्र्ये जीवपारतंत्र्ये च संप्रधावति सम्यक्प्रविशति । एवं वाऽविलुप्तावबोधरूपस्यात्मनः कथमविद्यया बंधः कुतो वा तन्निवृत्तिरिति संशयः । उभयत्रेति बंधे मोक्षे चेत्यर्थः ॥ १५ ॥ यस्मात्त्वया साधु व्याहृतं किं तत् हरेः शक्तिर्या आत्ममाया जीवविषया माया तदयनं तदाश्रयमेतद्धुर्भगत्वादिकं भातीति । यद्यस्मात्स्वशिरश्छेदादिवदपार्थमवस्तुभूतं निर्मूलं मूलशून्यं च । यस्मादस्य मूलं विश्वस्य मूलं स्वाज्ञानं बहिर्विना नास्ति ॥ १६ ॥ अल्पज्ञत्वात्पूर्वं मम संशयो जात इत्याह । यश्चेति ।

यथैकवृक्षारूढयोर्नृवानरयोरधःस्थितसिंहेन वानरदेहच्छाया हस्तेन ताडिता तामेवात्मानं मन्यमानो मूढो वानरः किलकिलेति स्वजातिशब्दं कृत्वाधः पपात तं च सिंहश्चखाद । पुनर्नृदेहछायामपि तथैव तताड ना च विवेकी छायात आत्मानं भिन्नं मत्वा न पपात जहास च सिंहः पुनः पुनरताडयित्वा नायं पतिष्यतीति ज्ञात्वा देशातरं जगाम । तथा नात्मदेहाभिमानेन मूढजीवस्यैव तत्प्रतीतिर्न त्वीशस्य सर्वज्ञस्येति ध्येयम् ॥ ११ ॥ निवृत्तिधर्मेण निष्कामकर्मणा दृश्यो भवति नश्यतीत्यर्थः ॥ १२ ॥ द्रष्टुर्जीवस्य क्लेशाः स्वाप्नव्याघ्रदंतक्षतजादिरूपाः ॥ १३॥ अशेषाः संक्लेशाः क्लेशा यस्मिन्सोऽशेषसंक्लेशः संसारोऽज्ञानं वा तस्य शमं शांतिम् । संक्लेश इह समुपसर्गस्तु धात्वर्थपर एव 'कश्चित्तमनुवर्तते' इत्युक्तेः' कुतः पुनारित्यस्य किंपुनारित्यर्थः । किं पुनर्न्यायः कैमुत्यन्यायः ॥ १४॥ सोपपत्तिकं सयुक्तिकं युक्तिश्च 'यदर्थेन विना' इत्यादिबोधिता सर्वज्ञत्वाल्पज्ञत्वादिरूपा ज्ञेया अतः संछिन्नसंशयत्वात् । प्रकारांतरमप्याह—संभवत्वात् एवं वेति । इत्यर्थ इति । ज्ञानाभावे बंधः सति च ज्ञान मोक्ष इति तात्पर्यम् ॥ १५ ॥ स्वाज्ञानं विनेति स्वाज्ञानमेव । विश्वमूलमित्यर्थः ॥ १६ ॥ 'यश्च मूढतमोऽतीव यो बुद्धेः परतस्तु सः' इति श्रीगीतोक्तेः । इत्यर्थ इति । वर्द्धनमत्र जीवनमेवानेकार्थत्वादिति भावः । अंतरितपदार्थमाह । यस्त्विति । इत्यर्थ इति । निश्चयदार्ढ्याभावात्क्लेशमेवानुभवतीति भावः ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्थोऽभावं विनिश्चित्य प्रतीतस्यापि नात्मनः ॥ तां चापि युष्मच्चरणसेवयाऽहं पराणुदे ॥ १८ ॥ यत्सेवया भगवतः कूटस्थस्य मधुद्विषः ॥ रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः ॥ १९ ॥ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु ॥ यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥ २० ॥ सृष्ट्वाऽग्रे महदादीनि सविकाराण्यनुक्रमात् ॥ तेभ्यो विराजमुद्धृत्य तमनुप्राविशद्विभुः ॥ २१ ॥ यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकम् ॥ यत्र विश्व इमे लोकाः सविकाशं समासते ॥ २२ ॥ यस्मिन्दशविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् ॥ त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः ॥ २३ ॥ यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः ॥ प्रजा विचित्राकृतय आसन्याभिरिदं ततम् ॥ २४ ॥ प्रजापतीनां सपतिश्चक्लृपे कान्प्रजापतीन् ॥ सर्गांश्चैवानुसर्गांश्च मनून् मन्वंतराधिपान् ॥ २५ ॥

मूढतमो देहाद्यासक्तो यश्च बुद्धेः प्रकृतेः परमीश्वरं प्राप्तस्तौ सुखं यथा भवति तथा एधेते जीवत इत्यर्थः । संशयक्लेशाभावात् । यस्तु दुःखानुसंधानेन प्रपंचं जिहासति स्वानंदसंवेदनाभावाद्धातुं न शक्नोति । स तु क्लिश्यतीत्यर्थः ॥ १७ ॥ इदानीं तु कृतार्थोऽस्मि यतस्त्वया संशयश्छिन्नः केवलं बाधितानुवृत्तिरेवावशिष्टा साऽपि युष्मत्प्रसादान्निवर्तिष्यत इत्याह । नात्मनः अनात्मनः प्रपंचस्य प्रतीतस्याप्यर्थाभावमर्थोऽत्र नास्ति किंतु प्रतीतिमात्रमिति युष्मच्चरणसेवया विनिश्चित्य तां प्रतीतिमप्यहं पराणुदेऽपनेष्यामीत्यर्थः ॥ १८ ॥ मधुद्विषः पादयोः रतिरासः प्रेमोत्सवस्तीव्रो दुर्वारः स्वाभाविकः व्यसनं संसारमर्दयति नाशयतीति तथा ॥ १९ ॥ अहो दुर्लभं प्राप्तं मयेत्याह । दुरापा दुर्लभा वैकुंठस्य विष्णोस्तल्लोकस्य वा वर्त्मसु मार्गभूतेषु महत्सु यत्र येषु महत्सेवया हरिकथाश्रवणं ततो हरौ प्रेम तेन च देहाद्यनुसंधानमपि निवर्तत इति तात्पर्यम् ॥ २० ॥ अर्थांतरं प्रष्टुं तदुक्तमनुवदति त्रिभिः । सृष्ट्वेति । विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशैर्विराजं सृष्ट्वा ॥ २१ ॥ प्रविष्टस्य स्वरूपमाह । यमिति । विराजं विशिनष्टि । यत्रेति । ते इमे विश्वे सर्वे लोकाः सविकाशमसंकोचेन ॥ २२ ॥ प्राणादयः पंच नागादयः पंचेत्येवं दशविधः इंद्रियाणि च अर्थाश्च । इंद्रियाणि चेति पुनरुक्तिस्तद्देवतालक्षणार्था तत्सहितः सर्वोपबृंहकत्वात्प्राणस्य तत्साहित्यम् । एवं त्रिविधः प्राणस्त्वयेरितः उक्तः तस्य विभूतीर्ब्रह्माद्या विसर्गशब्दवाच्याः ॥ २३ ॥ यत्र यासु इदं विश्वं ततं व्याप्तम् ॥ २४ ॥ एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल इति परीक्षित्प्रश्नोत्तरतया विदुरमैत्रेयसंवादः प्रस्तावितोऽतस्तानेव विदुरेण कृतान्प्रश्नानाह यावत्समाप्ति । प्रजाप

इत्यर्थ इति श्रीमदाराधनबलेन मोक्षोऽपि न दुर्लभः किमु प्रपंचप्रतीत्यभाव इति भावः॥ १८॥ नारायणांघ्रिसरोजसेवा संसारव्यथावारकत्वात्पुरुषार्थोपयोगिनी स्यात्किमस्मच्चरणसेवयेति चेदाह—येषां हरिस्वरूपद्रष्टॄणां युष्माकं सेवया मधुद्विषः लोकहितकर्त्तुः कूटस्थस्य निर्विकारस्य ॥ १९ ॥ स्वात्मभाग्यं श्लाघयन्नाह—दुरापेति ॥ २० ॥ तेभ्यो महदादिभ्यः तं विराजं विभुरिति मुख्यप्रवेशाभावमाह ॥ २१ ॥ यत्र पुरुषे ॥ २२ ॥ सर्वोपबृंहकत्वात्प्राणस्य सर्वेषां वर्द्धकत्वात्तत्साहित्यं प्राणसाहित्यम् । एवं त्रिवृत् इंद्रियेंद्रियार्थेन्द्रियदेवतारूपेण त्रिविधः यतः पुरुषात् । वर्णा ब्राह्मणाद्याः । "ब्राह्मणोऽस्य मुखमासीत्" इत्यादिश्रुतेः । 'विसर्गः पौरुषः स्मृतः' इत्युक्तेः पौरुषः पुरुषाद्ब्रह्मादिरूपेण जातः ॥ २३ ॥ यासु विभूतिषु निमित्तभूतासु नप्ता दौहित्रः 'पौत्रः' विचित्राकृतयः परस्परव्यावृत्तलक्षणोपेताकाराः ॥ २४ ॥ तद्भेदान् नवसर्गावांतरभेदान् ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतेषामपि वंशांश्च वंश्यानुचरितानि च ॥ उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते ॥ २६ ॥ तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय ॥ तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणाम् ॥ वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदाम् ॥ २७ ॥ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयम् ॥ सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमम् ॥२८॥ वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ॥ ऋषीणां जन्मकर्मादि वेदस्य च विकर्षणम् ॥२९॥ यज्ञस्य च वितानानि योगस्य च पथः प्रभो ॥ नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतम् ॥३०॥ पाखंडपथवैषम्यं प्रतिलोमनिवेशनम् ॥ जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ॥ ३१ ॥ धर्मार्थकाममोक्षाणां निमित्तान्य विरोधतः ॥ वार्ताया दंडनीतेश्च श्रुतस्य च विधिं पृथक् ॥ ॥ ३२ ॥ श्राद्धस्य च विधिं ब्रह्मन्पितॄणां सर्गमेव च ॥ ग्रहनक्षत्रताराणां कालावयवसंस्थितिम् ॥ ३३ ॥ दानस्य तपसो वाऽपि यच्चेष्टापूर्तयोः फलम् ॥ प्रवासस्थस्य यो धर्मो यश्च पुंस उताऽपदि ॥ ३४ ॥ येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः ॥ संप्रसीदति वा येषामेतदाख्याहि चाऽनघ ॥ ३५ ॥

तीनां पतिर्ब्रह्मेत्यादीनां वर्णयेति वक्ष्यमाणेनान्वयः । चक्लृपेऽकल्पयत् सर्गान्नवविधाननुसर्गांस्तद्भेदान् ॥ २५ ॥ हे मित्राया आत्मज ॥ २६ ॥ संस्थां संनिवेशं सर्गाणां संव्यूहं संविभागम् । गार्भस्वेदद्विजोद्भिदां गार्भा जरायुजाः स्वेदाच्च द्वाभ्यां च जाताः स्वेदद्विजा उद्भिदश्च तेषाम् ॥ २७ ॥ सर्गादीनाश्रयं च सृजतः ॥ २८ ॥ रूपं लिंगं शीलमाचारः स्वभावः शमादिस्ततो विकर्षणं विभागम् ॥ २९ ॥ वितानानि विस्तारान् नैष्कर्म्यस्य च ज्ञानस्य तदुपायस्य च सांख्यस्य पथो मार्गान् तंत्रं चेत्यर्थः ॥ ॥ ३० ॥ पाखंडानां पंथाः प्रवृत्तिस्तदेव वैषम्यम् ॥ ३१ ॥ निमित्तान्युपायान् परस्पराविरोधेन ॥३२॥ ग्रहादीनां कालचक्रे संस्थितिम् ॥३३॥३४ ॥ येन मार्गेण

एतेषां मन्वादीनां वंशान्संतानान् ॥ २६ ॥ तेषां लोकानां द्वाभ्यां स्वेदांडाभ्यां च जाताः स्वेदजा अंडजाश्च यद्वा स्वेदात् द्वाभ्यां मात्रंडाभ्यां च जाता द्विजाः पक्षिणः क्वचित्तु 'गार्भः स्वेदांडजोद्भिदाम्' इति पाठः । स्वेदश्चांडश्च स्वेदांडौ ताभ्यां जातौ स्वेदांडजौ भूमिमुद्भिद्य जाता उद्भिदः वृक्षाद्याः तिर्यगादिविशेषणं तिर्यगादीत्यादिकार्यमन्यथा पुनरुक्तिः स्यात् सरीसृपाः सहस्रपद्यादयः ॥ २७ ॥ गुणावतारैर्ब्रह्मविष्णुरुद्रैः श्रीनिवासस्येति वाक्ये "सद्बावेतौ नित्ययुक्तौ" इति श्रुत्यर्थस्सूचितः । उदारविक्रमं महच्चरितम् "उदारो दातृमहतो" इत्यमरः ॥२८॥२९॥ सांख्यस्य वेदांतस्य । इत्यर्थ इति । वाशब्दोत्र चार्थे इति भावः । भगवता नारदेन कृतं पंचरात्रम् ॥ ३० ॥ यद्वा पाखंडस्याधर्मलिंगस्य सकाशाद्यद्बुद्धिवैषम्यम् । प्रातिलोम्येनोत्पत्तिवैपरीत्येन सर्वेषां ब्रह्मणि निवेशनं प्रवेशो लय इत्यर्थः । यद्वा । ब्राह्मणादिकन्यकानां क्षत्रियादिविवाहलक्षणं प्रातिलोम्यनिवेशनम् । या यादृशीः यावतीर्यावत्संख्याकाः सत्त्वादिगुणनिमित्तकर्मजाताः ॥३१॥ वार्त्ताया वाणिज्यादेः दंडनीतेरर्थशास्त्रोक्तराजधर्मस्य श्रुतस्य श्रुत्युक्तस्य विधिं प्रकारम् ॥३२॥ तारा ध्रुवाद्याः कालावयवानां परमाण्वादिकालावयवानाम् ॥३३॥ पुंस इति मनुष्यमात्रस्य ॥३४॥ मेऽनघेति पाठे मे मह्यम् । धर्मस्य योनिः कारणं लोकसंग्राहकत्वेन कर्त्ता जनार्दन इति सकामभक्तान्कामान्याचयञ्शुद्धभक्तान्प्रेमोत्थानुतापेन पीडयंश्च येषां वेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम ॥ अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥ ३६ ॥ तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः ॥ तत्रेमं क उपासीरन्क उ स्विदनुशेरते ॥ ३७ ॥ पुरुषस्य च संस्थानं स्वरूपं वा परस्य च ॥ ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनम् ॥ ३८ ॥ निमित्तानि च तस्येह प्रोक्तान्यनघ सूरिभिः ॥ स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा ॥ ३९ ॥ एतान्मे पृच्छतः प्रश्नान्हरेः कर्मविवित्सया ॥ ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ॥ ४० ॥

संतुष्येत् । येषामिति यादृशानाम् ॥ ३५ ॥ अनापृष्टमप्यपृष्टमपि यद्योग्यं तद्वक्तव्यमिति भावः ॥ ३६ ॥ प्रतिसंक्रमः प्रलयः तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के वानुशेरते शयानमनुस्वपंति ॥ ३७ ॥ पुरुषस्य संस्थानं जीवस्य तत्त्वं परमेश्वरस्य स्वरूपं येनांशेन तयोरैक्यं तथा ज्ञानं च नैगममौपनिषदम् ॥ ३८ ॥ यानि सूरिभिः प्रोक्तानि तस्य ज्ञानस्य साधनानि च ब्रूहि गुरुं विनैतन्न भवतीत्याह । स्वत इति ॥ ३९ ॥ मे प्रश्नान् मे मित्रत्वात्स्निग्धत्वादित्यन्वयभेदान्न

क्रमेण तत्प्रसादस्य साधनं किं तत्राधिकारिणश्च कीदृशा इति कथयेत्यर्थः ॥३५॥ इति भाव इति । स्वाभीष्टमहं न जानाम्यतस्तत्र भवन्तः कृपया कथयंत्वित्याशयः । तदेवाह। अनुव्रतानामिति । चतुर्थ्यर्थे षष्ठी । द्विजोत्तमेति । ब्राह्मणा ह्यतीव दयाप्रकृतयो भवंतीत्याह ॥ ३६ ॥ क उपासीरन्नित्यनेन तत्पार्षदानां नित्यत्वमभिप्रेतं तदुक्तं काशीखंडे "न च्यवंते हि यद्भक्ता महत्यां प्रलयापदि । अतोऽच्युतोऽखिले लोके स एक सर्वगोऽव्ययः" इति ॥ ३७ ॥ तयोर्जीवेशयोः गुरुशिष्यौ प्रयोजनं हेतुभूतौ यस्य तत्तथा 'प्रयोजनं कार्यहेत्वोः' इति हैममेदिन्यौ । यद्वा । गुरुशिष्ययोर्व्याख्यानश्रवणाभ्यां प्रयोजनं निश्चायकत्वनिश्चयवत्त्वलक्षणम् । यद्वा । गुरुशिष्यौ । प्रयोजयतीति तथा । यद्वा । पुरुषस्योपासकस्य परस्योपास्यस्य च संस्थानं सम्यक्स्थितिं तत्त्वं वा । नैगममिति । स्वरूपविशेषणं वेदोक्तमित्यर्थः । यद्गुरुशिष्ययोः प्रयोजनं मत्तः शिष्योऽयं जानातु गुरुतोऽहं भक्तिज्ञानादि जानीयामित्येवंलक्षणं तस्य निमित्तानि सत्संगादीनि ॥ ३८ ॥ सूरिभिः शास्त्रतात्पर्यज्ञैः । अनघेति व्यसनांतररहितत्वात्त्वं कथनयोग्योसीत्याह स्वयत्नेनैव तत्संपादयेति चेत्तत्राह—गुरुं विनेति ॥ ३९ ॥ नन्वेतावंतो नानाविधाः प्रश्नाः कुतः कृतास्तत्राह—हरेरिति । कर्मपरिचर्यादिकं तस्य विवित्सया प्राप्तीच्छयैवैतान्प्रश्नान् ब्रूहि सर्वजिज्ञासितसिद्धौ सत्यामेव भगवत्परिचर्यायां मनोन्यानिरपेक्षमेकाग्रं भवति मनस ऐकाग्र्ये सत्येव तत्प्राप्तिरिति भावः । किञ्च 'आपत्सु मित्रं जानीयात्' इत्युक्तेस्त्वं मित्रपुत्रत्वांन्मित्रमेवासि सर्वजगतामिति भावः । मित्रत्वाद्ब्रूहीति । ननु तव का विपदत आह—नष्टचक्षुष इति । नष्टज्ञानस्येत्यर्थः । यद्वाऽजया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वे वेदाश्च यज्ञाश्च तपोदानानि चानघ ॥ जीवाभयप्रदानस्य न कुर्वीरन्कलामपि ॥ ४१ ॥ श्रीशुक उवाच ॥ स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः ॥ प्रवृद्धहर्षो भगवत्कथायां संचोदितस्तं प्रहसन्निवाऽऽह ॥ ४२ ॥ इति श्री भा० तृती० विदुरोक्तप्रश्नविधिवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ मैत्रेय उवाच ॥ सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ॥ बभूविथेहाजितकीर्तिमालां पदेपदे नूतनयस्यभीक्ष्णम् ॥ १ ॥ सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य ॥ प्रवर्तये भागवतं पुराणं यदाऽऽह साक्षाद्भगवानृषिभ्यः ॥ २ ॥ आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्त्वम् ॥ विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ॥ ३ ॥ स्वमेव धिष्ण्यं बहु मानयंतं यं वासुदेवाभिधमामनंति ॥ प्रत्यग्धृताक्षांबुजकोशमीषदुन्मीलयंतं विबुधोदयाय ॥ ४ ॥

मेपदस्य पौनरुक्त्यम् ॥ ॥ ४० ॥ तत्त्वोपदेशेन जीवाभयप्रदानस्य । ४१ ॥ पुराणे कल्पते प्रकाशत इति पुराणकल्पो बुभुत्सिताऽर्थः आपृष्टः पुराणकल्पोऽयं स मुनिप्रधानः ॥ ४२ ॥ इति तृ० टी० सप्त० ॥ ७ ॥ अष्टमे समभूद्ब्रह्मा नाभेस्तु जलशायिनः ॥ तमजानन् जले बिभ्यत्तपसाऽतोषयद्विभुम् ॥ १ ॥ श्रोतारमभिनंदति । सतां सेवितुं योग्यः । बत अहो यद्यस्मादिहास्मिन्वंशे लोकपालो धर्मराजस्त्वं बभूविथ जातोऽसि । कथंभूतः । भगवानेन प्रधानभूतो यस्य सः । अत्र हेतुः । अजितेति । प्रतिक्षणं नूतनयसि नवीनां करोषि ॥ १ ॥ अल्पसुखाय महद्दुःखं प्राप्तानां तस्य दुःखस्य विरमाय प्रवर्तये प्रारभे ॥ २ ॥ कोऽसौ भगवान् केभ्यश्च ऋषिभ्य आह कथं च त्वया प्राप्तमित्यपेक्षायामाह । आसीनमिति सप्तभिः । उर्व्यां पातालतले अकुंठसत्त्वमप्रतिहतज्ञानम् । अतः संकर्षणात्परस्य श्रीवासुदेवस्य ॥ ३ ॥ तमेव विशिनष्टि । स्वमेव

रात्रितमोरूपया नष्टनेत्रशक्तेर्यथा मित्रः सूर्यः प्रत्युपकारकस्तथा ममाज्ञस्य ज्ञानप्रकाशेन त्वमपि मित्रमसीति भावः ॥ ४० ॥ न केवलं ममैवोद्धारो भवदुपदेशेनापि तु तवापि महत्पुण्यावाप्तिर्भविष्यतीत्याह—सर्वे इति । वेदा वेदपाठाः तपः कृच्छ्रादि । दानानि तुलापुरुषप्रभृतीनि । न भयं येन तदभयं ज्ञानं तस्य प्रदानमभयप्रदानं जीवेभ्योऽभयप्रदानं जीवाभयप्रदानं भयमत्र संसृतिरूपं ज्ञेयं तन्निवृत्तिस्तु भगवन्नामोच्चारणादिभिर्भवत्येव स्वतः किं पुनर्महदुपदिष्टैरिति "आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । ततः सद्यो विमुच्येत यद्बिभेति भयं स्वयम्" इत्युक्तेः । कलां षोडशभागं तथा च ज्ञानभक्त्याद्युपदेशजन्यपुण्यस्य वेदपाठादयोंशेनापि तुल्या न भवंतीति भावः ॥ ४१ ॥ यद्वा पुराणेषु पुराणतात्पर्येषु कल्पते व्याख्याने समर्थो भवतीति पुराणकल्पः आपृष्टश्चासौ पुराणकल्पश्चेति तथा । यद्वा । पुराणस्य पंचमवेदाख्यस्य कल्पः प्रश्नाविकल्पः पुराणकल्प आपृष्टः पुराणकल्पो यस्मात्स आपृष्टपुराणकल्पो मैत्रेयः तं विदुरम् । इवेनाहो सर्वज्ञोऽप्ययं मोक्षाद्धर्मावतारत्वाल्लोकसंग्रहार्थम् "आचार्यवान्पुरुषो वेद" इति श्रुत्युक्तमार्गबोधनार्थमेवैतान्प्रश्नान्कृतवानित्युक्तम् । ननु बालवद्वृद्धकथाप्रश्ना एव कृता इत्यज्ञशंकामपानुदन्नाह—भगवत्कथायामिति ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे सप्तमोऽध्यायः ॥ ७॥ तं जलशायिनम् ॥ (१) ॥ अत्र भगवत्प्रधानत्वे ॥ १ ॥ ॥ २ ॥ त्रिलोकीविवक्षयोर्वीशब्देन कथंचित्पातालस्यापि ग्रहणं भवत्येव पातालसप्तकसहितभूमेर्भूर्लोकवाच्यत्वात् तच्च 'भूर्लोकः कल्पितः पद्भ्याम्' इत्यत्र स्वामिचरणैर्व्याख्यातम । पातालस्य तलेऽधस्तात् तथैव पञ्चमस्कंधे व्याख्यातत्वात् । उर्वीपदेन पातालार्थग्रहेऽपि तलबोधस्तु सामीपिकाधारसप्तम्यैवेति । मुनयः सनत्कुमारादयः ॥ ३ ॥ तमेव संकर्षणमेव । "आधार आश्रयो धिष्ण्यं निधानं चापि कथ्यते" इति तीर्थः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानम् ॥ पद्मं यदर्चंत्यहिराजकन्याः सप्रेमनानाबलिभिर्वरार्थाः ॥ ५ ॥ मुहुर्गृणंतो वचसाऽनुराग
स्खलत्पदेनाऽस्य कृतानि तज्ज्ञाः ॥ किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रम् ॥६॥ प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन॥
सनत्कुमाराय स चाह पृष्टः सांख्यायनायांऽग धृतव्रताय ॥ ७ ॥ सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः ॥ जगाद सोऽस्मद्गु
रवेऽन्विताय पराशरायाऽथ बृहस्पतेश्च ॥ ८ ॥ प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यम् ॥ सोहं तवैतत्कथयामि वत्स
श्रद्धालवे नित्यमनुव्रताय ॥९॥ उदाप्लुतं विश्वमिदं तदाऽऽसीद्यन्निद्रयाऽमीलितदृग् न्यमीलयत्॥अहींद्रतल्पेऽधिशयान एकः कृतक्षणःस्वात्मरतौ
निरीहः॥१०॥ सोंऽतःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ॥ उवास तस्मिन्सलिले पदे स्वे यथाऽनलो दारुणि रुद्धवीर्यः॥११॥

धिष्ण्यं स्वीयमाश्रयं वासुदेवसंज्ञं परमानंदरूपं ध्यानपथेऽनुभूय बहु मानयंतं सर्वोत्कर्षेण पूजयंतम् । प्रत्यग्धृतमंतर्मुखीकृतं नेत्रांबुजमुकुलं किंचिदुन्मीलयंतं कृपावलोकनेन सनत्कुमारादीनामभ्युदयार्थम् ॥ ४ ॥ मुनीनां विशेषणं सार्धेन स्वर्धुन्युदकेनार्द्रैरिति श्रीभागवतश्रवणार्थं सत्यलोकात्पातालं प्रत्यवतरंतो निरंतरं गंगामध्यत एवावतीर्णा इति भावः । चरणावुपधीयेते यस्मिन्पद्मे तदुपस्पृशंतो नमंतः । कथंभूतं तदाह । यत्पद्मं प्रेमसहितं यथाभवत्येवं नानोपहारैः पूजयंति वरार्थाः पतिकामाः ॥ ५ ॥ कृतानि कर्माणि गृणंतः । केन अनुरागेण स्खलंति पदानि यस्मिंस्तेन वचसा । तानि जानंतीति तज्ज्ञाः । सहस्रमेव साहस्रं किरीटानां साहस्रे ये मणिप्रवेका रत्नोत्तमास्तैः प्रद्योतितमुद्दामफणानां सहस्रं यस्य तम् । अपृच्छन्निति पूर्वेणान्वयः ॥ ६ ॥ तेन संकर्षणेन सनत्कुमाराय प्रोक्तम् ॥ ७ ॥ पारमहंस्ये धर्मे मुख्यः विवक्षमाण इत्यात्मनेपदं ब्रूञादेशस्य वचेरुभयपदित्वात् । अन्वितायानुगताय ॥ ८ ॥ पुलस्त्येनोक्त इत्यत्रैवमाख्यायिका । पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येन स्वसंततिरक्षणात्तुष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यसीति ॥ ९ ॥ तदेवं संकर्षणात्संप्रदायप्रवृत्तिं प्रदर्श्य विभूतिकथनाय पद्मोद्भवं वक्तुमाह । उदाप्लुतमेकार्णवोदकनिमग्नं यद्यदासीत्तदा अमीलितदृग्गतिरोहितचिच्छक्तिरेव श्रीनारायणो नेत्रे निमीलितवानित्यर्थः । मायाविनोदं परित्यज्य स्वात्मरतौ स्वरूपानंद एव कृतोत्सवः अत एव निरीहो निष्क्रियः सन् ॥ १० ॥ कालशक्तेः प्रेरणं पुनः सृष्ट्यवसरे प्रबोधनार्थम् । स्वे पदेऽधिष्ठाने । बहिर्वृत्त्यभावे दृष्टांतः । यथाऽनल इति ॥ ११ ॥

इति भाव इति । मार्गांतरेण गमने कस्यचित्संगाद्विलंबो भवेदतः प्रवाहमार्गेणागता इत्याशयः ॥ ५ ॥ "मुख्यवर्यवरेण्याश्च प्रवेकानुत्तमोत्तमाः" इत्यमरः । उद्दाममुत्कृष्टम् ॥ ६ ॥ किल प्रसिद्धम् एतद्भागवतं भगवत्तमेन भगवत्सूत्यादिज्ञानवत्सु श्रेष्ठेन यद्वा । भगवानेव भगवत्तमः स्वार्थे तमप् । यद्वा । भगवंतं वासुदेवं ताम्यति कांक्षतीति भगवत्तमस्तेन 'तमु कांक्षायाम्' ततोच् । 'स्वमेव धिष्ण्यं बहुमानयंतम्' इत्याद्युक्तेः । स च सनत्कुमारः । पृष्टः सन् 'नापृष्टः कस्यचिद्ब्रूयात्' इति स्मृतेः । निवृत्तिधर्माभिरतत्वादि पुराणश्रवणाधिकारप्रतिपादनायोक्तम् ॥ ७ ॥ बृहस्पतेर्बृहस्पतये च ॥ ८ ॥ उक्तो दत्तवरः । पितरं शक्तिं राक्षसेन कल्माषपादेन भक्षितम् ॥ ९ ॥ इत्यर्थ इति । योगनिद्रामुपाश्रितवानिति भावः । अहींद्रतल्पे शेषशय्यायाम् "अधिशीङ्स्थासांकर्म" इत्याधारस्य कर्मत्वाभावस्त्वार्षः ॥ १० ॥ स नारायणः अधिष्ठानेऽयने 'अयनं तस्य ताः पूर्वं तेन नारायणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या ॥ कालाख्ययाऽऽसादितकर्मतंत्रो लोकानपीतान्ददृशे स्वदेहे ॥ १२ ॥ तस्याऽर्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोऽर्थो रजसा तनीयान् ॥ गुणेन कालानुगतेन विद्धः सूष्यस्तदाऽभिद्यतनाभिदेशात् ॥ १३ ॥ स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन ॥ स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः ॥ १४ ॥ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् ॥ तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोऽभूत् ॥ १५ ॥ तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः ॥ परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि ॥ १६ ॥ तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढम् ॥ उपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाऽविददादिदेवः ॥ १७ ॥ क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाऽब्जमनन्यदप्सु ॥ अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यम् ॥ १८ ॥

स्वया चिच्छक्त्या सह वर्तमान एव योगनिद्रया स्वपन्पूर्वमेव प्रबोधनार्थं नियुक्तया स्वकालशक्त्याऽऽसादितं प्रापितं कर्मतंत्रं क्रियाकलापो यस्य सः । अपीतान् लीनान् ददर्श ॥१२॥ लोकसृष्टयर्थमर्थसूक्ष्मेऽभिनिविष्टा दृष्टिर्यस्य । कालानुसारिणा रजोगुणेन विद्धः संक्षोभितः संस्तनीयानतिसूक्ष्मोऽर्थः सूष्यन् प्रसोष्यन्नुद्भविष्यन् नाभिदेशादुद्भूत इत्यर्थः ॥ १३ ॥ स तनीयानर्थः पद्मकोशः सन्नुदतिष्ठत् । कर्माणि जीवादृष्टानि प्रतिबोधयति यः कालस्तेन आत्मा श्रीविष्णुर्योनिर्यस्य ॥ १४ ॥ तल्लोकात्मकं पद्मं सर्वान् गुणान् जीवभोग्यानर्थानवभासयतीति तथा तद्यस्माज्जातं स एव विष्णुः । उ इति संबोधने । प्रावीविशत्प्रकर्षेणालुप्तशक्तिरेवांतर्यामितया प्रविवेश । तस्मिन्विष्णुनाधिष्ठिते पद्मे विधाता ब्रह्माऽभूत् । कथंभूतः । स्वयमेव वेदमयो नत्वध्ययनेन प्राप्तवेदः । कोऽसौ अदृष्टपितृत्वेन यं स्वयंभुवं वदंति स प्राक्कल्पांते नारायणेन सह निद्रयैकीभूत आसीत् तस्मिंश्च प्रबुद्धे तत एव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्त इत्यर्थः ॥ १५ ॥ स च तस्मिन्कल्पे चतुर्मुखोऽभूदित्याह । तस्यामिति परिक्रमंस्तत्रस्थ एव ग्रीवां चालयँल्लोकनिरीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य ॥ १६ ॥ तस्य च श्रीनारायणोपासनयैवाविर्भूतज्ञानक्रियाशक्तेर्लोककर्तृकत्वं न स्वत इति वक्तुं प्रथमं तस्य विमोहमाह । तस्मात्सलीलाद्विरूढमुद्गतं कंजमुपाश्रितोऽपि साकल्येन तत्कंजं लोकतत्त्वं चात्मानं च साक्षान्न ज्ञातवान् । उ इति विस्मये । कथंभूतात् । युगांतश्वसनः प्रलयवायुस्तेनावघूर्णं तत्र तत्र प्रकंपितं यज्जलं तस्मात्सर्वत ऊर्मिचक्रं यस्मिन् ॥ १७ ॥ अविदुषस्तस्य वितर्कमाह । योऽसावहमब्जपृष्ठे एष कः अनन्यदेकमेवैतदब्जं कुतो वा

स्मृतः' इति स्मृतेः । रुद्धवीर्यः प्रतिष्टब्धदाहकत्वशक्तिः । अनलोऽग्निः ॥ ११ ॥ १२ ॥ तस्य जलशायिनः । अर्थसूक्ष्मे भूतसूक्ष्मवर्गे सर्वजनलिंगदेहोत्थापनरूपं वा अर्थः भूतसूक्ष्मवर्गः इत्यर्थः इति । सूक्ष्मोर्थ एव कंजरूपेणाविर्बभूवेति भावः ॥ १३ ॥ तदेवाह—स इति ॥ १४ ॥ इत्यर्थ इति । ब्राह्मकल्पजात एव ब्रह्मा पाद्मकल्पे कमलद्वारा प्रादुरभूदिति भावः ॥ १५ ॥ स च ब्रह्मा तस्मिन्पाद्मे कल्पे अनुदिशं प्रतिदिशम् । ॥ १६ ॥ कंजं पद्मम् चक्रं मंडलम् ॥ १७ ॥ ब्रह्मवितर्के प्रमाणमाह—तथा चेति । स ब्रह्मा पुष्करपर्णे कमलपत्रे यस्मिन्नधिकरणे एतत्पद्ममधिष्ठितमिति श्रुतिपदार्थः ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश ॥ नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविंदताऽजः ॥ १९ ॥ तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिणेमिः ॥ यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः ॥ २० ॥ ततो निवृत्तोऽप्रातिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः ॥ शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ॥ २१ ॥ कालेन सोऽजः पुरुषायुषाऽभिप्रवृत्तयोगेन विरूढबोधः ॥ स्वयं तदंतर्हृदयेऽवभातमपश्यताऽपश्यत यं न पूर्वम् ॥ २२ ॥ मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानम् ॥ फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये ॥ २३ ॥ प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवे रुरुरुक्ममूर्ध्नः ॥ रत्नोदधारौषधिसौमनस्य वनस्रजो वेणु भुजांघ्रिपांघ्रेः ॥ २४ ॥

जातं यत्रैतदधिष्ठितं तेनाधस्तात्सता वर्तमानेन नु निश्चितं भाव्यं स इत्थमुद्वीक्ष्येत्युत्तरेणान्वयः । तथा च श्रुतिः । "सोऽपश्यत्पुष्करपर्णे तिष्ठन् सोऽमन्यत अस्ति वैतद्यस्मिन्निदमाधितिष्ठति" इति ॥ १८ ॥ तस्य च बहिर्मुखप्रवृत्त्या महताऽपि कालेन तदप्राप्तिमाह । स इति द्वाभ्याम् । तस्याब्जस्य यन्नालं तस्य नाडीभिरंतश्छिद्रैः तस्य खरनालस्य पद्मस्य यन्नालं तस्य नाभिमधिष्ठानं विचिन्वन्नर्वाग्गतोऽपि तत्तदा नाविंदत ॥ १९ ॥ हे विदुर आत्मसर्गं स्वकारणं त्रिणेमिः कालः अजस्य विष्णोर्हेतिः सुदर्शनरूपं शस्त्रं देहभाजां नराणां भयमुत्पादयन्निति संवत्सरशतमतिक्रांतमित्युक्तं भवति ॥ २० ॥ अंतर्मुखतया तु भगवंतं दृष्टवानित्याह द्वाभ्याम् । ततोऽन्वेषणान्निवृत्तः न प्रतिलब्धः कामो मनोरथो येन । स्वधिष्ण्यं पद्मम् । जितेन श्वासेन निवृत्तं संयतं चित्तं यस्य । अत एवारूढ आश्रितः समाधियोगो येन तथाभूतः सन्न्यषीददुपविवेश ॥ २१ ॥ पुरुषायुषा संवत्सरशतेन कालेनाभिप्रवृत्तः सुनिष्पन्नो योगस्तेन विरूढ उत्पन्नो बोधो यस्य यत्पूर्वं विचिन्वन्नपि नापश्यत्तत्स्वयमेवांतर्हृदयेऽवभातमपश्यत् ॥ २२ ॥ यदपश्यत्तद्वर्णयति । मृणालेति नवभिः नवस्वप्यपश्यदित्यस्यैवानुषंगः । मृणालवद्गौरश्चासावायतश्च यः शेषस्तस्य भोगो देहः स एव पर्यंकस्तस्मिन् । कुत्र स्थिते पर्यंके । फणातपत्रैरायुताः सर्वतो युक्ता ये मूर्धानस्तेषां रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिर्हतध्वांते युगांततोये ॥ २३ ॥ कथंभूतं पुरुषम् । हरितोपलाद्रेर्मरकतशिलामयपर्वतस्य

तस्य ब्रह्मणः तदप्राप्तिरधिष्ठानाप्राप्तिः । नालं दंडः 'नालं न ना पद्मदंडं' इति कोशात् । 'नाडी नाली सकुहरेस्त्र्यादिनिर्गमनवृत्ति' इति कोशांतरात् । "नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे । आधारेऽपि क्वचिन्नाभिर्मध्यभागेऽपि युज्यते", इति धरण्यादयः । अर्वाक् समीपं तत्पद्माधिष्ठानं तदान्वेषणावसरे ॥ १९ ॥ विचिन्वतो मृगयतः तमसि स्वरूपाच्छादकमायालक्षणांधकारे अपारे भगवत्प्रसादं विना पारयितुमशक्ये "शतायुर्वै पुरुषः" इति श्रुत्यपेक्षया स्वामिचरणैः संवत्सरशतमितिव्याख्यातम् ॥ २० ॥ मनोरथः पद्माधिष्ठानावाप्तिलक्षणः अत एव संयतचित्तत्वादेव स देवो ब्रह्मा ॥ २१ ॥ संवत्सरशतेति । सामान्यत उक्तं भूयस्त्वं तप आतिष्ठेति भगवद्वाक्योत्तरं "विरिञ्चोऽपि ततश्चक्रे दिव्यं वर्षशतं तपः" इत्यग्रे वक्ष्यमाणत्वात्तत्रापि दिव्यप्रमाणकमेव तज्ज्ञेयमिति । यत्तु 'दिव्यं सहस्राब्दममोघदर्शनः' इति द्वितीयस्कंध उक्तं तद्ब्राह्मकल्पापेक्षमेतच्च पाद्मकल्पपरमिति न विरोधः । योगः समाधिः । विचिन्वन्नपि नालमार्गेण मृगयन्नपि ॥ २२ ॥ मृणालं बिसम् ॥ २३ ॥ 'प्रेक्षा धीक्षणशोभासु नृत्येपि क्वचिदुच्यते' इति । स्वलावण्यातिशयेन निजसौंदर्याधिक्येन स्वार्थक–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानां कृतश्रियाऽपाश्रितवेषदेहम् ॥२५॥ पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चितां कामदुघांघ्रिपद्मम् ॥ प्रदर्शयंतं कृपया नखेंदुमयूखभिन्नांगुलिचारुपत्रम् ॥२६॥ मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन ॥ शोणायितेनाधर बिंबभासा प्रत्यर्हयंतं सुनसेन सुभ्र्वा ॥२७॥ कदंबकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे ॥ हारेण चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन ॥२८॥ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखम् ॥ अव्यक्तमूलं भुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शम् ॥ २९ ॥

प्रेक्षां शोभां क्षिपंतं स्वलावण्यातिशयेन तिरस्कुर्वंतं संध्याभ्रं नीवी परिधानं यस्य तस्य शोभां पीतांबरेण क्षिपंतं उरुरुक्ममूर्ध्नोऽनेकस्वर्णशिखरस्य तस्य स्वकिरीटैः रत्नानि च उदधाराश्च ओषधयश्च सौमनस्यानि च पुष्पसमूहाः सुमनस एव वा तेषां वनस्रजो वनमाला यस्य । वेणव एव भुजा यस्यांघ्रिपा एवांघ्रयो यस्य स चासौ स च तस्य । अयमर्थः । यदि तस्मिन्माला इव स्थिता रत्नादयो भवंति वेणवश्च भुजा इव वृक्षाश्च पादा इव तर्हि तस्य शोभां स्वीयरत्नमुक्तातुलसीपुष्पदामाभिर्भुजैरंघ्रिभिश्च क्षिपंतमिति ॥ २४ ॥ किंच । आयामतो दैर्घ्येण विस्तरतश्च स्वमानदेहेन मीयतेनेनेति मानमुपमा शोभनश्चासावमानो निरुपमो देहस्तेन । यद्वा । सुष्ठु अमानोऽपरिच्छिन्नस्तेन । यद्वा ताभ्यां स्वानुरूपप्रमाणेन अतएव लोकत्रयं संगृह्यते यस्मिंस्तथा विचित्राणि नानाविधानि दिव्यान्यपूर्वाणि चाभरणान्यंशुकानि च तेषां कृताऽऽसमंताच्छ्रीः शोभा येन तेन देहेन विशिष्टम् । एवं स्वत एवातिरम्यत्वेऽप्यपाश्रितवेषः स्वीकृतालंकारो देहो यस्य तमपश्यत् । यद्वा । केन प्रेक्षां क्षिपंतमित्यपेक्षायामेवंभूतेन देहेनेति संबंधः ॥ २५ ॥ स्वाभिलषितफलाय विविक्तैः शुद्धैर्वेदोक्तैर्मार्गैरभ्यर्चितां पुसां कामदुघमंघ्रिपद्मं प्रदर्शयंतं किंचिदुन्नमय्य समर्पयंतम् । नखा इव इंदवस्तेषां मयूखा रश्मयस्तैर्भिन्नाः संभिन्ना अंगुलय एव चारूणि पत्राणि यस्य तत् ॥ २६ ॥ लोकार्तिहरं स्मितं यस्मिंस्तेन परिस्फुरद्भ्यां कुंडलाभ्यां मंडितेन अधरबिंबदीप्त्या शोणवदाचरितेन शोभननासायुक्तेन सुभ्रुवा शोभनया भ्रुवा च प्रत्यर्हयंतं पूजकान्प्रतिपूजयंतं संमानयंतम् ॥२७॥ कदंबकिंजल्कवत्पिशंगं यद्वासस्ते मेखलया च नितंबे स्वलंकृतम् । हे वत्स श्रीवत्सयुक्तं यद्वक्षःस्थलं तस्य वल्लभेन वक्षस्यनर्घेण हारेण स्वलंकृतमित्यर्थः ॥ २८ ॥ महाचंदनवृक्षरूपकेण निरूपयितुं तं विशिनष्टि । परार्ध्यानि श्रेष्ठानि केयूराण्यंगदानि मणिप्रवेकाश्च

न्यत्पक्षमाश्रित्याह—सुमनस एवेति । एतेन स्वीयरत्नमालामुक्तामालातुलसीमालापुष्पमालाभिस्सह वनस्रक्शब्देन मालामात्रत्वोक्तेः । अत्राशयमाह—अयमर्थ इति ॥ २४ ॥ अन्यदाह—किं चेति । 'अतसीकुसमोपमेयकान्तिः' इत्याद्युक्तेरनुपमत्वासंभवादाह—यद्वेति । अपरिच्छिन्नदेहस्य भूषणादिधारणासंभवं मत्वा पुनराह—यद्वेति । ताभ्यां दैर्घ्यविस्ताराभ्यां स्वस्येश्वरस्यानुरूपेण योग्येन प्रमाणेन "अल्पस्य ह्यल्पदेहः स्यान्महांश्च स महेशितुः" इत्याद्युक्तेः । अत एव स्वानुरूपप्रमाणदेहत्वादेव । विशिष्टमिति पदाध्याहारापेक्षया द्वयोः संबंधे लाघवं मत्वाह—यद्वेति ॥ २५ ॥ 'संभेदः स्फुटने संगे' इति मेदिनी । भिन्नपदस्य संभिन्नार्थताकथनमत्रोपसर्गस्य धात्वर्थद्योतकत्वाभिप्रायेणैव न हि केवलोपसर्गस्य वाचकतास्तीत्यन्यत् ॥ २६ ॥ सुभ्र्वेत्युवङ्भाव आर्षः ॥ २७ ॥ इत्यर्थ इति । बहुमूल्यहारालंकृतोरस्कमिति भावः ॥ २८ ॥ 'प्रधाने व्यक्तमव्यक्तो ब्रह्मण्यस्पष्टमूर्खयोः' इति यादवोक्तिमाश्रित्याह—यद्वेति । शास्त्रविद्भिरपि न व्यज्यत इदमित्थतया कथ्यते मूलं यस्य तत्तथा सर्वमूलत्वेन मूलांतररहितं यद्वाऽव्यक्तस्य प्रकृतेर्मूलं कारणं "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति भारतोक्तेः । यद्वा 'अव्यक्तोयमचिंत्योयम्' इत्याद्युक्तेः । स्वयं भगवान्मूलं यस्य तत्तथा । वल्शशब्दस्य स्कंधवाचकत्वे श्रुतिं प्रमाणयति "शतवल्शोनं तस्कंधो विरोहो वृक्षः"

३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चराचरौको भगवन् महीध्रमहींद्रबंधुं सलिलोपगूढम् ॥ किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भम् ॥ ३० ॥ निवीतमाम्नायमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिम्॥सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदम्॥ ३१॥तर्ह्येव तन्नाभिसरःसरोजमात्मानमंभः श्वसनं वियच्च॥ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ॥ ३२ ॥

मण्युत्तमास्तैः पर्यस्ता व्याप्ता दोर्दंडा एव सहस्रमनंताः शाखा यस्य। चंदनवृक्षोऽपि केयूरादितुल्यैः फलपुष्पादिभिर्व्याप्तशाखो भवति । अव्यक्तं प्रधानं मूलमधो भागो यस्य। यद्वा । अव्यक्तं ब्रह्म मूलं यस्य ब्रह्माभिव्यक्तिरूपत्वात् वृक्षस्यापि मूलं न व्यक्तम् । भुवनात्मकमंघ्रिपेंद्रम् । अहींद्रस्यानंतस्य भोगैः फणैर्देहावयवैर्वाऽधिवीताः संवेष्टिताः स्पृष्टा वल्शाः स्कंधा यस्य । 'वनस्पते शतवल्शो विरोह' इति श्रुतेः । सोऽपि सर्पैर्वेष्टितो भवति ॥ २९ ॥ प्रेक्षां क्षिपंतमित्यत्रैव पर्वतरूपेण निरूपितमपि विशेषणांतरैः पुनर्निरूपयति । भगवानेव महीध्रस्तम्। चराचराणामोकः स्थानं सोऽपि तथा अहींद्रस्य बंधुं सोप्यहींद्राणां बंधुः।सलिलेनोपगूढमावृतं पर्वतोऽपि मैनाकादिस्तथा। किरीटसाहस्रमेव हिरण्यशृंगाणि यस्य सोऽपि मेर्वादिस्तथा यथा । पर्वतस्य गर्भे क्वचिद्रत्नमाविर्भवति तथाविर्भवत्स्पष्टं दृश्यमानं कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तम् ॥ ३० ॥ किंच । वनमालया निवीतं कंठलंबिन्या व्याप्तम् । आम्नाया वेदा एव मधुव्रतास्तैः श्रीर्यस्यास्तया । हारिमिति पर्वतादिरूपमपश्यत् हारिरसाविति ज्ञातवानित्यर्थः । सूर्यादिभिरगममगम्यं स्वव्यापारैराकलयितुमशक्यमित्यर्थः । किंच । त्रिष्वपि लोकेषु धाम स्फूर्तिर्येषां ते रक्षणार्थं परिक्रमद्भिः परितो धावद्भिः प्राधनिकैः प्रधनं संग्रामस्तत्प्रयोजनैः सुदर्शनादिभिर्हेतुभूतैर्दुरासदं दुष्प्रापम् ॥ ३१ ॥ यदैव हारिमपश्यत्तर्ह्येव तदैव लोकविसर्गदृष्टिः संस्तस्य नाभिसरसि सरोजं श्वसनं प्रलयवायुं वियदाकाशं च ददर्श ॥ ३२ ॥

इति श्रुतिपदार्थः । सोऽपि चंदनवृक्षोपि । 'भोगिवेष्टनमार्गेषु' इति महाकव्युक्तेः ॥ २९ ॥ सिंहावलोकनन्यायेन पुनराह—प्रेक्षामित्यादिना सोपि पर्वतोपि तथा चराचरवासस्थानम् । सोऽपि पर्वतोपि । तथा समुद्रजलगुप्तः सोपि मेर्वादिरादिना कैलासग्रहः तथा स्वर्णादिशृंगवान् तथा पर्वतवत् ॥ ३० ॥ पुनः पर्वतपार्थक्येन वर्णयति । किं चेति । 'निवीतं कंठलंबितम्' इत्यमरः । आम्नायंतेऽभीक्ष्णं वर्ण्यंते धर्मादयो यत्र यद्वा । आम्नायंतेऽभ्यस्यंते कल्याणार्थिभिरनिशमित्याम्नायाः । इत्यर्थ इति । यथा मणिप्रभायां मणिबुद्ध्या यावन्मणिं लभते तथा विसंवादिभ्रमन्यायेन पर्वतबुद्ध्यापि हारिं पश्यन्हरिमेव लब्धवानिति भावः ॥ "दीपप्रभामणिभ्रांतिर्विसंवादिभ्रमस्मृतः । मणिप्रभा मणिभ्रांतिः संवादिभ्रम उच्यते" ॥ इति विद्यारण्योक्तेः । इत्यर्थ इति। "नतद्भासयते सूर्यो न चंद्रो न च पावकः" इति स्मृतेः । "न तत्र सूर्यो भाति" इत्यादिश्रुतेश्च । भक्तिं विना प्राप्तुमशक्यत्वमाह किं चेति । रक्षणार्थमभक्तजनासुरादीनां तत्रागमननिषेधार्थमिति सर्वरक्षकस्य "स्ववीर्यगुप्ताहि मनोः प्रसूतिः" इतिन्यायेन रक्षकांतरासंभवात् ॥ ३१ ॥ जलादिभूतत्रयमात्मानं सरोजं चेति पञ्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा ॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ॥ ३३ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे अष्टमोऽध्यायः ॥ ८ ॥ ब्रह्मोवाच ॥ ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यम् ॥ नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि ॥ १ ॥ रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय ॥ आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासम् ॥ २ ॥ नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धवर्चः ॥ पश्यामि विश्वसृजमेकमविश्वमात्मन् भूतेंद्रियात्मकमदस्त उपाश्रितोऽस्मि ॥ ३ ॥

कर्मबीजं लोकसृष्टेः कारणम् । रजसोपरक्तो रजोगुणयुक्तः अतः प्रजाः स्रष्टुमिच्छन्नियदेव नाभिसरोजादिपंचकमेव विसर्गेऽप्यभिमुखो दत्तचित्तः स्तुत्यंतं भगवंतमस्तौत् । कथंभूतः अव्यक्तवर्त्मनि भगवति निवेशितचित्तः ॥ ३३ ॥ इति तृतीये टीकायामष्टमोऽध्यायः ॥ ८ ॥ नवमे तपसा तुष्टं दृष्ट्वा नारायणं त्वजः ॥ अस्तौदेकार्णवे सीदँल्लोकसर्गचिकीर्षया ॥ १ ॥ भगवज्ज्ञानेनात्मनः कृतार्थतामाविष्कुर्वन्नज्ञांश्च शोचन्नाह । ज्ञातोऽसीति । सुचिराद्बहुकालोपासनेनाद्य मे मया ज्ञातोऽसि । नन्वहो देहभाजामेतदवद्यं दोषः । किं तत् । यद्भगवतस्तव गतिस्तत्त्वं न ज्ञायत इति । यतस्त्वमेव ज्ञातुं योग्यः सत्यत्वान्नान्यदसत्यत्वादित्याह । त्वत्त्वत्तोऽन्यन्नास्ति यद्यप्यस्तीति प्रतिभाति तदपि शुद्धं सत्त्वं न भवति । कथमसतः प्रतीतिस्तत्राह । यद्यतो मायागुणक्षोभात्त्वमेवोरुर्बहुरूपो विभासि ॥ १ ॥ ननु त्वमपि सम्यक् न जानासि यत्त्वया दृष्टं रूपमेतदपि गुणात्मकमेव निर्गुणं ब्रह्म वै तु सत्यं तत्राह । रूपमिति द्वाभ्याम् । अवबोधरसोदयेन चिच्छक्त्याविर्भावेन शश्वत्सदा निवृत्तं तमो यस्मात्तस्य तव यदेतद्रूपं त्वयैव स्वातंत्र्येण सतामुपासकानामनुग्रहाय गृहीतमाविष्कृतमवतारशतस्य शुद्धसत्त्वात्मकस्य यदेकं बीजं मूलं तत्प्रदर्शनार्थं गुणावतारबीजत्वं दर्शयति । यन्नाभीति ॥ २ ॥ हे परम अविद्धवर्चोऽनावृतप्रकाशं अतोऽविकल्पं निर्भेदम् अत एवानंदमात्रम् एवंभूतं यद्भवतः स्वरूपं तदतो रूपात्परं भिन्नं न पश्यामि किंत्विदमेव तत् । अतःकारणात्ते तवादः इदं रूपमुपाश्रितोऽस्मि योग्यत्वादपीत्याह । एकमुपास्येषु मुख्यं यतो विश्वसृजं विश्वं सृजतीत्यत एवाविश्वं विश्वस्मादन्यत् । किंच । भूतेंद्रियात्मकं भूतानामिंद्रियाणां चात्मानं कारण

कमेव ददर्श न पृथिव्यादीत्यर्थः ॥ ३२ ॥ स ब्रह्मा अतो रजोगुणोपयुक्तत्वात् दत्तचित्तः कथमहं विसर्गं कुर्यामिति भावयन् प्रभुमेव शरणं व्रजामीति विसर्गाभिनिवेशं परित्यज्य भगवन्तमेवास्तौदित्यर्थः ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ सीदन्सृष्टिनिर्माणशक्त्यलाभेनाकुलीभवन् ॥ (१) ॥ तदवद्यं किम् बहुरूपो विभासीति 'न हि सत्यस्य नानात्वम्' इत्युक्तेः । 'नानात्वभ्रम आत्मन्' इत्युक्तेश्च ॥ १ ॥ अत्राक्षिपति—नन्विति ॥ २ ॥ अतोऽनावृतप्रकाशत्वात् । अत एव निर्भेदत्वादेव 'भेदो दुःखस्य मूलं हि' इति वचनात् । एवंभूतमनावृतप्रकाशाभेदानंदमात्रं यत्स्वरूपम् । अतोऽस्माद्रूपात् । इदमेवास्मज्ज्ञातमेव तत्सच्चिदानंदरूपम् । यतो हेतोरिदं मज्ज्ञातमेव तत्—योग्यत्वाद्ध्यातुमर्हत्वादप्येतद्रूपमेवाहमुपाश्रितोस्मीति यतो हेतोर्विश्वस्रष्टा हि घटात्कुलालवद्भिन्न एव भवतीत्याह—अत एवेति विश्वसृक्त्वादेव न केवलं विश्वसृगेव किं तु विश्वसृजामवांतरकारणानामपि कारणमित्याह—किं चेति । इत्यर्थ इति ब्रह्मण एव तव सर्वकारणत्वं न तु भूतादीनामिति भावः । मा परो यस्मात्स परमः सर्वावधिभूतोसीत्याह परमेति ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानाम् ॥ तस्मै नमो भगवतेऽनुविधेम तुभ्यं योऽनादृतो नरकभाग्भिरसत्प्रसंगैः ॥ ४ ॥ ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतम् ॥ भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसाम् ॥ ५ ॥ तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः ॥ तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेंघ्रिमभयं प्रवृणीत लोकः ॥ ६ ॥ दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रिया ये ॥ कुर्वंति कामसुखलेशलवाय दीना लोभाभिभूतमनसोऽकुशलानि शश्वत् ॥ ७ ॥

मित्यर्थः ॥ ३ ॥ नन्वेवमपि सोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह । तद्वै तदेवेदं हे भुवनमंगल यतस्ते त्वया नोऽस्माकमुपासकानां मंगलाय ध्याने दर्शितम् । न ह्यव्यक्तवर्त्माभिनिवेशितचित्तानामस्माकं सोपाधिकदर्शनं युक्तमिति भावः । अतस्तुभ्यं नमोऽनुविधेमानुवृत्त्या करवाम । तर्हि किमिति केचिन्मां नाद्रियंते तत्राह । योऽनादृत इति । असत्प्रसंगैर्निरीश्वरकुतर्कनिष्ठैः ॥ ४ ॥ आदरेण तु त्वां भजंतः कृतार्था इत्याह । ये त्विति । श्रुतिर्वेदः स एव वातस्तेन नीतं प्रापितं नापैषि नापयासि ये त्वत्कथाश्रवणमत्यादरेण कुर्वंति तेषां हृदि नित्यं प्रकाशसे इत्यर्थः ॥ ५ ॥ ततः किमत आह । तावदिति । द्रविणादौ विद्यमाने भयं गते शोकः पुनश्च स्पृहा ततः परिभवस्तथाऽपि विपुलो लोभस्तृष्णा पुनः कथंचित्प्राप्ते ममेत्यसदाग्रहः। आर्तिमूलं भयशोकादेः कारणं न प्रवृणीत नाश्रयेत । त्वत्पादाश्रयमात्रेण भयादिनिवृत्तिः किंपुनस्त्वत्प्रकाशे सतीति भावः ॥ ६ ॥ ये निष्कामा अपि संतस्त्वां नाद्रियंते ते नरकभाज इत्युक्तं ये तु त्वत्कथाश्रवणादिविमुखाः संतः काम्यकर्मपरास्तेऽतिमंदा इत्याह । दैवेन ते हतधियो

पुनराक्षिपति—नन्विति । कारणकारणत्वेपि कारणत्वोपाधिना पुनरप्यर्वाचीनमेव शुद्धस्वरूपं योगिजनोपास्यं तु परमस्तीति चेदाह—तन्निरूपाधिस्वरूपमेतदेव लोकमंगलार्थं प्रकटितमित्याह—हेभुवनमंगलेति । इति भाव इति "ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्" इति गीतोक्तेः । "यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय" इति वक्ष्यमाणत्वाच्चेत्याशयः यतो भक्तमंगलार्थमाविर्भूतोसि अतो हेतोः यद्यहमीदृशस्तर्हि सर्वे मां किमिति न भजंतीत्याक्षेपपूर्वकं समाधत्ते तर्हीत्यादिना निरीश्वरकुतर्का निरीश्वरसांख्यमीमांसकास्तेषु निष्ठा स्थितिर्येषां तैः ॥ ४ ॥ श्रुतिः श्रवणं वा त्वदीयचरणांबुजकोशस्य क्षीराब्ध्यादिस्थितमूलरूपाख्यपद्मांमुकुलस्य गंधं हृदि व्यक्तरूपं जिघ्रंति अपरोक्षीकृत्यानुभवंति "हृदि व्यक्तं तु यद्रूपं हरेर्गंधः स उच्यते । उत्तमानां हि पादेन सर्वरूपं च कथ्यते" इति तीर्थोक्तेः । चरणः पादपर्यायः । अयमर्थः सम्यक् प्रतीयतेऽन्यथाकर्णानां घ्राणनासंभवेन विषयविषयिसंबंधाभावाद्विरोधः स्यात् । यद्वा । गंधशब्दस्य यशसि जिघ्रंतीत्यस्य शृण्वंतीत्यस्यार्थे लक्षणा कार्य्येति आदरेण शृण्वंति यथा कर्णच्छिद्रैर्द्वारभूतैः श्रुतिवातेन प्रापितं गंधमित्यर्थः । इत्यर्थ इति कथाश्रवणसमोन्यः प्रकारो भगवज्ज्ञानस्य नास्तीति भावः ॥ ५ ॥ ततो नित्यं हृदि प्रकाशात् । किं स्यादतोत्र भयं राजचौरव्यसनादितः स्पृहा पुनर्मे धनं कथं स्यादितीच्छा । ततः स्पृहातः 'याचञ्चानादप्रतिलब्धमानम्' इत्याद्युक्तेः । तथापि सत्यपि पराभवे असदाग्रहो वृथा हठः मम त्वस्यैव भयशोकादेः कारणत्वादित्यर्थः । आर्त्तिमूलमित्याविष्टालिंगत्वात् । षंढत्वम् । इति भावः इति। "तावद्रागादयःस्तेनास्तावत्काराग्रहं गृहम् । तावन्मोहोंघ्रिनिगडो यावत्कृष्ण न ते जनः" इति लोकेशोक्तेरित्याशयः ॥ ६ ॥ सकामनिष्कामजनानां भवत्सेवनमेव क्षेमहेतुरित्यभिप्रायेण स्वामिचरणा वदंति ये निष्कामा इति । दैवेन जन्मांतर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च ॥ कामाग्निनाऽच्युतरुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ॥ ॥ ८ ॥ यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमायाबलं भगवतो जन ईश पश्येत् ॥ तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थाऽपि दुःखनिवहं वहति क्रियार्था ॥ ९ ॥ अह्न्यापृतार्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः ॥ दैवाहतार्थरचना ऋषयोऽपि देव युष्मत्प्रसंगविमुखा इह संसरंति ॥ १० ॥ त्वं भावयोगपरिभासितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ॥ यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥ ११ ॥

नष्टमतयः प्रसंगाच्छ्रवणकीर्तनादिरूपात्सर्वदुःखनिवर्तकाद्विमुखानींद्रियाणि येषाम् । अकुशलान्यक्षेमकराणि काम्यकर्माणि ॥ ७ ॥ अकुशलत्वमेव दर्शयति । क्षुच्च तृट् च त्रिधातवश्च वातपित्तश्लेष्माणस्तैः इमाः प्रजाः सुदुर्भरेण दुःसहेन कामाग्निनाऽच्युतया रुषाऽविच्छिन्नक्रोधेन च पीड्यमानाः संपश्यतो मे मनः सीदति ॥ ८ ॥ नन्वेवंभूतायाः संसृतेरपरमार्थत्वात्किमर्थं विषादः क्रियते तत्राह । यावदिति । आत्मन इदं पृथक्त्वं देहादिभावं भगवतस्तवेंद्रियार्थरूपा या माया तया बलमाधिक्यं यस्य तत् । न प्रतिसंक्रमेत् नोपरमेत् । दुःखसमूहं प्रापयतीति क्रियाणामर्थः फलं यस्यां सा । त्वदिदमिति पाठे इदं देहादि त्वत्त्वत्तः पृथक् पश्येद्यावत्तावदसौ व्यर्थाऽपि नोपरमेत् ॥ ९ ॥ भवत्वेवमविवेकिनां विवेकिनस्तु मुक्ता एवेति किं तेषां भक्त्या कृत्यमत आह । अह्नि आपृतानि व्यापृतानि च तानि आर्तानि क्लिष्टानि करणानींद्रियाणि येषां रात्रौ विषयसुखलवोऽपि नास्ति यतो निशि निःशयानाः स्वप्नदर्शनेन च क्षणेक्षणे भग्ननिद्रा दैवेनाहताः सर्वतः प्रतिहता अर्थरचना अर्थार्थोद्यमा येषाम् ॥ १० ॥ तदेवमभक्तानां संसारान्निवृत्तिमुक्त्वा भक्तानां तन्निवृत्तिमाह । त्वमिति भक्तियोगेन शोधिते हृत्सरोजे आस्से तिष्ठसि । श्रुतेन श्रवणेनेक्षितः पंथा यस्य । किंच । श्रवणं

संपादिताकुशलकर्मणा अक्षेमकराणि चौर्यव्यभिचारादीनि । लोभेन जैह्वशैश्नादिभोगाभिलाषेणाभिभूतं शास्त्रीयमार्गतश्च्यावितं मनो येषां ते तथा ॥ ७ ॥ कामक्रोधाभ्यां क्षुत्तृट्त्रिधातुभिराध्यात्मिकैः । शीतोष्णमवातवर्षैराधिदैविकैः । इतरेतरादन्योन्यं स्त्रीपुत्रादित इत्याधिभौतिकैः संपश्यत इति कल्पांतरानुभूतापेक्षं तदा प्रजाया अभावादिति ज्ञेयम् । सीदति अहो कथमेषां निस्तारो भवेदिति खिद्यत इत्यर्थः ॥ ८ ॥ आक्षिपति—नन्विति । एवंभूतायास्तापत्रयपीडनादिरूपायाः आत्मनो जीवस्य इंद्रियार्थरूपा विषयरूपा "गोचरा इंद्रियार्थाश्च" इत्यमरः । क्रियाणां कर्मणाम् ॥ ९ ॥ प्रकारांतरेणाक्षिपति—भवत्विति । कृत्यं करणीयं संदर्भस्तु स्वभावाद्युष्मद्भजनविमुखाः संसरंति किं बहुना तत्तन्मार्गसिद्धा मुनयोऽपि युष्मत्प्रसंगविमुखाश्चेदिह जगति तद्वदेव संसरंति अथवा मुनयोऽपि त्वद्विमुखाश्चेत्तर्हि संसरंत्येव किं भूता 'अह्न्यापृते' इत्यादि "आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यतो नादृतयुष्मदंघ्रयः" इत्युक्तेः । अत एव श्रीयमुनाभ्रात्राप्युक्तं "धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः । न सिद्धमुख्या असुरा मनुष्याः कुतो नु विद्याधरचारणाद्याः ॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः । प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः । गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वाऽमृतमश्नुते । एतावानेवलोकेस्मिन्पुंसां धर्मः परः स्मृतः" इत्यादि एते धर्मप्रवर्तका विजानीम एव न तु स्वस्मृत्यादिषु प्रायेणोपदिशाम इत्यर्थः । यतो गुह्यमप्रकाश्यं दुर्बोधमन्यैस्तथा ग्रहीतुमशक्यं च गुह्यत्वे हेतुः 'यं ज्ञात्वाऽमृतमश्नुते' इति अत एव वक्ष्यते च "प्रायेण वेद तदिदं न महाजनोऽयम्" इत्यादि महाजनो द्वादशभ्यस्तदनुगृहीतसंप्रदायिभ्योऽन्यो महागुणयुक्तोपीत्यर्थः । तस्मात्साधूक्तमह्न्यापृतात्येत्यादि ॥ १० ॥ भक्तियोगोऽत्र प्रेमा परिभावितत्वं योग्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नातिप्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः ॥ यत्सर्वभूतदययाऽसदलभ्ययैको नानाजनेष्ववहितः सुहृदंतरात्मा ॥ १२ ॥
पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च ॥ आराधनं भगवतस्तव सत्क्रियाऽर्थो धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र ॥१३॥
शश्वत्स्वरूपमहसैव निपीतभेदमोहाय बोधधिषणाय नमः परस्मै ॥ विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इदं चकृमेश्वराय ॥ १४ ॥

विनापि त्वद्भक्ता मनसा यद्यत्तव वपू रूपं स्वेच्छया ध्यायंति तत्तत्प्रणयसे प्रकटयसि । सतां भक्तानामनुग्रहाय ॥ ११ ॥ भक्तानां च निष्कामानां त्वमतिसुलभो नेतरेषामित्याह । नेति । उपचितैरूर्जितैरुपचारैः पुष्पोपहारादिभिः । यद्यथा असतामभक्तानामलभ्यया सर्वभूतदयया । प्रसादे हेतुः एक इत्यादि ॥ १२ ॥ यतः सकामानां भवान्नातिप्रसीदत्यतः कामप्राप्तिः क्रियाणामुत्तमं फलं न भवति किंतु त्वत्प्रीणनमेव कामसंयोगस्त्ववांतरफलेन प्ररोचनार्थमित्याह । पुंसामिति । भगवतस्तवाराधनमेव संश्वासौ क्रियार्थश्च श्रेष्ठं क्रियाफलम् । श्रेष्ठत्वे हेतुः । यत्र त्वय्यर्पितो धर्मो न कदाचिद् ध्रियते न नश्यति कामार्थस्तु धर्मः कामं दत्त्वा नश्यतीत्यर्थः ॥ १३ ॥ अतस्त्वामेव वयं नता इत्याह । शश्वत्सर्वदा स्वरूपचैतन्येनैव निरस्तभेदभ्रमाय पुनश्च बोध एव धिषणा विद्याशक्तिर्यस्य यद्वा बोध एव धिषणमाश्रयः अत एव परस्मै । अत्र

तामापादितत्वं श्रुतेन भगवत्प्रतिपादकवैदिकशास्त्रश्रवणेन तर्हि मद्रूपविशेषाविर्भावे किं कारणं तत्राह—धिया श्रुतलब्धेन बुद्धिविशेषेण नत्वीश्वरोहं कथमेवं तेषां वशः स्यां तत्राह—सदनुग्रहायेति । सत्सु तेष्वनुग्रह एव तव वशत्वे कारणं नान्यदिति भावः । ननु श्रुतमात्रेण तेषां मम बहूनां रूपाणां कथं स्यात्तदभावे च कथमेकतरनिष्ठा स्यात्तत्राह—हे उरुगायेति । वेदेन त्वमुरुधैव गीयस इति स्वस्वमत्यनुसारेण तेषां सा स्यादिति भावः । भावयोगेन परिभावित संचिंतितेति संबुद्धिर्वा ॥ ११ ॥ भवानिति शेषः सकामानां स्वार्थपरत्वात्सर्वभूतदया तेषां नास्ति निष्कामानां परार्थपरत्वात्सर्वभूतदया स्वाभाविक्येवातस्तत्र तवातिप्रसादो भवति अतिप्रसादत्वे हेतुः एक एव भवान् नानाजनेष्ववहितः कृतावधानः यतः सुहृत् मद्भक्तकृपया भक्तिप्राप्त्या एते विस्तरंत्विति तेषां हितैषी नन्वेवं चेदहमेव स्वयं कृपया तान् कथं नोद्धरामीति चेदाह—अंतरात्मा त्वं स्वभक्ताय यशोदानार्थं जगदुद्धारिणीं स्वकृपाभक्तिं तेषु निधाय सर्वत्रांतर्यामिस्वरूपेण स्वयमौदास्यमेवावलंबस इत्यर्थः । न चैवं सर्वमुक्तिप्रसंग इति न च वाच्यं सर्वभूतदययेत्यत्र छत्रिणो गच्छंतीतिवत्सर्वशब्दस्य प्राचुर्य्यमात्रार्थपरत्वेनाभिधानात् । भगवद्भक्तकृपाया अपि प्रायः खल्वसार्वत्रिकत्वादर्शनात् । यद्वा । भक्तेन सर्व भूतेष्वेव दयाकार्य्यैव तदपि न सर्वमुक्तिर्द्रष्टव्या न हि सर्वत्रैवोप्तान्यपि बीजान्यूषरक्षारादिभूमिष्वपि प्ररोहंतीति नारदादीनामपि दक्षादिषु कृपायाः फलवत्त्वादृष्टेः ॥ १२ ॥ भक्तौ यतो निष्कामाः श्रेष्ठा अतः केवलं भक्त्यशक्तावपि प्रधानीभूता लौकिकवैदिककर्मार्पणरूपापि भक्तिर्निष्कामैव कार्येत्याह—विविधकर्मभिर्लौकिकैर्वैदिकैरध्वराद्यैश्च त्वदर्पितैराराधनं "यत्करोषि यदश्नासि" इति भगवता शिक्षितमित्यर्थः । अत्र प्रधानीभूतायां भक्तौ लौकिकवैदिकनिखिलकर्मार्पणं गुणीभूतायां वैदिकस्यैव न तु लौकिकस्य केवलायां लौकिकस्य कथाश्रवणकीर्त्तनादेश्चार्पितस्यैव कारणमिति भेदो द्रष्टव्यः हरतेः कर्मकर्त्तरि प्रयोगो ह्रियत इति । इत्यर्थ इति विनाशिधर्मसेवने न किमपि सिध्यतीति भावः ॥ १३ ॥ यतस्त्वदर्पितधर्मो न ह्रियतेऽतो हेतोः स्वरूपचैतन्येनैवागस्त्येनेव निपीतो भेदे मोहसमुद्रो जीवादिभिः सह तव भेदो न संभवतीति भ्रमो येनेति विश्वनाथगोस्वामिनो तीर्थश्च स्वरूपज्ञानेनैव "तद्ब्रह्मावेदहं ब्रह्मास्मि" इति श्रुतेर्निपीतभेदमोहाय सम्यङ्निरस्तेशापूर्णतादिषड्विधभेदमोहाय "ईशस्यापूर्णताज्ञानं विष्णोरन्यस्य चेशता । भेदस्तस्यावतारेषु जीवस्येशत्वमेव च ॥ तथा जीवत्वमंशिस्य जडाभेदस्तयोरपि । भेदमोह इति प्रोक्तः स सदा न हरेः क्वचित् ॥ अन्येषां तत्प्रसादेन शनैर्यातिसतामपि" इति तन्मतग्रंथोक्तेः । विद्याशक्तिर्बुद्धिः धिषणाशब्दस्य लिंगांतरेऽर्थांतरमाश्रित्याह यद्वेति । धिषणो जीव 'आधारे धिषणा धियि योषिति' इति कोशात् । अत एव बोधाश्रयत्वादेव अत्र परत्वे क्रीडाऽवलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणंति ॥ तेनैकजन्मशमलं सहसैव हित्वा संयांत्यऽपावृतमृतं तमजं प्रपद्ये॥१५॥यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलम्॥ भित्त्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मैनमो भगवते भुवनद्रुमाय ॥१६॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्यनिमिषाय नमोऽस्तु तस्मै ॥ १७ ॥

हेतुः । विश्वोद्भवादिनिमित्तं या माया तस्या लीला विलासस्तथा रासः क्रीडा यस्य ते तुभ्यमिदं नमो नमनं चक्रम कृतवंतो वयम् ॥ १४ ॥ नामग्रहणमात्रतः कैवल्यप्रदत्वेनैश्वर्यं व्यंजयन्नमस्करोति । यस्येति । अवतारादीनां विडंबनमनुकरणमस्ति येषु तत्रावतारविडंबनानि देवकीनंदन इत्यादीनि गुणविडंबनानि सर्वज्ञो भक्तवत्सल इत्यादीनि कर्मविडंबनानि गोवर्धनोद्धरणः कंसारातिरित्यादीनि । असुविगमेऽपि विवशा अपि गृणंत्युच्चारयंति केवलं शमलं पापम् अपावृतं निरस्तावरणम् ऋतं ब्रह्म प्राप्नुवंति ॥ १५ ॥ तत्र गुणावतारकर्माणि दर्शयन्प्रणमति । यो वै एकस्त्रिपात्त्रयो ब्रह्मादयः पादाः स्कंधा यस्य प्रत्येकं च उरवः प्ररोहाः शाखोपशाखा मरीच्यादिमन्वादिरूपा यस्य तथाभूतः सन्ववृधे । तस्मै भुवनाकाराय द्रुमाय नमः । किं कृत्वा ववृधे आत्मा स्वयमेव मूलमधिष्ठानं यस्य तत्प्रधानं भित्त्वा गुणत्रयरूपेण विभज्य त्रिपात्त्वमेवाह । अहं ब्रह्मा गिरिशश्च स्वयं विभुर्विष्णुश्चेति स्थित्युद्भवप्रलयहेतवो ये वयं एवं त्रिपाद्भूत्वा यो ववृध इत्यर्थः ॥ १६ ॥ एवं गुणावतारकर्मविडंबनमुक्त्वा तस्यैव

कनद्वारा ज्ञेया । यद्वा निमित्तेति संबुद्धिः हे कारणरूप लीलया रासो गोपीजनसंगतो लास्यविशेषो यस्य तस्मै "परार्द्धांते सोऽबुध्यत गोपवेशो मे पुरस्तदाविर्बभूव" इति श्रुतेः । 'कामदुघांघ्रिपद्मं प्रदर्शयंतम्" इति पूर्वोक्तेश्च । सविशेषस्वरूपेष्वपि श्रीकृष्णस्यैव परमपूर्णत्वात्परमाश्रयत्वं ज्ञापितम् । प्राचीनपुण्यराशेरिदानीमपि भगवद्दर्शनं प्राप्तमिति सूचयितुं चक्रमेति लिट्प्रयोगः ॥ १४ ॥ आदिना यशोनंदनादिग्रहः । द्वितीयादिना दीनबंध्वादिग्रहः । तृतीयादिना सेतुकारीत्यादिग्रहः । असुविगमे प्राणोत्क्रमणसमये एतेनोपास्योपासनागंधाभावेपि पंगुतुल्येभ्योऽपि स्वपददानात्त्वत्समकृपालुताऽन्यत्र नास्तीति ध्वनितम् यद्वा अवतारादिसदृशानि तत्तुल्यशक्तीनीति भावः । यद्वाऽवतारादीनां विडंबनं नटादिष्वनुकरणमपि यैस्तानि । यद्वा । अवतारादिविडंबनानि स्वभ्रातृपुत्रादिजीवविशेषवाचकत्वादवताराद्यनुकरणानीत्यर्थः । तत्र कृष्णोऽयं रामोऽयं नारायणोयमित्यादीन्यवतारविडंबनानि दयालुर्दीनबंधुर्दामोदर इत्यादीनि गुणविडंबनानि गोविंदो गिरिधरो मधुसूदन इत्यादीनि कर्मविडंबनानि अजामिलादय इव केवलमुच्चारयंति न तु ध्यायंति । ऋतं सच्चिदानंदं भगवंतमेव "आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतम् । दर्शयन्ब्रह्मणे रूपम्" इत्यत्र तथैव व्याख्यानात् ॥ १५ ॥ तत्राधुना गुणावतारा ब्रह्मादयः । इत्यर्थ इति । 'य एक एव रूपंरूपं प्रतिरूपो बभूव' इत्यादिश्रुतेर्बहुरूपो भूत्वा जगदाकारतां प्राप तस्मै नम इति भावः । अत्र विभुर्विष्णुः । स्वयं चेति । विष्णौ स्वयंपदप्रयोगाद्ब्रह्मगिरिशयोरिव विष्णोर्गुणनिबंधनः स्वतो भेदो नास्तीति द्योतितम् । यद्वा यऽहमादयः य एवात्मनः स्वस्यापि मूलं कारणं तथा य एव भित्त्वा स्वशक्तिकृतं भेदं प्राप्य त्रिपात् प्रथमं त्रिलोकरूपस्तत उरुप्ररोहश्चतुर्दशलोकरूपस्तस्मै भुवनाकाराय द्रुमाय सर्वव्यापिने नम इति विश्वरूपत्वमुक्तम् ॥ १६ ॥ तस्यैव गुणावतारधर्त्तुरेव तत्प्रसिद्धं विरुद्धकर्मभक्तिराहितकर्म यः कालरूपः यद्वा । 'स्वकर्मणा तमभ्यर्च्य' इत्युक्तेः । 'ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहम्' इत्युक्तेश्च कर्मज्ञानयोगाभ्यामपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्माद्बिभेम्यहमपि द्विपरार्ध्यधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत् ॥ तेपे तपो बहुसवोऽवरुरुत्समानस्तस्मै नमो भगवतेधिमखाय तुभ्यम् ॥ १८ ॥ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयाऽऽत्मकृतसेतुपरीप्सया यः ॥ रेमे निरस्तरतिरप्यवरुद्धदेहस्तस्मै नमो भगवते पुरुषोत्तमाय ॥ १९ ॥

तत्कालाख्यं रूपं तत्कर्म च दर्शयन्प्रणमति । लोक इति द्वाभ्याम् । विकर्मनिरतो विरुद्धकर्मनिष्ठः । कुशले हिते स्वे आत्मीये त्वदुदितेः त्वयैव साक्षादुक्के मदर्चनरूपे कर्मणि उक्तं हि गीतासु । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्" इति । तस्मिन् प्रमत्तो दत्तचित्तो यावद्वर्तते तावदस्य लोकस्य अनिमिषाय कालाय ॥ १७ ॥ आस्तां तावल्लोकस्य कथा यस्मात्कालाख्यात्त्वत्तो यद्द्विपरार्धावस्थायि धिष्ण्यं स्थानं तदारूढोऽपि बिभेमि भीतश्च संस्त्वामेवावरुरुत्समानः प्राप्तुमिच्छंस्तपस्तप्तवान् । कथंभूतः । बहुसवो बहवः सवा यागाः संवत्सरा वा यस्य बहून् यागान्कृत्वाऽपि बहून्संवत्सरान् वा तपस्तप्तवानित्यर्थः । अधिमखाय मखाधिष्ठात्रे ॥ १८ ॥ इदानीं तत्तत्कालभाविलीलावतारकर्माणि दर्शयन्नाह । तिर्यगादिषु स्वेच्छया स्वीकृतमूर्तिः सन् स्वकृतधर्ममर्यादापालनेच्छया रेमे वस्तुतः स्वानंदानुभवेनैव निरस्तविषयसुखोऽपि यो अत एव पुरुषोत्तमः तत्तदुपाधिधर्मासंस्पर्शात् । तदुक्तं गीतासु । "यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके

तदर्चनमेव स्यादिति केचिद्व्याचक्षते तत्राह—त्वदुदिते त्वयैव साक्षान्मदर्चनामिदमेवेत्युक्तेः । 'ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये' इत्येकादशे वक्ष्यमाणत्वात् । 'पंचरात्रस्य कृत्स्नस्य वक्ता तु भगवान्स्वयम्' इति मोक्षधर्माच्च तदेवं त्वद्भक्तलोकेभ्योऽन्यत्रैव कालस्याधिकार इति द्योतितम् । अभक्तलोकस्य तु जीवितस्याप्याशां छिनत्ति किमुत भोगाशामित्यर्थः । कालाधिकारो निरर्थकायुःक्षपणरूपो वा ज्ञेयस्तदुक्तम् "आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ । तस्यते यत्क्षणो नीत उत्तमश्लोकवार्तया" इति द्वितीयस्कंधे तीर्थस्तु अपराधमंतरेण जीविताशाछेदनमतीव साहसमिति न मन्तव्यमेतदभिप्रेत्याह—विकर्मेति । विहिताकरणादिनात्महत्यादिदोषापत्तेरतोऽधिकोपराधो नास्तीत्यतो न वैषम्यनैर्घृण्ये हरेरित्याह ॥ १७ ॥ "सवो यज्ञे च संधाने काले च परमात्मनि" इति निरुक्तिः । अत्र च कालभीतोहं तद्वशीकरणार्थं यज्ञैर्यजनेन कालो मे वशी भविष्यतीति प्रवृत्तोपि प्रत्युत कालेनैवाहं वशीकृतोऽतस्त्वच्छुद्धभक्तिं विना "त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति" इत्युक्तेः । कालजयो नास्तीत्यद्य ज्ञात्वा शुद्धभक्तिमेवाहं करवाणीति ध्वनिः ॥ १८ ॥ आदिनार्षादिग्रहः। विश्वनाथस्तु "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः"इति स्वकृतमर्यादापालनाय स्वभक्तोपनीतस्रक्चंदनशय्याद्युपभोगेष्वात्मारामोपि रेमे।'नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना" इत्यात्मारामत्वेप्यपूर्णकाम इव रेम इति भावः । यद्वात्मकृतसेतोः स्वभक्तकृतमर्यादायाः पारि सर्वतो भावेनेप्सया प्राप्तीच्छया श्रीयशोदया दाम्नैवान्यैरपि भक्तैः प्रणयरसनयाऽवरुद्धदेहः । अतः सर्वोत्कर्षात् महत्स्रष्ट्राद्यंतर्यामिपुरुषेभ्योप्युत्तमोयेति कृष्णावतार एव तात्पर्यम् । अत एव त्यक्तविषयसुखत्वादेव तत्पुरुषोत्तमत्त्वम् । श्लोकार्थस्तु "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते" इत्यस्मात्पूर्वमुक्तम् । वाक्यमादायैव भवतीत्यतो द्वावेव विवृणोति । इमौ द्वौ पृथग्राशीकृतौ पुरुषौ पुरुषोपाधित्वेन पुरुषशब्दव्यपदेश्यौ लोके संसारे तौ कावित्याह—क्षरोऽक्षरश्च क्षरतीति क्षरो विनाशी कार्यराशिरेकः पुरुषः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽविद्ययानुपहतोऽपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः ॥ अंतर्जले हि कशिपुस्पर्शानुकूला भीमोर्मिमालिनि जनस्य सुखं विवृण्वन्॥२०॥यन्नाभिपद्मभवनादहमाससमीड्य लोकत्रयोपकरणो यदनुग्रहेण॥तस्मै नमस्त उदरस्थभवाय योगनिद्राऽवसानविकसन्नलिनेक्षणाय॥२१॥ सोयं समस्तजगतां सुहृदेक आत्मा सत्त्वेन यन्मृडयते भगवान्भगेन॥ तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ ॥२२॥

वेदे च प्रथितः पुरुषोत्तमः" इति॥ १९॥इदानीं दृश्यमानामेव मूर्तिं प्रणमति । योऽविद्ययेति द्वाभ्याम् । दशार्धाः पंच वृत्तयो यस्यास्तयाऽविद्यया निद्राहेतुभूतयाऽनभितोऽपि योगनिद्रामुवाह तस्मै ते नम इत्युत्तरेणान्वयः । जठरीकृतोदरे प्रविलापिता लोकयात्रा लोकस्थितिर्येन अहिरेव कशिपुः शय्या तस्याः स्पर्शोऽनुकूलो यस्यास्तां निद्राम् । भीमानामूर्मीणां माला विद्यंते यस्मिन्नंतर्जले निद्राणस्याविवेकिनो जनस्य निद्रासुखमीदृगिति विवृण्वन् प्रदर्शयन्नुपहसन्नित्यर्थः । अतएवांतर्जलादिविशेषणानि । यद्वा । पूर्वकल्पे श्रांतस्य जनस्य विश्रामसुखं विवृण्वन् स्फारयन् । तदा तु परोपकाराय स्वयं दुःसहमपि दुःखं सोढव्यमिति द्योतनार्थं विशेषणानि ॥ २० ॥ किं च । यस्य नाभिपद्ममेव भवनं तस्मात् । लोकत्रयमुपकरणं यस्य यद्वा लोकत्रयस्य सृष्ट्यादिद्वारेणोपकरोतीति तथा तादृशोऽहं यदनुग्रहेणासम् । उदरे स्थितो भवः संसारप्रपंचो यस्य । योगनिद्रावसाने किंचिद्विकसन्नलिनवदीक्षणं यस्य ॥ २१ ॥ एवं स्तुत्वा प्रार्थयते । सोऽयमिति चतुर्भिः । येन सत्त्वेन ज्ञानेन भगेनैश्वर्येण च मृडयते

न क्षरतीत्यक्षरो विनाशरहितः क्षराख्यस्य पुरुषस्योत्पत्तिर्बीजं भगवतो मायाशक्तिर्द्वितीयः पुरुषः । तौ पुरुषौ स्वयमेव व्याचष्टे भगवान् क्षरः सर्वाणि भूतानि समस्तं कार्यजातमित्यर्थः । कूटस्थः कूटो यथार्थवस्त्वाच्छादनेनायथार्थवस्तुप्रकाशनं वंचनं मायेत्यर्थांतरं तेनावरणविक्षेपशक्तिद्वयरूपेण स्थितः । कूटस्थोऽभगवन्मायाशक्तिरूपः कारणोपाधिः संसारबीजत्वेनानंत्यादक्षर उच्यते । द्वितीयं श्रीस्वामिचरणलिखितं व्याचष्टे । यस्माद्धेतोः । क्षरं कार्यत्वेन विनाशिनं मायामयं संसारवृक्षमश्वत्थाख्यमतीतोऽतिक्रांतोहं परमेश्वरः अक्षरादपि मायाख्यात् 'अव्याकृता दक्षरात्परतः परः' इति पंचम्यंताक्षरपदेन श्रुत्या प्रतिपादितात्संसारवृक्षबजिभूतात्सर्वकारणादपि चोत्तम उत्कृष्टतमः।अतः क्षराक्षराभ्यां पुरुषोपाधिभ्यामभ्यासेन पुरुषपदव्यपदेश्याभ्यामुत्तमत्वादस्मि भवामि 'लोके वेदे च प्रख्यातः पुरुषोत्तमः' इति । 'स उत्तमः पुरुषः' इति श्रुतेर्वेदे उदाहृतः लोके च कविकाव्यादौ " हारिर्यथैकः पुरुषोत्तमो मतः" इत्यादि प्रसिद्धमेव ॥ १९ ॥ इत्यर्थ इति । अहो क्षणिकसुखार्थमयं लोको वृथैव शय्यादिसंपादने क्लिश्यति 'सत्यां क्षितौ किं काशिपोः प्रयासैः' इत्युक्तन्यायेनाहं यावत्कल्पमपि शयिष्ये तदपीत्थं न सामग्रीसंपादने प्रयत इत्युपहसन्निति भावः । क्वचित् 'उपदिशन्' इति पाठोस्ति स सुबोध एव अत एव निद्रासुखवशगत्वादेव प्राकृतजनोपि जलमध्यकोमलशय्याशायी सुखमाप्नोतीत्येतदर्थमंतलादिविशेषणानीति तदा प्राकृतजनाभावे उपदेशादेरसंभवं मत्वाह—यद्वेति।दुस्सहत्वं च जलमध्ये तथापि प्रलये जनांतराभावे पुनरपि भयदोर्मिमति समुद्रे तदपि सर्वलोकभयंकरसर्पशय्यायां शयनं महादुःखमेव तदंगीकरणं त्वतीवार्द्रचेतसं परमोपकारिणं विना न घटते । यद्वा । निद्रालुर्देशकालवस्तुभयान्न गणयति । यथाहं प्रलयकालेपि जनमात्रभयदे समुद्रेपि सर्पशय्यायामपि निर्भय एव शये सुखेन तथान्योपि निद्रालुरिति द्योतयन्निति भावः॥२०॥ अन्यदुत्कर्षमाह—किञ्चेति । यस्य भगवतः भवनमुत्पत्तिक्षेत्रम् । आसमभवम् । सर्वलोकस्रष्टुर्ममाप्युत्पादकत्वात्स्वमेव स्तुत्यर्हो नान्य इत्याह—ईड्येति । उपकरणमाज्ञाकारि कृतिर्वा सामग्री वा मद्बोधने लोकत्रयरचनयैव रचकत्वेन मद्बोधो भवति "उपकरणमस्त्युपकारे सामग्र्यां वशवार्त्तिनि रचने" इति निरुक्तिः । 'अप्रसिद्धेः प्रसिद्धिर्हि बलीयसी' इति न्यायमाश्रित्य सर्वप्रसिद्धार्थमाह—यद्वेति । यद्वा भवो रुद्रो ज्ञेयः । एतेन रुद्रस्य संहारकत्वं तु गौणमेव "निमित्तं परमीशस्य विश्वसर्गनिरोधयोः । हिरण्यगर्भश्शर्वश्च" इत्युक्तेः ॥ २१ ॥ योजयतु तज्ज्ञानं ददात्विति यावत् । 'स्पर्शनं प्रतिपादनम्' इत्यमरः । असौ मे प्रत्यक्षतां प्राप्तः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः ॥ तस्मिन्स्वविक्रममिदं सृजतोऽपि चेतो युंजीत कर्मशमलं च यथाविजह्याम् ॥ ॥२३॥ नाभिह्रदादिह सतोंऽभसि यस्य पुंसो विज्ञानशक्तिरहमासमनंतशक्तेः ॥ रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः ॥२४॥ सोऽसावदभ्रकरुणो भगवान् विवृद्धप्रेमस्मितेन नयनांबुरुहं विजृंभन् ॥ उत्थाय विश्वविजयाय च नो विषादं माध्व्या गिराऽपनय तात्पुरुषः पुराणः ॥ २५ ॥ मैत्रेय उवाच ॥ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः ॥ यावन्मनोवचः स्तुत्वा विरराम स खिन्नवत् ॥ २६ ॥

सुखयति विश्वं द्दशं प्रज्ञामनुस्पृशतायोजयतु यथाऽहं स्रष्टुं क्षमो भविष्यामि यतः प्रणतप्रियोऽसावहं च प्रणतो न चान्यः प्रार्थनीयोऽस्ति यतो भगवान् स एव समस्तजगतां सुहृत् यतोऽसावेकोऽनुस्यूत आत्मांतर्यामी ॥ २२ ॥ आत्मशक्त्या रमया सह यद्यत्कर्म करिष्यति स्वविक्रमं स्वस्य विष्णोरेव विक्रमः प्रभावो यस्मिंस्तादिदं विश्वं तदाज्ञया सृजतोऽपि मे चेतः स एव युंजीत प्रवर्तयतु कर्मासक्तिं तत्कृतं शमलं च वैषम्यादिपापं यथा विजह्यां त्यक्ष्यामि ॥ २३ ॥ अंभसि सतो यस्य नाभिह्रदादिहासम् । विज्ञाने शक्तिर्यस्य महत्तत्त्वात्मकस्य चित्तस्य तदभिमानी अस्य रूपमिदं विस्तारयतो मे निगमस्यावयवभूतानां गिरां विसर्ग उच्चारणं मारीरिषीष्ट "हलंतं ब्रह्मवर्चसम्" इति न्यायेन मा लुप्यतामित्यर्थः ॥ २४ ॥ विवृद्धप्रेम्णा स्मितेन विजृंभयन् विश्वस्य विजयायोद्भवाय । चकारादस्मदनुग्रहाय चोत्थाय ॥ २५ ॥ स्वस्य संभवो यस्मात्तम्

सुहृत्पालकः । आत्मा निरुपाधिप्रेमास्पदम् ॥ २२ ॥ गृहीता गुणा वात्सल्यादयस्तद्युक्ताः अवतारा येन सः । तत्कृतं कर्मासक्तिकृतम् । तस्मिन्कर्मणि धरोद्धारादिलक्षणे । एतेन सृष्टौ मे चेतो मा मज्जतु किन्तु तल्लीलायामेवेत्युक्तम् । तथा लीलास्मरणादिनैव पापहानिर्नान्यथेति च ॥ २३ ॥ किञ्च भगवतस्तवैश्वर्यसिंधोः कणमात्रेप्यस्मिन्मे प्रवेशो वेदाभ्यासप्रसादादेव 'वेदश्चक्षुस्तवेश्वर' इत्युक्तेः । संप्रति सृष्ट्यर्थं विविधव्यापारासक्तस्य मे वेदविस्मृतिर्मा भवतु । यद्वाऽस्पृश्याभक्ष्यापेयाग्राह्यादिवस्तुरूपमिदं सृजतो वेदोच्चारणाद्यधिकारो मा नश्यत्विति प्रार्थयते नाभीति । निगमस्य वेदराशेरवयवभूतानामृग्यजुःसामाथर्वरूपाणां विशेषेण सर्गोऽध्ययनाध्यापनादिसंबंधः । रिष् हिंसाया।मित्यस्य यङ्लुगंतात्कर्मकर्त्तरि छांदसं रीरिषीष्टेति । श्रीमद्भागवतस्य 'पुराणं ब्रह्मसंमितम्' इत्युक्तेर्वेदरूपत्वादत्र प्रायश्छांदसप्रयोगोल्लेख एव श्रीव्यासदेवेन कृत इति ध्येयम् । केचित्तु 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इत्युक्तेः । पाणिनीयशास्त्रान्निष्पन्नप्रयोगं नाद्रियंते । किञ्च छांदसत्वाश्रयणमपि सत्रान्नग्रहणवत्पाणिनीयशास्त्राज्ञानमूलकमेवेति चाहुस्तथा च रीरिषीष्टेति प्रयोगस्याप्यपाणिनीयत्वेनाप्रमाणमाहुस्ते चेत्थं बोध्याः " विरुद्धः पाणिनिमतात्प्रयोगोऽसंगतः स्फुटः ॥ तल्लोके न पुराणादौ यतस्ते वेदरूपिणः" इत्युक्तेः "यान्युज्जहार भगवान्व्यासो व्याकरणार्णवात् ।: तानि किंपदरत्नानि संति पाणिनिगोष्पदे " इति टीकांतरोक्तेश्च भगवता व्यासेन श्रीशिवप्रणीतव्याकरणार्णवग्रंथादुद्धृत्यैव बहवः प्रयोगा लिखिता न ते पाणिनिग्रंथे सिध्यंतीति । अत एवोक्तमभियुक्तैः 'समुद्रवद्व्याकरणं महेश्वरे तत्कुंभतोयोपमितं बृहस्पतौ । तद्भागलेशः सततं पुरंदरे कुशाग्रबिन्दुप्रमितं च पाणिनौ" इति । हलांतं हलग्रहणेन कर्षणमत्र हलशब्देनोक्तं तदेवांतोऽवसानो यस्य तद्धलांतं ब्रह्मवर्चसं ब्राह्मणत्वमित्यर्थ इति । 'ऊर्ध्ववस्त्रादधोवस्त्राद्धूमपानात्तथैव च ॥ षड्भिर्विप्राः प्रणश्यंति हालाहलहलाहलैः" इति वात्स्योक्तेरिति भावः । ऊर्ध्ववस्त्रं यच्छिरोदेशेन धार्यते । तत् अधोवस्त्रं यत्पादद्वारा धार्यते । तत् धूमपानं गुडादिमिश्रितताम्रकूटौषधिपत्रवटिकोतोरीत्यादियंत्रोत्थधूमस्य मुखद्वारोदरे प्रवेशनम् । हाला मद्यं हलं लांगलम् । हलाहलं तु स्थावरविषविशेषो यद्भक्षणेन झीटत्येव शरीराननुसंधानपूर्वकं प्राणवियोगः स्यात्तदित्यर्थः । एतैर्विप्राः प्रणश्यंति ब्राह्मणत्वच्युताः संतः श्रौतस्मार्तकर्मानधिकारिणो दानायोग्याश्च संतीत्यर्थः ॥ २४ ॥ अदभ्रकरुणो दयासमुद्रः । विजृंभयन्नुन्मीलयन् प्रकाशयन्निति यावत् । विश्वविजयाय सृष्ट्यादिषु पराभवाभावाय । माध्व्या विश्वसृजेति निदेशमय्या अपनय तात् दूरीकरोतु । 'विषादश्चेतसो भंगः' इति हैमः ॥ २५ ॥ शारीरं शरीरसाध्यं कृच्छ्रादि । 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ति' इति रीत्याकास्मिकस्फूर्त्तिप्राततन्मंत्रोपासना समाधिश्चित्तैकाग्र्येण ध्यानं "ज्ञानोपासनयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाऽभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः ॥ विषण्णचेतसं तेन कल्पव्यातिकरांभसा ॥२७॥ लोकसंस्थानविज्ञान आत्मनः परिखिद्यत ॥ तमाहा ऽगाधया वाचा कश्मलं शमयन्निव ॥ २८ ॥ श्रीभगवानुवाच ॥ मावेदगर्भ गास्तंद्रीं सर्ग उद्यममावह ॥ तन्मयाऽऽपादितं ह्यग्रे यन्मां प्रार्थयते भवान् ॥ २९ ॥ भूयस्त्वं तप आतिष्ठ विद्यां चैवमदाश्रयाम् ॥ ताभ्यामंतर्हृदि ब्रह्मँल्लोकान्द्रक्ष्यस्यपावृतान् ॥ ३० ॥ तत आत्मनि लोके च भक्तियुक्तः समाहितः ॥ द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः ॥ ३१॥ यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितम् ॥ प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलम् ॥ ३२ ॥

तपः शारीरं विद्या उपासना समाधिरैकाग्र्यं तैर्निशाम्य दृष्ट्वा यथाशक्ति स्तुत्वा श्रांतवद्विरराम ॥ २६ ॥ आत्मनो लोकसंस्थानविज्ञाने परिखिद्यतो ब्रह्मणोभिप्रेतमालक्ष्य तमाहेति द्वयोरन्वयः । तेन प्रलयोदकेन विषण्णचेतसम् ॥ २७ ॥ कश्मलं मोहम् । वेति समस्तमोहशमनं दर्शयति ॥ २८ ॥ हे वेदगर्भ तंद्रीं विषादकृतमालस्यं मा गाः । तेनैव मे दशमनुस्पृशतादित्यादि यत्प्रार्थयते तदग्रे पूर्वमेव संपादितम् ॥ २९ ॥ तर्हि कथमहं न जानामीत्यत आह । भूय इति ॥ ३० ॥ भक्तियुक्तः समाहितश्च सन्नात्मनि स्वस्मिंल्लोके च मां ततं व्याप्य स्थितं द्रष्टाऽसि द्रक्ष्यसि आत्मनो जीवांश्च॥ ३१ ॥सर्वत्र मद्दर्शने मोहो निर्वतत इत्याह । यदा त्विति । प्रतिचक्षीत पश्येत॥ ३२॥

विद्या सरस्वत्यां धियि गिरि" इति कोशात् ॥ २६ ॥ अथ ब्रह्मस्तुतिश्रवणानंतरम् । कल्पस्य व्यतिकरो ध्वंसो यत्र स कल्पव्यतिकरः प्रलयः । "अथ व्यातिकरः :पुंसि व्यसनव्यातिसंगयोः" इति मेदिनी । व्यसनं चेह ध्वंसः । यद्वा । 'संवर्त्तः प्रलयः कल्पः' इत्यमरः । तत्र व्यातिकर आगंतुकजलसंयोगस्तेन लोकानां देवतिर्यगादीनां संस्थानं समुचितस्वभावतया निर्माणं स्थावरादिपारिपाटी तद्विज्ञाने । इवात्र निश्चये तेन सर्वाज्ञानोपशमनं दार्शितम् ॥ २७ ॥ २८ ॥ यद्वा । तंद्रीमज्ञानं वेदगर्भेति सर्वज्ञस्य तवाज्ञानं नोचितमिति भावः । ननु सृष्टौ स्वसामर्थ्ये संशयितोस्मीति चेत्तत्राह—सर्ग इति । उद्यमो निष्फलो भविष्यतीति मा शंकिष्ठा इत्याह—तन्मयेति । पूर्वमेव तपेतिद्व्यक्षरद्विरावृत्त्या कथनेन संपादितम् । तत्प्रार्थनमपि न स्वाधीनं किं तु मत्प्रेरणयैवेतीममर्थं हिना सूचयति ॥ २९ ॥ अत्राक्षिपति तर्हीति । नन्वेतत्कालीनोद्यमेन किं स्याद्ये मया भूरादयो लोकाः सृज्यास्ते एव न दृश्यंत इति चेदाह—भूय इति । तपः प्राणायामादीति संदर्भः । चित्तैकाग्र्यमिति चक्रवर्त्ती आलोचनमिति तीर्थः । विद्यां निष्ठां भक्तिलक्षणाम् । "तप आलोचनं प्रोक्तं विद्या निष्ठा प्रकीर्त्तिता" इति तदुक्तेः । ततः किमत्राह—ताभ्यामिति । अंतर्हृदि हृदय एव बहिष्ठानपि लोकान्भूरादीन् तत्रस्थांश्च मनुष्यादीन् अपावृतान् जलावरणशून्यानेव द्रक्ष्यति । ततश्च मयैव यथास्थिततया दर्शयिष्यमाणांस्तान्स्वहृदय एव दृष्ट्वा आदर्शदर्शी लेखक इव सुखेनैव बहिः स्थितान्द्रक्ष्यतीति भावः ॥ ३० ॥ सृष्ट्यावेशवशात्वेपि त्वामहं न विस्मरेयमिति यत्प्रार्थितं तत्राह—तत इति । सृष्टिसमयेपि भक्तियुक्तः समाहितश्च आत्मनि स्वमनसि बहिर्लोके च मां द्रष्टासि तथा मयि लोकान्भूरादीन् आत्मनो जीवांश्च मृद्भक्षणदशायां यशोदेव द्रष्टासि । यद्वा । कृष्णावतारे वत्सवत्सपाद्याकारैर्व्यापकं मां मयि लोकान् ब्रह्मांडानि आत्मनश्चतुर्भुजमूर्त्तीः यद्वाऽऽत्मनः स्वान्बहून्परमेष्ठिनो द्रक्ष्यसीत्यर्थः ॥ ३१ ॥ कर्मशमलं च यथा विजह्यामिति यत्प्रार्थितं तत्खल्वेतादृश्यां दशायां संभवेदित्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा रहितमात्मानं भूतेंद्रियगुणाशयैः ॥ स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति ॥ ३३ ॥ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्माऽवसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ॥ ३४ ॥ ऋषिमाद्यं न बध्नाति पापीयास्त्वां रजोगुणः ॥ यन्मनो मयि निर्बद्धं प्रजाः संसृजतोऽपि ते ॥ ३५ ॥ ज्ञातोऽहं भवता त्वद्य दुर्विज्ञेयोऽपि देहिनाम् ॥ यन्मां त्वं मन्यसेऽयुक्तं भूतेंद्रियगुणात्मभिः ॥ ३६ ॥ तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितोऽबहिः ॥ नालेन सलिले मूलं पुष्करस्य विचिन्वतः ॥ ३७ ॥ यच्चकर्थाऽग मत्स्तोत्रं मत्कथाऽभ्युदयांकितम् ॥ यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥ ३८ ॥

तदा च मिथ्याज्ञाननिवृत्तौ मुच्यत इत्याह । यदेति । भूतादिभिर्विरहितमात्मानं जीवं शुद्धत्वंपदार्थस्वरूपेण स्वस्यात्मभूतेन मया तत्पदार्थेनोपेतमेकीभूतं पश्यन्भवति तदा स्वाराज्यं मोक्षं प्राप्नोति ॥ ३३ ॥ यतो वर्षीयान् वृद्धतरः अत्यधिकोऽस्तीत्यर्थः ॥ ३४ ॥ अनुग्रहमेवाह । ऋषिमिति चतुर्भिः । यद्यतस्ते मनो मयि निर्बद्धम् ॥ ३५ ॥ यद्यस्माद्भूतैरिंद्रियैर्गुणैः सत्त्वादिभिरात्मनाऽहंकारेण चायुक्तं मन्यसे ॥ ३६ ॥ तुभ्यं तव नालेन मार्गेण पुष्करस्य मूलमधिष्ठानं सलिले विचिन्वता मयि विचिकित्सायां भवितव्यमस्याश्रयेण न च दृश्यते ततोऽस्ति नास्तीति संदेहे सत्यात्मा स्वरूपं मे मयाऽबहिरंतर्हृदि दर्शितः ॥ ३७ ॥ अंग हे ब्रह्मन् चकर्थ कृतवा

यदेति ॥ ३२ ॥ कस्यां दशायां त्वां प्राप्नुयादित्यपेक्षायामाह—यदात्मानं स्वं भूतादिभी रहितं स्वरूपेण न तु स्वीयं जीवात्मत्वं परित्यज्येत्यर्थः । मया सेव्येन परमेश्वरेण सह उप समीप एव इतं सेवार्थं प्राप्तं पश्यन्भवति तदा स्वेन स्वीयेन प्रभुणा सह राजत इति स्वराट् दासस्तस्य भावः कर्म वा दास्यमृच्छति प्राप्नोति । केचित्तु निर्विशेषसविशेषस्वरूपयोरेव स्तुतौ प्रक्रांतत्वात्तदुपासकानां ज्ञानिनां भक्तानां च तंत्रेणैव चरमदशा व्यंजकतया पद्यमिदं व्याचक्षते ज्ञानिपक्षस्तु स्वामिचरणैरेव व्याख्यातः । द्वितीयमाह—भक्तः शांतादिपञ्चविधोपि स्वरूपेण शांतश्चिद्रूपत्वेन । दास्ये दास्यरूपत्वेन सख्ये सख्येनैव । पित्रादिर्वात्सल्येन । प्रिया प्रेम्णैव उपेतं युक्तमात्मानं स्वं तथा मयापि पञ्चविधभावविषयेण सह साक्षात्परब्रह्मणा प्रभुणा । सख्या पुत्रादिना कांतेन चोपेतमिति यथायथमेवार्थः । स्वाराज्यं स्वेन चिद्घनाकारेण स्वीयेन प्रभुणा सख्या पुत्रादिना कांतेन च सह राजत इति तस्य भावमृच्छति प्राप्नोति ॥ ३३ ॥ इत्यर्थ इति । अतिशयार्थे वृद्धशब्दस्य वर्षादेशत्वेनायमर्थोस्तीति भावः । अस्मिन्सिसृक्षासमयेपि ते आत्मा चित्तं यन्नावसीदति मोहं न प्राप्नोति स एव वर्षीयान्मदनुग्रह इत्यन्वयः । विश्वनाथस्तु तदेवं ज्ञानभक्तिरसत्वमुपदिश्य त्वयि ममानुग्रहो न केवलमद्यतन एव अपि तु सार्वकालिक एवेत्याह—नानेति ॥ ३४ ॥ त्वं रजोगुणात्माभैषीरिति सांत्वयन्नाह—ऋषिमिति । द्वितीयस्कंधेपि "एतन्मतं समातिष्ठ परमेण समाधिना । भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित्" इति । अतो "न भारती मेंग मृषोपलक्ष्यते" इत्यादिकमपि स्वयमुक्तम् । यत्तत्तस्यान्यावेशः क्वचिच्छ्रूयते स खलु न स्थिरः स्यादिति तदाभास एव ज्ञेयः । यत्तु दशमस्कंधेस्य मोहः श्रूयते स तु न रजसा किन्तु भगवदैश्वर्यविशेषदर्शनेन तद्विशेषदर्शनेच्छया च 'अंभोजन्मजनिः' इत्यादेस्तत्रैव श्रवणात् । एवमेकादशे च हंसस्वरूपेण सनकादिषु ज्ञानकथनात्स्वमाहिमप्रकाशनायैव ब्रह्मज्ञानावरणं ज्ञेयम् ॥ ३५ ॥ यद्यस्मात् मां साकारमपि भूतादिभिरयुक्तं भूतादिभ्यः पृथग्भूतं तत्साक्षिणमित्यर्थः । "रूपं यदेतदवबोधरसोदयेन" इत्यादि ब्रुवाणस्त्वं मन्यसे तस्मान्ममायमाकारो न भूतानि पृथिव्यादीनि नापींद्रियाणि तैजसानि नापि गुणमाया नाप्यात्मा जीवः किन्तु साक्षाद्ब्रह्मैव त्वं जानासीत्यर्थः । तेन मद्रूपस्य सच्चिदानंदत्वमायात्वयोर्मननमेव मज्ज्ञानाज्ञानयोर्लिंगमिति भगवदभिप्रायोवगाह्यः ॥ ३६ ॥ यतो मद्रूपस्य मदिच्छयैवातर्क्ययादृश्यत्वं न तु वस्तुतो नेत्रादींद्रियग्राह्यत्वमित्यत्र त्वमेव प्रमाणमित्याह—तुभ्यं त्वां कृतार्थी कर्त्तुं आत्मा श्रीविग्रहः । यद्वा बहिरपि दर्शितं "गोपवेशो मे पुरस्तादाविर्बभूव" इति श्रुतेः आत्मदर्शनस्य देयत्वात्क्रियाग्रहणमपि कर्त्तव्यमिति संप्रदाने वा चतुर्थी।अत्र तपसः समावेशानुल्लेखात्तावपि वस्तुतो दर्शनस्य न हेतू किंतु मदिच्छैवेति रहस्यं सिद्धांतमपि ब्रह्माणं ज्ञापयामासेति ज्ञेयम्॥३७॥अत स्तव मत्स्तवादयोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रीतोऽहमस्तु भद्रं ते लोकानां विजयेऽच्छया ॥ यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् ॥ ३९ ॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत्॥ तस्याऽऽशु संप्रसीदेयं सर्वकामवरेश्वरः ॥ ४० ॥ पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना ॥ राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥ ४१ ॥ अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि ॥ अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ॥४२॥ सर्ववेदमयेनेदमात्मनाऽऽत्मात्मयोनिना ॥ प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ॥ ४३ ॥

नसि मत्कथैवाभ्युदयस्तेनांकितं स एष बंधाभावो मयि मनोनिर्बंधो मज्ज्ञानं मद्रूपस्य हृदि दर्शनं मत्स्तुतिस्तपोनिष्ठा चेति यदेष सर्वोऽपि मदनुग्रहः ॥ ३८ ॥ गुणमयत्वेन प्रतीयमानमपि निर्गुणमेवानुवर्णयन् ॥ ३९ ॥ तव प्रीत इति किं वक्तव्यमित्याह । य इति ॥ ४० ॥ न च मत्प्रीतेरप्यधिकं किंचिदस्तीत्याह । पूर्तादिभी राद्धं सिद्धं यन्निःश्रेयसं फलं तन्मत्प्रीतिरेवेति तत्त्वविदां मतम् ॥ ४१ ॥ अत्र हेतुमाह । अहमिति । आत्मनामहंकारोपाधीनां जीवानामात्मा अतः प्रेयसामतिप्रियाणामपि मध्ये प्रेष्ठः प्रियतमः सन्निरवद्यः । यत्कृते यदर्थम् ॥ ४२ ॥ अतस्त्वं कृतार्थ एव तथाऽपि मत्प्रियार्थं सृष्टिं कुर्वित्याह । सर्वेति । आत्मा

पि मंदनुग्रहेणैवाभूवन्निति यच्चेति ॥ ३८ ॥ किञ्च मत्कृपोत्थयैव भक्त्या पुनरहं प्रीणामीत्यद्भुतां मत्पारिपाटीं पश्येत्याह—प्रीत इति । मत्सृज्यमाना लोका जयवंतः संत्वितीच्छया गणमयं कल्याणगुणसमुद्रं साकारं मां निर्गुणं प्राकृतसत्त्वादिगुणरहितं प्रीतोहमतस्तेषां भद्रमस्तु ये तु गुणमयं मां श्रीनारायणं सत्त्वादिगुणत्वेनैव स्तुवंति न तु निर्गुणत्वेन तेषु न तु प्रीतोस्मीति न तेषां भद्रमस्तीति भावः ॥ ३९ ॥ तस्य नित्यं स्तुवतः ॥ ४० ॥ न च मत्प्रीतेरभ्यधिकं किञ्चिदस्तीत्याह—पूर्तेति । मत्प्रीतिं विना राद्धं निःश्रेयसमनिःश्रेयसमेवेति हेतोर्मत्प्रीत्यर्थमेव ते पूर्त्तादिकं कुर्वंतीति भावः । ते मां प्रीणंतं कर्तुमिच्छंति न तु मां स्वप्रीतेर्विषयं चिकीर्षंति अतस्तया सात्त्विक्या भक्त्या तान्प्रत्यहं प्रीतस्तेभ्यो मोक्षं ददामीति भावः ॥ ४१ ॥ निर्गुणभक्तिमतां तु प्रीतेरहं विषय इति व्यंजयन्सर्वेषां वस्तुतः प्रीतेरहमेव विषयी भवितुं योग्य इत्यतः स्वस्मिन्प्रीतिं विधत्ते अहमिति । आत्मनां जीवानामहमात्मा परमात्मा यत्कृते देहादिः प्रिय इति कलत्रपुत्रादिषु प्रीतिर्देहसंबंधेन देहे प्रीतिर्जीवात्मसंबंधेन जीवात्मनि प्रीतिस्तु परमात्मसंबंधेन परमात्मनि प्रीतिः स्वाभाविकी जीवात्मादिषु त्वौपचारिकीति तेषु क्रमेण प्रियत्वह्रासः । ननु मयि रतिं कुर्यादित्यस्य वाक्यस्य कथंविधित्वं रतेः प्राप्तत्वादेव तदुक्तं 'विधिरत्यंतमप्राप्तौ' इति अत्रोच्यते मायायाः खल्वधिकारो जीवात्मपर्यंत: एव न तु ततोपि परत्र परमात्मनीति मायाबंधपतितानां मनुष्यादीनां मायिकेष्वेव वस्तुष्वनुभवोस्ति जीवस्याप्यारोपितं मायिकत्वमस्तीति तत्रापि परमात्मनि स्वाभाविक्याः प्रीतेर्वर्त्तमानत्वेप्यनुभवाभावादज्ञातस्वबहुवित्तस्य वणिजो दारिद्र्यमिव प्रीत्यभाव इति प्रीतिर्विधत्ते शास्त्रमिति । किञ्च वस्तुतः प्रेष्ठोपि परमात्मा ज्ञानिभिस्साक्षादनुभूतोपि रत्या विना प्रेमास्पदं न भवत्यतो भक्तानामेव स प्रेष्ठो भवति न तु ज्ञानिनां यथा शीताद्यार्त्तिहरे चक्षुःप्रकाशसुखदेपि सूर्ये साक्षादनुभूतेपि कोपि यन्नानुरज्यति तत्र ममत्वाभाव एव हेतुः सूर्यश्च तत्तत्सुखप्रदोपि तेषूदास्त एव एवं ज्ञानिजनाः खल्वज्ञानतमोहंतारि स्वानुभवसुखप्रदेपि ब्रह्मणि ममत्वाभावान्नानुरज्यंति । ब्रह्मापि स्वन्निर्विशेषमेवानुभावयंस्तेषूदास्त एव यदा च सूर्यभक्तो जनश्चक्षुष्मानंधो वा भक्त्या संभावितं सूर्यमिहैव करचरणादिमंतं सहाश्वरथसारथ्यादिकं पश्यति तं स प्रेमवशं करोति । तथैव मुक्तो बद्धो वा जीवो भक्त्यैव परमात्मानं सविशेषमनुभवस्तत्रानुरज्यति तं च स प्रेमवशं करोतीत्यतः परमात्मनः सर्वतः प्रेष्ठत्वं भक्तानां केवलया प्रधानीभूतया वा भक्त्यैव न तु ज्ञानिनां गुणीभूतया भक्त्येत्यत उक्तं स्वयं परमात्मनैव 'अतो मयि रतिं कुर्यात्' इति विवेचनीयम् । यद्वा । उक्तयुक्तेरेव हेतोर्मयि रतिं कुर्यात् । यस्या रतेः कृते देहादावप्रीतिमतोपि विवेकिनो देहादिः प्रियो भवति देहेंद्रियादिभिरेव परिचर्याकीर्त्तनादिभिर्भक्तिसिद्धिरिति नैव ते मोक्षाकांक्षिणः स्युरिति भावः । स्वामिचरणोक्तं व्याख्यास्यामः । अत्र तत्त्वविन्मते अतो जीवानामात्मत्वात् निरवद्यो निरुपाधिप्रेमास्पदम् । त्वं तु मत्कृपाकटाक्षेण सर्वधारणसमर्थोसीत्याह—धातरिति ॥ ४२ ॥ यतस्त्वं मयि प्रेमवानतो हेतोः तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः ॥ व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे ॥ ४४ ॥ इति श्रीभा०म०तृ०भगवद्ब्रह्मसंवादे भगवदंतर्धानवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ विदुर उवाच ॥ अंतर्हिते भगवति ब्रह्मा लोकपि तामहः ॥ प्रजाः ससर्ज कतिधा दैहिकीर्मानसी र्विभुः ॥ १ ॥ ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम ॥ तान्वदस्वाऽऽनुपूर्व्येण छिंधि नः सर्वसंशयान् ॥ २ ॥ सूत उवाच ॥ एवं संचोदि तस्तेन क्षत्रा कौषारवो मुनिः ॥ प्रीतः प्रत्याह तान्प्रश्नान् हृदिस्थानथ भार्गव ॥३॥ मैत्रेय उवाच ॥ विरिंचोऽपि तथा चक्रे दिव्यं वर्षशतंतपः ॥ आत्मन्यात्मानमावेश्य यदाऽऽह भगवानजः ॥ ४ ॥ तद्विलोक्याऽब्जसंभूतो वायुना यद धिष्ठितः ॥ पद्ममंभश्च तत्कालकृतवीर्येण कंपितम्॥५॥ तपसा ह्येधमानेन विद्यया चात्मसंस्थया ॥ विवृद्धविज्ञानबलो न्यपाद्वायुं सहांभसा ॥ ६ ॥ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितम् ॥ अनेन लोकान्प्राग्लीनान्कल्पिताऽस्मीत्यचिंतयत् ॥ ७ ॥

त्वमिदं त्रैलोक्यं या मय्यनुशेरते ताः प्रजाश्च सृज । केनात्मनैवान्यनिरपेक्षेण तत्र ज्ञापकापेक्षाऽभावमाह । सर्ववेदमयेनेति । आत्माहं योनिः कारणं यस्येति ज्ञानक्रिया शक्त्यतिशयं सूचयति । यथापूर्वमिति । तवात्राभ्यासोऽप्यस्तीत्युक्तम् । मय्यनुशेरत इति स्थितानामभिव्यक्तिमात्रमेव कर्तव्यमित्यनायासत्वमुक्तम् ॥ ४३ ॥ इदं सृज्यं व्यज्य प्रकाश्य पद्मनाभः श्रीनारायणरूपेण तिरोदधेऽदृश्योऽभवत् ॥ ४४ ॥ इति तृ० टी० नवमोऽध्यायः ॥९॥ दशमे कालसंप्रश्नं प्रतिवक्तुं तदुद्भवः ॥ प्राकृतादिविभा गेन सर्गस्तु दशधोच्यते ॥ १॥ १ ॥ मे मया वदस्व वद भासयस्वेति वा ॥ २॥ संचोदितः प्रार्थितः । हृदिस्थानेवाह । न तु ते प्रश्नास्ते न विस्मृता इत्यर्थः ॥ ३ ॥ आत्मनि श्रीनारायणे आत्मानं मन आवेश्य॥४॥ अब्जसंभूतो ब्रह्मा यदधिष्ठाय स्थितः कर्तरि क्तः तत्पद्ममंभश्च विलोक्य । कथंभूतं पद्ममंभश्च तेन प्रलयकालेन कृतं वीर्यं यस्य तेन वायुना कंपितं न्यपादित्युत्तरेणान्वयः॥५॥विवृद्धं विज्ञानं बलं च यस्य न्यपात्सर्वं पीतवान् ॥६॥ पुष्करं पद्मं प्राग्लीनाँस्त्रीँल्लोकान् कल्पिताऽस्मि स्रक्ष्यामि॥७॥

रचनाप्रकारे चक्रवर्ती तु मारीरिषीष्टेतियत्प्रार्थितं तत्राह सर्ववेदमयेनेति । त्वं तु 'वेदो नारायणः साक्षात्' इत्युक्तेर्वेदरूपात् मत्तः प्रादुर्भूतत्वाद्वेदस्वरूप एव यः पिता स सुतः साक्षात् 'स एष भगवान् द्रोणः प्रजारूपेण वर्त्तते' इत्युक्तन्यायेन तव वेदस्मरणं सर्वदैव स्थास्यति स्वरूपत्यागायोगादिति भावः ॥ ४३ ॥ अत्र ब्राह्मे कल्पे अहमेवासमेवाग्र इत्यादिचतुःश्लोकीभागवतमिव पाद्मे कल्पे यदा तु सर्वलोकेष्विति यदा रहितमिति पूर्त्तेनेति अहमात्मात्मनामिति चतुःश्लोकीभागवतमिदं भगवानुपदिदेशेति केचिदाहुः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कंधे नवमोऽध्यायः ॥ ९ ॥ तस्मात्कालादुद्भवतीति तदुद्भवः ॥ १ ॥ आर्षकल्पने गौरवादाह भासयस्वेति । "भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः" इत्यात्मनेपदम् । बहुविदोपि तज्जानंति किं वक्तव्यं बहुवित्तमो भवाञ्जानातीत्याह-बहुवित्तमेति ॥ २ ॥ सूत उवाच । एवमित्यादिका संगतिः स्वयमेव सूतेन क्रियते न श्रीशुककृतानूद्यत इति बोधयति । मैत्रेय उवाचेत्यादिकं तु श्रीशुकवाक्यानुकरणम् । श्रीशुक उवाचेति भारतेति च पाठौ न सर्वसंमतौ इत्यर्थ इति मुनित्वादेव सर्वपदार्थज्ञानं सर्वदा तिष्ठत्यृषिष्विति भावः । भार्गवेति ज्ञाने सामर्थ्यमाह ॥ ३ ॥ 'भूयस्त्वं तप आतिष्ठ' इति यथा नारायणेनोक्तं तथेत्यर्थः । क्वचिद्यदाहेति पाठः । तत्रापि यद्यथेत्यर्थः । यद्वा । तथेत्युक्तेर्यथेति बोध्यं यत्तपोऽजो नारायण आहेति ॥४॥ यत्पद्मम् ॥५ ॥ आत्मसंस्थया चित्तगतयां विद्ययोपासनया यावत्प्रमाणं प्रलयेंभो वायुश्चावर्द्धत तावन्न्यपादित्यर्थः ॥६॥ स्वेनाधिष्ठितं यद्वियद्व्यापि व्योमवन्महत्परिमाणं पद्मं तद्विलोक्येति योज्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मकोशं तदाऽऽविश्य भगवत्कर्मचोदितः ॥ एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ॥ ८ ॥ एतावाञ्जीवलोकस्य संस्थाभेदः समाहृतः ॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ ॥ ९ ॥ विदुर उवाच ॥ यदाऽऽत्थ बहुरूपस्य हरेरद्भुतकर्मणः ॥ कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय नः प्रभो ॥ १० ॥ मैत्रेय उवाच ॥ गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः ॥ पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत् ॥ ११ ॥

भगवता स्वयं करणीये कर्मणि चोदितो नियुक्तः संस्तदा पद्मकोशं प्रविश्य तमेकमेव त्रिधा लोकत्रयरूपेण व्यभांक्षीद्विभाज एकेन कमलमुकुलेन कथं लोकत्रय सृष्टिरित्यसंभावनां वारयितुं तस्य विशालतामाह। द्विसप्तधा चतुर्दशलोकरूपेण उरुधा ततोऽपि बहुप्रकारेण भाव्यं भावयितुं योग्यमतो न तेन त्रिलोकीकरणं चित्रमित्यर्थः । ॥ ८ ॥ त्रिलोकीरूपेणैव विभागे हेतुमाह । एतावांस्त्रिलोकीरूपो जीवलोकस्य जीवानां भोगस्थानस्य प्रत्यहं सृज्यस्य संस्थाभेदो रचनाविशेष उक्तः । ननु परमेष्ठिनोऽपि जीवत्वाविशेषाद्ब्रह्मलोकस्यापि किमिति प्रत्यहं सृष्टिर्न भवति तत्राह । हि यस्मादनिमित्तस्य निष्कामस्य धर्मस्य विपाकः फलरूपोऽसौ उपलक्षणमेतत् सत्यलोकस्य महत्प्रभृतिलोकानां तद्वासिनां च त्रैलोक्यस्य काम्यकर्मफलत्वात्प्रतिकल्पमुत्पत्तिविनाशौ भवतः । महःप्रभृतीनामुपासनासमुचितनिष्कामधर्मफलत्वाद्विपरार्धपर्यंतं न नाशः तत्रस्थानां च ततःपरं प्रायेण मुक्तिरिति भावः ॥ ९॥ कालभेदेन लोकसृष्टिभेदं श्रुत्वा तमेव कालं जिज्ञासुः पृच्छति । यत्कालाख्यं लक्षणं स्वरूपमात्थ अब्रवीः कथं कालः कल्पते किं वा तस्य सूक्ष्मं स्थूलं च रूपमिति यथावद्वर्णयेत्यर्थः ॥ १० ॥ तत्र सामान्यतः कालस्य स्वरूपमत्रोच्यते उत्तराध्याये तु विशेषतः गुणानां व्यतिकरो महदादिपरिणामस्तेनैवाक्रियते यः स काल इति शेषः । वक्ष्यते चैकादशे । "गुणव्यतिकरः कालः स्वभावः सूत्रमेव च" इति । स्वतस्तु निर्विशेषः अप्रतिष्ठितः क्वाप्यपर्यवसितः आद्यंतशून्य इत्यर्थः । एतदेव दर्शयितुमीश्वरः सृष्ट्यादि तेन निमित्तभूतेन करोतीत्याह । पुरुष इति उपादीयते निमित्ततया स्वीक्रियत इत्युपादानम् । स काल उपादानं निमित्तं यस्मिंस्तमात्मानमेव विश्वरूपेणासृजत् । स्वव्यतिरेकेण सृज्यस्याभावात् एतच्च वस्तुकथनमात्रम् । कालेन निमित्तेन चासृजदित्येतावदेव विवक्षितम् ॥ ११ ॥

प्रजाः सृजेति हरिणोपदिष्टो ब्रह्मा वाय्वादिपानरूपे संहारे कथं प्रवृत्त इति चेत्तत्र सर्वविरोधित्वात्तत्पानं कृतं सर्वविरोधित्वं च सर्वदेशव्यापकत्वेन प्रजासर्गार्थस्थानानिरोधादेवावसेयमिति ॥ ७ ॥ कर्मणि प्रजासृष्टिलक्षणे ततोपि चतुर्दशलोकतोपि बहुप्रकारेण सूर्यचंद्रादिलोकरचनारूपेण यतो भगवदिच्छया बहुधा भवनयोग्यमतो हेतोः इत्यर्थ इति । अनंतसरिदधिकरणार्णवतो यथा बहुधा कुल्याकल्पनं नानर्हं तथा तस्य पद्मस्याप्युरुधाभवनयोग्ये त्रिलोकीकरणं नाद्भुतमिति भावः ॥ ८ ॥ ब्रह्मणो जीवत्वसंभावनयाक्षिपति नन्विति । धर्मस्य तपोविद्यादेः विपाकः परकाष्ठाप्राप्तो मूर्त्तः परिणामः तपोबलेन न किमप्यशक्यं भवतीति भावः । इति भाव इति । प्रायेणेत्युक्तेर्निर्गुणनिष्ठानामेवेति बोध्यम् । भेददर्शिनां तु पुनर्जन्मादि श्रूयते "आद्यः स्थिरचराणां यो वेदगर्भः सहार्षिभिः ॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम् ॥ स संसृत्य पुनः काले कालेनेश्वरमूर्त्तिना । जाते गुणव्यतिकरे यथापूर्वं प्रजायते" इति श्रीकपिलोक्तेः असावित्यनेन ब्रह्मांतरव्यवच्छेदः ॥ ९ ॥ कालभेदेन ब्राह्मपाद्मादिकल्परूपकालभेदेन इत्यर्थ इति । कालस्यारूपित्वेन तत्सौक्ष्म्यस्थौल्यादि ज्ञातुमशक्यमतस्तत्स्वरूपं वर्णयेति भावः । प्रभो इति । योगित्वान्मैत्रेयस्य कालस्वरूपवर्णनसामर्थ्यं द्योतयतीति हे सर्ववर्णनसमर्थेत्यर्थः ॥ १० ॥ तत्राधुना अत्रास्मिन्नध्याये उत्तरत्राग्रिमे । स्वतः स्वभावतो निजरूपेण निर्गतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ॥ ईश्वरेण परिच्छिन्नं कालेनाऽव्यक्तमूर्तिना ॥ १२ ॥ यथेदानीं तथाऽग्रे च पश्चादप्येतदीदृशम् ॥ सर्गो नवविधस्तस्य प्राकृतो वैकृतस्तु यः ॥ १३ ॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः ॥ आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ॥ १४ ॥ द्विती यस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥ भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ॥ १५ ॥ चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्मकः ॥ वैकारिको देवसर्गः पंचमो यन्मयं मनः ॥ १६ ॥ षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभो ॥ षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ॥ १७ ॥

स्वव्यतिरिक्तस्य सृज्याभावं दर्शयन् कालस्य सृष्टिनिमित्ततां दर्शयति । विश्वमिति । विष्णुमायया संस्थितं संहृतं ब्रह्म तन्मात्रं सद्विश्वं ईश्वरेण कर्त्रा कालेन निमित्तेन परिच्छिन्नं पृथक् प्रकाशितम् । अव्यक्ता मूर्तिः स्वरूपं यस्येति स्वतो निर्विशेषता दर्शिता ॥ १२ ॥ अप्रतिष्ठितत्वं दर्शयितुं तत्कार्यविश्वप्रवाहस्याप्रतिष्ठामाह । यथेदानीमस्ति तथाऽग्रे पूर्वमप्यासीत्पश्चादपि भविष्यति । एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन्तन्निमित्तस्य सर्गस्य पूर्वोक्तानेव भेदाननुवदति सर्ग इति । यस्तु प्राकृतो वैकृतश्च स दशमः ॥ १३ ॥ तन्निमित्तमेव त्रिविधं प्रलयमाह । कालेनैव केवलेन नित्यः प्रलयः । द्रव्येण संकर्षणाग्न्यादिना नैमित्तिकः । गुणैः स्वस्वकार्यं ग्रसद्भिः प्राकृतिकः तानेव सर्गान् प्रपंचयति आद्य इत्यादिना यावदध्यायसमाप्ति । महतो लक्षणमात्मनो हरेः सकाशाद्गुणानां वैषम्यमिति ॥ १४ ॥ अहमोऽहं कारस्य तस्य लक्षणम् । यत्रेति । द्रव्यादयो वक्ष्यमाणास्त्रयः सर्गाः तृतीयस्तन्मात्रो भूतसर्गः भूतसूक्ष्मसर्गः इत्यर्थः । द्रव्यशक्तिमान्महाभूतोत्पादकः ॥ १५ ॥ ज्ञानकर्मेंद्रियात्मकश्च तुर्थः । पंचमो वैकारिकः इंद्रियाधिष्ठातारो देवा मनश्च ॥ १६ ॥ षष्ठस्तु तमसः पंचपर्वाऽविद्यायाः अबुद्धिर्जीवानामावरणं विक्षेपश्च तां करोतीत्यबुद्धिकृत्तस्य मे मत्तः शृणु ॥ १७ ॥

विशेषो भेदो यस्मात्स तथा । उपाधिकृतभेदं विना काले भेदो नास्ति भूतादिव्यवहारस्तत्रौपाधिक एव पर्वतादिवत्तथाहि यथा इमे पर्वता दाशरथिकाले तस्थुः कल्किकाले स्थास्यंतीदानींतनराजकाले तिष्ठंतीत्यत्र यथा पर्वतेषु भूतत्वादिकं नास्ति तथा कालेपीति भावः । न पर्यवसितिरवसानं यस्य सोऽपर्यवसितः । इत्यर्थ इति । नहि कालस्य कश्चिदुत्पादको नाशकश्चेति भावः । एतदेव आद्यंतशून्यत्वमेव यद्वात्मानमात्मशक्तिकार्यत्वादात्मशब्दवाच्यं विश्वमसृजदित्यर्थः । एतच्च आत्मनो विश्वरूपत्वेन संपादनं यत् तत् वस्तुनो विश्वस्वरूपस्य कथनमात्रं न तु पृष्टोत्तरत्वेन विवक्षितम् । तत्तु कालेनेत्यादिमात्रमेवेति ध्येयम् ॥ ११ ॥ व्यक्तस्येव घटादेर्विशेषो दृश्यते लोके न त्वव्यक्तस्य कालादेरुपाधिं विनेत्यर्थः ॥ १२ ॥ तत्कार्यं कालकार्यम् । तन्निमित्तस्य कालनिमित्तकस्य पूर्वोक्तान्पंचमाध्यायोक्तान् महदादिसर्गान् । दशम इति शेषः । प्राकृतवैकृतोभयात्मकः कौमार इत्यर्थः ॥ १३ ॥ तन्निमित्तं कालनिमित्तकमेव । आदिना वृष्ट्यभावादिग्रहः ॥ १४ ॥ इत्यर्थ इति द्रव्यशक्तिमानित्यग्रिमोक्तेरिति भावः । तेषां भूतानां मात्राः सूक्ष्मावस्था यस्मिन्स तन्मात्रः । तु शब्दः पादपूरणे । 'तुहिचस्महवैपादपूरणे' इत्यमरः ॥ १५ ॥ चतुर्थस्तैजसाहंकारकार्य इत्यर्थः वैकारिकः सात्त्विकाहंकारकार्यः । देवानामिन्द्रियाधिष्ठातॄणां सर्गः । यन्मयं सात्त्विकाहंकारकार्यरूपं मनोपि पंचमसर्गांतर्भूतमेवेत्यर्थः । एते पंच सर्गाः प्राधानिका उक्ताः ॥ १६ ॥ आविद्यकसर्गमाह–तुर्भिन्नोपक्रमे । "तमोमोहो महामोहस्तामिस्रो त्वंधसंज्ञकः । अविद्या पञ्चपर्वेयं प्रादुर्भूता महात्मनः" इति वैष्णवे । यद्वा । प्रभोः परमेश्वरस्य :। शक्तिरबुद्धिर्जीवमोहिनी याऽविद्यानाम्नी तया कृत इत्यर्थः । अविद्यावशवर्त्तित्वाभावबोधनाय संबुद्धिर्वा । राजानं विदुरं वा । मुनिक्तेति । अत्राशयमाह–प्रधानमविद्या विद्या चेति मायायास्तिस्रो वृत्तयः । तत्र प्राधान्येन महदादिपृथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजोभाजो भगवतो लीलेयं हरिमेधसः ॥ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥ १८ ॥ वनस्पत्यौषधिलतात्वक्सारा वीरुधो द्रुमाः ॥
उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशेषिणः ॥१९॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशतिधो मतः ॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः॥२०॥

अनुद्वेगेन श्रोतव्यतामाह । यद्विषया मेधा संसारं हरति तस्य हरेर्लीला यद्वा इयमिति तमआदिसर्गरूपा रजोभाज इति ब्रह्मरूपस्येत्यर्थः । अस्मिन्पक्षे अबुद्धिकृत इति प्रथमांतम् । अनवधानकृत इत्यर्थः । मुखमिव प्रथमं कृतो मुख्यः सर्गः । तस्थुषां स्थावराणाम् ॥ १८ ॥ षड्विधत्वमेवाह । ये पुष्पं विना फलंति ते वनस्पतयः ओषधयः फलपाकांताः लता आरोहणापेक्षाः त्वक्सारा वेण्वादयः लता एव काठिन्येनारोहणानपेक्षा वीरुधः ये पुष्पैः फलंति ते द्रुमाः तेषां साधारणं लक्षणमाह। ऊर्ध्वं स्रोत आहारसंचारो येषाम्। तमःप्राया अव्यक्तचैतन्याः अंतःस्पर्शाः स्पर्शमेव जानंति नान्यत् तदप्यंतरेव न बहिः। विशेषिणो व्यवस्थितपरिणामाद्यनेकभेदवंतः॥ १९॥ तिर्यक्स्रोतसां सर्गमाह । तिरश्चामिति । स चाष्टाविंशतिधः तिरश्चां लक्षणं अविदः श्वस्तनादिज्ञानशून्याः भूरितमसः आहारादिज्ञानमात्रनिष्ठाः घ्राणेनैवेष्टमर्थं जानंति हृदि

व्यंतानि तत्त्वानि सत्यान्येव सृष्टानि यैरेव समष्टिव्यष्टिरूपा जीवस्य स्थूलाः सूक्ष्माश्चोपाधयोऽभवन् । द्वितीययाऽविद्यया जीवं मोहयंत्या जीवसंबद्धमविद्याऽस्मितारागद्वेषाभिनिवेशात्मकं पंचविधं तमोऽज्ञानमसत्यमेव सृष्टम् । एवं सत्यामिथ्यात्मकं जगदिदं प्रधानाऽविद्यामेव सृष्टं तृतीयया विद्यया तु पंचविधाज्ञाननिवर्तकं ज्ञानं सृष्टं तच्चाग्रे विवृत्य व्याख्यास्यते । प्रकृतेर्मायाशक्तेः सकाशाज्जाता इमे प्राकृताः षट् । विकृतिस्समष्टिविराड् ब्रह्मा तस्माज्जातान् वक्ष्यमाणानपि ॥१७॥ ननु हरेर्लीला वर्णनीया कुतः प्रकृता संगता सृष्टिर्वर्णितेति चेदाह—लीलेयमिति इयमिति । सामान्यतः सर्गरूपा ननु न हि सात्त्विकस्य हरेरियमविद्या सर्गादिरूपा लीला नोपयुक्तेति चेदाह—यद्वेति । इत्यर्थ इति वजं उपाधिकब्रह्मणो हिरण्यगर्भस्येति भावः । अस्मिन्पक्षे ब्रह्मपक्षे इत्यर्थ इति । 'प्रमादोऽनवधानता'इत्यमरः । रजसः प्रमादजनकत्वं तु प्रसिद्धमेव तच्च श्रीदशमे स एव वक्ष्यति "अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः । अजावलेपांधतमोंधचक्षुषः" इति । अत्र पक्षे हारिमेधस इत्यस्य हरौ मेधा यस्य हारिर्मेधा यस्येति वार्थः । यद्वा । हारिरिव सूर्याग्निवन्मेधा यस्य जाज्वल्यमानबुद्धेरित्यर्थः । 'वह्निसूर्यौ हरी चंद्रः' इति कोशांतरात् । यथा प्रथमं शरीरोत्पत्तौ मुखमुत्पद्यते तद्वदित्यर्थः । यद्वा । सर्वथा स्वार्थराहित्येन परोपकारित्वान्मुख्यत्वं तच्च श्रीकृष्ण एव वक्ष्यति "अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् । सुजनस्येव येषां वै विमुखा यांति नार्थिनः"—इत्यादिना दशमे । चयः समूहः "चयः समूहे प्राकारमूलबंधे समाहृतौ" इति मेदिनी कस्मिंश्चित्कल्पे प्रलयोदशायिनो मुखतो जलबिंदुपतनादामर्दकी वृक्षोभूत्ततो ब्रह्माणमसृजद्धरिर्ब्रह्मा च देवासुरमनुष्यांस्तत एव सर्वस्थावरांश्चासृजत्ते सर्वे ब्रह्माणं पप्रच्छुः किमिदं स चाहायमादिप्ररोहः सर्वेषां नो धात्री नाम वृक्ष इति विष्णुपुराणीयफाल्गुनसितैकादशीमाहात्म्ये उक्तम् वाक्यानि तु विस्तरभियेह नोक्तानीति मुख्यत्वं स्थावरचयस्य ॥ १८ ॥ वनस्पतयोऽश्वत्थादयः । ओषधयो व्रीह्यादयः । लता नागवल्ल्यादयः त्वच्येव सारो बलं येषां ते तथा आदिना नडादिग्रहः । वीरुधः कूष्मांडादयः द्रुमा आम्रादयः तेषां षण्णामेव साधारणं सर्वगतम् । प्रायःशब्दः कल्पवृक्षादिव्यावृत्त्यर्थः । यद्वा भारते वृक्षाणामपि सर्वज्ञानमस्तीति 'तस्मात्पश्यंति पादपाः' इत्याद्युक्तेः । वायुवृक्षसंवादश्रवणाच्च प्रायःपदम् । एतच्चाज्ञानप्रचुरा इति तीर्थकृतव्याख्यापेक्षम् । स्वामिचरणैस्तु अव्यक्तचैतन्या इति व्याख्यातम् । वस्तुतश्चैतन्यं ज्ञानमेवेति नान्यत्स्पर्शेतरन्न जानंतीति भारतवाक्याविरोधादत्र स्पर्शपदं ज्ञानपरतया व्याख्येयं तथा चांतर्ज्ञाना इत्यर्थः । पारिणामादीत्यत्रादिना वृद्धिह्रासादिग्रहः ॥ १९ ॥ अष्टाविंशद्विध इह तकारेकारलोपस्त्वार्षः । क्वचिदष्टाविंशतिधा मत इत्यपि पाठः । तिरश्चां दीर्घानुसंधानशून्यत्वे प्रमाणमाह—तथा चेति । इतरेषां मनुष्येतराणां श्वस्तनमागामिदिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः ॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥ २१ ॥ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ॥ एते चैकशफाः क्षत्तः शृणु पंचनखान् पशून् ॥२२ ॥ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ ॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः॥ ॥ २३ ॥ कंकगृध्रवटश्येनभासभल्लूकबर्हिणः ॥ हंससारसचक्राह्वकाकोलूकादयः खगाः ॥ २४ ॥ अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणाम् ॥ रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः ॥ २५ ॥ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम ॥ वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥ २६ ॥ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः ॥ गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥ २७ ॥ भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः ॥ दशैते विदुराऽऽख्याताः सर्गास्ते विश्वसृक्कृताः ॥ २८ ॥

अवेदिनो दीर्घानुसंधानशून्याः । तथा च श्रुतिः । “ अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञातं वदंति न विज्ञातं पश्यंति न विदुः श्वस्तनं न लोकालोकौ” इति ॥ २० ॥ अष्टाविंशतिभेदानेवाह । गवादयः उष्ट्रांता द्विशफा द्विखुरा नव ॥ २१ ॥ खरादयः एकशफाः षट् ॥ २२ ॥ श्वादयो गोधांताः पंचनखा द्वादश एवमेते भूचराः सप्तविंशतिः । मकरादयो जलचराः ॥ २३ ॥ कंकादयः खगा अभूचरत्वेनैकीकृत्य गृहीता तदेवमष्टाविंशतिभेदा भवंति तेषु कृष्णरुरुगौरा मृगविशेषाः अन्येषा मपि तिर्यक्प्राणिनां यथायथमेतेष्वेवांतर्भावः ॥ २४ ॥ अथ आहारसंचारो यस्य सोऽर्वाक्स्रोताः ह्रस्वत्वमार्षम् । नृणां सर्गो नृणां लक्षणं रजोऽधिकं येषु ते ॥ २५॥ एते त्रयो वैकृता एव न कौमारवदुभयात्मकाः देवसर्गश्च वकृत इत्यनुषंगः । वैकारिकस्तु देवसर्गः प्राकृतेषु पूर्वमेव प्रोक्तः अयं तु ततो न्यूनत्वाद्वैकृतो देवसर्गत्वात्तदंतर्भूतश्च सनत्कुमारादीनां सर्गस्तु प्राकृतो वैकृतश्च देवत्वेन मनुष्यत्वेन च सृज्य इत्यर्थः ॥ २६ ॥ वैकृतश्च देवसर्गोऽष्टविधः तत्र विबुधादयस्त्रयो भेदाः गंधर्वाप्सरस एकः यक्षरक्षां स्येकः ॥ २७ ॥ भूतप्रेतपिशाचा एकः सिद्धचारणविद्याधरा एकः किन्नरादयः एकः आदिशब्दात्किंपुरुषाश्वमुखादयः एतद्विंशेऽध्याये स्पष्टं भविष्यति ॥ २८ ॥

कृत्यं लोकालोकौ प्रकाशांधकारी स्वर्गनरकौ वेति श्रुतिपदार्थः । यद्वा भूरितमसो बहुरुषः हृद्यं स्वप्रियं वस्तु विंदंति भोजनशयनाद्यर्थं गृह्णंतीति तथा ॥ २० ॥ अजो मेषः कृष्णरुरुगवया मृगविशेषाः अविरोर्ड्की ॥ २१ ॥ अश्वतरः खरादश्व्यां जातः । गौरोऽश्वतर्य्यामिश्वाज्जातो मृगविशेषो वा शरभः सिंहविरोधी पदाष्टकवान्वन्यो जीवः चमरी गोसदृशो दीर्घपृष्ठो बहुश्वेतरोमपुच्छो मृगविशेषः ॥ २२ ॥ वृकश्चित्रको व्याघ्रस्य पृथग्ग्रहणात् । गोधा भूखननशीला गोह इति ख्याता । कूर्मो जलचरत्वेनाष्टाविंशतिष्वंतर्भूतोपि पंचनखत्वप्रदर्शनार्थं पृथगुक्तः। मकरादय इहादिना नक्रपाठीनादिग्रहः ॥ २३ ॥ आदिना गरुडादिग्रहः । तेष्वष्टाविंशतिभेदेषु अन्येषां सर्पादीना मेतेष्वेवाष्टाविंशतिष्वेव । यथांडजत्वेन सर्पा अपि खगेष्वंतर्भवंतीति भावः । एवमन्यत्रापि बोध्यम् ॥ २४ ॥ तुशब्दादन्येपि भेदाः संति “एकपादादिभेदैश्च दशभेदाश्च मानवाः” इति गरुडोक्तेः । ते च द्वीपांतरीयमनुष्या असुराद्या वा इति ध्येयम् । रजः राजसं गृहकोशादि संपादनमधिकं येषाम् । कर्मपराः “ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्” इति गीतोक्तेः । दुःखे दुःखरूपे व्यवहारे सुखबुद्धयः ॥ २५ ॥ वैकारिकः सात्त्विकाहंकारकार्यरूपो देवसर्ग इंद्रियाधिष्ठातृदेवसर्गः । अयं तु देवसर्गस्ततः प्राकृतसर्गात् न्यूनत्वं त्वस्य प्रकृतिकार्यकार्यत्वाज्ज्ञेयम् । तदंतर्भूतः प्राकृदांतर्भूतश्च देवसर्गत्वाद्देवसर्गत्वेन तुल्यत्वात् । इत्यर्थ इति । “भगवद्ध्यानपूतेन मनसान्यांस्ततोऽसृजत्” इत्यग्रे वक्ष्यमाणत्वाद्भगवद्ध्यानजन्यत्वेन भगवज्जन्यत्वाद्ब्रह्मजन्यत्वाच्च प्राकृतो वैकृतश्चेति भावः॥२६॥२७॥ विश्वसृग्हार्ब्रह्मा च तेन कृताः प्रकटिताः ॥२८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च ॥ एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥ २९ ॥ सृजत्यऽमोघसंकल्प आत्मैवात्मानमात्मना ॥ ॥ ३० ॥ इति श्रीभा० महा० तृ० दशमोऽध्यायः ॥ १० ॥ मैत्रेय उवाच ॥ चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ॥ परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥ १ ॥ सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरंतरः ॥ २ ॥ एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥ ३ ॥

॥ २९ ॥ ३० ॥ इति श्री० भा० तृ० टी० दशमोऽध्यायः ॥ १० ॥ तत एकादशे कालपरमाण्वादिलक्षणैः ॥ युगमन्वंतरादिभ्यः कल्पमानादि वर्ण्यते ॥ १ ॥ तदेवं सामान्यतः कालस्योपलक्षणभूतं गुणव्यतिकरं दशविधं निरूप्येदानीं तस्यैव विशेषणं निरूपयितुं तत्परिच्छेद्यं वस्तु लक्षयति द्वाभ्याम् । सतः कार्यस्य विशेषाणामंशानां यश्चरमोंऽत्यो यस्यांशो नास्ति अनेकः कार्यावस्थामप्राप्तः असंयुतः समुदायावस्थां चाप्राप्तः । अत एव सदा कार्यसमुदायावस्थयोरपगमेऽप्यस्ति स परमाणुर्विज्ञेयः । किं तत्र प्रमाणमत आह यतो येभ्यः समुदितेभ्यो नृणां व्यवहर्तॄणामैक्यभ्रमोऽवयविबुद्धिः तथा च पंचमेवयविनिराकरणे वक्ष्यति । येषां समूहेन कृतो विशेष इति । कार्यानुपपत्त्या कल्प्यत इति भावः ॥ १ ॥ सूक्ष्ममुक्त्वा स्थूलमाह । सत एवेति । यस्य चरमोंऽशः परमाणुस्तस्यैव सतः कार्यमात्रस्य स्वरूपावस्थितस्य परिणामांतरमप्राप्तस्य यत्कैवल्यमैक्यं स परममहान् । पुंस्त्वं तु परमाणुप्रतियोगित्वात् । ननु नानाविशेषवान्परस्परं भिन्नश्च सर्वः पदार्थः कथमैक्यं तस्य तत्राह । अविशेषो विशेषविवक्षारहितो निरंतरो भेदविवक्षारहितश्च सर्वोऽपि प्रपंचः परममहानित्यर्थः ॥ २ ॥ यथा सूक्ष्मः स्थूलश्चायं पदार्थः एवं कालोऽप्यनुमितः चकारान्मध्यमावस्था गृह्यते संस्थानं परमाण्वाद्यवस्था तस्य

अतः दशविधसर्गवर्णनोत्तरं रजसा प्लुतो व्याप्तः कल्पादिष्विहादिना युगादिग्रहः ॥ २९ ॥ अमोघसंकल्पः संकल्पेनैव स्रष्टुं समर्थः । स्वेनैव साधनेन स्वमेव स्वयमेव स्वतंत्रो रचयति न तु कारकांतरापेक्षीत्यर्थः । "कर्त्ता कर्म च करणं स्वयमेव सदा हरिः" इति तीर्थोक्तेः ॥ ३० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे दशमोऽध्यायः ॥ १० ॥ ततः सृष्टिवर्णनानंतरं युगमन्वंतरादिभ्य इति तृतीयार्थे पंचमी युगमन्वंतरादिभिरित्यर्थः । आदिना ब्रह्मदिनादिग्रहः । मानादीत्यत्रादिना भगवत्स्वरूपादिग्रहः ॥ (१) ॥ तस्यैव कालस्यैव तत्परिच्छेद्यम् कालपरिच्छेद्यम् । अत एव कार्यावस्थासमुदायावस्थाप्राप्तत्वादेव । तत्र परिमाणौ । समुदितेभ्यः संयुतेभ्यः । कार्याणां द्वयणुकत्रसरेण्वादीनामनुपपत्त्या परमाणुं विनाऽसिद्ध्या स कल्प्यतेऽनुमीयते । इति भाव इति । द्वयणुकं सावयवं कार्यत्वात् घटवदित्यनुमाने द्वयणुकावयवः परिमाणुरेव तस्याप्यवयवित्वकल्पनेऽनवस्था स्यादतः स एव चरमोंश इति तात्पर्यम् ॥ १ ॥ परमाणुः प्रतियोगी निरूपको यस्य स परमाणुप्रतियोगी तस्य भावस्तत्त्वं तस्मात् । परमाणुमपेक्ष्यैव परममहत्त्वमस्त्यतः परमाणुरेव तत्प्रतियोगीति । अत्राक्षिपति–नन्विति । इत्यर्थ इति । नानाविशेषा यथैकस्यैव घटपदार्थस्य घटांतरापेक्षया नानाविशेषाः पटापेक्षया भेदश्च तथा सर्वप्रपंचश्च पदार्थमात्रस्यैकीकरणाद्विशेषविवक्षारहितो भवति । प्रपंचांतरस्य विलक्षणस्याभावाद्भेदविवक्षारहितो भवतीति भावः ॥ २ ॥ मध्यमावस्था स्थूलसूक्ष्मांतरालावस्था भगवच्छक्तित्वात्कालोऽपि भगवानेव शक्तिशक्तिमतोरभेदोपचारात् । कालस्य भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स कालः परमाणुर्वै यो भुंक्ते परमाणुताम् ॥ सतोऽविशेषभुग्यस्तु स कालः परमो महान् ॥ ४ ॥ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः ॥ जालार्करश्म्यवगतः खमेवानुपतन्नगात् ॥ ५ ॥ त्रसरेणुत्रिकं भुंक्ते यः कालः स त्रुटिः स्मृतः ॥ शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः॥ ॥६॥ निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः ॥ क्षणान् पंच विदुः काष्ठां लघुता दश पंच च ॥७॥ लघूनि वै समाम्नाता दश पंच च नाडिका ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम् ॥ ८ ॥

भुक्तिर्व्याप्तिस्तया भगवानिति हरेः शक्तिः स्वतो व्यक्तोव्यक्तं भुंक्ते व्याप्नोति परिच्छिनत्तीति तथा विभुरुत्पत्त्यादिषु दक्षः ॥ ३ ॥ एतदेव प्रपंचयति । स इत्यादिना । सतः प्रपंचस्य परमाणुतां परमाण्ववस्थां यो भुंक्ते स कालः परमाणुः तस्यैवाविशेषं साकल्यं यो भुंक्ते स परममहान् । अयमर्थः । ग्रहर्क्षताराचक्रस्थ इत्यादिना । यत्सूर्यपर्यटनं वक्ष्यते तत्र सूर्यो यावता परमाणुदेशमतिक्रामति तावान्कालः परमाणुः यावता च द्वादशराश्यात्मकं सर्वं भुवनकोशमतिक्रामति स परममहान् संवत्सरात्मकः कालः तस्यैवावृत्त्या युगमन्वंतरादिक्रमेण द्विपरार्धान्तत्वमिति । तथा च पंचमे सूर्यगत्यैव कालादिविभागं वक्ष्यति ॥ ४ ॥ इदानीं द्व्यणुकादिलक्षणपूर्वकं मध्यमकालावस्थां कथयति । द्वौ परमाणू अणुः स्यात् त्रयोऽणवस्त्रसरेणुः । स तु प्रत्यक्ष इत्याह । जालार्केति । गवाक्षप्रविष्टेष्वर्करश्मिष्ववगतः कोसौ योऽतिलघुत्वेन खमेवानुपतन्नगाद्गतः । पाठांतरे खमेवानुपतन्नवगतो न तु गां पृथ्वीम् ॥ ५ ॥ शतं भागास्त्रुटिरूपा यस्मिन् स वेधस्तैर्वेधैः ॥ ६ ॥ ते निमेषास्त्रयः क्षण इत्याम्नातः काष्ठाः पंचदश एकं लघु ॥ ७ ॥ नाडिकाः षट् सप्त वा प्रहरः स एव यामो दिनस्य रात्रेश्चतुर्थो भागः । ह्रासे षट् वृद्धौ सप्त संध्यांशमुहूर्तद्वयं विनेति ज्ञातव्यम् । तत्राप्यनियमार्थो वा शब्दः ।

गवच्छक्तित्वं 'कालशक्त्या नु मायायाम्' इत्यत्र काले शक्तिशब्दप्रयोगाद्बोध्यम् । स्वतः स्वरूपेण विशेषेण भातीति विभुः दक्षो निपुणः ''विभुः प्रभौ सर्वगते दक्षानंतस्वरूपयोः'' इति कोशात् ॥ ३ ॥ एतदेव कालानुमननमेव उक्तमर्थं स्फोटयति—अयमर्थ इति । भुवनकोशं भूगोलं द्वादशराशिमितार्कभोग्यकाललंध्यत्वाद्भूगोलस्यापि द्वादशराश्यात्मकत्वमुक्तम् । तस्यैव संवत्सरादिरूपकालस्यैव । पंचमे पंचमस्कंधे 'यदा चैन्द्राः प्रचलतः' इत्यादिना ॥ ४ ॥ स तु त्रसरेणुस्तु पाठांतरे ''खमेवानुपतन्न गाम्'' इति पाठे त्रसरणोः प्रत्यक्षत्वोक्त्याणुपरमाण्वोरप्रत्यक्षत्वं स्वत एवायातं प्राकृतमनुष्याणां योगिनां तु तावपि प्रत्यक्षाविति ज्ञेयम् । तथा च ''जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः । तस्य षष्ठस्तु यो भागः परमाणुः स उच्यते'' इत्युक्तेरवगतयोरप्यणुपरमाण्वोः स्वरूपं स्फोटयति तथाहि अत्राणुपरमाण्वोः सत्त्वे किं प्रमाणमिति चेत्त्रसुरेणुरेव कथम् अवयवानां स्थौल्यप्रचुरत्वे विनाऽवयवी दृश्यो न भवतीति सर्वत्र नियमः । अत्र त्रसरेणोरवयविनस्त्रयः स्थूला अणवोऽवयवाः कल्प्या न तु परमाणवस्तेषां स्थौल्याभावात् । स्थौल्यमनेकवस्तुघटितत्वमित्यणोः स्थौल्यं परमाणुं विना न संभवतीति परमाणुसिद्धिः । त्रसरेणोर्दृश्यत्वमवयवस्थौल्यं विना न संभवतीत्यणुसिद्धिः । तथाणोः स्थौल्यार्थं परमाणोर्द्वित्वमेव कल्प्यते न तु त्रित्वं चतुष्कादिकं च 'प्रथमोपस्थितेस्तंत्रत्वात्'[1] इति न्यायात् । यथा 'कपिंजलानालभेत'इत्यत्र प्राचुर्य्यार्थमन्यैरपि प्रथमोपस्थितत्रित्वमेवांगीक्रियते तथात्रापीति ज्ञेयम् ॥५॥ त्रिभिस्त्रसरेणुभिस्त्रुटिरित्यर्थः । ''सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते'' इति सूर्यसिद्धांतोक्तेः। यावता कालेन पद्मपुष्पपत्रं भिद्यते तावान् कालस्त्रुटिरित्यर्थः । त्रुटिशतेन वेधः स्यादित्यर्थः ॥६॥ त्रयो लवा यस्मिन्स त्रिलवः ॥७॥ नाडिका दंडः 'घटीदंडश्च नाडिका' इति कोशात् । ह्रासे दिनरात्र्योर्ह्रस्वत्वे चतुर्विंशा

१ तन्त्रं प्रधानम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशाऽर्धपलोन्मानं चतुर्भिश्चतुरंगुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतम् ॥ ९ ॥ यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे ॥
पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद ॥ १०॥ तयोः समुच्चयो मासः पितॄणां तदहर्निशम् ॥ द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥११॥
अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः ॥ संवत्सरशतं नृणां परमायुर्निरूपितम् ॥ १२ ॥ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् ॥
संवत्सरावसानेन पर्येत्यऽनिमिषो विभुः ॥ १३ ॥ संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥ १४ ॥

प्रत्यहं तद्भेदानां गणयितुमशक्यत्वात् ॥ ८ ॥ नाडिकाया उन्मानमाह । उन्मीयतेऽनेनेत्युन्मानं पात्रम् षट्पलताम्रविरचितम् । पंचगुंजो माषस्तैश्चतुरंगुलायामशलाका रूपेण विरचितैः कृतमूलच्छिद्रं तेन छिद्रेण यावत्प्रस्थपरिमितं जलं प्रविशति तेन प्लुतं निमग्नं भवति तावान् कालो नाडिका । अत्र पलच्छिद्रयोराधिक्ये शीघ्रं निमज्जेद ल्पत्वे च विलंबेनेति पलशलाकयोर्नियमः ॥९॥ अहनी अहोरात्रः ॥ १० ॥ षण्मासा अयनं दिवीत्यस्योत्तरेणान्वयः ॥ ११ ॥ दिवीति देवानामहोरात्रे प्राहुः द्वादश मासाः ॥ १२ ॥ अनेन क्रमेणासौ सूर्यो नित्यमायुः क्षपयतीत्याह । ग्रहाश्चंद्रादयः ऋक्षाण्यश्विन्यादीनि तारा अन्यानि नक्षत्राणि तदुपलक्षितं यत्कालचक्रं तत्र स्थितो ऽनिमिषः कालात्मा विभुरीश्वरः सूर्यो जगद्द्वादशराश्यात्मकं भुवनकोशं पर्येति पर्यटति ॥ १३ ॥ संवत्सरादिभेदश्च सौरबार्हस्पत्यसावनचांद्रनाक्षत्रमासभेदेन द्रष्टव्यः । केचि दिवटीपारिमाणवत्त्वे वृद्धावष्टाविंशादिपारिमाणवत्त्वे । संध्यांशमुहूर्त्तद्वयं मुहूर्त्तमेकं प्रातर्मुहूर्त्तमेकं सायं च परित्यज्य यामगणना कार्या तत्रापि मुहूर्त्तद्वयत्यागेपि । सततषण्नाडिकात्मकप्रहरस्य नियमो न किन्तु कदाचिन्न्यूनः कदाचिदधिकश्च स भवति कदा भवतीति चेत्तत्राह—तद्भेदानां प्रत्यहं गणनमशक्यमेवेत्युत्तरमाहेति भावः ॥ ८ ॥ नाडिकाया घट्याः रजतादिशलाकया छिद्रपुष्टिः स्यादिति सुवर्णस्यापि नियम एवेति ज्ञेयम् । प्रस्थ प्रमाणमप्युक्तं शार्ङ्गधरेण "गुंजाः पञ्चाद्यमाषकः, ते षोडशाक्षः कर्षोस्त्री पलं कर्षचतुष्टयम् । शरावोष्टपलं तद्द्वत्तद्वयं प्रस्थ उच्यते" इति ॥ ९ ॥ अहश्च रात्रिश्चाहनी "नपुंसकमनपुंसकेन—" इत्येकशेषः । मानं शिष्टोक्तं वस्तुपरिमाणं दयते पालयति धर्मावतारत्वाद्धर्मपालकत्वाद्वेति मानदस्तत्संबुद्धौ तथा श्रीमैत्रेयशुकदेवयोर्विदुरपरीक्षितौ प्रति संबुद्धिरियमिति ॥ १० ॥ तयोः शुक्लकृष्णयोः पक्षयोः समुच्चय ऐक्यं तदिति विधेया पेक्षं क्लीबत्वम् । "कृष्णपक्षस्त्वहस्तेषां शुक्लपक्षस्तु शर्वरी । कृष्णपक्षे त्वहःश्राद्धं पितॄणां वर्त्तते नृप" इति हारिवंशे । 'रात्रौ श्राद्धं न कुर्वीत' इति निषेधाच्च शुक्लपक्षस्य रात्रित्वे पितृशयनकालत्वात्स्वाभाविकश्राद्धं कृष्णपक्ष एव कार्यमित्युक्तमनेनोक्तम् । तौ मासौ ऋतवश्च षडेव ते च "हेमंतः शिशिरश्चैव वसंतो ग्रीष्म एव च । वर्षा शरच्च ऋतवो मार्गाद्या द्विद्विमासकाः" इति ज्योतिःशास्त्रे ॥ ११ ॥ दिवि देवलोके अयने दक्षिणोत्तरसं ज्ञे "देवानां तदहोरात्रं दिवा चैवोत्तरायणम् । शुभाशुभे तत्र कार्ये स्याद्रात्रिर्दक्षिणायनम्" इति शुभाशुभे कर्मणी तत्र तयोरुत्तरदक्षिणायनयोः कर्त्तव्ये इत्यर्थः । "मानुषेण तु मानेन यो वै संवत्सरः स्मृतः । देवानां तदहोरात्रम्" इति हारिवंशे । परमायुरिति । अल्पायुर्मध्यमायुः परमायुश्चेति त्रिधा ज्योतिःशास्त्रे नृणामायुरुक्तम् । आत्रिंशतमल्पायुराषाष्टिमध्यमायुस्ततः परमाष्टोत्तरशतमायुः परमायुरिति मतभेदेनाल्पाधिक्यकथनमपि "शतायुर्वै पुरुषः" इति श्रुत्या विरुद्धं न ज्ञेयम् । अत्रशतपदं न स्वार्थपरमानंत्ये तात्पर्यात् । वस्तुतस्त्वायुषोऽल्पाधिक्यं पापपुण्यापेक्षमेव पापेन क्षीयते पुण्येन वर्द्धते च पापं शास्त्रविरुद्धदिवामैथुनादि पुण्यं तद्विहितं रात्रिमैथुनादि तदुक्तं श्रुत्या "प्राणं वा एते प्रस्कंदंति ये दिवा रत्या संयुज्यंते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यंते" इति प्रश्नोपनिषदि । एवमन्यत्राप्यूह्यम् ॥ १२ ॥ तारा ध्रुवादयः । अश्विन्यादिभिन्नान्यनक्षत्राभावात् । स्वामिचरणैरप्यर्क्षसाहचर्य्यात्तारार्थकनक्षत्रशब्देन ध्रुवादय एवाभिप्रेता इति ध्येयम् ॥ १३ ॥ सौरबार्हस्पत्येति । "दर्शावधिं मासमुशंति चांद्रं सौरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः सृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥ १९ ॥ विदुर उवाच ॥ पितृदेवमनुष्याणामायुः परमिदं स्मृतम् ॥ परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ॥ १६ ॥

त्पुनरेवमाहुः । यदा शुक्लपक्षप्रतिपदि संक्रांतिर्भवति तदा सौरचांद्रमासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट् दिनानि वर्धंते चांद्रमानेन वर्षे षट् दिनानि ह्रसंतीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति । एवं व्यवधानतारतम्येन पंच वर्षाणि गच्छंति तन्मध्ये द्वौ मलमासौ भवतः पुनः षष्ठः संवत्सरो भवतीति ॥ १४ ॥ एवंभूतः कालात्मा नित्यमप्रमत्तैः पूजनीय इत्याह । य इति । सृज्यं कार्यमंकुरादि तद्विषयां बीजादीनां शक्तिं कालरूपया स्वशक्त्या बहुधोच्छ्वसयन् कार्याभिमुखीं कुर्वन् दिव्यंतरिक्षे धावति । कोऽसौ भूतभेदो महाभूतविशेषस्तेजोमंडलरूपी सूर्यः । किमर्थं धावति । पुंसः पुरुषस्याभ्रमाय भ्रमो मोहस्तन्निवृत्तये आयुरादिव्ययेन विषयासक्तिं निवर्तयन्नित्यर्थः । सकामानां तु गुणमयं स्वर्गादिफलं क्रतुभिर्विस्तारयन् तस्मै संवत्सरपंचकप्रवर्तकाय पूजां कुरुत ॥ १५ ॥ इदं स्वस्वमानेन वर्षशतं गणितमायुर्मानं प्रत्यहं कल्प्यते

तथा भास्कराशिचारात् । त्रिंशद्दिनं सावनसंज्ञमाहुर्नाक्षत्रमिंदोर्भगणभ्रमाच्च" इति ज्योतिःशास्त्रे मासभेदा उक्ताः । संवत्सर इति सौरगत्या । परिवत्सर इति बार्हस्पत्यगत्याऽनुवत्सर इति चांद्रगत्या । नक्षत्राणां ताराणां च स्वतोगत्यभावाच्चक्रगतिरेव गतिस्तत्रापि नक्षत्राणां सप्तविंशतिदिनमानैर्द्वादशमासैर्वत्सर इति ताराणां संख्याभावात्त्रिंशद्दिनघटितैः सावनसंज्ञैर्मासैरिडावत्सर इति विवेक इति मतांतरमाह—केचिदित्यादिना युगपदुपक्रम एककालावच्छेदेन प्रारंभः यस्मिन्वर्षे सौरचांद्रयोर्मासोस्समकाले प्रवृत्तिस्स वर्षः संवत्सरस्तदग्रिम परिवत्सर इडावत्सरस्तदग्रिमोऽनुवत्सरस्तदग्रिमो वत्सर इति । ततः पुनरस्थमेव संवत्सरादिप्रवृत्तिरितिज्ञेयम् किञ्च "शकाब्दात्पञ्चभिः शेषे समाद्यादिषु वत्सराः । संपरीदानुपूर्वाश्च तथोदा पूर्वकाः स्मृताः ॥ माने गुरोरगाभिदः परिवत्सराणां षष्टिः स्मृता मुनिवरैः प्रभवादिकानाम् । स्यादेकवत्सरमितिर्गुरुमध्यमैकराशेस्तु भोगमितिरेव सदा तथाहि ॥ प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः । अंगिराः श्रीमुखो भावो युवा धातेश्वरामिधौ ॥ बहुधान्यः प्रमाथी च विक्रमो वृषसंज्ञकः । चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः ॥ सर्वजित्सर्वधारी च विरोधो विकृतस्तथा । खरनन्दनसंज्ञौ च विजयो जयमन्मथौ ॥ दुर्मुखो हेमलंबश्च विलंबोऽथ विकारिकः । शर्वरीप्लवशुभकृच्छोभनाख्यास्ततः परः ॥ क्रोधो विश्वावसुस्तस्मात्पराभवप्लवंगकौ । कीलकः सौम्यसाधारणाख्यौ तस्माद्विरोधकृत् ॥ परिधावी प्रमाथी चानन्दो राक्षस एव च । अनलः पिंगलः कालयुक्तः सिद्धार्थरौद्रकौ ॥ दुर्मतिर्दुन्दुभिश्चैव रुधिरोद्गारिरक्तदृक् ॥ क्रोधनः क्षयकृच्चैषा षष्टिर्हि प्रभवादिका ॥" अथैतदानयनम् । "शकेन्द्रकालः पृथगाकृति २२ घ्नः शशांकनंदाश्वियुगैः ४२९१ समेतः । शराद्रिवस्विन्दु १८७५ हृतः स लब्धः षष्ट्या प्रशेषे प्रभवादयोब्दाः" । इष्टशकं द्विधा विन्यस्यैकत्र द्वाविंशतिगुणं कृत्वा ४२९१ युतं कृत्वा १८७५ विभज्य लब्धेनापरत्र स्थापितं शकं संयोज्य षष्ट्याप्तं गतवर्षवृंदं भवति प्रभवादितो गणनीयमिति सिद्धांतोक्तेः । दिनानां वृद्धिह्रासौ सूर्यसिद्धांतादितोऽवसेयौ पंचांगपत्रिकायां तौ प्रत्यक्षदृश्यौ उभयोश्चांद्रसौरमासयोश्चंद्रसूर्ययोर्वा तारतम्यंन्यूनाधिक्यभावः । तन्मध्ये पञ्चवर्षाणां मध्ये । मलमासावसंक्रांतिकमासौ " संक्रांतिरहितो मासो मलमासः प्रकीर्त्तितः" इत्युक्तेः ॥ १४ ॥ तत्तद्वर्षविहितधर्मादिसिद्ध्यर्थमेव वत्सरादिनिरूपणं कृतमतस्तत्प्रवर्त्तकः सूर्यरूपो हरिः सर्वदाऽर्चनीय इत्याह । एवं भूतो ग्रहर्क्षादिगत्याऽखिलजगत्परिक्रमकः अप्रमत्तैः सावधानैः । इत्यर्थ इति । सूर्य इति भावः । इत्यर्थ इति । स्वोदयातादिनायं रविरस्माकमायुः क्षिणोत्यतः सावधानैर्भाव्यमिति बोधयन्निति भावः । वत्सरादिविहितकर्मकालज्ञापनया क्रतुभिरनुष्ठेयैः 'बलिः पूजोपहारयोः' इति विश्वः । बलिमर्घ्यादिपूजोपहारम् । हरत प्रापयत कुरुतेति यावत् । 'हरणं प्रापणं स्तेयं नाशनं च' इत्युक्तेर्हृत्र प्रापणेस्तीति ॥ १९ ॥ पूर्वं 'संवत्सरशतं नृणाम्' इति निर्द्धारितत्वात्पितॄणां देवानाञ्चाधिकायुःप्राप्तेराह—इदमिति । कल्पात्त्रैलोक्यात्परेषां परत्र महर्लोकादिषु स्थितानां सनकादिप्रभृतीनां गतिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवान् वेद कालस्य गतिं भगवतो ननु ॥ विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ॥ १७ ॥ मैत्रेय उवाच ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम् ॥ १८ ॥ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि च ॥ १९ ॥ संध्यांऽशयोरंतरेण यः कालः शतसंख्ययोः ॥ तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥ २० ॥ धर्मश्चतुष्पान्मनुजान् कृते समनुवर्तते ॥ स एवान्येष्वधर्मेण व्येति पादेन वर्धता ॥ २१ ॥

सृज्यत इति कल्पस्त्रैलोक्यं तस्माद्बाह्यतः । विदो ज्ञानिनः॥ १६॥ योगराद्धेन योगसिद्धेन ॥ १७॥ द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोकसामर्थ्याज्ज्ञातव्यम् । अवधीयत इत्यवधानं संध्या चांशश्च तत्सहितम्॥ १८॥ कृतयुगे चत्वारि सहस्राणि संध्यासंध्यांशयोश्चत्वारिचत्वारीत्यष्टौ शतानि च एवं त्रेतादिष्वपि योज्यम् ॥ १९॥ युगस्यादौ संध्या अंतेंऽशः तयोः । उक्तानि शतानि संख्या ययोस्तयोरंतरेण मध्ये युगम् । तस्य विशेषमाह । यत्रेति । गवालंभादिधर्मविशेषो यत्र विधीयत इत्यर्थः । साधारणधर्मस्तु संध्यांशयो रप्यस्त्येव॥ २०॥ चतुष्पात्संपूर्णस्त्रेतादिषु पादेनपादेन व्येति ह्रसति पादेनपादेन वर्धमानेनाधर्मेण हेतुना । एतच्च स्वरूपकथनमात्रं वैराग्यार्थं न तु धर्मसंकोचनार्थम्॥ २१॥

दशां 'गतिः स्त्री मार्गदर्शयोः' इति मेदिनी । दशाया आयुरवयत्वाल्लक्षितलक्षणया गतिमायुरित्यर्थः । स्युर्जीवंतीत्यर्थः । प्राणधारणानुकूलव्यापारस्यैव सत्तापदार्थत्वादिति ॥ १६ ॥ ननु ममात्रत्यस्य, तत्रत्यायुर्ज्ञानं कथं संभवेदिति चेद्योगिनां सर्वज्ञानवत्त्वात्त्वं सर्वं जानासीत्याह–भगवानिति भगवान्भवान् । चक्षुषा ज्ञानेन धीरा ज्ञानिनः ॥ १७ ॥ कल्पबहिर्भूता हि भृग्वादयो ब्रह्मतुल्यायुष एवेति ब्रह्मण आयुर्वक्तुं प्रथमं युगादिमानमाह–कृतमिति । मनुष्याणां षष्ट्यधिकत्रिशतैः ३६० वर्षैर्देवानां वर्षस्तैर्द्वादशभिस्सहस्रैस्तेषां चतुर्युगं तच्च मनुष्याणां विंशतिसहस्राधिकं त्रिचत्वारिंशल्लक्षगणितं ४३२०००० वर्षसंख्याकं भवति तावदेव सत्यादिचतुर्युग मष्टाविंशतिसहस्राधिकसप्तदशलक्षवर्षैर्मानुषेण प्रमाणेन सत्यम् । षण्णवतिसहस्राधिकद्वादशलक्षवर्षैस्त्रेता ॥ चतुःषष्टिसहस्राधिकाष्टलक्षवर्षैर्द्वापरं द्वात्रिंशत्सहस्राधिकचतुर्लक्षवर्षैः कलिर्भवतीति तदुक्तं सनत्कुमारसंहितायाम् । "लक्षाणां सप्तदशकमष्टविंशसहस्रकम् । कृतमानं ततस्त्रेतामानं द्वादशलक्षकम् ॥ सहस्राणां षण्णवतिर्द्वापरस्याष्टलक्षकम् । चतुःषष्टिः सहस्राणां कलेर्लक्षचतुष्टयम् ॥ द्वात्रिंशत्सहस्राणि नृमानेन चतुर्युगम् ॥" तत्र सत्यम् १७२८०००, त्रेता १२९६०००, द्वापरम् ८६४०००, कलिः ४३२०००, एवं देवानां युगसहस्रद्वयं ब्रह्मणोऽहोरात्रतस्स च मनुष्याणां पद्माष्टकं चतुःषष्टिकोटयाधिकम् ॥ ८००००६४००००००० इति ॥ १८ ॥ एवमिति त्रेतायास्त्रीणि सहस्राणि प्रमाणम् । षट्शतानि संध्यासंध्यांशौ द्वापरस्य द्वे सहस्रे प्रमाणम् । चत्वारि शतानि संध्यासंध्यांशौ एवं कलेः सहस्रमेकं प्रमाणं द्वे शते संध्यासंध्यांशाविति विवेकः ॥१९॥ संध्यासंध्यांशयोरंतर्य इति पाठः । प्रायो प्राक्तनबहुपुस्तकेष्वस्ति तदर्थस्तु अंतर्मध्यवर्त्ती यः काल इति विश्वनाथेन कृतः तस्य युगस्य यत्र येषु । इत्यर्थ इति । यस्य युगस्य योऽसाधारणो धर्मो गवालंभादिरादिना पलपैतृकादि ग्रहः स विधीयते इति भावः । तदुक्तम् "अश्वालंभं गवालंभं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्" इति निर्णयसिंधौ यत्तु देवलेन "यावद्वर्णविभागोस्ति यावद्गंगा महीतले । अग्निहोत्रं च संन्यासं तावत्कुर्यात्कलौ युगे" इत्युक्तं तदतीव विरक्तपरमन्यथा वांताशित्वापत्तेर्नारकी स्यादिति ध्येयं सुधीभिः । "संन्यासी नरकं याति त्र्येषणासंयुतो यदि । त्रिवासनो महाघोरे कुंभीपाके वसेच्चिरम्" इत्याद्युक्तेः । यद्वा । यत्र येषु युगेषु ध्यानयज्ञपरिचर्याकीर्त्तनात्मको धर्मविशेषः "कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः । द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्" इत्युक्तन्यायेन साधारणधर्मस्तु गुणकृतः । किञ्च । यस्य युगस्य यो धर्मः स एव तत्संध्यासंध्यांशयोरप्यस्त्येवेत्यपि ज्ञेयम् ॥ २० ॥ " तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः" इत्युक्तपादचतुष्टयसंबद्धो धर्मः मनुजानुद्दिश्येति शेषः । यथा पादेन पादेन ह्रसंति तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम् ॥ तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥ २२ ॥ निशाऽवसान आरब्धो लोककल्पोऽनुवर्तते ॥ यावद्दिनं भगवतो मनून्भुंजंश्चतुर्दश ॥ २३ ॥ स्वंस्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिम् ॥ मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः ॥ भवंति चैव युगपत्सुरेशाश्चानु ये च तान् ॥ २४ ॥ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्तनः ॥ तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः ॥ २५ ॥ मन्वंतरेषु भगवान् बिभ्रत्सत्त्वं स्वमूर्तिभिः ॥ मन्वादिभिरिदं विश्वमवत्युदितपौरुषः ॥ २६ ॥ तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः ॥ कालेनाऽनुगताऽशेष आस्ते तूष्णीं दिनात्यये ॥ २७ ॥

त्रिलोक्या बहिर्महर्लोकप्रभृति ब्रह्मलोकमभिव्याप्य चतुर्युगसहस्रमेकं दिनम् । यद्यस्यां विश्वसृक् ब्रह्मा निमीलति स्वपिति ॥ २२ ॥ तत्र दिनस्थितिमाह निशाऽवसान इत्यादिसार्धैश्चतुर्भिः । चतुर्दश मनून् भुंजन् पालयन् व्याप्नुवन्नित्यर्थः ॥ २३ ॥ किंचिदधिकां युगानामेकसप्ततिम् । मनुवंश्याः पृथ्वीपालकाः क्रमेण भवंति सप्तर्षिप्रभृतयस्तु युगपत्समकालमेव भवंति । सुरेशा इंद्राः ताननुवर्तंते ये गंधर्वादयस्तेऽपि ॥ २४ ॥ त्रैलोक्यं वर्तयतीति तथा ॥ २५ ॥ स्वमूर्तिभिर्मन्वंतरावतारैर्मन्वादिभिर्द्वारभूतैराविष्कृतपुरुषकारः सन्विश्वं रक्षति ॥ २६ ॥ रात्रिगतां स्थितिमाह पंचभिः । तमसो मात्रां लेशम् । प्रतिसंरुद्धः प्रत्याहृतो विक्रमो येन । अनुगत

प्रथमस्कंधे निरूपितं निरूपयिष्यति च द्वादशस्कंधे एतच्च धर्मह्रासादिस्वरूपस्य युगस्वरूपस्य कथनमात्रं धर्मह्रासं दृष्ट्वाऽहो प्रतिदिनं धर्मः क्षीयते किमत्र स्थित्येति प्रपंचजिहासार्थमेव: न तु धर्मसंकोचार्थं धर्मः संकोचस्तु कृते यथोक्तं कार्यं त्रेतायां पादोनमर्द्धं द्वापरे पादं कलौ कुर्यादित्येतदर्थं नेति ज्ञेयम् । स्वरूपकथनमात्रमित्यत्र कथनमत्रेति पाठः समीचीनो भातीति ॥ २१ ॥ 'ये स्युः कल्पाद्बहिर्विदः' इत्यस्योत्तरमाह—त्रिलोक्या इति । स्वपिति तदैव स्वपंतं गर्भोदशायिनमनुस्वपिति तथा च चतुःषष्टिकोटयधिकाष्टपद्मसंख्याकमनुष्यप्रमाणवर्षैरहोरात्रो ब्रह्मणो भवतीति सिद्धम् ॥ २२ ॥ तत्राहोरात्रयोर्मध्ये मनून्मन्वन्तराणि । इत्यर्थ इति । भगवतो ब्रह्मणो यावद्दिनं तावच्चतुर्दशमन्वंतराणि व्याप्नुवँल्लोकानां मनुष्याणां कल्पो भवतीति भावः । ब्रह्मणो दिनकल्पनेन गर्भोदशायिनोपि दिनकल्पना ज्ञेया तस्यापि तदंते योगनिद्रास्वीकारात् ॥ २३ ॥ साधिकामित्युक्तेः तत्राधिकभागस्य शतोत्तरपंचसहस्रवर्षाणि द्विचत्वारिंशत्संवत्सराधिकानि दशमासा अष्टौ दिवसाश्चत्वारो यामाश्चतस्रो नांडिकाश्चतस्रः कला अष्टौ काष्ठाः किञ्चिदधिकाः सार्द्धाष्टनिमेषा इति विवेकः । तान् इंद्रान् मनुभुक्तिर्हि देवमानेन द्विपञ्चाशत्सहस्राधिकाष्टलक्षाणि वर्षाणि भवंति मनुष्यमानेन तु त्रिंशत्कोटयः सप्तषष्टिलक्षाणि विंशतिसहस्राणि भवंति तथोक्तं विष्णुपुराणे "त्रिंशत्कोटयश्च संपूर्णाः संख्याताः संख्यया द्विज । सप्त षष्टिस्तथान्यानि नियुतानि महामुने ॥ विंशतिश्च सहस्राणि कालोयमधिकं विना । मन्वंतरस्य संख्येयं मानुषैर्वत्सरैर्द्विज ॥" इति । हरिवंशे तु—मनूनामहोरात्रादिर्विलक्षणतयैवोक्तस्तथाहि "दिव्यमब्दं दशगुणमहोरात्रं मनोः स्मृतम् । अहोरात्रं दशगुणं मानवः पक्ष उच्यते ॥ पक्षो दशगुणो मासो मासैर्द्वादशभिर्गुणैः । ऋतुर्मनूनां संप्रोक्तः प्राज्ञैस्तत्त्वार्थकोविदैः ॥ ऋतुत्रयेण त्वयनं तद्द्वयेनैव वत्सरः" इति द्वासप्ततिसहस्राणि दिव्याब्दा एकं मनोर्वर्षं स्यादिति भावः॥२४॥ब्राह्मो ब्रह्मकृतः वर्तयति साधयति यत्र दैनंदिनसर्गे दिनेदिने भवतीति दैनंदिनः। अणिपूर्वपदस्य मुम् ॥२५॥२६॥ त्रैलोक्यमात्रसंहारार्थं तमोलेशस्यैवोपादानं युक्तं कालाग्निरुद्रसंकर्षणादिरूपेणोपादायं स्वीकृत्य विक्रमो भूर्भुवःस्वर्लोकरूपो येन स तथा । 'विक्रमो भूर्भुवः स्वश्च' इति द्वितीयस्कंधोक्तेः । अशेषं त्रैलोक्यस्थजीवबृंदादि । तूष्णीमास्ते त्यक्तमायिकलीलाविनोद इत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेवान्वपिधीयंते लोका भूरादयस्त्रयः ॥ निशायामनुवृत्तायां निर्मुक्तशशिभास्करम् ॥ २८ ॥ त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना ॥ यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोऽर्दिताः ॥२९॥ तावत्त्रिभुवनं सद्यः कल्पांतैधितासिंधवः ॥ प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः॥३०॥अंतः स तस्मिन् सलिल आस्तेऽनंतासनो हरिः ॥ योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ॥३१॥एवंविधैरहोरात्रैः कालगत्योपलक्षितैः ॥ अपक्षितमिवाऽस्याऽपि परमायुर्वयःशतम् ॥ ३२ ॥ यदर्धमायुषस्तस्य परार्धमभिधीयते ॥ पूर्वः परार्धोऽपक्रांतो ह्यपरोऽद्य प्रवर्तते ॥ ३३ ॥ पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत् ॥ कल्पो यत्राऽभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः ॥ ३४ ॥

मनुप्रविष्टमशेषं यस्मिन् ॥ २७ ॥ तदेव स्पष्टयति । तमेवेति । अन्वपिधीयंत इति कर्मकर्तरि प्रयोगः । तिरोहिता भवंतीत्यर्थः । कथम् । निर्मुक्तो रहितः शशी भास्करश्च यथा भवति तथा ॥ २८ ॥ भगवच्छक्तिरूपो यः संकर्षणमुखाग्निस्तेनोष्मणार्दिताः संतो जनलोकं यांति ॥ २९ ॥ कल्पांतेनैधिताः सिंधवः समुद्राः । उत्कट आटोपः क्षोभो येषां ते च ते चंडवातैरीरितोर्मयश्च ॥ ३० ॥ जनलोके आलयो येषां महर्लोकगतानामन्येषां च तैः ॥ ३१ ॥ वैराग्यार्थमाह । एवंविधैरहोरात्रैर्वर्षशतं सर्वेषां प्राणिनामायुषः परमधिकमस्य ब्रह्मणो यदायुस्तदप्यपक्षितमिव क्षीणमिवेति लोकोक्तिः गतप्रायमित्यर्थः ॥ ३२॥ तदेवाह । यदिति ॥ ३३ ॥ पूर्वस्य परार्धस्यादाविति

दिनात्यये दिनांतप्रलये॥२७॥तदेव दिनांतलक्षणप्रलयस्वरूपमेव । इत्यर्थ इति ।"अपिधानतिरोधानपिधानाच्छादनानि च" इत्यमरोक्तेः । स्वयमेव लीयंत इति भावः । तिरोधानप्रकारं पृच्छति कथमिति । अनुवृत्तायां प्राप्तायां सत्याम्॥ २८ ॥ दाहोऽत्र शतवर्षपर्यन्तो ज्ञेयः । ऊष्मणा तापेन ॥ २९ ॥ "चंडो दैत्येऽम्लवृक्षे च तीक्ष्णे कोपे यमानुगे" इति निरुक्तिः । चंडवातैस्तीक्ष्णपवनैः ॥ ३० ॥ योग एव निद्रा तया निमीले, निमीलिते अक्षिणी यस्य स तथा । तीर्थस्तु 'योगनिद्रामीलिताक्षः' इति पपाठ स च सुबोध इति । अन्येषां स्वतस्तत्रत्यानाम् ॥ ३१ ॥ मूले आयुषः परमं परमायुरिति विग्रहः कार्यः । "वयो वर्षविबाल्यादियौवनेषु नपुंसकम्" इति निरुक्तिः । इत्यर्थ इति । अहो सर्वाधिकद्विपरार्द्धायुषो ब्रह्मणोपि यदि कालभयं "यस्माद्बिभेम्यहमपि द्विपरार्द्धधिष्ण्ये" इत्युक्तेस्तदा का वार्त्ताऽत्यल्पायुषः पुंसोऽतो हरिभक्तिवैराग्यादौ यतितव्यमवश्यमिति भावः । ॥ ३२ ॥ तदेव गतप्रायत्वमेव अपक्रांतोऽतीतः परार्द्धज्ञानार्थमादितः संख्यामनुवदति ग्रंथांतरात् । "एकं दश शतं चैव सहस्रमयुतं तथा । लक्षं च नियुतं चैव कोटिरर्बुदमेव च ॥ बृंदं खर्वो निखर्वश्च शंखः पद्मश्च सागरः । अंत्यं मध्यं परार्द्धश्च दशवृद्ध्या यथाक्रमम् ॥" इति गणितरत्नाकरे । अपरो द्वितियः अद्यास्मिन्कल्पे ॥३३॥ वस्तुनः कल्पस्य कथनमात्रम् । प्रभासखंडोक्तेः श्वेतवाराहादिभिः पितृकल्पांतैः त्रिंशत्कल्पैरेव शुक्लप्रतिपदाद्यमावस्यान्तानि त्रिंशद्दिनानि तेषामेव कल्पानां तिथिवारादिवत्पुनःपुनरावृत्त्या मासा मासैर्द्वादशभिर्वर्षम् । पंचाशता वर्षैरेकं परार्द्धं तत्र पूर्वस्य प्रथमस्यादौ ब्राह्म इति श्वेतवाराह एव ब्रह्मजन्मतिथित्वात् । ब्राह्मशब्देनोच्यते सा तिथिश्च चैत्रशुक्लप्रतिपदेव ज्योतिःशास्त्रोक्ता ज्ञेया "तिथीशा वह्निकौ गौरी" इत्यादिना तु तिथीश्वराः कथ्यंते न तु यत्तिथौ यस्य देवस्य जन्म स तस्य तिथेरीश्वर इति नियमो अत्र विहितस्तथादर्शनाभावादेवजन्मतिथयस्तु भिन्ना एव ज्योतिःशास्त्रे वर्णितास्तत्र ब्रह्मजन्मतिथिश्चैत्रशुक्लप्रतिपदुक्ता वाक्यानि तु विस्तरभियेह न लिखितानीति । यत्र ब्राह्मकल्पे । यं ब्रह्माणं शब्दब्रह्म शब्दानां वेदशब्दानामाविर्भावको ब्रह्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैव चांते कल्पोऽभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहम् ॥ ३५ ॥ अयं ते कथितः कल्पो द्वितीयस्यापि भारत ॥
वाराह इति विख्यातो यत्रासीत्सूकरो हरिः ॥ ३६ ॥ कालोऽयं द्विपरार्धाख्यो निमेष उपचर्यते ॥ अव्याकृतस्याऽनंतस्य अनादेर्जगदात्मनः ॥
॥ ३७ ॥ कालोऽयं परमाण्वादिर्द्विपरार्धांत ईश्वरः ॥ नैवेशितुं प्रभुर्भूम्न ईश्वरो धाम मानिनाम् ॥३८॥ विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ॥
आंडकोशो वहिरयं पंचाशत्कोटिविस्तृतः ॥ ३९ ॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥ लक्ष्यतेंऽतर्गताश्चान्ये कोटिशो ह्यंडराशयः ॥४०॥

त्रिभिर्वस्तुकथनमात्रम् ॥ ३४ ॥ पाद्मत्वे हेतुः । यदिति ॥ ३५ ॥ अयं तु द्वितीयस्यादौ कथितः ॥ ३६ ॥ तदेवं कालेन निमित्तेन सृज्यानामायुःपरिमाणमुक्त्वा कालपरिच्छेदरहितं तत्त्वमाह । कालोऽयमिति पंचभिः । उपचर्यते केवलं न त्वनेनापि क्रमेणायुर्गणनं तस्येत्याह । अव्याकृतस्य कार्योपाधिशून्यस्यात एवानंतस्यानादेश्च जगदात्मनो जगत्कारणस्य ॥ ३७ ॥ तत्परिच्छेदे कालस्यासामर्थ्यादित्याह । कालोऽयमीश्वरः समर्थोऽपि भूम्नः परिपूर्णस्येशितुं नैव प्रभुः समर्थः । यतो धाममानिनां देहगेहाभिमानिनामेवेश्वरः ॥ ३८ ॥ भूम्नः इत्युक्तं तत्प्रपंचयन्नाह । विकारैः षोडशभिर्युक्तैरष्टप्रकृतिसंयुक्तैः सहितस्तदारब्ध इत्यर्थः । अयमांडकोशो यत्र प्रविष्टः परमाणुवल्लक्ष्यत इत्युत्तरेणान्वयः । कीदृशः अंतः पंचाशत्कोटियोजनविस्तृतो बहिश्च विशेषादिभिः पृथिव्यादिभिः सप्तभिरावृतः ॥ ३९ ॥ कीदृशैः आंडकोशप्रमाणाद्

शब्दब्रह्म तदग्रे वक्ष्यते "शब्दब्रह्मात्मनस्तात" इत्यादिना द्वादशेऽध्याये स्कंधे च ॥ ३४ ॥ तस्यैव ब्राह्मकल्पस्यैव कल्पः पितृकल्पः तत्कल्पस्यैवांतिमं पितृकल्पमेव पाद्मं वदंति पाद्मत्वे हेतुः यदिति । तेन सर्वेष्वेव कल्पेषु लोकात्मकं पद्मं न संभवति किन्तु क्वापिकापीति ज्ञेयम् ॥ ३५ ॥ अयं तु संप्रति वर्त्तमानस्य द्वितीयपरार्द्धस्य एकपंचाशत्तमवर्षस्य प्रथमदिवस इत्यर्थः । अत्र 'पाद्मं कल्पमथो शृणु' इत्युपक्रांतायाम् 'उदाप्लुतं विश्वम्' इत्यादिपाद्मकल्पकथायामेकार्णवोदके एकस्य पद्मस्यैव श्रवणात्तत्रैकस्य ब्रह्मण एवोद्भवाद् 'विलोक्य तत्रान्यदपश्यमान'इत्याद्युक्तेर्महाकल्पायुषां सनकादीनाञ्च तत्रानुपलंभात् । केचित्प्रथमपरार्द्धांते महर्जनस्तपःसत्यानां द्विपरार्द्धांतपर्यंतस्थायिनामनष्टानामपि जलाप्लवनं तथा तत्रत्यानां सर्वेषामेव कल्पायुषां ब्रह्मसाहित्येनैव श्रीनारायणे प्रवेशमाख्याय प्रथमपरार्द्धसमाप्तौ द्वितीयपरार्द्धस्यादिमं श्वेतवाराहमेव पाद्ममाहुः । द्वादशाध्याये च सनकादिमरीच्यादीनां ब्राह्मकल्प इव ब्रह्मतं एवाविर्भावं वक्ष्यते स च तत्र ब्राह्मकल्पकथैवेति वाच्यं पाद्मकल्पकथायाः प्रक्रांतत्वात् । तस्मात् 'तस्यैव चांते' इत्यत्रांतेऽवसाने समाप्तावित्यर्थ इति । अयं त्विति । तुरेवार्थे अयमेव पाद्म एव वाराह इति ख्यातः तत्र हेतुः यत्रासीदिति । द्वितीयस्यापीत्यपिकारेण प्रथमपरार्द्धस्यादिमो ब्राह्मः कल्पोऽपि पाद्म उच्यते इति व्याचक्षते॥३६॥केचिदत्रावतरणिकामेवमाहुस्तथाहि-तदेवं सूक्ष्मं स्थूलं च कालमुक्त्वात्यंतिकं स्थूलं परममहांतं द्विपरार्द्धसंज्ञं कालमाह । यद्यपि कालस्य पर्यवसानासंभवस्तथापि शास्त्रे स एवात्यंतिकस्थूलत्वेन व्यवह्रियते सोऽपि जगदात्मनः परमात्मनो निमेषः। नन्वेवं निमेषादिक्रमेण तस्याप्यायुर्गण्यते किमिति चेन्नहि नहीति । सरसनादंशमाह—उपचर्यते क्वचिन्निमेष इति । "तस्यैकनिश्वसितकालमथावलंब्य जीवंति लोमविलजा जगदंडनाथाः" इति ब्रह्मसंहितादौ क्वचिन्निश्वास इत्युपचारमात्रं न तु वस्तुतो निमेषोस्तीत्यर्थः। यतोऽव्याकृतस्य कालकृतविकाररहितस्य अत एव कालकृतविकाररहितत्वादेव अनादेरनंतस्य च । कालपरिच्छेदातीत्यस्येत्यर्थः । तत्र हेतुः जगदात्मनः कालादिसर्वजगत्कारणस्य ॥३७॥ व्यंजितमेवार्थं पुनः स्पष्टयति तत्परिच्छेदेत्यादि । तस्य परमात्मनः परिच्छेदे ईशितुं वशीकर्त्तुम् ॥३८॥ तद्भूमत्वं सर्वजगत्परिछेदकत्वमिति यावत् षोडशभिरेकादशेंद्रियपञ्चभूतरूपैः प्रकृतिमहदहंकारपञ्चतन्मात्रारूपा अष्टौ प्रकृतयः । "महदाद्याः प्रकृतिविकृतयः सप्त"इति न्यायेन ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ॥ विष्णोर्धाम परं साक्षात् पुरुषस्य महात्मनः ॥ ४१ ॥ इति श्रीभागवते महापुराणेष्टादशसाहस्र्यां संहितायां तृतीयस्कंधे विदुरमैत्रेयसंवादे कल्पमानादिवर्णनं नामैकादशोऽध्यायः ॥ ११॥ मैत्रेय उवाच ॥ इति ते वर्णितः क्षत्तः कालाख्यः परमात्मनः॥ महिमा वेदगर्भोऽथ यथाऽस्राक्षीन्निबोध मे ॥ १ ॥ ससर्जाग्रेंऽधतामिस्रमथ तामिस्रमादिकृत् ॥ महामोहं च मोहं च तमश्चाऽज्ञानवृत्तयः ॥ २ ॥

शगुणमुत्तरोत्तरोऽधिको येषु तैः न केवलमयमेक एवापि त्वन्येऽपि अंतर्गताः परमाणुवल्लक्ष्यंते ॥ ४० ॥ सर्वेषां कारणानां कारणं विष्णोः धाम स्वरूपम् ॥ ४१ ॥ इति श्रीभागवते तृतीयस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे तु कुमारादिमनःसर्गासमेधनात् ॥ कायद्वैधेन यौनस्तु मनुसर्गोऽनुवर्ण्यते ॥ १ ॥ १ ॥ अग्र इति ब्रह्मा स्वसृष्टौ प्रथममविद्यावृत्तीः ससर्ज तत्र तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबुद्धिः महामोहो भोगेच्छा तामिस्रं तत्प्रतिघाते क्रोधः अंधतामिस्रं तन्नाशेऽहमेव मृतोऽस्मीति बुद्धिः । तदेवोक्तं वैष्णवे । "तमोऽविवेको मोहः स्यादंतःकरणविभ्रमः ॥ महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा ॥ मरणं ह्यंधतामिस्रं तामिस्रः क्रोध उच्यते ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः" इति ॥ पातंजलेऽप्येत एवोक्ताः । "अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः" इति ॥ श्रीविष्णुस्वामिप्रोक्ता वा अज्ञानविपर्या

स्वकार्यं प्रति महदादीनामपि प्रकृतित्वमननात्।इत्यर्थ इति । चतुर्विंशातितत्त्वोत्पादित इति भावः॥३९ ॥४०॥यद्यपि पूर्वोक्तरीत्या महापुरुषोऽपि न कालाधीनस्तथाप्याविर्भावतिरोभावलीलत्वात्तस्याक्षरशब्दवाच्यत्वं नास्ति ।किं तु तस्य परं स्वरूपं स्वयं भगवानेव नित्याविर्भावत्वात्तद्वाच्य इत्याह तदाहुरिति । महात्मनो विष्णोर्महाविष्ण्वाख्यस्य साक्षात् यत् परं धाम स्वतःसिद्धं परमांशिस्वरूपं तत्त्वं तदेवाक्षरं नित्याविर्भावं ब्रह्मपरिपूर्णं भगवंतमाहुः । यतः सर्वकारणस्य पुरुषस्यापि कारणमिति । स च श्रीकृष्ण एव श्रीदशमे "काहं तमो महदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः । क्वेदृग्विधाविगणितांडपराणुचर्या वाताध्वरोमविवरस्य च ते महित्वम्" इति ब्रह्मोक्तेः "नारायणोंगं नरभूजलायनात्" इत्यादि तदुक्तेश्च ॥ ४१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ असमेधनमवृद्धिः । कायस्य ब्रह्मशरीरस्य द्वैधेने द्विधाभवनेन यौनो योनिसंभवः ॥(१)॥ ते तुभ्यं महिमा प्रभावः अथ दशविधसर्गारंभे तथा मे मत्तः निबोध शृणु ॥ १ ॥ अविद्यावृत्तयः पूर्वसिद्धा एव अथ सृष्ट्यारंभे ब्रह्मत आविर्बभूवुरित्याह । अग्रे ब्राह्मकल्पे या अज्ञानवृत्तयस्ताः ससर्ज प्रकटयामास तत्र तासु तत्प्रतिघाते भोगेच्छाप्रातिघाते । तन्नाशे भोगनाशे । स्पष्टमन्यत् । तदविद्यासर्जनं वैष्णवे विष्णुपुराणे महात्मनो ब्रह्मणः । पातंजले योगशास्त्रे एते तमआदय एव नामांतरैरुक्ताः वस्तुतस्त्वविद्याया आवरणविक्षेपावेव द्वौ धर्मौ तावेवाविद्याऽस्मिताशब्दाभ्यामज्ञानविपर्यासशब्दाभ्यां चोच्येते रागद्वेषाभिनिवेशास्त्वंतःकरणधर्मा अपि विक्षेपांशप्राधान्याद्विक्षेपप्रपंचतयैवोच्यंत इति । सूत्रार्थस्तु सूत्रैरेव कृतस्तथा हि "अनित्याशुचिदःखानात्मसु नित्यशुचिदुखात्मख्यातिरविद्या१" सा मुख्या बंधहेतुः यथा "अमरा देवा" इति श्रुत्वाऽनित्येषु नित्यत्वभ्रांत्या देवत्वार्थं कर्म कृत्वा बध्यंते । एवमशुचौ स्त्रीकाये 'स्त्रियो मेध्यास्तु सर्वतः' इति श्रुत्वा तत्र शुचित्वभ्रांत्या बध्यंते । तथा परिणामदुःखे भोगे सुखत्वभ्रांत्या बध्यंते । अनात्मनि बुद्ध्यादावात्मत्वख्यात्यापि बध्यंते । एवं चतुर्विधैवाविद्याबंधमूलमित्यर्थः ॥ १ ॥ "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता२" दृक् शक्तिः पुरुषो दर्शनशक्तिर्बुद्धिःशक्तिशब्दो योग्यतार्थकः भोक्तृभोग्यत्वयोग्ययोरत्यंतविविक्तयोर्दृग्दृश्ययोरविद्याकृता एकात्मता तादात्म्यामिव शब्देनाहमस्मीति भ्रांतिकृतत्वं तादात्म्यस्य द्योतयति साऽस्मितेत्यर्थः। ॥ २ ॥ "सुखानुशयी रागः ३ " अस्मिताकार्यं रागं निरूपयति सुखानुभवे सति स्मृत्या तज्जातीयसुखांतरे तत्साधने वा तृष्णा स रागः सुखमनुशेते विषयी करोतीति सुखानुशयीत्यर्थः ॥ ३ ॥ "दुःखानुशयी द्वेषः ४" दुःखानुभवितुः स्मृत्या दुःखतत्साधनयोर्यः क्रोधः स द्वेष इत्यर्थः ॥ ४ ॥ " स्वरसवाही विदुषोपि तथा रूढोऽभिनिवेशः ५" मूर्खस्य विदुषो वा जंतुमात्रस्य यो मरणत्रासः सोभिनिवेशः यथा मूर्ख

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत ॥ भगवद्ध्यानपूतेन मनसाऽन्यांस्ततोऽसृजत् ॥ ३ ॥ सनकं च सनंदं च सनातनमथात्मभूः ॥ सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ॥ ४ ॥ तान् बभाषे स्वभूः पुत्रान् प्रजाः सृजत पुत्रकाः ॥ तन्नैच्छन् मोक्षधर्माणो वासुदेवपरायणाः ॥ ५ ॥ सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः ॥ क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ॥ ६ ॥ धिया निगृह्यमाणोपि भ्रुवोर्मध्यात् प्रजापतेः॥ सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥७॥ स वै रुरोद देवानां पूर्वजो भगवान् भवः ॥ नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥८॥ इति तस्य वचः पाद्मो भगवान् परिपालयन् ॥ अभ्यधाद्भद्रया वाचा मा रोदीस्तत् करोमि ते ॥९॥ यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः॥ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः॥१०॥हृदिंद्रियाण्यसुर्व्योम वायुरग्निर्जलं मही॥सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि मे ११॥

सभेदभयशोकाः । तदुक्तम् । "स्वादृगुत्थविपर्यास" इत्यादि ॥ २ ॥ न बह्वमन्यत नाभ्यनंदत् ॥ ३ ॥ यद्यपि प्रतिकल्पं सनकादिसृष्टिर्नास्ति तथापि ब्राह्मसर्गत्वादिहोच्यते । वस्तुतस्तु मुख्यसर्गादय एव प्रतिकल्पं भवंति सनकादयस्तु ब्राह्मकल्पसृष्टा एवानुवर्तंते ॥ ४ ॥ स्वभूर्ब्रह्मा ॥ ५ ॥ अवध्यातोऽवज्ञातः । प्रत्याख्यातमनंगीकृतमनुशासनं यैः ॥ ६ ॥ स चासौ मन्युश्च तन्मन्युः ॥ ७ ॥ ८॥ ९॥ बालक इव ॥ १० ॥ अग्रे पूर्वमेव मे मया कृतानि ॥ ११ ॥

स्याहं सदा भूयासमिति रूढत्रासस्तथा विदुषोऽपि दृश्यते यतः स्वरसवाही सः पूर्वजन्मसुकृतमरणदुःखानुभवजन्यवासनासंघः स्वरसस्तेन वहति प्रवहतीति स्वरसवाही । दृश्यते हि जातमात्रबालस्य मरणाद्भयं तच्च मरणस्मरणं विना नोपपद्यत इत्यर्थः ॥१॥ तदुक्तं प्रथमस्कंधे आदिना भवभेदजर्भाशुचः "यन्मायया जुषन्नास्ते तं नृसिंहमहं भजे" इति पादत्रयग्रहः॥२॥अविद्यानिवर्त्तिका विद्यैवेति द्योतयितुं विद्यावृत्तयोऽपि तस्मादेव सनकादिरूपेण प्रादुर्बभूवुरित्याह—दृष्ट्वेति । ततोऽज्ञानवृत्युत्पत्तेरुत्तरं नाभ्यनंददुत्कृष्टं नामन्यत ॥३॥ ब्राह्मसर्गत्वाद्ब्रह्मसंबंधिसर्गत्वात् । इह पाद्मे महाकल्पायुषां जीवतामेव ब्रह्मादीनां परमेश्वरे प्रवेशात्। पाद्मे कल्पे यथा ब्रह्मा पद्मादुदपद्यत तथा ब्रह्मापि सनकादीनुत्पादयामासेत्यभिप्रेत्यैव श्रीस्वामिनोक्तं यद्यपीत्यादि अतः परं ब्राह्मसर्गत्वादिति सांख्ययोगवैराग्यतपांसीति चत्वार्येव विद्यायाश्वतस्रो वृत्तयस्तासामेव सनकादिचतुष्टयरूपेणाविर्भावः । किं च भक्त्या विना विद्याया वैफल्यात्तद्वृत्तिषु तपआदिष्वपि भक्तिर्गुणीभूता सती तिष्ठेदिति सनकादयोऽपि भक्तिमंत एव दृष्टाः मुख्यभक्तेराविर्भावं तु नारदरूपेणाग्रे वक्ष्यते ॥ ४ ॥ तान्सनकादीन् । स्वशब्देनात्मा गृह्यते तेनात्मभूरित्यर्थः । आत्मा च परमेश्वर एव "तत्त्वमसि" इत्यादेः । तत् प्रज्ञोत्पादनम् । अनिच्छायां हेतुः मोक्षधर्माण इति ननु प्रजापतयोपि मोक्षधर्माणो दृश्यंते तत्राह वासुदेवेति । " देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् । सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्त्रम्" इत्युक्तेः । ज्ञानयोगः खल्वाविद्यककर्मयोगनिरासक एवेति द्योतितम् ॥ ५ ॥ स ब्रह्मा सुतैः सनकाद्यैः नियंतुं निरोद्धुम् ॥ ६॥ अविद्याया निवर्त्तिका यथा विद्या तथा विद्याया अपि निवर्त्तिका क्वचिदविद्या स्यादिति दर्शयितुं विद्योदयवत्यपि ब्रह्मणि अविद्यावृत्तिमुख्यस्य तामिस्राभिधानस्य क्रोधस्य रुद्ररूपेणाविर्भावमाह धियेति । तस्य प्रजापतेर्मन्युरिति "मन्युर्दैन्ये युधि क्रुधि"इतिकोशात्।निगृह्यमाणो निरुध्यमानः । सद्यो नियमनात्पूर्वक्षणमेव क्रोधसमये भ्रुकुटी नीलशिरा नेत्रं च लोहितं स्यादित्यतो नीललोहित इति 'कारणगुणाः कार्ये समवयंति'इति न्यायात्। अनेन 'सद्यो जातो नीललोहित' इति श्रौतं नाम द्वयंनिरुक्तं "सद्योजातं प्रपद्यामि शंकरं नीललोहितम्" इति श्रुतेः ॥ ७ ॥ लोके बालस्वभावप्रवर्त्तनाय तस्य तं वक्ति—स वा इति । देवानामिंद्रादीनाम् । धातः पितः । न केवलं मम किं तु सर्वस्येत्याह जगद्गुरो इति । एतेन नामस्थानयोः करणे पितुरेवाधिकार इति ध्वनितम् ॥ ८ ॥ इति पूर्वोक्तं पाद्मः पद्मजः । भद्रया स्निग्धया । तत् नामादि ॥ ९ ॥ यद्यतः । सुरश्रेष्ठेति सर्वदेवपूर्वजत्वात् ॥ १० ॥ हृदीति।हृदादीनामहंकारकार्यत्वादहंकाराधिष्ठातृरुद्रस्य तत्तत्स्थानौचित्यात् । क्रोधपक्षे तु हृत्तु क्रोधस्य जन्मस्थानमेव स तत्र प्रवृद्धो नेत्रपाणिपादेंद्रियेष्वपि तिष्ठति तत्तद्व्यापारसूच्यः तथैवासुषु प्राणेष्वपि नासाश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्युर्मनुर्महिनसो महाञ्छिवः ऋतुध्वजः ॥ उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ १२ ॥ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलांऽबिका ॥
इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः॥१३॥गृहाणैतानि नामानि स्थानानि च सयोषणः ॥ एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः॥
॥१४॥ इत्यादिष्टः स गुरुणा भगवान्नीललोहितः ॥ सत्त्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः ॥१५॥ रुद्राणां रुद्रसृष्टानां समंताद्ग्रसतां जगत् ॥
निशम्याऽसंख्यशो यूथान् प्रजापतिरशंकत ॥१६॥ अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहंतीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥१७॥
तप आतिष्ठ भद्रं ते सर्वभूतसुखावहम् ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥ १८ ॥ तपसैव परं ज्योतिर्भगवंतमधोक्षजम् ॥
सर्वभूतगुहावासमंजसा विंदते पुमान् ॥ १९ ॥ ॥ मैत्रेय उवाच ॥ एवमात्मभुवादिष्टः परिक्रम्य गिरां पतिम् ॥ बाढमित्यमुमामंत्र्य विवेश तपसे
वनम् ॥ २० ॥ अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसंतानहेतवः ॥ २१ ॥

॥ १२ ॥ १३ ॥ सयोषणः सस्त्रीकः । एभिः स्थानैर्नामभिश्च युक्तः प्रजाः सृज ॥ १४ ॥ सत्त्वं बलम् । आकृतिर्नीललोहितता स्वभावस्तीव्रता तेन ॥१५॥ रुद्राणां यूथानि दृष्ट्वाऽशंकत तत्राशंकां प्राप्तः ॥ १६ ॥ १७ ॥ स्रष्टा स्रक्ष्यति ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

साधिक्यसूच्यस्तथा बहिराकाशस्य प्रचंडघोरासिंहादिशब्दैर्वाय्वग्निजलानां शोषकत्वदाहकत्वप्लावकत्वैर्महद्याः स्वविकारैर्मुद्ग्ररादिभिस्तथा तेषां संघातैः सिंहव्याघ्रसर्पादिभिः सूर्यचंद्रयोस्तापहिमाभ्यां मारकत्वमस्तीति तेष्वपि क्रोधास्तिष्ठति तप इत्युपलक्षकं सांख्ययोगवैराग्यानामपि तेषामपि भक्तिपाल्यत्वाभावे क्रोधस्थानत्वं दृष्टं 'तपोदीपितमन्यवः' इत्यादिवाक्यैरत एवोक्तम् "आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यतोऽनादृतयुष्मदंघ्रयः" इति ॥ ॥ ११ ॥ ननु नामानीति नामबहुत्वस्य प्रार्थितत्वात्कथं रुद्र इत्येकमेव नाम कृतमिति चेदाह—मन्युरिति । महिनस इति । 'महेशान' इत्यपि पाठः क्वचित् । क्रतुध्वज इत्यत्र ऋतुध्वज इति च । उग्रमसह्यं रेतः कुमारलक्षणं यस्येति । तीर्थस्तु—ऊर्ध्वरेता इति पपाठ तच्च श्रुतिसिद्धं "चकार ऊर्ध्वरेतं विरूपाक्षम्" इति श्रुतेः । मरुरेता इति च पठित्वा "मरुरग्निः कृष्णवर्त्मा शुचिर्वह्निरुषर्बुधः" इति यादवकोशादाग्निवीर्य इति व्याचख्यौ ॥ १२ ॥ हे रुद्र एता रुद्राण्यस्ते स्त्रियः संति ॥ १३ ॥ तीर्थस्तु—सपोषण इति पठित्वा पुष्णात्यनया गार्हस्थधर्ममिति पोषणा भार्येति व्याचष्ट ॥ १४ ॥ गुरुणा पित्रा ब्रह्मणा ॥ १५ ॥ यूथानिति पुंस्त्वमार्षम् ॥ ॥ १६ ॥ उल्बणैर्भयंकरैः ॥ १७ ॥ केचित्तु सृष्टिस्थितिसमये रुद्रस्य लीला न भद्रायेति तपसि प्रवर्त्तना यथा पूर्वं स्रष्टेति विपरीतलक्षणया यथा पूर्वं कल्पांते विश्वं समहरस्तथा इत ऊर्ध्वमपि संहर्त्तासीत्यर्थः । क्वचित्कल्पे शिवोऽपि ब्रह्मेव प्रजाः ससर्जेति केचित् । 'सृजाम सर्वे यदनुग्रहादिदम्' इति वक्ष्यत्यपि पंचमस्कंधे शिव एव—"सृजामि तपसा विश्वं ग्रसामि तपसा पुनः । बिभर्मि तपसा विश्वं वीर्यमे दुश्चरं तपः" इत्युक्तवता भगवतापि शिवस्यैक्यं स्वेन मत्वैवेदमुक्तमित्यपरे ॥ १८ ॥ किं च । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायेन त्वत्तस्तपः शिक्षित्वान्योऽपि निस्तारिष्यतीत्याह—तपसैवेति । तप एव भगवत्साक्षात्कारहेतुरित्युक्तमनेन ॥ १९ ॥ गिरां वेदवाचां पतिम्पालकम् । हरिं परिक्रम्य ध्यात्वा मनसा अमुं ब्रह्माणमामंत्र्य पृष्ट्वा वनमत्र जलं ज्ञेयं वृक्षसमूहस्य तदानीमसंभवात् । तदुक्तं वाराहे "रुद्र प्रजाः सृजस्वेति ब्रह्मणा नोदितो मुहुः । असमर्थ इति प्रोच्य जले रुद्रोऽन्यमज्यत ॥ तपसोऽर्थे तपोहीनः कथं स्रक्ष्याम्यहं प्रजाः" इति । 'जीवनं भुवनं वनम्' इत्यमरः ॥ २० ॥ तपस्तप्त्वा रुद्र एव सृष्टिशेषं करिष्यतीति मत्वा ब्रह्मणा किं तूष्णीं स्थित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः । भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥ २२ ॥ उत्संगान्नारदो जज्ञे दक्षोंऽगुष्ठात् स्वयंभुवः ॥ प्राणाद्व सिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः ॥ २३ ॥ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोर्ऋषिः ॥ अंगिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् ॥ ॥ २४ ॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयम् ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥ २५ ॥ हृदि कामो भ्रुवः क्रोधो लोभश्चाधरद च्छदात् ॥ आस्याद्वाक् सिंधवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः ॥ २६ ॥ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् ॥ २७ ॥ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः ॥ अकामां चकमे क्षत्तः सकाम इति नः श्रुतम् ॥ २८ ॥

॥२२॥२३॥२४॥२५॥ अधरदच्छदादधरोष्ठात् ॥२६॥२७॥ देहांतरेण कृतं सर्गं वक्तुं तद्देहत्यागे कारणमाह । वाचमित्यादिना ॥२८॥

मिति चेदाह–अथेति । अथ तपोर्थे रुद्राज्ञापनानंतरं भगवतो हरेरजोमिश्रसत्त्वशक्त्या युक्तस्य ब्रह्मणः अंगेभ्य इति शेषः॥२१॥तन्नामकथनव्याजेन कर्मयोगस्यापि मरीच्यादिरूपेणाविर्भावमाह मरीचिरिति । ज्ञानवैराग्यतपोयो गकर्मणां साफल्यं भक्त्यैव तथा स्वयमपि निरपेक्षतयैव भक्तिः सर्वफलदात्री स्वयं फलरूपा चेति सर्वांते नारदरूपेण भक्तेराविर्भावमाह तत्र तेषु पुत्रेषु दशम इति ॥ २२ ॥ उत्संगात्प्रकृतिस्थानात् । उत्कृष्टसंगात्साधुसं गाद्वा । 'आपो नारा इति प्रोक्ताः' इत्याद्युक्तेर्नरपदेन परमेश्वर उच्यते नरस्येदं नारं भगवद्दास्यसख्यादिकं ददातीति नारदो भक्तियोगः त्वचि त्वचः ॥ २३ ॥ कर्णयोः कर्णाभ्याम् ॥ २४ ॥ भक्तियोगस्य कर्मयोगस्य च विहितस्यानुष्ठानाननुष्ठानाभ्यां धर्मोऽधर्मश्च भवतीति धर्मोत्पत्तिमाह–धर्मः स्तनादिति । सर्वोत्कृष्टस्थानस्य हृदयस्याप्युत्तमप्रदेशाददतिप्रियाद्धर्मस्यैव विहितस्याकरणे निषिद्धस्य करणेऽधर्मो भवतीत्यधर्मस्याप्युत्पत्तिमाह–अधर्म इति । पृष्ठतोऽपकृष्टस्थानादनतिप्रियात् । यस्मादधर्मात् मृत्युर्देहवियोगकर्तृदेवता । यत्रेति पञ्चम्यर्थे त्रल् । तेन यस्माद्धर्मात्स्वयं नारायणः कृष्ण इत्यर्थः । "कृष्णो नारायणः स्वयम्" इति तंत्रात् ॥ २५ ॥ अधर्मः कथं स्यादिति तत्प्रवर्त्तकानां कामादीनामुत्पत्तिमाह–हृदीति । हृदि मनसि 'स्वातं हृन्मानसं मनः' इत्यमरः । मनसः पुरुषानधीनत्वात्तत्प्रभवस्य कामस्योन्मूलनं दुःशकमिति द्योतयति । क्रोधादीनामपि मनस एवोत्पन्नानां भ्रूप्रभृति प्राकट्यस्थानमेवेति ध्येयम् । कामक्रोधादिमत्त्वेपि शास्त्रज्ञानमयं पांडित्यं भवत्येवेति दर्शयितुं सरस्वत्या उत्पत्तिमाह–आस्यादिति । पायोर्गुदेंद्रियात् । निर्ऋतिर्नरकाधिष्ठातृदेवविशेषो दक्षिणपश्चिमांतरालविदिगधिष्ठातृदेवो वा । अघानां दुःखानां पापानां रक्षसां वाश्रयः स्वामी ॥ २६ ॥ सदा राजसतामसस्वभाववतामपि कदाचित्किंचित्सात्त्विकभावोदयः स्यादिति दर्शयितुमाह-छायायाः कांतेः 'छाया कांतिर्द्युतिश्छविः' इत्यमरादेः। प्रभुर्योग बलसमर्थः ॥ २७ ॥ किं चात्र भगवन्महत्त्वविद्भिरसुरजनमोहनस्यापि शास्त्रविषयत्वात्तदवश्यं कार्यमिति नियममवेक्ष्यमाणस्य ब्रह्मणः कामिजनविडंबनमाह–वक्ति परबोधकवाक्यमिति वाक् मानुषी तां "जिह्वायां च सरस्वत्यां नार्यां वाचि च वाग्ध्वनिः" इति निरुक्तेः । दुह्यते प्रार्थ्यते नरैरिति दुहिता तां 'दुहिरर्दने' अर्दनं प्रार्थनं पीडनं च । 'सुतानार्योरथ गवि दुहिता प्रोच्यते बुधैः' इति । आर्षत्वाद्दुहेः प्रपूरणार्थस्येटि रूपं वा तथा च शृंगाररस दोग्ध्रीं तन्वीं सूक्ष्मांगीम् अकामामकुत्सिताम् । कामयते सर्वमिति कामाऽसाध्वी तद्भिन्नाऽकामेति सकामः कामार्त्तःसन् इति नो वार्त्तामात्रं श्रुतं हे क्षत्तः न तु तथ्यमित्यर्थः । तथात्वे 'न मे हृषीकाणि पतंत्यसत्पथे' इति तदुक्ति विरुद्धा स्यात्सा च तदीयभार्यैवं "इतीरेशेऽतर्क्य"इत्यत्र तथैव वक्ष्यमाणात्वात्पाद्मेपि स्वराशब्देन सरस्वत्येवोक्ता सावित्र्यास्तत्र पृथगुक्तेरतस्तयोः परस्परशापाद्यपि तत्र श्रूयते सप्तशतस्तोत्रपाठनिर्णये नागोजिभट्टेनोक्तं ब्रह्मणः सरस्वती विष्णोर्लक्ष्मी रुद्रस्य गौरी पत्नीत्यौत्सर्गिकीरीतिरिति । "स्वरया सह संभूय विरिंचोऽण्डमजीजनत्" इति प्राधानिकरहस्योक्तेश्च । " प्रजापतिः स्वां दुहितरमगमत्" इति श्रुतिरप्येवमेव व्याख्येया । विश्व नाथस्तु-अतिविदुषामतिविवेकिनामपि कामजयो न भवेदतः कन्याभगिन्यादिभिरपि सह रहसि न वसेदिति बोधयितुमाह–वाचमिति । इति नः श्रुतमित्यनेन तद्वक्तुमनर्हमपि तज्जयज्ञानार्थमपराधाद्बिभ्यदेवादोषद्वगेव ब्रवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमधर्मे कृतमतिं विलोक्य पितरं सुताः ॥ मरीचिमुख्या मुनयो विश्रंभात्प्रत्यबोधयन् ॥ २९ ॥ नैतत्पूर्वैः कृतं त्वद्य न करिष्यंति चापरे ॥ यत्त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः ॥ ३० ॥ तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्पते ॥ ३१ ॥ तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥ आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ॥ ३२ ॥ स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन् ॥ प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ॥ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ॥ ३३ ॥ कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् ॥ कथं स्रक्ष्याम्यहं लोकान् समवेतान् यथा पुरा ॥ ३४ ॥

॥२९॥ तत्त्वतो ये पूर्वे ब्रह्मादयोऽन्ये वा तैरेतन्न कृतम् अपरे त्वत्तोऽर्वाचीनास्तेऽपि न करिष्यंति । अंगजं कामम् ॥ ३० ॥ तेजीयसामतितेजस्विनामपि सुश्लोक्यं सत्कीर्तिदं न भवति । येषां तेजीयसां वृत्तम् ॥३१॥ ३२ ॥ तन्वं तनुम् ॥ ३३ ॥ कथं स्रक्ष्यामीत्यभिध्यायतः स्रष्टुर्ब्रह्मणश्चतुःसंख्यायुक्तान्मुखात् समवेतान्सुसंगतान् । यथा पुरा प्राक्कल्पे ॥ ३४ ॥

मीति द्योतितम् । दोषदृष्ट्या तु मरीचिपुत्राणामिवाधःपातः स्यादिति भीषणा च ज्ञेया तथा नः श्रुतमित्येतत्कल्पभवानां केषांचिद्दृष्टमप्येतन्न भवेदिति प्रसंगात्पूर्वकल्पगतमेवैतत्कर्म संप्रत्युक्तमिति भावः । चतुश्श्लोकीभागवतोपदेशप्राप्त्यनंतरमेतदघटमानात् । यदुक्तं भगवता "एतन्मतं समातिष्ठ परमेण समाधिना । भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित्" इति व्याचख्यौ ॥ २८ ॥ अधर्मे कृतमतिं पुत्रादिसमक्षं निजस्त्र्यनुगमनमप्यधर्म एवेति भावः । विस्रंभात् जन्यजनकसंबंधोत्थसख्यात् न तु पापदर्शनोत्थकोपादित्यर्थः । यद्वा। महतां विकर्मापि नापकारकमिति विश्वासात् "विस्रंभः केलिकलहे विश्वासे प्रणयेऽपि च" इति मेदिनी । एतेन मरीच्यादीनां वस्तुतोऽपराधाभाव एवोक्तः ॥ २९ ॥ पूर्वैस्त्वत्प्राक्तनैर्ब्रह्मभिः । अपरे त्वदुत्तरकालीनाः एतत्पुत्रादिसमक्षं स्त्र्यनुगमनं दुहितरं भार्यां यथाश्रुतार्थस्त्वासुरजनानां शास्त्राप्रवृत्त्यर्थमेव अन्यथा "भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित्"इति भगवदुक्तिव्याकोपस्स्यादिति भावः । प्रभुर्निरोद्धुं समर्थः ॥ ३० ॥ नन्वेकस्यैवैतादृक्कर्माकीर्त्तिकरं न बहूनामिति चेदाह—तेजीयसामिति । बहुभिरनुष्ठितमपि सुरापानादि यथा निंद्यमेव तथेदमपीति । एतेन " तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा " इत्युक्तेर्दोषाभावेऽपि निंदा भवेदेवेत्युक्तम् । जगद्गुरो इति । यत्किंचिल्लोकगुरोरेतन्न शोभते किमुत जगद्गुरोरिति कैमुत्यमाह । "अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न हि" इत्युक्तेर्लोकविद्विष्टधर्मोपेतकर्मणोऽपि निषेधो यदि किमुताधर्मोपेतकर्मण इति कैमुत्यांतरं चोक्तम् ॥ ३१ ॥ एवं प्रबोधितोपि ब्रह्मा यदा न प्राबुध्यत तदा भगवत्कृपां विना कामशातिरशक्येति सिद्धांतमपेक्ष्य ते मुनयो भगवंतमेव प्रार्थयामासुरित्याह—तस्मा इति । इदं विश्वम् ॥ ३२ ॥ स ब्रह्मा पुरोग्रे । महापातकस्य प्राणांतमेव प्रायश्चित्तं मुख्यमिति ज्ञापयितुं तनुं तत्याजेत्युक्तम् । किं च । द्विपरार्द्धमध्ये तस्य तनुत्यागासंभवात् 'द्विपरार्द्धपरायुषः' इत्युक्तेर्भावत्याग एव तनुत्याग इति ध्येयं सुधीभिः । व्रीडितो लज्जितः तां तनुं घोरां दृष्टिनिरोधकत्वादंधकारसदृशत्वेन भयदां किं तदित्यपेक्षायामाह—यन्नीहारं धूमाकारं तम इति लोका विदुः ॥ ३३ ॥ ब्रह्मणः 'तेजीयसां न दोषाय' इत्यत्रोक्तं तेजीयस्त्वं दर्शयति कदाचिदिति । यथा पुराहमसृजं तथा कथं स्रक्ष्यामीति चिंतयतः वेदेषु सर्वसृष्टिप्रकारः स्थित एवानेनायं सर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह ॥ धर्मस्य पादाश्चत्वारस्तथैवाऽऽश्रमवृत्तयः ॥ ३५ ॥ विदुर उवाच ॥ स वै विश्वसृजामीशो वेदादीन्मुखतो ऽसृजत ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ ३६ ॥ मैत्रेय उवाच ॥ ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यां स्तुति स्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥ ३७ ॥ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥ ३८ ॥

चातुर्होत्रं होत्रादीनां चतुर्णां कर्म कर्मतंत्रं यज्ञविस्तारः उपवेदैर्न्यायैश्च सह आश्रमास्तद्वृत्तयश्चासन्॥ ३५॥ मुखतो मुखेभ्यः॥ ३६॥ चातुर्होत्रसृष्टिक्रममाह। शस्त्रमप्रगीतमंत्रस्तोत्रं होतुः कर्म इज्यामध्वर्योः कर्म स्तुतिस्तोमं स्तुतिः संगीतं स्तोमं तदर्थमृक्समुदायं त्रिवृत्स्तोमो भवतीत्यादिविहितमुद्गातृप्रयोज्यम्। प्रायश्चित्तं ब्राह्मम्॥ ३७॥ उपवेदक्रममाह।

लक्ष्यतीति भगवता तन्मुखाद्वेदाविर्भावः कारित इति ॥ ३४ ॥ होता उद्गाता अध्वर्युर्ब्रह्मेति चत्वारो होतारस्तेषां चतुर्णां न्यायैरुपोद्घातग्रंथैस्तर्कसांख्यपातंजलादिमतविधायकैः सूत्रैस्सहेत्यर्थः । ब्रह्मणैव सृष्ट्वा गौतमादिभ्यस्संक्षेपत उपदिष्टानि तैस्तानि विस्तारितान्यतस्तत्तन्नाम्ना प्रसिद्धिं गतानीति भावः ॥ ३५ ॥ तपोधनेति । तपोजन्यज्ञानबलेन सर्वं वक्तुं समर्थोऽसीत्याह—यद्यद्वस्तु येनयेनास्येन यद्यदितिद्विरुक्त्याऽग्रेऽपि द्विरुक्तिरेव ज्ञेयेति ॥ ३६ ॥ अप्रगीतमिति नाममंत्रात्मकं स्तोत्रम्। इज्या यजनम् । यद्वा । क्रियमाणकर्म पुरतः क्रियमाणस्तुतिविशेषः । स्तोमः अन्यदाक्रियमाणा स्तुतिरिति । आदिनाऽन्येऽपि मंत्रा ज्ञेयाः । उद्गात्रा प्रयोज्यं पाठ्यमित्यर्थः । ब्राह्मं ब्रह्मणः कर्म क्रमात्पूर्वादिमुखक्रमेण पूर्वमुखादृग्वेदं दक्षिणमुखाद्यजुर्वेदमेवमग्रेऽपि ज्ञेयम् । वेदादीनित्यनादिनोपवेदादिग्रहः ॥ ३७ ॥ आयुर्वेदं चिकित्साशास्त्रं तच्चाष्टस्थानात्मकं सूत्रशारीरैंद्रियचिकित्सानिदानकल्पप्रासिद्धिभेदात् । स्वरूपं च सूत्रादीनां तत एवावसेयम् । धनुर्वेदं शस्त्रशास्त्रं यद्यपि धनुःशब्दश्चापे रूढस्तथापि चतुर्विधायुधेषु वर्त्तते तच्चतुर्विधं मुक्तममुक्तं मुक्तामुक्तं मंत्रमुक्तं च तत्र मुक्तं चक्रादि अमुक्तं खड्गादि मुक्तामुक्तं शल्यावांतरभेदादि मंत्रमुक्तं शरादि तत्र मंत्रमुक्तमस्त्रमन्यत्सर्वं शस्त्रमिति । गांधर्वं—गीतनृत्यवाद्यप्रकारबोधकं शास्त्रं तल्लक्षणं तु "यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रंथिश्च यो मतः । तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः ॥ वह्निमारुतसंयोगान्नादः समुपजायते । न नादेन विना गीतं न नादेन विना स्वरः ॥ न नादेन विना नृत्यं तस्मान्नादात्मकं जगत् ॥ पवनाज्जायते नादो नादतः स्वरसंभवः । स्वरात्संजायते रागः स रागो जनरंजकः॥१॥ पदस्य स्वरसंघातस्तालेनानुमितस्तथा । प्रयुक्तश्चावधानेन गांधर्वमभिधीयते ॥ सप्त स्वरास्त्रयो ग्रामा मूर्छनाश्चैकविंशतिः । द्वाविंशतिश्च श्रुतय एतेभ्यो रागसंभवः ॥ षड्जर्षभकगांधारमध्यपंचमधैवताः । निषादश्चेत्यमी सप्त तंत्रीकंठोत्थिताः स्वराः ॥ षड्जादयः स्वराः सप्त ग्रामौ षड्जमध्यमौ । केचिद्गांधारमप्याहुः स तु नेहास्ति भूतले ॥ चतुर्दशैव श्रुतयस्तावन्मानाश्च मूर्च्छनाः । गीयंते मानवैर्भूमावान्यास्तु त्रिदशालये ॥ स्वयं यो राजते नादः स स्वरः परिकीर्त्तितः।स्वरैश्च निखिलं व्याप्तं तद्विज्ञेयं पृथक्पृथक्॥उच्चैर्निषादगांधारौ नीचैर्ऋषभधैवतौ । शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः॥षड्जं वदेन्मयूरो हि ऋषभं चातको वदेत्।अजा वदति गांधारं क्रौंचो वदति मध्यमम् ॥ पुष्पसाधारणे काले कोकिलः पञ्चमं वदेत् । दर्दुरो धैवतं चैव निषादञ्च वदेद्गजः ॥ हास्यशृंगारयोः कार्यौ स्वरौ पंचममध्यमौ । षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे ॥ गांधारश्च निषादश्च कर्त्तव्यौ करुणारसे । धैवतश्चैव कर्त्तव्यो बीभत्से च भयानके॥चतुःश्रुतिस्त्रिश्रुतिश्च द्विश्रुतिश्च चतुःश्रुतिः । चतुःश्रुतिश्चत्रिश्रु द्विश्रुतिश्चेति ते स्वराः" रागास्तु "भैरवः पञ्चमो नाटो मल्लारो गौडमालवः।देशाख्यश्चेति षड्रागाः प्रोच्यंते रागवित्तमैः ॥
वंगपालो गुणकरी मध्यमादिर्वसंतकः।धन्याश्रीश्चेति पंचैते रागा भैरवसंश्रयाः॥ललिता गुर्जरी देशी वराटी रामकृत्तथा।मता रागार्णवे रागाः पञ्चैते पञ्चमाश्रयाः ॥ नटनारायणः पूर्वं गांधारः सालगस्तथा । ततः केदारकर्णाटौ पञ्चैते नाटसंश्रयाः ॥ मेवमल्लारिका माल्कौशिकः प्रतिमंजरी । आसावरी च पञ्चैते रागा मल्लारसंश्रयाः ॥ हिंदोलस्त्रिगुणाधाली गौडी कोलाहलास्तथा । पञ्चैते गौडनामानं रागमाश्रित्य संस्थिताः ॥ भौपाली हारिपालश्च कामोदी धोरणिस्तथा । वेलीवली च पञ्चैते रागा देशाख्यसंश्रयाः ॥ अन्येऽपि बहवो रागा जाता देशविशेषतः । मारूप्रभृतयो लोके ते च भद्रेशिकास्स्मृताः ॥ न रागाणां न तालानामंतः कुत्रापि विद्यते । संतोषाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति हासपुराणानि पंचमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्रेभ्यः ससृजे सर्वदर्शनः ॥ ३९ ॥ षोडश्युक्थौ पूर्ववक्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम् ॥ ४० ॥ विद्या दानं तपः सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥ ४१ ॥ सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ॥ वार्तासंचयशालीनशिलोंछ इति वै गृहे ॥ ४२ ॥ वैखानसा वालखिल्यौदुंबराः फेनपा वने ॥ न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ॥ ४३॥

आयुर्वेदमिति । आत्मनो मुखैः स्थापत्यं विश्वकर्मशास्त्रम् ॥ ३८ ॥ ३९ ॥ कर्मतंत्रक्रममाह । षोडश्युक्थाविति।पुरीषी चयनम् । अग्निष्टुदग्निष्टोमः ॥ ४० ॥ विद्येति शौचम् । "क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता" इति स्मृतेः दानमिति दया। "भूताभयप्रदानस्य कलां नार्हंति षोडशीम्" इति वचनात् । एवं च । सत्यमिति "तपः शौचं दया सत्यमिति पादाः कृते कृताः" इति प्रथमस्कंधोक्तेरविरोधः॥ ४१ ॥ब्रह्मचर्याद्याश्रमेष्वेकैकस्य चातुर्विध्यमाह । सावित्रं ब्रह्मचर्यमुपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः संवत्सरं ब्राह्मं वेदग्रहणांतं बृहन्नैष्ठिकं वार्ता अनिषिद्धकृष्यादिवृत्तिः संचयो याजनादिवृत्तिः शालीनं अयाचितवृत्तिः शिलोंछः पतितकणिशकणवृत्तिः । एकवचनमार्षम् । इत्येता गृहे वृत्तय इति । यद्वा शिलोंछ इति द्वंद्वैक्ये सप्तमी एवं वृत्तिभेदे सति गृहे स्थिता भवंतीत्यर्थः॥ ४२॥ वने स्थिताश्चत्वारः तत्र वैखानसा अकृष्टपच्यवृत्तयः वालखिल्या नवेऽन्ने लब्धे पूर्वसंचितान्नत्यागिनः औदुंबराः प्रातरुत्थाय यां दिशं प्रथमं पश्यंति तत आहृतैः फलादिभिर्जीवंतः फेनपाः स्वयं

शिवस्यैते ज्ञेया बुधजनैः" इत्यलम्पल्लवितेन किञ्चिद्दशमस्कंधेप्येतदुपयोगि वर्णयिष्यामः । विश्वकर्मशास्त्रं हर्म्यादिनिर्माणकाष्ठविकारकल्पनास्वर्णादिभूषणरीतिकांस्यादिपात्रलोहकारककृत्यकुलालकर्मचित्रनिर्माणलेखनादिकर्मणां प्रकारबोधकं शास्त्रमित्यर्थः ॥ ३८ ॥ ईश्वरः समर्थः सर्वदर्शनः सर्वज्ञः सर्वेभ्यो मुखेभ्यः सर्ववेदविवरणरूपत्वात्सर्वमुखानिस्सृतवेदानां व्याख्यानं सर्वमुखैरेव कर्तुमुचितमित्यर्थः ॥ ३९ ॥ षोडश्यादयो यज्ञविशेषसंज्ञाः तत्त्वं चैषां कल्पतोऽवसेयम् । गोसवेन सहितं सगोसवम् । क्रमात्पूर्वादिमुखेभ्यो द्वयोर्द्वयोराविर्भावो ज्ञेयः ॥ ४० ॥ विद्याशब्दस्य शौचार्थत्वे याज्ञवल्क्यस्मृतिं प्रमाणयति—क्षेत्रज्ञेति। क्षेत्रज्ञो जीव ईश्वरः । परमात्मा तयोस्तत्त्वमस्यादिमहावाक्यविचारोत्थाहं ब्रह्मास्मीति ज्ञानात् । परमा यतः पुनर्गर्भवासादेरशुचित्वापादकस्य समूलोन्मूलिनीति स्मृत्यर्थः । दानदयाशब्दयोरेकार्थत्वं जीवाभयप्रदानस्यैव दयापदार्थत्वात् । तदुक्तं 'भूताभय—' इति । इत्थं व्याख्याने पूर्वोक्तविरोधाभावमाह—एवं चेति । यथासंख्यं ब्रह्मचर्यादिक्रमेण वृत्तिभिर्भिक्षाकृष्यादिभिः सह ॥ ४१ ॥ यथासंख्यमित्यनेनाश्रमचतुष्टयभेदोपि विवक्षितस्तत्र ब्रह्मचर्य्यावांतरभेदमाह—सावित्रमिति । त्रिरात्रमिति स्वामी । तीर्थस्तु—गुरुकुले द्वादशवर्षपर्यंताध्ययनं सावित्रमाह—व्रतानि ब्रह्मचारिविहितानि कृच्छ्रादीनि गुरुसेवादीनि वा । तीर्थस्तु—एकभार्यर्तुगमनं प्राजापत्यमाह—ब्राह्मं यावद्विवाहं वेदाध्ययनं नैष्ठिकं यावज्जीवं यथोक्तधर्माचरणपूर्वकं स्त्रीसंगादित्यागरूपमेव । ब्रह्मचारिधर्मास्तु सप्तमैकादशस्कंधतोऽवसेयाः । अनिषिद्धकृषिस्तु सपत्रशाखाचालिताष्टगवकृष्टक्षेत्रे नीलीतिलादिव्यतिरिक्तशुद्धधान्योत्पादनं प्रपंचस्त्वस्य सप्तमस्कंधे भविष्यतीति । आदिनाऽनिषिद्धवाणिज्यग्रहस्तदपि तत्रैव प्रपंचयिष्यामः । याजनादीत्यत्रादिनाध्यापनादिग्रहः। कणिशो धान्यवल्ल्यादिशिलोंछा इति बहुवचनांतौचित्ये एकत्वमार्षमित्यर्थः । आर्षस्यागतिकगतित्वं मत्वाह । यद्वेति । इत्यर्थ इति—एता एव गृहस्थस्य वृत्तयः ब्रह्मणस्यैव प्रधानत्वात्तद्वृत्तिकथनमत्रान्येषां सप्तमादौ वक्ष्यति केचित्तु "वार्त्ता यायावरं ज्ञेयमैकाहित्वमसंचयः । शालीनं वत्सरान्नं स्यामित्यक्तं शिलोंछनम्" इत्याहुः ।यायावरं भैक्ष्यचर्याविशेषः । ऐकाहिकं तत्र दिनार्जितव्रीह्यादेस्तत्तद्दिन एव व्ययः । शालीनं सकुटुंबस्य संवत्सरभोजनयोग्यं कुसूलादिस्थापितान्नम् । स्वामित्यक्तं छेदनाद्यवशिष्टं व्रीहिवल्ल्यादि तेन वर्तनमित्यर्थः ॥४२॥ वानप्रस्थभेदमाह—तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः ॥ ४४ ॥ तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ॥ त्रिष्टुब्मांसात्स्नुतोऽनुष्टुप् जगत्यस्थ्नः प्रजापतेः ॥ ४५ ॥ मज्जायाः पंक्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥ स्पर्शस्तस्याऽभवज्जीवः स्वरो देह उदाहृतः ॥ ४६ ॥ ऊष्माणमिंद्रियाण्याहुरंतःस्था बलमात्मनः ॥ स्वराः सप्त विहारेण भवंति स्म प्रजापतेः ॥ ४७ ॥

पतितैः फलादिभिर्जीवंतः कुटीचकः स्वाश्रमकर्मप्रधानः बह्वोदः कर्मोपसर्जनीकृत्य ज्ञानप्रधानः हंसो ज्ञानाभ्यासनिष्ठः निष्क्रियः प्राप्ततत्त्वः एते च सर्वे यथोत्तरं श्रेष्ठाः ॥ ४३ ॥ न्यायादीनां पूर्वादिक्रमेणोत्पत्तिमाह। आन्वीक्षिकीति आन्वीक्षिक्याद्या मोक्षधर्मकामार्थविद्या भूर्भुवरिति व्यस्तास्तिस्रः समस्ता चतुर्थी । यथाहाश्वलायनः । एवं व्याहृतयः प्रोक्ता व्यस्ता समस्ता इति । यद्वा मह इति चतुर्थी । तथा च श्रुतिः । "भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयस्तासामु ह स्मैतां चतुर्थीमाह । वाचमस्य प्रवेदयते मह" इति । दह्रतः हृदयाकाशात॥ ४४ ॥ स्नुतः स्नायुतः । "अनुष्टुप् स्नावानि" इति श्रुतेः॥ ४५॥ महाकल्पे ब्रह्मा शब्दरूपोऽभवदित्युक्तं तदेव दर्शयन् वर्णानामुत्पत्तिमाह । स्पर्श इति सार्धेन । स्पर्शः कादिवर्गपंचकम् । स्वरोऽकारादिः ॥ ४६ ॥ ऊष्माणं शषसहचतुष्कम् । अंतस्था यरलवाः । सप्तस्वराः षड्जादयः । विहारेण क्रीडया ॥४७॥

चतुर्षु अकृष्टपच्यं हलानाकृष्टभूम्युद्भूतमन्नादि तेन वृत्तिर्येषां ते तथा आहृतैरानीतैः । तीर्थस्तु "वैखानसा मूलभक्षाः फलभक्षा उदुंबराः । वालखिल्याः सर्वभक्षाः फेनपा वत्सफेनपाः" इति व्याचष्ट । वत्समुखगलितपयः फेनपानेन जीवंत इत्यर्थः । एवं न्यासे संन्यासे चत्वारो भेदाः कुटीचक इति यस्तु यात्राद्यशक्त एकस्मिन्नेव तीर्थे वसन्प्रत्यहं द्वादशसहस्रप्रणवं जपन् यथोक्तकाले भैक्ष्यमाहरन् कुट्यां पर्णशालायां चकास्ति ब्रह्मध्यानेन स कुटीचकः । स्वामिचरणैरप्ययमेवार्थ उक्तः । स्वाश्रमकर्मेति । यस्तु तीर्थयात्रासु शक्तो ग्रामे एकरात्रं नगरे त्रिरात्रं तीर्थे सप्तरात्रं वसंस्त्रिकालस्नायी माधुकरीं वृत्तिमाश्रितो निजाश्रमधर्मरतः प्रणवमनुस्मरन्दंडादिकं परिगृह्य तीर्थात्तीर्थांतरं व्रजति बहून्युदकानि तीर्थजलानि यस्य स बहूदकः । स्वामिचरणैरप्ययमर्थ एव सर्वत्रानासक्त्या प्रणवार्थस्मरणेन च ध्वनितः । कर्मोपसर्जनीत्यादिना उपसर्जनीकृत्य गुणीकृत्य । तृतीयमाह—यस्तु यथा जात स्तथा रूपधरो निर्द्वंद्वो निष्परिग्रहो ब्रह्मध्याननिष्ठश्चतुर्थभूमिकारूढो भवति स हंसः । तथैव स्वामिचरणैरप्युक्तं ज्ञानाभ्यासनिष्ठ इति । यस्तु दंडकौपीनविधिनिषेधहीनः सप्तमभूमिकारूढो ध्यातृध्येयविभागरहितो ब्रह्मानंदे लीनवृत्तित्वाच्छरीरमपि नानुसंधत्ते स परमहंसः एतदुक्तानुरोधेनैव स्वामिनोक्तः प्राप्ततत्त्व इति सप्तभूमिकास्तु नित्यानित्यवस्तुविवेकादिपुरःसराः । फलपर्यवसायिनी मोक्षेच्छाख्या प्रथमा १, ततो गुरुवाक्यतो वेदांतविचारः श्रवणमननात्मको द्वितीया विचारणाख्या २, ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं तनुमानसाख्या तृतीया ३, ततो वेदांतवाक्यान्निर्विकल्पको ब्रह्मात्मैक्यसाक्षात्काररूपश्चतुर्थी सत्वापत्याख्या ४ सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्विकल्पकसमाध्यवस्था संसक्त्याख्या पंचमी ५, तत्तदभ्यासपरिपाकेन चिरकालावस्थायिनी या सा पदार्थाभाविनी षष्ठी ६, गूढसुषुप्तिश्च सर्वदान्यैः परिपोष्यमाणः सच्चिदानंदे कनिष्ठो यदा तिष्ठति तदा तुर्यगाख्या सप्तमीति सप्तज्ञानभूमिकाः ॥ ४३ ॥ व्यस्ता भिन्नाः व्याहृतिचतुष्के प्रमाणमाह यथाहेति । आश्वलायनऋषिर्वेदव्याख्याकर्त्ता चतुर्थ्या व्याहृतेर्वैलक्षण्याभावादर्थांतरमाह—यद्वेति । मह इत्यस्याश्चतुर्थीत्वे श्रुतिं प्रमाणयति तथा चेति । तासां तिसृणां मध्ये चतुर्थीमेतां वक्ष्यमाणां महेति वितर्केऽव्ययम् चमस्य ऋषिरित्याप्रवेदयते स्म वक्ति स्मेति किं मह इति।यद्वा।मह इत्येतामाप्रवेदयते स्मेति संबंधः 'सुरवर्त्मखम्' इत्यमरः ॥४४॥ तस्य ब्रह्मणः स्नायुतः सर्वांगव्यापिनाडीमंडलात् । स्नुतोऽनुष्टुबुत्पत्तौ श्रुतिमाह अनुष्टुबिति स्नुतो भवतीति स्नावान् आर्षत्वान्मतुपि वृद्धिरिति श्रुतिपदार्थः । गायत्री षडक्षरा छंदोजातिः उष्णिक्सप्ताक्षरा अनुष्टुबष्टाक्षरा त्रिष्टुप् एकादशाक्षरा जगती द्वादशाक्षरा अनुष्टुप् श्रुतिरुपलक्षणभूतान्यासामुष्णिगादिश्रुतीनां लोकेऽनुष्टुभोतिप्रासिद्धत्वात्तत्रैव सोक्तेति ॥ ४५ ॥ मज्जास्थ्यंतर्गतस्नेहविशेषः । पंक्तिर्दशाक्षरा छंदोजातिर्बृहती नवाक्षरा प्राणतः प्राणादिपंचकात् । शब्दरूपः शब्दात्मकदेहः महाकल्पे यावद्ब्रह्मस्थितिस्तावत्पर्यंतं सर्वदेत्यर्थ इत्युक्तं श्रुतौ तदेव श्रुत्युक्तशब्दरूपत्वमेव। केचित्तु महाकल्पे 'ब्रह्मा शब्दरूपोऽभवत' इदमेव वाक्यं श्रुतिमाहुः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शब्दब्रह्मात्मनस्तात व्यक्ताव्यक्तात्मनः परः ॥ ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ॥ ४८ ॥ ततोऽपरामुपादाय संसर्गाय मनो दधे ॥ ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतम् ॥४९॥ ज्ञात्वा तद्धृद्ये भूयश्चिंतयामास कौरव ॥ अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ ॥ ५० ॥ न ह्येधंते प्रजा नूनं दैवमत्र विघातकम् ॥ एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा ॥ ५१ ॥ कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥ ५२ ॥ यस्तु तत्र पुमान् सोऽभून्मनुः स्वायंभुवः स्वराट् ॥ स्त्री याऽऽसीच्छतरूपाख्या महिष्यस्य महात्मनः ॥ ५३ ॥ तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे ॥ स चापि शतरूपायां पंचापत्यान्यजीजनत् ॥ ५४ ॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ॥ ५५ ॥

अत एव शब्दतनुत्वाद्ब्रह्मणः परमेश्वरो नित्यं प्रकाशत इत्याह । व्यक्ता वैखरी अव्यक्तः प्रणवः तदात्मनस्तस्य ब्रह्मणः परः परमेश्वरः अवभाति । कीदृशः । ब्रह्मपरिपूर्णः तत्राव्यक्तात्मनो ब्रह्मरूपो विततोऽवभाति व्यक्तात्मनो नानाशक्त्युपबृंहित इंद्रादिरूपोऽवभाति ॥ ४८ ॥ या पूर्वं विसृष्टा सती नीहारं ततोऽभवत् ततोऽपरामनिषिद्धकामासक्तां तनुम् । शब्दब्रह्मतनुस्तु सदाऽस्त्येव । तन्वंतरग्रहणे कारणमाह । ऋषीणामित्यादिना ॥ ४९ ॥ ५० ॥ युक्तकृतः यथोचितं कुर्वतः ॥ ५१ ॥ अत एव कस्य ब्रह्मण इदं द्विधाभूतमित्याश्चर्यात्कायमद्याप्यभिचक्षते ॥ ५२ ॥ मिथुनं स्त्री पुंसौ या स्त्री साऽस्य महिष्यासीत् ॥ ५३ ॥ एधांबभूविरे वृद्धिं प्राप्ताः । तदेवाह । स चापीति

क आदिर्यस्य चटतपवर्णचतुष्टस्य तत्कादिवर्गाणां पंचकं वर्गपंचकं कादि च तद्वर्गपंचकं कादिवर्गपंचकम् । वर्गसंज्ञा तु कुचुटुतुपुवर्ग इति व्याकरणे विहिता ज्ञेया । सूत्रेपिकादिस्थोकारः पञ्चवर्णग्रहणार्थ एव तस्यैव योग्यत्वात्तदुक्तं भर्तृहरिणा "अकारात्पञ्चमो वर्णस्तमाहुः पंचकग्रहम् । उकारस्तत्र विख्यातो नान्यो भवितुमर्हति॥" इति । अन्यथा कचटतपावर्ग इति ब्रूयादित्यलम् । अकारादिः षोडशसंख्याको मातृकोक्तः ॥ ४६ ॥ ४७ ॥ अत एव सर्ववर्णादुद्भवस्थानत्वादेव । तत्रोभयरूपयोर्मध्ये । अव्यक्तात्मनः प्रणवरूपस्य ब्रह्मणः स्वरूपत्वात्प्रगवस्य विस्तारेण भानमुचितमेत्र तच्च प्रणवशब्दवाच्यं 'ब्रह्माहमस्मि' इत्येवं रूपमेवेति । व्यक्तात्मनो वैखरीरूपस्य वर्णसमुदायरूपत्वाद्वैखर्यास्तत्रत्यतत्तद्वर्णवाच्यतत्तदिंद्रादिदेवरूपेणाभातीत्यर्थः । एतेन प्रणववैखरीरूपाद्वेदाद्ब्रह्मणः परमेश्वर एवोपास्यत्वेन ज्ञेयत्वेन च प्रतीयते न त्वन्यदिति । स च स्वरूपत एकोपि परमात्मा शक्त्या नानात्मको जात इत्येवं रूपेति भावः ॥ ४८ ॥ ततस्तस्याः । ननु तेन पूर्वं सृष्टा मरीच्यादय एव बहुतराः प्रजाः सृजंति तत्र तत्प्रयत्नेनालमिति चेत्तत्राह—ऋषीणमिति।तपोयोगाद्याविष्टचेतस्त्वात्ततः सृष्टिवृद्धिर्न जातेति भावः ॥४९॥ तद्वृद्धये सर्गवृद्धये । कौरवेति।शुद्धवंशोद्भूतत्वात्तुभ्यमेतदाख्यानं ब्रवीमीत्यभिप्राया संबुद्धिः।व्यापृतस्य प्रयतमानस्यापि ॥ ५० ॥ अत्र प्रजाया अवृद्धौ दैवं जीवादृष्टम् ॥५१॥ यतो द्विधा भूतमत एव अत्र प्रमाणं च ।"स इममेवात्मानं द्विधाऽपातयत्ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्द्धयुगलमिव स्व"इति श्रुतेः । कसंबंधित्वात्कायमिति कशब्दाण्ण्यप्रत्यये 'लोपाद्वृद्धिर्बलीयसी'इति न्यायेन लोपं बाधित्वा वृद्धौ संत्यां रूपसिद्धेः । तदेव स्फुटयति रूपस्य देहस्य विभागाभ्यां "रूपं देहे स्वभावे च सौंदर्यपशुवृंदयोः" । इति कोशात् । मिथुनं श्मश्रुयुक्तमेकं कुचद्वययुक्तमेकमेत्रं द्वंद्वमभूत् ॥ ५२ ॥ तत्र मिथुने स्वराट् चक्रवर्ती अस्य स्वायंभुवस्य ॥५३॥ तदा तत्प्रभृति मिथुनयोः स्त्रीपुंसयोर्धर्मेण सुरतेन । तदेव प्रजावर्द्धनमेत्र । कन्याया अपि दौहित्रद्वारा नरकपातनिरोधकत्वादपत्यत्वमित्याह—पंचापत्यानीति॥५४॥ प्रियं व्रतं भगवदुपासनालक्षणं यस्य स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमाम् ॥ दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ॥ ५६ ॥ इति श्रीभा० तृती० मनुसर्गवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥ विदुर उवाच ॥ स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥ २ ॥ चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ॥ ३ ॥ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोऽर्थः ॥ यत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषाम् ॥ ४ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानम् ॥ प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥ ५ ॥

सः मनुः ॥ ५४ ॥ ५५ ॥ यतः यासां संततिभिः ॥ ५६ ॥ इति तृतीये टीकायां द्वादशोऽध्यायः ॥ १२ ॥ त्रयोदशे सिसृक्षायां मनोराकस्मिकाप्लुताम् ॥ धरामुद्धर्तुमुद्भूतात्क्रोडाद्दैत्यानुसूदनम् ॥ १ ॥ १ ॥ स्वयंभुवः पुत्रस्तद्देहांशत्वात् सः ॥ २ ॥ विष्वक्सेनो हरिरेवाश्रयो यस्य सः ॥ ३ ॥ अतस्तस्य चरितं श्रोतव्यमित्याह । सुचिरं श्रमो यस्मिंस्तस्य पुंसां श्रुतस्यांजसा मुख्यत्वेनायमेवार्थ ईडितः स्तुतः । ननु मुकुंदपादारविंदं येषां हृदयेष्वस्ति तेषां भागवतानां गुणानुश्रवणम् ॥४॥ सहस्रशीर्षा श्रीकृष्णस्तस्य चरणावुपधीयेते यस्मिन् । श्रीकृष्णः प्रीत्या यस्योत्संगे चरणौ प्रसारयतीत्यर्थः । तमभ्यचष्ट अभ्यभाषत । मुनिर्मैत्रेयः प्रणीयमानस्तेन प्रवर्त्यमानः ॥ ५ ॥

प्रियव्रतः । पद्यते स्वर्गमनेनेति पादः संततिः उत्तान उत्कृष्टविस्तारवान्पादः संतातिर्ध्रुवरूपो यस्य स तथा। यद्वा । उद्ग्रतस्तानो याम्यां तावुत्तानौ ह्रस्वौ पादौ यस्य स तथा "ह्रस्वौ पादौ महासौख्यसंपत्संतानदायकौ" इत्यंगशास्त्रात् । भारतेति श्रवणार्हतामाह । आसमंतात्कूयते कथ्यते प्रदानकाले जामाता यस्याः साऽऽकूतिः । "अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति" इत्युक्तेः। देवेन विष्णुना हूयते दीयते तत्त्वज्ञानमस्या इति देवहूतिः। यद्वा देवेन ब्रह्मणा हूयते बोध्यते या सा तथा "एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः" इत्युक्तेः। प्रकृष्टा सूतिः संततिर्यस्याः सा प्रसूतिः। रुचये ब्रह्मपुत्राय "मानसश्च रुचिर्नाम विज्ञेयो ब्रह्मणः सुतः" इति वायुपुराणे नवमाध्यायोक्तेः ॥ ५५ ॥ मध्यमां देवहूतिम् । यतो याभिः ॥ ५६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे द्वादशोऽध्यायः ॥१२॥ आकस्मिकाप्लुतां विनैव मज्जनकारणं बुडिताम् । क्रोडाद्वराहात् । "क्रोडः शनौ शूकरे ना न पुमानंकरक्षसोः" इति मेदिनी (॥१॥) कौरव्यो विदुरः आदातिरस्यास्तीत्यादृतः सादरः अर्शआदित्वादच् । वासुदेवकथायामादृतस्तथा । यद्वा । कथयैव कर्त्र्याऽऽदृतः मन्माधुर्यमेतत्कर्तृकास्वादात्सार्थकं भवत्वित्यादृतः । यद्वा कथायां श्रोतृभिर्वक्तृभिश्चादृत इत्यर्थः ॥१॥ स्वयंभुवो ब्रह्मणः पुत्रस्य स्वभावतः प्रियत्वेपि पुनः प्रियपदोपादानं तस्य साक्षात्स्वदेहभागत्वादातिप्रियत्वबोधनार्थम् । मुने इति त्रिकालदर्शितामाह ॥२॥ तस्य स्वायंभुवस्य राज्ञामादिरादिराजो राजदंतादिवत्समासः। यद्वादिश्चासौ राजा चेत्यादिराजः।हि यतोऽसौ स्वायंभुवः विष्वक्सेनाश्रयोऽस्तीति स्वायंभुवकथाया विष्वक्सेनकथाऽविनाभूतत्वात्तत्कथायां विष्वक्सेनकथैव श्रुता स्यादिति भावः विष्वक् चतुर्दशभुवनेषु सेना भक्तलक्षणा यस्येति तथा ॥३॥ यतोसौ विष्वक्सेनाश्रयोऽतो हेतोः तस्य मनोः श्रुतस्य गुरुमुखादधीतशास्त्रादेः अर्थो मुख्यप्रयोजनं स च क इत्यपेक्षायाम् आह।ननु निश्चयेन विष्णुभक्तजनकथाश्रवणं विना विदुषामपि विद्यानिष्फलेति भावः॥४॥सहस्राणामनंतसंख्याकप्रादुर्भावानां शीर्ष्णः श्रेष्ठतमस्य श्रीकृष्णस्येत्यर्थः। विदुरशंकापनोदार्थं विदुरगृहे श्रीकृष्णःसहस्रशीर्षाऽभूदिति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः ॥ प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ॥६॥ त्वमेकः सर्वभूतानां जन्मकृद्वृत्तिदः पिता ॥ अथाऽपि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥ ७ ॥ तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु ॥ यत्कृत्वेह यशो विष्वगमुत्र च भवेद्गतिः ॥ ८ ॥ ब्रह्मोवाच ॥ प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर ॥ यन्निर्व्यलीकेन हृदा शाधि मेत्यात्मनाऽर्पितम् ॥ ९ ॥ एतावत्याऽऽत्मजैर्वीर कार्या ह्यपचितिर्गुरौ ॥ शक्त्याऽप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥ १० ॥ स त्वमस्यामपत्यानि सदृशान्यात्मनो गुणैः ॥ उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ॥ ११ ॥ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप ॥ भगवांस्ते प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति ॥ १२ ॥ येषां न तुष्टो भगवान् यज्ञलिंगो जनार्दनः ॥ तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयम् ॥ १३ ॥ मनुरुवाच ॥ आदेशेऽहं भगवतो वर्तेयाऽमीवसूदन॥ स्थानं त्विहानुजानीहि प्रजानां मम च प्रभो॥१४॥यदोकः सर्वसत्त्वानां मही मग्ना महांभसि ॥ अस्या उद्धरणे यत्नो देव देव्या विधीयताम्॥१५॥

वेदगर्भं ब्रह्माणम् ॥ ६ ॥ त्वमेवैकः पिता सर्वेषां यतो जन्मकृत् वृत्तिदः पोषकश्च त्वमेव अतस्तव यद्यप्यन्यापेक्षा नास्त्यथाप्यस्माकं ते शुश्रूषा केन कर्मणा भवेत्तद्विधेहीत्युत्तरेणान्वयः ॥ ७ ॥ हे ईड्य आत्मशक्तिष्वस्मच्छक्येषु कर्मसु मध्ये केन कर्मणा भवेत्तद्विधेहीदं कर्तव्यमिति कथय । यत्कृत्वा यस्मिन् कृते सति । विष्वक् सर्वतः । अमुत्र परलोके ॥ ८ ॥ वां युवाभ्यां स्वस्ति भद्रं स्तात् भूयात् । यद्यतो मा मां शाध्यनुशिक्षयेति आत्मना स्वयमेवार्पितं निवेदितमतः प्रीतोऽस्मि ॥ ९ ॥ अपचितिः पूजा गृह्येत आज्ञेति शेषः । सनकादयो न कुर्वंति वयं किमिति करिष्याम इत्येवंभूतो गतो मत्सरो येभ्यः ॥ १० ॥ गां शास शाधि पालयेत्यर्थः । पुरुषं हरिम् ॥ ११ ॥ प्रजापालकस्य ते तुष्टो भविष्यति ॥ १२ ॥ यज्ञलिंगो यज्ञमूर्तिः । अपगतोऽर्थो यस्मात् केवलं श्रमायैवेत्यर्थः । यद्यस्मादात्मैव स्वयं नादृतः तस्मिन्नतुष्टे स्वार्थस्यैवासिद्धेः सर्वात्मत्वाच्च तस्य ॥ १३ ॥ वर्तेय वर्तिष्ये । अमीवसूदन पापनाशन । अनुजानीह्यत्र स्थातव्यमित्यनुज्ञां देहि ॥ १४ ॥ महीति चेदत आह । यदोकः

तत्र च भोजनं कृत्वा विदुरोत्संगे चरणौ कृत्वा सुष्वापेति महाभारतादवसेयम् । इत्यर्थ इति । अतिप्रियत्वबोधनार्थं तदुत्संगे पादौ प्रसारितवानिति भावः । मुनिर्मैत्रेयः ॥ ५ ॥ इदं वक्ष्यमाणं वचः ॥ ६ ॥ अतो जन्मवृत्तिकृत्त्वात् ॥ ७ ॥ ममेति शेषः । गतिः स्वर्गादिरूपा । तदकरणे पुत्रस्येह निंदा परत्र नरकादिश्च भवेदित्यर्थः । अत एव । ''सर्वार्थसंभवो देहो जनितः पोषितो यतः । तयोर्न याति निर्वेशं पित्रोर्मर्त्यः शतायुषा'' इति । श्रीकृष्णबलदेवौ वक्ष्यतो दशमे ॥ ८ ॥ क्षितीश्वरेत्यामंत्रणेन तव वासार्थं भुव उद्धारो भविष्यतीति सूचितम् । स्वयमेव परप्रेरणां विनैव । विशेष्यपदानुक्त्याऽहंतास्पदममतास्पदादिकं सर्वमेवनिवेदितमित्यर्थः । निर्व्यलीकेन निष्कपटेन ॥ ९ ॥ ''भवेदपचितिः पूजा व्ययनिष्कृतिहानिषु'' इति मेदिनी ॥ १० ॥ गां भुवम् । 'भूमौ पशौ च गोशब्दः' इत्यनेकार्थमंजर्युक्तेः । इत्यर्थ इति । पालनस्यैव शासनपदार्थत्वादिति भावः ॥ ११ ॥ मह्यं मम नृपेति रक्षाधिकारसूचनायोक्तम् ॥ १२ ॥ यद्वा । यज्ञैर्यजनैरर्चनश्रवणकीर्तनाद्यैरेव लिंग्यते ज्ञायत इति परमात्मानादरे स्वस्यैवानादृतत्वात् । ''यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः'' इत्युक्तेः ॥ १३ ॥ 'अमीवं पापरोगयोः' इति हलधरः । अत्र स्थातव्यमित्यमनुज्ञां देहीति । तथा च प्रजाः सृजेत्याज्ञप्तो मनुः प्रजाः ससर्ज यदा धराप्लावेन सर्गविघ्नो जातस्तदागत्यो वाचेति ज्ञेयम् । तात्कालिकतदुक्तिस्वीकारे मनुकन्यादेवहूतिसुतायां मरीचेर्जातात्कश्यपाज्जातस्य दैत्यस्य धरोद्धारे वराहकृतसंहारो न घटेतेति ॥ १४ ॥ ननु पूर्वपूर्वकल्पे मनवः सप्रजाः कुत्रासन्निति त्वं शास्त्रज्ञत्वाज्जानासि

मैत्रेय उवाच ॥ परमेष्ठी त्वपां मध्ये तथाऽऽसन्नामवेक्ष्य गाम् ॥ कथमेनां समुन्नेष्य इति दध्यौ धिया चिरम् ॥ १६ ॥ सृजतो मे क्षितिर्वार्भिः प्लाव्यमाना रसां गता ॥ अथाऽत्र किमनुष्ठेयमस्माभिः सर्गयोजितैः ॥ १७ ॥ यस्याऽहं हृदयादासं स ईशो विदधातु मे ॥ इत्यभिध्यायतो नासाविवरात्सहसाऽनघ ॥ वराहतोको निरगादंगुष्ठपरिमाणकः ॥ १८ ॥ तस्याभिपश्यतः खस्थः क्षणेन किल भारत ॥ गजमात्रः प्रववृधे तदद्भुतमभून्महत् ॥१९॥ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह ॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥ २० ॥ किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितम् ॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतम् ॥ २१ ॥ दृष्टोंऽगुष्ठशिरोमात्रः क्षणाद्गंडशिलासमः ॥ अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥ २२ ॥ इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः ॥ भगवान्यज्ञपुरुषो जगर्जागेंद्रसन्निभः ॥ २३ ॥ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् ॥ स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥२४॥ निशम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपः सत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म ॥ २५ ॥

स्थानं सा मही । हे देव । अस्या देव्याः ॥ १५ ॥ पूर्वं पाने कृतेऽपि पुनरकांड एवोद्धतानामपां मध्ये सन्नामवसन्नां निमग्नाम् । समुन्नेष्ये उद्धरिष्यामि ॥ १६ ॥ चिंतामेवाह । सृजतः सतः । वार्भिरद्भिः रसां रसातलम् । ईश्वरेण सर्गे नियुक्तैः मेऽनुष्ठेयं स एव विदधातु संपादयतु ॥ १७ ॥ वराहतोकः सूक्ष्मो वराहः ॥१८॥ खस्थ आकाशे स्थितः सन् ॥ १९ ॥ चित्रधा अनेकधा ॥ २० ॥ २१ ॥ पूर्वमंगुष्ठाग्रप्रमाणो दृष्टः । गंडशिला स्थूलपाषाणस्तत्समः । यज्ञो विष्णुः । निजरूपतिरोधानेन मे मनः खेदयन् ॥ २२ ॥ इति मीमांसमानस्य सतः । जगर्जागर्जत् । गिरींद्रतुल्यः ॥ २३ ॥ गर्जनप्रयोजनमाह । ब्रह्माणमिति ॥ २४ ॥ घर्घरितं तज्जात्यनुकरणध्वनिम् । अनिश्चयेन यः स्वखेदस्तस्य क्षयिष्णु क्षपयिष्णु नाशकम् । ते इति पुनरुक्तिः प्रसिद्धिख्यापनार्था । त्रिभिः पवित्रैर्ऋग्यजुःसाममंत्रैरगृणन्नस्तुवन् ॥ २५ ॥

न वेति चेत्सत्यं जानाम्येवेत्याह—यदोक इति । यदोक इत्यादिकं पाद्मप्रसंगे ब्राह्मकथासूचनवत् वर्तमानकल्पजश्वेतवाराहकथासूचनं ज्ञेयम् । यत्रैव स्वायंभुवप्रसंगे प्राचेतसदक्षदौहित्रहिरण्याक्षवधरूपा चाक्षुषकथापि भविष्यति । अत्र तु श्यामतयाऽविर्भूत इति वक्ष्यति 'तमालनीलम्' इति महांभसि गर्भोदके । अस्या मह्याः ॥ १९ ॥ अकांडेऽनवसरे ॥ १६ ॥ प्लाव्यमाना चंचली क्रियमाणा । रसातलं रसातलोपलक्षितं गर्भोदं गतेत्यर्थः । रसातलस्य भूविवरत्वात्तत्र भुवो मज्जनानुपपत्तेः ॥ १७ ॥ 'तोकं पुत्राल्पयोरपि' इति कोशात् । निरगादित्युक्तेर्न पुत्रत्वादिव्यवहारस्तत्त्वे तु प्रासूताभवदित्यादि ब्रूयादिति भावः । परिमाणत इति । प्रथमार्थे तसिः वराहचारितस्य सर्वाघहारित्वेन तदाकर्णनेच्छुं नृपमाहानघेति ॥ १८ ॥ तस्य ब्रह्मणः तत्तस्य वर्द्धनम् ॥ १९ ॥ तर्कयामास विचारयामास ॥ २० ॥ सूकर एव सौकरस्तस्य व्याजोऽपदेशो यस्येति तत्सौकरव्याजं सत्त्वं जीवः । ''सत्त्वं जीवे गुणे धैर्ये' इति धरणिः ॥ २१ ॥ ''गलिताः स्थूलपाषाणा गंडशैला इति स्मृताः'' इति । ''यज्ञो वै विष्णुः'' इति श्रुतेः ॥ २२ ॥ अगेंद्रो महागिरिर्वा नीलपर्वतः । सूनुभिर्मरीच्यादिभिः ॥ २३ ॥ प्रतिस्वनयता प्रतिध्वनिमतीः कुर्वता ॥ २४ ॥ मायामयः कृपामयो ज्ञानमयो वा मायाया अविद्याया आमयो रोगो यस्मादिति वा स चासौ सूकरस्तस्य ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां सतां वेदवितानमूर्तिर्ब्रह्माऽवधार्यात्मगुणानुवादम् ॥ विनद्य भूयो विबुधोदयाय गजेंद्रलीलो जलमाविवेश ॥ २६ ॥ उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् खररोमशत्वक् ॥ खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः ॥ २७ ॥ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्वरांगः ॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशत्कम् ॥ २८ ॥ स वज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पाहि मेति ॥ २९ ॥ खुरैः क्षुरप्रैर्दरयंस्तदाऽप उत्पारपारं त्रिपरू रसायाम् ॥ ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ॥ ३० ॥

वेदैर्वितन्यते स्तूयते मूर्तिर्यस्य सः अत एवात्मनो गुणाननुवदति तथा तत्तेषां ब्रह्म उच्चारितं वेदमवधार्य ज्ञात्वा॥ २६ ॥ कथंभूतः सन्नाविवेशेत्यपेक्षायामाह । द्वाभ्याम् । उच्चैः क्षिप्तो वालः पुच्छं येन । खचर आकाशचारी । कठोरः कठिनः । सटाः स्कंधवालान् खराणि तीक्ष्णानि रोमाणि यस्याः सा त्वग्यस्य । खुरैराहतान्यभ्राणि येन । सितदंष्ट्रोऽतिशुक्लदंष्ट्रः ईक्षा निरीक्षणमेव ज्योतिरालोको यस्य । तदा प्रकाशांतराभावात् बभासेऽशोभत महीध्रः पृथिव्या उद्धर्ता ॥ २७ ॥ क्रोडापदेशो वराहच्छद्मा अतः स्वयमध्वरांगोऽपि पशुरिव घ्राणेन विजिघ्रन् गृणतः स्तोतॄन्विप्रानुद्वीक्ष्योर्ध्वं वीक्ष्य कं जलमाविशत् ॥ २८ ॥ तदानींतनसमुद्रध्वनिमुत्प्रेक्षते । स उदन्वान्समुद्र आर्त इव स्तनयन् शब्दं कुर्वन्भो यज्ञेश्वर मा मां पाहि मामवेत्येवं चुक्रोश । आर्तसादृश्यमाह । उत्सृष्टाः प्रसारिता दीर्घा ऊर्मय एव भुजास्तैर्विशिष्टः । आर्तत्वे हेतुः । वज्रकूटो वज्रमयः पर्वतस्तद्वदंगं यद्भगवतस्तस्य निपातवेगेन विशीर्णा कुक्षिर्यस्य ॥ २९ ॥ तदा रसायां रसातले गां पृथ्वीं ददर्श । कः त्रिपरुर्त्रीणि परूंषि सवनात्मकानि पर्वाणि यस्य । यज्ञमूर्तिरित्यर्थः । किं कुर्वन् । क्षुरप्रा आयताग्राः शरास्तत्सदृशैः खुरैरपो दरयन् । कथम् । उत्पारपारं उत्पाराणां पारशून्यानामप्यपां पारमवसानं यथा भवति तथा विदारयन् । कथंभतः । अग्रे प्रलयसमये तत्र तास्वप्सु सुषुप्सुः शिशयिषुः सन् जीवा धीयंते यस्यां सर्वजीवाधारभूतां यां स्वयमभ्यधत्ताभिमुख्येन दधार । जठरे धृतवानित्यर्थः ।

। यद्वा । वेदानां भगवन्निःश्वासरूपत्वात् भगवन्निःश्वासस्यैव लीलया ब्रह्मनासाप्रविष्टस्यसूकररूपत्वेनाविर्भावः । वस्तुतो ब्रह्मापि विष्णुरेव "तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम्" इत्युक्तेस्तन्निःश्वासोऽपि विष्णुनिःश्वास एवेत्यर्थः । अत एव वेदस्तुतमूर्त्तित्वादेव ।।२६।।२७।। वराहच्छद्मेति । "स्तनापदेशं फलयुग्ममेवं धत्ते मुहुः कांचनवल्लरीव" इतिवदपह्नुत्यलंकारेण क्रोडापदेशस्यैव वास्तवत्वं प्रत्याय्यते "प्रकृतं यन्निषिध्यान्यत्स्थाप्यते स्यादपह्नुतिः" इति लक्षणात्।।२८।।आर्त्तो यथा करौ प्रसार्य क्रोशति तद्वदित्यर्थः।।२९।।तदा समुद्रप्रार्थनावसरे । रसातले तदुपलक्षिते गर्भोदके अतलादीनां सप्तानामेव भूविवरत्वेन पृथिवीत्वाद्रसातले तस्याः स्थित्यसंभवात् । तदुक्तं विष्णुधर्मे "पातालमूलेश्वरभोगसंहतौ विन्यस्य पादौ पृथिवीञ्च बिभ्रतः । यस्योपमानं न बभूव सोच्युतो ममास्तु मांगल्यविवृद्धये हरिः" इति । वक्ष्यत्यपि 'सलिले स्वखुराक्रांते' इत्यर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वदंष्ट्रयोद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः ॥ तत्रापि दैत्यं गदया पतंतं सुनाभसं दीपिततीव्रमन्युः ॥ ३१ ॥ जघान रुंधानमसह्य
विक्रमं सलीलयेभं मृगराडिवांऽभसि ॥ तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जगतीं विभिंदन् ॥ ३२ ॥ तमालनीलं सितदंतकोट्या क्ष्मामु
त्क्षिपंतं गजलीलयांग ॥ प्रज्ञाय बद्धांजलयोऽनुवाकैर्विरिंचिमुख्या उपतस्थुरीशम् ॥ ३३ ॥ ऋषय ऊचुः॥जितंजितं तेऽजित यज्ञभावन त्रयीं
तनूं स्वां परिधुन्वते नमः ॥ यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ॥ ३४ ॥

अनेन तदुद्धरणेऽनायासं द्योतयति ।। ३० ।। रसायाः सकाशादुत्थितः संरुरुचे सम्यगशोभत । तत्राप्यंभसि गदामुद्यम्यागच्छंतं रुंधानं प्रतिघ्नंतम् असह्यः सहनानर्हो विक्रमो यस्य तं दैत्यम् । सुनाभं चक्रं तद्वत्संदीपितस्तीव्रो मन्युर्यस्य । यद्वा । मयि विद्यमाने किमिति परिभवं सहस इति सुनाभेन संदीपितस्तीव्रमन्युः स भगवान् सिंहो गजमिव लीलया जघानेत्युत्तरेणान्वयः ।। ३१ ।। गजेंद्रो जगतीं क्रीडया विदारयन् गैरिकया यथा अरुणगंडतुंडो भवति तथा । तस्य रक्तमेव पंकस्तेनांकितौ गंडौ तुंडं च यस्य सः ।। ३२ ।। प्रज्ञायालक्ष्य । अनुवाको वैदिकं सूक्तं तत्सदृशैर्वाक्यैस्तुष्टुवुः ।। ३३ ।। भो अजित ते त्वया जितंजितमिति संभ्रमे वीप्सा । यज्ञैर्भाव्यते आक्रियत इति

इति । प्रलयकाले सर्वस्योदरे ग्रहणादिति भावः । यद्वा । वेदरूपेण जलादुद्धृतवानित्यर्थः । यद्वाऽग्रे जलोपरि यां स्वयमभ्यधत्त स्थापितवानित्यर्थः । अनेनोदरप्रवेशकथनेन ।। ३० ।। चक्रस्य सत्यग्र्यादावुपमानमनुचितं मत्वाह–यद्वेति । मयि सुदर्शनाख्ये सर्वदलनसमर्थे । क्वचित्तु तत्रादिदैत्यमिति पाठः॥३१॥रुंधानं रोद्धुं चतुर्दिक्षु भ्रमंतं गजेंद्रः त्रिकूटपर्वतस्थः सिंहशरभादीनामपि हंता जगतीं तत्रत्यां भूमिं यथा तथेति वराहोपमा । "जगती जगतिच्छन्देविशेषेपि क्षितावपि" इत्यमरः । तुंडं मुखाग्रम् ॥ ३२॥ किं च । अत्र श्वेतवाराहकल्पे स्वायंभुवमन्वंतरारंभे ब्रह्मनासात एव श्वेतवाराह आविर्भूय केवलं पृथ्वीमुद्धृत्यैवांतरधात्ततः षष्ठे चाक्षुषमन्वंतरे पुनराकस्मिकप्रलये जलादेवाविर्भूय नीलो वाराहः पृथ्वीमुद्धरन्हिरण्याक्षं जघानेति वाराहद्वयलीलामेकीकृत्यैव मैत्रेयः प्राह स्मेति भागवतामृतकारिकाभ्योऽवगंतव्यम् । ताश्च यथा–"द्विधाऽविरासीत्कल्पेऽस्मिन्नादौ स्वायंभुवांतरे । प्राणाद्विधेर्धरोद्धृत्यै चाक्षुषीये तु नीरतः ॥ हिरण्याक्षं धरोद्धारे निहंतुं दंष्ट्रिपुंगवः । चतुष्पाच्छ्रीवराहोऽसौ नृवराहः क्वाचिन्मतः ॥ कदाचिज्जलदश्यामः कदाचिच्चंद्रपांडुरः । यज्ञमूर्तिः स्थविष्ठोयं वर्णद्वययुतः स्मृतः ॥ दक्षात्प्राचेतसात्सृष्टिः श्रूयते चाक्षुषांतरे । स्वतस्तत्रैव जन्मास्य हिरण्याक्षस्य युज्यते ॥ उत्तानपादवंश्यानां तनयस्य प्रचेतसाम् । दक्षस्यैव दितिः पुत्री हिरण्याक्षो दितेः सुतः॥ कल्पारंभे तदा नास्ति सुतोत्पत्तिर्मनोरपि । क्वासौ प्राचेतसो दक्षः क्व दितिः क्व दितेः सुतः ॥ अतः कालद्वयोद्भूतं श्रीवराहस्य चेष्टितम् । एकत्रैवाह मैत्रेयः क्षत्तुः प्रश्नानुसारतः ॥ मध्ये मन्वंतरस्यैव मुनेः शापान्मनुं प्रति । प्रलयोऽसौ बभूवेति पुराणे क्वचिदीर्य्यते ॥ अयमाकस्मिको जातश्चाक्षुषस्यांतरे मनोः । प्रलयः पद्मनाभस्य लीलयेति तु कुत्रचित्" इति विश्वनाथः । विजयध्वजस्तुहिरण्याक्षौ द्वावित्युक्त्वा कारकद्वयमाह । "ब्रह्मजस्तु हिरण्याक्षः प्रथमं दंष्ट्रया हतः । स एव पार्षदाविष्टो द्वितीयः कर्णताडनात् ॥ पूर्वं लयोदके मग्नां द्वितीयं तेन मज्जिताम् । भुवमुद्धरते.वासौ हरिणा क्रोडमूर्त्तिना" इति ।अविविच्य कथनं तु दुष्टमोहार्थं देवप्रियार्थं वेति ज्ञेयम् । "व्यत्यासेनापि चोच्यंते त्वविविच्यैव कुत्रचित् । दुष्टानां मोहनार्थाय देवानां च प्रियाय वै ॥ यत्र तत्र कथाः काश्चिद्व्यासे साक्षाद्धरेस्तनौ । भ्रांतिर्न युज्यते तेन ज्ञात्वैवेत्थं प्रवर्णितम्" इत्यलम् । तमालस्तापिच्छस्तद्वन्नीलं श्यामवपुषम् । संप्लवादिसाधारण्येनैवेयं मन्वंतरद्वयकथाया अभेदोक्तिरिति । वस्तुतस्तु– चाक्षुषांतरसंप्लव एवायं प्रसंग इति संदर्भः ।। ३३ ।। यद्वा ।यज्ञान्भावयत्युत्पादयतीति तथा हे सर्वयज्ञकारणेत्यर्थः ।हे अजित जयजयेत्यर्थो जितंजितमित्यस्य । कारणेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकम् ॥ छंदांसि यस्य त्वचि बर्हिरोमस्वाऽऽज्यं दृशि त्वंघ्रिषु चातुर्होत्रम् ॥ ३५ ॥ स्रुक् तुंड आसीत्स्रुव ईश नासयोरिडोदरं चमसाः कर्णरंध्रे ॥ प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥ ३६ ॥ दीक्षाऽनुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वाप्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते ॥ ३७ ॥ सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ॥ सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ॥ ३८ ॥ नमोनमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्यात्मजयाऽनुभावितज्ञानाय विद्यागुरवे नमोनमः ॥ ३९ ॥

तथा । त्रयीं वेदमयीम् । निलिल्युर्लीनप्रायाः । कारणं पृथिव्युद्धरणं तेन सूकराय ॥ ३४ ॥ यज्ञात्मतां प्रपंचयंतः स्तुवंति । रूपमित्यादिचतुर्भिः छंदांसि गायत्र्यादीनि । यज्ञांगभूतच्छंदआद्यनुवादेन भगवदवयवता विधीयते बर्हिःशब्दे दीर्घाभाव आर्षः । दृशि चक्षुषि चातुर्होत्रं होत्रादिकर्मचतुष्टयम् अंघ्रिषु ॥ ३५ ॥ स्रुक् जुहूस्तुंडे मुखाग्रे । स्रुवो नासिकयोः । इडा भक्षणपात्री । चमसा ग्रहाश्च सोमपात्राणि । प्राशित्रं ब्रह्मभागपात्रम् । ग्रस्यतेऽनेनेति ग्रसनं मुखांतर्वर्ति च्छिद्रम् । चर्वणं भक्षणम् ॥ ३६ ॥ दीक्षा दीक्षणीयेष्टिः । अनुजन्म वारंवारमभिव्यक्तिः । उपसदस्तिस्र इष्टयः । शिरोधरं ग्रीवा प्रायणीया दीक्षाऽनंतरेष्टिः । उदयनीयं समाप्तीष्टिः ते एव दंष्ट्रे यस्य प्रवर्ग्यो महावीरः प्रत्युपसदं पूर्वं क्रियते । सभ्यो होमरहितोऽग्निः । आवसथ्यमौपासनाग्निः तयोर्द्वंद्वैक्यम् । तत्तव क्रतुरूपस्य शीर्षं शिरः चितय इष्टकाचयनानि पंचासवः प्राणाः ॥ ३७ ॥ सोमो लताविशेषस्तव वीर्यं प्रातःसवनादीन्यवस्थितिरासनं बाल्याद्यवस्था वा । अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोडशी वाजपेयोऽतिरात्र आप्तोर्याम इति सप्तसंस्था विभेदास्त्वङ्मांसादिसप्तधातवः । सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि असोमाः यज्ञाः ससोमाः क्रतवस्तद्रूपस्त्वम् । इष्टिर्यजनमनुष्ठानं तदेव बंधनं यस्य सः ॥ ३८ ॥ पूर्वोक्तमेव सपरिकरं कीर्तयंतः प्रणमंति । नमोनम इति । अखिलमंत्रादिरूपाय क्रियात्मने सामान्यव्यापाररूपाय । किं च । वैराग्ययुक्तकर्मसाध्या सत्त्वशुद्धिस्ततो भक्ति

संबुद्धिर्वा ॥ ३४ ॥ ३५ ॥ जुहूः पालाशमयी । स्रुवः खादिरः । 'चर्वणं चूर्वणं दंतैः' इति यादवः ॥ ३६ ॥ महावीरः संतप्तघृतपूर्णे क्षीरप्रक्षारणम् ॥ ३७ ॥ आदिना मज्जास्थ्यादिग्रहः । आदिनाष्टादशाहादिग्रहः । सोमोऽमृतवल्लीरसः । बंधनं संधिसंधानम् ॥ ३८ ॥ यद्यप्येवं त्वं लीलया सर्वकर्मप्रवर्तकत्वेन सर्वकर्मकारणमूर्त्तिरसि तदपि कर्मफलस्पृहारहितया भक्त्यैव तवानुभवो भवेदित्याहुः । वैराग्यं दृष्टादृष्टकर्मफलस्पृहाराहित्यं तद्युक्ता या भक्तिस्तयैवात्मनो मनसो जयस्तेनानुभावितं ज्ञानं स्वविषयकं येन तस्मै । अत एव विद्यागुरवे "ददामि बुद्धियोगं तं येन मामुपयांति ते" इति त्वदुक्तेस्त्वत्प्रापकं ज्ञानं त्वमेव दातुमर्हसीति भावः ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंष्ट्राऽग्रकोट्या भगवंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतो दता धृता मतंगजेंद्रस्य सपत्रपद्मिनी ॥ ४० ॥ त्रयीमयं रूपमिदं च सौकरं भूमंडले नाथ दता धृतेन ते ॥ चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य यथैव विभ्रमः ॥ ४१ ॥ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मातरं पिता ॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥४२॥ कः श्रद्दधीताऽन्यतमस्तव प्रभो रसां गताया भुव उद्विबर्हणम् ॥ न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम् ॥ ४३ ॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयम् ॥ सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्यमाना भृशमीश पाविताः ॥ ४४ ॥ स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः ॥ यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शम् ॥ ४५ ॥

स्तत आत्मजयश्चित्तस्थैर्यं तेनानुभावितं साक्षात्कृतं यज्ज्ञानं तस्मै । एवंभूतज्ञानप्रदाय गुरवे च ॥ ३९ ॥ हे भूधर । सभूधरा सपर्वता । वनादुदकान्निर्गच्छतो गजेंद्रस्य । दता दंतेन ॥ ४० ॥ त्वया धृता भूर्विराजत इत्युक्तमिदानीं भमंडलेन त्वद्रूपं विराजत इत्याहुः । त्रयीति । अथेत्यर्थांतरे । ते इदं रूपं दंतेन धृतं यद्भूमंडलं तेन चकास्ति शोभते । शृंगेणोढो धृतो यो घनस्तेन भूयसाऽतिमहता । विभ्रमो विलासः ॥ ४१ ॥ लोकाय वासस्थानार्थम् । ते पत्नीं सस्थावराणां जगतां मातरम् । यतस्त्वं पिताऽसि एवं सति तत्र स्थिताः संतस्त्वया पित्रा सहास्यै मात्रे नमसा विधेम नमनं करिष्यामः । नमस्कारेण परिचरेमेति वा । स्वतेजोधारणशक्तिं याज्ञिका मंत्रतोऽग्निमरणाविवाधाः निहितवानसि ॥ ४२ ॥ इदं च त्वयाऽतिदुष्करं कृतमित्याहुः । क इति । हे प्रभो तव त्वया कृतं भुव उद्विबर्हणमुद्धरणं त्वदन्यः कः श्रद्दधीत स्पृहयेत अध्यवस्येदित्यर्थः । त्वयि पुनरसौ विस्मयो न भवति यतो विश्वे सवे विस्मया यस्मिन् । कुतः । यो भवान् अतिविस्मयमत्यद्भुतमिदं विश्वं क्रियाविशेषणं वा । ससृजे सृष्टवान् ॥ ४३ ॥ विस्मयं दर्शयंतः प्रार्थयंते । विधुन्वतेति द्वाभ्याम्—सटानां शिखाभिरग्रैरुद्धूता उच्छलिता ये शिवा अंबुबिंदवस्तैः सिच्यमाना वयं पवित्रीकृताः ॥ ४४ ॥ तव अपारकर्मणः कर्मणां पारं य एष तेऽवलोकयति ज्ञातुमिच्छतीत्यर्थः । यस्य तव योगमाया यो गुणैः सह योगस्तेन मोहितम् । अतो विश्वस्य शं मंगलं विधेहि यथा त्वाम्

अहो पृथिव्या भाग्यं यां त्वं धत्से इति तां वर्णयति दंष्ट्रेति । सपत्रपद्मिनीति । तस्याः कोरककुड्मलादिभिरुच्चनीचपर्वता उपमिताः ॥४०॥ कुलाचलानां मलयादीनामिंद्रो महापर्वतस्तस्य यथा विलासः शोभातिशय इति । "महेंद्रो मलयः सह्यः शुक्तिमानृक्षवांस्तथा । विंध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः" इति भारते ॥४१॥ किं युष्माकमभीप्सितं तद्ब्रूतेति चेत्तत्राहुः-संस्थापयेति । एवं सति त्वयि पितारि सति॥४२॥उद्विबर्हणमुद्धरणम् । इत्यर्थ इति । प्रभुत्वास्त्वय्येवैतद्घटेत नान्येत्रेति भावः । विश्वस्मिंस्तु विस्मयो न संभवति तस्य जडत्वादत आह—क्रियाविशेषणं वेति ॥ ४३ ॥ शिवा मंगलरूपा अत्यंतपवित्राः। ईशेति सर्वसमर्थः ॥४४ ॥ इत्यर्थ इति । 'इष—गतौ' भौवादिकः गत्यर्थानां ज्ञानार्थत्वेन ज्ञानेच्छापि तदर्थ इति भावः । ननु मायामोहितो जीवो मा जानातु मायातीतो मद्भक्तो नारदादिस्तु जानात्येवेति तत्राह—यस्य तव योगमायाचिच्छक्तिवृत्तिभेदः गुणयोगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः ॥ सलिले स्वखुराक्रांत उपाधत्ताऽविताऽवनिम् ॥४६॥ स इत्थं भगवानुर्वीं विष्वक्सेनः
पिजपतिः ॥ रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ॥४७॥ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः ॥ शृण्वीत भक्त्या
श्रवयेत वोशतीं जनार्दनोऽस्याऽऽशु हृदि प्रसीदति ॥४८॥ तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः ॥ अनन्यदृष्ट्या
भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः पराम् ॥ ४९ ॥ को नाम लोके पुरुषार्थसारवित्पुरा कथानां भगवत्कथासुधाम् ॥ आपीय
कर्णांजलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥ ५० ॥ इति श्रीभा० तृ० श्रीवराहप्रादुर्भावे० त्रयोदशः ॥ १३ ॥ श्रीशुक उवाच ॥
निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसूकरात्मनः ॥ पुनः स पप्रच्छ तमुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः ॥ १ ॥

चिंत्यानंतशक्तिं ज्ञात्वा भजेत्तथाऽनुगृहाणेत्यर्थः ॥ ४५ ॥ उपस्थीयमानः स्तूयमानः । स्वखुराक्रांत इति जलेऽपि धारणशक्त्याधानं दर्शयति । अविता रक्षकः ॥४६॥ ॥ ४७ ॥ कथनीयानि मायीनि मायावंति चरित्राणि यस्य । श्रवयेत श्रावयेत ह्रस्वत्वमार्षम् । उशतीं कमनीयाम् । हृदि प्रसीदति स्वमनसि संतुष्यतीत्यर्थः ॥ ४८ ॥ आशिषो यद्यपि सुलभास्तथापि न प्रार्थनीया इत्याह । ताभिराशीर्भिरलम् । लवात्मभिस्तुच्छाभिः । न च तदा भजनस्य वैफल्यं शंकनीयमित्याह । भगवद्भजनव्यतिरेकेण फलांतरदृष्टिं विना भजतां स्वपदप्राप्तिं स्वयमेव विधत्ते । गुहाशयत्वादहैतुकीं भक्तिं जानन् ॥ ४९ ॥ अतः को नाम पुराकथानां पूर्ववृत्तानां मध्ये । कथंचिदापीय विरज्येत विरमेत् । नरेतरं पशुं विना ॥ ५० ॥ इति श्रीमद्भागवते तृतीयस्कंधे टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशे निदानं तु तद्वधे वक्तुमुच्यते ॥ संध्यायां

गुणमेलनरूपा विद्या च ताभ्यां मोहितश्च को जानातीत्यर्थः । यतः सर्वो मोहितोऽतो हेतोः । इत्यर्थ इति । येऽप्राकृतास्त्वद्भक्तास्ते योगमायया त्वन्माधुर्येषु निमज्य मोह्यंते "ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति" इत्युक्तेः । ये च प्राकृतास्ते मायया विषयसुखेषु निमज्य मुह्यंते इति । अतस्त्वदनुग्रहेणैव मिथ्याज्ञाननिवृत्त्या कल्याणं भवतीति भावः ॥ ४५ ॥ ४६ ॥ ततो हरिः किं चकारेति चेत्तत्राह—स इति । अप्सु जलेषु स्वशक्त्या स्थापयित्वा स्वलोकमिति शेषः अंतर्दधे वा ॥ ४७ ॥ हरति भक्तसंसारं नाशयतीति हरिः "कृदिकारादक्तिनः" इति वाङीष् । हरति मेधा बुद्धिर्यत्रेति हरिमेधास्तस्य । यद्वा । हरति निजजनक्लेशामिति हरिः । मेधति हिनस्ति दुष्टदैत्यान् भक्तैर्युनाक्ति वेति मेधाः "मेधृसंगमहिंसयोः" इत्यसुन्प्रत्ययः । हरिश्चासौ मेधाश्चेति तथा । पुनरुक्तिभयात् न ह्रियते प्राप्यते भक्तिं विनेत्यहरिस्तस्य भक्तियोगगम्यस्येत्यर्थः । इत्यर्थ इति । जनार्दनः सर्वजनप्रार्थ्योऽप्यस्य वक्तुश्रोतुश्चोपरि स्वयं स्वचित्ते निजचरितश्रवणादिना तुष्यतीति भावः ॥४८ ॥ तस्मिन् जनार्दने ॥४९॥ यो विरज्येत स पशुरेवेत्यर्थः ॥५०॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ तद्वधे हिरण्याक्षवधे । निदानं कारणं कामतो निषिद्धकामतः ॥ (१)॥ कारणेनं पृथ्व्युद्धारहेतुना सूकरस्यात्मा देहो यस्य स तथा । तस्य न चातितृप्त इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुर उवाच ॥ तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ॥ आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥ २ ॥ तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राऽग्रेण लीलया ॥ दैत्यराजस्य च ब्रह्मन्कस्माद्धेतोरभून्मृधः ॥ ३ ॥ मैत्रेय उवाच ॥ साधु धीर त्वया पृष्टमवतारकथां हरेः ॥ यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशातनीम् ॥ ४ ॥ ययोत्तानपदः पुत्रो मुनिना गीतयाऽर्भकः ॥ मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदम् ॥ ५ ॥ अथात्रापीतिहासोऽयं श्रुतो मे वर्णितः पुरा ॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छताम् ॥ ६ ॥ दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिम् ॥ अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ॥ ७ ॥ इष्ट्वाऽग्निजिह्वं पयसा पुरुषं यजुषां पतिम् ॥ निम्लोचत्यर्क आसीनमग्न्यागारे समाहितम् ॥ ८ ॥ दितिरुवाच ॥ एष मां त्वत्कृते विद्वन्काम आत्तशरासनः ॥ दुनोति दीनां विक्रम्य रंभामिव मतंगजः ॥ ९ ॥

कश्यपाद्गर्भसंभवः कामतो दितेः ॥ १ ॥ १ ॥ तेनैव येन भूमिरुद्धृता । अनुशुश्रुम त्वन्मुखात् ॥ २ ॥ मृधो युद्धम् ॥ ३ ॥ साधुत्वे हेतुः । यद्यस्मात्त्वं हरेरवतारकथां पृच्छसीति मृत्योः पाशं विशातयति मोचयतीति तथा ॥ ४ ॥ तदेव दर्शयति । यया कथया । उत्तानपदः पुत्रो ध्रुवः । मुनिना नारदेन । अर्भक एव यदा ध्रुवाय सुनंदादिभिर्विमानमानीतं तदाऽस्य देहत्यागोऽपेक्षितः स्यादिति मत्वा मृत्यावासन्नेऽपि देहं न तत्याज किं तु सोपान इव तस्य मूर्ध्नि पदं दत्त्वा विमानमारुह्य विष्णुपदमारूढः । वक्ष्यति हि । "परीत्याभ्यर्च्य धिष्ण्याग्र्यं कृतस्वस्त्ययनो द्विजैः ॥ इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम्" इति ॥ ५ ॥ तयोः संग्रामे हेतुं वक्तुमितिहासं प्रस्तौति । अथेति । अनुपृच्छतां देवानां ब्रह्मणा वर्णित इतिहासो मया श्रुतः ॥ ६ ॥ देवप्रश्नप्रस्तावाय प्रथमं हिरण्याक्षहिरण्यकशिपूत्पत्तिप्रसंगमाह । दितिरित्यादिना यावदध्यायपरिसमाप्ति । मरीचेः पुत्रं कश्यपम् । हृच्छयः कामस्तेनार्दिता अतः संध्यायामेव कामितवती ॥ ७ ॥ तदप्यग्निहोत्रशालायां तत्रापि समाहितम् । अग्निर्जिह्वा यस्य यजुषां यज्ञानां पतिं पुरुषं श्रीविष्णुम् ॥ ८ ॥ कृपणां बहुभाषिणीमिति वक्ष्यति तत्र एष मामिति द्वाभ्यां कार्पण्यं भर्तरीति चतुर्भिश्च बहुभाषणं वर्ण्यते दुनोति पीडयति । विक्रम्य शौर्यमाविर्भा

"कस्तृप्येतामृतं जुषन्" इत्युक्तेः ॥ १ ॥ येन स्वायंभुवे पृथ्वी समुद्दध्रे चाक्षुषेपि तेनैवेत्यर्थः इति संदर्भः ॥ २ ॥ तस्य हरेः ॥ ३ ॥ यद्यपि युद्धप्रश्नो न शुभस्तथापि साधु पृष्टं युद्धमिषेण वराहावतारकथां मे पृच्छसीति भावः ॥ ४ ॥ तदेव मृत्युपाशविशातनत्वमेव । अर्भक इत्यनेन किशोरत्वं विवक्षितं तत्सान्निध्यात् । अन्यथा राज्यपालनयक्षयुद्धपुत्रोत्पत्त्यादिकं न संगच्छेतेति भावः । मूर्ध्नि पदं दत्त्वा तं विनमय्य मृत्युरपि तं ननामेत्यर्थः ॥ ॥ ५ ॥ तयोर्वराहहिरण्याक्षयोः । अथेति मंगले अत्रापि वराहहिरण्याक्षयुद्धेपि ॥ ६ ॥ देवप्रश्नप्रस्तावाय यथा देवाः प्रश्नं करिष्यंति तत्प्रसंगायेत्यर्थः । यतः कामपीडिताऽतो हेतोः ॥ ७ ॥ तदपि संध्यायामपि । तत्राप्यग्निहोत्रशालायामपि । समाहितं समाधिष्ठम् । अग्निजिह्वं "ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम्" इति वक्ष्यमाणत्वात् । निम्लोचति अस्तंगतवति । पयसेति पयोविकारेण 'घृतेन गोभिः श्रिणीतम्' इति वत्प्रयोगो बोध्यो यथाश्रुतार्थस्वीकारे त्वग्न्युच्छेदः स्यादिति ॥ ८ ॥ वक्ष्यमाणपूर्त्यर्थमाह—कृपणमित्यादि । तत्र कार्पण्यबहुभाषणयोर्मध्ये एव प्रत्यक्षमिव दृश्यमानः । त्वत्कृते इति । यद्यहमेकाकिन्यस्थास्यं तदा मम किमभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्भवान्दह्यमानायां सपत्नीनां समृद्धिभिः ॥ प्रजावतीनां भद्रं ते मय्याऽऽयुंक्तामनुग्रहम् ॥१०॥ भर्तर्याऽऽप्तोरुमानानां लोकानाविशते यशः ॥ पतिर्भवद्विधो यासां प्रजया ननु जायते ॥ ११ ॥ पुरा पिता नो भगवान्दक्षो दुहितृवत्सलः ॥ कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक्॥१२॥ स विदित्वाऽऽत्मजानां नो भावं संतानभावनः ॥ त्रयोदशाऽददात्तासां यास्ते शीलमनुव्रताः ॥ १३ ॥ अथ मे कुरु कल्याण कामं कंजविलोचन ॥ आर्तोपसर्पणं भूमन्नमोघं हि महीयसि ॥ १४ ॥ इति तां वीर मारीचः कृपणां बहुभाषिणीम् ॥ प्रत्याहाऽनुनयन्वाचा प्रवृद्धानंगकश्मलाम् ॥ १५ ॥ एष तेऽहं विधास्यामि प्रियं भीरु यदिच्छसि ॥ तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः ॥ १६ ॥ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् ॥ व्यसनार्णवमत्येति जलयानैर्यथाऽर्णवम् ॥ १७ ॥ यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि ॥ यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः ॥ १८ ॥

व्य । रंभां कदलीम् ॥ ९ ॥ आयुंक्तां सर्वतो युनक्तु सम्यक्करोतु ॥ १० ॥ भर्तरि प्राप्तबहुमानानां स्त्रीणां यशो लोकानाविशते व्याप्नोति । प्रजया पुत्ररूपेण । "तज्जाया जाया भवति यदस्यां जायते पुनः" इति श्रुतेः ॥ ११ ॥ नोऽस्माकं पिता नोऽस्मान्पृथगपृच्छत । अयं भावः त्रयोदशानामप्यस्माकं त्वयि भावसाम्ये वैषम्याचरणं तवानुचितमिति ॥ १२ ॥ १३ ॥ मोघं न भवति हि । महीयसि त्वादृशे महत्तमे ॥ १४ ॥ प्रवृद्धानंगेन कश्मलं मोहो यस्यास्ताम् ॥ १५ ॥ संध्याकालवंचनाय भार्याप्रशंसा । एष इति पंचभिः । यतो यस्याः सकाशात् ॥१६॥ सर्वाश्रमानुपादायेति तानप्यन्नादिदानेन कृच्छ्रतस्तारयन्स्वयं तरतीत्यर्थः ॥१७॥ आत्मनो देहस्यार्धं कर्मसु

विघ्यदिति पत्यौ तस्मिन्नेव दोषो न्यस्तः । दीनां दुनोति त्वं पतिः कथं मां न रक्षसीति भावः । ननु कथं सहसैव लज्जामहासीस्तत्राह—रंभामिवेति । यदि प्राणा नश्यंति तदा किं लज्जयेति भावः ॥ ९ ॥ न च केवलमहं कामातुरैव रतिं याचे किं तु पुत्रार्थिन्यपीत्याह—तदिति । यतोहमेकैवापुत्रा तत्ततः समृद्धिभिः पुत्रलक्षणार्द्धिभिः ते भद्रमिति स्वीयार्थसिद्ध्यर्थमाशीर्ददातीति भावः ॥ १० ॥ त्वत्प्रसादाद्यशस्विनी पुत्रवती च स्यामित्याह—भर्त्तरीति भर्त्तुः सकाशादित्यर्थः । तत्तदा यद्यदेति श्रुतिपदार्थः । यद्वा । भवद्विधः पतिः प्रजया हेतुनैव जायतेऽतोहं कथं न पुत्रवती स्यामिति भावः ॥११॥ किं च विवाहात्प्रागेवाहं त्वय्यनुरागिणी स्यामित्यतः प्रत्याख्येयवाक्यो भवितुं नार्हसीत्याह—पुरेति । भगवान् सर्वचित्ताभिप्रायज्ञः । हे वत्साः ॥१२॥ स दक्षः नोस्माकं लज्जया त्वन्नामागृह्णतीनामिंगितेनैव जनांतरद्वारा भावमभिप्रायं सहसा ज्ञात्वेत्यर्थः । अस्माकं त्रयोदशानां मध्ये कथमहमेवाऽपुत्रिणीत्यन्यासां पुत्रप्रदानं मम नेति वैषम्यं तव नोचितमिति भावः ॥१३॥ अथातः कंजविलोचनेति श्लाघ्यसंबोधनं तु स्वस्यां दयोत्पत्त्यर्थं सौंदर्यद्योतनार्थं वा ननु सायं स्वरमणार्थं मत्समाधिभंगे यतमाना त्वं कथं मत्समशीलेत्यत आह—आर्तोपसर्पणमिति संप्रत्यहमार्त्ता किं करोमि 'नार्त्तः कालं प्रतीक्षते' इति शास्त्रं परमदयालुस्त्वं जानास्येवेति भावः । महांतस्त्वन्येषामकार्यमपि क्षमंत इत्याह भूमन्निति ॥ १४ ॥ हे वीरेति । यथा भवद्विधा धर्मवीरास्तथा न कश्यप इति यतोऽनुनयन्नेवाह—न सकोपकटाक्षं तर्जयन्निति यद्यहं कृत्रिममपि कोपं दर्शयिष्ये तदा तस्या भीत्या कामपीडाप्यंतरधास्यतैवेति भावः । प्रवृद्धेति न ह्यनंगघूर्णिता ह्यनुनयं सहत इति भावः ॥ १५ ॥ एषोहम् । भीरु भयशीले त्रैवर्गिकी धर्मार्थकामरूपा ॥ १६ ॥ इत्यर्थ इति । गृहस्थ एव सर्वेषामाश्रमाणां परायणं वानप्रस्थाश्रमस्योत्पत्तिद्वारा न त्वन्नदानादिनेति ज्ञेयमिति कृच्छ्रतः क्षुधादिरूपात् वानप्रस्थं तु सिंहव्याघ्रादिकृच्छ्रत इति ज्ञेयं स्वयं च तेषामुपकृत्या कृच्छ्रतः संसारात्तरतीति भावः ॥१७॥ कर्मस्वग्निसाध्येषु द्वयोः स्त्रीपुंसयोः "पाणिग्रहणाद्धि सहत्वं कर्मसु" इति श्रुतेः । दृष्टं गृहरक्षावस्तुसंचयनादिलक्षण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः ॥ वयं जयेम हेलाभिर्दस्यून्दुर्गपतिर्यथा ॥१९॥न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि ॥ अप्यायुषा वा कात्स्न्र्येन ये चान्ये गुणगृध्नवः ॥२०॥अथापि काममेतं ते प्रजात्यै करवाण्यलम् ॥ यथा मां नातिवोचंति मुहूर्तं प्रतिपालय॥२१॥एषा घोरतमा वेला घोराणां घोरदर्शना ॥ चरंति यस्यां भूतानि भूतेशानुचराणि ह ॥ २२ ॥ एतस्यां साध्वि संध्यायां भगवान्भूतभावनः ॥ परीतो भूतपर्षद्भिर्वृषेणाऽटति भूतराट्॥२३॥श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः॥भस्मावगुंठामलरुक्मदेहो देवस्त्रिभिः पश्यति देवरस्ते॥२४॥

द्वयोः सहाधिकारात् । यच्छब्दानां तां त्वामिति तृतीयश्लोकेन संबंधः । स्वधुरं दृष्टादृष्टकर्मभारम् । विज्वरो निश्चिन्तः ॥१८॥ हेलाभिर्लीलाभिः जयेमेति सभार्यस्येंद्रियाणि प्रायेणेतस्ततो न सर्पंतीति भावः ॥ १९ ॥ तामनेकोपकारकर्त्रीं त्वां कात्स्न्र्येनानुकर्तुं प्रत्युपकारैस्त्वत्सदृशा भवितुं न प्रभवो समर्थाः । ये चान्ये गुणगृध्नवो गुणप्रियास्तेऽपि न समर्थाः । संपूर्णेनाप्यायुषा । वाशब्दाज्जन्मांतरैरपि न प्रभव इत्युक्तम् ॥ २० ॥ यद्यपि त्वदनुकरणमशक्यम् । प्रजात्यै पुत्रोत्पत्त्यै । नातिवोचंति न निंदंति । प्रतिपालय प्रतीक्षस्व ॥ २१ ॥ स्वनिंदामगणयंतीं भीषयन् श्रीरुद्रमनुवर्णयति । एषेति सप्तभिः । घोराणामेषा वेला स्वयं च घोरदर्शना ॥ २२ ॥ भूतपर्षद्भिर्भूतगणैः॥२३॥तर्हि तत्संमुखत्वमात्रं वर्जनीयमिति चेत्तत्राह श्मशाने यश्चक्रानिलो वातमंडली तस्मिन् या धूलिस्तया धूम्रो विकीर्णो विक्षिप्तो विद्योतो द्युतिमान् जटाकलापो यस्य । भस्मनाऽवगुंठः प्रावृतोऽमलो रुक्मवद्देहो यस्य । स देवस्त्रिभिः सोमार्काग्निनेत्रैः पश्यतीत्यस्योत्तरश्लोकत्रयेऽप्यनुषंगः। एकस्य जामातरः परस्परं भ्रातरो

मदृष्टं दैवपित्र्यतिथिसेवनादि स्वर्गादिहेतुः अध्यस्य निक्षिप्य ॥१८॥ इति भाव इति ।गृहस्थेतराः कामार्त्ता अगम्यागमनादिना नरकांश्चिरमनुभवंति । वस्तुतः स्त्रीमात्रस्यैव तेषामगम्यत्वादवश्यं तेषां तप्तसूर्म्याख्यनिरये वासः गृहस्थस्य तु स्वाधीनकलत्रत्वेन व्यभिचारासंभवान्नरको न संभवति यस्तु तत्रापि व्यभिचारादिनिष्ठः स न गृहस्थः किं तु पतित एव सुतस्याप्यवश्यं नरके वासः "कुपूयाचरणाः कुपूयामेव योनिमाप्नुवंति" इति श्रुतेः। तथा चेतराश्रमापेक्षया गृहस्थाश्रम एव श्रेयानिति तात्पर्यम् । दस्यवो हि दुर्गमाश्रित्यैव जनान् लुंठंति यस्तु दुर्गपतिस्तत्र कथं तेषां प्रभाव इति दुर्गोत्र विषयभोगस्तत्र पतितान्ब्रह्मचार्यादीनेव भ्रंशयंतींद्रियदस्यवो न तु गृहस्थांस्तेषां विषयभोगस्य शास्त्रविहितत्वेन दुरदृष्टानुत्पत्तेः । यद्वेंद्रियाणामरातयो विषयास्तान् वक्ष्यति च "यः षट् सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ॥" इत्यादिना पञ्चमस्कंधे इममेवार्थं प्रियव्रतं प्रति ब्रह्मा ॥ १९ ॥ तदेवं स्त्रियमाश्रित्यैव गृहस्थ एव सुखेन विषयमपि भुंक्ते नरकेपि न पतति न तु विरक्त इत्यत आह—नेति । या पतिं नरकाद्रक्षेत्तां त्वां त्वादृशीं वयं मत्सदृशाः गुणगृध्नवः स्त्रीगुणास्तु गृहशोधनसंतत्युत्पादनागम्यागमनरक्षणप्रियसंभाषणपाकादिनैपुण्यादयस्तेषु दृष्टिवंतो ये तेपि स्त्रीं प्रत्युपकर्त्तुमक्षमाः संतस्तदनुकूल्यमेव जुषन्त इति भावः ॥ २० ॥ नन्वलं वाग्विलासैः कालविलंबस्य दुःसहत्वात्तूर्णं तल्पगृहं प्रविशेति चेत्तत्राह यथा मामिति । अत्यवोपसर्गपूर्वाद्वचेश्छांदसं रूपमतिवोचंतीति क्वचिच्छोचंतीति पाठः । तर्हीदं वाक्यं गुडजिह्विकातुल्यमेवेत्यत आह—मुहूर्त्तं संध्यामुहूर्त्तं प्रदोषमित्यर्थः ॥२१॥ घोराणां भूतप्रेतादीनां वेला समयस्तेषां विहारकाल इत्यर्थः । घोराणां दर्शनं यस्यां सा तथा । यद्वा । घोरं भयंकरं दर्शनं यस्यास्सा तथा अत एव घोरतमाऽतिशयेन भयंकरेति तदेवाह—चरंतीति । भूतेशस्य रुद्रस्यानुचराणि भूतानि प्रमथादीनि ॥२२॥ भवत्सामर्थ्येन भूतान्यपि किं करिष्यंतीति भूतान्यप्यगणयंतीं पुनराह—एतस्यामिति । न हि साध्वीनां सदाचाराणामयं धर्म इति बोधयन्नाह—साध्वीति । भगवानतीव समर्थः । यश्चाधुना विकर्मनिरतस्तं भूतैर्नाशयतीत्याह—भूतराडिति । अत एव भूतानि सांसारिकाणि स्वगमनेन विकर्म निवर्त्तयन्भावयति पालयतीति तथा ॥२३॥ समाधत्ते तर्हीति । जटाकलापेन सर्वं प्रकाशयित्वा देदीप्यमानदेहेन च सोमसूर्याग्निनेत्रैश्च नः पश्यति । तथा च न ततः किंचिदपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः ॥ वयं व्रतैर्यच्चरणापविद्धामाशास्महेऽजां बत भुक्तभोगाम् ॥ २५ ॥ यस्याऽ
नवद्याचरितं मनीषिणो गृणंत्यविद्यापटलं बिभित्सवः ॥ निरस्तसाम्यातिशयोऽपि यत्स्वयं पिशाचचर्यामचरद्गतिः सताम् ॥ २६ ॥ हसंति
यस्याचरितं हि दुर्भगाः स्वात्मन् रतस्याऽविदुषः समीहितम् ॥ यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितम् ॥ २७ ॥
ब्रह्मादयो यत्कृतसेतुपाला यत्कारणं विश्वमिदं च माया ॥ आज्ञाकरी तस्य पिशाचचर्या अहो विभूम्नश्चरितं विडंबनम् ॥ २८ ॥

व्यवह्रियंते अतो मम भ्राता असौ तव देवर इति लज्जार्थमुक्तम् ॥ २४ ॥ ननु तथापि महत्त्वेनादरणीयस्य स्वजनस्य च तव स सर्वं क्षमेतैव तत्राह । यस्य स्वजनादिर्ना
स्ति समत्वात् । ईश्वरस्य ऐश्वर्यमेवाह । येन चरणेनापविद्धां निर्माल्यवद्दूरतस्त्यक्तां तेन भुक्तभोगामजां मायां तन्मयीं विभूतिं महाप्रसाद इत्याशास्महे । व्रतैस्तमाराध्य
॥ २५ ॥ अनिषिद्धसुखत्यागादसौ पिशाच इत्युपहासो न कार्य इत्याह द्वाभ्याम् । यस्यानवद्यं विषयासक्तिशून्यमाचरितम् । बिभित्सवो भेत्तुमिच्छवः ॥ २६ ॥ समी
हितमभिप्रेतं लोकशिक्षारूपमविदुषोऽविद्वांसः । यद्वा । न विद्वानन्यो यस्मादिति तस्य सर्वज्ञस्येत्यर्थः । दुर्भगानेवाह । यैरिति । श्वभोजनं शुनां भोज्यं शरीरं स्वात्मतया
यमेवात्मेति बुद्ध्या ॥ २७ ॥ अहो अतर्क्यं तस्याचरणमित्याह । ब्रह्मादयो येन कृतान्सेतून्स्वस्वाधिकारान्पालयंति यः कारणं यस्य येन कृतमिदं विश्वम् । माया च यस्या

स्थलं गुप्तमस्तीति ॥२४॥अत्राशंकते नन्विति । यद्यपि पश्यति तथापीति संदर्भकारस्तस्य श्लोकस्यावतरणिकामित्थमाह—ननु श्मशानादिसंबंधः कथमस्मै रोचते यदि रोचेत तर्ह्यस्माकं दुर्वृत्तमपि रोचेत किञ्च यदि देवरस्तर्ह्य
स्मत्संदृश एव कथमेतादृशस्यादरः स्यात्तत्राह—नेति । महानुभावत्वादस्मभ्यं सर्वसंपत्प्रदत्वात्तस्यानादेर दोष एव स्यादिति भावः ॥२५॥ ननु तस्यापि दिगंबरतया सदैव स्त्रिया सह मिथुनीभूय तिष्ठतः सर्वं सच्चरितमहं जाना
मीति तत्राह—हे कुमनीषिणि दिते मत्तः सकाशात्तच्चरितं शृण्विति यस्यानवद्यमनिंद्यमेव चरितं मनीषिण एवादरेण गृणंति ते संसारान्मुक्ता भवंतीत्यर्थः । पटलो दर्शनप्रतिबंधको नेत्ररोगविशेषः । इह चाविद्यैव पटलं भगवद्दर्श
नप्रतिबंधकत्वात् । निरस्तावपगतौ साम्यातिशयौ तुल्याधिक्ये यस्मात्स तथा पिशाचो देवयोनिविशेषो भूतभेदस्तादृशीं चर्यां तैः सह चरणं वा सतां सदाचारनिरतानां गतिराश्रयः स्वयमचरन्न तु कस्यचिदाज्ञयेति । तच्च देहानुशय
त्यागार्थमेवेति तत्त्वम् ॥२६॥ ये तु तच्चरितं निंदंति ते संसारिणो भवंतीत्याह—हसंतीति । लोकशिक्षेति । देहस्य कुत्सितत्वं दर्शयित्वा स्वात्मनिष्ठा कर्त्तव्येति लोकशिक्षारूपम् आर्षत्वापेक्षया सुगमपंथानमाह—यद्वेति । इत्यर्थः
इति । नञा पञ्चमीबहुव्रीहिणायमर्थो लभ्यत इति भावः । दुर्भगा न कस्याप्यनुकंप्या इत्यर्थः । यद्वा । स्वात्मनः स्वस्यात्मनि श्रीकृष्णे रतस्य समीहितमभिप्रायम् । तच्च समीचीनगंधपुष्पवस्त्राभरणादीनि मत्प्रभोः श्रीकृष्णस्यैवार्हाणीति
तस्मै यान्यतो नाहमुपभुंज इत्येवंरूपम् । दुर्भगलक्षणमाह—यैरित्यादि ॥२७॥ तस्य हरस्य अतर्क्यं तर्कागोचरम् । "यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः । रुद्रः संहारकर्त्ता च नमस्तस्मै पिनाकिने" इति श्रुतेः ।
इत्यर्थ इति । न हि तर्कागोचरे किंचिद्वक्तव्यमस्तीति भावः । अत एवोक्तं गंधर्वराजेनापि "अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः" इति महिम्नाख्यस्तवे । यद्वा । तत्र विश्वेश्वरे के वयं वराका इत्याह—ब्रह्मादयो मन्वादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ सैवं संविदिते भर्त्रा मन्मथोन्मथितेंद्रिया ॥ जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा ॥ २९ ॥ स विदित्वाऽथ भार्यायास्तं
निर्बंधं विकर्मणि ॥ नत्वा दिष्टाय रहसि तयाऽथोपविवेश ह ॥ ३० ॥ अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः ॥ ध्यायञ्जजाप विरजं
ब्रह्म ज्योतिः सनातनम् ॥ ३१ ॥ दितिस्तु व्रीडिता तेन कर्मावद्येन भारत ॥ उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ॥ ३२ ॥ दितिरुवाच ॥
मा मे गर्भमिमं ब्रह्मन्भूतानामृषभो वधीत् ॥ रुद्रः पतिर्हि भूतानां यस्याऽकरवमंहसम् ॥३३॥ नमो रुद्राय महते देवायोग्राय मीढुषे ॥ शिवाय
न्यस्तदंडाय धृतदंडाय मन्यवे ॥ ॥ ३४ ॥ स नः प्रसीदतां भामो भगवानुर्वनुग्रहः ॥ व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ॥ ३५ ॥
मैत्रेय उवाच ॥ स्वसर्गस्याशिषं लोक्यामाशासानां प्रवेपतीम् ॥ निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ॥ ३६ ॥

ज्ञाकरी । विभून्नः परमेश्वरस्य विडंबनमतर्क्यमित्यर्थः ॥ २८ ॥ भर्त्रा निरूपकेणैवं संविदिते ज्ञापितेऽपि सति वृषलीव वेश्येव ॥ २९ ॥ विकर्मणि निषिद्धे कर्मणि दिष्टाय देवरूपायेश्वराय । उपविवेशेति मैथुनं लक्ष्यते ॥ ३० ॥ उपस्पृश्य स्नात्वा भर्गशब्दवाच्यं विरजं ज्योतिर्ध्यायन्सनातनं ब्रह्म गायत्रीं प्रणवं वा जजाप ॥ ३१ ॥ कर्मावद्येन कर्मदोषेण॥ ३२॥मा वधीन्मा हंत्वित्यर्थः । वधशंकाबीजमाह । रुद्र इति । यस्य रुद्रस्य अंहसमंहोऽपराधमकरवं कृतवत्यस्मि ॥३३॥ रुत् दुःखं तद्द्रावयतीति रुद्रस्तस्मै उग्रायानतिलंघ्याय मीढुषे सकामेषु फलसेचनकर्त्रे निष्कामेषु शिवाय वस्तुतो न्यस्तदंडाय दुष्टेषु धृतदंडाय संहारे मन्यवे ॥ ३४ ॥ भामो भगिनीभर्ता उरुरनुग्रहो यस्य व्याधस्य निर्दयस्यापि सतीपतिरित्यनेन स्त्रीणां स्वभावं स्वयमपि वेत्तीति सूचयति ॥ ३५ ॥ स्वसर्गस्य स्वसंतानस्याशिषं शुभं लोक्यां लोकद्वयार्हां संध्यायां यो

रूपेण यत्कृतान्सेतून् । सायं स्त्रीसंगभोजनस्वापत्यागादिरूपा मर्यादाः पालयंति "चत्वारीमानि कर्माणि संध्यायां परिवर्जयेत् । आहरं मैथुनं निद्रां स्वाध्यायञ्च चतुर्थकम्" इति स्मृतेः ॥ २८ ॥ सा दितिः एवमुक्तरीत्या महादेवविभीषिकाप्रदर्शनेन वासः कटिवस्त्रं "कामो विवेकं ग्रसति स्त्रीयमन्यैश्च दर्शितम् । अत्र प्रमाणं ब्रह्मैव पुंसु स्त्रीभूच्यते दितिः" इत्यभियुक्तोक्तेः ॥ २९ ॥ स कश्यपः अथ ज्ञापनानंतरं तं सुरतलक्षणं निर्बंधं दुराग्रहं तया दित्या अथेश्वरनत्युत्तरं "निवेश उपभोगः स्यादुपवेशस्तु मैथुनम्" इत्यभिधानात् । हेति प्रत्यारंभे ॥ ३० ॥ अथ मैथुनोत्तरं भर्गशब्दवाच्यं सूर्याभिन्नं ब्रह्म विरजं वरेण्यम्, एतेनाकालमैथुने स्नात्वा तत्प्रायश्चित्तरूपेण गायत्रीजपो विधेयः कार्यःशैघ्र्ये तु प्रणवजपो वा कार्य इत्युक्तम् । "अनुक्ते त्वष्टसाहस्रं सहस्रं वा जपेदृचम्" इति स्मृतेः । "स्यादुपस्पर्शनं स्पर्शे स्नानाचमनयोरपि" इतिमेदिनी ॥३१॥ अधोमुखी व्रीडयाऽवाङ्मुखी ॥ ३२ ॥ इत्यर्थ इति । भूतानां श्लेषेण जीवजातानामृषभत्वादिति भावः बीजं हनने कारणम् ॥ ३३ ॥ द्रावयति दूरी करोति । यद्वा । रोदयत्यपराधिनमिति रुद्रस्तस्मै अपराधक्षमणार्थमाह—महते महत्त्वादपराधमगणयते । यद्वा । मद्गर्भे हनिष्यते स इत्यत आहोग्राय । तन्निवृत्तये पुनराह—मीढुषे मन्मनोरथशाखिनं कृपामृतेनाभिषेक्ष्यते यतो वस्तुतः परमार्थतः । यद्वा । मां दंडयिष्यतेतो मन्यवे मन्युस्वरूपाय ॥ ३४ ॥ एवं संशयानैव स्तुवाना स्वदैन्यं दर्शयंती तस्मादभयं प्रार्थयते । यद्वा । सत्या अप्यनुरोधेन तद्भगिनी मां सा दंडयत्विति सा सती मदपराधं मार्जयत्विति वा भावः ॥ ३५ ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कश्यप उवाच ॥ अप्रायत्यादात्मनस्ते दोषान्मौहूर्तिकादुत ॥ मन्निदेशातिचारेण देवानां चातिहेलनात् ॥ ३७ ॥ भविष्यतस्तवाभद्रावभद्रे जाठराधमौ ॥ लोकान्सपालांस्त्रींश्चंडि मुहुराक्रंदयिष्यतः ॥ ३८ ॥ प्राणिनां हन्यमानानां दीनानामकृतागसाम् ॥ स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ॥ ३९ ॥ तदा विश्वेश्वरः कुद्धो भगवान् लोकभावनः ॥ हनिष्यत्यवतीर्याऽसौ यथाऽद्रीञ्छतपर्वधृक् ॥ ४० ॥ दितिरुवाच ॥ वधं भगवता साक्षात्सुनाभोदारबाहुना ॥ आशासे पुत्रयोर्मह्यं मा क्रुद्धाद् ब्राह्मणाद्विभो ॥ ४१ ॥ न ब्रह्मदंडदग्धस्य न भूतभयदस्य च ॥ नारकाश्चानुगृह्णंति यां यांयोनिमसौ गतः ॥ ४२ ॥

नियमः स निवृत्तो यस्य ॥ ३६ ॥ ते आत्मनश्चित्तस्याप्रायत्यादशुचित्वात् मौहूर्तिकात्संध्यारूपात उत अपि मम निदेशस्याज्ञाया अतिचारेणातिक्रमेण देवानां रुद्रानुचराणाम् ॥ ३७ ॥ एतैश्चतुर्भिर्हेतुभिर्जाठराधमौ पुत्रापसदौ भविष्यत इत्यन्वयः । हे चंडि कोपने ॥ ३८ ॥ हन्यमानानां सताम् ॥ ३९ ॥ शतपर्वधृक् वज्रधर इंद्रः ॥ ४० ॥ सुनाभेनोदारो बाहुर्यस्य । मह्यं मम । कोपितेष्वित्युक्तत्वाच्छंकितचित्ता सती प्रार्थयते ब्राह्मणान्मा भूदिति ॥ ४१ ॥ नारका अपि तथा यांयां योनिमसौ गतो भवति "प्रयतः सावधानपवित्रयोरस्ति" इति नाममाला । मौहूर्तिकात्संध्यामुहूर्तजात् । अवहेलनमवज्ञानम् । चावहेलनादिति पाठानुरोधात् ॥ ३७ ॥ अभद्रे निषिद्धरतिकरणात्त्वस्य स्वपुत्राणां च भद्रमपहृतमित्याशयेनाह—हे अभद्रे अभद्राविति च जाठरौ जठरभवौ च तावधमौ जाठराधमौ अधमत्वमाह—लोकानिति । देवकोपनकर्त्रीत्वाच्चंडीत्याह । यद्वा । अकारवाच्याद्वासुदेवाद्भद्रं ययोस्तावभद्राविति । तवापि पुत्रद्वारा तत एव भद्रं भविष्यतीत्याहाभद्रे इति वा ॥ ३८ ॥ अकृतागसां निरपराधानां निगृह्यमाणानां प्रसह्याहृतानां सतीनां महति परमेश्वरे आत्मा मनो येषां तेषु विप्रादिषु "यत्रयत्र द्विजा गावः" इत्यग्रे वक्ष्यमाणत्वात् ॥ ३९ ॥ शतपर्व वज्रम् ॥ ४० ॥ " ब्रह्मकोपहतानां च न गतिर्विद्यते क्वचित्" इत्युक्तेः । यद्वा ब्राह्मणाद्रुद्रात् । तदुक्तं पराशरपुराणे "पितामहस्तु वैश्यश्च क्षत्रियः परमो हरिः । ब्राह्मणो भगवान्रुद्रः सर्वेषामुत्तमोत्तमः" इति । प्रपदाख्यसाम्न्यपि "त्वं देवेषु ब्राह्मणोऽस्म्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावति" इति श्रुतेश्च । शिवो ब्राह्मण एवेति तत्त्वम् । उपधावति सेवत इत्यर्थः । श्रुत्या ब्राह्मणस्य देवतांतरोपासनापि निषिद्धा । यतः स्वोत्कृष्ट एवोपास्यते न तु स्वनिकृष्टः । उत्कृष्टाभावे स्वसमोऽप्युपास्य इति शिवापेक्षया देवतांतरस्य जातिहीनत्वात्तस्यैव महत्त्वमत एव तत्र महेश्वरमहादेवशब्दौ प्रयुज्येते हरिवंशेऽपि विष्णुपर्वसप्तविंशशताध्याये पारिजातोपाख्याने रुद्रस्तुतौ कश्यपेनाप्युक्तम् । "हविर्भुजं भुवनानां सदैवं ज्येष्ठं द्विजं धर्मभृतां प्रपद्ये" इत्युक्तं नीलकंठेन ज्येष्ठं द्विजं ब्राह्मणमिति व्याख्यातमित्ययमर्थः प्रपंचित इति । किं चात एव मंत्रशास्त्रेपि मनुष्यगुरौ श्रद्धाद्यभावे यथोचितगुरोरलाभे वा महादेवादीक्षा ग्राह्या तस्यैव सर्वदेवेषु गृहस्थत्वे सति ब्राह्मणत्वात् । दीक्षा च "तत्त्वज्ञो मंत्रयंत्राणां ब्राह्मणो वीतमत्सरः । गृहस्थः सत्यवादी च गुरुः कार्यः प्रयत्नतः" इत्याद्यगस्त्यसंहितोक्तेर्गृहस्थविप्रादेव ग्राह्या तादृशो रुद्रं विना नान्यदेवोऽस्तीति " गुरोरभावे विप्रेंद्र मंत्रग्रहणमुच्यते । कृष्णपक्षे त्रयोदश्यां दक्षिणा मूर्त्तिसन्निधौ" इत्यादिना तंत्रसारामृदावे । तत्प्रपंचितएकादशे प्रपंचयिष्यामो वयमप्यत उपरम्यतेऽत्र । किं च विष्णूपासना शिवोपासनातो न भिन्नास्ति । "यो वै रुद्रः स नारायणः" इति श्रुतेस्तदभिन्नत्वादिति ध्येयं सुज्ञैः । किञ्च । विष्णोरुपासनापि ब्राह्मणस्य श्रुत्यैव बोधिता "यस्त्वेवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे" इत्युत्तरनारायणसूक्तोक्तेरित्यलं प्रसक्तानुप्रसक्त्येति । तमतिसुंदरं बाहुं पुत्रौ मे द्रक्ष्यत इति भाग्यवंतावेव पुत्रौ मे भविष्यतस्तथा मरणस्यावश्यकत्वेऽपि तद्धस्ततस्तयोर्मृतौ सर्वपापनिस्तारश्च भावीत्यत आशासे वांछाम्यहं मह्यं तावपि निस्तारयितुं तादृक्पुत्रयोर्माताहमपि जन्ममध्येप्यदृष्टभगवद्रूपापि पुत्रसंबंधेन भगवद्दर्शिनीवाभिमंस्ये क्रुद्धाद्विप्राद्वधं मा आशास्स इति ब्राह्मणान्मे पुत्रौ मरिष्यत इति शंकितचित्ता व्याकुलैवाहमखिद्यं संप्रति भगवद्धस्ततो वधं श्रुत्वा स्थिरचित्तैवाभूवमिति भावः ॥ ४१ ॥ ब्रह्महतस्य न कुत्रापि सुखमित्याह-नेति । नारका नरकस्थाः । असौ ब्रह्मदंडहतो भूतभयदश्च । कृपां न कुर्वंति स्वसमीपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कश्यप उवाच ॥ कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् ॥ भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥ ४३ ॥ पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः ॥ गास्यंति यद्यशः शुद्धं भगवद्यशसा समम् ॥ ४४ ॥ योगैर्हेमेव दुर्वर्णं भावयिष्यंति साधवः ॥ निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुम् ॥ ४५ ॥ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकम् ॥ स स्वदृग्भगवान्यस्य तोष्यतेऽनन्ययादृशा ॥४६॥ स वै महाभागवतो महात्मा महाऽनुभावो महतां महिष्ठः ॥ प्रवृद्धभक्त्या ह्यनुभाविताशये निवेश्य वैकुंठमिमं विहास्यति ॥ ४७ ॥ अलंपटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु ॥ अभूतशत्रुर्जगतः शोकहर्ता नैदाघिकं तापमिवोडुराजः ॥ ४८ ॥

तत्रस्थाश्च नानुगृह्णंति कृपां न कुर्वंति ॥ ४२ ॥ कृतो योऽपराधस्तेन शोकस्ततोऽनुतापस्तेन प्रत्यवमर्शनाद्युक्तायुक्तविचारात् भगवति हरौ भवे श्रीरुद्रे एतैः कारणैः॥ ४३॥ पुत्रस्य हिरण्यकशिपोः पुत्राणां मध्ये एक सतां मतो भविष्यति । तमेव वर्णयति गास्यंतीति साधः पंच।भेः । समं सह सदृशं वा ॥ ४४ ॥ हीनवर्णं हेम यथा योगैर्दाहादिभिरुपायैः शोध्यते तथा यस्य शीलं स्वभावमनुवर्तितुमनुगंतुं प्राप्तुं निर्वैरादिभिर्योगैरात्मानं भावयिष्यंति शोधयिष्यंति ॥ ४५ ॥ विश्वप्रसादे हेतुर्यदात्मकं स्वदृगात्मसाक्षी यस्यानन्यया भगवानेव सत्य इत्येवंभूतया दृशा तोष्यते तोषं प्राप्स्यते ॥ ४६ ॥ तत्र हेतुः । स वा इति । महात्माऽपरिच्छिन्नदृष्टिः महानुभावो महाप्रभावः महतामपि मध्ये महिष्ठोऽतिशयेन महान् प्रवृद्धया भक्त्यानुभाविते शोधिते चित्ते वैकुंठं हरिं निवेश्य देहाद्यभिमानं त्यक्ष्यति॥ ४७॥महाभागवतत्वमाह । अलंपट इति । शीलधरः सुस्व भावः गुणानां धैर्यादीनामाकरो जन्मभूमिः परेषां समृद्ध्या हृष्टः। परेषु दुःखितेषु सत्सु । न भूतो जातः शत्रुर्यस्य निदाघे भवं तापं चंद्रो यथा हरत्येवं जगतः शोकहर्ता भविष्यति॥ ४८॥

तदागमनसंभाषणादिकं च नानुमन्यंत इत्यर्थः ॥ ४२ ॥ ४३ ॥ मतः माननीयः यशसः सह गाने भगवत इदं भक्तस्य वेति भ्रांतिवारणायाह-सदृशं वेति ॥ ४४ ॥ हीनवर्णमष्टादशदोषयुतम् । शोध्यते दोषान्निरस्य निर्दोषं क्रियते सुवर्णाष्टादशदोषास्तु रत्नपरीक्षाशास्त्रतोऽवसेयाः ॥ ४५ ॥ यस्य भगवतः प्रसादात् । यदात्मकं यत्स्वरूपम् । यद्वा । यस्य भगवतः प्रसादात् यस्य यस्मै प्रह्लादाय इदं विश्वमेव प्रसीदति कीदृशं यत् यो भगवानेवात्मांतर्यामी यस्य तत् अंतर्यामिरूपेण तथा प्रेरयति यथा तत्पितृविरोधिन इंद्राद्या अपि प्रह्लादाय प्रसीदंतीत्यर्थः । स्वान्स्वीयान्भक्तानेव प्रीत्या पश्यतीति स्वदृक् । न विद्यतेऽन्यो यस्यां तादृश्या दृशा बुद्ध्या यद्बुद्धावन्यः प्रवेष्टुं न शक्नोतीति भावः ॥ ४६ ॥ तत्र भगवत्तोषे । यद्वा । महात्मा महाबुद्धिर्महाधृतिर्वा महांत एव स्तंभस्वेदाद्याः प्रेमानुभावा यस्य स तथा । तत्र हेतु–प्रवृद्धया भक्त्याऽनुभावं प्रापिते आशये मनसि वैकुंठं श्रीकृष्णं निवेश्येमं मायिकलोकं त्यक्ष्यतीत्यर्थः । अतद्विहास्यतीति पाठे तस्माद्धरेरन्यदतत् सर्वमनित्यमसारं चेति निरूप्य विहास्यतीत्यर्थः ॥ ४७ ॥ तस्य भक्तिं भक्त्युत्थान्महागुणांश्चावोचमन्यानपि भक्त्यनुकूलान्महाभागवतत्वसंपादकान्स्वाभाविकान्निवरौंदिभिरित्यत्रोक्तादिपदग्राह्याञ्शृण्वित्याह–अलंपट इति । लंपटो विषयासक्तस्तदन्यो विरक्त इत्यर्थः। 'शीलसमाधौ' समाधिं कुर्वाण इत्यर्थः। वक्तुमशक्या एवं तस्य गुणा इत्याह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छाऽनुगृहीतरूपम् ॥ पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुंडलमंडिताननम् ॥ ४९ ॥ मैत्रेय उवाच ॥ श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशम् ॥ पुत्रयोश्च वधं कृष्णाद्विदित्वाऽऽसीन्महामनाः ॥ ५० ॥ इति श्रीभा० महापु० तृती० दिति कश्यपसंवादवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ मैत्रेय उवाच ॥ प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः ॥ दधार वर्षाणि शतं शंकमाना सुरार्दनात् ॥ १ ॥ लोके तेन हतालोके लोकपाला हतौजसः ॥ न्यवेदयन्विश्वसृजे ध्वांतव्यतिकरं दिशाम् ॥ २ ॥ देवा ऊचुः ॥ तम एतद्विभो वेत्थ संविग्ना यद्वयं भृशम् ॥ न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ॥ ३ ॥ देवदेव जगद्धातर्लोकनाथशिखामणे ॥ परेषामपरेषां त्वं भूतानामसि भाववित् ॥ ४ ॥ नमो विज्ञानवीर्याय माययेदमुपेयुषे ॥ गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ॥ ५ ॥

अपरिच्छिन्नदृष्टित्वमाह । अंतरिति । स्वपुरुषाणामिच्छया पुनःपुनर्गृहीतानि रूपाणि येन । श्रीरेव ललना सुंदरी तस्या ललामं मंडनम् । द्रष्टा द्रक्ष्यति ॥ ४९ ॥ महामनाः सोत्साहचित्ता हरिणा सह युद्धेन मरणे पुत्रयोः कीर्तिः सद्गतिश्च भवेदिति ॥ ५० ॥ इति तृतीयस्कंधे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ हतप्रभैः सुरैः पृष्टः प्राह पंचदशे विधिः ॥ तद्बीजविप्रशापादि वैकुंठे विष्णुभृत्ययोः ॥ १ ॥ तदेवं देवानां ब्रह्मणश्च संवादप्रस्तावमुक्त्वेदानीं तं संवादं वक्तुमाह । प्राजापत्यं काश्यपं तेजो वीर्यं परेषां तेजो हंतीति तथा आर्षः । स्वपुत्राभ्यां करिष्यते यत्सुराणामर्दनं पीडनं तस्माच्छंकमाना ॥ १ ॥ तेन गर्भतेजसा हतालोके निरस्तसूर्यादिप्रकाशे हतौजसो हतप्रभावाः ध्वांतेन व्यतिकरं संकरम् ॥ २ ॥ वेत्थ जानासि किं विचारयसि यद्यतो वयं संविग्नाः भीताः अव्यक्तमज्ञातम् । न स्पृष्टं वर्त्म ज्ञानप्रचारो यस्य ॥ ३ ॥ ब्रह्माणं परमेश्वरत्वेन स्तुवंतः प्रार्थयंते । देवदेवेति सप्तभिः । लोकनाथानां शिखामणे भावविदभिप्रायज्ञोऽसि । केनाभिप्रायेण दितेर्गर्भो वर्धत इति जानासीत्यर्थः ॥ ४ ॥ विज्ञानं वीर्यं बलं यस्य । इदं ब्रह्मदेहमुपेयुषे प्राप्तवते गृहीतो गुणभेदो रजोगुणो येन । व्यक्तस्य प्रपंचस्य । योनये कारणाय । न व्यक्ता केनापि प्रमाणेन विज्ञाता योनिर्यस्य

गुणाकर इति । व्यथितस्तद्दुःखमात्मीयं करोतीत्यर्थः । निदाघे उष्णकाले ॥ ४८ ॥ अंतरंतःकरणे ध्यानेन । बहिर्नेत्राभ्यां साक्षात् । पौत्रः प्रह्लादः ॥ ४९ ॥ भृशममोदत अहो मद्विकर्मापि सत्कर्मशिरोमणिर्दुर्लभं फलं दास्यतीत्याहाहो मे भाग्यम् । पुत्रयोर्मे सत्कीर्त्तिसद्गती भविष्यतः । पौत्रश्च मे हरिभक्तो भविष्यतीति सोत्साहचित्ता "कुलं पवित्रं जननी कृतार्था वसुंधरा भागवती च धन्या । स्वर्गे गता वै पितरो हि तेषां येषां कुले वैष्णवनामधेयम्" इति विष्णुधर्मे । किञ्च । "येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । तेते गता विष्णुपुरीं नरेंद्राः क्रोधोऽपि देवस्य वरेण तुल्यः" इति च ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे चतुर्दशोऽध्यायः ॥१४॥ विधिर्ब्रह्मा (१) "अमनुष्यकर्तृके च" इति टकि तेजोघ्नमिति वक्तव्ये तेजोहनमित्यत्रोपधालोपाभाव आर्षः । यद्वा पचाद्यच् । यद्वाऽसुरार्दनाद्विष्णोः शंकमाना जातौ विष्णुर्मारयिष्यतीत्यर्थः ॥ १ ॥ "व्यतिकरः पुंसि व्यसनव्यतिषंगयोः" इति मेदिनी ॥ २ ॥ स्पृष्टं नाशितम् ॥ ३ ॥ लोकनाथानामिन्द्रादीनां शिखामणे मुख्यतम परेषामुत्तमानामपरेषामधमानां यद्वातीतानामनागतानां च इत्यर्थ इति । अतीतानागतज्ञस्य तव न किञ्चिदगोचरमिति भावः ॥ ४ ॥ प्रपञ्चकारणत्वं त्वन्येषामप्यस्ति किं तत्साम्यमेवेति चेदाह—न व्यक्तेत्यादि । यद्वाऽव्यक्तस्य प्रधानस्य योनये कारणाय प्रवर्त्तकाय वा । यद्वाऽव्यक्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये त्वाऽनन्येन भावेन भावयंत्यात्मभावनम् ॥ आत्मनि प्रोतभुवनं परं सदसदात्मकम् ॥ ६ ॥ तेषां सुपक्वयोगानां जितश्वासेंद्रियात्मनाम् ॥ लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ॥ ७ ॥ यस्य वाचा प्रजाः सर्वा गावस्तंत्येव यंत्रिताः ॥ हरंति बलिमायत्तास्तस्मै मुख्याय ते नमः ॥ ॥ ८ ॥ स त्वं विधत्स्व शं भूमंस्तमसा लुप्तकर्मणाम् ॥ अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुम् ॥ ९ ॥ एष देव दितेर्गर्भ ओजः काश्यपमर्पितम् ॥ दिशस्तिमिरयन्सर्वा वर्धतेऽग्निरिवैधसि ॥ १० ॥ मैत्रेय उवाच ॥ स प्रहस्य महाबाहो भगवान्छब्दगोचरः ॥ प्रत्याचष्टाऽऽत्मभूर्देवान्प्रीणन्रुचिरया गिरा ॥ ११ ॥ ब्रह्मोवाच ॥ मानसा मे सुता युष्मत्पूर्वजाः सनकादयः ॥ चेरुर्विहायसा लोकाँल्लोकेषु विगतस्पृहाः ॥ १२ ॥

ति वा ॥ ५ ॥ सकामतया प्रतिक्षणं दुःखमनुभवंतो निष्कामभक्तान् स्तुवंत आहुर्द्वाभ्याम् । ये त्वा त्वामनन्येन भावेन भक्त्या ध्यायंति आत्मनो जीवान्भावयंतीति तथा । स्वस्मिन्प्रोतानि ग्रथितानि भुवनानि येन । चेतनाचेतनप्रपंचकारणमित्यर्थः । तत्र हेतुः सदसदात्मकं कार्यकारणरूपं वस्तुतस्ताभ्यां परम् ॥ ६ ॥ जितः श्वास इंद्रियाण्यात्मा मनश्च यैः अतः सुपक्वयोगाः अत एव प्राप्तो युष्मत्प्रसादो यैस्तेषाम् ॥ ७ ॥ अन्ये तु नित्यं कर्मक्लेशिन इत्याहुः । यस्येति । तंत्या दामन्या आयत्ता अधीनाः । मुख्याय नियंत्रे प्राणरूपायेति वा । तथा च श्रुतिः । "तस्य वाक्तंतिर्नामानि दामानि" इत्यादिः ॥ ८ ॥ तमसा अहोरात्रविभागाभावेन लुप्तानि कर्माणि येषाम् । आपन्नानापद्गतानस्मान् ॥ ९ ॥ आपत्कारणमाहुः । एष गर्भः तस्य विशेषणम् ॥ अर्पितं निक्षिप्तं काश्यपमोजो वीर्यं दिशस्तिमिरयंस्तमोव्याप्ताः कुर्वन् ॥ १० ॥ दितेः कुचेष्टितं ज्ञात्वा प्रहस्य देवानां ये शब्दा विज्ञप्तिवाक्यानि तेषां गोचरो विषयभूतः प्रत्यभाषत ॥ ११ ॥ युष्मत्सकाशात्पूर्वं जाताः ॥ १२ ॥

विष्णुर्योनिः कारणं यस्य तस्मै । यद्वा व्यक्तो लोके प्रसिद्धः कंजो योनिर्यस्य तस्मै ॥ ५ ॥ भावयति सृजति इत्यर्थ इति । "यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति तथैवास्मादात्मनः सर्वं चराचरं भवति" इत्यादिश्रुतेरिति भावः । तत्र चेतनाचेतनप्रपंचकारणत्वे ताभ्यां कार्यकारणाभ्यां परमसंगम् ॥ ६ ॥ अतः जितेन्द्रियादित्वात् । अत एव सुपक्वयोगत्वादेव ॥ ७ ॥ अन्ये त्वद्विमुखाः । "प्राणो मुख्यः" इति श्रुतेराह प्राणरूपायेति तदधीनत्वे प्रमाणमाहुः तथाचेति । व्याख्यातचरेयम् ॥ ८ ॥ भवतां महता संरंभेण स्तवनाभिप्रायः क इत्यत आहुः—स त्वमिति।स इति तच्छब्देन पूर्वोक्तवैशिष्ट्यं स्मारयति कर्माणि संध्यावंदनादीनि महतामल्पेष्ववश्यं दयादृष्टिर्भवतीत्याहुर्भूमन्निति । अदभ्रा पूर्णा दया यस्यां तया ॥९॥ देवानां सर्वज्ञत्वात्त्वं तु जानास्येवेत्याहुर्देवेति।तस्य गर्भस्याजहल्लिंगत्वाद्वेनुराहुतिसाधनमितिवद्विशेषणम्॥१०॥ यद्वाऽहो अज्ञा मामेव स्तुवंति एतद्विपद्धरणे कोऽहं वराक इति वृद्धो बालकानिव प्रहस्येत्यर्थः। स ब्रह्मा आत्मभूः परमेश्वरोद्भूतः महाबाहो इति सनकादिभ्योऽपि त्वं क्रोधजयेन शूरोऽसीत्याह॥११॥मम कथने एषां प्रश्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त एकदा भगवतो वैकुंठस्यामलात्मनः ॥ ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतम् ॥ १३ ॥ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः ॥ येऽनिमित्तनिमित्तेन धर्मेणाऽऽराधयन्हरिम् ॥१४॥ यत्र चाऽऽद्यः पुमानास्ते भगवाञ्छब्दगोचरः ॥ सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन् वृषः ॥१५॥ यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः ॥ सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् ॥१६॥ वैमानिकाः सललनाश्चरितानि यत्र गायंति लोकशमलक्षपणानि भर्तुः ॥ अंतर्जलेऽनुविकसन्मधुमाधवीनां गंधेन खंडितधियोऽप्यनिलं क्षिपंतः ॥१७ ॥ पारावताऽन्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः ॥ कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृंगाधिपे हरिकथामिव गायमाने ॥ १८ ॥

वैकुंठस्य विष्णोः वैकुंठाख्यं लोकं ययुः ॥ १३ ॥ तं वर्णयति । वसंतीत्यादिद्वादशभिः । वैकुंठस्य हरेरिव मूर्तिर्येषां ते । निमित्तं फलं प्रवर्तकं यस्मिन् । निष्कामेन धर्मेणेत्यर्थः । आराधयन्नाराधितवंतः ॥१४॥ यत्रेति । शब्दगोचरो वेदांतैकवेद्यः विरजं सत्त्वमूर्तिं विष्टभ्य धृत्वा वृषो धर्ममूर्तिः स्वानां स्वान् ॥१५॥ तत्रत्यं वनं विशिनष्टि । यत्रेति चतुर्भिः । सर्वेष्वप्यृतुषु श्रीः पुष्पादिसंपद्येषां तैः॥१६॥ चरितानि चरित्राणि भर्तुः प्रभोः अनुविकसंत्यो मधु मकरंदस्तद्युक्ता माधव्यो वासंत्यो लताः । यद्वा अनुविकसन्मधवः प्रसरन्मकरंदा माधव्यो मधुकालीनाः सुमनसस्तासां गंधेन खंडिता विघ्निता धीर्येषां तेऽपि तद्गंधप्रापकमनिलं क्षिपंतास्तिरस्कुर्वंतो गायंति । अनेन भगवत्पार्षदानां निरतिशयविषयसुखेऽपि भगवद्भजनानंदासक्तिर्दर्शिता ॥ १७ ॥ अन्यभृताः कोकिलाः दात्यूहश्चातकः अचिरमात्रं क्षणमात्रं विरमति अनेन तत्रत्यपक्षिणामपि हरिकथा

मा भूदित्यादित एव वक्तुमारभते—मानसा मनसो जाताः । विहायसाकाशपथा किंप्रयोजनवंतश्चरंतीति चेदाह—लोकेष्विति ॥ १२ ॥ १३ ॥ निलीयते सर्वमत्रेति निलयमिति निरुक्त्या किं शून्यागारमिति चेदाह वसंतीति इत्यर्थ इति । निष्कामकर्मणामेव तत्र गतिरिति भावः । यद्वा । न विद्यते निमित्तं कारणं यस्य सोऽनिमित्तो विष्णुस्स एव निमित्तं फलं यस्मिंस्तेन भागवताख्येनेत्यर्थः । ये पूर्वमाराधितवंतः ते तत्र वसंति 'हरिपदानतिमात्रदृष्टैः' इति 'यन्न व्रजंति' इत्यादिवक्ष्यमाणत्वात् ॥ १४ ॥ विरजं शुद्धं यस्य नामरूपलीलादिकं सर्वं शुद्धसत्त्वमेवेत्यर्थः ॥ १५ ॥ तत्रत्यं वैकुंठस्थं मूर्तिमत्कैवल्यमिवेति वनस्पतिसमूहस्य नित्यसिद्धत्वमेकरसपरमानंदमयत्वमात्मारामविहंगमस्पृहणीयत्वं चोक्तम् ॥ १६ ॥ वसन्तेऽनंतपुष्पसमृद्धेस्सत्त्वान्न केवलं वासंत्य एव लतास्तदा संतीति चेदाह—यद्वेति । लोकशमलेति । ब्रह्मांडवर्तिजीवमालिन्यक्षपणानि स्वेषां तु तद्वियोगदुःखक्षपणानि । वैमानिकाः स्वरविशेषोद्भावनार्थं विमानादवतीर्य सरोवरस्यांतर्जले कंठदघ्नजले । यद्वा । तदवार्त्तिनीनामेव जलसंलग्नवृक्षशाखामारुह्य ताः स्वपत्रादिभिराच्छादयंतीनामंतर्जल एव विकसंतीनां मधुयुक्तमाधवीनां गंधेन खंडिता भगवच्चरितास्वादनैकतानत्वे सविघ्नी कृता धीर्येषां तथा भूता अपि गायंत्येव न तु गानाद्विरमंतीत्यर्थः । किन्त्वनिलं क्षिपन्तः अरे माधवीपुष्पामोदतुंदिल सुमंदशीतानिल भक्तलीलामाधुर्येषु निमज्जिता अस्माकं धियो वृत्तीः कथमाक्रष्टुं यतसे किं त्वं तेभ्योप्यात्मानं मधुरं मन्यसे धिक् त्वां मूढेति निन्दन्तस्तेन कैवल्यमिव मूर्तिमदिति पूर्वोक्तेस्तद्वनस्थपुष्पादीनां ब्रह्मानंदरूपत्वेप्याक्षेपाद्ब्रह्मानंदादपि भजनानंदोऽत्यधिक इति द्योतितम् ॥ १७ ॥ वैमानिका इव तत्रत्याः पक्षिणोऽपि परमभक्ता निर्मत्सराश्चेत्याह—पारावताः कपोताः। हंहो संप्रति हरिकथा प्रवर्तते वयमपि तूष्णीमेव शृणुम इत्येवं कोलाहलो विरमति कदा भृंगाधिपे वनमालाधिकारिणि हरिकथामिव हरिकथातुल्यमेव किमपि घुणाक्षरन्यायेन गायति सति 'हरिहरि' इत्याकारकस्वपक्षशब्दं कुर्वतीत्यर्थः। नजाने तस्मिन्साक्षाद्धरिकथां गायमाने पक्षिणां कीदृगादरो भवेदिति भावः।संदर्भस्तु भृंगाधिपो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंदारकुंदकुरवोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः ॥ गंधेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयंति ॥१९॥
यत्संकुलं हरिपदानतिमात्रदृष्टैर्वैडूर्यमारकतहेममयैर्विमानैः ॥ येषां बृहत्कटितटाः स्मितशोभिमुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः ॥
॥ २० ॥ श्री रूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा ॥ संलक्ष्यते स्फटिककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहणे
ऽन्ययत्नः ॥ २१ ॥

श्रवणादिपरमानंदो दर्शितः ॥ १८ ॥ मंदारपारिजातौ सुरतरुविशेषौ कुरवस्तिलकवृक्षः उत्पलं रात्रिविकासि अंबुजं दिनविकासि नागो नागकेसरः एताः सुमनसः पुष्पजातयः सुगंधा अपि तुलसिकाभरणेन श्रीहरिणा तुलस्या गंधेर्चिते सति यस्मिन्वने तस्यास्तपो बहु मानयंति । अनेन तत्रत्या गुणग्राहिण एव न मत्सरिण इत्युक्तम् । एवंभूतं यत्र तद्वैकुंठं ययुरिति पूर्वेणान्वयः ॥ १९ ॥ पुनर्वैकुंठमेव विशिनष्टि । यत्संकुलं व्याप्तं भवति कैः हरिपदयोरानतिः प्रणामस्तावन्मात्रेण दृष्टैर्भक्तानां विमानैर्न कर्मादिप्राप्यैर्वैडूर्यमारकतैर्हेममयैश्च विमानैः बृहंति कटितटानि यासाम् । स्मितशोभीनि मुखानि यासां ता अपि कृष्णे आत्मा येषां रजःकाममुत्स्मयाद्यैः परिहासादिभिर्न आदधुर्न जनयामासुः ॥ २० ॥ श्रीर्लक्ष्मीः रूपिणी मनोहरमूर्तिधारिणी सती श्रीहरेः सद्मनि संमार्जनं कुर्वतीव यस्मिन् लोके संलक्ष्यते चरणारविंदं क्वणयती नूपुरेण शब्दयंती मुक्तो दोषश्चांचल्यं यया यद्वा मुक्तेन दोषा प्रसारितेन बाहुना । कीदृशे सद्मनि । स्फटिकमयानि कुड्यानि यस्मिन् मध्येमध्ये च शोभार्थमुपेतं संयुक्तं हेम यस्मिन् यस्या अनुग्रहणे श्रीरनुग्रहं करोत्वित्येतदर्थमन्येषां ब्रह्मादीनां यत्नः सा । अयं भावः । यद्यपि तत्र रजो नास्त्येव तथाऽपि स्वर्णपट्टिकाऽवच्छिन्नभित्तिभागेषु बहुधा प्रतिबिंबिता

वनमालाधिकारी मुख्यो भृंगस्तु स्वातिशयेन भगवत्प्रियत्वाच्छ्रीगरुडवत्स्वभावत एव तत्तदक्षरमयपक्षशब्दात्मकं गानमेव तेषु हरिकथेति ज्ञेयम् । इवेति तत्पार्षदादिकर्तृकहरिकथासादृश्यं ज्ञापयति वीणादिवत् ॥ १८ ॥ अर्णः करवीरं पुन्नागस्सुरकर्णिकारः । अर्चिते आदृते अहो धन्या त्वं तुलसि यद्गंधेन भगवान्प्रीयते इति तस्या एव तपो बहु मानयंति न तु स्वेषां तेन यदास्यास्तपो वयं जानीमस्तदेव वयमितो भारतभूमिं गत्वा चराम इति तेषां मनोनुतापो ध्वन्यते । ततश्च वैकुंठवासिनोऽपि भारतभूमौ जन्म वांछंतीति वैकुंठादपि भारतभूमेरुत्कर्षोऽनुध्वन्यते इत्थं बहुमानयंति न त्वसूयंतीत्यर्थः । यतः सुमनसः शोभनाचित्ताः पक्षे पुष्पतरवः । तेन वैमानिका इति पारावतेति मंदारेत्यादिभिर्जरायुजांडजोद्भिदस्त्रय एव तत्र हरिं भजंतो वर्त्तंते न तु चतुर्थः स्वेदजोऽवर्णनादिति ज्ञेयम् । किञ्च । वैकुंठे शोभार्थं पक्षिणो वृक्षादयश्च भगवदिच्छाकल्पिता एव न कर्मवशतः "वैकुंठः कल्पितो येन लोको लोकनमस्कृतः । रमया प्रार्थ्यमानेन" इत्यष्टमस्कंधे वक्ष्यमाणत्वात् ॥ १९ ॥ अभितो वर्त्तिनीमुद्यानशोभां वर्णयित्वा मध्यवर्त्तिनीं वैकुंठशोभां वर्णयति तदिति । किञ्च । यत्र भजनानंदयुक्तेषु ब्रह्मानंदोऽपि न प्रभवति किं पुनर्विषयानंद इत्याह—येषामिति । ता अप्यतिसुंदर्योपि आत्मा चेतः उत्स्मयाद्यैरुत्कृष्टस्मितावलोकैरादिना गत्यालापादिव्यापारैः तैश्च संकुलमिति ॥ २० ॥ मुक्तदोषेति । 'अयमात्मापहतपाप्मा' इतिवन्नित्यमेव दोषरहितैव सेति चेत्तत्राह—यद्वेति । अत्राशयमाह अयं भाव इति । विश्वनाथस्तु-सर्वे हरिभजनानंदवंत इति किं वक्तव्यं साक्षाच्छ्रीरपि यत्र सदा भजंती वर्त्तत इत्याह-यद्वा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वापीषु विद्रुमतटास्वऽमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशम् ॥ अभ्यर्चतीस्वलकमुन्नसमीक्ष्य वक्रमुच्छेषितं भगवतेत्यमतांऽग यच्छ्रीः ॥ २२ ॥ यत्र व्रजंत्यघभिदो रचनाऽनुवादाच्छृण्वंति येऽन्यविषयाः कुकथा मतिघ्नीः ॥ यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यशरणेषु तमस्सु हंत ॥ २३ ॥ येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र ॥ नाराधनं भगवतो वितरंत्यमुष्य संमोहिता विततया बत मायया ते ॥ २४ ॥

सती लीलांऽबुजं भ्रामयंती विनयभक्तिभ्यां तथा लक्ष्यत इति ॥ २१ ॥ अंग हे देवाः यस्मिल्लोके श्रीरेवं अमत अमंस्त मेने किं कुर्वती विद्रुममयानि तटानि यासां अमला अमृततुल्या आपो यासां तासु वापीसु निजवने लक्ष्मीवने परिचारिकाभिरन्विता तुलसीभिः श्रीविष्णुं पूजयंती तदोदके प्रतिबिंबितं शोभनालकयुक्तमुत्कृष्टनासिकायुक्तं च स्ववक्रं वीक्ष्य भगवता उच्छेषितं चुंबितमित्यमन्यत अनेन लक्ष्म्या अपि सौभाग्यसुखं भगवदनुग्रहेणैवेति द्योतितम् ॥ २२ ॥ पुनः कथंभूतं तत् । यद्वैकुंठं न व्रजंति के ये कुकथाः शृण्वंति कास्ताः अघं भिनत्तीत्यघभित्तस्य हरेः रचना सृष्ट्यादिलीला तस्या अनुवादादन्यविषया अर्थकामादिवार्ता मतिभ्रंशिकाः तेषामव्रजने हेतुः । यास्तु हतभाग्यैर्नरैः श्रुताः सत्यस्तांस्तान् श्रोतॄनशरणेषु निराश्रयेषु तमःसु नरकेषु क्षिपंति । हंत खेदे कथंभूता आत्तः सारः श्रोतॄणां पुण्यं याभिस्ताः ॥ २३ ॥ प्रसंगात्तान् शोचंति नोऽस्माभिर्ब्रह्मादिभिरप्यभ्यर्थितां नृगतिं मनुष्यजातिं प्रपन्नाः प्राप्ताः संतोऽपि हरेराराधनं च कुर्वंति कीदृशीं नृगतिम्—यत्र यस्यां धर्मसहितं तत्त्वज्ञानं भवति । तदुभयसाधकत्वा

संमार्जनकारिण्यन्या दासीव यदुक्तं कुरुक्षेत्रयात्रायां "साहं तद्गृहमार्जनी" इति न चैतावता तन्माहात्म्यहानिरिति मंतव्यमित्याह-यदनुग्रहण इति ॥ २१ ॥ परिचरणभक्तिमुक्त्वा साधकभक्तानामिव तस्या अर्चनभक्तिमाह । वापीषु दीर्घिकासु निजवने निःश्रेयसवनैकदेशस्थे लक्ष्मीवने पूजयंती अर्चयितुं प्रातःस्नानं करिष्यंती प्रथमं मुखक्षालनार्थं सोपानतटमध्यासीना स्वमुखं निरीक्ष्य भगवता उच्छेषितमुच्छिष्टीकृतं चुंबनाधरपानाभ्यामित्यमन्यत । यद्वा । तत्र जले नीलोत्पलप्रतिबिंबे मिलितं स्ववक्रप्रतिबिंबं वीक्ष्य भगवता उन्मुखं चुंबितं जातमिति भावोदयो जातः पत्युरेव परमदेवरूपत्वात्ततः सौभाग्यलाभार्थं स एव पूज्य इत्यभिप्रायेण तत्र जले ध्यानेन तत्स्फूर्तेस्तत्र स्वप्रतिबिंबदृष्ट्या स्वमूर्तेश्च सहयोगाच्चुंबितत्वज्ञानमपि संगतम् । यद्वा । उच्छेषितमुपभुक्तमित्यमन्यत पूर्वपूर्वानुभूततया स्मृतवतीत्यर्थः । भगवत्कृतचुंबनप्रभावादिदं मदीयं सौंदर्यमित्यमन्यतेतिवार्थः "पतिरेव हि नारीणां दैवतं परमं मतम्" । किं च । "स्त्रिया भर्त्तरि सुप्रीते कः श्रम इह चागमः" इति वक्ष्यमाणत्वात् । पतिव्रतान्या स्त्रिया पतिं विहाय देवतांतरपूजा न कार्या स एव तत्तद्देवतारूपेणार्च्यः "स एव देवतालिंगैरर्चनीयः प्रयत्नतः" इत्युक्तेः।शैवेऽपि "पुत्रस्य पितरौ देवौ स्त्रिया भर्त्ता उदाहृतः" पत्युरेव देवत्वं विहितमिति॥२२॥तत्र गंतुं केऽधिकारिण इत्यपेक्षायां प्रथममनधिकारिण आह अघभिदोऽघासुरहंतुः । "अघोऽपि यत्स्पर्शनधौतपातकः" इत्यत्र तथा प्रसिद्धस्यैवानुवादं परित्यज्यान्यदन्यदीयं यद्वचनं तदेव विषयो यासां ताःकथा इति कृष्णकथाः कदाचिदपि ये न शृण्वंतीत्यर्थ इति संदर्भः । यद्वा श्रीकृष्णस्य रचना लीला कथा तस्या अनुवादादनुकीर्त्तनादन्यविषया एव कथा न्यायादिशास्त्रविषया अपि कथाः कुकथा एव वस्तुतस्तु मनुष्यवाङ्निर्मितपुराणेतिहासाप्रसिद्धाधुनिककथा एव कुकथा ज्ञेयास्ता ये शृण्वंति ते तद्वैकुंठं न व्रजंति तर्हि किं व्रजन्ति तत्राह याः कुकथाः हतभगा मन्दभाग्या एव तत्राधिकारिण इति सारोऽत्र विवेकादिः ताः कथा एव बलात्कारेण पातयंति वक्ष्यति च "नूनं दैवेन विहता ये चाच्युतकथासुधाम् । हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः" इति ॥ २३॥ तानसत्कथाश्रोतन् हंतहंत यद्यपि तत्र गंतुं नृजातय एवाधिकारिणो न तु देवादिजातयस्तदपि भक्तिरहितशास्त्रतात्पर्याद्भ्रंशितबुद्धयो नृजातय एव केचिद्वंचितास्तान्शोचंतीत्यर्थः । हा हंत भारतभूमौ कदा नृजनुषो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यच्च व्रजंत्यऽनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः॥भर्तुर्मिथः सुयशसःकथनानुरागवैक्लव्यबाष्पकलया पुलकीकृतांगाः॥२८॥
तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः ॥ आपुः परां मुदमपूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुंठम् ॥२६॥

तस्याः तेऽमुष्य भगवतो विस्तृततया मायया ननु संमोहिताः। बतेति खेदे यदि वैवं संबंधः। केवलं त एव न व्रजंति किं तु ये भगवदाराधनं न कुर्वंति तेऽपि तेषां मायामोहितत्वा दिति॥२४॥पुनः कथंभूतम्। यच्च न उपरिस्थितं व्रजंति। के अनिमिषां देवानामृषभः श्रेष्ठो हरिस्तस्यानुवृत्त्या दूरे यमो येषाम्। यद्वा। दूरीकृतयमनियमाः पाठांतरे दूरीकृताहंकारा इत्यर्थः। स्पृहणीयं करुणादि शीलं येषाम्। किं च भर्तुर्हरेर्यत्सुयशस्तस्य मिथः कथने योऽनुरागस्तेन वैक्लव्यं वैवश्यं तेन बाष्पकला तया सह पुलकीकृतमंगं येषाम्। यद्वा नः उपरीति व्रजतां विशेषणम्। निरहंकारत्वादस्मत्तोऽपि येऽधिकास्ते यद्व्रजंतीत्यर्थः ॥ २५ ॥ तत्तदा तदपूर्वं विकुंठमथो अनंतरमुपेत्य मुनयः परामुत्कृष्टां

भूत्वा कृष्णं भजंतः क्षणमात्रेण वैकुंठं प्राप्नुयामेति नोऽस्माभिः प्रार्थितां "गायंति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे। स्वर्गापवर्गस्य फलार्जनाय भवंति भूयः पुरुषाः सुरत्वात्" इति गारुडोक्तेः। यस्यां नृजातौ भगवद्धर्मपर्यंतो धर्मो भवति भगवद्धर्मपर्यंतस्य तत्त्वस्य ज्ञानं च भवति तां प्राप्ताः सर्वेषां धर्माणां मूलं भगवदाराधनं न कुर्वंति ते मोहिताः। तदुक्तं 'बिले बतोरुक्रमविक्रम—' इत्यादि। ब्रह्मवैवर्त्तेऽपि "प्राप्यापि दुर्लभतरं मानुष्यं विबुधेप्सितम्। यैराश्रितो न गोविंदस्तैरात्मा वंचितो ध्रुवम्॥ अशीतिचतुरश्चैव लक्षास्ताञ्जीवजातिषु। भ्रमद्भिः पुरुषैः प्राप्यं मानुष्यं जन्म पर्ययात्॥ तदप्यफलतां जातं तेषामात्माभिमानिनाम्। वराकाणामनाश्रित्य गोविंदचरणद्वयम्" इति। पञ्चमे वक्ष्यति "अहो अमूषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः। यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवोपयिकं स्पृहा हि नः॥" इत्यादिना 'यजतां शं तनोति' इत्यंतेन ग्रंथेन। विश्वनाथस्तु—तत्त्वविषयं ब्रह्मविषयं धर्मसहितं भवति तदप्याराधनं न कुर्वंति चेत्तेऽमुष्य हरेर्मायामोहिता एव धर्मज्ञानयोरपि भक्तिं विना फलासिद्धेरिति भावः। यद्वा। यत्र धर्मसहितं ज्ञानं कुर्वंति न त्वाराधनं ते मोहिताः। यद्वा। भगवत एवाराधनं भगवते न ददति नार्पयंति तत्सुखतात्पर्यतया न कल्पयंति ते सकामभक्ता अपि मोहिता इत्यर्थः। "मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम्। द्वयोर्न साधयत्येकं तेनात्मा वंचितो ध्रुवम्" इति वाक्यं सकामपरं भागवतैर्नाद्रियत इति सह धर्मेण वर्त्तते इति सहधर्मेति "धर्मादनिच् केवलात्" इत्यनिच्। सादेशस्तु पाक्षिकत्वान्नेति ॥ २४ ॥ निश्चयेन मिषंति पश्यंतीति निमिषो मनुष्याः 'मिषदर्शने'ऽस्मात्क्विपि नञ्समासे च षष्ठ्या बहुवचनम्। देवानां श्रेष्ठो हरिस्तस्य निरंतरसेवया यमो यमराजः। ननु विष्णुभक्तदर्शनार्थं यमोप्यायात्येव तच्च बृहन्नारदीये प्रसिद्धं भगीरथयमसंवादेऽतआह यद्वेति। यमा अहिंसादयस्ते च नियमादीनामप्युपलक्षकाः पाठांतरे दूरेऽहम इति पाठे। इत्यर्थ इति। निवृत्ताहंकारा अत्राप्यहं पदं ममत्वाद्युपलक्षकमिति भावः। ननु ब्रह्मलोकादुपरि त्वंडकटाहावरणान्यपि तिष्ठंति किं तत्र व्रजंतीत्याशंकानिवृत्त्यर्थमाह—यद्वेति। इत्यर्थ इति।ममापि ते वंद्या इति भावः।किञ्च। क्वचित्पुराणादावसुराणामपि कदाचित्तत्र क्षणिकगमनादिकं श्रूयते तत्तु तत्रत्यचिद्विभूतिसुखानुभवाभावाद्गमनमप्यगमनाय मानमेव यथा विविधसौरम्यादिगुणयुक्तेषु मणिमयराजसदनेषु व्याघ्रभल्लूकादीनां प्रवेशः स्वपुरस्थपरिजनवृंदान्येव कौतुकविशेषवशाद्दर्शयितुमिच्छो राज्ञ एवाज्ञया भवति तथैव स्वीयाप्राकृतनित्यधामनिवासिनः स्वजनान् कौतुकवशाद्दर्शयितुं प्राकृतपदार्थान्कदाचित् घोरसत्त्वान सुरान् कदाचित्सात्त्विकान्भृग्वादीन् कदाचित्त्रिगुणातिक्रमिणः सनकादींश्च स्वेच्छयैव भगवानानयति पुनः शीघ्रमेव तदयोग्यत्वात्ततो निःसारयति च स्वैकांतिकभक्तिसिद्धांस्तु स्वपार्षदद्वारा विमानेन वैकुंठमानयति तत्र सदा निवासयति स्वधाममाधुर्य्यं स्वसेवामाधुर्यं स्वलीलादिमाधुर्यं च तानेवास्वादयतीति विवेचनीयम् ॥ २९ ॥ तत्रतत्र सनकादीनां गमनं वर्णयति यदा भगवत इच्छा जाता तदेत्यर्थः। अपूर्वमदृष्टपूर्वम्। अनंतरमेव भगवदिच्छासमकालमेव। उत्कृष्टां तदीयब्रह्मानंदजमुदोऽप्यधिकां विश्वगुर्वधिष्ठितत्वान्नात्र मायाशक्तेरधिकारः कृपया स्वीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्तमायाम् ॥ देवावचक्षत गृहीतगदौ पराध्यकेयूरकुंडलकिरीटविटंकवेषौ ॥ ॥ २७ ॥ मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयासितचतुष्टयबाहुमध्ये ॥ वक्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग्रभसं दधानौ ॥ २८ ॥ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिकायाः ॥ सर्वत्र तेऽविषमया मुनयः स्वदृष्ट्या ये संचरंत्यविहता विगताभिशंकाः ॥ २९ ॥ तान्वीक्ष्य वातरशनांश्चतुरः कुमारान्वृद्धान्दशार्धवयसो विदितात्मतत्त्वान् ॥ वेत्रेण चास्खलयतामतदर्हणांस्तौ तेजो विहस्य भगवत्प्रतिकूलशीलौ ॥ ३० ॥

मुदमापुः अपूर्वत्वे हेतवः विश्वगुरुणा हरिणाऽधिकृतमधिष्ठितम् । भुवनानामेकमेव वंद्यम् । दिव्यमलौकिकम् । विचित्राणि विबुधाग्र्याणां विमानानि तेषां शोचिर्दीप्तिर्य स्मिन् । योगमायाबलेनेति अष्टांगयोगप्रभावेणोपेत्य परमेश्वरे तु योगमायेति चिच्छक्तिविलास इति द्रष्टव्यम् ॥ २६ ॥ तस्मिन्वैकुंठे षट् कक्षाः प्राकारद्वाराणि असज्जमानाः भगवद्दर्शनोत्कंठया तत्तदद्भुतदर्शन आसक्तिमकुर्वाणाः द्वारपालौ देवावपश्यन् । समानं वयो ययोः गृहीते गदे याभ्याम् । पराध्यैः केयूरादिभिर्विटंकः सुंदरो वेषो ययोः ॥ ॥ २७ ॥ तावेव वर्णयति मत्ता द्विरेफा यस्यां तया वनमालया निवीतौ कंठलंबिन्या अलंकृतौ असिता नीलाश्चतुष्टयं चतुःसंख्याका बाहवस्तेषां मध्ये विन्यस्तया वक्त्रं च मनाग्रभसं किंचित्क्षुब्धं दधानौ स्फुटावुत्फुल्लौ निर्गमौ श्वासमार्गौ नासापुटे ताभ्याम् ॥ २८ ॥ एतयोर्मिषतोः पश्यतोस्तावनादृत्यापृष्ट्वैव याः पूर्वाः षट् द्वारः पुरटालंकृत वज्रमय्यः कपाटिका यासु ता यथा विविशुस्तथा सप्तमायामपि द्वारि ते निविविशुः । अप्रश्ने हेतुः सर्वत्र ये अविहता अनिवारिताः संचरंति निःशंकत्वे हेतुः अविषमया स्वदृष्ट्येति ॥ २९ ॥ वातरशनान्नग्नान्वृद्धानपि पंचवर्षबालकवत्प्रतीयमानान् चकारादाज्ञया च अस्खलयतां निवारितवंतौ न तत्स्खलनमर्हतीति तथा तान् । अहो अत्रापि

भक्तिमुपदेष्टुमेवं मुनीनप्यानिनायेति विश्वगुरुपदव्यंग्यं वस्त्विति । संदर्भचक्रवर्त्तिनौ तु—योगमायाया भगवदिच्छानुवर्त्तिन्या भगवच्छक्तेर्बलेन न तु स्वबलेन "मनीषितानुभावोऽयं मम लोकावलोकनाम्" इति भगवदुक्त्यायेने त्याहतुः ॥ २६ ॥ यद्वा । जन्मतो ब्रह्मानंदमग्नत्वात् तत्रतत्र द्वारप्राकारादौ सौरभ्यसौगंध्यसौंदर्ययुक्तेषु विषयबुद्धिमकुर्वाणाः देवौ जयविजयौ "कक्षा बृहतिकायां स्यात्कांच्यां मध्येभबन्धने । हर्म्यादीनां प्रकोष्ठे च" इति मेदिनी । "प्रकोष्ठो मणिबंधस्य कूर्परस्यांतरेऽपि च । भूपकक्ष्यांतरेऽपि स्यात्" इतिच । "टंकः पाषाणभिच्छस्त्रे विटंकः सुंदरे स्मृतः । भूषितेऽपिविटंकः स्यात्" इति स्वामी॥२७॥ "निवीतं कंठलंबितम्" इत्यमरः। ॥२८॥ पुरटालंकृतवज्रमय्यः सुवर्णालंकृतहीरककीलवत्यः कपाटिका अरराणि यासु द्वार्षु "पुरटं कार्त्तस्वरे हेमकलधौते च" इति नाममाला । 'कपाटमररं तुल्ये' इत्यमरः । 'वज्रं हीरकशंवयोः इति' यादवः ॥२९॥ तान्मुनीन् । वातस्य रसना क्षुद्रघंटिकोपलक्षिता वस्त्रालंकारादीनि येषां तान्नग्नानित्यर्थः । वृद्धान्ब्रह्मसमवयस्कानपि वेत्रेण तिर्यग्वेत्रधारणेन आज्ञया सहसा भगवदंतःपुरं मा विशतेति वाचा च धाष्ट्यं ब्रह्मजत्वादहंकारेणान्याग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपाभ्याम् ॥ ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ॥ ३१ ॥ मुनय ऊचुः ॥ को वामिहैत्य भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः ॥ तस्मिन् प्रशांतपुरुषे गतविग्रहे वां को वात्मवत्कुहकयोः परिशंकनीयः ॥ ३२ ॥ न ह्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः ॥ पश्यंति यत्र युवयोः सुरलिंगिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोस्य ॥ ३३ ॥

धार्ष्ट्यमित्येवं तेषां तेजो विहस्य भगवतो ब्रह्मण्यदेवस्य प्रतिकूलं शीलं ययोः ॥ ३० ॥ हरेर्द्वारपालपतिभ्यां देवेषु पश्यत्सु वार्यमाणास्ते मुनयः को वामित्यादिश्लोकत्रयीमूचुः । सुहृत्तमः श्रीहरिस्तस्य दिदृक्षितं दर्शनेच्छा तस्य भंगे सति कामस्यानुजः क्रोधस्तेन सहसाऽकस्मादेवोपप्लुतानि क्षुभितान्यक्षीणि येषां ते सुष्ठु पूज्यतमा अपीति निषेधानर्हत्वे क्रोधानर्हत्वे वा हेतुः ॥ ३१ ॥ उच्चैर्महत्या भगवत्परिचर्यया एत्य प्राप्य इह वैकुंठे निवसतां तद्धर्मिणां भगवद्धर्मिणां समदर्शिनां मध्ये वां युवयोरेव कोऽयं विषमः स्वभावः कैश्चित्प्रवेष्टव्यं कैश्चिन्नेत्येवंभूतः । ननु स्वामिनो रक्षार्थं द्वारपालयोरेष स्वभावो गुण एवेति चेदत आहुः । तस्मिन्निति । कुहकयोः कपटयोः आत्मवत्स्वदृष्टांतेन यथा आवां कपटौ तथान्योऽपि कश्चित्कपटः प्रवेक्ष्यतीति । अयं भावः । न ह्यत्र भगवद्भक्तं विना कश्चिदागच्छति न चेश्वरे प्रशांतत्वादविद्यमानविरोधे भयशंका अतो युवां केवलं धूर्तावेवेति ॥ ३२ ॥ भयशंकाबीजं च भेदः स च कस्याप्यस्मिन्नास्तीत्याहुः । न हीति । समस्तं विश्वं कुक्षौ यस्य यत्र यदेह भगवति धीरा विद्वांस आत्मनोंऽतरं भेदं न पश्यंति किं त्वस्मिन्परमात्मन्यात्मानमंतर्भूतं पश्यंति महाकाशे घटाकाशमिव तदा यथाऽन्यस्य राजादेरुदरभेद्युदरभेदयुक्तं भयं भवति तथाऽस्य श्रीहरेस्तादृग्भयं यतो

णनमिति दासद्वारापि स्वब्रह्मण्यताविघातो नोचितो यतः प्रभोर्मनोऽनुसारिलीला एव भृत्या अदंडयाः कुशलिना भवंतीति भावः ॥ ३० ॥ देवेषु वैकुंठीयदेवेषु ताभ्यां जयविजयाभ्यां निर्गमागमार्थं प्रतिह्रियते प्राप्यते इति प्रतिहारो द्वारं तत्पात इति प्रतिहारपौ ताभ्यां " प्रतिहारो द्वारि द्वाःस्थे द्वास्स्थितायां तु योषिति " इति मेदिनी ॥ ३१ ॥ क्रोधोपरक्तत्वात्प्रथमं निंदति को वा इति । तद्धर्मिणां भगवत्तुल्यधर्माणां तत्रापि इह समीप एव वसतां विषमो ब्राह्मणैर्न प्रवेष्टव्यमिति भगवत्स्वभावपरिपंथी कः स्वभावः । ननु ब्राह्मणवेषेण भगवद्द्वेषिणोऽपि कपटेन प्रविशंत्यतः प्रथमं ब्राह्मणा अपि जिज्ञास्या एव ततः प्रवेशनीया इति चेत्तर्हि युवामेव भगवद्भक्तवेषेण कपटिनौ तदीयब्रह्मण्यत्वप्रशांतत्वगतविग्रहत्वादिमहागुणलोपे प्रवृत्तौ तद्द्वेषिणावत्रत्यौ न त्वन्यः कोपि तस्य शंकनीय इत्याहुः—तस्मिन्नित्यादि आत्मवदिति " आत्मवन्मन्यते जगत् " इति न्यायेन वां युवयोः कपटिनोरपि को वा शंकनीय इति काका युवामेव शंकनीयाविति भावः ॥ ३२ ॥ उदरोपलक्षितदेहभेदयुक्तं तादृग्भयमुदरोपलक्षितदेहभेदभयम् इत्यर्थ इति । रे मूर्खाः शृणुत ये शंकनीयास्तेप्यस्य कुक्षौ वसंतीति भावः । यद्वा । कश्चिच्छत्रुर्वेषांतरेण प्रविश्य प्रभोरस्योदरं भेत्स्यतीति भयमित्यर्थः । अत्र यद्यपि सर्वज्ञादिस्वरूपभूतानंतकल्याणगुणादीश्वरचैतन्यादल्पज्ञादिस्वभावं जीवचैतन्यं सूर्यात्तदातप इव जात्यैव भिद्यते तदाप्यत्र वक्तॄणां सनकादीनां ज्ञानित्वात् ज्ञानिनां च पद्धतावद्वैतज्ञानलभ्यनिर्वाणसिद्ध्यर्थं चित्सामान्यग्रहणस्यैव विधीयमानत्वाच्चिद्विशेषभूतानामीश्वरजीवयोर्गुणानां मायायाश्च ग्रहणस्य निषिद्धत्वादीश्वरजीवयोर्महाकाशदृष्टांतो नानुपपन्नो ज्ञेय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्धाममुष्य परमस्य विकुंठभर्तुः कर्तुं प्रकृष्टमिह धीमहि मंदधीभ्याम् ॥ लोकानितो व्रजतमंतरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र ॥ ३४ ॥ तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः ॥ सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ॥ ३५ ॥ भूयादघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषम् ॥ मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोऽधः ॥ ३६ ॥

येन कारणेन सुरवेषधारिणोर्युवयोर्विशेषेणोत्पादितं तत्किम् । न किंचिदित्यर्थः ॥ ३३ ॥ तत्तस्मादमुष्य वैकुंठनाथस्य भृत्याभ्यां युवाभ्यां प्रकृष्टं भद्रमेव कर्तुमिहास्मिन्नपराधे यद्युक्तं तद्धीमहि चिंतयेम । तदेवाहुः । अंतरस्य भेदस्य भावः सत्ता तद्दर्शनेन इतो वैकुंठलोकाद्व्रजतम् । यत्र येषु लोकेष्वस्य पापीयसोंऽतरभावद्रष्टुरिमे "कामः क्रोधस्तथा लोभ" इति गीतोक्तास्त्रयो रिपवो भवंति । इतो वैकुंठात्पापीयसो लोकानिति वा ॥ ३४ ॥ इति तेषामीरितं भाषणं घोरमवधार्य तं च ब्रह्मदंडं ब्रह्मशापमवधार्य तं चास्त्रसमूहैरप्यनिवार्यमवधार्य हरेरनुचरावतिकातरेणातिकातर्येण भयेन तत्पादग्रहणं कुर्वंतौ संतौ दंडवदपतताम् । कथंभूतस्य हरेः—एवंभूतेभ्यो मुनिभ्यस्ताभ्यामप्युरु अधिकं बिभ्यतो भयं भावयतः ॥ ३५ ॥ अहो अपराद्धमस्माभिरित्यनुतप्यमानान्प्रत्यूचतुः । अघोन्यघवति य उचितो दंडः स एव भगवद्भिरकारि नात्र भवतामपराधः कश्चित् । अतोऽसौ नौ आवयोर्भूयात् । योऽशेषमपि सुरहेलनमीश्वराज्ञातिक्रमरूपं पापं हरेत किंतु युष्माकं यः कृपानिमित्तोऽनुतापस्तस्य लेशेन नौ अधोऽधो मूढयोनी

इति विश्वनाथः ॥ ३३ ॥ एवं निंदित्वाप्यशांतक्रोधाः पुनराहुः यतो युवाभ्यामस्य विष्णोर्भेददर्शनेन विशेषतो ब्रह्मण्यदेवस्य ब्राह्मणद्वारेण चापकर्षः कृतस्तत्तस्माद्धेतोरस्यांतरंगत्वाद्वयमेव ध्यायेमेत्यर्थः । तदेव प्रकृष्टकरणमेव । अंतरस्य भेदस्य सत्ताभवनं "भावः सत्ताजन्मनोः स्यात्" इति कोशात् । अस्य इम इत्याभ्यां बुद्धिस्थपरामर्शस्त्यदादीनां तथात्वोक्तेः । विश्वनाथस्तु—अत्रापरोक्षार्थवाचिनेदंशब्दप्रयोगेणैते संप्रत्यस्मादेहादुद्भूताः क्रोधादय इति सरस्वत्यभिमता इत्यर्थमाह । संभवत्वादर्थांतरमाह पापीयसो लोकानिति वेति। गोस्वामिनस्तु—लोकान् जनसमूहान् व्रजतं तत्र जायेतां यत्र व्रजने इमेऽस्मान्निर्दिष्टा लोका दैत्यराक्षसराजन्यजनसमूहास्त्रयोऽस्य भगवतोऽपि रिपवो भविष्यंतीत्याहुः ॥ ३४ ॥ अहो अपराद्धमावाभ्यां यद्ब्राह्मणाः कोपिता इति घोरं भयजनकम् । अस्त्रसमूहैर्ब्राह्मपाशुपतायस्त्रसंघातैः । एवंभूतेभ्यः क्रोधयुक्ततपस्विभ्यः । ताभ्यां जयविजयाभ्यामपि सकाशादात्मनोऽधिकं भयं भावयतश्चिंतयतः । विश्वनाथस्तु—हरेः सकाशात्प्रथमं बिभ्यतुर्भीतौ । अतुस उकारस्याकारश्छांदसः । ततश्च तत्पादग्रहणं कुर्वंतौ दंडवदपततामित्याह । किञ्च ब्रह्मदंडमवधार्येत्यनेन तेषां शापात्पूर्वं ब्राह्मणत्वज्ञानं नासीदिति गम्यते ॥ ३५ ॥ तौ तु स्वस्य जन्म तद्रिपुषु बुद्ध्वा रिपुत्वं च बुद्ध्वा तत्स्मरणमात्रं प्रार्थयेते । यद्वा । अहो अपराद्धमस्माभिरेव यद्युवां भगवद्भक्तौ शप्तौ हंतहंततः परं किं कुर्मः क्रोधाद्या जिता इत्यस्माकीनः सार्वकालिकोऽभिमानोऽत्र वैकुंठे चूर्णी बभूवेत्यनुतप्तान्प्रत्येकमाहतुः अघवत्यपराधिनि मयि भगवद्भिर्युष्माभिः । असौ भूयादित्याशीर्लिङा तमहमाशिषमेव भावयामीति न तु दंडम् । अत्र हेतुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः ॥ तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः ॥ ३७॥ तं त्वागतं प्रतिहृतौपयिकं स्वपुंभिस्तेऽचक्षताऽक्षविषयं स्वसमाधिभाग्यम्॥हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकरांबुम् ॥३८॥

व्रजतोरपि भगवत्स्मृतिप्रतिघातको मोहो मा भवेत्किं तु मोहोऽपि स्मृतिमेव प्रवहतादिति प्रार्थना ॥ ३६ ॥ एवं स्वानां महत्स्वतिक्रममपराधं तत्क्षणमेव विबुध्य तस्मिन्यत्र ते रुद्धास्तं देशं ययौ आर्याणां हृद्यो मनोज्ञः । चरणौ चलयन्निति । अयं भावः । मच्चरणदर्शनप्रतिघातजं क्रोधं तौ दर्शयन् शमयिष्यामीति त्वराव्याजेन पद्भ्यामेव ययौ श्रीसाहित्यं च निष्कामानपि विभूतिभिः पूरयित्वा क्षमापयितुम् ॥ ३७ ॥ तत्र तैर्दृष्टं देवमनुवर्णयति पंचभिः । तं त्वागतं तेऽचक्षत अपश्यन् आपंचमादिदमेव क्रियापदम् । स्वपुंभिः शीघ्रं प्रतिहृतमानीतमौपयिकं गमनोचितं छत्रपादुकादि यस्य । कथंभूतम् । स्वसमाधिना भाग्यं भजनीयं फलं यद्ब्रह्म तदेवाक्षविषयम् । हंसवच्छ्रीर्ययोस्तयोरुभयतश्चल तोर्व्यजनयोर्यः शिवोऽनुकूलो वायुस्तेन लोलंतश्चलंतः शुभ्रातपत्रशशिकेसराः शुभ्रं यदातपत्रं तदेव शशिसादृश्याच्छशी तस्य केसरा मुक्ताहारविलंबास्तेभ्यो गलंति सीकरां

पुनर्द्रौ संहतावेवाहतुः य इति नावावयोः युष्मदवज्ञानाद्भगवदनभिप्रेताचरणाच्च वैकुंठदेशानुचितक्रोधकरणाच्च युष्मासु भगवति वैकुंठे धाम्नि च जनितोऽपराधः सर्वं हरेत नाशयेत् ॥ ३६ ॥ तात्पर्यमाह—अयं भाव इति । विश्वनाथस्तु एवं परस्परापराधभावनोद्भूतांतर्दैन्यसमुद्रपृषद्भिरेवाश्रुमिषेण बहिर्निस्सरद्भिः स्नपयित्वेव दोषाच्छुद्धीकृतेषु सनकादिजयविजयेषु विप्रत्वभक्तत्वयोर्याथार्थ्यमनुभावितेषु तत्रत्यसम्येष्वात्मधिकारेणैव भाक्तिः समुद्योतते समुद्योतिनी च भक्तिर्भगवंतमाकर्षतीममर्थं प्रमाणी कुर्वन्निव ब्रह्मण्यदेवो भक्तवत्सलो भगवांस्तदा तत्रैवाजगामेत्याह—एवमिति । स्वानां सदतिक्रमं स्वभक्तकर्तृकब्राह्मणातिक्रमम् । आर्याणां वेदानुयायिनां हृदि प्रादुर्भवतीत्यार्यहृद्यः सोऽपि तेषां नेत्रेष्वपि प्रादुर्भवितुमिति भावः । तस्मिन्सप्तमद्वारप्रदेशे महामुनीनामप्यन्वेषणीयावन्वेष्टुं योग्याविति यथा निर्विकल्पकज्ञानानंतरं सविकल्पकज्ञानमपेक्षितव्यं भवति । तथा ब्रह्मस्वरूपानुभवानंतरं भगवत्स्वरूपमनुभवितुमर्हमित्यत एव चरणौ चलयन्निति । मच्चरणमाधुर्यमननुभूतचरमेताननुभाव्य महानिर्वृतिचमत्कारसिंधौ निमज्जयामीत्यभिप्रायेणैव सहश्रीरिति । बहिरंगाया मायाया एव मच्छक्तित्वमेते जानंति न त्वस्याः श्रियः स्वरूपभूताया इत्येतामप्याल्हादिनीं शक्तिमनुभावयामीत्यभिप्रायेण । गोस्वामिनस्तु—अत्र तेषामात्मारामाणामप्यानंददानार्थं चरणदर्शनेन तस्य सच्चिदानंदघनत्वं श्रीसाहित्येन तच्छक्तिविलासस्यापि स्वरूपानतिरिक्तत्वं विवक्षितं स्वानामिति बहुवचनेन द्वयोरप्यपराधः, सर्वेष्वेव परिवारेष्वापततीत्यपेक्षया तयोर्बहुमानाद्वा । स्वशब्देन मुनीनां न तादृशं तदा स्वीयत्वमिति विवक्षितं यद्वा । चरणौ चलयन्निति पादुके अप्यस्वीकुर्वन्निति मुनिष्वादरविशेषो दर्शितः । सहश्रीरिति । तेषु तस्या अप्यगोपनं दर्शयित्वा तयोरपराध एव दृढीकृत इत्याहुः । मम त्वित्थं प्रतिभाति ते नैष्ठिकाः स्त्रीदर्शनात्संकुचिता मां न किंचिद्वादिष्यंतीत्येतदर्थं सहश्रीरिति । यद्वा। कुपितः पुत्रः पित्रोपायशतेनापि बोधितो न शाम्यति मात्रा त्वल्पप्रार्थितोऽपि शाम्यतीति तत्कोपशमनार्थमेव सहश्रीरिति यद्वा । भगवान्किं तेभ्यो वदिष्यसीति कौतुकावलोकार्थं स्वयमेव सहागता श्रीरिति ॥ ३७ ॥ तत्र तदा । तैः सनकादिभिः । तं भगवंतम् । आपञ्चमात्पंचमपद्यपर्यंतम् । इदमेवाचक्षतेत्येवंरूपं योज्यमित्यर्थः । तत्र तैरननुभूतचरं तन्माधुर्यं वर्णयति प्रतिहृतेति । अहो भगवच्चरणाः संप्रति बहिश्चत्वरमलं कुर्वंत इति तात्कालिक्या प्रथया तमवलोकितुमत्युत्कृष्टया । द्वारपुरनगरविमानकाननस्था भक्तजना आगत्य विविधरंगवस्त्रालंकारफलगंधपुष्पमालारात्रिकादीन्युपकल्पयाञ्चक्रुरित्यर्थः । अक्षविषयं तेषामिंद्रियगोचरीभूतम् । ननु तर्हि विषयत्वं प्रसक्तं तत्र सहुंकारभूतर्जनमाह—स्वसमाधेस्तेषां हृदि ब्रह्माकारे ब्रह्मानंदानुभवस्यापि भाग्यं मूर्तिमदित्यर्थः । अहो एतद्दर्शनेनैवास्माकं समाधिरपि सफलो बभूवेति तेऽमन्यंत तदापि तद्रूपादेर्विषयत्वं को मूढः संभावयेदिति भावः । अत्रातिशयोक्त्या मुक्तावलंबेन केसरत्वेन च्छत्रस्याधोमुखसहस्रदलकमलाकारत्वमारोपितं तेन च छत्रस्य शैत्यसौगन्ध्यमार्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्स्नप्रसादसुमुखं स्पृहणीयधाम स्नेहावलोककलया हृदि संस्पृशंतम् ॥ श्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुभगयंतमिवात्मधिष्ण्यम् ॥ ३९ ॥ पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्याऽलिभिर्विरुतया वनमालया च ॥ वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जम् ॥ ४० ॥ विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटम् ॥ दोर्दंडषंडविवरे हरता पराध्यहारेण कंधरगतेन च कौस्तुभेन ॥ ४१ ॥

बूनि यस्मिंस्तम् । सीकरोंऽबुकणः ॥ ३८ ॥ कृत्स्नस्य द्वारपालमुनिबृंदस्य प्रसादे सुमुखम् । स्पृहणीयानां गुणानां धाम स्थानम् । स्नेहावलोककलया सप्रेमकटाक्षेण हृदि संस्पृशंतं सुखयंतम् । त्रैलोक्यविवक्षापक्षे सत्यलोकपर्यंतः स्वर्गस्तस्य चूडामणिवत्स्थितं स्वधिष्ण्यं वैकुंठं सुभगयंतं शोभयंतम् ॥ ३९ ॥ पृथुर्नितंब आश्रयत्वेन विद्यते यस्य तस्मिन्पीतांशुके अलिभिर्नादितया वनमालया च युक्तम् । सुभगयंतमिति पूर्वेणैव वा संबंधः । वल्गुषु प्रकोष्ठेषु वलयानि यस्य गरुडस्य स्कंधे विन्यस्त एको हस्तो येन इतरेणान्येनाब्जं लीलाकमलं धुनानं भ्रामयंतम् । विन्यस्येति पाठे च वल्गित्यादि हस्तस्य विशेषणम् ॥ ४० ॥ स्वकांत्या विद्युतः क्षिपती ये मकराकारे कुंडले तयो मंडनस्यार्हे गंडस्थले यस्मिंस्तच्च तदुन्नसं च मुखं यस्य मणियुक्तकिरीटं यस्य दोर्दंडानां षंडं समूहस्तस्य विवरे मध्ये स्थितेन हरता मनोहरेण विहरतेति वा पराध्र्य उत्कृष्ट

वानि व्यंजितानि तथा शीकरांबूनां शशिसंबंधित्वेनामृतत्वं च व्यज्यत इति । "निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् । प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥ कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः । विज्ञेयातिशयोक्तिः सा" इति काव्यप्रकाशे बहुधातिशयोक्तिरुक्ता प्रकृतस्योपमेयस्य परेणोपमानेन निगीर्य कवलीकृत्याध्यवसानं तादात्म्यमभेद इत्यर्थः । प्रस्तुतस्योपमेयस्याभिन्नस्य यदन्यत्वं सा द्वितीया । यदि शब्दार्थस्यासंभविनोर्थस्य यदिशब्देन नचेच्छब्देन चोक्तौ, यदर्थकल्पनं कार्यकारणयोः पौर्वापर्यत्वेन वर्णनं चेति अत्र च तस्याः प्रथमो भेदो ज्ञेय इति ॥ ३८ ॥ स्वभक्ताभ्यामपि शापदायिष्वस्मासु न जानीमो भगवानंतः कुप्यति न वेति संशयसिन्धुनिमग्नेषु कृत्स्न आभ्यंतरो बाह्यश्च यः प्रसादस्तेन सुमुखम् अत एव हंतहंतास्मासु प्रत्युत प्रसाद एव पूर्ण उपलभ्यत इत्यंतरुल्लसन्मुनिबृंदस्य नेत्रादींद्रियैः स्पृहणीयानां सौंदर्यसौस्वर्यसौरम्यसौकुमार्याक्रोधौदार्य्यकारुण्यादीनां गुणानां धाम पूर्णास्पदं हा हंतावयोर्ब्रह्मशापानलदग्धयोरधः पततोरीदृग्दर्शनमाधुरीपुनर्न घटिष्यत इति खेदार्णवनिमग्नौ रुदंतौ जयविजयौ प्रति यः स्नेहावलोकस्तस्य कलया कौशलेन तत्रत्यजनानां सर्वेषामेव हृदि संस्पृशंतमहो भक्तवात्सल्यमिति मनोलोभयंतं श्रिया वामस्तनोऽर्द्धे स्वर्णरेखारूपत्वेन स्थितया स्वश्चूडामणिं सत्यलोकस्थानां स्वर्गाणां चूडाया मणिमिव स्वधिष्ण्यं स्वस्वरूपस्थानं वैकुंठं सुभगयंतं धन्यस्स वैकुंठलोको यत्रत्यास्स्वर्णरेखामयीं लक्ष्मीं भगवद्वक्षसि विलोकयंतीत्येवं सौभाग्यवंतं कुर्वंतमिति । अत्र कृत्स्नस्य द्वारपालमुनिवृंदस्येत्युक्तौ वक्ष्यमाणेन "एतौ तौ पार्षदौ मह्यं जयो विजय एव च" इत्यादिना विरोधात्पूर्वोक्त एवार्थः श्रेयान् ॥ ३९ ॥ "तुलसीकुंदमंदारकरवीरसरोरुहैः ॥ पञ्चभी रचिता माला वनमाला प्रकीर्त्तिता" इति गोपालभूषणे । इतरेण दक्षिणहस्तेन कमलं भ्रामयंतमिति लीलाकमलभ्रामणेमिषेण मुनीनां हृदयकमलं ब्रह्मास्वादसुस्थिरमपि स्वमाधुर्यदर्शनेन चपलीकुर्वन्तं तेन च हे मुनयो यन्निर्विशेषस्वरूपानंदात्सर्वोत्तमत्वेन निश्चितात्संप्रति कथंचित्तं चालयथ तत्रैव किं न स्थिरीकुरुध्वे मा स्वनिष्ठां त्यजतेति मुनिषु नर्म द्योतितम् ॥ ४० ॥ रुजो मनोहरत्वार्थाभावाद्व्युपसर्गयोगेन घटितार्थत्वमाह विहरतेति यद्वानेकार्थत्वाद्धातूनां विहरणेऽपि हृत्स्तीति द्योतितम् । यद्वा । हरता मुनीनां चित्तं हरता चोरयता अत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रोपसृष्टमिति चोत्स्मितमिंदिरायाः स्वानां धियां विरचितं बहुसौष्ठवाढ्यम् ॥ मह्यं भवस्य भवतां च भजंतमंग नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ॥ ४२ ॥ तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः ॥ अंतर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥ ४३ ॥

स्तेन हारेण कंधरायां स्थितेन ॥ ४१ ॥ किं बहुना इंदिराया उत्स्मितमहमेव सर्वसौंदर्यनिधिरित्यहंकरणमत्र भगवत्सौंदर्ये उपसृष्टमस्तंगतमिति स्वानां भक्तानां धिया विरचितम् । भृत्यैः स्वमनस्येवं वितर्कितमित्यर्थः । कुतः । बहुसौष्ठवेन सौंदर्येणाढ्यं युक्तम् । किं च । मह्यं मम भवस्येश्वरस्य भवतां च कृतेऽगं भजंतं मूर्तिं प्रकटयंतमचक्षत । निरीक्ष्य च कैः शिरोभिर्मुदा नेमुर्नमश्चक्रुः । न विशेषेण तृप्ता दृशो नेत्राणि येषां ते ॥ ४२ ॥ स्वरूपानंदादपि तेषां भजनानंदाधिक्यमाह । तस्य पदारविंदयोः किंज

एव चौर्यहेतुकभयेनैव भुजच्छिद्रं प्रविशतेत्यर्थः । कंधरशब्देनात्र वक्षसोऽभिधानं तस्यापि परंपरया शिरोधारित्वात् । यद्वा । कंधरायाः सकाशात्स्वर्णसूत्रद्वारा वक्षःपर्यंतं गतेन लंबितेनेत्यर्थः ॥ ४१ ॥ संदर्भस्तु परमसौंदर्यादिगुणशालिनः कांतस्य लाभेन तस्या उत्स्मितं गर्वं उपाधिक्येन सृष्टमाविर्भावयंतमिति । यद्वाऽत्र भगवति उपसृष्टं ब्रह्मादिभिराराध्ययापि रूपगुणमाधुर्यैः सर्वतः श्रेष्ठयापि मया उपसर्जनीभूतमप्रधानीभूतमित्यर्थः । इति हेतुना । चकारात्प्रेम्णा चेंदिराया लक्ष्म्या उत्कृष्टं स्मितं धन्याहं यस्या ईदृशः प्रेयानित्यानंदोत्थ उल्लासो यस्मात्तथाभूतमंगं भजंतं समुचितवस्त्रालंकारादिभिः शोभयंतं न तु शंभुमिव सुन्दरमप्यंगं भस्मादिभिर्विरूपयंतमित्यर्थः । दृश्यते च स्वांगपरिस्कोरऽपि पूजादिशब्दप्रयोगः । "पादयोरल्पपूजा' इति सामुद्रिकादौ तच्च परःसहस्रकिंकरद्वारैवेत्याह—स्वानां स्वाङ्गपरिचारकाणां धिया नित्यानित्यविविधवस्त्रादिशृङ्गारवैलक्षण्यविधायिन्या सूक्ष्मबुद्ध्यैव बहुसौष्ठवाढ्यं विरचितं सौष्ठवं सौंदर्यं तच्च "अंगप्रत्यंगकानाञ्च सन्निवेशो यथोचितम् । सुश्लिष्टसंधिबंधोयस्तत्सौंदर्यमिहोच्यते" इति लक्षितम् । पुनरंगं कीदृशं भवस्य शंभोर्भवतामस्मदादीनां च मह्यं महनीयं 'मह पूजायां' धातुः । गंधपुष्पादिभिर्ध्यानेन देशांतरे पूजनीयमेव न तु तेषामिव वैकुंठे साक्षात्परिचरणीयमित्यर्थः । एवम्भूतं तमचक्षत । ततो निरीक्ष्य चातृप्तनेत्राः संतः कैर्नेमुः 'कं शिरोंबुनोः' इति विश्वः । स्वामिव्याख्याने इत्यर्थ इति । विचारितमिति भावः । तत्र हेतुमाशंकते कुत इति । एतादृग्मूर्त्तिस्वीकारे कारणांतरमाह किं चेति । अस्मदादिध्यानायैव मूर्त्तिमाविश्चकारेति भावः ॥ ४२ ॥ किञ्च । तानि भगवदंगमाधुर्याणि तान् ब्रह्मानंदतोऽपि परमचमत्कारं प्रापयित्वा स्वेषु मज्जयामासुरिति किं वक्तव्यं तदेकांगसंबंधिवस्तुसंबंधी मारुतोऽपि तान्स्वनिष्ठातश्च्यावयित्वा क्षोभयन्विजिग्य इत्याह—तस्येति । पदारविंदयोर्ये किंजल्काश्श्वेतारुणकांतिमन्नखरास्तैर्मिश्रा या तुलसी । गोस्वामी तु अरविंदकिञ्जल्कतुलस्यौ च तदानीं वनमालास्थिते एव ज्ञेये तन्मकरंदसंबंधी वायुस्तेषामंतरंतःकरणं गतः तत्र स्वाधिकारं कर्तुमिव प्रविष्टः नन्वाज्ञां विना परकीयांतःपुरप्रवेशः सनकादीनामिव सहसानुचित इति चेत्तत्र सन्यायमाह—स्वविवरेणेति । नासाछिद्रेण नासाछिद्रं खलु वायोरेव विवरमस्ति तत्र प्रवेष्टुं कस्याज्ञां गृह्णीयादिति भावः तत्र गत्वा किमकरोत्तत्राह—चित्ततन्वोरिति । आदौ बलाच्चित्तं सानंदविवर्त्ते निपात्य क्षोभयामास ततस्तनुमपि कंपाश्रुरोमांचस्वेदादिभिः लोके ह्यन्योपि परकीयदेशेषु स्वाधिकारं चिकीर्षुः पूर्वं तद्देशाध्यक्षं निबध्य विलुठ्य प्रक्षोभयति ततस्तद्देशमपि स्वसैन्यसंमर्दितं करोतीति । ननु ब्रह्मानंदजुषां तेषां चित्तं ब्रह्मानंदमयमेव कथं भगवदानंदस्तत्स्वमयं करोतु तत्राह—अक्षरजुषामपीति । एवमेवास्यमाधुर्याधिक्येन बलवत्त्वमिति भावः ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुंदरतराधरकुंदहासम् ॥ लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ॥ ४४ ॥ पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयनाभिरामम् ॥ पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥ ४५ ॥ कुमारा ऊचुः ॥ योंऽतर्हितो हृदि गतोऽपि दुरात्मनां त्वं सोऽद्यैव नो नयनमूलमनंतराद्धः ॥ यर्ह्येव कर्णविवरेण गुहां गतो नः पित्राऽनुवर्णितरहा भवदुद्भवेन ॥ ४६ ॥

ल्कैः केसरैर्मिश्रा या तुलसी तस्या मकरंदेन युक्तो वायुः स्वविवरेण नासाछिद्रेण अक्षरजुषां ब्रह्मानंदसेविनामपि संक्षोभं चित्तेऽतिहर्षं तनौ रोमांचम् ॥ ४३ ॥ हर्षकारितं संभ्रममाह । द्वाभ्याम् । ते वै किलामुष्य वदनमेवासितपद्मस्य कोशोंऽतर्भागस्तम् । असितपद्मकोशमित्यभूतोपमा । सुंदरतरे अरुणे अधरोष्ठे कुंदवद्धासो यस्मिंस्तम् । उत्ऊर्ध्वं वीक्ष्य लब्धमनोरथाः संतो नखा एवारुणमणयस्तेषां श्रयणमाश्रयभूतमंघ्रिद्वंद्वं पुनरवेक्ष्याधोदृष्टया वीक्ष्य पुनःपुनरेवं निरीक्ष्य युगपत्सर्वांगलावण्यग्रहणाशक्तेः पश्चान्निदध्युर्ध्यातवंतः ॥ ४४ ॥ योगमार्गैर्गतिं मृगयतां पुंसां ध्यानस्य विषयभूतम् । बहुमतमत्यादरास्पदम् । बहूनां तत्त्वदृशां संमतमिति वा।पौंस्नं पौरुषं वपुर्दर्शयंतम् । अन्येष्वसिद्धैरसाधारणैरौत्पत्तिकैर्नित्यैरणिमाद्यष्टैश्वर्यैर्युतम् । समगृणन्सम्यगस्तुवन् ॥ ४५ ॥ नित्यं ब्रह्मरूपेण प्रकाशसे नैतच्चित्रम् । इदानीं तु परममंगलविशुद्धसत्त्वश्रीमूर्त्या

ते मुनयः सुंदरतरे अतिसुंदरे चक्रवर्ती तु—एवं तुलसीगंधेन शोधितप्राणानां तेषामिंद्रियाणां च प्राणाधीनत्वात्प्रथमं चक्षुर्भ्यां रूपमाधुर्य्यग्रहणे लब्धाधिकाराणां रूपमाधुर्यस्य च प्रत्यंगगतवैविध्यानंत्यादेककाले जिघृक्षायामावेगसंचारितमानन्दवैवश्यमाह—ते वेति । वै निश्चितं कोशो बाह्यरूक्षदलपटलरहितोंऽतर्भागस्तमुद्वीक्ष्योत्कृष्टमाधुर्यत्त्वेनास्वाद्य तत्रापि सुंदरतरेति । अधरमाधुर्यमुत्कृष्टतरं तदुपरि च हासपरिहासमाधुर्यमुत्कृष्टतममिति भावः । लब्धाशिष इति पित्रा ब्रह्मणा भ्रात्रा नारदेन च भक्त्यर्थं पूर्वं या आशिषो दत्तास्तत्फललाभात्ता लब्धा इत्यर्थः । अहो चरणमाधुर्यं कीदृशमिति मुखमाधुर्यमीषदेव गृहीत्वा तत्रातृप्ता एव ते चरणमाधुर्यदत्तेक्षणा बभूवुरित्याह—पुनरिति । नखा एवारुणमणयस्तेषां श्रयणमाश्रयभूतमंघ्रिद्वंद्वं पुनरेवाधःप्रदेशे ईक्षित्वा ईषद्वीक्ष्य निदध्युः पुनरपि मुखं वीक्ष्य पुनःपुनरप्येवं दध्युरित्यर्थः । ''निर्वर्णनं सुनिध्यानं दर्शनालोकनेक्षणम्'' इत्यमरः ॥ ४४ ॥ किञ्च मुमुक्षूणामपि शुद्धभक्त्यभावात्तन्माधुर्यमजिघृक्षूणामपि तद्ध्यानं विना मुक्तिर्नेत्याह—पुंसामिति । गतिं मुक्तिं योगमार्गैरष्टांगयोगैः बहुमतं ध्यानास्पदमिति सविशेषरूपस्यावश्यध्येयत्वे नारायणस्वरूपमेव बहूनां संमतमित्यर्थः । पौंस्नं पौरुषं पुरुषस्य गर्भोदशायिनो गुणावताररूपं यद्विराडाख्यं वपुस्तदभिन्नतः स्वं वपुर्दर्शयंतं न तु ब्रह्मादिवदन्यथात्वेनेति संदर्भः । चक्रवर्ती तु—पौंस्नं पुरुषसंबंधीति तेनान्यान्यपि मोहिन्यादीनि तस्य वपूंषि संतीति ध्वनितम् । अनन्येन स्वेनैव सिद्धैः स्वरूपभूतैरित्यर्थः । अत एवौत्पात्तिकैः स्वाभाविकैर्नित्यैरष्टभिः शब्दस्पर्शरूपरसगंधकृपाकमैश्वर्यैर्भोगैर्नानाविधभक्तैर्भक्त्या युज्यमानत्वादास्वाद्यमानत्वाद्भोगैः तत्र शब्दादीनि सौस्वर्यसौकुमार्यसौंदर्यमाधुर्यसौरभ्यवात्सल्यलीलाशब्दवाच्यानि । सप्त माधुर्याणि भक्तानां प्रेमाकारषडिंद्रियभोग्यानि अष्टमं भगशब्दवाच्यैश्वर्य्यषट्कं भक्तैर्मुमुक्षुभिर्मुक्तैश्च यथाशक्ति स्वाद्यंत इति ज्ञेयं स्वामिचरणास्त्वणिमाद्यष्टैश्वर्यैरित्याहुः ॥ ४९ ॥ अहो महत्कृपाया अपारो महिमा यतो भगवतेदृशसाक्षात्कारानंदमनुभाविताः स्म इत्यहो अस्माकं भाग्यमिति । अनुवर्णितरह इति पाठे रहशब्दोऽदंतोपि 'तन्मातरो यदभजन्रहरूढभावाः । इत्यादिषु दर्शनात् । पित्रेति । भो ब्रह्मानंदानुभविनो मत्तनया ब्रह्मसाक्षात्कारादपि कोटिगुणितानंदो भगवत्साक्षात्कारे सोऽपि भगवान्नीलोत्पलदलश्यामलः पीताम्बरश्चतुर्बाहुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं त्वा विदाम भगवन् परमात्मतत्त्वं सत्त्वेन संप्रति रतिं रचयंतमेषाम्॥यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागाः ॥४७॥ नात्यंतिकं विगणयंत्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते ॥ येंऽग त्वदंघ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ॥ ४८ ॥ कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पदयो रमेत ॥ वाचश्च नस्तुलसिवद्यदि तेंऽघ्रिशोभाः पूर्येंत ते गुणगणैर्यदि कर्णरन्ध्रः ॥ ४९ ॥

प्रत्यक्षोऽसि अहो भाग्यमस्माकमित्याहुः । हे अनंत यस्त्वं हृद्गतोऽपि दुरात्मनामंतर्हितो न स्फुरसि स नोऽस्माकमंतर्हितो न भवसि नयनमूलं त्वयैव राद्धः प्राप्तोऽसि । अंतर्धानाभावे हेतुः । भवतः सकाशादुद्भवो यस्य तेनास्मत्पित्रा यर्हि यदैवानुवर्णितरहा उपदिष्टरहस्यस्तदैव नः कर्णमार्गेण गुहां बुद्धिं गतः प्राप्तोऽसीति ॥ ४६॥ ननु पित्रोपदिष्टं भवतामन्यादृशमदृश्यमात्मतत्त्वमहं त्वन्य एव स्यां दृश्यत्वात् । नैवम् । अस्मत्प्रत्यभिज्ञया भेदनिरासादित्याहुः । तमिति । हे भगवन्नात्मतत्त्वमेव परं तं त्वां विदाम विद्मः प्रत्यभिजानीमः । ननु निरुपाधेरात्मतत्त्वस्य कथमीदृशमैश्वर्यं स्यादत आहुः । सत्त्वेन विशुद्धसत्त्वमूर्त्या एषां भक्तानां सम्यक् प्रतिक्षणं संप्रति रतिः प्रीतिस्तां रचयंतम् । आत्मतत्त्वमेवाहुः । तेऽनुतापः कृपा तेन विदितैर्ज्ञातैर्दृढैर्भक्तियोगैः श्रवणादिभिर्मुनयो हृदि यद्विदुः । कीदृशाः । उद्ग्रंथयो निरहंमाना अत एव विगतरागाः॥ ४७॥ स्वयमपि भक्तिं प्रार्थयितुं भक्तानां सुखातिशयमाहुः । आत्यंतिकं मोक्षाख्यमपि तव प्रसादं ते न गणयंति नाद्रियंते । किं तु किमुतान्यदिंद्रादिपदम् । ते भ्रुव उन्नयैरुज्जृंभैः कालात्मकैरर्पितं निहितं भयं यस्मिंस्तत् । ते के । अंग हे भगवन् ये भवतः कथाया रसज्ञाः । कथंभूतस्य । रमणीयत्वेन पावनत्वेन च कीर्तन्यं कीर्तनार्हं तीर्थं पवित्रं च यशो यस्य ॥ ४८ ॥ इदानीं स्वीयापराधं द्योतयंतो भक्तिं प्रार्थयंते । काममिति । हे भगवन्नितः पूर्वमस्माकं वृजिनं नाभवत् इदानीं सर्वाण्यपि जातानि यतस्त्वद्भक्तौ

कटककुंडलादिमंडितश्चंद्रवदनो वैकुंठे विराजमानो भक्त्या लभ्यत इति त्वद्भक्तस्यास्मत्पितुः कृपाशीर्वचनं यदैवाश्रौषं तदैव कारणे लब्धे तत्फललब्धेरावश्यकत्वात् भगवन् त्वं स्वतंत्रोऽस्मान्कृपयसि किं तु स्वभक्ताधीन एवेति त्वद्भक्तकृपामाहात्म्यमनिर्वचनीयमेवेति ॥ ४६ ॥ किञ्च एतावंतं कालं वयं ज्ञानिन एवास्म संप्रति तु त्वद्भक्ता अभूमेत्यहो भाग्यमस्माकमित्याहुः । तं पित्रानुवर्णितरहस्यमेव ननु पित्रोपदिष्टं भवता मदृश्यमात्मतत्त्वमहं त्वन्य एव स्यां दृश्यत्वादिति चेत्तत्राह—संप्रतीति । सत्त्वेन साधुत्वेन कृपयेत्यर्थः । 'सद्भावे साधुभावे च सत्' इति श्रीगीतोक्तेः । रतिं प्रीतिं किंभूतं परं "ब्रह्मणो हि प्रतिष्ठाहम्" इति गीतोक्ते रदृश्यतत्त्वापेक्षयोत्कृष्टम् । ननु चित्तं ब्रह्मसुखस्पृष्टं 'नैवोत्तिष्ठेत्तु कर्हिचित्' इति चेत्तर्हि पूर्वोक्तेन "आत्मारामाश्च मुनयो निर्ग्रंथा अप्युपक्रमे। कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः" इति वाक्येन "प्रायेण मुनयो राजन्निवृत्ताविधिषेधतः । नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः" इति वाक्येन च समाधेयम् । अत एव निरहंकारत्वादेव ॥४७॥ अधुना त्वत्साक्षात्कारस्य का कथा त्वत्परोक्षेऽपि त्वत्कथाकीर्तनानंदोऽपि ब्रह्मानंदादधिक इति प्रोचुर्नेति । नाद्रियंत इति "सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णंति विना मत्सेवनं जनाः" इत्यग्रे कपिलोक्तेः । दर्शनानंदजातप्रेमाण ऊचुरंगेति कथारसज्ञा एव कुशलिनस्तदितरेऽकुशलिन इति भावः ॥ ४८ ॥ स्ववृजिनैः स्वापराधैर्निरयेषु नारकियोनिषु अनेन तद्गुणवर्णनाकर्णनस्य तत्साक्षात्काररहेतुत्वेन तदधिगमे 'पूर्वोत्तराघयोरश्लेषविनाशौ तद्व्यपदेशात्' इति न्यायेन वस्तुतः पापयोनावपि पापिसंबंधो ॥ ५८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रादुश्चकर्थ यदिदं पुरुहूतरूपं तेनेश निर्वृतिमवापुरलं दृशो नः ॥ तस्मा इदं भगवते नम इद्विधेम योऽनात्मनां दुरुदयो भगवान् प्रतीतः ॥ ५० ॥
इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे पंचदशोऽध्यायः ॥ १५ ॥ ब्रह्मोवाच ॥ इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम्॥ प्रतिनंद्य जगादेदं
विकुंठनिलयो विभुः ॥ १ ॥ श्रीभगवानुवाच ॥ एतौ तौ पार्षदौ मह्यं जयो विजय एव च ॥ कदर्थीकृत्य मां यद्वो बह्वक्रांतामतिक्रमम् ॥ २ ॥

शप्तौ अतस्तैः स्ववृजिनैर्निरयेषु कामं नोऽस्माकं भवो जन्म स्तात्स्यात् । नु वितर्कें । यदि तु नश्चेतस्ते तव पदयो रमेत । अलिर्यथा कंटकैराविध्यमानोऽपि पुष्पेषु रमते तद्वद्विघ्नान् विगणय्य यदि रमेत । अंघ्रिभ्यां शोभा यासाम् । यथा च तुलसी गुणनैरपेक्ष्येण त्वदंघ्रिसंबंधेनैव शोभते तथा यदि नो वाचः शोभेरन् । यदि च ते गुणगणैरापूर्यैत कर्णरंध्र इत्यल्पस्य पूरणमेव याचकरीत्या प्रार्थयंते । अयं तु गूढोऽभिप्रायः । कर्णरंध्रस्याकाशत्वाद्गुणगणानां चामूर्तत्वान्न कदाचित्पूरणमतो नित्यमेव श्रवणं फलिष्य तीति ॥ ४९ ॥ अद्य वयं कृतार्थाः स्मेत्याहुः । हे पुरुहूत विपुलकीर्ते यदिदं प्रादुश्चकर्थ प्रकटितवानसि । दृशो नेत्राणि । अनात्मनामजितेंद्रियाणां दुरुदयोऽप्रकटोऽपि इत इत्थं यः प्रतीतोऽसि तस्मै तुभ्यमिदं नमो विधेम ॥ ५० ॥ इति तृतीयस्कंधे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ हरिणा सांत्वितौ विप्रैरनुतप्तैस्तु षोडशे ॥ तयोरसु रभावेऽपि कृतोनुग्रह ईर्यते ॥ १ ॥ इति गृणतां तेषां तद्वाक्यं प्रतिनंद्येदं जगाद एतावित्येकादशभिः ॥ १ ॥ यद्यस्मान्मां कदर्थीकृत्य तुच्छीकृत्य बहु यथा भवति तथा

न भवति भगवद्गुणवर्णनादिना स्वत एव मोक्षो भवेत्किंतदर्थनेनेति गूढोऽभिप्रायः । किं च श्रवणकीर्त्तनस्मरणानीत्यानंदत्रयं मोक्षे न भवति भवे तु संभवेदेवेति भव एव तदर्थं प्रार्थनीय इति भावः ॥ ४९ ॥ एवं त्वदीयश्रवणादिकलोभेन त्वत्परोक्षमयो भवोऽपि प्रार्थ्यते त्वया तु स्वसाक्षात्कारामृतं वयं त्वद्भक्तपराधीनोपि पायिताः स्म इत्याहुः ते कृपाया एतावती सीमा कारुण्यं त्वपारमित्याहुः । प्रादुरिति । पुरु यथा स्यात्तथा यद्वा । पुरुभिर्बहुभिर्भक्तैराहूत हे नारायण गोविंद विष्णो कृपय दर्शनं देहीत्याहूत तेन स्वभक्ताह्वानोत्थकृपापरवशेनैव भवता स्वरूपमाविष्कुर्वता वयमपि कृतार्थीकृता इति भावः । दृशो नेत्राणि बुद्धिवृत्तयो वा इदं नम इति । मूर्द्धसु धृतानंजलीन्दर्शयंति । यद्वा । इति—नम इत्यस्य विशेषणम् । एति श्रीचरणारविंदं प्रति गच्छतीतीदित्यर्थः । यद्वा । येषां त्वं दुरुदयस्तेऽनात्मान आत्मशून्या मृतका एवेति भावः । प्रतीत उलूकान सूर्य इव दर्श एव निश्चित इत्यर्थः । अत्र समस्तात्मारामचूडामणीनां लब्धनिरंतरब्रह्मानुभवानां श्रुतावपि तस्मै मृदितकषायाय तमसा पारं दर्शयति भगवान्सनत्कुमार इत्यादिना प्रसिद्धानां भक्तावीदृशप्रार्थनालिंगेनैव ब्रह्मानन्दादपि भजनानन्दस्याधिम्येऽवगते भगवन्नामरूपगुणपरिच्छदभक्तधाम्नां चिद्घनाकारत्वं स्वत एव लब्धं तथाभूतत्वं विना भक्तेरसिद्धेः "मुक्तानामपि भक्तिर्हि नित्यानन्दस्वरूपिणी" इति भारततात्पर्ये प्रमाणिता श्रुतिश्च तथा 'आप्राणायनात्तत्रापि हि दृष्टम्' इत्यत्र माध्वभाष्यप्रमाणिता सौपर्णश्रुतिः "सर्वदैनमुपासीत यावन्मुक्तिर्मुक्ता ह्येनमुपासते" इति अत एव प्रह्लादबलिप्रभृतिमहाभागवतसंबंधमभिप्रेत्य श्रीविष्णुपुराणेऽप्युक्तं "पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते" इति । अत्र संदर्भकारैर्बहूक्तं तत्तत्रैव लोकनीयमित्युपरम्यते ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ तयोर्जयविजययोः ॥ १ ॥ गृणतां स्तुवतां योगो भक्तियोगः स एव धर्मोस्ति येषां तेषाम् । इदं वक्ष्यमाणम् विकुंठनिलय इत्यनेन प्रतीतं परिच्छिन्नत्वं वारयति विभुरिति 'विभुः सर्वगते पत्यौ' इति यादवः ॥ १ ॥ अपराधाशंकया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः ॥ स एवानुमतोऽस्माभिर्मुनयो देवहेलनात् ॥३॥ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे ॥ तद्धीत्यात्मकृतं मन्ये यत्स्वपुंभिरसत्कृताः ॥ ४ ॥ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि ॥ सोऽसाधुवादस्तत्कीर्तिं हंतिं त्वचमिवामयः ॥५॥ यस्यामृतामलयशःश्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः ॥ सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिद्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम् ॥६॥ यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलम् ॥ न श्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थमितरे नियमान्वहंति ॥७॥

अतिक्रमं वः कृतवंतौ ॥ २ ॥ तस्मात्स एव दंडोंऽगीकृतः ॥ ३ ॥ हि यस्माद्ब्रह्म ब्राह्मणा एव मे परमं दैवं दैवतं तत्तस्मादद्य वः प्रसादयामि । तव कोऽपराध इति चेत्तत्राह । तद्धीति मदीयैः पुंभिरसत्कृतास्तिरस्कृता इति यत्तदात्मकृतमेव मन्ये ॥ ४ ॥ किं च । ममैवैताभ्यामनिष्टं कृतमित्याह । यस्य स्वामिनो नामानि तस्य कीर्तिम्। आमयोऽत्र श्वेतकुष्ठम् ॥ ५ ॥ यस्य मेऽमृतरूपेऽमले यशसि श्रवणेनावगाहः प्रवेशः । श्वपचमभिव्याप्य जगत्सद्यस्तत्क्षणमेव पुनाति सोऽहं विकुंठो भवद्भ्यो हेतुभूतेभ्य उपलब्धा प्राप्ता सुशोभना तीर्थभूता कीर्तिर्येन सः स्वबाहुस्थानीयं लोकेश्वरमपि हन्यां काऽन्यस्य कथेत्यर्थः । स्वगुणानुवर्णनं तु ब्राह्मणोत्कर्षार्थमेव ॥ ६ ॥ चरणपद्मयोः स्थितः पवित्रो रेणुर्यस्य अत एव क्षतो निरस्तोऽखिलस्य लोकस्य मलो येन । यद्वा । चरणपद्माल्लग्नः पवित्रो रेणुर्यस्मिन्निति क्षतोऽखिलो मलो यस्येति च विग्रहः । प्रति

युष्माभिर्न भेतव्यमित्याह एताविति । ताविति सर्वप्राधान्यद्योतनायोक्तम् । यद्वा यौ वोतिक्रमं कृतवंतावेतौ ताविति मदनभिप्रेताचरणमेव मत्तुच्छीकरणम् ॥ २ ॥ अतो मया कर्त्तव्य एव दंडो भवद्भिः कृत इत्याह-मामनुलक्षीकृत्य व्रतानि तपश्चरणादीनि येषां तैः देवा मदीया ब्राह्मणास्तेषां हेलनमवज्ञा तस्मात् । ''नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः । पुनंतः पादरजसा त्रिलोकीं दैवतं महत्'' इति युधिष्ठिरं प्रति नारदोक्तेः ''ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो'' इत्यग्रे इहैव वक्ष्यमाणत्वाच्च ॥ ३ ॥ तदेवाह परमं सर्वोत्कृष्टम् । किञ्च युष्मासु ममैवापराध इति चेत्तत्राह-तद्धीति । यदि जयविजयौ मद्भृत्यौ न स्यातामहं च तयोः प्रीतिमान्न स्यां तदा मेऽपराधो न स्यादिति भावः । स्वस्य मम पुंभिः 'मन्युंभिः' इति पाठोपि क्वचिदस्ति स एव स्वामिसंमतः प्रतिभाति ॥ ४ ॥ ननु परमेश्वरस्य तव कथमपराधस्तथात्वेऽपि तव को दंडयितेति किं संकुचसीति चेत्तत्राह-मास्तु दंडयिता दुष्कीर्त्तिस्तु स्यादेवेत्याह-किञ्चेति । एताभ्यां जयविजयाभ्याम् । अमुकस्य भृत्योऽयं कुकर्मकृदिति स्वामिन एव दुष्कीर्त्तिरिति यस्य त्वक् तस्यैवायं पुमान्कुष्ठीति निंदामुत्पादयतीति ॥ ५ ॥ नन्वस्मदपराधात्तव दुष्कीर्त्तिरस्मत्प्रसादनाच्च तव कीर्तिरिति चित्रं यतोऽस्मादृशा जीवास्त्वत्सृष्टास्तर्ह्यधिका एव त्वत्त इति चेदत्र कः संशय इत्याह-यस्येति । भवद्भ्यो विप्रेभ्यः ''इंद्रादयो बाहव आहुरुस्राः'' इत्युक्तेराह लोकेश्वरमिति । इत्यर्थ इति यद्यहन्तास्पदं स्वांगमपि छिंद्यां तर्हि ममतास्पदयोर्जयविजयोस्तु कावार्तेति तदसमर्थौ युष्मासु सापराध एवाहमिति भावः । ननु 'यस्यामल' इत्याद्युक्तेः स्वोत्कर्षप्रतीतेः स्वगुणाविष्क्रियादोष इति दंडयुक्तेर्भगवता तत्कथं कृतमिति चेदाह-स्वगणेति एतेन स्वोत्कर्षार्थं स्वगुणवर्णनस्यैव दोषत्वं न त्वन्योत्कर्षार्थमित्युक्तम् ॥ ६ ॥ नन्वस्मद्वैकुंठागमनस्येदमेवफलं वृत्तं यद्भवानस्मदभीष्टदैवतमस्मान्प्रत्येवं ब्रूत इति चेत्तत्राह नैतद्विपरीतमिति यदिति अत एव चरणपद्मस्थितपवित्ररेणुत्वादेव नन्वेतेन स्वोत्कर्ष एवोक्तः स च परकीयस्तुत्यवसरे नोचित इति चेदाह यद्वेति । अत एव युष्मच्चरणरजःसंबंधादेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहं तथाऽद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन ॥ यद्ब्राह्मणस्य मुखतश्चरतोऽनुघासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥८॥
एषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः ॥ विप्रांस्तु को न विषहेत यदर्हणांभः सद्यः पुनाति सहचंद्रललामलोकान् ॥
॥ ९ ॥ ये मे तनूर्द्विजवरान् दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या ॥ द्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषंत्यधिदंडनेतुः ॥ १० ॥

लब्धं प्राप्तं शीलं येन येषां सेवया एते गुणा ममात एव श्रीर्मां न विजहाति प्रेक्षालवार्थेऽवलोकनलेशार्थम् । इतरे ब्रह्मादयः तेषां वः प्रतिकूलवृत्तिं छिंद्यामिति पूर्वेणैव संबंधः ॥ ७ ॥ किं च ब्राह्मणो ममैव श्रेष्ठं मुखमतो युष्मदवज्ञया मन्मुखतिरस्कार एव कृत इत्याह । नाहमिति । विताने यज्ञे यजमानस्य हविश्चरुपुरोडाशादि हुतभुगग्निस्तेन मुखेनादन्नश्नन्नपि तथा नाद्मि नाश्नामि । यद्यथा श्च्योतता क्षरता घृतेन प्लुतं विलोडितं पायसादि प्रतिग्रासं रसास्वादपूर्वकं चरतो भुंजानस्य ज्ञानिनो ब्राह्मणस्य मुखतो श्नामि । मयि समर्पितैः कर्मफलैस्तुष्टस्य निष्कामस्येत्यर्थः ॥ ८ ॥ किं च येषाममलमंघ्रिरजोऽहं किरीटैर्बिभर्मि तान्विप्रानपकुर्वतोऽपि कोऽन्यो न विषहेत । कथंभूतोऽहम् । अखंडाऽनवच्छिन्ना विकुंठाऽप्रतिहता च योगमाया विलासभूता विभूतिर्यस्य सः । तथा यस्य ममार्हणांभः पादोदकं चंद्रललामेनेश्वरेण सहिताँल्लोकान्सद्यः पुनाति एवं परमेश्वरः परमपावनोऽपि सन्नहं बिभर्मीति ॥ ९ ॥ किं च । मे तनूरधिष्ठानानि कास्ताः द्विजवरान्दुहतीर्दोग्ध्रीः गा इत्यर्थः । दुहितॄरिति पाठेऽपि गा एव विष्णुरूपात्सूर्यादुत्पन्नत्वात् । "सूर्यसुताश्च गावः" इति वचनात् । अलब्धशरणानि रक्षकहीनानि भेदबुद्ध्या मदधिष्ठानं न भवंतीति पृथग्दृष्ट्या ये द्रक्ष्यंति अघेन क्षता नष्टा दृष्टि

शीलं सुचरितम् । किञ्च यद्भवद्भिर्मह्यं नमस्कारादि क्रियते तदपि भवदिच्छातिक्रमभयादेव न निवार्य्यत इति ॥ ७ ॥ एवमहं ब्राह्मणानेव सेवे मद्दृष्ट्या च ये ब्राह्मणान्सेवंते त एव मत्सेवका नान्ये इत्याह-किं चेति । यतो यूयं मम मुखमतो हेतोः ब्राह्मणावज्ञानं मम मुखे चपेटाप्रदानमिव तिरस्कारहेतुरित्यर्थः । आदिना सांनाय्यादिग्रहः । तेन मुखेन "ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम्" इतित्यष्टमे कश्यपोक्तेरग्निरूपेण मुखेनेत्यर्थः । इत्यर्थ इति । मन्निष्टब्राह्मण एव मत्तृप्तिकरत्वादर्चनीय इति भावः ॥ ८ ॥ ब्राह्मणातिक्रमोपि सोढव्य एव न तु प्रतिकर्तव्य इत्याह । किं चेति । अन्यो मदन्यः को ने ति अपि तु सर्व एव तत्र कारण जिज्ञासायां तर्जन्या स्वकिरीटं दर्शयन्नाह-किरीटैरिति बहुत्वं सर्वावताररूपग्रहणार्थम् । यद्धारणप्रसादात् अकुंठयोगमायासंपत्तिरहमभूवं तथा यस्य ममार्हणांभो ब्रह्मणा वामनावतारे स्वलोकगतस्य मच्चरणस्य यत्क्षालनं कृतं तज्जलं श्रीगंगारूपम् एतेन यो विप्ररजो मूर्द्ध्नी धत्ते तस्यैव चरणामृतं ग्राह्यं नान्यस्येति ध्वनितम् । किं च किरीटैरिति सर्वेश्वरस्य मम शिरस उपर्युष्णीषवस्त्रं तदुपरि किरीटं तदुपरि विप्रांघ्रिरज इत्यत्युत्कर्ष उक्तो रजसः॥९॥ब्राह्मणकृतातिक्रममसहिष्णूनां का वार्त्ता ब्राह्मणेषु मद्भेदबुद्धिमंत एव नारकिन इत्याह-किं चेति। अधिष्ठानानि पूजास्थानानि। इत्यर्थ इति । विशेषतः पयोदात्रीरिति भावः। विष्णुरूपात् 'अस्तमानः स्वयं विष्णुः' आदित्यं ये प्रपश्यंति मां पश्यंति न संशयः' इति भविष्येऽर्जुनं प्रति श्रीकृष्णोक्तेः। इति वचनादिति। पराशरस्मृतेः। यद्वा ओ वासुदेवस्तस्मात्स एव लब्धः शरणं रक्षणं यैस्तान्यलब्धशरणानि भगवद्भक्तानित्यर्थः ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये ब्राह्मणान् मयि धिया क्षिपतोऽर्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः ॥ वाण्याऽनुरागकलयाऽऽत्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाहृतस्तैः ॥ ११ ॥ तन्मे स्वभर्तुरवसायमलक्षमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः ॥ भूयो ममांतिकमितां तदनुग्रहो मे यत्कल्पतामचिरतो भृतयोर्विवासः ॥१२॥ ब्रह्मोवाच ॥ अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीम् ॥ नास्वाद्य मन्युदष्टानां तेषामात्माऽप्यतृप्यत ॥ ॥ १३ ॥ सतीं व्यादाय शृण्वंतो लघ्वीं गुर्वर्थगह्वराम् ॥ विगाह्याऽगाधगंभीरां न विदुस्तच्चिकीर्षितम् ॥ १४ ॥

येषां तान् । मदीयोऽधिकृतो दंडनेता यो यमस्तस्य गृध्राकारा ये दूताः अहिवन्मन्युर्येषाम् । रुषा क्रोधेन कुर्षंति चंचुभिश्छिंदंति ॥ १० ॥ एवंभूतास्तु मां वशीकुर्वंतीत्याह । ये क्षिपतः परुषं भाषमाणानपि ब्राह्मणान्संबोधयंति मयि या धीस्तया वासुदेवदृष्ट्याऽर्चयंतः संतः तुष्यद्धृदः प्रीयमाणचित्ताः स्मितमेव सुधा तयोक्षितं सिक्तं पद्मतुल्यं वक्त्रं येषामनुरागकलया प्रेमशोभया वाचा गृणंतः स्तुवंतः यथा कुपितमात्मजं स्निग्धः पिता सत्पुत्रो वा पितरम् । अहमिव भृगुं युष्मान्वा तैरहमुपाहृतो वशीकृतः ॥ ११ ॥ तत्तस्मान्मेऽवसायमभिप्रायमलक्षमाणावजानंतौ युष्मदपराधोचितां गतिं सद्यः प्राप्य मत्समीप इतां प्राप्नुताम् । तदिति स मेऽनुग्रहः । तमेवाह । यत् भृतयोर्विवासोऽचिरतः शीघ्रं कल्पतां संपद्यतां समाप्यतामिति ॥ १२ ॥ उशतीं कमनीयां प्रियां देवीं द्योतमानामृषिकुल्यां ऋषयो मंत्रास्तत्प्रवाहरूपमृषिकुलयोग्यामिति वा । सरस्वतीं वाचमास्वाद्य तन्माधुर्यमनुभूय सर्पप्रायेण मन्युना दष्टानामपि क्रोधविषव्याप्तानां हि मनो रसानुभवाभावात्प्रियभाषणमपि न सहते तेषां त्वात्मा मनो नातृप्यदलमिति नामन्यत ॥ १३ ॥ सतीं श्रेष्ठां व्यादाय प्रसार्य कर्णं दत्त्वेत्यर्थः लघ्वीं मिताक्षरां गुरुभिरर्थैर्गह्वरां दुष्प्रवेशाम् अगाधामभिप्रायतः गंभीरामर्थतः विगाह्य विचार्यापि किमस्मा

एवं भूता वक्ष्यमाणलक्षणाः संबोधयंति भो दयासिंधवः हे स्वामिन् इत्यादि कोमलामंत्रणेन प्रीणयंति ॥ ११ ॥ अभिप्रायं ब्राह्मणानुरागलक्षणम् । अजानंतौ दैवादपश्यंतौ ननु ब्राह्मणातिक्रमिणो मद्वेषिण एवेति स्वयं श्रीमुखेन ब्रूषे तत्कथं तयोः पुनरेवं स्निह्यतीति सर्वैवश्यमाह म इति । यद्यस्मात्तत्र जयविजययोर्ममानुग्रह एव न तु निग्रह इति । न हि स्वाभाविको धर्मस्त्यक्तुं शक्यत इति भावः । भृतयोर्भृत्ययोर्विवासः विशिष्टो मया सह वासः ॥ १२ ॥ सरस्वतीं वाणीं नदीं च पक्षे स्वच्छां देवीं मुनीनां बुद्ध्या विविधवितर्कादिमय्या सह क्रीडंतीं पक्ष्ये पूज्याम् । ऋषीणां कुल्यां जलाशयरूपाम् अत्र तेषां महानुतापत्वेपि यन्मन्युसर्पविषानपगमस्तद्भक्तापराधस्य दुर्वारत्वमेव ज्ञापयति सत्यपि तादृशे भक्तापराधे यो भगवच्चरणतुलसीगंधादिमाधुर्यानुभवः स खलु ब्राह्मणातिक्रमानंतमनुतप्तयोर्जयविजययोर्या तेषु कृपा तदनुगामिन्या भगवत्कृपायाः प्रभावमेव ज्ञापयति अतो यद्येषां भक्तापराधो नाभविष्यत्तदा भक्तभगवतोः कृपापात्रीभूतानामेषां शुद्धदास्यप्रेमैवाजनिष्यत तस्मादपराधसद्भावाच्चातद्भक्तत्वमेवैषामभूत् । यदुक्तं ''भावोऽप्यभावमायाति कृष्णप्रेष्ठापराधतः । आभासतां च शनकैर्न्यूनजातीयतामपि'' इति ॥ १३ ॥ इत्यर्थ इति व्यासंगांतरत्यागपूर्वकं शुश्रुवुरित्यभिप्रायः अत्राभिनंदनपक्षो व्याख्यात एव निंदापक्षस्तु भगवदनभिप्रेतोऽपि बिभ्यद्भिर्मुनिभिरात्मनि संभावितत्वात् सरस्वत्या च दत्तावकाशत्वादेवं व्याख्येयः तथा हि–''एतौ द्वौ पार्षदौ मह्यम्'' इति सर्वज्ञानपि मुनीन् यत्परिचाययति स्म तेन रेरे मूढा मत्पार्षदावपि शपथ एतावदपि बलं धद्ध्वे इति व्यंजितम् । कदर्थीकृत्य मामित्यत्र सनकाद्यवज्ञानात्पूर्वं भगवत्कदर्थनाभावादियं तेषु भगवतो वक्रोक्तिः कोपव्यंजिकैव । वस्तुतस्तु–चतुर्थ्यतिशयोक्त्या प्रथमं कदर्थनं न ततो युष्मदतिक्रम इति कारणकार्ययोः पौर्वापर्यविपर्ययो भगवता प्रयुक्तः स एवानुमत इति । अस्मदननुमतिर्यद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते योगमाययारब्धपारमेष्ठ्यमहोदयम् ॥ प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः ॥ १९ ॥ ऋषय ऊचुः ॥ न वयं भगवन् विद्मस्तव देव चिकीर्षितम् ॥ कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे ॥१६॥ ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो ॥ विप्राणां देवदेवानां भगवानात्मदैवतम् ॥ १७ ॥ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव ॥ धर्मस्य परमो गुह्यो निर्विकल्पो भवान्मतः ॥ १८ ॥

नंभिनंदति निंदति वाऽस्मत्कृतं दंडं वा संकोचयतीति न विदुः ॥ १४ ॥ ततश्चाभिनंदतीति ज्ञात्वा ते प्रहृष्टाः संतः प्रोचुः । क्षुभिता रोमांचिता त्वग्येषाम् । कूपितेति पाठे संजातरोमकूपोक्त्या रोमांचितत्वमेवोक्तम् आरब्ध आविष्कृतः पारमेष्ठ्यस्य परमैश्वर्यस्य महोदयः परमोत्कर्षो येन तम् । अधिराजत्वमाविष्कृत्य राजशिक्षार्थं ब्राह्मणान्मानयतीति ज्ञात्वेत्यर्थः ॥ १५ ॥ अध्यक्षः सर्वेश्वरः संस्तद्धीत्यात्मकृतं मन्य इत्युक्त्या मयापराधः कृत इति तथा तदनुग्रहो मे इत्यादिवचनेन ममानुग्रहश्चेति यत्प्रभाषसे तेन तव यच्चिकीर्षितं तन्न विद्मः ॥ १६ ॥ किलेति लोकशिक्षार्थं सूचितम् । परमार्थमाहुः । विप्राणामिति । देवदेवानां देवपूज्यानामपि भगवांस्त्वमात्मा च दैवतं च ॥ १७ ॥ लोकशिक्षार्थताप्रपंचस्त्वत्त इत्यष्टभिः । धर्मस्त्वत्त एव भवति रक्ष्यते च त्वदवतारैः परमः फलरूपोऽत एव गुह्यो गोप्यः न च स्वर्गादिफलवद्विकारी भवान्किं तु

भविष्यतदा युष्मत्कृतो दंडोऽपि नाभविष्यत् । "ब्रह्मतेजः समर्थोपि हंतुं नेच्छे मतं तु मे" इति वक्ष्यमाणोक्तेः । ततश्च यूयं च वराटिकार्द्धमूल्या अभविष्यतेति मद्ब्रह्मण्यतैव युष्मानुन्मादयतीति भावः ॥ तद्धि ह्यात्मकृतं मन्य इति । जयविजययोरात्मत्वेन स्वीकारात्प्रेमाधिक्यम् 'सोऽहं भवद्भ्य' इत्यादिमुनिष्वादरमात्रम् । छिंद्यां स्वबाहुमपीति तेषां प्रेमास्पदता । यत्सेवयेति मुनिषु पुनरप्यादरः सोऽपि बाह्य एव ब्राह्मणसेवयैव किम् तस्य चरणरेणुः पवित्रोऽभूत् तयैव किं तस्याखिलामलाः क्षताः तयैव किं लक्ष्मीस्तं न त्यजतीति हेत्वसत्त्वादिति नाहं तथाद्मीत्यादौ यूयं ब्राह्मणा भोजनप्रियाः केवलं भोजनीया एवेति ब्राह्मणमुखेनाहं भुंजे इति ख्यातिं लोकेषु विस्तारयितुम् घासं चरत इति श्लेषेण ब्राह्मणः खलु गौरिवादनीयश्चारणीयः पशुबुद्धित्वादेव मद्दत्तेन गौरवेण हृष्यंति न तु युष्माभिर्मत्सुखतात्पर्यिका काचिन्मदीयपरिचर्या संभवेदिति । येषां बिभर्मीति किरीटेषु ब्राह्मणपदरजोधारणादेव योगमाययैश्वर्यं तथा तस्मादेव हेतोर्मच्चरणोदकं सर्वजगत्पावनी गंगेति गौरवमुपहास एव फलितम् । दुहतीर्मदीया इति । गोब्राह्मणयोर्भेदो नास्ति द्वयोरेव मत्तनुत्वादिति । पुनरपि हास एव ये ब्राह्मणानिति । ब्राह्मणानां खलु क्रोध औत्पत्तिक एव धर्मस्तु–काहं मद्भक्ताश्च हसंत एवेति सहिष्णुता सुधा मद्भक्तेभ्य एव मया दत्तेति तयैवाहं वशीकृतः स्यामिति । जयविजययोश्च सहिष्णुतायाः संप्रत्यनुदयान्मम तत्रौदासीन्यं जातमतः शापोऽपि वः प्राभूदन्यथा तु नैव प्राभविष्यदत एवांबरीषे ममौदासीन्याभावाद्दुर्वाससः कोपात्क्षिप्तजटाया अपि वैफल्यं प्रत्युत मत्स्वरूपचक्रकृतः संतापः साक्षान्मया ब्रह्मण्येन कारितमंबरीषपादपतनादिकमिति "यं वानयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनु मन्महि निर्व्यलीकम् । अस्मासु वा य उचितो ध्रियतां स दंडो येऽनागसौ वयमयुंक्ष्महि किल्बिषेण॥" इत्यग्रिमवाक्यदृष्ट्या निंदनपक्षो व्याख्यातः॥ ॥ १४ ॥ एवं निंदनाभिनंदनयोर्द्वयोरपि पक्षयोः पर्यवसाने कतरस्मिन्भगवदभिमता विश्रांतिरिति चिरं विमृश्याभिनंदनमेव निश्चित्य हृष्यंत आहुः ते इति । इत्यर्थ इति । पारमेष्ठ्यमहोदययुक्तैरपि कृतापराधा अपि ब्राह्मणाः पूजनीया एव न दंड्या इति भावः । कूपा जाताः अस्या इति कूपिता तादृक् त्वक् येषां ते तथा एकदेशोच्चारणन्यायेन रोमकूपोपस्थितिः 'निशम्य भानुनंदिनी' इतिवद्यथा भानुनंदिनीति पदं वृषभानुनंदिन्युपस्थापकं तत्र तद्वदत्रापीत्यर्थः । "सर्वोत्कृष्टे पारमेष्ठ्यं साम्राज्ये ब्रह्मणः पदे" इति निरुक्तिः ॥ १९ ॥ तदेवं ज्ञाततत्त्वा अपि तदभिप्रायं तन्मुखादेव श्रोतुं पुनः प्रश्नगर्भमाहुः । नेति । चिकीर्षितमनुग्रहं निग्रहं वेति यद्यतः ॥ १६ ॥ १७ ॥ अत एव परमफलत्वादेव "यदायदा हि धर्मस्य" इत्याद्युक्तेः । यतो धर्मस्य प्रवर्तको रक्षकश्च त्वमतो हेतोः । इति भाव इति । "यदि ह्यहं न वर्त्तेय जातु कर्मण्यतंद्रितः । मम वर्त्मानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरंति ह्यंजसा मृत्युं निवृत्ता यदनुग्रहात् ॥ योगिनः स भवान्किं स्विदनुगृह्येत यत् परैः ॥ १९ ॥ यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः ॥ धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना ॥ २० ॥ यस्त्वां विविक्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसंगः ॥ स त्वं द्विजानुपथपुण्यरजः पुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वम् ॥ २१ ॥

निर्विकारो मतः अत एवंभूतस्य तदेवं लोकशिक्षामात्रमिति भावः ॥ १८ ॥ विपरीतं चेदमित्याहुः । तरंतीति । यस्यानुग्रहादेव निवृत्ता विरक्ता योगिनश्च संतो मृत्युं तरंति स भवान्परैरनुगृह्येतेति किं स्वित् न किंचिदित्यर्थः ॥ १९ ॥ यच्चोक्तं "यत्सेवया चरणपद्मपवित्ररेणुं सद्यः क्षताखिलमलं प्रतिलब्धशीलम्" इत्यादि तदत्यंतमसंभावितमित्याहुर्द्वाभ्याम् । यं वै विभूतिर्लक्ष्मीरनुवेलमवसरेऽवसरे उपयाति सेवते धृतः पादरेणुर्यस्याः धन्यैः सुकृतिभिरर्पितमंघ्रौ यत्तुलस्या नवं दाम माला तद्धाम स्थानं यस्य तस्य मधुव्रतपतेर्भ्रमरमुख्यस्य लोकं स्थानमंघ्रिं कामयमानेव ॥ २० ॥ विविक्तचरितैर्विशुद्धैः परिचरणैरनुवर्तमानां सेवमानामपि यो नात्याद्रियन्नातीवादृतवान् । स एवंभूतस्त्वम् । अयं भावः । इत्थं नामातिलंपटतया लक्ष्मीस्त्वां सेवते । कथम् । एवं हि सा मेने । अयं हि सारग्राही मधुव्रतश्चंचलश्च स चांघ्रिगतायां तुलस्यां सपरिवारो निश्चलः सन् रमतेऽतोंऽघ्रिलावण्यमत्यधिकं स्यात्ततोऽहं वक्षसि स्थितापि योगिजनादिबहुसेवकसंघर्षमंगीकृत्यापि तुलस्या सह सापत्न्येनापि चरणौ सेविष्ये इति तदेवमत्यौत्सुक्ये नानुवर्तमानामपि तां त्वं नातीवाद्रियसे । यतः परमभगावतेष्वेव प्रकृष्टसंगवान् । स एवं परमसौभाग्यनिधिस्त्वम् । अतो ब्राह्मणप्रसादान्मां श्रीर्न विजहातीत्यलभ्यलाभत्वेन निर्देशो न समंजस इति । किं च स्वत एव त्वं भगभाजनो भजनीयानां गुणानामाश्रयः परमशुद्धश्च तं त्वां द्विजानामनुपथं पथिपथि लग्नं यत्पुण्यं रजस्तथा श्रीवत्सलक्ष्म च किं पुनीतः पवित्री कुरुतः । किं किमर्थं च ते उभे अगाः प्राप्तो भूषणत्वेन स्वीकृतवानसि । अतो "यत्सेवया चरणपद्मपवित्ररेणुम्" इत्यादिवचनं लोकसंग्रहमात्र

वर्तंते मनुष्याः पार्थ सर्वशः" इत्यादिगीतोक्तेरत्रायमाशयः ॥ १८ ॥ भगवदुक्तौ वैपरीत्यमाहुः । इत्यर्थ इति । न घटत इति भावः ॥ १९ ॥ यं त्वाम् ॥ २० ॥ अत्राशयमाह-अयं भाव इति । यतो रमतेऽत इति । ततोऽत्यधिकत्वात् । अन्यदघटनीयत्वमाहुः । किं चेति । श्रीवत्सलक्ष्मात्र भृगुपादताडनजातचिह्नं ज्ञेयं "भृग्वंघ्रेर्लक्ष्म श्रीवत्सं रोमावर्त्तमथापरे" इति संहितोक्तेः । श्रीर्वसत्यनेनेति श्रीवत्सः इह वसतेः साधने सप्रत्यय औणादिकस्सस्य तश्च । स्वार्थेच्छाद्यर्थाभावाद्वित्वाभावः । 'प्रयोगमनुसृत्य प्रयोक्तव्यः' इत्युक्तेः । स च श्रीवत्सो विप्रपादसंबंध एव तदुक्तं "विप्रपादाङ्कितस्थाने पद्मवैकुंठयोः सदा । निवसामि हरेः प्रीत्यै दुर्नीते न कदाचन" इति लक्ष्म्या उक्तं नारदं प्रति पुराणांतरेऽत एव श्रीवैकुण्ठेशेन त्रिदेवीपरीक्षायां भृगुं प्रत्युक्तम् । "अद्याहं भगवंल्लक्ष्म्या आसमेकांतभाजनम् । वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः" इति । इत्यर्थ इति । सर्वमेतल्लोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मस्य ते भगवतस्त्रियुगस्त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थम् ॥ नूनं भृतं तदभिघातिरजस्तमश्च सत्त्वेन नो वरदया तनुवा निरस्य॥२२॥ न त्वं द्विजोत्तमकुलं यदिहात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन॥तर्ह्येव नंक्ष्यति शिवस्तव देव पंथा लोकोऽग्रहीष्यदृषभस्य हि तत्प्रमाणम् ॥ ॥ २३ ॥ तत्तेऽनभीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः ॥ नैतावता अधिपतेर्बत विश्वभर्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः ॥ २४ ॥

मित्यर्थः ॥ २१ ॥ धर्ममूर्तेश्च तवेदमुचितमेवेत्याहुः । धर्मस्येति त्रिभिः । त्रिष्वेव युगेष्वाविर्भवतीति त्रियुगः । यद्वा त्रीणि युगानि युगलानि त्रियुगाः षड्गुणा भगशब्दवाच्याः संत्यस्येति त्रियुगः । हे त्रियुग धर्मरूपस्य तव त्रिभिः पद्भिः स्वैरसाधारणैस्तपःशौचदयाभिः सत्यस्य धर्मविप्लवेऽपि कलावनुवर्तमानत्वात्त्रिभिरित्युक्तम् । भृतं पालितम् । किं कृत्वा नोऽस्माकं वरदया सत्त्वेन तनुवा तन्वा तत्त्वमूर्त्या तदभिघाति तेषां पादानामभिघातकं रजश्च तमश्च निरस्य निराकृत्य द्विजानां देवतानां च प्रयोजनाय नूनं भृतम् । यद्वा । हिलोपे रूपं निरस्येति । अस्माकं तन्निवर्तयेत्यर्थः ॥ २२ ॥ आत्मगोपं त्वयैव रक्षणीयं द्विजोत्तमानां कुलम् । यदिह स्फुटं त्वं न गोप्ता न रक्षिता तृन्प्रत्ययांतत्वान्न षष्ठीप्रयोगः । वृषः श्रेष्ठः हे देव पंथा वेदमार्गो नंक्ष्यति नाशं यास्यति ऋषभस्य श्रेष्ठस्य हि यस्मात्तदनर्हणमसूनृतं चाग्रहीष्यत । तदुक्तं गीतासु । "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते" इति ॥ २३ ॥ नश्यत्विति चेत्तत्राहुः । तद्वेदमार्गनाशनम् । इवेति लोकोक्तिः सत्त्वनिधित्वाज्जनाय क्षेमं शं विधातुमिच्छोरत एव निजशक्तिभी राजादिभिरुत्पाटितधर्मप्रतिपक्षस्य अतस्तव ब्रह्मकुलेऽवनतिर्युक्तैव । ननु महतोऽन्येष्ववनतिस्तेजोहानिकरी तत्राहुः ।

शिक्षैवेति भावः ॥ २१ ॥ औचित्यमाहुः–धर्मेति । इदं लोकसंग्रहणम् आविर्भवति स्वचिह्नैः स्पष्टमाविर्भवतीत्यर्थः । अनन्यलभ्यत्वादर्थस्यात्र त्रियुगेत्युक्तेस्त्रियुगाविर्भाववानित्यर्थो यन्नलभ्योऽतोऽक्षरार्थमाह–यद्वेति । सद्गुणाः "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतींगना" इति वाक्योक्ता भगशब्दस्यार्थभूताः । सत्यरूपचतुर्थपदानुपादानं त्रियुगापेक्षयेत्याह सत्यस्येति । धर्मस्य विप्लवो यत्र तस्मिन्कलाविति । "तन्वादीनां वेयङुवङौ" तनुं पुषेम तनुवं पुषेम, विषुं पश्य विषुवं पश्य, स्वर्गो लोकः सुवर्गो लोकः त्र्यंबकं, त्रियंबकं वरेण्यं वरेणियमिति वैदिक्याम् । पादानां तपःशौचदयानां "तपः शौचदयाहीनो जायते सर्वदा नरः । रजस्तमोभ्यामाविष्टचेता धर्मबहिष्कृतः" इत्यादिपुराणात् । संभवत्वादर्थांतरमाह–यद्वेति । निरुपपदाद्दैवादिकात् 'असु क्षेपणे' इत्यस्मादेतद्रूपम् । इत्यर्थ इति । वयमपि द्विजा अतोऽस्माकं रजस्तमसी नाशयेति भावः ॥ २२ ॥ अतिप्रियत्वात् " न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् " इत्युक्तेः । स्वदेहतोऽपि प्रियस्य ब्राह्मणकुलस्य रक्षणं तव नातीवाश्चर्यं, वृषः सर्वेप्सितवर्षणाच्छ्रेष्ठः सूनृतं सत्यप्रियवचनं तद्रहितमसूनृतम् । तदृषभाचरितग्रहणम् अतोऽस्मास्वघटमानमपि यत्सेवयेत्यादि त्वद्वचः केवलं लोकशिक्षार्थमेव तदिति भावः ॥ २३ ॥ स्वयमाक्षिप्य समाधत्ते नश्यत्विति इवेति । नात्रेवशब्द उपमाने किं त्ववधारणेऽनभीष्टमेवेत्यर्थः । लोकोक्तिरज्ञोक्तिः । 'लोकोऽज्ञे भुवने जने' इति धरणिः । अत एव जनक्षेमविधानेच्छुत्वादेव । अतो धर्मप्रतिपक्षहंतृत्वात् । अत्राक्षिपति नन्विति । विनोदो विलासः कौतुक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं वाऽनयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकम् ॥ अस्मासु वा य उचितो ध्रियतां स दंडो येऽनागसौ वयमयुं क्ष्महि किल्बिषेण ॥ २५ ॥ श्रीभगवानुवाच ॥ एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ ॥ भूयः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितस्तदवैत विप्राः ॥ २६ ॥ ब्रह्मोवाच ॥ अथ ते मुनयो दृष्ट्वा नयनानंदभाजनम् ॥ वैकुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभम् ॥ २७ ॥ भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च ॥ प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियम् ॥ २८ ॥ भगवाननुगावाह यातं मा भैष्टमस्तु शम् ॥ ब्रह्मतेजः समर्थोऽपि हंतुं नेच्छे मतं तु मे ॥ २९ ॥

एतावता तु धर्मत्राणप्रयोजनेनावनतस्य नमनं कृतवतस्तव तेजः प्रभावो न क्षतं न क्षीणं यतः स नमनादिस्ते विनोदः ॥ २४ ॥ शापाग्रहं परित्यज्य विज्ञापयंति यं वाऽन्यं दंडं विधास्यति भवान्वृत्तिं तु अधिकजीविकां वा तत्सर्वमनुमन्यामहे ये वयं निरपराधावेतौ किल्बिषेण शापेनायुंक्ष्महि योजितवंतः ॥ २५ ॥ मत्कारितत्वाच्छापस्य युष्माकं नापराध इत्याश्वासयन्नाह । एतौ सद्य एवासुरयोनिं प्राप्य भूयोऽप्याशु मत्समीपमागमिष्यतः । संरंभेण क्रोधावेशेन संभृतः संवृद्धो यः समाधिरेकाग्रता तेनानुबद्धो दृढी कृतो योगो ययोः । हे विप्रा यो वः शापो युष्मत्कृतः शापस्तदिति स मयैव निमितो निर्मित इत्यवैत जानीत ॥ २६ ॥ नेत्रोत्सवजनकं विकुंठं हरिं तन्निवासं च वैकुंठलोकम् । स्वयंप्रकाशं प्रकाशांतरानपेक्षम् । सत्त्वपरिणामत्वात् ॥ २७ ॥ अनुमान्यानुज्ञाप्य परिक्रम्य प्रदक्षिणीकृत्य वैष्णवीं श्रियं वैकुंठे वर्णिताम् ॥ २८ ॥ ममैव तु मतं संमतम् । इदमत्र

विशेष एवेत्यर्थः ॥ २४ ॥ वस्तुतस्तु-दुरवगाहाभिप्रायं त्वां कायवाङ्मनोभिरवनता वयमिदं निवेदयामो नास्माकं शापाद्याग्रह इत्याह-शापाग्रहमिति । अनुमन्यामहे स्वच्छंदेनैवैतौ तां विधेहि अस्मद्दत्तशापस्तु रसातलं गच्छत्विति भावः । पुनश्च सभयाश्रुकंपमाहुः-अस्मास्विति ॥ २५ ॥ आश्वासयन्नाभैष्टेति सांत्वयन् । योगो मत्संयोगः । निमितः निरत्र निरर्थेऽनेकार्थत्वादुपसर्गाणाम् छांदसत्वाद्वोपसर्गरेफलोपः । अनयोर्मत्परमभक्तयोरसुरभावसिद्ध्यर्थं युष्मान्वैकुंठमानीय द्वारपालाविमौ शुद्धसत्त्वस्वरूपावपि ब्राह्मणमात्रपरमभक्तावपि युष्मत्प्रातिकूल्ये प्रवर्त्य युष्माकमात्मारामचूडामणीनामपि क्रोधमुत्पाद्य शापमुपगमितौ मयैव न तु मत्पार्षदयोर्नापि युष्माकं कोऽप्यपराध इति भावः । ननु भक्तवत्सलस्यापि तव भक्ताभ्यामीदृशदुःखदाने प्रवृत्तौ किं कारणं तत्राह-हे विप्रास्तत्कारणमवैत परामृश्य सर्वज्ञत्वेनैवावगच्छत किं मत्कथनेन तत्र कारणं जयविजययोरेव प्रेमविजृंभिता काचिदिच्छा सा च भोः प्रभुवर देवाधिदेव वैकुंठनाथ अन्यत्राल्पबलत्वादस्मासु प्रातिकूल्याभावाद्यदि तत्र भवतो युयुत्सासुखं न संपद्यते तदावामेव केनापि प्रकारेण प्रतिकूलीकृत्य तद्युद्धसुखमनुभूयतामित्यावयोस्त्वत्सर्वसुखपारिपूर्णतायामणुमात्रमपि न्यूनत्वमसहमानयोः किंकरयोः प्रार्थनाहठः स्वभक्तवात्सल्यगुणमपि लघूकृत्य निष्पाद्यतामिति ''मनोऽनुलापमयी रसो वै सरस'' इति । ''आनंदमयः'' इति ''सैषा नंदमयस्य मीमांसा भवति'' इत्यादिश्रुतिविवृतिषु भगवतः शृंगारादिसर्वरसपरिपूर्तिविवेचनप्रसंगभवा ज्ञेया ततश्च स्वेच्छामयस्येति ''मद्भक्तानां विनोदाय करोमि विविधाः क्रियाः'' इति तत्प्रकारसंपादने भगवतोऽपीच्छाजनीति रहस्यस्य प्रकटानुक्तिरहो महदपराधाद्वैकुंठादपि परमसिद्धानामप्यधःपातो भवेत्किं पुनर्मर्त्यलोकात्साधकाभासानामस्माकमिति साधकभक्तान्महदपराधेषु सावधानीकर्तुं ज्ञेया । प्रकृतमनुसरामः सकाशं ''समीपे सप्रकाशे च सकाशः ससुखेऽपि च'' इति निरुक्तिः । समीपं कृष्णसायुज्यं प्राप्य तदंतर्द्धानावसरे उपयास्यतेति । अत्रोपयोगिवृत्तं शैवेऽपि तौ प्रति कुमारोक्तिः । ''भक्तिभावं समाश्रित्य सप्तभिर्जन्मभिस्त्विह । वैरभावे त्रिभिः स्थानं जन्मभिरिदमाप्स्यथः'' इति । पुनर्हरिं प्रति ''यथेच्छा ते हरे चाद्य तथैव ध्रियतां त्वया'' इति ॥ २६ ॥ अथ भगवदाश्वासनोत्तरम् ॥ २७ ॥ वैष्णवीं वैकुंठगां श्रियं संपत्तिं श्लाघयंतः ॥ २८ ॥ युवां यातमित्युपस्थितजयविजयौ प्रत्युक्तिः । तदैव विरहव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्पुरैव निर्दिष्टं रमया क्रुद्धया यदा ॥ पुराऽपवारिता द्वारि विशंती मय्युपारते ॥ ३० ॥ मयि संरंभयोगेन निस्तीर्यं ब्रह्महेलनम् ॥ प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ॥ ३१ ॥ द्वास्थावादिश्य भगवान् विमानश्रेणिभूषणम् ॥ सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ॥३२॥ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः ॥ हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ॥ ३३ ॥ तदा वैकुंठधिषणात्तयोर्निपतमानयोः ॥ हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥ ३४ ॥ तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः ॥ दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणम् ॥ ३५ ॥ तयोरसुरयोरद्य तेजसा यमयोर्हि वः ॥ आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ॥ ३६ ॥

तत्त्वम् । यद्यपि सनकादीनां क्रोधो न संभवति न च भगवत्पार्षदयोर्ब्राह्मणप्रातिकूल्यं न च भगवतः स्वभक्तोपेक्षा न च वैकुंठगतानां पुनर्जन्म तथापि भगवतः सिसृक्षादिवत्कदाचिद्युयुत्सा समजनि तदाऽन्येषामल्पबलत्वात्स्वपार्षदानां तुल्यबलत्वेऽपि प्रातिपक्ष्यानुपपत्तेरेतावेव ब्राह्मणनिवारणे प्रवर्त्य तेषु च क्रोधमुद्दीप्य तच्छापव्याजेन प्रतिपक्षौ विधाय युद्धकौतुकं संपादनीयमिति भगवतैव व्यवसितमतः सर्वं संगच्छते। तदिदमुक्तं शापो मयैव निमित इति मा भैष्टमिति अस्तु शमिति हंतुं नेच्छे मतं तु मे इत्यादि च ॥ २९ ॥ यदा मयि उपारते योगनिद्रां गतवति सति द्वारि विशंती युवाभ्यां पुराऽपवारिता तदा क्रुद्धया रमया एतद्यद्ब्राह्मणैरिदानीमुक्तं तत्पुरैव निर्दिष्टम् ॥ ३० ॥ प्रत्येष्यतं प्रत्येष्यथः । निकाशं समीपम् ॥ ३१ ॥ ३२ ॥ दुस्तराद्ब्रह्मशापात् हरिलोकतः पतंताविति शेषः । हरिलोकत एव हतश्रियावभूतामिति वा विगतस्मयौ नष्टगर्वौ च ॥ ३३ ॥ विकुंठस्य धिषणात्स्थानात् । पुत्रका हे देवाः ॥ ३४ ॥ काश्यपं तेजो वीर्यं प्राप्तौ ॥ ३५ ॥ सहैव गर्भे प्रविष्टौ यमौ कुलौ कूत्कृत्य रुदंतौ वीक्ष्य पुनः कृपाद्रवच्चित्तनवनीत आह मा भैष्टं शं कल्याणं युवयोरस्तु इतो वैकुंठान्मा यातम् अत्रैव मां सेवमानौ सदा तिष्ठतमिति मा पदमुभयत्रान्वयि । पुनरानंदितौ तौ वीक्ष्याह-ब्रह्मतेजः ब्रह्मशापं हंतुं समर्थोऽप्यहम् । मे तु मम तु मतं नेच्छामि ब्रह्मशापस्यामोघत्वमर्यादाया मयैव कृतत्वात् । अतो वज्रस्यामोघत्वरक्षणार्थं गरुडो यथा पक्षांशमेकं तत्याज तथैवैकांशेनैकैकप्रकाशेनासुरभावं गच्छतं वैकुंठेऽपि स्वरूपेण तिष्ठतमित्यतो वामनचरिते "तानभिद्रवतो दृष्ट्वादितिजानीकयूथपान् । प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ नंदः सुनंदोऽथ जयो विजयः प्रबलो बलः॥" इत्यादीनां युध्यमानानां भगवत्पार्षदानां मध्ये जयविजययोरप्युल्लेखः श्रूयते तदा च तयोर्हिरण्याक्षहिरण्यकशिपुत्वानंतरं रावणकुंभकर्णत्वप्राप्त्युन्मुखता च लक्ष्यते इति तयोर्युगपदेव पार्षदत्वासुरत्वान्यथानुपपत्तेरेवमवश्यं व्याख्येयम् ॥ २९ ॥ ३० ॥ न चैकांशेनासुरभावेऽपि चिंता कार्या यतोऽहमप्यवतारत्रयेण युवाभ्यां सह वीररसमयं युद्धसुखमनुभविष्यामीत्यासुरभावेऽपि मत्सेवैव भवद्भ्यां संपादयिष्यते । तृतीये तु जन्मनि साक्षादेव वां स्वीकरिष्य इत्याह मयीति । संरंभेण क्रोधावेशेन योगः युद्धेषु मयि संयोगो ध्यानं वा । ब्रह्महेलनम् ब्रह्मशापम् । अल्पीयसेति । शैववाक्यानुरोधेन सप्तजन्मापेक्षया त्रिजन्मलक्षणेनेत्यर्थः ॥ ३१ ॥ धिष्ण्यं मंदिरम् ॥ ३२ ॥ पूर्वव्याख्यानुसारेणाह । पक्षांतरमाह-हरिलोक एव हतश्रियौ जातौ सप्तम्यर्थेऽत्र तसिः । अंशेन श्रियोऽसुरभावत्वोक्तेः पूर्णश्रिया हीनावभूतामिति भावः ॥ ३३ ॥ तदा भगवद्वाक्योत्तरम् । तयोर्जयविजययोः । विमानाग्र्येषु सत्यादिलोकगतविमानश्रेष्ठेषु । पुत्रका इति । देवान्प्रति ब्रह्मण आमंत्रणम् ॥ ३४ ॥ प्राप्तौ अणिमाख्यसिद्ध्या प्रविष्टौ स्वदेहत्वेन स्वीकृतवंतावित्यर्थः । उल्बणमुग्रम् ॥ ३६ ॥ यमयोः श्लेषेणांतकतुल्ययोः । तर्हि किमप्युपशमनं कुर्विति चेत्तत्र के वराकाः शापदष्टयोरपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्ययोगमायः ॥ क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः ॥ ३७॥ इति श्रीभा० तृतीय० वैकुंठनाथेन वैकुंठे ब्राह्मणमाहात्म्यवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ मैत्रेय उवाच ॥ निशम्यात्मभुवा गीतं कारणं शंकयोज्झिताः॥ ततः सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः ॥ १ ॥ दितिस्तु भर्तुरादेशादपत्यपरिशंकिनी ॥ पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ ॥ २ ॥ उत्पाता बहवस्तत्र निपेतुर्जायमानयोः ॥ दिवि भुव्यंतरिक्षे च लोकस्योरुभयावहाः ॥ ३ ॥

तयोस्तेजसा वस्तेज आक्षिप्तं तिरस्कृतम् । न चात्र प्रतिविधिः शक्यः यतः एतर्हीदानीं भगवानेव तदेवं विधातुमिच्छति ॥ ३६ ॥ तथापि कोऽप्युपायो विचार्यतामिति चेत्तत्राह । विश्वस्येति । त्रयाणां गुणानामीशः स एव सत्त्वोत्कर्षकाले नः क्षेमं विधास्यति विमृशेन विमर्शनेन ॥३७॥ इति श्रीमद्भा० टीकायां षोडशोऽध्यायः ॥१६॥ ततः सप्तदशे जन्म तयोर्लोकभयंकरम् ॥ हिरण्याक्षप्रभावश्च वर्ण्यते दिग्जयेऽद्भुतः ॥ १ ॥ क्षेमं विधास्यतीति ब्रह्मवचनानंतरं शंकया त्यक्ताः ॥ १ ॥ भर्तुरादेशात् । "लोकान्सपालांस्त्रींश्चंडि मुहुराक्रंदयिष्यतः" इति वाक्यात् । स्वापत्याभ्यां परिशंकिनी देवोपद्रवं शंकमाना ॥ २ ॥ तत्र तदा निपेतुरुद्बभूवुः उरुभयमा

भगवत्पार्षदयोरुपरि नास्माकं प्रभुतेत्याह तत्खलूपशमनं स एव भगवान् विधातुमिच्छति ॥ ३६ ॥ ननु वयं संप्रति म्रियामहे स कदोपशमनं विधास्यतीति चेत्तत्र भवंतो म्रियन्तां जीवंतु वा तस्यैवेच्छा कारणम् । किं तु । संप्रति पालनसमये स पालयिष्यत्येवेत्याह । विश्वस्येति । तत्र प्रकारं तु वयं नैव जानीम इत्याह-योगेश्वरैरिति । तत्र सर्वज्ञानमिति भावः । ननु तदप्यत्र विपत्तावस्मदाश्वासनार्थं किमपि विमृशेति चेत्तत्राह तत्रास्मदीयेति । तत्र विपत्त्युपशमने । अस्मदीयविमृशेन अस्मत्कर्तृकविचारेण । कियानर्थो न कियदपीति । अस्मद्विमृश्यमन्यथा कर्तुमपि स प्रभुरिति भावः ॥ ३७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ तयोर्जयविजययोर्हिरण्याक्षहिरण्यकशिपुरूपेण जन्मेत्यर्थः । दिशां जये दिग्विजये॥ (१) ॥ कारणं तस्योपद्रवस्योत्पत्तौ प्रतीकारे च हेतुम् । ततः ब्रह्मवाक्यश्रुतेरनंतरं वैकुंठाद्वा त्यक्ता रहिता भगवति विश्वासेनेति भावः ॥ १ ॥ अपत्याभ्यां शंकावती सर्वलोकोपद्रवमपत्यं प्रति हरिहेतुकवधाद्वा शंकमानेत्यर्थः ॥ २ ॥ तदा तयोरुत्पत्तिकाले (३) भुवः प्रदेशा इति । भूम्यवयवा इत्यर्थः । तदुक्तं ज्यैतिषकल्पतरौ "चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम् । सलिलमशीतियुतं शतं कुलिशधरो ह्यधिषष्टिकं शतं च" इति मिहिराचार्योक्तेः । सर्वभूकंपो न भवति किन्तु तत्प्रदेशा एव कंपन्ते पवनादिमंडलवशादिति मंडलानि तु "प्राग्द्वित्रिचतुर्भागेषु द्युनिशोरद्भुतेषु सर्वेषु । अनिलाग्निशक्रवरुणा मंडलपतयः शुभाशुभं भैः स्यात् ॥ १ ॥ अर्यम्णा[1]दिचतुष्कचन्द्र[2]तुरगा[3]दित्[4]येषु वायुर्भवेद्देवेज्या[5]र्ज[6]विशाखयाम्ययुगले पित्र्यद्वये चानलः । विश्वादित्रयधा[10]तृ[11]मैत्रयुगलेष्विन्द्रो भवेन्मंडलः सा[12]र्पो[13]पांत्यशतांत्य[14]मूलयुगलेशो[15]नेष्त्रपामीश्वरः॥" इति । एवं केतव इति । बहुत्वेन केतवोऽपि बहव एव ते षष्ठस्कंधे नारायणवर्मव्याख्याने वर्णयिष्यंते सहस्रसंख्याका

१ उत्तराफाल्गुनी । २ मृगशिराः । ३ अश्विनी । ४ पुनर्वसुः । ५ पुष्पः । ६ पूर्वभाद्रपदा । ७ भरणी । ८ मघा । ९ उत्तराषाढा । १० रोहिणी । ११ अनुराधा । १२ आश्लेषा । १३ उत्तर भाद्रपदा । १४ रेवती । १५ आर्द्रा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहाचला भुवश्चेलुर्दिशः सर्वाः प्रजज्वलुः ॥ सोल्काश्चाशनयः पेतुः केतवश्चार्तिहेतवः ॥ ४ ॥ ववौ वायुः सुदुःस्पर्शः फूत्कारानीरयन्मुहुः ॥
उन्मूलयन्नगपतीन्वात्याऽनीको रजोध्वजः ॥५॥ उद्धसत्तडिदंभोदघटया नष्टभागणे ॥ व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदम् ॥६॥ चुक्रोश
विमना वार्धिरुदूर्मिः क्षुभितोदरः ॥ सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः॥७॥मुहुः परिधयोऽभूवन्सराह्वोः शशिसूर्ययोः॥ निर्घाता रथनिर्ह्रादा
विवरेभ्यः प्रजज्ञिरे॥८॥ अंतर्ग्रामेषु मुखतो वमंत्यो वह्निमुल्बणम् ॥ सृगालोलूकटंकारैः प्रणेदुरशिवं शिवाः ॥ ९ ॥ संगीतवद्रोदनवदुन्नमय्य शिरो
धराम् ॥ व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः ॥१०॥ खराश्च कर्कशैः क्षत्तःखुरैर्घ्नंतो धरातलम् ॥ खार्काररभसा मत्ताःपर्यधावन्वरूथशः॥
॥ ११ ॥ रुदंतो रासभत्रस्ता नीडादुदपतन्खगाः ॥ घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत ॥ १२ ॥ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः ॥
व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनाऽनिलम् ॥ १३ ॥ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः ॥ अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम् ॥१४॥

समंताद्दहंतीति ॥ ३ ॥ अचलैः सहिता भुवः प्रदेशाः केतवश्चोदयं चक्रुरिति शेषः ॥ ४ ॥ सुदुस्पर्शः खरस्पर्शः फूत्कारानिति तीव्रवायुशब्दानुकरणम् । नगपतीन्महावृक्षान् वात्या वातसमूह एवानीकं यस्य रज एव ध्वजो यस्य ॥ ५ ॥ उच्चैर्हसंत्य इव तडितो येषु तेषामंबुदानां घटया समूहेन नष्टो भागणः सूर्यादिप्रभासमूहो यस्मिन् । पदं स्थानं न व्यादृश्यते स्म ईषदपि नादृश्यत ॥ ६ ॥ वार्धिः समुद्रो विमना इव उद्गता ऊर्मयो यस्मात् क्षुभिता उदरस्थाः मकरादयो यस्मिन् उदपानैर्वापीकूपादिभिः सहिताः शुष्काणि पंकजानि यासु ॥ ७ ॥ परिधयः परिवेषाः सराह्वो राहुग्रस्तयोः निर्घाता निरभ्रगर्जितानि रथनिर्ह्रादतुल्या ध्वनयः विवरेभ्यो गिरिगुहाभ्यः ॥ ८ ॥ सृगालानामुलूकानां च टंकारैर्ध्वनिभिः सह शिवाः सृगाल्यः ॥ ९ ॥ ग्रामसिंहाः श्वानः ॥ १० ॥ कर्कशैस्तीक्ष्णैः । हे क्षत्तः खार्कारो गर्दभजातिशब्दस्तस्मिन् रभसः संभ्रमो येषाम् । वरूथशः संघशः ॥ ११ ॥ रासभशब्दात्रस्ताः सर्वतः क्रोशंतः ॥ १२ ॥ गावोऽत्रसन् त्रस्ताः असृग्दोहाश्च बभूवः देवलिंगानि व्यरुदन् प्रतिमा नामश्रुस्राव आसीदित्यर्थः॥ १३॥ पुण्यतमान्गुरुबुधादीन्भगणान् बहूनि नक्षत्राणि चान्ये क्रूरग्रहा मंगलादयोऽतिचेरुरतिक्रम्य जग्मुर्वक्रगत्या प्रत्यावृत्त्य युयुधुश्च ॥ १४ ॥

ब्रह्मपुत्रादिभेदेन ॥ ३ ॥ ४ ॥ सुदुःस्पर्शः अतीव दुःखदस्पर्शवान् । वात्या मंडलवायुः । अनीकं सेना ॥ ५ ॥ ६ ॥ उदरशब्देनोदरस्थोपादानं 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायात् । चुक्षुभुरुच्छृंखला बभूवुः ॥ ७ ॥८॥ शिवाः श्रृगालस्त्रियः । अशिवा नाशबोधिका वाच इति शेषः । प्रणेदुर्जगदुः ॥ ९ ॥ शिरोधरां ग्रीवाम् । उन्नमय्योर्ध्वं कृत्वा । ततस्ततस्तत्रतत्र देशे ॥ १० ॥ धराया भूमेस्तलमुपरिभागम् ॥ ११ ॥ रासभो गर्दभः नीडं पक्षिगृहम् । घोष आभीरपल्ली । शकृत्पुरीषम् ॥ १२ ॥ गावः सौरभेय्यः । असृग्रुधिरम् । दोहो दुग्धस्थानीयं यासां तास्तथा "पूयं स्यादामरुधिरे पवित्रे गमनेऽपि च" इति निरुक्तिः । इत्यर्थ इति । पाषाणादिमय्योऽपि देवता रुरुदुरिति भावः ॥ १३ ॥ आदिना शुक्रग्रहः । दीपिताः क्रुद्धाः । अतिचारवक्रत्वयुद्धादीनि ग्रहाणां सूर्यसिद्धान्तादिभ्योऽवसेयानि । स्थूलरीतिस्तु—"सूर्यात्पञ्चमगः खेटो वक्रो मार्गी चतुर्थगः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वाऽन्यांश्च महोत्पातानतत्तत्त्वविदः प्रजाः ॥ ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवम् ॥ १५ ॥ तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ ॥ ववृधातेऽश्मसारेण कायेनाद्रिपती इव ॥ १६ ॥ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ ॥ गां कंपयंतौ चरणैः पदेपदे कट्या सुकांच्याऽर्कमतीत्य तस्थतुः ॥ १७ ॥ प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत ॥ तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः ॥ १८ ॥ चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च ॥ वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः ॥ १९ ॥ हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहम् ॥ गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणम् ॥ २० ॥ तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरम् ॥ वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदम् ॥ २१ ॥

ब्रह्मपुत्रानृते विना तेषां स्वशापादिज्ञानात् ॥ १५ ॥ व्यज्यमानमात्मपौरुषं पूर्वसिद्धं स्वपौरुषं ययोः ॥ १६ ॥ निरुद्धाः व्याप्ताः काष्ठा दिशो याभ्याम् । स्फुरंत्यंगदानि येषु ते भुजा ययोः अंगदेति टाबंतत्वमार्षम् । शोभना कांची यस्यां तया कट्या ॥ १७ ॥ यमयोर्मध्ये यः स्वदेहात्प्रथममजायत तं यथा हिरण्यकशिपुं विदुः सा दितिः प्रथमं यमसूत तं हिरण्याक्षं यथा विदुस्तथा नाम कृतवानित्यर्थः । अयं भावः । यदा हि गर्भाधानसमये योनिपुष्पं विशद्वीर्यं द्विधा विभक्तमादिपश्चाद्भावेन प्रविशति तदा यमौ भवतस्तयोश्च पितृतः प्रवेशक्रमविपर्ययेण मातृतः प्रसूतिः । "यदा विशेद्द्विधाभूतं बीजं पुष्पं परिक्षरत् ॥ द्वौ तदा भवतो गर्भौ सूतिर्वेशविपर्ययात्" ॥ इति पिंडसिद्धिस्मरणात् अतः स्वदेहात्पूर्वं यो जातस्तस्य हिरण्यकशिपुरिति दितिः प्रथमं यमसूत तस्य हिरण्याक्ष इति नाम कृतवानिति ॥ १८ ॥ दोर्भ्यामुद्धतो ब्रह्मवरेणाकुतोमृत्युः ॥ १९ ॥ रणं युद्धम् ॥ २० ॥ दुःसहो जवो वेगो यस्य । रणंतौ कांचनमयौ नूपुरौ यस्य । अंसे न्यस्ता महती गदा येन ॥ २१ ॥

सूर्येण युक्तोऽस्तमयं प्रयाति रविप्रमुक्तो ह्युदयं प्रयाति । द्वितीयरामाब्धिषु सूर्यतश्चेच्छीघ्रः समो मंदगतिर्भवेद् ग्रहः॥" इत्यस्मत्कृतपञ्चाङ्गदर्शनादवसेयेति ॥१४॥ अन्यानुक्तेतरानुल्कापातादीन् । तेषामुत्पातानां तत्त्वं कारणं सनकाद्युत्सृष्टजयविजयशापलक्षणं विदंतीति तथा पुनर्नञा समासे तथा सत्यः ॥ १५ ॥ ब्रह्मशापेऽपि भगवत्पार्षदयोरकृतैरपि सुकृतैस्त्रैलोक्याधिपत्वादिकृतैरप्यनंतदुष्कृतैर्नरकाभावादीत्याधिक्यमाह--ताविति । अश्मवत्सारेण दृढेन अद्रिपती महापर्वतौ । व्यज्यमानं व्यक्तिं प्राप्तं सहसा झटिति ॥ १६ ॥ यद्वांगदेति सोमपावत् । कट्या कटिभागेन ॥ १७ ॥ प्रजापतिः कश्यपः यथातथयोरत्राध्याहारेणान्वयः । इत्यर्थ इति । स्वस्मात्प्राग्जातं ज्येष्ठं दितेः प्राग्जातं कनिष्ठं नामाक्षरतारतम्येन बोधितवानिति भावः। यद्वोक्तरीत्या क्रमद्वैविध्येन द्वयोरेव ज्येष्ठत्वे पितुः प्राधान्याद्धिरिण्यकशिपुरेव ज्येष्ठ इति ध्वनितम् 'हिरण्याक्षोऽनुजस्तस्य' इति वक्ष्यमाणत्वात् अत्राशयं स्वामिचरणा आहुः अयं भाव इति । योनिपुष्पं योन्यंतर्गतं पुष्पाकारं वीर्याशयं यमौ द्वौ तयोर्यमयोः । क्रमविपर्ययेणेति । यद्वस्तु पात्रे प्रथमं निक्षिप्यते तत्पश्चान्निस्सरति यच्च पश्चान्निक्षिप्यते तत्पूर्वं निःसरतीत्यर्थः । अत्र पिंडसिद्ध्याख्यग्रंथसंमतिमाह-यदेति । वेशविपर्ययात् प्रवेशक्रमवैपरीत्यत इत्यर्थः । अतः प्रवेशवैपरीत्येन सूतित्वात् ॥ १८ ॥ न कुतोऽपि बहिरंतः शुष्कार्द्रादिभिर्मृत्युर्यस्य स तथा दोर्भ्यां भुजाभ्याम् ॥ १९ ॥ तस्य हिरण्यकशिपोः । मृगयन्नन्वेषयन् । युयुत्सुर्योद्धुकामः ॥ २० ॥ तं हिरण्याक्षं वीक्ष्य देवा निलिल्यिरे इत्यग्रिमेणान्वयः । "वैजयंती भवेन्मालाष्टधा मौक्तिकनिर्मिता" इति लक्षणादष्टप्रकारमौक्तिकमालया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयम् ॥ भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः ॥ २२ ॥ स वै तिरोहितान्दृष्ट्वा महसा स्वेन दैत्यराट् ॥ सेंद्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशम् ॥ २३ ॥ ततो निवृत्तः क्रीडिष्यन्गंभीरं भीमनिस्वनम् ॥ विजगाहे महासत्त्वो वार्धिं मत्त इव द्विपः ॥ २४ ॥ तस्मिन्प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः ॥ अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः ॥२५॥ स वर्षपूगानुदधौ महाबलश्चरन्महोर्मीञ्छ्वसनेरितान्मुहुः ॥ मौर्व्याऽभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः ॥ २६ ॥ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसम् ॥ स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम् ॥ २७ ॥ त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनाम् ॥ विजित्य लोकेऽखिलदैत्यदानवान्यद्राजसूये न पुराऽयजत्प्रभो ॥ २८ ॥ स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपां पतिः ॥ रोषं समुत्थं शमयन्स्वया धिया व्यवोचदंगोपशमं गता वयम् ॥ २९ ॥ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदम् ॥ आराधयिष्यत्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ॥ ३० ॥

मनसा शौर्येण वीर्येण बलेन वरेण चोत्सिक्तं गर्वितम् । असृण्यं निरंकुशम् । निलिल्यिरे लीना बभूवुः ॥ २२ ॥ स्वेन महसा तेजसा तिरोहितान्स दृष्ट्वा ज्ञात्वा क्षीबान्मत्तानपश्यन्सन् क्लीबानिति पाठे पौरुषहीनान् ॥ २३ ॥ २४ ॥ सन्ना अवसन्ना धीर्येषाम् । वर्चसा तेजसा प्रधर्षिता अभिभूताः संतः ॥ २५ ॥ महोर्मीनभिजघ्ने मौर्व्या मारयति इति मौर्वं कार्ष्णायसं तन्मय्या । यद्वा मूर्वा नाम तृणविशेषः तन्मयरज्ज्वा दृढनिबद्धयेत्यर्थः । विभावरीसंज्ञाम् । आसेदिवान् प्राप्तः ॥ २६ ॥ असुराणां लोकः पातालं तत्पालकम् । प्रलब्धुमुपहसितुं प्रणिपत्य ॥ २७ ॥ यद्यस्माद्राजसूयेन भवानयजत् ॥ २८ ॥ उपशमं युद्धादिकौतुकादुपरमम् ॥ २९ ॥ युद्धमार्गनिपुणं त्वां यस्तोषयियुतमित्यर्थः । अष्टधामुक्ताश्च "जीमूतकरिमत्स्याहिवेणुशंखवराहजाः । शुक्त्युद्भवाश्च शास्त्रेषु मौक्तिका ह्यष्टधा मताः" इति रत्नपरीक्षार्णव उक्ताः । तीर्थस्तु—"पुष्पैश्चतुर्गुणां मालां वैजयन्तीं विदुर्बुधाः" इत्याह ॥ २१ ॥ वरेण देवप्रसादेन । तेनापि तपसा वरो लब्ध इत्यन्यत्रोक्तेः । सृणिनांकुशेन विनेयः सृण्यो न सृण्योऽसृण्यस्तम् "सृणिः स्यादंकुशेऽध्वनि' इति निरुक्तिः ॥ २२ ॥ स दैत्यः ॥ २३ ॥ स्वप्रतियोद्धारं दशदिक्षु क्वापि कमप्यदृष्ट्वा स्वीयमहाबलस्योष्मणानुतप्तो वारिधिमध्ये कथंचित्कश्चिद्वा तिष्ठेत्तेन सह युद्धापेक्षया वार्द्धिं जगाहे इत्याह तत इति । ततो देवतिरोधानानंतरम् ॥ २४ ॥ अवसन्नाः त्रस्ताः सभयाः तस्मिन्दैत्ये प्रविष्टे सति ॥ २५ ॥ स दैत्यः वर्षपूगान् वर्षसमूहान्व्याप्य गदायाः कार्ष्णायसमयत्वं तु प्रसिद्धमेव किं पुनस्तत्कथनेनेति चेदाह—यद्वेति । इत्यर्थ इति । मूर्वातृणानामतिनम्रत्वेन त्रोटितुमशक्यत्वादिति भावः । हे तातेति । प्रियत्वात्तवैतच्चरितं श्रावयामीति संबुद्ध्यभिप्रायः ॥ २६ ॥ तत्र विभावर्याम् । असुरलोका दानवप्रायजनाः । "तं गृहीत्वानयद्भृत्यो वरुणस्यासुरोंऽतिकम्" इति दशमे वक्ष्यमाणत्वात् ॥ २७ ॥ भवानयजदिति पृथग्वाक्यम् । विजित्येति विपरीतलक्षणा तेन दैत्यानां तदानीमभावात्सर्वैरपि राजसूयः कर्त्तुं शक्यते स्म तथा चाधुना मां विजित्य पुनरपि राजसूयं कुर्विति भावः । यद्वा । कृतोऽपि राजसूयस्तदैव ते सिध्यति यदा मां जयसीति भावः । ॥ २८ ॥ स वरुणः । उत्सिक्तोऽत्यधिको मदो यस्य तेन प्रलब्ध उपहसितः । शमयन्निति । अत्र मे रोषो न किञ्चित्कर्तुं शक्त इति विमर्शेनेत्यर्थः । उपशमं गताः संप्रति प्रवयसो जाता इत्यर्थः । तेन यौवनावस्थायां यदि त्वां प्राप्स्यं तदा त्वादृशसहस्रमप्यजेष्यमिति भावः । यद्वा । उपशमं संन्यासं तेन संन्यासं चेन्नाकरिष्यं तदाधुनापि त्वामजेष्यमिति भावः ॥ २९ ॥ तर्हि मे रणकंडूयानिवृत्तिः कथं स्यात्तत्राह—पश्यामीति । यस्तोषयिष्यति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं वीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः ॥ यस्त्वद्विधानामसतां प्रशांतये रूपाणि धत्ते सदनुग्रहेच्छया ॥३१॥ इति श्रीभा॰ तृती॰ हिरण्याक्षदिग्विजये सप्तदशोऽध्यायः ॥ १७ ॥ मैत्रेय उवाच ॥ तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः ॥ हरेर्विदित्वा गतिमंग नारदाद्रसातलं निर्विविशे त्वरान्वितः ॥ १ ॥ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णंतमक्ष्णा स्वरुचोऽरुणश्रिया जहास चाहो वनगोचरो मृगः ॥२॥ आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता ॥ न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ॥ ३ ॥

ष्यति तमिहि गच्छ । गृणते स्तुवंति ॥ ३० ॥ आराच्छीघ्रम् । विस्मयो नष्टगर्वः वीरशये रणांगणे रूपाणि वराहाद्यवतारान् ॥ ३१ ॥ इति श्री॰ भागवते तृतीयस्कंधे टीकायां सप्तदशोध्यायः ॥ १७ ॥ अष्टादशे हिरण्याक्षधरोद्धर्तृवराहयोः ॥ निर्विशेषं महायुद्धं देवक्षोभि निरूप्यते ॥ १ ॥ प्रतियोद्धारं श्रुत्वा महामनाः शयिष्यस इति यदुक्तं तद्विगणय्यागणयित्वा यतो दुर्मदः ॥ १ ॥ अभितो जयतीत्यभिजित्तं श्रीहरिम् । प्रकर्षेणोर्ध्वं नीयमाना अवनिर्येन अग्रदंष्ट्रया दंष्ट्राग्रेण स्वरुचो हिरण्याक्षतेजां स्यरुणश्रिया युक्तं यत्तेनाक्ष्णा नेत्रेण मुष्णंतं तिरस्कुर्वंतम् । अहो चित्रं वनगोचरो मृगो वारिचरो वराहः ॥२॥ एह्यागच्छ रसौकसां पातालवासिनां नोऽस्माकं समर्पिता अन्यथा पातालावतरणमस्या न घटत इति भावः । हिरण्याक्षेणाधिक्षेपार्थं प्रयुक्ताऽपि भारती वस्तुतो भगवंतं स्तौति । तथा हि । वनगोचरो जले शयानः श्रीनारायणः स एव योगिभिर्मृग्यते दुष्टान्वा हंतुं मृगयत इति मृगः । अज्ञ नास्ति ज्ञो यस्मात्सर्वज्ञेत्यर्थः । सुरा अधमा यस्मात् हे सुरोत्तम ममेक्षमाणस्यापि सतो मामनादृत्यापि त्व

तस्मादित्यर्थः । मनस्विनः शूराः गृणते रणकंडूयापहर्तृत्वेन स्तुवंति ॥ ३० ॥ ननु तं कतिभिर्दिनैर्लप्स्य इति चेत्तत्राह—तमिति । आरात्पंचषैरेव दिनैरित्यर्थः । संप्रति तु गर्वरोगपीडितो रणकंडूयोद्वेगेन त्वं संशेष इति भावः । वीराः शेरते यत्र स वीरशयो रणांगणम् । तत्र तव शय्यापि समुचिता भविष्यतीत्यर्थः । तदा चरणाद्यंगपरिचारका अपि बहवो भविष्यंतीत्याह—श्वभिरिति । नन्वेवं चेत्तस्याकारं ज्ञापय यथाधुनैव ब्रह्मांडस्यांतर्वहिश्चान्विष्य तं निष्कास्य तेन सहाहं योत्स्ये । कथं स मां हन्यादिति यूयं पश्यथेति तत्राह—त्वद्विधानां त्वादृशानां प्रशांतये नाशाय । आदिना नृसिंहादिग्रहः । सामान्यतोऽहं जानामि त्वां तु केन रूपेण वधिष्यतीति विशेषं न जानामीति भावः ॥ ३१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥ धराया उद्धर्त्ता धरोद्धर्त्ता स चासौ वराहश्चेति तथा निर्गतो विशेष उपमानभेदो यस्मात्तत्तथा अनुपममित्यर्थः । देवस्य हरेः क्षोभः प्रकृतिविपर्यासो यत्र तत्तथा ॥ (१) ॥ तदेवमित्थं महामनाः सोत्साहचित्तः गतिं गमनं रसातलं गर्भोदमेव ॥ १ ॥ पूर्वोक्तवराहचरिते युद्धलीला विशेषतो नोक्तेति तां वर्णयितुमाह—ददर्शेति । तत्र गर्भोदे । अभिजितं तन्नामकर्क्षाधिदैवतं वा । वने एव विविक्तारण्ये स्थित्वा तपश्चर्यादिना मुनिजनदृश्यत्वाद्वनगोचरो वा । यद्वा । रामावतारे पित्राज्ञया वनगोचरो यः सोऽयमित्यर्थः । अवताराणामनादित्वादियमुक्तिरपि नासंगतेति । यद्वा । वनगोऽपि संसारवनप्राप्तोप्यचरो ध्रुव एव, संसारधर्म्मैरुत्पत्त्यादिभिर्न चाल्य इति भावः ॥२॥ रसौकसामिति पंचम्यर्थे षष्ठी रसौकोभ्य इत्यर्थः । पातालेऽवतरणं गमनमस्या भुवः।इति भाव इति । अस्मदी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंत्यसुरान्परोक्षजित् ॥ त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे सुहृच्छुचः ॥ ४ ॥
त्वयि संस्थिते गदयाशीर्णशीर्षण्यस्मद्भुजच्युतया ये च तुभ्यम् ॥ बलिं हरंत्यृषयो ये च देवाः स्वयं सर्वे न भविष्यंत्यमूलाः ॥ ५ ॥
स तुद्यमानोरिदुरुक्ततोमरैर्दंष्ट्राग्रगां गामुपलक्ष्य भीताम् ॥ तोदं मृषन्निरगादंबुमध्याद्ग्राहाहतः सकरेणुर्यथेभः ॥ ६ ॥ तं निःसरंतं सलिलादनु
द्रुतो हिरण्यकेशो द्विरदं यथा झषः ॥ करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियां किं त्वसतां विगर्हितम् ॥ ७ ॥

मनया सह वर्तमानो नोऽस्मदीयं स्वस्ति समस्तं मंगलं राज्यं यास्यसि प्राप्स्यसि नात्र संदेहस्तथाप्यस्मत्कृपया विमुंचेत्यर्थः । आसादिता लीलया स्वीकृता सूकराकृतिर्येन ॥ ३ ॥ अभवाय नाशाय भृतः पुष्टः वस्तुतस्तु मोक्षाय भृतो धृत आश्रित इत्यर्थः । यो भवान्परोक्षेण चौर्येण जयतीति तथा । वस्तुतस्तु दूरत एव स्थित्वा जयतीति संस्थाप्य हत्वा वस्तुतस्तु योगमायारूपमचिंत्यं बलं यस्य अल्पं पौरुषं यस्मात् तं त्वां सम्यक् स्थापयित्वा भक्त्या हृदि स्थिरीकृत्येत्यर्थः । हे मूढ प्रमूढान्प्रात्याप्याययतीति तथा । प्रा पूर्ताविति धातुः । सुहृदां शुचः संसारदुःखानि मृजे नाशयामि यतस्त्वं स्मर्तुर्बांधवानपि मोचयसीति भावः ॥ ४ ॥ अस्मद्भुजच्युतयापि गदयाऽशीर्णं शीर्षं यस्य तथाभूते त्वयि सुखं स्थिते सति ये तुभ्यमधुना बलिं हरंति नवीना भक्ता ये च पूर्वे भक्ता ऋषयो देवाश्च ते सर्वे स्वयमेवोद्यमं विनैवामूला न भविष्यंति । किं तु दृढमूला एव भविष्यंतीत्यर्थः ॥ ५ ॥ स हरिररेर्दुरुक्तान्येव तोमराः शस्त्रविशेषास्तैस्तुद्यमानो व्यथ्यमानो दंष्ट्राग्रगतां पृथ्वीं भीतामालक्ष्य तोदं दुरुक्तव्यथां मृषन्सहमान एव निर्गतः करेणुर्हस्तिनी वस्तुतस्त्वरिदुरुक्ततोमरैर्निमित्तभूतैस्तुद्यमानः यथाश्रुतार्थग्राहिणां ब्रह्मादीनां व्यथां दृष्ट्वाऽनुकंपया पीड्यमान इत्यर्थः । तोदं मृषन्नित्यस्याप्ययमेवार्थः ॥ ६ ॥ सलिलान्निर्गच्छंतमनुगतः सन् हिरण्यवत्कपिशाः केशा यस्य दैत्यस्य झषो मकरः करालास्तुंगा दंष्ट्रा यस्य अशनिवन्निःस्वनो यस्य निर्लज्जानामसतां किं विगर्हितमस्ति

यत्वादेवास्मल्लोकमास्तेत्याशयः । 'विधाता विश्वसृड्विधिः' इत्यमरः । यद्वा । हे विश्वसृज॥इगुपधत्वात्कः । मही नो निषेधे मा विमुंच, इयं मही अर्पिता तुभ्यमुपहारीकृता न केवलमियमेव नोऽस्माकं स्वस्तिराज्याद्यप्यनया सहैव प्राप्स्यसि । न स्स्वस्तीति—"अनचि च" "वा शरि" इति सकारद्वयसिद्धेर्व्याख्याद्वयम्।ननु कुतो मह्यं महीं ददासि तत्राह—मम ईक्ष ईक्षणं तस्मात् मत्कर्मकात्कृपावलोकाददिशाद्धेतोरित्यर्थः॥३॥यद्वा। अक्षाणीन्द्रियाणि जयती त्यक्षजिदत एव पर इंद्रियानाकृष्ट इत्यर्थः । यद्वा । मायया कृपयाऽसुरानपि हंति स्वकर्तृकहननेन सद्गतिं ददातीत्यर्थः । "लोकान्प्रयांतु रिपवोऽपि हि शस्त्रपूता" इति मार्कंडेयोक्तेः । "येये हताश्चक्रधरेण विष्णुना" इत्याद्युक्तेश्च । अत एव कृपाधिक्यादेव । परोक्षोप्यप्रत्यक्षीभूतोऽपि जयसि देवतांतरेभ्योऽल्पसाधनेनैव प्रत्यक्षीभूतेभ्योऽपि बहुसाधनैरप्यसाक्षाद्भूतस्त्वं तेभ्यः सर्वेभ्य उत्कर्षेण वर्त्तस इत्यर्थः । पौरुषं पुरुषस्य महत्स्रष्टुः कर्म विश्वसृष्ट्यादि तदपि अल्पमननुरूपं यस्य तं त्वामिति वा । स्वामिचरणैस्तु पौरुषपदेन बलमुक्तमत एव पंचमीसमासः कृतः । इति भाव इति । 'कुलं पवित्रम्' इत्याद्युक्तेरिति तात्पर्यम् ॥ ४ ॥ इत्यर्थ इति । स्वामिसुखेन भृत्यसुखस्यापि संभवादिति भावः॥५॥इत्यर्थ इति । तोदं पाक्षिकदुरुक्तिव्यथां मृषन् पाक्षिकसूक्तसुखापेक्षया सहमान इति वार्थः ॥६॥ कपिशाः किंचित्पीताः इत्यर्थ इति । किमकार्यमसाधूनामिति भावः । इत्यर्थ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स गामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वम् ॥ अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः ॥ ८ ॥ परानुषक्तं तपनीयोपकल्पं महागदं कांचनचित्रदंशम् ॥ मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ॥ ९ ॥ श्री भगवानुवाच ॥ सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान् मृगये ग्रामसिंहान् ॥ न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णंत्यभद्र ॥ १० ॥ एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविितास्ते ॥ तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरम् ॥ ११ ॥

निंदाभयाभावात्पलायनमपि नायुक्तमित्यर्थः । वस्तुतस्तु गतह्रियः प्राप्तह्रियः न संतो येभ्यस्तेषां कृपालूनां किं विगर्हितं न किंचित् । अतः कृपालुत्वाद्दंष्ट्राश्रितभूरक्षणार्थं किंचित्पलायनमपि न निंदितमित्यर्थः । यद्वा । लोकोपकाराय भुवमुद्धरतोऽनुद्रवणमनुचितं मन्वानो दैत्य आत्मानमेवाधिक्षिपति । गतह्रियां स्वार्थैकपराणामसतामस्माकं किं विगर्हितगणनास्त्यपि तु नास्त्येव धिगस्मानित्यब्रवीदित्यर्थः ॥ ७ ॥ स भगवान्विश्वसृजाऽभिष्टुतो विबुधैश्च प्रसूनैरापूर्यमाणः पाठांतरे विश्वसृजां प्रसूनैर्विबुधैरभिष्टुत इति सलिलस्योदस्तादुपरि व्यवहारगोचरे देशे गां पृथ्वीं विन्यस्य तस्यां स्वसत्त्वमाधारशक्तिं निहितवान् अरेस्तस्य पश्यत एव ॥ ८ ॥ परा पराक् पृष्ठतोऽनुषक्तं लग्नम् । तपनीयोपकल्पं सुवर्णाभरणम् । कांचनमयश्चित्रो दंशः कवचं यस्य तं दैत्यम् । प्रचंडमन्युत्वमधिक्षेपादिकं चानुकरणमात्रं दैत्यवाक्यभीतानां देवानां भयनिवृत्तये वस्तुतस्तेन तथाऽनुक्तत्वेन कोपादिहेत्वभावात् ॥ ९ ॥ ग्रामसिंहान् शुनः प्रतिमुक्तस्य बद्धस्य विकत्थनं श्लाघाम् ॥ १० ॥ न्यासहरा निक्षेपहराः द्राविताः पलायनं कारिताः

परोपकृतयेऽकार्यकरणेऽपि न दोष इति भावः । वस्तुतस्तु—भगवति निंदा न संभवतीति तेनैव विचारितमित्याह । यद्वेति । इत्यर्थ इति । उपकारिष्वपकारस्मरणाद्द्वयमेव निन्दिता इति भावः॥७॥ व्यवहारगोचरे नेत्रव्यवहारदेशे आधारशक्तिं यथा जले न मज्जेदिति भावः । पाठांतरे 'विश्वसृजां प्रसूनैः' इति पाठे । प्रजापतिभिर्वृष्यमाणैः पुष्पैरित्यर्थः । तस्य दैत्यस्य । यद्वा । विश्वसृजां प्रसूनैः पुष्पतुल्यैः संततिभिर्विबुधैरभिष्टुतः । अत्र पक्षे आपूर्यमाण इह करणाकांक्षायां प्रसूनैरिहापि योज्यम्॥८॥ तेन दैत्येन । तथानुक्तत्वादधिक्षेपवाक्यानुक्तेः । कोपादीहादिना क्लेशादिग्रहः । यद्वा । दुरुक्तैः प्रचंडमन्युः, पाक्षिकसूक्तैः प्रहसन्निति हिरण्याक्षवाक्ये सरस्वतीकृतस्य स्तुतिवचनस्य प्रतिवचनमवश्यमपेक्ष्यत इत्यतो भगवद्वाक्येऽपि द्वितीयार्थो व्याख्येयः ॥ ९ ॥ वनगोचराः वनस्थैस्त्यक्तविषयभोगैर्भक्तैरेव दृश्यास्तदपि कृपयैव । ग्रामसिंहान् ग्रामस्थान् विषयासक्तांस्तन्मुख्यानपि मृगयेऽन्वेषयामि स्वपदं दातुम् । नन्वात्मश्लाघिनो दुर्विनीतान्कथं कृपयसीति तत्राह-धीरा अस्मद्विधा दयावीरास्तव विकत्थनं दोषं न गृह्णंति ।अत एव तव कथंभूतस्य मृत्युपाशैः प्रतिमुक्तस्यातिशयेन त्यक्तस्य ममानुकंपितजने मृत्योरनधिकारात् । हे अभद्र न विद्यते भद्रं यस्मात्सः ॥ १० ॥ तत्स्थानं किं कुतः पुनस्तत्स्थेयत्वं, काकूत्त्योपहास एवायम् । पक्षे रसौकसामसुराणामपि न्यासहरा भक्त्या समर्पितपूजोपहारग्राहिणः । गतह्रियः भक्तवात्सल्यादेव हेतोर्न लज्जामहे इत्यर्थः । यतो गदया तव स्तुतिवाचा द्राविता द्रुतचित्तीकृता । गदेर्भिदादित्वादङ् । अथापि तदपि त्वया सह आजौ युद्धेऽपि तिष्ठामहे स्वबलोद्रेकं प्रकाशयाम इत्यर्थः "प्रकाशनस्थेयाख्ययोश्च" इति प्रकाशने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः ॥ संस्थाप्य चास्मान् प्रमृजाऽश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिपर्त्यसभ्यः ॥ ॥ १२ ॥ मैत्रेय उवाच ॥ सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशम् ॥ आजहारोल्बणं क्रोधं क्रीडमानोऽहिराडिव ॥ १३ ॥ सृजन्नमर्षितः श्वासान्मन्युप्रचलितेंद्रियः ॥ आसाद्य तरसा दैत्यो गदयाऽभ्यहनद्धरिम् ॥ १४ ॥ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि ॥ अवंचयत्तिरश्चीनो योगारूढ इवांतकम् ॥ १५ ॥ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः ॥ अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदम् ॥ १६ ॥ ततश्च गदयारातिं दक्षिणस्यां भुवि प्रभुः ॥ आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत् ॥ १७ ॥ एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च ॥ जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः ॥ १८ ॥ तयोः स्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्य्वोः ॥ विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः ॥ १९ ॥

अथाप्यसमर्था अपि तिष्ठामः । तत्किम् । यतः स्थेयं स्थातव्यमेवास्माभिः तत्किमित्यत आह क्व यामः गंतव्यदेशाभावात् ॥ ११ ॥ पद्रथानां पदातीनां ये यूथपास्तेषामधिपः मुख्य इत्यर्थः । अस्वस्तये पराभवार्थमाशु घटस्व यतस्त्व अनूहो निर्वितर्कः यो नातिपिपर्ति न पूरयति पालयति वा असावसभ्यः सभायामनर्हः ॥ १२ ॥ सोऽधिक्षिप्तः सत्यं वयमिति श्लोकेन रुषा प्रलब्ध उपहसितश्च एते वयमिति द्वाभ्याम् । क्रीडां कार्यमाणोऽहिराण्महासर्प इव ॥ १३॥ मन्युना प्रचलितानि क्षुभितानींद्रियाणि यस्य ॥ १४ ॥ अंतकं मृत्युम् ॥ १५ ॥ १६ ॥ सौम्य विदुर तां गदामप्राप्तामेवाहनत् ॥ १७ ॥ हर्यक्षो हिरण्याक्षः ॥ १८ ॥ स्पृधोः स्पर्धमानयोः तिग्माभ्यां गदाभ्यामाहतान्यंगानि ययोः क्षतादास्रवतीति क्षतास्रवं रुधिरं तस्य घ्राणमवघ्राणं तेन विवृद्धो मन्युर्ययोः विचित्रान्मार्गान्गदायुद्धभ्रमणभेदान् इला गौस्तस्यां निमित्तभूतायां

आत्मने पदम् । ननु हे प्रभवः वैकुंठं गत्वा सुखेन विराजध्वं किं युद्धक्लेशेन तत्राह-स्थेयमिति । सनकादिद्वारा शापेन वैरमुत्पाद्य युद्धसुखार्थं बलिना त्वया सहाजौ स्थेयमेव क्व यामः ॥ ११ ॥ इत्यर्थ इति । पद्रथेत्युपलक्षणं सेनामात्रस्य त्वमेवाधुना राजासीति भावः । पक्षे त्वयैव प्रेयोमद्युद्धसुखोत्पादनार्थं प्रतिज्ञायासुरभावोंऽगीकृतः । अतो यः स्वामित्यादि । अत एव त्वमित्यादि । नोस्मान्सुखयितुं घटस्वेति "क्रियार्थोपपदस्य—" इति चतुर्थी । असूनामस्तये स्वप्राणत्यागार्थं किं कृत्वा संस्थाप्य हृदये सम्यक् स्थिरीकृत्य स्वीयानां कामानंदानां संबंधि अश्रु प्रमृज ॥ १२ ॥ पक्षे अधिक्षिप्तः अधिकारात्पार्षदत्वलक्षणात्क्षिप्तः पातितः । अत एव रुषा कर्त्र्या प्रकर्षेण लब्धश्च भगवदिच्छाप्रयुक्तशापवशाच्छुद्धसत्त्वमयोऽपि तमोमयोभूऽदित्यर्थः । तदा तु युद्धकाले आ सम्यक्प्रकारेणैवोल्बणमत्युद्रिक्तं क्रोधं जहार जग्राह॥१३॥तरसा बलेन अहनत् शब्लुगभावोऽत्रार्षः॥१४॥तिरश्चीनः तिर्यक् सन् अवंचयत् तत्सांमुख्यमत्यजत् । यथा कालमासन्नं वीक्ष्य योगी प्राणायामसमाधिना वंचयति तद्वदित्यर्थः ॥ १५ ॥ दष्टो दच्छदोऽधरोष्ठो येन तम् ॥ १६ ॥ ततो गदाभ्रामणोत्तरं भुवि भ्रुदेशे । सौम्येति । त्वया तु सौम्यत्वात्स्वगदा दुर्योधनद्वार्येव न्यस्तेत्यभिप्रायः । "सौम्यो ज्ञे ना त्रिष्वनुग्रे मनोज्ञे सोमदैवते" इति मेदिनी । भगवद्भक्तिमनोज्ञत्वात्त्वाहमेतद्वदामीति वा । सुसंरब्धावतिकुपितौ ॥ १८ ॥ तयोर्हरिहिरण्याक्षयोः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैत्यस्य यज्ञावयवस्य मायागृहीतवाराहतनोर्महात्मनः ॥ कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् ॥ २० ॥ आसन्नशौंडीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमम् ॥ विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरम् ॥ २१ ॥ ब्रह्मोवाच ॥ एष ते देवदेवानामंघ्रिमूलमुपेयुषाम् ॥ विप्राणां सौरभेयीणां भूतानामप्यनागसाम् ॥ २२ ॥ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः ॥ अन्वेषन्नप्रतिरथो लोकानटति कंटकः ॥ २३ ॥ मैनं मायाविनं दृप्तं निरंकुशमसत्तमम् ॥ आक्रीड बालवद्देव यथाऽऽशीविषमुत्थितम् ॥ २४ ॥ न यावदेष वर्धेत स्वां वेलां प्राप्य दारुणः ॥ स्वां देवमायामास्थाय तावज्जह्यघमच्युत ॥ २५ ॥ एषा घोरतमा संध्या लोकच्छंबट्करी प्रभो ॥ उपसर्पति सर्वात्मन् सुराणां जयमावह ॥ २६ ॥ अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात ॥ शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम् ॥२७॥

शुष्मिणोर्मत्तयोर्वृषभयोः प्रस्तुतेऽपि इला पृथ्वी तदर्थम् । वृषभौ हि खलु बहूनि दिनानि संग्रथितोत्तुंगशृंगसंघर्षविदीर्णांगगलद्रुधिरौ परस्परोपमर्दव्यग्रोग्रसंरंभौ चमत्कारितगजयूथपौ युध्यमानौ तिष्ठत इति प्रसिद्धम् ॥ १९ ॥ यज्ञा एवावयवा यस्य तस्य च मह्यां महीनिमित्तं द्विषतोः एवंविधं विमर्दनं युद्धं दिदृक्षुः स्वराट् ब्रह्मा तत्रागात् ॥ २० ॥ आगत्य च नारायणमाह । किं कृत्वा दैत्यं विलक्ष्य । कथंभूतम् । आसन्नं प्राप्तं शौंडीरं शौर्यं मदो वा येन अपेतं साध्वसं यस्मात् कृतः प्रतीकारो येन अहार्योऽप्रतीकार्यो विक्रमो यस्य सहस्रणीः सहस्राणामृषिसहस्राणां नेता ॥ २१ ॥ हे देव तेंऽघ्रिमूलं प्राप्तानां देवादीनाम् । एषोऽसुरः ॥ २२ ॥ आगस्कृद्व्यर्थैवापराधारोपकः तत्परिहाराय प्रवृत्तौ भयकृत् भीतं ज्ञात्वा दुष्कृदर्थप्राणादिहर्ता अस्मत्तो राद्धो लब्धो वरो येन अन्वेषन्प्रतिरथमवलोकयन् अप्रतिरथः प्रतिपक्षशून्यः ॥ २३ ॥ यद्यस्मादेवंभूतोऽयं तस्मादेनं मा क्रीड मा क्रीडय । हे देव यथोत्थितं क्षुभितमाशीविषं सर्पं बालः पुच्छाकर्षणादिना क्रीडयति तद्वत् ॥२४॥स्वामासुरीम् । हे देव स्वां मायाम् । अघं पापरूपम् ॥ २५ ॥ वेलामेवाह । एष इति । लोकानां छंबट्करी विनाशकरी छंबडित्यव्ययं विनाशे वर्तते ॥ २६ ॥ अभिजिन्मध्याह्नः स एव मौहूर्तिको योगः

संग्रथिते मिलिते ये उत्तङ्गश्रृंगे तयोः संघर्षेण विदीर्णगलाद्भिन्नकंठप्रदेशाद्गलत्स्रवद्रुधिरं ययोस्तौ तथा । परस्परोपमर्देऽन्योन्ययुद्धे व्यग्रौ संलग्नौ उग्रस्संरंभः कोपो ययोस्तावुग्रसंरंभौ परस्परोपमर्दव्यग्रौ च तावुग्रसंरंभौ परस्परोपमर्दव्यग्रोग्रसंरंभौ । चमत्कारितौ विडंबितौ गजयूथपौ याभ्यां तौ तथा इति लोके प्रासिद्धं 'भूगोवाचस्त्विडा इलाः' इत्यमरः ॥ १९ ॥ कौरव्येति । युद्धोत्कंठा कौरवाणां धर्म एवातस्तव तच्छ्रवणोत्कंठेति भावः । मायया भक्तकृपया गृहीता वराहसंबंधिनी तनुर्येन तस्य वराहवपुषैव तन्नाशस्य पुराणांतरे प्रतिपादितत्वात् । अत्रापि " दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम् " इति वक्ष्यमाणब्रह्मोक्तेश्च । द्विषतोर्द्वेषं कुर्वतो र्विमर्दनं युद्धम् । तत्र युद्धदेशे ॥ २० ॥ " शौंडीरं शौर्यमदयोश्चातुर्ये मद्यकारके " इति निरुक्तिः ॥ २१ ॥ एष इति युग्मकम् ॥ २२ ॥ कंटकः कंटकवद्दुःखदः ॥ २३ ॥ एवंभूतो देवद्विजादिदुःखदः । बालवदज्ञवत् । त्वं तु विज्ञचूडामणिरेवासीति भावः । यथाशीविषं कृष्णसर्पं गरुड इति शेषः । यद्वा । यथोत्थितं द्रष्टुमुद्युक्तं सर्पं लोको मन्यते तथेमं मन्य इति शेषः ॥ २४ ॥ न वर्द्धेतेति । तेनासुरवेलायां विवृद्धबलमेनं हंतुं त्वं न प्रभविष्यसीत्यैश्वर्यज्ञानवतोऽपि ब्रह्मणः प्रेम्णैवानिष्टोपशंकित्वं ज्ञेयं यथैश्वर्यज्ञानवतोरपि वसुदेवदेवक्योः "समुद्विजे भवद्धेतोः कंसादहमधीरधीः" इत्यादिकथनम् । मायां सामर्थ्यम् ॥ २५ ॥ भयेन निकटत्वप्रतीतेरेषेति ॥ २६ ॥ अभिजिदर्थमाह-"मध्याह्नस्त्वभिजित्प्रोक्त आषाढोत्तर एव च । श्रवणस्यापि पूर्वार्द्धो विषुवद्वाभिजित्स्मृतः ॥" इति । काशिनाथस्तु-"अंगुल्यो विंशतिः सूर्ये शंकोः सोमे च षोडश । कुजे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम् ॥ विक्रम्यैनं मृधे हत्वा लोकानाऽऽधेहि शर्मणि ॥ २८ ॥ इति श्रीभा० तृतीय० हिरण्याक्षश्री वराहयुद्धवर्णनं नामाऽष्टादशोऽध्यायः ॥ १८ ॥ मैत्रेय उवाच ॥ अवधार्य विरिंचस्य निर्व्यलीकामृतं वचः ॥ प्रहस्य प्रेमगर्भेण तदपांगेन सोऽग्रहीत् ॥ १ ॥ ततः सपत्नं मुखतश्चरंतमकुतोभयम् ॥ जघानोत्पत्य गदया हनावसुरमक्षजः ॥ २ ॥ सा हता तेन गदया विहता भगवत्क रात् । विघूर्णिताऽपतद्रेजे तदद्भुतमिवाऽभवत् ॥ ३ ॥

सन् मुहूर्तः शुभदः कालः अगाद्गतप्रायः अतो यावन्मुहूर्तशेषोऽस्ति तावदेव सुदुस्तरमेनं निस्तर जहि ॥ २७ ॥ त्वां मृत्युं त्वयैव शापानुग्रहकाले विहितं निर्मितम् । आसा दितः प्राप्तः शर्मणि सुखे आधेहि स्थापय ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे तृतीये टीकायामष्टादशोऽध्यायः ॥ १८ ॥ ॥ ऊनविंशे विरिंच्यादिप्रार्थितेन महामृधे ॥ वराहेण हिरण्याक्षवधः श्लाघ्योऽनुवर्ण्यते ॥ १ ॥ निर्व्यलीकं च तदमृतं च पाठांतरे निष्कपटाभिप्रायं च तद्वतं च कालात्मनोऽपि मम मुहूर्तबलमुपदिशतीति प्रहस्यापांगालोकनेन स्वीकृतत्वात् ॥ १ ॥ मुखतः अभिमुखे हनौ कपोलस्याधोभागे अक्षजो ब्रह्मणो घ्राणेंद्रियादाविर्भूतः ॥ २ ॥ सा स्वगदया तेन हता ततो विहता

पञ्चदशांगुल्यो बुधवारे चतुर्दश । त्रयोदश गुरोर्वारे द्वादशार्कजशुक्रयोः । शंकोर्मूले यदा छाया मध्याह्ने च प्रजायते ॥ सा तदाभिजिदाख्या हि घटिकैका स्मृता बुधैः । अत्र कार्याणि सर्वाणि सिद्धिं यांति कृतानि च । जातोभिजिति राजा स्याद्व्यापारे सिद्धिरुत्तमा" । अस्यार्थः—अत्र शंकुर्द्वादशांगुलो ग्राह्यः सूर्यसिद्धांतादिषु तथैवोक्तत्वात् "मूले द्व्यंगुलविस्तारः सूच्यग्रो द्वादशांगुलः । भवेच्छंकुः" इति तल्लक्षणात् । अंगुलिमानमपि लीलावत्यां 'यवोदरैरंगुलमष्टसंख्यैः' इति । यदा मध्याह्ने सति तच्छंकोर्मूले छाया प्रजायते तदा बुधैरेका घटिकाऽभिजिदाख्या स्मृताऽह्नो मध्यात्परतो घटिकैका यावदित्यर्थः । सार्वत्रिकोयं विधिरिति मध्याह्ने चेति । चशब्देन पुनरभिजित्कालः कथ्यते च पुनः सूर्ये रविवारे यदा तच्छंकुछायांगुल्यो विंशतिप्रमिता भवंति सोमवारे च षोडशांगुलिमिता छाया भवति तदा तत्कालमारभ्यैका घटिकाभिजिदाख्या स्मृता परश्चेयमभिजिद्घटी पूर्वाह्णेऽपराह्णे चेति कालद्वये जायते इति विज्ञेयं सुधिया । एवं कुजादिवारेष्वपि स्वस्वांगुलच्छायामानेन वारद्वयमभिजिद्भवतीति । देवानांप्रियास्तु—रविवारे विंशत्यंगुलं शंकुं कृत्वा मध्याह्ने तच्छंकोर्मूले यदा च्छाया जायते तदाभिजिदाख्या घटिका स्मृता । एवं चंद्रादिषु स्वस्वांगुलमानशंकुं विधाय तन्मूले छायातोऽभिजिद्भवतीति व्याख्यानं चक्रुस्तदसत् । यतो यावदंगुलमितः शंकुस्स्यात्तावदङ्गुलमितशंकोर्मूले छाया मध्याह्ने सदा भवेत् यद्येवं तर्हि रव्यादिवारेषु पृथगंगुलशंकुना किं न ह्यन्यशास्त्रवज्ज्योतिःशास्त्रं पारोक्ष्यपादकमिति किं तु प्रत्यक्षतापादकमेव "प्रत्यक्षं ज्यौतिषं शास्त्रं साक्षिणौ चंद्रभास्करौ" इति सिद्धांतोक्तेरित्यलं शास्त्रांतरविचारेण प्रकृतमनुसरामः अतो मुहूर्त्तस्य गतप्रायत्वात् ॥२७॥ त्वयेति । अहमेव युवां दैत्यभावे वराहनृसिंहरूपाभ्यां राक्षसत्वे नृपतिरूपत्वे च नररूपेण हनिष्यामीति प्रतिज्ञातमिति पुराणांतरादवसेयम् । यद्वा । तपोनंतरवरदानावसरे मया निर्मितमिति ॥२८॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ (१) ॥ निष्कपटं स्वादु च वचः । पाठांतरे निर्व्यलीककृतं वच इति पाठे । अत्र समास "ऋत्यकः" इति प्रकृतिभावः निर्व्यलीकं तु 'अस्मद्राद्ध्वरोऽसुरः' इत्युक्तेः । अमृतं 'न यावदेष वर्द्धेत' इत्यादिप्रेममयत्वादमृततुल्यं वचस्तु भगवताप्यादरेणास्वादितं तदिति अहो प्रेम्णः सर्वविस्मारकतासामर्थ्यं यत्कालात्मनो मुहूर्त्तबलमुपदिशतीति । तद्वचः प्रेमगर्भेण प्रीतियुक्तेन रात्रावेवैनं हनिष्यामीति ज्ञापयामासेत्यर्थः ॥ १ ॥ नन्वल्पशरीरेण वराहेणात्युच्चांगदैत्यहनौ हननं कथमिति चेत्तत्राह—उत्पत्येति उत्प्लुत्येत्यर्थः ॥२॥ तेनाऽसुरेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तदा लब्धतीर्थोऽपि न बबाधे निरायुधम् ॥ मानयन् स मृधे धर्मं विष्वक्सेनं प्रकोपयन् ॥ ४ ॥ गदायामपविद्धायां हाहाकारे विनिर्गते ॥ मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः ॥ ५ ॥ तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्षदमुख्येन विषज्जमानम् ॥ चित्रा वाचोऽतद्विदां खेचराणां तत्रास्माऽऽसन् स्वस्ति तेऽमुं जहीति ॥ ६ ॥ स तं निशाम्यात्तरथांगमग्रतो व्यवस्थितं पद्मपलाशलोचनम् ॥ विलोक्य चामर्षपरिप्लुतेंद्रियो रुषा स्वदंतच्छदमादशच्छ्वसन् ॥ ७ ॥ करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव ॥ अभिप्लुत्य स्वगदया हतोऽसीत्याहनद्धरिम् ॥ ८ ॥ पदा सव्येन तां साधो भगवान् यज्ञसूकरः ॥ लीलया मिषतः शत्रोः प्राहरद्वातरंहसम् ॥ ९ ॥ आह चायुधमाधत्स्व घटस्व त्वं जिगीषसि ॥ इत्युक्तः स तदा भूयस्ताडयन्व्यनदद्भृशम् ॥ १० ॥ तां स आपततीं वीक्ष्य भगवान्समवस्थितः ॥ जग्राह लीलया प्राप्तं गरुत्मानिव पन्नगीम् ॥ ११ ॥ स्वपौरुषे प्रतिहते हतमानो महासुरः ॥ नैच्छद्गदां दीयमानां हरिणा विगतप्रभः ॥ १२ ॥ जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपम् ॥ यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा ॥ १३ ॥

विच्युता सती विघूर्णिता भूत्वाऽपतद्रेजे च । तद्भगवत्करात्पतनम् । यद्वा तत्पदस्यावृत्त्या रेज इत्यनेनापि संबंधः तद्दैत्यपौरुषं रेज इति ॥ ३ ॥ लब्धतीर्थो लब्धावसरः स च न बबाधे न प्राहरत् स मानयन्बभूवेति वाक्यभेदात्स इत्यस्यापौनरुक्त्यम् ॥ ४ ॥ ५ ॥ व्यग्रं ससंभ्रमं चक्रं यस्य विषज्जमानं विशेषेण संगं प्राप्नुवंतं प्रति अतद्विदां तत्प्रभावमजानताम् । आसमंतादासन्स्म ॥ ६ ॥ स दैत्यस्तमात्तचक्रं निशम्य दृष्ट्वाऽग्रतो व्यवस्थितं च विलोक्यामर्षेण क्रोधेन परिप्लुतानि क्षुभितानींद्रियाणि यस्य सः आदशद्दष्टवान् ॥ ७ ॥ चक्षुर्भ्यां दहन्निव संचक्षाणः पश्यन् इवेति । वस्तुतः क्रोधाभावमाह । हतोऽसि ज्ञातोऽसीति वास्तवोऽर्थः ॥ ८ ॥ वातरंहसं वायुवेगाम् ॥ ९ ॥ घटस्वोद्यमं कुरु यतस्त्वं जेतुमिच्छसि ॥ १० ॥ ११ ॥ हतो मानो गर्वो यस्य ॥ १२ ॥ ज्वलन्यो ज्वलनस्तद्वल्लोलुपं ग्रसनव्यग्रम् । यज्ञाय विष्णुमालक्ष्य

ततो हरिकरात् । औचित्यादन्वयांतरमाह—यद्वेति ॥ ३ ॥ स दैत्यः । तदा गदापतनावसरे । "तीर्थं क्षेत्रावकाशस्त्रीरजश्शास्त्राध्वरेषु च" इति कोशात् । धर्मं निरायुद्धेऽप्रहरणरूपम् । यद्वा । समृधे सयुद्धे जने यो धर्मस्तमिति । चक्रवर्ती तु—न बबाधे न प्राहरत् तत्र हेतुः—मानयन्निति । तेन च प्रकोपयन्निति किमरे मामपि स्वबाहुबलादेव पतितगदं व्याकुलं जानासि यत्स्वधार्मिकत्वं प्रथयन्न प्रहरसि पश्य रे पश्य क्षणमात्रेणैव त्वत्प्राणानेवापहरामीति भगवांश्चुकोपेत्यर्थः । अपविद्धायां पतितायां न चैतत्सौभयुद्धे शार्ङ्गधनुःपतनमिव परमतमाशंकनीयं हिरण्याक्षस्य पार्षदत्वात् । पार्षदस्य च भगवत्तुल्यबलत्वात् । तुल्यबलत्वे च गदापतनस्यासंभवत्वाभावात् । तुल्यबलत्वम् विना च युद्धसुखानुत्पत्तेर्गदापतनमिदं भगवदुत्साहवर्द्धकत्वाद्भूषणमेव न दूषणं भक्तस्थाने भगवता प्रेमांबुधिना स्वपराभवस्य शतशोंगीकृतत्वादितो तदर्थव्यंजकमुत्तरश्लोके स्वपार्षदमुख्येनेति पदमनुसंधेयं, सुनाभं चेति चकाराद्गदामपि पूर्वं सस्मारैवेति गम्यते ॥ ४ ॥ सुनाभं सुदर्शनचक्रम् । अपविद्धायुधसंग्रहस्य सत्यं त्वं यथा दिशासि तथैव कुर्वन्निमं हन्मि किं तु ममास्य च युयुत्सासुखं पूर्यतामतो योधानामनुचितत्वाच्चक्रस्मरणम् ॥ ५ ॥ महानपीतरप्रेरित एव कार्यं करोति न तु स्वयमिति भावनातः खेचरा अस्य वधाय प्रेरयंतीत्याह तमिति । व्यग्रं संभ्रमयुक्तं हंतहंत भगवान्मां स्मरति स्मेति स्वयमेवागत्य हस्ते लग्नं चक्रं दितिपुत्राभिधेनेत्यपि पाठमाह चक्रवर्त्ती, दितिजाभिधेनेति संदर्भः । नाममात्रतत्तद्रूपेणेत्यर्थः । तत्प्रभावमैश्वरं तेजः प्रेमवैवश्यतयैव खेचराणां सिद्धानां देवविशेषाणाम् ॥ ६ ॥ ७ ॥ ८ ॥ साधो इति । भगवल्लीलाश्रवणव्यग्रत्वात्साधुरसीत्यभिप्रायः ॥ ९ ॥ सोसुरः । तयेति तीर्थः ॥ १० ॥ तां गदाम् । गरुत्मान् गरुडः पद्भ्यां न गच्छतीति पन्नगीं सर्पस्त्रीम् ॥ ११ ॥ १२ ॥ ज्वलन् ज्वालायुक्तः अभिचारं कुर्वन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदोजसा दैत्यमहाभटार्पितं चकासदंतःख उदीर्णदीधितिम् ॥ चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितम् ॥ १४ ॥ वृक्णे स्वशूले बहुधाऽरिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् ॥ प्रवृद्धरोषः स कठोरमुष्टिना नदन्प्रहृत्यांतरधीयतासुरः ॥१५॥ तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः॥नाकंपत मनाक् क्वापि स्रजा हत इव द्विपः॥१६॥अथोरुधा सृजन्मायां योगमायेश्वरे हरौ॥यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमम् ॥१७॥ प्रववुर्वायवश्चंडास्तमः पांसवमैरयन् ॥ दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः प्रहिता इव ॥ १८ ॥ द्यौर्नष्टभगणाऽभ्रौघैः सविद्युत्स्तनयित्नुभिः ॥ वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत् ॥ १९ ॥ गिरयः प्रत्यदृश्यंत नानायुधमुचोऽनघ ॥ दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्धजाः ॥ २० ॥ बहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुंजरैः ॥ आततायिभिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः ॥ २१ ॥ प्रादुष्कृतानां मायानामासुरीणां विनाशयत् ॥ सुदर्शनास्त्रं भगवान् प्रायुंक्त दयितं त्रिपात् ॥ २२ ॥

अकार्यकरत्वे दृष्टांतः । विप्रमुद्दिश्याभिचारं कुर्वन्यथा ॥ १३ ॥ अंतःखे आकाशमध्ये चकासत्प्रकाशमानम् । उदीर्णोत्कटा दीधितिर्दीप्तिर्यस्य निशातनेमिना शितधारेण हरिरिंद्रो यथा तार्क्ष्यस्य पतत्रमुज्झितं चिच्छेद देवान्विनिर्जित्यामृतकलशं नयता गरुडेनेंद्रप्रयुक्तवज्रस्यामोघस्य मानं दातुं पिच्छमेकं त्यक्तं तद्यथेंद्रश्चिच्छेद छिन्नं च तद्यथा खे प्रचकाशे तद्वत्प्रकाशमानमित्यभिसंधिः ॥ १४ ॥ अराः संत्यस्येत्यारि चक्रं तेन बहुधा वृक्णे छिन्ने सति प्रत्येत्याभिमुखमागत्य हरेरुरो वक्षः प्रहृत्य ॥ १५ ॥ मनागीषदपि क्वाप्यंशे ॥ १६ ॥ अस्य जगतः उपसंयमं प्रलयम् ॥ १७ ॥ पांसुकृतं तमश्च प्रेरितवंतः क्षेपणैर्यंत्रैः ॥ १८ ॥ नष्टो भगणो नक्षत्रसमूहो यस्याम् । अनेन दैत्यबलातिरेकाद्ब्रह्मदत्तमुहूर्तातिक्रमो गम्यते अह्नि नक्षत्राणामसंभवात् ॥ १९ ॥ नाना आयुधानि मुंचंतीति तथा यातुधान्यश्च प्रत्यदृश्यंत ॥ २० ॥ हिंस्राशिंछधिभिंधी त्येवंभूता अतिवैशसा अत्युग्रा वाच उत्सृष्टा इत्यत्रैव वाक्यसमाप्तिः ॥ २१ ॥ प्रादुष्कृतानामिति प्रकटिता माया विनाशयत् । विनाशनमिति पाठे यथा श्रुतैव षष्ठी ।

कृत्यां प्रयुंजन् ''यज्ञो वै विष्णुः'' इति श्रुतेः ॥ १३ ॥ स्मरणादागतं मामरिवधाय किमिति न प्रायुंक्त भगवानिति सुदर्शनचैत्तं जानन्निव तेन त्रिशूलमच्छिनदित्याह—तदिति । तात्रिशूलं निशातनेमिनेति । तादृशसहस्रच्छेदेऽपि यन्नैशित्यं न नश्यतीत्यर्थः । हरिरित्युभयत्रान्वेति । एकत्र विष्णुरन्यत्रेन्द्र इत्यर्थः ॥ १४ ॥ प्रहृत्य ताडयित्वा सोसुरः साक्षाद्युद्धे स्वासामर्थ्यं वीक्ष्य मायाः स्रक्ष्यन्नंतर्दध इत्यर्थः ॥ १६ ॥ तन्मुष्टिप्रहारेण भगवतः किं पतनादिजातमिति मा शंकीरित्याह—तेनेति । 'स्रग्ज्वालापुष्पयोर्मता' इति कोशात् ॥१६॥ अथांतर्द्धानोत्तरं यां मायाम् ॥१७॥ यंत्रैर्भिन्दिपालैः प्रहिताः प्रेरिताः॥१८॥ विद्युतस्तडितः स्तनयित्नवो गर्जितानि तत्सहितैः । ''स्तनयित्नुः पुमान्वारिधरेपि स्तनितेपि च'' इति मेदिनी । नष्टोऽदृश्यो भगणः ॥ १९ ॥२०॥ आसन्नित्यादिक्रियापदाध्याहारनिवृत्त्यर्थमुक्तमत्रैवेत्यादि ॥२१॥ अत्र षष्ठी द्वितीयार्थे । श्रुतिस्त्वष्टमस्कंधे व्याख्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा दितेः समभवत् सहसा हृदि वेपथुः ॥ स्मरंत्या भर्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे ॥ २३ ॥ विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवम् ॥ रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः ॥ २४ ॥ तं मुष्टिभिर्विनिघ्नंतं वज्रसारैरधोक्षजः ॥ करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः ॥ २५ ॥ स आहतो विश्वजिता ह्यवज्ञया परिभ्रमद्गात्र उदस्तलोचनः ॥ विशीर्णबाह्वंघ्रिशिरोरुहोऽपतद्यथा नगेंद्रो लुलितो नभस्वता ॥ २६ ॥ क्षितौ शयानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदम् ॥ अजादयो वीक्ष्य शशंसुरागता अहो इमां कोनुलभेत संस्थितिम् ॥ २७ ॥ यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया ॥ तस्यैष दैत्यापसदः पदा हतो मुखं प्रपश्यंस्तनुमुत्ससर्ज ह ॥ २८ ॥ एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिम् ॥ पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः ॥ २९ ॥ देवा ऊचुः ॥ नमो नमस्तेऽखिलयज्ञतंतवे स्थितौ गृहीतामलसत्त्वमूर्तये ॥ दिष्ट्या हतोऽयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ॥ ३० ॥

त्रीणि सवनानि पादा यस्य यज्ञमूर्तिरित्यर्थः "त्रयो अस्य पादाः" इति श्रुतेः ॥ २२ ॥ भर्तुरादेशं त्वत्पुत्रो भगवान् हनिष्यतीत्येवंभूतम् ॥ २३ ॥ आव्रज्याऽभिमुखमागत्य उपगूहमानो बाह्वोरंतर्निधाय संघट्टयन् ॥ २४ ॥ अहन् जघान त्वाष्ट्रं वृत्रम् । मरुत्पतिरिंद्रः ॥ २५ ॥ परितो भ्रमद्गात्रं शरीरं यस्य उदस्ते बहिर्निर्गते लोचने यस्य विशीर्णा बाह्वादयो यस्य नगेंद्रो महाद्रुमः लुलित उन्मूलितः नभस्वता वायुना ॥ २६ ॥ संस्थितिं मृत्युम् ॥ २७ ॥ असत आरोपितालिंगाल्लिंगशरीरान्मोक्तुमिच्छया वराहस्य पूर्वपादयोरेव करत्वात्करेणाहन्निति पदाहत इति चाविरुद्धम् ॥ २८ ॥ २९ ॥ अखिलयज्ञानां तंतवे विस्ताराय कारणायेति वा अरुंतुदो मर्मभेत्ता ॥ ३० ॥

स्यतेपि—अस्य यज्ञरूपस्य विष्णोस्त्रयः सवनत्रयं पादा इत्यर्थः ॥ २२ ॥ यदा भगवता सुदर्शनास्त्रं प्रयुक्तं तदेत्यर्थः ॥ २३ ॥ बहिः स्वभुजांतराद्बहिः स्थितं ददर्शेत्यर्थः । तद्भर्षः । आव्रज्य समीपं प्राप्य ॥ २४ ॥ करेण करवत्साधनभूतेन पादेनेत्यर्थः । अग्रे पदाहत इति वक्ष्यमाणत्वात् ॥ २५ ॥ ३६ ॥ आदिना ऋष्यादिग्रहः । अहो अद्भुतम् । इमां भगवद्धस्तताडनजाम् । भगवदनुग्रहं विना न कोपि लभत इत्यर्थः । ॥ २७ ॥ इतरमरणादस्य मरणस्य वैशिष्ट्यमाह इयमिति । हेति । पुनर्देहारंभसूचनाय ॥ २८ ॥ तौ जयविजयौ । कतिपयैस्त्रिभि स्त्रिभिर्लोकाय कल्पतामिति वक्ष्यमाणत्वात् । शैवोक्तेश्च ॥ २९ ॥ "तंतुर्विस्तारसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरिरादिसूकरः ॥ जगाम लोकं स्वमखंडितोत्सवं समीडितः पुष्करविष्टरादिभिः ॥३१॥ मया यथाऽनूक्तमवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितम् ॥ यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ॥३२॥ सूत उवाच ॥ इति कौषारवाख्यातामाश्रुत्य भगवत्कथाम् ॥ क्षत्तानंदं परं लेभे महाभागवतो द्विज ॥ ३३ ॥ अन्येषां पुण्यश्लोकानामुद्दामयशसः सताम् ॥ उप श्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ॥ ३४ ॥ यो गजेंद्रं झषग्रस्तं ध्यायंतं चरणांबुजम् ॥ क्रोशंतीनां करेणूनां कृच्छ्रतोऽमोचयद् द्रुतम् ॥ ॥ ३५ ॥ तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ॥ कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥ ३६ ॥ यो वै हिरण्याक्षवधे महाऽद्भुतं विक्रीडितं कारणसूकरात्मनः ॥ शृणोति गायत्यनुमोदतेंऽजसा विमुच्यते ब्रह्मवधादपि द्विजाः ॥३७॥ एतन्महापुण्यमलं पवित्रं धन्यं यशस्यं पदमायुरा शिषाम् ॥ प्राणेंद्रियाणां युधि शौर्यवर्धनं नारायणोंऽते गतिरंग शृण्वताम् ॥३८॥ इति श्रीभा० तृती० हिरण्याक्षवधवर्णनं नामैकोनविंशोऽध्यायः ॥१९॥

सादयित्वा हत्वेत्यर्थः । पुष्करविष्टरादिभिर्ब्रह्मादिभिः संस्तुतः ॥ ३१ ॥ यथाऽनूक्तं गुरूक्तिमनतिक्रम्य मयाऽवादि तव कथितम् । हे सुमित्र यथा येन प्रकारेण ॥ ३२ ॥ हे द्विज शौनक ॥ ३३ ॥ कथामुपश्रुत्य ॥ ३४ ॥ भक्तिमात्रेण पशूनामपि सुलभोऽन्यथा देवानामपि दुर्लभ इति तत्कथाश्रवणे कस्यानंदो न स्यादित्याह । य इति द्वाभ्याम् । झषो ग्राहः क्रोशंतीनां सतीनामिति कृपालुत्वमुक्तम् । संकटादमोचयत् ॥ ३५ ॥ ३६ ॥ कारणेन पृथिव्युद्धरणादिना सूकररूपस्य हरेः ॥ ३७ ॥ एतद्धरेर्विक्रीडितं शृण्वतामंते श्रीनारायणो गतिर्भवति । महापुण्यं स्वर्गादिप्रदम् अलं पवित्रमतिशयेन शोधकम् । धन्यं धनावहम् । यशस्यं कीर्तिकरम् । आयुष श्चाशिषां च पदं स्थानं परित्राणं वा प्राणानामिंद्रियाणां च पदम् । अंग हे विदुर ॥ ३८ ॥ इति तृतीये टीकायामेकोनविंशोऽध्यायः ॥ १९ ॥

तानकारणेषु निगद्यते'' इति निरुक्तिः । निर्वृताः संजातानंदाः ॥ ३० ॥ इत्यर्थ इति । स्वार्थण्यन्तात्सदेः क्त्वाप्रत्ययविधानादयमर्थो लब्ध इति भावः । पुष्करं पद्मं विष्टरमासनं यस्य स पुष्करविष्टरो ब्रह्मा स आदिर्मुख्यो येषामिन्द्रादीनां ते तथा तैः ॥ ३१ ॥ ते तुभ्यं सुष्ठु श्रीकृष्णो मित्रं यस्य स सुमित्र विदुर कृष्णभक्तत्वात्त्वैतदुक्तं न चाभक्ताय मेजात्वित्युक्तन्यायेनेति भावः ॥ ३२ ॥ द्विजेति । ब्राह्मणत्वाद्दानरूपेण प्रोक्तमिति । किं च । एतत्कथनस्य महादानत्वात्स्वस्य भूरिदत्वज्ञापनाय च । ''तव कथामृतं तप्तजीवनम्'' इत्यारभ्य ''भुवि गृणंति ये भूरिदा जनाः'' इति श्रीदशमे साक्षाच्छ्रुत्यवतारभूताभिर्गोपीभिर्वक्ष्यमाणत्वात् ॥ ॥ ३३ ॥ पुण्यश्लोकानां नलयुधिष्ठिरादीनां ''पुण्यश्लोको नलो राजा'' इत्याद्युक्तेः । कथामिति प्रसंगलब्धम् ॥ ३४ ॥ अन्यथा भक्त्यभावे यो हारिः 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । कृच्छ्रत आसन्नमरणात् ॥ ॥ ३५ ॥ ऋजुभिरकुटिलैः असाधुभिः कुटिलैः ॥ ३६ ॥ फलश्रवणस्य क्षिप्रं प्रवर्तकत्वात्तदाह । ब्रह्मज्ञानं ''सत्यज्ञानमनंतं ब्रह्म'' इति श्रुतेः । ''विप्रज्ञानात्मसु ब्रह्म'' इति कोशाच्च । तेन वध्यते नश्यत इति ब्रह्मवधः संसारो वा तस्मादपि अनुमोदते । वराहचरितं वक्तव्यमिति वक्त्रे प्रेरणमनुमोदनं श्रुतस्य श्लाघनं वा ॥३७॥ अंते इति । श्रवणाभ्यासेन मननसंभवात् । ततोऽपरोक्षज्ञानेन लिंगदेहनाशान्नारायणैकस्वरूपतां प्राप्नोतीत्यर्थः । ''पदं व्यवसितत्राण-'' इत्यादिकोशमाश्रित्याह-परित्राणं वेति । भगवद्भक्तत्वान्मे प्रियोसीत्याह-अंगेति ॥ ३८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनक उवाच ॥ महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः ॥ कान्यऽन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनाम् ॥ १ ॥ क्षत्ता महाभागवतः कृष्णस्यै
कांतिकः सुहृत् ॥ यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति ॥२॥ द्वैपायनादनवरो महित्वे तस्य देहजः ॥ सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्य
नुव्रतः ॥ ३ ॥ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया ॥ उपगम्य कुशावर्त आसीनं तत्त्ववित्तमम् ॥ ४ ॥ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः
कथाः ॥ आपो गांगा इवाघघ्नीर्हरेः पादांबुजाश्रयाः ॥ ५ ॥ ता नः कीर्तय भद्रं ते कीर्तन्योदारकर्मणः ॥ रसज्ञः को नु तृप्येत हरिलीलामृतं
पिबन् ॥ ६ ॥ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिशायनैः ॥ भगवत्यर्पिताध्यात्मस्तानाह श्रूयतामिति ॥ ७ ॥ सूत उवाच ॥ हरेर्धृतक्रोडतनोः स्वमा
यया निशम्य गोरुद्धरणं रसातलात् ॥ लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनिमाह नारदः ॥ ८ ॥

विंशे वराहजन्मादिव्यवधानादथादितः ॥सर्गोऽनुस्मार्यते वक्तुमन्वयं प्रस्तुतं मनोः॥ १ ॥प्रतिष्ठां स्थानम् । अध्यस्य प्राप्य सौते सूतस्य रोमहर्षणस्य पुत्र अवरमर्वाचीनं जन्म येषां तेषामीश्वरे लीनानां मार्गाय निर्गमाय कानि द्वाराणि कृतवान् । अर्वाचीनान् प्राणिनः कैरुपायैः सृष्टवानित्यर्थः ॥ १ ॥ विदुरमैत्रेयसंवादेनैवैतज्ज्ञास्यत इति तमेव संवादं प्रष्टुमाह। क्षत्तेति पंचभिः । श्रीकृष्णसुहृतत्त्वे हेतुः। य इति। दुर्योधनादिभिरपत्यैः सहितमग्रजं धृतराष्ट्रमघवान्कृतापराध इति हेतोः श्रीकृष्णोक्तमंत्रानादरात्यस्तत्याज॥ २॥ अनवरो न्यूनः महित्वे महिम्नि ॥ ३॥ कुशावर्ते गंगाद्वारे ॥४॥ यत्किमपि पृच्छतु किं तवेति चेत्तत्राह । तयोरिति। अघघ्नीरघघ्न्यो नूनं कथाः प्रवृत्ताः ॥ ५ ॥ कीर्तन्यानि कीर्तनार्हाण्युदाराणि कर्माणि यस्य हरेः॥६॥एवमिति व्यासवाक्यम्। उग्रश्रवा रोमहर्षणपुत्रः नैमिषमयनमाश्रयो येषाम् । आर्पितमध्यात्मं मनो येन ॥७॥गोरुद्धरणं

आदिना युद्धादिग्रहः । अथ पुनः । प्रस्तुतं प्रकृतम् ॥(१)॥ प्रासंगिकीं वाराहलीलां श्रुत्वा प्रकृतं पृच्छति महीमिति । अवरं सनकादिभ्यः । इत्यर्थ इति । कथमेते सृष्टा इति भावः॥ १॥तत् अर्वाचीनप्राग्युत्पत्तिद्वारं ज्ञास्यते बोधिष्यते तथा च विदुरकथाप्रश्ने स्वातंत्र्येण मम प्रश्नोऽनुचित इति विमृश्य तत्प्रश्नमेव पृच्छति । क्षत्तेति । ऐकान्तिकः अनन्यः॥२॥तस्य द्वैपायनस्य सर्वात्मना सर्वभावेन । यद्वा । सर्वेषामात्मा सर्वात्मा तेन हेतुना तत्परान्कृष्णभक्तान् अनुव्रतः अनुगतः ॥३॥ विगतं रजो यस्मात्स विरजा तीर्थसेवयेति हेतूक्तेः । प्रत्यासत्त्या च तीर्थानामिव मालिन्यं विगतमित्यर्थः । "तीर्थी कुर्वंति तीर्थानि" इति युधिष्ठिरोक्तेः ॥४॥ स्वयमाक्षिप्य समाधत्ते यत्किमपीति । तयोर्विदुरमैत्रेययोः प्रवृत्ता इत्यनेनादित एव शुश्रूषा स्पष्टीकृता गांगा गंगासंबंधिन्यः उभयोः श्रीकृष्णभक्तत्वेन श्रीकृष्णकथेतरकथास्तत्र न संजाता इत्यतस्तत्संवादं ब्रूहीति भावः ॥ ५ ॥ कीर्त्तन्योदारकर्मणः श्रीकृष्णस्य ताः कथाः नोऽस्मभ्यम् ॥ ६ ॥ ऋषिभिश्शौनकादिभिः ॥ ७ ॥ सुष्ठु अमायया धृता नित्यस्थिता क्रोडतनुर्यस्य तस्य तौदादिकस्य 'धृङ्-अवस्थाने' इति धातोः क्तप्रत्यये रूपम्। यस्यां लीलायां गोरुद्धरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुर उवाच ॥ प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् ॥ किमारभत मे ब्रह्मंस्तद् ब्रूह्यऽव्यक्तमार्गवित् ॥ ९ ॥ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः॥ ते वै ब्रह्मण आदेशात्कथमेतदभावयन् ॥ १० ॥ सद्वितीयाः किमसृजन्स्वतंत्रा उत कर्मसु ॥ आहोस्वित्संहताः सर्वं इदं स्म समकल्पयन् ॥ ११ ॥ मैत्रेय उवाच ॥ दैवेन दुर्वितर्क्येण परेणाऽनिमिषेण च ॥ जातक्षोभाद्भगवतो महानासीद्गुणत्रयात् ॥ १२ ॥ रजःप्रधानान्महतस्त्रिलिंगो देवचोदितात् ॥ जातः ससर्ज भूतादिर्वियदादीनि पंचशः ॥ १३ ॥ तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकम् ॥ संहत्य दैवयोगेन हैममंडमवासृजन् ॥ १४ ॥

लीलां हिरण्याक्षं चावज्ञया हतं निशम्य । भारतो विदुरः ॥ ८ ॥ यस्मात्त्वमव्यक्तमार्गवित् । ब्रह्मणो वा विशेषणम् ॥ ९ ॥ एतज्जगत् । अभावयन्नुत्पादयामासुः ॥ १० ॥ सद्वितीयाः सभार्याः स्वतंत्रा भार्यानपेक्षाः कर्मसु प्रजासर्गादिषु संहताः परस्परापेक्षाः । इदं जगत ॥ ११ ॥ ब्रह्मा किमारभतेति प्रश्नस्य यक्षादीन्सृष्टवानित्युत्तरं वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति । दैवेनेति सप्तभिः । मन्वादिप्रश्नानां तूत्तराध्यायमारभ्योत्तरं भविष्यति दुर्वितर्क्येण दैवेन जीवादृष्टेन परेण प्रकृत्यधिष्ठात्रा महापुरुषेणानिमिषेण कालेन च हेतुना भगवतो निर्विकाराज्जातक्षोभं यद्गुणत्रयं प्रधानं तस्मान्महानासीत् । तदुक्तं तंत्रे । "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितम् ॥ तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते" इति ॥ १२ ॥ महतो जातो भूतादिरहंकारस्त्रिलिंगस्त्रिगुणः रजःप्रधानादिति स्वतः सत्त्वप्रधानस्यापि महतोऽहंकारोत्पत्तिकाले कार्यानुरूपं रजःप्रधानत्वं भवतीति भावः । पंचशस्तन्मात्राणि महाभूतानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि तत्तद्देवताश्चेति पंचपंच ससर्जेत्यर्थः ॥ १३ ॥ भौतिकं हैममंडमेकैकशः प्रत्येकं स्रष्टुमसमर्थानि संति संहत्य ससृजः ॥ १४ ॥

मस्ति तां लीलां तत्रैवावज्ञया हेतुना हतं च निशम्य ॥ ८ ॥ प्रजापतयो मरीच्यादयस्तेषां पतिर्ब्रह्मा । प्रजासर्ग इति । निमित्ते सप्तमी । अव्यक्तमार्गवित् । अस्मदाद्यगोचरवस्तुवेत्ता ॥ ९ ॥ १० ॥ ११ ॥ प्राप्तसर्गं वक्तुं संगतये पूर्वप्रवृत्तब्राह्मीयसर्गं स्मारयति दैवेनेति । दुर्वितर्क्येण दुर्ज्ञेयमूलकेन भगवतः सकाशात्तदीक्षितादित्यर्थः ॥ १२ ॥ इति भाव इति । भगवत्सिसृक्षावशादिति तात्पर्य्यम् । इत्यर्थ इति । पंचन्शब्दात् "संख्यैकवचनाच्च वीप्सायाम्" इति वीप्सायां शस् । "तद्धितश्चाऽसर्वविभक्तिः" इत्यत्र परिगणितान्तर्गतत्वादव्ययत्वमिति भावः ॥ १३ ॥ दैवयोगेन भगवच्छक्तियोगेन भूतानामुत्पादने प्रधानत्वाद्भौतिकं भगवत्तेजोयुक्तत्वेन हेमवद्देदीप्यमानत्वाद्धैमम् । यद्वा । केवलपंचभूतात्मकमेव ब्रह्मांडं न तु तार्किकाभिमतनवद्रव्यात्मकं सप्तपदार्थात्मकं वा तच्च श्रीमहाभारते श्रीबादरायणेनोक्तं शांतिपर्वान्तर्गतमोक्षधर्मे तथैव व्याख्यातं नीलकंठाचार्य्यैः तथा हि-"आकाशं मारुतो ज्योतिरापः पृथ्वी च पंचमी । भावाभावौ च कालश्च सर्वभूतेषु पञ्चसु" इति अस्यार्थः-भूतेषु जरायुजादिषु पञ्चसु पञ्चात्मकेषु एतेन भावाभावकालानामपि भौतिकत्वमुक्तं ननु पञ्चभ्यो भूतेभ्योऽधिकानि कालदिगात्ममनांसि चत्वारि द्रव्याणि गुणाश्च चतुर्विंशतिः कर्मसामान्यविशेषसमवायाश्च भावपदार्थाः सप्तमोऽभावपदार्थश्चेति काणादा मन्यंते तत्कथं सर्वस्य पञ्चात्मकत्वं प्रतिज्ञायते इति चेत् अत्रोच्यते न कालो नाम पदार्थांतरमतीतानागतादिव्यवहारहेतुः कश्चिदस्ति नूतनत्वपुराणत्वादिवद्द्रव्यगताभिरेवातीताद्यवस्थाभिस्तादृग्व्यवहारोपपत्तेः । नापि दिक् आकाशे एव सूर्यौपाधिकी प्राच्यादिकल्पनेत्युपगमात् । नापि मनस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽशयिष्टाब्धिसलिले आंडकोशो निरात्मकः ॥ साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः ॥ १५ ॥ तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति ॥
सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् ॥ १६ ॥ सोऽनुविष्टो भगवता यः शेते सलिलाशये ॥ लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया ॥
॥ १७ ॥ ससर्ज छायया विद्यां पंचपर्वाणमग्रतः ॥ तामिस्रमंधतामिस्रं तमो मोहो महातमः ॥१८॥ विससर्जात्मनः कायं नाभिनंदंस्तमोमयम् ॥
जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवाम् ॥ १९ ॥

अन्ववात्सीदधिष्ठितवान् ॥ १५ ॥ सहस्रार्काणामिवोरुर्दीधितिः यस्य तत् । सर्वजीवनिकायानामोकः स्थानं पद्मम् । स्वराट् ब्रह्मा ॥ १६ ॥ यः सलिलाशये गर्भोदकस्यांतः शेते तेन भगवताऽनुविष्टोऽधिष्ठितः सन् स स्वराट् स्वया संस्थया नामरूपादिक्रमेण ॥ १७ ॥ छाया प्रभाप्रतियोगिनी तया अबुद्ध्येत्यर्थः । "यस्त्वबुद्धिकृतः प्रभोः" इत्युक्तत्वात् । महातम इति महामोहः स्वरूपनिर्देशमात्रविवक्षया मोह इति प्रथमाप्रयोगः ॥ १८ ॥ तदेवं प्रथमोक्तां साधारणां सृष्टिमनूद्य केनचिद्विशेषेणासाधारणां सृष्टिमाह । विससर्जेत्यादिना यावत्समाप्ति । तद्विसृष्टं कायं रात्रिरूपं तत एव जातानि यक्षरक्षांसि जगृहुः क्षुत्तृषोः समुद्भवो यस्यां ताम् । अत्र च "या अस्य सा तनूरासीत्तामपाहत सा तमिस्राऽभवत्" इत्यादिश्रुतिरनुसंधेया ॥ १९ ॥

स्येंद्रियत्वेन श्रोत्रादिवद्ग्राह्यसजातीयगुणाश्रयत्वस्यावश्यं वक्तव्यत्वेन पाञ्चभौतिकत्वात् । पराभिमतमनसस्तु ग्राह्यसजातीयगुणानाश्रयत्वेन दिक्कालवन्नेंद्रियत्वं युज्यते गुणा अपि आश्रयान्नातिरिच्यंते इति न पृथक्पदार्थः । तथा द्रव्यस्यैव स्वास्थप्रच्युतिः परिस्पंदात्मावस्थाविशेषः कर्मेति तदपि न पृथक्पदार्थः । तथा सत्सदिति व्यवहारविषयत्वस्य स्वकल्पितस्य सामान्यादिषु सद्भावेप्यनवस्थादिदोषभयात्तेभ्यो व्यावृत्तं द्रव्यगुणकर्मस्वेवानुगतं सामान्यमित्यसत् । अधिष्ठानसत्त्वेनैव सत्सदिति व्यवहारस्योपपत्तौ सत्यामननुगतस्य तस्य कल्पनाया अनौचित्यात् । 'नित्यद्रव्यवृत्तयोऽनंता विशेषा' इत्युपगमस्त्वैकात्म्ये नित्यद्रव्याणामेवाभावान्निरालंबनो मानांतरासिद्धश्च समवायवद्रूपादिकमपि समवायं विनैव द्रव्ये स्थास्यतीति समवायकल्पनाप्यनर्थिकैव । यथा घटे पटान्योन्याभावः एवं भूतलं घटसंसर्गाभावोपि भविष्यति तथा चोक्तं"भावांतरमभावो हि कयाचित्तु व्यपेक्षया"इति प्रागभावप्रध्वंसाभावयो स्स्वसत्प्रतियोगिकत्त्वादेवासिद्धिः सद्भयामभावो निरूप्यते इति न्यायेन तन्निरूपकाभावात् । तस्मादभौतिकः पदार्थ एव नास्तीति युक्तमुक्तं भावाभावकालानामपि पंचात्मकत्वमिति दिक् ॥१४॥ निरात्मकः तदानीं जीवानामनुद्बोधात् । तमंडकोशम् । ईश्वरो महत्स्रष्टा गर्भोदशायिना द्वितीयरूपेण साग्रं किंचिदधिकम् ॥ १५ ॥ य एव ब्राह्मे कल्पे सृष्टवांस्तस्य प्रविष्टस्य सतः पाद्मे कल्पे नाभेः सकाशात्पद्ममभूत् यत्र पद्मे स्वयं विष्णुरेव स्वराडभूत् ॥ १६ ॥ लोकानां संस्थां रचनां यथापूर्वं "धाता यथापूर्वमकल्पयत्" इति श्रुतेः ॥ १७ ॥ ब्रह्मसृष्टेषु यक्षराक्षसदेवमनुष्येष्वहंकारोऽविद्यां विना न संभवेदतः प्रथममविद्यावृत्तीः स्वयमेवाविर्भवंतीस्ता ब्रह्म द्वारेति हेतोस्ता ब्रह्मा ससर्जेत्याह-इत्यर्थ इति । तस्या आवरणस्वभावत्वादविद्योपलक्षिततमोरूपया तन्वेति भावः । अत्र हेतुत्वेन पूर्वोक्तं स्मारयति यस्त्विति । ननु सृजेः सकर्मत्वात्कर्तरि प्रत्ययविधानात्कर्मणि द्वितीयया भाव्यं कथं मोह इति प्रथमेति चेदत्राह—स्वरूपेति आर्षत्वाद्वा सेति ॥ १८ ॥ नाभिनंदन् हंतहंत सृष्ट्यारंभे तमसैवावृतोऽभूवमिति विनिंद्य तत्याजेत्यर्थः । तत एव तमस एव । तदानीमेव जातानि अत्र च तमस्तनुत्यागे तस्या रात्रिरूपत्वे च प्रमाणरूपा श्रुतिः अस्य ब्रह्मणः सा तनूस्तामसी तनुर्यासीत्तां तनुमपाहत अजहात्सा तमिस्रा तामसी रात्रिरभवदिति श्रुतिपदार्थः । अत्र च द्विपरार्द्धायुषो ब्रह्मणः कायत्यागो नाम ॥ ७१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः ॥ मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥ २० ॥ देवस्तानाह संविग्नो मा मां जक्षत रक्षत ॥ अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ ॥ २१ ॥ देवताः प्रभया याया दीव्यन्प्रमुखतोऽसृजत् ॥ ते अहार्षुर्देवयंतो विसृष्टां तां प्रभामहः ॥ २२ ॥ देवोऽदेवाञ्जघनतः सृजति स्मातिलोलुपान् ॥ त एनं लोलुपतया मैथुनायाभिपेदिरे ॥ २३ ॥ ततोऽहसन्स भगवानसुरैर्निरपत्रपैः ॥ अन्वीयमानस्तरसा क्रुद्धो भीतः पराऽपतत् ॥२४॥ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिम् ॥ अनुग्रहाय भक्तानामनुरूपात्मदर्शनम् ॥ २५ ॥

उपसृष्टा अभिभूताः जग्धुमत्तुं भक्षयितुं यतो वयं क्षुत्तृड्भ्यामर्दिता अत एनं पितेति कृपया मा रक्षतेत्येके अन्ये तु जक्षध्वं भक्षयतेति ब्रुवंतः "जक्षभक्षहसनयोः" इति धातुः ॥ २० ॥ देवो ब्रह्मा संविग्नो भीतः सन्मां मा जक्षत मा भक्षयत किं तु रक्षत अहो हे यक्षरक्षांसि यूयं मे प्रजाः सुता बभूविथ जाताः स्थ । एवमुग्रस्वभावा यक्षराक्षसा जाता इत्यर्थः । तत्र ये जक्षध्वमित्यूचुस्ते यक्षा ये तु मा रक्षतेति राक्षसा इति ज्ञेयम् । एतच्च तिर्यगादितामससर्गस्याप्युपलक्षणम् ॥ २१ ॥ प्रभया दीव्यन् द्योतमानो याया देवता द्युतिमत्यः सात्त्विक्यस्तास्ताः प्रमुखतः प्राधान्येनासृजत् । ते देवाः । देवता इति स्त्रीत्वेन निर्दिष्टानामप्यर्थमात्रविवक्षया त इति पुंस्त्वेन प्रतिनिर्देशः । एवं यक्षरक्षांसीत्यत्रापि ज्ञेयम् । तेन विसृष्टां त्यक्तां प्रभामहः दिवसरूपां सतीं देवयंतः क्रीडयंतोऽहार्षुर्जगृहुः ॥ २२ ॥ अदेवानिति छेदः । "स जघनादसुरानसृजत" इति श्रुतेः । अतिलोलुपान्स्त्रीलंपटान् अभिपेदिरे प्राप्ताः ॥ २३ ॥ परापत् पलायत ॥ २४ ॥ भक्तेच्छानुरूपमात्मानं दर्शयतीति तथा तमुपव्रज्य ॥ २५ ॥

भावत्याग एव विवक्षितः । ततश्च मनसि क्रोधादिस्तामसो भाव आविर्बभूव तस्माद्यक्षरक्षांसि बभूवुः । स च तामसो भावो रात्रिर्भूत्तां च यक्षरक्षांस्येव जगृहुरित्येतावानेवार्थः सृष्ट्यर्थं योगबलेन पृथक्पृथक्कायग्रहणभावत्याग एव विवक्षितः । ... केचिदाहुः ॥ १९ ॥ २० ॥ इत्यर्थ इति । एवं कारणानुरूपत्वात्कार्यस्येति भावः । तत्र तेषु । एतद्यक्षराक्षसादिवत्त्वे द्विपरार्द्धायुष्टं तस्य न व्याहन्येत विषयभोगार्थमपीन्द्रादिदेवानां नानारूपग्रहणत्यागदर्शनादित्यपि केचिदाहुः ॥ १९ ॥ २० ॥ इत्यर्थ इति । एवं कारणानुरूपत्वात्कार्यस्येति भावः । तत्र तेषु । एतद्यक्षराक्षसादिस्वभावकथनम् ॥ २१ ॥ प्रभया प्रभारूपया सत्त्वमय्या तन्वा देवयंतो याचमाना इत्यर्थः । 'दिवु अर्द्दने' इत्यस्य चौरादिकस्य रूपमिति संदर्भः । तया चात्र ब्रह्मणो मनसि प्रसादः सात्त्विकभाव आविर्बभूव तस्माद्देवा बभूवुः । स च प्रसादो दिनं बभूव तच्च त एव जगृहुरित्येतावानेवात्रार्थः । अहारिषुरिहेडार्षः ॥ २२ ॥ एवं च तस्य मनसि कामो राजसो भावोऽभूत्तस्मादसुरा बभूवुः स च भावः संध्याऽभूत्तां चासुरा जगृहुरित्याह—देव इति । अत्र प्रमाणमाह—स इति। जघनात् श्रोणिपुरोभागात् । यद्यपि जघनशब्दो नार्य्यवयवे प्रयुज्यते तथापि तत्सादृश्यात्पुरुषावयवेऽपीत्यनेनैव ज्ञाप्यते "पश्चान्नितंबः स्त्रीकट्याः क्लीबे तु जघनं पुरः" इत्यमरः । कामस्यानर्थहेतुतामाह—त इति । तेऽसुरा एनं ब्रह्माणं, लंपटलोलुपौ पर्यायौ स्त्रीपरायणे वर्त्तेते । लोलुपतया स्त्रीपरायणतया । मैथुनाय मैथुनं कर्तुम् ॥ २३ ॥ ततस्तैः निरपत्रपैः स्वकरात्तशिश्नैरन्वीयमानोऽनुग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाहि मां परमात्मंस्ते प्रेषणेनाऽसृजं प्रजाः ॥ ता इमा यभितुं पापा उपक्रामंति मां प्रभो ॥२६॥ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः॥
त्वमेकः क्लेशदस्तेषामनासन्नपदां तव ॥२७॥ सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः ॥ विमुंचात्मतनुं घोरामित्युक्तो विमुमोच ह ॥ २८ ॥
तां क्वणच्चरणांभोजां मदविह्वललोचनाम् ॥ कांचीकलापविलसद्दुकूलच्छन्नरोधसम् ॥ २९ ॥ अन्योऽन्याश्लेषयोत्तुंगनिरंतरपयोधराम् ॥ सुनासां
सुद्विजां स्निग्धहासलीलाऽवलोकनाम् ॥ ३० ॥ गूहंतीं व्रीडयात्मानं नीलालकवरूथिनीम् ॥ उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियम् ॥ ३१॥

पाहीति द्वाभ्यां प्रार्थितवान् । यभितुं मैथुनेन धर्षयितुम् ॥ २६ ॥ लोकानां जनानाम् । तवानासन्नावनाश्रितौ पादौ यैस्तेषाम् ॥ २७ ॥ विविक्तमसंदिग्धम ध्यात्मदर्शनं परचित्तज्ञानं यस्य हरेः घोरां कामकश्मलां स्वतनुं विमुंचेति उक्तवानिति शेषः । इत्युक्तश्च ब्रह्मा तां तनुं विमुमोच सर्वत्र तनुत्यागो नाम तत्तन्मनोभावत्यागो विवक्षितः । ग्रहणं च तत्तद्भावापत्तिरिति द्रष्टव्यम् ॥ २८ ॥ "साऽहोरात्रयोः संधिरभवत्" इति श्रुतेः सा तेन विसृष्टा तनुः सायंतनी संध्या बभूव । सा च कामोद्रेकवेला असुराश्च राजसत्वात्स्त्रीलंपटा अतस्तां संध्यामेव स्त्रियं कल्पयित्वा ते संमोहं प्राप्ता इत्याह । तामिति त्रिभिः । नूपुराभ्यां क्वणती चरणांभोजे यस्याः मदेन विह्वले लोचने यस्याः कांचीकलापेन विलसद्दुकूलं तेन छन्नं रोधः कटितटं यस्यास्ताम् ॥ २९ ॥ अन्योन्यमाश्लेषयोपमर्देन हेतुनोत्तुंगौ निरंतरौ पयोधरौ यस्याः सुद्विजां सुदतीम् । स्निग्धो हासो लीलाऽवलोकनं च यस्याः॥ ३०॥गूहंतीं वस्त्रांचलेनावृण्वानाम्।नीलानामलकानां वरूथः स्तोमो विद्यते यस्याः हेधर्म विदुर तां स्त्रियमुपलभ्य मत्वा॥ ३१॥

म्यमानः । तरसा वेगेन । स ब्रह्मा ॥ २४ ॥ २५ ॥ परमात्मन्निति । निवेदनाभावेऽपि त्वं जानास्येवेत्याह—प्रेषणेन प्रेरणया । इमा इति । शृंगग्राहिकया वदति । धर्षयितुं पातयितुम् । उपाक्रामंति समीपमायांति । प्रभो इति । त्वमेवैषां वारणे शक्त इत्याह ॥ २६ ॥ त्वत्पादावाश्रितवतां भक्तानां क्लिष्टानामपि क्लेशनाशनस्त्वमसीति गम्यते । एक इत्युक्तेस्त्वामृते कोऽपि भक्तवत्सलो नास्तीति भावः । क्लेशद इति । स्वं प्रत्युन्मुखी कर्त्तुमिति भावः । तथा च त्वच्चरणमनाश्रितवतां कालकर्मग्रहादिरूपेण त्वमेवैकः क्लेशदः तेषामेवाकस्माच्चरणाश्रितत्वे सति साक्षात्त्वमेव तत्तत्क्लेशनाशनः, त्वद्भक्तेषु कालकर्मादीनामनधिकारोऽस्तीत्याशयः "प्रेताश्च राहौ पितरः सुरेज्ये चंद्रे च देव्यस्तपने खदेव्यः । शाकिन्य आरे भृगुजेंबुदेव्यस्स्वगोत्रदेव्यः क्षितिजे शनौ वा ॥ बुधे च भूता व्ययरंध्रसंस्थे गृह्णंति मर्त्यं विमुखं मुकुंदात् ॥" इति ज्योतिःशास्त्रात् । "देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् । सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्त्तम् ॥" इत्येकादशे वक्ष्यमाणत्वाच्च । त्वयि वैषम्याभावश्च कल्पतरुदृष्टांतेन ज्ञेयः ॥२७॥ स विष्णुः । अस्य ब्रह्मणः । कार्पण्यं दैन्यम् । भावो नाम सृज्यावेश एव ज्ञेयः भावत्वमननं च तदायुषो द्विपरार्द्धमितत्वात् ॥ २८ ॥ अतः स्त्रीलंपटत्वात् । क्वणदिति । अत्र स्वनीडं प्रति गंतुं सशब्दमुड्डीनांश्चटकसारसादीनेव नूपुरकांच्यादीन्कलयंति स्म । तत्तदा कारान्मेघखंडानेव चरणनयननितंबस्तनादीन् । अत एवैकत्र श्लेषेण पयोधरशब्द उपन्यस्तः । संध्याया आरुण्यमेवारुणदुकूलं, रोधः कटितटम् ॥ २९ ॥ श्लेषयेति । भिदाद्यङंताट्टाप्प्रत्ययः । ङित्वेऽपि गुण आर्षः । यद्वा । "सुपां सुलुक्" इत्यादिना टाप्प्रत्ययस्य यादेश इति ज्ञेयम् । अंतराछिद्रोत्थौ यत्किंचित्सूर्यप्रकाशावेव । हासावलोकने कदाचित्तत्तन्मेघखंडांतर्द्धानमेव, लज्जया निगूहनम् । ऊर्द्ध्वतस्तलपर्यंतपतितानि दीर्घश्याममेघखंडान्येव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो धैर्यमहो रूपमहो अस्या नवं वयः ॥ मध्ये काममानानामकामेव विसर्पति ॥ ३२ ॥ वितर्कयंतो बहुधा तां संध्यां प्रमदाकृतिम् ॥ अभिसंभाव्य विश्रंभात्पर्यपृच्छन्कुमेधसः ॥ ३३ ॥ कासि कस्यासि रंभोरु को वाऽर्थस्तेऽत्र भामिनि ॥ रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ॥ ॥ ३४ ॥ या वा काचित्त्वमबले दिष्ट्या संदर्शनं तव ॥ उत्सुनोषीक्षमाणानां कंदुकक्रीडया मनः ॥ ३५ ॥ नैकत्र ते जयति शालिनि पादपद्मं घ्नंत्या मुहुः करतलेन पतत्पतंगम् ॥ मध्यं विषीदति बृहत्स्तनभारभीतं शांतेव दृष्टिरमला सुशिखासमूहः ॥ ३६॥ इति सायंतनीं संध्यामसुराः प्रमदायतीम् ॥ प्रलोभयंतीं जगृहुर्मत्वा मूढधियः स्त्रियम् ॥ ३७ ॥ प्रहस्य भावगंभीरं जिघ्रंत्यात्मानमात्मना ॥ कांत्या ससर्ज भगवान् गंधर्वाप्सरसां गणान् ॥ ३८ ॥

संमूढानां विभावनाक्रममाह । अहो इति ॥ ३२ ॥ अभिसंभाव्य सत्कृत्य । विश्रंभात्प्रणयात् । कुबुद्धयस्ते तां पप्रच्छुः ॥ ३३ ॥ काऽसीति त्रिभिः । काऽसि जात्या कस्य वा कन्या । हे भामिनि कोपने रूपमेव द्रविणमनर्घ्यं वस्तु तदेव पण्यं क्रयार्हं तेन तदसमर्पणेन नो विबाधसे ॥ ३४॥ किं जातिकुलादिप्रश्नेन या वा काचिद्भव दिष्ट्येदं तावद्भद्रं जातं यत्तव दर्शनं किं तु केवलं नो मन उत्सुनोषि विमथ्नासि ॥ ३५॥ क्षुभितचित्तानां वाक्यं नैकत्रेति । हे शालिनि श्लाघ्ये एकत्र न जयति न स्थिरी भवति यद्वा नैकत्रानेकगतिविलासेषु जयति सर्वोत्कर्षेण वर्तते । पतत्पतंगमुच्चलंतं कंदुकम् । बृहतोः स्तनयोर्भाराद्भीतं तव कृशं मध्यं विषीदति श्राम्यति शांता मंथरेव प्रसरति सुशिखासमूहः शोभनः केशकलापस्ते पाठांतरे सुशिखाः शोभनान्केशानवकीर्यमाणान्समूह बधानेति । अत्र चास्तं गच्छन्सूर्य एव पतत्पतंगः मेघविच्छेदो मध्यविषादः तारका रूपा दृष्टिः तम एव केशा इत्याद्यूह्यम् ॥ ३६ ॥ प्रमदेवाचरंतीं स्त्रियं मत्वा जगृहुः ॥ ३७ ॥ प्रहस्यात्मानमात्मना जिघ्रंत्या कांत्या सौंदर्येण प्रहसनमात्मावघ्राणं

नीलालकवरूथं समूहः धर्मावतारत्वाच्छिङ्गाररसमग्नो मा भवेत्यभिप्रायः ॥ ३० ॥ ३१ ॥ विभावना विशिष्टभावना काममोहप्रलापः । इवेन वस्तुतः सकामेत्युक्तम् ॥ ३२ ॥ वितर्कयंतः किमियमस्मास्वेवानुरागिणी अन्यत्र वा देवी मानुषी वा वृषस्यंती ब्रह्मचारिणी वेत्येवं विमृशंतः ॥ ३३ ॥ यद्वा । दुर्भगान् त्वद्दास्यानर्हानपि विबाधसे बद्ध्वा स्वसंग एव जिघृक्षसि । यद्वा । विबाधसे न क्रीणासि धिगस्मान्दुर्भगानिति भावः ॥ ३४ ॥ तद्दर्शनमेव परं मन्यमाना आहुः—किं जातीत्यादि । अबल इति । विपरीतलक्षणया प्रबल इत्यर्थः ॥ ३५ ॥ जयतेः स्थिरार्थाप्रसिद्धेराह—यद्वेति । पाठांतरे 'सुशिखाः समूह' इत्येवं पाठे उक्तार्थं गमयितुमाह । अत्र च संध्यापक्षे ॥ ३६ ॥ संध्या हि कामिनां स्त्रीस्फूर्त्तिं करोति ततश्च तेषां तस्यां स्फुरंती स्त्री तदभेदेन तैरवगता मुनींन्द्रेणापि वर्णितेति ज्ञेयमित्याह—इतीति ॥ ३७ ॥ यदा ब्रह्मणः सौंदर्यं स्मृतिपथमागतं तदा ततो गंधर्वाद्या बभूवुस्तच्च सौंदर्यं ज्योत्स्नीभूतं त एव जगृहुरित्याह-प्रहस्येति । सौंदर्यविषयको योऽनुभावः सूचनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विससर्ज तनुं तां वै ज्योत्स्नां कांतिमतीं प्रियाम् ॥ त एव चाददुः प्रीत्या विश्वावसुपुरोगमाः ॥ ३९ ॥ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतंद्रिणा ॥ दिग्वाससो मुक्तकेशान्वीक्ष्य चामीलयद् दृशौ ॥४०॥ जगृहुस्तद्विसृष्टां तां जृम्भणाख्यां तनुं प्रभोः ॥ निद्रामिंद्रियविक्लेदो यया भूतेषु दृश्यते ॥ येनोच्छिष्टान्धर्षयंति तमुन्मादं प्रचक्षते ॥ ४१ ॥ ऊर्जस्वंतं मन्यमान आत्मानं भगवानजः ॥ साध्यान्गणान्पितृगणान्परोक्षेणाऽसृजत्प्रभुः ॥ ॥ ४२ ॥ त आत्मसर्गं तं कायं पितरः प्रतिपेदिरे ॥ साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ॥ ४३ ॥ सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत् ॥ तेभ्योऽददात्तमात्मानमंतर्धानाख्यमद्भुतम् ॥ ४४ ॥ स किन्नरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः ॥ मानयन्नात्मनाऽऽत्मानमात्माभासं विलोकयन् ॥ ४५ ॥ ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना ॥ मिथुनीभूय गायंतस्तमेवोषसि कर्मभिः॥४६॥देहेन वै भोगवता शयानो बहुचिंतया ॥ सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः ॥४७॥ येऽहीयंताऽमुतः केशा अहयस्तेंग जज्ञिरे ॥ सर्पाः प्रसर्पत क्रूरा नागा भोगोरुकंधराः ॥४८॥

च सौंदर्यानुभावचातुर्यविकारः ॥ ३८ ॥ ज्योत्स्नां चंद्रिकारूपाम् । त एव गंधर्वादिगणाः विश्वावसुः पुरोगमो मुख्यो येषु ॥ ३९ ॥ आत्मनस्तंद्रिणा आलस्येन तांश्च मुक्तकेशान्वीक्ष्य नेत्रे निमीलितवान् ॥ ४० ॥ इंद्रियाणां विक्लेदः स्रावो यया तां निद्रां प्रचक्षते येनेंद्रियविक्लेदेन हेतुनोच्छिष्टांश्च सतो धर्षयंति भ्रांतान्कुर्वंति तं भूतादिगणमुन्मादं प्रचक्षते तंद्रा जृंभिका निद्रोन्मादहेतुत्वेन भूतादीनां तनूनां च चातुर्विध्यमुक्तम् ॥४१॥ ऊर्जस्वंतं बलवंतम् परोक्षेणादृश्यरूपेण ॥४२॥ आत्मनः सर्गो यस्मात्तम् यद्येन कायेन संप्रदानत्वनिमित्तेन कवयः कर्मकोविदाः साध्येभ्यः पितृभ्यश्च स्वपितृरूपेभ्यः वितन्वते श्रद्धादिना हव्यं कव्यं च ददति ॥ ४३ ॥ तिरोधानेन दृश्यत्वे सत्यप्यंतर्धानशक्त्या ॥ ४४ ॥ प्रत्यात्म्येन प्रतिबिंबेन देहेन आत्माभासं प्रतिबिंबमात्मनाऽऽत्मनो मानः प्रतिबिंबदर्शिनः सुंदरस्य शिरः कंपादिचेष्टा अत एव तत्सृष्टानां मिथः संमाननेन नित्यं मिथुनीभावः ॥ ४५ ॥ तत्प्रतिबिंबरूपम् । कर्मभिस्तत्पराक्रमानुवर्णनैः ॥ ४६ ॥ भोग आभोगो विस्तारः पादादिप्रसरणं तद्वता देहेन अनुपचिते वृद्धिमप्राप्ते तद्भोगक्रोधादियुक्तम् ॥ ४७ ॥ अमुतोऽमुष्माद्देहाद्ये केशा अहीयंत प्रच्युतास्तेऽहयो जाताः प्रसर्पतः पादाद्याकुंचनैः प्रचलतोऽमुष्मात्सर्पाः

तद्विषयकं यच्चातुर्यं तत्सूचको विकारः सौंदर्यानुभावचातुर्यविकारः सौंदर्यास्वादचिह्नानीत्यर्थः । भावगंभीरं व्यंजिताभियोगं यथा स्यात्तथा प्रहस्य । कांत्या कांतिमत्या कांतिकांतिमतोरभेदोपचारात् ॥ ३८ ॥ ३९ ॥ कदाचिद्ब्रह्मण आलस्यमभूत्ततो भूतप्रेताद्या बभूवुः तच्चालस्यं जृंभानिद्रारूपतां प्राप्तं त एव जगृहुरित्याह-सृष्ट्वेति । दिग्वाससो नग्नान् ॥ ४० ॥ उन्मादमित्युक्तेः भूतप्रेतादिधर्षिता जनाः उन्मत्ता इत्युच्यंते ॥ ४१ ॥ कदाचिद्धातात्मनो बलिष्ठत्वं पारोक्ष्यं च भावयामास ताभ्यां च साध्याः पितरश्च बभूवुरित्याह–द्वाभ्यामूर्जस्वंतमिति ॥ ४२ ॥ ४३ ॥ ४४ ॥ अत एवात्ममाननादेव । तत्सृष्टानां प्रतिबिंबसृष्टानाम् ॥ ४५ ॥ तमेव स्रष्टारमेव। उषसि प्रत्यूषे ॥ ४६ ॥ बहुचिंतयेति । कथं मे सृष्टिस्सिध्येदिति भावनया ततश्च चिंतामध्य एव कश्चिदविवेकोऽभूत् यतो महान् क्रोधो बभूव क्रोधानंतरं तद्वपुरुत्ससर्जेति ॥ ४७ ॥ अत एव पादाद्याकुञ्चनैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स आत्मानं मन्यमानः कृतकृत्यमिवात्मभूः ॥ तदा मनून्ससर्जांते मनसा लोकभावनान् ॥ ४९ ॥ तेभ्यः सोऽत्यसृजत्स्वीयं पुरं पुरुषमात्मवान् ॥ तान्दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम् ॥५०॥ अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतम् ॥ प्रतिष्ठिताः क्रिया यस्मिन्साकमन्नमदाम हे ॥ ५१ ॥ तपसा विद्यया युक्तो योगेन सुसमाधिना ॥ ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ॥ ५२ ॥ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदादजः ॥ यद्यत्समाधियोगर्द्धितपोविद्याविरक्तिमत् ॥ ५३ ॥ इति श्रीमद्भागवते तृतीयस्कंधे विंशतितमोऽध्यायः ॥ २० ॥ विदुर उवाच ॥ स्वायंभुवस्य च मनोर्वंशः परमसंमतः ॥ कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः ॥ १ ॥ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै ॥ यथाधर्मं जुगुपतुः सप्तद्वीपवतीं महीम् ॥ २ ॥ तस्य वै दुहिता ब्रह्मन्देवहूतीति विश्रुता ॥ पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयाऽनघ ॥ ३ ॥

अत एव अगा न भवंतीति नागाः अतिवेगवंत इत्यर्थः । भोगवतो जातत्वाद्भोगेन फणेनोरुर्विस्तीर्णा कंधरा येषाम् । सर्वे चैते तत्क्रोधयोगात्क्रूराः तेषामवांतरजातिभेदः सर्पसिद्धांते प्रसिद्धः ॥ ४८ ॥ यदा मन्यमानोऽभूत्तदा मनून्ससर्ज ॥ ४९ ॥ तेभ्यः स्वीयं पुरुषं पुरुषाकारं पुरं देहमत्यसृजद्ददौ तान्मनून् ॥ ५० ॥ ते त्वया यत्कृतं तत्सुकृतम् । सुकृतत्वमाहुः । यस्मिन्मनुसर्गे क्रिया अग्निहोत्राद्याः । अतोऽस्मिन्सर्वे वयं साकं सहान्नं हविर्भागाद्यदाम भक्षयाम हे ब्रह्मन् ॥ ५१ ॥ कायसृष्टिमुक्त्वा ऋषीणां सृष्टिमाह । तपसेति । विद्या उपासना योगोऽत्रासनादिः सुसमाधिर्वैराग्यैश्वर्यादियुक्तः समाधिः तेन च युक्तः हृषीकेशः स्ववशेंद्रियः सन् ऋषिर्ब्रह्मा ऋषीन्प्रजाः ससर्ज ॥ ५२ ॥ किं तद्देहं यस्यांशमदादित्यत आह । यदिति । समाधिश्च योगश्च ऋद्धिश्च ऐश्वर्यं तपश्च विद्या च विरक्तिश्च विद्यंते यस्मिंस्तत् ॥ ५३ ॥ इति तृतीयस्कंधे टीकायां विंशोऽध्यायः ॥ २० ॥ एकविंशे तपोविद्यातोषितेन तु विष्णुना ॥ कर्दमस्य मनोः पुत्र्या विवाहघटनोच्यते ॥ १ ॥ एधिरे एधांचक्रिरे ॥ १ ॥ धर्मं महीं च यथा जुगुपतुः ररक्षतुस्तन्मे वदेति तृतीयेनान्वयः ॥ २ ॥ तस्य मनोः ॥ ३ ॥

प्रचलनादेव । इत्यर्थ इति । न गच्छन्तीत्यगाः । न अगा नागा नञर्थेन नशब्देन 'सुप्सुपा' इति समासे रूपसिद्धेरयमर्थो लब्धः इति भावः । सर्पसिद्धांताख्यग्रंथे ॥ ४८ ॥ चिंतानंतरं सृष्टिर्मे पूर्णैव समपद्यतेति मनसि मिथुनं सिसृक्षतस्तस्य यदानंदो जातस्तस्मान्मनवो बभूवुस्ते च सृष्टिमूर्तिमयीं पुरुषाकारतां जगृहुरित्याह—स इति । मनूनिति तेषु तदा स्वायंभुवो मनुः प्रकटः सर्वैरदृश्यतान्ये च यथासमयं सर्वे दृश्या इति ज्ञेयम् । अत्रांतेति पदोपन्यासान्मनुसर्गोऽयं सर्वांतिमो ज्ञेयः । अत एतदनंतरं वक्ष्यमाणोऽप्यृषिसर्ग एतत्पूर्व एव ज्ञेयः । अत्र दशमद्वादशविंशाध्यायेषु क्वचित्क्रमेण क्वचिन्मंडूकप्लुतिसिंहावलोकादिन्यायात्क्रमातिक्रमेणाप्युक्तानां सर्गाणामयं क्रमो ज्ञेयः । प्रथमं पञ्चपर्वाविद्यासर्गस्ततो वनस्पतिवृक्षादिसर्गस्ततस्सर्पादिसर्गस्ततो गोमहिष्यादिसर्गस्ततो यक्षराक्षसासुरकिन्नरकिंपुरुषादिसर्गस्ततश्च सनकादिमरीच्यादिसर्गस्ततो मनुष्यसर्गः सर्वांते मनुसर्गस्ततः पूर्वसृष्टोऽपि स्त्रीपुंसरूपेण वर्द्धते स्मेति ॥ ४९ ॥ ५० ॥ एतन्मनुसृष्टिरूपं ते कृतं कर्म सुकृतं शोभनमस्ति प्रतिष्ठिता भवेयुस्तैर्मनुभिः पालनादिति भावः । यत एतत्सर्गोऽग्निहोत्रादिपालकोऽस्ति अतो हेतोः अस्मिन्मनुसर्गे। हे इति पृथक्पदम् ॥ ५१ ॥ ततो विद्यया युक्तस्य ब्रह्मणो मानुषीं सृष्टिमाह तपसेति । ऋषीन्सनकादीन्मरीच्यादींश्च ॥५२॥ तेभ्य ऋषिभ्यः यत्समाध्यादिमत्तददादित्यन्वयः ॥ ५३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे विंशोऽध्यायः ॥ २० ॥ घटना रचना ॥ (१) ॥ परमसंमतोऽतीवश्रेष्ठः । एधिरे एधांचक्रिरे आर्षत्वादाम् ॥ १ ॥ २ ॥ तस्य मनोः । देवहूती देवहूतिरत्र ङीबार्षः । क्वचित् 'देवहूतिरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यां स वै महायोगी युक्तायां योगलक्षणैः ॥ ससर्ज कतिधा वीर्य तन्मे शुश्रूषवे वद॥४॥रुचिर्यो भगवान्ब्रह्मन् दक्षो वा ब्रह्मणः सुतः॥यथा ससर्ज भूतानि लब्ध्वा भार्यां च मानवीम् ॥५॥ मैत्रेय उवाच ॥ प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः॥सरस्वत्यां तपस्तेपे सहस्राणां समा दश॥६॥ ततः समाधियुक्तेन क्रियायोगेन कर्दमः ॥ संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम् ॥ ७ ॥ तावत्प्रसन्नो भगवान्पुष्कराक्षः कृते युगे ॥ दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ॥ ८ ॥ स तं विरजमर्काभं सितपद्मोत्पलस्रजम् ॥ स्निग्धनीलालकव्रातवक्त्राब्जं विरजांबरम् ॥ ९ ॥ किरीटिनं कुण्डलिनं शंखचक्रगदाधरम् ॥ श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणम् ॥ १० ॥ विन्यस्तचरणांभोजमंसदेशे गरुत्मतः ॥ दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरम् ॥ ११ ॥ जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः ॥ गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृतांजलिः ॥ १२ ॥

योगलक्षणैर्यमादिभिर्युक्तायाम् । कतिधा वीर्यं ससर्ज कति पुत्रानुत्पादयामासेत्यर्थः ॥ ४ ॥ मानवीं मनोः कन्यामाकूतिं च प्रसूतिं च भार्यां लब्ध्वा यथा भूतानि ससर्ज तच्च वदेति चकारस्यार्थः ॥ ५ ॥ सहस्राणां समा दश दशसहस्राणि संवत्सरानित्यर्थः ॥ ६ ॥ ततस्तस्मिंस्तपसि क्रियायोगेन पूजाप्रकारेण संप्रपेदे सिषेवे प्रपन्नेभ्यो भक्तेभ्यो वरदातारम् ॥ ७ ॥ शब्दैकवेद्यं यद्ब्रह्म तन्मयं वपुर्दधत्त्प्रत्यात्मानं दर्शयामास ॥ ८ ॥ स कर्दमस्तं खेऽवस्थितं दृष्ट्वा मूर्ध्ना क्षितावपतत् । गीर्भिश्चाभ्यगृणादिति चतुर्णामन्वयः । पद्मोत्पले दिनरात्रिविकासे सितानां पद्मानामुत्पलानां च स्रक् यस्य तम् । स्निग्धा नीलाश्च येऽलकास्तेषां व्रातो वक्त्राब्जे यस्य ॥ ९ ॥ श्वेतोत्पलं क्रीडनकं यस्य मनःस्पर्शं मनस्यानंदजनकं स्मितमीक्षणं च यस्य तम् ॥ १० ॥ वक्षसि श्रीर्यस्य कौस्तुभः कंधरायां यस्य ॥ ११ ॥ प्रीतिरेव स्वभावः स्वतः सिद्धो धर्मो यस्य तथाविध आत्मा मनो यस्य ॥ १२ ॥

श्रुता, इत्यपि पाठः । अनघेति । दर्शनादिना पापनिवर्त्तकोऽसीत्याह॥३॥तस्यां देवहूत्याम् । स कर्दमः । इत्यर्थ इति । पुत्रानपत्यानीति भावः । पुत्रपदं स्वामिचरणैरुपलक्षणत्वेनोपन्यस्तमत्रेति ज्ञेयम् ॥४॥५॥ अत्र मनुपुत्रयो श्चरितस्यादौ वक्तव्यत्वेऽपि सूचीकटाहन्यायेन देवहूतिचरिताविनाभूतं कर्दमचरितं वक्तुमुपक्रमते-प्रजा इति । इत्यर्थ इति । समा दशेति ''कालाध्वनोरत्यंतसंयोगे'' इति द्वितीयेति भावः । बहुत्वमार्षं 'विंशत्याद्याः सदैकत्वे' इत्युक्तेः॥६॥तत इति सप्तम्यर्थे तसिल् । अत उक्तं तस्मिंस्तपसीति स्वामिचरणैः॥७॥तावदिति । यावत्संप्रपेदे तावदिति । सति पूजने तत्प्रसादोऽविलंबेनैवास्तीति सूचितम् । तन्मयं चिद्घनं न तु मायिकभौतिकमिति॥८॥ स कर्दमः । विगतं रजो भक्तानां यैः कर्मभिस्तानि विरजानि अदन्तत्वमार्षम् । तादृशानि कर्माणि यस्य तम् ॥९॥ शंखादित्रयोक्तेश्चतुर्थे हस्ते श्वेतोत्पलमेव धृतं कंजस्थान इति ज्ञेयम्॥१०॥ गरुत्मत इत्युक्तेर्विनतापुत्रत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच ॥ जुष्टं बताऽद्याऽखिलसत्त्वराशेः सांसिद्ध्यमक्ष्णोस्तव दर्शनान्नः॥ यद्दर्शनं जन्मभिरीड्य सद्भिराशासते योगिनो रूढयोगाः॥१३॥ ये मायया ते हतमेधसस्त्वत्पादारविंदं भवसिंधुपोतम् ॥ उपासते कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः ॥ १४ ॥ तथा स चाहं परिवोढुकामः समानशीलां गृहमेधधेनुम् ॥ उपेयिवान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य ॥ १५ ॥ प्रजापतेस्ते वचसाऽधीश तंत्या लोकः किलाऽयं कामहताऽनुबद्धः ॥ अहं च लोकानुगतो वहामि बलिं च शुक्लाऽनिमिषाय तुभ्यम् ॥ १६ ॥

त्वामृते परमानंदं धिगन्यवरकामुकम् ॥ अथापि कृपणं मानुगृहाण वरदानतः ॥ १ ॥ बतेति हर्षे । हे ईड्य नोऽस्माभिः समग्रसत्त्वनिधेस्तव दर्शनादद्याक्ष्णोः सांसिध्यं साफल्यं जुष्टं सेवितम् । त्वद्दर्शनमेव महाफलमित्युपपादयति । यस्य तव दर्शनं सद्भिरुत्तरोत्तरमापादितप्रकर्षैर्जन्मभी रूढो विरूढो योगो यैस्तेऽपि ॥ १३ ॥ सकामभक्तान्विगर्हयन्नाह य इति । हे ईश ये निरयेऽपि स्युस्तेषां कामानां लवाय ये त्वन्मायया नष्टबुद्धयस्त एवोपासते त्वं तु तेषां तान्कामानपि रासि ददासि ॥ १४ ॥ यः सकामान्निंदामि सोऽहमपि तादृश एवेत्याह । तथेति । गृहमेधो गृहाश्रमस्तत्र धेनुं त्रिवर्गदोग्ध्रीं भार्यां परिवोढुकामः परिणेतुमिच्छन्कामदुघांघ्रिपस्य कल्पद्रुमस्य तव मूलमंघ्रिमुपेयिवानुपगतोऽस्मि । ननु कामाद्यर्थमन्यत्किमप्युपास्यतां न यतोऽशेषस्य पुरुषार्थस्य मूलमेतदेव ॥ १५ ॥ ननु तर्हि मुक्त्यर्थमेव किं न भजसि अनधिकारादित्याह । हे अधीश यस्त्वं प्रजापतिस्तस्य तव वचसा तंत्या अयं कामहतो लोकः पशुवद्बद्धः हे शुक्ल शुद्धधर्ममूर्तेऽहं च किल लोकानुगतोऽतस्तुभ्यं बलिं वहामि कर्ममयीं त्वदाज्ञामनुवर्ते अनिमिषाय कालात्मने तदर्थं भार्यां चेच्छामीति चकारस्यार्थः । न केवलं लोकानुगतो

गरुडस्य निरस्तं तदानीं विनताजन्माभावादिति संदर्भः ॥ ११ ॥ १२ ॥ सकामत्वं विनिंद्यापि कृपणत्वात्तदेवाशास्त इत्याह-त्वामिति । अथापि त्वदन्यकामस्यायोग्यत्वे पि (१) इतः पूर्वमक्षिणी अप्यनक्षिणी एवास्तामिति भावः । तेऽपीति । आशासत इच्छंत्येव न तु लब्धमिति भावः । ईड्येति । मत्तस्त्वद्दर्शनोपयोगि किंचिदपि नो जातं तथापि दर्शनं दत्तमतो धन्योसीत्यभिप्रायः॥ १३ ॥ हे ईश सर्वसंपादनसमर्थ हंतहंत एवं कृपासमुद्रमपि त्वां सकामतया भजंत्यहो लोकानां मौढ्यमित्याह। ये तव मायया हतबुद्धयो भवंति त एव नान्ये। कामलवाय कामलेशं प्राप्तुमुपासते त्वं तु तेषां कामान् बहूनेवाकामितानपि रासि ददासि अन्यथा भक्तिसुखानभिज्ञाने त्वद्भक्तिमपि त्यक्तुं नैव विलंबेरन्निति भावः । भक्तेस्त्यागे तु काले तेऽपि निष्कामा भवेयुरेवेत्याशयेन ददासि न तु तद्दान एव तात्पर्यं यतस्ते कलत्रपुत्रकुटुंबैश्वर्याद्याः कामा निरये नारक्यामपि योनौ स्युः । किन्तु स्वर्गनरकयोः कर्मजन्यत्वनियमनात् । त्वद्भक्तानां तु-तादृशानामपि भोगानां कर्मजन्यत्वाभावेन बंधकत्वाभावात् । नैव वस्तुतः स्वर्गनरकशब्दव्यपदेशस्तदपि तत्तुल्यत्वात्तथोक्तिरिति ज्ञेयम् ॥१४॥ धेनुपदेन स्वस्य निर्बुद्धित्वाद्वृषत्वमुक्तम्। किंच। सकामेष्वप्यहं दुराशयः दुरभिप्रायत्वादतिदुर्बुद्धिरिति [illegible]आक्षिपति-नन्विति।अशेषाः सर्वे पदार्था मूले तले यस्य तत्। "स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदाम्। सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्" ॥ इत्युक्तेः ॥ १५ ॥ पुनराक्षिपति-नन्विति । एवं विवेकश्चेत्तर्हि [illegible] एव कथं न भजसीत्यत आह-प्रजापतेर्ब्रह्मणस्तव त्वदीयस्य । प्रजाः सृजेति वचसा तंत्या लोको मरीच्यादिः "सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वम्" इति श्रीगीतोक्तेश्च । [illegible]रणैव वक्ति न तस्यापि दोष इति ते पदध्वनिः । ननु कामहतो लोकोऽनुरक्तो भवतु नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकांश्च लोकानुगतान्पशूंश्च हित्वा श्रितास्ते चरणातपत्रम् ॥ परस्परं त्वद्गुणवादशीधुपीयूषनिर्यापितदेहधर्माः ॥ १७ ॥ न तेजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व ॥ षण्नेम्यनंतच्छदि यत्रिणाभि करालस्रोतो जगदाच्छिद्य धावत् ॥ १८ ॥ एकः स्वयं सञ्जगतः सिसृक्षया द्वितीययात्मन्नधियोगमायया ॥ सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णनाभिर्भगवान्स्वशक्तिभिः ॥ १९ ॥

बलिं वहामि किं तु ऋणत्रयापाकरणार्थमिति किलेत्युक्तम् ॥ १६ ॥ अनिमिषायेत्यनेन कालात्मकात्त्वत्तो भीतः कर्म करोमीत्युक्तमेतत्तु भयं त्वद्भक्तानां नास्तीत्याह द्वाभ्याम् । लोकान्कामाभिभूतांस्ताननुसृतान्पशूंश्च विवेके सत्यपि पुनः कर्मजडान्मादृशान्हित्वा अनादृत्य ये तव चरणरूपमातपत्रं श्रिताः । तानेवाह । त्वद्गुणानां वादः कथा तदेव सीधु मदिरा संसारविस्मारकत्वात् । पीयषं रुचिकरत्वात् । तेन निर्यापिता विलापिता देहधर्माः क्षुत्पिपासादयो यैः । एषामित्युत्तरेणान्वयः ॥ १७ ॥ तव यत्रिणाभि कालचक्रं तज्जगदाच्छिद्याकृष्य धावदपि एषां त्वद्भक्तानामायुराच्छिद्य धावन्न भवति । कथंभूतम् । अजरं ब्रह्म तस्मिन्नक्षररूपे भ्रमिर्भ्रमणम् । भ्रमदिति वक्तव्येऽतिभ्रमणशीलत्वादुपचारेण भ्रमिरित्यभेदनिर्देशः । अधिकमासेन सह त्रयोदशमासा अरा यस्य । त्रिशतं षष्टिश्चाहोरात्राः पर्वाणि यस्य । शतशब्दे विभक्ते रलुगार्षः । षड् ऋतवो नेमयो यस्य । अनंताः क्षणलवादयश्छदाः पत्राणि पत्राकारा धाराः संति यस्य । त्रीणि चातुर्मास्यानि नाभय आधारभूतानि वलयानि यस्य । करालस्रोतस्तीव्रवेगम् । एतैर्विशेषणैरेव संवत्सरात्मकं चक्रमुक्तमिति द्रष्टव्यम् ॥ १८ ॥ ननु निरुपाधिमुदासीनं मां किं याचसे तथाऽपि मायया विश्वसृष्ट्यादिकर्तृत्वात्त्वमेव याच्य इत्याह । स्वयमेक एव सन्नप्यात्मन्यधिकृतया योगमायया हेतुभूतया याः

त्वं त्वकामहतः कथं सनकादिवत्तन्नातिक्रामसि तत्राह—अहं च लोकानुगतस्तदनुसारिबुद्धिर्न तु नारदादिसदृशो भवितुं समर्थ इत्यर्थः । अतस्तंत्या बद्धो वृष इव बलिं वहामि कर्ममयीं त्वदाज्ञामनुवर्त्ते तदर्थमेकां भार्यामिच्छामीत्यर्थः । चकारात्त्वद्भक्तिञ्च करोम्यायत्यां त्वत्प्राप्त्यर्थमिति भावः । हे शुक्ल सर्वदोषविनिर्मुक्तत्वात्त्वं मादृशमपि शुक्लीकर्त्तुं समर्थोऽसीत्यभिप्रायः । अनिमिषाय कालरूपं त्वां प्रसादयितुमित्यर्थमाह विश्वनाथः । ॥ १६ ॥ ननु लोकाः पित्रादयस्तदाज्ञानुवर्त्तिनः पुत्रभ्रात्रादयश्च लोकतो धर्मतश्च यशस्विनः सुखिनश्च दृश्यंते किमिति तान्सकामत्वान्निन्दासि, पित्रादीन्दुःखयतां निष्कामभक्तानां निष्परिग्रहाणां कि सुखं किं वा यशो यतस्तानभिनंदसीति तत्राह-द्वाभ्याम् । लोकानिति । पशूनिति । तेषां पशुत्वात्तत्त्यागे दोषो नास्तीति भावः । यद्वा । लोकान्न्यायमीमासादिशास्त्राभिज्ञान् तदनुगतांस्तदुपदेशवाक्येषु विश्वसतः शास्त्रानभिज्ञान् । तेषामुभयेषामपि पशुत्वं भक्तिराहित्यात् । चरणमेवातपत्रमाश्रिता इति । निरातपत्राः पशवस्तु जाज्वलंत एवेति भावः । तेषां सुखमपरमप्याह—त्वद्गुणानां वादः कथनमेव संसारविस्मारकत्वाच्छीधु मृत्युदूरीकरणादतिस्वादुत्वाच्च पीयूषं तेनैव तत्पानेनव निर्यापिता देहधर्मा बाल्यपौगंडादयः क्षुत्पिपासादयो वा यैस्ते भवंतीति क्रिययान्वयः ॥ १७ ॥ उपचारेण गौण्या वृत्त्या ॥ १८ ॥ नन्वेवं निष्कामभक्तानेव धन्यान्ब्रूषे अथ च निष्कामो भवितुं न शक्नोसि तर्ह्यन्यस्माद्देवतांतराच्छीघ्रफलप्रदात्कथं स्वकामं न साधयसीति चेत्त्वां विना जगत्यन्यं कमप्यहं न पश्यामीत्याह । स्वामिचरणैरप्येतदभिप्रायेणैवोक्तम् 'निरुपाधिमुदासीनं मां कथम्' इत्यादि । इच्छाया द्वितीयत्वाभावादद्वितीयया सिसृक्षया "एकोऽहं बहु स्याम्" इति श्रुत्युक्तया आत्मनि अधिगतः प्राप्तो योग ईक्षणयोगाद्यस्यास्तया मायया । यद्वा । योगमायया चिच्छक्त्या । यथेति । अतस्त्व

॥ ७५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैतद्व्रताऽधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मम् ॥ अनुग्रहायाऽस्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः ॥ २० ॥

स्वीकृताः शक्तयः सत्त्वाद्यास्ताभिः । अदो विश्वम् । स्वव्यतिरिक्तसाधनानपेक्षत्वे दृष्टांतः । यथेति ॥ १९ ॥ यद्यपि मायिकत्वाद्भक्तेभ्यो विषयसुखं दातुं नेच्छसि तथाऽप्यस्मदभिप्रायानुसारेण तत्संपादयेत्याह । नैतदिति । हे अधीश नोऽस्माकं भजतां भूतसूक्ष्मरूपं पदं शब्दादिविषयसुखं मायया तनुषे विस्तारयसीति यदेतत्तव यद्यपीप्सितं न भवति तथाऽप्यस्मदनुग्रहायास्तु ऋणत्रयापाकरणानंतरमेवापवर्गाय भवत्वित्यर्थः । यर्हि यतो मायया परिच्छिन्नमिव लसंत्या तुलस्या

छिन्नदेवतांतराभावात्सकामेनापि मया त्वमेव सेव्यस इति भावः ॥ १९ ॥ एवं चेत्तर्हि मत्प्रसादात्तव कलत्रापत्यभोगैश्वर्याणि परमोत्तमानि भवंत्विति वरं ददानं भगवंतं सप्रणाममाह—नैतदिति द्वाभ्यां-हे अधीश एतत्पदं मत्काम्यमानं वस्तु तव स्वभक्तमात्रहितकारिणे दातुमीप्सितं न भवति "न राति रोगिणोऽपथ्यं वाञ्छतोऽपि भिषक्तमः" इति त्वदुक्तेरवसीयते इति भावः । कथं तर्हि ददासीति तत्राह—यद्यस्मान्नोऽस्मभ्यं भूत सूक्ष्मं शब्दादींद्रियभोग्यं विषयसुखं तनुषे ददासि तत्खलु माययैव न त्वमायया अनभिज्ञभक्तोयमन्यथा विमनस्को भविष्यतीति मदनुरोधेनैवेत्यर्थः । वासनामयं विषयसुखमंतःकरणे वर्त्तत एव तदेव वरदानेन विस्ता रयसीति तनुधात्वर्थः । नन्वेवं चेत्तर्हि न ददासीति तत्राह—अनुग्रहायास्तु दीयमानमेतदस्तु किं त्वनुग्रहायापि हंतहंत मयैव दत्तेन विषयसुखवरेण भक्तोऽयमंधे तमसि पातितस्तादिममुद्धरामीत्यायत्यां त्वत्कृपाप्राप्त्यर्थ मप्यस्त्वित्यर्थः । तत्र लिंगं तर्हि बरदानसमये संप्रति विलक्षितो विशेषेण त्वं दृष्टस्तर्हि मायया कृपया 'मनःस्पर्शस्मितेक्षणम्' इत्युक्तेः स्मितद्योतितकृपाकटाक्षेण विशिष्ट एव दृष्टस्तत्रापि लसंत्या भक्तजनैः सपर्यायां सम र्पितया दृष्टः परमसुखदया तुलस्या उपलक्षिता चिदानंदमयी या तनुस्तया युक्त इति भक्तपरिचरणीयत्वमेव तनोरमायिकत्वे लिंगम् । अमायिकतनुदर्शनप्रदानमेव कृपायां लिंगम् । 'भगवान्विलक्षित' इति पाठ एव श्रीध रसंमतः प्रतिभाति । तैस्तथैव तनूपदानुल्लेखेन लसंत्या तुलस्या युक्त इति व्याख्यातत्वात् । इत्यर्थ इति । "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥" इत्युक्तेरयं भावः । अत एव भगवता गौतमेनाप्युक्तम् । "ऋणक्लेशप्रवृत्त्यनुबंधादपवर्गाभावः" इति । सूत्रार्थस्तु-ऋणानुबन्धान्नास्त्यपवर्गः । जायमानो हि वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते, ब्रह्मयज्ञेन ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्य इति ऋणानि तेषामनुबन्धः स्वकर्मभिस्सम्बन्धः कर्मसम्बन्धवचनात् । "जरामर्य्यं वै एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च" इति । "जरया ह एष तस्मात्सत्राद्विमुच्यते मृत्युना ह च" इति ऋणानुबंधादपवर्गा नुष्ठानकालो नास्तीत्यपवर्गाभावः । क्लेशानुबन्धान्नास्त्यपवर्गः क्लेशानुबद्धश्च जायते नास्य क्लेशानुबंधविच्छेदो गृह्यते । प्रवृत्त्यनुबंधान्नास्त्यपवर्गः जन्मप्रभृत्ययं यावत्प्रायणं वाग्बुद्धिशरीरारंभेणाविमुक्तो गृह्यते तत्र यदुक्तं "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतराभावादपवर्गः" इति तदनुपपन्नम् । अत्राभिधीयते यत्तावदृणानुबंधादिति ऋणैरिव ऋणैरिति सूत्रान्तरमाह । "प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निंदा प्रशंसोपपत्तेः" अस्यार्थः ऋणैरिति नायं प्रधानशब्दः यत्र स्वल्वेकः प्रत्यादेयं ददाति द्वितीयश्च प्रतिज्ञेयं गृह्णाति तत्रास्य दृष्टत्वात् प्रधानमृणशब्दः न चैतदिहोपपद्यते प्रधानशब्दानुपपत्तेर्गुणशब्देनायमनुवादः । ऋणैरिव ऋणैरिति प्रलुप्तोपमं चैतत् । अग्निर्माणवक इति । अन्यत्र दृष्टश्चायमृणशब्द इह प्रयुज्यते यथाऽग्निशब्दो माणवके कथं गुणशब्देनानुवादः निंदाप्रशंसोपपत्तेः । कर्मलोपे ऋणीव ऋणादानान्निन्द्यते । कर्मानुष्ठाने च ऋणीव ऋणदानात्प्रशस्यते । जायमान इति । गुणशब्दो विपर्ययेऽनधिकारात् । जायमानो ह वै ब्राह्मण इति च शब्दः । गृहस्थः संपद्यमानो जायमान इति यदा गृहस्थो जायते तदा कर्मभिरधिक्रियते मातृतो जायमानस्यानधिका रात् । यदा तु मातृतो जायते कुमारो न तदा कर्मभिरधिक्रियते "अर्थितः शक्तस्य चार्थी समर्थो विद्वान्यजेत्" इति श्रुतेः "अधिकारोर्थिन एव कर्मभिः" इति कर्मविधौ कामसंयोगस्मृतेः । "अग्निहोत्रं जुहुयात्स्वर्ग कामः" इत्येवमादिशक्तस्य च प्रवृत्तिसंभवात् । शक्तस्य कर्मभिरधिकारः प्रवृत्तिसंभवात् । शक्तः खलु विहिते कर्मणि प्रवर्त्तते नेतर इति । उत्तमाभावस्तु प्रधानपदार्थे मातृतो जायमाने कुमारे उभयमार्थिता शक्तिश्च न

१ मातृतो जाते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवतीति । न भिद्यते लौकिकवाक्याद्वैदिकवाक्यं प्रेक्षापूर्वकारिपुरुषप्रणीतत्वेन तत्र लौकिकस्तावदपरीक्षकोपि न जायमानं कुमारमेवं ब्रूयादधीष्व यजस्व ब्रह्मचर्य्यं चरेति कुत एव ऋषिरुपपन्नानवद्यवादी उपदेशार्थेन प्रयुंक्त उपदिशति । न खलु वै नर्त्तकोंधेषु प्रवर्त्तते न गायनो बधिरेष्विति । उपदिष्टार्थविज्ञानं चोपदेशविषयः । यश्चोपदिष्टमर्थं जानाति तं प्रत्युपदेशः क्रियते न चैतदस्ति जायमानकुमारके इति । गार्हस्थ्यलिङ्गश्च मंत्रब्राह्मणं कर्माभिवदति । यच्च मंत्रब्राह्मणं कर्माभिवदति तत्पत्नीसम्बन्धिना गार्हथ्यलिङ्गेनोपपन्नं तस्माद्गृहस्थोयं जायमानोऽभिधीयते इति अर्थित्वस्य चाविपारिणामे जरामर्य्यवादोपपत्तिः । यावच्चास्य फलेनार्थित्वं न विपारिणमते न निवर्त्तेत तावदनेन कर्मानुष्ठेयमित्युपपद्यते जरामर्य्यवादस्तं प्रतीति जरया हवेत्यायुषस्तुरीयस्य चतुर्थस्य प्रव्रज्यायुक्तस्य वचनं 'जरया ह वा एष एतस्माद्विमुच्यते' इति आयुषस्तुरीयं चतुर्थं प्रव्रज्यायुक्तं जरेत्युच्यते । तत्र हि प्रव्रज्या विधीयतेऽत्यंतजरासंयोगे जरया ह वेत्यनर्थकम् । अशक्तो विमुच्यते इत्येतदपि नोपपद्यते । स्वयमशक्तस्य बाह्यशक्तिमाह-अंतेवासी वा जुहुयाद्ब्रह्मणा सपरिक्रीतः क्षीरहोता वा जुहुयाद्धनेन स परिक्रीत इति अथापि विहितं वानूद्येत कस्माद्वार्थः परिकल्प्येत विहितानुवचनं न्याय्यमिति ऋणवानिवास्वतंत्रो गृहस्थः कर्मसु वर्तत इत्युपपन्नं वाक्यस्य सामर्थ्यं फलस्य हि साधनानि प्रयत्नविषयो न तु फलं तानि संपन्नानि फलाय कल्प्यते विहितश्च जायमानं विधीयते च जायमानं तेन यः संबध्यते सोऽयं जायमान इति प्रत्यक्षविधानाभावादिति प्रत्यक्षतो विधीयते गार्हस्थ्यं ब्राह्मणेन । यदि चाश्रमांतरमभविष्यत्तदपि व्यधास्यत प्रत्यक्षतः प्रत्यक्षविधानाभावान्नास्त्याश्रमांतरमिति न प्रतिषेधस्य प्रत्यक्षविधानाभावात् । न प्रतिषेधोपि ब्राह्मणेन प्रत्यक्षतो विधीयते न सन्त्याश्रमान्तराणि एक एव गृहस्थाश्रम इति प्रतिषेधस्य प्रत्यक्षतोऽश्रवणादयुक्तमेतदिति । अत्र सूत्रांतरमाह-"अधिकाराच्च विधानं विद्यांतरवत्" अस्यार्थः-यथा शास्त्रांतराणि स्वेस्वेऽधिकारे प्रत्यक्षतो विधायकानि नार्थांतराभावात् । एवमिदं ब्राह्मणं गृहस्थशास्त्रं स्वेधिकारे प्रत्यक्षतो विधायकं नाश्रमांतराणामभावादिति । ऋग्ब्राह्मणं चापवर्गाभिधाय्यभिधीयते ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति ऋचश्च तावत्-"कर्मभिर्मृत्युमृषयो निषेदुः प्रजावंतो द्रविणमिच्छमानाः । अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः ॥ न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुः । परेण नाकं विहितं गुहायां विभ्राजते यद्यतयो विशंति ॥ वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय ॥" इति ॥ अथ ब्राह्मणानि-"त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति । प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोत्यंतमात्मानमाचार्यकुलेऽवसादयत् सर्व एवैते पुण्यलोका भवंति ब्रह्मसंस्थोऽमृतत्वमेति एवमेव प्रव्राजितो लोकमभीप्संतः प्रव्रजंतीति अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तथा क्रतुर्भवति तथा तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते" इति कर्मभिस्संसरणमुक्त्वा प्रकृतमन्यदुपदिशति "इति तु कामयमानो योऽकामो निष्काम आत्मकामो भवति न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येति" इति । तत्र यदुक्तमृणानुबन्धादपवर्गाभाव इत्येतद्युक्तमिति ये चत्वारः पथयो देवयाना इति चातुराश्रम्यश्रुतेरैकाश्रम्यानुपपत्तिः फलार्थितश्चेदम् ब्राह्मणं "जरामर्य्यं ह वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च" इति । कथमत्र सूत्रांतरमाह-"समारोपणादात्मन्यप्रतिषेधः" अस्यार्थः-प्राजापत्यामिष्टिं निरूप्य तस्यां सार्ववेदसं हुत्वात्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेदिति श्रूयते तेन विजानीमः प्रजावित्तलोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यांचरंतीति एषणाभ्यो व्युत्थितस्य पात्रचयांतानि कर्माणि नोपपद्यन्त इति नाविशेषेण कर्त्तुः प्रयोजकफलं भवतीति चातुराश्रम्यविधानाच्च इतिहासपुराणधर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः तदप्रमाणमिति चेन्न, प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते । ते वा खल्वेते अथर्वांगिरस एतदितिहासपुराणमभ्यवदत् इतिहासपुराणं पञ्चमो वेदानां वेद इति तस्मादयुक्तमेतदप्रामाण्यमिति । अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपाल्लोकोच्छेदप्रसंगः । द्रष्टृप्रवक्तृसामान्याच्चाप्रामाण्यानुपपत्तिः । य एव मंत्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च त एव खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति विषयव्यवस्थानाच्च यथाविषयं प्रामाण्यम् । अन्यो मंत्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्मशास्त्राणाम्, यज्ञो मंत्रब्राह्मणस्य, लोकवृत्तमितिहासपुराणस्य, लोकव्यवहारव्यवस्थानं धर्मशास्त्रस्य विषयः तत्रैकेन सर्वं व्यवस्थाप्यते इति यथाविषयमेतानि प्रमाणानि इंद्रियादिवदिति । यत्पुनरेतत्क्लेशानुबंधस्याऽनुच्छेदादिति तत्र सूत्रांतरमाह-"सुषुप्तस्य स्वप्नादर्शने क्लेशा भावादपवर्गः" । अस्यार्थस्तु-यथा प्रसुप्तस्य खलु रागानुबंधः सुखदुःखानुबंधश्च विच्छिद्यते तथाऽपवर्गेपीति । एतच्च ब्रह्मविदो मुक्तस्यात्मनो रूपमुदाहरंतीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं त्वाऽनुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रम् ॥ नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षम् ॥ २१ ॥ ऋषिरुवाच ॥ इत्यव्यलीकं प्रणतोऽब्जनाभस्तमाबभाषे वचसाऽमृतेन ॥ सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः ॥ २२ ॥ श्रीभगवानुवाच ॥ विदित्वा तव चैत्यं मे पुरैव समयोजि तत् ॥ यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः ॥ २३ ॥ न वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणम् ॥ भवद्विधेष्वतितरां मयि संगृभितात्मनाम् ॥ २४ ॥

युक्तस्त्वं विलक्षितोऽसि एवंभूतस्य तव दर्शनं यतो भुक्तिमुक्तिप्रदमित्यर्थः ॥ २० ॥ तं त्वा त्वां भुक्तिमुक्तिप्रदं नमामि । मुक्तिदत्वे हेतुः । अनुभूत्या ज्ञानेनोपरतः क्रियार्थः कर्मफलभोगो यस्मिन् । भोगदत्वे हेतुः । स्वमायया आवर्तितं लोकतंत्रं विश्वोपकरणं येन अतः सकामैर्निष्कामैश्च नमनीयं पादसरोजं यस्य तम् । तत्राल्पीयसि सकामे पुंसि भजने वा कामान्वर्षतीति तथा तम् ॥ २१ ॥ अमृतेन सुखकरेण प्रेमस्मिताभ्यामीक्षणेन विभ्रमंती भ्रूर्यस्य ॥ २२ ॥ चैत्यं हार्दं भावम् । मे मया समयोजि संघटितम् । यदर्थमेवाहं समर्चितस्तत् ॥ २३ ॥ मयि संगृभितः संगृहीत एकाग्रीकृत आत्मा चित्तं यैस्तेषां यन्मदर्हणम् । त्वादृशेष्वति

यदपि प्रवृत्त्यनुबंधादिति तत्र सूत्रांतरेण परिहरति "न प्रवृत्तिः प्रतिसंधानाय हीनक्लेशस्य" अस्यार्थस्तु-प्रक्षीणेषु रागद्वेषमोहेषु प्रवृत्तिर्न प्रतिसंधानाय पूर्वसंधिस्तु पूर्वजन्मनि वृत्तौ पुनर्जन्म तच्चादृष्टकारितम् । तस्यां प्रहीणायां पूर्वजन्माभावे जन्मांतराभावोऽप्रतिसंधानमपवर्गः । कर्मवैफल्यप्रसंग इति चेन्न कर्मविपाकसंवेदनस्याप्रत्याख्यानात् पूर्वजन्मनिवृत्तौ पुनर्जन्म न भवतीत्युच्यते न तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते "सर्वाणि पूर्वकर्माणि ह्यंते जन्मनि विपच्यंते" इति सूत्रान्तरम् । "न क्लेशसंततेः स्वाभाविकत्वात्" । अस्यार्थः-नोपपद्यते क्लेशानुबंधविच्छेदः कस्मात् क्लेशसंततेः स्वाभाविकत्वात् । अनादिरियं क्लेशसंततिः न चानादिः शक्य उच्छेत्तुमिति । अत्र कश्चित्परिहारमाह-सूत्रांतरेण "प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम्" । अस्यार्थः-यथानादिः प्रागुत्पत्तेरभाव उत्पन्नेन भावेन निवर्त्यते एवं स्वाभाविकी संततिरनित्येति । किं च । "अणुश्यामताभावेऽनित्यत्ववद्वा" अस्यार्थः-अपर आह यथाऽनादिरप्यणुश्यामताऽग्निसंयोगादनित्या तथा क्लेशसंततिरपीति । एवंभूतस्य लसत्तुलसीयुक्तस्य । इत्यर्थ इति । तव दर्शनादखिलपापक्षये प्रतिबंधकाभावाद्भोगमोक्षौ भवत एवेति भावः ॥ २० ॥ उपरतो विनष्टः कर्मफलभोक्तॄणामस्मत्सादृश्येन मोक्षदाने सामर्थ्यं नास्तीति भावः । आवर्त्तितं संपादितम् । अतो भोगमोक्षप्रदत्वात् । विश्वनाथस्तु-न त्वेतत्त्वय्यसंभवमित्याह । तं त्वाम् । अनुभूत्या उपरतः क्रियार्थः कर्मफलभोगो यस्मात्तं कृपया यदा स्वमाधुर्यानुभवं दास्यसि तदैव भोगेच्छा स्वयमेवापयास्यतीति । स्वमायया स्वीयमायाशक्तिप्रेरणया वर्तितं जनितं लोकानां देवतिर्यगादीनां तंत्रं कर्मफलसुखदुःखमंबंधिपरिच्छेदो येन तं, यावदविद्यां प्रेरयसि तावद्भोगेच्छा भवत्येवेति भावः । तेन संप्रति सृष्टिं विवर्द्धयिषुरस्मान्कामसंबलितान्करोषीति सत्यपि विवेके कामांस्त्यक्तुं न शक्नुम इत्याह—अल्पीयसीति । निकृष्टेपि मद्विधे जने कामान्वर्षसीति तम ॥ २१ ॥ अव्यलीकं निष्कपटम् ॥ २२ ॥ चैत्यं चित्ताभिप्रायम् । दिगादियदंतात्स्वार्थेण् । अहमेव नान्य इत्यर्थः ॥ २३ ॥ न च मद्भजनं कामं दत्त्वैव केवलमुपक्षीयतेऽपि तु मत्पदमपि ददातीति समाश्वसिहीत्याह । 'सत्यं दिशत्यर्थितमर्थितो नृणाम्' इत्यादिन्यायेन मदर्हणमात्रं मृषैव तुच्छफलदमेव न स्यात्किंत्वंते मत्पद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजापतिसुतः सम्राट् मनुर्विख्यातमंगलः ॥ ब्रह्मावर्तं योऽधिवसञ्छास्ति सप्तार्णवां महीम् ॥ २५ ॥ स चेह विप्र राजर्षिर्महिष्या शतरूपया ॥
आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः ॥ २६ ॥ आत्मजामसितापांगीं वयःशीलगुणान्विताम् ॥ मृगयंतीं पतिं दास्यत्यनुरूपाय ते
प्रभो ॥ २७ ॥ समाहितं ते हृदयं यत्रेमान्परिवत्सरान् ॥ सा त्वां ब्रह्मन्नृपवधूः काममाशु भजिष्यति ॥ २८ ॥ या त आत्मभृतं वीर्यं नवधा
प्रसविष्यति ॥ वीर्ये त्वदीये ऋषय आधास्यंत्यंजसाऽऽत्मनः ॥ २९ ॥ त्वं च सम्यगनुष्ठाय निदेशं म उशत्तमः ॥ मयि तीर्थीकृताशेषक्रियाऽ
र्थो मां प्रपत्स्यसे ॥ ३० ॥ कृत्वा दयां च जीवेषु दत्त्वा चाभयमात्मवान् ॥ मय्यात्मानं सहजगद्द्रक्ष्यस्यात्मनि चापि माम् ॥ ३१ ॥ सहाऽहं
स्वांशकलया त्वद्वीर्येण महामुने ॥ तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहिताम् ॥ ३२ ॥

तितरां सर्वथा मृषा निष्फलं न स्यात् ॥ २४ ॥ विख्यातं मंगलमभ्युदयः सदाचारादिलक्षणं यस्य ॥ २५ ॥ हे विप्र महिष्या सह ॥ २६ ॥ २७ ॥ यत्र यस्यां भार्यायाम् । समाहितमभिसंधानेन स्थितम् । नृपवधू राजकन्या ॥ २८ ॥ ते वीर्यमात्मनि भृतं धृतं या प्रसविस्यति सा भजिष्यति वीर्ये वीर्यप्रसूतासु कन्यासु अंजसा आत्मनः पुत्रानाधास्यंति ॥ २९ ॥ निदेशमाज्ञाम् । उशत्तमः शुद्धसत्त्वः । तीर्थं पात्रं तेन दानं लक्ष्यते । मयि समर्पितसर्वकर्मफल इत्यर्थः ॥ ३० ॥ गार्हस्थ्येन दयां कृत्वा संन्यासेनाभयं दत्त्वा मय्यात्मानं जगच्च सहैकीभूतं द्रक्ष्यसि ॥ ३१ ॥ त्वद्वीर्येण सह देवहूत्यामवतीर्येति शेषः ॥ ३२ ॥

प्रदमेव स्यात् । तत्रापि संगृभितात्मनां निहितमनसां भक्तानां मध्ये त्वादृशेष्वतितरां मृषा न स्यादित्यर्थः । "हृग्रहोर्भश्छंदसि" इति भकारः । ह्रस्वत्वमार्षम् ॥ २४ ॥ प्रकृतमनुसरति प्रजाः मरीच्यादयस्तेषां पतिः "उपान्वध्याङ्वसः" इत्याधारस्य कर्मत्वं—ब्रह्मावर्त्तमिति सप्तार्णवामिति । भाविनि भूतवदुपचारः । प्रियव्रताहृतदात्मजरथखातत्वात्तेषाम् । अनेन सम्राट्त्वं तस्योक्तम् ॥ २५ ॥ विप्रेति । तस्य दानपात्रत्वमाह—महिष्या पट्टराज्ञा ॥ २६ ॥ वनवासिनो मम किं सम्म्राजा तत्राह—आत्मजामिति असितापांगीं नीलद्युतिनेत्रां कियद्वयस्तस्या इति प्रश्नमंतरेणैव वयो लक्षयति । मृगयंतीमिति । आसन्नरजस्कां पाणिग्रहणयोग्यामित्यर्थः ॥ २७ ॥ राजपुत्र्यास्तापसोऽहं कथमनुरूपः स्यामिति तत्राह—इमानतीतान्वत्सरान्व्याप्य यस्यां वध्वां राजपुत्र्यादिविशेषणमंतरेण ते हृदयं समाहितं ममानुकूला भार्या स्यादिति सधर्मचारिणित्वयोग्यं चेतः संक्लृप्तम् । सा नृपवधू राजकन्या "वधूर्जायास्नुषा कन्या नवोढा सारिवासु च" इति धरणिः ॥ २८ ॥ नवधा नवप्रकारापत्यरूपेण वीर्ये इति कारणे कार्यप्रयोगः । गोभिः श्रिणी तु मत्सरमितिवत् । "आत्मा वै पुत्रनामासि" इति श्रुतेः ॥ २९ ॥ मे निदेशं वैदिकं नित्यनैमित्तिककर्मानुष्ठानलक्षणम् ।"अहरहः सन्ध्यामुपासीत" इत्यादिश्रुतिविहितम् । इत्यर्थ इति । सर्वकर्मणां मयि समर्पणेनाकर्मत्वान्मोक्षमेव प्राप्स्यसीति भावः ॥ ३० ॥ यद्वा । वैराग्ये मद्भक्त्युपदेशेनाभयं दत्त्वेत्यर्थः । मय्यधिष्ठानतत्त्वे परमेश्वरे सर्वं जगदात्मसहितमस्तीति यच्छास्त्रदृष्ट्या सांप्रतं जानासि तदेव तदा साक्षादेव द्रक्ष्यसि प्रथमादिपुरुषं कारणार्णवशायिनं सहस्रशीर्षादिस्वरूपं मां द्रक्ष्यसि । ततश्च तस्यैव मम रोमकूपेषु अनंतकोटिब्रह्मांडान्यात्मसहितानि साक्षाद् द्रक्ष्यसीत्यर्थः । तथात्मनि स्वस्मिन्नंतर्यामिणं मां संतमधुना जानास्येव तदा तु "केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम्" इति द्वितीयस्कंधोक्त तृतीयपुरुषं क्षीरोदनाथं मामेव साक्षाद्द्रक्ष्यसीति सृज्यासृज्यं सर्वं वस्तु त्वामहं दर्शयिष्यामीति फलितार्थः । यद्वा । मयि पुत्ररूपे श्रीयशोदेव जगदात्मानं द्रक्ष्यसि तथात्मनि चापि मां श्रीगोपीव "तं काचिन्नेत्ररंध्रेण हृदिकृत्य निमील्य च । पुलकांग्युपगूह्यास्ते योगीवानंदसंप्लुता" इत्युक्तरीत्या द्रक्ष्यसीति ॥३१॥ किञ्चान्याञ्च काञ्चनानंदस्य वार्त्तां शृण्वित्याह-त्वद्वीर्य्येण त्वत्कन्यापत्यबृन्देन सहाविर्भूयेति शेषः । तव क्षेत्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ एवं तमनुभाष्याऽथ भगवान्प्रत्यगक्षजः॥ जगाम बिंदुसरसः सरस्वत्या परिश्रितात् ॥३३॥ निरीक्षतस्तस्य ययावऽशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः ॥ आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितं स्तोमसुदीर्णसाम ॥ ३४ ॥ अथ संप्रस्थिते शुक्के कर्दमो भगवानृषिः ॥ आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन्॥३५॥ मनुः स्यंदनमास्थाय शातकौंभपरिच्छदम्॥ आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीम्॥३६॥तस्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत् ॥ उपायादाश्रमपदं मुनेः शांतव्रतस्य तत् ॥३७॥यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः ॥ कृपया संपरीतस्य प्रपन्नेऽर्पितया भृशम्॥३८॥ तद्वै बिंदुसरो नाम सरस्वत्या परिप्लुतम् ॥ पुण्यं शिवामृतजलं महर्षिगणसेवितम् ॥३९॥ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः ॥ सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियाऽन्वितम् ॥ ४० ॥ मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमम् ॥ मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम् ॥ ४१ ॥

प्रत्यग्भूतेष्वक्षेषु जायते आविर्भवतीति प्रत्यगक्षजः सरस्वत्या नद्या परिश्रितात्परिवेष्टितात् ।। ३३ ।। अशेषैस्तपोमंत्रादिसिद्धेश्वरैरभिष्टुतः सिद्धमार्गो वैकुंठमार्गो यस्य । यद्वा । अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यत इति सिद्धमार्गश्च स ययौ पत्ररथेंद्रो गरुडस्तस्य पक्षैरुदीर्णमभिव्यक्तं सामाकर्णयन् । "बृहद्रथंतरे पक्षौ" इति श्रुतेः । उच्चारितं स्तोमं च सामाधारभूतानामृचां समुदायं शृण्वन् । "स्तोम आत्मा" इति श्रुतेः । समासपाठे उच्चारितः स्तोमः स्तोत्रीयसमुदायो यस्य साम्न इति ॥ ३४ ॥ तं कालं परश्व इत्युक्तं प्रतीक्षमाणः ।। ३५ ।। शातकौंभाः सौवर्णाः परिकरा यस्मिंस्तं रथमास्थाय दुहितरं चारोप्य वरान्वेषणार्थं पर्यटन् ।। ३६ ।। हे सुधन्वन्विदुर यदहः ॥ ३७ ॥ तत्प्रवेशमात्रेण परमानंदं प्राप्त इति दर्शयितुमाश्रमं वर्णयति । यस्मिन्नित्यादिभिः सप्तभिः श्लोकैः । प्रपन्ने कर्दमे ॥ ३८ ॥ शिवमारोग्यममृतवत्स्वादु जलं यस्मिन् ।। ३९ ।। कूजंतः पुण्या मृगा द्विजाश्च येषु तैः पुण्यद्रुमलतानां जालैः समूहैर्युक्तम् ।। ४० ॥ घुष्टं नादितम् । मत्तभ्रमराणां विभ्रमो विनोदो यस्मिन् । मत्ता

भार्यायां "क्षेत्रं पुरे गृहे देहे केदारे योनिभार्ययोः । पुण्यक्षेत्रे समूहे च" इति यादवः । तत्त्वसंहितां तत्त्वसंख्यानलक्षणं सांख्यशास्त्रं प्रणेष्ये करिष्ये ॥ ३२ ॥ तं कर्दमम् । अथ प्रथमभाषणोत्तरम् । परिप्लुतादिति पाठेऽप्ययमेवार्थः ॥ ३३ ॥ सिद्धमार्गशब्दस्य वैकुंठेऽप्रसिद्धेराह—यद्वेति । साम सामवेदावयवम् । पक्षाभ्यां सामाभिव्यक्तौ प्रमाणमाह—बृहेति । स्पष्टार्था श्रुतिः । स्तोमः स्तोमाख्यो वेदावयवः । आत्मा आधार इति श्रुति पदार्थः । समासपाठे उच्चारितस्तोममिति पाठे ॥ ३४ ॥ अथ शुक्लप्रस्थानानंतरं भगवान् योगैश्वर्यवान् ॥ ३५ ॥ यदहो भगवान्समादिशत्तस्मिन्नहनि महीं पर्यटन्मुनेराश्रमपदमुपायादिति द्वयोरन्वयः ॥ ३६ ॥ सुधन्वन्निति । शूरास्त्वद्वत्सैन्याद्याश्रयणं विनैव निर्भया विचरंतीति मा शंकीः । सभार्यो विना बलं कथं विचरतीति? ।"स्वसैन्यचरणक्षुण्णम्" इति वक्ष्यमाणोक्तिस्तु राज्ञां गमनबोधनपरेति न तया विरोधः । तत् प्रसिद्धम् । शांतमुपरतम् । व्रतं ब्रह्मचर्यलक्षणं यस्य भार्याभिलाषुकत्वात् ॥३७॥ यस्मिन्स्थले तत्स्थानं बिंदुसरो नामेति द्वयोरन्वयः ॥३८॥ बिंदूनां सरणं यत्र तद्बिंदुसर इति । आरोग्यमारोग्यवर्द्धकम् । 'आयुर्घृतम्' इतिवत्प्रयोगः ॥ ३९ ॥ पुण्यद्रुमा अश्वत्थामलक्यादयः । पुण्यलता विष्णुक्रांतामाधव्याद्याः । पुण्यमृगाः कृष्णसारादयः । पुण्यद्विजा जारितार्यादिपक्षिणः ॥ ४० ॥ "आटोपः संभ्रमे कोपे" इति धरणिः ॥ ४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदंबचंपकाशोककरंजबकुलासनैः ॥ कुंदमंदारकुटजैश्चूतपोतैरलंकृतम् ॥ ४२ ॥ कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः ॥ सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥ ४३ ॥ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुंजरैः ॥ गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ॥ ४४ ॥ प्रविश्य तत्तीर्थवरमादिराजः सहानुगः ॥ ददर्श मुनिमासीनं तस्मिन्हुतहुताशनम् ॥ ४५ ॥ विद्योतमानं वपुषा तपस्युग्रयुजा चिरम् ॥ नातिक्षामं भगवतः स्निग्धापांगावलोकनात् ॥ तद्व्याहृतामृतकलापीयूषश्रवणेन च ॥ ४६ ॥ प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससम् ॥ उपसंसृत्य मलिनं यथाऽर्हणमसंस्कृतम् ॥ ४७ ॥ अथोटजमुपायातं नृदेवं प्रणतं पुरः ॥ सपर्यया प्रत्यगृह्णात्प्रतिनंद्यानुरूपया ॥ ४८ ॥ गृहीतार्हणमासीनं संयतं प्रीणयन्मुनिः ॥ स्मरन्भगवदादेशमित्याह श्लक्ष्णया गिरा ॥ ४९ ॥ नूनं चंक्रमणं देव सतां संरक्षणाय ते ॥ वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालनी ॥ ५० ॥ योऽर्केंद्वग्नींद्रवायूनां यमधर्मप्रचेतसाम् ॥ रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः ॥ ५१ ॥

बर्हिण एव नटास्तेषामाटोपो नृत्यसंभ्रमो यस्मिन् । आह्वयंतो मिथो मत्ताः कोकिला यस्मिन् ॥ ४१ ॥ कदंबादिभिर्वृक्षैरलंकृतम् ॥ ४२ ॥ कारंडवादिभिः पक्षिभिर्वल्गु यथा तथा कूजितम् ॥ ४३ ॥ हरिणादिभिर्वृतम् । तत्र क्रोडः सूकरः श्वाविच्छल्लकः मर्को मर्कटः तद्विशेषा गोपुच्छाः हरिर्वानरः सिंहो वा नाभिः कस्तूरीमृगः ॥ ४४ ॥ हुतो हुताशनो ब्रह्मचारियोग्यो येन ॥ ४५ ॥ उग्रा युक् योगो यस्य तेन वपुषा विद्योतमानं तस्य भगवता व्याहृतं भाषणमेवामृतकला अमृतमयस्य चंद्रस्य कला तन्मयं पीयूषं तस्य श्रवणेन च नातिक्षामं तपसा कृशं संतमप्यकृशम् ॥ ४६ ॥ प्रांशुमुन्नतं उपसंसृत्य समीपं गत्वा मलिनं ददर्शेति पूर्वेण क्रिया अर्ह्यते अनेनेत्यर्हणं महारत्नं तदसंस्कृतमनिर्णिक्तं यथा मलिनं दृश्यते तद्वत् ॥ ४७ ॥ उटजं पर्णशालां प्राप्तं पुरः पादसमीपे प्रणतमाशीर्भिरभिनंद्य सपर्यया पूजया प्रत्यगृह्णात्सत्कृतवान् ॥ ४८ ॥ ४९ ॥ ते चंक्रमणं पर्यटनम् । हि यस्मात् ॥ ५० ॥ मनस्थं विष्णुं प्रणमति य इति । स्थाने तत्तत्कार्यावसरे । शुक्लाय विष्णवे ॥ ५१ ॥

॥४२॥४३॥ यथैव पूर्वोक्तैः पक्ष्यादिभिस्तथैवेत्यर्थः । कचित्तु 'शशकैर्हरिणैः' इति पाठः । तद्विशेषा मर्कटभेदाः वानराणां मर्कपदेनोक्तत्वादाह—सिंहो वेति । नकुलो रक्तमुखः सर्पविरोधी वन्यजीवः ॥४४॥ तद्वर्णितं तीर्थं बिंदुसरो यत्रेति तत्तीर्थवरमाश्रमम् । आदिराजः स्वायंभुवः । अनुगच्छतीत्यनुगा भार्या तत्सहितः, कतिपयानुचरयुतो वा । तस्मिन्नाश्रमे ॥४५॥ अनतिक्षामत्वे हेतुद्वयं—स्निग्धापांगेति, तद्व्याहृतेति । अमृतमयी कला यस्य सोऽमृतकलस्तस्याऽसम्यक्पीयूषममृतं तस्य श्रवणेनास्वादनेनेत्यर्थः । पीयूषस्य पानमेव युक्तं तच्छ्रवणस्य तृप्त्यजनकत्वात् ॥ ४६ ॥ उन्नतमष्टवितस्तिप्रमाणम् । अनिर्णिक्तमशोधितम् ॥ ४७ ॥ अथ दर्शनोत्तरं "पर्णशालोटजोऽस्त्रियाम्" इत्यमरः । सत्कृतवानुत्थाप्य भुजाभ्यामालिलिंगेत्यर्थः । प्रतिनंद्य अद्य मूर्तमेव तपोमयं तेजः साक्षात्कृत्य कृतार्थोऽस्मीत्यभिनंदंस्तं राजानं 'राजन्नद्य भागवती विश्वपालिनी शक्तिस्त्वमेवावलोक्यस' इति प्रत्यभिष्टुत्येत्यर्थः ॥ ४८ ॥ क्षालितचरणमुचितदर्भाद्यासन आसीनं, गृहीतान्यर्हणानि गंधपुष्पदूर्वादलादीनि येन तं, संयतं तूष्णींभूतम् । श्लक्ष्णया शोभनया ॥ ४९ ॥ हे देव यस्य ते चंक्रमणं सम्यक्पर्यटनं सतां मादृशानां तपस्विनामसतामस्मद्विरोधिनाम् । स त्वं हरेः पालिनी शक्तिर्भवसीत्यर्थः ॥ ५० ॥ तत्र प्रतापेन त्वमर्कः यशसाऽऽह्लादकत्वेन च चंद्रः, अधृष्यत्वेनाग्निः, ऐश्वर्यवत्त्वेन कामप्रवर्षकत्वेन चेंद्रः, सर्वप्रवेशवत्त्वेन वायुः, दुष्टनिग्रहत्वेन यमः, शिष्टपालकत्वेन धर्मः, गांभीर्येण गुप्तवित्तत्वेन च प्रचेताः । अत एव तस्मै मदभीष्टदेवाय त्वद्रूपेण पुनरपि ममोटजगताय शुक्लाय शुद्धसत्त्वाय तुभ्यं नमः ॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यदा रथमास्थाय जैत्रं मणिगणार्पितम् ॥ विस्फूर्जंश्चंडकोदंडो रथेन त्रासयन्नघान् ॥ ५२ ॥ स्वसैन्यचरणक्षुण्णं वेपयन्मंडलं भुवः ॥ विकर्षन्बृहतीं सेनां पर्यटस्यंऽशुमानिव ॥ ५३ ॥ तदैव सेतवः सर्वे वर्णाश्रमनिबंधनाः ॥ भगवद्रचिता राजन् भिद्येरन् बत दस्युभिः ॥ ५४ ॥ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः ॥ शयाने त्वयि लोकोऽयं दस्युग्रस्तो विनंक्ष्यति ॥ ५५ ॥ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः ॥ तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ॥५६॥ इति श्रीमद्भागवते तृतीयस्कन्धे स्वायंभुवमनुकर्दमसमागमवर्णनं नाम एकविंशतितमोऽध्यायः॥२१

मैत्रेय उवाच॥एवमाविष्कृताशेषगुणकर्मोदयो मुनिम्॥सव्रीड इव तं सम्राडुपारतमुवाच ह॥१॥मनुरुवाच ॥ ब्रह्माऽसृजत्स्वमुखतो युष्मानात्मपरीप्सया ॥ छंदोमयाँस्तपोविद्यायोगयुक्तानलंपटान्॥२॥तत्त्राणायासृजच्चास्मान् दोःसहस्रात् सहस्रपात् ॥ हृदयं तस्य हि ब्रह्म क्षत्त्रमंगं प्रचक्षते ॥३॥

नयदेति पंचानामयमर्थः यद्यपि धर्मरक्षार्थं सर्वतः पर्यटतस्तव प्रसंगादप्यागमनं भवति तथापि विशेषकार्यं चेदस्ति तत्कथ्यतामिति जैत्रं जयप्रदं मणिगणा अर्पिता यस्मिंस्तं रथमारुह्य त्वं यदा भुवो मंडलं न पर्यटसि तदा सेतवो भिद्येरन्निति त्रयाणामन्वयः । विस्फूर्जन्नादं कुर्वंश्चंडं कोदंडं धनुर्यस्य ॥ ५२ ॥ स्वसैन्यस्य चरणैः क्षुण्णं संघट्टितम् ॥ ५३ ॥ वर्णाश्रमाणां निबंधनं यैः । बत अहो ॥ ५४ ॥ निरंकुशैर्नृभिर्निमित्तभूतैः शयाने निश्चिन्ते ॥ ५५ ॥ निर्व्यलीकेन सहर्षेण प्रतिपद्यामहे स्वीकुर्महे ॥ ५६ ॥ इति श्रीमद्भागवते तृतीयस्कंधे टीकायामेकविंशतितमोऽध्यायः ॥ २१ ॥ द्वाविंशे कर्दमायादाद्यथादिष्टं हि विष्णुना ॥ मनुर्दुहितरं देवहूतिमित्युपवर्ण्यते ॥ १ ॥ एवमाविष्कृतोऽभिष्टुतोऽशेषाणां गुणानां कर्मणां चोदय उत्कर्षो यस्य स सम्राण्मनुः सव्रीड इव स्वकीर्तिश्रवणात् प्रत्याख्यानशंकया वा तं मुनिमुवाच उपारतं निवृत्तिनिरतम् ॥ १ ॥ मदीया कन्या त्वया परिणेयेति विज्ञापयिष्यन्युष्मदस्मत्संबंधस्तावदीश्वरेण पूर्वमेव घटित इत्याह । ब्रह्मेति सार्द्धाभ्याम् । आत्मनः परीप्सया पर्याप्तुमिच्छया छंदोमयस्यात्मनः पर्याप्तिः पालनं वेदप्रवर्तनं तस्येच्छया युष्मान्ब्राह्मणान् ॥ २ ॥ तत्त्राणाय ब्राह्मणपालनाय ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रियजातिः ॥ ३ ॥

पञ्चानां श्लोकानाम् । हे राजन् किमर्थमागतोसीति कथं पृच्छामि यतस्तत्कारणं जानामीत्यभिप्रायेणाह–यद्यपीति ॥ ५२ ॥ संघट्टितं चूर्णितम् ॥ ५३ ॥ निबंधनं स्थितिः दस्युभिर्हिंसाशीलैश्चौरैर्वा "दस्युश्चौर रिपौ दुष्टे हिंसके क्षीणरिक्थके" इति निरुक्तिः ॥ ५४ ॥ लोलुपैर्विषयानुरागिभिः निश्चिंते नीतिविचारशून्ये सति ॥ ५५ ॥ अथापि यद्यपि सामान्यतो जानामि तदपि विशेषतः पृच्छे । इह मत्पर्णशालायां, यदर्थमिति । न हि दुष्टनिग्रहार्थं पर्यटनं मत्पर्णशालायां सफलं भवतीति भावः । "व्यलीकं छद्मदुःखयोः" इति यादवः ॥ ५६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे एकविंशोऽध्यायः ॥२१॥ यथा विष्णुनादिष्टम् "आत्मजामसितापांगीम्" इत्यादिना कथितं तथादादित्यर्थः ॥ (१) ॥ निवृत्तिपरे व्यवहारवार्ता न वक्तव्या तदप्रियत्वात्तत्कथनप्रवृत्तः सम्राड् लज्जित इव जात इति वार्थः । यद्वा । उं दुर्वासोरूपं रुद्रं पाति निजास्त्रत इत्युपो विष्णुस्तत्रासमंताद्रतं तत्परमित्यर्थः ॥ १ ॥ सहसा प्रदानप्रसंगस्य तत्प्रत्याख्यानशंकया ब्राह्मणक्षत्रिययोः कमपि संबंधं सन्यायमाह । एतदभिप्रायेणैव स्वामिचरणैरप्युक्तं मदीयेत्यादि-ब्रह्मेति ॥ २ ॥ ब्राह्मणान्के पालयेयुस्तत्राह-तदिति । परमेश्वरेणैक्यं ब्रह्मणो मत्वाह-दोःसहस्रादीति । ननु क्षत्रियानपि कः पालयेत्तत्राह-ब्रह्म ब्राह्मणः हृदयं ज्ञानशक्तिप्रधानत्वात्, अंगं भुजः क्रियाशक्तिप्रधानत्वात् । अत्रायं भावः-लोके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतो ह्यन्योऽन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः ॥ रक्षति स्माव्ययो देवः स यः सदसदात्मकः॥४॥तव संदर्शनादेव छिन्ना मे सर्वसंशयाः ॥ यत्स्वयं भगवान्प्रीत्या धर्ममाह रिरक्षिषोः ॥ ५ ॥ दिष्ट्या मे भगवान्दृष्टो दुर्दर्शो योऽकृतात्मनाम् ॥ दिष्ट्या पादरजःस्पृष्टं शीर्ष्णा मे भवतः शिवम् ॥ ॥ ६॥ दिष्ट्या त्वयाऽनुशिष्टोऽहं कृतश्चानुग्रहो महान् ॥ अपावृतैः कर्णरंध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ॥७॥ स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम ॥ श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम ॥ अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ॥ ९ ॥ यदा तु भवतः शीलश्रुतरूपवयोगुणान् ॥ अशृणो न्नारदादेषा त्वय्यासीत्कृतनिश्चया ॥ १० ॥ तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपाहृतां मया ॥ सर्वात्मनाऽनुरूपां ते गृहमेधिषु कर्मसु ॥ ११ ॥

एवं स देव एव रक्षति स्म । कोऽसौ । सदसदात्मकः सर्वात्मकः तथाऽप्यव्ययो निर्विकारः ॥४॥ विज्ञापयितुमेव तद्दर्शनादिकमभिनंदति । तवेति त्रिभिः॥५॥अकृतात्मनामवशीकृतचित्तानाम् ॥ ६ ॥ अनुग्रहोऽनुशासनादिरूप एव । उशतीरुशत्यः ॥ ७ ॥ विज्ञापयति । स भवानिति सप्तभिः । दुहितुः स्नेहेन परिक्लिष्ट आत्मा यस्य श्रावितं विज्ञापनम् ॥ ८ ॥ प्रियव्रतोत्तानपदोः स्वसेति पुत्रिकाकरणशंका निरस्ता मम सुतेति क्षत्रकन्या तव योग्येति दर्शितम् ॥९॥ एषा देवहूतिः ॥ १०॥ प्रतीच्छ

हि हृदये प्रहारे आपतिते भुजाभ्यां हृदयस्य गोपनं दृश्यते भुजे च प्रहारे प्राप्ते देहं कुंचितीकृत्य हृदयमध्य एव भुजो गोप्यते इति हृदयस्य पालको भुजो भुजस्य पालकं हृदयम् । अत एव महाभारतेपि शांतिपर्वणि "ब्रह्म वर्द्धयति क्षत्रं क्षत्रतो ब्रह्म वर्द्धते । यत्रादृष्टं भयं ब्रह्म प्रजानां शमयत्युत ॥ दृष्टं च राजा बाहुभ्यां यद्राज्यं सुखमेधते ॥" इति । किञ्च । "मिथोभेदाद्ब्राह्मणक्षत्रियाणां प्रजादुःखं दुःसहञ्चाविशंति । एवं ज्ञात्वा कार्य एवेह नित्यं पुरोहितो नैकविद्यो नृपेण ॥" इति ॥ ३ ॥ यतो ब्रह्मक्षत्रे भगवदवयवभूते अतो हेतोः । एवं पूर्वोक्तरीत्या ब्रह्म ब्राह्मणस्तपोबलेन क्षत्रियं पालयति क्षत्रञ्च बाहुबलेन ब्राह्मणमिति । वस्तुतस्तु-स देवः परमेश्वर एवोभयं रक्षति तथापि सर्वात्मकत्वेपि निर्विकार एकरसः ॥ ४ ॥ अतोऽहं स्वपालकं त्वामागतस्त्वया चाहं दर्शनेनैव पालित इत्याह-तवेति । संशयोत्र तत्कारणं चित्तमलं कन्याप्रत्याख्यानादिरूपो वा बहुत्वमेषामनंतत्वात् । सर्वपदेनान्येप्यात्मानात्मविषयास्ते गृह्यंत इति । यद्यतः स्वयं मत्प्रेरणां विनैव भगवान् भवानेव रिरक्षिषोर्मे क्षत्रियस्य धर्ममाह-'न यदा रथमास्थाय' इत्यादिश्लोकचतुष्केनेत्यर्थः । यद्वा । यद्यस्मै स्वयं भगवान् शुक्लरूपो विष्णुः रिरक्षिषोर्हेतोर्धर्ममाह-'कृत्वा दयाञ्च जीवेषु' इत्यादिना धर्मरक्षार्थं गृहस्थादिधर्मं संक्षेपेणोक्तवानित्यर्थः । यद्वाऽऽह वक्ष्यति 'गच्छ कामं मयादिष्टो मयि संन्यस्तकर्मणा' इत्यादिना । आहेति वर्तमानसमीपे भविष्यति लडस्तीति । वेदमार्गप्रवर्त्तकत्वेन ब्राह्मणा एव धर्मरक्षका इत्यभिप्रेत्याऽऽह । रिरक्षिषोस्तवेति वा योज्यम् ॥ ५ ॥ भगवान्भवान् दिष्ट्या भद्रम् । अकृतात्मनां पुण्यहीनानाम् ॥ ६ ॥ अनुशिष्टः दत्तशिक्षः । अपावृतैर्व्याधिना कार्यादिना वानवधानदोषरहितैः ॥ ७ ॥ एवं च त्वद्दर्शनान्मे सर्वे क्लेशा गता एव परं त्वेकः क्लेशो दुर्वारो हृदि वर्तते तमपि त्वत्कृपया दत्ताश्वासो विगतभीरेवोद्घाटयामीत्याह-स कृपासिंधुः । दीनस्येति । पुत्रीप्रदमहाराजेनापि अतिनिस्स्वसंप्रदानाग्रेपि दैन्यमेवाश्रयणीयमित्याह-मुने इति । मत्कथनं विनापि त्वं मदभिप्रायं ज्ञातुं समर्थ इत्याह-स्नेहाकुलचेतस्त्वाद्ब्रवीम्येवेत्यर्थः ॥ ८ ॥ वयआदिकथनं तादृशां धर्मसाचिव्यप्राधान्येनैवेति न लज्जाकरमिति । अन्विच्छंतीति शत्रंतपाठः सम्यक् प्रतिभाति (द्वयोरन्वयः कार्यः) । तथा च इयं मम कन्या यदा तु नारदाद्भवतः शीलादीनशृणोत्तदा त्वय्येव कृतनिश्चयासीत् । किंभूता । पतिमन्विच्छंती पत्यन्वेषणां कुर्वन्तीत्यर्थः ॥ ९ ॥ १० ॥ हे द्विजाग्र्येति । दानपात्रतामाह । श्रद्धादत्तं ग्राह्यमेवेत्याह-श्रद्धयेति । सर्वात्मना सर्वप्रकारेण गृहमेधेषु गृहस्थोचितेषु कर्मस्वग्निहोत्रसंतत्युत्पादनादिष्वनुरूपां योग्याम् ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्यतस्य हि कामस्य प्रतिवादो न शस्यते ॥ अपिनिर्मुक्तसंगस्य कामरक्तस्य किं पुनः ॥१२॥ य उद्यतमनादृत्य कीनाशमभियाचते ॥ क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥ १३ ॥ अहं त्वाऽशृणवं विद्वन्विवाहार्थं समुद्यतम् ॥ अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे ॥ १४ ॥ ऋषिरुवाच ॥ बाढमुद्वोढुकामोऽहमप्रत्ता च तवात्मजा ॥ अवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः ॥ १५ ॥ कामः स भूयान्नरदेव तस्याः पुत्र्याः समाम्नायविधौ प्रतीतः ॥ क एव ते तनयां नाद्रियेत स्वयैव कांत्या क्षिपतीमिव श्रियम् ॥ १६ ॥

स्वी कुरु ॥ ११ ॥ उद्यतस्य स्वतः प्राप्तस्य विषयस्य प्रतिवादः प्रत्याख्यानम् ॥ १२ ॥ कीनाशं कृपणम् । अवज्ञया परापमानेन ॥ १३ ॥ यस्य सावधि ब्रह्मचर्यं स उपकुर्वाणः मे प्रत्तां मया दत्ताम् ॥ १४ ॥ अप्रत्ता चेति मय्येव कृतनिश्चयत्वात्कस्मै चित्प्रतिश्रुता च न भवतीत्यर्थः । आद्यः प्रथमः ततः पूर्वं विवाहाभावात् । मुख्य इति वा ॥ १५ ॥ भूयाद्भवेत् प्रतीतः "गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या" न चाहं विरक्तस्तपस्वी तव कन्यां कथं स्वीकरोमीति वाच्यम् । स्वतः प्राप्तस्य धात्रा समुत्पादितस्य निर्मुक्तसंगस्य केवलं धर्मार्थं विषयोपार्जनमिति मनस्यासक्तिरहितस्य कामरक्तस्येति । तदंतर्गतं कामं ज्ञात्वैवाहमिहागममिति कामो नापलपनीय इति भावः ॥ १२ ॥ अत्र व्यावहारिकीं नीतिमाह-य इति । अनादृत्य प्रतिष्ठानुरोधाल्लज्जया प्रत्याख्याय पुनः कृपणमदातारमपि जनं तमेव कामं याचते । कामेनैवाचिरादेव प्राबल्यवता लज्जाप्रतिष्ठयोर्ग्रस्यमानत्वादिति भावः । मानश्च हतो भवतीत्यर्थः । तेन परिणामदर्शिना विदुषा वर्तमानमपि वैराग्यं स्वमनोमध्यवर्तिना कामेनाग्रतो प्रसिष्यमाणमनुमाय प्रथममेव दैवादयाचित एवायातोऽनिषिद्धो विषयोंगीकर्तव्य एवेति ध्वनिः । स्फीतं प्रवृद्धम् । "कीनाशः कर्षकक्षुद्रोपांशुघातियमेषु च" इति धरणिः ॥ १३ ॥ ननु मन्मनोमध्यवर्त्तिनं कामं त्वं कथमज्ञासीरिति चेच्छ्रुतत्वादित्याह-अहमिति । त्वा त्वाम् । अशृणवम् । श्रवणमपि स्फूर्तिप्राप्तस्य भगवत एव मुखादवगंतव्यम् । यतस्त्वं न नैष्ठिकः । किं तूपकुर्वाणोऽस्यतो हेतोः ॥ १४ ॥ इत्यर्थ इति । "अशृणोन्नारदादेषा त्वय्येव कृतनिश्चया" इति तदुक्तेरिति भावः । 'आकूतिं रुचये प्रादात्' इत्युक्तेर्दानमात्रमेवेतः पूर्वमासीत्पद्धत्योद्वाहो ममैव भवत्वित्यर्थः । यत आदिना वेदेन विहितः ॥ आद्यो वेदविहितोऽतोऽसौ वैवाहिको विवाहसंबंधी विधिः प्रकार आवयोर्मद्देवहूत्योरनुरूपो योग्योस्ति द्वयोस्साभिलाषत्वात् । 'भार्याश्चतस्रो विप्रस्य' इत्युक्तेः क्षत्रियकन्याया ग्राह्यात्वाचेति भावः । इतः पूर्वं गौणविवाहस्य दानरूपस्य सत्त्वेपि विधिविहितत्वादयमेव मुख्य इति स्वामिचरणैरुक्तम् । मुख्यो वेति । एतेन सम्यग्दानविधिना दत्ताया एव कन्याया भार्यात्वं भवति नान्यथा तथा चोक्तं भारतेऽनुशासनपर्वणि-"पाणिग्रहणमंत्राणां निष्ठा स्यात्सप्तमे पदे । पाणिग्रहस्य भार्या स्याद्यस्य चाद्भिः प्रदीयते" इति । किं च-"बंधुभिः समनुज्ञाते मंत्रहोमौ प्रयोजयेत् । तथा सिद्ध्यंति ते मंत्रा नादत्तायाः कथंचन" इति च वाल्मीकीयायोध्याकाण्डेपि श्रीरामं प्रति सीतावाक्यम् । "इह लोके च पितृभिर्या स्त्री यस्य महाबल । अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेपि तस्य सा" इति । एतेन श्रीमनुना यदुक्तम् "अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते । इतरेषां तु वर्णानामितरेतरकाम्यया" इत्यत्राप्यन्यवर्णानां जलपूर्वकप्रदानस्य निषेधो न कृतः । किन्तु ब्राह्मणैरद्भिरेवान्यवर्णैस्त्वद्भिरन्यथा वेति । न ह्यत्रैवकारो द्विजाग्र्यपदसमभिव्याहृतोस्ति येन ब्राह्मणैरेवाद्भिः प्रदानमितरैर्नेत्यर्थो लभ्येत । तथा सति पंचमवेदश्रीमहाभारतसाक्षाद्वेदरूपश्रीमद्वाल्मीयवाक्याभ्यां 'यस्य चाद्भिः प्रदीयते' इति "या स्त्री यस्य महाबल । अद्भिर्दत्ता" इत्येवंरूपाभ्यां या यस्येति निर्देशेनागृहीतविप्रपदाभ्यां विरोधोऽवश्यं भविष्यतीति । किं च । "वाचा दत्ता तु या कन्या न दत्ता वारिणा च या । सा कन्या पितुरेव स्यात्" इति दिवोदासीयाशौचनिर्णयप्रकरणे मरीचिवाक्येपि विप्रपदानिर्देशात्सर्वेषां कन्यादानं जलदानैरेव शोभनमत एव लोके प्रवृत्तिरेषेति ॥ १५ ॥ "कामः स भूयात्" इत्यादित्रयस्यायमर्थः । तादृशीयं मां तपस्विनमपि प्रार्थयते तत एनां शुद्धभक्तां कथं त्यजेय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीम् ॥ विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः ॥ १७ ॥ तां प्रार्थयंतीं ललनाललाममसेवितश्रीचरणैरदृष्टाम् ॥ वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियाताम् ॥ १८ ॥ अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे ॥ अतो धर्मान्पारमहंस्यमुख्याञ्छुक्लप्रोक्तान्बहु मन्येऽविहिंस्रान् ॥ १९ ॥ यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वाऽवतिष्ठते ॥ प्रजापतीनां पतिरेष मह्यं परं प्रमाणं भगवाननंतः ॥ २० ॥

इत्यादिमंत्रप्रसिद्धः । स्वयांगकांत्यैव श्रियं भूषणादिशोभाम् ॥ १६ ॥ यां विलोक्य न्यपतत संमोहेन विमूढं व्याकुलं चेतो यस्य क्वणद्भ्यामंघ्रिभ्यां शोभा यस्याः ॥ ॥ १७ ॥ तां ललनानां ललामं भूषणभूताम् असेवितौ श्रियश्चरणौ यैस्तैरदृष्टां द्रष्टुमप्ययोग्याम् उच्चपदः उत्तानपादस्य अभियातां स्वयं प्राप्ताम् ॥ १८ ॥ भजिष्ये स्वी करिष्ये यावदपत्योत्पत्तिस्तावद्गार्हस्थ्यं ततः परं संन्यास इति । भाषाबंधः समयः तमेवाह । यावदात्मनो मम तेजो गर्भं बिभृयात् । यद्वा ममात्मनो देहाच्च्युतं तेजो वीर्यं बिभृयादिति । अतः परं पारमहंस्यं ज्ञानं तस्मिन्मुख्यान् शुक्लेन विष्णुना साक्षात्प्रकर्षेणोक्तानविहिंस्रान्हिंसारहितान् शमादीन्बहु यथा भवत्येवमनुष्ठेयान्मन्ये ॥ १९ ॥ ननु तव पितुः प्रजापतेराज्ञा सृष्टावेव न संन्यासे तत्राह । यत इति । संस्थास्यते च लयं यास्यति । वावेति एवार्थे । ऋणत्रयापाकरणानंतरं संन्यास एव मादृशानां भगव

मिति । शुद्धभक्तित्वं चास्याः "पितृभ्यां प्रस्थिते साध्वी" इत्यादिना वक्ष्यति । यः समाम्नायविधौ वेदविहितविवाहविधौ प्रसिद्धः ते हस्तं सौभगत्वाय सौभाग्यवृद्धयेऽहं गृह्णामि मया पत्या सह जरदष्टिर्वृद्धा यथा भवसीति श्रुतिपदार्थः । छांदसत्वाद्ध्रस्य भः । स्वयाऽसाधारणया क्षिपतीमिव श्रियमिति व्यतिरेकालंकारेण तस्याः सौन्दर्यसाद्गुण्यादिकं निरुपममुक्तम् । "व्यतिरेको विशेषश्चेदुपमानोपमेययोः ॥ शैला इवोन्नताः संतः किं तु प्रकृतिकोमलाः" इति तल्लक्षणात् । अस्यार्थः-उपमानापेक्षयोपमेयस्योपमेयापेक्षयोपमानस्य च विशेषे व्यतिरेकालंकारः । यथा शैला इवेत्यत्रोन्नतत्वेन साम्येपि कोमलत्वेन विशेषोपपादनादिति । एवमत्रापि शोभात्वेन साम्येप्यंगशोभाभूषणादिशोभयोरतिशयत्वेन विशेष इति ध्येयम् ॥ १६ ॥ तामेवाह स्वाभाविकीम् यामिति । नितरामपतत् संमोहेन तद्दर्शनजेन सौंदर्यानुभवपारवश्येन भावपूर्वकतदवलोकनमहापराधफलं सद्य एव प्राप्येत्यर्थः ॥ १७ ॥ ननु विलोक्येति क्त्वाप्रत्ययोक्तेर्विश्वावसुना सा दृष्टैवेति न हि न हीत्याह-असेवितश्रीति । मदभीष्टदेवश्रीमन्नारायणकान्तायाः श्रियाश्चरणौ मयैव सेवितावतो मयैव सा दृश्या भवेन्नान्येषां केषामपीति भावः। तेन चाकाशचारिण्यास्तस्याः कान्तिरेव विश्वावसुना विलोकिता न सेत्यायातम् । आभिजात्येत्युत्कर्षमाह-मनोस्तव वत्सां वात्सल्यपात्राम् । प्रियव्रतस्य तदा विरज्य गतत्वादुच्चपद इत्युक्तम् । "ललामं लांछने ध्वजे । श्रृंगे प्रधाने भूषायां रम्ये बालधिपुंड्रयोः । तुरंगे च प्रभावे" इति मेदिनी ॥ १८ ॥ यत इयं सर्वथा योग्याऽतो हेतोः समयः संकेतः "समयौ कालसंकेतौ" इति कोशात् । तमेव समयमेव आत्मनो ममेति द्विरुक्ति प्रतीतेराह-यद्वेति । अत्रापि च्युतपदापेक्षणाद्वास्तवार्थमाह-आत्मनः परमात्मनस्तेजः कपिलाख्यं मे मत्तो बिभृयात् । मे ममात्मनोभीष्टस्येति विश्वनाथः । अतः परं कपिलाख्यतेजोधारणोत्तरं पारमहंस्याज्ज्ञानादपि मुख्यान्निष्परिग्रहभक्तिधर्मानिति चक्रवर्त्ती।अविहिंस्रान्यश्वाद्यालंभविधुरान् ॥१९॥ अत्राक्षिपति-नन्विति।यद्वात्रार्थे मम तव च स्मृत्यारूढो भगवानेव प्रमाणमित्याह-यत इति । इत्यर्थ इति । भगवता मन्वादिरूपेण "ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्" इत्युक्तेरिति भावः । यद्वा । भगवान्वेदो "वेदो नारायणः साक्षात्" इति याम्योक्तेः । "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासीत्स प्रव्रजेत्" इत्यादिश्रुतिरूपो नारायणो मम पित्रादिभ्यः परं प्रमाणं तदाज्ञा च पित्राद्याज्ञातोपि परं प्रमाणमित्यर्थः । वस्तुतः शास्त्रस्यैव मुख्यं पितृत्वं रक्षणार्थकपाधातुनिष्पन्नपितृशब्दस्यै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ स उग्रधन्वन्नियदेवाबभाष आसीच्च तूष्णीमरविंदनाभम् ॥ धियोपगृह्णन्स्मितशोभितेन मुखेन चेतो लुलुभे देवहूत्याः ॥ २१ ॥ सोऽनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटम् ॥ तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः ॥२२॥ शतरूपा महाराज्ञी पारिबर्हान्महाधनान्॥ दंपत्योः पर्यदात्प्रीत्या भूषावासःपरिच्छदान् ॥२३॥ प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः॥उपगुह्य च बाहुभ्यामौत्कंठयोन्मथिताशयः॥२४॥ अशक्नुवंस्तद्विरहं मुंचन्बाष्पकला मुहुः ॥ आसिंचदम्ब वत्सेति नेत्रोदैर्दुहितुः शिखाः ॥ २५॥ आमंत्र्य तं मुनिवरमनुज्ञातः सहानुगः ॥ प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः ॥ २६ ॥ उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ॥ ऋषीणामुपशांतानां पश्यन्नाश्रमसंपदः ॥ २७ ॥

तोक इत्यर्थः ॥ २० ॥ हे उग्रधन्वन् विदुर लुलुभे मुनेर्मुखेन प्रलोभ्यते स्म यद्वा मुखेन प्रलोभितवान् ॥ २१ ॥ स मनुः अन्वनंतरं महिष्याश्च व्यवसितं निश्चयं ज्ञात्वा ॥ २२ ॥ पारिबर्हान्विवाहकाले प्रदेयान् भूषाः भूषणानि वासांसि परिच्छदान्गृहोपकरणानि च ॥ २३ ॥ प्रत्तां दत्ताम् । सदृक्षाय सदृशाय गता व्यथा चिंता यस्य औत्कंठयेनोन्मथितः क्षुभित आशयो यस्य॥२४॥तस्या विरहं सोढुं हे अंब हे वत्से इति ब्रुवन् । संधिरार्षः शिखाः केशानासिंचत्॥२५॥२६॥ ऋषिकुलहितायाः

वार्थस्यै हिकामुष्मिकहितोपदेष्टृत्वेन पालनस्य तत्रैव चरितार्थत्वात् । वक्ष्यत्यपि । ''शास्त्रस्य पितुरादेशं यो न वेद निवर्त्तकम् । कथं स पितुरादेशं गुणविस्रंभ्युपक्रमेत्'' इति नारदो दक्षोपाख्याने॥२०॥हे उग्रधन्वन्निति । यथा त्वं वीरो युद्धान्न निवर्त्तसे तथायमपि भगव द्धर्मादित्यभिप्रायः । मुखेन कर्त्रा । मुखदर्शनलोभितत्वान्मुखेनेत्युक्तिः । मुखस्य जडत्वेन साक्षात्कर्तृत्त्वं न युक्तं किं तु करणत्वमित्याह-यद्वेति । अरविंदनाभानुभवजातप्रसादरूपेण स्मितेन यच्छोभितं शोभाविशेषं प्राप्तं तेन मुखेन लुलुभेऽयमेव महाभागवतो मद्योग्यः पतिरिति लोभं चकारेति भावः । सस्मितेक्षणभाषणादियुतमुखत्वं कन्याकर्षणमंत्रोऽयं पत्युरन्यथेदानीमिवांगारलिप्तमिवोत्तरत्र किमुत वैमुख्या दिकं स्यादित्यतस्तादृशावसरे सस्मितेनैव भाव्यम् । यद्वा । देवहूत्या मुखेन स्मितशोभितेन चेतो लुलुभे । अर्थात्कर्दमस्य चेतस्तस्यां साकांक्षं बभूव । 'लुभ आकांक्षायां' धातुः तेन च हंतहंतातिविरक्ते कन्यार्पितेति मनुशतरूपयोरनुतापो माभूदिति व्यंजितम् ॥ २१ ॥ अनु अनंतरम् । दुहितुर्देवहूतेरयं मद्योग्यः पतिरित्येवंरूपं महिष्यास्तन्मातुरवश्यमस्मै तपस्विने दानेन मत्पुत्र्याः सुखं भावीत्ययमेवास्या अनुरूप इत्येवंरूपं च निश्चयम् । गुणाः शीलरूपादयस्तेषां गणेन परिवारेण युताय । तुल्यां गुणगणाढ्याम् । समयोगेन प्रहर्षितो जातानन्दः ॥२२॥ ''पारिबर्हं राजयोग्यद्रव्ये देयपरिच्छदे । वरवध्वोर्विवाहादौ सर्वतो हिंसितेऽपि च'' इति निरुक्तिः । ''सामग्र्यां परितश्छन्ने गृहोपक रणे गृहे । परिच्छदपरिच्छादौ मेघसंघातवस्त्रयोः'' इति च ॥ २३ ॥ औत्कंठ्येन प्रेमविशेषेण । सदृशाय गुणशीलादिभिस्तुल्याय ॥२४॥ ''अंबा मातरि पुत्र्यां च काशीराजहि मालयोः । रक्षितायां सुतायां च'' इति निरुक्तिः।सोढुमिति शेषः । तद्विरहं सुतावियोगम् ॥२५॥२६॥ आश्रमसंपदोऽग्निहोत्रादिसाधनस्रुक्स्रुवादिलक्षणा वेदध्वनिलक्षणा वा । ''ऋचो यजूंषि सामानि सा हि श्रीरमृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजापतिम् ॥ गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः ॥ २८ ॥ बार्हिष्मती नाम पुरी सर्वसंपत्समन्विता ॥ न्यपतन् यत्र रोमाणि यज्ञस्यांगं विधुन्वतः ॥ २९ ॥ कुशाः काशास्त एवासञ्शश्वद्धरितवर्चसः ॥ ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे ॥ ३० ॥ कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः ॥ अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवम् ॥ ३१ ॥ बर्हिष्मतीं नाम विभुर्यां निर्विश्य समावसत् ॥ तस्यां प्रविष्टो भवनं तापत्रयविनाशनम् ॥ सभार्यः सप्रजः कामान्बुभुजेऽन्याविरोधतः ॥ ३२ ॥ संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः ॥ प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन्हरेः कथाः ॥३३॥ निष्णातं योगमायासु मुनिं स्वायंभुवं मनुम् ॥ यदा भ्रंशयितुं भोगा न शेकुर्भगवत्परम् ॥३४॥

उभयोः सुरोधसोः शोभनतटयोः ॥ २७ ॥ अभिप्रेत्य ज्ञात्वा ब्रह्मावर्तादेशात्प्रजाः पतिं प्रत्युज्जग्मुः ॥ २८ ॥ कोऽसौ ब्रह्मावर्त इत्यपेक्षायामाह । यत्र बर्हिष्मती नाम पुरीति । साऽपि कुत्र यत्र यज्ञस्य यज्ञवराहस्य रोमाणि न्यपतन्निति यत्रेति सर्वत्र संबध्यते ॥ २९ ॥ बर्हिष्मतीनामनिरुक्तिं ब्रुवन्प्रसंगाद्देशस्य श्रैष्ठ्यमाह । द्वाभ्याम् । कुशाः काशाश्चासन् शश्वन्नित्यं हरितं वर्चो वर्णो येषाम् । यज्ञघ्नान् राक्षसादीन् पराभवं नीत्वा यज्ञं विष्णुम् ॥ ३० ॥ यज्ञपुरुषं विष्णुं यत इति यत्रायजत् भुवं स्थानं लब्धेति तृन्प्रत्ययांतम् । लब्धवान्सन्नित्यर्थः । यतो लब्धवांस्तं यज्ञपुरुषमिति वा एतेन स्वर्गादपि भूमिः श्रेष्ठा तत्रापि तत्स्थानं श्रेष्ठमित्युक्तं भवति ॥ ३१ ॥ प्रस्तुतमाह । यां बर्हिष्मतीं नाम पुरीं समावसत् पूर्वं यस्यामुषितस्तस्यां निर्विश्य भवनं प्रविष्टः सन्भोगान्बुभुजे इत्यन्वयः ॥ ३२ ॥ अन्येषां धर्मादीनामविरोधेन प्रत्यूषेषु उषःसु संगीयमाना सत्कीर्तिर्यस्य तथापि स्वयं हरेरेव कथाः शृण्वन्भोगान्बुभुजे ॥ ३३ ॥ योगमायासु ऐच्छिकभोगरचनासु

सताम्'' इत्यादिश्रुतेः ॥ २७ ॥ ''सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते'' इत्यादिपुराणात् । तं स्वायंभुवम् ॥ २८ ॥ सापि बर्हिष्मत्यपि॥२९॥आदिनाऽसुरग्रहः । यैः कुशैः ''अपहता असुरा रक्षांसि वेदिषदः'' इति श्रुतेः ॥ ३० ॥ बर्हिःशब्द उभयार्थकः । यद्वा । कुशकाशरूपं बर्हिर्हस्तमितं तदित्यर्थः । ''हस्तमात्रं भवेद्बर्हिरत ऊर्द्ध्वं तृणं स्मृतम् ।'' एतेनासनं हस्तमितकुशकाशनिर्मितं जपयज्ञादौ कार्यमिति ध्वनितम् । यद्वास्तीर्यास्तरणं परिस्तरणं विधाय होमवेलायामित्यर्थः । यत इति सप्तम्यर्थे तसिः । इत्यथ इति । तृन्प्रत्ययस्य शीलेऽर्थे विहितत्वाच्छीलार्थातीतार्थयोः ''तृन्'' इत्यादिसूत्रेषु समनिर्दिष्टत्वात्तृन्प्रत्ययस्याप्यतीतार्थकत्वमिति भावः । यत्तदोर्नित्यसम्बन्धमपेक्ष्याह–यतो लब्धवानिति । स्वर्गादपि भूमिः श्रेष्ठेति खटांगोपाख्याने स्फुटतरं स्वर्गाद्भूतलागमनेनावसीयते । तत्रापि भूमितलेऽपि तत्स्थानं भारतांतर्गतार्यावर्त्तमध्यवर्त्ति ब्रह्मावर्त्तमित्यर्थः ॥ ३१ ॥ अविरोधेन यथा कामभोगैर्धर्मार्थमोक्षा न नश्येयुस्तथा बुभुज इत्यर्थः ॥ ३२ ॥ सस्त्रीभिः साप्सरोभिः सुरगायकैर्गंधर्वादिभिः ॥ ३३ ॥ निष्णातं निपुणम् ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयातयामास्तस्यासन् यामाः स्वांतरयापनाः ॥ शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ॥ ३५ ॥ स एव स्वांतरं निन्ये युगानामेकसततिम् ॥ वासुदेवप्रसंगेन परिभूतगतित्रयः ॥ ३६ ॥ शारीरा मानसा दिव्या वैयासे ये च मानुषाः ॥ भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रयम् ॥ ३७ ॥ यः पृष्टो मुनिभिः प्राह धर्मान् नानाविधाञ्शुभान् ॥ नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ॥ ३८ ॥ एतत्तु आदिराजस्य मनोश्चरितमद्भुतम् ॥ वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ॥ ३९ ॥ इति श्रीमद्भागवते तृतीयस्कंधे सपत्नीकस्वायंभुवमनोः बर्हिष्मतीं प्रत्यागमनं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ मैत्रेय उवाच ॥ पितृभ्यां प्रस्थिते साध्वी पतिमिंगितकोविदा ॥ नित्यं पर्यचरत् प्रीत्या भवानीव भवं प्रभुम् ॥ १ ॥ विश्रंभेणात्मशौचेन गौरवेण दमेन च ॥ शुश्रूषया सौहृदेन वाचा मधुरया च भोः ॥२॥ विसृज्य कामं दंभं च द्वेषं लोभमघं मदम् ॥ अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ॥ ३ ॥

यद्यतः आभ्रंशयितुम् आ ईषदपि भ्रंशयितुमभिभवितुम् ॥ ३४ ॥ अतो यातो यामो यस्य पक्वस्यान्नस्य तद्गतसारं भवत्यतोऽन्यदपि गतसारं यातयाममुच्यते । अयातयामा अगतसारा आसन् । स्वांतरं तदीयं मन्वंतरं यापयंति ते यामाः कालावयवाः कुर्वतः स्वव्यापारैरुपनिबध्नतः ॥ ३५ ॥ परिभूतगतित्रयं जाग्रदादि सात्विकादि वा येन ॥ ३६ ॥ दिव्यास्त्वांतरिक्षाः मानुषाः शत्रुप्रभावाः भौतिकाः शीतोष्णादिप्रभावाः । वैयासे हे विदुर ॥ ३७ ॥ तस्य ज्ञानातिशयमाह । य इति । नृणां साधारणधर्मान् ॥ ३८ ॥ तस्य यदपत्यं देवहूतिस्तस्योदयं प्रभावम् ॥ ३९ ॥ इति तृतीये टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ त्रयोविंशे ततो योगनिर्मिते सर्वसंपदि ॥ विमाने कामगे चित्रा तयो रतिरुदीर्यते ॥ १ ॥ प्रस्थिते गमने कृते सति ॥ १ ॥ २ ॥ दंभं कपटम् । अघं निषिद्धाचरणं तेजीयांसमतितेजस्वि

यतः पूर्वमुक्तेरत इति । "जीर्णं च परिभुक्तं च यातयाममिदं द्वयम्" इत्यमरः ॥३५॥ स मनुः ॥३६॥ शारीरा व्याधयः । मानसाः कामादिजाः । शारीरा मानसा आध्यात्मिकाः । दिव्या आधिदैविकाः । मानुष भौतिकाश्चाधिभौतिकास्तत्तदवांतरभेदविवक्षया तु द्वयोर्भेदः ॥ ३७ ॥ तस्य मनोः । स यच्च स्मृतिं चकार तदप्यधिकारानुसारेण भक्तौ तान्प्रवेशयितुमेव । ननु भक्तानेवानुगृह्णातु किमन्यैरत आह सर्वभूतेति ॥ ३८ ॥ तस्य मनोः ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥ सर्वाः संपदो यस्मिंस्तत्तथा तास्मिन् । तयोर्देवहूतिकर्दमयोः । चित्राऽनेकप्रकारा ॥ १ ॥ पतिरेव स्त्रीणामभीष्टद इति । विश्वासो विस्रंभः । आत्मशौचं मनःशुद्धिः । शुश्रूषया हितश्रवणेच्छया सेवया वा । सौहृदेनानिमित्तस्नेहेन ॥ २ ॥ कामं विषयेच्छाम् । दंभ आत्मन्यविद्यमानमाहात्म्यप्रकटनम् । अघं व्यसनं वा । अतितेज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वै देवर्षिवर्यस्तां मानवीं समनुव्रताम् ॥ दैवाद्गरीयसः पत्युराशासानां महाशिषः ॥ ४ ॥ कालेन भूयसा क्षामां कर्शितां व्रतचर्यया ॥ प्रेमगद्गदया वाचा पीडितः कृपयाऽब्रवीत् ॥५॥ कर्दम उवाच ॥ तुष्टोऽहमद्य तव मानवि मानदायाः शुश्रूषया परमया परया च भक्त्या ॥ यो देहिनामयमतीव सुहृत् स्वदेहो नावेक्षितः समुचितः क्षपितुं मदर्थे ॥ ६ ॥ ये मे स्वधर्मनिरतस्य तपःसमाधिविद्यात्मयोगविजिता भगवत्प्रसादाः ॥ तानेव ते मदनुसेवनयाऽवरुद्धान् दृष्टिं प्रपश्य वितराम्यभयानशोकान् ॥ ७ ॥ अन्ये पुनर्भगवतो भ्रुव उद्विजृंभविभ्रंशितार्थरचनाः किमुरुक्रमस्य ॥ सिद्धाऽसि भुंक्ष्व विभवान्निजधर्मदोहान् दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ॥ ८ ॥ एवं ब्रुवाणमबलाऽखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासीत् ॥ संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडाऽवलोकविलसद्धसिताननाह ॥ ९ ॥

नम् ॥ ३ ॥ दैवाद्गरीयसो दैवादपि गुरुतरात् । दैवमप्यन्यथा कर्तुं समर्थादित्यर्थः ॥ ४ ॥ व्रतचर्यया कर्शितां तत्रापि भूयसा कालेनातिक्षामामित्यर्थः ॥ ५ ॥ सुहृत्प्रियः मदर्थे क्षपयितुं नावेक्षितो न गणितः समुचितः श्लाघ्योऽपि मत्सेवासक्त्योपेक्षित इत्यर्थः ॥ ६ ॥ तपश्च समाधिश्च विद्या च उपासना तासु य आत्मयोगश्चित्तैकाग्र्यं तेन विजिताः प्राप्ता भगवत्प्रसादा दिव्यभोगास्तानेव तेऽवरुद्धांस्त्वयापि वशीकृतान्प्रपश्य ते दिव्यां दृष्टिं वितरामि यया दृष्ट्या द्रक्ष्यसि ॥ ७ ॥ अन्ये पुनर्भोगाः किं न किमपि अतितुच्छा इत्यर्थः । तत्र हेतुः । भगवत उरुक्रमस्य या भ्रूस्तस्या उद्विजृंभो वक्रीभावस्तेन विभ्रंशिता अर्थरचना मनोरथा येषु निजधर्मेण पातिव्रत्येन दुह्यंत इति तथा तान् दुरधिगान्दुष्प्रापान् नृपा वयमिति या विक्रियास्तत्तद्भोगविकृतयस्ताभिः ॥ ८ ॥ अखिला योगमायाश्च विद्याश्च तत्तदुपासनास्तासु विचक्षणं निपुणमेवं ब्रुवाणं पतिमवेक्ष्य गताधिर्निश्चिंता जाता संप्रश्रयो विनयः प्रणयः प्रेम ताभ्यां विह्वला गद्गदा तया गिरा ईषद्व्रीडासहितो

स्त्रिनमतींद्रियकरणशक्तिमंतम् ॥ ३ ॥ ब्रह्मदेहोद्भवा मरीच्यादयो देवर्षयः । देवत्वे सति तपोविद्यादिनिष्ठत्वात् तेष्वपि वर्य्यः श्रेष्ठः कर्दमः मानवीं मनुपुत्रीं समनुव्रतां स्वानुकूलाम् । इत्यर्थ इति । तपोयोगबलेनाभवितव्यमपि भवितव्यं, भवितव्यं चाभवितव्यी कर्त्तुं समर्थादिति भावः ॥ ४ ॥ तत्रापि कार्शत्वेऽपि । इत्यर्थ इति । बहुकालव्रतादिनातिस्थूलोप्यतिकृशो भवतीति भावः ॥ ५ ॥ इत्यर्थ इति । तिष्ठतु नश्यतु वेत्येवं न गणितः इति भावः । पतिव्रताया युक्तं तवैतदित्याह मदर्थे मत्सेवार्थे एव क्षपितुं क्षीणी कर्त्तुं समुचित इति देहविशेषणम् ॥ ६ ॥ तस्मादेतन्निरुपाधिसेवा ऋणपरिशोधनार्थमन्याकिञ्चन पूजां दातुं नोपयुज्यते । किं त्वेतदेव परमदुर्लभं वस्त्वित्याह-य इति । पूर्वं स्वधर्मः । ततः प्रधानपूजा ततस्तपस्ततः समाधिरेकाग्रता ततो विद्यानुभवः तत आत्मना भगवता शुक्लेन योगः संयोगः तैर्निर्जिता इति धर्मादीनामपि तत्परत्वेन कृतिर्गम्यत इति संदर्भः । अत्र स्वधर्मतपोमिश्रभगवद्ध्यानादिभिर्ये भगवत्प्रसादास्तेभ्यो भोगमोक्षाववाधितावेव स्यातामित्यभिप्रायेणाह-अभयानशोकानिति ॥ ७ ॥ अन्ये स्वर्गादिलोकीयाः । इत्यर्थ इति । सभयत्वादिति भावः । तत्र तुच्छत्वे उरुक्रमस्य विष्णोः । ताभिर्हेतुभूताभिरित्यर्थः । यद्वा । नृपाणां विशिष्टाः क्रिया अश्वमेधादिरूपास्ताभिरित्यर्थः । विभवान् ऐश्वर्याणि । ''विभवो रैमोक्षैश्वर्ये'' इति मेदिनी । सिद्धासि कृतार्थासि । ''स्यात्सिद्धस्त्रिषु निष्पन्नः'' इति धरणिः । निजधर्मप्राप्तान् ॥ ८ ॥ एवमुपदिष्टाया देवहूत्या मनसि किमभूदिति चेत्तत्राह-एवमिति । अवेक्ष्य विचार्य मद्भर्त्ता मत्पारलौकिकीर्भोगमोक्षसंपदो ददाति न त्वैहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवहूतिरुवाच ॥ राद्धं बत द्विजवृषैतदमोघयोगमायाऽधिपे त्वयि विभो तदवैमि भर्तः ॥ यस्तेऽभ्यधायि समयः सकृदंगसंगो भूयाद्गरीयसि गुणः प्रसवः सतीनाम् ॥ १० ॥ तत्रेति कृत्यमुपशिक्ष यथोपदेशं येनैष मे कर्शितोऽतिरिरंसयात्मा ॥ सिध्येत ते कृतमनोभवधर्षिताया दीनस्तदीश भवनं सदृशं विचक्ष्व ॥११॥ मैत्रेय उवाच ॥ प्रियायाः प्रियमन्विच्छन्कर्दमो यागमास्थितः ॥ विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत् ॥१२॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितम् ॥ सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतम् ॥ १३ ॥

योऽवलोकस्तेन विलसद्विकसितं हासितं जातहासं चाननं यस्याः सा आह जगाद ॥ ९ ॥ बतेति हर्षे । द्विजवृष द्विजश्रेष्ठ हे भर्तस्त्वय्येतत्सर्वं राद्धं सिद्धमेव तदहमवैमि जानामि किं तु यस्ते त्वया समयोऽभिहितः स तावद्भूयात् सकृदिति गर्भसंभवमात्रपर्यंत इत्यर्थः । यस्माद्गरीयसि श्रेष्ठे भर्तरि हेतुभूते स्त्रीणां प्रसवो गुणो महान् लाभः । समासपाठे गरीयसि सतीनां यतो गुणविस्तारो भवति । अतः पुत्रोत्पत्त्या मम गुणविस्तारे जाते पश्चात्त्वदुक्तं सर्वं भवत्विति भावः ॥ १० ॥ अंगसंगार्थं च प्रथममिति कर्तव्यतां संपादयेत्याह । हे ईश तत्रांगसंगे इति कृत्यं साधनं यथोपदेशं कामशास्त्रानुसारेणोपशिक्ष संजानीहि उपकल्पयेत्यर्थः । येन साधनेनाभ्यंगभोजनपानादिनाऽतीव रंतुमिच्छया कर्शितो दीनश्च ममैष आत्मा देहः सिध्येत रतिसमर्थो भवेत् । कथंभूतायाः । ते त्वयैव कृतः क्षोभितो यो मनोभवस्तेन धर्षितायाः । तत्ततोऽनुरूपं भवनं विचक्ष्व वितर्कय विचारयेति यावत् ॥ ११ ॥ तर्हि तत्क्षणमेव आविरचीकरदाविर्भावयांबभूव ॥ १२ ॥ तदेव विशिनष्टि । सर्वकामदुघमिति नवभिः सर्वैश्च

कीरिति मनसि विमृशंती । संप्रश्रयो विनयः प्रणयः प्रेमविशेषस्तावेव विह्वलं यथा स्यात्तथा यांती कर्दमं प्रति गच्छंती या गीस्तया विह्वलयेति सोमपाशब्दवदिति चक्रवर्ती । पत्यौ प्रकटं संभोगप्रार्थनाया रसाभासत्वात् । तस्या देवहूतेश्चोत्तमांगनामुकुटमणित्वात् । राद्धमित्यादिपद्यद्वयस्य मुखेन वक्तुमशक्यत्वात् तद्वाचनार्थं लज्जा हसितम्रक्षितमवलोकमेव मुखं चकार । तत्र व्यज्यमानौ विनयप्रणयावेव गद्गदवाणीं चक्रतुः तथा यथा राद्धमित्यादिपद्यद्वयं स्पष्टमुच्यमानं बभूव । मुखेन तु सा तूष्णीमेव तदा तस्थावित्यर्थः ॥९॥ एतत्सर्वमपूर्वैश्वर्योत्पादनादि । तत्सर्वमहं जानामि त्वत्सेवाप्रभावेण । इत्यर्थ इति । यावत्तेजो बिभृयादात्मनो मे इत्युक्तः । संकेतस्संपादनीय इति भावः । प्रसवोऽपत्योत्पत्तिः । यदभावाद्वंध्येयमिति स्त्रीणां निंदैवेति भावः । समासपाठे गुणप्रसव इति पाठे । इति भाव इति । मत्पुत्रोत्पत्त्यनंतरं यत्त्वयाभीप्सितं संन्यासकरणं तदप्यृणत्रयस्य शोधितत्वाद्भवत्वित्यहमप्यनुजानामीति तात्पर्यम् । गुणविस्तारस्तु धन्यौ मातापितरौ ययोरीदृशः पुत्र इत्येवंलक्षणः कीर्त्तिप्रसर एवेत्यर्थः ॥ १० ॥ ननु तर्हि प्रविश पर्णशालां तत्ते वांछितं करवाणीति चेन्न तदीदृशमलिनशरीरेणैतादृशपर्णशालायां नैतादृशपरिच्छदेन सिद्ध्येदित्याह-तत्रेति । कामशास्त्रानुसारेण वात्स्यायनादिशास्त्रोपदेशानतिक्रमेण उपशिक्ष । स्वस्मादेव जानीहि कामक्रियायाः स्वैकगम्यत्वात् ज्ञात्वा च तत्तत्समुचितवस्तुजातं रसोद्दीपनादिकमभ्यंगभोजनपानादिकं च साधु संपादयेत्यर्थः । धर्षिताया अभिभूतायाः भवनं गृहम् । ईशेति । योगबलेन सर्वं कर्तुं समर्थोसीत्याह ॥ ११ ॥ तूष्णीं स्थितया देवहूत्या नेत्रेङ्गितेनैव यदुक्तं कर्दमोपि तूष्णीं स्थित एव तदैव तत्सर्वं संपादयामासैव । न तु प्रत्युत्तरं ददावित्याह प्रियाया इत्यादिना । योगं योगबलमास्थितः । विमानं सार्वभौमसंपद्युतं सप्तभूमिकं खगामि गृहम् । “सम्राट्संपद्युतं गेहं खगामि सप्तभूमिकम् ॥ विमानं प्रोच्यते पोताश्वामरवाहनेष्वपि” इति धरणिः ॥ १२ ॥ तदेव विमानमेव । दिव्यं सुंदरम् । “दिव्यं वली दिवि भवे लवंगामलकीफले” इति धरणिः । संघवृद्ध्योरुपचय इति च अत्रोपचयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिव्योपकरणोपेतं सर्वकालसुखावहम् ॥ पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतम् ॥ १४ ॥ स्रग्भिर्विचित्रमाल्याभिर्मंजुसिंजत्षडंघ्रिभिः ॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ॥ १५ ॥ उपर्युपरिविन्यस्तनिलयेषु पृथक्पृथक् ॥ क्षिप्तैः कशिपुभिः कांतं पर्यंकव्यजनासनैः ॥ १६ ॥ तत्रतत्र विनिक्षिप्तनानाशिल्पोपशोभितम् ॥ महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः ॥ १७ ॥ द्वास्सु विद्रुमदेहल्या भातं वज्रकपाटवत् ॥ शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रितम् ॥ १८ ॥ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः ॥ जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः ॥१९॥ हंसपारावतव्रातैस्तत्रतत्र निकूजितम् ॥ कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥ २० ॥ विहारस्थानविश्रामसंवेशप्रांगणाजिरैः ॥ यथोपजोषं रचितैर्विस्मापनमिवात्मनः ॥ २१ ॥

रत्नादिभिः समन्वितम् । सर्वर्धीनां सर्वसंपदां य उपचयस्तस्योदर्के उत्तरोत्तराभिवृद्धिर्यस्मिन् उपस्कृतं शोभितम् ॥ १३ ॥ उपकरणं परिकरः । पट्टिका अल्पविस्तारपट्टवस्त्रविशेषाः पताका विस्तृतास्ताभिः ॥ १४॥ विचित्राणि माल्यानि पुष्पाणि यासु मंजु यथा भवत्येवं सिंजंतः कूजंतः षडंघ्रयो यासु ताभिः स्रग्भिः ॥ १५॥ उपर्युपरिविरचितगृहेषु कशिपुभिः शय्याभिः कांतं कमनीयम् । पर्यंकादिभिश्च कांतम् ॥ १६ ॥ १७ ॥ द्वास्सु द्वारेषु विद्रुमनिर्मिता देहली उदुंबरस्तया भातं शोभितम् । वज्रखचितकपाटयुक्तम् ।इंद्रनीलमयेषु शिखरेषु प्रासादाग्रभागेषु ॥ १८ ॥ चक्षुष्मंत इव ये पद्मरागाग्र्यास्तैः । यद्वा । चक्षुष्मदिव कैः पद्मरागाग्र्यैः विचित्रैर्वैतानैर्वितानसमूहैः ॥ १९ ॥ कृत्रिमानपि हंसादीन्स्वान्सजातीयान्मन्यमानैस्तत्रतत्राधिरुह्याधिरुह्य निकूजितम् ॥ २० ॥ विहारस्थानं क्रीडाप्रदेशः विश्रामः शयनगृहम् । संवेश

संघः ॥ १३ ॥ परिकरः सामग्री सर्वकालेषु शीतोष्णवर्षासमयेषु तत्तत्कालोचितस्थानद्रव्यादिभिः सुखदम् । पट्टिकाल्पपताका । "पताका विस्तृतध्वजे पट्टिकाल्पध्वजे स्मृता" इति स्वामी ॥ १४ ॥ सिंजंतः शब्दं कुर्वंतः स्रग्भिर्मालाभिः । सिंजितशब्दो यद्यपि भूषणशब्देस्ति तथाप्यत्र भ्रमराणामपि मालाभूषणत्वादत्र न विरुद्ध इति । "दुकूलं क्षौममस्त्रियाम्" इत्यमरोक्तेर्दुकूलक्षौमयोरेकार्थत्वेप्यवांतरभेदो ज्ञेयः । यद्वा । दुकूलैः श्लक्ष्णैः क्षौमैः कौशेयैश्च । क्षुमी अतसी तज्जैः क्षौमैः । कोशो जंतुविशेषस्तज्जैः कौशेयैः । "दुकूलं श्लक्ष्णवस्त्रे क्षौमे च" इति मेदिनी ॥ १५ ॥ शय्या चोक्ता शिल्पिशास्त्रे । "चतुरशीतिपर्वाणि दैर्घ्येण परिकल्पयेत् । षष्ट्यंगुलानि विस्तारं मंचकं हस्तसंमितम् । एवं शय्या विधातव्या सर्वेषां शयनोचिता । मानाधिक्ये दरिद्रः स्यान्मानहीने सुखक्षयः ॥" वाराहे तु "एकद्रुमेण धन्या वृक्षद्वयनिर्मिता तु धन्यतरा । त्रिभिरात्मजवृद्धिकरा चतुर्भिरर्थो यशश्चाग्र्यम् ॥ पंचवनस्पतिरचिता पंचत्वं याति तत्र यः शेते । षट्सप्ताष्टतरूणां काष्ठैर्घटिता कुलं हंति" इति । काष्ठविचारोप्युक्तः । पर्यंकलक्षणमपि तत्रैवोक्तम् । "आयामः सप्ततालः स्याच्चतुस्तालश्च विस्तृतम् । द्वितालमुन्नतं ज्ञेयमिति पर्यंकलक्षणम् ॥" तालादिप्रमाणश्च । "अंगुष्ठादिकनिष्ठांतं भवेन्मानचतुष्टयम् । प्रादेशस्तालगोकर्णं वितस्तिस्तु यथाक्रमम्" इति प्रयोगरत्नात् । व्यजनं तालवृन्तम् । आसनमौर्णादि ॥ १६ ॥ तत्रतत्र तासुतासु भूमिकासु महामरकतो मणिभेदस्तद्राचितया स्थल्या प्रासादाधस्तनभूम्या । विद्रुमोपि मणिभेदः । वेदिश्चतुष्का ॥ १७ ॥ शिखरेषु सर्वोर्द्धप्रासादचूडासु । हेमकुंभैः स्वर्णकलशैः ॥ १८ ॥ पद्मरागो मणिभेदः । अचक्षुष्मतश्चक्षुष्मत्त्वोपमानं सौभाग्याय समासापेक्षयाऽसमस्तस्य झटिति बुद्ध्यारोहणादाह-यद्वेति ॥ १९ ॥ २० ॥ यद्वात्मनो विमानस्यापि विस्मापनमिवेत्युत्प्रेक्षामात्रमिति

१ पादः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईदृग्गृहं तत्पश्यंतीं नातिप्रीतेन चेतसा ॥ सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयम् ॥ २२ ॥ निमज्ज्यास्मिन्ह्रदे भीरु विमानमिदमारुह ॥ इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणाम् ॥ २३ ॥ सा तद्भर्तुः समादाय वचः कुवलयेक्षणा ॥ सरजं बिभ्रती वासो वेणीभूतांश्च मूर्धजान् ॥ २४ ॥ अंगं च मलपंकेन संछन्नं शबलस्तनम् ॥ आविवेश सरस्वत्याः सरः शिवजलाशयम् ॥२५॥ सांऽतःसरसि वेश्मस्था शतानि दश कन्यकाः ॥ सर्वाः किशोरवयसो ददर्शोत्पलगंधयः॥२६॥तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः ॥वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किम् ॥२७॥ स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीम् ॥ दुकूले निर्मले नूत्ने ददुरस्यै च मानद ॥ २८ ॥ भूषणानि पराध्यार्नि वरीयांसि द्युमंति च ॥ अन्नं सर्वगुणोपेतं पानं चैवामृतासवम् ॥ २९ ॥ अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरम् ॥ विरजं कृतस्वस्त्ययनं कन्याभिर्बहु मानितम् ॥ ॥ ३० ॥ स्नातं कृतशिरःस्नानं सर्वाभरणभूषितम् ॥ निष्कग्रीवं वलयिनं कूजत्कांचननूपुरम् ॥ ३१ ॥

उपभोगस्थानम् । प्रांगणं गृहाद्बहिः अजिरं प्राकाराद्बहिः यथोपजोषं यथासुखमात्मनः स्वस्य मायाविनोऽपि विस्मयजनकमिव ॥ २१ ॥ नातिप्रीतेन मलिनदेहत्वात्परिचारिकाभावाच्च ॥ २२ ॥ अस्मिन् ह्रदे बिंदुसरसि आरुहाधिरोह शुक्लेन विष्णुना कृतमानंदबिंदुनिपातनेन, तीर्थं यापकं प्रापकम् ॥ २३ ॥ समादायाहृत्य सरजं मलिनम् । वेणीभूताञ्जटिलान् ॥ २४ ॥ शबलौ विवर्णौ स्तनौ यस्मिंस्तत् । सरस्वत्याः शिवानि जलान्याशेरते यस्मिन् । शिवा जलाशया जलचरा यस्मिन्निति वा ॥ ॥ २५ ॥ सा तत्र निमग्ना सती विस्मयं ददर्श । तमाह । सांऽतःसरसीति दशभिः । उत्पलगंधयः कमलगंधीः ॥ २६ ॥ तुभ्यं तव कर्मकरीः परिचारिका वयमस्मानाज्ञापयेति स्त्रियः प्रोचुः ॥ २७ ॥ ततश्च स्नानेन स्नानयोग्यतैलादिना ॥ २८ ॥ पराध्यार्न्युत्कृष्टानि वरीयांसि तत्प्रियाणि द्युमंति दीप्तिमंति च । पानं पेयम् । अमृतं स्वादु आसवं मादकम् ॥ २९ ॥ आदर्शे स्वमात्मानं ददर्शेति शेषः । आत्मानं विशिनष्टि चतुर्भिः । कृतं स्वस्त्ययनं मंगलं यस्य पुंस्त्वमात्मशब्दसामानाधिकरण्यात् ॥ ३० ॥ विरजमित्यस्य प्रपंचः स्नातमुद्वर्त्य क्षालितम् । कृतं शिरःस्नानमभ्यंगो येन भूषितत्वमेवाह । निष्कं पदकं ग्रीवायां यस्य ॥ ३१ ॥

संदर्भः ॥ २१ ॥ २२ ॥ आशिषामभीप्सितानाम् ॥ २३ ॥ सा देवहूतिः ॥ २४ ॥ मलपंकेन दृढकिट्टेन । शिवानि कल्याणदानि । यद्वा । सरस्वत्याः सरस्तत्संबंधिकासारः तन्निकटमिति यावत् । सरस्वत्या परिश्रितम् । इत्युक्तेः ॥ २५ ॥ तत्र बिंदुसरसि तं विस्मयं विस्मापकम् । प्रथमा द्वितीयार्थेत्र । यद्वोत्तरश्लोकस्थस्त्रिय इत्यस्य विशेषणम् ॥ २६ ॥ परिचारिका दास्यः ॥ २७ ॥ परिचारिकत्वमाह-ततश्च प्रार्थनोत्तरं महतां राजकलत्राणामर्हेण सुगंधिद्रव्याद्युद्वर्त्तनपूर्वकेण मनस्विनीमुदारमनसम् । दुकूले धौतवस्त्रे । निर्मले शुक्लोत्तरीये इत्यर्थः ॥ २८ ॥ सर्वगुणोपेतं सर्वरसयुतम् ॥ २९ ॥ अथ वस्त्रालंकारधृत्युत्तरपानभोजनानंतरम् । आदर्शे मुकुरे । ''आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि'' इति मेदिनी ॥ ३० ॥ केचित्तु सुभगायाः शिरस्स्नानं काचित्कमाहुः । ''कुलस्त्री तु शिरःस्नानमुत्सवे पुण्यतर्थिके । तैलादिना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रोण्योरध्यस्तया कांच्या कांचन्या बहुरत्नया ॥ हारेण च महाऽर्हेण रुचकेन च भूषितम् ॥ ३२ ॥ सुदता सुभ्रुवा श्लक्ष्णस्निग्धापांगेन चक्षुषा ॥ पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम् ॥ ३३ ॥ यदा सस्मार ऋषभमृषीणां दयितं पतिम् ॥ तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः ॥ ३४ ॥ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा ॥ निशाम्य तद्योगगतिं संशयं प्रत्यपद्यत ॥ ३५ ॥ स तां कृतमलस्नानां विभ्राजंतीमपूर्ववत् ॥ आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीम् ॥ ३६ ॥ विद्याधरीसहस्रेण सेव्यमानां सुवाससम् ॥ जातभावो विमानं तदारोहयदमित्रहन् ॥ ३७ ॥ तस्मिन्नलुप्तमहिमा प्रिययाऽनुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने ॥ बभ्राज उत्कचकुमुद्गणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ॥ ३८ ॥ तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु ॥ सिद्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरं धनदवल्ललनावरूथी ॥ ३९ ॥

बहूनि रत्नानि यस्यां तया रुचकन मंगलद्रव्येण कुंकुमादिना तदुक्तं विश्वप्रकाशे । "रुचकं मंगलद्रव्ये ग्रीवाभरणदंतयोः" इति॥ ३२ ॥ सुदता सुभ्रुवा चक्षुषेति च जातावेकवचनानि एतैर्लसच्छोभमानं मुखं यस्य कथंभूतेन चक्षुषा श्लक्ष्णो मनोहरः स्निग्धोऽपांगो नेत्रप्रांतो यस्य पद्मकोशेन स्पर्धत इति पद्मकोशस्पृत्तेन ॥ ३३ ॥ दृष्ट्वा च यदा पतिं सस्मार तदा यत्रासौ तत्रैव स्वयमप्यास्ते॥ ३४ ॥ आत्मानं निशाम्य दृष्ट्वा तां च तस्य योगगतिं योगप्रभावं दृष्ट्वा संशयं किमिदमिति विस्मयम्॥ ३५ ॥ स मुनिर्विवाहात्प्राग्यदात्मनो रूपं तदेव पुनर्बिभ्रतीम् । संवीतौ प्रावृतौ रुचिरौ स्तनौ यस्याः पाठांतरे तु रूपविशेषणम् ॥ ३६ ॥ शोभने वाससी यस्याः । जातो भावः प्रेम यस्य । हे अमित्रहन् जितकाम ॥ ३७ ॥ तस्मिन्विमाने मुनिर्बभ्राजे । न लुप्तो महिमा स्वातंत्र्यं यस्य उपचीर्णं शुश्रूषितं वपुर्यस्य विकसितकुमुद्गणवानपीच्योऽतिसुंदरः पूर्णचन्द्र इव मुनिर्नभ इव विमानं तारा इव ताः स्त्रियः कुमुदानीव तासां नेत्राणीति ज्ञेयम् ॥ ३८ ॥ तेन विमानेन अष्टलोकपालानां विहारो यस्मिन्कुलाचलेंद्रे मेरौ तस्य द्रो

पैतृके च सर्वदा कंठसंप्लवा ॥ वारुणर्क्षे न कुत्रापि स्नायात्स्त्री विधवां विना ॥" इति स्मार्त्ताः । बिंदुसरोवरस्य श्रीभगवन्नेत्रांबुसंभूतत्वादतीव पुण्यतीर्थत्वमस्त्यतोत्र शिरःस्नानेपि न दोषः । स्वामिचरणैः सशिरःस्नानस्य काचित्कत्वाभिप्रायेणैव शिरःस्नानपदेनाभ्यंगो गृहीतः । पदकमलंकारभेदः । "वक्षोलंकरणे निष्कम्" इति मेदिनी । वलयाः करकंकणास्तद्युक्तम् । "पादालंकृतिनूपुरम्" इति । "न धार्यं हेम पादयोः" इति निषेधस्य मनुष्यविषयत्वेन तस्या देवर्षिशिरोमणिकर्दमपत्नीत्वात्सर्वदेवतोत्तमत्वमतो न दोषः ॥ ३१ ॥ रुचकं वृत्ताकारं कंठाभरणं वा आदिना मुक्तादिग्रहः । "मंगलानि समस्पृशत्" इत्यत्र श्रीदशमे मंगलद्रव्याणि वक्ष्यामः॥ ३२ ॥ "श्लक्ष्णं द्वये परिष्वंगे" इति निरुक्तिः ॥ ३३ ॥ सस्मार एतत्सर्वं पतिपार्श्वे एव शोभत इति यदा चिचिन्त । अत्रात्मानं पत्युरेकासने आसीनमेव विवेद न तु जलह्रदात्पद्व्यापारेण यान्तमिति तस्याद्भुतैव योगगतिः ॥ ३४ ॥ संशयं विस्मयं न तु कोटिद्वयावलंबिविकल्पं प्रागेव योगित्वनिश्चायकधर्मदर्शनादित्यर्थः । "सुशय्यायां विस्मये च विकल्पेपि च संशयः" इति निरुक्तिः ॥ ३५ ॥ मलनिवर्तकं स्नानं मलस्नानं मध्यपदलोपी समासः । कृतं मलस्नानं यया ताम् । पाठांतरे संवीतरुचिरस्तनमिति पाठे ॥ ३६ ॥ विद्याधरो देवयोनिभेदस्तस्य भार्यासहस्रेण दासीरूपेण ॥ ३७ ॥ ३८ ॥ कुलाचला मलयादयस्तेषामिन्द्रः । "वरूथो रथगुप्तौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैश्रंभके सुरसने नंदने पुष्पभद्रके ॥ मानसे चैत्ररथ्ये च स रेमे रामया रतः ॥४०॥ भ्राजिष्णुन विमानेन कामगेन महीयसा ॥ वैमानिकान त्यशेत चरँल्लोकान्यथाऽनिलः ॥ ४१ ॥ किं दुरापादनं तेषां पुंसामुद्दामचेतसाम् ॥ यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ॥ ४२ ॥ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान् स्वसंस्थया ॥ बह्वाश्चर्यं महायोगी स्वाश्रमाय न्यवर्तत ॥ ४३ ॥ विभज्य नवधाऽऽत्मानं मानवीं सुरतोत्सुकाम् ॥ रामां निरमयन् रेमे वर्षपूगान् मुहूर्तवत् ॥ ४४ ॥ तस्मिन् विमान उत्कृष्टां शय्यां रतिकरीं श्रिता ॥ न चाबुध्यत तं कालं पत्याऽपीच्येन संगता ॥ ४५ ॥ एवं योगानुभावेन दंपत्यो रममाणयोः ॥ शतं व्यतीयुः शरदः काममलालसयोर्मनाक् ॥ ४६ ॥ तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित् ॥ नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ॥ ४७ ॥

णीषु दरीषु अनंगस्य सखा यो मारुतः शीतसुगंधमंदानिलस्तेन सौभगं सौंदर्यं यासु सिद्धैर्नुतः स्तुतः सन् घुधुनिर्गंगा तस्याः पातेन शिवः स्वनो यासु तासु रेमे । ललनावरूथी स्त्रीरत्नसमूहवान् ॥ ३९ ॥ वैश्रंभकादिषु देवोद्यानेषु मानसे च सरसि रतः प्रीतः सन् ॥ ४० ॥ अत्यशेतातिक्रम्य स्थितः ॥ ४१ ॥ उद्दामचेतसां धीराणाम् । व्यसनं संसारस्तस्यात्ययो यस्मात् ॥ ४२ ॥ प्रेक्षयित्वा दर्शयित्वा गोलं मंडलम् । स्वसंस्थया द्वीपवर्षादिरचनया यावांस्तावंतम् । बहून्याश्चर्याणि यस्मिंस्तम् ॥ ४३ ॥ नवधा विभज्य नवप्रभेदमात्मानं कृत्वा ॥ ४४ ॥ ४५ ॥ शरदः संवत्सराः मनागीषदिव व्यतीयुः ॥ ४६ ॥ आत्मना स्वदेहार्धरूपेणातिप्रीत्या भावयन् तथा सति सदपत्यं भवेदिति नोधा नवधा सर्वसंकल्पविदिति तस्या बह्वपत्यसंकल्पं जानन्नित्यर्थः । विभुस्तथाकर्तुं समर्थश्च आत्मविदिति च तस्यामनासक्त

ना समूहेपि च कथ्यते'' इति ॥ ३९ ॥ स मुनिः ॥ ४० ॥ वैमानिकान्विमानगामिनो देवान् ॥ ४१ ॥ उद्गतं दाम बंधनं यस्मात्स तथा यद्वोत्कृष्टं दाम यस्य स तथा । दामोदरो नंदनंदनस्तत्र चेतो येषां कृष्णभक्तानामित्यर्थः । तदेव स्फुटयति—यैरिति । तीर्थपदो गंगादितीर्थाश्रयस्य ॥ ४२ ॥ स्वाश्रमाय स्वाश्रमं प्राप्तुम् ॥ ४३ ॥ आत्मानमात्मा शरीरं तेन तत्कारणं वीर्यं लक्ष्यते ॥ ४४ ॥ तं कालं भोगकालं न चाबुध्यत कियान्कालो गत इति नाज्ञासीत् । तत्र हेतुः पत्येति । अपीच्येनाल्पकालचरमधातुस्खलनवर्जितेन । 'पीच स्खलने' धातुः॥४५॥ इवोत्रार्थलभ्य इत्याह—ईषदिवेति ॥ ४६ ॥ तथा सति शुक्रशोणितसंगमे उभयोः सौमनस्ये सत्संततिर्वैपरीत्ये तु कुसंततिरित्युक्तं गारुडे—''दंपत्योः शुक्रसंयोगे सौमनस्ये सुसंततिः । वैमनस्ये तयोस्तत्र निश्चितं स्यात्कुसंततिः'' इति । इति भाव इति । अनासक्तत्वात्कामाल्पत्वं ततश्च वीर्याल्पत्वमतो देवहूत्याश्चासक्तिमत्त्वाच्छोणिताधिक्यात्स्त्रीप्रजाधिक्यमित्याशयः । प्रमाणं चात्राह—पुमान् इति । नवशब्दस्य नवादेशश्छांदसः । यद्वा सर्वेषां ब्रह्मणो मरीच्यादिप्रजापतीनां च सृष्टिकामनया यः संकल्पस्तद्वित् । तथात्मानं भगवन्तं निजोपदेशकं वेत्तीति तथा । 'या तु आत्मभूतं वीर्यं नवधा प्रसविष्यति । वीर्ये त्वदीये ऋषय आधास्यंत्यंजसात्मनः ॥ सहाहं स्वांशकलया त्वद्वीर्येण महामुने । तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहिताम् ॥'' इति हि तदुपदेशो यद्यपीत्थं तथापि तदसमाप्तौ प्रव्रजिष्यंतमिति ततोप्यप्रिमतत्प्रार्थनान्तरमाशंक्येति गम्यते । श्रीदेवहूत्यास्तु ''यावत्तेजो बिभृयादात्मनो मे'' इत्यत्रार्थविशेषो नावगत इति संदर्भः ॥ ४७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः ॥ सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ॥ ४८ ॥ पतिं सा प्रव्रजिष्यंतं तदालक्ष्योशती सती ॥ स्मयमाना विक्लवेन हृदयेन विदूयता ॥४९॥ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया ॥ उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ॥ ५०॥ देवहूतिरुवाच ॥ सर्वं तद्भगवान् मह्यमुपोवाह प्रतिश्रुतम् ॥ अथापि मे प्रपन्नाया अभयं दातुमर्हसि ॥५१॥ ब्रह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः ॥ कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनम् ॥ ५२ ॥ एतावताऽलं कालेन व्यतिक्रांतेन मे प्रभो ॥ इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ॥५३॥ इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः ॥ अजानंत्या परं भावं तथाऽप्यस्त्वभयाय मे ॥ ५४ ॥ संगो यः संसृतेर्हेतुरसत्सु विहितो धिया ॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ॥ ५५ ॥

त्वात्स्त्रियो जाता इति भावः । "पुमान्पुंसोऽधिके शुक्रे स्त्रीभवत्यधिके स्त्रियाः" इति स्मृतेः ॥ ४७ ॥ अतोऽनंतरमेव सद्य एकस्मिन्नेवाहनि चारूणि सर्वाण्यंगानि यासाम् ॥ ४८ ॥ प्रव्रजिष्यंतमालक्ष्य वितर्क्य स्मयमाना बहिरंतस्तु विप्लवेन व्याकुलेन विदूयता संतप्यमानेन हृदा उवाचेत्युत्तरेणान्वयः ॥ ४९ ॥ नखा एव मणयस्तैः श्रीः शोभा यस्य तेन पदा भुवं लिखंतीति दुरंतचिंतालक्षणम् ॥५०॥ उपोवाह संपादितवान् ! अभयमिति भाविनो दैन्यात्संसाराच्च यद्भयं तन्निवर्तयेत्यर्थः॥५१॥ तत्र दैन्यं निवेदयति । तुभ्यं तव दुहितृभिः स्वयमेवात्मनः समा योग्याः पतयो विमृग्या इति दैन्यं प्राप्तम् । संसारभयमुररीकृत्याह । कश्चिदिति । विशोकाय ज्ञानोपदेशाय स्त्रीभिर्ऋणानपाकरणात्कंचित्कालं त्वदवस्थानेन ब्रह्मवित्पुत्रः कश्चित्किं स्यादित्यर्थः ॥ ५२ ॥ विषयान् भुंक्ष्व किं ब्रह्मविद्ययेति चेत्तत्राह । एतावताऽलं पूर्यताम् । परित्यक्तः पर आत्मा यया तस्या मम ॥ ५३ ॥ स्वकृतमनुशोचंत्याह । इंद्रियार्थेष्विति चतुर्भिः । मे मया परं भावं त्वं ब्रह्मविदिति ॥ ५४ ॥ प्रसंगः कथमभयाया

अतो वीर्यसेकोत्तरमेव ता देवहूत्यात्मजाः आसन्निति शेषः ॥ ४८ ॥ तदा कन्याप्रसूत्युत्तरप्रव्रज्योद्योगावसरे वितर्क्यविषयोपरत्यादिना ज्ञात्वा उशती पुत्रमिच्छंती ॥ ४९ ॥ पदनखेन भूविलेखनमपारचिन्ताचिह्नम् । वात्स्यायनेन तु कामार्त्ताचिह्नमुक्तं, तदित्यतः पुत्रोत्पत्तये सुरताभिलाषिणी सेत्यर्थः । ललितां प्रार्थनागर्भितत्वेन मनोज्ञाम् ॥ ५० ॥ यत्प्रतिश्रुतं यावत्तेज इत्याद्युक्तं प्रतिज्ञातं तत्सर्वमिति । इत्यर्थ इति । 'अप्रजदुस्तरम्' इत्यग्रे वक्ष्यमाणत्वात् "अपुत्रस्य गतिर्नास्ति" इत्यन्योक्तेश्च । संसारभयनिवर्त्तकं पुत्रं तद्द्वारा ज्ञानं देहीति भावः ॥५१॥ तत्र द्वयोर्मध्ये स्त्रीणां कन्यावरान्वेषणार्थं पतिं विना पुरुषांतराग्रे दैन्यमेव कर्त्तव्यं भवतीत्यतस्तन्निवृत्तये स्वयमेवेति । किञ्च स्त्रीभिः कन्याभिः । पैतृकर्णानिवृत्तेः । "पुत्री प्रव्रजेत्" इति स्मरणाच्च । इत्यर्थ इति । मत्कृपया कतिचिद्दिनान्यत्रैव तिष्ठ पुत्रोत्पत्तिनिमित्तमिति भावः । शोकोऽज्ञानलक्षणः संसारस्तस्य तरणं "ज्ञानेनैव तरति शोकमात्मवित्" इति श्रुतेः ॥ ५२ ॥ एतावता कालेन यः इंद्रियार्थप्रसङ्गस्तेनालं यतः पर आत्मा परमेश्वरः । एतेनैतावान्कालो व्यर्थो गत इति भावः ॥ ५३ ॥ महाभागवतस्य तव क्षणिकेनापि संगेन लोका निस्तरंति मम त्वेतावद्वार्षिकेणापि यन्निस्तारो नाभूत्तत्र हेतुद्वयमित्येवं स्वकृतं शोचंत्याह—इंद्रियार्थेष्विति । परं भावं तवैवं वैराग्यं महाभागवतत्वं यत्क्षणमात्रेणैव सर्वं ममतास्पदं त्यक्तुं प्रवृत्तोसीति भावः । त्वत्परभावाज्ञानमिंद्रियार्थप्रसंगश्चेति हेतुद्वयं मदनिस्तारे यद्यप्यस्ति तथापि मय्यपराधिन्यां कृपां कुर्विति भावः ॥५४॥ अत्राक्षिपति—प्रसंग इति । किं च 'वस्तुशक्तिर्बुद्धिन्नापेक्षते' इति न्यायेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपादसेवायै जीवन्नपि मृतो हि सः ॥ ५६ ॥ साहं भगवतो नूनं वंचिता मायया दृढम् ॥ यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ॥ ५७ ॥ इति श्रीमद्भागवते तृतीयस्कंधे कर्दमस्य नवकन्योत्पत्तिवर्णनं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ मैत्रेय उवाच ॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दयालुः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥ १ ॥ ऋषिरुवाच ॥ मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते ॥ भगवांस्तेऽक्षरो गर्भमदूरात् संप्रपत्स्यते ॥ २ ॥ धृतव्रतासि भद्रं ते दमेन नियमेन च ॥ तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥ ३ ॥ स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः ॥ छेत्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ॥ ४ ॥ मैत्रेय उवाच ॥ देवहूत्यपि संदेशं गौरवेण प्रजापतेः ॥ सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुम् ॥ ५ ॥

स्तु तत्राह । संग इति अविद्याऽज्ञानेन ॥ ५५ ॥ स्वभावतः प्रवृत्तं यस्य कर्म धर्मार्थं न कल्पते धर्माभिमुखं न भवेत् । तत्रापि निष्कामधर्मद्वारा विरागाय न कल्पते । तद्द्वारा च तीर्थपदस्य हरेः सेवार्थं न पर्यवस्येदित्यर्थः ॥ ५६ ॥ न मुमुक्षेय मोक्तुमिच्छां न कृतवत्यस्मि ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे टीकायां कपिलोपाख्याने त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ चतुर्विंशे ततो जन्म कपिलस्याह तत्पितुः ॥ प्रव्रज्यां तमनुज्ञाप्य ऋणत्रयविमोक्षतः ॥ १ ॥ शालिनीं श्लाघ्याम् । शुक्लेनाभिव्याहृतं “सहाहं स्वांशकलया” इत्यादि ॥ १ ॥ इत्थं मा खिदः खेदं मा कार्षीः आत्मानं प्रत्यहं भाग्यहीनेति । अदूराच्छीघ्रम् ॥ २ ॥ दमेनेंद्रियसंयमेन नियमेन स्वधर्मेण तपांसि द्रविणदानानि च तैः ॥ ३ ॥ हृदयग्रंथिं चिज्जडात्मकमहंकारलक्षणं बंधं छेत्ता छेत्स्यति औदर्यः पुत्रः सन् ब्रह्म भावयत्युपदिशतीति तथा ॥ ४ ॥ श्रद्धाय विश्वस्य ॥ ५ ॥

भवद्विधसाधुसंगो विफलो भवितुं सर्वथैव नार्हतीत्याह–संग इति । स एव योऽसाधुषु कृतोऽनर्थहेतुः । अज्ञानेन सत्संगान्मद्भव्यं भविष्यत्यत एषां संगो विधेय इति ज्ञानं विनापि घुणाक्षरन्यायेनाकस्माज्जातोऽपि सत्संगो मोक्षपर्यवसायी भवतीत्याशयः ॥ ५५ ॥ तत्रापि धर्माभिमुखत्वेपि । तद्द्वारा च वैराग्यद्वारा च । इत्यर्थ इति । यस्य स्वाभाविको देहेंद्रियादिव्यापारः परंपरया भगवत्सेवायां न पर्यवस्येत्स जीवन्मृतो व्यर्थायुरिति भावः । “आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ । तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया” इत्युक्तेः “क्षिणोति देवो निमिषस्तु येषामायुर्वृथा”इत्याद्युक्तेश्च । यद्वा । तीर्थपदाः साधवः “तीर्थी कुर्वंति तीर्थानि” इत्युक्तेः । अत एवोक्तं “जीवञ्छवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु” इति ॥ ५६ ॥ अत्रोदाहरणमहमेवेत्याह–सेति । या यथाकथंचित्कृतभवत्संगापि साहमिति । मायया बंधकशक्त्या । यद्यतः बंधनात्संसारबंधात् ॥ ५७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ तत्पितुः कर्दमस्य । तं कपिलम् (१) ‘शाडृ श्लाघायां’ शाडनं शालः सोऽस्या अस्तीति शालिनी ताम् । निर्वेदं वैराग्यं वदितुं प्रतिपादयितुं शीलमस्या इति तथा ताम् । दुहितरं देवहूतिम् ॥१॥ निन्दितं स्त्रीणां पतिसेवात्यागादि तत्र विद्यते यस्यास्तत्संबुद्धौ तथा । अक्षरः पितृवीर्येण मातृयोनौ क्षरणहीनः प्राकृतदेहहीनः॥२॥ न त्वमन्या प्राकृतीवाकृतपुण्यासि किं तु जन्मांतरे कृतव्रतादिनियमास्यत इहापि जन्मनि ते भद्रं भविष्यति॥३॥४॥ प्रजापतेः कर्दमस्य। संदेशमुपदेशं, गौरवेण गुरुतया । कूटस्थं लयविक्षेपशून्यं, गुरुं वेदरूपेण सर्वेषां हितोपदेष्टारम्॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यां बहुतिथे काले भगवान्मधुसूदनः ॥ कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥ ६ ॥ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः ॥ गायंति तं स्म गंधर्वा नृत्यंत्यप्सरसो मुदा ॥७॥ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः ॥ प्रसेदुश्च दिशः सर्वा अंभांसि च मनांसि च ॥ ८॥ तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितम् ॥ स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ॥ ९ ॥ भगवंतं परब्रह्मसत्त्वेनांशेन शत्रुहन् ॥ तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥ १० ॥ सभाजयन् विशुद्धेन चेतसा तच्चिकीर्षितम् ॥ प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ॥११॥ ब्रह्मोवाच ॥ त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः ॥ यन्मे संजगृहे वाक्यं भवान् मानद मानयन् ॥ १२ ॥ एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः ॥ बाढमित्यनुमन्येत गौरवेण गुरोर्वचः ॥१३॥ इमा दुहितरः सभ्य तव वत्स सुमध्यमाः ॥ सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा ॥१४॥

बहुतिथे बहुतरे कालेऽतिक्रांते सति। कार्दमं कर्दमसंबंधि ॥ ६ ॥ घनाघना इत्येकं पदम्। वर्षंतो मेघाः गायंति स्म नृत्यंति स्म ॥ ७ ॥ अपवर्जिता मुक्ताः ॥८॥ परिश्रितं परिवेष्टितम् ॥ ९ ॥ आगत्य किं कृतवांस्तदाह। भगवंतमिति द्वाभ्याम्। तत्त्वानां संख्यानं यस्मिंस्तस्य सांख्यस्य विज्ञप्त्यै विशेषेण ज्ञापनाय भगवंतं जातं विद्वानजो ब्रह्मा स्वराट् स्वतःसिद्धज्ञानः ॥ ॥ १० ॥ तस्य चिकीर्षितं सभाजयन्पूजयन्प्रहृष्यमाणैरसुभिरिंद्रियैरुपलक्षितः कर्दमं चेदमभ्यधादिति द्वयोरन्वयः। चकाराद्देवहूतिं च ॥ ११ ॥ तत्र त्वयेति पंचभिः। कर्दमं प्रत्याह। अपचितिः पूजा कृता यद्यस्मात् निर्व्यलीकतो निष्कपटं सम्यग्गृहीतवान् ॥ १२ ॥ अनुमन्येतेति यदेतावत्येव ॥ १३ ॥ अनेकधा प्रभावैर्वंशैर्बृंहयिष्यंति वर्धयिष्यंति ॥ १४ ॥

तस्यां देवहूत्यां, बहूनां पूरणे बहुतिथे "बहुपूगगणसंघस्य तिथुक्" इति सूत्रम्। भगवच्छब्दस्य हरिशब्दवदनेकार्थत्वादाह—मधुसूदन इति। आपदं नाशं नयति प्रापयतीत्यापन्नः। कर्मणिडः। वीर्यमापन्नोऽपाकुर्वन्प्रादुर्भूतः। यथाग्निः काष्ठे स्थित एव मथनेन प्रादुर्भूतः काष्ठमपनयति तद्वत्। न हि वीर्येण तद्देहो जातस्तस्य चिद्घनत्वात्। तदुक्तं वैष्णवसिद्धांते—"नावत रेष्वपि हरेर्देहः शुक्रादिसंभवः। तथापि शुक्रसंस्थः सन्मातृदेहं प्रविश्य च ॥ विलाप्य शुक्रं तत्रैव केवलज्ञानरूपतः। उदेति भगवान्विष्णुः काले लोकं विडंबयन्" इति। काले दशमे मासि। तथा च पूर्वमंतर्यामिरूपेण स्थित एव पुत्ररूपेण दारुणि स्थित एवाग्निर्यथा प्रादुर्भवति तथा प्रादुर्बभूवेति भावः ॥६॥ तत्र साक्षान्नारायण एव रूपांतरेणाभिव्यक्तो लोकविलक्षणोत्सवदर्शनादिति। तं कालं विशिनष्टि—अवादयन्नित्यादिना। घनाघना जगर्जुरिति शेषः। गर्जंतो मेघा इव देवा इत्यर्थः। "वर्षुकाब्दा घनाघनाः" इत्यमरः ॥ ७ ॥ खेचरैरमरैः। मनांसि सताम् ॥ ८ ॥ तत्पूर्वत्र वर्णितम् ॥ ९ ॥ सत्त्वेन शुद्धसत्त्वेनांशेन न तु पूर्णस्वरूपेणेत्यर्थः। शत्रुहन्निति। त्वद्वत्सोप्यज्ञानशत्रुहरणार्थमेवावतीर्ण इत्यभिप्रायः ॥१०॥ तस्य हरेश्चिकीर्षितं सम्यग्ज्ञानसाधनशास्त्रनिर्माणलक्षणम्। इदं वक्ष्यमाणम् ॥ ११ ॥ तत्र द्वयोर्मध्ये। "भवेदपचितिः पूजाव्ययनिश्चयहानिषु" इति मेदिनी। तात—मानदेति संबुद्धिद्वयं स्नेहद्योतनार्थम् ॥ १२ ॥ पुत्रकैः सत्पुत्रैः। बाढमिति मयांगीकृतं यथाज्ञापयसि तथा करोमीति भावः। गौरवेण परमादरेण। गुरोः पितुः ॥ यदि तव पुत्रा अभविष्यंत तदाप्येवं सर्गो नावर्द्धयिष्यत ॥१३॥ यथाभिर्दुहितृभिः सर्गो विस्तारयिष्यते इत्याह—इमा इति। प्रभावैः प्रभावद्भिः प्रकर्षेण भावो भवनं येषां तैरिति वा। वत्सेति स्नेहोक्तिः। सभ्येति। पुत्रीणां योग्येभ्योर्पणात्सभासु तव कीर्त्तिर्भविष्यतीत्यभिप्रायः। मध्ये देहमध्ये भवा मध्यमा संततिः सुष्ठु मध्यमा यासां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि ॥ आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि ॥ १५ ॥ वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया ॥
भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने ॥ १६ ॥ ज्ञानविज्ञानयोगेन कर्मणामुद्धरञ्जटाः ॥ हिरण्यकेशः पद्माक्षः पद्ममुद्रापदांबुजः ॥ १७ ॥ एष
मानवि ते गर्भं प्रविष्टः कैटभार्दनः ॥ अविद्यासंशयग्रंथिं छित्त्वा गां विचरिष्यति ॥ १८ ॥ अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः ॥ लोके
कपिल इत्याख्यां गंता ते कीर्तिवर्धनः ॥ १९ ॥ मैत्रेय उवाच ॥ तावाश्वास्य जगत्स्रष्टा कुमारैः सहनारदः ॥ हंसो हंसेन यानेन त्रिधाम परमं
ययौ ॥२०॥ गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः ॥ यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः ॥ २१ ॥ मरीचये कलां प्रादादनसूयामथात्रये ॥
श्रद्धामंगिरसेऽयच्छत्पुलस्त्याय हविर्भुवम् ॥२२॥ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीम् ॥ ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुंधतीम् ॥२३॥

ऋषिमुख्येभ्यो मरीच्यादिभ्यः ॥१५॥ पुत्रस्तु साक्षादीश्वर इत्याह । वेदाहमिति । शेवधिं निधिं सर्वाभीष्टदम् ॥ १६ ॥ देवहूतिं प्रत्याह । त्रिभिः । ज्ञानं शास्त्रोक्तं विज्ञान
मपरोक्षं च ते एव योग उपायस्तेन कर्मणां जटा मूलानि वासना उद्धरन्नुत्पाटयिष्यन् पद्ममुद्रायुक्तं पदांबुजं यस्य ॥१७॥ हे मानवि अविद्या स्वरूपाज्ञानं संशया मिथ्याज्ञा
नानि तन्मयं तव हृदयग्रंथिम् ॥ १८ ॥ सुसंमतः सुपूजितः सन् गंता प्राप्स्यति ॥ १९ ॥ कुमारैः सहेति शेषः । सहनारदो नारदसहितश्च मरीच्यादीन्विवाहार्थमवस्थाप्य नैष्ठिकै
रेतैः पंचभिः सहितो हंसो ब्रह्मा ययौ । त्रिधाम तृतीयं धाम स्वर्गस्तस्य परां काष्ठां सत्यलोकम् ॥ २० ॥ शतधृतौ ब्रह्मणि ॥ २१ ॥ २२ ॥ युक्तां योग्याम् । अयच्छददात् ॥ २३ ॥

तास्सुमध्यमाः । इयमुक्तिर्ब्रह्मणो भाविज्ञानवत्त्वात् ॥ १४ ॥ यत एताः सर्गवृद्धियोग्या अतो हेतोः । ऋषयश्च ते मुख्या इति कर्मधारयस्तत्पुरुषानवकाशात् । तदनवकाशस्तु मरीच्यादिभिन्नर्ष्यंतराभावादेव । कन्या
शीलरुच्यनुसारेणैव योग्येभ्यो देहीत्याह—यथाशीलमिति । तेन तव लोके ख्यातिर्भविष्यतीत्याह—विस्तृणीहीति ॥ १५ ॥ स्वेषु भक्तेषु मायया कृपयेति वा । कं सुखं पाति रक्षतीति कपिर्ज्ञानं सर्वसम्पद्वत्त्वेप्यज्ञानिन
स्सुखादर्शनात् । तल्लाति ददाति मात्रे मुनिभ्यश्चेति कपिलस्तं तन्नामानम् । कपिलवर्णत्वाद्वा कपिलम् । कपिं लाति स्वीकरोति वर्णेनेति कपिल इति निरुक्तेः । शब्दार्णवे तु—"सितपीतहरिद्रक्तः कडारस्तृणवह्निवत् ॥
अयं तूद्रिक्तपीतांगः कपिलो गोविभूषणः ॥" इति सितरक्तहरितात्पपीताधिक्ये वर्णः कपिलवर्णः । वानररोमवद्वर्णो वेति केचित् । "मुनिं प्रशान्तं कपिलम्" इति श्रुतेः । मुन इति । त्वमप्येतज्ज्ञानास्येव तपोबलेने
त्याह ॥ १६ ॥ "जटा लग्नकचे मूले" इति मेदिनी । अयञ्च हिरण्यकेशादिस्वलक्षणलक्षित एव । "हिरण्यकेशो हिरण्यश्मश्रुः" इत्यादिश्रुतेः ॥ १७ ॥ कपिल इत्याख्याश्रवणाद्धुताशावतारनिरीश्वरसांख्यकर्त्तायमिति मा
संशयिष्ठा इत्याह—कैटभार्दनः कैटभाख्यदैत्यहंता विष्णुरेवायं न तु स इत्यर्थः । अविद्यादिकमन्येषां छित्त्वेति ज्ञेयम् । भगवत्प्रादुर्भावस्थानस्य शुद्धसत्त्वात्मकत्वात्तत्र न संभवति । उपदेशादिकं तूद्धत्रादिवल्लोकहितार्थमेवेति
संदर्भः ॥ १८ ॥ अयमिति सुसंमतः । अन्यस्तु सिद्धविशेषः कपिलो दर्शनकर्त्ता न सुष्ठु संमतः वेदविरुद्धानीश्वरवादात् । तथैव भाष्यकृद्भिः पाद्मं वचनमुदाहृतम्—"कपिलो वासुदेवाख्यस्तत्त्वं सांख्यं जगाद ह ।
ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च ॥ तथैवासुरये सर्ववेदार्थैरुपबृंहितम्" इति । "सर्ववेदविरुद्धं च कपिलोन्यो जगादह । सांख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितम् ॥" इति च । स च वह्न्यवतारोहीत्यन्यत्रोक्तम् ।
॥१९॥ तौ देवहूतिकर्दमौ । सहनारद इति 'वोपसर्जनस्य' इति वैकल्पिकत्वान्न सादेशः । "हंसः सर्वादिलोकेशशतधृतिकंजोद्भवाः । वेदास्यश्च शतानंदः" इत्यभिधानचिंतामणिः । हंसेन मानसौकसा पक्षिणा ॥२०॥
तेन शतधृतिना । यथोदितं वेदोक्तरीत्या । ततस्तेषां विश्वसृजाम् । चतुर्थ्यर्थे षष्ठी । तसिश्च षष्ठ्यर्थे । तेभ्यो विश्वसृग्भ्यः ॥ २१ ॥ वरान्नामतो निर्दिशति अथेति मंगले ॥ २२ ॥ पातिव्रत्यशक्तिर्ज्ञेयारुंधतीति तन्नाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथर्वणेऽददाच्छांतिं यया यज्ञो वितन्यते ॥ विप्रर्षभान् कृतोद्वाहान् सदारान् समलालयत् ॥ २४ ॥ ततस्त ऋषयः क्षत्तः कृतदारा निमंत्र्य तम्॥ प्रातिष्ठन् नंदिमापन्नाः स्वंस्वमाश्रममंडलम् ॥ २५ ॥ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् ॥ विविक्त उपसंगम्य प्रणम्य समभाषत ॥ २६ ॥ अहो पापच्यमानानां निरये स्वैरमंगलैः ॥ कालेन भूयसा नूनं प्रसीदंतीह देवताः ॥ २७ ॥ बहुजन्मविपक्केन सम्यग्योगसमाधिना ॥ द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदम् ॥ २८ ॥ स एव भगवानद्य हेलनं न गणय्य नः ॥ गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ॥ २९ ॥ स्वीयं वाक्यमृतं कर्तुमवतीर्णोऽसि मे गृहे ॥ चिकीर्षुर्भगवान्ज्ञानं भक्तानां मानवर्धनः ॥ ३० ॥ तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव ॥ यानि यानि च रोचंते स्वजनानामरूपिणः ॥ ३१ ॥ त्वां सूरिभिस्तत्त्वबुभुत्सयाऽद्धा सदाऽभिवादार्हणपादपीठम् ॥ ऐश्वर्यवैराग्ययशोऽवबोधवीर्यश्रिया पूर्णमहं प्रपद्ये ॥ ३२ ॥

वितन्यते समृद्धः क्रियते शांत्यधिष्ठात्रीं देवतामित्यर्थः । समलालयत्संतोषितवान् ॥ २४ ॥ निमंत्र्य पृष्ट्वा नंदिं हर्षं प्राप्ताः संतः ॥ २५ ॥ स च मुनिः त्रियुगं विष्णुम् । विविक्ते रहसि ॥ २६ ॥ पापच्यमानानां भृशं दह्यमानानाम् । निरये संसारे स्वीयैरमंगलैः पापैः ॥ २७ ॥ कुतः सर्वा देवताः प्रसन्ना इति ज्ञातम लभ्यलाभादित्याह । द्वाभ्याम् । बहुषु जन्मसु विपक्केन सुसिद्धेन सम्यग्योगो भक्तियोगस्तस्मिन्समाधिरैकाग्र्यं तेन शून्यागारेषु विविक्तस्थानेषु यस्य तव पदम् ॥ २८ ॥ हेलनमवज्ञां लाघवं न गणय्यागणयित्वा उचितमेव तवैतदित्याह । यस्त्वं स्वानां भक्तानां पक्षं पुष्णासीति तथा सः ॥ २९ ॥ एतत्प्रपंचयति द्वाभ्याम् । स्वयमेवावतीर्णोऽसि स्ववाक्यं "तव पुत्रो भविष्यामि" इति यत्तत्सत्यं कर्तुं ज्ञानं ज्ञानसाधनं सांख्यं च चिकीर्षुः सन् ॥ ३० ॥ यानि तवालौकिकानि चतुर्भुजादिरूपाणि तान्येव तेऽभिरूपाणि योग्यानि यानि च स्वजनानां रोचंते मनुष्यसरूपाणि तान्यपि ते रोचंत इत्यर्थः । अरूपिणः प्राकृतरूपरहितस्य ॥ ३१ ॥ अभिवादार्हं पादपीठं यस्य

हि पतीच्छारोधनाकरणात् ॥ २३ ॥ इत्यर्थ इति । शांतिं विना न कोपि यज्ञः सिध्यतीति भावः ॥ २४ ॥ ततो विवाहोत्तरम् । तं कर्दमम् ॥ २५ ॥ २६ ॥ इह जगति ॥ २७ ॥ पदं स्वरूपम् ॥ २८ ॥ ग्राम्याणां विषयलोलुपानाम् ॥ २९ ॥ स्वीयं वाक्यं "सहाहं स्वांशकलया" । इत्यादि रूपम् ॥ ३० ॥ इत्यर्थ इति । भक्ताभीष्टप्रदत्वादिति भावः । यानि न रोचंते तानि वस्तुतस्त्वदीयानि रूपाणि न भवंति किं तु मायिकान्येव । यथा रंतिदेवाय दर्शितानि "तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् । आत्मानं दर्शयामासुर्माया विष्णुविनिर्मिताः" इति भगवद्रूपस्याप्राकृतत्वेन कुत्सितवृषलादिरूपत्वासंभवात् । स्वजनारोचकत्वात्तानि न भगवद्रूपाणि योग्यानीति भावः ॥ ३१ ॥ भक्तजनरोचकस्याभिरूपस्य लक्षणं वदन्नेव श्रीकपिलदेवं विशिनष्टि—त्वामिति । ऐश्वर्यादीनां षण्णां भगशब्दवाच्यानां चिन्मयगुणानां पूर्तं महातडागं तेन भक्तानाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालम् ॥ आत्मानुभूत्याऽनुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये॥३३॥आस्माभिपृच्छेऽद्य पतिं प्रजानां त्वयाऽवतीर्णार्ण उताप्तकामः ॥ परिव्रजत्पदवीमास्थितोऽहं चरिष्ये त्वां हृदि युंजन् विशोकः ॥ ३४ ॥ श्रीभगवानुवाच ॥ मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके ॥ अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥ ३५ ॥

ऐश्वर्यादिभिः पूर्तं पूर्णम् ॥ ३२ ॥ ऐश्वर्यादिकं विवृण्वन्नाह । परं परमेश्वरम् । तत्र हेतुः । स्वच्छंदाः स्वाधीनाः शक्तयो यस्य ता एवाह । प्रधानं प्रकृतिरूपं पुरुषं तदधिष्ठातारं महांतं महत्तत्त्वरूपं कालं तेषां क्षोभकं त्रिवृतमहंकाररूपं लोकात्मकं तत्पालात्मकं च तदेवं मायया प्रधानादिरूपतामुक्त्वा चिच्छक्त्या निष्प्रपंचतामाह । आत्मानुभूत्या चिच्छक्त्याऽनुगतः स्वस्मिन् लीनः प्रपंचो यस्य तम् । कविं सर्वज्ञम् । प्रधानाद्याविर्भावलयसाक्षिणमित्यर्थः ॥ ३३ ॥ संन्यासानुज्ञां प्रार्थयते । आस्माभिपृच्छे यत्किंचिदभिपृच्छामीत्यर्थः । त्वया पुत्ररूपेणावतीर्णानि निवृत्तानि ऋणानि दैवादिरूपाणि यस्य स आप्तकामश्चाहं परिव्रजतां संन्यासिनां पदवीं मार्गमाश्रितः संस्त्वां युंजन् स्मरन्विचरिष्यामि ॥ ३४ ॥ अहं तावज्ज्ञानोपदेशायैव त्वद्गृहेऽवतीर्णः अतस्तव गृहे वसतोऽपि मुक्तिः सुलभैव । यद्यवश्यं गंतव्यमेवेत्याग्रहस्तथापि मामेवानुस्मरन् गच्छेत्याशयेनाह । मयेति षड्भिः । सत्यलौकिके वैदिके लौकिके च कृत्ये स्वोक्तस्य प्रामाण्यमभिदर्शयति यद्यस्मात्तुभ्यं तव पुत्रो भविष्यामीत्यवोचम् । अथ

भिवादनार्चनपरिचर्यादिविषयीभूतं षडैश्वर्यपूर्णं स्वरूपमेवाप्राकृतं तव रूपमिति द्योतितम् ॥ ३२ ॥ तत्र परमेश्वरत्वे । ता एव शक्तीरेव । तदधिष्ठतारं प्रकृत्यधिष्ठातारम् । तेषां महदादीनाम् । इत्यर्थ इति । वस्तुतः सर्पाविर्भावतिरोभावाधिष्टानरज्जुवत्प्रपञ्चास्पृष्टमित्याशयः । किञ्च । प्रपञ्चहेतुत्वादपि प्रपंचरुपत्वमाह—स्वच्छंदास्स्वाधीनाः शक्तयो मायाद्या यस्य तम् । त्वदिच्छयैव मायादिभिः शक्तिभिः सर्वप्रपञ्चस्य निर्मितत्वात् । ''यदनुग्रहतः संति न संति यदुपेक्षया'' इत्युक्तेः । मायादीनां तच्छक्तित्वेनाभिन्नत्वात्तवैवेदं सर्वं मायिकं रूपमनभिरूपमित्यर्थः ॥३३॥ स्माभीति पादपूरणार्थम् । आपृच्छे अद्य संप्रति संन्यासार्थमाज्ञां प्रार्थये त्वया हेतुनाऽवतीर्णं निवृत्तं 'प्रजाः सृज' इति पितुराज्ञारूपम् ऋणं यस्य सः । आप्तकामः पूर्णमनोरथश्चाहं परिव्रजतां संन्यासिनां पदवीमास्थितस्त्वां हृदि युंजन्स्मरन् चरिष्ये । यतस्ततः पर्यटिष्यामि । अत्र श्रीकर्दमेन मनस्येवं परामृष्टं शुक्लाभिधाने श्रीनारायणे मत्प्रभौ ममाजन्मत एव दास्यनिष्ठा वरीवर्त्ति संप्रति पुत्रीभूते चास्मिन्दुर्वारवात्सल्यमप्युपदेष्यत्येवेति दास्यवात्सल्ययोर्यौगपद्यं न रसावहम् । किञ्चायमीश्वरः स्वतंत्र एव मां शोकसमुद्रे निमज्याचिरादेव प्रव्रजिष्यत्यतः प्रथममहमेव किं न प्रव्रजामि । न च गृहेऽवतीर्णं प्रभुं विहाय गच्छतो ममात्रापराधो यतोऽस्माकं वैष्णवानां स च भजनीयः प्रभुः । खलु भजनाधीन इति भजनीयादपि भजने भूयानाग्रहः कर्तुमुचित इत्यस्य भजनमेवाप्स्यामिकं विविक्तारण्ये निष्प्रत्यूहः चिकीर्षामीति ॥ ३४ ॥ विश्वनाथस्तु—भो मुने त्वं मदभिप्रेतमेव चिकीर्षसि सर्वं त्यक्त्वा मद्भजनस्य मयैव कर्तव्यत्वेन प्रोक्तत्वादित्याह । हि निश्चितम् मया यत्प्रोक्तं ''सर्वधर्मान्परित्यज्य'' इत्यादि श्रीगीतोपनिषदि तदेव लोकस्य प्रमाणं क सत्यलौकिके सति सर्वोत्तमे लौकिके । अयमर्थः—लोके भवो लौकिकस्त्रिवर्गप्राप्तिलक्षणो धर्मस्तत्र मन्वादिभिरपि प्रोक्तं लोकस्य प्रमाणम् अलौकिकस्तद्भिन्नो मत्प्राप्तिलक्षणो यो धर्मस्तत्र सति सर्वोत्तमे भागवतधर्मे मया प्रोक्तमेव लोकस्य प्रमाणम् । यदुक्तम्—''ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये'' इति । अतस्त्वया साधु विचारितं यत्सर्वं त्यक्त्वा यासीति भावः । स्वोक्तस्य प्रामाण्यमभिदर्शयति । अथात एव मयाऽजनि यत्तुभ्यं तव पुत्रो भविष्यामीत्येवोक्तं तदृतं सत्यमेवेति । संदर्भस्तु—यन्मया प्रोक्तं तत्कृतमिति । अन्यथा मत्प्रोक्तस्य प्रामाण्यं व्यभिचरेदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतन्मे जन्म लोकेऽस्मिन्मुमुक्षूणां दुराशयात् ॥ प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ॥ ३६ ॥ एष आत्मपथोऽव्यक्तो नष्टः कालेन भूयसा ॥ तं प्रवर्तयितुं देहमिमं विद्धि मया भृतम् ॥ ३७ ॥ गच्छ कामं मयाऽऽपृष्टो मयि संन्यस्तकर्मणा ॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ॥ ३८ ॥ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयम् ॥ आत्मन्येवात्मना वीक्ष्य विशोकोऽभयमृच्छसि ॥ ३९ ॥ मात्र आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणाम् ॥ वितरिष्ये यया चासौ भयं चातितरिष्यति ॥ ४० ॥ मैत्रेय उवाच ॥ एवं समुदितस्तेन कपिलेन प्रजापतिः ॥ दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ॥ ४१ ॥ व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः ॥ निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ॥ ४२ ॥ मनो ब्रह्मणि युंजानो यत्तत्सदसतः परम् ॥ गुणावभासे विगुण एक भक्त्याऽनुभाविते ॥ ४३ ॥

अत एव तद्दत्तं सत्यं यथा भवति तथा मयाऽजनि जन्म स्वीकृतम् ॥ ३५ ॥ दुराशयाल्लिंगान्मुमुक्षूणां मुनीनामात्मदर्शने संमताय तत्त्वानां प्रसंख्यानाय विद्धीत्युत्तरस्यानुषंगः ॥ ३६ ॥ नन्वयमात्मज्ञानमार्गः पूर्वसिद्ध एव नेदानीमपूर्ववत्प्रवर्तनीयस्तत्राह । एष इति अव्यक्तः सूक्ष्मः ॥ ३७ ॥ कामं यथेच्छम् । आपृष्टोऽनुज्ञातः यद्वा यथा त्वं गंतुं मां पृष्टवांस्तथाऽत्रावस्थातुं मयाऽपि त्वमापृष्ट इत्यर्थः । मयि संन्यस्तेन समर्पितेन कर्मणा । "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति श्रुतेः ॥ ३८ ॥ ततश्च मां परमं परमात्मानमात्मनि स्वस्मिन्नात्मना मनसा अन्वीक्षमाणोऽभयं मोक्षं प्राप्स्यसि ॥ ३९ ॥ मात्रे देवहूत्यै शमनीमुन्मूलनीम् । भयं संसारमतिशयेन तरिष्यति परमानंदं प्राप्स्यतीति चकारार्थः ॥ ४० ॥ समुदितः सम्यगुक्तः सन् तं प्रदक्षिणीकृत्य ॥ ४१ ॥ मुनीनामिदं मौनं व्रतमहिंसालक्षणम् ॥ ४२ ॥ सदसतः

भावः । सति च प्रामाण्ये ममोपदेशमेव गृहाणेति भाव इत्याह ॥ ३९ ॥ एतत्त्वत्पुत्ररूपेण यत् । संमताय सम्यग्ज्ञातायाभिमताय ॥ ३६ ॥ अत्राशंकते नन्विति । ईश्वरे देहिदेहविभागाभावेपि बुद्धिर्हि भगवति अभेदेपि भेदं जनयतीति न्यायेन देहं मयाभृतमिति लोकरीत्यैवोक्तिः । "सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः । स्थितिसर्गनिरोधेषु गृहीता मायया विभोः" इतिवज्ज्ञेया ॥ ३७ ॥ आपृच्छतेरनुज्ञानार्थादर्शनादाह—यद्वेति । इत्यर्थ इति । कथं मया गच्छेति निष्ठुरं वक्तव्यमत्रावस्थितस्यापि तव वांछितं सेत्स्यत्येवेति भावः । यद्वाऽमृतत्वाय मरणराहित्याय भगवतो रामकृष्णादित्वेन जन्मवन्मत्पार्षदतां प्राप्तस्यापि तत्र मत्संगितया जन्म तु भविष्यत्येवेति भावः । अत्र प्रमाणम् । अविद्यया इति । अविद्याकार्यभूतेन ॥ ३८ ॥ ततश्चामृतार्थं मद्भजनात् । "केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्" इत्याद्युक्तप्रकारं मां परमात्मानमन्तर्यामिणं त्वदिष्टदैवं शुक्लं वीक्ष्य बुद्ध्वा विशोको विगताज्ञानः ॥ ३९ ॥ पुत्रस्य परमेश्वरत्वात् कलत्रस्य देवहूतेश्च कृते चिंता न कार्येत्याह—मात्र इति । भयं द्वैतम् । "द्वितीयाद्वै भयं भवति" इति श्रुतेः ॥४०॥ तं कपिलम् ॥ ४१ ॥ अग्नीनामात्मनि समारोपादनग्निस्त्यक्ताग्निहोत्रादिकर्मा । अनिकेतनो नियतनिकेतनरहितः ॥ ४२ ॥ यद्वा । यत्सदसतो भद्राभद्राद्वस्तुनः परं तस्मादतीतं तन्मनो ब्रह्मणि युंजानः । कीदृशे । गुणानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक्स्वदृक् ॥ प्रत्यक्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ॥ ४४ ॥ वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि ॥ परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ॥ ४५ ॥ आत्मानं सर्वभूतेषु भगवंतमवस्थितम् ॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥ ४६ ॥ इच्छाद्वेषविहीनेन सर्वत्र समचेतसा ॥ भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ॥ ४७ ॥ इति श्रीमद्भागवते तृतीयस्कंधे कापिलेये कपिलावतारवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

परं यत्तस्मिन् ब्रह्मणि गुणावभासके निर्गुणे एकभक्त्याऽव्यभिचारिण्या भक्त्याऽनुभाविते ऽपरोक्षीकृते ॥ ४३ ॥ अतो देहादिष्वहंकारादिरहितः अत एव निर्द्वंद्वः शीतोष्णाद्यनाकुलः समदृग्भेदाग्राहकः किन्तु स्वदृक् स्वमेव पश्यन् प्रत्यक् प्रवणा शांता विक्षेपरहिता धीर्यस्य ॥ ४४ ॥ तदेवंविधंकल्पितोपाधिनिवृत्तिमुक्त्वा परमेश्वरपदप्राप्तिमाह । वासुदेव इति त्रिभिः प्रतीचो जीवस्यात्मनि लब्ध आत्मा चित्तं येन यतो मुक्तं बंधनमज्ञानं यस्य ॥ ४५ ॥ लब्धात्मतामेवाह । आत्मानमिति ॥ ४६ ॥ तदेवं तेन भागवती गतिः प्राप्ता । पाठान्तरे स एव तां गतिं प्राप्त इति ॥ ४७ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥

सौंदर्यमाधुर्यैश्वर्यादिरूपाणामवभासो यत्र तस्मिन् । विगुणे विगतप्राकृतगुणे । अनुभाविते नेत्रादिसर्वेंद्रियगोचरतां प्रापिते ॥ ४३ ॥ यतो मनो ब्रह्मणि युंजानोऽयमतो हेतोः । आदिनेंद्रियादिग्रहः । अत एव देहाद्यहंकाररहितत्वादेव । प्रवणा तत्परा ॥ ४४ ॥ आत्मन्यंतर्यामिणि । लब्धात्मत्वे हेतुरूपं विशेषणमाह—यतो हेतोर्मुक्तमित्यादि । अत्र जीवगोस्वामिनस्तु—तदेवं ब्रह्मज्ञानमिश्रभक्तिसाधनवशेन ब्रह्मानुभवे जातेपि भक्तिसंस्कारबलेन लब्धप्रेमादेस्तदूर्ध्वमपि श्रीभगवदनुभवमाह—वासुदेव इति । प्रत्यगात्मनि सर्वेषामाश्रयभूते । परेण प्रेमलक्षणेन भक्तिभावेन तच्छक्त्यैव लब्धात्मानस्तदीयतात्मका अहंकारादयो येनेति । ब्रह्मज्ञानेन प्राकृताहंकारादिलयानंतमाविर्भूतान् प्रेमानंदात्मकशुद्धसत्त्वमयांल्लब्धवानित्यर्थः । ननु त एव प्रत्यावर्त्तेतां किं वा पूर्ववदमी अपि बंधहेतवो भवंतु नेत्याह—मुक्तबंधनः । 'अनावृत्तिः शब्दादि'ति न्यायात् ॥ ४५ ॥ ततश्च तस्य भगवत्साक्षात्कारोऽभूदित्याह—आत्मानं सर्वांतर्यामिणं तृतीयपुरुषं क्षीरोदशायिनमित्यर्थः । भगवंतं तमेव स्वेष्टदेवं शुक्लं चतुर्भुजमपश्यत् । तथात्मनि प्रकृत्यंतर्यामिणि प्रथमपुरुषे कारणार्णवशायीनि सर्वभूतानि तदीयरोमकूपगतशतकोटिब्रह्मांडस्थानि योगजनेत्रेणात्रैव स्थित्वाऽपश्यत् । तेन द्वितीयस्कंधोक्तात् क्रममुक्तायोगिनः सकाशादस्योत्कर्ष उक्तः । स हि ब्रह्मांडस्थसर्ववस्तु दिदृक्षुस्तत्रतत्र स्थूलदेहं त्यक्त्वा गच्छति । अयं त्वत्रैव स्थित्वा सर्वब्रह्मांडबहिःकारणार्णवशायिनं तद्रोमकूपेषु सर्वभूतान्यपि निष्काम एवापश्यत् । भगवत्यपि चेति । तमेवात्मानं स्वेष्टदेवं शुक्लं भगवंतमपश्यत् । तस्मिन्नपि सर्वभूतानि श्रीकृष्णे यशोदेवापश्यदित्यैश्वर्योपासके श्रीकर्दमे तादृगैश्वर्यदर्शनमुचितमेवेति ज्ञेयम् ॥ ४६ ॥ ततश्च साक्षादेव तत्प्राप्तिमाह—इच्छेति । तदेवं भागवती भगवत्प्राप्तिरूपा । चक्रवर्ती तु—भगवत्पार्षदत्वलक्षणेत्याह । हेयत्वादन्यत्रेच्छाद्वेषविहीनेन तस्मादेव हेतोः सर्वत्र समचेतसेति । तदुक्तम्—"नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥" इत्युक्तेः । यद्वा । मया लक्ष्म्या सह वर्तते इति सम इति सहस्रनामभाष्यात् । भगवच्चेतसेति पाठांतरे प्राप्तो भागवतीं गतिमिति पाठे स कर्दम एव तां गतिं प्राप्तः । अत्र भगवद्भक्तियोगेनेत्येव विशेष्यमिति । एवमेवोक्तं श्रीभगवदुपनिषत्सु । "बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च । शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ विविक्तसेवी लघ्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभतेतराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति । अत्र विशतिर्मिलनार्थे । यथा "दुर्योधनं परित्यज्य युधिष्ठिरं प्रविष्टवानयं राजा" इति । श्रीदशमे श्रीगोपैर्ब्रह्मसंपत्त्यनंतरमेव वैकुंठो दृष्ट इति स्वामिभिरेव व्याख्यातं च ॥ ४७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनक उवाच ॥ कपिलस्तत्त्वसंख्याता भगवानात्ममायया ॥ जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम् ॥ १ ॥ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनाम् ॥ विश्रुतौ श्रुतदेवस्य भूरि तृप्यंति मेऽसवः ॥ २ ॥ यद्यद्विधत्ते भगवान् स्वच्छंदात्माऽऽत्ममायया ॥ तानि मेश्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ॥ ३ ॥ सूत उवाच ॥ द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा ॥ प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः ॥ ४ ॥ मैत्रेय उवाच ॥ पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया ॥ तस्मिन्बिंदुसरेऽवात्सीद्भगवान्कपिलः किल ॥ ५ ॥ तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनम् ॥ स्वसुतं देवहूत्याऽऽह धातुः संस्मरती वचः ॥ ६ ॥

पंचविंशे जनन्या तु पृष्टो बंधविमोचनम् ।। आदावाह परं भक्तिलक्षणं कपिलः सुतः ॥ १ ॥ कपिलेनार्पिता मात्रे गूढभावनियंत्रिता ।। योगमाणिक्यमंजूषा स्फुटमुद्घाट्यतेऽधुना ॥ २ ॥ उक्तानुवादपूर्वकं कापिलं योगं पृच्छति कपिल इति त्रिभिः। तत्त्वानां संख्याता गणकः सांख्यप्रवर्तक इत्यर्थः । अत एव स्वयंजातः आत्मप्राप्तये आत्मतत्त्वज्ञापनाय ।। १ ॥ पुंसां मध्ये वर्ष्मणोवृद्धस्योत्तमस्येत्यर्थः सर्वयोगिनां मध्ये वरिम्णः वरस्य भावो वरिमा भविवृप्रधानोऽयं निर्देशः वरिष्ठस्येत्यर्थः । यद्वा वरीयस्त्वादित्यर्थः । विश्रुतौ कीर्तौ असव इंद्रियाणि भूर्यलं न तृप्यंति श्रुतेन श्रवणेन दीव्यति द्योतत इति तथा तस्य । यद्वा । भूरि बहुशः श्रुतो देवो येन तस्यापि मेऽसव इति संबंधः ॥ २ ।। स्वानां पुंसां छंदेनेच्छया आत्मा देहो यस्य स यद्यत्कर्म विधत्ते तानि कर्माणि कीर्तनार्हाण्यनुकीर्तय ।। ३ ॥ यथा त्वं मां प्रचोदयस्येवं प्रचोदितः सन् तथा तत्प्रश्नानुसारेण आन्वीक्षिक्यामात्मविद्यायाम् ।। ४ ॥ बिंदुसरे बिंदुसरसि ।। ५ ।। तत्त्वमार्गस्याग्रं पारं दर्शयतीति तथा तम् । "एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः"

(१)मंजूषा पेटी। योगो भक्तियोग एव माणिक्यं रत्नं तस्य मंजूषा । एकत्वं समासे जात्यपेक्षम्। उद्घाट्यते निर्यंत्रा क्रियते प्रकाश्यत इति यावत्(२)इत्यर्थ इति । तत्त्वगणनामात्रकर्त्ता न ग्राह्य इति भावः । यतो भगवानत एव हेतोः स्वयमजस्तदापि जात इति । "न जातोहं न जायेय न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः" इति स्मृतेः । आत्ममाययाऽतर्क्ययोगमायाशक्त्या जातः प्रादुर्भावित इति । 'जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः" इति भगवदुक्तेस्तजन्मनो मायिकत्वस्य व्याख्यातुमशक्यत्वात् । संदर्भस्तु—स्वयमजोपि आत्मनः स्वस्य भक्तविषया या माया कृपा तया साक्षाज्जातः प्रकटो बभूवेत्याह ॥१॥ इत्यर्थ इति । "वर्ष्म देहप्रमाणातिसुंदराकृतिषु स्मृतम्" इति मेदिन्युक्तेरतिसुंदराकारस्येति भावः । स्वामिचरणैर्वृद्धस्योत्तमस्येति यद्व्याख्यातं तदप्यतिसुंदराकारपुरुषस्योत्तमत्वमुत्तमस्य च वृद्धत्वं लोके प्रसिद्धमित्याशयेनैवेति ज्ञेयम् । पुंसां क्षीरोदशायिप्रभृतिपुरुषाणां योगिनां दत्तात्रेयादीनामिति विश्वनाथः । वर्ष्मवरिमशब्दयोर्वस्तुत एकार्थत्वेन पुनरुक्तिं मत्वाह। यद्वेति । इत्यर्थ इति । हेतौ पञ्चमीयमिति भावः । संभवत्वाद्योजनांतरमाह—यद्वेति । श्रोत्रमात्रावेशे वक्तव्येऽसवो न तृप्यंतीति बहुत्वं तु चक्षुरादीनामपि तद्वृत्त्यावेशत्वात् । यद्वा । श्रोत्रद्वारा तादृशभगवद्रूपादीनामपि स्फूर्तेः श्रोत्रस्यैव चक्षुरादिमयत्वं निर्दिष्टम् ॥ २ ॥ यद्वा । स्वच्छंदः स्वाधीनो न तु जीववत्कर्माधीन आत्मा देहो यस्य स तथा । "छंद आधीनयद्ययोः" इति कोशात् । आत्ममायया योगमायया न तु बहिरंगमायया । "जन्म कर्म च मे दिव्यम्" इत्याद्युक्तेः । यद्यदित्येकत्वेपि वीप्सया बाहुल्यात्तानीत्यनेन बहुवचनान्तेन सहान्वयः ॥ ३ ॥ प्रचोदयसि पृच्छसि मां यथा तथा विदुरेण पृष्टः ॥ ४ ॥ बिंदुसर इत्यदंतत्वं समासांतप्रत्ययेनार्षत्वेन वा । मातुः प्रियचिकीर्षयेत्यनेन कौमारोचितस्तनपानादिलीलापि ज्ञेया ॥ ५ ॥ तत्र देवहूतिरयमवसर इति मत्वा कपिलं वक्ति—तमिति आसीनमकर्माणमिति विशेषणद्वयं निश्चलबुद्धित्वमाह तदैव प्रश्नावसर इति । आसीनमित्यनेनैवाकर्मत्वे पुनस्तद्वचनं कंडूयादिनिषेधार्थम् । तेन च सच्चिदानंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवहूतिरुवाच ॥ निर्विण्णा नितरां भूमन्नसदिंद्रियतर्षणात् ॥ येन संभाव्यमानेन प्रपन्नांऽधं तमः प्रभो ॥७॥ तस्य त्वं तमसोंऽधस्य दुष्पारस्याद्य पारगम् ॥ सच्चक्षुर्जन्मनामते लब्धं मे त्वदनुग्रहात् ॥ ८ ॥ य आद्यो भगवान् पुंसामीश्वरो वै भवान्किल ॥ लोकस्य तमसांऽधस्य चक्षुः सूर्य इवोदितः ॥ ९ ॥ अथ मे देव संमोहमपाक्रष्टुं त्वमर्हसि ॥ योऽवग्रहोऽहंममेतीत्येतस्मिन्योजितस्त्वया ॥ १० ॥ तं त्वा गताऽहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम् ॥ जिज्ञासयाहं प्रकृतेः परस्य नमामि सद्धर्मविदां वरिष्ठम् ॥ ११ ॥ मैत्रेय उवाच ॥ इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्धनम् ॥ धियाऽभिनंद्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः ॥ १२ ॥ श्रीभगवानुवाच ॥ योगं आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे ॥ अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य च ॥ १३ ॥ तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे ॥ ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणम् ॥ १४ ॥

इत्यादि धातुर्वचः ॥ ६ ॥ असतामिंद्रियाणां तर्षणाद्विषयाभिलाषान्निर्विण्णा श्रांताऽस्मि येन संभाव्यमानेन पूर्यमाणेन ॥ ७ ॥ पारं गमयतीति पारगं त्वमेव श्रेष्ठं चक्षुर्मे मया लब्धम् । त्वदनुग्रहाज्जन्मनामंते भाव्ये सति ॥ ८ ॥ तत्प्रपंचयति । स भगवान् भवांश्चक्षुरूप उदितः सूर्यो यथा ॥ ९ ॥ अपाक्रष्टुमपनेतुम् । कोऽसौ संमोहस्तमाह । एतस्मिन्देहादौ त्वयैव योजितो योऽहंममेत्यवग्रह आग्रहः । द्वितीय इतिशब्दस्तत्कार्यरागादिग्रहणार्थः ॥ १० ॥ प्रकृतेः पुरुषस्य च जिज्ञासया त्वामहं शरणं गता सती नमामीत्यन्वयः । कुठारं छेत्तारम् ॥ ११ ॥ अपवर्गवर्धनं मोक्षे रतिजनकम् । ईषत्स्मितेन शोभितमाननं यस्य ॥ १२ ॥ आध्यात्मिक आत्मनिष्ठः

रूपत्वं ज्ञाप्यत इति । स्वसुतमिति । ऐश्वर्यदर्शनेपि स्नेहो व्यंजितः ॥ ६ ॥ अंधं तमस्तत्त्वाज्ञानं प्राप्ता । प्रभो इति । तस्य तमोऽपाकरणसामर्थ्यं द्योतयतीति ॥ ७ ॥ तस्य प्रकृतस्य ॥ ८ ॥ तत्सच्चक्षुष्ट्वं न केवलं ममैवापि तु सर्वस्येत्याह—लोकस्येति ॥ ९ ॥ अथात एव संमोहं मिथ्याज्ञानलक्षणं भ्रमम् ॥ १० ॥ त्वा त्वाम् । स्वेषां भक्तानां ये भृत्या वेतनेनापि भरणीयास्तेषामपि संसारतरोः कुठारं भक्तिकर्तृकच्छेदनानन्यसाधनम् । पुरुषः खलु को यः संसारी प्रकृतिश्च का यतोस्य संसार इति ज्ञातुमिच्छया न चात्र कश्चिदन्यः प्रष्टव्य इत्याह । सतां यो धर्मस्तादृशसंसारनिवर्त्तको भक्तिरूपस्तद्विदां मध्ये श्रेष्ठम् ॥ ११ ॥ श्लेषेण अपकृष्टवर्गस्य त्रिवर्गस्य वर्द्धनं छेदनं यत्तत् । आत्मा स एव सेव्यत्वेन विद्यते येषां तेषां सताम् । ईषत्स्मितेति । मम परमेश्वरस्य माता त्वं तव का संसारवार्ता तथापि त्वां लक्ष्यीकृत्य लोकानुद्धर्तुं किमप्युपदिशामीति भावः । संदर्भस्तु—पुंसां साधारणानामपवर्गवर्द्धनम् । अस्यै तु मद्भक्त्याख्यं परमं सुखमपि दास्यामीति स्मिततात्पर्यमित्याह ॥ १२ ॥ आत्मनिष्ठां जीवात्मनिष्ठः योगो निःश्रेयसार्थमुपायः । स च भक्तिर्ज्ञानं योगश्चेति त्रिविधो वक्तव्यः । तत्राभक्तिपक्षे निःश्रेयसमननुसंहितं फलं ज्ञेयम् । यत्र योगे सति दुःखस्य सांसारिकस्य उपरतिरुन्मूलनम् ॥ १३ ॥ ऋषीणामृषीन्नारदादीन् । सर्वाण्यंगानि नैपुण्यानि तदनुष्ठानचातुर्याणि च यत्र तत् ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेतः खल्वस्य बंधाय मुक्तये चात्मनो मतम् ॥ गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये ॥ १५ ॥ अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः ॥
वीतं यदा मनः शुद्धमदुःखमसुखं समम् ॥ १६ ॥ तदा पुरुष आत्मानं केवलं प्रकृतेः परम् ॥ निरंतरं स्वयंज्योतिराणिमानमखंडितम् ॥१७॥
ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना ॥ परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् ॥ १८ ॥ न युज्यमानया भक्त्या भगवत्यखिलात्मनि ॥
सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये ॥ १९ ॥ प्रसंगमजरं पाशमात्मनः कवयो विदुः ॥ स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥२०॥
तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ॥ अजातशत्रवः शांताः साधवः साधुभूषणाः ॥ २१ ॥ मय्यनन्येन भावेन भक्तिं कुर्वंति ये दृढाम् ॥
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः ॥२२॥ मदाश्रयाः कथा मृष्टाः शृण्वंति कथयंति च ॥ तपंति विविधास्तापा नैतान्मद्गतचेतसः ॥२३॥

यत्र यस्मिन् ॥१३॥ ॥१४॥ तत्र सर्वांगनैपुण्यं चित्तसंयमाधीनमिति दर्शयन्नाह । चेत इति । अस्यात्मनो जीवस्य गुणेषु विषयेषु पुंसि परमेश्वरे वाशब्दस्तुशब्दार्थे ॥ ॥१५॥ यथा च चित्तसंयमे पुरुषार्थसिद्धिस्तद्दर्शयति । अहमिति त्रिभिः । मलैर्वीतं विरहितं यदा शुद्धं मनो भवति । मनःशुद्धेर्ज्ञापकमाह । अदुःखमिति ॥१६॥ निरंतरं निर्भेदम् अणिमानं सूक्ष्मम् । अखंडितमपरिच्छिन्नम् ॥१७॥ हतौजसं क्षीणबलाम् ॥१८॥ मनःशुद्धौ च भक्तिरेवांतरंगसाधनमित्याह नेति ॥ १९ ॥ अस्य सर्वस्यापि सत्संगो मूलमित्याह । प्रसंगमिति । अपावृतं निरावरणम् ॥ २० ॥ साधूनां लक्षणमाह । तितिक्षव इति चतुर्भिः । साधवः शास्त्रानुवर्तिनः साधु सुशीलं तदेव भूषणं येषाम् ॥ २१ ॥ २२ ॥ एतानुक्तलक्षणान्भक्तान् तापा आध्यात्मिकादयो न तपंति न व्यथयंति कुतः मद्गतं चेतो येषां तान् ॥ २३ ॥

परमेश्वररतेः कारणं भक्तिरेव न ज्ञानं नापि योगो मोचकत्वेन केवला भक्तिरेव समुचितेति ज्ञेयम् ॥१५॥ ज्ञानवैराग्ययोश्च मोचकत्वं भक्तिसाहाय्येनैवेत्याह—अहमिति । कामादिमलराहित्यं च मनसः शमदमादिभिर्यमनियमादिभिश्च भवतीति ज्ञानयोगयोरंगानि सूचितानि अदुःखं स्यादिति शेषः॥१६॥ पुरुषो जीवः प्रकृतेरविद्यातः "सूक्ष्माणामप्यहं जीवः" इति भगवदुक्तेः । अखंडितं विषयवासनाभिरिति वा ॥१७॥ भक्तियुक्तेन चेति चकाराद्भक्तेस्तत्र साहाय्यमेव तद्विना ज्ञानस्य स्वीयफलसाधकत्वाशक्तेः । प्रकृतिं स्वाविद्यां क्ष णबलां स्वस्मिन्किंचिदपि कर्तुमशक्ताम् ॥ १८ ॥ त्रयाणां मध्ये केवला भक्तिरेव श्रेष्ठा सुखमयी परममंगला चेत्याह—नेति । भगवति भक्तिरेव युज्यते समुचिता भवतीत्यर्थः । योगिनामुपायवतां, ब्रह्मणि परमेश्वरे विषयीकृते, सिद्धिर्दास्यसख्यादिनिष्पत्तिस्तस्यै । यद्वा । ब्रह्मसिद्धये ब्रह्मावाप्तये स्वरूपानंदलाभायेति यावत् ॥१९॥ अस्य भक्तिज्ञानादेः प्रपंचस्य प्रसंगं प्रकृष्टसंगम् अत्यंतासक्तिमिति यावत् । स्त्रीपुत्रादिषु कृतमिति शेषः । आत्मनो जीवस्य अजरं विमोक्तुमशक्यम् । तदुक्तं गारुडे—"लोहदारुमयैः पाशैः पुमान् बद्धो विमुच्यते । पुत्रदारमयैः पाशैः पुमान् बद्धो न मुच्यते" इति । वक्ष्यति च सप्तमे प्रह्लादचरिते । "को गृहेषु पुमान्सक्तमात्मानमजितेंद्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम्" इत्यारभ्य 'क्रीडामृगो यन्निगडो विसर्गः' इत्यंतेन प्रबंधेन यः प्रसंगोऽजरोऽनर्थहेतुः स एवेत्यर्थः । मोक्षस्य सालोक्यादेः स्वरूपावाप्तिलक्षणस्य वा द्वारं प्रवेशमार्ग इत्यर्थः ॥ २० ॥ तटस्थलक्षणमाह । शांता अनुग्राः । साधवः सरलाः । साधून्भूषयंति मानयंति । यद्वा । साधव एव भूषणानि प्रियाः परिच्छदा वा येषां ते । अजा प्रकृतिस्तया तत्कार्यं देहो लक्ष्यते । अजयाऽतंति सातत्येन गच्छंतीत्यजाताः, स्थिते तिष्ठंति गते गच्छंतीति कामलोभादयस्तेषां शत्रवो नाशका अजातशत्रवः । यद्वाऽजां तनोतीत्यजातो दुःसंगस्तस्य शत्रवो वारकाः 'संतः संगस्य भेषजम् इत्युक्तेः ॥ २१ ॥ स्वरूपलक्षणमाह—मयीति । अन्यादिपदानां सदृशार्थग्राहकत्वात् । न विद्यतेऽन्योऽहमिवाराध्यो ब्रह्मरुद्रादिविषयो यस्य तेन भावेन दास्यसख्यादिना अत एवैकमात्रविषयित्वाद्दृढाम् । मत्कृते मत्प्राप्त्यर्थम् । 'सर्वधर्मान्परित्यज्य' इत्यादिमदुक्तेस्त्यक्तकर्माणः 'ये दारागारपुत्रादि'त्याद्युक्तेश्च त्यक्तस्वजनाद्याः॥२२॥ मृष्टाः शुद्धाः अमायिकीः । एतान् । भक्तान् तापा इति । एते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त एते साधवः साध्वि सर्वसंगविवर्जिताः ॥ संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते ॥ २४ ॥ सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः ॥ तज्जोषणादाश्वऽपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ २५ ॥ भक्त्या पुमाञ्जातविराग ऐंद्रियादृष्टश्रुतान्मद्रच नाऽनुचिंतया ॥ चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥ २६ ॥ असेवयाऽयं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन ॥ योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे ॥ २७ ॥ देवहूतिरुवाच ॥ काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा ॥ यया पदं ते निर्वाणमंजसाऽन्वाश्नवा अहम् ॥ २८ ॥ यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः ॥ कीदृशः कति चांगानि यतस्तत्त्वावबोधनम् ॥ ॥ २९ ॥ तदेतन्मे विजानीहि यथाऽहं मंदधीर्हरे ॥ सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् ॥ ३० ॥

ये तापैर्नाभिभूयंते तेसाधव इत्यर्थः ॥२४॥ सत्संगस्य भक्त्यंगतामुपपादयति । सतामिति । वीर्यस्य सम्यग्विद्वेदनं यासु ता वीर्यसंविदः हृत्कर्णयो रसायनाः सुखदाः तासां जोषणात्सेवनादपवर्गोऽविद्यानिवृत्तिर्वर्त्म यस्मिंस्तस्मिन्हरौ प्रथमं श्रद्धा ततो रतिस्ततो भक्तिरनुक्रमिष्यति क्रमेण भविष्यतीत्यर्थः ॥ २५ ॥ ततः किमत आह । भक्त्येति मम रचना या सृष्ट्यादिलीला तस्या अनुचिंतया या भक्तिस्तया ऐंद्रियात्सुखाज्जातविरागः सन् दृष्टश्रुतादैहिकामुष्मिकात् ततो यत्त उद्युक्तः संश्चित्तस्य ग्रहणे यतिष्यते ऋजुभिर्भक्तिप्रधानत्वादनायासैः ॥ २६ ॥ तदेवं प्रकृतेर्गुणानामसेवया ज्ञानादिभिश्चायं जीव इहैव देहे मामेवावरुंधे प्राप्नोति ॥ २७ ॥ काचिदिति का स्विदित्यर्थः । उचिता योग्या तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या । निर्वाणं मोक्षात्मकं तव पदं स्वरूपमन्वाश्नवै अनंतरमेव सर्वात्मना प्राप्स्यामि । अंजसात्विति पाठे अहं त्विति संबंधः ॥ २८ ॥ भगवद्बाणो यो भगवंतं लक्ष्यी करोतीत्यर्थः । यतो यस्माद्योगात् ॥ २९ ॥ विजानीहि विशेषेण ज्ञापय सुखमनायासेन ॥ ३० ॥

तापैर्नाभिभूयन्त इत्यर्थः । इति स्वयं संतापशून्यत्वे सति परसंतापापहारकाः साधव इति भावः ॥ २३ ॥ उपसंहरति त इति । 'त उक्तलक्षणाः सर्वसंगविवर्जिताः पुरुषार्थचतुष्टयासक्तिशून्याः ते तव संगेनासत्संगेन यो दोषो नरकावाप्तिहेतुस्तद्धरास्तन्नाशकाः । ''सत्संगतिः कथय किं न करोति पुंसाम्'' इत्याद्युक्तेः ॥ २४ ॥ साधुसंगत एव मनो भगवति रतिं वहतीत्यत्र क्रममाह । प्रकृष्टात्संगान्मम कथा भवंतीत्युक्तेरप्रकृष्टात्संगा द्भजनक्रियामात्रं न तु कथा इति । इत्यर्थ इति । रसायनत्वेन प्रथमं रुचिस्तत्रापि पतितोद्धरणादिचरितश्रवणेन श्रद्धा विश्वासः । ततो रतिभक्ती भक्तेः पूर्वापरावस्थे इति भावः ॥ २५ ॥ ततो भक्तेः ग्रहणे वशीकारे संप्रति मत्प्रवर्त्तयिष्यमाणैर्यतिष्यतेऽग्रे जनिष्यमाणः पुमानित्यर्थः । एतेन योग उक्तः ॥ २६ ॥ ज्ञानमाह । गुणानां विषयाणां हेयत्वविचारेण वैराग्येणैहिकामुष्मिकभोगजिहासया विजृंभितेन वर्द्धितेन योगेन मयि मनो निधानलक्षणेन मां प्रत्यगात्मानं तत्पदार्थमवरुन्धे त्वंपदार्थतादात्म्येन प्राप्नोति । इहैव प्रारब्धप्रतिबंधकाभावे सति । भक्त्येति भक्तिं विना भूतस्य ज्ञानस्य वैकल्यात् ॥ २७ ॥ तत्रापि उचितत्वेपि गोचरा ज्ञातुं कर्त्तुं च शक्या ॥ २८ ॥ यद्यपि त्वत्संमतायां भक्तावेव मम जिज्ञासा चिकीर्षा च तथापि । ''जिज्ञासुना निजमतं ज्ञेयं परमतं बुधैः'' इति नित्ययोगश्च ज्ञानं च मम जिज्ञास्यमित्याह—य इति । भगवति बाणस्तत्र क्षितः शर इव यो भगवंतं लक्ष्यीकरोतीत्यर्थः । निर्वाणार्थ इति विश्वनाथसंमतः पाठः । तेन तथैव व्याख्यातं मोक्षप्रयोजनक इति । विजयध्वजेन तु-हे निर्वाणात्मन्परमानंदमूर्त्ते इत्यमेव व्याख्यातम् । तत्त्वानामवबोधनं यतस्तत् ज्ञानञ्च ॥ २९ ॥ तदेतद्योगलक्षणं भक्तिलक्षणं, योषेति हेतुगर्भितं विशेषणम् । योषात्वाच्छास्त्रधारणसमर्थबुद्धिराहिताहामित्याह—मंदधीरिति । यथा दुर्बोधं दुर्ज्ञेयमपि योगादिकं सुखं यथा स्यात्तथा बुद्ध्येय जानीयां तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच॥विदित्वाऽर्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाऽभिजातः॥तत्त्वाम्नायं यत्प्रवदंति सांख्यं प्रोवाच वै भक्तिवितानयोगम्॥३१॥ श्रीभगवानुवाच ॥ देवानां गणलिंगानामानुश्रविककर्मणाम् ॥ सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ ३२ ॥ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥ जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ ३३ ॥

इत्थं मातुरर्थं प्रयोजनं विदित्वा । जातस्नेहत्वे हेतुः । यत्र यस्यां तन्वा देहेनाविर्भूतः तत्त्वान्याम्नायंतेऽनुक्रम्यंते यस्मिन् । किं तत्। यत्सांख्यं प्रवदंति तत्प्रोवाच भक्तिवितानं च योगं च ॥ ३१ ॥ काचित्त्वय्युचिता भक्तिरिति पृष्टामुत्तमां भक्तिं लक्षयति गुणा विषया लिंग्यंते ज्ञायंते यैस्तेषां देवानां द्योतनात्मकानामिंद्रियाणां तदधिष्ठातॄणां वा सत्त्वे सत्त्वमूर्तौ हरावेव या वृत्तिः सा भक्तिः सिद्धेर्मुक्तेरपि गरीयसीत्युत्तरेणान्वयः । कथंभूता । अनिमित्ता निष्कामा स्वाभाविक्ययत्नसिद्धा । तेषामेवंविधवृत्तौ हेतुमाह । गुरो रुच्चारणमनुश्रूयत इत्यनुश्रवो वेदस्तद्विहितमानुश्रविकं तदेव कर्म येषाम् । अत एवैकमेकरूपमविकृतं मनो यस्य पुंसः शुद्धसत्त्वस्येत्यर्थः ॥ ३२ ॥ मुक्तिश्च प्रासंगिकी

कथयेति भावः ॥ ३० ॥ भक्तेर्वितानो विस्तारो यत्र तं भक्तियोगं योगमष्टांगश्च ॥ ३१ ॥ इत्यर्थ इति । विकृतिस्तु रजस्तमोभ्यामेव भवति तद्रहितत्वाच्छुद्धांतःकरणस्येत्यर्थः एवकारेण देवतांतरनिरासः । एकमेव स्वरूपमेव । सेवाबुद्धिमयत्वेन त्वद्रूपनामाद्युपादित्सु न तु योगिनामिवायत्यां तज्जिहासु मनो यस्य तस्य पुंसः । तथैकस्मिन्भजने एव मनो यस्य न तु ज्ञानकर्मादिषु तस्य पुंसः गुणाः सत्त्वादयो विषया लिंग्यंते ज्ञाप्यंते यैस्तेषां देवानामिंद्रियाधिष्ठातॄणां सद्विषयत्वाद्दीव्यतां क्रीडतामिंद्रियाणां सत्त्वे हरावेव या वृत्तिस्तदीयशब्दादिग्रहणरूपा व्यावृत्तिरनिमित्ता निष्कामा भागवती भक्तिरित्यन्वयः । अत्र सत्त्व एवैकमनसः सत्त्व एवेंद्रियाणां वृत्तिरिति काकाक्षिगोलकन्यायेनोभयत्रान्वितम् । अत्र सत्त्व इत्यनेन सत्त्वगुणवति ब्रह्मरुद्रादाविति न शंक्यं भागवतीत्यनेन तद्व्यावृत्तेः । यद्वा । सतां भावः सत्त्वं वैष्णवत्वं वैष्णवो भवेयमिति तत्र मनसः वैष्णवत्व एवेंद्रियाणां वृत्तिः सा भक्तिः । न च स्वच्छंदेनैव प्रवर्त्तमानानां तेषां वृत्तिर्भक्तिः । किं तु श्रीगुरूपदिष्टमंत्रोचिताचरणवतामित्याह । गुरोरुच्चारणमनुश्रूयते इत्यनुश्रवो मंत्रस्तद्विहितमानुश्रविकं तदेव कर्म नित्यकृत्यं येषां तेषाम् । किञ्च । ''उत्सर्गान्मलमूत्रादेश्चित्तस्वास्थ्यं यतो भवेत् । अतः पायुरुपस्थश्च तदाराधनसाधनम् ॥''इति विष्णुरहस्योक्तेः । पायूपस्थयोरपि वृत्तिर्भक्तिसंबंधेन भक्तिरिति । या तु तेषामिंद्रियाणां तथाभूतानामेव स्वाभाविकी वृत्तिः । सा सिद्धेर्मुक्तेरपि गरीयसी श्रेष्ठतरेत्यस्वाभाविक्यपि वृत्तिर्मुक्तेर्गुरुः श्रेष्ठेत्यर्थो लभ्यते । स्वाभाविकी वृत्तिश्च द्विविधा । कदाचिच्छास्त्रशासनेनैव श्रीगुरूपदिष्टशुद्धभक्तौ प्रवृत्तिमतो भजनाभ्यासपौनःपुन्येन निष्ठा रुच्यासक्तिभूमिकाधिरूढस्येंद्रियाणां वृत्तिर्हरौ स्वाभाविकी भवति । यथा प्राकृतलोकानां पतिपुत्रादिषु कदाचिच्च प्राचीनार्वाचीनतादृशमहत्संगकृपाजनितविलक्षणसंस्कारवशेन गुरूपदेशात्पूर्वमनंतरमेव वा शास्त्रशासनं विनैव स्वभावत एवेंद्रियाणां भक्तिशास्त्रोक्ताचरणवत्येव या हरौ वृत्तिः सापि स्वाभाविकी ज्ञेया पूर्वस्या वैधभक्तेः प्रमाणेनैवोत्कर्ष उदाहरणञ्च नैकात्मतामित्यादिपद्यचतुष्टयं ज्ञेयम् ॥ ३२ ॥ परस्या वैराग्यानुगायास्तु जात्यैवोत्कर्ष उदाहरणञ्च ''न कर्हिचित्'' इत्यादिपद्यम् । अस्वाभाविक्यास्तु स्वाभाविकीभ्यां सकाशात्प्रमाणेन जात्या च निष्कर्षः उदाहरणं च ''इमं लोकं तथैवामुम्'' इत्यादि पद्यद्वयम् । अस्या द्विविधाया अपि भक्तेर्निष्कामत्वादननुसंहितं फलं सैव भक्तिरननुसंहितं फलं च मोक्षस्तमाह—जरयतीति या भक्तिः कोशं लिंगशरीरं जरयति क्षपयति । किञ्च । ज्ञानहेतुकान्मोक्षादस्य मोक्षस्य दृष्टान्तेन वैलक्षण्यमाह—निगीर्णं भुक्तमन्नादिकमनलो जाठरो यथा जरयतीति स हि जाठरानलो देहपुष्टयान्यथानुपपत्तेर्भुक्तस्यान्नादेरसारांशमेव जरयति न तु सारांशं प्राणेंद्रियादीनि सप्तधातूंश्च पुष्यति । येनैवौजःसहोबलवान्देहो भवति तथैव भक्तिर्मायिकानेव शब्दादींस्तत्करणकर्त्रादींश्चासारांशानेव जरयति न तु सारांशान्भगवत्संबंधिनः शब्दादीनप्राकृतांस्तदिन्द्रियांदींश्च जरयति ''चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्'' इत्यादिश्रुतेः । यैरेव

॥ ९१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैकात्मतां मे स्पृहयंति केचिन्मत्पादसेवाऽभिरता मदीहाः ॥ येऽन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ॥ ३४ ॥ पश्यंति ते मे रुचिराण्यंब संतः प्रसन्नवक्त्रारुणलोचनानि ॥ रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ॥ ३५ ॥

भवत्येवेत्याह । या भक्तिः कोशं लिंगशरीरं जरयति क्षपयति । स्वप्रयत्नं विनैव सिद्धौ दृष्टांतः । निगीर्णं भुक्तमन्नमनलो जाठरो यथा जरयतीति ॥ ३३ ॥ भक्तेर्गरिष्ठत्वमेवोपपादयति । नैकात्मतामिति पंचभिः । एकात्मतां सायुज्यमोक्षं मदर्थमीहा क्रिया येषाम् । प्रसज्ज्यासक्तिं कृत्वा पौरुषाणि वीर्याणि ॥ ३४ ॥ प्रसन्नानि वक्त्राण्य

भक्तानां देहः सिद्धो भवति अत एव मायिकोसारांश एव लिंगकोशदेहेंद्रियादिशब्दैः शास्त्रेषूच्यते यथा "देहेंद्रियासुहीनानां वैकुंठपुरवासिनाम्" इत्यादि । यथा च पुरुषप्रयत्नं विनैव जाठरोग्निर्भुक्तान्नादिकं जरयति येन प्रकारेण जरयति तं प्रकारं च पुरुषो न जानात्येवं मोक्षार्थं किमप्ययतमानं श्रवणकीर्त्तनादिकञ्च नित्यं कुर्वाणं तन्माधुर्य्यास्वादवन्तं भक्तजनं भक्तिः संसारान्मोचयति । भक्तस्तु केन प्रकारेण कदा मे मुक्तिर्भविष्यतीति नानुसंधत्ते तद्वक्ष्यति—"त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिम्" इति । पथि गच्छतः पुंसो गोष्पदलंघनानुसंधानं यथा न भवति तथेति भक्तानां त्रिभूमिकब्रह्मज्ञानाभावेपि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेर्भगवत्कारुण्याद्भक्त्या तद्रूपगुणलीलैश्वर्यमाधुर्यानुभवरूपाज्ज्ञानादेव मोक्षः "तमेव विदित्वा अतिमृत्युमेति" इति श्रुतावप्येवकारेण मुक्तौ तस्यैव ज्ञानस्य कारणत्वेनोक्तेस्तज्ज्ञानञ्चोक्तप्रकारकमेव । सर्वथा तत्स्वरूपज्ञानं तु "यतो वाचो निवर्त्ततेऽप्राप्य मनसा सह" इति "यस्यामतं तस्य मतं मतं यस्य न वेद सः" इति, "द्युपतय एव तेन ययुरंतमनंततया" इत्यादिश्रुतिस्मृतिभ्यो न कस्यापि संभवत्येव जीवब्रह्मैक्यरूपा मुक्तिस्तु भक्तैस्त्याज्यैवेत्यग्रे वक्ष्यते । किञ्च । भुक्तमन्नादिकं जाठरानलो भोजनक्षणत एव जरयितुं प्रवृत्तोपि त्रिचतुर्यामानंतरमेव सम्यक्तया जरयति यथा तथा भजनक्षणत एव शोकमोहाद्यात्मकं संसारं नाशयितुं प्रवृत्तापि भक्तिः किंचित्कालविलंबेनैव सम्यक्तया नाशयतीत्यतो भजनदशायां शोकमोहाद्यनपगमेपि भक्तेषु संसारोयमिति न प्रत्येतव्यमिति ज्ञेयं, तदेवं गुरूपदिष्टमंत्रवती भक्तिशास्त्रोक्तविधानुसारिण्यन्याभिलषितशून्या ज्ञानकर्मादिरहिता भगवति श्रोत्रादींद्रियाणां वृत्तिर्भक्तिः, सा चाल्पप्रमाणा साधनभक्तिरस्वाभाविकी भवति, सैव पूर्णप्रमाणा साध्यभक्तिः स्वाभाविकी भावभक्तिर्भवति, सैव काचिदल्पप्रमाणापि जात्यैवाधिक्यात्स्वाभाविकी चेद्रागानुगानाम्नी साधनभक्तिः, सा च जातिप्रमाणाभ्यां पूर्णा रागानुगीयभावभक्तिर्भवतीति विवेको भक्तिरसामृतसिद्धौ ज्ञेयः।"निष्पत्तौ योगमोक्षयोः । अणिमादिषु सिद्धिः स्यात्" इति धरणिः ॥ ३३ ॥ लक्षणमुदत्वोदाहरणमाह—सप्तभिस्तत्र प्रथमं स्वाभाविक्या भावभक्तेरुदाहरणं, चतुर्भिर्वदन्नेवानिमित्तेत्येतत्सहेतुकं स्पष्टयति । नेति—एकात्मतां ब्रह्मैक्यरूपां ये मुक्त्यै न स्पृहयंतीति सिद्धेः सकाशाद्गरीयस्त्वम्।ननु केन सुखेन पूर्णास्ते ब्रह्मसुखं न रोचयंति तत्राह—मत्पादयोः सर्वैंद्रियैर्या सेवा तस्यामेव न तु कर्मज्ञानादिषु अभि शास्त्राभिमुख्येन रता अत्यासक्तिमंतः । अनेन भक्तेर्भगवद्विषयत्वं सर्वेंद्रियवृत्तिरूपत्वं कर्मज्ञानादिराहित्यं शास्त्रानुसारित्वं स्वाभविकत्वं चोक्तम् । मय्येव मत्सौंदर्यमाधुर्यास्वादने एवेहा वांछा येषां ते इत्यन्याभिलाषशून्यत्वं प्रसह्यासह्यपौरुषाणि गोवर्द्धनोद्धारणादिलीलामृतानि सभाजयंते संततिकमास्वादयंति तेन चरणसेवानंदाभावात्सौंदर्य्यसौरभ्याद्यनुभवाभावात् लीलामृतास्वादनाभावाच्च ब्रह्मसुखं न रोचयंतीति मुक्तावस्पृहायां हेतुत्रयमुक्तम्॥३४॥ इति भाव इति । मुक्तौ पूर्वोक्तहेतूनामभावाद्भक्तौ तेषां संभवाद्भक्तिरेवादरणीयेत्याशयः । चक्रवर्त्ती—यतः सायुज्यपर्यंतेषु फलेषु स्पृहारहिता अतस्ते मत्त एतत्प्राप्नुवन्तीत्याह द्वाभ्यां—पश्यंतीत्युपलक्षणं गृणंति जिघ्रंति स्वादयंतीत्यादेरपि।रूपाणीत्युपलक्षणं शब्दस्पर्शरसगंधादीनां च।दिव्यान्यप्राकृतानि वरप्रदानि अभीष्टसेवाप्रदानि । यद्वा।हे भक्ता वरं वृणुतेत्याद्युक्तिमंति साकं मया सार्द्धं वदंति "न कामयेन्यं तव पादसेवनादकिञ्चनप्रार्थ्यतमाद्वरं विभो" "न पारमेष्ठ्यं न महेंद्रधिष्ण्यम्"इत्याद्युच्चारयंति स्पृहणीयामिति तद्वचःशुश्रूषयैव मया वरं वृणुतेत्याद्युच्यते न त्वन्यवरदित्सा ममापि तेभ्य इति भावः । नित्यं परमेश्वरानुभवसुखं भक्तावधिकमिति स्वामिचरणैर्व्याख्यातमेवात इति । अंबेति स्नेहद्योतिका संबुद्धिः॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनो हृतप्राणाश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते ॥ ३६ ॥ अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तम् ॥ श्रियं भागवतीं वाऽस्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ॥ ३७ ॥

रुणानि लोचनानि च येषु तैर्मद्रूपैः साकं सह नित्यं परमेश्वरानुभवसुखं भक्तावधिकमिति भावः ॥ ३५ ॥ आत्मानंदस्त्ववश्यं भावीत्याह । तैरिति । दर्शनीया मनोहरा अवयवा मुखनेत्रादयो येषु तैः हृत आत्मा चित्तं येषाम् । हृता आकृष्टाः प्राणाश्चेंद्रियाणि येषां तान्भजतोऽनिच्छत इच्छाहीनानप्यण्वीं गतिं मुक्तिं प्रयुंक्ते प्रापयति । कैः साधनैर्हृतात्मनः उदारैर्विलासादिभिः तत्र विलासो लीला वामं मनोहरं सूक्तं मधुरभाषणम् ॥ ३६ ॥ विभूत्यादिकं च तत्राधिकमित्याह । अथो अविद्यानि वृत्त्यनंतरं विभूतिं सत्यलोकादिगतां भोगसंपत्तिमणिमाद्यष्टांगमैश्वर्यमनुप्रवृत्तं भक्तिमनु स्वत एव प्राप्तमपि भागवतीं च श्रियं वैकुंठस्थां संपत्तिमस्पृहयंति । ते यद्यपि न

तैरिति । दर्शनीया अतिमनोहरा ये अवयवाः श्रीकृष्णरामाद्यंगानि तैः उदारा भक्ताभीष्टप्रदातारो विलासादयो येषु तैर्हृतमनःप्राणत्वादनिच्छतोपि भक्तान् भक्तिरण्वीं गतिं प्रयुंक्ते 'भो भक्ताः ब्रह्मैक्यरूपां मुक्तिं गृह्णीत' इति प्रयोगमात्रं करोति न तु दातुमवकाशं लभते भगवतो लीलाविलाससहासावलोकमधुरभाषणैस्तेषामात्मनां चोरितत्वेन संप्रदानाभावादिति भावः । नन्वेवं चेत्तर्हि परमविज्ञो भक्तिमनिच्छतस्तान् कथमेवं प्रयुंक्ते उच्यते— कश्चिच्चिंतामणिस्पर्शहीरकपद्मरागादिमहारत्नानां दाता खल्वल्पार्थिभ्यः कनकमपि दातुं दर्शयत्यन्यथा कनकमस्य दातुर्नास्तीति कनकमात्रार्थिभिर्मंदधीभिरप्रतिष्ठा क्रियते इतिवद्भक्तिरपि मुक्तिमात्रार्थिज्ञानिमानिलोकवस्त्वभान निरासार्थं स्वीयांस्तानपि तथा प्रयुंक्ते न पुनर्मुक्तिमेव तेभ्यो दित्सतीत्यवधेयम् । यद्वा । भक्तिरेव तान् हृतात्मनो जनान् अण्वीं गतिमनिच्छतः प्रयुंक्ते अण्वीं गतिं न एषयति नाभिलाषयति अनिच्छायाः प्रयोजिका भवतीत्यर्थः । यथा कुर्वंतं प्रयुंक्ते इति कारयतीत्यनयोर्णिच्प्रत्ययवाक्यणिजंतयोस्तुल्य एवार्थः तथा हि न पाठयत्ययमिति वक्तव्ये न पठंतं प्रयुंक्ते इति न पठनप्रयोजकोऽयमिति च यथोच्यते तथैव भक्तिर्भक्तजनान् अण्वीं गतिं नैषयति नाभिलाषयतीति वक्तव्येऽण्वीं गतिमनिच्छतः प्रयुंक्त इत्युक्तम् । यद्वा । "स्वकर्मफलनिर्दिष्टां यांयां योनिं व्रजाम्यहम्" इत्यादिरीत्या दैन्येन शुद्धभक्तिमात्रेच्छुत्वादनिच्छतोप्यण्वीं प्रकृत्यतीतत्वेन दुर्ज्ञेयां पार्षदत्वाख्यां गतिं प्रयुंक्ते प्रापयतीति संदर्भः । अण्वीं गतिमनिच्छतो जनान् विलासादिभिर्हृतमनःप्राणान् कुरुते इति श्रीरूपगोस्वामिचरणाः । अनिच्छत इच्छाहीनानप्यण्वीं गतिं प्रापयतीति स्वामिचरणाः । एतद्व्याख्यानमपि नात्यसंगतम् "यथेंद्रियैः पृथग्द्वारैः" इत्यत्र भक्तानां सर्वसुखानुभवस्य व्याख्यास्यमानत्वात् । ततश्च भक्तिरिच्छाहीनानपि तान्बलाद्ब्रह्मसुखमप्यनुभावयितुं भक्तिं प्रापय्य "ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः" इति रीत्या ततो निष्क्रमय्य भगवद्धाम्नि तांस्तत्पार्षदान्विधाय भजनानंदैः सदा निमज्जयतीति तात्पर्य्यमुत्तरश्लोकार्थावगाहनाज्ज्ञेयमिति केचिदाहुः । स्वामिव्याख्याने तत्रेत्यस्य विलासादिषु मध्य इत्यर्थः ॥ ३६ ॥ तत्र भक्तिदत्तमुक्तौ । इत्यर्थ इति । 'अमानोनाः प्रतिषेधे' इत्यव्ययचतुष्केऽकाररूपमप्यव्ययं निषेधेऽस्तीति भावः । यद्यपि न स्पृहयंति तथापीति । चक्रवर्त्ती तु-किञ्च कर्मज्ञानयोगादीनां भक्त्यविनाभावसिद्धत्वात्तद्विनाभूताया अपि भक्तेस्तत्तत्फलदायित्वेन 'यत्कर्मभिर्यत्तपसा' इत्यादौ श्रुतत्वात्सर्गादीत्यपि । वस्तुतो भक्तेरेव फलानीति शुद्धभक्तिमंतो मल्लोकवासिन एव मद्भक्तजनानंतर्भूतान्येव सर्वसुखान्यनुभवंतीत्याह-अथो इति । अविद्यानिवृत्त्यनंतरमेव मायाचितां विभूतिं सर्वब्रह्मांडगतसुखानि । 'मायिनस्तान्' इति च पाठः । अणिमाद्यष्टयोगैश्वर्यसुखं चानुप्रवृत्तं भक्तिमनु स्वत एव प्राप्तं तथा भागवतीं श्रियं वैकुंटस्थां सार्ष्टिसंज्ञां सम्पत्तिं निश्चितं चकाराद्ब्रह्मानंदं चास्पृहयंति मदीयहासावलोकादिहृतात्ममनःप्राणत्वाद्यद्यपि तेभ्यो न स्पृहयंति तथापि परमेश्वरस्य मे लोके वैकुंठेऽश्नुवत इति स्ववात्सल्ये विशेषो दर्शितः ॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मेऽनिमिषो लेढि हेतिः ॥ येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ॥ ३८॥ इमं लोकं तथैवामुमात्मानमुभयायिनम् ॥ आत्मानमनु ये चेह ये रायः पशवो गृहाः ॥ ३९ ॥ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखम् ॥ भजं त्यनन्यया भक्त्या तान्मृत्योरतिपारये ॥ ४० ॥ नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् ॥ आत्मनः सर्वभूतानां भयं तीव्रं निवर्तते ॥ ४१ ॥

स्पृहयंतीत्यर्थः । तथापि लोके वैकुंठे अश्नुवते तु प्राप्नुवंत्येव ॥ ३७ ॥ नन्वेवं तर्हि लोकत्वाविशेषात्स्वर्गादिवद्रोक्तृभोग्यानां कदाचिद्विनाशः स्यात्तत्राह । हे शांत रूपे यद्वा शांतं शुद्धसत्त्वं तद्रूपे वैकुंठे मत्पराः कदाचिदपि न नंक्ष्यंति भोग्यहीना न भवंति अनिमिषो मे हेतिर्मदीयं कालचक्रं च नो लेढि तान्न ग्रसति । तत्र हेतुर्येषा मिति । सुत इव स्नेहविषयः सखेव विश्वासास्पदम् । गुरुरिवोपदेष्टा सुहृदिव हितकारी इष्टं दैवमिव पूज्यः एवं सर्वभावेन मां ये भजंति तान्मदीयं कालचक्रं न ग्रसतीत्यर्थः ॥ ॥ ३८ ॥ एवंभूतां तु मुक्तिमेकांतभक्तेभ्यो ददामीत्याह । इममिति द्वाभ्याम् । उभयायिनं लोकद्वयगामिनमात्मानं सोपाधिकमात्मानमनु ये पुत्रकलत्रादयो ये च पश्वा दयः । रायः धनानि ॥ ३९ ॥ अन्यांश्च परिग्रहान् मृत्योः संसारादतिपारयेऽतितारयामि ॥ ४० ॥ अभक्तानां तु कथंचिदपि न मोक्ष इत्याह । नेति । मद्भगव

अत्राक्षिपति--नन्विति । अप्राप्तज्ञानत्वात्तस्याः शांतरूपत्वामंत्रणं न संजाघटीति चेत्तत्राह-यद्वेति । मत्परा वैकुंठस्थाः तत्र कालचक्राग्रासे प्रियो लक्ष्म्यादीनामिव, आत्मा सनकादीनामिव, सुतो भवदादीनामिव, सखा श्रीदामादीनामिव, गुरुः प्रद्युम्नादीनामिव, सुहृद एक एव नानाप्रकारः पांडवानामिव, दैवमिष्टमुद्धवादीनामिवं अतस्तन्वाभिजाते मयि सुतस्नेहरूपैव भक्तिस्तवोचितेति च दर्शितम् । अंतिमनिष्ठा च तस्यास्तथा "ज्ञाततत्त्वाप्यभूलष्टे वत्से गौरिव वत्सला" इति । येषां मां विना न कश्चिदपरः प्रेमभाजनमस्तीत्यर्थः । तथा चोक्तं नारायणव्यूहस्तवे "पतिपुत्रसुहृद्भ्रातृमित्रवत्पितृवद्धरिम् । ये ध्यायंति सदोद्युक्तास्तेभ्योपीह नमोनमः" इति "यमेवैष वृणुते तेन लभ्यः" इत्यादिश्रुतेः । यं प्रियत्वेन पितृत्वेन भ्रातृत्वेन सखित्वेन पितृपुत्रादित्वेन वा वृणुते इति श्रुतिपदार्थः । इत्यर्थ इति । "न स पुनरावर्त्तत" इति श्रुतेः । "मां प्राप्यैव तु कौंतेय पुनर्जन्म न विद्यते" इति गीतोक्तेश्चेति भावः । सुहृद इति । बहुत्वं सौहार्दस्य नानाभेदापेक्षम् । इदं रागानुगायाः स्वाभाविक्या भक्तेरुदाहरणम् ॥३८॥ एवंभूतामुक्तस्वरूपाम् । एकांतभक्तेभ्योऽनन्यभक्तेभ्यः । चक्रवर्त्ती तु– अस्या भाविक्याः साधनभक्तेरुदाहरणमाह-द्वाभ्याम् इमं दृष्टभोगासक्तिममुमदृष्टभोगासक्तिम्, आत्मानमहंतास्पदे भोक्तारं चासक्तिमिति । आदिना भ्रात्रादिग्रहः । द्वितीयादिना गृहादिग्रहः । "राः पुंसि स्वर्णवित्तयोः" इति मेदिनी ॥ ३९ ॥ विसृज्येति । यथैव भोगाद्यासक्तिर्भोगादिप्रशंसागम्या तथैव तत्तदासक्तित्यागस्तत्तन्निंदागम्य इति "जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन्" इत्युक्तेः । एवं प्रियत्वादिप्रकारेण विश्वतोमुखं तत्तद्भा वानुसारेणानंताविर्भावम् । यद्वा । यस्यां दिशि ते यांति तत्रैवाहं तेषामभिमुख एव वर्त्ते इत्यर्थमाह विश्वनाथः । अनन्यया भावांतरामिश्रयेति संदर्भः । देवतांतरभक्तिज्ञानकर्मादिशून्ययेति चक्रवर्ती । मृत्योः संसार सिन्धोर्भक्तिमात्राभिलाषित्वेन संसारपारमनिच्छतोपि तानतिक्रम्य पारये पारं "यस्तस्य पारेऽभिविराजते विभुः" इत्युक्तेर्मां प्रापयामीत्यर्थः ॥ ४० ॥ भक्तिं विना तु नैव निस्तार इत्याह–नेति । मत्तो विना मद्भक्तिं विना भक्तिविषयीभूतस्यानंतस्वरूपत्वेपि विशेषणत्रयेण पूर्वपूर्वमुख्यानि सेव्यस्वरूपाणि कानिचित्सूचयति । भगवान्प्रथमतः पूर्णः श्रीकृष्ण एव ततः श्रीरामः प्रधानपुरुषेश्वरः परव्योमनाथः तत आत्मा प्रकृत्यंतर्यामी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ॥ वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात ॥ ४२ ॥ ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः ॥ क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयम् ॥४३॥ एतावानेन लोकेऽस्मिन् पुंसां निःश्रेयसोदयः ॥ तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥४४॥ इति श्रीमद्भागवते तृतीयस्कंधे कापिलेयोपाख्याने भक्तिलक्षणवर्णनं नाम पंचविंशोध्यायः ॥२५॥ श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ॥ यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः॥१॥ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम् ॥ यदाहुर्वर्णये तत्ते हृदयग्रंथिभेदनम् ॥२॥

तोऽन्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेण सामर्थ्यं निरपेक्षत्वं हितकारित्वं चोक्तम् ॥ ४१ ॥ ऐश्वर्यं स्फुटयति । मद्भयादिति । श्रुतिश्च "भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेंद्रश्च । मृत्युर्धावति पंचमः" इति ॥ ४२ ॥ मद्भजनादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति । ज्ञानेति ॥ ४३ ॥ उपसंहरति । एतावानिति । मय्यर्पितं सन्मनः स्थिरं भवतीति यदेतावानेव ॥ ४४ ॥ इति श्री० तृती० टीकायां पं० विं० ॥ २५ ॥ षड्विंशे पुंप्रकृत्योस्तु विवेकायोपवर्ण्यते ॥ सांख्येन सर्वभावानां जन्मलक्षणभेदतः ॥ १ ॥ धात्रा पुत्राय यत्प्रोक्तं क्षत्रे मित्रासुतेन यत् ॥ मात्रे सांख्यं तदध्यात्मप्राधान्येनाह तत्त्ववित् ॥ २ ॥ तत्त्वाम्नायं यत्प्रवदंति सांख्यमित्यत्र सांख्यं भक्तियोंगश्चेति त्रयमुपक्षिप्तम् । तत्र भक्तिमुक्त्वेदानीं सांख्यमाह । अथेति ॥ १ ॥ ननु मुक्तिरात्मज्ञानादेव न तु तत्त्वलक्षणज्ञानात् । "तमेव विदित्वाऽतिमृत्युमेति" इति श्रुतेरत आह ज्ञानमिति । आत्मदर्शनरूपं ज्ञानमत एव हृदयग्रंथिभेदनमहंकारनिवर्तकं निःश्रेयसप्रयोजनाय

समष्ट्यंतर्यामी व्यष्ट्यंतर्यामी चेति पुरुषत्रयं पुरुषावतारा मत्स्यकूर्मादयोपि ज्ञेयाः ॥ ४१ ॥ नन्वनन्यया भक्त्येति त्वयोक्तमतोन्ये खल्वसेविता देवाः कुप्यंतस्तत्तद्भक्तं कदाचिद्दुःखयंति न वेति तत्र साटोपमाह— "भीषास्मात्" इत्यादिश्रुतेरहमेव सर्वेश्वरस्तेन यदि कमपि ते मद्भक्तं कदाचिदपि दुन्वंति तदा तांस्तत्तदधिकारादप्यधः पातयितुं न विलंब इति भावः ॥ ४२ ॥ शुद्धां भक्तिमुक्त्वा ज्ञानादिमिश्रां भक्तिमाह—ज्ञानेति योगिनो ज्ञानिभक्ताः क्षेमाय पुनर्दुःखाभावाय पादमूलप्राप्तिरूपं मोक्षम् "येनापवर्गाख्यमदभ्रबुद्धिर्ज्ञानेन वैयासकिशब्दितेन । भेजे खगेंद्रध्वजपादमूलम्" इत्यत्र खगेंद्रध्वजपादमूलस्यैवापवर्गत्वेनाभिधानात् । अकुतोभयं "मृत्युरस्मादपैति" इति देवक्युक्तेः ॥ ४३ ॥ शुद्धा भक्तिरेव सर्वतः श्रेष्ठेत्याह—एतावानिवेति । इतोऽधिको निःश्रेयसस्योदयो नैव कोप्यधिकोस्ति किं त्वितो न्यून एव सर्व इति भावः । तीव्रेण दृढेन ज्ञानकर्मादिभिरभंगुरेण शुद्धेनेत्यर्थः । निःश्रेयसस्य परमपुरुषार्थस्योदय आविर्भावः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे पञ्चविंशोऽध्यायः ॥ २५ ॥ सांख्येन तन्नामकशास्त्रेण तदुक्तरीत्या सर्वेषां भावानां तत्त्वानां जन्मप्राकट्यं लक्षणस्य स्वरूपस्य भेदतः (१) पुत्राय नारदाय । क्षत्रे विदुराय । अध्यात्मस्यात्मज्ञानस्य प्राधान्येन । क्वचित्तु 'तदध्यात्मम्' इति पाठस्तत्र सांख्यविशेषणं ज्ञेयम् (२) उपक्षिप्तं कथितं तत्र त्रयाणां मध्ये । अथ भक्तिनिरूपणानंतरम् । ते तुभ्यम् । ननु यत्पुरुषार्थोपयोगि तदेव वक्तव्यं किं तत्त्वानां लक्षणज्ञानेनेति चेत्तत्राह—यदिति । पुरुषो जीवः । प्राकृतैः प्रकृतिकार्यभूतैर्गुणैः सत्त्वाद्यैः ॥ १ ॥ अत्राक्षिपति—नन्विति—तमात्मानमेवेत्येवकारेणान्ययोगव्यवच्छेदान्मृत्युं जन्ममरणलक्षणं संसारमत्येति अतिक्रामति छन्दसीत्यधिकारे "व्यवहिताश्च" इति व्यवहितेनातिपदेन संबंधः । अतो ज्ञानस्य मोक्षहेतुत्वादाह । अत एवात्मसाक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ॥ प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ॥ ३ ॥ स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ॥
यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ४ ॥ गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ॥ विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ॥ ५ ॥

यदाहुस्तत्ते वर्णयामि । तत्त्वलक्षणज्ञानादेव विविक्तात्मज्ञानं भवतीति भावः ॥ २ ॥ तत्र पुरुषं लक्षयति । अनादिरिति । आत्मैव पुरुषः कोऽसावात्मा प्रत्यक्प्रतिलोमं धाम स्फूर्तिर्यस्य । क्षणिकपक्षं व्यावर्तयति । अनादिरिति । संसारित्वपक्षं व्यावर्तयति । प्रकृतेः परः अन्यः संगः । ज्ञानादिगुणत्वं वारयति निर्गुणः । मीमांसकाद्यभिमतज्ञानविषयत्वं वारयति । स्वयंज्योतिः अनेनैव प्राभाकराभिमतं ज्ञानाधारत्वेन स्फुरणमपि निरस्तम् । स्वयंज्योतिष्ट्वे हेतुः । विश्वं येन समन्वितं प्रकाशत इति शेषः । एतैरेव हेतुभिः पुरुषस्य प्रकृतेः परत्वमपि सिद्धम् ॥ ३ ॥ अत्रावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रावरणशक्त्या सैव जीवोपाधिरविद्या विक्षेपशक्त्या सैव माया पारमेश्वरी । पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स ईश्वरः तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह । स एष इति पंचभिः । सूक्ष्मामव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाभ्यपद्यतेत्यन्वयः ॥ ४ ॥ तस्या लीलामाह । गुणैरिति । ज्ञानं

त्काररूपत्वादेव । आहुराद्याचार्याः । इति भाव इति । विना तत्त्वानां स्वरूपज्ञानं तत्पार्थक्येनात्मज्ञानं कथं स्यादतस्तज्ज्ञानस्यात्मज्ञानोपयोगित्वमित्याशयः ॥ २ ॥ तत्र तत्त्वेषु प्रथमं पुरुषम् पुरुषः । परमात्मा अन्यपदार्थस्फूर्त्यपेक्षया प्रतिलोममंतर्मुखीकृतचित्ते इत्यर्थः । स्फूर्त्तिविषयान्पदार्थान् विज्ञानवादिनः क्षणिकान्मन्यंते सोपि किं तादृश इति चेदाह–अनादिः सदातनः एतादृशस्तु जीवोप्यस्ति तत्राह–प्रकृतेरिति । नैयायिकाद्यभिमत ईश्वरोस्त्येतादृशस्तत्राह–निर्गुण इति । ते तु ज्ञानादिगुणकं मन्यंते इति ज्ञानादिगुणवत्त्वाभावेपि ज्ञानविषयोस्त्विति 'ज्ञानगम्यं ज्ञानज्ञेयम्' इत्याद्युक्तेस्तत्राह–मीमांसकादीति । अनेन स्वयंज्योतिष्टकथनेन यस्मिन् ज्ञानमस्ति स चात्मेति तैर्मन्यते येनात्मना समन्वितं संबद्धं विश्वस्य जडत्वात्तत्प्रकाशकत्वेन स्वमपि सूर्यवत्प्रकाशयतीत्यर्थः । एतैरनादित्वादिभिः । अनादित्वान्निर्गुणत्वात्स्वयंज्योतिष्ट्वात्प्रत्यग्धामत्वात्पुरुषः प्रकृतेः परः योऽनादित्वादिर्न स प्रकृतेः परोपि न यथा महदादिरिति । सगुणक्षे अनादिर्नित्य आत्मा परमात्मैव पुरुषः निर्गुणः प्राकृतगुणरहितः यतः प्रकृतेः परः प्रत्यक्सर्वेंद्रियागम्यं धाम कारणार्णवो यस्य अत एव स्वयंज्योतिरिति ॥ ३ ॥ अत्र प्रकरणे तत्र द्विविधायां सैव प्रकृतिरेव । आवरणशक्तिर्हि रजःसत्त्वाभ्यामनभिभूतं तम एवेत्युक्तं तत्त्वानुसंधाने सा च नास्ति न प्रकाशत इति व्यवहारहेतुरसत्त्वापादनमभानापादनं च । तदुक्तं विद्यारण्यैः– "न भाति नास्ति कूटस्थ इत्यापादनमावृतिः" इति सैव मलिनसत्त्वप्रधाना सत्यविद्येत्युच्यते मलिनसत्त्वं च रजस्तमोभिभूतं सत्त्वं सैव प्रकृतिरेव विक्षेपशक्तिश्च तमःसत्त्वाभ्यामनभिभूतं रज एव "रजसो लोभ एव च" इत्यादिस्मृतेर्लोभादीनां विक्षेपकत्वं प्रसिद्धमेव सा चाकाशादिप्रपञ्चहेतुः तदुक्तं "विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेत्" इति । पारमेश्वरी परमेश्वरशक्तिः । एवं च मायोपहितं चैतन्यमीश्वरो जगत्कारणमंतर्यामीत्युच्यते स एव तत्पदवाच्यार्थः । अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति चोच्यते तदुक्तं "तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा । सत्त्वशुद्ध्यविशुद्धिभ्यां माया विद्या च ते मते ॥ मायां बिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा॥" इत्यलम् । प्रकृतमनुसरामः–तत्र द्वयमध्ये प्रकृतिविवेकेन प्रकृतिर्जडाभिन्नाऽहं पुरुषश्चेतनो भिन्नोस्मीति विवेकाभावेन "देवात्मशक्तिं स्वगुणैर्निगूढाम्" इति श्रुतेर्यदृच्छया भगवत इच्छश लीलया हेतुनोपगतां प्राप्तामभ्यपद्यत स्वरूपत्वेनाभ्यजानादित्यर्थः । संदर्भस्तु–एष परमात्मा यदृच्छयैव स्वैरितयैव स्वशक्तित्त्वादुपगतां कर्मबद्धजगत्सिसृक्षासमय एव लीलयाऽभ्यपद्यत ऐक्षतेत्यर्थः । "स ऐक्षत" इत्यादिश्रुतेः ॥ ४ ॥ तस्याः प्रकृतेः सद्यः प्रकृतिसंसर्गावसर एव मुमुहे स्वरूपं विसस्मार । सदैवानाद्यविद्यया युक्तोपि जीवः सुषुप्तौ यथा स्वरूपं किञ्चिदुपलभते तथैव सृष्टेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ॥ कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥ ६ ॥ तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतम् ॥ भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥ ७ ॥ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः ॥ भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् ॥ ८ ॥

गूहयत्यावृणोतीति ज्ञानगूहा तया । तथाच श्रुतिः "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति मुमुहे आत्मानं विस्मृतवान् ॥ ५ ॥ पराभिध्यानं प्रकृत्यध्यासस्तेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते ॥ ६ ॥ तदिति कर्तृत्वमननमेव अस्य पुरुषस्य साक्षिमात्रत्वादकर्तुरेव सतः कर्मभिर्बंधः ईशस्यापरतंत्रस्यैव कर्मबंधकृतं भोगे पारतंत्र्यं निर्वृतात्मनः सुखात्मकस्यैव संसृतिर्जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः ॥ ७ ॥ ननु चैतन्यसामानाधिकरण्येनैव कर्तृत्वादिप्रतीतेः स्वस्यैव तदंगी क्रियतां नेत्याह । कार्यं शरीरं कारणमिंद्रियं कर्ता देवतावर्गः तद्भावापत्तौ पुरुषस्य प्रकृतिं कारणं विदुः । कूटस्थस्य स्वतो विकाराभावात्प्रकृतिपरिणामभूतदेहाद्यहंकारकृतमेव कर्तृत्वादिकमित्यर्थः । भोक्तृत्वे तु पुरुषं कारणं विदुरित्यस्यायं भावः । यद्यप्यहंकारगतमेव कर्तृत्वादिकं भोक्तृत्वं च तथाऽपि विकारस्य जडावसानत्वादुपाधिप्राधान्यं भोगस्य चिदवसानत्वादुपहितप्राधान्यमिति ॥ ८ ॥

पूर्वं प्रलयेपि स्वरूपमुपलभमान एवासीत् सृष्ट्यारंभे तु तद्विसस्मारेत्यर्थः । गुणैः सत्त्वादिभिः । श्रुत्यर्थः—अजामनाद्यां वृत्त्यवित्रक्षयैकाम् । लोहितशुक्लकृष्णां रजःसत्त्वतमोरूपाम् । सरूपां समानरूपाम् । एकोऽजो जीवः 'जुषमाण एनां सेवमानोऽनुशेते स्त्रीयां मन्यतेऽन्योज ईशः इति श्रुतिपदार्थः । विशेषतोऽस्या व्याख्यानं वेदस्तुतिटीकायां करिष्यामः ॥ ५ ॥ परायाः प्रकृतेरभिध्यानं स्वरूपत्वेन मननम् । एवं "नृत्यतो गायतः पश्यन्यथैवानुकरोति ताम्" इति रीत्या सा च प्रकृतिर्देह एव कार्यकारणयोरभेदोपचारात् देह एवाहमिति मननेन कर्मसु रूपादिग्रहणेषु एतदर्थः श्रीगीतास्वप्युक्तः "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंक्रियाविमूढात्मा कर्त्ताहमिति मन्यत" इति ॥ ६ ॥ इत्यर्थ इति । प्रकृत्याविवेककृत एव संसारः "सत्त्वपुरुषान्यताख्यातिर्मोक्षः" इति पतंजलिना सूत्रितत्वात्तद्विवेके सति संसारो न भवतीति भावः ॥ ७ ॥ अत्र न हि जडेषु प्रकृतिगुणेषु कर्तृत्वादि संभवतीत्याक्षिपति नन्विति । चैतन्यसमानाधिकरण्येनाहं कर्त्तेत्येवंरूपेण तस्यैव चैतन्यस्यैव तत्कर्तृत्वादि । तत्तद्भावापत्तौ देहेंद्रियदेवताभावप्राप्तौ पुरुषस्य जीवस्य देहोहमित्यादिमनने । इत्यर्थ इति । संसर्गवशात्सत्यसती भवतीति न्यायेनेति भावः । अत्राशयमाह—अयं भाव इति । विकाराणामंततो जडायां प्रकृतावेव समावेशात्तस्या एव प्राधान्यं भोगस्य संवेदनेन चिदवसानत्वमेवाहं सुखीत्यादिप्रतीतेरुपहितस्य चित एव प्राधान्यमित्यर्थः । विश्वनाथस्तु श्लोकमेनमित्थं व्याचष्ट तथा हि-जीवस्य कर्मभिरेव बंधस्तेषां कर्मणां च साधने फलभोगे च प्रकृतिपुरुषावेव कारणे इत्याह कार्येति । भूतेंद्रियदेवताभिरेव कर्मसिद्धेस्तेषां भूतेंद्रियदेवतानां कार्यकारणकर्तृत्वे प्रकृतिमेव कारणं विदुः प्रकृत्यैव तेषां तद्भावस्य सृष्टत्वाज्जीवस्य कर्मकरणं मायाधीनमित्यर्थः । कर्मफलदाता च परमेश्वर एवेति जीवस्य कर्मफल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवहूतिरुवाच ॥ प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ॥ ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् ॥ ९ ॥ श्रीभगवानुवाच ॥ यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ १० ॥ पंचभिःपंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा ॥ एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ॥ ११ ॥ महाभूतानि पंचैव भूरापोऽग्निर्मरुन्नभः ॥ तन्मात्राणि च तावंति गंधादीनि मतानि मे ॥ १२ ॥ इंद्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः ॥ वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥ १३ ॥ मनो बुद्धिरहंकारश्चित्तमित्यंतरात्मकम् ॥ चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥ १४ ॥ एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह ॥ सन्निवेशो मया प्रोक्तो यः कालः पंचविंशकः ॥ १५ ॥

तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं जगत्कारणमीश्वरं तत्प्रकृतिं च पृच्छति । प्रकृतेरिति । अस्य विश्वस्य सदसच्च स्थूलं सूक्ष्मं च कार्यं यदात्मकं तयोः प्रकृतिपुरुषयोः॥ ९॥ तत्र प्रकृतिं लक्षयति । यत्प्रधानं तदेव प्रकृतिं प्राहुः । किं तत् प्रधानं स्वतोऽविशेषम् । विशेषवद्विशेषाणामाश्रयः तर्हि किं ब्रह्म न त्रिगुणम् । किं महत्तत्त्वादिना अव्यक्तमकार्यम् । किं कालादि न सदसदात्मकं कार्यकारणरूपम् । किं जीवः प्रकृतिः न नित्यम् ॥ १० ॥ अन्येषां तत्त्वानां लक्षणं वक्तुं तानि गणयति । पंचभिरित्यादि । संख्याभेदेनैतच्चतुर्विंशतिकम् एतानि चतुर्विंशतिर्यस्मिन् गणे तं गणं प्राधानिकं प्रधानकार्यात्मकं ब्रह्म विदुः ॥ ११ ॥ एतद्विवृणोति । महाभूतानीति त्रिभिः । तावंति पंचैव ॥ १२ ॥ १३ ॥ अंतरात्मकमंतःकरणम् । लक्षणरूपया व्यवच्छेदिकया ॥ १४ ॥ यावान्मया प्रोक्त एतावानेव संख्यातो

भोक्तृत्वमीश्वराधीनमेवेत्याह भोक्तृत्वे जीवस्य कर्मफलानां भोगे पुरुषं कारणं विदुरित्यन्वयः ॥ ८ ॥ तद्धेतुं संसारहेतुं पुरुषोत्तमेति कथनसामर्थ्यमाह ॥ ९ ॥ तत्र तयोः प्रकृतिपुरुषयोर्मध्ये अविशेषं प्रकृत्यंतरासत्त्वात् । विशेषाणां महदादीनाम् । अत्रानेककिंशब्दैराशंक्य प्रकृतिस्वरूपं दर्शितम् । संदर्भस्तु-यत्खलु त्रिगुणं सत्त्वादिगुणत्रयसमाहारस्तदेवाव्यक्तं प्रधानं प्रकृतिं च प्राहुः । तत्राव्यक्तसंज्ञत्वे हेतुः । अविशेषं गुणत्रयसाम्यरूपत्वादनभिव्यक्तविशेषम् । अत एवाव्यक्तसंज्ञं चेति । प्रधानसंज्ञत्वे हेतुः । विशेषवत् स्वांशकार्यरूपाणां महदादिविशेषाणामाश्रयरूपतया तेभ्यः श्रेष्ठम् । प्रकृति संज्ञत्वे हेतुः— सदसदात्मकं सदसत्सु कार्यकारणरूपेषु महदादिषु कारणत्वादनुगतम् आत्मा स्वरूपं यस्य तत् तथापि नित्यं प्रलये कारणमात्रात्मनावस्थितसर्वांशत्वेन सृष्टिस्थित्योश्चापञ्चीकृतांशत्वे नाविष्कृतं स्वरूपं यस्य तादृशमिति ब्रह्मत्वं महदादिरूपत्वं च व्यावृत्तम् । ब्रह्मणो निर्गुणत्वान्महदादीनां चाव्यक्तापेक्षया कार्यरूपत्वात् । यद्वा । सर्वतोप्याश्चर्यरूपत्वेन निर्वक्तुमशक्यत्वाद्यत्तच्छब्देनोक्तमत एव सर्वश्रेष्ठत्वात्प्रधानशब्देन ख्यातं वस्तु प्रकृतिं प्राहुः । श्रौतास्स्मार्त्ताश्च आश्चर्यरूपत्वमेव दर्शयंति त्रिगुणमप्यव्यक्तं सगुणं खलु व्यक्तीभवत्येव तथा सत्कार्यमसत्कारणं तत्तदात्मकमपि नित्यं नैवं गृहादि तथा सत्त्वादिभिर्विशेषवदपि गुणसाम्यरूपत्वेनाविशेषं नैवमन्यदिति तदेवं सिद्धे पूर्ववाक्यार्थेऽतिव्याप्तयस्तु यथायोगमेकत्वादिधर्मैः परिहर्त्तव्याः ॥ १० ॥ अन्येषां प्रकृतिपुरुषेतराणाम् । तानि सत्त्वानि । ब्रह्म ब्रह्मत्वेनोपास्यम् । विदुर्ज्ञानिनः ॥ ११ ॥ एतत्प्राधानिकं ब्रह्म । एवकारेण सूक्ष्मभूतव्यावृत्तिः । मरुद्वायुः । नभः खम् । मे मम । वर्त्तमानाधारार्थक्तस्य योगे षष्ठी ॥ १२ ॥ दृक् चक्षुः । रसनं जिह्वा । मेढ्रमुपस्थम् ॥ ॥ १३ ॥ व्यवच्छेदिकया "बुद्धिरध्यवसानाय संशयं कुरुते मनः । अभिमानो ह्यहंकारश्चित्तं स्मरणकारणम्" इत्येवं व्यवच्छेदकर्त्र्या वृत्त्या ॥ १४ ॥ तत्त्वसंख्यामुपसंहरति—एतावानिति । संख्यातो गणितः । तत्त्वज्ञैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभावं पौरुषं प्राहुः कालमेके यतो भयम् ॥ अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः ॥ १६ ॥ प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ॥
चेष्टा यतः स भगवान्काल इत्युपलक्षितः ॥ १७ ॥ अंतः पुरुषरूपेण कालरूपेण यो बहिः ॥ समन्वेत्येष सत्त्वानां भगवानात्ममायया ॥ १८ ॥
दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ॥ आधत्त वीर्यं साऽसूत महत्तत्त्वं हिरण्मयम् ॥ १९ ॥ विश्वमात्मगतं व्यंजन्कूटस्थो जगदंकुरः ॥
स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः ॥ २० ॥ यत्तत्सत्त्वगुणं स्वच्छं शांतं भगवतः पदम् ॥ यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥ २१ ॥

प्रकृतेरेवावस्थाविशेष इत्यर्थः ॥ १५ ॥ एके तु पौरुषं पुरुषस्येश्वर
गणितस्तत्त्वज्ञैः । काले तु मतद्वयमाह । यः कालः स पंचविंशकः अल्पार्थे कप्रत्ययः । स्य प्रभावं विक्रमं कालमाहुः । तमेव कालं द्वेधा लक्षयति । यतो भयं भवति । कस्य प्रकृतिमीयुषः प्राप्तस्य अत एव देहेऽहंकारेण विमूढस्य कर्तुर्जीवस्य
अनेन संहारकत्वेन लक्षितः ॥ १६ ॥ सृष्टिहेतुत्वेन लक्षयति । प्रकृतेरिति ॥ १७ ॥ कोऽसौ भगवांस्तमाह । अंतरिति अंतः सर्वप्राणिनां यः पुरुषरूपेण
नियंतृत्वेन समन्वेति सम्यक् तद्विकाररहित एवानुस्यूतो वर्तते बहिश्च कालरूपेण । एष भगवान् । यद्वा यः पुरुष इति प्रसिद्धः कालः स पंचविंशः एके तु पुरुष
स्य प्रभावं कालमाहुः । प्रभावस्यैव लक्षणं यत इति पुरुषस्यैव कालत्वे हेतुः प्रकृतेरिति । उभयथा विवक्षायां हेतुः अंतरिति शेषं समानम् ।
तदेवं प्रकृतेश्चतुर्विंशतिभेदाः जीवेश्वरयोश्चैक्यविवक्षातः पंचविंशतिस्तत्त्वानि भवंति । तयोर्भेदविवक्षया च षड्विंशतिर्भवंति ॥ १८ ॥ इदानीं तत्त्वानामुत्पत्तिपूर्वकं
लक्षणान्याह । दैवादित्यादिना । एतान्यसंहत्येत्यतः प्राक्तनेन ग्रंथेन । तत्र चित्तस्योत्पत्तिपूर्वकं लक्षणमाह । चतुर्भिः दैवाज्जीवादृष्टात्क्षुभिता धर्मा गुणा यस्याः यो
नावभिव्यक्तिस्थाने प्रकृतौ वीर्यं चिच्छक्तिम् । सा प्रकृतिर्महत्तत्त्वमसूत । महतः स्वरूपमाह । हिरण्मयं प्रकाशबहुलम् ॥ १९ ॥ विश्वमहंकारादिप्रपंचम् । आत्मगतं स्व
स्मिन्सूक्ष्मरूपेण स्थितं व्यंजन्प्रकटयन्महांस्तीव्रं प्रलयकालीनं तमोऽपिबत् । कूटस्थो लयविक्षेपशून्यः कथंभूतं तमः आत्मानं प्रस्वापयति प्रच्छादयतीति तथा यत्पूर्वं प्रलय
समये महांतं प्रकृतौ विलापयामासेत्यर्थः ॥ २० ॥ प्रसंगाच्चतुर्व्यूहोपासनामाह । यत्तदिति । सर्वागमप्रसिद्धत्वमाह । स्वच्छं विशदम् । शांतं रागादिरहितम् । भगवतः

सांख्याचार्यैः । अवस्थाविशेषो गुणव्यतिकररूपत्वात् ॥ १५ ॥ तमेवोक्तमेव । अत एव प्रकृतिं प्राप्तत्वादेव । अनेन वाक्येन ॥ १६ ॥ गुणसाम्यस्य गुणानां साम्यावस्थारूपस्यात एव निर्विशेषस्य गुणानामपार्थक्य
विवक्षया विशेषरहितस्य प्रकृतेः प्रधानस्य यतश्चेष्टां साम्यत्यागः ॥ १७ ॥ यद्वेति । पञ्चदशश्लोकांतर्गतस्यैव व्याख्या यच्छब्देन पुरुषग्रहणं तु 'अंतः पुरुषरूपेण' इत्यग्रिमोक्त्यैव संगच्छते । वस्तुतस्तु चतुर्विंशतिको गणः
प्राधानिकः कालो जीवश्चेति द्वौ प्रकृतिपुरुषौ च द्वावेवं मिलित्वाऽष्टाविंशतितत्त्वानि संतीत्यमेव श्रीकृष्णोऽप्युद्धवायैकादशे वक्ष्यतीति ॥ १८ ॥ ॥ १९ ॥ इत्यर्थ इति । यत्तमो महत्त्वस्य प्रकृतौ लयं कारयामास तत्तमोऽपिब
दिति भावः । पुंस्त्वं त्वत्र तत्त्वपदत्यागेन महानित्येतस्यैव विशेष्यीकृतत्वादिति ॥ २० ॥ प्रसंगादंतःकरणोत्पत्तिप्रसंगात् । महदात्मकं महत्तत्त्वमेव देहे चित्तरूपेण तिष्ठतीत्यर्थः । उपलब्धिस्थानमुपासनापीठम् । अत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वच्छत्वमविकारित्वं शांतत्वमिति चेतसः ॥ वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा ॥ २२ ॥ महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् ॥ क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ॥ २३ ॥ वैकारिकस्तैजसश्च तामसश्च यतो भवः ॥ मनसश्चेंद्रियाणां च भूतानां महतामपि ॥ २४ ॥ सहस्रशिरसं साक्षाद्यमनंतं प्रचक्षते ॥ संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयम् ॥ २५ ॥ कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणम् ॥ शांतघोरवि मूढत्वमिति वा स्यादहंकृतेः ॥ २६ ॥ वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ॥ यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः ॥ २७ ॥ यद्विदुर्ह्य निरुद्धाख्यं हृषीकाणामधीश्वरम् ॥ शारदेंदीवरश्यामं संराध्यं योगिभिः शनैः ॥ २८ ॥

पदमुपलब्धिस्थानम् । अत एव वासुदेवाख्यं यदाहुः । अयमर्थः । अधिभूतरूपेण तस्यैव महानिति संज्ञा अध्यात्मरूपेण चित्तमिति उपास्यरूपेण वासुदेव इति अधिष्ठाता तु तस्य क्षेत्रज्ञः एवमहंकारे संकर्षण उपास्यः रुद्रोऽधिष्ठाता मनस्यनिरुद्ध उपास्यः चंद्रोऽधिष्ठाता बुद्धौ प्रद्युम्न उपास्यः ब्रह्माऽधिष्ठातेति ज्ञातव्यम् ॥ २१ ॥ स्वच्छत्वं भगवद्बिंबग्राहित्वम् । अविकारित्वं लयविक्षेपराहित्यम् । अपां प्रकृतिः फेनतरंगादिरहिताऽवस्था परा भूसंसर्गात्प्राक्तनी सा यथा मधुरा स्वच्छा शांता च तद्वदित्यर्थः । ॥ २२ ॥ अहंकारस्योत्पत्तिपूर्वकं लक्षणमाह । महत्तत्त्वादिति चतुर्भिः क्रियासु शक्तिर्यस्य स क्रियाशक्तिः ॥ २३ ॥ त्रैविध्यमाह । वैकारिक इति तस्य कार्यमाह । यतो यस्मान्मनआदीनां भव उत्पत्तिः ॥ २४ ॥ तस्मिन्नुपास्यव्यूहमाह । सहस्रशिरसमिति ॥ २५ ॥ लक्षणमाह । कर्तृत्वमिति । कर्तृत्वं देवतादिरूपेण करणत्वमिंद्रियरूपेण कार्यत्वं भूतरूपेण शांतत्वादिकं तु तत्तत्कारणगुणत्रयरूपेण ॥ २६ ॥ मनस उत्पत्तिपूर्वकं लक्षणमाह । वैकारिकादिति द्वाभ्याम् । संकल्पश्चिंतनम् । विकल्पो विशेषचिंतनम् । यस्य मनसः संकल्पविकल्पाभ्यां कामसंभवो वर्तत इति कामरूपा वृत्तिर्लक्षणत्वेनोक्ता न तु प्रद्युम्नव्यूहोत्पत्तिः तस्य संकल्पादिकार्यत्वाभावात् उपास्यव्यूहस्य चानिरुद्धस्योक्तेः ॥ २७ ॥ शारदं शरत्कालीनमिंदीवरं नीलोत्पलं तदिव श्यामम् । यच्छनैः संराध्यं वशीकर्तुं योग्यं दुर्ग्रहत्वात् ॥ २८ ॥

एवाधिष्टानाधिष्ठेययोरुपचारेणाभेदविवक्षात एव । यद्यम् । उक्तमर्थं स्फुटयति–अयमर्थ इति ॥ २१ ॥ इत्यर्थ इति । यथा भूसंसर्गादिना जलानामस्वच्छत्वादिकं भवति तथा चित्तमपि दुर्विषयासक्तमस्वच्छादि भवतीति भावः ॥ २२ ॥ क्रियाशक्तिरित्युपलक्षणं ज्ञानशक्तिद्रव्यशक्तयोः ॥ २३ ॥ यस्माद्वैकारिकादिभेदत्रयवतोहंकारात्क्रमेण मनस इत्युपलक्षणं देवानामपि । अपिना सूक्ष्मभूतोत्पत्तिपूर्विकोत्पत्तिरुक्ता ॥ २४ ॥ तस्मिन्नहंकारे । यमिति यत्स्थमित्यर्थः । मञ्चाः क्रोशंतीतिवत् । संदर्भस्तु–उपास्यतदधिष्टानयोस्तादात्म्यापत्तिं दृष्ट्वा तत्तुल्यं वदंतीत्यर्थमाह-"साक्षात्प्रत्यक्षतुल्ययोः" इत्यमरः ॥ २५ ॥ तत्कारणं शांतत्वादिकारणं यत्सत्त्वादि गुणत्रयं तेन रूपेण अहंकृतेरहंकारणस्य ॥ २६ ॥ संकल्पः सामान्यतो विषयजिघृक्षा सामान्यविषयस्यैव विविधसंकल्पनेन विशेषतो जिघृक्षा विकल्पश्च ताभ्यां कामस्य मनोरथस्य संभवो भवतीति ॥ २७ ॥ यदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैजसात्तु विकुर्वाणाद् बुद्धितत्त्वमभूत्सति ॥ द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः ॥ २९ ॥
संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ॥ स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ॥ ३० ॥

बुद्धेरुत्पत्तिपूर्वकं लक्षणमाह । तैजसादिति द्वाभ्याम् । हे सति द्रव्यस्फुरणरूपं विज्ञानमिति चित्तव्यावृत्त्यर्थमुक्तम् । इंद्रियाणामनुग्रह इति सविकल्पज्ञाने हृषीकाणामधी श्वरमिति यदुक्तं तत्तु निर्विकल्पज्ञाने ॥ २९ ॥ द्रव्यस्फुरणस्यैव प्रपंचः संशयादिः विपर्यासो मिथ्याज्ञानम् । निश्चयः प्रमाणज्ञानम् । स्वापो निद्रा "प्रमाणविपर्ययविक

पूर्ववत् ॥ २८ ॥ विज्ञानं विचारः । चेतनारूपविज्ञानं चित्तधर्मो ज्ञेयः । ज्ञानं च सविकल्पकनिर्विकल्पकभेदाद्द्विधा तथाहि—अयं घटोयं दंडीत्यादिशब्दाभिलापयोग्यं विशेषणविशेष्यवैशिष्ट्यावगाहि वा सविकल्पकं तत्कारणत्वेन कल्प्यमतींद्रियं विशिष्टशब्दाभिलापायोग्यं विशेषणविशेष्यवैशिष्ट्यानवगाह्यंत्यम् । तद्यथा दंडी पुरुष इति ज्ञाने दंडो विशेषणं पुरुषो विशेष्यः संयोगः संबंध इति तदवगाहि तज्ज्ञानं सवि कल्पकं तद्दंडज्ञानमंतरेण नोत्पद्यते तद्दंडज्ञानजन्यं यथा सुप्तोत्थितस्य जायमाने घट इति ज्ञाने घटत्वं विशेषणं घटो विशेष्यः समवायः संबंध इति तदवगाहितत्सविकल्पकं घटत्वज्ञानजन्यं वाच्यं तत्कारणीभूतं ज्ञानं चानुभवानास्यदत्वादतींद्रियं निर्विकल्पकमभिधीयत इति तदसत्त्वे सुप्तोत्थितस्यायं घट इति ज्ञानं न स्याद्विशेषणीभूतघटत्वाज्ञानात् । विशेषणज्ञानमंतरा विशिष्टज्ञानानुदयेन तस्य तद्धेतुत्वादित्यलं प्रसक्तानुप्रसक्त्येति । प्रकृत मनुसरामः—बुद्ध्या विनेंद्रियाणि न प्रवर्त्तितुं शक्नुवंतीत्यर्थः । यद्यपि चित्ताहंकारमनांस्यपींद्रियानुग्राहकाणि तथापि बुद्ध्या तदनुग्रहविशेषो ज्ञेयः तथा हि-शब्दं शृणोमीत्यत्र प्रथमं चित्तेन चेतनामात्रं निधीयते बुद्ध्या शब्दोयमिति स्फूर्त्तिः मनसा शब्दे जिघृक्षाऽहंकारेण तत्र स्वाभिमानार्पणमिति भेदः ॥ २९ ॥ संशयस्तु-एकस्मिन्धर्मिणि विरुद्धविषयकनानार्थावमर्शः यथा स्थाणौ स्थाणुर्वा पुरुषो वायमिति स च त्रिधा-साधारण धर्मजोऽसाधारणधर्मजो विप्रतिपत्तिजश्च स्थाणुपुरुषसाधारणोच्चत्वदर्शनज आद्यः उक्तः । नित्यानित्यव्यावृत्तशब्दत्वादिदशनर्जः शब्दो नित्योऽनित्यो वेति द्वितीयः । वादिविरुद्धार्थकवाक्याज्जायमानस्तमो द्रव्यं न वेति तृतीयः । विपर्यासो विपर्ययः स च प्रतियोगिव्यधिकरणतदभाववति तत्प्रकारको निर्णयः यथा शुक्ताविदं रजतमिति रजतत्वाभाववत्यां शुक्तौ तन्निर्णयोऽयं भवत्येव । अयं वृक्षः कपिसंयोगीति ज्ञाने मूलावच्छेदेन कपि संयोगाभाववति वृक्षे कपिसंयोगप्रकारकनिश्चयस्य सत्त्वादयमपि विपर्ययः स्यात्तद्वारणाय प्रतिव्यधिकरणेति । संयोगाभावो हि प्रतियोगिसमानाधिकरणो न प्रतियोगिव्यधिकरणः मूलावच्छेदेन कपिसंयोगाभावस्य सत्त्वेपि शाखावच्छेदेन कपिसंयोगस्य सत्त्वात् । यद्यपि संशयविपर्ययस्वप्नानध्यवसायभेदेन मिथ्याज्ञानस्य वैशेषिकैश्चतुर्विधस्योक्तत्वादत्रापि तथात्वमेवोचितं तथापि स्वप्नानध्यवसायावत्र विपर्ययेंतर्भावयित्वा द्वैविध्यमेवोक्तं श्रीबादरा यणेन । प्रमाणज्ञानं यथार्थज्ञानं तद्वति तत्प्रकारकानुभवरूपमितियावत् । तच्च घटत्ववति घटे घटोयमित्येवंरूपमिति । अत्र बुद्धेरेव संशयादयो वृत्तय इत्यत्र पातंजलसूत्रं प्रमाणयति-प्रमाणेति । अस्यार्थं सूत्रैरेवाह-अवि संवादिज्ञानं प्रमाणं तच्च प्रत्यक्षानुमानादि । तथा हि "तत्र प्रत्यक्षाऽनुमानागमाः प्रमाणानि" (७) ॥ "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" (८) अतथाभूतेऽर्थे तथोत्पद्यमानं ज्ञानं विपर्ययः । यथा शुक्तिकादौ रजतादिज्ञानं तस्यार्थस्य यत्पारमार्थिकं रूपं तन्न भासयतीत्यतद्रूपप्रतिष्ठम् (८) ॥ "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" (९) ॥ वस्तुनस्तत्त्वमनपेक्षमाणो योध्यवसायः स विकल्पः यथा पुरुषस्य चैतन्यं रूपमिति शब्दजनितज्ञाने बुद्ध्या षष्ठ्या योऽध्यवसितो भेदस्स च नास्त्येव चैतन्यस्यैव पुरुषरूपत्वादिति (९) ॥ "अभावप्रत्ययावलंबना वृत्तिर्निद्रा" (१०) या सततमुद्रिक्तत्वात्तमसः समस्तविषयपरित्यागेन प्रव र्त्तते वृत्तिः सा निद्रा (१०) ॥ अनुभतविषयासंप्रमोषः स्मृतिः (११) । प्रमाणेनानुभूतस्य विषयस्य योयमसंप्रमोषः संस्कारद्वारेण बुद्धावुपारोहः सा स्मृतिरिति (११) ॥ संशयादयो बुद्धेर्वृत्तयो लक्षणरूपा एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः ॥ प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ॥ ३१ ॥ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् ॥ शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगम् ॥ ३२ ॥ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च ॥ तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ॥३३॥ भूतानां छिद्रदातृत्वं बहिरंतरमेव च ॥ प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ॥ ३४ ॥ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः ॥ स्पर्शोऽभवत्ततो वायुस्त्वक्स्पर्शस्य च संग्रहः ॥ ३५ ॥ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च ॥ एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ॥ ॥ ३६ ॥ चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥ सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणम् ॥ ३७ ॥

ल्पनिद्रास्मृतयः" इति पातंजलोक्तेः ॥ ३० ॥ इंद्रियाणामुत्पत्तिमाह । तैजसानि तैजसाहंकाराज्जातानि ज्ञानेंद्रियाणां वैकारिकत्वशंकानिवृत्त्यर्थमेवकारः । द्विविधान्यपींद्रियाणि तैजसान्येवेत्यन्वयः । तत्र हेतुः प्राणस्येति । हि यस्मात्प्राणस्य क्रियाशक्तिर्बुद्धेश्च विज्ञानशक्तिताऽतः प्राणस्य तैजसत्वात्तत्क्रियाशक्तिमतामिंद्रियाणां तैजसत्वं तथा बुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणां तैजसत्वमित्यर्थः ॥ ३१ ॥ तन्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतोत्पत्तिं तल्लक्षणं चाह । तामसादिति पंचदशभिः । श्रोत्रं तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनंतरं तत्संबंधमात्रं कथ्यते न तूत्पत्तिः प्रागेवोत्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगम् ॥ ३२ ॥ शब्दस्य लक्षणमाह । अर्थाश्रयत्वमर्थवाचकत्वम् । द्रष्टुर्लिंगत्वं कुड्यांतरितस्य वक्तुर्ज्ञापकत्वम् । तदुक्तम् । "लिंगं यद्दृष्टदृश्ययोः" इति । नभसस्तन्मात्रत्वं सूक्ष्मत्वं शब्दस्य लक्षणमित्यन्वयः । ॥ ३३ ॥ नभसो लक्षणमाह । भूतानामिति । छिद्रदातृत्वमवकाशदातृत्वम् । बहिरंतर्व्यवहारास्पदत्वम् । आत्मा मनः प्राणादीनां धिष्ण्यत्वमाश्रयत्वं नाड्यादिच्छिद्ररूपेण वृत्तिः कार्यमेव लक्षणं वृत्तिलक्षणम् । एवमुत्तरत्राप्येकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणम् । तृतीयेन महाभूतलक्षणमित्यनुसंधेयम् ॥ ॥ ३४ ॥ का सा त्वक् स्पर्शस्य संग्रहः सम्यग्ग्रहणं यया पुंस्त्वं नियतलिंगत्वात् । यद्वा स्पर्शस्य संग्रहस्ततो भवतीति शेषः । शब्दतन्मात्रादित्यादितन्मात्रणामुत्तरोत्तरान्वयार्थमुक्तम् ॥ ३५ ॥ स्पर्शलक्षणमाह । मृदुत्वमिति । स्पर्शत्वं स्वरूपलक्षणमित्यर्थः । नभस्वतो वायोस्तन्मात्रत्वं च ॥ ३६ ॥ चालनं वृक्षशाखादेः व्यूहनं

वृत्तितो वृत्तिभिर्लक्षणमिदमित्यर्थः । पृथगिति चित्ताद्यपेक्षया भिन्नमित्यर्थः । यद्वा । पृथक्संशयादिभिन्ना वृत्तयो लक्षणरूपा नेत्यर्थः ॥ ३० ॥ तत्र तैजसत्वे । इत्यर्थ इति । "बुद्धिः प्राणश्च तैजसौ" इति ब्रह्मोक्तेरिति भावः ॥३१॥ भगवद्वीर्यं कालरूपस्तत्प्रभावस्तेन प्रेरितात् । शब्दः केन गृह्यते इत्यपेक्षायामाह-श्रोत्रं त्विति ॥३२॥ तदुक्तमिति । द्वितीयस्कंधे स्वरूपलक्षणं तन्मात्रत्वं नभस इति लक्षणं चेदमभेदविवक्षयैव । वस्तुतस्तु—शब्दादयो द्विविधा आकाशादिद्रव्याणां सूक्ष्मावस्था गुणावस्थाश्च तत्राद्यास्तन्मात्ररूपा अर्थाश्रयादिरूपास्त्वन्ये इति ॥३३॥ आकाशं विना बाह्यांतरव्यवहारानुपपत्तेर्मठाद्यंतर्गते ह्याकाशेंतरोयमिति तद्बहिर्भूते तस्मिन्बाह्योयमिति च व्यवहारो भवतीत्यर्थः । उक्तमर्थमन्यत्राप्यतिदिशति—एवमित्यादिना ॥ ३४ ॥ संग्रहशब्दे नियतं पुंस्त्वमेवेति वक्तुं न शक्यते वृत्तावन्यलिंगस्यापि संभवात् 'बुद्धिर्निश्चयसंग्रहा' इत्यादिप्रयोगदर्शनेनेति चेत्तत्राह—यद्वेति । ततस्तया मूले तत इत्यस्य तस्मात्स्पर्शात् ॥ ३५ ॥ इत्यर्थ इति । मृदुत्वाद्येव स्पर्शस्वरूपमिति भावः ॥ ३६ ॥ संयोगो वस्तुमात्रेण उपोद्बलकत्वं संजीवकत्वं तदविनाभूतत्वं वा स्वकार्यासमर्थत्वमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् ॥ समुत्थितं ततस्तेजश्चक्षरूपोपलंभनम् ॥ ३८ ॥ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ॥
तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ॥ ३९ ॥ द्योतनं पचनं पानमदनं हिममर्दनम् ॥ तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ॥ ४० ॥
रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् ॥ रसमात्रमभूत्तस्मादंभो जिह्वारसग्रहः ॥ ४१ ॥ कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ॥ भौ
तिकानां विकारेण रस एको विभिद्यते ॥ ४२ ॥ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोंदनम् ॥ तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्विमाः ॥
॥ ४३ ॥ रसमात्राद्विकुर्वाणादंभसो दैवचोदितात् ॥ गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ॥४४॥ करंभपूतिसौरभ्यशांतोदग्रादिभिः पृथक् ॥
द्रव्यावयववैषम्याद्गंध एको विभिद्यते ॥ ४५ ॥

मेलनं तृणादेः प्राप्तिः संयोगो द्रव्यस्य गंधवतो घ्राणं प्रति तथा शैत्यादिमतः स्पर्शनं प्रति शब्दस्य श्रोत्रं प्रति नेतृत्वम् । सर्वेंद्रियाणामात्मत्वमुपोद्बलकत्वम् । कर्मणा कार्येणाभिलक्षणम् । भावे ल्युट् । कर्मैवाभिलक्षणमिति विग्रहे तु करणे ॥ ३७ ॥ ३८ ॥ द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वम् । गुणता द्रव्योपसर्जनतया प्रतीतिः शब्दस्य तु स्वातंत्र्येणैव प्रतीतिः अप्रत्यक्षद्रव्यस्य स्पर्शादेरपि स्वातंत्र्येणैव प्रतीतिः । रूपस्य तु नैवमिति तस्यायं विशेषः उक्तः व्यक्तिसंस्थात्वं द्रव्यस्य या संस्था सन्निवेशः सैव संस्था यस्य तत्परिणामतया प्रतीतिरित्यर्थः । तेजसस्तेजस्त्वमसाधारणत्वम् ॥ ३९ ॥ द्योतनं प्रकाशनम् । पचनं तंदुलादेः क्षुत्तृडशनाया पिपासा च तद्द्वारेण पानमदनं च ॥ ४० ॥ जिह्वा रसनेंद्रियम् । रसो गृह्यतेऽनयेति रसग्रहः । यद्वा रसग्रहस्ततो भवतीति शेषः ॥ ४१ ॥ कषायादिषु लवणोऽपि द्रष्टव्यः । भौतिकानां संसर्गिद्रव्याणाम् । य एको मधुर एव सन्नेवमनेकधा भिद्यते स रस इत्यर्थः ॥ ४२ ॥ क्लेदनमार्द्रीकरणम् । पिंडनं मृदादेः पिंडीकरणम् । तृप्तिस्तृप्तिदातृत्वम् । प्राणनं जीवनम् । " आपोमयः प्राणः " इति स्मृतेः ॥ आप्यायनं तृड्वैक्लव्यानिवर्तनम् । उंदनं मृदूकरणम् । ओंदनमिति पाठेऽपि स एवार्थः यस्त्वं कपादावुद्धृतस्यापि पुनःपुनरुद्रवः ॥ ४३ ॥ गंधगो गंधं प्राप्नोति ॥ ४४ ॥ करंभो विश्रगंधः यथा व्यंजनादीनां हिंग्वादिसंस्कारेण पूतिर्दुर्गंधः सौरभ्यं कर्पूरादेः शांतः शतपत्रादेः उग्रो

यावत् । अभि सर्वतोभावेन लक्षणं स्वरूपकथनम् ॥ ३७ ॥ रूपस्योपलंभनं ज्ञानं येन तत्तथा ॥ ३८ ॥ द्रव्ये उपसर्जनेन प्रतीतिः उपसर्जनप्रतीतिः अमुख्यत्वेन प्रतीतिः अप्रत्यक्षद्रव्यं वाय्वादिस्तस्य स्पर्शादिरादिना शब्दग्रहः । तस्य रूपस्य । इत्यर्थ इति । द्रव्यस्य परिमाणेनैव तत्प्रमाणप्रतीतिरिति भावः । असाधारणत्वं लक्षणम् । तथा च—रूपवद्द्रव्यं तेज इति रूपेणैव भास्वरशुक्लेन तेजजोऽसाधारणत्वं गम्यते इति संदर्भः । रूपं मात्रा तन्मात्रा यस्येति रूपमात्रं तस्य वृत्तयः स्वभावलक्षणानि ॥ ३९ ॥ हिममर्दनं शीतनिवारकत्वम् । शोषणं शुष्ककरणम् ॥ ४० ॥ ४१ ॥ रसानां षड्विधत्वं लवणं विना न पूर्यतेऽतस्सोप्यत्र ग्राह्य इत्याह—कट्वम्लादिष्विति "तुवरस्तु कषायोऽस्त्री मधुरो लवणः कटुः । तिक्तोऽम्लश्च रसाः पुंसि तद्वत्सु षडमी त्रिषु" इत्यमरः । इत्यर्थ इति । जलस्य केवलं मधुररसवत्त्वेपि संसर्गिद्रव्यस्वभावादन्येपि तत्र रसाः संभवंतीति भावः ॥४२॥ जलस्य जीवनत्वे श्रुतिमाह-आपोमयः जलविकारः । यद्वा । चंद्रादिदर्शनेन समुद्रादाविव भूयस्त्वम् ॥४३॥४४॥ आदिनाऽवलेहादिग्रहः । पुनरादिना कस्तूर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावनं ब्रह्मणः स्थानं धारणं सद्विशेषणम् ॥ सर्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् ॥ ४६ ॥ नभोगुणविशेषोऽर्थो यस्य तच्छ्रोत्रमुच्यते ॥ वायोर्गुणविशेषोऽर्थो यस्य तत्स्पर्शनं विदुः ॥ ४७ ॥ तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते ॥ अंभोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः ॥ भूमेर्गुणविशेषोऽर्थो यस्य स घ्राण उच्यते ॥ ४८ ॥ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् ॥ अतो विशेषो भावानां भूमावेवोपलक्ष्यते ॥ ॥ ४९ ॥ एतान्यसंहत्य यदा महदादीनि सप्त वै ॥ कालकर्मगुणोपेतो जगदादिरुपाविशत् ॥ ५० ॥

लशुनादेः अम्लस्तिंतिण्यादेः संसर्गिणां द्रव्यावयवानां वैषम्याच्च एवं विभिद्यते स गंध इत्यर्थः ॥ ४५ ॥ ब्रह्मणो भावनं प्रतिमादिरूपेण साकारतापादनम् । स्थानं जलादिविलक्षणाऽऽश्रयांतरनैरपेक्ष्येण स्थितिः धारणं जलाद्याधारत्वम् । सतामाकाशादीनां विशेषणमवच्छेदकत्वम् । सर्वेषां सत्त्वानां प्राणिनां तद्गुणानां च पुंस्त्वादीनामुद्भेदः परिणामविशेषैः प्रकटीकरणम् ॥ ४६ ॥ श्रोत्रादीनां शब्दादिग्राहकत्वमुक्तं तेषां च लक्षणं तदेवेत्याह । पंचभिः श्लोकार्धैः । नभसो गुणविशेषः शब्दो यस्यार्थो विषयः ॥ ॥ ४७ ॥ ४८ ॥ गुणविशेषशब्दव्यावर्त्यं दर्शयति । परस्येति । परस्य कारणस्य धर्मः शब्दादिरपरस्मिन्कार्ये वाय्वादौ कारणान्वयाद् दृश्यते । अतो भवानामाकाशादीनां विशेषो गुणः सर्वोऽपि शब्दादिर्भूमावेवोपलभ्यते चतुर्णां तत्रान्वयात् जलादिषु यथाऽन्वयमेव न सर्वः आकाशे त्वन्यान्वयाभावादेक एव ॥ ४९ ॥ एवं कारणोत्पत्तिमुक्त्वा कार्योत्पत्तिमाह । सार्धैस्त्रिभिः । एतान्यसंहत्यामिलित्वा यदा स्थितानि तदा जगदादिरीश्वरः प्राविशत् । सप्तेति च प्राधान्याभिप्रायेणोक्तम् । प्रवेशस्तु सर्वेष्वपि विव

दिग्रहः । पुनरादिनोत्पलादिग्रहः । पुनरादिना पलांड्वादिग्रहः । पुनरादिना मातुलुंगादिग्रहः । इत्यर्थ इति । वस्तुत एकोपि गंधः संसर्गिद्रव्यवशेन नानात्वं भजतीति भावः ॥ ४५ ॥ तन्नैरपेक्ष्येण जलाद्यपेक्षां विनैव । अत्रादिना वाय्वग्न्यादिग्रहः । अवकाशं विना स्थित्यसंभवादाकाशापेक्षा त्वस्त्येवेति ज्ञेयं, पुनरादिनाऽग्न्यादिग्रहः । अवच्छेदकत्वं व्यावर्त्तकत्वं गंधरूपस्वगुणेनेति बोध्यं तथा हि आकाशादिगुणानां शब्दादीनां पृथिव्यां सत्त्वेनाकाशादिषु न व्यावर्त्तकत्वं पृथिवीगुणस्य गंधस्य तेष्वसत्त्वेन तस्याव्यावर्त्तकत्वम् । अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकत्वादिति भावः । विश्वनाथस्तु-विशेषणं विशेषणहेतुः मलिनमाकाशं धूसरोऽनिल इत्यादिप्रतीतेरित्याह । पुंस्त्वादि हि—शिश्नवृषणाकारपरिणामेन पुंस्त्वं, योन्याकारपरिणामेन स्त्रीत्वमुभयविलक्षणसच्छिद्रभूभागाकारपरिणामेन च षंढत्वं पृथिव्या एव जायत इति विवेकः । संदर्भस्तु—ब्रह्मणः परमेश्वरस्य इंद्रनीलादिरूपायास्तस्या रूपादिदृष्टांतत्वेन भावनं स्मरणहेतुत्वमित्याह ॥ ४६ ॥ गुणविशेषो विशेषगुणः विशेषगुणस्तु "रूपं गंधो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः । बुद्ध्यादिभावनांताश्च शब्दो वैशेषिका गुणाः" इति तार्किकोक्तेः ॥ ॥ ४७ ॥ ४८ ॥ अतः कारणान्वयात् । चतुर्णामाकाशादीनां, तत्र भूमौ, यथान्वयं कारणभूतान्वयानुसारेणैव गुणसद्भावः आकाशस्य भूतांतरकारणगुणाभावादेकः शब्द एवेत्यर्थः ॥ ४९ ॥ कालः क्षोभकः । कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्तेनानुविद्धेभ्यो युक्तेभ्योंडमचेतनम् ॥ उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ॥ ५१ ॥ एतदंडं विशेषाख्यं क्रमवृद्धै र्दशोत्तरैः ॥ तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ॥ यत्र लोकवितानोऽयं रूपं भगवतो हरेः ॥ ५२ ॥ हिरण्मयादंडकोशादुत्थाय सलिलेशयात् ॥ तमाविश्य महादेवो बहुधा निर्बिभेद खम् ॥ ५३ ॥ निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् ॥ वाण्या वह्निरथो नासे प्राणोऽतो घ्राण एतयोः ॥ ५४ ॥ घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः ॥ तस्मात्सूर्यो न्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः ॥ ५५ ॥ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः ॥ तत ओषधयश्चासन्छिश्नं निर्बिभिदे ततः ॥५६॥ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् ॥ गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ॥५७॥ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् ॥ पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ॥५८॥ नाड्योऽस्य निरभिद्यंत ताभ्यो लोहितमाभृतम् ॥ नद्यस्ततः समभवन्नुदरं निरभिद्यत ॥ ५९ ॥ क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ॥ अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ॥ ६० ॥

क्षित एव ॥ ५० ॥ अनुविद्धेभ्यः क्षुभितेभ्यः यस्मादंडादसौ विराट् पुरुष उदतिष्ठत् ॥ ५१ ॥ भगवतो रूपमिति पुरुषाभेदाभिप्रायेण ॥ ५२ ॥ तस्मिन्नध्यात्मादिविभागमाह । हिरण्मयादिति नवभिः । उत्थायौदासीन्यं विहाय तमाविश्याधिष्ठाय महांश्चासौ देवश्च खं छिद्रम् ॥ ५३ ॥ वाण्या सह वह्निरभवत् प्राविशत् । नासे निरभिद्येताम् । प्राणोतः प्राणेन ऊतः स्यूतः सन् घ्राण एतयोर्नासिकयोरभवदित्यनुषंगः ॥ ५४ ॥ घ्राणादनंतरं वायुश्च प्राणोत इति विशेषणं सर्वेंद्रियेष्वपि द्रष्टव्यम् । न्यभिद्येता मन्वभिद्येतामिति पाठद्वयेऽप्येक एवार्थः । ततो दिशः प्राविशन् ॥ ५५ ॥ आदिशब्देन केशाः ॥५६॥५७॥ स्वराडिंद्रः हरिर्विष्णुः ॥५८॥ आभृतं जातम् ॥५९॥६०॥

जीवादृष्टं गुणः प्रकृतिस्तैः सहितः प्राविशत्संहननकारिण्या शक्त्या सर्वतत्त्वमेलनार्थं प्रथमं प्राविशत् । ततो वर्षसहस्रांतेंतर्यामित्वेन प्राविशदिति ज्ञेयम् ॥ ५० ॥ ततोंतर्यामिप्रवेशानंतरम् । तेन तत्प्रवेशेन । उत्थितमुत्पन्नम् । पुरुषो हिरण्यगर्भात्मकः समष्टिजीवः उदतिष्ठत् निद्रामिवातिक्रम्य सचेतनो बभूव ॥ ५१ ॥ विशेष इत्याख्या यस्य तत्तथा । दशोत्तरैरुत्तरोत्तरं दशगुणाधिकैः तोयस्यादिः पृथ्वी तदाद्यैरत्रैकादिपदलोपस्त्वार्षो ज्ञेयोऽन्यथा "ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्त्तिः" इति ब्रह्मांडभेदनोक्तक्रमविरोधः स्यादिति यत्रांडेयं प्रत्यक्षदृश्यो लोकानां पातालादीनां वितानः समूहः किंभूतो भगवतो हरे रूपं मूर्त्तिवदधिष्ठानम् । अजहल्लिंगत्वाच्छंढत्वम् ॥ ५२॥ तस्मिन्नंडे । तमंडकोशम् । देवो हरिः । निर्बिभेद पृथक् चकार । इह जलेंद्रियतदधिष्ठातृदेवानां भगवदिच्छया तदानीमेवाविर्भावो जातस्ततः पूर्वं तेषामसत्त्वात् । तदुक्तं "सृजत्यमोघसंकल्पः कल्पादौ विविधास्तनूः । देहेंद्रियादिभेदेन सर्गवृद्धिकरा हरिः" इत्यादिपुराणे यमनु देवगणा उभय इति सूचितं वेदस्तुतौ ॥ ५३ ॥ धातूनामनेकार्थत्वाद्भवतेः प्रवेशार्थमभिप्रेत्याहाभवत्प्राविशदिति । ततइत्यादिपञ्चम्यंतानामनंतरार्थो बोध्यः ॥ ५४ ॥ इत्यर्थ—इति व्याख्येयम् ॥ ५५ ॥ ५६ ॥ ५७ ॥ हरिस्तदाविष्टो देवविशेष इति संदर्भः ॥ ५८ ॥ अस्य विराजः लोहितं रक्तादि ॥ ५९ ॥ ६० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसश्चंद्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः ॥ अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ॥ ६१ ॥ एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् ॥ पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ॥६२॥ वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ॥ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ॥६३॥ अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ॥ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ॥ ६४ ॥ त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ॥ रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ॥ ६५ ॥ गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ॥ हस्ताविंद्रो बलेनैव नोदतिष्ठत्तदा विराट् ॥ ६६ ॥ विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ॥ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ॥ ६७ ॥ क्षुत्तृड्भ्यामुदरं सिंधुर्नोदतिष्ठत्तदा विराट् ॥ हृदयं मनसा चंद्रो नोदतिष्ठत्तदा विराट् ॥ ६८ ॥ बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् ॥ रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्तदा विराट् ॥ ६९ ॥ चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा ॥ विराट् तदैव पुरुषः सलिलादुदतिष्ठत ॥ ७० ॥ यथा प्रसुप्तं पुरुषं प्राणेंद्रियमनोधियः ॥ प्रभवंति विना येन नोत्थापयितुमोजसा ॥ ७१ ॥ तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया ॥ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ॥ ७२ ॥ इति श्रीभा० तृतीय० कापिलेयोपाख्याने तत्त्वसमाम्नाये षड्विंशोऽध्यायः ॥ २६ ॥ श्रीभगवानुवाच ॥ प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् ॥ १ ॥

बुद्ध्यादिषु हृदयमेवाधिष्ठानम् । गिरां पतिर्ब्रह्मा चैत्यः क्षेत्रज्ञः ॥ ६१ ॥ अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विवेक्तुं सर्वेषां पुनः प्रवेशमाह । एत इति नवभिः ॥ ६२ ॥ ६३ ॥ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ विराड्देहस्य व्यष्टिदेहं दृष्टांतत्वेन दर्शयन्सांख्यानुकथनस्य प्रयोजनमाह । यथेति द्वाभ्याम् ॥ ७१ ॥ प्रथमं परमेश्वरे भक्तिस्ततोऽन्यत्र विरक्तिस्ततो योगप्रवृत्ता धीः एकाग्रं चित्तं ततो यज्ज्ञानं तेन प्रत्यगात्मानं क्षेत्रज्ञमस्मिन्नात्मनि कार्यकारणसंघाते विविच्य चिंतयेत् ॥ ७२ ॥ इति तृतीये टी० षड्विंशतितमोऽध्यायः ॥ २६ ॥ सप्तविंशे ततः सम्यग्बहुसाधनयोगतः ॥ पुंप्रकृत्योर्विवेकेन मोक्षरीतिर्निरूप्यते ॥ ॥ १ ॥ विवेकज्ञानेन मोक्षमुपपादयितुं शुद्धस्यैव पुरुषस्य प्रकृत्यविवेकतः पूर्वोक्तं संसारमनुस्मारयति । प्रकृतिस्थोऽपीति त्रिभिः । देहस्थोऽपि नाज्यते न लिप्यते गुणै

चैत्यश्चित्ताधिष्ठाता वासुदेवः स एव चित्त उपास्यदेवता च स एव समष्टिजीवस्य हिरण्यगर्भस्य प्रद्युम्नत्वेनांतर्यामी स एव व्यष्टिजीवानामनिरुद्धत्वेनांतर्यामीति भागवतामृते । न तु चित्ताधिष्ठाता क्षेत्रज्ञो जीव इति वाच्यं तस्य कर्तृत्वकरणत्वाद्यभावस्य सर्वत्र प्रतिपादितत्वात् । "आचार्यचैत्त्यवपुषा स्वगतिं व्यनक्ति" इत्यादावपि चैत्त्यशब्देनांतर्यामिण एवोक्तिः । क्वचिच्चैत्त्यशब्देन जीवाभिधानं तु चित्तोपाधिकत्वादेव न तु चित्ताधिष्ठातृत्वादिति ज्ञेयम् ॥ ६१ ॥ अभ्युत्थिताः स्वस्वाधिष्ठानसंयोगं प्राप्ता अप्यस्य विराज उत्थापने बहिश्चेष्टासंपादने आविविशुः प्रयत्नं चक्रुः ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ चैत्त्यो वासुदेवः स एव क्षेत्रज्ञोंतर्यामी "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत" इति श्रीगीतोक्तेः ॥ ७० ॥ येन चित्ताधिष्ठात्रा परमेश्वरेण विना प्रसुप्तं व्यष्टि तथैव येन विना समष्टिविराडपि नोदतिष्ठदिति पूर्वेणान्वयः ॥ ७१ ॥ कार्यकारणसंघाते देहे जीवे वा ॥ ७२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे, तृतीयस्कन्धे षडिंशोऽध्यायः ॥ २६ ॥ ततो विराडंतर्यामित्वेन परमात्मविवेचनानंतरम् (१) शुद्धस्यैव वस्तुतः प्रकृतिसंगरहितस्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते ॥ अहं क्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते ॥२॥ तेन संसारपदवीमवशोऽभ्येत्य निर्वृतः ॥ प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ॥ ३ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥४॥ अत एव शनैश्चित्तं प्रसक्तमसतां पथि ॥ भक्तियोग न तीव्रेण विरक्त्या च नयेद्वशम् ॥ ५ ॥ यमादिभिर्योगपथैरभ्यसञ्छ्रद्धयाऽन्वितः ॥ मयि भावेन सत्येन मत्कथाश्रवणेन च ॥ ६ ॥ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ॥ ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ॥७॥ यदृच्छयोपलब्धेन संतुष्टो मितभुङ् मुनिः ॥ विविक्तशरणः शांतो मैत्रः करुण आत्मवान् ॥ ८ ॥

स्तत्कृतैः सुखदुःखादिभिः निर्गुणत्वादकर्तृत्वं ततोऽविकारित्वं तस्मात् ॥ १ ॥ २ ॥ अनिर्वृतः सन् प्रासंगिकैः प्रकृतिसंगकृतैः सदसन्मिश्रयोनिषु देवतिर्यङ्नरादिषु संसारपदवीं प्राप्नोति ॥ ३ ॥ ननु तर्ह्यवास्तवत्वात्संसृतेः किं तन्निवृत्तिप्रयासेन तत्राह । अर्थे हीति ॥ ४ ॥ यतो विषयध्यानमनर्थहेतुरतो मनो नियंतव्यमित्याह । अत एवेति । असतामिंद्रियाणां पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या च तीव्रया ॥ ५ ॥ भक्तिविरक्त्योरतीव्रत्वे कारणानि वर्णयन् ज्ञानेन मोक्षप्रकारमाह षड्भिः । यमादिभिर्योगमार्गैश्चित्तमभ्यसन्पुनः पुनरेकाग्री कुर्वन्नात्मानमुपलभ्य सर्वानुस्यूतमद्वयं परमात्मानं प्रतिपद्यत इति षष्ठेनान्वयः । सत्येन निष्कपटेन भावेन प्रेम्णा ॥ ६ ॥ अप्रसंगतः संगत्यागेन बलीयसा ईश्वरेऽर्पितेन ॥ ७ ॥ विविक्तशरण एकांतवासी ॥ ८ ॥

तत्कृतैर्गुणकार्यभूतैः ततो निर्गुणत्वात् ॥ १ ॥ इह जलार्कदृष्टांतेन दर्पणमुखदृष्टांतो लक्ष्यस्तस्मात्स्वमुखस्य दर्पणदोषलिप्तत्ववत्तल्लिप्तत्वेन मिथ्यैवाभिमानं कुरुते इत्याह—स इति ॥ २ ॥ तेन कर्तृत्वमननेन ॥ ३ ॥ अत्राक्षिपति-नन्विति । अर्थे कर्मरूपेर्थे वस्तुतः आत्मनोऽकर्तृत्वादसत्यपि तत्र कर्तृत्वाभिमानेन तद्ध्यानात् संसृतिर्न निवर्तत इति । अनर्थागमः स्वशिरश्छेदादिः ॥ ४ ॥ अत एव विषयध्यानस्यानर्थहेतुत्वादेव ॥ ५ ॥ आदिना नियमादिग्रहः । विश्वनाथः—मयि भावेन सत्येन मद्रूपनामलीलादीनां सत्यत्वदृष्ट्या मयि यः सत्यो भावः सत्यत्वभावना तेन न तु मायाशबलितब्रह्मदृष्ट्या मय्यायत्यामसत्यत्वभावनयेत्यर्थः । तथात्वे "त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यतो नादृतयुष्मदंघ्रयः" इति " नैष्कर्म्यमप्यच्युतभाववर्जितम् " इति "अवजानंति मां मूढा मानुषीं तनुमाश्रितम्" इति "न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः" इत्यादिभ्यो भगवद्विग्रहादौ चिदानंदभिन्नत्वभावनालक्षणावज्ञयाज्ञानिनामपि मोक्षाभावावगतेः ॥ ६ ॥ ७ ॥ यदृच्छयोपलब्धेन दैवात्प्राप्तेन धनादिनालंबुद्धिः । मितं परिमितं भुनक्तीति तथा "द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत् । मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत्" इत्युक्तेः । श्रुतिरप्येतमर्थमुपबृंहयति तथाहि—"यदात्मसम्मतमन्नं तदवति न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवति" इति श्रुतिः । एतदर्थस्तु आत्मसम्मतं स्वोदरपरिमाणमनुकूलञ्च यदन्नं भुज्यते तदन्नं भोक्तारमवति धर्मनिर्वाहाय च भवति न हिनस्ति धातुवैषम्यं संपाद्य पुरुषं न हन्ति न पीडयति च । यद्भूयः स्वोदरपरिमाणादतिरिक्तमन्नं भुज्यते तद्धिनस्ति शूलादिकमुत्पाद्य पुरुषं हंति धर्मञ्च नाशयति । यत्कनीयोऽत्यल्पमन्नं भुज्यते न तत्पुरुषमवति क्षुन्निवृत्त्यै धर्मनिर्वाहाय च क्षमं न भवति ततः परिमितमेव भोक्तव्यमिति सिद्धमत एव श्रीभगवताप्युक्तं गीतोपनिषदि "युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु । युक्तस्वप्नावबोधस्य योगो भवति दुःखहा" इति चिकित्साशास्त्रेप्ययमर्थो वर्णितः । 'ये गुणा लंघने प्रोक्तास्ते गुणा लघु भोजने' इति । मुनिर्मननशीलः । शांतो नियतचित्तः । मैत्रः सर्वत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सानुबंधे च देहेऽस्मिन्नकुर्वन्नसदाग्रहम् ॥ ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ॥९॥ निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः ॥ उपलभ्यात्मना ऽऽत्मानं चक्षुषेवार्कमात्मदृक् ॥ १० ॥ मुक्तलिंगं सदाभासमसति प्रतिपद्यते ॥ सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयम् ॥ ११ ॥ यथा जलस्थ आभासः स्थलस्थेनावदृश्यते ॥ स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः ॥ १२ ॥ एवं त्रिवृदहंकारो भूतेंद्रियमनोमयैः ॥ स्वाभासैर्लक्षितो ऽनेन सदाभासेन सत्यदृक् ॥ १३ ॥ भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विह निद्रया ॥ लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः ॥ १४ ॥

असदाग्रहमहंममताम् । प्रकृतेः पुरुषस्य च दृष्टं तत्त्वं येन तेन ज्ञानेन॥९॥निवृत्तानि बुद्ध्यवस्थानानि जाग्रदादीनि यस्य सः अत एव दूरीभूतमन्यदर्शनं यस्य आत्मना ऽहंकारावच्छिन्नेनात्मानं शुद्धमुपलभ्य एकस्यैवावच्छेदानवच्छेदाभ्यां करणकर्मत्वे दृष्टांतमाह । चक्षुषा चक्षुरवच्छिन्नेनार्केण गगनस्थमर्कमिव । एवमात्मदृक् शुद्धमात्मानं पश्यन् ॥१०॥मुक्तलिंगं निरुपाधिकमसति मिथ्याभूतेऽहंकारे सदाभासं सद्रूपेणावभासमानं ब्रह्म प्राप्नोति । शुद्धजीवस्वरूपाद्विशेषमाह । सतः कारणस्य प्रधानस्य बंधुम् धिष्ठानम् । असतः कार्यस्य चक्षुरिव प्रकाशकम् । सर्वेषु कार्यकारणेष्वनुस्यूतम् । अद्वयं परिपूर्णम्॥११॥अहंकारोपहितेन शुद्धब्रह्मप्रतिपत्तिं सदृष्टांतमाह । यथेति । जले स्थित आभासः सूर्यप्रतिबिंबो यदा गृहांतर्वर्ति भित्तौ स्फुरति तदा गृहकोणस्थितैः पुरुषैर्भित्त्यादौ स्थले स्थितेन स्वाभासेन सूर्यप्रतिबिंबेन यथा प्रथमं जलस्थ आभासो ऽवदृश्यते लक्ष्यते गगनस्थस्य गृहमध्ये प्रतिबिंबायोगात् । चार्थे तथाशब्दः।यथा चेत्यर्थः।यथा च जलस्थेन आभासेन दिवि स्थितः सूर्यो लक्ष्यते॥१२॥एवं भूतेंद्रियमनो मयैर्देहेंद्रियमनोभिरवच्छिन्नैः स्वाभासैरात्मप्रतिबिंबैस्त्रिवृत्त्रिगुणोऽहंकारः सतो ब्रह्मण आभासो यस्मिंस्तेन रूपेण लक्षितः।अहंकारस्थाभासं विना विषयाभासानुत्पत्तेः अनेन चाहं कारेण सदाभास वता सत्यदृक् परमार्थज्ञप्तिरूप आत्मा लक्षित इत्यर्थः॥१३॥इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति त्रिभिः।भूतादिष्वसत्यसत्तुल्येऽव्याकृते

प्रीतिमान्। करुणो दयालुः । आत्मवान् स्थिरबुद्धिः॥८॥सानुबंधे दारापत्यादिसहिते तत्त्वं स्वरूपम् ॥९॥ अत एव निवृत्तबुद्ध्यवस्थत्वादेव। अन्यदर्शनं भेददृष्टिः। अत्र चक्रवर्ती—ततश्च ज्ञानी शुद्धेन जीवात्मनैव परमात्मानं भक्त्यैवानुभूय तमेव प्राप्नोतीत्याह—उपलभ्येति । आत्मना शुद्धजीवेन चित्कणेन आत्मानं परमात्मानं पूर्णचैतन्यनिधिमुपलभ्य भक्त्यानुभूय चक्षुषा पटलादिदोषरहितेन ज्योतिःकणेनार्कं ज्योतिर्निधिमिव आत्म दृक् ज्ञानी प्रतिपद्यते प्राप्नोति अत्र पटलादिदोषरहितेनापि चक्षुषा यथोलूकादिरर्कं न पश्यति किन्तु तद्भिन्नो मनुष्यादिरेवार्कं पश्यति तथैव शुद्धेनापि जीवात्मना भक्तिरहितो ज्ञानी परमात्मानं नानुभवति किन्तु भक्ति मानेवानुभवति “भक्त्याहमेकया ग्राह्यः” इति “भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम्” इति भगवदुक्तेः॥१०॥कार्यस्य प्रपञ्चस्य। विश्वनाथः—तं कीदृशं मुक्तैर्जीवन्मु क्तैर्लिंग्यते ज्ञायते असति जगति सदैव भासतेंतर्यामित्वेनेति तं विशेषणपंचकेनानुभवज्ञानपूर्वदशायां तस्य शास्त्रोत्थज्ञानाविषयीभूतत्वं ज्ञापितम् ॥ ११ ॥ प्रथमं जीवात्मैव केन प्रकारेण ज्ञातव्यस्ततस्तेन परमात्मा चेत्यत्र दृष्टांतमाह—यथेति । जले स्थित आभासः प्रतिबिंबाकारो निष्कंपः सूर्यप्रकाशो यदा गृहान्तर्वर्त्ति स्वच्छभित्त्यादौ स्थले स्फुरति तदा गृहकोणस्थितैः पुंभिः प्रथमं स्थलस्थ आभासो दृश्यते कुतश्च कुतोयं प्रकाश इति परामृशद्भिस्तैस्तेन स्थलस्थेन स्वाभासेन शोभनसूर्यप्रकाशेन जलस्थो निष्कंप आभासोवदृश्यते लक्ष्यते पुनश्चायमवभासः कुत इति तथा तेनैव प्रकारेण तेन जलस्थेन स्वाभासेन शोभनप्रकाशेन दिवि स्थितः सूर्यो लक्ष्यते ॥ १२ ॥ एवं सूर्यवत् । इत्यर्थ इति । न हि चैतन्यप्रकाशं विना जडैः किंचित्कर्तुं शक्यते इति भावः ॥ १३ ॥ चक्रवर्ती—नन्वार्केण चक्षुषार्कं इवात्मनैव भक्तिमता ज्ञानिना परमात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा ॥ नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः ॥ १५ ॥ एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते ॥ साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः ॥ १६ ॥ देवहूतिरुवाच ॥ पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् ॥ अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ॥ १७ ॥ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः ॥ अपां रसस्य च यथा तथा बुद्धेः परस्य च ॥ १८ ॥ अकर्तुः कर्मबंधोऽयं पुरुषस्य यदाश्रयः ॥ गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम् ॥ १९ ॥

निद्रया लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं प्रतिपद्यत इति तृतीयेनान्वयः ॥ १४ ॥ ननु यदि तदा विनिद्रोऽसावस्ति तर्हि जाग्रत्स्वप्नयोरिव स्फुटः ।किं नावभासते तत्राह । पूर्वं स द्रष्टातो द्रष्टृत्वेन सविकल्पतया स्फुटं प्रतीतः सुषुप्तौ तु भूतादेरहंकारविषयस्य लीनत्वात्तद्विषयेऽहंकारे नष्टे सति स्वयमनष्टोऽपि मृषैवात्मानं नष्टवन्मन्यमानो यः । अन्यस्य नाशेऽन्यस्य नष्टतुल्यत्वे दृष्टांतः । नष्टवित्तो यथा आतुरो विवशः नष्टवद्भवतीत्यर्थः॥ १५॥ ननु सुषुप्तौ न किंचिदनुभूयते मैवम् ॥ "सुखमहमस्वाप्सं न किंचिदवेदिषम्" इति विशेषज्ञानं विना केवलस्यात्मनः प्रतिसंधानादित्याह । एवमिति । ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह। साहंकारस्य द्रव्यस्य कार्यकारणसंघातस्यानुग्रहः प्रकाशकः अवस्थानं च द्रव्यविशेषणतयाऽहंकारस्यापि दृश्यत्वाच्च तद्द्रष्टाऽऽत्मा तद्व्यतिरिक्तः तमात्मानमित्यन्वयः ॥ १६ ॥ भक्तिविरक्तिभ्यां सत्यपि विवेके प्रकृतिपुरुषयोः परस्परत्यागाभावात्कथं मुक्तिरिति पृच्छति पुरुषमिति चतुर्भिः । पुरुषव्यतिरेकेण प्रकृतेः स्वरूपलाभाभावात्प्रकृतिव्यतिरेकेण पुरुषस्याभिव्यक्त्यभावादित्यन्योन्यापाश्रयत्वान्नित्यत्वाच्च पुरुषं प्रकृतिः कदाचिन्न मुंचतीत्यर्थः ॥ १७ ॥ व्यतिरेकाभावमात्रे दृष्टांतः । यथा व्यतिरेकतो भावः सत्ता नास्ति । गंधस्य कदाचिदपक्षयदर्शनाद्दृष्टांतांतरम् । अपामिति । बुद्धेः प्रकृतेः परस्य पुरुषस्य च ॥ १८ ॥ ततः किमत आह । अकर्तुरिति । ये गुणा आश्रयो

नुभूयत इति सत्यं जानीमः किं तु चक्षुःश्रोत्रादिकमिव जीवात्मानं त्रिवृदहंकारात्पृथग्भूतं साक्षाद्दर्शयेत्यपेक्षायामाह–भूतेति । भूतादिषु असति अनभिव्यक्तत्वादसत्तुल्ये प्रधाने निद्रया लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं जीवं प्रतिपद्यते लोकोनुभवतीति ॥ १४ ॥ अत्राक्षिपति–नन्विति । पूर्वं जाग्रत्स्वप्नयोः । स जीवः । अतः अनयोरवस्थयोः सप्तम्यर्थे तसिल् स्वामिचरणैः कृतः । भूतादेरिहादिर्नेंद्रियादिग्रहः । इत्यर्थ इति । न तु नष्टो भवतीति भावः । चक्रवर्ती–तु नन्वलं तर्हि योगाभ्यासेन मनोबुद्धीन्द्रियादिलये सति यः केवलात्मानुभवो योगाभ्यासफलरूपस्तं खलु निद्रैव कारयतीति तत्राह–मन्यमान इति । भूतादीनामहंकार्याणामहंकारस्य च लयादहंकरणे नष्टे सति द्रष्टा जीवो दृश्यानामभावाद्दर्शने च नष्टे सति स्वयमनष्टोप्यात्मानं नष्टवन्मन्यमानो य इत्यविद्यावंतं जीवं सुषुप्तावुत्प्रेक्षते नष्टवित्त इव न तु नष्टवित्तासक्तिरित्यर्थः । अयमर्थः–योगाभ्यासेन जीवोपाधिभूतानां तत्त्वानामात्यंतिके लये सत्येव जीवः स्वरूपानंदमयो भवति न तु नैमित्तिकयोः सुषुप्तिप्रलययोः यथा वित्ते नष्टे सत्याकिंचन्यं सुखं न भवति किं तु वित्तासक्तावेव नष्टायां सत्यां तथैव जीवस्य नैष्कर्म्यं विना सुषुप्तिप्रलययोरुपाधिनाशेपि न स्वरूपप्राप्तिर्नैष्कर्म्यं च भक्तिज्ञानाभ्यां विना न भवेदिति । सुषुप्तावविद्यातत्संस्काराणां च विद्यमानत्वात् केवलात्मानुभवोप्यकिंचित्कर एवेति ॥ १९ ॥ पुनराक्षिपति–नन्विति । प्रतिसंधानात्स्फुरणात् । एवमहंकारावभासकत्वेन कार्यकारणसंघातो देहस्तस्य ॥ १६ ॥ पुनराक्षिपति भक्त्यादिना । इत्यर्थ इति । पुरुषव्यतिरेकेण प्रकृतेः स्वरूपलाभाभावात्प्रकृति व्यतिरेकेण पुरुषस्याभिव्यक्त्यभावादित्यन्योन्याश्रयत्वान्नित्यत्वाच्च पुरुषं प्रकृतिः कदाचिन्न मुञ्चतीति भावः ॥ १७ ॥ अपक्षयोऽभिभवः ॥ १८ ॥ ततः प्रकृतिपुरुषयोरन्योन्याश्रयत्वान्नित्यत्वाच्च किमागतमतोत्राह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणम् ॥ अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते ॥ २० ॥ श्रीभगवानुवाच ॥ अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना ॥ तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरम् ॥ २१ ॥ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा ॥ तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना ॥ २२ ॥ प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् ॥ तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥ २३ ॥ भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ॥ नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ॥ २४ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥ २५ ॥ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसम् ॥ युंजतो नापकुरुत आत्मारामस्य कर्हिचित् ॥ २६ ॥

यस्य सः तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं कथम् ॥ १९ ॥ अत एव क्वचिन्निवृत्तप्रायस्यापि संसारभयस्य पुनरुद्भवो दृश्यत इत्याह । क्वचिदिति ॥ २० ॥ न हि प्रकृतिसंबंधमात्रं बंधहेतुः किं तु गुणबुद्ध्या तदासक्तिस्तन्निवृत्तौ सत्यां मोक्षो घटते क्वचिदुद्भवस्तु साधनवैकल्यादित्यभिप्रेत्य साधनातिशयं कथयन्परिहरति त्रिभिः। निमित्तं फलं तन्न निमित्तं प्रवर्तकं यस्मिंस्तेन निष्कामेन धर्मेण अमलात्मना निर्मलेन मनसा श्रुतेन कथाश्रवणेन संभृतया पुष्टया॥ २१ ॥ २२॥ दह्यमानाऽभिभूयमाना तिरोहिता भवति ॥ २३ ॥ एवं च सति पुनरुद्भवो नास्तीत्याह । भुक्तो भोगो यस्याः नित्यशः सदा दृष्टो दोषो यस्याः अत एव परित्यक्ता सतीश्वरस्यापरतंत्रस्य स्वे महिम्नि स्थितस्य स्वानंदं प्राप्तस्य ॥ २४ ॥ अविवेकावस्थायामनर्थहेतुरपि विवेकानंतरं न भवतीति सदृष्टांतमाह । यथेति द्वाभ्याम् । प्रस्वापः स्वप्नः बहूनर्थान्बिभर्ति पुष्णाति

अतः प्रकृतेः कैवल्यं मोक्षः ॥ १९ ॥ यतः प्रकृतिगुणसत्त्वे मोक्षाभावोऽस्त्यत एव हेतोः तत्त्वविचारेण निवृत्तं निवृत्तप्रायं, न निवृत्तं निमित्तं कारणं रागरूपं यस्य तस्य भावस्तत्त्वं तस्मात् समूलनिवृत्त्यभावादपथ्यसेवने नासम्यक्चिकित्सितगद इव विषयसंबंधादुत्तिष्ठत इत्यर्थः ॥२०॥ इदानीं तन्निवृत्त्युपायसाधनान्याह—न हीत्यादिना । गुणबुद्ध्या शोभनधिया तदासक्तिः प्रकृतिकार्ये देहगेहादौ रागः । तन्निवृत्तौ प्रकृत्यासक्तिनिवृत्तौ "निमित्तं हेतुलक्ष्मणोः फले प्रवर्तकेपि स्यात्" इति स्वामी । यद्वा । अः विष्णुः स निमित्तं फलं तेन हेतुना भगवदर्पणबुद्ध्या कृतेनेत्यर्थः । चिरं श्रुतसंभृतया ॥ २१ ॥ भगवति बलीयसा दृढेन आत्मनि दृष्टं तत्त्वं जीवेशपारमार्थ्यं येन तेन ज्ञानेन समाधिश्चेतःस्थापनं तेन तीव्रेणाग्बहं क्रियमाणेन ॥ २२ ॥ इह लोके योनिरभिव्यक्तिस्थानम् । अरणिः काष्ठभेदः । यथाग्नेराविर्भावनिदानभूताप्यरणिः स्वत उत्पन्नेनाप्यग्निना दह्यमाना विनश्यति तथा साधनदशायामविद्याप्रयुक्तदेहाद्यभिमानाज्जातैर्ज्ञानादिसाधनैर्दह्यमाना प्रकृतिर्नश्यतीत्यर्थः ॥ २३ ॥ भोगः संसारानुभवः । दोष आनंदाद्यावरणलक्षणः । अत एव दृष्टदोषत्वादेव । यथाज्ञातव्यभिचारादिदोषस्य पत्युरग्रे नारी स्वचांचल्यादि न प्रकटयति तथा ज्ञानिनः प्रकृतिरपीति भावः । अत्राशुभं संसारभयम् एतदभिप्रेत्यैवोक्तं सप्तत्याम्—"प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति । मे मतिर्भवति । या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य" इति । सुकुमारतरं सलज्जम् ॥२४॥ एतद्दृष्टांतेन स्फुटयति—यथेति। दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति एवमिति । विदितमपरोक्षितं तत्त्वं स्वस्य प्रकृतेश्च स्वरूपं येन तस्य अपकुरुतेऽशोभनं कुरुते॥२५॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदेवमध्यात्मरतः कालेन बहुजन्मना ॥ सर्वत्र जातवैराग्य आब्रह्मभवनान्मुनिः ॥ २७ ॥ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा ॥ निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम् ॥ २८ ॥ प्राप्नोतीहांजसा धीरः स्वदृशा छिन्नसंशयः ॥ यद्गत्वा न निवर्तेत योगी लिंगाद्विनिर्गमे ॥ २९ ॥ यदा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग ॥ अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः ॥ ३० ॥ इति श्रीभा० तृती० कापिलेयोपाख्याने मोक्षरीतिवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ श्रीभगवानुवाच ॥ योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे ॥ मनो येनैव विधिना प्रसन्नं याति सत्पथम् ॥ १ ॥

प्रतिबुद्धस्य संस्कारवशेन स्फुरन्नपि ॥ २५ ॥ २६ ॥ उपसंहरति यदेवमिति त्रिभिः । बहूनि जन्मानि यस्मिन्काले ॥ २७ ॥ प्रतिबुद्धार्थो विदितात्मतत्त्वः कैवल्याख्यं स्वसंस्थानं देहादिव्यतिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निरतिशयानंदम् ॥ २८ ॥ स्वदृशा आत्मज्ञानेन छिन्नाः संशया मिथ्याज्ञानानि यस्य । लिंगाद्विनिर्गमे लिंगशरीरनाशे सतीत्यर्थः ॥ २९ ॥ तदा त्वणिमादिसिद्धयोंतरायरूपा भवंति तासु योगेनोपचितासु समृद्धासु न योगादन्यो हेतुर्यासां तासु यदा सिद्धस्य चेतो न विषज्जते । अंग हे मातः अथ तदांतमतिक्रांतोऽत्यंतो योऽहं तत्संबंधिनी यत्र यस्यां गतौ मृत्योर्हासो न भवति विषक्तौ तु सिद्धोऽपि मया वशीकृत इति मृत्योर्हासो गर्वो भवतीत्यर्थः ॥ ३० ॥ इति श्रीमद्भागवते तृतीये टीकायां सप्तविंशतितमोऽध्यायः ॥ २७ ॥ अष्टाविंशे ततोऽष्टांगयोगेन ध्यानशोभिना ॥ सर्वोपाधिविनिर्मुक्तं स्वरूपज्ञानमीर्यते ॥ १ ॥ भक्तिं संक्षेपतः प्रोच्य सांख्यमाख्याय विस्तृतम् ॥ अथाह वैष्णवं योगमष्टांगं कपिलो हरिः ॥ २ ॥ सबीजस्य

॥ २७ ॥ अहमेवाश्रयो यस्य तन्मदाश्रयं मदेकनिष्ठम् ॥ २८ ॥ यद्गत्वा इह संसारे न निवर्त्तते तद्धामेत्यध्याहार्य योज्यम् । ''न स पुनरावर्त्तते'' इति श्रुतेः । इत्यर्थ इति । ''अलिंगत्वादसंभवः'' इत्युक्तेरिति भावः। ॥ २९ ॥ तत्संबंधिनी अंतशून्या सार्वकालिकी मोक्षलक्षणेति यावत् । विषक्तावासक्तौ सत्याम् इत्यर्थ इति । 'ईश्वरो धाममानिनाम्' इत्युक्तन्यायेन 'अंतरायान्वदन्त्येतान् युंजतो योगमुत्तमम्' इति श्रीमुखोक्त्या च सिद्धि स्वीकारो भ्रंशहेतुस्तदस्वीकारश्च मोक्षहेतुरिति भावः ॥ ३० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे सप्तविंशोऽध्यायः ॥ २७ ॥ ततः सिद्ध्यनंगीकरणोत्तरम् । ध्यानेन सगुणविग्रहचिंतनेन । शोभितुं शीलमस्येति तेन सर्वोपाधिभिरहंकारादिभिर्विनिर्मुक्तं रहितम् (१) वैष्णवं विष्णुचिंतनात्मकं विष्णुप्रोक्तं वा ''ऋषीणां श्रोतुकामानां यमवोचं पुरानघे । तमिमं ते प्रवक्ष्यामि योगं सर्वांगनैपुणम्'' इत्युक्तेः (२) आलंबनं ध्यानविषयः स च विष्णुरेव तस्यैव सर्वबीजत्वात् ''बीजं विष्णुर्हि जगतः शाखास्सर्वा हि देवताः'' इति तीर्थोक्तेः । नृपात्मजायास्तव सालम्बनयोग एवाधिकारो निरालंबनस्य स्त्रीबुद्ध्यवस्थितेरसंभवात् ''स्त्रीत्वान्मातुस्तिरो दधे'' इति प्रह्लादोक्तेः ''योषाहं मंदधीर्हरे'' इति देवहूत्युक्तेश्चेति संबुद्ध्यभिप्रायः । विधिना प्रकारेण तत्प्रकारकं लक्षणं सतो ब्रह्मणः पंथाः प्राप्तिमार्गस्तम् '' ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः'' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनम् ॥ दैवाल्लब्धेन संतोष आत्मविच्चरणार्चनम् ॥ २ ॥ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा ॥ मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम् ॥ ३ ॥ अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ॥ ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ॥ ४ ॥ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः ॥ प्रत्याहारश्चेंद्रियाणां विषयान्मनसा हृदि ॥ ५ ॥ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणम् ॥ वैकुण्ठलीलाऽभिध्यानं समाधानं तथात्मनः ॥ ६ ॥ एतैरन्यैश्च पथिभिर्मनोदुष्टमसत्पथम् ॥ बुद्ध्या युंजीत शनकैर्जितप्राणो ह्यतंद्रितः ॥ ७ ॥ शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम् ॥ तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत् ॥ ८ ॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलम् ॥ ९ ॥

सालंबनस्य प्रसन्नं सत् सत्पथं ब्रह्ममार्गम् ॥ १ ॥ तत्र यमनियमानाह त्रिभिरक्षरद्वयाधिकैः । शक्त्या स्वधर्माचरणम् ॥ २ ॥ ग्राम्यस्त्रैवर्गिको धर्मस्तस्मान्निवृत्तिः मितं च तन्मेध्यं शुद्धं च तस्यादनम् । तत्र मितं नाम । "द्वौ भागौ पूरयेदन्नैस्तोयेनैकं प्रपूरयेत ॥ मारुतस्य प्रचारार्थं चतुर्थमवशेषयेद् " इति स्मृतिप्रसिद्धम् । विविक्तं विजनं क्षेमं निर्बाधं तस्य स्थानस्य सेवनम् ॥ ३ ॥ यावताऽर्थः प्रयोजनं तावन्मात्रस्य परिग्रहः ॥ ४ ॥ आसनादीन्यंगान्याह त्रिभिः । सत् आसनस्य जयेन स्थैर्यम् ॥ ५ ॥ स्वधिष्ण्यानां प्राणस्थानानां मूलाधारादीनां मध्ये एकस्मिन्देशे मनसा सह प्राणस्य धारणं धारणा । आत्मनो मनसः समाधानमात्माकारता ॥ ६ ॥ अन्यैश्च व्रतदानादिभिः पथिभिरुपायैः ॥ ७ ॥ आसनादीनि प्रपंचयति । शुचाविति यावत्समाप्ति । आसनं कुशाजिनचैलोत्तरं प्रतिष्ठाप्य स्वस्तिकासनेन यथासुखमिति वा समभ्यसेत्प्राणमिति शेषः । "ऊरू जंघांतराधाय पादाग्रे जानुमध्यगे ॥ योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः" ॥ ८ ॥ बाह्यवायोरंतःप्रवेशनं पूरकः प्रवेशितस्य धारणं कुंभकः धृतस्य बहिर्निःसारणं रेचकः । प्रतिकूलेन वा रेचककुंभकपूरकैः । यद्वा इडयापूर्य पिंगलया रेचनं पिंगलयापूर्य

श्रीगीतोक्तेः ॥ १ ॥ शक्त्या-यथाशक्ति विधर्माद्धर्मबाधरूपात् "धर्मबाधो विधर्मः स्यात्" इति सप्तमे वक्ष्यमाणत्वात् । धर्मबुद्ध्या क्रियमाणेन येन धर्मस्य बाधो नाशो भवेत्स विधर्मो यथा चैत्यवंदनादिः चात्पर धर्मादयोपि ग्राह्यास्ते च " विधर्मः परधर्मश्च आभास उपमा छलः । अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत्त्यजेत्" इति । "धर्मबाधो विधर्मः स्यात्परधर्मोन्यनोदितः । यः स्वेच्छया कृतः पुंभिराभोसा ह्याश्रमात्पृथक् ॥ उपधर्मस्तु पाखण्डो दम्भो वा शब्दभिच्छलः ।" इत्येवं सप्तमे वक्ष्यते । आत्मविदां सगुणनिर्गुणब्रह्मविदां चरणयोरर्चनम् ॥ २ ॥ त्रैवर्गिको धर्मार्थकामप्रधानः ॥ ३ ॥ ब्रह्मचर्यं स्त्रीसंगादित्यागः । तपः कृच्छ्रादि । शौचं बाह्याभ्यंतरम् । मृज्जलादिसाध्यं बाह्यं, भावशुद्धिरूपमांतरम् । स्वाध्यायः स्वशाखोचितवेदजपः । पुरुषार्चनं वेदाद्युक्तविधिना भगवत्पूजनम् ॥ ४ ॥ आदिना प्रत्याहारादिग्रहः । मौनं यथार्थमितभाषणम् । सतः पद्मासनादिषु श्रेष्ठस्यासनस्याक्लिष्टस्येत्यर्थः ॥ ५ ॥ मूलाधारादीनामित्यत्रादिना स्वाधिष्ठानादिग्रहः । एकदेशे मूलाधाराद्यन्यतमे वैकुंठस्य हरेर्लीलायाः सृष्ट्यादिरूपाया अभिध्यानं सततं स्मरणम् ॥ ६ ॥ आदिना तीर्थसेवादिग्रहः । असत्पथं विषयमार्गगमत एवं दुष्टं युंजीत सन्मार्गे योग इति शेषः ॥ ७ ॥ पूर्वं कुशासनं तदुपरि मृगचर्मादि तदुपरि चैलमौर्णादिवस्त्रमिति प्रतिष्ठाप्य एकदेशन्यायाश्रयापेक्षयाऽनन्यलभ्यार्थमुचितं मत्वाह--यथासुखमिति, वेति । स्मृत्यर्थस्तु--जंघांतर्जंघयोरंतराले ऊरूजानुनोर्मध्यगे पादाग्रे चाधाय शेषं स्पष्टम् ॥ ८ ॥ ग्रन्थांतरसंमत्या प्रकारांतरमाह--यद्वेति । इडया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः ॥ वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम् ॥ १० ॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषान् ॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ११॥ यदा मनः स्वं विरजं योगेन सुसमाहितम् ॥ काष्ठां भगवतो ध्यायेत्स्वनासाऽग्रावलोकनः॥१२॥ प्रसन्नवदनांभोजं पद्मगर्भारुणेक्षणम् ॥ नीलोत्पलदलश्यामं शंखचक्रगदाधरम् ॥१३॥ लसत्पंकजकिंजल्कपीतकौशेयवाससम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरम्॥१४॥मत्तद्विरेफकलया परीतं वनमालया॥परार्ध्यहारवलयकिरीटांगदनूपुरम्॥१५॥काञ्चीगुणोल्लसच्छ्रोणिं हृदयांभोजविष्टरम् ॥ दर्शनीयतमं शांतं मनोनयनवर्धनम् ॥ १६॥ अपीच्यदर्शनं शश्वत्सर्वलोकनमस्कृतम् ॥ संतं वयसि कैशोरे भृत्यानुग्रहकातरम् ॥ १७ ॥ कीर्तन्यं तीर्थयशसं पुण्यश्लोकयशस्करम् ॥ ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः ॥ १८ ॥

इडया रेचनमित्येवं प्रतिकूलेन । वाशब्दश्चार्थे । स्थिरं सत्पुनरपि चंचलं यथा न भवति तथा शोधयेत् ॥ ९ ॥ ध्मातं संतप्तमित्यर्थः । लोहं सुवर्णं यथा मलं त्यजति तथा मनो विरजं स्यात् । ततश्चंचलं न स्यादिति भावः ॥ १० ॥ प्राणायामादीनां समाधौ द्वारकार्याण्याह । प्राणायामैरिति । दोषान्वातश्लेष्मादीन् संसर्गान्विषयसंसर्गान् । अनीश्वरान् रागादीन् । वायुना सह मनसः स्थिरीकरणं धारणा । स्थिरस्य वृत्तिसंततिर्ध्यानम् । वृत्तिनिरोधः समाधिरिति भेदः ॥ ११ ॥ सुसमाहितं स्थिरं जातम् । काष्ठां कलां मूर्तिमित्यर्थः । स्वनासाग्रेऽवलोकनं यस्य । एतच्च लयविक्षेपयोः परिहाराय ॥ १२ ॥ ध्येयं हरिमाह सप्तभिः । प्रसन्नं वदनांभोजं यस्य तं ध्यायेदिति षष्ठेनान्वयः । पद्मगर्भवदरुणे ईक्षणे नेत्रे यस्य नीलोत्पलदलवच्छ्यामम् ॥ १३ ॥ लसत्पंकजस्य किंजल्कवत्पीते कौशेये वाससी यस्य श्रीवत्सो लांछनं वक्षसि यस्य भ्राजत्कौस्तुभेनामुक्ता संश्लिष्टा कंधरा यस्य ॥ १४ ॥ मत्तद्विरेफाणां कलो मधुरो ध्वनिर्यस्यां तया परीतं व्याप्तम् । परार्ध्यान्यमूल्यानि हारादीनि यस्य ॥ १५ ॥ कांचीगुणेनोल्लसंती श्रोणी यस्य । भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य । भक्तानां मनोनयनानि वर्द्धयति हर्षयतीति तथा ॥ १६ ॥ अपीच्यमतिसुंदरं भक्तविषयं दर्शनं यस्य कैशोरे तारुण्ये वयसि संतं स्थितम् । भृत्यानामनुग्रहे कातरं व्यग्रम् ॥ १७ ॥ कीर्त्तन्यं कीर्तनार्हं तीर्थं यशो यस्य पुण्यश्लोका

वामनासया पिंगलया दक्षिणनासया । तदुक्तं तत्त्वानुसंधाने "इडया पिब षोडशभिः पवनं चतुरुत्तरषष्टिकमौदरिकम् । त्यज पिंगलया शनकैःशनकैर्दशभिर्दशभिर्दशभिर्द्विधिकैः" इति । षोडशादिसंख्या चात्र मात्राणां प्रणवोच्चारणस्य वा ज्ञेयेति । अत्राकारप्रश्लेषेप्यर्थभेदो नास्तीति ॥ ९ ॥ इत्यर्थ इति । धमतेरग्निसंयोगार्थत्वमपीति भावः । लोहं पीतलोहं तच्च हेमलोहस्याष्टविधत्वमेकादशेऽर्चनोपाख्याने व्याख्यास्याम इति । इति भाव इति । रजस एव चालकत्वं सांख्यैरुक्तमित्याशयः ॥ १० ॥ द्वारकार्यं प्रवेशनम्' । किल्बिषान् जन्मान्तरसंचितपापानि । तत्र धारणादीनां भेदमाह—वायुनेत्यादिना । वृत्तिसंततिः प्रत्ययैकतानता । तथा च पातंजलसूत्राणि । "देशबंधश्चित्तस्य धारणा" (१) "तत्र प्रत्ययैकतानता ध्यानम् (२) "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" (३) ॥११॥ इत्यर्थ इति । " काष्ठोत्कर्षे सीम्नि दिशि " इत्यभिधानादुत्कृष्टं स्वरूपमिति भावः । संदर्भस्तु—काष्ठा दिक् अवधिः परमस्वरूपमिति यावदित्याह ॥ १२ ॥ चतुर्थं पद्ममपि ज्ञेयं योग्यत्वात् ॥ १३ ॥ श्रीवत्सो रोमावर्त्तो भृगुपादाचिह्नं वा तथैव श्रीदशमे व्याख्यास्यमानत्वात् । कं शिरो धरतीति कंधरा ग्रीवा ॥ १४ ॥ १५ ॥ १६ ॥ तारुण्ये तरुणसमीपे " कैशोरमापंचदश" इत्युक्तेः । " व्यग्रे कृशे कातरं स्यात्" । इति कोशात् ॥ १७ ॥ तीर्थं सर्वदोषहरम् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थितं व्रजंतमासीनं शयानं वा गुहाशयम् ॥ प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा ॥ १९ ॥ तस्मिँल्लब्धपदं चित्तं सर्वावयवसंस्थितम् ॥ विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः ॥ २० ॥ संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्यम् ॥ उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारम् ॥ २१ ॥ यच्छौचानिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ॥ ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदम् ॥ २२ ॥ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याऽखिलस्य सुरवंदितया विधातुः ॥ ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् ॥ २३ ॥

बलिप्रमुखास्तेषां यशस्करम् । समग्राण्यंगानि यस्मिन् न च्यवते नापयाति न पर्यैति वा ॥ १८ ॥ प्रेक्षणीयमीहितं लीला यस्य ॥ १९ ॥ तदेवं समग्रध्यानमुक्त्वैकैकावयवध्यानमाह । तस्मिँल्लब्धं पदं स्थितिर्येन तच्चित्तं विलक्ष्य विशेषेण लक्षीकृत्य । एकत्रैकैकस्मिन्नंग इत्यर्थः ॥ २० ॥ तदेव पादादिक्रमेणाह त्रयोदशभिः । सम्यक् चिंतयेत् पादतले रेखात्मकानि वज्रादीनि लांछनानि तैराढ्यं युक्तम् । उत्तुंगाश्च रक्ताश्च विलसंतो नखास्तेषां चक्रवालं मंडलं तस्य जोत्स्नाभिराहतो महतां ध्यातॄणां हृदयांधकारो येन । एतच्च सर्वमुपादेयविशेषणं ध्येयत्वेनैवोच्यते ॥ २१ ॥ किं च यस्य शौचेन क्षालनेन निःसृतायाः सरित्प्रवराया गंगाया उदकेन तीर्थेन संसारतारकेण मूर्ध्न्यधिकृतेन धृतेन शिवोऽपि शिवोऽभूत् अत्यधिकं सुखं प्रापेत्यर्थः । ध्यातुर्मनसि यः शमलशैलः पापपर्वतस्तस्मिन्निसृष्टं क्षिप्तं वज्रमिव यत् । यद्वा । शमलशैले निसृष्टं स्वलांछनरूपं वज्रं येन तत् ॥ २२ ॥ विभोर्जानुद्वयं तत्पर्यंतं जंघाद्वयमखिलस्य विधातुर्ब्रह्मणो जनन्या लक्ष्म्या संलालितं स्पर्शचातुर्येण संसेवितम् । संसारित्वमिव प्रतीतं वारयति । अभवस्येति । हृदि कुर्याद्ध्यायेत् ॥ २३ ॥

विश्वनाथस्तु–प्रसंगतो रागानुगीयभक्तानामपि ध्येयां लीलामाह–स्थितं वैकुंठे । वृंदावनीयकल्पतरुमूले च व्रजंतं वैकुंठाद्गोष्ठाच्च वनाय । आसीनं रक्तसिंहासने गोवर्द्धनशृंगे च । शयानं शेषपर्यंके गोवर्द्धनगुहायाञ्च । शुद्धभावं शुद्धाभिप्रायं चेतस्तदा तेन प्रेक्षणीयं जालरंध्राद्बहिः स्थित्वैव द्रष्टुमर्हमीहितं क्रीडा चेष्टितं यस्य तम् ॥ १९ ॥ लक्ष्यीकृत्य ज्ञात्वा । इत्यर्थ इति । झटिति बुद्ध्यारोहार्थमेकैकांगं ध्यायेदिति भावः ॥ २० ॥ तदेव ध्यानमेव । वज्रेति । दक्षिणचरणतलध्यानं तस्यैव कल्पतरुमूले तिष्ठतस्त्रिभंगललितस्य कृष्णस्य भक्तैर्दृश्यत्वात् । दक्षिणचरणस्य कनिष्ठातलेंकुशं ध्यायेदंकुशतले वज्रमनामिकातले सरोरुहं सरोरुहतले ध्वजमेवमंगुष्ठतले यवचक्रादिकं ज्ञेयम् । अंधकारोत्र पापम् । एतच्च वज्रांकुशादि उपादेयस्य ध्येयत्वेन स्वीकृतस्य पादारविंदस्य विशेषणम् ॥ २१ ॥ अन्यदपि चरणोत्कृष्टमाह किञ्चेति । यस्यांघ्रेः । इत्यर्थ इति । अद्यैवाहमेतद्धृत्वा शिवोऽभूवमित्यभिमन्यते स्मेति भावः । इवेत्युपमानोत्तरसमासे लुप्तोपमायां च । गौरवं मत्वाह–यद्वेति । एवमेव यच्चरणारविंदं ध्यातुर्भक्तस्य मनोहस्तिनः स्ववर्त्मन्यानेतुमंकुशं धत्ते मनःसरसीमलं कर्तुं कमलं मनसे सर्वोत्कर्षसाम्राज्यं दातुं ध्वजं सर्वोत्कृष्टयशो दातुं यवं त्रिविधतापोपशमनाय छत्रं सर्वतो रक्षणार्थं चक्रादिकमपिधत्त इत्यपि ज्ञेयम् ॥ २२ ॥ शयानं ध्यायेदित्युक्तमतः शेषपर्यंके शयानस्य विभोर्जानुद्वयं हृदि कुर्यादिति । जलजलोचन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊरू सुपर्णभुजयोरधि शोभमानावोजोनिधी अतसिकाकुसुमावभासौ ॥ व्यालंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबम् ॥ ॥ २४ ॥ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मम् ॥ व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरम् ॥ २५ ॥ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानम् ॥ कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य ॥ २६ ॥ बाहूंश्च मंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् ॥ संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहराजहंसम् ॥ २७ ॥ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन ॥ मालां मधुव्रतवरूथगिरोपघुष्टां चैत्त्यस्य तत्त्वममलं मणिमस्य कंठे ॥ २८ ॥

सुपर्णस्य भुजयोः स्कंधयोरधि उपरि ओजसो बलस्य निधी आधारौ अतसिकायाः कुसुमवत्कांत्यावभासमानौ व्यालंबि आगुल्फं लंबमानं यत्पीतांबरं वासस्तस्मिन्वर्तमानो यः कांचीकलापस्तेन परिरंभः संश्लेषो विद्यते यस्य तद्विभोर्नितंबबिंबं च। हृदि कुर्यादिति पूर्वेणैवान्वयः ॥ २४ ॥ अमुष्य हरेर्नाभिह्रदं ध्यायेत् । कथंभूतम् । भुवनानां कोशस्य समूहस्य गुहाधिष्ठानं यदुदरं तत्र स्थितम् । यत्र नाभिह्रदे आत्मयोनेर्ब्रह्मणो धिषणं धिष्ण्यमखिललोकात्मकं पद्मं व्यूढमुत्थितम् । तथा हरिन्मणिवृषौ मरकतमणिश्रेष्ठाविव यौ स्तनौ तयोर्द्वयं ध्यायेत् । विशदहाराणां मयूखैर्गौरं श्वेतम् ॥ २५ ॥ ऋषभस्य महाविभूतेर्महालक्ष्म्या अधिवासं स्थानं वक्षः कंठं च मनसि कुर्यात् । कथंभूतं कंठम् । कौस्तुभमणिर्यो भूषणार्थं धृतस्तस्याधिकं भूषणमर्थः प्रयोजनं यस्य कौस्तुभमणिमेव स्वयमलंकुर्वंतमित्यर्थः । पुंसां स्मर्तॄणां द्रष्टॄणां च मनोनयनानां निर्वृतिमादधानमित्युभयोर्विशेषणम् ॥ २६ ॥ निर्णिक्तान्युज्ज्वलीकृतानि बाहुवलयान्यंगदानि येषु अधिश्रिता लोकपाला येषु दशशतारं चक्रम् । न सह्यं तेजो यस्य करसरोरुहे राजहंस इव तम् ॥२७॥ अरातयो ये भटा योद्धारस्तेषां शोणितमेव कर्दमस्तेन दिग्धां लिप्ताम्। अस्य कंठे मालां मणिं च स्मरेत्। मधुव्रतानां वरूथस्य गिरा उपघुष्टां नादिताम् । चैत्त्यस्य जीवस्य तत्त्वम् । तदुक्तं वैष्णवे । "आत्मानमस्य जगतो निर्लेपमगुणामलम् ॥ बिभर्ति कौस्तुभमणिं स्वरूपं भगवान् हरिः"

येति । तल्लोचनाभ्यां निर्बाधमेवास्वादितलावण्यमित्यर्थः । इदमेव जानुनोर्जंघयोश्च माधुर्यमैश्वर्यमेवमग्रेपि ज्ञेयम् ॥ २३ ॥ व्रजंतं ध्यायेदित्युक्तमतः पृथुध्रुवादिभ्यो वरं दातुं गच्छतो गरुडारूढस्य हरेरूरुद्वयं हृदि कुर्यादिति । नितंबयोर्बिम्बं मंडलम् ॥ २४ ॥ यद्वा । हरिन्मणिवर्णो वृषो धर्मो यत्र तथाभूतयोस्तनयोरिति 'धर्मस्तनाद्दक्षिणतः' इत्युक्तेस्तस्य दक्षिणस्तनस्य धर्मकारणत्वात् । श्वेतामिति दक्षिणस्तनोपरि दक्षिणावर्त्तश्वेतश्रीवत्सरेखामपि हारकांतिमिव ध्यायेदिति सूचितम् ॥ २५ ॥ इत्यर्थ इति । कंठेनैव मणिशोभा कृतेति भावः ॥ २६ ॥ समुद्रं मथतो हरेर्बाहूंश्चिंतयेत् ॥ २७ ॥ मणेर्जीवस्वरूपत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भृत्यानुकंपितधियेह गृहीतमूर्तेः संचिंतयेद्भगवतो वदनारविंदम् ॥ यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारनासम् ॥ २९ ॥ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टम् ॥ मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ॥ ॥ ३० ॥ तस्यावलोकमधिकं कृपयाऽतिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः ॥ स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायाम् ॥ ३१ ॥ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् ॥ संमोहनाय रचितं निजमाययाऽस्य भ्रूमडलं मुनिकृते मकरध्वजस्य ॥ ३२ ॥

इति ॥ २८ ॥ भृत्येष्वनुकंपिता कृतानुकंपा या धीस्तया गृहीता मूर्तिर्येन तस्य विस्फुरती ये मकरकुंडले तयोर्वल्गितेन प्रचलनेन विद्योतितावमलौ कपोलौ यस्मिंस्तत् । उदारा उन्नता नासा यस्मिंस्तत् ॥ २९ ॥ यच्च स्वया भूत्या शोभयाऽलिभिः परिसेव्यमानं मीनद्वयाश्रयं च श्रीनिकेतनं पद्ममधिक्षिपद्वर्तते तद्ध्यायेत् । तत्र कुंतलै रलीनामधिक्षेपः नेत्रद्वयेन मीनद्वयस्येति द्रष्टव्यम् । अब्जे इव नेत्रे यस्मिन्नित्युपमानांतरम् । उल्लसंत्यौ भ्रुवौ यस्मिन् मनोमयं मनस्याविर्भवत् ॥ ३० ॥ कृपयाऽधिकम त्यर्थम् । अक्षिभ्यां निसृष्टं प्रयुक्तम् । स्निग्धस्मितेनानुगुणितं संयुक्तम् । विपुलः प्रसादो यस्मिन् । गुहायां हृदि ॥ ३१ ॥ अवनता येऽखिललोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशोषयतीति तथा तं हरेर्हासम् । अस्यात्युदारं भ्रूमंडलं च ध्यायेत् । कथंभूतम् । निजमायया मकरध्वजस्यापि संमोहनाय रचितं मुनिकृते

पुराणांतरसंमतिमाह—तदुक्तमिति । स्पष्टोर्थः ॥ २८ ॥ यद्वाऽनुकंपितमनुकंपा कृपा तदात्मिका तन्मयी वा या धीस्तया स्ववासार्थं गृहीता मूर्तिर्यस्य हे मत्स्वरूपशक्तिसारभूतानुकंपे इह मर्त्यलोके मन्मूर्तिषु मध्ये यामिच्छसि तां स्वनिर्भरनिवासार्थं गृहाणेत्युक्ते तया विविविच्य रामकृष्णमूर्ती एव विशेषतो गृहीते इत्यर्थः । यदिति मकरकुंडलयोर्वल्गनं खलु पार्श्वद्वयस्थ पार्षदसंचालितचामरहेतुकेन मारुतेन वा वयस्यगणनर्मोक्तिहेतुकेन शिरःकंपेन वा सहचरीगणनृत्यगीतवाद्यतालतानाद्यास्वादनसाधुत्वख्यापनहेतुकया ग्रीवाभंग्या ज्ञेयम् । अमलेति । कपोलयोर्मसृणमणिदर्पणायमानत्वं तयोश्चलन्मकरकुण्डलद्वयप्रति बिंबेन नटन्तौ नयनखंजनौ नृत्योपाध्यायौ भूत्वा स्वतलस्थलमायातं मकरचतुष्टयं नर्त्तयत इवेत्युत्प्रेक्षा गम्या । 'उदारो दातृमहतोः' इत्यभिधानान्नासिकायास्तदास्वादनसम्यत्वेन सर्वस्वदातृत्वम् ॥ २९ ॥ यच्च वदनारविंदं तत्र वदनांगेषु उल्लसंत्यौ भक्तेषु कृपाद्योतनायेति ॥ ३० ॥ तस्य हरेः । यद्वाऽन्वनुगुणितं पौनःपुन्येनस्फीतनीकृतं प्रथमं द्विगुणितं ततस्त्रिगुणितादिक्रमेण कोटिकोटिगुणितमित्यर्थः । अत एव विपुलः प्रसादो यत्रेति तत् । विपुलभावनया विततभक्त्या ॥ ३१ ॥ लोका भक्तास्तेषां दास्यसख्यादिभाववतां तद्विरहोत्थत्वात्तीव्रो यः शोकाश्रुसागरस्तं विशेषेण शोषयतीति । अत्युदारं शोकसागरादुद्धृत्यानंदसागरे निमज्जनं ददानमित्यर्थः । यद्वा । सांसारिकतीव्रदुःखशोकाश्रुसागरशोषणत्वेन हासस्य संसारातीतप्रेमानंदाश्रुसागरवर्द्धनत्वं ध्वन्यते तेन चंद्रत्वेप्यद्भुतत्वं प्रसिद्धं चंद्रो हि क्षीरोदं वर्द्धयतीति । इत्यर्थ इति । पत्रांबुभोजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यानायनं प्रहसितं बहुलाधरोष्ठभासाऽरुणायिततनुद्विजकुंदपंक्ति ॥ ध्यायेत्स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथग् दिदृक्षेत् ॥
॥ ३३ ॥ एवं हरो भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ॥ औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ॥ ३४ ॥

मुनीनामुपकाराय मुनीनां संमोहने प्रवृत्तं काममेव संमोहयितुमित्यर्थः ॥ ३२ ॥ मंदहासध्यानमुक्त्वा स्फुटहासध्यानमाह । विष्णोः प्रहसितमुच्चैर्हसितं ध्यायेत् । कीदृशम् । ध्यानायनमतिसुंदरतया प्रयत्नं विनैव ध्यानस्य विषयभूतम् । सौंदर्यमेवाह । बहुलयाऽधिकयाऽधरोष्ठस्य भासा कांत्याऽरुणीभूतास्तनवः सूक्ष्मा द्विजा एव कुंदमुकुलानि तेषां पंक्तिः स्फुरति यस्मिंस्तत् । देहकुहरे हृदयाकाशेऽवसितस्य ज्ञातस्य प्रेमरसेनार्द्रया भक्त्या तस्मिन्नेवार्पितमनाः सन्पृथक् तद्व्यतिरिक्तं द्रष्टुं नेच्छेत् न चित्तं विचालयेदित्यर्थः ॥ ३३ ॥ समाधिमाह । एवमिति द्वाभ्याम् । नीर्बीजः सबीजश्चेति द्विविधो योगः तत्र निर्बीजयोगो "यतो यतो निश्चरति मनश्चंचलमस्थिरम् ॥ ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्" इति गीताद्युक्तमार्गेण क्रियमाणोऽपि दुष्करः समाधिः । सबीजे तु सुकरः तत्र हि परमानंदमूर्तौ हरौ ध्यायमानेऽयत्नत एव चित्तोपरमो भवति । तदुक्तम् । "हृतात्मो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते" इति । अतः स एवोपक्षिप्तो योगस्य लक्षणं वक्ष्ये सबीजस्येति तदेवायत्नसिद्धत्वं दर्शयति । एवं ध्यानमार्गेण हरौ प्रतिलब्धो भावः प्रेम येन तथा भक्त्या द्रवद्धृदयं यस्य प्रमोदादुद्गतानि पुलकानि यस्य औत्कंठ्यप्रवृत्तयाश्रुकलया च मुहुरर्द्यमान आनंदसंप्लवे निमज्जमानो

नस्तपस्यतोपि मुनीनयं द्वेष्टीति कोपेनेवेति भावः ॥ ३२ ॥ प्रेक्षणीयेहितं ध्यायेत् इत्युक्तमतः क्वापि रहसि कुसुमतल्पमध्यासीनस्य स्वप्रेयसीमातिसौरभलोभेन श्रवणनयननासामुखादिसमीपमजहतः कदाचिद्भ्रमरस्य झंकारेण त्रस्तां शश्वद्भ्रूजोत्क्षेपरसनोन्नमनग्रीवानयनादिचापल्यवतीं रसिकशेखरपदयोस्ते पतामि दुष्टमिमं विद्रावयेति सकाकुव्याहरतीं पश्यतः शृणु भो भृंगाधिपेमामद्य मा जहीहि मुंक्ष्वेति निगदतो भगवतः प्रहसितं ध्यायेत् । इत्यर्थ इति । पुरुषार्थसारादन्यस्याधिकवस्तुनोऽसंभवाद्भक्तानामेतदास्वादानंदमोह एव समाधिरिति भावः । एवं नवांगभक्तेस्तृतीयमंगमेतद्भगवदवताररूपगुणलीलामाधुरीधुरीणमपि ध्यानमष्टांगयोगप्रसंगे यदुक्तं तत्खलु योगमहागह्वराद्योगिनोपि भक्तिरससुधार्णवे मज्जयितुमेव दृश्यते च "पारिनिष्ठितोपि नैर्गुण्ये उत्तमश्लोकलीलया । गृहीतचेता राजर्षे आख्यानं यदधीतवान्" इति । "अद्वैतवीथीपथिकैरुपास्याः स्वानंदसिंहासनलब्धदीक्षाः । हठेन केनापि वयं शठेन दासीकृता गोपवधूविटेन" इति तत्तदुक्तिभिर्महायोगिनोपि वैयासकिबिल्वमंगलादयो महदनुग्रहवशाद्भक्तिरस एव निमज्जंत एवेति ॥ ३३ ॥ निर्बीजः निरालंबनः । सबीजः सालंबनः तावेवासंप्रज्ञातसंप्रज्ञातौ स्तः । पतंजलिना सूत्रितावपि "ता एव सबीजः समाधिः" पा॰ १॥ सू॰ ४६॥ ताः पूर्वोक्ताः समापत्तयः सवितर्काद्याः । सह बीजेनालंबनेन वर्तते इति सबीजः संप्रज्ञातः (१) "तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः" पा॰ १॥ सू॰ ५१ ॥ तस्य संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद्या या संस्कारमात्रा वृत्तिरुदेति तस्यांतस्यां नेतिनेति पर्युदसनान्निर्बीजः समाधिराविर्भवति । यस्मिन्सति पुरुषः स्वरूपमात्रनिष्ठो भवतीत्यर्थः (२) तत्र द्विविधयोर्मध्ये यतोयतो विषयात् एतन्मनः । तत्रहि—सबीजे हि । तत्—चित्तोपरमणम् । अतः अयत्नतश्चित्तोपरमात् । स एव—सबीज एव । उपक्षिप्त—उपन्यस्तः । इत्यर्थ इति । तद्रूप्यं प्राप्तत्वादिति भावः । अत्र विश्वनाथः—यस्त्वतिमंदो महदननुगृहीत एतामपि ध्यानमाधुरीमुपभुज्याप्यलब्धास्वादनिष्ठो जिहासति स तु योगी योग एव प्राप्तनिष्ठोपि योगिष्वपि निकृष्ट एव भक्त्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथाऽर्चिः॥आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः॥३८॥

दुर्ग्रहस्य भगवतो ग्रहणे बडिशं मत्स्यवेधनमिवोपायभूतं चित्तमपि ध्येयाद्वियुंक्ते तद्धारणे शिथिलप्रयत्नो भवतीत्यर्थः ॥ ३४ ॥ यर्हि यदैवं निर्विषयं भवत्यत एव दीयमानमेकाविंशातिप्रकारदुःखनाशपूर्वकप्रत्यगात्मानुभवात्मकं मोक्षं प्राप्नोति न तु ब्रह्मानुभवात्मकं मोक्षमित्याह—एवमित्यादि यावदध्यायसमाप्ति । हरौ भगवतीति मनोहरत्वाद्भगषड्कवत्वाच्च माधुर्य्यैश्वर्यामृत परिपूर्णोपि प्रतिलब्धभावः । श्लेषेण प्रतिरूपतयैव न त्वनुरूपतया लब्धो भावो येन सः अत्र खल्वपिशब्दः सर्वत्रान्वेति प्रतिलब्धभावोपि, द्रवद्धृदयोपि, उत्पुलकोपि औत्कंठ्यहेतुकया बाष्पकलयाश्रुभागेन मुहुरर्द्यमानोपि, तत्रापि तस्मादपि स्वरूपाच्चित्तबडिशं वियुंक्ते वियोजयति 'ज्ञानं च मयि संन्यसेत्' इति विधिवद्भक्तिसंन्यासे विध्यभावात् । प्रत्युत ''भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत्'' इति निषेधविधेः सद्भावादयं मंदधीः स्वेच्छयैव वियोजयतीत्यर्थः वियुंज्यादिति विध्यप्रयोगात् । यतोऽस्य चित्तं बडिशमतस्तादृशोपि सन् तस्मादपि माधुर्य्यमयस्वरूपाद्वियोजयतीति विषयरसौत्कर्ष्यद्रवीकरणार्थं भगवन्माधुर्य्ये निक्षिप्तं यच्चित्तं तस्य तन्माधुर्य्यौत्कर्ष्यस्यापि निवृत्तये तच्चित्तं ततोपि निवर्तयतीत्यर्थः । शनकैरिति । चित्तस्य सम्यग्युक्तत्वे वियोजनं खलु दुर्घटमेवातोऽसम्यग्योग एव सत्यभ्यासेन शनैःशनैर्द्वित्रिनिवारेण चतुःपंचवारेण वा सप्ताष्टवारेण वाऽवश्यमेव वियोजयतीति । बडिशं ह्यश्मसारमयं भवति अतः स्वर्णरूप्यादिवन्न नवनीतादिवद्द्रवी भवति किं तु वह्नितापाधिक्यवशात्किञ्चिद्द्रवदेव तत्क्षण एव पुनः कठोरं च भवत्यतो द्रवद्धृदय इति न तु द्रुतहृदय इत्युक्तं यथा बडिशं खलु गंगादितीर्थजलनित्यस्नानपरमपि कुटिलमरसज्ञं यथा च मीनलोभनमिष्टपिष्टान्नखंडेनावृतमुखत्वाद्दांभिकं च तथैव विगीतयोगिनश्चेतोपि तीर्थपूतमपि कठोरं कुटिलं भगवदाकर्षकध्यानभक्त्यावृतमुखत्वाद्दांभिकं च 'धर्मः प्रोज्झितकैतवः' इत्यत्र स्वामिचरणैः प्रशब्देन मोक्षाभिसंधेरपि कैतवत्वव्याख्यानात् कैवल्येच्छा कैतवदोषादेव येन सर्वश्रेष्ठापि ध्यानरूपा श्रीभक्तिदेवी योगांगत्वेनोपासितापि पश्चात्त्यक्ता तस्य योगिचित्तबडिशस्य स्पर्शो भगवतोपि कष्टकर एवातस्तद्वियोगे भगवानेव तस्मै हारिततादृशचित्तबडिशाय योगिधीवराय मोक्षमेवैकाविंशातिप्रकारदुःखनिवृत्तिपूर्वकप्रत्यगात्मानुभवरूपं ददाति न तु परमात्मानुभवरूपं मोक्षं यस्तु भगवद्गीतोक्तोऽष्टांगयोगी भगवद्ध्यानमजहदेव दृष्टस्तस्मै तु परमात्मानुभवरूपमपि मोक्षं ददातीत्याहुर्भागवतरसिकाः । यतः स कदाचिदपि न ध्येयाद्भगवन्मधुररूपाद्वियोक्तुमीष्टे यथोक्तं राज्ञा ''धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति । मुक्तसर्वपरिक्लेशः पांथः स्वशरणं यथा'' इति । उद्धवेन च ''तस्याखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु'' इति श्रीनारदेन च ''स्मरन्मुकुंदाध्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः'' इति रसग्रह इत्यनेन योगिष्वपि मध्ये श्रीशुकप्रभृतय एवाभिनंदिताः । अत्रैव पूर्वश्लोके ''भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत्'' इति । अर्पितमना इति । भगवते मनः समर्प्य तस्मिन्मनसि स्वत्वाभावात्कथं तस्मात्तद्वियोजयेत् । कथं वा दत्तापहारी भवेदिति तथात्वे निंदा दुर्निवारैव भगवानपि भक्तानामेव हृदि तिष्ठति न योगिनः तदुक्तं ब्रह्मणा ''भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृदयांबुरुहात्स्वपुंसाम्'' इति । आविर्होत्रेण च 'विसृजति हृदयं न यस्य' इत्यादि । संदर्भस्तु—बडिशजीविकसादृश्येन तस्य निकर्ष एव ज्ञापितः न तु 'स्वसुखनिभृतचेता' इत्यादौ रुचिरपदेन श्रीव्याससूनोर्लोभनीयां लीलां प्रशंसति वाक्ये तद्विधस्यैव तस्योत्कर्षः प्रतिपादितः ''आराधनं भगवत ईहमाना निराशिषः । ये तु नेच्छंत्यपि परं ते स्वार्थकुशला नराः'' द्वयोरनयोरधिकारिणावुत्तरत्र विलक्षणायां निष्ठायां परमनिदानत्वं महत्संगवैलक्षण्यमेव ज्ञेयं यदेव सर्वत्र मूलमिति । तैर्दर्शनीयावयवैरित्यादौ हृतात्मन इत्यादिकं तु नात्रोदाह्रियते 'तस्य नैकात्मताम्' इत्यादिशुद्धभक्तप्रकरणपाठाद्यथादर्शितमेव व्याख्यानं युक्तमिति । तदेतत्सोदाहरणं श्रीकपिलदेववाक्यं ''भक्त्या पुमाञ्जातविराग ऐन्द्रियात्'' इत्यादिकमपि ज्ञेयं तथाहि अस्य पूर्वत्र 'श्रद्धा रतिर्भक्तिरनुक्रमिष्यति' इति भक्तिमात्रं दर्शितमुत्तरत्र भक्तलक्षणे पृष्टे तल्लक्षणं वदता तेन ''भक्तिः सिद्धेर्गरीयसी'' इति ''नैकात्मतां मे स्पृहयन्ति केचित्'' इति च मोक्षनिरपेक्षतयैव तस्य मुख्याभिधेयत्वमुक्तं 'जरयत्याशु या कोशम्' इत्यनेन कोशध्वंसस्य तु तदानुषंगिकगुणत्वमुक्तम्। 'अत्र भक्त्या पुमानि'त्यादौ तु तादृश्या अपि तस्या भक्तेर्ज्ञानादिसाहाय्यादेव मोक्षमात्रसाधकत्त्वमुक्त्वा गौणाभिधेयत्वमुक्तं तस्मादत्रापि तस्या भक्तेराभास एव प्रथमतो दर्शितः । एवं ''दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः । दंडवत्पतिता राजञ्शनैरुत्थाय तुष्टुवुः'' इत्यत्र वृत्राख्यनाशस्वराज्यप्राप्तितात्पर्यवतां देवानां भक्त्याभासत्वमुदाहार्य्यम्॥३४॥निर्विषयं निरालंबम् । अत एव निर्विषयत्वादेव । अत्राक्षिप्य समाधत्ते न चेति। पूर्ववत्। एतदवस्थातः प्राग्वत्। तत्र शब्दादौ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये ॥ हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन्विधत्त उपलब्धपरात्मकाष्ठः ॥ ३६ ॥ देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत्स्वरूपम् ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ॥ ३७ ॥

मुक्ताश्रयं च ध्येयसंबंधं विना ध्यातर्यवस्थानासंभवात्। न च पूर्ववच्छब्दादिर्विषयः स्यात् यतस्तत्र विरक्तं परमानंदानुभवेन अतो निर्वाणं लयमृच्छति। वृत्तिरूपतां परित्यज्य ब्रह्माकारेण परिणमत इत्यर्थः। यथाऽर्चिर्ज्वालाऽऽश्रयविषयापगमे महाभूतज्योतीरूपेण परिणमते अत्रास्यां दशायामव्यवधानं ध्यातृध्येयविभागशून्यमेकमखंडमात्मानमनुगतमीक्षते। अत्र हेतुः प्रतिनिवृत्तोऽपगतो गुणप्रवाहो देहाद्युपाधिर्यस्य ॥ ३५ ॥ न च सुप्तोत्थित इव पुनः संसरतीत्याह। सोऽपि स एव पुरुषस्तस्मिन्महिम्नि ब्रह्मरूपेऽवसितोऽवसानं निष्ठां प्राप्तः। कया। मनसो निवृत्त्या चरमयाऽविद्यारहितयेति सुषुप्ताद्विशेषः तत्र ह्यविद्याऽस्ति न त्विदानीम्। अत्र हेतुः। एतया योगाभ्यासकृतयेत्यर्थः। नन्वेवमपि सुखदुःखयोरात्मधर्मत्वे कुतो ब्रह्मैक्यं तत्राह। दुःखयोः सुखदुःखयोर्हेतुत्वं भोक्तृत्वं च यत्पूर्वमासीत्तदप्यसत्याविद्याकृते कर्तर्यहंकारे विधत्ते तन्निष्ठमेव पश्यतीत्यर्थः। यत उपलब्धपरात्मकाष्ठोऽपरोक्षीकृतात्मतत्त्वः ॥ ३६ ॥ तस्य जीवन्मुक्तिमाह। देहं चेति द्वाभ्याम्। चरम उक्तलक्षणः सिद्धो देहमपि न विपश्यति कुतः सुखदुःखे आसनादुत्थितमुत्थाय तत्रैव स्थितं तत्स्थानादपेतं ततो दैववशात्पुनरप्युपेतं वा न विपश्यति यतः स्वरूपं प्राप्तः यतो देहात्स्वरूपमध्यगमत्तं देहमिति वा। सतोऽप्यननुसंधाने दृष्टांतः। वासः परिकृतं कटितटे परिवेष्टितं स्थितं गतं वा मदिरामदेनांधो यथा न पश्यति ॥ ३७ ॥

इत्यर्थ इति 'गुणानुरक्तं व्यसनाय जंतोः' इत्यारभ्यान्यदास्वं"पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेन्यत्र तत्त्वम्। यथा प्रदीपो घृतवर्त्तिमश्नञ्छिखाः सधूमा भजति ह्यन्यदास्वम्" इत्युक्तेरिति भावः। आश्रयविषयापगमे ज्वालादीपकलिकातैलवर्त्यादिराहित्ये स्वरूपं महाभूतत्वं प्राप्नोति। अत्रात्मैकत्वान्वीक्षणे ॥ ३५ ॥ अत्राक्षिप्य समाधत्ते न चेति। सुप्तोत्थितः सुषुप्त्युत्थितः। तत्र सुषुप्तौ इदानीं जीवन्मुक्तिदशायाम्। अत्राविद्यानिवृत्तौ। इत्यर्थ इति। योगाभ्यासो ज्ञानयोगाभ्यासो ब्रह्माभ्यास इति यावत्। तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम्। "एतदेकपरत्वं हि ब्रह्माभ्यासं विदुर्बुधाः" इत्युक्तेः। पुनराक्षिपति-नन्विति। एवमप्यविद्यानिवृत्तावपि। सुखदुःखयोर्हेतुत्वं सुखदुःखहेतुकर्मकर्तृत्वं पूर्वमज्ञानावस्थायामहंकारे स्वात्मत्वाभिमानादात्मनि यत्कर्तृत्वं भोक्तृत्वं चासीत्तदपीति तन्निष्ठमहंकारस्थम्। इत्यर्थ इति। स्वस्मिन्नहंकाराभावादिति भावः। दुःखयोरिति नैकशेषः। सरूपत्वाभावात् "सरूपाणामेकशेष एकविभक्तौ" इति पाणिन्युक्तेः। अत्र हि दुःखयोरिति द्विवचनेन सुखस्यापि दुःखत्वमेव तदवस्थायाम्। "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" पा० २॥ सू० १५॥ इति पतंजल्युक्तेः ॥ ३६ ॥ तस्यापरोक्षीकृतात्मतत्त्वस्य अपेतमन्यत्र गतं, ततः स्थानांतरात्। उपेतं प्राप्तं देहादर्शने हेतुः यत इत्यादि। ननु ज्ञाततत्त्वस्यापि देहानुसंधानं दृश्यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमक्षित एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३८ ॥ यथा पुत्राच्च वित्ताच्च पृथङ् मर्त्यः प्रतीयते ॥ अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ॥ ३९ ॥ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वाऽपि स्वसंभवात् ॥ अप्यात्मत्वेनाभिमतात्तदाग्निः पृथगुल्मुकात् ॥ ४० ॥ भूतेंद्रियांतःकरणात् प्रधानाज्जीवसंज्ञितात् ॥ आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञितः ॥ ४१ ॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ ईक्षेतानन्यभावेन भूतेष्विव तदात्मताम् ॥ ४२ ॥

ननु तर्हि देहस्य कथं प्रवृत्तिनिवृत्ती जीवनं वा तत्राह । देहोऽपीति । दैवं पूर्वसंस्कारस्तद्वशे गच्छन्यावत्स्वारंभकं कर्मास्ति तावत्प्रतिसमीक्षते जीवत्येव सासुः सेंद्रियः । ननु तर्हि तस्मिन्पुनः संगः स्यात्तत्राह । तं देहं स्वाप्नदेहादितुल्यं सप्रपंचं पुत्रादिसहितं पुनर्न भजतेऽहंममेति नाभिमन्यते अधिरूढः प्राप्तः समाधिपर्यंतो योगो येन अत एव प्रतिबुद्धं वस्त्वात्मतत्त्वं येन सः ॥ ३८ ॥ प्रतिबोधप्रकारमाह षड्भिः । यथेति । अतिस्नेहवशादात्मत्वेनाभिमतादपि पुत्रादेः मर्त्यः पित्रादिपुरुषो देहादेर्द्रष्टा ॥ ३९ ॥ पृथगवस्थानाभावेऽपि भेदं सदृष्टांतमाह । यथोल्मुकादिदानीं ज्वलतः काष्ठात् स्वसंभवादग्नेः संभूतात् आत्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादपि अत्यंताविवेकिनो हि धूमेऽप्यग्न्यभिमानोऽस्ति उल्मुकात्पूर्वसिद्धादपि तद्दाहकः प्रकाशकश्चाग्निः पृथगेव ॥ ४० ॥ भूतादेर्द्रष्टा तेभ्यः पृथक् तस्मादपि जीवसंज्ञिताद्ब्रह्मसंज्ञितः पृथक् तथा प्रधानादपि तत्प्रवर्तको भगवान्पृथगित्यर्थः ॥ ४१ ॥ उपाधितो विवेकमुक्त्वा तस्यैक्यमाह । सर्वभूतेष्विति भूतेषु चतुर्विधेषु तदात्मतां महाभूतात्मताम् ॥ ४२ ॥

एवेति चेत्तत्राह यतो देहादित्यादि । अननुसंधानेऽनीक्षणे ॥ ३७ ॥ अत्राक्षिपति—नन्विति । पुनराक्षिपति-नन्विति । तस्मिन्देहे अत एवाधिरूढयोगत्वादेव ॥ ३८ ॥ देहादेरिहादिनेंद्रियादिग्रहः । द्रष्टा जीवः ॥ ३९ ॥ ननु यथा पुत्रवित्तादिभ्यो मर्त्यः पृथगवस्थितो दृश्यते न तथा देहेंद्रियादिभ्यो जीवात्मा ततोपि परमात्मा पृथक्कथमवगंतव्य इत्यत आह—पृथगवस्थानाभावेपीति । मायातत्कार्याभ्यां पृथग्भूतो जीवात्मनः सकाशात्परमात्मा पृथगेवेत्यत्रायं दृष्टांतः यथेति । अत्र यथाशब्दस्योल्मुकशब्दस्य च पौनरुक्त्यादेव स्वामिचरणैर्व्याख्यातमेवार्थं स्फुटयति यथा चोल्मुकात्पृथक्तथा विस्फुलिंगादपि यथा च विस्फुलिंगात्पृथक्तथा धूमादपि स्वकार्यात्पृथगिति । यद्वा । द्वितीययथाशब्दस्य यथावदित्यर्थः । द्वितीयोल्मुकादिति उल्मुकमत्ति ज्वलयतीत्युल्मुकादित्यग्निविशेषणम् ॥ ४० ॥ दार्ष्टांतिकं योजयति प्रधानादुल्मुकस्थानीयात् । जीवसंज्ञितात् जीवो यः संज्ञा चेतनां प्राप्तस्तस्माद्विस्फुलिंगस्थानीयाद्भूतेंद्रियांतःकरणाद्धूमस्थानीयात् । आत्मा परमात्माग्निस्थानीयः पृथग्यतो द्रष्टा स हि दृश्यात्पृथगेव सह स्थितोप्यसंगो यतो भगवानचिंत्यैश्वर्यः भगवानेव ब्रह्मसंज्ञां प्राप्तः कस्मिंश्चिदधिकारिणि निर्विशेषचिन्मात्रत्वेन भातश्च भवतीत्यर्थः । इत्यर्थ इति । चेतनाचेतनभेदस्याबालगोपालप्रसिद्धत्त्वादिति भावः ॥ ४१ ॥ तस्यात्मनः । विश्वनाथः—एवं सर्वस्मात्परमात्मनः पृथग्भूतत्वं विभाव्य तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते ॥ योगिनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ॥ ४३ ॥ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदा
त्मिकाम् ॥ दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने अष्टांगयोगे साध
नानुष्ठानं नामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥ देवहूतिरुवाच ॥ लक्षणं महदादीनां प्रकृतेः पुरुषस्य च ॥ स्वरूपं लक्ष्यतेऽमीषां येन तत्
पारमार्थिकम् ॥१॥ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते ॥ भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो ॥२॥ विरागो येन पुरुषो भगवन्सर्व
तो भवेत् ॥ आचक्ष्व जीवलोकस्य विविधा लोकसंसृतीः ॥ ३ ॥ कालस्येश्वररूपस्य परेषां च परस्य ते ॥ स्वरूपं बत कुर्वंति यद्धेतोः कुशलं
जनाः ॥४॥ लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये ॥ श्रांतस्य कर्मस्वऽनुविद्धया धिया त्वमाविरासीः किल योगभास्करः॥५॥

धर्मभेदस्याप्यौपाधिकतां सदृष्टांतमाह । स्वयोनिषु काष्ठेषु ज्योतिरग्निः गुणवैषम्याद्दीर्घह्रस्वादिभेदात प्रकृतौ देहे ॥ ४३ ॥ स्वां स्वांशस्य जीवस्य बंधहेतुं
दैवीं देवस्य विष्णोः शक्तिं पराभाव्य तत्प्रसादेनैव जित्वा स्वरूपेण ब्रह्मत्वेनावतिष्ठते ॥ ४४ ॥ इति श्रीमद्भागवते तृतीये टीकायामष्टाविंशतितमोऽध्यायः ॥ २८ ॥
एकोनत्रिंशके भक्तियोगस्तु बहुधोच्यते ॥ कालस्य च बलं घोरा संसृतिश्च विरक्तये ॥ १ ॥ उक्तानुवादपूर्वकं भक्तिमार्गभेदान्पृच्छति द्वाभ्याम् । लक्षणं महदादीनां
यथा सांख्येषु तथा कथितम् । येन लक्षणेन तत् पारमार्थिकं परस्परविभक्तमित्यर्थः । यो भक्तियोगो मूलं प्रयोजनं यस्य तद्यन्मूलं तत्कथितम् । तस्य भक्तियोगस्य
मार्गं प्रकारं विस्तरतो मे ब्रूहि ॥ १ ॥ २ ॥ येन संसृतीनामाख्यानेन विगतरागो भवेत् ॥ ३ ॥ ईश्वररूपस्य महाप्रभावस्य ते त्वदात्मकस्य यद्धेतोर्यद्भयात्कुशलं पुण्यं
कुर्वंति ॥ ४ ॥ अचक्षुषोऽज्ञस्य अतो मिथ्याभूते देहादावभिमतिरहंकारो यस्य । अतः कर्मस्वनुविद्धया आसक्तया धिया श्रांतस्य अत एवानाश्रयेऽपारे तमसि संसारे

सर्ववस्तूनां कारणत्वं लयस्थानत्वं च पश्येदित्याह—सर्वभूतेष्विति । कारणस्यैव कार्यात्मत्वमित्यर्थः । कार्याणामपि लयस्थानत्वात्कारणरूपत्वमित्याह-सर्वेति ॥ ४२ ॥ परमात्मनः प्रतिदेहवर्तित्वेन नानात्वप्रतीतिर्भद्रा
भद्रादिप्रतीतिश्च न वास्तवीत्याह स्वयोनिष्विति ॥ ४३ ॥ यतः प्रकृतिरेव नानात्वदर्शायितृत्त्वादनर्थहेतुस्तस्मादित्यर्थः । स्वां स्वोपाधिम् । अत एव स्वामिचरणैस्स्वांशस्य बंधहेतुमिति व्याख्यातम् । देवस्येति । "देवात्म
शक्तिं स्वगुणैर्निगूढाम्" इति श्रुतेः । दुर्विभाव्यां दुरत्ययां दुर्वितर्क्यां वा "दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति श्रीगीतोक्तेर्भगवद्भक्त्यैव जित्वा स्वरूपेणानावृतचैतन्यरूपेण
॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धेऽष्टाविंशोऽध्यायः ॥ २८ ॥ घोराभयंकरा (१) उक्तस्य महदादिलक्षणस्यानुवादपूर्वकं तत्स्वरूपममीषां महदादीनाम् । इत्यर्थ इति । लक्षणं विना परस्परभे
दज्ञानं न भवतीति भावः ॥ १ ॥ यन्मूलमिति । सांख्यविविक्तात्मरूपभगवज्ज्ञानं विना तद्भक्त्यनुपपत्तेरिति भावः । विश्वनाथस्तु—तत्स्वरूपज्ञानं यत्कारणकं प्रचक्षते यं विना तेषां स्वरूपं ज्ञातमप्यज्ञातमेवेत्यर्थ
माह । प्रभो इति । कथनसामर्थ्यमाह ॥ २ ॥ भक्तौ प्रवेशाय किंचिद्वैराग्यमपेक्ष्यते तदर्थं पृच्छति विराग इति ॥ ३ ॥ ते त्वद्रूपस्य "कालोस्मि लोकक्षयकृत्प्रवृत्तः" इति गीतोक्तेः ॥ ४ ॥ अतो
चक्षुष्ट्वात् । अतो मिथ्याभिमतित्वात् अत एव श्रांतत्वादेव । तथा च मिथ्याभिमतेरभिमानजाड्यनिवर्त्तनायाचक्षुषश्चक्षुःप्रकाशनाय प्रसुप्तस्य स्वापतमोनाशायश्रांतस्य श्रमपल्वलशोषणाय योगयोर्भक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः ॥ आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणाऽर्दितः ॥ ६ ॥ श्रीभगवानुवाच ॥ भक्तियोगो बहुविधो मार्गैर्भाविनि भाव्यते ॥ स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ॥ ७ ॥ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा ॥ संरंभी भिन्नदृग् भावं मयि कुर्यात्स तामसः ॥ ८ ॥ विषयानभिसंधाय यश ऐश्वर्यमेव वा ॥ अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ॥ ९ ॥ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणम् ॥ यजेद्यष्टव्यमिति वा पृथग्भावः स सात्त्विकः ॥ १० ॥ मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ॥ मनोग तिरविच्छिन्ना यथा गंगांऽभसोंऽबुधौ ॥ ११ ॥

चिरं प्रसुप्तस्य लोकस्य प्रबोधाय त्वं योगप्रकाशको भास्करः किलाविर्भूतोऽसि ॥ ५ ॥ श्लक्ष्णं सुंदरम् ॥ ६ ॥ मार्गैः प्रकारविशेषैः तानेवाह । स्वभावभूता ये गुणास्तेषां मार्गेण वृत्तिभेदेन पुंसां भावोऽभिप्रायः फलसंकल्पभेदाद्भक्तिभेद इत्यर्थः ॥ ७ ॥ अभिसंधाय संकल्प्य संरंभी क्रोधी भिन्नदृक् भेददर्शी यो भावं भक्तिं कुर्यात्स त्रिविधोऽपि तामसः ॥ ८ ॥ पृथग्भावो भेददर्शी ॥ ९ ॥ कर्मनिर्हारं पापक्षयम् । परस्मिन्परमेश्वरे तदर्पणं कर्मार्पणम् । भगवत्प्रीतिमुद्दिश्येत्यर्थः । यष्टव्य मिति विधिसिद्धिमुद्दिश्येत्यर्थः । भेददर्शित्वमर्चादावर्चनं च त्रिष्वपि समानम् । तदेवं तामसादिभक्तिषु त्रयस्त्रयो भेदाः तासु यथोत्तरं श्रेष्ठ्यम् । एवं च श्रवण कीर्तनादयो नवापि प्रत्येकं नवनव भेदाः तदेवं सगुणा भक्तिरेकाशीतिभेदा भवति ॥ १० ॥ निर्गुणा तु भक्तिरेकविधैव तामाह। मद्गुणश्रुतिमात्रेणेति द्वाभ्याम् । मद्गुणश्रु

ज्ञानयोगयोः कमलयोर्भास्करः प्रकाशकोसीति भावः ॥ ५ ॥ इति भक्तिमहिमज्ञानजत्वात् । प्रीतः प्रश्नसौष्ठवेन । करुणा तु दैन्येन । महामुनिः श्रीकपिलः ॥ ६ ॥ देवानां गुणलिंगानामित्यनेन निर्गुणाया भक्तेरुक्तत्वादिह प्रथमं सगुणां भक्तिंलक्षयति भक्तियोग इति । भाविनि भावोऽभिप्रायस्तद्वति पुरुषे । भामिनीति पाठे तेजोवतीत्यर्थः संबुद्धिरियम् । भाव्यते ज्ञायते । तानेव मार्गानेव । इत्यर्थ इति । भक्तिः स्वरूपतो निगुर्णापि पुंसां स्वाभाविकतमआदिगुणोपरक्ता सती तामस्यादिनामभिः सगुणा भवतीति भावः ॥ ७ ॥ तत्र प्रथमं तामसीं भक्तिं लक्षयन्भक्तिस्तामसी स्यादिति वक्तुमनौचित्यं परामृशंस्तद्वान्पुरुष एव तामसादिशब्दैरुच्यते इत्याह–अभीति । भेददर्शी स्वस्मिन्निव परस्मिन्नपि सुखदुःखं समानं न पश्यतीति निरनुकंप इत्यर्थः । अस्यास्तामस्या भक्तेस्त्रैविध्यं बृहन्नारदीये स्पष्टमुक्तं यथा–“यश्चा न्यस्य विनाशार्थं भजते श्रद्धया हरिम् । फलवत्पृथिवीपाल सा भक्तिस्तामसाधमा ॥ योर्च्चयेत्कैतवधिया स्वैरिणी स्वपतिं यथा । नारायणं जगन्नाथं सा वै तामसमध्यमा ॥ देवपूजापरान्दृष्ट्वा स्पर्द्धया योर्च्चयेद्धरिम् । शृणुष्व पृथिवीपाल सा भक्तिस्तामसोत्तमा ” इति । एवं राजस्यास्सात्त्विक्याश्च भक्तेस्त्रैविध्यमुक्तं द्रष्टव्यम् ॥ ८ ॥ आदिना गुर्वादिग्रहः । पृथक् मत्तोन्यत्र विषयादिष्वेव भावः स्पृहा यस्य सः ॥ ९ ॥ कर्मनिर्हारमिति । यस्य भक्तेः कर्मनिर्हारमेव प्रयोजनमित्यर्थः । तदर्पणं कर्मार्पणं यथा स्यात्तथा यो यजेत् स्वधर्मार्पणप्रचुरां श्रवणादिभक्तिं यः कुर्यादित्यर्थः । इत्यर्थ इति । मत्कर्मणा भगवानेव प्रसीदतु नाहं किञ्चिदिच्छामीति भावः । इत्यर्थ इति । यष्टव्यं सर्वेषामिति नित्यविधिप्राप्तत्वेनावश्यमेव तत्पूजनं कर्त्तव्यं स्वाश्रमकर्मवदिति बुद्ध्यैव स्वाश्रमधर्माचरणपूर्वकं यो यजेत्पृथग्भावः भक्तेः पृथग्भूते मोक्षे भावोऽभिप्रायो यस्य सः यथोत्तरं तामसादिष्वध ममध्यमोत्तमेषूत्तमभेदानां श्रैष्ठ्यम् प्रत्येकं न वेति अधममध्यमोत्तमभेदत्रयवत्सात्त्विकं श्रवणं तादृशे एव तामसराजसे श्रवणे एवं कीर्त्तनादीनामपि ज्ञेयम् । श्रवणादयो नव तु श्रवणं, कीर्त्तनं, स्मरणं, पादसेवनम्, अर्चनं वंदनं, दास्यं, सख्यम्, आत्मनिवेदनञ्चेति ॥ १० ॥ देवानां गुणलिङ्गनामित्यत्र लक्षितामेव निर्गुणां भक्तिं सुखबोधार्थं पुनर्लक्षयति मद्गुणश्रवणमात्रेणैव न तु तत्रोद्देशांतरसिद्धाभिप्रायेण मय्येव सर्वगुहाशये सर्वांतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ॥ अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ १२ ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानं न गृह्णंति विना मत्सेवनं जनाः ॥ १३ ॥ स एव भक्तियोगाख्य आत्यंतिक उदाहृतः ॥ येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ १४ ॥ निषेवितेनानिमित्तेन स्वधर्मेण महीयसा ॥ क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥ १५ ॥

तिमात्रेण मयि पुरुषोत्तमे मनोगतिरिरिति या भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः अविच्छिन्ना संतता ॥ ११ ॥ लक्षणं स्वरूपम् अहैतुकी फलानुसंधान शून्या अव्यवहिता भेददर्शनरहिता च ॥ १२ ॥ भक्तानां निष्कामतां कैमुत्यन्यायेनाह । सालोक्यं मया सहैकस्मिंल्लोके वासम् । सार्ष्टिं समानैश्वर्यम् । सामीप्यं निकटवर्तित्वम् । सारूप्यं समानरूपताम् । एकत्वं सायुज्यम् । उत अपि दीयमानमपि न गृह्णंति कुतस्तत्कामनेत्यर्थः ॥ १३ ॥ किमिति तर्हि भजंते भक्तेरेव परमफल त्वादित्याह । स एवेति । ननु त्रैगुण्यं हित्वा ब्रह्मप्राप्तिः परमफलं प्रसिद्धम् । सत्यं तत्तु भक्तावानुषंगिकमित्याह । येन भक्तियोगेन मद्भावाय ब्रह्मत्वाय ॥ १४ ॥ एवं भूताया भक्तेः साधनान्याह । पंचभिः । निषेवितेन सम्यगनुष्ठितेन अनिमित्तेन स्वधर्मेण नित्यनैमित्तिकेन महीयसा श्रद्धादियुक्तेन क्रियायोगेन पंचरात्राद्युक्तपूजाप्रकारेण

करणवर्त्तिनि सुखध्येयमूर्त्तौ श्रीपुरुषोत्तमे मनसो गतिरविच्छिन्ना विषयांतरेणावच्छेत्तुं शक्या या नभवति तत्र दृष्टांतः यथांबुधौ गंगांभसो गतिरिति हेतोरेतदर्थमेव भक्तियोगस्य लक्षणमुदाहृतमित्यन्वयः । यतो निर्गुण श्रवणादिभक्तियोगेनैव मयि मनोगतिरविच्छिन्ना भवेदतो भक्तियोगं सलक्षणमुदाहृतमिति फलितोर्थः । अम्बुधिना स्वलहरीभिः परावर्त्तितस्याप्यंभसो यथांबुधावेवं गतिस्तथा मयापि पारमेष्ठ्यसार्ष्टिसाऽऽलोक्यादिफलैः प्रलो भितस्यापि तस्य मय्येव गतिरिति । एवञ्च भक्तमनसो गंगाजलदृष्टांतेन द्रौत्यशैत्यपावित्र्यजगत्पूज्यत्वादीन्युक्तानि तदेवं लक्षणं किमित्यपेक्षायामाह–अहैतुकीति । हेतुः कारणं फलानुसंधानञ्च तद्रहिता । स्वप्रकाशत्वात्स्वतः फलरूपत्वाच्च नेयं ज्ञानयोगादिवदिति भावः । साधुसंगप्रेम्णोश्च प्रथमद्वादशभूतिकत्वादनयोर्हेतुत्वफलत्वे वस्तुत इति प्रथमस्कंधे एव व्याख्यातम् । अव्यवहिता ज्ञानकर्मादिव्यवधानशून्या या भक्तिः सैव निर्गुणेत्यर्थः । भक्ते रास्पदश्रद्धानिवाससुखादीनामपि निर्गुणत्वं ''निर्गुणो मदपाश्रयः'' इति । मत्सेवायां तु निर्गुणेति 'मन्निकेतं तु निर्गुणम्' इति ''निर्गुणं मदपाश्रयम्'' इत्येकादशस्कंधोक्तेः ॥११॥१२॥ इत्यर्थ इति । आत्यंतिकभक्तानां भक्ति रेवापेक्षिता ''सत्याशिषो हि भगवंस्तवपादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्त्तेः'' इति ध्रुवोक्तेरिति भावः॥१३॥ आक्षिप्य समाधत्ते किमितीति अत्यंते सर्वांते भव आत्यंतिकः । अत्राक्षिपति-नन्विति । तत्तु ब्रह्मप्राप्तिरूपमानुषं गिकम् । विश्वनाथस्तु–नन्वात्यंतिकशब्देन सायुज्यमुच्यते इत्याह भक्तियोगाख्यं भक्तियोगाख्यो भक्तिनामायं ततोप्यधिकफलमित्यर्थः । अत एवापवर्गशब्देन क्वचिद्ब्रह्मणि निर्वाणशब्देन चायमुच्यते यदुक्तं पञ्चमे ''अपव र्गश्च भवति योसौ भगवत्यनन्यनिमित्तभक्तियोगलक्षणः'' इति । सप्तमे च ''अधोक्षजालंभमिह'' इत्यादौ, ''तद्ब्रह्मनिर्वाणसुखं विदुर्बुधाः'' इति ''हरावैकांतिकी भक्तिर्मोक्षमाहुर्मनीषिणः'' इति पुराणान्तराच्च । भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यमिति गोपालतापिनीश्रुतिश्च । ननु त्रिगुणमयाद्बंधान्मोक्ष एव परमं फलं प्रसिद्धं सत्यं तत्तु भक्तावानुषंगिकमिति स्वामिचरणैरुक्तमेव अतिव्रज्योल्लंघ्य मच्चरणा श्रयणमात्रेणैव संसारसिंधोर्गोष्पदायमानत्वे जाते तल्लंघनानुसंधानं भवतीति भावः । मद्भावाय मद्विषयकप्रेम्णे ॥ १४ ॥ निषेवितेन पूर्वपूर्वैः शुद्धभक्तैर्निषेवितेनांगीकृतेन स्वधर्मेणेति वा स च स्मृतिशास्त्रोक्तप्रमाणै र्मृज्जलादिभिर्देहवस्त्रपात्रादिद्रव्यशुद्धिविधिरूपो निर्मंत्रक एव ज्ञेयः । महीयसाऽर्चनादिभक्त्युपयोगित्वात्प्रशस्तेन । व्याख्यांतरे मत्कृते त्यक्तकर्माण इति मयादिष्टानपि स्वकान् धर्मान् संत्यज्येत्यादिभगवद्भक्तिस्तथात्र निषेवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः ॥ भूतेषु मद्भावनया सत्त्वेनासंगमेन च ॥ १६ ॥ महतां बहुमानेन दीनानामनुकंपया ॥ मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च ॥ १७ ॥ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्च मे ॥ आर्जवेनार्यसंगेन निरहंक्रियया तथा ॥ १८ ॥ मद्धर्मणो गुणैरेतैः परिसंशुद्ध आशयः ॥ पुरुषस्यांजसाऽभ्येति श्रुतमात्रगुणं हि माम् ॥ १९ ॥ यथा वातरथो घ्राणमावृंक्ते गंध आशयात् ॥ एवं योगरतं चेत आत्मानमविकारि यत् ॥ २० ॥ अहं सर्वेषु भूतेषु भूतात्माऽवस्थितः सदा ॥ तमवज्ञाय मां मर्त्यः कुरुतेऽर्चाविडंबनम् ॥ २१ ॥

शस्तेन निष्कामेन ॥ १५ ॥ मद्धिष्ण्यं मत्प्रतिमादि । तस्य दर्शनादिभिः सत्त्वेन धैर्येण असंगमेन वैराग्येण ॥ १६ ॥ १७ ॥ आर्जवेनाकौटिल्येन ॥ १८ ॥ मद्धर्मणो भगवद्धर्मानुष्ठातुः पुरुषस्याशयश्चित्तम् ॥ १९ ॥ प्रयत्नं विनैव प्राप्तौ दृष्टांतः वातो रथः प्रापको यस्य गंधस्य आशयात्स्थानात् आवृंक्ते आत्मसात्करोति अविकारि समं यच्चेतः ॥ २० ॥ चित्तशुद्धिश्च सर्वभूतात्मदृष्ट्यैव भवतीति वक्तुं केवलप्रतिमादिनिष्ठां निंदन्नाह अहमिति सप्तभिः अर्चैव विडंबनमनुकरणम् । अर्चायां

तपदस्य वैयर्थ्यञ्च स्यात् ! नातिहिंस्रेण–इहातिपदेन भगवन्मंदिरमार्जनलेपनतदर्थान्नादिविविधनैवेद्यसाधनादिष्वतिदुर्वारदुर्लक्ष्यजीवहिंसनशाकपत्रमूलफलादित्रोटनादावपि न क्षतिरिति द्योतितम् ॥ १५ ॥ मद्भावनयांतर्यामित्वेन मच्चिंतनेन । सत्त्वेन धैर्येण ॥ १६ ॥ “ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ” ॥ पा० २ ॥ सू० ३० ॥ “शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः” ॥ पा० २॥ सू० ३२॥ इति पतंजलिः । ॥ १७ ॥ आध्यात्मिकमात्मानात्मप्रतिपादकं शास्त्रमिति संदर्भः । चक्रवर्ती तु–आध्यात्मिकस्यांतःकरणभवस्य दोषस्य गुणस्य चानुश्रवणादंतःकरणस्य भक्तौ प्रवर्त्तनार्थं तद्गुणदोषावश्यं श्रोतव्यौ दंभाद्यंतःकरणदोषस्य स्वस्मिन्सति ‘दंभं महदुपासनया जयेत्’ इत्यादिविधौ भक्तप्रवृत्तिः स्यादित्याह । नामसंकीर्त्तनाच्च नामापराधत्यागेनैव कार्यम् । आर्याणां शास्त्रविदां संगेन निरहंक्रियया देहादिष्वहंतात्यागेन ॥ १८ ॥ मद्विषयकः श्रवणादिरेव धर्मो यस्य तस्य मद्गुणश्रुतिमात्रेणेत्युक्तलक्षणं साध्यं भक्तियोगं प्राप्नोति । अत्र शुद्धभक्तेः साध्यत्वेपि ज्ञानकर्ममिश्रभक्तिसाधनतया निर्देशः ‘यन्मूलं तत्प्रचक्षते’ इति देवहूतिप्रश्नानुसारात् । अनयापि मुमुक्षुमार्गश्रवणाय रुच्यतिशयेनैव तथा पृष्टमिति ज्ञेयम् ॥ १९ ॥ यथा वातः पद्माकरस्थं गन्धं नासिकां प्रापयति तथैवायं भक्त्यंगसमुदायो भक्तियोगनिष्ठं चित्तं परमेश्वरं प्रापयतीत्यर्थः ॥ २० ॥ किं चैतादृशीमपि भक्तिमपराध एव संकोचयति । स चापराधः प्रायो महदवज्ञानमूलक एव ते च महांतो लोके दुर्लक्ष्या अपि बहवस्तिष्ठंत्यतस्तदपराधाभावार्थं सर्वभूतान्येव स्वेष्टदेवाधिष्ठानबुद्ध्या संमाननीयानि । तदभावे श्रीभगवद्विग्रहसेवापि न सम्यक्फलतीति वदन्नीश्वरत्वात्प्राणिसंमानमकुर्वते स्वभक्ताय हितकारित्वेन वात्सल्यात्कुप्यन्निव श्रीकपिलदेव आह–अहमित्यादिषड्भिः । तत्रावज्ञोपेक्षाद्वेषनिंदाः क्रमेण चतुर्भिर्निषिध्यंते । अर्चाकर्तृत्वं त्वर्चकेतराणामपि दृश्यतेऽतः कर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरम् ॥ हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥ २२ ॥ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः ॥ भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति ॥ २३ ॥ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे ॥ नैव तुष्येऽर्चितोर्चायां भूतग्रामावमानिनः ॥ २४ ॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ॥ यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥ २५ ॥

पूजाविडंबनमिति वा अवज्ञोपेक्षाद्वेषनिंदाः क्रमेण चतुर्भिर्निषिध्यंते ॥ २१ ॥ हित्वा उपेक्ष्य ॥ २२ ॥ २३ ॥ द्रव्यैरुत्पन्नया क्रियया भूतग्रामावमानिनस्तन्निंदकस्य ॥ २४ ॥ तर्हि किमर्चादावर्चनमनर्थकमेव नेत्याह । अर्चादाविति । सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत्कर्माविरोधेन यथावकाशम् । अनेन

धारयेऽस्वारस्यमालक्ष्याह–अर्चायामिति । 'अर्चा पूजाप्रतिमयोः' इति धराणः ॥ २१ ॥ स भूतांतर्याम्युपेक्षकार्चार्चकः । संदर्भस्तु–मौढ्यात् । शैली दारुमयी वा काचित्प्रतिमेयमिति मूढबुद्धित्वात् । यः सर्वेषु भूतेषु वर्तमानं परमात्मानमीश्वरं मां हित्वा मयैक्यमविभाव्यार्चां मदीयां प्रतिमां पूजते । केवलं लोकरीतिदृष्ट्या तस्यै जलादिकमर्पयति । यथाग्निपुराणे श्रीदशरथहतात्मजतपस्विविलापे । "शिलाबुद्धिः कृता किं वा प्रतिमायां हरेर्मया ॥ किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित् ॥ तन्मुद्रांकितदेहस्य चेतसा नादरः कृतः । येन कर्मविपाकेन पुत्रशोको ममेदृशः" इति । विष्णुधर्मेपि–"अर्चे विष्णोः शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां कलिमलहरणे पादतीर्थेंबुबुद्धिः । शुद्धे तन्नाम्नि मंत्रे सकलकलुषहे शब्दसामान्यबुद्धिर्विष्णोः सर्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः" इति । तस्य मूढस्य मद्दृष्ट्यभावात्सर्वभूतावज्ञापि भवतीति तथा तद्दोषेण भस्मनि यथा जुहोति कश्चित्तथा तस्याश्रद्दधानस्य फलाभाव इत्यर्थः । "ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः" इत्याद्युक्तरीत्या लोकपरंपरया जातकिंचिच्छ्रद्धासद्भावे तु कनिष्ठभागवतत्वमेव "अर्चायामेव हरये पूजां यः श्रद्धयेहते । न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः" इत्येकादशोक्तेः । यद्यपि यथाकथंचिद्भजनस्यैव फलावश्यंभावतास्त्येव तथापि न झटिति भवतीति तथोक्तम् । वक्ष्यते च 'अर्चादावर्चयेत्तावत्' इत्यादिनां ॥२२॥ अवज्ञामात्रस्य तादृशत्वे सुतरां तु द्विषत इति । भिन्नदर्शिनः सर्वत्रांतर्याम्येकत्वदृष्टिरहितस्य स्वस्य दुःखमिवान्यस्य दुःखं समानमित्यजानत इति भावः । मानिनो देहाहंकारिणः अत एव बद्धवैरस्य तथा च महाभारते "पितेव पुत्रं वरुणो नोद्वेजयति यो नरः । विशुद्धस्य हृषीकेशस्तूर्णं तस्य प्रसीदति" इति ॥२३॥ द्रव्यैर्गंधाद्यैरुत्पन्नया साधितया क्रिययाऽर्चया । अनघे इत्यामंत्रयंस्तस्यास्तत्राधिकारं द्योतयति । निंदकस्य "न तथा तप्यते विद्धः पुमान्बाणैर्हि मर्मगैः । यथा तप्यंति मर्मस्था ह्यसतां परुषेषवः" इत्युक्तेर्निन्दाद्वेषादप्याधिकेति नायं व्युत्क्रम इत्यभिप्रेत्य न द्वेषात्पूर्वमसौ पठितेति ॥ २४ ॥ अत्राक्षिपति तर्हीति । संदर्भस्तु–तदेवमीश्वरज्ञानाभावाद्भक्तावश्रद्दधानस्य दोष उक्तः । अथ तच्छ्रद्धाहेतुतज्ज्ञानस्य स्वधर्मसंयुक्ततदर्चनमेव कारणमुपदिशंस्तादृशार्चनस्याप्यत्यर्थतां स्वीकरोति अर्चादाविति । तत्र स्वकर्मसहायत्वमजातश्रद्धस्य शुद्धभक्तावनधिकारात् । तत्प्रतिपादयिष्यते 'जातश्रद्धो मत्कथासु' इत्यादिनाऽतो भगवज्ज्ञानादूर्ध्वं जातश्रद्धस्तु स्वकर्मकृन्नार्चयेत् किं तु शुद्धमर्चादिकमेव कुर्वीतेत्यायातं तच्च तावत्कर्माणि कुर्वीतेत्यादिना प्रतिपादयिष्यते न त्वर्चा परित्यजेदित्यर्थः । "प्रतिष्ठितार्चा न त्याज्या यावज्जीवं समर्चयेत् । वरं प्राणपरित्यागः शिरसो वापि कर्तनम्" इति हयशीर्षपंचरात्रोक्तेः । ये च पामराः "न तस्य प्रतिमास्ति" इति श्रुतिमाश्रित्य प्रतिमार्चनं नांगी कुर्वंति ते श्रुत्यर्थानभिज्ञतयोपेक्ष्या एव । तत्र प्रतिमापदं सादृश्यपरम् "मूर्तौ तुल्ये च प्रतिमा" इति निघंटूक्तेः । प्रतिमार्चनस्य श्रुतिप्रोक्तत्वादावश्यकत्वम् । तथा च श्रुतिः–"अरं दासो न मीढुषे कराण्यहं देवाय भूर्णयेऽनागाः । अचेतयदचितो देवोऽअर्यो गृत्सं राये कवितरो जुनाति" इति । अर्थश्च–न शब्द इवार्थः अहं मीढुषे–भूयसीं धनस्य वृष्टिं कृतवते स्वामिने । दासो न दास इव । देवाय चतुर्भुजमूर्तयेऽलंकराणि अलंकरवाणि 'प्रार्थनायां लोट्' यथा दासाः स्वामिनं स्रक्चंदनमुकुटादिनालंकुर्वंत्येवमहं पार्थिवं नंदनंदनविग्रहं भूषयेयमित्यर्थः । अनागा निषिद्धाचरणवर्जितः । ननु चेतनो ह्यलंक्रियमाणः सद्यः फलं ददाति किमचेतनायालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनश्च परस्यापि यः करोत्यंतरोदरम् ॥ तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥२६॥ अथ मा सर्वभूतेषु भूतात्मानं कृतालयम् ॥ अर्हयेद्दानमानाभ्यां मैत्र्याऽभिन्नेन चक्षुषा ॥ २७ ॥ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ॥ ततः सचित्ताः प्रवरास्ततश्चेंद्रियवृत्तयः ॥ २८ ॥ तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः ॥ तेभ्यो गंधविदः श्रेष्ठास्ततः शब्दविदो वराः ॥ २९ ॥

कर्मनिष्ठाया अपि स एवावधिरित्युक्तं भवति ॥ २५ ॥ अंतरा अंतरं भेदम् । उत् अपि अरमल्पम् । अल्पमपि भेदं यः पश्यतीत्यर्थः । यद्वा अंतरा मध्ये उदरं शरीरम् । मृत्युरहं तस्य भयं विदधे करोमि ॥ २६ ॥ अथ अतः सर्वभूतेषु कृतावासम् । तत्र हेतुः । भूतानामात्मानमंतर्यामिणम् । अभिन्नेन चक्षुषा समदर्शनेन ॥ २७ ॥ तत्रापि यथोत्तरं मानाद्यतिशयः कर्तव्य इति वक्तुं तारतम्यमाह । जीवा इति सार्द्धैः षड्भिः । अजीवानामचेतनेभ्यस्ततस्तेष्वपि प्राणभृतः प्राणवृत्तिमंतः सचित्ता ज्ञानवंतः इंद्रियाणां वृत्तयो येषु इंद्रियवृत्तयो वृक्षाणामपि सूक्ष्माः संत्येव । तथाहि महाभारते मोक्षधर्मेषु स्मर्यते । "तस्मात्पश्यंति पादपाः तस्माज्जिघ्रंति पादपाः" इत्यादि । प्रसिद्धा तु स्पर्शनेंद्रियवृत्तिरेव ॥ २८ ॥ अतस्तेभ्यः स्पर्शवेदिभ्यो रसवेदिनो मत्स्यादयः श्रेष्ठाः गंधविदो भ्रमरादयः शब्दविदः सर्पादयः ॥ २९ ॥

करणेनेत्यत आह । भूर्णये भूरि मनुष्यराजापेक्षयाधिकं द्रव्यं नयति भक्ताय प्रापयतीति भूर्णिस्तस्मै भूर्णये अचेतनोप्ययं सर्वान्कामान्दास्यतीति भावः । ननु दृष्टविरुद्धमेतत् । न हि प्रतिमाराधनेन धनं प्रतिमातः प्राप्यत इत्यत आह—अचेतयदिति । अर्यः भुक्तिमुक्तिकामैरभिगम्यः स्वामीदेवः प्रतिमादिरूपः । अचितश्चेतनारहितान्सर्वान्पिंडानचेतयच्चेतनायुक्तान्करोति अहल्यावत् भूतनिर्देशश्छांदसः । अयं भावः—देह इव प्रतिमायामपि तीव्रभावनावता चैतन्यं स्पष्टमुपलभ्यते प्रसिद्धं चैतत्प्रतिमोन्मेषणं मंत्रशास्त्रे उपाख्यायते च पुराणादौ तस्मात्प्रतिमायाश्चेतनाधिष्ठितत्वेन चेतनस्य च सर्वपुरुषार्थप्रवर्त्तकत्वेन ततः फलसंभावनास्तीति । एवं परमेश्वरे श्रीमाधवादिप्रतिमारूपे सर्वपुरुषार्थप्रदे सत्यपि कवितरो बुद्धिमत्तरो जनो गृत्सं प्राणं "प्राणो वै गृत्स" इति श्रुतेः । प्राणवंतं जीवंतं राजादिं राये धनार्थं जुनात्यनुसरति नानाविधैः काव्यैः क्षुद्रं प्रभुं प्रस्तौत्यहो दौर्भाग्यमस्येति श्रुतिरुरस्ताडं मंदानाक्रोशति कवितमस्तु परमेव नंदनंदनापरपर्यायं समस्तपुरुषार्थकामः शरणीकुर्यादिति भावः । स्थितं चैतद्वृत्तं महाभारतारंभे नीलकंठवर्णितम् ॥ २५ ॥ इत्यर्थ इति । "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति श्रुतेरिति भावः । अंतरेत्यस्य भेदार्थाप्रसिद्धेः प्रसिद्धार्थमाह यद्वेति । आत्मन उदरं परस्याप्युदरं यः भिन्नं करोति तस्य मृत्युस्वरूपोहमेव उदरं खलु जाठरानलज्वालायुक्तं यथात्मनस्तथा परस्यापीति ज्ञात्वा क्षुधार्त्तंजीवमात्मानमिव भोजयेदेवान्यथा मृत्युभयं भवतीत्यर्थः ॥ २६ ॥ तत्र सर्वभूतकृतालयत्वे । विश्वनाथः—ननु पृथिव्यामनंता एव क्षुधार्त्ता जीवास्ते च दातारमायांत्येव तान्भोजयितुं कः प्रभू रंतिदेवनृप इव धैर्यं धत्त इत्यत आह—अथाथवा तेभ्यो यथेष्टदानासामर्थ्येपि मानादिभिरर्हयेत् "अथाथो संशये स्यातामधिकारे च मंगले । विकल्पानंतरप्रश्नेः कात्स्न्यारंभसमुच्चये" इति मेदिनी । किंच तेषु बुभुक्षुषु गालिप्रदानादिभिस्तिरस्कुर्वत्स्वपि प्रतितिरस्कारं न कुर्यात् । किन्तु तेष्वात्मनोप्याधिक्यान्मानेन स्तुत्यादिभिरादरेणार्हयेत् । यदुक्तं भगवता—"ये ब्राह्मणान्मयि धिया क्षिपतोर्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितवक्त्रपद्माः" इत्यादि आत्मनस्तुल्यान् मैत्र्याभिन्नेनाविदीर्णेनाकुटिलेनेति यावत् । एवं निष्कैतवस्य व्यवहृत्यापि तेषु कुप्यत्स्वपि तदंतःस्थितः प्रभुस्तु न कुप्यादिति भावः ॥ २७ ॥ तत्रापि सर्वभूतेष्वपि । अजीवानामजीवद्भ्यो जीर्णसस्यादिभ्यः सकाशाज्जीवा अजीर्णसस्यादयः श्रेष्ठास्ततः प्राणभृतः भूमिष्ठजलाकर्षणगमनादिलिंगेन प्राणवृत्तिभृतो जीवत्पाषाणादयः ततः सचित्ताः पूर्वमुड्डयनादिचेष्टाः पश्चादिंद्रवज्रेण शुष्का इति श्रवणादंतःसंज्ञानाः पर्वताः तेभ्योपि ॥२८॥ तत्रापि तेष्वपींद्रियवृत्तिभ्योपि दूरतोपि स्पर्शवृत्त्या दृष्ट्यादितुल्यया स्वोद्यमावकाशज्ञानिनो वृक्षादयः पूर्वपूर्वस्मादुत्तरोत्तरस्मिन्नेकैकगुणाधिक्येनाधिक्यम् । केचित्तु अजीवाः काष्ठाद्यास्सजीवाः पाषाणादयस्तेषां वृद्धिदर्श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपभेदविदस्तत्र ततश्चोभयतोदतः ॥ तेषां बहुपदः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ॥ ३० ॥ ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः ॥ ब्राह्मणे
ष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ॥ ३१ ॥ अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् ॥ मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ॥ ३२ ॥
तस्मान्मय्यर्पिताशेषक्रियाऽर्थात्मा निरंतरः ॥ मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ॥ न पश्यामि परं भूतमकर्तुः समदर्शनात् ॥ ३३ ॥
(समदर्शीनरा नित्यं वैकुंठं तं व्रजंति ते ॥) मनसैतानि भूतानि प्रणमेद्बहु मानयन् ॥ ईश्वरो जीवकलया प्रविष्टो भगवानिति ॥ ३४ ॥

रूपभेदविदः काकादयः उभयतो दंता येषाम् । अपादेभ्यो बहुपादास्तेभ्यश्चतुष्पादा इत्यर्थः । ततो द्विपान्मनुष्यः ॥ ३० ॥ ततस्तेषु वर्णाः ॥ ३१ ॥ संशयच्छेत्ता
मीमांसकः । ततोऽपि केवलात्स्वकर्मकृत् मुक्तसंगस्य लक्षणमात्मनो धर्ममदोग्धा निष्काम इत्यर्थः ॥ ३२ ॥ अर्पिता अशेषाः क्रिया अर्थास्तत्फलान्यात्मा देहश्च
येन अत एव निरंतरोऽव्यवहितः अकर्तुः कर्तृत्वाभिमानशून्यात् ॥ ३३ ॥ जीवानां कलया परिकलनेन अंतर्यामितया प्रविष्ट इति दृष्ट्येत्यर्थः ॥ ३४ ॥

नात् । प्राणभृतस्तृणादयो रसवृद्धिदर्शनात् । सचित्ता लताया वृक्षं प्रति चलनदर्शनात् । इंद्रियवृत्तयो वृक्षाः गृहीतपर्शुं दृष्ट्वा कंपनात् ।रसवेदिनः पिपीलिका मत्स्याद्याः स्वतंत्रव्यापारत्वात् । गंधविदो भ्रमराः । शब्दविदो हरिणसर्पादयः ॥ २९ ॥ रूपभेदविदो मर्कटादयः । उभयतोदतो अजादयः । बहुपदः शरभाद्याः । पक्षिणामपि गमनसाधनपक्षाभ्यां चतुष्पात्त्वमिति केचित् । एवमन्येषां चतुष्पात्त्वद्विपात्त्वादौ सत्यपि तादृशतत्तद्गुणाधिक्याभावाभावाभ्यां तारतम्यं ज्ञेयम् । विशेषस्तु शास्त्रादवसेयः। यथा गोवर्द्धनतुलस्यादिषु सर्वतोऽर्हणीयत्वम्॥३०॥ततस्तेषु।ततो वेदपाठमात्रज्ञेभ्यः॥३१॥ संशयच्छेत्ता ऊहापोहकुशलत्वेन प्रष्टृसंदेहवारकः । स्वकर्मकृद्विहितानुष्ठायी । इत्यर्थ इति। स्वकर्मफलेप्सूनां न मुक्तसंगत्वमिति भावः ॥३२॥ अत एव मदर्पिताशेषक्रियार्थत्वादेव।पुंस इत्यत्र सामान्यतः पुंमात्रग्रहे प्रकरणविरोधाद्ब्राह्मणस्यैव ग्रहणं पुंस्त्वमपि विशेषतो ब्राह्मण एव भयार्त्तानां क्षत्रादीनां पालकत्वात्तच्च प्रथितं भारतादिषु "पाल्या नार्यः समाख्याताः पालकः पुरुषो भवेत्" इत्यभियुक्तोक्तेः । "लोके पुरुषमेवेह ह्यनुयांति यथाबलाः ॥ प्रजाखिलास्तथा विप्रमतो विप्रः पुमान्स्मृतः" ॥ यद्वा । "धर्माधर्मोपदेशेन विप्रः पात्यखिलं जगत् । अतो विप्रः पुमान्प्रातेर्डुम्सुप्रत्यये बुधः" इति सहितोक्तेश्च । विश्वनाथस्तु–मयि मत्प्राप्त्यर्थं संन्यस्तकर्मणस्त्यक्तवर्णाश्रमधर्मात् 'मत्कृते त्यक्तधर्माणः' इति पूर्वोक्तेः । अकर्त्तुः मद्भक्तावपि भगवानेव मे भक्तिं कारयतीति बुद्ध्या स्वातंत्र्येण कर्तृत्वाभिमानशून्यात् । समदर्शिनः स्वस्य सममेव सुखदुःखादिकं पश्यतः यदुक्तं भगवता "आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः" इति । "विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पंडिताः समदर्शिनः" इत्युक्तलक्षणसमदर्शित्वग्रहे तु 'जीवाः श्रेष्ठा अजीवानाम्' इत्याद्युक्तविरोधः स्यात् ॥ ३३ ॥ इत्यर्थ इति । "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेरिति भावः । संदर्भस्तु–तदेवं प्रथमोपासकानां सर्वभूतादरो विहितः । सश्रद्धसाधकानां तु भगवद्वैभवसार्वत्रिकतास्फूर्त्या भगवत्येवासौ यथोक्तं स्कांदे "एतेन ह्युद्भुता व्याध तवाहिंसादयो गुणाः । हरिभक्तौ प्रवृत्ता ये न ते स्युः परतापिनः" इति । वक्ष्यमाणरीत्या शुद्धवस्तुत्वादिभावसाधकानामपि वस्तुभावसिद्धश्रीगोकुलवास्यादिलीलानुसारेण तादृशभगवद्गुणानुसारेण चासौ जायते जात भावानां त्वहिंसा चोपरमश्चस्वीय एव स्वभावः।यथा"यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढम्।व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्न हिंसोपरमः स्वधर्म" इति । ततः परमसिद्धानां "सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः" इत्याद्यनुसारेण सिद्ध एव सः । तत्र साधकानां यत्तु 'यथा तरोर्मूलनिषेचनेन' इत्याद्युक्त्या तदन्योपासनानां पुनरुक्तत्वमुपलक्ष्यते।तत्पुनः केवलस्वतंत्रतत्तद्दृष्ट्योपासनानामेव । अत्र तु तत्तदधिष्ठानकभगवदुपासनमेव विधीयते । तदा दरावश्यकत्वञ्च तत्संबंधेनैव संपाद्यते । तच्चान्यत्र झटिति रागद्वेषविश्लेषार्थमिति ज्ञेयम् । अत एव भूतानुकंपया श्रीभगवदर्चनं त्यक्तवतो भरतस्यांतरायः परमात्मदृष्ट्या रंतिदेवादीनां तु कृतार्थत्वम् । तस्माद्भूतदयैव भक्तिर्मुख्या नार्च

॥१०९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तियोगश्च योगश्च मया मानव्युदीरितः ॥ ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥ ३५ ॥ एतद्भगवतो रूपं ब्रह्मणः परमात्मनः ॥ परं प्रधानं पुरुषं दैवं कर्म विचेष्टितम् ॥ ३६ ॥ रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ॥ भूतानां महदादीनां यतो भिन्नदृशां भयम् ॥ ३७ ॥ योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः ॥ स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः ॥ ३८ ॥ न चास्य कश्चिद्दयितो न द्वेष्यो न च बांधवः ॥ आविशत्यप्रमत्तोऽसौ प्रमत्तं जनमंतकृत् ॥ ३९ ॥ यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ यद्भयाद्वर्षते देवो भगणो भाति यद्भयात्॥४०॥यद्वनस्पतयो भीता लताश्चौषधिभिः सह ॥ स्वेस्वे कालेऽभिगृह्णंति पुष्पाणि च फलानि च ॥४१॥ स्रवंति सरितो भीता नोत्सर्पत्युदधिर्यतः॥अग्निरिंधे सगिरिभिर्भूर्न मज्जति यद्भयात्॥४२॥नभो ददाति श्वसतां पदं यन्नियमाददः॥लोकं स्वदेहं तनुते महान् सप्तभिरावृतम्॥४३॥

उक्तं भक्तियोगं पूर्वोक्तेनाष्टांगयोगेन सहोपसंहरति । भक्तियोगश्चेति । हे मानवि पुरुषं परमेश्वरम् ॥३५॥ यदन्यत्पृष्टं जीवस्य संसृतीः कालस्य स्वरूपं चाचक्ष्वेति तदाह । एतदिति सार्धेन । एतत्सर्वनियंतृ यद्भगवतो रूपम् । कीदृशम् । प्रधानपुरुषात्मकं परं तद्व्यतिरिक्तं च एतदेव दैवमित्यभिधीयते कीदृशं कर्मणो विचेष्टितं नानासंसृतिलक्षणं यस्मात्तत् दैवप्रेरितकर्मकृताः संसृतयो विचित्रा इत्यर्थः ॥ ३६ ॥ एतदेव भगवतो रूपं काल इति चाभिधीयते । कीदृशम् । रूपभेदस्य वस्तूनामन्यथात्वस्यास्पदमाश्रयः कारणम् । उक्तं हि । " कालाद्गुणव्यतिकर " इति वक्ष्यते च "गुणव्यतिकरः काल " इति दिव्यमद्भुतप्रभावम् । तदेवाह । भूतानामिति यावत्समाप्ति । महदादीनां तत्तदभिमानिजीवानाम् ॥ ३७ ॥ भयहेतुत्वमाह । य इति भूतैरेव भूतान्यत्ति संहरति अधियज्ञो यज्ञफलदाता कलयतां वशीकुर्वताम् ॥ ३८ ॥ ३९ ॥ ॥४०॥ यद्यस्माद्भीताः ॥४१॥ यतो भीताः सरितः स्रवंति । इंधे दीप्यते । सह गिरिभिर्भूः ॥४२॥ अदो नभो यन्नियमायस्याज्ञया महान्महत्तत्त्वमंकुरात्मकं स्वदेहं

नमिति निरस्तम् । तथैवाव्यवहितपूर्वं निर्गुणभक्त्युपायत्वेन "क्रियायोगेन शस्तेन नातिहिंस्रेग नित्यशः" इत्यत्रातिशब्देन पञ्चरात्रिकार्चनलक्षणक्रियायोगार्था पत्रपुष्पावचयादिलक्षणा किञ्चिद्धिंसापि विहिता तस्मादन्येषामनादरो न कर्तव्यः भगवत्संबंधेनादरादिकं च कर्तव्यं स्वातंत्र्येणोपासनं तु धिकृतं साक्ष्येवोक्तम् । "अविस्मितं तं परिपूर्णकामम्" इत्यादि एव एव प्रस्तावः पूर्वम् 'अभिसंधाय यद्धिंसाम्' इत्यादिकं यदुक्तं तत्पोषत्वेन निर्दिष्टम् ॥ ३४ ॥ भक्तियोगेन चिद्घनमदीयश्रीमूर्तिसाक्षात्कारः अष्टांगयोगेन च मन्निर्विशेषस्वरूपसाक्षात्कार इत्युभयोरेव मत्प्राप्तिसाधनत्वेन शास्त्रेषूक्तेः । तथाहि "यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते" इति गीतोक्तेः ॥ ३५ ॥ कर्मणः पुण्यपापलक्षणस्य । इत्यर्थ इति । सति कर्मणि संसार इति भावः । चक्रवर्ती तु—ननु 'पुरुषः पुरुषं व्रजेत्' इति प्रब्रवीषि न तु 'पुरुषो मां व्रजेत्' इति ब्रूषेऽतः कः स पुरुषस्तत्र स्वपक्षस्तर्जन्या स्पृशन्नाह एतदिति । यः खलु भक्तेषु भगवान्भवति ज्ञानिषु ब्रह्मयोगिषु परमात्मेति तस्यैव परं यद्प्राकृतं रूपं तदेतदेव त्वत्पुत्रोहमेव परमेश्वर इत्यर्थः । न केवलमेतावदेव किन्तु प्रकृतिपुरुषजीवादृष्टकालाद्यपि मदीयमेतद्रूपमेवेत्याह—प्रधानञ्च तत्प्रवर्त्तकः पुरुषश्चेति द्वंद्वैक्यम् ॥ ३६ ॥ तदेव काललक्षणमेव । यतः कालात् भिन्नदृशामज्ञानाम् ॥ ३७ ॥ यः कालः ॥ ३८ ॥ अप्रमत्तः सावधानः ॥ ३९ ॥ देव इन्द्रः भगणस्तारासमूहः ॥ ४० ॥ स्वेस्वे यत्र यस्योत्पत्तिर्विहिता तदातदेत्यर्थः ॥ ४१ ॥ स्रवंति "कश्चिच्छिन्ना कलौ गंगा भविष्यति" इति न्यायात्कदाचिन्न स्रवंतीत्यपि । इन्धे कदाचिदव्यक्तमपि स्थास्यतीति वर्त्तमाननिर्देशाल्लक्ष्यते मज्जति किन्तु कष्टेनापि धैर्यमेव धत्तेऽतिकष्टे तु द्वापराद्यन्ते गोरूपिण्या तया ब्रह्मणे स्वभारज्ञापनमिति भावः॥४२॥सप्तभिः पृथिव्यादिभिः श्वसतां जीवितां प्राणिनां श्वासक्रियावतामवकाशं ददाति मृतानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात् ॥ वर्ततेऽनुयुगं येषां वश एतच्चराचरम् ॥४४॥ सोऽनंतोंऽतकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकम्॥४५॥इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे बहुविधभक्तियोगवर्णनं नाम एकोनत्रिंशत्तमोऽध्यायः ॥२९॥
कपिल उवाच ॥ तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमम् ॥ काल्यमानोऽपि बलिनो वायोरिव घनावलिः ॥ १ ॥ यंयमर्थमुपादत्ते दुःखेन सुखहेतवे ॥ तंतं धुनोति भगवान्पुमाञ्शोचति यत्कृते ॥ २॥ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः॥ ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च॥३॥ जंतुर्वै भव एतस्मिन्यांयां योनिमनुव्रजेत् ॥ तस्यांतस्यां स लभते निर्वृतिं न विरज्यते ॥ ४ ॥ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति ॥ नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ॥ ५ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ निरूढमूलहृदय आत्मानं बहु मन्यते ॥६॥ संदह्यमानसर्वांग एषामुद्वहनाधिना ॥ करोत्यविरतं मूढो दुरितानि दुराशयः ॥७॥ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया ॥ रहो रचितयाऽऽलापैः शिशूनां कलभाषिणाम् ॥ ८ ॥

लोकत्वेन तनुते विस्तारयति ॥ ४३ ॥ गुणाभिमानिनो गुणनियंतारो देवा ब्रह्मादयोऽस्य विश्वस्य सर्गादिषु प्रवर्तंते । अनुयुगं वारंवारमित्यर्थः ॥ ४४ ॥ जनेन पित्रादिना जनं पुत्रादिं जनयन्नादिकृत् मृत्युनांऽतकमपि मारयन्नंतकरः स्वयं त्वनादिरनंतोव्ययश्च ॥ ४५ ॥ इति श्रीभागवते महापुराणे तृतीयस्कंधे टीकायामेकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ त्रिंशे तु कायकांतादिलालनाकुलचेतसाम् ॥ कामिनां तामसी पापादधोगतिरुदीर्यते ॥ १ ॥ कालप्रभाववर्णनपूर्वकं वैराग्याय विचित्रकर्मकृतां संसृतिमध्यायत्रयेण प्रपंचयति । तस्यैतस्य बलिनः कालस्य बलिनेति वा पाठः । काल्यमानो विचाल्यमानोऽपि वायोर्विक्रमं यथा मेघपंक्तिर्न वेद ॥ १ ॥ विक्रममेवाह । यंयमर्थं दुःखेन प्रयासेनोपादत्ते आपादयति तंतमर्थं भगवान्कालो धुनोति विनाशयति । यत्कृते यन्निमित्तम् ॥ २ ॥ शोके हेतुः । यद्यस्मात्सानुबंधस्य कलत्रादिसहितस्य देहस्य संबंधीनि गृहादीनि वसु द्रव्यम्।अनुक्तसमुच्चयार्थश्चकारः॥ ३॥दुर्मतित्वं दर्शयन्दुःखं प्रपंचयति । जंतुरिति चतुर्दशभिः॥४॥नारक्यां नरकाहारादिभिर्जातायाम् ॥ ५ ॥ निरूढमूलं प्रसृतमनोरथं हृदयं यस्य बहु मन्यते कृतार्थोऽहमिति श्लाघते ॥ ६ ॥ उद्वहनाधिना पोषणचिंतया ॥ ७ ॥ दुराशयत्वमाह । आक्षिप्त आत्मा इंद्रियाणि च यस्य । कया । असतीनां पुंश्चलीनामपि रहसि रचितया संभोगादिरूपया मधुरभाषिणां शिशूनामालापैश्च सुखवन्मन्यत

तेषां तु न ददाति ॥ ४३ ॥ गुणानां सत्त्वादीनां नियंतारोऽधिष्ठातारः । आदिना विष्ण्वादिग्रहः । इत्यर्थ इति । प्रतिकल्पमिति भावः ॥ ४४ ॥ मृत्युना मृत्युहेतुना रुद्रादिना व्याघ्रादिकमप्यंतकं शरीरांतकरम् ॥४५॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ आदिना पुत्रादिग्रहः (१) 'बलिना' इति बहुसंमतः पाठः।एतस्योक्तलक्षणस्य ॥१॥ प्रयासेन परसेवादिना भगवान्समर्थः ॥ २ ॥ ध्रुवमनने हेतुः दुर्मतिरिति ॥ ३ ॥ निर्वृतिं सुखम् ॥ ४ ॥ आदिना नारकीयस्त्रीसंगादिग्रहः ॥ ५ ॥ ६ ॥ ७ ॥ आक्षिप्तो गृहीतः ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः ॥ कुर्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ॥ ९ ॥ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् ॥ पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् ॥ १० ॥ वार्तायां लुप्यमानायामारब्धायां पुनःपुनः ॥ लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहाम् ॥ ११ ॥ कुटुंबभरणाकल्पो मंदभाग्यो वृथोद्यमः ॥ श्रिया विहीनः कृपणो ध्यायञ्श्वसिति मूढधीः ॥ १२ ॥ एवं स्वभरणाकल्पं तत्कलत्रादयस्तथा ॥ नाद्रियंते यथापूर्वं कीनाशा इव गोजरम् ॥ १३ ॥ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः ॥ जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे ॥ १४ ॥ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन् ॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोऽल्पचेष्टितः ॥ १५ ॥ वायुनोत्क्रमतोत्तारः कफसंरुद्धनाडिकः ॥ कासश्वासकृतायासः कंठे घुरघुरायते ॥ १६ ॥ शयानः परिशोचद्भिः परिवीतः स्वबंधुभिः ॥ वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः ॥ १७ ॥ एवं कुटुंबभरणे व्यापृतात्माऽजितेंद्रियः ॥ म्रियते रुदतां स्वानामुरुवेदनयाऽस्तधीः ॥ १८ ॥ यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ ॥ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति ॥ १९ ॥

इत्युत्तरेणान्वयः ॥ ८ ॥ कूटाः वित्तशाठ्यादिबहुला धर्मा येषु दुःखप्रधानेषु ॥ ९ ॥ येषां पोषणेनाधो याति तान्पुष्णाति शेषभुगिति भोगोऽपि तस्य दुर्लभ इत्यर्थः ॥ १० ॥ वार्तायां जीविकायाम् । निःसत्त्वोऽशक्तः परार्थे परस्वे ॥ ११ ॥ अकल्पोऽसमर्थः ॥ १२ ॥ पूर्वं यथाऽऽद्रियंते तथाऽऽदरं न कुर्वंति कीनाशाः कृपणाः कृषीवलाः गोजरं वृद्धं बलीवर्दम् ॥ १३ ॥ भ्रियमाणः पुष्यमाणः ॥ १४ ॥ अवमत्याऽवज्ञयोपन्यस्तं समीपे प्रक्षिप्तम् । गृहपालः श्वा आहरन् भुंजानः आमयावी रोगी ॥ १५ ॥ उत्तारो बहिर्निर्गतनेत्रः कफेन संरुद्धा नाड्यो मार्गभूता यस्य कासश्वासाभ्यां कृत आयासो यस्य घुरघुर इति शब्दं करोति ॥ १६ ॥ परिवीतः परिवेष्टितः वाच्यमानो बंधो तातेत्याहूयमानः ॥ १७ ॥ अस्तधीर्नष्टमतिः ॥ १८ ॥ मृतस्य पुण्यपापाभ्यां द्वे गती तत्र पापगतिमाह । यमदूतावित्यादि यावत्समाप्ति ।

' तंत्रं प्रधाने ' इत्यादिकोशात् ॥ ९ ॥ इत्यर्थ इति । कदाचित्सर्वभुक्तौ शेषाभावान्निराहार एव तिष्ठतीति भावः । यद्यपि कुटुंबभरणं शास्त्रविहितं तथापि शास्त्रातिक्रमेण तद्भरणं नरकायैव " केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः " इत्याद्यग्रे वक्ष्यमाणत्वात् ॥ १० ॥ लोभाक्रांतः । स्पृहां छलादिना तद्धरणेच्छाम् ॥ ११ ॥ पुत्रादिजीवनोपायं ध्यायन् ॥ १२ ॥ " कीनाशः कर्षुकक्षुद्रापांशुघातिषु वाच्यवत् । यमे ना" इति मेदिनी । जरा विद्यतेऽस्येति जरः मत्वर्थीयोऽच् । गौश्चासौ जरश्चेति गोजरस्तम् । वहनोल्लेखनासमर्थं वृषभमित्यर्थः ॥ १३ ॥ स्वकलत्राद्यनादरं दृष्ट्वा मोक्षाय यतिष्यत इति चेत्तत्राह—तत्रापीति । तस्यामवस्थायामपि ये पूर्वं स्वयं भृताः पुत्राद्यास्तैः आसन्नमरणस्यापि गृहस्थारूढचेतसो वैराग्यं नोत्पद्यत इति भावः ॥ १४ ॥ अप्रदीप्ताग्निर्मन्दीभूतजाठरानलः । चेष्टितं गमनादि ॥ १५ ॥ उत्क्रमता कासाधिक्येनोर्ध्वमुत्तिष्ठता । आयासः क्लेशः ॥ १६ ॥ १७ ॥ १८ ॥ स पापी । शकृत्पुरीषम् ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात् ॥ नयतो दीर्घमध्वानं दंड्यं राजभटा यथा ॥ २० ॥ तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः ॥ पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ॥२१॥ क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके ॥ कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रमोदके ॥२२॥ तत्रतत्र पतञ्छ्रांतो मूर्छितः पुनरुत्थितः ॥ पथा पापीयसा नीतस्तमसा यमसादनम् ॥ २३ ॥ योजनानां सहस्राणि नवतिर्नव चाध्वनः ॥ त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः॥२४॥आदीपनं स्वगात्राणां वेष्टयित्वोल्मुकादिभिः ॥ आत्ममांसादनं क्वापि स्वकृत्तं परतोऽपि वा ॥२५॥ जीवतश्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम् ॥२६॥ कृंतनं चावयवशो गजादिभ्योऽभिदापनम् ॥ पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः ॥ २७ ॥ यास्तामिस्रांधतामिस्रा रौरवाद्याश्च यातनाः ॥ भुंक्ते नरो वा नारी वा मिथःसंगेन निर्मिताः ॥ २८ ॥ अत्रैव नरकः स्वर्ग इति मातः प्रचक्षते ॥ या यातना वै नारक्यस्ता इहाप्युपलक्षिताः ॥ २९ ॥

सरभसं सक्रोधमीक्षणं ययोस्तौ दृष्ट्वा ॥ १९ ॥ आवृत्य निरुद्ध्य ॥ २० ॥ तयोस्तर्जनैर्निर्भिन्नं हृदयं यस्य आर्तः संश्वलतीति द्वितीयेनान्वयः ॥ २१ ॥ क्षुत्तृड्भ्यां परीतो व्याप्तः तप्ता वालुका यस्मिन् निर्गत आश्रमो विश्रामस्थानमुदकं च यस्मिन् ॥ २२ ॥ यमसादनं नीतो भवति ॥ २३ ॥ तत्रैव विशेषमाह । अध्वनः संबंधिनां योजनानां नवतिं नव च सहस्राणि पापाधिक्ये द्वाभ्यां वा नीतः सन् ॥ २४ ॥ यातनाः संक्षेपतो दर्शयति चतुर्भिः । आदीपनं प्रज्वलनं प्राप्नोति स्वेन कृत्तमन्येन वा कृत्तं छिन्नं यत्स्वस्य मांसं तस्य भक्षणमित्यर्थः ॥२५॥ आत्मनो वैशसं पीडाम् ॥२६॥ भिदापनं भेदप्रापणम् ॥२७॥२८॥ न चैतदसंभावितमत्रापि दृश्यमानत्वादित्याह ।

नरकदुःखभोगयोग्यो देहो यातनादेहः "पापानां दुःखभोगाय देहा यातनसंज्ञकाः । अनन्ताः संति धर्मस्य नगरे यैश्च पापिनः॥नीयन्ते यमदूतैश्च यमसद्मनि नित्यशः। छिन्ना दग्धाः पुनस्ते हि प्ररोहंति यथायथम्" इति पुराणांतरोक्तेः।असुभिश्चारुह्यमाणा इति न म्रियमाणः पुनरारोपितो निपततीति वक्ष्यमाणत्वाच्च। दंड्यं दंडार्हम्। राजभटा नृपभृत्याः नयतः प्रापयतः ॥ २० ॥ तयोर्यमदूतयोः।तर्जनैस्तर्जन्युत्थानपूर्वकभर्त्सनैः।स्वमघं तस्यैव पापस्य फलमनुभवामीतिस्मरन्॥२१॥वालुकाःसिकताः।कशयाऽश्वताडनार्थं बहुतंतुकदृढहस्तिशुंडाकारकाष्ठदंडबद्धहस्तामितरज्जुःकशा तया'कोडा'इति भाषायां प्रसिद्ध्या॥२२॥ तत्रतत्र मार्गे पापीयसाऽतिक्लिष्टेन पथा मार्गेण सदनमेव सादनं यमस्य सादनं गृहं नरकमित्यर्थः।सायंतेऽवसा द्यंतेऽत्रेति सादनं नरकं यमाज्ञप्तं सादनं यमसादनमिति वा॥२३॥तत्रैव मार्गे एव। यातना नरकपीडाः ॥२४॥ कृत्तमिति समासांतर्गतमप्यार्षत्वादन्वेति परतः परेण वा कृत्तमित्यर्थ इति।'पदार्थः पदार्थैनान्वेति न तु पदार्थैकदेशेन'इति न्यायो नात्रानुसरणीयस्तथात्वे स्वकृत्तपदस्यात्ममांसादनपदेनान्वयोऽनौचित्योद्भावकः स्यादतः पदार्थैकदेशेनात्ममांसपदेनैवान्वयः कार्य इति भावः। "जातिव्यक्त्याकृतयः पदार्थः" इति गौतमसूत्राज्जात्यादित्रित्वं पदार्थं मन्यमानैस्तार्किकैर्गौरनित्येत्यत्र व्यक्तिरेवानित्यांगी क्रियते सा च पदार्थैकदेश एव । किं च। कुंडली भुंक्ते इत्यत्रापि विशेष्यस्य देवदत्तस्यैव भोजनेऽन्वयो न तु विशेषणीभूतकुंडलस्येहापि विशिष्टस्य पदार्थत्वेप्येकदेश एवान्वयात्पदार्थैकदेशन्यायस्यासार्वत्रिकत्वमेवेत्यलम् ॥ २५ ॥ वैशसं हिंसां पीडां वा " हिंसायां पीडने वापि वैशसं नरकेऽपि च" इति निरुक्तिः। प्राप्नोतीत्यनेन द्वितीयांतानामन्वयः ॥ २६ ॥ २७ ॥ या यातनास्ताश्च भुंक्ते मिथःसंगेन पापिष्ठगृहस्थप्रसंगान्नरनार्योः पापिष्ठत्वे प्राप्ते परस्परसंगः पापातिशयहेतुरिति ॥ २८ ॥ अत्रापि राज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं कुटुंबं बिभ्राण उदरंभर एव वा ॥ विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशम् ॥ ३० ॥ एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरम् ॥ कुशले तरपाथेयो भूतद्रोहेण यद्भृतम् ॥ ३१ ॥ दैवेनासादितं तस्य शमलं निरये पुमान् ॥ भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ॥ ३२ ॥ केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः ॥ याति जीवोंऽधतामिस्रं चरमं तमसः पदम् ॥ ३३ ॥ अधस्तान्नरलोकस्य यावतीर्यातनादयः ॥ क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने कामिनां नरकादिवर्णनं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ श्रीभगवानुवाच ॥ कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये ॥ स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः ॥ १ ॥

अत्रैवेति ॥ २९ ॥ उभयं कुटुंबं स्वं देहं च ॥ ३० ॥ पापार्जितं धनं भुंजते बहवः कर्तैव नरकं यातीत्याह एक इति भूतद्रोहेण यद्भृतं तत्स्थूलं स्वकलेवरमिहैव हित्वा । कुशलादितरत् पापं तदेव पाथेयं भोग्यं यस्य ॥ ३१ ॥ ननु पापमपि विहाय गच्छतु तत्राह । दैवेनेति । तस्य कुटुंबपोषणस्य शमलं पापं दैवेनेश्वरेण प्रापितं भुंक्ते ॥ ३२ ॥ ननु कुटुंबपोषणं विहितमेव तत्राह । केवलेनेति । तमसो नरकस्य चरमं पदं स्थानम् ॥ ३३ ॥ पुनर्मनुष्यशरीरप्राप्तिप्रकारमाह । नरलोकस्य मनुष्यदेहस्य प्राप्ते रधस्तादर्वाग्यावत्यो यातनाः आदिशब्देन श्वसूकरादियोनयश्च यास्ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः शुचिः सन्नत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ॥ ३४ ॥ इति श्रीम० तृती० टीकायां त्रिंशत्तमोऽध्यायः ॥ ३० ॥ एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहांतरा ॥ मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः ॥ १ ॥ पुनरत्राव्रजेदित्युक्तं

दंडे कासांचित्प्रत्यवयवकृत्तनादियातनानां तथा स्रक्चन्दनवनितादिसुखभोगानां च दर्शनादिति ॥ २९ ॥ ३० ॥ पाथेयं पथिभोज्यं शंबलमित्यर्थः ॥ ३१ ॥ अत्राशंकते नन्विति ॥ ३२ ॥ पुनराशंकते—नन्विति ॥ ३३ ॥ इत्यर्थ इति । "चतुरशीतिसाहस्रं भुक्त्वा मानुष्यमाप्नुयात्" इत्युक्तेरिति भावः । सहस्राणां समूहः साहस्रं लक्षमित्यर्थः ॥ ३४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे त्रिंशत्तमोऽध्यायः ॥ ॥ ३० ॥ इहांतरा अत्रलोकमध्ये भारते वर्षे मनुष्ययोनेः प्राप्तिर्यस्यां राजसगती सा तथा (१) अत्र गर्भोपनिषदर्थं दर्शयति—"भुक्तान्नादिषडिधरसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसः स्नायवः स्नायुभ्योऽस्थीन्यस्थिभ्यो मज्जा मज्जातः शुक्रं शुक्रशोणितसंयोगादावर्त्तते गर्भो हृदि व्यवस्थां नयति।तदिदं शुक्रमृतुकाले प्रयोगादेकरात्रोषितं कललं भवति सप्तरात्रोषितं बुद्बुदमर्द्धमासाभ्यंतरे पिंडं रक्तं कठिनं, मासद्वयेन शिरो ग्रीवा, मासत्रयेण पादप्रदेशश्चतुर्थे गुल्फौ जठरं कटिप्रदेशः, पञ्चमे पृष्ठवंशः, षष्ठे मुखनासिकाक्षिश्रोत्राणि, सप्तमे जीवेन संयुक्तोऽष्टमे सर्वलक्षणसंपूर्णः पितूरेतोऽतिरेकात्पुरुषो, मातूरेतोऽतिरेकात्स्त्री, उभयबीजतुल्यत्वान्न पुंसको, व्याकुलितमनसोंधाः खंजाः कुब्जा वामनका भवंत्यन्योन्यवायुपरिपीडितशुक्रद्वैविध्याद्विधातनुः स्यात्ततो युग्माः प्रजायंते पञ्चात्मकः समर्थः पंचात्मिका चेतसा बुद्धिर्गंधरसादिज्ञानाक्षराक्षरमोङ्कारं चिंतयतीति तदे काक्षरं ज्ञात्वाष्टौ प्रकृतयः षोडश विकाराः शरीरे तस्यैव देहिनः अथ मात्राशितपीतनाडीसूत्रगतेन प्राण आप्यायते नवमे मासि सर्वलक्षणज्ञानकरणसंपूर्णो भवति पूर्वजातीः स्मरति । शुभाशुभं च कर्म विंदति "पूर्वयोनिसहस्राणि दृष्ट्वा चैव ततो मया । आहारा विविधा भुक्ताः पीता नानाविधाः स्तनाः ॥ जातश्चाहं मृतश्चाहं जन्म चैव पुनःपुनः । मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ॥ नानायोनिसहस्राणि मयोषितानि यानि वै । मातरो विविधा दृष्टाः पितरः सुहृदस्तथा ॥ अवाङ्मुखः पीडितोहं जंतुभिश्च समन्वितः । मया परिजनस्यार्थे कृतं कर्म शुभाशुभम् ॥ एकाकी तेन दह्येहं गतास्ते फलभोगिनः । अहो दुःखोदधौ मग्नो न पश्यामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदम् ॥ दशाहेन तु कर्कंधूः पेश्यंडं वा ततः परम् ॥ २ ॥ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः ॥ नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ॥३ ॥ चतुर्भिर्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः ॥ षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे॥४॥ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते ॥ शेते विण्मूत्रयोर्गर्ते स जंतुर्जंतुसंभवे ॥ ५ ॥

तदेव विशेषतो दर्शयति । कर्मणा पूर्वकृतेन दैवमीश्वरस्तदेव नेत्रं नेतृ प्रवर्तकं यस्य प्रविष्टो भवति ॥ १ ॥ कललं शुक्रशोणितमिश्रितं भवति बुद्बुदं वर्तुलाकारम् । कर्कंधूर्बदरीफलं तदाकारं कठिनम् । पेशीमांसपिंडाकारम् अंडं वा योन्यंतरे ॥ २ ॥ बाह्वंघ्र्यादीनामंगानां विग्रहो विभागः लिंगं च छिद्राणि च तेषामुद्भवः ॥ ३ ॥ जरायुणा गर्भवेष्टनेन वीतः प्रावृतः ॥ ४ ॥ मातुर्जग्धेन भक्षितेनान्नेन पानाद्यैश्चैधमाना धातवो यस्य जंतूनां संभवो यस्मिंस्तस्मिन्नसंमते गर्ते शेते । तथाच मार्कंडेयपुराणे । "नाडी चाप्यायनी नाम नाभ्यां तस्य निबद्ध्यते ॥ स्त्रीणां तथांत्रसुषिरे सा निबद्धोपजायते ॥ क्रमंते भुक्तपीतानि स्त्रीणां गर्भोदरे तथा ॥ तैराप्यायितदेहोऽसौ

प्रतिक्रियाम् ॥ यदि योन्याः प्रमुच्येहं प्रपद्ये परमेश्वरम् । अशुभक्षयकर्त्तारं फलमुक्तिप्रदायकम् ॥ यदि योन्याः प्रमुच्येहं तत्प्रपद्ये नारायणम् । अशुभक्षयकर्त्तारं फलमुक्तिप्रदायकम् ॥ यदि योन्याः प्रमुच्येऽहं तत्सांख्यं योगमभ्यसे ।" अशुभक्षयकर्तारं फलमुक्तिप्रदायकम् ॥ यदि योन्याः प्रमुच्यामि ध्याये ब्रह्म सनातनम् ॥ अथ योनिद्वारं संप्राप्तो यंत्रेणापीड्यमानो महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृष्टस्तदानुस्मरति जन्ममरणानि न च कर्म शुभाशुभं विंदति" इति गर्भोपनिषद्व्याख्यानरूपोऽध्यायोऽयमिति स्पष्टार्थत्वान्न व्याख्यातेति । "अन्याधिष्ठिते पूर्ववदभिलापात्" (अन्यैर्जीवैराधिष्टिते व्रीह्यादौ संसर्गमात्रमनुशायिनां पूर्ववदाकाशादिवदभिलापादित्यर्थः) इति सूत्रात् जीवनां वर्षधाराद्वारा पृथिवीप्रवेशानंतरं पठ्यते "त इह व्रीहियवा ओषधिवनस्पतयस्तिला माषा इति जायंते" इति श्रुतेः । ते जीवाः । "रेतःसिग्योगोथ" इति सूत्राच्च । अथ व्रीह्यादिभावानंतरमनुशायिनां रेतः सिंचतीति रेतस्सिक् तद्योगस्तद्भावः श्रुतावाम्नायते " यो रेतः सिंचति तद्भूय एव भवति" इति श्रुतेः । अनुशयी व्रीह्याद्यन्नद्वारा पुरुषं प्रविष्टस्तद्भूयो भवति तद्भावं गच्छतीति न ह्यत्रानुशयिनो रेतःसिग्भावो मुख्योस्ति इदानीं पुरुषप्रविष्टत्वेनाप्राप्तयौवनत्वात् । अतस्तत्संसर्गो वक्तव्यः । तथा च व्रीह्यादावपि संसर्ग एवाकाशादावपि संसर्गमात्रावगतेरित्यर्थः । 'केचिद्दैवं वदंत्यन्ये' इति ध्रुवोपाख्यानोक्तेर्दैवमीश्वरः तदेव दैवमेव ॥ १ ॥ योन्यंतरे जरायुभिन्नपक्ष्यादियोनौ चांडमेव भवतीति ततो दशाहात्परमग्रे इत्यग्रिमेणान्वेति ॥ २ ॥ द्वाभ्यां मासाभ्याम् । लिंगं पुंस्त्वादि । छिद्राणींद्रियद्वाराणि ॥ ३ ॥ धातवस्त्वगादयः । दक्षिणे इति पुरुषमधिकृत्योक्तेः । "पुंगर्भो दक्षिणे कुक्षौ वामे स्त्रीगर्भ इष्यते । मध्यभागे षंढगर्भः" इति मार्कंडेयोक्तेः ॥ ४ ॥ असंमतेऽशुचौ । अत्र प्रमाणमाह-तथा चेति । तस्य गर्भस्य । स्त्रीणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रृमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणम् ॥ मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैःक्षुधितैर्मुहुः ॥ ६ ॥ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः ॥ मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ॥ ७ ॥ उल्बेन संवृतस्तस्मिन्नंत्रैश्च बहिरावृतः ॥ आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ॥८॥ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे ॥ तत्र लब्धस्मृतिर्दैवात्कर्मजन्मशतोद्भवम् ॥ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विंदते॥९॥ गर्भवाससमं दुःखं न भूतं न भविष्यति ॥ आरभ्य सप्तमान्मासाल्लँब्धबोधोऽपि वेपितः ॥ नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः ॥ १० ॥ नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांजलिः ॥ स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ॥ ११ ॥

जंतुर्वृद्धिमुपैति वै" इति ॥ ५ ॥ तत्रत्यैः कृमिभिः खादद्भिः सौकुमार्यात्कोमलत्वेन क्षतानि सर्वांगानि यस्य ॥ ६ ॥ उल्बणैर्दुःसहैः सर्वेष्वंगेषूत्थिता वेदना यस्य आस्त इत्युत्तरेणान्वयः ॥ ७ ॥ उल्बेन जरायुणा भुग्नं कुटिलीभूतं पृष्ठं शिरोधरा ग्रीवा च यस्य ॥ ८ ॥ दैवात्पूर्वकर्मवशात् लब्धा स्मृतिर्येन सः दीर्घं दुरंतमनुच्छ्वासं यथा भवति तथा तत्र स्थितः सन् ॥ ९ ॥ सूतिहेतुभिर्वातैर्वेपितः सोदरः समानोदरजन्मा विष्ठाभूः कृमिरिवेति ॥ १० ॥ नाथमानो याचमान उपतप्यमान इति वा

मांत्रसुषिरे आंत्रच्छिद्रे । तैर्मातृभुक्तपीतैरन्नादिभिः ॥ ५ ॥ तत्रत्यैर्गर्भस्थमलगैः ॥ ६ ॥ कटुर्मरीचादिस्तीक्ष्णं सर्षपादि ॥ ७ ॥ ८ ॥ तत्र गर्भे । नन्वतीवबीभत्सितस्थलस्थस्य साधनाभावात्कथं जन्मशतज्ञानं बहिर्निर्गतस्य प्रयतमानस्याप्येकजन्मज्ञानमपि कथं नोदेतीत्याशंकायामाह—"गर्भे यदस्य विज्ञानं तन्माहात्म्यं स्थलस्य हि । गर्भाशये भवेज्ज्ञानं वाराणस्यां विमुक्तिवत् ॥ तस्माच्च्युतोऽज्ञतामेति मागधो दुर्गतिं यथा ॥" इति शिष्टगीतात् ॥ ९ ॥ १० ॥ याचमानः एवंविधगर्भवासः पुनर्मे मां भूदिति प्रार्थयमानः । भगवत्कृपा मयि भूयादिति स्वस्मिन्नाशिषं कुर्वन्वा । अहो मयात्रातीव दुःखं भुक्तमित्येवमुपतप्यमानः प्राप्तज्ञानैश्वर्यो वेति 'नाथृ—याच्ञोपतापैश्वर्याशीषु' इति धातोर्यद्यप्याशिष्येवात्मनेपदमस्ति तथाप्यार्षत्वादत्र सर्वार्थेष्वपि तदिति शानच् । अत एव स्वामिचरणैर्याचमानः प्रतप्यमान इति च व्याख्यातम् । अत्र विश्वनाथः—तं स्तुवीतेति गर्भे विष्ण्वादेः संभवाभावात् "हेतुहेतुमतोर्लिङ्" इति लिङ् । ततश्च यो भगवंतं भजेतेति हेतुरत्र गम्यः तेन च यो भगवंतं भजेत स गर्भेपि स्तुवीतेत्यन्यो जीवस्तु न स्तुवीतेत्यर्थो लभ्यते । तस्यैव स्तुवानस्य जीवस्याग्रे संसारो वर्णयिष्यते बर्णितश्च न तु भगवंतं स्तुवानस्यापि । "अकामादपि ये विष्णोः सकृत्पूजां प्रकुर्वते । न तेषां भवबंधस्तु कदाचिदपि जायते" इति बृहन्नारदीये "सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम" इति गारुडे इत्येवं परसहस्रवचनविरोधात् । अत एव 'शेते विण्मूत्रयोर्गर्त्ते' इति 'मूर्च्छामाप्नोत्युरुक्लेश इति' 'आस्ते कृत्वा शिरः कुक्षौ' इत्यादिवद्दशमास्थो जीवो हरिं स्तौतीति वर्त्तमानप्रयोगो न कृतः किन्तु जीव उवाचेति भूतकालप्रयोग एव तेन च पूर्वकालभवः कश्चिद्भक्तो जीव एवं गर्भे हरिं स्तुवान आसीन्न तु सर्व इत्यर्थो ज्ञापितः । अत एव नैरुक्ता अपि पठंति नवमे सर्वांगसंपूर्णो भवतीति पठित्वा "मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः" इत्याद्यनंतरम् "अवाङ्मुखः पीड्यमानो जंतुश्चैवं समन्वितः । सांख्यं योगं समभ्यस्येत्पुरुषं पञ्चविंशकम् ॥ ततश्च दशमे मासि प्रजायते" इत्यादिगर्भोपनिषद्वाक्यम् । अत्र वाशब्दबलात्कश्चित्सकर्मा जीवो 'मृतश्चाहं पुनर्जातः' इत्यादि पूर्वपूर्वजन्ममात्रं स्मरति । कश्चिज्ज्ञानी सांख्यं कश्चिद्योगी योगं कश्चिद्भक्तश्चतुर्विंशात्प्रधानात्परं पंचविंशं पुरुषं परमेश्वरमभ्यस्येद्भजेदिति पूर्वाभ्यस्तमेव गर्भे स्फुरेदिति युक्तम् । अत्र भेदेप्येकत्वेन वर्णनं तु श्रीवराहावतारवज्ज्ञेयं तत्र प्रथममन्वंतरस्यादौ पृथिवीमज्जने ब्रह्मनासिकातोवतीर्णो वराहस्तामुद्धरन्हिरण्याक्षेण युद्धं कृतवानिति वर्ण्यते । हिरण्याक्षस्तु षष्ठमन्वंतरावसानजातप्राचेतसदक्षकन्याया दितेर्जातस्तस्मात्तथा वर्णनं तदवतारमात्रत्वपृथिवीमज्जनमात्रत्वैक्यविवक्षयैव घटेत तद्वदत्रापि कश्चिदेवान्यो जीवः स्तौति इत्यन्यः संसरती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University, Ramtek Collection

जंतुरुवाच ॥ तस्योपसन्नमवितुं जगदिच्छयाऽऽत्तनानातनोर्भुवि चलच्चरणारविंदम् ॥ सोहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा ॥ १२ ॥ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलंब्य मायाम् ॥ आस्ते विशुद्धमविकारमखंडबोध मातप्यमानहृदयेऽवसितं नमामि ॥ १३ ॥ यः पंचभूतरचिते रहितः शरीरे छन्नो यथेंद्रियगुणार्थचिदात्मकोऽहम् ॥ तेनाऽविकुंठमाहिमानमृषिं तमेनं वंदे परं प्रकृतिपूरुषयोः पुमांसम् ॥ १४ ॥

ऋषिर्देहात्मदर्शी भीतः पुनर्गर्भवासात् सप्त वध्रयो बंधनभूता धातवो यस्य सः विक्लवया व्याकुलया ॥ ११ ॥ उपसन्नं जगद्रक्षितुं स्वेच्छया गृहीतनानामूर्ते र्भगवतश्चरणारविंदमकुतोभयं सोऽहं शरणं व्रजामि। भुवि चलदिति श्रीकृष्णावताराभिप्रायेण असतो मेऽनुरूपा योग्या येनेदृशी गर्भवासलक्षणा गतिर्दर्शिता तस्य ॥ १२ ॥ ननु कोऽसौ यं शरणं व्रजसि को वा तव तस्य च विशेषो येन सेव्यसेवकत्वमित्यपेक्षायामाह। अत्र मातुर्देहे भूतेंद्रियाशयमयीं देहाकारपरिणतां मायामवलंब्या श्रित्य कर्मभिरावृतस्वरूप इव बद्ध इव च य आस्ते सोऽहम्। यस्त्वत्रैवास्ते तं नमामि। कथंभूतमित्यपेक्षायां तुशब्दोक्तं विशेषं दर्शयति। आतप्यमाने हृदयेऽवसितं प्रतीतमेवमप्यविकारम्। कुतः विशुद्धं निरुपाधिं तत्कुतः अखंडो बोधो यस्य तम् ॥ १३ ॥ ननु त्वमपि वस्तुतः शुद्ध एव। "असंगो ह्ययं पुरुषः" इत्यादिश्रुतेः। तत्क थं युवयोरयं विशेषस्तत्राह। यः पंचभिर्भूते रचिते शरीरे अयथा मिथ्यैव छन्नो न वस्तुतः यतस्तेन शरीरेण रहितोऽसंगोऽतो यथैवेंद्रियगुणार्थचिदात्मकः इंद्रियाणि च गुणाश्च अर्थाश्च चिदाभासश्च तदात्मकः सोऽहं तं वंदे। कथंभूतम्। तेन शरीरेणाविकुंठो महिमा यस्य तम् अवगुंठेति पाठेऽवसन्नं गुंठनमावरणं यस्य स महिमा यस्येत्यर्थः।

त्येवं मंतव्यम् ॥ ११ ॥ भुवि चलदिति कृष्णावताराभिप्रायेणेति नूनं तदानीं कृष्णावतारात्। अत्र लिंगं गृहीतनानातनोरिति वर्त्तमानार्थकशत्रंतप्रयोगश्च तस्यैव सर्वावतारित्वात्। श्रीकपिलोक्तिश्चेयं पूर्वकल्पगततदवतारा पेक्षयेति संदर्भः। यद्वा। सतः परमापद्विनिर्दश्यतो मम येनानुरूपा तदुद्धरणक्षमेदृशी स्वस्फूर्त्तिलक्षणगतिश्चित्तवृत्तिरदर्शि प्रकाशितेति ॥ १२ ॥ अत्राशंकते–नन्विति । तन्निरुपाधित्वम् । अत्र विश्वनाथः–तस्य स्वप्रभोरद्भुतां लीलां कृपालुताञ्च स्मरन्साश्चर्यमाह–यः खल्वत्रास्मद्विधदुर्जीवानां नानादुःखमयप्रतिशरीर एवास्ते किमस्मान्पालयितुं किं वा स्वैरलीलत्वेनेति न विद्म इति भावः । तमहं नमामीत्यन्वयः। अहं स्वदुष्कृतफलं भुंजानो यदत्रास्मि तदुचितमेव स कथमत्र दुर्गंधे महानरकेंऽतर्यामित्वेनापि तिष्ठतीत्याह। कर्मभिर्बद्ध इव न तु बद्धो वृंदावनभुवि चलच्चरणारविंदत्वात्। आवृतात्माहं यथा तथैव देहेनावृतस्वरूप इव न त्वावृतः उक्तयुक्तेरेव मायां स्वशक्तिमवलंब्य प्रवर्त्य। नन्वेवं तर्हि तस्मिन्मायावलंबत्वान्मालिन्यं विकारश्च प्रसज्येतेत्यत आह–विशुद्धं निर्विकारञ्च तत्र हेतुः अखंडबोधं मदज्ञातमिव यस्य ज्ञानं मायया खंडायितुमशक्यमि त्यर्थः। ननु कथमिदमवगतं त्वयेत्यत आह–आसमंतात्तप्यमानेऽत्र हृदये मयाऽवसितं प्रतीतं संतप्यति हृदये स्थित्वा येन मह्यमपीदं ज्ञानं दत्तं तस्य ज्ञानं कथं खंडितं भवेदिति ॥ १३ ॥ पुनराशंकते–नन्विति । अतोऽ संगत्वात्। इत्यर्थ इति व्याख्येयम्। तत्राविकुंठमहिमत्वे नियंतृत्वे हेतुं पृच्छति कुत इति । इत्यर्थ इति । "विद्याशक्तया त्रिकालज्ञा ऋषयः परिकीर्त्तिताः" इत्युक्तेरिति भावः । इति भाव इति । "योऽविद्यया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्माययोरुगुणकर्मनिबंधनेऽस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण ॥ नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंतरेण॥ १५॥ ज्ञानं यदेतददधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः ॥ तं जीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनाय वयं भजेम ॥ १६॥ देह्यन्यदेहविवरे जठराग्निनाऽसृग्विण्मूत्रकूपपतितो भृशतप्तदेहः॥इच्छन्नितो विवसितं गणयन् स्वमासान् निर्वास्यते कृपणधीर्भगवन् कदा नु॥ १७॥ येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन ॥ स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनाऽजलिमस्य कुर्यात्॥ ॥ १८॥पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे॥यत्सृष्टया स तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतम्॥ १९॥

तत्र हेतुः। प्रकृतिपुरुषयोः परं नियंतारम् । कुतः ऋषिं सर्वज्ञं विद्याशक्तिमित्यर्थः।विद्याऽविद्याकृतो विशेष इति भावः॥ १४॥ननु ज्ञानेनायं बंधो निवर्तिष्यते.किं परमेश्वरवंदनेन तत्राह । यस्य मायया नष्टस्मृतिः सन् संसारसंबंधिनि पथि तदभिश्रमेण तत्कृतेन क्लेशेन चरन्नयं जीवो महतस्तस्यैवेश्वरस्यानुग्रहं विना पुनः कया युक्त्या लोकं निजस्वरूपं प्रवृणीत संभजेत अभिश्रमहेतुत्वेन पंथानं विशिनष्टि । उरूणि गुणनिमित्तानि कर्माणि नितरां बंधनानि यस्मिन् ईश्वरस्य प्रसादं विना ज्ञानाभावात्स एव सेव्य इत्यर्थः ॥ १५ ॥ ईश्वर एव ज्ञानद इत्युपपादयन्नाह । यदेतत्त्रिकालविषयं ज्ञानं तत्तं विना कतमो मय्यदधान्न कोऽपि किं तु स देव ईश्वर एव । नन्वन्यः प्रकृष्टो जीवो दधातु । नेत्याह । जीवरूपां कर्मपदवीमनुवर्त्तमाना वयमिति तद्व्यतिरेकेण न कोपि समर्थ इत्यर्थः । अन्यस्यात्रासंभवमुक्त्वा तस्य संभवमाह । स्थिरेषु चरेषु चांतर्यामिरूपोऽनुवर्तितोंऽशो येन तं भजेम ॥ १६ ॥स्वदुःखं विज्ञापयन्नाह । देहीति। अन्यदेहविवरे मातुरुदरकुहरे योऽसृग्विण्मूत्रकूपस्तस्मिन्पतितस्तत्र जठराग्निना भृशं तप्तो देहो यस्यात एव कृपणधीरितो विवराद्विवसितुं निर्गंतुमिच्छन्स्वमासान्गणयन्नसौ कदा नु अहो बहिर्निर्वास्यते ॥ १७ ॥ तत्कृतमुपकारं स्मरन्नाह । येनेदृशीं गतिं ज्ञानम् । भवादृशेनेति निरुपमेनेत्यर्थः । स्वकृतेनैव स्वयं तुष्यतु अंजलिमात्रं विना तत्कृतोपकारे प्रत्युपकारं कः कुर्यादित्यर्थः ॥ १८ ॥ ईदृशीं गतिमित्यनेन जात्यंतरविलक्षणं ज्ञानं प्रापितवानित्युक्तं तदेव वैलक्षण्यमाह ।

युक्स्तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥'' इत्याशयः ॥ १४ ॥ पुनराक्षिपति—इत्यर्थ इति । ''वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम्'' इत्युक्तेः । 'मत्तो ज्ञानं हि जीवानाम्' इति गीतोक्तेश्च ॥ १५ ॥ आक्षिपति अन्यो जीव इति । इत्यर्थ इति । ''अहं ज्ञानप्रदो गुरुः'' इत्युक्तेर्गुरावपि स्थित्वा ज्ञानदाताहमेवेति भावः । अन्यस्येश्वरेतरस्य । अत्र गर्भे ॥ १६ ॥ उदरकुहरे अत एव तप्तदेहत्वात्कृपणधीः स्वदुःखसुखदत्तदृष्टित्वात्कुबुद्धिः गणयन्नयमष्टमोऽयं नवमोऽयं दशमोयमिति मासगणनां कुर्वन् निर्वास्यते बहिर्निष्कास्यते अत्रत्यकष्टस्यासह्यत्वाद्बहिरागत्य त्वां भजेयमिति भावः । त्वयेति शेषः ॥ १७ ॥ तत्कृतमीशकृतम् । इत्यर्थ इति । अन्यस्येश्वरस्याभावादिति भावः । भवतेत्याक्षेपलब्धस्य विशेषणमिदं भवादृशेनेति । किञ्च । भवत्सदृशो दयालुर्भवानेव न त्वन्य इति मद्बुद्धिरस्तीति त्वयापि दुर्गततमोयं यदि मत्कृपानुगृहीतः स्यात्तर्हि कथं त्याज्य इति विचार्य स्वयमेव तुष्यतु । इत्यर्थ इति । न कस्यापि प्रत्युपकारसामर्थ्यमस्तीति भावः । अस्य तत्र ॥ १८ ॥ आसमिति पाठ एव प्रशस्तः प्रतिभाति स्वामिचरणैरभवमिति व्याख्यातत्वात् । छन्दोभंगस्त्वार्षः । आत्मनेपदमप्यार्षम् । इत्यर्थ इति । वस्तुतो न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिगमिषे बहिरंधकूपे ॥ यत्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमेतत् ॥ २० ॥
तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव ॥ भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादितविष्णुपादः॥२१॥
कपिल उवाच ॥ एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः॥ सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः ॥ २२ ॥

पश्यतीति । अयमपरः पश्वादिः सत्त्वधिर्जीवः स्वदेहे शारीरके शरीरभवे सुखदुःखे केवलं ननु पश्यति अहं पुनर्यत्सृष्टया धिषणया यद्दत्तेन विवेकज्ञानेन दमशरीरी दम इत्युपलक्षणं शमदमादियुक्तशरीरवानासमभवं तमेव च पुराणमनादिं पुरुषं पूर्णं बहिश्च हृदि च पश्ये पश्यामीत्यन्वयः । कथं अपरोक्षतया प्रतीतं चैत्यमिव अहंकारास्पदं भोक्तारमिवेत्यर्थः ॥ १९ ॥ विवेकज्ञानकृतं संसारोद्वेगमनुवदन्मोक्षमार्गमेवाध्यवस्यति । सोऽहमिति द्वाभ्याम् । हे विभो बहुदुःखवासं तथा भवति यथा गर्भे वसन्नपि सोऽहं गर्भाद्बहिर्निर्गंतुमिच्छामि । तत्र हेतुः । अंधकूपप्राये यत्र बहिरुपयातं गतं प्राणिनं देवस्य तव मायोपसर्पति व्याप्नोति । यदनु यां मायामनु मिथ्यामतिर्देहेऽहंबुद्धिः । संसृतिचक्रं च कलत्रपुत्रादिसंबंधादुपसर्पति ॥ २० ॥ तस्मादत्रैव स्थितोऽपि विगतविक्लवोऽव्याकुलः सन्सुहृदा आत्मना सारथिरूपया बुद्ध्यैवात्मानं तमसः संसारादुद्धरिष्यामि अनेकरंध्रं नानागर्भवासरूपमेतद्व्यसनं दुःखं यथा मे मा भविष्यन्न भविष्यति तथा काऽत्र तव साधनसामग्री तत्राह । उपसादितौ हृदयं प्रापितौ विष्णोः पादौ येन मया सः ॥ २१ ॥ दश मासाः परिच्छेदका यस्येति प्रसूतिपूर्वक्षणोपलक्षणम् । ऋषिर्जीवः सद्यस्तत्क्षणमेव अवाचीनमवाङ्मुखम् ।

भोक्तारं भोक्तृत्वस्य मायिकत्वादिति भावः ॥ १९ ॥ तत्र बहिर्निर्गमे ॥ २० ॥ यतो बहिर्निर्यातस्य मायासंगो भवति तस्मादित्यर्थः । विष्णुरत्र श्रीकृष्णो नंदनंदन एव "तत्रांशेनावतीर्णस्य विष्णोर्वीर्याशंस नः" इति प्रसिद्धेः । किञ्च । 'शूरो वैरिप्रशंसितः' इत्युक्तन्यायेन नास्तिकशिरोमणिनाऽमरसिंहेनापि विष्णुनामान्युक्त्वा वसुदेवोऽस्य जनकः' इति श्रीकृष्णजनकत्वेन प्रसिद्धवसुदेवस्य विष्णुपितृत्वोक्तेः । श्रीनंदनंदनस्यैव विष्णुत्वमुक्तमन्यथा 'कश्यपो ह्यस्य जनकः' इत्यादि ब्रूयात् 'धनं न गोभिः सदृशं पृथिव्याम्' इति पाराशरोक्तेर्वसुपदोपलक्षितगोरूपैर्धनैरित्यभिप्रेत्याह–वसुभिर्गोभिर्दीव्यतीति वसुदेवः । यद्वा । "द्रोणो वसूनां प्रवरो धरया सह भार्यया । जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत्" इति श्रीदशमे वक्ष्यमाणत्वादवतारावतारिणोरभेदाद्वसुश्चासौ देवो वसुदेवस्स च श्री नंदराज एवेत्यलं प्रसक्तानुप्रसक्त्या । अत्रोपसादितौ विष्णुपादौ येन तस्य मे इत्यन्वयः "पादस्य लोपोऽहस्त्यादिभ्यः" इत्यनेनात्र पादशब्दस्याकारलोपे सत्यपि पदादेशाभाव आर्षः । अहमित्यस्य विशेषणे तु समासपुनरात्तत्वदोषप्रसक्तिः स्यात्सा यदि पुराणादौ नाद्रियेत तर्हि तथैवास्त्वित्यलम् ॥ २१ ॥ य ऋषिर्भगवद्द्रष्टा पूर्वोक्तरीत्या ब्रह्मवैवर्त्तवर्णितश्रीशुकदेव इव कश्चित्स दशमास्य एव स्तुवन्कृतमतिः पूर्णभगवज्ज्ञानो भवति अतः प्रसंगेनैवोक्तमहिम्नस्तस्य जन्मादिसांसारिकावस्थाभासो न वर्णनीय इति भावः । यस्तु प्रस्तुतो दुर्जीवस्तस्य तु पुनर्दुरवस्था श्रूयतामित्याह–सद्य इति । अवाचीनमधो गच्छंतं संसारपदवीमनुवर्त्तमानं तं दशमास्यत्वे सति सूतिहेतुर्मारुतः सद्यः क्षिपति । यस्तु शुकदेववद्भगवज्ज्ञानपूर्णः स तु तद्वत्स्वातंत्र्येणैवाविर्भवतीत्यर्थः । मध्यस्थानां जीवानां तु तारतम्यं ज्ञेयमिति भावः । अत्रैक एव जीवो यदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनावसृष्टः सहसा कृत्वाऽवाक् शिर आतुरः ॥ विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः ॥ २३ ॥ पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते ॥ रोरूयति गते ज्ञाने विपरीतां गतिं गतः ॥ २४ ॥ परच्छंदं न विदुषा पुष्यमाणो जनेन सः ॥ अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः ॥ २५ ॥ शायितोऽशुचिपर्यंके जंतुस्वेदजदूषिते ॥ नेशः कंडूयनेंऽगानामासनोत्थानचेष्टने ॥ २६ ॥ तुदंत्यामत्वचं दंशा मशका मत्कुणादयः ॥ रुदंतं विगतज्ञानं कृमयः कृमिकं यथा ॥ २७ ॥ इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च ॥ अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचाऽर्पितः ॥ २८ ॥ सह देहेन मानेन वर्धमानेन मन्युना ॥ करोति विग्रहं कामी कामिष्वंताय चात्मनः ॥ २९ ॥ भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत् ॥ अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिम् ॥ ३० ॥ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिम् ॥ योऽनुयाति ददत् क्लेशमविद्याकर्मबंधनः ॥ ३१ ॥ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः ॥ आस्थितो रमते जंतुस्तमो विशति पूर्ववत् ॥ ३२ ॥

सूतिहेतुर्मारुतः क्षिपति नुदति ॥ २२ ॥ अवसृष्टोऽधः क्षिप्तः सन् ॥ २३ ॥ रोरूयति रोरूयते ॥ २४ ॥ परस्य च्छंदमभिप्रायमविदुषा अनभिप्रेतं स्तन्यार्थं रोदने उदरव्यथां प्रकल्प्य निंबरसपानमुदरव्यथया रोदने स्तनपानमित्यादि ॥ २५ ॥ आसनोत्थानचेष्टने चानीशः सन् रोरूयतीत्यनुषंगः ॥ २६ ॥ आमा कोमला त्वग्यस्य तम् । विगतं गर्भे जातं ज्ञानं यस्य ॥२७॥ शैशवं पंचवर्षाणि ततः पौगंडं यौवनादर्वाक् तत्र चाध्ययनादिदुःखम् । यौवने दुःखमाह । सार्धैस्त्रिभिः । अलब्धाभीप्सितत्वेन शुचार्पितो व्याप्तः अज्ञानादिद्धो दीप्तो मन्युर्यस्य सः ॥ २८ ॥ देहेन सहैव वर्धमानेनाभिमानेन मन्युना च विग्रहं विरोधकं करोति । आत्मनोंऽताय नाशाय ॥ २९ ॥ अज्ञानं प्रपंचयति । भूतैरारब्धे देहे असदाग्रहोऽहंममेति मतिं करोति ॥ ३० ॥ तदर्थं देहार्थम् । यद्येन कर्मणा बद्धः यो देहः अनुयाति पुनःपुनरायात्यनुवर्तत इति वा । कुत अविद्याकर्मभ्यां बद्ध्यत इति तथा ॥ ३१ ॥ यद्यसद्भिरास्थितोऽधिष्ठितः संस्तेषां पथि रमते पथि सन्मार्गे आस्थितोऽपि यद्यसद्भिः सह रमत इति वा तर्हि विवक्षितो भवेत्तर्हि पूर्वार्द्धेपि कृतमतिमित्येव द्वितीयांतान्येव पदानि प्रयुज्येरन्निति तत्त्वम् ॥ २२ ॥ तेन सूतिमारुतेन अवाक् अध आतुर इक्षुपीडनयंत्रनिक्षिप्तवत्पीडितः हता नष्टा स्मृतिः 'मृतश्चाहं पुनर्जातः' इत्यादिपूर्वपूर्वजन्मानुसंधानलक्षणा यस्य स तथा । तथा च पादप्राथम्येन जन्म तु कस्यचिदेव स्याच्छिरःप्राथम्येनैव जन्म प्रायो भवतीत्यप्युक्तं स्यात् ॥ २३ ॥ विण्मूत्रे विष्ठाभूः कृमिरिव ज्ञानेऽनेकजन्मगतसुखदुःखादिविषये पूर्वपूर्वमहादुःखे विस्मृते सति सांप्रतिकक्षुद्रदुःखेनैव दुःखी भवतीति भावः । विपरीतामज्ञत्वलक्षणां भक्तजीवस्यापि वस्तुस्वाभाव्यादाबाल्यं प्रायो ज्ञानमावृतं तिष्ठति ततः किंचिन्मात्रं सत्संगोद्बुद्धपूर्वसंस्कारस्य भक्त्या भगवत्प्राप्तिरिति ज्ञेयम् ॥ २४ ॥ स बालतां गतः ॥ २९ ॥ अशुचिपर्यंके मलमूत्रलिप्तत्वादशुद्धे । दोलायमाने दारुविरचिततल्पविशेषे । जंतवश्च ये स्वेदजा यूकादयस्तैर्दूषिते शयनानर्हतां प्रापिते कचिज्जन्तुरिति पृथक्पदं तच्च शिशुपरम् ॥ २६ ॥ दंशाः सूचीमुखाः । मशकाः सूक्ष्ममक्षिकाः । मत्कुणाः शय्याजाता रक्तवर्णाश्चलद्रक्तपाः स्वेदजविशेषाः । आदिना लिक्षादिग्रहः । कृमिकं मणिकीटम् ॥ २७ ॥ पौगंडं दशमावधीति यद्यप्युक्तं तथाप्यत्र पठनादेस्ततः परत्रापि दर्शनाद्यौवनादर्वागिति व्याख्यातं स्वामिचरणैः । तत्र च पौगंडादौ ॥ २८ ॥ २९ ॥ अबुधोऽज्ञः देहस्य स्वतोऽन्यत्वं स्पष्टमपि तदपि तत्रैवाहं ममेति बुद्धिं करोति । यतोऽसद्ग्रहः असद्वस्त्वेव गृह्णाति न तु सदिति ॥ ३० ॥ क्लेशं नरकादिदुःखं ददत् तं पापकर्मणापि पुष्णातीति मौढ्यम् ॥ ३१ ॥ तेषामिति पदाध्याहारेणान्वये गौरवमालक्ष्याह—यद्यसद्भिरिति । यदि सद्भिः कृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा ॥ शमो दमो भगश्चेति यत्संगाद्याति संक्षयम् ॥ ३३ ॥ तेष्वऽशांतेषु मूढेषु खंडितात्मस्वसाधुषु ॥ संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ॥ ३४ ॥ न तथाऽस्य भवेन्मोहो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ ॥ ३५ ॥ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः ॥ रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ॥ ३६ ॥ तत्सृष्टसृष्टसृष्टेषु कोन्वखंडितधीः पुमान् ॥ ऋषिं नारायणमृते योषिन्मय्येह मायया ॥ ३७ ॥

यातनादेह आवृत्येत्यादिपूर्वोक्तप्रकारेण तमो नरकं प्रविशति ॥ ३२ ॥ ॥ असत्संगं निंदति । सत्यमिति त्रिभिः । बुद्धिः परमपुरुषार्थविषया श्रीर्धनधान्यलक्षणा ह्रीर्लज्जा यशः कीर्तिः क्षमा सहिष्णुत्वं शमो बाह्येंद्रियनिग्रहः दमो मनोनिग्रहः भग उन्नतिः यत्संगाद्येषामसतां संगात् ॥ ३३ ॥ खंडितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ॥ ३४ ॥ यथा च योषित्संगिनां संगतो बंधस्तथाऽन्यप्रसंगतो न भवेत् ॥ ३५ ॥ योषित्संगस्यानर्थहेतुतां प्रपंचयति । प्रजापतिरिति सप्तभिः । रोहिद्भूतां मृगीरूपां सतीमृक्षरूपी मृगाकारः सन् हतत्रपो निर्लज्जः ॥ ३६ ॥ तेन ब्रह्मणा सृष्टा मरीच्यादयस्तैः सृष्टाः कश्यपादयस्तैरपि सृष्टा देवमनुष्यादयस्तेषु को नु

सेवाकृतोद्यमैरास्थितो रमते तदा जंतुः कृष्णं प्राप्नोतीत्यर्थाल्लभ्यते । पूर्ववत्पूर्वोक्तभक्तजीववदिति भावः ॥ ३२ ॥ सत्यं यथार्थोक्तिः । शौचं पावित्र्यम् । दया परदुःखासहनम् । बुद्धिः पुरुषार्थविषया । श्रीर्भक्तिसंपल्लक्षणा । ह्रीरकार्यलज्जा । क्षमा परापराधसहिष्णुता । शमो बाह्येंद्रियनिग्रहः । दमोंतरिंद्रियनिग्रहः । भगो देशाधिपत्याद्यैश्वर्यम् । येषामसतां संगात् ॥ ३३ ॥ ३४ ॥ तत्संगिसंगत इति । यथाग्न्याविष्टलोहो दहति तथाग्निरपि न दहतीति भावः । अन्येषां प्राकृतानां प्रसंगतः ॥ ३५ ॥ न च विवेकिनां महापुरुषाणां धियो भ्रंशयितुं योषिन्न शक्नोतीति वाच्यमित्याह–प्रजापतिरिति । सा लज्जिता रूपांतरं दधौ सोपि निर्लज्जः संस्तादृशमेव रूपं दधौ।इहापि दुहितृपदार्थौ द्वादशाध्यायोक्त एवानुसंधेयः। अत्र "प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्तस्य यद्रेतसः प्रथममुददीप्यत तदसावादित्योभवत्" इति श्रुतिरस्ति । अस्या व्याख्यानमाधुनिकं चेत्थम्–प्रजापतिः सवितेति 'शतपथ'दशमकांडद्वितीयाध्याये–तत्र "पिता दुहितुगर्भं दधाति पर्जन्यः पृथिव्याः" । 'निरुक्त'चतुर्थाध्याये–"द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे माता पृथिवी महीयम् । उत्तानयोश्चम्वोर्योनिरंतरत्रापिता दुहितुर्गर्भमाधात् ॥ शासद्वह्निदुहितुर्नप्त्यंकाद्विदां ऋतस्य दीधितिं सपर्यन् पिता यत्र दुहितुः सेकमृजन्संशग्म्ये नमसा दधन्वे" इति ऋग्मंत्रद्वयमिदम् । "योनिर्भग आदित्यः" इति निरुक्तात् । परं त्विदं व्याख्यानं विगीतमिव प्रतीयते शिष्टास्वीकृतत्वात् । इह सूर्यप्रजापतेः प्रकाशः प्रातःकालश्च पुत्रीद्वयमुक्तमिति तन्न शिष्टसंमतम् । वस्तुतस्तु सृष्ट्यारंभे पशुवद्व्यवहर्त्तव्यमन्यथा सृष्ट्यनुपपत्तेरिति ॥ ३६ ॥ नारायणमृते वर्त्तमानेषु नारायणमनुपासीनेष्वित्यर्थः । वर्त्तमानेष्विति शेषः । तेषु मध्ये नारायणं विनेति न व्याख्येयं नारायणस्य विधिसृज्यत्वापत्ते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलं मे पश्यमायायाः स्त्रीमय्या जयिनो दिशाम् ॥ या करोति पदाक्रांतान् भ्रूविजृंभेण केवलम् ॥ ३८ ॥ संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ॥ मत्सेवया प्रतिलब्धात्मलाभो वदंति या निरयद्वारमस्य ॥ ३९ ॥ योपयाति शनैर्माया योषिद्देवविनिर्मिता ॥ तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतम् ॥ ४० ॥ या मन्यते पतिं मोहान्मन्मायामृषभायतीम् ॥ स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदम् ॥ ४१ ॥ तामात्मनो विजानीयात् पत्यपत्यगृहात्मकम् ॥ दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ॥ ४२ ॥ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् ॥ भुंजान एव कर्माणि करोत्यविरतं पुमान् ॥ ४३ ॥

पुमानखंडितधीरनाकृष्टमनाः ॥ ३७ ॥ दिशां जयिनः शूरानपि ॥ ३८ ॥ प्रतिलब्ध आत्मरूपो लाभो येन यस्य मुमुक्षोर्याः प्रमदा निरयद्वारं वदंति योगिनः ॥ ३९ ॥ शनैः शुश्रूषादिमिषेणोपयाति या योषिद्रूपा माया तां मृत्युं प्रतिकूलामीक्षेत ॥ ४० ॥ मुमुक्षुं स्त्रियं प्रत्येतदेवाह । या मन्यते इति द्वाभ्याम् । ऋषभायतीं पुरुषवदाचरंती या मम माया वित्तादिप्रदं पतिं मन्यते तदा तां पुरुषरूपां मायां मृत्युं विद्यादित्युत्तरेणान्वयः । यतः पूर्वजन्मनि स्वयं पुमान्स्त्रीसंगतोऽतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ॥ ४१ ॥ तां पत्यादिरूपं मृत्युं विजानीयात् मृगयोर्लुब्धकस्य गायनमनुकूलत्वेन प्रतीयमानमपि यथा मृगस्य मृत्युः ॥ ४२ ॥ तदेवं जीवस्य संसृतिः

'सत्त्वेन नः सुरगणान्' इति ब्रह्माद्युक्तनारायणस्तुतौ ब्रह्मादीनामेव तत्सृज्यत्वोक्तेश्च । इह जगति ॥ ३७ ॥ शूरानपि सर्वा दिशो विजित्य स्वांतःपुरमागतांश्चक्रवर्त्तिनोऽपि या मां त्यक्त्वाऽन्यदेशीयाः स्त्रीः संभोक्तुं दिग्विजयं करोषि धिक् त्वामिति व्यंजकेन कोपकुटिलीकृतेन भ्रूविजृंभेण मानिनी स्त्रीजातिस्तान्प्रगमतः पदाक्रांतान्पदप्रहारपरिभूतान् करोतीति केवलं निर्णीतं नात्र युक्तिरन्वेष्टव्येतिभावः । 'निर्णीते केवलम्' इत्यमरः । अत एवोक्तं भर्तृहरिणापि-''नूनं हि ते कविवरा विपरीतबोधा ये नित्यमाहुरबला इति कामिनीस्ताः । याभिर्विलोलतरतारकदृष्टिपातैरिंद्रादयोपि विजिता अबलाः कथं ताः'' इति ॥३८॥ परं पारं मोक्षमारुरुक्षुर्ज्ञानी ''आत्मरूपोऽहमात्मा गुडाकेश'' इत्युक्तेर्भगवानेव लाभो येन तथा च भक्त इत्यायातं तेन 'न शयानः पतत्यधः' इति न्यायेन सकर्मा स्त्रीसंगकृदपि न दुष्यतीति भावः । 'द्वारं किमेकं नरकस्य नारी' इति शुकप्रश्नोत्तररत्नमालोक्तेरेकं मुख्यम् ॥ ३९ ॥ या च पुरुषं विरक्तं ज्ञात्वा स्वीयनिष्कामतां व्यंजयंती शुश्रूषादिमिषेणोपयाति साप्यनर्थकारिणीत्याह—येति अत्र तृणाच्छादितकूपस्य 'मयि जनः पतंतु' इति भावनाभावात्। कस्यचित्पार्श्वेऽप्यनागमनादप्यनर्थकारित्वात्सर्वत्रोदासीना वा, भक्तिज्ञानवैराग्यादिमती वा, उन्मादादपचेतना वा, निद्राणा वा, मृतापि वा, स्त्री सर्वथैव दूरे परित्याज्येति व्यंजितम् ॥ ४० ॥ यथा भक्तिज्ञानवतां पुंसां योषिदनर्थहेतुस्तथैव भक्तिज्ञानवतीनां योषितां पुमांश्चेत्याह—यामिति ॥ ४१ ॥ ४२ ॥ तत्र च संसृतौ च । तस्य जीवस्य । तत्र लोकांतरगमनादौ । शंकामाह—नन्विति । ननु जीवो येन देहेन कर्म कुरुते तं देहं त्यक्त्वा देहांतरे तत्फलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीवो ह्यस्यानुगो देहो भूतेंद्रियमनोमयः ॥ तन्निरोधोऽस्तु मरणमाविर्भावस्तु संभवः ॥ ४४ ॥ द्रव्योपलब्धिस्थानस्य द्रव्येक्षाऽयोग्यता यदा ॥ तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनम् ॥ ४५ ॥ यथाऽक्ष्णोर्द्रव्यावयवदर्शनायोग्यता यदा ॥ तदैव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यताऽनयोः ॥ ४६ ॥ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः ॥ बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह ॥ ४७ ॥

प्रपंचिता तत्र च तस्य कर्मवशेन लोकाल्लोकांतरगमनं जन्ममरणं चोक्तम् । तत्रैवं शंक्यते । ननु व्यापकस्य कथं लोकाल्लोकांतरगमनम् । नित्यस्य च कथं जन्ममरणे भोगेन कर्मक्षये च सति जन्म मरणं च नेष्यते । तत्कुतः पुनरपि तस्य कर्मसंभव इति तत्र लोकांतरगमनं कर्म च संभवतीत्याह । देहेनेति । जीवस्योपाधितया भूतेन जातेन लिंगदेहेन लोकांतरमनुव्रजन् अविरतं कर्माणि करोतीति कर्मणामसमाप्तिरुक्ता ॥ ४३ ॥ जन्ममरणसंभवमाह । जीवो जीवोपाधिर्लिंगदेहोऽस्यात्मनोऽनुगोऽनुवर्ती भूतेंद्रियमनोमयः स्थूलभूतादिविकारो देहो भोगायतनं तयोर्निरोधः कार्यायोग्यता तदस्य जीवस्य मरणमुच्यते । आविर्भावस्तु संभवो जन्मोच्यते ॥ ४४ ॥ एतदेव दृष्टांतेन स्पष्टयति । द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्येक्षायां रूपादिदर्शने काचकामलादिदोषेण यदाऽयोग्यता भवति तदैव चक्षुष इंद्रियस्याप्ययोग्यता अनयोः स्थानचक्षुषोर्यदाऽयोग्यता तदैव द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता एवं स्थूलदेहवैकल्ये लिंगस्य वैकल्यं तदेव जीवस्य मरणं न स्वत इत्यर्थः । क्वचिदेकः श्लोकोऽधिकः पठ्यते । तत्रायमर्थः द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायां यदाऽयोग्यता तत्पंचत्वं मरणम् । अहंमानादिदमेवाहमित्यभिमानेन द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः अक्ष्णोर्गोलकयोर्द्रव्यावयवस्य रूपादेर्दर्शनेऽयोग्यता शेषं समानम् ॥ ४५ ॥ ४६ ॥ यस्मान्न वस्तुतो जीवस्य जन्ममरणादिस्तस्मान्मरणात्संत्रासो न

स्वर्गादि भुंक्ते इति को न्यायस्तत्राह–येनैव कुरुते तेनैव भुंक्ते देहेन लिंगदेहेनोपाधिगमनेनोपाधिस्थजीवस्यापि गमनं संभवति यथा व्यापकस्याप्याकाशस्य घटोपाधिगमनादिना गमनादि तथात्राप्यनुसंधेयमिति । तत्र भुंजान एव भोगमसमाप्नुवन्नेव पुनर्मर्त्यलोकमागत्य कर्माणि कुरुतेऽतः स्थूलदेहस्य पुत्रादिदेहवद्द्वारमात्रत्वाल्लिंगदेहेनैव कर्म कुरुते तेनैव च भुंक्ते वक्ष्यति च प्राचीनबर्ह्युपाख्याने "येनैव कुरुते कर्म तेनैवामुत्र तत्पुमान्। भुंक्ते ह्यव्यवधानेन" इति ॥ ४३ ॥ तयोर्लिंगस्थूलयोः । तत्र मरणं स्थूलदेहविगमे स्थूलांतरप्राप्तिप्राग्भवे सुषुप्त्यादौ कार्याक्षमत्वेपि कार्यप्रतियोग्यतास्त्येव सुषुप्त्यादिभंगे सद्य एव तद्योग्यतादर्शनात् । जन्म तु भोगायतनदेहविगमे स्थूलांतरप्राप्तौ गर्भान्निष्क्रमणकाले भवेदिति ॥ ४४ ॥ एतदेव मृतिजन्मैव । काचकामला नेत्ररोगविशेषः । आदिना तिमिरादिग्रहः । इत्यर्थ इति । जीवस्याजरामरत्वात् "न म्रियते म्रियमाणे शरीरे' इत्यादिश्रुतेरिति भावः ॥ ४५ ॥ ४६ ॥ ४७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया ॥ मायाविरचिते लोके चरेन्न्यस्य कलेवरम् ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेये पुण्यपापैर्जीवगतिवर्णनं नाम एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ कपिल उवाच ॥ अथ यो गृहमेधीयान् धर्मानेवावसन् गृहे ॥ काममर्थं च धर्मान् स्वान् दोग्धि भूयः पिपर्ति तान् ॥ १ ॥ स चापि भगवद्धर्मान् काममूढः पराङ्मुखः ॥ यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयाऽन्वितः ॥ २ ॥ तच्छ्रद्धयाऽऽक्रांतमतिः पितृदेवव्रतः पुमान् ॥ गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ ॥ यदा चाहींद्रशय्यायां शेतेऽनंतासनो हरिः ॥ तदा लोका लयं यांति त एते गृहमेधिनाम् ॥ ४ ॥ ये स्वधर्मान्न दुह्यंति धीराः कामार्थहेतवे ॥ निःसंगा न्यस्तकर्माणः प्रशांताः शुद्धचेतसः ॥ ५ ॥

कार्यो जीवने च न कार्पण्यं दैन्यं कार्यम् । संभ्रमश्च जीवनप्रयत्ने ॥ ४७ ॥ ननु सर्वथा मुक्तसंगत्वे कथं जीवितमत आह । सम्यक् पश्यति विचारयतीति सम्यग्दर्शना तया बुद्ध्या मायाविरचिते लोके कलेवरं न्यस्य निक्षिप्य तस्मिन्नासक्तिं त्यक्त्वा विचरेदित्यर्थः ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे टीकायां एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ द्वात्रिंशे सात्त्विकैर्धर्मैरूर्ध्वं गतिरुदीर्यते ॥ तत्र ज्ञानविहीनस्य ततश्च पुनरागतिः ॥ १ ॥ तदेवं पापकर्मणो गतिरुक्ता इदानीं काम्यकर्मणो गतिमाह । अथेति चतुर्भिः । यो गृह एवावसन्स्वान्धर्मान्दोग्धि दोह्यमाह-काममर्थं च तान्दुग्धान्धर्मान्भूयः पिपर्ति पूरयत्यनुतिष्ठति ॥ १ ॥ सोऽपि भगवदाराधनरूपाद्धर्मात्पराङ्मुखः सन्प्राकृतानपि देवान्पितॄंश्च यजते ॥ २ ॥ ततः किं तत्राह । तेषां श्रद्धयाऽऽक्रांता व्याप्ता मतिर्यस्य पित्रर्थं देवार्थं च व्रतं नियमो यस्य सोमपाः तत्र सोमं पीत्वेत्यर्थः ॥ ३ ॥ लोके तिष्ठत्यपि पुण्यक्षयात्पातमुक्त्वा लोकानामपि लयमाह । यदा चाहरहः प्रलये ॥ ४ ॥ भगवद्धर्मनिष्ठानां तत्प्राप्तिमेव गति

अत्राक्षिपति—नन्विति । इत्यर्थ इति । शरीरासक्तित्यागेन जीवन्मुक्तिलाभात्तत्पाते च विदेहमोक्षः स्यादिति ॥ ४८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे एकत्रिंशोध्यायः ॥ ॥ ३१ ॥ तत्रोर्द्धगतावपि । तत ऊर्द्धगतेः (१) अथ कात्स्न्येंव्ययम् । यः कात्स्न्येंन गृहमेधीयानाग्निहोत्रादीन् यथा गाश्चारयित्वा दुग्धानि दोग्धि पुनरपि दुग्धप्राप्त्याशया ताश्चारयतीत्येव मत्र बोध्यम् ॥ १ ॥ स च गृहमेधिधर्मानुष्ठाता । प्राकृतानपि क्षुद्रानपि ॥२॥ ततः देवाद्यर्चनात् । तत्र चंद्रलोके । इत्यर्थ इति । पुनरायातीति भावः । तथा चात्र श्रुतयः—"अथ ये यज्ञेन दानेन तपसा लोकान् जयंति ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति मासेभ्यः । पितृलोकं पितृलोकाच्चंद्रलोकं प्राप्यान्नं भवंति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयंति तेषां यदा तत्पर्यवैति अथेममाकाशमभिनिष्पद्यंते ॥ आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं प्राप्यान्नं भवति एवमेवानुपरिवर्तंते" इति । अर्थस्तु—धूममभिसंभवंति प्रथमं धूमाभिमानिनीं देवतां प्राप्नुवंति एवमुत्तरोत्तरं ज्ञेयम् । अपक्षीयमाणपक्षं कृष्णपक्षं यान्कर्कादिचापांतान्षण्मासान्दक्षिणादित्य एति तानित्यर्थः । अन्नं देवान्नं तत्रस्था देवा यथा चंद्रं चंद्रादमृतं पिबंति तथा तान्भक्षयंति तेषां पुण्यफलमन्नं भक्षयंतीत्यर्थः । तेषां यत्पुण्यं यदा पर्यवैति। तदा सोमलोकादिममाकाशं निष्पद्यंते प्राप्यंते पृथिव्यां मनुष्याद्यन्नं भवति ततो वीर्यरूपेण परिणतात्पुनर्जायंत इति शेषार्थः॥३॥त एते भूरादयस्त्रयः।"अंतास्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रतः"इत्युक्तेः॥४॥न दुहंति कर्मफलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवृत्तिधर्मनिरता निर्ममा निरहंकृताः ॥ स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ॥ ६ ॥ सूर्यद्वारेण ते यांति पुरुषं विश्वतोमुखम् ॥ परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनम् ॥ ७ ॥ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते ॥ तावदध्यासते लोकं परस्य परचिंतकाः ॥ ८ ॥ क्ष्मांऽभोऽनलाऽनिलवियन्मनइंद्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः ॥ अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयंभूः ॥ ९ ॥ एवं परेत्य भगवंतमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः ॥ तेनैव साकममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः ॥ १० ॥ अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम् ॥ श्रुतानुभावं शरणं व्रज भावेन भाविनि ॥ ११ ॥

माह त्रिभिः । ये तु कामार्थप्रयोजनाय स्वधर्मान्न दुह्यंति न दुहंति निःसंगा अनासक्ताः । न्यस्तानीश्वरे समर्पितानि कर्माणि यैः ॥ ५ ॥ ६ ॥ विश्वतोमुखं परिपूर्णं पुरुषं यांति । तथा च श्रुतिः । "सूर्यद्वारेण ते विरजाः प्रयांति यत्रामृतः पुरुषो ह्यव्ययात्मा" इति प्रकृतिमुपादानकारणम् । उत्पत्त्यंतभावनं निमित्तकारणम् ॥ ७ ॥ परमेश्वरदृष्ट्या हिरण्यगर्भोपासकानामपि क्रमेण तत्प्राप्तिमाह । द्विपरार्धावसान इति त्रिभिः । परस्य हिरण्यगर्भस्य परचिंतकाः परमेश्वरदृष्ट्या हिरण्यगर्भोपासकाः ॥ ८ ॥ क्ष्मादीनि पंचमहाभूतानि मनश्चेंद्रियाणि चार्थाश्च शब्दादयो भूतादिश्चाहंकार एवमादिभिः परिवृतं युक्तं ब्रह्मांडं प्रति संहर्तुमिच्छुः सन् अव्याकृतमीश्वरम् । पराख्यं द्विपरार्धलक्षणं कालम् ॥ ९ ॥ परेत्य दूरं गत्वा भगवंतं हिरण्यगर्भमनुप्रविष्टा ये योगिनोऽमृतं परमानंदरूपं प्रधानमुत्कृष्टं ब्रह्म तेनैव सहोपयांति न तु पूर्वम् । यतस्तदाऽगताभिमानाः ॥ तथा च स्मृतिः "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यांते कृतात्मानः प्रविशंति परं पदम्" इति ॥ १० ॥ भगवदुपासकास्तु साक्षादेव तं प्राप्नुवंति

स्वर्गादि नेच्छंति प्रकर्षेण शांता भगवन्निष्ठबुद्धयः ॥ ५ ॥ स्वस्य पुरुषस्य धर्मः शुद्धसत्त्वगुणस्तेन । यद्वा । सत्त्वेनात्मभावेन परमात्मभक्त्या परिशुद्धेनोभयत्रान्वेति ॥ ६ ॥ पुरुषप्राप्तौ प्रमाणमाह—तथा चेति । स्पष्टार्थत्वान्न व्याख्याता । उत्पत्त्यंतौ भावयतीत्युत्पत्त्यंतभावनस्तम् ॥७॥ ब्रह्मा परमेश्वरस्य गुणावतार एवेति परमेश्वरदृष्ट्या क्रमेण भक्तिमिश्रज्ञानेन तत्प्राप्तिं मुक्तिम् । ये तु केवलं हिरण्यगर्भोपासकास्तेषां ब्रह्मणो मुक्तावपि न मुक्तिरिति । लोकं सत्यलोकम् । "अधिशीङ्स्थासां कर्म" इत्याधारस्य कर्मत्वम् ॥ ८ ॥ ततश्च महाप्रलये सति ब्रह्मा मुच्यते इत्याह—क्ष्मेति । परिवृतं स्वदेहं वैराजं प्रति संजिहीर्षुस्त्यक्तुमिच्छुरव्याकृतं परमेश्वरं प्रकृत्यंतर्यामिणं विशति गुणत्रयात्मा रजोगुणोपाधिकोपि त्रिगुणोंशेन सत्त्वतमसी अपि बिभर्त्तीत्यर्थः । प्रकृत्या तादात्म्यं प्राप्त इति संदर्भः ॥९॥ तेनैव ब्रह्मणैव । प्रमाणमाह—तथा चेति । ते हिरण्यगर्भोपासकाः । प्रतिसंचरे प्रलये । परस्य ब्रह्मणोंते शरीरे कृतात्मानः प्रविष्टदेहा इत्यर्थः । न तु पूर्वं ब्रह्मणः प्राक् न तदा तेषां साभिमानत्वाद्ब्रह्मलोकं गतास्तु स्वयं प्रभातवेदविचारेण गताभिमानाः संतः परं प्राप्नुवंतीत्यर्थः । विश्वनाथः—एवं ब्रह्मणो मुक्तावपि तदुपासका भक्त्यभावान्न मुच्यंत इत्याह—एवमिति । परेत्य ब्रह्मलोके देहं त्यक्त्वा भगवंतं ब्रह्माणमनुप्रविष्टा ये योगिनस्ते तेन ब्रह्मणा साकं पुरुषं परमेशं प्रधानमुत्कृष्टं ब्रह्मोपयांति प्रविशंति अगताभिमाना वयं हिरण्यगर्भोपासका इत्यभिमानवतस्तेन परमेश्वरे तेषामात्यंतिको न लयः किं तु प्राकृतिक एवेति तेन पुनर्जगत्सर्गे तेषामपि सर्गो भवतीति भावः ॥ १० ॥ यतस्तत्र क्रमापेक्षा नास्ति अतो हेतोः तमेव भगवंतमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ॥ योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः ॥ १२ ॥ भेददृष्ट्याभिमानेन निःसंगेनापि कर्मणा ॥ कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभः ॥ १३ ॥ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना ॥ जाते गुणव्यतिकरे यथापूर्वं प्रजायते ॥ १४ ॥ ऐश्वर्यं पारमेष्ठ्यं च तेऽपि धर्मविनिर्मितम् ॥ निषेव्य पुनरायांति गुणव्यतिकरेसति ॥ १५ ॥ ये त्विहासक्तमनसः कर्मसु श्रद्धयाऽन्विताः ॥ कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः ॥१६॥ रजसा कुंठमनसः कामात्मानोऽजितेंद्रियाः ॥ पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशयाः॥१७॥

न क्रमेणातस्त्वं साक्षात्तमेव भजेत्याह । अथ तस्मात् । भावेन प्रेम्णा ॥ ११ ॥ एवं तावद्भगवद्भक्तानां निरंतरमेव तत्प्राप्तिर्भगवद्भेदेन हिरण्यगर्भोपासकानां तु क्रमेणेत्युक्तम् । भेदेनोपासने तु ब्रह्मादयोऽप्यावर्तंते किमुतान्य इत्याह । आद्य इति चतुर्भिः । यो वेदगर्भः सोऽपि गुणव्यतिकरे जाते यथापूर्वं ब्रह्मपदाधिकृतः सन्प्रजायते इति तृतीयेनान्वयः । न केवलं स एवैकः किं तु ऋषिभिर्मरीच्यादिभिर्योगेश्वरादिभिश्च सह ॥ १२ ॥ जन्मनि हेतुद्वयम् । भेददृष्ट्याऽभिमानेन कर्तृत्वादिति च । यथापूर्वत्वे हेतुः । निःसंगेन निष्कामेन कर्मणेति ॥ १३ ॥ किं कृत्वाऽत्र प्रजायते प्रथमं पारमेष्ठ्यमैश्वर्यं निषेव्य पश्चात्प्रलये सगुणं गुणाधिष्ठातारं प्रथमावताररूपं पुरुषं संसृत्य प्राप्य तेऽपि ऋषिप्रमुखाः स्वकर्मनिर्मितमैश्वर्यं निषेव्य पुरुषं च संसृत्य यथापूर्वं स्वस्वाधिकारेण पुनरायांतीत्यन्वयः ॥ १४ ॥ १५ ॥ यदा ब्रह्मोपासकानामपि भेददर्शनाभिमानाभ्यामेवमावृत्तिस्तदा काम्यकर्मिणां किं वक्तव्यमिति तान्निंदन्नाह षड्भिः । ये त्विह कर्मस्वासक्तमनसः संतोऽप्रतिषिद्धानि काम्यानि नित्यानि च कर्माणि

भावेन 'येषामहं प्रिय आत्मा सुतश्च' इत्युक्तरीत्या प्रियत्वाद्यभिमानैकतमेन तत्रापि प्राप्ततया सुतभावेनेत्याह—भाविनीति संदर्भः ॥ ११ ॥ विश्वनाथः—ननु ब्रह्मा मुक्तो भवेदथ च स्वभक्तान्मोचयितुं नेष्ट इति कथं प्रतीमस्तत्र "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति भगवत्प्रतिज्ञाश्रुतेर्भक्तिं विना ब्रह्मापि संसरति के पुनरन्ये वराका इत्याह । आद्यः स्रष्टृत्वात्कारणरूपोपि सर्ववेदविदपि ऋषिभिर्मरीच्यादिभिरपि सह योगिभिः साधकैः सहेति किं वक्तव्यं योगेश्वरैः सिद्धेश्वरैरपि सह भेददृष्ट्या यथा रुद्रः संहरति विष्णुः पालयति तथाहमपि ब्रह्मा सृजामीति भगवतः सकाशाद्भेददृष्ट्या योऽभिमानस्तेन यत्कर्तृत्वं तस्मात्सगुणं कल्याणगुणमयं ब्रह्म महत्स्रष्टारं काले महाप्रलयकाले प्रविश्य पुनः कालेन गुणव्यतिकरे महत्तत्त्वादौ जाते सति यथापूर्वं प्रजायते ब्रह्मा भवतीत्यर्थः । तेपि तत्संगिनो महर्ष्यादयोपि कर्मज्ञानयोगादिविनिर्मिताणिमाद्यैश्वर्यादिकं पूर्वमहाकल्प एव निषेव्य पुनर्महाकल्पांतरे आयांत्यावर्त्तंते । ननु योगेश्वराणां सनत्कुमारादीनाञ्च सिद्धानामन्येषाञ्च योगप्रवर्त्तकत्वेन सर्वज्ञानिगुरूणां च कथं भेददृष्टिरभिमानो वा संभवेत्ताभ्यां स्थिताभ्याञ्च कथं योगेश्वरादित्वमुच्यते तेषां निरभिमानानां निर्भेदब्रह्मानुसंधानमस्त्येव । किं तु भेदव्युदासेन मायाशबलितब्रह्मत्वबुद्ध्या मायिकवस्त्वंतरवद्भेददृष्टिस्तथा वयं ब्रह्मानुभविनः साकारं रूपं निषिध्याम इत्यभिमानश्च ताभ्यामेव दोषाभ्यां यत्कर्तृत्वं कर्माधिकारस्तस्मादावृत्तिरित्येतच्च काचित्कब्रह्मांडवर्त्तिब्रह्मब्राह्मणयोगिज्ञानिकुमारादीनामभक्तत्वादुक्तं तदन्यसर्वब्रह्मांडवर्त्तिनां ब्रह्मादीनाम् । तेषां तु भक्तिमत्त्वान्मुक्तिप्रेमभक्तिभगवद्दास्यादिभावप्राप्तयो यथायथं भक्तितारतम्याज्ज्ञेयाः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ अर्यम्णः सूर्यस्य "सूरसूर्यार्यमादित्य–"इत्यमरात् ॥ १६ ॥ ननु "श्राद्धकृत्सत्यवादी च गृहस्थोपि विमुच्यते" इति याज्ञवल्क्यादिभिः पितृयजनस्यापि मुक्तिहेतुत्वकथनात्कथमत्र त्रैवर्गिकेषु पितृयाजिनो गणनेति चेत्सत्यं तच्च हर्यर्पितान्नादिना पितृयजनपरं तदनर्पितान्नादिना पितृयाजिनस्तु निंद्या एव त्रैवर्गिकत्वमपि तेषामशोभनमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः ॥ कथायां कथनीयोरुविक्रमस्य मधुद्विषः ॥ १८ ॥ नूनं दैवेन विहता ये चाच्युतकथासुधाम् ॥ हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः ॥१९॥ दक्षिणेन पथाऽर्यम्णः पितृलोकं व्रजंति ते ॥ प्रजामनु प्रजायंते श्मशानांतक्रियाकृतः ॥ ॥ २० ॥ ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति ॥ पतंति विवशा दैवैः सद्यो विभ्रंशितोदयाः ॥ २१ ॥ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनम् ॥ तद्गुणाश्रयया भक्त्या भजनीयपदांबुजम् ॥ २२ ॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यद् ब्रह्मदर्शनम् ॥ २३ ॥ यदाऽस्य चित्तमर्थेषु समेष्विंद्रियवृत्तिभिः ॥ न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत ॥ २४ ॥

कृत्स्नानि कुर्वंति तेऽर्यम्णो दक्षिणेन पथा धूममार्गेण पितृलोकं व्रजंतीति पंचमेनान्वयः । मध्ये तन्निंदा ॥ १६ ॥ १७ ॥ हरति संसारं मेधा यस्य कथनीया उरवो विक्रमा यस्य तस्य मधुद्विषः कथायां विमुखाः संतो ये त्रैवर्गिकाः ये चाच्युतस्य कथासुधां हित्वाऽसतां गाथाः शृण्वंति ते नूनं दैवेन विहता इत्यन्वयः ॥ १८ ॥ ॥१९॥ पितृलोकात्पुनः प्रजामनु स्वपुत्रादिषु प्रजायंते गर्भाधानादारभ्य श्मशानांताः क्रियाः कृतवंतः यथोक्तकारिण इत्यर्थः ॥ २० ॥ कथं प्रजायंते तदाह । ततस्ते पुनरिमं लोकं प्रति पतंति । विभ्रंशित उदयो भोगसाधनं येषाम् ॥ २१ ॥ परमेष्ठिनं परमेश्वरम् । सर्वभावेनातिप्रीत्या तस्य गुणानाश्रयते या भक्तिस्तया ॥ २२ ॥ भजने च ज्ञानवैराग्ये स्वत एव भवत इत्याह वासुदेव इति ॥ २३ ॥ तदेवोपपादयति । यदाऽस्य भक्तस्य चित्तं भगवद्गुणानुरागेण तस्मिन्नेव निश्चलं सदिं

तथा च श्रुतिः । "विष्णुनाशितमश्नंति पितरो देवताश्च" इति । किञ्च । "विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरम् । पितृभ्यश्चापि तद्देयं तदानंत्याय कल्पते" इति पुराणाच्च । विपक्षे "पितृशेषं तु योदद्याद्धरये परमात्मने । रेतोदाः पितरस्तस्य भवंति क्लेशभागिनः ॥" इति पुराणांतरे दोषश्रवणाच्च इत्यभिप्रेत्यैवोक्तं "विमुक्तिदा येनभिसंधितेषु" इति मार्कंडेये । रुचिनाऽनभिसंधितेष्वंतःकरणशुद्धिद्वारा ज्ञानोपयोगित्वात्पितृपूजनतत्परेषु पितरो मोक्षदा अन्यथा कामदा इत्यर्थः ॥ १७ ॥ विक्रमाः पुरुषार्था गोवर्द्धनोद्धरणादिलक्षणाः ॥ १८ ॥ संसारदोषहारिण्यामपि हरिकथायामपि दोषापादनं खलानां निसर्ग एव तदुक्तं "खलो मृगयते दोषं गुणपूर्णेषु वस्तुषु । वने पुष्पकलाकीर्णे पुरीषमिव विड्भुजः" इति शिष्टोक्तेः ॥१९॥ इत्यर्थ इति । एतावता प्रवृत्तिमार्गः पुनरावृत्तिहेतुरित्यापादितमिति भावः ॥ २० ॥ भोगसाधनं पुण्यं "क्षीणे पुण्ये मर्त्यलोकं विशंति" इति गीतोक्तेः ॥ २१ ॥ निवृत्तकर्मपराणामंते "अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयम् । शरणं व्रज" इत्युक्तं तथा प्रवृत्तकर्मपराणामप्यंत आह-तस्मात्त्वमिति । तेन त्वं प्रवृत्तं निवृत्तं च कर्म मा कुर्वित्याह-तस्मादिति । यतो भक्तिरेव मुख्या तस्मादित्यर्थः । सर्वभावेन सर्वात्मना । ननु सा कथं स्यात्तत्राह-तद्गुण एवाश्रयः प्रवृत्तिहेतुर्यस्याः । 'अहो बकीयम्' इत्यादिरीत्या तदनुसंधाने कृते सा प्रवर्त्तत एवेति भावः । भजनीयपदांबुजमिति । तदा तस्य सौंदर्यादिकमभ्युल्लसितं तद्भजनं निरंतरमेव रोचयति । अंबुजं खलु कस्मै मधुपाय न रोचत इति भावः । तदेवं तत्र पुरुषार्थांतरमपि निरस्तम् ॥ २२ ॥ ज्ञानादीच्छुरपि भक्तिमेव कुर्यादित्याह-भजने चेति । ब्रह्म दर्शयतीति ब्रह्मदर्शनं ब्रह्मानुभवरूपम् ॥ २३ ॥ तदेव ज्ञानवैराग्ययोर्भक्तिजन्यत्वमेव । अर्थेषु समेषु प्राकृतेषु दृश्यश्रव्यस्पृश्यादिवस्तुषु इंद्रियग्राह्यत्वांशेन । वस्तुतस्त्वन्येष्वपीदं मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तदैवाऽऽत्मनात्मानं निःसंगं समदर्शनम् ॥ हेयोपादेयरहितमारूढं पदमीक्षते ॥२५॥ ज्ञानमात्रं परब्रह्म परमात्मेश्वरः पुमान् ॥ दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥ २६ ॥ एतावानेव योगेन समग्रेणेह योगिनः ॥ युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः ॥ २७ ॥

द्रियवृत्तिभिर्वैषम्यमर्थेषु न विगृह्णाति ॥ २४ ॥ तदैवात्मनात्मानं स्वप्रकाशमीक्षते । कथंभूतम् । समं च तद्दर्शनं च तत्कुतः निःसंगम् । संगाद्धि वैषम्यं भवति निःसंगत्वे हेतुः । हेयोपादेयरहितम् । तत्कुतः पदं व्यवसितमारूढं परमानंदोऽहमिति निश्चयं प्राप्तमित्यर्थः ॥ २५ ॥ समेष्वर्थेष्वित्युक्तं तदेव साम्यं दर्शयति । ज्ञानमात्रमेव परब्रह्मादिशब्दैः प्रसिद्धम् । दृश्यादिभिर्दृश्यद्रष्टृकरणरूपेण पृथक् प्रतीयते । ज्ञानमात्रत्वेन समेष्वित्यर्थः ॥ २६ ॥ ननु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति

प्रियं श्रव्यादीदमप्रियमित्येवं वैषम्यं न गृह्णाति निंदास्तुत्यादिषु लोष्टकांचनादिषु च समभावनं स्यादित्यर्थः ॥ २४ ॥ स समदर्शी । तदैव वैषम्यनिवृत्तौ सत्यामेव । समदर्शनमविषमज्ञानरूपमित्यर्थः । समदर्शने हेतुमाशंकते कुत इति । तद्धेयोपादेयरहितत्वं कुत इति । "पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु" इत्यमरः । इत्यर्थ इति । स्वस्वरूपमनुभवन्परमानंदरूपोहमस्मीतीक्षते जानातीति भावः ॥ २५ ॥ इत्यर्थ इति । ज्ञानगम्यत्वेन समेष्वर्थेषु । यद्वा । ज्ञानरूपत्वेन वा समेषु "बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् । रूपं चक्षुश्च दीपश्च ज्योतिषो न पृथग्भवेत् ॥" इत्याद्युक्तेरिति भावः । विश्वनाथः— एवञ्च भक्तियोगाध्यायोक्तं 'पश्यंति ते मे रुचिराण्यंब' इति भक्तिफलं भगवद्धाम्नि प्रेमवत्पार्षदत्वं तथा ज्ञानयोगाध्यायोक्तं "निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम्" इत्यादिना ज्ञानफलं ब्रह्मैक्यं तथाष्टांगयोगाध्यायोक्तं 'मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति' इत्यादिभिर्योगफलमपि ज्ञानवैराग्याभ्यां मोक्षमेव सांप्रतं तु 'तस्मात्त्वम्' इत्यादिना 'वासुदेव' इत्यादिना च तत्तत्सर्वं भक्तिज्ञानयोगफलं केवलयैव भक्त्या सिध्यतीत्युच्यते । "अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥" इति । उक्तं च 'यत्कर्मभिर्यत्तपसा' इत्यादौ । "सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा । स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥" इति वक्ष्यते च । तत्र का युक्तिरित्यपेक्षायामाह—ज्ञानमात्रमिति । एको भगवान्षडैश्वर्यपूर्णो वैकुंठनाथ एव दृश्यादिभिः दर्शिज्ञानं तदादिभिः साधनैः । पृथग्भावैः पृथग्भावनावद्भिरुपासकैः परब्रह्मादिरूप ईयते ईर्यते, इति च पाठः । यद्वा । दृश्यैःस्वरूपैरदृश्यैः स्वरूपैर्दृश्यादृश्यैश्च स्वरूपैः । तत्र परब्रह्मणो लक्षणं ज्ञानमात्रमिति परमात्मनो लक्षणमीश्वरः पुमानिति । तेन भगवत एव ब्रह्मत्वात्परमात्मत्वाच्च भगवत्साधनभूतया भक्त्यैव स्वसाध्यं प्रेमवत्पार्षदत्वं ज्ञानयोगसाध्यं सायुज्यं च सिद्ध्यति न च तथा ब्रह्मसाधनेन ज्ञानेन परमात्मसाधनेन योगेन वा प्रेमवत्पार्षदत्वं सिद्ध्यति प्रमाणाभावादेवेति । अत्र ब्रह्मणो निराकारत्वाददृश्यं स्वरूपं परमात्मनोपि निराकारत्वाददृश्यं "केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् । चतुर्भुजम्" इत्यादिना 'सहस्रशीर्षा पुरुषः' इत्यादिश्रुत्या केषांचिन्मते साकारत्वाद्दृश्यं भगवतश्च ब्रह्मत्वात्परमात्मत्वाच्चादृश्यं भगवदवतारकाले दृश्यमन्यदा दृश्यादृश्यञ्च । यदुक्तं विष्णुपुराणे प्रथमेंशे "प्राकृतब्रह्मरूपस्य विष्णोः स्थानमनुत्तमम् । तत्राव्यक्तस्वरूपोऽसौ व्यक्तरूपो जगत्पतिः ॥ विष्णुर्ब्रह्मस्वरूपेण स्वयमेव व्यवस्थितः ॥" इति । अस्यार्थः— अनुत्तमं निकृष्टं तत्र प्राकृतेऽव्यक्तस्वरूपस्तेनाप्राकृते उत्तमस्थाने व्यक्तरूप इति ॥ २६ ॥ अत्राक्षिपति—नन्विति । यद्वा । यद्योर्थः कृत्स्नशः साकल्येन सर्वत्रासंगोऽनासक्तिस्तद्रूप इति । इत्यर्थ इति । संगस्य योगभ्रंशकत्वादिति भावः । विश्वनाथः—त्रयाणामेवोपासकानां कमपि साधारणं धर्मफलसाधनमाह—एतावानिति । योगेन भक्त्युत्थेन ज्ञानोत्थेन योगोत्थेन च । योगिनो भक्तस्य ज्ञानिनोऽष्टांगयोगिनश्च । यत्कृत्स्नशोऽसंग इंद्रियार्थेष्वनासक्तिरेतावानेवाभिमतार्थसाधकत्वादभिमतोर्थः प्रयुज्यते युक्त उचितो भवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणम् ॥ अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा ॥ २८ ॥ यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट् ॥ एकादशविधस्तस्य वपुरंडं जगद्यतः ॥ २९ ॥ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः ॥ समाहितात्मा निःसंगो विरक्त्या परिपश्यति ॥ ॥ ३० ॥ इत्येतत् कथितं गुर्वि ज्ञानं तद् ब्रह्मदर्शनम् ॥ येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ॥ ३१ ॥ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः । द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥ ३२ ॥

किमनेकसाध्येन योगेन प्राप्यते तदाह । एतावानिति युज्यते प्राप्यते प्रपंचसंगव्युदास एव योगफलमित्यर्थः ॥ २७ ॥ ननु कथं प्रत्यक्षादिप्रतीतिः प्रपंचो व्युदसितुं शक्यते प्रतीतेर्भ्रांतित्वादित्याह । ज्ञानमिति । पराचीनैः पराङ्मुखैः शब्दादिर्धर्मो यस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभाति न त्वर्थः पृथगस्तीत्यर्थः ॥ २८ ॥ अर्थरूपत्वमेवोदाहृत्य दर्शयति यथेति । महान् महत्तत्त्वम् । अहंरूपोऽहंकारः स च त्रिवृत् त्रिगुणात्मकः पुनश्च भूतरूपेण पंचविधः इंद्रियरूपेणैकादशविधश्च स्वराड् जीवरूपः तस्य जीवस्य वपुरंडं जगच्च यतो येभ्यो महदादिभ्यः तथाऽवभाति ॥ २९ ॥ ननु तर्हि जनः किमित्येवं न प्रत्येति तत्राह । एतद्ब्रह्म ॥ ३० ॥ उक्तमेवार्थं सुखप्रतिपत्त्यर्थं संक्षेपेणानुवदति इतीति । हे गुर्वि पूज्ये ॥ ३१ ॥ अनेन च ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह । नैर्गुण्यो ज्ञानयोगश्च मन्निष्ठो भक्ति

त्यर्थः । कृत्स्नशोऽनासक्त्यैव स्वाभिमतं वस्तु प्रेमा मोक्षो वा लभ्यत इत्यर्थः ॥ २७ ॥ पुनराक्षिपति—नन्विति । अर्थरूपेणाकाशादिरूपेण । इत्यर्थ इति । "सर्वं खल्विदं ब्रह्म"इति श्रुतेरिति भावः । विश्वनाथः—ननु भक्तिरस्मच्चिकीर्षिता श्रुत्यवगता च ज्ञानयोगावप्यस्मज्जिज्ञास्यौ श्रुत्यवगतौ च तत्र यदद्वैतज्ञानं तन्न सम्यगवगतमतः संक्षेपेण तद् ब्रूहीत्यतो विवर्त्तवादिनां संमतं ज्ञानमाह—ज्ञानमेकमद्वैतं ब्रह्म यत्तदेव पराचीनैः पराङ्मुखैर्मायाशक्त्युत्थैरिंद्रियैः श्रोत्रादिभिर्हेतुभिः । शब्दादिधर्मेणाऽर्थरूपेण शब्दवानयं मृदंगो रूपवतीयं स्त्री रसवदिदं क्षीरं स्वादितमित्यादिरूपेण जीवस्य भ्रांत्याऽवभाति । इंद्रियाणां सर्वेषामभावे ज्ञानभेदाभावाद्यदेकं ज्ञानं तदद्वैतं ब्रह्मैवेत्यर्थः । ननु तर्हि भ्रमप्रतीतवस्तुनो मिथ्यात्वमिव विश्वस्यास्य मिथ्यात्वं प्रसज्यते । मैवम् ॥ रजतमिदमिति प्रतीतौ शुक्तित्वेन प्रतीत्यभावात् । शुक्तौ ब्रह्मतत्त्वस्य मिथ्यात्वमेव चक्षुषा रूपमयं पश्यतीत्यत्र तु चक्षुःकरणकमेतत्कर्तृकं रूपविषयकं ज्ञानमिति ज्ञानमात्रस्य ब्रह्मणे विशेष्यत्वेनानुभवो भवत्येव केवलं कर्तृकरणकर्मादिविशेषणानि ज्ञानपदार्थभेदकानि मायया बहिरंगशक्त्या सृज्यंत इति न तेषां मिथ्यात्वं ज्ञेयं सृष्ट्या चाविद्यया स्ववृत्त्या जीवः साहजिकं ज्ञानं भ्रमयित्वा स्वसृष्टकर्तृत्त्वादिविशेषणवैशिष्ट्यादनन्तविधे ज्ञाने पातते, एषैव जीवस्यार्थरूपे नानाविधे ज्ञाने भ्रांत्या प्रवृत्तिर्यथा गोगर्दभादीनां शुद्धे गंगोदके वर्त्तमानेपि प्रणालिकादिविविधखातजलेष्वेव पिपासया प्रवृत्तिर्भ्रांत्यैव न त्वभ्रांतधियां मनुष्याणामिति । अत्र पराङ्मुखैरितींद्रियाणां विशेषणादपराङ्मुखैरबहिर्मुखैर्भगवदुन्मुखैरिंद्रियैश्च मधुरशब्दवतीयं भगवन्मुरली श्यामसुंदरो यं भगवद्देहः इत्यादिचिद्वस्तुनिष्ठो ज्ञानभेदो न व्यवच्छिद्यते तस्य ब्रह्मत्वादेवेत्याहुर्भागवताः ॥ २८ ॥ तथावभाति अर्थरूपः प्रतीयत इत्यर्थः ॥ २९ ॥ अत्रा शंकते-नन्विति । अत्राधिकारिणमाह-समाहितः संयत आत्मा चित्तं यस्य स तथेति ॥ ३० ॥ इतीत्थमेतदधुनैवोपदिष्टं मातृत्वात्तुभ्यमतिगोप्यमपि कथितं यत्तदेव ज्ञानं किंभूतं ब्रह्म दर्शयति साक्षात्कारयतीति तथा । येन ज्ञानेन तत्त्वं स्वरूपम् ॥३१॥ योगस्यायत्यां ज्ञानत्वादेतत्प्रकरणोक्ते ज्ञानं भक्तियोगश्चेति द्वे एव साधने स्तस्तत्साध्ययोर्ब्रह्मप्राप्तिभगवत्प्राप्त्योर्द्वित्वेप्युक्तन्यायेन भगवत एव ब्रह्मत्वाद्भगवत्प्राप्तिरित्येकमेव फलं स्यादित्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवाञ्छास्त्रवर्त्मभिः ॥ ३३ ॥ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायदर्शनैः ॥ आत्मेंद्रियजयेनापि संन्यासेन च कर्मणाम् ॥ ३४ ॥ योगेन विविधांगेन भक्तियोगेन चैव हि ॥ धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ॥ ३५ ॥ आत्मतत्त्वावबोधेन वैराग्येण दृढेन च ॥ ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ॥ ३६ ॥ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधम् ॥ कालस्य चाव्यक्तगतेर्योऽतर्धावति जंतुषु ॥ ३७ ॥

लक्षणश्च यो योगस्तयोर्द्वयोरप्येक एवार्थः प्रयोजनम् । कोऽसौ । भगवच्छब्दोपलक्षणं ज्ञापको यस्य तदुक्तं गीतासु । "ते प्राप्नुवंति मामेव सर्वभूतहिते रताः" इति ॥ ३२ ॥ ननु ज्ञानयोगस्यात्मलाभः फलं शास्त्रेणावगम्यते भक्तियोगस्य तु भजनीयेश्वरप्राप्तिः कुतस्तयोरेकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति । तथा बहूनां रूपरसादीनां गुणानामाश्रयो गुडक्षीरादिरेक एवार्थो मार्गभेदप्रवृत्तैरिंद्रियैर्नाना प्रतीयते चक्षुषा शुक्ल इति रसनेन मधुर इति स्पर्शनेन शीत इत्यादि तथा भगवानेक एव तत्तद्रूपेणावगम्यते ॥ ३३ ॥ शास्त्रमार्गानेव प्रपंचयति । क्रियेयेति त्रिभिः । क्रियया पूर्वरूपया क्रतुभिर्यागैः मर्शनं मीमांसा आत्मेंद्रियजयो निषिद्धवर्जनम् ॥ ३४ ॥ उभयचिह्नेन सकामनिष्कामलक्षणेन । तमेवाह य इति । सकामधर्मप्राप्यं स्वर्गाद्यपि भगवत एव सगुणं स्वरूपमिति भावः ॥ ३५ ॥ एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशः ॥ ३६ ॥ तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगेन समानार्थत्वमुक्त्वा भक्तियोगाद्युपसंहरति । प्रावोचमिति द्वाभ्याम् । चतुर्विधं त्रिगुणनिर्गुणभेदेन अंतर्धावति

ज्ञानेति । मन्निष्ठ इति । ममैव ब्रह्मत्वादिति भावः । अत्र प्रमाणमाह-तदुक्तमिति । 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यनुक्तमप्यत्रानुसंधेयम् ॥ ३२ ॥ अत्राक्षिपति–नन्विति । अयमर्थो भागवतामृते व्याख्यातस्तथा हि–यथा रूपरसादीनां गुणानामाश्रयः सदा क्षीरादिरेक एवार्थो ज्ञायते बहुधेंद्रियैः दृशा शुक्लो रसनया मधुरो भगवांस्तथा उपासनाभिर्बहुधा स एकोपि प्रतीयते । "जिह्वयैव यथा ग्राह्यं माधुर्यं तस्य नापरैः । तथैव चक्षुरादीनि गृह्णंत्यर्थं निजंनिजम् ॥ तथान्यबाह्यकरणस्थानीयोपासनादिना । भक्तिश्च चेतःस्थानीया तत्तत्सर्वार्थलाभतः ॥ इति प्रबलशास्त्रेषु तस्य ब्रह्मस्वरूपतः । माधुर्यादिगुणाधिक्यात्कृष्णस्य श्रेष्ठतोच्यते ॥" इति चक्रवर्ती । ॥ ३३ ॥ क्रियादित्रयं गृहस्थधर्मः । तपो वानप्रस्थस्य । स्वाध्यायमर्शने ब्रह्मचारिणः । आत्मेति द्वयं संन्यासिनः ॥ ३४ ॥ विविधानि यमादीन्यंगानि यस्य तेन । यद्वा । विविधांगेन श्रवणकीर्तनाद्यनेकांगेनेत्युभयत्रा न्वेति । तमेवोभयचिह्नत्वमेव । यो धर्मः । विश्वनाथस्तु–भक्तियोगेन चैव हीति चकारेण क्रियेत्यादीनां भक्तियोगमिश्रणं ज्ञापयति । क्रियया भक्तियोगेन च क्रतुभिर्भक्तियोगेन दानैर्भक्तियोगेन चेत्येव सर्वत्र योजनाद्भक्तियोगमिश्रणं विना क्रियादीनां स्वफलसाधकत्वाशक्तिं बोधयति । एवंहिशब्दाभ्यामवधारणनिश्चयवाचकाभ्यां क्रियादिसाध्यं वस्तु भक्तियोगेनैव केवलेन लभ्यं निश्चितं स्यादिति भक्तियोगस्य सर्वमुख्यत्वं भगवत्स्वरूपवज्ज्ञेय मित्याह ॥ ३५ ॥ इति भाव इति । 'वासुदेवपरा गतिः' इत्याद्युक्तेरयमाशयः-सगुणपक्षे स्वाननन्यभक्तानेव पश्यतीति स्वदृक् । यद्वा । स्वैर्दृश्यत इति स्वदृक् भक्तियोगप्राप्य इत्यर्थः । "भक्त्या मामभिजानाति यावान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः ॥ यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ॥ ३८ ॥ नैतत् खलायोपदिशेन्नाविनीताय कर्हिचित् ॥ न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ॥ ३९ ॥ न लोलुपायोपदिशेन्न गृहारूढचेतसे ॥ नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ॥ ४० ॥ श्रद्दधानाय भक्ताय विनीतायानसूयवे ॥ भूतेषु कृतमैत्राय शुश्रूषाऽभिरताय च ॥ ४१ ॥ बहिर्जातविरागाय शांतचित्ताय दीयताम् ॥ निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ॥ ४२ ॥ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् ॥ यो वाऽभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्यानं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ मैत्रेय उवाच ॥ एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः ॥ विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्वविषयांकितसिद्धिभूमिम् ॥ १ ॥

उत्पत्तिनिधनादि करोति ॥ अंग हे मातः ॥ ३७ ॥ ३८ ॥ उपदेशेऽनधिकारिणो दर्शयति । नैतदिति द्वाभ्याम् । खलाय परोद्वेजकाय भिन्नाय दुराचाराय धर्मध्वजाय दांभिकाय ॥ ३९ ॥ ४० ॥ अधिकारिण आह । श्रद्दधानायेति द्वाभ्याम् ॥ ४१ ॥ ४२ ॥ एतच्छ्रवणकीर्तनपरस्यापि मत्पदप्राप्तिरेव फलमित्याह । य इति । अप्यर्थे चकारः । सोऽपि मत्पदवीमेति हि निश्चितम् ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे टीकायां द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ त्रयस्त्रिंशे तु तस्यैव कपिलस्योपदेशतः ॥ ज्ञानभावेन तन्मातुर्जीवन्मुक्तिरुदीर्यते ॥ १ ॥ विस्रस्तं मोहरूपं पटलमावरणं यस्याः सा तत्त्वान्येव विषयस्तेनांकिता सिद्धिः सांख्यज्ञानं तस्या

श्वास्मि तत्त्वतः ॥'' इति श्रगितोक्तेः । ईयते ज्ञायते 'ई गत्यादौ' अतः कर्मणि लट् ॥ यः कालः ॥ ३६ ॥ ३७ ॥ संसृतीर्योनीः । यासु संसृतिषु प्रविशन्नयं जीव आत्मनः स्वस्य । गतिं शरणम् । मामात्मानं न वेद । अंगेत्यव्ययं संबुद्धौ ॥ ३८ ॥ खलो दूषणार्थमेव कृत्रिमभक्त्याऽधिजिगमिषुः । अविनीतः शिष्यमर्यादारहितः । स्तब्धो गर्वी । भिन्नो मतांतराभिनिवेशी । धर्मध्वजो लोभप्रतिष्ठाद्यर्थमेव धर्मनिष्ठः ॥ ३९ ॥ लोलुपस्तत्तद्दोषरहितोपि विषयभोगेतिलोभी । गृहारूढचेताः विषयेष्वनतिलोलुपोपि पुत्रदारधनादिष्वत्यासक्तः । अभक्त उक्तानुक्तसर्वदोषरहितोपि मद्भक्तिहीनः । किं च । भ्रमप्रमादतः कदाचिदेभ्योप्युपदिशतु नाम जातु कदाचिदपि मद्भक्तद्विषामिति षष्ठ्यंतनिर्देशेन तत्संबंधवतेपि नोपदिशेत्किमुत तेभ्य इति ॥ ४० ॥ तद्विपरीतानधिकारिणः । श्रद्दधानो मद्भक्तगुरुमदुपदिष्टशास्त्रयोर्विश्वासवान् । भक्तो भक्तिसंस्कारयुक्तः । विनीतः शिष्यमर्यादायुक्तः । अनसूयुः सतीर्थादिगुणाधिक्येन गुर्वादराधिक्ये दृष्टे प्रत्युत सुखवान् । कृतमैत्रो दयायुक्तः । शुश्रूषाभिरतो गुरुसेवायामनलसः ॥ ४१ ॥ बहिरिति द्वयस्य यथा बहिर्विरक्तस्तथान्तरपीत्यर्थः । निर्मत्सरः सर्वशुभाकांक्षी । शुचिर्बहिरंतःपवित्रः । एषां हेतुहेतुमद्भावो यथेष्टं विवेचनीयः । यस्याहमिति । तेन गुरुणा दीयते इत्यन्वयाद्गुरुलक्षणमप्युक्तम् । यद्वा । तादृशशिष्यस्य फलमाह-यस्येति । एवंभूतस्य यस्याहमतिप्रेयान्भविष्यामीत्यर्थः । अत्र यद्यपि पूर्वदोषा अपि त्यक्तास्स्युस्तथापि तेषामुद्देशो व्यतिरेकस्यापि पृथग्ज्ञानार्थ इति ज्ञेयम् । किं च । एते गुणास्तु समुदिता एव ज्ञेयाः । तत्तदंगवैकल्ये तु न्यूनाधिकारित्वमिति तानेव गुणान्समुद्दिश्याह-शुचय इति ॥ ४२ ॥ 'अंब–हिताहितवेदने' इति धातोरजंताट्टापि संबुद्धौ हे अंबेति । मातृत्वादेवोक्तमिदं तुभ्यं पूर्वोक्ताधिकारिविशेषणानादरेणेति संबुद्ध्यभिप्रायः ॥ ४३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे तृतीयस्कन्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥ तन्मातुः कपिलमातुर्देवहूतेः (१) मोहरूपं भक्तिज्ञानादिविषयकमज्ञानम् । संदर्भस्तु-यानि तत्त्वानि तत्त्वविचारस्य विषयास्तैरंकितां लक्षितां यां सिद्धिः परमात्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवहूतिरुवाच ॥ अथाप्यजोंतःसलिले शयानं भूतेंद्रियार्थात्ममयं वपुस्ते ॥ गुणप्रवाहं यदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः ॥ २ ॥ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः ॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः ॥ ३ ॥ स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् ॥ विश्वं युगांते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ॥ ४ ॥ त्वं देहतंत्रप्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये ॥ यथावतारास्तव सूकरादयस्तथाऽयमप्यात्मपथोपलब्धये ॥ ५ ॥

भूमिं क्षेत्रं प्रवर्तकम् ॥ १ ॥ अथेति वाक्यांतरे । अजोऽपि तव वपुः केवलं दध्यौ न तु दृष्टवान् स च स्वयं साक्षाद्यस्य तव जठराब्जाज्जातः स भवानेव विश्वस्य सर्गादि विधत्ते न तु तव सर्गादिकर्ता कश्चिदस्ति स एवंभूतस्त्वं मे मया कथं जठरेण धृत इति त्रयाणामन्वयः ॥ कथंभूतं वपुः सत् व्यक्तम् । तत्र हेतुः । अंतःसलिले शयानम् । कीदृशम् । भूतानींद्रियाणि च अर्थाश्च शब्दादय आत्मा च मन एतन्मयमेतैर्व्याप्तमित्यर्थः । कुतः गुणानां प्रवाहो यस्मिंस्तत्कुतः अशेषस्य कार्यकारणस्य बीजं कारणम् ॥ २ ॥ कथंभूतो भगवान्सर्गादि विधत्ते गुणप्रवाहरूपेण विभक्तं वीर्यं शक्तिर्येन सः शक्तिद्वारेण विधत्ते न साक्षादित्यर्थः । यतोऽनीहो निष्क्रियः । तर्हि कथं शक्तिद्वारेणापि सर्गादि विधत्ते तत्राह । अवितथाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते । आत्मनां जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः । ननु कथं विचित्रान्भोगानेक एव विदध्यात्तत्राह । अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य ॥ ३ ॥ किं च प्रलये यस्योदरे एतद्विश्वमासीत्स त्वं मया जठरेण कथं धृतः । ननु शिशौ मयि किमेतदुच्यते तत्राह । वटपत्र इति । अंघ्रिं पादांगुष्ठं पिबतीत्यंघ्रिपानः इदमपि शिशुत्वं तद्वदेव मायेति भावः ॥ ४ ॥ अथ वा न त्वं मयाऽपत्यांतरमि

स्फूर्त्तिस्तस्या भूमिमाश्रयमिति । विश्वनाथस्तु—तत्त्वविषयेषु भक्तितत्त्वसांख्यज्ञानतत्त्वयोगतत्त्वादिविषयेष्वंकितः परमनिपुणत्वेनांको गणनायां रेखा संजाता यस्य स चासौ सिद्धा भूमयो भूतलस्था जना यतः स चेति तम् । यद्वा । तत्त्वं विष्णुर्विषयो येषां ते तत्त्वविषया नंदसुनंदाद्यास्तैरंकिता सिद्धभूमिः स्वतःसिद्धवैकुंठभूमिर्यस्य तम् । यद्वा । तत्त्वे वस्तुयाथार्थ्यज्ञाने विषं तदज्ञानलक्षणं यापयति नाशयतीति तत्त्वविषया गुरूपसत्तिस्तयांकिता लक्षिता ये सिद्धास्तेषां भूमिं विषयम् । ''आचार्यवान्पुरुषो वेद'' इति श्रुतेः । सिद्ध इति संबंधोक्तिसंमतस्तीर्थसंमतश्च पाठः ॥ १ ॥ तत्त्वमुपदिश्य यस्त्वं मां संसाराद्दुद्धरसि नैतच्चित्रं यन्मानुष्या निकृष्टाया मम गर्भाजठरीकृतानन्तब्रह्मांडकोटिर्जातोसि तच्चित्रमित्याह-अथेति । इत्यर्थ इति । न तु तद्विकारादीति भावः।अत्र व्याप्त्यर्थे मयट्सूत्रे चादिपदोपादानाद्बोध्यः । यद्वा । भूतानि चेंद्रियाणि चार्थाश्चात्ममयाः स्वमयाश्चिदानंदरूपा एव न तु प्रकृतिविकारा यत्र तथेति भूतादिव्याप्तत्वे हेतुं पृच्छति कुत इति । गुणानां तत्कार्याणामाकाशादीनाम् । तद्गुणकार्यत्वमेव कुत इत्याशंकापनोदार्थमाह—अशेषेति । यद्वा । गुणान् भक्तवात्सल्यादीन् प्रकर्षेण वहतीति तत्तथा । सत् सत्यम् ॥ २ ॥ गुणप्रवाहेण रजआदिपरंपरया । इत्यर्थ इति । ब्रह्मादिरूपस्वशक्त्या सृष्ट्यादि करोतीति भावः । स्वयं कुतो न करोतीति चेदाह-यतोऽनीह इति । तत्राप्याशंकते तर्हीति । इत्यर्थ इति । जीवादृष्टं विमृश्यैव सृष्ट्यादि करोतीति भावः । पुनराक्षिपति—नन्विति ॥ ३ ॥ अन्यदाह किं चेति । कथं धृत इति । इत्याश्चर्यहेतुं त्वमेव ब्रूहीति भावः । अत्राक्षिपति भगवान्—नन्विति । इति भाव इति । लालनाभ्यासिनः सांसारिका अपि मां ध्यातुं शक्नुवंत्विति कृपामयबालमूर्त्तिरित्याशयः । मद्भक्ताः सर्वमेव सुखं त्यक्त्वा मच्चरणमाधुर्य एव सदा निमज्जंति तदेतन्मयाप्यास्वाद्यानुभवनीयमिति बुद्ध्यैवांघ्रिपाने प्रवृत्तिरिति भावः ॥ ४ ॥ पक्षांतरमाह—अथ वेति । तंत्रं परिकरेपि वर्त्तते । यद्वा । देहे तंत्रमीश्वरत्वज्ञापकशंखचक्रादिपरिच्छदो यस्येति । दुष्टानां हिरण्याक्षादीनाम् । समृद्धये भक्तिज्ञानादिसंपत्त्यै । तथायमप्यवतारः पाप्मशब्दो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ॥ श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ॥ ६ ॥ अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाऽग्रे वर्तते नाम तुभ्यम् ॥ तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये ते ॥ ७ ॥

व जठरे भृतः किं तु वराहाद्यवतारवदिच्छयैवाविर्भूतोऽसीत्याह । त्वं देहतंत्रो देहपरिकरः स्वीकृतमूर्तिरसि । पाप्मनां दुष्टानाम् । निदेशभाजामाज्ञानुवर्तिनां विभूतये समृद्ध्ये आत्मपथोपलब्धये ज्ञानमार्गप्रदर्शनाय ॥ ५ ॥ अतस्त्वद्दर्शनादहं कृतार्थोऽस्मीति कैमुत्यन्यायेनाह । यन्नामधेयस्य श्रवणमनुकीर्तनं च तस्मात् क्वचित्कदाचिदपि श्वानमत्तीति श्वादः श्वपचः सोऽपि सवनाय सोमयागाय कल्पते योग्यो भवति । अनेन पूज्यत्वं लक्ष्यते ॥ ६ ॥ तदुपपादयति । अहो बतेत्याश्चर्ये यस्य जिह्वाग्रे तव

पलक्षिताज्ञाननाशायेत्यर्थः ॥ ९ ॥ यतस्त्वं ज्ञानिशिरोमणिरत इत्यर्थः । अत्र जीवगोस्वामिचरणाः–क्वचित्कदाचिदपि नामधेयश्रवणादिहेतोरित्यन्वयः । उत्तरानुरोधादपिशब्दासंगतेश्च । श्वादत्वमत्र श्वभक्षकजातिविशेषत्वमेव श्वानमत्तीति निरुक्तौ वर्त्तमानप्रयोगात्क्रव्यादवत्तच्छीलत्वप्राप्तेः कादाचित्कभक्षणे प्रायश्चित्तविवक्षया त्वतीतप्रयोगः क्रियते "श्वादो गंगांबु संसेव्य मासांते संस्कृतो भवेत्" इत्याद्युक्तेः । 'रूढिर्योगमपहरति' इति न्यायेन विरुध्यते च । अत एव श्वपच इति स्वामिचरणाः । सद्यः सवनाय कल्पत इति "सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति" इतिवद्योग्यतायां लब्धारंभो भवतीत्यर्थः । तदुत्तरजन्मन्येव द्विजत्वं प्राप्य तदधिकारी स्यादिति भावः । विश्वनाथस्तु–सौमयागकर्त्ता ब्राह्मण इव मान्यो भवतीति दुर्जात्यारंभकप्रारब्धपापनाशो व्यंजितस्तदुक्तं श्रीरूपगोस्वामिचरणैः–"दुर्जातिरेव सवनायोग्यत्वे कारणं मतम् । दुर्जात्यारंभकं पापं यस्मात्प्रारब्धमेव तत्"इत्याह ॥ अस्यार्थस्तु–ततश्चास्य भगवन्नामश्रवणाद्येकतरां सद्य एव सवनयोग्यताप्रतिकूलदुर्जातित्वप्रारंभकप्रारब्धपापनाशपूर्वकसवनयोग्यजातित्वजनकपुण्यलाभः प्रतिपाद्यते ब्राह्मणानां शौक्रे जन्मनि दुर्जातित्वाभावेपि सवनाय सुजातित्वजनकसावित्र्यजन्मापेक्षावत् । तस्मात् 'भक्ति पुनाति मन्निष्ठा श्वपाकानपि संभवात्' इति कैमुत्यार्थमेव प्रोक्तमित्यायाति । तस्माद्दुर्जातिरेवेत्यत्र सवनायोग्यत्वे कारणमिति तद्योग्यता प्रतिकूलपापमपीत्यर्थः । न तु तदयोग्यताभावमात्रमपीति ब्राह्मणकुमाराणां शौक्रजन्मनि दुर्जातित्वाभावेपि सवनयोग्यत्वाय पुण्यविशेषमयसावित्रजन्मापेक्षमाणत्वात् । ततश्च सवनयोग्यत्वप्रतिकूलदुर्जात्यारंभकं प्रारब्धमपि गतमेव । किन्तु । शिष्टाचाराभावात्सावित्रं जन्म नास्तीति ब्राह्मणकुमाराणां सवनयोग्यत्वाभावावच्छेदकपुण्यविशेषमयसावित्रजन्मापेक्षावदस्यापि जन्मांतरापेक्षा वर्त्तत इति । अत एव सवनाय कल्पते संभावितो भवतीति । न तु तदैवाधिकारी भवतीत्यभिप्रेत्य व्याख्यातं तैः । सद्यः सवनाय कल्पतेऽनेन पूज्यत्वं लक्ष्यते । तदेवं दुर्जात्यारंभकपापस्य सद्यो नाशे वचनादवगते दुःखारंभकस्यापि नाशस्तु भक्त्यावृत्त्या संभावित इति सर्वप्रारब्धपापहारितायामुदाहरणं युक्तमेव "न वासुदेवभक्तानामशुभं विद्यते क्वचित्" इत्यादेः ॥ ६ ॥ तत्पूज्यत्वं यदित्यस्य प्रसिद्ध्यर्थे श्रेष्ठं मत्वाह–यद्यस्मादिति । गरीयान् श्रेष्ठतमः न त्वतिशयेन गुरुरुपदेष्टेत्यर्थो विधेयः 'श्रोत्रियं ब्रह्मनिष्ठम्' इति श्रुतिव्याकोपात् । 'ब्राह्मणस्यैव विहितं मंत्राणामुपदेशनम्'इति नारदाद्युक्तेश्च विरोधाद्विश्वनाथव्याख्यानं गुरुर्भवति । अन्यामपि नामात्मकं मंत्रमुपदेष्टुं योग्यतां धत्त इत्येवंरूपं नादर्त्तव्यम् । केचित्तु जिह्वाया अग्र एव न तु संपूर्णायां तस्यामित्यसम्यक्तयोच्चारितमित्यर्थः । वर्त्तत एव न तु वृत्तमसंपूर्णमुच्चारितमित्यर्थः । नामैव न तु नामानि संपूर्णजिह्वायां संपूर्णोच्चारितानि बहूनि नामानि तु किमुतेति भाव इत्याहुः । गरीयस्त्वे हेतुं पृच्छति । कुत इति । ये साम गृणंति ते अत एव तपोहोमतीर्थस्नानादिमत्त्वादेव "अनूचानः प्रवचने सांगेधीती गुरोश्च यः" इत्यमरः । इत्यर्थ इति । सर्वसुकृतफलदायित्वान्नाम्नोऽधिकसुकृतस्याभावात्तस्मिन्नुच्चारिते सर्वं सुकृतं कृतं स्यादिति भावः । परोक्षार्थप्रयोगात्तेषां तपआदीनि सिद्धान्येव न तदर्थं साधनश्रमः कर्त्तव्य इति इह जन्मनि तदभाववतां नामप्रवृत्तिदर्शनात्कथं ज्ञायेतैतैरेतानि कृतानीति चेत्तत्राह–यद्वेति । इत्यर्थ इति । जन्मांतरपुण्यं विना नामोच्चारणे प्रवृत्तिर्न भवतीति भावः । गृणंतीति । वर्त्तमानप्रयोगेण नामोच्चारणाविच्छेद एव यदि स्यात्तदैवं स्यादित्यपि न व्याख्येयं "चित्रं विदूरविगमः सकृदाददीत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेदगर्भम् ॥ ८ ॥ मैत्रेय उवाच ॥ ईडितो भगवानेवं कपिलाख्यः परः पुमान् ॥ वाचा विक्लवयेत्याह मातरं मातृवत्सलः ॥ ९ ॥ कपिल उवाच ॥ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे ॥ आस्थितेन परां काष्ठामचिरादवरोत्स्यसि ॥ १० ॥ श्रद्धस्वैतन्मतं मह्यं जुष्टं यद् ब्रह्मवादिभिः ॥ येन मामभवं याया मृत्युमृच्छंत्यतद्विदः ॥ ११ ॥ मैत्रेय उवाच ॥ इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिम् ॥ स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ ॥ १२ ॥ सा चापि तनयोक्तेन योगादेशेन योगयुक् ॥ तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता ॥ १३ ॥ अभीक्ष्णावगाहकपिशाञ्जटिलान्कुटिलालकान् ॥ आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशम् ॥१४॥ प्रजापतेः कर्दमस्य तपोयोगविजृंभितम् ॥ स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि ॥१५॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि च हैमानि सुस्पर्शास्तरणानि च ॥१६॥

नाम वर्तते स श्वपचोऽप्यतोऽस्मादेव हेतोर्गरीयान् । यद्यस्माद्वर्तते अत इति वा कुत इत्यत आह । त एव तपस्तेपुः कृतवंतः जुहुवुर्होमं कृतवंतः सस्नुस्तीर्थेषु स्नाताः आर्यास्त एव सदाचाराः ब्रह्म वेदमनूचुरधीतवंतः । त्वन्नामकीर्तने तप आद्यंतर्भूतमतस्ते पुण्यतमा इत्यर्थः । यद्वा जन्मांतरे तैस्तपोहोमादि सर्वं कृतमिति त्वन्नामकीर्तनमहाभाग्योदयादवगम्यत इत्यर्थः ॥ ७ ॥ प्रत्यक्स्रोतसि प्रत्यावृत्ते आत्मनि मनसि संविभाव्यं संचिंत्यम् । वेदा गर्भे यस्य सः ॥ ८ ॥ अविक्लवया गंभीरया वाचा ॥ ९ ॥ ते तव सुसेव्येन सुखसेव्येन मे मयोदितेन आस्थितेनानुष्ठितेन परां काष्ठां जीवन्मुक्तिमवरोत्स्यसि प्राप्स्यसि ॥ १० ॥ यायाः यास्यसि अतद्विदो मन्मतमविद्वांसः ॥ ११ ॥ अनुमतोऽनुज्ञातः ॥ १२ ॥ सरस्वत्या आपीडे पुष्पमुकुटतुल्ये । सरस्वत्येति पाठे मुकुटेनेव संवेष्टिते बिंदुसरसि समाहिता बभूव ॥ १३ ॥ कथंभूता सती समाहिता तदाह । अभीक्ष्णं त्रिषवणमवगाहः स्नानं तेन कपिशान्पिशंगान् स्वत एव कुटिलानलकान्केशांस्तथाऽऽत्मानं देहं चीरधारिणं कृशं च बिभ्रती सती ॥ १४ ॥ प्रजापतेः कर्दमस्य तपोयोगाभ्यां विजृंभितमतिशयितं स्वगार्हस्थ्यं हित्वा पुत्रभूतेश्वरविरहातुरा सती वदनं किंचिदनिर्वाच्यं शोकव्याकुलं चकारेति षष्ठेनान्वयः ॥ १५ ॥ यत्र गार्हस्थ्ये क्षीरफेननिभा मृदुशुभ्राः शय्या आस्तरणान्याभांति दंतघटिता मंचकाश्च स्वर्णमया परिकराः आसनानि पीठादीनि सुस्पर्शान्यास्तरणा

यन्नामधेयमधुना स जहाति बंधम्" इति 'यन्नामसकृच्छ्रवणात्पुष्कसो मुच्यते संसारात्' इत्यादिषु सकृत्पदव्याकोपात् ॥ ७ ॥ परं पुमांसं पुरुषोत्तमम् । "अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" इति श्रीगीतोक्तेः । साक्षाद्विष्णुम् । अवतारावतारिणोरभेदात् "ऋषिं प्रसूतं कपिलम्" इति श्रुतेः । यद्वा । मां मातरं यदि तारयिष्यस्यत्र किमाश्चर्यं त्वं तु कपिलोसि कपिभ्योपि सुग्रीवहनुमदादिभ्यो लाति ज्ञानं ददाति स्वीयत्वेनादत्ते वेति भावः । वेदगर्भत्वेनात्र हिरण्यगर्भभ्रमो मा भूदत आह–विष्णुमिति । अत एव त्वां वंदे न तु पुत्रबुद्धिं करोमीति भावः ॥८॥ इति वक्ष्यमाणम् ॥९॥१०॥ मृत्युं संसारम् । मह्यं मम ब्रह्मवादिभिर्वैदिकैर्जुष्टं सेवितम् ॥११॥ इतीत्थम् । ननु स्वस्याज्ञानोपदेष्टृत्वेन गुरुत्वात्पुत्रत्वेन सुहृत्त्वात्सा देवहूतिः पुत्रगमनं कथमनुजज्ञे निर्दयहृदयत्वेनेतिचेत्तत्राह–ब्रह्मवादिन्या ब्रह्मरूपत्वात्तस्य तद्वियोगं विचारेण जानंत्येति भावः ॥ १२ ॥ सा देवहूतिः । योगस्यादेशो भक्तिज्ञानयोगस्योपदेशस्तेन योगं भगवद्ध्यानं युनक्तीति योगयुक् सती । समाहिता समाधिस्थां ॥ १३ ॥ १४ ॥ १५ ॥ पीठादीन्यादिनासंद्यादिग्रहः "वेत्रादिनिर्मितं पीठमासंदीत्यभिधीयते"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नप्रदीपा आभांति ललनारत्नसंयुताः ॥ १७ ॥ गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः ॥ कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतम् ॥ १८ ॥ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः ॥ वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितम् ॥ १९ ॥ हित्वा तदीप्सिततममप्याखंडलयोषिताम् ॥ किंचिच्चकार वदनं पुत्रविश्लेषणातुरा ॥ २० ॥ वनं प्रव्रजिते पत्यावपत्यविरहातुरा ॥ ज्ञाततत्त्वाऽप्यभून्नष्टे वत्से गौरिव वत्सला ॥ २१ ॥ तमेव ध्यायती देवमपत्यं कपिलं हरिम् ॥ बभूवाचिरतो वत्स निःस्पृहा तादृशे गृहे ॥ २२ ॥ ध्यायंती भगवद्रूपं यदाह ध्यानगोचरम् ॥ सुतः प्रसन्नवदनं समस्तव्यस्तचिंतया ॥ २३ ॥ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा ॥ युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना ॥ २४ ॥ विशुद्धेन तदात्मानमात्मना विश्वतोमुखम् ॥ स्वानुभूत्या तिरोभूतमायागुणविशेषणम् ॥ २५ ॥ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये ॥ निवृत्तजीवापत्तित्वात क्षीणक्लेशाऽऽप्तनिर्वृतिः ॥ २६ ॥

नि येषु ॥ १६ ॥ १७ ॥ बहुभिरमरद्रुमै रम्यम् ॥ १८ ॥ यत्रोद्याने प्रविष्टमात्मानं देवहूतिम् ॥ १९ ॥ आखंडल इंद्रस्तस्य या, योषितस्तासामपीप्सिततमं प्रार्तमिष्टतमं तद्धित्वा तत्राभिमानं त्यक्त्वा ॥ २० ॥ सुहृद्वियोगस्य दुःसहतामाह । वनमिति । नष्टे वत्से वत्सला गौरिवाभूत् ॥ २१ ॥ विरहकृतध्यानफलमाह । निःस्पृहा निर्वासना । वत्स विदुर ॥ २२ ॥ ततः स्वसुतः कपिलो यदाह तद्भगवतो रूपं ध्यायंती तदाऽऽत्मानं च विश्वतोमुखं सर्वगतं ध्यायंती ब्रह्मण्यवस्थितमतिर्बभूवेति पूर्वस्यैवानुषंगः । केन ध्यायंती विशुद्धेनात्मना मनसा ॥ २३ ॥ विशुद्धौ कारणान्याह । भक्तिप्रवाहरूपेण योगेन वैराग्येण च युक्तानुष्ठानेन जातं यज्ज्ञानं तेन च । युक्तानुष्ठानं च गीतासूक्तम् । "युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा" इति ब्रह्महेतुना ब्रह्मत्वापादकेन ॥ २४ ॥ विश्वतोमुखत्वे हेतुः । स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूतम् । मायागुणैर्विशेषणं परिच्छेदो यस्य ॥ २५ ॥ कथंभूते ब्रह्मणि आत्मनां जीवानां संश्रये भगवति तस्या जीवन्मु

इति ॥ १६ ॥ स्वच्छानि यानि स्फटिकस्य कुड्यानि भित्तयस्तेषु । मरकतै रचितानि कुड्यानि मारकतानि महांति तानि तेषु च । रत्नमयाः प्रदीपाः ललनारत्नैः प्रतिबिंबितोत्तमस्त्रीभिस्संयुताः 'कुड्यं भित्तौ विलेपने' इति मेदिनी ॥ १७ ॥ अमरद्रुमैः संतानकल्पद्रुमहरिचंदनमंदारपारिजातैः । "संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनम् । पंचैते देवतरवो मंदारः पारिजातकः ॥" इत्यमरः । कूजंति विहंगानां मयूरादीनां मिथुनानि यत्र तत् ॥ १८ ॥ यत्र वाप्यां प्रविष्टम् ॥ १९ ॥ किंचिच्चकार दीनं चक्रे पतिविरहादपि पुत्रविरहो दुःसह इत्याह–पुत्रविश्लेषेति ॥ २० ॥ भगवति वात्सल्याख्यायाः प्रीतेः सर्वोपमर्दित्वमाह–वनमिति । पत्यौ कर्दमे वनं गते यदपत्यं वीक्ष्यमाणा जीवंत्यासीत्तस्यापि विरहेणातुरेति हंत भोः के कुत्र वर्त्तते पश्यतो मदपत्यं शीघ्रमेव परावर्त्तयंतां भवंतो नो चेदहं न जीविष्यामीति विलपंती गौरिवेति सर्वमेव तत्त्वज्ञानं सहसैव विस्मृतवती वेति भावः ॥ २१ ॥ तादृशे इंद्रस्याभिलषिते । वत्सेति हरियशःश्रवणानुरागित्वेन प्रियत्वद्योतिका संबुद्धिः ॥ २२ ॥ ततः निस्स्पृहत्वात् । ध्यानस्य गोचरं विषयम् ॥ २३ ॥ बलीयसा ब्रह्मलोकमपि काकविट्सममं ज्ञात्वाऽनिच्छितेन ॥ २४ ॥ मायागुणैः सत्त्वादिभिर्विशेषणं 'शुद्धसत्त्वमयो हरिः' इत्यादिपरिच्छेदः । निर्गुणे गुणविशेषणासंभवात् । "न तत्र सत्त्वं न रजस्तमश्च" इत्यादिश्रुतेः ॥ २५ ॥ जीवभावो लिंगशरीराध्यासः । यद्वा । जीवस्यापत्तिर्यया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा ॥ न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः ॥ २७ ॥ तद्देहः परतः पोष्योऽप्यकृशश्चाध्यसंभवात् ॥ बभौ मलैरवच्छन्नः सधूम इव पावकः ॥ २८ ॥ स्वांगं तपोयोगमयं मुक्तकेशं गतांबरम् ॥ दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः ॥ २९ ॥ एवं सा कपिलोक्तेन मार्गेणाचिरतः परम् ॥ आत्मानं ब्रह्म निर्वाणं भगवंतमवाप ह ॥ ३० ॥ तद्वीराऽऽसीत् पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् ॥ नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥ ३१ ॥ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् ॥ स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ॥ ३२ ॥ कपिलोऽपि महायोगी भगवान्पितुराश्रमात् ॥ मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ॥ ३३ ॥ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥ स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ॥ ३४ ॥ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः ॥ त्रयाणामपि लोकानामुपशांत्यै समाहितः ॥ ३५ ॥ एतन्निगदितं तात यत्पृष्टोऽहं त्वयानघ ॥ कपिलस्य च संवादो देवहूत्याश्च पावनः ॥ ३६ ॥

किमाह । सार्धैस्त्रिभिः । तदा च निवृत्ता जीवापत्तिर्जीवभावो यस्यास्तस्या भावस्तत्त्वं तस्मात् विगतक्लेशा प्राप्तनिर्वृतिश्च सत्यात्मानं देहं न सस्मारेत्युत्तरेणान्वयः ॥ २६ ॥ ननु तथापि गुणानां विद्यमानत्वात्कथमस्मरणं तत्राह । नित्यारूढो लब्धप्रतिष्ठः समाधिर्यस्यास्तस्या भावस्तत्त्वं तस्मात् । परावृतः शांतो गुणनिमित्तो भ्रमो यस्याः सा ॥ २७ ॥ परतः पराभिरेव कर्दमसृष्टविद्याधरीभिः पोषः पोषणं यस्य आधिर्मनोग्लानिस्तदसंभवादकृशः मलैरवच्छन्नोऽपि बभौ ॥ २८ ॥ दैवगुप्तमारब्धकर्मपालितम् ॥ २९ ॥ निर्वाणं नित्यमुक्तम् ॥ ३० ॥ हे वीर विदुर ! उपेयुषी प्राप्ता ॥ ३१ ॥ हे सौम्य ! तस्यास्तन्मर्त्यं शरीरं सरिदभूत् । कथंभूतम् । योगेन विधूता विलीना मार्त्या दैहिका धातुमला यस्य ॥ ३२ ॥ कपिलोऽपि ययावित्युक्तं तदेव प्रपंचयति । कपिलोऽपीति त्रिभिः समनुज्ञाप्यानुज्ञां संप्रार्थ्य ॥ ३३ ॥ दत्तमर्हणमर्घ्यं निकेतनं च यस्मै ॥ ३४ ॥ उपशांत्यर्थं समाहित आस्ते ॥ ३५ ॥ प्रकरणार्थमुपसंहरति । एतदिति । तव त्वया ॥ ३६ ॥

सा जीवापत्तिरविद्या जीवस्येति भावप्रधानो निर्देशः ॥ २६ ॥ अत्राक्षिपति—नन्विति ॥ २७ ॥ तस्या देवहूतेर्देहः ॥ २८ ॥ दैवेन हरिणा गुप्तं "किमजितोऽवति नोपसन्नान्" इतिन्यायेन ॥ २९ ॥ सा देवहूतिः ॥ ३० ॥ अज्ञानजये प्रवृत्तत्वाद्वीरेति संबुद्धिः । संसिद्धिं मुक्तिम् ॥ ३१ ॥ सोमवंशोद्भूतत्वात्प्रियदर्शनोऽसीति प्रियत्वं व्यंजयन्नाह-सौम्येति । सिद्धिदा तटवासिनां स्नातॄणाञ्च ॥ ३२ ॥ प्राक् प्रथमं सदाचारादुदीचीमुत्तराम् 'गतपूर्वां महात्मभिः" इत्युक्तेः । ततो गंगासागरसंगमे स्थिरतामवापेत्यर्थः ॥ ३३ ॥ ३४ ॥ सांख्याचार्यैरासुर्यादिभिः । मां दृष्ट्वाऽन्येपि मोक्षार्थं योगाचरणे प्रवृत्ताः स्युरित्यालोच्य समाहितोऽभूदित्याह-त्रयाणामित्यादि ॥ ३५ ॥ प्रियत्वात्तुभ्यमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यम् ॥ भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदम् ॥३७॥ इति श्रीभागवते महापुराणे अष्टादशसाहस्र्यां संहितायां तृतीयस्कंधे कपिलांतर्धानवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ समाप्तोऽयं तृतीयः स्कंधः ॥ ३ ॥

एतच्छ्रवणकीर्तनफलमाह । य इति । सुपर्णकेतौ गरुडध्वजे उपलभते प्राप्नोति ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे टीकायां भावार्थदीपिकायां श्रीधरस्वामिविरचितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ समाप्तोऽयं तृतीयः स्कंधः ॥ ३ ॥

तन्निगदितामित्याह-तातेति ॥ ३६ ॥ श्रीमत्कपिलदेवोक्तं तात्पर्य्यं फलेन दर्शयन्देवहूत्यास्तादृशीं गतिमेव द्रढयति-योऽभिधत्ते मात्रं यो वा श्रृणोति मात्रं किमुतानुतिष्ठति यः किमुततरां श्रीदेवहूतिः । उपाधिक्येन प्रेमवत्पार्षदतया भगवत्पदारविंदसेवार्थं प्राप्नोति ॥ ३७ ॥ यो मात्रे कापिलं रूपं धृत्वा ज्ञानमदात्प्रभुः । स सदा संसृतेः पातु यशोदानंदनो हरिः ॥ १ ॥ भावार्थदीपिकाटीकाप्रकाशोऽति प्रयत्नतः । वंशीधरेण संदब्धो बहुटीकावलोकनैः ॥२॥ प्रीयतां यमुनातीरवल्लवीकेलितत्परः । श्रीराधारमणोनेन वृषार्कसुतया सह॥ ३॥इति श्रीगौडवंशोद्भूतकौशिकगोत्रवंशीधरशर्मकृतस्तृतीयस्कंधभावार्थदीपिकाप्रकाशः समाप्तः।

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवततृतीयस्कन्धः मुम्बय्यां खेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा प्रकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीधरीयटीकया बंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया
चोपेते भागवते तृतीयस्कन्धः समाप्तः ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश-
टीकया चोपेते भागवते चतुर्थस्कन्धः प्रारभ्यते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्थस्कंध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णाय नमः ॥ मैत्रेय उवाच ॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥ १ ॥ आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः ॥ पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥ २ ॥ प्रजापतिः स भगवान्रुचिस्तस्यामजीजनत् ॥ मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ॥ ३ ॥ यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ या स्त्री सा दक्षिणा भूतेरंशभूताऽनपायिनी ॥ ४ ॥ आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम् ॥ स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् ॥ ५ ॥ तां कामयानां भगवानुवाह यजुषां पतिः ॥ तुष्टायां तोषमापन्नोऽजनयद् द्वादशात्मजान् ॥ ६ ॥ तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः ॥ इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ॥ ७ ॥

॥ श्रीगणेशाय नमः ॥ ॥ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामचंद्राय ॥ ॥ अथैकत्रिंशताध्यायैर्विसर्गस्तुर्य ईर्यते ॥ विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वादिभिः कृतः ॥ १ ॥ तत्र तु प्रथमेऽध्याये मनुकन्यान्वयाः पृथक् ॥ वर्ण्यंते यत्र यज्ञादिमूर्तिभिः प्रभवो हरेः ॥ २ ॥ मनुकन्यान्वयं विस्तरेण वक्तुमाह । मनोस्त्विति । चकाराद्द्वौ पुत्रौ च ॥ १ ॥ तुशब्दादन्यतोऽपि पुत्रलाभः सूचितस्तं दर्शयितुमाह । पुत्रिकाधर्ममाश्रित्येति । "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् ॥ अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति ॥" इति भाषाबंधेन कन्यादानं पुत्रिकाधर्मः । स चाभ्रातृकायां कन्यायां पुत्रार्थिन एव प्रसिद्धस्तथापि पुत्रबाहुल्यकामस्तथा कृतवानित्याह । भ्रातृमतीमपीति ॥ २ ॥ मिथुनं पुरुषं स्त्रियं च । समाधिना ईश्वरध्यानेन ॥ ३ ॥ भूतेर्लक्ष्म्या अंशभूता अतस्तयोर्विवाहो न विरुद्ध इति भावः ॥ ४ ॥ पुत्र्या आकूतेः पुत्रं यज्ञम् ॥ ५ ॥ यजुषां यज्ञानां मंत्राणां वा पतिर्विष्णुः ॥ ६ ॥ द्विषट् द्वादश ॥ ७ ॥

ॐ स्वस्ति श्रीगणेशाय नमः ॥ श्रीकृष्णं बल्लवीनाथं यशोदानन्ददायिनम् ॥ प्रणम्य कुर्वे तुर्य्यस्य स्कन्धस्य व्याकृतिं मुदा ॥ (१) ॥ अथ सर्गकथनोत्तरम् । तुर्ये चतुर्थस्कंधे । ईश्वराधीनैरीश्वरप्रेरितैः कृतः सर्गो विसर्गः । एकवचनांतस्याप्येकात्रिंशच्छब्दस्य बह्वर्थबोधकत्वादध्यायैरित्यनेनान्वयो न विरुद्धः । 'विंशत्याद्यास्सदैकत्वे' इत्यमरात् ॥ (१) ॥ "एकेन मनुकन्यानामन्वयाः कथिता इह । ततो रसैर्दक्षयज्ञध्वंसो भूयः प्रवर्त्तना ॥ ततो ध्रुवस्य चरितं पंचभिः श्रीपृथोस्ततः ॥ एकादशभिरध्यायैरष्टभिश्च प्रचेतसाम् । इत्येवं क्रमशो ज्ञेयो विज्ञैः प्रकरणक्रमः" ॥ यत्र मनुकन्यान्वयेषु । आदिना कपिलादिग्रहः ॥ (२) ॥ पूर्वोक्तमनुवदति प्रस्तुतलाभाय मनोरिति विश्रुताः प्रसिद्धाः ॥ १ ॥ मनोस्त्विह तु पदप्रयोगफलं दर्शयति अभ्रातृकां भ्रातृरहिताम् । अस्यां मत्कन्यायाम् । यद्वाकूतेः पुत्रो भगवान्यज्ञो भविष्यतीति सर्वज्ञत्वेन दौहित्रः सन्नपि मे पुत्र एव यथा स्यात्तथा भावेन वा पुत्रिकाधर्ममाश्रितवानिति । नृपः स्वायंभुवः । अनुमोदितः सुष्ठु विमृष्टमित्युक्तः ॥ २ ॥ स रुचिः । भगवाननल्पज्ञानः । तस्यामाकूत्याम् । ब्रह्मवर्चस्वी वेदाध्ययनादिनातीवतेजस्वी । परमेण श्रीहरिध्यानाविष्टेन । समाधिना चित्तैकाग्र्येण । अनेन रुचेर्ब्राह्मणत्वं लक्ष्यते ॥ ३ ॥ तयोः कन्याकुमारयोर्मध्ये 'धृज्–धारणे' जकारांतोपि धातुः । 'धातूनामप्यनंतत्वान्नानार्थत्त्वाच्च सर्वथा' इत्यनुभूतिस्वरूपोक्तेः । 'भूतिः श्रीभस्मजन्मासु' इति यादवः । अतो लक्ष्म्यंशत्वात् । तयोर्यज्ञदक्षिणयोः । इति भाव इति । "लक्ष्मीर्नान्यस्य भार्या स्याद्विना विष्णुं स्वयं प्रभुम्" इत्यादिपुराणादयमाशयः ॥ ४ ॥ स्वायंभुवेनोद्वाहकाले यदुक्तं तन्न विस्मृतमित्याह–आनिन्ये इति । विततं रोचिस्तेजो यस्य तम् ॥ ५ ॥ तां दक्षिणां कामयानामुद्वहनेच्छावतीं तुष्यत्यनयेति तुष्टा दक्षिणा । कारितेपि सुभोजने दक्षिणादानाभावे भोक्तुस्तोषो न भवतीत्यवश्यं सा देया । "ब्राह्मणमद्य विदेयं पितृमंतं पैतृमत्यमृषिमार्षेयं सुधातुदक्षिणम् । अस्मद्राता देवत्रा गच्छत दातारमाप्रीणयत" इति श्रुतेः ॥ ६ ॥ द्विरावृत्ताः षट् द्विषट् आर्षत्वाद्द्विशब्दस्येद्वयादेशो मध्यमपदलोपश्च ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुषिता नाम ते देवा आसन्स्वायंभुवांतरे ॥ मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ ॥ तत्पुत्रपौत्रनप्तृणामनुवृत्तं तदंतरम् ॥ ९ ॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः ॥ तत्संबंधि श्रुतप्रायं भवतो गदतो मम ॥ १० ॥ दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः ॥ प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ॥ ११ ॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः ॥ तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे ॥ १२ ॥ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा ॥ कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥ पूर्णिमाऽसूत विरजं विश्वगं च परंतप ॥ देवकुल्यां हरेः पादशौचाद्याऽभूत्सरिद्दिवः ॥ १४ ॥ अत्रेः पत्न्यनसूया त्रीञ्जज्ञे सुयशसः सुतान् ॥ दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥ १५ ॥ विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतहेतवः ॥ किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो ॥ ॥ १६ ॥ मैत्रेय उवाच ॥ ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदां वरः ॥ सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥ १७ ॥ तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः ॥ १८ ॥

प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह तुषिता इति द्वाभ्याम् । "मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ॥ ऋषयोंशावतारश्च हरेः षड्विधमुच्यते ॥" इति वक्ष्यति॥तत्र स्वायंभुवो मनुः तुषिता देवाः । मरीचिप्रमुखाः सप्तर्षयः । यज्ञो हरेरवतारः स एव सुरगणेश्वर इंद्रः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तदेवं यज्ञस्य द्वैरूप्येण षड्विधत्वम् । तयोः पुत्रपौत्रनप्तृणां वंशैरनुवृत्तं व्याप्तं पालितं तन्मन्वंतरम् ॥ ९ ॥ श्रुतप्रायं बाहुल्येन श्रुतम् । तत्कन्यावंशानामश्रुतत्वात्प्रायग्रहणम् ॥ १० ॥ ११ ॥ प्रसूतिप्रसवं पुत्रपौत्रादिभिर्विस्तारम् ॥ १२ ॥ ययोः पुत्रयोर्वंशेनापूरितम् ॥ १३ ॥ कश्यपस्य वंशं षष्ठे वक्ष्यति । द्वितीयस्य वंशं तावदाह । पूर्णिमेति । देवकुल्यां नाम कन्यां च । हरेः पादक्षालनान्मज्जांतरे या दिवः सरिद्गंगाऽभूत् ॥ १४ ॥ आत्मेशब्रह्मसंभवान्विष्णुरुद्रब्रह्मणामंशैः संभूतान् ॥ १५ ॥ किंचित्किं स्वित् । किं कर्तुमिच्छव इत्यर्थः ॥ १६ ॥ ऋक्षं नाम कुलाद्रिम् । तपसि स्थितः सन् ॥ १७ ॥ तस्मिन्कुलाद्रौ । प्रसूनानां स्तबका येषु पलाशाशोकेषु तेषां कानने । निर्विंध्या

मन्वन्तरलक्षणमष्टमस्कंधे वक्ष्यति । स एव यज्ञ एव यज्ञस्य द्वैरूप्यात्षट्कमूर्त्तिः॥८॥९॥तत्संबंधि तस्या देवहूत्याः पुत्रकन्यादिकम्॥१०॥भगवान्समर्थः यत्कृतः प्रसूतिदक्षकृतः सर्गः सृष्टिः॥११॥ब्रह्मर्षीणां मरीच्यादीनाम् । पत्नय इत्या र्षत्त्वान्ङीपो ह्रस्वत्वे बुद्ध्य इतिवत् । तासां कर्दमात्मजानाम् ॥१२॥ वंशेनेति शेषः । ययोः कश्यपपूर्णिमयोः ॥१३॥ परंतपेति विदुरस्येंद्रियजये सामर्थ्यमाह ॥१४॥ जज्ञे उत्पादयामास । 'जनी प्रादुर्भावे' इह प्रादुर्भावयतीति प्रादुर्भाव इत्यन्तर्भावितणिजर्थत्वेन सकर्मकोप्ययम् । प्रादुर्भवनं प्रादुर्भाव इति निरुक्त्याश्रयणे त्वकर्मकोयमिति । आत्मशब्देन विष्णोः स्वातंत्र्यमुक्तमन्ययोस्तत्पारतंत्र्यं च "सृजामि तन्नियुक्तोहं हरो हरति तद्वशः । परिपाति स्वयं विष्णुः" इत्युक्तेः । सोमे हि ब्रह्मण आवेशमात्रमेव न तु पृथग्जननमिति तीर्थः ॥ १५ ॥ गुरूणां शिष्यसंदेहापनोदनमुचितमित्यभिप्रेत्यामंत्रयति गुरो इति ॥ १६ ॥ कुलाद्रिं सप्तकुलाचलांतर्गतम् । तपसि स्थितोभूदिति शेषः ॥ १७ ॥ स्तबका गुच्छाः । तेषां काननं यस्मिन्स तथा तस्मिन् । स्वामिचरणैस्तु तदद्यधिकरणके कानन इति पृथक् व्याख्यातम् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणायामेन संयम्य मनो वर्षशतं मुनिः ॥ अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः ॥ १९ ॥ शरणं तं प्रपद्येऽहं य एव जगदीश्वरः ॥ प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् ॥ २० ॥ तप्यमानं त्रिभुवनं प्राणायामैधसाऽग्निना ॥ निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥ २१ ॥ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसस्तदाऽऽश्रमपदं ययुः ॥ २२॥ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः ॥ उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् ॥ २३ ॥ प्रणम्य दंडवद्भूमावुपतस्थेऽर्हणांजलिः ॥ वृषहंससुपर्णस्थान्स्वैःस्वैश्चिह्नैश्च चिह्नितान् ॥ २४ ॥ कृपाऽवलोकेन हसद्वदनेनोपलंभितान् ॥ तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी ॥ २५ ॥ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः ॥ श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः ॥ २६ ॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः ॥ ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः ॥ २७ ॥

नाम नदी तस्याः स्रवद्भिर्वार्भिरुद्घुष्टे नादिते ॥१८॥ १९ ॥ २० ॥ प्राणायाम एव एधः संदीपकं काष्ठं यस्य तेन मुनेर्मूर्ध्नो निर्गतेनाग्निना तप्यमानं समीक्ष्य तदाश्रमपदं ययुरित्युत्तरेणान्वयः ॥ २१ ॥ अप्सरःप्रमुखैर्वितायमानं विस्तारेण गीयमानं यशो येषां ते ॥ २२ ॥ तेषां प्रादुर्भावः प्राकट्यं तस्य संयोगः सन्निधिस्तेन विद्योतितं मनो यस्य । उत्तिष्ठन्नुत्कर्षेण तिष्ठन् ॥ २३ ॥ अर्हणं पुष्पादिकमंजलौ यस्य । उपतस्थे पूजयामास । वृषाद्यारूढान् स्वैःस्वैश्चिह्नैस्त्रिशूलकमंडलुचक्रादिभिः ॥ २४ ॥ कृपयाऽवलोको यस्मिन् हसच्च तद्वदनं च तेनोपलंभितान्प्रसन्नत्वेन ज्ञापितान् । तेषां रोचिषा दीप्त्या ॥ २५ ॥ श्लक्ष्णया मधुरया । सूक्तया गंभीरार्थया ॥ २६ ॥ अनुयुगं कल्पेकल्पे विभज्य गृहीतो देहो यैस्ते प्रसिद्धा ब्रह्मविष्णुगिरिशा ययम् । वो युष्मान्प्रणतोऽस्मि । तेभ्यः सकाशादेक एव मे मयोपहूतः शरणं ।

निर्द्वंद्वस्त्यक्तकामादिद्वंद्वः । वर्षशतमिति " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीयया क्षणमपि पादद्वयेन नातिष्ठदित्युक्तम् ॥१९॥ आत्मनः स्वस्य विष्णुमूर्तेः समां तुल्याम् । संततिं ददातु । अत्र संगतिश्चेत्थं पूर्वमुपविश्य प्राणायामः पश्चादुपासनाविशेषार्थमेकपादेनोर्द्ध्वस्थितिः क्त्वाप्रत्ययस्य पूर्वकालाश्रयत्वादूर्द्ध्वस्थितावेव शरणं तमित्यादिमंत्रार्थचिंतनं शतृप्रत्ययस्य समानकालाश्रयत्वात् । तथापि तस्या प्राकट्ये पुनर्दुःखेन स्वदेहत्यागाय सान्निधारणप्राणायामस्तदर्थं पुनरुपवेश एव ज्ञेय औचित्यात् । ततस्तस्य विश्वस्य च दाहारंभे तेषां तत्र सहसा प्राकट्यं ततश्च ते बहिः प्रकटा इति मनस्येव स्फुरिते पुनरुत्थानादिकमिति ज्ञेया ॥ २० ॥ 'काष्ठं दार्विन्धनं त्वेधः' इत्यमरः । त्रयो ब्रह्मविष्णुरुद्राः । प्रभवः सर्वथा समर्थाः ॥ २१ ॥ तस्यात्रेराश्रम एव पदं स्थानम् ॥ २२ ॥ विबुधर्षभान्सर्वदेवश्रेष्ठान् ॥ २३ ॥ आदिना त्रिनेत्रत्वचतुर्मुखत्वचतुर्भुजत्वादिग्रहः ॥ २४ ॥ प्रतिहते प्रतिबद्धदर्शनशक्तिनी ॥ २५ ॥ तेषु प्रवणं मग्नं युंजन्कुर्वन् । संहतांजलिर्बद्धांजलिः । यद्वा सूक्तया "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव आस्य जानतो नामचिद्विवक्तनमहस्ते विष्णो सुमतिं भजामहे इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधास" इत्यादिवेदरूपया ॥ २६ ॥ इत्यर्थ इति । भवतामंतर्यामित्वेन सर्वज्ञत्वाद्यूयमेव मदभीष्टदेवं कथयत न मत्तो निजानांदरगर्भां वाचं भाषयथेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एको मयेह भगवान्विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् ॥ अत्रागतास्तनुभृतां मनसोऽपि दूराद्ब्रूत प्रसीदत महानिह विस्मयो मे ॥ ॥२८॥ मैत्रेय उवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥ प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ॥ २९ ॥ देवा ऊचुः ॥ यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा ॥ सत्संकल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयम् ॥ ३० ॥ अथास्मदंशभूतास्त आत्मजा लोकविश्रुताः ॥ भवितारोंग भद्रं ते विस्रप्स्यंति च ते यशः ॥३१॥ एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः ॥ सभाजितास्तयोः सम्यग्दंपत्योर्मिषतोस्ततः ॥३२॥

प्रपद्येहमित्येकस्यैव निर्दिष्टत्वात् स च युष्मासु क इति युष्माभिरेव कथ्यतामित्यर्थः ॥ २७ ॥ अस्य प्रपंचः । एक इति । विविधैः प्रधानैरुपचारैः । विबुधप्रधान इति वा पाठः । प्रजननाय पुत्रोत्पत्त्यै चित्तीकृतश्चित्तेनैक्यं नीतः । मनसोऽपि दूरा अगोचराः संतः कथं नु त्रयोऽप्यत्रागताः ॥ २८ ॥ २९ ॥ ते त्वया यथा कृतः संकल्पस्तेन तथैव भाव्यं नान्यथा । यतः सत्संकल्पस्य सत्यसंकल्पस्य ते संकल्पः । तर्हि कथमेकस्मिन्ध्यायमाने त्रयः प्रतीताः स्थ तत्राहुः । यदेकं जगदीश्वराख्यं तत्त्वं भवान्ध्यायति त एते वयं त्रयोऽपि तदेवैकं तत्त्वं नास्माकं भेदोऽस्तीत्यर्थः॥ ३० ॥विस्रप्स्यंति विस्तारयिष्यंति । अंतर्भूतणिजर्थस्य सृप्लृगतावित्यस्य रूपम्॥ ३१ ॥ताभ्यां सम्यक्

तात्पर्यम् ॥ २७ ॥ तांस्तूष्णीं स्थितान्वीक्ष्य स्वाभिमतं स्पष्टयति अहो मद्भाग्यमलौकिकं यतोऽलभ्यलाभो जात इत्याह—महानिहेति ॥२८॥ प्रभो इति । भगवत्कथाश्रवणसमर्थत्वादुक्तं मैत्रेयेण ॥ २९॥ इत्यर्थ इति । भेदाभावज्ञापनायैवैकाह्वाने त्र्यागमनमिति भावः । अयं भावः—भवता य एव जगदीश्वर इति पूर्णषडैश्वर्यो भगवान्न विवक्षितः । न च महत्स्रष्टृत्वादिविश्वशक्तिकः पुरुषः विसर्गाद्यंशमात्रसिद्धिकामनया तावन्मात्रोपाधितयोपासनाप्रवृत्तेः । यदि च तत्तदुपासनामकरिष्यस्तदा तत्तद्रूपः सस एवाविरभविष्यदेव । विश्वेत्यादिपद्येप्युद्भवादिशब्दा विसर्गगततन्मात्रपरा एवातो जगदीश्वरशब्देनापि विसर्गादिमात्रशक्तिको विवक्षितः । स चैकत्वेनोपासितोपि'सृजामि तन्नियुक्तोहम्' इत्यादिन्यायेन सर्वतत्तच्छक्त्याश्रयत्वाच्छ्रीविष्णुत्वेन प्राप्तोऽपि तद्रूपतया न विवक्षितस्तद्विग्रहादिनिष्ठत्वाभावात् । अथ त्रयाणामभेदोपि न विवक्षितस्तेषां क एवेत्यादिविरोधात् । किं तु सामान्यतयैव विवक्षितः । सामान्यञ्च विशेषाद्विना नोपलभ्यत इत्यतस्त्रयाणामप्याविर्भावो योग्य एवेति तथैवाहुर्यद्वै ध्यायतीति संदर्भः । विश्वनाथस्तु—यत्—यं जगदीश्वरं भवान्ध्यायति ते जगदीश्वरा वयं सत्संकल्पस्य तवाभीष्टप्रदातारो भवामेत्यर्थः । अयं भावः—जगदीश्वरतुल्य एकः पुत्रो मे भूयादिति संकल्पे कतमो जगदीश्वरः स्यादिति संदेहेन त्रय एव वयं ध्याताः पुनश्च ध्यातेषु त्रिषु मध्ये जगदीश्वर एक आयात्विति पुनरेकस्य चित्तस्थीकृतत्वेपि त्रयाणामेवास्माकं जगत्यस्मिन्नैश्वर्य्यात्त्रय एवागता अस्माकं त्रित्वेप्यैक्याद्वयमेक एव नापि त्वया य एव परमेश्वर इति परमेश्वरशब्दः प्रयुक्तोऽत इंद्रशत्रो विवर्द्धस्वेत्यादौ संकल्पादपि साधनस्य प्राबल्यदर्शनात्साधनानुरूपं संकल्पानुरूपं च तव फलं भविष्यतीत्याह । तथा च विग्रहाणां भेदेपि विग्रहिण ऐक्यमेव एकस्यैवाश्विनीकुमाराद्वित्ववत्त्रित्वं तदुक्तं "तस्याग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुश्च" इति मैत्रेयोपनिषदि । पूर्वमप्युक्तं । "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः" इति नाममात्रेणैव भेदो न वस्तुत इति तात्पर्यम् ॥३०॥ तर्हि प्रसन्नाश्चेत्प्रजा मे दत्तेत्यत्रेर्जिह्वाग्रसंचलनावकाशमददाना आहुरथेति । अथैते वयमित्युक्त्यनंतरमिति वरं ददुरिति । अस्माकं त्रयाणामंशभूतास्त्रयः पुत्रास्ते भविष्यंति अभेददर्शित्वाभावेपि सत्यवक्तृत्वेन तुष्टा आहुः हे अंगेति ॥३१ ॥ काम्यते इति कामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोमोऽभूद् ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् ॥दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ॥ ३३ ॥ श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः ॥सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेंतरे ॥ उतथ्यो भगवान्साक्षाद् ब्रह्मिष्ठश्च बृहस्पतिः ॥ ३५ ॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि ॥ सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ॥ ३६ ॥ तस्य यक्षपतिर्देवः कुबेरस्त्विडविडासुतः ॥ रावणः कुंभकर्णश्च तथाऽन्यस्यां विभीषणः ॥ ३७ ॥ पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान् ॥ कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥ क्रतोरपि क्रिया भार्या वालखिल्यानसूयत ॥ ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥ ३९ ॥ ऊर्जायां जज्ञिरे पुत्रा वशिष्ठस्य परंतप ॥ चित्रकेतुप्रधानास्ते सप्त ब्रह्मर्षयोऽमलाः ॥ ४० ॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ॥ उल्बणो वसुभृद्यानो द्युमान्छक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतम् ॥ दध्यंचमश्वशिरसं भृगोर्वंशं निवोध मे ॥ ४२ ॥ भृगुः ख्यात्यां महाभाग पत्न्यां पुत्रानजीजनत् ॥ धातारं च विधातारं श्रियं च भगवत्पराम् ॥ ४३ ॥

सभाजिताः पूजिताः संतः ततः स्थानात्प्रतिजग्मुः ॥ ३२ ॥ अंगिरसो ब्रह्मणस्तृतीयपुत्रस्य । निबोध बुद्ध्यस्व ॥ ३३ ॥ ताः कन्या निर्दिशति । सिनीवालीति ।। ३४ ॥ ३५ ॥ पुलस्त्यो हविर्भुवि पत्न्यामित्यन्वयः । सोऽगस्त्यः जन्मांतरे दह्राग्निः जठराग्निः । विश्रवाश्च पुलस्त्यस्य सुत इति शेषः ॥ ३६ ॥ तस्य विश्रवस इडविडायां पत्न्यां जातः सुतः कुबेरः । अन्यस्यां भार्यायां केशिन्यां रावणादयस्त्रयः सुताः ॥ ३७ ॥ ३८ ॥ ज्वलतः प्रकाशमानान् ॥ ३९ ॥ चित्रकेतुप्रमुखा जज्ञिरे ते च सप्तर्षयो जाताः॥४०॥तानेवाह । चित्रकेतुरिति । वसुभृद्यानो नामैकः । शक्त्यादयोऽपरेऽन्यस्याः जाताः पुत्राः ।। ४१ ॥ ४२ ॥ ख्यात्यां

स चासौ वरश्चेति तमभिलषितवरमित्यर्थः । ताभ्यामत्र्यनुसूयाभ्याम् । तत ऋक्षगिरेः ॥ ३२ ॥ योगवित् योगशास्त्रकर्त्ता ॥ ३३ ॥ कृष्णशुक्लचतुर्दशीपंचदश्योरभिमानिन्यस्ताः क्रमाद्बोध्याः ॥ ३४ ॥ तत्पुत्रावंगिरःपुत्रौ । "साक्षाद्भगवान्प्रत्यक्षपूज्यः ब्रह्मिष्ठः वैदिकतमः बृहस्पतेर्न परः साम्नो विदुः" इति श्रुतेः । बृहत्या वाचः पालकत्वात्स्वामित्वाद्वा बृहस्पतिः "पारस्करप्रभृतीनि च संज्ञायाम्" इत्यत्रोक्त— "तद्बृहतोः" इत्यादिना सुट्तलोपाभ्यां सिद्धेर्विशेषणद्वयं बृहस्पतेरेवेति ॥ ३५ ॥ त्यक्त्वागादित्यगस्त्य इति त्यागो विषयाणां विंध्यगिरेर्वा ज्ञेयोऽत्र ॥ ३६ ॥ कुंबत्यन्येषामैश्वर्यमाच्छादयतीति कुबेरः । 'कुबि—(आच्छादने) धातोरौणादिकः प्रयोगः । यद्वा । कुत्सितं बेरं शरीरमस्येति कुबेरः पार्वतीशापाद्रोगाक्रांतदेह इति वाल्मीकीयादौ स्पष्टम् ॥ ३७ ॥ ३८ ॥ ३९ ॥ ऊर्जेत्यरुंधत्या एव नामांतरम् ॥ ४० ॥ शक्तिरादिर्येषां ते । अन्यस्या ऊर्ज्जेतरायाः ॥ ४१ ॥ पूर्वमथर्वा ब्रह्मपुत्रेष्वगणितोपि तत्पुत्र एव बोध्यः । किञ्च । चित्तिरिति शांताया एव नामांतरमस्ति ॥ ४२ ॥ पुत्री च पुत्री च पुत्रास्तान् "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्" इत्यनुशास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयतिं नियतिं चैव सुते मेरुस्तयोरदात् ॥ ताभ्यां तयोरभवतां मृकंडः प्राण एव च ॥ ४४ ॥ मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः ॥ कविश्च भार्गवो यस्य भगवानुशना सुतः ॥ ४५ ॥ त एते मुनयः क्षत्तर्लोकान्सर्गैरभावयन् ॥ एष कर्दमदौहित्रसंतानः कथितस्तव ॥ ४६ ॥ शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ॥ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः ॥ ४७ ॥ तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः ॥ ४८ ॥ पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः ॥ ॥ ४९ ॥ बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥ श्रद्धाऽसूत शुभं मैत्री प्रसादमभयं दया ॥ ५० ॥ शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥ योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत ॥ ५१ ॥ मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम् ॥ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ५२ ॥ ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतम् ॥ मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः ॥ ५३ ॥ दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ॥ मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिन्नराः ॥ ५४ ॥

पत्न्याम् । पुत्रान्पुत्रौ पुत्रीं च । तानेवाह । धातारमिति ॥ ४३ ॥ तयोर्धातृविधात्रोः ॥ ४४ ॥ कविश्च भार्गवो भृगोः पुत्रः यस्य कवेः सुत उशना ॥ ४५ ॥ ४६ ॥ अजात्मजो ब्रह्मपुत्रः न तु प्राचेतसः ॥ ४७ ॥ ४८ ॥ युक्तेभ्यः संयतेभ्यो मिलितेभ्यो वा ॥ ४९ ॥ ५० ॥ ५१ ॥ सर्वेषां गुणानामुत्पत्तिर्यस्यां सा ॥ ५२ ॥ ५३ ॥ ५४ ॥

नात् । श्रियं लक्ष्म्यंशभूतां कन्यामत एव भगवत्परामिति ॥ ४३ ॥ तयोस्ताभ्यां धातृविधातृभ्यां पुनस्ताभ्यां सकाशात्तयोरायतिनियत्योः क्रमेण मृकंडप्राणावभूताम् ॥ ४४ ॥ ४५ ॥ एते संप्रत्युक्तास्ते । 'सर्वे ते मुनयः' इति पाठस्तर्थिसंमतः क्वचित्तु 'नवैते' इत्यपि पाठः । सर्गैस्स्वरचनाभिर्लोकान्नानाजनानवर्द्धयन् । यद्वा । लोकान्भूरादीन् । दुहितॄणामयं दौहित्रस्स चासौ संतानः पुनः कर्दमशब्देन तत्पुरुषः । तव तुभ्यम् ॥ ४६ ॥ सद्यः श्रवणकाल एवा पर उत्कृष्टोऽवश्यमित्यर्थः । उपयेमे "उपाद्यमः स्वकरणे" इत्यात्मनेपदम् । अजात्मजो दक्षः ॥ ४७ ॥ तस्यां प्रसूत्याम् । विभुः प्रकृष्टकांतिः ॥ ४८ ॥ भवच्छिदे ज्ञानोपदेशेन संसृतिनिर्मूलकात् 'शिवरूपाज्ज्ञानमहम्' इत्यार्यास्तवोक्तेः । संयतेभ्यो जितेंद्रियेभ्यः तादृशां कन्यास्वीकारासंभवं मत्वाह—मिलितेभ्यो वेति ॥ ४९ ॥ श्रद्धायाः स्वस्वनामनिरुक्त्या सात्त्विकशक्तीनामधिष्ठात्र्यो देवतास्तदंशाश्च तदनुरूपा एव पत्नय इहायादेश आर्षः ॥ ५० ॥ स्मयं धर्मेषूत्साहम् । दर्पं तपोयोगादिषु सामर्थ्यप्रख्यापनम् । अन्यौ स्मयदर्पौ त्वधर्मवंश्यौ ज्ञेयौ ॥ ५१ ॥ गुणानां कल्याणगुणानामर्णवस्य हरेरुत्पत्तिर्यतः सा तथा शुद्धसत्त्वस्वरूपभगवत्प्रकाशिकाशक्तिरियं ज्ञेयेति चक्रवर्ती ॥ ५२ ॥ सुनिर्वृत्तं पूर्णानंदयुतमभ्यनंददभवत् । यद्वा । विश्वस्थमात्मानं श्लाघयामास धन्या वयं यतो भगवद्दर्शनादिना सर्वसुखमाप्स्याम इति । ककुभो दिशस्तासां प्रसादश्च दूरस्थदर्शनहेतुप्रकाशः । विशेषः वातप्रसादश्च तत्स्पर्शस्य सुखजनकत्वं सरितां प्रसादो नैर्मल्यादिरद्रीणां प्रसादश्च स्वांतस्थमण्यादीनां बहिराविष्करणम् । मनःप्रसादश्च कौटिल्यादित्याग इति विवेकः ॥ ५३ ॥ देवैरवाद्यंत ॥ ५४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलम् ॥ देवा ब्रह्मादयः सर्वं उपतस्थुरभिष्टवैः ॥ ५५ ॥ देवा ऊचुः ॥ यो मायया विरचितं निजयाऽऽत्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय ॥ एतेन धर्मसदने ऋषिमूर्तिनाऽद्य प्रादुश्चकार पुरुषाय नमः परस्मै ॥ ५६ ॥ सोऽयं स्थितिव्यतिकरोपशमाय सृष्टान्सत्त्वेन नः सुरगणाननुमेयतत्त्वः ॥ दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविंदम् ॥ ५७ ॥ एवं सुरगणैस्तात भगवंतावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरर्चितौ गंधमादनम् ॥ ५८ ॥ ताविमौ वै भगवतो हरेरंशाविहागतौ ॥ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५९ ॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकं पवमानं च शुचिं च हुतभोजनम् ॥ ६० ॥ तेभ्योऽग्नयः समभवंश्चत्वारिंशच्च पंच च ॥ त एवैकोनपंचाशत्साकं पितृपितामहैः ॥ ६१ ॥ वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः ॥ आग्नेय्य इष्टयो यज्ञे निरूप्यंतेऽग्नयस्तु ते ॥ ६२ ॥

उपतस्थुर्भेजुः ॥ ५५ ॥ निजया मायया यस्मिन्नात्मनि खे गगने रूपभेदं गंधर्वनगरमिवेदं विश्वं विरचितम् ॥ तस्यात्मनः प्रतिचक्षणाय प्रकाशनायात्मानं योऽद्य प्रादुश्चकार प्रकटितवांस्तस्मै पुरुषाय नमः । केन रूपेण प्रादुश्चकार ऋषेर्मूर्तिराकारो यस्मिंस्तेन रूपेण ॥ ५६ ॥ सोऽयं नोऽस्मान्सुरगणाननल्पकरुणायुक्तेन विलोकनेन विशिष्टनेत्रेण दृश्यात्पश्यतु । कथंभूतेन । यच्छ्रीनिकेतममलमरविंदं तत्क्षिपता तिरस्कुर्वता । कथंभूतः । अनुमेयं शास्त्रतो विचार्यं न त्वस्माकमपरोक्षं तत्त्वं यस्य । कथंभूतानस्मान् । स्थितेर्जगन्मर्यादाया व्यतिकरोऽन्यथात्वं तस्योपशमाय सत्त्वेन गुणेन सृष्टान् ॥ ५७ ॥ लब्धोऽवलोको यैः सुरगणैस्तैरभिष्टुतावर्चितौ संतौ ययतुः ॥ ५८ ॥ भुवो भारस्य व्ययाय नाशाय । चकार एकवाक्यत्वार्थः तौ च सांप्रतमिहागतावित्यर्थः । तदुक्तं तंत्रे । "अर्जुने तु नरावेशः कृष्णो नारायणः स्वयम्" इति यदूद्वहः श्रीकृष्णः कुरूद्वहोऽर्जनः उभावपि कृष्णनामानौ ॥ ५९ ॥ अग्न्यभिमानिनो देवान् । स्वाहा नाम तस्य भार्या । हुतभोजनमिति त्रयाणां विशेषणम् ॥ ६० ॥ पितरस्त्रयः पितामह एकस्तैः साकं सह ॥ ६१ ॥ वैतानिके वैदिके कर्मणि यज्ञे येषां नामभिराग्निदेवताका इष्टयो निरूप्यंते क्रियंते त एतेऽ

अभिष्टवैः स्तोत्रैः ॥ ५५ ॥ रूपभेदं मेघवृंदमिति विश्वनाथः । रूपं सौरचांद्रकिरणं धूल्यादिमयं भेदश्च तत्कृतः । द्वयोर्द्वन्द्वैक्यं तद्दर्शित्वात्तदाच्छादकत्वाच्चेति संदर्भः । रूपं नीलं नभ इत्येवमाकारकम् । भेदो घटाकाशादिमाययाधिष्ठानशक्त्या मिथ्यैव विरचितं तयेति सुष्ठु प्रतिभाति । षण्ढत्वं समाहारद्वंद्वत्वात् ॥ ५६ ॥ ५७ ॥ ५८ ॥ ताविमौ भगवतो हरेः श्रीकृष्णस्यांशौ कर्त्तारौ इह द्वापरांते यदूद्वहकुरूद्वहौ । कृष्णौ कृष्णार्जुनौ कर्मभूतावागतौ प्राप्तौ कृष्णार्जुनयोः स्वांशिनोस्तावंशौ नरनारायणौ प्रविष्टावित्यर्थः । तथैव भागवतामृते कारिका "कर्त्तारौ तौ हरेरंशौ नरनारायणावृषी । द्वापरांते कर्मभूतावायातौ कृष्णफाल्गुनौ ॥" इति । इत्यर्थ इति । याविमौ हरेरंशौ तावेवाधुनेह कृष्णार्जुनयोरागताविति भावः । अत्र प्रमाणमाह–तदुक्तमिति । नरस्यर्षेरावेशः प्रवेशः । स्वयं नारायणः कृष्णः कृष्णोऽस्त्याश्रयत्वेनास्येति कृष्णः । मत्वर्थीयोच् । द्वंद्वांते श्रूयमाणत्वादुद्वहपदमुभयत्रान्वेतीत्युक्तं यदूद्वहः कुरूद्वह इति ॥ ५९ ॥ त्रीन्पावकादीन् ॥ ६० ॥ तेभ्यस्त्रिभ्यः । पंचदशपंचदशपुत्रा अभवन्नित्यर्थः । सर्वसंख्यामाह–त इति ॥ ६१ ॥ यत एतेषामिष्टयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः ॥ साऽग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ॥ ६३ ॥ तेभ्यो दधार कन्ये द्वे वयुनां धारिणीं स्वधा ॥ उभे ते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥ ६४ ॥ भवस्य पत्नी तु सती भवं देवमनुव्रता ॥ आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥ ६५ ॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा ॥ अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ॥ ६६ ॥ इति श्रीमद्भा० म० चतुर्थस्कंधे मनुकन्यान्वये नरनारायणावतारवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ विदुर उवाच ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीम् ॥ १ ॥ कस्तं चराचरगुरुं निर्वैरं शांतविग्रहम् ॥ आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥

ग्नयो न लौकिकाः । अतो बहूनां न वैयर्थ्यमिति भावः ॥ ६२ ॥ सौम्याः सोमपाः येषामग्नौकरणमस्ति ते साग्नयः तद्रहितास्त्वनग्नयः ॥ ६३ ॥ तयोस्तु संततिर्नाभवज्जीवन्मुक्तत्वादित्याह । उभे ते इति ॥ ६४ ॥ गुणशीलत आत्मनः सदृशं देवमनुव्रताऽपि सती पुत्रं न लेभे ॥ ६५ ॥ तत्र हेतुः । स्वे पितरि दक्षेऽप्रतिरूपेऽसदृशे प्रतिकूले सतीत्यर्थः । आत्मना स्वयमेवात्मानं देहमजहात्त्यक्तवती । योगसंयुता योगमाश्रित्येति ॥ ६६ ॥ इति श्रीभा० म० चतुर्थे टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये प्रथमाध्यायोपक्षिप्तभवदक्षयोः ॥ विद्वेषे वर्ण्यते हेतुर्विश्वसृड्यज्ञसंभवः ॥ १ ॥ सतीं सतीनाम्नीम् ॥ १ ॥ न चासौ कस्यचिद्द्वेषार्ह इत्याह । क इति चराचरगुरुं जगतो दैवतं च तं को द्वेष्टि कथं च निर्वैरं द्वेष्टि । निर्वैरत्वे हेतुः । भावे क्तः । शांतं शांतिरेव विग्रहो यस्य । कुतः । आत्मन्येवारामो रतिर्यस्य ननु विषये तम् । यद्वा कः

संति अतो हेतोः । इति भाव इति । तदर्चनमृते यज्ञासिद्धिस्स्यादतस्ते सार्थका एवेत्याशयः ॥ ६२ ॥ ६३ ॥ तेभ्यः समुदितेभ्यः पितृभ्यः ॥ ६४ ॥ गुणशीलतः गुणैः शीलेन च तुल्यम् ॥ ६५ ॥ तत्र पुत्रालाभे । इत्यर्थ इति । असदृशपदेन सर्वोत्कर्षग्रहणं माभूदिति भावः ॥ ६६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे प्रथमोध्यायः ॥ १ ॥ प्रथमाध्याये 'पितर्यप्रतिरूपे स्व' इत्यादिनोपक्षिप्तः सूचितो यो भवदक्षद्वेषस्तत्र विश्वसृजां मरीच्यादीनां यागस्य संभवो भवनमेव हेतुरस्तीति द्वितीये वर्ण्यते (१) कस्माद्धेतोः । सतीम्—अन्वर्थनामत्वात्तत्पतिना द्वेषो न संगच्छते । भवस्य सौशील्याद्दक्षस्य तदभावेपि दुहितृवात्सल्यादपि द्वेषो न घटत इति भावः ॥ १ ॥ असौ भवः । सामान्यार्थकिंशब्दोपादाने 'कः सर्वमाराधयितुं समर्थः' इति न्यायेन तस्यापि प्रपंचवैचित्र्यात्कश्चिद्द्वेष्टा संभवत्येवेत्यस्वारस्यादाह—यद्वेति । इत्यर्थ इति । वैरत्वानप्यशांतदेहोपि । बहिर्दर्श्यपि जगदनादृतोपि गुरुर्न द्वेषार्हः । किञ्च अन्यगुणविचारस्तिष्ठतु भवस्य जगद्गुरुत्वे जग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदाख्याहि मे ब्रह्मञ्जामातुः श्वशुरस्य च ॥ विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती ॥ ३ ॥ मैत्रेय उवाच ॥ पुरा विश्वसृजां सत्रे समेताः परमर्षयः ॥ तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥ ४ ॥ तत्र प्रविष्टमृषयो दृष्ट्वार्कमिव रोचिषा ॥ भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः ॥ ॥५॥ उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः ॥ ऋते विरिंचं शर्वं च तद्भासाक्षिप्तचेतसः ॥ ६ ॥ सदसस्पतिभिर्दक्षो भगवान्साधुसत्कृतः॥ अजं लोकगुरुं नत्वा निषसाद तदाज्ञया ॥ ७ ॥ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः ॥ उवाच वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ॥ ८ ॥ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः ॥ साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ॥९॥ अयं तु लोकपालानां यशोघ्नो निरपत्रपः ॥ सद्भिराचरितः पंथा येन स्तब्धेन दूषितः ॥ १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् ॥ पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ॥ ११ ॥

प्रजापतिर्दक्षः कथं द्वेष्टि । एवंभूते तस्मिन्द्वेषोऽयुक्तोऽशक्यश्चेत्यर्थः ॥ २ ॥ यतो हेतोर्विद्वेषः यतो विद्वेषात्प्राणांस्तत्याज एतदाख्याहि ॥ ३ ॥ तदेवाख्यातुमितिहासं प्रस्तौति । पुरेति । समेता आसन् ॥ ४ ॥ प्रविष्टं दक्षमिति शेषः । महत्सदो महतीं सभाम् ॥ ५ ॥ स्वधिष्ण्येभ्यः स्वीयासनेभ्यः ॥ ६ ॥ ७ ॥ प्राक् स्वोपवेशनात्पूर्वमेव निषण्णमुपविष्टं मृडं शिवम् । तदनादृतस्तेनाभ्युत्थानादिभिरकृतादरः नामृष्यन्नासहत । वामं वक्रं यथा भवति तथाऽभिवीक्ष्य ॥ ८ ॥ मे वचनं श्रूयताम् । अज्ञानान्मत्सराच्च न ब्रुवतः ॥ ९ ॥ स्तब्धेनोचितक्रियाशून्येन । ध्वस्तेनेति पाठे भ्रष्टेन ॥ १० ॥ तदेवाह । एष इति । यद्यस्माद्विप्राग्निसमक्षं सावित्रीतुल्याया मे

दिष्टदेवत्वे च दक्षस्य जगदंतःपातित्वे द्वेषसंभावनापि नोचितेति भावः ॥ २ ॥ यत इत्युभयत्रान्वेति विशिष्टो द्वेषो विद्वेषः । ब्रह्मन्निति प्रश्नोत्तरसामर्थ्यमाह ॥ ३ ॥ ४ ॥ तत्र सत्रशालायाम् ॥ ५ ॥ ब्रह्मपुत्रत्वाद्रुद्रश्वशुरत्वाच्च नायं प्राकृतः पुरुष इति विमृश्य सभ्यादयस्तदादरं चक्रुरित्याह—उदतिष्ठन्निति । तस्य दक्षस्य भासा तेजसा क्षिप्तं संक्षिप्तं तेजो येषां ते तथा क्वचित् 'क्षिप्तचेतस' इति पाठस्तत्र कौतूहलचित्ता इत्यर्थः ॥ ६ ॥ भगवान् ज्ञानवान् । तदाज्ञया ब्रह्माज्ञया ॥७॥ तेन मृडेन । आदिनासनादिग्रहः ॥ ८ ॥ मे वचनमिति शेषः । वृत्तं चरितं वक्तुं प्रवृत्तस्य ममासाधूनां निंदा स्यादेव तत्र भवद्भिरपरामर्शेन दुःखं न प्राप्यतामिति ध्वनिः। शालिक्षेत्राणां यवसाद्यपसारणाभाव इव साधूनामप्यसाधुद्वेषाभावे दुःखं स्याद्द्वेष्टृजनस्य तेषु साधुष्वपराधोपि स्यादित्यनुध्वनिः । ननु शिवस्यासाधुत्वमज्ञानादेव त्वयोच्यते इति चेत्तत्र ममाज्ञानमण्वपि नास्ति मत्सरस्तु मया जन्मारभ्य न परिचीयित इत्याह—नाज्ञानादिति ॥ ९ ॥ अस्यासाधुत्वमेकाग्रमनसा शृणुतेत्याह—लोकपालानां यशोघ्न इति । तुल्यजातीनां सतामेकस्याप्रतिष्ठायां सर्वेषामेव दुर्यशो लोकैरुद्घुष्यत इति भावः । इंद्रद्वेषिविद्युन्माल्यादिराज्ये प्रवर्षणाभावे स्वभक्ततयाऽनेन वृष्ट्या तद्यशो हृतं, तथा स्वतृतीयाक्ष्युत्थकोपाग्निना कामादिदाहकतयाऽग्नेरपि यशो हृतं, तत्कार्यकरणान्मृत्युंजयत्वेन तदनधीनत्वाद्यमस्य, तथा रक्षोधार्य्यासृगार्द्रगजचर्मधारित्वेन निर्ऋतेस्तथा वरुणपाल्ययादोगणाधिष्ठितगंगाधृतेर्वरुणस्य, प्रलये निजनिःश्वासशोषिताब्धित्वेन शोषणरूपवायुकार्यकर्तृतया वायोः, सर्वनिधीशकुबेरसखित्वेपि कपालित्वेन कुबेरस्य, तथा ब्रह्मसृष्टसृष्टिभक्षकसृष्टिसर्जकत्वेन ब्रह्मणः, धराधर्तृशेषधारित्वेन शेषस्य च यशोनाशिनः यशोनाशश्च तत्तत्कर्मोल्लंघनतद्वत्करणतदनधीनत्वादिभिर्भवत्येवेति । वस्तुतस्तु तदीयसरस्वती शिवं स्तौति यथा यशोघ्नस्तेषां स्वयशसा यशसस्तिरस्कर्ता निर्गता अपत्रात्राणं येषां तानशरणान्पातीति सः । केन प्रकारेणेत्यत आह—येनासुरादिना सद्भिराचरितः पंथा दूषितस्तस्य। ध्वस्तेन ध्वंसनेन 'स्तब्धेनेति' पाठे स्तब्धानां गर्ववतामिनाः स्वामिनस्तैर्दूषितः पंथा येन हेतुना सद्भिराचरितः दुष्टनाशनेन पुनस्सद्धर्मप्रवर्त्तकः ॥ १० ॥ "अन्वियातां महावेगैरश्वैराजन्गुरुद्वुहम्" इति स्यमंतकोपाख्याने श्वशुरेपि गुरुपदप्रयोगात् । तदुक्तं पाद्मे "उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः । मातुलः श्वशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः ॥ प्रत्युत्थानाभिवादार्हे वाचाऽप्यकृत नोचितम् ॥ १२ ॥ लुप्तक्रियायाऽशुचये मानिने भिन्नसेतवे ॥
अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरम् ॥ १३ ॥ प्रेतावासेषु घोरेषु प्रेतैर्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन् ॥ १४ ॥
चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः ॥ शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः ॥ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनाम् ॥ १५ ॥
तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे ॥ दत्ता बत मया साध्वी चोदिते परमेष्ठिना ॥ १६ ॥

दुहितुः पाणिमग्रहीत् ॥ ११ ॥ मृगशावस्य हरिणबालस्याक्षिणी इवाक्षिणी यस्याः । प्रत्युत्थानाभिवादार्हे मय्युचितं सन्मानं वाचाऽपि नाकरोत् ॥ १२ ॥ अनर्हाय कन्या दत्तेत्यनुतप्यमान आह । लुप्तक्रियायेति सार्धैश्चतुर्भिः । उशतीं शुद्धां वेदलक्षणां गिरम् ॥ १३ ॥ प्रेतावासेषु श्मशानेषु व्युप्ता विकीर्णाः केशाः यस्य ॥ १४ ॥ चिताभस्मना कृतं स्नानं येन । प्रेतानां स्रजो माल्यानि यस्य स प्रेतस्रक् । नृणामस्थीनि भूषणानि यस्य । शिव इत्यपदेशो नाममात्रं यस्य । तमोमात्रात्मकः केवलतमो रूप आत्मा स्वभावो येषाम् ॥ १५ ॥ उन्मादा भूतविशेषास्तेषां नाथाय दुर्हृदे दुष्टचित्ताय । बतेति खेदे ॥ वास्तवस्त्वयमर्थः । लुप्ताः क्रिया यस्मिन् परब्रह्मरूपत्वात् अत एव नास्ति शुचिर्यस्मात् अमानिने अभिन्नसेतवे इति च छेदः । तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्यादिति लज्जादिना दातुमनिच्छन्नपि तत्संबंधलाभेन दत्तवान् । शूद्रायेत्यनर्हत्वमात्रे दृष्टांतो न हीनत्वे पूर्वापरस्ववचनविरोधापत्तेः । एतदुक्तं भवति । यथा कश्चिच्छूद्राय वेदमर्थलोभेन ददाति तद्वत् इति प्रेतावासेष्वित्यादि सर्वं विडंबनमात्रमिति स्वयमेवाह । उन्मत्तवदिति । अन्यथोन्मत्त इत्येवावक्ष्यत् । अशिवो नास्ति शिवो यस्मात् । अमत्तोऽमत्तजनप्रिय इति च छेदः । पतिः प्रमथभूतानामिति भक्तवात्सल्यमाह । तामसानपि दोषमपनीय पातीति । नष्टानामपि शौचं शुद्धिर्यस्मात् । दुष्टेष्वप्येते मयाऽनुकंप्या इति हृन्मनो यस्य स दुर्हृ

रश्चैव मातामहपितामहौ ॥ वर्णज्येष्ठः पितृव्यश्च पुंसोऽत्र गुरवः स्मृताः'' इति वर्णेषु ज्येष्ठो ब्राह्मणः प्राणिमात्रस्य गुरुः ''वर्णानामाश्रमाणाञ्च गुरुर्विप्रो न चेतरः । मंत्रोपादानपठने सर्वसंस्कारकर्मसु''॥ इति संहितोक्तेः । स्तुतिपक्षे तु—ममाशिष्यतामशिष्टतामेतावद्दिनपर्यंतं गूढामप्येष प्राप्तः सर्वज्ञत्वात्प्रथममेवावगतवानत एवोत्थानादिकं न कृतवानिति भावः । तदपि यद् दुहितुः पाणिमग्रहीत्तत्सावित्र्या इव मद्दुहितर्य्येव गुणमपेक्ष्येति भावः । मे कीदृशस्य साधुवत्साधोरिव मथुराया इवेति मथुरावत् पाटलिपुत्रे प्राकार इतिवत्प्रयोगः । वस्तुतस्त्वसाधोरित्यर्थः ॥ ११ ॥ मर्कटान्मर्कटतुल्यान्कामिनोपि कृपयालोचते तत्कामान्संपादयतीति तथा । तस्मिन्प्रत्युत्थानाभिवादार्हे मल्लक्षणो जनो वाचाप्युचितं नाकृतेति धिङ्मामिति भावः ॥ १२ ॥ १३ ॥ १४ ॥ शिवो मंगलरूपोऽपदेशोऽपकृष्टदेशो यस्मात्स तथा ॥१५॥ अत एव परब्रह्मरूपत्वादेव निंदापक्षे परमेष्ठिना चोदिते सति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ विनिंद्यैवं स गिरिशमप्रतीपमवस्थितम् ॥ दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे ॥ १७ ॥ अयं तु देवयजन इंद्रोपेंद्रादिभिर्भवः ॥ सहभागं न लभतां देवैर्देवगणाधमः ॥ १८ ॥ निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापम् ॥ तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनम् ॥ १९ ॥ विज्ञाय शापं गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः ॥ दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥ २० ॥ य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥ २१ ॥ गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया ॥ कर्मतंत्रं वितनुते वेदवादविपन्नधीः ॥ २२ ॥ बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीकामः सोऽस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ॥ २३ ॥

तस्मै । बतेति हर्षे । ब्रह्मणो वाक्याल्लज्जाभयादिकं परित्यज्य दत्तेत्यर्थः ॥ १६ ॥ अप्रतीपमप्रतिकूलं यथा भवत्येवमवस्थितमपि विनिंद्य ॥ १७ ॥ देवानां यजनसमये देवैः सह भागं न लभतां किं तु तेभ्यः पूर्वमेव लभताम् अग्रभोजित्वात् । यद्वा तेषु भुक्तवत्सु लभतां सर्वपोषकत्वात् । तत्र हेतुः । देवगणोऽधमो यस्मात्सः ॥ १८ ॥ स दक्षस्तस्मात्स्थानाद्विनिष्क्रम्य जगाम । हे कौरव्य ॥ १९ ॥ गिरिशस्यानुगानामग्रणीर्मुख्यः । रोष एव कषायस्तेन दूषितः आरक्तनेत्र इत्यर्थः । तस्य गिरिशस्यावाच्यतां वचनानर्हतां निंद्यतामित्यर्थः । तेभ्योऽपि शापं विससर्ज ॥ २० ॥ दक्षं शपति सार्धैस्त्रिभिः । एतन्मर्त्यं दक्षशरीरमुद्दिश्य श्रेष्ठं मत्वा । अप्रतिद्रुहि प्रतिद्रोहमकुर्वति । पृथग्दृष्टिर्भेददर्शी । तत्त्वतः परमार्थात् ॥ २१ ॥ अज्ञत्वमेवाह । गृहेष्विति । कर्मतंत्रं कर्मपरिकरम् । वेदे ये वादा अर्थवादा "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादयस्तैर्विपन्ना विनष्टा धीर्यस्य ॥ २२ ॥ परो देहादिस्तमेवात्मत्वेनाभितो ध्यातुं शीलं यस्यास्तया बुद्ध्या विस्मृताऽऽत्मनो गतिस्तत्त्वं

मदिच्छा तु नासीद्ब्रह्माज्ञापालनमेव मद्दुःखदमभूदिति ब्रह्माप्यनभिज्ञ इति ध्वनिः । मत्पित्रेत्यनुक्तेः । परमेष्ठिनेति नामोच्चारणेन च सोपि मत्पितृत्वायोग्य एवेत्यनुध्वनिः ॥ १६ ॥ १७ ॥ तत्र देवैस्सह भागालाभे । इत्यर्थ इति, अधमैस्सह भोजनं नोचितमितिभावः । पूर्वव्याख्यानेऽग्रभोजित्वादिति स्वामिचरणैर्हेतुरुक्तस्तदर्थस्तु ब्राह्मणत्वादित्येतच्च तृतीयस्कंधे दित्युपाख्याने निरूपितम् । "अग्रजन्माग्रभुग्विप्रो ब्राह्मणश्च द्विजोत्तमः" इति धरणिः । वस्तुतस्तु महादेवपदवाच्यत्वात्स्वस्य स्वेतरान्बालान्मत्वा पूर्वमेव भोजयतीत्यत उक्तं यद्वेति॥१८॥अत्र मदन्यः कोपि न युक्तवादी ततोस्यामधार्मिकसंकुलायां न स्थेयमिति कोपेन ततो निर्ययावित्याह—निषिध्यमानः मा क्रुध्य मा गच्छेत्याद्युच्यमानः । हे कौरव्येति । यथा कौरवाणां दुर्योधनादीनां सभातस्त्वं निर्गतस्तानयोग्यान्मत्वेति कुरुभ्यो निर्गतः कौरव्यस्तदभिप्रायेयमिति । 'सानिर्गतः कौरवपुण्यलब्धः' इत्युक्तेः॥१९॥कषायो रागहेतुर्द्रव्यविशेषो गैरिकादिः । इत्यर्थ इति । अतीव कुपित इति भावः । इत्यर्थ इति । स्तुतेर्वाच्यत्वान्निन्दैवावाच्येति भावः । दारुणं दुःसहम् । तेभ्यो द्विजेभ्यः अन्वमोदन् । अभ्युपागमन्सुष्ठु कृतमित्यवोचन्नित्यर्थः॥२०॥पृथग्दृष्टिः स्वस्माद्भिन्नेषु देहापत्यकलत्रादिष्वेव दृष्टिर्यस्य सः । परमार्थाद्भगवत्स्वरूपात् ॥ २१ ॥ कूटधर्मेषु तुच्छफलप्रदधर्मवत्सु । 'कूटस्तुच्छेऽनृते राशौ' इति कोशात् ॥२२॥ अतोऽनात्मज्ञत्वादेव । "वस्तौ निवासे छागे च वस्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः ॥ संसरंत्विह ये चामुमनु शर्वावमानिनम् ॥२४॥ गिरः श्रुतायाः पुष्पिण्या मधुगंधेन भूरिणा ॥ मथ्ना चोन्मथितात्मानः संमुह्यंतु हरद्विषः ॥ २५ ॥ सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः ॥ वित्तदेहेंद्रियारामा याचका विचरंत्विह ॥ २६ ॥ तस्यैवं ददतः शापं श्रुत्वा द्विजकुलाय वै ॥ भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययम् ॥२७॥ भवव्रतधरा ये च ये च तान्समनुव्रताः ॥ पाखंडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः ॥ २८ ॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः ॥ विशंतु शिवदीक्षायां यत्र दैवं सुरासवम् ॥ २९ ॥ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ ॥ सेतुं विधारणं पुंसामतः पाखंडमाश्रिताः ॥ ३० ॥

येन अतः पशुतुल्यः । अतितरां स्त्रीकामोऽस्त्विति द्वितीयः शापः । बस्तस्य छागस्य मुखमेव मुखं यस्येति तृतीयः शापः ॥ २३ ॥ अयं च शापोऽस्यानुरूप एवेत्याह विद्याबुद्धिः इयमेव तत्त्वविद्येति बुद्धिर्यस्य । अतोऽसौ जड एव । द्विजान् शपति संसरंत्विति सार्धद्वाभ्याम् । शर्वमवमन्यत इति तथा तममुं दक्षं ये चानुवर्तंते ते संसरंतु जन्ममरणाद्यनुभवंत्वित्येकः शापः ॥ २४ ॥ श्रुताया वेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादा मनःक्षोभकत्वात् संति यस्याः । अर्थवादबहुलाया इत्यर्थः । मधुगंधतुल्येन प्रोचनेन मथ्ना मनःक्षोभकेणोन्मथित आत्मा मनो येषां ते संमुह्यंतु कर्मस्वासक्ता भवंत्विति द्वितीयः शापः ॥ २५ ॥ सर्वभक्षा भक्ष्याभक्ष्यविचारशून्याः । वृत्त्यै देहादिपोषणाय न तु मोक्षाय धृतानि विद्यातपोव्रतानि यैः । वित्तादिष्वेवारामो रतिर्येषां ते । याचकाः संतो विचरंत्विति च शापचतुष्टयम् ॥ २६ ॥ तस्य प्रत्यसृजत्प्रत्यदात् । शापरूपं ब्रह्मदंडम् ॥ २७ ॥ सच्छास्त्रस्य पारिपंथिनः प्रतिकूलाः ॥ २८ ॥ सुरा गौडी पैष्टी माध्वी च । आसवं तालादिसंभवं मद्यम् । द्वंद्वैक्यात्षंढत्वम् । तद्यत्र दैवं पूज्यं देवतावदादरणीयमिति वा ॥ २९ ॥ ब्रह्म वेदम् । कथंभूतम् । सेतुं मर्यादारूपम् । तदेवाह । पुंसां वर्णाश्रमाचारवतां विधारणं धारकम् ॥ ३० ॥

पक्के च सर्पिषि'' इति निरुक्तिः ॥ २३ ॥ अतः क्षयिष्णुफलकर्मसु तत्त्वबुद्धित्वादसौ दक्षः ॥ २४ ॥ अर्थवादाः स्तुनिनिंदान्यतरप्रतिपादकवाक्यानि । इत्यर्थ इति । प्ररोचकवाक्याधिक्ययुक्ताया इति भावः ॥ २५ ॥ सर्वभक्षा इत्येकः । वृत्त्यै धृतविद्यादिर्द्वितीयः । वित्तारामादिस्तृतीयः । याचका इति चतुर्थः शापः ॥२६॥ ब्राह्मणानामिदमेवायुधमिति द्योतनाय ब्रह्मदंडमित्युक्तं ''वाग्वज्रा मुनयः किल'' इति न्यायेन दुरत्ययमपाकर्तुमशक्यम् ॥२७॥ भवस्य व्रतं नियमो जटाभस्मास्थ्यादिधारणं तद्धारिणो ये पाशुपता ये च तदनुयायिनस्ते सर्वे सच्छास्त्रं वेदस्तत्परिपंथिनस्तद्बहिर्मुखाः संतः पाखंडिनस्तन्निन्दकाः संत्विति ॥२८॥ मद्यादिपूजा त्वप्रसिद्धेति चेदाह— देवतावदिति । यद्वा । देवेभ्यो देयं दैवमिति । यद्वा । असूनां तर्पकमासवं सुरैवासवं सुरासवं नैवेद्यस्थानापन्नमुपलक्षणं चैतन्मांसस्य । शिवदीक्षायां चांडाला दिजन्मनामपि ''प्रवृत्ते शांभवे यागे नराः सर्वे द्विजोत्तमाः ॥ स्युस्तत्र शंका नो कार्या स्पर्शने भोजनादिषु ॥'' इति ''सर्वं वस्तु पवित्रं स्यात्सर्वा भोग्याः स्त्रियस्तदा'' इत्यादिना विप्रत्वकारणलक्षणायाम् ॥२९॥ गिरः श्रुताया इत्यादिना वेदं, सर्वभक्षा इत्यादिशापमिषेण ब्राह्मणांश्च ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष एव हि लोकानां शिवः पंथाः सनातनः ॥ यं पूर्वे चानु संतस्थुर्यत्प्रमाणं जनार्दनः ॥ ३१ ॥ तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनम् ॥ विगर्ह्य यात पाखंडं दैवं वो यत्र भूतराट् ॥ ३२ ॥ मैत्रेय उवाच ॥ तस्यैवं वदतः शापं भृगोः स भगवान्भवः ॥ निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥ ३३ ॥ तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् ॥ संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥ ३४ ॥ आप्लुत्यावभृथं यत्र गंगा यमुनयाऽन्विता ॥ विरजेनात्मना सर्वे स्वंस्वं धाम ययुस्ततः॥३५॥ इति श्रीभागवते० म० चतुर्थस्कंधे दक्षशापवर्णनं नाम द्वितीयोऽध्यायः॥२॥ मैत्रेय उवाच ॥ सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः ॥ जामातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥ १ ॥

सेतुत्वं प्रपंचयति द्वाभ्याम् । एष वेदलक्षण एव शिवः पंथा यतो यं पूर्वे ऋषयोऽनुसंतस्थुराश्रितवंतः । यद्यस्मिन् जनार्दनः प्रमाणं मूलम् ॥ ३१ ॥ भूतराड् भूतानां तामसानां पतिः एवं तस्य वदतः सतः ॥ ३२ ॥ अन्योन्यशापेनोभयोर्नाशाद्विमना इवेति । तथापि भगवदनुगृहीतानां नाशो न स्यादिति भावः ॥ ३३ ॥ ऋषभः सर्वश्रेष्ठो हरिर्यत्र ईज्यः पूज्यस्तत्सत्रं सम्यग्विधाय । हे महेष्वास विदुर ॥ ३४ ॥ यत्र प्रयागेऽन्विता तत्रावभृथस्नानं कृत्वा ततः स्थानाद्ययुः ॥ ३५ ॥ इति चतुर्थे टीकायां द्वितीयोऽध्यायः ॥ २ ॥ तृतीये तु सती तातयज्ञोत्सवदिदृक्षया ॥ गमिष्यंती महेशेन वारिता नीतिहेतुभिः ॥ १ ॥ ध्रियमाणयोरवतिष्ठमानयोः । धृङ्अ

तदेव सेतुत्वमेव । अतो ब्रह्मब्राह्मणनिंदनात् । "पालनात्सर्वधर्माणां पाशब्देन त्रयी मता । तां खंडयति यो मोहात्पाखंडः स प्रकीर्त्तितः ॥" इत्युक्तलक्षणं पाखंडम् ॥ ३० ॥ मूलं स एवात्र साक्षी प्रष्टव्य इति भावः । तीर्थस्तु—यद्यस्य प्रमाणं सम्यग्वक्ता । "प्रमाण बोधनेयत्तामर्यादाशास्त्रहेतुषु । सम्यग्वक्तरि वाथ स्यात्प्रमाणं मरणे गतौ ॥" इति यादवः ॥ ३१ ॥ यत्र पाखंडमार्गे वो युष्माकम् । विश्वनाथस्तु—वेदनिंदायाः फलमिदं भाव्यमेव मदभिशापश्च पिष्टपेष इवेति भावः । भूतानां राजा भूत एवेति निदाभूतेषु सर्वप्राणिषु राजत इति स्तुतिः ॥ ३२ ॥ इति भात्र इति । 'न मे भक्तः प्रणश्यति' इति श्रीगीतोक्तेः । 'यत्प्रमाणं जनार्दनः' इति श्रुत्वा कदाचिज्जनार्दनं तद्भक्तांश्च प्रति किमप्यवद्यं क्रोधादेव नंदीश्वरो वदेदिति शंकमानो भवस्ततो निष्क्रांत इत्याह—तस्यैवमिति विमना इवेति । वस्तुतस्त्वात्मारामत्वान्न विमनास्तेन द्वयोः शापाभ्यां कर्मशैवमार्गौ परिहृत्य वैष्णवमार्ग एव शुद्धत्वेन ग्राह्य इह प्रकरणव्यंग्यं वस्त्वेतदेवेति तात्पर्यम् ॥ ३३ ॥ एवं विवादेपि सत्रांतरायो नाभूदित्याह—तेपीति । सानुगदक्षरुद्रौ विनापि सत्रं संविधाय ययुर्न च तद्विरोध जन्यः कोपि विघ्नोऽभूत्तत्र हेतुः यत्र हरिरेवेज्यानामृषभ इति । संध्यभावस्त्वार्षः । महेष्वासेति । यथा त्वां महेष्वासं विनैव भारतयुद्धमभूत्तथा पिनाकपाणिं विनापि यागोऽभूदित्यभिप्राया संबुद्धिः ॥ ३४ ॥ अस्यैव कर्मणः स्वाभीष्टदत्त्वादिदं समाप्य न कर्मांतरं तैरारब्धम् । किं तु स्वगृहगमनमेवानुष्ठितमित्याह स्वंस्वमिति॥३५॥ इति श्रीमद्भागवतदीपिकाप्रकाशे चतुर्थस्कन्धे द्वितीयोऽध्यायः॥२॥ तातो दक्षः । नीतियुक्तैर्हेतुभिर्वाक्यलक्षणैः (१) शिवस्य तु द्वेषस्तदज्ञान एव न तु तस्मिन्बाले पितुरिवेति । "द्वयोर्द्वित्वं समादाय त्रयाणां त्रित्वमेव च । विशेषणे स्याद्द्वित्वादि विशेष्यप्रत्ययस्य च ॥" इत्युक्तेर्विद्विषतोरिति षष्ठीद्विवचनम् ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना ॥ प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥ २ ॥ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च ॥ बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥ ३ ॥ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः ॥ आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥ ४ ॥ तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम् ॥ सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवम् ॥ ५ ॥ व्रजतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः ॥ विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः ॥ ६ ॥ दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः ॥ पतिं भूतपतिं देवमौत्सुक्यादभ्यभाषत ॥ ७ ॥ सत्युवाच ॥ प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल ॥ वयं च तत्राभिसराम वाम ते यद्यर्थिताऽमी विबुधा व्रजंति हि ॥ ८ ॥ तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः ॥ अहं च तस्मिन्भवताभिकामये सहोपनीतं परिबर्हमर्हितुम् ॥ ९ ॥

वस्थान इत्यस्मात् ॥ १ ॥ यद्यपि रुद्रविहीनो यज्ञो नास्त्येव तथापि दक्षस्य रुद्रपरित्यागो द्वेषाद्गर्वाच्च । तत्र द्वेषे हेतुरुक्तः । गर्वे हेतुमाह । यदा तु प्रजापतीनामाधिपत्येऽभिषिक्तस्तदा तस्य स्मयो गर्वोऽभवत् ॥ २ ॥ गर्वादेव ब्रह्मिष्ठान्सेश्वरानभिभूय तिरस्कृत्य । "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत" इति श्रुतेर्वाजपेयेनेष्ट्वा समारेभे ॥ ३ ॥ कृतस्वस्त्ययनाः कृतमंगलाः सभर्तृका इति दक्षिणादिभिः प्रथममर्हितानामपि पत्न्यर्हणे पुनरर्हणमुक्तम् ॥ ४ ॥ तत्तदा खेचराणां प्रजल्पतां सतां पितृयज्ञमहोत्सवं श्रुत्वा तत्र प्रव्रजंतीरुपदेवानां गंधर्वादीनां वरस्त्रियश्च स्वस्य निलयस्याभ्याशे समीपे दृष्ट्वौत्सुक्यात्पतिमभ्यभाषतेति त्रयाणामन्वयः ॥ ५ ॥ कथंभूताः स्त्रियो दृष्ट्वा विमानानि यानानि यासां ताः । प्रेष्ठैः सहिताः । निष्काणि पदकानि कंठेषु यासाम् । शोभमानानि वासांसि यासाम् ॥ ६ ॥ लोलानि चंचलान्यक्षीणि यासाम् । मृष्टान्युज्ज्वलानि कुंडलानि यासां ताः ॥ ७ ॥ निर्यापितः प्रवर्तितः । हे वाम शिव ते यद्यर्थिता इच्छा तर्हि वयं च तत्राभिसराम गच्छामः । न चाद्यापि यागो निवृत्तो यतोऽमी विबुधा व्रजंति ॥ ८ ॥ औत्सुक्यं प्रकटयंत्याह तस्मिन्निति षड्भिः । पितृभ्यामुपनीतं दत्तं परिबर्हमलंकारादिद्रव्यं भवता सहार्हितुं स्वीकर्तुमभिकामये। आर्हितमिति पाठे तत्कृतं परिबर्हमिच्छामीति ९ ॥

तत्र द्वयोर्मध्ये द्वेषे हेतुर्नत्यभावादिरुक्तः ॥ २ ॥ पाठान्तरे—वाजि पेयं यत्र स वाजिपेयो यागभेदः । आमिक्षावशिष्टं जलं वाजीत्युच्यते इति । "आमिक्षा सा श्रितोष्णे या क्षीरे स्याद्दधियोगतः" इत्यमरः । श्रुत्यंतरे च "वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति । वाजिसंज्ञका देवा अपि संति तेभ्यो वाजिनं दद्यादिति । "आमिक्षातोऽवशिष्टं यद्वारि तद्वाजि संस्मृतम्" इति कोशांतराच्च । सेश्वरान् । भवं तत्पक्षीयांश्च भागदानामंत्रणायकरणेन तिरस्कृत्य ॥ ३ ॥ तस्मिन्यज्ञे । कृतमंगलाः कृतार्हणाः ॥ ४ ॥ खेचराणां विद्याधरादीनाम् ॥ ५ ॥ ६ ॥ भूतानां सर्वदेहिनां पतिमीश्वरम् । औत्सुक्यादुत्कंठातः ॥ ७ ॥ प्रजापतयोऽनेके संतीति चेत्तत्राह । ते श्वशुरस्येति । यज्ञपदोपादानात्तत्र तव मुख्यभागित्वमितोऽवश्यं तत्र गंतव्यमिति ध्वनितम् । वामेत्यामंत्रणेनात्र वक्रता न विधेया । सरलोसि सुंदरोसि वा तेन गंतव्यमेव 'वामो वक्रेऽतिसुंदरे' इति धराणिः ॥ ८ ॥ तत्र तव मम वा किं कार्यमत आह—तस्मिन्निति । तासां सभर्तृकाणामर्हणमिव ममापि सभर्तृकाया अर्हणं भवत्विति कामय इत्याह—अहञ्चेति । "परिबर्हो राजयोग्यद्रव्यपरिच्छद इति मेदिनी" ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र स्वसृर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरम् ॥ द्रक्ष्ये चिरोत्कंठमनाः सहर्षिभिरुन्नीयमानं च मृडाध्वरध्वजम् ॥ १० ॥ त्वय्ये तदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकम् ॥ तथाऽप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिम् ॥११॥ पश्य प्रयांती रभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः ॥ यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुभिः ॥ १२ ॥ कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते ॥ अनाहुता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनम् ॥ १३ ॥ तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान्कारुणिको बतार्हति ॥ त्वयात्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता माऽनुगृहाण याचितः ॥ १४ ॥

स्वसृर्भगिनीः भर्तृभिः संमिताः सदृशीः सहिता इत्यर्थः । क्लिन्नधियं स्नेहार्द्रचित्ताम् । चिरमुत्कंठमुत्सुकं मनो यस्याः साऽहं द्रक्ष्यामि । हे मृड उन्नीयमानं प्रवर्त्यमानमध्वरेषु ध्वजमिव दृश्यं श्रेष्ठमध्वरम् । यद्वा । उत्क्षिप्यमाणं यज्ञे केतुं यूपं वा ॥ १० ॥ अहो किं तत्राश्चर्यं येन तवैतदौत्सुक्यमिति चेदत आह । त्वयीति । हे अज एतद्विश्वमाश्चर्यरूपं त्वय्येव त्वन्मायया रचितं विभात्यतो यद्यपि तव नाश्चर्यबुद्धिस्तथाऽप्यहं योषिदुत्सुकस्वभावा तव तत्त्वं न जानाम्यतो दीना कृपणा सती हे भव मे भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ॥ ११ ॥ दिदृक्षामेव कैमुत्यन्यायेन व्यनक्ति । पश्येति द्वाभ्याम् । हे अभवेति । सुहृद्वियोगदुःखं त्वया नास्वादितमिति भावः । अन्या योषितः संबंधरहिता अपि प्रयांतीः पश्य । कांतसखा भर्तृसहिताः । वरूथशः संघशः । कथंभूताः । यासां विमानैर्नभो मंडितं ताः । हे शितिकंठ नीलकंठेति परानुग्रहाय त्वया विषमपि भक्षितमिति सूचयति ॥ १२ ॥ तदा हे सुरश्रेष्ठ पितृगेहोत्सवं निशम्य सुताया देहः कथं नेंगते द्रष्टुं न प्रचलति । तथाऽप्यनाहूताः संतः कथं गच्छामस्तत्राह । सौहृदं सुहृत्संबंधि केतनं गृहं तथा भर्त्रादीनां च गृहमनाहूता अप्यभियंति संतः । ह्रस्वत्वमार्षम् ॥ १३ ॥ हे अमर्त्य तत्तस्मात्प्रसीद इदं मे वांछितं कर्तुं

किं परिबर्हार्थिनी यियाससीति तत्राह—तत्रेति।तत्र यागोत्सवे।'यज्ञानां जपयज्ञोस्मि' इति श्रीमुखोक्तेर्भगवत्स्वरूपयागस्य सर्वयागश्रेष्ठत्वमस्तीति चेत्तत्राह—यद्वेति।यूपस्य दूरतो दृश्यत्वात्केतुत्वमेवेत्याह—यूपं वेति।मृडेति।सर्वसुखदत्त्वात्तव मदभिलषितपूरणेन मह्यमपि तद्देयमित्याह ॥ १० ॥ अजत्वात्तव जन्मभूरेव नास्ति यतस्तत्रापि मत्तुल्यमौत्सुक्यं स्यादित्यभिप्रायः । अतस्त्वन्मायारचितत्वात् । अतस्त्वत्तत्त्वानज्ञभिन्नत्वात् । हे भवेति । मंगलरूपत्वात्तव मंगलकर्मदर्शनाज्ञां देहीति भावः ॥ ११ ॥ न केवलमहमेकैवैतादृशीत्याह—पश्येति । अभवेति । इति भाव इति । जन्मादिमतामेव सुहृद्वियोगादिदुःखं भवतीत्याशयः ॥ १२ ॥ तदौत्सुक्यम् । अहं तु तस्य कन्या भूत्वा कथं धैर्यं धास्यामीत्याह—कथमिति । इह गुरुपदेन श्वशुरोपि गृह्यते देहकृतः पितुः 'गृहे स्थाने च केतनम्' इति धरणिः ॥ १३ ॥ यतस्त्वममर्त्यो देवोसि तत्तस्मात् देवा हि प्रार्थिता वाञ्छितं कुर्वंतीति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच॥एवं गिरित्रः प्रिययाऽभिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः॥संस्मारितो मर्मभिदः कुवागिषून्यानाह को विश्वसृजां समक्षतः॥१५॥ श्रीभगवानुवाच ॥त्वयोदितं शोभनमेव शोभने अनाहुता अप्यभियंति बंधुषु॥तेयद्यनुत्पादितदोषदृष्टयो बलीयसाऽनात्म्यमदेन मन्युना ॥१६॥ विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः॥स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा न पश्यंति हि धाम भूयसाम्॥१७॥नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम् ॥ येऽभ्यागतान्वक्रधियाऽभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः ॥ १८ ॥

भवानर्हति । कारुणिकत्वमेवाह अदभ्रचक्षुषाऽनल्पज्ञानेनापि त्वयाऽऽत्मनो देहस्यार्धेऽहं निरूपिता धृता । यतोऽर्धनारीश्वर इति ख्यातोऽस्यतो मामनुगृहाण । याचितः सन् ॥ १४ ॥ अभिभाषितो याचितः । को दक्षो यानाह मर्म भिंदंति ये तान्कुवागिषून्दुरुक्तिबाणान्संस्मारितः सन् ॥ १५ ॥ अनाहूता अपीति त्वया यदुदितमुक्तं तच्छोभनमेव किं त्वनात्म्यं देहादावहंकारस्तत्कृतेन मदेन मन्युना च ते बंधवो यद्यनुत्पादितदोषदृष्टयो भवंति तर्हि न उत्पादिते आरोपिते दोषे दृष्टिर्येषां ते ॥ १६ ॥ ननु विद्यादिगुणयुक्तो दक्षस्त्वादृशेषु महत्सु कथं दोषदृष्टिर्भवेत्तत्राह । विद्यादिभिरेव स्मृतौ हतायां विवेकज्ञाने नष्टे सति भूयसां महत्तमानां धाम तेजो न पश्यंति हि । ननु गुणैः कथं विवेकनाशस्तत्राह । सतां गुणैर्विवेकहेतुभिरप्यसत्तमानामितरैर्दोषभूतैरत एव तैर्भृतो धृतः पुष्टो वाऽहं विद्वांस्तापस इत्यादिर्मानो गर्वस्तेन दुष्टा दृष्टिर्येषां ते ॥ १७ ॥ स्वजनव्यपेक्षया बंधुदृष्ट्या गृहान्न प्रतीयान्नावलोकयेत् । अनवस्थितचित्तत्वमेवाह । ये वक्रधिया कुटिलया बुद्ध्या पश्यंति । आरोपिता उत्तंभिता भ्रूर्येषु

'अमर्त्या अमृतान्धसः' इत्यमरः । पूर्वं त्वयाऽकर्तव्यमपि कृतमित्याह—आत्मनोर्द्धे इति । अनल्पज्ञानेनात्मारामेण ॥ १४ ॥ ननु दक्षप्रयुक्ताः कटुवागिषवः श्रीशिवस्यात्मारामस्य मर्म कथं भिंदंति । उच्यते । शिवस्य परमेश्वरत्वादात्मारामत्वे सत्येव तमोगुणोपहितत्त्वात्कदाचित्परमैश्वर्यानुसंधाने सति शोकमोहरागद्वेषादयोपि भवंति । तथैव कृष्णस्य सदैवात्मारामत्वेपि श्रीयशोदादिश्रीबलदेवादिश्रीगोपिकादिविशिष्टत्वे प्रेमवत्त्वादेव स्वीय पारमैश्वर्यानुसंधानाच्छोकमोहरागद्वेषादयः । किन्तु शिवस्य तमोगुणोद्भूतास्ते दुःखाभासानुभवमयाः । कृष्णस्य प्रेमोद्भूतास्ते आनंदपरमकाष्ठानुभवमयाः प्रेम्णश्चिच्छक्तिसारवृत्तित्वादात्मारामत्वस्याप्यसंकोचकाः असुरादि हिंसादयश्च सत्त्वगुणकार्या एव गुणानां परस्परोपमर्दित्वात् । यथा प्रकाशोंधकारं हंति तथैव सत्त्वगुणस्तमोरजसी हंति तथैव कृष्णोऽसुरादीन्निहंतीति शुद्धसत्त्वरूपे तस्मिन्प्राकृतसत्त्वकार्यास्ते वर्तमाना अपि नापकारका इति व्याख्यातं प्रथमे, सप्तमारंभे च वक्ष्यते ॥ १५ ॥ १६ ॥ अत्राशंकते नन्विति । तत्राक्षेपे । पुनराक्षिपति—नन्विति । अत एवासत्तमगुणानां दोषभूतत्वादेव । भृग्वातोरुभयार्थकत्वाद्विकल्प इति । एतेन दुग्धमनृतमपि सर्पास्यप्रविष्टं विषमेव भवेत्तथाब्धिजलं क्षारमपि मेघप्रविष्टं मिष्टं स्यादिति स्थान एव गुणा गुणायंतेन्यथा दोषा एवेत्युक्तं तथा दोषा अपि स्थानभेदेन गुणा भवंतीत्यन्यत् ॥ १७ ॥ अत एतादृशाः पि त्रादयोप्युपेक्ष्या एवेत्याह—नैतादृशेति । यदि गच्छेत्तदा शत्रुदृष्ट्यैव गच्छेदिति भावः । ननु दुरात्मनोपि स्वापत्यजामात्रादिषु स्निह्यंत्येवेति तत्राह—अनवस्थितात्मनां नायमपि तेषां निश्चय इति भावः । अमर्षणपदेनैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाऽरिभिर्न व्यथते शिलीमुखैः शेतेऽर्दितांगो हृदयेन दूयता ॥ स्वानां यथा वक्रधिया दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः ॥ १९ ॥ व्यक्तं त्वमुत्कृष्टगतेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता ॥ अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २० ॥ पापच्यमानेन हृदातुरेंद्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणाम् ॥ अकल्प एषामधिरोढुमंजसा पदं परं द्वेष्टि यथासुरा हरिम् ॥ २१ ॥ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे ॥ प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने ॥ २२ ॥ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ॥ सत्त्वे च तस्मिन्भगवान्वासुदेवो ह्यधोऽक्षजो मे नमसा विधीयते ॥ २३ ॥

तान्यारोपितभ्रूणि तैः आरोपिताभिर्भ्रूभिरिति वा । अमर्षणैः सक्रोधैरक्षिभिः नेत्रैः ॥ १८ ॥ ननु स्वजनानां गृहं सुहृद्भिर्गंतव्यं तेषां दुश्चेष्टितं च विवेकिभिः सोढव्यम् इति चेत् न तस्य दुःसहत्वादित्याह । तथेति । अरिभिः शत्रुभिः शिलीमुखैर्बाणैरर्दितांगः खंडितगात्रोऽपि तथा न व्यथते । यतः शेते स्वपिति । स्वानां दुरुक्तिभिर्मर्मसु ताडितो यथा दूयता व्यथमानेन हृदा दिवानिशं तप्यति ॥ १९ ॥ मयि तत्र गतायां नेयं शंकेति चेत्तत्राह । व्यक्तं निश्चितमुत्कृष्टा गतिः स्थितिर्यस्य तस्यात्मजानां कन्यानां मध्ये त्वं प्रियेति मे संमताऽस्यथापि पितुः सकाशान्मानं न लप्स्यसे । मदाश्रयान्मत्संबंधात् ॥ २० ॥ ननु भगवंस्त्वया किमिति दक्षस्तिरस्कृतो यतोऽसौ त्वां द्वेष्टयत आह । पापच्यमानेनालं दह्यमानेन हृदा मनसा दुःखितेंद्रियः । काभिः । पुरुषो जीवस्तस्य बुद्धिश्चित्तं तत्साक्षिणां निरहंकाराणामित्यर्थः । समृद्धिभिः पुण्यकीर्त्यादिभिः । एषां पदं स्थानमैश्वर्यं प्राप्तुमकल्पोऽशक्तः सन्परं द्वेष्टि । असुरा यथा हरिं केवलं द्विषंति ॥ २१ ॥ ननु त्वया प्रत्युत्थानविनयाद्यकरणादवज्ञात एवासौ तत्राह । हे सुमध्यमे प्रत्युद्गमादिकं मिथो जनैर्यद्विधीयते तत्तु प्राज्ञैः भागवतैः साधु विधीयते । साधुत्वमेवाह । परस्मै श्रीवासुदेवाय । गुहाशयायांतर्यामिण एव । तच्च चेतसैव । परिपूर्णे तस्मिन्कायिकव्यापारायोगात् । अतोंतर्यामिदृष्ट्या मनसा सर्वं कृतमिति भावः ॥ २२ ॥ किं च न केवलमभ्यागतेष्वेव

चरितार्थत्वाद्विशेषणानर्थक्यमाशंक्याह । आरोपिताभिर्भ्रूभिरिति वेति ॥ १८ ॥ पुनराक्षिपति—नन्विति । एतादृशा बंधवोरिभ्योप्यधिका इति भावः ॥ १९ ॥ उत्कृष्टगतेरिति विपरीतलक्षणया ॥ २० ॥ इहाक्षिपति—नन्विति । परं केवलं तदुक्तं "दह्यमानास्सुतीव्रेण नीचाः परयशोग्निना । अशक्तास्तत्पदं गंतु ततो निंदां प्रकुर्वते ॥" इति । अयमर्थः । अस्माकं तु त्वत्पितारि दक्षे द्वेषलेशोपि नास्तीति सशपथं वदन् विशिनष्टि पूरुषः परमेश्वर एव बुद्धेर्भद्राया अभद्राया वा साक्षी येषां तेषामिति हे दाक्षायणि यदि त्वं न प्रत्येषि तदा क्षणं समाधिना परमेश्वरं साक्षात्कृत्वा मद्दोषगुणौ स एव प्रष्टव्य इति भाव इति विश्वनाथः ॥ २१ ॥ सत्यं त्वद्द्वेष्टैवेति प्रत्येमि तदपि श्वशुरे तस्मिन्प्रत्युत्थानविनयादिकमुचितमेवेति शंकते—नन्विति । तच्च नमनादि । अतः कायिकव्यापारानर्हत्वात् । इति भाव इति । प्राज्ञेतरैः परमेश्वरस्मरणाभावाद्देहमानिन एव विधीयते तत्र साधु, मम दक्षागमनावसरे भगवच्चरणसमाहितचेतस्त्वात् । यद्यपि दक्षो मया न दृष्टस्तदपि भगवत्संमानेन दक्षसंमानोप्यभूदेव दक्षस्तु मूर्खो वृथा कुप्यतीत्याशयः ॥ २२ ॥ अन्यदाह-किञ्चेति । वसुदेवशब्दोक्तत्वे हेतुं पृच्छति अत्राशयमाह वासुदेव इत्यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्ते निरीक्ष्यो न पिताऽपि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये॥यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरोत्तिरः॥२४॥यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति ॥ संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते ॥ २५ ॥ इति श्रीभा० महापु० चतुर्थ० उमारुद्रसंवादे तृतीयोऽध्यायः ॥ ३ ॥

वासुदेवदृष्ट्या नमनं क्रियते किं तु नित्यमेव मनसि वासुदेवश्चिंत्यत इत्याह । विशुद्धं सत्त्वमंतःकरणं सत्त्वगुणो वा वसुदेवशब्दितं वसुदेवशब्देनोक्तम् । कुतः यद्यस्मात्तत्र सत्त्वे पुमान्वासुदेव ईयते प्रकाशते । अपगतमावृतमावरणं यस्मात्सः । अयमर्थः । वसुदेवे भगवति प्रतीयत इति हि वासुदेवः परमेश्वरः प्रसिद्धः स च विशुद्धे सत्त्वे प्रतीयते अतः प्रत्ययार्थेन प्रसिद्धेन प्रकृत्यर्थो निर्धार्यते ततश्च वासयति देवमिति व्युत्पत्त्या वा वसत्यस्मिन्निति वा वसुः देवो दीव्यति द्योतत इति देवः वा वसुभिः पुण्यैर्दीव्यति प्रकाशत इति वा वसुदेवशब्दवाच्यं शुद्धं सत्त्वम् ततः "तत्र भवः" इत्यण् । अत्र प्रतीतिर्भवतेरर्थः । ततः किमत आह । सत्त्वे च तस्मिन्मे मया नमसा नमस्कारेणानुविधीयते सेव्यत इत्यर्थः । मनसेति पाठे मनसा विशेषेण धीयते धार्यते चिंत्यत इत्यर्थः । यतोऽधो भूतेषु प्रत्याहृतेष्वक्षेषु इंद्रियेषु जायते प्रकाशते । इंद्रियागोचर इत्यर्थः ॥ २३ ॥ तत्तस्मात्त्वया न निरीक्ष्यः । देहकृदपीति पोषकत्वादिभिरौपचारिकपितृत्वव्यावृत्त्यर्थम् । द्विट् शत्रुः । तदेवाह । हे वरोरु यो दक्षो विश्वसृजां यज्ञगतं मां निरपराधं तिरोऽकरोत्तिरस्कृतवान् ॥ २४ ॥ विपक्षे दोषमाह । यदीति । मद्वचोऽतिहायातिक्रम्य । यतः संभावितस्य सुप्रतिष्ठितस्य यदा पराभवो भवति तदा स पराभवस्तस्य मरणाय कल्पते ॥ २५ ॥ इति श्रीमद्भागवते चतुर्थस्कंधे टीकायां तृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥

शैषिकोण् स च परमेश्वरः । अतो व्युत्पत्तेः । प्रत्ययार्थेनाण्प्रत्ययार्थेन । प्रतीतिरूपेण प्रकृत्यर्थो वसुदेवपदार्थः । यद्वा । प्रत्ययार्थेन प्रयोजकलक्षणेनाधिकरणलक्षणेन च । प्रकृतेर्वसधातोरर्थो निवासस्तथा अप्रत्ययेन प्रकृतेर्दिवुधातोरर्थो द्युतिलक्षणश्च निर्द्धार्य्यते निश्चाय्यते । ततश्च निर्द्धारणात् इति ज्ञातं तथाहि वासयतीत्यादि निवासयतीति । निवासो निवसत्यत्रेति वसिप्रकृत्यर्थ एवात्र निर्द्धारितः । ततः वसुदेवशब्दार्थनिर्द्धारणात्किं जातमित्याक्षेपे । इत्यर्थ इति । उपसर्गवशात्सेवार्थोपीत्यर्थः । इत्यर्थ इति । चिंतनस्यैव धारणपदार्थत्वादत्रेति भावः । तत्र हेतुः—यत इति । इत्यर्थ इति । "मनसैवानवाप्तव्यम्" इत्यादिश्रुतेरिति भावः । 'मनःषष्ठानींद्रियाणि' इति वाक्येन मनसोऽनिंद्रियत्वोक्तेर्मनसो विषयत्वेपि नाधोक्षजत्वहानिः । यत्तु "यतो वाचो निवर्त्तंते अप्राप्य मनसा सह" इत्युक्तं तद्बहिर्मुखमनोऽपेक्ष्येत्यवधेयमिह तु भगवदुपास्तिशुद्धमनोविषयत्वोक्तेर्न दोष इत्यनवद्यं सर्वम् ॥ २३ ॥ यतो मम द्विट् स तस्मादित्यर्थः । आदिनाध्यापकादिग्रहः । औपचारिकपितृत्वं गौणपितृत्वम् । "अन्नदाता भयत्राता यश्च विद्यां प्रयच्छति । जनको ह्युपनेता च पंचैते पितरः स्मृताः" इति स्मृतेः । 'उपकर्त्ता पितृसमः' इति न्यायेन जनकेतराणामपि पितृत्वमस्ति मुख्यं तज्जनकस्यैवेति तत्त्वम् । वरोर्विति । गुप्तांगनिरीक्षको हि पितृतोपि प्रियोस्ति स्त्रीणामतो मां विहाय मा गच्छ मदाज्ञापालनमेव त्वद्धर्म इति संबुद्ध्यभिप्रायः । श्लेषेण देहं कृंततीति देहकृत् । 'कृती छेदने' देहपातो भावी सूचितः ॥ २४ ॥ विपक्षे मदाज्ञात्यागरूपे । ततस्तत्र गमनात् । भवत्यास्तव कल्पते समर्थो भवति स्वजनपराभूतो मरणमेव श्रेष्ठं मनुते स्वस्य पराभवितुश्च श्रीगीतोपनिषदाचार्येण स्वांतेवासिनेऽर्जुनाय तु मरणतोप्यधिकः "संभावितस्य चाकीर्त्तिर्मरणादतिरिच्यते" इति प्रतिपादितः । अकीर्त्तेः पराभवजन्यत्वेन कार्यकारणयोरभेद एवेति ॥२५॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् ॥ सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधाऽऽस सा ॥ १ ॥ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदंत्यश्रुकलाऽतिविह्वला ॥ भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः ॥ २ ॥ ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा ॥ पित्रोरगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णात्मनो योऽर्धमदात्सतां प्रियः ॥ ३॥ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः ॥ सपार्षदयक्षा मणिमन्मदादयः पुरोवृषेंद्रास्तरसा गतव्यथाः ॥ ४ ॥ तां सारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः ॥ ५ ॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडं यजनं समाविशत् ॥ ६ ॥

चतुर्थे तु पतिं हित्वा गता पित्राऽवमानिता॥रुषा निर्भर्त्स्य तं यज्ञे जहौ देहमितीर्यते॥ १ ॥उभयत्रानुज्ञाने बलान्निवारणे च।सुहृद्दिदृक्षुर्निष्क्रामंती भवात्परिशंकिता पुनर्निर्विशंती च तदा सा सती द्विधा आस उभयनिष्ठचित्ता बभूव न गता न च स्थिता आंदोलावद्गतिरभवत् ॥ १ ॥ सुहृदां दिदृक्षायाः प्रतिघातेन दुर्मनाः । अश्रूणां कलाभिर्लेशैरतिविह्वला व्याकुला । अप्रतिपूरुषं स्वसमानपुरुषांतररहितम् । प्रधक्ष्यतीव भस्मी करिष्यतीव । रुषा जातो वेपथुः कंपो यस्याः ॥ २ ॥ ततस्तं विहाय पित्रोर्गृहानगात् । कथंभूतम् । यः प्रीत्या तस्यै आत्मनो देहस्यार्धमदात् । त्यागे हेतुः । स्त्रैणं स्त्रीस्वभावस्तेन विमूढा धीर्यस्याः ॥ ३ ॥ द्रुतविक्रमां शीघ्रं गच्छंतीम् । सह पार्षदैर्यक्षैश्च वर्तमानाः । मणिमान्मदश्चादिर्येषां ते ।पुरः पुरतो वृषेंद्रो येषां ते । गतव्यथा निर्भयाः । रुद्रातिक्रमेण तस्या गमनादागतव्यथा इति वा ॥ ४ ॥ तां वृषेंद्रमारोप्य सारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिः सह विटंकिताः शोभिता ययुः । सारिका पठननिरूपिता पक्षिणी । गीतायनैर्गीताश्रयैः ॥ ५ ॥ आ समंताद्यो वेदघोषस्तेनोर्जितं शोभमानं यज्ञसंबंधिपशुविशसनं यस्मिन् । यद्वा । तेनोर्जितमतिशायितं यज्ञवैशसं परस्परं स्पर्धा यस्मिन् । तद्यजनं यज्ञस्थानं समाविशद्देवी । विप्रार्षिभिः

तं दक्षम् (१) द्विधा द्विचित्ता ॥ १ ॥ प्रधक्ष्यतीवात्मानमिति शेषः भाविसूचनम् । रोदनमिहशिवानुज्ञार्थमपि ज्ञेयम् ॥ २ ॥ रोदनेप्यननुज्ञाता स्त्रीस्वभावायत्ता जगामैवेत्याह—स्त्रैण्यमिति । स्त्रैणशब्दात्स्वार्थे ष्यञ् ॥ ३ ॥ निर्भयत्वं ह राज्ञो विना न घटत इति चेदाह—आगतेति ॥ ४ ॥ वृषेंद्रो नंदी पठने निरूपिता स्थापिता श्यामवर्णा शुकी । 'मंडुके'तिपाठे मंडुकं जलक्रीडावाद्यं, 'विटंकः शुष्कपर्वते शोभायां धूर्तपुरुषे' इति स्वामी ॥ ५ ॥ पशुविशसनस्य शोभमानत्वं तु न संगच्छत इति चेत्तत्राह-यद्वेति । परस्परं शास्त्रविचारस्पर्द्धान्योन्यजिगीषयैव जुष्टमिति । 'विप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामागतां तत्र न कश्चनाऽद्रियद्विमानितां यज्ञकृतो भयाज्जनः ॥ ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥ ७ ॥ सौदर्यसं प्रश्नसमर्थवार्त्तया मात्रा च मातृष्वसृभिश्च सादरम् ॥ दत्तां सपर्यां वरमासनं च सा नादत्त पित्राऽप्रतिनंदिता सती ॥ ८ ॥ अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ ॥ अनादृता यज्ञसदस्यधीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ॥ ९ ॥ जगर्ह साऽमर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयम् ॥ स्वतेजसा भूतगणान्समुत्थितान्निगृह्य देवी जगतोऽभिशृण्वतः ॥ १० ॥ श्रीदेव्युवाच ॥ न यस्य लोकेऽस्त्य तिशायनः प्रियस्तथाऽप्रियो देहभृतां प्रियात्मनः ॥ तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवंतं कतमः प्रतीपयेत् ॥ ११ ॥ दोषान्परेषां हि गुणे ष्वसाधवो गृह्णंति केचिन्न भवादृशा द्विज ॥ गुणांश्च फल्गून्बहुलीकरिष्णवो महत्तमास्तेष्वविदद्भवानघम् ॥ १२ ॥

विबुधैश्च जुष्टम् । मृदादिभिर्निसृष्टानि निर्मितानि भांडानि पात्राणि यस्मिन् ॥ ६ ॥ कश्चन नाद्रियत् नादृतवान् । यज्ञकृतो दक्षाद्भयं तस्मात् । तत्र हेतुः । तेन विमानिताम् । स्वसॄर्जननीं च ऋते विना तास्तु सादराः परिषस्वजुरालिंगितवत्यः प्रेमाश्रुभिर्निरुद्धः कंठो यासाम् ॥ ७ ॥ अप्रतिनंदिताऽनादृता सती नादत्त न गृहीतवती । कथम्°। सौदर्येण सोदरत्वेन सम्यक्तया भगिनीनां यः संप्रश्नस्तत्र समर्था योग्या या वार्ता तया सह । तां च नादत्त नाशृणोदित्यर्थः ॥ ८ ॥ न विद्यते रुद्रस्य भागो यस्मिंस्तम् । देवे रुद्रे कृतं हेलनमवज्ञामाह्वानाद्यकरणात् ॥ ९ ॥ जगर्ह निंदितवती । अमर्षेण कोपेन विपन्नाऽव्यक्ता तया । शिवं द्वेष्टीति शिवद्विट् तम् । धूमपथः कर्ममार्गस्तत्र श्रमोऽभ्यासस्तेन स्मयो गर्वो यस्य । दक्षवधाय समुत्थितान्स्वाज्ञया निगृह्य निवार्य ॥ १० ॥ निंदामेवाह न यस्येति त्रयोदशभिः । मुक्तवैरके त्यक्तविरोधे तस्मिन् शिवे भवंतमृते विना कतमः प्रतीपयेत्प्रतिकूलमाचरेत् । वैराभावे हेतवः । यस्य लोके अतिशायनोऽतिशयितो नास्ति तथा प्रियश्चाप्रियश्च नास्ति । समासपाठेऽतिशयेन प्रियो नास्ति देहभृतां प्रियोऽयमात्मा तस्य । समस्तस्यात्मनि कारणभूते समस्तरूप इति वा ॥ ११ ॥ तस्य च प्रतिकूलकरणं द्वेधा । महत्तमद्रोहेण साक्षात्तद्द्रोहे

कीर्णजटाच्छन्नं रौरवेणाजिनेन च' इतिवत् ॥ ६ ॥ तां सतीम् ॥७॥ तत्र यज्ञे संप्रश्नः कुशलप्रश्नः । तां सपर्याम् । इत्यर्थ इति । कुशले पृष्टे न प्रत्युवाचासनं च न पस्पर्शेति भावः ॥८॥९॥१०॥ अतिशयितोऽधिको नास्ति ईश्वरत्वात् । प्रियश्चाप्रियश्च नास्ति आत्मारामत्वात् । अतिशायनश्च प्रियश्चेतीतरेतरयोगेपि 'सर्वो द्वंद्वो विभाषयैकवद्भवती'त्येकत्वं पुंस्त्वं त्वार्षम् । अथ च देहधारिणां प्रियात्मनः प्रियात्मस्वरूपस्य तस्मिन्समस्तात्मनि सर्वजगत्कारणे भवंतं विनेति भवानेव प्रतीपयेत् प्रतिकूलं कुर्यात् । यद्वा । ऋते सत्यरूपे । तस्मिन्मुक्तवैरके सति भवंतं कः प्रतीपयेत्समुचिताचरणेन प्रतिकूलं कुर्यात् । एते याज्ञिकसदस्यादयस्तु त्वदन्नैः कुक्षिंभरा एव । किं तु स रुद्र एव वा तदीयो वा कश्चिदेव प्रतीपयेदिति भावः ॥ ११ ॥ तस्य रुद्रस्य । तत्र यज्ञे । इत्यर्थ इति । अनेकार्थत्वात्कल्पनार्थोपि विदेर्युक्त इति भावः । तच्चाघकल्पनम् । अत्र विश्वनाथः— असाधोस्तव सभायामेते खल्वसाधव एवेति वक्तुं साधूनसाधूंश्च लक्षयति-दोषानिति । परेषां दोषानपि गुणेषु प्रकारविशेषेण गुणांतःपातितयैव ये गृह्णंति यथा कठोरभाषित्वं यद्यप्यस्य दोषस्तदपि हितकारित्वादयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिंदा कुणपात्मवादिषु ॥ सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजस्सु तदेव शोभनम् ॥ १३ ॥ यद् व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् ॥ पवित्रकीर्तिं तमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ॥ १४ ॥

ण च तत्र पुरुषाणां चातुर्विध्यं वदंती महत्तमद्रोहमाह दोषानिति द्वाभ्याम् । हे द्विजेत्यधिक्षेपः । भवादृशास्त्वद्विधा असूयकाः परेषां गुणेषु दोषानेव गृह्णंति न तु गुणान् ते अधमा उच्यंते । केचिन्मध्यस्था गुणेषु दोषान्न गृह्णंति किं तु यथास्थितान्गुणदोषान्विवेकेन गृह्णंति ते तु महांत उच्यंते । साधवस्तु केवलं गुणानेव गृह्णंति न दोषांस्ते तु महत्तरा उच्यंते महत्तमास्तु दोषान्न गृह्णंत्येव ते च प्रत्युत फल्गूंस्तुच्छानपि गुणान्बहुली कुर्वंतीति करिष्णवो भवंति तेषु भवानघमविदद्विदितवान् कल्पितवानित्यर्थः। तच्च ब्रह्मिष्ठानभिभूयेत्यनेन सूचितम् ॥ १२ ॥ एतच्च दुर्जनेषु युक्तमेवेत्याह । नेति । कुणपं जडं शरीरं तदेवात्मेति वदंति ये तेषु ईर्ष्या अक्षांतिः सेर्ष्यं यथा भवत्येवं महतां विनिंदेति यदेतदाश्चर्यं न भवति सेर्ष्यं निरस्तं तेजः प्रभावो येषामिति वा । यद्यपि महापुरुषाः स्वानिंदां सहंते तथापि तत्पादरेणवस्तदसहमानास्तेषां तेजो निरस्यंति । अतोऽशक्तेषु महन्निंदनमेवोचितमित्यर्थः ॥ १३ ॥ तदेवं महत्तमद्रोहमुक्त्वा तस्मिन्नेव कृतं द्रोहमाह । यदेति द्वाभ्याम् । यद्यस्य द्व्यक्षरमात्रमपि शिव इति तत्प्रसिद्धं नाम नृणां सर्वेषामाश्वघं सर्वं हंति केवलं गिरैवेरितमुच्चारितं न तु मनःपूर्वकम् । तत्तु सकृदपि प्रसंगादपि तं शिवं द्वेष्टि न लंघ्यं शासनमाज्ञा यस्य अहो शिवेतरोऽमंगलरूपः ॥ १४ ॥

रोगनिवर्तको निम्बरस इव गुण एवेत्येवं ते साधवो महांत एव केचिद्वदंति । हे द्विजेति । तत्र न भवादृशा इति भवादृशास्तु गुणानपि दोषांतःपातितयैव गृह्णंति । यथास्य यत्परोपकारित्वं तत् परद्रव्यजिघृक्षयैवेति दोष एवायमित्येवं ते खल्वसाधव एव । ये तु दोषानपश्यंतो गुणानेव गृह्णंति यथा वणिगयमातिथेयो निस्तीर्ण इत्येवं ते महत्तराः ये गुणानेव गृह्णंति न तु दोषान् त्यक्तपरिग्रहः भिक्षुरयमुदरपूरमन्नमात्रं यथा तथा गृह्णाति न तु दरिद्रो बह्वाशीत्येवं ते साधवः । तथा ये दोषानेव गृह्णंति न तु गुणान् यथा भिक्षुरयमुदरपूरं सिद्धान्नं यदत्ति तदयं कामी भ्रष्टो मंतव्य इत्येवं तेऽसाधवः । ये तु फल्गूंस्तुच्छानपि गुणान्बहुलीकरिष्णवो बहुलीकरणशीलाः किमुताफल्गून् । दोषांस्तु नैव पश्यंति यथा शीतार्तत्वादेव मदीयवस्त्रमपहरन्नपि शस्त्रपाणित्वेपि दयालुत्वादेव न हिनस्ति तदयं धन्य इत्येवं ते महत्तमास्तथैव ये तुच्छानपि दोषान्बहुली करिष्णवो गुणानेव गृह्णंति यथा विरक्तोऽयं वनमपहाय यद्गृहस्थगृहेषु तत्प्रचुरधनं चोरयितुकाम इत्येवं तेऽसाधुतमाः । ये तु गुणाभावेपि परेषां गुणानेव पश्यंति यथा जगत्यस्मिन्केपि दुष्टा न संति सर्व एव साधव इत्येवं ते महत्तमाः । तथैव दोषाभावेपि । परेषां दोषानेव पश्यंति यथा जगत्यस्मिन्केपि शिष्टा न संति सर्व एव दुष्टाः संतीत्येवं तेऽसाधुतमाः इत्येवं सत्त्वतारतम्येन साधव इति । साधूनां द्वैविध्य्युक्तेन तमप्रत्ययेन युक्तिसंभवेन च महतां चातुर्विध्यमायातं तथैव तमतारतम्येन न भवादृशा इति । अविदद्वानघमित्याभ्यामसाधूनामपि द्वैविध्येपि युक्त्या चातुर्विध्यं शुद्धसत्त्वस्वरूपकल्याणगुणमयभक्तियोगतारतम्येन । पुनरप्येवं साधूनामपराधतारतम्येनासाधूनां चातुर्विध्यं ज्ञेयम् । एवं च देहभृतां प्रियात्मनः । ''तस्मिन्समस्तात्मनि मुक्तवैरके '' इत्यादिना श्रीरुद्रस्य सर्वत्रापि प्रीतिमत्त्वेन सर्वत्रादोषदृष्टित्वाच्चातिमहत्तमत्वं तेष्वविदद्वानघमित्यनेन तस्मिञ्छ्रीरुद्रे दोषमात्रदर्शनात् । तस्य च सर्वात्मत्वात्सर्वजगत्येव दोषदृष्टिप्राप्त्या 'चोदिते परमेष्ठिना' इत्यनेन ब्रह्मण्यपि दोषदृष्ट्या ब्रह्मिष्ठानभिभूयेति महत्स्वपरावेन च दक्षस्यात्यसत्तमत्वं ध्वनितम् ॥ १२ ॥ एतत्पूर्वश्लोकोक्तं सेर्ष्यपदस्य महद्विनिंदनपदेन संबंधे पुनरुक्तिप्रतीत्याह—सेर्ष्यं निरस्तमिति । अतो दुर्जनत्वात् । इत्यर्थ इति । ''अशक्तास्तत्पदं गंतुं ततो निंदां प्रकुर्वते'' इति भावः ॥ १३ ॥ तस्मिन्नेव रुद्र एव । ''शिवेति द्व्यक्षरं नाम यस्य वाचा प्रवर्त्तते । भस्मी भवंति तस्याशु महापातककोटयः ॥'' इति । ''शिवेति यद्वाचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्पादपद्मं महतां मनोऽलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः ॥ लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान्द्रुह्यति विश्वबंधवे ॥ १५ ॥
किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने ॥ तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्धभिर्दधति तच्चरणाव
सृष्टम् ॥ १६ ॥ कर्णौ पिधाय निरयाद्यदकल्प ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ॥ छिंद्यात्प्रसह्य रुशतीमसतीं प्रभुश्चेज्जिह्वामसूनपि
ततो विसृजेत्स धर्मः ॥१७॥ अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठगर्हिणः ॥ जग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्योद्धरणं
प्रचक्षते ॥१८॥ न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः ॥ यथा गतिर्देवमनुष्ययोः पृथक्स्व एव धर्मे न परं क्षिपेत्स्थितः ॥१९॥

पापहरत्वमुक्त्वा भुक्तिमुक्तिप्रदत्वेन शिवं वर्णयन्त्याह । यस्य पादपद्मं मनांस्येवालयस्तैः ब्रह्मरसो ब्रह्मानंदः स एवासवो मकरंदस्तदर्थिभिः यच्चार्थिनः सकामस्य लोकस्य तास्ता आशिषो वर्षति विश्वबन्धवे जगत्पित्रे ॥ १५ ॥ यदुक्तं शिवापदेशो ह्यशिव इति यच्चोक्तं प्रेतावासेष्वित्यादि तदाक्षिपंत्याह । किं वेति । यो जटा अवकीर्य श्मशानेऽवसद्वसति स्म तस्य श्मशानस्य माल्यानि भस्मानि नृकपालानि च भूषणत्वेन संति यस्य तं त्वत्तोऽन्ये न विदुः किं विदंत्येवेति चेन्न तथा सति तेषां तद्दास्यानुपपत्तेरित्याह । तच्चरणादवसृष्टं गलितं निर्माल्यं ये मूर्धभिर्धारयंति ॥ १६ ॥ इदानीं देहं त्यक्तुकामा धर्मतत्त्वमाह । कर्णावाच्छाद्य निर्गच्छेत् यद्यदि मर्तुं मारयितुं वा कल्पो न भवति कदा धर्मावितरि धर्मरक्षके ईशे स्वामिन्यसृणिभिर्निरंकुशैर्नृभिरस्यमानेऽधिक्षिप्यामाणे प्रभुः शक्तश्चेत् रुशतीमकल्याणवादिनीम् प्रसह्य बलाच्छिंद्यात् । ततोऽपि स्वयं प्राणान्विसृजेदिति यत्स धर्मः ॥ १७ ॥ तव त्वत्त उत्पन्नम् शितिकंठो नीलकंठस्तन्निंदकात् । प्रमादादापन्नस्यापवित्रस्य त्यागं विना न शुद्धिरिति दृष्टांतेनाह । जग्धस्य भक्षितस्यान्नस्योद्धरणं वमनमेव पुंसो विशुद्धिं प्रचक्षते ॥ १८ ॥ यदुक्तं लुप्तक्रियायाशुचय इति तत्प्रत्याह । नेति । वेदवादान्विधिनिषेधरूपान्स्व एव

हि वर्णयुग्मं प्रवर्त्तये यस्य न तस्य पापम् । स्वर्गस्य लाभः सुलभोन्यधर्माः प्रत्यूहवन्तः कलिदोषदुष्टाः '' इति । ''शिवेति नाम विमलं येनोच्चारितमादरात् । तेन भूयो न संसारसागरः समवाप्यते'' इति । ''परं ब्रह्मेति विज्ञेयं शिव इत्यक्षरद्वयम् '' इत्यादिबहुशो नाममाहात्म्ये तत्तद्ग्रंथनामपूर्वकमुक्तम् ॥ १४ ॥ यस्य शिवस्य । महतां सनकादीनाम् । यच्च पादपद्मम् ॥ १५ ॥ तथा सति ज्ञानाभावे सति । तेषां ब्रह्मादीनाम् । तस्य शिवस्य दास्यानुपपत्तेः ॥१६॥ ''मार्गे वाय्वंकुशे सृणिः'' इति निरुक्तिः । ततो जिह्वाच्छेदनापेक्षयापि निंदाश्रवणप्रायश्चित्तं प्रकुर्वन्स्वयं प्राणान्विसृजेदित्यर्थः । यद्वा ततः प्रभुत्वाभावेऽसूंस्त्यजेदित्यर्थः । यद्वा जिह्वाच्छेदादनंतरं यदि स निंदकः प्राणांस्त्यजेत्तदा धर्मस्तस्यानंतनरकभोगप्रशमनात्तद्वधलक्षणोऽधर्मो न भवतीत्यर्थः । अत्रेयं व्यवस्था क्षत्रियस्य दंडाधिकारात्स एव तज्जिह्वां छिंद्यात् अपरेषामन्यदंडेऽनधिकृतानां त्रयाणां मध्ये वैश्यशूद्रौ तनुत्यागरूपं स्वदंडं कुर्यातां ब्राह्मणस्य शरीरदंडानौचित्यात्स तु कर्णौ पिधाय विष्णुं स्मरंस्ततो निर्गच्छेदिति वक्ष्यत्यपि शिशुपालाख्याने '' निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः ॥ '' इति ॥ १७ ॥ अहञ्च सर्वैश्वर्यात्सर्वसामर्थ्यात्त्वां ब्रह्मांडकोटीरपि हंतुं समर्थापि शिव एव स्वभार्याद्वारा दक्षं जघानेति शिवयशोहानिभीत्या न हन्मि स्वप्रायश्चित्तं करिष्याम्येव पश्य पार्षिश्चक्षुर्भ्यामित्याह–यत इति ॥ १८ ॥ नानुसरति कुशलाचरितेनैषामिह चार्थो न विद्यते । विपर्ययेण वानर्थ इति । 'स्वैरं चरंति मुनयोपि न नह्यमाना' इति बद्धानां मुक्तानां च मिथः पृथगेव गतिरित्यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितम् ॥ विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति ॥ २० ॥
मा वः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः ॥ तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिंगा अवधूतसेविताः ॥ २१ ॥
नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना ॥ व्रीडा ममाभूत्कुजनप्रसंगतस्तज्जन्म धिग्यो महतामवद्यकृत् ॥ २२ ॥

लोके स्वात्मन्येव रममाणस्य महतो मुनेः सम्यग्विरक्तस्य मतिर्नानुवर्तते निवृत्ताधिकारत्वात् । अधिकारभेदे दृष्टांतः । यथा देवानां गतिराकाश एव मनुष्याणां पृथिव्यामेव अतः स्व एव धर्मे प्रवृत्तिलक्षणे निवृत्तिलक्षणे वा स्थितः सन्परमन्यं धर्मं पुरुषं वा न क्षिपेन्न निंदेत् । व्यवस्थिताधिकारत्वेनोभयोः सत्यत्वात् । न क्षिपेदेवेति वाऽन्वयः ॥ १९ ॥ एतदेवोपपादयंस्त्याह । प्रवृत्तमग्निहोत्रादि निवृत्तं शमदमादि ऋतं सत्यमेव यतो वेदे आश्रितं विहितं तच्च विविच्य व्यवस्थयाऽऽश्रितं न त्वविशेषेण । व्यवस्थामेवाह । उभयं रागवैराग्यलक्षणं लिंगं चिह्नमधिकारिविशेषणं यस्मिंस्तत् । ननु " यावज्जीवमग्निहोत्रं जुहोति शांतो दांत " इत्यादिषु नैवं व्यवस्था प्रतीयते । सत्यम् । तथाप्युभयोरेकाधिकारविरोधात्तथा पर्यवस्यतीत्याह । युगपद्भावो यौगपदं यौगपदेनैकस्मिन्कर्तरि तत्कर्मद्वयं विरोधि । ननु तर्हि निवृत्तं कर्म शिवेनापि कर्तव्यमेव नेत्याह । ब्रह्मणि सदाशिवे किंचिदपि कर्म न ऋच्छति न प्राप्नोति अतो यथा प्रवृत्तनिवृत्तयोरधिकारिणोः परस्परधर्माकरणे न दोषस्तथेश्वरे एतदुभयधर्माकरणेऽपीति भावः ॥ २० ॥ चिताभस्मकृतस्नानस्तथा नग्न इत्यादिना यो भोगाद्यभाव उक्तस्तत्राह । हे पितः अस्माभिरास्थिता आश्रिताः पदव्योऽणिमादिसमृद्धयो वो युष्माकं मा न संतीत्यर्थः । यतो वः पदव्यो यज्ञशालास्वेव भवंति ताश्च तदन्नेन यज्ञगतेनान्नेन तृप्तैः केवलमीडिता धूमवर्त्मभिश्च भुज्यंते । या अस्मत्पदव्यस्तास्तु नैवंभूताः किं त्वव्यक्तलिंगाः न व्यक्तं लिंगं हेतुर्यासाम् । इच्छामात्रप्रभवत्वात् । अवधूतैर्ब्रह्मविद्भिः सेविताः । अतोऽहमाढ्यो रुद्रो दरिद्र इति गर्वं मा कृथा इति भावः ॥ २१ ॥ किं बहुनोक्तेनेमं

दृष्टांतः । यथेति ॥ १९ ॥ एतदेव भिन्नगतित्वमेव रागवति निवृत्तं विरोधि वैराग्यवति प्रवृत्तं च विरोधि अत्राशंकते- नन्विति । उभयोः प्रवृत्तनिवृत्तयोः तथा पर्यवस्यति अधिकारभेदेन पर्यवसानं प्राप्नोति । पुनराशंकते—नन्विति । यतः किंचिन्न प्राप्नोति अतो हेतोः । इति भाव इति । प्रवृत्तस्य शमदमाद्यकरणे न प्रत्यवायो यथा निवृत्तस्याग्निहोत्राद्यकरणे न प्रत्यवायस्तथेश्वरस्योभयस्याप्यकरणे न प्रत्यवाय इति तात्पर्यम् ॥ ॥ २० ॥ हन्त हे पुत्रिके ममैव तद्भाग्यं यत्परमाग्रतमस्य सदाचारस्य मम कन्यात्वं भिक्षुककदाचारगृहे पातितासि तदपि गुणशीलनिधिस्त्वं स्वभर्तुरपकर्षं यन्न सहसे तत्तव पतिव्रताचूडामणेरुचितमेवेति । तत्र समर्त्सनमाह-मेति । इत्यर्थ इति । जन्मकोटिभिरपि न भविष्यंतीति भावः । नन्वेवं कुतो ब्रूषेऽस्माकमपि सिद्धयः संत्येवेति नेत्याह—या यज्ञशालासु तदन्नतृप्तैरुदरंभरैर्वायसादितुल्यैर्धूमवर्त्मभिः कामीभिर्नेडिता न स्तुताः किं त्वव्यक्तलिंगास्त्वादृशैरलक्षितप्रभावाः ब्रह्मविद्भिस्सनकादिनारदादिभिः सेविताः सेव्यंते वर्तमाने क्तः । इति भाव इति । अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारबंधनात् । तत्त्वमस्यर्थसिद्धत्वादवधूतोऽभिधीयते'' इति तत्त्वविवेकोक्ते ज्ञानिन एवावधूतपदवाच्या ऽवधूयन्ते सेवोद्यतानामपि पापानि येभ्यस्तेवधूताः ''येषां संस्मरणात्पुंसां सद्यः शुद्ध्यंति वै गृहाः'' इत्यादेर्वयमेवाढ्यास्त्वं दरिद्रोसीति तात्पर्यम् ॥ २१ ॥ स्वाशयमाह—किं बहुनेत्यादि । तदेवं कुजन्मत्वमेव प्रजापतित्वान्ममपुत्र देहोद्भूतस्तव देहस्स्लाघ्य एवेत्याशंकते—नन्विति । अतो लज्जाकरत्वात् । इत्यर्थ इति । रुद्रापराधकरणात्त्वमप्यश्लाघ्यो जातस्तज्जातत्वादयं देहोऽतिविश्लाघ्य इति भावः ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोत्रं त्वदीयं भगवान्वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मनाः ॥ व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदंगजम् ॥ २३ ॥ मैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन्क्षितावुदीचीं निषसाद शांतवाक् ॥ स्पृष्ट्वा जलं पीतदुकूलसंवृता निमील्य दृग्योगपथं समाविशत् ॥ २४ ॥ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः ॥ शनैर्हृदि स्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदिताऽनयत् ॥ २५ ॥ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् ॥ जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणाम् ॥ २६ ॥

देहं त्यक्ष्याम्येवेत्याह द्वाभ्याम् । एतेन नालं न पूर्यते किमपि त्वलमेव। कथंभूतेन। कुजन्मना। तदेवाह। हरे कृतापराधस्य तव देहादुद्भूतेनोत्पन्नेन । ननु श्लाघ्योऽयं देहः कथं त्याज्यस्तत्राह । कुजनस्य कुत्सितजनकस्य तव प्रसंगतः संबंधान्मम लज्जाऽभूत् अतो यो महतामप्रियकर्ता तस्मायज्जन्म तद्धिक् त्वत्संबंधादश्लाघ्यमित्यर्थः ॥ २२ ॥ किं च परिहासादिषु विनोदेनापि दाक्षायणीति संबोधयंस्त्वदीयं त्वत्संबंधवाचकं गात्र नाम यदा वृषध्वज आह गृह्णाति तदाहं व्यपेतनर्मस्मितं यथा भवत्येवं सुदुर्मना अतिदुःखितचित्ता भवामि तत्तस्माद्धि निश्चितमेतत्कुणपप्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि ॥ २३ ॥ दक्षं प्रत्यनुवादं कृत्वा । शत्रुहन् क्रोधादिरिपुघातिन् विदुर उदीचीमुदीच्यां दिशि पाठांतरे उदङ्मुखी शांतवाक् गृहीतमौना जलं स्पृष्ट्वाऽऽचम्य दृक् दृशम् ॥ २४ ॥ योगमार्गमेवाऽऽह । कृत्वेति । अनिलौ प्राणापानावूर्ध्वाधोवृत्तिकौ निरोधेन समानावेकरूपौ नाभिचक्रे कृत्वा तत उदानमुत्थाप्य धिया सह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् ॥ २५ ॥ महतां पूज्यतमेन श्रीरुद्रेण ॥ २६ ॥

कारणांतरमाह–आह वक्ष्यति भविष्यदर्थे लट् एवं भवामि भविष्यामि कुणपं कुणपप्रायं मलप्रायं "विट्सारिकायां कुणपी पूतगंधौ शवे पुमान् । शरीरे कुणपं रक्षोमलयोः कर्मणः फले" इति स्वामी । इतः पूर्वमेव देहं त्यक्ष्य इति भावः । चक्रवर्त्ती–तु परिहासादिषु त्वदीयं त्वत्संबंधज्ञापकं गोत्रं नाम त्वं दाक्षायणी भवसि तव मत्सरद्वेषानिंदावज्ञादिकं सधर्म एवेति यदा वृषध्वज आह तदाहं विगतनर्मस्मितं यथा स्यादेवं सुदुर्मना भवामीति पूर्ववत् ॥ " गोत्रा भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः " इति यादवः ॥ २३ ॥ अनूद्य लक्षीकृत्योक्त्वा । हे शत्रुहन्निति । यथा त्वं कामादिरूपशत्रुं हंसि तथा सापि स्वदेहत्यागमिषेण दक्षं स्वशत्रुं जघानेति भावः । पाठांतरे उदीचीति पाठे । पीतदुकूलेति । भर्तुकामानां कुसुंभरंजितवस्त्रधारणौचित्यात् । उदीचीं दिशमुद्दिश्य क्षितौ निषसादेति योज्यम् । देहत्यागस्यायत्नसाध्यत्वेपीति कृत्यतात्र योगिजन शिक्षणाय फलाधिक्याय वा दर्शिता ॥ २४ ॥ जितासना प्राणादिसंचारवेगदेहसंचलनरहिता । प्रथमं रेचकपूरके कृत्वाऽनिलौ एकविषयगतौ विधाय ततोऽनंतरं मूलाधारादुत्क्रमणकर्त्तारं सुषुम्णासञ्चारिणमुदानमुत्थाप्योर्ध्वमुखं कृत्वा नाभिचक्रमानीय ततो नाभिमंडलाद्धिया निश्चलया बुद्ध्या शनैरुद्वेगं विना हृदि स्थाप्य–संस्थाप्योरसि स्थितं वायुं कंठं नीत्वा कंठाद्भ्रुवोर्मध्यमनयदित्यन्वयः । यद्वा । सर्वसंधिसंचारिणं वायुं व्यानमूर्द्ध्वाधोगतिनिमित्तौ प्राणापानौ समानवायुनैकीकृत्य तं समानवायुम् सोदानमुदानगत्या सहितमुदानेनैकीकृत्योपर्युपरि स्थानं जीवेन सहानयदिति । अत्र द्रव्यनयनशक्तिमता वायुना जीवसंज्ञद्रव्यनयनं न तु तन्मात्रं तस्य योगिनो नित्याभ्यस्तत्वात् ॥ २५ ॥ एवमुक्तरीत्या भ्रूमध्यं वायुं नीत्वा स्वयं च तत्र स्थित्वा मनस्विनीवशीकृतमना महतामिंद्रादीनां महीयसा पूज्यतमेन हरेण गात्रेषु करचरणाद्यवयवेषु । अनिलाग्निधारणां देहभस्मीकरणाय वाय्वग्न्युत्पत्तिलक्षणं ध्यानं दधार चकार अनेकार्थत्वाद्धातूनाम् । दक्षरुषेत्यनेनात्महत्यादोषं मार्ष्टि । "यमुद्दिश्य त्यजेद्देहं पापभागी स जायते । इतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततःस्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरम् ॥ ददर्श देहो हतकल्मषा सती सद्यः प्रजज्वाल समाधिजाग्निना ॥ २७ ॥ तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वादः सुमहानजायत ॥ हंत प्रिया दैवतमस्य देवी जहावसून् केन सती प्रकोपिता ॥ २८ ॥ अहो अनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः ॥ जहावसून्यद्विमतात्मजा सती मनस्विनी मानमभीक्ष्णमर्हति ॥२९॥ सोयं दुर्मर्षहृदयो ब्रह्मध्रुक्च लोकेऽपकीर्तिं महतीमवाप्स्यति ॥ यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः ॥ ३० ॥ वदत्स्येवं जने सत्या दृष्ट्वाऽसुत्यागमद्भुतम् ॥ दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः ॥ ३१ ॥ तेषामापततां वेगं निशाम्य भगवान्भृगुः ॥ यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह ॥ ३२ ॥ अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा ॥ ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः ॥ ३३ ॥

चरणांबुजे आसवं भजनानंदम् । भर्तुरपरं न ददर्श देहश्च सद्यः प्रज्वलितोऽभूत् । समाधिना जातो योऽग्निस्तेन ॥ २७ ॥ खे भुवि च हाहेत्यादिवादः । तमेवाह । हंतेति विषादे । दैवतमस्य पूज्यतमस्य प्रिया केन दक्षेण प्रकोपिता सती ॥ २८ ॥ महदनात्म्यं दौर्जन्यम् । अस्य सर्वत्र स्नेह एव न्याय्य इत्याहुः । यस्येति । येन विमताऽवज्ञाता ॥ २९ ॥ दुर्मर्षमत्यसहनं हृदयं यस्य लोके जनमध्ये च शब्दान्नरकं च यतः स्वीयामंगजां सुतामपराधतः स्वावज्ञया मृतये मरणायोद्यतां न निवारितवान् पुरुषद्विट् शिवद्वेषी ॥ ३० ॥ अद्भुतं दृष्ट्वा च ॥ ३१ ॥ यत् यज्ञघ्नान्हंतीति यज्ञघ्नघ्नं तेन । अपहतं रक्ष इत्यादिना ॥ ३२ ॥ अध्वर्युणा भृगुणा ये तपसा सोमं

न कोपयेत्कांचित्परलोकसुखाय च ॥'' इत्यादिपुराणांतरात् ॥ २६ ॥ ततस्तस्मिन्ननिलाग्निधारणाकाले सप्तम्यर्थे तसिः । जगद्गुरोस्सर्वेषां ज्ञानोपदेष्टृत्वादाचार्यस्य स्वभर्तुः शिवस्य चरणयोर्ध्यानेनोत्पन्नानंदलक्षणमासवं मधु चिंतयंत्यास्वादयंती हतं दक्षकन्यात्वाभिमानलक्षणं कल्मषं यतस्तथाभूतो देहः प्रजज्वाल दिदीपे । ''ज्वल–दीप्तौ'' । सद्यस्तत्क्षण एव न तदुत्तरक्षण इति विद्युदिव प्रदीप्यांतरधादित्यर्थः । तस्या मायाशक्तित्वान्मायायाश्च साकाराया अपि ''नित्यैव सा जगन्मूर्तिर्यया सर्वमिदं ततम्'' इत्याद्युक्तेर्नित्यत्वान्मायिकवस्तूनामेवानित्यत्वव्यवस्थापनात्तस्या अप्यनित्यत्वे शक्तिशक्तिमतोरभेदात् 'मायिनन्तु महेश्वरम्' इत्युक्तेस्तच्छक्तिमत ईश्वरस्याप्यनित्यत्वं स्यादतस्तद्देहनाशो न व्याख्येयः । अन्यथा स्कांदीयकेदारखंडोक्तशिवधृततद्देहस्य विष्णुकर्तृकचक्रच्छेदाद्योन्यादिक्षेत्रोत्पत्तिवर्णनमसंगतं स्यात् । तीर्थस्तु–दक्षो मद्देहं मा संस्कुर्यादिति देहेऽग्निधारणां चकारेत्याह । ॥ २७ ॥ एवं जगत्सुंदरदेहत्यागे कस्याप्यंतःकरणखेदो नाभूदिति चेत्तत्राह-तदिति । तत्सतीदेहप्रज्ज्वलनरूपमाश्चर्यम् ॥ २८ ॥ यद्वाऽनात्म्यं न विद्यते आत्मा यस्य स मृतकस्तस्यभावोऽनात्म्यं संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः । येनात्मजायामपि स्नेहो न कृतः स मृतक एवेति ध्वनितम् । येन मानार्हात्मजाऽवज्ञाता तं धिगिति भावः ॥ २९ ॥ य एतादृशमनार्यमकार्षीः सोयं दक्षः । अत्यसहनमतिक्रूरम् । ''तत्पुरुषाय'' इति श्रुतेः पुरुषो रुद्रः । अनेन विष्णुद्वेषोपि ध्वनितः । ''पुरुषो विष्णुरुच्यते'' इति श्रुतेः ॥ ३० ॥ अद्भुतं योगाग्निना देहप्रज्ज्वलनलक्षणम् । तत्पार्षदा रुद्रगणाः ॥ ३१ ॥ तेषां रुद्रगणानामापततामागच्छतां निशाम्य दृष्ट्वा । ''अपहतं रक्ष'' इत्यत्र रक्षो यज्ञघ्नं जीवजातमित्यर्थः । आदिना ''येनोरसि दुस्तरितासो यदून्यतासो अनृतं वयंतः तेषां वपूंष्यर्चिषा जातवेदश्शुष्कं न वृक्षमुत संदहस्व'' इत्यादिग्रहः ॥ ३२ ॥ ततः किमत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः ॥ हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा ॥ ३४ ॥ इति श्रीभाग० चतुर्थ० सतीदेहोत्सर्गो० चतुर्थो ऽध्यायः ॥४॥ मैत्रेय उवाच ॥ भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात् ॥ स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे ॥१॥ क्रुद्धः सुदष्टौष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषम् ॥ उत्कृत्य रुद्रः सहसोत्थितो हसन्गंभीरनादो विससर्ज तां भुवि ॥२॥ ततोऽतिकायस्तनुवा स्पृशन्दिवं सहस्रबाहुर्घनरुक् त्रिसूर्यदृक् ॥ करालदंष्ट्रो ज्वलदग्निमूर्धजः कपालमाली विविधोद्यतायुधः ॥ ३ ॥ तं किं करोमीति गृणंतमाह बद्धांजलिं भगवान्भूतनाथः ॥ दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांशको मे ॥ ४ ॥ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम् ॥ मेने तदात्मानमसंगरंहसा महीयसां तात सहस्सहिष्णुम् ॥ ५ ॥

प्राप्तास्ते ऋभवो नाम देवा उत्थिताः ॥ ३३ ॥ ब्रह्मतेजसोशद्भिर्देदीप्यमानैः ॥ ३४ ॥ इति श्रीभा० म० चतुर्थ टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ पंचमे तु सतीदेहत्यागमाकर्ण्य शंकरः ॥ वीरभद्रं रुषोत्पाद्य तेन दक्षमघातयत् ॥ १ ॥ प्रजापतेर्हेतोर्निधनम् । कुतः तेनासत्कृतायाः । तस्याध्वरे ऋभवो देवास्तैः ॥ १ ॥ स धूर्जटी रुद्रो घोरः सन् जटामुत्कृत्योत्पाट्योत्थितः संस्तां भुवि विससर्ज सुदष्ट ओष्ठपुटो येन तडितां वह्नीनां च सटा ज्वालास्तद्वदुग्रं रोचिर्यस्यास्ताम् ॥ २ ॥ ततो जटायाः सकाशादतिकायो वीरभद्रो जात इति शेषः । तनुवा तन्वा देहेन दिवं स्पृशन् अत्युच्च इत्यर्थः । घनरुक् कृष्णवर्णः त्रयः सूर्या इव दृशो यस्य करालास्तुंगा दंष्ट्रा यस्य ज्वलदग्निरिव मूर्धजाः केशा यस्य कपालमालायुक्तः विविधान्युद्यतान्यायुधानि यस्य ॥ ३ ॥ हे रुद्र हे भट युद्धकुशल मद्भटानां त्वमग्रणीः सन्सयज्ञं दक्षं जहि ब्रह्मतेजो दुर्जयमिति मा मंस्थाः यतस्त्वं मेंशकः ॥४॥ मन्युना रुद्रेण । स वीरभद्रः । परिचक्रमे प्रदक्षिणीचकार । असंगमप्रतिघातं यद्रंहो वेगस्तेन भोः तात महीयसां

आह अध्वर्युणेति ॥ ३३ ॥ 'देवगणाद्ब्राह्मणशक्तिरेव बलीयसी' इति ध्वनयन्नाह-तैरिति । यद्वोशद्भिर्भृगोः संकल्पं कर्तुमिच्छद्भिः 'वशकांती' ''कांतिः स्यादीप्तिवांछयोः'' इति धरणिः ॥ ३४ ॥ इति श्रीमद्भागवत भावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ तेन वीरभद्रेण (१) निधने हेतुं पृच्छति कुत इति । तेन दक्षेण । असत्कृताया अवज्ञातायाः । तस्य दक्षस्य ! अपारं महांतम् ॥ १ ॥ धूता कंपिता जटा अस्येति धूर्जटिः पृषोदरादिः । सुदष्टे ओष्ठयोः पुटेऽग्रे येन स तथा । 'पुटमग्रे च संश्लेषे' इति निरुक्तिः । 'सटा जटाकेशरयोः' इति । मेदिनी । लक्षितलक्षणामाश्रित्य स्वामिचरणैर्ज्वालेत्युक्तम् । तां जटाम् ॥२॥ इत्यर्थ इति । अल्पदेहेन दिवःस्पर्शानुपपत्तेरिति भावः । ''करालो दंतुरे तुंगे भीषणे त्वभिधेयवत्''इति मेदिनी ॥३॥ ''भटः स्यात्पुंसि वीरे च विशेषे पामरस्य च'' इति मेदिनी ॥ ४ ॥ ''मन्युर्दैन्ये क्रतौ क्रोधे शोक शंकरबुद्धिषु' इति धरणिः । ''नमस्ते रुद्र मन्यव'' इति श्रुतेश्च । मन्यू रुद्रः । स वीरभद्रो देवदेवं महादेवम् । कथारसाविष्टचेतस्त्वेन प्रीत आह हे ताततेति यद्वाऽसंगस्यात्मारामस्य रुद्रस्य रंहसा बलेन ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्वीयमानः सह रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम् ॥ उद्यम्य शूलं जगदंतकांतकं स प्राद्रवद्घोषणभूषणांघ्रिः ॥ ६ ॥ अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम् ॥ तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च दध्युः ॥ ७ ॥ वाता न वांति न हि संति दस्यवः प्राचीनबर्हिर्जीवति होग्रदंडः ॥ गावो न काल्यंत इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ॥ ८ ॥ प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको वृजिनस्यैष तस्य ॥ यत्पश्यंतीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥ ९ ॥ यस्त्वंतकाले व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः ॥ वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥ १० ॥ अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या ॥ करालदंष्ट्राभिरुदस्तभागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥ ११ ॥ बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मखे महात्मनः ॥ उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥ १२ ॥

बलीयसामपि सहस्रसहिष्णुं बलं सोढुं क्षमं मेने ॥ ५ ॥ जगदंतको मृत्युस्तस्याप्यंतकं शूलम् । घोषयंति शब्दं कुर्वंतीति घोषणानि नूपुरादीनि भूषणानि ययोस्तावंघ्री यस्य सः ॥ ६ ॥ ककुभि दिशि तमो न भवति किं तु रज इति ज्ञात्वाऽऽहुः । रज एतत्कुतोऽभूदिति दध्युश्चिंतयामासुः ॥ ७ ॥ हेत्वंतरासंभवेनौत्पातिकं कल्पयंति । वाता इति । दस्यूनामभावे हेतुः । प्राचीनबर्हिस्तदानींतनो राजा जीवतीति । न काल्यंते न शीघ्रं नीयंते ॥ ८ ॥ प्रसूतिर्दक्षपत्नी सा मिश्रा मुख्या यासाम् । विपाकः फलम् । पश्यंतीनामिति तस्या दुःखाधिक्ये हेतुः अवदध्याववज्ञातवान् । अनागामनागसम् ॥ ९ ॥ न चेदं सुताऽवज्ञामात्रं किं तु रुद्रावज्ञानं चातो नास्य भद्रं भविष्यतीत्याहुः यस्त्विति द्वाभ्याम् । व्युप्तो विकीर्णो जटाकलापो यस्य स्वशूलस्य सूच्यामग्रेऽर्पिताः प्रोताः दिग्गजेंद्रा येन उदितान्युन्नमितान्यस्त्राणि यैस्ते दोषो बाहव एव ध्वजास्तान्वितत्य विस्तार्य । हर्षेण नृत्यति उच्चोऽट्टहासः कठोरो हास एव स्तनयित्नुर्घनगर्जितं तेन भिन्ना विदीर्णा दिशो येन सः ॥ १० ॥ अमर्षयित्वाऽसहनयुक्तं कृत्वा मन्युप्लुतं क्रोधव्याप्तम् । उदस्तो विक्षिप्तो भगणो नक्षत्रसंघो येन पुनश्च तं कोपयतो विधातुरपि किं स्वस्ति स्यान्न स्यादेव काऽन्यस्य कथा ॥ ११ ॥ उद्विग्ना प्रचलिता

स वीरभद्रः । ह प्रसिद्धम् । सुभैरवमतिभयंकरं यथा स्यात्तथा व्यनदत् । शूलविशेषणं वा प्राद्रवदतिवेगेनागच्छत् ॥ ६ ॥ अथ वीरभद्रागमनारंभे । प्रथमं तम इति ततस्तम एतन्न किन्तु रज इति ज्ञात्वाहुः । एतद्रजः कुतोऽभूदिति ॥ ७ ॥ पुनरपि विविधं संशेरते—वाता इति । उग्रदंडत्वात्तद्राज्ये चौरभयं सर्वथा नास्तीति भावः । ह प्रसिद्धम् ॥ ८ ॥ तस्य कस्येत्याकांक्षायामाह-यदिति ॥ ९ ॥ उन्नमितान्युच्चैःकृतानि ॥ १० ॥ एतेन दक्षापराधेन सर्व एव महाविपदि सपापनौरिव निमज्जाम इति भावः । भगण एव भागणः स्वार्थिकोऽण् ॥ ११ ॥ जनेन तत्रत्यलोकेन । महात्मनो विपरीतलक्षणया दुरात्मनः यद्वा । मखे यज्ञोत्सवे आत्मा बुद्धिर्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावत्स रुद्रानुचरैर्मखो महान्नानायुधैर्वामनकैरुदायुधैः ॥ पिंगैः पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुराऽन्वरुध्यत ॥ १३ ॥ केचिद्बभंजुः प्राग्वंशं
पत्नीशालां तथापरे ॥ सद आग्नीध्रशालां च तद्विहारं महानसम् ॥ १४ ॥ रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् ॥ कुंडेष्वमूत्रयन्केचिद्बिभि
दुर्वेदिमेखलाः ॥ १५ ॥ अबाधंत मुनीनन्य एके पत्नीरतर्जयन् ॥ अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान् ॥ १६ ॥ भृगुं बबंध मणिमान्वीर
भद्रः प्रजापतिम् ॥ चंडीशः पूषणं देवं भगं नंदीश्वरोऽग्रहीत् ॥ १७ ॥ सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः ॥ तैरर्द्यमानाः सुभृशं ग्रावभि
र्नैकधाऽद्रवन् ॥ १८ ॥ जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः ॥ भृगोर्लुलुंचे सदसि योऽहसच्छ्मश्रु दर्शयन् ॥ १९ ॥ भगस्य नेत्रे भगवा
न्पातितस्य रुषा भुवि ॥ उज्जहार सदःस्थोऽक्ष्णा यः शपंतमसूसुचत् ॥ २० ॥ पूष्णश्चापातयद्दंतान्कालिंगस्य यथा बलः ॥ शप्यमाने गरि
मंणि योऽहसद्दर्शयन्दतः ॥ २१ ॥

दृग्यस्य तेन जनेन बहु यथा भवत्येवमुच्यमाने सत्युत्पाततमा महोत्पाता उत्थिताः पर्यक् सर्वतश्च कथंभूताः महात्मनोऽपि दक्षस्य भयावहाः ॥ १२ ॥ नानाऽयुधानि
येषां वामनकैर्ह्रस्वैः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोदरमाननं च येषां तैः परितो धावद्भिरवरुद्धः ॥ १३ ॥ यज्ञशालायाः पूर्वपश्चिमस्तंभयोरर्पितं
पूर्वपश्चिमायतं काष्ठं प्राग्वंशस्तम् । यज्ञशालायाः पश्चिमतः पत्नीशाला ताम् । यज्ञशालायाः पुरतः स्थितं सदोमंडपम् । सदसः पुरो हविर्धानं तस्योत्तरत आग्नीध्रशालाम्
तद्विहारं यजमानगृहम् । महानसं पाकभोजनशालाम् ॥ १४ ॥ रुरुजुर्बभंजुः उत्तरवेद्या मेखलाः सीमासूत्राणि । " आज्ञा गुरूणां ह्यविचारणीया " इति हेतोर्न ते
दोषभाजिन इति भावः ॥ १५ ॥ प्रत्यासन्नान्पलायितान्समीपस्थान्पलायितानपि जगृहुः ॥ १६ ॥ १७ ॥ ग्रावभिरर्द्यमानाः नैकधा अनेकधा
दुद्रुवुः ॥ १८ ॥ स्रुवो हस्ते यस्य भवो वीरभद्रः लुलुंचे उत्पाटितवान् ॥ १९ ॥ उज्जहारोद्धृतवान् । यः सदःस्थः सभायां स्थितः सन् शपंतं शिवनिंदां कुर्वंतं दक्ष
मक्ष्णाऽक्षिनिकोचेनासूसुचत्प्रेरितवान् ॥ २० ॥ कलिंगदेशराजस्यानिरुद्धोद्वाहे बलभद्रो यथा द्यूते दंतान्पातितवान् गरिमणि गुरुतरे रुद्रे निंद्यमाने दतो दंतान्दर्शयन्यो

यज्ञाविष्टचेतसः 'कर्मतंत्रं वितनुताम्' इत्यादिनंद्युक्तेः । अपिनाऽतितेजस्विन इत्यर्थः स्वाम्यभिप्रेतः ॥ १२ ॥ यावदुत्पाता उत्पन्नास्तावत्कालक्षेपमंतरेण ॥ १३ ॥ हविःशालायाः पूर्वभागे यजमानादिस्थित्यर्थे गृहे
प्राग्वंशशब्दो वर्तते । 'प्राग्वंशः प्राग्घविर्गेहात्' इत्यमरोक्तेः ॥ १४ ॥ १५ ॥ 'तिष्ठत भवतीः संप्रति विधवाः कुर्म' इत्यश्लीलवचोभिर्वा पत्नीरतर्जयन् । तर्जन्युत्थानपूर्वकमकथयन् । प्रत्यासन्नान्समीपस्थान् ॥ १६ ॥
मणिमान्कश्चिद्रुद्रगणनाथः । प्रजापतिं दक्षम् । चंडीशश्चंडेश्वरः ॥ १७ ॥ सदस्या विधिदर्शिनः ॥ १८ ॥ 'लुञ्च—अपनयने' ॥ १९ ॥ अक्षिनिकोचेन नेत्रचालनेन ॥ २० ॥ इंद्रापूषाणौ देवते यस्य चरोः स ऐन्द्रापौष्णः । "देवताद्वन्द्वे च ।
७ । ३ । २१ ।" इति पदद्वयादिवृद्धिः । " देवताद्वन्द्वे च । ६ । ३ । २६ ।" इति पूर्वपदस्यानङ् । अन्यसहितस्येंद्रसहितस्यापि दंतपातप्राप्तिरर्थः प्रयोजनं तदिति द्विवचनमित्यस्य विशेषणं सूचितवान्मैत्रेय इति शेषः ।
तद्दर्शयति—तथा हीति । प्रकर्षेण पिष्टः प्रपिष्टो गोधूमचूर्णतंदुलचूर्णादिस्तल्लक्षणो भागो यस्य स तथा । अदन्तको दंतरहितः । हि यतो देवास्तं पूषाणमितीत्थमदन्तकमन्नुवन्निति मंत्रविहितस्य पेषणस्य पिष्टभागस्य पूषेत्येकवचनश्रुतेर्द्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥ छिंदन्नपि तदुद्धर्तुं नाशक्नोत्र्यंबकस्तदा ॥ २२ ॥ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरम् ॥ २३ ॥ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे ॥ यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥ साधुवादस्तदा तेषां कर्म तत्तस्य शंसताम् ॥ भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः ॥ तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयम् ॥ २६ ॥ इति श्रीभा० चतु० वीरभद्रेण दक्षयज्ञविध्वंसनं नाम पंचमोऽध्यायः ॥ ५ ॥ मैत्रेय उवाच ॥ अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ १ ॥

जहास पूष्णोरिति पाठे द्विवचनमैंद्रापौष्णश्चरुर्भवतीत्यत्रान्यसहितस्यापि पूष्णो दंतपातप्राप्त्यर्थं सूचितवान् । तथा हि । " पूषा प्रपिष्टभागोऽदंतको हि तं देवा अब्रुवन् " इति विहितस्य पेषणस्य द्विदेवत्याभावात्तत्र तस्य दंताः संतीति वक्तव्यं स्यात् । न चैतत्संगच्छत इत्याशंक्य तत्रापि तस्य दंतपातोऽवस्थाभेदे प्रवृत्तेन द्विवचनेन प्राप्यते अत एव पूष्णोऽनुग्रहं द्वेधा वक्ष्यति " पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् " इति । केवलश्चेत्प्रपिष्टभुग्भविष्यति अन्यसहितश्चेद्यजमानस्य दद्भिर्भक्षयिष्यतीत्यर्थः ॥ ॥ २१ ॥ छिंदन्नपीत्यत्र शिर इत्युपरि व्यक्तीभविष्यति त्र्यंबको वीरभद्रः ॥ २२ ॥ अस्त्रान्वितैर्मंत्रसहितैः शस्त्रैरनिर्भिन्ना त्वग्यस्य तथाभूतं दृष्ट्वेति शेषः ॥ २३ ॥ स पशूनां पतिर्मखे संज्ञपनं योगं कंठनिष्पीडनादिरूपं मारणोपायं दृष्ट्वा तेनोपायेनाहरत् ॥ २४ ॥ अन्येषां ब्राह्मणादीनां तद्विपर्ययोऽसाधुशब्दः अभूदिति शेषः ॥ २५ ॥ गुह्यकालयं कैलासं प्रतस्थे ॥ २६ ॥ इति श्रीभा० म० चतुर्थे टीकायां पंचमोऽध्यायः ॥ ५ ॥ षष्ठे तु देवसंघेन सह गत्वा भवं विधिः ॥ सांत्वयामास दक्षादिजीवितार्यर्थमादरात् ॥ १ ॥ अथ देवगणाः सर्वे स्वयंभुवे न्यवेदयन्निति द्वितीयेनान्वयः ॥ १ ॥

दैवत्याभावात् । तत्रेंद्रसाहित्यावस्थायाम् तस्य पूष्णः वक्तव्यं स्यात् पिष्टातिरिक्तचरुद्रव्यस्य सत्त्वात् । एतत्सदंतत्वं न च संगच्छते कुतस्तस्य पूष्णः सदन्तत्वे "पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक्" इत्यग्रिमानुग्रहस्यायोग्यत्वपातात् । तत्रापींद्रसाहित्यावस्थायामपि । अवस्थाभेदे केवले साहित्यरूपे । अत एवावस्थाभेदेन पूष्णो द्विविधत्वादेव । इत्यर्थ—इति तात्पर्यम् । कालिंगस्य कलिंगदेशनृपस्य ॥ २१ ॥ तच्छिर उद्धर्तुं छेत्तुम् । तदा छेदनावसरे ॥ २२ ॥ २३ ॥ स प्रसिद्धः पशुपतिः वीरभद्रः अंशांशिनोरभेदोपचाराद्रुद्रवत्र्यंबकपशुपतिहरशब्दा वीरभद्रवाचका एव वह्निकगवह्निन्यायेन वा । यजमान एव पशुस्तस्य ॥ २४ ॥ तेषां रुद्रगणानाम् । साधुकृतमिति जल्पः साधुवादः ॥ २५ ॥ तस्मिन्यज्ञे । दक्षिणसंज्ञाग्नौ । स च (दक्षश्च) देवयजनं च (यज्ञश्च) इति समाहारद्वंद्वो वा ॥ २६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ आदिना भृग्वादिग्रहः । द्वितीयादिना श्मश्रुरोहादिग्रहः (१) अथ दक्षयज्ञनाशानंतरम् । रुद्रानीकैश्शिवसैन्यैः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुलाः ॥ स्वयंभुवे नमस्कृत्य कात्स्न्येंनैतन्न्यवेदयन् ॥२॥ उपलभ्य पुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि ॥ क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषताम् ॥ ४ ॥ अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं परादुः ॥ प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मम् ॥५॥ आशासाना जीवितमध्वरस्य लोकः सपालः कुपितेन यस्मिन् ॥ तमाशु देवं प्रियया विहीनं क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ ६ ॥ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वम् ॥ विदुः प्रमाणं बलवीर्ययोर्वा यस्यात्मतंत्रस्य क उपायं विधित्सेत् ॥ ७ ॥

शूलादिभिः संछिन्नानि त्रुटितानि भिन्नानि विदीर्णान्यंगानि येषाम् । सह ऋत्विग्भिः सभ्यैश्च वर्तमानाः ॥ २ ॥ कस्य दक्षस्य यज्ञे ब्रह्मा विष्णुश्च नेयतुर्न जग्मतुः यत्रारुद्रको यज्ञस्तत्र नारायणविरिंचावपि नागतौ ॥ ३ ॥ विभुर्ब्रह्मा तेजीयस्यतितेजस्विनि पुरुषे कृतागसि कृतापराधे सत्यपि स्वयं तत्र कृतागसां बुभूषतां भवितुमिच्छतां प्रत्यपराधं चिकीर्षतां सा तथाविधा बुभूषा तेषां क्षेमाय न भूयात् । प्रायेणेति लोकोक्तिः न भवेदेवेत्यर्थः । यूयं तु अकृतागस्यपि तस्मिन् कृतकिल्बिषाः अतः कथं क्षेमं स्यात् ॥ ४ ॥ अथापि तं प्रसादयध्वं क्षमापयत ये भवंतो बर्हिषो यज्ञस्य भागभाजं परादुर्दूरादेव खंडितवंतः प्रगृहीतांघ्रिपद्मं पादौ प्रगृह्येत्यर्थः ॥ ५ ॥ अध्वरस्य जीवितं पुनःसंधानं प्रार्थयमानाः संतः यस्मिन्कुपिते सति सपालो लोको न भवेन्नश्येदित्यर्थः ॥ ६ ॥ वयं तु तत्र गंतुं बिभीमस्त्वमेव कंचिदुपायं विधत्स्वेति चेदत आह । नेति । यज्ञस्तदानींतन इंद्रः यस्य तत्त्वं स्वरूपं बलवीर्ययोः प्रमाणमियत्तां च न विदुः तत्र वीर्यं पराक्रमः तस्य स्वतंत्रस्य क उपायं कर्तुमिच्छेत् । पापमिति

स्वयंभुवे स्वयंभुवमनुकूलयितुमित्यर्थः । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति तुमुनोऽप्रयुक्तस्य कर्मणि चतुर्थी न तु नमोयोगे। उपपदविभक्तेर्बलीयस्त्वाच्छांदसी वा । एतद्वृत्तं कात्स्न्येंन सामस्त्येन॥२॥ ननु "अग्नौ वैष्णवं पुरोडाशं निर्वपति प्रजापते न त्वदेतानि" इति श्रुतेस्तौ कथं नाहूतौ तत्र । किंचानाहूतात्रे तत्संधानादिप्रार्थनं च कथं युक्तमिति चेदाहूतावपि तत्र न गतावित्याह—उपलभ्य ज्ञात्वा समष्टिजीवत्वाद्ब्रह्मा परमात्मत्वान्नारायणश्च विश्वात्मेत्युभयोर्विशेषणम्। पुराज्ञाने हेत्वंतरं च भगवानिति । एतदपि द्वयोर्विशेषणम् ॥३॥ तत्र तेजस्विनि तथा बुभूषाकृतागसां तेषां तेजस्विन्यपराधकृतवताम्। इत्यर्थ इति। प्रायेणेत्यनेन कस्यचिन्महदतिक्रमकर्तुरपि क्षेमो भवेदिति न मंतव्यमिति भावः। "हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः" इति श्रीदशमोक्तेः॥४॥ अथापि यदि बुभूषथेत्यर्थः। इत्यर्थ इति। पादग्रहणमात्रेणैव स प्रसीदति तदन्तःकरणमहं जानामीति भावः। "प्रणिपातप्रतीकारः संरंभो हि महात्मनाम्" इत्युक्तेः। "उष्णत्वमग्न्यातपसंनियोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य" इति न्यायात्। "बर्हिर्यज्ञकुशाग्निषु" इति धरणिः॥५॥ तस्य कोपेन सपाललोकस्यापि नाशसंभवादतस्तं तूर्णं प्रसादयध्वं किं च तत्कोपे केवलं दक्षदुरुक्तिरेव न कारणमपि तु प्रियावियोगोपीतीतः शीघ्रं यतध्वमिति भावः ॥ ६ ॥ "यज्ञो यज्ञपतिस्त्विंद्रः पुरुहूतः पुरुष्टुतः" इति तीर्थोक्तेर्यज्ञपदमत्र न विष्णुपरं तस्य "यः सर्वज्ञः सर्ववित्" इति श्रुतेर्व्याकोपात् । तत्त्वं स्वरूपं बलवीर्येत्युपलक्षणं ज्ञानादीनाम् । यद्यपि यज्ञः स्वायंभुवमन्वंतरेंद्रः श्रीविष्णोरवतारः यज्ञाधिष्ठातृत्वेन तस्य प्राचीनबर्हिषो राज्ये षष्ठमन्वंतरेपि स्थितेरित उक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः ॥ ययौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः॥८॥ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः ॥ जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ॥९॥ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥ नानाऽमलप्रस्रवणैर्नानाकंदरसानुभिः ॥ रमणं विहरंतीनां रमणैः सिद्धयोषिताम् ॥ ११ ॥ मयूरकेकाभिरुतं मदांधालिविमूर्छितम् ॥ प्लाविते रक्तकंठानां कूजितैश्च पतत्रिणाम् ॥ १२ ॥ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः ॥ व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः ॥१३॥ मंदारैः पारिजातैश्च सरलैश्चोपशोभितम् ॥ तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥ १४ ॥

पाठेऽपराधम् ॥ ७ ॥ ८ ॥ कैलासं वर्णयति जन्मौषधीत्यादिचतुर्दशभिः । नेरतरैर्देवैर्जुष्टम् सेवितम् ॥ ९ ॥ शृंगे रमणं रतिप्रदमित्युत्तरेणान्वयः । कथंभूतैः । नानाधातुभिर्विचित्रितैः नाना द्रुमलता गुल्माश्च येषु ॥ १० ॥ नाना अमलानि प्रस्रवणानि येषु नाना कंदराः सानवश्च येषु तैः रमणैः सह क्रीडंतीनाम् ॥ ११ ॥ मयूराणां केकाभिः स्वनैर्नादितम् । मदांधैरलिभिर्भृंगैः विशेषेण मूर्च्छितं मूर्छना रागगतिविशेषस्तद्व्याप्तं कृतम् । रक्तकंठानां कोकिलानां प्लावितैः प्लुतत्वं नीतैः स्वरैः अन्येषां च पतत्रिणां पक्षिणां कूजितैः ॥ १२ ॥ उद्धस्तैरुन्नतशाखैर्द्रुमैर्द्विजान्पक्षिण आह्वयंतमिव आकारयन्तमिव । लोके हि हस्तमुत्क्षिप्योच्चैः स्वरेणाह्वानमर्थिनां द्विजानां कुर्वंति अद्रिश्चोत्क्षिप्तहस्ताकारैर्द्रुमैस्तत्रत्यपक्षिस्वनैश्च तथा लक्ष्यत इत्यर्थः । व्रजद्भिर्मातंगैर्गजैर्व्रजंतमिव निर्झरध्वनिभिर्गृणंतं भाषमाणमिव ॥ १३ ॥ १४ ॥

स्वामिचरणैस्तदानींतन इंद्र इति ॥ ७ ॥ मया सह गमने चैतेषां शिवः क्षिप्रं प्रसत्स्यतीति महादयालोरजस्य कैलासयात्रामाह–स इति ॥ ८ ॥ जन्मना विशिष्टकुलोत्पत्त्या ओषधिना चित्रकाद्यौषधेन । तपसा कृच्छ्रचांद्रायणादिना । मंत्रेण महामृत्युंजयादिना । महामृत्युंजयमंत्रश्च मंत्रमहोदधावुक्तः "महामृत्युंजयं वक्ष्ये दुरितापन्निवारणम् । यं प्राप्य भार्गवः शंभोर्मृतान्दैत्यानजीवयत् (१) तारः खं व्यापिनी चंद्रयुक्ता रश्वतुराननः । अर्घीशबिन्दुसंयुक्तो हंसः सर्गी च भूर्भुवः । (२) "सकारवालसर्गाढ्यस्त्र्यंबकं वैदिको मनुः । भूर्भुवः स्वो भुजंगेशस्तारो जूंसर्गवान्भृगुः ॥ आकाशो मनुबिन्द्वाढ्यः प्रणवांतो मनूत्तमः" (३) तथा हि "ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् । भूर्भुवः स्वरों जूं सः हौं ॐ" योगेनाष्टांगेन । एतैः सिद्धैर्नरेतरैर्देवादिभिः ॥ ९ ॥ मणयो मरकतादयः । धातवो हरितालादयः सुवर्णादयः । मृगाणां चमर्यादीनां गणाः समूहास्तैरावृतैर्वेष्टितैः ॥ १० ॥ "निर्झरः प्रस्रवोंभसाम्" इति हलायुधः । जलस्य नानात्वं मारकतादिस्थलसंपर्कात् । कर्दमराहित्ये नामलत्वं न तु शौक्ल्येन तथात्वे नानात्वं, कंदरा गुहा । सानवो नगोर्द्धसमभूमागाः । रमणं रतिप्रदम् ॥ ११ ॥ "क्रमयुक्ताः स्वराः सप्त मूर्च्छना यत्र सा भवेत्" । स्वरा निषादादयः । प्लुतत्वमुच्चैस्त्वम् । नीतैः प्रापितैः स्वरैश्चाभिरुतम् । यद्वा । मयूरकेकाभिः रुतं कृतशब्दम् । रलोपे दीर्घाभावोऽत्र छंदोभंगभयात् । "गतोऽसौ पुनराजसु' इतिवत् ॥ १२ ॥ इत्यर्थ इति । अत्र कैलासस्य तद्वासस्थानस्याप्यार्थिमनोरथपूरकत्वकथनेन शिवस्य तथात्वं तु कैमुत्यन्यायसिद्धमिति ध्वनितम् ॥ १३ ॥ मंदारैः पुष्पद्रुमैः । पारिजातैः पारिभद्रैः । सरलैर्देवदारुभिः । तमालैस्तापिच्छैः । शालैस्सर्जैः । तालैस्तृणराजैः । कोविदारैः कांचनारकैः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चूतैः कदंबैर्नीपैश्च नागपुन्नागचंपकैः ॥ पाटलाशोकबकुलैः कुंदैः कुरबकैरपि ॥ १५ ॥ स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः ॥ कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मंडितम् ॥ १६ ॥ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥ भूर्जैरोषधिभिः पूगै राजपूगैश्च जंबुभिः ॥ १७ ॥ खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः ॥ द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः ॥१८॥ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः ॥ नलिनीषु कलं कूजत्खगवृंदोपशोभितम् ॥ १९ ॥ मृगैः शाखामृगैः क्रोडैर्मृगेंद्रैर्ऋक्षशल्यकैः ॥ गवयैः शरभैर्व्याघ्रैरुरुभिर्महिषादिभिः ॥ २० ॥ कर्णान्त्रैकपदाश्वास्यैर्निर्जुष्टं वृकनाभिभिः ॥ कदलीखंडसंरुद्धनलिनीपुलिनश्रियम् ॥२१॥ पर्यस्तं नंदया सत्याः स्नानपुण्यतरोदया ॥ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः ॥ २२ ॥ ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीम् ॥ वनं सौगंधिकं चापि यत्र तन्नाम पंकजम् ॥ २३ ॥

चूताम्रयोर्नीपकदंबयोरवांतरजातिभेदः वेणुकीचकयोश्च नीरंध्रसरंध्रत्वेन भेदः॥ १५॥स्वर्णार्णैः स्वर्णवर्णैः शतपत्रैः पुष्पप्रधानगुल्मभेदैर्मंडितम् । वररेणुकजातिभिरित्यत्र वराः श्रेष्ठा रेणुका एला जातिर्मालती ॥ १६ ॥ १७ ॥ द्रुमजातिभिरित्यत्र जातिरवांतरभेदसामान्यम् ॥ १८ ॥ कुमुदादिवनस्य समृद्धिभिर्हेतुभिर्नलिनीषु सरःसु कलं मधुरं यथा भवत्येवं कजंति यानि पक्षिवृंदानि तैरुपशोभितम् ॥ १९ ॥ मृगादिभिर्निर्जुष्टं निषेवितम् । तत्र शाखामृगैर्वानरैः क्रोडैः सूकरैः ऋक्षैर्ऋच्छभल्लैः पूर्वं मृगगणाः शृंगविशेषणत्वेनोक्ता इदानीं तु स्वातंत्र्येणेत्यपौनरुक्त्यम् ॥ २० ॥ नाभिभिः कस्तूरीमृगैः कदलीषंडैः कदलीनां षंडैः संघातैः संरुद्धान्यावृतानि नलिनीनां नदीनां पुलिनानि तैः श्रीः शोभा यस्मिंस्तम् ॥ २१ ॥ नंदया गंगया पर्यस्तं परिवेष्टितम् सत्या भवान्याः स्नानेन पुण्यतरमतिसुगंधमुदकं यस्यां तया ॥ २२ ॥ तत्र गिरौ वनं

असनैः प्रियकपुष्पैः । अर्जुनैः ककुभैः ॥ १४ ॥ नागो नागकेसरः । पुन्नागः सुरवल्लभः । कुरबकैस्तिलकैः ॥ १५ ॥ वरः करवीरः । कुब्जकैः कुंकुमतरुभिः । माधवी वासंती । अत्र संस्कृताधिकारित्वात्पर्यायांतरमेवोक्तमपभ्रंशानां नानात्वात्तैर्बोधनस्याशक्यत्वात् ॥ १६ ॥ पनसः प्रकांडोद्भूतमहाफलवृक्षविशेषः । उदुंबरो जंतुफलः । अश्वत्थश्चलदलः । प्लक्षः पर्कटी । न्यग्रोधो वटः । हिंगू रामठवृक्षः । भूर्जैर्भूर्जपत्रैः । औषधीभिः सौभांजनादिवृक्षैः ॥ १७ ॥ आम्रातकः विदुलः । प्रियालो राजादनम् । मधुको मधूकः । इंगुदी तापसतरुः । अवांतरभेदसामान्यमवांतरजातिः ॥ १८ ॥ कुमुदाद्याः कमलजातयस्ताभिः । वनर्द्धिभिर्जलसमृद्धिभिः । यद्वा । कुमुदादिवनानां समूहानां समृद्धिभिराधिक्यैः "वनं नपुंसकं नीरे समूहालयकानने" इति कोशात् ॥१९॥ शाखामृगा वानराः । क्रोडा वराहाः । मृगेंद्राः सिंहाः।ऋक्षा भल्लुकाः । शल्यकाः कंटकवराहाः । गवया वनगावः । आदिना शरभादयो ग्राह्याः ॥२०॥२१॥ "पुण्यं धर्मे शोभने च सुगंधे सुकृती जले" इति कोशात्॥२२॥पंकजानि संति सौगंधिकाख्यानि मानससरोवरीयकमळजातीनीत्यर्थः ॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदा चालकनंदा च सरितौ बाह्यतः पुरम् ॥ तीर्थपादपदांभोजरजसाऽतीव पावने ॥२४ ॥ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः ॥ क्रीडंति पुंसः सिंचंत्यो विगाह्य रतिकर्शिताः ॥ २५ ॥ ययोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरम् ॥ वितृषोऽपि पिबंत्यंभः पाययंतो गजा गजीः ॥२६॥ तारहेममहारत्नविमानशतसंकुलाम् ॥ जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम् ॥ २७ ॥ हित्वा यक्षेश्वरपुरीं वनं सौगंधिकं च तत् ॥ द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः ॥ २८ ॥ रक्तकंठखगानीकस्वरमंडितषट्पदम् ॥ कलहंसकुलप्रेष्ठं खरदंडजलाशयम् ॥ २९ ॥ वनकुंजरसंघृष्टहरिचंदनवायुना ॥ अधिपुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः ॥ ३० ॥ वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः ॥ प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटम् ॥ ३१ ॥ स योजनशतोत्सेधः पादोनविटपायतः ॥ पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ॥ ३२ ॥

च ददृशुः । यत्र वने तन्नाम सौगंधिकं पंकजं भवति जातावेकवचनम् ॥ २३ ॥ पुरीं वर्णयति । नंदा चेति चतुर्भिः ॥ सरितौ पुरः पुराद्बाह्यतो भवतः तीर्थपादस्य हरेः पादांभोजरजसा ॥ २४ ॥ ययोर्नद्योः रतिकर्शिताः सुरतश्रमकर्शिता विगाह्य प्रविश्य क्रीडंति ॥ २५ ॥ ययोरंभो विगततृषोऽपि गजाः पिबंति । तत्र हेतुः । तासां सुरस्त्रीणां स्नानेन विभ्रष्टं गलितं यन्नवं कुंकुमं नवीनकेसरं तेन पिंजरं पीतवर्णम् । गजीः करिणीः ॥ २६ ॥ तारं रूप्यम् । तारादिमयविमानानां शतैः संकुलाम् । तडिद्भिः स्त्रीणां घनैर्विमानानां खेन पुर्याः सादृश्यम् ॥ २७ ॥ यक्षेश्वरपुरीं हित्वाऽतिक्रम्य तद्वनं च दृष्ट्वा ते देवा आराद् दूराद्वटं ददृशुरिति चतुर्थेनान्वयः । कथंभूतं वनम् । चित्राणि माल्यानि फलानि छदाश्च पत्राणि येषु तैर्द्रुमैर्हृद्यं सुखकरम् ॥२८॥ रक्तकंठखगानां कोकिलानामनीकस्य स्वरैर्मंडिताः षट्पदाः षट्पदस्वरा यस्मिन् । कलहंसानां कुलस्य प्रेष्ठमतिशयेन प्रियम् । खरदंडानि पद्मानि तैर्युक्ता जलाशया यस्मिन् ॥ २९ ॥ वनकुंजरैः संघृष्टा ये हरिचंदनद्रुमास्तत्संबंधिना वायुना पुण्यजनस्त्रीणां मनः अधि अधिकमुन्मथयन् ॥ ३० ॥ यत्र चोत्पलमालिन्यो वाप्यस्तत्किंपुरुषैः प्राप्तं वनं दृष्ट्वा । पाठांतरे किंपुरुषैः प्राप्ता वापीश्च दृष्ट्वेत्यर्थः ॥ ३१ ॥ योजनशतमुत्सेध उच्छ्रायो यस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैर्विटपैः शाखाभिरायतो विस्तृतः पर्यक् सर्वतः कृता अचला छाया येन निर्गतं नीडं यस्मात् ॥ ३२ ॥

तीर्थौ तीर्थवत्पवित्रकरौ ध्यानार्चनादिना पादौ यस्य तस्य विष्णोः पदांभोजरजसा एतेन भगीरथानयनात्पूर्वमप्यलकायां गंगासदृश्यौ नद्यावास्तां ते च भगीरथसंगमादतीव पावन्यावभूतामिति ॥ २४ ॥ ययोर्नंदालकनंदयोः । तयोरतिकार्शितदेवस्त्रीपावनकर्तृत्वेन त्वामपि पावयिष्यत इति मा दासीजत्वेनापावनशंकां कुर्वित्याभिप्रेत्याह–क्षत्तरिति त्वं तु व्यासोद्भूतत्वाच्छुद्ध एवेति भावः ॥ २५ ॥ तत्र पाने कुंकुमसंगात्सुगंधं सुवर्णं च वारि दृष्ट्वा पानलोलुपा आसन्नित्यर्थः ॥ २६ ॥ " तारं रूप्ये न ना ताम्रे मौक्तिकाद्युच्चशब्दयोः " इति । महारत्नानि हीरकादीनि । संकुलां व्याप्ताम् । पुण्यजना यक्षाः ॥ २७ ॥ अलकांतःप्रवेशे तद्वैचित्र्यदर्शनेन तत्स्थे जनसल्लापेन कालक्षेपे छिन्नदक्षदेहेन यज्ञानुसंधानं दुष्करं स्यादिति धिया तां पुरीं तद्वनञ्च हित्वा बहिरेव गच्छंतस्ते देवा इति । माल्यानि पुष्पाणि । छदाः पत्राणि ॥ २८ ॥ २९ ॥ संघृष्टाः कंडूतिवारणार्थम् । उन्मथयद्विलोडयत् ॥ ३० ॥ यत्र च वने । पाठांतरे प्राप्ता इति पाठे । इत्यर्थ इति । द्वितीयार्थेयं प्रथमेति भावः । किंपुरुषा देवयोन्यवांतरभेदः ॥ ३१ ॥ स वटः । " नीडं स्थानकुलाययोः । निश्चयेन स्तुते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्महायोगमये मुमुक्षुशरणे सुराः ॥ ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकम् ॥ ३३ ॥ सनंदाद्यैर्महासिद्धैः शांतैः संशांतविग्रहम् ॥ उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम् ॥ ३४ ॥ विद्यातपोयोगपथमास्थितं तमधीश्वरम् ॥ चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलम् ॥ ३५ ॥ लिंगं च तापसाभीष्टं भस्मदंडजटाजिनम् ॥ अंगेन संध्याभ्ररुचा चंद्रलेखां च बिभ्रतम् ॥ ३६ ॥ उपविष्टं दर्भमय्यां बृष्यां ब्रह्म सनातनम् ॥ नारदाय प्रवोचंतं पृच्छते शृण्वतां सताम् ॥ ३७ ॥ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि ॥ बाहुप्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया ॥ ३८ ॥ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षाम् ॥ सलोकपाला मुनयो मनूनामाद्यं मनुं प्रांजलयः प्रणेमुः ॥ ३९ ॥ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिः ॥ उत्थाय चक्रे शिरसाऽभिवंदनमर्हत्तमः कस्य यथैव विष्णुः ॥ ४० ॥ तथाऽपरे सिद्धगणा महर्षिभिर्ये वै समंतादनु नीललोहितम् ॥ नमस्कृतः प्राह शशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः ॥ ४१ ॥ ब्रह्मोवाच ॥ जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ॥ शक्तेः शिवस्य च परं यत्तद् ब्रह्म निरंतरम् ॥ ४२ ॥

मुमुक्षूणां शरणे आश्रये त्यक्तामर्षोऽतकस्तत्तुल्यम् ॥ ३३ ॥ तं विशिनष्टि सनंदनाद्यैरिति पंचभिः । सख्या कुबेरेण चोपास्यमानम् ॥ ३४ ॥ विद्या उपासना तपश्चित्तैकाग्र्यं योगः समाधिस्तेषां पंथानं प्रवर्तनद्वारा स्थितं लोकस्य मंगलं हितं तपोवात्सल्यात्स्नेहादाचरंतम् ॥ ३५ ॥ संध्याभ्ररुचा रक्तवर्णेनांगेन भस्मादिलिंगं चंद्रलेखां च बिभ्रतम् ॥ ३६ ॥ व्रतिनामासनं बृसी तस्यां ब्रह्म प्रवोचंतम् ॥ ३७ ॥ सव्यं पादपद्मं दक्षिणे ऊरौ कृत्वा विन्यस्य जानुनि च सव्यं बाहुं कृत्वा दक्षिणबाहुप्रकोष्ठे मणिबंधस्थाने अक्षमालां च कृत्वा दक्षिणहस्तकृतया तर्कमुद्रयोपलक्षितमासीनमित्यर्थः । तदुक्तं योगशास्त्रे । "एकं पादमथैकस्मिन्विन्यसेदूरुसंस्थितम् ॥ इतरस्मिंस्तथा बाहुं वीरासनमिदं स्मृतम् ॥" इति । तर्कमुद्रा चोक्ता । "तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगुलीः ॥ प्रसार्य बंधनं प्राहुस्तर्कमुद्रेति मान्त्रिकाः॥" इति ॥ ३८॥ ब्रह्मनिर्वाणं ब्रह्मानंदस्तत्र समाधिरैकाग्र्यं तमाश्रितम् । योगकक्षां योगपट्टं च वामजानुदृढीकरणार्थं विशेषेणोपाश्रितवंतम् । मननशीला मनवस्तेषामाद्यं मुख्यम् ॥ ३९ ॥ अर्हत्तमो पूज्यतमोऽपि विष्णुर्वामनमूर्तिर्यथा कस्य कश्यपस्य ॥ ४० ॥ महर्षिभिः सहिता ये समंतान्नीललोहितमनुवर्तंते तेऽपि तस्मै वंदनं चक्रुः । एवं सर्वैर्नमस्कृतः प्राह। कृतः प्रणामो देवैर्यस्मै तम् ॥ ४१ ॥ यद्यपि त्वं नीचवन्मां नमस्करोषि तथापि तवैश्वर्यमहं वेद्मीत्याह । जान इति । त्वां विश्वस्येशं जाने । तत्र हेतुः । जगतो योनिर्या

पक्षिगृहेपि" इति निरुक्तिः । तापेति । शीतस्याप्युपलक्षणं शीतोष्णरहित इत्यर्थः । पक्षिवासरहितत्वादनुपद्रवश्च ॥ ३२ ॥ तस्मिन्वटे सामीपिकाधारे सप्तमी । महायोगानां सनकानां प्राचुर्यं यत्र तस्मिंस्तथा दक्षकृतापराधस्मृत्यैवेत्युक्तम् ॥ ३३ ॥ तं शिवम् ॥ सनंदः सनंदनः ॥ ३४ ॥ ३५ ॥ लिंगं चिह्नं "लिंगं शेफसि वेषे च चिह्ने बुद्ध्यादिसंहतौ" इति यादवः ॥ ३६ ॥ ब्रह्म वेदं सतां शृण्वतां सनकादिनां मध्ये नारदस्य भक्तत्वाच्छ्रैष्ठ्यम् । वेदस्यापि प्रायो भक्तिप्रतिपादकत्वमेवेति ज्ञेयम् ॥ ३७ ॥ इत्यर्थ इति । एतेन वीरासनमुक्तमिति भावः । तत्तथा । तर्कमुद्रा च तत्रैवोक्ता ॥ ३८ ॥ ३९ ॥ स शिवः । आत्मयोनिं ब्रह्माणं यथैव कस्य ब्रह्मणो जनकत्वाद्विष्णुरर्हत्तमः पूज्यतमस्तथा रुद्रस्य ब्रह्मेत्यर्थः ॥ ४० ॥ तेऽपरेपि । तस्मै ब्रह्मणे । तथा रुद्रवत् । वंदनं नतिम् ॥ ४१ ॥ तत्र विश्वेशत्वे । तथापीशत्वेपि ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः ॥ विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥ ४३ ॥ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरम् ॥ त्वयैव लोकेऽव सिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः ॥ ४४ ॥ त्वं कर्मणां मंगल मंगलानां कर्तुः स्म लोके तनुषे स्वः परं वा ॥ अमंगलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ॥ ४५ ॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव ॥ भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुम् ॥ ४६ ॥ पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशम् ॥ परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः ॥ ४७ ॥

शक्तिः प्रकृतिर्बीजं च शिवः पुरुषस्तयोः परं कारणम् । तथापि निरंतरं निर्भेदं यद्ब्रह्म निर्विकारं तदेव त्वमिति जाने ॥ ४२ ॥ ननु विरुद्धमेतत्तत्राह । त्वमेव सरूपयोरविभक्तयोः शिवशक्त्योः क्रीडन्विश्वसृष्ट्यादि करोषि । ऊर्णपटो यथा ऊर्णनाभिरिव । स्वरूपयोरिति पाठे स्वांशयोः । अतो न विरोधः ॥ ४३ ॥ धर्ममर्थं च दोग्धि या त्रयी तस्या अभिपत्तये संरक्षणायाध्वरं सृष्टवानसि । यद्वा हे धर्मार्थदुघ धर्माद्यभिपत्तये तत्प्राप्तये दक्षेण सूत्रेण निमित्तेन सेतवो वर्णाश्रममर्यादाश्च अवसिता निबद्धा निर्णीता इति वा श्रद्दधते श्रद्धयाऽनुतिष्ठंति ॥ ४४ ॥ सर्वकर्मफलदाताऽपि त्वमेवेत्याह । हे मंगल त्वं मंगलानां शुभानां कर्मणां कर्तुः स्वः स्वर्गं परं मोक्षं वा तनुषे अमंगलानामशुभानां निषिद्धानां कर्मणां कर्तुश्च तमिस्रं नरकं तनुषे । तत्र केन हेतुना तदेव तस्मिन्नेव कस्यचिद्विपर्ययो भवति ॥ ४५ ॥ त्वत्कोपोऽत्र हेतुरित्यसंभावितमिति कैमुत्यन्यायेनाह । न वै सतां सतः रोषोऽभिभवेत् । तव त्वां द्वितीयार्थे षष्ठ्यौ । पशुमज्ञं यथाऽभिभवति तद्वत् ॥ ४६ ॥ अतो ये पृथग्धियो भेददृशोऽतः कर्मण्येव दृष्टिर्येषाम् । दुष्ट आशयो

अत्राक्षिपति—नन्विति । एतदीशत्वे ब्रह्मत्वं विरुद्धं मायाशबलेशस्य तद्रहितब्रह्मत्वं तेजास्तिमिरैकत्रस्थितिवन्न संगच्छतेऽतोविरुद्धम् । अतस्तयोः 'तदभिन्नाभिन्नस्य तदभिन्नत्वानियमात्' इति न्यायेन तदभिन्नत्वात् । 'तथा हि—तच्छब्देन ब्रह्म तदभिन्न ईशस्तदभिन्नौ प्रकृतिपुरुषौ तयोस्तदाभिन्नत्वं ब्रह्माभिन्नत्वमेवेत्यर्थः । शिवशक्त्योरित्यधिकरणे सप्तमी । तत्र क्रीडन्नित्यर्थः । यद्वा । द्वितीयार्थे षष्ठी । ते क्रीडन् क्रीडयिष्यन्नित्यर्थः । तृतीयार्थे षष्ठीति चक्रवर्ती । ताभ्यां क्रीडन्नित्यर्थः ॥ ४३ ॥ अभिपूर्वपदे रक्षणार्थानुपलब्धेराह—यद्वेति । अभिपत्तिपदेन धर्माद्यन्वयस्तु प्रसंगबलेनैवेत्याह—तत्प्राप्तये धर्मादिप्राप्तये । "सूत्रं स्यात्तन्तुशास्त्रयोः" इति निरुक्तयुक्तेः [। सूत्रपदस्यार्थद्वयवाचकत्वादाह—निर्णीता इति वेति । तथा च सूत्रेण तंतुना वस्त्रमिव निबद्धाः सूत्रेण शास्त्रेण निर्णीता इति विवेकः । अतो दक्षवधे सति संप्रति धर्मप्रवर्तकस्याभावाद्धर्मस्य लोपे लोकस्य दुर्गतिः स्यादिति भावः ॥ ४४ ॥ हे मंगल कल्याणरूप । तत्र शुभाशुभयोर्मध्ये । तस्मिन्नेव शुभाशुभकर्मण्येव । यथा पुण्यकर्तुर्दक्षादेस्तमिस्रं पापं कर्तुरजामिलादेरपवर्ग इति त्वं पृच्छसि इति भावः । तीर्थस्तु—नायं नियमो द्रढीयान्विपर्ययदर्शनादित्याक्षिप्य समादधौ । केनचिद्भक्तद्वेषादिना हेतुना कस्यचिदेवं धर्मादेः फलविपर्ययः स्यान्न तु सर्वस्येत्यज्ञानां धर्मसूक्ष्मत्वज्ञानं दुर्लभमिति भावः ॥ ४५ ॥ अत्र यज्ञनाशे । चक्रवर्ती तु—मम रोषप्रसादावेव तत्र हेतू इति चेन्मैवं तव प्रसाद एव भवेन्न तु रोष इति कैमुत्यन्यायेनाह—आत्मनि परमात्मनि त्वयि । यद्वा आत्मनि स्वस्मिन्नपृथगभेदेन स्वस्मिन्सुखदुःखे इव भूतान्यपि सुखदुःखवंति दिदृक्षतां द्रष्टुमिच्छतामेव किमुत पश्यतामिति पशव एव रोषवंतो भवंति न तु संतः प्रायेणेति जयविजयविषयकरोषवतां सनकादीनामिव दक्षविषयकस्तव रोष आत्मारामस्याप्यभूदिति सूचयति ॥ ४६ ॥ अतो विज्ञानां रोषाभावात् । अतो भेददर्शित्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्टधियः पृथग्दृशः ॥ कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमम् ॥ ४८ ॥ भवांस्तु पुंसः परमस्य मायया दुरंतयाऽस्पृष्टमतिः समस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि प्रभो ॥४९॥ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयाऽसमाप्तस्य मनोः प्रजापतेः ॥ न यत्र भागं तव भागिनो ददुः कुयज्विनो येन मखो निनीयते ॥ ५० ॥ जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः ॥ भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् ॥ ५१ ॥ देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः ॥ भवतानुगृहीतानामाशुमन्योऽस्त्वनातुरम् ॥ ५२ ॥

येषां परेषामुदयेन संपदा अर्पिता हृदि रुग्येषामरुंतुदा मर्मभेत्तारः दैवेनैव वधो येषां तान्मृतप्रायान्भवद्विधो निरुपमः साधुर्मा वधीन्न हन्यात् ॥ ४७ ॥ प्रत्युत साधूनां वृत्तमालोक्यानुग्रहमेव कर्तुमर्हसीत्याह द्वाभ्याम् । यस्मिन्देशे यदा काले भगवन्मायया स्पृष्टधियो मोहितचित्ताः पृथग्दृशो भेदबुद्धयो भवंति तत्रापराधेऽपि साधवो ह्यनुकंपयाऽनंतरमेव परदुःखासहिष्णुतया चित्तप्रकंपेन कृपां कुर्वंति न तु क्रमं पराक्रमम् । कुतः । दैवबलात्कृतेऽर्थे ममैव दैवमेवंभूतं कोऽत्रापराधस्तेषामिति मत्वा तद्धननं न कुर्वत इत्यर्थः ॥ ४८ ॥ भवांस्तु माययाऽस्पृष्टमतिरत एव समस्तदृक् सर्वज्ञः तया मायया हत आत्मा येषां तेष्वत एव कर्मानुगतचित्तेष्विहापराधेऽनुग्रहं कर्तुमर्हसि ॥ ४९ ॥ एवं सामान्येनोक्त्वा प्रस्तुतमाह कुर्विति त्रिभिः । त्वया हतस्यात एवासमाप्तस्य प्रजापतेरध्वरस्य । हे मनो यत्राध्वरे कुयाज्ञिका भागिनोऽपि तव भागं न ददुः । भागार्हत्वमाह । येन त्वया मखो निनीयते फलं प्राप्यते ॥ ५० ॥ ५१ ॥ हे मन्यो आयुधैरश्मभिश्च भग्नगात्राणामनातुरमारोग्यमस्तु ॥ ५२ ॥

युष्मत्कोपविषयीभूतत्त्वे तेषां कदाप्युद्धारो न भावीति भावः । भवद्विधोपि किमुत भवानिति भावः ॥ ४७ ॥ सर्वसहनशीला अपि साधवः परदुःखासहिष्णवः स्वापराधिनोपि दयंत एवेत्याह—साधुवृत्तमिति । इत्यर्थ इति । "सुखदुःखप्रदो नान्यः पुरुषस्य" इत्याद्युक्तेरिति भावः "हृदयस्य द्रवीभावो ह्यनुकंपेति कथ्यते । उपकारं कर्तुमिच्छा कृपेत्याहुर्मनीषिणः" इति तीर्थः ॥ ४८ ॥ तव तु साधुचूडामणेः कोपो न संभवेदित्याह—भवांस्त्विति । अतो मायाऽस्पृष्टमतित्वात् । समस्तदृक् तेषामपराधफलं महादुःखं पश्यस्येवेति भावः । अत एव मायाहतात्मत्वादेव । एते खलु मायया हतबुद्धयः कथं विवेकं लभंतां नानाकर्मग्रस्तमनसः कथं वा साधून्पश्यंत्वित्यत एतेषु मम दयैवोचितेति विचार्यानुग्रहं कर्तुमर्हसीति भावः ॥ ४९ ॥ तर्हि संप्रति किं कर्त्तव्यं तद् ब्रूहीति प्रस्तुतमाह—कुर्विति । अत एव त्वया हतत्वादेव । हे मनो मननशील मंत्रमूर्त्ते वा "मनुर्मंत्रे च मनने स्वायंभुवप्रभृतिषु" इति धरणिः । मंत्रैरेव मखसिद्धिरिति ते च त्वन्मूर्त्तिभूता अत उक्तं येन त्वयेति स्वामिचरणैः ।"यागोऽमंत्रोदक्षिणश्च न फलं दास्यति कर्हिचित्"इति पुराणात् ॥५०॥ यजमानसद्भावे यागोद्धारः संभवति तस्य मया हतत्त्वात्कथं नष्टाक्षाद्यवयवानां देवानां स्वभागनिरीक्षणं कथं चायुधाश्मभिर्भग्नगात्राणामृत्विजां च होमांगत्वमित्याशंक्य त्वदनुग्रहसुधासमुद्रमग्नाः सर्वे संपन्ना भवंत्वित्याह-जीवतादिति ॥ ५१ ॥ हे मन्यो यज्ञ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै॥यज्ञस्ते रुद्र भागेन कल्पतामद्य यज्ञहन्॥५३॥इति श्रीभा०म०च०रुद्रसांत्वनं नाम षष्ठोऽध्यायः॥६॥

भागश्च तवास्त्वित्याह । एष इति । हे रुद्र । यावदित्यर्थे यदित्यव्ययम् । यज्ञे कृते यावानुच्छिष्टोऽवशिष्टोऽर्थस्तावानेष तव भागोऽस्तु । हे रुद्र ते भागेनाद्य यज्ञः कल्पतां संपद्यताम् । सिद्धो भवत्वित्यर्थः ॥ ५३ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थे टीकायां षष्ठोऽध्यायः ॥६॥ सप्तमे विष्णुरुद्भूतः स्तुतो दक्षभवादिभिः ॥ यज्ञं प्रवर्तयामास

मूर्ते । एतत्समाप्तिं विना तवैवांगभंगो नान्यस्येत्यभिप्रायः ॥ ५२ ॥ सर्वं निरवद्यं स्याद्यदि मम भागो भवेदिति चेत्तवायमनुशोको मा भूदित्याह-एष त इति । उच्छिष्टः स्विष्टकृद्भागः "यदग्नये स्विष्टकृते समवद्यति भागधेयेनैव तद्रुद्रं समर्द्धयति सकृत्सकृदवद्यति सकृदेव हि रुद्र उत्तरार्द्धादवद्यत्येषा वै रुद्रस्य दिक् स्वीयायामेव दिशि रुद्रं निरवदयते " इति श्रुतेरिति तीर्थः । उत्कृष्टः शिष्टः उच्छिष्टो न तु भुक्तावशिष्ट इत्यर्थः । अत एव श्रीमहाभारतेऽनुशासनिकेत्युक्तं "रुद्रस्य विक्रमं दृष्ट्वा भीता देवाः सहर्षिभिः" इत्यारम्य "रुद्रस्य भागं यज्ञे च विशिष्टं ते त्वकल्पयन्" इत्यंतेन । किं च । रुद्रस्य देवेषु ब्राह्मणत्वादपि नोच्छिष्टभागार्थता ब्राह्मणस्याग्रभोजित्वात् । "विप्रो वाडवमुख्यौ च सर्वश्रेष्ठोग्रभुग्गुरुः । पुरुषो वीरनामा च ब्राह्मणो ब्रह्मवित्कविः ॥ वैष्णवाग्र्यो द्विजाग्र्यश्च सर्वपूज्यो धरामरः" इति सर्वार्थचिंतामण्युक्तेः । रुद्रस्य ब्राह्मणत्वं तु " त्वं हि भगवन्देवेषु ब्राह्मणोऽहं मनुष्येषु ब्राह्मणः ब्राह्मणो हि ब्राह्मणमुपधावति" इति जाबालश्रुतेः । अतो यागार्थानीतशुद्धावशिष्टद्रव्यमेव रुद्रभागस्तं विना यागो न पूर्य्यते ततो यागेविकमेव वसुसंपाद्यम् । उच्छिष्टस्य सर्वोत्कर्षतार्थर्ववेदैकादशकांडचतुर्थानुवाकारंभे प्रोक्ता तथा हि–"उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः । उच्छिष्ट इंद्रश्चाग्निश्च विश्वमंतःसमाहितम् ॥ (१) उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम् । आपः समुद्र उच्छिष्टे चंद्रमा वात आहितः ॥ (२) सन्नुच्छिष्टे प्रसंश्चोभौ मृत्युर्वाजः प्रजापतिः । लौक्या उच्छिष्ट आयत्तावश्चंद्रश्चापि श्रीर्मयि ॥ (३) दृढो दृंहः स्थिरोऽन्यो ब्रह्मविश्वसृजो दश । नाभिमिव सर्वतश्चक्रमुच्छिष्टे देवताः श्रिताः ॥ (४) ऋक्सामयजुरुच्छिष्ट उद्गीथः प्रस्तुतं स्तुतम् । हिंकार उच्छिष्टे स्वरः साम्नो मेडिश्च तन्मयि ॥ (५) ऐंद्राग्नं पावमानं महानाम्नीर्महाव्रतम् । उच्छिष्टे यज्ञस्यांगान्यंतर्गर्भे इव मातरि ॥ (६) राजसूयं वाजपेयमग्निष्टोमस्तदध्वरः । अर्काश्वमेधाउच्छिष्टे जीवबर्हिर्मदि तमः ॥ (७) अग्न्याधेयमथो दीक्षा कामप्रश्छंदसा सह । उत्सन्ना यज्ञाः सत्राण्युच्छिष्टेऽधिसमाहिताः ॥ (८) अग्निहोत्रं च श्रद्धा च वषट्कारो व्रतं तपः । दक्षिणेष्टं पूर्त्तं चोच्छिष्टेऽधिसमाहिताः ॥ (९) एकरात्रो द्विरात्रः सद्यः क्रीः प्रक्रीरुक्थः । ॐ तं निहितमुच्छिष्टे यज्ञस्याणूनि विद्यया ॥ (१०) चतूरात्रः पंचरात्रः षड्रात्रश्चोभयः सह । षोडशी शतरात्रश्चोच्छिष्टाज्जज्ञिरे सर्वे ये यज्ञा अमृतेहिताः ॥ (११) प्रतीहारो निधनं विश्वजिच्चाभिजन्नयः ॥ साह्नातिपत्रावुच्छिष्टे द्वादशाहोपि तन्मयि (१२) सूनृतासंनतिः क्षेमः स्वधोर्जामृतंसह । उच्छिष्टे सर्वे प्रत्यंचः कामाः कामेन तातृपुः (१३) नवभूमीः समुद्रा उच्छिष्टेधिश्रिता दिवः। आसूर्यो भात्युच्छिष्टेहोरात्रे अपि तन्मयि ॥ (१४) उपहव्यं विषूवंतं ये च यज्ञा गुहाहिताः । बिभर्त्ति भर्त्ता विश्वस्योच्छिष्टो जनितुः पिता ॥ (१५) पिता जनितुरुच्छिष्टोऽसौ पौत्रः पितामहः । स क्षिपति विश्वस्येशानो वृषा भूम्यामतिघ्नः ॥ (१६) ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च । भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलंबले ॥ (१७) समृद्धिरोज आकूतिः क्षत्रं राष्ट्रं षडुर्व्यः । सँवत्सरोप्युच्छिष्ट इडा प्रैषा ग्रहा हविः ॥ (१८) चतुर्होतार आप्रियश्चातुर्मास्यानि नीविदः । उच्छिष्टे यज्ञा होत्राः पशुबंधास्तदिष्टयः ॥ (१९) अर्द्धमासाश्च मासाश्चार्त्तवा ऋतुभिः सह । उच्छिष्टे घोषिणीरापः स्तनयित्नुः श्रुतिर्मही ॥ (२०) शर्कराः सिकता अश्मान ओषधयो वीरुधस्तृणाः । अभ्राणि विद्युतो वर्षमुच्छिष्टे संश्रिताश्रिताः ॥ (२१) राद्धिः प्राप्तिः समाप्तिर्व्याप्तिर्महराधतुः । अत्याप्तिरुच्छिष्टे भूतिश्चाहितानिहिता हिता ॥ (२२) यच्च प्राणिति प्राणेन यच्च पश्यति चक्षुषा । उच्छिष्टा जज्ञिरे सर्वे दिवि देवा दिवि श्रिताः (२३) ऋचः सामानि च्छंदांसि पुराणं यजुषा सह । उच्छिष्टाज्जज्ञिरे (२४) प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च वा । उच्छिष्टाज० (२५) आनंदामोदाः प्रमुदोऽभीमोदो मुदश्च ये । उच्छिष्टाज्जज्ञिरे० (२६) देवाः पितरो मनुष्या गंधर्वाप्सरसश्च ये । उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः (२७)" इत्थं सर्वोपादानत्वे उच्छिष्टस्य सर्वोत्कृष्टत्वादेव देवैः श्रीमहादेवस्य स भागः कल्पितोऽन्यथा सर्वदेवगुरोस्तद्दानं न संगच्छते स्विष्टकृत्संज्ञाहुतिरेवोच्छिष्टपदवाच्या तां विना न यागपूर्त्तिरस्तीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ इत्यजेनानुनीतेन भवेन परितुष्यता ॥ अभ्यधायि महाबाहो प्रहस्य श्रूय तामिति ॥ १ ॥ श्रीमहादेव उवाच ॥ नाघं प्रजेश बालानां वर्णये नानुचिंतये ॥ देवमायाऽभिभूतानां दंडस्तत्र धृतो मया ॥ २ ॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः ॥ मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ॥ ३ ॥ पूषा तु यजमानस्य दद्भिर्जक्षतु पिष्टभुक् ॥ देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ॥ ४ ॥ बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः ॥ भवंत्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ॥ ५ ॥

दक्षेणेति निरूप्यते ॥ १ ॥ अजेन योऽनुनीतः प्रार्थितो भवस्तेनाभिहितम् । हे महाबाहो विदुर ॥ १ ॥ अघमपराधम् ॥ २ ॥ स्वापराधमपहृत्यानुगृह्णाति । दग्धं शीर्षं यस्य तस्य प्रजापतेः दक्षस्य अजमुखभजस्य मुखं यस्मिंस्तत्तथाभूतं शिरोऽस्तु । बर्हिषः यज्ञस्य संबंधिनं भागम् । मित्रनाम्नो देवस्य ॥ ३ ॥ प्रकर्षेण कृतानि लग्नानि सर्वाण्यंगानि येषां ते भवंतु । उच्छेषणं यज्ञावशिष्टम् ॥ ४ ॥ येषां त्वंगानि नष्टानि ते त्वश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां कृतहस्ताश्च भवंतु । अध्वर्यवः

अपूर्णो हि यागो न फलं दातुं शक्नोति यज्ञोपयुक्तावशिष्टं वस्तु तत्र रुद्रभागोऽस्ति किं तु यागशालागतमनुपहतं यत्स्थितं तदपि रुद्रभाग एव " यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् । चक्रुर्भागं हि रुद्राय" इति नव मे नभगोक्तेः । उत्कृष्टं शिष्टमुच्छिष्टमिति निरुक्तेः । " त्वं हि भगवन्देवेषु ब्राह्मणोऽहं मनुष्येषु " इति जाबालोपनिषदुक्तेरग्रभोक्तुर्ब्राह्मणदेवस्य रुद्रस्योच्छिष्टनानौचित्यादुत्कृष्टभाग एवोच्छिष्टपदार्थ इति ॥९३॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ आदिनेंद्रमुनिदेवादिग्रहः (१) इत्युक्तरीत्या । धर्मपरिपंथिनो बाधेत इति बाहू महान्तौ बाहू यस्य स तथेति । यमावतारत्वादित्य भिप्रायः । यद्वा । स्वसंगिनां तत्त्वोपदेशेन बाधते शोकमोहादिकमिति बाहुर्विवेकी महांश्चासौ बाहुर्विवेकी तत्संबुद्धौ तथा ॥ १ ॥ प्रजेशेत्यनेन दंडाधिकारो वस्तुतस्तवैव तवोद्भूतत्वान्ममापि दंडकरणे न दोष इत्युक्तम् । किं च—बालत्वाद्दक्षस्य तदपराधमपि न गणये । ननु तव श्वशुरत्वात्तस्यातिज्येष्ठत्वं कथं तं बालं मन्यसे इति चेदत्र श्रीमद्वाल्मीकीयवाक्येन समाधत्ते तथाहि "गुरुलाघवमर्थानां प्रारंभे कर्मणं फलम् । तत्त्वतो यो न जानाति स बालः प्रोच्यते बुधैः" इत्युक्तबाललक्षणवत्त्वात्स बाल एव बहुत्वं तद्वत्विगपेक्षं तर्हि बालत्वेऽपि श्वशुरत्वादनुतापं तु करोष्येत्र तत्राह—नानुचिंतये पश्चात्तापं न करोमि तत्र हेतुः दंडस्तत्रेति । तत्र दक्षादौ । अपराधानुरुपदंडे हि पश्चात्तापो भवति मया तु तथा न कृतमिति भावः ॥ २ ॥ पुत्रच्छात्रादिभिर्गुरोर्वाक्यं सबहुमानं ग्राह्यमिति दर्शयन्नाह—प्रजापतेरिति । दग्धशीर्षत्वात्पूर्वं शिरोऽनुसंधानाभावः । स्वपौरुषजयस्तंभस्थापनायाज्ञजनशिक्षणाय च भगादीनामप्यन्यावयवैरेव स्वनिर्वाहः स्यादित्यभिप्रेत्याह—मित्रस्येति । स्वनेत्रस्य सूचकत्वलक्षणदोषदुष्टत्वादिति भावः । भागं स्वमिति । तद्विधजनचक्षुषः । स्वभोज्यमात्रवस्तुदर्शनतात्पर्यकत्वेन पारमार्थकत्वाभावाद्वैयर्थ्यमिति भावः ॥ ३ ॥ पूषा केवलश्चेत्पिष्टभुग्भवतु अन्यसहितश्चेद्यजमानस्य दद्भिर्जक्षतु भक्षतु'जक्षभक्षहसनयोः' इति । तस्य दन्तान्प्रकाश्य साधून्हसतः सर्वथैव दंतधारणानौचित्यादिति भावः । उच्छेषणमुत्कृष्टशेषं शिवभागं ददुः । " उच्छेषणभागो वै रुद्र " इति श्रुतेः । येये वा मे मह्यं दक्षयज्ञेमामनादृत्य प्रथमं भुक्त्वाच्छिन्नांगा अभूवन्संप्रति ते प्रकृतसर्वांगा भवन्तु मन्निंदनसमये दक्षपक्षग्रहणाच्छिन्नांगा अप्यधुना मम भागदानात्पूर्णांगाः संत्विति भावः ॥ ४ ॥ तन्मध्ये ये केचिदध्वर्यवो दक्षपक्षपातिनो हस्तचालनं चक्रुस्ते च भग्नहस्ता आसन् "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितम् ॥ परितुष्टात्मभिस्तात साधुसाध्वित्यथाब्रुवन् ॥६॥ ततो मीढ्वांसमामंत्र्य शुनासीराः सहर्षिभिः ॥ भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः॥७॥विधाय कार्त्स्न्येन च तद्यदाह भगवान्भवः॥संदधुः कस्य कायेन सवनीयपशोः शिरः॥८॥ संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः ॥ सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडम् ॥ ९ ॥ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः ॥ शिवावलोकादभवच्छरद्ध्रद इवामलः ॥ १० ॥ भवस्तवाय कृतधीर्नाशक्नोदनुरागतः ॥ औत्कंठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ॥ ११ ॥ कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः ॥ शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥ दक्ष उवाच ॥ भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः ॥ न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥ विद्यातपोव्रतधरान्मुखतः स्म विप्रान्ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् ॥ तद्ब्राह्मणान्परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः ॥ १४ ॥

अन्ये च ऋत्विजः बस्तस्याजस्य श्मश्रूण्येव श्मश्रूणि यस्य ॥ ५ ॥ मीढुष्टमः शिवस्तेनोक्तम् । परितुष्टैश्चित्तैः ॥ ६ ॥ मीढ्वांसं शिवं त्वयागत्य सर्वं कार्यमित्यामंत्र्य संप्रार्थ्य शुनासीरा देवाः सह मीढुषा वेधसा च वर्तमानाः समीढ्वद्वेधसः ॥ ७ ॥ कार्त्स्न्येन वक्रहस्तबाह्वादिसाधारण्यं विधाय ॥ ८ ॥ ९ ॥ पूर्वं वृषध्वजद्वेषेण कलिलः कलुषीकृत आत्मा यस्य सः तदा शरत्कालीनो ह्रद इवामलोऽभवत् ॥ १० ॥ ११ ॥ १२ ॥ यदपि यद्यपि प्रलब्धः पराभूतो मया भवांस्तथापि त्वया दंडो भृतः शिक्षा कृता न तूपेक्षितोऽस्मि युक्तमेवैतदित्याह । ब्रह्मबंधुषु च ब्राह्मणाभासेष्वपि तुभ्यं तव हरेश्चेति वां युवयोरवज्ञोपेक्षा नास्ति ॥ १३ ॥ तत्र हेतुमाह । विद्येति । ब्रह्मा

हुभ्यां पूष्णो हस्ताभ्याम्'' इति श्रुतेः । भृगुर्हि दक्षस्य मुख्यामात्योऽतो बस्तमुखस्य दक्षस्य बस्तश्मश्रुरेवामात्य उचित इति भावः ॥ ५ ॥६ ॥ प्रणतजनेभ्योऽभीष्टं मिमिह्वारिति मीढ्वांसः ''मिह–सेचने'' क्वसुप्रत्यये रूपं ''दाश्वान्साह्वान्मीढ्वांश्च'' इति निपातात्सिद्धम् । तेषामतिशयेन मीढान् मीढुष्टमः अनेन तदानीमेवैतन्नामोपलब्धमिति रहस्यं ज्ञायते । परितुष्टात्मभिः प्रसन्नचेतोभिः तत्र यज्ञे । अथेति मंगले । साधुसाध्विति मंगलमब्रुवन् ॥ ७ ॥ ततो मंगलध्वनेरनंतरं सुष्टु नासीरं सेनामुखं येषां ते तथा शुनो वायुः शीरः सूर्यस्तौ विद्येते येषु ते शुनाशीरा इति '' अन्येषामपि०'' इति पूर्वपदस्य दीर्घ इति तालव्यद्वयकोपि पाठोस्ति ''शुनो वायुः समाख्यातः शीरः सूर्यस्तथा हलम् । नासीरोऽग्रेसरे प्रोक्तस्तथा सेनामुखेऽपि च '' इति हरिदीक्षितः ॥ ८ ॥ तद्विधाय मित्रादिर्भगादिभ्यश्चक्षुरादिदानमेव साधारण्यं तत्कृत्वेत्यर्थः । यद्भगवान्मित्रस्य चक्षुषेक्षेतेत्याद्याह तदित्यर्थः । सवनीयपशोर्यज्ञपशोश्छागस्येत्यर्थः । कस्य दक्षस्य ॥ ९ ॥ तदा रुद्रदृष्ट्युत्तरमुत्थाने ॥ १० ॥ औत्कंठ्यात् स्नेहजन्यात् ॥ ११ ॥ भावेन प्रेम्णा ॥ १२ ॥ धृतव्रतेषु तपोविद्यायुक्तेषु ॥ १३ ॥ तत्रोपेक्षाभावे । अस्राागिति सिचो लोप आर्षः । भूत्वेति क्रियापदाध्याहारे गौरवमालक्ष्याह–यद्वेति । इत्यर्थ इति । अध्ययनाध्यापनावेदरक्षणार्थमुपदेशविचारादिनात्मतत्त्वरक्षणार्थं चेति भावः । एतेन ब्राह्मणस्यैवात्मतत्त्वोपदेशेऽधिकारो नान्यस्यात एव विदुरो धृतराष्ट्रोपदेशार्थं स्वस्य साक्षाद्यमराजावतारत्वेऽप्यनधिकारिणं मत्वा सनत्सुजातमानाय्यैव धृतराष्ट्रायात्मतत्त्वमुपदेशितवानित्युद्योगपर्वणि महाभारते स्फुटम् । वस्तुतस्तु–ब्राह्मणस्यैवाधिकारो धर्ममात्रोपदेशने अन्योपदिष्टधर्मेण फलं प्रायो न जायते ''जानानोऽपि स्वयं विप्रमुखाच्छ्रुत्वा समाचरेत् । अपृष्ट्वा ब्राह्मणं कर्म कर्त्ता नरकमाप्नुयात्'' इति संहितोक्तेः । तथैव पंचमे वक्ष्यति । यद्यपि स्वविदितं सकृद्धर्मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽसौ मयाऽविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैरगणय्य तन्माम् ॥ अर्वाक्पतन्तमर्हत्तमनिंदयाऽपाद्दृष्ट्याऽऽर्द्रया स भगवान्स्वकृतेन तुष्येत् ॥ १५ ॥ मैत्रेय उवाच ॥ क्षमाप्यैवं स मीढ्वांसं ब्रह्मणा चानुमंत्रितः ॥ कर्म संतानयामास सोपाध्यायर्त्विगग्निभिः ॥ १६ ॥ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः ॥ पुरोडाशं निरवपन्वीरसंसर्गशुद्धये ॥ १७ ॥ अध्वर्युणाऽऽत्तहविषा यजमानो विशांपते ॥ धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः ॥ १८ ॥ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश ॥ मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना ॥ १९ ॥ श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः ॥ कंब्वब्जचक्रशरचापगदाऽसिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः ॥ २० ॥

भूत्वा त्वमस्रागस्राक्षीः । किमर्थम् । आत्मतत्त्वमवितुम् । यद्वा । ब्रह्म वेदमात्मतत्त्वं चावितुं संप्रदायप्रवर्तनेन ज्ञापयितुमित्यर्थः । तत्तस्मात् हे परम उत्कृष्ट ॥ १४ ॥ अत्र च प्रत्युपकारो नास्तीत्याह । योऽसाविति । अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन तदगणय्य विस्मृत्य अर्हत्तमस्य तव निंदयाऽर्वागधःपतंतं मामपाद्रक्षितवान् । स्वकृतेनैव परानुग्रहेणैव तुष्येत् । न मया तत्प्रतिकर्तुं शक्यमित्यर्थः ॥ १५ ॥ अनुमंत्रितोऽनुज्ञातः उपाध्यायसहितैर्ऋत्विगादिभिः अनुवर्तयामास ॥ १६ ॥ वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये निवृत्त्यर्थम् ॥ १७ ॥ उपात्तहविषाऽध्वर्युणा सह विशुद्धया बुद्ध्या दध्यौ । हे विशांपते विदुर ॥ १८ ॥ स्वया प्रभया तेषां तेजो मुष्णंस्तिरस्कुर्वन् उपानीतः समीपं प्रापितः स्तोत्रे बृहद्रथंतरे वाजौ पक्षौ तद्वता । "बृहद्रथंतरे पक्षौ" इति श्रुतेः ॥ १९ ॥ तमेवानुवर्णयति श्याम इति द्वाभ्याम् । हिरण्यवद्रशना यस्येति वस्त्रं लक्ष्यते । अर्कतुल्येन किरीटेन जुष्टः नीलालका एव भ्रमरास्तैर्मंडितं कुंडलयुक्तमास्यं यस्य कंब्वादिभिरायुधैर्भृत्यरक्षार्थं व्यग्रैर्हिरण्मयैः स्वर्ण

"ब्राह्मं गुह्यं ब्रह्मणैर्दर्शितमार्गेण सामादिभिर्जनतामनुशशास" इति वचनात्स्वयमीश्वरावतारोप्यृषभदेवो धर्मरक्षणार्थं तथा चकारेत्यलं प्रसक्तानुप्रसक्त्या । तस्मादात्मतत्त्वरक्षणार्थसृष्टत्वात् । शिष्टाचारप्रवर्त्तकत्वादाह—हे परम हे शीर्षण्य "धर्मात्मा धर्मकर्त्ता च तथा धर्मप्रवर्त्तकः । परमः प्रोच्यते विज्ञैस्तद्धीनोऽपरमो मतः ॥" इति संहितोक्तेः ॥ १४ ॥ भवान्कृपासमुद्रोऽहं निर्घृण इत्यभिप्रेत्याह—अत्र चेति । मद्रक्षणलक्षणकर्मणि तन्मत्कृतस्वाव ज्ञानम् अर्हत्तमस्य तव । अधो नरके । इत्यर्थ इति । स्वकर्मणा स्वयमेव तुष्टोभव न च त्वत्तोषहेतुर्मयि किञ्चिदस्तीति भावः ॥ १५ ॥ स दक्षः अनुवर्तयामास प्रवर्त्तयांचकार ॥ १६ ॥ वैष्णवं विष्णुदेवताकं त्रिकपालं त्रिकपालसंस्कृतं निरवपन् समंत्रं ददुः । वीरो वीरभद्रस्तस्य संसर्ग उपद्रवस्तस्य शुद्धये निवृत्त्यै एतेन दुष्टयागोपि विष्णुपूजनाच्छुध्यतीत्युक्तम् । तण्डुलपिष्टनिर्मितकूर्माकारः पुरोडाशः पुरो दाश्यत इति पुरोडाशोत्र दस्य डत्वमार्षम् ॥ १७ ॥ यथा दध्यौ तथा तेन रूपेण विशांपते इत्यस्य विशां विषयप्रवेशवतामिंद्रियाणां पतेर्वशीकर्त्तुस्तव यथा शुद्धबुद्धित्वाद्धरेः प्रादुर्भावस्तथा तत्रापीत्यभिप्रायः । यद्वा । राजभ्रातृत्वाद्विदुरेपि विशांपतित्वमस्त्येवेति ॥ १८ ॥ तदा ध्यानकाले बृहद्रथंतराख्ये वेदोपनिषदाविति श्रुतिपदार्थः ॥ १९ ॥ तमेव तत्रागतमेव । यद्वा । कंब्वादीनि हस्ताग्रास्थितत्वाद्विशिष्टान्यग्राणि येषु तथाभूता हिरण्मया भुजा एव प्रथमातिशयोक्त्याऽष्टैव दलानि तैः शोभमानः कार्णिकारः कमलराज इव मत्त्वर्थीयाशादिनाचा वा कार्णिकायामरास्तदाकाराणि दलानि संत्यस्येति कार्णिकारः । यद्वा । कार्णिकां एति ददातीति व्युत्पत्त्या वा कर्णिकारशब्देनात्र

॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वम् ॥ पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः ॥ २१ ॥ तमुपागतमालक्ष्य सर्वे सुरगणादयः ॥ प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः ॥ २२ ॥ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः ॥ मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजम् ॥ २३ ॥ अप्यर्वाग्वृत्तयो यस्य महित्वात्मभुवादयः ॥ यथामति गृणंति स्म कृतानुग्रहविग्रहम् ॥ २४ ॥ दक्षो गृहीतार्हणसादनोत्तमं यज्ञेश्वरं विश्वसृजां परं गुरुम् ॥ सुनंदनंदाद्यनुगैर्वृतं मुदा गृणन्प्रपेदे प्रयतः कृतांजलिः ॥ २५ ॥

भूषितैर्भुजैः पुष्पितः कर्णिकार इव शोभमानः । भुजानां हिरण्मयत्वं केयूरकंकणमुद्रिकाद्यलंकारैर्लक्षितम् ॥ २० ॥ वक्षस्यधिश्रिता वधूर्लक्ष्मीर्यस्य सः उदारो हासोऽवलोकश्च तयोः कलया लेशेन पार्श्वे उभयतो भ्रमती व्यजनचामरे एव राजहंसौ यस्मिन्सः रज्यमानः शोभातिशयं नीयमानः ॥ २१ ॥ ब्रह्मेंद्रत्र्यक्षा नायका मुख्या येषां ते ॥ २२ ॥ हतरुचस्तिरस्कृतप्रभाः सन्नजिह्वाः सन्ना स्खलिताक्षरा जिह्वा येषाम् ते गद्गदवाच इत्यर्थः । ससाध्वसास्तन्महिम्ना क्षुभितचित्ताः उपतस्थुस्तुष्टुवुः ॥ २३ ॥ यस्य महि महिमानं प्रति तु अर्वागेव वृत्तिर्येषां तेऽपि यथामति गृणंति स्मास्तुवन् । कृतः प्रकटीकृतोऽनुग्रहार्थं विग्रहो येन तम् । यद्वा तेषामर्वाग्वृत्तित्वे हेतुः ।ते तु यस्य महि महिमा विभूतिमात्ररूपा इत्यर्थः ॥ २४ ॥ तत्र तावद्दक्षस्तुतिप्रकारमाह । दक्ष इति । गृहीतमर्हणसादनोत्तमं येन तम् ॥ उत्तमे पात्रे आसाद्यार्हणेषु समर्पितेषु प्रीत्या सार्हणपात्रं स्वयमेव येन गृहीतमित्यर्थः । यद्वा कथं प्रपेदे गृहीतमर्हणसादनोत्तमं यथा भवति तथा तद्गृहीत्वा प्रपेदे इत्यर्थः । गृहीत्वेति पाठस्तु सुगमः । गृणन्स्तुवन्प्रपेदे शरणं जगाम । “दक्ष ऋत्विक्सदस्येशभृगुब्रह्मेंद्रयोषितः ॥ ऋषयश्च तथा सिद्धा यजमानी च लोकपाः ॥ १ ॥ योगिब्रह्माग्निदेवाश्च स्तुवंति जगदीश्वरम् ॥ तथा गंधर्ववि

पद्माभिधानात् । “कर्णिकारः पुमानारग्वधद्रौ च द्रुमोत्पले” इति मेदिनी । द्रुमश्चोत्पलञ्च द्रुमोत्पलमिति समाहारद्वंद्वोपि संभवतीति ॥ २० ॥ उदारयोर्महामाधुर्यरंगवर्षिणोर्हासावलोकयोः कलया वैदग्ध्या विश्वमेव रमयन् किं पुनर्भक्तान् । तथा च सर्वोपरि शशी तत्तले किरीटरूपोऽर्कः तत्तले आस्यरूपं कमलं तत्पार्श्वद्वये नृत्यत्कुंडलरूपं पुनरर्कद्वयं तत्पार्श्वद्वये चामररूपं हंसद्वयं मुखकमलतले लक्ष्मीरूपा विद्युत् सर्वसमुचितं पुनरष्टदलमेकं कमलमेव चंद्रार्कविद्युद्भ्रमरहंसशंखचक्रगदापद्मचापशरचर्मासियुक्तमत्यद्भुतं स विष्णुरदृश्यतेत्यर्थः ॥ २१ ॥ २२ ॥ २३ ॥ स्तुतिसाधनवागिंद्रियस्य सन्नत्वात्तद्व्यापाराभावे कथं ते तुष्टुवुस्तत्राह—अपीति । महि प्रति अनंतत्वादर्वाग्वृत्तयोऽप्राप्तवाङ्मनसव्यापारा अपि । महिशब्दस्य महिमार्थवाचकत्वेपि प्रतिपदाध्याहारे गौरवं मत्वाह—यद्वेति । वेदाः प्रमाणमितिवद्यस्य भगवत आत्मभुवादयो महीति प्रयोगः । इत्यर्थ इति । न हि शक्तीनां शक्तत्वं संभवतीति भावः ॥२४॥ तत्र तेष्वात्मभुवादिषु । यक्षस्य यजमानत्वेन मुख्यत्वात्तावदादौ तत्कर्तृकस्तुतिप्रकारमाह—उत्तमे पात्रे स्वर्गादिनिर्मिते पात्रे । आगते प्राप्तेऽर्हणेषु पूजाद्रव्येषु समर्पितेषु स्थापितेषु सत्सु । इत्यर्थ इति। पूजाद्रव्यसहितं पात्रं स्थालमेव येन भक्तिपारवश्यात्स्वीकृतमिति भावः। अर्ह्यते पूज्यते एभिरित्यर्हणानि पुष्पाक्षतादीनि । तानि साद्यंते स्थाप्यंतेऽस्मिन्नित्यर्हणसादनं तच्चोत्तममर्हणसादनोत्तमम् । यद्वा साद्यतेऽस्मिन्निति सादनं तच्चोत्तमं सादनोत्तममर्हणानां सादनोत्तममर्हणसादनोत्तममिति । संभवत्वात्प्रकारांतरमाह—यद्वेति । इत्यर्थ इति । पूजनपात्रमादाय स्तुतिं कुर्वन्प्रापेति भावः । दक्षादय ऊनविंशतिसंख्याकाः पृथङ्मतैर्निजनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्ष उवाच ॥ शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायाम् ॥ तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इवात्मतंत्रः ॥ २६ ॥ ऋत्विज ऊचुः ॥ तत्त्वं न ते वयमनंजन रुद्रशापात्कर्मण्यवग्रहधियो भगवन्विदामः ॥ धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदो व्यवस्थाः ॥ २७ ॥

याश्च ब्राह्मणाश्च पृथङ्मतैः" ॥ २ ॥ २५ ॥ ननु साक्षात्परमेश्वर एव रुद्रस्तस्य ब्रह्मपुत्रत्वेन जीवत्वमनुकारमात्रं हंत किमिति त्वया भेददृष्ट्याऽसाववज्ञात इति मां भगवानाक्षेप्स्यतीत्याशंक्याप्रच्युतस्वरूपस्य जीवधर्मनाट्यं तवैव संगच्छते नान्यस्येत्याह । शुद्धमिति । स्वधाम्नि स्वस्वरूपे तिष्ठन्भवान् शुद्धं चिन्मात्रं चैतन्यघनः । शुद्धत्वे हेतुः । उपरता नित्यनिवृत्ताऽखिला बुद्ध्यवस्था यस्मात् । अतः एकं भेदशून्यम् अत एवाभयम् । "द्वितीयाद्वै भयं भवति" इति श्रुतेः । जीवस्यापि वस्तुत एवंभूतत्वात्तद्वैलक्षण्यार्थमुक्तम् । मायां प्रतिषिध्याभिभूय स्वतंत्र एव संस्तया मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां तिष्ठन्नपरिशुद्ध इव रागादिमानिवास्ते । रामकृष्णाद्यवतारे तथा प्रतीयते भवानित्यर्थः । अन्ये त्वविद्योपाधयो मायाऽभिभूताः संसरंति । अतस्त्वमेवेश्वरो न रुद्रादय इति भावः । अत एवेमां दृष्टिं भगवान्वारयिष्यति । "अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ।" इत्यादिना ॥ २६ ॥ ऋत्विजोऽपि स्वस्यापराधं परिहरंतः स्तुवंति । भो अनंजन उपाधिमलशून्य यद्यपि त्वमेव रुद्रादिदेवतारूपस्तथापि नंदीश्वरशापात् कर्मण्येव दुराग्रहधियः संतस्तव तत्त्वं न विद्मः । किंतु धर्मस्यापूर्वस्योपलक्षणभूतं त्रिवृत् त्रयीप्रतिपाद्यमध्वराख्यं तव रूपमस्माभिर्ज्ञातम् । कीदृशम् । यदर्थं यस्य सिद्धयेऽधिदैवं देवताऽधिकारेणादो व्यवस्थाः अमूर्व्यवस्थाः । अत्रेयमेव देवता नान्येत्येवंभूता नियमाः प्रवृत्ता इत्यर्थः । यद्वा । व्यवस्था इत्याख्यातम् । अडागमाद्यभाव आर्षः ।

जाभिमतवाक्यैः । पृथक्पृथक्छंदोभिश्च सर्वेश्वरं स्तुवंतीति स्वामिचरणैस्संगृहीतश्लोकार्थः ॥ २५ ॥ स्वयमाक्षिप्य समादधान आह—नन्विति । तस्य रुद्रस्य बुद्ध्यवस्था जागरणादयः । 'बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः' इत्युक्तेः । अतो निवृत्ताखिलबुद्ध्यवस्थत्वात् । भेदश्च विश्वतैजसादिरूपो जाग्रदादिकृत एवेत्यर्थः । अत एवैकत्वादेव । स्फुटार्था श्रुतिर्न व्याख्याता । इत्यर्थ इति । विद्योपाधिरीश्वरस्त्वमेव यतो मनुष्यनाट्यं यथार्थमभिनेतुं सत्राजितं श्वशुरं मृतं श्रुत्वा "अहो नः परमं कष्टमित्यस्राक्षो विलेपतुः" इति सत्यभामासन्निधौ सराग इवारोदीत्तथा रामावतारे पितृमृतिं श्रुत्वा सर्वसन्निधावेव चित्रकूटे व्यलपत्सीताहरणोत्तरमतीव कामार्त्त इव लक्ष्मणपार्श्वे शुशोच । तेन च किं तवात्मारामता प्रच्युता ? नेति भावः । इति भाव इति । अविद्योपाधयो रुद्राद्यास्त्वद्दृष्ट्या मानुष्यनाट्यं कुर्वन्तोप्यभिनेतुं न जानंति यतो मयि श्वशुरे सभायामात्मारामत्वं प्रकाशितवानतस्त्वमेवाखिलकलाविचक्षण ईश्वरोसि नान्य इत्याशयः । पुनरपि श्रीरुद्रे कटाक्षः श्रीरुद्रापराधशेषेणैव भगवद्विग्रहे मायिकबुद्धिरपीति ज्ञेयम् । अत एवेश्वरत्वादेव । छंदश्चेदं वसंततिलका " उक्ता वसंततिलका तभजा जगौ गः " इति लक्षणवत्त्वात् ॥ २६ ॥ इत्यर्थ इति । देवताधिकरणे पूर्वमीमांसायां तत्तद्देवताधिकारेण तत्तत्कर्मव्यवस्थाः कृतास्त्वयैव जैमिन्यादिरूपेणेति भावः । भवतु व्यवस्था किं तया ममेति चेदर्थांतरमाह—यद्वेति । आख्यातं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदस्या ऊचुः ॥ उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेऽतकोग्रव्यालान्विष्टे विषयमृगतृष्यात्मगेहोरुभारः ॥ द्वंद्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौ कस्ते शरणद कदा याति कामोपसृष्टः ॥ २८ ॥ रुद्र उवाच ॥ तव वरद वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये ॥ यदि रचितधियं माऽविद्यलोकोऽपविद्धं जपति न गणये तत्त्वत्परानुग्रहेण ॥ २९ ॥ भृगुरुवाच ॥ यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादय स्तनुभृतस्तमसि स्वपंतः ॥ नात्मञ्छ्रितं तव विदंत्यधुनाऽपि तत्त्वं सोऽयं प्रसीदतु भवान्प्रणतात्मबंधुः ॥ ३० ॥ ब्रह्मोवाच ॥ नैतत्स्वरूपं भव तोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत् ॥ ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो यतस्त्वम् ॥ ३१ ॥

यदर्थमद इदमिंद्राद्यधिदैवं रूपं विशेषेणास्थितवानसीत्यर्थः ॥ २७ ॥ सदस्यास्तु निरीश्वरेऽपि दक्षाध्वरे धनलोभेन स्वमवृत्तिमनुचिंत्यानुतप्ता विरक्तिमाशासानाः स्तुवंति । हे शरणद आश्रयप्रद उत्पत्त्यध्वनि संसारमार्गे वर्तमानोऽज्ञानां सार्थः समूहस्ते पादौकस्त्वत्पादरूपमोको निवासं कदा यास्यति । कथंभूते संसारमार्गे । अशरणे विश्रमस्थानशून्ये उरुक्लेशा एव दुर्गमस्थानानि यस्मिन् अंतक एवोग्रो व्यालस्तेनान्विष्टे लक्षीकृते विषयरूपा मृगतृष्णमृगतृष्णिका यस्मिन् आत्माहंकारास्पदं शरीरं ममत्वा स्पदं गेहं च स एवोरुर्भारो यस्य सः । द्वंद्वानि सुखदुःखादीन्येव श्वभ्राणि गर्ता यस्मिन् खला एव मृगा व्याघ्रादयस्तेभ्यो भयं यस्मिन् शोक एव दावाग्निर्यस्मिन् । कामे नोपसृष्टः पीडितः ॥ २८ ॥ श्रीरुद्रस्तु पूर्वं मम निंदा दुःसहाऽऽसीदिदानीं तु तां गणयामीत्याह । तवेति । आशिषा कामेनाऽसक्तैर्निष्कामै रचितधियमभिनिवेशितचित्तं मा मामविद्यो विद्याहीनो लोको यद्यपविद्धं जपत्याचारभ्रष्टं जल्पति तज्जल्पनमहं न गणये । तत्र हेतुः तव यः परोऽनुग्रहस्तेन त्वत्पराणां वा योऽनुग्रहस्तेन ॥ २९ ॥ भृगुस्तु स्वभावतस्तत्त्वज्ञानहीना जीवा अतोऽज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह । यन्माययेति । आत्मन्नात्मनि श्रितमनुगतं तव तत्त्वं न विदंति प्रणतानामात्मा बंधुश्च भवान् ॥ ३० ॥ ब्रह्मादयो न विदंतीति भृगुणोक्ते तदसहमानो ब्रह्मा तत्त्वज्ञानमाविष्कुर्वन्निवाह । नैतदिति । पदार्थभेदग्राहकैरिंद्रियैः गुणस्येंद्रियस्य यद्वा ज्ञानार्थयोः

तिङन्तम् । इत्यर्थ इति । यज्ञकर्मनिष्पत्तय एवैकस्त्वमिंद्रादिदेवतारूपेण बहुधासीति भावः । अनंजनेत्यामंत्रणेन त्वां विना सर्वे सोपाधिका एवातस्त्वमेवोपाधिनिवृत्तये सेव्य इत्युक्तम् ॥ २७ ॥ "सदस्या विधिदर्शिनः" इत्यमरः । "शरणं गृहरक्षित्रोः" इत्यमरश्च । हे आश्रयप्रदेति । यदि त्वामाश्रयप्रदं नाश्रयेत तदा त्वया किं कर्त्तव्यमिति दक्षं कटाक्षाभिप्राया संबुद्धिः । उत्पत्तिरूपो योध्वा तस्मिन्नुत्पत्तिपदमुपलक्षणं मृत्यादेः कदा याति "विभाषा कदाकर्ह्योः" इति भविष्यति लट् । छंदश्चेदंमंदाक्रांता "मंदाक्रांतांबुधिरसनगैर्मो भनौ तौ गयुग्मम्" इति लक्षणात् ॥२८॥ तवांघ्रौ त्वच्चरणे । मालिनी वृत्तम् । "ननमयययुतेयं मालिनी भोगिलोकैः" इति लक्ष णात् ॥ २९ ॥ अतस्तत्त्वज्ञानहीनत्वात् । ब्रह्मादय इति रुद्रे कटाक्षः । यद्वा । ब्रह्माऽऽदिकारणं येषां ते तथा तत्त्वं स्वरूपं न विदंति । जानीम इत्यभिमानग्रस्ता अन्यानेवाज्ञानिनो वदंतीति भावः । अहं तु यथार्थवादित्वा द्पराधी भवाम्येवेति भावः । भवांस्तु न ब्रह्मादीनां न मद्विधानां किं तु प्रणतानां नम्रस्वभावानामकिंचनानां बंधुर्हितकरस्तदपि प्रसीदतु मदपराधं क्षाम्यतु । वसंततिलका वृत्तम् ॥ ३० ॥ यावदीक्षेत तावत्सकलमेतद्भा वतः स्वरूपं नेत्यन्वयः । यत एतद्द्वयं ज्ञानार्थेन्द्रियाणां मायामयानामाश्रयो विषयः अर्थोन्तःकरणं त्वं तु तद्रहित इत्यर्थः स्वामिसंमतः । विश्वनाथस्तु–पदार्थानां शब्दस्पर्शादीनां भेदग्राहकैरिन्द्रियैस्तैस्तैतत्स्वरूपं श्रीमूर्त्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्र उवाच ॥ इदमप्यच्युत विश्वभावनं वपुरानंदकरं मनोदृशाम् ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ॥ ३२॥ पत्न्य ऊचुः ॥ यज्ञोऽयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाऽद्य दक्षकोपात् ॥ तं नस्त्वं शवशयनाभशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥ ३३ ॥ ऋषय ऊचः ॥ अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाऽज्यसे ॥ विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान् ॥३४॥

कारणस्य सत्त्वादेः अत एवासतो मायामयाद्व्यतिरिक्तो भवान् ॥ ३१ ॥ इंद्रस्त्विंद्रियविषयः सर्वोऽपि मिथ्येति ब्रह्मणोक्तमसहमान आह । इदं तव वपुरप्युपपन्नमेव न तु प्रपंचवदनिर्वचनीयतयाऽनुपपन्नम् । सुराणां विद्विषः क्षपयंतीति तथा तैर्भुजदंडैरुपलक्षितम् ॥ ३२ ॥ ऋत्विजां पत्न्यः स्तुवंति । यज्ञोऽयं तव यजनाय त्वां यष्टुं केन ब्रह्मणा पूर्वं सृष्टः । हे यज्ञात्मंस्त्वं तं नोऽस्माकं यज्ञं नलिनकांत्या दृशा नेत्रेण पुनीहि पवित्रं कुरु । कथंभूतं यज्ञम् । शवाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य स चासौ शांतमेधश्चोपरतोत्सवः । मेधशब्देन पशुहिंसाद्युत्सवो लक्ष्यते । शवमुदकं तत्र शेते इति तथा । पद्मं तन्नाभेति संबोधनं वा ॥ ३३ ॥ ऋषयस्तु कर्माण्यनुतिष्ठंतस्तत्पुण्येन तत्फलेन च युज्यंते भगवति तु तदभावमालक्ष्य विस्मिताः स्तुवंति । अनन्वितमघटमानं यद्यस्मादात्मना स्वयं कर्माचरस्यनुतिष्ठसि न

यावन्न पश्येत्तावदेव ज्ञानस्याधिदैवस्यार्थस्याधिभूतस्य गुणस्याध्यात्मत्वस्य चाश्रयः स्यात् त्वत्स्वरूपे साक्षाद्दृष्टे सति न ज्ञानादेराश्रयः । किं त्वप्राकृत एव स्याद्यतस्त्वं मायामयादधिदैवादेर्व्यतिरिक्तश्चिद्रूपो न तैर्गृह्यस इत्येतावत्तत्त्वं वयं जानीमोत एते प्राकृतेंद्रियाः पश्याम इत्यभिमानवन्तोऽपि तत्स्वरूपं नैव पश्यंतीति भृग्वादिषु कटाक्षः । संदर्भस्तु– श्रीब्रह्मापि भृगुवाक्यमनुमोदमान एवाह–इंद्रियैः करणभूतैः पुरुषो यावद्वस्तु जानाति तावति वस्तुनि भवत एतच्छ्रीविग्रहात्मकं स्वरूपं न स्यात्किन्तु तावदतिक्रम्यैव स्यात् " यतो वाचो निवर्त्तन्ते " इत्यादिश्रुतेः । तर्हि किं लक्षणं तत्राह–ज्ञानस्येति । तदेतद्विग्रहलक्षणत्वमेवाश्रयः " नातः परं परम यद्भवतः स्वरूपम् " इत्याद्युक्तेः । तस्मात्कृपया स्वयमेव प्रकाशत इति भावः । व्यतिरिक्तोमतस्त्वमिति चित्सुखसंमतः पाठः । तत्र व्यतिरिक्तश्चासावोमोंकारश्चेति व्यतिरिक्तोम् अतस्त्वमिति च्छेदः ॥ ३१ ॥ हे अच्युतेति । ते सर्वाणि रूपाणि च्युतिवर्जितान्येवेत्याह–इदमष्टभुजं वपुः शुभाकारं तनुः ' शुभाकारे तनौ वपुः ' इति यादवः । विश्वं भावयति भाववंतं करोतीति तथा । अस्मदाद्यानंदान्यथानुपपत्तिरेवात्र प्रमाणमिति ब्रह्माणि कटाक्षः । उपजातिरिदं छंदः सहजासीधुच्छंदसोर्लक्षणवत्त्वात् आद्यपादे तु "सहजा ससजं गुरुर्यदा" इति लक्षणमन्येषु सीधुरस्ति "इह सीधुः सभरा लगौ यदि" इति लक्षणात् ॥ ३२ ॥ अंतरायितस्य कर्मणः पूर्णफलवत्त्वसिद्धिः श्रीनारायणकटाक्षेणैवेत्यभिप्रेत्य पत्न्यः स्तुवंति यज्ञात्मन्नित्यस्य " यज्ञो वै विष्णुः " इति श्रुतेर्यज्ञस्य तव रूपत्वादेतदपूर्त्तौ त्वदंगवैकल्यमेव स्यात्तच्च नोचितमतोस्य पूर्त्तिमेव संपादयेत्यभिप्रायः । शवशयनादिनाऽशुचितां प्राप्तस्य शोधनं त्वत्कृपादृष्टचैव नान्यथेति भावः । यत्र त्वदागमनं नास्ति तत्र तु तव नामोच्चारणाद्येव वैकल्यमपाकरोति । " मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः । सर्वं करोति निश्छिद्रं नामसंकीर्त्तनं तव " इति वक्ष्यमाणत्वात् । " यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति तं ध्यायेदच्युतं सदा ॥ " इति पुराणांतराच्च । साक्षादत्र तवागमने यद्यपि यज्ञपूर्त्तौ संशयो नास्ति तथाप्यत्युदारात्त्वत्तः किञ्चित्प्रार्थनमुचितमेवास्माकं स्त्रीस्वभावत्वाद्वेति मत्वाहुः पुनीहीति । यद्वा । शयनाभेति सर्वादिकारणस्य तवैवैतदपि संपाद्यमित्यभिप्रायेणाहुः । शवमित्युदकपर्यायत्वेन वैदिकनिघण्टौ प्रसिद्धं मेदिन्यामप्युक्त "शवः स्यात्कुणपे पुमान् । नपुंसकं तु पानीये" इति हिंसार्थकत्वान्मेधृधातोः तव सन्निधानं विना सप्रयत्नैरप्येतैर्न किञ्चित्सिध्यतीत्यवगतमस्माभिरिति सर्वेषु कटाक्षः । प्रहर्षिणीवृत्तं "त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्" इति लक्षणात् ॥ ३३ ॥ भगवन्नित्यतवैश्वर्यमाह–कर्मकारिणस्त्वन्ये सर्वे लिप्यंत एवेति ब्रह्मादिषु कटाक्षः । लक्ष्मीरप्यप्राप्तप्राप्तये भजतीति न जानामि किं वस्तुधर्मवज्जालस्यंदनवद्भाक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धा ऊचुः॥अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः॥ तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥३५॥ यजमान्युवाच ॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः ॥ त्वामृतेऽधीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पूरुषः ॥ ३६ ॥ लोकपाला ऊचुः ॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यम् ॥ माया ह्येषा भवदीया हि भूमन्यस्त्वं षष्ठः पंचभिर्भासि भूतैः ॥ ३७ ॥

त्वज्यसे लिप्यसे यतश्चान्ये विभूतये संपदे ईश्वरीं लक्ष्मीमुपसेदुर्भेजुः । यद्वा यत इति सार्वविभक्तिकस्तसिः यामित्यर्थः । भवांस्तु स्वयमेवानुवर्तमानां तां न मन्यते नाद्रियते ॥ ३४ ॥ सिद्धास्तु तत्कथासुखमभिनंदंतः स्तुवंति । अयं नो मनोगजस्त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी या नदी तस्यामवगाढः प्रविष्टो दावाग्नितुल्यं संसारतापं न संस्मरति स्म न च ततो निर्गच्छंति ब्रह्मसंपन्नवद्ब्रह्मैक्यं प्राप्त इव ॥ ३५ ॥ यजमानी दक्षपत्नी स्तौति । ते स्वागतं भद्रमागमनं जातम् । हे अधीश यथा शिरसा हीनः कबंधमात्रः पुरुषोंऽगैः करचरणाद्यवयवैः शोभमानैरपि न शोभते । तथा त्वां विना केवलं प्रयाजादियागाङ्गैर्मखो न शोभतेऽतो नोऽस्माञ्छ्रिया सह त्रायस्व त्वद्भक्तान्कुर्वित्यर्थः ॥ ३६ ॥ लोकपालास्त्वीश्वरत्वाभिमानारूढा भगवतस्तत्त्वमपश्यंत ऊचुः । दृष्टः किं न दृष्ट इत्यर्थः । कुतः असद्ग्रहैः । पुंस्त्वमाविष्टलिंगत्वात् । असत्प्रकाशरूपाभिर्दृग्भिरिंद्रियैः । अयं भावः । शुद्धचित्तानां त्वं शुद्धसत्त्वमूर्तिर्भासि अस्माकं तु बहिर्मुखेंद्रियाणां पंचभूतोपलक्षितो जीवविशेष इवावभासि अतस्त्वमस्मदिंद्रिय

करणमस्याः स्वभाव एवेति जानामीत्यर्थः । रुचिरावृत्तम् “ जभौ सभौ गुरु रुचिरा चतुर्ग्रहैः ” इति तल्लक्षणात् ॥ ३४ ॥ सिद्धाः केवलया भुक्त्यैव प्रेमसिद्धिं प्राप्ता इत्यर्थः । देवयोनिविशेषा वा किं कर्मकरणाकरणलेपालेपविचारेण भगवतो लीलाकथामृत एव निमज्जतेति ऋषिषु कटाक्षः । भुंजगप्रयातं वृत्तम् “चतुर्भिर्यकारैर्भुजंगप्रयातम्” इति लक्षणात् ॥ ३५ ॥ दक्षपत्नी प्रसूतिः । ईश श्रीनिवासाधीशेति संबुद्धित्रयेण स्वस्य भगवज्ज्ञाने स्वायंभुवपुत्रीत्वेन देवहूतिस्वसृत्वेन मातृस्वसृत्वात्तद्वत्तत्कृपाकटाक्षं बोधयतीति ज्ञेयं, प्रथममशिोक्त्या शिवेति प्रसंगस्तद्वारणायाहाधीशेति । तथापि ब्रह्मणः सुरज्येष्ठत्वात्सर्वप्रवर्तकत्वात्तत्र प्रसक्तिवारणाय श्रीनिवासेति । यतश्श्रिया सह मद्गृहमागतोस्यतो रुद्रापराधविध्वस्तान्नस्त्राहीति यतो न शोभतेऽतो हेतोः। इत्यर्थ इति । भक्त्यव साक्षाद्भवस्यतो भक्तिदानेन नोऽनुगृहाणेति भावः।त्वामृते इत्युक्त्या सर्वदेवेषु कटाक्षः । स्रग्विणी वृत्तं “कीर्तितैषा चतूरेफिका स्रग्विणी” । इति लक्षणात् ॥ ३६ ॥ इत्यर्थ इति । भक्त्या विना त्वद्रूपदर्शनं न संभवति “ पश्यंति ते मे रुचिराण्यंब संतो दिव्यानि रूपाणि ” इत्याद्युक्तेरिति भावः । स्वयमेवोक्तार्थाशयमाह स्वामी । अयं भाव इति । अतोन्यथा प्रतीतेः । चक्रवर्ती-असद्ग्रहैर्विषयग्राहिभिरिन्द्रियैस्त्वं ।किं नो दृष्टोपि तु दृष्ट एवेत्यर्थः । प्रत्यगपिः द्रष्टापि त्वं त्वद्रूपयैव दृश्यः स्या इत्यर्थः । यतस्त्वं षष्ठः पंचभूतातिरिक्तोपि पंचभिर्भूतैर्भौतिकशरीरो भासीत्येषा भवदीया मायैव कृपैव वा । ये तु त्वदीयश्रीविग्रहस्य भौतिकत्वं मन्यंते जरासंधादिभिरिव दृष्टोपि त्वं माधुर्यानुपलंभान्नैव दृष्ट इति । भूमन्निति व्यापकस्यापि व्याप्यत्वेन प्रतीतिर्विना अनुग्रहं न घटत इति तात्पर्यकम् । शुष्कज्ञानिषु देवेष्वृषिषु च कटाक्षः। शालिनी वृत्तम् । “मात्तौ गौ चेच्छालिनी वेदलोकैः” इति लक्षणात् । सन्दर्भकारस्त्वत्र श्रीविग्रहस्य लोकपालास्तु दृश्यत्वं भौतिकत्वं च निवार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगेश्वरा ऊचुः ॥ प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः ॥ अथापि भक्त्येश तयोपधावतामनन्यवृत्त्याऽनुगृहाण वत्सल ॥ ३८ ॥ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया ॥ रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ॥ ॥ ३९ ॥ ब्रह्मोवाच ॥ नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये ॥ निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥

गोचरो न भवसि धिगस्मज्जीवितमिति ॥ ३७ ॥ योगेश्वरास्तदभेदेन भजतामनुग्रहभाक्त्वं मन्यमानाः स्वामिभृत्यभावेन भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्याम् । प्रेयानिति । विश्वात्मनि परब्रह्मणि त्वयि य आत्मनः पृथक्त्वं नेक्षेत अमुतोऽमुष्मादन्यस्ते प्रेष्ठो नास्ति । आत्मनो जीवान्पृथङ् नेक्षेतेति वा । हे वत्सल भक्तजनप्रिय अनन्यवृत्त्याऽव्यभिचारिण्या भक्त्या भजतोऽनुगृहाणेत्यर्थः ॥ ३८ ॥ अव्यभिचारिणी भक्तिः कथं स्याद्भजनीयानां बहुत्वादित्याशंक्याहुः । जगत उद्भवादिषु निमि त्तेषु दैवतो जीवादृष्टाद्बहुधा भिद्यमाना गुणा यस्यास्तया स्वमाययाऽऽत्मनि स्वरूपे रचिता ब्रह्मादिभेदमतिर्येन तस्मै स्वसंस्थया केवलस्वरूपावस्थानेन च विनिवर्तितो भेदभ्रमो गुणाश्च तद्धेतव आत्मनि येन तस्मै ॥ ३९ ॥ शब्दब्रह्म स्तौति । नमस्त इति । श्रितं स्वीकृतं सत्त्वं येनातो धर्मादिफलप्रसवित्रे । ननु सत्त्वगुणत्वं चैकस्य कथमित्या

यंति दृष्टः किल इति । किं तु स्वयमेव प्रकाशस इत्यर्थः। तत्र हेतुः षष्ठः पंचभूतातिरिक्तो यस्त्वं पञ्चभिर्भूतैः स्वोपाधिभिरेव भासि नात्मनेति यत्सैषा त्वदीया मायेव मायाभिभूतानामेव तथा विवेको भवतीत्यर्थः । प्रत्य ग्दृष्ट्येति चित्सुखः ॥ ३७ ॥ केवलस्य स्वस्याभेददर्शनेप्यन्यजीवानां तथाऽदर्शनेनाद्वैतसिद्धिरत आहात्मनो जीवानिति । जीवेषु स्वस्याप्यागतत्त्वान्नाद्वैतहानिरिति भावः । इत्यर्थ इति । भक्तवत्सलनामत्वादितिभावः । नामै कदेशोच्चारणन्यायेन वत्सलपदेन भक्तवत्सल एव लभ्यते यथा 'देवंविश्वद्रुहोपि हि' इत्येकादशे स्कंधे देवपदेन वसुदेवग्रहः। यद्यपि ज्ञानिनस्ते प्रेयान्नान्यः 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति त्वदुक्तेस्तथापि तदपि भृत्येशतयाऽहं ते भृत्यस्त्वं म ईश इति भावेनोपधावतां भजतां भक्त्या अनन्यवृत्तिर्वर्त्तनमनुवृत्तिस्तयैव तद्दानेनैवास्माननुगृहाण निकृष्टा वयं त्वदभेदभावं प्राप्तुं कथं शक्नुम इति द्योतितया व्याजस्तुत्या दासा एव तवातिप्रिया इति ज्ञानिषु कटाक्षस्तदुक्तं त्वयैव " न तथा मे प्रियतम आत्मयोनिर्न शंकरः । न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्" इति "नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना" इति तत्र लिंगं वत्सलेति । त्वं भक्तवत्सल इति सर्वत्र श्रूयसे न ज्ञानिवत्सल इति । संदर्भकारस्तु—प्रस्तुतत्वादस्मान् ज्ञानिभक्तानप्यनुगृहाणेति लभ्यत इत्याह । "वीरासिका स्यात्तयुगं यदा यरौ" इति लक्षणवत्त्वाद्वीरासिका वृत्तम् । 'भृत्येशतया' इति पाठेपि व्याख्यातः । 'भक्त्येश' इति पाठे ईशेति संबुद्धिरनुग्रहे सामर्थ्यबोधिका । 'भक्त्येश तवोपधावताम्' इति पाठे तवेति द्वितीयार्थे षष्ठी । अत्र विश्वनाथः—ननु परब्रह्मणो मम मायाशाबल्य एव साकारत्वं तस्मिंश्च सति भृत्येशभावस्तत्र च सति भक्तवात्सल्यमिति केचिद्व्याचक्षते सत्यं ते भ्रांता एवेत्याहुः ॥ ३८ ॥ विनिवर्त्तितो भेदरूपोभेदरूपो गुणात्मा गुणबुद्धिर्यत्र तस्मै । "आत्मा यत्नो धृतिर्बुद्धिः" इत्यमरः । संदर्भस्तु—ननु योगेश्वरत्वाभिमाने सति भृत्येशत्वाद्यभिमानः कुतः स्यात्तत्राह—सर्वोप्यन्योभिमानस्तन्मायागुणभेदभ्रमेणैव जीवेषु रचितस्ततः स्वस्फूर्त्या तस्मिन्निवर्त्तिते त्वत्प्रसादात्सोपि स्यादित्याहुर्जगदिति । आत्मनां जीवानां भेदमतिर्नानाभिमानः । यद्वा । हे निवर्त्तितभ्रम ज्ञानानंदादिकल्याणगुणवते नमः ॥ ३९ ॥ शब्दब्रह्म तत्रत्योपयोगी कर्मप्रतिपादको वेदः । 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः । अतः स्वीकृतसत्त्वत्वात् । धर्मादीहादिना ज्ञानवैराग्यैश्वर्यग्रहः । एकस्य सत्त्वगुणत्वनिर्गुणत्वमाक्षिपति-नन्विति । अपरे ज्ञानप्रतिपादका वेदाश्च न विदुः किमुतैते । एतेन स कर्मज्ञानिषु कटाक्षः "काष्ठोत्कर्षे सीम्नि दिशि याथार्थ्येपि च कथ्यते"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निरुवाच ॥ यत्तेजसाऽहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तम् ॥ तं यज्ञियं पंचविधं च पंचभिः स्विष्टं यजुर्भिः प्रणतोस्मि यज्ञम् ॥ ॥ ४१ ॥ देवा ऊचुः ॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेंद्राधिशयने ॥ पुमाञ्छेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ॥ ४२ ॥ गंधर्वा ऊचुः ॥ अंशांशास्ते देव मरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः ॥ क्रीडाभांडं विश्वमिदं यस्य च भूमंस्तस्मै नित्यं नाथ नमस्ते करवाम ॥ ४३ ॥ विद्याधरा ऊचुः ॥ त्वन्माययार्थमभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः ॥ क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्कथाऽमृतनिषेवक उद्व्युदस्येत् ॥ ४४ ॥

शंक्याह । यस्य काष्ठां तत्त्वं नाहं वेद्मि अपरे ब्रह्मादयश्च न विदुस्तस्मै ॥ ४० ॥ अग्निस्तु यज्ञमूर्तिं प्रणमति । यस्य तेजसा सुष्ठु प्रसिद्धं प्रदीप्तं तेजो यस्य सोऽहं प्रशस्तेऽध्वरे हविर्वहामि तं यज्ञियं यज्ञाय हितं पालकम् । यज्ञं यज्ञमूर्तिम् । पंचविधत्वमैतरेयके उक्तम् । "स एष यज्ञः पंचविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुसोमः" इति । पंचभिर्यजुर्भिर्यज्ञमंत्रैः स्विष्टं सुपूजितम् । तथाच श्रुतिः । "आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पंचाक्षरं द्व्यक्षरो वषट्कारः ।" इति । स्मृतिश्च । "चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च ॥ हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु" ॥ इति ॥ ४१ ॥ देवास्तु सत्यं वयमपि देवास्तथापि जगदाद्यंतयोस्त्वमेव नान्यः कश्चिदित्याहुः । पुरेति । कल्पापाये प्रलये विकृतं कार्यजातमुदरीकृत्य संहृत्य त्वमेवाद्यः पुमानुरगेंद्र एवाधिकं शयनं शय्या तस्मिन् शेषे शयनं करोषि । सिद्धैर्जनलोकादिवासिभिर्विमृशिता विचिंतिताऽध्यात्मपदवी ज्ञानमार्गो यस्य स एव त्वं य इदानीमक्ष्णोः पथि चरसि प्रत्यक्षोऽसि अवसि रक्षसि ॥ ४२ ॥ गंधर्वाप्सरसस्तु वयं भिया केवलं सर्वानपि परमेश्वरत्वेनोपश्लोकयामस्त्वमेव तु परमेश्वरोऽन्ये तु त्वदंशा एवेत्याहुः । अंशांशा इति । हे विभूमन्महत्तम क्रीडाभांडं क्रीडोपकरणं विश्वं ब्रह्मांडं यस्य तस्मै ते नमनं कुर्मः ॥ ४३ ॥ विद्याधरास्तु केवलं विद्याभिः संपदः प्राप्यंते अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं

इति यादवः ॥४०॥ यज्ञकुंडस्थोग्निराह—केवलं हविर्वहामि न तु तव तत्त्वं जानामि । जानीम इति ज्ञानाभिमानिषु याज्ञिकेषु कटाक्षः 'स एष' इत्यादिश्रुतिः स्पष्टार्था । तथा चेत्युक्तावपि तथा स्मृते च चतुर्भिरित्यादिपदं वर्णसंख्यापरं स यज्ञरूपः। उपजातिश्छंदः। इंद्रवज्रे, द्रुवंशयोः पादवत्त्वात् तृतीयपादे इंदुवंशा "स्यादिंदुंशा तयुगं यदा जरौ" इति लक्षणात् । अपरेषु त्विंद्रवज्रा "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति लक्षणात् ॥४१॥ त्वत्पालितैर्भृत्यैरेव त्वं दृश्यसे नान्यैरिति याज्ञिककर्मवत्सु ज्ञानिषु च कटाक्षः । "रसैरीशैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणवत्त्वाच्छिखरिणीवृत्तम् ॥ ४२ ॥ हे देव सर्वेषु देदीप्यमान, अत एव विभूमन्सर्वेश्वर मरीच्यादयोंऽशांशा अंशो ब्रह्मा तदंशा ब्रह्माद्या अंश एव । यद्वा । ब्रह्मापि त्वान्नाभिकञ्जोद्भूतत्वादंशांश एव रुद्राद्या अपि ब्रह्मोद्भूतत्वादंशांशा एव त्वदंशत्वात्तेषां वस्तुतस्त्वामेव स्तुवीमः । ते तु खल्वीश्वराभिमानिन एव न त्वीश्वरा इति ब्रह्मादिषु कटाक्षः । मत्तमयूरं वृत्तम् "वेदैरंध्रैर्म्तौ यसगा मत्तमयूरम्" इति लक्षणात् ॥ ४३ ॥ अत्राक्षिपति—नन्विति । अत्र शुष्कज्ञानिषु कटाक्षः । वसंततिलकावृत्तम् ॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणा ऊचुः ॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च ॥ त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ॥ ४५ ॥ त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा ॥ स्तूयमानो नदह्लीलया योगिभि र्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ॥ ४६ ॥ स प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञ विघ्नाः क्षयं यांति तस्मै नमः ॥ ४७ ॥ मैत्रेय उवाच ॥ इति दक्षः कविर्यज्ञं भद्ररुद्रावमर्शितम् ॥ कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने ॥ ॥ ४८ ॥ भगवान्स्वेन भावेन सर्वात्मा सर्वभागभुक् ॥ दक्षं बभाष आभाष्य प्रीयमाण इवानघ ॥ ४९ ॥ श्रीभगवानुवाच ॥ अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् ॥ आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ॥ ५० ॥ आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज ॥ सृजन्रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचिताम् ॥ ५१ ॥

विना नास्तीत्याहुः । त्वन्माययेति । अर्थं पुरुषार्थसाधनं कलेवरमभिपद्य प्राप्य त्वन्माययाऽस्मिन्ममेत्यहमिति चाभिमानं कृत्वेममात्ममोहं युष्मत्कथामृतनिषेवक उदुच्चैर्व्युद स्येत्परित्यजेन्नान्यः । ननु स्वैः पुत्रादिभिरधिक्षिप्तो दुःखितः सन्परित्यजेदेव नेत्याहुः ॥ क्षिप्तोऽपि दुर्मतिः असत्सु विषयेष्वेव लालसा तृष्णा यस्य सः ॥ ४४ ॥ ब्राह्मणाः स्तुवंति त्वमिति त्रिभिः । सदस्याश्च ऋत्विजश्च ॥ ४५ ॥ गां पृथ्वीं रसाया रसातलाद्दंष्ट्रया व्युज्जहर्थ विशेषेणोद्धृतवानसि । योगिभिः स्तूयमानः । हे त्रयीगात्र वेद मूर्ते यज्ञो यागः सयूपस्तद्विशेषः क्रतुस्तद्रूपी यज्ञसंकल्परूप इति वा यज्ञः क्रतुः कर्म यस्येति वा ॥ ४६ ॥ स त्वमस्माकं त्वद्दर्शनमाकांक्षतां प्रसीद अस्मद्यज्ञमप्युद्धरे त्यर्थः । न चाशक्यं तवैतत् । यतस्तव नाम्नि कीर्त्यमान एव यज्ञविघ्नाः क्षयं यांति एवं प्रभावो यस्तस्मै नमः ॥ ४७ ॥ इत्यनेन प्रकारेण सर्वैः कीर्त्यमाने हे भद्र विदुर संनिन्ये प्रवर्तयामास ॥ ४८ ॥ सर्वात्मतया सर्वभागभोक्ताऽपि भगवान्निजानंदतृप्तोऽपि स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाण इव दक्षमाभाष्य संबोध्य बभाषे ॥ ४९ ॥ योऽहं जगतः कारणम् आत्मा चेश्वरश्च उपद्रष्टा साक्षी च स्वयंदृक्स्वयंप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च शर्वश्चेत्यन्वयः ॥ ५० ॥ कुत इत्यत आह । अहमे

स्रग्विणी छंदोद्वयम् ॥ ४५ ॥ त्रयिगात्रेति । वेदस्य सर्वप्रकाशकत्वेन सर्वरूपतास्तीति भावः ॥ ४६ ॥ कीर्त्यमान एव किं पुनः कीर्त्तिते किंतरां तत्साक्षात्सन्निधौ यज्ञविघ्ना रुद्रानुचरा इति तेषु कटाक्षः । अत्र स्तावकानामन्यत्र कटाक्षैर्भगवतो भक्तेश्च प्राय उत्कर्षपोषान्न दोष आख्येयः ॥ ४७ ॥ भद्रेति । भगवद्भक्तत्वान्मंगलरूपसर्वेषां भद्रचिंतकत्वाद्वा । भद्रेति । विदुरे लक्षणया भद्रत्वस्थापनेनास्वारस्यं मत्वाह-यद्वेति । भद्ररुद्रो भद्राख्यरुद्रो वीरभद्रस्तेन दूषितम् ॥ ४८ ॥ प्रीयमाण इवेति । रुद्रापराधित्वान्न वस्तुतः प्रीत इति भावः । तीर्थरत्नु-पूर्वं प्रीयमाण इदानीं प्रीयमाण इवेत्युभयार्थाभिप्रायेणेवशब्दः । "इवोभयार्थे सादृश्ये" इत्यभिधानात् । यद्वा न पुरोडाशमात्रं प्रीतिहेतुः किं तु भक्तिरेवेतीवशब्दोपादानम् । हे अनघेति । निरपराधिनामेव प्रीणातीत्यत्र त्वमेव प्रमाणमित्यभिप्रायः ॥ ४९ ॥ मा पुनरपराधं कार्षीरिति हितमुपदिशति अविशेषणः । त्रयाणामस्माकं नास्ति विशेष इत्यर्थः ॥ ५० ॥ ननु परमेश्वरः खल्वेक एव शास्त्रेषूच्यते त्रित्वं तस्य त्वया कुत उक्तमित्यत्राह—क्रियासु सृष्टिस्थितिसंहृतिषूचितम् । स्रष्टा पालकः संहर्त्तेत्येवंरूपां ब्रह्मवि

॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्ब्रह्मण्यद्वितीये केवले परमात्मनि ॥ ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥ ५२ ॥ यथा पुमान्न स्वांगेषु शिरःपाण्यादिषु क्वचित् ॥ पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥ ५३ ॥ त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ॥ सर्वभूतात्मनां ब्रह्मन्स शांतिमधिगच्छति ॥५४॥ मैत्रेय उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिम् ॥ अर्चित्वा क्रतुना स्वेन देवानुभयतोऽयजत् ॥ ५५ ॥ रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः ॥ कर्मणोदवसानेन सोमपानितरानपि ॥ उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ॥ ५६ ॥ (विप्रेभ्यो दक्षिणां दत्त्वा विरराम यथासुखम् ॥) तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ धर्म एव मतिं दत्त्वा त्रिदशास्ते दिवं ययुः ॥ ५७ ॥ एवं दाक्षायणी हित्वा सती पूर्वकलेवरम् ॥ जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥५८॥ तमेव दयितं भूय आवृंक्ते पतिमंबिका ॥ अनन्यभावैकगतिं शक्तिः सुप्तेव पूरुषम् ॥५९॥

वात्ममायामधिष्ठाय जगत्सृष्ट्यादि कुर्वन्स च स च सन्सर्वशक्तिः क्रियोचितां कर्म शक्तियोजितां संज्ञां धारयामि ॥ ५१ ॥ तस्मिन्केवलेऽद्वितीये समानासमानजातीयभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेनाज्ञः पश्यतीत्यर्थः ॥ ५२ ॥ विद्वांस्तु भेदं न पश्यतीति सदृष्टांतमाह । यथेति ॥५३ ॥ तस्मादेवमैक्यं पश्यन्कृतार्थो भवतीत्याह । त्रयाणां ब्रह्मविष्णुरुद्राणामेको भावः स्वरूपं येषाम् ॥ ५४ ॥ स्वेन क्रतुना त्रिकपालेष्ट्या उभयतोंऽगैः प्रधानेन च ॥ ५५ ॥ स्वेन भागेन यज्ञावशिष्टेन उदवस्यते समाप्यतेऽनेनेत्युदवसानं तेन कर्मणा सोमपानितरानप्युपाधावदयजदित्यनुषंगः । ततश्चोदवस्य कर्म समाप्यावभृथरूपं यथा भवति तथा स्नातवान् ॥५६ ॥ स्वेनैवानुभावेनाप्तराधसे प्राप्तसिद्धये तस्मा अपि ॥५७॥५८॥ आवृंक्ते भजते स्म । अनन्यभावानां स्वात्मन्येकनिष्ठानामेकैव गतिर्यस्तम् । केवल प्रलयकाले सुप्ता शक्तिरीश्वरमिव ॥५९॥

विष्णुरुद्राख्याम् ॥ ५१॥ ननु ब्रह्मणो हिरण्यगर्भत्वे न जीवत्त्वाद्रुद्रस्येश्वरत्वेपि गुणस्पर्शात्कथं तयोस्त्वदभेदस्तत्र कैमुत्यन्यायमाह-इत्यर्थ इति । ब्रह्मरुद्रो च भूतानि जीवानपि भेदेनाज्ञ एव पश्यति किमुत ब्रह्मरुद्रौ भूतानां मदीयतटस्थशक्तित्वाद्ब्रह्मरुद्रयोस्तु गुणावतारत्वान्मदभेद एवेति भावः ॥ ५२ ॥ यथा स्वशिरःपाण्यादिसुखदुःखे तथैव सर्वभूतेष्वपि सुखदुःखे पश्येदित्येव भक्तानामभेददर्शनमित्यर्थः ॥ ५३ ॥ यतः पारक्यधीरनुचिता तस्माद्धेतोः । त्रिदेव्या सैक्यमेकरूपत्वम् । संदर्भस्तु—त्रयाणामेकः पुरुषस्यैव भावः "पार्थिवाद्दारुणो धूमः" इति न्यायेन यथायथं प्राकट्यं येषु तेषां सर्वभूतस्यात्मनां तत्तत्कार्यप्रवर्त्तकानामित्याह । इममर्थं कालिदासोपि कुमारसंभवे प्राह-तथा हि " एकैव मूर्त्तिर्बिभिदे त्रिधासौ सामान्यमेषां प्रथमावरत्वम् । विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ" इति । सोऽभेददर्शी शांतिं मोक्षम् ॥ ५४ ॥ ५५ ॥ "आग्नेयं पञ्चकपालमुदवसानीयं निर्वपेत्" इति श्रुत्युक्तेन पञ्चकपालपुरोडाशनिर्वपनलक्षणेनोदवसानकर्मणा सोमपानिति पाणिनेरपि सर्वज्ञेन व्यासेन प्रयुक्तत्वात्क्विप्प्रत्ययः प्रायिक इति ज्ञातव्यम् । अत्र च डप्रत्ययो बोध्यः । ततश्च उदवसानेष्ट्यनंतरमवभृथं यज्ञांतस्नानं यथा स्यात्तथा ॥ ५६ ॥ तस्मै दक्षाय । स्वेनैवानुभावेन भगवन्महिम्नैव 'राध—संसिद्धौ' इतोऽसुः सिद्धिरत्र यागस्यान्या पुनर्जीवनादिरूपा वा ज्ञेया । ये यज्ञं आगतास्ते इत्यर्थः ॥ ५७ ॥ मेनायां मेनकायाम् ॥ ५८ ॥ ननु पतिव्रतायाः पत्या सहैव मुक्तिश्रवणाद्दक्षात्मजया सत्या पत्यौ जीवति निजदेहत्यागोऽनुचितः कृत इति चेन्न सा मुक्तिमिता किन्तु तमेव देहांतरेणावाप्येत्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. च.
श्री. टी.
॥ २६ ॥

भा. दी. प्र.
टीका.
अ० ८

एतद्भगवतः शंभोः कर्म दक्षाध्वरद्रुहः ॥ श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥ ६० ॥ इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणम् ॥ यो नित्यदाऽऽकर्ण्य नरोऽनुकीर्तयेद्धुनोत्यघं कौरव भक्तिभावतः ॥ ६१ ॥ इति श्रीभा० च० दक्षयज्ञे सर्वदेवकृतस्तुतिवर्णनं नामसप्तमोऽध्यायः ॥ ७ ॥ छ ॥ मैत्रेय उवाच ॥ सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः ॥ नैते गृहान्ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः ॥ १ ॥ मृषाऽधर्मस्य भार्यासीद्दंभं मायां च शत्रुहन् ॥ असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः ॥ २ ॥ तयोः समभवल्लोभो निकृतिश्च महामते ॥ ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ॥ ३ ॥ दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम ॥ तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ॥ ४ ॥ (एते ह्यधर्मवृक्षस्य वंशाः संसृतिहेतवः ॥ श्रेयस्कामो न सेवेत नितरामाश्रमोत्तमी ॥ १ ॥) संग्रहेण मयाऽऽख्यातः प्रतिसर्गस्तवानघ ॥ त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलम् ॥ ५ ॥

बृहस्पतेः शिष्यान्मया श्रुतम् ॥ ६० ॥ परं पवित्रं य आकर्ण्य तथाऽनुकीर्तयेत् हे कौरव विदुर । स आत्मनः परस्याप्यघं संसारव्यसनं सर्वदा धुनोति ॥ ६१ ॥ इति श्रीभा० म० चतुर्थे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ दक्षकन्यान्वये प्राप्ता दक्षयज्ञकथोदिता ॥ मनुपुत्रान्वये प्राप्ता ध्रुवचर्याऽथ पंचभिः ॥ १ ॥ अष्टमे गुरुदारोक्तिरोषमत्सरतः पुरात ॥ निर्गतेन ध्रुवेणाह तपसा तोषणं हरेः ॥ २ ॥ वंशा वर्णितास्तत्रावशिष्टं किंचिदाह । सनकाद्या इति । नावसन्नाश्रिताः किंतु ऊर्ध्वरेतसो नैष्ठिका आसन् । अतस्तेषां वंशो नास्ति ॥ १ ॥ एवं तावन्मनुकन्याऽन्वयोक्त्यैव मरीच्यादीनां ब्रह्मपुत्राणामधर्मोऽपि ब्रह्मपुत्रस्तस्य वंशमाह मृषेति चतुर्भिः । दंभः परप्रतारणं माया तदुचिता चेष्टा तयोः सोदरयोरपि दांपत्यमधर्मांशतया एवमुपर्यपि । अप्रजोऽपुत्रः ॥ २ ॥ निकृतिः शठता यत याभ्यां कलिश्च तस्य स्वसा दुरुक्तिश्चेत्यर्थः ॥ ३ ॥ यातना तीव्रवेदना ॥ ४ ॥ प्रतिसर्गोऽनुसर्ग इव यद्वा प्रतिसर्गः प्रलयः । अधर्मस्य प्रलयहेतुत्वात्प्रतिसर्गत्वम् । एतदंतमधर्मवंशम् । पुण्यमिति वर्जनद्वारा

तमेवेति । सुप्ता उपरता शक्तिमार्यारूपा सृष्ट्यारंभे ईश्वरं यथा भजति तथेत्यर्थः ॥ ५९ ॥ दक्षस्याध्वरं यागं द्रोहितवान्नाशितवानिति दक्षाध्वरध्रुक् तस्य ॥ ६० ॥ यशसे हितं यशस्यमेवमायुष्यम् । अघानां पातकानामोघं प्रवाहं मृष्यति हिनस्तीति तथा मृषिरत्र हिंसायामनेकार्थत्वात् भक्तिभावेन प्रेम्णा तृतीयार्थे तसिल् । कौरवेति । कुरुवंशोद्भतत्वेन तव भक्तिभावोस्त्येवेत्यभिप्रायः ॥ ६१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ पंचभिरधुनोच्यत इति शेषः (१) गुरुदारा मातृसपत्नी तस्या उक्तेर्यो रोषो मत्सरश्च भ्रात्रुत्कर्षासहनजस्ताभ्यामिति द्विवचनान्ताभ्यां तासिः । तत्र ब्रह्मपुत्रेषु अत ऊर्द्ध्वरेतस्त्वात् । तेषां सनकादीनाम् ॥ १ ॥ हेयत्वेन त्यक्तुमधर्मवंशमाह हे–शत्रुहन्निति । अधर्म एव शत्रुस्तं भवाद्विध एव हंतीत्यभिप्रायः । तत् मिथुनम् । निर्ऋतिरिति नरकाधिष्ठातृदेवता रक्षस्तुल्यस्वभावोस्ति यद्वा । दिक्पालोऽलक्ष्म्यधिष्ठातृदेवता "निर्ऋतिः स्यादलक्ष्म्यां तु दिक्पाले नरकाधिपे" इति कोशात् ॥ २ ॥ तयोर्दंभमाययोः । हे महामते तव महे सर्वपूज्ये हरावासमंतान्मतिर्यस्य तथाविधत्त्वाल्लोभादयो न सन्तीति भावः । ताभ्यां लोभनिकृतिभ्याम् । इत्यर्थ इति व्याख्येयम् ॥ ३ ॥ सत्तमेति । कलिसंबंधाभावमाह "कलिना धीरभीरुणा" इत्याद्युक्तेः । तयोर्मृत्युभययोः ॥ ४ ॥ इह शास्त्रेऽभिधेयत्वेन तस्याश्चानु

॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह ॥ स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ॥ ६ ॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ ॥ वासुदेवस्य कलया रक्षायां जगतः स्थितौ ॥ ७ ॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः ॥ सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ॥ ८ ॥ एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् ॥ उत्तमं नारुरुक्षंतं ध्रुवं राजाऽभ्यनंदत ॥ ९ ॥ तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवम् ॥ सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता ॥ १० ॥ न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति ॥ न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥ ११ ॥

पुण्यहेतुत्वात् ॥५॥ मनोः पुत्रवंशम् । हरेरंशो ब्रह्मा तस्यांशादेहार्धाज्जन्म यस्य ॥६॥ जगतो रक्षायां स्थितौ ॥ ७ ॥ सुनीतिः सुरुचिश्च जाये तयोर्मध्ये नेतरा सुनीतिः ॥८॥ तयोः प्रियाप्रियत्वे प्रपंचयन्ध्रुवचरित्रमाह पंचभिरध्यायैः । सुरुचेः पुत्रमुत्तमसंज्ञं लालयन् ॥९॥ तथा अंकारोहणं चिकीर्षमाणम् ॥ १० ॥ गर्वोक्तिमेवाह त्रिभिः ॥

कूलप्रतिकूलवस्तुजिज्ञासायां वर्जनीयत्वेनाधर्मवंशो नरकांतः संग्रहेण संक्षेपेणोक्तः । अनुसर्गः पश्चात्सर्गः पृष्टभागीय इत्यर्थः । ''अधर्मः पृष्ठतो यस्मात्'' इत्युक्तेः । अनघेति त्वयायं नानुभूत इति भावः । त्रिः श्रवणं तु दृढीकरणार्थम् । आत्मनश्चेतसो मलं दंभादिरूपमेव ॥५॥ वक्तव्यकथायाः समाप्तत्वादतः परं किं वक्तव्यमिति तत्राह अथात इति । अथेत्यनेन पूर्वस्माद्वक्ष्यमाणस्यार्थस्य मंगलत्वं वक्ति यतोऽधर्मादिकं हेयमत उपादेयं कथयामीत्यत इति । यद्वा ''अथातो ब्रह्मजिज्ञासा'' 'अथात आदेशमप्राक्ष्म' इतिवच्छ्रुतिसूत्रतुल्यत्वमस्योपाख्यानस्य सूचितमिति।अपिना वंशाधिक्यं च सूचितम् । कुरूद्वहेति । भवदीयवंशवदयमपि वंशो वर्णनार्ह एवेत्याह । यद्वा । हरेरंशानां ध्रुवपृथुदत्तयज्ञर्षभाणां जन्म यतस्तस्य यज्ञदत्तयोर्दौहित्रत्वं ध्रुवस्य पौत्रत्वं पृथोर्ध्रुवप्रत्रौत्रप्रपौत्रत्वमृषभस्यापि प्रपौत्रत्वं चास्तीति विवेकः । अत्रैवं बोध्यं ''वत्सां मनोरुत्तपदः स्वसारम्'' इति कर्दमप्रार्थनायां मुनिकर्तृकपूर्वनामोच्चारणेन ज्येष्ठत्वे प्रतीतेप्युत्तपदस्तथापि प्रियव्रतोत्तानपदोः स्वसेयमित्यत्रान्यत्रापि ''प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ'' अत्रापि च द्वंद्वे प्रियव्रतस्यैव ज्येष्ठत्वेन प्राधान्यात्पूर्वनिपाताज्ज्येष्ठत्वं सिद्ध्यति । तद्वंशस्य प्रथमं वर्णनीयत्वाद्यदुत्तानपदो वंशवर्णनं पूर्वं कृतं तद्भक्तबाहुल्योत्सुकतयेति बोध्यं, स्वतंत्रेच्छस्य मुनेः पर्यनुयोगानर्हत्वादिति न्यायेन वा बोध्यम् । किञ्च । पूर्वं प्रियव्रतेनैव राज्यं कृतं यदा विरजसंतत्यंतस्तद्वंशः समाप्तिमितस्तदा पुनरुत्तानपाद्राजाभूत् । प्रियव्रतादिराज्यकाले स योगसमाधिनिष्ठस्तपोनिष्ठो वा तद्वंशसमाप्तौ स्वर्गादागत्य मनुना ब्रह्मणा च पुंनस्तस्मै राज्यं दत्तं समाधेरुत्थाप्य मन्वागमनं हि ध्रुवानुशासनार्थागमनवत्संभावितमेव अन्यथा प्रथमं प्रियव्रतराज्याभावे भूमंडलजलधिमेखलमाकलय्येति ध्रुवचरितोक्तिः समुद्रमुपविस्तीर्णमिति प्राचेतसोपाख्यानोक्तिश्च न संगच्छेत । प्रियव्रतात्पूर्वं समुद्राद्यभावात्समुद्रादीनां तद्रथचरणनेमिनिम्नोद्भूतत्वस्य ''यो निमिनिम्नैरकरोच्छायांघ्नन्सप्तवारिधीन्'' इत्यादिनोक्तत्वादिति प्रतिभाति । युगपदेकभूमंडले चक्रवर्त्तिद्वयासंभवात् ॥ ६ ॥ वासुदेवस्य कलया कलारूपेण विष्णुना या जगतो रक्षा तस्यां स्थितौ विष्णोर्वासुदेवकलारूपत्वं श्रीदशमस्कंधोपक्रमे वर्णयिष्यामः ॥ ७ ॥ प्रियव्रतोत्तानपात्पत्नी पितरौ तु ग्रंथांतरादवसेयौ । उक्तमपि स्कांदीयकेदारखंडे ''कर्दमस्य सुता देवी काम्या नाम्नी प्रियव्रतम् । पतिं लेभे सूनृता तु धर्मकन्योत्तपादकम्'' इति प्रियव्रतस्य विश्वरूपदुहिता बर्हिष्मत्यपि भार्यासीदिति वक्ष्यति पञ्चमस्कंधे । सूनृतेति । सुनीतेरेव नामांतरमेवं सुरुचिपितापि तदानींतनः प्रजापतिविशेषो ज्ञेयः । तयोः सुनीतिसुरुच्योः । इतरा सुनीतिः ॥८॥ नाभ्यनंदत नांग्यकरोत् ॥९॥ सेर्ष्यं यथा भवति तथा ॥ १० ॥ वत्सेति साक्षेपा संबुद्धिः वत्सवदज्ञोसीत्यभिप्रायः । नृपात्मज इति । न हि नृपात्मजत्वमेव राज्यासनारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बालोऽसि बत नात्मानमन्यस्त्रीगर्भसंभृतम् ॥ नूनं वेद भवान्यस्य दुर्लभेऽर्थे मनोरथः ॥ १२ ॥ तपसाऽऽराध्य पुरुषं तस्यैवानुग्रहेण मे ॥ गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनम् ॥ १३ ॥ मैत्रेय उवाच ॥ मातुः सपत्न्या सुदुरुक्तिविद्धः श्वसन्रुषा दंडहतो यथाऽहिः ॥ हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशम् ॥ १४ ॥ तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदुह्य बालम् ॥ निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्याः ॥ १५ ॥ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला ॥ वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह ॥ १६ ॥ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला ॥ मामंगलं तात परेषु मंस्था भुंक्ते जनो यत्परदुःखदस्तत् ॥ १७ ॥ सत्य सुरुच्याऽभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः ॥ स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्माम् ॥ १८ ॥

नेति । नृपतेर्धिष्ण्यमासनं नृपात्मजोऽपि भवान्नारोढुमर्हति ॥ ११ ॥ १२ ॥ पुरुषमीश्वरम् ॥ १३ ॥ मिषंतं पश्यंतम् । सन्नवाचं कुंठितवाचम् ॥ १४ ॥ उदुह्यारोप्य । अंतःपुरजनमुखाच्छ्रुत्वा ॥ १५ ॥ शोक एव दावाग्निस्तेन दावाग्निगता लतेव स्थिता सा बाला विलापं चकार ॥ १६ ॥ वृजिनस्य दुःखस्य अमंगलमपराधं परेषु मा मंस्थाः । यद्यतः परेभ्यो दुःखं ददाति यः स स्वदत्तमेव तद्दुःखं भुंक्ते ॥ १७ ॥ दुर्भगया मया उदरे गृहीतस्तस्या एव स्तन्येन वृद्धश्च । दुर्भगत्व

हकरं किन्तु राज्यात्मजत्वम्।नृपात्मजत्वस्य दास्यादिपुत्रेपि संभवादित्यभिप्रायः। नैवं धृत इति पाठे एवमुत्तमवत्कुक्षौ न धृतो अपि न कदाचिल्लालनार्थं कुक्षौ कटिपरिदेशे न गृहीत इत्युक्तम्।वस्तुतस्तु यस्त्वं हरिभक्तो मया लालनार्थमपि कुक्षौ न धृतोस्यहो मे भाग्यमांद्यमिति वागर्थः । तथा नृपतेर्धिष्ण्यमात्रमारोढुं नार्हसि किं तु सर्वोत्कृष्टं विष्णुपदं, हे नृपतेर्नरपालकस्य विष्णोर्वत्स प्रिय नृपदमत्रोपलक्षणं नृप आत्मजो यस्येति तथा तत्र पुत्रस्यापि राज्यं भविष्यति तव तत्र कः संदेह इति भावः । "वत्सः पुत्रे प्रिये चाद्यवर्षे धेनुसुते च ना ।उरसि क्लीबम्" इति धरणिः ॥ ११॥ दुर्लभे राज्यासनारोहणरूपे यस्य तव ॥१२॥ तर्हि राज्यासनलाभः कथं स्यात्तत्राह--तपसेति । पुरुषं नारायणम् । तस्य पुरुषस्य गर्भे साधय संप्रत्येव त्रिचतुरैः पंचषैर्वैतैर्मद्धर्तृप्रातिसाधनैर्हरिं संतोष्य त्वं शीघ्रं म्रियस्व त्वन्मातरं रुदंतीं पश्येयमित्येवं तव च मम च सुखं भवत्विति भावः । पुरुषमाराध्येति भक्तं मन्येयं नृपसंन्निधाने न तु भक्तेयमिति भावः ॥१३॥१४॥ पुरेऽतःपुरे भवाः पौरा दासीजनास्तेषां मुखात् । अत्रापि पुरपदमेकदेशोच्चारणन्यायेनांतःपुरं वक्तीति निशम्य भानुनंदनीतिवत् । तत्सपत्न्युदितम् । नितांतमतिशयेन सा सुनीतिः । विव्यथे दुःखिता बभूव॥१५॥दावलतापि वह्निस्पर्शाच्चटचटेति शब्दं कुर्वती प्रस्विन्नेव जलमप्यश्रुवन्मुंचतीति भावः । हेतौ तृतीया प्राप्तेतिपदाध्याहारो वा।बालेति परिचारकस्त्री तुल्यतामाह-"बाला त्रुटिस्त्रियोः" इति मेदिनी॥१६॥ शलभभक्षितसस्यवत्पूर्वकृतकर्मणोऽपरिहार्यत्वं पश्यंत्याह-हे तातेति । प्रियत्वं द्योतंती तत्र स्वासामर्थ्यमाहेत्यभिप्रायः ॥१७॥परेण द्वेषादुक्तमपि गुणग्राहिणस्तत्पथ्यमेत्र प्रतिभातीत्याह-सत्यमिति। विलज्जते मद्रक्षणपालने यो भारस्तं वोढुं त्रपत इत्यर्थः। स्वास्यानुरूपतामनेनेति भावः । इडस्पतिरिहेडाया इडसादेशश्छान्दसः । इडा भूमिस्तस्याः पतिःमे दुर्भगाया इति षष्ठ्यौ तृतीयार्थे तस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्राऽपि यदव्यलीकम् ॥ आराधयाऽधोक्षजपादपद्मं यदीच्छसेऽध्यासनमुत्तमो यथा ॥ १९ ॥ यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः ॥ अजोऽध्यतिष्ठत्खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यम् ॥ २० ॥ तथा मनुर्वो भगवान्पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः ॥ इष्ट्वाऽभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यम् ॥ २१ ॥ तमेव वत्साऽऽश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषम् ॥ २२ ॥ नान्यं ततः पद्मपलाशलोचनाद्दुःखच्छिदं ते मृगयामि कंचन ॥ यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्यमाणया ॥ २३ ॥

मेवाह । यां मामिडस्पतिर्भूपतिर्भार्येति वोढुं स्वीकर्तुं विलज्जते वाशब्दाद्दासीत्यपि ॥ १८ ॥ पितृभार्यात्वेन मात्रा समा मातुः सपत्नी तथापि यदुक्तं तपसाराध्य पुरुषमित्यादि तदातिष्ठ कुरु । अध्यासनं यदीच्छसि ॥ १९ ॥ परिचर्य निषेव्य विश्वस्य विभावनाय पालनायात्ता स्वीकृता गुणाभिपत्तिः सत्त्वगुणाधिष्ठानं येन तस्य जितआत्मा मनः श्वसनः प्राणश्च यैस्तैरभिवंद्यम् ॥ २० ॥ एकमत्या सर्वांतर्यामिदृष्ट्या ॥ २१ ॥ मृग्या पदाब्जयोः पद्धतिर्मार्गो यस्य तमेवाश्रय शरणं व्रज ततो भजस्व नान्यस्मिन्भावोऽभिप्रायो यस्य तस्मिन् । निजधर्मैर्भाविते शोधिते ॥ २२ ॥ तमेवेत्यनेन सूचितं सर्वोत्तमत्वं प्रपंचयति । नान्यमिति । हस्तेन गृहीतं दीपवत्पद्मं यया तया

दुर्भगाया एव स्तन्येन क्षीरेण न तु पितृदत्तरसायनेनेति भावः ॥ १८ ॥ मात्रा समा समाता तया विमात्रापि त्वद्बधमभिलषंत्यापि यत्तप उक्तं तत्कुरु अव्यलीकं प्रियं ततं न हि हरिभजनं कस्याप्यप्रियम्भवति विमत्सरं स्तस्या द्वेषं परित्यज्येत्यर्थः । मम रोदनमाजन्म विधात्रा ललाटे लिखितं सुखं भवत्विति भावः । "अलीकमप्रियेऽपि स्याद्व्ये सत्ये नपुंसकम्" इति मेदिनी । विशेषेणालीकं व्यलीकं न व्यलीकमव्यलीकम् । अध्यासनमधिकमासनम् उद्गतं तमोऽज्ञानं यस्य स तथा यथा ज्ञानी भगवत्प्राप्तये तत्पादं सेवते तं च प्राप्नोति तथा त्वमपि तं प्राप्स्यसीति भावः ॥१९॥ २० ॥ चतुर्मुखस्य भगवत्पुत्रत्वेन तत्प्रसादयोग्यतया तस्य तादृशैश्वर्यप्राप्तिर्युक्ते वास्मत्पूर्वजेन केनाप्तं येन श्रद्धयास्माकमपि तत्र झटिति प्रवृत्तिः स्यात्तत्राह—तथेति । यथाऽजस्तथा अन्यतो भक्त्यादिव्यतिरिक्तसाधनेनान्येभ्यो देवेभ्यो वा भौमं मन्वंतराधिपत्वं दिव्यं स्वर्गसम्बन्धि आपवर्ग्यं कैवल्यसंबंधि अथेत्यनेन देहत्यागानंतरमेवापवर्गसुखावाप्तिर्न जन्मातरं प्राप्येत्याह ॥ २१ ॥ किं बहूक्त्या सारं वक्ष्यामीत्याह—तमिति । एवेति । देवतांतरनिरासाय यत्किंचिद्दोषदृष्ट्या विमुखो न भविष्यतीत्याह—भृत्यवत्सलमिति । चक्रवर्ती तु—मद्विधमातृकोटितोपि त्वयि भृत्ये तस्य वात्सल्यमुदेष्यत्यतो दुःखगंधमपि न प्राप्स्यतीति भावः । यं त्वं प्राप्स्यसि तस्य पदाब्जयोः पद्धतिर्मार्ग एव मुमुक्षुभिर्मृग्यते न तु तैरपि सुलभ इति भावः । एतेन न केवलं सकामैरेव स सेव्योऽपि तु मोक्षेप्सुभिरपीत्युक्तम् । आश्रितस्य च नान्यस्मिन्भाव आसक्तिर्यस्य तादृशे मनसि । वत्सेति । पञ्चवार्षिकस्य ते कर्मान्तरानाधिकाराद्भक्तिरेव कार्येत्याह—निजधर्मैर्भक्तिधर्मैर्यमनियमादिभिः पुरुषमित्यनेन स्वांतस्थमेव तं न देशांतरादानेयमित्युक्तम् ॥ २२ ॥ कुतोयमेवाशेषपुरुषार्थावाप्तौ नियमोऽन्यः किं न स्यादिति चेत्सुखाराध्यस्यापि देवतान्तरस्य नश्वरफलदायित्वात्त्वद्दुःखं निर्मूलयितुमसमर्थस्य भजनपरिणामदर्शिन्यहं नोपादशामीत्याह—नेति । यो युष्माकं कुलदेवता लक्ष्मीकांतस्तुतस्तस्मात्पद्मपलाशलोचनादित्यनेन तस्य दृष्टिपातेनैव तत्तस्वं शीतली भविष्यतीति ध्वनितं, त्वयानन्विष्यैतदुक्तं विचारिते कश्चित्स्यादेवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. च.
श्री. टी.
॥ २८ ॥

भा. दी. प्र.
टीका.
अ० ८

॥ मैत्रेय उवाच ॥ एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः ॥ संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात् ॥ २४ ॥ नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम् ॥ स्पृष्ट्वा मूर्धन्यघघ्नेन पाणिना प्राह विस्मितः ॥ २५ ॥ अहो तेजः क्षत्रियाणां मानभंगममृष्यताम् ॥ बालोऽप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥ २६ ॥ नारद उवाच ॥ नाधुनाप्यवमानं ते सन्मानं वापि पुत्रक ॥ लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥ २७ ॥ विकल्पे विद्यमानेऽपि न ह्यसंतोषहेतवः ॥ पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥ २८ ॥ परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः ॥ दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः ॥ २९ ॥ अथ मात्रोपदिष्टेन योगेनावरुरुत्ससि ॥ यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ॥ ३० ॥

श्रिया इतरैर्ब्रह्मादिभिः ॥ २३ ॥ संजल्पितं विलापम् । ततोऽर्थस्यागमः प्राप्तिर्यस्मात्तथाभूतं वच आकर्ण्य ॥ २४ ॥ २५ ॥ विस्मित इत्युक्तं तदेवाह । अहो तेजः प्रभावः ॥२६॥२७॥ विकल्पे मानापमानविवेके सत्यपि भिन्ना न संति । किंतु मोहकल्पिता एव ते इत्यर्थः । कुतः । यत्सुखं दुःखं वा तन्निजकर्मभिरेव भवति यतः ॥२८॥ उपशमोपदेशेन निवर्तयति । परितुष्येदिति षड्भिः । ईश्वरगतिं वीक्ष्येश्वरानुकूल्यं विना नोद्यमाः फलहेतव इति ज्ञात्वा परितुष्येत्संतोषमेव कुर्यात् ॥ २९ ॥ दुष्करश्च तवाय

स्यत आह-मृगयामि विचारेणान्यं तादृशं न पश्यामीति भावः।लक्ष्मीरेव स कुतो न स्यात्तत्राह-य इति। श्रीत्वं तु भारत्यादावप्यस्तीत्यत आह-इतरैरिति । तर्हि संपल्लक्षणा श्रीरेव सा स्यादित्यत आह-हस्तेति । अनेन श्रीप्रिया मूर्त्तिमती साक्षाल्लक्ष्मीरिति ज्ञायते मृग्यत इत्यनेन हरेर्गुणतः स्वरूपतश्चोत्कर्षो ध्वनितः । विमृग्यमाणयेत्यनेन श्रीकटाक्षमोक्षस्य दुःसाधनत्वमुक्तम् ॥ २३ ॥ बालत्वाद्रोषतोषयोः क्षणकालीनत्वेन समत्वान्मातृवचः श्रुत्वापि गृह एवावस्थानं हृदि संनिधाय तत्समर्थनाय ततो निर्गमनं वा युक्तमिति ध्रुवेण द्वयोर्मध्ये किमकारीत्यांतरीं शंकां परिहर्त्तुमाह-एवमिति । ततो विलापाकर्णनानंतरम् । अर्थस्याभिप्रेतस्य । आत्मना धैर्येणात्मानं मनः ॥ २४ ॥ ध्रुवस्याभीष्टसिद्धिलक्षणं नारदसंवादं वक्ति । नारद इति । उपाकर्ण्येत्यनेन नारदस्य दूरश्रवणशक्तिर्योगींद्रत्वात्स्वाभाविकीति सूचयति । सर्वप्राणिचित्तविषयं ज्ञानं वा योगसिद्धं स्पृष्ट्वेति गुरुप्रसादं ध्वनयति-अघघ्नेनेति । सर्वदुरितविनाशकेन पित्रादिद्वेषनिमित्तदोषनाशं वक्ति ॥ २५ ॥ तदेव विस्मितत्वमेव तेजो धैर्यलक्षणम् । अमृष्यतामसहमानानां समातुः समानमातुः सुरुच्याः ॥ २६ ॥ पुत्रकेति पुत्रसदृशत्वाच्छिष्यस्येत्यभिप्रेत्योक्तम् । सादृश्येपि कप्रत्ययः ॥ २७ ॥ असंतोषहेतवो दुःखहेतवोऽपमानादयस्तत्कर्त्तारो वा । इत्यर्थ इति । अज्ञानकल्पिता एवेति भावः । अत्र विश्वनाथः-विकल्पो भेदस्तस्मिन्विद्यमानेपि ज्ञानयोगिनां तावद्विकल्पो नास्त्येवेति को वाऽसंतोषः के वा तस्य हेतवः भक्तियोगिनां कर्मयोगिनां च विकल्पो विद्यत एवेति विद्यमाने विकल्पे पुंसो मोहं विनाऽसंतोषस्य हेतवोऽपमानादयस्तत्कर्त्तारश्च भिन्ना न संति किं तु मोह एवेत्यर्थः।यद्यस्माल्लोके सर्वत्र निजकर्मभिरेवापमानादयो भवंतीत्यात्मानं विना कस्मै दोषो देय इत्यत एव विवेकिनो भक्ताः सकर्माणश्च केचिद्भवंतीति भावः॥२८॥निवर्त्तयति-न्तपस इति।यतः कर्मैव दुःखादिहेतुस्ततो हेतोः यत्र फलप्रापकं तत्रैवेश्वरानुकूल्यं भवतीति दैवोपपादितेनैव तुष्येदिति भावः । बुध इति । स्वोपार्जितविवेकबुद्ध्येत्याह इति ज्ञात्वेश्वरप्रेरितमेव कर्म फलतीति विचार्य ॥ २९ ॥ तव तु प्रारीप्सितोयमुद्यमोतिकठिन इत्याह-अथेति । अथ यदि योगेनोपायेन मातृपदमत्रोभयमातृपरं ज्ञेयं सुरुच्यापि तपसाराध्य पुरुषमित्युपदिष्टत्वात्। दुराराध्यस्य कुतः प्रसादः कुतस्तरां फलाप्तिरिति भावः। वा इत्यनेन स्वानुभवसिद्धमिति दर्शयति॥३०॥

॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनयः पदवीं यस्य निःसंगेनोरुजन्मभिः ॥ न विदुर्मृगयंतोऽपि तीव्रयोगसमाधिना ॥ ३१ ॥ अतो निवर्ततामेष निर्बंधस्तव निष्फलः ॥ यतिष्यति भवान्काले श्रेयसां समुपस्थिते ॥ ३२ ॥ यस्य यद्दैवविहितं स तेन सुखदुःखयोः ॥ आत्मानं तोषयन्देही तमसः पारमृच्छति ॥ ३३ ॥ गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ॥ मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ॥ ३४ ॥ ध्रुव उवाच ॥ सोऽयं शमो भगवता सुखदुःखह तात्मनाम् ॥ दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ॥ ३५ ॥ अथापि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः ॥ सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ॥ ३६ ॥ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधुवर्त्म मे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ॥ ३७ ॥

मुग्धम इत्याह अथेति द्वाभ्याम् । यस्य प्रसादमवरोढुं प्राप्तुमिच्छसि ॥ ३० ॥ निःसंगेन तीव्रयोगेन युक्तेन समाधिना मृगयंतोऽपि यस्य पदवीं मार्गं न विदुः स देवो दुराराध्यः ॥ ३१ ॥ श्रेयसां काले वृद्धत्वे ॥ ३२ ॥ सुखदुःखयोर्मध्ये सुखे सति पुण्यं क्षीयत इति । दुःखे सति पापं क्षीयत इत्यात्मानं तोषयंस्तमसः पारं मोक्षं प्राप्नोति ॥ ३३ ॥ किं च गुणैरधिकात्पुंसः इति ल्यब्लोपे पंचमी । तं दृष्ट्वा प्रीतिं कुर्यात् न त्वसूयामित्यर्थः । अनुक्रोशं कृपां लिप्सेन्न तु तिरस्कारम् । समाना न्मैत्रीं न तु स्पर्धाम् ॥ ३४ ॥ ३५ ॥ क्षात्रं स्वभावं प्राप्तवतोऽत एवाविनीतस्य दुर्वाक्यबाणैर्भिन्ने हृदि न श्रयते न तिष्ठति ॥ ३६ ॥ अन्यैरनधिष्ठितं त्रिभुवने उत्कृष्टं पदं जेतुमि

मुनयोपि यन्मार्गं समाराध्यं न जानंति बालकस्त्वं किमुतेति भावः ॥ ३१ ॥ यतः स दुराराध्योस्त्यतो निवर्त्ततताम् । एष सत्प्रसादनलक्षणो हठः । वास्तवोर्थस्तु-निनिश्चितं फलं यत्र तथाभूत एव सन्निवर्त्ततां काले प्राप्त्यवसरे एवास्मिन् यतिष्यतीति वर्त्तमानसामीप्ये ॥ ३२ ॥ तेन दैवविहितेन ॥ ३३ ॥ मनोदुःखाभावे उपायांतरमाह—किं चेति । गुणाश्शंमदमादयः । इत्यर्थ इति । तादृशगुणाप्तयेऽन्यथा तद्गुणाप्तिर्न स्यादिति भावः । कृपामिति । अयमपि मादृशो भवत्वित्यर्थः । न तु स्पर्द्धामिति । स्पर्द्धया नरकपातादि स्यादित्यर्थः ॥ ३४ ॥ नारदेनैवं बोधितोपि ध्रुवस्तं प्रशस्य स्वहार्दं विज्ञापयति सोयं शमो भगवन्निष्ठालक्षणः । सुखदुःखाभ्यां पीडितमनसाम् ॥ ३५ ॥ त्वया यद्यप्यनधिकारिणेपि मह्यं कृपयेदमुपशमामृतं दत्तम् । अथापि तथापि । अत एव स्वभावं प्राप्तत्वादेव । भिन्ने मृद्भाजनवद्विदीर्णे न तिष्ठतीति व्याजस्तुत्या शौर्यादिहीनान् दुर्बलान् ब्राह्मणानेवोपशमामृतं पायय मम तु महाघोरशौर्यवतः क्षत्रियकुमारस्य दृष्टिरप्यत्र न पततीति भावः ॥ ३६ ॥ तर्हि तवाकांक्षायाः कियानवधिरित्याकांक्षायामाह—पदमिति । त्रिभुवनोत्कृष्टत्वेप्यस्मत्पितृभिरिति यो मामवम न्यते स्म तत्पतिनोत्तानपादेन तत्पित्रा मनुना तत्पित्रा ब्रह्मणा तदन्यैरपि ब्रह्मपुत्रपौत्रादिभिरनधिष्ठितमप्राप्तं पदं जेतुमिच्छोर्वर्त्म ब्रूहीति त्वं तावद्वर्त्ममात्रमुपदिशन्नचिरेणैव तद्विजये किञ्चन शौर्यं मे पश्येति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नूनं भवान्भगवतो योंगजः परमेष्ठिनः ॥ वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्युदाहृतमाकर्ण्य भगवान्नारदस्तथा ॥ प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया ॥ ३९ ॥ नारद उवाच ॥ जनन्याऽभिहितः पंथाः स वै निःश्रेयसस्य ते ॥ भगवान्वासुदेवस्तं भज तत्प्रवणात्मना ॥ ४० ॥ धर्मार्थकाममोक्षार्थं य इच्छेच्छ्रेय आत्मनः ॥ एकमेव हरेस्तत्र कारणं पादसेवनम् ॥ ४१ ॥ तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि ॥ पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥ ४२ ॥ स्नात्वाऽनुसवनं तस्मिन्कालिंद्याः सलिले शिवे ॥ कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ॥ ४३ ॥ प्राणायामेन त्रिवृता प्राणेंद्रियमनोमलम् ॥ शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुम् ॥ ४४ ॥

च्छोर्मे साधु वर्त्म मार्गं ब्रूहि॥ ३७॥ अंकज इति पाठे उत्संगाज्जातो यो नारदः स भवान्खलु तत्र लिंगम् । वीणां वितुदन्वादयन् हितायाटति ॥ ३८॥ ३९॥ निःश्रेयसस्याभिप्रेतार्थस्य पंथाः कोऽसावित्यत आह । भगवान्वासुदेवोऽत एव तं भज ॥ ४० ॥ ४१ ॥ मधुवनाख्यं यमुनायास्तटं गच्छ । यत्र मधुवने ॥ ४२ ॥ अध्ययनाद्यभावेऽप्यात्मन उचितानि योग्यानि देवतानमस्कारादीनि कृत्वेति यमनियमा उक्ताः । आसनकल्पनं च कुशादिभिः स्वस्तिकादिभिश्च ॥ ४३ ॥ प्राणेंद्रियमनसां मलं

भावः । एतेन ब्रह्माद्यप्राप्ये पदे तत्पुत्रस्योत्तमस्य तु मनोरथोपि दुर्घट इत्यसूचि । किञ्च राजसिंहासनस्यानित्यत्वेन तपसा तन्नाकांक्ष इति च ध्वनितम् ॥ ३७ ॥ मम त्वयं मनोरथः सेत्स्यत्येव यद् गृहान्निष्क्राम्यत एव भवद्दर्शनमिदमेवात्र ज्ञापकमित्याह–नूनमिति । अंगादुत्संगादाविर्भूतो लोकहिताय भगवदवतार एव त्वं न कस्यापि पुत्र इति भावः । पाठांतरं स्वामिचरणैर्व्याख्यातमेव । तत्र नारदत्वे श्रीनारदस्यैवैतादृशत्वात् नारं नरसमूहं दयते हितोपदेशेन पालयतीति निरुक्तेरन्वर्थत्वात् ॥ ३८ ॥ यादृच्छिकमुनित्वात्तदुक्तमाकर्ण्य स्मित्वा योगित्वेनादृश्यशक्तित्वात्तूष्णीं गत उत किमप्युक्तमिति तत्राह–इतीति ॥ ३९॥ प्रागुक्तं दृढी कर्तुमाह–जनन्येति । वा-इत्यत्रार्थः यो जनन्याऽभिहितः स एव ते निःश्रेयसः परमसुखस्य स्यान्नान्य इत्येवान्वयः । कोसाविति तत्राह–यो हरेर्विग्रहेषु वासुदेवनामा भगवांस्तं, तस्मिन्प्रवणस्तत्प्रवणः स चासावात्मा मनस्तेन "प्रवणो ना चतुर्मार्ग्यां क्रमनिम्नमहीतले । प्रह्वे च जठरे लग्ने प्रकृष्टवचनेपि च॥" इति कोशात् ॥ ४० ॥ हरिसेवनमेव सर्वाभीष्टहेतुरित्याह । तस्येति शेषः । तस्य तत्र तत्प्राप्तावेकमेव कारणांतरव्यावर्त्तकं हरेः पादसेवनं कारणमित्यर्थः । ॥ ४१ ॥ अभीष्टसाधनं क्षेत्रं चोपदिशति–यस्माद्धरेरेव प्रधानसाधनत्वं तत्तस्माद्यमुनायास्तटं गच्छ किंभूतं तटं "वीरहा माधवो मधुः" इति सहस्रनामसु पठितत्वान्मधोरन्वयोद्भूतत्वाद्वा मधोर्विष्णोर्वनो भजनं यत्र तन्मधुवनं 'वन संभक्तौ' इत्यतो घञर्थे कविधानमिति कप्रत्यये भावे वननं वन इति । हरेर्नैत्यञ्च सांनिध्यं यत्र तटेस्तीति । एतेन व्रजांतर्गतं तल्लक्ष्यते तत्रैव भगवतो नित्यविहारस्य नारदपुराणादौ "नित्यं श्रीयमुनातटे व्रजभुवि लेलायते माधवः" इत्याद्युक्तेः श्रवणात् । अत एव शुचि पवित्रतापादकत्वेन दीप्तम् पुण्यं तपस्यं 'पुण-शुभे कर्मणि' पुणाय हितं पुण्यं सर्वक्षेत्रेषु मुख्यं सिद्धिस्थानम् । यद्वा-मधुवनस्य नित्यत्वेनाविर्भावतिरोभावावेव तस्य स्तोऽतो ध्रुवकालेपि तदस्त्येवेति मंतव्यम् । स्वामिचरणोक्तिस्तु–मधुवनमाख्यातवनिति मधुवनाख्यमिति डांता बोध्या ॥ ४२॥ तत्र किं कर्तव्यमिति तत्राह–स्नात्वेति । अनुसवनं त्रिकालं प्रथमादिना चैलाजिनग्रहः । "चैलाजिनकुशोत्तरम्" इति गीतोक्तेः । यद्वा–काशादि ग्राह्यमादिना । स्वस्तिकादिभिरित्यत्रादिना पद्मासनादिग्रहः ॥ ४३ ॥ त्रिवृता पूरकादित्रित्वसंख्यायुक्तेन । यद्वा–प्रणवेन व्युदस्येत्युत्तया प्रत्याहारोपि ध्वनितः । मनसश्चेंद्रियाणां च विषयेभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसादाऽभिमुखं शश्वत्प्रसन्नवदनेक्षणम् ॥ सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरम् ॥ ४९ ॥ तरुणं रमणीयांगमरुणोष्टेक्षणाधरम् ॥ प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवम् ॥ ४६ ॥ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनम् ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ॥ ४७ ॥ किरीटिनं कुंडलिनं केयूरवलयान्वितम् ॥ कौस्तुभाभरणग्रीवं पीतकौशेयवाससम् ॥ ४८ ॥ कांचीकलापपर्यस्तं लसत्कांचननूपुरम् ॥ दर्शनीयतमं शांतं मनोनयनवर्धनम् ॥ ४९ ॥ पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चताम् ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम् ॥ ५० ॥ स्मयमानमभिध्यायेत्सानुरागावलोकनम् ॥ नियतेनैकभूतेन मनसा वरदर्षभम् ॥ ५१ ॥ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः ॥ निर्वृत्या परया तूर्णं संपन्नं न निवर्तते ॥ ५२ ॥ जप्यश्च परमो गुह्यः श्रूयतां मे नृपात्मज ॥ यं सप्तरात्रं प्रपठन्पुमान्पश्यति खेचरान् ॥ ५३ ॥ ओं नमो भगवते वासुदेवाय ॥ मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः ॥ सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित् ॥ ५४ ॥

चांचल्यं व्युदस्येति प्राणायामप्रत्याहारौ । धारणामाह अभिध्यायेदित्यादिषड्भिः । गुरुणा धीरेण मनसा गुरुं श्रीहरिम् ॥ ४४ ॥ सुरेषु सुंदरम् ॥ ४५ ॥ रमणीयान्यंगानि यस्य ओष्ठश्च ईक्षणा ईक्षणं च ओष्ठेक्षणे अरुणे ओष्ठेक्षणे धारयतीति तथा तम् । अरुणमोष्ठमीक्षणं चाधारयतीति वा । नृम्णं सुखकरम् यद्वा नृम्णं धनम् । सर्वपुरुषार्थनिधिमित्यर्थः । शरण्यं रक्षितारम् ॥ ४६ ॥ पुरुषं पुरुषलक्षणयुक्तम् ॥ ४७ ॥ कौस्तुभस्याभरणं ग्रीवा यस्य ॥ ४८ ॥ कांचीकलापेन पर्यस्तं परिवेष्टितम् । मनोनयनयोर्वर्धनं हर्षकरम् ॥४९॥ हृत्पद्मकर्णिकाया धिष्ण्यं मध्यस्थानं तदाक्रम्य समर्चतां भक्तानाम् । आत्मनि मनसि स्थितम् ॥५०॥ ध्यानमाह । स्मयमानमिति । नियतेन प्रागुक्त्या धारणया सुस्थिरेणात एवैकभूतेनैकाग्रेण । धारणोक्तानि विशेषणानि ध्यानेऽपि द्रष्टव्यानि । यद्वा यथोक्तमात्रमेव । तदुक्तमेकादशस्कंधे “ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखम् । ” इति ॥ ५१ ॥ समाधिमाह । एवमिति । परया निर्वृत्या आनंदेन तूर्णं शीघ्रं संपन्नं सत् ॥ ५२ ॥ जप्यो मंत्रः ॥५३॥५४॥

प्रत्याहरणमेव व्युदास इति शुद्धत्वाच्छ्रेष्ठेनेति वा गुरुणेत्यस्यार्थः ॥ ४४ ॥ ४९ ॥ नृम्णपदस्यार्थद्वयवाचित्वादर्थान्तरमाह–यद्वेति । “नृम्णं स्यात्सुन्दरे धने” इति धराणिः । इत्यर्थ इति । सर्वधनरूपत्वं हरेरेव कल्याणहेतुत्वात्तद्धनं यत्सुखप्रदमिति भावः । नेत्रारुण्यस्य भयहेतुत्वेपि प्रांतारुण्यस्य शोभाहेतुत्वमपीत्यभिप्रेत्याह–अरुणेति ॥ ४६ ॥ श्रीवत्सार्थो हि श्रीकृष्णावतारवर्णने स्फुटो भविष्यतीति । पुरुषलक्षणं श्यामवर्णशंखचक्रादि तद्युक्तम् ॥ ४७ ॥ कौस्तुभस्याभरणं भूषणरूपं ग्रीवा यस्य तम् । न तु कौस्तुभेन ग्रीवाशोभा ग्रीवयैव कौस्तुभशोभेत्यर्थः ॥ ४८ ॥ कांचीकलापेन तत्संज्ञभूषणेन “ कलापो भूषणे बर्हे समूहे चंद्रमस्यपि” इति निरुक्तिः । ॥४९॥५०॥ अतः संस्थितत्वात् । धारणोक्तानि “प्रसन्नवदनेक्षणम्” इत्यादीनि तथा च धारणाध्यानयोर्भेदो न सेत्स्यति तुल्यविशेषणत्वादुभयोरिति चेत्तत्राह–यद्वेति ॥५१॥ ‘समाधिश्चित्तवृत्तिनिरोधः’ इति लक्षणसद्भावादाह–समाधिमाह एवमिति । परया निर्वृत्त्योद्रिक्तानंदेन संपन्नं पूर्णं ध्येयादितरत्र न गच्छतीत्यर्थः॥५२॥नृपात्मजेति । नरपालकपुत्रत्वात्त्वमपि नरान्पालयिष्यसीत्यतस्त्वां गोप्यमपि वदामीत्यभिप्रायः । खेचरान् देवान् प्रकृष्टं तदाकारचेतस्त्वेन पठन् ॥ ५३ ॥ ध्रुवस्य पंचवर्षत्वेन “ एकादशे राजन्यमुपनयीत ” इति श्रुतेरुपनयनाभावेपि सर्वज्ञनारदकर्तृकसप्रणवमंत्रोपदेशाद्वैष्णवमंत्राणां नायं नियमो यदुपनीतस्यैव ब्राह्मणादेरूपदेष्टव्यास्तथा सति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुम् ॥ ५५ ॥ लब्ध्वा द्रव्यमयीमर्चां क्षित्यंब्वादिषु वार्चयेत् ॥ आभृतात्मा मुनिः शांतो यतवाङ् मितवन्यभुक् ॥ ५६ ॥ स्वेच्छावतारचरितैरचिंत्यनि जमायया ॥ करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमम् ॥ ५७ ॥ परिचर्या भगवतो यावत्यः पूर्वसेविताः ॥ ता मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ॥ ५८ ॥

द्रव्याण्येवाह। सलिलैरिति। शस्तैर्दूर्वांकुरैर्वन्यैरेवांशुकैर्भूर्जत्वगादिभिः ॥५५॥ पूजाया अधिष्ठानमाह। लब्ध्वा संपाद्य। द्रव्यमयीं शिलादिनिर्मितम् अर्चां प्रतिमाम्। पूजासाद्गुण्यहेतूनाह सार्धाभ्याम्। आभृतात्मा धृतचित्तः। मितं वन्यं फलमूलादि भुंक्त इति तथा॥५६॥यत्करिष्यतीति तदानीमवतारप्राचुर्याभावाल्लृट्॥५७॥पूर्वसेविताः पूर्वं सेवनं

श्रीनारदस्तं कथमुपदिशेदिति ज्ञेयमत्र विज्ञैः। अस्य मंत्रस्य विनियोगांगन्यासादि तु षष्ठस्कंधे नारायणवर्मव्याख्याने वर्णयिष्यामः । जपितुं योग्यो जप्यः। द्रव्यमयीं द्रव्यप्रधानाम्। सपर्यां पूजाम् । "अर्चा पूजा सपर्या स्यात्" इति कोशात्॥ ५४ ॥ शुचिभिश्शूद्रादिभिरनानीतैः। "शूद्रानीतैः स्त्रियानीतैर्यस्स्नापयति केशवम्। स याति नरकं घोरं वस्त्रापूतैस्तथा जलैः ॥" इत्यादिपुराणात्। आदिना त्वगादिग्रहः। अंशुकैः सूक्ष्मैर्वस्त्रैः। पत्रैर्वा। "अंशुकं सूक्ष्मवस्त्रे स्याद्वस्तुमात्रोत्तरीययोः।" इति मेदिनी। तदुक्तं हरिभक्तिचंद्रोदये "दूर्वांकुरं तु हरये पूजाकाले प्रयच्छति। पूजाफलं शतगुणं सम्यगाप्नोति मानवः ॥ शमीपत्रैश्च देवेशं पूजयंत्यसुरद्विषम्। यममार्गं महाघोरं न ते पश्यन्ति नारद ॥ धात्रीपत्रैर्बिल्वपत्रैस्तथैवाश्वत्थपत्रकैः। नवीनैर्मृदुभिर्ये च पूजयंति जनार्दनम्। न तेषां पुनरावृत्तिर्वैकुण्ठाज्जायते द्विज ॥ धात्री धुनोति पापानि शमी शमयतेऽशुभान्। दूर्वा हरति दुःखानि तुलसी सर्वकामदा। श्रियं ददति बैल्वान्याश्वत्थान्यारोग्यसंदः॥" इति। प्रिययेति तुलस्या भगवतो हृदयजत्वात्प्रियत्वमन्यपुष्पपत्राद्यपेक्षया। तदुक्तं तुलस्युपनिषदि तथा हि—"नमः श्रीकृष्णायनिःश्रेयसारण्यविविधविचित्रानंतपारिजातादिपुष्पामोदानन्द१७हीश्वरहृदयानन्दरूपाह्लद्यामनोरमासुंदर्यैवाभूत्ता १७ सपत्नी १७ ब्रह्ममहिषीअमृष्यमाणाशशापत्वंजडाभवेतिसावृक्षरूपाभगवत्करस्थितादिव्यपरिमलातर्पयंती १७ ह्रियमाणांशिरसाधारयामीत्युद्यनिस्थापितवान्परब्रह्मपत्नीस्वशक्तिभिःपरिबृंहिता १७ सपरिकरदिव्याभरणाभूषितांविचिक्रीडिषयोद्यानमागता १७ हितत्चरणनूपुरध्वन्युद्भवाप्रमदोत्तमातत्स्वरूप १७ हिध्यात्वोपचारैर्दिव्यपरिमलकरजातुलसीमहाहारैःसपर्यांप्राप्ता १७ साननामसाहोवाचवरंवृणीष्वेतियुगलतच्चरणपरिचर्य्यारतांतिकेतिष्ठामीत्यब्रुवाणा १७ होवाचत्वच्छेमुषीसमुत्थिता १७ हिदिव्यगुणज्वालांगांस्त्रियंसमातरंवैकुंठमहिषीप्रियांनिवेशयिष्यामीत्यंतर्हितैकदाध्यायंतीस्ववाक्योद्भवागायंतीवीणाकणिताब्जहस्तातदंतिकेभगवंतंदृष्ट्वाप्रणम्यस्थितवतीतिसर्वज्ञः सपुत्रिकांप्रेक्ष्योवाचत्वंकाकिमर्थमागतासीतिलीलयापृच्छन्त १७ हिदेव्युवाचत्वच्छत्त्युद्भवा १७ हंत्वत्कैंकर्यमिच्छती १७ हीत्यभिनंद्यतत्पुत्रिकांभक्तिंहारिवल्लभांकारयामास इदमत्र १७ हवैतुलस्यसंस्कृतं १७ पुरुषाराधनार्नहंभवतिनतेनविष्णुःप्रीणातितस्मात्तुलसीमिश्रित १७ समर्पणंकुर्यात्तुलसीरहितंनिवेदितंयोभुंक्तेसकिल्विष १७ सर्वंभुंजानःपापीयान्भवतिससर्वलोकगर्हितोभवति कृष्णे अभक्तोभवीत" ॥ ३० ॥
इति श्रुतेः ॥ ५५ ॥ आदिना सुवर्णादिग्रहः। "अर्चा स्यात्प्रतिमा पूजा" इति कोशात् ॥ ५६ ॥ करिष्यतीति भविष्यन्निर्देशः। तदानीं स्वायंभुवमन्वंतरे। यत्कंसवधादिलक्षणं चरितम् ॥५७॥ पूर्वैराचार्यैःसेविताः या विहिताः परिचर्या धूपगंधादिसमर्पणलक्षणाः पूजास्ताः सर्वा अपि मंत्राणां हृदयेन मुख्येन "हृदयं मानसे मुख्ये वक्षसीश्वरबुक्कयोः" इति निरुक्तेः। मंत्रमूर्तये मंत्राक्षरप्रतिपाद्याय वासुदेवाय मंत्रेषूर्णिता मूर्तिर्यस्य।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं कायेन मनसा वचसा च मनोगतम् ॥ परिचर्यमाणो भगवान्भक्तिमत्परिचर्यया ॥ ५९ ॥ पुंसाममायिनां सम्यग्भजतां भाववर्धनः ॥ श्रेयोदिशत्यभिमतं यद्धर्मादिषु देहिनाम् ॥ ६० ॥ विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा ॥ तं निरंतरभावेन भजेताद्धा विमुक्तये ॥ ६१ ॥ इत्युक्त स्तं परिक्रम्य प्रणम्य च नृपार्भकः ॥ ययौ मधुवनं पुण्यं हरेश्चरणचर्चितम् ॥ ६२ ॥ तपोवनं गते तस्मिन्प्रविष्टोंतःपुरं मुनिः ॥ आर्हितार्हणको राज्ञा सुखासीन उवाच तम् ॥ ६३ ॥ नारद उवाच ॥ राजन्किं ध्यायसे दीर्घं मुखेन परिशुष्यता ॥ किं वा न रिष्यते कामो धर्मो वाऽर्थेन संयुतः ॥ ६४ ॥ राजोवाच ॥ सुतो मे बालको ब्रह्मन्स्त्रैणेनाऽकरुणात्मना ॥ निर्वासितः पंचवर्षः सह मात्रा महान्कविः ॥ ६५ ॥ अप्यनाथं वने ब्रह्मन्मा स्मादंत्यर्भकं वृकाः ॥ श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजम् ॥ ६६ ॥ अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय ॥ योंकं प्रेम्णाऽऽरुरुक्षंतं नाभ्यनंदमसत्तमः ॥ ६७ ॥ नारद उवाच ॥ मामा शुचः स्वतनयं देवगुप्तं विशांपते ॥ तत्प्रभावमविज्ञाय प्रावृंक्ते यद्यशो जगत् ॥ ६८ ॥

कारिताः कार्यत्वेन विहिता इत्यर्थः । मंत्रहृदयेन द्वादशाक्षरेण ॥ ५८ ॥ एवमुक्तरीत्या मनोगतं यथा भवति तथा कायादिभिर्भक्तिमत्या परिचर्यया सेवया परिचर्यमाणो भगवान् ॥५९॥ अमायिनां निष्कपटानां पुंसां धर्मार्थकामेषु यदभिमतं तच्छ्रेयो दिशतीति द्वयोरन्वयः ॥६०॥ इंद्रियरतौ विषयभोगे विरक्तः सन्भजेत् । किमर्थं विमुक्तये ॥६१॥ हरेश्चरणाभ्यां चर्चितं मंडितम् ॥ ६२ ॥ अर्हितं सत्कृत्य समर्पितमर्हणमर्घ्यादिकं यस्मै ॥ ६३ ॥ किं वा न रिष्यते न नश्यतीति सवितर्कः प्रश्नः ॥ ६४ ॥ मात्रा सह निर्वासितः निष्कासितः । मात्रेत्युक्तिः तस्या अप्यनादृतत्वात् ॥ ६५ ॥ मा स्मादंति किंस्विन्न खादंतीत्यर्थः ॥ ६६ ॥ ६७ ॥ देवेन श्रीहरिणा गुप्तमात्मसात्कृत्वा

यद्वा । मंत्रो वेदः स एव मूर्तिर्यस्य तस्मै॥५८॥५९॥६०॥ इंद्रियरतौ विषयभोगे योभिमतं ददाति तम् ॥६१॥ तं नारदम् । चरणचर्चितमिति भूतभविष्यत्त्वापेक्षया । यद्वा । "मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः" इति श्रीदशमे वक्ष्यमाणात्वात्तत्र सदैव हरेः स्थितित्वाद् ध्रुवकालेपि तच्चरणचर्चितत्वं नासंगतम् ॥६२॥ तपसे हितं तपोहितं तच्च तद्वनं तपोवनं मध्यमपदलोपी समासः ॥ तस्मिन् ध्रुवे मुनिर्नारदः । 'आर्हितोर्हणया' इति पाठे अर्हणया पूजासाधनेनार्हितार्चित इत्यर्थः । क्वचित् 'अर्हिताभ्यर्हणः' इति पाठोप्यास्ति ॥६३॥ रिष्यत इति । 'रिष–हिंसायाम्' आत्मनेपदमार्षम् ॥६४॥ स्त्रैणेन स्त्रीवशवर्तिना । न करुणा दयात्मनि चित्ते यस्य तादृशेन । निर्वासितो निष्कासितः । कविरिति ज्ञानित्वं द्योतयति यतोऽसौ राजसिंहासनतोप्युत्तमं पदं साधयामीति निरूप्य मात्रादींस्त्यक्त्वा पुरान्निरगादिति । महानिति मानयोग्यतामाह ॥ ६५ ॥ अनाथमरक्षितं वृका व्याघ्राः । इत्यर्थ इति । वितर्केण वदति नारदं प्रति क्षुधा परिम्लानास्यं चङ्क्रमणेन श्रांतमत एव शयानं रक्षकांतरहीनमर्भकत्वात्स्वयमकल्पं वनगं कथं न वृकादयो भक्षयिष्यंतीति भावः । ब्रह्मन्निति । सर्वज्ञो भवान्मे सशयमपनुदत्विति भावः ॥ ६६ ॥ बत खेदे ॥ ६७ ॥ विशां पत इति । देवस्य हरेः सामर्थ्यं त्वत्तोधिकं त्वं तु प्रजापतिरेव स तु त्वादृगनंतपतिरतस्तद्गुप्तं को वराको वृकादिरित्याभिप्रायः । प्रावृंक्त इति । वर्त्तमानानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः ॥ एष्यत्यचिरतो राजन्यशो विपुलयंस्तव ॥ ६९ ॥ ॥ मैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः ॥ राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ॥ ७० ॥ तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् ॥ समाहितः पर्यचरदृष्यादेशेन पूरुषम् ॥ ७१ ॥ त्रिरात्रांतेत्रिरात्रांते कपित्थबदराशनः ॥ आत्मवृत्त्यनुसारेण मासं निन्येऽर्चयन्हरिम् ॥ ७२ ॥ द्वितीयं च तथा मासं षष्ठेषष्ठेऽर्भको दिने ॥ तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुम् ॥ ७३ ॥ तृतीयं चानयन्मासं नवमेनवमेऽहनि ॥ अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥ ७४ ॥ चतुर्थमपि वै मासं द्वादशेद्वादशेऽहनि ॥ वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ॥ ७५ ॥ पंचमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः ॥ ध्यायन्ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥ ७६ ॥ (देवाश्चक्रुस्तपोविघ्नं त्रासयंतः स्वमायया ॥ सर्पैर्भसिंहकूष्मांडैस्तान्नापश्यत्परं गतः ॥ १ ॥) सर्वतो मन आकृष्य हृदि भूतेंद्रियाशयम् ॥ ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरम् ॥ ७७ ॥ आधारं महदादीनां प्रधानपुरुषेश्वरम् ॥ ब्रह्म धारयमाणस्य त्रयो लोकाश्चकंपिरे ॥ ७८ ॥

रक्षितम् । यस्य यशो जगत्त्रावृंके व्याप्नोति ॥ ६८ ॥ विपुलयन्विस्तारयन् ॥ ६९ ॥ ७० ॥ ध्रुवो मधुवने किमकरोदित्यपेक्षायामाह तत्रेत्यादिना । अभिषिक्तः स्नातः यस्यां प्राप्तस्तां रात्रिम् ॥ ७१ ॥ कपित्थानि बदराणि चाशनं यस्य । आत्मवृत्तिर्देहस्थितिस्तदनुसारेण ॥ ७२ ॥ ७३ ॥ तृतीयं च आनयन्नीषदिवनयन्नुपाधावदित्यन्वयः । प्रतिमासमाहारसंकोचं तपोऽतिरेकं च कृतवानित्यर्थः ॥ ७४ ॥ ७५ ॥ ७६ ॥ भूतानि शब्दादीनि इंद्रियाणि च आशेरते यस्मिंस्तन्मन आकृष्य भगवतो रूपं ब्रह्म ध्यायन् ॥ ७७ ॥ धारयमाणस्य सतस्तस्य तेजः सोढुमशक्नुवंतः संतः कंपिताः ॥ ७८ ॥

देशस्तु तदुपरि भगवत्प्रसादस्य निश्चितत्वादेव । उक्तमर्थं विशदयति यत्त्वयोक्तं स्त्रैणेनाकरुणात्मनेति तेन तवाकरुणत्वेपि स तु भगवान्कारुण्यसागरोस्ति अत एवानाथनाथः यद्यमात्मसात्कृत्वात्मीयं मत्वा तस्मिन्प्रहर्तुममी प्रसिद्धा वृकादयः के किं कर्तुं शक्ता न किमपीति भावः । श्लोकोयं प्रक्षिप्तोपि प्रकृतोपयुक्तत्वाद्व्याख्यातः ॥ ६८ ॥ प्रभुः प्राप्तभगवत्प्रसादत्वात्समर्थः । राजन्निति । त्वमपि राजभोगासक्तत्वात्कर्मकर्तुमशक्त इत्याह । किञ्च । तत्कर्मणैव तव यशोऽधिकं भविष्यतीत्याह—यश इति ॥ ६९ ॥ एवं विस्रब्धस्यापि राज्ञोऽनुतापपरंपरामाह—इतीति । अनेन संसारस्य दुस्तरत्वमसूचीति ॥ ७० ॥ तत्र मधुवने । प्रयतः पूतः यस्यां विभावर्यां तत्र गतस्तां रात्रिमुपोष्योपवासं कृत्वा ऋष्यादेशेन नारदाज्ञया । पूरुषं हरिम् । अनेन तीर्थव्रतमपि तेन कृतमित्युक्तम् ॥ ७१ ॥ तस्य तपस्यतोऽशनमाह—त्रिरात्रांत इति । कपित्थो बिल्वफलसमफलो वृक्षः । यावता देहस्थितिर्भवेत्तावन्मात्रमेवाशेत्यर्थः ॥ ७२ ॥ शीर्णैः स्वतः पतितैः । आदिना शुष्कफलग्रहः कृतमन्नमशनं येन स तथा ॥ ७३ ॥ इत्यर्थ इति । धैर्यसंपन्नत्वादतीव दुष्करं तपो विहितवानिति भावः ॥ ७४ ॥ ७५ ॥ स्थाणुः कीलः "स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे" इति मेदिनी ॥ ७६ ॥ भूतानां प्राणिनामिंद्रियेषु न शेते न विषयी भवतीति तथाभूतं भगवद्रूपं "यतो वाचो निवर्तंते" इत्यादिश्रुतेः । यद्वा । आ ईषच्छेते न तु जागर्त्ति तदगम्यमित्यर्थः ॥ ७७ ॥ सर्वात्मकत्वेन बृहत्तमत्वाद्भगवतो रूपमेव ब्रह्म अत एवाधारमपि ततस्तादृशत्वेन धारणात्तदात्मकताप्राप्त्यां यदा भारविशेषेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही ॥ ननाम तत्रार्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदेपदे ॥ ७९ ॥ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्याऽसुमनन्यया धिया ॥ लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ॥ ८० ॥ देवा ऊचुः ॥ नैवं विदामो भगवन्प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः ॥ विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यम् ॥ ८१ ॥ श्रीभगवानुवाच ॥ मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम ॥ यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥ इति श्रीमद्भा०महा० च० ध्रुवच० मधुवनसमागमनवर्णनं नाम अष्टमोऽध्यायः ॥ ८ ॥ मैत्रेय उवाच ॥ त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपम् ॥ सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः ॥ १ ॥ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभम् ॥ तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श ॥ २ ॥

तस्यांगुष्ठेन निपीडिता आक्रांता सती मही तत्र तदा अर्धं ननाम । समेंऽशके अर्धशब्दस्य नपुंसकत्वादंशांशिनोरभेदाच्चैवं सामानाधिकरण्यम् । इभेंद्रेणाधिष्ठिता तरी नौर्यथा पदेपदे सव्यतो दक्षिणतश्च नमति तद्वत् ॥ ७९ ॥ अन्यदप्याश्चर्यमाह ॥ तस्मिन्ध्रुवे विश्वं विश्वात्मकं विष्णुमात्मनः सकाशादनन्यया धियाऽऽत्मा भेददृष्ट्याऽभिध्यायति सति किं कृत्वा असुं प्राणं तद्द्वारं च निरुध्य लोका निरुच्छ्वासनिपीडिता विश्वरूपं विष्णुमात्मन्येकीकृत्य स्वप्राणनिरोधे कृते विश्वस्य प्राणनिरोधो जात इति भावः ॥ ८० ॥ एवं प्राणनिरोधं कदाचिदपि न विद्मः अखिलसत्त्वधाम्नः सर्वप्राणिशरीरस्य तस्माद् वृजिनात्क्लेशात् ॥ ८१ ॥ यतो बालात् कोऽसौ बालः कथं च तस्मात्प्राणनिरोध इत्यत आह । उत्तानपादस्य पुत्रो मयि विश्वरूपे संगतात्मा ऐक्यं प्राप्तो वर्तत इति ॥ ८२ ॥ इति श्रीमद्भागवते चतुर्थस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥ ॥ नवमे तु हरिं स्तुत्वा लब्ध्वा तस्माद्वरान्ध्रुवः॥प्रत्यागत्याकरोद्राज्यं पित्रा दत्तमितीर्यते ॥ १ ॥ एवं भगवद्वाक्येन गतभयाः ॥ १ ॥ स वै ध्रुवो योगस्य विपाकेन दार्ढ्येन तीव्रया निश्चलया गरुडाधि

कंपते स्म तदा विश्वमपि कंपते स्मेति भावः ॥ ७८ ॥ 'पुंस्यर्द्धोऽर्द्धं समेंऽशके' इत्यमरः । अंशी मही अंशस्तस्या अर्द्धं भागः तस्याङ्गुष्ठेन निपीडिता मही अर्द्धमर्द्धं प्रदेशं व्याप्य ननाम यत्र स्वांगांशेन भारं विन्यस्यति स्म तत्रांशेन पृथिव्या नमनमपि युक्तमेव । ''स्त्रियां नौस्तरणिस्तारिः'' इत्यमरः । नमति नतोन्नता भवति ॥७९॥ इति भाव इति । तत्र ध्रुवसंज्ञकशरीरस्य प्राणेषु निरोधनीयेषु बालत्वात्समष्टेरेव प्राणान्यरुन्ध अत एवानन्यधियोक्तं व्यष्टिसमष्ट्योरैक्यबुद्धिरेव तत्र कारणमित्याशयः ॥८०॥ हे भगवन्निति । त्वमेवात्र साक्षीत्यभिप्रायः । ''सत्त्वं तु प्राणिद्रव्ययोः गुणभेदेपि'' इति हलायुधः ॥८१॥ बालत्वादेव स्वप्राणेषु निरुध्यमानेषु युष्माकमपि प्राणान्यरुद्ध अतोऽस्मान्हनिष्यतीति बुद्ध्या तस्मान्न भेतव्यमित्याह–मयि संगतचित्तः कमपि नैव जिघांसतीत्यर्थः॥८२॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धेऽष्टमोऽध्यायः॥८॥ तस्माद्वरैः (१) ते देवाः । उरुक्रमाय सप्तमी चतुर्थ्यर्थे । गर्भोदशायिनाऽभेदविवक्षया सहस्रशीर्षेति । तदानींतनोऽवतारस्तु पृश्निगर्भाख्यो भागवतामृते उक्तः । गरुत्मता गरुडेन । भक्तेति वक्तव्ये ऽवश्यभर्तव्यत्वविवक्षया भृत्येति ॥ १ ॥ यत आक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दर्शनेनागतसाध्वसः क्षिताववंदतांगं विनमय्य दंडवत् ॥ दृग्भ्यां प्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येन भुजैरिवाश्लिषन् ॥ ३ ॥ स तं विवक्षंत
मतद्विदं हरिर्ज्ञात्वाऽस्य सर्वस्य च हृद्यवस्थितः ॥ कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बालं कृपया कपोले ॥ ४ ॥ स वै तदैव प्रतिपादितां
गिरं दैवीं परिज्ञातपरात्मनिर्णयः ॥ तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः ॥ ५ ॥ ध्रुव उवाच ॥ योंतः प्रविश्य मम वाच
मिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना ॥ अन्यांश्च हस्तचरणश्रवणत्वगादीन्प्राणान्नमो भगवते पुरुषाय तुभ्यम् ॥ ६ ॥

रूढं पुरतः स्थितमपि यदांऽतर्दृष्टित्वादसौ नापश्यत्तदा भगवतैवांतःस्थं रूपमाकृष्टमतस्तिरोहितमुपलक्ष्य व्युत्थितः सन् तदवस्थं यादृगंतः स्फुरितस्तादृशम् ॥ २ ॥ आगतसाध्वसो जातसंभ्रमः विनमय्य आनतं कृत्वा । संभ्रममेवाह । दृग्भ्यां प्रपिबन्निव प्रपश्यन्नवंदत आस्येन चुंबन्निवावंदत भुजाभ्यामाश्लिषन्निवावंदतेत्यर्थः ॥ ३ ॥ विवक्षंतं तद्गुणान्वक्तुमिच्छंतम् । अतद्विदं स्तुत्यादि कर्तुमजानंतम् । अस्य ध्रुवस्य सर्वस्य च हृद्यवस्थितत्वात् ज्ञात्वा ब्रह्ममयेन वेदात्मकेन शंखेन ॥ ४ ॥ भगवता प्रतिपादितां गिरं प्रतिपद्येति शेषः । प्रतिपद्यतामिति पाठे तां वेदात्मिकाम् । परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयो येन सः । अत एव भक्त्या भावः प्रेमा यस्य असत्वरं स्थैर्येण परितः श्रुतं विख्यातमुरु श्रवः कीर्तिर्यस्य तम् । ध्रुवा क्षितिः स्थानं यस्येति भाविनिर्देशः ॥ ५ ॥ ईशानुग्रहसंप्राप्तवागाद्यद्भुतवृत्तिभिः ॥ द्वादशादित्यसंकाशैः श्लोकैरस्तौद्धरिं ध्रुवः ॥ ॥ १ ॥ यो मम प्रसुप्तां लीनां वाचमन्यांश्च प्राणानिंद्रियाणि स्वधाम्ना चिच्छक्त्या संजीवयति यतः अखिलाश्चक्षुरादिज्ञानक्रियाशक्तीर्धारयतीति तथा पुरुषायांतर्यामिणे ॥ ६ ॥

ष्टमतो हेतोः ॥ २ ॥ ज्ञातानंदवेगः । इत्यर्थ इति । दृग्भ्यां मुखारविंदमाधुर्यमत्यादरेण गृह्णन्निव । आस्येन चरणारविंदमाधुर्यं चुंबन्निव भुजाभ्यां चरणांगुलिशिखराणि स्पृशन्निव ननामेति भावः । भुजैरिति बहुत्वेन भुजयोर्व्यापारबाहुल्यं लक्षयित्वाऽऽनंदकंपो ध्वनितः ॥ ३ ॥ स हरिः । तं ध्रुवं व्याकरणाद्यज्ञानात्संस्कृतं प्रयोक्तुमशक्नुवंतम् । अस्य ध्रुवस्य कपोले कपोलोपलक्षिते वदने । यद्वा 'कपोले वसते वाणी' इत्याद्युक्तेस्तत्र सरस्वती सुप्तेव स्थिता सा भगवता वेदमयशंखेनैव संचाल्योत्थापिता मय्यागतेपि सुप्तैवेति भावः। "पांचजन्यो वा एष आम्नाय उत्" इति श्रुतेः । 'स्याच्छंखः कंबुरस्त्रियाम्' इत्यमरः ॥ ४ ॥ स ध्रुवः । प्रतिपादितां दत्ताम् । अत एव ज्ञातजीवेश्वरस्वरूपत्त्वादेव ॥ ५ ॥ "भगवद्दत्तवेदार्थज्ञानस्तुष्टाव यद्ध्रुवः । वेदार्थो हि स एवेति नात्र संशेरते बुधाः" अकस्मादेव स्वीयवागादिसर्वेंद्रियाणां भगवदुन्मुखीभावमालक्ष्यैषामीदृशमप्राकृतत्वं श्रीभगवत्कृतमिति जानन्स स्वस्मिन्भगवतो निरुपमां निरुपाधिकां तां कृपामेव साक्षादनुभवन्निति विस्मयेन नमस्यति—य इति । मम त्वद्दासस्येमां वैखरीं नाम वाचं त्वत्स्वरूपगुणलीलादिकमेव वर्णयित्रीम् । इदंशब्देन वैखरीग्रहणं तु "तुरीयां वाचं मनुष्या वदंति" इति श्रुतेरेव ध्वनितम् । तुरीयां परापश्यंतीमध्यमावैखरीतिचतुःसंख्यासु वाक्षु चतुर्थीम् । प्रसुप्तामेव तत्कालपर्यंतं सुप्तेव स्थितां मृतामिव संजीवयति या तु स्त्रीयान्नपानादिप्रकृतभोगवार्तां विषयी कुर्वती जाग्रत्येव वागासीत्तामत आरभ्य शाययति स्म नाशयति स्मेति भावः । न केवलं वागिंद्रियमेवापि त्वन्यानपि त्वत्परिचर्यादिकं विषयी करिष्णून्प्राणांश्च त्वदुन्मुखानिति ध्रुवस्येंद्रियादीनां चिन्मयत्वेनाप्राकृतत्वं सद्योजातमिति सूचितम् । अत्र समेतीमामिति विशेषाभ्यां वागादींद्रियाणि विशिष्टान्येवोपलभ्यंते "असुप्तः सुप्तानभिचाकशीति" इति श्रुतिरीशस्येंद्रियादिप्रबो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषम् ॥ सृष्ट्वाऽनुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि ॥ ७ ॥
त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तः प्रबुद्ध इव नाथ भवत्प्रपन्नः ॥ तस्याऽपवर्ग्यशरणं तव पादमूलं विस्मर्यतेऽकृत विदा कथमार्तबंधो ॥ ८ ॥
नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्यहेतोः ॥ अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत् स्पर्शजं निरयेऽपि नृणाम् ॥ ९ ॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वंतका सिलुलितात् पततां विमानात् ॥ १० ॥

ननु वागादींद्रियशक्तिधरा वह्न्यादयः प्रसिद्धा नाहमित्यत आह । एक इति । अनुविश्य पुरुषोंतर्यामी त्वमेक एव तस्या मायाया असत्सु गुणेष्विंद्रियादिषु स्थितः संस्तत्तद्देवतारूपो नानेव भासि । यतस्त्वद्व्यतिरेकेण ज्ञानाक्रियाशक्तिधरो न कश्चिदस्तीत्यर्थः ॥ ७ ॥ अपि च किं वक्तव्यं वह्न्यादयो ज्ञानादिशक्तिधरा न भवंतीति यस्माद्ब्रह्मणोऽपि ज्ञानं त्वदधीनमेवेत्याह । त्वद्दत्तया वयुनया ज्ञानेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वमचष्टापश्यत् । कथम् । सुप्तः पुरुषः प्रबुद्धः सन्यथा पश्यति तद्वत् । अत आपवर्ग्या मुक्तास्तेषामपि शरणम् । कृतविदा सर्वेन्द्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते । एवंभूतं त्वामभजंतः कृतघ्ना इत्यर्थः ॥ ८ ॥ ये च मादृशाः कामाद्यर्थं भजंति तेऽतिमूढा इत्याह । नूनमिति । भवाप्ययौ जन्ममरणे तद्विमोक्षे हेतुं त्वामन्यहेतोः कामाद्यर्थं ये भजंति ते नूनं विमुष्टमतयो वंचितचित्ताः यतस्ते कल्पतरुं त्वामर्चंति ततः कुणपतुल्येन शवतुल्येन देहेनोपभोग्यं सुखमिच्छंति न चेच्छायोग्यं तदित्याह । यत्स्पर्शजं विषयसंबंधजन्यं सुखं तन्नरकेऽपि भवति ॥ ९ ॥ ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभजने तु तन्न स्यादित्यत आह । येति । स्वमहिमनि निजानंदरूपेऽपि मा भूत् न भवतीत्यर्थः । अंतकस्यासिना शस्त्ररूपेण

धने मानं "ब्रह्मणो वा एतानि करणानि" इति श्रुतिश्च ब्रह्मणः सकाशादेतानींद्रियाण्यवाप्तचेष्टानीत्यर्थः ॥ ६ ॥ इत्यर्थ इति । "योध्यात्मिकोयं पुरुषः सोऽसावेवाधिदैविकः" इत्युक्तेरिति भावः । अत्र विश्वनाथः—त्वद्भक्तानामिन्द्रियाणि त्वत्प्रसादात्त्वामेव विषयी कुर्वंति त्वन्मयान्यप्राकृतान्येव भवंति अन्येषाञ्च तानि मायामेव विषयी कुर्वंति मायामयान्येवेति । स्वधाम्नेति मायाख्येति पदाभ्यां सिद्धांतो ध्वनित इत्याह ॥ ७ ॥ यतस्त्वद्दत्तज्ञानेनैव सर्वेन्द्रियप्रबोधो भवेदतो हेतोः । इत्यर्थ इति । त्वत्प्रसादावाप्तसर्वेंद्रियशक्तयो यदि त्वां न भजंति तदा ते कृतघ्नशिरोमणय एवेति भावः । नाथेति । त्वमेव सर्वैश्वर्यदोसीत्याह । आर्त्तस्य भक्तस्य बंधो इति एवञ्ज्ञानि भक्तो जिज्ञासुभक्त आर्त्तभक्तश्चेति त्रयो गीतोपनिषदुक्ता भक्ता व्याख्याताः ॥ ८ ॥ यश्चतुर्थोऽर्थार्थी मद्विधो भक्तः । सत्वतिनिकृष्टो मूढ इत्याह—नूनमिति । ततः कल्पतरोः कुणपो मृतदेहस्तत्सदृशेन "कुणपः शव दुर्गंध्योः" । इति मेदिनी । तद्द्वारा भोगं च दक्षिणस्यां दिशि कुरुक्षेत्रादौ श्मशानवृत्तिकब्रह्मबंधुषु महादक्षिणालोभेन शवहस्ते बद्धबृहद्दर्वीकृतपायसादिभोजनेन प्रसिद्धमिति नरकेपि तत्तुल्यशूकरादियोनावपि तथा च तन्नेच्छायोग्यमिति भावः ॥ ९ ॥ अत्राक्षिपति नन्विति । इत्यर्थ इति । इह लङर्थे लुङ् "माङि लुङ्" इति सर्वलकारविषये लुङो विधानादिति भावः । अत्र विश्वनाथः—ननु तर्हि भवाप्ययविमोक्षणमित्युक्त्या ब्रह्मसायुज्यमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंतमहताममलाशयानाम् ॥ येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथाऽमृतपानमत्तः ॥ ११ ॥
ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥ ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्रसंगाः ॥ १२ ॥
तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् ॥ रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥ १३ ॥

कालेन लुलितात्खंडिताद्विमानात्पततां सा नास्तीति किमु वक्तव्यम् ॥ १० ॥ अतस्ते कथाश्रवणाय सत्संगतिं देहीत्याह । भक्तिं त्वयि प्रवहतां सातत्येन कुर्वताम् । ननु मोक्षं किं न याचसेऽत आह । येन महत्प्रसंगेनांजसा अयत्नत एवोरूणि व्यसनानि यस्मिंस्तम् । नेष्ये पारं गमिष्यामि भवद्गुणकथैवामृतं तस्य पानेन मत्तः सन् ॥ ११ ॥ कथामृतपानस्य मादकत्वमाह । तेऽतितरां प्रियमपि मर्त्यं देहं न स्मरंति नानुसंदधते ये च सुतादयः अदः मर्त्यमनुसंबंद्धास्तानपि । के ते न स्मरंति ये कृतप्रसंगाः । केषु भवदीयपदारविंदसौगंध्ये लुब्धं हृदयं येषां तेषु । तुशब्देनान्येषां केवलयोगादिनिष्ठानां देहाद्यभिमानानिवृत्तिं दर्शयति ॥ १२ ॥ नन्वेवं विद्वानपि त्वं किमित्यभिमानं वहस्यत आह । तिर्यगिति । तिर्यङ्नगपक्षिसर्पादिभिः परिचितं व्याप्तं संतोऽसंतश्च विशेषा यस्य महदादीन्यनेकानि कारणानि यस्य हे परम हे अज ते इदं स्थविष्ठं विराड्

वार्चनफलं ब्रूषे तस्यैव कुणपोपभोग्यत्वाभावात्तदिच्छंत एव भवन्मतेऽभिज्ञास्तत्र नहिनहि इत्याह—येति । ध्यानादित्युपलक्षणं श्रवणादेरपि श्रवणेनेत्युपलक्षणं ध्यानादेरपि सा निर्वृतिः स्वस्य महिमरूपे ब्रह्मणि ब्रह्मानंदेपि मा भून्न भवति । महतो भावो महिमा त्वं महांस्तत्तु तव महत्वं सर्वव्यापकत्वलक्षणो धर्म एवेति त्वन्निष्ठा यावती निर्वृतिस्तावती तत्र कथं वर्ततामिति भावः । ''मदीयं महिमानं च परं ब्रह्मेति शब्दितम्'' इति । मत्स्यदेवोक्त्यापि ब्रह्मणो भगवन्माहिमत्वमवगतं ततश्चांतकासीति स्वामिचरणैर्व्याख्यातमेव । विमानात्स्वर्गीयात् ततश्च स्वर्गापवर्गाभ्यामन्यस्य कस्यापि फलत्वाश्रवणात् त्वद्भक्तेर्वास्तवं फलं त्वद्भक्तिरेवेति भक्तेः स्वतः फलत्वं भक्तानां च निष्कामत्वमुपपादितम् ॥ १० ॥ सा च श्रवणकीर्तनादिमयी भक्तिः । सत्संगं विना न सुरसी भवतीति सत्संगं प्रार्थयते अत इति । यतश्श्रवणादिभक्तिरेव मुख्यातो हेतोः अत्राशंकते तर्हि संसाराब्धेर्भयं ते स्थास्यत्येवातो मोक्षं वरयेति चेत्साटोपं सभुजास्फोटं चाह—येनेति । नेष्ये प्रहीष्यामि स यदि ममाभिमुखमभ्येति तदाराचु द्रक्ष्यामि किं मे कर्तुं शक्नुयादिति भावः । किं चामृतं पिबंतं मृत्युरपि स्प्रष्टुं न शक्नोतीति तथा स्पर्द्धावज्ञाद्वेषादयश्च तं न व्यथयितुं शक्नुवंतीति भावः । अत्र सत्संगोत्थया भक्त्या भगवंतं साक्षात्कृत्यापि पुनः सत्संगस्य प्रार्थनाद्भक्तिकारणमपि भक्तिफलमपि भक्तिरपि सत्संग इति भक्तानां मतं व्यंजितम् ॥ ११ ॥ ननु तदप्यहंतास्पदममतास्पदयोर्विद्यमानत्वे खलु द्वेषो दुर्वार इत्यत आह—त इति । भक्तानां निष्कामत्वद्योतकः स्वभाव एव वस्तुतस्तु ''कथमनुवर्त्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयम्'' इति । ''जरयत्याशु या कोशं निगीर्णमनलो यथा'' इत्यादेरननुसंहितं भक्तेः फलं संसारनिवृत्तिरस्त्येव ॥ १२ ॥ एवं जानासि चेत्तर्हि मत्प्रित्रादिभ्यो प्यप्राप्तं पदं साधयामीति संकल्पः किमिति तद्भजनमेव कुतो नाकार्षीरित्याक्षिपति—नन्विति । न वेद्मीति ''वर्तमानसामीप्ये वर्तमानवद्वा'' इति विधानादेतावंतं कालं नावेदिषमित्यर्थः । अजेति परमेति च विराड्रूप एव मेऽनाद्यंतदृष्टिरस्ति दुर्ज्ञेयमतः परं यद्रूपमस्ति तत्र मे बुद्धिर्नारोहतीति भावमाह । अतस्तज्ज्ञानाभावात् । इति भाव इति । ''अहं ममेति भावोयं विना ज्ञानं न नश्यति'' इति पूर्वं बाल्त्वेनाज्ञत्वात्तथादुर्भावनाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्पांत एतदखिलं जठरेण गृह्णञ्छेते पुमान्स्वदृगनंतसखस्तदंके ॥ यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान्भगवते प्रणतोऽस्मि तस्मै ॥ ॥१४॥त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थितिमखंडितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥ १५ ॥ यस्मिन्विरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात् ॥ तद्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥ १६ ॥

रूपं केवलं वेद्मि अतः परमीश्वरस्वरूपं न वेद्मि । यत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मरूपं च न वेद्मि । अतोऽभिमानो न निवर्तत इति भावः ॥ १३ ॥ तदेवं भगवदनुकंपया तद्रूपद्वयं ज्ञात्वेश्वररूपमनुवर्णयन्नमस्करोति । कल्पांत एतदिति । एतत्त्रैलोक्यं यः पुमान् शेते स्वस्मिन्नेव दृक् न बहिर्यस्य योगनिद्रारूढत्वात् अनंतसखः शेषसहायः तदंके शेषोत्संगे यस्य नाभिरेव सिंधुः समुद्रस्तस्मिन् रोहतीति तथा तस्मिन्कांचनलोकपद्मस्य हिरण्मयलोकरूपकमलस्य गर्भे कर्णिकायां द्युमांस्तेजस्वी ब्रह्मा भवति तं प्रणतोऽस्मीत्यर्थः ॥ १४ ॥ ननु ममापि स्वापाद्यवस्थावत्त्वे को जीवाद्विशेष इत्यत आह । त्वं तु व्यतिरिक्तो जीवविलक्षण आस्से तिष्ठसि । वैलक्षण्यमेवाह । त्वं तु नित्यमुक्तो जीवस्तु त्वत्प्रसादान्मुच्यते । त्वं परिशुद्धः स तु मलिनः । त्वं तु विबुद्धः स त्वज्ञः । त्वमात्मा स तु जडः । त्वं कूटस्थः स तु विकारी त्वमादिपुरुषः स त्वादिमान् । त्वं तु भगवान्स भगहीनः । त्वं त्रयाणां गुणानामधीशः स तु परतंत्रः । कुत एतद्वैलक्षण्यं यद्यतो बुद्ध्यवस्थितिं बुद्धेस्तांतामवस्थामखंडितया स्वदृष्ट्या चिच्छक्त्या द्रष्टा पश्यसि । द्रष्टेति तृन्प्रत्ययांतः शब्दः अतो बुद्ध्यवस्थितिमित्यत्र षष्ठ्यभावः । तथाभूत एव त्वं स्थितौ पालनेऽधिमखो यज्ञाधिष्ठाता श्रीविष्णुः ॥ १५ ॥ तमेव ब्रह्मरूपेण ज्ञातं नमस्क

करवमधुना त्वदीयकंबुस्पर्शेण सर्वमेव वेदार्थमज्ञासिषमत एव श्रीमच्चरणेष्वेवं निवेदयामीति तात्पर्यम् ॥ १३ ॥ ननु मां जानासि चेत्तर्हि त्वामहं परीक्षिष्ये कथय कोहमिति चेत्तदैव भगवदेतदुक्तिसमकालमेव कांचनलोकपद्मस्यागंतुकसौवर्णवर्णकमलस्य । इत्यर्थ इति । तं प्रसादयितुं नतोस्मि केवलं न तु परिचारितुं किमपि शक्नोमीति भावः॥१४॥अत्राक्षिपति–नन्विति । नित्यमुक्तः अविद्याकर्माजनितस्वरूपत्वात् परिशुद्धः शुद्धसत्त्वात्मकरूपत्वात् विबुद्धस्तत एव स्वरूपसिद्धज्ञानस्यानावरणात् प्रत्युतोल्लासात् आत्मा स्वरूपाभिन्नत्वात्, कूटस्थ एकरूपतया कालव्यापी स तु नानारूपतयैव आदिपुरुष आदित एव पुरुषाकारः स्वभावसिद्धरूपत्वात् । चक्रवर्त्ती तु–आदिकारणं पुरुषाकारश्च स तु न कारणं स्त्रीपुंनपुंसकाकारश्चेत्याह । भगवान् पूर्णशक्त्याश्रयः वस्तुलक्षणरूपत्वात् त्र्यधीशस्त्रिगुणशक्तेर्नियामकः तदतिरिक्तस्वरूपशक्त्यात्मकरूपत्वात् तस्मात्तत्र रूपस्य च प्रकृत्यतीतशक्तिमयत्वादेकात्मकत्वेनान्याभ्यां रूपिरूपाभ्यां विशेष एवेति संदर्भः । तांतां स्वापाद्यवस्थाम् । जीवस्तु–बुद्ध्यवस्थाभिः खंडितदृष्टिः त्वं तु स्थितौ जगत्पालनकर्मण्यास्से स तु स्वपालनेप्यसमर्थः त्वं यज्ञादिकर्माधिष्ठाता स तु यज्ञादिकर्माधीनः अतस्त्वं तस्माद्विविक्त एवास्से तव योगनिद्रादिकं च चिच्छक्तिविलास इति जानाम्येवेति भाव इति विश्वनाथः । अतस्तृन्प्रत्ययांतत्वात् । ''न लोकाव्ययनिष्ठाखलर्थ तृनाम्'' इति निषेधात् षष्ठी न ॥ १५ ॥ सविशेषं स्वरूपमुक्त्वा निर्विशेषमाह–यस्मिन्निति । अविकारं केवलमानंदमात्रमेव नित्यचिदानंदात्मकनानाविशेषग्रहणासमर्थानां दूरस्थानां केवलशांतानां भक्तिमिश्रज्ञानदृष्ट्या भाति तद्ब्रह्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्याऽऽशिषो हि भगवंस्तव पादपद्ममाशीस्तथाऽनुभजतः पुरुषार्थमूर्तेः ॥ अप्येवमार्य भगवान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १७ ॥ मैत्रेय उवाच ॥ अथाभिष्टुत एवं वै सत्संकल्पेन धीमता ॥ भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत् ॥ १८ ॥ श्रीभगवानुवाच ॥ वेदाहं ते व्यवसितं हृदि राजन्यबालक ॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥ १९ ॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति ॥ यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम् ॥ २० ॥

रोति । यस्मिन्निति । पतंत्यकस्मादुद्भवंति विश्वस्य भवो जन्म यस्मात् । एकमखंडम् । आद्यमनादिम् ॥ १६ ॥ सकामभजनादपि मोक्षमाशासान आह । हे भगवन्पुरुषार्थः परमानंदः स एव मूर्तिर्यस्य तस्य तव पादपद्ममाशिषो राज्यादेः सकाशात्सत्या आशीः परमार्थफलं हि निश्चितम् । कस्य तथा तेन प्रकारेण त्वमेव पुरुषार्थ इत्येवं निष्कामतया अन्वनुभजतः । यद्यप्येवं तथापि हे आर्य स्वामिन्दीनान्सकामानप्यस्मान्भगवान्भवान्परिपाति संसारभयाद्रक्षत्येव । यतः अनुग्रहे हिताचरणे कातरः परवशः यथा वाश्रा नवप्रसूता धेनुर्वत्सं क्षीरं पाययति वृकादिभ्यो रक्षति च तद्वत् ॥ १७ ॥ १८ ॥ व्यवसितं संकल्पितम् ॥ १९ ॥ तत्प्रयच्छामीत्युक्ते

त्वन्महिमस्वरूपं प्रपद्य यस्मिन् निःशक्तिकत्वेन प्रतीतेपि विश्वशक्तयोऽनिशं स्थिता आनुपूर्व्यात्पतंति प्रतीता भवंति । अत एव त्वं भक्तितारतम्येन सामीप्यतारतम्यवतां विशेषतारतम्यग्रहणसमर्थानां भक्तिमिश्रज्ञानिभ्यः किञ्चिदधिकभक्तिमतां प्रथमं विद्याशक्तिमानात्मेति भासितस्ततोऽप्यधिकभक्तिमतां मायाशक्तिमान्पुरुषो जगत्कारणमिति । अत एव विश्वभवमिति विशेषणं ततः संपूर्णभक्तिदृष्ट्या ऐश्वर्यमाधुर्याद्यनंतशक्तिमान्भगवानिति तत्रात्यतिप्रविष्टधियां लीलालावण्यकलाकुतूहलवैदग्धीमहोदाधिरिति त्वमनुभवगोचरी भवसि यथा नगरस्यातिदूरस्थजना विशेषमनुपलभमाना इदमग्रे स्थितं वस्तुमात्रमिति तदेव पश्यंति अनतिदूरस्था वृक्षखण्डमिति समीपस्था विविधनिष्कुटाट्टपुरगोपुरगृहध्वजपताकादियुक्तं नगरमिति तत्र प्रविष्टास्तु विचित्रतडागरथ्याविपणिशृंगाटकाजिरनृत्यगतिवादित्रादिसकलसुखास्पदमित्यनुभवंति । यथाहुः प्रांचोपि—"चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् । विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः" इति । शक्तयः कीदृश्यः विरुद्धगतय इति विद्याविद्ययोः सर्गसंहारयोर्जन्मवत्ताजत्वयोरनीहत्वसललित्वयोरात्मारामत्वभक्तवात्सल्ययोर्विरोधेपि तत्तच्छक्तीनामतर्क्यैव त्वयि नित्या स्थितिरेवेति ॥ १६ ॥ ननु भो बालक सत्यमेव त्वं मत्स्वरूपं जानास्येव किं तु तव सांप्रतिकनिष्कामत्वेपि यथापूर्वसंकल्पमेव फलमहं दास्यामि गृहाणेति तत्र स्वस्याज्ञत्वं विवृण्वन्प्रेममाधुर्यमाशासान आह-सत्येति । हे भगवन्निति । निरतिशयानंदयुक्तत्वमाह-तव पादपद्ममेवाशिषो राज्यादेः सकाशात्सत्याऽऽशीः परमार्थफलं कस्य तथा तेन प्रकारेण त्वमेव पुरुषार्थमूर्तिरित्येवं निष्कामतयाऽन्वनुभजतः एवमपि दीनानस्मान्कृतसकामभजनानपि परिपाति निष्कामप्राप्यपादपद्मकिंचिन्माधुर्य्यदानेनेत्यर्थः । तत्र हेतुः अनुग्रहकातरः बालत्वाद्यद्यप्ययं शुद्धभक्तिं न जानाति तदपि तत्फलं स्वमाधुर्यमास्वादयामीति बुद्ध्येत्यर्थः । वाश्रा धेनुर्यथा वत्सकमज्ञं स्वामभजंतमपि स्वदुग्धं पाययति रक्षति च सिंहादिभ्यस्तद्वन्मामपि स्वचरणमाधुर्य्यमास्वादयतु सकामत्वादिभक्तिविघ्नेभ्यश्च रक्षत्विति भावः ॥१७॥ अथ स्तुत्याकर्णनानंतरम् । सत्सत्योऽभ्यर्हितः संकल्पो वाउच्चैः पदाप्तिरूपो यस्य तेन "सत्सत्येऽभ्यर्हिते श्रेष्ठे साधीयसि भवत्यपि" इति यादवः । धीमता योग्यायोग्यविमर्शवता॥१८॥ राजन्यबालकेति । तवैश्वर्यस्पृहा स्वाभाविक्येव तदहं ते प्रयच्छामीत्युक्ते तर्हि स्वप्रेमाणं न दास्यतीति कातरमुखं तमाश्वासयति—भद्रं त इति । मा चिंतय प्रेमाणमपि दास्यामीत्यधिकारार्थः॥१९॥त्वया पूर्वं यया प्रार्थितं "पदं त्रिभुवनोत्कृष्टं जिगीषोः साधुवर्त्म" इत्यादि यत्तद् गृहाणेत्याह—नेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनाम् ॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ॥ चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः ॥ ॥ २१ ॥ प्रस्थिते तु वनं पित्रा दत्त्वा गां धर्मसंश्रयः ॥ षट्त्रिंशद्वर्षसाहस्रं रक्षिताऽव्याहतेंद्रियः ॥ २२ ॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ॥ अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति ॥ २३ ॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः ॥ भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि ॥ २४ ॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतम् ॥ उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते यतिः ॥ २५ ॥ मैत्रेय उवाच ॥ इत्यर्चितः स भगवानतिदिश्यात्मनः पदम् ॥ बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः ॥ २६ ॥ सोऽपि संकल्पजं विष्णोः पादसेवोपसादितम् ॥ प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरम् ॥ २७ ॥

किं तदित्यपेक्षायामाह नान्यैरिति सार्धद्वाभ्याम् । हे भद्र ध्रुवा क्षितिर्निवासो यस्मिन् । यत्र यस्मिन् आहितमर्पितम् ॥ २० ॥ धान्याक्रमणाय भ्राम्यमाणानां पशूनां बंधनस्तंभो मेढी तस्यां बलीवर्दसमूहवत् अवांतरकल्पवासिनां परस्तादपि स्थास्नु लोकत्रयनाशेऽप्यनश्वरम् । धर्माग्न्यादयो नक्षत्ररूपाः वनौकसः सप्तर्षयो यत्प्रदक्षिणीकृत्य भ्रमंतश्चरंति ॥ २१ ॥ एतच्च राज्यानंतरं भविष्यतीत्याह । प्रस्थित इति । तुभ्यं पृथ्वीं दत्त्वा वनं प्रस्थिते । भावे क्तः । वनं प्रति दीर्घगमने कृते सति धर्मसंश्रयः राजधर्मं समाश्रयन्नित्यर्थः । अव्याहतानि अविरुद्धार्थसेवीनि इंद्रियाणि यस्य गां पृथ्वीं रक्षिता रक्षिष्यसि ॥ २२ ॥ त्वया असंकल्पितमपि मद्भक्तस्य तव द्रोहादेवं भविष्यतीत्याह । त्वद्भ्रातरीति । सा सुरुचिर्दावाग्निं वनवह्निं प्रवेक्ष्यति ॥ २३ ॥ किं च त्वमिष्ट्वा माम् । यज्ञो हृदयं प्रिया मूर्तिर्यस्य तम् ॥२४॥ यतः स्थानात् ॥२५॥ अतिदिश्य दत्त्वा॥२६॥संकल्पजं मनोरथम् । पादसेवया प्रापितं प्राप्य । संकल्पस्य निर्वाणं समाप्तिर्यस्मात् ॥२७॥

चक्रं शिशुमारलक्षणम् । केचित्तु तिलपीडनोलूखलं मेढीत्याहुः । कल्पवासिनां दैनंदिनप्रलयस्थायिनाम् । महाप्रलये सति ध्रुवस्य महावैकुंठारोहणमिति केचित् । ब्रह्मांडमध्यवर्तित्वेपि श्वेतद्वीपमथुराद्वारकादीनामिव ध्रुवलोकस्यापि "सुदुर्लभं यत्परमं पदं हरेः" इति 'ततो गंतासि मत्स्थानम्' इति 'आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदम्' इति 'ध्रुवस्य वैकुंठपदाधिरोहणम्' इत्यादिप्रमाणेभ्यो भगवल्लोकत्वेन नित्यत्वान्महाकल्पवासिनामपि परस्तादित्यपरे॥२०॥२१॥एतन्मदुक्तम्।राज्यानंतरं राज्यभोगोत्तरकाले। भावे क्त इत्युक्तेर्वनमिति न कर्मणि द्वितीया किं तु प्रतियोग इति ॥२२॥ पूर्वमपि निगूढभाक्तिसंस्कारस्य तव मद्भक्तस्य नारदसंगादुद्बुद्धभक्तेः। तस्मिन्नुत्तमाख्ये पुत्रे मनो यस्यास्सा तन्मनाः॥२३॥ लोके यशश्च तव भविष्यतीत्याह–किं चेति। सत्या–मत्संबंधेनैव भोगात् "धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा तपश्शमदमौ विविधा च वार्त्ता। मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः" इति प्रह्लादोक्तेः॥२४॥ यतो देहत्यागे विभाव्यमाने मत्स्मरणात् यतिः इंद्रियसंयमपूर्वकभगवत्स्मरणे कृतप्रयत्नः नावर्त्तते नायाति एतेन नित्यत्वमुक्तम् ॥२५॥२६॥ सोपि ध्रुवोपि संकल्पनिदानमपि तदतीतविष्णुपदरूपत्वात्संकल्पनिर्वाणं तत्र हेतुः विष्णोः पादसेवार्चनं विष्णोरेव संकल्पजमिति वा कृपया प्रापितमित्यर्थः । तथापि स्वसंकल्पजत्वानुसंधानेन तादृशत्वाज्ञानान्नातिप्रीतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुर उवाच॥सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्चितम् ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यतार्थवित् ॥ २८॥
मैत्रेय उवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान्॥२९॥ ध्रुव उवाच॥समाधिना नैक
पदेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः ॥ मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः ॥ ३० ॥ अहो बत ममानात्म्यं
मंदभाग्यस्य पश्यत ॥ भवच्छिदः पादमूलं गत्वा याचे यदंतवत् ॥ ३१ ॥

मायाविनः सकामस्य यत्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वाऽपि स्वमात्मानं मनोसिद्धार्थमप्राप्तमनोरथमिव कथममन्यत । पुरुषार्थविदपि ॥ २८ ॥ २९ ॥ तापमेवाह समाधिनेति सार्धैः षड्भिः । नैके अनेके भवा यस्मिन् । बहुजन्माभ्यस्तेनेत्यर्थः । प्रणामस्तुत्यादिसमये गरुडाधिरूढस्य हरेः पादच्छायायां स्थितमात्मानं स्मरन्नाह । छायामुपेत्येति । पृथङ्मतिर्भेददृष्टिः सन् । हा कष्टमिति भावः ॥ ३० ॥ अनात्म्यमात्मशून्यत्वमज्ञत्वम् । भवच्छेत्तुर्यदंतवत्तदयाचे याचितवानस्मि ॥ ३१ ॥

तादृशज्ञानेपि स्वस्य तुच्छसंकल्पत्वमेवाधिकृत्य तिरस्काराद्वेति ॥ २७ ॥ नातिप्रीत इत्याकर्ण्य पृच्छति–स्विति । मायाविन इति । हरेर्विशेषणं वा स्वमायया स्त्रीपुत्रधनमानादिरूपयैव लोकं मोहयति । स्वमार्गप्रवृत्तं तत्प्रेमपरीक्षणार्थमतस्तत्सर्वमुत्सृज्य कश्चिदेव कथंचन तदाप्नोतीति भावः । यद्वा मायाविनः कृपालोः ॥ २८ ॥ मुक्तिं भक्तिमत्पार्षदत्वं "विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः" इति पाद्मोत्तरखंडोक्तेः । 'न वै मुकुंदस्य' इत्यादिवक्ष्यमाणवचनैकवाक्यत्वानुरोधाच्च सायुज्यं न व्याख्येयं "या निर्वृतिस्तनुभृताम्' इत्यादिना तत्र तदरोचकत्वज्ञापनात् । ननु नैच्छदिति न संगच्छते 'भक्तिं मुहुः प्रवहताम्' इति तद्वाक्येन भक्तेरेव तदिच्छाविषयत्वावगतेः । सत्यम् । अत्र स्मरन्निति वर्तमाननिर्देशान्मातृसपत्नीवाग्बाणस्मरणदशायामेव नैच्छदतस्तदैव मधुवने आगत्य मत्पित्रादिदुर्लभपरमोच्चपदप्राप्तिकामो भगवंतं भक्ष्ये इति संकल्प तपश्चकार । भगवत्साक्षाद्दर्शनसमये तु 'योऽन्तः प्रविश्य' इति तदुक्तेस्तदीयसर्वेंद्रियाणां भगवदाकारत्वात्कुतः सुरुचिवाग्बाणस्मरणं किं तु 'वेदाहं ते व्यवसितम्' इति भगवद्वाक्येन स्मृतपूर्वस्वीयसंकल्पो मत्सकामत्वलक्षणं व्यभिचारं प्रभुर्मे जानातीति जातत्रपोन्वतप्यत् । हंतहंत दुर्बुद्धिरहं कथमेवं संकल्पमकरवं "भक्तिं मुहुः प्रवहताम्' इति सांप्रतिकीं भक्तिप्रार्थनां मे मत्प्रभुर्मत्कपटमेव जानाति स्म अतस्तदनुरूपं किमपि स्पष्टं नावोचत् । किं तु पूर्वसंकल्पानुरूपमेव वरं ददौ 'त्वद्भ्रातर्युत्तमे नष्टे' इत्यादिना पुरातनं मन्मात्सर्यमपि मां स्मारयामासेत्येवं तस्य लज्जानुतापदैन्यनिर्वेदास्तदुक्तश्लोकषट्के द्रष्टव्या इति विश्वनाथः । संदर्भस्तु–'अत्राहो बत' इत्यादिवक्ष्यमाणवचने च श्रीध्रुवस्य यदपूर्णमन्यत्वं तदुच्चपदकामनयैव तत्प्रार्थितवता तेन लब्धमनोरथातीतवरेणापि स्वसंकल्पमेव तिरस्कर्तुमुक्तमिति घटेत मनोरथातीतत्वञ्चोक्तं श्रीविदुरेण "सुदुर्लभं यत्परमं पदं हरेः" इति स्वयं श्रीध्रुवप्रियेण "ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतम् । उपरिष्टादृषिभ्यस्त्वं यतो नावर्त्तते यतिः ॥ इति वक्ष्यते पार्षदाभ्यामपि "आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदम्" । सूतेन च "ध्रुवस्य वैकुंठपदाधिरोहणम्" इति । पञ्चमे ज्योतिश्चक्रवर्णने "विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमंति"इति यत्तद्विष्णोः परं पदमपि वदंतीति प्रपंचांतर्गतत्वेपि तद्धर्मातीतत्वमुक्तं जीवन्मुक्तवत् । अतोस्मिन्पद्ये प्रापंचिकस्य बहिरंशस्यैव प्रलयो ज्ञेयस्तस्य तु तदानीमंतर्धानमेव एतदालंब्यैव हिरण्यकशिपुनोक्तं "किमन्यैः कालनिर्द्धूतैः कल्पांते वैष्णवादिभिः" इति । येऽद्यापि तथा ब्रुवंति ते तत्तुल्या एवेति भाव इत्याह । मुमुक्षुणा विषयाभिलाषो न कार्य इत्यभिप्रेत्य ध्रुवेणानिन्दीति तीर्थः ॥२९॥ इति भाव इति । पुनर्दुःखबहुले संसारे पतितोहो मे भाग्याल्पतेत्याशयः । छायापदमाश्रयपरं देवानां छायाया अभावात् पृथग्भावतोन्यत्र विषयेषु मतिर्यस्य स तथा अत एव प्रभुर्मां स्वधाम स्वसंगेन नानैषीदिति भावः ॥ ३० ॥ अत्र तादृशत्वाज्ञानपक्षः स्पष्ट एव । पक्षांतरन्तु–मह्यं स्वयं स्वपददानेन भवच्छिदस्तस्य पादमूलं प्राप्यापि स्वयं त्वहं त्रिभुवनोत्कृष्टपदरूपत्वेनानंतवदेव याचे तन्निर्बंधं न परित्यक्तवानस्मि । 'अप्येवमार्य भगवान्परिपाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः ॥ यो नारदवचस्तथ्यं नाग्राहिषमसत्तमः ॥ ३२ ॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् ॥ तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृद्रुजा ॥ ३३ ॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि ॥ प्रसाद्य जगदात्मानं तपसा दुःप्रसादनम् ॥ भवच्छिदमयाचेऽहं भवं भाग्यविवर्जितः ॥ ३४ ॥ स्वाराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत ॥ ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः ॥ ३५ ॥ मैत्रेय उवाच ॥ न वै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः ॥ वांछंति तद्दास्यमृतेऽर्थमात्मनो यदृच्छया लब्धमनःसमृद्धयः ॥ ३६ ॥ आकर्ण्यात्मजमायांतं संपरेत्य यथागतम् ॥ राजा न श्रद्दधे भद्रमभद्रस्य कुतो मम ॥ ३७ ॥

अज्ञत्वे कारणं संभावयति । मतिरिति । पतद्भिर्मदपेक्षयाधःस्थानं प्राप्नुवद्भिरत एवासहनशीलैः 'नाधुनाप्यवमानं ते' इत्यादि सत्यमपि नारदस्य वचो यो न गृहीतवानस्मि तस्य मे मतिर्विदूषिता ॥ ३२ ॥ किं च दैवीमिति । प्रसुप्तः स्वप्नानिव पश्यन् द्वितीयेऽसत्यपि भ्रातैव भ्रातृव्यः शत्रुरिति दृष्ट्या हृद्रुजा हृदयशोकेन तप्ये तापमनुभवामि ॥ ३३ ॥ किं च मया प्रसाद्य यत्प्रार्थितं तद्व्यर्थमित्याह । भवच्छिदमिति ॥ ३४ ॥ एतदेव सदृष्टांतमाह । स्वाराज्यं निजानंदं प्रयच्छतः सकाशादभिमानः क्षीणपुण्येन मया भिक्षितो याचितः । क्षीणेन पुण्यनेति वा दृष्टांत एव संबंधः । यथाऽधन ईश्वराच्चक्रवर्तिनः फलीकारान्सतुषतंडुलकणान् याचते तद्वत् ॥ ३५ ॥ एवं निःस्पृहत्वं तस्य युक्तमित्याह । तस्य दास्यं विनान्यमर्थमात्मनो नैव वांछंति । यदृच्छयैव लब्धेन मनसः समृद्धिर्येषां ते ॥ ३६ ॥ प्रस्तुतमाह । आकर्ण्येति ।

दीनान्'' इत्याद्युक्तेः । न तु तत्पादसेवां तत्पादमेवेत्यर्थः । अत एव राज्यादिकमपि विघ्नत्वेन लब्धमिति भावः । चक्रवर्ती तु—भवच्छिदोऽप्रार्थितोपि यो भक्तस्य भवं छिनत्ति वैष्णव्या दीक्षया तस्य पादमूलं प्राप्य यत्तमहमंतवद्याचे प्राप्तुं संकल्पमकरवं तन्ममैवदोषः । प्रभुस्तु तदपि कृपया नश्वरमेव ददौ 'ततो गंतासि मत्स्थानम्' इति तदुक्तेरित्याह ॥ ३१ ॥ तन्निर्बंधात्त्याग एवाज्ञत्वं तत्र हेतुं कल्पयति अत एवाधस्स्थत्वादेव । यद्वाऽधःपतनपर्यवसानैः ॥ ३२ ॥ एतत्स्फुटयति—किं चेति । द्वितीये सिंहव्याघ्रादिरूपेऽसत्यपि तज्जामार्तिं यथा स्वप्ने प्राप्नोति । भ्रातरं व्ययति नाशयतीति भ्रातृव्यः नाशार्थाभावेऽपि व्ययतेरनेकार्थत्वाड्डुप्रत्यये टिलोपे रूपसिद्धेः । यद्वा ''व्यन्सपत्ने'' इति शत्रौ वाच्ये भ्रातृशब्दाद्व्यन् । ''भ्रातृव्यौ रिपुबांधवौ'' इति धरणिः । यत आत्मदृष्ट्याऽहं स च मद्भ्रातेत्युभावपि भगवतो जीवाख्यतटस्थशक्तिवृत्तिरूपौ देहदृष्ट्याप्युभयोरपि पांचभौतिकत्वान्मायाशक्तिवृत्तिरूपत्वमतो भगवन्माययैव तस्मिञ्छत्रुदृष्ट्या मुह्यामीति भावः । देवस्य विष्णोरियं दैवी तां ''देवात्मशक्तिं स्वगुणैर्निगूढाम्'' इत्यादि श्रुतेः ॥ ३३ ॥ आधिपत्यादेरनित्यत्वं प्रेक्ष्याह—किंचेति । भोग्यवस्तुनो भवकारणत्वाद्भवत्वमेव । गतं नष्टमायुर्यस्य तस्मिन्निश्चितासाध्यसन्निपातादिरोगाजिते पुंसि । चिकित्सा तदपनयनौषधप्रदानम् ॥ ३४ ॥ एतदेव व्यर्थप्रार्थनमेव । स्वस्मिन्भक्त्या राजत इति स्वमेव राट् राजा येषां ते स्वराजो दासास्तेषां भावः स्वाराज्यं दास्यं यच्छतः ददतः स तु विदग्धः परमोदारो राजा यथा तस्मै तन्मनोरथातीतां सम्पत्तिं ददाति तथैव भगवान्मह्यं स्वधामवासित्वमित्यहो मम दुर्बुद्धित्वपरमकाष्ठा भगवतश्च कारुण्यौदार्य्यसीमेति क्षणं सविस्मयस्तिमितोऽभूदिति भावः ॥ ३५ ॥ रजोजुषः परागरसास्वादिनः लब्धेन वस्तुना ॥ ३६ ॥ ततो मधुवनाद् ध्रुवस्य बंधुमेलनादिकमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः ॥ वार्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनम् ॥ ३८ ॥ सदश्वं रथमारुह्य कार्तस्वरपरिष्कृतम् ॥ ब्राह्मणैः कुलवृद्धैश्च पर्यस्तोऽमात्यबंधुभिः ॥ ३९ ॥ शंखदुंदुभिनादेन ब्रह्मघोषेण वेणुभिः ॥ निश्चक्रामपुरात्तूर्णमात्मजाभीक्षणोत्सुकः ॥ ४० ॥ सुनीतिः सुरुचिश्चास्य महिष्यौरुक्मभूषिते ॥ आरुह्य शिबिकां सार्धमुत्तमेनाभिजग्मतुः ॥ ४१ ॥ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात् ॥ अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥ ४२ ॥ परिरेभेंगजं दोर्भ्यां दीर्घोत्कण्ठमनाः श्वसन् ॥ विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनम् ॥ ४३ ॥ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः ॥ स्नापयामास तनयमात्तोद्याममनोरथः ॥ ४४ ॥ अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः ॥ ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४५ ॥

संपरेत्य मृत्वाऽऽगतमाकर्ण्य यथा तथा न श्रद्दधे विश्वासं न चकार । अभद्रस्य मम भद्रं कुत इति मत्वा ॥ ३७ ॥ एष्यत्यचिरत इति देवर्षेर्वाक्यं श्रद्धाय ॥ ३८ ॥ ब्राह्मणादिभिः पर्यस्तः परिवृतः ॥ ३९ ॥ ४० ॥ अस्य राज्ञो महिष्यौ मध्ये उत्तमं निधाय एकामेव शिबिकां नरविमानमारुह्य ॥ ४१ ॥ उपवनस्याभ्याशे समीपे ॥ ४२ ॥ विष्वक्सेनस्य विष्णोरंघ्रिसंस्पर्शेन हतमशेषमघं बंधनं च यस्य तम् ॥ ४३ ॥ आत्त उद्दामो महान्मनोरथो यस्य ॥ ४४ ॥ अभिमंत्रितः

प्रस्तुतमिति । भद्रं पुत्रागमनरूपम् ॥ ३७ ॥ हर्षस्यात्मजागमनजानंदस्य वेगेनोद्रेकेण धर्षितो वशीकृतः । वार्त्ताहर्त्तुर्ध्रुव आयातीति वक्तुः महांति धनानि रत्नानि यस्मिन्स तम् यद्वा महांति धनानि मूल्यानि यस्य तम् ॥ ३८ ॥ "कार्त्तस्वरं महारत्नं सुवर्णं कलधौतकम्" इति कोशात् सुवर्णभूषितम् ॥ ३९ ॥ राज्ञस्स्नेहोद्रेकमाह–शंखेति ॥ ४० ॥ ध्रुवस्य निष्क्रमणादिने राजा बहुतरमुद्विग्नस्तदा श्रीनारदाश्वासनेन ध्रुवमात्र एव सौभाग्यं ददावुत्तममात्रे च दौर्भाग्यं ददौ तदपि सुनीतिर्विनयराशिस्तां सपुत्रां स्वशिबिकायामेवारोहयामासेति तत्त्वमत्राह–सुनीतिरिति । 'रुक्मं कांचनं हेम' इति कोशात् ॥ ४१ ॥ तं ध्रुवम् । 'अभ्याशस्तु समीपेऽर्थे सतालव्यः प्रकीर्तितः । पूर्वरूपे च मनने संमुखस्थे स दंत्यकः ॥" इति शब्दार्थविवेके तरसा वेगेनाङ्गजं सुतं परिरेभे इति योज्यम् । विष्वक्सेनांघ्रीत्यादि विषेषणेन तत्स्प्रष्टुरपि पापहानिरिति ध्वनितम् ॥ ४२ ॥ ॥ ४३ ॥ अथालिंगनानंतरं शीतैश्शीतलैः सुखलक्षणतयाऽवसितैः । "अंतो ह्यवसिते मृत्यौ स्वभावे परमात्मनि" इति यादवः । "शमं तोषं च शं सुखम्" इति हलायुधः । अनेन राज्याभिषेकमदूरे सूचयति एतमर्थं ध्वनयन्नाह–आत्तेति । आत्त उद्दाम उत्कटो मनोरथः ज्येष्ठाय राज्यासनप्रदानलक्षणो येन स तथा ॥ ४४ ॥ भगवद्भक्तस्यापि रागद्वेषादिदोषो नास्ति किमुत हरेरंतीममर्थं ध्वनयन्ध्रुवः पित्राद्युचितक्रियामाचरतीत्याहाभिवंद्येति । मातरावित्युक्तेः पूर्वांतःकरणकालुष्यं दूरीकृतमिति व्यनक्ति शीर्ष्णा ननामेत्युक्तेः पितृतो मातुर्गुरुत्वाधिक्यं सूचितम् । तदुक्तमपि "पितुर्दशगुणं माता गौरवेणातिरिच्यते" इति । ननु सुरुचिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरुचिस्तं समुत्थाप्य पादावनतमर्भकम् ॥ परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ॥ ४६ ॥ यस्य प्रसन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः ॥ तस्मै नमंति भूतानि निम्नमाप इव स्वयम् ॥ ४७ ॥ उत्तमश्च ध्रुवश्चोभावन्योऽन्यं प्रेमविह्वलौ ॥ अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः ॥ ४८ ॥ सुनीतिरस्य जननी प्राणेभ्योऽपि प्रियं सुतम् ॥ उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता ॥ ४९ ॥ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः ॥ तदाऽभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ॥ ५० ॥ तां शशंसुर्नरा राज्ञीं दिष्ट्या ते पुत्र आर्तिहा ॥ प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः ॥ ५१ ॥ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा ॥ यदनुध्यायिनो वीरा मृत्युं जिग्युः सुदुर्जयम् ॥ ५२ ॥ लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः ॥ आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम् ॥ ५३ ॥ तत्रतत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः ॥ सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः ॥ ५४ ॥

पितुराशीर्भिः तेन सह कृतसंभाषणः ॥ ४५ ॥ ४६ ॥ सुरुच्याः प्रीतिर्नासंभावितेत्याह । यस्येति । नमंत्यनुसरंति आपो यथा स्वयमेव निम्नं देशमवतरंति ॥ ४७ ॥ ऊहतुर्दधतुः ॥ ४८ ॥ ४९ ॥ हे वीर वीरसुवो ध्रुवमातुः अभिषिच्यमानाभ्यां स्तनाभ्यां पयस्तदा सुस्राव ॥ ५० ॥ चिरं नष्टो दर्शनमप्राप्तः रक्षिता रक्षिष्यति ॥ ॥ ५१ ॥ ५२ ॥ एवमिति व्यवहितं पित्रायुपलालनं परामृश्यते ॥ ५३ ॥ पुरं वर्णयति तत्रतत्रेति चतुर्भिः । सवृंदैः फलमंजरीयुक्तैः पूगानां पोतैर्बालवृक्षैस्तद्विधैः

दुःखदायिनीं कथं ननामेति तत्राह—सज्जनाग्रहणीरिति ॥ ४५ ॥ "अत्र कचित्पुस्तकेषु अंबांब भगवान्नूनं प्रसादात्तव सुव्रते । सात्वतानामभयदं व्यदधान्मूर्ध्नि मे करम्" इत्यधिकोऽपि श्लोकः पठ्यते स च सुगम एवेति परंतु मूर्ध्नि भगवत्करदानस्य पूर्वमनुक्तेर्विगीत एवेत्युपेक्षितः । यद्वा श्रीनारदस्यापि भगवदवतारत्वात् "स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना" इति तत्करदानापेक्षया वोक्तम् । यद्वाऽस्य शिरसि राज्ञः कर इति किं वदत्या मूर्द्धकरदानपदेनानुग्रहो लक्ष्यते ध्रुवस्य मरणमिच्छंत्या सुरुच्या जीवेति वाक्कथमुक्तेति तं चेदाह—सुरुच्याः प्रीतिरिति । तं ध्रुवम् । अर्भकमिति लुप्तोपमा अर्भकं प्रेंखच्छिशुमिवेति स्नेहविशेषो ध्वनितः ॥ ४६ ॥ आदिना करुणादिग्रहः ॥ ४७ ॥ अस्रौघं वाष्पप्रवाहम् । "ओघः परंपरायां स्याज्जलस्रोतसि संचये" इति यादवः ॥ ४८ ॥ सुनीतेः पश्चान्मेलनमानंदमूर्च्छाभंगे सतीति ज्ञेयमिति विश्वनाथः । सूचीकटाहन्यायेनेति तीर्थः । आधिं क्लेशम् ॥ ४९ ॥ हे वीरेति । यथात्वं वीरस्तादृशो ध्रुवस्तं सूते या तस्याः "यशसं वीरवत्तमम्" इति श्रुतेः ॥ ५० ॥ ५१ ॥ यं भगवंतमनुध्यातुं शीलं येषां ते यदनुध्यायिनः । मृत्युजये तव पुत्रस्यैवोदाहरणम् । किं च—यदि प्रणतार्त्तिहरो हरिस्त्वया नाभ्यर्चितस्तर्हि चिरं नष्टः पुत्रो न प्रतिलब्धः स्यात् न तथा तस्मादभ्यार्चित इति निश्चितमेव ॥५२॥ व्यवहितं 'परिरेभेंगजं दोर्भ्याम्' इत्यादिनोक्तम् । "कलभश्चैव कन्यानां करिणी बालमंगले" इति वचनात्करिणीमित्युक्तम् ॥ ५३ ॥ उपसंक्लृप्तैस्तदानीमेवोद्यानादिभ्य आनीयारोपितैः । लसन्मकराणि पत्रादिनिर्मितमकराकाराणि तोरणानि यत्र तैः ॥ ५४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चूतपल्लववासःस्रङ्मुक्तादामविलंबिभिः ॥ उपस्कृतं प्रतिद्वारमपां कुंभैः सदीपकैः ॥५५॥ प्राकारैर्गोपुरागारैः शातकुंभपरिच्छदैः ॥ सर्वतोऽलंकृतं श्रीमद्विमानशिखरद्युभिः ॥५६॥ मृष्टचत्वररथ्याऽट्टमार्गं चंदनचर्चितम् ॥ लाजाक्षतैः पुष्पफलैस्तंडुलैर्बलिभिर्युतम् ॥ ५७ ॥ ध्रुवाय पथि दृष्टाय तत्रतत्र पुरस्त्रियः ॥ सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च ॥ ५८ ॥ उपजह्रुः प्रयुंजाना वात्सल्यादाशिषः सतीः ॥ शृण्वंस्तद्वल्गुगीतानि प्राविशद्भुवनं पितुः ॥ ५९ ॥ महामणिव्रातमये स तस्मिन्भवनोत्तमे ॥ लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥ ६० ॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ आसनानि महाऽर्हाणि यत्र रौक्मा उपस्कराः ॥ ६१ ॥ यत्र स्फटिककुड्येषु महामारकतेषु च ॥ मणिप्रदीपा आभांति ललनारत्नसंयुताः ॥ ६२ ॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६३ ॥ वाप्यो वैडूर्यसोपानाः पद्मोत्पलकुमुद्वतीः ॥ हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥ ६४ ॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तम् ॥ श्रुत्वा दृष्ट्वाऽद्भुततमं प्रपेदे विस्मयं परम् ॥ ६५ ॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतम् ॥ अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिम् ॥ ६६ ॥

सवृंदैरुपस्कृतं प्रतिद्वारमित्युत्तरेणान्वयः ॥ ५४ ॥ चूतपल्लवाश्च वासांसि च स्रजश्च मुक्तादामानि च तेषां विशिष्टं लंबनमस्ति येषु कुंभेषु ॥ ५५ ॥ गोपुरैर्बहिर्द्वारैरगारैर्गृहैश्च शातकुंभाः परिच्छदाः परिकरा येषु विमानानामिव शिखरे द्युतिर्येषां तैः ॥ ५६ ॥ चत्वरमंगणम् । रथ्या महामार्गः । अट्ट उच्चगृहस्योपरि निर्मिता भूमिका । मार्ग अवांतरः । मृष्टाः संमार्जिताश्चत्वरादयो यस्मिन् ॥ ५७ ॥ सिद्धार्थः श्वेतसर्षपः अक्षता यवाः ॥ ५८ ॥ उपजह्रुर्व्यकिरन् । सतीः सत्यः ॥ ५९ ॥ ६० ॥ यत्र भवनोत्तमे ॥ ६१ ॥ ६२ ॥ ६३ ॥ कुमुत् कुमुदम् । पद्मादिमत्यो वाप्यः ॥ ६४ ॥ ६५ ॥ ऊढवयसं प्राप्तयौवनम् । अनुरक्ताः प्रजा यस्मिन् ॥ ६६ ॥

उपस्कृतमलं कृतम् । प्रथमं कुंभं रक्तपीतादिवस्त्रेणावृत्य ततश्चाम्रपल्लवमालया ततः पुष्पहारेणावरणं कार्यमभ्युदयकर्म्मणीति प्रसिद्धेः ॥ ५५ ॥ शातकुंभस्सौवर्णाः परिच्छदाः कलशाद्याः परिकराः सामग्र्य इत्यर्थः । प्राकारः परितोवेष्टनभित्तिविशेषः ॥ ५६ ॥ लाजा भ्रष्टव्रीहयः तंडुलानां पृथगुक्तेरक्षता यवाः "यवास्तिलास्तण्डुलाश्च कर्म्मभेदेन चाक्षताः" इत्युक्तेः ॥ ५७ ॥ तत्रतत्र स्थले सार्द्धेनान्वयः ॥५८॥ शृण्वन्नित्यर्द्धकम् ॥ ॥ ५९ ॥ स ध्रुवः ॥ ६० ॥ दांता हस्तिदंतनिर्मितपादाः रुक्मपरिच्छदाः स्वर्णतंतुमिश्रितकौशेयादिवस्त्राच्छादनयुताः । उपस्कराः पात्रादयः रौक्मा हैमाः ॥ ६१ ॥ यत्रेति द्विकम् । ललनारत्नैः स्त्रीरत्नैः 'रत्नं श्रेष्ठेऽपि निर्दिष्टम्' इति हलधरः ॥ ६२ ॥ अमरद्रुमैः संतानादिभिः ॥ ६३ ॥ वैदूर्याणां विद्रुमाणां सोपानानि आरोहणावरोहणामार्गा यासां ताः ॥ ६४ ॥ तमलौकिकम् ॥ ६५ ॥ प्राप्तयौवनम् 'वयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानं च प्रवयसमाकलय्य विशां पतिः ॥ वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिम् ॥ ६७ ॥ इति श्रीभागवते म० चतुर्थ० नवमोऽध्यायः ॥ ९ ॥ मैत्रेय उवाच ॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ॥ उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥ १ ॥ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः ॥ पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २ ॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा ॥ हतः पुण्यजनेनाद्रौ तन्माताऽस्य गतिं गता ॥ ३ ॥ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचाऽर्पितः ॥ जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयम् ॥ ४ ॥ गत्वोदीचीं दिशं राजा रुद्रानुचरसेविताम् ॥ ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलाम् ॥ ५ ॥ दध्मौ शंखं बृहद्बाहुः खं दिशश्चानुनादयन् ॥ येनोद्विग्नदृशः क्षत्तरुपदेव्योऽत्रसन्भृशम् ॥ ६ ॥ ततो निष्क्रम्य बलिन उपदेवमहाभटाः ॥ असहंतस्तं निनादमभिपेतुरुदायुधाः ॥ ७ ॥ स तानापततो वीर उग्रधन्वा महारथः ॥ एकैकं युगपत्सर्वानहन्बाणैस्त्रिभिस्त्रिभिः ॥ ८ ॥ ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव हि ॥ मत्वा निरस्तमात्मानमाशंसन्कर्म तस्य तत् ॥ ९ ॥ तेपि चामुममृष्यंतः पादस्पर्शमिवोरगाः ॥ शनैरविध्यन्युगपद्द्विगुणं प्रचिकीर्षवः ॥ १० ॥

प्रवयसं वृद्धम् ॥ ६७ ॥ इति चतुर्थे टीकायां नवमोऽध्यायः ॥ ९ ॥ छ ॥ दशमे भ्रातृहंतॄणां यक्षाणामकरोद्वधम् ॥ एक एवालकां गत्वेत्यस्य विक्रम उच्यते॥ १ ॥ १ ॥ योषितां रत्नमिवातिमनोहरम् । कन्यारत्नं चाजीजनदिति वा ॥ २ ॥ यक्षेणाद्रौ हिमवति हतः । आजाविति पाठे युद्धे । अस्य गतिं गता मृतेत्यर्थः ॥ ३ ॥ कोपामर्षशुचा द्वंद्वैक्यम् । तेनार्पितो व्याप्तः जैत्रं जयहेतुम् । पुण्यजनालयमलकाम् ॥ ४ ॥ रुद्रानुचरा भूतादयः ॥ ५ ॥ दध्मौ वादितवान् । येन शंखवादनेन हे क्षत्तः उपदेव्यो यक्षस्त्रियः ॥ ६ ॥ ७ ॥ एकैकं त्रिभिस्त्रिभिरित्येवं सर्वांस्त्रयोदशायुतानि यक्षान्युगपदहन् जघान ॥ ८ ॥ निरस्तं पराजितम् । तस्य ध्रुवस्य तत्कर्माशंसंस्तुष्टुवुः ॥ ९ ॥ तेऽपि तत्कर्मा

यौवनपक्षिणोः' इति धरणिः । एतेन राज्यपालनसामर्थ्यम् । प्रकृतीनां मंत्र्यादीनाम् ॥ ६६ ॥ प्रगतं वयो यस्य तम् । आकलय्य संचिंत्य आत्मनः स्वस्य गतिं हरिम् ॥ ६७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे नवमोऽध्यायः ॥ ९ ॥ अलकां कुबेरपुरीम् (१) उपयेमे विवाहविधिना स्वी चक्रे । एतद्विवाहः पितुर्वनगमनात्पश्चादवगम्यते तत्सुतौ भ्रमिसुतौ ॥ १ ॥ इलायां पूर्वमुद्वाहितायामपि योषिद्रत्नं श्रेष्ठां कन्याम् ॥ २ ॥ उत्तमस्यापि ध्रुवभ्रातृत्वात्कथा वर्णनीयेति चेत्तत्राह-उत्तमस्त्विति । मृगयाव्यसनित्वेन सदैव वनाद्यटनशीलत्वादनुद्वाहित एव मृतस्तन्माता सुरुचिरपि । इत्यर्थ इति । वने पुत्रान्वेषणार्थं गता दवानलेन दग्धेति वक्ष्यमाणरीत्या मृतेति भावः ॥ ३ ॥ भागुरिमते शुचाशब्दोप्यस्ति तथा च कोपामर्षशुचाभिः क्रोधासहनशोकैर्व्याप्तः । जैत्रं जयहेतुकमुहूर्त्तघटितम् ॥ ४ ॥ आदिना पिशाचादिग्रहः । ''द्रोणी निम्नतटे गिरेः'' इति कोशात् । गुह्यका यक्षास्तैर्निबिडाम् ॥ ५ ॥ क्षत्तरिति । यथा त्वं पापशकलीकरणे समर्थस्तद्वत्सोऽपीत्याह । 'क्षद-शकलीकरणे' धातुस्ततस्तृप्रत्यये क्षत्तेति रूपम् ॥ ६ ॥ ततः शंखध्वन्याकर्णनोत्तरम् ॥ ७ ॥ स ध्रुवस्तान्यक्षान् । युगपदेककालावच्छेदेन ॥ ८ ॥ ते यक्षाः निरस्तं दीनम् । तस्य ध्रुवस्य । तत्कर्म सर्वेषां युगपत्ताडनरूपम् । आशंसन् श्लाघयामासुः ॥ ९ ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः ॥ शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैः शरैरपि ॥ ११ ॥ अभ्यवर्षन्प्रकुपिताः सरथं सहसारथिम् ॥ इच्छं तस्तत्प्रतीकर्तुमयुतानि त्रयोदश ॥ १२ ॥ औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा ॥ न उपादृश्यत च्छन्न आसारेण यथा गिरिः ॥ १३ ॥ हाहाकारस्तदैवासीत्सिद्धानां दिवि पश्यताम् ॥ हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥ १४ ॥ नदत्सु यातुधानेषु जयकाशिष्वथो मृधे ॥ उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥ १५ ॥ धनुर्विस्फूर्जयन्दिव्यं द्विषतां खेदमुद्वहन् ॥ अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानिलः ॥ १६ ॥ तस्य ते चापनिर्मुक्ता भित्त्वा वर्माणि रक्षसाम् ॥ कायानाविविशुस्तिग्मा गिरीनशनयो यथा ॥ १७ ॥ भल्लैः संच्छिद्यमानानां शिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥ १८ ॥ हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः ॥ आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥ १९ ॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः ॥ प्रायोविवृक्णावयवा विदुद्रुवुर्मृगेंद्रविक्रीडितयूथपा इव ॥ २० ॥ अपश्यमानः स तदाततायिनं महामृधे कंचन मानवोत्तमः ॥ पुरीं दिदृक्षन्नपि नाविशाद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥ २१ ॥

सहमाना अमुमविध्यन् ध्रुवकृतविक्रमात् द्विगुणं यथा भवत्येवं षड्भिःषड्भिरिषुभिःप्रतिकर्तुमिच्छंतः ॥ १० ॥ विचित्रवाजैर्विचित्रपक्षैः ॥ ११ ॥ १२ ॥ धारासंपातेन छन्नो गिरिरिव नैवादृश्यत ॥ १३ ॥ सूर्यतुल्यः ॥ १४ ॥ यातुधानेषु राक्षसेषु जयकाशिषु जितंजितमिति जयप्रकाशकेषु सत्सु ॥ १५ ॥ व्यधमत्संचूर्णयामास ॥ १६ ॥ वर्माणि कवचानि ॥ १७ ॥ शिरःप्रमुखैरास्तृताः प्रकीर्णा रणभुवो रेजुरिति द्वयोरन्वयः ॥ १८ ॥ १९ ॥ प्रायो बाहुल्येन विवृक्णाः संछिन्ना अवयवा येषाम् ॥ २० ॥ आततायिनं

परिघो लोहबद्धलगुडः । ऋष्टिभिर्द्विधारखड्गैः । "उड्डीयोड्डीय च प्राप्य नदन्ती दशकार्त्रिका । क्रमते चानतांगी या सा भुशुंडी निगद्यते" इति नागेशोक्तेः ॥ ११ ॥ अयुतानां त्रयोदश त्रिंशत्सहस्राधिकैकलक्षसंख्याकाः ॥ ॥ १२ ॥ आसारेण 'धारासंपात आसारः' इत्यमरः ॥ १३ ॥ पुण्यजनार्णवे सूर्यः सूर्यतुल्यः इति तेषां सरस्वत्या ध्रुवस्य कोऽपि नापकारोऽभूदिति व्यज्यते । न ह्यर्णवे मग्नस्य सूर्यस्य किमपि कष्टं भवतीति ॥ १४ ॥ अथो मज्जनानंतरमेव । तस्य ध्रुवस्य ॥ १५ ॥ १६ ॥ ते बाणाः । अशनयो वज्राणि 'दंभोलिरशनिर्द्वयोः' इत्यमरः । अत्र च 'गिरीनशनयो यथा' इति 'आसारेण यथा गिरिः' इति दृष्टांताभ्यां यक्षाणां बाणाः ध्रुवस्याकिंचित्कराः प्रत्युतोत्साहवर्द्धका एव यथा धारासंपातेन गिरयः क्षालितमला उद्दीप्ता एव भवंति ध्रुवस्य शराश्च यक्षाणां प्राणहारिण एव यथाऽशनिभिर्गिरयो विदीर्यंत एवेति व्यंजितम् ॥ १७ ॥ हेमतालाभैर्गौर वर्णत्वेन दीर्घत्वेन च स्वर्णतालतरुसदृशैः "तालो माने तरौ गानकालमाने च वाद्यके" इति धरणिः । वलयैः कंकणैः । "वलयः कंठरोगे ना कङ्कणे पुंनपुंसकम्" इति मेदिनी ॥ १८ ॥ 'उष्णीषं तु शिरोवेष्टे' इति कोशात् । वीरमनोहराः शूरप्रियाः ॥ १९ ॥ मृगेन्द्रस्य विक्रीडितेन यूथपा हस्तिन इव गजसिंहयोः परस्परविरोधप्रसिद्धेरत्र यूथपपदं गजपरमेव ज्ञेयम् ॥ २० ॥ अत्र तत्पुरं प्रविश्य तत्सर्वस्वं गृहीत्वा गमनं तत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति ब्रुवंश्चित्ररथः स्वसारिर्थिं यत्तः परेषां प्रतियोगशंकितः ॥ शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥२२॥ क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः ॥ विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥ २३ ॥ ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनादस्य कबंधान्यग्रतोऽनघ॥ २४ ॥ ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो दिशम् ॥ गदापरिघनिस्त्रिंशमुशलाः साश्मवर्षिणः ॥ २५ ॥ अहयोऽशनिनिःश्वासा वमंतोऽग्निं रुषाक्षिभिः ॥ अभ्यधावन्गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥ २६ ॥ समुद्र ऊर्मिभिर्भीमः प्लावयन्सर्वतो भुवम् ॥ आससाद महाह्रादः कल्पांत इव भीषणः ॥ २७ ॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनाम् ॥ ससृजुस्तिग्मगतय आसुर्या माययाऽसुराः ॥ २८ ॥ ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तराम् ॥ निशाम्य तस्य मुनयः शमाशंसन्समागताः ॥ २९ ॥

शस्त्रपाणिम् ॥ २१ ॥ इति ब्रुवन्नित्यत्रापि न मायिनामित्यादेरनुषंगः । चित्ररथो ध्रुवः । यत्तो यत्नवान् । प्रतियोगः पुनरुयोगस्तस्माच्छंकितः । नभस्वतो वायोर्हेतोः ॥ २२ ॥ विस्फुरंत्यस्तडितो यस्मिंस्तेन त्रासयंतः स्तनयित्नवोऽशनयो यस्मिंस्तेन ॥ २३ ॥ ववृषुर्निपेतुरित्यर्थः । न सृजति शरीरमित्यसृगिह श्लेष्मादि । मेदसः पुंस्त्वमार्षम् । मेदांसि अस्याग्रतो निपेतुः ॥ २४ ॥ साश्मवर्षिणः अश्मसहितं यद्वर्षं तद्वंतः ॥ २५ ॥ अशानिवन्निःश्वासो येषाम् ॥ २६ ॥ २७ ॥ त्रासनानि भयंकराणि । तिग्मा क्रूरा गतिः प्रवृत्तिर्येषाम् । असुरराक्षसादिशब्दैरदूरांतरत्वेन यक्षा एवोच्यंते ॥ २८ ॥ तस्य शं कल्याणमाशंसन्प्रार्थितवंतः ॥ २९ ॥

वस्थानं चेत्युभयोरेकं प्राप्तं तत्र ध्रुवेण किमकारीत्याशंक्योभयमपि न कृतं मायिजनकुचेष्टाशंकयेत्याह-अपश्यमान इति । स ध्रुवः । तदा यक्षसेनाद्रावणोत्तरकाले सुवर्णाद्यलंकृतामलकां दिदृक्षुरपि यतो मायिजनकुचेष्टा दुर्ज्ञेयाऽतो नाविशदिति ॥ २१ ॥ इति 'न मायिनां वेद' इत्यादिवाक्यमितिपदार्थः । अत एव स्वामिचरणैरित्यत्रापीत्युक्तम् ॥ २२ ॥ २३ ॥ अस्य ध्रुवस्य मेघा इति शेषः ॥ २४ ॥ ततः कबंधपातोत्तरम् ॥ २५ ॥ अशनिर्मेघवह्निज्वाला ॥ २६ ॥ महान् ह्रादो यस्य स महाह्रादः "आन्महतः" इत्यादिना टेरात्वं लक्षणप्रतिपदोक्तपरिभाषा तु समानाधिकरणसामर्थ्यान्न प्रवर्तते ॥ २७ ॥ एवं विधानि कृत्यानि अदूरांतरत्वेन तुल्यकर्मत्वेन तुल्यदेवयोनित्वेनैकस्थानोद्भूतत्वेन च यैरुक्तं जक्षतेमं ब्रह्माणं ते यक्षा यैरुक्तं रक्षत ते राक्षसा यैरुक्तं न सुरांस्त्यजेम तेऽसुरा इति बाल्मीकीये सुरासुरविभागप्रकृते उक्तं यक्षरक्षसां समानजन्मभूमित्वं तृतीयस्कंधविंशाध्याये वर्णितमित्युक्तं स्वामिचरणैरदूरांतरत्वेनेति ॥ २८ ॥ निशाम्य दृष्ट्वा निशम्येति पाठे श्रुत्वेत्यर्थः । 'समाशंसन्' इति पाठेऽपि सं सुखं "संसभेदे समीचीने सुष्टुपूजासुखेषु च" इति यादवोक्तेः । "यञौ शसाविति प्राच्याः" इति व्याकरणांतरसूत्राद्वा । अतएव मा मां जक्षतेत्यत्र जस्थाने यकारो जात इति पूर्वोक्तमनुसंधेयम् । सूत्रार्थस्तु-प्राचां मते यकारजकारौ शकारसकारौ चान्योन्यस्थाने भवत इति ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनय ऊचुः ॥ औत्तानपादे भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् ॥ यन्नामधेयमभिधाय निशम्य चाद्धा लोकोंजसा तरति दुस्तरमंग मृत्युम् ॥ ३० ॥ इति श्रीभा० म० चतुर्थ० दशमोऽध्यायः ॥ १० ॥ ॥ मैत्रेय उवाच ॥ निशम्य गदतामेवमृषीणां धनुषि ध्रुवः ॥ संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम् ॥ १ ॥ संधीयमान एतस्मिन्माया गुह्यकनिर्मिताः ॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा ॥ ॥ २ ॥ तस्याऽऽर्षमस्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः ॥ विनिःसृता निर्विविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखंडिनः ॥ ३ ॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ॥ तमभ्यधावन्कुपिता उदायुधाः सुपर्णमुन्नद्धफणा इवाहयः ॥ ४ ॥ स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ॥ निनाय लोकं परमर्कमंडलं व्रजंति निर्भिद्य यमूर्ध्वरेतसः ॥ ५ ॥ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः ॥ औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः ॥ ६ ॥

तव विपक्षाञ्छत्रून्नाशयतु । अद्धा साक्षात् । अंजसा सुखेनैव मृत्युं तरति ॥ ३० ॥ इति श्रीमद्भागवते म० चतुर्थस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥ एकादशे तु यक्षाणां क्षयं दृष्ट्वा मनुः स्वयम् ॥ आगत्य वारयामास ध्रुवं तत्त्वोपदेशतः ॥ १ ॥ एवं गदतां वचनमुपदेशमिव निशम्य उपस्पृश्याचम्य यन्नारायणनिर्मितं नारायणास्त्रं तत्संदधे ॥ १ ॥ क्लेशा अविद्यास्मितारागद्वेषाभिनिवेशा यथा ॥ २ ॥ किं च तस्य ध्रुवस्यार्षास्त्रमृषेर्नारायणादुद्भूतमस्त्रं प्रयुंजतः संदधतः सतः सुवर्णमयाः पुंखा मूलप्रांता येषाम् ॥ कलहंसानां वासांसि पक्षा येषां ते शरा विनिःसृता इति द्रष्टव्यम् । उपरिष्टाच्छिलीमुखग्रहणात् ॥ ३ ॥ प्रधने युद्धे उन्नद्धा उच्छ्रिताः फणा येषां तेऽहयः सर्पाः ॥ ४ ॥ पृषत्कैर्बाणैर्निकृत्ता बाह्वादयो येषां तान् । परं लोकं निनाय । कथंभूतं लोकम् । ऊर्द्ध्वरेतसः संन्यासिनोऽर्कमंडलं निर्भिद्य यं व्रजंति तम् ॥ ५ ॥ताननागसो

मृत्युं तैरंति त्वं किं यक्षमायां न तरिष्यसि किं तु तरिष्यस्येवेति नारायणास्त्रं स्मारयामासुरित्यर्थः ।यद्वा ''यन्नामधेयमभिधाय'' इत्यनेन भगवन्नाम स्मृत्वा युध्यतस्तव शत्रुजयः स्यादित्युपदिष्टमिति ध्येयम् । औत्तानपाद इति । क्षत्रियत्त्वात्तव युद्धे भयं नोचितं, यद्वा-उत्तानावुच्चौ सामंतराजमूर्द्धसु पादौ यस्य स उत्तानपात्तस्यापत्यं त्वमपि तादृश एवाधुनैवैषां मूर्ध्नि पदं धास्यसीत्यभिप्रायः । अंगेति संबोधनेऽव्ययम् ॥ ३० ॥ इति श्रीमद्भागवत भावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे दशमोऽध्यायः ॥ १० ॥ ॥ तत्त्वोपदेशतः ज्ञानोपदेशेन (१) आसुरमायानाशे समर्थं नारायणास्त्रमेवेति जानन्ध्रुवो मुनिभिरप्येतदेवोपदिष्टमिति तदस्त्रं संदधे ॥ १ ॥ एतस्मिन्नारायणास्त्रे योजिते सति क्लेशाः पञ्च ''अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः'' इति पतंजलिसूत्रात् । विदुरेति । यथा तव वेदनशीलस्य क्लेशो नास्तीत्यभिप्रायः ॥२॥ तस्यास्त्रस्य फलमाह—किं चेति । सुवर्णालंकृताः पुंखा ज्यानुसंधानप्रदेशाः येषां ते तथा । 'वस-आच्छादने' वस्त आत्मानमनेनेति वासस्तेन पक्षा लक्ष्यंते कलहंसानां वासांसि पक्षा इव पक्षा येषां ते कलहंसवाससः ॥ ३ ॥ ''तिग्मं तीक्ष्णं खरं तद्वत्'' इत्यमरः । तं ध्रुवम् ॥ ४ ॥ स तान् परं सत्यलोकं, भगवद्भक्तहस्तमृतितो विशिष्टस्वार्गिणो बभूवुः 'आब्रह्मभुवनाँल्लोकाः पुनरावर्त्तिनोऽर्जुन' इति गीतोक्तेरावर्त्तयिष्यत एव तेन तु संन्यासिसाहचर्य्यात्तेषां मुक्तिर्व्याख्येया स्वयं भगवन्तं श्रीकृष्णं विना संग्राममृतानां कालनेम्यादीनामवतारांतरेभ्योऽपि मोक्षाश्रवणादर्शनाभ्याम् ॥ ५ ॥ चित्रोऽद्भुतो रथांतरविलक्षणो रथो गमनसाधनसाधर्म्याद्वारपदप्रापकस्तपोविशेषो यस्य स चित्ररथः । यद्वा—चैत्ररथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुरुवाच ॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना ॥ येन पुण्यजनानेतानवधीस्त्वमनागसः ॥ ७ ॥ नास्मत्कुलोचितं तात कर्मैतत्सद्विगर्हितम् ॥ वधो यदुपदेवानामारब्धस्तेऽकृतैनसाम् ॥ ८ ॥ नन्वेकस्यापराधेन प्रसंगाद्बहवो हताः ॥ भ्रातुर्वधाभितप्तेन त्वयांग भ्रातृवत्सल ॥ ९ ॥ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनाम् ॥ यदात्मानं पराग्गृह्य पशुवद्भूतवैशसम् ॥ १० ॥ सर्वभूतात्मभावेन भूतावासं हरिं भवान् ॥ आराध्याऽऽप दुराराध्यं विष्णोस्तत्परमं पदम् ॥ ११ ॥ स त्वं हरेरनुध्यातस्तत्पुंसामपि संमतः ॥ कथं त्ववद्यं कृतवाननुशिक्षन्सतां व्रतम् ॥ १२ ॥ तितिक्षया करुणया मैत्र्या चाखिलजंतुषु ॥ समत्वेन च सर्वात्मा भगवान्संप्रसीदति ॥ १३ ॥

निरपराधान् ॥ ६ ॥ तमसो नरकस्य द्वारेण येन रोषेण ॥ ७ ॥ ८ ॥ ननु मद्भ्रातृहंतारः कथमकृतैनसोऽत आह । नन्विति ॥ ९ ॥ नन्वेकस्य दोषः सर्वेषां संसर्गिणां भवतीत्याशंक्य सत्यप्यपराधे तवैतदुचितं न भवतीत्याह । नायमिति । पराग्गृह्य पराग्भूतं देहमात्मानं गृहीत्वा आत्मत्वेन पशवो यथा देहाभिमानादन्योन्यं घ्नंति तथा भूतानां वैशसं हिंसेति यत् ॥ १० ॥ त्वं च बाल्ये साधुः सन्निदानीं कथमन्यथा कृतवानित्याह सर्वभूतात्मभावेनेति द्वाभ्याम् ॥ ११ ॥ अनुध्यातो हरेर्हृदि स्थितो विज्ञातो वा तत्पुंसां हरिदासानामपि साधुत्वेन मतः ॥ १२ ॥ सतां व्रतमेवाह । महत्सु तितिक्षया नीचेषु करुणया समेषु मैत्र्याऽखिलेषु जंतुषु

कुबेरोद्यानं गतो यक्षनाशमुद्दिश्येति चित्ररथः अत्रार्षत्वाद्भूतभव्यवृद्ध्यभावोऽण् प्रत्ययश्च गतार्थे तथा च ध्रुव इति निर्णीतम् । यद्वा—चित्ररथेन विमानेनार्षीभिः सहोपेयातो मनुरिति योज्यम् ॥६॥ वत्सेति । वत्सोपलक्षित वृषभाणामतिरोषो भवति तद्वत्त्वद्यपियुक्तस्तत्साम्यावातेरित्याह । यद्वा प्रियत्वात्त्वामहं वारयामीत्यभिप्रायः तमोद्वारेण यथार्थज्ञानप्रतिबंधकत्वेन मोक्षनिरोधकत्त्वात्संसारहेतुनेत्यर्थः ॥ ७ ॥ ८ ॥ अत्राक्षिपति—नन्वकृतापराधत्वं कथं भ्रातृवधलक्षणापराधप्रसिद्धेरिति चेत्तत्राह-नन्विति । ननु निश्चये एकस्य त्वद्भ्रातृहंतुर्यक्षस्यापराधेन तत्संगाद्धेतोरित्यर्थः । भ्रातृवत्सलेति । भगवद्भक्तस्य सर्वत्र भगवंतं पश्यतस्तव देहसंबंधिषु देहेषु स्नेहो नोचितः किन्तु सर्वत्रैवेति भावः ॥ ९ ॥ उक्तमर्थं विशदयन्नाह व्यावहारिकस्नेहपारवश्यं भक्तानां नोचितं किं पुनस्तेन परहिंसेत्यभिप्रायेण स्वाम्याह-सत्यपीति । एतद्यक्षहिंसनं पराग्भूतं जडम् आत्मानं गृहीत्वात्मत्वेन मत्वा पशवो मूढाः ''पशुर्मूढे वृषादौ च देवदेयबलौ तथा'' इति निरुक्तिः । परेति पाठे 'परा-निराकरणेर्थे' आत्मानमगृहीत्वाऽज्ञात्वेत्यर्थः । हृषीकेशानुवर्त्तिनां सर्वत्रांतर्यामित्वेन भगवंतं पश्यताम् । इति यत् अयमिति विधेयापेक्षं पुंस्त्वम् ॥ १० ॥ हृषीकेशानुवर्त्तित्वं तस्याप्याह-त्वं चेति । तत्प्रसिद्धम् । भूतेषु प्राणिष्वावासो यस्य भूतान्यावसंत्यस्मिन्निति वा भूतावासस्तम् ॥ ११ ॥ तव तु भक्तेष्वप्यतिप्रियस्यैतदत्यंतमनुचितमित्याह । यस्त्वपदमाप स त्वं हरेरनु निरंतरं ध्यातं ध्यानं यस्मिन्स तथा वात्सल्याद्धरिणापि स्मर्यमाण इत्यर्थः । तत्पुंसां नारदादीनामपि संमतः । कृपापात्रीकृतः । संदर्भस्तु—तत्पुंसामिति हर्य्यनुसंध्यातत्वेपि न प्रौढिमान् किं तु तद्भक्तजनसंमतिं गृहीत्वैव सर्वमनुष्ठातेत्यर्थः । यथोक्तमंबरीषमुद्दिश्य स वै मन इत्यादौ 'यथोत्तमश्लोकजनाश्रया रतिः' इति ॥ १२ ॥ महत्सु तितिक्षयेति । पूर्वोक्त 'गुणाधिकान्मुदं लिप्सेत्' इतिन्यायानुरोधेन ध्येयम् । चक्रवर्त्ती तु—समत्वेन स्वतुल्यहर्षशोकक्षुत्पिपासादिभावनया । तदुक्तम् ''आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः ॥'' इति । सर्वात्मेति । सर्वभूतेषु तुष्यत्सु भगवत्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः ॥ विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति ॥ १४ ॥ भूतैः पंचभिरारब्धैर्योषित्पुरुष एव हि ॥ तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह ॥ १५ ॥ एवं प्रवर्तते सर्गः स्थितिः संयम एव च ॥ गुणव्यतिकराद्राजन्मायया परमात्मनः ॥ १६ ॥ निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः ॥ व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत् ॥ १७ ॥ स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः ॥ करोत्यकर्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या ॥ १८ ॥ सोऽनंतोंतकरः कालोऽनादिरादिकृदव्ययः ॥ जनं जनेन जनयन्मारयन्मृत्युनांतकम् ॥ १९ ॥

समत्वेन च ॥ १३ ॥ ततः कृतार्थो भवतीत्याह । संप्रसन्ने सति गुणैर्विमुक्तोऽत एव तत्कार्येण जीवेन लिंगशरीरेण निर्मुक्तः सन्निर्वाणं सुखात्मकं ब्रह्म प्राप्नोति ॥ १४ ॥ भ्रातृहंतृत्वमंगीकृत्योक्तम्—इदानीं तु नात्मनो भ्रातृपुत्रादिसंबंधो न चान्योन्यं हंतृत्वादिकमपीत्याह भूतैरिति दशभिः । भूतैः पंचभिरारब्धैर्देहाद्याकारेण परिणतैर्योषित्पुरुषश्चेति प्रसिद्धिः । तयोर्व्यवायान्मैथुनात्संभूतिरन्ययोर्योषित्पुरुषयोरिह संसारे भवति ॥ १५ ॥ एवं तावत्सर्गः प्रवर्तते । एवं पालकाकारेण परिणतैर्भूतैरेव स्थितिर्हंतृदेहाकारेण परिणतैः संयमः संहारः । स च परमात्मनो मायया गुणानां व्यतिकरान्न तु स्वतः ॥ १६ ॥ ननु जडानां देहानां गुणानां वा कथं सर्गादिहेतुत्वं तत्राह । निमित्तमात्रं पुरुषर्षभ ईश्वरः यत्र यस्मिन्निमित्ते सति कार्यकारणात्मकं विश्वं भ्रमति परिवर्तते यथायस्कांते निमित्ते सति लोहं प्रवर्तते तद्वत् ॥ १७ ॥ ननु स चेन्निमित्तं तर्हि तस्याविशेषाद्युगपदेव सर्गादित्रयं भवेदत आह । स खल्विति । कालशक्त्या क्रमेण गुणानां प्रवाहः क्षोभस्तेन विभक्तं सृष्ट्यादिविषयं वीर्यं शक्तिर्यस्य । ननु कालोऽपि गुणान्युगपदेव क्षोभयतु तत्राह । चेष्टा कालशक्तिर्दुर्विभाव्याऽचिंत्या ॥ १८ ॥ ननु पित्रादिः सृजति पालयति राजादिर्निहंति च चोरादिर्न त्वीश्वरस्त

षोऽनुमेय इत्यर्थः ॥ १३ ॥ ततस्तितिक्षादिभिर्भगवत्तोषात् । अत एव प्राकृतगुणविमुक्तत्वादेव निर्वाणं ज्ञानी चेत्सायुज्यं भक्तश्चेदधोक्षजालंबनकं दास्यम् । "अधोक्षजालंबमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् । तद्ब्रह्मनिर्वाणसुखं विदुर्बुधाः" इति प्रह्लादोक्तेस्तदा प्राकृतैर्गुणैर्विमुक्तोऽप्राकृतैर्विशिष्ट इत्यर्थः ॥ १४ ॥ इदं भ्रातृहंतृत्वं यक्षाणामंगीकृत्योक्तमिदानीं तु विचार्यमाणे तु वस्तुनि कः कस्य हंता वध्यो वेत्याह—नात्मन इत्यादिना ॥ १५ ॥ पालकाकारेण नृपाद्याकारेण हंतृदेहा दस्युव्याघ्रसर्पाद्यास्तदाकारेण परिणतैः संयमो नाशश्च व्यतिकरादन्यतमाधिक्यात् रजसा सर्गः सत्त्वेन स्थितिस्तमसा संहार इत्यर्थः ॥ १६ ॥ पुनरत्राक्षिपति-नन्विति । परिवर्त्तते जडमपि चेतनी भवति लोहं प्रवर्त्तते तद्वद्यथा निश्चेष्टमपि सचेष्टं भवतीत्यर्थः ॥ १७ ॥ पुनः प्रतिवंद्याक्षिपति—नन्विति । करोतीति गुणकालजीवानां तच्छक्तित्वेन तद्भेदाभावात्स एवोपादानकारणं स एव निमित्तकारणं चेत्यर्थः । अकर्त्तेति । तेषां गुणादीनां स्वरूपभूतत्वाभावात् एवं हंतेत्यहंतेत्यपि । अत्र पुनराक्षिपति—ननु विश्वं किमर्थं करोति सर्वदा किं न करोति विषमं किं करोतीति सर्वाक्षेपपरिहारार्थमाह चेष्टेति—अचिंत्याऽतर्क्या ॥ १८ ॥ पुनराक्षिपति—नन्विति । अत्राशयमाह—अयं भाव इति । अन्वयः चिंतामणिरिव सर्वप्रसवितापि व्ययशून्यः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न वै स्वपक्षोऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः ॥ तं धावमानमनु धावत्यनीशा यथा रजांस्यनिलं भूतसंघाः ॥ २० ॥ आयुषोऽपचयं जंतोस्तथैवोपचयं विभुः ॥ उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ ॥ २१ ॥ केचित्कर्म वदंत्येनं स्वभावमपरे नृप ॥ एके कालं परे दैवं पुंसः काममुतापरे ॥ २२ ॥ अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च ॥ न वै चिकीर्षितं तात को वेदाऽथ स्वसंभवम् ॥ २३ ॥

त्राह । स इति । जनेन पित्रादिना जनं पुत्रादिं जनयन्नादिकृत् अंतकं चोरादिकं तन्मृत्युहेतुना राजादिना मारयन्नंतकरः स्वयं त्वनंतोऽनादिश्च अव्ययोऽक्षीणशक्तिश्च । अयं भावः । पित्रादयोऽन्यत उत्पत्त्यादिमंतो न स्वातंत्र्येण कारणं किं त्वीश्वर एव तन्नियंता सर्वकारणमिति ॥ १९ ॥ न चैवं कुर्वतोऽपि वैषम्यप्रसक्तिः—पक्षपाताभावादित्याह द्वाभ्याम् । न वा इति । मृत्युरूपस्य समं यथा भवति तथा प्रजाः कर्मभूता विशतः तस्य साम्येऽपि भूतेषु फलवैषम्यं तत्कर्मवशादिति सदृष्टांतमाह । तं धावंतमन्वनीशाः कर्माधीना भूतसंघा धावंति अनिलं धावंतमनु रजांसीव तत्र यथा रजसां तमःप्रकाशजलाग्न्यादिप्रवेशेऽपि नानिलस्य वैषम्यमेवमीश्वरस्यापीति भावः ॥ २० ॥ अपचयमकालमृत्युम् । उपचयं कालमृत्योरपि रक्षाम् । यद्वा अपचयं मशकादावुपचयं देवादौ । स्वस्थत्वादुभाभ्यामुपचयापचयाभ्यां रहितोऽसौ विभुर्दुःस्थस्य कर्माधीनस्य जन्तोर्जीवस्य विदधाति ॥ २१ ॥ एवंभूतश्चेश्वरः सर्ववादिसंमतो विवादस्तु नाममात्र इत्याह । केचिदिति । पुंसः कामं वात्स्यायनादयः । श्रुतिश्च—"कामोऽकार्षीत्कामः करोति कामः कर्ता कामः कारयिता" इत्यादिः ॥ २२ ॥ ननु कर्मादीनां जडत्वादिना स्वरूपतोऽपि भिन्नत्वात्कथमैकमत्यं तत्राह । अव्यक्तस्यात एवाप्रमे

तर्हि विषमस्स इति चेदाह—न चेति । तत्कर्म तथात्वात्तेषां भूतानां कर्मण एव तथात्वाद्वैषम्यजनकत्वात् । इति भाव इति । ईश्वरस्तु—जडानां कर्मणां प्रेरकतया तदनुसारेणैव फलं ददाति न स्वतोऽतस्तत्र वैषम्यं नास्तीत्याशयः ॥ २० ॥ आयुरादिफलयाचकत्वेनांतादिकर इत्युक्तं स्पष्टयति । अकाल मृत्युं दुर्मृतिं "श्रृंगिदंष्ट्रिगरव्यालनीराग्न्युद्बंधनैस्तथा । विद्युन्निर्घातवृक्षैश्च विप्रैश्चैवात्मना मृताः ॥ व्रणसंजातकीटाश्च म्लेच्छैश्चैव हता नराः । पापमृत्यव एवैते ह्यन्येपि बहवस्तथा ॥ दुर्मृतिः पापमरणमकालमरणं तथा । पर्याया एव विज्ञेया न कालेन विना मृतिः" इति पराशरादिभिरुक्तत्वात् । कालमृत्युस्त्वायुषोंते स्वभावत एव देहपातः हानिवृद्धिरूपप्रसिद्धाक्षरार्थत्यागेन तंत्रातरावलंबनेन चोपचयापचयपदव्याख्याने गौरवं मत्वाह—यद्वेति । आदिना दंशादिग्रहः मशकादीनामेकस्मिन्नेव दिवसेऽनेकजन्मलाभोपलंभादपचयस्त्वमेव । द्वितीयादिना गंधर्वादिग्रहः देवादीनां यावदधिकारस्थितिश्रवणात् स्वस्थत्वात्स्वरूपस्थितिमत्त्वात् । असाविति प्रकृतपरामर्शी कालशक्तिरीश्वर इत्यर्थः ॥ २१ ॥ एवंभूत उपचयापचयरहितः । केचिन्मीमांसकाः । अपरे चार्वाकादयः । एके पौराणिकादयः । परे मौहूर्त्तिकाः । दैवं ग्रहादिरूपां देवताम् । अपरे वात्स्यायनादयः । आदिना भरतादिग्रहः । कामस्य सर्वहेतुत्वे प्रमाणमाह—श्रुतिश्चेति कामः संकल्पः । नृपेति । एते वादा नृपत्वात्तव श्रुतप्राया एव राज्ञां सर्वविधविद्वत्संगस्य सुलभत्वादित्यभिप्रायः । अतो ज्ञानाभावात् इत्यर्थ इति । अनेकविधवादस्तत्पदार्थतात्पर्यापरिज्ञानेनैवेति ध्येयम् । वस्तुतस्तु तत्तन्नैव भेद इति । एनं प्रकृतम् । अन्वादेशत्वादेतद एनदादेशः ॥ २२ ॥ अत्राक्षिपति—नन्विति । अव्यक्तस्य कैरपि बलबुद्ध्यादिभिर्व्यक्तीकर्तुमशक्यस्या अत एव अव्यक्तत्वादेवं । अप्रमेयस्य प्रत्यक्षादिप्रमाणैः प्रमातुमशक्यस्य नानाशक्तीनां कालकर्मस्वभाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चैते पुत्रक भ्रातुर्हंतारो धनदानुगाः ॥ विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ॥ २४ ॥ स एव विश्वं सृजति स एवावति हंति च ॥
अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः ॥ २५ ॥ एष भूतानि भूतात्मा भूतेशो भूतभावनः ॥ स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च ॥
॥ २६ ॥ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणम् ॥ यस्मै बलिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः ॥ २७ ॥

यस्य । तथाप्यस्य सत्त्वे हेतुः । नानाशक्तीनां महदादीनामुदयो यस्मात् । चिकीर्षितमेव तावत्कोऽपि न वेद अथ स्वस्य संभवो यस्मात्तमीश्वरं को वेद न कोऽपि । अद्धेति पाठे साक्षात् । अतस्तस्य तत्त्वज्ञानाभावाद्विशेषांशे विवाद इत्यर्थः । तथा च श्रुतिः—"को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ " इत्यादिः ॥ २३ ॥ ईश्वरवादस्य प्रकृतोपयोगमाह । न चैते भ्रातुर्हंतारः । अत्रोक्तमेव हेतुमनुवदति । विसर्गादानयोर्मृत्युजन्मनोः । यद्वा विसर्गः सृष्टिः आदानं संहारः । दैवमीश्वर एव हि कारणम् ॥ २४ ॥ तथापि निर्लेपतामाह । स एवेति ॥ २५ ॥ अनहंकारत्वे हेतुमाह । एष इति ॥ २६ ॥ सत्यमीश्वर एव कर्ता तथाप्यहंकारादि मया न त्यक्तुं शक्यमिति चेदत आह तमेवेति चतुर्भिः । मृत्युमभक्तानां भक्तानां त्वमृतम् उपेहि शरणं गच्छ तमेवेत्यवधारणे हेतुः । यस्मै नसि नासिकायां दामभिर्बद्धा गाव इव विश्वसृजोऽपि नामभिर्यंत्रिता बद्धाः संतो बलिं हरंति तत्कारितं कर्म कुर्वंतीत्यर्थः ॥ २७ ॥

कामादीनामुदयो यस्मादिति । तस्यैकैकां शक्तिमाश्रित्यैव विवदमानानां तेषां शक्तिमति तस्मिन्वस्तुतो नास्त्येव वाद इति भावः अथास्येत्यर्थः । चिकीर्षितमपि यस्य न ज्ञायते तस्य ज्ञानं तु कथं स्यादिति तदुक्तं भीष्मेण "न ह्यस्य कर्हि चिद्राजन्पुमान्वेद विधित्सितम् । यद्विजिज्ञासया युक्ता मुह्यंति कवयोऽपि हीति । तीर्थस्तु—को वेदाद्धास्य संभवम्' इति पाठमाह—को ब्रह्माऽस्य संभवं वेद सोप्यद्धा न जानातीति व्याचख्यौ च तदुपरिज्ञाने प्रमाणमाह—तथा चेति । सर्ग उत्पत्तिस्तद्विरुद्धो विसर्गो मृत्युः ॥२३॥ आदानमत्र देहस्वीकारः विसर्गस्य सृष्टिपरत्वादादानस्य च संहारपरत्वादाह—यद्वेति । "आदानं स्वीकृतौ नाशे विसर्गः सृष्टिदानयोः" इति स्वाम्युक्तेः । पुत्रस्य कं सुखं येन स पुत्रकः पौत्रस्तत्संबुद्धौ तथा । तव हिंसादिकर्मपरत्वे तस्य सुखं न स्यादिति भावः ॥ २४ ॥ तथापि विसर्गादानयोर्हेतुत्वेपि कर्दमक्षेत्रप्रवृत्तदेवदत्तवद्गुणकर्मभिर्गुणकार्य भूतैः सृष्ट्यादिभिरस्य लेपो नास्ति अहं कर्त्तास्मीत्याद्यभिमानाभावात् ॥ २५ ॥ मायया युक्तः मायाया बहिरंगत्वेन स्वरूपशक्तित्वाभावात्तत्कार्येषु तस्याहंकारो नोदयत इति भावः । भूतानामात्मा कारणमीशो नियामकः भावनस्तद्रूपतापादकस्तत्र हेतुः स्वशक्त्येति संदर्भः ॥ २६ ॥ अति प्रियत्वादाह—तातेति । यद्वा—तातस्य पितुर्दैवमुपास्यम् । इत्यर्थ इति । "सृजामि तन्नियुक्तोहं हरो हरति तद्वशः' इत्याद्युक्तेरिति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा ॥ वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्ध्नि पदं त्रिलोक्याः ॥ २८ ॥ तमेनमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरम् ॥ आत्मानमन्विच्छ विमुक्त आत्मदृग्यस्मिन्निदंभेदमसत्प्रतीयते ॥ २९ ॥ त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपसन्नसमस्तशक्तौ ॥ भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढम् ॥ ३० ॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परम् ॥ श्रुतेन भूयसा राजन्नगदेन यथाऽऽमयम् ॥ ३१ ॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशम् ॥ न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः ॥ ३२ ॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम् ॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ॥ ३३ ॥

तदाराधनं च तव सुशकमेवेत्याह । यः पंचवर्षः स त्वं यमाराध्य त्रिलोक्या मूर्ध्नि पदं स्थानं लेभे लब्धवानसि इदानीं तमेवान्विच्छावलोकयेत्युत्तरेणान्वयः । प्रत्यंचि अक्षाणि इन्द्रियाणि यस्मिन् । क्रियाविशेषणं वा ॥ २८ ॥ हरिं ध्यायंतं प्रत्याह । हे अंग ध्रुव मुक्तविरोधे आत्मनि मनसि व्यपाश्रितमवस्थितं परमात्मानमात्मदृक् प्रत्यग्दृष्टिः सन् । इदंभेदमिति समस्तं पदम् । अयं दृश्यमानो भेदो यस्मिंस्तदिदंभेदमसदेव विश्वं यस्मिन्नधिष्ठाने प्रतीयते ॥ २९ ॥ तदन्वेषणफलमाह । त्वं तदा अन्वेषणकाल एव ॥ ३० ॥ उपदेशसारमाह संयच्छेति द्वाभ्याम् । प्रतीपं प्रतिकूलम् । अगदेनौषधेन यथा रोगं नियच्छति ॥ ३१ ॥ येन रोषेणोपसृष्टाद्व्याप्तात् ॥ ३२ ॥ अन्यच्च त्वया

तत्प्रपात्तिं विनाज्ञानेनाहंकारापगमो दुःशक इति भावः ॥ २७ ॥ प्रत्यंचि प्राप्तानि । तत्र सर्वेन्द्रियप्राप्तिमशक्यां मत्वाह—क्रियाविशेषणं वेति । तीर्थस्तु—प्रति प्रतिगतमतींद्रियं यस्य तमनेन मत्क्रियमाणं कर्म नासौ द्रक्ष्यतीति प्रत्युक्तम् ॥ २८ ॥ अयं भेदोऽयं शत्रुरयं मित्रादिरित्ययंशब्दनिर्दिष्टो भेदः । यस्मिन्नन्विष्टे सति असदभद्रमेवारोचकमेवेति चक्रवर्ती ॥ २९ ॥ तदा पंचवर्षवयसि किमिदं स्मरसीति "अभिज्ञावचने लट्" इति । भूतकाल एव लडिति विश्वनाथः ॥ ३० ॥ व्यावहारिकलोकमनुकुर्वंस्तादृशेऽपि भ्रातरि प्रणयं लोके प्रथयन्यद्यपि बहिरेव रोषं धत्से तथापि मदाज्ञया तमपि संयच्छापाकुरु । श्रुतेन मदुपदेशवाक्येन । आमयमिवेति । त्वादृशानां भक्तानां लोके प्रतिष्ठाप्रख्यापनमपि रोग एवेति भावः ॥ ३१ ॥ लोक उद्विजते क्रोध्ययमेतत्पार्श्वे न गंतव्यमुपहासेप्ययं प्रहरिष्यतीति बिभेतीत्यर्थः । तद्वशं रोषवशम् । अभयं गुणातीतत्वं "यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् । आत्मजिज्ञासया यच्छेत्स गुणानतिवर्त्तते" इति प्रचेतसः प्रति पितामहोक्तेः ॥ ३२ ॥ अन्यदुक्तेतरत् । भक्तस्य तवैतन्नोचितमित्याह—जघ्निवानिति । यत्तदेव हेलनमवज्ञानं त्वया कृतमित्यन्वयः । भ्रातृघ्ना इति वा स्वामिपाठः । वैश्रवणस्येशसखत्वात्तदवज्ञानेन शिवावज्ञानं स्यात्तदवज्ञानेन श्रीनारायणविषयं ज्ञानमपि नोदेति 'ज्ञानमिच्छेन्महेश्वरात्' इति स्मृतेस्तस्यैव देवेषूपदेशाधिकारिब्राह्मणदेवत्वादत एव वाराणस्यां तदधीनानेकदेवांतरसत्त्वेप्यन्येषां ब्राह्मणदेवत्वाभावात्स एव सर्वेभ्यो देहांते तारकोपदेशेन ज्ञानं दत्त्वा मोचयतीत्यभिप्रेत्योक्तं गिरिशभ्रातुरिति । धनं विना राज्यपालनमपि दुर्घटं तदातुत्वादपि तस्यापराधो नोचित इत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं प्रसादय वत्साशु सन्नत्या प्रश्रयोक्तिभिः ॥ न यावन्महतां तेजः कुलं नोऽभिभविष्यति ॥ ३४ ॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवम् ॥ तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ ॥ ३५ ॥ इति श्रीभा० म० चतु० मनुकृततत्त्वोपदेशेन यक्षवधनिवारणं नामैकादशोऽध्यायः ॥ ११ ॥ मैत्रेय उवाच ॥ ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान्धनेश्वरः ॥ तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानोऽभ्यवदत्कृतांजलिम् ॥ १ ॥ धनद उवाच ॥ भोभोः क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ ॥ यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः ॥ २ ॥ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव ॥ काल एव हि भूतानां प्रभुरप्ययभावयोः ॥ ३ ॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि ॥ स्वाप्नीवाभात्यतद्ध्यानाद्यया बंध विपर्ययौ ॥४॥ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजम् ॥ सर्वभूतात्मभावेन सर्वभूतात्मविग्रहम् ॥ ५ ॥ भजस्व भजनीयांघ्रिमभवाय भवच्छिदम् ॥ युक्तं विरहितं शक्त्या गुणमय्यात्ममायया ॥ ६ ॥

कार्यमित्याह हेलनमिति द्वाभ्याम् । यद्यतः जघ्निवान् घातितवान् ॥ ३३ ॥ ३४ ॥ ३५ ॥ इति श्रीमद्भागवते चतुर्थे० टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे धनदेनाभिनंदितः पुरमागतः ॥ यज्ञैरिष्ट्वा हरेः स्थानमारुरोहेति कीर्त्यते ॥ १ ॥ वैशसाद्वधान्निवृत्तं ज्ञात्वा ॥ १ ॥ हे क्षत्रियदायाद क्षत्रियपुत्र अत्यजः त्यक्तवानसि ॥ २ ॥ न च वैरस्य कारणमस्तीत्याह । न भवानिति । अप्ययभावयोर्मृत्युजन्मनोः ॥ ३ ॥ कथं तर्ह्यहं हंतेत्यादिबुद्धिस्तत्राह । अहं त्वमिति । आभाति प्रकाशते जायत इत्यर्थः । अतद्ध्यानाद्देहानुसंधानात् यया धिया कर्मात्मको बंधः विपर्ययो दुःखादिश्च ॥ ४ ॥ तत्तस्माद्गच्छगत्वा च भगवंतं भजस्वेत्युत्तरेणान्वयः । सर्वभूतात्मको विग्रहो यस्य तम् ॥५॥ भजनीयावंघ्री यस्य तम् । गुणमय्या शक्त्या युक्तम् । किं तत्त्वतः । न ।आत्ममायया।अतस्तत्त्वतस्तया विरहितं

भिप्रेत्याह—धनदस्येति ॥ ३३ ॥ वत्सेति । प्रियत्वाभिप्रायेण । यद्वा—तर्णकस्वभावनिवृत्त्यर्थं साक्षेपाभिप्रायेण वेति । महतामिति बहुत्वं रुद्राद्यपेक्षया । नाभिभविष्यति न धक्ष्यति ॥ ३४ ॥ ऋषिभिः साकमिति । यदि मनुबोधितो न बुध्येत तदा वयं तं बोधयाम एतदर्थमेवर्षयो मनुना सहागतास्स च तद्बोधित एव निवृत्तवैशसो जातस्ततः परमृषिस्थितिप्रयोजनाभावात्तेपि तेनैव साकं ययुरित्याशयः । स्वपुरं स्वं लोकम् । यद्वा तेन प्रार्थितो मनुर्ऋषिभिः सहैव स्वपुरं ध्रुवराजधानीपुरमित्यर्थः ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ (१) "युद्धे हिंसाक्रूरयोश्च वैशसस्त्रिषु वर्त्तते" इति निरुक्तिः । यत्र मनुनोपदिष्टं तत्रेत्यर्थः ॥ १ ॥ भोभो इति संबुद्धिद्वये पृथग्योज्यम् । क्षत्रियदायादेति युद्धलक्षणक्षत्रधर्मनिष्ठत्वात् । अनघेति समर्थेनापि प्राक्तनमात्सर्याद्भ्रातृहंता न हत इति लोकापवादरूपाद्यातिवर्त्तनायैवं त्वया यक्षवधादिकृतमन्यथा हरिभक्तस्य तवात्र प्रवृत्तिर्न संभवतीत्यभिप्रायः । स्वधर्मनिष्ठत्वाल्लोकापवादभीतत्वाच्च तवाहं प्रीतोस्मि परितोषे कारणांतरमप्याह । यस्त्वमिति ॥ २ ॥ मद्भृत्ययक्षहंतृत्वं तव नास्तीति ममापि त्वया साकं वैरं नास्तीति मनोः स्वस्य चैकमत्यं व्यंजयन्नाह—न भवानिति । प्रभुः कारणम् ॥ ३ ॥ अत्र ध्रुवः शंकते—कथमिति । पुरुषस्यात्मनोऽज्ञानात् । इत्यर्थ इति । अनेकार्थत्वाद्धातूनामत्र भातेराविर्भावार्थत्वमुपसर्गवशाद्वेति भावः ॥ ४ ॥ यतोऽहंकारादिकमात्माज्ञानकार्यमेव तन्निवृत्तये भगवद्भजनमेव कार्यमतस्तदपवादार्थं "भज सर्वात्मना हरिम्" इति श्रीरुद्रगीतोक्तेस्तस्माद्धेतोः, विग्रहो देहः ॥ ५ ॥ युक्तं सृष्ट्यादिकाले ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशंकितः ॥ वरं वरार्होंबुजनाभपादयोरनंतरं त्वां वयमंग शुश्रुम ॥ ७ ॥
मैत्रेय उवाच ॥ स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः ॥ हरौ स वव्रेऽचलितां स्मृतिं यया तरत्ययत्नेन दुरत्ययं तमः ॥
॥ ८ ॥ तस्य प्रीतेन मनसा तां दत्त्वैडविडस्ततः ॥ पश्यतोंऽतर्दधे सोऽपि स्वपुरं प्रत्यपद्यत ॥ ९ ॥ अथायजत यज्ञेशं क्रतुभिर्भूरिदक्षिणैः ॥
द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदम् ॥ १० ॥ सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिमुद्वहन् ॥ ददर्शात्मनि भूतेषु तमेवावस्थितं विभुम् ॥ ११ ॥
तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलम् ॥ गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥ १२ ॥ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमंडलम् ॥ भोगैः
पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥ १३ ॥ एवं बहुसवं कालं महात्माऽविचलेंद्रियः ॥ त्रिवर्गौपयिकं नीत्वा पुत्रायादान्नृपासनम् ॥ १४ ॥

यद्वा शक्त्यात्ममायया विरहितं च सगुणनिर्गुणभेदेन ॥ ६ ॥ काममसंकोचेन अविशंकितो निर्भयः अनंतरमतिनिकटम् ॥७॥ स वराय चोदित इत्यनुवादरूपं पृथग्वाक्यम् ।
अतः स वव्र इति तच्छब्दस्यापौनरुक्त्यम् ॥ ८ ॥ ९ ॥ द्रव्यादिशब्दैर्यज्ञादिकर्म लक्ष्यते । द्रव्यक्रियादेवतानां कर्म साध्यं तत्फलरूपं कर्मफलप्रदं चेत्यर्थः ॥ १० ॥
सर्वस्यात्मनि असर्वे सर्वोपाधिविवर्जिते ॥ ११ ॥ १२ ॥ भोगैरैश्वर्यादिभिः अभोगैर्यज्ञाद्यनुष्ठानैः ॥ १३ ॥ बहवः सवा यागाः संवत्सरा वा यस्मिंस्तं कालं त्रिवर्गौपयिकं

विरहितमन्यदा ॥६॥ नृपेति । राज्यपालनोपयोगिवरदानार्हस्त्वमसीत्याह । तत्र हेतुत्वेन पितृनाम्ना मंत्रयति–औत्तानपद इति । त्वं राजास्यहं च राजराजोस्म्यतोन्वर्थनामकरणेच्छया वरदाने प्रवृत्तिः ! वस्तुतस्तु हरिभक्तस्य तवादेर हरिरेवादतः स्यादित्याह–वरार्ह इति ॥ ७ ॥ तमः संसारम् ॥ ८ ॥ तस्य ध्रुवस्य ततः तां भगवत्यचलितस्मृतिम् । इडविडाया अपत्यमैलविलः डलयोरैक्यं कुबेरः । ततो वरदानानंतरम् । सोऽपि ध्रुवोऽपि ॥ ९ ॥ अथ नगरमागत्य । इत्यर्थ इति । द्रव्यक्रियादेवतानां पुरोडाशावहननेंद्रादिदेवतार्चनाभिर्भगवानेव फलरूपेण साध्यते । स एव कर्मवैगुण्यनिवर्त्तकत्वेन सत्फलदाता चेति भावः । विश्वनाथस्तु–द्रव्यक्रियादेवता संबंधिकर्मप्रदं कर्मफलप्रदश्चेत्यर्थः । स एव कर्म कारयति स एव कर्मफलं योजयतीति भाव इत्याह ॥१०॥ राजानो हि देवब्राह्मणादितर्पका न क्रतून्कुर्वंति तान्विना न राज्ञो व्यवहारसिद्धिरिति तदनुरोधेनैव तस्य यज्ञादिकर्मकरणं स्वप्रतिमूर्त्तिद्वारैव । वस्तुतस्तु–स स्वयमवकाशमेव कर्मणि नैव लभत इत्याह–सर्वात्मनीति । तीव्रौघां कालव्यवधानरहिताम् । आत्मन्यंतःकरणे भूतेषु बहिरपि तद्ध्यानपरिपाकात्स्फूर्त्या तमेव यं पुरा तपसा प्रत्यक्षी चकारेत्यर्थः । अत्र तीर्थोऽकारप्रश्लेषं विना व्याचख्यौ सर्वे पूर्णे "विश्वः पूर्णस्तथा सर्वस्समस्तश्चाभिधीयते" इत्यभिधानात् । "सर्वः शर्वः शिवः स्थाणुः" इति नामत्वात्सर्वनामसंज्ञाभावात्स्मिन्नादेशाभावः ।"सर्वादिः सर्वकार्यी स्यान्न चेद्गौणोऽथ वाभिधा" इत्युक्तेः ॥ ११ ॥ १२ ॥ आदिना व्रतनियमादिग्रहः । कुर्वन् कर्त्तुमिच्छन्नित्यर्थः । अत्र तुमर्थे शतृप्रत्ययः । तुमुनि च सर्वत्रेच्छतिराक्षेपलब्ध एव । यथा देवदत्तो भोक्तुं व्रजतीत्यत्र भोक्तुमिच्छन्व्रजतीत्यर्थो लभ्यते इति तस्य पुण्यपापक्षयचिकीर्षा दैन्येनैव । वस्तुतस्तूत्पन्नप्रेमत्वात्तस्य पुण्यपापे नैव स्त इति पूर्वं भगवदवतारेषु गणनयापि तस्य ते नोचिते इति भावः ॥ १३ ॥ "सर्वः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्यमान इदं विश्वं मायारचितमात्मनि ॥ अविद्यारचितस्वप्नगंधर्वनगरोपमम् ॥१५॥ आत्मरूयपत्यसुहृदो बलमृद्धकोशमंतःपुरं परि विहारभुवश्च रम्याः ॥ भूमंडलं जलधिमेखलमाकलय्य कालोपसृष्टमिति स प्रययौ विशालाम् ॥ १६ ॥ तस्यां विशुद्धकरणः शिववार्विगाह्य बद्ध्वाऽऽसनं जितमरुन्मनसा हृताक्षः ॥ स्थूले दधार भगवत्प्रतिरूप एतद्ध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥ १७ ॥ भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयः पुलकाचितांगो नात्मानमस्मरदसाविति मुक्तलिंगः ॥ १८ ॥ स ददर्श विमानाग्र्यं नभसोऽवतरद् ध्रुवः ॥ विभ्राजयद्दश दिशो राकापतिमिवोदितम् ॥ १९ ॥ तत्रानुदेवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजेक्षणौ ॥ स्थिताववष्टभ्य गदां सुवाससौ किरीटहारांगदचारुकुंडलौ ॥ २० ॥ विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतक्रमः ॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहतांजलिः ॥ २१ ॥

त्रिवर्गसाधकं नीत्वा अविचलानि संयतानींद्रियाणि यस्य ॥ १४ ॥ इदं देहादि भगवन्माययात्मनि स्वस्मिन् रचितं मन्यमानः । अत्राविद्यासृष्टिं दृष्टांतयति । अविद्यारचितेति ॥ १५ ॥ आत्मा देहः । आत्मादि मायिकमपि पुनः कालेनोपसृष्टमनित्यमाकलय्य विचिंत्य विशालां वदरिकाश्रमम् ॥ १६ ॥ तत्र तत्कृतमष्टांगयोगमाह । तस्यां शिवं वाः उदकं विगाह्य प्रविश्येति स्नानादिनियमा उक्ताः । विशुद्धकरण इति शमादयो यमाः । आसनादीनि स्फुटमेवोक्तानि । जितो मरुत्प्राणो येन आहृतान्यक्षाणि येन भगवतः प्रतिनिधिभूते स्थूले विराड्रूपे एतन्मनो दधार ध्यायन्नव्यवहितो ध्यातृध्येयभेदशून्यः सन्समाधौ स्थितस्तत्स्थूलं व्यसृजत् ॥ १७ ॥ एवमजस्रं नित्यं हरौ भक्तिं प्रकर्षेण वहन्नसौ ध्रुवोऽहमित्यात्मानं न सस्मार । यतो मुक्तलिंगस्त्यक्तशरीराभिमानः । तत्र हेतवः आनंदबाष्पस्य कलया बिन्दुप्रवाहेणाभिभूयमानः विक्लिद्यमानं द्रवद् हृदयं यस्य पुलकैर्व्याप्तांगः ॥ १८ ॥ १९ ॥ अन्वनन्तरं देवप्रवरौ ददर्शेत्यनुषंगः । गदामवष्टभ्य स्थितौ किरीटादिभिः सहिते चारुणी कुण्डले ययोः ॥ २० ॥ उत्तमगायः पुण्य

संधानयज्ञाब्दसामकालोद्भवेषु च'' इति निरुक्तिः । नीत्वा गमयित्वा ॥ १४ ॥ गंधर्वनगरं तु वायुनिर्मितहर्म्यगोपुरगजाश्वादिवत्प्रतयिमानार्कांशुसंवलितो त्तराशामेवालिवैचित्र्यमेव । तच्च क्षणिकमेव ॥ १५ ॥ उपसृष्टं ग्रस्तम् ''विशाला बदरी प्रोक्ता पुरी भूमिश्च निम्नगा'' इति कोशात् । स ध्रुवः ॥ १६ ॥ तत्र विशालायाम् । तत्कृतं ध्रुवकृतम् । तस्यां विशालायाम् । जितमरुदितिप्राणायाम उक्तः । मनसा हृताक्ष इति प्रत्याहार उक्तः । दधार धारणामकरोत् । प्रतिनिधिभूते प्रतिमासदृशे ''शिलावत्प्रतिमैषा हि विष्णोर्लोकचतुर्दशी'' इति तार्थोक्तिः ॥ १७ ॥ एतच्च सर्वं तत्रत्यानां योगिनां सदाचारसंमानार्थं द्वित्रिदिनमेवानुरोधेन चकार । वस्तुतस्तु तस्य योगेऽवकाश एव नास्तीत्याह—भक्तिमिति । इति हेतोरेव न तु योगाद्धेतोः । गार्हस्थ्ये कर्मयोगो वैराग्ये भक्तियोगश्च तस्य लोकप्रदर्शनार्थक एव बभूवेति भावः । तत्र मुक्तलिंगत्वेन हि देहाभिमानिन आनंदाश्रुनिपातहृदयक्लेदपुलकांगानि प्रादुर्भवंतीति ॥ १८ ॥ राकापतिं पूर्णचंद्रम् ॥ १९ ॥ तत्र विमाने । अवष्टभ्य धृत्वा ॥ २० ॥ प्रागदृष्टश्रुतवस्तुदर्शनसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरम् ॥ सुनंदनंदावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ ॥ २२ ॥ सुनंदनंदावूचतुः ॥ भोभो राजन्सुभद्रं ते वाचं नोऽवहितः शृणु ॥ यः पंचवर्षस्तपसा भवान्देवमतीतृपत् ॥ २३ ॥ तस्याखिलजगद्धातुरावां देवस्य शार्ङ्गिणः ॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदम् ॥ २४ ॥ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य विचक्षते परम् ॥ आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षताराः परियंति दक्षिणम् ॥ २५ ॥ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हि चित् ॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदम् ॥ २६ ॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि ॥ २७ ॥ मैत्रेय उवाच ॥ निशम्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतं वाचमुरुक्रमप्रियः ॥ कृताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याशिषमभ्यवादयत् ॥ २८ ॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदावभिवंद्य च ॥ इयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम् ॥ २९ ॥ तदोत्तानपदः पुत्रो ददर्शांतिकमागतम् ॥ मृत्योर्मूर्ध्नि पदं दत्त्वा आरुरोहाद्भुतं गृहम् ॥ ३० ॥ तदा दुंदुभयो नेदुर्मृदंगपणवादयः ॥ गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ ३१ ॥ स च स्वर्लोकमारोक्ष्यन्सुनीतिं जननीं ध्रुवः ॥ अन्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपम् ॥ ३२ ॥

श्लोको हरिस्तस्य किंकरौ तौ विज्ञाय मधुद्विषः पार्षत्प्रधानाविति हेतोः साध्वसेन संभ्रमेण विस्मृतपूजाक्रमः केवलं तस्य नामानि गृणन्ननाम ॥ २१ ॥ २२ ॥ सुभद्रमिति सशरीरस्यैव विष्णुपदारोहाभिप्रायम् । अतीतृपत्तर्पितवान् ॥ २३ ॥ आवां तस्य पार्षदौ ॥ २४ ॥ सुदुर्जयत्वे हेतुः । सूरयः सप्तर्षयोऽपि यदप्राप्य केवलमधः स्थिताः पश्यंति—यच्चन्द्रादयः दक्षिणं प्रदक्षिणं यथा भवत्येवं परिक्रामंति तदातिष्ठाधितिष्ठ ॥ २५ ॥ २६ ॥ आयुष्मन्नित्यपि संबोधनं सशरीरयानाभिप्रायमेव ॥ २७ ॥ मधु च्यवते स्रवतीति मधुच्युत्ताम् । पाठांतरे मधु च्युतं स्रुतं यस्यांताममृतस्राविणीमित्यर्थः । कृतं नित्यं कर्म मंगलं चालंकरणं येन अभ्यवादयद्वादयामास ॥ २८ ॥ तदेव रूपं हिरण्मयं प्रकाशबहुलं बिभ्रत्सन्नियेष ऐच्छत् ॥ २९ ॥ गृहं विमानम् । अयं भावः । यदा ध्रुवो विमानमारोढुमैच्छत्तदा मृत्युरागत्य प्रणम्योवाच । हे महाराज मामंगी कुरु । उवाच ध्रुवः।स्वागतं ते क्षणं तावदुपविश।एवमुक्त्वा ध्रुवो विष्णोः स्मरणं कृत्वा मृत्योर्मूर्ध्नि पदं दत्त्वा विमानाग्र्यमारुरोह ॥ ३० ॥ ३१ ॥ दीनां जननीं हित्वा

ध्वसलक्षणोंतःकरणवृत्तिविशेषः । संभ्रमो भवति तेन विस्मृतः नामानि जय नारायण जय गोपाल जय गोविंदेत्याद्युच्चारयन्ननामेत्यर्थः ॥ २१ ॥ २२ ॥ भोभो इति वीप्सादरे । राजन्निति । सर्वदा दीप्तिमांस्त्वं भविष्यसीत्याह ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ मधु क्षौद्रं तद्वदास्वादजनकमक्षरवृंदं, पाठांतरे मधुच्युतामिति । मंगलं भूषणादावप्यस्तीति ॥ २८ ॥ परीत्य प्रदक्षिणीकृत्य धिष्ण्याग्र्यं विमानं 'भगवद्विमानाय नमः' इति पुष्पगंधादिभिः संपूज्य ॥ २९ ॥ ३० ॥ गंधर्वेषु मुख्यास्तुंबुरुप्रभृतयः ॥ ३१ ॥ स च ध्रुवः । अत्र भगवता नाहमेव सत्यसंकल्पः किं तु मद्भक्तोपीति भावेन स्फुरितांतःकरणवृत्तिविशेषो ध्रुव एतादृशं पुत्रं सूतवत्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ ॥ दर्शयामासतुर्देवीं देव यानेन गच्छतीम् ॥ ३३ ॥ तत्रतत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः ॥ अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ॥ ३४ ॥ त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि ॥ परस्ताद्यद् ध्रुवगतिर्विष्णोः पदमथाभ्यगात् ॥ ३५ ॥ यद् भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनुविभ्राजन्त एते ॥ यन्नाव्रजञ्जंतुषु येऽननुग्रहा व्रजंति भद्राणि चरंति येऽनिशम् ॥ ३६ ॥ शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः ॥ यांत्यंजसाऽच्युतपदमच्युतप्रियबांधवाः ॥ ३७ ॥ इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः ॥ अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ॥ ३८ ॥ गंभीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितम् ॥ यस्मिन्भ्रमति कौरव्य मेढ्यामिव गवां गणः ॥ ३९ ॥ महिमानं विलोक्यास्य नारदो भगवानृषिः ॥ आतोद्यं वितुदञ्श्लोकान्सत्रेऽगायत्प्रचेतसाम् ॥ ४० ॥ नारद उवाच ॥ नूनं सुनीतेः पतिदेवताया स्तपःप्रभावस्य सुतस्य तां गतिम् ॥ दृष्ट्वाभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः ॥ ४१ ॥ यः पंचवर्षो गुरुदारवाक्छरैर्भिन्नेन यातो हृदयेन दूयता ॥ वनं मदादेशकराऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितम् ॥ ४२ ॥ यः क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः ॥ षट्पञ्चवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदम् ॥ ४३ ॥

कथमगं दुर्गमं त्रिविष्टपं यास्यामीत्यन्वस्मरत् ॥ ३२ ॥ व्यवसितमभिप्रायं व्यवसाय ज्ञात्वा ॥ ३३ ॥ ३४ ॥ देवयानेन देवमार्गेण विमानेनेति वा मुनीन्सतर्षीनपि ततः परस्ताद्यद्विष्णोः पदं तदभ्यगात् । ध्रुवा गतिर्यस्य सः ॥ ३५ ॥ यद्भ्राजमानमनु यस्य रुचा लोका विभ्राजंते येऽननु ग्रहा निष्कृपास्ते यन्नाव्रजन्न गतवंतः ॥ ३६ ॥ अच्युतः प्रियो बांधवो येषाम् ॥ ३७ ॥ ३८ ॥ अनिमिषमनलसं ज्योतिषां चक्रं यस्मिन्नाहितमर्पितं सद्भ्रमति । मेढ्यामाहितो गंभीरवेगो गवां गण इव ॥ ३९ ॥ आतोद्यं वीणां वितुदन्वादयन्प्रचेतसां ब्रह्मसत्रे भगवन्माहात्म्यप्रसंगेन ध्रुवमहिमप्रतिपादनपरांस्त्रीञ्श्लोकानगायत् ॥ ॥ ४० ॥ नूनमिति । पतिरेव देवता यस्यास्तस्याः सुतस्य यस्तपःप्रभावस्तस्य तां गतिं फलमधिगंतुं वेदवादशीला ब्रह्मर्षयोऽपि नैव प्रभवंति । अभ्युपायान्भगवद्धर्मान् दृष्ट्वापि किं पुनर्नृपाः ॥ ४१ ॥ तपःप्रभावं गतिं च विशिनष्टि द्वाभ्याम् । गुरुदाराः पितृपत्नी सुरुचिस्तस्या वाक्छरैर्भिन्नेनात एव दूयता हृदयेन वनं यातः सन्नजितमपि यो जिगाय वशीकृतवान् ॥ ४२ ॥ तस्याधिरूढं तेन प्राप्तं पदं यो भुवि क्षत्रबंधुः क्षत्रियो भवेत्स तमनु वर्षसमूहैरप्यारोढुमिच्छेदपि किम् । तत्संकल्पोऽप्यशक्यो दूरत

स्वकृते त्यक्तविषयभोगायाः सुनीतेः पुत्रेण सह देवलोकातिर्नाभूत्स्वयं च नास्मार्षीदिति लोकापवादं मन्वान इव यदा स्वमातरमस्मार्षीत्तदा कैटभारेः संकल्पज्ञानवन्तौ पार्षदौ तस्य पुरतो यांतीं दर्शयामासतुरिति ध्रुवस्य सत्यसंकल्पत्वं ज्ञापितमिति ॥ ३२ ॥ व्यवसायेति । "न ल्यपि" इत्युक्तेर्नैत्वं "विमाने देवमार्गे च देवयानं सुरार्चने" इति निरुक्तिः ॥ ३३ ॥ ग्रहान्सूर्यचंद्रादीन् ॥ ३४ ॥ अथ मंगले ॥ ३५ ॥ तत्पदाधिकारिणोऽन्वयव्यतिरकाभ्यामाह-यदिति । भद्राणि हरिभजनादीनि ॥ ३६ ॥ ३७ ॥ ३८ ॥ यस्मिन्नित्यतेनोपारि प्रतीतिं वारयति मेढीसमीपे यथा परितो गवां गणः तथात्रापीत्यर्थः ॥ ३९ ॥ "आतोद्यं वाद्यमिष्यते" इति हलायुधोक्तेर्नारदस्य वीणैव वाद्यम् ॥ ४० ॥ अभ्युपायान्यन्तरंगसाधनानि ॥ ४१ ॥ दूयता तप्यमानेन 'टुदु—उपतापे'। तत्पूर्वोक्तं मधुवनं यातः ॥ ४२ ॥ क्षत्रेण क्षतत्राणेन बध्नाति दस्युगणानिति क्षत्र बंधुः । क्षत्रियोत्तमोऽपि कस्तत्पदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं यत्पृष्टोहमिह त्वया ॥ ध्रुवस्योद्दामयशसश्चरितं संमतं सताम् ॥ ४४ ॥ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ॥ स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम् ॥ ४५ ॥ श्रुत्वैतच्छ्रद्धयाऽभीक्ष्णमच्युतप्रियचेष्टितम् ॥ भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥ ४६ ॥ महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः ॥ यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनाम् ॥ ४७ ॥ प्रयतः कीर्त्तयेत्प्रातः समवाये द्विजन्मनाम् ॥ सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥ ४८ ॥ पूर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथ वा ॥ दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥ ४९ ॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति ॥ ५० ॥

आरोहणमित्यर्थः।कथंभूतं पदम्।षड्वा पंच वा वर्षाणि यस्य सः अल्पैरेवाहोभिर्वैकुंठं प्रसाद्य यत्तस्य पदमवाप तत् ॥ ४३ ॥ उद्दाममुत्कृष्टं यशो यस्य ॥ ४४ ॥ धनादेर्निमित्तम् । ध्रौव्यं ध्रुवस्थानप्रापकम् । प्रशस्यं प्रशंसार्हम् । अघमर्षणं पापनाशनम् ॥ ४५ ॥ अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा यो वर्तते तस्य भक्तिर्भवेत् ॥ ४६ ॥ तीर्थं महत्त्वावाप्ति स्थानम् । गुणा यत्र भवंति ॥ ४७ ॥ समवाये सभायाम् ॥ ४८ ॥ ४९ ॥ नेच्छन्निष्कामस्तत्र श्रवणे आत्मनैवात्मानं प्रति संतुष्टो भवतीति हेतोः सिद्धिं प्राप्नोति ॥ ५० ॥

प्राप्तुं शक्नुयादिति । इत्यर्थ इति । तत्पदारोहणसंकल्पस्याप्यशक्तत्वे कुतस्तदारोहणमिति भावः । गर्भापेक्षया षडित्युक्तिरस्ति सर्वज्ञशिरोमणेश्श्रीव्यासदेवस्य संशयानुपपत्तेः । यद्वा–षडिति पृथक्पदमेव यः पञ्चवर्ष इति पूर्वश्लोकानुरोधात् । तच्चाहोभिरित्यंतेनान्वेति प्रथमांतमपि तृतीयार्थेऽस्ति अहश्चात्रोपलक्षणं रात्रेरपि स चाहोरात्रोऽप्यत्र पैत्रो ग्राह्यः । पैत्रो मासेनेत्यमरोक्तेः । 'मासैरहं षड्भिरमुष्य पादयोः' इति ध्रुवोक्तेः । यद्वा–कियद्वर्षोयं बाल इति केनचित्पृष्टो बालपिता यथा पञ्चषडब्दोयमित्युत्तरयति तथा लोकोक्तिवदियमुक्तिर्ज्ञेयेति ॥ ४३ ॥ ४४ ॥ ४५ ॥ यथा भक्त्या । क्लेशानामविद्यादीनां क्षयः ॥ ४६ ॥ "तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजस्सु च । अवतारर्षिजुष्टांबुपात्रोपाध्यायमंत्रिषु" इति मेदिनी । तदिच्छूनां तेज आकांक्षमाणानां यत्र यस्मिंश्चरितेऽभ्यस्यमाने तेजो भवतीत्यर्थः । मनस्विनां मानेप्सूनां मानः पूजा च भवति यद्वा । मनस्विनां स्थिरचेतसां मध्ये मानोऽस्य श्रोतुर्वक्तुर्वा भवतीत्यर्थः ॥ ४७ ॥ "समवायः समूहे च संबंधेऽपि निगद्यते" इति ॥ ४८ ॥ सिनीवाल्यां दृष्टेंदुकलायाममावस्यायां श्रवणर्क्षस्य हरिदेवताकत्वेन पर्वत्वमस्तीति दिनक्षयेऽवमदिने । व्यतीपाते विष्कंभाद्यन्तर्गते योगविशेषे । यद्वा–"श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके । यद्यमा रविवारेण व्यतीपातः स उच्यते ॥ " नागदैवतमाश्लेषा मस्तकं मृगशिरः प्रथमपाद इत्यन्ये स च सर्वेषामित्युक्तलक्षणे संक्रमे रविसंक्रांतौ अपिनाऽन्यस्मिन्नपि पुण्यकाले चूडामण्यादियोगे "सप्तम्यां रविवारेण योगश्चूडामणिस्स्मृतः" इत्याद्युक्ते ॥ ४९ ॥ श्रद्दधानानामिति द्वितीयार्थे षष्ठी । निष्कामस्तद्वेतनं किमपि द्रव्यं न प्रतिगृह्णन् तत्र हेतुरात्मानं प्रत्यात्मनैव संतुष्टः मत्कथ्यमानां कृष्णकथां भक्ताः श्रद्धया शृण्वंत्वित्येतदेव मम वेतनमिति मन्यमानः इत्यत एव सिद्धिं सर्वाभीष्टनिष्पत्तिं प्राप्नोति ॥ ५० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतम् ॥ कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥ ५१ ॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यात
विशुद्धकर्मणः ॥ हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥ ५२ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे ध्रुवचरितं
नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ सूत उवाच ॥ निशाम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणम् ॥ प्ररूढभावो भगवत्यधो
ऽक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥ १ ॥ विदुर उवाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत ॥ कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमा
सते ॥ २ ॥ मन्ये महाभागवतं नारदं देवदर्शनम् ॥ येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥ ३ ॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः ॥
इज्यमानो भक्तिमता नारदेनेरितः किल ॥ ४ ॥ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः ॥ मह्यं शुश्रूषवे ब्रह्मन्कात्स्न्येनाचष्टुमर्हसि ॥५॥

किं च सत्पथे भगवन्मार्गेऽमृतरूपं ज्ञानं यो दद्यात् ॥ ५१ ॥ ध्रुवस्य चरितं मया तेऽभिहितम् । मातुर्गृहं च हित्वा ॥ ५२ ॥ इति श्रीगङ्गाभागवते
महापुराणे चतुर्थस्कन्धे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ एवं पंचभिरध्यायैर्ध्रुवचर्यानुवर्णिता ॥ अथैकादशभिश्चित्रं पृथुचारित्रमुच्यते ॥ १ ॥ तत्र त्रयोदशे वक्तुं पृथो
र्जन्म ध्रुवान्वये ॥ अंगो वेनपिता पुत्रकौर्याद्गत इतीर्यते ॥ २ ॥ प्ररूढो भावो भक्तिर्यस्य सः ॥ १ ॥ अन्ववाये वंशे ॥ २ ॥ नारदेन प्रचेतसां सत्रे वर्णिताः कथाः
प्रष्टुं तन्महिमानमाह । मन्य इति । देवस्य दर्शनं यस्य हरेः परिचर्याप्रकारः क्रियायोगः पंचरात्रे येन प्रोक्तः ॥ ३ ॥ स्वधर्मशीलैः पुरुषैः प्रचेतोभिः ॥ ४ ॥ ५ ॥

जीवनिस्तारकं किमपि ज्ञानं श्रावयत एव महाफलं किमुतेदृग्भक्तध्रुवचरितमित्याशयेनाह-किञ्चेति।तस्य भागवतज्ञानदातुर्न केवलं भगवानेवानुगृह्णाति किं तु तदिन्द्रियाभिमानिनो देवा "दिग्वातार्कप्रचेताश्विवह्नींद्रोपेंद्रमित्रकाः"
इत्युक्ता अप्यनुगृह्णतीत्यर्थः ॥ ५१ ॥ पुनरपि तन्महात्म्यं सूचयन्नुपसंहरति । शुद्धकुलप्रादुर्भूतत्वेन श्रद्धानत्वात्त्वमेतच्छ्रावणयोग्योऽसीत्यभिप्रायेणाह-कुरूद्वहेति । अर्भको बालः सन् ॥ ५२ ॥ इति श्रीमद्भागवतभावार्थदी
पिकाप्रकाशे चतुर्थस्कन्धे द्वादशोऽध्यायः ॥१२॥ चित्रमद्भुतम् (१) तत्रैकादशसु मध्ये (२) तं कौषारविम् ॥ १ ॥ त्वादृशां हरिचर्यावर्णनाद्येव व्रतोऽस्तीत्याशयेनाह-सुव्रतेति ॥२॥ ननु महाभागवतेन विदुरेण हरिकथा
प्रश्नं त्यक्त्वा प्रचेतसां प्रश्नः किमिति कृत इति चेत्तेषां कथापि हरिकथाऽविनाभूतैव श्रीनारदेन प्रोच्यमानत्वान्नारदस्त्वन्यकथां न वक्ति भागवतचूडामणित्वादित्याह-मन्य इति । देवं श्रीकृष्णं दर्शयत्युपदेशेनेति देवदर्शनः ।
यद्वा—देवैर्भक्त्या देदीप्यमानैर्दृश्यत इति । तत्र हेतुः-येन नारदेन भगवत्साक्षात्कारार्थमेव पंचरात्रे पूजनविधानं तस्यैव मोक्षहेतुत्वोक्तेः । येन क्रियानैपुणेन । 'मर्त्यो यायादमर्त्यताम्" इत्युद्धवोक्तेः ॥ ३ ॥ स्वधर्मेति ।
अत्रायं भावः-साक्षान्नारायण एव चरुपुरोडाशादिद्रव्यस्वामित्वेन तदभिमान्यग्न्यादिदेवतांतर्यामित्वेन तच्छब्दप्रवृत्तिनिमित्तस्य मुख्यत्वेन देवतात्वेन च मंत्रमूर्त्तित्वेनेज्यमान एव नारदेन प्रतिपादित इति ॥ ४ ॥ ततः किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम् ॥ सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ॥ ६ ॥ स जन्मनोपशांतात्मा निःसंगः समदर्शनः ॥ ददर्श लोके विततमात्मानं लोकमात्मनि ॥ ७ ॥ आत्मानं ब्रह्म निर्वाणं प्रत्यस्तमितविग्रहम् ॥ अवबोधरसैकात्म्यमानंदमनुसंततम् ॥ ८ ॥ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः ॥ स्वरूपमवरुंधानो नात्मनोऽन्यं तदैक्षत ॥ ९ ॥ जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः ॥ लक्षितः पथि बालानां प्रशांतार्चिरिवानलः ॥ १० ॥ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः ॥ वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतम् ॥ ११ ॥ स्वर्वीथिर्वत्सरस्येष्टा भार्याऽसूत षडात्मजान् ॥ पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयम् ॥ १२ ॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः ॥ प्रातर्मध्यंदिनं सायमिति ह्यासन्प्रभासुताः ॥ १३ ॥ प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः ॥ व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥ १४ ॥ स चक्षुःसुतमाकूत्यां पत्न्यां मनुमवाप ह ॥ मनोरसूत महिषी विरजान्नड्वला सुतान् ॥ १५ ॥

ध्रुवस्य वंशे ते जाता इति वक्तुं ध्रुवस्य वंशमनुक्रामति । ध्रुवस्येत्यादिना । पितुः सार्वभौमश्रियं नैच्छदधिराजासनं च ॥६॥ अनिच्छायां हेतुमाह-स इति चतुर्भिः ॥७॥ आत्मानं स्वरूपभूतं ब्रह्मावरुंधान आप्नुवन् जानन्नात्मनो नान्यं तदैक्षत । स्वयं तु सर्वस्मादन्यः सन् । कथंभूतं ब्रह्म । निर्वाणं शांतम् । प्रत्यस्तमितविग्रहं प्रत्यस्तमितः प्रतिसंधानेनास्तमितः शांतो विग्रहो भेदो यस्मिन् । अवबोधरसेनैकात्म्यं यस्य ॥ ८ ॥ कथंभूतः । अव्यवच्छिन्नो निरंतरो यो योगः स एवाग्निस्तेन दग्धः कर्ममल आशयो वासना च यस्य ॥ ९ ॥ जडादीनामिवाकृतिर्यस्य तथाभूतो लक्षितः अतन्मतिः न तेषामिव मतिर्यस्य सर्वज्ञत्वात् । प्रशांतान्यर्चींषि ज्वाला यस्यानलस्य तद्वत्स्थितः ॥ १० ॥ यवीयांसमुत्कलात्कनिष्ठम् ॥ ११ ॥ इष्टा प्रिया भार्या ॥१२॥१३॥ निशिथो निशीथः ॥ १४ ॥ स सर्वतेजाश्चक्षुःसंज्ञं मनुं सुतं पुत्रमवाप

फलितमित्यत्राह-यास्ता इति । कथनसामर्थ्यं प्रथयन्नाह-ब्रह्मन्निति ॥ ५ ॥ ६ ॥ जन्मना जन्मप्रभृति ॥ ७ ॥ प्रत्यस्तमितविग्रहं निरस्तविवादम् ॥ ८ ॥ ९ ॥ १० ॥ उत्कलः सर्वापेक्षया ज्येष्ठस्ततः कनीयान्वत्सरस्तत्कनीयान्कल्य इति बोध्यमन्यथा कल्यं विहाय वत्सस्याभिषेकोऽसंगतः स्याद्दशमाध्यायारंभे 'प्रजापतेर्दुहितरम्' इत्यादिना पुत्रकथनमात्रं न तु क्रमो विवक्षितः अन्यथोत्कलस्य सर्वापेक्षया कनिष्ठत्वमापद्येतेति ॥११॥१२॥ अत्र यंयमादाय कथा प्रवर्त्तते स स एव वंशहेतुभूतः अन्ये त्यक्तोद्वाहा योगिनोऽप्रजाश्चेति ध्येयमिति तार्थः । स्त्रियः सुताश्च कालादितत्तद्व्रस्त्वभिमानिन एवेति च ॥ १३ ॥ १४ ॥ चक्षुःसंज्ञं चाक्षुषसंज्ञं "षष्ठस्तु चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः" इत्यष्टमे वक्ष्यमाणत्वात् । अत्र चक्षुश्शब्देन चाक्षुष एव ग्राह्यस्तद्धिताभावस्त्वार्ष इति ध्येयम् । मार्कंडेयेऽपि "अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ॥ चाक्षुषत्वमतस्तस्य जन्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतं धृतव्रतम् ॥ अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम् ॥ १६ ॥ उल्मुकोऽजनयत्पुत्रान्पुष्करिण्यां षडुत्तमान् ॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयम् ॥ १७ ॥ सुनीथांगस्य या पत्नी सुषुवे वेनमुल्बणम् ॥ यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात् ॥ १८ ॥ यमंग शेपुः कुपिता वाग्वज्रा मुनयः किल ॥ गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करम् ॥ १९ ॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः ॥ जातो नारयणांशेन पृथुराद्यः क्षितीश्वरः ॥ २० ॥ विदुर उवाच ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः ॥ राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥ २१ ॥ किंवाऽहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन् ॥ दंडव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥ २२ ॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि ॥ यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥ २३ ॥ एतदाख्याहि मे ब्रह्मन्सुनीथात्मजचेष्टितम् ॥ श्रद्दधानाय भक्ताय त्वं परावरवित्तमः ॥ २४ ॥ मैत्रेय उवाच ॥ अंगोऽश्वमेधं राजर्षिराजहार महाक्रतुम् ॥ नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः ॥ २५ ॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः ॥ हवींषि हूयमानानि न ते गृह्णंति देवताः ॥ २६ ॥ राजन्हवींष्यदुष्टानि श्रद्धयाऽऽसादितानि ते ॥ छंदांस्ययातयामानि योजितानि धृतव्रतैः ॥ २७ ॥

मनोर्महिषी नाम्ना नड्वला विरजान् शुद्धान्पुरुप्रमुखान् द्वादश सुतानसूत ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ अंग हे विदुर वागेव वज्रं येषाम् ॥ १९ ॥ मंथने हेतुः अराजक इति । आद्यः पुरग्रामादीनां तेन रचितत्वात् ॥ २० ॥ यद्यस्याः प्रजाया हेतोर्विमनाः संन्ययौ ॥ २१ ॥ किं वा अंहः अपराधं वेने उद्दिश्य आलक्ष्य ॥ २२ ॥ यतोऽयमधर्म इत्याह । नावध्येयोऽवज्ञेयोऽपि न भवति ॥ २३ ॥ परावरविदां मध्येऽतिश्रेष्ठस्त्वम् ॥ २४ ॥ अभावी पुत्रः काम्यकर्मणा बलादापादितो न सुखाय भवेदिति द्योतयन्नंगस्य पुत्रोत्पत्तिक्रममाह अंग इत्यादिना ॥ २५ ॥ २६ ॥ अयातयामान्यगतवी

न्यस्मिन्नपि द्विजे" इति क्रोष्टुकिं प्रति मार्कंडेयोक्तेः चक्षुःसुतं चक्षुष उद्भूतत्वाच्चक्षुःपुत्रमर्थाच्चाक्षुषं पुत्रं भाविनं मनुमवाप जनयामास । किंच्चायमेव कारणांतरेण दक्षवशिष्ठादिवद्वक्ष्यमाणषष्ठस्कंधीयवसुवंशेप्येतन्नाम्नैव भविष्यतीति ध्येयम् ॥ १५ ॥ १६ ॥ १७ ॥ निर्विण्णो विरक्तः ॥ १८ ॥ यं वेनं, गतासोर्मृतस्य, तस्य वेनस्य ॥१९॥ तदा वेननाशे । यद्वा—प्रचलितराजवंशो हि वेननाशान्नष्ट एव मुनिभिः पृथुमुत्पाद्य पुनः प्रचारितः पृथुतः प्रथमं प्रचलनात्तस्यैवाद्यत्वम् ॥ २०॥ तस्यांगस्य ॥२१॥ "दंडोऽस्त्री शासने राज्ञां हिंसायां लकुटे गुडे" इति यादवः । दंडव्रतधरे शासनाख्यव्रतं बिभ्रति । न तेष्वज्ञानलेशः संभाव्यते इत्याह—धर्मकोविदा इति । ॥२२॥ यतोयं राजावमानोऽधर्मोऽतो न कार्य इत्याह-अघवान्पापशीलोपि । लोकपालानामिंद्रादीनामोजो बलं दीप्तिं वा "ओजो दीप्ताववष्टंभे प्रकाशबलयोरपि" इति मेदिनी । तस्मिन्नवज्ञाते इंद्राद्यवज्ञा स्यादिति भावः ॥२३॥ ॥ २४ ॥ २५ ॥ तमंगम् । अथ देवावाहनोत्तरम् । स्नेहादाह-तातेति । 'तातः स्याज्जनके प्रिये' इति कोशात् ॥ २६ ॥ द्रव्यादिदोषान्नं गृह्णंतीति चेदाह—राजन्निति । हवींषि चरुद्रव्याणि । अदुष्टान्यतीवशोभनानि दातृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न विदामेह देवानां हेलनं वयमण्वपि ॥ यत्र गृह्णंति भागान्स्वान्ये देवाः कर्मसाक्षिणः ॥ २८ ॥ मैत्रेय उवाच ॥ अंगो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः ॥ तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥ २९ ॥ नागच्छंत्याहुता देवा न गृह्णंति ग्रहानिह ॥ सदसस्पतयो ब्रूत किमवद्यं मया कृतम् ॥ ३० ॥ सदसस्पतय ऊचुः ॥ नरदेवेह भवतो नाघं तावन्मनाक्स्थितम् ॥ अस्त्येकं प्राक्तनमघं यदिहेदृक्त्वम प्रजः ॥ ३१ ॥ तथा साधय भद्रं ते आत्मानं सुप्रजं नृप ॥ इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥ ३२ ॥ तथा स्वभागधेयानि ग्रहीष्यंति दिवौकसः ॥ यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥ ३३ ॥ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयते जनः ॥ आराधितो यथैवैषां तथा पुंसां फलो दयः ॥ ३४ ॥ इति व्यवसिता विप्रास्तस्य राज्ञः प्रजातये ॥ पुरोडाशं निरवपञ्छिपिविष्टाय विष्णवे ॥ ३५ ॥

र्याणि ॥ २७ ॥ २८ ॥ यज्ञे गृहीतमौनोऽपि वाचं व्यसृजत्प्रायुंक्त ॥ २९ ॥ आहुता आहूताः ग्रहान्सोमपात्राणि इह यज्ञे न गृह्णंति ॥ ३० ॥ इह जन्मनि न तावन्मनागीष दप्यघं स्थितम् । कथंचिज्जातस्याघस्य सद्य एव प्रायश्चित्तैः क्षालनात् । किं तु प्राक्तनमेकमघमस्ति यद्यस्मादीदृक् गुणाधिकोऽपि त्वं प्रजारहितः ॥ ३१ ॥ अतो यथा देवा हवि र्गृह्णंति तथात्मानं सुप्रजं साधय । कथं साधनीयं तदाहुः । इष्ट इति ॥ ३२ ॥ तथा सति स्वभागान्ग्रहीष्यंति । यद्यतो हरिः साक्षाद् वृतः स्यात् अतस्तेन सह सर्वे देवा आगमिष्यंतीत्यर्थः ॥ ३३ ॥ नन्वतितुच्छान्कामान्हरिः कथं दद्यात्तत्राह । तांस्तानिति ॥ ३४ ॥ प्रजातये पुत्रोत्पत्तये शिपिविष्टाय शिपिषु पशुषु यज्ञरूपेण प्रविष्टाय ।

श्रद्धाराहित्यादपि तथा भवति तदत्र नास्तीत्याहुः—श्रद्धयेति । निर्बलमंत्रप्रयोगात्तथात्वमिति तत्राह—छंदांसीति "अस्थानोच्छ्वासविच्छेदघोषणाध्ययनादिकम् । प्रमादोपगतं वाथ यातयामत्वकारकम्" इति कात्यायनस्मृतेः । अस्यार्थः—उक्तोदात्तादिस्थाने निश्वासस्य विच्छेदेन त्यागेन युक्तं यद् घोषणमध्ययनाध्यापनादि । यद्वा-अध्ययनसमये चांचल्यादिना यथावच्छ्रवणाभावश्च छंदसां यातयामत्वं निर्बलतां करोतीत्यर्थः । एतद्यज्ञगतविप्रैस्तु यथाविहितमेव तदधीतमिति न यातयामता छंदसामस्तीति भावः । किं च "अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः । क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकम् ॥" इत्यपि तेनैवोक्तमतो न ज्ञायते किमत्र कारणं यतो देवा न स्वभागान्स्वीकुर्वंतीति भावः । दुर्वृत्तविप्रोच्चारणादप्यत्र तथात्वं न संभाव्यते—धृतव्रतैरिति "देवपूजापितृपूजानिरताः सर्वदा द्विजाः । यथालाभेन संतुष्टास्तेऽत्र ज्ञेया धृतव्रताः ॥ अभक्ष्यभक्षका हिंस्राः पैशून्यानृतवादिनः । क्रोधेर्ष्यादंभिनो वेदविमुखास्त्वधृतव्रताः ॥ पूर्वे योग्याः परेऽयोग्याः श्रौते स्मार्त्ते च कर्मणि" इति वारतंतविः ॥ २७ ॥ इह यज्ञकर्मणि । हेलनमवज्ञानम् । यद्यतो हेलनात् ॥ २८ ॥ तदनुज्ञया ब्राह्मणानुज्ञां प्राप्य । तद्देवानागमन भागाग्रहणवृत्तम् ॥ २९ ॥ "ग्रहः सूर्यादिनवके यज्ञपात्रोपरागयोः" इति धरणिः । अवद्यमपराधः ॥ ३० ॥ नरदेवेत्यस्याधुनिकपापस्य महादानादिना प्रायश्चित्तेनापाकरणसमर्थस्त्वमित्यभिप्रायः । प्राक्तनं पूर्वजन्मभवमेकवाल हत्यादिरूपं किञ्चिदस्तीत्यनुमीयते तत्र हेतुः यतोऽघात् ॥ ३१ ॥ यज्ञभुक् हरिः ॥ ३२ ॥ इत्यर्थ इति । सर्वेश्वरत्वाद्धरेस्तदनुगा एवान्ये नरदेवं भृत्या इवेति भावः ॥ ३३ ॥ अत्राक्षिप्य समाधत्ते-नन्विति ॥ ३४ ॥ तंडुलपिष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्पुरुष उत्तस्थौ हेममाल्यमलांबरः ॥ हिरण्मयेन पात्रेण सिद्धमादाय पायसम् ॥ ३६ ॥ स विप्रानुमतो राजा गृहीत्वांऽजलिनौ दनम् ॥ अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः ॥ ३७ ॥ सा तत्पुंसवनं राज्ञी प्राश्यतौ पत्युरादधे ॥ गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजा ॥ ३८ ॥ स बाल एव पुरुषो मातामहमनुव्रतः ॥ अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥ ३९ ॥ स शरासनमुद्यम्य मृगयुर्वनगोचरः ॥ हंति साधून्मृगान्दीनान्वेनोऽसावित्यरौज्जनः ॥ ४० ॥ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः ॥ प्रसह्य निरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥ तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः ॥ यदा न शासितुं कल्पो भृशमासीत्सुदुर्मनाः ॥ ४२ ॥ प्रायेणाभ्यर्चितो देवो येऽप्रजा गृहमेधिनः ॥ कदपत्यभृतं दुःखं ये न विंदंति दुर्भरम् ॥ ४३ ॥ यतः पापीयसी कीर्तिरधर्मश्च महान्नृणाम् ॥ यतो विरोधः सर्वेषां यत आधिरनंतकः ॥ ४४ ॥ कस्तं प्रजाऽपदेशं वै मोहबंधनमात्मनः ॥ पंडितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ॥ ४५ ॥

तथा च श्रुतिः । "यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति" इति ॥ ३५ ॥ तस्मादिति योगतयाग्नेः ॥ ३६ ॥ पत्न्यै प्रादात् ॥ ३७ ॥ पुमांसं सूतेऽनेनेति तथा तदन्नं प्राश्य पत्युः सकाशाद्गर्भमादधे अप्रजाः सती ॥ ३८ ॥ मातामहं मृत्युम् । मृत्योर्हि पुत्री सुनीथा ॥ ३९ ॥ मृगयुर्लुब्धकः सन् तं दृष्ट्वा वेनोऽसावागच्छतीति जनः सर्वोऽप्यरौचुक्रोश ॥ ४० ॥ आक्रीडे क्रीडास्थाने बालान्पशूनिवामारयत् ॥ ४१ ॥ विचक्ष्य दृष्ट्वा ॥ ४२ ॥ दुर्मनसस्तस्य कुपुत्रनिंदावाक्यान्याह प्रायेणेति त्रिभिः । अप्रजासो ये तैरभ्यर्चितः । तत्र हेतुः । कुत्सितैरपत्यैः संभृतं दुर्भरं धारयितुमशक्यं दुःखं ये न विंदंति ॥ ४३ ॥ सर्वेषां सर्वैः सह आधिर्मानसी व्यथा ॥ ४४ ॥ तं प्रजापदेशं

निर्मितकूर्माकृतिर्बलिः पुरोडाशः । "प्रादेशनं निर्वपनमपवर्जनमंहतिः" इत्यमरः । श्रुतिः स्पष्टार्था ॥ ३५ ॥ ३६ ॥ सोंगः ॥ ३७ ॥ सा सुनीथा । अप्रजेति । समासांतविधेरनित्यत्वान्नाऽसिच् । असिजंतो वा पाठस्तत्सत्त्वेऽपि छंदोभंगाभावात् ॥ ३८ ॥ परुषो निष्ठुरो मातामहं मातुः पितरं मृत्युनामानमसुरवरमनुव्रत इति हेतुनाऽधार्मिको धर्मद्वेष्यभूत् । अधर्मांशोद्भवमिति विशेषणेन धर्मांशोद्भवो मृत्युरन्योऽस्तीति रहस्यमवगंतव्यम् । "मृत्युर्देवो यमभ्राता वेनमातामहोऽसुरः" इति विजयध्वजः । प्रायेणेति कथनात्केचिदेवेत्यर्थः । ब्रह्मवैवर्तेऽपि "जनः पैतृकदोषेण दोषान्मातामहस्य च । गुरुदोषात्त्रिभिर्दोषैर्हरिद्वेषी भवेद् ध्रुवम् ॥" इति ॥ ३९ ॥ किन्नामायं बाल इत्यतस्तत्कर्मानुसृतं नाम लोका अरूरुवन्नित्याह-स इति । वेनयति पीडयतीति वेनः "पीडां वेन इति प्राहुर्वेनोऽसौ पीडनाद्भवेत्" इति तीर्थः । वेनयति चिंतायुक्तान्करोति सर्वानिति वेनः 'वेनृ-गतिज्ञानचिंतानिशामनवादित्रग्रहणेषु' अतोऽच् ॥ ४० ॥ निरनुक्रोशो निर्दयः ॥ ४१ ॥ सुदुर्मना अत्याकुलचेताः ॥ ४२ ॥ तत्र देवाभ्यर्चने । संभृतं संपूर्णीकृतम् ॥ ४३ ॥ यतः कदपत्यात् । पापीयसी कीर्त्तिर्निन्दाऽहो यस्यायं सुरापो दुर्व्यसनी पुत्रः सोऽपि मंदभाग्य इत्येवंरूपा भवतीत्यर्थः । पापसंगान्महानधर्मो महापातकी च स्यात् 'तत्संसर्गी च पञ्चमः' इति स्मृतेः । ये तं निन्दंति तैर्विरोधोऽपि अनंतको यावज्जीवव्यापी ॥ ४४ ॥ वस्तुतो दुःखसमुद्रमेव पुत्रनामधरमित्यर्थः । तस्माल्लोकलज्जामनस्तापादिबहुलेभ्यो गृहेभ्यो निस्सृत्य क्वचिदलक्षिते प्रदेशे शाकमूलादिवृत्तिरष्टावेव यामान्भगवन्तं भजन्नवशिष्टमायुरव्यर्थी कुर्वन् कृतार्थी भवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् ॥ निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥ ४६ ॥ एवं स निर्विण्णमना नृपो गृहान्निशीथ उत्थाय महोदयोदयात् ॥ अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुताम् ॥ ४७ ॥ विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः ॥ विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥ ४८ ॥ अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम् ॥ ऋषीन्समेतानभिवंद्य साश्रवो न्यवेदयन्पौरवभर्तृविप्लवम् ॥ ४९ ॥ इति श्रीभा० चतु० वेनसुतदुःखादंगनृपवनप्रवेशो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ मैत्रेय उवाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ॥ गोप्तर्यसति वै नृणां पश्यंतः पशुसाम्यताम् ॥ १ ॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः ॥ प्रकृत्यसंमतं वेनमभ्यषिंचन्पतिं भुवः ॥ २ ॥ श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम् ॥ निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ॥ ३॥ स आरूढो नृपस्थान उन्नद्धोऽष्टविभूतिभिः ॥ अवमेने महाभागान्स्तब्धः संभावितः स्वतः ॥४॥ एवं मदांध उत्सिक्तो निरंकुश इव द्विपः ॥ पर्यटन्रथमास्थाय कंपयन्निव रोदसी ॥५॥ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् ॥ इति न्यवारयद्धर्मं भेरीघोषेण सर्वशः ॥६॥

पुत्रनाममात्रमप्यात्मनो मोहेन बंधनम् । यदर्था यन्निमित्ताः क्लेशदा गृहा भवंति ॥ ४५ ॥ इदानीं निर्वेदहेतुत्वेन कुत्सितमेवापत्यमभिनंदति । कदपत्यमिति ॥ शुचां पदाद्विरहादौ शोकानां स्थानात् । वरत्वे हेतुः निर्विद्येतेति । तत्कुतः यद्यतः । कदपत्यात् गृहाः क्लेशनिवहा भवंति ॥ ४६ ॥ महतामुदयानां विभूतीनामुदयो यस्मिंस्तस्माद्गृहाद्गतः । या वेनं सूते स्म ताम् ॥ ४७ ॥ प्रजाः पुरोहितादयश्च विचिक्युरन्वेषितवंतः । तं तत्रैव संतमपि नापश्यन्निति दृष्टांतेनाह । यथेति ॥ ४८ ॥ साश्रवो रुदंतः । भर्तुर्विप्लवं नाशमदर्शनमित्यर्थः ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशे तु दुष्पुत्रभयादंगे गते द्विजैः ॥ अभिषिक्तस्य वेनस्य रोषात्तैर्वध उच्यते ॥ १ ॥ क्षेमदर्शिनः क्षेमचिंतकाः पशुसमानरूपतां पश्यंतः ॥ १ ॥ अमात्यादीनां प्रकृतीनामसंमतम् । पाठांतरे प्रकृत्या स्वभावेनासंमतम् ॥ २ ॥ चोराः सर्वे लीना बभूवुः ॥ ३ ॥ आरूढं नृपस्थानं राजासनं येन अष्टविभूतिभिर्लोकपालैश्वर्यैः ॥४॥५॥६॥

प्यामीति निश्चिकाय ॥ ४५ ॥ निश्चित्य च स्वनिर्वेदामृतप्राप्तिकारणं पुत्रमेव स्मृत्वा भगवतैव परमकृपया विषयभोगांधं मां स्वचरणांतिकं बलान्निनीषुणा पुत्रोयं मह्यं दत्त इत्याह—कदपत्यमिति । शुचां पदाद् गृहा दिति वा ॥४६॥ तां सुनीथां, प्रसुप्तामिति । यदैव सा स्वपिति स्म तदैव स्वस्य वेषांतरं कृत्वेत्यर्थः । निशीथेर्द्धरात्रेऽनुपलक्षितोऽदृष्टः 'लक्ष-दर्शनांकनयोः' इति ॥४७॥ तं नृपं, तत्रैव नगरे एव, निलीय वसंतमपि कुयोगिनो योगच्छद्मनेंद्रियतर्पणपराः ॥ ४८ ॥ इत्यर्थ इति । णशधातोरदर्शनार्थत्वादिति भावः । पौरवेति । पूरुर्यथा भवद्वंशप्रवर्त्तकः स्वभार्यां देवहूतीं राज्येन सह त्यक्त्वा ययौ तथायमपीति नात्र विस्मय इति भावः ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ तैर्द्विजैः (१) पशुसाम्यतां यथा सिंहादयो मेषादीन्स्वार्थे नाशयंति तथा दस्यवो नृन्नाशयिष्यंतीति पश्यंत इत्यर्थः । "क्षमो ना प्रातरक्षायाम्" इति यादवः ॥ १ ॥ आदिना सुहृदादिग्रहः । "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्यांगानि प्रकृतयः" इत्यमरः । पाठांतरे 'प्रकृत्या संमतम्' इति पाठे ॥ २ ॥ तस्मिन्नभिषिक्ते सत्येको गुणो राज्यस्याभूदित्याह-श्रुत्वेति । सर्वे इत्युक्त्या "नारायणो नाम नरो नराणां प्रसिद्धचौरः प्रथितः पृथिव्याम् । अनेकजन्मार्जितपापसंचयं हरत्यशेषं स्मृतमात्र एव" इति वचनान्नारायणोपि कस्यचिच्चेतसि नायातीति भावः 'आखुर्मूषिक उंदरः' इति कोशात् ॥ ३ ॥ यद्वाऽष्टदिग्वर्तिनीभिः संपद्भिरिति सप्तद्वीपाधिपत्यं ध्वनितं स्तब्धो गर्वी स्वतः स्वेनैव संभावितः शूरोऽहं पंडितोऽहमित्येवं कृतात्मकत्थनः ॥ ४ ॥ उत्सिक्त उद्वृत्तः ॥ ५ ॥ भेरीघोषेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितम् ॥ विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रिणः ॥ ७ ॥ अहो उभयतः प्राप्तं लोकस्य व्यसनं महत् ॥ दारुण्युभयतो दीप्त इव तस्करपालयोः ॥ ८ ॥ अराजकभयादेष कृतो राजाऽतदर्हणः ॥ ततोऽप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनाम् ॥ ॥ ९ ॥ अहेरिव पयःपोषः पोषकस्याप्यनर्थभृत् ॥ वेनः प्रकृत्यैव खलः सुनीथागर्भसंभवः ॥ १० ॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः ॥ तथाऽपि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥ ११ ॥ तद्विद्वद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः ॥ सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत ॥ १२ ॥ लोकधिक्कारसंदग्धं दहिष्यामः स्वतेजसा ॥ एवमध्यवसायैवं मुनयो गूढमन्यवः ॥ उपव्रज्याब्रुवन्वेनं सांत्वयित्वा च सामभिः ॥ १३ ॥ मुनय ऊचुः ॥ नृपवर्य निबोधैतद्यत्ते विज्ञापयाम भोः ॥ आयुः श्रीर्बलकीर्तीनां तव तात विवर्धनम् ॥ १४ ॥ धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः ॥ लोकान्विशोकान्वितरत्यथानंत्यमसंगिनाम् ॥ १५ ॥

सत्रिणो मिलिताः संतः ॥ ७ ॥ मूलतश्चाग्रतश्च दीप्ते प्रज्वलिते काष्ठे तन्मध्यवर्तिनां पिपीलिकादीनां यथोभयतो व्यसनमेवं तस्करेभ्यः पालकाच्च दुःखं प्राप्तमित्यर्थः ॥ ॥ ८ ॥ तदेवाहुः । अराजकभयादिति । अतदर्हणो राज्यानर्हः ॥ ९ ॥ अस्माकमप्यनिष्टं जातमित्याहुः । अहेर्यथा पयःपोषः क्षीरेण पोषणं पोषकस्याप्यनर्थं विष द्वारा बिभर्ति पुष्णाति । तदेवाहुः । वेन इति । खलत्वे हेतुः सुनीथागर्भसंभव इति मृत्योर्दौहित्र इत्यर्थः ॥ १० ॥ निरूपितो नियुक्तोऽस्माभिः । सांत्वयेमोपपत्तिभिः प्रार्थयिष्यामः । तस्य पातकम् ॥ ११ ॥ स्वस्य तत्तत्पातकस्पर्शहेतुः । तत्पातकित्वं विद्वद्भिः ॥१२॥ गूढो मन्युर्येषाम् । सामभिः प्रियोक्तिभिः ॥१३॥१४॥ निष्काम

भेरीवादनपूर्वकं सर्वलोकाञ्श्रावणेन ॥ ६ ॥ तत्र सर्वनिग्रहानुग्रहसमर्था मुनयः किमकार्षुरिति तत्राह-वेनस्येति । मिलिता इत्यार्थिकोऽयमर्थः । "सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे" इति मेदिन्युक्तेर्यज्ञो हि मिलितैरेव बहुभिस्साध्यते तेनात्रापि सत्रपदेन मेलनं लक्ष्यते । दुर्वृत्तस्य दुःशीलस्य विरुद्धं चेष्टितं यज्ञदानादिनिवारणरूपं लोकानां व्यसनं दुःखहेतुं धर्मे निवृत्ते सति सर्वे लोका नश्येयुरित्येवं विचार्योचुः ॥ ७ ॥ इत्यर्थ इति । वनदुर्गादौ गमने तस्करेभ्यो राष्ट्रे स्थितौ पालकान्नृपाद्भयमिति भावः ॥ ८ ॥ तदेवोभयतो दुःखमेव । अराजके लोकेऽवृष्टिदस्युरोगादितो महाभयं भारते वर्णितं तन्निवृत्तिहेतोः ततोपि राजतोपि ॥ ९ ॥ देहिनां का कथास्माभिरेवायमभिषिक्तः संप्रत्यस्मानेव न यष्टव्यमित्याद्याज्ञया शास्तीत्याहुरस्माकमिति । तदेवाहितुल्यत्वमेव । सुनीथागर्भसंभव इति हेतुगर्भितं विशेषणं सुनीथागर्भसंभवत्वादिति ॥ १० ॥ सांत्वयेम प्रबोधयाम तत् तथा सत्यस्मान्पातकं पापं न स्पृशेदन्यथा तु पापं स्पृशेदेवेत्यर्थः ॥ ११ ॥ नोऽस्माकं वाचं सांत्वनरूपाम् ॥ १२ ॥ दहिष्यामो धक्ष्यामः इडागमस्त्वार्षः । स्वतेजसा तपोबलेन दग्धस्य दाहेनापि नास्माकं पापमुत्पत्स्यत इत्याह—लोकधिक्कारेति । सांत्वयित्वा प्रबोध्य ॥ १३ ॥ तातेति । स्वयंकृतत्वेन प्रियत्वमस्ति "विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" इति न्यायेन । किञ्च—नायं नृपाणामपि धर्मो यं त्वमुपास्से कुतो नृपवर्यस्यात्यंतधर्मशीलांगात्मजस्य तवेत्यतोऽस्मदुक्तं गृह्यतामित्यभिप्रायेणाहुर्नृपवर्येति । श्रीः संपत्तिः ॥ १४ ॥ विशोकान्—शोकरहितान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः ॥ यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥ १६ ॥ राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः ॥ रक्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते ॥ १७ ॥ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः ॥ इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमात्मभिः ॥ १८ ॥ तस्य राज्ञो महाभाग भगवान्भूतभावनः ॥ परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥ १९ ॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे ॥ लोकाः सपाला ह्येतस्मै हरंति बलिमादृताः ॥ २० ॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयम् ॥ यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्व देशाननुरोद्धुमर्हसि ॥ २१ ॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमानेन सुराः कला हरेः ॥ स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं तद्धेलनं नार्हसि वीर चेष्टितुम् ॥ २२ ॥ वेन उवाच ॥ बालिशा बत यूयं वा अधर्मे धर्ममानिनः ॥ ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥ २३ ॥ अवजानन्त्यमी मूढा नृपरूपिणमीश्वरम् ॥ नानुविंदंति ते भद्रमिह लोके परत्र च ॥ २४ ॥

नामानंत्यं मोक्षमपि ॥ १५ ॥ मा विनशेन्मा विनश्यतु ॥ १६ ॥ असाधवो ये अमात्यास्तेभ्यः यथा यथाशास्त्रम् ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ सर्वांल्लोकांश्च तत्पालानमरांश्च तत्प्रापकान्यज्ञांश्च संगृह्णाति नियच्छतीति तथा तं विचित्रैर्द्रव्ययज्ञतपोज्ञानादिभिः भवाय समृद्ध्यै स्वदेशांस्तद्वासिनो जनान् । अनुरोद्धुमनुवर्तितुम् ॥ २१ ॥ युष्मद्विषये त्वद्देशे हरेः कला अंशाः सुराः तेषां सुराणां हेलनमवज्ञाम् ॥ २२ ॥ बालिशा अज्ञाः वृत्तिदमन्नादिप्रदं मां हित्वा ॥ २३ ॥ २४ ॥

ब्रह्मलोकादीन् । निष्कामानां फलाभिसंधिशून्यानाम् । मोक्षस्यानंत्यत्वं तु वक्ष्यते “तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते” इति सनत्कुमारः । अंतमतिक्रांतोऽत्यंतः स एवात्यंतिकस्तस्य भावस्तत्ता तयेति वक्ष्यमाणात्यंतिकपदार्थः ॥ १९ ॥ स धर्मः । वीरेति—तद्रक्षणे सामर्थ्यमुद्बोधयति । यस्मिन्धर्मे । अवरोहति अधो याति ॥ १६ ॥ कोसौऽधर्मो यो लोकान्ददाति तत्राहुः—राजन्निति । असाधवो ह्यमात्या उत्कोचग्राहिणः आदिना धाटीग्रहः । “परोक्षं लुंठकश्चौरो धाटी प्रत्यक्षलुंठकः” इत्युक्तेः । व्यभिचारिणो वादिपदार्थः, तेऽपि वर्णसंकरकारकत्वेन प्रजाधर्मनाशकत्वात्प्रजानाशका एव यथाशास्त्रं षष्ठांशम् । प्रेत्य लोकांतरे ॥ १७ ॥ वर्णाश्रमेष्वात्मा मनो येषां तैः ॥ १८ ॥ १९ ॥ एतस्मै सर्वेश्वराय हरये ॥ २० ॥ नियच्छति नियोजयति पालयति वा, त्रयीमयं त्रयीप्रतिपाद्यं तद्रूपं वा, द्रव्यमयं सर्वस्वरूपम् । तपोमयं तत्प्राप्यंते भवाय यजतः ‘भवो भद्रे हरे प्राप्तौ’ इति यादवः । अनुवर्त्तितुं तत्रैव यजने प्रवर्त्तयितुं वा ॥ २१ ॥ २२ ॥ ऋषीणां वाक्यामृतं शिरसि वज्रपातोपममिव मन्वानो गूढाक्षेपाभिसंधिर्वेनः प्रतिवक्ति वेन उवाचेति । ये भवंतः वृत्तिदं माम् अद्यैव मया फलमूलादित्रोटने निषिद्धे सद्य एव मरिष्यंतीति भावः । जारं वयोहरं तत्परिचर्यायां निरर्थं वयो गमयंतीति भावः । तेनाहमेव वृत्तेर्दाने निरोधे च प्रभुरतोऽहमेवार्च्य इति ध्वनितम् ॥ २३ ॥ अमीति । मुनिवृंदमुद्दिश्याह येऽमी इह लोके नृपकोपात्तेषामनर्थाप्तिः प्रसिद्धैव परलोकेऽपि सर्वदेवमयनृपावज्ञातो महानर्थाप्तिः श्रूयत एव “क्लिश्यंत्येव महाघोरनरके ह्यनिशं नराः । देवब्राह्मणभूपालधेनूनामवहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी ॥ भर्तृस्नेहविदूराणां यथा जारे कुयोषिताम् ॥ २५ ॥ विष्णुर्विरिंचो गिरिश इंद्रो वायुर्यमो रविः ॥ पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः ॥ २६ ॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः ॥ देहे भवंति नृपतेः सर्वदेवमयो नृपः ॥ २७ ॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः ॥ बलिं च मह्यं हरत मत्तोऽन्यः कोऽग्रभुक्पुमान् ॥ २८ ॥ मैत्रेय उवाच ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ॥ अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमंगलः ॥ २९ ॥ इति तेऽसत्कृतास्तेन द्विजाः पण्डितमानिना ॥ भग्नायां भव्ययाच्ञायां तस्मै विदुर चुक्रुधुः ॥ ३० ॥ हन्यतांहन्यतामेष पापः प्रकृतिदारुणः ॥ जीवञ्जगदसावाशु कुरुते भस्मसाद् ध्रुवम् ॥ ३१ ॥ नायमर्हत्यसद्वृत्तो नरदेववरासनम् ॥ योऽधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः ॥ ३२ ॥ को वैनं परिचक्षीत वेनमेकमृतेऽशुभम् ॥ प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः ॥ ३३ ॥ इत्थं व्यवसिता हंतुमृषयो रूढमन्यवः ॥ निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया ॥ ३४ ॥ ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरम् ॥ सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३५ ॥

भर्तृस्नेहो विदूरो येषाम् ॥ २५ ॥ २६ ॥ देहे भवंति नृपतेरतो नृपतिरेवेश्वर इतरे तदंशा इति भावः ॥ २७ ॥ बलिं च करादिकम् । अग्रभुगाराध्यः ॥ २८॥ २९॥ तेनासत्कृताः भग्नायां याञ्चायां चक्रुधुः क्रोधं चक्रुः ॥ ३० ॥ ३१ ॥ ३२ ॥ परिचक्षीत निंदेत अशुभं वेनं विना । कृतघ्नतामाहुः । यदनुग्रहविषयः सन्नीदृशमैश्वर्यं यः प्राप्तः ॥ ३३ ॥ पूर्वं गूढमन्यव इदानीं रूढमन्यवः प्रकटकोपाः हुंकृतैर्हुंकारैः ॥ ३४ ॥ स्वाश्रमपदं प्रति ऋषिभिर्गते गमने कृते सति विद्यायोगेन मंत्रसहितया युक्त्या

लनात् ॥'' इत्यादिपुराणांतरात् ॥ २४ ॥ पुनरपि स्वस्मिञ्छापयोग्यापराधं कर्त्तुमाह—क इति । कुयोषितां स्वैरिणीनाम् ॥२५॥ अस्मद्भक्तिविषयो नाम्ना विष्णुः सृष्ट्यादिकारिणस्तदाज्ञानियता विरिंच्यादयस्तत्परिवारभूता इति भ्रांतिर्मा भूद्यत एते विष्णुप्रभृतयो मयि संनिहिता अतस्तत्तच्छक्तिमत्त्वादहमेवाखिलोत्तम इत्याहः—विष्णुरित्यादिना । अपां पतिर्वरुणः । पर्जन्यो धर्मः स च यमाद्भिन्नो देवविशेषः वर्षति निखिलमभीष्टमिति निरुक्तेः । 'पृषु—वर्षणे' पृषेरंत्यस्य जोऽन्यप्रत्ययश्चोणादौ प्रतिपादितः । यद्वा पर्जन्य इति सर्वेषां विशेषणम् ॥ २६ ॥ अन्येऽश्विन्यादयश्च प्रभवः समर्थाः ॥ २७ ॥ यतोऽहं सर्वदेवमयस्तस्माद्धेतोः कर्मभिर्यज्ञाद्यनुष्ठानैः । अस्मत्स दृशो मनुष्योयमिति मत्सरं परित्यज्येत्यर्थः ॥ २८ ॥ अनुनीयमानः प्रबोध्यमानः । तेषामृषीणां, याच्ञां प्रार्थनाम् । यतो भ्रष्टानि मंगलानि शुभकर्माणि जीवनादिहेतुभूतानि यस्य स तथा ॥ २९ ॥ पंडितमानिना मूर्खेण तेन वेनेन । ते मुनयः । असत्कृता अवमानिताः । भव्या मंगलरूपा या याच्ञा तस्यां भग्नायामगृहीतायां त्वमपि दुष्टस्वभावमेतत्तुल्यं दुर्योधनं यथा बोधितवानित्यभिप्रायेणाह—विदुरेति । यद्वा—भव्येत्यपि संबुद्धिरेव । त्वमपि तेषां भव्यहेतुत्वाद्दृषिवद्भव्योऽसीत्यभिप्रायः ॥ ३० ॥ कुरुते करिष्यते तस्मादयमेव भस्मसात्कर्त्तव्य इति एकस्मिन्नस्मिन्हतेऽनेकेषां रक्षासिद्धेर्नैतद्धनने दोष इति भावः ॥ ३१ ॥ नरदेवानां वरासनं सिंहासनम् । अधियज्ञो यज्ञाधिष्ठाता स चासौ पतिः पालकस्तम् । न अपत्रया लज्जा यस्य स तथा 'लज्जा सापत्रपान्यतः' इत्यमरः ॥३२॥ एतं विष्णुम् । भाजनशब्दस्य पुंस्त्वमार्षम् । तीर्थस्तु—भाजनमित्येव पपाठ । विश्वनाथस्तु—यद्यस्मादीदृशमैश्वर्यं प्राप्तो हि अनुग्रहभाजनं भवति तस्मान्निरनुग्रहादयं हंतव्य इति भाव इति व्याचख्यौ॥३३॥निजघ्नुर्मारयामासुः । तद्धनने दोषाभावमाह हतमिति ॥३४॥ युक्त्या औषधिसहिततैलप्रक्षेपाद्युपायेन ॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः ॥ हुत्वाऽग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ॥ ३६ ॥ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ॥ ३७ ॥ एवं मृशंत ऋषयो धावतां सर्वतो दिशम् ॥ पांसुः समुत्थितो भूरिश्चोराणामपि लुंपताम् ॥ ॥३८॥ तदुपद्रवमाज्ञाय लोकस्य वसु लुंपताम् ॥ भर्तर्युपरते तस्मिन्नन्योऽन्यं च जिघांसताम् ॥ ३९॥ चोरप्रायं जनपदं हीनसत्त्वमराजकम् ॥ लोकान्नावारयञ्छक्ता अपि तद्दोषदर्शिनः ॥ ४० ॥ ब्राह्मणः समदृक्छांतो दीनानां समुपेक्षकः ॥ स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥ ४१ ॥ नांगस्य वंशो राजर्षेरेष संस्थातुमर्हति ॥ अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ॥ ४२ ॥

पालयामास ॥ ३५ ॥ पुंवद्भाव आर्षः । सरस्वत्याः सलिले आप्लुताः कृतस्नानाः विष्णुकथाश्चक्रुः ॥ ३६ ॥ तदा तूत्पातान्वीक्ष्य नृपरहितायाः भुवोऽभद्रं न भवेत्किमित्याहुश्च ॥ ३७ ॥ एवं मृशंतस्तर्कयंत ऋषयः स्थिताः तदा धावतां चोराणां भूरिः पांसुः धूलिः समुत्थितः ॥ ३८ ॥ तत्तदा तेषां लोकस्य वसु धनं लुंपतां जिघांसतां चोपद्रवमाज्ञाय ॥ ३९ ॥ तथा चोरप्रायमराजकं हीनसत्त्वं च जनपदमाज्ञाय शक्ता अप्यवारणे दोषदर्शिनोऽपि जना लुंपतो लोकान्नावारयन्नित्यन्वयः ॥ ४० ॥ शक्तानां क्षत्रियाणामवारणे दोष इति किं वक्तव्यम् । समदृगपि शांतोऽपि ब्राह्मणोऽपि यदि दीनानां समुपेक्षको भवेत्तर्हि तस्यापि ब्रह्म तपः स्रवति ॥ ४१ ॥ अत उपेक्षादोषपरिहाराय नांगस्येत्यादि विनिश्चित्य महीपतेरूरुं तरसा ममंथुरित्यन्वयः । संस्थातुं नाशं गंतुम् । यद्वा । ऋषय एव लुंपतो लोकान्नावारयन् । कथंभूताः । हुंकारेणैव वेनं निवारयितुं शक्ता अपि । तत्किम् । तस्मिन्निवारणे तन्मरणादिदोषदर्शिनः न चोदासत चोरोपद्रुते दीनोपेक्षायां तपोहानिप्रसंगात । न चान्यं तन्निवारकं

यैर्भृग्वादिभिर्वेनो मारितस्ते सतोऽभ्यर्हितस्य विष्णोः कथाः इत्यर्थः । आर्षः इति । सरस्वत्पदेन सरसीमद्देशीयजलकृतस्नाना इति भ्रांतिर्मा भूदिति भावः ॥ ३६ ॥ तदा सत्कथावसरे न भवेत्किमपि तु भवेदेवेत्यर्थः ॥ ३७ ॥ पांशुर्धूलिः ॥ ३८ ॥ तस्मिन्वेने ॥ ३९ ॥ शक्ता अपि जनाः क्षत्रादयः समर्था अपि दोषदर्शिनोऽपि यद्यधर्मकर्त्तारं शक्ता न वारयंति सोऽधर्मस्तानपि स्पृशत्येवेति जानंतोपि ॥ ४० ॥ "ब्रह्म सत्यतपो धर्मपरात्मब्राह्मणेषु च" इति कोशात् । तस्यापि ब्राह्मणस्यापि । पयो नीरम् । "पयः स्यात्क्षीरनीरयोः" इति विश्वः ॥ ४१ ॥ नन्वेवं चेत्तर्हि भृग्वादयस्ते मुनयः कथं निश्चिताः स्थिताः सत्यं त एव स्वैर्दस्युवधप्रजापालनाम्यां तपःक्षयविक्षेपादिकमालक्ष्य कोऽप्येको जनो राजा कर्त्तव्य इति व्यवस्थायां परामृश्याहुर्नांगस्येति । यतो दीनोपेक्षा तपोनाशिकाऽतो हेतोः सा न कार्येति स्वाम्यवतरणिकार्थः । नृपा भविष्यंतीति शेषः । पूर्वव्याख्याने जनानावारयन्नित्युक्तं तत्र च तेजोबलादिहीनसामान्यजनस्य प्रबलदस्युवारणासामर्थ्येनास्वारस्यप्रतीतेराह-यद्वेति । हुंकारेण वेनमिव तानपि वारयितुं शक्ताः तत्तर्हि किन्नावारयन्निति चेदाह-तस्मिन्निवारणे हुंकारेण निवारणे तन्मरणादिदोषदर्शितो लोकानां मरणादिरूपो यो दोषः तं पश्यंतीत्यर्थः । यथा हुंकारेण निवारणे वेनो मृतस्तथेमे मा म्रियेरन्निति तर्हि किमुदासीना बभूवुरिति चेदाह—न चेति । तर्हि किं कंचिदन्यं राजानं चक्रुस्तत्राह न चान्यमिति । तत्र हेतुः—अंगवंशेति । वंशानुच्छेदज्ञानं तु तपोयोगबलेनैवेति ज्ञेयं यतोंगवंश उच्छेदानर्होऽतो हेतोः "बाहुको वामनो ह्स्वः खर्वोऽल्पतनुपृश्निकौ" इति कोशात् । प्रथमं तद्देहतो मात्रंशः पृथग्भूय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः ॥ ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४३ ॥ काककृष्णोऽतिह्रस्वांगो ह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ॥ ४४ ॥ तं तु तेऽवनतं दीनं किं करोमीति वादिनम् ॥ निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥ ४५ ॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः ॥ येनाहरज्जायमानो वेनकल्मषमुल्बणम् ॥ ४६ ॥ इति श्रीभागवते म० चतु० पृथुचरिते निषादोत्पत्तिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ मैत्रेय उवाच ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत ॥ १ ॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः ॥ ऊचुः परमसंतुष्टा विदित्वा भगवत्कलाम् ॥ २ ॥ ऋषय ऊचुः ॥ एष विष्णोर्भगवतः कला भुवनपालिनी ॥ इयं च लक्ष्म्याः संभूतिः पुरुषस्यानपायिनी ॥ ३ ॥ अत्र तु प्रथमो राज्ञां पुमान्प्रथयिता यशः ॥ पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः ॥ ४ ॥

राजानमकुर्वन् । अंगवंशोच्छेदस्यानर्हत्वात् । अतो वेनस्यैव देहं ममंथुरिति योज्यम् ॥ ४२ ॥ बाहुको वामनः ॥ ४३ ॥ तमेवाह । काक इव कृष्णः महत्यौ हनू कपोलप्रांतौ यस्य । ह्रस्वौ पादौ यस्य ॥ ४४ ॥ ४५ ॥ गिरिः काननं च गोचर आश्रयो न तु पुरादिप्रवेशो येषाम् । तत्र हेतुः । येन कारणेनासावहरत्ततस्तस्य वंश्यास्तथाभूताः ॥ ४६ ॥ इति श्रीमद्भागवते चतुर्थे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ ततः पंचदशे विप्रैर्मथनाद्वेनबाहुतः ॥ जातस्य तु पृथोरुक्तमभिषेकार्हणादिकम् ॥ १ ॥ १ ॥ २ ॥ किमूचुरित्यत आह—एष इति चतुर्भिः । लक्ष्म्याः संभूतिः कला ॥ ३ ॥ अत्र यः पुमान्स तु महाराजो भविष्यति ॥ ४ ॥

प्रकटी बभूवेति चक्रवर्त्ती । कमूरुमित्याकांक्षाशमनं ग्रंथांतरसंमत्या करोति ''अंगानुक्तौ दक्षिणं स्याद्दिगनुक्ताविंद्रदिङ्मता । रत्नानुक्तौ सुवर्णं स्यादनुक्तौ हविषो घृतम्'' इति कात्यायनोक्तेर्दक्षिणमूरुं निर्मथ्य स्वमतप्रवृत्त्यर्थं वेनदेहं योगेन प्रविष्टं पापरूपं नास्तिकं निषादरूपेण मुनयो निष्कासयामासुरिति ग्रंथांतरे स्पष्टम् ॥ ४२ ॥ ४३ ॥ तं बाहुकनरम् । 'कपोलौ तत्परो हनुरित्यमरः' निम्ननासाग्रोऽवोनतघ्राणशिराः ताम्रमूर्द्धजो रक्तकेशः । ॥ ४४ ॥ निषीदेति । नासौ राज्ययोग्य इति व्यवसीय तमकथयन्नित्यर्थः । मातृविकृत्यंशवत्त्वेनात्मनस्तादृशत्वं संचिंतयानं प्रत्याह-तातेति । त्वं तु साक्षाद्धर्मावतारत्त्वात्सर्वजनद्वेष्यनिषादापेक्षया सर्वोत्तमोसीत्यभिप्रायः ॥ ॥४५॥ सपादम् । येन कारणेनासौ जायमानो वेनकल्मषमहरज्जग्राह ततस्तेन हेतुना स निषादो नीचजातिरभवत् तस्य वंश्याश्च नैषादा अतिनीचा अभवन्नित्यन्वयः । तत्र पुराद्यवेशे ''चांडालानां गृहा नैव कार्या ग्रामपुरादिषु । अरण्ये पर्वते वापि वसेयुर्नगराद्बहिः'' इति स्मृतेः ''निषादः स्वरभेदे च चांडाले धीवरांतरे'' इति मेदिनी । तथाभूता गिरिकाननगोचराः । उल्बणमुग्रम् ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ आदिना स्तवनादिग्रहः । अर्हणमुपढौकनम् (१) अथ मात्रंशनिषादोत्पत्त्यनंतरम् । पित्रंशो विष्णुयज्ञप्रभावश्च कीदृगभवदित्यपेक्षायामाह-अथेति । तस्य वेनस्य ॥ १ ॥ क्षात्रं तेजो भगवत्प्रभावश्च क्षत्रियस्य बाहोरेव तिष्ठतीत्यभिप्रेत्य बाहुमथनमिति कलाविभूतिः ॥ २ ॥ अपायो वियोगस्तद्रहिता । एष पुरुषरूपो यो मिथुनांतर्गतः । अनपायत्वे प्रमाणं तु ''देवत्वे देवता साक्षात्मानुषत्वे तु मानुषः'' इति पराशरपुराणोक्तिरेव ॥ ३ ॥ अत्र मिथुने यः पुमान्स तु पुरग्रामादिकल्पकत्वाद्राज्ञां प्रथमायत्तो यशः प्रथयिताऽतः पृथुरिति प्रसिद्धः पृथुश्रवा महाराजो भविष्यतीति सर्वत्र योजना । अत्रायं तु प्रथमो राज्ञामिति प्रचुरः पाठो यद्यपि दृश्यते तथापि स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इयं च सुदती देवी गुणभूषणभूषणा ॥ अर्चिर्नाम वरारोहा पृथुमेवावरुंधती ॥ ५ ॥ एष साक्षाद्धरेरंशो जातो लोकरिरक्षया ॥ इयं च तत्परा हि श्रीरनुजज्ञेऽनपायिनी ॥ ६ ॥ मैत्रेय उवाच ॥ प्रशंसंति स्म तं विप्रा गंधर्वप्रवरा जगुः ॥ मुमुचुः सुमनोधाराः सिद्धा नृत्यंति स्वःस्त्रियः ॥७॥ शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि ॥ तत्र सर्व उपाजग्मुर्देवर्षिपितॄणां गणाः ॥८॥ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः ॥ वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः ॥ ९ ॥ पादयोररविंदं च तं वै मेने हरेः कलाम् ॥ यस्याऽप्रतिहतं चक्रमंशः स परमेष्ठिनः ॥ १० ॥ तस्याऽभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्मा आजह्रुः सर्वतो जनाः ॥११॥ सरित्समुद्रा गिरयो नगा गावः खगा मृगाः ॥ द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनम् ॥ १२ ॥ सोऽभिषिक्तो महाराजः सुवासाः साध्वलंकृतः ॥ पत्न्यार्चिषाऽलंकृतया विरेजेऽग्निरिवापरः ॥ १३ ॥ तस्मै जहार धनदो हैमं वीरवरासनम् ॥ वरुणः सलिलस्रावमातपत्रं शशिप्रभम् ॥ १४ ॥ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजम् ॥ इंद्रः किरीटमुत्कृष्टं दंडं संयमनं यमः ॥ १५ ॥

सुदती शोभनदंतवती गुणानां भूषणानां च भूषणरूपा अवरुंधती भर्तृत्वेन भजंती भविष्यति ॥ ५ ॥ अत्र हेतुः । एष इति । लोकस्य रिरक्षया रिरक्षयिषया ॥ ६ ॥ स्वःस्त्रियः अप्सरसो नृत्यंति स्म ॥७॥८॥ देवैः सहासृत्यागत्य वैन्यस्य पृथोः चिह्नं रेखात्मकं चक्रम् ॥९॥ अप्रतिहतं रेखांतरैरभिन्नं चक्रं यस्य चिह्नं स परमेश्वरस्यांशः ॥१०॥ आभिषेचनिकान्यभिषेकसाधनानि ॥ ११ ॥ १२ ॥ १३ ॥ हे वीर विदुर वरासनमुत्कृष्टमासनम् । सलिलस्य स्रावो यस्मात् ॥१४॥ द्वे वालव्यजने ॥१५॥

श्रीधरसंमतः । अत्र य इत्यादिव्याख्यानात् ॥ ४ ॥ एकदेहोद्भूतयोर्यद्यप्युभयोरुद्वाहो नोचितस्तथापि लक्ष्म्यंशाया अर्चिषो विष्ण्वंशं पृथुं विनान्यायोग्यत्वान्न दोषः । पुरा विमृश्यैव मुनिभिरुभयत्राहुभ्यामुभयोत्पादनं कृतमन्यथैकबाहोः पृथुमेवोत्पादयेयुरिति भावः ॥ ५ ॥ अत्र पृथ्ववरोधे ॥ ६ ॥ प्रशंसंति स्तुवंति, तं पृथुं स्मयोगे लट् । सुमनसां पुष्पाणां धारा इव धाराः ॥ ७ ॥ तत्र पृथ्वाविर्भावदेशे ॥ ८ ॥ ब्रह्मेति सार्द्धकम् । गदाभृतो हरेश्चिह्नं गदेव तच्चिह्नं तं वैन्यम् । चिह्नं पाणितल इति शेषः "यस्य रेखांतराभिन्नं चक्रं पाणितले भवेत् । स भवेत्पृथिवीपालो विष्णोरंशसमुद्भवः" इति सामुद्रिकात् ॥९॥ १० ॥ अस्मै पृथवे ॥११॥ "उपायनमुपाहार उपढौकनमित्यपि" इत्यमरः ॥ १२ ॥ १३ ॥ यथा स संग्रामवीरत्वात्सर्वैरर्चितस्तथा त्वमपि हरिभक्तेष्वर्चितत्वाद्वीरोसीत्याह-वीरेति ॥ १४ ॥ वालव्यजने चामरयुगलम् । संयम्यंतेऽधर्मिणस्ताड्यंतेऽनेनेति संयमनम् । यमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमम् ॥ हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम् ॥ १६ ॥ दशचंद्रमसिं रुद्रः शतचंद्रं तथांबिका ॥ सोमोऽ
मृतमयानश्वांस्त्वष्टा रूपाश्रयं रथम् ॥ १७ ॥ अग्निराजगवं चापं सूर्यो रश्मिमयानिषून् ॥ भूः पादुके योगमय्यौ द्यौः पुष्पावलिमन्वहम् ॥ १८ ॥
नाट्यं सुगीतं वादित्रमंतर्द्धानं च खेचराः ॥ ऋषयश्चाशिषः सत्याः समुद्रः शंखमात्मजम् ॥ १९ ॥ सिंधवः पर्वता नद्यो रथवीथीर्महात्मनः ॥
सूतोऽथ मागधो बंदी तं स्तोतुमुपतस्थिरे ॥ २० ॥ स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् ॥ मेघनिह्रादया वाचा प्रहसन्निदमब्रवीत् ॥२१॥
पृथुरुवाच॥भोः सूत हे मागध सौम्य बंदिँल्लोकेधुनाऽस्पष्टगुणस्य मे स्यात्॥ किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः ॥२२॥
तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः ॥ सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः ॥ २३ ॥

ब्रह्ममयं वेदमयं वर्म कवचं तत्पत्नी श्रीः श्रियं संपदम् ॥ १६ ॥ दशचंद्राकाराणि बिंबानि कोशे यस्य तं असिं खड्गं शतचंद्रं चर्मरूपाश्रयमतिसुंदरम् ॥ १७ ॥
अजस्य गोश्च शृंगाभ्यां निर्मितं चापम् ॥ योगमय्यौ पादस्पर्शमात्रेणाभीष्टदेशप्रापिके ॥ १८ ॥ नाट्यादिकौशलं खेचराः आत्मजं स्वप्रभवम् ॥ १९ ॥ तं स्तोतुमुप
स्थिताः ॥ २० ॥ स्तावकान् स्तोतुमुद्यतान् अभिप्रेत्य ज्ञात्वा ॥ २१ ॥ लोके स्पष्टगुणस्य सतो मे स्तुतिः स्यात् अधुना तु किमाश्रयो मे स्तवो योज्यताम् । अतो
वो गिरोऽधुना मयि वितथा मा भूवन् । यद्वा लोकेऽधुनाऽस्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् अतः एष क्रियमाणः स्तवो मे मदन्यस्य योज्यतां न तु मे । वितथाभि
धानापत्तेरित्यर्थः ॥ २२ ॥ तस्मात्परोक्षे कालांतरे स्पष्टेषु गुणेषु सत्स्वस्माकमुपश्रुतानि यशांसि प्रतिस्तोत्रमलमत्यर्थं करिष्यथ । हे अपीच्यवाचो मधुरगिरः सभ्यैः

यमराजः ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ खेचराः विद्याधरादयो देवविशेषाः ॥ १९ ॥ रथवीथीरथमार्गान् । "वीथी पंक्तौ गृहांगे च रूपकांतरवर्त्मनोः" इति मेदिनी । महात्मनो महे प्रजापालनोत्सवे आत्मा
बुद्धिर्यस्य तस्य अथोपायनप्रदानोत्तरं, तं पृथुम् । सूतमागधबंदिन इति । ते च "पुराणस्थनृपस्तोता सूत इत्यभिधियते । सूतशूद्रनृपस्तोता मागधः परिकीर्त्तितः॥वर्त्तमान नृपस्तोता बंदीति प्रोच्यते बुधैः" इति जैमिनिनोक्ताः ।
ते च पृथक्पृथग्जातीयास्त्रिवर्णेतरा एव ॥ २० ॥ इदं वक्ष्यमाणम् ॥ २१ ॥ क आश्रयो यस्य स किमाश्रयः भवद्भिरिति शेषः । योज्यतां योज्यते लडर्थे लोट् । यद्वा योज्यतां स्तुतिं प्रयुजानानां वो युष्माकमिति योज्यम् ।
यतोधुना स्तवाश्रयत्वं नास्ति अतो हेतोः वितथा असत्याः स्पष्टगुणस्य तु स्वत एव स्यादिति चेदाह—यद्वेति । अत एवास्पष्टगुणत्वादेव । किमाश्रयोमे इहामे इति च्छेदः कार्यस्तेनामे मदन्यस्य इत्यर्थ इति । असदभिधानाद्भव
त्स्वेव दोषो भविष्यति न मयीति भावः । नमेऽमे इति तत्पुरुषे नञो नलोपे विभक्तेरलुगार्ष एवेति ॥ २२ ॥ ननु भो गुणरत्नाकर भवतोनिखिला एवैते गुणाः स्पष्टी भविष्यंत्येवेति ज्ञात्वैव स्तुम इति चेत्तत्राह—तस्मादिति ।
यस्माद्गुणा भविष्यंति तस्माद्धेतोः करिष्यंत्येव न तु कुरुथ तदा के युष्मान्निषेत्स्यंतीति भावः । तदापि परोक्ष एव न तु मत्साक्षात् न हि स्तव्यः संमुख एव स्तुत्वा हर्षयितुं युज्यत इति भावः । अपीच्यवाचः मनोज्ञवाक्कौ
शलाभिज्ञाः वाचो मनोज्ञत्वं सत्याया एवान्यथा युष्मत्करिष्यमाणस्तुत्यां न कस्याप्यादरो भविष्यतीत्यभिप्रायः । संबुद्धेः अर्वाचीनं मद्विधम् । अतएवोत्तमश्लोकस्तावकत्वादेव । इत्यर्थ इति । उत्तमश्लोकस्तावकत्वाभावे सभ्यत्वमेवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि ॥ तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥ २४ ॥ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः ॥ ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितम् ॥२५॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः ॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥ २६ ॥ इति श्रीमद्भा० म० च० पृथुचरिते राज्याभिषेकनिरूपणं नाम पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः ॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥ १ ॥ नालं वयं ते महिमानुवर्णने यो देववर्योऽवततार मायया ॥ वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥ २ ॥ अथाप्युदारश्रवसः पृथोर्हरेः कलाऽवतारस्य कथाऽमृतादृताः ॥ यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ॥ ३ ॥

प्रेरिता वयं त्वामेव स्तुम इति चेत्तत्राह । उत्तमश्लोकस्य गुणानुवादे कार्ये सति जुगुप्सितमर्वाचीनं न स्तावयंति ॥ २३ ॥ ननु संभावितैरेव गुणैरात्मानं जनः स्तावयतीति चेत्तत्राह । महतां गुणानात्मनि संपादयितुं शक्तोऽप्यसतो गुणान्संभावनामात्रेण कः स्तावयते यद्वा आदावेव सतोऽपि कः स्तावयते स्वत एव प्रख्यातिसिद्धेः । अन्यस्तु मिथ्यागुणस्तुतिश्लावी मंद इत्याह । त इति । यद्ययं शास्त्राभ्यासादिकमकरिष्यत्तर्ह्यस्य ते विद्यादयो गुणा अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धो जनानामवहासं न वेद ॥ २४ ॥ किं च प्रभवोऽपि विश्रुता अपि ह्रीमंतोऽपि जुगुप्संति वेति दृष्टांते यथाऽतिस्तुतौ क्रियमाणायां विगर्हितं ब्राह्मणवधादि पौरुषमपि निंदंति तथोचितामपि स्तुतिं न सहंत इत्यर्थः ॥ २५ ॥ वरीमभिरिति दीर्घत्वमार्षं भवितृप्रधानोऽयं निर्देशः । वरिष्ठैः कर्मभिरविदिता इत्यर्थः ॥ २६ ॥ इतिश्रीभा० म० चतुर्थे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ षोडशे सर्वलोकेशैः सत्कृतं भार्यया युतम् ॥ मुनिप्रयुक्ताः सूताद्याः स्तुवंति स्मेति वर्ण्यते ॥ १ ॥ गायकाः सूतादयः ॥ १ ॥ नालं न समर्थाः भवामः अवतारेष्वप्यस्याधिक्यमाहुः । वेनस्यांगाज्जातस्य ते पौरुषाणि प्रत्यवितर्क्यतया ब्रह्मादीनामपि धियो बभ्रमुः । कुतः पुनर्वयं तद्वर्णने समर्था भवेम ॥ २ ॥ अथापि यथा

न सेत्स्यतीति भावः ॥ २३ ॥ अत्राक्षिपति नन्विति । अकारप्रश्लेषेणार्थांतरमाह—यद्वेति । क्रियातिपत्त्या स्तुतिकाले विद्याभ्यासादिक्रियाया अनिष्पत्त्या । अत्र विश्वनाथः—ननु स उत्तमश्लोकस्त्वमेवेति तत्राह—महतां भगवतो गुणान्स्वात्मनि स्वस्मिन्कर्तुं शिरःशेखरी कर्तुमीशः समर्थोपि कोभिज्ञ आत्मानं स्तावयते न कोपि सतो वर्तमानानपि किं पुनरवर्तमानानित्याह ॥ २४ ॥ प्रभवोप्यात्मस्तोत्रं न बहु मन्यंते किं पुनरहमित्याह—किं चेति । वा शब्दो दृष्टांते इवार्थे विगर्हितं पौरुषमिव अहो अयं सतां धर्मध्वंसे परमसमर्थस्तथापि प्रबलगोब्राह्मणहननेऽयं शूर इत्यादि लक्षणं पौरुषं विगर्हितमेव । इत्यर्थ इति । यद्यपि प्रबलहननेन मां स्तौति तथापि गोब्राह्मणपदोपादानान्मां निंदत्येवायमिति तं वारयस्येवेति भावः ॥ २५ ॥ वरस्य भावो वरिमा तैः । इत्यर्थ इति । अत्र भवितुर्वरिष्ठकर्मणः प्राधान्येन निर्देशो न तु भावस्य तथात्वे तु वरिष्ठत्वैरित्यर्थः स्यादिति भावः ॥ २६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ (१) ॥ १ ॥ यद्वा-मायया कृपया स्वशक्त्याऽर्चिषा सहेत्यर्थः ॥ २ ॥ तर्हि निवर्ततामित्यत्राह-अथापीति । यद्यपि कथामृतादरत्वान्मनो न निवर्तते इत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन् ॥ गोप्ता च धर्मसेतूनां शास्ता तत्परिपंथिनाम् ॥ ४ ॥ एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः ॥ कालेकाले यथाभागं लोकयोरुभयोर्हितम् ॥ ५ ॥ वसु काल उपादत्ते काले चायं विमुंचति ॥ समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः ॥ ६ ॥ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि ॥ भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान् ॥ ७ ॥ देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः ॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत् ॥ ८ ॥ आप्याययत्यसौ लोकं वदनामृतमूर्तिना ॥ सानुरागावलोकेन विशदस्मितचारुणा ॥ ९ ॥ अव्यक्तवर्त्मैष निगूढकार्यो गंभीरवेधा उपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥ १० ॥ दुरासदो दुर्विषह आसन्नोऽपि विदूरवत् ॥ नैवाभिभवितुं शक्यो वेनारण्युत्थितोऽनलः ॥ ११ ॥

वद्वर्णयितुमशक्ता अपि कथामृते सादराः मुनिभिः कृत उपदेशो योगबलेन हृदि प्रकाशनं तदनतिक्रम्य वितन्महि विस्तारयामः ॥ ३ ॥ ४ ॥ तनौ स्वदेहे लोकपालानां तनूर्मूर्तीः काले काले बिभर्ति यथाभागं पालनपोषणानुरंजनादिकार्यानुसारेण यज्ञादिप्रवर्तनेन स्वर्गस्य हितं वृष्ट्यादिना च भूर्लोकस्य हितं यथा भवति तथा ॥ ५ ॥ सूर्यादितनुधारणमेवाहाष्टभिः । वसु धनं करादानकाले आदत्ते दुर्भिक्षादिकाले विमुंचति च । अष्टौ मासान्सूर्यो यथा वसु जलमादत्ते वर्षासु विमुंचति तद्वत् ॥ ६ ॥ मस्तके पादेनाक्रमतामप्यार्तानां भूतानामतिक्रमं सहिष्यते क्षितेर्वृत्तिः सर्वसहनं सा वृत्तिर्यस्यास्ति स तथा ॥ ७ ॥ देवेऽवर्षति एष कृच्छ्रं गताः प्राणा यासां ताः प्रजाः स्वयं वृष्टिं कृत्वा रक्षिष्यति । अत्र हेतुः । असौ नरदेववपुर्हरिरिति ॥ ८ ॥ वदनमेवामृतमूर्तिश्चंद्रस्तेन सानुरागोऽवलोको यस्मिन् । विशदं शुभ्रं यस्मिंस्तेन चारुणा । अत्र च क्वचिद्वर्तमाननिर्देशो वर्तमानसामीप्ये वर्तमानवद्वेति भूतनिर्देशश्च "आशंसायां भूतवच्च" इति द्रष्टव्यः ॥ ९ ॥ न व्यक्तं वर्त्म प्रवेशनिर्गममार्गो यस्य । निगूढं निष्पत्तेः पूर्वमविज्ञातं कार्यं यस्य तच्च कार्यं गंभीरं किमर्थमेतत्कृतमित्यन्यैरज्ञाताभिप्रायं विधत्त इति तथा उपगुप्तं सुरक्षितं वित्तं यस्य अनंतमाहात्म्यश्चासौ गुणानामेकं धाम विष्णुर्यस्मिन् अनंतमाहात्म्योपेता गुणा एवैकं धाम स्थानं यस्येति वा । संवृतात्मा संयतमूर्तिः समुद्रचरत्वेन वरुणस्याप्येते गुणा द्रष्टव्याः ॥ १० ॥ दुरासदः

मुनिवचनोल्लंघनमियापि यथामति स्तोष्यामः॥३॥ एष पृथुः। तत्परिपंथिनां धर्मसेतुविरोधिनाम्॥४॥५॥ "वसु तोये महाधने" इत्यभिधानात्॥६॥ अक्रममपराधम् । आर्त्तानां दारिद्र्यादिपीडितानाम्॥७॥अत्र वृष्टिकरणे हरिरिंद्रो विष्णुर्वा कृच्छ्रं कष्टं गता अन्नानाप्त्या प्राणा इंद्रियाणि शरीरधारकवायवो वा॥८॥ 'विशदश्वेतपांडुराः' इत्यमरः । अत्र च पृथुवर्णने । अत्र चंद्रतनुधारणमुक्तम् ॥९॥ वरुणतनुत्वमाह अव्यक्तेति॥१०॥ वह्नितनुत्वं चाह-दुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्बहिश्च भूतानां पश्यन्कर्माणि चारणैः ॥ उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम् ॥ १२ ॥ नादंड्यं दंडयत्येष सुतमात्मद्विषामपि ॥ दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः ॥ १३ ॥ अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् ॥ वर्तते भगवानर्को यावत्तपति गोगणैः ॥ १४ ॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः ॥ अथामुमाहू राजानं मनोरंजनकैः प्रजाः ॥ १५ ॥ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः ॥ शरण्यः सर्वभूतानां मानदो दीनवत्सलः ॥ १६ ॥ मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः ॥ प्रजासु पितृवत्स्निग्धः किंकरो ब्रह्मवादिनाम् ॥ १७ ॥ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदिवर्धनः ॥ मुक्तसंगप्रसंगोऽयं दंडपाणिरसाधुषु ॥ १८ ॥ अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलयाऽवतीर्णः ॥ यस्मिन्नविद्यारचितं निरर्थकं पश्यंति नानात्वमपि प्रतीतम् ॥ १९ ॥

शत्रोर्मनसापि प्रातुमशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः विदूरवत्पौरुषेणाभिभवितुमशक्यः वेन एवारणिस्तस्मादुत्थितः ॥ ११ ॥ चारणैर्गुप्तभृत्यैः पश्यन्नपि स्वस्तुतिनिंदादावुदासीन इव वर्तिष्यते यथा देहिनामध्यक्षोऽविकृत आत्मभूतो वायुः सूत्रात्मा तद्वत् ॥ १२ ॥ आत्मद्विषां सुतमिति सुतग्रहणं स्वात्मजसाम्यार्थम् । द्विषां सुतमपि दंडानर्हं न दंडयति आत्मनः सुतमपि दंडार्हं दंडयत्येवेत्यर्थः । धर्मपथे यमस्य वृत्ते स्थितः ॥ १३ ॥ चक्रमाज्ञा सेना वा रथस्य वा चक्रं मानसाचलमभिव्याप्य प्रवर्तते । किंपर्यंतमित्यत आह । अर्को रश्मिगणैर्यावत्तपति तावत् ॥ १४ ॥ यद्यस्माद्रंजयिष्यत्यथ तस्मान्मनोरंजनैर्हेतुभिरमुं राजानमाहुः । मनोरंजनकैरिति चेष्टितविशेषणं वा ॥ १५ ॥ १६ ॥ मातरीव भक्तिर्भजनं यस्य । आत्मनो देहस्यार्ध इव पत्न्यां प्रीतिमान् ॥ १७ ॥ नांदिं सुखं वर्धयतीति तथा । मुक्तसंगेषु साधुषु प्रकृष्टः संगो यस्य दंडपाणिरित्यपराधानुपेक्षणमुच्यते । नादंड्यमित्यत्र पक्षपाताभाव उक्तः ॥ १८ ॥ अयं त्विति । तुशब्देन निरुपमत्वं दर्शयति । कोसावात्मा तमाह । यस्मि

सद इति ॥११॥ वायुधर्ममाह-अंतरिति 'वायुर्वै गौतमसूत्रम्' इति श्रुतेः सूत्रात्मेति ॥१२॥ धर्मराजतनुतामाह नेति ॥१३॥ सूर्यतनुतामाह-अस्येति ॥१४॥ अथातः । अन्यस्तु राजतीति निरुक्त्यायं तु रंजयति राजतीति निरुक्तिद्वयेनैव राजेति रंजेः कनिर्नलोपवृद्धी च औणादिकौ ॥ १९ ॥ सत्यसंधः सत्यप्रतिज्ञः 'संधा स्थितिप्रतिज्ञयोः' इति मेदिनी । व्रतसंधयोः शास्त्रीयलौकिकत्वाभ्यां भेदो ज्ञेयः । दीना वत्सलाः प्रिया यस्य सः ॥१६॥ स्निग्धः स्नेहकरः । ब्रह्मवादिनां वेदार्थानुसंधानवताम् ॥ १७ ॥ मुक्तसंगेषु । विरक्तेषु यद्वा—मुक्तानां ज्ञानिनामपि संग आसक्तिर्यस्मिन्स मुक्तसंगो हरिः । "प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः । नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः" इत्युक्तेः।"आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिम्" इत्युक्तेश्च । तस्मिन्प्रकृष्टः कायवाङ्मनोभिः संगो यस्य स तथा । क्रियाभेदमादाय धर्मराजस्य पुनरुपादानम् । असाधुषु वेदाननुयायिषु ॥ १८ ॥ ननु देवमनुजांतरेष्वप्येते गुणाः संतीति न तत्साम्यमित्याह अयं तु साक्षादिति यतः स एव कलया शक्त्या सहावतीर्णोऽस्मिन्प्रविष्टः आत्मा परमात्मा सर्वातिशयगुणत्वमेवाहुः । यस्मिन्भगवति साक्षात्सति नानात्वं स्वात्मनि देवमनुष्यादिभेदं निरर्थकं पुरुषार्थशून्यं पश्यंति । अविद्याकल्पितत्वेनातितुच्छत्वादिति भाव इति संदर्भः । विश्वनाथस्तु—यस्मिन्वर्तमाना मुनयोऽविद्या रचितमेकस्यापि जीवस्य स्थूलसूक्ष्मदेह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं भुवो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः ॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः ॥ २० ॥ अस्मै नृपालाः किल तत्रतत्र बलिं हरिष्यंति सलोकपालाः ॥ मंस्यंत एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरंत्यः ॥ २१ ॥ अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानाम् ॥ यो लीलयाऽद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः ॥ २२ ॥ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ ॥ तदा निलिल्युर्दिशिदिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः ॥ २३ ॥ एषोऽश्वमेधाञ्छतमाजहार सरस्वती प्रादुरभावि यत्र ॥ अहार्षीद्यस्य हयं पुरंदरः शतक्रतुश्चरमे वर्तमाने ॥ २४ ॥ एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवंतमेकम् ॥ आराध्य भक्त्याऽलभतामलं तज्ज्ञानं यतो ब्रह्म परं विदंति ॥ २५ ॥ तत्रतत्र गिरस्तास्ता इति विश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः ॥ २६ ॥ दिशो विजित्याऽप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ॥ सुरासुरेंद्रैरुपगीयमानमहाऽनुभावो भविता पतिर्भुवः ॥ २७ ॥ इति श्रीभा० म० चतु० पृथुचरिते षोडशोऽध्यायः ॥ १६ ॥ मैत्रेय उवाच ॥ एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः ॥ छंदयामास तान्कामैः प्रतिपूज्याभिनंद्य च ॥ १ ॥ ब्राह्मणप्रमुखान्वर्णान्भृत्याऽमात्यपुरोधसः ॥ पौराञ्जानपदाञ्छ्रेणीः प्रकृतीः समपूजयत् ॥ २ ॥

न्प्रतीतमपि नानात्वमर्थशून्यं पश्यंति ॥ १९ ॥ आ उदयाद्रेस्तत्पर्यंतं गोप्ता गोपायिष्यति तदर्थं पर्यस्यते पर्यटिष्यति प्रदक्षिणी करिष्यतीत्यर्थः ॥ २० ॥ अस्मै तथा प्रदक्षिणं कुर्वते मंस्यंते ज्ञास्यंति तस्य यश उद्धरंत्य उदाहरंत्यः कीर्तयंत्यः ॥ २१ ॥ इंद्र इवाद्रीन्विभिंदन् ॥ २२ ॥ लांगूलमुन्नमय्य यथा मृगेंद्रश्चरति तथा धनुर्विस्फूर्जयन्यदा क्ष्मामचरत् ॥ २३ ॥ सरस्वती यत्र प्रादुरभावि प्रादुरभूत् । कर्मकर्तरि चिण् । तत्राहार्षीत् हरणं करिष्यतीत्यर्थः ॥ २४ ॥ २५ ॥ विश्रुता विक्रमा यस्य । गाथाः प्रबंधान् आत्माश्रिता विष्ण्वाश्रिताः ॥ २६ ॥ उपगीयमानो महाननुभावो यस्य ॥ २७ ॥ इति श्रीमद्भागवते चतुर्थे टीकायां षोडशोऽध्यायः ॥ १६ ॥ ततः सप्तदशे लोकक्षुधाः प्रशमयन्पृथुः ॥ ग्रस्तबीजां महीं हंतुं यत्तो भीत्या तया स्तुतः ॥ १ ॥ छंदयामास तोषितवान् ॥ १ ॥ भृत्यानमात्यान्पुरोधसः पुरोहितांश्च

ध्यासान्नानात्वं स्वप्ने च नानात्वं प्रतीतमपि निरर्थकमवस्थामिव पश्यंतीत्याह । स्वामिव्याख्याने यस्मिन्नात्मनि प्रतीतं जाग्रदाद्यवस्थाभेदेन विश्वादिरूपं नानात्वमित्यर्थः ॥ १९ ॥ इत्यर्थ इति । यथा सूर्यः सर्वं प्रकाशयन्पर्यटति तथेति भावः ॥ २० ॥ अस्मै पृथवे तथाऽर्कवत् ॥ २१ ॥ शरासकोट्या शरासनाग्रेण ॥ २२ ॥ संग्रामेऽसह्यं धनुः ॥ २३ ॥ तत्र सरस्वतीप्रादुर्भावस्थले चरमेत्येऽश्वमेधे ॥ २४ ॥ यतो ज्ञानात् ॥ २५ ॥ तत्र तत्र देशे ॥ २६ ॥ अप्रतिरुद्धचक्रोऽविहताज्ञः लोकशल्यः लोकोपद्रवः ॥ २७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ ततः यशोवर्णश्रुत्यनंतरं, यत्तः सावधानः, तया भूम्या । (१) एवं पूर्वोक्तरीत्या तान्सूतादीन् ॥ १ ॥ समपूजयत् धन्या स्थ भो धन्याः स्थ युष्मानहं साधु पालयानीत्येतदेव मत्कर्तृकं युष्मत्परिचरणं भूयादिति मधुरमभाषत । विजयध्वजस्तु—राज्ञा समानवयसः श्रेणयस्तंग ॥ ५३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुर उवाच ॥ कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ॥ यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किम् ॥ ३ ॥ प्रकृत्या विषमा देवी कृता तेन समा कथम् ॥ तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥ ४ ॥ सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥ ५ ॥ यच्चान्यदपि कृष्णस्य भवान्भगवतः प्रभो ॥ श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयम् ॥ ६ ॥ भक्ताय मेऽनुरक्ताय तव चाधोक्षजस्य च ॥ वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमाम् ॥ ७ ॥ सूत उवाच ॥ चोदितो विदुरेणैवं वासुदेवकथां प्रति ॥ प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥ ८ ॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग विप्रैरामंत्रितो जनतायाश्च पालः ॥ प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ ९ ॥ वयं राजञ्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥ १० ॥ तन्नो भवानीहतु रातवेऽन्नं क्षुधार्दितानां नरदेवदेव ॥ यावन्न नंक्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥ ११ ॥

श्रेणीस्तैलिकतांबूलिकादीन्पौरविशेषान् प्रकृतीर्नियोगिनः ॥ २ ॥ दोहनं पात्रम् ॥ ३ ॥ मेध्यं यज्ञार्हम् ॥ ४ ॥ सविज्ञानमपरोक्षज्ञानसहितम् ॥ ५ ॥ पूर्वदेहः पृथ्ववतारस्तत्कथाश्रयम् । श्रवो यशः । सुष्ठु श्रवो यस्य ॥ ६ ॥ अदुह्यदुग्धवान् ॥ ७ ॥ ८ ॥ जनतायास्त्वं पाल इत्यामंत्रितो नियुक्तः तदा निरन्ने क्षितितले सति क्षुधा क्षामाः क्षीणा देहा यासां ताः प्रजा एत्य पतिं पृथुमब्रुवन् ॥९॥ जाठरेणाग्निनाऽभितप्ताः । यः साधितो विप्रैर्मथनेन संपादितस्तं त्वां शरणं याताः ॥ १० ॥ तत्तस्मान्नोऽ

रक्षका इत्याह ॥ २ ॥ विदुरः सूतादिभिः सूचितं गोदोहनादिपृथुविक्रमं विस्तरतः श्रोतुं लोकोपकाराय पृच्छति कस्मादिति । तत्र पृथुदोहनावसरे ॥३॥ प्रकृत्या स्वभावतः । तेन पृथुना । देव इंद्रः ॥ ४ ॥ ५ ॥ कृष्णस्यैव पूर्वदेहः पृथुरयम् अत एव श्रीगर्गमुनिना श्रीनन्दराजाय नामकरणसंस्कारावसरे उक्तम् "पुरानेन व्रजपते साधवो दस्युपीडिताः । अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः॥" इत्युक्तं, वेने विप्रहते बहवो दस्यवो जाताः पुनर्भगवता तद्देहत आविर्भूय ते मारिता इति ध्येयम् ॥ ६ ॥ ७ ॥ एवं यथा त्वयाहं चोदितस्तथा विदुरेणेत्यर्थः ॥ ८ ॥ ९ ॥ कोटरं वृक्षविवरम् । शरण्यं शरणागतपालकम् ॥ १० ॥ यतस्त्वं नो वृत्तिकरस्ततो हेतोः।रादानेऽतस्तुप्रत्ययः । चतुर्थी तुमन्नर्थे छांदसी।वस्तुतस्तादर्थ्ये एव सा । "ऊर्जः कार्त्तिक उत्साहबलान्नप्राणनेषु च" इति कोशात् । वार्त्तायां वृत्तेः पतिः कर्त्ता "वार्त्ता कृष्याद्युदंतयोः" इति।ननु वृष्टिहेतुककृष्याद्युत्पादकत्वेनेंद्र एव वार्त्तापतिर्नाहमिति चेदाहुस्त्वमिति । किलाश्चेताश्च ये लोका अर्थात्सात्त्विका देवास्तेषां पालः यज्ञादिना पालको वृष्टिहेतुकयज्ञकर्तृत्वेन तवैवेन्द्रकर्मवृष्टिहेतुत्वमपि।इंद्रस्तु-त्वद्दत्तहविर्द्वारा वृष्टिहेतुत्वान्न मुख्यो वृत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ पृथुः प्रजानां करुणं निशम्य परिदेवितम् ॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत॥१२॥इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः ॥ संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा॥१३॥प्रवेपमाना धरणी निशाम्योदायुधं च तम्॥ गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ॥१४॥ तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः ॥ शरं धनुषि संधाय यत्रयत्र पलायते ॥१५॥ सा दिशो विदिशो देवी रोदसी चांतरं तयोः ॥ धावंती तत्रतत्रैनं ददर्शानूद्यतायुधम् ॥ १६ ॥ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः ॥ त्रस्ता तदा निववृते हृदयेन विदूयता ॥ १७ ॥ उवाच च महाभागं धर्मज्ञाऽऽपन्नवत्सल ॥ त्राहि मामपि भूतानां पालनेऽवस्थितो भवान् ॥ १८ ॥ स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषाम् ॥ अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ १९ ॥ प्रहरंति न वै स्त्रीषु कृतागःस्वपि जंतवः ॥ किमुत त्वद्विधा राजन्करुणा दीनवत्सलाः ॥२०॥ मां विपाट्याऽजरां नावं यत्र विश्वं प्रतिष्ठितम् ॥ आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि ॥ २१ ॥ पृथुरुवाच ॥ वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीम् ॥ भागं बर्हिषि या वृंक्ते न तनोषि च नो वसु ॥ २२ ॥

स्माकमन्नं रातवे रातुं दातुमीहतु ईहतां यत्नं करोतु । उज्झितोर्जास्त्यक्तान्नाः सत्यः वार्ताया जीविकायाः पतिः ॥ ११ ॥ परिदेवितं विलापम् । निमित्तं हेतुमन्वपद्यत ज्ञातवान् ॥ १२ ॥ पृथिव्या ओषधिबीजानि ग्रस्तानीति व्यवसितो निश्चितवान्सन् ॥ १३ ॥ मृगयुना द्रुतानुगता मृगीव ॥ १४ ॥ १५ ॥ रोदसी द्यावापृथिव्यौ तयोरंतरमंतरिक्षं च अनु पृष्ठतः उद्यतमायुधं येन तम् ॥ १६ ॥ १७ ॥ १८ ॥ यो धर्मज्ञ इति मतः स भवान् योषां मां कथमहनिष्यदहनिष्यति ॥ १९ ॥ ॥ २० ॥ अजरां दृढाम् । विपाट्य हत्वा धास्यसि धारयिष्यसि ॥ २१ ॥ बर्हिषि यज्ञे या भवती देवतारूपेण भागं वृंक्ते भजते । वसु धान्यादिकम् ॥ २२ ॥

कर इत्यर्थः ॥ ११ ॥ हेतुं भूग्रस्तबीजत्वलक्षणम् ॥ १२ ॥ ममाभिषेके जातेऽपि यदियं बीजानि गोपायति तदस्यां चतुर्थमुपायमेव करवाणीति व्यवसितं निश्चयो यस्येति वा । भूमेरिति द्वितीयार्थे षष्ठी भूमिं प्रति ॥१३॥ निशाम्य दृष्ट्वा । तं पृथुम् । स्वीयमार्त्तिकबृहद्देहात्स्वल्पं गोरूपं कृत्वा पृथिव्यधिष्ठात्री देवतैवापाद्रवन्न तु सामस्त्येन मार्त्तिकरूपेण देवतां प्रत्येव तेन बाणसंधानं कृतं न तु जाड्यावच्छिन्नभूमंडलं प्रतीति ध्येयम् । मृगयुना व्याधेन ॥ १४ ॥ तत्तदा स चासौ वैन्यस्तद्वैन्य इति वा ॥ १५॥ एनं पृथुम् ॥ १६ ॥ जीवन्भद्राणि पश्यतीति भावेन निवृत्ता । विदूयता उपतापवता ॥ १७ ॥ धर्मज्ञापन्नवत्सलेतिसंबुद्धिद्वयेन मां स्त्रियं तत्रापि गोरूपां हंतुं नार्हसि धर्मज्ञत्वादापन्नवत्सलत्वाच्चेत्याह–भूतानामिति । श्लेषेणाहमपि पंचभूतांतर्गतत्वेनाभूतमस्मि सर्वभूतधर्माणां मयि विद्यमानत्वेन चाहमेव सर्वभूतान्यप्यस्मीति 'अतो विशेषो भावानां भूमावेवोपलक्ष्यते' इत्युक्तेः॥१८॥१९॥ जंतवोऽतीवमूढाः॥२०॥ विपाट्य विदार्य्य।अजरां सदा नूतनवत्स्थितां, यत्र मयि ।अंभसीति ।मयि मृतायां गर्भोद एव स्थास्यसीति भावः॥२१॥ वसुधे इति । हेतुगर्भा संबुद्धिः । वसु धान्यादि दधाति स्वस्मिन्निरुणद्धि यतोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः ॥ तस्यामेवं हि दुष्टायां दंडो नात्र न शस्यते ॥२३॥ त्वं खल्वौषधिबीजानि प्राक्सृष्टानि स्वयंभुवा ॥ न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः ॥ २४ ॥ अमूषां क्षुत्परीतानामार्तानां परिदेवितम् ॥ शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥ २५ ॥ पुमान्योषिदुत क्लीब आत्मसंभावनोऽधमः ॥ भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः ॥ २६ ॥ त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ॥ आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥ २७ ॥ एवं मन्युमयीं मूर्तिं कृतांतमिव बिभ्रतम् ॥ प्रणता प्रांजलिः प्राह मही संजातवे पथुः ॥ २८ ॥ धरोवाच ॥ नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमो र्मये ॥ २९ ॥ येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः ॥ स एव मां हंतुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ॥३०॥

गोरूपेण तु यवसं तृणं जग्धि अत्तीत्यर्थः । औधसमूधःसंबंधि पयस्तु नैव दोग्धि दुग्धं न स्रवति । अत्रास्मिन्नपराधे ॥२३॥ आत्मनि देहे रुद्धानि ॥२४॥ मद्वधे सर्वथा अन्नं न स्यादिति चेदत आह । अमूषां प्रजानाम् । मेदसा मांसेन ॥ २५ ॥ यदुक्तं योषां कथं हनिष्यतीति तत्राह । पुमानिति । तस्य वधोऽवध एव ॥ २६ ॥ यच्चोक्तं कथमंभसि धास्यसीति तत्राह । त्वामिति । तिलशस्तिलप्रमाणानि खंडानि इत्येवंभूतामवस्थां त्वां नीत्वा ॥ २७ ॥ मन्युमयीं मूर्तिं बिभ्रतः कृतांततुल्यत्वमुच्यते न तु कृतांतस्य मन्युमयी मूर्तिरिति ॥ २८ ॥ "शुद्धसत्त्वतनुं देवमकस्मादपि दारुणम् ॥ वीक्षमाणा पृथुं पृथ्वी तुष्टाव करुणोक्तिभिः" ॥ १ ॥ मायया विन्यस्ता रचिता नाना घोरादितनवो येन । गुणात्मने गुणमयत्वेन प्रतीयमानाय । वस्तुतस्तु निर्धुता निरस्ता द्रव्यक्रियाकारकेष्वधिभूताध्यात्माधिदैवेषु विभ्रमोऽहंकारस्तन्निमित्ता ऊर्मयो रागद्वेषादयश्च यस्मिंस्तस्मै ॥ २९ ॥ अहो सर्वजीवाश्रयत्वेन सृष्टां मां कथं हंतुं प्रवर्तत इत्याह । येन विधात्रात्मनां जीवानामायतनमहं विनिर्मिता । यतो यस्यां मयि गुण

तस्त्वां हनिष्यामीत्यभिप्रायः । तदेवाह-भागमित्यादिना "बर्हिः स्यात्कुशयज्ञयोः" इति कोशः । भागम् ॐभूःस्वाहेत्यादिमंत्रदत्तं हविर्भागम् ॥ २२ ॥ इत्यर्थ इति । अत्तेर्लटि जवादेशाविधानादार्षोऽयं प्रयोग इति भावः । अपराधे निरर्थकंभागभक्षणरूपे 'न द्वयं प्रकृतार्थं गमयति' इति वामनः ॥२३॥ त्वदधिकरणकप्रजाजीवनार्थब्रह्मसृष्टौषध्यदानेन तव चौर्य्यदोषोऽप्यस्तीति त्वद्दंडे न दोष इति भावः । न दास्यामीति दुराग्रह एवात्र ममावज्ञा॥ ॥ २४ ॥ २५ ॥ अधमो भूत्वा य आत्मानं संभावयति सर्वोत्कृष्टं मन्यते स आत्मसंभावनः यदि शूद्रो गैरिकादिरक्तवस्त्रं धृत्वा किञ्चिदधीत्य चात्मानं ब्राह्मणाधिकं मन्येत तदा तद्वधे नृपस्यादोष एव पाखंडित्वात्तस्य "वध्या हि धर्म्मध्वजिनस्ते हि पातकिनोऽधिकाः" इति सूतवधोपाख्याने श्रीसंकर्षणोक्तेः । निरनुक्रोशो निर्दयः ॥२६॥ स्तब्धामात्मसंभावनावर्तीम् । ननु मद्वधेन तव गोवधो भावी किञ्च गोमांसं कथं भोजयिष्यसीति चेदाह—मायया गां वस्तुतो नेत्यर्थः आत्मयोगबलेनौत्पत्तिकस्वरूपया धारणशक्त्या ॥२७॥ मन्युमयीं क्रोधप्रचुराम् ॥२८॥२९॥ स्वयं देवतारूपत्वात्पृथ्वी हरेरन्यस्यैवंविधोक्तिर्न संभवतीति ज्ञाततत्त्वात्तं स्तौति स्म करुणोक्तिभिर्दीनवचनैः (१)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययाऽवितर्क्यया ॥ तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥ ३१ ॥ नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाऽकृतात्मभिः ॥ न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ॥ ३२ ॥ सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ॥ तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥ ३३ ॥ स वै भवानात्मविनिर्मितं जगद्भूतेंद्रियांतःकरणात्मकं विभो ॥ संस्थापयिष्यन्नज मां रसातलादभ्युज्जहारांभस आदिसूकरः ॥ ३४ ॥ अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ॥ स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि ॥ ३५ ॥

सर्गस्य चतुर्विधभूतग्रामस्य संग्रहो धारणम् । स एव स्वराट् स्वतंत्रः ॥ ३० ॥ सृष्टिसंहारकारकोऽहमेवेति चेत्तथापि प्रजापालने प्रवृत्तस्य मद्वधोऽनुचित एवेत्याह । य एतदिति । आत्माश्रयया जीवविषयिण्या ॥ ३१ ॥ अतो दुर्ज्ञेयमीश्वरचेष्टितमित्याह । नूनमिति । अकृतात्मभिर्विक्षिप्तचित्तैः य ईश्वरः स्वतंत्रः अकरोद्ब्रह्माणम् । परत इति तेन ब्रह्मणा चराचरमकारयत् । यश्च स्वत एकः परतो माययाऽनेकः ॥ ३२ ॥ तस्मादचिंत्यशक्तये केवलं नम इत्याह । सर्गादि जन्मस्थितिभंगमस्य जगतोऽनुरुणद्ध्यनुवर्तते करोति द्रव्याणि महाभूतानि क्रिया इंद्रियाणि कारका देवाः चेतना बुद्धिः आत्माऽहंकारः तैः स्वशक्तिरूपैः समुन्नद्धाः समुत्कटा निरुद्धाः शक्तयो यस्य ॥ ३३ ॥ प्राणिनां धारणार्थं मां रसातलादुद्धृत्येदानीं प्रजारक्षणे प्रवृत्तस्य मद्वधो न युक्त इति सकरुणमाह द्वाभ्याम् । हे अज यः सृष्टवान्स एव भवान्स्वनिर्मितं चराचरं जगत्सम्यक्स्थापयितुमादिसूकरः सन्मां रसातलादभ्युज्जहार ॥ ३४ ॥ स एव धराधरो वराहोऽप्यापामुपस्थे उपरि मयि नावि आधारभूतायामवस्थिताः प्रजा रक्षितुमिच्छुर्वीरमूर्तिः

आदिना शांतविमूढयोर्ग्रहः । "शांता अशांता उत मूढयोनयः" इत्युक्तेः । विधात्रा त्वया, अन्यं त्वदितरम् ॥ ३० ॥ जीवविषयिण्या जीवावरकया तर्कितुमशक्यया ॥ ३१ ॥ बत खेदे ॥ ३२ ॥ समुत्कटाः प्रबलाः, निरुद्धाः स्वाधीनाः, शक्तयः सृष्ट्यादिविषयाः ॥ ३३ ॥ हे अजेति । त्वं तु नानातनूराविर्भावयस्येव न तु जायस इति भावः । उक्तार्थसमर्थनाय पुनरामंत्रयति—विभो इति । विविधं भातीति विभुरिति निरुक्तेरेकस्यैव तव बहुरूपतया भानमिति भावः । रसातलादंभसो गर्भोदसंज्ञाज्जलात् उद्धार ॥ ३४ ॥ पयसि पयउपलक्षितेऽन्नादौ निमित्ते स एव मत्स्वामी धराधर आदिवराहस्त्वम् । अत्राशयमाह-इमास्त्वत्प्रजा मदपत्यान्येव मदुत्संगे स्थितानि नित्यमहं स्तन्यं पयः पाययाम्येव सांप्रतमेत दुर्वृत्तमालक्ष्य शालिं शिक्षयंती माताप्यहं क्रुद्धा पयो न पाययामीति त्वं गृहपतिर्मां ताडयसीति भाव इति विश्वनाथः । स्वामिव्याख्याने इत्यर्थ इति । जले निमित्तेऽन्नोत्पादनकारणे सति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीर यशस्करेभ्यः ॥ ३६ ॥ इति श्रीमद्भा० म० चतुर्थ० पृथुविजये धरित्रीनिग्रहो नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ मैत्रेय उवाच ॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् ॥ पुनराहाऽवनिर्भीता संस्तभ्यात्मानमात्मना ॥ १ ॥ संनियच्छाभिभो मन्युं निबोध श्रावितं च मे ॥ सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥ २ ॥ अस्मिँल्लोकेऽथ वामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः ॥ दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ॥ ३ ॥

पृथुरूपः समभूत् एवंभूतो यः स त्वं पयसि क्षीरे निमित्ते मां जिघांससि हंतुमिच्छसीति चित्रमित्यर्थः ॥ ३५ ॥ तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति कैमुत्यन्यायेनोपसंहरति । नूनमिति । तस्येश्वरस्य गुणसर्गरूपया मायया मोहितं चित्तमेव वर्त्म येषाम् । मोहितानि चित्तवर्त्मानि येषामिति वा तैर्जनैरीश्वराणां हरिभक्तानामेव तावदीहितं न ज्ञायते किं पुनस्तस्य परमेश्वरस्य । अत एव परमेश्वरवत्तेभ्योऽपि नम एव केवलम् । वीराणां जितेंद्रियाणां यशः कुर्वंति ये तेभ्यः । यथा वीराणां यशो वर्धेत तथा चेष्टतां न तु यथेष्टमिति भावः ॥ ३६ ॥ इति श्रीमद्भागवते चतुर्थे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ अष्टादशे महीवाक्याद्वत्सपात्रादिभेदतः ॥ पृथ्वादिभिस्तु सा दुग्धा स्वंस्वं दुग्धमितीर्यते ॥ १ ॥ १ ॥ हे अभिभो प्रभो यद्वा भो देव अभि अभयं यथा भवत्येवं मन्युं संनियच्छ श्रावितं विज्ञापितम् । न मद्वाक्येऽनादरः कर्तव्य इत्याह । बुधो हि सर्वतः सारमादत्ते ॥ २ ॥ मयि जीर्णाश्चौषधीरुपायेन गृहाणेति वक्तुमुपायेन सर्वं सिद्ध्यति नान्यथेत्याह अस्मिन्निति त्रिभिः । पुंसां श्रेयसः पुरुषार्थ

यन्मत्ताडनं तदद्भुतं न हि केवलाहं बीजोत्पादने हेतुः किं तु जलमपि धरणिसलिलसंयोगस्यैव बीजांकुरोत्पत्तौ हेतुत्वादिति भावः ॥ ३५ ॥ यत उभयनिमित्तककार्येऽन्यतरस्यं ताडनं तस्मादित्यर्थः । चित्तवर्त्मनामने कत्वात्समासांतरमाह-मोहितानीति । ईश्वराणामीश्वरमपि वशी कर्त्तुं समर्थानां "वशी कुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" इति नवमे श्रीमुखोक्तेः । अत एव भगवन्तं वशीकर्त्तुं समर्थत्वादेव वीराणां दयावीराणां चेष्टतां प्रार्थनायां लोट् । भवांस्तथा चेष्टताम् । इति भाव इति । त्वं चेन्मयि न दयसे तदा वीरयशो नश्यतीत्याशयः । एतेन पृथिव्याः पृथोरधिकारिपुरुषत्वमारोप्य हरिभक्तत्वमपि ध्वनितम् ॥ ३६ ॥ इति श्रीमद्भागवत भावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥ आदिना मुन्यादिग्रहः (१) इत्थं पूर्वोक्तरीत्या आत्मना बुद्ध्यात्मानं मनः संस्तभ्य निरुध्य ॥ १ ॥ अभितो भातीत्यभिभुस्तत्संबुद्धौ तथा अभिभाते: प्रभ्वर्थाप्रसिद्धिमालक्ष्याह-यद्वेति । भो इत्युक्तेर्देवेत्याक्षेपलब्धमेव 'यद्विनानुपपन्नं तत्तेनाक्षिप्यते' इति न्यायात् । मधुकरो भ्रमरः ॥२॥ "योगोऽष्टांगाभियोगोपायसंयोगाहवेषु च" इति कोशात् । अस्मिन्नित्यादि निमित्ते सप्तमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानातिष्ठति यः सम्यगुपायान्पूर्वदर्शितान् ॥ अवरः श्रद्धयोपेत उपायान्विंदतेंजसा ॥ ४ ॥ताननादृत्य यो विद्वानर्थानारभते स्वयम् ॥ तस्य व्यभिचरंत्यर्था आरब्धाश्च पुनःपुनः ॥ ५ ॥ पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते ॥ भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ॥ ६ ॥ अपालिताऽनादृता च भवद्भिर्लोकपालकैः ॥ चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥ ७ ॥ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा ॥ तत्र योगेन दृष्टेन भवानादातुमर्हति ॥ ॥ ८ ॥ वत्सं कल्पय मे वीर येनाहं वत्सला तव ॥ धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनम् ॥ ९ ॥ दोग्धारं च महाबाहो भूतानां भूतभावन ॥ अन्नमीप्सितमूर्जस्वद्भगवान्वांछते यदि ॥ १० ॥ समां च कुरु मां राजन्देववृष्टं यथा पयः ॥ अपर्त्तावपि भद्रं त उपावर्तेत मे विभो ॥ ११ ॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ॥ वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥१२॥ तथा परे च सर्वत्र सारमाददते बुधाः ॥ ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ १३ ॥

स्य प्रसिद्धयेऽस्मिँल्लोके कृष्यादयोऽमुष्मिंश्च लोकेऽग्निहोत्रादयो योगा उपाया दृष्टाः ज्ञाताः प्रयुक्ता अनुष्ठिताश्च ॥ ३ ॥ पूर्वैर्दर्शितान् अवरोऽर्वाचीनः ॥ ४ ॥ अविद्वान्विद्वानपीति वा व्यभिचरंति न सिद्धयंति ॥ ५ ॥ सहेतुकमुपायमाह पुरेति षड्भिः ॥ ६ ॥ भवद्भिरिति राजसामान्याभिप्रायेण वेनादिभिरिति वा अपालिता चोरायनिवारणात् अनादृता च यज्ञादिप्रवर्तनाभावात् । यज्ञार्थे अग्रसं गिलितवती अन्यथाऽधृतव्रतैर्भुक्ता न प्ररोक्ष्यंते ततश्च यज्ञादयो न सिद्धयेरन्निति भावः॥७॥ क्षीणा जीर्णाः॥८॥ दोहनं दोहनपात्रम् । दोग्धारं चोपकल्पय । धोक्ष्ये प्रपूरयिष्यामि ॥ ९ ॥ भूतानामभीप्सितमन्नम् । ऊर्जस्वद्बलप्रदम् ॥ १० ॥ अपगतेऽपि वर्षर्तौ देववृष्टमुदकं यथा मे मयि सर्वतो वर्तेत ॥ ११ ॥ मनुं स्वायंभुवम् । ओषधीर्व्रीह्यादीः ॥ १२ ॥ प्रसंगादर्थांतरमाह । तथेति । भुवो वाक्यं श्रुत्वा यथा पृथुरेवं सर्वत्र वाक्ये परेऽपि सारमाद्दयम् ।

एतल्लोकनिमित्तं परलोकनिमित्तञ्चेत्यर्थः ॥ ३ ॥ ततः किमित्यतोन्वयव्यतिरेकं वाह उपेयान् उपायसाध्यफलानि ॥ ४ ॥ तान्पूर्वदर्शितान् ॥ ५॥ असद्भिरकृतपञ्चयज्ञैः 'यज्ञशिष्टाशिनः सन्तः' इत्युक्तेरयज्ञशेषभोजिन एवासन्त इति लभ्यते । अधृतव्रतैस्त्यक्ततपोभिः ॥ ६ ॥ भवद्भिरिति । वेनं मनसि कृत्वा तत्पुत्रे पृथावुपालंभः । वेनमृतौ लोके चौरीभूते चौरप्रचुरे । इति भाव इति । सत्सूत्पन्नेषु यज्ञस्यावश्यंभावित्वानियमेन त्वद्यज्ञप्रवृत्तये मया सर्वाणि बीजानि ग्रस्तानीत्याशयः ॥ ७ ॥ जीर्णाः सूक्ष्मरूपेण स्थिताः । तत्र तत्तत्कार्यासाधने। दृष्टेन तत्तच्छास्त्रोपदिष्टेन, ता आदातुं ग्रहीतुम् ॥८॥ वत्सला वत्सप्रिया । क्षीरमयान् क्षीरस्वरूपान् । वीरेति। भीताया मम रक्षणेनैव तव वीरत्वं स्थास्यति नान्यथेति भावः ॥९॥ महाबाहो इति । युद्धवीरस्य तव मयि भुजबलप्रदर्शनं नोचितमिति भावः । हे भूतभावनेति । सर्वभूतपालकस्य तव मत्पालनमप्युचितमेवेत्याशयः । भूतानामूर्जस्वद्बलहेतुभूतमन्नम् । यद्वा—महांतः श्लाघनीया असंगगतित्वाद्वाहा अश्वा यस्य स तथेति भगवद्विशेषणम् । एतेनेंद्रलोकं गत्वेन्द्रं जित्वापि वृष्टिं कारयितुं समर्थोंसीत्युक्तम् ॥१०॥ विभो इति । मत्समीकरणेन त्वं विशेषतो भास्यसीति भावः । राजन्निति । राज्ञः पार्श्वे एव स्वदुःखं निवेद्यत इति भावः ॥११॥ सकलौषधीस्तत्तद्बीजमयानि पयांसि यत्सेकमात्रेण सर्वौषधिप्रभवो भवेत्। मनोर्वत्सत्वं तु सर्वभूभृद्गणमूलत्वात्तत्संबंधेन तस्य तस्योद्भावनोपपत्तेः । एवमुत्तरत्रापि । पृथुपाणेः पात्रत्वं तत्र तत्पालनशक्तिप्रकाशात् तत्प्रभावात्पयसश्चाक्षयत्वं ज्ञेयम् ॥ १२ ॥ यथा पृथुः पृथिव्या वाक्यसारं जग्राह गृहीत्वा च स्वकार्यं साधयामास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तम ॥ वत्सं बृहस्पतिं कृत्वा पयश्छंदोमयं शुचि ॥ १४ ॥ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन् ॥ हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥ १५ ॥ दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् ॥ विधायादूदुहन्क्षीरमयःपात्रे सुराऽऽसवम् ॥ १६ ॥ गन्धर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः ॥ वत्सं विश्वावसुं कृत्वा गांधर्वं मधुसौभगम् ॥ १७ ॥ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत ॥ आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीम् ॥ सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥ १९ ॥ अन्ये च मायिनो मायामंतर्द्धानाद्भुतात्मनाम् ॥ मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् ॥ २० ॥

ददते । प्रस्तुतमनुवर्तयति । ततोऽन्ये च ऋष्यादयः पंचदश दुदुहुः । पृथुना भावितां वशीकृताम् ॥ १३ ॥ देवीं पृथ्वीम् । वाङ्मनःश्रवणैर्वेदग्रहणादिंद्रियाणां पात्रत्वम् ॥ १४ ॥ सोमममृतम् । वीर्यं मनःशक्तिम् । ओज इंद्रियशक्तिं बलं देहशक्तिं च तदेव पयः ॥ १५ ॥ सुरामासवं च तालादिमयम् ॥ १६ ॥ मधु वाङ्माधुर्यं सौंदर्यं तत्सहितम् ॥ १७ ॥ कव्यं पितॄणामन्नम् । आमपात्रे अपक्वे मृन्मये अधुक्षत दुदुहुः ॥ १८ ॥ संकल्पनामयीमणिमादिरूपां सिद्धिम् । ये विद्याधरादयस्ते च तमेव वत्सं प्रकल्प्य नभस्येव पात्रे खेचरत्वादिरूपां विद्यां दुदुहुः ॥ १९ ॥ अन्ये च किंपुरुषादयोंतर्धानेनाद्भुतात्मनां आश्चर्यमनसां संबंधिनीं मायाम् । धारणामयीं संकल्पमा

तथाऽपरे च बुधाः सर्वत्र सर्वेषामेव सर्ववाक्येषु सारं गृह्णंतीति नीतिः । ततः पृथुकर्तृकभूदोहनानंतरं, पञ्चदशसंख्याकाः । वेनराज्येऽराजके च धर्मलोपात्सर्वेषामपि सर्वं हारितं वस्तु सर्व एव पुनः प्रापुरित्याह-वशीकृतां सर्वमहं सर्वेभ्यो दास्यामि कामधुक्त्वादित्येवं दित्सुताभाववतीं कृतां भाववतीं चकारेति 'तत्करोति–' इति करणार्थकणिचि मतुपो ''विन्मतोर्लुक्'' णिचीष्ठवदित्यतिदेशात् ततो भावीति जातायां धातुसंज्ञायां लिङंतात्क्तप्रत्यये चिण्वदिटि णेर्लोपे भावितामिति रूपम् ॥ १३ ॥ अथ पृथुदोहनोत्तरम् । सत्तमेति । यथा त्वं सत्तमो भगवद्गुणानुरागवानसि तथर्षयोऽपि 'ब्रह्मावधार्यात्मगुणानुवादम्' इति वाराहोपाख्याने वेदस्य भगवद्गुणानुवादरूपत्वोक्तेस्तदनुरागिणः छंदोमयं वेदरूपमेव पयो दुदुहुरिति भावः । शुचित्वापादकाच्छुचीति । अत्र संदर्भः–यथा पृथ्व्या गोरूपत्वं तथा तदभिलषितपयसोऽपि साक्षाद्दुग्धत्वमेव तस्य छन्दोमयत्वञ्च तदुपलंभमात्रेण छंदसां सहसा प्रादुर्भावात् तत्प्रादुर्भावयोग्यानि तु वाङ्मनःश्रवणानींद्रियाणि तेषां पात्रत्वं तत्तद्गोलकसेकेन तत्प्रादुर्भावात् । तत्र 'ब्रह्मिष्ठानां बृहस्पतिः' इति न्यायेन प्रथमाधिकारी बृहस्पतिरिति स एव वत्सः कृत इत्यादिकं सर्वत्रानुसंधेयम् ॥ १४ ॥ १५ ॥ सुरां त्रिविधां 'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा'' इत्युक्तेः । आसवमपि द्वादशविधं ग्राह्यं तच्च मद्यशब्देनापि क्वचिदुच्यते तच्च पञ्चमस्कंधे व्याख्यास्यामः । प्रह्लादं ब्रह्मजवनोद्भूतं कश्चिद्दैत्यवर्यं पृथुवंशजदक्षकन्यादितिपौत्रस्य तदानीमभावात् । विजयध्वजस्तु–''प्रतिमन्वंतरं प्रायः प्रह्लादाद्या बभूविरे'' इति जगाद । संदर्भस्तु–श्रीमतः प्रह्लादस्य भावित्वेपि पृथिव्युपदेशेन सोऽयं प्रह्लादो दैत्यानां भावनामयो ज्ञेय इति । अयःपात्र इति । दोग्ध्रस्य निकृष्टापेक्षया ॥ १६ ॥ गांधर्वं गानं मधुसौभगमित्यत्रार्शआद्यच् । 'गंधं मधुससौभगम्'इति पाठे गंधं सौरभ्यमयम् । मधुवद्रूपं पयः तच्च ससौभगं सौन्दर्य्यसहितं तत्र ससौभगसौंदर्य्याभ्यां तत्तत्प्रकाशो जातः अधुना गानमाधुर्यमिति ज्ञेयं पद्मस्य पात्रत्वं च तत्रयास्पदत्वेनोपोद्बलकत्वात् ॥१७॥ कव्यं स्वधाशब्देन दीयमानम् । ''अपक्वं मृन्मयं पात्रं पितॄणां वल्लभं सदा । तच्च हस्तेन घटितं ग्राह्यं चक्रोद्भवं न हि ॥'' इति ''कुलालचक्रनिष्पन्नमासुरं दैविकं न तत् । तदेव हस्तघटितं दैविकं पैतृकं तथा'' इति छंदोगपरिशिष्टात् ॥ १८ ॥ आदिना चारणादिग्रहः । सिद्धादयो देवयोनिविशेषाः 'विद्याधरोऽप्सरोयक्षरक्षोगंधर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः' इत्यमरः ॥१९॥ आदिना किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः ॥ भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥ २१ ॥ तथाऽहयो दंदशूकाः सर्पा नागाश्च तक्षकम् ॥ विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् ॥ अरण्यपात्रे चाधुक्षन्मृगेंद्रेण च दंष्ट्रिणः ॥ २३ ॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ॥ सुपर्णवत्सा विहगाश्चरं वाऽचरमेव च ॥ २४ ॥ वटवत्सा वनस्पतयः पृथग्रसमयं पयः ॥ गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु ॥ २५ ॥ सर्वे स्वमुख्यवत्सेन स्वेस्वे पात्रे पृथक्पयः ॥ सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥ २६ ॥ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः ॥ दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥ २७ ॥ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः ॥ दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥ २८ ॥ चूर्णयन्स्वधनुष्कोट्या गिरिकूटानि राजराट् ॥ भूमंडलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥ २९ ॥ अथास्मिन्भगवान्वैन्यः प्रजानां वृत्तिदः पिता ॥ निवासान्कल्पयांचक्रे तत्रतत्र यथार्हतः ॥ ३०॥ ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च ॥ घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ॥ ३१ ॥

त्रप्रभवाम् ॥ २० ॥ भूतेशो रुद्रः स एव वत्सो येषाम् । क्षतजं रुधिरं तदेवासवम् ॥ २१ ॥ अहयो निष्फणाः दंदशूका वृश्चिकादयः सर्पाः सफणास्त एव कद्रूसंततिजा नागाः बिलपात्रे मुखे ॥ २२ ॥ यवसं तृणम् । गोवृषं रुद्रवाहं वृषभम् । मृगेंद्रेणेत्युत्तरेणान्वयः ॥ २३ ॥ क्रव्यं मांसम् ॥ चरं कीटादि । अचरं फलादि ॥ २४ ॥ ॥ २५ ॥ अनुक्तसर्वसंग्रहार्थमाह । सर्वे इति । सर्वे स्वजातौ यो मुख्यस्तेन वत्सेन ॥२६॥ उपसंहरति । एवमिति । स्वन्नमभीष्टमन्नम् । तमेव क्षीरभेदं दुदुहुः । दोहः पात्रम् ॥२७॥ इमां पृथ्वीम् ॥२८॥ धनुषोऽग्रेण गिरिशृंगाणि चूर्णयन् राजराट् राज्ञां राजा सर्वेषामाजीविकादानात् ॥२९॥ ३० ॥ ग्रामा हट्टादिशून्याः । पुरो हट्टादिव

पुरुषादिग्रहः । अद्भुतात्मनामद्भुतस्वभावानाम् ॥ २० ॥२१ ॥ यथान्ये दुदुहुस्तथेति ॥ २२ ॥२३॥ क्रव्यमाममांसमदंतीति क्रव्यादा वृकादयः । दंष्ट्रिणो बृहद्दंष्ट्रावंतः । स्वे कलेवरे स्वस्वभक्ष्यकलेवर इत्यर्थः । स्वपदमत्र स्वीयपरं तच्च स्वीयत्वं भक्ष्यत्वरूपेण ध्येयम् । सुपर्णो गरुडः सोऽपि श्रीप्रह्लादवद्भावनामयो बोध्यः । यद्वा–प्रतिमन्वंतरमविकारिसुरत्वात्तद्भवो ज्ञेयः सुपर्णादीनामपि पात्रं पूर्वोक्तमेव । आदिना भृंगादिग्रहः द्वितीयादिना मूलादिग्रहः ॥२४॥ रसस्य मधुरादिभेदेन बहुविधत्वात्पृथगित्युक्तं पात्रमत्र स्वकलेवरं बोध्यम् । नानाधातून् हरितालस्वर्णादीन् । स्वसानुषु स्वोर्द्धविस्तृतदेशेषु ॥२५॥ सर्वे उक्ता अनुक्ताश्च ॥२६॥ आदिना दोग्धृग्रहः । कुरूद्वहेति । त्वं साक्षाद्यमो हि सूर्यात्मजोऽपि कुरुवंशोद्भूतत्वाद्यथा कुरूद्वहस्तथा दुग्धस्यैकत्वेऽपि दोहादिभेदाद्भेद इति भावः ॥२७॥ ततः सर्वदोहनोत्तरम् । इमां पृथ्वीम् । दुहितृत्वे इति । स्वहस्तेनैवान्नमयदुग्धादानात्स्त्री भावस्यानौचित्यं शरहस्तेन स्वेन दंडकरणान्मातृभावस्याप्यनौचित्यमालक्ष्य पारिशेषात्तस्यां वात्सल्योदयाच्च दुहितृत्वमेव रसावहमिति ज्ञेयम्॥२८॥प्राय इत्युक्तेः कुत्रचिद्वैषम्यमप्यस्ति पर्वतभूमौ तथात्वानुपलब्धेः ।कूटानि शृंगाणि ‘कूटोऽस्त्री पुंजमायाद्येष्वद्रिशृंगेषुभेदयोः’इति यादवः॥२९॥अथ भूसमीकरणानंतरम्। अस्मिन्भूमंडले । पिता पालकः। तत्रतत्र देशे। यथार्हतः यस्मिन्देशे यथा निवासस्सुखदः स्यात्तथा कल्पयांचक्रे इत्यर्थः ॥३०॥ औदकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना ॥ यथासुखं वसंति स्म तत्रतत्राकुतोभयाः ॥ ३२ ॥ इति श्रीभा० म० च० पृथुविजये पृथुपृथिवीदोहन वर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ मैत्रेय उवाच ॥ अथादीक्षत राजा तु हयमेधशतेन सः ॥ ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥ १ ॥ तदभिप्रेत्य भगवान्कर्मातिशयमात्मनः ॥ शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥ २ ॥ यत्र यज्ञपतिः साक्षाद्भगवान्हरिरीश्वरः ॥ अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥ ३ ॥ अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः ॥ उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥ ४ ॥ सिद्धविद्याधरा दैत्या दानवा गुह्यकादयः ॥ सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः ॥ ५ ॥ कपिलो नारदो दत्तो योगेशाः सनकादयः ॥ तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥ ६ ॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ॥ दोग्धि स्माभीप्सितानर्थान्यजमानस्य भारत ॥ ७ ॥

त्यः । ता एव महत्यः पत्तनानि । दुर्गाणि विविधानि दुर्गमस्थानानि ॥ यथाह बृहस्पतिः । "औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा ।" इति । घोषान् आभीराणां निवासान् । व्रजान् गवां निवासान् । शिबिरं सेनानिवासस्थानम् । तत्सहितानाकरान्स्वर्णादिस्थानानि । खेटाः कर्षकग्रामाः । खर्वटाः पर्वतप्रांतग्रामास्तांश्च ॥ ३१ ॥ ॥ ३२ ॥ इति श्रीमद्भागवते चतुर्थे टीकायामष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ऊनविंशेऽश्वमेधांगहयापहरणात्पृथोः ॥ इंद्रं हंतुं प्रवृत्तस्य धात्रा वारणमुच्यते ॥ १ ॥ हयमेधशतेन निमित्तेनादीक्षत दीक्षितोऽभूत् शताश्वमेधसंकल्पमकरोदित्यर्थः । ब्रह्मावर्ते । "सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् ॥ तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते" ॥ १ ॥ आत्मनः स्वस्य कर्मातिशेत इत्यतिशयमभिप्रेत्य ज्ञात्वा । तदिति तं पृथोर्यज्ञमहोत्सवं न ममृषे न सेहे ॥ २ ॥ अतिशयमेव दर्शयति यत्रेति सप्तभिः । साक्षादन्वभूयत प्रत्यक्षेणादृश्यत ॥ ३ ॥ ४ ॥ सिद्धादयश्च तं हरिमन्वीयुरित्युत्तरेणान्वयः ॥ ५ ॥ ६ ॥ धर्मदुघा हविर्दोग्ध्री धेनुः सती ॥ ७ ॥

तन्मध्यगं पार्वतं तन्निखनेन कृतं वार्क्षं बहुवृक्षैः परित आवृतं धान्वनं निरुदकदेशगमैरिणमूषरभूदेशगमिति विवेकः ॥ ३१ ॥ पुरादिकल्पनाप्रयोजनमाह–यथासुखमिति । एतेन पृथोः पूर्वराज्ञां साधुत्वेऽपि संबाधया प्रजानां निवाससुखं नास्तीति सूचितम् ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कंधेऽष्टादशोऽध्यायः ॥ १८ ॥ अश्वमेधस्यांगभूतो यो हयस्तस्यापहरणात् (१) अथ प्रजावासोचितनिवासादिकल्पनोत्तरम् । स पृथुः । इत्यर्थ इति । हयमेधशती कर्तुं प्रवृत्तोऽभूदिति भावः । प्राचीमैन्द्रीदिशमुद्दिश्य स्यन्दमाना सरस्वती प्राची सरस्वती ॥ १ ॥ आत्मनः स्वस्य सकाशात् । अतिशयमधिकमतिक्रामकम् ॥ २ ॥ यत्र यज्ञे ॥ ३ ॥ निवंटुत्वयज्ञपतिर्भगवानित्यादिनाम्नां बहुत्वकथनेनैकस्यानेकत्वं न संभवत्यतः किं तेनैकेनागतेन समाजपूर्तिः स्यादत आह–अन्वित इति ॥ ४ ॥ ५ ॥ नन्वविदामनुगमनमेव तन्माहात्म्यद्योतकमित्यत आह–कपिल इति । नित्यविरोधिनां दैत्यादीनामनुगमनं कथं संगच्छतेऽत आह–भागवता इति । अनेन दैत्यादीनां भागवताभागवतत्वभेदेन द्वैविध्यमुक्तम् । ये तत्सेवनोत्सुका भागवतास्त एवान्वीयुर्नान्य इति भावः ॥ ६ ॥ धर्मदुघेति । धर्मशब्दो धर्मसाधनपरः अत एव स्वामिचरणैर्हविर्दोग्ध्रीति व्याख्यातम् । भारतेति । तत्र वंशकुटीभूतभरतस्य राज्ञो यागेऽपीत्थमेव जातस्तस्यापि 'दौष्यंतिरिव यज्वनाम्' इति तस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् ॥ तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः ॥ ८ ॥ सिंधवो रत्ननिकरान् गिरयोऽन्नं चतुर्विधम् ॥ उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥ ९ ॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयम् ॥ असूयन्भगवानिंद्रः प्रतिघातमचीकरत् ॥ १० ॥ चरमेणाऽश्वमेधेन यजमाने यजुष्पतिम् ॥ वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥ ११ ॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ॥ आमुक्तमिव पाखंडं योऽधर्मे धर्मविभ्रमः ॥ १२ ॥ अत्रिणा चोदितो हंतुं पृथुपुत्रो महारथः ॥ अन्वधावत संक्रुद्धस्तिष्ठतिष्ठेति चाब्रवीत् ॥ १३ ॥ तं तादृशाकृतिं वीक्ष्य मेने धर्मशरीरिणम् ॥ जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुंचति ॥ १४ ॥ वधान्निवृत्तं तं भूयो हंतवेऽत्रिरचोदयत् ॥ जहि यज्ञहनं तात महेंद्रं विबुधाधमम् ॥ १५ ॥ एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा ॥ अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥ १६ ॥ सोऽश्वं रूपं च तद्धित्वा तस्मा अंतर्हितः स्वराट् ॥ वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥ १७ ॥

ऊहुर्वहंति स्म । सर्वरसानिक्षुद्राक्षादिरसान् । क्षीरं च दधि च अन्नं च पानकादि गोरसो घृतं तक्रं च तांश्च । भूरीणि विस्तृतानि वर्ष्माणि शरीराणि येषां ते फलादि प्रासूयंत । मधुच्युतो मधुस्राविणः संतः ॥ ८ ॥ चतुर्विधं भक्ष्यं भोज्यं चोष्यं लेह्यं च ॥ ९ ॥ अधोक्षज ईशो नाथो यस्य । तस्य पृथोः परम उदयोऽभिवृद्धिर्यस्मिंस्तत्कर्मासूयन्नसहमानः प्रतिघातं विघ्नं चकारेत्यर्थः ॥ १० ॥ वैन्ये यजुष्पतिं विष्णुं यजमाने सति स्पर्धमान इंद्रस्तिरोहितः सन्नश्वमपहृतवान् ॥ ११ ॥ त्वरमाणं धावंतम्। "आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् ॥ सन्नद्धो वर्मितः सज्जः" इत्यमरसिंहः । पाखंडमामुक्तमिव पाखंडवेषं कवचमिव गृहीतवंतमित्यर्थः । अधर्मे धर्मविभ्रमो धर्मोऽयमिति भ्रांतिकरो यस्तम् ॥ १२ ॥ १३ ॥ न मुंचति स्म ॥ १४ ॥ हंतवे हंतुम् । यज्ञहनं यज्ञं हतवंतम् ॥ १५ ॥ गृध्रराट् जटायुः ॥ १६ ॥ तस्मै हित्वा तदर्थमुत्सृज्य ॥ १७ ॥

यज्ञे सर्वकामान्दुदुहतुरित्यादिना तथोक्तेरिति मा विस्मयं कुर्वित्यभिप्रायः ॥ ७ ॥ ८ ॥ भक्ष्यादिलक्षणं द्वितीयस्कंधे वर्णितम् ॥ ९ ॥ इत्यर्थ इति । परोत्कर्षासहित्वाद्राज्ञामिति भावः । असूयन्नसहमानः । कंड्वादियगंताच्छतृप्रत्ययः ॥ १० ॥ चरमेण शततमेन 'अथादीक्षत राजा तु हयमेधशतेन' इत्युक्तेः । तिरोहितोन्तर्हितः ॥ ११ ॥ तर्कि स केनापि न दृष्ट इत्यत आह–तमिति । भगवान्सर्वज्ञः । इत्यर्थ इति। पाखंडपदं पाखंडवेषपरमिहेति भावः ॥ १२ ॥ १३ ॥ तादृशाकृतिमिति । श्रीशिवादिषु दर्शनात्कस्यचिद्धर्मस्यायमपि वेशो भवेदिति भावनया वर्त्तमानसमीपे भूते लट् । मुंचतीति । अत एव स्वामिचरणैः स्म पदं प्रयुक्तम् ॥ १४ ॥ हंतवे चौर्यप्रवृत्तवधो न दोषायेति ज्ञानवता प्रेर्य्यमेवात एवात्रिः पुनः प्रेरयामास न हि प्रियः कुकर्मणि योज्यंत इत्यभिप्रेत्याह–तातेति । विबुधाधमं स्पर्द्धालुत्वात् ॥ १५ ॥ गृध्रराट् जटायुः एतच्च भविष्यदपि साक्षान्नारायणावतारत्वेन श्रीव्यासदेवस्य त्रिकालज्ञत्वात्कथनं न विरुद्धम् । सीतां हृत्वा गच्छंतं रावणं जटायुर्यथान्वद्रवत् ॥ १६ ॥ स इंद्रः तत्पाखंडं रूपं च तदर्थमुत्सृज्य पृथुपुत्रमंतर्द्धानविद्या शिक्षयितुमित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः॥नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥१८॥उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः॥चषालयूपतश्छन्नो हिरण्यरशनं विभुः ॥ १९ ॥ अत्रिः संदर्शयामास त्वरमाणं विहायसा ॥ कपालखट्वांगधरं वीरो नैनमबाधत ॥ २० ॥ अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा ॥ सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट् ॥ २१ ॥ वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् ॥ तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥ २२ ॥ यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया ॥ तानि पापस्य खंडानि लिंगं खंडमिहोच्यते ॥ २३ ॥ एवमिंद्रे हरत्यश्वं वैन्ययज्ञजिघांसया ॥ तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणाम् ॥ २४ ॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु ॥ प्रायेण सज्जते भ्रांत्या पेशलेषु च वाग्मिषु ॥ २५ ॥

विचक्ष्य दृष्ट्वा ॥ १८ ॥ उपसृज्य सृष्ट्वा तेन छन्नः सन् । चषालो यूपाग्रे निक्षितः काष्ठकटकस्तद्युक्ताद्यूपात् । हिरण्यनिर्मिता रशना यस्य तम् । रशनाया दृढत्वेन छेदाशक्त्या रशनासहितमेवोद्धृत्य यूपाग्रान्नीतवानित्यर्थः । विभुः समर्थः ॥ १९ ॥ २० ॥ २१ ॥ अवद्यं निंदितं हरेरिंद्रस्य रूपं ज्ञानदुर्बला मंदप्रज्ञा जगृहुः ॥ २२ ॥ तदेव पाखंडनामनिरुक्त्या दर्शयति यानीति । बहुवचनेन चान्यान्यपि गृहीतानीत्युक्तम् ॥ २३ ॥ तत्प्रभृति पाखंडमार्गाः प्रवृत्ता इत्याह । एवमिति । तेन गृहीतेषु पुनर्विसृष्टेषु पाखंडेषु ॥ २४ ॥ नग्ना जैनाः रक्तपटा बौद्धाः आदिशब्देन कापालिकादयस्तेषूपधर्मेषु धर्मोपमेषु धर्म एवायमिति मतिः सज्जत इति द्वयोरन्वयः । पेशलेषु आपात

"अंतर्द्धानगतिं शक्राल्लब्ध्वांतर्द्धानसंज्ञितः" इति वक्ष्यमाणत्वात् ॥१७॥ तस्य पृथुपुत्रस्य तदश्वानयनलक्षणं, प्रभो इति । यथा त्वया कामक्रोधादयोऽश्वा जितास्तथा तेनापीत्याह मैत्रेयो विदुरम् ॥१८॥ इत्यर्थ इति । यूपाग्रं यूपोपरिभागं तत्र निक्षिप्तचखालसहितमेव जहारेति भावः ॥ १९ ॥ कपालं नृकपालं 'खट्वांगं नरमंजरी' इत्यभिधानात् ॥ २० ॥ २१ ॥ अंतर्हित इत्यनेन गृहीतरूपं विसृज्य रूपांतरेणांतर्द्धानं गम्यते तत्र पूर्वरूपं किमभूदचेतनस्य चेतनसंबंध एव हानादिक्रियासामर्थ्यमन्यथोच्छूनीभूय नष्टं स्यान्न तदयुक्तं देवकृतस्यान्यथात्वादर्शनादाह–तदवद्यमिति । ज्ञानदुर्बला मूढाः । अत्र विश्वनाथः-पृथुपुत्रेणावधात्स्वेषामवध्यत्वमभिमन्यमाना ज्ञानदुर्बलाः यज्ञादिदूषकमतप्रवर्त्तकं स्वसंप्रदायं रचयित्वा परधनाकर्षणांतर्द्धानादि क्षुद्रसिद्धीरेव साध्यत्वेन निरचैषुरित्यर्थः ॥ २२ ॥ तदेव निंद्यरूपमेव । पाखंडनामनिरुक्त्या पाखंडशब्दव्युत्पत्त्या । शास्त्रांतरसिद्धपाखंडपदं निर्वक्ति । "पालनाच्चैव सर्वेषां वाशब्देन त्रयी मता । तां खंडयति मोहाद्यः स पाखंडः प्रकीर्त्तितः ॥" किञ्च "पाशब्दः पापनिकरे खंडं चिह्नमिहोच्यते । पापस्य चिह्नं पाखंडस्तत्सेवी नारकी ध्रुवम् ॥" इति । केचित्तु मूर्द्धन्याद्यं षंडशब्दं पठंति तेन पाषंड इत्यपि सिद्धं तन्मते पां पापनिकरं सनोति ददाति स्वसेविभ्य इति पाषंड इति अनुनासिकांताडुप्रत्ययः 'षणु–दाने' इत्यस्मान्निपातनात्सस्य षः । यद्वा पापं सनति भजतीति पाषंडः । 'षन–संभक्तौ' ॥ २३ ॥ तेनेंद्रेण ॥२४ ॥ "सर्वेषामेव लोकानां त्रयी संवरणं मता । तदुक्तधर्महीना ये नग्नास्ते परिकीर्त्तिताः ॥"इति।तथा ह्युक्तं सर्वदर्शने-"न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः । नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः ॥ अग्निहोत्रं त्रयो वेदास्त्रिदंडं भस्मगुंठनम् । बुद्धिपौरुषहीनानां जीविका धातृनिर्मिता ॥ पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति । स्वपिता यजमानेन तत्र कस्मान्न हन्यते ॥ मृतानामपि जंतूनां श्राद्धं चेत्तृप्तिकारणम् । गच्छतामिह जंतूनां व्यर्थं पाथेयकल्पनम् ॥ स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः । प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते ॥ यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदभिज्ञाय भगवान्पृथुः पृथुपराक्रमः ॥ इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥ २६ ॥ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुःप्रेक्ष्यमसह्य रंहसम् ॥ निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥ २७ ॥ वयं मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् ॥ अयातयामोपहवैरनंतरं प्रसह्य राजञ्जुहवाम तेऽहितम् ॥ २८ ॥ इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा ॥ स्रुग्घस्ताञ्जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत ॥ २९ ॥ न बध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः ॥ यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥ ३० ॥

रम्येषु वाग्मिषु हेतूक्तिचतुरेषु ॥ २५ ॥ २६ ॥ शक्रवधेऽभिसंधितं कृताभिप्रायम् ॥ प्रचोदितात्पशोर्वधादन्यस्य वधस्तव न युज्यते ॥ २७ ॥ तद्वधं तु वयं करिष्याम इत्याहुः । वयमिह यज्ञनाशकं त्वत्कीर्त्यैव हतप्रभमिंद्रमाह्वयामहे । कैः । अयातयामैरगतवीर्यैराह्वानमंत्रैः । अनंतरं च ते तवाहितं जुहवाम होष्यामः ॥ २८ ॥ अस्य पृथोः । स्रुक् हस्ते येषां तान् ॥ २९ ॥ यमिंद्रं यज्ञेन यजनेन जिघांसथ । यज्ञेनेष्टाः सर्वे सुरा यस्य तनवः स इंद्रो भवतां वधार्हो न भवति । यद्यस्माद्यज्ञो नामाऽप्यमिंद्रो

भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥ यदि गच्छेत्परं लोकं देहादेष विनिर्गतः ॥ कस्माद्भूयो न चायाति बंधुस्नेहसमाकुलः ॥ ततश्च जीवनोपायो ब्राह्मणैर्निर्मितस्त्विह । मृतानां प्रेतकार्याणि न त्वन्यद्विद्यते क्वचित् ॥ त्रयो वेदस्य कर्त्तारो भंडधूर्त्तनिशाचराः । जर्फरीतुर्फरीत्यादिपंडितानां वचः स्मृतम् ॥ अश्वस्यात्र हि शिश्नं तु पत्नीग्राह्यं प्रकीर्त्तितम् । भंडैस्तद्वत्परं चैव ग्राह्यजातं प्रकीर्त्तितम् ॥ मांसानां खादनं तद्वन्निशाचरसमीरितम् ॥'' इत्यलं प्रसक्तानुप्रसंगेन । रक्तो रागोस्ति पटे शून्यादिवादे येषां ते रक्तपटा बौद्धाः ''आच्छादने गतौ वृक्षे शून्यवादादिके पटः'' इति निरुक्तिः । ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं कथयंति ते च माध्यमिकयोगाचारसौत्रांतिकवैभाषिकसंज्ञाभिः प्रसिद्धा यथाक्रमं सर्वशून्यत्वबाह्यशून्यत्वबाह्यार्थानुमेयत्वबाह्यार्थप्रत्यक्षत्ववादानातिष्ठंते यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोस्तमर्क इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुद्ध्यंते एवमत्रापि सर्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं बुद्धेन भगवता तैः स्वभावनानुसारेण पृथक्पृथग्गृहीतमत्र वक्तव्यं बह्वस्ति ग्रंथविस्तरभियोपरम्यते । प्रायेणेत्युक्त्या ''तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत'' इति श्रुतेः । ''तस्य महतो भूतस्य निःश्वसितमिदं यदृग्वेदो यजुर्वेदस्सामवेदः'' इत्यादिश्रुतेश्चेश्वरादेव वेदाविर्भावमजानंतो मूढा एव भ्रांत्या आपाततोऽविचारतो रम्येषु सुंदरेषु हेतूक्तिचतुरेषु पूर्वोक्त–'पशुश्चेन्निहतः स्वर्गम्' इत्यादिकुतर्कजालोपबृंहितवाग्मिपुणेषु । आदिना मैरालकादिग्रहः ''नृकपाले च यो भुंक्ते स हि कापालिको मतः'' इति निरुक्तिः । 'उपधर्मस्तु पाषंड' इति नारदः ॥ २५ ॥ तदिन्द्ररचितपाखंडेनोपसृष्टं यज्ञस्थलमभिज्ञाय ज्ञात्वा । इंद्रायेंद्रं हंतुम् ॥ २६ ॥ तत्राविहितहिंसाप्रवृत्ते पृथौ तत्तत्वविदः किं निद्रितास्तत्राह–तमिति । महामतेरित्यस्य त्वं महामतिः सर्वज्ञशिरोमणिर्भगवदंशत्वादस्यतस्त्वां वयं किं बोधयाम इत्यभिप्रायः । प्रचोदिताद्विहितात् । अत्राश्वमेधयागो न युज्यते न युक्तः ॥ २७ ॥ कस्तर्ह्यत्र प्रतीकार इति चेदाह–तद्वधमिति । अत्र तदानीमिंद्रस्य भगवदवतारत्वेपि विप्राणां चाबहिर्मुखत्वेपि तथाभूतोक्त्या कर्ममार्गस्य स्वभाव एव तैर्द्योतितो यत्तत्र प्रवृत्ता विवेकिनोप्यंधा भवंतीति यथा ब्रह्मणा कामस्य श्रीरुद्रेण क्रोधस्य श्रीविष्णुनापि यज्ञावतारे तस्मिन्मात्सर्यकौटिल्यादिकमीहमानेनेंद्रस्य स्वभावो द्योतित इति ॥ २८ ॥ नन्विंद्रे मृते यज्ञ एव कथं स्यान्मंत्राणां तद्विषयत्वात् ''मरुत्वंतं सख्याय हवामहे'' इत्यादिश्रुतेरतोऽत्र धर्मरहस्यवेदी कोपि नाभूदिति सभादोषं परिहरतो ब्रह्मण उक्तिप्रकारमाह–इतीति । क्रतुपतिं पृथुमिति । वयं मरुत्वतमित्यादिरीत्यामंत्र्य पृष्ट्वा रुषा जुह्वतोऽस्य पृथोर्ऋत्विजो ब्रह्माऽभ्येत्य संमुखीभूय । विदुरेति । यथा त्वं विद्वत्त्वाद्दुर्योधनादीन्प्राकृतमार्गप्रवृत्तान्न्यषेध इत्यभिप्रायः ॥ २९ ॥ किमाकारः प्रतिषेधस्तत्राह–नेति । संदर्भस्तु–यद्यस्माद्यज्ञो यागो भगवत्तनुः सुराश्चेन्द्राद्या यस्येष्टाः प्रियास्तनवस्तस्मादेकां तनुं हत्वा नान्यां रक्षितुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः ॥ इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥ ३१ ॥ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ॥ अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥ ३२ ॥ नैवात्मने महेंद्राय रोषमाहर्तुमर्हसि ॥ उभावपि हि भद्रं त उत्तमश्लोकविग्रहौ ॥ ३३ ॥ माऽस्मिन्महाराज कृथाः स्म चिंतां निशामयाऽस्मद्वच आहतात्मा ॥ यद्ध्यायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोंधम् ॥ ३४ ॥ क्रतुर्विरमतामेष देवेषु दुरवग्रहः ॥ धर्मव्यतिकरो यत्र पाखंडैरिंद्रनिर्मितैः ॥ ३५ ॥

भगवतस्तनुरवतारः । "ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरम्" इत्युक्तत्वात् ॥ ३० ॥ अतो बलीयसाऽनेन सख्यमेव कर्तव्यमन्यथा भूयः पाखंडं स्रक्ष्यतीत्याशयेनाह । तदिदमिंद्रेणानुष्ठितं महदन्याय्यं पश्यत । किमित्यपेक्षायामाह । धर्मस्य व्यतिकरं विपर्ययं पाखंडपथम् ॥ ३१ ॥ तर्हि किमत्र युक्तमित्यत आह । पृथुकीर्तेरिति । एकेनोनं शतं यस्मिंस्तादृशः क्रतुः क्रतुप्रयोगः पृथोर्भूयात् । पृथुकीर्तिः पृथुरिति पाठे एकोनशतं क्रतवो यस्य तादृशोऽपि महेंद्रात्पृथुकीर्तिर्भूयादित्यर्थः । तदेवमृत्विजः प्रत्युक्त्वा पृथुं प्रत्येवाह । अलमिति ॥ ३२ ॥ आत्मनैवात्मने महेंद्राय रोषं कर्तुं नार्हसि । तत्र हेतुः । उभावपीति॥ ३३॥ तथापि क्रतुसमाप्तिमेव ध्यायंतं प्रत्याह । अस्मिन्यज्ञविघ्ने चिंतां मा स्म कृथाः । यद्यस्माद्दैवहतं कार्यं कर्तुं ध्यायतो मनो नु निश्चितमतिरुष्टं सदंधं तमो मोहं विशति न तु शांतिं लभते ॥ ३४ ॥ अत एव तव क्रतुर्विरमतु । नन्विंद्रः किं न निवार्यतेऽत आह । यतो देवेषु दुराग्रहो भवतीति । यत्र क्रतौ ॥ ३५ ॥

युक्ताः । किन्तु द्वयमपि रक्षितुं युक्तमिति भाव इत्याह । विश्वनाथस्तु–भगवत्तनुरिति । न हि भगवद्विग्रहो विप्रैर्हंतुमध्यवस्यते भवतां तर्हि विप्रत्वमेव कुतः यं यज्ञेन जिघांसथेति स खलु यज्ञः कथं यज्ञेन वध्यो भवेद्यथा क्षीराब्धिः क्षीरप्रस्थेनेति । किञ्च यस्य यज्ञस्येंद्रस्य च तनवः सुरास्ते च यज्ञेन युष्माभिरिष्टा इज्यंते स्मेति कथं स मरिष्यतीत्येतमपि विवेकं न कुरुथेति भाव इत्याह ॥ ३० ॥ यतस्तद्द्वेषेणाधर्म एव वर्धिष्यते तं चाधर्ममस्य राज्ञो मूर्त्तमेव प्रवृत्तं पश्यतेत्याह–अतो बलीयसेति । तदिदं प्रत्यक्षसिद्धं द्विजा इत्यदीर्घदर्शित्वमाह ॥ ३१ ॥ इत्यर्थ इति । क्रतुभिर्यश एव साध्यं तच्च मदाशीर्वादादेव भविष्यतीति भावः । षष्ठ्यंतपाठे एकत्वं जात्यपेक्षया एकोनशतं क्रतुरिति पाठे संख्या वाच्यापेक्षया शंढत्वमेकत्वं च "विंशत्याद्याः सदैकत्वे तासु चानवतेः स्त्रियः । क्लीबे शताद्याः प्रायः स्युः" इत्यभिधानात् । क्रतुशतस्य संकल्पोऽपूर्णोपि मदाशीर्वादात्पूर्णो भवत्वित्यर्थो व्यंजितः । यद्यतो मोक्षधर्मविदिति । न चेंद्रत्वलाभाय तव क्रतुशतकारंभः किं तु प्रजापालनवदिज्यादेरपि राजधर्मत्वेन निजधर्माचरणस्य 'स्वधर्ममाराधनमच्युतस्य' इत्युक्त्या मोक्षहेतु हर्याराधनार्थत्वमेव । मोक्षहेतुत्वं तु स्वधर्मस्य 'यदीहमानो विजहाति बंधम्' इत्युक्तेः । यज्ञस्य राजधर्मत्वं तु गयोपाख्याने "स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनोपलक्षणेनेज्यादिना च" इत्युक्तेरेवावसीयत इति । अत उक्तमलं पूर्णं तिष्ठतु वा । "अलं तु भूषणे शक्तौ पर्याप्तौ विनिवारणे" इति यादवः । निवृत्तिमार्गप्रियस्य तव प्रवृत्तिमार्गेहा तु लोकसंग्रहार्थमेवेति भावः ॥ ३२ ॥ फलितमाह–नैवेति । तत्र रोषाकरणे आत्मन इति हेतुः आत्मने इत्यत्रापि हेतुः उभाविति । द्वयोरपि युवयोर्भगवदवतारत्वादित्यर्थः ॥ ३३ ॥ तथापीत्थं बोधितेपि ॥ ३४ ॥ अत एव मनःशांत्यभावादेव । अत्राक्षिपति–नन्विति । तीर्थस्तु–न केवलं क्रतोर्विरामेण पूर्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एभिरिंद्रोपसंसृष्टैः पाखंडैर्हारिभिर्जनम् ॥ ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥ ३६ ॥ भवान्परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपम् ॥ वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलाऽसि वैन्य ॥ ३७ ॥ स त्वं विमृश्यास्य भवं प्रजापतेः संकल्पनं विश्वसृजां पिपीपृहि ॥ ऐंद्रीं च मायामुपधर्ममातरं प्रचंडपाखंडपथं जहि प्रभो ॥ ३८ ॥ मैत्रेय उवाच ॥ इत्थं स लोकगुरुणा समादिष्टो विशांपतिः ॥ तथा च कृत्वा वात्सल्यं मघोनाऽपि च संदधे ॥ ३९ ॥ कृतावभृथस्नानाय पृथवे भूरिकर्मणे ॥ वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ ४० ॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः॥ आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ ४१ ॥

इंद्रदुराग्रहकृतमनर्थं पश्येत्याह । एभिरिंद्रेणोपसंसृष्टैरधिष्ठितैर्हारिभिश्चित्ताकर्षकैः । य इंद्रस्तेऽश्वं मुष्णातीति तथा यज्ञाय द्रुह्यतीति तथा । तेन सृष्टैः ॥ ३६ ॥ ततो मम किमिति चेत्तत्राह–भवानिति द्वाभ्याम् । सांख्ययोगादिनानासिद्धांतानुरूपं धर्मं वेनस्यान्यायाल्लुप्तं परित्रातुं तद्देहाद्विष्णोः कलैव त्वमवतीर्णोऽसि ॥ ३७ ॥ हे प्रजापते अस्य विश्वस्य भवमुद्भवं विचार्य यैरुत्पादितोऽसि तेषां विश्वसृजां संकल्पं पिपीपृहि आर्षः प्रयोगः पूरयेत्यर्थः । प्रचंडो यः पाखंडमार्गः सैवैंद्री मायोपधर्मजननी तां जहि विनाशय ॥ ३८ ॥ तथा च कृत्वा यज्ञाग्रहं हित्वा वात्सल्यं स्नेहं च कृत्वेंद्रेण सह संधानं च कृतवान् ॥ ३९ ॥ कृतमवभृथसंबंधि स्नानं येन स तस्मै ॥ ४० ॥ ४१ ॥

किन्तु देवेषु दुरवग्रहो विरमतां देवेषु कुपितेषु त्वद्राष्ट्रे वृष्टिविघातोऽपि स्यादतस्तद्दुरवग्रहविरामः कर्त्तव्य इत्यर्थः । क्रतो विशेषणं वा कुपितदेवविषयो दुष्टोऽवग्रहो यस्मात्स तथा । देवप्रीत्या सुवृष्ट्यर्थं पुरुषैर्यज्ञोनुष्ठीयते ''कारीर्या वृष्टिकामो यजेत'' इति श्रुतेः । तत्र देवप्रतिहते क्रतौ क्रियमाणे तदप्रीत्यानावृष्ट्या व्रीह्याद्यौषध्यनुत्पत्त्याऽन्नाभावेन प्राणिनां प्राणधारणोपायाभावेन देहवियोगलक्षणो विनाशः स्यादिति ''व्याङ्परिभ्यो रमः'' इति विहितपरस्मैपदप्रयोगं विहाय स्वार्थहानिसूचनाय विरमतामित्यात्मनेपदप्रयोगः । इतोपि क्रतुर्विरमत्वित्याह–यत्र चरमाश्वमेधे क्रियमाणे सति धर्मव्यतिकरः धर्मेऽधर्मसंबंधेन धर्मस्य नाशो जात इति भावः । ''ध्रुवं धर्मः प्रणश्येत तपोयज्ञव्रतादिषु । दर्शनस्पर्शभाषाभिर्म्लेच्छपाषंडिदंभिभिः'' इति संहितोक्तेः । ''वृष्टिर्वर्षं तद्विघातेवग्राहावग्रहौ समौ''इत्यमरः ॥ ३५ ॥ पाखंडैर्ह्रियमाणं स्वायत्तीकृतं जनं तत्र हेतुर्हारिभिर्मूढजनाकर्षिभिः ॥ ॥ ३६ ॥ ततः पाखंडहृतजनदर्शनान्मम किं का हानिरित्यत्राह । ''समयः शपथाचारसिद्धांतेषु तथा विधि । क्रियाकारे च निर्देशे संकेते कालभाषयोः'' इति मेदिनी । हे वैन्येति । वेनदेहोद्भूतत्वात्तन्मतिं मा गृहाणेति भावः । ''विरोधे प्रणधित्यक्तेऽपचारोऽन्यायनिंदयोः'' इति निरुक्तिः ॥ ३७ ॥ हे प्रजापते । प्रजापालनं हि धर्मरक्षयाऽधर्महत्या च भवतीत्यतः पाखंडस्य महाऽधर्मत्वात्तद्धननमेव युक्तमिति भावः । इत्यर्थ इति । 'पृपालनपूरणयोः' इत्यस्य लोटो मध्यमपुरुषैकवचने द्वित्वेत्वयोः पिपृहीति ततः पुनः पीत्यस्य द्वित्वमुत्तरस्य दीर्घश्च च्छांदसत्वात् । यद्वा–'वष्टिभागुरिः' इत्यप्युपसर्गाकारलोपे अभ्यासस्य च्छान्दसे दीर्घे पिपीपृहीति रूपमिति भावः । प्रचंडपाखंडपथमित्याविष्टलिंगत्वात्पुंस्त्वम् ॥ ३८ ॥ स पृथुर्लोकगुरुणा ब्रह्मणा ॥ ३९ ॥ अवभृथो यज्ञांतस्तस्येदमावभृथ्यं तच्च स्नानमावभृथ्यस्नानं कृतमावभृथ्यस्नानं येन तस्मै । तद्बर्हिषि तस्य यज्ञे ॥ ४० ॥ क्षत्तरिति। त्वं जानास्येवैतद्वृत्तं विप्राः पूजिताः सुखायापूजिता दुःखाय क्षत्तृपदमत्र विद्रुरपरमनेन प्राग्भवमांडव्यवृत्तं स्मारितमिति भावः । ''क्षत्ता शूद्राक्षत्रियजे प्रतीहारे च सारथौ। भुजिष्यातनयेपि स्यान्नियुक्तविदुषोरपि''

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वयाऽहूता महाबाहो सर्व एव समागताः ॥ पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ ४२ ॥ इति श्रीभा० म० चतुर्थ० पृथुचरित्रे इंद्रकृतपाखंडागमवर्णनं नाम एकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ मैत्रेय उवाच भगवानपि वैकुंठः साकं मघवता विभुः ॥ यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत ॥ १ ॥ श्रीभगवानुवाच ॥ एष तेऽकारषीद्भंगं हयमेधशतस्य ह ॥ क्षमापयत आत्मानममुष्य क्षंतुमर्हसि ॥ २ ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः ॥ नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरम् ॥ ३ ॥ पुरुषा यदि मुह्यंति त्वादृशा देवमायया ॥ श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ ४ ॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः ॥ आरब्ध इति नैवास्मिन्प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥ असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे ॥ अपत्ये द्रविणे वाऽपि कः कुर्यान्ममतां बुधः ॥ ६ ॥ एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः ॥ सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः ॥ ७ ॥

तुष्टानां वाक्यं त्वयेति ॥४२॥ इति श्रीमद्भागवते चतुर्थस्कंधे टीकायामेकोनविंशोऽध्यायः॥१९॥छ॥ विंशे तु विष्णुना साक्षात्पृथोर्यज्ञेऽनुशासनम् ॥ वरदानप्रसंगेन प्रीतिश्चान्योन्यमीर्यते॥१॥मघवता साकमिंद्रेण सह वर्तमानः॥१॥आत्मानं त्वां क्षमां कारयताऽमुष्य इंद्रस्य त्वमपि क्षंतुमर्हसि ॥२॥ यर्हि यस्मात्कलेवरमात्मा न भवत्यतस्तदभिमानेन भूतानि नाभिद्रुह्यंति॥३॥४॥अविद्या स्वरूपाज्ञानं ततः कामस्ततः कर्म तैरारब्ध इति विद्वानत एव प्रतिबुद्ध आत्मज्ञोऽस्मिन्नैवानुषज्जते ॥ ५ ॥ तथापि पुत्रादिममत्वेन भूतद्रोहेण च संगो भवेत्तत्राह । असंसक्त इति॥६॥प्रतिबोधक्रमं विवृण्वन्देहेऽनुषंगाभावमाह एक इति द्वाभ्याम् । असावात्मा आत्मनो देहात्परो भिन्नः तत्र नवधा

इति मेदिनी ॥ ४१ ॥ महाबाहो इति । इंद्रस्यापि भयंकरौ तव बाहू इति भावः ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥ अन्योन्यं पृथुविष्णोः परस्परं प्रीतिः ॥ (१) अपिना ब्रह्मणः समुच्चयः । वैकुंठ इति । जगदुत्पत्तौ विश्लिष्टानां भूतानां संयोजकत्वात् । तदुक्तं शान्तिपर्वणि "मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना । वायुश्च तेजसा सार्द्धं वैकुंठत्वं ततो मम ॥" इति । विभुरित्यनेन यज्ञस्येंद्रस्य तद्व्याप्यत्वमुक्तं यज्ञानां पतिर्भोक्ता च "अहं हि सर्व यज्ञानां भोक्ता च प्रभुरेव च" इति श्रीगीतोक्तेः । तं पृथुम् ॥ १ ॥ हयमेधशतमस्येति हयमेधशतस्तस्य ते मत्वर्थीयोऽच् । भंगमश्वापहरणे नानादरमकार्षीत् । "भंगो मर्दनरीढयोः" इति निरुक्तिः । यद्वा—हयमेधशततमस्येति व्याख्येयं तमप्प्रत्ययलोपस्त्वार्षः । अन्यथा चरमाश्वमेधासिद्ध्या तदेकभंगाभावेन सर्वभंगापत्त्या त्वमेकोनशतक्रतुरित्यनुपपन्नं स्यादिति भावः ! किमत्र कार्यं तदाज्ञापयेति तत्राह—अमुष्येन्द्रस्य ॥ २ ॥ अक्षमा साधुगुणो न स्यादित्याह—नरदेवेति । तव तु नरपालकस्य सर्वथा द्रोहोऽनुचित इत्यभिप्रायः । भूतेभ्य इति चतुर्थी त्वार्षी । "क्रुधद्रुहोरुपसृष्टयोः कर्म" इत्युपसर्गयोगे कर्मसंज्ञाविधानात् ॥ ३ ॥ भगवन्मायामोहनादेव भवेदिति चेत्तत्राह-पुरुषा इति । त्वादृशाः कुतस्त्वमित्यर्थः ! वृद्धानां शास्त्रवृद्धानां सेवया ॥ ४ ॥ अतो वृद्धसेवयैव मायानावरणात् । ततः स्वरूपाज्ञानात् पुनस्ततः कामात् । अत एव वैदुष्यादेव । अस्मिन्काये । अनुषज्जति आसक्तो भवति ॥ ५ ॥ यद्यपि प्रतिबुद्धो न सज्जते तथापि इति । आदिना हयादिग्रहः । अमुना शरीरेण ॥ ६ ॥ तत्रात्मनि यत आत्मा देहवान्नातो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एवं संतमात्मानमात्मस्थं वेद पूरुषः ॥ नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः॥८॥यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः ॥ भजते शनकैस्तस्य मनो राजन्प्रसीदति ॥ ९ ॥ परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः ॥ शांतिं मे समवस्थानं ब्रह्मकैवल्यमश्नुते ॥ १० ॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् ॥ कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम्॥११॥ भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः ॥ दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियंते मयि बद्धसौहृदाः ॥१२ ॥ समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेंद्रियाशयः ॥ मयोपक्लृप्ताखिललोकसंयुतो विधत्स्व वीराऽखिललोकरक्षणम् ॥ १३ ॥

वैलक्षण्येन भेदं साधयति एक इति नवभिः पदैः । देहो हि बाल्ययुवादिभेदादनेको मलिनश्च जडश्च सगुणश्च स्वकारणभूतगुणाश्रितश्च परिच्छिन्नश्च गृहादिभिरावृतश्च दृश्यश्च सात्मा च । आत्मा तु नैवमतो भिन्नः ॥ ७ ॥ आत्मस्थं स्वस्मिन् स्थितम् । प्रकृतिस्थोऽपि देहस्थोऽपि तद्गुणैस्तद्विकारैर्न लिप्यते । यतः स मयि ब्रह्मणि स्थितः ॥ ८ ॥ इयमवस्था कस्योत्पद्यत इत्यपेक्षायामाह यः स्वधर्मेणेति चतुर्भिः । निराशीः निष्कामः ॥ ९ ॥ भवतु मनः प्रसन्नं ततः किं तत्राह यर्हि यदा विशदाशयःप्रसन्नमनास्तदा परित्यक्तगुणः सन्सम्यग्दर्शनो भूत्वा शांतिमश्नुते । शांतिमेवाह । मम सम्यगौदासीन्येनावस्थानमेव ब्रह्म तदेव कैवल्यमश्नुते ॥१०॥ सम्यग्दर्शनमेवाह उदासीनमेवात्मानं द्रव्यज्ञानक्रियात्मनां देहज्ञानकर्मेंद्रियमनसामध्यक्षमिव स्थितमात्मानं यो वेद ॥ ११ ॥ संसारिणः कथं कूटस्थत्वमत आह । भिन्नस्य लिंगस्य देहस्य गुणप्रवाहः संसारः । भिन्नत्वे हेतुः द्रव्याद्यात्मकस्य । तत्र चेतना चिदाभासः । अतो दृष्टासु प्राप्तासु संपदादिषु हर्षशोकादिभिर्न विक्रियंते॥ १२॥ त्वं च सूरिरतः सुखे दुःखे च समः सन्समाना उत्तममध्यमाधमा यस्य । जितानींद्रियाण्याशयश्च येन । स त्वमखिललोकरक्षणं विधत्स्व । कथमेकेन मया रक्षणं कर्तुं शक्यं तत्राह । मयेश्वरेणोपक्लृप्ताः संपादिता येऽखिला लोका

भिन्न इत्यर्थः ॥ ७ ॥ यतस्त्वं देहादात्मान्योस्त्यतो हेतोः । इति भाव इति । आसक्तिरेव बंधहेतुर्न ह्यनासक्तिरपीत्याशयः ॥ ८ ॥ कस्योत्पद्यते भक्तिमिश्रज्ञानेन यतमानस्येत्याह—य इति ॥ ९ ॥ भवतु मनः प्रसन्नं ततः किं तत्राह—यर्हीति ॥ १० ॥ अत्र विश्वनाथः—अध्यक्षं जीवात्मानमुदासीनमिव तेष्वनासक्तमिव यो वेद स इमं कूटस्थमात्मानं परमात्मानं वेद यः परमात्मानं वेद सोऽभवं मोक्षं प्राप्नोत्यावृत्त्यान्वयः । शोभनमिति पाठेपि स एवार्थः । अत्रेवकारेण सम्यगुदासीनत्वाभावेऽपि साधनदशायां ज्ञानसिद्धिं सूचयति ॥ ११ ॥ अत्राक्षिपति—संसारिण इत्यादिना । द्रव्याद्यात्मकस्याधिभूताध्याधिदैवबुध्यात्मकस्य । तत्र द्रव्यादिषु चेतनाबुद्धिश्चिदाभासश्च यतो बुद्ध्याद्यात्मकलिंगदेहस्यैव संसारोऽतो हेतोः हर्षशोकादीनामात्मधर्मत्वाभावादित्यर्थः । अयमर्थः—लिंगदेहस्य खल्वभिमानेनैव जीवस्य संसारो न त्वौदासीन्येनेति । तत्राध्यक्षत्वेऽपि न जीवस्य क्षतिर्लिंगस्यापि तदेव लिंगत्वमिति । एवञ्च ‘यः स्वधर्मेण’ इत्यादिना भक्तिमिश्रेण ज्ञानेन यतमानानां संसाराभावमुक्त्वा केषांचित्केवलयैव भक्त्या ‘जरयत्याशु या कोशम्’ इत्युक्तन्यायेन संसारनिवृत्तये यतमानानामपि संसाराभावमाह—दृष्टास्विति । आसक्त्यभावात्प्राकृतसम्पद्विपदोर्न विक्रियंते आसक्त्यभावे हेतुः—मयि बद्धेति । सौहृदबद्धत्वं तु केवलयैव भक्त्या भवेदित्यापादितं तृतीयस्कंधे ॥१२॥ सूरिर्मयि बद्धसौहृद इत्यतो मन्निदेश एव वर्त्तस्वेत्याह । अतःसूरित्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रेयः प्रजापालनमेव राज्ञो यत्सांपराये सुकृतात्षष्ठमंशम् ॥ हर्ताऽन्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघ मत्ति ॥ १४ ॥ एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽविताऽस्याः ॥ ह्रस्वेन कालेन गृहोपयातान्द्रष्टासि सिद्धाननुरक्तलोकः ॥ १५ ॥ वरं च मत्कंचन मानवेंद्र वृणीष्व तेऽहं गुणशीलयंत्रितः ॥ नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती ॥ १६ ॥ मैत्रेय उवाच ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् ॥ अनुशासित आदेशं शिरसा जगृहे हरेः ॥ १७ ॥ स्पृशंतं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा ॥ शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥ १८ ॥ भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ॥ समुज्जिहानया भक्त्या गृहीतचरणांबुजः ॥ १९ ॥

अमात्यादयस्तैः संयुतः ॥ १३ ॥ ननु रक्षणं दंडादिसापेक्षमतस्तपोऽन्यद्वा पुण्यं करिष्यामीति चेदत आह । श्रेय इति । यद्यस्मात्सांपराये परलोके प्रजाभिः कृतात्सुकृतात्षष्ठमंशं हर्ता हरति । अरक्षणे दोषमाह । अन्यथा प्रजाभिर्हृतं पुण्यं यस्य स प्रजानामघमत्ति पापं भुंक्ते । अन्यथेत्यस्य विवरणम् । करहारः सन्नरक्षिता चेत् ॥ १४ ॥ एवं च मोक्षोऽप्यनायासेन भविष्यतीत्याह । द्विजाग्र्याणामनुमतश्चासावनुवृत्तश्च परंपराप्राप्तो यो धर्मः स एव प्रधानमर्थकामौ तु प्रासंगिकौ यस्य अन्यतमोऽतिशयेनान्यः । धर्मादिष्वनासक्त इत्यर्थः । ऐकपद्यपाठे धर्मप्रधानावन्यतमावर्थकामौ यस्येत्यर्थः । अस्याः पृथिव्या अविता सन्नल्पेन कालेन गृहागतान्सनकादीन्द्रक्ष्यसि । अनुरक्तो लोको यस्मिन्सः ॥ १५ ॥ मत् मत्तः सकाशात्कंचन कंचिद्वरं वृणीष्व । गुणाः क्षमादयः शीलं निर्मत्सरत्वादिस्वभावस्तैरहं यंत्रितो वशीकृतः । तद्रहितैस्तु मखादिभिर्नाहं सुलभः । यतः समं चित्तं येषां तेष्वेव वर्तितुं शीलं यस्य सोऽहम् ॥ १६ ॥ १७ ॥ क्षमापयितुं पादयोः स्पृशंतम् । स्वेन कर्मणाऽश्वापहरणेन व्रीडितम् । प्रेम्णा परिष्वज्य ॥ १८ ॥ भगवान्प्रस्थानाभिमुखोऽप्यनुग्रहेण विलंबितः सन्न प्रतस्थे प्रयाणं न कृतवानिति द्वयोरन्वयः । कथंभूतः । उपहृतमर्पितमर्हणं यस्मै । समुज्जिहानया समु

कथमित्याशंकते । तत्राशंकायाम् । ईश्वरदत्तैश्वर्योऽहमीश्वराज्ञापालनरूपं प्रजारक्षणं करोमीति बुद्ध्येत्यर्थः ॥ १३ ॥ अत्राक्षिपति नन्विति । आदिना करादिग्रहः । ''संपरायः समीपे स्यादापदुत्तरकालयोः । परलोके महैश्वर्ये'' इत्यभिधानात् । एवकारेणान्ययोगो व्यवच्छिद्यते ॥ १४ ॥ द्विजाग्र्याणां शास्त्राभिज्ञविप्राणामनुमतस्तैरनुज्ञातः । इत्यर्थ इति । तमबत्र प्रकृष्टार्थे न तु डतम इति भ्रमितव्यं तस्यानुपयोगादिति भावः । इत्यर्थ इति । इत्थं बहुव्रीहिं कृत्वा पुनर्द्विजाग्रैरनुमतस्स चासौ प्रवृत्तश्चेति धर्मप्रधानान्यन्यतमश्चेति कर्मधारयः कार्य इति भावः ॥ १९ ॥ अत्यनुकम्पाविगतधैर्य आह-वरं चेति । मानवेंद्रेत्युक्त्या देवेंद्रत्वं तु यज्ञस्यैव तिष्ठत्वतोऽन्यं वरं मत्तः कंचन वृणीष्वेत्यभिप्रायः । समत्वं चात्र ''नारायणपराः सर्वे नकुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः'' ॥ इत्युक्तरीत्या भक्त्युत्थमेव ग्राह्यं 'न रोधयति मां योगः' इत्याद्युक्तैर्योगाद्युत्थमिति संदर्भः । विश्वनाथस्तु–समं तुल्यमेव सर्वेषां चित्तवर्त्ती चित्ताधिष्ठाता सर्वत्रोदासीन एव न तु कस्यापि वश इत्याह । समे ''निर्दोषं हि समं ब्रह्म'' इति श्रीगीतोक्तेर्ब्रह्मणि चित्तं येषां ते समचित्ता ज्ञानिनस्तत्र वर्त्ती ''प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः'' इति श्रीमुखोक्तेः ॥ १६ ॥ विश्वजित्समस्तजेता पृथुः ॥ १७ ॥ १८ ॥ अथोभयोर्मेलनानंतरम् ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्थानाभिमुखोऽप्येनमनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम् ॥२०॥ स आदिराजो रचितांजलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ॥ न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥ २१ ॥ अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषम् ॥ पदा स्पृशंतं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरंगविद्विषः ॥२२ ॥ पृथुरुवाच ॥ वरान्विभो त्वद्वरदेश्वराद् बुधः कथं वृणीते गुणविक्रियात्मनाम् ॥ ये नारकाणामपि संति देहिनां तानीश कैवल्यपते वृणे न च ॥ २३ ॥ न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणांबुजासवः ॥ महत्तमांतर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥ २४ ॥

द्रुच्छंत्या वर्द्धमानया भक्त्या गृहीते चरणांबुजे यस्य ॥ १९ ॥ पद्मपलाशवदक्षिणी यस्य तथाभूतः सन् एनं पृथुं पश्यन् ॥ २० ॥ भगवतस्तत्कृपातिरेकमुक्त्वा तस्य भक्त्युद्रेकमाह स इति द्वाभ्याम् । बाष्पविक्लवत्वेन तूष्णीमवस्थितः सन्नमुं हरिं हृदोपगुह्याधाद्धृतवान् ॥ २१ ॥ अतृप्तयोर्दृशोर्गोचरं विषयभूतम् । पदा क्षितिं स्पृशंतमिति अयं भावः । न खलु देवाः पदा भुवं स्पृशंत्यतः कृपापरवशो नूनं हरिरात्मानं विस्मृतवानिवेति । अत एव स्खलनपरिहारायैव गरुडस्योन्नते स्कंधे विन्यस्तं हस्ताग्रं येन तम् ॥ २२॥ वरं वृणीष्वेति यदुक्तं तदसहमान आह । हे विभो वरदानां ब्रह्मादीनामीश्वराद्वरप्रदात्त्वत्त्वत्तः ॥ सकाशद् बुधः सन्कथं वरान्वृणीते । कीदृशान् । गुणैर्विक्रियत इति गुणविक्रियोऽहंकारः स एवात्मा येषां तेषां ब्रह्मादीनां संबंधिनः देहाभिमानिनां भोग्यानिति वा । तथा चेत्स बुध एव न भवतीत्यर्थः । जुगुप्सितत्वादपीत्याह । ये इति । बुध एवाहमपि न वृणे इति समुच्चयाय चकारः ॥ २३ ॥ कैवल्यपत इति संबोधनात्कैवल्यं वरिष्यतीति मा शंकीरित्याह । नेति । महत्तमानामंतर्हृदयान्मुखद्वारेण निर्गतो भवत्पदांभोजमकरंदो यशःश्रवणादिसुखं यत्र नास्ति तादृशं चेत्कैवल्यं तर्हि तत्कचित्कदाचिदपि न कामये । तर्हि किं कामयसे तदाह । यशःश्र

"यात्रा प्रयाणं प्रस्थानं गमनं चलनं गतिः" इत्यभिधानात् ॥ २० ॥ स पृथुः वाक्यभेदात्स इत्यस्य पौनरुक्त्यन्न ॥ २१ ॥ अतोऽत्र । अत एव विस्मृतात्मत्वादेव । अथ हृदि धारणोत्तरम् ॥ २२ ॥ विभो इति । न हि विभोर्वरं वृणीष्वेति कथनं युक्तं विभुत्वहानिप्रसंगादिति भावः । आत्मात्मत्वेनाभिमतः । कैवल्यपते इति । कैवल्यकामोऽपि यान्न वृणीते तानहं कैवल्यस्याप्यसहिष्णुः कथं वृण इति भावः । ईशेति । स्वाभिमतदाने सामर्थ्यं द्योतयति ॥ २३ ॥ कैवल्यमपि येभ्य एव रोचते तेभ्य एव तदीयतामित्यभिप्रायेणैव मया तच्छब्देनामंत्रितोऽसीत्याह-नेति । वरश्च मत्कंचनेति यदुक्तं तत्र सामान्यतो वरानहं नैव कामये विशेषतोऽपि कञ्चन वरं कैवल्यं तदपि न कुतः यत्र कैवल्ये अंतर्हृदयेनास्वाद्यानंदोद्रेकात्कीर्त्यमान इत्यर्थः । "शुकमुखादमृतद्रवसंयुतम्" इतिवन्महदास्वाद्यत्वे सति तस्यापि माधुर्य्यमुदयत इति भावः । मधुरमपि जलं क्षारभूमिप्रतिष्ठं यथा विरसं भवति तथैवावैष्णवमुखनिर्गतो भगवद्गुणोऽपि न रोचको भवतीति व्यतिरेकश्च गम्यः । महतां गुणकथानाञ्चानंत्यात् । यत्रयत्र यैर्यैर्याया गुणकथाः कीर्त्यमानास्तासामेकामपि गुणकथां त्यक्तुं न शक्नोमीत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स उत्तमश्लोकमहन्मुखच्युतो भवत्पदांभोजसुधाकणानिलः ॥ स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥ २५ ॥ यशः शिवं सुश्रव आर्य संगमे यदृच्छया चोपश्रृणोति तेऽसकृत् ॥ कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥ २६ ॥ अथाभजे त्वाऽखिलपूरुषोत्तमं गुणालयं पद्मकरेव लालसः ॥ अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥ २७ ॥

वणाय कर्णानामयुतं विधत्स्व । ननु कोऽप्येवं न वृतवान् किमन्यचिंतयेत्याह । मम तु एष एव वरः ॥ २४ ॥ ननु तर्हि कैवल्याभावे रागद्वेषाद्याकुलानां भक्तिसुखमपि न स्यादित्याशंक्याह । स इति । भवत्पदांभोजसुधायाः कणो लेशस्तत्संबंधी योऽनिलः स एव दूरादपि किंचिद्यशःश्रवणमात्रमित्यर्थः । विस्मृतं तत्त्ववर्त्म यैः, कुयोगिभिस्तेषामपि पुनः स्मृतिमात्मज्ञानं वितरति अतो न खलु भक्तानां रागद्वेषादिसंभवोऽतो नोऽस्माकं सारग्राहिणामन्यैर्वरैरलम् । भक्तावेव मोक्षादिसर्वसुखांतर्भावादिति भावः ॥ ॥ २५ ॥ ननु भक्तिर्मुक्तिफलैवातः फलं विहाय साधने भवतः कोऽयमाग्रह इत्याशंक्याह । हे सुश्रवः मंगलकीर्ते ते शिवं यशः सतां संगमे यः सकृदपि यदृच्छयाप्युपश्रृणोति गुणज्ञश्चेत्स पशुं विनाऽन्यः कथं विरमेत । गुणातिशयं सूचयति । श्रीर्यद्यश एव प्रकर्षेण वृतवती गुणानां सर्वपुरुषार्थानां संग्रहः स्वस्मिन्समाहारस्तदिच्छया ॥ ॥ २६ ॥ अतो लक्ष्मीरिवान्यवरत्यागेन त्वामेवाहं भज इत्याह । अथेति । लालस उत्सुकः सन् कर्मणि क्रियमाणे यथेंद्रेण सह कलिरेवं भक्तावपि किं लक्ष्म्या सह

तिलोभात्कर्णानंत्यस्पृहा तेन कैवल्यकामा येभ्य इंद्रियेभ्यो द्रुह्यंति तानेवाहं कामय इति द्योतितम् ॥ २४ ॥ अत्राक्षिपति-नन्विति । इत्यर्थ इति । तत्संबंधी तावदनिलोऽपि कुतः कणः कुतस्तरां सा सुधा तद्गुणकथालेशप्रसंगानीति भावः । अतः प्राप्तज्ञानत्वात् । अतो रागाद्यभावात् । इत्यर्थ इति । "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणे न वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्" इत्युक्तेरिति भावः ॥ ॥ २५ ॥ पुनराक्षिपति-नन्विति । यतो मुक्तिरेव भक्तिफलमतो हेतोः । अत्र विश्वनाथः—ननु मत्कथास्वादादपि विरम्य योगींद्रस्पृहणीयं कैवल्यमेव गृहाणेति तत्राह-यश इति । हे सुश्रवः मंगलकीर्ते यशःश्रवणेनैव "कैवल्यसंमतपथस्त्वथ भक्तियोगः । को निर्वृतो हरिकथासु रतिं न कुर्यात्" इति न्यायेन न मोक्षार्थं यत्नांतरं कार्यमिति भावः । तव यशः यदृच्छयाऽयत्नतोऽकस्मात्प्राप्तमपि सकृदपि यः श्रृणोति गुणज्ञश्चेत्स कथं तस्माद्विरमेत् पशुं विनेति यो विरमेत्स मनुष्येषु पशुर्यो न विरमेत्स पशुष्वपि मनुष्य इति ध्वनिः । "तत्रापि चित्तबडिशं शनकैर्वियुक्ते" इत्याद्युक्तलक्षणलक्षिताद्युष्मद्यशःपीयूषाद्विरमते योगिने "त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः । कथायाम्" इत्याद्युक्तस्वभावाय सकर्मणे च पशवे पिण्याकतुषादिकमिव कैवल्यं देहि न तु मह्यं मनुष्यायेत्यनुध्वनिः । ननु मद्यशःस्वादादपि कैवल्यादिकमधिकं भवेदित्यत्र योगी सकर्मा च प्रमाणं कैवल्यादिभ्यो मद्यशःस्वादोऽधिक इति भवन्मते कः प्रमाणमिति तत्राह-श्रीर्महालक्ष्मीर्ब्रह्मादिसर्वजगत्पूज्या सर्वगुणपंडितापि त्वद्यशो वव्रे गुणानां तदीयरूपरसगंधशब्दस्पर्शलीलालावण्यकारुण्यानां सम्यग्ग्रहणमास्वादनसामर्थ्यं तदिच्छयेति सैवात्र प्रमाणं तदुपलक्षिता अन्येप्यास्वादितचरकैवल्यसुखमपि लघू कारिष्णवो यशस्येव रममाणाः शुकादयोऽपि प्रमाणं घासबुद्ध्यैवेक्षुपल्लवानि चरन्नप्यन्तस्तदीयकांडेष्वरुचिर्घासमेवास्वादयन्वृष इव योगी सहकारपल्लवानि त्यक्त्वा कंटकमेवास्वादयन्नुष्ट्र इव सकर्मा किं प्रमाणं भवेदिति भावः ॥ २६ ॥ यतो लक्ष्मीस्त्वां भजतेऽतो हेतोः । अत्र विश्वनाथः—अतः केवलं भजनमेव वृणे न तु वरानित्याह । अथातः आ सम्यक् निष्काम एव केवलामेव भक्तिं कुर्वे न तु ज्ञानकर्मादिसिद्ध्यर्थं ज्ञानिसकर्मगुणीभूतामित्यर्थः । तत्रापि न नारदादिरिव किन्तु पद्मकरा लक्ष्मीरिव मार्जनलेपनपादसंवाहनव्यजनतांबूलार्पणादिभिरभीक्ष्णमेवेत्यर्थः । यतो लालसः लाल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगज्जनन्यां जगदीश वैशसं स्यादेवयत्कर्मणि नः समीहितम् ॥ करोति फल्ग्वप्युरुदीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥ २८ ॥
भजंत्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम् ॥ भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥ २९ ॥
मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजंतमात्थ यत् ॥ वाचा नु तंत्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥ ३० ॥

कलिः स्यादिति वितर्कयति । एकस्मिन्पत्यौ स्पर्धमानयोरावयोरपि किं कलिर्न स्यादिति काक्वा वितर्कः । ननु पर्यायेण सेवायां न स्यात् । नैवम् । कृतस्त्वच्चरणयोरेवै कस्तानो मनोविस्तारो याभ्यां तयोः ॥ २७ ॥ भवतु वा कलिस्तथापि भजेयमेवेत्याह । जगज्जनन्यां वैशसं विरोधः स्यादेव तत्र हेतुर्यस्याः कर्मणि चरणसेवालक्षणे नः समीहितमिच्छा भवति तथापींद्रविरोधे मत्पक्षपातवदत्रापि मयि तव पक्षपात एव स्यादित्याह । फल्गु तुच्छमप्युरु बहु करोषि यतो दीनेषु वत्सलो दयावान् स्वे स्वरूप एव रतस्य तव तया लक्ष्म्या किं प्रयोजनम् । तां नाद्रियस इत्यर्थः ॥ २८ ॥ यतस्त्वं दीनवत्सलोऽत एव साधवो निष्कामा अथ ज्ञानानंतरमपि त्वां भजंति । कथंभूतम् । मायागुणानां विभ्रमो विलासस्तस्योदयः कार्यं स निरस्तो यस्मिंस्तम् । ते मां किमर्थं भजंति तत्राह । भवत्पदानुस्मरणाद्विनान्यत्तेषां निमित्तं फलं न विद्मः ॥ २९ ॥ वैरः प्रलोभनं च कृपालोस्तवानुचितमित्याशयेनाह । मन्य इति । नु अहो ते वाचा तंत्या यदि जनोऽयमसितोऽबद्धः स्यात्तर्हि पुनःपुनः फलैर्मोहितः सन्कथं कर्म

सावान् "समर्हाल्लालसा द्वयोः"इत्यभिधानादत्यधिकं स्पृह इत्यर्थः । न चात्र पृथोरुज्ज्वलभाव आशंकनीयः उत्तरश्लोके जगज्जनन्यामित्युक्तेः जगति च स्वस्यान्तःपाताल्लक्ष्म्यां जननीभावेन स्वस्य दास्यभावव्यक्तेः । अतः पद्म करेवेत्युपमेयम् । परिचरणांशेनैव भगवच्चरणपरिचर्य्यायां तस्या एवातिप्रसिद्धेः लक्ष्म्यां परमभक्तिमतोऽपि स्वस्य वीरभक्तत्वं वाचैव द्योतयन्नाह-अपीति । अपरं स्वामिचरणोक्तिवत् समाधये शंकते-नन्विति । परिहरति-नैषामिति ॥२७॥तत्र विरोधे । तथापि लक्ष्म्या विरोधेऽपि।इत्यर्थ इति। तयोपादेयाभावादिति भावः।चक्रवर्ती तु-"कृपां तस्य समाश्रित्य प्रौढं नान्यमपेक्षते॥ अतुलां यो वहेत्कृष्णे प्रीतिं वीरः स उच्यते"इति वीरभक्तोचितं स्वस्वभावं प्रकटयन्नाह-जगज्जनन्यां जगन्मध्यवर्त्तित्वेन ममापि जनन्यां लक्ष्म्यां वैशसं विरोधः स्यादेव कुतः यस्याः कर्मणि त्वत्पादसेवारूपे नोऽस्माकमिच्छा जाता सा खलु युष्मद्वक्षस्यासीना विराजतु अहं पुत्र एव सर्वं युष्मच्चरणपरिचरणं करवाणि तस्याः कोयमाग्रहो यत्परिचरणं विना न जीवतीति भावः । ननु त्वमर्वाचीनः सातिप्राचीना त्वं निकृष्टः सातिमहतीति तया सह किं विरुध्यसे । सत्यं । तथापीन्द्रविरोधे मत्पक्षपातवदत्रापि मयि तव पक्षपातः स्यादित्याह फल्गु तुच्छमपि त्वमुरु करोषि यतो दीनेषु वत्सलः । ननु त्वं तस्याः कोपान्न बिभेषि? किं तत्र सत्यं न बिभेमीत्याह—स्व एव धिष्ण्ये स्वसामर्थ्येभिरतस्य मम तया किं न किमपीत्यर्थः । तत्कृपोद्रेक एव सामर्थ्यं यदुक्तम् वीरभक्तोदाहरणेषु "प्रलंबरिपुरीश्वरो भवतु का क्षतिस्तेन मे कुमारमकरध्वजादपि न किंचिदास्ते फलम् । किमन्यदहमुद्धतः प्रभुकृपाकटाक्षश्रिया प्रियापरिषदग्रिमां न गणयामि तां मामपि" इति "धिष्ण्यं शक्तौ च पारदे" इति पुंकांडेऽमरदत्तः । जगदीशेति । पितुस्तव पुरुषविशेषस्य रक्षकत्वे मातुः स्त्रियाः कोपेपि न मे हानिरिति भावः ॥ २८ ॥ कार्यं वरस्पृहा त्वद्भजनस्यैवायं स्वभावो यद्वरस्पृहा निवर्त्तत इति । अनुस्मरणस्यैव सर्वसुखचूडामणेस्तदितरसुखतिरस्कारकत्वादिति भावः ॥ २९ ॥ ननु तर्ह्यहं स्वभक्तं प्रति वरं वृणीष्वेति कथं ब्रवीमि तत्राह—मन्य इति । यदि कश्चिदपक्वो भक्तस्त्वत्प्रलोभनाद्वरं वृणुते तदैव तस्य भक्तिरसवंचनात्सर्वनाश इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वन्माययाऽद्धा जन ईश खंडितो यदन्यदाशास्त ऋतात्मनोऽबुधः ॥ यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम् ॥ ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यादिराजेन नुतः स विश्वदृक्तमाह राजन्मयि भक्तिरस्तु ते ॥ दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम् ॥ ३२ ॥ तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते ॥ मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥ ३३ ॥ मैत्रेय उवाच ॥ इति वैन्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः ॥ पूजितोऽनुगृहीत्वैनं गंतुं चक्रेऽच्युतो मतिम् ॥ ३४ ॥ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः ॥ किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥ ३५ ॥ यज्ञेश्वरधिया राज्ञा वाग्वित्तांजलिभक्तितः ॥ सभाजिता ययुः सर्वे वैकुंठानुगतास्ततः ॥ ॥ ३६ ॥ भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः ॥ हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥ ३७ ॥ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने ॥ अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥ ३८ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे श्रीविष्णोः पृथोर्यज्ञेऽनुशासनवर्णनं नाम विंशोऽध्यायः ॥ २० ॥ छ ॥

करोति ॥ ३० ॥ त्वन्मायया खंडितस्य त्वया पुनः खंडनं न कर्तव्यं किं तु हितं चेष्टितव्यमित्याह । त्वन्मायया ऋतादात्मनस्त्वत्तः खंडितः पृथक्कृतो यद्यतोऽन्यत्पुत्रादिक माशास्ते अतः स्वयमविज्ञापित एव नः समीहितुं हितं चेष्टितुमर्हसि ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ वाग्वित्तांजलिभिर्भक्तितः पूजिताः संतः । वैकुंठानु गताः पार्षदाश्च ॥ ३६ ॥ अमुष्य राज्ञः । हरन्निवेति लोकोक्तिः । वस्तुतस्तस्य मनः सर्वदैव तदधीनमस्त्येव । स्वधाम राज्ञो हृदयम् ॥ ३७ ॥ अदृष्टाय लोचनपथमतिक्रांताय । संदर्शितोऽनुभावित आत्मा येन यस्मै । वासुदेवाय शुद्धचेतसि प्रतीयमानाय । वस्तुतोऽव्यक्ताय ॥ ३८ ॥ इति श्रीमद्भागवते चतुर्थस्कंधे टीकायां विंशोऽध्यायः ॥ २० ॥ छ ॥

भावः । "कर्मणा पितृलोकः, स्वर्गकामो यजेत" इत्यादिवेदलक्षणापि तव जगन्मोहिनीत्याह । नु अहो ते वाचा तंत्या यदि जनोयमसितोऽवद्ध इति समानम् ॥३०॥ ईशेति । नियंतुस्तव मम नियोज्यस्य का संमतिग्रहण चिंतेति भावः ॥ ३१ ॥ राजन्निति । राज्ञां दुर्लभापि मद्भक्तिर्मत्कृपयास्त्विति भावः ॥३२॥ प्रजापते इति । राज्ञः प्रजापालनमेव सर्वेष्टदमतस्तदेव कार्यमिति भावः । सर्वत्रेह परत्र च शोभनं सुखम् ॥३३॥ अर्थवत्सत्यं वचो 'वरान्विभो त्वद्वरदेश्वरात्' इत्यादिवाक्यजातम् एनं पृथुम् ॥ ३४ ॥ ३५॥ ततो यज्ञप्रदेशात् ॥ ३६ ॥ स्वधाम वैकुंठम् ॥ ३७॥ अदृष्टायान्यैः । पृथुस्तु वैकुंठगमनपर्यंतं तं ददर्शैवेत्यर्थः ॥३८॥ इति श्रीमद्भागवत भावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे विंशोऽध्यायः ॥ २० ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः ॥ महासुरभिभिर्धूपैर्मंडितं तत्रतत्र वै ॥ १ ॥ चन्दनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ॥ पुष्पाक्षतफलैस्तोक्मैर्लाजैरार्चिर्भिरर्चितम् ॥ २ ॥ सवृंदैः कदलीस्तंभैः पूगपोतैः परिष्कृतम् ॥ तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥ ३ ॥ प्रजास्तं दीपबलिभिः संभृताशेषमंगलैः ॥ अभीयुर्मृष्टकन्याश्च मृष्टकुंडलमंडिताः ॥४॥ शंखदुंदुभिघोषेण ब्रह्मघोषेण चर्त्विजाम् ॥ विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ ५ ॥ पूजितः पूजयामास तत्रतत्र महायशाः ॥ पौराञ्जानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ॥ ६ ॥ स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः ॥ कुर्वञ्छशासावनिमण्डलं यशः स्फीतं निधायारुरुहे हरेः पदम् ॥ ७ ॥ सूत उवाच ॥ तदादिराजस्य यशो विजृंभितं गुणैरशेषैर्गुणवत्सभाजितम् ॥ क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणंतमर्चयन् ॥ ८ ॥ विदुर उवाच ॥ सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाऽशेषसुरार्हणः ॥ बिभ्रच्च वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम् ॥ ९ ॥ को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ॥ लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धम् ॥ १० ॥ मैत्रेय उवाच ॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन् ॥ आरब्धानेव बुभुजे भोगान्पुण्यजिहासया ॥ ११ ॥

एकविंशे तु पृथुना प्रजानामनुशासनम् ॥ महासत्रे सुरादीनां महासदसि वर्ण्यते ॥ १ ॥ स्वपुरं ययावित्युक्तं तत्पुरमनुवर्णयति मौक्तिकैरिति त्रिभिः ॥ १ ॥ चंदनागुरुयुक्तैस्तोयैरार्द्रा रथ्यादयस्तद्युक्तम् । तोक्मैर्हरितयवैरंकुरैरिति वा अर्चिर्भिर्दीपैः ॥ २ ॥ सवृंदैः पुष्पफलयुक्तैः कदलीस्तंभैः पूगैर्वृक्षैस्तथाविधैः सर्वतः समलंकृतं शोभितम् ॥ ३ ॥ संभृतानि संपादितान्यशेषाणि मंगलानि दध्यादीनि तैः सहाभिजग्मुः मृष्टा उज्ज्वलाः कन्याश्च ॥ ४ ॥ गतस्मयो निरहंकारः ॥ ५ ॥ प्रियान्वरान्प्रददावीति तथा ॥ ६ ॥ गुणैर्महानत एव महत्तमः पूज्यतमः ॥ ७ ॥ गुणैर्विजृंभितमूर्जितं गुणवद्भिः सभाजितं सत्कृतं यशो गृणंतम् । मैत्रेयमर्चयन्प्राह । हे सदसस्पते शौनक ॥ ८ ॥ लब्धान्यशेषसुराणामर्हणानि येन सः । किमकरोदिति शेषः ॥ ९ ॥ श्रवणौत्सुक्यमाविष्कुर्वन्प्रार्थयते । को न्विति । यस्य विक्रमः पृथ्वीदोहनं तस्योच्छिष्टतुल्यं कामं विषयम् । तत्तस्य कर्म वद ॥ १० ॥ प्राचीनकर्मभिः प्रारब्धानेव भोगान्बुभुजे न तु भोगांतरार्थं कर्माणि करोति तदपि भोगेन पुण्यक्षपणेच्छया न तु सुखा

महासत्रे दीर्घयज्ञे (१) ॥ १ ॥ २ ॥ ३ ॥ तं पृथुम् ॥ ४ ॥ निरहंकारस्तादृशमसाधारणमैश्वर्यं स्वस्य वीक्ष्यापि गतगर्वः ॥ ५ ॥ पूजितः स्वर्णमुद्रानर्घ्यनववस्त्राद्युपायनप्रदानेनेत्यर्थः । पूजयामास उष्णीषकंचुकनेपालकंबलादिप्रतिदानेनेत्यर्थः ॥ ६ ॥ अत एव गुणैर्महत्त्वादेव ॥ ७ ॥ सदसः सभायाः पते सभापतित्वेन पूज्यत्वात्त्वामहमिदं वर्णये । किञ्चेदमेव सदस्पतेः शोभनमिति भावः ॥ ८ ॥ वैष्णवं तेजः सुदर्शनं "त्वं तेजः पौरुषं परम्" इत्यंबरीषोक्तेः । "विष्णुः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियम्" इत्यभिषेकोत्तरमुपायनाख्यानोक्तेः । कदाचिद्वामकरेपि तद्धारणाद्बाह्वोरिति द्विवचनम् । अन्यथा बाहावित्येवं कथं नावादीति मनीषिभिरेतेन कल्पनान्तरानिवृत्तिरप्यसूचि ॥ ९ ॥ सर्वकामानां पृथ्वीदुग्धत्वात्पृथ्वीदोहनस्य तद्विक्रमकृतत्वादित्यर्थः ॥ १० ॥ इत्यर्थ इति । वस्तुतस्तु प्रारब्धभोगादिकं लोक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् ॥ अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥ १२ ॥ एकदासीन्महासत्रदीक्षा तत्र दिवौकसाम् ॥ समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥ १३ ॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ॥ उत्थितः सदसो मध्ये ताराणामुडुरा डिव ॥ १४ ॥ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः ॥ सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥ १५ ॥ व्यूढवक्षा बृहच्छ्रोणिर्वलिव ल्गुदलोदरः ॥ आवर्तनाभिरोजस्वी कांचनोरुरुदग्रपात् ॥ १६ ॥ सूक्ष्मवक्रासितस्निग्धमूर्धजः कंबुकंधरः ॥ महाधने दुकूलाग्र्ये परिधायोप वीय च ॥ १७ ॥ व्यंजिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः ॥ कृष्णाजिनधरः श्रीमान्कुशपाणिः कृतोचितः ॥ १८ ॥

सक्त्येत्यर्थः ॥ ११ ॥ अस्खलितोऽप्रतिहत आदेश आज्ञा यस्य सप्तसु द्वीपेष्वेक एव दंडं धारयतीति तथा । किं सर्वत्र नेत्याह । ब्राह्मणकुलव्यतिरेकेण अच्युतो गोत्रप्र वर्तकतुल्यो येषां वैष्णवानां तद्व्यतिरेकेण च ॥ १२ ॥ एकदा तस्य महासत्रदीक्षा आसीत्तत्र सत्रे देवादीनां समाज आसीदित्यर्थः ॥ १३ ॥ तस्मिन्सत्रे पूज्येषु स्व र्चितेषु सत्सु सदसो मध्ये उत्थितः स पृथुः समंततः समैक्षतेति षष्ठश्लोकेनान्वयः ॥ १४ ॥ प्रांशुरुन्नतः पीनावायतौ भुजौ यस्य कंजवदरुणे ईक्षणे यस्य शोभना द्विजा दंताः स्मितं च यस्य ॥ १५ ॥ व्यूढं विस्तीर्णं वक्षो यस्य वलिभिस्तिसृभिर्वल्गु सुंदरं दलवदधोऽग्रमश्वत्थपत्रमिव उपरि विस्तृतमधस्तात्संकुचितमुदरं यस्य आवर्तवद म्भसां भ्रम इव निम्ना नाभिर्यस्य कांचनवदुज्ज्वलावूरू यस्य उदग्रावुन्नताग्रौ पादौ यस्य ॥ १६ ॥ सूक्ष्माश्च ते वक्राश्चासिताश्च स्निग्धाश्च मूर्धजा यस्य कंबुवत्रिरेखां किता कंधरा यस्य परिधाय वसित्वा उपवीयोत्तरीयं कृत्वा ॥ १७ ॥ नियमे निमित्ते न्यस्तानि त्यक्तानि भषणानि येन सः अत एव तैरनावृतत्वाद्व्यंजिताशेषगात्रेषु श्रीः

दृष्ट्यैव, तस्य भगवदवतारत्वान्न प्रारब्धभोगादीति भावः । अंतरा क्षेत्रं मध्यवर्त्तिदेशम् ॥ ११ ॥ वैष्णवानां वर्णाश्रमाभावो ध्वनित इति चक्रवर्त्ती । ग्रंथांतरे तु "स्त्रीणां स्यात्पतिगोत्रत्वं पाणिग्रहणतो यथा । नृणामच्युत गोत्रत्वमच्युताश्रयणात्तथा ॥ संत्यज्य विधिवत्सर्वं पुत्रदारगृहादिकम् । आत्मानं यद्व्रजेद्विष्णुमच्युताश्रयणं हि तत्" इति वैष्णवात् । विधिवदित्युक्तेस्संन्यासो लक्ष्यते । यद्वा-विधिवच्छास्त्रविहिताचार्ययथाधिकारमंत्रग्रहण विधिनेत्यर्थः । न तु जात्यादिव्युत्क्रमणेन मंत्रग्रहणादि कार्यमिति भावः । अस्खलिताज्ञः । यत्तु चक्रवर्त्तिना वैष्णवानां वर्णाश्रमाभावो ध्वनितस्तन्नारदसनकादिषु विप्रद्विजोत्तमादिशब्दप्रयोगस्य "स्वागतं भो द्विजश्रेष्ठाः, यस्य विप्राः प्रसीदंति" इत्यादिपृथूक्तेः । किञ्चार्जुनादिमहाभागवतेषु क्षत्रियबाहुजादिप्रयोगदर्शनाच्च तथा "नैष्ठिकाः सनकादयः,तथा वव्रे,बृहद्व्रतं मां तु" इति नारदोक्तेः । 'कर्मभिर्गृहमेधीयैः' इत्यादियुधिष्ठिराद्युक्तेश्च वर्णाश्रमा भिमानश्रवणादवैष्णवत्वप्रसक्तेश्चिंत्यम् ॥ १२ ॥ सत्तमेति । यथा त्वं सत्समाजमीहसे तथा पृथुरप्यासीदिति भावः । "यज्ञे वेषे सदादाने सत्रमाच्छादने नवे" इति ॥ १३ ॥ तस्मिन्सत्रे, अर्हत्सु पूज्येषु "अर्हतौ जिनसंमान्यौ" इति यादवः । उडुराट् चंद्रः ॥१४॥ सामुद्रिकोक्तमहाराजलक्षणवत्त्वेन पृथुं वर्णयति–प्रांशुरिति । पीनौ पीवरौ । आयतौ लंबौ । द्विजा दन्ताः ॥ १५॥ बृहंतौ श्रोणीनितंबौ यस्य स बृहच्छ्रोणिः अधोग्र मधस्तात्कृताग्रभागं पिप्पलपत्रं यथा तथोदरं यस्य ॥ १६ ॥ मूर्द्धजाः केशाः । कंबुः शंखः ॥ १७ ॥ अत एव न्यस्ताभरणत्वादेव । तैर्भूषणैः । उचितान्यावश्यकानि संध्यावंदनादीनि ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिशिरस्निग्धताराक्षः समैक्षत समंततः ॥ ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव ॥ १९ ॥ चारुचित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम् ॥ सर्वेषामु पकारार्थं तदा अनुवदन्निव ॥२०॥ राजोवाच ॥ सभ्याः शृणुत भद्रं वः साधवो य इहागताः ॥ सत्सु जिज्ञासुभिर्धर्ममावेद्यं स्वमनीषितम् ॥ २१॥ अहं दंडधरो राजा प्रजानामिह योजितः ॥ रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक् ॥ २२ ॥ तस्य मे तदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः ॥ लोकाः स्युः कामसंदोहा यस्य तुष्यति दिष्टदृक् ॥ २३ ॥ य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् ॥ प्रजानां शमलं भुंक्ते भगं च स्वं जहाति सः ॥ २४ ॥तत्प्रजा भर्तृपिंडार्थं स्वार्थमेवानसूयवः ॥ कुरुताधोऽक्षजधियस्तर्हि मेऽनुग्रहः कृतः ॥ २५ ॥

स्वाभाविकी शोभा येन कृतान्युचितानि विहितानि कर्माणि येन ॥ १८ ॥ शिशिरे संतापहरे स्निग्धे च तारे ययोस्ते अक्षिणी यस्य इदं वक्ष्यमाणं वाक्यमुक्तवांश्च ॥ ॥ १९ ॥ चारु श्रोत्रप्रियम् । चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रशस्तम् । मृष्टं शुद्धम् । गढं गंभीरार्थम् । अविक्लवमव्याकुलम् । उत्प्रेक्षते । स्वयमनुभूतमनुवदन्निव ॥ ॥२०॥ भाषणे हेतुः। धर्मे जिज्ञासुभिः पुंभिः सत्सु स्वमनीषितमावेद्यं वक्तव्यम् । अतः प्रजानुशासनमिषेण जिज्ञासैव क्रियते न युष्मान्प्रति धर्मप्रवचनमिति भावः ॥२१॥ इदानीं प्रजाः शिक्षयिष्यन्प्रजाशिक्षणादिकं ममावश्यकमित्याह अहमिति त्रिभिः । पृथक् सेतुषु स्वस्वहितवर्त्मसु स्थापिता स्थापयिता ॥ २२ ॥ दिष्टदृक् प्राक्कर्म साक्षीश्वरो यस्य तुष्यति तस्य वेदवादिनो याँल्लोकानाहुः प्रजारक्षणाद्यनुष्ठानात्ते लोका मे स्युः । कथंभताः । कामानां सम्यक् दोहः प्रपूरणं येषु ॥ २३ ॥ अन्यथा त्वनिष्टं स्यादित्याह । य इति ! शमलं पापम् । भगमैश्वर्यम् ॥ २४ ॥ तत्तस्माद्धे प्रजाः भर्तुर्मम पिण्डार्थं पिंडदानवत्परलोकहितार्थं स्वार्थं स्वकार्मयेव कुरुत स्वधर्ममेवानुतिष्ठत ।

तारे कनीनिके ॥ १९ ॥ चित्राणि सालंकाराणि, प्रशस्तं मधुराक्षरम् । अव्याकुलं झटित्यर्थबोधकम् ॥ २० ॥ साधवो य इति । अन्यैरत्रागतैरपि मे प्रयोजनं नास्तीति भावः । न च नृपत्वादहं युष्मान् किमप्यादिशामि शास्मि वा किं तु किमपि जिज्ञासुरहं युष्माभिरेव शासनीय आदेष्टव्यश्चेत्याह—सत्सु साधुषु भाग्यतः प्राप्तेषु सत्सु धर्मे जिज्ञासुभिः स्वमनीषितं स्वविचारितमावेद्यं ज्ञापयितुमर्हमेव स्वेषु प्रामाण्याभावादिति भावः । स्वामिव्याख्याने अतः स्वमनीषितस्यावेद्यत्वात् । इति भाव इति । मया जिज्ञासयैवोच्यते न तूपदिश्यत इति तात्पर्यम् ॥ २१ ॥ न च त्वं राजाऽस्माकमाराधनीय इति वाच्यं प्रत्युत युष्माकमेव वृत्त्यादिसाधनलक्षणे आराधने परमेश्वरेणाहं प्रवर्त्तित इत्याह—धात्रा परमेश्वरेण नियोजितः कुत्रकुत्र कर्मणीति तत्राह—दंडधर इति । विकर्मरोगोपशमनौषधरूपे दंडधर इत्यर्थः । रक्षितेति । दस्युचौरादिभ्यो रक्षणे । वृत्तिद इति । जीविकाप्रदाने स्वेषु सेतुषु पृथक्पृथक् स्थापियितेति । प्रतिस्ववर्णाश्रमादिधर्ममर्य्यादायाः स्थापने इति । युष्माकं बहुविधपरिचरणभावो मन्मूर्ध्नि न्यस्तो वर्तत इति भावः ॥ २२ ॥ तस्याहं प्रतिमासिकं प्रतिवार्षिकं वेतनमपि प्राप्नोमीत्याह--तस्य मम तत्तत्स्वकर्मानुष्ठानात् यान् लोकान् प्राप्यान्ब्रह्मवादिन आहुस्तेस्युरित्यन्वयः । लोकाः पारत्रिका मदिच्छानुरूपाः । मदभिलषितानां सम्यग्दोहः प्रपूरणं यत्र । यस्य ममेति दिष्टदृक् सर्वधर्मसाक्षी मत्प्रभुः यदुक्तं तेनैव श्रेयः प्रजापालनमेव राज्ञ इत्यादि ॥ २३ ॥ किं च मम सर्वकृत्येषु धर्मप्रवर्त्तनमेव मुख्यं नित्यं चेत्याह । अन्यथा तु—धर्मप्रवर्त नाद्यभावे ॥ २४ ॥ स्वेषा, मेवार्थं कार्यं कर्त्तव्यत्वेन विहितं कुरुत युष्माभिः स्वकृत्य एव कृते सति मम कृतार्थता भविष्यतीति नात्र मदर्थे पृथक् कोपि भावो भवतामिति भावः । स्वार्थमेव वदन्विशिनष्टि—हे अधो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यूयं तदनुमोदध्वं पितृदेवर्षयोऽमलाः ॥ कर्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलम् ॥ २६ ॥ अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः ॥ इहा
मुत्र च लक्ष्यंते ज्योत्स्नावत्यः क्वचिद्भुवः ॥ २७ ॥ मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः ॥ प्रियव्रतस्य राजर्षेरंगस्यास्मात्पितुः पितुः ॥ २८ ॥
ईदृशानामथान्येषामजस्य च भवस्य च ॥ प्रह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता ॥ २९ ॥ दौहित्रादीनृते मृत्योः शोच्यान्धर्मविमो
हितान् ॥ वर्गस्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना ॥ ३० ॥

अधोक्षजे धीर्येषां तादृशाः संतः वासुदेवार्पणदृष्टचेत्यर्थः । अनुग्रहः कृतो भवेदिति शेषः ॥ २५ ॥ शास्तुः शिक्षयितुरनुज्ञातुरनुमोदितुश्च प्रेत्य परलोके यत्फलं तत्तुल्यम् ॥ २६ ॥ कर्म कर्तव्यमित्यनुमोदामहे न तु वासुदेवेऽर्पणीयमिति वेनादिभिस्तदनंगीकारादित्येवंवादिनः शनैः संबोधयन्नाह । हे अर्हसत्तमाः मीमांसकश्रेष्ठाः यज्ञपतिर्नाम परमेश्वरः केषांचिन्मते तावदस्ति तथापि विप्रतिपत्तेर्न तत्सिद्धिरित्याशंक्य जगद्वैचित्र्यान्यथानुपपत्तिं प्रमाणयति । इहामुत्र च ज्योत्स्नावत्यः कांतिमत्यो भुवो भोगभूमयः शरीराणि च ॥ २७ ॥ नन्विदं कर्मवैचित्र्यादेव सेत्स्यति तथापि विद्वदनुभवेनेश्वरसिद्धिरित्याह मनोरिति त्रिभिः । अस्मत्पितामहस्यांगस्य ॥ २८ ॥ कृत्यमस्ति अवश्यं कर्मफलदात्रा भाव्यमिति तेषां मतमित्यर्थः ॥ २९ ॥ मृत्योर्दौहित्रादीन्वेनादीन्विना धर्मे विमोहितान् अतः शोच्यान् । ननु कर्मैव फलं दास्यति विध्युद्देशगता वा देवताः किं परमेश्वरेण तत्राह । वर्गेति । वर्गोऽत्र त्रिवर्गः स्वर्गो धर्मस्य फलमपवर्गो मोक्षस्तेषामैकात्म्येनैकरूप्येण सर्वानुगतेन हेतुना । तत्रापि प्रायेण हेतुना सर्वानुगतत्वं महत्त्वं चेश्वरस्यैव दृष्टम् । अयं भावः । न तावज्जडस्य कर्मणः फलदातृत्वं घटते न चार्वाग्देवतानां स्वातंत्र्यम् । अंतर्यामिश्रुतेः । न च तदा कर्मसाम्ये फलतारतम्यं क्वचित्तद

क्षजधिय इति "मय्येव मन आधत्स्व मयि बुद्धिं निवेशय" इति श्रीगीतोक्तेर्भगवंतं भजतेत्यर्थः । स्वामिचरणैस्तु संबुद्धिर्नांगीकृता तत्रेत्यर्थ इति । 'धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र' इति ब्रह्मोक्तेर्भवत्कृतधर्मस्य वासुदेवेर्पणात्तद्बुद्ध्या ममाप्यधिकलाभो भवेदिति भावः ॥ २९ ॥ कार्यं खलु सर्वानुमोदनेन सिध्यतीत्यत आह—यूयमिति ॥ २६ ॥ तदनंगीकाराद्वासुदेवानंगीकारात् । हे अर्हसत्तमा इति । विपरीतलक्षणया यद्वाऽर्हान्सादयंति पूज्यान्भगवदनंगीकारेण दुःसहोक्त्या पीडयंतीत्यर्हसदोऽतिशयेन तेऽर्हसत्तमा इति । केषांचिच्छुत्यर्थतत्त्वविदास्तिकानां तार्किकादीनां, तथापि सत्यपीश्वरे, विप्रतिपत्तोर्विवादात्, तत्सिद्धिरीश्वरसिद्धिः । विप्रतिपत्तिश्चेश्वरसत्त्वे मानं नास्तीत्येवंरूपा जगद्वैचित्र्यान्यथानुपपत्तिरीश्वरानंगीकारे एतज्जगति मनुष्याणां द्विपदत्वादिपशूनां चतुष्पदत्वादिपक्षिणां हंसशुकमयूरादीनां श्वेतहारितचित्रितगरुत्वादिवृक्षाणामनेकविधफलपुष्पपत्रादि पर्वत सागरादि किञ्च नृषु मौढ्यपांडित्यसुखित्वदुःखित्वधनिकत्वदरिद्रत्वसुरूपकुरूपादि च न केनापि सुमेधसापीश्वरं विना कर्तुं शक्यतेऽत एतद्वैचित्र्यसंपादक ईश्वरोऽवश्यमंगीकर्त्तव्य एवेत्याह—इह प्रत्यक्षेणअमुत्र शास्त्रेण च ॥ २७ ॥ अत्राक्षिपति—नन्विति । यद्यपीदं जगद्वैचित्र्यं तथापि कर्मवैचित्र्येण जगद्वैचित्र्ये सिद्धेपि विदुषां सर्वज्ञानामाप्तानां मन्वादीनामनुभवेनेत्यर्थः ॥ २८ ॥ ईदृशानामथाग्रे भविष्यतामंबरीषादीनां प्रह्लादबली तु शास्त्राज्ज्ञात्वेव गणितौ गदाभृता गदाधारणान्मधुरमनोहररूपवतेत्यर्थः । कृत्यञ्च तेषां निरंतरं साक्षाच्चरणपरिचरणमेव ज्ञेयम् । इत्यर्थ इति । अन्यथा तेषां तद्भजनादौ प्रवृत्तिर्न संगच्छत इति । भावः ॥२९॥ तदन्यांस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्पादसेवाऽभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः ॥ सद्यः क्षिणोत्यन्वहमेधती सती यथा पदांगुष्ठविनिःसृता सरित् ॥ ३१ ॥ विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्यवान् ॥ यदंघ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते ॥ ३२ ॥ तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः ॥ अमायिनः कामदुघांघ्रिपंकजं यथाऽधिकारावसितार्थसिद्धयः ॥ ३३ ॥ असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियोक्तिभिः ॥ संपद्यतेऽर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ॥ ३४ ॥

सिद्धिश्च संभवति अतः स्वातंत्र्येण कर्तुमकर्तुमन्यथाकर्तुं समर्थेन परमेश्वरेण भाव्यमिति ॥ ३० ॥ किं च । जीवानां मोक्षदः परमेश्वर एव नार्वाग्देवतास्तासामपि जीवत्वाविशेषादित्याशयेनाह त्रिभिः । यस्य पादयोः सेवायामभिरुचिस्तपस्विनां संसारतप्तानामशेषैर्जन्मभिः समृद्धं धियो मलं सद्यः क्षपयति तमेव भजतेति तृतीयेनान्वयः । कथंभूताभिरुचिः । अहन्यहनि वर्धमाना सती सात्त्विकी तत्पादसंबंधस्यैवैष महिमेति दृष्टांतेनाह । यथेति ॥ ३१ ॥ न विनिर्धुता अशेषा मनोमला यस्य असंगो वैराग्यं तेन विज्ञानस्य विशेषः साक्षात्कारस्तदेव वीर्यं यस्य । यस्यांघ्रिमूले कृताश्रयः सन् ॥ ३२ ॥ आत्मवृत्तिभिरध्यापनादिभिः मनोवचःकायानां गुणैर्ध्यानस्तुतिसपर्याभिः अमायिनो निष्कपटाः संतः । ननु ब्रह्मादिभिः सेव्ये किमस्मद्भक्त्या भविष्यति तत्राह । यथाधिकारमेवावसिता निश्चिता समाप्ता वार्थसिद्धिर्येषाम् ॥ ३३ ॥ स्वकर्मभिर्यागादि

निंद्यत्वेनाह-धर्मे वेदविहिते नित्यनैमित्तिकादौ विमोहितान्विचित्तान् । मृत्यो रित्यनेन तेऽद्य यद्यत्र मन्मते विप्रतिपत्स्यंते तर्हि मृत्योस्तन्मातामहस्य पुरीमेव प्रस्थापयिष्यामीति द्योतितम् । आदिनेंद्रगृहीतविसृष्टपाखंडानुग्रहः । अत्राक्षिप्य समाधत्ते—नन्विति । विधौ स्वर्गकाम इंद्रं यजेदित्येवंरूपे वाक्ये उद्दिष्टा देवता चेंद्रोस्तीत्यतः स एव फलं दास्यतीत्यभिप्रेत्याह-विध्युद्देशेति । यद्वा—एकोऽसहायश्चासावात्मा स्वरूपं चेत्येकात्मा स्वार्थे ष्यञ् ऐकात्म्यं तेन वर्गादीनामैकात्म्येनान्यनिरपेक्षेण स्वस्वरूपेणैव हेतुनेत्यर्थः । तथा च वर्गस्वर्गापवर्गकामैरपि गदाभृदर्चनीय इति तेषां सकामानां निष्कामानां च गदाभृता कृत्यमस्तीत्यायातम् । अत्र प्रमाणम् ''अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम्'' इति ''यत्कर्मभिर्यत्तपसा'' इत्यादौ ''सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा'' इत्यादिकञ्च । अत्र प्रायेणेत्यनेन क्वचित्कर्मज्ञानादिसापेक्षस्वस्वरूपेणेति । कर्मज्ञानादिमिश्रयापि भक्त्या भक्तिमिश्रैरपि कर्मज्ञानादिभिर्वर्गादिसिद्धिर्न तु भक्त्या विनेति निर्गलितार्थः । स्वामिचरणैरपि प्रायेणेत्यस्य मुख्येन हेतुनेत्यर्थोभिप्रेतः । अत्राशयमाह—अयं भाव इति । अर्वाग्देवतानामीश्वरेतरदेवानाम् । अंतर्यामिश्रुतेः—''यः पृथिवीमंतरायमयति पृथिवीयं न वेद'' इत्यादिश्रुतारित्यर्थः । तदेश्वरस्वीकृतौ तु कर्मानुरूपमेव फलं कर्तुर्भविष्यति तथा क्वचिदपि कर्मणि फलाभावश्च न भविष्यति अन्यथा तदुभयं स्यादेव फलदातुरभावादित्यर्थः । यत इत्थमतो हेतोः ॥ ३० ॥ उक्तमेवार्थं क्रमेण विवृण्वन्भगवतः केवलयैव भक्त्या यथा कृतार्थी भवति न तु तथा तपोज्ञानादिभिः किमुत कर्मभिरित्याशयेनाह—किंचेति । यद्वा—तपस्विनां तपोभिरपि वृद्धैर्मालिन्यमपाकर्तुमशक्नुवतामित्यर्थः । सद्य इति । यदैव महत्सेवया पादसेवाहरुचिर्भवेत्तदैवेत्यर्थः । अपरं समानम् ॥ ३१ ॥ विनिर्धुता निरस्ताः ॥ ३२ ॥ ननु गार्हस्थ्यकर्मनिमग्ना वयं कथं केवलया भक्त्या भजामस्तत्र कर्ममिश्रां भक्तिमुपदिशन्नाह—तमिति । अध्यापनादिभिरादिना रक्षणकृष्यादिसेवादीनां ग्रहः । अत्राक्षिपति—नन्विति । यथाधिकारं ब्राह्मणादिवर्णधर्ममनतिक्रम्यैव । यद्वा येषांयेषां येषुयेषु शिल्पेष्वधिकारस्तैरेव भगवदर्थंकृतैस्तैस्तैः तैलिकतांबूलिकपर्यंता अपि कृतार्था भवंतीत्यर्थः । यद्वात्मनः स्वस्यैव वृत्तिः सत्ता येषु तैः स्वकर्मभिर्वर्णाश्रमधर्मैरपि सहिताः संतो भजतेति भक्तेः प्राधान्यमभिहितम् ॥ ३३ ॥ कर्मस्वरूपतोऽशुद्धं जडं राजसमपि भगवदर्पितं सत् तद्रूपगुणीभूतभक्त्यंशेन विशुद्धं सत्त्वं चैतन्यमेव भवति फलत इति भक्तिमिश्रं कर्मोपदिशति द्वाभ्याम्—असाविति । तर्ज्जन्या प्रस्तुतमध्वरं दर्शयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रतिपद्य चेतनाम् ॥ क्रियाफलत्वेन विभुर्विभाव्यते यथाऽनलो दारुषु तद्गुणात्मकः ॥ ३९ ॥
अहो ममामी वितरंत्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरम् ॥ स्वधर्मयोगेन यजंति मामका निरंतरं क्षोणितले दृढव्रताः ॥ ३६ ॥

भिर्भजतेत्युक्तं तत्र ब्रह्मार्पणं ब्रह्महविः इति न्यायेन सर्वेषु यागतदंगतत्फलेषु भगवद्दृष्ट्या कर्म कर्तव्यं न भिन्नदृष्ट्येति वक्तुं तेषां भगवद्रूपतामाह द्वाभ्याम् । असौ भगवानेव स्वरूपतो विशुद्धविज्ञानघनोऽप्यगुणो निर्विशेषणोऽपि सन्निह कर्ममार्गेऽनेकगुणो नानाविशेषणवान् अध्वरो यज्ञः संपद्यते । "यज्ञो वै विष्णुः" इति श्रुतेः । अनेकगुणत्वमेवाह । पृथग्विधानि यानि द्रव्यादीनि तैः । तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अवघातादयः उक्तयो मंत्राः अर्थोंगसाध्य उपकारः आशयः संकल्पः लिंगं पदार्थानां शक्तिः नाम ज्योतिष्टोमादि तैश्चाध्वरः संपद्यते ॥ ३४ ॥ यागतदंगानां भगवद्रूपत्वमुक्त्वा यागफलस्यापि भगवद्रूपतामाह । प्रधानेति । एष विभुः परमानंदोऽपि शरीरे चेतनां विषयाकारां बुद्धिं प्रतिपद्य तदभिव्यंग्यानंदरूपः सत्क्रियाफलत्वेन प्रतीयते । "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति" इति श्रुतेः । यथानलो दारुषु स्थितस्तद्गुणात्मको दारुधर्मदैर्घ्यवक्रत्वादिमांस्तद्वत् । कथंभूते शरीरे । प्रधानमव्यक्तम् । कालस्तत्क्षोभकः आशयो वासना धर्मोऽदृष्टं तैः संगृह्यते जन्यत इति तथा तस्मिन् ॥ ३५ ॥ तदेवमप्रवृत्तान्भगवद्भजने प्रवर्त्य स्वतः प्रवृत्तानां प्रवृत्तिमभिनंदनेन द्रढयति । अहो इति । वितरंति कुर्वंति गुरुं गुरुत्वेन स्वाहितकर्मफलदातृत्वेन च पूज्य

असावद्ध्वरोऽनेकगुणो नानाविशेषवान् । राजसोपि भगवदर्पणरूपभक्तिमाहात्म्यात्तत्फलदशायामगुणो गुणातीतो भवन् स्वरूपतो विशुद्धविज्ञानघनः ब्रह्मानंदस्वरूपत्वेन संपद्यते कर्मणोऽस्य मोक्षफलकत्वादिति भावः । तेन साक्षात्तदीयश्रवणकीर्त्तनादिस्तु प्रथमत एव विशुद्धविज्ञानघनः स तु सर्वतोपि श्रेष्ठ इति द्योतितमिति चक्रवर्त्ती ! तत्र द्रव्यादिष्वष्टसु पदार्थानां मत्सरादिपदार्थानां यथा 'गोभिः श्रिणीत मत्सरम्' इत्यत्र गोपदस्यक्षीरे शक्तिः मत्सरपदस्य सोमे शक्तिस्तज्ज्ञानं विना कथं दुग्धेन सोममिश्रणं कुर्यादित्यर्थलाभो भवेदतः पदार्थशक्तिरपि यज्ञहेतुरिति । तीर्थस्तु—"आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिश्रुतिप्रसिद्धो योसौ नारायण एकः स एवानेकगुणोऽध्वरः संपद्यते द्रव्यं पुरोडाशादिकल्पोक्तगुणविशिष्टं 'द्रव्यं गुणानामाधारः' इति यादवः । गुणो विशिष्टमातापितृजन्यत्वादिः । क्रिया ऋत्विगादिव्यापारा इंद्रायाग्नय इत्याद्या उक्तयस्ताभिः अर्थेषु यजमानेष्वाशयोंतःकरणं येषां, लिंगानि वज्रधरत्वादीनि नामानींद्रादीनि तैः यद्वाऽर्थाशयत्वं मुक्ताश्रयत्वं लिंगं चक्रधरत्वादि नाम नारायणादि तैः संपद्यते प्राप्यते 'विशुद्धविज्ञानघनः स्वरूपतः' इत्येवं ज्ञानेन प्राप्यते इत्यर्थः । अनेन कर्मणा शुद्धांतःकरणानां जातं ज्ञानं संसारनिवर्तकमित्युक्तं "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इत्युक्तेः॥३४॥अत्र विश्वनाथः—भगवदर्पितस्य कर्मणस्तन्मिश्रभक्तेश्च फलं भगवत्प्राप्तिरेवेत्याह—चेतनां स्वार्पितकर्मरूपेण बुद्धिं प्रतिपद्य अंतर्भावितण्यर्थत्वान्निष्पाद्येत्यर्थः । कृपया कर्मफलत्वेन विभुस्स्वयमेव भगवान् विभाव्यते प्रकाशते कर्मकर्त्तरि प्रयोगः । "यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्" इति वचनात्तदर्पितकर्म्मा भक्तिमिश्रज्ञानद्वारा तमेव प्राप्नोतीत्यर्थः । किञ्च—कर्मार्पणश्रद्धाभक्तितारतम्येन ज्ञानतारतम्येन च भक्तिप्राप्तितारतम्यं भवेदित्याह यथा चंदनागुरुधवखदिरादिस्थितोग्निस्तत्तद्गुणानुरूपो भवेत्तथैव भगवानप्युपासकस्योपासनातारम्येन फलप्रदो भवेत् । भक्तिमिश्रकर्मवते निष्कामाय मोक्षं कर्ममिश्रभक्तिमते शांतरतिं च एवं भक्तितारतम्यवते सालोक्यादिकं च ददातीति भक्तेर्गुणभावप्राधान्यादिकं दर्शितम् ॥ ॥ ३९ ॥ अहो इति । सम्यानुन्मुखी करोति । मम मह्यम् । अमी मामका मदीया अनुग्रहम् अमी के ये हरिं स्वस्य जीवस्य धर्मो भक्तिरेव स्वधर्मः "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुंडरीकाक्षं स्तवै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा जातु तेजः प्रभवेन्महद्भिर्भिस्तितिक्षया तपसा विद्यया च ॥ देदीप्यमानेऽजितदेवतानां कुले स्वयं राजकुलाद्द्विजानाम् ॥ ३७ ॥ ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् ॥ अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥ ३८ ॥ यत्सेवयाऽशेषगुहाशयः स्वराड् विप्रप्रियस्तुष्यति काममीश्वरः ॥ तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यताम् ॥ ३९ ॥ पुमाह्लँभेतानातिवेलमात्मनः प्रसीदतोऽत्यंतशमं स्वतः स्वयम् ॥ यन्नित्यसम्बंधानिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजाम् ॥ ४० ॥

हरिरूपमिष्टदैवतं स्वधर्मयोगेन भक्तियोगेन यजंति पूजयंति ॥ ३६ ॥ इदानीं हरिभक्तिदार्ढ्याय ब्राह्मणभक्तिं विधत्ते मा जात्वित्यष्टभिः । महत्यश्च ता ऋद्धयश्च ताभिर्यद्राजकुलस्य तेजस्तत्तस्मात्सकाशाद्द्विजानां कुलेऽजितो विष्णुः देवता येषां वैष्णवानां तेषां च कुले मा जातु प्रभवेत्कदाचिदपि प्रभावं न करोतु । कथंभूते । समृद्धिभिर्विनापि स्वयमेव तितिक्षाभिर्देदीप्यमाने ॥ ३७ ॥ ब्राह्मणान्स्तुवन्नाह । यच्चरणाभिवंदनाद्धरिर्लक्ष्मीं यशश्चावाप यत्सेवया चेश्वरस्तुष्यति तदेव ब्रह्मकुलं निषेव्यतामिति द्वयोरन्वयः ॥ ३८ ॥ तस्य हरेर्लोकसंग्रहरूपो यो धर्मस्तत्परैः ॥ ३९ ॥ ननु ब्रह्मकुल एव नित्यं सेव्यमाने सर्वदेवतामुखभूतेऽग्नौ यज्ञाद्यनुष्ठानं न स्यान्न च तेन

रर्चेश्वरः सदा'' इत्युक्तेः । तेन भक्तियोगेन यजंति त इत्यर्थः । यद्वा-ये यजंति ते मामकाः । यद्वा-हे मामका इति संबुद्धिः । यद्वामी इति ब्राह्मणपरामर्शनायोक्तमनुग्रहे विप्राणामेव समर्थत्वात् । ''तस्यैवानुग्रहेणान्ये भुंजते क्षत्रियादयः'' इति वक्ष्यमाणसंगतिलाभाय तत्समर्थकं धृतव्रता इति । सत्रादिदीक्षितानामन्यव्यापारराहित्यबोधनाय च ॥ ३६ ॥ ऋद्धयः सेनासंपदादिलक्षणाः अत्र टीकावतरणिकायां केवलब्राह्मणपदोपादानात् अजितः श्रीनारायणो देवता येषां तेषां द्विजानां विप्राणां कुले ''विप्राणां देवदेवानां भगवानात्मदैवतम्'' इत्युक्तेश्चकारस्य पुनरर्थकस्यानुपादानाच्चेदं व्याख्यानं शोभनं प्रतिभाति । यद्वाऽजितस्यः भक्तगुणेतरापराजितस्य श्रीविष्णोर्देवता ब्राह्मणास्तेषां कुले ''सत्त्वं यस्य प्रिया मूर्तिर्ब्राह्मणास्त्विष्टदेवताः'' इति भार्गवीयत्रिदेवीपरीक्षाध्याये श्रीदशमोत्तरार्द्धोक्तेस्तथा 'ब्रह्म दैवं परं हि मे' इति वैकुंठोपाख्याने तृतीये स्वयं सनकादीन्प्रति श्रीमुखोक्तेश्च तीर्थेनापीत्थमेव व्याख्यातम् । क्वचित्पुस्तकांतरे स्वामिचरणैर्यत्कुल इत्युभयत्र योजितं दृश्यते तदन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रत इत्युक्ताभिप्रायेण ध्येयम् ॥ ३७ ॥ न केवलं ब्रह्मकुलं नाभिभवनीयं किं तु तत्र भक्तिरपि कार्येत्याह-ब्रह्मण्यदेवः ब्राह्मणप्रियो देवः येषां विप्राणां चरणाभिवंदनात् । तीर्थेण त्वत्र हरिरिंद्रो यस्य श्रीनारायणस्य चरणाभिवंदनात् लक्ष्मीं त्रैलोक्यश्रियं ''यया गुप्तः सहस्राक्षस्त्रैलोक्या बुभुजे श्रियम्'' इत्युक्तेः । जगति पवित्रं शोभनं यशश्चावाप स पुरातनः पुरुषोपि ब्रह्मण्यदेवो ब्राह्मणभक्तिनिष्ठो देव इत्थं व्याख्यातम् ॥ ३८ ॥ ३९ ॥ अत्राक्षिपति-नन्विति । तेन यज्ञाद्यनुष्ठानेन । तया चित्तशुद्ध्या । इत्यर्थ इति । 'सर्वे पदा हस्तिपदे निमग्नाः' इति न्यायेन । ''यज्ञो दानं तपश्चैव तीर्थानि नियमा यमाः । एतत्सर्वं कृतं तेन विप्रो येनात्र सेवितः ॥'' इति स्कांदोक्तेर्विप्रसेवनेन सर्वं सुकृतं कृतं स्यादिति भावः । असौ हरिरेवंभूतः सर्वदेवमयश्चैतन्यमूर्त्तिरनंतः । कुत इति । इत्यर्थ इति । ''एष वै सर्वे देवाः, सत्यं ज्ञानमनंतं ब्रह्म विज्ञानघनः'' इत्यादिभिश्श्रुतिवचनैरुक्त इति भावः । पूर्वस्मिन्समासे वेदे प्रसक्तिवारणायाह । यद्वेति । इत्यर्थ इति । ''ज्ञानमनंतं ब्रह्म, यतो वाचो

॥ ६७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्नात्यनन्तः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः ॥ न वै तथा चेतनया बहिष्कृते हुताशने पारमहंस्यपर्यगुः ॥ ४१ ॥
यद् ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः ॥ समाधिना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ॥ ४२ ॥ तेषामहं
पादसरोजरेणुमार्या वहेयाधिकिरीटमायुः ॥ यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजंति ॥ ४३ ॥

विना चित्तशुद्धिर्न च तया विना मोक्षः स्यादित्याशंक्याह पुमानिति द्वाभ्याम् । यस्य ब्रह्मकुलस्य नित्यं संबंधेन निषेवया पुमान्स्वयमेव ज्ञानाभ्यासादिकं विनाप्यत्युत्तमं शमं मोक्षं लभेत । कुतः । यत्सेवया स्वत एवानतिवेलं शीघ्रं प्रसीदतः शुद्ध्यत आत्मनश्चित्तात् ततः परं श्रेष्ठं हविर्भुजां देवानां किं मुखमस्ति ब्राह्मणसेवयैव यज्ञादिफलं ज्ञानफलं च तत्सर्वं भवतीत्यर्थः ।। ४० ॥ हरेरपि तदेव परं मुखमित्याह । अश्नातीति । इज्यानां पूज्यानामिंद्रादीनां नामभिर्यस्य ब्रह्मकुलस्य मुखे श्रद्धया हुतं हविरनंतो यथाऽश्नाति तथा चेतनया रहिते हुताशने हुतं नाश्नाति । कैर्हुतमश्नाति । तत्त्वकोविदैः सर्वदेवमयश्चैतन्यमूर्तिरनंत इति तत्त्वं विद्वद्भिः । कुत एवंभूतोऽसौ तत्राह । पारमहंस्यं ज्ञानं तत्परानर्हत्यधिकुर्वतीति पारमहंस्यपर्यास्ता गावो वाचो यस्मिन् उपनिषद्भिर्ज्ञानघनत्वेनोक्त इत्यर्थः । यद्वा परमहंसानां ज्ञाननिष्ठानां गम्यः पारमहंस्यः परितो न गच्छंति गावो वाचो यस्मात्स पर्यगुरिंद्रियनियंता स चासौ स च पारमहंस्यपर्यगुर्ज्ञानरूपः सर्वांतर्यामीत्यर्थः ॥ ४१ ॥ न केवलं चेतनत्वेन हुताशनाद्विशेषः किं तु वेदज्ञानादपी त्याह । यदित्यव्ययम् । ये ब्रह्म वेदं नित्यं बिभ्रति तेषामित्युत्तरेणान्वयः । मंगलं नाम । "प्रशस्ताचरणं नित्यमप्रशस्तस्य वर्जनम् । एतद्धि मंगलं प्रोक्तमृषिभिस्तत्त्व दर्शिभिः" ॥ मौनमध्ययनविरोधिवार्तात्यागः संयमो दमः तैः समाधिना चित्तस्थैर्येण च किमर्थम् । अर्थदृष्टये अध्ययनस्यार्थज्ञानपर्यवसायित्वात् वेदार्थमपि विचारयंतीत्यर्थः । यत्र वेदे इदं विश्वमवभासते । यथा आदर्शे मुखम् । ह स्फुटम् ॥ ४२ ॥ हे आर्या आ आयुर्यावज्जीवमधिकिरीटं मुकुटस्योपरि वहेयेति प्रार्थनायां

निवर्त्तंते" इत्यादिश्रुतेः"यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति । तस्याहं सुलभः पार्थ" इति स्मृतेश्चेति भावः ॥ ४० ॥ ४१ ॥ श्रद्धा आस्तिक्यं, तपः 'स्वधर्माचरणं तपः' इत्युक्तेर्नित्यनैमित्तिककर्मनिष्ठत्वं, संयम इंद्रियनिग्रहः । इत्यर्थ इति । पूर्वोक्तसाधनैश्चित्तस्थैर्यं तेन वेदार्थविचार इति खिन्ने चित्ते कुतो बोध इत्याशयः । अत्र मंगललक्षणवाक्येनाचार उक्तः "आचारहीनं न पुनंति वेदाः" इत्युक्तेः । अत्र ब्रह्मपदेन वेदः परमात्मा चोक्तः । "यावद्ब्रह्मविष्टितं तावती वाक्" इति श्रुतेर्द्वयोर्लक्षणसाम्यात् । यद्वा—यत्र ब्रह्मकुले इदमुक्तं ब्रह्मद्वयं दर्पणे मुखमिवाभाति "दर्पणे मुकुरादर्शौ" इति कोशात् ॥ ४२ ॥ एवं ब्रह्मकुलमभिष्ट्यात्मक्रियोपदेशतस्तत्सेवा यावदायुः कर्त्तव्येति विधत्ते हे आर्या इत्यनेन ब्राह्मणसेवयैवार्यत्वमन्यथा तन्नश्यति म्लेच्छादिदेशे तदभावादेवानार्यत्वमत एवैतद्देशस्यार्यावर्त्तमिति संज्ञापीति भावः । मुकुटस्योपरीत्यस्य शिरस्युष्णीषं तदुपरि मुकुटं तदुपरि विप्रपादरजस्तदुपरि न किञ्चित्कर्त्तव्यं तस्य सर्वोत्कृष्टत्वात् । "विपद्घनध्वांतसहस्रभानवः समीहितार्थार्पणकामधेनवः । अपारसंसारसमुद्रसेतवः पुनंतु मां ब्राह्मणपादरेणवः" इति पुराणांतरे तदुक्तेः । आशु झटिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणतेऽनुसंपदः ॥ प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ॥ ४४ ॥ मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः ॥ तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ॥ ४५ ॥ पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ॥ ब्रह्मदण्डहतः पापो यद्वेनोऽत्यतरत्तमः ॥ ४६ ॥ हिरण्यकशिपुश्चापि भगवन्निंदया तमः ॥ विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ॥ ४७ ॥ वीरवर्य पितः पृथ्व्याः समाः संजीव शाश्वतीः ॥ यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ॥ ४८ ॥ अहो वयं ह्यद्य पवित्रकीर्ते त्वयैव नाथेन मुकुंदनाथाः ॥ य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ॥ ४९ ॥

लिङ् । यं रेणुम् ॥ ४३ ॥ गुणभजनस्य फलमाह । गुणायनमन्वनु संपदः संवृणते सम्यग्भजंति तस्मात्प्रसीदतां प्रसीदतु गवां च कुलम् ॥४४॥४५॥ साधुवादमाह । पुत्रेणेति षड्भिः ॥ यद्यतो वेनोऽपि तमो नरकमत्यतरदतितताार ॥ ४६ ॥ ४७ ॥ ४८ ॥ मुकुंदनाथाः स्म त्वन्नाथत्वमेव मुकुंदनाथत्वे पर्यवसितमित्यर्थः । तत्र हेतुर्य

पापं नश्यति 'विप्रपादरजो राजन्हंति दारुणदुष्कृतम्' इति भीष्मोक्तेः । अमुं विप्रपादरजोधारिणं सर्वसौभगत्वसम्पत्तिमत्त्वादयो भजंति सेवंते ॥ ४३ ॥ शीलधनं सुचरितं वृद्धान्धर्मज्ञान् ''न ते वृद्धा ये न वदंति धर्मान्'' इत्युक्तेः । यद्वा कृतं विहितं जानातीति कृतज्ञस्तं विमृश्यकारिणमित्यर्थः । ''कृतं युगेऽलमर्थे स्याद्विहिते हिंसिते त्रिषु'' इति मेदिनी । तदुक्तं भारविणा ''सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृण ते हि विमृश्य कारिणं गुणलुब्धाः स्वयमेव संपदः ॥'' इति किरातार्जुनीये । ब्रह्मकुलसेवा गोकुलसेवा ब्रह्मादिपरिवृतजनार्दनसेवा च मुमुक्षूणां यथाशास्त्रमवश्यं कर्त्तव्येत्याह–प्रसीदतामिति । ''ब्रह्मा रुद्रो महेंद्राद्या देवाः सर्वे जनार्दनम् । अनुगच्छंति वै यस्मात्तस्मात्तस्यानुगा हि ते'' इत्यादिपुराणात् । यद्वाऽनुचरा भक्ताः ॥४४॥ साधुवादेन निर्दोषवाक्येन ॥ ४५ ॥ पुत्रेण सत्पुत्रेण ''सोयं मनुष्यलोकः पुत्रेण जय्यः'' इति श्रुतेरत्र मनुष्य लोक इत्युपलक्षणं स्वर्गादेरपि अत एव श्रीवेदव्यासाचार्येण लोकानित्युक्तं मूले । तमः श्रीपृथुजन्मनः पूर्वं कतिचिद्दिनानि प्राप्तं नरकम् । यद्वा–ब्रह्मदंडहतत्वादवश्यं भावि नरकम् । 'मा क्रुद्धाद्ब्राह्मणात्प्रभो' इति स्वपुत्रमृत्यु मुद्दिश्य कश्यपं प्रति दित्युक्तेः । ''शाश्वतपुत्रेण पितरोत्यायन्बहुलं तमः'' इति श्रुतेः । शाश्वतपुत्रेण मंगलपुत्रेण ''शाश्वत्स्यादात्मप्रश्ने च मंगले पुराकल्पे सदार्थे च'' इति मेदिन्युक्तेः । मंगलं शुभं तेन सत्पुत्रेणेत्यायातं न तु पुत्र मात्रेण 'कुपुत्रो नाशयेत्कुलम्' इत्युक्तिविरोधात् ॥ ४६ ॥ अत्र प्रमाणांतरमाह अनुभावतः श्रीनृसिंहादिप्रादुर्भावकारणाद्भक्तिलक्षणात्प्रभावादित्यर्थः ॥ ४७ ॥ विशेषेणेरयति कंपयति पाखंडिजनान् शत्रुसैन्यं वेति वीर आस्तिकः शूरश्च तेषु वर्य श्रेष्ठेति सन्मार्गोपदेष्टृत्वाद्दस्युनाशकत्वाच्चास्माकमैहिकपारात्रिकसुखकर्त्ता त्वं चिरंजीवेति भावः । 'वीरभोग्या वसुंधरा' इत्यभिजनोक्तेः । पृथिवीपतित्वमागतं वीरवर्येत्यामंत्रणेन। ततश्च 'दुहितृत्वे चकारे माम्' इति पूर्वोक्तिव्याकोपवारणाय पुनरामंत्रयंति हे पृथ्व्याः पितरिति पातृत्वात्पितैव पृथ्वीपदमप्यत्र पृथिवीस्थपरं 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायेन यस्य तव सर्वलोकानामेकभर्त्तरि मुख्यपालके ''एके मुख्यान्यकेवलाः'' इत्य मरः । ईदृशी अलौकिकी ॥४८॥ हे पवित्रकीर्त्ते भगवद्भक्तमुख्यत्वाल्लोकपावनकीर्तिमांस्त्वमसीत्यभिप्रायः । ''मद्भक्तियुक्तो भुवनं पुनाति'' इत्येकादशे वक्ष्यमाणत्वात् । अहो भाग्यम् । इत्यर्थ इति । तवापि मुकुंदावतारत्वेन सागरतरंगन्यायेन मुकुंदाभिन्नत्वान्मुकुंदत्वमेव मुकुंदभक्तिविधायकत्वाद्वा तथात्वमिति भावः । 'हरिभक्त्युपदेष्टॄणां हरिणा साम्यमिष्यते' इत्युक्तं भक्तितरंगिण्यादौ । यद्वा 'पवित्राणां पवित्रं यः' इत्युक्तेः पवित्रस्य हरेः कीर्त्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात्यद्भुतमिदं नाथ तवाऽऽजीव्यानुशासनम् ॥ प्रजानुरागो महतां प्रकृतिः करुणात्मनाम् ॥५०॥ अद्य नस्तमसः पारस्त्वयोपासादितः प्रभो ॥ भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥५१॥ नमो विवृद्धसत्त्वाय पुरुषाय महीयसे ॥ यो ब्रह्मक्षत्रमाविश्य बिभर्तीदं स्वतेजसा ॥ ५२ ॥ इति श्रीभा० म० चतु० पृथुचरिते एकविंशोऽध्यायः ॥ २१ ॥ मैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमम् ॥ तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः ॥ १ ॥ तांस्तु सिद्धेश्वरान्राजा व्योम्नोऽवतरतोऽर्चिषा ॥ लोकानपापान्कुर्वत्या सानुगोऽचष्ट लक्षितान् ॥ २ ॥ तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थितः ॥ स सदस्यानुगो वैन्य इंद्रियेशो गुणानिव ॥ ३ ॥

इति ॥४९॥ आजीविनाम् सेवकानाम् आ सम्यगनुशासनम् । प्रजास्वनुरागः प्रकृतिः स्वभावः ॥५०॥ उपासादितः प्रापितः कर्मभिर्भ्राम्यताम् ॥५१ ॥ ईश्वरदृष्ट्या विप्रादयोऽपि प्रणमंति । नम इति । ब्रह्माविश्य ब्राह्मणजातिमधिष्ठाय क्षत्रं क्षत्रियं बिभर्ति क्षत्रं चाविश्य ब्रह्म बिभर्ति तदुभयं चाविश्येदं विश्वं बिभर्ति ॥ ५२ ॥ इति श्रीमद्भागवते म० चतुर्थस्कंधे टीकायामेकविंशोऽध्यायः ॥ २१ ॥ ॥छ॥ द्वाविंशे तु परं ज्ञानं पृथवे हरिशासनात् ॥ सनत्कुमारो भगवानुपादिशदितीर्यते ॥ १ ॥ मुनयः सनकादयः ॥ १ ॥ अर्चिषा लक्षिताः सनकादय इति ज्ञापितान् । अचष्टापश्यत् ॥ २ ॥ तेषां दर्शनेनोद्गतान्प्राणानुमिच्छुरिव । अयं भावः । "ऊर्ध्वं प्राणा ह्युत्क्रा

कीर्त्तिर्यस्य तत्संबुद्धौ । तथा हरिभक्तस्य तव संगाद्वयमपि हरिभक्ता जाता इति भावः ॥ ४९ ॥ नाथेति । स्वामिनामयमेव मुख्यो धर्म इत्याह महतां लक्षणमाह—करुणात्मनि येषां तेषाम् ॥ ५० ॥ 'तमोज्ञानमिहोच्यते' इत्युक्तेस्तमसोज्ञानस्य तत्कार्यीभूतसंसारस्य पारः "परमात्मा तमसः परस्तात्" इति श्रुतेः । नष्टदृष्टीनां नष्टज्ञानानाम् । प्रभो इति । प्रभुत्वादेव त्वया संसारो दर्शितस्तवेतरस्यात्र सामर्थ्यं नास्तीति भावः ॥ ५१ ॥ यो ब्रह्म ब्राह्मणजातिं क्षत्रं क्षत्रियजातिमाविश्य धृत्वेदं विश्वं पाति तस्मा इति योजना अत्र ब्रह्मक्षत्रशब्दौ भावनिर्देशपरौ तेन ब्राह्मणत्वं क्षत्रियत्वं च प्राप्य तत्कुलेऽवतीर्येत्यर्थः । एवं चेत्कथं नंदगृहे भगवदवतारस्तस्य 'वैश्यवृत्तिश्चतुर्द्धेयम्' 'वयं गोवृत्तयोऽनिशम्' इति श्रीनंदराजं श्रीकृष्णचंद्रोक्तेर्वैश्यत्वात् इत्युक्तावुद्धारमाह न हि नंदगृहे भगवदवतारो जातः किं तु वसुदेवगृहेऽवतीर्य तद्द्वारा कंसच्छलनाय भगवानागत इति श्रीदशमे स्फुटतरं वक्ष्यति एवं चेत्तर्हि कथं परमाप्तशिरोमणिना योगींद्रेण "नंदस्यात्मज उत्पन्ने जातानन्दो महामनाः" इति मृषोक्तं न हि परमापद्गतोपि योगी मृषा वदति कुतो योगीन्द्रस्तत्रापि श्रीबादरायणिः यदि श्रीनंदगृहे भगवदवतारो नाभूत्तदा 'नन्दस्त्वात्मज आयात' इत्थमेव किं नावादीद्यतो नोक्तमतो नन्दगृहे साक्षादेव भगवानवतीर्णः कन्यया साकमिति अत एव 'अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा' इत्युक्तम् । वस्तुतस्तु श्रीनंदराजोपि यादवत्वात् क्षत्रिय एव "यादवानां हितार्थाय धृतोद्रिप्रवरो मया" इति हरिवंशोक्तेः। एतच्चक्रवर्त्तिविश्वनाथादिभिर्बहुधोक्तं श्रीदशमेऽत उपरम्यते । यद्वा-ब्रह्मक्षत्रेतिपदं द्विजातिपरं तेन न श्रीनन्दनन्दनावतारे कोपि शंकावसर इति।यद्वा-वैश्येन सहितं क्षत्रं वैश्यक्षत्रं ब्रह्मणा सहितं वैश्यक्षत्रं ब्रह्मक्षत्रमत्र मध्यमपदलोपी समासः शाकपार्थिवादयो न केवलं कर्मधारयाः किन्तु तत्रादिशब्दस्य व्यवस्थार्थत्वमाश्रित्य सर्वसमासजाते मध्यमपदलोपी समासो भवतीति ध्येयमिह तु तत्पुरुषस्समस्तुतः कर्मधारयविशेष एवेत्थं प्राक्तनशाब्दिकैर्व्यवस्थापितम् । विवृद्धसत्त्वाय रजस्तमोनभिभूतशुद्धसत्त्वस्वरूपाय । यद्वा—यः पृथुरूपो भवान् क्षत्रं वेनांगजातदेहमाविश्येदं ब्रह्मकुलं स्वतेजसा बिभर्त्ति पालयति तस्मै ॥५२॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे एकविंशोऽध्यायः॥२१॥ परं परत्वापादकम् (१) पृथुलोधिकं विक्रमो यस्य तम् । तत्र समाजे समाजो हि स च स्वगृहे एव जातो ज्ञेयः । "एष स्वसद्मोपवने समेत्य सनत्कुमारं भगवन्तमेकम्" इत्युक्तेः ॥१॥२॥ सिद्धेश्वरान् मुनीश्वरान् "सिद्धो नाव्यासादौ भेदे योगस्य देवयोनेश्च" इति मेदिनी॥२॥अत्राशयमनुसंमत्याह-अयं भाव इति । आयाति आगते स्थविरे वृद्धे यूनस्तरुणस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गौरवायंत्रितः सभ्यः प्रश्रयानतकंधरः ॥ विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ॥ ४ ॥ तत्पादशौचसलिलैर्मार्जितालकबन्धनः ॥ तत्र शीलवतां वृत्तमाचरन्मानयन्निव ॥ ५ ॥ हाटकासन आसीनान्स्वधिष्ण्येष्विव पावकान् ॥ श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ॥ ६ ॥ पृथुरुवाच ॥ अहो आचरितं किं मे मंगलं मंगलायनाः ॥ यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः ॥ ७ ॥ किं तस्य दुर्लभतरमिह लोके परत्र च ॥ यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सानुगः ॥ ८ ॥ नैव लक्षयते लोको लोकान्पर्यटतोऽपि यान् ॥ यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः ॥ ९ ॥ अधना अपि ते धन्याः साधवो गृहमेधिनः ॥ यद्गृहा ह्यर्हवर्यांबुतृणभूमीश्वरावराः ॥ १० ॥

मंति यूनः स्थविर आयति ॥ प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते'' इति स्मृतेः । प्राणास्तावत्तत्तेजसाक्षितास्तान्प्रत्युद्गच्छंत्यतः स्वयमनुद्गच्छतः प्राणहानिः स्यादिति भयादिव ससंभ्रमं प्रत्युद्गमं चकारेति सह सदस्यैरनुगैश्च वर्तमान इंद्रियेशो जीवो गुणान्गंधादीन्प्रति यथोद्गच्छतीत्यौत्सुक्ये दृष्टांतः ॥ ३ ॥ यंत्रितो वशीकृतः गृहीतमध्यर्हणमर्ध्यमासनं च यैस्तान् ॥४॥ मार्जितं क्षालितमलकबंधनं केशबंधनं यस्य मानयन्निव स्वयमाचचार ॥५॥ भवस्याप्यग्रजत्वेन मान्यान् । संयमः प्रश्रयः ॥६॥ प्रीतः प्राहेत्युक्तं तदेव प्रीतिपूर्वकं वचनमाह । अहो इति दशभिः हे मंगलायनाः मंगलमयनं येषां ते । मया किं मंगलं पुण्यमाचरितम् । यस्य मे योगिभिरपि दुदर्शानां वो दर्शनमासीत् ॥ ७ ॥ ८ ॥ दुर्दर्शत्वमेवाह । नैवेति । सर्वदृशमात्मानं यथा सर्वे दृश्या न लक्षयंते येऽस्य विश्वस्य हेतवो महदादयो मन्वादयो वा । यद्वा कथं भूतान् । येऽस्य सर्वदृगात्मदर्शनस्य हेतवस्तान् ॥ ९ ॥ येषां साधूनां गृहा अर्हाणां पूज्यानां वर्या वरणीयाः स्वीकारार्हा अंब्वादयो येषु तादृशाः अंबु च तृणं च भूमिश्च ईश्वरो

उपलक्षणमतो युवस्थविरशब्दावल्पमहतोः यतः प्राणहानिस्स्यादनुतिष्ठतोऽतो हेतोः । अत्रेदं तत्त्वं वृद्धानादरणादायुः क्षीयते तद्भयात्तदादरो विधेय इति ॥३॥४॥ तेषां सनकादीनां पादावनेजनांबुभिः तत्र तदा शीलवद्भिरेवं वर्त्तितव्यमिति स्वयमाचरन्मानयन्निवात्रैवार्थे ज्ञेयः ॥५॥ हाटकासने काञ्चनपीठे ''सुवर्णं हाटकं वाह्नं कलधौतं च कांचनम्'' इति कोशात् । स्वधिष्ण्येषु कुंडेषु पावकान् सावसथ्यगार्हपत्यादिवह्नित्रयान् ॥ ६ ॥ 'मंगलं भगवान्विष्णुः' इत्युक्तेर्विष्णुरेवायनं स्थानं येषां ते ''हरिः शरणमेवात्र नित्यं येषां मुखे वचः'' इति पाद्मोक्तेः मंगलरूपाणां दर्शनान्ममापि मंगलं भविष्यतीति भावः । पूर्वमपि मया मंगलमवश्यमाचरितमहो तदहं न जाने संप्रत्यपि पापहानिरूपं मंगलं जातं महतां दर्शनं त्रिकालसुखदमस्तीति एतदभिप्रेत्यैव शिशुपालवधे ''हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः । शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यताम्'' इति नारदं प्रति श्रीकृष्णेनोक्तम् ॥ ७ ॥ स्वस्य सर्वलब्धव्ययोग्यतां सूचयति । किमिति ॥ ८ ॥ महदादीनां जगद्धेतुत्वस्य विज्ञेयत्वेप्यल्पज्ञबुध्यारोहो न भवति तदर्थमाह-मन्वादयो वेति । अत्राप्रकृतं महन्मन्वादिग्रहणं यानिति पदापेक्षितसनकादिग्रहणस्यैवौचित्यादत आह—यद्वेति । अस्येति पदादीनामव्यवहितपरामार्शित्वेनात्मग्रहणायेति आत्मपदस्याप्यत्र तात्पर्यानुपपत्त्यात्मदर्शने लक्षणा कार्या ''आत्मैवेदमग्र आसीत्'' इति श्रुतेरात्मन एव सर्वहेतुत्वमवसीयते तथा ''अहं सर्वस्य प्रभवः'' इति श्रीगीतोक्तेश्च ॥ ९ ॥ अत्रेदं तत्त्वं भक्ष्यद्रव्याभावे पानार्थेम्बु च तदभावे शय्यार्थं तृणानि च तदभावे आसनार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यालालयद्रुमा वैतेऽप्यरिक्ताखिलसंपदः ॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ॥ ११ ॥ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः ॥ चरंति श्रद्धया धीरा बाला एव बृहंति च ॥ १२ ॥ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवेदिनाम् ॥ व्यसनावाप एतस्मिन्पतितानां स्वकर्मभिः ॥ १३ ॥ भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते ॥ कुशलाकुशला यत्र न संति मतिवृत्तयः ॥ १४ ॥ तदहं कृतविश्रंभः सुहृदो वस्तपस्विनाम् ॥ संपृच्छे भव एतस्मिन्क्षेमः केनांजसा भवेत् ॥ १५ ॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः ॥ स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः ॥ १६ ॥

गृहस्वामी चावरा भृत्यादयश्च ॥ १० ॥ व्यालानां दुष्टसर्पाणामालया द्रुमा एव ते अरिक्ताः पूर्णा अखिलाः संपदो येषु तादृशा अपि यद्गृहा ये गृहास्तीर्थपादीया वैष्णवास्तेषां पादतीर्थेन विवर्जिताः ॥ ११ ॥ स्वागतं भद्रमागमनं जातम् । यद्यस्माद्बाला एव भवंतो बृहंति व्रतानि चरंति । यद्वा येषां वो व्रतान्यन्ये बालाश्चरंति ॥ ॥ १२ ॥ इंद्रियार्था विषयास्तानेवार्थं पुरुषार्थं ये विदंति तेषां नः कुशलं कच्चित् । व्यसनान्यप्यंते यस्मिंस्तस्मिन्संसारे ॥ १३ ॥ नन्वभ्यागतानां कुशलं पृच्छ्यते लोके न त्वात्मनस्तत्राह । भवत्स्विति ॥ १४ ॥ तत्तस्मात्कृतविश्वासः संस्तपस्विनां संतप्तानां सुहृदो वो युष्मान्पृच्छामि ॥ १५ ॥ न खल्वन्ययोगितुल्या यूयं किं तु

परिष्कृतभूमिश्च तदभावे प्रीतिवागंजल्याद्यर्थं गृहस्वामी च तस्याप्यभावे अवराः साश्रुप्रणिपाताद्यर्थं तत्पुत्रकलत्रादयश्च येष्वर्हाणां वरणीयास्त इत्यर्थः । साधवः सदाचारानिष्ठाः ॥ १० ॥ तदेवं ब्राह्मणत्वेन स्तुत्वा वैष्णवत्वेन स्तौति । तत्रैव मुख्यवैष्णवपदस्य स्थितेस्तदुक्तमादिपुराणे "ब्राह्मणा वैष्णवा मुख्या यतो विष्णुमुखोद्भवाः । अंगेषु देवताः सर्वा मुखे वेदा व्यवस्थिताः ॥ विष्णुना समतां नीतास्ते ज्ञेया वैष्णवोत्तमाः । विप्रैः कृतास्त्रयो वर्णा वैष्णवाः संभवंति हि" इति विप्रैः कृता इत्युक्तेर्ब्राह्मणस्यैवान्यवर्णानां यथाधिकारं वैष्णवमंत्रदीक्षाकरणेधिकारः त्रयो वर्णा विप्रेतरा ये तेषां वैष्णवत्वे धिकारो न तु दीक्षादान इत्यन्यत्र विस्तरः । व्यालानां व्यालवत्कटुवाग्विषवर्षिणां पुत्रकलत्रादीनामालयो येषु तथा भूता द्रुमा एव ते गृहस्था येषां छायापि कैरपि भीत्या न स्पृश्यत इति भावः । वैपदमेवार्थे पादतीर्थेन पादक्षालनोदकेन ॥११॥ द्विजश्रेष्ठा इत्युक्तेर्वैष्णवे जातिबुद्धिर्न कर्त्तव्येत्युक्तवंतः परास्ताः । ननु तेषां बालवत्प्रतीयमानत्वेऽपि न बालशब्दप्रयोग उचितः "पञ्चषड्हायनाभाभाः पूर्वेषामपि पूर्वजाः" इत्युक्तेरत आह-यद्व्रतेति । अन्ये बाला अज्ञा मुमुक्षवो मुक्तिकामा यद्व्रतानीति । धीरा धैर्य्यवंतः संतः बृहंति यावदायुर्नैष्ठिकत्वान्महांति ॥ १२ ॥ तेषां सर्वदानंदमग्नत्वमालक्ष्य कुशलप्रश्नानौचित्यात्स्वकुशलमेव पृच्छति व्यसनानि विपद उप्यंते बीजवन्निक्षिप्यंतेऽस्मिन्निति "व्यसनं तु शुभे सक्तौ पानस्त्रीमृगयादिषु । दैवानिष्टफलेपाये विपत्तौ निष्फलोद्यमे" इति मेदिनी ॥ १३ ॥ अत्राक्षिपति—नन्विति । अभ्यागतेषु कुशलप्रश्नस्यौचितत्वेपि भवत्सु स नोचितस्तत्र हेतुः—आत्मारामेष्विति । आत्मना भगवता सह रमणं क्रीडा येषां तेषु । यद्वा सतम्यंतेन समासः । यत्र येषु 'बुद्धेरात्मा महान्परः' इति श्रुतेरात्मारामेषु बुद्धेःपरत्रात्मनि रममाणेषु बुद्धिवृत्तिरूपकुशलादि धर्माणां संबंधो न संभवतीति भावः ॥ १४ ॥ किञ्च युष्मदागमनमस्मदुद्धारप्रयोजनकमेव बुद्ध्यते तस्मादात्मकुशलप्रश्न एव मम संप्रति युज्यते इत्यत आह—तदहमिति । यतो यूयं तपस्विनामत्र संसारे सुहृदस्त तस्माद्धेतोः केन साधनेनांजसा 'झटित्यञ्जसाह्वाय' इत्यमरः ॥ १५ ॥ तेषां प्रकर्षमाह—न खल्विति । निश्चितं स्पष्टं 'व्यक्तं स्पष्टे बुधे तु ना' इत्यभिधानात् । यद्वात्मा स्वयमेवात्मत्वेन वर्त्तते येषां ते आत्मवंतो स्माज्ञानिनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्ठु मितं मधु ॥ स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह ॥ १७ ॥ सनत्कुमार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना ॥ भवता विदुषा चापि साधूनां मतिरीदृशी ॥ १८ ॥ संगमः खलु साधूनामुभयेषां च संमतः ॥ यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शम् ॥ १९ ॥ अस्त्येव राजन्भवतो मधुद्विषः पादारविंदस्य गुणानुवादने ॥ रतिर्दुरापा विधुनोति नैष्ठिकी कामं कषायं मलमन्तरात्मनः ॥ २० ॥ शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः ॥ असंग आत्मव्यतिरिक्त आत्मनि दृढा रतिर्ब्रह्मणि निर्गुणे च या ॥२१॥ सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽध्यात्मिकयोगनिष्ठया ॥ योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया च ॥ २२ ॥

साक्षाद्भगवानेवेत्याह । व्यक्तं निश्चितमात्मवतां धीराणामात्मा तेष्वात्मत्वेन प्रकाशमानः आत्मानं भावयति प्रकाशयतीति तथा अजः श्रीनारायण इमां पृथ्वीं चरति॥ १६॥ सूक्तं शोभनं वचनम् । सारं न्याय्यम् । सुष्ठु गंभीरार्थम् । मितमल्पाक्षरम् । मधु श्रोत्रप्रियम् । मुखप्रसत्त्या स्मयमान इव प्रतीयमानः ॥ १७ ॥ विदुषा जानतापि ईदृशी परार्थैकपरा ॥ १८ ॥ स्वयमपि पृथोः संगममभिनंदति । संगम इति । उभयेषां वक्तृणां श्रोतृणां च येषां संभाषणसंहितः संप्रश्नः सर्वेषां शं सुखं विस्तारयति ॥ १९ ॥ तदेवं संगमं प्रश्नं चाभिनंद्यानुवादमुखेनैव मोक्षसाधनमुपदिशति । अस्त्येवेति । गुणानामनुवादने प्रश्नद्वारेणानुवादप्रवर्तने गुणश्रवण इत्यर्थः । आत्मनो मनसोंतरस्थं कामात्मकं मलं विधुनोति कषायं धातुरागवदनिवर्त्यम् ॥ २० ॥ चित्तशुद्ध्यैव बहिर्वैराग्यमात्मनि रतिश्च भवति न च ततोऽधिकं साधनमस्ति शास्त्रेषु तयोरेव मोक्षहेतुत्व निश्चयादित्याह । शास्त्रेष्विति । सध्र्यग्विमृशेषु सम्यग्विचारवत्सु शास्त्रेषु क्षेमस्य हेतुरेतावानेव सुनिश्चितः कोऽसौ आत्मव्यतिरिक्ते देहादावसंगो वैराग्यमात्मनि च दृढा रतिः प्रीतिः आत्मनो विशेषणम् निर्गुणे ब्रह्मणीति ॥ २१ ॥ नन्वेतदेवातिदुर्लभमित्याशंक्योत्तमाधिकारिणः श्रवणमात्रेण भवत्यन्यस्य तु चित्तशुद्ध्यनुसारेण साधनतारत

तेषामात्मैव प्रीतिविषयीभूत इत्यर्थः । स्वानां स्वेषां सर्वकार्याभावो गणकार्यस्यानित्यत्वादित्यर्थः ॥ १६ ॥ १७ ॥ महाराजेति । अल्पराजानोपि लोकहिताचरणं कुर्वंति धर्मपालनोपदेशादिना किं पुनस्त्वं महाराजेति भावः ॥ १८ ॥ सुखं भक्तिनिष्ठात्मकम् ॥ १९ ॥ यद्यपि तव शिक्षणीयांशो नास्ति तथापि लोकहितार्थं तव प्रश्नः । क्षेमः केनांजसेति तत् संश्लाघ्य क्षेमसाधनमनुवदति—इत्यर्थ इति । अनुवादयति कथने प्रवर्त्तयतीत्यनुवादनं तच्च श्रवणार्थमेव भवतीति भावः । कषेण सावर्णादिनिकषणेन न यातीति कषायः 'कष—निकषणे' इति कषणं कषः भावाद्यर्थको मदाद्यच् ॥ २० ॥ एतावानेवेति । वतुप्रत्ययैवकाराभ्यामेतयोरेव सारत्वं सुनिश्चितं न पुनरेतदर्थं शास्त्राणि द्रष्टव्यानीति सूचितम् । क्षेमशब्देन सायुज्यशांतरतिप्रेमाणोऽधिकारिभेदेन द्रष्टव्याः ॥ २१ ॥ अत्राक्षिपति—नन्विति । एतदेवात्मेतरासंगब्रह्मरतिरूपं द्वयमेव अन्यस्य मध्यमाद्यधिकारिणः तत्तद्विशेषाणां भक्तिज्ञानादिभेदानां ब्रह्मरतिर्ब्रह्मेतरासंगसाधनभेदानां वा बुभुत्सया ज्ञातुमिच्छयाऽध्यात्मयोगो वेदांतविचारस्तत्र स्थित्या 'यत्र योगेश्वरः कृष्णः' इत्युक्तेः श्रीकृष्णोपासनया योगेश्वराणां भक्तानां ज्ञानिनां वोपासनया नित्यमविच्छेदेन नित्यमिति सर्वत्र संबध्यते पुण्यश्रवस्त्वादेव कथायाः पुण्यत्वं लब्धं पुनः पुण्ययेति विशेषणात्सर्वधर्मेभ्यो हरिकथाया उत्कर्षद्योतनाय ''नैतादृशः परो धर्मो यत्कथाश्रवणं हरेः'' इति पाद्मोक्तेः । ''पुराणश्रवणं

॥ ७० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्थेंद्रियारामसगोष्ठचतृष्णया तत्संमतानामपरिग्रहेण ॥ विविक्तरुच्या परितोष आत्मन्विना हरेर्गुणपीयूषपानात् ॥ २३ ॥ अहिंसया पारमहंस्यचर्यया स्मृत्या मुकुंदाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैश्चाप्यनिंदया निरीहया द्वंद्वतितिक्षया च ॥ २४ ॥ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृंभमाणया॥भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गुणे ब्रह्मणि चांजसा रतिः ॥ २५ ॥ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा ॥ दहत्यवीर्यं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः ॥ २६ ॥

म्यतो वर्धमानया भक्त्येत्यभिप्रेत्याह । सेति चतुर्भिः । सा ब्रह्मणि रतिरसंगश्च श्रद्धादिभिः स्यादिति चतुर्थेनान्वयः । जिज्ञासया तत्तद्विशेषबुभुत्सया पुण्यं श्रवो यशो यस्य तस्य हरेः पुण्यया कथया च ॥ २२ ॥ अर्थारामा अर्थो द्रव्यं तन्निष्ठास्तामसा इंद्रियारामाः कामनिष्ठा राजसास्तैः सह या गोष्ठी तस्यामतृष्णया तेषां च ये संमता अर्थाः कामाश्च तेषामपरिग्रहेणानासक्त्या विविक्ते विजने या रुचिस्तया सा चात्मन्येव परितोषे सति स्यात्किं तु हरेर्गुणपीयूषपानाद्विना तस्मिन्सति विविक्ते रुचिर्न कार्या न चात्मनि परितोषः कार्य इत्यर्थः ॥ २३ ॥ पारमहंस्यचर्यया उपशमादिप्रधानया वृत्त्या स्मृत्यात्महितानुसंधानेन मुकुंदाचरितमेवाग्र्यं सीधु श्रेष्ठममृतं तच्चरितस्मृतिसुखेनेत्यर्थः । मार्गांतरस्यानिंदया निरीहया योगक्षेमार्थक्रियाराहित्येन शीतोष्णादिद्वंद्वसहनेन ॥ २४ ॥ कथयेत्यत्रोक्तमपि कथनं भक्तावंतरंगत्वेन पुनरुच्यते तत्परा हरिभक्तास्तेषां कर्णपूराः कर्णालंकारभूता ये हरेर्गुणास्तेषामभिधानेन कीर्तनेन सदसति कार्यकारणरूपे ॥ २५ ॥ भवत्वन्यत्रासंग आत्मनि रतिश्च ततः किमत

नित्यं सर्वधर्मात्परं मतम्'' इति स्कांदीयकेदारखंडोक्तेः । ''आयासः सर्वधर्मेषु वर्जयित्वा हरेः कथाम् । अतः कलौ हरिकथाश्रुतिस्संसृतिनाशिनी'' इति तत्रैवोक्तेः ॥ २२ ॥ अर्थनिष्ठा धनसंग्रहतत्पराः । कामनिष्ठा भोगासक्ताः यद्वाऽर्थस्य देहस्योंद्रियाणाञ्चारामेषु क्रीडावनेषु विषयेष्वतृष्णात्यागेन तत्संमतानामर्थेंद्रियारामाणां ये संमताः पुरुषा हेमरजतादिस्रक्चंदनादयश्च वा तेषामपरिग्रहेणास्वीकारेण । इत्यर्थ इति । हरेः पीयूषपानं चेल्लभ्यते तदा विविक्तरुचिस्वतःपरितोषौ विहाय जनसंसद्यपि परस्मादपि गायकादेः सकाशादपि कृष्णलीलास्वादार्थमागच्छेदेवेति भावः ॥ २३ ॥ अहिंसया सर्वभूताक्लेशदानेन तदुक्तं ''कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा । अक्लेशजननं प्रोक्तमहिंसा त्विह योगिभिः'' इति । मुकुंदाचरितेति पूर्वत्र कथयेत्युक्तेः । 'कथ-वाक्यप्रबंधे' इति धातोः । भगवद्गुणसंदब्धशास्त्रेणेत्यर्थः । इह तु तत्कृतकंसवधादिपराक्रमलक्षणकर्मामृतपानेन। इत्यर्थ इति । श्रीकृष्णलीलामृतपानजतत्स्मृतिसुखेन। मुकुंदेत्यादिशीध्वंतपदे तृतीया हेतौ ज्ञेयेति भावः । ''शीधु मद्येमृतेपि च'' इति स्वामी । मार्गांतरस्य शास्त्रविहितस्य''अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्। क्षमा धृतिर्मिताहारः शौचं चैते यमा दश ॥ तपःसंतोषमास्तिक्यं दानमीश्वरपूजनम् । सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च तथा व्रतम् ॥ एते तु नियमाः प्रोक्ता'' इति याज्ञवल्क्यः ॥ २४ ॥ अत्र संदर्भः—ननु हरेर्गुणश्चेदीदृशस्तर्हि स एव पुरुषार्थः स्यात् कथं ब्रह्मज्ञानं साधनत्वेन निर्दिश्यते । उच्यते मुमुक्षूणामेव न तु तदेकपुरुषार्थिनामित्याह—हरेरिति । तत्पराणां तदेकभूषणत्वे कर्णपूररूपाः श्लेषेण कर्णौ पूरयतीत्यपेक्षान्तरनाशकाश्च ये गुणास्तेषामेवान्यकर्तृकेनान्यविषयेण वाभिधानेन विजृंभमाणा या भक्तिर्मुमुक्षामयी तयैव केवलया सदसतीति कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इति श्रुत्या कार्यकारणात्मकजीवेशोपाधावनात्मन्यसंगो यदा तदा तद्बाधेन तद्विविक्ते प्रत्यग्रूपे निर्गुणे ब्रह्मणि अञ्जसा स्वाभाविकी रतिः स्यादित्यर्थः ॥२५॥ अत्राक्षिप्य समाधत्ते—भवत्विति । ततोऽन्यत्रासंगात्मरतेः । आचार्यवान् गुरुभक्तिमान् । हृदयं लिंगशरीरमहंकारात्मकं लिंगशरीरं जीवस्य गृहस्थानीयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरंतर्विचष्टे ॥ परात्मनोर्यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुषस्तद्विनाशे ॥ २७ ॥ आत्मानमिंद्रियार्थं च परं यदुभयोरपि ॥ सत्याशय उपाधौ वै पुमान्पश्यति नान्यदा ॥ २८ ॥ निमित्ते सति सर्वत्र जलादावपि पूरुषः ॥ आत्मनश्च परस्यापि भिदां पश्यति नान्यदा ॥ २९ ॥

आह । यदा निष्ठां प्राप्ता रतिर्भवति तदाचार्यवान्सन् ज्ञानवैराग्ययोर्वेगेनावीर्यं निर्वासनं सज्जीवस्य कोशमावरकं हृदयं पुमान्दहति । कथंभूतम् । पंचमहाभूतप्रधानम् । यद्वा अविद्यास्मितारागद्वेषाभिनिवेशाः पंच तदात्मकम् । उत्थितः प्रज्वलितोऽग्निर्योनिमरणिमिव । यद्वा यदा रतिराचार्यानुग्रहश्च तदा ज्ञानविरागयोर्वेगेनोत्थितः साक्षात्कारो वीर्यं पुनः प्ररोहक्षमं यथा न भवत्येवं हृदयं दहति शेषं समानम् ॥ २६ ॥ ततः किमत आह । दग्ध आशयो हृदयमुपाधिर्यस्य अत एव मुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो येन आत्मनः सकाशाद्बहिर्घटाद्यंतःसुखदुःखादिनैव विचष्टे न पश्यत्येव । कुत इत्यपेक्षायां द्रष्टृदृश्यप्रतीतेरंतःकरणहेतुत्वादित्याह । परो दृश्य आत्मा द्रष्टा तयोर्यद्व्यवधानं भेदकं पूर्वमासीत्तस्य विनाशे सति यथा स्वप्ने राजाऽहमित्यारोपितं सैन्यादि द्रष्टारं दृश्यं सैन्यं च स्वप्नावस्थानाशे न पश्यति तद्वत् ॥ २७ ॥ द्रष्टृदृश्यभेदप्रतीतेरंतःकरणहेतुत्वमन्वयव्यतिरेकाभ्यामुपपादयति । आत्मानमिति । आत्मानं द्रष्टारमिंद्रियार्थं दृश्यमुभयोस्तयोः परं संबंधहेतुमहंकारं चाशयेऽन्तःकरणे सत्येव जाग्रत्स्वप्नयोः पश्यत्यन्यदा सुषुप्तौ न । तदुक्तम् । "दृश्यानुरंजितं द्रष्टृ दृश्यं द्रष्ट्रनुरंजितम् ॥ अहंकृत्योभयं रक्तं तन्नाशेऽद्वैततात्मनः" ॥ इति ॥ २८ ॥ एकस्मिन्नात्मनि दृश्यादिभेदप्रतीतिरौपाधिकीति दृष्टांतेन स्पष्टयति । निमित्त इति । लोकेऽपि च सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येवात्मनो बिंबभूतस्य परस्य प्रतिबिंबस्य च

तदाहे जीवोपि दग्धः स्यादिति चेदाह-पंचेति । पञ्चमहाभूतात्मकत्वं स्थूलदेहस्याप्यस्तीत्यत आह-यद्वेति । अविद्याद्यात्मकत्वं त्वहंकारस्यैव न तु स्थूलदेहस्येत्यर्थः । यथाऽरणावव्स्थितोऽग्निररणिमेव दहति एवं प्राकृतबुद्धीन्द्रियादावुत्थिता रतिस्तमेव दहति वह्निना काष्ठं दहतीत्यादौ वह्निरेव काष्ठं दहतीतिवद्दार्ष्टांतिकसंगतिः । पूर्वव्याख्यांने पूर्वं रतिः पश्चादाचार्यवानित्युक्तेर्वैपरीत्यप्रतीतेर्न त्वाचार्यानुग्रहं विना पूर्वमेव रतिरुदयते रतिश्च ज्ञात एव वस्तुनि भवति ज्ञानञ्च "आचार्यवान्पुरुषो वेद"इति श्रुतेराचार्यानुग्रहात्पश्चादेव स्यादत आह—यद्वेति ॥ २६ ॥ ततो लिंगदेहनाशात् । अत एव दग्धाशयत्वादेव । तद्गुणा आशयधर्माः । आदिना भोक्तृत्वादिग्रहः । आदिनां पटादिग्रहः । पुनरादिना शोकमोहादिग्रहः । अत्र हेतुमाशंकते—कुत इति । भेदकमहंकाराख्यांतःकरणं यदासीत्तस्यांतःकरणस्य ॥ २७ ॥ अत्र विश्वनाथः-लिंगदेह एव जीवस्योपाधिस्स एव व्यवधानशब्दवाच्यस्तत्सत्त्वे तमेव पश्यति तदभावे परमात्मानमेव पश्यतीत्याह-आत्मानं भोक्तारमुपाधिग्रस्तजीवमिंद्रियार्थं भोग्यञ्च परं भोगोत्थं सुखदुःखं चाशये लिंगदेहे उपाधौ सत्येव पुमान्पश्यति न त्वन्यदा लिंगदेहाभावे तदा तु परमात्मानमेव पश्यतीति भावः ॥ २८ ॥ किञ्च उपाधिसत्त्वे एवौपाधिधर्म्माध्यासः स चोपाधिस्स चोपाधिः कर्मवशान्मानुषदेवतिर्यगादिर्भवति । न तु तदभाव इत्यत्र दृष्टांतमाह-निमित्त इति । जलतैलचक्षुरादौ निमित्ते विद्यमान एव पुरुष आत्मनः स्वस्य परस्यान्यस्य च भिदामुपाधेर्मध्यमोत्तमाधमभेदं पश्यति तत्र जले चांचल्यं दर्पणे नैर्मल्यं चक्षुषि मालिन्यं च यथा पश्यति तथैव मानुषदेवतिर्यक्शरीरेषु भद्राभद्रं केवलं भद्रं केवलाभद्रञ्च पश्यति नान्यदेति ज्ञानेनोपाधिनाशे तु न तथा पश्यति । किन्तु परमात्मानमेव पश्यति । भक्त्योपाध्यपगमे तु शुद्धो जीवो रतिमहिम्नैव लब्धचिद्घनानंदविग्रहः परमात्मन एव तस्य नारायणरामकृष्णादिचिद्घनानंदाकारस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः ॥ चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ॥ ३० ॥ भ्रश्यत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये ॥ तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ॥ ३१ ॥ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः ॥ यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥ ॥ ३२ ॥ अर्थेन्द्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणाम् ॥ भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यताम् ॥ ३३ ॥ न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः ॥ धर्मार्थकाममोक्षाणां यदत्यंतविघातकम् ॥ ३४ ॥ तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते ॥ त्रैवर्ग्योऽर्थो यतो नित्यं कृतांतभयसंयुतः ॥ ३५ ॥

भेदं पश्यति न तु जलाद्यभावे ॥ २९ ॥ तदेवं चतुर्भिरसंगात्मरत्योर्मोक्षहेतुत्वमुक्तमिदानीमनात्मरतेः संसारहेतुत्वमाह इंद्रियैरिति चतुर्भिः । ध्यायतां गुणारोपेण स्मरतां पुंसामिंद्रियाणि स्मृतैर्विषयैराकृष्यंते तैश्च मन आकृष्यते विषयासक्तिं प्राप्यते । तच्च बुद्धेः सकाशात्तद्धर्मं चेतनां विचारसामर्थ्यं हरति । एतच्चाविवेकिना न लक्ष्यत इति दृष्टांतेनाह । तीरजः कुशादिस्तंबो यथा मूलैस्तोयं ह्रदादपहरति तद्वत् ॥ ३० ॥ चित्तं चेतनामनु तस्यामपहृतायां स्मृतिः पूर्वापरानुसंधानं भ्रश्यति । एवं तद्रोधं ज्ञानभ्रंशमात्मन एव हेतोरात्मनोऽपह्नवं नाशं प्राहुः ॥ ३१ ॥ एवंभूतो नाशो भवतु ततश्च किमित्यत आह । यदधि यमधिकृत्यान्यस्य विषयस्य प्रियतमत्वम् । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेः । तस्यात्मनः स्वेनैव यो व्यतिक्रमोऽपह्नवस्तस्माद्यः स्वार्थनाशोऽतः परतरः स्वार्थनाशो नास्ति ॥ ३२ ॥ कुत इत्यत आह । अर्थस्याभिध्यानमिंद्रियस्यार्थः कामस्तस्याभिध्यानं सर्वार्थनाशः ज्ञानं विज्ञानं च परोक्षापरोक्षम् तस्मात् । येन ध्यानेन मुख्यतां स्थावरताम् ॥ ३३ ॥ अनात्मरतेरनर्थहेतुत्वमुक्तं संगस्याप्याह । नेति । यद्वस्तु धर्मादीनां विघातकं तस्मिन्संगम् । तमः संसारम् ॥ ३४ ॥ तुल्यवन्निर्देशात्पुरुषार्थसाम्यभ्रांतिं वारयति तत्रापीति ।

षडैश्वर्यमाधुर्यवतः सौंदर्यादिकं स्वीयनयनादिभिरास्वादयेदिति मुख्यं फलं द्रष्टव्यं "तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः" इत्याद्युक्तेः ॥ २९ ॥ ध्यायतां ध्यातुमनिच्छतामप्यभ्यासपारवश्येन ध्यायतामरण्येपि तिष्ठतां पुंसामिन्द्रियाणि पुत्रकलत्रादीनां शब्दस्पर्शादिभिः स्मृत्यारूढैः प्रथममाकृष्यते ततो विषयाकृष्टैरिंद्रियैराक्षिप्तमिति विश्वनाथः ॥ ३० ॥ तस्यां चेतनायाम् ॥ ३१ ॥ तत आत्मनाशाक्तिमनिष्टम् । यद्वा कीदृशं प्रेयस्त्वं न धीः परामर्शो यत्रातदधि यद्यत आत्मनोन्यस्य विषयस्य स्त्रीपुत्रादेः ॥ ३२ ॥ अत्र हेतुमाशंकते अर्थस्य धनादेः कामो विषयः अभिध्यानं सातत्येन चिंतनं 'सप्तमो मुख्यसर्गस्तु' इत्यत्र मुख्यशब्दस्य स्थावरे प्रयुक्तत्वादत्रापि स एवार्थः ॥ ३३ ॥ संगमत्र धर्मशास्त्रनिषिद्धेतरमेव न तु विषयासक्तिमात्रं निषिद्धेतरविषयासक्तिमतामेव त्रिवर्गाधिकारित्वादिति केचिदाहुः । परन्तु संगं विषयासक्तिमात्रमेव धर्मादयोऽपि मोक्षानुकूला एव ग्राह्याः 'धर्मस्य ह्यापवर्ग्यस्य' इतिन्यायेनेत्यन्ये । दुष्टसंसर्गस्यैव विषयाभिध्यानमूलकारणत्वात्तमेवं न कुर्यादिति भावः ॥३४॥ धर्मार्थकाममोक्षाणामिति तुल्यवन्निर्देशान्मोक्षस्यापि त्रिवर्गसाम्यभ्रांतिं वारयति । तत्रापि तेषु मोक्षादिष्वपि मध्ये आत्यंतिकतयांताभाववत्तया अर्थः सत्यः "अर्थः स्याद्वाच्यसत्ययोः" इति निरुक्तिः । त्रैवर्ग्यस्त्रिवर्गसंबंधी योऽर्थः पुरुषार्थः । कृतांतस्य कालात्मनो हरेर्भूविभ्रमजनितनाशलक्षणभयसंयुतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परेऽवरे च ये भावा गुणव्यतिकरादनु ॥ न तेषां विद्यते क्षेममीशविध्वंसिताशिषाम् ॥ ३६ ॥ तत्त्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियाऽसुधिषणात्मभिरावृतानाम् ॥ यः क्षेत्रवित्तपतया हृदि विश्वगाविः प्रत्यक्चकास्ति भगवांस्तमवेहि सोऽस्मि ॥ ३७ ॥ यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुतिस्रजि वाऽहिबुद्धिः ॥ तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ॥ ३८ ॥ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति संतः ॥ तद्वन्नरिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम् ॥ ३९ ॥

कृतांतः कालः ॥ ३५ ॥ भयसंयुतत्वमेवाह । परे ब्रह्मादयोऽवरेऽस्मदादयो गुणक्षोभादनु पश्चाद्भवंति ईशः कालस्तेन विध्वंसिता आशिषो येषाम् ॥ ३६ ॥ यस्मादनात्मरतिरनर्थहेतुस्तत्तस्माज्जगतां जंगमानां तस्थुषां स्थावराणां च देहादिभिरात्मनाऽहंकारेण चावृतानां हृदि यश्चकास्ति प्रकाशते तमवेहि । कथं सोस्मीति सोस्तीति पाठे स एवैकोस्ति ततोऽन्यदसदित्यर्थः । ननु जीवो हृदि चकास्ति नान्यस्तत्राह । क्षेत्रविदं जीवं तपति नियमयतीति क्षेत्रवित्तपस्तस्य भावस्तत्ता तयांतर्यामिरूपेण । यद्वा क्षेत्रवित्ते अहंममतास्पदे पातीति क्षेत्रवित्तपस्तेन रूपेण जीवस्तु पारतंत्र्यान्न पाति । ननु कर्म जीवं नियच्छति न आविः प्रत्यक्षः कर्म तु न तथा तर्हि बुद्धिः न प्रत्यक्प्रतिलोमं चकास्ति बुद्धिस्तु पराग्विषयाकारेण तर्ह्यहंकारः न विष्वग्व्याप्तत्वेन स तु परिच्छिन्नः एवंभूतो यो भगवांस्तमवेहीति ॥ ३७ ॥ स्थावरजंगमादीनां हृदि चकास्तीत्युक्ते तेषां सत्त्वं तत्संबंधादीश्वरस्य मालिन्यं च प्रसक्तं निराकुर्वन्नुद्रिक्तभक्त्या तं प्रणमति । यस्मिन्निदं विश्वं सदसदात्मतयोत्कृष्टनिकृष्टभावेन कार्यकारणभावेन वा मायैव विभाति तं प्रपद्ये । मायात्वे हेतुः । विवेकेन विधूतिर्निराकृतिर्यस्य तत स्रजि वेति वाशब्दो दृष्टांते । नित्यमुक्तम् । यतः परिशुद्धम् । तत्कुतः । विबुद्धं तत्त्वं सत्यमत एव प्रत्यूढाभिभूता निरस्ता कर्मभिः कलिला मलिना प्रकृतिर्येन तम् ॥ ३८ ॥ तमवेहीति ज्ञानमुपदिष्टं तस्य दुष्करत्वेन भक्तिमुपदिशति द्वाभ्याम् । यस्य पादपंकजयोः पलाशानि

यतोऽतो मोक्ष एवेति योज्यम् । भविष्यन्नाशमवलोक्य नित्यमिति ॥ ३९ ॥ गुणक्षोभात्सर्गादिकालीनगुणव्यतिकरात् । आशिषश्चित्यमानार्थाः । अनेन ब्रह्मलोकादिप्राप्तिलक्षणोपि पुरुषार्थो न नित्य इत्युक्तम् ॥ ३६ ॥ अथ चार्थे "हृदि ह्येष आत्मा" इति श्रुतेः । अत्राक्षिपति-नन्विति । यद्यपि धातूनामनेकार्थत्वमादायायमप्यर्थश्श्रेयांस्तथापि तस्यागतिकगतित्वादृजुमार्गेण सिध्यतोऽर्थस्य वक्रेणादर्शनायोगादाह-यद्वेति । अहंतास्पदं देहं ममतास्पदं स्त्रीपुत्रधनादि जीवनियमने शंकते-नन्विति । नियच्छति नियमनं करोति नेति निषेधे । स्वबुद्धेः प्रत्यक्षत्वेऽपि परबुद्धेरप्रत्यक्षत्वात् । यद्वा–प्रतिलोमं बाह्यविषयापेक्षयांतःप्रकाशमानत्वात् । पुनराक्षिपति-तर्हीति, नेति । एवंभूत उक्तविशेषणविशिष्टः ॥ ३७ ॥ सत्त्वं पृथक्सत्त्वं विवेकश्चायं विश्वस्य मायिकत्वान्मायात्वेन मायायाश्च परमात्मनो बहिरंगशक्तित्वात् । जीवस्य च तत्तटस्थशक्तित्वाच्छक्तिशक्तिमतोर्भेदाभावमननान्निर्भेदात्मज्ञानमेवेति।तत्परिशुद्धं विबुद्धं ज्ञानरूपम् । अत एव परिशुद्धविबुद्धतत्त्वस्वरूपत्वादेव ॥ ३८ ॥ अत्र विश्वनाथः–तदेवं 'सा श्रद्धया' इत्यादिना भक्तेः प्राधान्ये ज्ञानमिश्रया भक्त्या साध्यां मुक्तिसहितां शांतरतिमुक्त्वा 'तत्त्वं नरेंद्र' इति श्लोकद्वयेन भक्तिमिश्रज्ञानसाध्यं सायुज्यमुक्तिं च दर्शयित्वा तमवेहि सोस्मीतिपदैस्तस्य शुद्धदास्यभक्त्यैकस्पृहस्य तत्रारुचिमभिप्रेत्य भक्तेः कैवल्ये शुद्धभक्त्या तदभीष्ट्या साध्यं प्रेमाणमानुषंगिकमुक्तिकं वदंस्तामेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृच्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीरषंति ॥ तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम् ॥ ४० ॥ मैत्रेय उवाच ॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ॥ दर्शितात्मगतिः सम्यक्प्रशस्योवाच तं नृपः ॥ ४१ ॥ राजोवाच ॥ कृतो मेऽनुग्रहः पूर्वं हरिणाऽऽर्तानुकंपिना ॥ तमापादयितुं ब्रह्मन्भगवन्यूयमागताः ॥ ४२ ॥

दलानि अंगुलयस्तेषां विलासः कांतिस्तस्य भक्त्या स्मृत्या कर्माशयमहंकाररूपं हृदयग्रंथिम्। कर्मभिरेव ग्रथितम् । रिक्ता निर्विषया मतिर्येषाम् । रुद्धः प्रत्याहृतः स्रोतोगणः इंद्रियवर्गो यैः तेनोद्ग्रथयंति । अरणं शरणम् ॥३९॥ ननु "ब्रह्मविदाप्नोति परम्" इति श्रुतेः कथं यतयो नोद्ग्रथयंतीत्युच्यते तत्राह । कृच्छ्र इति । अप्लवेशां न प्लवस्तरणहेतुरीट् ईशो येषां तेषां महानिह तरणे कृच्छ्रः क्लेशः ते ह्यसुखेन योगादिषड्वर्गनक्रमिंद्रियषड्वर्गग्राहं भवार्णवं तितीर्षंति तत्तस्मात् । उडुपं प्लवं कृत्वा दुस्तरार्णवमित्यर्थः । अर्णशब्दे वकाराभाव आर्षः । यद्वा दुस्तरोदकरूपं व्यसनमित्यर्थः ॥ ४० ॥ आत्ममेधसा ब्रह्मविदा दर्शिता आत्मनो गतिस्तत्त्वं यस्मै सः ॥ ४१ ॥ ब्रह्मन्निति

भक्तिं सर्वथोत्कर्षयति यत्पादेति द्वाभ्याम् । यस्य हरेः पादकमलयोः पलाशान्यंगुलयस्तेषां विशेषेण लासः प्रतिक्षणं वर्द्धमाना कांतिर्यस्यास्तया साधनरूपया भक्त्या साध्यरूपया च । यद्वा विलासयुक्तया भक्त्या विविधाद्भुतशिल्पयाऽभ्यंजनोद्वर्त्तनस्नपनसचाकचिक्यप्रसाधनादिसपर्यया । यद्वांगुलीनां विलासः कांतिस्तस्य भक्त्या स्मृत्यापीत्यर्थः । कर्माशयं कर्मवासनामयमहंकारं ग्रथितं येनैव स्वकर्मणा तद्विपरीतेन भगवत्कर्मणोद्ग्रथयंति सन्तो भक्तास्तद्वद्यतयः संन्यासिनो न कुतः निर्विषयाऽविद्यमाना मतिर्येषां ते रिक्तधना इव निर्बुद्धयोऽसंतश्चेत्यर्थः । संतश्च भगवद्विषयमतयः सुबुद्धय एवेति भावः । निरुद्धो नद्यादेः स्रोतसामिवेंद्रियाणां गणो यैः न हि स्रोतांसि निरोद्धुं शक्यानि भवन्तीति निर्बुद्धित्वचिह्नमेतदेवेति भावः । सन्तश्च भगवत्सौंदर्य्यामृतादिषु प्रसारितचक्षुरादींद्रियगणाः सुधियः सुखिनश्चेति भावः । अरणं शरणं वसुदेवनंदनं नंदवाचकोपि वसुदेवशब्दः पूर्वमुक्त एव तेन नंदनंदनं भजेत्यप्यर्थः । "असंग्रामे च शरणे कंसादावरणध्वनिः" इति निरुक्तिः । श्लेषेण अरणं निस्संग्राममेवान्यथा तवेंद्रियैः सह संग्रामो भविष्यति तत्र च त्वमेव बहुभिस्तैः पराभूतो भविष्यसीति भावः ॥ ३९ ॥ इहाक्षिपति-नन्विति । ईट् समर्थ ईशो वा यतोऽसुखेन तर्त्तुमिच्छंति न तु तरंतीत्यर्थः । यदि कामादितरंगैर्न हन्यमानः षडिन्द्रियनक्रैर्न चर्व्यमाणः स्वयं च बलिष्ठः श्रांतोप्यनलसः स्यात्तदा ज्ञानवैराग्याभ्यां दोर्भ्यां चिरेणैव कथंचिदेव तेषां मध्ये कोपि कष्टेनैव तरतीति भावः । इह "श्रेयसामिह सर्वेषां ज्ञानं निश्श्रेयसं परम् । सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवम्॥" इति रुद्रगीते वक्ष्यमाणेन सह विरोधस्य कः परिहार इति चेत्तत्रेदमवधेयम् । तत्र ज्ञानशब्देन प्रस्तुतभगवद्गुणैश्वर्य्यज्ञानमेव विवक्षितं न तु कैवल्योपयोगीति "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" इति श्रीमुखोक्तिविरोधात् । तस्मात्त्वं हरेरंघ्रिमुडुपं कृत्वा व्यसनं संसारदुस्तरार्णवमुत्तर, अत्रोडुपं कृत्वेति "समाश्रिता ये पदपल्लवप्लवम्" इति "त्वत्पादपोतेन महत्कृतेन" इत्याद्युक्तेर्हरिपदपल्लवाश्रयणमात्रेणैव भवार्णवस्य गोवत्सपदप्रमाणत्वे जाते तत्तरणे खलु कः प्रयास इति प्लवारोहणं नाशंकनीयम् । इत्यर्थ इति । दुस्तराण्यर्णांसि तोयानि यस्मिन्स तथा तम् । अत्रसमासांते टेर्लोपे चेदं रूपमिति भावः । उडुपेनार्णवतरणस्यासंभवमालक्ष्याह-यद्वेति । इत्यर्थ इति । दुस्तरं च तदर्णश्चेति दुस्तरार्णमिति समासांतविधेरनित्यत्वमालक्ष्य स्वामिचरणैरार्ष इत्युक्तम् । किञ्च योगवासिष्ठे 'अर्णपूरादिवार्णवः' इत्यकारान्तोप्यंबुवाच्यर्णशब्दोस्तीति ॥४०॥ स पृथुः ॥४१॥एकस्य सनत्कुमारस्योपदेष्टृत्वेन प्राधान्यात् सर्वांश्चतुःसंख्याकान्॥४२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्पादितं च कात्स्न्येंन भगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टं हि सर्वं म आत्मना सह किं ददे ॥ ४३ ॥ प्राणा दाराः सुता ब्रह्मन्गृहाश्च सपरिच्छदाः ॥ राज्यं बलं मही कोश इति सर्वं निवेदितम् ॥ ४४ ॥ सैनापत्यं च राज्यं च दंडनेतृत्वमेव च ॥ सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥ ४५ ॥ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च ॥ तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः ॥ ४६ ॥ यैरीदृशी भगवतो गतिरात्मवाद एकांततो निगमिभिः प्रतिपादिता नः ॥ तुष्यन्त्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रातिकरोति विनोदपात्रम् ॥ ४७ ॥

संबोधनं प्राधान्यादेकस्य यूयमित्युक्तिः सर्वान्प्रति ॥ ४२ ॥ आत्मना देहेन सह सर्वं राज्यादिकं मदीयं साधूच्छिष्टं साधुभिः स्वीयं सन्मह्यं प्रसादरूपेण दत्तमतस्तत्र मम स्वत्वाभावाद् गुरुदक्षिणार्थं किं ददे । न हि पित्रा दत्तं मोदकादि तस्मै दानरूपेण प्रत्यर्प्यते ॥ ४३ ॥ निवेदनं तु तदीयस्यैव तस्मै समर्पणं यथा भृत्यो राज्ञे सेवादिरूपेण तांबूलादिकमर्पयति तथा मयापि सर्वं निवेदितम् स्वीकुरुतेत्याह । प्राणा इति ॥ ४४ ॥ आत्मनः स्वत्वाभावं प्रपंचयति । सैनापत्यं चेति द्वाभ्याम् । दंडो दमः तन्नेतृत्वम् ॥ ४५ ॥ वस्ते परिधत्ते अन्नमात्रं केवलं भुंजते न तु दाने स्वतंत्राः ॥ ४६ ॥ सत्यपि स्वत्वे सर्वस्वेनापि न गुरोः प्रत्युपकर्तुं शक्यमित्याह । यैरिति । आत्मवादेऽध्यात्मविचारे एकांततोपि निश्चयेन निगमिभिर्वेदविद्भिः ते नित्यमनल्पकरुणाः स्वकृतेनैव दीनोद्धरणकर्मणा तुष्यंतु को नाम तत्कृतमुपकारं प्रति स्वयमुपकरोत्युदपात्रमंजलिं विना । मयांजलिरेव तेभ्यो बद्ध इत्यर्थः । यद्वा । विनोदपात्रमुपहासास्पदम् । प्रत्युपकारे प्रवृत्तो जनानामुपहासास्पदं भवेदित्यर्थः ॥ ४७ ॥

ननु साधूनां राज्यादौ कथं स्वत्वं जातं तत्राह-वक्ष्यमाणश्लोकेन प्राणा इत्यादिना अश्वमेधयागांते प्राणादिकं सर्वं मया ब्राह्मणेभ्यः पूर्वमेव दत्तं पुनश्च तैर्निजोच्छिष्टं मह्यमेव समार्पितमिति भावः । अत उक्तं साधूच्छिष्टं हीति । निष्पादित इत्यस्यानुग्रह इति शेषः । अतस्साधुदत्तत्वादेव । तत्र राज्यादौ ॥ ४३ ॥ तदीयस्य द्रव्यस्वामिनः । आदिना वस्त्रालंकारादिग्रहः ॥ ४४ ॥ ननु सेनापत्यादिभिः किं फलं ब्राह्मणस्य मास्तु फलमेतैस्तस्य तदपि तस्यैव दानपात्रत्वात्स एव कृपया गृहीतुमर्हतीति भावः । सैनापत्यं सेनाधिपत्वं वेदैस्सहितानि शास्त्राणि धर्मशास्त्रादीनि वेत्तीति वेदशास्त्रविद्ब्राह्मण एवार्हति योग्यो भवति मूर्खस्य सर्वत्रायोग्यत्वादिति भावः ॥ ४९ ॥ साधुपदं पूर्वब्राह्मणपरमेवेत्यभिप्रेत्याह-स्वमिति । दाने स्वतंत्रता नेति । ब्राह्मणाज्ञयैव सर्वं दातव्यमन्यथा दोषाय तत्स्यादिति भावः । अत एव गोदानादौ वरणं कृत्वा गां ते ददानीति दात्रोक्ते ददस्वेति ब्राह्मणाज्ञा भवति पश्चात्सा दीयत इति संप्रदायः "गृहीत्वा ब्राह्मणस्याज्ञां दानं तस्मै निवेदयेत् । तेन दातुर्दानफलमन्यथा दोषभाग्भवेत्" इति संहितोक्तेः ॥ ४६ ॥ उदकं पीयते पात्राभावेऽनेनेत्युदपात्रमिति निरुक्तेः । इत्यर्थ इति । द्रव्यमात्रस्य ब्राह्मणस्वामिकत्वेन मत्स्वत्वविशिष्टस्य वस्तुनो भावादंजलिरेवोचित इति भावः । यद्यप्येवं तथापि "विद्यां श्रुत्वा ये गुरुं नाद्रियंते प्रत्यासन्नं मनसा कर्मणा वा । तेषां पापं भ्रूणहत्याविशिष्टं तेभ्यो नान्यः पापकर्त्तास्ति लोके" इति महाभारतोक्तेर्हि गुरुदक्षिणाया आवश्यकत्वमिति चेत्तत्राह-यद्वेति । इत्यर्थ इति । न ह्यमूल्यवस्तुनो मूल्यं दातुं शक्यते तथात्वेऽमूल्यत्वहानेः काकाणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ त आत्मयोगपतय आदिराजेन पूजिताः ॥ शीलं तदीयं शंसंतः खेऽभूवन्मिषतां नृणाम् ॥४८॥ वैन्यस्तु धुर्यो महतां संस्थित्या ऽध्यात्मशिक्षया ॥ आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः ॥ ४९ ॥ कर्माणि च यथाकालं यथादेशं यथाबलम् ॥ यथोचितं यथा वित्तमकरोद् ब्रह्मसात्कृतम् ॥ ५० ॥ फलं ब्रह्मणि विन्यस्य निर्विषंगः समाहितः ॥ कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परम् ॥ ५१ ॥ गृहेषु वर्तमानोऽपि स साम्राज्यश्रियाऽन्वितः ॥ नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ॥ ५२ ॥ एवमध्यात्मयोगेन कर्माण्यनुसमाचरन् ॥ पुत्रानुत्पादयामास पंचार्चिष्यात्मसंमतान् ॥ ५३ ॥

खेऽभूवन्नाकाशमार्गेणोद्गताः ॥ ४८ ॥ धुर्यो मुख्यः अध्यात्मशिक्षया या संस्थितिरेकाग्रता तयात्मनि स्वस्वरूपेवस्थितः सन्मेने ॥ ४९ ॥ ब्रह्मसात्कृतं ब्रह्मण्यर्पितं यथा भवति तथा॥५०॥ निर्विषंगः कर्मस्वनासक्तः कर्माध्यक्षं कर्मसाक्षिणमुदासीनं मन्वानोऽकरोदिति पूर्वेणैवान्वयः नासज्जतेत्युत्तरेण वा ॥ ५१ ॥ ५२॥ अर्चिषि

कया गजक्रयणे प्रवृत्तवत्तस्योपहास एव जायत इति भावः ॥ ४७ ॥ ते मुनयः आत्मयोगस्याध्यात्मिकयोगस्योपदेष्टृत्वेन पतयः पातारः तदीयं पृथुसंबंधिनं सुचरितम् ॥ ४८ ॥ शुद्ध भक्तत्वाद्भगवद्भक्तिं विनान्यत्र नैव सम्यगाप्तकामत्वमितीवशब्देन द्योतितम् । आप्तकाममिव न त्वाप्तकामं शुद्धभक्तत्वेन भक्त्यैवाप्तनिर्वृतित्वात् । वेदविदां शास्त्रांतरेष्विवाध्यात्मादिष्वपि पूर्वं तस्य जिज्ञा सैवासीत्सा पूर्णेतित्येताकन्मात्रमिवकारेणासूचीति । आत्मनि स्वभाव एवावस्थितः आध्यात्मशिक्षयापि शुद्धभक्तिस्वभावस्तस्य नापगत इति भावः ॥ ४९ ॥ कर्माणि चेति युग्मकम् । चकारेण शुद्धभक्तानां कर्मानधि कृतत्वेपि गृहस्थानां लोकसंग्रहार्थं वा वर्णाश्रममर्यादालोपाभावार्थं वा भक्तिमार्गाकुत्सनार्थं वा रहस्यायाः शुद्धभक्तेर्गोपनार्थं वा स्वयं वा प्रतिमूर्त्त्या वा पूर्वाचारतोऽनासक्त्या किञ्चित्कर्मकरणं न दूषणावहमित्या पि सांप्रदायिका आहुः । किञ्च—तेषां कर्माणि श्रद्धाराहित्यादश्रद्धया कृतमकृतमेवालमिति शुद्धभक्तेर्न क्षतिः । यथाकालयथादेशयथाबलशब्दैः कालदेशपात्रानुसारेणैव करणान्न सामस्त्येन कर्मकरणं तत्रापि यथोचितमित्यनेन शुद्धभक्तानां कर्मानौचित्याल्लोकप्रदर्शनयैव कर्मकरणाद्वस्तुतः कर्माकरणमेवायातं ब्रह्मसात्कृतं ब्राह्मणसाद्व्यापारं यथा स्यात्तथाकरोदिति तस्य कर्मव्यापारान्ब्राह्मणा एव चक्रुरिति तस्य कर्मविक्षेपाभाव उक्तः "पाणिग्रहणवर्जं हि सर्वं विप्रेण कारयेत् । विप्रैस्संपादितं कर्म भवेत्कारयितुर्ध्रुवम्" इति स्मृतेः । संदर्भस्तु—चकारादत्रापीवशब्दः संबध्यते । ब्रह्मसात्कृतं यथा स्यात्तथाऽकरोदिवेत्यर्थः । ब्रह्मसात्कृतं भगवत्यार्पितं यथा भवेत्तथेति ॥ ५० ॥ कर्मणामध्यक्षं साक्षिणम् ॥ ५१ ॥ गृहेष्विति सार्द्धमेकं वाक्यं नासज्जतेत्यनेनैव संबंधात् । एवमित्यर्द्धस्यांतरेण संबंधो न युज्यते विजिताश्वस्य प्राक्तनत्वात् । यद्यपि पूर्वं "स्वस्योत्तमश्लो कमहन्मुखच्युतः" इत्यादौ तल्लीलाश्रवणानुषंगेणैव सर्वज्ञानसंपत्तिर्दर्शिता यद्यपि च 'यथाचरेद्बालहितं पिता' इत्यादौ तद्दत्तभारेण भगवतापि 'इत्यादिराजेन' इत्यादौ तदेव दृढीकृतं तथा यद्यपि च 'यत्पादपङ्कजपलाश विलासभक्त्या' इत्यादौ कुमारैरपि तदेवानुमतं तथाप्यध्यात्मायोगविधानमिदमुपाधिमात्रपरित्यागार्थं प्रयुज्य भक्तिश्च यथा पूर्वं निष्कामैव रक्षितेत्यग्रेपि ज्ञेयम् । फलेन तत्कारणानुमानात् । अंते हि वैकुंठगमनमेव लक्ष्यते तच्च भक्तस्यैव स्यात् । "यद्वै व्रजंत्यनिमिषामृषभानुवृत्त्या" इत्यादेः । तदेवं श्रीभगवदभिमतिः श्रीगुर्वाज्ञया स्वाभिमतिश्च रक्षितेति संदर्भः ॥५२॥ अध्यात्मयोगेन विनैवासक्त्या कर्माणि कुर्वन्।यद्वाऽध्यात्मेति सप्तम्यर्थेऽव्ययीभावः। आत्मनि स्वतःसिद्धो यो योग आसक्तिविनाभूतविषययोगलक्षणः सिद्धिविशेषस्तेनैव पुत्रानुत्पादयामास न तु पुत्रोत्पादनहेतुकः स्त्रीविषयकः कोपि तस्य कामविकारोस्तीत्यर्थः । यथा पूर्वं बंदिभिरेष संस्तुतस्तथैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विजिताश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकम् ॥ सर्वेषां लोकपालानां दधारैकः पृथुर्गुणान् ॥ ५४ ॥ गोपीथाय जगत्सृष्टेः काले स्वेस्वेऽच्युतात्मकः ॥ मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संरंजयन्प्रजाः ॥ ५५ ॥ राजेत्यधान्नामधेयं सोमराज इवापरः ॥ सूर्यवद्विसृजन्गृह्णन्प्रतपंश्च भुवो वसु ॥ ५६ ॥ दुर्धर्षस्तेजसेवाग्निर्महेंद्र इव दुर्जयः ॥ तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणाम् ॥ ५७ ॥ वर्षति स्म यथाकामं पर्जन्य इव तर्पयन् ॥ समुद्र इव दुर्बोधः सत्त्वेनाचलराडिव ॥ ५८ ॥ धर्मराडिव शिक्षायामाश्चर्ये हिमवानिव ॥ कुबेर इव कोशाढ्यो गुप्तार्थे वरुणो यथा ॥५९॥ मातरिश्वेव सर्वात्मा बलेन सहसौजसा ॥ अविषह्यतया देवो भगवान्भूतराडिव ॥ ६० ॥ कंदर्प इव सौंदर्ये मनस्वी मृगराडिव ॥ वात्सल्ये मनुवन्नृणां प्रभुत्वे भगवानजः ॥ ६१ ॥ बृहस्पतिर्ब्रह्मवाद आत्मवत्त्वे स्वयं हरिः ॥ भक्त्या गोगुरुविप्रेषु विष्वक्सेनानुवर्तिषु ॥ ह्रिया प्रश्रयशीलाभ्यामात्मतुल्यः परोद्यमे ॥ ६२ ॥

भार्यायाम् ॥ ५३ ॥ ५४ ॥ ५५ ॥ सोमश्चासौ राजा च स इव भुवो वसु धनं गृह्णन्विसृजंश्चासौ सूर्यवत् राज्ञः प्रतपनमाज्ञाकरणम् ॥ ॥ ५६ ॥ अग्निरिव तेजसा दुर्धर्षः द्यौः स्वर्ग इव ॥ ५७ ॥ समुद्रो यथा गांभीर्येणैतावानिति न बुद्ध्यते तथासावभिप्रायतो दुर्बोधः । अचलराण्मेरुरिव ॥ ॥ ५८ ॥ ५९ ॥ सर्वात्मा सर्वत्र संचारशक्तिः बलादिभिर्मातरिश्वेव । भूतराट् श्रीरुद्रः ॥ ६० ॥ अजो ब्रह्मेव ॥ ६१ ॥ आत्मवत्त्वे जितेंद्रियत्वे भक्त्यादिभिः

सर्वदाभूदिति दर्शयन्नाह–सर्वेषामिति । सर्वेषामिंद्रादीनां गुणान्वर्षणादीन् ॥ ५३ ॥ ५४ ॥ 'गोपीथोऽवनदुर्गयोः' इति कोषः ॥ ५५ ॥ ''वसु रत्नं जलं रश्मिर्वसुर्देवो विभावसुः'' इति कोशः ॥ ५६ ॥ दुर्धर्षोऽभिभवितुमशक्यः । स्वर्गो यथाऽभीष्टं ददाति तथेत्यर्थः ॥ ५७ ॥ पर्जन्य इव मेघवत्कामैस्तर्पयन्यथा वर्षति सत्यं पूरयति । यद्वा–यथाश्च ते कामश्चेति तथा तैः शब्दनिर्देशपक्षे यथाशब्दो विभक्त्यंतोपि स्यादिति ॥ ५८ ॥ आश्चर्येऽद्भुतेऽलौकिकवस्तुदर्शने इति यावत् । कोशाढ्यो धनाधिपतिः । गुप्तोऽर्थो यस्य स तथा । जलांतर्गतस्य दर्शनायोगात् ॥५९॥ बलादिशब्दा देहेंद्रियमनोबलवाचकाः क्रमात् । अविषह्यतया युद्धादौ सोढुमशक्यतया ॥ ॥ ६० ॥ कं न स्वावेशेन दर्पयति हर्षयतीति कंदर्पः कामः 'दृप् हर्षगर्वयोः' । मनस्वी स्वाधिकप्रहर्त्ता ''मनस्वी स्थिरचित्ते नोदारे स्वाधिकहर्त्तरि'' इति निरुक्तिः । वात्सल्ये प्रीतिकरणे ''वात्सल्यं गोसमूहेपि स्नेहे च धेनुदुग्धयोः'' इति च । मनुस्स्वायंभुवः मंत्रो वा मंत्रोपि यथा जपतां नृणां वात्सल्यं करोतीत्यर्थः । प्रभुत्वे आज्ञादाने ब्रह्मण आज्ञां यथा सर्वे गृह्णंति तथा तस्यापीति । अजशब्देन वेदोऽपि ग्राह्यस्तस्यापि ''वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम'' इत्युक्तेः । स्वयंभूत्वेनाजत्वमस्तीति ॥ ६१ ॥ ब्रह्मवादे वेदोच्चारणे वेदविचारे वा स्वयं हरिः श्रीकृष्णः जितेंद्रियत्वं श्रीकृष्णस्य जैमिनीये नागहृतार्जुनशिर आनयने तापनीये च गोपी

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीर्त्योर्ध्वगीतया पुंभिस्त्रैलोक्ये तत्रतत्र ह ॥ प्रविष्टः कर्णरंध्रेषु स्त्रीणां रामः सतामिव ॥ ६३ ॥ इति श्रीभा० म०चतु० पृथुचरिते सनत्कुमारेण परमाध्यात्मोपदेशो नाम द्वाविंशोऽध्यायः ॥२२॥छ॥ मैत्रेय उवाच ॥ दृष्ट्वात्मानं प्रवयसमेकदा वैन्य आत्मवान् ॥आत्मना वर्धिताशेषस्वानुसर्गः प्रजापतिः ॥१॥ जगतस्तस्थुषश्चापि वृत्तिदो धर्मभृत्सताम् ॥ निष्पादितेश्वरादेशो यदर्थमिह जज्ञिवान् ॥२॥ आत्मजेष्वात्मजां न्यस्य विरहाद्रुदतीमिव ॥ प्रजासु विमनस्स्वेकः सदारोऽगात्तपोवनम् ॥३॥ तत्राप्यदाभ्यनियमो वैखानससुसंमते ॥ आरब्ध उग्रतपसि यथा स्वविजये पुरा ॥४॥ कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित् ॥ अब्भक्षः कतिचित्पक्षान्वायुभक्षस्ततः परम् ॥ ५ ॥ ग्रीष्मे पंचतपा वीरो वर्षास्वासारषाण्मुनिः ॥ आकंठमग्नः शिशिर उदके स्थंडिलेशयः ॥ ६ ॥ तितिक्षुर्यतवाग्दांत ऊर्ध्वरेता जितानिलः ॥ आरिराधयिषुः कृष्णमचरत्तप उत्तमम् ॥ ७ ॥

परार्थोऽधमे चात्मना स्वेनैव तुल्यो निरुपमः ॥ ६२ ॥ पुंभिः सत्पुरुषैः रामः सीतापतिर्यथा सतां कर्णरंध्रेषु प्रविष्टः ॥ ६३ ॥ इति श्रीभा० म० चतुर्थे० टीकायां द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥छ॥ त्रयोविंशे सभार्यस्य वने नित्यसमाधितः ॥ विमानमधिरुह्याथ वैकुंठगतिरीर्यते ॥ १ ॥ प्रवयसं वृद्धं दृष्ट्वा तपोवनमगादिति तृतीयेनान्वयः । स्वकृतोऽनुसर्गोऽन्नादिसर्गः पुरग्रामादिसर्गश्च वर्धितोऽशेषः स्वानुसर्गो येन ॥ १ ॥ निष्पादित ईश्वरादेशः प्रजापालनादिर्येन । जज्ञिवान् जातः ॥ २ ॥ आत्मजां पृथ्वीम् । विमनःसु चिंतातुरासु सदारः सभार्यः ॥ ३ ॥ अदाभ्या विघ्नैर्नाशयितुमशक्या नियमा यस्य वानप्रस्थानां सुसंमते उग्रे तपस्यारब्धः प्रवृत्तः कर्तरि क्तः । यथा स्वस्य धरामंडलस्य विजये पूर्वं महता यत्नेन प्रवृत्तस्तथेति ॥ ४ ॥ उग्रं तपो दर्शयति कंदमूलेति त्रिभिः । क्वचित्कदाचित् ॥ ५ ॥ चतुर्दिक्षु चत्वारोऽग्नय उपरि सूर्य इति पंचानां तपः संतापो यस्य स पंचतपाः आसारं सहत इत्यासारषाट् शिशिरऋतौ स्थंडिलेशयो भूमिशयनः सर्वदा ॥ ६ ॥ ७ ॥

यमुनोल्लंघने प्रतिपादितमस्ति ॥ ६२ ॥ स्त्रीणां सत्स्त्रीभिश्चानसूर्यादिभिरूर्द्ध्वं गीतया सर्वोर्द्धत्वेन नीतयेत्यर्थः ॥ ६३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥ अथ नित्यसमाधिका त्स्र्येन (१) आत्मवान् जितमनाः ॥ १ ॥ ईश्वरादेशः लोकशिक्षणार्थं धर्मज्ञानाद्यनुकरणमेव । यद्वेश्वरेण मुनिप्रेरितवंदिजनांतर्यामिणा य आदिश्यते एष धर्मभृतां श्रेष्ठ इत्यादिना स ईश्वरादेशः ॥ २ ॥ अत्र विश्वनाथस्तु—आत्मानं देहं गतायुषं दृष्ट्वाऽहो अद्यापि भगवान्मां साक्षात्सेवार्थं न नयतीत्यतोऽनुमीयते मम तावत्प्रमाणकं भजनं नाभून्निष्कषायता च न वर्त्तत इत्यतो वानप्रस्थाश्रममिषेण वनं गत्वा कीर्त्तनश्रवणाभ्यामष्टावेव यामान्नयन्न स्मत्पूर्वपुरुषो ध्रुव इव शीघ्रं भगवत्प्राप्त्यर्थमेव तपः कुर्वन् लोके वानप्रस्थधर्मं स्थापयामीति मनसि निश्चित्य तपोवनमागादिति तृतीयेनान्वयः॥ ३ ॥ तत्रापि यथा गार्हस्थ्ये कर्मकरणं सकर्मजनप्रदर्शनया तथैव तृतीयाश्रमेपि वानप्रस्थजनप्रदर्शनयास्य तपश्चरणमित्याह—वैखानसेति । अदाभ्येति 'दभ—नोदने' धातो रूपम् ॥ ४ ॥ कंदो विनैव वपनं, वनजो मूलावांतरभेदः । मूलं तु वपनेनोद्भूतं मूलकादि । यद्वोभयं ग्रामारण्यसाधारणं वपनजमेव ग्राह्यम् । "मूलं बीजसमुद्भूतं कंदः स्वग्रंथिसंभवः । मूलकादि भवेन्मूलं कन्दश्च सूरणादिकः" इति कौशिकः । ततो भक्षोत्तरम् ॥ ५ ॥ आसारषाट् निराश्रयतयोग्रवृष्टिसेवी 'धारासंपात आसारः' इत्यमरः । शिशिरे माघ फाल्गुनमासयोः ॥ ६ ॥ ननु लोकप्रदर्शनकेपि तस्मिंस्तपसि तस्य कीदृङ् मन आसीदित्यत आह-आरराधेति । वैकुंठे साक्षात्कृष्णाराधनकामोहं तपश्चरामीति तस्य संकल्प आसीदित्यर्थः । दृश्यते च रागात्मकभक्तिमतां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेन क्रमानुसिद्धेन ध्वस्तकर्ममलाशयः ॥ प्राणायामैः संनिरुद्धषड्वर्गश्छिन्नबंधनः ॥ ८ ॥ सनत्कुमारो भगवान्यदाहाध्यात्मिकं परम् ॥ योगं तेनैव पुरुषमभजत्पुरुषर्षभः ॥ ९ ॥ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा ॥ भक्तिर्भगवति ब्रह्मण्यनन्यविषयाऽभवत् ॥ १० ॥ तस्यानया भगवतः परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या ॥ ज्ञानं विरक्तिमदभून्निशितेन येन चिच्छेद संशयपदं निजजीवकोशम् ॥ ११ ॥ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं वयुनेन येन ॥ तावन्नयोगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् ॥ १२ ॥

तेन तपसा क्रमानुसिद्धेन शनैः प्राप्तेन ध्वस्तानि कर्माणि यस्यातोऽमल आशयोंऽतःकरणं यस्य । छिन्नानि बंधनानि वासना यस्य ॥ ८ ॥ ९ ॥ १० ॥ परिकर्मणा परिचर्य्यया शुद्धसत्त्व आत्मा मनो यस्य तस्य ज्ञानमभूत् । कीदृशं येन निजमुपाधिं जीवकोशं हृदयग्रंथिं संशयानामसंभावनादीनां पदमाश्रयं चिच्छेद कीदृशेन । अनया भक्त्या निशितेन तीक्ष्णेन । कथंभूतया । तस्य भगवतोऽनुसंस्मरणेनानुपूर्तिः संपूर्तिर्यस्यास्तया निशितेन ॥ ११ ॥ किंच । छिन्ना अनन्यधीर्देहात्म

सिद्धानां श्रीविशाखादिगोपीजनानां बृहद्वामनदृष्टानां श्रुतीनां च कृष्णप्राप्त्यर्थं तपश्चरणमिति ॥ ७ ॥ अनुसिद्धेन परिपक्वेनामलाशयः प्रफुल्लमनाः ध्वस्तकर्मा तु स प्रागेव प्राणायामैर्भगवन्मंत्रावृत्तिभिरेव भक्तिमार्ग विहितैः ॥ ८ ॥ आत्मनि स्वस्मिन्नधिकृतं विनयादित्वाट्ठक् स्वार्थे आध्यात्मिकं "परमंतिकं, यत्पादपंकजपलाश–" इत्यादिपद्यद्वयोक्तं शुद्धिभक्तियोगम् । व्याख्यान्तरे आध्यात्मिकस्य ज्ञानयोगस्य परत्वानुक्तेः श्रेष्ठत्वानु क्तेश्च तेन च पुरुषभजनासंभवादुत्तरश्लोके चानुपपत्तेश्चासंगतिरेव तादृशशब्देनोक्तिश्च भक्तियोगस्य रहस्यत्वव्यंजिकैव ज्ञेया ॥ ९ ॥ १० ॥ ततश्च "हरिभक्तिमहादेव्याः सर्वा मुक्त्यादिसिद्धयः । मुक्तयश्चाद्भुतास्तस्याश्चे टिकावदनुद्रुताः" इति नारदपंचरात्रोक्तेस्तस्यानन्यभक्तिमतोऽनाकांक्षतोपि स्वत एव स्वयं ब्रह्मविद्या तथाऽणिमाद्यष्टादशसिद्धयश्च मूर्त्तिमत्य एवागत्य वयं भगवता प्रेषितास्तदर्थमेवास्मानंगीकुर्विति वदंत्यस्तस्याभिमुखे प्रादुरभवन्नित्याह-तस्येति द्वाभ्याम् । तस्य पृथोर्ज्ञानं ब्रह्मविद्याख्यमभूत्स्वत एव प्रादुरभूत् । यद्यपि शुद्धभक्ताश्चातका इव भक्तेरेव माधुर्यास्वादिनः स्वयं प्राप्तामपि ब्रह्मविद्यां नांगी कुर्वंति तत्कार्यभूतो लिंगदेहध्वंसो भक्त्यैव विनानुसंधानेनापि भवेत् । तदुक्तं "जरयत्याशु या कोशं निगीर्णमनलो यथा ।" इति । तदपि यथा कश्चिज्जाठरानलेन जरयिष्यमाणस्यापि निगीर्णान्नस्य शीघ्रपाकार्थं किमप्यौषधं पिबति तथैव पृथुर्भगवद्धाम्नि साक्षात्से वाप्राप्त्यर्थमत्युत्कंठः कालविलंबासहिष्णुः सोपाधिध्वंसनार्थं ब्रह्मज्ञानमंगी चकारेत्याह–निशितेनातितीक्ष्णेन येन ज्ञानेन निजजीवकोशं सोपाधिं चिच्छेद कीदृशं संशयपदं भक्त्यादृष्टसाक्षाद्भगवच्चरणस्य मे जीवकोशो नास्त्यस्ति वेति तदीयसंदेहास्पदं, वस्तुतस्तस्य जीवकोशो नास्त्येव कृष्णस्य पूर्वदेहकथाश्रयमिति "उभावपि च भद्रं ते उत्तमश्लोकविग्रहौ" इत्युक्तेः पृथुदेहस्य भगवद्विग्रहत्वात् । तदपि पृथोस्तस्य योगेन देहत्यागचिकीर्षा तु भक्तिमहिम्ना स्वस्मिन्प्राकृतत्वमननात् देहपातश्रवणं च बहिर्मुखमतोत्थानाभावार्थं भगवदवताराणामिवान्येषां भगवद्भक्तानामिव च माययैव प्रत्यायितं भगवत्सु श्रीरामस्य भक्तेषु श्रीध्रुवस्य देहपाताभाव एव तेषां देहपाताभावोपलक्षणार्थो ज्ञेय इति तु भक्तान्प्रति सिद्धान्तो दर्शितो ज्ञेयः ॥ ११ ॥ अन्यदाह--किंचेति । अत एवाधिगतात्मगतित्वादेव । इत्यर्थ इति । स्वराडिव निपानखनित्रमिन्द्र इति न्यायेन धान्यपलालन्यायेन वेति भावः । प्रमत्तो यथा प्राप्तं वस्तु सुंदरमपि त्यजति तद्वत्स्यात् । इत्यर्थ इति । आत्यन्तिकं न गणयंत्यपि ते प्रसादम्' इत्याद्युक्तेः । कथाया रसज्ञैर्मोक्षमपि नाद्रियते कुतः सिद्धय इति भावः । अत्रायमाशयः–शुद्धाया भक्तेः फलं द्विविधम् अनुसंहितमननु संहितञ्च । तत्रानुसंहितं प्रेमभक्तिरेव अननुसंहितं ज्ञानसिद्ध्यादि । तत्र च कस्यचिद्भक्तस्य स्वतः प्राप्त एव तत्रतत्र यद्यादित्सा स्यात्तदा शुद्धाया भक्तेः संकोचः स्यात्–तदुक्तमेकादशे–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं स वीरप्रवरः संयोज्यात्मानमात्मनि ॥ ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरम् ॥ १३ ॥ संपीड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयञ्छनैः ॥ नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरः कंठशीर्षाणि ॥ १४ ॥ उत्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निःस्पृहः ॥ वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत् ॥ ॥ १५ ॥ खान्याकाशे द्रवं तोये यथास्थानं विभागशः ॥ क्षितिमंभसि तत्तेजस्यदो वायुं नभस्यमुम् ॥ १६ ॥ इंद्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवम् ॥ भूतादिनाऽमून्युत्क्षिप्य महत्यात्मनि संदधे ॥ १७ ॥

बुद्धिर्यस्य यतोऽधिगतात्मगतिरत एव निरीहः प्राप्तासु सिद्धिषु निःस्पृहः येन वयुनेन ज्ञानेनेदं संशयपदं चिच्छेद तत्तत्यजे त्यक्तवान् । तत्प्रयत्नादप्युपररामेत्यर्थः । तस्य योगसिद्धिष्वपि निःस्पृहत्वं युक्तमेवेत्याह । तावन्नाप्रमत्तः किं तु प्रमत्तो भवति तस्य श्रीकृष्णकथारतत्वान्न तासु लोभो जात इत्यर्थः ॥ १२ ॥ १३ ॥ देहत्यागप्रकारमाह संपीड्येति पंचभिः । पायुं गुदं संपीड्येति मुक्तासनं सूचितम् । "संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु मध्यतः ॥ सव्ये दक्षिणगुल्फेन मुक्तासनमितीरितम् ॥" इत्युक्तेः । मूलाधाराद्वायुमुत्सारयन्नूर्ध्वं नयन्नाभ्यामवस्थाप्य ततः कोष्ठेष्ववस्थाप्यायूयुजदित्युत्तरेणान्वयः । कोष्ठान्येवाह । हृदादीनां द्वंद्वैक्यम् । शीर्षं भ्रूमध्यं तस्मिन् ॥ १४ ॥ तं वायुम् । पाठांतरे एवमसून्प्राणानुत्सर्पयन् क्रमेण मूर्ध्नि ब्रह्मरंध्रे आवेश्य ततो देहारंभकपंचभूतानि समष्टिभूतेषु विलापितवांस्तदाह । वायुं वायावयूयुजदेकीकृतवान् ॥ कायं देहगतं कठिनांशं क्षितौ ॥ १५ ॥ खानींद्रियच्छिद्राणि । द्रवांशं तोये । तदेवं देहं प्रविलाप्याद्वितीयात्मप्रतिपत्त्यर्थं महाभूतानामपि लयमाह । क्षितिमंभस्येकी कृतवान् । तदंभस्तेजसि अदस्तेजो वायौ । अमुं वायुं नभसि ॥ १६ ॥ तदेवं तामसाहंकारकार्यस्याकाशपर्यंतस्य लयमुक्त्वा सात्त्विकराजसाहंकारकार्याणां लयमाह । इन्द्रियेष्विति इंद्रियेषु मन इति देवानामप्युपलक्षणम् । सविकल्पकज्ञाने मनस इंद्रियैराकर्षणात्तेषु लयाभिधानं न तु कार्यत्वात । तदुक्तं गीतासु ।

'अंतरायान्वदंत्येतान्' इति । किञ्च—तत्तत्त्यागसामर्थ्यं च शुद्धभक्त्यभ्यासबलेनैव स्यादित्याह—तावदिति चक्रवर्त्ती ॥ १२ ॥ किञ्च तासु सिद्धिषु मध्ये स्वच्छंदमृत्युनाम्नीं सिद्धिं स्वयमुपस्थितामालक्ष्य शीघ्रमेव भगवत्पार्श्वं जिगमिषोस्तस्य पृथोर्विद्याया इव तस्या अपि यदैवांगीचिकीर्षाऽजनिष्ट तदैव तया महाकर्मठपुरोधसेव देहत्यागप्रकारं शिक्षयत्या पृथुः स्वेच्छया सुखेन देहं त्यक्तुमारेभे इत्याह—एवमिति । वीरप्रवर इति । देहमेवमधुनैव त्यक्त्वा शुद्धचिन्मयाकारः सन्संप्रत्येव वैकुंठं गत्वा भगवच्चरणौ परिचराणीति जातमहोत्साह इत्यर्थः । आत्मानं मन आत्मनि पार्षदरूपे देहे अत एव ब्रह्मभूतः शुद्धचिद्रूपः सन् ॥ १३ ॥ मूलाधाराचक्रात् ऊर्ध्वं स्वाधिष्टानं नयन् ताभ्यां मणिपूरकचक्रे हृत् अनाहतचक्रम् । उरः कंठाधो विशुद्धिचक्रं, कंठं तस्यैव चक्रस्याग्रदेशः, शीर्षं भ्रूमध्यमाज्ञाचक्रं तस्मिन् ॥ १४ ॥ पाठांतरे उत्सर्पयन्नसून्मूर्ध्नीति पाठे वायुं देहारंभकं वायौ समष्टिवायौ । एवमन्यान्यपि देहारंभकभूतचतुष्टयानि समष्टिभूतेषु विलापितवान् । कायं कायस्थिता पृथ्वी । यद्यपि कायं पांचभौतिकमेव तथापि पार्थिवांशाधिक्यात्कायशब्दः पृथ्वीपर एव वैशेष्यात्तद्वाद इति न्यायात् ॥ १५ ॥ यथास्थानं यस्य यत उत्पत्तिस्तस्य तत्र स्थान एव लयं संभावयेदित्यर्थः ॥ १६ ॥ सविकल्पकज्ञाने विशेषणवैशिष्ट्यावगाहिज्ञाने घटोयमित्यादिरूपे । तेष्विंद्रियेषु । मनस इंद्रियाधीनत्वे प्रमाणमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंसर्वगुणविन्यासं जीवे मायामये न्यधात् ॥ तं चानुशयमात्मस्थमसावनुशयी पुमान् ॥ ज्ञानवैराग्यवीर्येण स्वरूपस्थोऽजहात्प्रभुः ॥ १८ ॥ (प्रभुर्भूतः प्रसन्नात्मा वैकुंठमधिगच्छति ॥) अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनम् ॥ सुकुमार्यतदर्हा च यत्पद्भ्यां स्पर्शनं भुवः ॥ १९ ॥

"इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ।" इति । अत्र च इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मन इति च । इंद्रियेषु नभ इति पाठेऽप्ययमर्थः । भट्टादीनां मते नभश्चाक्षुषं केषांचिन्मानसम् ॥ आनुमानिकत्वमतेऽपींद्रियव्यापारोऽस्त्येव । नभोगुणश्च शब्दः श्रोत्रग्राह्योऽत इन्द्रियग्राह्यत्वादिंद्रियेषु नभो विलापितमिति तानींद्रियाणि यथोद्भवमुद्भवो वृत्तिलाभः स च विषयाधीन इति श्रोत्रादीनां विषयेषु शब्दादिषु लयः । यद्वा तन्मात्रकार्याण्येवेन्द्रियाणि मनोऽप्यपंचीकृततन्मात्रकार्यम् । अहंकारिकत्वाभिधानं तदधीनत्वविवक्षयेत्यविरोधः भूतादिनाहंकारेण प्रागवशिष्टनभःसहितानींद्रियाण्युत्कृष्य परतो नीत्वा भूतादौ क्षिप्त्वा तेन सह महत्तत्त्वे संदध इत्यर्थः ॥ १७ ॥ सर्वेषां गुणानां कार्याणां विन्यासः स्थितिर्यस्मिंस्तं महांतं मायामये मायोपाधिप्रधाने जीवे तं चानुशयमुपाधिं यः पूर्वमनुशयी पुमान् जीवोऽसौ पृथुर्ब्रह्मणि स्थितः सन्नजहादित्यर्थः ॥ १८ ॥ वनप्रवेशमारभ्य राज्ञीकथामाह अर्चिर्नामेति चतुर्भिः । अनुगतानुजगाम । अतदर्हा तदपि नार्हति या । तत् किं । पद्भ्यां भुवः स्पर्शनमिति यत् ॥ १९ ॥

तदुक्तमिति । चरतां स्वंस्वं विषयं गच्छतां यदिंद्रियं मनोऽनुविधीयतेऽनुसरति । किञ्च—आकृष्टमाकर्षितं भवतीति भट्टा मीमांसकाः । आदिना तदेकदेशिनश्च । आनुमानिकस्तार्किकादिः । शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति समवायिकारणकत्वात् । यन्नैवं तन्नैवं यथारूपमिति परिशेषानुमानेन तादृशद्रव्यविधयाकाशः सिध्यतीति रूपादिवारणाय सत्यन्तम्, रूपत्वादिवारणाय विशेष्यं, परिशेषश्च प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसंगात्परिशिष्यमाणे संप्रत्ययः । न च विशेष्यासिद्धिः शब्दः समवायिकारणकः जन्यगुणत्वात् पृथिवीरूपवदित्यनुमानेन तत्सिद्धेः । न च विशेषणासिद्धिरपि शब्दोऽष्टद्रव्यानाश्रितः श्रोत्रग्राह्यत्वात् शब्दत्ववदित्यनुमानेन तस्यापि सिद्धेरित्यलं प्रसक्तानुप्रसक्त्या । इंद्रियव्यापारश्चक्षुरिंद्रियव्यापारो नभसि स्वगुणद्वारास्त्येवेत्याह—नभोगुणश्चेति । अतोस्य नभसः । नन्वेवं राजभृत्यादिष्वतिप्रसंगो यथास्थानमित्युक्तिविरोधः प्रसिद्धार्थपरित्यागश्चेति दोषत्रयं स्यादत आह—यद्वेति । "शब्दमात्रमभूत्तस्मान्नभः श्रोत्रञ्च शब्दगम्" इत्यादिना तन्मात्रेभ्य इंद्रियाणामुत्पत्तिश्रवणात्तन्मात्रकार्याण्येवेंद्रियाणीति । इत्यर्थ इति । आत्मनीति महत आत्मशक्तित्वेन शक्तिशक्तिमतोरभेदात्तत्रात्मशब्दप्रयोगो नासंगत इति भावः ॥ १७ ॥ इत्यर्थ इति । यत्कृतं जीवत्वं तं मायालक्षणमुपाधिं त्यक्त्वा ब्रह्मभावं प्राप्त इति भावः । विश्वनाथस्तु—स्वस्य रूपे भगवद्भक्तिलब्धे पार्षददेहे स्थितः सन्नजहात्प्रभुः त्यागे परमसमर्थः पूर्वं "चिच्छेद संशयपदं निजजीवकोशम्" इति यत्कोशच्छेदनमुक्तं तदेतत्प्रकारकमेव । पुनः स्थूलदेहत्यागावसरे पिष्टपेषणन्यायेन तथा चक्रे ततश्च भगवत्प्रेषितविमानमारुह्य वैकुंठं जगामेत्यग्रिमवाक्ये व्यक्तं भावि ॥ १८ ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चारषदेहयात्रया ॥ नाविंदतार्तिं परिकर्षिताऽपि सा प्रेयस्करस्पर्शनमाननिर्वृतिः ॥२०॥ देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः ॥ आलक्ष्य किंचिच्च विलप्य सा सती चितामथारोपयदद्रिसानुनि ॥ २१ ॥ विधाय कृत्यं ह्रदिनीजलाप्लुता दत्त्वोदकं भर्तुरुदारकर्मणः ॥ नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादौ ॥ २२ ॥ विलोक्यानुगतां साध्वीं पृथुं वीरवरं पतिम् ॥ तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः ॥ २३ ॥ कुर्वत्यः कुसुमासारं तस्मिन्मन्दरसानुनि ॥ नदत्स्वमरतूर्येषु गृणंति स्म परस्परम् ॥ २४ ॥ देव्य ऊचुः ॥ अहो इयं वधूर्धन्या या चैवं भूभुजां पतिम् ॥ सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव ॥ २५ ॥ सैषा नूनं व्रजत्यूर्ध्वमनुवैन्यं पतिं सती ॥ पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा ॥ २६ ॥ तेषां दुरापं किं त्वन्यन्मर्त्यानां भगवत्पदम् ॥ भुवि लोलायुषो ये वै नैष्कर्म्यं साधयंत्युत ॥ २७ ॥

भर्तुर्व्रतं यद्भूमिशयनादि तस्मिन् धर्मे या निष्ठा तया ऋषीणामियमार्षी देहयात्रा कंदमूलादिवृत्तिस्तया चार्तिं दुःखं न प्राप । तत्र हेतुः । प्रेयसः करेण स्पर्शनं मानश्च ताभ्यां निर्वृतिरानंदो यस्याः ॥ २० ॥ पृथिव्याः पत्युः दुहितृत्वं तु तस्या देवतारूपेण । विपन्नं नष्टमखिलं चेतनादिकं यस्मिंस्तथाभूतं देहमालक्ष्य तं देहं चितामारोपयत् ॥ २१ ॥ कृत्यं तत्कालोचितं विधाय ह्रदिन्या जले आप्लुता स्नाता सती भर्तुरुदकं दत्त्वा दिव्यंतरिक्षे स्थितान्देवान्नत्वा वह्निं त्रिः प्रदक्षिणीकृत्य ॥ ॥ २२ ॥ देवैः सहिताः ॥ २३ ॥ गृणंति स्माभाषंत ॥ २४ ॥ ॥ २५ ॥ असतीनां दुर्विभाव्येन कर्तुमशक्येन कर्मणा ॥ २६ ॥ भगवान्पद्यते गम्यते तत्र दुःखप्राप्तौ ॥ २० ॥ आत्मनः स्वस्य पत्युः पृथोः दया संजाताऽस्येति दयितस्तस्य पृथिव्यां दुहितृभावात्तस्यां तस्य दयैवोचितेत्यर्थः ॥ २१ ॥ तत्कालोचितं मुन्यन्नेन पिंडदानादि कृत्वा ह्रदिन्या नद्याः । अंतरिक्षे स्थितान्स्वर्गादागत्य पृथुं दिदृक्षूंस्तस्या दृग्गोचर एवाकाशे स्थितान् । भर्तृपादाविति पाठ एव श्रेयान्भाति । एकवचनान्तपाठे तु सामान्यापेक्षं ध्येयम् ॥ २२ ॥ २३ ॥ ॥ २४ ॥ धन्या सर्वगुणैः पूर्णा ''अनपेक्षो गुणैः पूर्णो धन्य इत्यभिधीयते'' इत्यभिधानात् ॥ २५ ॥ एषेत्यंगुल्या निर्दिशत्यूर्ध्वं, किमधश्चिताग्निं पश्यथेत्याशयः । नूनमिति वितर्के । येयं विमानस्था काचिद्दिव्योतिनी दृश्यते सैषाऽर्चिरेव भवेदित्यर्थः । अनुवैन्यमिति अग्रे विमानस्थं वैन्यं तत्पश्चादार्चिषमपि विमाने पश्यतेत्यर्थः । अस्मानतीत्येति वयं देवता भूत्वाप्यस्याः पादतलवर्त्तिन्य एवाभूमेति भावः । दुर्विभाव्येन चिंतयितुमप्यशक्येन ॥ २६ ॥ हंतहंतेदृशा मनुष्या वयमपि भूयास्म यदि भाग्यं स्यादित्याह-तेषामिति । नैष्कर्म्यमिति भक्तियोगांगत्वमुक्तम् । यद्वा-भगवत्पदं वैकुंठं नैष्कर्म्यं कर्मभिरप्राप्यमित्यर्थः । ये पृथ्वर्चिः प्रभृतय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वंचितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ॥ लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥ २८ ॥ मैत्रेय उवाच ॥ स्तुवंतीष्वमरस्त्रीषु पतिलोकं गता वधूः ॥ यं वा आत्मविदां धुर्यो वैन्यः प्रापाच्युताशयः ॥ २९ ॥ इत्थंभूतानुभावोऽसौ पृथुः स भगवत्तमः ॥ कीर्तितं तस्य चरितमुद्दामचरितस्य ते ॥ ३० ॥ य इदं सुमहत्पुण्यं श्रद्धयाऽवहितः पठेत् ॥ श्रावयेच्छृणुयाद्वाऽपि स पृथोः पदवीमियात् ॥ ३१ ॥ ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः ॥ वैश्यः पठन्विट्पतिः स्याच्छूद्रः सत्तमतामियात् ॥ ३२ ॥ त्रिःकृत्व इदमाकर्ण्य नरो नार्यथ वादृता ॥ अप्रजः सुप्रजतमो निर्धनो धनवत्तमः ॥ ३३ ॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पंडितः ॥ इदं स्वस्त्ययनं पुंसाममंगल्यनिवारणम् ॥ ३४ ॥ धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहम् ॥ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः ॥ श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परम् ॥ ३५ ॥ (परमेश्वरस्य वैकुण्ठप्रापकं मोक्षदायकम् ॥) विजयाभिमुखो राजा श्रुत्वैतदभियाति यान् ॥ बलिं तस्मै हरंत्यग्रे राजानः पृथवे यथा ॥ ३६ ॥ मुक्तान्यसंगो भगवत्यमलां भक्तिमुद्वहन् ॥ वैन्यस्य चरितं पुण्यं शृणयाच्छ्रावयेत्पठेत् ॥ ३७ ॥

ऽनेनेति तथा तन्नैष्कर्म्यं ज्ञानं ये चंचलायुषोऽपि साधयंति तेषामन्यद्देवादिपदं किमु दुर्लभं न किंचिदित्यर्थः ॥ २७ ॥ अभक्तं शोचंति । स वंचित इति । यत आत्मने द्रुह्यति योऽपवर्गसाधनं मानुष्यं लब्ध्वापि विषयेष्वासक्तिं याति ॥ २८ ॥ अच्युते एवाशयो मनो यस्य ॥ २९ ॥ ३० ॥ ३१ ॥ विशां पश्वादीनां वैश्यादीनां वा पतिः स्यात् । शूद्रः श्रृण्वन्निति शेषः । तस्य पाठानधिकारात् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ यद्यपि बहूनि फलानि भवंति तथापि मुक्तान्यसंग एव श्रवणादि

एते तेषामित्यर्थः । इत्यर्थ इति । हस्तिपदन्यायेन तत्रैव सर्वलोकानंदस्यांतर्भूतत्वादिति भावः ॥ २७ ॥ बत खेदे । वञ्चितः प्रलब्धः ॥ २८ ॥ ननु सहमरणपुण्यलभ्यं पतिलोकं नहिनहि यं लोकं वै निश्चितं वैन्यः प्राप आत्मविदां धुर्य इति न तस्याः प्राकृतः पतिलोकः प्राप्त्यर्ह इति भावः । अच्युताश्रय इति । नापि सायुज्यं लभ्यं 'न कामये नाथ' इत्यादितदीयप्रार्थनाविरोधात् । अत एव स्वामिचरणैरेतद ध्यायार्थावतरणिकाश्लोके उक्तं "त्रयोविंशे सभार्यस्य वने नित्यसमाधितः । विमानमधिरुह्याथ वैकुंठगतिरीर्य्यते ॥" इति । भक्तिभिन्नेष्वेव पतिलोकबलीयस्त्वं ज्ञेयम् ॥२९॥ भगवत्तमः अतिशयितैश्वर्यवान् । "भगो योन्यां भगो यत्ने यशोवीर्यार्कभूतिषु । कांतीच्छाज्ञानवैराग्यधर्मैश्वर्यतपःसु च॥"इति हलधरोक्तेः । प्रयत्नादिगुणवतामतिशयेन प्रधानत्वाद्भगवत्तमः । उद्दामचरितस्य वरुणसदृशस्य'गुप्तार्थो वरुणो यथा' इत्युक्तेः ।"उद्दामो बन्धरहिते स्वंतंत्रे च प्रचेतसि" इति मेदिन्युक्तेः । वरुण इत्युपलक्षणमिन्द्रादेरपि "दधार लोकपालानामेक एव पृथग्गुणान्" इत्युक्तेश्च ॥ ३० ॥ पृथोः पदवीं शुद्धभक्तियोगं वैकुंठं वा ॥ ३१ ॥ "प्रजावैश्यपशुस्वान्नपुत्रीषु विडिती रितः" इत्यभिधानचिंतामणिः । शूद्र इति । "अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्त्रियेण च । श्रोतव्यमेव शूद्राणां नाध्येतव्यं कदाचन ॥ श्रौतं स्मार्त्तं च वै धर्मं प्रोक्तमस्मिन्नृपोत्तम । तस्माच्छूद्रैर्विना विप्रं न श्रोतव्यं कदाचन" इति भविष्ये पुराणाधिकारिप्रस्तावे सत्तमतां श्रेष्ठतां पावित्र्यमिति यावत् ॥ ३२ ॥ अप्रज इति । समासांतविधेरानित्यत्वान्नासिच् ॥३३॥ एतदनुसारचलनात्सुयशाः । मूर्खोऽज्ञः । पंडितो निपुणः ऐहिकपार त्रिककर्त्तव्यज्ञानवान्भवति । अमंगल्यं रोगादि॥३४॥चतुर्णां धर्मादीनां, परमुत्कृष्टम् । एतत्पृथुचरितम् ॥३५॥यान् राज्ञस्ते राजानः, तस्मै एतच्छ्रोत्रे, बलिं करम् । "भागधेयः करो बलिः"इत्यमरः॥३६॥मुक्तान्यसंगः । ॥ ७७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकम् ॥ अस्मिन्कृतमतिर्मर्त्यः पार्थवीं गतिमाप्नुयात् ॥ ३८ ॥ अनुदिनमिदमादरेण शृण्वन्पृथुच रितं प्रथयन्विमुक्तसंगः ॥ भगवति भवसिंधुपोतपादे स च निपुणां लभते गतिं मनुष्यः ॥ ३९ ॥ इति श्रीभागवते म० चतुर्थ० पृथु चरित्रसमाप्तिवर्णनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ छ ॥ मैत्रेय उवाच ॥ विजिताश्वोऽधिराजाऽऽसीत्पृथुपुत्रः पृथुश्रवाः ॥ यवीयोभ्योऽददात्का ष्ठा भ्रातृभ्यो भ्रातृवत्सलः ॥ १ ॥ हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणाम् ॥ प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः ॥ २ ॥ अंतर्धानगतिं शक्राल्लब्ध्वांतर्धानसंज्ञितः ॥ अपत्यत्रयमाधत्त शिखंडिन्यां सुसंमतम् ॥ ३ ॥ पावकः पवमानश्च शुचिरित्यग्नयः पुरा ॥ वशिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ॥ ४ ॥

कुर्यात् ॥ ३७ ॥ महतो भगवतो माहात्म्यस्य सूचकम् । पार्थवीं पृथुसंबंधिनीम् । पार्थिवीमिति वा पाठः ॥ ३८ ॥ प्रथयन्कीर्तयन् भवसिंधौ पोतो नौका पादो यस्य ॥ ३९ ॥ इतिश्रीभा० म० चतुर्थे टीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥छ॥ एकादशभिरध्यायैः पृथोश्चरितमीरितम् ॥ प्रचेतसामथाष्टाभिस्तन्मध्ये पंचभिः पितुः ॥ १ ॥ चतुर्विंशे प्रपौत्रात्तु पृथोः प्राचीनबर्हिषः ॥ प्रचेतसां जनिस्तेभ्यो रुद्रगीतं च वर्ण्यते ॥ २ ॥ अधिराज आसीदित्यर्थः । यवीयोभ्यः कनिष्ठेभ्यः । काष्ठा दिशः ॥ १ ॥ तुर्यां चतुर्थीमुत्तरां दिशम् ॥ २ ॥ शक्राल्लब्ध्वा पृथोरश्वमेधेऽश्वविजयावसरे ॥ ३ ॥ अपत्यत्रयमेवाह । पावक इति ।

फलेच्छारहितः ॥ ३७ ॥ वैचित्रवीर्येति । स्वस्यानधिकारं मा शंकीर्मनुष्यमात्रस्यात्राधिकारात्त्वं तु विचित्रवीर्यात्मजत्वान्महाकुलप्रसूतोसीत्यभिप्रायः । यद्वाऽविचित्रमत्यद्भुतं वीर्यं प्रभावो वेदविभागकर्तृत्वलक्षणो यस्य व्यासस्य तस्यापत्यमासि तत एव तुभ्यं मयेदमुक्तमिति भावः । पृथुसंबंधिनीं पृथ्वी विद्यमानां भक्तिज्ञानादिलक्षणामिति यावत् । ननु पृथुकृतपर्वतोद्भेदादिरूपा गतिरन्यैः प्राप्तुमशक्येत्यत आह-पार्थिवीमिति । वेति । पार्थिवीं पार्थिवानां राज्ञामुचितामत्रौचित्येऽण् । मतिमिति पाठस्तु सुबोध एव ॥ ३८ ॥ प्रथयन्व्याख्यां कुर्वन्वा । निपुणां श्रीहरिप्रसादजननसमर्थाम् ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ तन्मध्येऽष्टसु मध्ये । पितुः प्राचीनबर्हिषः (१) जनिरुत्पत्तिः । तेभ्यः प्रचेतोभ्यः (२) "ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात्" इत्यतो मोक्षसिद्धये रुद्राज्ज्ञानोपदेशप्रकारो ब्रह्मपदयोग्यानामृजूनां देवानामुत्तमाधिकारित्वं चात्राध्याये वर्ण्यते तत्रादावेतस्योपोद्घातमाह-अधिराजो महाराजः । इत्यर्थ इति । संधिरत्रार्ष इति भावः । "दिशस्तु ककुभः काष्ठाः" इत्यमरः । 'कनिष्ठेऽनुजो यवीयांश्च' इति च ॥ १ ॥ विभुः समर्थः ॥ २ ॥ विजिताश्व एवांतर्द्धानसंज्ञितो जात इत्यर्थः ॥ ३ ॥ पुरा पूर्वजन्मनि । कस्मिंश्चित्कारणान्तरे यो वशिष्ठशापस्तस्मात् । योगयुक्ता गतिर्योगगतिर्देवत्वं देवानां नैसर्गिकयोगित्वात् । "योगोन्येषां प्रयत्नेन स देवानां निसर्गतः" इत्युक्तेः । पुराणांतरगम्यं शापवृत्तम् । यद्वा—अग्निर्हि सप्तर्षिभार्यारूपमोहितस्ताश्चकमे रन्तुं तदा स्वाहा तत्तद्रूपिणी भूत्वाऽग्निं सिषेवे सा महत्प्र यत्नेनापि वशिष्ठभार्यारुंधतीरूपामात्मानं कर्त्तुन्न प्रबभूव सोऽग्निस्तदा तां तादृशीमदृष्ट्वा पुनस्तामेव चकमे वशिष्ठो योगबलेन तज्ज्ञात्वाग्निमाहूय त्वं यतो मत्पत्न्याः पातिव्रत्यभंगमिच्छस्यतस्त्रिविधेनैव रूपेण मनुष्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्धानो नभस्वत्यां हविर्धानमविंदत ॥ य इंद्रमश्वहर्तारं विद्वानपि न जघ्निवान् ॥ ५ ॥ राज्ञां वृत्तिं करादानदंडशुल्कादिदारुणाम् ॥ मन्यमानो दीर्घसत्रव्याजेन विससर्ज ह ॥ ६ ॥ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् ॥ यजंस्तल्लोकतामाप कुशलेन समाधिना ॥ ७ ॥ हविर्धानाद्धविर्धानी विदुरासूत षट् सुतान् ॥ बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम् ॥ ८ ॥ बर्हिषत्सुमहाभागो हाविर्धानिः प्रजापतिः ॥ क्रियाकांडेषु निष्णातो योगेषु च कुरूद्वह ॥ ९ ॥ यस्येदं देवयजनमनुयज्ञं वितन्वतः ॥ प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम् ॥ १० ॥ सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिम् ॥ यां वीक्ष्य चारुसर्वांगीं किशोरीं सुष्ठ्वलंकृताम् ॥ परिक्रमंतीमुद्वाहे चकमेऽग्निः शुकीमिव ॥ ११ ॥ (सप्तर्षिभार्या भ्रांत्याग्निः स्वाहायां चाप्यरीरमत् ॥) विबुधासुरगन्धर्वमुनिसिद्धनरोरगाः ॥ विजिताः सूर्यया दिक्षु क्वणयंत्यैव नूपुरैः ॥ १२ ॥

पुरा यः शापस्तस्मान्मनुष्येषूत्पन्नाः संतो योगगतिमग्नित्वं प्राप्ताः ॥ ४ ॥ नभस्वत्यामन्यस्यां भार्यायाम् । अंतर्धानस्य विशेषणं य इति । एतेन शक्राद्दंतर्धानगतिलाभे कारणमुक्तम् ॥ ५ ॥ स चांतर्धानो राज्ञां वृत्तिं करादानादिभिर्दारुणां परपीडात्मिकां मन्यमानो विससर्ज ह ॥ ६ ॥ हंति स्वानां क्लेशमिति हंसस्तं पुरुषं पूर्णम् । कुशलं पुण्यं तद्रूपेण समाधिना ॥ ७ ॥ ॥ ८ ॥ हाविर्धानिर्हविर्धानस्य पुत्रः योगेषु च प्राणायामादिषु ॥ ९ ॥ क्रियाकांडनिष्णातत्वमाह । यस्येति । इदं वसुधातलं देवयजनं यज्ञवाटं वितन्वतः यत्रैको यज्ञः कृतस्तत्समीप एव यज्ञांतरं कुर्वतः सतः अत एव प्राचीनबर्हिरित्युच्यते ॥ १० ॥ समुद्रस्य कन्यां देवदेवेन ब्रह्मणोपदिष्टां शतद्रुतिं नाम किशोरीं बालां परिक्रमंतीं प्रदक्षिणं गच्छंतीम् । सुष्ठु प्रशस्तं यथा तथा अलंकृतां शुकीमिवेति । एवं ह्याख्यायते । सप्तर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः कामसंतप्तोऽभूत् तं च तद्भार्या स्वाहा नाम सप्तर्षिभार्यारूपधारिणी सती रमयामास रमयित्वा च तद्रेतः शुकीरूपेण शरस्तंबे निधायागच्छत् तां यथा सप्तर्षिभार्याभ्रांत्याऽग्निः कामितवांस्तद्वदिति । स्तुकीमिवेति पाठे स्तोकवृतधारामिवेत्यर्थः ॥ ११ ॥ सूर्यया नवोढयैव विबुधादयो विजिता अभिभूतास्तच्च नूपुरैः पादौ

भविष्यसीति प्रतीयते श्रीमहाभारतोक्तरीत्येति वा ज्ञेयम् ॥ ४ ॥ एतेन शक्राहननवचनेन । अहो मामयं यज्ञहनं ज्ञात्वापि यतो न जघानातोऽस्मै विद्यामंतर्द्धानाख्यां दास्यामीति प्रसन्नः संस्तां तस्मै ददाविति ॥ ५ ॥ "शुल्को घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम्" इति मेदिन्युक्तेश्शुल्कं क्रेतृविक्रेतृनद्याद्यवतारकेभ्यो ग्राह्यं किञ्चिद् द्रव्यम् । आदिना युद्धादिग्रहः । साक्षात्त्यागे राजमर्यादालंघनं स्यादिति भावः ॥ ६ ॥ तत्रापि दीर्घसत्रेपि । कर्म कुर्वन्नपि । समाधिना चित्तैकाग्र्येण । तल्लोकतां तत्साक्षात्कारं प्राप "हंसः शुचिषत्" इत्यादिश्रुतेः ॥ ७ ॥ विदुरेति । त्वद्वज्ज्ञानिनोप्यनासक्त्या संतत्युत्पादनं न दोषायेति भावः ॥ ८ ॥ कुरूद्वहेति । कुरुनृपोपि बहुयज्ञकृद्यथा तथा यमपीतीति त्वं जानास्येवेति भावः ॥ ९ ॥ अत एव सर्वत्र कुशैराच्छादनादेव । पृथिव्यां तादृशं स्थलं नासीद्यत्र तेन यज्ञो न कृत इति भावः । यद्वाऽनुयज्ञं प्रतियज्ञं देवानां सर्वेषां यजनमेवैनं वितन्वतः विस्तार्य मुख्यकल्पेनैव कुर्वतः ॥ १० ॥ सार्द्धेन आख्यायते महाभारते । इत्यर्थ इति । 'स्तुक । अल्पीभावे' अत इगुपधत्वात्कप्रत्यये ङीपि च स्तुकीति रूपं प्रकरणाद्घृतधारेति लब्धमिति भवः । ॥ ११ ॥ इत्यर्थ इति । किं पुनर्दर्शनादिनेति भावः । "सूर्या स्याद्रविभार्यायामोषधिभिन्नवोढयोः" इति स्वामी । 'सूर्यां वहतुना सह' इति श्रुतिरपि नवोढामेवाह—सूर्यापदेन ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् ॥ तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः ॥ १३ ॥ पित्रादिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् ॥ दश वर्षसहस्राणि तपसाऽर्चंस्तपस्पतिम् ॥ १४ ॥ यदुक्तं पथि दृष्टेन गिरिशेन प्रसीदता ॥ तद्ध्यायंतो जपंतश्च पूजयंतश्च संयताः ॥ १५ ॥ विदुर उवाच ॥ प्रचेतसां गिरित्रेण यथासीत्पथि संगमः ॥ यदुताह हरः प्रीतस्तन्नो ब्रह्मन्वदार्थवत् ॥ १६ ॥ संगमः खलु विप्रर्षे शिवेनेह शरीरिणाम् ॥ दुर्लभो मुनयो दध्युरसंगाद्यमभीप्सितम् ॥ १७ ॥ आत्मारामोऽपि यस्त्वस्य लोककल्पस्य राधसे ॥ शक्त्या युक्तो विचरति घोरया भगवान्भवः ॥ १८ ॥ मैत्रेय उवाच ॥ प्रचेतसः पितुर्वाक्यं शिरसाऽऽदाय साधवः ॥ दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः ॥ १९ ॥ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः ॥ महन्मन इव स्वच्छं प्रसन्नसलिलाशयम् ॥ २० ॥ नीलरक्तोत्पलांभोजकह्लारेंदीवराकरम् ॥ हंससारसचक्राह्वकारंडवनिकूजितम् ॥ २१ ॥ मत्तभ्रमरसौस्वर्यहृष्टरोमलतांघ्रिपम् ॥ पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवम् ॥ २२ ॥

क्वणयंत्यैव तद्ध्वनिमात्रेणेत्यर्थः ॥१२॥ तुल्यं नाम व्रतमाचारश्च येषाम् । धर्मस्नाता धर्मपारगाः ॥१३॥ तपसा तपसां पतिं हरिमर्चन्नर्चयामासुः ॥१४॥१५॥ १६ ॥ मुनयोऽपि संगत्यागेनाप्तुमिष्टं यं दध्युरेव केवलं न तु प्रापुः तेन शिवेन ॥ १७ ॥ ननु मुनीनां किं तद्ध्यानेन घोरत्वादित्याशंक्याह । आत्मारामोऽपि लोकरचनायाः पालनाय ॥ १८ ॥ गुर्वाज्ञाकारिणां शिवदर्शनं स्वत एव भवतीत्याशयेनाह । प्रचेतस इति ॥ १९ ॥ समुद्रमुप समुद्रात्किंचिन्न्यूनम् । "उपोऽधिके च" इति कर्मप्रवचनीयः । प्रसन्नाः सलिलाशया मत्स्यादयो यस्मिन् ॥ २० ॥ नीलोत्पलादीनामाकरं जन्मस्थानम् उत्पलांभोजकह्लाराणि रात्रिदिनसंध्याविकासीनि । इंदीवरं नीलोत्पलम् । तस्य पुनरुक्तिः प्राचुर्यज्ञापनार्थम् । हंसादिभिर्निकूजितम् ॥ २१ ॥ मत्तानां भ्रमराणां सौस्वर्येण हृष्टरोमाणो

प्रकृष्टे श्रीकृष्णे चेतो येषां । ते प्रचेतसः "अथ भागवता यूयं प्रियाः स्थ भगवान्यथा ।" इति रुद्रोक्तेर्ज्ञायते तेषां कृष्णचेतस्त्वम् ॥ १३ ॥ प्रजासर्गे इति निमित्ते सप्तमी । तपसे तपः कर्तुम् ॥ १४ ॥ १५ ॥ अर्थवत् प्रयोजनयुक्तम् ॥ १६ ॥ असंगात्संगं परित्यज्य ॥ १७ ॥ अत्राक्षिपति—नन्विति । राधसे सिद्धये । घोरया भयानकया 'घोरं भीमं भयानकम्' इत्यमरः । दुष्टानां भयजननाय तत्कृतोपद्रवं वारयितुं घोरां शक्तिं गृह्णातीति भावः ॥१८॥१९॥ सलिल आसमंताच्छेरते इति सलिलाशयाः महतां समचित्तत्वादिविशिष्टानां हरिभक्तानां मन इवानाविलं "महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये" इत्युक्तेः । "महच्छब्दस्तत्त्वभेदे पुंसि कण्वार्षिकृष्णयोः । वीणाभेदे स्त्रियां राज्ये क्लीबे वृद्धे तु वाच्यवत्" इति कोशोक्तेर्महतः कण्वर्षेर्मन इव स्वच्छं कण्वमनसः स्वच्छत्वं शकुंतलायाः पुत्रीत्वेन रक्षणात् ॥ २० ॥ नीलं च तद्रक्तं च नीलरक्तं तथाभूतं यदुत्पलं नीलरक्तोत्पलम् । एवश्चेंदीवरपदेन न पुनरुक्तिः । अंभोजकह्लारेंदीवरशब्दाः क्रमेण श्वेतरक्तनीलपद्मवाचकाः । 'कारंडवः प्लवो मद्गुः' इत्यभिधानात् ॥ २१ ॥ सौस्वर्येण शोभनस्वरपरंपरया ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरम् ॥ विसिस्म्यू राजपुत्रास्ते मृदंगपणवाद्यनु ॥ २३ ॥ तर्ह्येव सरसस्तस्मान्निष्क्रामंतं सहानुगम् ॥ उपगीयमानममरप्रवरं विबुधानुगैः ॥ २४ ॥ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनम् ॥ प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥ २५ ॥ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः ॥ धर्मज्ञाञ्छीलसंपन्नान्प्रीतः प्रीतानुवाच ह ॥ २६ ॥ श्रीरुद्र उवाच ॥ यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितम् ॥ अनुग्रहाय भद्रं व एवं मे दर्शनं कृतम् ॥ २७ ॥ यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे ॥ २८ ॥ स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचतामेति ततः परं हि माम् ॥ अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥ २९ ॥

लतांघ्रिपा यस्मिन्। पद्मकोशरजो दिक्षु विक्षिपता पवनेनोत्सवो यस्मिन् ॥ २२ ॥ तत्र मृदंगपणवादिवाद्यमनु पश्चाद्दिव्यैर्मार्गैः स्वरभेदैर्मनोहरं गांधर्वं गानमाकर्ण्य विस्मयं प्राप्ताः ।पाठांतरे मृदंगपणवादि अवत् रक्षत् तेषां ध्वनिमतिरस्कुर्वदित्यर्थः ॥२३॥ ते च त्रिलोचनं वीक्ष्य जाताश्चर्याः प्रणेमुरित्युत्तरेणान्वयः ॥२४॥ तप्तहेमराशिसदृशकांतिम् । शितिर्नीलः कंठो यस्य तम् ॥ २५ ॥ २६ ॥ वेदिषदो बर्हिषदः । चिकीर्षितं भगवदाराधनं मया विदितम् ॥ २७ ॥ अनुग्रहकारणमाह । यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः । कथंभूतम् । रंहसः सूक्ष्मात्त्रिगुणात्प्रधानाज्जीवसंज्ञितात्पुरुषाच्च :परम् । प्रकृतिपुरुषयोर्नियंतारमित्यर्थः ॥ २८ ॥ तत्किं तस्य महत्तमत्वादित्याह । स्वधर्मनिष्ठः पुमान्बहुभिर्जन्मभिर्विरिंचतां प्राप्नोति ततोऽपि पुण्यातिशयेन मामेति भागवतस्त्वथ देहांतेऽव्याकृतं प्रपंचातीतं वैष्णवं

तत्र सरोवरे । दिव्यैरलौकिकैर्मार्गभेदैर्गानप्रकारैः । यद्वा-दिव्यमार्गा देवास्तेषां मनोहरम् । पाठांतरे पणवाद्यवदिति पाठे । इत्यर्थ इति । एतादृशगानमस्ति येन मृदंगादिध्वनिर्नाच्छाद्यत इति भावः ॥ २३ ॥ तर्ह्येव गांधर्वश्रवणोत्तरमेव ।अमरप्रवरं सर्वदेवश्रेष्ठम् ॥२४॥२५॥ स शिवः । तान् प्रचेतसः ॥ २६ ॥ "वेदिर्विज्ञे बर्हिःपुंजे वेदी स्यात्संस्कृतावनौ । अंगुल्या भूषणे चाथ वेदो वृत्ते श्रुतौ घने" इति कोशात् । वो युष्माकमनुग्रहाय एवं विधं भद्रं कल्याणरूपं मे मया कृतं दत्तं धातूनामनेकार्थत्वात् । यद्वा-वोऽनुग्रहाय युष्माननुग्रहीतुं युष्माकं दर्शनं मया कृतमित्यर्थः ॥ २७ ॥ इत्यर्थ इति । "त्वमीशिषे जगतस्तस्थुषश्च" इति श्रवणादिति भावः । जगत्तस्थिवच्छब्दौ पुरुषप्रकृतिलक्षकौ तौ त्वमीशिषे प्रेरयसीत्यर्थः । यद्वा—त्रिगुणान्मायाशक्तेर्जीवसंज्ञिताज्जीवशक्तेश्च रहः सर्वदुर्लक्ष्यं यन्निर्गुणं ब्रह्म तस्मादपि परं "ब्रह्मणो हि प्रतिष्ठाहम्" इति श्रीगीतोक्तेः । यः साक्षात्प्रपन्नः । न तु कर्मार्पणद्वारा नापि देवतांतरभक्तिज्ञानादिव्यवधानेनेत्यर्थः । स हि सद्येव प्रिय इति तेनमद्भक्तोऽपि मे तथा न प्रिय इति भावः । तमस इति पाठं चित्सुखादयः पेठुः । तत्र तमसः प्रकृतेरित्यर्थः ॥ ॥ २८ ॥ तत्प्रियत्वं किं कुतः तस्य भगवद्भक्तस्य । अत्र विश्वनाथः-ब्रह्मविष्णुरुद्राणामस्माकं सुकृतेस्तारतम्यं सम्मुखादेव श्रृणुतेति वदन्विष्णोः सर्वतः श्रैष्ठ्यमाह विरिंचितां विरिंचिपदं तत्राप्यनिष्ठितत्त्वे शतजन्मभिरपि न प्राप्नोतीत्यर्थः । ततो विरिंचितोपि परं श्रेष्ठं मां ततोपि पुण्यातिशयैरेव । भागवतस्तु—अथ देहान्त एवाव्याकृतं वैकुंठ यथाहमेमि प्रतिक्षणमेव वैकुंठे वसन्नेकेन प्रकाशेन भगवंतं भजामीत्यर्थः । कलालिंगं तस्यांते भक्तपदेन प्रेमभक्तो ग्राह्यः "देहांते देवस्तारकं व्याचष्ट" इत्यादि श्रुतिः प्रेमभक्तपरैवेति । अत्र तीर्थस्तु—स्वधर्मो वैराग्यभक्तिज्ञानादयस्तेषु निष्ठा नितरां स्थितिर्यस्य स तथा ब्रह्मपदमेति ततः परं ब्रह्मपदानुभवानंतरं मां श्रियमेति । अथ श्रियं प्रविश्य भागवतो भगवद्भिर्भाग्यवद्भिर्युक्तो वैष्णवं पदमपरिच्छिन्नं भगवत्स्वरूपमेतीति । कलात्यये षोडशकलोपलक्षितशरीरलये सति यथाहं हरिप्रसादेन शैवं पदं प्राप्तो

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ भागवता यूयं प्रियाः स्थ भगवान्यथा ॥ न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥ ३० ॥ इदं विविक्तं जप्तव्यं पवित्रं मंगलं परम् ॥ निःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥ ३१ ॥ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयो भगवानाह ताञ्छिवः ॥ बद्धांजलीन्राजपुत्रान्नाराय णपरो वचः ॥ ३२ ॥ श्रीरुद्र उवाच ॥ जितं त आत्मविद्धुर्यस्वस्तये स्वस्तिरस्तु मे ॥ भवता राधसा राद्धं सर्वस्मा आत्मने नमः ॥ ३३ ॥ नमः पंकजनाभाय भूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे ॥ ३४ ॥

पदमेति । यथाहं रुद्रो भूत्वाऽधिकारिकवद्वर्तमानो विबुधा देवाश्चाधिकारिकाः कालात्ययेऽधिकारांते लिंगभंगे सत्येष्यंति ॥ २९ ॥ अथ भागवतत्वाद्यूयं मे प्रियाः स्थ । भवद्भिरपि मयि प्रीतिः कार्येत्याशयेनाह । मन्मत्तोऽन्यो भागवतानां च प्रेयान्नास्ति ॥ ३० ॥ अत इदं जप्तव्यम् श्रूयतामिति । विविक्तमसंकीर्णं यथा भवति ॥ ३१ ॥ सृष्ट्यादौ ब्रह्मणा सृष्ट्वा पुत्रेभ्यः प्रोक्तमिष्टदम् ॥ स्तोत्रं प्राह प्रचेतोभ्यः कृपया भगवाञ्छिवः ॥ १ ॥ ३२ ॥ ते जितं तवोत्कर्षः आत्मविद्धु र्याणां ज्ञानिश्रेष्ठानां स्वस्तये शोभनसत्तायै स्वानंदलाभायेत्यर्थः । अतो मे स्वस्ति स्वानंदसत्तास्तु । ननु ममोत्कर्षो मदर्थ एव किं न स्यात्तत्राह । भवता राधसा स्वानंदरूपेण राद्धं सिद्धम् । त्वं परमानंदरूपेणैव नित्यं स्थित इत्यर्थः । अत एवंभूतायात्मने तुभ्यं नमः सर्वस्मै सर्वरूपाय च ॥ ३३ ॥ सर्वरूपत्वं प्रपंचयन्प्रणमति सार्धैर्दशभिः । पंकजं लोकात्मकं नाभौ यस्य तस्मै कारणात्मने नमः । कारणत्वादेव सृज्यानां प्राणिनां ये उपाधयो भूतानि सूक्ष्माणि तन्मात्राणींद्रियाणि च तेषामा त्मने नियंत्रे अंतःकरणचतुष्टयाधिष्ठातृत्वेन प्रणमति चतुर्भिः श्लोकार्धैः । वासुदेवाय चित्ताधिष्ठात्रे कूटस्थाय निर्विकाराय चित्तस्यैकरूपत्वात् ॥ ३४ ॥

स्मीत्याह तत्त्वासार्वत्रिकत्वादचारुवद्भाति ॥ २९ ॥ अथ हेत्वर्थे तदेवाह भागवतत्वादिति । यथा च यूयं मे प्रियास्तथा भागवतानां सम्मतिः ॥ ३० ॥ अतो भगवद्भक्तत्वात् । इदं वक्ष्यमाणं यत् ॥ ३१ ॥ अनुक्रोशो दया हृदये यस्य स तथा "कृपा दयानुकंपा स्यादनुक्रोशोपि" इत्यमरः ॥ ३२ ॥ पुत्रेभ्यो भगवादिभ्य इत्यर्थः । भगवंतं स्तुवानो भक्तः प्रथमं जयजयेति वदेदित्याह । जितं त इति । आत्मविद्धु र्य्याणामात्मारामाणाम् । इत्यर्थ इति । "इक्श्तिपौ धातुनिर्देशे" इति श्तिप् । अस्धातुश्च सत्तामेव वदतीति भावः । शोभनसत्ता च भगवद्गुणमाधुर्योत्कृष्टतया सायुज्यस्पृहाराहित्येन शुकादीनामिव भक्त त्वेन सनातनी स्थितिः यदुक्तं "तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थम्" इति "कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः" इति च । यत आत्मविद्धुर्याणां शोभनसत्तायै तवोत्कर्ष आविष्कृतोऽतो हेतोर्मे मम सास्त्वित्यर्थः । अत्राक्षिपति—नन्विति । इत्यर्थ इति । परमानंदस्वरूपस्य तेऽन्यार्थापेक्षा नास्त्येवेति भावः । अतः सर्वोत्कृष्टत्वात् । चक्रवर्त्ती तु—भवता प्रयोजकेन यत् आराध आराधनं तेन राद्धं त स्य सिद्धिरस्तु । ननु श्रीगुरुणा मद्भक्तेनान्येन वा मदाराधनं भवति न तु मयेति तत्राह—सर्वस्मै सर्वस्वरूपायात्मने त्वमेव गुरुवैष्णवादिरूपः स्वभजनं कारयसीति भावः ॥ ३३ ॥ किंच त्वद्विषयकस्सर्वेंद्रियव्यापार एव त्वद्भक्तिः सर्वेंद्रियाणि च त्वदधीनान्यतः कृपया मदिंद्रियाणि । स्वव्यापारवंति संपादयेति प्रणमति—नम इति, पंकजनाभायेति । हे पंकजनाभ तव नाभिपंकजोद्भवाद्ब्रह्मत एव मदीयस्यास्य मर्त्यदेहस्योद्भूतत्वादिमं स्वभक्त्युन्मुखं कुरु । तुभ्यं नम इति भावनाभिप्रेता । एवं भक्त्युपयोगार्थं देहेंद्रियाणि समासेन संशोध्य पुनः प्रत्येकमपि शोधयितुं प्रथमं चित्ताधिष्ठातारं वासुदेवं प्रणमति—वासुदेवायेति । भो वासुदेव मच्चित्तं शांतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकर्षणाय सूक्ष्माय दुरंतायांतकाय च ॥ नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने ॥ ३५ ॥ नमोनमोऽनिरुद्धाय हृषीकेशेंद्रियात्मने ॥ नमः परमहंसाय पूर्णाय निभृतात्मने ॥ ३६ ॥ स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे ॥ ३७ ॥ नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे ॥ तृप्तिदाय च जीवानां नमः सर्वरसात्मने ॥ ३८ ॥ सर्वसत्त्वात्मदेहाय विशेषाय स्थवीयसे ॥ नमस्त्रैलोक्यपालाय सहओजोबलाय च ॥ ३९ ॥

संकर्षणायाहंकाराधिष्ठात्रे सूक्ष्मायाव्यक्ताय दुरंतायानंताय अंतकाय मुखाग्निना लोकदाहकाय विश्वस्य प्रकृष्टो बोधो यस्मात । अंतरात्मने बुद्ध्यधिष्ठात्रे ॥ ३५॥ हृषीकाणां चक्षुरादीनामीशं यदिंद्रियं मनस्तदात्मने । सूर्यरूपेण प्रणमति । परमहंसाय सूर्याय पूर्णाय तेजसा विश्वव्यापिने निभृतात्मने क्षयवृद्धिशून्याय ॥ ३६ ॥ स्वर्गापवर्गयोर्द्वाराय कर्मज्ञानफलभूतस्वर्गमोक्षयोर्द्वारभूताय त्रयीमयत्वादित्यर्थः । शुचिन्यंतःकरणे निषीदतीति शुचिषत्तस्मै । "हंसः शुचिषत्" इति श्रुतेः । हिरण्यं वीर्यं यस्य तस्मै अग्निरूपाय । चातुर्होत्रं कर्म तस्मै तत्साधनायेत्यर्थः । कुतस्तंतवे तद्विस्तारकाय ॥ ३७ ॥ सोमत्वमाह । ऊर्जे पितॄणामन्नाय इषे देवानामन्नाय यज्ञरेतसे सोमाय । स हि पितॄणां देवानां चान्नम् । एवंरूपाय त्रय्याः पतये हरये नमः । सूर्याग्निसोमत्वेनैव तेजस्त्वमुक्तम् । जलत्वमाह । सर्वरसात्मने जलरूपाय ॥ ३८ ॥ विशेषाय पृथ्वीरूपाय सर्वेषां सत्त्वानां प्राणिनां ये आत्मानस्तेषां देहाय स्थवीयसे विराड्देहाय च त्रैलोक्यपालाय वायवे सहआदिरूपाय स हि प्राणरूपेण त्रैलोक्यं पालयति अतस्तस्मै

निर्विकारं कृत्वा स्वरोचिषा प्रकाश्य भक्तावेव चेतय तुभ्यं नम इति ॥ ३४ ॥ भोः संकर्षणदेव ममाहंताममतयोर्वृत्तीनां देहगेहादिनिबद्धानामनंतानां तद्बंधनं संदह्य तास्ततो विच्युतीकृत्य भक्त्याश्रययोर्निबधान । तुभ्यं नमः । भोः प्रद्युम्न मद्बुद्धिं तथा प्ररोधय यथा सा भक्तावेव मां दधाति तुभ्यं नमः ॥ ३५ ॥ हे अनिरुद्धदेव मन्मनो भक्तावेवानुरंजय तुभ्यं नमः इति । अंतःकरणचतुष्टयं तदुपास्यवासुदेवादिप्रणतिभि संशोध्य बहिःकरणानि तथा देहारंभकाणि पंच भूतानि च शोधायितुमधिष्ठातृरूपत्वेन भूतरूपत्वेन च प्रणमति—नमः परमहंसेति चतुर्भिः । नितरां भृतो वृष्ट्यादिभिः पालिता आत्मानो जीवा येन तस्मै "आदित्या जायते वृष्टिः" इति स्मृतेः "भानुर्हंसः सहस्रांशुः" इत्यमरः । भोः सूर्यात्मक देव मच्चक्षुः श्रीमूर्त्तिसौन्दर्यदर्शने एव प्रवर्त्तय देहगतं सूर्यात्मकं तेजश्च शुद्ध्यतु तुभ्यं नम इति ॥ ३६ ॥ भो वह्न्यात्मक देव यथान्येषां कर्म प्रवर्त्तयसि । तथैव मम वाचां कीर्त्तनभक्तौ प्रवर्त्तय वन्ह्यात्मकं तेजश्च शुध्यतु तुभ्यं नमः ॥ ३७ ॥ भोः सोमात्मक देव मम देवर्ष्यादिऋणं संशोध्य मन्मनो भक्तावेव मज्जय सोमात्मकं तेजश्च शुध्यतु तुभ्यं नमः । पूर्वमुपास्यदैवतप्रणत्या संशोध्यापि मनसो दुर्दमत्वादधिष्ठातृदैवतप्रणत्यापि पुनः संशोधनमिदं ज्ञेयम् । एवं सूर्याग्निसोमरूपं तेजश्च तद्रूपेण प्रणत्य संशोध्य रसनेंद्रियं : रसं च संशोधयितुं रसरूपेण प्रणमति—तृप्तिदायेति । भो रसात्मक देव हरे मम रसनां भवदीयवस्तुमाधुर्य्ये एव स्वादं प्राशय दैहिका आपश्च शुध्यंतु तुभ्यं नमः ॥ ३८ ॥ हे पृथिव्यात्मक हरे मम घ्राणेंद्रियं भवदीयसौरम्य एव प्रवर्त्तयन्देहं च स्वीयपरिचर्य्यादिषु प्रवर्त्तयेति सहओजोबलायेति मन इंद्रियदेहेषु सहओजोबलरूपेण प्रविश्य तत्तत्पाटवं कर्त्तव्यमिति । हे वायुस्वरूप हरे मम त्वगिंद्रियं त्वदीयसौकुमार्यादावेवोल्लासयन् देहेंद्रियमनांस्यपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्थलिंगाय नभसे नमोंतर्बहिरात्मने ॥ नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ॥ ४० ॥ प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे ॥ नमो धर्म विपाकाय मृत्यवे दुःखदाय च ॥ ४१ ॥ नमस्त आशिषामीश मनवे कारणात्मने ॥ नमो धर्माय बृहते कृष्णायाकुंठमेधसे ॥ पुरुषाय पुराणाय सांख्ययोगेश्वराय च ॥ ४२ ॥ शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने ॥ चेतआकूतिरूपाय नमो वाचोविभूतये ॥ ४३ ॥ दर्शनं नो दिदृक्षूणां देहि भागवतार्चितम् ॥ रूपं प्रियतमं स्वानां सर्वेन्द्रियगुणांजनम् ॥ ४४ ॥

तद्रूपत्वम् । सहआदिधर्माय च॥ ३९ ॥नभसे आकाशायार्थानां लिंगाय ज्ञापकाय शब्दगुणत्वात् । अंतर्बहिरात्मनेंतर्बहिर्व्यवहारालंबनाय एवं महाभूतरूपत्वमुक्तम् । अमुष्मै स्वर्गाय भूरिवर्चसे । "एष वै ज्योतिष्मंतं पुण्यं लोकं याति" इति श्रुतेः ॥ ४० ॥ प्रवृत्ताय च निवृत्ताय च कर्मणे पितृदेवाय यथाक्रमं पितृदेवप्राप्तिफलाय अधर्मफलरूपाय च मृत्यवे॥ ४१ ॥हे ईश आशिषां कामनानां कारणात्मने सर्वकर्मफलदात्रे मनवे सर्वज्ञाय मंत्रात्मकायेति वा। विष्णुत्वेन प्रणमति । बृहते धर्माय परमधर्मात्मने कृष्णाय ॥ ४२॥ रुद्ररूपेण प्रणमति । मीढुषे रुद्राय अहंकृतमहंकारस्तदात्मने । स च कर्तृकरणकर्मशक्तित्रयसमेतस्तस्मै ब्रह्मत्वेन प्रणमति । चेतो ज्ञानमाकूतिः क्रिया तद्रूपाय वाचो विविधा भूतिः सृष्टिर्यस्मात्तस्मै ॥ ४३ ॥ एवं नमस्कृत्य दर्शनं प्रार्थयते दर्शनमिति नवभिः । भागवतैः सत्कृतं दर्शनं देहीत्यस्य विवरणं रूपमित्यादि प्रदर्शयेत्यं तम् । स्वानां भक्तानां प्रियतमं रूपं प्रदर्शयेति नवमेनान्वयः । सर्वेषामिंद्रियाणां ये गुणा विषयास्तेषामंजनं व्यंजकम् । सर्वेंद्रियविषयविषयिरूपमित्यर्थः । सर्वेंद्रियाणि

भजनसामर्थ्यवंति कुरु तुभ्यं नमः । भो नभस्वरूप हरे मम श्रोत्रं भवत्सौस्वर्य्य एव प्रवर्त्तय स्वीयनाममंत्रभक्तिशास्त्रार्थं स्फोरय मम नभस्तत्त्वं च शुद्ध्यतु तुभ्यं नम इति ॥ ३९ ॥ एवं स्वीयभूतेंद्रियमनांसि भगवदुपासनोन्मुखीकृत्यापासनाप्राप्यवैकुंठलोकस्वरूपत्वेन प्रणमति—पुण्याय सर्वोत्तमाय "पुण्यं स्यात् सुकृते शुद्धे सुंदरे च परात्मनि । उत्कर्षे वाच्यवत्" इत्यभिधानात् । भूरिवर्चस इति । लोकांतरव्यावृत्तिः। अत्र वैकुंठलोके प्रमाणमाह-एष इति । एष भगवद्भक्तः ज्योतिस्स्वतःसिद्धप्रकाशस्तद्विद्यते यत्र स तथा तं "यद्भ्राजमानं स्वरुचैव सर्वतः" इत्युक्तेः । पुण्यमतीव शुद्धं भगवद्वासत्वात् "यत्र व्रजंत्यनिमिषामृषभानुवृत्त्या" इति यात्यंजसाच्युतपदमच्युतप्रियबांधवाः "इत्याद्युक्तेर्भक्त्यैव तत्प्राप्यते नान्येनेति श्रुत्यर्थः ॥ ४० ॥ धर्मांतरस्यापि प्रयोजकत्वेन प्रणमति—प्रवृत्तायेति । अधर्मफलदातृत्वेन प्रणमति—अधर्मस्य विपाकः फलं यस्मात्तस्मै ॥ ४१ ॥ विहितकर्मफलदातृत्वेन प्रणमति—हे आशिषामीश स्वर्गादिफलदायिन् । अथ त्रिदेवीरूपत्वेन स्तुत्येषु विष्णुरूपत्वे पद्मनाभाभेदेनैव स्तौति—नमो धर्मायेति । तत्र पुरुषाय पुराणायेति पद्मनाभरूपेण निःश्वासप्रवर्त्तितवेदद्वारा धर्माय बृहते नमः । स्वयं भगवद्धर्मस्वरूपेण तदनुगतसर्वधर्मप्रवर्त्तनद्वारा सांख्ययोगेश्वरायेति कपिलदत्तात्रेयादिरूपेण तत्तद्धर्मप्रवर्त्तनद्वारा कृष्णायाकुंठमेधस इति । परब्रह्मरूपेण ज्ञानप्रवर्त्तनद्वारा विश्वपालकायेत्यर्थः । व्यंतिक्रमनिर्देशश्च तदिच्छाया अनैयत्यात् ॥ ४२ ॥ अहंकारस्याधिदैवादिभेदत्रयसहितस्य पुनरपि तदधिष्ठातृदेवतस्वरूपप्रणत्या संशोधनमाह—शक्तीति । भो रुद्ररूप हरे ममाहंताममतयोर्वृत्तयः शुद्ध्यन्तु भक्तिमय्यो भवंतु तुभ्यं नमः । ज्ञानेंद्रियकर्मेंद्रियाणां शुद्धिमाह-वाचो वेदलक्षणायाः वाच इति तदुपलक्षितानां कर्मेंद्रियाणां शुद्धिर्व्यंजिता ज्ञानेंद्रियाणामपि शुद्धिः पूर्वमुक्तापि पुनरनया प्रणत्यापि ज्ञेया । हे ब्रह्मस्वरूप हरे मम बुद्धिप्रणवृत्तीर्भक्त्युन्मुखी कुरु तुभ्यं नम इति ॥ ४३ ॥ एवं स्मरन् प्रणतिभिरेव स्वस्यदेहेंद्रियमनसां शुद्ध्या योग्यतामापाद्य निजाभीष्टं दर्शनं प्रार्थयते । ननु कीदृशं दर्शनं त्वदभिमतं ददानि तत्राह—भागवतैर्भगवदनुरागिभिर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्निग्धप्रावृड्घनश्यामं सर्वसौंदर्यसंग्रहम् ॥ चार्वायतचतुर्बाहुं सुजातरुचिराननम् ॥ ४५ ॥ पद्मकोशपलाशाक्षं सुन्दरभ्रूसुनासिकम् ॥ सुद्विजं
सुकपोलास्यं समकर्णविभूषणम् ॥ ४६ ॥ प्रीतिप्रहसितापांगमलकैरुपशोभितम् ॥ लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलम् ॥ ४७ ॥ स्फुर
त्किरीटवलयहारनूपुरमेखलम् ॥ शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥ ४८ ॥ सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभम् ॥ श्रियाऽनपा
यिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ॥ ४९ ॥ पूररेचकसंविग्नवलीवल्गुदलोदरम् ॥ प्रतिसंक्रामयद्विश्वं नाभ्याऽऽवर्तगभीरया ॥ ५० ॥

स्वगुणैरनक्ति रंजयतीति वा ॥ ४४ ॥ स्निग्धः प्रावृषि यो घनस्तद्वच्छ्यामम् । सर्वेषां सौंदर्याणां संग्रहो यस्मिन् । चारव आयताश्चत्वारो बाहवो यस्मिन् । सुजातं
यथोचितं सर्वावयवरुचिरमाननं यस्मिन् ॥ ४५ ॥ पद्मस्य कोशे मध्ये यानि पलाशानि दलानि तद्वदक्षिणी यस्मिन् । सुकपोलमास्यं यस्मिन् समौ कर्णौ विभूषणं
यस्य कुंडलयोरग्रे वक्ष्यमाणत्वात् ॥ ४६ ॥ प्रीत्या प्रहसिताविवापांगौ यस्मिन् ॥ ४७ ॥ स्फुरंति किरीटादीनि यस्मिन् शंखादिमत् उत्तमर्द्धिर्लक्ष्मीः । यद्वा एतैरुत्तमा
ऋद्धिरुत्कर्षो यस्यास्ति तत् ॥ ४८ ॥ सौभगयुक्ता ग्रीवा येन सिंहस्य स्कंधे परितः प्रसरंतः केसरा एव त्विषस्तादृशीः सर्वतस्त्विषो बिभ्रच्चासौ सौभगग्रीवश्च कौस्तुभो
यस्मिन् । यद्वा सिंहस्येव स्कंधौ तयोस्त्विषः कुंडलहारादिदीप्तीर्बिभ्रदिति पृथग्विशेषणम् । सौभगयुक्ता ग्रीवा येन स कौस्तुभो यस्मिन् । श्रिया हेतुभूतया क्षिप्तस्तिरस्कृतो
निकषाश्मा स्वर्णरेखांकितो निकषणपाषाणो येन तादृशेनोरसा उल्लसच्छोभमानम् ॥ ४९ ॥ श्वासोच्छ्वासाभ्यां संविग्नाश्चंचला वलयास्ताभिर्वल्गु सुंदरं दलवदश्व

चिंतं न तु बौद्धाद्यैरित्यर्थः । इंद्रियगुणा रूपादयः । विषयेपि गुणपदं प्रयुज्यते इति । इत्यर्थ इति । दर्शनादियोग्यमिति भावः । सर्वेषामेव रूपं सर्वेन्द्रियविषयमस्ति तत्र को विशेष इति चेत्तत्राह—सर्वेंद्रियाणीति ।
स्वगुणैरसाधारणसौन्दर्य्यमाधुर्य्यादिभिरित्यर्थः ॥ ४४ ॥ किञ्च स्निग्धेति स्नेहवत्त्वस्नेहजनकत्वचिक्कणत्वान्युक्तानि प्रावृड्घनेति । रसवर्षित्वसर्वतापोपशमकत्वमनश्वातकहर्षत्वानि श्लेषेण प्रकर्षेण आ सम्यगेव वर्षति भक्तमनो
रथमिति प्रावृड्घनश्याममतिनिबिडश्यामं सर्वेषामेव प्राकृताप्राकृतवस्तुनिष्ठानां सौंदर्य्याणां संग्रहो यत्र तत् यद्वा—सौंदर्यकर्तृकं सम्यग्ग्रहणमाकर्षणं यत्र तदित्यत एवान्यत्र तादृशसौंदर्यं नास्तीत्यर्थः । यद्वा—सर्वसौन्दर्य्येण
कर्त्रा सम्यगासत्त्यैव ग्रहणं यस्येति सर्वसौंदर्यमपि स्वं सफलयितुं यदेव गृह्णातीति भावः । यद्वा—सुंदरीणां समूहः सौंदर्यं सर्वं च तत्सौंदर्यं त्रिलोकीगतस्त्रीसमूहं सर्वसौंदर्यं तेन सम्यग्गृह्यते यत्तत्तथा "दिवि भुवि च
रैसायां काः स्त्रियस्तद्दुरापाः" इति 'का स्त्री न चलेत्त्रिलोक्याम्' इत्याद्युक्तेः । चतसृषु दिक्षु भुजा यस्येति पद्मनाभोपासकाः चत्वारो भुजा यस्येति वैकुंठोपासकाः । प्रेयसीसाहित्यादेव चतुर्भुजा इति श्रीकृष्णोपासकाः ।
"सुजातं कोमलं विदुः" इत्यभिधानात् ॥ ४५ ॥ तद्वत्कोमले विस्तृते चाक्षिणी यस्य तत् ॥ ४६ ॥ 'अलकाश्चूर्णकुंतलाः' ॥ ४७ ॥ श्रियानपायिन्येत्यनेन पुनरुक्तिमाशंक्याह—यद्वेति । उत्तमा उत्कृष्टा, ऋद्धिश्शोभा ।
"ऋद्धिश्शोभा रमौषधी" इति निघंटुः ॥४८॥ सिंहस्कंधत्विष इव त्विषः सिंहस्कंधत्विष इत्युपमानोत्तरपदलोपो बाहुलकात् । पुनस्ता बिभर्तीति सिंहस्कंधत्विषो बिभ्रत् अलुक्समासः । पुनः सौभगेत्यादिना कर्मधारय इति
ऋजुमार्गेण सिध्यतोर्थस्य वक्रेणादर्शनायोगादितिन्यायेन तत्र गौरवमालोक्याह-यद्वेति ॥४९॥ वल्गंति चलंति दलानि पत्राणि यस्य स वल्गद्दलोऽश्वत्थः "बोधिद्रुमश्चलदलो ह्यश्वत्थः कुंजराशनः" इत्यमरः । लेखकप्रमादादेव
वल्गुशब्द उकारांतोऽत्रप्रतिभाति । स्वामिचरणैरप्यत्र न हि दलशब्देनाश्वत्थो गृहीतः किन्तु वल्गद्दलशब्देनैव चलदलपदसमानार्थकत्वादेकदेशन्यायस्त्वगतिकगतिक एवेति । आधुनिकैः वल्गुसुंदरमिति व्याख्यातं च तदचारु

॥ ८१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्यामश्रोण्यऽधिरोचिष्णुदुकूलस्वर्णमेखलम् ॥ समचार्वंघ्रिजंघोरु निम्नजानु सुदर्शनम् ॥ ५१ ॥ पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोंतरघं विधुन्वता ॥ प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषाम् ॥ ५२ ॥ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सता ॥ यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठताम् ॥ ५३ ॥ भवान्भक्तिमता लभ्यो दुर्लभः सर्वदेहिनाम् ॥ स्वाराज्यस्याप्यभिमतं एकांतेनात्मविद्गतिः ॥ ५४ ॥

त्थपत्रसदृशमुदरं यस्मिन् । आवर्तगभीरया दक्षिणावर्तेन निम्नया प्रतिसंक्रामयद्यतो निर्गतं तेनैव द्वारेण पुनः प्रवेशयदिव ॥ ५० ॥ श्यामश्रोण्याधिकं रोचिष्णु यत्पीतं दुकूलं तत्र स्वर्णमयी मेखला यस्मिन् अंघ्री च जंघे च उरू च निम्ने अनुन्नते जानुनी च समैश्चारुभिरेतैः शोभनं दर्शनं यस्य समाश्चारवोंघ्र्यादयो यस्मिन् निम्ने जानुनी यस्मिन् शोभनं दर्शनं यस्येति पदत्रयं वा ॥ ५१ ॥ पदा दीपस्थानीयेन यद्वा एवंभूतेन पदोपलक्षितं रूपं पदं शरणं प्रदर्शयेत्यर्थः । शरदि यत्पद्मं तस्य पलाशं तद्वद्रोचिर्यस्य तेन नखदीप्तिभिरंतर्भवमघमज्ञानं विधुन्वता स्वीयं पदं शरणं प्रदर्शय अपास्तं प्रह्लादादीनां साध्वसं येन तत् हे गुरो यतस्त्वमेव तमोजुषामज्ञानामस्माकं मार्गं प्रदर्शको गुरुः ॥ ५२ ॥ अतिदुर्लभमिदं मया प्रार्थितमिति स्तोतैवाह । एतद्रूपमनुध्येयं ध्यानार्हमेव न तु प्रत्यक्षतः प्राप्यमित्यर्थः ॥ ५३ ॥ तर्हि किं केनापि न प्राप्यते तत्राह । भवानिति । दुर्लभत्वमेवाह । स्वर्गे राज्यं यस्य तस्याप्यभिमतः स्पृहणीयः । किं च एकांतेन य आत्मवित्तस्यापि गतिर्गम्यः ॥ ५४ ॥

प्रतीयत इति । आवर्त्तेन दक्षिणावर्त्तेन गभीरया निम्नया नाभ्या विश्वं प्रति संक्रामयदित्यन्वयः । तयैवोद्भूतः पुनस्तयैव स्वस्मिन्प्रवेशयदिव स्वसौंदर्य्येणाकर्षदिवेत्यर्थः ॥ ५० ॥ संभवत्वात्पदत्रयत्वेनव्याख्येयं बहुपदसमासस्य दुरूहत्वात् ॥ ५१ ॥ स्वेन स्वस्य दर्शनस्य हास्योत्पादकत्वादाह । यद्वेति । इत्यर्थ इति "पदं व्यवसितत्राण—" इत्यादिकोशादिति भावः । यद्वा हे प्रभो तव सर्वांगलावण्यं प्राप्तं किं तु चरणतलमाधुर्य्यं नोपलब्धं तत्र यद्यपि महायोगपीठे तिष्ठतस्तव द्वयोः पदयोः सामस्त्येन दर्शनासंभवस्तथाप्येकेन पदा भुवमवष्टभ्यापरं पदं किञ्चिदुन्नमय्य दर्शयेत्याह—पदैव पदं दर्शय वामपदा भुवमवष्टभ्य दक्षिणं पद किञ्चित्तिरश्चीनीकृतमुन्नमय्य प्रदर्शय यथा चक्रध्वजवज्रांकुशादिदर्शनेन संसारभयं निवर्त्तयेत्याह—अपास्तेति । ननु कथमीदृशी मतिस्तवाजनीति तत्र श्रीगुरुप्रसादादित्याह—हे गुरो तमोजुषामज्ञानतिमिरांधचक्षुषामस्माकं मार्गगुरुर्भक्तिमार्गोपदेष्टा त्वमेव गुरुरूपधारीत्यर्थ इति विश्वनाथः ॥ ५२ ॥ इदं श्रीमद्दर्शनं, स्तोता रुद्रः । इत्यर्थ इति । ध्यानार्हस्य प्रत्यक्षत्वप्रार्थनं दुर्लभमेवेति भावः । विश्वनाथः—यावद्दर्शनं न लभ्यते साधकभक्तेन तावदेतद्रूपमेव पुनःपुनर्ध्येयमात्मनो जीवस्य शुद्धिमविद्यामालिन्यक्षालनमिच्छतेति न तु प्रकारांतरेण त्वंपदार्थशुद्धिर्भक्तानामुचितेति भावः । यथा वासुदेवादिप्रणतिभिर्देहद्वयशुद्धिरुक्ता तथा स्निग्धप्रावृडित्यादिध्यानपौनःपुन्येन जीवस्य शुद्धिरियमुक्ता ततो दर्शनं ततः पार्षदत्वप्राप्तिरिति शुद्धभक्तमतं दार्शितम् । किमत्र माहात्म्यं वाच्यं यतः स्वस्वधर्ममनुतिष्ठतामाश्रमिणामपि यस्य भक्तियोग एवाभयदो न तु कर्मज्ञानादिरित्यर्थः । संदर्भस्तु—यद्यस्माद्भक्तियोगः प्रेमा भवति तच्च ध्यानं गाढश्रद्धावत्त्वाभावेन स्वधर्मसापेक्षाणां भक्तियोगाभासं जनयति स च संसारभयत्राणमात्रं करोतीत्याह—अभयद इति ॥ ५३ ॥ ध्यानकैवल्यं कुर्वता प्रशस्तभक्तियोगयुजा तु भवानपि लभ्यते इत्याह—भवानिति । भवांश्च जीवन्मुक्तपर्य्यंतानां दुर्लभः स्वाराज्यस्याप्यभिमतः लब्धे सालोक्यादिकेऽपि वांछितः एकांतेन सालोक्यादिसुखनिरपेक्षेण भक्तियोगेन तु आत्मविदां भवदेकज्ञानिनां गतिः परमफलरूपः । स्वामिचरणाः—यदि सर्वथा दुर्लभस्तर्हि किं शंकायां स्वर्गपदमुपलक्षणं ब्रह्मपदादेरपि तेन ब्रह्मणोपि वांछनीय एव न तु प्राप्य इत्यर्थः । न केवलमिंद्रादेरेव किं तु ज्ञानिनामपीत्याह—किं चेति एकांतेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं दुराराध्यमाराध्य सतामपि दुरापया ॥ एकांतभक्त्या को वांछेत्पादमूलं विना बहिः ॥ ५५ ॥ यत्र निर्विष्टमरणं कृतांतो नाभिमन्यते ॥ विश्वं विध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा ॥ ५६ ॥ क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ ५७ ॥ अथानघांघ्रेस्तव कीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनाम् ॥ भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्संगमोऽनुग्रह एष नस्तव ॥ ५८ ॥ न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् ॥ यद्भक्तियोगानुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते गतिम् ॥ ५९ ॥

अतस्त्वद्व्यतिरेकेण न किंचिद्वांछामीत्याह । तं त्वामेकांतभक्त्याराध्य बहिः स्वर्गादिसुखम् ॥ ५५ ॥ तत्र हेतुः । यत्र पादमूले शरणं प्रविष्टं कृतांतः कालो ममायं वश्य इति नाभिमानं करोति । किं कुर्वन् । वीर्यं प्रभावः शौर्यमुत्साहस्ताभ्यां विस्फूर्जितया क्षुभितया भ्रुवा विश्वं विध्वंसयन्नपि ॥ ५६ ॥ त्वत्पादमूले प्रविष्टस्य कृतांतभयाभावः कियानयं लाभो यतस्त्वद्भक्तसंग एव सकलपुरुषार्थश्रेणिशिरसि नरीनर्तीत्याह । क्षणार्धेनेति । भगवतस्तव संगिनां संगस्य क्षणार्धेनापि स्वर्गं न तुलये समं न गणयामि न चापुनर्भवं मोक्षं मर्त्यानामाशिषो राज्याद्याः किमुत ॥ ५७ ॥ अथ अतो हेतोरनघावघहरावंघ्री यस्य तस्य तव कीर्तिर्यशस्तीर्थं गंगा तयोः क्रमेणांतर्बहिःस्नानाभ्यां विधूतः पाप्मा येषाम् । अत एव भूतेष्वनुक्रोशः कृपा सुसत्त्वं च रागादिरहितं चित्तं शीलं चार्जवादि विद्यते येषां तेषां संगमोऽस्माकं स्यात् एष एव नस्तवानुग्रहः ॥ ५८ ॥ तत्त्वज्ञानं च त्वद्भक्तसंगादेव भवतीत्याह । न यस्येति । येषां सतां भक्तियोगेनानुगृहीतं शुद्धं सद्यस्य चित्तं बाह्यार्थविक्षिप्तं न भवति तमोरूपायां गुहायां च नाविशल्लयं न प्राप तत्र तदा मुनिस्तव गतिं तत्त्वं पश्यति ॥ ५९ ॥

निश्चयेन गम्यो गन्तुमर्ह एव न त्ववगत इति भावः ॥ ५४ ॥ यतः स एव ब्रह्मादिस्पृहणीयोऽतो हेतोः तद्व्यतिरेकेण तं विहाय सतां सन्मार्गप्रविष्टानामपि किं पुनरन्येषां न कोपीत्यर्थायातम् ॥ ५५ ॥ तंत्र पादमूलांगीकारे ॥ ५६ ॥ क्षणार्द्धेनेति । किमु तद्वित्र्यादिक्षणेन किमुततरां तत्फलभूतया भक्त्या किमुततमां भक्तिफलेन प्रेम्णेति कैमुत्यातिशयो द्योतितः । स्वर्गं कर्मफलमपुनर्भवं ज्ञानफलं मोक्षमपि न तुलये किमुत ज्ञानं किमुततरां कर्म किमुततमां राज्याद्या दृष्टा आशिषः अहं न तुलये गौरवलाघवयोरतिस्पष्टत्वादिति भावः ॥ ५७ ॥ विधूतोऽपास्तोऽन्येषामपि पाप्मा यैरिति वा । अत एव विधूतपाप्मत्वादेव त्वदनुग्रह इत्यनेनैव वयं कृतार्था इत्यर्थः ॥ ५८ ॥ चक्रवर्त्ती तु—त्वदीयसाधुसंगादेव चित्तं विशेषतः शुद्धेत् विशुद्धे च चित्ते त्वद्रूपली लालावण्यानुभवः स्यादिति विशुद्धमेव चित्तं लक्षयति । यस्य चित्तं बहिरर्थविभ्रमं न त्वदीयश्रवणस्मरणादिसमये बाह्यार्थैः स्त्रीपुत्रधनादिचिंतनैर्विक्षिप्तं न भवति तमोगुहायां सुप्तगह्वरे च न प्रविष्टं त्वदीयस्मरणश्रवणादिसमये यच्चित्तं लयविक्षेपयुक्तं न भवतीत्यर्थः । तत्र हेतुः यत्खलु भक्तियोगेनानुगृहीतं तत् शुद्धं भवति । अयंभावः—दशनामापराधा भक्त्यपराधा एव लयविक्षेपकारकास्तेषामपगमे एव भक्तिदेवी प्रसीदति प्रसीदंत्या ॥ ८२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् ॥ तत्त्वं ब्रह्म परं ज्योतिराकाशमिव विस्तृतम् ॥ ६० ॥ यो माययेदं पुरुरूपयाऽसृजद्विभर्ति भूयः क्षपयत्यविक्रियः ॥ यद्भेदबुद्धिः सदिवात्मदुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि ॥ ६१ ॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति सिद्धये ॥ भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च त एव कोविदाः ॥ ६२ ॥ त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्त्वतमो विभिद्यते ॥ महानहं खं मरुदग्निवार्धराः सुरर्षयो भूतगणा इदं यतः ॥ ६३ ॥

कीदृशं तत्त्वं तदाह । यत्रेति ॥६०॥ जगत उपादानत्वेन तत्त्वं लक्षितम् । निमित्तत्वेनापि तदेव लक्षयन्नाह । य इदं विश्वं सदिव परमार्थमिव माययाऽसृजत् । कथंभूतया । यया भेदबुद्धिरन्येषां भवति तया आत्मनि त्वयि दुःस्थया स्वकार्यं कर्तुमसमर्थया । तं त्वां निरस्तभेदं प्रतीमहि जानीमः ॥ ६१ ॥ यद्यपि त्वमेव निर्भेदं ब्रह्म तथापि प्रागुक्तं साकारमिदं तव रूपं ये यजंति त एव वेदागमतत्त्वज्ञा इत्याह । क्रियाकलापैर्यैः कर्मयोगिनः पूजयंति त एव कोविदाः न त्वेतदनादृत्य केवलज्ञाने प्रवृत्ताः । तंत्रे आगमे । कथंभूतमिदम् । भूतेंद्रियांतःकरणैरस्वतंत्रैर्यदुपलक्ष्यते नियंतृरूपं तत् ॥ ६२ ॥ नन्वभिन्ने मयि भेदं कुर्वंतः संतः कथं ते कोविदाः न हि तैर्भेदः क्रियते त्वयैव क्रीडार्थं चेतनाचेतनात्मको भेदः कृत इत्याह । त्वमिति आद्यस्त्वमेक एव । सुप्ता मायाख्या शक्तिर्यस्य पश्चात्तया शक्त्या रजःसत्त्वतमसां द्वंद्वैक्यं यतो रज आदेः महान

एव तस्या अनुग्रहः स्यात्स च भक्तिसमयगतलयविक्षेपाभावगम्य इत्यतस्तत्र शुद्धे चित्ते मुनिर्मननशीलः संस्तव गतिं चेष्टां लीलालावण्यादिकं विचष्टे पश्यति ॥ ५९ ॥ यत्राधिष्ठाने तदज्ञानेनेदं विश्वं व्यज्यते । विश्वस्मिन्ननुगतसच्चिद्रूपेण यद्भाति त्वंपदलक्ष्यं प्रत्यक् चैतन्यं त्वमेव तत् नान्योतोऽस्ति द्रष्टा "तत्त्वमसि" इति श्रुतेः । संदर्भः—त्वदीयभक्तियोगानुग्रहं विना ब्रह्मत्वभगवत्त्वान्तर्यामित्वकालत्वभेदेनांतरंगबहिरंगाविर्भावेषु तवातिदुर्बोधत्वदुराराध्यत्वदुर्वहत्वदुस्सहत्वान्येवेत्याशयेनाह—यत्रेति सप्तभिः । अत्र ब्रह्मत्वमाहाद्येन तद्ब्रह्मत्वमिति योज्यं ततश्च स्वभक्तियोगं विना तदेतदपि दुर्बोधं स्यादिति भावः । विश्वनाथः—यत्तु कश्चिन्मुनिस्तव ब्रह्मस्वरूपं विचष्टे तदपि त्वमेव तवैव परममहतस्तन्महिमव्यापकन्तेज इत्याह-यत्रेति ॥ ६० ॥ स्वकार्यं व्यामोहादिकं कर्त्तुमसमर्थया विलज्जमानया । यस्येत्याद्युक्तेर्यथा ह्यप्रतिबुद्धस्येत्याद्युक्तेश्च । निरस्तभेदमित्यात्मतंत्रमित्यतः फलितम् । संदर्भः—भगवत्त्वमाह—य इति । यदित्यस्यान्ते यद्यया भेदबुद्धिः परमेश्वरात्त्वत्तोऽन्ये स्वतंत्रसत्ताका इति बुद्धिर्भवति आत्मदुस्थया त्वयि स्वरूपभूतमहाभगवत्त्वदर्शनेनात्मनि दुस्थया स्वं दौष्ठ्यं दर्शयंत्या । विश्वनाथः—वयं तु त्वां भगवत्स्वरूपमेवानुभवाम इत्याह—यो भवान् इदं पुरुषरूपेणासृजत् विष्णुरूपेण बिभर्त्ति पालयति संकर्षणरूपेण क्षपयति । मायया कीदृश्यात्मनि त्वयि दुस्थया यद्यस्या मायाया भेदे भेदप्रभेदरूपे जगत्येव बुद्धिर्ज्ञानं लोकानां स्यात् तच्च ज्ञानं सदिव प्रशस्तमिव न तु प्रशस्तमित्यर्थः । क्लीबत्वमार्षम् । हे भगवन् श्रीकृष्ण तं त्वामात्मतंत्रं प्रतीमहि साक्षादनुभवेमहि प्रार्थनेयम् ॥ ६१ ॥ संदर्भः अंतर्यामित्वमाह-क्रियेति । इदमेवेति त्रयाणामभेदं दर्शयति कर्ममार्गे ये सर्वांतर्यामिदृष्टितत्परास्त एव भगवत्तत्त्वकोविदा नान्ये ततः किं पुनर्भक्तिमार्गे साक्षात्तदुपासका इत्यर्थः । यद्वा—सिद्धये बोधदार्ढ्याय इदमेव ध्याने उक्तमेव उपसमीपे साक्षितया लक्षणया लक्षितं "योऽन्यां देवतामुपास्तेऽन्योसावन्योहं न स वेद यथा पशुः" इति श्रुतेः ॥ ६२ ॥ अत्राक्षिपति—नन्विति । तैः सद्भिः । तया शक्त्या । उद्बुद्ध्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन ॥ अथो विदुस्तं पुरुषं संतमंतर्भुंक्ते हृषीकैर्मधु सारघं यः ॥ ६४ ॥ स एष लोकानतिचंडवेगो विकर्षसि त्वं खलु कालयानः ॥ भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाऽविषह्यः ॥ ६५ ॥ प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसम् ॥ त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः ॥ ६६ ॥ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेऽवमानव्ययमान केतनः ॥ विशंकयाऽस्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश ॥ ६७ ॥

हंकारः खं च मरुदग्निर्वार्धराश्च । वारुदकम् । सुराश्चर्षयश्च भूतगणाश्चैवमिदं जगद्यतो भवति तद्विभियत इत्यन्वयः ॥ ६३ ॥ एतदुपपादयति । सृष्टमिति । जरायुजांडजस्वेदजोद्भिज्जरूपेण चतुर्विधं स्वांशेन प्रविष्टः । अथो इति हेतोः पुरस्यांतः संतमंशं चिदाभासं पुरि शयनात्पुरुषं विदुः । तर्हि किमीश्वरमेव संसारिणं विदुर्नेत्याह । सरघा मधुमक्षिकास्ताभिः सृष्टं मध्विव क्षुल्लकं विषयसुखमविद्यावृतः सन्यो भुंक्ते तं जीवं विदुः । तथा च श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति । निर्णीतं च "गुहां प्रविष्टावात्मनौ हि तद्दर्शनात्" इत्यत्र ॥ ६४ ॥ तव तु सर्वनियंतुः कुतः संसार इत्याह । यः स्वशक्त्येदं सृष्टवान्स एष त्वं खलु भूतैरेव भूतानि मेघपंक्तिर्वायुरिव अनवहितम् । कालयन्विचालयँल्लोकान्विकर्षसि संहरसि अनुमेयतत्त्वो लक्ष्यस्वरूपः ॥ ६५ ॥ विकर्षणप्रकारमाह । प्रमत्तमिति । इतिकृत्यमेवमेवमिदं कर्तव्यमिति चिंतयोच्चैः प्रमत्तमनवहितम् । तत्र हेतुः । विषयेषु लालसमतिकामुकम् । प्राप्तेऽपि विषये प्रवृद्धलोभम् । अंतकस्त्वमभिपद्यसे आक्रमसि । क्षुधा लेलिहानो जिह्वयौष्ठप्रांतौ स्पृशन्सर्पो मूषकमिव ॥ ६६ ॥ अतः कस्तव पादाब्जं त्यजेत्पंडितश्चेत् । कथंभूतः । यस्तवावमानोऽनादरस्तेन व्ययमानम् । अय गतौ ।

मायाशक्त्या । तत् रजआदि त्वत्तो विभिद्यते पृथक् क्रियते इति वा संदर्भः । अंतर्यामित्वमेव ज्ञापयति त्वमेक इति द्वाभ्यां तत्र प्रथमेनांशानुवादो द्वितीयेनांशप्रातिपादनम् ॥ ६३ ॥ एतद्विभेदनमेव । श्रुतिस्तु बहुत्र व्याख्याता । इत्यत्र सूत्रे जीवपरात्मानावंतस्थौ द्वावेवति निर्णीतम् । जीवपरमात्मानावेव गुहां हृदयाकाशं प्रविष्टौ न तु बुद्धिजीवौ । ऋतं पिबंतावित्यत्र कर्मफलभोगश्रवणे एकस्तावदात्मेति द्वितीयोप्यात्मैव न्याय्यः कुतस्तद्दर्शनात् संख्याश्रवणे हि संख्यावतोरेकरूपत्वस्य लोके दर्शनात् । तथाहि—अस्य गोर्द्वितीयोन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोन्वेष्टव्यो नाश्वो न मनुष्य इति । एवं चेतनत्वसामान्याज्जीवपरमात्मानावेवेति सूत्रार्थः । किञ्च—सारघदृष्टांतेन तन्मक्षिकादंशतत्त्वेपि तद्भोजनात्यागादासक्तिर्द्योतिता । ततश्चातिशयोक्त्यलंकारेणाभक्त्या सदुःखं विषयसुखं तुच्छमविद्यावृतो यो भुंक्ते इत्यर्थः ॥ ६४ ॥ संदर्भः कालत्वमाह द्वाभ्यां—सर्वदुःखहंतारि सर्वसुखदातारि स्वस्मिन्नुन्मुखं विधातुं दययैव तथा विभीषयस इति भावः । चक्रवर्ती—तमेव भक्तिहीनं जीवं सपरिच्छेदमेव कालस्वरूपस्त्वमाकर्षयसीत्याह स एष इति द्वाभ्याम् । चंडवेगोऽसह्यवेगः । भूतानि भूतैरिति । "जीवो जीवस्य जीवनम्" इति न्यायेनेत्यर्थः ॥ ६५ ॥ तत्र प्रमत्तत्वे । अत्र कोशगतभ्रमरदृष्टान्तोप्यनुसंधेयः स च "रात्रिर्गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पंकजश्रीः । इत्थं विचिंतयति कोशगते द्विरेफे हा हंतहंत नलिनीं गज उज्जहार" इति ॥ ६६ ॥ एवंभूतं त्वां निर्बुद्धिरेव भजेदित्याह—क इति । अतः कालरूपत्वात्तव दुष्टजनकृतोनादरोऽवमानस्तेन ॥ ८३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ त्वमसि नो ब्रह्मन्परमात्मन्विपश्चिताम् ॥ विश्वं रुद्रभयत्रस्तमकुतश्चिद्भया गतिः ॥ ६८ ॥ इदं जपत भद्रं वो विशुद्धा नृपनन्दनाः ॥ स्वधर्म
मनुतिष्ठंतो भगवत्यर्पिताशयाः ॥ ६९ ॥ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितम् ॥ पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिम् ॥ ७० ॥ योगादे
शमुपासाद्य धारयंतो मुनिव्रताः ॥ समाहितधियः सर्व एतदभ्यसतादृताः ॥ ७१ ॥ इदमाह पुराऽस्माकं भगवान्विश्वसृक्पतिः ॥ भृग्वादीनामा
त्मजानां सिसृक्षुः संसिसृक्षताम् ॥ ७२ ॥ ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः ॥ अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ॥७३॥ अथेदं
नित्यदा युक्तो जपन्नवहितः पुमान् ॥ अचिराच्छ्रेय आप्नोति वासुदेवपरायणः॥७४॥श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परम् ॥ सुखं तरति दुष्पारं
ज्ञाननौर्व्यसनार्णवम् ॥ ७५ ॥ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवम् ॥ अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ ७६ ॥ विंदते पुरुषोऽमु
ष्माद्यद्यदिच्छत्यसत्वरम् ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥ ७७ ॥

व्ययं प्राप्नुवत् केतनं शरीरं यस्य सः । यदस्माकं गुरुर्ब्रह्मार्चति स्मेति सर्वेषां स्तोतॄणां वाक्यम् । विशंकया नाशशंकया । विनोपपत्तिमिति । अस्मादेतत्फलं भवतीत्युपप
त्त्यपेक्षां विनापि स्वभावत एव दृढविश्वासेन मनवश्चतुर्दशार्चंति स्म ॥ ६७ ॥ उपसंहरति । अथेति । विश्वं रुद्रभयेन ध्वस्तम् । अथ अतो न कुतश्चिद्भयं यस्यां तादृशी गति
रसि ॥ ६८ ॥ ६९ ॥ ७० ॥ योगादेशं नामैतत्स्तोत्रमुपासाद्य पाठतः प्राप्य मनसा धारयंतोऽभ्यासेन जपंतः अभ्यसत ॥ ७१ ॥ विश्वसृजां पतिर्ब्रह्मा ॥ ७२ ॥
सिसृक्ष्मः सृष्टवंतः ॥ ७३ ॥ युक्त एकाग्रचित्तः ॥ ७४ ॥ ज्ञानमेव नौर्यस्य ॥ ७५ ॥ योऽधीयानो भवत्यसौ हरिमाराधयति ॥ ७६ ॥ अमुष्माद्धरेः असत्वरम् स्थिरः

व्ययमानं नाशं प्राप्तमिव भयात्कंपमानमिवेति नाशशंकया भवबंधशंकया उपपत्तिं युक्तिं विना स्वभावत एव विश्वासदार्ढ्येन । यद्वा—कामनां विना ॥ ६७ ॥ यतो विश्वं रुद्रभयध्वस्तं विश्ववर्त्तिनो जीवाः कालभयध्वस्ता
एव अथातः हे विपश्चितां परमात्मन् स्वभावतः श्रेष्ठ त्वमेव कालाद्रक्षक इति भावः । "मर्त्यो मृत्युव्यालभीतः पलायन्" इत्यारभ्य मृत्युरस्मादपैति" इत्युक्तेः ॥ ६८ ॥ नृपनंदना इति । नरपालकत्वेन लोके भं
वतामप्यनेन सुखं भविष्यतीति भावः । स्वधर्ममनुतिष्ठंत इति "स्वेस्वेकर्मण्यभिरतः संसिद्धिं लभते नरः" इति श्रीगीतोक्तेः ॥ ६९ ॥ कर्ममिश्रां भक्तिमुक्त्वा शुद्धामाह—तमेवेति ॥ ७० ॥ ७१ ॥ इदं स्तोत्रम् ॥
॥ ७२ ॥ ७३ ॥ अथातः वासुदेवैकनिष्ठः ॥ ७४ ॥ ज्ञानं प्रस्तुतत्वाद्भागवतमेव ज्ञानपदाभ्यां ग्राह्यम् । प्रतिपादितं चैतत् 'कृच्छ्रोमहानिह' इत्यत्र । व्यसनार्णवं संसारम् ॥ ७५ ॥ अत एव भक्तिमेवाह य इति ।
आराधयति वशी करोति ॥ ७६ ॥ ७७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं यः कल्य उत्थाय प्रांजलिः श्रद्धयाऽन्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥ ७८ ॥ गीतं मयेदं नरदेवनंदनाः परस्य पुंसः परमात्मनः स्तवम् ॥ जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत आप्स्यथेप्सितम् ॥ ७९ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे रुद्रगीतं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ मैत्रेय उवाच ॥ इति संदिश्य भगवान्बार्हिषदैरभिपूजितः ॥ पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः ॥१॥ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः ॥ जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥२॥ प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम् ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥ ३ ॥ श्रेयस्त्वं कतमद्राजन्कर्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ ४ ॥ राजोवाच ॥ न जानामि महाभाग परं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥५॥

सन् मद्गीतं स्तोत्रं तेन गीतात्स्तुतात् यद्यदिच्छति तत्तद्विंदते । एक एव वल्लभः प्रिय आश्रयस्तस्मात् ॥ ७७ ॥ कल्ये उषसि ॥ ७८ ॥ तपश्चरत तपसोंते ईप्सितं प्राप्स्यथ ॥ ७९ ॥ इति श्रीभा० म० चतुर्थे टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ प्रचेतस्सु तपस्यत्सु तत्पित्रे नारदो घृणी ॥ प्राचीनबर्हिषेऽध्यात्मं पारोक्ष्येणाह पंचभिः ॥ १ ॥ पुरंजनकथाव्याजात्पंचविंशे तु नारदः ॥ आत्मनो बुद्धिसंगेन विविधामाह संसृतिम् ॥ २ ॥ प्रचेतस्सु तपस्तीव्रं तप्यमानेषु नारदः ॥ पुरंजनकथाकूटं प्राह प्राचीनबर्हिषे ॥ ३ ॥ १ ॥ २ ॥ प्रचेतस्सु तपश्चरत्सु नारदः प्राचीनबार्हिषं पुरंजनकथाकूटेन बोधितवान् । अतः प्रचेतसां कथामसमाप्यैव तत्पितुर्वृत्तमाह । प्राचीनबार्हिषमिति ॥३॥ हे क्षत्तः श्रेयःफलमीहसे इच्छसि इह कर्मणि तदुभयं नेष्यते विचारकैः ॥४॥ परं श्रेयो मोक्षम् । कर्मभिरपविद्धा विक्षिप्ता धीर्यस्य ॥५॥

त्वरया सह वर्तत इति सत्वरस्तमिवाचरतीति सत्वरति सत्वरतीति सत्वरन् न सत्वरन्नसत्वरन् । आचारक्विबन्ताच्छतृप्रत्यये नञा समासे चेदं रूपं सिध्यतीति ॥ ७८ ॥ ७९ ॥ इति श्रीमद्भागवते भावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ घृणी दयालुः । पारोक्ष्येण गोप्येन (१) (२) पुरंजनकथैव कूटं दुर्लक्ष्यार्थं वाक्यम् (३) इतीत्थं यत्र संदृष्टस्तत्रैव ॥ १ ॥ तपोत्र स्तोत्रजपरूपमेव ग्राह्यम् ॥ २ ॥ यदैव रुद्रः स्वगीतं प्रचेतोभ्य उपदिदेश तदैव तत्पितरं प्राचीनबर्हिषं नारदोपि पुरंजनोपाख्यानेन ज्ञानवैराग्यभक्तीरुपदिदेशेति । अतः प्रचेतसां तपोनिष्ठत्वादेव । हंतहंत मत्प्रियशिष्यध्रुवस्य वंशोऽयं कर्मणि मज्जति तदिममुद्धरामीति कृपालुः । क्षत्तरिति । यथा मत्प्रियश्रीव्यासोद्भूतत्त्वात्त्वां क्षत्तारमहमित्यभिप्रायः ॥ ३ ॥ राजन्निति । ज्ञानवैराग्यभक्तिभिरेव दीप्तिर्भवति न केवलयज्ञैरित्यभिप्रायः । नेष्यते न लक्ष्यते । कर्मसंपाद्यसुखस्यापि दुःखसंभिन्नत्वान्नश्वरत्वाच्च न श्रेयस्त्वमिति भावः । अत्र तीर्थः—पुरुषार्थिना पुरुषेण प्रार्थ्यानि श्रेयांसि बहूनि तेषां कतमच्छ्रेयो दुःखहानिमुत सुखावाप्तिमथ वोभयमथान्यत्सदपत्यादीहसे इह कर्मणि किमपि न नियतं कर्मणां दुःसंपाद्यत्वात् ‘गहना कर्मणो गतिः’ इत्युक्तेः ॥ ४ ॥ अत्र राजा सर्वश्रेयोवाप्तौ मुख्यसाधनं ज्ञानमेवेति नारदहार्दं विद्वांस्तदेव भवतोपदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ॥ न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ॥ ६ ॥ नारद उवाच ॥ भोभोः प्रजापते राजन्पशून्पश्य त्वयाऽध्वरे ॥ संज्ञापिताञ्जीवसंघान्निर्घृणेन सहस्रशः ॥ ७ ॥ एते त्वां संप्रतीक्षंते स्मरंतो वैशसं तव ॥ संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ॥ ८ ॥ अत्र ते कथयिष्येऽमुमितिहासं पुरातनम् ॥ पुरंजनस्य चरितं निबोध गदतो मम ॥ ९ ॥ आसीत्पुरंजनो नाम राजा राजन्बृहच्छ्रवाः ॥ तस्याविज्ञात नामाऽऽसीत्सखाऽविज्ञातचेष्टितः ॥ १० ॥

किं च गृहेषु स्थितः पुत्रादिष्वेव पुरुषार्थधीर्यस्य ॥ ६ ॥ कर्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योगानुभावेन यज्ञपशून्प्रत्यक्षं प्रदर्श्याह । भोभो इति । पशुरूपाञ्जीवसंघान् संज्ञापितान्मारितान् ॥ ७ ॥ एते त्वां संपरेतं मृतं संप्रतीक्षंते वैशसं त्वत्कृतां पीडां स्मरंतः ततश्चायःकूटैर्लोहयंत्रमयैः शृंगैश्छिंदंति छेत्स्यंति ॥ ८ ॥ अत्रास्मिन्संकटे निस्तारकममुमितिहासं कथयिष्यामि ॥ ९ ॥ तत्र जीवस्य विषयासक्त्या संसारः स चेश्वरानुग्रहेण निवर्तेत इति वक्तुं विपर्ययगृहीतस्य साक्षाद्बोधयितुमशक्ते राजवृत्तांतमिवाह । आसीदिति । पुरंजनादीन्स्वयमेवेतः पंचमेऽध्याये व्याख्यास्यति । तथापि तावत् सुखग्रहणाय यथोपयोगं किंचिद्व्याख्यास्यामः । तत्र स्वकर्मभिः पुरं शरीरं जनयतीति पुरंजनो जीवः न विज्ञातं नाम यस्य न च विज्ञातं चेष्टितं यस्य स ईश्वरस्तस्य सखा यद्वा विज्ञातं चेष्टितं जीवप्रेरणादिलक्षणं यस्य जीवपारतंत्र्यस्या

ष्टव्यमिति प्रार्थयते "वैराग्यवंतः खलु भाग्यवंतः" इत्यभियुक्तोक्तेस्त्वन्तु भक्तिज्ञानाभ्यामधिकाभ्यां तेभ्योप्यधिकोसीत्यभिप्रायेणाह–महाभागेति । यद्वा–यस्य भाग्येनान्येपि भाग्यवंतो भवेयुस्स महाभाग एतेन यदहं त्वदुपदेशेन त्वद्वन्निर्बंधो भवेयं तदैव ते महाभागत्वं सेत्स्यतीत्यभिप्रायः । यद्वा–मह्यते पूज्यतेऽखिलैरिति महो विष्णुः भजनं भागः महस्यासमंताद्भागो यस्य स तथा तत्संबुद्धौ । तथा "अनुग्रहायेह चरंति नूनं भव्यानि भूतानि जनार्दनस्य" इत्युक्तेस्सर्वभक्तशिरोमणेस्तव मय्यनुग्रहो न्याय्य एवेति भावः । विमलम्–अविद्यामलनिवर्त्तकम् ॥५॥ कूटधर्मेषु व्यर्थकृत्येषु । 'कूटो मिथ्याद्रिशृंगयोः' इति । यद्यपि गृहस्थकर्मणोपि ज्ञानसाधनत्वात्कार्यत्वमस्ति तथाप्यासंगस्य तथात्वाभावादुक्तं कूटधर्मेष्विति । तदुक्तं तीर्थेन "यथाबुद्धिकृतं कर्म ज्ञानसाहाय्यकारकम् । अथ वा तत्कृतं कर्म नरकायैव जायते" इति ॥६॥ प्रजापत इति राजन्निति संबुद्धिद्वयेन नहि प्रजापालनेऽधिकृतस्य राज्ञः प्रजांतर्गतपश्वादीनां मारणमुचितमिति भावः ॥७॥ संप्रतीक्षंते कदायं मरिष्यतीति वांछंति ॥ "कूटोऽस्त्री पुंजमायाद्येष्वद्रिशृंगेषुभेदयोः" इति यादवोक्तेः । कूटो बाणविशेषः शृंगाकारो भवतीति स्वामी च ॥ ८ ॥ वैषयिककथाप्रियमिमं वैषयिककथयैव प्रबोधयामीति मनसि विचार्य तस्यैव प्राचीनबर्हिषः कथामेव कथांतरकल्पनयाऽप्रस्तुतप्रशंसालंकारेण तत्प्रबोधे कारणी कुर्वन्नाह–अत्रेति । वस्तुतस्तु–तवैव चरितं कीदृशस्य पुरमेतच्छरीरं स्वकर्मणा जनयतीति तस्य पुरंजनस्य पुरातनं मातृगर्भप्रवेशात्पूर्वमप्यारभ्येत्यर्थः । पुरं शरीरमतति सततं विषयीकृत्य वर्तेत इति पुरातनमध्यात्मविषयमित्यर्थः । अन्यथा 'इतिहासः पुरा वृत्तः' इति कोशात्पुनरुक्तिः स्यात् । "अत–सातत्यगमने" अतो युच् । "अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा" इति । यत्राप्रस्तुतप्रशंसाऽप्रस्तुतकथा प्रस्तुतानुगा प्रस्तुते पर्यवस्यति तत्राप्रस्तुतप्रशंसालंकारो भवतीत्यर्थः । यथात्रैवाप्रस्तुतकथा राजकथा प्रस्तुतेऽध्यात्मोपाख्याने पर्यवस्यतीति ॥ ९ ॥ तत्र प्रकृते अध्यात्मादिभी राजमानत्वाद्राजा पुरं स्वयोग्यानंदपूर्त्तिं जनयिष्यति व्यक्ती करिष्यतीति पुरंजन इति वा । सखेति । "द्वा सुपर्णा सयुजा सखायौ" इत्यादि श्रुतेः । पक्षे विज्ञातचेष्टितो नीतिशास्त्रप्रसिद्धव्यापारः नामरूपादिहीनस्य सखित्वं न संजाघटीति तत्राह–यद्वेति । पृथु पुरु श्रवो यशः दृष्टादृष्टसुखसाधनकर्मादिशुश्रूषुत्वाच्छ्रवः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः ॥ नानुरूपं यदाऽविंददभूत्स विमना इव ॥ ११ ॥ न साधु मेने ताः सर्वा भूतले यावतीः पुरः ॥ कामान्कामयमानोऽसौ तस्यतस्योपपत्तये ॥ १२ ॥ स एकदा हिमतो दक्षिणेष्वथ सानुषु ॥ ददर्श नवभिर्द्वार्भिः पुरीं लक्षितलक्षणाम् ॥ १३ ॥ प्राकारोपवनाट्टालपरिखैरक्षतोरणैः ॥ स्वर्णरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः ॥ १४ ॥ नीलस्फटिकवैडूर्यमुक्तामरकतारुणैः ॥ सतहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥ १५ ॥ सभाचत्वररथ्याभिराक्रीडाय तनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥ १६ ॥

नुभवसिद्धत्वात् ॥ १० ॥ शरणं भोगायतनं देहं पृथिवीं तदुपलक्षितं ब्रह्मांडम् ॥ ११ ॥ यावत्यः पुरस्तास्तस्यतस्य कामस्योपपत्तये प्राप्त्यै असौ साधु न मेने । गवादिदेहानामैहिकपारलौकिकभोगभोग्यत्वाभावात् । तथा च श्रुतिः "ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलम्" इति "ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलम्" इति ॥१२॥ हिमवतो दक्षिणेषु सानुषु कर्मक्षेत्रे भारतवर्षे पुरं मनुष्यशरीरम् । लक्षितानि दृष्टानि सर्वाणि लक्षणानि यस्याम् । अंधपंगुत्वादिदोषरहितामित्यर्थः ॥१३॥ तामनुवर्णयति त्रिभिः । अत्र किंचित्किंचित्सादृश्यमवलंब्य कथासौंदर्याय प्राकारादीनि वर्ण्यंते । परिखैरिति पुंस्त्वमार्षम् । अक्षाणींद्रियाणि गवाक्षाः त्वगादयः शरीराव यवाः प्राकारादिपुरावयवत्वेन निरूप्यंते । स्वर्णादिशृंगैः शिखरैर्युक्ता ये गृहास्तैः संकुलामिति । आधारादिचक्राणि गृहाः शृंगाणि च राजसादिस्वभावा विवक्षिताः ॥१४॥ नीलादिभिः कृता हर्म्यस्थली यस्याम् । अरुणं माणिक्यम् । स्थली हृदयम् । नाड्यो नीलादिभावेन निरूप्यंते तत्तद्विषयवासना वा । भोगवतीं नागानां पुरीमिव भोग साधनभूतामिति वा ॥१५॥ सभा समाजस्थानम् । चत्वरं चतुष्पथः रथ्या राजमार्गः आक्रीडायतनं द्यूतादिस्थानम् । आपणो हट्टस्तैः । चैत्यं जनानां विश्रामस्थानम् ॥

श्रवणं वा "श्रवः कीर्त्तिश्रवणयोः" इति निरुक्तिः ॥ १० ॥ शरणं वासस्थलं वा । पृथिवीं कर्मभूमिं बभ्रामेति नानाजन्मवत्वात् । नानुरूपमिति । क्वापि जन्मनि स्वाभीप्सितसमस्तसुखप्राप्त्यदर्शनात् । इवेति । शूकरादि जन्मन्यपि विषयानंदप्राप्त्या वस्तुतो विमनस्त्वाभावात् । प्रभुः प्रभवंत्यस्मात्कर्माणीति । पक्षांतरे परपापमर्दनसमर्थः । यद्वाऽनुरूपं दुःखभोगमंतरेण सुखभोगयोग्यमन्यत्र दुर्गादिलक्षणम् ॥ ११ ॥ श्रुत्यर्थः—ताभ्यो देवताभ्यः गवादिदेहानामसाधुमननञ्च गर्भदशायामेव 'मृतश्चाहं पुनर्जातः' इत्यादिश्रुतेस्तत्रैव ज्ञानोत्पत्तेः । पक्षे शत्रुसाध्यत्वात् ॥ १२ ॥ अत्र हिमवज्जाड्यरूपं पापं दक्षिणे जाड्यमांद्यत्वं भवति तेन समपापपुण्येन मानुषं भवतीति भावः । इत्यर्थ इति । अंगहीनस्यासमर्थत्वेन कर्मयोग्यत्वं म्लेच्छादिदेहस्यापि तथात्वमिति भावः ॥ १३ ॥ प्राकारो दुर्गभित्तिः । उपवनमारामः 'आरामः स्यादुपवनम्' इति कोशात् । अट्टालो भित्त्यंतर्भूप्रदेशः । परिखा दुर्गबहिः परितः खाता नदी । पक्षे प्राकारास्त्वचः । उपवनानि बहिर्विषया रोमाणि । अट्टालो मुखमुच्चशिरोनासादिमत्त्वात् । परिखा विरागविवेकादिप्रवेशरोधकजलदुर्गादिरूपा रागादयः गुणा वा । गवाक्षा रोमरंध्राणि । तोरणानि पक्ष्माणि । नेत्रादीनि द्वाराणि वा । स्वर्णाद्यैः शृंगैः पित्तकफवातैर्धातुभी राजससात्त्विकतामसस्वभावैर्वा । आधारादीत्यत्रादिना स्वाधिष्ठानमणिपूरकानाहतविशुद्धिब्रह्मरंध्राणां ग्रहः ॥ १४ ॥ विषयवासनानामपि सत्त्वादिगुणवर्णस्वभाववत्त्वादनेकविधत्वमालक्ष्योक्तं तत्तदिति । पक्षे भोगवतीमिवेति वस्तुतस्तत्र भोगा अपि न संतीत्यर्थः ॥ १५ ॥ सभा राजोपवेशस्थानं सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले ॥ नदद्विहंगालिकुलकोलाहलजलाशये ॥ १७ ॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवाल विटपनलिनीतटसंपदि ॥ १८ ॥ नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ॥ आहूतं मन्यते पांथो यत्र कोकिलकूजितैः ॥ १९ ॥ यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम् ॥ भृत्यैर्दशभिरायांतीमेकैकशतनायकैः ॥ २० ॥ पंचशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः ॥ अन्वेषमाणामृषभमप्रौढां कामरूपिणीम् ॥ २१ ॥ सुनासां सुदतीं बालां सुकपोलां वराननाम् ॥ समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडलश्रियम् ॥ २२ ॥

ध्वजेषु पताकास्ताभिश्च युक्ताम् ॥ १६ ॥ अत्र च विषयनिष्ठबुद्धियोगेन जीवस्य देहसंबंध इति विवक्षया विषयवर्गं बाह्योपवनत्वेन निरूपयति । तद्विशेषान् स्रक्चंदना दीन् दिव्यद्रुमलतादिभावेन । शेषः कथालंकारः । बाह्योपवने प्रमदां ददर्शेति चतुर्थेनान्वयः । नदतां विहंगालिकुलानां कोलाहलो येषु ते जलाशया यस्मिन् ॥ १७ ॥ हिमनिर्झराणां विप्रुषो बिंदवस्तद्वता कुसुमाकरसंबंधिना वायुना चलंतः प्रवाला विटपाः शाखाश्च येषां तैर्वृक्षैर्नलिनीनां सरसीनां तटेषु संपत्समृद्धिर्यस्मिन् ॥ १८ ॥ अनाबाधे आबाधा महती पीडा तत्कृतोपद्रवरहिते मुनिव्रतैरहिंस्रैः । आत्मानमाहूतं मन्यते यत्र ॥ १९ ॥ तत्र प्रमदोत्तमां विषयविवेकवर्तीं बुद्धिं ददर्श । यदृच्छयागतामिति तयोः संबंधस्य दुर्निरूप्यत्वं दर्शयति । तामनुवर्णयति सार्धैश्चतुर्भिः । दशभिर्ज्ञानकर्मेंद्रियैः एकैकं प्रत्येकं शतमनंता वृत्तयस्तासां नायकैः पतिभिः सह । पाठांतरे नायिकाः स्त्रियो येषां तैः ॥ २० ॥ पंचशीर्षाणि वृत्तयो यस्य तेनाहिना प्राणेन प्रतीहारेण पालकेन गुप्तां रक्षिताम् । ऋषभं भर्तारम् । अप्रौढां षोडशवार्षिकीम् ॥ २१ ॥ गंधज्ञा

चात्र हृदयं तत्रैव राज्ञः पुरंजनस्य जीवस्य स्थितेः । चत्वरं चतुष्पथं तच्चात्र ताल्वधःस्थलं तत्रैव मुखनासानयनकर्णमार्गाश्चत्वारः । यथा राजमार्गः इडापिंगलासुषुम्णाः । आयतनानींद्रियगोलकाः । आपणो मनोगोलकः । चैत्यं चित्तमध्यम् । ध्वजे भगवद्वैमुख्यरूपे संयुक्ताः पताकाः पञ्च क्लेशाः । विद्रुमवेदय आधारादिचक्रमध्यस्थलभेदाः । अधरा इति केचित् ॥ १६ ॥ अत्र च संसारे प्रकृते वा बाह्योपवने प्रमदोत्तमामविद्यावृत्तिं यदृच्छया पुरंजनो राजा ददर्शेति तयोः प्राथमिकसंबंधस्य निर्हेतुत्वमुक्तं तेन कथापक्षे हे राजन् युष्मद्विधैरुपवने प्रमदोत्तमा कदापि नानेतव्या कथंचित् स्वत एव प्राप्ता दृष्टा स्पृष्टा वा स्याच्चेदात्मधिक्कारः कर्त्तव्यः । अध्यात्मपक्षे—शब्दस्पर्शादिभोग्यवस्तुषु बुद्धिर्न देया दैवाद्दत्ता चेदनुतपनीयमिति विधिर्व्यंजितः ॥ १७ ॥ १८ ॥ अहिंस्रैरिति । पक्षे—पुरंजनस्य पुण्यवत्त्वात्पापाभावाच्च भोगा निष्कंटका एव । आहूतमातिथ्यदानार्थम् । आध्यात्मपक्षेपि तान्निष्कंटकान्भोगान्स्वीयकुटुंबबंधुब्राह्मणातिथ्यादिभ्यो विभज्यैव यत्र भुंक्ते इत्यर्थः ॥ १९ ॥ तत्रोपवने । पाठांतरे नायिकैरिति पाठे नायिकाश्च केचन वृत्तिविशेषाः ॥ २० ॥ भर्त्तारं स्वस्योपभोक्तारं पतिं जीवम् । अप्रौढामपरिगृहीतपाणिमिव स्थिताम् । यद्वा—यथाऽप्रौढैव कांता पतिं मोहयति तथैवाविद्यावृत्तिबुद्धिर्जीवमित्यर्थः । कामरूपिणीं नित्यविविधशृंगारधारिणीम् । पक्षे विविधवासनावतीम् ॥ २१ ॥ गंधज्ञानादिभिर्बुद्धिवृत्तिभिरेवावयवैः सुनासत्वादि निरूप्यते । रसास्वादचर्वणासक्तयो दंताः । सुकपोलत्वं बुद्धेः स्वच्छता । आननं बुद्धेरग्रभागः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिशंगनीवीं सुश्रोणीं श्यामां कनकमेखलाम् ॥ पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव ॥ २३ ॥ स्तनौ व्यंजितकैशोरौ समवृत्तौ निरन्तरौ ॥ वस्त्रांतेन निगूहंतीं व्रीडया गजगामिनीम् ॥ २४ ॥ तामाह ललितं वीरः सव्रीडस्मितशोभनाम् ॥ स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा ॥ २५ ॥ का त्वं कंजपलाशाक्षि कस्यासीह कुतः सति ॥ इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे ॥ २६ ॥ क एतेऽनुपथा ये त एकादश महाभटाः ॥ एता वा ललनाः सुभ्रूः कोऽयं तेऽहिः पुरःसरः ॥ २७ ॥

नादिभिर्बुद्ध्यवयवैः सुनासत्वादि निरूप्यते । समं विन्यस्तौ रचितौ कर्णौ ताभ्यां कुंडलश्रियं कुंडलशोभां दधतीम् ॥ २२ ॥ "अन्नमयं हि सौम्य मन इति यत्कृष्णं तदन्नस्य" इत्यादिश्रुत्यनुसारेण श्यामामित्युक्तम् । नूपुरैः क्वणद्भ्याम् । नूपुरेण पादांगुलीयकानामप्युपलक्षणाद्बहुवचनम् ॥ २३ ॥ व्यंजितं कैशोरं यौवनोपक्रमो याभ्यां तौ । समौ च वृत्तौ च ॥ २४ ॥ तामाहेति तयोः संवादोक्तिः संबंधदार्ढ्याय । अपांग एव पुंखो मूलप्रांतो यस्य कटाक्षरूपस्य बाणस्य तेन स्पृष्टो विद्धः प्रेम्णा उच्चैर्भ्रमंती भ्रूर्धनुःस्थानीया यस्मिंस्तेन ॥ २५ ॥ कुतः स्थानादिहागताऽसि । हे सति पुर्याः समीपस्था उपपुरी भूस्तामालक्ष्य किं कर्तुमिच्छसीत्यर्थः ॥ २६ ॥ ते तव येऽनुपथा अनुवर्तिन एते के एकादशो महान्भटो बृहद्बलत्वेन वक्ष्यमाणो येषु दशसु ते । बुद्धेर्मनसः पृथगुपादानं बुद्धिपरिचारकेंद्रियसहायतया तत्परिचारकत्वविवक्षया ॥ २७ ॥

समं यथा स्यात्तथा धात्रैव कौशलेन विन्यस्ताविव यौ कर्णौ कुंडलशोभां प्रवृत्तिनिवृत्तिशास्त्रार्थमवधारयंतीम् ॥ २२ ॥ पिशंगनीवीं पीतांबरां रजोगुणमयसमस्तकर्मावृताम् । सुश्रोणीं शोभनविषयोपरक्ताम् । श्यामां तमोगुणप्रचुरत्वात्तच्च तस्या जीवान्प्रति सूर्यस्थानीयेश्वरावरकमेघस्थानीयत्वात् । स्वामिचरणैस्तु—बुद्धिमनसोरैक्यविवक्षयैव श्रुत्यवष्टंभेन व्याख्यातमिति ज्ञेयम् । क्वणद्भ्यामिति चलतीमित्याभ्यां बुद्धेरस्थैर्यमेव शास्त्रेषु शब्दितमिति द्योतितम् ॥ २३ ॥ स्तनौ रागद्वेषौ यदुक्तम् "इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ" इति व्यंजितकैशोरावित्यत एव वृद्धस्यापि रागद्वेषौ नित्यतरुणावेव लोके दृश्येते समौ तुल्यौ वृत्तौ वर्तुलौ च । पक्षे समं तुल्यमेव वृत्तं पुंमात्रमोहनं चरित्रं ययोस्तौ निरन्तरावतिपीनत्वान्मूलदेशेऽवकाशशून्यौ । पक्षे वस्तुतस्तयोरैक्येन निर्भेदौ । यदुक्तं—"काम एष क्रोध एष रजोगुणसमुद्भवः" इति । निगूहंतीमिति । रागद्वेषावपि शिष्टजनैर्ह्रीविनयाभ्यां निह्नूयेते एव ॥ २४ ॥ अविद्यावृत्त्या जीवः स्वमिच्छयैव बध्नाति न तु तमीश्वरो बलात्कारेण तया बध्नातीति वक्तुं तयोः संबंधस्य प्रकारमाह—तामाहेति । स्निग्धेन स्निग्धत्वादलब्धभंगेनापांगरूपेण पुंखेन तत्पर्यंतेनापि कटाक्षशरेण विद्ध इत्यर्थः । यतो वीरः वीरत्वादेव तदप्युत्क्रांत इत्यर्थः । पक्षे भोगोत्साहवत्त्वाद्वीरः । अयमर्थः—अविद्या खलु भोग्यपदार्थभूतं स्वं दर्शयति जीवस्तत्र सुरसबुद्ध्या भोक्तृत्वमंगीकुर्वन्ननुरज्यति ईश्वरस्तु तत्र विरसबुद्ध्या ततो विरज्यतीति ॥ २५ ॥ यद्यपि बुद्ध्यादिभिः सहैव जीवस्य सर्वदा स्थितिस्तथापि मनुष्यशरीरसंबंधिनो बुद्ध्यादयो विलक्षणा भवन्तीत्यनुरागेण च तां बुद्धिमपरिचिन्वन्निव पृच्छति—केति । इत्यर्थ इति । यदि ते वासादिरुचिस्तर्ह्यहमपि वासकाम एवैकाकित्वादत्र न विशामीति भावः । कंजपलाशाक्षि सतीति संबुद्धिद्वयेन यौवनं मुधा न नेयं सत्यास्ते स्वानुरूपः पतिर्ग्राह्य एवेति ध्वनितम् । भीरु इत्यनेन पुर्यामेकाकिनी कथं तिष्ठेयमिति मा भैर्द्वितीयोहमागतोस्मीति ध्वन्यते ॥ २६ ॥ अनुपथा इत्यनेनैते पतय इति । सुभ्रू इति । ललनास्सविलासा ॥ ८६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं ह्रीर्भवान्यस्यथ वाग्रमापतिं विचिन्वती किं मुनिवद्रहो वने ॥ त्वदंघ्रिकामाप्तसमस्तकामं क पद्मकोशः पतितः कराग्रात् ॥ २८ ॥
नासां वरोर्वन्यतमा भुविस्पृक्पुरीमिमां वीरवरेण साकम् ॥ अर्हस्यलं कर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ॥ २९ ॥
यदेष माऽपांगविखंडितेंद्रियं सव्रीडभावस्मितविभ्रमद्भ्रुवा ॥ त्वयोपसृष्टो भगवान्मनोभवः प्रबाधतेऽथानुगृहाण शोभने ॥ ३० ॥ तदाननं सुभ्रु
सुतारलोचनं व्यालंबिनीलालकवृंदसंवृतम् ॥ उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ॥ ३१ ॥

त्वं ह्रीः किं पतिं धर्मं विचिन्वती । अथ वा भवानी पतिं शिवं विचिन्वती । अथ वा किं वाक् सरस्वती पतिं ब्रह्माणम् । रमा लक्ष्मीः पतिं विष्णुम् । मुनिरिव संयता सती । कंथभूतं पतिम् । त्वदंघ्रिकामेनैव त्वत्कृतया त्वदंघ्रिकामनयैव प्राप्ताः समस्ताः कामा येन तम् ॥ २८ ॥ हे वरोरु आसां ह्रीप्रभृतीनां मध्ये त्वमन्यतमाऽपि न संभवसि । यतो भुविस्पृक् । न हि देवता भुवं स्पृशंति । वीरवरेण मया । ननु त्वमकर्मा कथं त्वया सहालंकरोमीति चेत्तत्राह । अदभ्रमनल्पं कर्म त्वत्संगाद्यस्य मम तेन स्वतोऽकर्मत्वेन त्वत्संगात्सकर्मा भवामीत्यर्थः । परं वैकुंठम् ॥ २९ ॥ यद्यस्मात्तवापांगेन विखंडितमिंद्रियं मनो यस्य तं मां मनोभवो बाधते अथ तस्मादनुगृहाण सव्रीडं यद्भावेन प्रेम्णा स्मितं तेन विभ्रमंती या भ्रूस्तयोपसृष्टः प्रेरितः ॥ ३० ॥ यद्व्रीडया संमुखं न भवति तदाननमुन्नीय मे दर्शय । शोभने भ्रुवौ यस्मिन् सुतारे शोभन

अप्येतास्तदपि त्वमेव सुभ्रूत्वेन स्वामिनी प्रतीयसे । यस्ते पुरस्सरः सोऽहिः हिनोति सततं गच्छतीति हिः न हिर्यस्मात्सोहिरस्थिरोऽतो नायमपि पतित्वेन वरणीय इत्यसूचि ॥ २७ ॥ लोके ह्यविवेकात्स्वबुद्ध्युत्कर्षाभिमानोऽखिलस्यास्तीति पुरंजनवाक्येनाभिव्यंजयति—त्वं ह्रीरिति । तस्या मुखनेत्राद्यावरणव्यंजितां ह्रियमालक्ष्याह—न त्वं ह्रीमती किं तु साक्षात्स्वयं ह्रीरेव मां मोहयंती सती किं पतिं धर्मं विचिन्वती । अत्र वने रहो वर्त्तसे इति । स्वबुद्धिवृत्तिमाधुर्य्यैः स्वमोहनप्रपंचः । भवानीति सौंदर्यमालक्ष्योक्तिः । वागिति तस्या महाबुद्धिमत्त्वमालक्ष्य । लक्ष्मीरिति महासंपत्तिमालक्ष्य । त्वदंघ्रीति लोकेऽपि स्वबुद्धिबलाधीनमेव सर्वमैश्वर्य्यं सर्वस्येति प्रसिद्धेः । क्वेति । पद्मकोशो लीलाकमलं स च जीवस्य विवेक एव तया तदलक्षितमेव स्वहस्तवशीकृत्य दूरतः क्षिप्त इति ज्ञेयम् ॥ २८ ॥ त्वदनुरूपोऽहमेवेति वक्तुं स्वकृतं संदेहं स्वयमेव निरस्यति—तासामिति । हे वरोरु इति पत्नीभावेनोक्तम् । पक्षे किञ्चिद्विवेकप्राप्त्या स्वबुद्धिं न सर्वोत्कृष्टां मन्यते लोकः किं तु स्वानुरूपामेवेति भावः । तदुक्तं—"यदा किंचिज्ज्ञोहं द्विप इव मदांधः समभवं तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः । यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥" इति भर्तृहरिणा । स्वामिव्याख्याने नन्वित्याशंक्येत्यर्थ इति समाहितम् । तत्रायं भावः—यथा दाहशक्तिरहितमपि लोहमग्निसंगेन दाहकं भवति तथा ममाकर्मणोपि "विज्ञानं यज्ञं तनुते" इत्यादिश्रुतेः । क्रियाशक्तिमत्यास्तव संगात्क्रियावत्त्वं नाद्भुतमिति ज्ञेयम् ॥ २९ ॥ इंद्रियं चक्षुः । पक्षे विखंडितज्ञानचक्षुषं मनोभवो वैषयिकीवासनोपसृष्टः तयैवाधिक्येन निर्मितो मां बाधतेऽतोऽनुगृहाण त्वदीयान् शब्दस्पर्शानुपभोक्तुं लभेयेत्यर्थः । वस्तुतो न गृहाण स्वभंगिनीं विद्यां दर्शयेति दैवघटितोर्थः । यदेष तेऽपांगेति अर्थोपसृष्ट इति प्रबाधते थो नुगृहाणेति प्रथमतृतीयचतुर्थचरणेषु पाठो दृश्यते तत्र त्वयेति चित्सुखसंमतः किन्तु यदेष तेऽपांगेति अथोपसृष्ट इति प्रबाधत मानुगृहाणेत्येव पाठः स्वामिसम्मतो लक्ष्यते । शोभने इति । मदनुग्रहेणैव तव शोभनत्वं सेत्स्यत्यन्यथा नेति भावः । भगवानिति मनोभवस्य दुर्जयत्वं वक्ति ॥ ३० ॥ स्मृतिभ्रष्टस्य कामिनो जीवस्य वैयग्र्यं दर्शयति—तदिति । वल्गु मनोहरं यथा स्यात्तथा वक्तीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनारद उवाच ॥ इत्थं पुरंजनं नारी याचमानमधीरवत् ॥ अभ्यनंदत तं वीरं हसंती वीरमोहिता ॥३२॥ न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ ॥ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥३३॥ इहाद्य सन्तमात्मानं न विदाम ततः परम् ॥ येनेयं निर्मिता वीर पुरी शरणमात्मनः ॥३४॥ एते सखायः सख्यो मे नरा नार्यश्च मानद ॥ सुप्तायां मयि जागर्ति नागोऽयं पालयन्पुरीम् ॥ ३५ ॥ दिष्ट्याऽऽगतोऽसि भद्रं ते ग्राम्यान्कामानभीप्ससे ॥ उद्वहिष्यामि तांस्तेऽहं स्वबन्धुभिररिंदम ॥ ३६ ॥

कनीनिके लोचने यस्मिन् व्यालंबिनो दीर्घा ये नीला अलकास्तेषां वृंदेन संवृतम् । वल्गूनि वाचकानि वाक्यानि यस्मिन् ॥ ३१ ॥ हे वीर हे राजन् सापि तं दृष्ट्वा मोहिता सती तमाह॥ ३२॥ यत्पृष्टं कस्यासीत्यनेन कस्य पुत्री किं गोत्रजेति का त्वमिति च किंनामासीति तत्राह । आत्मनो मम परस्य तवापि कर्तारं सम्यक् न विद्मः गोत्रं नाम च यत्कृतं भवति तं च न विदाम न विद्मः ॥ ३३ ॥ हे वीर आत्मनो मम शरणमियं पुरी येन निर्मिता तं च न विद्मः ॥ ३४ ॥ यत्पृष्टं क एते अनुपथा इति तत्राह । एत इति ॥ ३५ ॥ आस्तां नामगोत्रादि यदत्रागतोऽसि एतद्दिष्ट्या भद्रं तावत् । ग्राम्यानिंद्रियग्रामार्हान् उद्वहिष्यामि संपादयिष्यामि स्वबंधुभिः सखिभिः

तत् यदाननं तवेदं ममाभिमुखं नेति भगवत्यविद्ये देवि मदीयचिन्मयज्ञानानंदभोगादहं त्वया वंचित एव किं तु स्वीयां रूपादिविषयसंपात्तिं संप्रति मद्भोग्यत्वेनोपकल्पय अलमेतावता वाम्येन । तवाननमित्यादिना रूपरसगंधस्पर्शानां वाचकमिति शब्दस्य च भोगप्रार्थनाभिव्यंजिता । शुचिस्मिते इति । श्रृंगारजनकस्मितायास्तव दर्शनेन मम धैर्य्यं मनोभवेनापनीतमिति भावः । पक्षे शुचिषु हरिपरायणेषु स्मितमहो एते मत्तो बिभ्यंत एव भक्तिरता इत्येवंरूपमीषद्धसनं यस्यास्सा तथा । यद्वा—शुचीनां स्मितमहो किं कुर्वतीयं लोकं मोहयतीत्येवं यस्यां सा शुचिस्मिता तत्संबुद्धौ तथा ॥ ३१ ॥ अधीरवदिति चिद्रूपत्वात् । वस्तुतो धीर एवायमित्यर्थः । हे वीरेति । हास्याभिप्रायं नायं वीरधर्मोस्ति यद्यज्ञे निरपराधान्पशून्हिनस्सीति भावः । यद्वा—विदुरं प्रति मैत्रेयामंत्रणं कामकथाश्रवणे साकांक्षो मा भूस्त्वं जितेंद्रियवर्य्योसीति भावः । यद्वा वीरेण विशिष्टमीरं ज्ञानं यस्य तेन मोहितेत्यर्थः । यथा विषयमाधुर्यैस्तया जीवोऽनुरंजितस्तथा चिन्माधुर्ये जीवेनापि साऽनुरंजितेत्यर्थः ॥ ३२ ॥ यत्पृष्टं कस्यासीति तत्र नेति । कथापक्षे कस्यचिन्मुनेर्मोहनार्थमायातायाः कस्याश्चिदप्सरस इयं कन्येति राजा जानीते स्म । अध्यात्मपक्षे या जीवज्ञानमावृणीते सा कथमहमीश्वरं जानामीति व्याहर्त्तुमर्हतु । गोत्रमिति । किं गोत्रजाहं, किं नामेति किन्नाम्नी चाहमिति न विद्मः । पुरुषर्षभेति । त्वं हि पुरुषश्रेष्टत्वाज्जानीहीति स्त्रीणां मंदबुद्धित्वस्य 'योषाऽहं मंदधीर्हरे' इति "कथं पश्येमहि स्त्रियः" इत्यादौ प्रसिद्धेरिति भावः ॥ ३३ ॥ तर्हि किं जानासीत्यत आह—इहेति । कथापक्षे तेनैव केनचिन्मुनिना कर्दमेनेव विषयभोगार्थं पुरीयं योगबलेन निर्मितेति राजा जानीते स्म । अयमाशयः—कालः कर्म स्वभावः प्रकृतिर्गुणा ईश्वरो वा कर्त्तेत्यहं न जानामि किं त्वज्ञानेनात्मनि कल्पितमिति । इह पुरि संतं विद्यमानमात्मानमेव वयं विदाम । ततो मत्तः परमन्यं न विदामेत्यन्वयः ॥ ३४ ॥ मानदेति । मम मानं त्वया कार्यमेवेति भावः । सखायः इंद्रियाणि । सख्यस्तद्वृत्तयः । नागः प्राणः । मयि सपरिकरायां सुप्तायां सत्यां जागर्ति स्वप्ने इंद्रियाणां लये सुषुप्तौ मनोबुद्ध्योरपि लये प्राणो विराजत एव ॥ ३५ ॥ दिष्ट्या भाग्येनैवागतं मनुष्यशरीरं प्राप्नोतीति । अरिं शत्रुं दाम्यतीति तथा । मामपि कामोरिः पीडयति तस्य दमनं कुर्वीति भावः ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो ॥ मयोपनीतान्गृह्णानः कामभोगाञ्छतं समाः ॥ ३७ ॥ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम् ॥ असंपरायाभिमुखमश्वस्तनविदं पशुम् ॥ ३८ ॥ धर्मो ह्यत्रार्थकामौ च प्रजानंदोऽमृतं यशः ॥ लोका विशोका विरजा यान्न केवलिनो विदुः ॥ ३९ ॥ पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह ॥ क्षेम्यं वदंति शरणं भवेऽस्मिन्यद्गृहाश्रमः ॥ ४० ॥ का नाम वीरविख्यातं वदान्यं प्रियदर्शनम् ॥ न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम् ॥ ४१ ॥ कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज ॥ योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम् ॥ ४२ ॥

सखीभिश्च सह ॥ ३६ ॥ समाः संवत्सरान् मनुष्यदेहप्रवेशाच्छतमित्युक्तम् ॥ ३७ ॥ प्रवृत्तिस्वभावत्वान्निवृत्तिनिंदापूर्वकं तत्संगमभिनंदति कमिति पंचभिः । त्वत्तोऽन्यं कं नु रमये अरतिज्ञं नैष्ठिकम् । अकोविदमनिषिद्धसुखत्यागिनम् । संपरायो मृत्युस्तदनभिमुखं परलोकचिंताशून्यम् । अश्वस्तनविदं श्व इदं कर्तव्यमितीहलोकचिंताशून्यम् । अत एव पशुतुल्यम् ॥ ३८ ॥ अत्र गार्हस्थ्ये प्रजानंदः पुत्रसुखम् । अमृतं मोक्षः केवलिनो यतयः ॥ ३९ ॥ गृहाश्रम इति यदेतत्क्षेमार्हं शरणमाश्रयं वदंति ॥ ४० ॥ ४१ ॥ भोगिभोगयोः सर्पदेहाकारयोस्तव भुजयोर्यत्र सज्जेदेवंभूतं कस्याः स्त्रिया मनः स्यान्न कस्या अपि । यो भवाननाथवर्गादीनस्तोमास्तेषामाधिं मनोदुःखमलमत्यर्थमपोहितुं सर्वत्र चरति । केनापोहितुम् । घृणयोद्धरतोऽतिशयितो यः स्मितपूर्वकोऽवलोकस्तेन ॥ ४२ ॥

मनुष्य देहप्रवेशाच्छतमित्युक्तम् । विभो इति । व्यापकत्वात्त्वं जानीष एव । यद्वा–विशेषेण भातीति व्युत्पत्तेर्न हि नारीं विना नरो भातीत्यतोऽहं ते स्वीकार्यैवेति भावः॥३७॥कथापक्षे–संप्रति पतिवरैवाहमकस्मात्प्राप्तं स्वसदृशं त्वां पश्यंती नान्यमन्वेषयामीत्याह–कमिति । अध्यात्मपक्षे–बुद्धिरियं राजसी किञ्चित्सत्त्वमिश्रत्वाद्धार्मिकैवेति तामस्या सात्त्विक्या च बुद्ध्या वृतं पुमांसं निन्दति कमिति पञ्चभिः । स्थावरयोनिगतत्वादरतिज्ञं पश्वादियोनिगतत्वेन रतिज्ञत्वेप्यकोविदं विप्रवणिजादिजातित्वेन कोविदत्वेऽपि संपरायो मृत्युस्तदनभिमुखं शरीरमित्यर्थः । क्षत्रियत्वेन वीरत्वेप्यश्वस्तनविदं श्वः परश्वो वा मरणानंतरं मे किं भविष्यतीति ज्ञानशून्यत्वादधार्मिकमित्यर्थः । पशुतुल्यत्वात्पशुम् ॥ ३८ ॥ त्रिवर्गसाधकं गार्हस्थ्यमभिनंदति–धर्म इति । प्रजार्थकरत्युत्थ आनन्दः पुत्रपौत्रादिलालनरूप आनंदो वा अमृतमदनीयं यज्ञशिष्टा हि "अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते" इति मेदिनी । लोका यागादिप्राप्याः केवलिन उदरंभरिणो वा । यान्न विदुरित्यतिदुःखप्राप्यस्य चतुर्थपुरुषार्थस्थानभिनंदनात् सात्त्विकी बुद्धिरपि निंदिता । अध्यात्मपक्षे–त्रिवर्गस्योपपादनमविद्ययैवेत्युक्तम् ॥ ३९ ॥ सर्वाश्रमोपजीव्यत्वाद् गृहाश्रम एव श्रेयानित्याह–पित्रिति । अस्मिन्भवे मनुष्यजन्मनि यत्क्षेमं शरणं वदंति स गृहाश्रमः यश्च यज्ञकर्तृत्वेन सर्वसुखदो गृहस्थ इत्युक्तमनेन ॥ ४० ॥ वदान्यं पुत्रकलत्राद्यभीष्टदानशीलं "गुणवान्दानशीलश्च वदान्यः पुरुषो मतः" इत्युक्तेः । तत्रापि प्रियदर्शनं सुंदरं स्त्रीप्रियरतिसुखसाक्षात्कारकं वा प्राप्तं काकतालीयेनावाप्तं स्वयं का वीरेति युवावस्थत्वेन कामारिपुदलनसमर्थ वादहं त्वां वृणोमीति भावः ॥ ४१ ॥ दीनस्तोमा अस्मदादयः आधिमंतः । पीडामपोहितुं दूरीकर्तुं केन स्मितावलोकेन । हे घृणोद्धत कृपयोज्जृंभितेति वा । महाभुजेति स्वस्यालिंगनसुखमाह । यद्वा–मत्संगेन महं कामोत्सवमा सर्वतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ इति तौ दंपती तत्र समुद्य समयं मिथः ॥ तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ॥ ४३ ॥ उपगीयमानो ललितं तत्रतत्र च गायकैः ॥ क्रीडन्परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ॥ ४४ ॥ सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः ॥ पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ॥ ४५ ॥ पंचद्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा ॥ पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ॥ ४६ ॥ खद्योताविर्मुखी च प्राग्द्वारावेकत्र निर्मिते ॥ विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥ ४७ ॥ नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते ॥ अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥ ४८ ॥

समुद्य समुदीर्य समाः संवत्सरान् ॥ ४३ ॥ तत्र जाग्रदवस्थां संक्षेपेणाह । उपगीयमान इति । सुषुप्तावस्थामाह । ह्रदिनीं हृदयाकाशं स्वापस्थानम् । शुचौ निदाघे ॥ ४४ ॥ इदानीं नवद्वारप्रदर्शनपूर्वकं जाग्रदवस्थां प्रपंचयति सप्तेति यावदध्यायसमाप्ति । तस्याः पुर उपरि कृता द्वारः सप्त वृता इति पाठे संवृताः । नेत्रे नासिके श्रोत्रे मुखं चेति सप्त अधो द्वे द्वारौ गुदलिंगे । यः कश्चनेति । आत्मनः सम्यगविज्ञानादनियतत्वाच्च ॥ ४५ ॥ तासु सप्तसु पंच द्वारः पौरस्त्याः पूर्वदिग्भवाः ॥ ४६ ॥ खद्योतवदल्पप्रकाशा वामनेत्ररूपा आविः प्रकटं मुखं यस्याः सा बहुप्रकाशा दक्षिणनेत्रलक्षणा । "तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यवत्तरः" इति श्रुतेः । स्वानुभवाच्च तत्र प्रकाशाधिक्यम् । एकत्र संलग्ने विभ्राजितं रूपम् । द्युमत्सखश्चक्षुरिंद्रियसहितः ॥ ४७ ॥ नळनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च वामदक्षिणनासिके । अत्रापि संज्ञाभेदादेव कार्यं

भोक्ष्यतीति तयासूचि ॥ ४२ ॥ समयं संकेतम् "समयः शपथाचारसिद्धान्तेषु तथा विधि । क्रियाकारे च निर्देशे संकेते कालभाषयोः" इति मेदिनी । शतं समा इति । "शतं वर्षाण्यभ्यार्छत्" इति श्रुतेः । मुमुदाते इति । 'मुद–हर्षे' हर्षस्य शोकानुयायित्वात्तौ बुद्धिजीवावुभयं क्रमेण प्राप्तवंताविति भावः । "सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखम् । ते द्वयेन्योन्यसंलग्ने दृश्येते जलपंकवत्" इत्युक्तेः ॥ ४३ ॥ तत्र मुमुदाते शतं समाः इत्यत्र जाग्रदवस्थायां मोदप्रकारमाह–जाग्रदवस्थायां तत्रतत्र प्रतींद्रियविषयं गायकैस्तल्लक्षितैः शब्दादिभिर्विषयैरुपगीयमानस्सेव्यमानः स्वप्नावस्थायां स्त्रीभिः केवलं मनोवृत्तिलक्षणाभिः "परिवृतः स्त्रीभिर्वा यानैर्वा" इति श्रुतेः । स्वप्ने इंद्रियाणामवसन्नत्वात्तत्संस्कारेण तद्वृत्तीनामेव तत्तत्कार्य्यकारित्वात्स्त्रीभिरित्युक्तं सुषुप्त्यवस्थायां शुचौ तन्निमित्ते शोके प्राप्ते शीतलागाधतोयधारामिव सुषुप्तिकाले सच्छब्दवाच्यां ब्रह्मस्थितिमाविशदित्यन्वयः । ललितं यथा तथा अन्यत्र शुचौ ऋतुविशेषे "सता सौम्य तदा संपन्नो भवति" इति श्रुतेः । पुरुषस्त्रीशब्दवाच्यैस्सत्संगभक्त्यादिभिः परिवृतः क्रीडन्कालं यापयन् ह्रदिनीं ह्रदिन्यां ब्रह्मनाड्यां हृदयस्थानेऽष्टदलपद्मे स्थितं श्रीनारायणमाविशदध्यायादिति वार्थः ॥ ४४ ॥ देहाख्यं पुरं प्रसिद्धपदसाम्येन वर्णयितुमाह–इदानीमिति । वृता द्वार इति पाठे संवृताः सम्यग्विभक्ता इत्यर्थः । 'वृङ्–संभक्तौ' न त्वाच्छादिता इत्यर्थः । कथापक्षे विषया देशाः पृथग्विषयाः शब्दादयस्तज्ज्ञप्त्यै तस्यां पुरि ॥ ४५ ॥ अमूषां द्वारा नृपत्वात्त्वं पुरद्वाररचनां जानास्येवेति भावः ॥ ४६ ॥ तस्मात्पूर्वोक्ताद्धेतोः । आत्मनो देहस्य दक्षिणो भागोऽतिशयेन बलवानिति श्रुतिपदार्थः । द्युमान् आदित्यस्तस्य वासस्थानत्वाच्चक्षुषोऽपि तन्नाम । "आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्" इति श्रुतेः । "आदित्यो ह वै चक्षुस्तेनानुगृहीतं रूपं गृह्णाति" इति च ॥ ४७ ॥ अर्वागुपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुख्या नाम पुरस्ताद्वास्तयाऽऽपणबहूदनौ ॥ विषयौ याति पुरराड्रसज्ञविपणान्वितः ॥ ४९ ॥ पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरंजनः ॥ राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः ॥ ५० ॥ देवहूर्नाम पुर्या द्वा उत्तरेण पुरंजनः ॥ राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः ॥ ५१ ॥ आसुरी नाम पश्चाद्वास्तया याति पुरंजनः ॥ ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥ ५२ ॥ निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः ॥ वैशसं नाम विषयं लुब्धकेन समन्वितः ॥ ५३ ॥ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ॥ ५४ ॥

न्यूनाधिक्यं पूर्ववज्ज्ञेयम् । अवधूतो वाय्वधिष्ठितो घ्राणः सौरभं गंधम् ॥ ४८ ॥ मुख्या प्रधाना अस्याम् । आपणो भाषणम् । बहूदनश्चित्रमन्नम् । बह्वोदन इत्यनुक्तिः परोक्षवादत्वाय । रसज्ञं रसनेंद्रियं विपणो वागिंद्रियं ताभ्यामन्वितः । पण व्यवहारे ॥ ४९ ॥ दक्षिणेनेति न तृतीया किं तु दक्षिणस्यां दिशीत्यस्मिन्नर्थे तद्धितोयमेनप् प्रत्ययोऽव्ययसंज्ञः एवमुत्तरेणेति । अयमर्थः । पंचानां विषयाणामन्यतोऽनवगतानां प्रकाशायालमिति पंचालं शास्त्रं श्रवणकाले च बलाधिक्याद्दक्षिणकर्णः प्रथमं प्रवर्तते शास्त्रे च प्रथमं श्रोतव्यं कर्मकांडमित्येतावता साम्येन प्रवृत्तसंज्ञस्य कर्मकांडस्य दक्षिणकर्णेन श्रवणमिष्यते । अतस्तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते । तदनेन प्रकारेण पितॄणामाह्वानमनेन भवतीति पितृहूर्दक्षिणकर्णः एवं तद्वैपरीत्येनोत्तरः कर्णो देवहूः । तथा च व्याख्यास्यति "पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥ प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञितम् ॥ पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत्" ॥ इति ॥५०॥५१ ॥ असुरा इंद्रियारामास्तेषामियमासुरी शिश्नद्वाः ग्रामकं ग्रामस्थजनानां कं सुखं व्यवायं दुर्मदेन गुह्येंद्रियेण ॥ ५२ ॥ निर्ऋतिर्नाम गुदो मृत्युद्वारत्वात् । वैशसं मलविसर्गलक्षणं विषयम् । लुब्धकेन पायुना तेनोत्क्रांतस्य दुःखप्राप्तेर्लुब्धकसाम्यम् ॥ ५३ ॥ अमीषां मध्ये निर्वाक्पादः पेशस्कृद्धस्तस्तावुभावंधौ छिद्राभावात् । स्वतो ज्ञानक्रियाशक्त्यभावाच्च अक्षण्वतामिंद्रियवतां

तिर्यक् च धूनोति कंपयतीत्यवधूतो वायुर्घ्राणेंद्रियाभिमानी तेन प्रेर्यमाणं घ्राणेंद्रियमपि तच्छब्दवाच्यमिति । ताभ्यां द्वार्भ्याम् ॥ ४८ ॥ सर्वद्वारमुख्यत्वात्सर्वसंजीवकत्वाच्च मुख्या तयैकयैव द्वौ देशौ याति अन्यत्र द्वाभ्यांद्वाभ्यामेकदेशं यातीत्यपि मुख्यत्वे हेतुः । बह्वोदन इत्युक्तौ स्फुटार्थप्रत्यायकत्वात्परोक्षार्थता भज्येतेति भावः ॥ ४९ ॥ नृपेति । यथा त्वं लोकरक्षणार्थं श्रुतिधरैस्सह यासि तथायमपीति भावः । अत्राभिप्रायमाह—अयमर्थ इति । अन्यतोऽन्येंद्रियेणानवगतानामज्ञातानां पञ्चानामपि विषयाणां श्रोत्रेणैव प्रथममवगमात्पञ्चालमिति संज्ञेति विश्वनाथः । शास्त्रं विना भूतभविष्यद्व्यवहितादिविषयाणां नान्यत्प्रकाशकमिति स्वाम्यभिप्रायः । एतावता साम्येन प्राथम्यतौल्येन । ततः कर्मकांडश्रवणात् । तदर्थं कर्मकांडार्थम् । अनुष्ठाय कृत्वा । एवं दक्षिणकर्णवत् । तद्वैपरीत्येन । पितृयानवैपरीत्येन। निवृत्तिशास्त्रश्रवणजविचारेण देवैराहूतो देवयानं प्रपद्यतेऽर्चिरादिमार्गप्रापक उत्तरो वामः देवहूरुच्यत इत्यर्थः ॥ ५० ॥ ५१ ॥ असुभ्य इंद्रियेभ्यो रांति विषयभोगं ददतीत्यसुरा इंद्रियारामाः । रातेर्डः । तेषामियमासुरी द्वाः ग्राम्याणां गृहस्थाणां कं सुखं येन स ग्राम्यको व्यवायस्तम् ॥ ५२ ॥ निर्ऋच्छति निर्याति पुरीषमस्मादिति निर्ऋतिः 'ऋ—गतौ' अतः क्तिन्नपादाने बाहुलकात् । गुदाच्छिद्रं हिंसालक्षणं नरकं वा वैशसं तेन गुदेनोत्क्रांतस्य त्यक्तदेहस्य नरकप्राप्तेः "ऊर्ध्वच्छिद्रगतप्राणास्स्वर्गं यान्ति नरोत्तमाः । अधश्छिद्रगतप्राणा नरकं भृशदारुणम् ॥" इति गरुडोक्त्या श्रूयमाणत्वादिति ॥ ५३ ॥ निर्गता वाक् यस्मात्स निर्वाक् पेशः कोशाकारगृहं करोतीति पेशस्कृत् पेश इत्युपलक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स यर्ह्यंतःपुरगतो विषूचीनसमन्वितः ॥ मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम् ॥५५॥ एवं कर्मसु संसक्तः कामात्मा वंचितोऽबुधः ॥ महिषी यद्यदीहेत तत्तदेवान्ववर्तत ॥ ५६ ॥ क्वचित्पिबंत्यां पिबति मदिरां मदविह्वलः ॥ अश्नंत्यां क्वचिदश्नाति जक्षत्यां सह जक्षति ॥५७॥ क्वचिद्गायति गायंत्यां रुदत्यां रुदति क्वचित् ॥ क्वचिद्धसंत्यां हसति जल्पंत्यामनु जल्पति ॥ ५८ ॥ क्वचिद्धावति धावंत्यां तिष्ठंत्यामनु तिष्ठति ॥ अनु शेते शयानायामन्वास्ते क्वचिदासतीम् ॥ ५९ ॥ क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनु पश्यति ॥ क्वचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित् ॥ ॥ ६० ॥ क्वचिच्च शोचतीं जायामनु शोचति दीनवत् ॥ अनु हृष्यति हृष्यंत्यां मुदितामनु मोदते ॥ ६१ ॥ विप्रलब्धो महिष्यैवं सर्वप्रकृतिवंचितः ॥ नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥ ६२ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पुरंजनपुरंजनीरमणचरित्रवर्णनं नाम पंचविंशोऽध्यायः ॥ २५ ॥ छ ॥ नारद उवाच ॥ स एकदा महेष्वासो रथं पंचाश्वमाशुगम् ॥ द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरम् ॥ १ ॥

देहानामधिपतिः पुरंजनः त्वगिंद्रियस्यानुक्तिः सर्वेष्वंतर्भावात् ॥ ५४ ॥ अंतःपुरं हृदयं गतः विषूचीनं सर्वतोमुखं मनः मोहप्रसादहर्षास्तमःसत्त्वरजःकार्याणि जाया बुद्धिरात्मजा इंद्रियपरिणामास्तदुद्भवम् ॥ ५५ ॥ ५६ ॥ जक्षत्यां भक्षयंत्याम् ॥ ५७ ॥ ५८ ॥ आसतीमासीनाम् ॥ ५९ ॥ ६० ॥ ६१ ॥ सर्वासंगत्वादिलक्षणा प्रकृतिः स्वभावो वंचितो यस्य सर्वथा प्रकृत्या वंचित इति वा नेच्छन्ननिच्छन् क्लैब्यात्पारवश्यात् क्रीडामृगो गृहमर्कटः ॥ ६२ ॥ इति श्रीभागवते चतुर्थे टीकायां पंचविंशोऽध्यायः ॥ २५ ॥ ॥छ॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः ॥ सद्बुद्धित्यागयोगाभ्यां संसृतिः सा प्रपंच्यते ॥ १ ॥ तदेवमात्मन उपाधिकृतां

करकार्य्यवस्तुमात्रस्य यद्यपि निर्वाकृत्वं रसनेतराणां सर्वेषामस्ति तथाप्यत्र वाग्वेदलक्षणा ग्राह्या सा च शब्दोपलक्षितस्य पादजस्य शूद्रस्य नेति व्यंजितं "न केनचिच्छूद्रम्" इति श्रुतेस्तस्याः श्रुतिजत्वात् ॥ ५४ ॥ विषु सर्वतोञ्चतीति विषूचीनम् । इंद्रियपरिणामा दर्शनादयः ॥ ५५ ॥ काम्यंत इति कामा विषयास्तेष्वात्मा मनो यस्य स कामात्माऽबुधः । अन्ववर्तत अन्वसरत् ॥५६॥ "ध्यायतीव लेलायतीव" इत्यादिश्रुतिमनुसृत्याह—क्वचिदिति । भक्षयंत्यां चर्वंत्याम् । स पुरंजनः । ह स्फुटम् ॥५७॥५८॥ ५९ ॥ ६० ॥ ६१ ॥ त्रिपदबहुव्रीहेरसार्वत्रिकत्वात्कर्मधारयगर्भं तत्पुरुषमाह--सर्वथेत्यादिविशेषेण । प्रकर्षेण लब्धः प्राप्तः । महिष्यैवमनेन प्रकारेण विप्रलब्धः नेच्छन्नेकेन स्वभावेन । वस्तुतस्तु-तदनिच्छन्नपि पारवश्यप्रापकादपरस्मात्स्वभावादनुकरोति तद्धर्ममात्मन्यध्यस्यति तदुक्तं—"प्रकृतेः क्रियमाणानि गुणैरात्मनि मन्यते" इत्यादिना सद्बुद्धिसंयोगे तु महोस्यास्तीति मही तस्मिन्नित्योत्सवसमुद्रे हरौ सीदति विषयीकृत्य वर्त्तत इति महिषी सद्बुद्धिस्तया विशेषेण प्रलब्धः प्राप्ताभीष्टकार्यलाभः सर्वस्य स्वजनस्य प्रकृतिः स्वभावस्सर्वप्रकृतिः सर्वप्रकृतिर्वंचिता येन स तथा वञ्चितसर्वस्वजनस्वभावः । अं विष्णुं जानातीत्यज्ञो हरिभक्तः सद्बुद्ध्यधीनत्वात् । क्रीडामृग इव नेच्छन्नपि सांसारिकं कर्मानुकरोति "जोषयेत्सर्वकर्माणि" इत्यादिश्रीगीतोक्तेर्लोकसंग्रहार्थं करोतीति भावः ॥६२॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे पंचविंशोऽध्यायः ॥ २५ ॥ सा प्रसिद्धा (१) धार्मिकस्य विवेकिनोपि जीवस्य कदाचिद्दैववशात्तामसभावोद्गमेनाविवेकतो निषिद्धविषयासक्तिः स्यादिति दर्शयन्विषयलौल्यातिरेकार्थमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकरश्म्येकदमनमेकनीडं द्विकूबरम् ॥ पंचप्रहरणं सप्तवरूथं पंचविक्रमम् ॥ २ ॥ हैमोपस्करमारुह्य स्वर्णवर्माऽक्षयेषुधिः ॥ एकादश चमूनाथः पंचप्रस्थमगाद्वनम् ॥ ३ ॥ चचार मृगयां तत्र दृप्त आत्तेषुकार्मुकः ॥ विहाय जायामतदर्हां मृगव्यसनलालसः ॥ ४ ॥ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ॥ न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ॥ ५ ॥ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान्पशून्वने ॥ यावदर्थमलं लुब्धो हन्यादिति नियम्यते ॥ ६ ॥

सुषुप्तावस्थां जाग्रदवस्थां चोक्त्वेदानीं स्वप्नावस्थामाह स एकदेति दशभिः । महानिश्वासो धनुः कर्तृत्वभोक्तृत्वाद्यभिनिवेशो यस्य स रथमारुह्य पंचप्रस्थं वनमगादिति तृतीयेनान्वयः । रथं तदानीमेव विधृतं स्वप्नदेहम् । जाग्रद्देहस्य शतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात् । पंच ज्ञानेंद्रियाण्यश्वा यस्य आशुगं शीघ्रगतिम् । द्वे अहंताममते ईषे दंडिके यस्य द्वे पुण्यपापे चक्रे यस्य एकं प्रधानमक्षो यस्य त्रयो गुणा वेणवो ध्वजा यस्य पंच प्राणा बन्धुराणि बन्धनानि यस्य ॥ १ ॥ एकं मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्दमनः सूतो यस्य तं च तं च एकं हृदयं नीडं रथिन उपवेशस्थानं यस्मिन् द्वौ शोकमोहौ कूबरौ युगबन्धनस्थानं यस्य पंच शब्दादयो विषयाः प्रहियंते प्रक्षिप्यंते यस्मिन् । अस्य व्याख्यानं भविष्यति 'पंचेंद्रियार्थप्रक्षेप' इति । सप्त धातवो वरूथा रक्षार्थं चर्माद्यावरणानि यस्य पंच कर्मेंद्रियाणि विक्रमा गतिप्रकारा यस्य ॥ २ ॥ हैमोपस्करं सौवर्णाभरणम् । स्वर्णवर्मा वर्म कवचम् । रजोगुणावृतः । अक्षयेषुधिः इषुधिर्निषंगः । अनन्तवासनायुक्ताहंकारोपाधिः एकादशो मनोरूपश्चमूनाथः सेनापतिर्यस्य वासनामयस्य मनसः प्रग्रहत्वं संकल्पविकल्पात्मकस्य बृहद्बलत्वेन वक्ष्यमाणस्य चमूनाथत्वमिति विभागः । पंच शब्दादयो विषयाः प्रस्थाः सानवो यस्मिंस्तद्वनं भजनीयं देशमगात् ॥ ३ ॥ आत्ता गृहीता इषवो रागादिरूपाः कार्मुकं च भोगाद्यभिनिवेशरूपं येन जायां विवेकवतीं बुद्धिं विहाय अतदर्हां त्यागानर्हाम् । त्यागे हेतुः । मृग्यंत इति मृगा विषयास्तेषु व्यसनं भोगासक्तिस्तेन लालसाऽतिस्पृहा यस्य ॥ ४ ॥ बाणै रागादिभिः वनेषु भजनीयदेशेषु वनगोचरान्भजनीयविषयान् न्यहनदात्मसात्कृतवान् । आसुरीम् राजसीम् । कथापक्षे तु स्पष्टमेव ॥ ५ ॥ नन्वासुरीं वृत्तिमाश्रित्येति किमिति मृगया निंद्यते । कथापक्षे तावद्राज्ञो विहितैव सा अध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एवान्यथा शरीरनिर्वाहोऽपि न स्यादित्याशंक्याह

देहं रथरूपेण वर्णयति स इति॥ १ ॥ कथापक्षे पञ्चविक्रमं विस्तृतविक्रमं 'पचि—विस्तारे' ॥ २ ॥ अध्यात्मपक्षे हैमा हिमसंबंधिन उपस्करा अतिजाड्यादस्फूर्त्तय एव परिच्छदा यस्य तम् ॥ ३ ॥ तत्र पञ्चप्रस्थवने मृगयां परदारगमनादिपापम् ॥ ४ ॥ घोरात्मा भयंकरमूर्त्तिः । निरनुग्रहो निर्दयः ॥ ५ ॥ अत्राक्षिपति—नन्विति । अत्राशयं प्रकाशयति—अयं भाव इति । आदिना यागादिग्रहः । तत्रापि श्राद्धादिष्वपि । तत्रापि प्रख्यातेषु महालयादिष्वपि । इत्यर्थ इति । नियमं द्वारीकृत्य परिसंख्यैवेयमिति भातीति भावः । "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तते" इति श्रुतेः । मृगया हि केवलं दुष्टनाशजन्यप्रजारक्षार्थं शस्त्राभ्यासदार्ढ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एवं कर्म नियतं विद्वान्कुर्वीत मानवः ॥ कर्मणा तेन राजेंद्र ज्ञानेन न स लिप्यते ॥ ७ ॥ अन्यथा कर्म कुर्वाणो मानारूढो निबध्यते ॥ गुणप्रवाहे पतितो नष्टप्रज्ञो व्रजत्यधः ॥ ८ ॥ तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः ॥ विप्लवो दुःखितानां हि दुःसहः करुणात्मनाम् ॥ ९ ॥ शशान्वराहान्महिषान्गवयान्रुरुशल्यकान् ॥ मेध्यानन्यांश्च विविधान्विनिघ्नञ्छ्रममध्यगात् ॥ १० ॥ ततः क्षुत्तृट्परिश्रांतो निवृत्तो गृहमेयिवान् ॥ कृतस्नानोचिताहारः संविवेश गतक्लमः ॥ ११ ॥

तीर्थेष्विति त्रिभिः । अयं भावः । नहि मृगया विधीयते रागप्राप्तत्वात्किं तु नियम्यते प्रवृत्तिः संकोच्यते । नियममेव षड्विधं दर्शयति । यद्यलमत्यर्थं लुब्धो रागी सन् हन्यात्तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिदृष्टेषु प्रख्यातेष्वेव न तु नित्यश्राद्धादिषु तत्रापि राजैव मेध्यानेव वन एव यावदुपयोगमेवेति एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एवेत्यर्थः ॥ ६ ॥ अतो नावश्यकत्वमित्याह । य इति । एवं नियतं कर्म विद्वान् तेनेत्युपलक्षणम् । तेनान्येन वा कर्मणैवमनुष्ठितेन यज्ज्ञानं भवति तेन ज्ञानेन हेतुना सोऽनुष्ठाता न लिप्यते ॥ ७ ॥ अन्यथा नियमोल्लंघनेनांतःकरणशुद्ध्यभावात् । कर्तृत्वाभिमानमारूढः कर्मभिरनुबद्ध्यते ततश्च गुणप्रवाहे पतितोऽधो व्रजति ॥ ८ ॥ प्रासंगिकं परिसमाप्य पुनर्मृगयामेवानुवर्णयति । तत्रेति । चित्रा वाजाः पक्षा येषां तैः विप्लवो नाशः करुणात्मनां कृपालूनां दुःसहः ॥९॥१०॥ तदेवं स्वमावस्था दर्शिता । इदानीं पुनरपि विवेकवत्या बुद्ध्या रममाणस्य पुत्रादिसंततिं प्रपंचयिष्यन्कथासौंदर्याय तस्याः प्रणयकुपिताया अनुनयं प्रस्तावसहितमाह । तत इत्या

यैव विहिता तत्रापि विहितयागाद्यवशिष्टमांसाशनमतिरागिणोऽभ्यनुज्ञामात्रेण तन्निवृत्तावेव तात्पर्यं तादृशयागस्य श्रीनारदेन घोरत्वेनोक्तत्वात् ''ऋतुभिर्घोरैः पशुमारकैः'' इति ॥ ६ ॥ अतः परिसंख्याविधित्वात् । तेन मृगयादिनाऽन्येन ऋतुकालस्त्रीसंगादिरूपादिना ज्ञानेन हेतुना तत्कर्मजन्येन ज्ञानेन हेतुनेत्यर्थः । तथा चाध्यात्मपक्षेपि निषिद्धेतरविषयभोग एव जीवस्य विहित इत्यर्थः ॥ ७ ॥ ८ ॥ तत्र तदा । शिलीमुखैर्बाणैः ''अलिबाणौ शिलीमुखौ'' इति कोशात् । पक्षे विविधदोषयुक्तैरिंद्रियैः विप्लवो विविधहिंसादिपापम् । करुणात्मनामस्मादृशाम् । अत एव त्वमेव प्रबोध्यस इति भावः ॥ ९ ॥ शशान् विच्छिद्यविच्छिद्य प्राप्तान् 'शश-प्लुतगतौ' । वराहान् श्रेष्ठनरैस्सर्वतस्त्यक्तान् 'ओहाक्-त्यागे आङ्पूर्वः' । महिषान् प्रतिष्ठाप्रदान् महीं सन्वंतीति व्युत्पत्तेः 'षणु-दाने' तानादिकः । गवयान् गतवयसो जरसं गतान् गतस्य गादेशे वयसो डप्रत्यये टिलोपे च रूपसिद्धेः । रुरून् रोदनहेतून् ''प्रियं त्वां रोत्स्यति'' इति श्रुतेः । शल्यकान् वियोगे शल्यवद्दुःखहेतून् । मेध्यान्संप्राप्तान् 'मेधृ-संगमे च' विनिघ्नन्प्राप्नुवन्भुंजान इत्यर्थः । श्रममध्यगादिति । धार्मिकजीवो हि कथंचिद्दैववशात्कंचित्कालमधर्मं कृत्वाऽनुतापं प्राप्तः स्यादित्यर्थः ॥ १० ॥ ततो मृगयाश्रमोत्तरम् । क्षुत्तृट्परिश्रांत इति । कृतानां दुष्कृतानां श्रवणेन व्याकुल इत्यर्थः । निवृत्तः पापेभ्यो विरतः गृहमेयिवानित्यधर्ममर्य्यादां विहाय पुनर्धर्ममर्य्यादायां स्थातुमियेषेत्यर्थः । कृतस्नान इति । ब्राह्मणानामंत्र्य पापप्रायश्चित्तं कृतवानित्यर्थः । उचिताहारः मांसमद्याद्यशुचिभक्षणं तत्त्याजेत्यर्थः । संविवेश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानमर्हयांचक्रे धूपालेपस्रगादिभिः ॥ साध्वलंकृतसर्वांगो महिष्यामादधे मनः ॥ १२ ॥ तृप्तो हृष्टः सुदृप्तश्च कंदर्पाकृष्टमानसः ॥ न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीम् ॥ १३ ॥ अन्तःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत् ॥ अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा ॥ न तथैतर्हि रोचंते गृहेषु गृहसंपदः ॥ १४ ॥ यदि न स्याद्गृहे माता पत्नी वा पतिदेवता ॥ व्यंगे रथ इव प्राज्ञः को नामासीत दीनवत् ॥ १५ ॥ क्व वर्तते सा ललना मज्जंतं व्यसनार्णवे ॥ या मामुद्धरते प्रज्ञां दीपयंती पदेपदे ॥ १६ ॥ रामा ऊचुः ॥ नरनाथ न जानीमस्त्वत्प्रिया यद् व्यवस्यति ॥ भूतले निरवस्तारे शयानां पश्य शत्रुहन् ॥ १७ ॥ नारद उवाच ॥ पुरंजनः स्वमहिषीं निरीक्ष्यावधुतां भुवि ॥ तत्संगोन्मथितज्ञानो वैक्लव्यं परमं ययौ ॥ १८ ॥

रभ्य यावदध्यायसमाप्ति । एयिवानागतः कृतं स्नानमुचित आहारश्च येन । संविवेश शय्यामाश्रितः ॥ ११ ॥ १२ ॥ गृहमेधिनीं विवेकवतीं सात्त्विकीं बुद्धिं राजस्यां बुद्ध्यां वर्तमानो नापश्यत् ॥ १३ ॥ हे वेदिषत् हे प्राचीनबर्हिः । अंतःपुरस्त्रियस्तत्सखीः । सेश्वरीणां स्वामिनीसहितानाम् । यथा पुरेत्यादि पृथग्वाक्यम् ॥ १४ ॥ व्यंगे चक्राद्यंगहीने ॥ १५ ॥ १६ ॥ निरवस्तारे आस्तरणरहिते ॥ १७ ॥ अवधुतां त्यक्तदेहादराम् । तत्संगेनोन्मथितं व्याकुलं ज्ञानं यस्य ॥ १८ ॥

किंचित्स्थिरी बभूवेत्यर्थः । गतक्लमस्त्यक्तविषयपरिश्रमः ॥ ११ ॥ आत्मानमर्हयांचक्रे इति । साधून्मुनीन्विद्विषश्च संमान्यानीय तैः स्वांतःकरणं शोधयामासेत्यर्थः । कैर्धूपादिभिरिति ज्ञानवैराग्यादिनानोपाख्यानोपदेशैः 'साध्वलंकृतसर्वांगः' इति शास्त्रानुसरणीकृतसर्वचित्तवृत्तिक इत्यर्थः । महिष्यां पूर्वावस्थाप्राप्तायां धर्मलीलायां स्वबुद्धावित्यर्थः ॥ १२ ॥ तृप्त इत्यादिनाऽधर्मसंस्कारापगम उक्तः । कंदर्पाकृष्टमानस इति । पूर्वदशावर्त्तिनीं धर्मनिष्ठावतीं बुद्धिं युवतिमिव प्राप्तुमत्युत्सुक इत्यर्थः । न व्यचष्टेति । कथापक्षे मृगयाव्याजेन वनं गत्वा कामपि कामिनीं रमयामासेति पुरंजनी मानिनी बभूवेति हेतोरिति भावः । अध्यात्मपक्षे—आगंतुकपापकृतमालिन्यस्य निःशेषानपगमात् प्राक्तनी धर्मप्रयोजिका बुद्धिरीप्सितापि न शीघ्रमाविर्भवेदित्येव विवक्षितम् ॥ १३ ॥ पक्षेंतःपुरस्त्रीरंतःकरणवृत्तीः पूर्वदशावस्थाधर्मप्रवर्त्तिनीर्मनाक् प्रादुर्भूता वीक्ष्य परामर्श । हंतैतादृश्य एव मम बुद्धिवृत्तयो यदि सांप्रतिकपापसंस्कारेणोच्छिद्यमानाः स्थिरास्स्युस्तदैव ममोद्धार इति कुशलप्रश्नस्यार्थः । ननु विषयभोगेन सुखी भव किन्ते धर्म्मेणेत्यत आह—एतर्हि इदानीं निषिद्धविषया रोचंते ॥ १४ ॥ माता विष्णुभक्तिः । पत्नी धर्मपत्नी ॥ १५ ॥ क्व वर्त्तत इति । बुद्धिवृत्तय एव काश्चनकाश्चनानुभूयंते न तु वस्तुतः सा बुद्धिरिति मनसि खिद्यते स्म पदेपदेऽनुक्षणं मम प्रज्ञामुद्दीपयंती भगवद्विषयज्ञानमुद्बोधयंती या मामुद्धरति संसारादिति शेषः । सा ललना शोभना बुद्धिः क्व वर्त्तत इत्यन्वयः । उद्धरत इति वर्त्तमानसमीपे भविष्यति लट् ॥ १६ ॥ पक्षे तस्य हृदयमेव तस्याः पुष्पपर्यंकस्तस्माद्विच्युतिरेव तस्याः सद्बुद्धेर्निरवस्तारे भूतले शयनं, नरैः कामादिविक्षिप्तैस्त्वमेव तन्नाशार्थं नाथ्यसेऽतस्तव तस्याः कामादिजिहीर्षावत्या बुद्धेस्त्यागो नोचित इति भावः । अत्र हेतुर्द्वितीयामंत्रणं हे शत्रुहन् त्यक्तपापोसीति भावः ॥ १७ ॥ पक्षेऽवधुतां वृक्षे स्वेनैव स्वहृदयाच्च्यावितत्वात्खंडितां निरीक्ष्य हंत ममैवायं महापराध इति विचार्य तत्संगेन तस्याः पुनरादित्सयोन्मथितज्ञानस्तिरस्कृतस्वबुद्धिक इत्यर्थः । वैक्लव्यं दैन्यम् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सांत्वयञ्श्लक्ष्णया वाचा हृदयेन विदूयता ॥ प्रेयस्याः स्नेहसंरंभलिंगमात्मनि नाभ्यगात् ॥ १९ ॥ अनुनिन्येऽथ शनैर्वीरोऽनुनयकोविदः ॥ पस्पर्श पादयुगलमाह चोत्संगलालिताम् ॥ २० ॥ पुरंजन उवाच ॥ नूनं त्वकृतपुण्यास्ते भृत्या येष्वीश्वराः शुभे ॥ कृतागःस्वात्मसात्कृत्वा शिक्षादंडं न युंजते ॥ २१ ॥ परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः ॥ बालो न वेद तत्तन्वि बंधुकृत्यममर्षणः ॥ २२ ॥ सा त्वं मुखं सुदति सुभ्र्व नुरागभारव्रीडाविलंबविलसद्धसितावलोकम् ॥ नीलालकालिभिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि वल्गुवाक्यम् ॥ २३ ॥ तस्मिन्दधे दममहं तव वीरपत्नि योऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्तम् ॥ पश्ये न वीतभयमुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात् ॥ २४ ॥

स्नेहसंरंभः प्रणयकोपस्तस्य लिंगं कुटिलदृष्ट्यादि स्वस्मिन्न लब्धवान् ॥ १९ ॥ उत्संगमारोप्य लालिताम् ॥ २० ॥ कृतमागोऽपराधो यैस्तेषु आत्मसात्कृत्वा अस्मदधीनोऽयमिति मत्वा शिक्षार्थं दंडं न कुर्वंति ते भृत्या मंदभाग्याः ॥ २१ ॥ यतः परमोऽनुग्रहो दंडः । यस्तु दंडतो विषीदति सोऽज्ञ इत्याह । बाल इति । बंधुकृत्यं शिक्षाकरणम् । अमर्षणः क्रोधी ॥२२॥ हे सुदति हे सुभ्रु हे सुभ्रूः हे मनस्विनि सा त्वमस्माकं स्वामिन्यतः स्वानां मुखं प्रदर्शय । कीदृशम् । अनुरागभारेण व्रीडया च यो विलंबो मंथरता तेन विलसन्हसितावलोको यस्मिन् । नीला अलका एवालयस्तैरुपस्कृतं भूषितम् । उन्नतनासिकम् । वल्गु वाक्यं यस्मिंस्तत् ॥ २३ ॥ हे वीरपत्नि वीरस्य मम भार्ये यस्ते कृतापराधस्तस्मिन्नहं ब्राह्मणकुलादन्यत्रान्यस्मिन्प्राणिनि मुररिपुदासादितरत्र च दमं दधे दंडं करोमि । किं तु तं विगतभयमुच्चैर्मुदितम् ।

सांत्वयन्निति । मद्भाग्यादियं मे प्राक्तनी बुद्धिः पुनरप्याविर्भवति यां विनैव मम दुर्गतिरिति मनोनुलापः प्रेमसंरंभस्तु चित्तं नाभ्यगादिति । ममाप्येवं पापाचरणं केन कारणेनाभूदिति क्षणं परामम‍र्श ॥१९॥ अनुनिन्य इति । पुनरद्यारभ्य दुर्विषयभोगो नैव कार्य इति पस्पर्श पादयुगलमिति । अहंकारत्यागसाधुजनसंमानावेव तस्याः पादौ पस्पर्श प्राप । उत्संगलालितां स्वहृदयनिकटमानीताम् ॥२०॥ शुभे इति । मम दंडेन त्वं मे शुभदैवेति भावः । कथापक्षे प्रिये मह्यं यत्कोपरूपं दंडं करोषि तत्कृपया सापराधमपि निजदासमबुधं शिक्षयस्यतस्त्वामेतज्जन्मनि कदापि न त्यक्ष्यामीत्यर्थांतरन्यासेनाह-नूनमिति द्वाभ्याम् । आत्मसात्कृत्वाऽस्मदधीनोऽयमिति मत्वा शिक्षार्थं दंडं येषु न कुर्वंति ते भृत्या मंदभाग्यास्तेन येषु दंडं कुर्वंति ते भूरिभाग्या इत्यहं ते दंडपात्री भवन्नात्मानं भूरिभाग्यमेव मन्य इति भावः । अध्यात्मपक्षे हंतहंत प्रतिष्ठितस्यापि मम कादाचित्कपापाचरणेन संप्रति यल्लोके निंदा-चित्ताप्रसादौ दुस्सहावभूतां तत्परमेश्वरेणैव मह्यं शिक्षादंडो दत्तस्तदहमेतज्जन्मनि पुनः कदापि सद्बुद्धिं न त्यक्ष्यामीति तां सद्बुद्धिमेव मनसा संबोध्याह-नूनमिति द्वाभ्याम् ॥२१॥ यस्तु दंडितो विषीदति सोऽज्ञ इत्याह-बाल इति । अमर्षणः क्रोधी । पक्षे सद्बुद्धिं प्रति स्वगतमाह त्वां सद्बुद्धिं त्यक्तवतो मम यः सांप्रतिकोनुताप एष एव त्वद्दत्तो दंडः परमो ममानुग्रह एव यतः पुनरपि पापासक्तिर्न सम्भाविनीति भावः । तन्वीति । तन्व्यास्ते क्रोधेपि तनुत्वमेवोचितमिति भावः ॥२२॥ अतः स्वामिनीत्वात् । दंडस्तु दत्त एव संप्रति प्रसीदेत्याह-सा त्वमिति । प्रसिद्धा त्वमस्माकं स्वामिनी । अध्यात्मपक्षे-सर्वेणैव प्रकारेण सैवेयं मे प्राक्तनी बुद्धिरनुकूलीभूय स्थिरा भवत्विति मुहुः प्रार्थना ॥२३॥ वीरपत्नीति । भगवद्भक्तात्सर्वपापानि बिभ्यतीति भावः । कथापक्षेपीत्यर्थ इति स्वामिभिरुक्तं, वीरात्सर्वे कातरा बिभ्यति विना वीरामिति भावः । ब्राह्मणकुलस्य वैष्णवकुलस्य च वीरकुलत्वं भगवत्कलावीरकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्त्रं न ते वितिलकं मलिनं विहर्षं संरंभभीममविमृष्टमपेतरागम् ॥ पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबाधरं विगतकुंकुमपंकरागम् ॥ २५ ॥ तन्मे प्रसीद सुहृदः कृत किल्बिषस्य स्वैरंगतस्य मृगयां व्यसनातुरस्य ॥ का देवरं वशगतं कुसुमास्त्रवेगविस्रस्तपौंस्नमुशती न भजेत कृत्ये ॥ २६ ॥ इति श्रीभा० म० च० पुरंजनोपा० षड्विंशोऽध्यायः ॥ २६ ॥ छ ॥ नारद उवाच ॥ इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः ॥ पुरंजनी महाराज रेमे रमयती पतिम् ॥ १ ॥

त्रिलोक्यामन्यत्र वै लोकत्रयाद्बहिरपि न पश्यामि यस्तेऽपराधी स यत्र कुत्रापि गतो मद्भयादेवासौ मरिष्यतीत्यर्थः ॥ २४ ॥ ते वक्त्रमितः पूर्वं कदाचिदपि वितिलकं न पश्यामि । संरंभेण कोपावेशेन भीमं भयंकरम् अविमृष्टमनुज्ज्वलम् । अपेतरागं स्नेहशून्यं तथा ते सुजातौ शोभनौ स्तनावपि शोकाश्रुभिरुपहतौ न पश्यामि तथा बिंबफलाकारमधरं च विगतः कुंकुमपंकतुल्यस्तांबूलरागो यस्मात्तादृशं न पश्यामि । इदानीं कुत एवं जातमिति शेषः । पाठांतरे एवंभूतं मुखं स्तनौ च पश्यन् शं न विंदामीत्यन्वयः । विगतः कुंकुमपंकरागो याभ्यामिति स्तनयोर्विशेषणम् ॥ २५ ॥ तत्तस्मात्कृतं किल्बिषमपराधो येन तस्य । किल्बिषमेवाह । स्वैरं स्वातंत्र्येण त्वामपृष्ट्वा मृगयां गतस्य देवो देवनं क्रीडा तां राति ददातीति देवरः कांतस्तम् । कामवेगेन विस्रस्तं पौंस्नं पौरुषं धैर्यं यस्य तम् । उशती कामयमाना कृत्ये कर्तुं योग्येऽर्थे का न भजेत ॥ २६ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे टीकायां षड्विंशोऽध्यायः ॥ २६ ॥ ॥ छ ॥ सप्तविंशे प्रियापुत्राद्यासक्तया विस्मृतात्मनः ॥ कालकन्याद्युपाख्यानैर्जरारोगाद्युदीर्यते ॥ १ ॥ तदेवं जीवस्यानुनयादिकथासौंदर्येणात्यंतमुपाधिवश्यत्वमुक्त्वा तन्निमित्तां संसारपरंपरां निरूपयितुमाह । इत्थमिति । अत्र च प्रतिपदं

लं कदर्थीकृत्य स्वैरं विचरतामिति भरतोपाख्याने पञ्चमस्कंधे वक्ष्यतीति । अध्यात्मपक्षे—यदि प्राचीनदैहिकाद्वा पापाचरणात्तव प्रातिकूल्यं तदा हे सद्बुद्धे दमं तदुपशमकं दानपुण्यव्रतादिकं करोमि यदि तु ब्राह्मणकोपाद्वैष्णवापराधाद्वा तदा तु तौ दुरुपशमावेवेत्याह—भूसुरकुलादन्यत्रेत्यादि । तद्द्वयापराधस्य तद्द्वयप्रसादादेवोपशांतिर्नान्यथेति भावः । वीतभयमित्याद्यधर्मनिर्मूलने साटोपोक्तिः ॥२४॥ कदापि न पश्यामीदानीं मद्दौर्भाग्यादेव पश्यामीति भावः । पाठांतरे “पश्यन्स्तनावपि शुचोपहतौ सुजातौ विंदामि शं विगतकुंकुमपंकरागौ” इति पाठे । पक्षे वितिलकत्वादिभिरुपलब्धाया अपि सद्बुद्धेः पूर्ववत्प्रसादाभावो द्योतितः ॥ २५ ॥ यतोऽहं त्वदनुवर्त्यैवास्मि तत्तस्माद्धेतोः “पौंस्नं स्वातंत्र्यधैर्य्ययोः” इति निरुक्तिः । कृत्ये कांतविषयकस्नेहोचितकर्मणि । पक्षे सद्बुद्धिमेव साक्षात्कृत्याह—प्रसीद प्रसन्ना भवंती मम हृदि विराजस्व मम कीदृशस्य स्वैरं निरंकुशमेव कृतकिल्बिषस्य मृगयां गतस्य व्याधस्येव पापिन इत्यर्थः । “व्याधो मृगवधाजीवो मृगयुर्लुब्धको हि सः” इत्यभिधानात् । सद्बुद्धेः स्वस्मिन्नवस्थितिमर्थांतरन्यासेनाह—केति । स्त्री यथा कांतं सापराधमपि न जहाति तथैव हे सद्बुद्धे मां त्वं न जहीहीत्यर्थः ॥ २६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे षड्विंशोऽध्यायः ॥ २६ ॥ आदिना पौत्रस्नुषादिग्रहः । द्वितीयादिना गंधर्वोपाख्यानादिग्रहः । तृतीयादिना मरणादिग्रहः (१) तदेवं तदित्थम् । अनुनयः कुपितप्रसादनम् । आदिना स्वानुकूल्यप्रदर्शनग्रहः । अत्र च पुरंजनोपाख्याने कथंचित्प्रतिभाधिक्यादिना । तत्र श्रीनारदोपदेशकथायां, ततो नारदोक्त्यनुरोधादेव । स्वप्रौढिप्रख्यापनं निजपाण्डित्याधिक्यद्योतनम् । अत्र विश्वनाथः—तदेवं धार्मिकस्यापि जीवस्य कदाचिदंतराये प्राप्ते विविधदुष्कृतदूषितांतःकरणस्यापि पुनर्लब्धविवेकस्य दानव्रततपःप्रायश्चित्तादिकं कृतवतोपि मनोमालिन्यान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स राजा महिषीं राजन्सुस्नातां रुचिराननाम् ॥ कृतस्वस्त्ययनां तृप्तामभ्यनन्ददुपागताम् ॥ २ ॥ तयोपगूढः परिरब्धकंधरो रहोऽनुमंत्रैरपकृष्टचेतनः ॥ न कालरंहो बुबुधे दुरत्ययं दिवा निशेति प्रमदापरिग्रहः ॥ ३ ॥ शयान उन्नद्धमदो महामना महाऽर्हतल्पे महिषीभुजोपधिः ॥ तामेव वीरो मनुते परं यतस्तमोऽभिभूतो न निजं परं च यत् ॥ ४ ॥ तयैवं रममाणस्य कामकश्मलचेतसः ॥ क्षणार्धमिव राजेंद्र व्यतिक्रांतं नवं वयः ॥ ५ ॥ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः ॥ शतान्येकादश विराडायुषोऽर्धमथात्यगात् ॥ ६ ॥

कथंचिदध्यात्मपक्षेऽपि योजयितुं शक्यमेव श्रीनारदेन तु जीवस्य स्त्रीपुरुषवासनादार्ढ्येन विचित्रा संसृतिर्भवतीत्येतावदेव कथातात्पर्यं दर्शितम् । "क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमंमधीः ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः" ॥ इति वदता तत्रादौ पुंस्त्वेन संसृतिरध्यायत्रयेणोक्ता ततश्चैकेनाध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्येश्वरप्रसादलब्धज्ञानेन मोक्ष इत्युक्तम् । ततस्तदेव यथोपयोगं व्याख्यातमिति पंचाध्याय्यारंभः प्रतीयते प्रतिपदमध्यात्मयोजना तु दुर्घटा प्रायशो निष्प्रयोजना चेति स्वप्रौढिख्यापनमनादृत्य यथोपयोगमेव व्याख्यास्यामः । सध्र्यक् सम्यक् विभ्रमैर्विलासैः ॥ १ ॥ कृतं स्वस्त्ययनं मंगलं कुंकुमसिंदूरादिभिर्यस्यास्ताम् ॥ २ ॥ उपगूढः परिरब्धः । परिरब्धा कंधरा तस्या येन । रह एकांते अनुमंत्रैरनुकूलैर्गुह्यभाषणैः अपकृष्टा चेतना विवेको यस्य । कालरंह आयुर्व्ययम् । दिवा निशा अहर्निशं, प्रमदैव परिग्रहो न ज्ञानसाधनं यस्य ॥ ३ ॥ महार्हतल्पे उत्कृष्टशय्यायां शयानः महिष्या भुज उपधिरुपधानमुच्छीर्षकं यस्य अविसर्गपाठे शयनक्रियाविशेषणम् । तां महिषीमेव परं पुरुषार्थममन्यत न तु यन्निजं रूपं ब्रह्म तत् तमसाऽज्ञानेनाभिभूतो यतः ॥ ४ ॥ ५ ॥ पुत्रानिंद्रियपरिणामान् दुहितॄस्तदनंतरं बुद्धिवृत्तीः । इयं पुत्रसंख्या च बाहुल्यमात्रविवक्षया ।

पगमादनुपदमनुतापसहस्रविदीर्णस्य भाग्यवशादेव पुनरपि सद्बुद्धिप्राप्तिः प्रपञ्चिता । इदानीं पूर्ववदेव धर्मबुद्धिमतः सदाचारस्य तस्य गार्हस्थ्यमाह—इत्थमिति । पक्षे धर्मे मतिं त्यज्य पूर्ववत्कर्मबुद्धावेवासक्तो बभूवेत्यर्थः । ॥ १ ॥ सुस्नातेत्यादिना स्त्रीयसद्बुद्धेः प्रसन्नतामालक्ष्य विगतमनोमालिन्यः कृतार्थी बभूवेत्युक्तम् ॥ २ ॥ पक्षे धर्मकर्मनिर्वाहमंत्रणाभिरपकृष्टो विलुप्ती कृता चेतना संसारतरणलक्षणा बुद्धिर्यस्य सः । कालस्य रंहो वेगं वैराग्याभावान्न बुबुधे । कीदृशमिदं दिवा गतमियं निशागतेत्येतत्प्रकारकमित्यर्थः ॥३॥ तामेव व्यवायतो हेतोर्मनुते स्त्रीसंगसुखमेव पुरुषार्थममन्यत । अमनुतेति स्वामिसंमतः पाठः प्रतिभातीति । न तु निजं स्वीयं परश्च किमपि अमनुतागणयदित्यर्थः । यद्वा निजमात्मानं ततः परञ्च परमात्मानमित्यर्थः । अध्यात्मपक्षे व्यवायतो धर्मपत्नीसंगतो धर्मासक्त्या धर्ममेव पुरुषार्थममन्यत न तु मोक्षं यतो न निजं जीवस्वरूपं नापि परं परमेश्वरस्वरूपं, धार्मिक इत्युन्नद्धमदः । महामना दानशीलः । महार्हतल्पे पुण्यकर्मणि शयानो मग्नः । महिषीभुजोपधिरविद्योपाधिः ॥ ४ ॥ राजेन्द्रेति । त्वं तु यज्ञानुष्ठानरतत्वादव्यर्थमायुर्नयन्नपि वस्तुविचारशून्ययज्ञकार्यनिरतत्त्वात्क्षपयस्येवेति भावः । नवं वयः । परिशुद्धं ज्ञानमानंदस्वरूपं व्यतिक्रांतं गतप्रायमिति केचित् ॥५॥ पुत्रान्विवेकनिर्णयसंशयादीन् । दुहितॄर्लज्जोत्कंठाचिन्ताद्याः । आयुषोर्द्धमिति पञ्चाशद्वर्षपर्यंतं विषयभोगलंपट्यमिति विवक्षया ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः ॥ शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ॥ ७ ॥ स पंचालपतिः पुत्रान् पितृवंशविवर्धनान् ॥ दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ॥ ८ ॥ पुत्राणां चाभवन्पुत्रा एकैकस्य शतंशतम् ॥ यैर्वै पौरंजनो वंशः पंचालेषु समेधितः ॥ ९ ॥ तेषु तद्रिक्थहारेषु गृहकोशानुजीविषु ॥ निरूढेन ममत्वेन विषयेष्वन्वबध्यत ॥ १० ॥ ईजेच क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान् पितॄन् भूतपतीन्नानाकामो यथा भवान् ॥ ११ ॥ युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः ॥ आससाद स वै कालो योऽप्रियः प्रिययोषिताम् ॥ १२ ॥ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयम् ॥ १३ ॥ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति सर्वकामविनिर्मिताम् ॥ १४ ॥ ते चंडवेगानुचराः पुरंजनपुरं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत्प्रजागरः ॥ १५ ॥

दुहितृसंख्या तु पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौंदर्यार्थमेव । विराट् सम्राट् आयुषोऽर्धमित्यादपि कथासौंदर्यार्थमेव ॥६॥ पुरंजनकन्यात्वात्पौरंजन्यः । हे प्रजापते ॥७॥ दारैः परिणामानंतरं हिताहितचिंताभिः वरैरुचितविषयभोगैः॥८॥पुत्राणां पुत्राः कर्माणि पंचालेषु शब्दादिविषयेषु॥९॥तेषु पुत्रादिषु तेषामपि ये रिक्थहाराः पुत्रास्तेषु च॥१०॥ भूतपतीन् भैरवादीन् ॥११॥ युक्तेष्वात्महितेषु कर्मस्वनवहितस्य स वै कालो जरासमयः ॥ १२ ॥ चंडवेगः संवत्सरेणावर्तमानेनोपलक्षितः गंधर्वा दिवसाः ॥ १३ ॥ गंधर्व्यो रात्रयः तादृशीस्तादृश्यः मैथुन्यो दिवसैर्मिथुनीभूय स्थिताः सिताश्चासिताश्च शुक्लकृष्णपक्षीयाः परिभ्रमणेन सर्वैः कामैः सह विनिर्मितां पुरीमपहरंति॥१४॥प्रजागरः

पितृमातृयशस्करीरिति । तासां शीलौदार्य्यगुणोपेतत्वेन पुण्यक्रियाहेतुत्वात् । प्रजापते इति । तमेव निर्दिश्योक्तं त्वमेव तासां प्रजानां पतिरिति भावः ॥ ७ ॥ हितांहितंचिंताभिः यथा सौगंध्यसौरूप्यादौ हितचिन्ता दौर्गंध्यकौरूप्यादौ चाहिताचिंतेति । विश्वनाथस्तु—दारैर्मतिधृत्यादिभिर्वरैर्नैयप्रणयादिभिरित्याह ॥ ८ ॥ कर्माणि पुण्याचरणादीनि ॥ ९ ॥ तेषु विवेकादिषु । तस्य पुरंजनस्य । रिक्थहारेषु अभिमानादिधन हर्तृषु । गृहानुजीविषु प्राणेषु कोशानुजीविषु सहओजआदिषु इति चक्रवर्त्ती ॥ १० ॥ ईज इति । पक्षद्वये साम्यं यथा भवानिति । तवैव कथेयं कथ्यते तव दृष्टांतत्वं तु संगोपनार्थमेवेति भावः । संदर्भस्तु-यथा भवानिति विभक्तिविपरिणामेन सर्वत्र योज्यमित्याह ॥ ११ ॥ युक्तेषु भक्तिवैराग्यादिषु । प्रिययोषितां कांताजनानामप्रियः संभोगप्रातिकूल्यात् ॥ १२ ॥ नृपेति । नृपालनेनात्महितं झटिति कुरु समागतो दुस्समय इति भावः ॥ १३ ॥ तादृश्यो बलवत्यः । अपहरंति जन्मारभ्य प्रतिदिनमायुरपहार एव पुर्य्या अपहार इत्युपचारितः ॥ १४ ॥ यदा पंचाशद्वर्षानंतरं पुरं देहमपि हर्त्तुमारेभिरे तदा प्रजागरः प्राण एव प्रत्यषेधत मा पुरमेव मयि तिष्ठति लुप्यतेति साटोपमाहेति । पंचाशद्वर्षानंतरमपि द्वित्रिवर्षपर्यंतं बलं नापयातीति भावः "प्राणाग्नय एवैतस्मिन्पुरे जाग्रति" इति श्रुतेः प्राणबलादेव व्यवहारे प्रवर्त्तत इत्यर्थः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली ॥ १६ ॥ क्षीयमाणे स्वसंबन्ध एकस्मिन्बहुभिर्युधा ॥ चिंतां परा जगामार्तः सराष्ट्रपुरबांधवः ॥ १७ ॥ स एव पुर्यां मधुभुक्पंचालेषु स्वपार्षदैः ॥ उपनीतं बलिं गृह्णन्स्त्रीजितो नाविदद्भयम् ॥ १८ ॥ कालस्य दुहिता काचित्त्रिलोकीं वरमिच्छती ॥ पर्यटंती न बर्हिष्मन्प्रत्यनंदत कश्चन ॥ १९ ॥ दौर्भाग्येनात्मनो लोके विश्रुता दुर्भगेति सा ॥ या तुष्टा राजर्षये तु वृताऽदात्पूरवे वरम् ॥ २० ॥ कदा चिदटमाना सा ब्रह्मलोकान्महीं गतम् ॥ वव्रे बृहद्व्रतं मां तु जानती काममोहिता ॥ ॥ २१ ॥ मयि संरभ्य विपुलमदाच्छापं सुदुःसहम् ॥ स्थातुमर्हसि नैकत्र मद्याच्ञाविमुखो मुने ॥ २२ ॥ ततो विहतसंकल्पा कन्यका यवनेश्वरम् ॥ मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥ २३ ॥

प्राणः ॥ १५ ॥ विंशत्या च सह ॥ १६ ॥ स्वसंबंधे स्वसंबंधिनि प्राणे ॥ १७ ॥ स एव मधुभुक् क्षुद्रसुखभोक्ता स्वपार्षदैरिंद्रियैः नाविदन्नालोचितवान् ॥ ॥ १८ ॥ कालस्य दुहिता जराऽस्ति तां न प्रत्यनंदत नैच्छत् बर्हिष्मन् हे प्राचीनबर्हिः ॥ १९ ॥ पूरवे ययातिपुत्राय तेन वृता सती वरमदात् ! ययातिः शुक्रशापाज्जरां प्राप्य पुत्रानुवाच इमां गृह्णीतेति तां ज्येष्ठाश्चत्वारो न जगृहुः । पुरुस्तु जगृहे ततो ययातिस्तस्मै राज्यं ददाविति जरैवादादित्युक्तम् ॥ २० ॥ सा जरा बृहद्व्रतं नैष्ठिकम् ॥ २१ ॥ प्रत्याख्यातवति मयि संरभ्य क्रोधं कृत्वा नैकत्र स्थातुमर्हसीति शापमदात् ॥ २२ ॥ आधयो व्याधयश्च यवनास्तेषामीश्वरं भयनामानं मृत्युरूपं पतिं

युद्धं तु प्रजागरस्य तैः सार्द्धं जन्मारभ्यैवाभूदित्याह सप्तभिः शतैर्विंशके । न चेति वर्षगतानां दिनानां रात्रीणां च तावत्येव संख्या दर्शिता । शतं समा इति । यावत्परमायुरित्यर्थः । "शतायुर्वै पुरुषः" इति श्रुतेः ॥ १६ ॥ त्रिपंचाशद्वर्षपर्यंतं प्रजागरस्य प्रायः प्रजागरो नाभूदिति तदनंतरं तूत्तरोत्तरं पराजय एवेत्याह–क्षीयमाण इति बहुभिः कालावयवैः ॥ १७ ॥ १८ ॥ जराप्रवेशमुपाख्यानेनाह–कालाज्जरा जायत इति कालस्य दुहितेति । नामविशेषाश्रवणात्काचिदिति । बर्हिष्मन्निति । यज्ञादिकर्मकर्त्तुस्तवापि सा समीपमागता न तु सा कमप्ययं याज्ययं योगी सत्कर्मकर्त्तायं मया परिहार्य्य एवेति मनुते इति भावः ॥१९॥ आत्मनः शरीरस्य दौर्भाग्येण सौंदर्यनाशकत्वेन दुर्गतो भगो यया सा दुर्भगेति प्रसिद्धा ॥ २० ॥ महीं गतं प्राकृतमनुष्यभ्रांत्येत्यर्थः । बृहद्व्रतं नैष्ठिकब्रह्मचारिणं संन्यासिनं वा महाप्रभाववंतं वा सा कमपि न त्यजतीत्यर्थः ॥ २१ ॥ पक्षे मद्देहस्य कर्मारब्धत्वाभावात् षड्डूर्मिराहित्येन तस्याः प्रवेशासामर्थ्यमेव मत्प्रत्याख्यानत्वेन कृपालुत्वेन सर्वत्र मम गमनमेव तस्याः शापफलत्वेनोत्प्रेक्षितमिति ज्ञेयम् । मुने इति । स्त्रीणां कामार्त्तिं जानतापि मुनित्वेन परतापहरणसमर्थेन त्वया नाहं त्यक्तुमुचितेति भावः ॥ २२ ॥ ततो मत्प्रत्याख्यानानंतरम् । मयोपदिष्टमिति । लोकानां भयमेव जरया जीर्णं भवत्विति स्वस्य दयालुत्वं सूचितम् ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिम् ॥ संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति ॥ २४ ॥ द्वाविमावनुशोचंति बालावसदवग्रहौ ॥
यल्लोकशास्त्रोपनतं न राति न तदिच्छति ॥ २५ ॥ अथो भजस्व मां भद्र भजंतीं मे दयां कुरु ॥ एतावान्पौरुषो धर्मो यदार्ताननुकंपते ॥२६॥
कालकन्योदितवचो निशम्य यवनेश्वरः ॥ चिकीर्षुर्देवगुह्यं स सस्मित तामभाषत ॥ २७ ॥ मया निरूपितस्तुभ्यं पतिरात्मसमाधिना ॥ नाभि
नन्दति लोकोऽयं त्वामभद्रामसंमताम् ॥ २८ ॥ त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मविनिर्मितम् ॥ या हि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि ॥२९॥

वव्रे ॥ २३ ॥ हे वीर त्वामीप्सितं पतिं वृणे न रिष्यति न नश्यति ॥ २४ ॥ लोकतो वेदतश्च यद्देयत्वेन ग्राह्यत्वेन चोपनतं प्राप्तं तद्याच्यमानं यो न ददाति यश्च दीयमानं नेच्छति न गृह्णाति इमौ द्वौ कर्मभूतावनुशोचंति संतः ॥ २५ ॥ पुरुषेण कर्तव्यो धर्मः पौरुषः ॥ २६ ॥ देवगुह्यं मरणम् । तद्धि प्राणिनां वैराग्यानुदयाय देवैर्गोप्यते ॥ २७ ॥ तुभ्यं तव आत्मसमाधिना ज्ञानदृष्ट्या याच्यमानोऽयं लोकस्त्वां नेच्छति ॥ २८ ॥ अतोऽव्यक्तगतिः कुतः प्राप्तेत्यलक्षितगतिः सती लोकमा

पक्षे भूतानां भगवद्भक्तानां संकल्पो न रिष्यति । लोकानां भयं जीर्णं भवत्विति नारदेन यः संकल्पः कृतः सोऽन्यथा भवितुं नार्हतीति त्वं मे पतिर्भव यथा त्वामहं भुंक्षे भूतशब्देन भगवद्भक्तोप्युच्यते । यदुक्तं-"भूतानि भव्यानि जनार्दनस्य" इति । संदर्भस्तु-यतो भूतानामन्यैरपि भूतैस्त्वयि कृतः संकल्पो मनोरथो न रिष्यति नष्टुं नार्हति मम तु त्वदेकशरणायाः सुतरां नार्हतीत्यर्थमाह । भयस्य 'यद्भिभेति भयं स्वयम्, इत्यादौ काल वाचकत्वोक्तेस्त्वयि काले कृतः भूतानां संकल्पो न नश्यति किं तु फलत्येव अकाले कृतौ नश्यति 'सर्वं कालेन फलति' इति शिष्टोक्तेस्त्वमेव सर्वफलदोसीत्यतस्त्वामेवाहं वृण इतिभावः । हे वीरेति । विशिष्टानपि त्वमीरयसि कंपयसीति सर्वोत्कृष्टत्वेनापि त्वमेव योग्यो वर इति भावः । यद्वा वीरायाः सर्वदलनसमर्थाया ममेक्षितं पतिमित्यर्थः ॥ २४ ॥ बालावज्ञौ स्वकार्यानभिज्ञौ असन्नवग्रहो हठो ययोस्तावसदवग्रहौ "पदविभागे वृष्ट्यभावे हठेऽ वग्रहो ग्रहः" इति धरणिः । नन्वनेन लोकविद्विष्टं चेत्तर्हि शास्त्रीयमपि न कर्त्तव्यमित्यायातं समत्वेन सहोक्तेः तथा च "तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥" इति श्रीगीतोक्तिर्विरुद्धेति चेद्व्यर्थांतरसंमत्या समादधाति । "अलौकिकं च शास्त्रीयं कर्त्तव्यं लौकिकं कुतः । लोकार्थे शास्त्रहा याति निरयं वितरः सुरान्" इति । तस्माच्छास्त्रानुसारि लौकिकं कर्त्तव्यं नेतरदिति तात्पर्यम् । इतरः शास्त्रानुकूललौकिकं कुर्वाणः । सुरान्याति स्वर्गादिपुरुषार्थमाप्नोतीति तीर्थः । तथा च कन्याहं स्वयंवराऽकस्मात्त्वद्गृहमागता गृहस्थेन त्वया ग्राह्यैवेति भावः । अन्यथा 'य उद्यतमनादृत्य' इत्यादिदोषश्रुतेस्तव शोभनं न भावीति । पक्षे लोकेषु कृपालुना नारदेन यदभिलषितं भयं जीर्णं भवत्विति तल्लोकशास्त्रोचितमेवातस्त्वं मां गृहाणेत्यर्थः ॥ २५ ॥ यस्मादिदं मद्ग्रहणं लोकशास्त्रसिद्धमथोऽतः संक्षिप्य स्वकार्यस्य कर्त्तव्यतामाह-एतावानिति । पक्षे स्वबलं प्रकाश्यापि त्वया जरां न गृह्णामीति वक्तुमशक्यं नारदोक्तिबलादहं त्वां लगंती संहरिष्याम्येवेति स्वगतं वदंती बहिर्वक्रोक्त्या सोत्प्रासमाह-अथो इति । भद्रेति संबुद्धिरभद्रस्यापि न विरुद्धा स्वसमं सर्वो हि भद्रं मनुते इति भावः ॥ २६ ॥ तां कालकन्यां देवस्य परमेश्वरस्य गुह्यं रहस्यं संसारचक्रप्रवर्त्तनं चिकीर्षुः । सस्मितमिति । त्वद्वचनमिदमप्रत्याख्येयमिति स्मितेन ज्ञापयन्नित्यर्थः ॥ २७ ॥ यद्वा-तुभ्यं त्वां भोजयितुमित्यर्थः । अभद्रामभद्रकराम् "गात्रं संकुचितं गतिर्विगलिता भ्रष्टा च दंतावलिर्दृष्टिर्नश्यति वर्द्धते बधिरता वक्रं च लालायते । वाक्यं नो ब्रुवते च बांधवजना भार्या न शुश्रूषते हा कष्टं पुरुषस्य जीर्णवयसः पुत्रोप्यमित्रायते" इति भर्तृहर्युक्तेः । अत एवासंमतामननुमताम् । इत्यर्थ इति । स्त्रीणां बहुपतित्वमभीप्सितमेवेति भावः ॥ २८ ॥ प्रजानाशं प्रजानां त्वया भुक्तानां नाशं प्रणेष्यसि त्वं करिष्यसि कः पुनस्त्वां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रज्वारोऽयं मम भ्राता त्वं च मे भगिनी भव ॥ चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः ॥ ३० ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे पुरंजनोपाख्याने पुरंजनस्य विनश्यदवस्थानिरूपणे कालकन्योपाख्यानवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ छ ॥ नारद उवाच ॥ सैनिका भयनाम्नो ये बर्हिष्मन्दिष्टकारिणः ॥ प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥ १ ॥ त एकदा तु रभसा पुरंजनपुरीं नृप ॥ रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालिताम् ॥ २ ॥ कालकन्याऽपि बुभुजे पुरंजनपुरं बलात् ॥ ययाऽभिभूतः पुरुषः सद्यो निःसारतामियात् ॥ ३ ॥ तयोपभुज्यमानां वै यवनाः सर्वतोदिशम् ॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीम् ॥ ४ ॥ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः ॥ अवापोरुविधांस्तापान्कुटुम्बी ममताकुलः ॥ ५ ॥ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः ॥ नष्टप्रज्ञो हृतैश्वर्यो गन्धर्वयवनैर्बलात् ॥ ६ ॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् ॥ पुत्रान्पौत्राऽनुगामात्यान्जायां च गतसौहृदाम् ॥ ७ ॥

क्रम्य भुंक्ष्व एवं सर्वोऽपि लोकस्तव पतिः स्यादित्यर्थः । न चैवं त्वया शंकनीयं प्रतिकूलां मां लोको हनिष्यतीति यस्मात्त्वमेव प्रजानाशं करिष्यसीत्याह । याहीति । या मंदीया यवनपृतना तया युक्ता ॥ २९ ॥ किं च । प्रज्वार इति । प्रज्वारो मारको वैष्णवो ज्वरः माहेश्वरस्य व्याध्यंतःपातित्वात् भीमा घोराः सैनिका यस्य ॥ ३० ॥ इति श्रीभागवते चतुर्थे टीकायां सप्तविंशोऽध्यायः ॥ २७ ॥ ॥छ॥ अष्टाविंशे तु वैदर्भ्याख्यानेन स्त्रीविचिंतया ॥ स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते ॥ १ ॥ इदानीं तु पुरंजनस्य पुंदेहत्यागप्रकारपूर्वकं स्त्रीत्वप्रकारमाह । सैनिका इत्यादि राजसिंहस्य वेश्मनीत्यंतेन । दिष्टं दैवं कुर्वंत्यधिकुर्वंतीति तथा मृत्योरादेशकारिण इति वा ॥ १ ॥ जरत्पन्नगेन जीर्णप्राणेन पालिताम् ॥ २ ॥ ३ ॥ द्वार्भिश्चक्षुरादिभिः रोगरूपेण प्रविश्य ॥ ४ ॥ ५ ॥ कन्यया जरयोपगूढः संस्तत्प्रतिक्रियां न लेभे इति तृतीये नान्वयः । हृतैश्वर्य उत्थानादिष्वशक्तः ॥ ६ ॥ प्रतिकूलाननपेक्षितविषयप्रापणान् अनादृतानादरमकुर्वाणान् स्वाधीनत्वाभावात् । अनुगा इंद्रियाणि अमात्याः

हंतुं प्रभवेदिति भावः ॥ २९ ॥ अथ युक्त्यंतरेण तदभिलषितमेवाह—किं चेति भगिनीति । मम भगिनी कापि नास्तीति त्वमेव भगिनी भव । ननु नारदोक्तं "वव्रे नाम्ना भयं पतिम्" इत्येवं रूपमन्यथा भवितुं नार्हतीति त्वं मे पतिरेव भवेति । सत्यम् । अधर्मवंशोद्भवानामस्माकं भगिन्यपि भार्या स्यादतस्तव भ्राताप्यहं पतिस्तस्मान्नारदोक्तमपि प्रमाणीकरणीयं भगवद्भक्तानां निकटमहं न यामीति मामपि निर्भरं भुक्त्वा संहर नारदं यथा पतिं नाकृथास्तथान्यमपि भगवद्भक्तं त्वमपि पतिं न कुरुष्व अत एव मयोक्तं "त्वमव्यक्तगतिर्भुङ्क्ष्व लोकं कर्मविनिर्मितम्" इति भक्तानां कर्मविनिर्मितत्वाभावात्ते तव पतयो न भवंतीति तेषु तेष्वहमेव पतिरिति नारदोक्तमपि सुसंगतमभूदिति ॥ ३० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे सप्तविंशोऽध्यायः ॥ २७ ॥ (१) दैवं दुरदृष्टफलं दिष्टशब्देन दुर्दैवग्रहणे सुदैवत्यागे च कारणाभावमालक्ष्याह-मृत्योरित्यादि वेति । सैनिका व्याधयः ॥ १ ॥ एकदा प्रारब्धकर्मक्षये भौमभोगा अशनपानवसनलक्षणास्तैराढ्यां जरत्पन्नगेन शतवर्षस्थायिना ॥ २ ॥ निस्सारतां नैर्बल्यम् । यया कालकन्यया ॥ ३ ॥ यवना व्याधयः । प्रार्दयन्निति जराग्रस्तस्याक्षिमांद्यादयो दृश्यंत एव ॥ ४ ॥ अभिमानीति । ममेयमित्यभिमानवान् ॥ ५ ॥ कन्येति त्रिकम् ॥ ६ ॥ विशीर्णां विशीर्यमाणाम् । प्रतिकूलान् शोकादीन् आदरमकुर्वतः न्सर्वथा निगिलितुमुपक्रांतानित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् ॥ दुरंतचिंतामापन्नो न लेभे तत्प्रतिक्रियाम् ॥८॥ कामानभिलषन्दीनो यातयामांश्च कन्यया ॥ विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥ ९ ॥ गन्धर्वयवनाक्रांतां कालकन्योपमर्दिताम् ॥ हातुं प्रचक्रमे राजा तां पुरीमनिकामतः ॥ १० ॥ भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः ॥ ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥११॥ तस्यां संदह्यमानायां सपौरः सपरिच्छदः ॥ कौटुंबिकः कुटुंबिन्या उपातप्यत सान्वयः ॥ १२ ॥ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया ॥ पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥१३॥ न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः ॥ गंतुमैच्छत्ततो वृक्षकोटरादिव सानलात् ॥ १४ ॥ शिथिलावयवो यर्हि गन्धर्वैर्हृतपौरुषः ॥ यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥ १५ ॥ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् ॥ स्वत्वावशिष्टं यत्किंचिद्गृहकोशपरिच्छदम् ॥ १६ ॥ अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही ॥ दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥ १७ ॥

इंद्रियदेवाः गतसौहृदामध्यवसायाभावात् ॥ ७ ॥ कन्यया जरया ग्रस्तम् । पंचालान्विषयान् अरिभिर्व्याध्यादिभिर्दूषितान् ॥ ८ ॥ कालकन्यया हेतुभूतया यातयामान्निःसारानपि कामानभिलषन् विगता आत्मनो गतिः पारलौकिकी ऐहिकः पुत्रादिस्नेहश्च यस्य सः विगतात्मगतिः । स्नेहादिति वा पाठः । तदा विगता आत्मगतिर्यस्येत्येव विसर्गांतपदपाठे विग्रहः । स राजा पुरंजनो हातुं त्यक्तुं प्रचक्रमे उपक्रांतवानिति द्वयोरन्वयः ॥ ९ ॥ अनिकामतोऽनिच्छयाऽपि ॥ १० ॥ ११ ॥ सपरिच्छदो भृत्यवर्गसहितः । कुटुंबेन दीव्यतीति कौटुंबिकः कुटुंबिन्या सह । संधिर्नात्र विवक्षितः । सान्वयः पुत्रादिसहितः ॥ १२ ॥ यवनैर्व्याधिभिरुपरुद्धान्यायतनानि नाडीप्रभृतीनि यस्य स पुरपालः ॥ १३ ॥ पुरु बहु कृच्छ्रं क्लेशस्तेन उरुर्वेपथुर्यस्य वृक्षकोटरादिव सर्पः ॥ १४ ॥ कंठे उपरुद्धो रुरोद घुरघुरध्वनिं चकार ॥ १५ ॥ दुहित्रादीन्दध्याविन्त्युत्तरेणान्वयः । जामयोऽत्र स्नुषाः स्वत्वमात्रेणावशिष्टम् । भोगस्तु प्रागेव क्षीणः ॥ १६ ॥ १७ ॥

पुत्रान्विवेकादीन् । पौत्रान् धैर्य्यगांभीर्य्यादीन् । चकाराद्गतसौहृदान्स्वस्वकृत्यं सम्यक्कुर्वाणान् ॥७॥ तत्प्रतिक्रियां तेषांतेषां प्रतिक्रियां मंत्रौषधादिकृत्यैरपि न लेभे ॥८॥ कामान् मिष्टभोजनादीन् । यातयामान् क्षुन्मांद्यादिहेतोरित्यर्थः ।स्नेहादिति भिन्नपदपाठः शोभनः प्रतिभाति।स्नेहांतसमासस्य सापेक्षत्वात्॥९॥ १ ०॥प्रज्वारो विष्णुज्वरः।भ्रातुर्भयनाम्नः॥ १ १॥स पौरः।सप्तधातुसहितः सपरिच्छदः सर्वेंद्रियभृत्यवर्गसहितः।नात्र विवक्षितो विवक्षितः संधिर्भवतीति नियमात्। आर्षो वा संध्यभावः। कुटुंबिन्या बुद्ध्या॥ १ २॥ यवनैर्व्याधिभिः।रुद्धमायतनं नाडीसंचारनिरोधात्।अनुतापो जीवक्लेशदर्शनात् ॥ १ ३॥ स पुरपालः । अवितुं रक्षितुम्।सानलाद्वाह्निव्याप्तात् । कोटरं छिद्रम् ॥ १ ४॥ ॥ १ ५॥ १ ६॥प्रमदया स्त्रिया सहेति। जीवस्यस्थूलशरीरभंगे बुद्ध्या विच्छेदाभावात्। प्रमदेयं न पुरंजनी किन्तु संसारिणो जीवस्य सर्वेंद्रियैर्भोग्या ममतास्पदीकृता व्यावहारिक्येव भार्या व्याख्येया।दुहित्रादयोप्यत्र तत्संबंधिन्यो न त्वध्यात्मपक्षीया व्याख्येयाः । मरणकाले जीवस्य स्त्रीपुत्रादीनामेव स्मरणं संभवति न तु बुद्धिविवेकादीनामिति केचिदाहुः । अन्ये तु—धर्मवती बुद्धिरेव पुरंजनीत्वेन पूर्वं प्रस्तुतेत्यतो मृत्युसमये धर्मबुद्ध्या विच्छेदो बुध्यंतरेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकांतरं गतवति मय्यनाथा कुटुंबिनी ॥ वर्तिष्यते कथं त्वेषा बालकाननुशोचती ॥ १८ ॥ न मय्यनाशिते भुंक्ते नास्नाते स्नाति मत्परा ॥ मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात् ॥ १९ ॥ प्रबोधयति माविज्ञं व्युषिते शोककर्शिता ॥ वर्त्मैतद्गृहमेधीयं वीरसूरपि नेष्यति ॥ २० ॥ कथं नु दारका दीना दारकीर्वा परायणाः ॥ वर्तिष्यंते मयि गते भिन्ननाव इवोदधौ ॥ २१ ॥ एवं कृपणया बुद्ध्या शोचंतमतदर्हणम् ॥ ग्रहीतुं कृतधीरेनं भयनामाऽभ्यपद्यत ॥ २२ ॥ पशुवद्यवनैरेष नीयमानः स्वकं क्षयम् ॥ अन्वद्रवन्नानुपथाः शोचंतो भृशमातुराः ॥ २३ ॥ पुरीं विहायोपगत उपरुद्धो भुजंगमः ॥ यदा तमेवानु पुरी विशीर्णा प्रकृतिं गता ॥ २४ ॥ विकृष्यमाणः प्रसभं यवनेन बलीयसा ॥ नाविंदत्तमसाऽऽविष्टः सखायं सुहृदं पुरः ॥ २५ ॥ तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना ॥ कुठारैश्चिच्छिदुः क्रुद्धाः स्मरंतोऽमीवमस्य तत् ॥ २६ ॥ अनन्तपारे तमसि मग्नो नष्ट स्मृतिः समाः ॥ शाश्वतीरनुभूयार्तिं प्रमदासंगदूषितः ॥ २७ ॥

ध्यानमेवाह लोकांतरमिति चतुर्भिः ॥ १८ ॥ अनाशितेऽभोजिते भर्त्सिते भर्त्सने कृते यतवाग्भवति ॥ १९ ॥ अविज्ञमविवेकिनं माम् । व्युषिते देशांतरं गते गृहमेधीयं वर्त्म गृहधर्ममपि किं नेष्यत्यनुवर्तयिष्यति । नीञ् प्रापणे । युक्तमेतत् यतो वीरसूः पुत्रवती । किं वा मद्विरहमसहमाना मरिष्यत्येवेत्यर्थः ॥ २० ॥ न विद्यते परमयनमाश्रयो येषां तेऽपरायणाः पुत्राः कन्याश्च । यद्वा पराश्रयाः कन्याः भिन्ना नौर्येषाम् ॥ २१ ॥ अतदर्हणं वस्तुतस्तस्य ब्रह्मत्वात् ॥ २२ ॥ एष यदा क्षयं स्थानं नीयमानस्तदानुपथाः प्राणा इंद्रियाणि च । तथाच श्रुतिः । "तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंति" इति ॥ २३ ॥ प्रकृतिं महाभूतात्मताम् ॥ २४ ॥ नाविंदन्न सस्मार पुरः पूर्वं सखायं संतमीश्वरम् ॥ २५ ॥ अदयालुना काम्यकर्मसु ये संज्ञप्ता हताः । अमीवं पापं क्रौर्यं वा ॥ २६ ॥ शाश्वतीः समा

संयोगः'न मय्यनाशिते भुंक्ते'इत्यादिकन्तु सद्बुद्धिविच्छेदात्पूर्वमेव यदुक्तं तदेवाग्रे वक्ष्यते।तच्च ममाधुनापि धर्माचरणे तृप्तिर्न जाता किं करोमि मरणमुपस्थितमित्येतस्यैवार्थस्योत्प्रेक्षया विवरणं ज्ञेयमित्याचक्षते॥१७॥१८॥मत्परा मदेकनिष्ठा। रुष्टे कुपिते। सुसंत्रस्ताऽत्युद्विग्नचित्ता भवति ॥१९॥ इत्यर्थ इति । अत्यंतस्नेहाधिकरणवियोगस्य दुःसहत्वादिति भावः ॥२०॥ दारिकीर्दारिक्यः परायणाः वृद्धस्य ममातिस्नेहेन प्रतिक्षणमेवैकनिष्ठाः कथं वर्त्तिष्यंते रुदित्वारुदित्वैव मरिष्यंतीत्यर्थः । स्वामिचरणोक्तयद्वेतिपक्षस्याप्ययमेवार्थः । अन्याश्रयत्वे तासां शोकानधिकरणत्वात् ॥ २१ ॥ कृपणया बुद्ध्येति । "अनीशया शोचति मुह्यमानः" इति श्रुतेः । तस्य जीवस्य । अतदर्हणं शोकानर्हम् यद्वा—अतदर्हणं धार्मिकत्वेन भयकर्तृकग्रहणायोग्यमित्यर्थः॥२२॥एष जीवः। यवनैर्यवनवन्निर्दयैः स्वकर्मभिर्यमदूतैर्वा स्वकं स्थानं देहांतरं यमपुरं वा।अत्र प्रमाणमाह-तथा चेति।तं जीवमनुक्रामन्तं देहं त्यजंतमनु पश्चात्प्राणोपि देहं त्यजति तमनु सर्वाणींद्रियाणि देहं त्यजंतीति श्रुतिपदार्थः ॥ २३ ॥ महाभूतात्मतां कार्यनाशेन कारणस्यैवावशेषादित्यर्थः ॥ २४ ॥ तमसाऽज्ञानेन व्याप्तः ॥ २५ ॥ तत्पूर्वकृतम् । 'अमीवं क्रौर्य्यपापयोः' इति निरुक्तिः ॥ २६ ॥ अनंतपारेंतपारशून्ये । तमसि दुःखे 'ईजे च बहुभिर्यज्ञैः' इत्युक्तत्वाद्बहुकालं स्वर्गसुखमप्यनुभूयेत्यपि ज्ञेयं तस्येहानुक्तिस्तु प्राचीनबर्हिषो वैराग्यार्था स्त्रीस्मरणात्स्त्री बभूव । अध्यात्मपक्षे दुःखा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामेव मनसा गृह्णन्बभूव प्रमदोत्तमा ॥ अनन्तरं विदर्भस्य राजसिंहस्य वेश्मनि ॥ २८ ॥ उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ॥ युधि निर्जित्य राजन्यान्पांड्यः परपुरंजयः ॥ २९ ॥ तस्यां स जनयांचक्र आत्मजामसितेक्षणाम् ॥ यवीयसः सप्त सुतान्सप्त द्रविडभूभृतः ॥ ३० ॥

आर्तिमनुभूय ॥ २७ ॥ अंतकाले तां भार्यामेव मनसा गृह्णन्स्मरन्ननंतरं विदर्भस्य वेश्मनि प्रमदोत्तमा बभूव । अतः परमस्मिन्प्रकरणे एतावदेव प्रकृतोपयोगि विवक्षितम् । स्त्रीध्यानेन स्त्रीत्वप्राप्तावपि पतिव्रताध्यानेन पूर्वादृष्टेन च धार्मिकाद्विदर्भाज्जन्माभूत् । धार्मिकसंगेन च विशुद्धस्य भागवतेन मलयध्वजेन संगोऽभूत् । ततो विष्णुभक्तिस्ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्रत्यधर्मेण भजतो भगवत्प्रसादलब्धज्ञानेन मोक्ष इति । अन्यत्तु कथालंकारमात्रं तथापि किंचिद्वृत्तिसामान्येनेह योजयिष्यामः । विदर्भस्य विशिष्टदर्भोपलक्षितस्य कर्मठस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च क्षत्रिया राजंते तेषु श्रेष्ठस्य वेश्मनि ॥ २८ ॥ मलयोपलक्षिते दक्षिणदेशे ध्वज इव दर्शनीयः स हि श्रीविष्णुभक्तप्रधानो देशः तत्र मुख्यो महाभागवत इत्यर्थः । पंडा निश्चयबुद्धिस्तामर्हतीति पांड्यः स उपयेमे । पुरंजनो भागवतसंगं प्राप्त इत्यर्थः। ॥ २९ ॥ आत्मजां श्रीकृष्णसेवारुचिम् । तत्संगेन भगवद्धर्मे रुचिरभदित्यर्थः । असितस्य श्रीकृष्णस्येक्षणं यया ताम् । यवीयसः सप्त सुतान् "श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ अर्चनं वंदनं दास्यम्" इति भक्तिप्रकारान् । सख्यात्मनिवेदनयोस्त्वंपदार्थज्ञानोत्तरकालत्वात्तस्य च भगवतैवोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुत्पत्तेः सप्तेत्युक्तम् । भगवद्धर्मरुच्या तच्छ्रवणकीर्तनादिकं जातमित्यर्थः । द्रविडभूमिपालकान् द्रविडभर्मिर्हि श्रवणादिभक्तिभिरेव सुरक्षिताऽस्तीति प्रसिद्धम् ॥ ३० ॥

तिशये प्रयुक्तमूर्च्छावशादेव मृत्युकाले सद्बुद्धित्यागः क्षणिक एवोक्तः । वस्तुतस्तु-स्वर्गभोगांते पुण्यक्षयेण तादृशधर्मबुद्धिविशिष्ट एव धार्मिकगृहे जन्म लेभ इत्येतावदेव विवक्षितं स्त्रीत्वपुंस्त्वादिकं त्वविवक्षितमेव । तद्वक्ष्यते । "कचित्पुमान्कचिच्च स्त्री कचिन्नोभयमंधधीः" इत्यादिना ॥२७॥ वृत्तिसामान्येन प्रकृतिप्रत्ययादिकल्पनासामान्येन "कृत्तद्धितमासैकशेषसनाद्यन्तधातुरूपाः पंच वृत्तयः" इति वैयाकरणाः । तां सद्बुद्धिलक्षणां पुरंजनीं मनसा गृह्णन्स्मरन् । "यंयं वापि स्मरन्भावं त्यजत्यंते कलेवरम् । तन्तमेवैति कौंतेय सदा तद्भावभावितः" इति श्रीगीतोक्तेः ॥ २८ ॥ विश्वनाथस्तु-अथैवं जीवस्य यावद्भक्तिर्न भवेत्तावन्नैव संसारोद्धारः सा च भक्तिर्यादृच्छिकी यादृच्छिकसाधुसंगाद्यादृच्छिक्यैव साधुकृपया भवतीति दर्शयंस्तज्जन्मनि तस्य साधुसंगो बभूवेत्याह-उपयेम इति । आदरणीयत्वेन मलयतुल्येषु साधुषु ध्वज इव श्रेष्ठ इति विश्वनाथः।इत्यर्थ इति।सर्वभागवतश्रेष्ठ इति भावः। इत्यर्थ इति । पूर्वसत्संस्कारवशादिहापि सत्संगमेव लब्धवानिति भावः । चक्रवर्ती-उपयेमे शिष्यत्वेन कृपया स्वीचकार । वीर्यपणामिति । कृपालक्षणः स्वप्रभाव एवात्र हेतुर्न त्वन्यः कश्चिदिति 'मद्भक्तिं वा यदृच्छया' इत्युक्तेः "भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युतसत्समागमः" इति न्यायेन कस्मिंश्चिज्जन्मनि जीवस्याकस्मादेव साधुसंगमो भवेदिति विवक्षितम् । राजन्यान्विजित्य तदीयपापापराधकामकर्मादीन्निर्मूलीकृत्य पांड्यः पंडदेशोद्भवः । पक्षांतरस्तु-स्वामीभिर्व्याख्यात एव । पक्षे परपुरंजयो मतांतरोत्थसंदेहच्छेदी॥२९॥इत्यर्थ इति । "सतां प्रसंगान्मम वीर्यसंविदः" इत्यारभ्य "श्रद्धा रतिर्भक्तिरनुक्रमिष्यति" इत्युक्तन्यायेनेति भावः । यवीयसस्तदुत्तरका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम् ॥ भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परम् ॥ ३१ ॥ अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् ॥ यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ॥ ३२ ॥ विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः ॥ आरिराधयिषुः कृष्णं स जगाम कुलाचलम् ॥ ३३ ॥ हित्वा गृहान्सुतान्भोगान्वैदर्भी मदिरेक्षणा ॥ अन्वधावत पांड्येशं ज्योत्स्नेव रजनीकरम् ॥ ३४ ॥

अर्बुदमिति । श्रवणादीनां प्रत्येकमनेके प्रकारा अभवन्नित्यर्थः । तदुक्तम्।"भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते" इति ॥ येषां वंशधरैर्यतः प्रवृत्तैः संप्रदायभेदैः कृत्स्ना मही मन्वंतरं ततः परं च भोक्ष्यतेऽविद्याकामकर्मभ्योऽपि रक्षिष्यते ॥ ३१ ॥ अगस्त्यः अगानि निष्क्रियाणि गात्राणि स्त्यायति संघातयतीत्यगस्त्यो मनः स प्राक्प्रथम जातां दुहितरं कृष्णसेवारुचिमुपयेमे तस्य मनः कृष्णे दृढां रतिं बबंधेत्यथः । धृतानि शमदमादीनि व्रतानि यया तां रतिम् । दृढेभ्यः सत्यलोकादिभोगेभ्योऽपि च्युतस्तद्रहितः कृष्णरताविहामुत्र भोगाविरागो जात इत्यर्थः । स एवोपशमात्मकत्वान्मुनिः । कथंभूतः इध्मवाह आत्मजो यस्य सः । "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादिश्रुतिप्रसिद्धा समिद्वहनोपलक्षिता गुरूपसत्तिर्वैराग्यादभूदित्यर्थः । न ह्यविरक्तस्य गुरूपसत्तिः संभवति।कथापक्षे यथाश्रुतमेव ॥ ३२॥क्ष्मां विभज्य तत्र श्रवणादिभक्तिभेदं व्यवस्थाप्य ॥ ३३ ॥ इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सर्वतो विरक्तस्य "पतिरेव गुरुः स्त्रीणाम्" इति वचनात्पतिसेवया गुरुशुश्रू

लभवान् । इत्यर्थ इति । भगवद्धर्मरुच्यैव तच्छ्रवणादौ प्रवृत्तिर्भवति नान्यथेति भावः । यद्वाऽसितो नित्यमुक्तो हरिस्तस्येक्षणं ययेति ॥ ३० ॥ इत्यर्थ इति । श्रवणादीनां प्रत्येकं नामलीलादिभेदैर्नामादीनां च प्रत्येकमवतार भेदैस्तेषामपि दास्यसख्याद्यभिरुचितत्वभेदैरित्येवमसंख्या एव प्रकारा इति भावः ॥३१॥ इत्यर्थ इति । महत्कृपया जीवस्य मनः कृष्णसेवासक्तं बभूवेति भावः । इत्यर्थ इति । वैराग्यं पदार्थानित्यदृष्ट्या जायते तच्च हरिभ क्तानां हरिरतिं विना सर्वत्र स्वभावत एवास्ति "तावद्भयं द्रविणदेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः । यावन्न तेंघ्रिमभयं प्रवृणीत लोकः" इत्याद्युक्तेरिति भावः । तस्यात्मनो विज्ञानार्थं स विरक्तः सन् । श्रोत्रियपदार्थमेकादशे निर्णेष्यामः "परं ब्रह्म कृष्ण इत्यभिधीयते" इति श्रुतेः । श्रीकृष्णानुरागिणमित्यर्थः । इत्यर्थ इति । विरक्तेनैव संसारसारासारबोधदार्ढ्याय गुरूपसदनं क्रियत इति भावः । यद्वा-दृढेभ्यो ज्ञानादिभ्य स्तत्साध्येभ्यो मोक्षादिभ्यश्च च्युतः मनसः कृष्णसेवारुच्येकतानत्वादन्यसाधनसाध्यस्पृहाराहित्यं जातमित्यर्थः । कथापक्षेऽगस्त्यस्य पुत्रो दृढच्युतस्तस्येध्मवाह इति मलयध्वजस्य कन्यावंशः ॥ ३२ ॥ कुलेन लोकसमू हेनाप्यचलं चालयितुमशक्यमेकांतस्थलं वेंकटादिपर्वतं वा ॥ ३३ ॥ सुतान् हित्वेति पतिव्रता पत्युरिव गुरोः सेवायां प्रवृत्तः शिष्यः श्रवणकीर्तनादीन्यपि भोगान् तदुत्थान्प्रेमानंदानपि गृहान् तदुचितविविक्तस्थलमपि नैवापेक्षते श्रीगुरुसेवयैव सुखेन सर्वसाध्यसिध्यर्थमित्युद्देशो व्यंजितः । मादयति यदुक्ताचरणेन सर्वत्र हृष्यतीति मत् इरा वाणी हृष्यंत्यां वाण्यां वेदलक्षणायामेवेक्षणं यस्याः गुरुसे वाया वेदेन सर्वाधिक्येनोक्तत्वादित्यर्थः । "नाहमिज्याप्रजातिभ्यां तपसोपशमेन च । तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥" इति साक्षान्नारायणरूपवेदोक्तेर्यद्वास्य पुराणस्योक्तिरपीयं वेदोक्तिरेव 'निगमकल्पतरोर्गलितं फलम्' इत्युक्तेरस्य वेदफलरूपत्वाद्यथाम्रवृक्षफलमाम्रं तथा वेदवृक्षफलमपि वेद एव "पुराणं ब्रह्मसंमितम्" इत्युक्तेर्वा तथेत्यर्थः । मदयतीति मदिरं भगवद्रूपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र चंद्रवशा नाम ताम्रपर्णी वटोदका ॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥ ३५ ॥ कंदाऽष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः ॥ वर्तमानः शनैर्गात्रकर्शनं तप आस्थितः ॥ ३६ ॥ शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये ॥ सुखदुःख इति द्वंद्वान्यजयत्समदर्शनः ॥ ३७ ॥ तपसा विद्यया पक्वकषायो नियमैर्यमैः ॥ युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥ ३८ ॥ आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः ॥ वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिम् ॥ ३९ ॥ स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि ॥ विद्वान्स्वप्न इवामर्शसाक्षिणं विरराम ह ॥ ४० ॥

षाप्रकारं दर्शयितुमाह हित्वेत्यादिना मनो दध इत्यंतेन ग्रंथेन । मदयतीति मदिरमीक्षणं यस्याः ॥ ३४ ॥ तत्र चंद्रवशाद्या नद्यस्तासां पुण्यैः सलिलैरुभयत्रांतर्बहिश्चात्मनो मृजन्मनोमलं क्षालयंस्तप आस्थित इत्युत्तरेणान्वयः ॥ ३५ ॥ अस्यते भूमौ क्षिप्यत इत्यष्टिर्बीजम् ॥ ३६ ॥ ३७ ॥ विद्ययोपासनया पक्वकषायो दग्धकामादिवासनः । युयुजे आत्मनो ब्रह्मतां भावयामास । अक्षाणींद्रियाणि अनिलः प्राणः आशयश्चित्तम् । विजिता अक्षादयो येन ॥ ३८ ॥ आस्ते स्म । वर्षशतमिति ज्ञानस्य दुःसाधनतां दर्शयति । अत एव हरौ भक्तिं कृतवानित्याह । वासुदेवे रतिमुद्वहन्सन्नन्यद्देहादिकं न वेद ॥ ३९ ॥ स एवं वर्तमान आत्मन्यात्मानं विद्वानन्यस्मादुपरराम । कथं विद्वान् व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेन । कुतः । व्यापकतया देहादिप्रकाशकत्वेन । ननु देहाद्याकारो विमर्श एव तत्प्रकाशयति न तु निराकार आत्मा अत आह । आमर्शस्यापि साक्षिणम् । अयं भावः । आमर्शो नामांतःकरणवृत्तिः सा च जडत्वादात्मप्रकाश्यैवेति ।

तत्रेक्षणं यस्या इति संदर्भः ॥ ३४ ॥ तत्र कुलाचलसमीपे । आध्यात्मपक्षे–तत्रैकांतस्थले चंद्रवंशा चंद्राय ब्रह्मप्रकाशायोष्यते वांच्छयत इति तथा वेदांतस्मृतिः । 'वश-कान्तौ' ताम्रं रक्तवर्णत्वेन समं "रजो रक्तं तमः श्यामं सत्त्वं शुक्लमिहोच्यते" इत्युक्तेः । रजोगुणं पर्णयत्याच्छादयतीति ताम्रपर्णी सात्त्विकी स्थितिः । 'पर्ण-आच्छादने' । उद्गतमकं दुःखं येन तदुदकं सुखं वटयति वेष्टयति वटं तदुदकं यस्यां सा वटोदका सत्संगतिः । सर्वसुखाच्छादकभगवज्जनसंग इति यावत् । 'तुलयाम लवेनापि न स्वर्गम्' इत्याद्युक्तेः । 'वट-वेष्टने' चौरादिकः । तासां पुण्यानां पुण्यकर्त्रीणां सलिलैः प्रातिभिः 'सल-गतौ' अत औणादिक इलच् । आत्मनस्स्वस्य अन्तर्मार्जनं कपटादित्यागः बहिर्मार्जनं परापवादादित्यागः ॥ ३५ ॥ मूलं जगदाधारं ब्रह्म फलंति निष्पादयन्तीति मूलफलानि तैः । कं सुखं ददातीति कंदं मिताशनं तदादि येषां मितस्वापादीनां तानि कंदानि योगसाधनानि "नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः" इति श्रीगीतोक्तेः । पुष्पवन्मृदुलैः पर्णैराच्छादनैः स्तीर्यंत इति स्तृणान्यासनानि तानि चोदकानि सुसुखानि तैः स्थिरसुखासनैरित्यर्थः । वर्तमानः शरीरयात्रां कुर्वाणः । गं ज्ञानं न त्रातीति गात्रमज्ञानं तत्कर्शयत्यल्पी करोतीति गात्रकर्शनं तपः । आलोचनं मननमनुतिष्ठन् शीतोष्णादीन्यजयत् । उपलक्षणत्वाच्छीतादेः कामादीनप्यजयदिति ज्ञेयम्, उभयेषां शरीरविकरणत्वात् ॥ ३६ ॥ ३७ ॥ ब्रह्मणि उत्तरश्लोकस्पष्टीभूतार्थे वासुदेवे । आत्मानं मनः ॥ ३८ ॥ तादृशस्मरणभक्त्या भगवति रतिरव्यवच्छिन्ना जातेत्याह–आस्त इति । अत एव ज्ञानस्य दुःसाध्यत्वादेव ॥ ३९ ॥ अत्राक्षिपति–नन्विति । अत्राशयमाह–अयं भाव इति । अत्र विश्वनाथः–तादृशस्य च सर्वत्र भगवत्स्फूर्त्तिरभूदित्याह–स इति । व्यापकतया जातरतित्वेन सर्वास्वेव दिक्षु स्फुरद्रूपतया विद्वान् जानन् तदप्यात्मनि स्वस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप ॥ विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखम् ॥ ४१ ॥ परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि ॥ वीक्षमाणो विहायेक्षामस्मादुपरराम ह ॥ ४२ ॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम् ॥ प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता ॥ ४३ ॥ चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा ॥ बभावुपपतिं शांता शिखा शांतमिवानलम् ॥ ४४ ॥

यथा स्वप्ने ममेदं शिरश्छिन्नमित्यादिप्रतीतौ तद्व्यतिरिक्तमात्मानं छिन्नशिरस्कस्य प्रकाशकं वेत्ति तद्वत् ॥ ४० ॥ केन विद्वांस्तत्राह । साक्षाद्भगवान्हरिरेव यो गुरुस्तेनोक्तेन सर्वतोमुखं यथा तथा स्फुरताऽनवच्छिन्नेन विशुद्धेन ज्ञानदीपेन ॥ ४१ ॥ तदेवाह । पर इति । ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मन ईक्षणे शोकादिनिवृत्तिः अहमेव ब्रह्मेत्यात्मनि ब्रह्मण ईक्षणे ब्रह्मपारोक्ष्यनिवृत्तिः अतो व्यतिहारेणेक्षमाणोऽस्मात्संसारादुपरराम । नन्वेवमपि जीवस्य कुतो ब्रह्मत्वापत्तिः ईक्षणस्यैव व्यवधायकत्वादित्याशंक्याह । ईक्षां विहाय दग्धेंधनानलवत्तस्याः स्वयमेवोपशांतेरिति भावः ॥ ४२ ॥ ४३ ॥ उपपतिं पत्युः

व्यतिरिक्ततया वियुक्तत्वेनैव जानन् प्रेमोत्कंठातापेन विरराम मूर्छां प्रापेत्यर्थः । विरहोत्थस्फूर्तिजनितभगवद्दर्शनेन विरहो न शाम्यतीत्यत्र दृष्टांतः—स्वप्न इव जानन् न हि स्वप्ने भुक्तेनौदनादिना स्वप्नोत्थितस्य जनस्य क्षुधा शाम्यतीत्यर्थः । ननु स्फूर्तौ किं प्रमाणमित्यतो विशिनष्टि—आमर्शो नामांतःकरणवृत्तिस्स एव साक्षी न तु लोचनं यत्र तम् । अंतःकरणवृत्तीनां विरहसंतापानपगमात् लोचनाभ्यां तद्दर्शनमपि तत्स्फूर्तिजनितमेवमेवेत्यनुभवादिति भावः ॥ ४० ॥ ततश्च तस्योत्पन्नप्रेम्णो भगवतः साक्षाद्दर्शनमभूदित्याह—साक्षादेव भगवता हरिणा संतापहारिणा विश्वतोमुखं स्फुरता समन्तादेव प्रस्फुरत्तेजसा गुरुणा सता उक्त उपदिष्टो ज्ञानदीपः स्वमाधुर्यानुभवप्रकारस्तेन तस्मिन्नेव परे ब्रह्मणि आत्मानमीक्षमाणः वासुदेवे भगवति 'नान्यद्वेदोद्वहन्रतिम्' इति पूर्वोक्तेः। भगवति स्वरतिमुद्वहन्तमनुरागिणं पश्यन्नित्यर्थः । तथैव "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भगवदुक्तेः । आत्मनि स्वस्मिंश्च परब्रह्म मामनुरागमीक्षमाणः तत्क्षण एव प्रबलितानन्दमूर्च्छावशादीक्षां विहायास्मत्स्थूलसूक्ष्मोपाधिद्वयादस्पष्टमेव विरराम । ऐश्वर्यपक्षीयास्तु—श्लोकत्रयमिदमेवं व्याचक्षते—स मलयध्वज आत्मानं परमेश्वरं सर्वव्यापकतया सर्वस्माच्च व्याप्याज्जगतो व्यतिरिक्ततया चात्मनि स्वस्मिन्नधिष्ठातारं विद्वाञ्ज्ञानान्विरराम संसारादिति शेषः । व्यापकत्वे व्यतिरिक्तत्वे च दृष्टांतः—आमर्शसाक्षिणं मनआदिद्रष्टारं जीवमध्यात्मादिव्यापकम् । अथ च स्वप्ने सुषुप्तावध्यात्मादिव्यतिरिक्तमिव 'सुखमहमस्वाप्सम्' इत्यत्र तत्तद्व्यतिरिक्तस्य केवलस्यात्मन एवानुभवादिति । नन्वेतज्ज्ञानं कुतोसाववापेति तत्राह- साक्षादिति "ददामि बुद्धियोगं तं येन मामुपयांति ते" इति भगवदुक्तेः । तेनैव ज्ञानदीपेन परे ब्रह्मणि भगवत्याश्रयतत्त्वे आत्मानं शुद्धजीवमाश्रितं प्रेक्षमाणस्तथात्मनि शुद्धजीवे च तमेव परं ब्रह्म भगवंतमधिष्ठातारमीक्षमाणः विहायेक्षामिति जातप्रेमत्वादंते तं परामर्शमपि विहायेत्यर्थः ॥ ४१ ॥ स्वामिचरणाः—तदेव अव्यवच्छिन्नज्ञानमेव। ब्रह्मणि शोकाद्यभावात्तत्रात्मनोपि तदभेददृष्ट्या शोकाद्यभाव आयातीति । आदिना मोहादिग्रहः । अतः पारोक्ष्याभावात् । अन्योन्ययोरेकीकरणं व्यतिहारः । पुनराशंकते—नन्विति । इति भाव इति । न हि काष्ठे सर्वथा दग्धे पुनरग्निस्तत्र तिष्ठतीत्याशयः । संदर्भस्तु—अस्माद्देहद्वयादेवोपरराम न तु तस्मात्तदीक्षाहेतुचिच्छक्त्याविर्भावादपीत्यर्थः । अनलादीनां कालवाय्वादिवत्तस्यानाशकाभावादाश्रयविद्यमानत्वाच्चेत्याह ॥ ४२ ॥ तदेवं श्रीगुरुदेवस्य सिद्धिदशापर्यंतं शिष्यास्तं परिचरंत एव वर्त्तन्त इति दर्शयति—पतिमिति चतुर्भिः । परिचरणं हितप्रेरकत्वं, भोगानिंद्रियद्वारेण त्यक्त्वा ॥ ४३ ॥ चीरवासाः चीरवत्स्वमहिम्ना सर्वमाच्छादयति 'कायमात्मा नभश्छदिः' इत्युक्तेः 'अत्यतिष्ठद्दशांगुलम्' इति श्रुतेश्च । य आत्मा तत्र वासो विचारद्वारा यस्यास्सा चीरवासाः । क्षमैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजानती प्रियतमं यदोपरतमंगना ॥ सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ॥ ४५ ॥ यदा नोपालभेतांघ्रावूष्माणं पत्युरर्चती ॥ आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥ ४६ ॥ आत्मानं शोचती दीनमबंधुं विक्लवाऽश्रुभिः ॥ स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ॥ ४७ ॥ उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलाम् ॥ दस्युभ्यः क्षत्रबंधुभ्यो बिभ्यतीं पातुमर्हसि ॥ ४८ ॥ एवं विलपती बाला विपिनेऽनुगता पतिम् ॥ पतिता पादयोर्भर्तुरुदंत्यश्रूण्यवर्तयत् ॥ ४९ ॥ चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥ आदीप्य चानुमरणे विलपंती मनो दधे ॥ ५० ॥ तत्र पूर्वतरः कश्चित्सखा ब्राह्मण आत्मवान् ॥ सांत्वयन्वल्गुना साम्ना तामाह रुदतीं प्रभो ॥ ५१ ॥

समीपे । यद्वा पत्युः किंचिन्मात्रं न्यूना तत्समाना सती बभावित्यर्थः । "उपोधिके च" इति कर्मप्रवचनीयस्तद्योगे च द्वितीया । शांतमंगारावस्थं ज्वालाया अधःस्थितमनलमुपशांता शुद्धा निर्धूमा ज्वाला यथा भवति तद्वत् ॥ ४४ ॥ तदानीमपि सुस्थिरमासनं यस्य अत एवाजानती यदा तदा यथापूर्वमसेवत ॥४५॥ पत्युरंघ्रिमर्चयंती सेवमाना यदा तस्मिन्नंघ्रावूष्माणं नापश्यत् ॥ ४६ ॥ अबंधुं पतिरहितम् । अश्रुभिरासिच्य ॥ ४७ ॥ क्षत्रबंधुभ्योऽधार्मिकक्षत्रियेभ्योऽपि ॥ ४८ ॥ अवर्तयत्प्रवर्तयामास ॥ ४९ ॥ तस्यां निधायाग्निदानेनादीप्य च ॥ ५० ॥ पूर्वतरोऽनादिरीश्वरः सखा "द्वा सुपर्णा" इति श्रुतेः । साम्ना प्रियवाक्येन संबोधयन् ॥ ५१ ॥

क्षामा स्वार्थिकोण् । टाबार्षः । व्रते तपश्चर्यादिलक्षणे समर्था । वेणीभूतानि संयतानि शिरोरुहाणि वृत्तिसमूहा यया सा तथा । अनेन सात्त्विकयैव बुद्ध्या हरिः प्राप्यते 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुतेः । शांतमित्यनेन धूमराहित्यमुक्तं न तु निर्वाणत्वं न हि नष्टस्याग्नेः शिखास्तीति । सामीप्येर्थे तु कुंभस्य समीप उपकुंभमित्यादौ षष्ठीदर्शनादत्रार्षत्वाश्रयणेन द्वितीयाकरणतः सुलभं पंथानमाह—यद्वेति । इत्यर्थ इति । 'उपोधिके च' इति सूत्रबलादयमर्थ इति भावः ॥ ४४ ॥ अंगना अंगानि शिक्षादीनि विद्यंते यस्याः सांगना । प्रियतममत्यंतप्रियम् । उपरतं जीवन्मुक्त्यवस्थां प्राप्तम् । अंगाभ्यासनिष्ठत्वादजानती । सुस्थिरे ब्रह्मण्यासनं स्थितिर्यस्य तं यथापूर्वं साधनावस्थायामिवोपाचरत्तत्रैवातिष्ठदित्यर्थः । कथापक्षे—तदानीमपि देहत्यागावसरेऽपि । अत एव सुस्थिरासनत्वादेव । यथापूर्वं श्रीभगवत्प्रतिमामिवाचेष्टमानमपि पाद्यादिनोपाचरदानर्चेति ॥ ४५ ॥ ऊष्माणमौष्ण्यम् । पक्षे—पत्युः शुद्धजीवस्यांघ्रौ शास्त्रविचारतीर्थगमनादौ सात्त्विकेऽपि कर्मण्यूष्माणमुत्साहं न लेभे तदा अहो सात्त्विकीमपि मामयं त्यक्तुमुद्यत इत्यतः संविग्नहृदयासीत् ॥ ४६ ॥ गुरोः साधकशरीरापगमे सति पत्युर्विच्छेदे पतिव्रतेव शिष्यस्तद्विच्छेदसंतप्तो विलापमग्नो भवतीत्याह—आत्मानं शोचती । अतः परं मां कस्त्रास्यतीति शोकाकुला । अबंधुं जीवन्मुक्तिदशायां वृत्त्यंतरानुत्पत्तेः । स्तनौ धर्माधर्मौ । विक्लवाश्रुभिः कर्ममार्गरतैः सह विपिने संसारवने । आसिच्य सुस्वरं प्ररुरोद "अहं ब्रह्मास्मि' इत्येवं रुरोद परिणतवतीत्यर्थः ॥ ४७ ॥ पक्षे—हे श्रीगुरो इमां पृथ्वीं त्वत्प्रवर्त्तितश्रवणादिभक्तिमतीं दस्युभ्यो भक्तिविरोधिमतेभ्यो बिभ्यतीम् । तीर्थस्तु—उदधिः कर्म तदेव मेखलास्थानीयं यस्याः सा । तथा दस्युभ्योऽहंकारादिभ्यः क्षत्रं संसाराद्रक्षकं ज्ञानं बध्नंति प्रतिबध्नंतीति क्षत्रबंधवो मिथ्याज्ञानादयस्तेभ्योपि बिभ्यतीमिमां गां रक्षितुमर्हसि । त्वदनुगृहीतया बुद्ध्याऽज्ञानादयो निवर्त्तंत इत्यर्थः ॥ ४८ ॥ विपिने वासनावने विलपंती रुदती स्वामिनं विहाय स्थिताऽश्रूण्यवर्त्तयन्मुग्धेवाभवत् ॥ ४९ ॥ पक्षे—श्रीगुरोर्देहसंस्कारं कृत्वा श्रीमद्गुरुचरणवियुक्तोऽहं तदीयगुणानुस्मरणमयशोकदवाग्निदग्धदेहः प्राणं धर्त्तुमशक्नुवंस्तदुपदिष्टश्रवणकीर्त्तनादिभक्तौ नैव शक्तिं धास्यामि तस्मादद्यैव मरिष्यामीति शिष्यो मनसि निश्चिनोतीति दर्शयामास । तीर्थस्तु—दारुमयीं भेदविषयां चितिं संविदं कृत्वा प्रकाश्य तस्यां संविदि पत्युः कलेवरं संसारकारणमादीप्य दग्ध्वाऽनुमरणेऽनुस्यूतदोषनाशे मनो दधे तादृशीं वृत्तिं प्रकाशयंत्याह ॥ ५० ॥ स्वगुरुविरहव्याकुलीभावदशायामिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मण उवाच ॥ का त्वं कस्यासि को वाऽयं शयानो यस्य शोचसि ॥ जानासि किं सखायं मां येनाग्रे विचचर्थ ह ॥ ५२ ॥ अपि स्मरसि चात्मानमविज्ञातसखं सखे ॥ हित्वा मां पदमन्विच्छन्भौमभोगरतो गतः ॥ ५३ ॥ हंसावहं च त्वं चार्यसखायौ मानसायनौ ॥ अभूतामन्तरा वौकः सहस्रपरिवत्सरान् ॥ ५४ ॥ स त्वं विहाय मां बन्धो गतो ग्राम्यमतिर्महीम् ॥ विचरन्पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ॥ ५५ ॥ पंचारामं नवद्वारमेकपालं त्रिकोष्ठकम् ॥ षट्कुलं पञ्चविपणं पंचप्रकृति स्त्रीधवम् ॥ ५६ ॥ पंचेंद्रियार्था आरामा द्वारः प्राणा नव प्रभो ॥ तेजोऽबन्नानि कोष्ठानि कुलमिंद्रियसंग्रहः ॥ ५७ ॥ विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया ॥ शक्त्यधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते ॥ ५८ ॥

यस्य यं शोचसि अग्रे सृष्टेः पूर्वं येन विचचर्थ ह मयि स्थितत्वेन सख्यसुखमनुभूतवानसि ॥५२॥ ननु नाहमावयोः सख्यं सहचरत्वं च जानामीति चेत्तत्राह । यद्यपि मां न जानासि तथाप्यात्मानं त्वामविज्ञातसखमविज्ञातः कश्चिन्मे सखा आसीदित्येवं किं स्मरसि । सख इति पुंस्त्वनिर्देशः प्राक्तनपुंस्त्वस्मरणाय । सख्यं स्मारयन्स्ववियोगकृतमनर्थमाह हित्वेति सार्धैः षड्भिः । पदं स्थानम् ॥ ५३ ॥ हंसौ शुद्धौ मानसं हृदयमयनं ययोः । कथापक्षे मानससरसि स्थितौ पक्षिणावभूतां जातौ । ओको गृहम् । अंतरा विनैव । वाशब्द एवार्थे । सहस्रपरिवत्सरान्महाप्रलयो यावत ॥ ५४ ॥ हे बंधो ग्राम्ये विषयसुखे मतिर्यस्य । स्त्रिया मायया ॥ ५५ ॥ पंच शब्दादय आरामा उपवनानि यस्मिन् नव द्वाराणि प्राणच्छिद्राणि यस्मिन् एकः प्राणः पालो यस्मिन् । त्रीणि पृथिव्यप्तेजांसि कोष्ठानि प्राकारा यस्मिन् षट् ज्ञानेंद्रियमनांसि कुलान्यभीष्टविषयसमर्पका वणिजो यस्मिन् पंच विपणा हट्टाः कर्मेंद्रियाणि यस्मिन् पंच भूतानि प्रकृतिरुपादानकारणं यस्य स्त्री बुद्धिरेव धवः पतिः स्वामिनी यस्मिन् ॥५६॥ स्वयमेवेमं श्लोकं व्याचष्टे । पंचेंद्रियार्था इति । षट्कुलमिति षट्त्वमेकपालमिति च स्पष्टत्वान्न व्याख्यातम् ॥ ५७ ॥ भूतान्येवाव्यया प्रकृतिरुपादानं यस्य स्त्रीधवमि

शिष्यस्य भगवद्दर्शनं स्यादिति द्योतयति । तत्र तस्यामवस्थायाम् । ब्राह्मणः ब्राह्मणरूपधारी साक्षात्स्वीयस्वरूपदर्शनं प्रेम्णा विना न संभवतीति ज्ञापयति । यद्वा—"ब्रह्म ब्राह्मण आत्मना" इति श्रुत्यर्थद्योतनाय तथोपदेशे ब्राह्मणस्यैवाधिकार इति द्योतनाय च ब्राह्मणरूपधारणमिति ज्ञेयम् । अत एवात्मा स्वरूपं विद्यते यस्य स आत्मवान्स्वस्वरूपयुक्त इत्यर्थः । वल्गुना प्रीतिद्योतकतया सुंदरेण सामवाक्येन सांत्वयन्समादधानः ॥ ५१ ॥ यस्येति द्वितीयार्थे षष्ठी । का किंजातिविशिष्टासि न कापि किञ्च कस्यासि कं पुरुषमाश्रित्य तिष्ठसि न कमपि सर्वस्य चेतनानुस्यूतत्वान्न विशिष्टं शंक्यते वक्तुं यस्य शोचति यदीयाहमिति प्रकाश्य वर्त्तसेऽयं शयानः शरीरलक्षणः पदार्थः कः पांचभौतिकत्वात्तवचानेन न कोऽपि संबंधः । त्वं का नामतो गोत्रतो लिंगतश्च तवैतत्त्रयमेव नास्ति कस्यासि पुत्री भार्या वा न कस्यापीति को वायं शयानस्तव निरूपितो यस्य मरणं शोचसि न कोऽपीति वार्थः ॥ ५२ ॥ नन्वहं किमपि न जानामीति तत्राह—अपीति । बहुव्रीहावपि टजार्षः । त्वमेव स्मारयेति चेदाह—हित्वेति । सृष्ट्यारंभे प्राचीनकर्मवशादेवेत्यर्थः ॥ ५३ ॥ आर्येति । शुद्धकुलोद्भूतत्वेन ज्ञानाधिकारित्वमाह ॥ ५४ ॥ बंधो इति । प्रीतिविषयतां द्योतयंस्ताद्धितकर्तृत्वं स्वस्याह ॥ ५५ ॥ ५६ ॥ ५७ ॥ अत्र पदे प्रविष्टः पुमान्मुह्यति । इत्यर्थ इति । तत्पदं स्त्रीस्वामिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः ॥ तत्संगादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ॥ ५९ ॥ न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव ॥ न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया ॥ ६० ॥ माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् ॥ मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिम् ॥ ६१ ॥ अहं भवान्न चान्यस्त्वं त्वमेवाऽहं विचक्ष्व भोः ॥ न नौ पश्यंति कवयश्छिद्रं जातु मनागपि ॥ ६२ ॥ यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूत मवेक्षेत तथैवांतरमावयोः ॥ ६३ ॥

त्यस्य व्याख्यानं शक्तिर्बुद्धिरधीशा यस्य तद्वशः सन्नित्यर्थः ॥ ५८ ॥ स्पृष्टोऽभिभूतः अतो न विद्यते श्रुते ब्रह्मत्वे स्मृतिर्यस्य ॥ ५९ ॥ तत्त्वमुपदिशति । न त्वमिति चतुर्भिः । सुहृत्पतिः नवद्वारे पुरे यया रुद्धोऽसि तस्याः ॥ ६० ॥ पुमांसं पूर्वजन्मनि यदमन्यथाः इदानीं च सतीं श्रेष्ठां स्त्रियं यन्मन्यसे एषा माया यत उभयत्वमपि वस्तुतो नास्ति यस्मादावां हंसौ शुद्धौ । नौ आवयोर्वक्ष्यमाणां गतिं स्वरूपं पश्य ॥ ६१ ॥ तत्त्वंपदार्थयोश्चिदंशेनैक्यमाह । अहमेव भवान् । उपचारं वारयति । न चान्य इति । व्यतिहारोपदेश उक्ताभिप्राय एव । छिद्रमंतरम् ॥ ६२ ॥ तर्हि कथमावयोरज्ञत्वसर्वज्ञत्वादिधर्मभेदस्तत्राह । यथेति । आत्मानं देहमादर्शे निर्मलं महांतं

मिति किं वाच्यम् । तत्र प्रविष्टः पुमानपि स्त्रीस्वामिको भवेदिति भावः ॥ ५८ ॥ तस्मिन्पदे रामया विषयबुद्ध्या । अतो रामास्पृष्टत्वात् । श्रुते सर्ववेदेतिहासपुराणादिवर्णिते जीवस्य ब्रह्मभावे । विश्वनाथस्तु–न श्रुता श्रवणविषयीकृता स्मृतिर्गीतादिज्ञानसाधनशास्त्रं येन स तथेत्याह । तत्संगाद्रामासंगात् । ईदृशीं स्त्रीदेहप्राप्तिलक्षणाम् । स्त्रीशरीरस्य बहुदुःखाधिकरणत्वात्पापीयसीम् "नारीशरीरं बहु दुःखभाजनम्" इति गरुडोक्तेः । प्रभो इति । त्वं तु साक्षात्प्रभुरपि संगदोषादेवात्मानमप्रभुं जानासीति भावः ॥ ५९ ॥ तत्त्वं याथार्थ्यम् । पुरंजन्या इति पूर्वजन्माभिप्रायेणोक्तम् । अत्र विश्वनाथः–ननु यद्यहमश्रुतस्मृतिरस्मि तर्हि मत्स्मृतित्वमेव श्रावयेति चेदाह–नेति । त्वं विदर्भस्य प्राकृतजीवस्य कस्यापि न दुहिता नापत्यं किं तु मच्छाक्तिरूपो जीवोसीति भावः । अयं वीरोऽपि न ते सुहृद्धितकारी किं त्वहमेव एतद्रूपेण त्वद्गुरुर्भूत्वा स्वभक्तिमुपदिश्य सख्यनुरूपं कृत्यमकरवमिति पक्षद्वयं पृथक्पृथक् । यया नवमुखे पुरे त्वं रुद्धस्तस्याः पुरंजन्यास्त्वं न पतिः किं त्वविद्योपहितं चैतन्यमपि । कथापक्षः स्पष्ट एव ॥ ६० ॥ ननु यद्येवं तर्हि कथं मे तथातथा प्रतीतिस्तत्राह–मायेति । कदाचिन्नोभयं नपुंसकमिति उपलक्षणमेतत्कदाचिन्मनुष्यदेवतिर्यगादिकं चेति । यद्यस्माद्वै निश्चितमावां हंसाविति ॥ ६१ ॥ चिदंशेन चिद्रूपत्वेन । उक्ताभिप्रायः 'परे ब्रह्मणि चात्मानम्' इत्यत्रोक्तोऽभिप्रायो यस्य स तथा । अत्र विश्वनाथः–अहं परमात्मैव भवान् जीवः न चान्यः मत्तश्चैतन्यस्वरूपान्न भिन्न इत्यर्थः । ननु किमेतन्मदसह्यं ब्रूषे तत्राह–भो मच्छुद्धभक्त अहम्–अकोपं यथास्यात्तथा त्वमेव विचक्ष्च सविमर्शं पश्य "हं तु कोपे समाख्यातः शिवे च कुक्कुरेऽपि च" इति मेदिनी । ननु त्वद्दासस्य मम तथा मत्प्रभोस्तवापि नातः परोऽन्यकलंको यदावयोरभेद इति तत्राह–नेति । नावावयोश्छिद्रमीदृशं कलंकं जातु कदाचिदपि मनागीषदपि कवयो विज्ञा न पश्यंति किं त्वविज्ञा एव भेदं पश्यंतीत्यर्थः ॥ ६२ ॥ इत्यर्थ इति । विद्योपाधिप्रधानत्वात्तव सर्वज्ञत्वादिकमविद्योपाधिप्रधानत्वान्ममाज्ञत्वादिकं च न तु स्वाभाविकमतो न चावयोर्भेद इति भावः । अत्र विश्वनाथः-नन्वहं भवानिति त्वदुक्तिरेवासह्या तत्र मा कुप्यावधेहीत्याह-यथेति।पुरुषो जीव आत्मानं स्वमेकमपि मोक्षदशायां बंधदशायां च क्रमेणादर्शचक्षुषोर्द्विधाभूतम् आदर्शे मणिमयदर्पणे यथोचितप्रमाणं सुवर्णतेजस्कं महांतमचंचलमीक्षेत चक्षुषि त्वत्यल्पप्रमाणमल्पतेजस्कमतिक्षुद्रं चंचलं चेक्षेत यथेति । एकस्यापि द्विधाभूतत्वमुपाधिधर्मलिप्तत्वालिप्तत्वाभ्यां भेदमीक्षेत । तथैवावयोः परमात्मजीवात्मनोः सदैव द्विधाभूतयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं स मानसो हंसो हंसेन प्रतिबोधितः ॥ स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥ ६४ ॥ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् ॥
यत्परोक्षप्रियो देवो भगवान्विश्वभावनः ॥ ६५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्यानेऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥ छ ॥
प्राचीनबर्हिरुवाच ॥ भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते ॥ कवयस्तद्विजानंति न वयं कर्ममोहिताः ॥ १ ॥

स्थिरं चावेक्षेत परस्य चक्षुषि च तद्विपरीतम् । विद्याविद्योपाधिकृतो धर्मभेदो न तु वास्तव इत्यर्थः ॥ ६३ ॥ एवममुना प्रकारेण स मानसो हंसः क्षेत्रज्ञो हंसेन परमात्मना बोधितः सन् स्वस्थ आत्मनि स्थितः संश्चिरं ध्यात्वा तद्व्यभिचारेणेश्वरवियोगेन विषयाभिलाषबुद्ध्या नष्टां स्मृतिमहं ब्रह्मास्मीति ज्ञानं पुनः प्राप्तवान् ॥ ६४ ॥ कथामात्र मेतदिति बुद्धिं वारयति । बर्हिष्मन्निति । पारोक्ष्येण राजकथामिषेण । तत्र हेतुः । यद्यस्मात् हे बर्हिष्मन् प्राचीनबर्हिः एतद्राजकथामिषेणात्मकथा प्रदर्शिता । यस्माद्देवः श्रीनारायणः परोक्षप्रियः । तथाच श्रुतिः "परोक्षप्रिया इव हि देवाः" इति । साक्षादात्मज्ञानकथनेन तव चेतसि कथा नायातीति भावः ॥ ६५ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे टीकायामष्टाविंशतितमोऽध्यायः ॥ २८ ॥ छ ॥ ऊनत्रिंशे परोक्षार्थव्याख्यानेनोपसंहृतम् ॥ स्त्रीसंगतो भवस्त्वीशसंगान्मुक्तिरिति स्फुटम् ॥ १ ॥ कवयो

रंतरं सदैव भेदमीक्षेत । "अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये" इत्यमरः । अहं देहमध्ये परमात्मस्वरूपेण वर्त्ते त्वं च जीवो वर्त्तसे तत्राह-स्वतो निरुपाधिरपि स्वैरतया सकललोकदेहगतः सन्नंतर्यामी स्वसमुचितप्रमाणः संपूर्णतेजस्को महानिश्चलो मुक्तजीव इव सदैव निर्लेप एव त्वं तु जीवोऽत्यल्पप्रमाण एवात्यल्पतेजस्कोऽतिक्षुद्रः सदैवोपाधिधर्मग्रस्तः कदाचिदेव मुक्तिदशायामलिप्त इति तदैवावयोर्भेदं जानीयादित्यर्थः । यदुक्तम् "अहं भवान्न चान्यस्त्वम्" इति तत् अहं यथा चित्तथा मद्भक्तो भवानपि चिन्न तु जडो मायेवेत्यर्थः । एतत्पद्ययोरर्थांतरं तु शास्त्रस्यास्य मोहिनीत्वख्यापकमसुरैरेव ग्राह्यमेकात्मवादस्य भगवदनभिमतत्वात् । यदुक्तं तृतीये भगवतैव "यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात् । अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ॥ भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् । आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः" इति । श्रुत्या च-"यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति" इति । स्मृत्या च-"एकदेशे स्थितस्याग्नेर्ज्योत्स्ना विस्फारिणी यथा" इति तथा सच्चिदानंदविग्रहो भगवान्निरुपाधिरेव तस्य विद्योपाधित्वमप्यसुरमतेनैवोक्तमिति ज्ञेयम् ॥ ६३ ॥ मुनिरपि तथैवोपसंहरति एवमिति । स्वस्थः प्राधानिकावेशरहितः । तद्व्यभिचारेण भगवद्वैमुख्येन । नष्टां स्मृतिं पूर्वमेव श्रीगुरुभक्त्या प्राप्तामेव पुनः प्राप । अत्रास्यासायुज्यकथनात्सुपर्णश्रुतेर्ब्राह्मवत्वाच्च प्रेमवत्पार्षदत्वप्राप्तिरेव श्रीनारदेन परमपुरुषार्थोऽभिमतो ज्ञेयः ॥ ६४ ॥ बर्हिष्मन्निति । तव कर्मश्रद्धाक्रांतत्वात्साक्षात्कथनग्रहणानधिकारित्वमाह-तत्र पारोक्ष्यकथने । आत्मानं जीवमीश्वरमधिकृत्य वर्त्तत इत्यध्यात्म्यं जीवेश्वरस्वरूपविवरणं सर्वस्यास्य प्रसंगस्य भगवत्प्रीतिपरत्वमेव स्पष्टयति । यदिति । परोक्षत्वेन कथनस्यापीदमेव तात्पर्यमित्याह-परोक्षप्रिय इति । "परोक्षप्रिया इव हि देवाः" इत्यादिश्रुतेः ॥ ६५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धेऽष्टाविंशोऽध्यायः ॥ २८ ॥ स्त्रीसंगात्संसारः । यद्वा संगतः स्वयभवत् (१) भगवन्निति । भगवदभिप्रायस्य दुर्ज्ञेयत्वं कृपालुत्वं च द्योतयतीति । अज्ञाने हेतुः कर्ममोहिता इति ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ पुरुषं पुरंजनं विद्या यद्व्यनक्त्यात्मनः पुरम् ॥ एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥ २ ॥ योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ॥ यन्न विज्ञायते पुंभिर्नामभिर्वा क्रियागुणैः ॥ ३ ॥ यदा जिघृक्षुः पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् ॥ नवद्वारं द्विहस्तांघ्रि तत्रामनुत साध्विति ॥ ४ ॥ बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम् ॥ यामधिष्ठाय देहेऽस्मिन्पुमान्भुंक्तेऽक्षभिर्गुणान् ॥ ५ ॥ सखाय इंद्रियगणा ज्ञानं कर्म च यत्कृतम् ॥ सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः ॥ ६ ॥ बृहद्बलं मनो विद्यादुभयेंद्रियनायकम् ॥ पंचालाः पंच विषया यन्मध्ये नवखं पुरम् ॥ ७ ॥ अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति ॥ द्वे द्वे द्वारौ बहिर्याति यस्तदिंद्रियसंयुतः ॥ ८ ॥ अक्षिणी नासिके आस्यमिति पंच पुरः कृताः ॥ दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ॥ ९ ॥ पश्चिमे इत्यधो द्वारौ गुदं शिश्नमिहोच्यते ॥ खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्मिते ॥ रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥ १० ॥ नलिनी नालिनी नासे गन्धः सौरभ उच्यते ॥ घ्राणोऽवधूतो मुख्याऽऽस्यं विपणो वाग्रसविद्रसः ॥ ११ ॥

ऽध्यात्मविदः ॥ १ ॥ व्यनक्ति लिंपति चेतनी करोतीत्यर्थः । यद्वा व्यनक्ति प्रकटयति ततश्च स्वकर्मणा पुरं जनयतीति पुरंजनपदं व्याख्यातं भवति । एकद्व्यादयः पादा यस्य ॥२॥ अविज्ञातशब्देनाहृतो व्याहृत उक्तो यः स ईश्वरः । अविज्ञातनामनिरुक्तिः यद्यस्मात्पुंभिर्नामादियोगेन न विज्ञायते ॥ ३ ॥ तत्र तेषु पुरेषु मध्ये ॥४॥ अक्षभिरिंद्रियैः ॥ ५ ॥ पंचवृत्तित्वात्पंचशिराः सर्प इव प्राणः ॥ ६ ॥एकादशमहाभट इत्यनेन एकादशो महाभटो नायक इत्युक्तस्तं दर्शयति। बृहद्बलं यस्य तन्मनः नव खानि द्वाराणि यस्य तत् ॥ ७ ॥ द्युमत्सख इत्यादेरर्थं संक्षेपेणाह । यस्तदिंद्रियसंयुतः स आत्मा ताभिर्द्वार्भिर्बहिर्यातीति ॥ ८ ॥ पुरः पूर्वभागे कृताः ॥ ९ ॥ नेत्रे इति रूपमिति चक्षुषेति खद्योतादीनां व्याख्यानम् । शेषोऽनुवादः ईश्वरः पुरंजनः ॥ १० ॥ नासे इति व्याख्या अवधुनोतीति अवधूतो वायुस्तदात्मकेनोच्छ्वासेन सहैकस्था

इत्यर्थ इति । चेतनीकरणमेवात्र म्रक्षणपदार्थत्वेनोक्तं लेपनमिति भावः । 'येन चेतयते विश्वम्' इत्याद्युक्तेश्चेतनीकरणमीश्वर एव पर्यवस्यति न तु जीव इति चेदाह-यद्वेति । एकः पादः पिशाचादेः । द्वौ मनुष्यादेः । त्रयो ज्वरादेः । चत्वारः पश्वादेः । बहवः खार्जूर्यादेः । अपादः सर्पादिरिति ॥ २ ॥ नामभिरीश्वरादिभिः । क्रियाभिर्जीवप्रेरणादिभिः । गुणैः सर्वज्ञत्वादिभिः ॥ ३ ॥ कार्त्स्न्येन सामस्त्येन । प्रकृतेर्गुणान्स्रक्चंदनादिविषयान् । तत्र तदा । अंघ्रिमित्यार्षं पुंस्त्वम् ॥ ४ ॥ गुणान् विषयान् ॥ ५ ॥ ६ ॥ बृहद्बलं "मनसा वा अग्रे संकल्पयत्यथ वाचा वदति" इति श्रुतेः । ज्ञानकर्मेंद्रियाणां विषयं प्रति नेतृत्वादुभयेंद्रियनायकमित्युक्तम् "आत्मा मनसा संयुज्यते मन इंद्रियेणेंद्रियं विषयेण ततः प्रत्यक्षम्" इति तांत्रिकोक्तेः । येषां विषयाणां मध्ये । "खं शून्याकाशच्छिद्रेषु" इत्यभिधानात् । विषयैरावृतत्वाद्यन्मध्य इत्युक्तम् ॥ ७ ॥ द्वे द्वे इति । मुखातिरिक्तश्रोत्राद्यूर्द्ध्वद्वारापेक्षयोक्तं द्वाभ्यांद्वाभ्यां द्वार्भ्यामित्यर्थः । तृतीयार्थे द्वितीया । बहिर्याति कः यस्तदिंद्रियसंयुतो जीव इत्यर्थः ॥ ८ ॥ ९ ॥ अत्र प्रकृते चक्षुषेति द्युमत्सख इत्यस्य व्याख्यानम् ॥ १० ॥ आर्षत्वान्नवाक्षरपादोऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आपणो व्यवहारोऽत्र चित्रमंधो बहूदनम् ॥ पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥ १२ ॥ प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञितम् ॥ पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् ॥ १३ ॥ आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः ॥ उपस्थो दुर्मद प्रोक्तो निर्ऋतिर्गुद उच्यते ॥ ॥ १४ ॥ वैशसं नरकं पायुर्लुब्धकोंधौ तु मे शृणु ॥ हस्तौ पादौ पुमांस्ताभ्यां युक्तो याति करोति च ॥ १५ ॥ अन्तःपुरं च हृदयं विषूचिर्मन उच्यते ॥ तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥ १६ ॥ यथायथा विक्रियते गुणाक्तो विकरोति वा ॥ तथातथोपद्रष्टात्मा तद्वृत्तीरनुकार्यते ॥ १७ ॥ देहो रथस्त्विंद्रियाश्वः संवत्सररयो गतिः ॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः ॥ १८ ॥ मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः ॥ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥ १९ ॥

नत्वात् घ्राणोऽवधूतः । आस्यमिति व्याख्या रसज्ञविपणान्वित इति । अत्र रसज्ञशब्दनिर्दिष्टस्य रसविदित्यनुवादः । रस इति व्याख्या रसनेंद्रियमित्यर्थः ॥ विपणो वाग्रसविद्रस इत्येव पाठः । आर्षत्वान्न दोषः ॥ ११ ॥ अंधोऽन्नम् ॥ १२ ॥ १३ ॥ ग्रामकमित्यस्यानुवादो ग्रामिणां रतिरिति तस्य व्याख्या व्यवाय इति ॥ १४ ॥ ॥ १५ ॥ विषूचीनपदार्थानुवादो विषूचिरिति । तद्गुणैर्मनोगुणैस्तमःसत्त्वरजोभिः ॥ १६ ॥ 'महिषी यद्यदीहेत' इत्यादेरर्थं संगृह्याह यथा यथा बुद्धिः स्वप्ने विक्रियते जाग्रति विकरोति वा इंद्रियाणि परिणमयति तस्या गुणै रक्तो लिप्त आत्मा तथातथा तस्या वृत्तीर्दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैव सन्बलादनुकार्यते ॥ १७ ॥ आशुगमित्येतद्व्याचष्टे । संवत्सरस्येवाप्रतिहतो रयो वेगः प्रतीतितो यस्य स संवत्सररयः वस्तुतस्त्वगतिः स्वप्नशरीरादेर्बुद्धावेव विवृतत्वेन देशांतरगत्यभावात् । पाठांतरे संवत्सरश्च तत्कृतं वयश्च ताभ्यां गतिर्यस्येति । द्वीषमित्यस्य व्याख्या नारदेन कृता । द्विचक्रमित्यस्य व्याख्या द्विकर्मचक्रः त्रिगुणध्वज इति त्रिवेणुपदव्याख्या ॥ १८ ॥ पंचप्रहरण

न दोषाय व्याख्यातुरसनेंद्रियमिति । यद्वा रसोऽस्ति विषयत्वेनास्येति रस इति पुंस्त्वमिंद्रियवाचकत्वेऽप्यार्षत्वान्न दुष्टमित्यर्थः ॥ ११ ॥ व्यवहारो वाक्यप्रयोगलक्षणः । चित्रं चतुर्विधं भक्ष्यादि ॥ १२ ॥ श्रोत्रादिति ल्यब्लोपे पञ्चमी । श्रोत्रमालंब्येत्यर्थः "इह वामुत्र वा काम्यं प्रवृत्तमभिधीयते । वैराग्यज्ञानपूर्वं तु निवृत्तमभिधीयते" इति स्मृतेः । काम्यकर्मबोधकं प्रवृत्तं शास्त्रं वैराग्यज्ञानपूर्वकमोक्षबोधकं निवृत्तमित्यर्थः ॥ १३ ॥ १४ ॥ १५ ॥ तत्र हृदये ॥ १६ ॥ स्वप्ने यथा करितुरगादिदृष्टश्रुतवस्तुवासनावासिता बुद्धिर्विक्रियते । दैवेनेति शेषः । तस्या बुद्ध्याः । अनुकार्यते बुद्धिसंगादकर्तर्यप्यात्मनि कर्तृत्वं प्रतीयत इति भावः ॥ १७ ॥ विवृतत्वेनातात्त्विकप्रतीतत्वे । पाठांतरे 'संवत्सरवयोगतिः' इति पाठे । द्वे कर्मणी सुखदुःखरूपे चक्रे यस्य स तथा । त्रयो गुणाः सत्त्वादयो ध्वजा यस्य स तथा । पंचासवः प्राणाद्या बंधुरा यस्य 'साम्ये बंधे च बंधुरः' इत्यभिधानात् । ॥ १८ ॥ रश्मिः प्रग्रहः । नीडमुपवेशस्थानम् । पंचानामिंद्रियाणामर्थेषु शब्दादिषु स्वस्वव्यापाराणां प्रक्षेपः । शब्दादीनि पंचप्रहरणानीत्यर्थः । सप्त धातवस्त्वगाद्या वरूथा यस्य स तथा । 'रथगुप्तिर्वरूथो ना'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आकूतिर्विक्रमो बाह्यो मृगतृष्णा प्रधावति ॥ एकादशेंद्रियचमूः पंचसूनाविनोदकृत् ॥ २० ॥ संवत्सरश्चंडवेगः कालो येनोपलक्षितः ॥ तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः ॥ हरंत्यायुः परिक्रांत्या षष्ट्युत्तरशतत्रयम् ॥ २१ ॥ कालकन्या जरा साक्षाल्लोकस्तां नाभिनंदति ॥ स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥ २२ ॥ आधयो व्याधयस्तस्य सैनिका यवनाश्वराः ॥ भूतोपसर्गाशुरयः प्रज्वारो विविधज्वरः ॥ २३ ॥ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः ॥ क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः ॥ २४ ॥ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ॥ शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत् ॥ २५ ॥ यदात्मानमविज्ञाय भगवंतं परं गुरुम् ॥ पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥ २६ ॥ गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः ॥ शुक्लं कृष्णं लोहितं वा यथा कर्माभिजायते ॥ २७ ॥ शुक्लात्प्रकाशभूयिष्ठाँल्लोकानाप्नोति कर्हिचित् ॥ दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्क्वचित् ॥ २८ ॥

मित्येतद्व्याचष्टे । पंचेंद्रियार्थप्रक्षेप इति ॥ १९ ॥ पंचेंद्रियैः सूनाविनोदमिव हिंसाविनोदमिवान्यायेन विषयसेवां करोतीति पंचसूनाविनोदकृत् । अनेन चचार मृगयां तत्रेत्यादि व्याख्यातम् ॥ २० ॥ परिक्रांत्या परिभ्रमणेन ॥ २१ ॥ भगिनीत्वेन जगृहे लोकानां क्षयाय ॥ २२ ॥ चराः संचारिणः भूतानामुपसर्गे पीडायामाशु शीघ्रो मृत्युहेतू रयो वेगो यस्य प्रज्वारस्येति प्रशब्दव्याख्या अरय इति । पाठांतरे भूतकृता अरयः अनेन चारिभिरुपरुद्ध इत्यारिपदं व्याख्यातम् । द्विविधः शीतोष्णरूपेण प्रवेशानिर्गमभेदात् ॥ २३ ॥ एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वकथातात्पर्यमाह । एवमित्यादिविरमक्रमेणेत्यंतेन आधिदैविकादिभिर्दुःखैः क्लिश्यमानो ममाहमिति देहे शतं वर्षाणि शेते वर्त्तत इति द्वयोरन्वयः ॥ २४ ॥ अशनायापिपासादीन्प्राणधर्मानंधत्वादीनिंद्रियधर्मान्कामादीन्मनोधर्मांश्च निर्गुणोऽप्यात्मन्यध्यस्य कामलवान्विषयसुखलेशान्ध्यायन्कर्मकृत् ॥ २५ ॥ ततः किमत आह यदेति द्वाभ्याम् । स्वदृक् स्वप्रकाशस्वभावोऽपि ॥ २६ ॥ शुक्लं सात्त्विकम् । कृष्णं तामसम् । लोहितं राजसम् । यथा कर्म तथा जायते ॥ २७ ॥ तदेवाह शुक्लादिति द्वाभ्याम् । प्रकाशो भूयिष्ठो येषु दुःखमुदर्कं उत्तरफलं येषु क्रियया आयासो येषु तान् लोहितात् तमःशोकावुत्कटौ येषु तान्

इत्यमरः ॥ १९ ॥ मृगतृष्णा प्रातीतिकसुखम् । तदुक्तं "सुखवद्दूरतो दृश्यं तत्काले दुःखमेव यत् । मृगतृष्णेत्यतः प्राहुर्भोगं वैषयिकं बुधाः ॥" इति ॥ २० ॥ तस्य चंडवेगस्य ॥ २१ ॥ पक्षे-स्वस्य क्षयाय स्वसारमपि तां जगृहे अधर्मवंशोद्भवत्त्वात्स्वसुरपि तस्याः स्वयमेव पतिरभूदिति । कालकन्या वैष्णवजनेष्वतिक्रपालोर्नारदस्याज्ञया मृत्युमेव जरयतीति ॥ २२ ॥ पाठांतरे 'भूतोपसर्गा ह्यरयः' इति पाठे भूते राजचौरक्रमिजलादिकृता उपसर्गा अरय इत्यर्थः । यद्वा भूतसंबंध्युपसर्गाः पवनजलहिमाग्निसूर्यातपकुपथ्यादिकृताः श्वासतंद्राप्रलापादयः आशुरयाः शीघ्रवेगा यस्य स तथा ॥ २३ ॥ दैवेति । अधिदैवाधिभूताध्यात्मिकैः । तमोवृतो ज्ञानावृतस्तत्परिहारोपायमजानन्नित्यर्थः । शतमित्युक्तिस्तु न्यूनातिरेकसंभवेऽपि "शतायुर्वै पुरुषः" इति श्रुत्यनुरोधतो ज्ञेया ॥ २४ ॥ अध्यस्य बुभुक्षितोहमंधोऽहं मुग्धोहमित्यात्मन्यारोप्य ॥ २५ ॥ सज्जेत आसक्तो भवेत् ॥ २६ ॥ अवशः पूर्वसंस्काराधीनः वासुदेवाधीनो वा ॥ २७ ॥ तदेव कर्मानुगुणजन्मैव । शुक्लात्सात्त्विकात्कर्मणः । प्रकाशभूयिष्ठांस्तेजोमयान्देवादिलोकान् । लोहिताद्राजसात् । क्रियया सर्वदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमंधधीः ॥ देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः ॥ २९ ॥ क्षुत्परीतो यथा दीनः सारमेयो गृहंगृहम् ॥ चरन्विंदति यद्दिष्टं दंडमोदनमेव वा ॥३०॥ तथा कामाशयो जीव उच्चावचपथा भ्रमन् ॥ उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम् ॥ ३१ ॥ दुःखेष्वेकतरेणापिदैवभूतात्महेतुषु ॥ जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ॥ ३२ ॥ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ॥ तं स्कंधेन स आधत्ते यथा सर्वाः प्रतिक्रियाः ॥ ३३ ॥ नैकांततः प्रतीकारः कर्मणां कर्म केवलम् ॥ द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ॥३४॥

कृष्णादिति ज्ञेयम् ॥ २८ ॥ नोभयं नपुंसकम् । यथाकर्मगुणं कर्मगुणावनतिक्रम्य ॥ २९ ॥ तेषु दैववशेन सुखदुःखे प्राप्नोतीति सदृष्टांतमाह द्वाभ्याम् । क्षुधा परीतो व्याप्तः सारमेयः श्वा दण्डं दंडेन ताडनम् ओदनमन्नं वा ॥ ३० ॥ कामव्याप्त आशयो यस्य ॥ ३१ ॥ ननु तर्हि सुखस्य संभवाद् दुःखस्य च प्रतीकारसंभवान्नैकांततो हेयत्वं तत्राह । दुःखेष्विति । दुःखस्य प्रतीकारस्तावन्नास्ति स्याच्चेत्तस्यतस्य प्रतिक्रिया तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति ॥ ३२ ॥ प्रतिक्रियाणामपि दुःखरूपत्वादिति सदृष्टांतमाह । यथाहीति ॥ ३३ ॥ दुःखस्य मूलभूतानि कर्माणि तु प्रतिक्रियादिकर्मभिराविरोधित्वया नैव निवर्तंत इत्याह । नैकांततो नियमेनात्यंतं सवासनं केवलं ज्ञानरहितमविद्ययोपसृतं प्राप्तम् अतो विरोधान्न निवर्त्यनिवर्तकत्वं तस्येति भावः । अत्र दृष्टांतः । स्वप्ने दृष्टः स्वप्नः प्रबोधं

व्यापारासक्तया मनुष्यादीन् । कृष्णात्तामसात् । तमःशोकोत्कटान् तिर्यगादीन् ॥ २८ ॥ पुरंजनः परस्मिञ्जन्मनि स्त्री कथं बभूवेत्यत आह—क्वचिदिति । कर्माणि च गुणाश्च कर्मगुणास्ताननतिक्रम्य वर्त्तत इति यथा कर्मगुणम् । पदार्थानतिवृत्तिरूपयथार्थेऽव्ययीभावः । भव उत्पत्तिर्देवादिरूपास्तीत्यर्थः ॥ २९ ॥ दीन इति । राजकीयसारमेयव्यावृत्त्यर्थम् । 'श्वा सारमेयः' इति कोशात् ॥ ३० ॥ ३१ ॥ अत्र निर्बुद्धिः श्वा दंड प्रहारं प्राप्नोति बुद्धिमांस्तु दुःखस्य कारणमेव न करोति दैवात्प्राप्तरोगादिदुःखस्य प्रतीकारं च करोतीत्याशंकते—नन्विति । एकांततो नियमेन कर्मणो हेयत्वं न । तथापि प्रतिक्रियासत्त्वेपि । वियोगो नास्तीति दुःखस्य चादृष्टाधीनत्वात्तस्य च दुःखप्राप्तेः प्रागशक्यज्ञानत्वात्तत्प्रतीकारकरणासंभवात्प्राप्तदुःखप्रतीकारकरणस्यापि भिषक्सेवामंत्रानुष्ठानादिरूपत्वेन दुःखात्मकत्वाद्दुःखवियोगस्यासंभव एवेति भावः ॥ ३२ ॥ गुरुं दुर्भरम् "गुरुस्तु गीष्पतौ श्रेष्ठे गुरुः पितारि दुर्भरे" इत्युज्ज्वलः ॥ ३३ ॥ यतो द्वयमेवाविद्योपसृतमतो हेतोराविरोधात् । इति भाव इति । निवर्त्यं निवर्त्तकत्वं हि तेजस्तिमिरयोरिव विरोधिनोरेव भवतीति तात्पर्य्यम् । अत्र अविद्याया अविद्यानिवर्त्तकत्वाभावे । इत्यर्थ इति । स्वप्नगतजागरस्य स्वप्नरूपत्वान्न तस्य मुख्यं स्वप्ननिवर्त्तकत्वमिति भावः । अत्र विश्वनाथः-ननु यस्माद्दुःखस्य कारणं दुष्कृतकर्मैव तस्मात्सर्वदुष्कृतक्षयकामनया कस्मिंश्चिद्बृहति यागकर्मणि कृते सर्वदुःखनाशः स्यादेवेति तत्राह-नेति । द्वयं दुष्कृतं कर्म दुष्कृतनिवर्तकं च कर्मेति द्वितयमविद्यामुपाश्रितमाश्रितं तद्द्वयस्य तमोरजोगुणजनकत्वादिति भावः । तद्यथा रजसि सत्त्वांशेन तमसो निवर्त्तकेपि तमोंशस्तिष्ठति तथा सर्वदुष्कृतनिवर्तकेपि यागकर्मणि पशुहिंसालक्षणं दुष्कृतं तिष्ठत्येवेत्यत्र दृष्टांतः । स्वप्ने पुत्रो मृत इति दुःखप्राप्तिस्तत्स्वप्न मध्य एव पुनः स्वप्ने पुत्रो जीवतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ मनसा लिंगरूपेण स्वप्ने विचरतो यथा ॥ ३५ ॥ अथात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥ ३६ ॥ वासुदेवे भगवति भक्तियोगः समाहितः ॥ सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ॥३७॥ सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः ॥ शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ॥ ३८ ॥ यत्र भागवता राजन्साधवो विशदाशयाः ॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ॥ ३९ ॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति ॥ ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः ॥ ४० ॥

विना यथा तं स्वप्नमत्यंतं न प्रतिकरोतीत्यर्थः ॥ ३४ ॥ ननु तर्ह्यज्ञानविलसितत्वेन संसृतिहेतोर्देहादेरप्यसत्त्वात्किं तन्निवर्तनप्रयासेन तत्राह । अर्थे हीति । लिंगरूपेणोपाधिभूतेन ॥ ३५ तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह । अथ तस्मात्पुरुषार्थभूतस्यैवात्मनो यतोऽज्ञानान्मनसो वाऽनर्थपरंपरारूपा संसृतिर्भवति तस्य व्यवच्छेदो निवृत्तिः गुरुरूपे वासुदेवे भक्त्यैव ॥ ३६ ॥ ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकाज्ज्ञानादेव न तु भक्त्या "तरति शोकमात्मवित्" इत्यादिश्रुतेस्तत्राह । वासुदेव इति । सध्रीचीनेन समीचीनेन प्रकारेण ॥ ३७ ॥ नन्वसौ महाफलो भक्तियोगः कथं स्यादत आह । स त्वच्युतस्य कथामाश्रित्य वर्तमानोऽचिरात्स्यात् कस्य स्यात्तदाह । शृण्वतोऽधीयानस्य च ॥ ३८ ॥ कुत्र स्यात्तदाह । यत्रेति । भगवतो गुणानुकथने श्रवणे च व्यग्रं सत्वरं चेतो येषां ते ॥ ३९ ॥ ननु साधुसंगं विना स्वयमेव हरिक

तद्दुःखोपशमः । किञ्च-तदैव तं पुत्रं सर्पो दशतीति पुनर्दुःखप्राप्तिरिति प्रबोधं विना यथा स्वाप्निकं दुःखं न निवर्तते तथा संसारनिवृत्तिं विना सांसारिकदुःखं न निवर्त्तत इत्युक्तम् ॥ ३४ ॥ किञ्च सुखदुःखादेर्देहधर्मत्वाद्वस्तुतस्त्वसंगस्य जीवात्मनो दुःखादिकं नैव विद्यतेऽतोऽविद्यमानस्य दुःखस्य किं निवर्त्तनोद्यमैरित्याशंकते-नन्विति । अर्थे दुःखादौ जीवात्मनोऽवस्तुभूतेपि तन्निवर्तनं विना संसृतिर्न निवर्तते । यथा स्वप्ने लिंगरूपेणोपाधिभूतेन मनसा सह विचरतो जीवस्यासत्यमपि सर्पात्मकं वस्तु दुःखदमेव प्रबोधं विनेति ॥ ३५ ॥ यत आत्मा सत्यः संसृतिरसत्या । अथ तस्माद्धेतोः । अथाव्ययं हेतावत्र । चक्रवर्त्ती तु-गुरौ भक्त्येति 'गुरुर्न स स्यात्' इत्यादिना हरिभक्त्युपदेष्टुरेव गुरुत्वविधानाद्गुरौ हरौ च भक्त्येत्यायातं ततश्च पुरंजनस्यापरस्मिन् जन्मनि गुरौ हरौ च भक्त्यैव निस्तारो व्याख्यात इत्याह ॥ ३६ ॥ अत्राक्षिपति-नन्विति । चक्रवर्त्ती-साधनभक्त्या प्रेमपर्यंता भक्तिर्भवतीत्याह-भक्तियोगः प्रेमा भगवत्येव सम्यगाहित इति भजनस्य तत्सुखे तात्पर्यं न तु स्वसुखे । सध्रीचीनेनेत्युक्त्या सायुज्यप्रयोजकयोर्ज्ञानवैराग्ययोर्व्यावृत्तिः । तदुक्तं "वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं च यदहैतुकम् ॥" इति । इहाहैतुकपदोपन्यासेन अत एव ज्ञानवैराग्ययोर्भक्त्युत्थत्वात्तदर्थं भक्तेः पृथङ्न प्रयतितव्यमिति द्योतितम् ॥ ३७ ॥ अत्र पृच्छति-नन्विति । श्रवणादित्रयं कुर्वता भक्तियोगः प्राप्य इत्युक्तम् ॥ ३८ ॥ यथैव गृहासक्ता गृहकर्मव्यग्रास्तथैव हन्तायमनुकथनस्य समयः हाहा श्रवणस्य समयो व्यतीतः संप्रति कीर्त्तनस्य समयोभ्येति हा हंत मंदभाग्योऽहं निद्रालस्यदुर्दैहिककृत्यगमितसमयः शीघ्रगतिरेव भक्तसमाजं केन प्रकारेण गच्छामीत्येवं व्यग्रं विवशं लग्नं वा चेतो येषां ते । तथा "व्यग्रं वैवश्यसंलग्नाग्रहीनसत्वरेषु च" इति धरणिः ॥ ३९ ॥ यत्र भागवतास्तत्रैव हरिकथेति कोऽयं नियम इत्याशंकते-नन्विति । इत्यर्थ इति-'पिबत भागवतं रसमालयम्' इत्यत्र व्याख्यातरीत्या सारांशो विषयवैचित्र्यवर्णनादिस्तद्धीनाः केवलशुद्धभगवद्भक्तिविषया इति भावः । इत्यर्थ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजः ॥ न करोति हरेर्नूनं कथामृतनिधौ रतिम् ॥ ४१ ॥ प्रजापतिपतिः साक्षाद्भगवान्गिरिशो मनुः ॥ दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ॥ ४२ ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः ॥ ४३ ॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यंतोऽपि न पश्यंति पश्यंतं परमेश्वरम् ॥ ४४ ॥ शब्दब्रह्मणि दुष्पारे चरंत उरुविस्तरे ॥ मंत्रलिंगैर्व्यवच्छिन्नं भजंतो न विदुः परम् ॥ ४५ ॥ यदा यमनुगृह्णाति भगवानात्मभावितः ॥ स जहाति मतिं लोके वेदे च परिनिष्ठिताम् ॥ ४६ ॥

थाचिंतनादिना भक्तिर्भवेदेवेत्याशंक्याह द्वाभ्याम् । तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिताः मधुभिदश्चरित्रमेव पीयूषं तदेव शिष्यत इति शेषो यासु असारांशरहितशुद्धा मृतवाहिन्य इत्यर्थः । अवितृषोऽलंबुद्धिशून्याः संतो गाढैः सावधानैः कर्णैर्ये ताः सरितः पिबंति सेवंते अशनशब्देन क्षुल्लक्ष्यते । अशनादयस्तान्न स्पृशंति भक्तिरसिकान्न बाधंत इत्यर्थः ॥ ४० ॥ सत्संगमंतरेण स्वयमेव कथाचिंतनादावालस्यादिना रसावेशाभावाच्च क्षुत्पिपासाद्यभिभूतस्य भक्तिर्न संभवतीत्याह । एतैरिति ॥ ४१ ॥ भगवदनुग्रहमंतरेण तु न कस्यापि ज्ञानसंभव इति कैमुत्यन्यायेनाह चतुर्भिः । प्रजापतिपतिर्ब्रह्मा ॥ ४२ ॥ मदंताः अहं नारदोंते येषाम् ॥ ४३ ॥ वाचां पतयोऽपि तपोविद्यासमाधिभिरुपायैः पश्यंतो विचिन्वंतोऽपि पश्यंतं सर्वसाक्षिणं न पश्यंति ॥ ४४ ॥ कुत इत्यत आह । शब्दब्रह्मणि वेदे उरुर्महान्विस्तरो यस्य अर्थतोऽपि पारशून्ये तस्मिन्वर्तमानाः मंत्राणां लिंगैर्वज्रहस्तत्वादिगुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिच्छिन्नमेवेंद्रादिरूपं तत्तत्कर्माग्रहेण भजंतः परं परमेश्वरं न विदुः ॥ ४५ ॥ तर्ह्यन्यः को नाम कर्माद्याग्रहं हित्वा परमेश्वरमेव भजेदित्यत आह । यदा यमनुगृह्णाति । अनुग्रहे हेतुः । आत्मनि भावितः सन्न स तदा लोके लोकव्यवहारे वेदे च कर्ममार्गे

भक्त्यावेशाच्छरीराद्यननुसंधानादिति भावः । अत्र विश्वनाथः-तस्मिन्महत्सदसि । मुखं रांति गृह्णंतीति मुखराः महद्भिर्मुखराः कृता मुखरिताः स्वयमेव मुखप्राप्तीकृता या महतां मुखे सदा तिष्ठंतीत्यर्थः । ता एव कास्तत्राह—मध्विति । मधुभिच्चरित्रपीयूषाणां ये शेषा महद्भिरास्वाद्यास्वाद्य महाप्रसादीकृतास्त एव सरितो महानद्यः परितश्चतुर्दिक्षु प्रतिभक्ता एव स्रवंति ता ये पिबंतीति तासां स्वादाधिक्यात्तेषां च तृष्णाधिक्यं सूचितम् । ता इति तासामेकमपि कणं परित्यक्तुं न शक्नुवंतीत्यनुरागो व्यंजितः । 'ते न स्मरंत्यतितराम्' इत्याद्युक्त्या विस्मृतममतास्पदत्वेनैव शोकमोहाद्यभावात्॥४०॥एतैरशनादिभिः स्वभावजैः ॥४१॥ननु "तरति शोकमात्मवित्" इति श्रुतेर्ज्ञानिनां किं भक्त्येति तत्र कैमुत्यन्यायेन ज्ञानिनो नैव जानंतीत्याह-प्रजेति चतुर्भिः । भगवान्सर्वज्ञः ॥४२॥ मदंता इति । न केवलं तानेव निंदाम्यपि त्वात्मानमपि ॥४३॥ एते तपोविद्यासमाधिभिर्न पश्यंति भक्त्या तु पश्यंति।"भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इति श्रीमुखोक्तेः । एतेषां भक्तिमत्त्वस्य प्रसिद्धेः । एते वयं भक्त्या विना के वराका इति भावः । वाचस्पतयोऽन्यान्प्रत्युपदेष्टु सरस्वतीपतयो भवंति स्वयं तु शास्त्रार्थं नैव जानंति भक्तिं विना व्याख्यानादिति भावः । अद्यापीति । तपआदीनां परिपाकश्च ज्ञापितः अज्ञानस्य लक्षणं पश्यंतोपि उरुप्रयासेन विचिन्वंतोपि यथार्थज्ञानान्न पश्यंतीत्यर्थः॥४४॥अदर्शने हेतुं पृच्छति-कुत इति । उरुविस्तरे शब्दतोपि दुर्विज्ञेये "वज्रहस्तः पुरंदरः" इत्यादिमंत्रोक्तलिंगैः ॥ ४५ ॥ अत्राशंकते—तर्हीति । नामेति प्रसिद्धौ । कोऽन्यः पुरुषो यः सर्वं हित्वा परं भजेदित्यत आह—यदेति । विश्वनाथः—ननु यदि ज्ञानिनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्कर्मसु बर्हिष्मन्नज्ञानादर्थकाशिषु ॥ माऽर्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४७ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः ॥ आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४८ ॥ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमण्डलम् ॥ स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परम् ॥ तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ ४९ ॥ हरिर्देहभृतामात्मा स्वयंप्रकृतिरीश्वरः ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५० ॥ स वै प्रियतमश्चात्मा यतो न भयमण्वपि ॥ इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ॥ ५१ ॥

परिनिष्ठितां मतिं त्यजति ॥ ४६ ॥ अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु अज्ञानाद्विवेकाभावात् पुरुषार्थबुद्धिं मा कृथाः न कुरु । प्ररोचनाय केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु यैः ॥ ४७ ॥ ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति कथमस्पृष्टवस्तुष्वित्युच्यते तत्राह । हे धूम्रधियो मलिनबुद्धयः सकर्मकं कर्मपरं वेदमाहुस्ते अतद्विदोऽवेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकमात्मतत्त्वं वेदतात्पर्यगोचरं न विदुः । यत्र देवोऽस्ति ॥ ४८ ॥ त्वं तु महामूर्ख इत्याह । आस्तीर्येति । बृहद्वधाद्बहुपशुवधात् मानी महायज्वाऽहमित्यहंकारी अतः स्तब्धोऽविनीतः सन्कर्म नावैषि परं विद्यास्वरूपं तच्च न वेत्सि । नारदः स्वयं कृपया तद् द्वयं निरूपयति । हरिं तोषयतीति हरितोषं यत्तदेव कर्म । यया तस्मिन् हरौ मतिर्भवति सैव विद्या महाफलत्वात् ॥ ४९ ॥ कुत इत्यपेक्षायां हरेः परमफलत्वं दर्शयन्नाह द्वाभ्याम् । हरिर्देहभृतामात्मा ईश्वरश्च । तत्र हेतुः । स्वयं स्वातंत्र्येण प्रकृतिः कारणमतस्तेषां तत्पादमूलमेव शरणमाश्रयः । यतो यस्मिन् ॥ ५० ॥ न च तद्भजनेऽन्यभजन इव दुःखं भयं

सकर्माणश्च न जानंति तदा कस्तं जानाति भक्त एवेति चेत्स भक्त एव कथं स्यात्केन वा चिह्नेन ज्ञेय इत्यत आह—यदेति । आत्मनि मनसि भावितोऽर्थाद्भक्तैरेव भगवन्निमं जनं संसारादुद्धरन्नंगीकुर्वीति । स्वभक्तैर्मनसि निवेदितो भगवान्यदा यस्य यमनुगृह्णाति तदैव स भक्तो लोके लौकिके व्यवहारे वेदे च कर्मकांडे परिनिष्ठितां कृतस्थितिमपि मतिं त्यजति ॥ ४६ ॥ उपसंहरति यस्माज्ज्ञानेनैव मोक्षस्तस्माद्धेतोः । अज्ञानाद्भगवत्तत्त्वापरिज्ञानात् । कर्मस्वग्निष्टोमादिषु । तत्प्रवृत्तौ हेतुः—श्रोत्रेति । 'अपाम सोमम्' इत्यादिश्रवणे श्रोत्रं तत्सुखं स्पृशंति ददतीति श्रोत्रस्पर्शीनि तेषु । हेयत्वे हेतुमाह—अस्पृष्टेति । परमात्माख्यवस्तु संबंधगंधरहितेषु ॥ ४७ ॥ अत्राक्षिपति—नन्विति । एते मत्पुरोधसः कथं विद्वांसोपि मां यागादिकर्मैव कारयंति । स्वमिति । यत्र लोके जनार्दनस्तं लोकं वैकुंठं स्वं स्वप्राप्यं स्वीयं न विदुः किं तु स्वर्गमेव स्वं विदुः । "इष्ट्वेह देवता यज्ञैः स्वर्गं प्राप्स्यामहे ध्रुवम्" इत्युक्तेः । स्वामिव्याख्याने यत्रात्मतत्त्वज्ञाने देवो द्योतनात्मको जनस्याविद्यादेरर्दनः परमात्मैवास्ति स एव भवतीत्यर्थः ॥ ४८ ॥ त्वन्तु तैरनभिज्ञैरध्यापितो महामूर्खोसि अतोऽहंकारित्वात् । प्राचीनाग्रदर्भास्तरणं कृत्वा पशुसंज्ञपनमेव जानासि न तु कर्मस्वरूपमित्यर्थः । 'कुरु कर्मैव तस्मात्त्वम्' इत्यादिना विहितं यत्परं कर्म तन्न जानासीत्युच्यते न तु कर्ममात्रं न वेत्सीति । ननु कल्पोक्तद्रव्यसामग्र्या क्रियमाणस्य कर्मणः कथं परत्वाभावस्तत्राह—तदिति । ब्रह्मार्पणबुद्ध्या क्रियमाणस्यैव कर्मणः तत्तोषकत्वेन परत्वं न द्रव्यसामग्र्या क्रियमाणस्येति भावः । ननु ममापि क्षत्रियत्वाद्वेदविद्या विकारित्वेन कर्मानुष्ठानं तत्पूर्वकमेवास्तीति तत्राह—सेति । महाफलत्वान्मोक्षहेतुत्वात् ॥ ४९ ॥ महाफलत्वे हेतुं पृच्छति—कुत इति । हारिरिति अज्ञानतत्कार्यदुरितादिहरणशीलत्वात् । ईश्वरः स्वामी । तत्र आत्मत्वे स्वामित्वे च । अतः स्वामित्वादात्मत्वाच्च । तेषां देहभृताम् । शरणं रक्षिता 'शरणं गृहरक्षित्रोः' इत्यमरः । देहभृतामात्मेति । तत्तोषं विना कथं स्वस्य तोषो भवेदिति भावः । प्रकृतिरीश्वर इति । सर्वं जगन्मातापितरावपि हरिरेवेत्यर्थ इति चक्रवर्ती ॥ ५० ॥ अन्यभजने देवांतरभजने पुत्रादिभजने वा यथा दुःखं भयं च दुःखं दैहिकादिभयं मरणादेरिति । संदर्भस्तु—तस्मादेवंभूतो गुरुरेवाश्रयणीय इत्युपदिशन् पुरंजनोपाख्यानादिविवक्षितमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ प्रश्न एव हि संछिन्नो भवतः पुरुषर्षभ ॥ अत्र मे वदतो गुह्यं निशामय सुनिश्चितम् ॥५२॥ क्षुद्रंचरं सुमनसां शरणे मिथित्वा रक्तं षडंघ्रिगणसामसु लुब्धकर्णम् ॥ अग्रे वृकानसुतृपोऽविगणय्य यांतं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नम् ॥५३॥ सुमनःसधर्मणां स्त्रीणां शरण आश्रमे पुष्पमधुगन्धवत्क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैह्वयौपस्थ्यादि विचिन्वंतं मिथुनीभूय तदभिनिवेशितमनसं षडंघ्रिगणसामगीतवदतिमनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रांतान्काललवविशेषानविगणय्य गृहेषु विहरंतं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतांतोंतःशरेण यमिह पराविध्यति तमिममात्मानमहो राजन्भिन्नहृदयं द्रष्टुमर्हसि ॥ ५४ ॥ स त्वं विचक्ष्य मृगचेष्टितमात्मनोंतश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते ॥ जह्यंगनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण ॥ ५५ ॥

चेत्याह । स वा इति । इति यो वेद स एव विद्वान्स गुरुः स एव हरिश्च ॥ ५१ ॥ उक्तमुपसंहरति । प्रश्न इति । एवं भवतः प्रश्नः संछिन्नः परिहृतः तदेवमात्मानो बंधमोक्षप्रकारे कथारूपेण कथितेऽपि नातिनिर्विण्णचित्तं पुत्रागमनं प्रतीक्षमाणं संतं तं तत्क्षणमेव महाभयकंपितसकलगात्रं गृहान्निर्वासयितुं हरिणरूपकमाह । अत्रेति । वदतो मे वचः शृणु ॥ ५२ ॥ क्षुद्रमल्पं चरतीति तथा तम् । अलुक् । सुमनसां पुष्पाणां शरणे आश्रमे वाटिकायां मिथित्वा मिथः परपरं स्त्रिया सह मिलित्वा तत्रैव रक्तमासक्तं षडंघ्रयो भ्रमरास्तेषां गणास्तेषां सामसु गीतेषु लुब्धः कर्णौ यस्य तम् । परेषामसुभिर्हृतैः स्वीयानसूंस्तर्पयंतीत्यसुतृपस्तानविगणय्यागणयित्वा लुब्धकस्य बाणेन भिन्नं मृगं मृगयान्वेषय ॥५३॥ श्लोकं प्रस्तुते योजयन् व्याचष्टे । सुमनोभिः समानो धर्मः परिणामविरसत्वं यासां स्त्रीणाम् । मिथित्वेत्यस्य व्याख्या मिथुनीभूयेति । स्त्रीभिः सहेति शेषः । रक्तमित्यस्य व्याख्या तास्वभिनिवेशितं मनो येन । असुतृप इत्यस्य व्याख्या आयुर्हरत इति । यांतमित्यस्य व्याख्या विहरंतमिति । अंतर्नलिकायां गूढेन शरेण पराविध्यति दूरादेव ताडयति ॥ ५४ ॥ उपदेशसारमाह । स इति । एवं त्वमात्मनः स्वस्य मृगवच्चेष्टितं विचक्ष्य विचार्य अंतर्हृदि चित्तं कर्णयोः श्रोत्रेंद्रियस्य धुनीं नदीमिव

स वा इति सार्द्धेन । वै प्रसिद्धम् । रूपगुणलीलाभिर्मनोरमत्वेन स हरिनामा सर्वेषां प्रियतमः परमप्रीतानां योग्यः यत एव चात्मा स्वात्मेति पाठे स्वेषां जीवानां रश्मिस्थानीयानां देहभृतां मंडलस्थानीयः यस्मादेव च यतः सकाशादण्वपि भयं न जायते इति । य एवं विद्वान् स एव गुरुः य एवंभूतो गुरुः स तु हरिरेवेत्यर्थः । विश्वनाथः—स हरिरेव प्रियतम आत्माऽसौ जीवस्तु प्रिय इत्यर्थः । तत्र हेतुः—यतो यद्भजनादस्य जीवात्मनोण्वपि भयं न स्यात् इति यो भेदेनात्मद्वयं वेद य एव त्वया विद्वान् ज्ञेयः स एव विद्वान् स एव त्वया गुरुराश्रयणीयः य एव गुरुः स एव हरिस्त्वयोपासनीय इत्यर्थः । अत्र 'स वै प्रियतमो ह्यस्य' इति पाठस्तीर्थसंमतः ॥ ५१ ॥ पुरुषर्षभेति । पुरुषेणापि स्वहिताय झटिति प्रयत्यते त्वं तु पुरुषर्षभो भत्वा कथं तत्र विलंबस इति भावः । अत्र अवसरे । सुनिश्चितं शास्त्रैरिति शेषः ॥ ५२ ॥ तत्रैव पुष्पवाटिकायामेव । अलुक्समास आर्षो वा मुम्—क्षुद्रंचरमिति ॥ ५३ ॥ अन्तर्नलिकायां गूढेन नलिकामध्यस्थापितेन दर्शनायोग्येन मरणहेतुभूतेन व्यापारेण । राजन्निति । राज्य एवासक्तिं मा कुर्विति भावः ॥ ५४ ॥ मद्वाक्ये श्रद्धा चेत्तर्हि हितमुपदिशामीत्याह—यत्त्वं पूर्वं कर्मठः स एव त्वं मृगस्येव विषयानन्विच्छतो जीवस्य चेष्टितम् । शरणं रक्षितारम् । क्रमेण साधनसामग्र्यनुरोधेन विरम संसाराद्विरतो भूया इत्यर्थः ॥ ५५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राचीनबर्हिरुवाच ॥ श्रुतमन्वीक्षितं ब्रह्मन्भगवान्यदभाषत ॥ नैतज्जानंत्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ॥ ५६ ॥ संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान् ॥ ऋषयोऽपि हि मुह्यंति यत्र नेंद्रियवृत्तयः ॥ ५७ ॥ कर्माण्यारभते येन पुमानिह विहाय तम् ॥ अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ॥ ५८ ॥ इति वेदविदां वादः श्रूयते तत्रतत्र ह ॥ कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥ ५९ ॥ नारद उवाच ॥ येनैवार भते कर्म तेनैवामुत्र तत्पुमान् ॥ भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयम् ॥ ६० ॥

बहिर्वृत्तिं चित्ते नियच्छ । एतच्च सर्वेंद्रियोपलक्षणार्थम् । अंगनाश्रमं गृहाश्रमं च जहि । कीदृशम् । असत्तमानामतिकामुकानां यानि यूथानि तेषां गाथा वार्ता यस्मिन् हंसानां जीवानां शरणमीश्वरं प्रीणीहि एवं क्रमेण सर्वतो विरम ॥ ५५ ॥ अर्थान्तरं प्रष्टुं पूर्वोक्तमर्थमनुवदति श्रुतमन्वीक्षितं विचारितं च । ब्रह्मन् हे नारद एतत्त्वदुक्तमात्मतत्त्व मुपाध्याया ये मम कर्मोपदेष्टार आचार्यास्ते न जानंति । तत्र हेतुः यदि विदुस्तर्हि किं न ब्रूयुरिति ॥ ५६ ॥ अतस्तत्कृत उपाध्यायकृतस्तद्वाक्यविरोधेनासंभावनारूपो महान् संशयः संछिन्नस्त्वया अत्र तु कश्चित्संशयो वर्तते । यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति ॥ ५७ ॥ संशयमाह द्वाभ्याम् । कर्माणि येन देहेन करोति तमत्रैव विहायामुत्र लोकांतरे कर्मोपस्थापितेनान्येन देहेन जुष्टान्युपभुक्तानि जीवोऽश्नुते प्राप्नोति ॥ ५८ ॥ इति वादः श्रूयते "प्राप्य पुण्यकृतांल्लोकान्" इति । "शरीरजैः कर्मदोषैर्याति स्थावरतां नरः" इति त्वया चोक्तं "शाश्वतीरनुभूयार्त्तिम्" इति । एतच्च कर्तृभोक्तृदेहभेदेन कृतनाशाकृताभ्यागमप्रसंगान्न संगच्छत इति भावः । संशयांतर माह । प्रोक्तं वेदोक्तं कर्म यत्क्रियते जनैस्तच्चानंतरक्षण एव परोक्षमदृश्यं सन्न प्रकाशते । अतः कर्मणो नष्टत्वात्तद्भोगोपि दुर्घट इति भावः ॥ ५९ ॥ प्रथमस्योत्तरम् ।

न जानंतीत्यत्र हेतुः किन्नेत्यादि ॥ ५६ ॥ यतस्तेऽज्ञा अतो हेतोः । अत्र ब्रह्मणि । महानिति । सूक्ष्मत्वेनाज्ञातविषयत्वान्महत्त्वं न तु स्थूलपरिमाणत्वेनेत्यभिप्रायेणाह—ऋषयोपि । त्रिकालज्ञा अपि किंपुनर्मादृशा इत्यर्थः । अत्र तु कर्ममार्गे तु यत्र कर्म वर्त्मनि । इंद्रियाणां त्वैहिकमपि सर्वं न गोचरी भवति किं पुनः पारलौकिकमत उक्तमिंद्रियवृत्तीनामप्रवृत्तेरिति । यद्वा—यत्र येषु इंद्रियवृत्तयोपि न प्रभवंति । ये जितेंद्रिया इत्यर्थः । ते ऋषयः । हि निश्चितम् । ये मुह्यंति मोहादेव कर्म कुर्वंति मद्विधान्कर्म कारयंति च तर्हि मद्विधानां का वार्त्तेति भावः ॥ ५७ ॥ किञ्च कर्मवर्त्मन्येकः संशयोस्ति तमपि छिन्धीत्याह—कर्माणीति । उपभुक्तानि स्वर्गनरकादीनि ॥ ५८ ॥ वादः श्रूयते स कथं संगच्छेत न ह्यन्येन कृतमन्येन भोक्तुं युज्यते इति भावः । एतच्च अन्यकृतान्यभोगलक्षणम् । इति भाव इति । येन देहेन कृतानि स त्वभुक्त्वैव मृतोऽतस्तत्कृतकर्मणां नाश एव जातोऽन्येन देहांतरेणं तत्फलभोगांगीकारे च तस्य विनैव कर्मकरणं तत्फलावाप्तिरित्यकृताभ्यागम एव जात इत्याशयः । इति भाव इति । यत्तु स्वयमेव नष्टं तत्फलं कथं दातुं समर्थो भवेत्कर्त्रे इति न हि मृतः पिता पुत्राय कदलीफलमानीय ददातीति युज्यत इत्याशयः । तज्जन्यादृष्टे प्रमाणाभावात्तदपि न प्रकाशते लोकान्तरे कथं तत्फलभोग इति ॥ ५९ ॥ इत्यर्थ इति । पापपुण्ययोर्मनःप्रधानैरिंद्रियैरेव करणात्तत्फलयोः स्वर्गनरकयोरपींद्रियैरेव भोगात् व्यवधानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयानमिममुत्सृज्य श्वसंतं पुरुषो यथा ॥ कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ॥ ६१ ॥ ममैते मनसा यद्यदसावहमिति ब्रुवन् ॥ गृह्णीयात्तत्पु
मान्राद्धं कर्म येन पुनर्भवः ॥ ६२ ॥ यथानुमीयते चित्तमुभयैरिंद्रियेहितैः ॥ एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ॥ ६३ ॥ नानुभूतं क्व
चानेन देहेनादृष्टमश्रुतम् ॥ कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ॥ ६४ ॥

येनैवेति । अव्यवधानेन कर्तृभोक्तृदेहविच्छेदं विना । स्थूलदेहनाशेऽपि मनःप्रधानस्य लिंगदेहस्यानाशान्नोक्तदोषप्रसंग इत्यर्थः ॥ ६० ॥ लिंगदेहविशिष्टस्य भोक्तृत्वं स्वप्न दृष्टांतेन स्पष्टयति । शयानमिमं जाग्रद्देहं श्वसंतं जीवंतमुत्सृज्य तदभिमानं त्यक्त्वात्मनि मनसि संस्काररूपेणाहितं कर्म यथा भुंक्ते तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन देहेनान्येन वा पश्चादिदेहेन तथा लोकांतरेऽपीति भावः ॥ ६१ ॥ ननु भवतु नाम लिंगविशिष्टस्यानेन दृष्टांतेन भोक्तृत्वं कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह। ममैते पुत्रादयोऽसावहं ब्राह्मण इति ब्रुवन्मनसा यद्यद्देहं गृह्णीयात्तत्ततो देहाद्राद्धं सिद्धं कर्म पुमान् गृह्णीयात येन कर्मणा एवमहंकारगृहीतेन पुनर्भवो भवति । अन्यथा जन्मानुपपत्तेः । अतोऽभिमंतुर्मनोविशिष्टस्यैव कर्तृत्वमभिमानविषयस्य तु देहस्य पुत्रादिदेहवद् द्वारमात्रत्वमिति भावः ॥ ६२ ॥ यदुक्तं कर्मणो नष्टत्वाच्चामुत्र भोग इति तत्राह । यथेति । उभयैर्ज्ञानकर्मरूपैरिंद्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभिश्चित्तमनुमीयते । सत्यपि सर्वेंद्रियविषयसंबंधे युगपज्ज्ञानानुत्पत्तेः । तदुक्तमक्षपादेन "युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगम्" इति । एवं चित्तवृत्तिभिरपि पूर्वदेहजं कर्म लक्ष्यते तासामपि युगपदनुत्पत्तेः ॥ ६३ ॥ इतोपि कर्म लक्ष्यत इत्याह नानुभूतमिति द्वाभ्याम् । अनेन वर्तमानेन देहेन क्व च कुत्रचिदपि यन्नानुभूतमननुभूतमनुपभुक्तमदृष्टं चाश्रुतं च यद्रूपं यदात्मकं यादृक् यत्प्रकारं च तत्कदाचित्स्वप्न

न विद्यते यस्य तेनाव्यवधानेन लिङ्गेन स्थूलदेहस्य तत्र व्यवधायकत्वाशक्तेः ॥ ६० ॥ इति भाव इति । स्थूलदेहस्य शयने स्थितत्वात्स्वप्नभोगनिमित्तकर्मोपार्जितेन देहेन लिंगिन एव यथाभोक्तृत्वं तथात्रापीति तात्पर्यम् ॥ ६१ ॥ अत्राक्षिपति—नन्विति । ममैते यागाः स्वर्गफला इति अयमहं कर्म करोमीति ब्रुवन्मनसा यद्यत्स्थूलं देहं गृह्णीयादभिमानविषयी कुर्यात्ततो देहाद्राद्धं सिद्धं कर्मैव सलिंगो जीवो गृह्णीयान्न तु तत्स्थूलदेहं प्रयोजनाभावादिति भावः । ततश्च तेन कर्मणैवाहंकारगृहीतेन पुनर्जन्म भवति । अन्यथा कर्मग्रहणाभावे जन्मैव न स्यात् 'कर्मणा जायते जंतुः' इत्याद्युक्तेः । अतो जन्मानुपपत्तेर्हेतोः । इति भाव इति । यथा पुत्रादिकृतं कर्म पुत्रादिषु निजाभिमानेन स्वकृतमित्युच्यते तथा स्थूलदेहेपि निजाभिमानत्वात्तत्कृतं कर्म स्वकृतं मन्यत इत्याशयः । तस्मात्साक्षात्कर्त्ता भोक्ता च पुरुष एव तत्र मनसोंतरंगत्वमिति भावः ॥ ६२ ॥ अक्षपादेन गौतमेन । युगपदेककालावच्छेदेन । मनसो लिंगं ज्ञापकम् । तस्माद्यदा येनेंद्रियेण मनसो योगस्तदा तस्येंद्रियस्यैव विषयज्ञानमिति । एवमेव चित्तस्य सर्वाभिर्वृत्तिभिर्युगपदनुद्भूताभिः पूर्वदेहस्थं कर्म लक्ष्यते । येनयेन कर्मणा यदायदा याया चित्तवृत्तिर्युज्यते सासैव भद्राऽभद्रा वाप्युद्भवतीत्यर्थः । तेन कर्मणः समनन्तरक्षण एवोपरतत्वेपि तत्संस्कारस्तद्रूपास्तिष्ठेदेवेति सिद्धांतो दर्शितः ॥ ६३ ॥ इतोपि वक्ष्यमाणहेतुनापि । अत्र विश्वनाथः—ननु स्थूलदेहनाशेऽपि लिंगदेहो यन्न नश्यतीत्येतत्कथं प्रतीमस्तत्राह—नानुभूतमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनास्य तादृशं राजँल्लिङ्गिनो देहसम्भवम् ॥ श्रद्धत्स्वाननुभूतोर्थो न मनः स्प्रष्टुमर्हति ॥ ६५ ॥ मन एव मनुष्यस्य पूर्वरूपाणि शंसति ॥ भविष्यतश्च भद्रं ते तथैव न भविष्यतः ॥ ६६ ॥ अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते ॥ यथा तथाऽनुमन्तव्यं देशकालक्रियाश्रयम् ॥ ६७ ॥ सर्वे क्रमानुरोधेन मनसींद्रियगोचराः ॥ आयांति वर्गशो यांति सर्वे समनसो जनाः ॥ ६८ ॥

मनोरथादिष्वात्मनि मनस्युपलभ्येत ॥ ६४ ॥ तेन हेतुनास्य लिंगिनो वासनाश्रयस्य जीवस्य तादृशं तदनुभवादियुक्तं पूर्वदेहसंभवं श्रद्धत्स्व निश्चयेन मन्यस्व । न ह्यननुभूतोऽर्थो मनः स्प्रष्टुं मनसि स्फुरितुमर्हति ॥ ६५ ॥ किं च मनोवृत्त्यैव पूर्वापराणि शुभाशुभानिमित्तानि शरीराणि ज्ञायंत इत्याह । मन एवेति । भद्रं त इति सम्यगवधानार्थमाशिषाभिनन्दति । भविष्यत उद्भवं प्राप्स्यतो न भविष्यतो नीचत्वं प्राप्स्यतोऽपि भावीनि रूपाणि शंसति मन एवौदार्यकार्पण्यादिवृत्तिभिः पूर्वमप्येवमेवासीत्पश्चादप्येवमेव भविष्यतीति भूतभाविरूपाणि ज्ञापयतीत्यर्थः॥६६॥ननु कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रो दिवा नक्षत्राणि स्वशिरश्छेद इत्यादि तत्राह।अदृष्टमिति । अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे निशाश्रयं नक्षत्रादिकं दिवा अभ्यंगादिक्रियाश्रयं स्वशिरश्छेदनाश्रयम् । निद्रादिदोषेण हि तथा प्रतीयत इत्यनुमन्तव्यम् । परस्यापि तदनुपपत्तेस्तुल्यत्वादिति भावः ॥६७॥ ननु दरिद्रः क्वचिदात्मानं महाराजं पश्यति राजा च रंकमात्मानं पश्यति तत्कथमसंभावितं संगच्छेत तत्राह। सर्व इति । आयांति भोग्यत्वेन प्राप्नुवंति यांति च भोगानंतरम् । यदि च कश्चिदमना भवेत्तर्ह्येवं न स्यान्न त्वेतदस्तीत्याह । सर्वे समनस इति । अतः सर्वेषां समनस्कत्वान्मनसि च सर्वार्थानां

द्वाभ्याम् । बाल्ये दृष्टं श्रुतं यथा वार्द्धके स्फुरति तथैव पूर्वपूर्वस्थूलदेहगतमेतद्देहे मनसि स्फुरति चेत्तदेवेदं मनो नान्यदिति जानीयादिति भावः ॥ ६४ ॥ ६५ ॥ अन्यदाह—किं चेति । उद्भवमुत्कर्षम् । उत्कृष्टस्यैव भवनमभवनमधमस्य च यथेंदोस्तमसश्चैव गण्यते क्रमत उभ इति न्यायमाश्रित्योक्तमुद्भवमित्यादि । मनः कर्तृ उग्रत्वशांतत्वविमूढत्वज्ञानवैराग्यादीनामादिपदेन ग्रह इत्यर्थ इति । अन्यथा सर्वेषां साम्यतैव भवेदिति भावः । विश्वनाथस्तु—न भविष्यतः पुनर्न जनिष्यमाणस्यास्य मुक्तिर्भविष्यतीति मन एव शुद्धज्ञाननिष्ठं ज्ञापयति । अत एकमेव मनोमयं लिंगशरीरं न पुनःपुनर्जातमिति । मनसोनेकत्वे तु पूर्वानुभूतहिताहितादिज्ञापनमनुपपन्नं स्यादिति भावः । "रूपं शब्दे पशौ श्लोके ग्रंथावृत्तौ हितादिषु" इति यादवः ॥ ६६ ॥ यदवादि पूर्वानुभूतमेव मनः स्प्रष्टुमर्हति नाननुभूतमिति तदयुक्तमित्याक्षिपति—नन्विति । दर्शनानर्हमत्यंतादृष्टचरमपि दृश्यते तत्राह—अदृष्टमिति । इह जन्मन्यदृष्टमश्रुतमपि क्वचिन्मनसि दृश्यते चेत्तर्हि तद्यथा घटते तथानुमंतव्यं घटनीयं कथमत्राह—देशेत्यादि । अन्यदेशाश्रयं किञ्चिद्देशाश्रयं मैनाकादिदेशाश्रयमित्यर्थः । मैनाकस्य समुद्रांतःस्थत्वात्तदुपरिदेशे समुद्रोस्त्येवेत्युक्तं वाल्मीकीये । दिवेति राहुणा रवेः सर्वग्रासे तदपि नासंभवि । तैलमर्दनोत्तरं शयने स्वशिरश्छेदरूपदुःस्वप्नोपि नासंभव इत्युक्तं चिकित्साशास्त्रे । यद्वा—धातुवैषम्यदोषेण शिरच्छेदोपि दृश्यते स्वप्न इत्यपि तत्रैव । निद्रादिनेहादिपदार्थो धातुवैषम्यमेव । इत्थं कुतो मंतव्यमिति चेत्तत्राह—परस्य पूर्वपक्षिणोपि । इति भाव इति । एतदनंगीकारे कस्यचिदपि मते पर्वताग्रादौ समुद्रादिस्थित्यादि न सेत्स्यतीत्याशयः ॥ ६७ ॥ पुनराक्षिपति—नन्विति । रंकं दरिद्रम् । तत् उभयोरुभयत्वम् । इत्यर्थ इति । सर्वेषामर्थानां दृष्टानां श्रुतानां च वासनारूपेण स्थितत्वात्समनस्कस्य तन्नाद्भुतमिति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि ॥ तमश्चन्द्रमसीवेदमुपरज्यावभासते ॥ ६९ ॥ नाहं ममेति भावोऽयं पुरुषे व्यवधीयते ॥ यावद्बुद्धिमनोऽक्षार्थगुणव्यूहो ह्यनादिमान् ॥ ७० ॥ सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः ॥ नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥ ७१ ॥ गर्भे बाल्येऽप्यपौष्कल्यादेकादशविधं तदा ॥ लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा ॥ ७२ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ७३ ॥

क्रमेण प्रवेशान्नात्यंतादृष्टचरः कस्यापि कश्चिदर्थोऽस्तीत्यर्थः ॥ ६८ ॥ तदेवं सर्वैरपि सर्वेऽर्थाः क्रमेण दृश्यंत इत्युक्तमिदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह । सत्त्वैकनिष्ठे सत्त्वे एवैका निष्ठा यस्य भगत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसीदं विश्वमुपरज्य संयोगमिव प्राप्यावभासते । प्रतीत्यनर्हस्यापि कदाचित्प्रतीतौ दृष्टान्तः । चन्द्रमस्युपरज्य तमो राहुरिव तदिदं शुद्धे मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धम् ॥ ६९ ॥ तदेवं स्थूलदेहनाशेऽपि लिंगदेहस्यानाशादन्यः कर्ताऽन्यो भोक्तेति दोषो नास्तीत्युक्तम् । तत्रैवं शंकते । ननु लिंगदेहस्य स्थूलदेहद्वारेणैव कर्तृत्वभोक्तृत्वे न तु केवलस्य तत्र कदाचित्स्थूलदेहाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावान्मुक्तिः प्रसज्येत तत्राह नेति । अहंममेति भावः स्थूलदेहसंबंधः पुरुषे जीवे न व्यवधीयते न विच्छिन्नो भवति । किंपर्यन्तम् । बुद्ध्यादीनां व्यूहः परिणामो लिंगं यावदस्ति अनादिमाननादिः सन् ॥ ७० ॥ स्वापादावहंकाराद्यभावात्तद्विच्छेदमाशंक्याह द्वाभ्याम् । सुप्त्यादिषु उपताप इष्टवियोगादिदुःखम् । तेष्वहमिति ज्ञानमहंकारो नेहते न प्रकाशते प्राणायनानामिंद्रियाणां विघातात् । इंद्रियैरिदंकारास्पदवस्तुग्रहणे ह्यहंकारः स्फुरति नान्यथेत्यर्थः ॥ ७१ ॥ अपौष्कल्यादसंपूर्णत्वात्प्राणायनानामिति शेषः । यूनस्तरुणस्य यदेकादशविधमेकादशेंद्रियैः स्फुटं लिंगमहंकरणं तन्न दृश्यते । गर्भादाविति शेषः । सतोऽप्यनभिव्यक्तौ दृष्टांतः । कुह्वाममावस्यायां चंद्रमसो लिंगं रूपमिव ॥ ७२ ॥ तस्मादहंकारास्पदस्य स्थलदेहस्याविच्छेदाद्वस्तुभूतार्थाभावेऽपि संसृतिनिवृत्तिर्नास्तीत्याह । अर्थे हीति ॥ ७३ ॥

एकेनैव लिंगदेहेन परस्सहस्रान्स्थूलदेहान्प्रविश्य कालभेदेनैक एव यः कोपि जीवः सर्वानेव विषयभोगान्भुंक्ते इत्याह—सर्वे इति । समनसः सलिंगदेहा इति चक्रवर्ती ॥ ६८ ॥ सत्त्वे शुद्धसत्त्वे । चिद्विभूताविव निष्ठा स्थितिर्यस्य तथाभूते मनसि यथा भगवान्विश्वं पश्यति तथा तदिच्छावशात्तद्भक्तोपि पश्यति यथा व्रजेश्वरी मृद्भक्षणलीलायामिति ॥ ६९ ॥ नन्वयं कदारभ्य प्रवृत्तस्तत्राह—अनादिमान् अविज्ञातादिकालः ॥ ७० ॥ ननु लिंगदेहसद्भाव एव परं सहस्राणां स्थूलदेहानां नाश उद्भवश्च यथा भवति तथा स्थूलदेहसद्भावेपि प्रतिसुषुप्ति सूक्ष्मदेहनाशं सुषुप्त्यन्ते तदुद्भवं च कथं न ब्रूम इत्यभिप्रेत्याह—स्वापादाविति । इत्यर्थ इति । स्वापादाविंद्रियाणां सत्त्वान्न तथा स्फुरणं न तु लिंगाभावेनेति भावः । चक्रवर्ती—प्राणानामयनं देहेंद्रियेषु संचलनं तस्य विघातात् विघातजन्यादिंद्रियाणां स्वस्वव्यापारासामर्थ्यादहमिति ज्ञानमहममुक इति ज्ञानं तत्र सुषुप्तौ मनआदिसर्वेंद्रियेषु प्राणसंचारणाभावः । स्वप्ने बहिर्ज्ञानेंद्रियेष्वेवेति ज्ञेयम् । मृत्युप्रज्वाराभ्यां जनितकष्टेपि सुषुप्त्यादिषु यथापूर्वं विघाताधिक्यं न तु लिंगाभावः ॥ ७१ ॥ ७२ ॥ यतो लिंगदेहस्य नाशे नास्ति तस्माद्धेतोः । वस्तुभूतार्थाभावेपि सत्यत्वाभावेपि । विश्वनाथः—एवं सुषुप्त्यादिषु लिंगस्य विघात एव न त्वभावः । ये तु सुषुप्तिप्रलययोर्लिंगस्य प्रकृतौ लयादभावमाहुस्तन्मतेपि जीवस्य न मुक्तिः ॥१०५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं पंचविधं लिंगं त्रिवृत्षोडशविस्तृतम् ॥ एष चेतनया युक्तो जीव इत्यभिधीयते ॥ ७४ ॥ अनेन पुरुषो देहानुपादत्ते विमुंचति ॥ हर्षं शोकं भयं दुःखं सुखं चानेन विंदति ॥ ७५ ॥ यथा तृणजलौकेयं नापयात्यपयाति च ॥ न त्यजेन्म्रियमाणोपि प्राग्देहाभिमतिं जनः ॥ ७६ ॥ यावदन्यं न विंदेत व्यवधानेन कर्मणाम् ॥ मन एव मनुष्येंद्र भूतानां भवभावनम् ॥ ७७ ॥ यदाऽक्षैश्चरितान्ध्यायन्कर्माण्याचिनुतेऽसकृत् ॥ सति कर्मण्यविद्यायां बंधः कर्मण्यनात्मनः ॥ ७८ ॥ अतस्तदपवादार्थं भज सर्वात्मना हरिम् ॥ पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ॥ ७९ ॥ मैत्रेय उवाच ॥ ॥ भागवतमुख्यो भगवान्नारदो हंसयोर्गतिम् ॥ प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोऽगमत् ॥ ८० ॥ प्राचीनबर्हीं राजर्षिः प्रजासर्गाभिरक्षणे ॥ आदिश्य पुत्रानगमत्तपसे कपिलाश्रमम् ॥ ८१ ॥

यावल्लिंगं स्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपंचयति एवमिति सार्धैस्त्रिभिः । पंचविधं पंचतन्मात्रात्मकम् । त्रिवृत्त्रिगणम् । षोडशविकारात्मना विस्तृतम् ॥ ७४ ॥ ॥ ७५ ॥ नन्वेकं देहं विसृज्य देहांतरप्रवेशात्पूर्वं विदेहता स्यादेवेत्यत आह । यथेति । नापयाति पूर्वतृणस्यात्यागात् अपयाति च तृणांतरधारणात् । तथा प्राग्देहाभिमतिं न त्यजेन्म्रियमाणोऽपि ॥ ७६ ॥ अन्यं देहम् । कर्मणां प्राग्देहारंभकाणां व्यवधानेन विच्छेदेन समाप्त्या प्रकरणार्थमुपसंहरति । मन एवेति । भवभावनं संसारहेतुः ॥ ७७ ॥ कथं सति तदाह । यदेति । चरितानुपभुक्तान् यतः कर्मणि सति । नन्वसंगस्य कुतः कर्म तत्राह । अविद्यायां सत्यामनात्मनो देहादेः कर्मणि बंधो भवति ॥ ७८ ॥ विश्वस्थित्यादयो यतो हरेर्भवंति ॥ ७९ ॥ हंसयोर्जीवेश्वरयोः ॥ ८० ॥ पुत्रानादिश्येति पुत्राणामादेशं मंत्रिणामग्रे कथयित्वा । कपिलाश्रमं गंगासागर

किन्तु संसार एवेति सदृष्टांतमाह । अर्थे लिंगशरीरे विषयध्यानादनिवृत्तस्य पुंसः स्वप्ने विषयाभावेपि । विषयग्रहणरूपस्यानर्थस्य यथागमनं तथैव सुषुप्तौ लिंगलयेप्यविद्यातत्संस्काराणामपगमात् मुक्तिर्न किन्तु संसार एवेत्यर्थः ॥ ७३ ॥ लिंगशरीरमेव किं तत्राह-एवमिति । पंच प्राणा विधा विद्धतश्चेष्टां कुर्वतो यत्र तदिति वा । त्रिगुणं त्रिगुणकार्यं त्रिभिर्वर्तत इति त्रिवृत् एकादशेंद्रियपंचतन्मात्रैः षोडशविकारात्मना चेतनया बुद्ध्या चिदाभासेन वा "प्रतिपज्ज्ञप्तिचेतनाः" इत्यमरः । यद्वा—प्राणेंद्रियांतःकरणभेदेन त्रिवृत्त्रिविधं "प्राणेंद्रियांतःकरणभेदेन त्रिविधं मतम् । पञ्चपञ्चैव ते सर्वे प्राणा बुद्धींद्रियाणि वा ॥ कर्मेन्द्रियाणि च तथा तस्मात्पंचविधं स्मृतम् । लिंगं षोडशकं प्राहुर्बुद्ध्या च मनसा सह॥" इति टीकांतरोक्तेः । जीवः जीवोपाधिः॥७४॥अनेन लिंगदेहेन पुरुषो जीवः देहान्स्थूलान्॥७५॥ अत्राशंकते नन्विति—अदेहता मुक्तिः । तृणजलौका कीटविशेषः । कचिज्जलूकेति पाठः । कर्मणामुत्तरदेहारंभकाणां विशेषतो धारणेन यद्वा—कर्मणां प्राचीनानां सत्त्वेन भगवत्प्रसादमंतरेण विनाशानुपपत्तेः सर्वदेहवियोगासंभवे मुक्त्यभाव इति भावः ॥ ७६ ॥ मनुष्येंद्रेति । मनुष्यस्यैवापि देहांतरापेक्षयाधिकज्ञातवत्त्वेनैतद्विचारे सामर्थ्यं भवति तव तु मनुष्येंद्रत्वात्कथं न भवेदिति भावः ॥ ७७ ॥ कथं सति केन प्रकारेण मनसि सति कीदृशे मनसि सति संसारो भवतीत्यर्थः । तद्बंधहेतुत्वम् । अक्षैरिंद्रियैः । असकृदभीक्ष्णम् । आचिनुते करोति । यतो हेतोः कर्मण्येकस्मिन्नपि बीजरूपे स्थिते सति । अत्राक्षिपति—नन्विति । अविद्यायां विषयेच्छारूपायां कर्मणि बंध आसक्तिर्भवति 'यया संमोहितो जीवः' इत्याद्युक्तेः ॥ ७८ ॥ यतोऽविद्यासंबंध एव बंधहेतुस्ततो हेतोः । तदपवादार्थमविद्यानिवृत्तये । सर्वात्मना सर्वभावेन "अनर्थोपशमं साक्षाद्यतो भक्तिरधोक्षजे" इत्युक्तेः । तदात्मकं तद्रूपं "भयं द्वितीयाभिनिवेशतः स्यात्" इत्युक्तेः ॥ ७९ ॥ गतिं सच्चिदानंदलक्षणाम् । अमुं प्राचीनबर्हिषम् सिद्धलोकं ब्रह्मलोकम् । तत उपदेशानंतरम् । वर्णाधिक्यमार्षपादे छांदसम् ॥ ८० ॥ प्रजासर्गश्च संततु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रैकाग्रमना धीरो गोविंदचरणांबुजम् ॥ विमुक्तसंगोऽनुभजन्भक्त्या तत्साम्यतामगात् ॥ ८२ ॥ एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणा नघ ॥ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ॥ ८३ ॥ एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचम् ॥ यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मुक्तसमस्तबंधः ॥ ८४ ॥ अध्यात्मपारोक्ष्यमिदं मयाऽधिगतमद्भुतम् ॥ एवं स्त्रियाऽऽश्रमः पुंसश्छिन्नोऽमुत्र च संशयः ॥ ८५ ॥ इति श्रीभा० महा० चतुर्थ० प्राचीनबर्हिर्नारदसंवादेऽध्यात्मज्ञानवर्णनं नामै कोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ विदुर उवाच ॥ ये त्वयाऽभिहिता ब्रह्मन्सुताः प्राचीनबर्हिषः ॥ ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य काम् ॥ १ ॥ किं बार्हस्पत्येह परत्र वाऽथ कैवल्यनाथप्रियपार्श्ववर्तिनः ॥ आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ २ ॥

संगमम् ॥८१॥८२॥८३॥ आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदम्॥८४॥स्त्रीबुद्धिस्तत्सहितस्याश्रमोऽहंकारश्छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशयश्छिन्नः ॥८५॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे टीकायामेकोनत्रिंशोऽध्यायः ॥२९॥छ॥ प्रसंगात्पंचभिः प्रोक्तं वृत्तं प्राचीनबर्हिषः ॥ वर्ण्यते च पुनर्द्वाभ्यां प्रस्तुतं तत्प्रचेतसाम् ॥ १ ॥ तत्र त्रिंशे तपस्तुष्टादीशाल्लब्धवरास्ततः ॥ आगत्य वार्क्षींमुद्वाह्य राज्यं चक्रुरितीर्यते ॥ २ ॥ हरिं प्रतोष्य कां सिद्धिमापुः ॥१॥ हे बार्हस्पत्य

त्यादनमभिरक्षणं प्रजापालनं चेति द्वंद्वैक्यम् ।: यद्वा—प्रजाया ब्राह्मणादिरूपायाः सर्गस्य स्वभावस्य शमदमादेरभिरक्षणे स्थापने तत्परिपंथिनिरासेनेति शेषः ॥ ८१ ॥ तत्र कपिलाश्रमे । तत्साम्यतां तत्पार्षदत्वम् ॥ ८२ ॥ एतत् उपाख्यानम् । अध्यात्मस्य जीवस्य । पारोक्ष्यं परोक्षतया वर्णनं पुरंजनराजरूपतया कथनम् । अनघेति । तव त्वविद्यालक्षणोऽघो नास्त्यप्यन्येषां तन्निवर्त्तक त्वमित्याह—लिंगेन । लिंगयति प्रकाशयति संसारमिति लिंगमज्ञानं तेन त्यज्यते जीवन्मुक्तो भवतीति भावः ॥ ८३ ॥ मुकुंदयशसा कर्मादिभ्यो भक्त्युत्कर्षवर्णनेन 'तस्मिन्महन्मुखरिता मधुभिच्चरित्रम्' इत्यादिना व्यंजितेन वा । पारमेष्ठ्यं परमेष्ठिकर्म परमेष्ठिनाप्येतन्नित्यं कीर्त्यत इत्यर्थः । यद्वा—परमेष्ठिनः सर्वोत्कृष्टलोकवासिनो हरेर्ज्ञप्तौ साधनं पारमेष्ठ्यमधिगच्छति गुरोस्सकाशाज्जानाति यस्मिञ्जन्मनि जानाति अस्मिन्नित्यर्थः । तथा च संसारभ्रम एवानेन निवार्यते न बंध इति मंदाशंकां वारयति मुक्तेति । अस्मिन्प्रसिद्धे संसारे वा ॥ ८४ ॥ एतच्च शिष्टशिरोमणिना मैत्रेयेणाप्यधिगतत्वादन्यैरवश्यमधिगंतव्यमिति भावेनाह । मया मैत्रेयेण । गहनादद्भुतमिदं नारदेन प्राचीनबर्हिष उपदिष्टमध्यात्मपारोक्ष्यमधिकाद्गुरुमुखादधीतमेव तुभ्यमुपदिष्टमतस्त्वयाप्यतिश्रद्धयाधीत्याभ्यसनीयमिति शेषः । किं च अस्य फलमप्यद्भुतमेवेत्याह—एवमिति । एवमुक्तरीत्या । पुंसः स्त्रिया बुद्ध्या सह वर्तमानस्य य आसमंताच्छमयति तापयति स्वसंबधिनमित्याश्रमोहंकारः । "अहंकारो भवेत्पुंसो निखिलानर्थकारणम् । बुद्धिसंगादीशसंगिसंगात्स च निवर्त्तते ॥" इत्यादिपुराणोक्तेः।पक्षे गार्हस्थ्यलक्षणः । किञ्चाधिगंतुः पुंसः पारलौकिकसंशयोप्यनेन निवर्त्तत इति भावः ॥ ८५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ प्रसंगात् प्रचेतःकथाप्रसंगात् । प्रस्तुतं प्रकृतं तद्वृत्तम् । (१) तत्र द्वयोर्मध्ये । ततः तपस्थलात् । वार्क्षीं वृक्षैः पालितां कंडुतः प्रम्लोचोद्भवाम् । उद्वाह्य परिणीय (२) रुद्रगीतेन शिवोपदिष्टयोगादेशाख्यस्तवेन ॥ १ ॥ कैवल्यनाथो विष्णुः "वरं वृणीष्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ प्रचेतसोंतरुदधौ पितुरादेशकारिणः ॥ जपयज्ञेन तपसा पुरंजनमतोषयन् ॥ ३ ॥ दशवर्षसहस्रांते पुरुषस्तु सनातनः ॥ तेषामाविरभूत्कृच्छ्रं शांतेन शमयन्रुचा ॥ ४ ॥ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः ॥ पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ॥ ५ ॥ काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः ॥ अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो गरुडकिन्नरगीतकीर्तिः ॥ ६ ॥ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्धच्छ्रिया परिवृतो वनमालयाद्यः ॥ बर्हिष्मतः पुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः ॥ ७ ॥ श्रीभगवानुवाच ॥ वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः ॥ सौहार्देनाऽपृथग्धर्मास्तुष्टोऽहं सौहृदेन वः ॥ ८ ॥ योऽनुस्मरति संध्यायां युष्माननुदिनं नरः ॥ तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥ ९ ॥

कस्यांचिद्दियायां बृहस्पतेर्मैत्रेयः शिष्यः इति ज्ञातव्यम् । ते यदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्तिनस्तदनुगृहीताः संतो नूनं परं मोक्षं प्रापुरेव ततः पूर्वं त्विहाथ वा परत्र किं प्रापुः ॥ २ ॥ रुद्रगीतजपरूपेण यज्ञेन तपसा च पुरंजनं हरिम् ॥ ३ ॥ तेषां कृच्छ्रं तपःक्लेशं रुचा कांत्या शमयन् शांतेन शुद्धसत्त्वेन वपुषा आविर्भूतः ॥ ४ ॥ सुपर्णस्कंधमारूढ इत्यादीनां बर्हिष्मतः सुतानाहेति तृतीयेनान्वयः ॥ ५ ॥ कनकमयेन वर्णवता विभूषणेन भ्राजमानं कपोलं वदनं च यस्य । अष्टभिरायुधैः । गरुड एव किन्नरस्तेन पक्षस्वनैर्गीता कीर्तिर्यस्य ॥ ६ ॥ पीनाश्च ते आयता अष्टौ भुजास्तेषां मंडलं समूहस्तन्मध्ये स्थितया लक्ष्म्या स्पर्धमाना श्रीः शोभा यस्यास्तया वनमालया परिवृत आद्यः पुरुष आह । पर्जन्यस्य नाद इव रुतं नादो यस्यास्तया वाचा । सघृणोऽवलोको यस्य ॥ ७ ॥ यूयं मे मत्तो वृणीध्वम् । सौहार्देन हेतुना अपृथगेकविषयो धर्मो येषां तेषां संबोधनम् । वः परस्परं सौहृदेन तुष्टोऽहम् ॥ ८ ॥ भूतेषु सौहृदं च भविष्यति ॥ ९ ॥

भद्रं ते ऋते कैवल्यमद्य नः" । इति "कैवल्यनाथो भगवान्विष्णुरेव न संशयः" इति मुचुकुंदं सर्वदेवोक्तेः । स प्रियो यस्य शिवस्य 'अहं च भगवत्प्रियः' इति चित्रकेतूपाख्याने सतीं प्रति साक्षाच्छ्रीरुद्रोक्तेः । ततो मोक्षात् । गिरिशं ज्ञानदातृषु मुख्यं गिरिणा ब्रह्मणा शं सुखं यस्य स गिरिशः "तं ब्रह्मगिरिरित्याचक्षते" इति श्रुतेः । यद्वा–गिरिमज्ञानपर्वतं श्यति नाशयतीति गिरिशः । गिरौ कैलासे शेते तिष्ठतीति वा गिरिशः । एतेन ब्रह्मनिष्ठैकांतवासित्वादिकं गुरुधर्मा अप्यत्र दर्शिताः । बार्हस्पत्येति । बृहस्पतिवत्तवापि त्रैकालिकज्ञानवत्त्वेन सर्वज्ञत्वात्सर्वकथनसामर्थ्यमस्तीति भावः । प्रचेतस इति । प्रकृष्टचेतस्त्वाच्च तु मोक्षा धिकारिण एवेति ॥ २ ॥ पुरं सर्वसमूहं जनयतीति पुरंजनः । यद्वा–पिपर्त्तीति पुरः जनयतीति जनः पुरश्चासौ जनश्चेति पुरंजनः । आर्षो मुम् । सर्वोत्पत्तिस्थितिकर्त्तारमीश्वरमित्यर्थः ॥ ३ ॥ तेषां प्रचेतसाम् ॥ ४ ॥ ५ ॥ 'काशृ–दीप्तौ' इति इष्णुप्रत्ययः । वर्णवता शोभनवर्णेन । संदर्भस्तु–कनकवर्णेनेत्यलौकिकत्वान्न तु कनकमयत्वेनेत्यर्थः । विभूषणेन कुंडलादिना । भ्राजदिति । शत्रं तत्वमार्षम् । किन्नरो गायको देवयोनिभेदः । वर्णानि रूपभेदास्तानि संत्यस्मिन्निति वर्णं मत्वर्थीयोच् बहुवर्णयुतम् । भूमार्थेपि मतुबादयः संति । सुवर्णस्य वर्णानि बहूनि संति तानि च रत्नपरीक्षाग्रंथतोऽवसेयानि । लोके व्यवहारोपि द्वादशवर्णमिदमेकादशवर्णमिदं स्वर्णमिति दृश्यते तथा च कनकं च तद्वर्णञ्चेति कनकवर्णं तस्य विभूषणेनेति वा ज्ञेयम् ॥ ६ ॥ स्पर्द्धदिति प्रयोगस्त्वश्वश्वदाचरतीत्यश्वन्नित्यादिवदौपचारिक एव । नहि हरेर्वक्षसि नित्यस्थितयोर्लक्ष्मीवनमालयोरौत्सर्गिकी स्पर्धा संजाघटीति ॥ ७ ॥ वो युष्माकं सौहृदेन वैशिष्ट्यं प्राप्तेन सुहृत्त्वेन यथा तुष्टो न तथा मदुपासनयापीति भावः ॥ ८ ॥ संध्यायां प्रातरादौ आत्मसाम्यमात्मनीव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः ॥ स्तुवंत्यहं कामवरान्दास्ये प्रज्ञां च शोभनाम् ॥ १० ॥ यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ॥ अथो व उशती कीर्तिर्लोकाननुभविष्यति ॥ ११ ॥ भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ॥ य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥ ॥ १२ ॥ कंडोः प्रम्लोचया लब्धा कन्या कमललोचना ॥ तां चापविद्धां जगृहुर्भूरुहा नृपनंदनाः ॥ १३ ॥ क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् ॥ देशिनीं रोदमानाया निदधे स दयाऽन्वितः ॥ १४ ॥ प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता ॥ तत्र कन्यां वरारोहां तामुद्वहत मा चिरम् ॥ १५ ॥ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा ॥ अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥ १६ ॥ दिव्यवर्षसहस्राणां सहस्रमहतौजसः ॥ भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम ॥ १७॥ अथ मय्यनपायिन्या भक्त्या पक्कगुणाशयाः ॥ उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥ १८ ॥

तेभ्यो दास्ये । किं पुनर्युष्मभ्यमिति शेषः॥ १०॥ अग्रहीष्ट गृहीतवंतः । अथो इति हेतोः लोकाननु लोकेषु भविष्यति यद्वा लोकाननुभविष्यति द्रक्ष्यति व्याप्स्यतीत्यर्थः । ॥ ११ ॥ आत्मनो वीर्येण सन्तानेन ॥ १२ ॥ पुत्रार्थमादौ भार्यां संपादयति भगवान् कंडोरिति त्रिभिः । तपोनाशार्थमिंद्रप्रेषितया प्रम्लोचया कंडुर्नाम ऋषिर्बहुकालं रेमे । सा च ततः स्वर्गं गच्छंती कंडोर्जातं गर्भं वृक्षेषु त्यक्त्वा जगाम । तदेतदुक्तम्–अपविद्धां त्यक्ताम् ॥ १३ ॥ स प्रसिद्धो वनस्पतीनां राजा सोमोऽमृतस्राविणीं देशिनीं तर्जनीं रुदत्यास्तस्या मुखे निदधे । अनेनाप्सरोगर्भसंभवेनामृताहारेण च तस्या लावण्यं क्लमस्वेददौर्गंध्यादिराहित्यं चोक्तम् ॥१४॥ मामनुवर्तमानेन पित्रा नियुक्ताः संतस्तत्र प्रजाविसर्गे निमित्ते तामुद्वहत ॥ १५ ॥ ननु बहूनां कथमेका भार्या स्यात्तत्राह । अपृथग्धर्मः शीलं च येषां तेषां वः पत्नी भूयात् । अर्पितो भवत्सु आशयो यया धर्मशीलयोरैक्यान्मद्वाक्याच्च न दृष्टादृष्टविरोध इति भावः ॥ १६ ॥ अहतौजसोऽप्रतिहतबलाः सन्तः ॥ १७ ॥ पक्कगुणो दग्धकामादिमल आशयो येषां

परमस्नेहः सौहृदं प्रीतिः ॥ ९ ॥ शोभनामैहिकयशोमुत्रसुखदाम् ॥ १० ॥ लोकानन्वत्र सप्तम्यर्थेऽव्ययीभावकल्पनेऽनुपूर्वभवतेः सकर्मकत्वेन प्रसिद्धस्याकर्मकत्वकल्पने गौरवं मत्वाह–यद्वेति । इत्यर्थ इति । धातूनामुपसर्गाणां चानेकार्थत्वादनुपूर्वो भवतिर्व्याप्स्यर्थकोपीति भावः । एतेन विपुलकीर्त्तिकामैर्नरैर्गुर्वादेशोऽवश्यमनुष्ठेय इति ध्वनितम् ॥ ११ ॥ गुणैर्ब्रह्मणोऽन्यूनः समः ॥ १२ ॥ कस्यां भार्यायां पुत्रो भवितेत्येतदर्थम् । कन्यात्यागे हेतुर्मातृपितृमृतिप्रदयोगजनिरेवेति ध्येयम् ॥ १३ ॥ क्षुत्क्षामायाः क्षुत्पीडितायाः । निदधे स्थापितवान् ॥ १४ ॥ पित्रा प्राचीनबर्हिषा । नियुक्ताः प्रेरिताः ॥ १५ ॥ इति भाव इति । मदाशीर्वाद एव दृष्टादृष्टदोषमुपशमयिष्यतीति तात्पर्यम् । दृष्टविरोधो लोके बहूनामेकभार्यत्वे व्यभिचारकल्पनया निंदा "दातव्येका सुतैकस्मै बहुभ्यो न कदाचन" इति विहितमर्यादाभंगेनादृष्टविरोधोपीति द्वयोद्भवं पापं युष्मान्न स्प्रक्ष्यतीति ॥ १६ ॥ दिव्यवर्षसहस्राणां संबंधिनं कालमभिव्याप्य सहस्रमनंतान्भोगान्भोक्ष्यथेति । सहस्राणामिति–'कपिंजलानालभेत' इतिवत् त्रयाणामित्यर्थः । अत एव तर्थैणोक्तं "मानुषाणां वत्सराणां लक्षद्वादशकं पुरा । प्रचेतोभिरियं भूमिः पालिताव्याहतेंद्रियैः" इति ॥ १७ ॥ हे भक्त्या पक्कगुणाशयाः । अथ भौमभोगांते । मद्धाम यास्यथेति योज्यं न तु भविष्यंत्या भक्त्या पक्कगुणाशयाः संत एवेति व्याख्येयम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ॥ मद्वार्तायातयामानां न बंधाय गृहा मताः ॥ १९ ॥ नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः ॥ न मुह्यन्ति न शोचंति न हृष्यंति यतो गताः ॥ २० ॥ मैत्रेय उवाच ॥ एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्रांजलयः प्रचेतसः ॥ तद्दर्श नध्वस्ततमोरजोमला गिराऽगृणन्गद्गदया सुहृत्तमम् ॥ २१ ॥ प्रचेतस ऊचुः ॥ नमोनमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥ २२ ॥ शुद्धाय शांताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ॥ नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥ २३ ॥

पक्को गुणानामाशयो येषामिति वा । अतो लोकद्वयभोगान्निरयप्रायान्निर्विद्य मत्स्थानं प्राप्स्यथ ॥ १८ ॥ ननु गृहेषु प्रविष्टानामस्माकं तदासक्त्या बंध एव स्यात्कुतस्त्वद्भक्तिर्निर्वेदो वा तत्राह । गृहेष्विति । कुशलं मय्यर्पितं कर्म येषाम् । मद्वार्तया यातो यामः कालो येषाम् ॥ १९ ॥ त्वद्वार्ताश्रोतॄणां गृहैर्न बन्ध इति कुतस्तत्राह । नव्यवदिति । यद्यस्मात्कथाश्रवणात् ज्ञः सर्वज्ञोऽहमीश्वरो ब्रह्मवादिभिः प्रवक्तृभिर्निमित्तभूतैः श्रोतॄणां हृत् हृदयं नव्यवत्प्रतिपदं नूतनवत् अये प्राप्नोमि ब्रह्मसाक्षात्कारो भवतीत्यर्थः । ननु त्वत्कथाश्रवणे कथं ब्रह्मसाक्षात्कारस्तत्राह । योऽहमेतदेव ब्रह्म । तत्र हेतुः । यतो गताः यं मां प्राप्ताः सन्तो मोहशोकहर्षान्न प्राप्नुवंत्यतो मत्कथाश्रवणेन नव्यवन्मम हृद्याविर्भावादस्यैव ब्रह्मसाक्षात्कारत्वाद्गृहेषु वसतामपि न बंध इत्यर्थः ॥ २० ॥ पुरुषार्थं भाजयति प्रापयतीति तथा तम् ॥ २१ ॥ वेदैः ब्रह्मवादिभिश्च सकलश्रेयःसाधनत्वेन निरूपिता उदारगुणा आह्वया नामानि च यस्य मनोवचसोर्वेगादपि पुरोऽग्रतो जवो वेगो यस्य । मनोवचसोरगोचरायेत्यर्थः । अत एव सर्वेषामक्षाणां मार्गैरगतोऽनवगतोऽध्वा यस्य तस्मै ते नमः ॥ २२ ॥ स्वनिष्ठया स्वरूपस्थित्या शुद्धाय अतः शांताय सुखाय मनसि निमित्ते सत्यपार्थं व्यर्थमेव विलसद्विस्फुरितं द्वयं

अपक्ककषायाणां भगवद्दर्शनासंभवात् । "अविपक्ककषायाणां दुर्दर्शोऽहं कुयोगिनाम्" इति नारदं प्रत्यशरीरवागुक्तेः । अत इदंकारास्पदात्पारमेष्ठ्यादिपदादपि निर्विद्य निरयान्निरयतुल्यान्निर्गतोऽयः शुभावहो विधिर्यत्र स निरय इति निरुक्तेः । "आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन" इति श्रीमुखोक्तेः पारमेष्ठ्यादिपदेभ्योऽप्यावृत्तिश्रवणेन तत्र शुभावहविधित्वाभावान्निरयतुल्यत्वमेवेति ॥ १८ ॥ ननु 'भौमान्भोक्ष्यथ' इत्याद्युक्त्या निरयतुल्ये विषयभोगे त्वद्भक्तिप्रतिकूले कथमस्मान्निक्षिपसीति भावेनाह—गृहेष्विति । आविशतां प्राप्तावेशानामपि कुशलं मत्परिचरणमेव कर्म येषां मत्कथया यातो यामः प्रहरोऽपि येषां प्रहरमध्ये मत्कथा येषामवश्यमेव भवतीत्यर्थः । अयमर्थः—कर्मजन्यानामेव भोगानां बंधकत्वं निरयतुल्यत्वं भक्तिप्रातिकूल्यञ्च न तु मदनुग्रहजन्यानामत एव मदनुग्रहाद्भौमान्भोक्ष्यथेति मयोक्तमतोऽन्यत्रापि यत्र विषयभोगेऽपि मद्भक्तेरसंकोचः प्रत्युत वृद्धिरेव दृश्यते चेत्तदा स विषयभोगो मदनुग्रहजन्य एवानुमेयो न बंधकः पृथुप्रह्लादध्रुवमन्वादिषु तथा दर्शनात् । अविपक्ककषायेषु तु भक्तेषु मदनुग्रहो भोगाच्च्यावक एव द्रष्टव्यो यदुक्तम् । "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति । 'गृहाः पुंसि च भूम्नि' इत्यमरः ॥ १९ ॥ तेषां भक्तानां कुतो बंधदुःखं यतस्तेषां हृदयेऽहं सुखं प्राप्तुं नित्यं वसामीत्यभिप्रेत्याह—त्वद्वार्त्तेति । इत्यर्थ इति । सर्वदा तदा तच्छ्रवणादिना तदाकारवृत्तेरेव ब्रह्मसाक्षात्कारत्वमिति भावः । अत्राक्षिपति—नन्विति । उच्यते इति शेषः । तत्र ब्रह्मत्वे । अतो हर्षशोकाद्यभावात् । इत्यर्थ इति । बंधनिवर्त्तकब्रह्मज्ञानवत्त्वान्न बंध इति भावः ॥ २० ॥ ॥ २१ ॥ इत्यर्थ इति । "तद्धावतोऽन्यानत्येति" इति श्रुतेरिति भावः । अत एव मनोवचोऽगोचरत्वादेव । "यतो वाचो निवर्तन्ते" इत्यादिश्रुतेः ॥ २२ ॥ अतः शुद्धत्वात् । द्वयं द्वैतरूपं विलसदेदीप्यमानमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमो विशुद्धसत्त्वाय हरये हरिमेधसे॥वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम्॥२४॥नमः कमलनाभाय नमः कमलमालिने॥ नमः कमलपादाय
नमस्ते कमलेक्षण॥२५॥नमः कमलकिंजल्कपिशंगामलवाससे॥सर्वभूतनिवासाय नमोऽयुंक्ष्महि साक्षिणे॥२६॥रूपं भगवता त्वेतदशेषक्लेशसंक्षयम्॥
आविष्कृतं नः क्लिष्टानां किमन्यदनुकंपितम् ॥२७॥ एतावत्त्वं हि प्रभुभिर्भाव्यं दीनेषु वत्सलैः ॥ यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररंधन ॥२८॥
येनोपशांतिर्भूतानां क्षुल्लकानामपीहताम् ॥ अंतर्हितोंतर्हृदये कस्मान्नो वेद नाशिषः ॥ २९ ॥ असावेव वरोस्माकमीप्सितो जगतः पते ॥
प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ॥ ३० ॥ वरं वृणीमहेऽथापि नाथ त्वत्परतः परात् ॥ नह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे ॥ ३१ ॥

यस्मिन् । गृहीता मायागुणैर्विग्रहा ब्रह्मादिमूर्तयो येन ॥ २३ ॥ स्वतस्तु विशुद्धसत्त्वरूपाय संसारं हरति मेधा ज्ञानं यस्य तस्मै ॥ २४ ॥ २५ ॥ अयुंक्ष्महि कृतवंतो वयम् ॥ २६ ॥ यदुक्तं वरं वृणीध्वमिति तन्मनसि निधायाहुः । रूपमिति । समस्तानां क्लेशानां संक्षयो यस्मात् नः आविष्कृतं प्रकटितम् । अतोऽन्यत्किमनुकंपितमनुकंपा।इयमेवास्माकं परमानुकंपेत्यर्थः॥ २७॥कुत इत्यत आह। हे अभद्ररंधनामंगलनाशन त्वप्रत्ययोऽत्र न विवक्षितः। एतावदेव दीनेषु वत्सलैः प्रभुभिर्भाव्यं कार्यम् । किं तत्तदाह । यदिति । अस्मदीया एत इति बुद्ध्या उचिते कालेऽनुस्मर्यत इति यत् । त्वया तु रूपमपि दर्शितमिति भावः ॥ २८ ॥ येनानुस्मरणेन स्मृतानां तेषामुपशांतिः सुखं भवति । किं च क्षुल्लकानां क्षुद्राणामपि भूतानामन्तर्हृदयेंतर्हितोंतर्यामित्वेन स्थितो भवानीहतामिच्छतां त्वदुपासकानां नोऽस्माकमाशिषः कस्माद्धेतोर्न वेद जानात्येवेत्यर्थः॥ २९॥ तथापि वक्तव्यं चेत्तर्हि येषामस्माकं भगवान्प्रसन्नोऽसावेव वरः भगवत्प्रसाद एवास्माकमीप्सितो वर इत्यर्थः । अपवर्गगुरुर्मोक्षमार्गप्रदर्शकः गतिः स्वतश्च पुरुषार्थभूतः॥ ३०॥यद्यप्येवं तथापि हे नाथ त्वत्त्वत्तो वरमेकं वृणीमहि । कथंभूतात् ।परतः कारणादपि परात् । "अक्षरात्परतः परः" इति श्रुतेः । अतो यद्यपि त्वं दातुं समर्थो न च

द्वैतं यस्मात्तस्मै यं प्राप्तानां मनसि विविधभोगयुक्तमपि जगन्निष्प्रयोजनमेव स्यादित्यर्थः ॥ २३ ॥ २४ ॥ कमलेक्षणेति कृपालुतामाहुः ॥२५॥२६॥ इत्यर्थ इति । 'त्वद्दर्शनात्पूर्णकामः सत्यकामो भवेत्पुमान्' इत्युक्तेः । कृतार्था वयमिति भावः ॥ २७ ॥ परमानुकंपात्वे हेतुमाशंक्य समाधत्ते–कुत इति । अभद्ररंधनेति । पापनिवृत्तिस्तु त्वद्दर्शनादेव जाता तदर्थमपि नास्माभिस्त्वं प्रार्थ्य इति भावः । त्वप्रत्ययस्य विवक्षितत्वे तु ब्राह्मणत्ववदन्यत्रापि तत्तुल्यत्वापत्तेः तद्वारणाय स्वामिचरणैर्व्याख्यातमेतावदेवेति । इयत्प्रमाणकमेव नातोधिकमित्यर्थः । इति भाव इति । त्वया तु परमकृपालुना परमप्रभुत्वमेव स्फुटितमित्याशयः ॥ २८ ॥ येन त्वत्कर्तृकानुस्मरणेन । स्मृतानां स्वीयत्वेन चिंतितानाम् । अन्यदाह–किं चेति । क्षुल्लकानां सकामत्वेन तुच्छानाम् । इत्यर्थ इति । नहि परमसर्वज्ञस्य तव किञ्चिदप्यज्ञातमस्तीति भावः । 'क्षुल्लकस्त्रिषु नीचेल्पे' इति मेदिनी । यद्वांतोन्तःकरणस्य हितं शुद्धिर्यस्मात्स तथा ॥ २९ ॥ यद्यप्यहं जानामि तथापि भवद्भिरेव वक्तव्यमिति चेत्–। इत्यर्थ इति । अत उत्कृष्टवरस्याभावादिति भावः । अत्र हेतुः–अपवर्गेति । अपवर्गान्मोक्षादपि गुरुस्त्वमेव यदि प्राप्तस्तदा मोक्षपर्यंतैर्वरैरलमिति भावः । जगतः पते इति । सर्वपालकस्य तवास्माकं पालनं विनैव प्रार्थनमपि कार्यमेवेति भावः ॥ ३० ॥ यद्यपि त्वद्दर्शनमेव परो वरस्तथापि हे नाथ सर्वप्रार्थ्य । अक्षरात्प्रधानात्परतः पुरुषात् अपि परः तस्यापि कारणमिति श्रुतिपदार्थः । अतः सर्वकारणत्वात् । यतो देयानामंतो न अतः स एव वरस्त्वयावश्यं देय इति भावः ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारिजातेंजसा लब्धे सारंगोऽन्यं न सेवते ॥ त्वदंघ्रिमूलमासाद्य साक्षात्किंकिं वृणीमहि ॥ ३२ ॥ यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः ॥
तावद्भवत्प्रसंगानां संगः स्यान्नो भवेभवे ॥ ३३ ॥ तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ ३४ ॥
यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः ॥ निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥ ३५ ॥ यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः ॥
संस्तूयते सत्कथासु मुक्तसंगैः पुनःपुनः ॥३६॥ तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ॥ भीतस्य किं न रोचेत तावकानां समागमः ॥३७॥

देयानां त्वद्विभूतीनामंतोऽस्ति यतोऽनंतविभूतित्वादनंत इति गीयसे ॥ ३१ ॥ तथापि यथा सारंगो भ्रमरः पारिजाते अंजसा सुखेन लब्धे सति सुलभमप्यन्यद्वृक्षांतरं न सेवते तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किंकिं वृणीमहि न किंचिदित्यर्थः । यद्वा । किमप्यन्यत्तुच्छं किमर्थं वृणीमहि । यद्वा । यदि वृणीमहि किंकिं तर्हिं वृणीमहि । अनंतत्वेन मनोरथानामनवस्थानादित्यर्थः ॥ ३२ ॥ अत एतावदेव प्रार्थयाम इत्याहुः । यावदिति । स्पृष्टा व्याप्ताः । भवति प्रकृष्टः संगो येषां तेषां संगोऽस्माकं स्यात् ॥ ३३ ॥ ननु राज्यभोगान्स्वर्गापवर्गौ च विहाय किमिदं प्रार्थ्यते तत्राहुः । तुलयामेति । भगवत्संगिनां भागवतानां संगस्य लवेनापि ॥ ३४ ॥ सत्संगस्य श्रैष्ठ्यं प्रपंचयति यत्रेति त्रिभिः । यत्र येषु भगवत्संगिसंगेषु । यतो याभ्यः कथाभ्यः । निर्वैरं वैराभावः । उद्वेगो भयम् ॥ ३५॥ ३६॥ पद्भ्यां पावनेच्छया संसाराद्भीतस्य ॥ ३७॥

व्रियंतां तर्हिं बह्वो वरा यथेष्टमिति चेन्मैवं त्वच्चरणांबुजमेवास्माकं वरणीयं तन्माधुर्यास्वादप्राप्त्यर्थमेव कश्चिदेको वरोऽभीष्टोऽस्ति तं विना बहूनन्यान्वरान्न वृणीम इत्याहुः पारीति त्रिभिः।यद्यपि त्वं बहुवरदोसि तथापीति।ननु पारिजातादेव बहूनभिलषितार्थान्प्रकामं गृह्णातु तत्राह—सारंग इति । सारंगस्य मकरंदमात्रग्राहित्वाद्वस्त्वंतरेषु वांछैव नोदेति यथा तथैव त्वदंघ्रिमूलं प्राप्य किंकिमिति । इत्यर्थ इति । किं तु त्वच्चरणमकरंदं विना न किंचिदिति भावः । तथापि व्यवहारसिद्ध्यर्थं किञ्चिदन्यदपि वरणीयमेवेति चेदाह—यद्वेति । एककिंशब्दस्य तुच्छमित्यर्थः । द्वितीयस्य तादर्थ्यमिति । किं च नैकेन वरेण सांसारिकव्यवहारः सेत्स्यतीति चेत्तर्हि बह्वो वरणीयास्तत्र पुनराह-यद्वेति । इत्यर्थ इति । वरणीयानवस्थानादेका त्वच्चरणांबुजसेवैव सुष्ठु वरणीया भातीति भावः ॥ ३२ ॥ अत एव मनोरथानवस्थानादेव । तेषां भवद्भक्तानाम् । अयमेवास्माकमीप्सिततमो वर इति भावः ॥ ३३ ॥ अत्राक्षिपति—नन्विति । अत्र चक्रवर्त्ती—ननु मायया स्पृष्टा इत्युक्त्या मायाजयार्थं साधुसंगं प्रार्थयध्वे चेन्मोक्षार्थमेव साक्षात्किन्न गृह्णीतेत्यत आहुस्तुलयामेति । यावन्तो वरणीया वरास्ते सर्वे स्वर्गमोक्षांतःपातिन एवानुभूताः साधुसंगस्य तु स्वर्गमोक्षाभ्यां परःसहस्राधिक्यमवगम्यते । यतः साधुसंगे सति त्वद्रूपगुणकथामाधुर्यास्वादो भवेत् स च स्वर्गसुखात्त्वदीयनिर्विशेषब्रह्मसुखादपि कोटिकोटिगुणाधिको "नाहं वसामि वैकुंठे योगिनां हृदये न च । मद्भक्ता यत्र गायंति तत्र तिष्ठामि नारद ॥" इति त्वदुक्त्या सर्वसुखदातुस्तवापि परमसुखप्रद इत्यत एकः साधुसंग एव व्रियते इति । किं च "अथानघांघ्रेस्तव कीर्त्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनाम्। भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्संगमोऽनुग्रह एष नस्तव॥"इति वचनात्परमोत्कृष्टमहादेवेनापि प्रार्थ्यत्वात्साधुसंग एव सर्वतोधिकं वर इति भावः॥ ३४॥स च साधुसंगः सिद्धभक्तानां साधकभक्तानां च सर्वदैव सर्वथैव परमोपादेय इत्याहुः । येषु भक्तेषु । मृष्टाः पवित्राः । उद्वेगः त्रासः । तासां च परमास्वाद्यत्वात्कथाश्रवणात्तृष्णानिवृत्तिरुचितैव अत एव वैराभावस्ततश्च त्रासाभाव इति ध्येयम् ॥ ३५ ॥ यत्र यासु सत्कथासु । न्यासिनां कर्मफलत्यागिनां न तु कर्मत्यागिनां यज्ञादिविहितकर्मणां त्यागानौचित्यात् । "यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव हि" इति श्रीमुखोक्तेः । मुक्तसंगैर्नारदाद्यैः । पुनःपुनरित्युक्त्या मुहुर्मुहुर्हरिकथाश्रवणं ध्वनितम् ॥ ३६ ॥ परमदुर्लभानामपि भक्तानां सुलभत्वमाहुः—तेषामिति । तेषां तावकानां तीर्थानां पावनेच्छया स्नानादिभिरस्मान्पुनंत्विति तीर्थकर्त्तृका या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन ॥ सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाऽद्य गतिं गताः स्म ॥ ३८ ॥ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ॥ आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ॥ ३९ ॥ यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु ॥ सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥ ४० ॥ मनुः स्वयंभूर्भगवान्भवश्च येऽन्ये तपोज्ञानविशुद्धसत्त्वाः ॥ अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः ॥ ४१ ॥ नमः समाय शुद्धाय पुरुषाय पराय च ॥ वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः ॥ ४२ ॥ मैत्रेय उवाच ॥ इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः ॥ अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ॥ ४३ ॥ अथ निर्याय सलिलात्प्रचेतस उदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ॥ ४४ ॥

सत्संगफलमस्माभिरेवानुभूतमित्याहुः । वयं त्विति । तव यः प्रियः सखा तस्य भवस्य रुद्रस्य । अत्यंतमचिकित्सस्य असाध्यरोगरूपस्य भवस्य जन्मनो मृत्योश्च भिषक्तमं सद्वैद्यं त्वां गतिं प्राप्ताः ॥ ३८ ॥ वरांतरं वृणुते यन्न इति द्वाभ्याम् । नता नमस्कृताः ॥ ३९ ॥ निरंधसां निरन्नानामस्माकम् । अदभ्रं बहुकालम् । ते पारितोषणाय भवत्विति वृणीमहे ॥ ४० ॥ अज्ञानामप्यस्माकं त्वत्स्तुतिर्नायुक्तेत्याहुः । मनुरिति । यस्य तव महिम्नो न दृष्टं पारं यैस्तेऽपि त्वामात्मसमं स्वमत्यनुरूपं यथा स्तुवंति अथो अतो वयमपि गृणीमः ॥ ४१ ॥ सत्त्वमूर्तये वासुदेवाय ॥ ४२ ॥ यानं स्वप्रयाणमनिच्छतामपि सतां स्वधाम ययौ भक्तहृदयं विवेश । अनपवर्गवीर्योऽकुंठितप्रभावः ॥ ४३ ॥ उदन्वतः सिंधोः सलिलान्निर्याय निर्गत्य गां स्वर्गं रोद्धुमिवोच्छ्रितैर्द्रुमैर्गां महीं छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यन् । तदाहि प्राचीनबर्हिषः प्रव्रजितत्वादराजके कर्ष

पावनेच्छा तया हेतुभूतया तीर्थानां शुभादृष्टवशादेवेत्यर्थः । किं न रोचेतापि तु रोचेतैवेत्यर्थः ॥ ३७ ॥ तत्र न वयं भीतत्वेन सत्संगं प्रार्थयामहे किन्तु परमपुमर्थबुद्ध्यैव क्षणिकेनैव सच्छिरोमणिसंगलाभेन सर्वभयापवर्गस्य तत्र लब्धत्वात् । एवं चाभीष्टवरस्त्वत्प्राप्तिरेव तस्याः फलं साधुसंग एवास्माकं त्वत्प्राप्तिसाधनं च साधुसंग एवेत्याहुः—सत्संगफलमस्माभिरिति । वयं त्विति । सद्वैद्यं समूलरोगनिर्मूलनक्षमम् ॥ ३८ ॥ वयमज्ञास्त्वत्परितोषसाधनं न जानीमस्तदपि स्वेच्छया यद्यत्कृतं तेनापि त्वं प्रसीदेत्याशास्महे । यन्न इति । स्वधीतं सम्यगध्ययनविधिना वेदाद्यधीतम् । गुरवः दक्षोपाख्याने लिखिताः पित्रादयः । वृद्धा ज्ञानादिना वृद्धाः । आर्या भक्तिवृद्धाः । भूतानि मानितानीति शेषः ॥ ३९ ॥ हे ईशेति । स्वामित्वात्तव नास्मत्कृतबहुसेवाद्यपेक्षास्तीति भावः । ''न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः'' इति कायाधवोक्तेः । 'ईशः स्वामिनि शंकरे' इत्यभिधानात् । भूम्न इति । सर्वथा सर्वाधिकस्य तव किंचिदपेक्षया न परितोषः किन्तु भूमत्वादेवेति भावः ॥ ४० ॥ तेऽपि यथा तव महिमनि सर्वात्मनाज्ञा एव यथा स्तुवन्ति ॥ ४१ ॥ समाय वैषम्यनैर्घृण्यरहिताय मा लक्ष्मीस्तया सहिताय वा । शुद्धाय सर्वपापनाशकाय । पुरुषाय सर्वदेहस्थाय । पराय सर्वोत्कृष्टाय । वासुदेवाय बलज्ञानात्ममुख्यप्राणप्रवर्त्तकाय । सत्त्वाय पराक्रमरूपाय । भगवते सौभाग्यरूपाय ॥ ४२ ॥ तथेत्यनुमोदनं तद्वरस्य ज्ञेयम् । स्वधाम वैकुंठम् ॥ ४३ ॥ अथ भगवद्गमनोत्तरम् । अकुप्यन्निति । अहो भगवदादिष्टं राज्यं क करवाम तदाज्ञापालनं च भूत्या वयं कथं जिहासाम इह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽग्निमारुतौ राजन्नमुंचन्मुखतो रुषा ॥ महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ॥४५॥ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्य पितामहः ॥ आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः ॥ ४६ ॥ तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा ॥ उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा ॥ ४७ ॥ ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे ॥ यस्यां महदवज्ञानादजन्यजनयोनिजः ॥ ४८ ॥ चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे कालविद्रुते ॥ यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥ ४९ ॥ यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा ॥ स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥ ५० ॥ तं प्रजासर्ग रक्षायामनादिरभिषिच्य च ॥ युयोज युयुजेऽन्यांश्च स वै सर्वप्रजापतीन् ॥ ५१ ॥ इति श्रीभा० म० चतुर्थ० प्रचेतसां गृहे दक्षोत्पत्तिवर्णनं नाम त्रिंशोध्यायः ॥ ३० ॥ ॥ छ ॥ मैत्रेय उवाच ॥ तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् ॥ स्मरंत आत्मजे भार्यां विसृज्य प्राव्रजन्गृहात् ॥ १ ॥

णाद्यभावात् द्रुमैर्भूमिश्छन्नाऽभूत् ॥ ४४ ॥ निरस्ता वीरुधोऽपि यस्यास्तथाभूतां कर्तुम् । संवर्तकः कालाग्निरुद्रः । अत्यये प्रलये ॥ ४५ ॥ नयैर्युक्तिभिः ॥४६॥ उज्जह्रुः समर्पयामासुः ॥ ४७ ॥ मारिषां वार्क्षीम् । अजनयोनिर्ब्रह्मा तस्माज्जातो दक्षः । महतः श्रीमहादेवस्यावज्ञानात् पूर्वमजनयोनिजो ब्रह्मपुत्रोऽपि सन् क्षत्रियजातौ यस्यां वार्क्ष्यामजनि जातः ॥ ४८ ॥ प्राक्सर्गे पूर्वदेहे कालेन विद्रुते गते दैवेनेश्वरेण चोदितः सन् यश्चाक्षुषेंतरे इष्टाः प्रजाः ससर्ज । स दक्ष इति प्रसिद्धः ॥ ४९ ॥ यः स्वया रुचा प्रभया तेज उपादत्ताच्छादितवान् । यं च कर्मदाक्ष्याद्दक्षमब्रुवन् ॥ ५० ॥ तमभिषिच्यानादिर्ब्रह्मा प्रजासर्गरक्षायां युयोज । स च दक्षोऽन्यान्मरीच्यादींस्तत्तद्व्यापारेषु नियुक्तवान् ॥ ५१ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे टीकायां त्रिंशोऽध्यायः ॥ ३० ॥ छ ॥ एकत्रिंशे सुते दक्षे धुरं न्यस्य वने सताम् । नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसाम् ॥ १ ॥ ततो दिव्यवर्षसहस्राणां सहस्रस्यांते उत्पन्नविवेकज्ञानास्ते "उपयास्यथ मद्धाम निर्विद्य निरयादतः" इत्यधोक्षजभाषितं स्मरंत आशु प्राव्र

पुनरमी वृक्षा एव पृथ्वीमावव्रुः स्वर्गं च जिघृक्षंति तर्हि मनुष्याः क्व स्थास्यंतीत्यनय एव कोपे हेतुः ॥ ४४ ॥ राजन्निति । जितकोपत्वाद्वृत्त्या विराजमान हे विदुरेत्यर्थः । ततो द्रुमाच्छन्नभूमिदर्शनोत्तरम् । अत्यये प्रलये ॥ ४५ ॥ "नयो नीतिद्यूतविशेषयोः" इति मेदिनी ॥ ४६ ॥ तत्र देशे । वृक्षाः सोमद्वारा उज्जह्रुः षष्ठे 'राजोवाच महान्सोमः' इत्याद्युक्तेः ॥ ४७ ॥ ननु ते प्रतिपक्षीभूतवृक्षदत्तां कन्यां कथं जगृहुरिति तत्राह—ब्रह्मण आप्तस्यादेशादिति । अजनि गर्भवासजदुःखं प्राप पूर्वं वीरभद्रहस्तात् पुनश्च कालतश्चेति मरणद्वयं प्राप्येति ज्ञेयम् ॥ ४८ ॥ पुनश्चाशुतोषस्य तस्यैव स्तुत्युत्थादनुग्रहादैश्वर्यं स्वीयमवापेत्याह—चाक्षुष इति । प्रायः प्राचीनदेवादीनां तदानीं भोगकर्मक्षयात्पञ्चममन्वंतरावसाने मर्त्यलोकस्य दैवाज्जलाप्लुतत्वाच्चेति संदर्भः । प्राक्सर्गे कालतो दैवान्नष्टे सतीत्यर्थः । जन्मत्वस्य स्वायंभुवमन्वंतर एव पौर्वकालिकैश्वर्यप्राप्तिकामनया पंचममन्वंतरपर्यंतमस्य तपः षष्ठे चाक्षुषमन्वंतरेऽस्य तपःफलप्राप्तिर्ज्ञेयेति केचित् । तत्र 'यस्यां महदवज्ञानात्' इत्याद्युक्तिविरोधपरिहाराय द्वितीयजन्म प्राप्यैव पौर्वकालिकमैश्वर्यं लेभे इति व्याख्येयम् ॥ ४९ ॥ तदैश्वर्यमाह—य इति । अज इवाचरतीत्यजायतेऽजायत इत्यजायमानः ब्रह्मतुल्य इत्यर्थः । यद्वा—अजायमानो न जायमानः श्रीवशिष्ठवत्केवलं नंदीश्वरशापपूर्त्तये जन्मानुकृतिमेव भेजे न तु मुख्यं जन्मेत्यर्थः । यद्वा जायमान उत्पद्यमान इत्यर्थः ॥ ५० ॥ तं दक्षम् ॥ ५१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥ धुरं राज्यादिभारम् (१) ततो दक्षाभिषेकानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ॥ प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ॥ २ ॥ तान्निर्जितप्राणमनोवचोदृशो जितासनाञ्छांतस मानविग्रहान् ॥ परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ॥ ३ ॥ तमागतं त उत्थाय प्रणिपत्याभिनंद्य च ॥ पूजयित्वा यथादेशं सुखासीनमथास्तुवन् ॥ ४ ॥ प्रचेतस ऊचुः ॥ स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः ॥ तव चंक्रमणं ब्रह्मन्नभयाय यथा रवेः ॥ ॥ ५ ॥ यदादिष्टं भगवता शिवेनाधोक्षजेन च ॥ तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥ ६ ॥ तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनम् ॥ येनांजसा तरिष्यामो दुस्तरं भवसागरम् ॥ ७ ॥ मैत्रेय उवाच ॥ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः ॥ भगवत्युत्तमश्लोक आविष्टात्माऽब्रवी न्नृपान् ॥ ८ ॥ नारद उवाच ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ॥ नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥ ९ ॥ किं जन्मभिस्त्रि भिर्वेह शौक्लसावित्रयाज्ञिकैः ॥ कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥ १० ॥

जन् ॥ १ ॥ ब्रह्मसत्रेणात्मविमर्शेन दीक्षिताः कृतसंकल्पा बभूवुः । सर्वेषु भूतेषु आत्मेति मेधा ज्ञानं यस्मिंस्तेन । क । वेलायां समुद्रतटे । जाजलिर्नाम ऋषिः ॥ २ ॥ निर्जिताः प्राणमनोवचोदृशो यैस्तान् । शांता उपरताः समाना मूलाधारादारभ्य ऋजवो विग्रहा येषाम् । ब्रह्मणि योजित आत्मा यैस्तान् । सुरासुरैरीड्यः स्तुत्यः ददृशे दृष्टवान् ॥ ३ ॥ उत्थाय तं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा ॥ ४ ॥ ५ ॥ आदिष्टमुपदिष्टं यदात्मतत्त्वम् । क्षपितं विस्मृतम् ॥ ६ ॥ ७ ॥ इति प्रचेतोभिः पृष्टः ॥ ८ ॥ अहो गृहप्रसक्त्या हरिसेवां विना सर्वं जन्मकर्मादिकं व्यर्थीकृतमिति तान् शोचन्नाह तज्जन्मेति चतुर्भिः । येन जन्मादिना विश्वात्मेति सुलभत्वमुक्तम् । यतो जन्मादेर्हरिसेवैव फलमतस्तद्विहीनं सर्वं व्यर्थमित्यर्थः ॥ ९ ॥ शौक्लं शुक्लसंबंधि जन्म विशुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन याज्ञिकं दीक्षया विबुधाना

तरं वा ॥ १ ॥ आत्मविमर्शेन परस्परं मिलित्वा ब्रह्मविचारेण । यद्वा—वेदविचारेण श्रुतितात्पर्यालोचनेन 'वेदस्तत्त्वं तपो ब्रह्म' इत्यमरः जाजलिर्जाजलात्मजः ॥ २ ॥ तान् प्रचेतसः ॥ ३ ॥ तं नारदम् । ते प्रचेतसः ॥ ४ ॥ सुरर्षे इति । सुरैस्सर्वतः शुद्धैरपि त्वं पूज्यसे किमुतास्माभिरहो भाग्यं मादृशां मनुष्याणां देवपूज्यस्य भवतो दर्शनं जातमिति भावः ॥ यथा रवेर्दर्शनेन चौरादिभयमपगच्छति तथा तव दर्शनेन संसार भयमिति ॥ ५ ॥ ज्ञानं तु भवद्भ्यः शिवाधोक्षजाभ्यामेवोपदिष्टं मयाधुना तदर्थं न किमप्यनुष्ठेयमिति तत्राह--यदादिष्टमिति । प्रभो इति । योगसामर्थ्येन त्वं जानास्येवेति भावः ॥ ६ ॥ तत् तभ्यामुपदिष्टज्ञानम् । अध्यात्मज्ञानमात्मनि यज्ज्ञानं विभक्त्यर्थेऽव्ययीभावः । जीवात्मनो यज्ज्ञातुमुचितं तदस्माकं जातमेवासीत्तदेव त्वं प्रद्योतयोद्दीपयेत्यर्थः ॥ ७ ॥ प्रचेतसां प्रचेतोभिः । नृपान् प्रचेतसः ॥ ८ ॥ देहं धृत्वा जीवा त्मनो यद्यद्वस्तु स्वतः प्राप्तं तत्तद्धरिसेवायामेव नियुंजीतेत्येतदेवाध्यात्मज्ञानमित्यभिप्रेत्याह स्वामी—अहो गृहेत्यादि । इत्यर्थ इति । तदेव जन्म येन जन्मना हरिः सेव्यते एवमग्रेपि योज्यमन्यथा मुधैवाखिलं शूक रादितुल्यत्वादिति भावः ॥ ९ ॥ अन्वयं विवृत्य व्यतिरेकं विवृणोति –किमिति त्रिभिः । त्रिविधं ब्रह्म जन्मापि न तन्नृजन्म किं तु शूकरादिजन्मैव फलतस्तुल्यत्वात् । चांडालादिजन्मापि हरिसेवानुकूलं साधु नृजन्मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्या वा किं निपुणया बलेनेंद्रियराधसा ॥ ११ ॥ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ॥ किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥ १२ ॥ श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ॥ सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥ १३ ॥ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥ १४ ॥ यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले ॥ भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः ॥ १५ ॥

मिव दीर्घायुषाऽपि ॥ १० ॥ वचोभिर्वाग्विलासैः । चित्तवृत्तिभिर्नानावधानसामर्थ्यैः । बलेन शरीरशक्त्या इंद्रियाणां राधसा पाटवेन ॥ ११ ॥ योगेन प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण । संन्यासवेदाध्ययनाभ्यामपि । अन्यैरपि व्रतवैराग्यादिभिः श्रेयःसाधनैः ॥१२॥ नन्वेषां नानाफलसाधनानां हरिसेवाभावमात्रेण कुतो वैयर्थ्यं तत्राह । श्रेयसां फलानामात्मैवावधिः परा काष्ठा। अर्थतः परमार्थतः। आत्मार्थत्वेनैवान्येषां श्रेयसां प्रियत्वादित्यर्थः । भवत्वात्मावधिर्हरेः किमायातं तत्राह। सर्वेषामपीति । आत्मा आत्मदश्चाविद्यानिरासेन स्वरूपाभिव्यंजकः ऐश्वरेणापि रूपेण बलिप्रभृतिभ्य इवात्मप्रदः प्रियश्च परमानन्दरूपत्वात् ॥ १३ ॥ किं च नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवंति केवलं तत्तद्देवताराधनेन तु न किंचिदिति सदृष्टांतमाह । यथेति। मूलात्प्रथमविभागाः स्कंधाः तद्विभागा भुजाः तेषामप्युपशाखाः उपलक्षणं पत्रपुष्पादयोऽपि तृप्यंति न तु मूलसेकं विना ताः स्वस्वनिषेचनेन। प्राणस्योपहारो भोजनं तस्मादेवेंद्रियाणां तृप्तिर्न तु तत्तदिंद्रियेषु पृथक्पृथगन्नलेपनेन तथाऽच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः ॥ १४ ॥ कुतः सर्वमूलत्वादिति सदृष्टांतांतरमाह । यथैव वारो जलानि वर्षाकाले सूर्यादुद्भवंति ग्रीष्मे तस्मिन्नेव प्रवि

भगवत्प्रापकत्वादित्येवं कर्मादिष्वपि भावो व्याख्येयः । त्रयीप्रोक्तैरपि किं पुनर्व्यावहारिकैः । त्रिभिःपुरुषाऐः किं पुनः शतायुषा ॥ १० ॥ श्रुतेन वेदांतादिश्रवणेन । वाग्विलासैः शास्त्रव्याख्यानचातुर्यैः । नानाशास्त्रार्थावधारणं नानावधानम् ॥ ११ ॥ आदिना तीर्थयानादिग्रहः । यत्र येषु सत्सु हरिरात्मप्रदो न भवतीति योगिप्रभृतयोऽपि योगादिभिः परमात्माद्यनुभवं न प्राप्नुवंतीत्यर्थः । हरिः खल्वात्मानं च भक्तिं विना न प्रददातीत्येषां भक्तित्वाभावाद्भक्तिकारणत्वाभावाच्च वैयर्थ्यमेव । प्रकारांतरेण भक्तिसद्भावे त्वेषां भक्तिमिश्रत्वेनैव सार्थक्यं न तु स्वत इति भावः ॥ १२ ॥ अत्राक्षिपति—नन्विति । तत्र युक्तिमाह—इत्यर्थ इति । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेरयं भावः । पुनराक्षिपति—भवत्विति । सर्वेषामात्मनां हरिरेवात्मा जीवात्मना तस्य तटस्थशक्तित्वात्स च हरिः प्रियः केवलया भक्त्या प्रीणाति चेदात्मदः "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनुं स्वाम् ॥" इति श्रुतेः । संदर्भस्तु—तत्र शुद्धजीवात्मब्रह्मात्मनोः भावनामपि परित्यज्य श्रीहरावेव निष्ठापयितुमाह—श्रेयसामिति । सर्वेषां हरिरेवात्मा मूलं स्वरूपम् । शुद्धजीवानां तदीयतटस्थशक्तित्वात् । ब्रह्मणस्तन्निर्विशेषाविर्भावरूपत्वादिति भावः । ततो विलक्षणत्वेन निजभक्तेभ्यः स्पष्टमात्मानं ददाति ततस्ततोऽपि परमप्रेमास्पदं भवतीत्यर्थः ॥ १३ ॥ अन्यदाधिक्यमाह—किञ्चेति । इत्यर्थ इति । अच्युतस्य पूजायां सर्वे एव पूजिताः स्युरित्यर्थः । नन्वशक्तस्यैव भवत्वेतच्छक्तेन तु अच्युतस्य पूजा कर्त्तव्या देवादीनां च, यथा मूलस्य स्कंधादीनां च सेके न दोषः प्रत्युत गुण एवेत्याशंक्य दृष्टान्तान्तरमाह—प्राणोपहारेति । पृथक्पृथगन्नलेपेनांध्यबाधिर्योत्पादनाद्दोष एव । इत्यर्थ इति । अच्युतस्य सर्वाधिष्ठानत्वेन सर्वदेवमूलत्वं 'मूलं विष्णुर्हि देवानाम्' इत्याद्युक्तेरिति भावः ॥ १४ ॥ अच्युताराधने कुतः सर्वाराधनमित्याशंक्य-कुत इति । स शुक्रो दृष्टान्तान्तरमाह-यद्वा। दृष्टान्तान्तरेण सहितं सदृष्टांतांतरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा ॥ यथाऽसवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाऽज्ञानभिदाभ्रमात्ययः ॥ १६ ॥ यथा नभस्य भ्रतमःप्रकाशा भवंति भूपा न भवंत्यनुक्रमात् ॥ एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमः सत्त्वमिति प्रवाहः ॥ १७ ॥

शंति । अस्याप्रसिद्धत्वेन दृष्टांतांतरमाह । यथा भूतानि भूमाविति । गुणप्रवाहश्चेतनाचेतनात्मकः प्रपंचः ॥ १५ ॥ ननु हरावेव गुणप्रवाह इत्युक्ते तदाधारत्वेन सोपाधिकत्वं हरेः स्यादित्याशंक्याह । एतदिति । एतद्विश्वं विष्णोस्तत्सर्वशास्त्रप्रसिद्धं पदं परं सर्वोपाधिरहितम् । तदुत्पन्नत्वान्न ततः पृथगित्यर्थः । तर्हि कथमन्यथा भाति तत्राह । सकृदिति । सकृत्कदाचिद्विभातं स्फुरितं गंधर्वनगरवत् यथा सवितुः प्रभा न ततो भिन्ना यथा च जाग्रत्यसव इंद्रियाणि स्फुरंति सुषुप्तौ तु सुप्तशक्तयो भवंतीत्यर्थः । कथंभूतोऽसौ हरिः द्रव्यादीनां त्रिविधाहंकारकार्याणां तन्निमित्तस्य भेदभ्रमस्य [illegible] यस्मात्सः । यद्वा । अजाग्रति सुषुप्तावसवः सुप्ताः शक्तयो येषां ते भवंति द्रव्यादेरप्यत्ययो भवति । सवितुः प्रभेत्युद्गतौ दृष्टांत इति ॥ १६ ॥ नन्वसंगे हरौ कथं प्रपंचोत्पत्तिलयौ तत्राह । यथेति । अभ्रतमःप्रकाशा आगमापायिनो रजस्तमःसत्त्वस्थानीयाः ज्ञेयाः । हे भूपाः

दृष्टान्तान्तरं भूतानि भूमाविति यथैव सूर्यादित्युपादानकारणत्वमुक्तम् ॥१५॥ अत्राशंकते । इत्यर्थ इति । स्वर्णादुत्पन्नं कुंडलं यथा स्वर्णाभिन्नमिति भावः । इत्यर्थ इति । कारणे लीनत्वादिति भावः । पूर्वव्याख्याने सुषुप्तावित्यस्यानेयत्वादाह—यद्वेति । द्रव्यादेर्महाभूतादेः । केचित्तु—तदेतद्विष्णोः पदं तस्मादुत्पन्नत्वाज्जगदात्मन उपाधेः परं तत्संबद्ध आधाराधेयभावोपि गगनगंधर्वनगरवद्बोध्यः । तर्हि शून्यं स्यात्तत्राह—सकृद्विभातं न दीपादिवद्विच्छिद्य प्रज्ञानघनमित्यर्थः । यथा सवितुः प्रभासकृत्प्रभाता तद्वत् यज्ज्ञानाच्च द्रव्यक्रियाज्ञानानि तामसतैजसवैकारिकाहंकारभेदास्तन्निमित्तो भेदभ्रमस्तस्यात्ययो निवृत्तिर्भवति । किंलक्षणो हरिरित्याशंक्य लक्षणं वा तस्येदं द्रव्यक्रियेत्यादि नोच्यते इत्याहुस्तन्न ग्राह्यं स्वामिचरणैरप्यस्यैवार्थस्योक्तत्वात् ॥ १६ ॥ पुनराक्षिपति—नन्विति अत्र विश्वनाथः—ननु गुणमयस्य विश्वस्य गुणातीतो हरिः कथं कारणं न हि मृण्मयस्य घटस्य मृदतीतं वस्तूपादानकारणं भवितुमर्हति उपादानत्वे च हरेः कथं वा निर्विकारत्वमित्यत आह-यथेति । अभ्रतमःप्रकाशा नभसि दृश्यमानाः सूर्यादेव भवंति तत्रैव लीयंते च । सूर्यादिति पूर्वेणानुषंगः । हिमोपि सूर्यादेवेति यद्वक्ष्यते च "प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः" इति । उपरागशब्देन दुष्टजीवाविष्टं तमःखंडमेवात्रोच्यते । हे भूपा इति । रजसाविष्टचेतसामेतच्चेतःप्रणिधानेन ज्ञेयमिति भावः । सूर्यो यथा मेघहिमाद्यतीतोऽपि तेषामुपादानकारणं तदपि यथा निर्विकारो भवति तथेत्यर्थः । यथैवाभ्रादिरहितेऽपि सूर्ये कारणत्वादभ्रादयः संतीत्युच्यते तथैव हरौ गुणरहितेऽप्यमूः शक्तयो रजआद्याः इत्येवं प्रकारेणायं जगत्प्रवाहः । अत्र यथाभ्रतमसी सूर्यस्य शुद्धज्योतिर्मात्रस्य न स्वरूपं दूरवर्त्तिमलिनः प्रकाशोपि न स्वरूपं तथैव हरे रजस्तमसी शुद्धचित्तस्य तस्य सत्त्वं च न स्वरूपमित्येवं श्रीनारदस्य मते भगवतो गुणमयजगदुपादानत्वं निर्विकारत्वं च सिद्धमत एव "आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि हरसि पासि" इति देवैर्वक्ष्यते 'यत उदयास्तमयौ' 'विकृतेर्मृदिवाविकृतात्' इति श्रुतिभिश्च "नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय" इति गजेंद्रेण च कारणस्य तदेवाद्भुतत्वं यदुपादानत्वेऽपि निर्विकारत्वं विवर्त्तांगीकारे च युक्तिसद्भावादद्भुतत्वं न स्यात् । व्याख्यातं तत्रैव स्वामिभिश्च कारणत्वे च मृदादिवद्विकारं वारयति

॥१११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैनेकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ॥ स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥ १८ ॥ दयया सर्वभूतेषु संतुष्ट्या येन केन वा ॥ सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः ॥ १९ ॥ अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ॥ निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि ॥ २० ॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ॥ श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु ॥ २१ ॥ श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यत्स्वपूर्णः ॥ न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञः ॥ २२ ॥

प्रचेतसः ! तथा अमूः रजआदयः शक्तयो भवंति उद्भवंति न भवंति लीयंते इत्येवमयं जगत्प्रवाहः॥ १७॥तेन सर्वकारणत्वेन हेतुना । अशेषदेहिनामात्मानम्। कालो निमित्तम् । प्रधानमुपादानम् । पुरुषः कर्ता । एतत्रितयात्मकत्वात्सर्वकारणं परमेश्वरमद्धा साक्षाद्भजध्वम् । कथम् । आत्मन एकभावेनाभिन्नत्वेन ॥ १८ ॥ साधनमाह । दयादिभिः शीघ्रं तुष्यति ॥ १९ ॥ ततो न कदाचिद्भक्तजनान् त्यजतीत्याह । अपहताः सकला एषणाः कामा यस्मात्स चासावमल आत्मा मनस्तस्मिन्सतां मनसि निरंतरमेधितया भावनयोपहूतः सन्निधापितः सन्नक्षरो हरिश्छिद्रवत्तत्र्याकाशवत्ततो न सरति नापयाति हि । किं कुर्वन् । आत्मनः स्वस्य निजजनवशगत्वं स्वभक्ताधीनत्वमयन्नवगच्छन् ॥ २० ॥ सतामेव वश्योऽसावसतां तु पूजामपि न गृह्णातीत्याह । नेति । कुमनीषिणां कुत्सितमतीनाम् । अधनाश्च ते आत्मधनाश्च भगवद्धनास्ते प्रिया यस्य । रसज्ञो भक्तिसुखज्ञः । के कुमनीषिणस्तानाह । श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं तिरस्कारं कुर्वंति॥ २१ ॥ भक्ताधीनत्वं प्रपंचयन्नाह । अनुवर्तमानां संसेवमानामपि श्रियं तदर्थिनः सकामान् द्विपदप

अद्भुतकारणायेति ॥ १७ ॥ भजध्वं तद्भजनमेव देवपित्रादिसर्वभजनं भवेदिति । एकभावेनैकाग्र्येण । आत्मनो यो भावांतरामिश्रो भावो दास्यादीनामेकतरस्तेनेति संदर्भः ॥ १८ ॥ १९ ॥ ततः स्वतोषे सति । एवमुक्तप्रकारया भक्त्या भक्तेभ्यो भगवान्स्वात्मप्रदो भवतीति पूर्वमुपपादितं तल्लक्षणं विवृणोति—अपहृतेति । अवगच्छन्स्वनिष्ठा रक्षितुमिति भावः ॥ २० ॥ यद्वा—अधुना अकिंचना निष्कामा एवात्मनो धनानि प्रियाश्च यस्य सः । धनपुत्रादिषु ममतां परित्यज्य मय्येवामी ममतां दधत इति भक्तानां प्रेमरसं जानातीति रसज्ञः । पापं निंदापि तद्दृक्ष्यते सत्कर्मण उद्दिश्य "सतो विनिंदंति हरिप्रियान् खलाः" इति ॥ २१ ॥ भक्तानां भगवत्येव ममता नान्यत्र तथैव भगवतो भक्तेष्वेव ममतेति भक्ताधीनत्वं प्रपंचयति । श्रियं समष्टिसंपत्तिरूपाम् । अनुचरंतीं स्वसंपत्तिवृद्ध्यर्थमनुवर्त्तमानाम् । तदर्थिनः व्यष्टिसंपदर्थिनो द्विपदपतीन्नरेन्द्रान्विबुधान्देवानपि न भजति नापेक्षते यतः स्वेनैव पूर्णः स्वरूपत्वेपि निजभृत्यवर्गतंत्र इत्यधीनत्वमप्यन्यस्येवास्य वास्तवं न सोपाधिकमित्यर्थः । अमुमेवंभूतमुदीषदपि कथं विसृजेत् । रसज्ञ इति १ यथा प्रेमरसज्ञो भगवानुक्तस्तथा भक्तोपि भगवत्प्रेमरसज्ञ इत्युभावेव जगत्यस्मिन् रसज्ञाविति भावः । ननु तर्हि भक्तस्य भगवद्वशत्वमुचितमेव भगवतोपि भक्तवश्यत्वे रस एवोपाधिरभूत् । मैवम् । रसो हि विभावादिसंवलितः स्थायिभावः स्थायी च प्रेमा रसापरपर्यायः स च स्वाभाविकममत्वातिशयविषयीभूतभगवत्सुखकामिता भक्ताश्रयैव तस्याश्च निर्निमित्तत्वात् । भगवतश्च सुखपूर्णत्वेऽपि तस्याः सुखातिशयप्रदत्वं श्रुतिस्मृतिप्रसिद्धं निष्कारणकमेवातः कथमुपाधित्वं तेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रेय उवाच ॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः ॥ २३ ॥ तेऽपितन्मुखनिर्यातं यशो लोकमलापहम् ॥ हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः ॥ २४ ॥ एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य संवादं हरिकीर्तनम् ॥ २५ ॥ श्रीशुक उवाच ॥ य एष उत्तानपदो मानवस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥ २६ ॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥ २७ ॥ इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथाम् ॥ प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥ २८ ॥ विदुर उवाच ॥ सोऽयमद्य महायोगिन्भवता करुणात्मना ॥ दर्शितस्तमसः पारो यत्राकिंचनगो हरिः ॥ २९ ॥

तीन्नरेंद्रान्विबुधान् देवानपि यो नानुवर्तते । यतः स्वेनैव पूर्णोऽतः स्वभृत्यवर्गानुरक्त एव एवंभूतः कृतज्ञो भगवानमून् । ईषदपि कथं परित्यजेत् ॥ २२ ॥ प्रचेतसः कर्मभूतान् । इत्येवं भगवन्माहात्म्यं श्रावयित्वा । अन्याश्च 'नूनं सुनीतेः' इत्यादिध्रुवचरितायाः । 'सत्रेऽगायत्प्रचेतसाम्' इत्युक्तत्वात् ॥ २३ ॥ तेऽपि प्रचेतसः तद्गतिं विष्णुलोकम् ॥ २४ ॥ प्रचेतसां नारदस्य च संवादरूपमेतदाख्यानं तेऽभिहितम् । हरेः कीर्तनं यस्मिंस्तत् ॥ २५ ॥ य एष वंशः सोऽनुवर्णितः ॥ २६ ॥ यः प्रियव्रतः ॥ २७ ॥ २८ ॥ २९ ॥

भगवतः स्वाभाविकमेव प्रेमवशत्वमायातम् । प्रेमा च स्वाधारं स्वीकृती करोतीति भक्तवश्यत्वम् ॥ २२ ॥ राजन्निति । भक्तिरसेन दीप्यमान हे विदुरेत्यर्थः । अन्याश्च ध्रुवादिसंबंधिनीः कथाः ॥ २३ ॥ तेऽपि प्रचेतसोपि । तन्मुखान्नारदास्यात् । निर्यातं निर्गतम् । हरेर्यशः उभयत्र तत्पदं हरिं ब्रूते । गतिरत्र पार्षदादिरूपैव ज्ञेया ॥ २४ ॥ क्षत्तरिति । न जातिस्मारणमपि तु त्वमधुना शकलीकृताखिलाघो जात इति भावः । 'क्षद–शकलीकरणे' धातुः ॥ २५ ॥ एष इति । तात्कालिकवर्णितत्वेन बुद्धिसंनिहितत्वादुक्तम् । नृपसत्तमेति । अहो धन्योऽयं मानवो वंशो यत्रैतादृशा ध्रुवादयो हरिभक्ता आसन्नहं तु तद्वंशकीर्तिं प्रातुमसमर्थ एवेति शोचमानं परीक्षितमुत्साहयति–त्वमपि नृपेषु सत्तमोसि यद्रक्षार्थं स्वयमेव विष्णुर्ब्रह्मास्त्रं ददाहेति भावः ॥ २६ ॥ श्रोतृजनप्रत्यर्थं प्रियव्रतचरितं प्रस्तौति-य इति ॥ २७ ॥ अजितस्य हरेर्वादो यस्यां सत्कथायां ताम् यद्वा–अजितस्य हरेर्वादः कथनं येषां तेऽजितवादा ध्रुवाद्यास्तेषां सत्कथाम् । मुनेश्चरणं मूर्ध्ना हरेश्च हृदा दधार । यद्वा हरेर्हृदा । हरिसंबंधिदृष्ट्या साक्षाद्धरिरेवायमिति दृष्ट्या हृच्छब्दस्य दृष्टिवाच कत्वे मानमाद्यपद्यमत्कृतव्याख्याशतकेऽवलोक्यम् ॥ २८ ॥ महायोगिन्निति । सर्वसामर्थ्यबोधनाय योगिनोपि परोद्धरणे समर्थाः किं पुनर्महायोगी त्वमिति भावः । तमसः संसारसमुद्रस्य । यत्र पारे । हरिरकिंचनं प्राप्नोति किं पुनर्वक्तव्यमकिंचनो हरिं प्राप्नोतीति । यद्वा–अकिञ्चनैर्निरस्तदेहादिभावैर्गीयत इत्यकिञ्चनगः पारोऽत्र भक्तिमार्ग एव । तस्यैव भगवत्प्रापकत्वात् । 'भक्त्याहमेकया ग्राह्यः'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयम् ॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥ ३० ॥ एतद्यः शृणुयाद्राजन्राज्ञां हर्यर्पितात्मनाम् ॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां चतुर्थस्कंधे प्राचेतसोपाख्यानं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ छ ॥ समाप्तोऽयं चतुर्थः स्कन्धः ॥ ४ ॥

स्वान् ज्ञातीन् दिदृक्षुः ॥ ३० ॥ राज्ञां एतत् चरितमिति शेषः ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे श्रीधरस्वामिविरचितायां भावार्थदीपिकाख्यायां टीकायामेकत्रिंशोऽध्यायः ॥ ३१ ॥ छ ॥ समाप्तोऽयं चतुर्थः स्कंधः ॥ ४ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥

इत्याद्युक्तः ॥ २९ ॥ स्तुत्वा नत्वा च पुनः किमकार्षीदत्राह–इतीति । इत्युक्त्वा । स्वानामिति कर्मणि षष्ठी । निर्वृताशयः मैत्रेयद्वारा श्रीभगवदंगीकारानुसंधानेनेति भावः । ज्ञातव्यांशाभावाद्वा जातानंदः "यावतः कृतवान्प्रश्नान् क्षत्ता कौषारवाग्रतः । जातिकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह ॥" इत्युक्तेः ॥ ३० ॥ एतच्छ्रोतुरैहिकामुष्मिकफलमाह-एतदिति ॥ ३१ ॥ श्रीमद्भागवते कृता गुणिगणैस्तत्या शुभा व्याकृतिस्स्वामिश्रीधरदंडिभिः सुविशदा भावार्थदीपाभिधा । श्रीवंशीधरशर्मणा तदुपरि व्याख्याप्रकाशः कृतस्तुर्य्येऽनेन भवेद्वृषार्कतनयाधीशो हरिः प्रीतिमान् ॥ १ ॥ अथास्य श्रवणादिमाहात्म्यं पाद्मे "विष्णुरुवाच । शृणु त्वं भोस्सुरवर स्कन्धं चैव चतुर्थकम् । तच्च मे हृदयं प्रोक्तं सकुक्षीकं महामते ॥ १ ॥ चतुर्थश्रवणेनैव कृतघ्नो मुक्तिमाप्नुयात् । इतिहासं मम मुखाच्छृणु त्वमघनाशकृत् ॥ २ ॥ मथुरायां पुरा कश्चिन्नाम्ना राजा परंतपः । धर्मशास्त्रानुसारेण प्रजापालनतत्परः ॥ ३ ॥ स कदाचिन्मृगयासक्तो वनं गत्वा मृगानहन् । राज्ञि तस्मिन्मृगासक्ते संध्याकालोऽभवत्तदा ॥ ४ ॥ ततः परतरं राजा द्विजाश्रममुपेयिवान् । सुदेवस्याश्रमे राजा सप्तरात्रं व्यवस्थितः ॥ ॥ ५ ॥ आतिथ्यमकरोद्राज्ञो यथाविधि महामुनिः । पञ्चमे दिवसे रात्रौ राजा दष्टोऽहिना मृतः ॥ ६ ॥ प्रभाते तं मृतं दृष्ट्वा सैन्यं दुःखसमन्वितम् । ऋषिर्जलं मंत्रयित्वा ह्यभिषेकं चकार ह ॥ ७ ॥ समुत्थितोऽभून्नृपतिर्निद्रापाये यथा पुमान् । सैन्यं दृष्ट्वोत्थितं भूपं हर्षमाप तथा मुनिः ॥ ८ ॥ मुनिकर्म तु सैन्येन प्रोक्तं नृपतये तदा । राजा तमर्हयामास ततो गंतुं प्रचक्रमे ॥ ९ ॥ आगत्य मथुरापुर्य्यां कालिंदीनिकटे मखम् । चकार विधिना तत्र सुदेवोऽपि समागतः ॥ १० ॥ सुदेवमागतं दृष्ट्वा न बभाषे यदा नृपः । तदा मुनिर्गतः स्थानं निःश्वसन् क्रोधमूर्च्छितः ॥ ११ ॥ तेन दोषेण तद्यागो निष्फलत्वमगात्तदा । देवैरुक्ता नृपतये यज्ञे विफलता विधे ॥ १२ ॥ चिन्तासक्तः समाहूय विप्रान्पप्रच्छ तन्नृपः । केन पापेन भो विप्रा नष्टं यज्ञफलं मम ॥ १३ ॥ इति श्रुत्वा विचार्याशु विप्रैरुक्तमिदं हि तम् । महापापस्य करणाद्यदोषो जायते नृणाम् ॥ १४ ॥ स एव हि कृतघ्नस्य संजातस्ते नृपात्मज । एवमुक्त्वा गता विप्रा राजा चांडालतां गतः ॥ १५ ॥ कुष्ठाक्रांतस्तु तद्देहो बहुकीटादिभिर्युतः । बभूव शृणु भो ब्रह्मंस्ततश्चक्रे नृपोऽटनम् ॥ १६ ॥ कदाचिद्दैवयोगेन कुरुक्षेत्रमुपेयिवान् । तत्र भागवती गाथा चतुर्थस्कंधसंभवा ॥ १७ ॥ तेन श्रुता देवलाच्च ततः पापचयो गतः । विमानमारुह्य गतो वैकुंठं तनुमुज्जहत् ॥ अतो भागवतीयां वै कीर्तिं को वक्तुमर्हति ॥ १८ ॥ इति श्रीखरडनगरवासिश्रीवंशीधरशर्मगौडनिर्मितश्री मद्भागवतभावार्थदीपिकाप्रकाशे चतुर्थस्कंध एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ समाप्तश्चायं चतुर्थस्कन्धः ॥ ४ ॥

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवतचतुर्थस्कन्धः मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया बंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते चतुर्थस्कन्धः समाप्तः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया बंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश टीकया
चोपेते श्रीमद्भागवते पंचमस्कन्धप्रारंभः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ प्रियव्रतो भागवत आत्मारामः कथं मुने ॥ गृहेऽरमत यन्मूलः कर्मबंधः पराभवः ॥ १ ॥ न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ ॥ गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥ २ ॥ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ॥ ३ ॥

श्रीगणेशाय नमः ॥ नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥ अथातः पंचमस्कंधव्याख्याऽनेकविशेषवान् ॥ प्रियव्रतान्वयो यत्र सप्रपंचः प्रपंच्यते ॥ १ ॥ षड्विंशत्याऽधुनाऽध्यायैः पंचमे स्थानमीर्यते ॥ लोकद्वीपादिमर्यादापालनाख्यमनेकधा ॥ २ ॥ पृथिव्युपर्यधोलोकैर्मर्यादा त्रिविधा मता ॥ पुनश्चैकैकशस्तेषु मर्यादा बहुधा मता ॥ ३ ॥ भुवि द्वीपादिमर्यादाः पाल्यंते राजभिः पृथक् ॥ भूमेरुपरि देवाद्यैस्ततश्चाधोऽसुरादिभिः ॥ ४ ॥ तत्राध्यायैस्तु विंशत्या प्रियव्रतपुरःसरैः ॥ भुवि द्वीपादिमर्यादाः पालिता इति वर्ण्यते ॥ ५ ॥ त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिष्विति कीर्त्यते ॥ अतलादिषु दैत्याद्यैः पालनं च ततस्त्रिभिः ॥ ६ ॥ तत्र तु प्रथमेऽध्याये ज्ञानिनो राज्यनिर्वृतिः ॥ पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाऽद्भुता ॥ ७ ॥ "वंशं प्रियव्रतस्यापि निबोध नृपसत्तम ॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीम् । भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥" इति पूर्वस्कंधांते प्रियव्रतस्य प्रथममात्मविद्या ततो गृहाश्रमस्ततः सर्वसंगत्यागेन मोक्ष इत्युक्तम् । तत्र विस्मितः पृच्छति । प्रियव्रतो भागवतोऽत एवात्मारामो गृहे कथमरमत । ननु रमतां को दोष इति चेदत आह । कर्मणा बंधः पराभवश्च स्वरूपतिरस्कारो यन्मूलो भवति यद्गृहं मूलं कारणं यस्य ॥ १ ॥ गृहेषु रतिश्च तत्राभिनिवेशात्स्यात्स च भागवतानामात्मारामाणां न संभवतीत्याह । न नूनमिति ॥ २ ॥ गृहासक्तिर्हि कुटुंबादिस्पृ

ॐ श्रीगणपतये नमः ॥ यशोदानन्दनं देवं वृषभानुसुतापतिम् । नत्वा पञ्चमभावार्थदीपिकाविवृतिं ब्रुवे ॥ १ ॥ त्रैलोक्यं रचितं येन सपरिच्छदमात्मना । तथा तत्पालितं येन नानारूपैरनेकधा ॥ २ ॥ वंदे तं परमात्मानं गोपिकाप्राणवल्लभम् । अनेकार्थावबोधाय विरुद्धार्थावहानये ॥ ३ ॥ अथेति मंगले । अतः चतुर्थस्कंधव्याख्यानोत्तरम् । पञ्चमस्कंधस्य व्याख्या प्रपंच्यते विस्तार्य्यते । यत्र पञ्चमस्कंधे । अनेके विशेषा भेदा यस्मिन्सोनेकविशेषवान् प्रियव्रतस्यान्वयो वंशः सविस्तारः प्रपंच्यत इति देहलीदीपकन्यायेनोभयत्रान्वेति (१) अधुना इदानीम् । स्थानं भागवततृतीयलक्षणम् । आदिना वर्षादिग्रहः (२) तेषु पृथिव्यादिषु । एकैकश एकैकस्मिन्नपि (३) देवाद्यैः इहादिना सूर्यरथसंबंधियक्षादिग्रहः । असुरादिभिः इहादिना नागादिग्रहः (४) तत्र षड्विंशेषु (५) आदिना चन्द्रादिग्रहः । द्वितीयादिनाऽजवीथ्यादिग्रहः । आदिना वितलादिग्रहः (६) तत्र विंशेषु । राज्यानंदः । अद्भुता आश्चर्यजनिका (७) तत्र प्रियव्रतवृत्ते । अत एव भागवतत्वादेव । संदर्भस्तु—आत्मारामत्वे गृहारामत्वं न संभवति कुतस्तरां भागवतत्वे । अत्राक्षिपति—नन्विति । मुन इति । त्रिकालज्ञत्वात्त्वमेतद्वृत्तं जानास्येवेति भावः ॥ १ ॥ तत्र गृहेषु । अभिनिवेशोऽत्यंतरागः । द्विजर्षभेति । गृहाभिनिवेशाभावादेव भवान् द्विजोत्तमतां लेभे गृहासक्त्या तु द्विजत्वमपि यथावन्न तिष्ठति कुतो द्विजर्षभत्वमिति भावः ॥ २ ॥ छायाकांतिराश्रयो वेति स्पृहा तावन्नास्त्येव मतिस्तदनुसंधानञ्च नास्तीत्यर्थः । संदर्भः—येषां चित्तं सदा भगवच्चरणानुगामीति ध्यानमुक्तं स्पृहा सैवामतिरज्ञानमिति वा छेदः । विप्रर्षे इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संशयोऽयं महान्ब्रह्मन्दारागारसुतादिषु ॥ सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥ ४ ॥ श्रीशुक उवाच ॥ बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंदरस आवेशितचेतसो भागवतपरमहंसदयितकथाम् ॥ किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ॥ ५ ॥ यर्हि वाव ह राजन्स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांऽजसावगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितल परिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रोपामंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रिया कलापो नैवाभ्यनंदद्यद्यपि तत् प्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥

हया भवति। सा च तेषां नास्तीत्याह। महतामिति। उत्तमश्लोकपादयोश्छाया कामादिसंतापहारिणी तया निर्वृतं चित्तं येषां तेषां स्पृहायुक्ता मतिर्नास्ति ॥ ३ ॥ दाराद्या सक्तस्य तु मोक्षः श्रीकृष्णेऽस्खलिता मतिश्चाभूदिति यदयं च महान्संशय इत्याह। संशय इति ॥ ४ ॥ अंगीकृत्य परिहरति। बाढमभिनिवेशादिकं नास्तीति सत्यमेव तथापि विघ्नवशेन तेषां प्रवृत्तिः पूर्वाभ्यासबलेन पुनर्निवृत्तिश्च संगच्छत इत्याह। भगवतः श्रीमच्चरणारविंदमकरन्दरूपो यो रसस्तस्मिन्नावेशितं चेतो यैस्तेऽपि केनचिदंतरायेण विघ्नेन विहतामपि स्वां शिवतमां पदवीं मार्गं न हिन्वंति न त्यजंति। काम्। भागवता एव परमहंसास्तेषां दयितस्य प्रियस्य श्रीवासुदेवस्य कथाम् ॥ ५ ॥ प्रियव्रतस्य ब्रह्माज्ञैवांतरायरूपा बभूवेति सप्रसंगमाह। यर्हीत्यादिना विमुक्तसंगः प्रकृतिं भजस्वेत्यंतेन। यर्हि वाव ह। यदा हि वावेति प्रसिद्ध्याद्यो ह इति च। स स्वपित्रा मनुनाऽवनितलपरि

विप्रर्षीणामिदमेवोचितमत एव भवान्हर्यंघ्रिध्यानरतत्वात्कुटुंबादिस्पृहाहीनोस्तीति भावः ॥ ३ ॥ ब्रह्मन्निति। साक्षाद्वेदरूपोसीत्यतो मत्संशयं छेत्तुं समर्थोऽसीति भावः। सिद्धिर्भगवत्सामीप्यादिरूपा। न केवलं तस्यामेव संशयः अपि तु साधनरूपायां तन्मतावपीत्याह—कृष्णे चेति। कथं चिदपराधवशाद् ग्रहासक्तिसत्त्वेपि तस्य सिद्धिः कृष्णासक्तिश्चेति कथमिति भावः। अच्युता च्युतिवर्जिता ॥ ४ ॥ बाढमित्यर्द्धांगीकारेऽव्ययम्। आत्मारामस्य गृहारामता गृहारामस्य च कृष्णासक्तिरित्युभे न संभवत इति सत्यमेव तदप्यति महतां दुर्वितर्क्यचरितानां कापि कादाचित्की विषयासक्तिस्तया न विश्वसनीयेत्याह—भगवत इति। आवेशितचेतसो जना भागवती भगवत्संबंधिनी चासौ परमहंसानां दयिता प्रियतमा च या कथा तां किंचिन्मात्रेणांतरायेण विघ्नेन विहितां स्थगितीकृतां न प्रायेण हिन्वति त्यजंति। कीदृशीं स्वां शिवतमां पदवीमिति तत्कथैव भक्तानां पदवी सुखमय वर्त्म तयैव गम्यो भगवानित्यर्थः। संदर्भस्तु—शिवतमामंतरायेष्वपि भगवच्चित्तापादनेन परमकल्याणरूपामित्याह। ननु "त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो" इत्याद्युक्तेर्भक्तानामंतरायो नास्त्येव। सत्यम्। कालकर्मादिहेतुकोसौ नास्त्येव किं त्वंतरायो हि भक्तानां द्विविधः महदपराधहेतुको भगवदिच्छाहेतुकश्च। तत्र महदपराधो हि समुचितकष्टभोगेन चिरकालत एव तस्यैव महतः कृपया सद्य एव च शाम्यति यथा द्विविदादीनां रहूगणादीनाञ्च। भगवदिच्छा स्वभक्तसदाचारशिक्षणार्था तदुत्थो विघ्नस्तु प्रेमवर्द्धनार्थ एव यथा भरतादीनाम्। तत्र प्रियव्रतस्यापराधाभावाद्भगवदिच्छानिबंधन एव विघ्नोयं तत्र गुणबुद्ध्यापि भक्तैः क्वापि ममता न कर्त्तव्येति। यथा भरतस्य मृगपोषणप्रदर्शनया स्वभक्ता भगवता शिक्षितास्तथा महदाज्ञा हि भक्तानुपयोगिन्यपि भक्तैः प्रतिपालनीयैवेति प्रियव्रतकर्तृकब्रह्माज्ञाप्रतिपालनप्रदर्शनया शिक्षिता इति ज्ञेयम् ॥ ५ ॥ प्रियव्रतस्यात्मारामत्वमौत्पत्तिकमेव। श्रीनारदकृपया परमभागवतत्त्वं श्रीब्रह्माज्ञया गार्हस्थ्यं चाह—यर्हीत्यादिना। अतः अवगतपरमार्थसत्तत्वात्। ब्रह्मसत्रेण दीक्षिष्यमाण इतः परं भगवत्तत्वमेव परस्परं विचार्यं नान्यत्किमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ॥ ७ ॥ स तत्रतत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथिपथि च वरूथशः सिद्धगंधर्व साध्यचारणमुनिगणैरुपगीयमानो गंधमादनद्रोणीमवभासयन्नुपससर्प ॥ ८ ॥

पालनायोपामंत्रितो नियुक्तो नैवाभ्यनंदन्नैच्छत् । अथ ह तदैव भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्यन्वयः । उपामंत्रणे हेतुः । आम्नाता राज्ञां शास्त्रेणोक्ता ये प्रवराः श्रेष्ठा गुणास्तेषां गणस्यैकांतभाजनतया नियताश्रयत्वेन । अनिच्छायां हेतुः । परमार्थसत्तत्त्वमात्मयाथात्म्यमवगतं तद्येन स तथा । अतो ब्रह्मसत्रेणात्मध्यानेन कार्येण दीक्षिष्यमाणो नियमं ग्रहीष्यन् । प्रागपि वासुदेव एव निरंतरसमाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः सकलकारकाणामिंद्रियाणां याः क्रियास्तासां कलापो येन सः । यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकारेऽसतोऽपि मिथ्याभूतादपि राज्यप्रपंचादात्मनः पराभवमालोचयन्नाभ्यनन्दत् ॥ ६ ॥ गुणविसर्गस्य गुणसृष्टेः परिबृंहणं समृद्धिस्तदनुचिंतया व्यवसितः सकलजगतामभिप्रायो येन सः । यथा राज्ञा चौरैर्मंडलेश्वराणामभिप्रायो निश्चीयते तद्वत् । अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्च मरीच्यादिभिः परिवृतः सत्यलोकादवतीर्णः ॥ ७ ॥ स च ब्रह्मा तत्रतत्रोडुपतिश्चन्द्र इव प्रकाशमानो गन्धमादनस्य द्रोणीं दरीमवभासयन्नुपससर्पेत्यन्वयः ।

कार्यमिति नियमं कर्त्तुमुद्यत इत्यर्थः । समर्पणं च 'यत्करोषि यदश्नासि' इत्यादि 'ब्रह्मार्पणं ब्रह्म हविः' इत्यादि श्रीगीतोक्तप्रकारेण ज्ञेयम् । राजपुत्र इति नववयस्त्वं ज्ञापितम् । संदर्भः—स्वभावत एव परमभागवतः ततो नारदेत्यादि, ततो भगवति वासुदेवेत्यादि, ततो ब्रह्मसत्रेणेत्यादि, ततोऽवनितलपरिपालनायेत्यादि, ततो नैवाभ्यनंददित्यादि योज्यम् ॥ ६ ॥ भूतलमिति शेषः । प्रियव्रतं प्रत्युपदेष्टव्ये धर्मे प्रमाणीकरणार्थं सत्यलोकादवतीर्ण इत्यर्थः । तत्र प्रियव्रतं बाल्यमारभ्यैव विरक्तं गृहान्निर्विद्य वन एव कृतवासं ज्ञात्वा तदाज्ञया कनिष्ठोऽप्युत्तानपादो राज्यं चकार तद्वंश्याश्च प्रचेतःपर्यंतं यथासमयं राज्यं चक्रुरेवं च स्वायंभुवमन्वंतरस्यार्द्धादप्यधिकः कालो गतवान् प्राचेतसो दक्षश्च स्वायंभुवमन्वंतर एव लब्धजन्मा पैर्वभविकैश्वर्यकामनया तपसे जगाम । ततश्चाराजकं वीक्ष्य मनुरुपायांतरमलभमानो विरक्तमपि प्रियव्रतं वनादानिनीषन्नप्यानेतुं यदा न शशाक तदा ब्रह्मैवागत्य प्रियव्रतं राज्ये प्रवर्त्तयामास । ततश्च पञ्चममन्वंतरपर्यंतं क्रमेण प्रियव्रतस्य तद्वंश्यानां च राज्याधिकारः तृतीयचतुर्थपञ्चममनूनामुत्तमतामसरैवतानां प्रियव्रतपुत्रत्वात् । द्वितीयमनोः स्वारोचिषस्यापि तदंतःपातात् तत्तन्मनुपुत्रपौत्राद्यास्तु प्रैयव्रता एव राज्ये खंडमंडलेश्वररूपा राजानो बभूवुः । ततश्च षष्ठस्य चाक्षुषमन्वंतरस्याप्यारंभे तपसो निवृत्तेन दक्षेण प्रजासृष्टिस्तत्रैव तस्य साम्राज्यञ्च यदुक्तं "चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवनोदितः" इति । चाक्षुषस्य मनोरुत्तानपादवंश्यत्वात्तन्मन्वंतरपर्यंतमेव स्वायंभुवमनोरधिकार इति ज्ञेयम् । स्वारोचिषस्य गांधर्वत्वेपि 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते क्षीरांबुवत्' इति न्यायेन स्वायंभुवमनुतत्पौत्रोत्तमयोरंतर्गतत्वात्स्वायंभुवत्वमेवेति तस्य गांधर्वत्वं तु मार्कंडेयमनुवर्णनोपाख्यानादवसेयम् ॥ ७ ॥ भूतलं प्रति तस्यावतरणे शोभामाह—तत्र तत्र लोके देशे वांतरिक्षस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवंतं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहितांजलिरुपतस्थे ॥ ९ ॥
भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १० ॥
श्रीभगवानुवाच ॥ निबोध तातेदमृतं ब्रवीमि माऽसूयितुं देवमर्हस्यप्रमेयम् ॥ वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥११॥
न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ॥ नैवार्थधर्मैः परतः स्वतो वा कृतं विहंतुं तनुभृद्विभूयात् ॥ १२ ॥

अमरपरिवृढैर्देवेंद्रादिभिः ॥ ८ ॥ हंसयानेनोपलक्षणेनैनं पितरमुपलभमानो मत्पिताऽयमिति लक्षयन्पितापुत्राभ्यां मनुप्रियव्रताभ्यां सह नारदः कृतांजलिः सन्सहसैवाभ्युत्थायार्हणेन पूजया सहोपतस्थे तुष्टाव । प्रियव्रतं तदा मंदरद्रोण्यां नारद उपदिशति मनुश्च तं नेतुमागतोऽस्तीति ज्ञातव्यम् ॥ ९ ॥ हे भारत भगवानादिपुरुषो ब्रह्माऽपि तं प्रियव्रतमिति होवाचेत्यन्वयः । तेन नारदेनोपनीतमर्हणं यस्य सः। सूक्तवाक्येन यथोचितवाक्येन अतिशयेनोदिता वर्णिता गुणगणा अवताराः सुजयाः सर्वोत्कर्षाश्च यस्य ॥ १० ॥ प्रवृत्तिनिष्ठं मद्वाक्यं प्रतिकूलं मत्वा मय्यसूयां करिष्यतीति शंकमानो नाहमेवं वदामि किं तु मन्मुखेन हरिरेव त्वामाज्ञापयतीति वदन्प्रवृत्तिनिवृत्तिरहस्यमाह । निबोधेति नवभिः । ऋतं सत्यम् । अप्रमेयं देवमसूयितुं दोषारोपेण द्रष्टुं नार्हसि । ते तव ततस्तात एष त्वद्गुरुश्च महर्षिः दिष्टमादिष्टमाज्ञा विवशा अस्वतंत्राः संतो वहामः ॥ ११ ॥ विवशत्वमेवाह चतुर्भिः । नेति । तस्य कृतं तेन निर्मितं तनुभृज्जीवस्तपआदिभिर्विहंतुमन्यथा कर्तुं न विभूयात्प्रभुर्न भवेत् । मनीषया सामादिबुद्धिब

अमराणां परिवृढैः प्रभुभिः "प्रभौ परिवृढः" इति निपातनात् । विमानानामावलयः पंक्तयो येषां तैः । द्रोणी पर्वतांतरालभूमिः ॥ ८ ॥ तदा नारदस्तत्र मंदरद्रोण्यां गंधमादनस्य नामांतरं मंदरमपि 'मंदरो गंधमादनः' इत्यभिधानात् ॥ ९ ॥ हे भारतेति । त्वं तु साक्षादाकाशवाग्रूपभगवत्समर्पितराज्यभरतकुले जातोसीत्यतोऽत्र राज्यदानार्थं ब्रह्मागमने विस्मयं मा कुर्विति भावः । यद्वा—तैर्नारदमनुप्रियव्रतैरुपनीतमर्हणमर्घ्यादि यस्य स तथा । यद्वा—सूक्तवाक्येन "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्" इत्यादिवैदिकसूक्तेन । गुणानां वात्सल्यौदार्यादीनां गणः । विश्वनाथस्तु—उदितो वर्णितो गुणगणः स्वप्रजासु वात्सल्यादिस्तत एव हेतोरवतारः सत्यलोकादवतरणं तत एव सुजयोऽत्युत्कर्षो यस्य स तथा । सदयेति । तस्याभिवांछितभक्तिज्ञानवैराग्याणामहमेव प्रतिबंधकोऽभूवं तद्वार्हस्थेप्यस्य भक्तिर्वर्द्धतामेवेत्याशीर्व्यंजकः सदयावलोकः । अहं राज्यं न करोमीति तव प्रौढिः । त्वामहं राज्यं कारयामीति मम प्रौढिस्तत्र पश्यामः कस्याद्यप्रौढिस्तिष्ठतीति नतरि प्रियव्रते सहासावलोकश्च यस्य सः ॥ १० ॥ निबोध स्वबुद्ध्यैवेदं परामृशेत्यर्थः । हे तातेति । नाहं तव शत्रुर्यत्त्वां दुःखयामीति भावः । ऋतं सत्यमेव न तु त्वामहं प्रतारयामीति भावः । ब्रवीमीत्यहं ब्रह्मा न तु स्वपितेवाहमप्रमाणीकर्त्तव्य इति भावः । किं सत्यं तत्राह-वयमिति । तातो मनुः स खलु यस्मैयस्मै द्वदा यद्यदादिशति तथैव चेष्टते इति तदाज्ञयैव त्वामहं राज्ये प्रवर्त्तयामीति भावः । यमहं सर्वात्मना भजे स प्रभुरेव मां संसारसिंधौ निमज्जयतीति स्वेष्टदेवेपि दोषदर्शी मा भूरित्याह—मासूयितुमिति । अमेयं प्रमातुमशक्यं कमपि संसारेऽपि प्रवर्त्त्य उद्धरति । कमपि वनेऽपि प्रस्थाप्य नोद्धरतीति कस्तस्य चरितं वेदेति भावः ॥ ११ ॥ न चात्र स्वहठं रक्षितुमात्मनस्तपोविद्यायोगबलं प्रदर्शयितव्यमित्याह—ननु त्वद्वारा मां राज्ये प्रभुः प्रवर्त्तयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय ॥ सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतांग धत्ते ॥ १३ ॥ यद्वाचि तंत्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः ॥ सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४ ॥ ईशाभिसृष्टं ह्यवरुंध्महेंग दुःखं सुखं वा गुणकर्मसंगात् ॥ आस्थाय तत्तद्यदयुंक्त नाथश्चक्षुष्मतांधा इव नीयमानाः ॥ १५ ॥

लेन । परतो बलवदाश्रयात् ॥ १२ ॥ तत्र देहयोगे तावत्पारतंत्र्यं प्रसिद्धमित्याह । भवायेति। भवो जन्म । भवाद्यर्थमव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं जनता जीवसमूहः सदा धत्ते न त्वन्यथा कर्तुं शक्नोति । अंग हे प्रियव्रत ॥ १३ ॥ कर्मकरणेऽपि पारतंत्र्यमाह । यद्वाचीति । यस्य वाचि वेदलक्षणायां तंत्यां दामन्यां गुणाः सत्त्वादयस्तत्पूर्वकाणि च यानि कर्माणि तन्निबन्धनैर्दामभिर्ब्राह्मणादिशब्दैः सुदुस्तरैः सुदृढैर्हे वत्स वयं सर्वे सुयोजिता निबद्धाः संतस्तस्मै ईश्वराय बलिं वहामस्तदिच्छया कर्म कुर्मः । नसि नासिकायां प्रोता बद्धाः सन्तश्चतुष्पदो बलीवर्दा यथा द्विपदे पुरुषाय ॥ १४ ॥ भोगेषु पारतंत्र्यमाह । ईशा ईश्वरेणाभिसृष्टं दत्तमेवांग हे प्रियव्रतावरुंध्महे स्वीकुर्मः । यथा स्वामिना दत्तमेव कणिशादि बलीवर्दा भक्षयंति न स्वेच्छया तद्वत् । न चैवं वैषम्यमीश्वरस्य यतो गुणकर्मसंगान्नाथो यद्यद्देवतिर्यगादिलक्षणं देहमयुंक्त

यथा तथा नारदद्वारा मां राज्यात्प्रव्राजयति चेति किमत्र निश्चिनोमीति चेद् बुद्धिबलेन मां परमेश्वरं विजिगीषस्वेत्याह—मनीषया वेति । तेनोत्तरमपि भगवदादिष्टं मत्वा राज्यं कुर्वन्नेव तत्रानासक्त्या प्रव्रज्यामपि कुर्वीति भावः । न च यथेष्टद्रव्यदानतः स्वप्रतिमूर्तिकल्पनेन राज्यं चिकीर्षयस्व नापि मां विपदं बहुधर्मैर्बलवदाश्रयेण वा स्वबाहुबलेन वोत्तितीर्षेत्याह—नैवार्थेति ॥ १२ ॥ तत्र संसारे । अंगेति स्नेहाधिक्यद्योतनाय । नात्र किमपि शोचनीयं यतो देहधारिण ईश्वराधीना भद्रमभद्रं वा स्वेच्छया परेच्छया वा सर्वं सहंत एवेत्याह—भवायेति । भवनाशौ पुनःपुनर्जन्ममृत्यू तदाद्यर्थं धत्ते स्वकर्मोपार्जितमपि देहमीश्वराज्ञां विना न प्राप्नोति यथा साध्वसाधुक्रियाद्युपार्जितमपि शालिक्षेत्रकारागारादिकं नृपाज्ञां विना प्रजा न प्राप्नोति नृपः खल्वन्यथापि कुर्यादित्यतो हेतोः ॥ १३ ॥ देहधारणे पारतंत्र्यमिव कर्मकरणेपि पारतंत्र्यमाह—तन्निबंधनैः कर्महेतुकैः ते बलीवर्दा यथा मनुष्यदत्तस्य भारस्यावहने गमनागमनक्रियादिषु स्वातंत्र्ये च दंडं प्राप्नुवंति तथा वयमपीति भावः । हे वत्सेति । यद्यस्माभिर्बलीवर्दायमानैस्तदायत्तत्वमंगीकृतं तदायं त्वं वत्सायमानो नांगीकरिष्यसीति भावः॥१४॥गुणेति । तमआदिगुणनिबंधनानि यानि कर्माणि तेषु संगादासक्तत्वात् । यथा स्वीयत्वात्समेष्वपि बलीवर्देषु मध्ये साध्वसाधुकर्मकरणतारतम्यानुरूपमेव केभ्यश्चिदुत्तमगृहाभ्यंतरस्थापितेभ्यः सघृतदुग्धौदनादिकं तत्स्वामी दत्ते केभ्यश्चन रूक्षबंधिचणकमाषादिकं केभ्यश्चन कणिशघासादिकं केभ्यश्चन नीहारातपपंकादिमति बहिःस्थले स्थापितेभ्यः साक्रोशदंडप्रहारं विरसं दलपलालादिकमिति किं कुर्वीवरुंध्महे नाथः स्वामी यद्यदयुंक्त भद्रमभद्रं वा फलं ददौ तत्तदास्थाय अस्मद्वैगुण्यसाद्गुण्यानुरूपमेव ददाति स्वामिनः को दोष इति मनसि विश्वसेत्यर्थः । प्रत्युत परमेश्वरस्यात्र गुण एव द्रष्टव्य इति दृष्टांतेनाह—चक्षुष्मतेति । शीतलमातपतप्तं वा वर्त्म नीयमानास्तत्र कदाचिच्छीतले वर्त्मनि कंटककूर्पादिकं दृष्ट्वा यदा तप्तं वर्त्म नीयंते तेन किमंधैश्चक्षुष्मानुपालभ्यतेऽपि तु हितकृदयमिति विश्वस्य प्रशस्यत एवेति भावः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तोपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ॥ यथाऽनुभूतंप्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृंक्ते ॥ १६ ॥ भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः ॥ जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥ १७ ॥ यः षट् सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ॥ अत्येति दुर्गाश्रित ऊर्जितारीन्क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥ त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ॥ भुंक्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसंगः प्रकृतिं भजस्व ॥ १९ ॥

योजितवांस्तत्तदास्थाय स्वीकृत्य । यथांधाश्चक्षुष्मता छायामातपं वा नीयमानाः संतस्तत्रैव गच्छंति तद्वत् ॥ १५॥ नन्वेतत्सर्वमविदुष एव न त्वात्मविद इत्याशंक्याह । मुक्तोऽपीति यावत्प्रारब्धं कर्म तावत् । यथा स्वप्नेऽनुभूतं प्रतियातनिद्रो गतनिद्रोऽभिमानशून्य एवानुस्मरति। तर्हि भोगवासनया पुनर्जन्म भवेत्तत्राह किं तु देहांतरारंभकान्गुणान्कर्माणि वासनाश्च न वृंक्ते न संभजते ॥१६॥ ननु गृहे वर्तमानस्य भोगान् भुंजानस्य कुतोऽभिमानाभावो मोक्षो वा अतस्तत्त्यागेन वनवास एव युक्तस्तत्राह । भयं संसारः स्यादेव प्रमत्तस्याजितेंद्रियस्य । वनेष्विति । संगभिया वनाद्वनांतरं गच्छतोऽपीत्यर्थः । सहैव षट् सपत्नाः शत्रवो मनोबुद्धींद्रियाणि च यस्य स तथाभूत एव वनेष्वपि यत आस्ते बुद्धत्वेन जितेंद्रियत्वादात्मरतेरात्मारामस्यावद्यं रागादिदोषं किं नु करोति न करोत्येव ॥ १७ ॥ ननु गृहे वसतः पुरुषस्य रागादयः संभवंति न तु वन इत्याशंक्याह । य इति । यः षड्वैरिणः षडिन्द्रियाणि विजिगीषमाणः स पूर्वं गृहेषु स्थित्वा तेषामत्यन्तं निरोधमकुर्वन् जेतुं यतेत । क्षीणेष्वरिषु कामं गृहेऽन्यत्र वा विचरेत् । यतो लोके ऊर्जितारीन्दुर्गाश्रित एवात्येति जयति पश्चाद्दुर्गे वाऽन्यत्र वा वर्तेत । युद्धयेतेति पाठे प्रहरेदित्यर्थः ॥ १८ ॥ इदं च गृहदुर्गाश्रयणं प्राकृतानाम् । त्वं त्वब्जनाभस्यांघ्रिसरोजकोश एव दुर्गं तदाश्रितोऽत एव निर्जितषट्सपत्नश्च तथापि पुरुषेणेश्वरेणातिदिष्टान्दत्तान्भोगांस्तावद्भुंक्ष्व । पश्चाद्विमुक्तसंगः सन्प्रकृतिं स्वरूपं भजस्व । आत्म

अत्राक्षिपति—नन्विति । अविदुषः सकर्मण एव न तु कर्मग्रंथित उत्तीर्णस्यात्मज्ञानिनः । पुनराक्षिपति—तर्हीति ॥ १६ ॥ पुनराक्षिपति नन्विति—अतः मोक्षाभावात् । इत्यर्थ इति । नह्यजितेंद्रियस्य वनवासादिना मोक्षं सेत्स्यति मृगादीनां मोक्षापत्तेरिति भावः । तथाभूत एव षडिंद्रियशत्रुसहित एव । जितेंद्रियस्य तत्राप्यात्मारामस्य तत्रापि बुधस्य वनगृहयोस्तारतम्याभावं बुध्यमानस्य ॥ १७ ॥ पुनराक्षिपति—नन्विति । अजितेंद्रियो जितेंद्रिय इंद्रियजयेप्सुरित्यत्र लोके त्रिविधो जनस्तत्राद्ययोर्गृहाश्रमो न दोष इत्युक्तम् । अंत्यस्य तु प्रत्युत गुण एवेत्याह यो विजिगीषमाणः ॰विजेतुमिच्छति । इत्यर्थ इति । युधधातोः संप्रहारार्थत्वादिति भावः ॥ १८ ॥ त्वं तु त्रिषु मध्ये न कोपीत्याह—त्वमिति । तुर्भिन्नोपक्रमे । अब्जनाभेति । न त्वन्यप्राकृतवद्गृहदुर्गाश्रितः न चान्यवजितेंद्रियश्च यतो निर्जितेति जितषट्सपत्नेभ्यो निर्गतः तव षडिंद्रियाणि भगवत्सौंदर्येष्वासक्तानि परममित्राण्येव न तु शत्रवः अतः पुरुषेण स्वप्रभुणैवातिशयेन दिष्टान्दत्तान् भोगानिति कर्मजन्यानामेव भोगानां बंधकत्वं न त्वीश्वरदत्तानामिति भावः । इत्यर्थ इति । राज्यभारं स्वपुत्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयाऽवनतशिरोधरो बाढमिति सबहुमानमुवाह ॥ २० ॥ भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥ २१ ॥ मनुरपि परेणैव प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तये आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥ २२ ॥

निष्ठो भवेत्यर्थः ॥ १९ ॥ आत्मनस्ततो लघुतयाऽल्पतया तच्छासनमंगीचकार । यद्वा । आत्मनो यदनुशासनं तदलघुतया गौरवेण बाढं तथा करिष्यामीत्यवनतकंधरः सन्नग्राह ॥ २० ॥ मनुना संतुष्टेनोपकल्पिता पूजा यस्य । प्रियव्रतस्य योगभ्रंशान्नारदस्य च शिष्यनाशात्कुटिलमीक्षणं संभवति तत्तु नास्तीत्याह । अविषमं यथा तथा तयोरभिसमीक्षमाणयोः सतोरात्मनः सम्यगवस्थानमवाङ्मनसं वाङ्मनसयोरविषयं क्षयं निवासं जगाम । पाठांतरे अवाग्वाचामगोचरं कथंचिन्मनसः क्षयं विषयमतोऽव्यवहृतं व्यवहारशून्यं ब्रह्मनिवृत्तं प्रवर्तयन् । व्यवहाराद्विषण्णः सन् व्यवहारातीतं स्वरूपं चिंतयन्नंतर्हित इत्यर्थः ॥ २१ ॥ पुत्रं राज्येऽभिषिच्य वनं यास्यामीत्येवं यो मनोरथः स परेण ब्रह्मणैव प्रतिसंधितः संपादितो यस्य सः । नारदस्यानुमतेन राज्ये स्थापयित्वाऽतिविषमो दुस्तरो यो विषयविषजलाशयो गृहं तस्याशा दिक् प्रवृत्तिवासना भोगेच्छा

न्यस्य वने तिष्ठेतीयमेव प्रकृतिः सर्वराजन्यानामिति भावः ॥ १९ ॥ अल्पतया तत्पौत्रत्वादित्यर्थः । स्वस्य लघुता तु प्रसिद्धैव न केवलं तदभिप्रायेणैव तदंगीचकार किं तु भगवता 'पश्चात्प्रकृतिं भजस्व' इति यदुक्तं तदभिप्रायेणैव तदुररी चकारेत्याह—यद्वेति ॥ २० ॥ यथावदिति । तत्कालदेशोचितसपर्ययेत्यर्थः । वाङ्मनसयोः प्राकृतयोरविषयं सर्वनिवासस्थानत्वात्क्षयमाश्रयत्वमित्यर्थः । पाठांतरे 'अवाङ्मनसः क्षयम्' इति पाठे । न विद्यंते वाचस्त्रैगुण्यविषया विधिनिषेधात्मिकाः श्रुतयो यत्र तथाभूतं यन्मनस्तस्य क्षयं निस्त्रैगुण्यमनोविषयमित्यर्थः । यद्वा—अव्यवहृतं प्रियव्रतं व्यवहारे प्रवर्त्तयन्क्षयं सत्यलोकमगमत् । कीदृशमात्मनः स्वस्य सम्यगवस्थानं यत्र तत् । प्रियव्रतं कीदृशम् अवाङ्मनसमात्मारामम‍हाभागवतत्वात्प्राकृतवाङ्मनसशून्यमित्यर्थः । यद्वा वासुदेवे वाङ्मनसं यस्य तम् । यद्वा—तयोर्नारदप्रियव्रतयोरात्मसमवस्थानं ब्रह्म प्रवर्त्तयन् जगामेत्यर्थः । इत्यर्थ इति । सर्वसुखानां ब्रह्मानंदेंतर्भूतत्वादिति भावः ॥ २१ ॥ स्थितिगुप्तये मर्यादापालनाय । संदर्भः—मनुरपीत्यादिवाक्येन प्रियव्रतस्य राज्यं पूर्वमिति गम्यते तथैव विष्णुपुराणेऽपि दृश्यते तथैव च तत्पुत्राणां तृतीयचतुर्थपञ्चममनुत्वमुत्तानपादवंशजस्य तु चाक्षुषस्य षष्ठमनुत्वं तद्वंशांतिमस्य प्राचेतसस्य दक्षस्य च सप्तमन्वंतरे राज्यं घटतेऽन्यथा पारिवेत्तृत्त्वादिकमापद्येत । न च तयोर्ज्येष्ठानुक्रमेणैव राज्यं किं तु वंशेषु कदाचित्कस्यचित्साम्राज्यमिति वेनमृत्यौ प्रचेतसां तपस्यायां चाराजकत्वसंभवात् । किं तूत्तानपादस्य चिरकालेनैव सुतोत्पत्तिरिति गम्यते । यत्तु चतुर्थे "प्रियव्रतोत्तानपादौ मनुपुत्रौ महीजसौ । तत्पुत्रपौत्रनप्तृणामनुवृत्तं तदंतरम् ॥" इति । तदपि तद्वंशस्य मनूनामपि तद्ग्रहणेन गृहीतत्वात् । स्वारोचिषस्यापि तदंतःपातात् । यच्च श्रीपृथुं प्रति ब्रह्मवचनं "न वध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः" इति यज्ञस्येन्द्रत्वेन तद्राज्यस्य स्वायंभुवसमकालत्वं बोधयति । अत्रापि तदादरायैव तदभेदनिर्देशो ज्ञेयः । तदंशावेशेनैवान्यथासिद्धत्वात् । शब्दार्थस्तु तत्रैव दर्शितः । तत्र प्रायः प्रियव्रतादिराज्यं तृतीमन्वंतरावसानमुत्तानपादादिराज्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. पं. श्री. टी. ॥ ५ ॥

इति ह वाव स जगतीपतिरीश्वरेच्छयाऽधिनिवेशितकर्माधिकारोऽखिलजगद्बंधध्वंसनपरानुभावस्य भगवत आदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभावेन परिरंधितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ २३ ॥ अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान्दश भावयांबभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २४ ॥ आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ २५ ॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥२६॥ तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितांतर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २७ ॥ अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वंतराधिपतयः ॥ २८ ॥ एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥ २९ ॥

भा. दी. श्री. टीका. अ० १

वा तस्या उपरतोऽभूत् ॥ २२ ॥ यत्पृष्टं गृहे कथमरमत तत्रोक्तमुत्तरमुपसंहरति । इति ह वाव इत्थमेव हि । अधिनिवेशितः प्रापितः कर्माधिकारो यस्य । अखिलस्य जगतो बंधध्वंसनः परोऽनुभावो यस्य तस्य यदंघ्रियुगलं तस्यानवरतं ध्यानं तदनुभावेन परिरंधितकषायो दग्धरागादिमल आशयो यस्य । अतोऽवदातः शुद्धोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानवर्धनः ॥२३॥ उ इति विस्मये । ह इति प्रसिद्धौ । वावेति निश्चये । आत्मनः समानैः शीलादिभिरुदारान्महतो दश पुत्रान् जनयामास॥२४॥ तानाह । आग्नीध्र इध्मजिह्वो यज्ञबाहुर्महावीरो हिरण्यरेता घृतपृष्ठः सवनो मेधातिथिर्वीतिहोत्रः कविश्चेत्यग्नीनां नामानि येषां ते ॥ २५ ॥ अर्भभावाद्बाल्यादारभ्य ॥२६॥ तस्मिन्पारमहंस्याश्रमे श्रीमच्चरणारविंदयोरविरतस्मरणेनाविगलितोऽखंडितो यः परमो भक्तियोगस्तस्यानुभावेन विशोधितांतःकरणे प्रतीतो यो भगवांस्तस्मिन्नात्मनस्त्वंपदार्थस्य तादात्म्यविशेषेण विशेषो देहाद्युपाधिस्तदपोहेन प्रापुः ॥ २७ ॥ २८ ॥ उपशमाश्रयेषु सत्सु । दशकोटिभिरेकमर्बुदम् । एतादृशानि वर्षाणामेकादशार्बुदानि जगतीं ॥ ५ ॥

तु षष्ठावसानं प्रियव्रतवंशयोस्तामसरैवतयोस्तु मनुत्वं राजत्वं चातीतचरमावस्थायां ज्ञेयं चाक्षुषवत् । तस्मात्सर्वमेव समंजसमतः कथन एव विपर्यासो न कथनीये यथा दशमे कुरुक्षेत्रयात्रादाविति ॥ २२ ॥ अतो रागादिदोषराहित्यात् ॥ २३ ॥ अथातो राज्याद्येतोरेव ॥ २४ ॥ २५ ॥ २६ ॥ तादात्म्यमैक्यं तत्साम्यं वा । अपोहेन निराकरणेन ॥ २७ ॥ २८ ॥ अर्बुदं कोटिपर्यायं तथैव द्यष्टमस्कंधे बलेः स्वर्गविजये व्याख्यातं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावदवभासयति सुरगिरिमनुपरिक्रामन्भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभाव स्तदनभिनंदन्समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतंगः ॥ ३० ॥

बुभुज इत्यन्वयः । राज्ञो धर्मपालनविषयभोगप्रभावैर्भाव्यम् । तत्रानायासेनैव धर्मपालनमाह । अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन संभृतौ पूर्णौ दोर्दंडौ तयोर्युगलं तेनापीडित आकृष्टो मौर्वीगुणस्तस्य स्तनितं टंकारस्तेनैव युद्धं विना विरमिता निरस्ता धर्मप्रतिपक्षा येन । भोगातिशयमाह । बर्हिष्मत्याः स्वभार्याया अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इवात एव विषयासक्त्यात्मानमनवबुध्यमान इव बुभुजे । तत्र प्रमोद आयांतं पतिं दृष्ट्वा हर्षस्ततः प्रसरणमभ्युत्थानादिलीला ततो यौषिण्यं योषित्स्वभावकृतश्रृंगारानुभावप्रकाशनं ततो व्रीडया प्रमुषिताः संकुचिता हासावलोकास्ततो रुचिरक्ष्वेल्यादयः परिहासवाक्यादीनि तैः ॥२९॥ प्रभावातिशयमाह ।

तथामरकोशे क्षीरस्वामिधृतं प्रमाणवचनं "दशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम् । अर्बुदकोटिन्यर्बुदपद्मे खर्वं निखर्वमिति दशभिः ॥ गुणनान्महाशंखसमुद्रमध्यान्तमथ परार्द्धकं च । स्वहतं परार्द्धमगितं तत्स्वहतं भूर्य्यतोऽसंख्यम् ॥" इति प्रयुताख्यलक्षामिति तयोरेकपर्यायत्वामित्यर्थः । एवमर्बुदकोट्योरपि अर्बुदाख्यकोटिरिति मध्यपदलोपी समासः । तथा च माध्यंदिनशाखायाम् "इमा मेऽग्नय इष्टिका धेनवः संत्येकादश च शतं च सहस्रं च सहस्रायुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रं मध्यं वांत्यश्च परार्द्धं च" इत्यादिश्रुतेः कोटिरेवार्बुदमित्यर्थः । दोर्दंडौ भुजदंडौ । तत्र प्रमोदादिषु । आदिना स्वांगावरणाविवर्त्तनस्थानांतरगमनादिग्रहः श्रृंगारानुभावप्रकाशनम्-अपांगचालननासामुक्तोन्नयनकर्णकंडूयनादि स्वयं दूत्यं ततः पत्युरौत्सुक्यमालक्ष्य संकोचिताहासावलोकाः । अत्रेवशब्दद्वयेन तस्य विवेकज्ञानयोः संक्षुब्धयोरपि वैषयिकलोकैर्दुर्गमत्वं व्यंजितं तत्र हेतुर्महामना विषयासक्तितदभावयोर्यौगपद्येन सद्भावा दुस्तर्कमनस्तत्त्व इत्यर्थः ॥ २९ ॥ तदा हि प्रियव्रतराज्याधिकारसमये इत्यर्थः । तदनभिनंदन् अर्द्धेनावच्छादनमप्रशंसन् तरणिं सूर्यमनुलक्षीकृत्य तरणेरस्ताचलावरोहसमये स्वयमुदयाचलमारोहन्नित्यर्थः । पतंगः सूर्यः पर्यक्रामत्परिक्रांतवान् । प्रजाभ्यः सुखदानेच्छयैव न तु सूर्यस्पर्द्धया तेन ज्यैष्ठादिमासेषु प्रियव्रताख्यसूर्यस्य चंद्रादप्यातिशीतलत्वं मार्गादिमासेषु तु सूर्यादपि प्रातःसायंकालयोरौष्ण्यमधिकमिति ज्ञेयम् । एवञ्च प्रियव्रतस्य सौभर्यादेरिव योगबलेनैव राजत्वसूर्यत्वे कायद्वैधेनैवेति ज्ञेयम् । 'पतंगः पक्षिसूर्ययोः' इति विश्वः । 'द्युमणिस्तरणिर्मित्रः' इत्यमरः । सप्तावृत्तिरथकरणानंतरं तद्वारणं च पुना रथकरणप्रवृत्तस्य ब्रह्मणा कृतमिति ज्ञेयम् । तदाज्ञयैव तस्य राज्ये प्रवृत्तिश्रवणात् । अत्रेदं ज्ञेयं—समुद्राणां सप्तसंख्यत्वाद्रथा अपि सप्तैव स्वयोगबलकल्पिता एकचक्राः सूर्यरथादप्युच्चतराः मंडलावृत्तिरीत्या भ्राम्यमाणा ज्ञेयाः । तत्र च बहिर्बहिर्मंडलानामधिकप्रमाणत्वाद्रथा अपि क्रमेणाधिकप्रमाणा अवगम्यंत इति संदर्भः । मदीयो दूरस्थोऽपि रथ आर्यावर्तगतमदीयराजधानीस्थप्रजानां दृष्टिगोचरी भवत्वितीच्छया पूर्वपूर्वरथाद्द्विगुणोच्चताविशालताक उत्तरोत्तरोरथः कृत इत्यन्ये प्राहुः । अत एव रथचक्राग्राणामधिकाधिव प्रमाणत्वात्तत्तत्परिखाताः समुद्रा अप्यधिकप्रमाणा दृश्यंते । तेषु चोत्तरोत्तराधिकप्रमाणेषु सप्तसु रथेषु मध्ये पञ्चविंशत्या दिनैः सार्द्धपंचचत्वारिंशद्घटिकाधिकैकरथस्यारोहणमेवं सूर्य्यस्येव दक्षिणायनस्योपक्रममारभ्य प्रियव्रतस्योत्तरदेशतो दक्षिणदेशगमनं पौषपर्यंतं पुनरुत्तरायणस्योपक्रममारभ्य परिसमाप्तिपर्यंतं तावत्संख्याकदिनैर्व्युत्क्रमेण पुनरपि तत्तद्रथारोहणम् । एवं दक्षिणदेशात उत्तरदेशगमनमाषाढपर्यंतं किं तु स्वगत्या मेरुं वामावर्त्तेनैव परिक्राम्यतोऽपि सूर्यस्य ज्योतिश्चक्राधीनैरेव प्रदक्षिणीकृत्य क्रमेण शीघ्रगमनैर्दक्षिणायने दिनानि मासिमासि ह्रसंति उत्तरायणे तु क्रमेण मंदगमनैर्दिनानि वर्द्धंते प्रियव्रतस्य तु सूर्यकृतरात्रिलोपार्थं स्वेच्छयैव मेरुं प्रदक्षिणीकृत्य परिक्रामतः स्वेच्छयैव मंदीकृतैर्गमनैरुत्तराणि दिनानि वर्द्धंते दक्षिणायने तु स्वेच्छाधीनया शीघ्रगत्या दिनानि ह्रसंतीति ज्ञेयम् । रथानां योगप्रभावत्वाद्यथासमयं प्राकट्याप्राकट्ये च ज्ञेये तेषां सप्तसंख्यत्वेनैव सप्तकृत्व इति पूर्वमुक्तं ज्ञेयं, व्याख्येयं सप्तदिनानंतरं प्रियव्रतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिंधव आसन्यत एव कृताः सप्त भुवो द्वीपाः ॥ ३१ ॥ जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो यथासंख्यं द्विगुणमानेन बहिः समंतत उपक्लृप्ताः ॥ ३२ ॥ क्षारोदेक्षुरसोदसुरोदक्षीरोददधिमंडोदशुद्धोदाः सप्त जलधयः सप्तद्वीपपरिखा इवाभ्यंतरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक् परित उपकल्पितास्तेषु जंब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान् यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥ ३३ ॥ दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानी नाम काव्यसुता ॥ ३४ ॥ नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम् ॥ चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बंधम् ॥ ३५ ॥

यावद्वसुधातलं लोकालोकपर्यंतमवभासयति मेरुं प्रदक्षिणी कुर्वन्नादित्यस्तस्मिन्नर्धेनैवोपलक्षितं प्रतपति प्रकाशयत्यर्धेन चावच्छादयति तमसावृणोति तदा द्वितीयः पतंगः सूर्य इव पर्यक्रामत् न चेदमसंभावितम् । यतो भगवदुपासनेनोपचितोऽतिपुरुषः पुरुषानतिक्रांतः प्रभावो यस्य ॥ ३० ॥ ये वै उ ह अतिप्रसिद्धास्तस्य रथचक्राग्रकृताः परिखाता गर्ताः । यतो यैरेव कृताः ॥ ३१ ॥ तानाह जंब्विति । तेषां परिमाणं–शृण्विति शेषः । पूर्वस्य यद्विस्तारमानम् उत्तरस्ततो द्विगुणेन विस्तारमानेनेत्येवं सिंधुभ्यो बहिः समंतत उपक्लृप्ता रचिताः ॥ ३२ ॥ यथा सिंधुभ्यो बहिरेकैकशो द्वीपा एवं द्वीपानामपि बहिः सिंधव इत्याह । क्षारोदेति । दधिमंडो मथितं दधि । एते सप्त जलधयः सप्तद्वीपानां परिखा इवाभ्यंतरे तैः संवेष्टिता ये द्वीपास्तैः समाना विस्तारतः । बहिर्नीतः पृथगसंकीर्णतया ॥ ३३ ॥ ३४ ॥ अहो आश्चर्यं राज्ञः सामर्थ्यमिति परीक्षिदभिशयज्ञो भगवान्बादरायणिराह । नैवमिति । जिताः-षड्गुणा इंद्रियाणि षडूर्मयो वा यैस्तेषाम् । एवंविधः पुरुषकार इति न चित्रं नासंभावितम् । यतो विदूरविगतोंत्यजोऽपि यस्योरुक्रमस्य नाम सकृदुच्चारयेद्यः सोऽधुना तत्क्षणमेव बंधं संसारम् । तत्त्वमिति पाठेऽप्ययमेवार्थः । पाठांतरे तत्त्वं चांडालत्वम् । जहाति शुद्धो भवतीत्यर्थः ॥ ३५ ॥

स्वयं निवृत्त्यनौचित्यादन्येन केनाप्यनिवर्तनश्रवणाच्च नासमंजसा ॥ ३० ॥ यतो येभ्यस्सिंधुभ्य एव हेतुभ्यः । तीर्थस्तु–वा इत्यनेन समुद्राणां पूर्वसद्भावप्रसिद्धिं ध्वनयति । अयं तु तेषां स्थौल्यं कृतवानिति । " पूर्वसृष्टान्यथावृत्त्या स्थूलांश्चक्रे प्रियव्रतः । समुद्रांस्तेन तत्कर्त्रेत्याहुरेनं प्रियव्रतम् " इति । एवशब्दः प्रधानभूतः । सप्तैवान्येऽवांतरद्वीपा बहवः संतीति विशेषबोधनार्थः ॥ ३१ ॥ तान् द्वीपान् । तेषां द्वीपानां, समंततः सर्वदिक्षु ॥ ३२ ॥ एकस्मिनेकस्मिन्नित्येकैकस्मिन् एकमेकमित्येकैकम् " एकं बहुव्रीहिवत् " इति द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्तेन सुब्लोपपुंवद्भावौ इह द्वयोरपि सुपोर्लुकि सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप् ॥ ३३ ॥ पारिबर्हदाने सुतानां मिथो विवादः स्यादिति कृत्वा कन्यादानमपि स्वयं चकारेत्याह–दुहितरमिति । उशनसे शुक्राय " उशना भार्गवः कविः " इत्यमरः । तत्पुत्र्यपि राजकुलवृद्धिकर्यभूदित्याह–यस्यामिति ॥ ३४ ॥ एवंविधः समुद्रद्वीपादिकरणरूपो माहात्म्यविशेषः । गुणाः कामादयः मनसा सह शब्दादयो वा । अंघ्रिरजसापि यैरतीव दुर्जया गुणा जिता इति विरोधः यतो विदूरेति । विप्रा

॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥ ३६ ॥ अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिंद्रियैरविद्यारचितविषमविषयांधकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयांचकार ॥ ३७ ॥ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥ ३८ ॥ तस्य ह वा एते श्लोकाः ॥ प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् ॥ यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्तवारिधीन् ॥ ३९ ॥ भूसंस्थानं कृतं येन सरिद्गिरिवना दिभिः ॥ सीमा च भूतनिर्वृत्यै द्वीपेद्वीपे विभागशः ॥ ४० ॥

तस्य पराक्रममुपसंहरन्निवृत्तिक्रममाह । स एवमिति । देवर्षिचरणयोरनुशयनमुपसत्तिस्तदनुपतितो यो गुणविसर्गो राज्यादिप्रपंचस्तत्संसर्गेण आत्मनि मनसि निर्वेदो यस्य ॥ ३६ ॥ तमाह । मयाऽसाध्वनुष्ठितं यद्यतोऽभिनिवेशितः तत्तः अलमलं विषयैः । विनोदमृगं मर्कटम् ॥ ३७ ॥ परदेवताया हरेः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्शो विवेकस्तेन नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुससारेत्यन्वयः । किं कृत्वा । अनुगतेभ्यः पुत्रेभ्य इमां पृथ्वीं विभज्य । भुक्तः भोगो यस्यास्तां भार्यां महाविभूतिः साम्राज्यसंपत्तत्सहितां महिषीं मृतशरीरमिव परित्यज्य । तत्र हेतुः । हृदि निहितो निर्वेदो येन । हृदीत्यस्योत्तरत्राप्यन्वयः । हृदि गृहीतो निश्चितो हरिविहारस्तेनानुभावस्त्यागसामर्थ्यं यस्य ॥ ३८ ॥ तस्य महिमोपनिबंधनश्लोकाः पूर्वसिद्धाः कथ्यंते । यथा वेदे "तदप्येष श्लोको भवति" इति तद्वदुक्तिरियम् । को नु को नाम कुर्यात् । छायां घ्नन् तमो निरस्यन् ॥ ३९ ॥ भूसंस्थानं द्वीपैः कृतम् । सरिद्गिरिवनादिभिः सीमा च येन कृता । भूतानां निर्वृत्यै सुखायाविधा

दूरो विदूरः पृषोदरादित्वाद्विप्रस्य विरादेशः । शूद्रस्तस्मादपि विप्रकृष्टं दूरं गतः विगतश्चांडालोंत्यजोपीत्यत्रापिना गृहीतश्चांडांलादिरपि तन्वं ततुं तत्क्षणे तनुत्यागादर्शनात्तन्वारंभकं कर्मेति तेन प्रारब्धकर्मक्षय उक्तः । तत्वं महदादिपृथिव्यंतं स्थूलसूक्ष्मदेहावित्यर्थः । तदापि तद्देहस्थितिरिति नाम्न एवाचिंत्यप्रभावत्वादिति ध्येयं गत्यंतराभावात् । स्वामिचरणैस्तत्त्वं चांडालत्वमिति यद्व्याख्यातं तत्तच्छब्दस्य बुद्धिस्थपरामर्शित्वाभिप्रायेणैवेति ध्येयम् । इत्यर्थ इति । 'श्वादोपि सद्यः सवनाय कल्पते' इत्याद्युक्तेरिति भावः ॥ ३९ ॥ तस्य प्रियव्रतस्य । गुणानां संध्यादीनां विसर्गः ." संधिश्च विग्रहश्चैव यानमासनमेव च । द्वैधीभावं संश्रयं च गुणान्षट् कवयो विदुः ॥" इत्युक्तेर्नीतिशास्त्रोक्तेः । गुणानामिंद्रियाणां विसर्गो विषयप्रपञ्चो वा । " गुणो मौर्व्यामप्रधाने रूपादौ सूद इंद्रिये । त्यागशौर्यादिसत्त्वादिसंध्याद्यावृत्तिरज्जुषु ॥" इति मेदिनी । इदं वक्ष्यमाणम् ॥ ३६ ॥ तं निर्वेदम् । धिग्धिगिति आत्मानम् ॥ ३७ ॥ अनुगतेभ्यो भक्तिश्रद्धादिनाऽनुसृतेभ्यः । तत्र त्यागे ॥ ३८ ॥ तस्य प्रियव्रतस्य । ह वै प्रसिद्धा एते श्लोकाः श्लोकलक्षणलक्षितानि वाक्यानि यशांसि वा 'श्लोकः पद्ये यशस्यपि' इत्यभिधानात् । "श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् । द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥" इति श्लोकलक्षणोक्तेः । श्लोकस्य वेदेपि वर्णितत्वादस्य श्रीभागवतस्य साक्षाद्वेदरूपत्वात् । वेदे यथा 'तदप्येष श्लोको भवति' इति वर्णितं तथात्राप्युक्तं तस्य वा एते श्लोका इति । नेमिनिम्नै रथचक्राग्रकृतैर्गर्त्तैः । तमो निरस्यन्रात्रिं विलोपयन्नित्यर्थः ॥ ३९ ॥ संस्थानं रचनाविशेषः । भूतानां ग्रामजनपदाद्यधिपानाम् ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम् ॥ यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥ ४१ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे प्रियव्रतविजयो नाम प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् ॥ १ ॥ स च कदाचित् पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्वी आराधयांबभूव ॥ २ ॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायंतीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥३॥ सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहंगममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारंडवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥ ४ ॥ तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥ ५ ॥

दाय ॥ ४० ॥ भौमं पातालजं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं महित्वं वैभवं यो निरयतुल्यं मेने। पुरुषानुजना विष्णुभक्तास्त एव प्रिया यस्येति ॥ ४१ ॥ इति पंचमे टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये प्रोक्तमाग्नीध्रचरित्रं स्त्रैणसंमतम् ॥ पत्न्यां हि पूर्वचित्त्यां यो नाभिमुख्यानजीजनत् ॥ १ ॥ अस्मिन्वंशे प्रसिद्धोऽयमाग्नीध्रः स्त्रैणपुंगवः ॥ विहसन्निव तस्येदं चरितं मुनिरब्रवीत् ॥२॥ जंबूद्वीपमोको यासां ताः प्रजाः पुत्रवत्पालयामास । धर्मावेक्षमाणः धर्ममवेक्षमाणो धर्मेणेत्यर्थः ॥१॥ पितृलोककामः पुत्रकामः । सुरवराणां वनितास्तासामाक्रीडाचलो मंदरस्तस्य द्रोण्याम् । आभृतानि संपादितानि परिचर्योपकरणानि पुष्पादीनि येन ॥ २ ॥ तदुपलभ्य ज्ञात्वा ब्रह्माऽभियापयामास संभोगार्थं प्रस्थापयामास ॥ ३ ॥ सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः । रमणीयत्वमेवाह । विविधाश्च निबिडाश्च ये विटपिनस्तेषां विटपाः शाखास्तेषां निकरास्तैः संश्लिष्टाः पुरटलताः स्वर्णवल्ल्यस्तास्वारूढाः स्थलविहंगमा मयूरादयस्तेषां मिथुनैः प्रोच्यमानाभिः श्रुतिभिरुच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथातथोपकूजिता नादिता अमला जलाशयास्तेषु कमलानि तेषामाकरमुपवनम् ॥ ४ ॥ सुललिते गमने ये पदविन्यासास्तैर्गतौ विलासो यस्याः । चकारस्तस्याश्चेत्येकवाक्यत्वाय । अनुपदं प्रतिपदम् । खणखणेति ध्वनिं कुर्वतो रुचिरस्य

निरयतुल्यं त्याज्यत्वेनेत्यर्थः । तत्र हेतुः पुरुषेति ॥ ४१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ स्त्रैणाः स्त्रीवशवर्त्तिनस्तेषां संमतमंगीकृतम् (१) स्त्रैणपुंगवः स्त्रैणशिरोमणिः । मुनिः श्रीशुकः । इवशब्देन कामिषु नाद्भुतं तदित्युक्तम् (२) संप्रवृत्ते सम्यग्नारदोपदिष्टप्रकारेण भगवद्भजने प्रवृत्ते सति । यद्वा—सम्यक्प्रवृत्तं प्रवृत्तिर्हरिभजने यस्य स संप्रवृत्तस्तस्मिन् । औरसो ब्राह्मप्राजापत्यार्षविवाहविधिगृहीतभार्योत्पन्नपुत्रः । इत्यर्थ इति । धर्मशब्दो नांतोप्यस्ति । यद्वा—द्वितीयातत्पुरुषः कार्योऽत्राऽऽर्ष इति भावः ॥ १ ॥ विश्वसृजां पतिं ब्रह्माणम् ॥ २ ॥ तत् पुत्रकामनया तपः ॥ ३ ॥ सा पूर्वचित्तिः । निबिडाः सांद्राः । विटपिनो वृक्षाः । ' पुरटं हेम दुर्वर्णम् ' इति । आदिना शुकादिग्रहः । आदिना मध्यमादिग्रहः । आदिना सारसादिग्रहः । आकरं खनिः ॥ ४ ॥ मुकुलमविकासितपुष्पम् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामेवाऽविदूरे मधुकरीमिव सुमनस उपाजिघ्रंतीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारक्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदमदांधमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पंदनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ॥ ६ ॥ श्लोकाः ॥ का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायाऽसि कापि भगवत्परदेवतायाः ॥ विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान् मृगयसे विपिने प्रमत्तान् ॥ ७ ॥

चरणाभरणस्य स्वनम् । आमीलिते नयने एव नलिनमुकुले तयोर्युगलमीषाद्विकचय्य किंचिदुन्मील्य व्यचष्ट ददर्श ॥ ५ ॥ तामेव देवीं मकरध्वजस्य वशमुपनीतः सन् जडवदिति ह वक्ष्यमाणान्दश श्लोकानुवाच । जाड्यानुकरणं च वैदग्ध्येन तद्वशीकारार्थम् । दिविजानां देवानां मनुजानां च यानि मनांसि नयनानि च तेषामाह्लाददुघैर्गत्यादिभिर्नृणां मनासि कामस्य विवरं प्रवेशद्वारं विदधतीम् । गतिश्च विहारश्च क्रीडाविनययुक्तोऽवलोकश्च सुस्वराण्यक्षराणि चावयवाश्च नेत्रादयस्तैर्निजमुखाद्विगलितममृतमिव स्वादु आसव इव मादकं च यत्सहासं भाषणं तस्मिन्नामोदो निःश्वासगंधस्तेन मदांधा ये मधुकरनिकरास्तैरुपरोध आवरणं तेन भयाद्द्रुतः शीघ्रो यः पदविन्यासस्तेन वल्गुस्पंदनं किंचिच्चलनं स्तनकलशयोः कबरभारे रशनायां च यस्यास्ताम् । तस्या अवलोकनेन विवृतावसरस्य दत्तावकाशस्य ॥ ६ ॥ का त्वं शैले गिरावस्मिन्किं चिकीर्षसि । मुनिवर्येत्यादि पुंस्त्वेन संबोधनादि जाड्यानुकरणार्थम् । हे मुनिवर्य नूनं भगवतः परदेवताभूतस्य मायाऽसि । भ्रुवावालक्ष्याह । हे सुहृत्सखे विज्ये निर्गुणे धनुषी बिभर्षि किमात्मनोऽर्थे तवैवाभ्यां किं कार्यमस्ति । किं वा प्रमत्तानजितेंद्रियान्मृगतुल्यानस्मदादीन्मृगयसे । तान्वशीकर्तुं धनुषी धारयसि

वैदग्ध्येन चातुर्य्येणाप्सरोमोहनार्थम् । आह्लाददुघैरानंदपूरकैः । कबरभारे केशसमूहे । रशना क्षुद्रघंटिका । रसनारशना चोभे क्षुद्रघंटिकाजिह्वारज्जुषु वर्त्तेते इति । भगवतः भगो योनिर्विद्यते निवासत्वेनास्येति भगवांस्तस्य 'भगे हि स्मरमंदिरे' इति कोशांतरोक्तेः ॥ ६ ॥ का त्वमित्युक्तेर्बाल्यमारभ्य तपस्यतः स्त्रीपुंविशेषज्ञानं नास्तीति द्योतयन्नाह–मुनिवर्येति । अहमिव त्वमपि तपोऽर्थमेवात्र तिष्ठसि किमिति भावः । किञ्च त्वं मुनिवर्यो भूत्वा मुनिं मां यन्मोहयस्यत्र किं कारणमिति क्षणं विभाव्य 'आः' ज्ञातमित्याह–मायासीति । भगवानेव परदेवता तस्या मायैव मुनिवर्यरूपेणात्र वर्त्तसे इति भावः । वस्तुतस्तु–मुनिरहं वर्यो वरणीयो यस्येति मुनिवर्योसि त्वं मद्वरणार्थमेवात्राऽऽगतोसीति भावः । यद्वा–शीलमेव शैलं मुनिवर्य्ये शैलं यस्यास्सा मुनिवर्यशैला तत्संबुद्धौ तथा । अप्सरसां मुनिवरणशीलत्वं स्वत एव प्रसिद्धमतस्तन्नान्यथा कार्यमिति भावः । काप्यनिर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाणाविमौ भगवतः शतपत्रपत्रौ शांतावपुंखरुचिरावतितिग्मदंतौ ॥ कस्मै युयुंक्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥ ॥ ८ ॥ शिष्या इमे भगवतः परितः पठंति गायंति साम सरहस्यमजस्रमीशम् ॥ युष्मच्छिखाविलुलिताः सुमनोभिवृष्टीः सर्वे भजंत्यृषिगणा इव वेदशाखाः ॥ ९ ॥ वाचं परं चरणपंजरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ॥ लब्धा कदंबरुचिरंकविटंकबिंबे यस्यामलातपरिधिः क्व च वल्कलं ते ॥ १० ॥ किं संभृतं रुचिरयोर्द्विज शृंगयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ॥ पंकोरुणः सुरभिरात्मविषाण ईदृग्येनाश्रमं सुभग मे सुरभी करोषि ॥ ११ ॥

त्यर्थः ॥ ७ ॥ कटाक्षावालक्ष्याह । बाणाविमौ शतपत्रे नेत्रकमले ते एव पत्राणि पिच्छानि ययोः । शांतौ विभ्रमेण मंथरौ पुंखाभ्यां विनापि रुचिरौ पत्रतया कल्पितनेत्राभ्यां परभागस्य पुंखस्थानीयस्याभावात् । अतितिग्मौ तीक्ष्णौ दंतावग्रभागौ ययोस्तौ कस्मै प्रयोक्तुमिच्छसीति न विद्मः अतो भयादेतावत्प्रार्थयामहे तवायं विक्रमोऽस्माकं क्षेमायास्तु ॥ ८ ॥ तदंगपरिमललोभेनानुगच्छतो भ्रमरानालक्ष्याह । शिष्या इति । अजस्रं संततं युष्मच्छिखातो विलुलिता विगलिताः सुमनसामभितो वृष्टीर्गलितानि कुसुमानि भजंतीत्यर्थः । शुद्धत्वेनोपमा वेदशाखा इवेति ॥ ९ ॥ नुपूरस्वनमाकर्ण्याह । वाचमिति । तुभ्यं तव चरणगतपंजरयोर्नुपूरयोस्तित्तिरीणामंतर्गत रत्नानां परं केवलं वाचं शृणुमः । कथंभूताम् । अरूपा अदृष्टवक्तृका मुखरा अतिप्रकटा च तां च तां च । पीतं परिधानवस्त्रं नितंबकांतित्वेन प्रकल्प्याह । कदंबकुसुमस्य रुचिर्दीप्तिरंकविटंकबिंबे नितंबस्य सुंदरमंडले क्व लब्धा । पाठांतरे अंगेति संबोधनम् । मेखलामालक्ष्याह । यस्यामलातपरिधिर्वर्तते । वस्त्रं नितंबकांतित्वेन प्रकल्प्य वस्त्रमदृष्ट्वैव पृच्छति । क्व च ते वल्कलमिति ॥ १० ॥ स्तनावालक्ष्याह । शृंगयोः स्तनयोः किं संभृतं किं पूर्णमस्ति । मनोहरं किंचिदस्तीत्येतावत्तु जानामि ।

चनीया कृपासीति भावः । इत्यर्थ इति । वयं तु स्वत एव त्वद्वशवर्त्तिन इति भावः ॥ ७ ॥ यदि प्रयोक्ष्यसे तर्ह्यनयोर्ज्वालया नैव जीविष्याम इति भावः ॥ ८ ॥ हस्तवारणलक्षणशिक्षायोग्यत्वाच्छिष्या इति भगवत इति पुंस्त्वनिर्देशः पूर्ववत् । ईशमीश्वरप्रतिपादकं बृहद्रथांतरादि साम । केचित्त्वीशेति संबुद्धिमाहुः । तत्र मन्मनोरथसंपादनसमर्थोसीति संबुद्ध्यभिप्रायः ॥ ९ ॥ पाठांतरे 'रुचिरंग विटंक' इतिपाठे ''विटंकः सुंदरे पक्षिनिवासेऽनंबुपर्वते'' इति निरुक्तिः । ''तित्तिरिर्नूपुरांतस्थरत्नपक्षिविशेषयोः । वक्रमार्गे यजुर्वेदशाखायामपि कथ्यते॥'' इति तीर्थः । ''वल्कं वल्कलमस्त्रियाम्'' इत्यभिधानात् । तुभ्यं त्वामानंदयितुम् । मुखरां पारस्परिककलहमयीम् । ब्रह्मन्निति । तव तपोयोगबलविलसितमेवैतदिति भावः । यस्यां पीतकांतौ अलातपरिधिर्ज्वलदंगारमंडलमहो ते तपस्तीव्रतेति भावः । क्व च वल्कलं ते इति । किं स्वाश्रम एव वल्कलं भ्रमादेवापहाय मन्निकटं नग्न एवायासीति भावः । भंग्या सुरतप्रार्थना च द्योतिता ॥ १० ॥ अन्यथा मनोहरत्वाभावे । इत्यर्थ इति । कष्टेन धारणमप्यनर्घवस्तुन एव भवति दृष्टिरपि सुंदरवस्तुन्यव पततीति द्वयमेवान्यथा न संभवतीत्याशयः । अत्र विश्वनाथः—हे द्विज शृंगयोः किं संभृतं किमद्भुतं बहुमूल्यरत्नं धृतं वर्त्तते यद्यस्मान्मद्दृष्टिपातसमय एव मुहुराच्छादयसीति भावः । ब्राह्मणो भूत्वापि शृंगद्वयं धत्से तत्रापि रक्षसि तत्रापि मनोहरमेव वस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसाऽवयवावपूर्वौ ॥ अस्मद्विधस्य मनउन्नयनौ बिभर्ति बह्वद्भुतं सरसरासुधादि वक्त्रे ॥ १२ ॥ का वात्मवृत्तिरदनाद्बहिरंग वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ॥ उद्विग्नमीनयुगलं द्विजपंक्तिशोचिरासन्नभृंगनिकरं सर इन्मुखं ते ॥ १३ ॥ योऽसौ त्वया करसरोजहतः पतंगो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ॥ मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लंपट एष नीवीम् ॥ १४ ॥

यतो मध्ये कृशोऽपि त्वं कृच्छ्रेण वहसि धारयसि । यत्र च मे दृशिर्दृष्टिः श्रिता संलग्नास्ति । अन्यथेदं द्वयं न घटत इति भावः । स्तनगतं कुंकुममालक्ष्याह । पंकोऽरुण आत्मनस्तव विषाणे श्रृंगे ईदृगत्यपूर्वः कुत इत्यत आह । येन पंकेनाश्रमं सुरभी करोषि सुगंधयुक्तं करोषीति ॥ ११ ॥ लोकं स्थानम् । यत्रत्यो जन उरसा इत्थम पूर्वावयवौ बिभर्ति । मनस उन्नयनौ क्षोभकौ । पाठांतरे "इत्थंभूतलक्षणे" तृतीया । वक्त्रे च बह्वद्भुतं बिभर्ति । किं तदाह । रसो मधुरालापो रासो विलासस्ताभ्यां सहिता सुधा अधरामृतमादिशब्दात्स्मितनर्मादिः ॥ १२ ॥ क्वा वा तव लोके आत्मनो देहस्य वृत्तिराहारः । अंग हे सखे अदनाच्चर्वणाद्बहिरिति तत्संबंधी गंधो वात्यागच्छति इति तांबूलाभिप्रायम् । अदनाद्बहिरंग भातीति पाठ मम तावद्भोजनाद्बहिर्भूतैव वृत्तिर्भातीत्यर्थः । यतस्त्वं विष्णोः कलाऽसि विष्णुश्च नाश्नाति । "अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः । विष्णोः कलासीत्यत्र हेतुः । तव च कर्णौ विष्णोरिवानिमिषोन्मकरौ अनिमिषौ रत्ननेत्रत्वेन निमेषशून्यावुल्लसंतौ मकरौ तदाकारे कुंडले ययोस्तौ । किं च तव मुखं सर इत्सर इव । तदेवाह । उद्विग्नं चंचलं मीनयुगलमिव नेत्रद्वयं यस्मिन् । द्विजा दंतास्तेषां पंक्त्या शोचिः शोभा यस्मिन् । सरसि तु द्विजा राजहंसाः । आसन्नो भृंगनिकर इव केशस्तोमः परिमललुब्धभृंगस्तोमो वा यस्मिन् ॥ १३ ॥ पतंगः कंदुको भ्रमतो भ्रमचित्तस्य मेऽक्षिणी एजयते

धत्से यतो मध्ये कृशोपि कृच्छ्रेणापि वहसि यत्र मद्दृष्टिर्लग्ना मद्दृष्टिरेवात्र प्रमाणमिति भावः । तेनाच्छादनमुद्घाट्य स्वयमेव दर्शयित्वा मत्संदेहमपाकुरु किं वा आज्ञापयसि चेत्सौहार्देनाहमेवोद्घाटयामि तपस्विनो मम वस्तुनि प्रयोजनं नास्ति केवलं दर्शन एवेति भावः । स्तनस्य श्रृंगत्वं तूच्चतातिशयविवक्षयैव । स्तनगतकुंकुममालक्ष्याह—आत्मनः स्वस्य विषाणे श्रृंगे ईदृक् पंको धृतः कस्य सरोवरस्य सुरभिररुणश्च पंकस्तमहमपि वक्षसि धित्सामीति भावः ॥ ११ ॥ अस्मद्देशे मनुष्योऽपि वक्षसि श्रृंगद्वयं धत्त इति चेत्तत्रैव गत्वा तपश्चिकीर्षामीत्याह—लोकमिति । हे सुहृत्तमेति सौहार्देनैवेति भावः । नन्वेते श्रृंगे न भवत इत्यत आह—यत्रत्यो जनः इत्थमुरसा वक्षसा । मनसोन्नयनाविति पाठे च तृतीयेत्थंभूतलक्षणे ज्ञेया ॥ १२ ॥ तांबूलगंधमनुभूतं व्यंजयन्नाह—हविरिति । इत्यर्थ इति । अन्नभुजां हि वलिपलितदौर्गंध्यादिकमस्ति तव तदभावात्तन्नास्तीति भावः । तत्र हेतुमाह—यतस्त्वमिति । अन्य ईश्वरः । अभिचाकशीति देदीप्यते इत्यर्थः । अन्यदाह—किंचेति । इदित्यव्ययमिवार्थे । तदेव सरस्तुल्यत्वमेवाह ॥ १३ ॥ न स्मरसि किमेतावांस्तव कंदुकक्रीडायामावेश इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ॥ चर्तुं तपोर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे॥१५॥ न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन् मनो दृगपि नो न वियाति लग्नम् ॥ मां चारुशृंग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरंतु शिवाः सचिव्यः ॥ १६ ॥ श्रीशुक उवाच ॥ इति ललनाऽनुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥ १७ ॥ सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षितमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जंबूद्वीपपतिना भौमस्वर्गभोगान् बुभुजे ॥ १८ ॥ तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नव पुत्रानजनयत् ॥ १९ ॥

चंचलतां नयति । वक्रकेशसमूहं मुक्तबंधनं न स्मरसि न संभावयसि किम् । कष्टो धूर्त्तोऽनिलो नीवीं हरत्येतन्न स्मरसि किम् ॥ १४ ॥ उपलब्धं प्राप्तम् । मह्यं मम । हे मम मित्र मया सह तपश्चर्तुमर्हसि । किंच स वै भवभावनः संसृतिविस्तारको ब्रह्मा मे प्रसीदति । त्वां भार्यां कल्पयतीत्यर्थः ॥ १५ ॥ द्विजदेवेन ब्रह्मणा दत्तम् । दृक् मनश्च लग्नं सन्नापयाति । हे चारुशृंगि यतस्ते चित्तं तत्र मां त्वदधीनं नेतुमर्हति । सचिव्यस्तव सख्योऽपि शिवा अनुकूलाः सत्यो मां प्रतिसरंत्वनुवर्ततां । यद्वा । एतावत्पर्यंतं मे याः सचिव्यः सख्यः शिवाः फेरवस्ताः प्रतिसरंतु निर्यातु । यद्वा । वनवासे सहचर्यो हरिण्यः शिवाः प्रतिसरंतु प्रदक्षिणं गच्छंतु ॥ १६ ॥ ग्राम्येषु वैदग्ध्यं यस्यास्तया परिभाषया वाचा । सभाजयामास पूजयामास संमुखी चकारेत्यर्थः ॥१७॥ बुद्ध्यादीनां द्वंद्वैक्यम् ॥ १८ ॥ १९ ॥

भावः ॥१४॥ तपस्विनो मम तपस्विसंगोऽपेक्षित एवेत्याह—रूपमिति । हे मम मित्रेति नहि भार्यासमं मित्रमित्यभिप्रेत्योक्तम् । इत्यर्थ इति । विना भार्यां सृष्टिवृद्धेरदृष्टत्वादिति भावः । तपोधनेति । मनस्संतापजननमेव तव धनमिति भावः ॥ १५ ॥ ननु त्वया मम किं फलं तदितो यामीति तत्राह । न त्वामिति । हे चारुशृंगीति । उन्नतस्तनीति स्त्रीलिंगेन संबोधनमतिकामवैवश्येनावहित्थाया नाशं द्योतयति । यतो यत्र देशे । ननु शिवानां तत्र किमानुकूल्यं तासामतीव विकृतध्वनित्वेन भयहेतुत्वादिति चेत्तत्राह—यद्वेति । निर्यातु आसां समक्षमपि त्वां भोक्तुं नाहमुत्सह इति भावः । सखीनां समक्षमपि भोगे सति दांपत्ये न दोषस्तदेव न जातमतः पुनराह—यद्वेति । प्रदक्षिणं गच्छन्तु मदभीष्टसाधकशकुनं कुर्वन्त्विति भावः ॥ १६ ॥ ललनानां युवतीनामनुनयेऽनुकूलीकरणेऽतिनिपुणः ग्राम्येषु विषयभोगेषु वाक्येषु वैदग्ध्यं पाटवं यस्या वाचस्तया तामप्सरसमधिसभाजयामासानुकूली चकार ॥ १७ ॥ ततो नृपत्यानुकूल्योत्तरम् । श्रियेत्यत्रैयडार्षः । पराक्षितमना आकृष्टचेताः । स्तेन राज्ञा । अयुतायुतं न्यर्बुदं भौमभोगान् नृपत्वे । स्वर्गभोगान्देवत्वे ॥ १८ ॥ तस्यां विप्रचित्याम् ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा सूत्वाऽथ सुतान् नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥ २० ॥ आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहनन बलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जंबूद्वीपवर्षाणि बुभुजुः ॥२१॥ आग्नीध्रो राजाऽतृप्तः कामानामप्सरसमेवानुदिनमधिमन्य मानस्तस्याः सलोकतां श्रुतिभिरवारुंध यत्र पितरो मादयंते ॥ २२ ॥ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमिति संज्ञा नवोदवहन् ॥ २३ ॥ इति श्रीभा० म० पंचम० आग्नीध्रचरितादिवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥

श्रीशुक उवाच ॥ नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमवहितात्माऽयजत् ॥१॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावयवाभिराममाविश्चकार॥२॥अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयांबरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाऽच्छूर्यमृतमणिगदादिभिरुपलक्षितम् ॥ स्फुटकिरणप्रवरमणिमयमुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥ ३ ॥

सूत्वा प्रसूय । उपतस्थेऽभजत् ॥ २० ॥ औत्पत्तिकेनैव स्वभावेन संहननं दृढांगत्वम् ॥ २१ ॥ कामानां भोगैः अध्यधिकं मन्यमानः । श्रुतिभिर्वेदोक्तैः कर्मभिः अवारुंध प्राप । मादयंते मोदंते ॥ २२ ॥ इत्येवंभूता संज्ञाः यासां ताः परिणीतवंतः ॥ २३ ॥ इति पंचमस्कंधे टीकायां द्वितीयोऽध्यायः ॥ २ ॥ तृतीये चरितं नाभेः परं मंगलमीर्यते ॥ यस्य यज्ञे प्रतीतः सन्पुत्रोऽभूदृषभो हरिः ॥ १ ॥ नाभिराग्नीध्रसुतः । अपुत्रया मेरुदेव्या भार्यया सह ॥ १ ॥ प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु । द्रव्यादयः सप्त ये योगा उपायास्तेषामुपपत्त्या संपत्त्या दुरधिगमो दुष्प्रापोऽपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः सन्नात्मानमाविश्चकार् । अपराजितं स्वतंत्रम् । निजभक्तानां येऽभिप्रेतार्थास्तेषां विधित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य । हृदयंगमं सुखकरम् । यतो मनोनयनान्यानंदयंति येऽवयवास्तैरभिरामं सुंदरम् ॥ २ ॥ अथहेत्यादिनिपातबाहुल्यं वाक्यालंकाराय । आविष्कृतं भुजानां युगलद्वयं चतुष्टयं येन । हिरण्मयं तेजोमयम् । पुरुषेषु विशिष्यत इति तथा । पुरु

अनुवत्सरं प्रतिवत्सरं, गृहे राज्ञो भवन एवापहाय अप्सरस्त्वात्तेषु वात्सल्यमपि पूर्वकृतं त्यक्त्वा ॥ २० ॥ अनुग्रहात्तदीयस्तनपानात् । आत्मतुल्यनामानि स्वतुल्यनामाक्षराणि । 'वर्षं खंडाब्दयोर्वृष्टौ' इत्यभिधानात् ॥ २१ ॥ सलोकतां समानलोकताम् । यत्र लोके तत्र पितॄणामधिकारित्वमस्तीति गम्यते । मादयन्ते 'मदी-हर्षे' अतः स्वार्थिकाणिचि लटस्तङ् । अप्सरोलोक एव पितृलोक इति तात्पर्यं ॥ २२ ॥ संपरेते मृते । मेरुसंज्ञप्रजापतेः पुत्रीः । देवर्द्धिमिति क्वचित्पाठः ॥ २३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ प्रतीतः प्रकटः (१) ॥ १ ॥ द्रव्यादयो विधानांताः सप्त ॥ २ ॥ अथाविर्भावानंतरम् । इत्यर्थ इति । क्षराक्षरातीतस्वरूपामिति भावः । श्रीवत्सस्यैव मुख्यचिह्नत्वम् "आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ" इति वक्ष्यमाणत्वात । 'ललामं चिह्नभूषयोः' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋत्विज ऊचुः॥ अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमोनम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान् प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥४॥ सकलजननिकायवृजिननिरसनाशिवतमप्रवरगुणगणैकदेशकथनादृते॥५॥ पीरजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वांकुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ॥ ६ ॥ अथानयाऽपि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ७ ॥

षोत्तममित्यर्थः। अर्हणेनार्घ्येण सहोपतस्थुरभजन्नित्यन्वयः। विलसन् श्रीवत्स एव ललामं चिह्नं यस्य। दरवरः शंखश्रेष्ठः।वनरुहं पद्मम्।अच्छूरि चक्रम्।अमृतमणिः कौस्तुभः। एवमादिभिरुपलक्षितम्। स्फुटकिरणा ये प्रवरा मणयस्तन्मयानि यानि मुकुटादीन्यंगानां भूषणानि तैर्विभूषितम्। बहुमाने दृष्टान्तः—अधना इवोत्तमधनं निधिम् ॥ ३ ॥ अर्हसीत्यादिना निगदेन स्तुवंति। हे अर्हत्तम परिपूर्णोऽपि त्वमनुपथानां भृत्यानामस्माकमर्हणं मुहुः स्वयमेव स्वीकर्तुमर्हसि न तु वयं स्तोतुं शक्ता इत्याहुः। नमोनम इत्येतावदेवास्माकं सद्भिरुपशिक्षितंत्वद्रूपस्य दुर्ज्ञेयत्वात्। तदेवाहुः। कोऽर्हतीति। प्रकृतिगुणानां व्यतिकरः प्रपंचस्तस्मिन्नेव मतिर्यस्यात एवानीशः। प्रकृतिपुरुषयोः परस्यात एवेश्वरस्यार्वाक्तनाभिस्त्वामस्पृशंतीभिः प्रपंचांतर्गताभिर्नाम च रूपं चाकृतिश्चाकारस्ताभिस्तव रूपनिरूपणं कर्तुं को नाम पुमानर्हति ॥ ४ ॥ स ह्येतन्मात्रमेवार्हति नाधिकमित्याहुः। सकलजननिकायस्य वृजिनं निरस्यंतीति तथा शिवतमाः प्रवराश्च ये गुणगणास्तेषामेकदेशस्तस्य कथनाद्विनाऽधिकं नार्हति ॥ ५ ॥ वाङ्मनसाऽगोचरोऽपि त्वं भक्तानां सुखाराध्य एवेत्याहुः। पारिजनेति। हे परम पारिजनैरनुरागेण विरचिता ये शबलसंशब्दा गद्गदाक्षरस्तुतयः सलिलं च सितकिसलयाश्च शुद्धपल्लवाः। शिलेति पाठे शिलं कुशादिमंजरी। एवमादिभिः संभृतया संपादितया पूजया परितुष्यसि ॥ ६ ॥ अथेति प्रकारांतरे। अन्यथा त्वनयेज्यया यागेनाप्युरुभारभरया

धराणिः। अच्छीत्यत् 'शूर शूरिरुभौ शूरे' इति कोशोक्तेः। शूरीणामत् अच्छूरि क्लीबत्वम्पूर्वत्वञ्चार्षम्। अमृतेन सहोद्भूतो मणिरमृतमणिर्मध्यपदलोपी समासः। आदिना रमांकादिग्रहः।कपिशेति। श्यामवर्णमिति बुध्यते 'पीतांशुकं वक्षसि लक्षितं श्रिया' इत्यत्र पीतांशुकपदेन ध्वन्यते श्यामवर्णतेति भागवतामृतोक्तेः। नूपुरं मंजीरम् ॥ ३ ॥ अर्हत्तमेति। यज्ञे त्वदितरामराणां पूज्यत्वेपि मुख्यपूज्यत्वं तवैवेति भावः। अत्र विश्वनाथः—यथा भक्तियोगस्तमनुवर्त्तमानानामनुपथानां न तु साक्षात्प्राप्तानां सकामत्वात्। तथाभूता येयेऽनुपथास्तेषामपि पूजां मुहुरर्हसि स्वीकर्त्तुं योग्योसि तव कृपालुत्वादेव न तु वयं योग्या इति भावः। अस्माकमनुपथत्वेप्येतावदेव लक्षणमस्ति नाधिकमित्याहुः। नमोनम इति। सतां सकाशाच्छिक्षितं न तु पूजापरिचर्यास्तुत्यादिकं जानीम इति भावः। ननु विद्वांसो मद्भक्ताश्च यूयं सर्वं जानीथैव तत्किं स्तोतुं संकुचथेति तत्राहुः—कोर्हतीति। मुखाद्यंगानां चंद्राद्युपमाभिस्तुतिर्भवति तव त्वर्वाक्तनाभिः प्रपंचांतर्गताभिर्नाम इंद्रनीलमण्यादिरूपं तच्छयामताकृतिस्तत्प्रतिमा ताभी रूपस्य निरूपणमपि कर्त्तुं कोर्हति स्तुतेर्वाक्यं तु दूरे वर्त्ततामित्यर्थः। तत्र कीदृशस्य प्रकृतिपुरुषयोरपि परस्य नहि प्रकृतिपुरुषातीतं रूपं प्राकृतेंद्रनीलमण्यादिभिः सदृशीकर्त्तुमुचितं न त्वप्राकृतपदार्थैरेव मद्रूपमुपमीयतां तत्राहुः—गुणव्यतिकरेति। प्राकृतजीवलोकस्याप्राकृतपदार्थेषु बुद्धिप्रवेशासंभवादिति भावः। अत एव भक्तवात्सल्यगुणानां केनाप्यंशेन कीर्त्तनमात्रं कर्तुमर्हतीत्याहुः ॥ ४ ॥ ५ ॥ हे परमेति। न हि परा सर्वोत्कृष्टा मा लक्ष्मीर्यस्य तस्य तवानल्पोपचारापेक्षास्तीत्यभिप्रायः ॥६॥ अस्माकं तु भक्तिर्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मन एवानुसवनमंजसाऽव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किं तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥८॥ तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥ ९ ॥ अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥ १० ॥ असंगनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपरममंगलायनगुणगणकथनोऽसि ॥ ११ ॥ अथ कथंचित् स्खलनक्षुत्पतनजृंभणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवंतु ॥ १२ ॥

ऽनेकांगसमृद्धयाऽपि भवतः समुचितमपेक्षितं प्रयोजनं नैव पश्यामः ॥ ७ ॥ अत्र हेतुः । आत्मनः स्वत एवानुसवनं सर्वदांजसा साक्षादव्यतिरेकेण समन्वयेन बोभूयमाना अतिशयेन भवंतो येऽशेषाः पुरुषार्थास्ते स्वरूपं यस्य परमानंदस्य । न चैवं सत्यपि यागानर्थक्यमित्याहुः । किं त्विति । सकामानामस्माकमेवैतदुपपद्यते न तवेत्यर्थः ॥८ ॥ स्वोपयोगमेव प्रदर्शयंति । तद्यथेति । परमेभ्योऽपि हे परमपुरुष प्रकर्षयुक्तया करुणया । उपकल्पयिष्यन्संपादयिष्यन् । चकारात्कामितं च । नापचितोऽपूजित एव पूजाऽनपेक्षत्वात्स्वयमेवोपलक्षितो दृष्टोऽसि इतरवत्सापेक्षवत् ॥ ९ ॥ यद्यपि त्वं वरान्दातुमाविर्भूतोऽसि । तथापि हे अर्हत्तम राजर्षेर्बर्हिषि यज्ञे निजपुरुषाणां त्वद्भक्तानामस्माकमीक्षणविषयो भवान् यर्हि यदा आसीत्तदा ह्ययमेव वरः संजातः ॥ १० ॥ दर्शनस्य दुर्लभतामाहुः । असंगेन वैराग्येण निशितं यज्ज्ञानं स एवानलस्तेन विधूता अशेषा मला येषाम् अतो भवत इव स्वभावो येषाम् । तानेवाहुः । आत्मारामाणामेवंभूतानां मुनीनामपि परममंगलायनं गुणगणकथनमेव न तु दर्शनं यस्य अतस्तैरनवरतं परिगुणिता अभ्यस्ता गुणगणा यस्येति संबोधनम् ॥ ११ ॥ दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयंते । अथेति । स्मरणाय विवशानां त्वां स्मर्तुमशक्तानां नः ॥ १२ ॥

स्तीत्यतः कथं ते परितोषो भविष्यतीत्याहुः । अन्यथा तु भक्तिं विना तु ॥ ७ ॥ अत्र प्रयोजनाभावे । व्यतिरेको विच्छेदस्तदभावोऽव्यतिरेकस्तेनेति वा । इत्यर्थ इति । अस्माकं तु सकामत्वेन पूजने प्रयोजनमस्ति तव सर्वथा परिपूर्णस्य पूजनं नापेक्षितमिति भावः ॥ ८ ॥ ननु तर्हि कथं संतुष्टोऽहं युष्मत्प्रत्यक्षीभूतोस्मीति तत्राहुः—तत्तस्माद्यथा बालिशानामज्ञानामपि समीपमनाहूतोप्यपजितोपि विज्ञः कृपावशात्तानुद्धर्तुमायाति तथैव त्वं परमेभ्योपि विज्ञेभ्योऽपि परमः प्रकृष्टः पुरुषः प्रकर्षयुक्तया निरुपाधिकया करुणया स्वमहिमानं स्वमैश्वर्यं तदनुभवमित्यर्थः । अपवर्ग इत्याख्या यस्य तं चकारात्कामितं वस्तु चोपकल्पयिष्यन्दास्यन्स्वयं नापचित एवास्मद्भक्त्यभावादपूजित एवेतरवद्यज्ञकौतुकदर्शीतरजन इव ॥ ९ ॥ यथा तथा भवतु तथापि यूयं वरं वृणुथेति चेत्तत्राहुः—अथायमिति । निजपुरुषाणां भक्तानामीक्षणविषयोपि राजर्षेर्यज्ञे य्याविरभूदयमेव वर इति । हे अर्हत्तमेति । अहो ते महत्वमिति भावः ॥ १० ॥ सर्वैरतिदुर्लभात्त्वद्दर्शनादप्यधिको वरो वरणीय इति मूढानामेव मतं न तु विज्ञानामित्याहुः । यद्वा—विधुताशेषसकामत्वमलानां भवत्येव स्वीयो भावो येषामत एवात्मनि त्वय्येव रममाणानाम् । अतो दर्शनाभावात्तैर्मुनिभिः ॥ ११ ॥ अस्माकं त्वस्थिरमनसामेतावत्त्वं भवत्वित्याहुः । अथेति । दर्शनानन्तरम् । स्खलनमकस्मात्पतनम् । क्षुतं छिक्का । पतनमुच्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवंतमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥ १३ ॥ को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्याऽनावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥१४॥ यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मंदानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषाम् ॥ १५ ॥ श्रीशुक उवाच ॥ इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह ॥ १६ ॥

अन्यच्च प्रार्थनीयमस्तीत्याहुः । किं चेति । आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति । प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य । अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावति ॥ १३ ॥ इदं च नातिचित्रमित्याहुः । इह संसारे तेऽपराजितया माययाऽनवसितपदव्याऽलक्षितमार्गयाऽपराजितः को वै न कोऽपि । अतस्तयाऽनावृतमतिः कः अत एव विषय एव विषं तस्य रया वेगास्तैरनावृता प्रकृतिर्यस्य । स कः । यश्चानुपासितमहच्चरणः । अतस्त्वन्मायया मोहितस्यैवमाशंसा घटत इत्यर्थः ॥ १४ ॥ अदभ्रकर्तः हे बहुकार्यकारिन् अल्पीयसे कार्याय त्वं यद्यस्मादिह समाहूतोऽसि तत्र प्रजायामर्थे धीर्येषां मंदानां तेषां नो यद्देवहेलनमवज्ञानं तत्सर्वान्प्रति तव साम्येन हेतुना प्रतिवोढुं सोढुमर्हसि ॥ १५ ॥ इति निगदेन गद्यात्मकस्तोत्रेण । वर्षधरो भारतवर्षपतिर्नाभिस्तेनाभिवादिता ये ऋत्विजस्तैरभिवंदितौ चरणौ यस्य ॥ १६ ॥

स्थलादधःपातः । जृम्भणमालस्येन गात्रस्फोटनपूर्वकं मुखप्रसरणम् । दुःखस्थानानि सिंहादियुतवनादीनि । आदिना दुःखनिमित्तादिग्रहः । गुणा वात्सल्यादयः । कृतानि कंसहननादीनि । नामानि नारायणादीनि । यद्वा—गुणैर्वात्सल्यादिभिः कृतानि नामानि भक्तवत्सलदीनदयाल्वित्यादीनि वनगोचराणि कथनविषयाणि ॥ १२ ॥ निवेदयितुमयोग्योप्यावश्यकत्वेनैवैकं निवेदयाम एवेत्याहुः । किञ्चेति । अयमस्मद्यजमानो राजर्षिरपत्यकामोऽपत्यं तु देवतांतरयजनेनापि भवति तदपि त्वां भगवन्तमुपधावति । ननु तदप्यहं स्वर्गापवर्गादिकमपि दास्यामीत्याशंक्याहुः । आशिषामैहिकानां स्वर्गापवर्गयोरीश्वरमप्युपधावति । अथ च प्रजायामेवार्थः पुरुषार्थः इति प्रत्ययो यस्य न त्वपवर्गादिषु यस्य स इति मौढ्यम् । न च तावतैव स्थितिः किन्तु भवादृशीमिति । धाष्टर्यश्च पश्येति भावः ॥ १३ ॥ इदं पुत्राद्याशासनं च । अतः पराजितत्वात् । अत एव आवृतमतित्वादेव । प्रकृतिः स्वभावः । अत अनुपासितमहच्चरणत्वात् । इत्यर्थ इति । राजर्षिरयमपि तादृश एवेति भावः । यद्वा पराजित इति ते इत्यस्य विशेषणम् । 'महतः परमव्यक्तम्' इत्युक्तेः परां मायां जयति तत् पराजित् तस्य क्विबंतं रूपम् ॥ १४ ॥ यजनस्य सकामत्वलक्षणमपराधं क्षमयंतः स्तोत्रमुपसंहरंति—यदुहेति । अदभ्रकर्त्तरिति । ब्रह्मादिदुर्लभमपि त्वद्दर्शनं सकामेभ्योप्यस्मभ्यमदा इति भावः । देवस्य तव हेलनं, सहने हेतुः सर्वान्प्रति यत्तव साम्यं तेन । देवदेवेति । देवानामपि देवत्वात्तवातीवमहत्त्वम् । "महांतो हि क्षमावंतः क्षुद्राः क्रोधादिसंयुताः" इत्याद्युक्तेरित्याह ॥ १५ ॥ "निगदमपरिमितवर्णमाख्यातांतमनेकधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्य आत्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद् द्विजदेवकुलम् ॥ १७ ॥ तत आग्नीध्रीयेंऽशकलयावतरिष्याम्यात्मतुल्यमनुपलभमानः ॥ १८ ॥ श्रीशुक उवाच ॥ इति निशामयंत्या मेरुदेव्याः पतिमभिधायांतर्दधे भगवान् ॥ १९ ॥ बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शायितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमंथिनां शुक्लया तनुवाऽवततार ॥ २० ॥ इति श्रीमद्भागवते म० पंचमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ २ ॥

असुलभत्वे हेतुः । ममाहमेवाभिरूपः सदृशः कैवल्याददद्वितीयत्वात् । द्विजेषु देवा इव ये ब्राह्मणास्तेषां कुलम् ॥ १७ ॥ आग्नीध्रीये नाभौ ॥ १८ ॥ पतिं नाभिम् ॥ १९ ॥ हे विष्णुदत्त तस्यावरोधायनेंतःपुरे मेरुदेव्यां शुक्लया शुद्धसत्त्वरूपया मूर्त्याऽवततार । केषां धर्मान् । वातरशनानां दिग्वाससाम्। पाषंडिव्यावृत्त्यर्थमाह । श्रमणानां तपस्विनाम् । ऋषीणां ज्ञानिनाम् । ऊर्ध्वमंथिनां नैष्ठिकब्रह्मचारिणाम् ॥ २० ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे टीकायां तृतीयोऽध्यायः ॥ ३ ॥ चतुर्थादित्रिभिः प्रोक्तमृषभस्येहितं महत् ॥ लोकार्थं येन सत्कर्म नैष्कर्म्यं च निदर्शितम् ॥ १ ॥ चतुर्थे शतपुत्रस्य राज्यं तस्योपवर्ण्यते ॥ यस्य राज्ये जनः सर्वः संतोषामृतनिर्वृतः ॥ २ ॥ अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्रांकुशादीनि यस्य । महाविभूतिः सर्वसंपत्तिः । साम्यादिभिः सह वर्धमानप्रभावम् । प्रकृतयोऽमात्यादयः । जगृधुरभिकांक्षंति स्म ॥ १ ॥ वर्ष्मणा देहेन । तस्य विशेषणद्वयम् । वरीयसा श्रेष्ठतमेन । बृहंतः श्लोकाः पद्यानि कवीनां यस्मिंस्तेन च । ओजस्तेजः । वीर्यं

ज्ञेयम् । मुक्तकचूर्णकवृत्तगंधोत्कलिकादिभेदतो द्विधः ॥" इत्युक्तलक्षणेन निगदेन । अनिमिषर्षभो देवश्रेष्ठो हरिः । इदं वक्ष्यमाणम् ॥ १६ ॥ अहो बतेति अद्भुतम् । अवितथगीर्भिरमोघवाग्भिः । "ब्राह्मणोस्य मुखमासीत्" इति श्रुतेः ॥ १७ ॥ ततो द्विजदेवोक्तेः ॥ १८ ॥ १९ ॥ यद्वा–शुचं शोकं लापयति नाशयतीति शुक्ला शुकं ज्ञानं लाति ददातीति वा शुक्ला 'शुक–गतौ । वातो वायुस्स एव रशना कटिसूत्रं येषां ते तथा । श्राम्यंति तपंतीति श्रमणाः । 'श्रमु–तपसि खेदे च' ऊर्ध्वमुपस्थोर्ध्वदेशे मंथंति रुन्धंति रेतो न तूपस्थदेश इत्यूर्ध्वमंथिनस्तेषां येषामुपस्थदेशे रेतः कदापि नायातीति भावः ॥ २० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ महत् श्लाघ्यम् । सत्कर्म वैदिकं कर्म (१) (२) अभिव्यज्यमानानि प्रकटीभूतानि । आदिना ध्वजशंखादिग्रहः । अमात्यादयः "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्यांगानि प्रकृतयः" इत्यमरः । उपशमः बाह्यांतरिंद्रियनिग्रहः ॥ १ ॥ वर्ष्मणादिहेतुना पिता यद्यपि 'उत्तरस्थः स्मृतः श्रेष्ठः' इति मेदिन्युक्तेः केवलर्षभशब्दस्य श्रेष्ठवाचकत्वं नास्ति तथाप्यत्रार्थमार्गेण तादृश एव भवति । यथोक्तं वर्ष्मणार्षभः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य हींद्रः स्पर्धमानो भगवान्वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥ ३ ॥ नाभिस्तु यथाऽभिलषितं सुप्रजास्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवंतं पुराणपुरुषं मायाविलसित मतिर्वत्स तातेति सानुरागमुपलालयन्परां निर्वृतिमुपगतः ॥ ४ ॥ विदितानुरागमापौरप्रकृति जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवंतं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ ५ ॥ यस्य ह पांडवेय श्लोकावुदाहरंति ॥ को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ६ ॥ ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मंगलपूजिताः ॥ यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ ७ ॥

प्रभावः । शौर्यमुत्साहः । एतैर्गुणैरतिश्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ २ ॥ तस्य वर्षे मंडले ॥ ३ ॥ अवरुध्य प्राप्य । स्वैरमिच्छया गृहीतो नरलोकसमानधर्मो मनुष्याकारो येन तम् । अत एव मायया स्वपुत्र इति विलसिता मतिर्यस्य ॥ ४ ॥ आपौरप्रकृति पौरान्प्रकृतींश्चाभिव्याप्य विदितोऽनुरागो यस्मिन् । कथंभूतो नाभिः । जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः।आत्मजं धर्ममर्यादारक्षणार्थमभिषिच्य। ब्राह्मणानामुत्संगे निधाय विशालायां बदरिकाश्रमे । प्रसन्नं परानुद्वेजकं निपुणं तीव्रं च तेन । उपासीनः सेवमानः कालेन तन्महिमानं जीवन्मुक्तिमवाप ॥५॥ नाभेस्तत्प्रसिद्धं कर्म । अनु तदनन्तरं को नु पुमानाचरेत् । न कोऽपीत्यर्थः ॥६॥ मंगलैर्दक्षिणाभिः

अत्रार्थे क्रियमाणे वर्ष्मर्षभ ओजऋषभ इत्यादिनामैव जायते इति । आर्षत्वात्केवलोपि वा श्रेष्ठार्थाभिधार्यांति॥२॥इंद्रस्पर्द्धा तु शतयज्ञविधायित्वादेव ‘क्रतुभिः शतक्रत्व इयाज’ इति वक्ष्यमाणत्वात् । अजऋषभो नाभिस्तात्पिता ताभ्यां रक्षितमजनाभमिति । वृद्धिस्तु पाक्षिकत्वान्न॥३॥ “सुप्रजास्त्वमंगिरसो वो अस्तु प्रतिगृह्णीत मानवं सुमेधस इति । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय” इति च श्रुतौ प्रसिद्धोऽयं प्रयोगोऽतोऽत्राशुद्धिर्नाशंक्याति । मायया पुत्रज्ञानेन विलसिता विकासिता मतिर्यस्य सः । ‘स्यान्माया शांबरीबुद्धयोः’ इति त्रिकांडशेषः ॥ ४ ॥ प्रमाणं राज्याभिषेक एव “पदं व्यवसितित्राणस्थानलक्ष्मांघ्रिवस्तुषु” इत्यमरः । समयानां सदाचाराणां या मर्यादा तस्या रक्षणे ब्राह्मणानामुत्कृष्टसंगे शास्त्रश्रवणादिरूपे निधाय त्वया हे पुत्र सर्वदा शास्त्रविद्ब्राह्मणसंगः कार्य इत्युक्त्वा “ विशालेन नृपतिना यतस्तप्तं विशेषतः । अतो विशाला सा प्रोक्ता बदरीवनमेदिनी ॥ ” इति वाराहे । “ समयः शपथाचारसिद्धांतेषु तथा धियि ” इति मेदिनी । “ सेतुः स्याद्वालमर्य्यादा जललंघनसाधने ” इति कोशात् । स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन्निति पूर्वाध्याय ऋत्विगाद्युक्तेस्तन्महिमानं मोक्षम् । यद्वा“मदीयं महिमानं परं ब्रह्मेति शब्दितम् ” इति श्रीमत्स्योक्तेः । परं ब्रह्मावापेत्यर्थः । उभयथैक एवार्थः संपद्यते परब्रह्मावाप्तेरेव मोक्षत्वात् ॥ ५ ॥ यस्य नाभेः संबंधिनौ । इत्यर्थ इति । तत्तुल्यस्यान्यस्याभावादिति भावः । शुद्धेन कर्मणा भक्तियोगेन । पांडवेयेति । त्वमप्यतिप्रसिद्धसुकर्मपांडुवंशोद्भूतत्वात्तादृश एवेति भावः ॥ ६ ॥ ‘ मंगलं भगवान्विष्णुः ’ इत्याद्युक्तेर्मंगलत्वेन विष्णुधिया पूजिताः । मंगलमिति भावप्रधाननिर्देशः । यद्वा—“ हिरण्यं दधि रत्नानि गावो भूमिश्च कन्यकाः । लाजास्तिला हरिद्रा च रोचनागुरुकुंकुमाः ॥ मंगलार्था इमे शब्दास्सितदूर्वा च मंगले ॥ ” इत्यभिधानाद्दक्षिणास्तुतिपाठादिभिरर्चिता ओजसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुंजन्नात्मजानामात्मसमानानां शतं जनयामास ॥ ८ ॥ येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद् येनेदं वर्षं भारतमिति व्यपदिशंति ॥ ९ ॥ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इंद्रस्पृग् विदर्भः कीकट इति नव नवतिप्रधानाः ॥ १० ॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायन आविर्होत्रोथ द्रुमिलश्चमसः करभाजनः ॥ ११ ॥ इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥ १२ ॥ यवीयांस एकाशीतिर्जायंतेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥ १३ ॥ भगवानृषभसंज्ञ आत्मतंत्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केवलानंदानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपाशिक्षयन्नतद्विदां सम उपशांतो मैत्रः कारुणिको धर्मार्थयशःप्रजानंदामृतावरोधेन गृहेषु लोकं नियमयत् ॥ १४ ॥

पूजिताः संतः ओजसा मंत्रबलेन ॥ ७ ॥ अन्येषां ग्रहणाय प्रदर्शितो गुरुकुलवासो येन । अनुशिक्षमाणोऽनुशिक्षयन् उभयविधं श्रुतिस्मृतिलक्षणं कर्मविधिमभियुंजन्ननुतिष्ठन् जयंत्यां भार्यायामात्मजानां शतं जनयामास ॥ ८ ॥ ९ ॥ तं भरतमनु कुशावर्तादयो नव पुत्रा नवतेः प्रधाना ज्येष्ठाः ॥ १० ॥ ११ ॥ तदनंतरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः । वसुदेवनारदयोः संवादो यस्मिन् । उपरिष्टादेकादशस्कंधे ॥ १२ ॥ महाशालीना अतिविनीताः ॥ १३ ॥ केवलः शुद्धः । विपरीतवदनीश्वरवत्कर्माणि कुर्वन् । नियमयत् नियमितवान् । पाठान्तरे नितरामरमयत् । कर्मकरणे हेतुः । अनुगतमुत्सन्नं धर्मं स्वयमाचरणेनातद्विदामुपशिक्षयन् । कथम् ।

तपोबलेन ' नासाध्यं तपसा किञ्चित् ' इत्युक्तेः । यज्ञेशं यज्ञफलदं विष्णुं तन्नेत्रगोचरी चक्रुः । तत्र हेतुमाह—विप्रा इति । विशेषेण प्रांति निजार्चकाभीष्टं पूरयंतीति विप्राः विपूर्वकात् प्रा पूरण इति धातोः " आतश्चोपसर्गे " इति कः । ' समीहितार्थार्पणकामधेनवः ' इति स्मृतेः ॥ ७ ॥ अन्येषां ग्रहणाय शिक्षणाय यद्यहं गुरुसेवापूर्वकं शास्त्राध्ययनं करिष्ये तदान्येपि तथा करिष्यंतीति बोधनायेत्यर्थः । लब्धवरैः प्राप्तदक्षिणैः " विद्यां श्रुत्वा ये गुरुं नाद्रियंते प्रत्यासन्नाः कर्मणा वा धनैर्वा । तेषां पापं भ्रूणहत्याविशिष्टं तेभ्यो लोके पापकृन्नैव चान्यः ॥" इति भारतोक्तेर्विना गुरुदक्षिणादानं गृहे न गंतव्यमिति भावः । सम्यगाम्नायेन ब्राह्मणोपदेशेनाम्नातमभ्यस्तम् । " आम्नायो निगमेपि च उपदेशेपि" इति मेदिनी ॥ ८ ॥ येषां शतानां मध्ये येन भरतेनाधिकृतत्वाद्भारतनाम्ना कथयंति ॥ ९ ॥ कुत्रचित् ब्रह्मावर्तादग्रे आर्यावर्त इति पाठमंगीकृत्य मलयकेतुरित्येकं नामेत्युक्तम् । पूर्वत्र तु भेदेन नामद्वयमुक्तं तत्कल्पभेदेन ध्येयम् ॥ १० ॥ ११ ॥ १२ ॥ ब्राह्मणा यजनयाजनाध्यापनादिविप्रकर्मनिष्ठत्वेन तच्छब्दवाच्याः । वस्तुतो ब्राह्मणप्रसादावाप्तब्राह्मणभावाः । यद्वा—युगांतरे ब्राह्मणकर्मणा क्षत्रियादेरपि ब्राह्मणता भवति " कलौ ब्राह्मणता वीर्योत्तपश्चर्यादिना नहि " इति वारतंतव्युक्तेः । यवीयांसः कनिष्ठाः " युवाल्पयोः कनन्यतरस्याम् " इति कनादेशाऽभावे " स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः " इति पाणिनिशासनात् ॥ १३ ॥ पाठांतरे न्यरमयदिति पाठे । अतद्विदामिति । द्वितीयार्थे षष्ठी । धर्ममवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १५ ॥ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जन
तामनुशशास ॥ १६ ॥ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥ १७ ॥ भगवतर्षभेण परि
रक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृंभितस्नेहाति
शयमंतरेण ॥ १८ ॥ स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयंतीनामात्मजानवहितात्मनः प्रश्र
यप्रणयभरसुयंत्रितानप्युपशिक्षयन्निति होवाच ॥ १९ ॥ इति श्रीभागवते म० पंचमस्कंधे ऋषभदेवानुचरितं ना० चतुर्थोऽध्यायः ॥ ४ ॥ ऋषभ
उवाच ॥ नायं देहो देहभाजां नृलोके कष्टान्कामानर्हते विड्भुजां ये ॥ तपो दिव्यं पुत्रका येन सत्त्वं शुध्येद्यस्माद्ब्रह्मसौख्यं त्वनंतम् ॥ १ ॥

धर्मादीनामवरोधेन संग्रहेण आनंदो भोगः । अमृतं मोक्षः ॥ १४ ॥ शीर्षण्यः श्रेष्ठस्तेनाचरितम् । तत्तदनुवर्त्तते यतः ॥ १५ ॥ सकलो धर्मो यस्मिंस्तद्ब्राह्मं गुह्यं वेद
रहस्यम् । यद्यपि स्वेनैव विदितम् । तथाऽपि ब्राह्मणान् पृष्ट्वैव करोतीत्यर्थः ॥ १६ ॥ द्रव्यादिभिरुपचितैर्यज्ञैरिष्टवान् । तत्र वयो यौवनम् । युवैव धर्ममन्विच्छेदिति वचनात् ।
विविधोद्देशा नानादेवतोद्देशाः । यथोपदेशं यथाविधि ॥ १७ ॥ अन्यस्मात्सकाशादात्मनः कश्चिदपि किमपि कथंचनापि न वांछति । इच्छानुदये दृष्टान्तः । अविद्य
मानं खपुष्पादिकमिव । न चान्यदीयमवेक्षतेऽपीत्यर्थः । भर्तरि ऋषभदेवे प्रतिक्षणमुल्लसितस्नेहोद्रेकं विनाऽन्यन्न वांछति ॥ १८ ॥ अवहितात्मनः संयतचित्तानपि प्रजानु
शासनार्थमुपशिक्षयन्निति ह वक्ष्यमाणमुवाच ॥ १९ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भावार्थदीपिकायां टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे मोक्षधर्मोपदेशैः
पुत्रानुशासनम् ॥ उक्तं पारमहंस्यं च तस्य द्वंद्वतितिक्षया ॥ १ ॥ विड्भुजामपि ये संति तान्कष्टान्दुःखदान्कामान्विषयान्नार्हति तद्योग्योऽयं मनुष्यदेहो न भवति । दिव्य

दुष इत्यर्थः ॥ १४ ॥ १५ ॥ इत्यर्थ इति । ''यो पृष्ट्वा ब्राह्मणं धर्मं कुरुते तद्भवेन्मुधा'' इति स्मृतिसिद्धयर्थं ब्राह्मणमपृष्ट्वा न किञ्चिद्धर्मादिकार्यमिति लोकशिक्षणार्थं वेति भावः ॥ १६ ॥ द्रव्याणि व्रीह्यादीनि ।
देश आर्यावर्त्तादिः । कालो वसंतादिः ॥ १७ ॥ १८ ॥ अटमानोऽटितुकामः । शानजत्र ताच्छीलिकार्थः । निशामयंतीनां शृण्वंतीनाम् । प्रश्रयो नम्रता । प्रणयः स्नेहस्तयोर्भरेणाधिक्येन सुयंत्रितान्वशी
कृतानपि ॥ १९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ तस्यर्षभस्य (१) पुत्राणां तत्त्वोपदेशव्याजेन लोकहिताय सकलशास्त्रसारभूतं तत्त्वं निरूपयत्यस्मिन्न
ध्याये तत्रादौ विषयसेवा मुमुक्षुणाऽवश्यं वर्जनीयेत्याशयेनाह—नायमिति । कामान् योषिद्दर्शनस्पर्शनादीन् । कुतो नार्हते ये विड्भुजां श्वशूकरादीनामपि संति कामार्हत्वे तु मनुष्यदेहशूकरदेहयोस्तुल्यतापत्तेरिति भावः । तेन
शूकरादिदेहेन यन्न लभ्यते तदेव मनुष्यदेहेन लब्धुं यतनीयं तदेव मनुष्यत्वचिह्नं तर्त्किं तत्राह--तप इति । तच्चानाहारवर्षातपसहनादिकं वृक्षादीनामपि वर्त्तते तद्व्यावृत्त्यर्थमाह दिव्यमप्राकृतं भगवत्संबंधीत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगम् ॥ महांतस्ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये ॥ २ ॥ ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु ॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ३ ॥ नूनं प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आपृणोति ॥ न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥ ४ ॥ पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ॥ यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबंधः ॥ ५ ॥

मुत्कृष्टम् । येन तपसा । यस्माच्छुद्धात्सत्त्वादनंतं ब्रह्मसुखं भवति ॥ १ ॥ मोक्षबंधयोर्निदानमाह । महत्सेवामिति । तमसः संसारस्य द्वारं योषितां ये संगिनस्तेषां संगम् । महतां लक्षणमाह सार्धेन । महांत इति । साधवः सदाचाराः ॥ २ ॥ मयि ईशे कृतं सौहृदमेवार्थः पुरुषार्थो येषाम् । वाशब्देनान्यनिरपेक्षस्यैवास्य लक्षणत्वं दर्शयति । देहं बिभर्तीति देहंभरा विषयवार्तैव न धर्मविषया येषु तेषु जनेषु जायादियुक्तेषु गृहेषु च । रातिर्मित्रं धनं वा पाठांतरे जायादिप्रदेषु । यावदर्थाश्च यावदर्थमेवार्थो येषामिति मध्यमपदलोपी समासः । देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः ॥ ३ ॥ कामान्नार्हतीति यदुक्तं तदुपपादयति । नूनमिति । यद्यदा इंद्रियप्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन्विकर्म पापं नूनं कुरुते यतो विकर्मणः प्राचीनादयम् असन्नपि नश्वरोपि क्लेशदो देहो जातस्तस्यैव पुनःकरणं साधु न मन्ये ॥ ४ ॥ देहादेर्नश्वरत्वात्क्रियानयमनर्थ इत्याशंक्याह । पराभवो देहादिना स्वरूपाभिभवोऽज्ञानकृतस्तावद्भवति । तत्र हेतुः । यावत्क्रियाः स्युस्तावदिदं मनो हि कर्मस्वभावमेव स्यात् । येन कर्मात्मकेन

हे पुत्रका इति । कृपायां कन् । कृपाविषयत्वाद्युष्मानहं शास्मीति भावः । 'सत्त्वं द्रव्ये गुणे जीवे धैर्येन्तःकरणे सति' इति निरुक्तिः ॥ १ ॥ मनुष्यदेहादेवोद्धारोऽधःपातश्च भवतीति तयोः कारणमपि मनुष्यदेहेस्तीत्याह-महदिति । विमुक्तेर्विविधमुक्तेः । 'ब्रह्मसौख्यं ह्यनंतम्' इति पूर्वोक्तेर्ब्रह्मसौख्यस्य च निर्विशेषसविशेषब्रह्मसंबंधित्वेन द्वैविध्यान्मुक्तिरपि सायुज्यं भक्तिमत्पार्षदत्वं चेति द्विविधा विशब्दाव्याख्येया । महान्तोऽपि द्विविधा ब्रह्मोपासका भगवदुपासकाश्च तेषां लक्षणं तंत्रेणैवाह—समचित्ता अभेददर्शिनः अकुटिलचित्ताश्च । मा लक्ष्मीस्तया सहितः समो नारायणस्तत्रचित्ता इति वा । प्रशांताः प्रशमादियुक्ताः प्रकृष्टं शं येन स प्रशो भक्तियोगस्तत्रांतो निश्चयो येषां ते तथा वा । 'यद्वा–मन्निष्ठता बुद्धेः' इत्युक्तेर्भगवन्निष्ठधिय इत्यर्थः । विमन्यव इत्यादिविशेषणत्रयमुभयत्र तुल्यार्थम् । साधवः परदोषाग्राहिणः ॥ २ ॥ उत्तरेषामसाधारणं लक्षणं पुनराह—य इति । मत्प्रीतेरन्यद्वस्तु ये पुरुषार्थं न मन्यंते इत्यर्थः । देहंभराणां भोजनपानाद्यासक्तानां या वार्त्ता जीविका कथा वा ताभिरेव ये दीव्यंति तेषु जनेषु वा । पाठांतरे 'रातिदेषु' इति पाठे । ननु तर्हि किमर्थं तेषु तिष्ठंतीत्यत्राह—यावद्भिरेव धनादिभिरर्थो मत्पादसेवात्मिका भक्तिर्भवेत्तावंत एवोपादेया येषां ते तावदादिपदानां वृत्तावंतर्भावस्तेन तावदुपादेय इत्यादेर्लोपोपि सिद्ध इति । इत्यर्थ इति । तथा च तेषां गृहवासो न दोषाय "नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः" इति श्रीवामनोक्तेरिति भावः ॥ ३ ॥ तमोद्वारं योषितां संगिसंगाद्देहिन एवाधःपातः स्यात्तं दर्शयति—शोचते च । विकर्म परदारादिग्रहणं देहः कीदृश आत्मनो जीवस्यासन्नपि मिथ्याभूतोऽपि । "असंगो ह्ययं पुरुषः" इति श्रुतेः ॥ ४ ॥ तर्हि पुण्यं कर्त्तव्यमिति चेन्न तस्यापि संसारहेतुत्वेन क्लेशदत्वात् । तस्मात्पुण्यपापयोर्निरासकं ज्ञानमेवाभ्यसनीयमित्याह—पराभवः कर्मपारतंत्र्यं तदेव जीवस्य बंधः स चाज्ञानकृतस्तावदेव भवति यावन्न जिज्ञासत इति । "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इति श्रीगीतोक्तेः । यावच्च ज्ञानं नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने ॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥ यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ॥ गतस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥ ७ ॥ पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः ॥ अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ॥ ८ ॥ यदा मनोहृदयग्रंथिरस्य कर्मानुबद्धो दृढ आश्लथेत ॥ तदा जनः संपरिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ॥ ९ ॥ हंसे गुरौ मयि भक्त्याऽनुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च ॥ सर्वत्र जंतोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १० ॥

मनसा ॥ ५ ॥ उक्तमुपसंहरति । एवं पूर्वकृतं कर्म कर्तृभूतं मनः कर्मभतं वशं प्रयुंक्ते पुनः कर्मनिष्ठं करोतीति । जीवन्मुक्तकर्मव्यावृत्त्यर्थमाह । अविद्ययेति । अविद्यया आत्मनि उपधीयमाने आच्छाद्यमाने सति । एवं मनः कर्तृ पुरुषं कर्मवशं प्रयुंक्त इति वा ॥ ६ ॥ न केवलं देहयोगमात्रमनर्थांतरं चेत्याह । यदा गुणानामिन्द्रियाणामीहां चेष्टामयथा मिथ्या आत्मीया न भवतीति विपश्चिद्विवेकी सन्न पश्यति । 'नु पश्यति' इति पाठे अयथा आत्मीयत्वेनेत्यर्थः । तत्र तदा सहसा गतस्मृतिः स्वरूपस्मृतिशून्यः सन्नज्ञो मूढो मैथुनसुखप्रधानं गृहं प्राप्य तापान्विंदति ॥ ७ ॥ ननु यथोपयोगं स्त्रिया मिथुनीभूय सुखमात्रमनुभवतः कुतस्तापाः स्युस्तत्राह । पुंस इति । प्रत्येकं तयोरेकैको हृदयग्रंथिरस्त्येव । एतं मिथः परस्परं स्थूलमन्यं हृदययोर्ग्रंथिं दुर्भेदं वदंति । कुत इत्यत आह । अतोऽस्मान्मिथुनीभावात् । प्रत्येकं हृदयग्रंथिना तु देहेंद्रियमात्रेऽहंममेति मोहोऽस्मात्तु गृहादिभिर्विषयभूतैर्महान्मोहो भवेदित्यर्थः ॥ ८ ॥ कदा तर्हि तस्य निवृत्तिरत आह । यदाऽस्य जनस्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रंथिः शिथिलो भवेत्तदाऽस्मान्मिथुनीभावान्निवर्तते । ततश्च हेतुमहंकारं त्यक्त्वा मुक्तः सन्परं पदं याति ॥ ९ ॥ हेतुमतिहायेत्युक्तं तत्र पंचविंशतिसाधनान्याह चतुर्भिः । हंसे मयि गुरौ भक्तिः

द्भवेत् तावत्कर्माणि न नश्यंति यावत्क्रियाः पुण्यपापकर्माणि स्युस्तावदिदं मनः कर्मात्मकं कर्मस्वभावमेव स्यात् ॥ ५ ॥ येन प्रकारेण मनः कर्मात्मकं स्यात्तमाह—कर्म प्राचीनमर्वाचीनं वा । एवमनेन प्रकारेण मनः कर्मात्मकं स्यात् यद्वस्तु यदधीनं स्यात्तच्च तदात्मकमेव भवेदित्यर्थः । आत्मनि जीवे । उपधीयमाने युज्यमाने सति । उपधिरुपाधिर्लिंगं तदध्यासात्तद्रूपी क्रियमाण इत्यर्थः । किं च सर्वकर्मनिर्मूलीकरणी भक्तिरेवेत्याह-प्रीतिरिति । स्नेहलक्षणा भक्तिः प्रीतिः ॥ ६ ॥ इत्यर्थ इति । गुणचेष्टामात्मीयां पश्यतीति भावः । अत्र विश्वनाथः—एवं च भक्तिमिश्रस्य ज्ञानस्य परिपाकदशायामेव नैष्कर्म्यं न त्वपरिपाकदशायामित्याह—यदा गुणेषु शब्दादिष्वर्थेषु । ईहां वाञ्छाम् अयथामनर्थरूपाम् । विपश्चित् ज्ञानवानपि न पश्येत् । 'यदानुपश्यति' इति पाठे गुणानामिंद्रियाणामीहां चेष्टामयथा ममात्मन एव चेष्टेत्यर्थः । तत्र तदा सहसा गतस्मृतिः संस्तापान्विंदति मैथुनार्हमगारं प्राप्य त्वतितापानित्यर्थः ॥ ७ ॥ इंद्रियचेष्टानामात्मीयत्वाभिमननसद्भावेऽपि स्वकुटुंबसंगवतो यथा मोहस्तथा तद्रहितस्य नेत्याह—पुंस इति । प्रत्येकं तयोरेकैकं ग्रंथिर्यथा ममेयं स्त्रीत्येकोयं ग्रंथिस्तदुपरि ममायं पतिरिति द्वितीयो ग्रंथिस्तेन पुंसा वैराग्येण त्यक्तुमिष्टोऽपि स्त्री न तं त्यजतीति बंधस्य गाढत्वम् । उपलक्षणमेतत्पितृपुत्रादेरपीति । कुटुंबराहित्ये तु वस्त्रासनपात्रादिष्वात्मीयत्वेनाभिमानसद्भावेऽपि मिथो ग्रंथ्यभावान्न तादृशो बंध इति भावः । इत्यर्थ इति । अहं गृही मम गृहमित्येवं महामोहो भवेदिति भावः । यत्तु कुटुंबी शुचौ देशे इत्याद्युक्त्वा 'न स पुनरावर्त्तते' इति श्रुत्या कुटुंबिनोऽपि पुनरनावृत्तिलक्षणमुक्तिरुक्ता तत्प्रायिकाभिप्रायेण । "ब्रह्माद्या याज्ञवल्क्याद्या मुक्ताः स्युः स्त्रीसहायिनः । बध्यंते केचनैतेषां विशेषं च विदो बुधाः ॥" इति तीर्थोक्तेः ॥ ८ ॥ ९ ॥ भक्तिमिश्रज्ञानेन लिंगभंगमुक्त्वा ज्ञानमिश्रया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्कर्मभिर्मत्कथया च नित्यं मद्देवसंगाद् गुणकीर्तनान्मे॥निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः॥ ११॥अध्यात्मयोगेन विविक्तसेवया प्राणेंद्रियात्माभिजयेन सध्र्यक् ॥ सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचाम् ॥१२॥ सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ॥ योगेन धृत्युद्यमसत्त्वयुक्तो लिंगं व्यपोहेत् कुशलोऽहमाख्यम् ॥ १३ ॥ कर्माशयं हृदयग्रंथिबंधमविद्ययाऽऽसादितमप्रमत्तः ॥ अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ॥ १४ ॥ पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ॥ इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ॥ कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥ १५ ॥

सेवा । अनुवृत्तिस्तत्परता । विगततृष्णया । सर्वत्र लोकांतरेऽपि व्यसनावगत्या दुःखानुसंधानेन । ईहानिवृत्त्या काम्यकर्मत्यागेन ॥१०॥ मदर्थैः कर्मभिः । अहमेव देवो येषां तैः संगात् । हे पुत्राः देहगेहयोरात्मबुद्धेरहंममेति बुद्धेः ॥ ११ ॥ अध्यात्मयोगेनाध्यत्मशास्त्राभ्यासेन सध्र्यक् सम्यगिति सर्वत्र संबन्धः । असंप्रमादेन कर्तव्यस्यापरित्यागेन ॥ १२ ॥ सर्वत्र मद्भावो मद्भावना तत्र विचक्षणेन निपुणेन विज्ञानविराजितेनानुभवपर्यंतेन ज्ञानेन योगेन समाधिना धृत्युद्यमसत्त्वयुक्तो धैर्यप्रयत्नविवेकैर्युक्तः सन्नहंकाराख्यमुपाधिं व्यपोहेन्निरस्येत् ॥ १३ ॥ ततः साधनादुपरमेदित्याह । कर्माण्याशेरते यस्मिन् । योगेनोपायेन । यद्यपि फले सिद्धे साधनोपरमः सिद्ध एव । तथापि यावद्देहपातं तदभ्यासशंकावारणायोक्तम् ॥ १४ ॥ किं च । पुत्रान्पिता शिष्यान्वा गुरुर्नृपश्च प्रजा एवमनुशिक्षयेत् मम लोकं यः कामयते । यद्वा । मदनुग्रह एवार्थो यस्य । विमन्युः शिक्षितस्याकरणेऽपि कोपशून्यः । अतज्ज्ञांस्तत्त्वमविदुषः । श्रेयोबुद्ध्या कर्मसु मूढान् । अन्यथोपदेशे प्रत्यवायमाह । मनुजः काम्यकर्मसु पुरुषं योजयन्

च भक्त्या पंचविंशत्यंगया लिंगमाह चतुर्भिः । तत्रापि शुद्धभक्तानां केवलयैव भक्त्या पंचदशांगया लिंगभंगमाह प्रथमद्वाभ्याम् । हंसे परमहंसस्वरूपे । जिज्ञासया भक्तेर्भजनीयेश्वरस्य वेति शेषः । तपसा एकादशी कार्त्तिकादिव्रतलक्षणेन विष्णुवैष्णवसेवानिबंधनस्वीयभोजनशयनादिसंकोचलक्षणेन वा " आत्मनो विहितं कर्म वर्जयित्वान्यकर्मणः । काम्यस्य वा परित्यागो निरीहेत्याहुरुत्तमाः ॥" इति तीर्थोक्तिमालक्ष्योक्तं काम्यकर्मपरित्यागेनेति ॥ १० ॥ अहं देव उपास्यो येषां तैः संगात् । निर्वैरमद्वेष्टृत्वम् । साम्यमन्यस्य सुखदुःखयोः स्वसुखदुःखसाम्यभावना । उपशमः क्रोधाद्यभावः । देहगेहादिष्वात्मीयत्वबुद्धित्यागासामर्थ्येपि त्यागेच्छया । एतादृशकर्मभिरेव पूर्वपावनरूपपुत्रशब्दार्थश्चरितार्थो भवतीत्यभिप्रायेणाह–हे पुत्रा इति ॥ ११ ॥ १२ ॥ अनुभवजनकत्वमेव ज्ञानस्य विराजनमिति भावः ॥ १३ ॥ ततः अहमाख्योपाधिनिवृत्तेरनंतरम् । साधनात् लिंगभंगसाधनात् । यथोपदेशं योगेन गुरूपदेशमनतिक्रम्य यो योग उपायस्तेन न तु पांडित्यबलात् । पुस्तकदर्शनमात्रादेव स्वोत्प्रेक्षितेन विरमेदिति लिंगव्यपोहनार्थमेव विरमेत् न तु तत्पदार्थज्ञानार्थमित्यर्थः । तदर्थं तु भक्तिं कुर्वीतैव । तदुक्तं " ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समस्सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ॥" इति । तत्पदार्थानुभवसिद्धेऽपि भक्तेः सर्वथैवात्यागः । ' आत्मारामाश्च मुनयः ' इत्यादिप्रमाणाद्व्याख्येय एवेत्यतो भक्तिभिन्नादुपायादुपरमेदिति केचिदाहुः ॥ १४ ॥ एवं भक्तेर्गुणभावमंतर्भूतं कैवल्यं चोक्त्वा भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः ॥ अन्योऽन्यवैरः सुखलेशहेतोरनंतदुःखं च न वेद मूढः ॥१६॥ कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामंतरे वर्तमानम् ॥ दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथांधम् ॥ १७ ॥ गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ॥ दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥१८॥ इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ॥ पृष्ठे कृतो मे यदधर्म आराद‌तो हि मामृषभं प्राहुरार्याः ॥ १९ ॥

गर्ते संसारकूपे तं पातयति स मनुजः कमर्थं पुरुषार्थं लभेत । न कमपीत्यर्थः ॥ १५ ॥ न योजयेदित्येतदुपपादयति । लोक इति त्रिभिः । नष्टदृष्टित्वे हेतुः । य इति । निकाममतिशयेन कामो यस्य ॥ १६ ॥ तमीदृशं कुबुद्धिं दृष्ट्वा तत्रैव कस्तं प्रवर्तयेन्न कोऽपि । उत्पथेन गच्छंतमंधं यथा तेनैव गच्छेति को ब्रूयात् ॥ १७ ॥ समुपेतः संप्राप्तो मृत्युः संसारो येन तम् । ततो भक्तिमार्गोपदेशेन यो न मोचयेत्स गुर्वादिर्न भवतीत्यर्थः । यद्वा यस्तं मोचयितुं न शक्नुयात्स तस्य गुर्वादिर्न स्यादिति निषेधः । ततश्च पिता न स्यादिति पुत्रोत्पत्तौ यत्नो न कार्य इत्यर्थः । दैवं देवता न स्यादिति पूजा न ग्राह्येत्यर्थः । एवमन्यदपि द्रष्टव्यम् ॥ १८ ॥ एवं मोक्षधर्मानुपादिश्य भ्रातृशुश्रूषणलक्षणं धर्मं स्पर्धादिनिवृत्तये तेषां जन्मकथनपूर्वकमाह द्वाभ्याम् । इदं मनुष्याकारं शरीरं मम दुर्विभाव्यमवितर्क्यं मदिच्छाविलसितम् । न त्वहं प्राकृतो मनुष्य इत्यर्थः ।

क्तेरुपदेष्टापि कृतार्थः स्यादित्याह—पुत्रानिति । कर्मैव कुरुतेति नोपदिशेत् । 'जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरेत्' इति तु ज्ञानोपदेष्टृविषयं न तु भक्त्युपदेष्टृविषयमिति ज्ञेयम् । विहितकर्माचरणाधीन चित्तशुद्धिं विना ज्ञानानुत्पत्तेस्तत्र कर्मकरणस्यावश्यकत्वं भक्तेस्तु स्वत एव चित्तशोधनहेतुत्वान्न तत्र कर्मापेक्षेति तत्त्वम् । यद्वा—अथ वा मल्लोककामनया मदनुग्रहप्रयोजनेन वेत्यर्थः । इत्यर्थ इति । प्रत्युत ज्ञानचक्षूरहि तस्याधःपातहेतुकाम्यकर्मोपदेष्टृत्वेन स्वस्यापि नरकपातः स्यादिति भावः ॥ १९ ॥ अर्थान् भोग्यपदार्थान्दृष्टानदृष्टांश्च । न केवलं पुरुषार्थानवाप्तिरपि तु दुःखावाप्तिश्च स्यादित्याह—अन्योन्येति ॥ १६ ॥ १७ ॥ एवं भक्तेरुपदेष्टारमभिनंद्य तदनुपदेष्टॄणां गुरुत्वबन्धुत्वाद्यभावं तद्धेतुकं तेषां त्यागं चाभिव्यंजयति—गुरुर्नेति । इत्यर्थ इति । तं त्यजेदित्यर्थः । ननु गुरुं कृत्वा पुनस्त्यागेऽपि दोष एव । वस्तुतस्तु—परमार्थानुपदेष्टृगुरुत्यागे दोषो नास्ति तथापि "अन्ते रंडाविवाहश्चेदादावेव कुतो न सः" इति न्यायेन तादृशो गुरुरेव न कार्य इत्याह—यद्वेति । इत्यर्थ इति । नाहं पुत्रोद्धरणसमर्थ इति विमृश्येति भावः । इत्यर्थ इति । यो देवोप्यसमर्थो मोचने तं न पूजयेदिति भावः । अन्यत्स्वजनजनन्यपि मोचनासमर्थं स्वजनं मातरं च तथाविधां स्वजनबुद्ध्या मातृबुद्ध्या च नाश्रयेदिति भावः । अत्र विश्वनाथः-यो न मोचयेद्भक्तिमार्गोपदेशेन स गुर्वादिर्न भवेत् । बलिः शुक्रमिव तं गुरुं त्यजेदेव तस्य प्रणत्यनुवृत्त्याद्यभावेऽपि न प्रत्यवायी स्यादिति भावः । एवं विभीषणो रावणमिव तं स्वजनम् । प्रह्लादो हिरण्यकशिपुमिव तं पितरम् । श्रीभरतः कैकेयीमिव तां जननीम् । खट्वांग इंद्रादिकमिव तद्दैवम् । याज्ञिकब्राह्मणीयाज्ञिकविप्रमिव तं पतिं च त्यजेदेवेत्यर्थः । यद्वा-स्यादिति विधिलिङ्गा यस्तं मोचयितुं न शक्नुयात्स तस्य गुर्वादिर्न स्यात्प्रणत्यनुवृत्त्यादिकं न गृह्णीयाद्यदि गृह्णीयात्तर्हि प्रत्यवायी स्यादिति तेन च यदि मोचयितुं न शक्नुयात्तर्हि गुरुर्भवितुमन्यं शिष्यं न कुर्यात् । स्वजनो भवितुं बंधुतां न दध्यात् । पिता भवितुं पुत्रोत्पत्तौ न यतेत जननी भवितुमन्यं गर्भे न दध्यात् दैवं भवितुं पूजां न गृह्णीयात् पतिर्भवितुं पाणिं न गृह्णीयादिति द्योतितम् ॥ १८ ॥ यस्य भक्तिः कर्त्तव्या स क भगवांस्तथा भक्तिप्राप्त्यर्थं भागवतसेवा चापेक्षणीयेति क वा स भागवत इति युष्माकमल्पोपि प्रयासो नास्ति यतो गृहे एव भगवानहं वः । पिता तथैव गृह एव भागवतोऽयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसममुं सनाभम्॥अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २० ॥ भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ॥ ततो मनुष्याः प्रमथास्ततोऽपि गंधर्वसिद्धा विबुधानुगा ये ॥ २१ ॥ देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम् ॥ भवः परः सोथ विरिंचवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥ २२ ॥ न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं तु ॥ यस्मिन्नृभिः प्रहुतं श्रद्धयाऽहमश्नामि कामं न तथाऽग्निहोत्रे ॥ २३ ॥

मे हृदयं तु सत्त्वम् । किं तद्धृदयम् । यत्र धर्मस्तत् । शुद्धं सत्त्वमित्यर्थः । कुतः । यद्यस्मान्मयाऽधर्मो दूरादेव पृष्ठे कृत उत्सारितः अत एव मामृषभं श्रेष्ठं प्राहुः ॥ १९ ॥ भवंतश्च हृदयेन शुद्धसत्त्वमयेन जातास्तस्मान्मत्सरं हित्वा महत्तमं सनाभं सोदरं भजध्वम् । ननु त्वत्पुत्रत्वात्त्वां वयं भजेम राजपुत्रत्वात्प्रजाश्च पालयेमेति चेदत आह । तदेव मे शुश्रूषणं प्रजानां च पालनम् । भरतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः ॥ २० ॥ इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह पंचभिः । भूतेषु चेतनाचेतनेषु । विरोहंतीति वीरुधः स्थावरा उदुच्चैरतिशयेनोत्तमाः तेभ्योऽपि ये सरीसृपाः सर्पंतीति जंगमास्ते उदुत्तमा इति सर्वत्रानुषंगः । तेष्वपि सबोधा निष्ठा स्थिति र्येषां पश्वादीनां ते कीटकादिभ्यः । ततस्तेष्वपि मनुष्याः । ततोऽपि प्रमथा भूतप्रेतादयः । ततोऽपि गन्धर्वाः । ततः सिद्धाः । ततोऽन्ये विबुधानुगाः किन्नरादयः ॥ २१ ॥ तेभ्योऽसुराः । देवा असुरेभ्यः । संधिरार्षः। देवाश्च मघवत्प्रधानाः। देवेभ्य इंद्रः श्रेष्ठ इत्यर्थः । ततोऽपि ब्रह्मसुता दक्षादयः । तेषां मध्ये भवः परः श्रेष्ठः । स भवो विरिंचवीर्यो विरिंचो वीर्यं शक्तिः कारणं यस्य स विरिंचवीर्यः अतस्तज्जनकत्वाद्विरिंचस्ततः पर इत्यर्थः ॥ स विरिंचो मत्परः अहं परो यस्य । द्विजदेवाः ब्राह्मणा एव देवाः पूज्या यस्य सोऽहम् ॥ २२ ॥ ब्राह्मणैरन्यद्भूतं न तुलये समं न पश्यामि । अतो ब्राह्मणात्परं तु भूतं किं पश्यामि न किंचित् । विप्रा इति तत्रत्यानां ब्राह्मणानां संबोधनम् ।

वो भ्राता वर्तत इत्याह-इदमिति । इत्यर्थ इति। चिद्वस्तुनस्तत्त्वस्य यन्मूर्त्तत्वमेतदेव दुर्विभाव्यत्वमन्येषां पृथिव्यादीनां तत्त्वानां दुर्विभाव्यत्वाभावादिति भावः। हि निश्चितं यत्र मे धर्मः मत्प्रापको भक्तियोगस्तत्रैव मे हृदयं मनः 'साधवो हृदयं मह्यम्' इति मदुक्तेः । मे अधर्मो मद्धर्मभिन्न इत्यर्थः । आराद्दूरत एव पृष्ठे कृतः ततः पराङ्मुखोऽहं तत्र न मे मन इत्यर्थः । अतो हेतोर्द्धर्मस्वीकाराधर्मत्यागरूपाद्धेतोः ॥ १९ ॥ हृदयेन उरसा जाता अत एव पुत्रा औरसा उच्यंते भरतं भजध्वम् । ननु जायात्मजरातिमत्सु न प्रीतियुक्ता इत्यनेन स्वसंबंधिभक्तिस्त्याजितैव सा पुनः कथमुपदिश्यते तत्राह—महीयांसमिति । 'महत्संगं द्वारमाहुः' इत्यादिना महतां संग उपदिष्टस्तेषामपि मध्ये श्रेष्ठमित्यर्थः । अक्लिष्टबुद्ध्येति । भ्रातृत्वेन तुल्यैरस्माभिः कथमयं भजनीय इति व्यवहारदृष्टिर्न कार्येति भावः । अत्राक्षिपंति—नन्विति । भक्तिहेतुत्वेन नारदादीन्महतः सेवेमहि । इति भाव इति । ज्येष्ठानुवृत्त्या राष्ट्रभेदाद्यभावेन भरतं शुश्रूषद्भिर्भवद्भिरपि प्रजापालनमनुष्ठितं मम शुश्रूषणं च कृतमित्याशयः॥२०॥तेष्वपि जंगमेष्वपि । ततस्तदनु । तेषु पशुष्वपि । भूतादयो रुद्रगणत्वात् । गंधर्वा देवगायकत्वात् सिद्धा देवकार्यसाधकत्वात् । किन्नरादयोऽद्भुतमूर्त्तित्वात्॥२१॥तेभ्यः किन्नरादिभ्यः । असुरास्तपोनिष्ठतया ब्रह्माराधकत्वात् । इत्यर्थ इति । देवराजत्वादिति भावः । अतो विरिंचवीर्यत्वात् । इत्यर्थ इति । ततो रुद्राद्ब्रह्मा श्रेष्ठस्तत्पितृत्वादिति भावः । अत्र द्विजेषु दीव्यंति तप आदिना द्योतंते इति द्विजदेवा विप्रास्त एव देवा देववत्पूजनीया यस्य स तथा मत्तोपि ब्राह्मणाः पूज्या इत्यर्थः ॥ २२ ॥ अन्यद्भूतं स्थावरजंगमादिशरीरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धृता तनूरुशती मे पुराणी येनेह सत्त्वं परमं पवित्रम्॥शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षाऽनुभवश्च यत्र ॥२४॥ मत्तोप्यनंतात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित् ॥ येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजाम् ॥२५॥ सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि ॥ संभावितव्यानि पदेपदे वो विविक्तदृग्भिस्तदुहार्हणं मे ॥ २६ ॥ मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि ॥ विना पुमान्येन महाविमोहात्कृतांतपाशान्न विमोक्तुमीशेत् ॥ २७ ॥

समस्यैवाभावादधिकं कुतस्त्यमित्यर्थः । तत्र हेतूनाह सार्धाभ्याम् । यस्मिन् ब्राह्मणे श्रद्धया प्रकर्षेण हुतमन्नादि कामं यथेच्छमहमश्नामि ॥ २३ ॥ मे तनूर्मूर्तिर्वेदाख्या येन ब्राह्मणेनेह लोके धृता यत्र च ब्राह्मणे सत्त्वादयोऽष्टौ गुणाः संति ततः परं किं पश्यामीत्यन्वयः ॥ २४ ॥ निःस्पृहत्वमाह । मत्तोऽपि येषां न किंचित्प्रार्थनीयमस्ति तेषामितरेण राज्यादिना किमु स्यान्न किमपि ॥ २५ ॥ तदेवं ब्राह्मणसंमानं विधायेदानीं सर्वभूतसंमानं विधत्ते सर्वाणीति । हे सुताः सर्वाणि जंगमानि स्थावराणि च भूतानि मदधिष्ठानतया वो युष्माभिः संमाननीयानि । पदेपदे क्षणेक्षणे । विविक्ता पूता मत्सरादिरहिता दृष्टिर्येषां तैः । तदेव ममार्हणम् ॥ २६ ॥ सर्वकर्मणामीश्वरार्पणं विधत्ते । मनोवचोदृशामन्येषां च करणानामीहितस्य व्यापारस्य मे परिबर्हणमाराधनमेव साक्षात्कृतं फलम् । येन परिबर्हणेन विना कालपाशाद्विमोक्तुं न ईशे न समर्थो भवेत् ॥ २७ ॥

तत्रत्यानां सभाशालागतानाम् । इत्यर्थ इति । सर्वेश्वरस्यापि मम पूज्यदेवत्वात् 'ब्रह्म दैवं परं हि मे' इति सनकादीन्प्रति मदुक्तेरिति भावः । तत्र ब्राह्मणाधिक्ये । यस्मिन्ब्राह्मणे इति । ब्राह्मणद्वारैव मत्तृप्तिः स्यान्नान्यथेति "विप्राशितं देवा अश्नंति विप्राशितं पितरोऽश्नंति विप्राशितं देवदेवो विष्णुरश्नाति" इति श्रुतेः । तत्रापि श्रद्धया पादशौचासनार्चनादिकपूर्वयाऽन्यथा "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" इति गीतोक्तेः । कर्मानर्थक्यं स्यादिति ॥२३॥ ननु "ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम्" इत्युक्तेरग्नेरपि तादृक्त्वात्को विशेषो ब्राह्मणे तत्राह–धृतेति । पुराणी अनादिनिधना । परमं पवित्रं सत्त्वं शुद्धं सत्त्वमित्यर्थः । सत्यं यथार्थभाषणं समदर्शनं वा अनुग्रहः परदुःखप्रहाणेच्छा अनुभवो भगवद्रूपसाक्षात्कारः ॥ २४ ॥ द्विजदेवत्वे कारणविशेषमाह–मत्त इति । येषां ब्राह्मणानां मद्भक्तिं विना न किंचिदपेक्षणीयमित्याह–ओं वासुदेव एव किञ्चन येषां तेऽकिञ्चनास्तेषामत एव मयि भक्तिं कुर्वताम् । यद्वा–अहंतास्पदममतास्पदयोर्मह्यमेव दत्तत्वान्न विद्यते किञ्चनापि येषां मयि भक्तिः प्रेमा तामेव भजतां प्रतिक्षणं प्राप्नुवतामित्यर्थः । अत एव ते नित्यं तथा बुभूषुभिराराध्या इति भावः ॥ २५ ॥ स्पर्द्धावज्ञादिदोषशान्त्यर्थं सर्वभूतसंमानमपि विधत्ते । चराणि जंगमानि ध्रुवाणि स्थावराणि । हे सुता इति । पुत्रत्वाद्भवद्भ्य इदमतिगुह्यमुक्तमिति भावः । तदेव मम मुख्यं पूजनं न तु केवलप्रतिमादिपूजनं "सर्वभूतेषु मद्भावो मनोवाक्कायकर्मभिः । इदं ममार्चनं मुख्यं न प्रतीकादिपूजनम्" इति भगवदुक्तेः ॥ २६ ॥ समासेन भक्तेर्लक्षणं ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २८ ॥ जडांधमूकबधिरपिशाचोन्मादकवद्दवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥ २९ ॥ तत्रतत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखंडितमनाः पृथिवीमेकचरः परिबभ्राम ॥ ३० ॥

स्वत एव सुशिक्षितानपि लोकानुशासनार्थमनुशास्य मुनीनां पारमहंस्यधर्ममुपशिक्षयिष्यन्भरतमभिषिच्य ऋषभ इत्यपदेशो नाम यस्य स भगवान् ब्रह्मावर्तात्स्वदेशात्प्रवव्राजेत्यन्वयः । उर्वरितोऽवशिष्टः शरीरमात्रपरिग्रहो यस्य ॥ २८ ॥ अभिभाष्यमाणोऽपि जनानां मध्ये जडादिवद्वर्तमानस्तूष्णीं बभूव । अवधूतस्येव वेषो यस्य ॥ २९ ॥ तत्रतत्र पुरादिष्वनुपथं मार्गेमार्गेऽवनिचरापसदैर्दुर्जनैस्तर्जनादिभिः परिभूयमानोऽपि तदविगणयन्नेवैकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः । तत्र पुरं पत्तनम् । ग्रामा हट्टहीनाः । आकरः खनिः । खेटः कृषीवलग्रामः । वाटः पुष्पादिवाटिका । खर्वटः पर्वतप्रांतग्रामः । शिबिरं सेनाया वासस्थानम् । व्रजो गवां स्थानम् । घोषो गोपानां स्थानम् । सार्थो यात्रिकजनसंघातः । आश्रम ऋषीणाम् । तर्जनं भयजननम् । ताडनं प्रहारः । अवमेहनमुपरिमूत्रणम् । ष्ठीवनं फूत्कृत्य श्लेष्मप्रक्षेपः । ग्राव्णां शकृतो रजसश्च प्रक्षेपः । पूतिवातोऽधोवायुः । दुरुक्तं शापः एतैः । अगणने दृष्टांतः मक्षिकाभिरिवेति । तत्र हेतुः । असति मिथ्याभूते संस्थाने सांनिवेशे देह इत्युपलक्षणमाकारो यस्य । सदित्यपदेशमात्रं यस्य तस्मिन् । निरभिमानत्वात् । केन हेतुना । उभयोः सदसतोर्योऽनुभवस्तत्स्वरूपेण यत्स्वमहिम्न्यवस्थानं तेन । अत एवाविखं

ताश्च विना निस्ताराभावश्चोपपादयन्नुपसंहरति–मन इति । यद्वा–मे साक्षात्कृतं साक्षान्मत्संबंधित्वेन यत्करणं प्रवृत्तिस्तदेव मे परिबर्हणमाराधनमित्यर्थः ॥ २७ ॥ गगनपरिधानो दिगंबरः । आत्मनि स्वस्मिन्नेवारोपित आहवनीयोऽग्निविशेषो येन स तथानेन प्रव्रज्या लक्ष्यते । "आत्मन्यग्नीन्समारोप्य न्यस्ताग्निः प्रव्रजेत्ततः" इत्युक्तेः ॥ २८ ॥ २९ ॥ तत्र पुरादिषु तत्रैवागगत एव । असत्संस्थान इत्यादिकं लोकशिक्षणाय व्यंजनमात्रम् । "इदं शरीरं मम दुर्विभाव्यं तत्त्वम्" इत्याद्युक्तेरिति संदर्भः । किञ्च–ऋषभदेवदेहस्य वक्तृपरोक्षत्वादेतच्छब्दवाच्यत्वं न घटेत तस्मादेवं व्याख्येयम् । एतस्मिन् जगति नश्वरत्वादसत्संस्थाने समष्टित्वेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुंदरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकंठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः परागवलंबमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ॥३१॥ यर्हि वाव स भगवाँल्लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥ ३२ ॥

डितं मनो यस्य स परिबभ्राम ॥३०॥ स च तदा ग्रहगृहीत इवादृश्यत । तत्र हेतुः । पराक् पुरतोऽवलंबमानाश्च ते कुटिलाश्च ते जटिलाश्च कपिशाश्च केशास्तेषां भूरिभारो यस्य सः । अवधूतमनादृतमत एव मलिनं निजशरीरं तेन । कथंभूतोऽप्येवमदृश्यत । अतिसुकुमाराणि करचरणोरःस्थलानि तथा विपुला बाह्वादयस्त एवावयवास्तेषां विशिष्टो न्यासः संनिवेशो यस्य सः । तथा प्रकृत्यैव सुंदरः स्वभावसिद्धो हासस्तेन शोभनं मुखं यस्य । तथा नवनलिनदलवदाचरती ये शिशिरतारे तापहारिकनीनिके अरुणे आयते नयने ताभ्यां रुचिरः । तथा सदृशा अन्यूनाधिकाः सुभगाश्च कपोलकर्णकंठनासिका यस्य । तथा विगूढस्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुरांगनानां मनसि काममुद्दीपयन् । एवंभूतोऽपि तथादृश्यतेत्यन्वयः ॥ ३१ ॥ यर्हि यदा लोकं जनं योगस्य प्रतिपक्षमाचक्षाणः पश्यन्बभूव । तस्य प्रतिक्रियाकरणं कर्म च निंदितमित्याचक्षाणस्तदाऽऽजगरं व्रतमास्थितः सन् शयान एवाश्नाति स्मेत्यन्वयः । आजगरं व्रतं नाम एकत्रैव स्थित्वा प्रारब्धकर्मोपभोगः । अवमेहति मूत्रयति । हदति पुरीषमुत्सृजति । उच्चरिते पुरीषे चेष्टमानो विलुठन् तेनैवादिग्धा आलिप्ता उद्देशा देहप्रदेशा यस्य सः ॥ ३२ ॥

देहमुपलक्षयतीति जगदपि प्राकृतं स्वदेहस्तस्मिन्निरभिमानत्वादिति । तर्जनादिकृज्जनसमुदायवतो जगतः स्वदेहत्वेनाभिमाने हंतहंत एतादृशमहदपराधदोषदुष्टो जगदात्मको मद्देह इति खेदेन मनः खंडितं स्यात् । अतः स्वमहिम्नि चिन्मयानंदे यदवस्थानं तेन हेतुना । तत्र देहे निरभिमानत्वात् । कीदृशेन उभयोश्चिच्छक्तिमायाशक्त्योः स्वीयस्वरूपास्वरूपत्वाभ्यां योनुभवस्तेन यत्स्वमहिमावस्थानं तेन ॥ ३० ॥ स च ऋषभदेहः तत्र गृहगृहीततुल्यत्वे । कुटिला वक्राः । जटिला ग्रथिताः । कपिशाः श्यावाः । अत एवानादृतत्वादेव ॥ ३१ ॥ इमं देहम् । प्रतीपं क्षुत्पिपासालोकोपद्रवाद्यैर्विक्षेपकारणैः प्रतिकूलम् । इवेत्यारूढयोगानां प्रायः प्रातिकूल्याभावात् । एकत्रेति । एकत्रावस्थाने सति परिचितत्वादेर्लोकोपद्रवाद्यधिकं न स्यादिति भावः । यद्वा—योगस्य समाध्यादेः प्रतिपक्षं लोकानामत्रा गमने वार्त्तालापादिना योगभ्रंशो भविष्यतीति विचार्य पुनस्तस्य लोकागमनादेः अन्यकर्तृकप्रतिकूलाचरणस्य वा प्रतिक्रियाकरणं तद्वारणं यथैतेऽत्र नागच्छेयुस्तच्च कर्म वीभत्सितं भ्रष्टाचरणरूपं निंदितमेव तत्स्वीकारेणैते स्वयमेव मत्पार्श्वे नागमिष्यंति निंदिताचारवानयमे तत्पार्श्वे न गंतव्यमित्यामृश्येतीत्यत एतदेव मया स्वीकार्यमित्याचक्षाणः पश्यन्नाजगरं व्रतमास्थितवानिति भावः ॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य ह यः पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सुरभिं चकार ॥ ३३ ॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥ ३४ ॥ इति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेनाभ्यनंदत् ॥ ३५ ॥ इति श्रीभागवते म० पं० ऋषभदेवानुचरिते पंचमोऽध्यायः ॥ ५ ॥
राजोवाच ॥ न नूनं भगव आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हंति यदृच्छयोपगतानि ॥ १ ॥

बीभत्समिवाशंक्याह । तस्येति । पुरीषस्य सुरभिणा गंधेन सौगंध्यं यस्य स वायुः ॥ ३३ ॥ एवं गवादिचर्यया पानादि करोति स्म । तदेवाह । व्रजन्नित्यादिना । काकमृगगवामिवान्यदपि चरितं वृत्तिर्यस्य ॥ ३४ ॥ नानायोगचर्या आचरतीति तथा । लोकयात्रापरिहाराय योगिभिरेवं वर्तितव्यमिति प्रदर्शनाय तथा कृतवान् । वस्तुतस्तु भगवान्यतोऽविरतः परममहानुत्तरोत्तरशतगुणत्वेनोक्तो य आनंदस्तदनुभवस्वरूपः । किं च वासुदेवे आत्मनोऽव्यवधानेनाभेदेन न विद्यतेऽन्येषामिवांतरा मध्ये उदरस्य देहोपाधेर्भावस्तेन । नित्यनिवृत्तोपाधित्वेनेत्यर्थः । स्वत एव सिद्धैः समस्तैरर्थैः फलैः परिपूर्णत्वाद्योगैश्वर्याणि नाभ्यनंदत् । वैहायसं खेचरत्वम् । मनोजवं मनस इव देहस्य वेगम् । दूरग्रहणं दूरदर्शनम् । हे नृप हृदयेन मनसा ॥ ३५ ॥ इति श्रीमद्भागवते पंचमे टीकायां पंचमोऽध्यायः ॥ ५ ॥ ॥ षष्ठे लीनाभिमानस्य देहत्यागक्रमाभिधा ॥ प्रदहंतं दवाग्निं यः पश्यन्नपि न पश्यति ॥ १ ॥ योगैश्वर्याणि नाभ्यनंददित्युक्तं तत्र पृच्छति । नेति । भगव हे भगवन् योगेन समीरितमुद्दीपितं यज्ज्ञानं तेनावभ

तस्य चिन्मयशरीरस्यैतदतिबीभत्सितमेवेति चेद्वस्तुतस्तन्नास्तीत्याह—तस्येति । किं च—यद्यपि " मलमूत्रादिरहिताः पुण्यश्लोकाः प्रकीर्त्तिताः " इत्युक्तेर्भगवत ऋषभस्य पुरीषोत्सर्गाद्येवासंभावितं तथापि योगभ्रंशप्रतीकारार्थमेव तदा तथा दर्शितम् । न वस्तुतस्तस्मिंस्तदस्तीति ज्ञेयम् । ननु सौगंध्ये बीभत्सता न संभवति कथमुक्तं बीभत्सितमिति चेदत्रेदं बोध्यम्—सौगंध्येऽपि पुरीषस्यास्पृश्यत्वादिना बीभत्सतैवेति । सुगंधिस्तु तत्र समागतसिद्धिपरित्यागादिनाऽमर्त्त्यीयत्वादिति ज्ञेयम् । अत्र व्याख्याने इवशब्दस्यानुल्लेखादिवशब्दरहित एव पाठः स्वामिसंमत इति भाति दृश्यते च सर्वत्रेवशब्दः स च स्वरूपावस्थितस्यान्यकर्तृकप्रतिकूलाचरणं वस्तुतो न संभवतीति सूचनार्थः । यद्वा—प्रतिक्रियाकरणं बीभत्सितं निंदितं योगशास्त्रनिषिद्धमिति यावत् । विक्षेपजनकत्वादिति भावः ॥ ३३ ॥ अन्यदपि गमनशब्दादिरूपं चरितम् ॥ ३४ ॥ " शतगुणत्वेन तस्यैवानंदस्य मात्रामुपजीवंति " इत्यादिश्रुतावुक्तो य आनंदस्तत्साक्षात्कारविग्रहः । कैवल्यपतिरित्यन्येभ्योपि कृपया यः कैवल्यं ददाति तस्येयं लीला ध्येयैव न तु चिकीर्षणीयेति । अन्यदद्भुतमाह—किं चेति । भगवानपि भगवति वासुदेवे वसुदेवनंदने तस्यैव सर्वावताराणामाराधनीयत्वात् । यदुक्तं भीष्मेण " अस्यानुभावं भगवान्वेद गुह्यतमं शिवः । देवर्षिर्नारदः साक्षाद्भगवान्कपिलो मुनिः॥ " इति ईश्वरबाहुल्यं वारयति—आत्मनीति । स्वस्यांशित्वात्स्वस्मिन्नेवेत्यर्थः । इत्यर्थ इति । देहस्य भेदो हि प्रातीतिक एव न वस्तुत इति भावः । यद्वा—आत्मनः स्वस्याव्यवधानः साक्षाद्भूतः । अनंतोऽपारः । रोदो रोदनमश्रु राति आददातीति रोदरो भावः प्रेमा तेनैव सिद्धैः समस्तैरर्थैः परिपूर्णः । अंजसा साक्षादुपगतानि । नृपेति । नृपाणामेत दुर्लभमित्याह ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ य ऋषभः (१) हे भगव इत्यार्षो नलोपः । योगेन भक्तियोगेन यतो न क्लेशदानि अतो हेतोः । इत्यर्थ इति । न ह्यकस्मात्प्राप्तेषु भोगेष्वनपकुर्वत्सु विरज्यत इति भावः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच ॥ सत्यमुक्तं किंत्विह वा एके न मनसोऽद्धा विश्रंभमनवस्थानस्य शठः किरात इव संगच्छंते ॥ २ ॥ तथा चोक्तम् ॥ न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते ॥ यद्विश्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरम् ॥३॥ नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः ॥ योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥ कामो मन्युर्मदो लोभः शोकमोहभयादयः ॥ कर्मबंधश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः ॥ ५ ॥ अथैवमखिललोकपालललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन्स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥

जितानि दग्धानि कर्मबीजानि रागादीनि यैस्तेषां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नार्हंति अतः किमिति नाभ्यनंददित्यर्थः ॥ १ ॥ अंगीकृत्य परिहरति । सत्यमिति । एके बुद्धिमंतोऽनवस्थानस्य चंचलस्य मनसो विश्वासं न संगच्छंते न सम्यक् प्राप्नुवंति । शठः किरातो यथा धृतेष्वपि मृगेषु । शठे किराते यथा मृगा इति सप्तम्यंतं वा । पाठांतरे शठो वंचकः किरातो वणिग्व्यवहर्तरि यथा तस्मिन्वा व्यवहर्ता विश्वासं न यातीत्यर्थः । पाक्षिकोऽपि दोषो वर्जनीय इत्युपदेष्टुं नाभ्यनंददिति भावः ॥ २ ॥ तत्र हेतुः । यद्विश्रंभायस्य मनसो विश्वासाच्चिराच्चीर्णं बहुकालसंचितं तपश्चस्कंद सुस्राव । ऐश्वरं विष्णोर्मोहिनीरूपदर्शनेन । यद्वा । ईश्वराणां समर्थानामपि सौभरिप्रभृतीनां तपः ॥ ३ ॥ नित्यमिति । कृतविश्वासो यो योगी तदीयं मनः कामस्य तमनु येऽरयस्तेषां च छिद्रमवकाशं ददाति । यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्वा पतिं घातयति तथा मनोऽपि कामादिभिर्योगिनं भ्रंशयतीत्यर्थः ॥ ४ ॥ अरीन्कथयन्नुपसंहरति । काम इति । यन्मूलो यन्निमित्तो भवति तन्मनः को नु बुधः स्वीकुर्यात्स्वाधीनमिति मन्येत ॥ ५ ॥ प्रासंगिकं समाप्य प्रस्तुतमाह । अथेति । अखिलानां

ऋषिः शुकः । पाठांतरे 'शठकिराट' इति पाठे । इत्यर्थ इति । उभयोः परस्परं स्वतुल्यभावनया विश्वासाभाव इति भावः । पाक्षिकोऽपि दोषो वर्जनीय इति दोषो भवति न वेति संदिह्यमानदोषोपीत्यर्थः । इति भाव इति । वस्तुतस्तु–किरातपदस्य साधकमात्रविषयत्वात्तानपि शिक्षयितुमिति तात्पर्यम् । अत्र विश्वनाथः–अर्द्धांगीकारेण परिहरति–सत्यमिति । क्लेशदानि न भवंत्येव तदपि एके सुधियः कुतः अनवस्थानस्य प्रतिक्षणमेव प्राप्तनानादशाकस्येत्यर्थः । तेन शुद्धमपि भूत्वाप्यशुद्धं भवितुं न तस्य विलंब इति भावः । शठे धूर्त्ते किराते नीचजातौ च धूर्तो यथा सौहार्दं प्रदर्श्य लुंठितुमेव विश्वसितारं हंति तथैव मनः खलु कामक्रोधाद्यनभिभवरूपां स्वशुद्धिं प्रदर्श्य स्वनिरोधे शिथिलप्रयत्नं साधकमेकस्मिन्दिने कामाद्यैराकस्मिकैस्तमधः पातयति यथा च नीचजातिर्मुहुरपि धर्ममध्यापितोऽपि साधुतां दधानोऽपि गृहकोशादिषु विश्वस्तस्तत्समये दुस्त्यजस्वभावप्राप्तं चौर्य्यमेव करोति तथैव मनः शमदमादिभिः शोधितमपि श्रवणमननादिर्ष्वैश्वर्यं दधानमपि विश्वस्तं सदनिरुध्यमानं कस्मिंश्चित्क्षणे दुर्विषयेष्वपि निमज्जद्विवेकज्ञानादिकमपहरति ॥ २ ॥ यथा मनोविश्वासादनर्थो भवति तथा चोक्तं श्रीकृष्णमुनिना–नेति । ऐश्वरं शांभवम् । ननु श्रीशंकरेण तु स्वयं संप्रार्थ्य भगवदैश्वर्यं श्रीसतीं बोधयितुं तथा कृतं "यमामपृच्छस्त्वमुपेत्य योगात्" इत्याद्युक्तेरतः कथमुक्तं शांभवमिति तत्राह–यद्वेति । प्रभृतीत्युक्तेर्ऋष्यशृंगादिग्रहः ॥ ३ ॥ तं काममनु येऽरयः क्रोधलोभादयः । इत्यर्थ इति । अतो मनसो विश्वासो न कार्य इति भावः ॥ ४ ॥ आदिना मात्सर्यादिग्रहः ॥ ५ ॥ प्रासंगिकं प्रसंगप्राप्तम् । प्रस्तुतमाह प्रकृतमनुसरति । अथ कदाचिदर्थे । विलक्षितोऽलक्षितः देहत्यागानुकरणेनैव शिक्षयन्नित्यर्थः । तद्देहस्य चिन्मयत्वात् । वस्तुतस्तु–आत्मनि परमात्मनि स्वस्मिन्नात्मानं श्रीऋषभदेवा ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य ह वा एवं मुक्तलिंगस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः कोंकवेंककुटकान्दक्षिणकर्नाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्यकृताश्मकवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ७ ॥ अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥ ८ ॥ यस्य किलानुचरितमुपाकर्ण्य कोंकवेंककुटकानां राजाऽर्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाषंडमसमंजसं निजमनीषया मंदः संप्रवर्तयिष्यते ॥ ९ ॥

लोकपालानां ललामो मंडनभूतोऽप्युपरता बाधितानुवृत्तिर्यस्मात्स उपरराम देहाभिमानं जहौ । विलक्षणैरनेकप्रकारैरवधूतवेषादिभिः । न विलक्षितो भगवत्प्रभावो यस्मिन् । सांपरायविधिं देहत्यागप्रकारम् । आधाराधेयभावव्यावृत्त्यर्थमाह । अनर्थांतरभावेनाभेदेन । उपासनाव्यावृत्त्यर्थमाह । असंव्यवहितम् ॥ ६ ॥ मनसा स्वयंत्यक्तेऽप्यभिमाने केनापि संस्कारेण देहः प्रचलति यथा कुलालचक्रं सोऽयमभिमानाभासस्तेन । स च जीवन्मुक्तानामविद्यावासनया भवतीति ततो विशेषमाह । योगमायावासनयेति । कोंकादीन् देशान्गतः सन्कयापि वासनयाऽऽस्ये कृतोऽश्मकवलो येन । असंवीतो नग्नः ॥ ७ ॥ समीरवेगेन विधूतानां कंपितानां वेणूनां संघर्षणेन जात उग्रो दावानलः । आलेलिहानः सर्वतो ग्रसन् ॥ ८ ॥ अवधूतवेषेण ऋषभदेवस्तत्र गत इत्येतस्य सूचकमाह । यस्य किलाश्रमातीतमनुचरितं तद्देशवासिभ्य उपाकर्ण्य अर्हन्निति नाम यस्य स राजा स्वयं तदुपशिक्ष्य शिक्षित्वा कुपथश्चासौ पाषंडश्च तं निजमनीषया संप्रवर्तयिष्यत इत्यन्व

स्वयं शरीरमव्यवहितं मायाव्यवधानरहितमत एवानार्थांतरभावेनाभेदेनान्वीक्षमाणः प्रतिक्षणं पश्यन् । उपरतानुवृत्तिरवधूतत्वानुकरणं यस्य स उपरराम स्वावतारलीलातो विरराम । अत एव स्वकलेवरं जिहासुः स्वकलेवरे प्राकट्यं त्यक्तुमिच्छुरिति वास्तवोर्थः ॥ ६ ॥ तस्य देहांतर्द्धानप्रकारमाह—तस्येति । भगवतोऽपि मुक्तलिंगस्य त्यक्तभगवच्चिह्नस्य मुक्तानामिव लिंगं यस्येति वा । यथा योगिनां केनापि संस्कारेण देहः प्रचलति निष्पन्नघटमपि कुलालचक्रमिव सोयमभिमानाभासः स च जीवन्मुक्तानामविद्याभासवासनया भवतीति ततो विशेषमाह—योगमायावासनया अवधूतलीलेच्छासंस्कारेण । यथातिबालको यद्यत्प्राप्नोति तदपि स्वमुखे निःक्षिपति तथैवास्ये कृतोऽश्मनः पाषाणस्य कवलो ग्रासो येन स तथा । नान्यद्वोक्तव्यं वक्तव्यं वा किञ्चिदित्यभिप्रायाभासेनेति संदर्भः । नागपुरतः पूर्वतो नदीतटे कुटकाचलोस्ति तस्योपवने उन्माद इवोन्मत्तो यथा चेष्टते तथा ॥ ७ ॥ तेन सह श्रीऋषभदेवसहित एव दावानलस्तद्वनं ददाह तथा च तद्वनवर्त्तितरुमृगादीनां स्थूलं देहं दावानलो ददाह सूक्ष्मं तु देहं श्रीऋषभ इति तद्वनवर्त्तिनः सर्वे तत्प्रसादान्मुक्ता बभूवुः "यैः संस्पृष्टोऽभिदृष्टो वा संविष्टोनुगतोऽपि वा । कोशलास्ते ययुः स्थानं यत्र गच्छंति योगिनः ॥" इतिवत् । ततोऽनलसाधर्म्यमुक्त्वा तद्वदंतर्द्धानमेव तस्येति व्यंजितमत एव तस्य तृतीयेध्याये आविर्भाव एवोक्तो न तु जन्मेति ॥ ८ ॥ अस्यावतारलीलाश्रवणकीर्त्तनादिभिरेव कलिकालवर्त्तिनः पराग्दर्शिनो जीवाः कृतार्था भवंति न त्वाचरितानुष्ठानेन कलौ प्रायः प्रत्यग्दर्शनासंभवात् । श्रद्धयाऽपि तदीयकेवलबाह्याचरणनिष्ठा भ्रष्टा एव भवंतीत्याह—यस्येति । अर्हन्नामा कलौ जनिष्यमाणो लोकशास्त्रद्वारा श्रीऋषभदेवोत्कर्षं श्रुत्वा तादृशाचरणेन वयमपि तादृशा भवामेति मत्वा तदीयचेष्टामुपशिक्ष्याधिक्येन शिक्षित्वा भवितव्येन तादृशादुरदृष्टेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येन ह वाव कलौ मनुजापशदा देवमायामोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्ना
नाचमनाशौचकेशोल्लुंचनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यंति ॥ १० ॥ ते च
ह्यर्वाक्तनया निजलोकयात्रयांधपरंपरयाश्वस्तास्तमस्यंधे स्वयमेव प्रपतिष्यंति ॥ ११ ॥ अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः ॥
तस्यानुगुणाञ्श्लोकान्गायंति ॥ १२ ॥ अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ॥ गायंति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवं
ति ॥ १३ ॥ अहो नु वंशो यशसाऽवदातः प्रैयव्रतो यत्र पुमान्पुराणः ॥ कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥ १४ ॥

यः । तत्र हेतुः कलावित्यादि । भवितव्येन प्राणिपूर्वसंचितपापफलेन ॥ ९ ॥ येन प्रवर्तकेन मनुजेष्वपशदा निकृष्टाः स्वविधिना नियोगो यस्मिन् शौचचारित्रे तद्विहीना
देवावज्ञारूपाण्यस्नानादीनि कुव्रतानि गृह्णाना वेदादीनां विदूषका भविष्यंति ॥ १० ॥ तत्फलं चांधं तमः प्राप्स्यंतीत्याह । ते चेति । अर्वाक्तनया अवेदमूलया । निजलो
कयात्रया स्वेच्छाकृतप्रवृत्त्या आश्वस्ताः कृतविश्वासाः ॥ ११ ॥ ननु तर्ह्यनर्थकारी किमर्थोऽयमृषभावतारस्तत्राह। अयमिति। रजोव्याप्तानां जनानां मोक्षमार्गोपशिक्षणा
र्थः । तस्य कैवल्योपशिक्षणस्यानुरूपान् ॥ १२ ॥ अधि अधिकं पुण्यं यस्मिन् । एतद्भारतं वर्षम् । ऋषभाद्यवतारयुक्तानि कर्माणि ॥ १३ ॥ प्रियव्रतस्य वंशः अवदातः

यदवश्यभवितव्यं तेनेति विश्वनाथः । संदर्भस्तु—तदेवं सर्वहितमपि तच्चरितं वैदिकवेदाद्यपराधसंस्कारवतां त्वन्यथैव भातमित्याह—यस्येति । अन्येषां तु रजसोपरक्तानामपि तद्द्वयश्रवणेनान्वयव्यतिरेकाभ्यां हितायैव
जायते तदित्याह-मंदः कुमनीषी। असमंजसमयोग्यं वेददूषकत्वात्॥९॥स्वविधिना स्वकल्पितेन विधिना नियोगः कुव्रतादीनां यस्मिन्ग्रंथे स स्वविधिनियोगस्तेन हेतुना शौचादिहीनाः।स्वामिचरणैस्तु-स्वविधिना वेदविधिना नियोग
आज्ञा शौचस्य जलमृदादिना दैहिकमलापकर्षणस्य चारित्रे करणे ‘मृज्जलाभ्यां देहं मृज्यात्’ इत्यादिविधिना विहिते ‘मलवद्वाससा न संवदेत्’ इत्यादिनिषेधेन च निषिद्धेऽपि तद्रहिता इत्यभिप्रायेण व्याख्यातं स्नानादि
विना देवपूजानधिकारात् । कुव्रतानि निंदिताचरणानि। आदिना दंतधावनादित्यागादेर्ग्रहः—कुव्रतत्वं चास्नानादेः “अस्नाताशी मलं भुंक्ते ह्यजापी पूयशोणितम्” इत्यादिस्मृत्योक्तमवधेयम् । प्रायेणेत्युक्तेः केचिन्निंदादिशून्या
अपि स्वदृष्टवशाद्भविष्यन्तीत्यर्थः ॥ १० ॥ अंधे तमस्यंधतामिस्रे नरके ॥ ११ ॥ अत्राक्षिपति—नन्विति । अनर्थकारी तदाचरणश्रवणप्रवृत्तजननरकहेतुत्वात् । किञ्च—श्रीऋषभदेवाचरणं तु तत्समकालीनै
रेवानुवर्त्तितव्यमित्याह—अयमिति । रजसा गुणेनोपप्लुतं कालेन विनष्टीकृतं यत्कैवल्यं ज्ञानयोगस्तस्योपशिक्षणार्थः । अर्थांतरं तु स्वामिभिरुक्तमेव तेन सत्यादियुगत्रयं तच्चरितमनुवर्त्तितव्यं कलौ तु तत्कथैव श्रोतव्येति
व्यवस्थितिरिति विश्वनाथः । अत्र प्रमाणं च श्रीदशमे वक्ष्यति “ईश्वराणां वचः सत्यं तथैवाचरणं क्वचित् । कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वानर्थः” इति । किञ्च—“तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्तदाचरे
त्” इति च ॥ १२ ॥ अवतारा विद्यंते वर्ण्यत्वेन येषु तानि । अहो इत्यानंदे ॥ १३ ॥ वंशेष्वपि प्रियव्रतवंशो धन्य इत्याह । यत्र पुराणः पुमान् पुरुषः कृतावतारोऽभूदिति शेषः । किं तेन कृतमिति चेत्तत्राह—स
आद्यः सर्वकारणीभूतो विष्णुः पुरुषो मनुष्यमूर्त्तिः तन् यद्यतो मोक्षहेतुं धर्मं पारमहंस्यं धर्मं चचारातो हेतोर्यशसावदात इत्यन्वयः । “नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृग्जडयोगचर्याम् । यत्पारमहंस्यमृषयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवस्य योगी ॥ यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥ १९ ॥ इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामंगलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन्वासुदेव एकांततो भक्तिरनयोरपि समनुवर्तते ॥ १६ ॥ यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयंतस्तयैव परया निर्वृत्या ह्यपवर्गमात्यंतिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियंते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १७ ॥

शुद्धः । यत्र वंशे । यद्यस्मात् । अकर्म मोक्षस्तस्य हेतुं धर्मं चचार ॥ १४ ॥ अपरः को नु योगी अस्य काष्ठां दिशमप्यनुगच्छेत् । यो योगी येन ऋषभेणासत्तयाऽवस्तुत्वेनोदस्ता निरस्ता योगमायाः सिद्धीर्वांछति । कथंभूताः । कृतः प्रयत्नो यासु तदर्थं प्रयत्नं च करोतीत्यर्थः । यद्वा कथंभूताः उदस्ताः कृतप्रयत्नाः सेवितुमुद्यता अपीत्यर्थः ॥ १५ ॥ विशुद्धाचरितं यदीरितं कथितं तत्समस्तं दुश्चरितमभितो हरतीति तथा परममहामंगलानामयनं च । अवहितः सन् । अनयोरपि श्रोतृश्रावयित्रोरविशेषेण भक्तिः सम्यगनुवृत्ता भवतीत्यर्थः ॥ १६ ॥ भक्तेः परमपुरुषार्थत्वमाह । यस्यां भक्तावेव न तु योगादिषु । अनुसवनमविरतमात्मानं स्नापयंतः । स्वयमासादितमप्रार्थितं भगवता स्वयमेव दीयमानमपि । अनादरे हेतुः । भगवदीयत्वेनैव परितः समाप्ताः सम्यक् प्राप्ताः सर्वे पुरुषार्थाः यैस्ते ॥ १७ ॥

पदमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः'' इति नारदं प्रति ब्रह्मोक्तेः।संदर्भस्तु स्वतः पुराणः पुमानेव यत्र कृतावतारेऽपि नान्यथात्वं प्राप्तः किन्तु स आद्यः पुरुष एव यत्राकर्महेतुं कर्माभावकारणं धर्मं चचारेत्यर्थः।यद्यप्येतज्ज्ञानपर्यवसानं तच्चरितं तथापि तत्पराणां भक्त्य एव पर्यवस्यति तथा स्वभावत्वादित्याह ॥ १४ ॥ योगिष्वपि मध्ये श्रीऋषभदेव एव धन्य इत्याह । मनोरथेनापि किमु कर्मणा अस्य कीदृशस्याभवस्य नास्ति भवो यस्मात्तस्य । इत्यर्थ इति । लोकख्यात्यर्थं सिद्धिषु प्राकृता योगिन एव सयत्ना भवंति न तु विज्ञास्तासां भगवत्प्राप्त्यंतरायत्वात्तदुक्तमेकादशे श्रीकृष्णेनोद्धवं प्रति—''अन्तरायान्वदंत्येता युंजतो योगमुत्तमम्'' इत्यादिना चतुर्दशेऽध्याये । नन्ववाञ्छितास्ताः कथं प्राप्ता इति चेन्मुख्यस्वाधारतयेत्यभिप्रायेणाह—यद्वेति । इत्यर्थ इति । श्रीऋषभदेवोऽस्मान्स्वीकरोत्विति भावः ॥ १९ ॥ किं च—सत्यादियुगवर्त्तिभ्यो योगिभ्यस्तच्छिक्षितयोगानुष्ठातृभ्योपि सकाशात्कलियुगवर्त्तिनो जनास्तल्लीलाश्रवणकीर्त्तनवंतोऽधिकफलभाजो भवंतीत्याह—इति हेति हस्मेति निपाती श्रद्धातिशयजननार्थौ । न केवलं रामाद्यवतारवद्दुष्टभंजन एवायमवतारोऽपि तु व्यासाद्यवतारवज्ज्ञानस्योपदेष्टेति ज्ञापनाय परमगुरोरिति । विशुद्धमाचरितं च ईरितं 'नायं देहो देहभाजां नृलोके' इत्याद्युपदेशवाक्यं च विशुद्धमित्युक्तेरर्हता राज्ञाऽभिप्रायापरिज्ञानाद्विपरीतमेव गृहीतं न तेन तच्चरितेऽशुद्धा शंका कार्येति । अत एवोक्तं 'समस्तदुश्चरितापहरणम्' इति । यद्वा—विशुद्धाचरितेनर्थः । इत्यर्थ इति । अपिकारात्स्मर्त्तुरनुमोदितुरपीति भावः ॥ १६ ॥ भगवत इमे भगवदीयास्तेषां भावस्तत्त्वं तेन भगवदीया वयं न ह्यस्माकं किंचिदपेक्षितमस्ति सर्वगुरुणा ब्रह्मणापि ''येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम्'' इत्युक्तेर्भगवदीयत्वस्य प्रार्थितत्वान्न तु प्राप्तद्वयं तु तत्प्राप्ता अहो कृतार्था वयमिति भावः ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजन्पीतर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः ॥ अस्त्वेवमंग भगवान्भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १८ ॥ नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ॥ लोकस्य यः करुणयाऽभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ १९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंध ऋषभदेवानुचरितवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालनाय संचिंतितः तदनुशासनपरः पंचजनीं विश्वरूपदुहितरमुपयेमे ॥१॥ तस्यामु ह वा आत्मजान्कात्स्न्र्येनानुरूपानात्मनः पंच जनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥

ननु भगवतोऽतिसुलभत्वदर्शनान्मोक्षस्य चातिदुर्लभत्वादियमतिस्तुतिरेवेत्याशंक्याह । हे राजन् भवतां पांडवानां यदूनां च पतिः पालकः । गुरुरुपदेष्टा । दैवमुपास्यः । प्रियः सुहृत् । कुलस्य पतिर्नियंता । किं बहुना । क्व च कदाचिद्दौत्यादिषु वः पांडवानां किंकरोऽप्याज्ञानुवर्ती । अस्तु नामैवं तथाऽप्यन्येषां नित्यं भजतामपि मुक्तिं ददाति न तु कदाचिदपि सप्रेमभक्तियोगम् ॥ १८ ॥ वर्णितमृषभावतारं नमस्करोति । नित्यमनुभूतं यन्निजं रूपं स एव लाभस्तेन निवृत्ता तृष्णा यस्य सः अतद्रचनया देहाद्यर्थमनोरथेन श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य करुणया निर्भयमात्मस्वरूपं य आख्यातवांस्तस्मै नमः ॥ १९ ॥ इति पंचमस्कंधे टीकायां षष्ठोध्यायः ॥ ६ ॥ अध्यायानां त्रयेणैवमृषभाख्यानमीरितम् ॥ अष्टभिर्भरताख्यानमतः प्रस्तूयतेऽमृतम् ॥ १ ॥ सप्तमे भरतो राज्ये चिरं यज्ञैर्हरिं यजन् ॥ आरब्धकर्मनिर्वाणे हरिक्षेत्रेऽभजद्धरिम् ॥ २ ॥ संचिंतितः संकल्पेनैव राज्यादौ नियुक्तः ॥ १ ॥ आत्मनोनुरूपान् । भूतादिरहंकार इव भूतसूक्ष्माणीति संततिवृद्धौ दृष्टांतः ॥ २ ॥

इयं मोक्षानादरेण भक्त्यादरणरूपा । हे राजन्निति।त्वं तु मातरं द्वारीकृत्य तद्भक्त्यैव लब्धांगत्वाद्राजसे कथं तव भक्तावनुत्कर्षधीरिति भावः।अत्र विश्वनाथः—धन्योऽयं प्रियव्रतवंशो यत्र भगवानृषभदेवोऽवतीर्णः । उत्तानपादवंशोऽपि धन्यो यत्र पृथुः । रघुवंशोऽपि धन्यो यत्र रामः । यदुवंशपुरुवंशयोरेककालिकयोरपि मध्ये यदुवंश एव सुभगो यत्र कृष्णः अस्मदीयः । पुरुवंशस्तु सर्वतोपि दुर्भगो यत्र भगवान्नावततारेति मनोनुतापेन विषीदंतं राजानं सर्वज्ञतयैव ज्ञात्वा मोक्षाद्भक्तेरुत्कर्षेण प्रतिपादितेनैव तमानंदयति । हे राजन्निति।भवतां पांडवानां यदूनां च पतिः पालकः इत्यादिभिः यदुष्ववतरतोपि कृष्णस्य तेषु भवत्सु च तुल्य एव व्यवहारो दृष्टः।किं च-क्व च कदाचित् वः पांडवानां दूत्यादिषु किंकरः। न च तथा यदूनामिति । यदुभ्योऽपि प्रेमवत्त्वेन भवतामाधिक्यमेवेति भावः । भवद्भयोऽभजद्भयोपि परमप्रेमाधिक्यदानस्य वार्त्ता कियती वक्तव्या सा सर्वोपरि विराजिता अन्येभ्यो भजद्भयोऽपि भक्तियोगं भावभक्तिमपि प्रायो न ददाति ।किं तु ततोऽपि निकृष्टां मुक्तिमेवेत्याह-अस्त्वेवमिति।अत्र कर्हिचिदपीत्युक्तेर्मुक्तिमनिच्छद्भयः शुद्धभक्तेभ्यस्तु भक्तिमेव ददातीत्यर्थो लभ्यते।केचित्तु—भक्तिदाने भगवतः कैंकर्यादिप्रसक्तेरुग्रसेनयुधिष्ठिरादिषु तथा दर्शनात्तां न ददातीत्याहुः॥१८॥यद्वा आत्मलोकं वैकुंठमभयं'न मत्पराः शांतरूपे नंक्ष्यंति' इत्यादिश्रीकपिलोक्तेः।कालभयहीनं करुणयोपदिष्टेन भक्तियोगेन चाख्यातवांस्तस्मै॥१९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे षष्ठोऽध्यायः ॥६॥ अतः परम् मृतवत्स्वादु (१) आरब्धकर्मणां निर्वाणः समाप्तिर्यत्र तस्मिन् संकल्पेनैव भगवत्सिद्धसंकल्पत्वाद्ब्राह्मनियोगादिकं नास्तीत्यर्थः ॥१॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति ॥ अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशंति ॥ ३ ॥ स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वेस्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ॥ ४ ॥ ईजे च भगवंतं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥ ५ ॥ संप्रचरत्सु नानायागेषु विरचितांगक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिंगानां मंत्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत् ॥ ६ ॥

भारतमिति स्वनामख्यापकत्वेन धर्माद्यतिशयः सूचितः ॥ ३ ॥ बहुवित्सर्वज्ञः ॥ ४ ॥ यज्ञा अयूपाः क्रतवः सयूपास्तद्रूपम् । उच्चावचैर्महद्भिरल्पैश्च क्रतुभिः कर्मभिः श्रद्धया ईजे च । तानेवाह । आहृताः स्वाधिकारेणात्मसात्कृता येऽग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिः । अग्निहोत्रादयो द्विविधाः सकलांगयुक्ताः प्रकृतयः विकलांगा विकृतय इति तैर्द्विविधैरपीष्टवानित्यर्थः । अनुसवनमित्यंतं वा चातुर्होत्रविधिनेत्यंतं वा गद्यम् ॥ ५ ॥ किं च संप्रचरत्सु प्रवर्तमानेषु नानायागेषु विरचितानुष्ठितांगाक्रिया येषां तेषु यदपूर्वं तद्वासुदेव एव भावयमानश्चिंतयन्स यजमानो यज्ञभाजो ये देवाः सूर्यादयस्तान्पुरुषस्य वासुदेवस्यावयवेषु चक्षुरादिष्वभ्यध्यायन्न तु पृथक्त्वेनेत्यन्वयः । अपूर्वे पक्षद्वयं मीमांसकानाम् । तदानीमेव सूक्ष्मत्वेनोत्पन्नं फलमेवापूर्वं कालांतरफलोत्पादिका कर्मशक्तिर्वेति । तदुक्तं—"यागादेव फलं तद्धि शक्तिद्वारेण सिद्ध्यति । सूक्ष्मं शक्त्यात्मकं वाऽपि फलमेवोपजायते" इति । तदेवाह । क्रियाफलं धर्माख्यमिति च । ननु यद्यंगं देवताः कर्म प्रधानमिति मतं तर्हि कर्तृनिष्ठमपूर्वं स्यात् । तदुक्तम् । "कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा । योग्यता शास्त्रगम्या या परा सापूर्वमिष्यते" इति । अथ देवताप्रधानं कर्म तु देवताराधनार्थं तदा देवताप्रसादरूपत्वादपूर्वस्य देवताश्रयत्वमेव युक्तं प्रोक्षणाद्यपूर्वस्येव व्रीह्याद्याश्रयत्वम् । कुतो वा वासुदेवाश्रयमपूर्वं भावयति । उच्यते । यदि कर्तृनिष्ठमपूर्वं तर्हि वासुदेवस्यांतर्यामिणः प्रवर्तकत्वेन मुख्यकर्तृत्वात्तदाश्रयमेवापूर्वं न तु तत्प्रयोज्ययजमानाश्रयम् । 'शास्त्रफलं प्रयोक्तरि' इति न्यायात् । अन्यथा ऋत्विजामप्यपूर्वाश्रयत्वप्रसंगात् । तदेवाह । साक्षात्कर्त

अजस्य ऋषभदेवस्य नाभेश्चैतद्वर्षस्वामित्वादजनाभं नाभिश्चाजश्चेत्यजनाभी अभ्यर्हितत्वात्स्वराद्यदंतत्वाच्चाजपदस्य पूर्वनिपातः । तयोरिदमजनाभं संज्ञापूर्वकविधेरनित्यत्त्वाद्वृद्ध्यभावः । भारतस्वामिकत्वात् ॥ ३ ॥ ४ ॥ इत्यर्थ इति । अनुसवनमवसरेऽवसरे "काले यज्ञेऽभ्यनुज्ञाने स्नानपीडनयोरपि । सवनं त्रिषु चोत्पत्तौ" इति निरुक्तिः । सर्वथा समर्थत्वादुभयविधयागांश्चकारेति भावः ॥ ५ ॥ ननु "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥" इति भगवदुक्तेर्भगवत्कथादिषु प्रौढश्रद्धस्य निष्कामस्य शुद्धभक्त्यधिकारिणो भरतस्य कर्मकर्तृत्वं कर्मफलभोक्तृत्वं च कथं संगच्छतामित्यत आह—किं चैति । संप्रचरत्स्विति । चिंतयन् अस्य कर्मणो यत्फलं भावि तत्र न मे लिप्सा किन्तु तद्वासुदेवप्रीत्यर्थं वासुदेवायैव समर्पितमिति तत्र न मे स्वत्वमिति चिंतयन्नित्यर्थः । तदुक्तं पूर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंकर्मविशुद्ध्या विशुद्धसत्त्वस्यातर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालाऽरिदरगदादि भिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत ॥ ७ ॥

रीति । देवताश्रयत्वेऽपि वासुदेवाश्रयत्वमेवेत्याह । परदेवतायामिति । परदेवतात्वे हेतुः । सर्वदेवतालिंगानां तत्तद्देवताप्रकाशकानां मंत्राणां येऽर्था इंद्रादिदेवतास्तेषां नियामक तया तस्यैव प्रसादनीयत्वात्फलदातृत्वाच्च युक्तमेवापूर्वाश्रयत्वमित्यर्थः । एवं भावनमेवात्मनो नैपुण्यं कौशलं तेन मृदिताः क्षीणा कषाया रागादयो यस्य । अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण ॥६॥ एवंभूतया कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिरजायतेत्यन्वयः । क्व । अंतर्हृदये य आकाशः स एव शरीरमभिव्यक्तिस्थानं यस्य तस्मिन्ब्रह्मणि । कीदृशे । महापुरुषरूपस्योपलक्षणमाकारो यस्य तस्मिन् । किं च श्रीवत्सादिभिरुपलक्षिते । निजपुरुषाणां नारदादीनां हृदि लिखितवन्निश्चलतया स्थितेनोक्तेन पुरुषरूपेणा

मीमांसायां क्रियाफलं सूक्ष्मरूपेणोत्पन्नं फलमित्यर्थः । धर्माख्यमिति च कालांतरे फलजनकशक्त्यात्मकमदृष्टशब्दवाच्यमित्यर्थः । अत्राशंकते—नन्विति । अत्र प्रमाणमाह—तदुक्तमिति । पक्षांतरमाह—अथेति । शास्त्र फलं शास्त्रेणोक्तं फलं प्रयोक्तरि प्रयोजककर्त्तरीति सूत्रार्थः । अन्यथैतदनंगीकारे । इत्यर्थ इति । वासुदेवस्यैव मुख्यकर्तृत्वात्सर्वदेवरूपत्वाच्चापूर्वाश्रयत्वमुचितमेति भावः । अत्र विश्वनाथः—कर्मकर्तृप्रधानं देवताप्रधानं वेति पक्षद्वयं मीमांसकानामस्ति । तत्राद्यपक्षे कर्तृनिष्ठमपूर्वं द्वितीये कर्मणो देवताराधनार्थत्वाद्देवतानिष्ठं तत्र भरतस्य निष्कामत्वादपूर्वस्य देवतानिष्ठत्वे एव युक्ते देवतानां चंद्रसूर्यादीनां बाहुल्यात्कथमेकस्मिन्वासुदेव एव कर्मफल भावनेत्यत आह—सर्वदेवतालिंगानां तत्तद्देवताप्रकाशकानां मंत्राणां येऽर्था इंद्रादिदेवतास्तेषां नियामकतया यज्ञपुरुषे यज्ञभोक्तरीत्यर्थः । नन्वेवं भरतस्य मास्तु भोक्तृत्वं कर्मकर्तृत्वं तु तस्य दुर्वारमित्यत आह—साक्षात्कर्त्तरि वासुदेवस्यैवांतर्यामिणः प्रवर्तकत्वेन स्वतंत्रकर्तृत्त्वात्साक्षात्कर्तृत्वं न तु तत्प्रयोज्यस्य यजमानस्यास्वतंत्रस्यान्यथार्त्विजामपि साक्षात्कर्तृत्वप्रसंगात् "यज्ञभुग्यज्ञकृद्यज्ञः" इति तन्नामस्मृतेश्च तस्य स्वतंत्रकर्तृत्वेप्यज्ञानादहं करोमीति स्वस्य स्वतंत्रकर्तृत्वमननमेव कर्तृत्वगमकं बंधकारणं च ज्ञेयम् । आत्मनैपुण्यमेवंभावनमेव तेन मृदिताः क्षीणाः कषायाः कर्मकरणवासनात्मिका येन सः । अध्वर्युभिरित्यनेन तथाविधानां भक्तानां कर्तृत्वाद्यभिमान शून्यानां कर्मफलत्यागिनां स्वप्रतिमूर्त्तिद्वारा कर्मकरणमपि श्रद्धाराहित्यात्कर्माकरणमेव ज्ञेयमिति ज्ञेयं द्योतितम् "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥" इति भगवद्गीतोक्तेः । अत एवांबरीषादीनां श्रद्धया भगवद्भक्त्यैव यापिताऽष्टयामानामपि पितृपैतामहसदाचारपरंपराप्राप्तयज्ञादिकर्माचरणं प्रतिनिधिद्वारैव श्रूयतेऽर्वाचीनानामपि प्राच्यादिदेशवर्त्तिनां सुप्रतिष्ठानां गृहस्थमहाभागवतानां विवाहोपनयना दावपि सर्वथैव वर्णधर्माभावे लौकिकादपि सांकर्यदोषाद्बिभ्यतां प्रतिनिधिद्वारैव कर्मकरणं दृश्यते च अत एव 'स कर्माणि कुर्वीत' इत्यात्मनेपदप्रयोगादण्यंतनिर्देशाच्चानात्मगामिकफलत्वे सति प्रतिनिधिद्वारा कर्मकरणमपि शुद्धसत्त्वभक्तानां न दूषणं तथैव शुद्धभक्तिलक्षणेप्यन्याभिलषिताशून्यमितिवज्ज्ञानकर्मादिशून्यमित्यनुक्त्वा ज्ञानकर्माद्यनावृतमित्यनावृतपदोपन्यासात् प्रतिनिधिद्वारा कर्मकरणेऽपि स्वीयेंद्रियैः प्रतिक्षणश्रवणादिभक्त्यवकाश प्राप्त्या भक्तेः कर्मानावृतत्वाच्छुद्धत्वमेवेति केचिद्व्याचक्षते । नन्वेवंभूतत्वेन भरतस्य मास्तु कर्मकरणे दोषः । यज्ञानां भगवतोऽवयवेषु बाह्वादिषु अभ्यध्यायत् इंद्रायस्वाहेत्युक्तेर्मत्प्रभोर्बाहुपूजेयं सूर्याय स्वाहेत्युक्तेर्लोचनपूजेयमिति भावयामास । पृथक्पृथग्देवतात्वेन पूजा ह्यनन्यताविघातिनी न तु तदंगत्वेनेति ॥ ६ ॥ एवं कर्मकर्त्तुरन्तःकरणं विशेषतः शुद्ध्यतीत्याह—एवमिति । अक्लिष्टबुद्ध्या भरतं भजध्वमिति भगवद्वाक्यादेवोत्पत्तित एव शुद्धांतः करणस्य तस्य पिष्टपेषणन्यायेनैवं कर्मविशुद्ध्यापि शुद्धांतःकरणस्य । यद्वा—एवमनेन प्रकारेण कर्मणो विशुद्धिर्यस्मिन्स चासौ विशुद्धसत्त्वश्चेति तस्य भक्तिरौत्पत्तिक्यैव प्रतिदिनमुच्चैस्तरां वर्द्धमानवेगा गंगेव भुवनपावन्य जायतेति योज्यम् । क्व वासुदेवे वसुदेवनंदने कृष्णे य एव परमात्मब्रह्मभगवच्छब्दैरुपासनाभेदेनोच्यते इत्याह—अंतर्हृदयाकाशे शरीरं योगिभिर्ध्येयं यस्य तस्मिन्परमात्मनीत्यर्थः । "केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् । चतुर्भुजम् " इत्यादिना परमात्मनोपि साकारत्वश्रवणात् । तथा ब्रह्मणि ज्ञानिभिरुपास्ये भगवति भक्तैरुपास्ये वसुदेवपुत्रत्वेऽपि महापुरुषस्य वैकुंठनाथस्य यद्रूपं शास्त्रेषु प्रसिद्धं तदुपाधिक्येन लक्ष्यते दृश्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं वर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥८॥ यत्र ह वाव भगवान्हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन सन्निधाप्यत इच्छारूपेण ॥९॥ यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥ १० ॥ तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकांबुभिः कंदमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥ ११ ॥ तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगंभीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ॥ १२ ॥ इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवंतं हिरण्मयं पुरुषमुज्जिहाने सूर्यमंडलेऽभ्युपतिष्ठन्नेतदु होवाच ॥ १३ ॥

त्मनि स्वमनसि विरोचमाने । कीदृशी भक्तिः । अत्यंतातिशयेनैधमानो रयो वेगः प्रकर्षो यस्याः ॥ ७ ॥ एवमनुवृत्त्या वर्षाणामयुतानि तेषां सहस्रं तत्पर्यंतकालेऽवसितो निश्चितः कर्मनिर्वाणावसरो राज्यभोगादृष्टसमाप्तिसमयो येन सः । अधिकृत्य भुज्यमानं रिक्थं धनं यथाविभागं विभज्य सकलसंपदां निकेतादाश्रयात्स्वगृहात्पुलहाश्रमं हरिक्षेत्रं प्रवव्राज ॥ ८ ॥ यत्र क्षेत्रे विद्याधरकुंडे वात्सल्यं कर्तृ तेन सन्निहितः क्रियते । भक्तानामपेक्षितेन रूपेण सन्निहितो भवतीत्यर्थः ॥ ९ ॥ आश्रमस्थानान्युभयत उपर्यधश्च नाभिर्येषां तैर्दृषच्चक्रैः शिलामध्यगतैश्चक्रैश्चक्रनदी गंडकी सरितां श्रेष्ठा पवित्री करोति ॥ १० ॥ एकल एकः । आराधनं समीहमानः कुर्वाणः । विविक्तः शुद्धः अत एवोपरतो विषयाभिलाषो यस्य । उपभृतः संवृद्ध उपशमो यस्य ॥ ११ ॥ प्रवर्धमानानुरागस्य भरेण यद्द्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य । आत्मनि देहे उद्भिद्यमानं रोमपुलककुलं रोमांचवृंदं यस्य ककारः समासांतः । औत्कंठ्यात्प्रवृत्तेन प्रणयबाष्पेण निरुद्धोऽवलोको ययोस्ते नयने यस्य सः एवं वर्तमानस्तामपि भगवत्सपर्यां न सस्मारेत्यन्वयः । तत्र हेतुः । निजरमणस्य स्वप्रीतिदातुये अरुणे चरणारविंदे तयोरनुध्यानेन परिचितः समृद्धो भक्तियोगस्तेन परिप्लुतः सर्वतो व्याप्तः परम आह्लादः परमानंदो यस्मिन्गंभीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा यस्य ॥ १२ ॥ धृतानि भगवद्व्रतानि येन स भगवंतं

यत्र तस्मिन् । श्रीवत्सादिभिरपि चिह्निते निजपुरुषाणां नारदादीनां हृदि चित्रपट इव लिखितवन्निश्चलतया स्थितेन पुरुषरूपेण नराकारस्वरूपेण विरोचमाने । क आत्मनि मनसि ॥ ७ ॥ तद्राज्यभोगस्य भक्त्यानुषंगिकफलत्वात्कर्मफलत्वाभावेऽपि कर्मफलत्वमननं दैन्यादेवेति ज्ञेयम् ॥ ८ ॥ इत्यर्थ इति । इच्छाविषयीभूतेन श्रीरामकृष्णादिरूपेण । कदाचिद्दर्शनं तत्र भवतीति भावः ॥ ९ ॥ चक्रैः शालग्रामैरुपलक्षितत्वात्तन्नामापि चक्रनदीति । यत्र हरिक्षेत्रे ॥ १० ॥ तस्मिन्पुलहाश्रमोपवने । किशलयानि पत्राणि शम्यादिनामित्युक्तं चतुर्थस्कंधे ध्रुवोपाख्याने ॥ ११ ॥ अत एव शुद्धत्वादेव । तत्र सपर्याविस्मृतौ ॥ १२ ॥ तमपि प्रेमविकारं भगवत्पूजायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. पं. श्री. टी. ॥ २२ ॥

परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥ सुरेतसाऽदः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिंगिरामिमः ॥ १४ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतचरिते भगवत्परिचर्यानि० सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकांत उपविवेश ॥ १ ॥

सूर्यमंडलेऽभ्युपतिष्ठन्नेतदु होवाचेत्यन्वयः । कीदृशः । एण्या हरिण्या अजिनमैणेयं तदेव वासस्तेनानुसवनाभिषेकेणार्द्रः कपिशाश्च याः कुटिला जटास्तासां कलापेन च विरोचमानः । सूर्यप्रकाशिकया ऋचा हिरण्मयं "ध्येयः सदा सवितृमंडलमध्यवर्ती" इत्यादिनोक्तम् । उज्जिहाने उद्गच्छति सति । सकारांतपाठे सन्नंतात्पचाद्यच् । अर्थस्तु स एव ॥ १३ ॥ परोरजः रजसः प्रकृतेः परं शुद्धसत्त्वात्मकं सवितुर्देवस्य सूर्यस्य भर्गः स्वरूपभूतं तेजः । जातं वेदो धनं कर्मफलं यस्मात्तत्कर्मफलदमित्यर्थः । अत्र हेतुः । यन्मनसैवेदं विश्वं जजान ससर्ज । पुनश्च अदः सृष्टं विश्वमंतर्यामिरूपेण प्रविश्य गृध्राणं कांक्षंतं हंसं जीवं सुरेतसा चिच्छक्त्या विचष्टे पश्यति पालयतीत्यर्थः । नृषु सीदत्युपाधितया तिष्ठतीति नृषद् बुद्धिस्तस्यां रिंगिं रिंगणं गतिं राति ददातीति नृषद्रिंगिराम् । "वा छंदसि" इत्यमि पूर्वरूपत्वाभावः । तद्भर्गः इमः शरणं व्रजामः ॥ १४ ॥ इति पंचमस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे भजतो विष्णुं तस्य कर्मांतरायतः ॥ एणरक्षाप्रसक्तस्य जातमेणत्वमीर्यते ॥ १ ॥ कृपयाऽपि कृतः संगः पतनायैव योगिनः ॥ इति प्रदर्शयन्नाह भरतस्यैणपोषणम् ॥ २ ॥ नैयमिकं नित्यनैमित्तिकविधिप्राप्तम् । आवश्यकमर्थप्राप्तं मूत्रोत्सर्गादि ।

विघ्नमिव मत्वा प्रेमविकारेणापि मे बुद्धिर्न खल्वाक्रियतामिति विमृश्य बुद्धिप्रकाशकेन केन च भगवन्मंत्रेण भगवंतमुपासितुं प्रवृत्ते इत्याह–इत्थमिति । सूर्यर्चा सूर्यमंडले भगवत्प्रकाशिकया "ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः" इत्यनेन मंत्रेणोक्तम् । सकारांतपाठे 'उज्जिहासे' इति पाठे ॥ १३ ॥ भर्गस्तन्मंडलस्थं "सशंखचक्रं रविमंडले स्थितं कुशेशयं कान्तमनंतमव्ययम्" इत्यादिमंत्रवाच्यं तेजः । इत्यर्थ इति । कालरूपेण सर्वकर्मदात्रिति भावः । अत्र सर्वकर्मफलदातृत्वे । मनसा संकल्पमात्रेण गृध्राणं दुर्विषयसुखं कांक्षंतम् । इत्यर्थ इति कृपया दुर्विषयेभ्यो रक्षतीत्यर्थः । केन प्रकारेणेत्यपेक्षायां स्वस्मिन्बुद्धिवृत्तिप्रेरणयैवेत्याह–रिंगिं स्वस्मिन्नेव गतिं ततस्तद्विषयिणी मे बुद्धिः केनावृता मास्त्विति भावः । मंत्रोऽयं गायत्रीसहोदर इति संदर्भः ॥ १४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे सप्तमोऽध्यायः ॥७॥ तस्य भरतस्य । कर्मैवान्तरायो विघ्नस्तस्मात् । एणो मृगः(१) अभिषेकः स्नानम् । नैयमिकं नित्यनियमप्राप्तमावश्यकं संध्यावंदनादि । नैमित्तिकं शौचादि । अत्र जायंदतत्वेष्वल्पस्वरत्वादभिषेकशब्दस्य पूर्वनिपातः । अक्षरमक्षरात्मकं ब्रह्म श्रीकृष्णमंत्रं वा मुहूर्तत्रयमित्युक्तेः । प्रातस्संध्यां कृत्वा मुहूर्तत्रयादधिके काले गते पुनः संध्यांगीभूतं जपं समाप्य पुनर्जलसमीपे जपो न विधेय

भा. दी. प्र. टीका. अ० ८

॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र तदा राजन्हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥ २ ॥ तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयंकर उदपतत् ॥ ३ ॥ तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात्सहसैवोच्चक्राम ॥ ४ ॥ तस्या उत्पतंत्या अंतर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात ॥ ५ ॥ तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपाताथ च ममार ॥ ६ ॥ तं त्वेणकुणकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बंधुरिवानुकंपया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥ ७ ॥ तस्य ह वा एणकुणक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सहयमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ ८ ॥

कृतमभिषेकादिकं येन । ब्रह्माक्षरं प्रणवं जपन् उदकांते नद्यास्तीरे ॥ १ ॥ जलाशयाभ्याशं नद्याः समीपम् ॥ २ ॥ पेपीयमाने अत्यासक्त्या पीयमाने सति । तावदेव तत्क्षणमेव । अविदूरेण सन्निधौ । मृगपतेः सिंहस्य उन्नादो महान्नाद उद्गतः ॥ ३ ॥ प्रकृत्या स्वभावत एव विक्लवा व्याकुला । सुतरां तु हरिभयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः । पारिप्लवदृष्टिः परिभ्रांतनेत्रा । न गता तृषा तृट् यस्याः । उच्चक्राम नदीमुल्लंघितवती ॥ ४ ॥ अंतर्वत्न्या गर्भिण्याः । उरुभयेन स्थानाद्विचलितो योनेर्निर्गतः सन् स्रोतसि प्रवाहे निपतितः ॥ ५ ॥ तत्प्रसवो गर्भपातः उत्सर्पणमुल्लंघनं भयं च एतैः खेदेनातुरा पीडिता दर्यां गिरिगुहायां हरिणवधूर्निपपात अथानन्तरं मृता च ॥ ६ ॥ एणकुणकं हरिणबालकम् अपविद्धं बंधुभिस्त्यक्तम् इत्येतैः कृपणत्वादिहेतुभिर्याऽनुकंपा तया अनयत् ॥ ७ ॥ कृतो निजः स्वीय इत्यभिमानो येन । पोषणं तृणादिना पालनं वृकादिभ्यो रक्षणं लालनं चुंबनादिना प्रीणनं कंडूयनादिना एतैर्यदनुध्यानमासक्तिस्तेनात्मनो नियमाः स्नानादयो यमा अहिंसादयस्तत्सहिता ईश्वरपरिचर्यादयश्च

इति ज्ञेयम् । यद्वा—'ओमित्येकाक्षरं ब्रह्म' इति गीतोक्तेः प्रणवं जजापेत्यर्थः । यद्वाऽक्षरमक्षररूपं ब्रह्म वेदमित्यर्थः ॥१॥ तत्र नदीतटे । तदा जपावसरे राजन्निति । तत्तुल्यकर्मणा त्वमप्यधुना तादृशदीप्तिमानसीति भावः । "समीपे भोजने व्याप्तौ सतालव्यः प्रकीर्तितः । अभ्याशस्तु सदंत्यःस्यादावृत्तिक्षेपणादिषु" इति वर्णविवेकोक्तेः ॥२॥३॥ "पारिप्लवश्चाकुले स्याच्चंचले च" इति मेदिनी । अपिशब्दस्त्वर्थे सुतरां त्विति॥४॥उत्पतंत्या ऊर्ध्वं गत्वा पतंत्या उच्छलंत्या इत्यर्थः ॥ ५ ॥ उत्प्रसवः उच्चाकाशादेव गर्भपातः । 'कंदरे तु दरी स्मृता' इति मेदिनी । कृष्णसारः श्यामहरिणः । "श्यामैणे कृष्णभके च कृष्णसारोऽसितायसि" इति निरुक्तिः ॥ ६ ॥ 'एणो मृगे ज्ञानगत्योः' इति निरुक्तिः । 'कुणको ध्वनिबालयोः' इति च । कृपणं दीनम् । 'कदर्ये कृपणे दीने समर्थे च दयावति' इति च । कृपणादिभिश्चतुर्भिर्हेतुभिः ॥७॥ आदिना संध्यादिग्रहः । द्वितीयादिनाऽस्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञाती न्यौथिकांश्चैवोपेयाय नान्यं कंचन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनाऽनुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ९ ॥ नूनं ह्यार्याः साधव उपशमनशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षंते ॥ १० ॥ इति कृतानुषंग आसनशयनाटनस्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ११ ॥ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशंसमानो यदा सह हरिणकुणकेन वनं समाविशति ॥१२॥ पथिषु च मुग्धभावेन तत्रतत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात्स्कंधेनोद्वहति एवमुत्संग उरसि चाऽऽधायोपलालयन्मुदं परमामवाप॥१३॥ क्रियायां निर्वर्त्यमानायामंतरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ते सर्वत इति ॥ १४ ॥ अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन्किल कश्मलं महदभिरंभित इति होवाच ॥ १५ ॥ अपि बत स वै कृपण एणबालको मृतहरिणीसुतोऽहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रंभ आत्मप्रत्ययेन तदविगणयन्सुजन इवागमिष्यति ॥ १६ ॥

प्रत्यहमेकैकशो वियुज्यमानाः संतः कतिपयेनाहर्गणेन सर्वे उत्सन्ना बभूवुः ॥ ८ ॥ आसक्तिं प्रपंचयति । अहो इत्यादिना इतिकृतानुषंग इत्येतत्पर्यंतेन । ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विभ्रंशितः । मा इति मां च शरणं प्रापितः । मामेव मातापित्रादिबुद्ध्योपेयाय प्राप्तः । यौथिकान्यूथसंघातिनः । अनसूयुना एतन्निमित्तं मम स्वार्थो भ्रश्यतीति दोषदृष्टिमकुर्वता ॥ ९ ॥ तदेवाह । नूनं हीति ॥ १० ॥ इत्येवं कृतोऽनुषंग आसक्तिर्येन । मृगजहुना मृगापत्येन सह स्नेहेनानुबद्धं हृदयं येन ॥११॥ स्नेहानुबन्धमेव प्रपंचयति । कुशकुसुमेत्यादिना स्वधयतीत्यंतेन । सालावृकाः श्वानः । यदा भयं शंकमानो भवति तदा तेन सह वनं समाविशति॥ १२॥ अतिशायितः प्रणयभरो यस्य तद्धृदयं यस्य सः॥ १ ३॥ क्रियायां देवपूजादिलक्षणायाम् । वर्षपतिर्भरतः।प्रकृतिस्थेन स्वस्थेन । स्तात् भूयात् ॥ १४॥ अन्यदाऽदर्शने सकरुणं यथा भवत्येवमनुशोचन्निति होवाचेत्यन्वयः।अतितर्षेणात्यौत्सुक्येन।हारिणकुणकविरहेण विह्वले हृदये संतापो यस्य।कश्मलं मोहं प्रापितः सन्॥ १५॥अपीति संभावनायाम् ।

यादिग्रहः । तृतीयादिना जपादिग्रहः । उत्सन्ना नष्टाः ॥ ८ ॥ "शरणस्य परित्यागे महापातकयुग्भवेत्" इत्यादिस्मृतिपरिभाषितं दोषं ज्ञातवता ॥ ९ ॥ तदेव शरण्यानुपेक्षणमेव । एवंविधार्थे दीनपालनादिलक्षणकर्मणि। गुरुतरान्बहुलाभयुतानपि ॥ १० ॥ "अल्पापत्ये जहुः प्रोक्तम्" इति तीर्थः ॥ ११ ॥ "वृको व्याघ्रे कपिक्रोष्टुश्वानः शालावृकाः स्मृताः" इत्यभिधानात् । आदिना सिंहादिग्रहः । तीर्थस्त्वत्र यदेति न पपाठ ॥ १२ ॥ तत्रतत्र महाकर्दमोपरितले कोमले तृणादौ मुग्धभावेन कर्दममध्ये निमज्जामीति ज्ञानराहित्येन विषज्जमानम् ॥ १३ ॥ क्रियायां भगवत्परिचर्यायामपि । अंतरालेऽपि । अभिचक्षीत "न जाने क्व गतो मे हरिणबालकः" इत्युत्थाय पश्येत् । प्रकृतिस्थेन तद्दर्शनानंदप्राप्त्यर्थम् ॥ १४ ॥ दैवाददर्शने सति ॥ १५ ॥ सुजन इव 'आत्मवन्मन्यते जगत्' इति न्यायेन स्वस्य शुद्धचित्तत्वात्त्वामपि शुद्धचित्तं प्रतियन्नित्यर्थः ॥१६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरंतं देवगुप्तं द्रक्ष्यामि ॥ १७ ॥ अपि च न वृकः सालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ॥ १८ ॥ निम्लोचति ह भगवान्सकलजगत्क्षेमोदयस्त्रय्यात्माऽद्यापि मम न मृगवधून्यास आगच्छति ॥ १९ ॥ अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसंतोषं स्वानामपनुदन् ॥ २० ॥ क्ष्वेलिकायां मां मृषासमाधिनाऽऽमीलितदृशं प्रेमसंरंभेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ॥ २१ ॥ आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास ऋषिकुमारवदवहितकरणकलाप आस्ते ॥ २२ ॥ किं वा अरे आचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपदपंक्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयंत्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥ २३ ॥

बतेत्यनुकंपायाम् । अहो इति खेदे । शठकिरातयोरिव वंचनपरा क्रूरा च मतिर्यस्याकृतसुकृतस्य निर्भाग्यस्य मम तच्छाठ्यादिकमगणयन्नचिंतयन्नागमिष्यति किम् । अपराधाचिंतने हेतुः । आत्मप्रत्ययेन स्वचित्तशुद्ध्या कृतविश्वासः सन्सुजनो यथा न गणयति तद्वत् ॥ १६ ॥ शष्पाणि कोमलतृणानि ॥ १७ ॥ नैकचरो यूथचरः सूकरादिः यद्वा एक एव चरति यः क्रूरस्वभावो व्याघ्रादिर्न भक्षयति किम् ॥ १८ ॥ सकललोकस्य क्षेमो यस्मात्स उदयो यस्य वेदत्रयी आत्मस्वरूपं यस्य स सूर्यो निम्लोचत्यस्तं याति । मृगवध्वा न्यासो निक्षेपभूतः ॥ १९ ॥ हरिण एव राजकुमार आगत्य मामपिस्वित्सुखयिष्यतीत्यन्वयः। किं कुर्वन् । विविधै रुचिरैर्दर्शनीयैर्निजैर्मृगदारकविनोदैः स्वीयानां खेदमपनुदन् ॥ २० ॥ संभवति चैतदित्याह । क्ष्वेलिकायां क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरंभेण प्रणयकोपेन पृषज्जलबिंदुस्तद्वदपरुषेण मृदुना विषाणाग्रेण लुठति संघट्टयति ॥ २१ ॥ आसादितं हविर्यस्मिन्बर्हिषि दर्भे दंताकर्षणादिना चापलेन दूषिते सति । दूषित्वेति पाठे बर्हिषि विषये दूषणं कृत्वेत्यर्थः । मयाऽधिक्षिप्तः संस्तत्क्षणमेवोपरतक्रीडो निश्चल आस्ते ॥ २२ ॥ इति बहुधा प्रलप्योत्थाय बहिर्निर्गत्य तत्खुरखातभूभागोपलंभसंभ्रांतहृदय आह ।

देवेन कृपालुनामदिष्टदेवेन श्रीकृष्णेन रक्षितम् ॥ १७ ॥ तीर्थस्तु—नैकचरोऽष्टपान्मृगविशेष इत्याह ॥ १८ ॥ "त्रय्येषा तपति" इति श्रुतेः । केवलमहमेव वेदोक्तदयाधर्मविमुख इति भावः ॥ १९ ॥ प्रेम्णैव तद्गुणमुत्कीर्त्त्यन्प्रलपति—अपीति ॥ २० ॥ "पृषंति बिंदुपृषतः पुमांसो विप्रुषः स्त्रियाम्" इत्यमरः। रे मूढ त्वां पुष्यतो मे श्रवणकीर्त्तनादिनित्यकृत्यं न निर्वहति तत्त्वं मया त्यक्तो यथेष्टमितो याहीति मृषैवाक्रुश्य मृषा समाधिनेति तच्चेष्टितदिदृक्षायाः प्राबल्यात् । प्रेमसंरंभेण प्रणयकोपेन ॥ २१ ॥ दूषणं कृत्वा स्थितवतीत्यर्थः । आः किं करोषीति मयाऽधिक्षिप्तः ॥ २२ ॥ प्रेम्णैव भूभागेष्वारोपितमाहात्म्येन स्वं साधिक्षेपं संबोध्य विलपति—अरे मंदभाग्य भरत वृथातपस्विन् अनयाऽवन्या किं तप आचरितं तत्तपस्त्वया न तप्तमिति भावः । यद्वा—विशेषानुक्त्वा अरे चतुर्दशलोका ब्रूत रे ब्रूत युष्मासु मध्येऽनयेति युष्माकमीदृशं तपो नास्तीति भावः । ननु तरेत्यादिविशेषणैस्तन्माधुर्यास्वादः स्वस्य व्यंजितः । द्रविणपदवीं सूचयन्तीति । भो दुःखिन् भरत किं रोदिषि अनयैव खुरक्षुण्णया पदव्या वनं प्रविशंतं मृगबालकं स्वप्राणधनं प्राप्स्यसीति मां कृपयाश्वासयतीत्यर्थः ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि स्विदसौ भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकंपया कृपणजनवत्सलः परिपाति ॥ २४ ॥ किं वात्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशांतानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च ॥ २५ ॥ एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारंभणतो विभ्रंशितः स योगतापसो भगवदाराधनलक्षणाच्च । कथमितरथाजात्यंतर एणकुणक आसंगः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमंतरायविहतयोगारंभणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥ २६ ॥

किं वेति । अरे अहो अनया क्षित्या किं वा तप आचरितं तपस्विन्या सभाग्यया । यद्यस्मादियं सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्च खराश्च खुरा येषु तेषां पदानां तत्रतत्रांकितानां पंक्तिभिर्द्रविणं मृगस्तेन रहितस्यात एवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयंती सती स्वात्मानं च ताभिः कृतमण्डनं द्विजानां देवयजनं यज्ञभूमिं करोति । "यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत" इति स्मृतेः॥ २३ ॥तावदुदिते चन्द्रे मृगं दृष्ट्वा स्वमृगत्वं संभावयन्नाह । अपिस्विदिति ॥ २४ ॥ चंद्ररश्मिस्पर्शसुखं प्राप्याह । किं वेति संभावनायाम् । आत्मजविश्लेषेण ज्वरस्तापः स एव दवदहनस्तस्य ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य । जलस्थं पद्मं तापं सोढुं न क्षममिति स्थलग्रहणम् । उपसृतोऽनुगतो मृगीतनयो येन तं मां चंद्रः स्वधयति शांतिं गमयति । कैः । शिशिरं शांतं मय्यनुरागेण गुणितं चावर्तितं पुनःपुनःस्रवद्यद्वदनसलिलं तदेवामृतमया गभस्तयस्तैः । लोके हि मंत्रवादिनो वदनसलिलैस्तापं शमयंतीति प्रसिद्धम् । उपसृत्य मृगीतनय इति पाठे मनोरथांतरमेतत् उपसृत्य मृगीतनयः किं वा मां स्वधयिष्यतीति । शेषं समानम् ॥ २५ ॥ मृगदारकवदाभासमानेन भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः । प्रारब्धकर्मत्वे

स्वाश्रमात्परिभ्रष्टमिति । ममैव पापिष्ठस्यानवधानादिति भावः । भगवानिति । भगवत्त्वं विनेदृशं भाग्यं न संभवेदिति भावः ॥ २४ ॥ चंद्रकिरणानां दाहकत्वमनुभूयाहो मदात्मजविरहे शीतकिरणोऽप्युष्णकिरणो भवति हंतहंत किं मे समयो भविष्यति यत्र स मृगीतनयो भूयोपि मामुपैष्यति । चंद्रोप्ययं मां शिशिरयिष्यतीत्यभिलपन्नाह–किं चेति । उपसृतो मृगीतनयोऽयं तथाविधं मां चंद्रोऽयं सुखयति विरहसंततस्यांगस्य सुधाप्लुतीकरणात्सुधावंतं किन्न करिष्यतीति " विन्मतोर्लुक् " इति मतुपो लुका रूपम् । कैः शिशिरं च तत् शांतमनुग्रं च मय्यनुरागेण गुणितं च यद्वदनसलिलं पुनःपुनः स्रवत्तदेवामृतमया गभस्तयस्तैः । यथा मांत्रिका अभिमंत्रितमुखांबुभिस्तापं घ्नंति तथायमपीत्यर्थः । मृगीतनयः प्रेम्णा निजसुखस्पर्शेन मामिहागत्य सुखयिष्यतीति ल्यबंतपाठपक्षेऽर्थः ॥ २६ ॥ एवमिति श्रीशुकोक्तिः । मृगदारकमाभासयति प्रकाशयतीति यत्तेन स्वारब्धकर्मणा प्रारब्धं हि द्विविधं शोभनमशोभनं च तत्राद्यं भक्तप्रियेणापि नयनतीव्रांजनदानन्यायेन स्वभक्तयुत्कर्षवर्द्धनविदग्धेन भगवतैव स्वेच्छयैव प्रारब्धतुल्यत्वात्प्रारब्धमुपपाद्यते यदुदर्को भक्त्युद्रेक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचंतमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु नमृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥२७॥ तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥२८॥ अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसंगस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥ २९ ॥ इत्येवं निगूढनिर्वेदो विसृज्य मृगीमातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालंजरात्प्रत्याजगाम ॥ ३० ॥

हेतुः । कथमितरथेति । साक्षात्स्वपुत्रवत्कथमासंगः स्यात् । पूर्वं परित्यक्ता दुस्त्यजा औरसा येन । अंतरायेण विहतं योगारंभणं यस्य । आत्मानमविगणयत आत्मचिंतामकुर्वतः । तावदेव तीव्रवेगः कालो मृत्युसमयश्चापद्यत ॥ २६ ॥ लोकं देहं मृगेण सहितं विसृज्य प्राकृत इव मृगशरीरमवाप । कथंभूतः । कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य ॥ २७ ॥ आह स्वे चित्ते ॥ २८ ॥ अहो कष्टं धीराणां मार्गाद्भ्रष्टोऽहम् । भ्रंशमेवाह । यद्यतो विमुक्ताः समस्ताः संगा येन । विविक्तं पुण्यारण्यं शरणं यस्य । आत्मवतो धीरस्य मम मनः सर्वेषां भूतानामात्मनि वासुदेवे समावेशितं समाहितं च निश्चलं सदारादूरादेव परिसुस्राव गलितं निःसृतम् । केन समावेशितम् । तस्यानुश्रवणादिष्वभियोगेनाभिनिवेशेनाशून्याः सकला यामा यस्मिंस्तेन कालेन ॥ २९ ॥ निगूढोऽनाविष्कृतो निर्वेदो येन । शालवृक्षोपलक्षितं

एव स्यात्तत्खलूत्सन्नवर्त्तिनामपि संभवेदेव । द्वितीयं तु प्राचीनप्राकृतकर्ममयमेव यदुदर्को विषयाभिनिवेश एव स्यात् । अत्र तु शोभनेनारब्धेनेति साक्षात्सुशब्द एवोपन्यस्तः । योगेन भक्तियोगेन हेतुना तापसः सर्वविषयत्यागरूपं तपः कुर्वाणः । यद्यपि भक्तियोगो बहुविघ्नाकुलो न भवति तथापि भगवदिच्छया भगवदाराधनाद्विभ्रंशित इत्यर्थः । इतरथा प्रारब्धकर्माभावे । जात्यंतरे भिन्नजातौ । कथमासक्तिःस्यान्न कथमपीत्यर्थः । साक्षान्निःश्रेयसस्य भगवत्प्राप्तेः प्रतिपक्षतया विरोधित्वेन " पुत्रदारमयैः पाशैः पुमान्बद्धो न मुच्यते " इत्युक्तेस्तत्प्राप्तिबंधकरूपत्वेन । प्राक् पूर्वं परित्यक्ता दुस्त्यजास्त्यक्तुमशक्या हृदयाभिजाता औरसात्मजा येन तस्य । अंतरायेण मृगरूपविघ्नेन योगो यमनियमादिस्तस्यारंभणं करणम् । आखुर्मूषिकः ॥ २६ ॥ तदानीमपि देहत्यागावसरेपि । अनुशोचंतं मृगम् । इतरवत् इतरः प्राकृतः सकर्मा तद्वदिति । भरतस्तु कर्मातीत एवात एव तस्य प्रारब्धाभावः प्रावसमर्थितः ॥ २७ ॥ तत्रापि मृगशरीरप्राप्तावपि । भगवदाराधनस्य समीहाऽनुष्ठानं तस्यानुभावः प्रभावस्तेन ॥ २८ ॥ २९ ॥ शालग्रामं तदाख्यं क्षेत्रं गंडकीतटम् ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्नपि कालं प्रतीक्षमाणः संगाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदक क्लिन्नमुत्ससर्ज ॥ ३१ ॥ इति श्रीमद्भागवते महापु० पंचमस्कंधे भरतचरिते मनुष्यदेहत्यागपूर्वकमृगशरीरप्राप्तित्यागवर्णनं नामाऽष्टमोऽध्यायः ॥८॥ श्रीशुक उवाच ॥ अथ कस्यचिद्विजवरस्यांऽऽगिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानंदयुक्त स्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अंगजा बभूवुर्मिथुनं च यवीयस्यां भार्यायाम् ॥ १ ॥ यस्तु तत्र पुमांस्तं परमभागवतं राज र्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥ तत्रापि स्वजनसंगाच्च भृशमुद्विजमानो भगवतः कर्मबंधविध्वंसनश्रवणस्मर णगुणविवरणचरणारविंदयुगलं मनसा विदधदात्मनः प्रतिघातमाशंकमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडांधबधिर स्वरूपेण दर्शयामास लोकस्य ॥ ३ ॥

ग्रामम् । कालंजरायत्र हरिणो जातस्तस्मात्पर्वतात् ॥ ३० ॥ आत्मैव सहचरो यस्य एकाकी । प्रतीक्षमाणस्यैव प्रपंचः मृगत्वनिमित्तेति । तीर्थोदकेन क्लिन्नमार्द्रमर्धोदक स्थमित्यर्थः ॥ ३१ ॥ इति श्रीमद्भागवते पंचमस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥ नवमे जडविप्रत्वे तस्य रागाद्यभावतः ॥ भद्रकालीपशुत्वेऽपि निर्विकारत्वमीर्यते ॥ १॥ पितुः प्राप्तात्मविज्ञानो भरतो मृगतां गतः ॥ प्रारब्धकर्मवेगेन तदंते जडविप्रताम् ॥ २ ॥ आंगिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य । शमादियुक्तस्य । त्यागोऽत्रातिथ्यादि भ्योऽन्नदानादि । विद्या कर्मविद्या । आत्मज्ञानं देहादिव्यतिरिक्तभोक्त्रात्मज्ञानम् । आनंदो धर्मसंपत्तिजः । आत्मना सदृशाः श्रुतादयो गुणा येषां ते समानोदरा नव पुत्रा बभूवुः । यवीयस्यां कनिष्ठायां च मिथुनं स्त्रीपुरुषयुग्मम् ॥ १ ॥ उत्सृष्टं मृगशरीरं येन तम् । "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" इति स्मृतेः ॥ २ ॥ तत्रापि चान्यसंगादात्मनो भ्रंशमाशंकमानश्चात्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः । किं कुर्वन् । कर्मबंधविध्वंसनं श्रवणं स्मरणं गुणानां विवरणं कथनं च यस्य तस्य भगवतश्चरणारविंदयुगलं मनसा विशेषेण धारयन् । प्रतिघातशंकायां हेतुः । अनुस्मृता स्वीयपूर्वजन्मनामावलिः परंपरा येन सः ॥ ३ ॥

तस्मिन्नपि क्षेत्रे ॥ ३१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ तस्य उत्सृष्टमृगशरीरात्तविप्रदेहस्य । भद्रकाली दुर्गा (१) तदंते प्रारब्धकर्मान्ते (२) अथ मृगदेहत्यागानंतरम् । स्वाध्यायाध्ययनं स्वशाखोचितवेदाध्ययनम् । संतोषो यदृच्छालाभेनालंबुद्धिः । परापराधसहनं तितिक्षा प्रश्रयः । प्रणयः ॥ १ ॥ तत्र मिथुने । चरमशरीरेणांत्यदेहेन । मोक्षे मुख्याधिकारित्वेन ब्राह्मण देहस्यैव चरमत्वमेतच्च स्वयं भगवता श्रीकृष्णेन श्रीदशमे मुचुकुंदोपाख्याने स्फुटीकृतम् । " भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम् " इत्यादिना ॥ २ ॥ तत्रापि ब्राह्मणशरीरेपि । चादन्यसंगात् । लोकस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान्यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्कर्मनियमाननभिप्रेतानपि समशिक्षयत्। अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥ ४ ॥ स चापि तदु ह पितृसन्निधावेवासध्रीचीनमिव स्म करोति छंदांस्यध्यापयिष्यन्सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥ ५ ॥ एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥ ६ ॥ अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् ॥ ७ ॥ पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्बंधान्न्यवृत्संत ॥ ८ ॥

पुत्रस्नेहेऽनुबद्धं मनो यस्य। जडस्य गार्हस्थ्यानधिकारात्समावर्तनांतान्संस्कारान्विदधानस्तमुपनीयोपनीतस्य पुनः शौचादींस्तस्यानभिप्रेतानपि शिक्षितवान्। तत्र हेतुः। अनुशिष्टेन हि भाव्यं पितुः सकाशात्पुत्रेणेति ॥४॥ सोऽपि च पितुः शिक्षानिर्बंधनिवृत्तये असध्रीचीनमसमीचीनमिव करोति स्म। उपाकरणवेदव्रताद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यन्नादौ तावद्व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं चैत्रादिचतुरो मासानधीयानमप्यसमवेतरूपं यथाभवत्येवं ग्राहयामास । तावतापि कालेन स्वरानुपूर्व्या युक्तं व्याहृत्यादि तस्य नागतमित्यर्थः ॥५॥ आत्मभूते स्वतनुजेऽनुरागेणावेशितं चित्तं येन । शौचादीनि यान्यौपकुर्वाणकस्य सावधिब्रह्मचर्यवतः कर्माणि तेनानभियुक्तान्यनादृतान्यपि तं पुत्रं प्रत्यनुशास्याप्यप्राप्तपुत्रपांडित्यमनोरथः स्वयं कालेनोपसंहृतो मृत इत्यर्थः। अनुशासननिर्बंधे पुनस्तमेव हेतुमाह। अनुशिष्टेन भाव्यमित्यसन्नयोग्य आग्रहो यस्य ॥ ६ ॥ सपत्न्यै समर्प्य। अनुसंस्थयाऽनुमरणेन। सप्तम्यंतपाठेऽप्ययमेवार्थः ॥ ७ ॥ न्यवृत्संत निवर्तितुमैच्छन्। निवृत्ता इत्यर्थः ॥ ८ ॥

लोकम् ॥ ३ ॥ तस्यापि जडस्वरूपस्यापि । समावर्त्तनं संस्कारभेदः । अनभिप्रेतांतस्मै अरोचमानानपि । तत्र शिक्षणे । अनुशिष्टेन शिक्षितेन ॥ ४ ॥ इत्यर्थ इति । पितृकर्तृपाठनहठनिवृत्त्यर्थं जानन्नेव तथा चकारेति भावः ॥ ५ ॥ “ आत्मा वै पुत्रनामासि ” इति श्रुतेरात्मभूते स्वस्वरूपे । इत्यर्थ इति । उपसंपूर्वस्य हरतेः समाप्त्यर्थकत्वादिति भावः । समनुशिष्टेन सम्यग्विशिक्षितेन पुत्रेण भाव्यं भवितव्यम् । पितुः सकाशादिति । बालापाठने “ माता वैरी पिता शत्रुर्बालो याभ्यां न पाठितः ” इत्यादिना मातापित्रोरपि निंदाश्रवणात्तन्निवृत्तये यथाबलं स्वविद्यानिष्णात एवात्मजः कारयितव्य इति ॥ ६ ॥ अथ भर्तृमरणोत्तरम् । यत्तु “ मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ” इति हारीतेनोक्तं तत्पृथक्चितिविषयं “ पृथक्चितिं समारुह्य न विप्राऽग्निं समाविशेत् ” इति बृहन्नारदीयोक्तेः ॥ ७ ॥ पितरीति । अनुशिष्टवतीति शेषः । एनमनुशिष्टवति । पितर्युपरते सति । इत्यर्थ इति । न तु पितेव तस्मिन्नाग्रहवंत इति भावः । सन्ततालुङि लुङि वा रूपमिदमार्षमेवेति ज्ञेयम् । न परविद्यायामित्यनेन “त्रैगुण्यविषया वेदाः” इत्यादिभगवदुक्तेस्त्रयीविद्याती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि स च कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहु मिष्टं कदन्नं वाऽभ्यवहरति परं नेंद्रियप्रीतिनिमित्तम् ॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमः सुखदुःखयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः ॥ ९ ॥ शीतोष्णवातवर्षेषु वृष इवानावृतांगः पीनः संहननांगः स्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबंधुरिति संज्ञया अतज्ज्ञजनावमतो विचचार ॥ १० ॥ यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किं तु न समं विषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥ ११ ॥

यदाऽभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते । मूल्यमंतरेण बलाद्यत्कर्म कार्यते सा विष्टिः । वेतनं मूल्यम् । विष्टयादिभिरुपसादितमन्नमभ्यवहरति परं भुंक्ते केवलं न त्विंद्रियप्रीतये । अत्र हेतुद्वयमाह । नित्यं सदा निवृत्तं निमित्तं यस्मात्स उत्पादकशून्यः स्वसिद्धोऽभिव्यंजकशून्यो विशुद्धः केवलो योऽनुभवः स एवानंदरूपः स्वात्मा तस्य लाभ एवंभूतोऽहमिति ज्ञानं तस्याधिगमः प्राप्तिरस्ति यस्य । द्वंद्वानि सन्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः तस्मान्नेंद्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः ॥ ९ ॥ अत एव शीतोष्णादिष्वनावृतांगो विचचारेत्यन्वयः । कीदृशः । पीनः पुष्टः संहननांगः संहन्यंते निबिडी भवंति स्मांगानि यस्य । कठिनावयव इत्यर्थः । स्थंडिलसंवेशनं भूमिशयनम् अनुन्मर्दनं मर्दनाभावः अमज्जनं स्नानाभावः तैर्यद्रजस्तेनाप्रकटं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य । यथा महामणिरनभिव्यक्ततेजा भवति कुत्सितेन पटेनावृता कटिर्यस्य । उरुमषिणाऽतिमलिनेन । तत्त्वतस्तं न जानंति ये तैर्जनैरवमतः सन् ॥ १० ॥ यदा तु परेभ्यः कर्ममूल्येनाहारमपेक्षमाणो भवति तदा केदारकर्मणि शालिक्षेत्रे

तत्वं परविद्यात्वं च दर्शितं तत्रापीत्यादिगद्ये तस्य भक्त्येकनिष्ठताया दर्शितत्वात् । अत्र चैवं ज्ञेयम्–सोयमंतर्भगवन्निष्ठ एव आत्मारामता तु शुकादिवद्बहिरंगैव तदावरणाय प्रयुक्ता तस्या अप्यावरणायोन्मत्तचेष्टेति । किञ्च–भगवद्भक्तिरेव परविद्या ' सा विद्या तन्मतिर्यया ' इति नारदोक्तेः । ' विद्यान्या केवलं विद्या परविद्या हरौ मतिः ' इत्युक्तेश्च । क्वचिन्न्यवृत्सन्नित्यपि पाठः ॥ ८ ॥ स च जडभरतः । प्राकृतैः मूढैः । अस्य विवरणं द्विपदेत्यादि । चतुष्पदः पशोर्द्विपदत्वमेव विशेषः । तादृशैर्मनुष्यैर्यदा हे उन्मत्त इत्यादिनाभिभाष्यमाणो भवति तदा तदनुरूपाण्युन्मत्तादिवचनानुकूलवचनानि भाषते । यद्वा–तदनुरूपाणि प्रतिध्वनिवत्तदुक्तानेव शब्दान्वदतीत्यर्थः । कदन्नं रसादिहीनम् । इंद्रियप्रीतये जिह्वादींद्रियतृप्तये अत्र इन्द्रियप्रीत्यभावे । निमित्तं कारणम् । अन्यानपेक्षिस्वरूपानंदावाप्तेरिंद्रियप्रीतिनिमित्ताभाव इत्यर्थः । द्वितीयमाह–त्यक्तदेहाभिमानत्वादित्यर्थः । अत्र विश्वनाथः–नित्यं सदैव । पूर्वजन्मन्यपि निवृत्तं निमित्तं कर्म यस्य सः । स्वसिद्धेन स्वत एव सिद्धेन । विशुद्धेन प्राकृतेनानुभवानंदेन दृष्टेनैव स्वात्मनः स्वेष्टदेवस्य कृष्णस्य लाभाधिगमो लाभप्रतीतिर्यस्मिन् स च स च सः । अत एव द्वंद्वयोरिति पूर्ववत् ॥ ९ ॥ इत्यर्थ इति । संपूर्वस्य हंतेर्दृष्टसंघातार्थत्वमुक्तम् । वररुचिनोक्तत्वादिति भावः ॥ १० ॥ सर्वं दिनं कर्म कारयित्वाऽऽहारमात्रं चेद्ददति तर्हि वयमेव तथा कारयामोऽप्रतिष्ठा च न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥ १२ ॥ तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावंतो निशि निशीथसमये तमसा वृतायामनधिगतपशव आकस्मिकेन विधिना केदारान्वीरासनेन मृगवराहादिभ्यः संरक्षमाणमंगिरःप्रवरसुतमपश्यन् ॥ ॥ १३ ॥ अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चंडिकागृहमुपनिन्युर्मुदाविकसितवदनाः ॥ १४ ॥ अथ पणयस्तं स्वविधिनाऽभिषिच्याऽहतेन वाससाच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवंतं धूपदीपमाल्यलाजकिसलयांकुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदंगपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥ १५ ॥ अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमंत्रितमसिमतिकरालनिशितमुपाददे ॥ १६ ॥

कर्दमविलोडनादावाहारप्रलोभनेन नियुक्तः सन्करोति किं त्वत्र कर्दमस्य प्रक्षेपे क्षेत्रं समं भवेदित उद्धरणे विषमं स्यादित्यादि न वेद । भ्रातृभिर्दत्तान्कणादीनप्यमृतवद्भुंक्ते । कणाश्चूर्णतंडुलाः । पिण्याकं तैलयंत्रोद्धृतं तिलकिट्टम् । फलीकरणं तुषाः । कुल्माषाः कीटदष्टा माषाः । स्थालीपुरीषं स्थालीलग्नं दग्धान्नम् ॥ ११ ॥ तस्य रागादिराहित्यमलौल्यं चैवमीरितम् । अथान्यच्चरितं प्राह चित्रं मृत्यावसंभ्रमम् ॥ वृषलपतिः शूद्रसामंतश्चोरराजः आलभताऽऽलब्धुं प्रवृत्तः ॥ १२ ॥ दैवाद्बंधनविमुक्तस्य पशोः तमसा व्याप्तायां निशि तत्रापि निशीथसमयेऽर्धरात्रावसरे । आकस्मिको दैवनिर्मितो विधिः प्रकारस्तेन । वीरासनेनोर्ध्वावस्थानेन ॥ १३ ॥ अवमृश्य ज्ञात्वा ॥ १४ ॥ पणयश्चोराः । अहतेन नूतनेन । उपस्कृतमलंकृतम् । वैशससंस्थया हिंसाविधानेन गीतादिघोषेण सह ॥ १५ ॥ वृषलराजस्य पणिः पुरोहितत्वेन वर्तमानश्चोरः । तदभिमंत्रि

तावती भविष्यतीति भावः । आदिना कोद्रवादिग्रहः ॥ ११ ॥ अथेति चरितांतरारम्भसूचनाय । अलौल्यमचाञ्चल्यम् । असंभ्रमं भयाभावम् (१) भद्रं कालयति दुष्टानां कल्याणं चालयतीति भद्रकाली वा भद्राणां सुकृतिनां कं सुखं तेनालते शोभत इति भद्रकाली तस्यै । अत्रोपाख्यान एव भद्रकालीपदार्थद्वयं चरितार्थं भविष्यतीति ज्ञेयम् ॥१२॥ तत्रापि निश्यपि ॥१३॥ अथ तद्दर्शनानंतरम् । अनवद्यानि निर्दोषाणि लक्षणानि हीनांगत्वादिराहित्यानि यस्य तम् । भर्तृकर्मणः संततिप्राप्तिरूपस्य सिद्धिम् । रशनया रज्वा ॥ १४ ॥ स्वविधिना बलिदानविधिना । लाजाभृष्टव्रीहयः । किसलयो बिल्वपत्रादि । अंकुरो यवांकुरः न तु दूर्वांकुरः 'दुर्गां नैव तु दूर्वया' इति पाद्मोक्तेः । तत्पूजनस्यापि दुर्गापूजनांगतयांगांगिनोरभेदत्वा द्दुर्गार्चनत्वमेवेति ॥ १५ ॥ वृषो धर्मो लीयते एभिरिति वृषलः "हिंसाचौर्यानृतैर्धर्मो लीयते सर्वदेहिनाम्" इत्युक्तेरेषु प्रसक्तास्तेषां राजा तस्य पणिः "पणिस्तोतारि चौरे च व्यवहर्तृपुरोधसोः" इति तीर्थस्वामिनौ । भद्रकाल्या मंत्रेण "गृध्रकर्णि विरूपाक्षि लंबस्तनि महोदरि । हन शत्रुं त्रिशूलेन क्रुद्धस्य पिब शोणितम् ।" इत्यादिना "कालिकालि महाकालि" इत्यादिनाभिमंत्रितमर्चितम् ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालंभनं तदुपलभ्य ब्रह्मतेजसा अतिदुर्विषहेण दंदह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली ॥ १७ ॥ भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हंतुकामेवेदं महाट्टहासमतिसंरंभेण विमुंचंती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात् स्रवंतमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त च विजहार च शिरःकंदुकलीलया ॥ १८ ॥ एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनाऽऽत्मने फलति ॥ १९ ॥

तं भद्रकालीमंत्राभिमंत्रितम् ॥ १६ ॥ धनमद एव रजस्तेनोत्सिक्तं त्यक्तमर्यादं मनो येषाम् । भगवत्कलायुक्तं वीराणां ब्राह्मणानां कुलं तुच्छीकृत्य यथेच्छं वर्तमानानां यत्कर्म तदुपलभ्य देवी उच्चचाट प्रतिमां त्यक्त्वा बहिर्निर्गता । कथंभूतमालंभनम् । सूनायामप्यापत्कालेऽनुज्ञातायामपि हिंसायामननुज्ञातम् । भद्रकालीत्यंतं गद्यम् ॥ १७ ॥ अमर्षोऽपराधासहनं रोषश्च वपुषो दाहनं तयोरावेशस्तस्य रभसेन वेगेन विलसित उत्तंभितो भ्रुकुटिलक्षणो विटपः शाखा कुटिला दंष्ट्राश्चारुणानीक्षणानि च तेषामाटोपः संभ्रमस्तेनातिभयानकं वदनं यस्याः । इदं जगद्धंतुमुद्यतेव । महांतमट्टहासं सनादं हासम् । ततः स्थानादुत्पत्य विवृक्णानि छिन्नानि शीर्षाणि येषाम् । गणेन परिवारेण सह । शिरांस्येव कंदुकानि तेषां लीलया चिक्रीड च ॥ १८ ॥ ननु कथं देव्याराधकानामेवं विपरीतं फलं तत्राह । एवमेवेति महत्स्वभिचाररूपोऽतिक्रमोऽपराधः ॥ १९ ॥

भगवानेव कला वेदास्तेषामध्ययनाध्यापनविचारे ये वीरा अग्रण्यो ब्राह्मणास्तेषां कुलम् 'वेदो नारायणः साक्षात्' इति षष्ठस्कंधे वेदस्य साक्षान्नाराणरूपत्वोक्तेः । 'यत्र मूर्त्तिधराः कलाः' इत्यष्टमस्कंधे कलाशब्दस्य वेदपरत्वस्योक्तत्वाच्च एतेन भगवद्रूपवेदविचाराग्रगण्यब्राह्मणकुलमित्यर्थों लब्ध इति 'अननुज्ञातं मनुष्यं नालभेद्देव्यै ब्राह्मणं तु कदापि न' इत्याद्यागमशास्त्रेणापि ब्राह्मणालंभनं नानुज्ञातमित्यर्थः । अत एव हरिश्चन्द्रमखे भार्गवः शुनःशेफो देवैर्न गृहीतो बलित्वेन किन्तु रक्षित एव तत एव स देवरातत्वञ्च प्राप्तवानिति व्यक्तीभविष्यति नवमस्कंधे । यत्तु "ब्रह्मणे ब्राह्मणाꣳ क्षत्राय राजन्यम्" इति यजुर्वेदे पुरुषमेधप्रकरणे प्रोक्तम् । तत्र ब्राह्मणस्य यूपसमीपे पर्यग्निमात्रं कृत्वा त्याग एव तत्स्थाने घृतहोमविधानात् तथा च श्रुतिः-"तत्पर्यग्निकृताः पशवो बभूवुरसंज्ञप्तास्तान्पर्यग्निकृतानेवोदसृजत्तद्देवत्या आहुतीरजुहोत्ताभिस्ता देवता अप्रीणात्ता एनं प्रीता अप्रीणन्सर्वकामैः आज्येन जुहोति तेजो वा आज्यं तेजसैवास्मिंस्तत्तेजो दधाति" इति तद्भाष्यात् । यद्वा–भगवतः कला रक्षा भगवत्कला तद्युतं वीरकुलं ब्राह्मणकुलम् "विप्रैः संवर्धितो विष्णुर्जपहोमार्चनादिभिः । भगवद्रक्षका एते वीरा एव न संशयः ॥" इति संहितोक्तेस्तत्रैव वीरशब्दो ब्रह्मणवाचको दृष्टस्तथाहि 'वीरः शूरे जिने विष्णौ रसे विप्रेऽर्जुने द्रुमे । शृंग्यां नले तंडुलीये किरिकंदे च पौष्करे ॥ आरूकोशीरमरिचकाञ्जिके च करञ्जके । वायौ श्रेष्ठे तथा वीराचारनिष्ठेऽपि कीर्त्तितः ॥" इति । यद्वा सैव या यष्टुमाकांक्षिता प्रतिमारूपा देव्येवोच्चचाट छिन्नभिन्ना बभूव न तु तदीयासिना भरतः च्छिन्नो बभूवेत्येवकारार्थो व्यक्तः ॥ १७ ॥ १८ ॥ अत्राशंकते–नन्विति । कार्त्स्न्येन सामस्त्येन न त्वेकदेशेन । आत्मने व्यभिचारत्रर्के । फलत्यभिचारफलं ददाति "यो हि यस्य विषमं विचिंतयेत्प्राप्नुयात्स कुमतिर्हि तत्फलम्" इति लोलिंबोक्तेः ॥ १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न वा एतद्विष्णुदत्तमहदद्भुतं यदसंभ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रंथीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवता आनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम् ॥ २० ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे जडभरतचरितं नाम नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ अथ सिंधुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननांगो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः ॥ १ ॥

नन्वसंभावितमिदमेवं यन्मरणेऽप्यव्याकुलत्वं मारकेषु च क्रोधाभाव इत्यादि तत्राह । न वा इति । विमुक्तो देहाद्यात्मभावलक्षणः सुदृढो हृदयग्रंथिर्यैः सर्वसत्त्वानां सुहृद आत्मा नश्च ये तेषाम् । न च तेषां देहाद्यभिमानसद्भावेपि मरणादिभयमस्तीत्याह । साक्षाद्भगवताभितो रक्ष्यमाणानाम् । केन । अनिमिषः कालः स एवारिचक्रं तेन वरायुधेन तैस्तैर्भावैश्चांतर्यामितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः । न कुतश्चिदपि भयं यस्मिन् । भागवतानां भगवदुपासकानां परमहंसानाम् ॥ २० ॥ इति पंचमस्कंधे टीकायां नवमोध्यायः ॥ ९ ॥ दशमे क्षिपता राज्ञा शिबिकां स्वां वहन्मुनिः ॥ स्वदुर्वादानुवादेन विज्ञायाशु प्रसादितः ॥ १ ॥ एवंभूताविकारित्वमज्ञसर्वज्ञयोः समम् ॥ इति सर्वज्ञतासिद्ध्यै रहूगणकथेरणम् ॥ २ ॥ रहूगणो नाम सिंधुसौवीरदेशयो राजा तत्त्वजिज्ञासुः कपिलाश्रमं यदा गच्छति स्म तदा यद्वृत्तं तदाह । अथेति । इक्षुमत्या नद्यास्तीरे । तेषां शिबिकावाहानां कुलस्य नाथेन एष गौरिव खर इव च भारं वोढुं समर्थ इति धिया पूर्वं ये केचन विष्टया बलाद् गृहीतास्तैः सह प्रसभं बलाद् गृहीतः सन्नतदर्होऽपि स

पुनराक्षिपति—नन्विति । केन रक्ष्यमाणानां तत्राहानिमिषेति—विष्णुरातेति । यथा त्वमतीवदुर्निवार्यब्रह्मास्त्रतो विष्णुना सुदर्शनास्त्रेण रक्षितस्तथायमपीति भावः ॥ २० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे नवमोऽध्यायः ॥ ९ ॥ क्षिपता तिरस्कुर्वता रहूगणेन स्वस्य दुर्वादा दुरुक्तयस्तेषामनुवादेन यथावत्प्रतिपादनेन (१) एवंभूतं स्वमारकेष्वपि क्रोधानुत्पादनरूपं यदविकारित्वं तदज्ञस्यातीवबालस्य सर्वज्ञस्य देहाद्यतिरिक्तात्मानुसंधानवतश्च सममेवातस्तत्र को विशेष इति हेतोः (२) तदेवं भरतस्य कणपिण्याकादिभिः स्वपालकेषु भ्रात्रादिषु तत्प्रतिवेशितेषु च सकर्मित्वाद्राजसेष्वपि कृपां चकारैव यतो बहुकालं तेभ्यो दर्शनं ददौ तथैव वृषलराजे दुराचारसक्तत्वादतितामसे स्वघातकेऽपि कृपां चकारैव यतस्तेनापि प्रकारेण स्वस्य देव्याश्च साक्षाद्दर्शनं जन्मांतरेऽपि तन्मुक्तिकारणं कारयामासैव तथैव रहूगणे ज्ञानित्वात्सात्त्विके राजत्वोचितशिबिकां वाहयत्यपि कृपां चकारेति तत्र रजस्तमसोः प्रकाशकत्वाभावादारात्सत्त्वस्य तु प्रकाशकत्वाद्रहूगण एव भरतस्य भक्तिज्ञानादिप्रकाशो न पूर्वयोरिति ज्ञापयंस्तदुपाख्यानमारभते—अथेति कदाचिदर्थे । परमहंसत्वेन सर्वत्र तस्य साम्यस्यौचित्येपि महाभागवतत्वादेव कृपा व्याख्येया भरतस्य भक्तिज्ञानवैराग्यादिकं भगवत्कृपया शतगुणी बभूवेति एतत्कथं ज्ञायते इत्येतदर्थं रहूगणोपाख्यानमिति च केचिदाहुः । शिबिका नरयानं "काश्यां पुर्यां नृयाने च शिबिका प्रोच्यते बुधैः" इति । उपसादितः प्रापितः उपलब्धः आसीदिति शेषः । एवं च वाक्यभेदेनाग्रिमस इत्यस्यापि न पौनरुक्त्यम् । पीवा पुष्टांगः । संहननांगो बलिष्ठश्च । अतदर्हः ब्राह्मण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह॥हे वोढारः साध्व तिक्रमत किमिति विषममुह्यते यानमिति ॥ २ ॥ अथ त ईश्वरवचः सोपालंभमुपाकर्ण्योपायतुरीयाच्छंकितमनसस्तं विज्ञापयांबभूवुः ॥ ३ ॥ न वयं नरदेव प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः ॥ अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति ॥ ४ ॥ सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसाऽऽवृतमतिराह ॥ ५ ॥ अहो कष्टं भ्रातर्व्यक्तमुरु परिश्रांतो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननांगो जरसा चोपद्रुतो भवान् ॥ सखे नो एवापर एते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ६ ॥

महानुभावः शिबिकामुवाहेत्यन्वयः ॥ १ ॥ हिंसापरिहारार्थमिषुमात्रप्रदेशावलोकस्यानु पश्चाद्या गतिस्तस्या हेतुभूतायाः पुरुषाणां गतिर्न सम्यगाहिता एकरूपा नाभूत् ॥ २ ॥ सोपालंभं साक्षेपम् । सामदानभेददंडेषूपायेषु चतुर्थाच्छंकितचित्ताः ॥ ३ ॥ भवन्नियमानुपथास्त्वदाज्ञानुवर्तिनः । न पारयामो न शक्नुमः ॥ ४ ॥ कृपणानां वचो निशम्य सांसर्गिकः संसर्गनिमित्त एकस्यापि दोषः सर्वेषामेव भवितुमर्हतीति निश्चित्य रहूगण आहेत्यन्वयः । कथंभूतः ॥ उपासिता वृद्धा येन सोऽपि स्वभावेन बलात्परवशः कृतः सन् । कथंभूतं प्रत्याह न विस्पष्टं ब्रह्मतेजो यस्मिन् । भस्मनाच्छन्नमग्निमिव स्थितम् ॥ ५ ॥ भ्रातरिति संबोधनमाक्षेपाभिप्रायम् । व्यक्तं

त्वाच्छिबिकावहनायोग्यः तत्रापि महानुभवोऽतीवपूज्यतमः ॥१॥ उपधार्य्य ज्ञात्वा ॥२॥ अथ तदानीं, ते वोढारः, ईश्वरवचो राजवचनम् । तं राजानम् ॥३॥ नरदेवेति । अस्माकं नराणां त्वं देव एवातस्त्वदाज्ञां सर्वथा वयं गृह्णीम इति भावः ॥ ४ ॥ कृपणवचो दीनवाक्यम् ॥ ५ ॥ भ्रातः सख इत्यादिसंबोधनेन भ्रात्रादिभिः सह लोके विरोधो दृश्यते नान्यैरिति सूचितम् । विपरीतार्थकानि तेन श्रांतोऽसि यतोऽधुनैवात्र नियोजितः अतिपीवा भवसि दृढांगश्चासि युवा चासि एतेऽपरेऽन्ये तव संघट्टिनश्च तथा न संति तदपि विरुद्धगत्या वोढुं न शक्नोषीति मयि राजन्यपि दुष्टतां किं प्रकाशयसीत्यर्थः । अविद्यया मायया । अवस्तुनि मायिकत्वादनित्ये । यद्यपि भरतस्य तच्छरीरं शुकदेवादीनामिवाप्राकृतत्वादनश्वरं नित्यमेव तदपि तस्य तदानीमुत्पन्नप्रेमत्वादेव भगवंतं विनाऽन्यत्र स्वदेहादौ ममत्वासंभवात्तदानीं तेन देहेन साक्षात्सेवाऽलाभादौत्कण्ठ्यवृद्ध्यातिदैन्येनाहंत्वस्यार्पणात् सर्वज्ञत्वेऽपि तत्र स्वदेहे प्राकृतत्वभानमेवातस्तत्संमत्या श्रीशुकदेवेनापि तत्प्राकृतमिव वर्णितम् । वस्तुतस्तु-स्वसंमत्या तदप्राकृतमेव व्याख्यातम् । सा व्याख्या च यथाऽविद्यया मायया न विहिता द्रव्यगुणकर्माशया यत्र तथाभूते स्वस्य चरमेऽवशिष्टे पूर्वपूर्वेभ्यो नष्टेभ्यः कलेवरेभ्योऽवशिष्टेऽनश्वरे इत्यर्थः । यद्वाऽसुष्ठु अचरमेऽनिकृष्टे कलेवरे कर्मारब्धत्वाभावाद्वस्तुनि परमसत्ये सम्यगवस्थानविशेषो वैकुंठलोको यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः॥किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दंडपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति ॥ ७ ॥ एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसाऽनुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पंडितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमानं इव विगतस्मय इदमाह ॥ ८ ॥

निश्चितमुरु अधिकं परिश्रांतोऽसीत्यादीनि विपरीतार्थानि षड्वाक्यानि । ऊढ्वािन्प्रापितवान् । तत्रापि सुचिरम् । जरसा च वृद्धत्वेन । संवढ्िनः सहचराः । बहु यथा भवत्येवं विप्रलब्धोऽपि वक्रोक्त्योपहसितोऽपि तूष्णीमुवाहेत्यन्वयः । तूष्णींभावे हेतुः । अविद्यया रचिता द्रव्यादयो यस्मिंस्तस्मिन्स्वचरमकलेवरे नाध्यारोपितो मिथ्याप्रत्ययो येन । तत्र द्रव्याणि महाभूतानि । गुणा इंद्रियाणि । कर्माणि पुण्यपापानि । आशयोंतःकरणम् । यतो ब्रह्मभूतः ॥ ६ ॥ मामनादृत्य भर्तुः स्वामिनो मम शासनमाज्ञामतिक्रामसि चिकित्सां शास्तिम् । दंडपाणिर्यमो यथा जनसमूहस्य शास्तिं करोति तथा । स्वां प्रकृतिमप्रमत्तताम् ॥७॥ अबद्धमनन्वितम् । नरदेवोऽहमित्यभिमानो यस्य तम् । अनुविद्धेन संगुणितेन । तिरस्कृतोऽशेषः संपूर्णो भगवतः प्रियो निकेत आश्रयो येन तम् । यद्वा । अशेषाणां भगवत्प्रियाणां निकेतः सर्वेषां भूतानां सुहृच्च आत्मा च योगेश्वराणां चर्या जडादिवदाचरणं तस्यां नात्यंतं व्युत्पन्ना परिचिता मतिर्यस्य स तम् । स्मयमानो हसन्निवेति मुखप्रसत्तिर्योत्यते । विगतस्मयो गतगर्वः ॥ ८ ॥

तस्मिन्नपि प्रेमोत्थदैन्योदयादेव प्राकृतदेह इवाहं ममेति नाध्यारोपितो मिथ्याप्रत्ययो येन स तथेति ॥ ६ ॥ अथ तदुपालंभानंतरम् ॥ ७ ॥ एवमिति शुकवाक्यं संगुणितेन वर्द्धितेन । आश्रयो भरताख्यो येन तम् । एवं व्याख्याने भक्तांतरेषु भगवत्कर्तृकप्रियत्वाभावः सेत्स्यतीत्यत आह—यद्वेति । सर्वभगवद्भक्ताश्रयीभूतस्तत्कालीनहरिभक्तमुख्य इति यावात् । पुनस्तिरस्कृतपदेन बहुव्रीहिः कार्यः यद्वा—अशेषो न्यूनत्वविधुरोऽर्थात्परिपूर्णतमश्चासौ भगवांश्चेति अशेषभगवाञ्छ्रीकृष्ण एव । " एते चांशकलाः सर्वे कृष्णस्तु भगवान्स्वयम् " इत्युक्तेः तस्य प्रियनिकेतः "न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भजम्" इति श्रीदशमे श्रीमुखोक्तेश्च ब्राह्मणदेह एव । यद्वा—भगवान्निकेतो येषां ते जीवात्मानो भगवन्निकेता अशेषाश्च भगवन्निकेता अशेषभगवन्निकेता अशेषभगवन्निकेतास्तेषु प्रियोऽशेषभगवन्निकेतप्रियः । यद्वा—अशेषाश्च ये भगवत्प्रिया अशेषभगवत्प्रियाः सर्वे देवाः 'प्रिया देवाः सदा मम ' इति श्रीभगवदुक्तेस्तेषां निकेतो ब्राह्मणदेह एव । " सर्वा देवता वेदविदि ब्राह्मणे सन्तीति " इति श्रुतेः । पुनस्तिरस्कृशब्देन बहुव्रीहिः कार्यः । यद्वा—भगवतः प्रियो भगवत्प्रियः स चासौ निकेतो देहो ब्राह्मणदेहः । ' ब्रह्मज्ञो ब्राह्मणप्रियः ' इति सहस्रनामसु पठितत्वात् । अशेषेषु सर्वेषु भगवत्प्रियनिकेतोशेषभगवत्प्रियनिकेतस्तिरस्कृतोऽशेषभगवत्प्रियनिकेतो भरताख्यब्राह्मणदेहो येन तं "निकेतं स्याद् द्वयोर्देहे पुरे स्थाननिवासयोः " इति कोशात् । यद्वा—सर्वभूतानां सुहृदात्मा स्वरूपं यस्य स तथा । अपराधिन्यपि कृपालुरिति भावः । पंडितमानिनं तस्य किञ्चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मण उवाच ॥ त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर भारः ॥ गंतुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥ ९ ॥
स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च ॥ निद्रा रतिर्मन्युरहंमदः शुचो देहेन जातस्य हि मे न संति ॥ १० ॥
जीवन्मृतत्वं नियमेन राजन्नाद्यंतवद्यद्विकृतस्य दृष्टम् ॥ स्वस्वाम्यभावो ध्रुव ईड्य यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥ ११ ॥

तत्र वक्रोक्त्या यदुक्तं त्वं न श्रांतो न च दीर्घमध्वानमागत इति तत्रोत्तरमाह।त्वया यदुदितमुक्तं श्रमादि नास्तीति तद्व्यक्तं स्फुटं तत्तथैव। अविप्रलब्धं विप्रलंभो न भवति। तदेवाह। हे वीर यदि भारो नाम कश्चित्स्यात्स च भर्तुर्वोढुर्देहस्य यदि स्यात स च मे यदि प्रसक्तः स्यात्तर्हीदानीं भाराभावाद्विप्रलंभः स्यान्न त्वेतदस्ति भारस्य वोढुश्चानिरूप्यत्वान्मम च तत्संबंधाभावात् । तथा गंतुरधिगम्यं प्राप्यमध्वा वा यदि स्यात् । अद्धेति पाठे साक्षात्परमार्थतः तच्च मे यदि स्यादित्यादि योज्यम् । यत्त्वयोक्तं नातिपीवेति तत्राह । चेतनमुद्दिश्य त्वं पीवेति प्रवादो विदां विदुषां न भवति किं तु मूर्खाणाम् । यतोऽयं प्रवादो राशौ भूतसंघे देहे एव न त्वात्मनि । देह एव पीनो नाहमित्यर्थः ॥ ९ ॥ एतत्प्रपंचयति । स्थौल्यमिति । कलिः कलहः । अहंकारेण मदश्च । देहेन सह तदभिमानेन जातस्य हि भवंति । मम तु निरभिमानस्य न संति । यद्वा । देहे जाते यो जातस्तस्यैव तानि मम तु तत्र न जातस्य न संति ॥ १० ॥ यच्चोक्तं जीवन्मृतोऽसीति तत्राप्याह । जीवन्मृतत्वं न केवलं मम किं तु विकृतस्य सर्वस्यापि परिणामिनो दृष्टम् । यद्यस्माद्विकृतं प्रतिक्षणमाद्यंतवत् । यदुक्तं भर्तृशासनमतिचरसीति तत्राह । स्वं च स्वाम्यं च तयोर्भावः सत्ता हे ईड्य यत्र पक्षे ध्रुवो यदि व्यवस्थितः स्यादित्यर्थः । तर्हि विधिर्नियोगः कृत्यं कर्म तयोर्योगो ध्रुव उच्यते उचितो भवति । उच समवाये इति धातुः । यदि तु तव राज्यभ्रंशो मम च राज्यं स्यात्तदा सर्वमेतद्वि

न्मात्रज्ञानित्वं सर्वज्ञत्वेन ज्ञात्वेत्यर्थः । स्मयमान इत्यसौ स्वं ज्ञानिनं जानात्यथ चाज्ञानिवदुक्तिरिति इवेति तस्य बहिरनिष्क्रमात् ज्ञानित्वगर्वरहितः ॥ ८ ॥ ज्ञानिमानिनमेनं ज्ञानेनैव परास्तीकृत्य कृपयिष्यामीत्यभिप्रायवानाह—तत्रेति । तत्र मयि । विप्रलंभो विसंवाद आक्षेपो न किन्तु यथार्थमेव । तदेव यथार्थत्वमेव । हे वीरेति । वाक्यवीर एव त्वमसि न तु ज्ञानवीरोऽसि । यद्वा—वीन् एकदेशन्यायेन विदुष ईरयति कंपयति पंडितमानित्वेनेति वीरो न तु पंडितोऽसीति भावः । यदि स्यादित्यस्य विवरणं स च भारो यदि मे प्रसक्तः स्यादिति न त्वेतदस्ति भारेण मम देहाद्भिन्नस्य चिद्रूपस्य संबंधो नास्तीत्यतो नाहं वोढा भवामीति भावः । भारवोढ्रोरनिरूप्यत्वं चाग्रे ' अयं जनो नाम चलन्पृथिव्याम् ' इत्यग्रिमाध्याये स्वयमेव वदिष्यति । प्राप्यं स्थानादिकमध्वा मार्गो वा । इत्यर्थ इति । " अत एव ह्रस्वम् " इत्यादिश्रुतेरिति भावः । यद्वा—राशौ भूतानां राशिरूपे देहे विदुषां प्रवादो न भवति किन्तु सत्यमेव पीवत्वम् । मयि चेतनस्वरूपे तु प्रवादः कलह एवेति भावः ॥ ९ ॥ न केवलं पीवत्वमेव मे नास्त्यपि त्वन्येपि देहधर्मा मे न संतीत्याह—एतत्प्रपंचयंतीति । स्थौल्यमिति । देहाभिमानस्तु देहेन सह न जायते तस्य चिरपश्चाद्भावित्वदर्शनादिति चेत्तत्राह—यद्वेति । यो जातो जीवस्तस्यैव तानि स्थौल्यादीनि मम तु साक्षाद्ब्रह्मरूपत्वेन मयाऽजातत्वात्तानि न संति " न जायते जायमाने शरीरे " इत्यादिश्रुतेः ॥ १० ॥ सत्ता विद्यमानत्वम् । ध्रुवः स्थिरः । इत्यर्थ इति । व्यवपूर्वस्यतेर्निश्चयार्थत्वादयमर्थः । यद्वा—विविक्तो योगः शिबिकावहनादिकर्मणि योगः । अयं जनो युज्यतामित्युच्यते कथ्यते इत्यर्थः । इत्यर्थ इति । त्वामहं शिबिकां वाहयन् किमिदमरे इत्यादि कथयेयमित्याशयः । राजन्निति । रजोगुणव्याप्तबुद्धित्वात्त्वामेतन्न भासत इति भावः । ईड्येत्यपि विपरीतलक्षणयोपहासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषबुद्धेर्विवरं मनाक् च पश्यामि यन्न व्यवहारतोऽन्यत्॥क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् करवाम किं ते॥१२॥उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर चिकित्सितेन ॥ अर्थः कियान्भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः॥१३॥श्रीशुक उवाच ॥ एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन्राजयानमपि तथोवाह ॥ १४ ॥ स चापि पांडवेय सिंधुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक्छ्रद्धयाऽधिकृताधिकारस्तद्धृदयग्रंथिविमोचनं द्विजवच आश्रुत्य बहुयोगग्रंथसंमतं त्वरयाऽवरुह्य शिरसा पादमूलमुपसृतः क्षमापयन् विगतनृपदेवस्मय उवाच ॥ १५ ॥

परीतं स्यादित्यर्थः ॥ ११ ॥ ननु यावद्राजाऽहं तावत्त्व स्वामी भवाम्येवेति चेत्तत्राह । विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्विवरमवकाशं व्यवहारादन्यन्न पश्याम । मनाक् च ईषदपि । अथापि तवायमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामेति ॥ १२ ॥ यत्तूक्तं प्रमत्तस्य ते चिकित्सां करोमि यथा स्वां प्रकृतिं भजिष्यस इति तत्राह । उन्मत्तादिवद्वर्तमानस्य वस्तुतः स्वसंस्थां ब्रह्मभावं गतस्य भवता कृतेन चिकित्सितेन दंडेन शिक्षितेन वा कियानर्थः मुक्तस्यार्थानर्थयोरसंभवात् । यदि पुनरहं न मुक्त किंतु प्रमत्तः स्तब्ध एव तथापि मम शिक्षादिकं पिष्टपेषणवद्व्यर्थमित्यर्थः । नहि जडस्वभावः शिक्षयापि पटू कर्तुं शक्यत इति ॥ १३ अनुवादरूपया परिभाषया भाषणेन तं प्रत्युत्तरं दत्त्वा उपरतमनात्म्ये देहात्मत्वे निमित्तमविद्या यस्य । आरब्धफलं कर्म क्षपयन् ॥ १४ ॥ हे पांडवेय सम्यग्या श्रद्धा तयैव तत्त्वजिज्ञासायां प्राप्तोधिकारो येन । यथा दर्शपूर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्यापः प्रणयेदिति गुणफलसंबंधेऽप्याधिकारः । एवं सात्त्विकश्रद्धायामधिकृतस्यैवास्यामधिकार इत्यर्थः ।

भिप्रायैव संबुद्धिः ॥ ११ ॥ अत्राशंकते—नन्विति । त्वां पृच्छामि क ईश्वरः । ईशितव्यं नियमनीयम् । तत्र ईश्वरत्वे सति । राजन्निति मूर्खेषु राजमानत्वादुक्तम् ॥ १२ ॥ कायिकेन वाचिकेन वा दंडेन कियानर्थः साधयितव्यः । इत्यर्थ इति । यथा पिष्टं वस्तु प्रहारेणाप्यपिष्टं न भवति किं त्वतिपिष्टं भवति तथा प्रमत्तस्य दंडेन प्रमत्तता न शाम्यति किं त्वतिप्रमत्तता स्यादिति भावः ॥ १३ ॥ ननु स्वदेहाभिमानं विना तद्वचोनूद्य सोढुमसमर्थ इव समादधानः कथं तया प्रत्युक्तव्यस्तत्राह—उपभोगेन राजोचितैश्वर्यभोगेन प्रापितं यद्बहुगणस्य प्रारब्धं कर्म तदपि व्यपनयन् व्यपनेतुमनुवादमिषेण कृपया स्वोपदिष्टतदनुष्ठितया भक्त्यैव तत्प्रारब्धमपि दूरीकर्त्तुमित्यर्थः । यद्वा—प्रेमोत्थदैन्येन स्वस्य भक्तत्वामननात् उपभोगेन शिबिकाभारोद्वहनादिना प्रारब्धफलं कर्म व्यपनयन्व्यपनयामीति मनसि भावयन्नित्यर्थः ॥ १४ ॥ हे पांडवेयेति । अहो ज्ञानार्थं कपिलाश्रमं गच्छतः कथमित्थं ब्राह्मणवाहने प्रमाद इति विमृशंतं परीक्षितं प्रति विरक्तस्यापि वने वसतोपि पांडोस्तव प्रपितामहस्य । राजस्वभावाद्धृतमृगरूपद्विजहननप्रवृत्तिवदस्यापि तादृशस्वभावत्वेन नैतदद्भुतमित्यभिप्रायः । नन्वेवं प्रमत्तस्य कथं तत्त्वजिज्ञासाधिकारस्साधनचतुष्टयसंपन्नप्रमातुरेव वेदांतश्रवणाधिकारात् । "साधनचतुष्टयसंपन्नः प्रमाताधिकारी" इति भगवत्पूज्यपादैरुक्तत्वादिति तत्राह—सम्यक्छ्रद्धयेति । 'सर्वे पदा हस्तिपदे निमग्नाः' इति न्यायेन सम्यक्श्रद्धायामेव सर्वसाधनानां निविष्टत्वाच्छ्रद्धां विना कर्मफलं न सूत इत्यभियुक्तोक्तेः । "अश्रद्धया हुतं दत्तम्" इति श्रीगीतोपनिषदुक्तेश्च । श्रद्धैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः॥कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदासि नोत शुक्लः ॥१६॥ नाहं विशंके सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दंडात् ॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंके भृशं ब्रह्मकुलावमानात् ॥१७॥ तद् ब्रूह्यसंगो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ॥ वचांसि योगग्रथितानि साधो न नः क्षमं ते मनसाऽपि भेत्तुम् ॥१८॥ अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै ॥ प्रष्टुं प्रवृत्तः किमिहारणं तत् साक्षाद्धरिं ज्ञानकलाऽवतीर्णम् ॥ १९ ॥ स वै भवाँल्लोकनिरीक्षणार्थमव्यक्तलिंगो विचरत्यपिस्वित् ॥ योगेश्वराणां गतिमंधबुद्धिः कथं विचक्षीत गृहानुबंधः ॥ २० ॥

बहुयोगग्रंथसंमतं द्विजस्य तद्वचः श्रुत्वा विगतो नृपदेवोऽधिराज इति गर्वो यस्य ॥ १५ ॥ द्विजानां मध्ये कतमः । यतः सूत्रमुपवीतं बिभर्षि । यद्वा । दत्तात्रेयादीनां मध्ये कतमोऽवधूतः । इहापि कस्माद्धेतोः प्राप्तः । नोऽस्माकं क्षेमाय चेत्प्राप्तस्तर्हि शुक्लः कपिलो मुनिर्न भवसि किम् । उतेति वितर्के ॥ १६ ॥ किमनया चिंतया शिबिकां तावद्वहामीति चेदत आह । नाहमिति । वित्तपः कुबेरः ॥१७॥ यस्माद्भृशं शंके तत्तस्मात्कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहि । निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन । अपारोऽनंतमहिमा । तत्र हेतुः । नो मनसापि भेत्तुं न क्षमं न शक्यम् । किं भेत्तुमित्यपेक्षायामाह ते वचांसीति । यद्वा मनसा युक्ताः सूक्ष्मदृष्टयोऽपि भेत्तुं न शक्नुवंतीत्यर्थः ॥ १८ ॥ स्वस्य ज्ञानार्थितां दर्शयति । अहं चेति इह संसारे यदरणं शरणं तत्किमिति प्रष्टुं प्रवृत्तोऽस्मि । ज्ञानशक्त्याऽवतीर्णं कपिलम् ॥ १९ ॥ स एव भवान्किंस्विदेवं

सर्वत्र मुख्यं साधनमिति । तथा च श्रद्धासंपन्नत्वेन तस्य तदधिकारित्वेन विकल्पो न्याय्य इति दर्शपूर्णमासयज्ञाधिकृतस्य पुरुषस्य पशुकामसत्त्वे गुणफलविधावपि तदधिकारो यथा गोदोहनेन पशुकामस्येति यस्मिंस्तद्गोदोहनं पात्रं तेन पशुकामस्यापो जलानि कर्मण्युपयोगार्थं प्रणयेदानयेदिति गुणः साधनं फलं कर्मजन्यं स्वर्गादि । यथा "दध्ना यजेत्पुष्टिकामः" इह दधि गुणः पुष्टिः फलमिति । इत्यर्थ इति । सम्यक्श्रद्धा सात्त्विकश्रद्धा तद्युक्त एव जिज्ञासाधिकारी तस्यैव ज्ञानप्राप्तियोग्यत्वस्य 'श्रद्धावाँल्लभते ज्ञानम्' इति भगवता प्रतिपादितत्वादिति भावः । बहुयोगग्रंथसंमतमनेकयोगशास्त्रसिद्धम् । योगोऽत्र ज्ञानयोग एव प्रकृतत्वात् ॥ १५ ॥ यद्वा–पक्षांतरम् । कस्य पुत्रोऽसि कुत्रत्यः किंदेशजन्मासि । शुक्लो नारायणस्तदवतारः कपिलोऽसि ॥ १६ ॥ नाहमिति । सुरराजादयो वज्रादिभिर्युधि मां हंतुं यदि प्रवर्त्तेरंस्तदपि स्वस्य वीरत्वस्वभावान्न शंके प्रत्युतोत्साहसुखमेव प्राप्नोमीति भावः । यद्वा–सुरराजादिषु जातापराधादहं तेषां कुपितानां वज्रादिप्रहारादपि न शंक इत्यर्थः ॥ १७ ॥ कस्त्वं ब्रूहीति तव शिबिकावाहकोऽस्मीति चेदलमतः परमपि मद्विडंबनैस्त्वामहं कमपि महायोगींद्रमज्ञासिषमेवेत्याह । तद्ब्रूहीति । तत्र अपारमहिमत्वे वचांसि भेत्तुं क्षममित्यन्वयस्यार्षत्वाश्रयणं विनाऽनुचितं मत्वाह–यद्वेति । इत्यर्थ इति । यत्रातीवसूक्ष्मबुद्धयोऽप्यसमर्थास्तत्र कोऽहं वराक इति भावः । विश्वनाथः–वचांसि योगैर्ग्रथितान्यपि योगेश्वराणामुपदेशवाक्यानि कर्तॄणि नोऽस्मानतिकठोरान् भेत्तुं भिन्नसंशयीकर्तुं न क्षमंते न शक्नुवंति । किं भूतान्मनसा सहितानवहितमनसोऽपि तानि जिघृक्षून्अपीत्यर्थः । तव त्वेतावता प्रतिवचनेनैव भिन्नसंशयोऽस्मि संवृत्त इति भावः ॥ १८ ॥ योगेश्वराणामतिमुख्य एव मत्संशयं छेत्तुं समर्थ इति द्योतयन्स्वस्य ज्ञानार्थितामाह–ज्ञानकलया ज्ञानकलायै ज्ञानशक्त्या ज्ञानज्ञापनाय वाऽवतीर्णं "कला रक्षाषोडशांशशक्तिबोधनकृपामायासु" इत्यभिधानात् ॥ १९ ॥ लोकानां साध्वसाधूनां निरीक्षणार्थं परीक्षणार्थम् । अंधबुद्धिर्व्यवहारासक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गंतुर्भवतश्चानुमन्ये ॥ यथाऽसतोदानयानाद्यभावात् समूल इष्टो व्यवहारमार्गः ॥ २१ ॥ स्थाल्यग्नितापात्प यसोऽभितापस्तत्तापतस्तंडुलगर्भरंधिः ॥ देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २२ ॥ शास्ताऽनुगोप्ता नृपतिः प्रजानां यः किंकरो वै न पिनष्टि पिष्टम् ॥ स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥ २३ ॥ तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृत सत्तमस्य ॥ कृषीष्ट मैत्रीदृशमार्तबंधो यथा तरे सदवध्यानमंहः ॥ २४ ॥

विचरति । गृहाविष्टः कथं विचक्षीत पश्येत् ॥ २० ॥ एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तराण्याक्षिपति । तत्र यदुक्तं मम श्रमो नास्तीति तत्राह । दृष्ट इति । आत्मनो मे । अनुमन्ये अनुमिमे । अनुमानं चैवम्—भवान्भारवाहनादिना श्रांतः कर्तृत्वात् । यः कर्ता स श्राम्यति । यथाऽहं युद्धादिकर्तेति । नन्विदं व्यवहारमात्रं न तु सत्यम् । यदुक्तं व्यवहारतोऽन्यन्न पश्यामीति तत्राह । यथेति । व्यवहारमार्गः प्रपंचः समूलः सप्रमाणक एव इष्टः । यथा यथावत् । असता घटादिनादकोनयनादे रभावात् । एवं प्रयोगः—प्रपंचः सत्यः । अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी । यथा मिथ्याघटादिरिति ॥ २१ ॥ यदुक्तमुपाधिधर्माऽस्थौल्या दयो मे न वस्तुतः संतीति तत्रौपाधिकत्वेऽपि सत्यत्वं किं न स्यादित्याह । स्थाल्याः अग्निना तापात्तन्मध्यवर्तिनः क्षीरस्य तापः तस्य तापात्तंडुलानां बहिर्भागस्य ततस्तद्गर्भस्य च रंधिः पाकः । न चात्र किंचिन्मिथ्या । एवं देहादिभिः सन्निकर्षात्संबंधात्तन्निमित्ता संसृतिः पुरुषस्य भवति । असवः प्राणाः आशयो मनः अनुरोधादु पाधिधर्मानुवृत्तेः । तथाहि । निदाघादिना देहे तप्ते इंद्रियाणां तापस्ततः प्राणस्य ततो मनस इत्येवं यथायथमूह्यम् ॥ २२ ॥ यदुक्तं स्वस्वाम्यभावो ध्रुव इति तत्राह । शास्तेति अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च । यच्चोक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्राह। योऽच्युतस्य किंकरः स पिष्टं न पिनष्टि निष्फलं न करोति । स्तब्धत्वाद्यनपगमेऽपि शास्तुरीश्वराज्ञासंपादनेनैव सफलत्वात्तदाह स्वधर्मरूपमच्युतस्याराधनं कुर्वन्यस्मादघौघं विजहाति ॥ २३ ॥ यस्मादेवं मम त्वदुक्तं विपरीतं प्रतिभाति तत्तस्मान्नरदेवाभिमानमदेन तुच्छीकृतास्तिरस्कृताः सत्तमा भवादृशा येन तस्य मे मैत्रीदृशं स्नेहयुक्तां दृष्टिं कृषीष्ट करोतु सतामवज्ञारूपं पापं यथा

सधीः ॥ २० ॥ तत्स्वरूपं जडविप्रस्वरूपम्। तत्र तेषूत्तरेषु । अत्राक्षिपति—व्यावहारिका एवेत्थं जल्पंति न तु पारमार्थिका इति चेत्—व्यवहारमार्गस्यापि निर्मूलीकर्तुमशक्यत्वादित्याह—यथेति । घटादिकरणकं जलमाहरे त्युक्तेऽसता घटादिनोदकानयनादेरदृष्टत्वाद्व्यवहारः सत्य एवेति ॥ २१ ॥ उपाधिधर्मा देहधर्माः ॥२२॥ तदा शास्ता गोप्ता भवत्येव किंकरो मद्विधः । तत् ईश्वराज्ञासंपादनमेव । न हन्यंते समूलानि विना ज्ञानमित्यघानि दुःखानि पापानि वा तेषामोघं समूहम् । एतेन मम धर्मस्य शासनादिलक्षणस्य त्वद्दृष्ट्या विगुणत्वेऽपि मम तु श्रेयस्करमेव तत् 'श्रेयान्स्वधर्मो विगुणः' इति श्रीमुखोक्तेः ॥ २३ ॥ नरदेवोऽहमित्यभिमानेन यो विज्ञंमन्यत्वादि मदस्तेन तुच्छीकृता इमे किं जानंतीत्यनादृताः । स्नेहयुक्तां दुर्जीवोऽयं नरके पतिष्यतीति विचार्य प्रीतियुक्ताम् । आर्त्तानां संसृतिपीडितानां मादृशानां बंधो प्रीतिकर्तः त्वादृशाः सन्त एव संसृतेर्बिभ्यतां रक्षका इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ॥ महद्विमानात् स्वकृताद्धि मादृक् नंक्ष्यत्यदूरादपि शूलपाणिः ॥ २५ ॥ इति श्रीमद्भा० महापु० पंचमस्कंधे रहूगणजडभरतसंवादो नाम दशमोऽध्यायः ॥ १० ॥ ब्राह्मण उवाच ॥ अकोविदः कोविदवादवादान्वदस्यथो नातिविदां वरिष्ठः ॥ न सूरयो हि व्यवहारमेनं तत्त्वावमर्शेन सहामनंति ॥ १ ॥ तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृंभितेषु ॥ न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥ २ ॥

तरिष्यामि ॥ २४ ॥ ननु ममावज्ञाकृतविकाराभावात्कुतः पापं तत्राह । नेति । यद्यपि तव विक्रिया नास्ति । विश्वस्य सुहृच्चासौ सखा च तस्य । अतः सर्वत्र साम्येन स्वदेहे विगताभिमानस्य तथापि महतामवमानान्मादृशो विनंक्ष्यति । अदूरात्क्षिप्रम् । शूलपाणिरिवातिसमर्थोऽपीत्यर्थः ॥ २५ ॥ इति पंचमे टीकायां दशमोऽध्यायः ॥१०॥ एकादशेथ संपृष्टो रहूगणमहीभृता ॥ उपादिशत्परं ज्ञानं स योगीति निगद्यते ॥१॥ अकोविदोऽविद्वानपि त्वं कोविदानां वादा उद्ग्रहणिकास्तत्तुल्यान्वादानेव वदसि । अथो अतः अत्यंतं विदुषां मध्ये श्रेष्ठो न भवसि । कुतः । हि यस्मात् यं स्वामिभृत्यादिलौकिकव्यवहारं त्वं सत्यमात्थ । एनं सूरयस्तत्त्वविचारेण सह न वदंति किं त्वविचारसुंदरं वदंति अतो न सत्यः ॥ १ ॥ वैदिकोऽपि कर्मव्यवहारो न सत्य इत्याह । तथैवेति । उरवो गार्हा गृहसंबंधिनो मेधा यज्ञास्तेषां वितानो

भावः । 'संतोऽर्वाग्बिभ्यतोऽरणम्' इत्येकादशे श्रीकृष्णेनैवोद्धवं प्रति वक्ष्यमाणत्वात् । 'अंहो दुरितदुष्कृतम्' इत्यमरः॥२४॥अत्राक्षिपति–त्वत्कृतेन तिरस्कारेण मादृशां दुःखं नोत्पद्यते कुतस्तवापराध इत्येवम् । नन्विति । इत्यर्थ इति । इह लुप्तोपमा बोध्येति भावः । इत्यभिप्रेत्यैव "सेर्ष्यं महापूरुषपादपांशुभिर्निरस्ततेजस्सु" इति सत्योक्तम् ॥ २५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे दशमोऽध्यायः ॥ १० ॥ अथ रहूगणप्रार्थनोत्तरम् । परं संसृतिवारकम् (१) उद्ग्रहणिका उदाहरणानि हठान्निजपक्षसाधनवाक्यानि वा । व्यवहारं व्यावहारिकं वस्तु च तत्त्वविचारेण सम्यग्विचारेण तत्त्ववस्तुना च नामनंति दृष्टान्तादिना च नाभ्यस्यंति । तयोः परस्परातिवैधर्म्यात् । तथा हि स्थालीतापात्पयस्तापस्तत्तापात्तण्डुलताप इति तंडुलस्य जडस्य स्थाल्यादिभिर्जडैर्वह्निनापि जडेन यथा संसर्गस्तथा देहेंद्रियादिभिर्जडैर्मुक्तजीवस्य चिद्वस्तुनः संसर्गाभावादेव देहादिश्रमैर्न श्रमः सिध्यति बद्धजीवस्य तु जडदेहाध्यासाज्जडत्वेन तैर्भवत्येव श्रम इति बद्धजीवैर्युष्माभिर्मुक्तजीवानामस्माकं सादृश्यासंभवादनुमानं न घटत इति ॥ १ ॥ ननु मीमांसकाः कर्मफलात्स्वर्गसुखादतिरिक्तं पुरुषार्थं न मन्यंत इत्यतः किं तत्त्ववादेनेति चेत्सत्यं तेष्वज्ञेष्वनधिकारिषु तत्त्वोपदेशो नैव समुचितः । तथैवेति । यथैव भवद्विधानां दृष्टफलेषु व्यवहारकर्मसु तथैवादृष्टफलेषु वेदवादेषु तत्त्ववादः परब्रह्मस्वरूपविषयज्ञानसिद्धांतो न चकास्ति । अत्र प्रमाणमाह–तथा चेति । इह ब्रह्मणि । किं च "नापि नाना–नानात्वं नास्ति" इति श्रुत्या ब्रह्मणि नानात्वनिषेधेन शुद्धत्वं प्रतिपादितं तच्च वेदवादेषु नास्ति । "स्वर्गकामो यजेत" इत्यादिकर्मप्रतिपादकानां "ब्रह्मविदाप्नोति परम्" इत्यादिब्रह्मज्ञानप्रतिपादकानां च यथैकवाक्यत्वं तथा न प्रकाशते इत्यर्थः । किं च शुद्धो हिंसाशून्योपि न प्रतीयते "अग्नीषोमीयं पशुमालभेत" इति श्रुतेः । यद्यपि "या वेदविहिता हिंसा न सा हिंसेति कीर्त्यते" इत्युक्तेर्विधिविहितालंभनस्य हिंसात्वं नास्ति तथापि प्राणवियोगानुकूलव्यापारस्यैव हिंसात्वेन तत्रापि सात्त्वेवेति । "रागादिशून्यश्च न श्येनेनाभिचरन्यजेत" इति श्रुतेर्द्वेषस्य प्रतिपादितत्वान्न हि द्वेषं विनाभिचारे प्रवृत्तिः । किञ्च "पुत्रकामः प्राजापत्या यजेत" इति श्रुते रागस्यापि प्रतिपादितत्वाच्च रागं विना पुत्रेष्ट्यादावप्रवृत्तेर्दर्शनाच्च रागद्वेषयोरनित्यत्वेन तत्कृतकर्मणां सुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ॥ स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥ यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वाऽनुरुद्धम् ॥ चेतोभिराकूतिभिरातनोति निरंकुशं कुशलं चेतरं वा ॥ ४ ॥ स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ॥ बिभ्रत्पृथङ्नामभिरूपभेदमंतर्बहिष्ट्वं च पुरैस्तनोति ॥ ५ ॥ दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ॥ आलिंग्य मायारचितांतरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥ ६ ॥

विस्तारस्तद्विषयासु विद्यासु उरु अधिकं विजृंभितेषु विलसितेषु वेदवादेषु तत्त्ववादो नु निश्चितं न चकास्ति न प्रकाशते । तथाच श्रुतिः । "नेह नानाऽस्ति किंचन" इत्यादि । शुद्धो हिंसादिशून्यः साधू रागादिशून्यश्च । प्रायेणेतीश्वरार्पितकर्मणां परमार्थफलत्वाभिप्रायेणोक्तम् ॥ २ ॥ ननु श्रुतवेदांतस्यापि पुंसः कर्मसु प्रवृत्तेः कथमसत्यता तत्राह । नेति साक्षाद्यथावत्तत्त्वज्ञानाय वरीयस्योऽपि वेदांतवाचस्तस्य न सम्यगासन्बभूवुः । स्वप्ने या निरुक्तिस्तया स्वप्नदृष्टांतेन दृश्यत्वादिहेतुना स्वयमेव हेयत्वेनानुमितं यस्य न स्यात् ॥ ३ ॥ एवं प्रपंचस्य सत्यत्वं तदुक्तं निराकृत्य संसारस्यापि तदुक्तां सत्यतां निराकर्तुं तस्य मनोनिमित्ततामाह । यावदित्यादिना यावत्समाप्ति । मनो यावद्रजआदिभिर्गुणैरनुरुद्धं वशीकृतं भवति तावत्तन्मनो निरंकुशं सत्पुरुषस्य कुशलं धर्ममितरमधर्मं वा आतनोति । कैः । चेतोभिर्ज्ञानेंद्रियैः आकूतिभिः कर्मेंद्रियैश्च ॥ ४ ॥ ततश्च धर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यं करोतीत्याह । स इति । पुंस्त्वमात्मशब्दविशेषणत्वेन तन्मन इत्यर्थः । वासनायुक्त आत्मोपाधित्वादात्मा । अतो विषयैरुपरक्तोऽनुविद्धः । अतो गुणप्रवाहो गुणैरितस्ततश्चाल्यमानः । अत एव विकृतः कामादिपरिणामवान् । षोडशात्मा षोडशकलासु भूतेंद्रियरूपासु मुख्यः । पृथङ्नामभिः सह पृथग्रूपभेदं देवतिर्यगादिरूपं बिभ्रत् । अंतर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वं च पुरैस्तैरेव देहैर्हेतुभूतैस्तनोति । नामभिरित्यत्र रेफलोपे दीर्घाभाव आर्षः ॥ ५ ॥ फलं च तदनुरूपं करोतीत्याह । दुःखं सुखं व्यतिरिक्तं च मोहं तीव्रं दुर्निवारं कालप्राप्तं सर्वतोऽभिव्यनक्ति सृजति । ननु जडः कथं सृजति तत्राह । स्वदेहि

रामसत्यत्वम् ॥२॥ अत्राक्षिपति—नन्विति । स्वप्ने भोगानां स्वल्पकालमात्रस्थायित्वं स्वप्नस्य स्वतो विनाशित्वं मिथ्यात्वं चेति या निरुक्तिः कथनं तया स्वप्नदृष्टांतेनेत्यर्थः । सुकर्मणां नश्वरमसार्वकालिकं क्षुद्रं वैषयिकमेव सुखं तथा वैषयिकेण सुखेनात्मनो वस्तुतः संबंधाभावात् तत्सुखमात्मनः शशस्य शृंगमिव मिथ्याभूतं च ज्ञानिनां न नश्वरं सार्वकालिकं महद्ब्रह्मसुखमिति बह्वेवान्तरामित्यत एवैव युक्तिरस्य तत्त्वग्रहण इति ज्ञेयम् ॥ ३ ॥ नन्वेवं सद्भिः प्रबोधिताः सर्वे जनाः प्रायो वैषयिकसुख एव प्रवर्त्तमानाः कथं दृश्यंते तत्राह—निरंकुशं मत्तमतंगजोपमं गुणमयं मन एव बलाद्विवेकादिकमपि निगीर्य पुण्यपापकर्मणोः प्रवर्त्तयति पुरुषस्य को दोष इति भावः ॥ ४ ॥ इत्यर्थ इति । मनोवाचकत्वादत्रात्मपदस्येति भावः । अतो वासनायुक्तत्वात् । अतो विषयानुविद्धत्वात् । अत एव गुणैश्चाल्यमानत्वादेव । आदिना नरादिग्रहः ॥ ५ ॥ अत्राक्षिपति—नन्विति । स्वदेहिनं जीवात्मानम् । माययाऽविद्यया । उपाधिश्च समीपे स्थित्वा स्वधर्मस्य तत्राधानं यः करोति स एवेति । तथा च मनोऽपि स्वधर्मान्संकल्पविकल्पादीन्निजतादात्म्याध्यासेनात्मन्यादधातीति तस्योपाधित्वम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः ॥ तस्मान्मनो लिंगमदो वदंति गुणागुणत्वस्य परावरस्य ॥ ७ ॥ गुणानुरक्तं व्यसनाय जंतोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ॥ यथा प्रदीपो घृतवर्तिमश्नञ्छिखाः सधूमा भजति ह्यन्यदा स्वम् ॥ पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥ ८ ॥ एकादशासन्मनसो हि वृत्तय आकूतयः पंच धियोऽभिमानः ॥ मात्राणि कर्माणि पुरं च तासां वदंति हैकादश वीरभूमीः ॥ ९ ॥ गंधाकृतिः स्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ॥ एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः ॥ ॥ १० ॥ द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ॥ सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतःस्युः ॥ ११ ॥

नमालिंग्य । आलिंगने कारणमाह । मायारचितोंऽतरात्मा जीवोपाधिः । उपाधितामाह । संसृतिचक्रे कूटयति छलयतीति तथा यथा ग्रामकूटक इति ॥ ६ ॥ एवमयं मनोनिबंधनः । संसारो जीवे फलतीत्याह । तावानिति । आविः प्रकाशमानः सदा क्षेत्रज्ञस्य साक्ष्यो दृश्यो भवति । स्थूलसूक्ष्मो जाग्रत्स्वप्नस्वरूपः । मनसः संसारहेतुत्व मुपसंहरन्मोक्षस्यापि तदेव कारणमित्याह । तस्मादिति । अदो मनः लिंगं कारणम् । गुणत्वं गुणाभिमानित्वमगुणत्वं तद्राहित्यं तदेव परमवरं च तस्य ॥ ७ ॥ कथमेक मेव विलक्षणयोः कारणमवस्थाभेदादित्याह । गुणेति । नैर्गुण्यं निर्गुणम् । अथो इति कार्त्स्न्येन दृष्टांतेन स्फुटयति । यथेति । अन्यदा तु घृतक्षये । स्वं पदं शुक्लभास्वर रूपं महाभूतात्मत्वं वा । अन्यत्रान्यदा ॥ ८ ॥ वृत्तीर्दर्शयति । एकादश वृत्तय आसन् । आकूतयः क्रियाकाराः पंच धियश्च ज्ञानाकाराः पंच अभिमानश्चेति । हे वीर भूमीर्विषयान् ॥ ९ ॥ विषयानेवाह । गंधादयः पंचज्ञानेंद्रियद्वारा धीवृत्तीनां विषयाः । आकृतिः रूपम् । श्रवः शब्दः ' विसर्गादयः पंचकर्मेंद्रियद्वारा कर्माकारवृत्तीनां विषयाः । रतिः संभोगः । अर्तिर्गतिः । पुरस्याभिमानविषयत्वप्रकारमाह एकादशं पुरम् । स्वी क्रियत इति स्वीकरणम् । अयमर्थः । शरीरमभिमानस्य न ज्ञेयतया गंधा दिवद्विषयः नापि कार्यतया विसर्गादिवत् किं तु ममेति भोगायतनत्वेन स्वीकार्यतया विषय इति। एके तु विवेकिनामेव पुरं ममत्वाभिमानविषयो न तु मूढानामतो मूढदृष्ट्या अहमहंकारं द्वादशं वृत्त्यंतरमाहुः । तस्य च पुरमेव शय्यासंज्ञं द्वादशं विषयमाहुः । तत्र हि जीवोऽहंकारेण सह शेते यतः पुरि शयनात्पुरुष इत्युच्यते ॥ १० ॥ तासां वृत्तीनामवांतरभेदैरा

ग्रामस्थः कूटकः छद्मी ग्रामकूटकः स यथा ग्रामस्थान्निजमायया वंचयति तथा मनोप्यात्मानमिति भावः ॥ ६ ॥ अयं मनोनिबंधनं कारणं यस्य स मनोनिबंधनः । गुणाभिमानित्वं संसारः तद्राहित्यं मोक्षः । विश्वनाथस्तु—तौ संसारमोक्षौ कस्य स्यातामित्यत आह—परावरस्य उत्कृष्टनिकृष्टजनस्य । पाठक्रमोत्र न विवक्षितः । निकृष्टस्य संसार उत्कृष्टस्य मोक्ष इत्याह ॥ ७ ॥ व्यसनाय संसाराय । क्षेमाय मोक्षाय । अन्यत्र तुच्छीकृतविषयसंपर्कत्वे । तत्त्वमनारोपितं ब्रह्मस्वरूपं श्रयते भजति ॥ ८ ॥ हे वीरेति । रागद्वेषदलनसमर्थस्य तव विचारमार्गेपि कातर्यं न युक्तमिति भावः । यद्वा—ज्ञानग्रहणरूपनिश्चयांतगामिन् । "आकारे सर्वथा यत्ने रूपे चाकृतिरुच्यते " इति निरुक्तिः ॥ ९ ॥ शिल्पो लिप्यादिर्हस्तविषयः । अत्राशयमाह—अयमर्थ इति ॥ १० ॥ द्रव्येति । कोटिश इतः पूर्वं लक्षश इत्यपि ज्ञेयम् । द्रव्याणां चंदनकस्तूरीकुंकुमादीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्या ॥ आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्त्तुः ॥ १२ ॥ क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ॥ नारायणो भगवान्वासुदेवः स्वमाययात्मन्यवधीयमानः ॥ १३ ॥

नंत्यमाह । द्रव्याणि विषयाः स्वभावः परिणामहेतुः आशयः संस्कारः कर्म अदृष्टं कालः क्षोभकः तैर्निमित्तभूतैः प्रथमं शतशस्ततः सहस्रशस्ततः कोटिशः स्युर्न तु मिथः स्युर्न च स्वतः किं तु क्षेत्रज्ञतः परमेश्वरात् । तस्य चानंतशक्तित्वादनन्ताः स्युरित्यर्थः । यद्वा तासां मिथ्यात्वमनेनोच्यते । कोटिशो भवंत्यतस्ताः क्षेत्रज्ञत एव स्युस्ततस्तयैव सत्तां लभेरन्न तु मिथो न च स्वत इति । यद्वा क्षेत्रज्ञो जीवस्तस्मान्न स्युस्तस्याविकारित्वात् । न मिथः इतरेतराश्रयत्वापत्तेः । न स्वतः आत्माश्रयत्वापत्तेः । अतो मिथ्याभूता एव ॥ ११ ॥ तदेवं श्लोकत्रयेण गुणकर्मानुबद्धं मनोवृत्तीः श्रयत इति यदुक्तं तत्प्रपंचितम् । अन्यदा तत्त्वं श्रयत इति यदुक्तं तदेव तत्त्वमाह । क्षेत्रज्ञ इति । जीवस्य जीवोपाधेः अविशुद्धकर्तुर्मनसः नित्याः प्रवाहरूपेणाविच्छिन्ना जाग्रत्स्वप्नयोराविर्भूताः पश्यति क्वापि सुषुप्तौ तिरोभूताः पश्यति । अवस्थात्रयसाक्षी क्षेत्रज्ञ आत्मा तत्त्वमित्यर्थः ॥ १२ ॥ क्षेत्रज्ञो द्विविधः त्वंपदार्थो जीवः तत्पदार्थ ईश्वरश्च । तत्राद्यो निरूपित इदानीं तत्राप्यमीश्वरं निरूपयति । क्षेत्रज्ञ आत्मा व्यापी । पुराणो जगत्कारणभूतः । पुरुषः पूर्णः । साक्षादपरोक्षः । स च स्वयंज्योतिः न तु ज्ञानस्य विषयत्वेनाश्रयत्वेन वा परोक्षः । अजो जन्मादिशून्यः परेषां ब्रह्मादीनामपि ईशः । नारं जीवसमूहः सोऽयनं यस्य नियंतुः भगवानैश्वर्यादिषड्गुणवान् । वासुदेवः सर्वभूतानामाश्रयः स्वाधीनया माययाऽऽत्मनि जीवेऽवधीयमानोऽवस्थाप्य

स्वर्णरजतादीनां चानंत्यात् । कोपि गंधरूपादिः । कस्मैचिद्रोचत इति स्वभावानन्त्यात् । आशयोंतःकरणं तस्य शिष्टतादुष्टताभ्यां कर्मादृष्टं तद्वशादपि कालो बाल्ययौवनादिस्तद्वशादपि प्रत्येकमनंता एव गंधादयः स्युरिति चार्थः । अनन्तवृत्तिस्वीकारे संसाराभावप्रसंगमाशंक्याह—यद्वेति । सांतवृत्तिस्वीकारेऽपि तदुत्पादकः क इत्याकांक्षायामाह—यद्वेति । परस्परसिद्धौ परस्परापेक्षणमन्योन्याश्रयः । यथा प्रथमवृत्तिगतैकत्वमपेक्ष्य द्वितीयवृत्तौ द्वित्वसिद्धिर्द्वितीयवृत्तिगतद्वित्वमपेक्ष्य प्रथमायामेकत्वसिद्धिरित्यन्योन्याश्रयः । स्वसिद्धौ स्वस्यापेक्षणमात्माश्रयः स्वस्मात्स्वभवनांगीकारे आत्माश्रयो भवतीत्यर्थः । अतो वृत्तीनामुत्पादकनिर्णयाभावात्ता मिथ्याभूता एवेति भावः ॥ ११ ॥ इत्यर्थ इति । आत्मैव सत्यत्वात्तत्वं तदितरत्सर्वमसत्यत्वादतत्त्वमिति भावः । अत्र संदर्भः—यश्शुद्धोऽपि मायारचितस्य वक्ष्यमाणसर्वक्षेत्रज्ञस्य मायया कल्पितस्य मनसोंतःकरणस्यैताः प्रसिद्धा विभूतीर्वृत्तीर्विचष्टे विशेषेण पश्यति पश्यंस्तत्राविष्टो भवति स खल्वसौ जीवनामा स्वशरीरद्वयलक्षणक्षेत्रस्य ज्ञातृत्वात् क्षेत्रज्ञ उच्यत इत्यर्थः । तदुक्तं "यया संमोहितो जीव आत्मानं त्रिगुणात्मकम्" इत्यादि । मनसः कीदृशस्य जीवस्य जीवोपाधितया जीवतादात्म्येन रचितस्य ततश्च तत्तयोपचर्यमाणस्येत्यर्थः । ततश्च कीदृशस्याविशुद्धं भगवद्बहिर्मुखं कर्म करोतीति तादृशस्य कीदृशीर्विभूतीर्नित्या अनादित एवोपगताः कथं तर्हि सदा न दृश्यंत इत्यत आह आविर्हिताः क्वापीति ॥ १२ ॥ इत्यर्थ इति । जीवानां नियंतेश्वर इति भावः । अत्र संदर्भः—यस्तु—पुराणः पुरुषः 'आद्योऽवतारः पुरुषः परस्य' इत्यादिना द्वितीयस्कंधादौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाऽनिलः स्थावरजंगमानामात्मस्वरूपेण निविष्ट ईशेत् ॥ एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १४ ॥ न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन ॥ विमुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ १५ ॥ न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य ॥ यच्छोकमोहामयरागलोभवैरानुबंधं ममतां विधत्ते ॥ १६ ॥

मानः । कर्मकर्तरि प्रयोगः । तन्नियंतृत्वेन वर्तमान इत्यर्थः ॥ १३ ॥ एतत्सदृष्टांतमाह । यथेति । आत्मस्वरूपेण प्राणरूपेण ईशेन्नियमयति । इदं विश्वम् ॥ १४ ॥ तदेवमात्मनः शुद्धत्वं संसारस्य च मिथ्यात्वं प्रदर्श्येदानीं तन्निवृत्तिमाह । तनुभृद्देही वयुनोदयेन ज्ञानोत्पत्त्या यावन्मायां विधूयात्मतत्त्वं न वेद तावदिहं भ्रमति ॥ १५ ॥ यावच्च विषयानुरक्तं मन एवानर्थहेतुरिति न वेद तावन्निर्वेदाभावात्परिभ्रमत्येवेत्याह । नेति । आत्मनो लिंगमुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावद्भ्रम

प्रसिद्धः साक्षादेव स्वयंज्योतिः स्वप्रकाशः न तु जीववदन्यापेक्षया अजो मायिकजन्मादिशून्यः । स्वमायया स्वरूपशक्तयात्मनि स्वरूपेऽवधीयमान इति मायायां मायिकेष्वंतर्यामित्वेन प्रविष्टोऽपि स्वरूपशक्त्या स्वरूपस्थ एव न तत्संसक्त इत्यर्थः । यद्वा-सुष्ठु अमायया हेतुना मुक्तर्जीवेनात्मनि मनस्यवधानविषयीक्रियमाण इति । वासुदेवत्वेन सर्वक्षेत्रज्ञातृत्वात्सोऽपरः क्षेत्रज्ञः आत्मा परमात्मेति । तदेवं मुख्यं क्षेत्रज्ञत्वं परमात्मन्येव । तदुक्तं "सर्वं पुमान्वेदगुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे" इति तथा श्रीगीतोपनिषत्सु "इदं शरीरं कौंतेय क्षेत्रमित्यमिधीयते । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥" इति । अत्र खलु क्षेत्रज्ञं चापि मां विद्धि इति सर्वेष्वपि क्षेत्रेषु मां च क्षेत्रज्ञं विद्धि न तु जीवमिव स्वस्वक्षेत्र एवेत्यर्थं वहति । 'ज्ञेयं यत्तत्प्रवक्ष्यमि'इत्यादौ 'सर्वतः पाणिपादं तत्' इत्यादिना सविशेषत्वस्यैव निर्दिष्टत्वात् । अमानित्वमित्यादिना ज्ञानस्य च तथोपदिष्टत्वात् । किं च क्षेत्रज्ञं चापीत्यत्र "तत्त्वमसि" इतिवत्सामानाधिकरन्येन तन्निर्विशेषज्ञाने विवक्षिते क्षेत्रज्ञेश्वरयोर्ज्ञाने विवक्षिते क्षेत्रज्ञेश्वरयोर्ज्ञानमित्यनूद्येत न तु क्षेत्रक्षेत्रज्ञयोर्ज्ञानमिति । किं तु क्षेत्रक्षेत्रज्ञयोरित्यस्यायमर्थः ज्ञेयस्यैकत्वेन निर्दिष्टत्वाद्योग्यत्वाच्च । न च निरीश्वरसांख्यवत् क्षेत्रक्षेत्रज्ञमात्रविभागात् 'अत्र ज्ञानं मतं मम'इत्यनेनेश्वरस्यापेक्षितत्वात् । न च विवर्त्तवदीश्वरस्यापि भ्रममात्रप्रतीतिपुरुषत्वं तद्वचनलक्षणसवेदगीतादिशास्त्राणामप्रामाण्याद्बौद्धवादापत्तेः । तस्यां च सत्यां बौद्धानामिव विवर्त्तवादिनां तद्व्याख्यानायुक्तेरिति । तीर्थेणात्र-श्रुतयोपि सर्वपदेषु प्रमाणिताः ताश्च "आत्मेति यदाप्नोति यच्चादत्ते महांतं विभुमात्मानम्" इति 'अत्रायं पुरुषः स्वयंज्योतिः' इति । "अजो नित्यः"इति । "परेशः" इति । "ब्रह्मणोऽधिपतिः" इति । नारायणत्वं तु कस्यचिद्ग्रामाधिपतेरपि स्यादत उक्तं भगवानिति । 'उत्पत्तिं प्रलयं चैव' इत्युक्तलक्षणः स ज्ञेयः । एतादृशस्तु-'ऋषिस्त्रिकालदर्शी स्यात्' इत्युक्तेः । कश्चिदृषिः स इत्यत आह-वासुदेव इति ॥१३॥ स भगवान्मुक्तर्जीवेन सुलभ एवेति सदृष्टांतमाह-यथेति । "वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रति रूपो बभूव । एकस्तथा सर्वभूतांतरात्मा रूपंरूपं प्रतिरूपो बहिश्च ॥" इति काठकश्रुतेः॥ १४॥ज्ञानोत्पत्त्या शास्त्रश्रवणादिना ज्ञानोद्भवेन । नरेन्द्रेति । नरेणाप्येतज्ज्ञातुं शक्यते त्वन्तु नरेन्द्रोऽसीति भावः ॥ १५ ॥ मायाविधूननं च सम्यक्तया कथं ज्ञातव्यमिति चेद्यावद्विषयानुरक्तं मनस्तावन्मायाविधूननं तत्त्वज्ञानं च न स्यादित्याह–नेति । 'तदेवं मनः श्रयतेऽन्यत्र तत्त्वम्' इति यदुक्तं तत् श्लोकपंचकेन प्रपंचितम् ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाऽध्येधितमप्रमत्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ १७ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतचरिते भरतरहूगणसंवादे रहूगणाय मनोविजयवर्णनं नाम एकादशोऽध्यायः ॥ ११ ॥ रहूगण उवाच ॥ नमोनमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय ॥ नमोऽवधूत द्विजबंधुलिंगनिगूढनित्यानुभवाय तुभ्यम् ॥ १ ॥

तीत्यनुषंगः । तापावपनत्वे हेतुः । यन्मनः शोकायनुबंधं ममतां च विधत्ते ॥ १६ ॥ ततस्मात् भ्रातृव्यं शत्रुम् । अध्येधितं संप्रवृद्धं स्वयं व्यलीकं मिथ्याभूतं तथाऽऽत्मानं मुष्णातीति तथा तं गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय ॥ १७ ॥ इति पंचमस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे पुनरापृष्टः संदेहेन महीभृता ॥ स योगी सर्वसंदेहानपानुददितीर्यते ॥ १ ॥ कारणमीश्वरस्तस्यैव लोकसंरक्षणार्थो विग्रहो देहो यस्य । स्वरूपेण परमानंदप्रकाशेन तुच्छी

तस्मान्मन एव निग्रहीतव्यमित्याह–भ्रातृव्येति । उपेक्षयैव जहि निगृहाण तदुपेक्षणमेव तद्वध इति भावः।न तु तदिष्टविषयभोगप्रदानलक्षणयाऽपेक्षयाऽनुगृहाणेत्यर्थः।सर्वथैव तद्वधरत्वनभिप्रेत एव।''तस्मान्मनोलिंगमदो वदंति गुणागुणत्वस्य परावरस्य''इति । 'श्रूयतेऽन्यत्र तत्त्वम्''इति च पूर्वोक्तेः दृष्टान्ते च भ्रातुः पुत्रस्यावध्यात्वात् श्लेषाभिप्रायेणैतज्ज्ञेयं'भ्रातृव्यो भ्रातृपुत्रेऽरौ' इति कोशात्। मनः कीदृशमधिकमेधितं स्ववृत्तीः संश्रित्य संवृद्धम्। ननु बलवन्तमिमं दुर्बलोऽहं कथं निगृह्णामीत्यत आह-गुरोः स्वकाशात्प्राप्तस्य मंत्ररूपस्य हरेश्चरणयोरुपासनाश्रवणादिनवविधभक्तिरेवास्त्रं यस्य सः । व्यलीकमप्रियं यतः स्ववृत्तिदर्शनया संमोह्यात्मानं परमात्मस्वरूपं सर्वस्वमेव मुष्णातीति तं महाचौरमित्यर्थः । " भक्त्यस्त्रेण त्याजयित्वा विषयान्स्वमनो यतिः । ध्वस्तावियोऽवधत्ते यः कृष्णं मुक्तः स उच्यते ॥ भक्त्यभावान्मनोवृत्तीराश्रयद्वासनामयम् । अविद्यां यस्य पुष्णाति स पुमान्बद्ध उच्यते ॥ " इति । अत्र विजयध्वजः–मनो हि द्विविधं चिदचिद्भेदात् । तत्र चिन्मनस्तु स्वरूपमभिन्नं मुक्तावानंदानुभवसाधनं तन्नाशे स्वरूपनाश एव स्यात्तथा च–" अविनाशी वा अयमात्मानुच्छित्तिधर्मा " इति श्रुतिव्याकोपः स्यात् । इतरं मन आदिमप्रलये लिंगशरीरवत्सूक्ष्मं यावन्मुक्ति तदीयतया स्थितं सत्सृष्टावुपस्थितं स्थूलशरीरवर्त्तिनश्चेतनस्य ममेदमहमित्यभिमानमुत्पाद्य संसारापादनपटुस्वामिनश्चिदानंदलक्षणस्य दुःखापादकत्वेन वैरि मनो जहि तस्य हननं तन्निमित्ताभिमानलक्षणमोहनाशेन । व्यलीकं विगता चिन्मनः संसर्गी स्वयं स्वरूपभूतं सच्चिन्मनः स्वयमिति द्विरावर्त्तनीयं सुपूजितमिमामिष्टप्रदं दैवं श्रीनारायणाख्यं जहि गमय तद्विषयं कुरु । अत्रार्थद्वयाभिप्रायेण 'हन-हिंसागत्योः' इत्ययं धातुः प्रयुक्त इति ज्ञायते । अनेनाहमित्यभिमानः संसारहेतुस्तन्मूला चिन्मनोनाशेन तदभावेन तदभाव इति परिहारः सूचित इत्याह॥ १७॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ स भरताख्यः । अपानुदत् दूरी चकार (१) ब्राह्मणस्तुतिव्याजेनेश्वरं स्तौति–'करणं कारणं कर्त्ता' इति सहस्रनामसु पठितत्वात्कारणमीश्वरः । विग्रहो देहः । कारणाय लोकानुग्रहलक्षणाय विग्रहो यस्येति वा । यद्वा–कस्यानंदस्यारणं शरणं विग्रहो यस्य यद्वैकदेशन्यायेन कष्ट आसमंताद्रणो येषां, को ब्रह्मा वरदानादिनाऽरणं रक्षिता येषां ते वा । कारणा असुरास्तैर्विग्रहो विरोधो यस्य तस्मै । ''मायाभिरुत्सिसृक्षत इंद्र द्यामारुरुक्षत अवदस्त्रं रघुनुधा'' इति श्रुतेः । हे अवधूतेति । संबुद्धिः । अवधूयंते नाश्यंते पापा अनेनेति व्युत्पत्तेर्ममाप्यज्ञानं पापं च नाशयेति भावः । लिंगेनोन्मत्तवेषेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वरामयार्त्तस्य यथाऽगदं सन्निदाघदग्धस्य यथा हिमांभः ॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधं मे ॥ २ ॥ तस्माद्भवंतं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम् ॥ अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥ यदाह योगेश्वर दृश्यमानं क्रियाफलं सद्व्यवहार मूलम् ॥ नह्यंजसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे ॥ ४ ॥ ब्राह्मण उवाच ॥ अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव कस्य हेतोः ॥ तस्यापि चांघ्र्योरधिगुल्फजंघाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥ अंसेधि दार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ॥ यस्मिन् भवान् रूढनिजाभिमानो राजाऽस्मि सिंधुष्विति दुर्मदांधः ॥ ६ ॥

कुतो विग्रहो येन । हे अवधूत योगेश्वर द्विजबंधोर्लिंगेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः ॥ १ ॥ विशेषतः प्रष्टुं तद्वाक्यमभिनंदति । ज्वर एवामयो रोगस्तेनार्तस्य यथा सत्स्वाद्वगदमौषधम् । यथा च निदाघेन दग्धस्य संततस्य हिमांभः शीतलमुदकं गंगोदकं वा । तथा हे ब्रह्मन्कुत्सिते देहे यो मानोऽहंकारः स एवाहिस्तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे तवेदं वचोऽमृततुल्यमौषधम् ॥ २ ॥ मम संशयविषयमर्थं पश्चात्प्रक्ष्यामि अधुना तावत्त्वदुक्तं वचोऽध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथा भवत्येवं व्याख्याहि । कौतूहलयुक्तं चेतो यस्य तस्य मम ॥ ३ ॥ त्वयोदितं व्यक्तमविप्रलब्धमित्यादिना भारवहनादिक्रिया च तत्फलं च श्रमादिप्रत्यक्षादिभिर्दृश्यमानं सदबाधितमपि व्यवहारमात्रमूलम् । यद्वा । सतोऽबाधितव्यवहारस्य मूलं कारणमपि नह्यंजसा तत्त्वविमर्शनाय क्षममिति भवान्यदाह । अमुष्मिन्नर्थे मम मनो भ्रमति ॥ ४ ॥ अबाधितत्वमसिद्धमित्याह । हे पार्थिव यः पार्थिवो विकारः स एव कस्य हेतोः कस्माच्चित्कारणात्पृथिव्यां चलन्नयं भारवाहकादिर्जनो नाम प्रसिद्धः । यस्तु न चलति स पाषाणादिरित्येतावानेव भेदः । तस्य च जडत्वान्न भारः श्रमश्च । किं च । भवेदेवं यदि श्रमस्याश्रयो निरूप्येत न त्वेतदस्ति । अवयवव्यतिरेकेण श्रमास्पदस्यावयविनोऽनिरूपणादित्याशयेनाह । तस्यापि पृथ्वीविकारस्यापि । अंघ्र्योरध्युपर्युपरि गुल्फादयः । उरसः सलोप आर्षः ॥ ५ ॥ शिबिकायामप्यवयवी नास्ति त्वय्यपि नास्ति तदाह । सौवीरराजेत्यपदेशो नाममात्रं यस्य स पार्थिवो विकार आस्ते । राजेति संधिरार्षः । यस्मिन्भवान्निरूढात्माभिमानः सिंधुषु

निगूढो नितरां छन्नो नित्यानुभवो ज्ञाननिष्ठारूपो यस्य स तथा स चासौ स चेति तथा तस्मै । यद्वा—अवधूतद्विजा दत्तात्रेयादय एव बंधवो यस्य स तथा ॥ १ ॥ "निदाघस्तापपापयोः" इति कोशमपेक्ष्योक्तं गंगोदकं वेति । अमृततुल्यममृतमिव तुल्योपमा । ब्रह्मन्निति । वेदविद्रत्वैतन्नाद्भुतमिति भावः ॥ २ ॥ ३ ॥ अमुष्मिन्नर्थे स्पष्टाभिप्रायाप्राप्त्या मे मनो न स्थिरी भवति । योगेश्वरेति । योगीश्वरत्वात्त्वत्र संदेहाभावेपि मम संदेहोऽस्त्येवेति भावः ॥ ४ ॥ पूर्वं स्वमतेन भंग्या दत्तोत्तरमबुद्ध्वैव पुनः पृच्छंतं राजानमवजानन्निव भो राजंस्तव व्यवहारोऽयमप्रमाण एवेति मतांतरमाश्रित्य पुनः प्रत्याह—हे पार्थिवेति । यथा पृथिवीविकारो घटपाषाणादिर्बोधितो न बुध्यते तथा त्वमपीत्यभिप्रायः । कस्माच्चिददृष्टादिरूपात्कारणात् । श्रमासंभवमाह—किंचेति । एवं त्वदुक्तरीत्या ॥ ५ ॥ समासांतविधेरनित्यत्वाश्रयणे त्वार्षत्वं नास्तीत्यपि ज्ञेयम् । राजास्मीत्यभिमान एव न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोच्यानिमांस्त्वमधिकष्टदीनान् विष्ट्या निगृह्णन् निरनुग्रहोऽसि ॥ जनस्य गोप्ताऽस्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥ ७ ॥ यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् ॥ तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत् क्रिययाऽनुमेयम् ॥ ८ ॥ एवं निरुक्तं क्षिति शब्दवृत्तमसन्निधानात् परमाणवो ये ॥ अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेषः ॥ ९ ॥

राजाऽस्मीति दुर्मदेनांधः सन् ॥ ६ ॥ शोच्यानिमान्विष्ट्या निगृह्णन्निष्कृपो वर्तसेऽतो मिथ्यैव गोप्ताऽस्मीति श्लाघमानो महतां सभासु न शोभसे । यतो धृष्टः ॥ ७ ॥ न चोत्तरोत्तरावयवभारः पूर्वपूर्वावयवानां भवेदिति वाच्यम् । तेषामप्यनिरूपणादित्याशयेनाह । यदेति । निष्ठां नाशं प्रभवमुत्पत्तिं विदाम विद्मस्तत्तदा क्षितेरन्यस्य विकारस्याभावान्नाममात्रादन्यद्व्यवहारस्य मूलं कारणमर्थक्रियया सदित्यनुमेयं निरूप्यताम् । तथा च श्रुतिः "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ॥ ८ ॥ तर्हि क्षितेः सत्यता स्यात्तत्राह । एवं क्षितिशब्दस्यापि वृत्तं वर्तनमर्थं विनैव निरुक्तम् । यद्वा । क्षितिशब्दस्य वृत्तं यस्मिंस्तदपि मिथ्यात्वेन निरुक्तमित्यर्थः । कुतः असत्सु सूक्ष्मेषु परमाणुषु स्वकारणभूतेषु निधानाल्लयात् अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः । परमाणवस्तर्हि सत्याः स्युस्तत्राह । ते मनसा कार्यानुपपत्त्या वादिभिः कल्पिताः । कल्पनाबीजमाह । येषां समूहेन विशेषः कृतस्तेषां समूहः पृथ्वीबुद्ध्यालंबनमित्यर्थः । अवयविनो निरस्तत्वात्समूहग्रहणम् । तथापि सत्याः स्युः न अवि

वस्तुतः । अत्र पृथिव्यादीनां शिबिकांतानां भारवहनात्किं सर्वेषां श्रम उत कस्यचित्कस्यचित् न तावत्सर्वेषां पृथिव्याः शिबिकायाश्च श्रमादर्शनात् । अंघ्र्यादीनां श्रम उपलभ्यत इति चेन्न । शिबिकाया अभावे गुल्फादिभारवाहिनामपि तेषां श्रमानुपलब्धेः । अंघ्र्याद्यवयविनः शिबिकावहनाच्छ्रम इति चेदवयवेभ्यः पृथगवयविनः श्रमाश्रयस्यानिरूपणात् । नन्वस्तु नास्तु वाऽवयवी भारवाहिनः श्रमदुःखमनुभूयत एवेति चेत्तदपि नैकांतिकम् । अतिसुकुमार्या अपि नार्या रत्नालंकारान्वहंत्या रतौ स्वदेहे पतिं स्वबालकं च वहंत्याः श्रमदुःखानुपलब्धेः प्रत्युत सुखोपलब्धेश्च तस्मादभिमानविशेषेणैव सुखदुःखे स्तः । यथा राजास्मीति दुर्मदेन दुरभिमानमत्ततयांधः किमपि न पश्यसीत्येतावदेव तव सुखं निरभिमानानां तु न ते दुःखसुखे इति भावः ॥ ६ ॥ ज्ञानाभावेपि राज्ञः प्रजाशासनं धर्म इति यदुक्तं तत्राह—शोच्यानिति । ईदृशमेव प्रजापालनं धर्म एव । धृष्ट इति । अविनीतोसि तदपि अच्युतस्य किंकरोऽस्मि जिज्ञासुरस्मीति कल्मष इति भावः ॥ ७ ॥ नन्वभिमानशून्यस्य मुक्तस्यापि प्रारब्धसुखदुःखभोगश्रवणात्तवापि भारवहनक्रियाफलस्य श्रमस्य प्रत्यक्षादिभिर्दृश्यमानत्वेनाबाधितत्वाद्व्यवहारस्याप्रामाण्यं त्वदुक्तं न घटेतेति चेत्सत्यम् । मुक्तानां मादृशानां बाधितानुवृत्त्यैव दुःखसुखाभासो यथा स्वप्नात्प्रबुद्धस्य जनस्य स्वप्नदृष्टसर्पस्य मिथ्यात्वज्ञानेऽपि किंचित्क्षणपर्यंतं भयकंपादिकिंचित्करावेव । अप्रबुद्धानां तु स्वाप्निकः सर्पः सत्य एव भाति यथा युष्माकं व्यवहारस्तदपि व्यवहारस्यासत्यत्वं युक्त्या दर्शयामि शृण्वित्याह—यदेति । चराचरस्य जगतः क्षितावेव निष्ठां नाशमुत्पत्तिं च विद्मस्तत्तस्मात्सर्वेषां विकाराणां क्षितिभिन्नत्वाभावात् निरूप्यतां यदि युक्तिः प्रतिभातीति भावः । विकाराणां मिथ्यात्वे श्रुतिं प्रमाणयति । तथा चेति । स्पष्टार्थत्वान्न व्याख्यातोति ॥ ८ ॥ अर्थं विनैव तात्त्विकस्वरूपं विनैव निश्चयेनोक्तम् । नन्वत्र क्षितिशब्दस्येत्युक्तेः क्षितिः शब्दो मृषेति सिद्ध्यति न तु क्षितिर्मृषेति चेत्तत्राह—यद्वेति । यस्मिन्पदार्थे क्षितिशब्दो वर्तते सोऽपि मृषेति भावः । अत्र हेतुमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ॥ द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयाऽवेहि कृतं द्वितीयम् ॥ १० ॥ ज्ञानं विशुद्धं परमार्थमेकमनंतरं त्वबहिर्ब्रह्म सत्यम् ॥ प्रत्यक् प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदंति ॥ ११ ॥

यया प्रपंचस्य भगवन्मायाविलसितत्वादज्ञानेन कल्पिताः ॥९॥ एवमन्यदपि कृशत्वादिधर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं द्रव्यादिनाम्नोपलक्षितयाऽजया मायया कृतमवेहि । तत्र कृशं ह्रस्वम् स्थूलं तत्प्रतियोगि । अणुबृहतोः पृथगुपादानात् असत्कारणम् । सत्कार्यम् । जीवं चेतनम् । अजीवं जडम् ॥ १० ॥ तर्हि किं सत्यं तदाह । ज्ञानं सत्यम् । व्यावहारिकसत्यत्वं व्यावर्तयति । परमार्थम् । वृत्तिज्ञानव्यवच्छेदार्थानि षड्विशेषणानि । विशुद्धं तत्त्वाविषयकम् । एकं तत्तु नानारूपम् । अनन्तरं त्वबहिर्बाह्याभ्यंतरशून्यं तत्तु विपरीतम् । ब्रह्म परिपूर्णं तत्तु परिच्छिन्नम् । प्रत्यक् तत्तु विषयाकारम् । प्रशांतं निर्विकारम् । तदेवं स्वरूपज्ञानं सत्यमित्युक्तम् । कीदृशं तत् । ऐश्वर्यादिषड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य यच्च ज्ञानं वासुदेवं वदंति ॥ ११ ॥

कुत इति । अतः परमाणुषु लयात् । इत्यर्थ इति । कारणमंतरेण कार्यस्यासिद्धेः कारणमेव सत्यमिति भावः । इत्यर्थ इति । परमाणुसमूहं विनाऽन्या पृथिवी नाम कापि नास्तीति भावः । तेषामप्यवयविनिरूपणाशक्यत्वात्तेप्यज्ञानेनैव कल्पिता इत्यर्थः ॥ ९ ॥ तत्र कृशादिषु । तत्प्रतियोगि यदपेक्ष्य ह्रस्वत्वं निश्चीयते तत्स्थूलमित्यर्थः ॥ १० ॥ वृत्तिरूपज्ञानस्य व्यवच्छेदार्थानि भेदकानि । तत्तु वृत्तिरूपं तु । अविद्याया मलिनसत्त्वप्रधानत्वात्तज्ज्ञानमपि मलिनमेवेत्यर्थः । वृत्तीनामानंत्यान्नानारूपत्वं विपरीतं बाह्याभ्यंतरधर्मकं प्रत्यगात्माकारम् । अत्र विश्वनाथः—तर्हि किं सत्यं पूर्वोक्तं तत्त्वमेव शब्दप्रमाणवेद्यं तच्च तत्त्वं ''वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्'' इति प्रथमस्कंधोक्तवदेवाह—ज्ञानं सत्यं किंविधं विशुद्धं गुणातीतं परमोर्थो मोक्षादिको यस्मात्तत् । एकमद्वयम् । अनंतरमबहिर्व्यापकमित्यर्थः । तच्च ज्ञानं ''ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'' इतिवदेवाह—ब्रह्म ब्रह्मशब्दवाच्यं निर्विकल्पकं ज्ञानिनामुपास्यं प्रत्यक् प्रशांतं परमात्मशब्दवाच्यं योगिनामुपास्यं प्रशांतमिति जीवात्मव्यावृत्त्यर्थं भगवच्छब्दः संज्ञा यस्य तत् । भक्तानामुपास्यम् । यत्त्रिरूपमिदमपि वासुदेवं वसुदेवनंदनं वदंति 'पूर्णं ब्रह्म सनातनम्' इति 'कृष्णाय परमात्मने' इति 'ततश्च भगवन्कृष्ण' इत्यादिभ्यः तत्रापि ''ब्रह्मणो हि प्रतिष्ठाहम्'' इति ''विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'' इति 'वासुदेवो भगवताम्' इत्यादिभ्यो वसुदेवनंदनस्यैव परमपूर्णत्वम् । अत्र भगशब्दस्यैश्वर्यवाचित्वादैश्वर्यस्य चेशितव्यापेक्षितत्वादीशितव्यानां मायिकानां चोक्तयुक्त्या मिथ्यात्वादुक्तास्तद्धामवासिन एवेशितव्या नित्या अवगतास्तेषां तद्धाम्नश्च नित्यसत्यत्वं भगवत इव शब्दप्रमाणसिद्धमेव प्रथमस्कंधादौ प्रपंचितमेव तथैव मत्सेवायां च निर्गुणेत्यादिभिरेकादशे भक्तिसंबंधिवस्तुमात्रस्यैव नित्यसत्यत्वं प्रपंचयिष्यते च । प्रकरणाभिप्रायश्चायं—भो राजन् युष्माकं प्रत्यक्षप्रमाणसिद्धस्यापि व्यवहारस्य मायाजीवस्य मायारचितस्य नित्या आविर्हिताः क्वापि तिरोहिताश्चेत्यनेन स्वमतेन कालदेशादिपरिच्छिन्नत्वान्नश्वरत्वमंगीकुर्वता कालदेशाद्यपरिच्छिन्ने तत्त्वे चिद्घन वस्तुनि व्यवहारो वैजात्यादेव नाशीयते इत्युक्तं तदपि व्यवहारमेव पुनःपुनरुत्थापयसि चेदेनं मन्ये वादिनो मिथ्यैवाचक्षते इति तन्मतमुदाहृतम् । शब्दप्रमाणसिद्धे तत्त्वे तु तेऽपि न विप्रतिपद्यंते इत्यनेन 'ज्ञानं विशुद्धम्' इति पद्यमुक्तमिति । ननु देहेंद्रियादिव्यापारः श्रीकृष्णैकनिष्ठो भक्तिरिति भक्तिर्लक्षिता तस्याश्च ''लक्षणं भक्तियोगस्य निर्गुणस्येत्युदाहृतम्'' इति भगवदुक्तेर्निर्गुणत्वमवसीयते । तच्च परिणामवादे कार्यस्य सत्त्वात् प्राकृतदेहेंद्रियादीनामेव भक्तिसंसर्गेणाप्राकृतत्वं स्पर्शमणिन्यायेन बुद्ध्यामहे । विवर्तवादे तु—कार्यमात्रस्यैवासत्त्वाद्देहेंद्रियादीनां मिथ्याभूतत्वाद्भक्तेः स्थितिरेव नास्ति कुतस्तस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ॥ न च्छंदसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥ १२ ॥ यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ॥ निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥

एतत्प्राप्तिस्तु महत्सेवां विना न भवतीत्याह । हे रहूगण एतज्ज्ञानं तपसा पुरुषो न याति । इज्यया वैदिककर्मणा । निर्वपणादन्नादिसंविभागेन । गृहाद्वा तन्निमित्तपरोपकारेण । छंदसा वेदाभ्यासेन । जलाग्न्यादिभिरुपासितैः ॥ १२ ॥ महत्सेवायास्तत्प्राप्त्युपायतामाह । यत्र येषु महत्सु उत्तमश्लोकस्य हरेर्गुणानुवादः ग्राम्यकथानां विघातो

निर्गुणत्वं घटतां तथा हि निर्गुणां भक्तिमयमुपदेष्टव्य इति । गुरूपदेशकाले उपदेष्टव्यजनस्य मिथ्याभूतत्वादाकाशक्षेत्रे बीजवपनमिव गुरूपदेश एव तावन्न भवेत् कुतः कृष्णभक्तिः कुतस्तरां तदभ्यासेन प्रेमादयः । कुतस्तमां तेन भगवद्वशीकार इति । सत्यम् । महाचिंत्यशक्तौ भगवति काप्यसंभावना न भावनीया । यदुक्तं स्वयं भगवतैव "एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम् ॥ " इति । अस्यार्थः—यद्यतः अनृतेन मिथ्याभूतेनापि मर्त्येन मरणधर्मवता देहेंद्रियप्राणादिना पत्रपुष्पधूपदीपगंधविविधनैवेद्यच्छत्रचामराद्युपचारेण च यदाप्नोति एषैव बुद्धिमतां बुद्धिरेषैव मनीषिणां परमपरामर्शवतां मनीषा विचार इति । प्राप्तिप्रकारश्च स्वयं भगवतैवोक्तो यथा " मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे । तदामृतत्वं प्रतिपद्यमानो मयात्मभूताय च कल्पते वै ॥ " अस्यार्थः—यदा मर्त्यस्त्यक्तसमस्तकर्मा गुरूपदेशकाले त्यक्तसमस्तवर्णाश्रमकामनः मयि श्रीगुरुरूपे निवेदितावात्मानावहंतास्पदममतास्पदे येन सः । योऽहं ममास्ति यत्किंचिदिह लोके परत्र च तत्सर्वं नाथचरणेषु समर्पितमिति व्यवसायवान्भवति तदा स जनो मिथ्याभूतोऽपि मे मया विचिकीर्षितः स्याद्विशिष्टः कर्तुमिष्टः स्यात् ' निर्गुणो मदपाश्रयः ' इति मदुक्तेर्निस्त्रैगुण्य एव स्यादित्यर्थः । स हि माया कार्यत्वान्न नश्वरः सत्यः नाप्यज्ञानकार्यत्वान्मिथ्याभूतः किन्तु स्वरूपभूतो मत्कार्यत्वान्निर्गुण एव स्यात् । किं च मया विशिष्टः कृतः स्यादित्यप्रयुज्य विचिकीर्षित इति सन्प्रत्ययप्रयोगान्निर्गुणः कर्तुमारभ्यमाण एव स शनैःशनैर्भक्त्या भासवान् निष्ठारुच्यासक्तिरतिभूमिकारूढ एव सम्यक् निर्गुणः स्यात्ततो मिथ्याभूतवस्तुभिः सह तस्य व्यवहारो न स्यात्तत्पूर्वं तु यथायोगं व्यवहारस्तैश्च सह लभ्यते । अयमर्थः-अचिंत्यशक्त्या भक्त्युपदेशकाल एव तस्य गुणातीतानि देहेंद्रियमनांसि मया भक्तिमाहात्म्यदर्शनार्थमलक्षितमेव सृज्यंते मिथ्याभूतानि तान्यप्यलक्षितमेव लयं यांति यथा "नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम् । चित्रं विदरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति तन्वम् ॥ " इति । अस्यार्थः—एवंविधः प्रियव्रतकर्तृकसप्तसमुद्रनिर्माणप्रपंच इव पुरुषकारो न चित्रम् । चित्रं खल्वेतदेव यद्विदूरविगतोंत्यजोऽपि यस्योरुक्रमस्य नामधेयं सकृदाददीत अधुना तत्क्षणमेव तन्वं तनुं विजहातीति तदानीं तनोर्दृश्यमानत्वेऽपि प्रारब्धकर्मसंवलिततनुत्यागोऽलक्षित एवेत्यर्थः । ततश्च तदाऽमृतत्वं मरणधर्माभावं प्रतिपद्यमानस्तदानीमेव प्राप्तवन्मया सहात्मभूयायात्मभावायात्मनः स्वस्य स्थित्यै कल्पते यत्राहं तिष्ठामि तत्रैव सोऽपि मत्सेवार्थं तिष्ठतीत्यर्थः । एवञ्च जगत्यस्मिन्यानियानि वस्तूनि मिथ्याभूतान्युपलभ्यंते तेषामेव भक्तिसंपर्कान्मिथ्याभूतत्वं प्रविलाप्य भगवता स्वभक्तेच्छानुकूलेन परमसत्यत्वमेव तत्क्षण एव सृज्यते ' किमशक्यमचिंत्यशक्तेर्भगवतः ' इत्यत एव 'मत्सेवायां तु निर्गुणे'ति ' मन्निकेतं तु निर्गुणम् ' इत्यादिकानि संगच्छंते । " अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यत्तु तदचिंत्यस्य लक्षणम् ॥"इत्युद्योगपर्ववचनं भाष्यकारेणापि धृतम् । तत्र भावा इति बहुवचनेनाद्वैतभंगो न ध्येयस्तेषामैक्यादिति सर्वमवदातम् ॥ ११ ॥ हे रहूगणेति । नाम्ना संबुद्धिस्तु तस्याज्ञत्वादनादरविषयेति भावः । एतत् उक्तलक्षणं त्रिविधं ज्ञानमिति विश्वनाथः । तपः चित्तैकाग्र्यम् ॥ १२ ॥ ते च महान्तः कृष्णभक्ता एवेत्यभिव्यंजयति यत्र महत्पादरजोभिषेके सति यत्र महत्सु वा उत्तमश्लोकस्य कृष्णस्य गुणानां भक्तवात्सल्यादीनामनुवादः पुनःपुनः कथनं प्रस्तूयते प्रसज्यते प्रकर्षेण श्लाघ्यते वा । ग्राम्यकथानां विषयवार्त्तानां मुमुक्षोर्मुक्तिकामस्यापि वसुदेवनंदने सतीं मोक्षेच्छाराहित्येन शुद्धाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसंगबंधः ॥ आराधनं भगवत ईहमानो मृगोऽभवं मृगसंगाद्धतार्थः ॥ १४ ॥ सा मां स्मृतिर्मृगदेहेऽपि वीर कृष्णार्चनप्रभवा नो जहाति ॥ अथो अहं जनसंगादसंगो विशंकमानोऽविवृतश्चरामि ॥ १५ ॥ तस्मान्नरोऽसंगसुसंगजातज्ञानासिनेहैव विवृक्णमोहः ॥ हरिं तदीहाकथनस्मृतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥ १६ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ब्राह्मणरहूगणसंवादे श्रीभगवत्कथास्वरूपनिरूपणवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ब्राह्मण उवाच ॥ दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक् ॥ स एष सार्थोऽर्थपरः परिभ्रमन् भवाटवीं याति न शर्म विंदति ॥ १ ॥ यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुंपंति कुनायकं बलात् ॥ गोमायवो यत्र हरंति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ॥ २ ॥

यस्मात् ॥ १३ ॥ विषयसंगस्तु योगभ्रंशक इति वदन्कस्त्वं निगूढश्चरसीति प्रश्नस्योत्तरमाह । अहमिति द्वाभ्याम् । विमुक्तो दृष्टश्रुताभ्यां संगनिमित्तो बंधो येन । हतोऽर्थः प्रयोजनं यस्य ॥ १४ ॥ श्रीकृष्णार्चनं भ्रष्टमप्युद्धरतीत्याह । सेति । जनसंगादि शंकमानः अविवृतोऽप्रकटः ॥ १५ ॥ असंगैर्महद्भिर्यः सुसंगस्तेन जातं ज्ञानमेवासिः खड्गस्तेन छिन्नमोहः सन् अध्वनः संसारमार्गस्यातिशयितं श्रेष्ठं पारं हरिं याति । यद्वा । पारमति अतिक्रम्य हरिं याति " अतिरतिक्रमणे च " इति कर्मप्रवचनीयत्वाद्द्वितीया । यस्य हरेरीहानां कथनस्मृतिभ्यां लब्धा स्मृतिर्येन सः ॥ १६ ॥ इति पंचमस्कंधे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ छ ॥

त्रयोदशेऽविरक्ताय वृथा तत्त्वनिरूपणम् ॥ इति वैराग्यदार्ढ्याय भवाटव्युपवर्ण्यते ॥ १ ॥ अध्वनः पारमित्युक्तं तमेवाध्वानं प्रसिद्धमार्गरूपकेण वैराग्याय प्रपंचयति । दुरत्यये दुस्तरेऽध्वनि प्रवृत्तिमार्गे रजस्तमःसत्त्वैर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथा स एष प्रसिद्धः । सार्थो जीवसमूहोऽर्थपरः सुखार्थः सन् । यथा वणिक् सार्थोऽर्थार्जनाय गच्छन्नटवीं याति तद्वत् ॥ १ ॥ अस्याध्यायस्य व्याख्यानरूप उत्तराध्यायोऽस्ति तथापि सुखप्रतिपत्तये किंचित्किंचिद् व्याख्यायते । यस्यां भवाटव्या

यच्छति ददाति ॥ १३ ॥ मह्यं स्वापराधिने महापामरायाप्येवं ज्ञानमुपदिशन्परमकृपालुः को भवानित्यपेक्षायामाह-अहमिति । दृष्टे श्रुते च व्यवहारे राज्यादौ स्वर्गादौ च संगबंध आसक्तिलक्षणो बंधो विमुक्तो येन सः । तदपि दैवादसावधानोऽभवमित्याह–मृग इति ॥ १४ ॥ या पूर्वजन्मनि कृष्णार्चनजाता साऽधुनापि वर्त्तत इत्यर्थः । वीरेति । शत्रुहननवदज्ञानहननेपि प्राप्ताधिकारत्वात्समर्थोऽसि कथं ममोद्धारः स्यादिति मा शोचेति भावः । यतः संगोऽनर्थहेतुरथो अतः ॥ १५ ॥ यस्मात्कृष्णार्चनमीदृक्प्रभावं तस्माद्धेतोः । सो वासुदेवस्तत्र संगो येषां तेऽसंगाः श्रीकृष्णभक्तास्तैः । पारं हरिं "यस्तस्य पारेऽभिविराजते विभुः" इत्युक्तेस्तस्य पारस्थत्वश्रवणान्नपारत्वमिति चेत्तत्राह–यद्वेति।पारं मोक्षं वातिक्रम्य हरिं श्रीकृष्णं याति भजते "सालोक्यसार्ष्टिसामीप्यम्" इत्यारभ्य "दीयमानं न गृह्णंति विना मत्सेवनं जनाः" इति कपिलोक्तेः । असंगो व्यवहारानासक्तिः सुसंगो महत्संगस्ताभ्यां जातज्ञानखड्गेन वा ॥१६॥ इति श्रीमद्भागवतभावार्थदिपिकाप्रकाशे पञ्चमस्कंधे द्वादशोऽध्यायः ॥१२॥ अविरक्ताय अनिर्विण्णाय । 'अटव्यरण्यं विपिनम्' इत्यमरः (१) 'सार्थो वणिक्समूहे स्यात्' इति मेदिन्युक्तेः प्रसिद्धः सार्थो वणिक्समूहो यथा तथा एष सार्थोपीति योज्यम् ॥ १ ॥ इत्यर्थ इति । भगवत्सेवार्थं विनियुक्तमपि धनं स्वस्वविषयभोगार्थं हरंतीति भावः । 'बहुमायगोमायुर्मृगधूर्त्तकाः'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तु गंधर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥ निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावतिभो अटव्याम् ॥ क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४ ॥ अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितांतरात्मा ॥ अपुण्यवृक्षाञ्छ्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥ क्वचिद् वितोयाः सरितोऽभियाति परस्परं चालषते निरंधः ॥ आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥

मिमे इंद्रियनामानः षड् दस्यवश्चौराः । कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं सार्थं विलुंपंति तस्य धर्म्यं धनमुपभोगेन मुष्णंतीत्यर्थः । गोमायवः सृगालतुल्या दारापत्यादयस्त्वं मे भर्ता पितेत्येवं प्रविश्य प्रमत्तं सार्थिकं सार्थे स्थितं हरंति इतस्तत आकर्षंति । उरणं मेषम् ॥ २ ॥ वीरुधो लतास्तृणानि च गुल्माश्च लतादिजालानि प्रभूतैरेतैर्गह्वरे दुष्प्रवेशे क्षेत्रे कठोरैस्तीव्रैर्दंशैर्मक्षिकाविशेषैर्मशकैश्च यथा कश्चिदुपद्रुतो भवत्येवं कामकर्मादिभिर्गह्वरे गृहाश्रमे वर्तमानो दुर्जनैरुपद्रुतो भवतीत्यर्थः । गंधर्वपुरवदघटमानमेव देहादिकं प्रकर्षेण सत्यमेवेदमिति पश्यति । क्वचित्कचित्कापिकाप्याशुरयोऽतिवेगो य उल्मुकाकारो ग्रहः पिशाचस्तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः ॥ ३ ॥ निवासादिष्वात्मा स्वभावो यस्याः सा बुद्धिर्यस्य स ततस्ततो धावतीत्युभयत्र तावानेवार्थः । वात्या चक्रवातस्तस्यामुत्थितः पांसुस्तेन धूम्रा दिशो रजस्वले रजोव्याप्ते अक्षिणी यस्य स यथा न जानाति तथा वात्येव भ्रमयंती या स्त्री तस्यामुद्भवै रागादिभिरप्रकाशमाना दिग्देवताः कर्मसाक्षिभूता न जानातीत्यर्थः ॥ ४ ॥ अदृश्यानां झिल्लीनां भृंगारिकासंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलो व्यथा यस्य । उलूका घूकास्तेषां वाग्भिर्व्यथितोंऽतरात्मा मनो यस्य अत्र च परोक्षमप्रियवक्तारो झिल्लीतुल्याः प्रत्यक्षमप्रियवक्तारो घूकतुल्याः येषां छायापि पापहेतुस्ते अपुण्यवृक्षास्तत्तुल्यानधार्मिकान्सेवते । मरीचितोयानिति निष्फलत्वेन विज्ञातानपि विषयान् ॥५॥ वितोयासु सरित्सु पतितस्य गात्रभंगात्सद्यो दुःखं भवति न चोदकलाभस्तद्वदिह च परत्र दुःखदान्पाखंडानभियाति । आलषते दायादादिभ्योऽन्नादि वांछति । उभयत्रापि स एवार्थः । दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो निर्विद्यते विषीदति । तत्र च यक्षराक्षसतुल्यै राजभिर्हृतमसुवत्प्रेष्ठं धनं यस्य स निर्विद्यते ॥ ६ ॥

इति।'कोक ईहामृगो वृकः' इति 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडकः' इति चामरः । गोमायव इति लुप्तोपमा।सार्थे स्थितमन्नवस्त्रादिसंपुटं प्रमत्तं परमार्थदृष्टिविमुखम्।आविश्य तस्य गृह इवांतःकरणेऽपि प्रविश्येत्यर्थः ॥२॥ इत्यर्थ इति । पिशाचवन्मृत्युहेतुभूतमपि स्वर्णमुपादेयमिदमिति पश्यतीति भावः ॥ ३ ॥ उभयत्र संसारपक्षे वनपक्षे च तुल्य एवार्थः दिशंति स्वाभिमतं प्रयच्छंतीति दिशो देवाः । इत्यर्थ इति । जीवकृतपुण्यपापकर्मसाक्षिभूता आदित्यादिदेवता अपि न गणयति । कामांधस्य दिग्देवतादिज्ञानं सर्वमेव नश्यतीति भावः ॥ ४ ॥ 'झिल्ली भृंगारिकायां स्यात्' इत्यभिधानात् । येषां छायापीति " दिवा विभीतकच्छाया रात्रौ चलदलस्य च । दिवारात्रौ कपित्थस्य हंति पुण्यं पुराकृतम् ॥" इत्युक्तेः ॥ ५ ॥ 'अंधोन्नम्' इत्यमरः । निर्विद्यते धिङ् मां धनरहितमिति खिन्नो भवतीत्यर्थः । "हिरण्यं हि मनुष्यस्य प्राणा ह्येते बहिश्चराः" इति कौर्मोक्तेरसव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन् विमुह्यन्नुपयाति कश्मलम् ॥ क्वचिच्च गंधर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तम् ॥ ७ ॥ चलन् क्वचित् कंटकशर्करांघ्रिर्नगारुरुक्षुर्विमना इवास्ते ॥ पदेपदेऽभ्यंतरवह्निनाऽर्दितः कौटुंबिकः क्रुध्यति वै जनाय ॥ ८ ॥ क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किंचिद्विपिनेऽपविद्धः ॥ दष्टः स्म शेते क्व च दंदशूकैरंधोंधकूपे पतितस्तमिस्रे ॥ ९ ॥ कर्हि स्म चित क्षुद्ररसान् विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः ॥ तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुंपत्यथ तं ततोऽन्ये ॥ १० ॥ क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते ॥ क्वचिन्मिथो विपणन् यच्च किंचिद्विद्वेषमृच्छत्युत वित्तशाठ्यात् ॥ ११ ॥ क्वचित् क्वचित् क्षीणधनस्तु तस्मिञ्छय्यासनस्थानविहारहीनः ॥ याचन् परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेऽवमानम् ॥ १२ ॥ अन्योऽन्यवित्तव्यतिषंगवृद्धवैरानुबंधो विवहन् मिथश्च ॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन् विपन्नः ॥ १३ ॥

अन्यैश्च शूरैर्हृतं स्वं वित्तं यस्य । निर्विण्णं विषण्णं चेतो यस्य । कश्मलं मूर्छाम् । गंधर्वपुरमिव मनोरथोपगतपितृपुत्रादिसमाजं प्रविष्टः सन् ॥ ७ ॥ कंटकादिविद्धांघ्रिरिव विघ्नैरभिभूतः सन्नगतुल्यं महत्कर्मारोढुं कर्तुमिच्छुर्विमना इव आस्ते । पदेपदे क्षणेक्षणे । अभ्यंतरेण वह्निना जाठरेण ॥ ८ ॥ अजगराहिना निद्रारूपेण गिलितो न वेत्ति । विपिने त्यक्तः शव इव दंदशूकैर्हिंस्रैर्दुर्जनैर्दष्टः पीडितोंधो लुप्तविवेकोंधकूपे मोहे पतितस्तमिस्रे दुःखे शेते लीयते ॥ ९ ॥ क्षुद्ररसान्परयोषादीन्विचिन्वन्गवेषयंस्तन्मक्षिकाभिर्योषादिस्वामिभिर्विमानोऽवज्ञातस्ताडितः सन्व्यथितो भवति । यदि कथंचित्तत्रातिक्लेशेन प्रतिलब्धमानः प्राप्तयोषादिर्भवति तदा बलादन्येऽपहरंति तान्यदाऽभियुंक्ते तदा ततोऽप्यन्ये हरंति ॥ १० ॥ यत्किंचिदत्यल्पमपि मिथो व्यवहरन् क्रयादिना गृह्णन् । वित्तशाठ्याद्धनवंचनात् ॥ ११ ॥ शाय्यादिहीनः । आस्यतेऽस्मिन्नित्यासनं कंबलादि । स्थीयतेऽत्रेति स्थानं गृहम् । विहरंत्यनेनेति विहारो यानादि । याचमानोऽपि यदा परस्मादप्राप्तकामस्तदा परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्राप्नोति ॥ १२ ॥ एवमन्योन्यं वित्तव्यतिषंगेण धनविनिमयेन विवृद्धो वैरानुबंधो यस्य तथाविधोऽपि परस्परं विवहन् विवाहादिसंबंधं कुर्वन्नुरुभिः कृच्छ्रैः श्रमैर्वित्तबाधैरुपस

एव धनमिति वा ॥ ६ ॥ मनोरथेनैव पितृपुत्रादिसमाजं संपाद्य तत्र मानोरथिकं सुखमनुभवतीत्यर्थः ॥ ७ ॥ महत्कर्म वैदिकमिष्टापूर्त्तादि कन्यापुत्रोद्वाहादि यशो वा विमना इव सहायकाभावात्कथमहमेतत्पारयिष्यामीति चिंतयन्नास्ते ॥ ८ ॥ ९ ॥ तत्र तदाऽतिक्लेशेन वित्तव्ययादिना बलाद्धृद्धवित्तव्ययादितः अभियुक्ते उपभुक्ते ॥ १० ॥ अनीशोऽसमर्थः ॥ ११ ॥ अभिलाषश्चौर्यादिना हरिष्येऽस्येदं धनमितीच्छा । अवमानं बधबंधादिरूपम् ॥ १२ ॥ वित्तस्य धनस्य बाधैर्नाशैः । यद्वा—उरुकृच्छ्रेणाप्तं वित्तमुरुकृच्छ्रवित्तं मध्यपदलोपी समासः । तस्य बाधेन नाशेन ये उपसर्गा वैक्लव्यादयस्तैः ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तांस्तान् विपन्नान् स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः ॥ आवर्ततेऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥ १४ ॥ मनस्विनो निर्जितदिग्गजेंद्रा ममेति सर्वे भुवि बद्धवैराः ॥ मृधे शयीरन् न तु तद्व्रजंति यन्न्यस्तदंडो गतवैरोऽभियाति ॥ १५ ॥ प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः ॥ क्वचित्कदाचिद्धरिचक्रतस्त्रसन् सख्यं विधत्ते बककंकगृध्रैः ॥ १६ ॥ तैर्वंचितो हंसकुलं समाविशन् न रोचयञ्छीलमुपैति वानरान् ॥ तज्जातिरासेन सुनिर्वृतेंद्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥ द्रुमेषु रंस्यन् सुतदारवत्सलो व्यवायदीनो विवशः स्वबंधने ॥ क्वचित् प्रमादाद्गिरिकंदरे पतन् वल्लीं गृहीत्वा गजभीत आस्थितः ॥ १८ ॥

गैश्च द्वेषादिभिर्विपन्नो मृतप्रायो भवति ॥ १३ ॥ दुरत्ययत्वमध्वनो दर्शयति । तांस्तान्विपन्नान्मृतान्विहाय जातंजातं परिगृह्य विहरन्यतः प्रस्थितस्तं प्रति नावर्तते । हे वीर अध्वनः पारं यो योगस्तं च नोपैति । अत्र सार्थे । कश्चिदतिसमर्थोऽपि ॥ १४ ॥ तदेवाह । मनस्विनः शूराः निर्जिता दिग्गजेंद्रा यैः ममेयं भूर्ममेयमिति भुविनिमित्तभूतायां बद्धं वैरं यैः । न्यस्तदंडः संन्यासी । यद्विष्णोः पदमभियाति तत्तु न व्रजंति ॥ १५ ॥ सिंहावलोकनेन पुनर्भवाटवीमेवानुवर्णयति । प्रसज्जत्यासक्तिं करोति । कीदृशः । लतानां भुजाः शाखास्तद्वत्सुकुमारा ये स्त्रीणां भुजास्तदाश्रयः सन् । तदाश्रया अव्यक्तपदा अस्फुटाक्षराः कलभाषिणो ये द्विजाः पक्षिणस्तत्तुल्येषु स्त्रीसंगप्रसक्तेष्वपत्येषु स्पृहा यस्य तादृशो भूत्वा हरिचक्रं सिंहसमूहस्तत्तुल्यात्कालचक्रनिमित्ताज्जन्ममरणादेस्त्रसंस्तत्परिहाराय कैश्चित्प्रलोभितो बकादिवद्वंचकैः क्षुद्रैः क्रूरैश्च पाखंडैः सह सख्यं करोति तेषु प्रविशति ॥ १६ ॥ तैर्वंचितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुनः प्रविशंस्तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचारमरोचयन्नप्रियं पश्यन्वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायानुपैति । तज्जातिरासेन वानरजातिक्रीडया स्त्रिया मिथुनीभूय परस्परमुखोद्वीक्षणेन विस्मृतो जीवितावधिर्मरणकालो येन ॥ १७ ॥ द्रुमवत्केवलदृष्टार्थेषु गृहेषु व्यवायदीनः सुरतेच्छया कृपणः एवं स्वस्य यद्बंधनं प्राप्तं तस्मिन्विवशः परिहर्तुमशक्तः । पाठांतरे तु वने संसारे चर

विपन्नान्मृतप्रायान् । योऽविपन्नः स हीति जातंजातमविपन्नमविपन्नं यतः परमेश्वराच्चलितस्तं प्रतीत्यर्थः । तत्प्राप्तिसाधनं योगमुपायं भक्तिज्ञानादिकं पारं पारप्रापकं नोपैति । अत्र सार्थमध्ये । वीरेति । हे वाक्छूरेत्यभिप्रायः ॥ १४ ॥ तदेव तदनावर्तनमेव ॥ १५ ॥ पक्षे भार्योत्संगवर्त्तिनि अस्फुटाक्षरभाषिणि । द्वाभ्यां स्त्रीपुंसाभ्यां जातत्वात् द्विजे बालके दर्शनस्पर्शनादिस्पृहा यस्य तादृशो भूत्वा कदाचित्काले क्वापि देशे स्वयमेव कथमरे संसारं तरिष्यामीति दैवात्पाषंडानां वाक्येन वा त्रस्यन् ॥ १६ ॥ शूद्रप्रायान् लिंगिनः । जटाभस्मदेवमुद्राकाषायांबरधारिणः "नास्तिकानुगता बौद्धाः कापालाद्यास्तु लिंगिनः । कलौ ते बहुधा लोकान्निगमात्पेशलोक्तिभिः॥च्यावयिष्यंति राजेंद्र ते दंड्या नृपसत्तम ॥" इत्यादिपुराणात् । तज्जातिरासेन तज्जातौ भोजनपानस्त्रीसंगादिस्वाच्छंद्येन लिंगिमध्य एव सुखं नान्यत्रेति प्रसन्नमना भवतीत्यर्थः ॥ १७॥ पाठांतरे चरन्वने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतः कथंचित् स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिंदम ॥ अध्वन्यमुष्मिन्नजया निवेशितो भ्रमञ्जनोऽद्यापि न वेद कश्चन ॥ १९ ॥
रहूगण त्वमपि ह्यध्वनोऽस्य संन्यस्तदंडः कृतभूतमैत्रः ॥ असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तराति पारम् ॥ २० ॥ राजोवाच ॥
अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ॥ न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥ २१ ॥
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ॥ मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥ २२ ॥ नमो
महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आबटुभ्यः ॥ ये ब्राह्मणा गामवधूतलिंगाश्चरंति तेभ्यः शिवमस्तु राज्ञाम् ॥ २३ ॥

न्नित्यर्थः । गिरिकंदरवदतिभयानके रोगादिदुःखे पतन्कंदरस्थगजतुल्यान्मृत्योर्भीतः सन् वल्लीतुल्यं प्राचीनं कर्मावलंब्यावस्थितो भवति ॥ १८ ॥ सार्थं प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते न वेद परमपुरुषार्थम् ॥ १९ ॥ त्वमपि अध्वनि निवेशित इत्यनुषंगः । अतोऽस्याध्वनः पारमातितर । असज्जितात्मा विषयेष्वनभिनिवेशितचित्तः सन् । हारिसेवया शितं तीक्ष्णीकृतम् ॥ २० ॥ अखिलजन्मसु शोभनं नृजन्मैव । न परं श्रेष्ठं येभ्यो देवादिजन्मभ्यस्तैरपि किम् । अमुष्मिन् स्वर्गेऽपि जन्मभिः किं न किंचित् । यद्येषु जन्मसु यत्र स्वर्गे वा वो महात्मनां समागमः प्रचुरो न भवति । हृषीकेशस्य यशसा कृतः शोधित आत्मा यैस्तेषाम् ॥ २१ ॥ संततमुपासितैस्त्वत्पदाब्जरेणुभिर्हतमंहो यस्य तस्याधोक्षजे निर्मला भक्तिर्भवतीति नैवाद्भुतम् । यस्य तव मुहूर्तमात्रभवात्समागममात्रादपि दुस्तर्केण बद्धमूलोपि ममाविवेको नष्टः ॥ २२ ॥ ब्रह्मविदः केन रूपेण विचरंतीत्यज्ञानात्सर्वान्नमस्यति । नम इति । ये बटवः क्रीडारतत्वादश्रद्धेयधौरेयास्तानप्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः । स्वदृष्टांतेन राज्ञां महद

इति पाठे । इत्यर्थः इति व्याख्येयम् ॥ १८ ॥ अतः संसाररूपाया आपदः । कथंचित्सत्संगादिना । अरिंदमेति । त्वमज्ञानशत्रुदमनेऽपि समर्थो भवेत्यभिप्रायः ॥ १९ ॥ रहयति त्यजति संसारमनयेति रहूः श्रीकृष्णभक्तिः तया गण्यते संख्यायते लोक इति रहूगण तत्सम्बुद्धौ इत्यन्वर्थनामा भवेति भावः ॥ २० ॥ कथमहमकस्मादेव कृतार्थोभूवमिति साश्चर्यं सवितर्कमाह—अखिलेति । अहो अद्भुतेऽस्मिन्मर्त्यलोके । हृषीकेशस्य स्वभक्तसर्वेंद्रियाकर्षकस्य । आत्मा बुद्धिः ॥ २१ ॥ ननु प्रचुर इत्युक्तया किं स्वल्पसंगस्यानर्थकत्वं ब्रूषे । मैवम् । अत्यौत्सुक्ययंत्रित एव तथा ब्रवीमीत्याह—नहीति । ब्रह्मादिभिरपि दुर्लभा भगवत्यमला भक्तिर्युष्मच्चरणधूलिप्राप्तिमात्रेणैव भवतीत्येतदपि नाश्चर्यम् आश्चर्यं खल्वेतदेव यन्मद्विधानां ज्ञानलवदुर्विग्धानां कूटयुक्तिविप्लुतधियां चेतःपरावृत्तं भक्तियोगोन्मुखीकरणं तच्च मौहूर्तिकादेव समागमाद्यद्भूत्तर्हि प्रचुरस्य समागमस्य माहात्म्यं को वक्तुं क्षमतामिति तत्र मया स्वौत्सुक्यमेव व्यंजितमिति भावः ॥ २२ ॥ हंतहंत शिविकां वहंस्तत्र भवान् स्वं यदि नाज्ञापयिष्यत्तदा ममापराधिनः का गतिरभविष्यदिति सभयं प्रणमति—नम इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच॥इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः सिंधुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवंदितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥ सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याऽध्यारोपितां देहात्ममतिं विससर्ज ॥ एवं हि नृप भगवदाश्रिताश्रितानुभावः ॥ २५ ॥ राजोवाच ॥ यो ह वा इह बहुविदा महाभागवत त्वयाऽभिहितः पारोक्ष्येण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नांजसाऽव्युत्पन्नलोकसमधिगमः ॥ अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भवाटव्युपवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ स होवाच ॥ य एष देहात्ममानिनां सत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिंद्रियवर्गेण तस्मिन् दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे यस्यामु ह वा एते षडिंद्रियनामानः कर्मणा दस्यव एव ते ॥ १ ॥

वज्ञां संभाव्याह । राज्ञां शिवमस्त्विति॥ २३ ॥उत्तरा माता यस्य हे उत्तरामातः । विगणयतो न गणयतः । अवमंतर्यपि परमकरुणाकरत्वेन सिंधुपतये आत्मतत्त्वमुपदिश्य । निभृताः शांताः करणानामूर्मयो यस्मिन्स आशयो यस्य॥ २४ ॥सुजनात्तस्मात्सम्यगवगतं परमात्मसतत्त्वं येन तथाभूतः संस्तदानीमेव देहे आत्ममतिं च विससर्ज।हेनृप भगवदाश्रितो भरतस्तदाश्रितो रहूगणो यस्तस्यानुभावः सद्यो देहाहंकारत्यागः॥ २५ ॥परोक्षेण वणिक्सार्थरूपकेण । आर्याणां विवेकिनां मनीषयैव दस्युस्थानीयानींद्रियाणि गोमायुस्थानीयान्यपत्यादीनीत्येवं कल्पितविषयः अव्युत्पन्नस्य तु लोकस्य तु जनस्य सम्यगधिगमो न भवति।अथ अतस्तदेतदेव भवाध्वरूपं समवेतानुकल्पेन प्रस्तुते तत्तदनुरूपार्थोपकल्पनेन॥ २६ ॥इति पंचमस्कंधे टीकायां त्रयोदशोऽध्यायः॥ १३ ॥चतुर्दशे भवारण्यरूपकव्याकृतिः कृता॥प्रस्तुते तस्य गोमायुमशकाद्यर्थकल्पनम्॥ १ ॥यः परीक्षिता पृष्टः

अश्रद्धेषु धौरेया मुख्याः ॥ २३ ॥ हंतहंत महाभूरिभाग एव रहूगणो यत्तादृशब्रह्मतेजसि शिबिकावाहनादपराद्धोऽपि तदनुग्रहामृतवृष्ट्याभिषिक्तः कृतार्थी बभूव । अहं त्वतिमंदभाग्यो विप्रगले सर्पार्पणापराधात्तदपराधाक्षमापणात्तदभिशापविषदष्टो न जाने किमंधं तमो यास्यामीति विषीदंतं राजानमाश्वासयति–इत्येवमिति । उत्तरा माता यस्येति । भो राजन् त्वन्मातुर्गर्भे प्रविश्य ब्रह्मतेजसः सकाशाद्भगवान्स्वयमेव त्वां ररक्ष स्वं दर्शयामास च पुनरपि सांप्रतं ब्रह्मतेजसो रक्षितुं मामेतांश्च नारदादिमहामुनीन्प्रेर्य त्वदंतिकमानीयैतेषामपारकृपामृतेन त्वामभिषिच्य भागवतामृतं मद्द्वारा पाययन्स एव प्रभुर्ब्रह्मतेजोऽपि व्यर्थीचकारेति रहूगणात्तस्माद्भरताच्च मत्तश्चैतेभ्यो महामुनिभ्यश्च त्वदीयं सौभाग्यमतिमहत्तमं व्यंजयामास तदपि किं विषीदसीति भावः । न गणयतस्तिरस्कुर्वतोपि । संबंधसामान्यविवक्षया षष्ठी । परोऽनुभावो यस्माद्यस्य वेति सः । करणानामिंद्रियाणामूर्मयो वृत्तयः ॥ २४ ॥ सुजनाच्छ्रीमद्भरतात् । आत्मनि स्वस्मिन्याऽनादित एव प्रवृत्ताऽविद्या तयारोपितां देहात्मबुद्धिम् ॥ २५ ॥ समवेतं योग्यं यथा भवति तथा आनुकूल्येन पुनःपुनःकथनेन वा ॥ २६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ भवारण्यरूपकस्य व्याकृतिर्व्याख्या (१) श्रीगुरुचरणाश्रयं विना संसाराटव्यां भ्रमत्येवेति भावः । ननु जीवसंसारस्य मायाकृतत्वान्माया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्यथा पुरुषस्य धनं यत्किंचित् साक्षाद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु सांपराय उदाहरंति तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य तथाऽजितात्मनो विलुंपंति ॥ २ ॥ अथ च यत्र कौटुंबिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एव अनिच्छतोऽपि कदर्यस्य कुटुंबिन उरणकवत् संरक्ष्यमाणं मिषतोऽपि हरंति ॥ ३ ॥ यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन् न हि कर्माण्युत्सीदंति यदयं कामकरंड एष आवसथः ॥ ४ ॥

स श्रीशुक उवाच।हेति सूतोक्तिः।दुरत्ययेऽध्वन्यजया निवेशित इति यदुक्तं तदेव निवेशनप्रकारकथनेन प्रपंचयति।य एष प्रसिद्धो जीवलोकोऽयं विष्णोर्माययाऽसुगमेऽध्वन्यापतितो भवाटवीं गतः सन् हरिरूपस्य गुरोश्चरणारविंदे ये मधुकराः सेवकास्तेषामनुपदवीं तैरनुष्ठितं भक्तिमार्गमद्यापि नावरुंधे न संप्राप्नोतीत्यन्वयः। मायायाः स्वकार्यद्वारेण संसार मार्गे पातहेतुत्वमाह।देहात्ममानिनां सत्त्वादिगुणविशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलविमिश्रकर्माणि तैर्विनिर्मिताभिर्विविधदेहावलिभिर्वियोगसंयोगादिर्योऽनादिः संसारस्तदनुभवस्य द्वारभूतेन षडिंद्रियवर्गेण तस्मिन्संसाररूपे दुर्गमार्गवदसुगमेऽध्वन्यापतितो यथा वणिजां सार्थः समूहोऽर्थार्जनपरः । स्वदेहनिष्पादितानां कर्मणां फलद्वारेणानुभवो यस्य विफलाश्च बहुप्रतियोगा बहुविघ्नाश्च ईहाश्चेष्टा यस्य सः।तस्यां संसाराटव्यां ये तापास्तेषामुपशमनीं नाशनीम्।यस्यामित्यादि व्याचष्टे।यस्यां भवाटव्याम्॥ १ ॥ दस्युतुल्यं तेषां कर्म दर्शयति । तद्यथेति । धर्मौपयिकं धर्मकारणम् । तमेव स्वाभिप्रेतं धर्ममाह । साक्षादिति । तं तु सांपराये परलोकार्थमुदाहरंति तद्धर्म्यं धर्मार्हं धनम् । दर्शनाद्याः पंचज्ञानेंद्रियाणां वृत्तयः संकल्पव्यवसायावंतःकरणस्य एतैर्गृहे यो ग्राम्य उपभोगस्तेन कुनाथस्य कुबुद्धेरजितात्मनो विलुंपंति । यथा चौराः कुपालकस्यानवहितात्मनः । सार्थस्य धनं हरंति तद्वत् ॥२॥ गोमायवो यत्रेत्येतद्व्याचष्टे । अथ चेत्यर्थांतरोपन्यासे । कर्मणा ते तु वृकाः सृगालाश्च कदर्यस्यातिलुब्धस्य ॥३॥ प्रभूतवीरुत्तृणगुल्मगह्वरमित्येतद्व्याचष्टे । यथाहीति । न दग्धानि बीजानि यस्मिन् । यद्यस्माद्योऽयमावसथ आश्रम एष कामानां करंडः यथा कर्पूरभाजने कर्पूरक्षयेऽपि परिमलो न

देवीमेव जीवः प्रपद्यतां सैव प्रसन्ना तं संसारान्मोचयिष्यति किं हरिगुरुचरणप्रपत्त्या तत्राह–विष्णोर्वशवर्त्तिन्या माययेति । संसारान्मोचने न तस्याः स्वातंत्र्यमिति भावस्तदुक्तं "दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥" इति गीतायां, तत्र श्लोके एवकारेण समुच्चयपक्षोपि निरस्तः । "विघ्ने च तुल्ययोर्योगे प्रतियोगस्तथोद्यमे' इति निरुक्तिः ॥ १ ॥ २ ॥ कर्मणा स्वस्वव्यापारेण दर्शनादिना संरक्ष्यमाणं स्वार्थिकमन्नगुडघृतादिसंपुटम् । उरणकवन्मेषवत् ॥ ३ ॥ आवसथो गृहस्थाश्रमः । "आवसथो ग्रामगेहशिबिरादिषु युज्यते" इति । "करंडोऽसिकोशपिटकासरघापटलेषु च" इति निरुक्तिः । इत्यर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुंततस्करमूषकादिभिरुपरुध्यमानो बहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसाऽनुपपन्नार्थं नरलोकं गंधर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥ तत्र च क्वचिदातपोदकनिभान् विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥ ६ ॥ क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ॥ ७ ॥ अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥८॥ क्वचिच्च वात्यौपम्यया प्रमदयाऽऽरोहमारोपितस्तत्कालरजसा रजनीभूता इवासाधुमर्यादो रजस्वलाक्षोपि दिग्देवता अतिरजस्वलमतिर्न विजानाति ॥९॥

क्षीयते एवमत्र वासनानामक्षीणत्वान्न कर्माण्युत्सीदंतीत्यर्थः ॥ ४ ॥ दंशमशकतुल्यैरपसदैर्नीचैः शलभादिभिश्चोपरुध्यमानः पीड्यमानो बहिःप्राणो वित्तं यस्य तथाविधोऽप्यस्मिन्नध्वनि परिभ्रमन्नविद्यादिभिरुपरक्तेन मनसा गंधर्वपुरतुल्यमघटमानं नरलोकं सत्यतया मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥ प्रपश्यतीति प्रशब्दसूचितमर्थांतरं दर्शयति । तत्र च गंधर्वपुरे क्वचिदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयानुपधावतीति ॥ ६ ॥ क्वचित्क्वचिच्चाशुरयोल्मुकग्रहमित्येतद्व्याचष्टे । क्वचिच्चाशेषाणां दोषाणां निषदनं स्थानं पुरीषविशेषमग्नेर्विष्ठा तस्य पुरीषस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता तद्विषया मतिर्यस्य स सुवर्णमुपादातुमिच्छति । अग्निकामेन कातरः परवश उल्मुकसदृशं पिशाचमिव । शीतातुरो ह्यरण्येऽग्निवज्ज्वाज्वल्यमानं ततस्ततो धावंतमुल्मुकपिशाचमग्निबुद्ध्याऽनुधावति न तु तं प्राप्नोति कथंचित्प्राप्तश्चेत्तर्हि तेन भक्षितः सन् म्रियते । एवं सुवर्णमनुधावन्नपीत्यर्थः ॥ ७ ॥ निवासतोयद्रविणेत्येतद्व्याचष्टे । अथेति । निवासादिष्वनेकेष्वात्मन उपजीव्येष्वभिनिवेशो यस्य ॥८॥ क्वचिच्च वात्योत्थितेत्येतद्व्याचष्टे ।

इति । सर्वथा नाशस्तु कर्मणां विना ज्ञानं न संभवति गृहस्थस्य सर्वदा कर्मासक्तत्वाज्ज्ञानं दुर्लभमेवातो गृहस्थे कर्मणामनवरतस्थितिरेवेति भावः ॥४॥ 'गर्ह्ये नीचोपसदनिंद्या' इति कोशात् । 'वित्तं बहिश्चराः प्राणाः' इत्यभियुक्तोक्तेः । परिवर्त्तमानः परावृत्य परामृशन् । न उपपन्नोऽर्थो वित्तं यस्य तं नरलोकवञ्चकनृपादिकं पश्यति ततश्च तदुपासनया वाञ्छितवित्तादिकमुपपन्नमिति गंधर्वनगरमिव तमनुपश्यति ॥ ५ ॥ आदिना गानादिग्रहः ॥ ६ ॥ पुरीषविशेषं मलविशेषम् । तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भवतीति वक्ष्यमाणत्वात् । 'पुरीषं मलहेययोः' इति कोशात् । इत्यर्थ इति । सुवर्णार्थमितस्ततस्तत्प्राप्तये यत्नं कुर्वन्यदि तदाप्नोति तदा चौरादिस्ततस्तदुपाहर्तुं तमेव मारयतीति भावः । स्वर्णमत्र द्रव्यमात्रोपलक्षकं परकीयस्येति केचित् ॥ ७ ॥ आदिना वस्त्रादिग्रहः । 'अत्रोपजीव्याभिनिवेशः' इति पाठश्चकानुरोधात्प्रतिभाति । उपजीव्येषूपजीवनसाधनेषु ॥ ८ ॥ वात्यया धूलिचक्रेण सहौपम्यमुपमा यस्यास्तया । अत एव रजश्छन्नमतित्वादेव । देवता वह्निसूर्याद्याः । असाधुमर्यादस्त्यक्तशास्त्रमर्यादः ॥ ९ ॥

१–इष्टाश्चायं पाठोंऽग्रदेशाङ्कितपुस्तकेषु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति ॥१०॥ क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ ११ ॥ स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुंडाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान् जीवन्मृतान् स्वयं जीवन् म्रियमाण उपधावति ॥१२॥ एकदाऽसत्प्रसंगान्निकृतमतिर्व्युदकस्रोतःस्खलनवदुभयतोऽपि दुःखदं पाखंडमभियाति ॥ १३ ॥ यदा तु परबाधयांध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतः पितृपुत्रान् वा स खलु भक्षयति ॥ १४ ॥

क्वचिचेति आरोहमंकम् । तस्मिन्काले यद्रजो रागस्तेन स्वदृष्ट्यावरकेण रजन्यां रात्रौ भूता इव । ह्रस्वपाठे रजनीभूतस्तमोमय इवातीव रजसाच्छन्नमतिरत एव रजोव्याप्तचक्षुरिव दिक्षु स्थिता मर्यादातिक्रमसाक्षिभूता देवता न जानाति ॥ ९ ॥ अनुपादेयमेवोपादेयतया गृह्णातीति प्रक्रमसाजात्यादुत्तरश्लोकचतुर्थपादं प्रथमं व्याचष्टे । क्वचित्सकृदिति । क्वचिदातपोदकनिभानित्यत्र मिथ्याविषयेषु लंपटत्वमुक्तम् । निवासतोयेत्यत्र तदर्जनप्रयास उक्तः । अत्र तु बाधितेष्वपि पुनः प्रवृत्तिरुच्यते इत्यपौनरुक्त्यम् । स्वयमेव सकृदवगतं विषयाणां वैतथ्यं विफलत्वं येन । पराभिध्यानेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य । तयैव विभ्रंशितया स्मृत्या स्मृतिभ्रंशादेवेत्यर्थः ॥ १० ॥ अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । क्वचिदुलूकेति । अतिपरुषो रभस उत्साहस्तेनाटोपः संभ्रमो यथा भवत्येवं रिपूणां राजकुलस्य च निर्भर्त्सितेनातिव्यथितं कर्णमूलं हृदयं च यस्य ॥ ११ ॥ अपुण्यवृक्षानित्येतद्व्याचष्टे । स यदेति । दुग्धमुपभुक्तं पूर्वसुकृतं येन तदा कारस्करो विषतिंदुस्तत्प्रमुखा येऽपुण्यद्रुमास्तथाविधा लताश्च विषोदपानाश्च विषकूपास्तत्तुल्यान् दृष्टादृष्टप्रयोजनशून्यधनान् ॥ १२ ॥ क्वचिद्वितोयाः सरित इत्येतद्व्याचष्टे । एकदा क्वचिदसतां प्रसंगान्निकृता वंचिता मतिर्यस्य सः निरुदकनदीगर्तपाते यथा सद्यः शिरः स्फुटति पश्चादपि तद्वेदनाऽनुवर्तते एवमिह परत्र च दुःखदम् ॥ १३ ॥ परस्परं चालषते निरंध इत्येतद्व्याचष्टे । यदात्विति । अंधोऽन्नम् । नोपन

उत्तरश्लोकचतुर्थपादं पूर्वाध्यायस्थपंचमश्लोकस्य मरीचितोयानीति चतुर्थं पादमित्यर्थः। अत्र क्वचित्क्रमेण क्वचित्क्रमोल्लंघनेन क्वचित्पौनरुक्त्येनापि व्याख्यानं नावगणनीयं न हि महाटव्यां सर्व एव पंथा ऋजुः कर्तुं शक्य इति। अत्र स्वप्रौढिमपहाय यथास्थितमेव व्याख्यायते मरीचितोयान्यभिधावति क्वचिदिति व्याचष्टे—क्वचिदिति । इत्यर्थ इति । न हि यथावत्स्मृतिकोऽन्यथा चरति किं तु तद्धीन एवेति भावः ॥१०॥ ११ ॥ दृष्टप्रयोजनं भोगः अदृष्टप्रयोजनमिष्टापूर्त्तादिकरणमेतदुभयानुपयुक्तद्रव्यान् । दृष्टादृष्टप्रयोजनशून्यधना एव जीवन्मृता लोके कथ्यंत इत्यर्थः । किञ्च—दृष्टादृष्टप्रयोजनशून्यधनसेवी यः स एव जीवन्म्रियमाण इत्युच्यते इति भावः॥१२॥ तद्वेदना शिरःस्फुटनपीडा । पाखंडमिह लोकापवाददुःखं परत्र नरकदुःखम् ॥१३॥ इत्यर्थ इति । शृणु भो मत्पुत्रान्मत्पितुर्वा सकाशात्त्वत्पुत्रेण त्वया च गताद्भुतवर्षे कुशत्रयं गृहीतं तच्च न दत्तमधुना तद्ग्रैष्मिकहैमंतिकान्नतृणादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिदासाद्य गृहं दाववत् प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥१५॥ क्वचित् कालविषमितराजकुलरक्षसाऽपहृत प्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते॥१६॥ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत् सदिति स्वप्ननिर्वृतिलक्षणमनुभवति॥१७॥ क्वचिद्गृहाश्रमकर्मचोदनाऽतिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्शितमनाः कंटकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥१८॥ क्वचिच्च दुःसहेन काया भ्यंतरवह्निना गृहीतसारः स्वकुटुंबाय क्रुध्यति ॥ १९ ॥ स एव पुनर्निद्राऽजगरगृहीतोंधे तमसि मग्नः शून्यारण्य इव शेते नान्यत् किंचन वेद शव इवापविद्धः ॥ २० ॥ कदाचिद् भग्नमानदंष्ट्रो दुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोंधकूपेंधवत् पतति ॥ २१ ॥

मति नोपतिष्ठति पितृपुत्राणां बर्हिः कुशस्तद्वतः पितुः पुत्राणां वा कुशादितृणमात्रमपि येषु पश्यति तान्भक्षयति बाधत इत्यर्थः । पितृपुत्रबर्हिष्ठानिति तु पाठः सुगमः ॥ १४ ॥ आसाद्य दावमित्येतद्व्याचष्टे । क्वचिदासाद्येति ॥ १५ ॥ क्व च यक्षैर्हृतासुरित्येतद्व्याचष्टे । क्वचित्कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षस्तेनापहृताः प्रियतमधनरूपा असवो यस्य । विगतानि जीवलक्षणानि हर्षादीनि यस्य शूरैर्हृतस्व इत्यप्यनेनैव व्याख्यातम् ॥ १६ ॥ क्वचिच्च गंधर्वपुरं प्रविष्ट इत्ये तद्व्याचष्टे । कदाचिन्मनोरथप्राप्तं पित्राद्यसदेव सदिति मत्वा । पूर्वं गंधर्वपुरवदघटमानदर्शनमुक्तमिदानीं तन्निमित्तसुखासाक्तिरुच्यत इति भेदः ॥१७ ॥ चलन् क्वचिदित्ये तद्व्याचष्टे । क्वचिद् गृहाश्रमे याः कर्मचोदनास्तासामतिभरोऽतिविस्तारः स एव गिरिस्तमारुरुक्षंस्तदंतं गंतुमिच्छन् ॥ १८ ॥ पदेपदेऽभ्यंतरवह्निनेति व्याचष्टे । क्वचिच्च दुः सहेनेति ॥ १९ ॥ क्वचिन्निगीर्ण इत्येतद्व्याचष्टे । स एवेति ॥ २० ॥ दष्टः स्म शेते इति व्याचष्टे । कदाचिदिति । मानो गर्व एव दंष्ट्रा परपीडाकरत्वात् । भग्ना मानदंष्ट्रा

दानवर्द्धमानत्वरीत्या“अन्नं सपादं षण्मासे तृणं हि द्विगुणं भवेत्” इत्यतः प्रथमषण्मासे द्विगुणं भवेत्पुनर्द्वितीये तद्विगुणं तृतीये तद्विगुणमेवमग्रेऽपि ज्ञेया वर्द्धनरीतिस्तथा च भारो जात इति तत्तत्तन्मौल्यं वा झटिति देहि नो चेदहं राज्ञे कथयामीति तान्पीडयतीति भावः । अथ वा बालं पुत्रमपि दुर्भिक्षे विक्रीय तद्विक्रयलब्धान्नभक्षणं तद्भक्षणमेव तथैव वृद्धं पितरं कस्यचिद्द्वारपालं विधाय ततो लब्धद्रव्येण स्वपालनं यत्तत्पितृभक्षण मेवेति भावः । पितृपुत्रयोर्बर्हिषि तिष्ठंति भुंजंतीति तथा बर्हिःपदमत्र बर्हिरुत्पादकक्षेत्रपरतया व्याख्येयम् ॥ १४ ॥ दाववद्दुनवद्दह्विवद्वा प्रियार्थैर्विधुरं रहितं दुःखाधिकम् । अहो गृहमतिदुःखरूपं कदास्य त्यागो भविष्यतीति निर्वेदं प्राप्नोति ॥ १५ ॥ विगतजीवलक्षणः शोकमूर्च्छितः ॥ १६ ॥ असन्मृतमपि सत्पुनः परलोकादागतमिति मत्वा स्वप्न इव निर्वृतिरानंदस्तत्स्वरूपम् ॥ १७ ॥ कर्मचोदनाः कर्मविधयो विवाहाश्व मेधादिरूपाः । लोकानां प्रतिवेशिजनानां व्यसनं तादृशबृहत्कर्मासक्तिस्तेन कर्शितमनाः । एते स्वप्रतिष्ठार्थं बृहत्कर्म कुर्वंति तदहं कथं न करोमीति विक्षुब्धचित्तः कंटकशर्कराभिर्युक्तं क्षेत्रं प्रविशन्पुरुषो यथाऽवसीदति तथा स कस्यचिदृणेन धनं गृहीत्वोपस्थितं कर्म कृत्वोत्तमर्णगृहीतो दातुमशक्तोऽतीव दुःखी भवतीति भावः ॥ १८ ॥ गृहीतसारो दग्धवीर्यः ॥ १९ ॥ अपविद्धः त्यक्तः ॥ २० ॥ अत एव भग्नमानदंष्ट्रत्वादेव । अंधकूपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्हिस्मचित् काममधुलवान् विचिन्वन् यदा परदारपरद्रव्याण्यवरुंधानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥ अथ च तस्मादुभयथाऽपि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरंति ॥ २३ ॥ मुक्तस्ततो यदि बंधाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥२४॥ क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणे अकल्पो दुरंतचिंतया विषण्ण आस्ते ॥ २५ ॥ क्वचिन्मिथो व्यवहरन् यत्किंचिद्धनमन्येभ्यो वा काकिणिकामात्रमपहरन् यत्किंचिद्वा विद्वेषमेति वित्तशाठ्यात् ॥ २६ ॥ अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्याऽवमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥ २७ ॥ क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारंभाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेंधे तमसि प्रहिणोति ॥ २८ ॥

यस्य अत एव न लब्धो निद्रायाः क्षणोऽपि येन ॥ २१ ॥ कर्हिस्मचित्क्षुद्ररसानित्येतद्व्याचष्टे । कर्हिस्मचित्काममधुलवानिति । यदा निहतो भवति तदा सद्य एव निरये पतति ॥ २२ ॥ प्रसंगात्प्रवृत्तस्य कर्मणः संसारहेतुत्वं स्फुटयति । अथ चेति । यस्मादेवं तस्मात् । अथ अनंतरमेव । उभयथा इह च परत्र च अस्मिन्प्रवृत्तिमार्गे । संसारस्यावपनं जन्मक्षेत्रं कर्मोदाहरंति ॥ २३ ॥ तत्रातिकृच्छ्रात्प्रतिलब्धमान इत्येतद्व्याचष्टे । मुक्त इति । यदि बंधान्मुक्तो भवति तर्हि ततः सकाशादन्यो हरति तस्मादप्यन्यः न त्वसौ भोक्तुं लभत इत्यर्थः ॥ २४ ॥ क्वचिच्च शीतातपेत्येतद्व्याचष्टे । क्वचिच्चेति । शीतादयोऽनेका आधिदैविकाद्या या दशा दुःखावस्थास्तासाम् ॥ २५ ॥ क्वचिन्मिथ इत्येतद्व्याचष्टे । क्वचिन्मिथो यत्किंचिद्धनं व्यवहरन्काकिणिकामात्रं विंशतिकपर्दकमात्रं ततोऽपि न्यूनं वा यत्किंचिदपहरन्विद्वेषमेति ॥ २६ ॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैरित्युक्तानुपसर्गान्प्रपंचयति । अध्वन्यमुष्मिन्निमे उरुकृच्छ्रवित्तबाधादयस्तथा सुखदुःखादयश्च ॥ २७ ॥ व्युत्क्रमैः पुनरुक्तैश्च नाना पाठैरतः परम् ॥ दुर्गमोऽपि भवाध्वायं संप्रदायेन तीर्यते । तत्र प्रसज्जति क्वापीत्यादिना । सिंहावलोकनन्यायेनोक्तमर्थमपकृष्य क्रमेण व्याचष्टे क्वापि देवमाययेति । प्रस्कन्नमपगतं विवेकविज्ञानं यस्य । यस्याः स्त्रिया विहारगृहं क्रीडागृहं तदारंभे आकुलं हृदयं यस्य अनेन प्रसज्जतीति व्याख्यातम् । तदाश्रयेत्यादि व्याचष्टे । तस्या आश्र

शोकलक्षणे ॥ २१ ॥ अवरुंधानः स्वीकुर्वाणः । स्वामिभिर्दारादिपतिभिर्निहतो मृतो भवति निरये पतति अपमृत्युमरणादिति भावः ॥ २२ ॥ यस्मादेवं कर्मफलमवश्यं भुज्यते तस्माद्धेतोः । अथ कर्मप्रवृत्त्यनंतरमेव । उभयथा पुण्यप्रकारेण पापप्रकारेण च । अस्मिन् जगति । आत्मनो जीवस्य ॥२३॥ बंधात्तत्स्वामिदत्तबंधप्रहारादेर्यदि द्रव्यादिव्ययेन मुक्तः संस्तद्दारान्संभोक्तुं प्राप्नोति तदा देवदत्तोऽन्यः कश्चिल्लम्पटस्तत आच्छिद्य ततोऽपि बहुधनादिव्ययेन भुंक्ते तस्मादप्यन्य इति न प्रकामं भोक्तुं लभते । इत्यर्थ इति । अनंतधनबलादेरभावादिति भावः । देवदत्तविष्णुमित्राविरयेतौ सर्वजनमात्रे प्रयोक्तव्यशब्दौ ॥२४॥ दैविकाश्च भौतिकाश्चात्मीयाश्चेति दैविकभौतिकात्मीयाः अधिना सहिता दैविकभौतिकात्मीया अधिदैविकभौतिकात्मीयास्तथा चाधिदैविका अधिभौतिका अध्यात्मीयाश्च या दशास्तासामित्यर्थः ॥ २५ ॥ "शाठ्यं लोभे च वञ्चने" इत्यभिधानात् ॥२६॥ २७॥ व्युत्क्रमैर्विपरीतक्रमैः । संप्रदायेन सद्गुरुकृपया । तत्र भवाटव्याम् । सैव स्त्री यस्या आश्रये संलग्ना सेत्यर्थः । यद्वा—कलत्रं पुत्रवधूः । अंधे तमसि अंधतामिस्रे । अपारे पारयितुमशक्ये ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात् परमाण्वादिद्विपरार्धापवर्गकालोपलक्षणात् परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तंबादीनां भूतानाम निमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं कालचक्रं निजायुधं साक्षाद् भगवंतं यज्ञपुरुषमनादृत्य पाखंडदेवताः कंकगृध्रबकवटप्राया आर्यसमयपरिहृताः सांकेत्येनाभिधत्ते ॥ २९ ॥ यदा पाखंडिभिरात्मवंचितैस्तैरुरुवंचितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेन भगवतो यज्ञपुरुषस्य आराधनमेव तदरोचयन्छूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथुनीभावकुटुंबभरणं यथा वानरजातेः ॥ ॥ ३० ॥ तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृतकालावधिः ॥ ३१ ॥

येऽवसक्ताः संलग्नाः सुता दुहितरश्च कलत्रं च सैव स्त्री तेषां भाषितादिभिरपहृतं हृदयं यस्य । प्रहिणोति प्रक्षिपति ॥ २८ ॥ कचित्कदाचिद्धरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे । कदाचिदीश्वरस्येति । परमाणुरादिः द्विपरार्धोऽपवर्गांतः तदेवोपलक्षणं यस्य तस्मात् कालोपलक्षणादिति पृथक्पदत्वेन पाठे कालस्वरूपादित्यर्थः । रंहसा शीघ्रेण परिवर्तितेन परिभ्रमणेन वयसा बाल्यादिक्रमेण ब्रह्माणमभिव्याप्य तृणस्तंबादीनि भूतानि हरतश्चक्रतः सकाशाद्वित्रस्तहृदयः सन्पाखण्डदेवता आभिमुख्येन धत्त इत्यन्वयः । अनिमिषतो निमेषमकुर्वतः । अप्रमत्तादित्यर्थः । मिषतां प्रतिकर्तुमशक्तानामित्यर्थः । कर्मणि षष्ठ्यः । कालचक्रं निजं नित्यमायुधं यस्य । सांकेत्येन मूलप्रमाणशून्येन पाखंडागमेन ॥ २९ ॥ तैर्वंचित इत्येतद्व्याचष्टे । यदा त्विति । आत्मना वंचितैरुरु अधिकं वंचितः सन् । तेषां ब्राह्मणानां यच्छीलमुपनयनादि तदरोचयन् शूद्रवद्वर्तते । निगमोक्ताचारे अशुद्धितः स्वस्य शुद्ध्यभावात् यस्य शूद्रस्य केवलं मिथुनीभावः कुटुम्बभरणं च व्यापारो नाग्निहोत्रादिः ॥३०॥ तज्जातिरासेनेत्यादि व्याचष्टे ।

परमाणुरादिर्द्विपरार्द्धोऽपवर्गांतो यस्यैवंविधो यः कालस्तदेवोपलक्षणं यस्येति । तदिति नपुंसकं तूपलक्षणविशेषणत्वात् । पृथक्पदत्वेन पाठे 'द्विपरार्द्धापवर्गात्कालोपलक्षणात्' इति पाठे । आभिमुख्येन धत्ते सेव्यत्वेनांगीकरोति । इत्यर्थ इति । सावधानात्स्वावसरे हंतुमुद्युक्तादिति भावः । इत्यर्थ इति । असमर्थ एव हंतुं प्रवृत्तं पश्यन् क्षमत इति भावः । अकारप्रश्लेषे व्यवहारे प्रमत्तानामित्यर्थः । कर्मणि षष्ठ्य इति । भूतानि हरत इत्यर्थः । यद्वा—आयुरित्यध्याहार्यं तेषामायुर्हरत इति । आर्यसमयपरिहृताः शिष्टाचाररहिताः । कंकादयः पक्षिणः । कश्मलवृत्तयो यथा तादृशा एव कश्मला देवता यासामर्चनादौ स्नानाद्यपेक्षा नास्ति ताः कश्मलदेवतास्ताश्च सेविताः स्वसेविनां कश्मलमेव लोकं वैतरिण्याद्युपलक्षितं नयंति 'देवान्देवयजो यान्ति' इति न्यायेन नहि सिंहग्रस्तं कंकादयो मोचयितुं समर्था अपि तु सिंहकर्तृकतद्धनने प्रमुदिता भवंति । सिंहावशिष्टमेतन्मांसादि वयमपि भक्षयाम इति विमृश्येति भावः ॥ २९ ॥ आत्मना वंचितैः स्वकल्पितकुपथगामित्वादिति उरु वंचितः कल्पितकिंचिन्मात्रापराधमिषेण धनाद्यपहृत्य स्वधर्मात्प्रच्याव्य स्वगणान्निःसारितः । शूद्रकुलं शूद्रकुलाचारम् । निगमोक्ताचारमध्ये याऽशुद्धिरुच्यते तयैव यस्य मिथुनीभावः । विधवायास्त्यक्तधवाया वा मूल्यादिप्रदानेन परिणयः ॥ ३० ॥ तत्रापि शूद्राचारस्वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिद् द्रुमवदैहिकार्थेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥ ३२ ॥ एवमध्वन्यवरुंधानो मृत्युगजभयात्तमसि गिरिकंदरप्राये ॥ ३३ ॥ क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणे अकल्पो दुरंतविषयविषण्ण आस्ते ॥ ३४ ॥ क्वचिन्मिथो व्यवहरन् यत्किंचिद्धनमुपयाति वित्तशाठ्येन ॥ ३५ ॥ क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽव सितमतिस्ततस्ततोऽवमानादीनि जनादपि लभते ॥ ३६ ॥ एवं वित्तव्यतिषंगविवृद्धवैरानुबंधोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥ ३७ ॥ एतस्मिन् संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमु ह वावेतरस्तत्र विसृज्य जातंजातमुपादाय शोचन् मुह्यन् बिभ्यद् विव दन् क्रंदन् संहृष्यन्गायन्नह्यमानः साधुवर्जितो नैवावर्त्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थो यमध्वनः पारमुपदिशंति ॥ ३८ ॥

तत्रापि निरवरोधः प्रतिबंधरहितः स्वैरेण स्वेच्छया क्रीडन्विस्मृतमृत्युकालः सन् ॥ ३१ ॥ द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे । क्वचिद् द्रुमवदिति व्यवायक्षणो मैथुनोत्सवो भवति ॥ ३२ ॥ क्वचित्प्रमादादित्येतद्व्याचष्टे । एवमध्वनि सुखदुःखायवरुंधानो गिरिकंदरप्राये तमसि रोगाद्यापदि पततीति शेषः ॥ ३३ ॥ क्वचिच्छीतवातेत्यादिपूर्वस्मादधिकोक्तिः । रोगाद्यापदि पतितः सन् शीतादिभिः क्लिश्यन्नास्त इत्यर्थः ॥ ३४ ॥ तदेवं सिंहावलोकनन्यायेनोक्तमर्थं यथास्थानमपकृष्य व्याख्याय क्रमस्थमनुवर्तयितुं पूर्वोक्तमेवानुवदति । क्वचिन्मिथ इति । वित्तशाठ्येन कदाचिद्यत्किंचिद्धनमुपयाति ॥ ३५ ॥ क्वचित्क्वचित्क्षीणधनस्त्विति व्याचष्टे । क्वचित्क्षीणधन इति । अप्रतिलब्धं यन्मनोरथेनोपगतं वांछितं तस्याऽऽदाने स्वीकारे निश्चितमतिः सन् ॥ ३६ ॥ अन्योन्यवित्तव्यतिषंगेणेत्येतद्व्याचष्टे । एवं वित्तव्यतिषंगेति । अपवहति त्यजति ॥ ३७ ॥ अध्वन्यमुष्मिन्नित्यादि व्याचष्टे । एतस्मिन्निति । आपन्न आपदं प्राप्तः विपन्नो विनष्टो वा यत्र यस्तमितरस्तत्र विसृज्य नह्यमानो वध्यमानः साधुवर्जितः साधुव्यतिरिक्तः ॥ ३८ ॥

कंरेऽपि । निरवरोधो धर्ममर्यादाभिरनवरुध्यमानः ॥ ३१ ॥ व्यवाय एवोत्सवो यस्य न तु भक्तिज्ञानसुसंगादावित्यर्थः ॥ ३२ ॥ ३३ ॥ इत्यर्थ इति । असमर्थः सन्केवलदुःखमेवावशो भुंक्त इति भावः ॥ ३४ ॥ पुनस्तदेव स्थूणानिखननन्यायेनाह–तदेवमिति । उपयाति प्राप्नोति ॥ ३५ ॥ आदाने स्वीकारे । यावत्तावतोर्नित्यसंबंधात्तावदवमानादीनीति योज्यम् । आदिना ताडनादिग्रहः ॥ ॥ ३६ ॥ व्यतिषंगेण ऋणादानप्रत्यर्पणादिसंबंधेन विवृद्धो वैरानुबंधो वैरपरंपरा यस्य तादृशोऽपि पूर्ववासनया पूर्वप्रीतिवासनानुरोधेन उद्वहति विवाहादिसंबंधं करोति । अथापवहति पुनरुद्वाहं त्यजति च ॥ ३७ ॥ जातंजातं धनादिभिः प्रसिद्धंप्रसिद्धम् । बिभ्यत् भयं प्राप्नुवन् । क्रंदन्रुदन् । साधुवर्जितो हरिभक्तसंगे सत्येव तरतीति भावः । यतः परमेश्वरादारब्धः प्रचलितोऽयमध्वा यश्चाध्वनः पारं पारप्रापकं वदंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदिदं योगानुशासनं न वा एतदवरुंधते यन्न्यस्तदंडा मुनय उपशमशीला उपरतात्मानः समवगच्छंति ॥३९॥ यदपि दिगिभजयिनो यज्विनो ये वै राजर्षयः किं तु परं मृधे शयीरन् ॥ अस्यामेव ममेयमिति कृतवैरानुबंधा यांति विसृज्य स्वयमुपसंहृताः ॥ ४० ॥ कर्मवल्लीमवलंब्य तत आपदः कथंचिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थमुपयाति एवमुपरि गतोऽपि ॥ ४१ ॥ तस्येदमुपगायंति ॥ आर्षभस्येह राजर्षेर्मनसाऽपि महात्मनः ॥ नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥ ४२ ॥ यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ॥ जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ४३ ॥ यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् ॥ नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवाऽनुरक्तमनसामभवोऽपि फल्गुः ॥ ४४ ॥

अनावृत्तौ हेतुमाह । यदिदमिति॥ ३९॥मनस्विन इत्यादि व्याचष्टे । यदपीति । ये वै राजर्षयस्तेऽपि नावरुंधते किं तु परं केवलं मृधे शयीरन् ॥ ४० ॥प्रसज्जतीत्यादिगिरिकंदर इत्यंतमपकृष्य व्याख्यातं ग्रंथमतिक्रम्य वल्लीं गृहीत्वेत्यादिग्रंथं व्याचष्टे । कर्मवल्लीमिति । एवमुपरि स्वर्गं गतोऽपि नरलोकसार्थमेवोपयाति ॥ ४१ ॥ तदेवं भरतोक्तिं व्याख्याय तच्चरितसंग्रहश्लोकानाह । तस्येदं कर्म श्लोकैरुपगायंति । आर्षभस्य ऋषभपुत्रस्य अन्यो नृपोऽनुवर्त्म नार्हति वर्त्मानुगंतुं न शक्नोति॥४२॥तत्र हेतुमाह ।य इति। सुहृद्राज्ययोर्द्वंद्वैक्यम् । यो दुस्त्यजान्दारादीन्विष्ठामिव जहौ तस्यार्षभस्येति संबंधः । दुस्त्यजत्वे हेतुः हृदिस्पृशो मनोज्ञान् । त्यागे हेतुः । उत्तमश्लोके लालसा लंपटत्वं यस्य ॥ ४३ ॥ तस्यैवं विषयत्यागो न चित्रमित्याह । य एवंभूतोऽसौ नृपः स क्षित्यादीन्नैच्छदिति यत्तदुचितम् । सदयावलोकां भरतस्य दया यथा भवत्येवमव

तं प्रति नावर्त्तते इति साधुसंगं विना तत्प्राप्तिर्नास्ति “ विना महत्पादरजोभिषेकम् ” इत्युक्तेः ॥ ३८ ॥ यद् यतः । इदमुक्तं योगयोर्भक्तिज्ञानयोगयोरनुशासनं कथनं समवगच्छंति ये ते वै निश्चयेन एतद्विश्वं नावरुंधते नाप्नुवंति । ततो हेतोरिति । इदं किं यन्न्यस्तदंडस्समवगच्छंतीत्यावृत्त्या योज्यम् । न्यस्तस्त्यक्तो भूतेषु कायिकवाचिकमानसरूपो दंडो यैस्ते न्यस्तदंडाः । उपरतो निवृत्तो विषयेभ्य आत्मा मनो येषां ते तथा ॥ ३९ ॥ यदपि यद्यपि तदपि अस्यां पृथिव्याम् । उपसंहृता मृताः ॥ ४० ॥ कर्मवल्लीमिति । वल्लीवत्प्राचीनकर्मावलंब्येति ॥ ४१ ॥ भरतोक्तिं भरतोपाख्यानम् । व्याख्यायोपसंहृत्य । तच्चरिते तन्महिमनि । प्राचां सम्मतिमाह—तस्येति । तस्य भरतस्य । न शक्नोति योग्यताभावादिति भावः । मनसा मनोरथेनापि किमुत कर्मणा । मक्षिका सूक्ष्मपतगी ॥ ४२ ॥ तत्र वर्त्मोऽननुगमने । तस्य प्रेमानुभावमाह—य इति । अस्योत्तरवाक्यगतत्वान्न तत्पदापेक्षा । ‘ मीलितं यदभिरामताधिके ’ इतिवत् । युवैवेति । वार्द्धक्यत्यागिभ्यः प्रियव्रतादिभ्योऽप्युत्कर्षः । मलवदिति । यथा मलस्य त्याग एव निर्वृतिस्त्यागाभावे कष्टं त्यक्तस्य तस्य स्मरणे ष्ठीवनीयमस्तथैवेति । त्यागेऽप्यन्येभ्यो वैलक्षण्यादुत्कर्षः । उत्तमः सर्वोत्कृष्टो रूपगुणलीलामाधुर्य्यैश्वर्यस्य संबंधी श्लोको यशो यस्य तस्मिन् लालसो दर्शनाद्यौत्सुक्यं यस्य सः । तेन भगवत्सौंदर्य्याद्यनाविष्टसर्वेन्द्रियाणां विरक्तानां दारादयो न मलभूता भवंतीति भरतस्योत्तमभक्तत्वं ध्वनितम् ॥ ४३ ॥ तस्य भरतस्य । उक्तमेवार्थं पुनरुल्लासेन स्पष्टीकृत्याह—य इति । परिजनावलोकोऽमात्याद्यवलोकः अमात्याद्यैः सदैवैवं निरीक्ष्यते यथा महाराजश्रीभरतस्यास्मासु दया जायेत तेषामवलोकः श्रियामुपचर्य्यते गौणत्वेन वर्ण्यते तेषामपि राज्ञः श्रीरूपत्वादिति । यद्वा—भरतो वैराग्योत्थं शारीरकष्टं मा स्वीकरोतु मया लाल्यमानो गृह एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय ॥ नारायणाय हरये नम इत्युदारं हास्यन् मृगत्वमपियः समुदाजहार ॥ ४५ ॥
य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वाऽनुशृणोत्याख्यास्यति अभिनंदति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भरतोपाख्याने ब्राह्मणरहूगणसंवादे पारोक्ष्यविवरणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ भरतस्यात्मजः सुमतिर्नामाभिजितो यमु ह वाव केचित्पाखंडिन ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यंति ॥ १ ॥ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥

लोको यस्या इति परिजनावलोकः । श्रियमुपचर्यते । यतो मधुद्विषः सेवायामनुरक्तं मनो येषां तेषां महतामभवो मोक्षोऽपि फल्गुस्तुच्छ एव ॥ ४४ ॥ तस्य सेवानुरागमेवाह । यज्ञायेति । यज्ञरूपाय धर्मपतये यज्ञादिफलदात्रे विधौ नैपुण्यं यस्य तस्मै धर्मानुष्ठात्रे योगोऽष्टांगस्तस्मै । सांख्यं ज्ञानं तच्छिरः प्रधानं फलं यस्य तस्मै योगाय प्रकृतीश्वराय मायानियंत्रे अत एव नारं जीवसमूहः सोऽयनमाश्रयो यस्य सर्वजीवनियंत्रे एवं कर्मज्ञानदेवताकांडैः प्रतिपादिताय हरये नम इत्युदारमुच्चैर्यः सम्यगुच्चारितवान् मृगत्वं मृगदेहमपि हास्यन् त्यक्ष्यन् य एवंभूतस्तस्य तदुचितमिति वा तस्यानुवर्त्म नार्हतीति वा संबंधः ॥ ४५ ॥ भरतचरितश्रवणादिफलमाह । य इदमिति । भागवतैः सभाजिता अवदाताः शुद्धा गुणाः कर्माणि च यस्य तस्य भरतस्यानुचरितं योऽनुशृणोति स आत्मन एव सकाशात्सर्वा आशिष आशास्ते स्वत एव प्राप्नोति । न तु कांचिदपि परस्मादपेक्षत इत्यर्थः ॥ ४६ ॥ इति पंचमे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ एवमष्टभिरध्यायैर्भरतस्योक्तमीहितम् ॥ ततः पंचदशे तस्य कीर्त्यंते वंशजा नृपाः ॥ १ ॥ ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्तमानम् । यं दृष्ट्वेति शेषः । यद्वा । यं सुमतिमवेदसमाम्नातां देवतां कल्पयिष्यंति । बुद्धोऽयं साक्षादवतीर्ण इति मंस्यंत

तिष्ठत्विति सदयोऽवलोको यस्यास्ताम् । तुच्छ एव तत्रापि विरज्यंतीति भावः ॥ ४४ ॥ यज्ञायेति । त्रिभिः पादैः क्रमेण कर्मज्ञानभक्तिमार्गाणां यथोत्तरमुत्कर्षो व्यंजितः । अत एव मायानियंतृत्वादेव । य एवंभूतः परमभक्तो भरतस्तस्येति । वाथ वा पक्षांतरमाह ॥ ४५ ॥ भागवतेऽस्मिञ्शास्त्रे वा सभाजिताः श्लाघिताः । इत्यर्थ इति । सर्ववांछितानि तस्यानायासेन स्वत एव सिध्यंतीति भावः ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ ईहितं चारितम् । ततो भरतचारितकथनानंतरम् । तस्य भरतस्य (१) दृष्ट्वेति । शेषे गौरवं प्रयोजनाभावं च मत्वाह-यद्वेति । इत्यर्थ इति । पापाविष्टबुद्धित्वादिति भावः । चक्रवर्ती तु-कलौ तस्य चरितं श्रुत्वा तादृशाचारवन्तोऽस्माकं सुमतिरेव देवता यथा बुद्ध इति बौद्धसंप्रदायाद्विच्छिद्य कल्पयिष्यंतीत्याह ॥ १ ॥ तस्मात् सुमतेः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चायां प्रतीह उपजातः ॥ ३ ॥ य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥ ४ ॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानौ अजनिषाताम् ॥ ५ ॥ भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुः ॥ विभो रत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्षणेन महापुरुषतां प्राप्तः ॥ ६ ॥ स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत् ॥ ७ ॥ तस्येमां गाथां पांडवेय पुराविद उपगायंति ॥ ८ ॥ गयं नृपः कः प्रतियाति कर्मभिर्यज्वाऽभिमानी बहुविद्धर्मगोता ॥ समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ९ ॥

इत्यर्थः ॥ १ ॥ २ ॥ तत्तनयो देवताजितः पुत्रः ॥ ३ ॥ आत्मविद्यां बहुभ्य आख्याय व्याख्याय व्याख्यानेनैव स्वयं संशुद्धोऽनुसस्मारापरोक्षतयाऽनुभूतवान् ॥ ४ ॥ प्रतिहर्ता प्रस्तोता उद्गातेति त्रयो यज्ञनिपुणाः सूनव आसन् । अजनिषातां जातौ ॥ ५ ॥ हृदयजः पुत्रः । जगतो रिरक्षिषया रक्षितुमिच्छया गृहीतं सत्त्वं येन तस्य विष्णोः कलांशः सन् ॥ ६ ॥ महापुरुषत्वमेवाह । स वै इति । धर्मस्तस्य द्विविधः । अभिषिक्तत्वात्प्रजापालनादिरेकः । गृहस्थत्वादिज्यादिश्चापरः । द्विविधोऽपि भगवति सर्वात्मनाऽर्पितः सन् परमार्थलक्षणस्तेन परिभाविता संस्कृताऽतिशुद्धा मतिर्यस्य अत एवोपरतमनात्म्यं देहाद्यहंभवो यस्मिंस्तस्मिन्नात्मनि चित्ते स्वयमेवोपलभ्यमाने ब्रह्मण्यात्मानुभवो यस्य तादृशोऽपि निरभिमान एवावनिमजूगुपत्पालयामास ॥ ७ ॥ ८ ॥ कर्मभिर्गयं कः प्रतियात्यनुकरोति न कोपि । अत्र हेतुः । यज्वादिरूपो भगवत्कलां गयमृतेऽन्यः क इत्यनुषंगः । अभिमानी सर्वतो मानास्पदं मनस्वीति वा । समागता संप्राप्ता श्रीर्येन यमिति वा । सतां सदसः सभायाः पतिः । सतां सेवकः । यद्वा यज्वादिरूपोऽपि भगवत्कलामृते गयं कोऽन्यः प्रतियातीत्यन्वयः ॥ ९ ॥

अथ अनंतरम् । ततो देवद्युम्नात् । तस्य परमेष्ठिनः । सुवर्चासंज्ञायाम् । अत्र सुवर्चलेति पाठो लेखकप्रमादादवसेयस्तीर्थेण सुवर्चायामिति पठितत्वात् ॥ ३ ॥ यः प्रतीहः ॥ ४ ॥ अत्र सुवर्चलेति पूर्वनिगदे सुवर्चेति नामभेदः ॥ ५ ॥ तत उद्गीथात् । तस्मात् पृथुषेणात् । द्रुत्यां जातः पुत्रो द्रुतिपुत्रः । महापुरुषतां पूज्यपुरुषतां परमभक्ततामिति यावत् ॥ ६ ॥ अत एव विशुद्धमतित्वादेव । आत्मानुभवो ब्रह्मैवाहमित्यनुभवः ॥ ७ ॥ ८ ॥ अत्राननुकरणे । अनुषंगोऽन्वयः । प्रसिद्धार्थमाह—मनस्वी वेति । यत्नवान्सर्व एव श्रियं प्राप्नोति 'उद्यमेन यथा लक्ष्मीः' इत्युक्तेरत्र को विशेषोऽत आह—यमिति । वेति । यज्वादिरूपामित्येवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमभ्यर्षिंचन्परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ॥ यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ॥ १० ॥ छंदांस्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपाः॥ प्रत्यंचिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य ॥ ११ ॥ यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥ १२ ॥ यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंचात् ॥ प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ १३ ॥ गयाद्गयंत्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥ १४ ॥ तत उत्कलायां मरीचिर्मरीचेर्बिंदुमत्यां बिंदुमानुदपद्यत तस्मात् सरघायां मधुनामाऽभवत् मधोः सुमनसि वीरव्रतस्ततो भोजायां मंथुप्रमंथू जज्ञाते मंथोः सत्यायां भौवनस्ततो दूषणायां त्वष्टाऽजनिष्ट त्वष्टुर्विरोचनायां विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातम् ॥ १५ ॥

सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयेत्याद्याः । निराशिषोऽपि यस्य प्रजानामाशिषः कामान् धरा दुदुहे । तस्य गुणा एव वत्सस्तेन स्नुतमूधो यस्याः पृथिव्याः । यच्छब्दानां तं गयं कः प्रतियातीति सम्बन्धः ॥ १० ॥ छन्दांसि वेदास्तद्विहितकर्माणि च दुदूहुर्ददुहुः । युधि प्रत्यंचिता बाणैः प्रतिपूजिता नृपा यस्य । बलिमाजह्रुरर्पयामासुः । धर्मेण पालनेन दक्षिणादिभिश्च यदा प्रत्यंचिता विप्रास्तदा परेत्य लोकांतरे आशिषां धर्मफलानां षष्ठमंशमाजह्रुः । " पुण्यषड्भागमादत्ते न्यायेन परिपालयन् " इति स्मृतेः ॥ ११ ॥ उरुसोमपीथे बहुसोमपानेऽध्वरे मघोनि इंद्रे माद्यति मदं प्राप्नुवति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलमाजहार । अर्हणमिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥ १२ ॥ यस्य भगवतः प्रीणनात् । देवादीनां द्वंद्वैक्यम् । तत्सद्यः प्रीयेत प्रीतिं गच्छेत् । स विश्वजीवः सर्वांतर्यामी स्वयं प्रीतरूप एव बर्हिषि यज्ञे गयस्य ह स्फुटं प्रीतिमगात्तृप्तोऽस्मीति प्रत्यक्षं प्रीतिमाविष्कृतवानित्यर्थः ॥ १३ ॥ १४ ॥ सुमनसि स्त्रियाम् ॥ १५ ॥

रूपं व्याख्यानं न शब्दबोधितमपि तु नेयमेव प्रथमांताद्वितीयांतयोरन्योन्यं विशेष्यविशेषणभावेनान्वयस्यानुपलब्धेरत आह—यद्वेति ॥९॥ ऊधो दुग्धाशयः ॥ १० ॥ दुदूहुरिह दीर्घ आर्षः । षष्ठो भागः षड्भाग इति तद्धितनिवृत्तिरप्यार्ष्येव । स्मृतेर्याज्ञवल्क्योक्तेः ॥ ११ ॥ यस्य गयस्य । अध्वरात्मा यज्ञमूर्त्तिर्विष्णुः । इत्यर्थ इति । 'न हि परोक्षतया ब्रह्मार्पणम्' इति न्यायेन भगवति यज्ञफलं तेनार्पितं किंतु तद्भक्तिपरवशः संकल्पितं वस्तु ब्राह्मण इव साक्षात्तद्धस्ततो स्वहस्तेनैव स्वीचकारेति भावः ॥ १२ ॥ इत्यर्थ इति । तद्यशो लोके ख्यापयितुं स्वयं भगवांस्तस्मा अहो ते यज्ञो यत्र मेऽतीव तृप्तिर्जातेत्याहेति भावः ॥ १३ ॥ १४ ॥ ततः सम्राजः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रायं श्लोकः ॥ प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ॥ अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥१६॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे प्रियव्रतवंशानुकीर्तनं नाम पंचदशोऽध्यायः ॥ १५ ॥ राजोवाच ॥ उक्तस्त्वया भूमंडलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चंद्रमा वा सह दृश्यते ॥ १ ॥ तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिंधव उपक्लृप्ता यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन् खलु सूचितः ॥ एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥ २ ॥ भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥

कीर्त्या अतिशयेनालमकरोद्भूषितवान् ॥ १६ ॥ इति श्रीमद्भागवते पंचमस्कन्धे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ पूर्वोक्तद्वीपसिंध्वादिमानचिह्नस्वरूपतः ॥ स्पष्टं प्रव कुमारब्धा पंचाध्यायी ततः परम् ॥ १ ॥ षोडशेऽधस्तथा चोर्ध्वं परितः सन्निवेशतः ॥ मेरोः स्थितिर्महीकंजकर्णिका चोपवर्ण्यते ॥ २ ॥ प्रियव्रतचरित्रोक्तावुक्ता द्वीपादिकल्पना ॥ तद्विशेषविजिज्ञासुः कथांते परिपृच्छति ॥ ३ ॥ उक्त इति । किंपर्यंतमुक्तस्तदाह । यावदादित्यस्तपति यत्र चासौ शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चंद्रमा वा दृश्यते तावत् ॥ १ ॥ यतो येभ्यः सिंधुभ्यः । एतस्या भुवः सूचितः संक्षेपतो दर्शितः ॥ २ ॥ जिज्ञासायाः फलमाह । भगवत इति ॥ ३ ॥

तस्मात् बिन्दुमतः । ततो वीरव्रतात् । ततो भौवनात् ॥ १५ ॥ विरजमाहात्म्यबोधकं प्राचां श्लोकमाह—तत्रायमिति । तत्र विरजविषये । अयं वक्ष्यमाणः । इमं कथितम् । चरमाणां शतजिदादीनामुद्भवो यस्मात्स तथा ॥ १६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ आदिना वर्षादिग्रहः (१) परितः सर्वतः संनिवेशतः महीरूपकंजस्य कर्णिका मध्यवर्त्तिबीजकोशस्तद्रूपत्वेन मेरोः स्थितिर्वर्णिता । अत्र चशब्दः पादपूरणे (२) प्रियव्रतचरित्रस्योक्तौ कथने प्रथमाध्याये । तेषां द्वीपादीनां विशेषो भेदस्तज्ज्ञातुमिच्छुः परीक्षित् (३) भूमंडलस्यायामविशेषः । तपति प्रकाशयति । तावत् तत्प्रमाणं तत्पर्यंतमित्यर्थः ॥ १ ॥ तत्रापि भूमंडलमध्येपि । रथचक्रस्य परिखातैर्नेमिनिशित्योद्धृतभूदेशैः । सप्तद्वीपानां ये विशेषा भेदास्तेषां यो विकल्पः प्रभेदः खंडादिरूपः । सूचित इति । विशेषो नोक्त इति भावः । भगवन्निति । परावरगतिज्ञत्वाद्भवत एतन्नाद्भुतमिति भावः । एतत्सिंधुद्वीपादिकमखिलमुर्वरितं यथा न भवेत्तथा । मानं परिमाणम् । लक्षणं वर्तुलचतुरस्राकारादि । न केवलमिदंमेवं किं तु यत्सप्तसागरादिभ्यः परस्तात्काञ्चनभूम्यादिकं न केवलं तावतालमपि तु तत्रापि विद्यमानं सर्वमनुर्वरीकृत्यैतदाभिप्रायेण पुनः सर्वशब्दं प्रयुनक्ति सर्वमिति । जिज्ञासामीत्यनेन ज्ञानेच्छैव न तु विचारः । परस्मैपदप्रयोग आर्षः । अहमित्यनेनान्येषां प्रयोजनसद्भावेऽपि ममातीव प्रयोजनमस्तीति सूचयति अन्यथा विजिज्ञासामीत्येव वदेत् ॥ २ ॥ एवं किं तदतीव प्रयोजनमत्राह—भगवत इति । इतः पूर्वं गुणमये सत्त्वादिगुणविरचिते स्थूलरूपे पातालाद्यचेतनावयवविशिष्टे आवेशितं निधायाभ्यस्तं विशेषस्मरणसमर्थं हि यन्मनस्तदगुणेऽपि सत्त्वादिगुणप्रवृत्तिशून्येऽपि सच्चिदानंदाकारेऽत एव सूक्ष्मेऽनुग्रहमंतरेणादृश्ये । तर्हि किं तमोमयं नेत्याह—आत्मज्योतिषि स्वयं प्रकाशे किन्नाम्नि परे ब्रह्मणि परब्रह्मसंज्ञे भगवति ऐश्वर्यादिगुणे वैदिकमंतरेण लौकिकं नाम किं तत्राह—वासुदेवाख्ये । अनेनात्र किंवदंती प्रमाणमिति सूचितम् । क्षमं समर्थम् । अत्र मयेति कर्तृपदानुक्त्या तत्रत्यानां भक्तिमिश्रयोगवतां मनोनिधित्सानुरोधेनैव मयैतत्पृच्छ्यते । मम तु त्वन्मुखकमलस्पंदमानभगवत्कथारूपमकरंदस्य कर्णाभ्यां पानमेव भगवत्प्राप्तिसाधनमिति द्योतितम् । किञ्च—इह भगवतो गुणमये स्थूलरूपे इति भेदबोधिकया षष्ठ्याऽगुणे भगवतीत्यभेदबोधकेन सामानाधिकरण्येन च भगवत्त्वस्य गुणातीतत्वं बोधितम् । गुरो इति । तव सर्वमुनिजनगुरुत्वादवश्यवक्तव्यमेवैत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच ॥ न वै महाराज भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाऽधिगंतुमलं विबुधायुषाऽपि पुरुषस्तस्मात् प्राधान्येनैव भूगोलक विशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥ यो वाऽयं द्वीपः कुवलयकमलकोशाभ्यंतरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम् ॥ ५ ॥ यस्मिन् नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवंति ॥ ६ ॥ एषां मध्ये इलावृतं नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडश सहस्रं तावतांऽतर्भूम्यां प्रविष्टः ॥ ७ ॥

या मायागुणविभूतिस्तस्याः काष्ठामंतम्।रूपं सन्निवेशः।लक्षणं चिह्नम्॥ ४ ॥कुवलयं भूमंडलं तदेव कमलं तस्य कोशाः सप्तद्वीपास्तेष्वभ्यंतरकोशः प्रथमो जंबूद्वीपो नियुतयोजनविशालो लक्षयोजनविस्तीर्णः॥ ५॥नवयोजनसहस्रमायामो येषाम्। आयामोऽत्र विस्तारः। एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यम्। तयोश्चैकत्रिंशयोजनसहस्रायामत्वात् केचित्तु नीलनिषधयोः संलग्नाग्रयोः समुद्रप्रवेशमंगीकृत्य तयोरपि संकुचितत्वेन नवसहस्रायामत्वं संपादयंति। संनिवेशश्च वायुनोक्तः।"धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे॥ दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम्" इति ॥६॥ नाभ्यां मध्ये द्वीपस्यायायो लक्षयोजनप्रमाणं तावान्समुन्नाह उच्छ्रायो यस्य। मूले षोडशयोजनसहस्रं विततः। तावतादिति भावः॥ ३ ॥ ऋषिरुवाचेति। इह त्रिकालदर्शित्वबोधनार्यर्षिपदप्रयोगः। मायागुणविभूतेः प्रकृतिगुणप्रवृत्तये यद्विविधभवनं बहुरूपग्रहणं यस्य। विबुधायुषा द्विपरार्द्धलक्षणेन। प्राधान्येनैव मुख्यत्वेनैव ॥ ४ ॥ द्वाभ्यां पूर्वपश्चिमाभ्यां दक्षिणोत्तराभ्यां वा पार्श्वाभ्यां सामुद्रं जलं पिबतीति द्वीपः। दीर्वो निपातनात्। तदभावे तरणिकिरणसंतापेन घनीभावं मुक्त्वा परमाण्वशेषेण द्वीपस्थितजनस्याधाराभावेन जलमज्जनेन सर्वनाशप्रसंगः स्यादिति। अमरकोशे तु "द्वीपो स्त्रियामंतरीपं यदन्तर्वारिणस्तटम्" इत्युक्तं तत्र द्विर्गता अंतर्गता वापोऽत्र "ऋक्पूरब्धूःपथामाऽनक्षे" इति समासान्तोऽः। "द्व्यंतरुपसर्गेभ्योऽप ईत्" इतीत्वम्। नियुतशब्दोऽत्र दशलक्षवाचकोऽपि कथंचिल्लक्षं वक्ति तत्सनिहितत्वात्। पुष्करपत्रमत्र पौष्पं न ज्ञेयं किन्तु यद्योजनादिग्राह्यं तदिति ॥५॥ अष्टभिः हिमालयादिभिः। दक्षिणोत्तरे भारतोत्तरे कुरुवर्षे चत्वारि किंपुरुषहरिवर्षरम्यकहिरण्मयानि वर्षाणि नीलनिषधयोस्तिरश्चीनीभूय समुद्रप्रविष्टयोः संलग्नत्वमंगीकृत्य भद्राश्वकेतुमालयोरपि धनुराकृतित्वम्। अतस्तयोर्दैर्घ्यत एव मध्ये संकुचितत्वेन नवसहस्रायामत्वम्। इलावृतस्य तु मेरोः सकाशाच्चतुर्दिक्षु नवसहस्रायामत्वं संभवेत्। वस्तुतस्तु——इलावृतभद्राश्वकेतुमालानां चतुस्त्रिंशत्सहस्रायामत्वं ज्ञेयम्। "इलाप्सरा रूपवती दिव्या यौवनशालिनी। महेंद्रेण वृता यत्र तेनेलावृतमीरितम् ॥१॥ पुरा देवासुराणाञ्च नियुद्धे समुपस्थिता। केतुमालात्र संजाता केतुमालमतो मतम् ॥२॥ अमृतोन्मथनोद्भूतो हय उच्चैःश्रवाह्वयः। यत्रासौ चरते नित्यं भद्राश्वं तेन कीर्त्तितम् ॥ ३ ॥ उपमन्युस्तपः कुर्वन्यत्रागत्य हरेण सः। कुर्वेवं तत्पिब क्षीरं यत्रोक्तस्तेन तत्कुरु॥४॥यत्र हेममयं सर्वं जनाश्चापि तथाविधाः। तेनेदं स्वर्णबाहुल्याद्वर्षं प्रोक्तं हिरण्मयम् ॥५॥ उर्वशी याप्सरोरम्या यत्र दृष्टा हिमांशुना। रम्येति लंबिता स्वार्थे तेनेदं रम्यनामकम् ॥६॥ यत्रानंतेन नागेन हारिराराधितः स्वयम्। प्रससाद वरं दातुं हरिवर्षं ततस्त्विदम् ॥ ७ ॥ यत्र विद्याधरी रम्या विद्याधरकरच्युता। किं तया पुरुषस्त्यक्तस्तेन किंपुरुषाह्वयम् ॥ ८ ॥ भरतेन भृतं दुखं यत्र पुत्रैः कुमार्गगैः तेनेदं भारतं नाम वर्षं धीरैरुदाहृतम् ॥ ९ ॥" इति शैवे वर्षनिरुक्तयोप्युक्ताः। तत्रैवेदमप्युक्तं "बालाग्रं स्यादष्टकेन त्र्यणुकानाञ्च तेऽष्ट वै। लिक्षा तदष्टकं यूकं तदष्टकमितो यवः॥ तेष्टावंगुलिरित्युक्तं तालं तै रविसंमितैः। तद्वयं हस्तमित्युक्तं दण्डः स्यात्तच्चतुष्ककम्। दंडाभ्यां द्विसहस्राभ्यां क्रोश इत्युच्यते बुधैः। योजनं तैश्चतुर्भिः स्यादित्येवं व्यासभाषितम् ॥" षड्भिः परमाणुभिरत्र त्र्यणुकमिति ॥६॥ एषां वर्षाणां मध्ये हि कुल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रं पृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसंति॥ ८॥ एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्॥ ९॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गंधमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते॥ १०॥ मंदरो मेरुमंदरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टंभगिरय उपक्लृप्ताः॥ ११॥ चतुर्ष्वेतेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपाविततयः शतयोजनपरिणाहाः॥ १२॥

षोडशयोजनसहस्रमानेन चतुरशीतियोजनसहस्रमानेन च बहिर्दृश्यते एवं लक्षयोजनोन्नाहः॥ ७॥ उत्तरोत्तरेणेलावृतमिलावृतस्योत्तरोत्तरतः क्रमेण नीलादयस्त्रयो मर्यादागिरयः प्रागायताः पूर्वतो दीर्घाः। क्षारोद एवावधिर्येषाम्। द्विसहस्रयोजनविस्तीर्णाः। दशांशादीषदधिको योंशस्तेन दैर्घ्य एव ह्रसंति न तूच्चत्वे पृथुत्वे वा। यथोक्तं विष्णुपुराणे। "लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथा परे" इति। एतच्च स्थूलदृष्टयैवोक्तम्। तयोरपि यथावन्मध्यमत्वाभावेन लक्षप्रमाणत्वाभावात् ॥ ८ ॥ अयुतयोजन उत्सेध उच्छ्रायो येषाम्। अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः। नीलादिपृथुत्वं चैषामपि द्रष्टव्यम्। यथासंख्यं मर्यादागिरय इति शेषः ॥ ९ ॥ आनीलनिषधायतौ उत्तरतो नीलपर्यंतं दक्षिणतो निषधपर्यंतं च दीर्घौ। पप्रथतुर्विस्तीर्णौ भवतः तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं कुर्वाते। नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः किंचिदस्ति। दक्षिणोत्तररेखायां तु तथैवेलावृतवेष्टितो मध्ये मेरुरुभयतस्त्रीणि त्रीणि वर्षाणि गिरयश्च षट् तत्कथं सर्वतो लक्षप्रमाणत्वं जंबुद्वीपस्य। उच्यते। मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्याष्टादश अन्येषां षण्णां चतुष्पंचाशत् गिरीणां षण्णां द्वादशेत्येवं दक्षिणोत्तररेखायां तावल्लक्षम्। पूर्वापररेखायामपि स मेरोरिलावृतस्य चतुस्त्रिंशत् गिर्योश्चत्वारि शेषाणि द्विषष्टिसहस्राणि पूर्वापरवर्षयोरासमुद्रं दैर्घ्ये द्रष्टव्यान्यतो न विरोधः ॥ १० ॥ अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषाम्। विस्तीर्णमूर्ध्नो मेरोरवष्टंभत्वात्पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ च दक्षिणोत्तरौ पूर्वापरविस्तारौ द्रष्टव्यौ। सर्वतो दशयोजनसहस्रविस्तारांगीकारे त्विलावृतलोपात्पूर्वेणेलावृतमुपप्लावयतीत्यादिविरोधः स्यात् ॥ ११ ॥ अधिसहस्रमेकादशशतानि उन्नाहो येषाम्। तावत्प्रमाणा विटपविततिर्येषाम्। शतयोजनं परिणामो

गिरयो महेंद्रादयस्तदुक्तं भारते–"महेंद्रो मलयः सह्यः शुक्तिमानृक्षमानपि। विंध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥" इति तेषां राजा "राजाहःसखिभ्यष्टच्" । विततो विस्तृतः। अंतर्भूम्यां भूमिमध्ये ॥ ७ ॥ उभयतः पूर्वपश्चिमदिशोः द्वौ नीलनिषधौ एतच्च विष्णुपुराणवाक्यञ्च ॥ ८ ॥ नीलादिपृथुत्वम् द्विसहस्रविस्तृतत्वम् ॥ ९ ॥ अपरेण पश्चिमायां पूर्वेण पूर्वस्यां दिशि। अत्राक्षिपति–नन्विति। अत इत्थं विचारणात्। न दोषो न विरोधः ॥ १० ॥ विस्तारोऽत्र दैर्ध्यम्। चतुर्दिशं चतस्रो दिशोऽभिव्याप्य चतुर्षु दिक्ष्वित्यर्थः ॥ ११ ॥ यावदुच्छ्राययोजनसंख्यानं तावत्संख्याकशाखाविस्तारः परिणाहः सर्वतः स्थौल्यविस्तारः। "एकादशशतायामाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयंति ॥ १३ ॥ देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥ १४ ॥ येष्वमरपरिवृढाः सहसुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति ॥ १५ ॥ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतंति ॥ १६ ॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुणरसोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति ॥ १८ ॥ एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबूनामनदी मेरुमंदरशिखरादयुतयोजनादवनितले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्पंदति ॥१९॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदाऽमरलोकाभरणं जांबूनदं नाम सुवर्णं भवति ॥ २० ॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयंति ॥ २१ ॥ यस्तु महाकदंबः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पंचायामपरिणाहाः पंच मधुधाराः सुपार्श्वशिखरात् पतंत्योऽपरेणात्मानमिलावृतमनुमोदयंति ॥ २२ ॥

विस्तारो येषाम् ॥ १२ ॥ यदुपस्पर्शिनो यत्सेविनः ॥ १३ ॥ १४ ॥ ललामो भूषणम् । सुरललनानां भूषणभूताः श्रेष्ठा याः स्त्रियस्तासां यूथस्य पतयः सह संभूय येषु विहरंति ॥ १५ ॥ एकादशशतयोजनमुत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात् । फलप्रमाणमुक्तं वायुपुराणे । "अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ॥ फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः" इति ॥ १६ ॥ अतिमधुरश्चासौ स्वतः सुरभिश्च सुगंधिश्च न चान्येषां गंधैरधिवासितः । बहुलश्चारुणश्च रसः स एव उदमुदकं तेन ॥ १७ ॥ यदुपजोषणाद्यस्य रसस्य सेवनात् ॥ १८ ॥ अनस्थिप्रायाणामतिसूक्ष्मबीजानाम् । यत्र निपतति ततश्चारभ्यात्मनो दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः ॥ १९ ॥ तावत्सर्वतः रोधसोस्तटयोः ॥२०॥२१॥ आयामोऽत्र व्यामः । स च "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगंतरम्" इत्युक्तलक्षणः

पादपा गिरिकेतवः" इति पुराणांतरात् ॥ १२ ॥ मृष्टं निर्मलं पयश्च मधु माक्षिकम् च इक्षुरसश्च मृष्टजलं च तानि पयोमध्विक्षुरसमृष्टजलानि तानि विद्यंते येषु ते तथा । मत्वर्थीयोऽच् प्रत्ययः । भरतर्षभेति । तवाप्येतादृशैश्वर्यं स्वाभाविकमेव महाराजभरतवंशश्रेष्ठत्वादतस्त्वं तादृशस्थानाभिलाषी मा भूरिति भावः ॥ १३ ॥ १४ ॥ अमराणां परिवृढाः प्रभवः "प्रभौ परिवृढः" इति निपातितत्वात् । येषु उद्यानेषु । उपदेवा गंधर्वादयस्तेषां समूहैः॥१५॥देवचूतो देवाम्रः । 'बद्धमुष्टिकरोऽरत्निः' इत्यमरः ॥१६॥ तेषामाम्रफलानां विशीर्यमाणानां स्फुटितानाम् । इलावृतस्य पूर्वदिग्देशमुपप्लावयति सर्वतः स्वप्रवाहव्याप्तं करोति ॥१७॥ पुण्यजनवधूनां यक्षांगनानाम् । अनुवासयति सौरभ्ययुक्तं करोति ॥ १८ ॥ इत्यर्थ इति । आत्मनः पतनदेशाद्दक्षिणस्यां सर्वमिलावृतमुपप्लावयतीति भावः । चक्रवर्त्ती तु—दक्षिणस्यां दिशि यावदिलावृतं तावदात्मानं बर्द्धयंतीति शेषः । नवयोजनसहस्रपर्यंतं निःसृत्येत्यर्थमाह ॥ १९ ॥ तावत्पर्यंतमेव अनुविध्यमाना युज्यमाना या मृत्तिका सा सुवर्णं भवति । तत्र हेतुः—वाय्वर्केति ॥ २० ॥ यत्सुवर्णम् । आदिना गंधर्वादिग्रहः । पुनरादिना ताटंकादिग्रहः ॥ २१ ॥ सुपार्श्वे मेर्ववष्टंभीभूतपश्चिमदिक्स्थगिरौ । निरूढः स्थितः । कोटरेभ्यो महाशाखाछिद्रेभ्यः । इत्यर्थः—इति समास इति भावः । अनुमोदयंति तत्र लोकप्रशंसाभिरात्मानं हर्षयंति ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या ह्युपयुंजानानां मुखनिर्वासितो वायुः समंताच्छतयोजनमनुवासयति ॥ २३ ॥ एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कंधेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति ॥ २४ ॥ यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवंति ॥ यावज्जीवं सुखं निरतिशयमेव ॥ २५ ॥ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनीवासकपिंजलशंखवैदूर्यजारुधिहंसर्षभनागकालंजरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥२६॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ भवतः ॥ एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ॥एवमुत्तरतस्त्रिशृंगमकरावष्टभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति कांचनगिरिः ॥ २७ ॥ मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौंभीं वदंति ॥ २८ ॥ तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥२९॥ इति श्रीभा० म० पंच० भुवनकोशवर्णनं नाम षोडशोऽध्यायः ॥१६॥

पंच व्यामाः परिणाहः स्थौल्यं यासामित्यर्थः । केचित्तु पंच व्यामपरिणाहा इत्येवं पठंति ॥ २२ ॥ २३ ॥ नीचीना अधोमुखाः ॥२४ ॥ २५ ॥ २६ ॥ चतुर्दिक्षु मेरुमूलाद्योजनसहस्रं त्यक्त्वाग्नेः परितः परिधय इव जठरदेवकूटादयस्तिष्ठंति अतोऽष्टादशयोजनसहस्रं प्रमाणमत्रोक्तम् । "वैष्णवादिपुराणेषु परिमाणादि यत्पुनः । अन्यथा वर्णितं तत्तु कल्पभेदाद्यपेक्षया" ॥ द्विसहस्रं पृथू च तुंगौ च ॥ २७ ॥ २८ ॥ यथादिशं प्राच्यादिदिक्षु यथारूपमिंद्रादिवर्णानतिक्रमेण । तुरीयमानेन सार्धद्विसहस्रप्रमाणेन । नामानि पुराणांतराज्ज्ञातव्यानि । यथोक्तम् " मेरौ नव पुराणि स्युर्मनोवत्यमरावती ॥ तेजोवती संयमनी तथा कृष्णांगना परा ॥ श्रद्धावती गंधवती तथा चान्या महोदया ॥ यशोवती च ब्रह्मेंद्रवह्न्यादीनां यथाक्रमम्" इति ॥ २९ ॥ इति पंचमे टीकायां षोडशोऽध्यायः ॥ १६ ॥

या मधुधाराः । उपयुंजानानां भुंजताम् ॥ २३ ॥ कुमुदोत्तरदिक्स्थोऽवष्टंभगिरिः । आदिना शर्करान्नादिग्रहः । उपयोजयंति भोजयंति ॥ २४ ॥ यान् नदान् । उपसर्गौ भूताद्युपद्रवः । आदिना दैवादिग्रहः ॥२५॥ 'शितिवास' इति पाठोऽपि क्वचित् । आदिनामापि कश्चित्पर्वत एव ज्ञेयोऽन्यथा विंशतिसंख्यापूर्त्तिर्न स्यादिति । मेर्वाख्यकर्णिकायाः उपक्लृप्ता रचिताः ॥ २६ ॥ परिधयो हि कुंडस्थाग्नेः संति तत्प्रकारो हि कुंडनिर्माणग्रंथेभ्योऽवसेयः । अतास्तिर्यग्भूतयोर्जठरदेवकूटयोरुदगायतयोर्मंदरगिरेः परस्तात्स्थितिर्ज्ञेया । एवमपरेण पश्चिमायां सुपार्श्वात्परत्र पवनपारियात्रयोरप्युदगायतोरष्टादशसहस्रयोजनयोः स्थितिस्तथैव मेरुमंदरात्परत्र दक्षिणस्यां कैलासकरवीरयोस्तथा कुमुदादवष्टंभगिरेः परत्रोत्तरस्यां त्रिशृंगमकरयोः पृथुत्वं तुंगत्वं चाष्टानां तुल्यमेव तथैवायामोऽपि । परिस्तृतः कुशैः कृतपरिस्तरणः । परितः सर्वतः ॥ २७ ॥ मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविस्तृते । समाश्चत्वारोऽस्रयो यस्यास्ताम् । शातकौंभीं स्वर्णमयीम् । नाम तु तस्याः मनोवतीति पुराणांतरवाक्यात् ॥ २८ ॥ तां ब्रह्मपुरीमनु । परित इत्यस्य विवरणं यथादिशमिति ॥ २९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ तत्र भगवतः साक्षाद् यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद् भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानाऽतिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत् तद् विष्णुपदमाहुः ॥ १ ॥ यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविंदोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानांतर्हृदय औत्कंठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाऽभिव्यज्यमानरोमपुलककुलकोऽधुनाऽपि परमादरेण शिरसा बिभर्ति ॥ २॥ ततः सप्त ऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यंतिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहंति ॥ ३ ॥

ततःसप्तदशे गंगागमनं तच्चतुर्दिशम् ॥ इलावृते च रुद्रेण संकर्षणनिषेवणम् ॥ १ ॥ यज्ञलिंगस्य बलेर्यज्ञे लिंगं त्रिविक्रममूर्तिर्यस्य । विक्रमतो दक्षिणेन पदा भुवं क्रांत्वा वामपदमुत्क्षिपतो वामपादांगुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्यांडकटाहस्य तस्य विवरेणांतः प्रविष्टा या बाह्यजलधारा सा दिवो मूर्धन्यवततारेत्यन्वयः । तस्य यच्चरणपंकजं तस्यावनेजनेन क्षालनेनारुणं तद्गतं कुंकुमं तदेव किंजल्कास्तैरुपरंजिता अत एवाखिलस्य जगतोऽघमलापहमुपस्पर्शनं यस्यास्तथाऽप्यमला तन्मलसंगशून्या साक्षाद्भगवत्पदीति यदनुपलक्षितं जाह्नवीभागीरथीत्याद्युपलक्षणांतररहितं वचो नाम तेनाभिधीयमाना तस्मिन्समये भगवत्पदी नाम पश्चान्नामांतराणि जातानीत्यर्थः । कोऽसौ दिवो मूर्धा तमाह । यदिति ॥ १ ॥ किं तद्विष्णुपदं तदाह । यत्रेति । वीरव्रतो दृढसंकल्पः अस्मत्कुलदेवताया हरेश्चरणारविंदोदकमिति हेतोः परमादरेण बिभर्तीत्यन्वयः । कथंभूतः सन् । प्रतिक्षणं वर्धमानेन भगवद्भक्तियोगेन दृढमत्यंतं क्लिद्यमानमंतर्हृदयं यस्य । अत एवौत्कंठ्येन विवशमामीलितं यल्लोचनयुगलं तदेव कुड्मले ताभ्या विगलितममलं बाष्पं तस्य कलया सहाभिव्यज्यमानं रोमपुलकानां कुलं यस्य ॥ २ ॥ ततः सप्तऋषयस्तस्या गंगायाः प्रभावाभिज्ञाः संतो यां जटाजूटैरुद्वहंतीत्यन्वयः ।

ततः सुमेरुवर्णनोत्तरम् । तच्चतुर्दिशं सुमेरुचतुर्दिशम् (१) एवं मेरोः परिधिकेसरादिशोभां वर्णयित्वा सर्वशोभाचूडामणिमतिदीर्घतरशाखाशिखरहीरकमुकुटविशेषायमानां तन्मूर्ध्नि विराजमानां श्रीगंगां वर्णयंस्तत्प्रादुर्भावप्रकारमाह–तत्र बुद्धिस्थपरामर्शकत्वात्त्यदादीनां वामनावतारसमये विक्रमतः ' त्रिसाम्यसदनादुरुकंपयानम्' इति । ब्रह्मोक्तौ तस्य प्रकृत्यावरणपर्यंतव्याप्तिश्रवणाद्बाह्यपृथिव्याद्यष्टावरणेभ्यो बहिर्भूता कारणार्णवसंबंधिनी या चिन्मयी जलधारा सा दिवो मूर्द्धनि ध्रुवलोके अवततारेत्यन्वयः । अत एव भगवच्चरणपंकजावनेजनत्वादेव । शालग्रामशिलाभिषेकांबुवन्न त्वौपचारिकं किं तु साक्षादीति । यद्वा–यत्तत्प्रसिद्धं विष्णुपदं विज्ञा आहुस्तत्रावततारेति संबंधोऽग्रिमनिगदेन । युगमिह ज्योतिःशास्त्रप्रसिद्धं पञ्चवर्षात्मकं ज्ञेयम् 'युगं भवेद्वत्सरपंचकेन'इति श्रीपत्युक्तेः ॥ १ ॥ यत्र विष्णुपदे । औत्तानपादिर्ध्रुवः । अत एव क्लिद्यमानांतर्हृदयत्वादेव । रोमपुलकानां रोमांचानाम् । कुलं समूहम् ॥ २ ॥ ततो ध्रुवादनंतरम् । तत्र तपस आत्यंतिकसिद्धित्वे । उपेक्षिताः त्यक्ताः । अन्ये धर्मार्थकामरूपाः ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमावार्य ब्रह्मसदने निपतति॥४॥तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभि स्पंदंती नदनदीपतिमेवाभिनिविशति सीताऽलकनंदा चक्षुर्भद्रेति॥५॥सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवंती गंधमादन मूर्धसु पतित्वा अंतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥ ६ ॥ एवं माल्यवच्छिखरान्निष्पतंती ततोऽनुपरतवेगा केतुमालमभि. चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद् गिरिशिखरमतिहाय शृंगवतः शृंगादव स्यंदमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥ ८ ॥ तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद् बहूनि गिरिकूटान्यतिक्रम्य हेमकूटहिमकूटान्यतिरभसतररंहसा लुठयंतीभारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं पानार्थं चागच्छतः पुंसः पदेप देऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ ९ ॥

एतावत्येव नातोऽधिकास्तीत्यभिप्रायवंतः। तत्र हेतुः। भगवति संततं भक्तियोगलाभेनैवोपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैः। कामिव क इव धारयंति। प्रत्यक्षं मुक्तिमिव तामागताम्। मुमुक्षवो जना इव ते ॥ ३ ॥ ततोनेकसहस्रकोटीनां विमानानामनीकैः संकुलेन देवयानेनाकाशमार्गेणावतरंती। सप्तऋषिभ्योऽर्वागेव प्रायशः कर्मिणां गतिरिति ततोऽर्वागेव संकुलत्वमुक्तम्। आवार्य आप्लाव्य। मेरुमूर्धस्थे ब्रह्मसदने निपतति ॥ ४ ॥ अभिस्पंदंती अभितो गच्छंती ॥ ५ ॥ केसराचलानां मेरुसमानोच्छ्रायत्वात्प्रथमं तेषामादिशिखरेषु मुख्यशृंगेषु पतति ततस्तेभ्योऽधोधः प्रस्रवंती सती ॥ ६ ॥ माल्यवच्छिखरात् केतुमालाभिमुखं निष्पतंती चक्षुःसंज्ञा ॥ ७ ॥ गिरिशिखरादिति। कुमुदशिखरादुच्चलिता नीलशिखरं तत उच्चलिता श्वेतशिखरं तदप्यतिहाय शृंगवतः शृंगादधः स्रवंती ॥ ८ ॥ अतिरभसतररंहसा अस्खलिततीव्रतरवे

ततः सप्तर्षिमंडलात् ॥ ४ ॥ तत्र ब्रह्मसदनांगणे। नदनदीपतिं समुद्रम् ॥ ५ ॥ अंतरेण भद्राश्ववर्षे भद्राश्ववर्षमध्ये। पतित्वेति। इलावृतमुलंघ्येत्यर्थः ॥ ६ ॥ ततो निपतनादप्यनुपरतवेगा पूर्णवेगा सती ॥ ७ ॥ अभिलक्ष्य अधः स्रवंती इलावृतादिवर्षत्रयमुल्लंघ्येत्यर्थः ॥ ८ ॥ तथैव वर्षत्रयमुलंघ्य गिरिशिखराद्गिरिशिखरे पततीत्यर्थः। भारतमभिलक्ष्य। पतित्वेति शेषः। अत्र द्वीपमध्यवर्त्तीनि उल्लंघ्यो ल्लंघ्यापि चलंती प्राच्यादिषु चतुर्षु समुद्रसमीपवर्त्तिष्वेव वर्षेषु। कुलाचलेशादवरुह्य भूमौ यन्निपतति तत्खलु स्वपतिं समुद्रमभिलक्ष्य लज्जानम्रमुखी स्वमौद्धत्यं परिहरंतीवेति ज्ञेयम्। हेमकूटहिमकूटानीति। हेमकूटहिमालयो र्मध्ये व्योम्नः पतंती कूटान्यतिक्रम्य लुठंती स्खलित्वा परिवर्तमाना भुवं पतंती सतीत्यर्थः। यस्याम् अलकनंदायाम्। स्नानार्थं पानार्थं चेति। बहुषु पुस्तकेषु यस्यामित्यारभ्य न दुर्लभमित्यंतः पाठो नास्ति बहुषु चास्ति तत्रापि केषु चित्पानार्थमिति नास्तीति परं चातीतपञ्चशताब्दलिखितपुस्तके पानार्थमिति पाठसहित एवायं निगदो दृष्टस्तत एवात्र लिखितः। अत्रादिना सर्वमेधादिग्रहः। न दुर्लभं किन्तु सुलभमतोऽप्याधिकफलस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्ये च नदा नद्यश्च वर्षेवर्षे संति बहुशो मेर्वादिगिरिदुहितरः शतशः ॥ १० ॥ तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशंति ॥ ११ ॥ एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्तते ॥ १२ ॥ यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहाऽर्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रियानम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुंदरीणां कामकलिलविलासहासलीलाऽवलोकाकृष्टमनोदृष्टयः स्वैरं विहरंति ॥ १३ ॥ नवस्वपि वर्षेषु भगवान् नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाऽद्यापि सन्निधीयते ॥ १४ ॥

गेन ॥ ९ ॥ बहुशो बहुविधाः । मेर्वादिगिरीणां दुहितरस्तत्प्रसूताः ॥ १० ॥ दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः । तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशंति ॥ ११ ॥ अयुतं पुरुषमानेन आयुर्वर्षाणि येषाम् । वज्रवद्दृढं संहननं शरीरं तस्मिन्बलवयोमोदास्तैः प्रमुदितानि यानि महासौरतानि मिथुनानि तेषां व्यवायापवर्गे संभोगावसाने एक वर्षशेषे आयुषि धृत एको गर्भो यैस्तादृशानि कलत्राणि येषाम् । त्रेतायुगसमः विषयसुखोत्कर्षात् । कृतयुगे हि सर्वे ध्याननिष्ठाः । द्वापारादौ दुःखबहुलाः ॥ १२ ॥ यत्र ह येषु हि वर्षेषु देवपतयः स्वैःस्वैः सेवकगणेषु मुख्यैः कृतमहोपचाराः संतः स्वैरं विहरंतीत्यन्वयः । केषु स्थानेषु । सर्वेषु वर्षेषु ऋतुषु कुसुमस्तवकादीनां श्रिया समृद्ध्यात्यंतं नम्यमाना विटपास्तदाश्रिता लताश्च येषु तैर्विटपिभिरुपशुंभमानानि शोभमानानि रुचिराणि काननानि येषु तेष्वाश्रमायतनेषु वर्षगिरिद्रोणीषु च । तथा अमलेषु जलाशयेषु विकचानि विकासीनि विविधानि नवानि च यानि वनरुहाणि नीरजानि तेषामामोदेन मुदितै राजहंसादिभिर्मधुकरनिकराणां चाकृतिभिर्जातिविशेषैरुपकूजितेषु कामेन कलिलैः क्षुभितैर्विलासादिभिराकृष्टं मनो दृष्टिश्च येषां ते ॥ १३ ॥ नवस्वपि वर्षेषु ये पुरुषास्तेषां तदनुग्रहाय स चासौ वक्ष्यमाणोऽनुग्रहस्तदर्थमात्मतत्त्वव्यूहेन स्वमूर्तिसमूहेन सन्निधीयते सन्निहितो भवति ॥ १४ ॥

मोक्षस्य शास्त्रेषु श्रवणादित्यर्थः ॥ ९ ॥ १० ॥ तत्रापि नववर्षशोभित जंबूद्वीपेऽपि । क्वचिदत्रापीति पाठ उभयत्रार्थस्तुल्य एव । तत्र त्रिविधेषु ॥ ११ ॥ पुरुषमानेन मनुष्यप्रमाणेन । मिथुनानि स्त्रीपुरुषयुगलानि । बहुपुस्तकेष्वत्र ‘ तत्र तु ’ इति पाठोऽस्ति स त्वाधुनिक एवासंबद्धत्वात्सर्वथानुपयुक्त एव ॥ १२ ॥ वर्षगिरयो वर्षख्यातिकरपर्वतास्तेषां द्रोणीषु । उपकूजितेष्वत्राधिकरणे निष्ठा षष्ठयभावश्चार्ष एव ॥ १३ ॥ नवस्विति । सर्वेषामवताराणां नित्यं प्राकट्यं दर्शितं तत्र चात्मनेति स्वरूपेणैव न तु प्रतिमारूपेणेत्यर्थः । प्रद्युम्नाविर्भावे गतिविलासादेरपि वर्णयिष्यमाणत्वात् । अद्याप्यवतारसमयादारभ्याद्यापि सर्वदेत्यर्थ इति संदर्भः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इलावृते तु भगवान् भव एक एव पुमान् न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो यत् प्रवेक्ष्यतः स्त्रीभावस्तत् पश्चाद् वक्ष्यामि ॥ १५ ॥ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्यैतदभिगृणन् भव उपधावति ॥ १६ ॥ श्रीभगवानुवाच ॥ ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानंतायाव्यक्ताय नम इति ॥ १७ ॥ भजे भज न्यारणपादपंकजं भगस्य कृत्स्नस्य परं परायणम् ॥ भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥ १८ ॥

अपरोऽर्वाचीनः पश्चान्नवमस्कंधे ॥ १५ ॥ भवानी नाथः स्वामिनी येषां तैः स्त्रीगणानामर्बुदसहस्रैरवरुद्ध्यमानः सर्वतः सेव्यमानः आत्मनः प्रकृतिं कारणम् । आत्मनि समाधिर्ध्यानं यस्य तेन रूपेण । एतद्वक्ष्यमाणं मंत्रादिकमभिगृणन् जपन् ॥ १६ ॥ सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात् । स्वयं त्वव्यक्तायाप्रमेयाय ॥ १७ ॥ हे भजन्य भजनीय त्वा त्वां परमेश्वरं भज इत्यन्वयः । अरणं शरणं पादपंकजं यस्य । कृत्स्नस्य भगस्यैश्वर्यादिषाड्गुण्यस्य परमयनमाश्रयम् । भक्तेष्वलमत्यर्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन । भवापहं संसारहरम् । भक्तेष्वित्यनुषंगः । भवं भावयतीति तथा तम् । अर्थादभक्तेष्विति द्रष्टव्यम् ॥ १८ ॥

अत्रोपास्यदेवता वर्षेषु भगवन्मूर्त्तय एव ज्ञेयाः । आविराविर्भवेति प्रह्लादस्योपरिष्टादुक्तेरिति विश्वनाथः । मम त्वित्थं प्रतिभाति तत्रत्यावतारमूर्त्तिषूपास्त्या झटित्याविर्भावो जायते इत्यत उक्तं संनिधाप्यत इति ॥ १४ ॥ १५ ॥ तामसीं तमःकार्यभूतस्य संहारस्य संप्रवर्त्तयित्रीम् । वस्तुतस्तु—तुरीयां तमोरजःसत्त्वेभ्योऽपि परां शुद्धचिन्मयीमित्यर्थः । ‘ न यस्य माया ’ इत्यादिना ‘ त्रिभिर्विहीनम् ’ इत्यादिना च तथा प्रतिपादयिष्यमाणत्वात् । आत्मनः स्वस्य कारणं “ यस्य भ्रमर्भ्रुवोरंतरेण सांकर्षणो रुद्रव्यूह उदतिष्ठत् ” इति वक्ष्यमाणत्वात् । स्त्रीणां बहुत्वं भगवता पार्वतीसेवार्थं युगपदेवाविर्भावितं तासां पुनरुत्पत्त्यादयः संतीति ध्येयम् ॥ १६ ॥ १७ ॥ हे भजनीयेति । न हि स्वकारणं विहायान्यभजनमुचितमिति भावः । यद्वा ‘भजेभजे न्यारणपादकपङ्कजम् ’ इति पाठे नितरामा सम्यगेवारणं शरणं पादपंकजं यस्य तं भजेभजे इति हर्षाद्विरुक्तिः । भूतेष्वलमलंकारवद्वर्त्तमानं भावितः सृष्टो ध्यानं कारितो वा भूतभावनो ब्रह्मा एनं त्वा त्वां भवस्य मल्लक्षणस्य । दासस्य भावः प्रेमा यत्र तमिति वार्थः । स्वामिचरणैस्तु—भवं संसारं भावयतीति व्याख्यातम् । यद्वा--भजन्यं भजनीयं चारुणं च पादपंकजं यस्य तम् । हे भक्तेष्वलंभावित अत्यर्थं ध्यात वशीकृतेति वा नित्यतृप्ततया स्थितेति । भवं संसारमपजहाति त्यजतीति भवापहो नित्यमुक्तस्तं भक्तसंसारं नाशयतीति वा । भवस्य पुण्यलक्षणभद्रस्य भावउत्पत्तिर्यस्मात्स तथा तं भगस्येति पूर्ववत् । ईश्वरं सर्वसमर्थशीलं “ स्थेशभासपिसकसो वरच् ” इति ताच्छीलिको वरच् । अनेन शेषाभिन्नत्वेन हरिस्तुतिर्ध्वनिता । यद्वा हे भक्ते मयि इषुर्यस्य स भक्तेषुः कामस्तस्यालंभोऽभावो यस्मात्स भक्तेष्वलंभः क्रोधः । “ कामं दहंति कृतिनो ननु रोषदृष्टेः ” इति ब्रह्मवाक्यात् । तस्मादवित इति भक्तेष्वलंभावितस्तत्संबुद्धौ तथा हे क्रोधाद्रक्षितेत्यर्थः । दक्षयज्ञेऽतीवावज्ञातोऽपि महादेवः क्रोधं न चकार तदपेक्षयेयं संबुद्धिः । स्वात्मानं प्रत्येव रुद्रस्येति ज्ञेयं त्वमीश्वरमंतर्यामिणं भज निषेवस्व । किंभूतम् । ईर्लक्ष्मीस्तया भजन्यं सेव्यमरुणपादपकजं यस्य तं कृत्स्नस्य सौभाग्यस्य परंपराया आश्रयम् । अनेन ब्रह्मादिसकलचेतनसमवेतसौभाग्यपरंपरायास्तारतम्योपेताया अयनमित्युक्तं भूतभावनमनीतानागतवर्तमानजगज्जनकं भवत्युत्पद्यत इति भवो जगत्तस्यापहर्त्तारं स्वीयत्वेनांगीकर्त्तारम् । ‘ ओहाङ्—गतौ ’ अतो डप्रत्यये रूपम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ॥ ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ १९ ॥ असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ॥ न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेंद्रियाः ॥ २० ॥ यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमृषयः ॥ न वेद सिद्धार्थमिव क्वचित्स्थितं भूमंडलं मूर्धसहस्रधामसु ॥ २१ ॥ यस्याद्य आसीद्गुणविग्रहो महान् विज्ञानधिष्ण्यो भगवानजः किल ॥ यत्संभवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥ २२ ॥

ईश्वरत्वमुपपादयंस्तामसत्वेन प्रसक्तमनादरं वारयति । न यस्येति । यस्य निरीक्षमाणस्यापि दृष्टिर्मायागुणैर्विषयैश्चित्तवृत्तिभिः करणैश्चाण्वपीषदपि नाज्यते न लिप्यते किमर्थं निरीक्षमाणस्य । ईशे ईशनाय नियमनाय । ईशनमीट् संपदादित्वाद्भावे क्विप् । अत्र वैधर्म्ये दृष्टांतः । यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति। अत आत्मन इंद्रियाणि जिगीषुर्जेतुमिच्छुर्मुमुक्षुस्तं को न मन्येत नाद्रियेत॥ १९॥ ननु सुरामद्याभ्यां मत्तस्य पुंसः कुतो दृष्टिर्नाज्यते तत्राह । असती दृष्टिर्यस्य तस्य स्वमायया क्षीबा मत्त इव यो भयंकरः प्रतिभाति मध्वासवाभ्यां ताम्रलोचन इव च॥ नागवधूविमोहनेन तथा प्रतिभानं युक्तमित्याह। नेति। पादार्चनेन यस्य पादयोः स्पर्शनेन धर्षितं मोहितमिंद्रियं मनो यासां ताः ह्रिया लज्जया भुजार्घर्हणेन ईशिरे न शेकुः । कस्तं न मन्येतेति पूर्वेणैवान्वयः ॥ २० ॥ अस्य विश्वस्य स्थितिजन्मसंयमहेतुं यमाहुः । अत एव त्रिभिः स्थित्यादिभिर्विहीनमनंतं च यमाहुः । ऋषयो मंत्राः । छंदोऽनुरोधेन दीर्घपाठे ऋकारो देवमाता लक्ष्मीः सा च ऋषयश्चेत्यर्थः । अनंतत्वं दर्शयति । मूर्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकदेशस्थितं भूमंडलं यो न वेद । सिद्धार्थं सर्षपमिव । तस्मै नम इति चतुर्थेनान्वयः ॥ २१ ॥ तत्र जन्महेतुत्वं महदादिद्वारेण प्रपंचयति । यस्य गुणनि

यद्वा—हरतेष्टिलोपे रूपम् । " ईर्लक्ष्मीः प्रोच्यते विज्ञैरिः स्मर उर्भवः स्मृतः " इत्येकाक्षरकोशात् ॥ १८ ॥ संपदादिसूत्रे समुपसर्गयोगाद्यद्यपि सोपसर्गादेव क्विप् भवति तथाप्यत्रार्षत्वमाश्रित्यैव निर्वाहोऽन्यथा पदादिभ्यः क्विप् इत्येव वदेदिति ॥ १९ ॥ अत्राक्षिपति—नन्विति । यद्वा—असदृशः कुबुद्धीन्प्रति । क्षीबेति । ' क्षीबृ—मदे ' अतो ग्यादित्वादौणादिके कनि प्रथमैकवचनांतम् । यथान्यः सुरासवाभ्यां ताम्रलोचनो विवेकहीनो भवति तथैवेत्यर्थः । वस्तुतस्तु—भवान्न तथाभूतः किन्तु नित्यानंदसद्विवेक इति भाव इतीव शब्देनोक्तम् । सुरादिकं तु " पानसद्राक्षमाधूकं खार्जूरं तालमैक्षवम् । माधूत्थं सारमादिष्टं मैरेयं नारिकेलजम् ॥ समानानि विजानीयान्मद्यान्येकादशैव हि । द्वादशं तु सुरा मद्यं सर्वेषामधमं स्मृतम् ॥ सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ॥ " इति पुलस्त्यः । एषां लक्षणानि विस्तरभिया नोक्तानि । सामान्यलक्षणं तु यंत्रनिष्कृष्टत्वे सति मादकत्वे च सति द्रवद्रव्यत्वं मद्यत्वम् । भंगारसादावतिव्याप्तिवारणाय प्रथमं विशेषणम् । शतपुष्पार्कादावतिव्याप्तिवारणाय परं विशेषणम् । विशेष्यमात्रस्य लक्षणत्वे जलेऽतिव्याप्तिरतः सर्वमुपादेयम् । नागांगनाविमोहनेन हेतुना तथा प्रतिभातं मत्तवत्प्रतीयमानत्वम् । न शेकुरिति । अस्माकमंतःक्षोभं सर्वज्ञत्वादयं जानाति संप्रति कथं सेवेमहीति भावः ॥ २० ॥ अत एव सर्वकारणत्वादेव । यद्यपि चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटियोजनप्रमाणस्य भूमंडलस्याधस्तादेव स्थितत्वात्तस्मात्सकाशात्तन्मूर्ध्ना तावद्विस्ताराधिक्यं न युज्यते तदपि तत्र गतैर्जनैस्तदीयाचिंत्यशक्त्यैव तन्मूर्ध्ना प्रमाणापरिच्छेद्यत्वं भूमंडलस्य च सर्षपायमानत्वं दृश्यते तच्च वास्तवमेव न तु मायिकमित्येतदप्येकमद्भुतमनस्तत्त्वमिति तथोक्तम् ॥ २१ ॥ सृजामि—सर्गोपयोगितां प्राप्नोमि । अग्निरेवान्नं पचतीतिवन्मत्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः ॥ महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥ २३ ॥ यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः ॥ न वेद निस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने ॥ २४ ॥ इति श्रीभागवते म० पंचमस्कंधे इलावृतखंडे भगवत्संकर्षणवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद् भगवतो वासुदेवस्य प्रियां तनूं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदमभिगृणंत उपधावंति ॥ १ ॥ भद्रश्रवस ऊचुः ॥ ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति ॥ २ ॥

मित्तो महान्नाम विग्रह आसीत् । विज्ञानं सत्त्वं धिष्ण्यमाश्रयो यस्य सः तस्य चित्तरूपत्वेन सत्त्वप्रधानत्वात् । स एव किलाधिदैवो वासुदेवाभेदविवक्षया भगवानजो ब्रह्मा । यत्संभवो यस्माद्ब्रह्मणः संभूतोऽहं रुद्रः । त्रिवृता त्रिगुणेन स्वतेजसा स्वविभूतिरूपेणाहंकारेण वैकारिकं देवतावर्गं तामसं भूतवर्गमैंद्रियमिंद्रियवर्गं च सृजे सृजामि ॥ २२ ॥ किं च एते वयं महदादयः सर्वे यस्यानुग्रहादिदं ब्रह्मांडं सृजामः । कथंभूताः यस्य महात्मनो वशे स्थिताः संतः यतः सूत्रेण क्रियाशक्त्या यंत्रिताः प्रोताः शकुंताः पक्षिण इव लौकिकेन सूत्रेण वयमित्युक्तं तानेवाह । महानहंकारश्च वैकृतादयः पूर्वोक्ता वर्गाश्च ॥ २३ ॥ स्थितिलयहेतुत्वं दर्शयन्प्रणमति । येन निर्मितामेतां मायामेवायं जनोंजसा वेद न तु तन्निस्तारणयोगमुपायं कर्हिंचिदपि वेदेति स्थितिहेतुत्वं दर्शितम् । कीदृशीम् । कर्माण्येव पर्वाणि ग्रंथयस्तानि नयति प्रापयतीति तथा ताम् । प्रलयहेतुत्व माह । विलीयतेऽस्मिन्निति विलयः उदेत्यस्मादित्युदयः विलयश्चोदयश्चात्मा स्वरूपं यस्य तस्मै नमः ॥ २४ ॥ इति श्रीभा० पंचमस्कं० टीकायां सप्तदशोऽध्यायः ॥ १७ ॥ अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु ॥ त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनम् ॥ १ ॥ भद्रश्रवा वर्षपतिः तस्य कुलपतयः सेवकमुख्याश्च ॥ १ ॥ भद्रश्रवस ऊचुरिति । "प्राणभृत

र्तृकत्वमिति भावः ॥ २२ ॥ अन्यदाह–किंचेति । महात्मनः सर्वेश्वरस्य ॥ २३ ॥ निर्मितां प्रापितां मायामेवायं जनो न वेद किमुत त्वामिति कैमुत्यं चोक्तम् । मायावृताः संसार एव तिष्ठंति तदंतमितास्संसारं तरंतीति स्थितिहेतुतोक्ता । निस्तारणोपायं भक्तियोगम् । तस्या मायाया विलयो भक्तेषु उदयस्त्वभक्तेषु यतस्तस्मा आत्मने परमात्मने । 'तद्विलयोदयात्मने' इति पाठ एव चक्रवर्त्यादिभिर्व्याख्यातः । स्वामिचरणैस्तु–नमस्त इति पाठोंगीकृतः प्रतीयते ॥ २४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥ तत इलावृतवर्णनोत्तरम् । पूर्वादिक्रमतः प्रथमद्वितीयतृतीय इत्येवं क्रमेणोत्तरदिक्स्थखंडेषु (१) साक्षाद्भगवतः वासुदेवस्य श्रीकृष्णस्य प्रियां वेदाविर्भावकर्तृत्वात् । हयंति बुध्यंते सर्वमिति हयाः सर्वज्ञास्तेषां शीर्षा प्रधान इति हयशीर्षा स एवाभिधानं नाम यस्यास्ताम् । संनिधाप्य साक्षात्कृत्य इदं वक्ष्यमाणम् । "ॐ नमो भगवते" इत्यादिमंत्रमित्यर्थः । उपधावंति स्तुवंति ॥ १ ॥ भद्रश्रवःशब्देनाजहत्स्वार्थलक्षणया तद्गणोऽप्युच्यतेऽतः प्राणभृत उपदधातीति । तद्योगाद्भद्रश्रवःशब्दयोगात् । गणिषु भद्रश्रवःसंबंधिषु । लिंगस्य वाच्यार्थस्य समवायः समुदाये प्रवेशः । तथाहि "अयं पुरो भुवस्तस्य प्राणो भौवायनः" इत्येकस्यैव मंत्रस्य प्राणभृत्त्वेऽपि प्राणशब्दवत्त्वेपि तत्सहिताः सर्वे मंत्राः प्राणभृच्छब्देन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो विचित्रं भगवद्विचेष्टितं घ्नंतं जनोऽयं हि मिषन्न पश्यति ॥ ध्यायन्नसद् यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ॥ ३ ॥ वदंति विश्वं कवयः स्म नश्वरं पश्यंति चाध्यात्मविदो विपश्चितः ॥ तथाऽपि मुह्यंति तवाऽज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥ ४ ॥ विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्यपावृतः ॥ युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥ ५ ॥ वेदान् युगांते तमसा तिरस्कृतान् रसातलाद् यो नृतुरंगविग्रहः ॥ प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथेहिताय इति ॥ ६ ॥ हरिवर्षेचापि भगवान् नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये ॥ तदयितं रूपं महापुरुषगुणमहाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥ ७ ॥

उपदधाति" इतिवद्गणलक्षणया तद्योगाद्गणिषु लिंगसमवायन्यायेन बहुवचनम् ॥ २ ॥ अयं जनो मिषन्नपि पश्यन्नपि घ्नंतं हिंसंतं न पश्यति नालोचयतीति भगवद्विचेष्टितमेव तच्च विचित्रम् । अदर्शने लिंगम् । पुत्रं बालं पितरं वृद्धं मृतं निर्हृत्य दग्ध्वा स्वयं तदुभयवनैर्जिजीविषति जीवितुमिच्छति । पाठांतरे तु छन्दःसामंजस्यम् किं धर्माद्यर्थम् । न यर्हि यतोऽसत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन् ॥ ३ ॥ नन्वविद्वान्न पश्यति किमत्र चित्रं तत्राह । नश्वरं वदंति स्म शाश्वतः पश्यंति च समाधौ । हे अज तथापि मायया मुह्यंति एतच्च तव कृत्यं चेष्टितं सुविस्मितमतिचित्रमतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोऽस्मि ॥ ४ ॥ इदमपरं चित्रवत्प्रतीयमानमपि त्वयि न चित्रमित्याह । विश्वोद्भवादिकर्माकतुरप्यपगता आवृदावरणं यस्मात्तादृशस्यापि तेंगीकृतं वेदेन । त्वयि तन्न चित्रम् । यतो मायया सर्वात्मनि कार्यस्य कारणे स्रष्टरि कर्म युक्तम् । वस्तुतः सर्वव्यतिरिक्ते निरुपाधावनावृतत्वमकर्तृत्वं च युक्तम् ॥ ५ ॥ परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचारितमाह । वेदानिति । तमसा दैत्यरूपेण तिरस्कृतानपनीतान् । ना च तुरंगश्च नृतुरंगौ तद्रूपो विग्रहो यस्य । कवये ब्रह्मणे । तदर्थमवितथेहिताय सत्यसंकल्पाय ॥ ६ ॥ उत्तरत्र प्रह्लादचारित्रे । महापुरुषस्य गुणा

च्यंते छत्रिणो यांतीतिवद्बहुवचनमिति । आत्मनो जीवस्याविद्यामालिन्यापाकरणाद्विशोधनायेत्यर्थः ॥ २ ॥ बालं स्वजनितं वृद्धं स्वजनकं जनस्तन्मध्यवर्ती जिजीविषुर्जिजीविषन्नित्युभयविधपाठांतरे छंदःसामंजस्यं छंदोभंगाभावः । मृत्युर्मां कथं हास्यतीति नानुसंधत्ते इत्यतिमौढ्यमिति भावः । ननु पञ्चषानपि वासरान् जिजीविषा भगवद्भक्त्यर्थं तादृश्यपि न विगीतेत्यभिप्रेत्याह–किं धर्माद्यर्थमिति । परिहरति–नेति । ननु भद्राश्वादिवर्षाणां भौमस्वर्गरूपत्वात्तद्वासिनां पितुः पुत्रस्य च युगपन्मृत्युदर्शनं न घटते । सत्यम् । सर्वा एव वाचो भारत भूमिवर्तिनो जनानालक्ष्यैवोच्यंते । 'वयमधन्याः स्वकर्मफलं भुंजानाः अत्र भद्राश्वादिवर्षे पशुवद्वर्त्तामहे ये त्वतिधन्या अपवर्गसाधने भारतभूमंडले लब्धजन्मानः श्वपचादिजातयोऽपि यत्रानायासेनैव वैकुंठपदमपि साधयंति तत्रापि कथमेवं मुह्यंति इति रीत्या ॥ ३ ॥ अत्राक्षिपति–नन्विति । त्वां भजन्त एव विद्वांस इति भावः ॥ ४ ॥ अत्र विश्वनाथः–ननु विद्वांसोऽपि ममैव मायया मुह्यंति चेत्तर्हि मय्येव दोषं प्रसंजयसीति तत्र मायायास्तत्कार्यस्य च त्वदीयत्वेऽपि त्वं ततः पृथक् वर्त्तसे इत्याह–विश्वोद्भवेति । अकर्तुरिति । गुणानामेव कर्तृत्वादिति भावः । उक्तं त्वय्युपचारादिति भावः । न च जीववत्कर्तृत्वाभिमानादित्याह–अपावृतस्त्वं गुणैरावृतो न भवसीत्यर्थः । यद्वापावृत इति षष्ठ्यंतम् । एतच्च त्वयि युक्तमेव न तु चित्रं मायायास्त्वच्छक्तित्वात्तत्कार्याणामपि कारणेऽतः सर्वात्मनि सर्वस्वरूपे मायायाः स्वरूपशक्तित्वाभावात्सर्वतोव्यतिरिक्ते च ॥ ५ ॥ दैत्यरूपेण मधुनामकदैत्येन ॥ ६ ॥ नरहरिरूपेण नृसिंहरूपेण । उत्तरत्र प्रह्लादचरित्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रंधयरंधय तमो ग्रसग्रस ॐस्वाहा अभयमभयमात्मनि भूयिष्ठाः ॐ क्ष्रौम् ॥ ८ ॥ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायंतु भूतानि शिवं मिथो धिया ॥ मनश्च भद्रं भजतादधोऽक्षज आवेश्यतां नो मतिरप्यहैतुकी ॥९॥ माऽगारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः ॥ यः प्राणवृत्त्या परितुष्ट आत्मवान्न सिध्यत्यदूरान्न तथेंद्रियप्रियः ॥ १० ॥

नां भाजन आश्रयः । दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य । फलसंकल्पेन व्यवधानशून्यश्चासावनन्यश्चाव्यभिचारी यो भक्तियोगस्तेनोपास्ते सेवते ॥७॥ तेजसामपि तेजसे । आविराविः अतिप्रकटो भव वीप्सा वा । कर्माशयान्कर्मवासनाः । कर्माश्रयानिति पाठे रागादीन् रंधय निर्दह । भूयिष्ठाः भूयाः ॥ ८ ॥ विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत्तच्च साधुपीडां विना न स्यात् । अन्योन्यममंगलं ध्यायतां च भूतानामन्योन्यघातं विना न भवेदित्याशंक्याह । खलः प्रसीदतां प्रसीदतु क्रौर्यं त्यजतु । भूतानि च मिथः शिवमेव ध्यायंतु । तेषां मनश्च भद्रमुपशमादिकं भजतु । नोऽस्माकमपि मतिरपिशब्दाद्भूतानां च मतिरहैतुकी निष्कामा सती ॥ ९ ॥ नः संगः क्वापि मा स्यात् यदि कथंचित्स्यात्तर्ह्यगारादिषु मा स्यात्किन्तु भगवत्प्रियेष्वेव । अगारादिसंगे दोषमाह । य इति । इंद्रियप्रियो गृहाद्यासक्तः ॥ १० ॥

सप्तमस्कंधे । भाजन इह पुस्त्वमार्षम् । महापुरुषगुणा वीर्यशौर्यादयो भक्तिज्ञानादयो वा । प्रकृष्टो ह्लादः शांत्यादिगुणो यस्य स तथा । इदं वक्ष्यमाणम् ॥ ७ ॥ आत्मनि मन्मनसि । "क्ष्रौम्" इति नृसिंहबीजम् । इति बीजकोशे । "बीजं देवस्य मूर्त्तिर्हि तत्स्मृतेः स प्रसीदति" इति तांत्रिकसिद्धांतानुसारेणात्र तानि लिखितानीति ज्ञेयम् । महारोगाद्युपद्रवेऽस्य जपो झटितिसिद्धिः ॥ ८ ॥ मंत्रं जपित्वा प्रार्थयते—तच्च खलस्य स्वस्ति च साधूनां पीडां कृत्वैव भवति. नान्यथेति भावः । अमंगलमभद्रं न भवेत्स्वस्ति न स्यादिति । ननु विषयासक्तिमतां विषयत्यागं विना स्वस्ति न स्यादित्यत आह मनश्चेति । भद्रमनासक्तिं तदपि भक्तिं विना भद्रमप्यभद्रमेवेति चेदाह—अधोक्षजे श्रीकृष्णे नो मत्सहितानां विश्वेषामेव मतिरहैतुकी निष्कामा सती आवेश्यतामधोक्षजेनैव स्वदयालुतयेत्यर्थः । अत्राद्यैवेति युगपदिति पदोपन्यासाभावात्क्रमेण कालतः प्रह्लादवांछितं भगवान्संपादयिष्यत्येव न च तर्हि सर्वमुक्तौ ब्रह्मांडानां शून्यत्वप्रसंग इति वाच्यं जीवशक्तिमायाशक्त्योर्नित्यत्वात्तदैव तेषामनंतानां जीवानां प्रसवादिति विश्वनाथः ॥ ९ ॥ अधोक्षजासक्तेश्च यद्यपि सत्संगदुःसंगौ साधकबाधकौ तदपि सत्संगस्य प्राबल्यात्तस्मिन्सति दुःसंगः स्वत एवापयातीत्याह—मेति । नोऽस्माकं यदि भगवत्प्रियेषु संगः स्यात्तदागारादिषु मैव स्यात् । अत एव तेष्वासक्तिः शनैरपयास्यतीत्यर्थः । ननु अगारादिराहित्ये भोगासिद्ध्या क्लिष्टदेहः कथं वर्त्तेतेत्यत आह—य इति । भिक्षान्नादिभिरुदरपूर्त्त्यैव तुष्टः यत आत्मवान् धृतियुक्तः । अदूरादिति । इंद्रियप्रियस्तु विलंबेनैवेत्यर्थः । यद्वा—यदि भगवत्प्रियेषु संगः स्यात्तदाऽगारादिषु संगो मास्तु यतो युगपदुभयसंगे सति भक्त्यसिद्ध्याऽसंगस्य ज्ञानजनकस्यापि वैफल्यमेवेति भावः । ननु तर्ह्यलमसंगेन केवलसाधुसंग एव प्रार्थ्यतां सत्यं तदपि असंगसहितः साधुसंगः शीघ्रफलप्रदो भवतीत्याह—य इति । लब्धभगवत्प्रियसंगः । किञ्च—यदि संगः स्यात्तदागारादिषु मा स्यात्किं तु भगवत्प्रियेषु स्यादिति व्याख्यानेऽसंगादपि भगवत्प्रियसंगस्यापकृष्टत्वे व्यंजनयावगमिते भक्तिसिद्धांतापगम उत्तरश्लोकस्यासंगतिः । 'तुलयाम लवेनापि' इत्यादि वचनं च विरुध्यते इत्याद्यवधेयम् । प्राणवृत्त्या क्षुत्तृण्मात्रनिवृत्त्या अत्रेत्थं विचार्यं चुल्लीस्थाग्निस्तु कमंडलुजलमात्रेणैव शाम्यति दावाग्निस्तु जलघटकोटिभिरपि न शाम्यती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ॥ हरत्यजोंतः श्रुतिभिर्गतोंगजं को वै न सेवेत मुकुंदविक्रमम् ॥ ११ ॥ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ १२ ॥ हरिर्हि साक्षाद्भगवाञ्छरीरिणामात्मा झषाणामिव तोयमीप्सितम् ॥ हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनाम् ॥ १३ ॥

भगवत्प्रियसंगे गुणमाह । येषां भगवत्प्रियाणां संगाल्लब्धं मुकुंदविक्रमं श्रुतिभिः श्रवणादिभिः संस्पृशतां सेवमानानां पुंसामंतर्गतोऽजो मानसं मलं हरति । कथंभूतं विक्रमम् । निजमसाधारणं वीर्यवैभवं प्रभावातिशयो यस्य । तीर्थं तु गंगादि मुहुः संस्पृशतामंगजं मलं केवलं हरति न तु वासनाः । तान्को वै न सेवेतेत्यन्वयः ॥ ११ ॥ मानसमलापगमफलमाह । यस्येति । अकिंचना निष्कामा । मनःशुद्धौ हरेर्भक्तिर्भवति ततश्च तत्प्रसादे सति सर्वे देवाः सर्वैर्गुणैर्धर्मज्ञानादिभिः सह तत्र सम्यगासते नित्यं वसंति । गृहायासक्तस्य तु हरिभक्त्यसंभवात्कुतो महतां गुणा ज्ञानवैराग्यादयो भवंति । असति विषयसुखे मनोरथेन बहिर्धावतः ॥ १२ ॥ ननु हरिविमुखस्य गृहायासक्तस्यापि लोके महत्त्वं दृश्यते सत्यं दृश्यते तत्तूपहासास्पदमिति सहेतुकमाह । हरिर्हीति । यथा झषाणां मीनानामीप्सितं तोयमेवात्मा तेन विना जीवनाभावात् । महानतिप्रसिद्धोऽपि गृहे यदि सज्जते तदा दंपतीनां मिथुनानां शूद्रादिष्वपि प्रसिद्धं वयसैव केवलं यन्महत्त्वं तदेतस्य भवति न तु ज्ञानादिना । मिथुनेषु पूज्यमानेषु स्त्रीभ्यः पुंसां महत्त्वं

त्यतोऽतितृष्णाव्याप्तमनसां संगे तद्वत्तृष्णावृद्धौ महाननर्थ एव स्याद्विरक्तसंगे तु तद्वद्वैराग्योत्पत्त्या क्षुद्वारकान्नशीतादिवारकवस्त्रमात्रावाप्त्यैव संतोषान्मनःस्थैर्येऽतीव सुखं स्यादिति ॥ १० ॥ भगवत्प्रियसंगस्य माहात्म्यमाह—येषां संगादेव लब्धं निजवीर्यवैभवं गोवर्द्धनधारणादि प्रभावोत्कर्षं सत्त्वशोधकत्वात् तीर्थं श्रुतिभिः संस्पृशतां कर्णैराचम्यतां जनानां मानसमंगजं मनःसंबंधिनं कामं वासनामयम्। अजः श्रीकृष्णो हरति दूरीकरोति श्लेषेण मानसं मनश्चाकर्षति कीदृशः सन् श्रुतिभिः श्रवणेंद्रियैरेवांतर्गतः । अतः को मुकुंदस्य विक्रमं गोवर्द्धनोद्धरणादिवीर्यं न सेवेतेति तस्य च मुकुंदविक्रमस्य भगवत्प्रियसंगं विना दुर्लभत्वात्तस्यैवोत्कर्षः ॥ ११ ॥ मुकुंदविक्रमसेवनस्य भक्तित्वात्तस्याश्च साधुसंगलब्धायाः परमोत्कर्षत्वात्तद्वतो भक्तस्याप्युत्कर्षमाह—यस्येति। नित्यं वसंतीति । सर्वदेवमयः स एव स्यात्तत्सेवयैव सर्वदेवसेवा स्यादिति भावः । यद्वा—सुरा इंद्रियाधिष्ठातारो रुद्रादयः सर्वैर्गुणैरेव सह न तु दोषैरित्यर्थः । तेन तस्याहंकारादीनामिंद्रियाणां दुरभिमानादयो दोषा नैव भवंतीति भावः। अभक्तस्य तु महद्गुणा महतो भक्तिमतस्तस्य ये निर्दोषा गुणास्ते कुतः । यदि च शास्त्रज्ञत्वादयो गुणाः स्युस्तदा खल्वीर्ष्यामत्सरादिदोषसहिता एव स्युः । असति संद्भिर्निद्येऽविद्यमाने वा बहिर्लाभप्रतिष्ठादिसुखे मनोरथेनापि धावतः । यद्वा—समासते इति सुरा इंद्रियाधिष्ठातारोऽन्यत्र सांसारिकलोके संसारप्रवर्त्तकत्वेन दोषैरेव सहासते ज्ञानिलोके नित्यमध्यात्मादिलयभावनावति न सम्यगासते । किन्तु असमत्त एव ज्ञानमवाप्य पुनरस्मानेव संजिहीर्षावस्मिन्कृतघ्ने पुंसि स्थिता वयमद्य श्वो वा मरिष्याम एवेति सभयोत्कंपमेवासते । भक्तजने तु प्रतिदिनं भगवन्माधुर्य्य एवाध्यात्मादिकं संचारयति सति सर्वैर्गुणैरेव सम्यगासते। वयं कृष्णायसजातयः प्राकृता अप्यप्राकृताः कृष्णस्पर्शसंयोगात् कार्ष्ण्यप्राप्तादिव्यजातरूपगुणा नित्यमेव भगवन्माधुर्यामृते विहरंतोऽत्र पुंसि नूनमतिमृत्यवो भवामेति सानंदचमत्कारं निश्चलीभवंतीत्यर्थः । अन्यत्समानम् ॥ १२ ॥ इत्यर्थ इति । वयोमहत्त्वं हि न महत्त्वहेतुरपि तु ज्ञानमहत्त्वस्यैव " छंदोभ्योऽन्यत्र नो ब्रह्मन्वयोज्यैष्ठस्य कारणम् " इति न्यायेन तद्धेतुत्वश्रुतेरिति भावः । अत्र विश्वनाथः—कश्चिज्झषजातिर्यथा तोयमपि हित्वा बहिस्तटादिषु सुखार्थं प्रचरन् जीवन्मृतो भवति तथैव हरिविमुखो जीवन्मृत एव स न तु महानिति भावः । तदपि यदि लोके महान्स्यात्तदा वयसा यौवनेनैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताऽकुतोभयमिति ॥ १४ ॥ केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः संवत्सरांते विनिपतंति ॥ १५ ॥ अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमां रमयन्निंद्रियाणि रमयते ॥ १६ ॥ तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ १७ ॥ ॐ ह्रां ह्रीं ह्रूँ ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाऽधिपतये षोडशकलाय छंदो मयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांताय कामाय नमस्ते उभयत्र भूयात् ॥ १८ ॥

बालमिथुनेभ्यश्च वृद्धमिथुनानां वयसा महत्त्वं यथेत्यर्थः ॥ १३ ॥ यस्मादेवं तस्माद्गृहं हित्वाऽकुतोभयं नृसिंहपादं भजतेत्यसुरानुपादिशति । कीदृशं गृहम् । रजस्तृष्णारागोऽभिनिवेशः रजआदीनां मूलं कारणमत एव संसृतीनां जन्ममरणादीनां चक्रवालं मंडलमविच्छेदो यस्मात् ॥ १४ ॥ केतुमालेऽपि कामदेवस्वरूपेणास्त इति शेषः। किमर्थमास्तेऽत आह। लक्ष्म्या इति। प्रजापतिः संवत्सरः। "संवत्सरो वै प्रजापतिः" इति श्रुतेः। तस्य दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा दिवसाभिमानिनो देवास्तेषां च प्रियचिकीर्षया। पुरुषायुषा वर्षशतेन यान्यहोरात्राणि तैः परिसंख्यानं गणना येषाम् । षट्त्रिंशत्सहस्राणामित्यर्थः । यासां दुहितॄणां महापुरुषस्य महास्त्रं चक्रं तस्य तेजसा ॥ १५ ॥ रमां रमयन् स्वीयानींद्रियाणि रमयते । केन साधनेन रमयंस्तदाह । अतीव सुललितया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मंदस्मितं तत्सहितोऽवलोक एव लीला तया किंचिदुत्तंभितमुत्तुंगितं सुंदरं यद्भ्रूमंडलं तेन सुभगं यद्वदनारविंदं तस्य श्रिया ॥ १६ ॥ तद्भर्तृभिर्दिवसाधिष्ठातृभिरुपेता ॥ १७ ॥ सर्वैर्गुणविशेषैः श्रेष्ठवस्तुभिर्विलक्षितो लक्षीकृत आत्मा

दंपतीनां यथा महत्त्वं तथा यूनोर्दंपत्योर्यथा परस्परमादरस्तथा न वृद्धयोर्नापि बालयोः दंपतिपूजायाञ्च यौवनविशिष्टावेव दंपती वस्त्रालंकारादिभिरधिकं पूज्येते न तथा वृद्धाविति ॥ १३ ॥ यस्मादेवं गृहे महत्त्वं नास्ति तस्माद्धेतोः। अत एव रजआदिमूलत्वादेव । गृह एव संसृतिस्तिष्ठतीति भावः ॥ १४ ॥ लक्ष्मीस्तु दास्यसंवलितशुचिरसेन स्तौति कामेन कंदर्पविलासेन दीव्यतीति कामदेवस्तत्स्वरूपेण । संवत्सरप्रजापतित्वे श्रुतिमाह—सँव्वत्सर इति । प्रजापतिः संवत्सरात्मकः कालस्तदभिमानी देव एव तस्य दुहितॄणां पुत्राणां च रात्रिदिवसाभिमानिनां देवानां प्रियचिकीर्षया पुरुषायुषेति कथनसमकालकलियुगापेक्षयोक्तवर्षशतेन यान्यहोरात्राणि तैर्गणना येषाम् । इत्यर्थ इति । यः शतवर्षं जीवति स षट्त्रिंशत्सहस्रदिनानि जीवतीति भावः । दुहितॄणां पतिवत्नीनां दिवससहितानां रात्रीणामित्यर्थः । महास्त्रतः कालचक्ररूपात् । गर्भाः क्षणलवाद्यात्मकाः कालाः । यद्वा—वर्षभोज्यानि लोकानां प्रारब्धकर्मफलान्येव ता रात्रीर्निमित्तीकृत्योद्भूतत्वात्तासामेव गर्भा इत्युत्प्रेक्षंते । तथा तेषां संवत्सरात्मकस्थूलकालांते भोगेन क्षय एव गर्भपातत्वेनोत्प्रेक्षितः । अहोरात्र्यधिष्ठात्र्यो देवतास्ताः प्राकृतलोकवर्त्तिन्यो भगवंतमुपास्य वैकुंठ एव तद्भक्तानामनश्वरप्रेमसेवासुखनिमित्तरूपा भविष्यंतीत्युपासनाफलं च द्रष्टव्यम् ॥ १५ ॥ १६ ॥ मायामयं कृपाप्रचुरम् । यद्वा—मायाया जीवाविद्याया आमयो रोगो यतस्तम् ॥ १७ ॥ कृपामयत्वमेव विवृण्वती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रियो व्रतैस्त्वां हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ॥ तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः ॥ १९ ॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनम् ॥ स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् ॥ २० ॥ या तस्य ते पादसरोरुहार्हणं निकामयेत् साऽखिलकामलंपटा ॥ तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाच्ञा भगवन् प्रतप्यते ॥ २१ ॥

यस्य आकूतीनां क्रियाणाम्।चित्तीनां ज्ञानानाम्। चेतसां संकल्पाध्यवसायादीनाम्। विशेषाणां तत्तद्विषयाणाम्। षोडश कला अंशा एकादशेंद्रियपंचविषयलक्षणा यस्य। छंदोमयाय वेदोक्तकर्मप्राप्याय। अन्नमयायान्नोपष्टभ्यत्वात्। अमृतमयाय परमानंदाविष्कारत्वात्। सर्वमयाय सर्वविषयत्वात् सहसे ओजसे बलाय तद्धेतुत्वात् ॥ १८॥ त्वत्कामेनैव त्वत्सेवकत्वादहं कृतार्थोऽस्मि। अन्यकामनया तु त्वामर्चंत्यो न परिपूर्णमनोरथाः स्युरित्याह। स्त्रिय इति। स्वत एव हृषीकाणामीश्वरं पतिं संतं त्वामाराध्य याः स्त्रियोऽन्यं पतिं प्रार्थयंते। पतिकामानां हि कामाराधनं व्रतेषु प्रसिद्धम्। तासामपत्यादीनि ते पतयो न पातुं शक्ताः॥१९॥अतस्ते पतय एव न भवंतीत्याह। स वा इति।स चैवंभूतः पतिर्भवानेक एव नान्यो यो भवानात्मलाभात्परमन्यदधिकं न मन्यते इतरथाऽन्याधीनसुखस्य न स्वतंत्रता।स्वतंत्रनानात्वे च मंडलेश्वराणामिव मिथो भयं स्यादित्यर्थः ॥२०॥किं च निष्कामभजनेऽप्रार्थिता एव सर्वे कामा भवंति सकामभजने तु कामितमात्रमनित्यं चेत्याह। या स्त्री तस्योक्तलक्षणस्य तव पादसरोरुहस्यार्हणं पूजामेव काम

मंत्रं जपंती एतन्मंत्रोपासकोऽन्योप्येवं स्वसंबंधेन मंत्रार्थं भावयेदिति व्यंजयंती प्रणमति–कांताय मत्पतये कामाय नम इत्यन्वयः। देवपदानुक्तिस्तु पत्युः संपूर्णनामोच्चारणानौचित्यात्। "पत्युर्नाम ना गृह्णीयादेकदेशादिकं विना" इति। केचित्तु "उच्चारे न हि दोषः स्याद्व्यावहारिकनामनि। जन्मनाम न गृह्णीयात्कलत्रादेर्विनाऽऽपदम् ॥" इति संहितोक्तेः। अन्यस्तु लक्ष्म्या दासीभावेनैवात्मानं ध्यात्वा मंत्रमिममुच्चारयेदिति संप्रदायः। हृषीकेशाय स्वसौंदर्यादिना मन्नेत्रादींद्रियाकर्षकाय मन्नेत्रादिमाधुर्य्यसंभोक्त्रे इति वा। स्वस्य तथा योग्यतायां हेतुः सर्वैर्गुणविशेषैरप्राकृतैर्गुणैर्विलक्षिता विलक्षणी कृता आत्मान देहमनोबुद्ध्यादयो भवंति यतस्तस्मै। हृषीकेशत्वं विवृणोति–आकूतीनां मम कर्मेंद्रिणां चित्तीनां ज्ञानेन्द्रियणां चेतसां चित्ताहंकारबुद्धिमनसां विशेषाणां तद्वृत्तीनां तत्तद्विषयाणां वाऽधिपतये स्वामिने तत्तन्माधुर्य्यस्वामिने अन्योपासकपक्षेऽधिष्टात्रे तेषामप्राकृतीकरणात्स्वयमेवाधिष्ठाता न तु दिगादिदेवसमूह इति भावः। षोडशकलाय राकाचंद्रतुल्यत्वात्पूर्णाय। छंदोमयाय वेदरूपिणे स्वभक्त्युपदेष्ट्रे। अन्नमयाय अन्नरूपेण साध कभक्तपरिपालकाय। अमृतमयाय अमृतवदास्वाद्यरूपगुणलीलादिकाय मोक्षरूपाय वा। सर्वमयाय मम सर्वस्वरूपाय। महसे ओजसे बलाय त्वत्सेवायां मच्चित्तेंद्रियदेहसामर्थ्यप्रदाय। उभयत्रेहलोके परलोकेंतर्बहिश्च। अत्र लज्जाबीजत्रिकं सप्रणवं चतुर्वर्गसिद्धिद्योतनायादौ लक्ष्म्या प्रयुक्तं कामो मे लज्जां रक्षतु वर्गचतुष्टय इति द्योतनाय वा ॥ १८ ॥ स्वयं निष्कामा सकामभक्तिमतीरन्याः शोचंत्याह–त्वत्कामेनैवेति ॥ १९ ॥ यतः पातुं न शक्ता अतो हेताः। इत्यर्थ इति। स्वप्रजापालकानामपि मिथो भयं ततश्च प्रजानामपि भयमतस्तदपालनमेवेति भावः। अत्र विश्वनाथः–पतिशब्दार्थमेव ता न जानंतीत्याह–स इति। यश्चात्मानमपि पातुं न शक्नोति स कथमन्यान्पातीत्यतः प्रथममकुतोभयः स्यात्स चैको भवानेव। इतरथा प्रकारांतरेण। पतिशब्दस्य व्याख्यायामित्यर्थः। यद्वा–सप्तम्यर्थे थाल्प्रत्ययः। इतरत्रेति पूर्ववत्। अत एवात्मनः परमात्मनस्तव लाभात्। अधि अधिकं परं वस्तु न मन्यते शास्त्रज्ञैरिति शेषः। त्वत्प्राप्तेः सकाशादन्यप्राप्तिर्नैवाधिकेति त्वमेव वस्तुतः पतिशब्दवाच्य इत्यर्थः ॥ २० ॥ निष्कामसेवनस्याधिक्यमाह–किंश्चेति। इत्यर्थ इति। सा निष्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्प्राप्तयेऽजेश सुरासुरादयस्तप्यंत उग्रं तप ऐंद्रियेधियः ॥ ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोऽजित ॥ २२ ॥ स त्वं ममाप्य च्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि सात्वताम् ॥ बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति ॥ २३ ॥

येन्न फलांतरं साखिलेषु कामेषु लम्पटा सर्वान्कामान्प्राप्नोतीत्यर्थः । ईप्सितमीप्सितः फलान्तरमाप्तुमपेक्षितः सन्नर्चितश्चेत्तर्हि तदेवैकं रासि ददासि । किं च । यद्यतः फल भोगानंतरं भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोति तदेव रासि न तु नित्यम् ॥ २१ ॥ ननु ममार्हणे कुतः सर्वकामप्राप्तिस्त्वमेव कामार्थिभिः सेव्यसेऽत आह । मत्प्राप्तये ब्रह्मादयस्तपस्तप्यंते कुर्वंति । कथंभूताः । ऐन्द्रिये सुखे धीर्येषां अलुक्समासः तथापि भवत्पादपरायणादृते मां न विंदंति । मत्कटाक्षविलसिता विभूतीर्न लभंत इत्यर्थः । यतस्त्वय्येव हृदयं यस्याः साऽहं त्वत्परतंत्रत्वात्त्वदनुवर्तिनमेव विलोकयामि नान्यमित्यर्थः ॥२२॥ इदानीं कृपां प्रार्थयते । स त्वमिति । यद्भजनं विना न कश्चित्पुरुषार्थः स त्वं त्वादिति त्वया यत्करांबुजं सात्वतां भक्तानां शीर्ष्ण्यधायि कृपया न्यस्तं तन्ममापि शीर्ष्णि निधेहीति शेषः । कथंभूतम् । वंदितं सर्वकामव र्षित्वेन सद्भिः स्तुतम् । न च मयि तवानादरः यतो हे वरेण्य मां वक्षसि लक्ष्म बिभर्षि । अहो विचित्रमेतत् मयि केवलमादरमात्रं भक्तेषु तु परमा कृपाऽत ईश्वरस्य तव

म ~ सकामापदवाच्येति भावः । भगवन्निति । सर्वसंपद्दानसामर्थ्यमाह । अत्रेप्सितांतरकामायाः परितापः स्वस्वभावप्रातिकूल्यदृष्ट्यैव।लक्ष्म्या तामधिक्षिपंत्योक्तः । वस्तुतस्तु—सकामभजनादपि कृतार्थत्वमुपरिष्टाद्वक्ष्यते ' चतुर्विधा भजते माम् ' इत्यारम्य । ' उदाराः सर्व एवैते' इत्यंतेन । श्रीगीतासु भगवतापि तस्याप्युदारत्वं वर्णितमिति ॥ २१ ॥ अत्राक्षिपति—नन्विति । केचित्सकामास्त्वामपहाय मामेव ये सेवंते ते धूलिमेव लभंते इति तान्निंदंत्याह—मत्प्राप्तये इति । इत्यर्थ इति । भवत्परायणा ध्रुवप्रह्लादादय एव विंदंतीति भावः । इत्यर्थ इति । या तु त्वदभक्तेष्वपि देवासुरादिषु संपद्दृश्यते सा तु गुणमयी प्रतिस्वकर्मफलरूपा मायाशक्तिदुर्गाया एव प्रसादाद्वा कामादितरंगजनिका कादाचित्की न तु स्वरूपभूताया ममेति मम मायात्वाभावात् मत्प्रसादोत्थायाः संपत्तेरपि त्वद्वैमुख्यापादकत्वाभावादिति भावः। अहो ब्रह्मादयोऽपि मया जिता न त्वमित्यभिप्रायेणाह—अजितेति । ॥ २२ ॥ तदेवं ब्रह्मादीनामाराध्याऽपि तव भार्याप्यहं निष्किंचनो भक्तो यथा त्वत्तः सौभाग्यं लभते तथा नाहं लभे एवं मे ललाटमित्याह—स इति । ननु त्वत्सौभाग्यतोऽप्यधिकं यतस्त्वामहं हृदय एव नित्यं दधामीति तत्र सत्रपं सांचलमुखाच्छादनं सहुंकारं नीचैराह—बिभर्षीति । हेवरेण्येति । वरेण्यानामयमेव धर्मो यत्सर्वेषामाश्वासनमिति भावः । मा माम् । लक्ष्म कनकरेखाम् । चिह्नतया यद्वक्षसि दधासि तन्माययैव । हे अच्युतेति । च्युतिमतामेव स्त्र्याकांक्षा भवति न त्वच्युतस्य तवेति भावः । मद्भक्तसौभाग्यं दृष्ट्वा कुबुद्धिरेषा मय्यसूयां मा कार्षीदिति कपटेनैवेति भावः । ननु कोऽप्येवं न ब्रूते तत्राह—कः खल्वीश्वरस्य तवेहितमूहितुं वितर्कितुं क्षमः यतः " न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् " इति तव भक्तमुद्धवं प्रति निभृतोक्तिमहमश्रौषमेवेति ध्वनिः । संदर्भस्तु—स त्वमिति दैन्योक्तिः यत्त्वया यत्करांबुजं स्त्रीकारव्यंजकं सात्वतानां शीर्ष्णि अधायि तन्ममापि तादृशभक्तिहीनायाः शीर्ष्णि अधायीत्येकमाश्चर्यम् किञ्च—स तादृशस्त्वं मायया कृपया मा मां वक्षसि लक्ष्मरूपत्वेन बिभर्षीति ततोऽपि परमाश्चर्यं तस्मात्कः खल्वीश्वरस्येति ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक् प्रदर्शितम् ॥ स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ ॥ २४ ॥ ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥ २५ ॥ अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः ॥ स ईश्वरस्त्वं य इदं वशे नयन् नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥ २६ ॥ यं लोकपालाः किल मत्सरज्वरा हित्वा यतंतोऽपि पृथक् समेत्य च ॥ पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २७ ॥ भवान् युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम् ॥ मया सहोरुक्रम तेऽज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ॥ २८ ॥ हिरण्मयेऽपि भगवान् निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मंत्रमिमं चानुजपति ॥ २९ ॥

यन्मायया ईहितं तत्को वितर्कयितुं समर्थः ॥ २३ ॥ २४ ॥ सत्त्वाय सत्त्वप्रधानाय । मुख्यतमाय प्राणाय सूत्रात्मने ॥ २५ ॥ उरुः स्वनो वेदात्मको नादो यस्य । य इदं विश्वं ब्राह्मणादिनाम्ना विधिनिषेधालंबनभूतेन वशेऽनयन्नियमितवान्स त्वमीश्वरः । तथा च श्रुतिः । "यस्य वाक्तंतिर्नामानि दामानि" इति ॥ २६ ॥ नन्विंद्रादयो वर्शयंति लोकपालत्वात्कुतोऽहं तत्राह । यमिति । मत्सर एव ज्वरो येषां ते । यं हित्वा द्विपदश्चतुष्पदः सरीसृपं जंगमं स्थाणु स्थावरं च यदत्र दृश्यते तत्किंचिदपि पातुं न शक्ताः स त्वमेव प्राणरूपेण पालक ईश्वरश्चेत्यर्थः । तथा च श्रुतिः–" ता अहिंसंताहमुक्थमस्म्यहमुक्थमस्मि" इत्यादि ॥ २७ ॥ अवतारचरितमाह । भवानिमां क्षोणीं मया मनुना सह मत्सहितां धृत्वेत्यध्याहारः ऊर्मिमालावति प्रलयार्णवे ओजसा क्रमते विचरति । यद्वा पातुमित्यस्यानुषंगः । क्षोणीं पातुं क्रमते उत्सहत इत्यर्थः । यतोऽजः । कीदृशीम् । ओषधीनां वीरुधां च निधिमाश्रयभूताम् । तस्मै नमः जगतो यः प्राणगणस्तस्यात्मने नियंत्रे ॥ २८ ॥ तत्प्रियतमां तां प्रियतमाम् ॥ २९ ॥

प्राक् चाक्षुषमन्वंतरांते प्रलये सत्यव्रतराजावस्थायाम् मत्स्यत्वेन निकृष्टदृष्टिं प्रत्याह–प्रियतममिति । तदपि भगवतः परमस्वरूपमेव जानीयादित्यर्थः । तद्वर्षपुरुषस्य रम्यकखंडमुख्यस्य । मनोः वैवस्वतस्य ॥ २४ ॥ २५ ॥ सर्वत्रैवांतर्बहिरपि चरसि अथ च लोकपालैरप्यदृष्टस्वरूपः कुतोऽन्यैः । ननु तर्हि ममास्तित्वमेव मास्तु तत्राह–ऊरुस्वन इति । " यतो वा " इत्यादिवेद एव तवास्तित्वं प्रतिपदमुच्चैर्ब्रूत इत्यर्थः । अत एव य इदमिति । दारुमयीं पांचालिकां विश्वस्य पारतंत्र्यादपि स्वतंत्र ईश्वरस्त्वमनुमानेनापि ज्ञाप्यस इति भावः ॥ २६ ॥ अत्राक्षिपति–लोकपालत्वादीश्वराः स्वतंत्राश्चेति चेत्तेषां लोकपालकत्वादिकमौपचारिकमेवेत्याह–यमिति । हित्वा पृथग्भूता वा समेता मिलित्वा वा । मत्सरज्वरत्वे प्रमाणमाह–तथा चेति । ता देवता अहिंसंत समत्सरा बभूवुः । तत्र प्रत्येकं साभिमानमाहुः उ भो अहं कमाश्रित्यास्मि वर्त्ते अपि तु न कमपीति श्रुतेरर्थः । एवं त्वमेव प्राणरूपेण पालक ईश्वरश्चेत्यर्थः ॥ २७ ॥ भक्त्या तु त्वं दृष्टरूपः प्रत्यक्षतयाऽप्युपलभ्यसे तत्र भक्ताभासोऽहमेव प्रमाणमित्याह–भवानिति । युगांतार्णवे मन्वंतरातार्णवे । क्षोणीं धृतनौकारूपां ' नाव्यारोप्य महीमय्याम् ' इत्युक्तेः धृत्वेत्यध्याहारे प्रयोजनापेक्षा न निवर्त्तत इत्यत आह–यद्वेति । इत्यर्थ इति । इह क्षोणीत्युपलक्षणं मां च पातुमपाद्रिवस्त्वं मनुमिति भावः ॥ २८ ॥ सा चासौ प्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणाय नोपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोनमोऽवस्थानाय नमस्ते ॥ ३० ॥ यद्रूपमेतन्निजमाययाऽर्पितमर्थस्वरूपं बहुरूपरूपितम् ॥ संख्या न यस्यास्त्ययथोपलंभनात् तस्मै नमस्तेऽव्यपदेशरूपिणे ॥ ३१ ॥ जरायुजं स्वेदजमंडजोद्भिदं चराचरं देवर्षिपितृभूतमैंद्रियम् ॥ द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥ यस्मिन्नसंख्येय विशेषनामरूपाकृतौ कविभिः कल्पितेयम् ॥ संख्या यया तत्त्वदृशाऽपनीयते तस्मै नमः सांख्यनिदर्शनाय त इति ॥ ३३ ॥ उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्तयति ॥३४॥

अकूपाराय कूमार्य। सर्वः संपूर्णः सत्त्वगुणो विशेषणं यस्य न उपलक्षितं स्थानं यस्य वारिचरत्वात् । वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय भूम्ने सर्वगताय अवस्थानायाधाराय ॥ ३० ॥ निजमाययार्पितं प्रकाशितमेतदर्थं स्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं यतः पृथङ्नास्ति । कथंभूतम् । बहुभी रूपै रूपितं निरूपितम् । यस्य च संख्या नास्ति । कुतः अयथा मिथ्यैवोपलंभनात् । न हि मरीचिजलमेतावदिति संख्यातुं शक्यते । अव्यपदेशरूपिणे निरुक्तप्रपंचाकाराय ॥ ३१ ॥ बहुरूपत्वं दर्शयंस्तस्येश्वरादव्यतिरेकमाह । जरा युजमिति । द्वीपग्रहर्क्षमित्यभिधेयस्त्वमेवैको न त्वद्व्यतिरिक्तोऽस्ति । "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतेरित्यर्थः ॥ ३२ ॥ सप्रपंचतामनूद्य तन्निरासेन प्रणमति यस्मिन्निति । असंख्येया अनंता विशेषा येषां तानि नामानि रूपाण्याकृतयश्च यस्य तादृशे यस्मिंस्त्वयि कविभिः कपिलादिभिरियं चतुर्विंशत्यादिसंख्या कल्पिता सती यया तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै । ते सांख्यसिद्धांतरूपाय नमः परमार्थज्ञानरूपायेति वा ॥ ३३ ॥ एषा भूरुपधावति हेत्यन्वयः ॥ ३४ ॥

तमा तत्प्रियतमा ताम् । वर्षपुरुषैर्हिरण्मयखंडजनैः ॥ २९ ॥ नं कूपे आरो गतिर्यस्य सोऽकूपारस्तस्मै कूर्मरूपायेत्यर्थः । प्रायः कूपे कूर्मो न भवतीति विशेषणमाकारः शुद्धसत्त्वमूर्तये इत्यर्थः । यद्वा—सर्वे सत्त्वगुणा ज्ञानानंदादयो विशेषणं यस्येति । सत्त्वस्य धैर्यस्य वा गुणाः क्षमादयः सर्वे विशेषणं यस्येति । नोपलक्षितं सर्वैरदृष्टं वैकुंठाख्यं स्थानं यस्येति वा । वर्ष्मणे महाप्रमाणाय ॥ ३० ॥ माययाऽर्पितं न तु स्वरूपभूतमिति वाऽर्थ स्वरूपं वस्तुस्वरूपं न त्ववस्तुभूतं त्वद्रूपत्वात् । बहुभिर्नरगोपशुपक्षिमत्स्यादिरूपै रूपितं निरूपितं किन्तु संख्या यस्य नास्ति । अयथोपलंभनाद्यथावदुपलब्धुमशक्यत्वात् । यैः प्रकारैरिदं विश्वमभूत्तेषामुपलंभनाशक्यत्वादित्यर्थः । तथा हि एकस्य स्थूलस्य नरजातेरेव प्रतिशरीरं वर्णस्वभावकंठस्वरादिभेदादनंतप्रकारा ज्ञातुमशक्याः सूक्ष्माणां स्वेदजोद्भिज्जादीनां का वार्त्तेत्यनंतस्य तव शक्तिकार्यस्याप्यानंत्यमिति भावः । अतस्तव स्वरूपभूतस्य रूपस्य सर्वागम्यत्वे कैमुत्यमेवेत्याह—अव्यपदेशं वक्तुमशक्यम् । नित्यं रूपं यस्य तस्मै । संदर्भस्तु—यस्य च तव संख्या नास्तीत्याह ॥ ३१ ॥ तदेवमनंतभेदस्यापि विश्वस्य त्वदेककारणत्वादेकविधत्वमपीत्यभिप्रायेणाह—बहुरूपत्वमित्यादि । ग्रहर्क्षेतीत्यार्षः । इत्यर्थ इति । श्रुत्या ज्ञानदृष्ट्या सर्वस्यैक्यमेवोक्तमिति भावः ॥ ३२ ॥ किञ्च—विश्वस्य नश्वरत्वाज्ज्ञानिभिरनुपादेयत्वमाह—यस्मिन्निति । इयं जरायुजादिरूपा वा ॥ ३३ ॥ उपनिषदं षट्कर्णागोचरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते मंत्रतत्त्वालिंगाय यज्ञक्रतवे महाऽध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्त ॥ ३५ ॥ यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ॥ मथ्नंति मथ्ना मनसा दिदृक्षवो गूढं क्रियाऽर्थैर्नम ईरितात्मने ॥ ३६ ॥ द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ॥ अन्वीक्षयांऽगातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥ करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ॥ माया यथाऽयो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ ३८ ॥

मंत्रैस्तत्त्वेन लिंग्यत इति तथा तस्मै।यज्ञा अयूपाः क्रतवः सयूपास्तद्रूपाय अत एव महांतोऽध्वरा अवयवभूता यस्य।कर्मणा शुक्लाय शुद्धाय यज्ञानुष्ठात्रे।त्रियुगाय कृतयुगे यज्ञाभावात् यद्वा।कलियुगे छन्नत्वात्॥ ३५॥ कवयो विद्वांसो विपश्चितो निपुणा गुणेषु देहेंद्रियादिषु मथ्नंति विचिन्वंति । मथ्ना विवेकसाधनेन मनसा। क्रियार्थैः कर्मभिस्तत्फलैश्च गूढमप्रकाशमानं दिदृक्षवः।एवं मथने ईरितः प्रकटित आत्मा स्वरूपं यस्य तस्मै नमः॥ ३६॥ मथनमेव दर्शयंत्याह । द्रव्येति । द्रव्यं विषयः क्रिया इंद्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्ताऽहंकारः एतैर्मायागुणैः कार्यैरुपलक्षणैर्वस्तुत्वेन निरीक्षितो य आत्मा तस्मै । अन्वीक्षया विचारेणांगैर्यमनियमादिभिरतिशयात्मा निश्चयवती बुद्धिर्येषां तैर्निरस्ता मायानिमित्ता आकृतिर्यस्मात्तस्मै ॥ ३७ ॥ तदेवं निर्गुणरूपेण नत्वा परमेश्वररूपेण प्रणमति । करोतीति । यस्येक्षितुर्जीवार्थमीप्सितम् । अत्यंतानिच्छायामीक्षणायोगात् । स्वार्थं तु नेप्सितम् । विश्वस्थित्यादि स्वगुणैर्माया करोति तस्या जडत्वेऽपीश्वरसन्निधानात्प्रवृत्तिं दृष्टांतेनाह । यथाऽयो लोहं ग्राव्णोऽयस्कांता

मंत्रम् । "उपनिषत्तु द्विजाध्येयवेदभागे समीपगे । षट्कर्णागोचरे मंत्रे" इति धरणिः । आवर्तयति जपति । इमाम् ॐ 'नमो भगवते' इत्यादिकाम् ॥ ३४ ॥ मंत्रैर्वेदमंत्रैः "सहस्रशीर्षा पुरुषः" इत्यादिभिरेव तत्त्वेन याथार्थ्यतो यो ज्ञायते तस्मै । यद्वा–मंत्रा एव तत्त्वं लिंगं मूर्तिर्यस्य तस्मै । 'मंत्रमूर्त्तिममूर्त्तिकम् ' इति नारदोक्तेः । कृतयुगे यज्ञाभावात् "पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप" इति नवमस्कंधे वक्ष्यमाणत्वेन यज्ञकारणीभूतवेदत्रय्याःकृतयुगेऽनाविर्भूतत्वेन यज्ञानुष्ठानासिद्धेः । ननु कृतयुगेऽपि प्रथमोद्भूतहिरण्यगर्भादिकृतं "यज्ञेन यज्ञमयजंत देवाः" इत्यादिश्रुतेर्यज्ञानुष्ठानं श्रूयते तत्कथमुक्तं कृतयुगे यज्ञाभावादिति चेत्तत्राह–यद्वेति । कलियुगे हि परमप्रीतिपूर्वकमत्यंतभक्त्या कदाचित्प्रादुर्भवति न हि युगांतरवत्सर्वगोचरी भवतीति भावः ॥३५॥ विपश्चितो भक्तिचतुरा यस्य गणेषु शब्दरूपादिषु कृष्णरामेति नीलोत्पलदूर्वादलश्यामेत्यादिषु मनसा मथ्ना मथनसाधनेन यस्य स्वरूपं दिदृक्षवो 'मथ्नंति दारुष्विव जातवेदसम्' इति यथा मथनेनैव जातवेदा वह्निः प्रत्यक्षी भवति तथैवात्र यस्य नामरूपादिषु पुनःपुनर्मनोनिधानमेव मथनं तेनैव यत्स्वरूपंप्रत्यक्षी कुर्वंतीत्यर्थः।कीदृशं क्रियार्थैः कर्मभिस्तत्फलैश्च गूढं भक्त्यैव नैष्कर्म्ये सत्येव द्रष्टुं शक्यमित्यर्थः । एवमेवेरितः कथित आत्मा स्वभावो यस्य यत्नो वा यत्र तस्मै । यद्वा–गुणेषु श्रोत्रवागादिष्विंद्रियेषु यस्य स्वरूपं स्वरूप भूतं नामगुणलीलादि श्रूयमाणकीर्त्यमानादि मनसा मथ्ना मथ्नंति । मनःसहितश्रवणकीर्त्तनादिदृढाभ्यासेनैव यं प्रत्यक्षी कुर्वंतीत्यर्थः। अन्यत्समानम् ॥३६॥ एवं स्थूलसूक्ष्ममायिकदेहद्वयसंभवे एव मथनं संभवेत्सति च मथने तत्स्वरूपं दृश्यं स्यादित्याह–द्रव्यमिति।एतैर्मायागुणैः श्रवणकीर्त्तनपरिचरणादिभिर्भजनसाधकैरन्वीक्षया मनःकृतपुनःपुनःपरामर्शेन च अंगानां श्रवणकीर्त्तनादीनामतिशय आधिक्ये आत्मा यत्नो बुद्धिर्वा येषां तैर्वस्तुत्वेन सत्यत्वेन निरीक्षित आत्मा स्वरूपं यस्य तस्मै । तच्च ते स्वरूपं चिन्मयमेवेत्याह–निरस्तमायेति । संदर्भस्तु–मायागुणैरुपलक्षितं यद्वस्तु शुद्धजीवतत्त्वं तत्रापि निरीक्षितो य आत्मा परमात्मा तत्स्वरूपायेत्याह ॥ ३७ ॥ जगतो मायाकार्यत्वं दर्शयंती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ॥ कृत्वाऽग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणताऽस्मि तं विभुमिति ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच ॥ किंपुरुषे वर्षे भगवंतमादिपुरुषं लक्ष्मणाग्रजं सीताऽभिरामं श्रीरामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते॥१॥ आर्ष्टिषेणेन सह गंधर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॥ २ ॥ ॐ नमोभगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥ यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थम् ॥ प्रत्यक् प्रशांतं सुधियोपलंभनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥

न्निमित्ताद्भ्रमति तदाश्रयं तदभिमुखं सत् गुणानां कर्मणां जीवादृष्टानां च साक्षिणे तस्मै ते नमः ॥ ३८ ॥ अवतारचरितमाह । प्रमथ्येति । यो जगतामादिः कारणभूतः सूकरो मां पृथ्वीमग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्योदन्वतः प्रलयार्णवादिभो गज इव निरगात् ततश्च प्रतिगजतुल्यं दैत्यं प्रमथ्य यः क्रीडन् स्थितस्तं विभुं प्रणतास्मीत्यन्वयः ॥ ३९ ॥ इति श्रीभा० पंचमस्कं० टीकायामष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ ऊनविंशे किंपुरुषे भारते चोपवर्ण्यते ॥ सेव्यसेवकभावश्च भारतश्रैष्ठ्यमेव च ॥ १ ॥ १ ॥ भर्ता चासौ भगवांश्च तस्य कथाम् ॥ २ ॥ आर्याणि लक्षणानि शीलं व्रतं च यस्मिन् । उपशिक्षितात्मने संयतचित्ताय उपासितोऽनुसृतो लोको येन । साधुवादः साधुत्वप्रसिद्धिस्तस्य निकषणाय निकषाश्मवन्निर्धारस्थानाय परमसीम्न इत्यर्थः ॥ ३ ॥ श्रीरामं परमार्थरूपेण प्रणमति । यदेकं वेदांतेषु प्रसिद्धं तत्त्वं

प्रणमति–करोतीति । यस्य भगवतः अयस्कांतात् चुंबकमणेः ॥ ३८ ॥ स्वस्मिन्कृपातिशयं द्योतयंत्यवतारचरितमाह–सुष्ठुकरोति लोकस्थित्यर्थं धरोद्धरणलक्षणं शुभनं विदधातीति सूकर उपसर्गस्य दीर्घो निपातनात् । यद्वा–शूमित्यनुकारशब्दं करोतीति शूकरः शसयोरभेदो ज्ञेय आलंकारिकमतानुरोधात् । रसातलोपलक्षितादृर्भोदात् । इति शब्दः समाप्तौ ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ श्रैष्ठ्यं महत्त्वम् (१) सीतयाभिरामः सुंदरतम् ॥ १ ॥ आर्ष्टिषेण ऋषिविशेषो भारते प्रसिद्धः । भर्तृभगवत्कथामित्यनेन नारदादिरिव नावतारांतरकथायामनुरज्यतीति द्योतितम् ॥ २ ॥ आर्य्याणि सर्वैः शिरोधार्य्याणि लक्षणानि चरणतलगतध्वजवज्रादीनि आजानुबाहुत्वादीनि च शीलानि धीरोदात्तादीनि व्रतानि धर्मनिष्ठत्वादीनि यस्य तस्मै । उपशिक्षितात्मने गुरुब्राह्मणादिशिक्षाग्राहिणे उपासितलोकाय स्वल्पब्रह्माद्युपास्यत्वेपि मयास्वाचरणेन रजकपर्यंता अपि लोकाः प्रसादनीया इति विचारवत्त्वाल्लोकानां तदुपासितत्वं साधुवादानां ब्रह्मण्यत्वसत्यसंधत्वकृपालुत्वादीनां निकषणाय परमोत्कर्षप्रापकाय लोका हि साधुवादैरुत्कृष्यंते रामं प्राप्य साधुवादा अप्युत्कृष्टा भवंतीत्यर्थः । यथा परमोत्कृष्टस्यापि कनकस्य निकषं प्राप्तस्यैवोत्कर्षो लोके प्रमाणी भवति तद्वदित्यर्थः ॥ ३ ॥ ननु शंखचक्रादिमत्त्वगरुडवाहनाद्यैश्वर्य्यानाविष्कारादवतारस्यास्य ब्रह्मत्वे केचित्संशेरते तत्र ये संशेरते ते संशेरतां नाम अहं तु साक्षादिमं परब्रह्मरूपमेवानुभवामीत्याह–यदिति । विशुद्धो मायासंबंधशून्यो योऽनुभवस्तन्मात्रम् । अन्यत् "न चक्षुषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ॥ कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ॥ ५ ॥
न वै स आत्माऽऽत्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः ॥ न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥ ६ ॥

तत्प्रपद्ये । तत्कथंभूतम् । विशुद्धश्चासावनुभवश्च स एव मात्रा स्वरूपं यस्य । विशुद्धत्वे हेतुः । प्रशांतम् । तत्रापि हेतुः । स्वतेजसा स्वरूपप्रकाशेन ध्वस्ता गुणानां विविधा जाग्रदाद्यवस्था यस्मिन् । अनुभवमात्रत्वे हेतुः । प्रत्यक् दृश्यादन्यत् । तत्कुतः । अनामरूपम् । ननु वस्तुत एवंभूतस्यापि जीवस्योक्तसर्वविपर्ययो दृश्यते तत्राह । निरहं अहंकाराभावान्न तथा वैपरीत्यमित्यर्थः । ननु श्रीरामस्य स्वरूपं नैवं प्रतीयते तत्राह । सुधिया पुंसा उपलभ्यत इत्युपलंभनम् । शुद्धचित्तेन ब्रह्मत्वेनैवोपलभ्यत इत्यर्थः ॥ ४ ॥ कथं तर्हि दशरथपुत्रत्वं तत्राह । विभोर्मर्त्यावतारस्तु रक्षसो रावणस्य वधाय तस्य मनुष्यादन्यतोऽवध्यत्वात् । न केवलमेतावत्किं त्विह संसारे स्त्रीसंगादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः । अन्यथा स्वे स्वरूपे रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसनानीति कुतः स्यात् ॥ ५ ॥ विषयासक्त्यभावेन व्यसनानर्हत्वमुपपादयति । न वै स भगवांस्त्रिलोक्यां क्वापि सक्तः यत आत्मवतां धीराणामात्मा सुहृत्तमश्च । अतो न स्त्रीकृतं मोहं प्राप्नुयात् । न लक्ष्मणं चेति । देवदूतेन

पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैवात्मा विवृणुते तनुं स्वाम्'' इति श्रुतेः । तत्कुतः अनामरूपं यतः ''एतास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'' इति प्रसिद्धप्राकृतनामरूपरहितं तत्र हेतुर्निरहमिति । आत्मशब्देनास्यां श्रुतौ परमात्मनो जीवाख्यशक्तिरूपोंश उच्यतेऽनेनेति पृथङ्निर्देशात् । तद्रूपेण च प्रवेशो नाम देवताशब्दवाच्यतेजोवारिमृल्लक्षणोपाध्यभिनिवेशः स च तस्य जीवस्य तत्राध्यासादेव भवति । ततोंतर्यामिरूपेण स्वयं तत्र स्थितस्यापि तदध्यासाभावादुपाधिकृतनामरूपराहित्यं युक्तमेवेत्यर्थः । सर्वथाहंकारराहित्ये सति व्याकरवाणीति प्रयोगानर्हत्वादिति भावः । अत्राक्षिपति—नन्विति । इत्यर्थ इति । चित्तशुद्धिं विना ''दृश्यते त्वग्र्यया बुद्ध्या'' इति श्रुतेस्तत्साक्षात्कारो न भवतीति भावः॥४॥नन्वेवंभूतस्य मर्त्येषु प्राकट्यं किं प्रयोजनकमित्यत्रोच्यते—गौणे सत्यपि प्रयोजनांतरे मुख्यं तु भक्तेषु लीलामाधुर्य्याभिव्यंजनमेवेत्याह—मर्त्येति । इत्यर्थ इति । मर्त्या हि द्विविधा धर्मवन्तो भक्तिमन्तश्च तेभ्यः क्रमेण स्वस्य धार्मिकत्वप्रेमवश्यत्वयोः प्रदर्शनया धर्मशिक्षणार्थं प्रेमशिक्षणार्थं चेति भावः । अन्यथा मर्त्यशिक्षणाभावे कुतः स्यात्—स्युः किन्तु साध्वी स्वभार्या धार्मिकैः सर्वथैव नोपेक्षितव्या तदर्थं प्राप्तानि दुःखान्यपि सोढव्यानीति शिक्षणार्थं स्वस्मिन्नसंत्यपि दुःखानि दर्शितानीति प्रथमे पक्षे । द्वितीये तु—सीताविरहकृतानि विषादादीनि कुतो दुःखानि किन्तु प्रेम्णः स्थायिभावस्य विप्रलंभेन रसास्वादनजनितानि दुःखत्वेन भासमानानि परमसुखान्येव न तु दुःखानीत्यर्थः । आत्मारामत्वदुःखित्वयोर्युगपदेकत्र विरोधात् । न च सीतया रममाणस्य कुत आत्मारामत्वमिति वाच्यं सीतायाः स्वरूपशक्तित्वेनात्मभूतत्वात् । ननु सीतायाः स्वरूपभूतत्वे कथं तद्विरहः संभवेत् । उच्यते । एकमेव परमतत्त्वं चिच्छक्तिवृत्तिभेदेन महासारेण प्रेमाख्येनानादित एव द्विधा विभक्तं तिष्ठति ह्लादषडैश्वर्यमयं केवलं ह्लादमयं च प्रथमम्।प्रथमं परमेश्वराख्यं द्वितीयं भक्त्याख्यं पुनश्च तेनैव प्रेम्णा स्वस्य चतसृभिर्वृत्तिभिर्द्वितीयं तत्त्वं चतुर्द्धा विभक्तं दाससखिपित्रादिप्रेयस्याख्यं प्रथमस्य तदेव तत्त्वस्य दास्यादिभावभावितत्वं व्यवस्थापितं प्राकृतेष्वपि जीवेषु यदृच्छयैतादृशभक्तिसाधनवत्सु भक्तिपरिपाके स्वयमाविर्भूयैतच्चतुष्कमावेश्यतेऽपि दासादित्वेन यथाकालं नित्यलोकं प्रापय्य चतुष्केण तेन समनुगम्यते पुनरपि तेनैव प्रेम्णा स्थायिभावतां प्राप्तेन स्वशक्त्यैवाविर्भाविताभिर्विभावादिभिः स्वं रसरूपीकृत्य तदेव युगलं स्वस्य विषयाश्रयीभावभावितं कृत्वा स्वाधीनीकृत्य योगवियोगाभ्यां सुखदुःखायितं स्वमाधुर्यमसाधारणमपारमास्वादयता कोऽप्यानंदचमत्कार एव निष्पाद्यते । अतद्विदां तु केषांचित् रामकृष्णादीनामप्येतावद्दुःखमनिर्वाच्यमिति केषांचिज्जीवप्रदर्शनायै अनुकृतमित्येवं व्यामोह एव ॥ ५ ॥ तस्य प्रेमवश्यत्वसत्यव्रतत्वब्रह्मण्यत्वादिभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न जन्म नूनं महतो न सौभगं न वाङ्न बुद्धिर्नाकृतिस्तोषहेतुः ॥ तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥ ७ ॥ सुरोऽसुरो वाऽप्यथ वा नरोऽनरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ॥ भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत् कोसलान् दिवमिति ॥ ८ ॥ भारतेपि वर्षे भगवान् नरनारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपया तपोऽव्यक्तगतिश्चरति ॥ ॥ ९ ॥ तं भगवान् नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥ १० ॥

श्रीरामं संमंत्रयता विज्ञापितमत्रागतस्त्वया वध्य इति तदैव द्वारि स्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं हंतुमुद्यतो वसिष्ठवाक्यात्तत्याज तच्च न युज्येतेत्यर्थः ॥ ६ ॥ अतः श्रीराम एव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादि किं तु भक्तिरेवेत्याह । न जन्मेति । महतः पुरुषाज्जन्म महतः श्रीरामस्येति वा । सौभगं सौंदर्यम् आकृतिर्जातिः । यद्यस्मात्तैर्जन्मादिभिर्विसृष्टांस्त्यक्तानपि नो वनचरान् बत अहो लक्ष्मणस्याग्रजोऽपि सखित्वे कृतवान् ॥ ७ ॥ तस्मात्सुरो वान्यो वा यः कोऽपि श्रीराममेव सर्वप्रकारेण भजेत । सुकृतज्ञमल्पीयस्यपि भजने बहुमानिनम् । उत्तरान्कोशलानयोध्यावासिनः ॥ ८ ॥ उपचितैर्धर्मादिभिरात्मोपलभ्यते येन तत्तपश्चरति । तत्रोपशम इंद्रियाणां संयमः । उपरमो निरहंकारता आत्मवतामनुग्रहाय न स्वार्थम् । ईश्वरत्वात् ॥ ९ ॥ भगवदनुभाव उपवर्ण्यते येन पंचरात्रेण तत् । सावर्णेर्मनोः । उपसरति सेवते ॥ १० ॥

रप्राकृतैर्गुणैरेवैतदुपपद्यते नान्यथेत्याह—नेति । न सक्तोऽत्र हेतुः—आत्मा परमात्मा भगवान् परिपूर्णैश्वर्यादिः वासुदेवः सर्वाश्रयश्चेति । किं त्वात्मवतामात्मा स्वयमेव नाथत्वेन विद्यते येषां तेषां स्वविषयकममताधारिणां भक्तविशेषाणामित्यर्थः । तेषामेव सुहृत्तमः । तस्माद्यथान्ये स्त्रीकृतं स्त्रीहेतुकं कश्मलमश्नुवते तथा नासावश्नुवीत अतस्तस्यात्मवत्त्वेनैव तादृशकश्मलहेतुतत्प्रीतिविषयतापीति भावः । तथा देवदूतसमयातिक्रमेणात्मवतोऽपि लक्ष्मणस्य परित्यागो यः स खलु नात्यंतिक इत्याह—न लक्ष्मणमिति । इत्यर्थ इति । मर्यादारक्षणार्थमेव किञ्चित्तत्तदनुकरणमिति भावः ॥ ६ ॥ यतः परमदयालुस्स रामोऽतो हेतोः । न हि रामादपरो महानिति कथमुक्तं महतः पुरुषादिति ततः पक्षांतरमाह—श्रीरामस्य वेति । लक्ष्मणस्य सर्वसद्गुणलक्षितस्य श्रीसुमित्रानंदनस्याग्रजोप्यग्रजत्वेन तमपि दास्ये विदधानोऽस्मान्सर्वसल्लक्षणरहितत्वेन दास्ययोग्यानपि सीतान्वेषणादिभक्तितुष्टत्वेन सखित्वे कृतवान् । सहविहारादिना सखीनिव स्वीकृतवान्सुग्रीवमनुलक्ष्य वेयमुक्तिः ॥ ७ ॥ तस्माद्भजनीयेषु सर्वावतारेषु मध्ये राम एव कृपासिंधुरतिशयेन भजनीयो यद्भजने सर्व एवाधिकारीत्याह—सुर इति । दिवं वैकुंठम् ॥ ८ ॥ नरनारायणाख्य इति । द्वयोरभेदो दर्शितः । आत्मवताम् आत्मा स एव भगवान् विद्यते नाथत्वेन येषां तेषां भक्तानामनुकंपया हेतुना तद्विषयकानुकंपाधीनः सन् तेषां मंगलार्थं स्वयमेव तपश्चरतीत्यर्थः । अहो एतावानपि तदनुकंपापरिणाम इति भावः । उपचितैर्वर्द्धितैः । आत्मा त्वंपदार्थ उपलभ्यते ज्ञायते । तत्र धर्मादिषु । यद्वात्मोपलंभनं भगवत्स्फूर्त्तिहेतुकमित्यर्थः । लोकैस्तथा कथं नावगम्यत इति चेत्तत्राह—अव्यक्तगतिरिति । ईश्वरस्य स्वार्थे तदसंभवाद्व्यक्तगतिर्वा ॥ ९ ॥ प्रजाभिः सह ताश्च मुनिरूपा एव न सर्वाः । भगवता नरनारायणाख्येन प्रोक्ताभ्यां सांख्ययोगाभ्यां सारासारविवेकभगवन्निष्ठाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिंचनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरवे आत्मारामाधिपतये नमोनम इति ॥ ११ ॥ गायति चेदम् ॥ कर्ताऽस्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ॥ द्रष्टुर्न दृग् यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥ इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ॥ यदंतकाले त्वयि निर्गुणे मनो भक्त्याद्धीतोज्झितदुष्कलेवरः ॥ १३ ॥ यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन् ॥ शंकेत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्मायायाऽहंममतामधोक्षज ॥ भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमिति ॥ १५ ॥

उपरतानात्म्याय निरहंकाराय ॥ ११ ॥ असक्तश्चासौ विविक्तश्च साक्षी च तस्मै नमः । असक्तत्वं दर्शयति । अस्य विश्वस्य सर्गादिषु कर्तापि यो न बद्ध्यतेऽहंकर्तेति न मन्यते । विविक्तत्वमाह । देहगतोऽपि दैहिकैः क्षुत्पिपासादिभिर्यो न हन्यते नाभिभूयते ।साक्षित्वमाह । यस्य द्रष्टुरपि सतो दृष्टिर्गुणैर्दृश्यैर्न विदूष्यते न विक्रियते ॥ १२॥ योगकौशलं निरूपयन्योगं प्रार्थयते । इदमिति त्रिभिः । हे योगेश्वर हिरण्यगर्भो यद्योगनैपुणं जगाद इदमेव तत् । किम् । जन्मप्रभृति भक्त्यांतकाले पुमांस्त्वयि मनो धारयेदिति यत् । कथंभूतः सन् । उज्झितं दुष्कलेवरं तदभिमानो येन ॥ १३ ॥ अन्यथा तस्य शास्त्राभ्यासादिश्रमो व्यर्थ इत्याह । यथैहिकामुष्मिककामेषु लंपटो मूर्खः सुतादिषु योगक्षेमं चिंतयन्कुत्सितस्य कलेवरस्यात्ययान्मृत्योः शंकते तथा विद्वानपि सन्यः शंकेत तस्य यत्नः शास्त्रश्रवणादिः श्रम एव ॥ १४ ॥ यस्माद्विदुषोऽपीयमेव दशा तत्तस्माद्धे प्रभो अधोक्षज त्वमेव नो योगं विधेहि । कीदृशम् । त्वयि स्वभावं सहजवासनारूपम् । येन योगेन वयं त्वन्मायया नः कुकलेवरेऽर्पितामहंममतां शीघ्रं

यद्भगवदनुभावोपवर्णनं तत्सावर्णिं प्रत्युपदेक्ष्यति यः स इत्यर्थः । तीर्थस्तु–सांख्ययोगाभ्यां यथार्थज्ञानतत्साधनाभ्यामित्यर्थमाह ॥ १० ॥ न विद्यते आत्मा ज्ञातव्यत्वेन यस्य सोऽनात्मा तस्य भावोऽनात्म्यमुपरतमनात्म्यं यस्मात्तस्मै निवृत्तदेहादिधर्माय ॥ ११ ॥ आत्मारामचूडामणित्वमाह–कर्त्तेति ॥ १२ ॥ योगाभ्यासिनां रहस्यमाह–इदमिति । यदिति शत्रंतम् । अंतकाले यत् गच्छच्चपलमिति यावत् । मनस्त्वयि दधीत स्थिरी कुर्यादित्यर्थः । योगेश्वरेति । भगवतो निजेष्टदाने सामर्थ्यमाह–उज्झितेति । वर्त्तमाने निष्ठा ॥ १३ ॥ शंकेत मयि मृते सति मत्पुत्रादयः कथं वर्त्तेरन्निति भावयेत श्रम एव तस्य शास्त्राभ्यासादि व्यर्थमेवेति भावः ॥ १४ ॥ कुकलेवरेति । कलिभवलोकापेक्षयोक्तम्–प्रभो इति । त्वमेवास्मदभिमतसंपादने समर्थ इति भावः । अधोक्षजेति । तव कृपां विना तव ज्ञानं दुर्लभमिति भावः । यद्वा–यथा विषयेषु स्वभावस्तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भारतेप्यस्मिन् वर्षे सरिच्छैलाः संति बहवो मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः ॥ १६ ॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशन्ति ॥ १७ ॥ चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिंधुरंधः शोणश्च नदौ महानदी वेदस्मृती ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥ अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयंते यथा वर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥

भिंद्याम त्यजेम । सुदुर्भिदामुपायांतरैः सर्वथा त्यक्तुमशक्याम् ॥ १५ ॥ इलावृतवदस्मिन्नपि वर्षे सरितः शैलाश्च संति नितंबप्रभवास्तटेभ्यः संभूताः ॥ १६ ॥ आत्मना च देहेनाप्युपस्पृशंति ॥ १७ ॥ १८ ॥ लब्धं जन्म यैस्तैः पुरुषैः । सात्त्विकादिना स्वकृतेन कर्मणा दिव्यादिगतय आत्मनो विधीयंते साध्यंते । हि यस्मात् । सर्वा एव गतयः कर्मानुसारेण सर्वेषां भवंति यस्य वर्णस्य यद्विधानं मोक्षप्रकारः संन्यासवनस्थत्वादिस्तदनतिक्रमेणास्मिन्नेव वर्षे नृणामपवर्गश्च भवति । एतच्च कर्मादि बहुसाधनसंभवाभिप्राये

त्वयि स्वभावो निसर्गोस्त्वित्यर्थः ॥ १९ ॥ गोवर्द्धनोऽयं शास्त्रलोकप्रसिद्धः श्रीवृंदावनगतः श्रीकृष्णक्रीडत्वेन तमनु रैवतोऽपि पठ्यतेऽधुना तस्य स्वल्पत्वादिदृष्टिस्तु दिनेदिनेंतर्द्धानात् । चित्रकूटस्याप्यां पूर्वपाठो हि श्रीरामावतारस्य कृष्णावतारात्प्राक्तनत्वेन तद्वासस्थानस्य तस्यापि प्राक्तनत्वेनैवेति ज्ञेयम् ॥ १६ ॥ एतासां भारतस्थानां नामभिर्नामोच्चारणमात्रेणैव 'गंगागंगेति यो ब्रूयात् ' इत्युक्तन्यायेन ॥ १७ ॥ काश्चिन्नामतोऽपि निर्दिशति—नर्मदेति । चर्मण्वत्या विशेषणं तेन न पौनरुक्त्यं कचिद्वयोरेकतरा एव पठितास्ति । अंधो ब्रह्मपुत्रः ॥ १८ ॥ तदनतिक्रमेण यथा ब्राह्मणस्य चत्वार आश्रमाः । क्षत्रियस्य त्रयो विना संन्यासम् । वैश्यस्य द्वौ विना वानप्रस्थसंन्यासौ । शूद्रस्यैको गृहस्थाश्रम एव नान्ये त्रयस्तस्यावैदिकत्वादिति निर्णीतमस्माभिराद्यपद्यव्याख्याशतके । एतच्च भारत एवापवर्गकथनं च । अन्यत्र भारतेतरवर्षेषु स्वर्गादिषु चापवर्गो नास्तीत्यभिप्रायेण नोक्तम् । अन्यत्रापि तत्सत्त्वे पारमर्षं सूत्रं प्रमाणयति—तदुपर्यपीति । देवादीनां ब्रह्मविद्याधिकारोऽस्ति नास्ति वेति संदेह आह—तेषां मनुष्याणामुपरि ये देवादयस्तेषामपि ब्रह्मविद्याधिकारोऽस्ति । संभवात् । अर्थित्वसामर्थ्याद्यधिकारकारणस्य संभवात् । इति बादरायणो मन्यत इति सूत्रार्थः । अत्र विश्वनाथः-अस्मिन्नेव वर्षे नान्यत्र तत्रापि सहस्रयोजनप्रमाणे प्रदेश एवेति ज्ञेयम् । तदुक्तं विष्णुपुराणे—"भारतस्यास्य वर्षस्य नव भेदान्निशामय । इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ॥ नागद्वीपस्तथा सौम्यो गांधर्वस्त्वथ वारुणः । अयन्तु नवमस्तेषां द्वीपः सागरसंभृतः ॥ योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात् " सागरसंभृत इति । समुद्रप्रां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मानि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताऽविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः ॥ २० ॥ एतदेव हि देवा गायंति ॥ अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ॥ यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवौपयिकं स्पृहा हि नः ॥ २१ ॥ किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ॥ न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टाऽतिशयेंद्रियोत्सवात् ॥ २२ ॥ कल्पायुषां स्थानजयात् पुनर्भवात् क्षणायुषां भारतभूजयो वरम् ॥ क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः ॥ २३ ॥

णोक्तं न त्वन्यत्रापवर्गाभावेन । तदुपर्यपि बादरायणः संभवादिति देवानामपि मोक्षस्य सूचितत्वात्॥ १९॥ अपवर्गस्वरूपमाह । योऽसाविति । अनात्म्ये आत्मनि भवमात्म्यं रागादि तद्रहिते । अनिरुक्ते वाचामगोचरे । अनिलयनेऽनाधारे । अनन्यनिमित्तोऽहैतुको भक्तियोग एव लक्षणं स्वरूपं यस्य । कथं भवति । नानागतीनां निमित्तं यो वियाग्रंथिस्तस्य रंधनं छेदनं तद्द्वारेण महापुरुषपुरुषा विष्णुभक्तास्तैः प्रकृष्टः संयोगो यदा भवंति तदा ॥ २० ॥ एतदेव मानुष्यमेव सर्वपुषार्थसाधनं गायंति । अमीषामेभिः उत स्वित् । अथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोऽभूत् । एवंभूतस्य पुण्यस्य दुष्करत्वात् । भारताजिरे भारतांगणे नः केवलं स्पृहैव यत्र तन्मुकुंदसेवोपयोगि नृषु जन्म यैर्लब्धम् ॥२१॥ स्पृहामेवाहुः किमित्यादिसप्तभिः । दुष्करैः क्रत्वादिभिर्नः फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या किं न किंचित्फलं कुतः यत्र नारायणपादपंकजस्मृतिर्नास्ति । प्रत्युतातिशयितादिंद्रियाणामुत्सवाद्भोगात्प्रमुष्टाऽभूत्॥ २२॥क्षणमल्पमेवायुर्येषाम् । वरत्वे हेतुः । मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य

तवर्त्तीति श्रीस्वामिव्याख्या नवमस्यास्य पृथङ्नामाकथनान्नाम्नापि नवद्वीपोऽयमिति गम्यते । विशेषश्च तत्रैव "पूर्वे किराता यस्यांते पश्चिमे यवनाः स्मृताः । पूर्वदेशादिकाश्चैव कामरूपनिवासिनः ॥ उंड्राः कलिंगा मगधां दाक्षिणात्याश्च कृत्स्नशः । मारुका मालवाश्च" इत्यादि । "चत्वारि भारते वर्षे युगान्यत्र महामुने । कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् ॥" इति । वायवीये च "भारतस्यास्य वर्षस्य नव भेदान्निबोधत सागरांतरिता ज्ञेयास्ते त्वगम्याः परस्परम् ॥" इति । शुक्ललोहितकृष्णवर्णेन सात्त्विकराजसतामसेन कर्मणा क्रमेण दिव्यादिगतयो बह्व्य आत्मनः स्वस्य विधीयंते साध्यंते । हि यस्मात्सर्वा एव गतयः सर्वेषां यथावर्णविधानमिति वर्णानां धर्मस्याधर्मस्य च करणं संभवेदिति विधीयंते वेदेनेति शेषः । तथाऽपवर्गश्चेति तस्य विधातुमशक्यत्वात्स स्वयमेव भवतीति चकारेणापवर्गस्य वैरल्यं द्योतितमिति ॥ १९ ॥ ननु किंस्वरूपोऽपवर्गः कदा वा भवेदित्याकांक्षायामपवर्गस्वरूपमाह—भगवति परमकल्याणसौंदर्यादिगुणवति अत एव सर्वभूतानामात्मा मनो यत्र माधुर्येण सर्वभूतचित्ताकर्षके इत्यर्थः । अनिलयने लयरहिते वा वासुदेवे श्रीनंदनंदने ॥ २० ॥ ननु दुरात्मनामपि तत्र जन्म दृश्यतेऽतो विशिंषंति मुकुंदसेवाया उपयोगिब्राह्मणादिजन्मेत्यर्थः ॥ २१ ॥ ननु भवद्भिरपि भारते जन्म प्राप्यैव सत्कर्मभिर्दिवि सुखमुपभुज्यते इति चेदस्माकं तज्जन्म धिक् तत्प्राप्यं दिवमपि धिक् तत्रत्यं सुखमपि धिगित्याद्यभिव्यंजयंत आहुः—किमिति । यत्र दिवि ॥ २२ ॥ ब्रह्मलोकादपि भारतभूमेरुत्कर्षः खल्वपूर्व एवेत्याहुः—कल्पायुषामिति । ब्रह्मलोके द्विपरार्द्धपर्यंतनिवासादपि भारतभूमौ क्षण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यत्र वैकुंठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ॥ न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥ प्राप्ता नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृताम् ॥ न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यांति बंधनम् ॥ २५ ॥ यैः श्रद्धया बर्हिषि भागशो हविर्निरुतमिष्टं विधिमंत्रवस्तुतः ॥ एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत् पुनरर्थिता यतः ॥ स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥

हरेः पदं सम्यग्यांति॥२३॥अतो यत्र वैकुंठकथामृतनद्यो न संति तदाश्रयाः कथाश्रयापगा महांतो नृत्याद्युत्सवा येषु तादृशा यज्ञेशस्य मखाश्च पूजाः । स सुरेशस्य ब्रह्मणोऽपि लोको न सेव्यताम् ॥२४॥ अमुमुक्षून्नरान्निंदति । प्राप्ता इति । ज्ञानं च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन संभृतां पूर्णाम् । अपुनर्भवाय मोक्षाय वनौकस इव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरंति तर्हि यथा बध्यंते तद्वत ॥२५॥ अहो भारतवासिनां भाग्यमित्याहुः । यैरिति । "अग्नये जुष्टं निर्वपामि इंद्राय जुष्टं निर्वपामि" इत्येवं भागशो निरुतं पृथक्कृतम्।कथम्।विधिना प्रकारेण मंत्रेण च वस्तुतश्चरुपुरोडाशादिभेदेन चेष्टं देवतामुद्दिश्य त्यक्तं निरुतं च ममेदमिति स्वीकृत्य त्यागानंतरमश्नातीत्यर्थः पृथगिंद्रादिनामभिराहुत आहूतः आशिषां प्रभुः स्वयं पूर्णोऽपि हरिः ॥ २६ ॥ तत्रापि निष्कामाः कृतार्था

मात्रं वासोऽपि श्रेष्ठ इत्यर्थः । तत्र हेतुः—पुनर्भवाद्ब्रह्मलोके तावान्वासोऽपि पुनर्भवप्रद इत्यर्थः । भारते तु मर्त्येन मरणधर्मकेणापि देहेन मनस्विनो भगवच्चरणदत्तमनसः हरेः पदं वैकुंठं ब्रह्मलोकमूर्धन्यपि पादौ निधाय कृतं शुभाशुभं सर्वमपि कर्म संन्यस्य त्यक्त्वा 'यत्करोषि यदश्नासि' इति प्रोक्तन्यायेन भगवति समर्प्येत्यर्थः । " एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पंते कल्पिताः परे ॥ " इत्युक्तेर्भगवदर्पितकर्मणां मोक्षहेतुत्वश्रवणादिति भावः ॥ २३ ॥ यतस्तत्र हरिकथादि नास्ति अतो हेतोरिति स्वामी । विवेकिनामयमेव विवेक इत्याहुः—नेति । सुधेव सर्वत आधिक्येन स्वाद्वी तदापगेव भूयसी न तु ज्ञानयोगादिकथेव श्रव्याऽल्पीयसी च । भागवता भगवदालंबिनः । तदाश्रयास्तामेवाश्रयन्ते न तु परमात्मालंबिनः ज्ञानादिसिद्ध्यर्थं तां किञ्चिन्मात्रीमपेक्षमाणाः । यज्ञानां ब्रह्मयज्ञादीनामांगिरसबृहस्पतिसवादीनामन्येषामपीशस्य हरेर्मखाः " यज्ञैः संकीर्त्तनप्रायैर्यजंति हि सुमेधसः " इति प्रमाणोक्तलक्षणाः संकीर्त्तनबहुलाः परिचरणरूपाः महांत उत्सवा गीतनृत्यवाद्यभक्त्याराधनाद्या येषु ते यत्र न संति स सुरेशस्य ब्रह्मणोऽपि लोकः न सेव्यतां नाश्रीयताम् ॥ २४ ॥ तादृशं भारतं प्राप्ता अप्यकृतार्था अतिशयेन शोच्या एव । यथा लब्धचिन्तामणयोऽपि पूर्ववत्कृषीवला एवेत्याहुः--प्राप्ता इति । ज्ञानमधिदैवम् क्रिया अध्यात्मम् द्रव्यमधिभूतं तेषां समूहैः संभृतां पूर्णां श्रवणादिसर्वेंद्रियैः पूर्णामिति । हरिनामश्रवणकीर्त्तनादिसंभवेऽपीति भावः । अपुनर्मृताय भक्तियोगाय शेषं समानम् ॥ २५ ॥ अत्र भारते 'एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्' इत्यादिर्श्रीभगवदुक्तं भगवद्विभूतिबुद्ध्या विश्वरूपोपासनामपि कुर्वाणा धन्या एवेत्याहुः—यैरिति । इत्यर्थ इति । तमुद्दिश्यैव तत्तन्नाम्ना त्यक्तत्वादिति भावः ॥ २६ ॥ तत्रापि भारतेऽपि विश्वनाथस्तु—शुद्धां भक्तिं कुर्वाणाः सकामा अपि कृतार्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ॥ तेनाजनाभे स्मृतिमज्जन्म नः स्याद् वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥ श्रीशुक उवाच ॥ जंबूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशंति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥ तद् यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति ॥ ३० ॥ एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥ इति श्रीभा० म० पंचम० जबूद्वीपवर्णनं नामैकोनविंशतितमोऽध्यायः ॥ १९ ॥

इत्याहुः । सत्यमिति । प्रार्थितः सन्नर्थितं ददातीति सत्यं तथापि परमार्थदो न भवत्येव । यद्यस्माद्यतो दत्तादनंतरं पुनरप्यर्थिता भवति । ननु नार्थितश्चेत्किमपि न दद्यादित्याशंक्याहुः । अनिच्छतां निष्कामानां तु इच्छानां पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव संपादयति ॥ २७ ॥ स्विष्टस्य सम्यग्यजनस्य । सूक्तस्य प्रवचनस्य । कृतस्यान्यस्यापि कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं यदि किंचिदस्ति तेनाजनाभे वर्षे नोऽस्माकं जन्म स्यात् । कीदृशं स्मृतिमत् हरिरेव सेव्य इत्यनुसंधानयुक्तम् । यतो हरिर्भजतां शं सुखं तनोति ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ इति श्रीभा० पंचमस्कंधे टीकायामेकोनविंशोऽध्यायः ॥ १९ ॥

निष्कामभक्ततुल्या एव भवंतीत्याहुः—सत्यमिति । नृणां भजताम् । अर्थितं कामितं पदार्थं तैरर्थितः सन् दिशति ददातीति सत्यम् किं तु यत् यथा पुनरर्थिता भोगांते याचकत्वं स्यात् तथा नैवार्थदः एतत्कथमवगतमित्यत आह—यतः निजपादपल्लवमनिच्छतामपि भजतां स्वयमेव ध्रुवादीनामिवेच्छापिधानं सर्वकामाच्छादकं तदेव निजपादपल्लवं विधत्ते कृपया ददाति निजपादपल्लवं स्वयमेव बलाद्दत्त्वा इच्छायाः पिधानमाच्छादनं करोतीति वा । ततश्चानभीप्सितामपि सितशर्करां पितुः सकाशात्प्राप्य शिशवो यथा मृदि स्पृहां त्यजंति तथैव कामानपीत्यर्थः।अत एव 'अकामः सर्वकामो वा' इत्यादौ तीव्रेण ज्ञानकर्माद्यमिश्रेण भक्तियोगेन यजेतेत्युक्तम् । तत्र सकामानां निष्कामाणां च भक्तानामंततः पादपल्लवप्राप्तावपि नैकरूप्यं भावनीयं न हि जात्यैव शुद्धं बह्वाच्छोधितं च तुल्यमूल्यं भवत्यतो ध्रुवादिभ्यः सकाशाद्भरतादीनामुत्कर्षः परम एव दृश्यत इति।अत्र संदर्भः— अर्थितः प्रार्थितः सन्नृणामार्थितं सत्यमेव ददाति न तत्र कदाचिदपि व्यभिचार इत्यर्थः । किन्तु तथापि तन्मात्रेणार्थदो न भवति तन्मात्रं दत्त्वा निवृत्तो न भवतीत्यर्थः । यत उपासकस्तत्रापूर्णत्वाद्भोगक्षये सति तदेव पुनरप्यर्थिता भवति । " न जातु कामः कामानामुपभोगेन शाम्यति " इत्यादेस्तदेवमभिप्रेत्य स तु परमकारुणिकस्तत्पादपल्लवमाधुर्यज्ञानेन तदनिच्छतामपि भजतामिच्छापिधानं सर्वकामसमापकं निजपादपल्लवमेव विधत्ते तेभ्यो ददातीत्यर्थः । यथा माता चर्वमाणां मृत्तिकां बालकमुखादपसार्य्य तत्र खंडं ददाति तद्वदिति भावः । तथोक्तं गरुडे—" यद्दुर्लभं यद्दुष्प्राप्यं मनसो यन्न गोचरम् । तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः ॥ " इति ॥ २७ ॥ अत एव प्रार्थयंते शोभनं सुकृतम् । तेन शोभनेन ॥ २८ ॥ अश्वान्वेषणे अश्वमेधीयाश्वमार्गणावसरे ॥ २९ ॥ तद्यथा तान् दर्शयति ॥ ३० ॥ जंबूद्वीपस्य वर्षाणां विभागः । भारतोत्तमेति । भरतवंशे उत्तमस्त्वमेवासि राजन्यतस्तव विचित्रहरिलीलाकर्णनरतिरस्तीति भावः ॥ ३१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच॥ अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते॥ १॥ जंबूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंबाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखाबाह्योपवनेन प्लक्षो जंबूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते ॥ सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥ २ ॥ शिवं यवयसं सुभद्रं शांतं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ॥ ३ ॥ मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः ॥ अरुणा नृम्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरा इति महानद्यः ॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते ॥ ४ ॥ प्रत्नस्य विष्णो रूपं यत् सत्यस्यर्तस्य ब्रह्मणः ॥ अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥ ५ ॥

विंशे प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः ॥ लोकालोकस्थितिश्चांतर्बहिर्भागादिमानतः ॥ १ ॥ १ ॥ तावता लक्षविस्तारेण परिक्षिप्तः परिवेष्टितः । उपास्ते तिष्ठति । आकलय्य समर्प्य ॥ २ ॥ अभिज्ञाताः प्रसिद्धाः सप्तैव । अन्ये च पर्वता नद्यश्च सहस्रशः संतीत्यर्थः । मानसोत्तरस्य मंडलाकारत्वोक्तेरेतेषु प्लक्षादिपंचद्वीपेषु वर्षाद्रयस्तिर्यग्रेखाकाराः उभयतोऽब्धिस्पृश इति गम्यते अन्यथा सप्तभिः सप्तवर्षविभागासंभवात् । वैष्णवे वर्षाणां पूर्वादिक्रमोक्तेश्च ॥ ३ ॥ जलोपस्पर्शनेन विधूतं रजस्तमश्च येषाम् । हंसादयो ब्राह्मणादिस्थानीयाः । विबुधोपमं संदर्शनं क्लमस्वेदादिरहितं रूपं प्रजननमपत्योत्पादनं च येषाम् ॥ ४ ॥ विगीता अपि द्वीपमंत्रा व्याख्यायंते प्रत्नस्य पुराणपुरुषस्य विष्णोर्यद्रूपं तं सूर्यमीमहि शरणं व्रजेम । कथंभूतम् । सत्यादीनामात्मानमधिष्ठातारम् । तत्र सत्यमनुष्ठीयमानो धर्मः । ऋतं प्रमीयमाणो धर्मः ।

स्थितिः मर्यादा (१) अतो जंबूद्वीपात् । परं परत्र ॥ १ ॥ ततो जंबूद्वीपात् । द्विगुणविशालेन द्विलक्षयोजनविस्तारेण । परिखा दुर्गादिपरितोऽधः संकुचितः क्रमेणोपर्युपरिविस्तृतो भूसमः शत्रुप्रवेशवारकः खातविशेषः । ' प्लक्षस्तु पर्कटी जटी ' इत्यमरः । उप आधिक्येनास्ते । तस्य प्लक्षद्वीपस्य । सप्तवर्षाणां नामान्येव नामानि येषां ते सप्तवर्षनामानस्तेभ्यो वैयधिकरण्यबहुव्रीहित्वान्मध्यमपदलोपी समासः ॥ २ ॥ यवसमित्यत्र यशस्यमिति तीर्थः पपाठ । इत्यर्थ इति । मुख्यानामेव गणना भवति सूर्यादिवन्न त्वमुख्यानामपि तारादिवदिति भावः । अन्यथा उभयतोब्धिस्पर्शतिर्यग्रेखाकारत्वानंगीकारे मंडलाकारत्वांगीकारे च । वर्षाष्टकं स्याद्विष्णुपुराणोक्तवर्षाणां पूर्वादिक्रमोऽपि न सेत्स्यतीत्यर्थः ॥ ३ ॥ ४ ॥ विगीता ग्रंथांतरेष्वदर्शनादनिश्चिता अपि । यद्वा स्पष्टार्थत्वाद्विगतं गीतं व्याख्यानं येषां ते सुगमा अपीत्यर्थः । न तु निंदिताः श्रीशुकदेवेन श्रावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्लक्षादिषु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते ॥ ६ ॥ प्लक्षः स्वसमानेने क्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः समानेन सुरोदेनावृतः परिवृंक्ते ॥ ७ ॥ यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छंदःस्तुतः पतत्त्रिराजस्य सा द्वीपहूतय उपलक्ष्यते ॥ ८ ॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् ॥ सुरोचनं सौमनस्यं रमणकं देववर्ष पारिभद्रमाप्यायनमविज्ञातमिति ॥ ९ ॥ तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः ॥ स्वरसः शतशृंगो वामदेवः कुंदः मुकुंदः पुष्पवर्षः सहस्रश्रुतिरिति ॥ अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति ॥ १० ॥ तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते ॥ ११ ॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः ॥ प्रजानां सर्वासां राजांऽधः सोमो न आस्त्विति ॥ १२ ॥ एवं सुरोदाद्बहिस्तद् द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तंबो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥ १३ ॥

ब्रह्मणस्तद्बोधकस्य वेदस्य अमृतस्य शुभफलस्य । मृत्योरशुभफलस्य ॥ ५ ॥ ६ ॥ ७ ॥ "सुपर्णोसि गरुत्मान् त्रिवृत्ते शिरः" इत्यादिश्रुतेश्छंदोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छंदःस्तुत् तस्य गरुडस्य । निलयनं स्थानम् । सा शाल्मली । द्वीपस्य हूतये व्यपदेशाय ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ स्वगोभिः स्वरश्मिभिः । अंधोऽन्नम् । सोमो नो राजा आस्तु आभिमुख्येन भवतु । ह्रस्वपाठे त्वविवक्षया संध्यभावः ॥ १२ ॥ एवं सुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीप इत्यन्वयः ।

तत्वादिति । रूपं प्रतिमास्थानीयम् । तत्र सत्यादिषु । प्रमीयमाणः श्रुत्यादिबोधितोऽवश्यं कर्त्तव्य इत्यर्थः ॥ ५ ॥ सर्वेषां पुरुषाणां स्वाभाविकी सिद्धिरापुराद्याधिक्यरूपा सामान्यतोऽस्तीत्यर्थः । आपुरादिशब्दाः स्वाधिक्ये लाक्षणिकाः सप्त ॥ ६ ॥ द्विगुणविशालः चतुर्लक्षयोजनविशालः । परिवृंक्ते पृथग्वर्त्तते । 'वृजी–वर्जने–रुधादिरुदात्तेत् । आत्मनेपदमार्षम् ॥ ७ ॥ यत्र द्वीपे । शाल्मली तूलपूर्णफलवान्कंटकी वृक्षः । श्रुतौ त्रिवृदाख्यवेदभागस्य गरुडशिरस्त्वेनोक्तत्वाद्वेदभागानां गरुडावयवत्वं निश्चीयते ॥ ८ ॥ तन्नामानि पुत्रनामकानि ॥ ९ ॥ तेषु खंडेषु ॥ १० ॥ तस्य शाल्मलीद्वीपस्य वर्षेषु पुरुषाः । वेदमयं वेदप्रतिपाद्यम् ॥ ११ ॥ संधौ सति नो इति पाठे छंदोभंगः स्यादिति भावः ॥ १२ ॥ एवं पूर्ववत् । तस्माच्छाल्मलीद्वीपात् । द्विगुणोऽष्टलक्षयोजनप्रमाणकः । यथा पूर्वः शाल्मलः सुरोदेनावृतस्तद्वदित्यर्थः । यस्मिन् द्वीपे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेतो नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत ॥ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥ १४ ॥ तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तसप्तैव चक्रश्चतुःशृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ॥ रसकुल्या मधुकुल्या मित्रविंदा श्रुतविंदा देवगर्भा घृतच्युता मंत्रमालेति ॥ १५ ॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवंतं जातवेदसरूपिणं कर्मकौशलेन यजंते ॥ १६ ॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् ॥ देवानां पुरुषांगानां यज्ञेन पुरुषं यजेति ॥ १७ ॥ तथा घृतोदाद बहिः क्रौंचद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥ १८ ॥ योऽसौ गुहप्रहरणोन्मथितनितंबकुंजोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ १९ ॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥ २० ॥ आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमानो भोजन उपबर्हणो नंदो नंदनः सर्वभद्र इति ॥ अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्लेति ॥ २१ ॥ यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते ॥ २२ ॥

स्वश्ष्पाणि स्वकोमलशिखास्तेषां रोचिषा ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ हे जातवेदस्त्वं साक्षात्परस्य ब्रह्मणो हरेर्हव्यवाडसि अतो देवानां यज्ञेन पुरुषं हरिमेव यज । अंगानां नाम्ना दत्तमंगिने समर्पयेत्यर्थः ॥ १७ ॥ उपक्लृप्तो वेष्टितः । यथा कुशद्वीपो घृतोदेन वृतः ॥ १८ ॥ गुहस्य कार्तिकेयस्य प्रहरणेनायुधेनोन्मथिता नितंबाः कुंजानि च यस्य ॥ १९ ॥ स्वयं भगवान् ज्ञानी । परमकल्याणं यशो यस्य ॥ २० ॥ २१ ॥ आपोमयमंभोमयम् ॥ २२ ॥

कुशस्तंबः कुशगुल्मः तं द्वीपमाख्यातीति तद्द्वीपाख्यायनः । ल्युटि 'आतो युक्' इति युक् । ज्वलनो वह्निः ॥ १३ ॥ तद्द्वीपपतिः कुशद्वीपपतिः । राजन्निति । राज्ञामियमेव गतिरिति भावः ॥ १४ ॥ तेषां वस्त्रादीनाम् ॥ १५ ॥ यासां रसकुल्यादीनाम् । जातवेदःस्वरूपिणं वह्निं क्रियानैपुण्येन ॥ १६ ॥ हव्यवाट् हविषो नेता यतो हरेरपि हविर्नेतास्यतो हेतोः । यज्ञेन यजनेन । इत्यर्थ इति । यथा पुरुषहस्ते दत्तं पुरुषदत्तं भवति तथेति भावः ॥ १७ ॥ तथा बहिः ततो घृतोदाद्बहिरग्रे द्विगुणः कुशद्वीपादिति शेषः । षोडशलक्षयोजनप्रमाणकः द्वीपनाम निर्वर्त्तयति साधयतीति तथा ॥ १८ ॥ योऽसौ क्रौंचः आयुधेन तारकहननार्थं प्रक्षिप्तशक्त्या। नितंबा रोधांसि 'कटकोऽस्त्री नितंबोद्रेः' इत्यमरः । कुंजानि लतापिहितोदराणि च । 'नितंबः स्कंधरोधसोः' इति मेदिनी । ''कुंजोऽस्त्रियां निकुंजेऽपि हनौ दंते च दंतिनाम्'' इति च । 'स्यान्निकुंजो लतागृहे' इति च । विभयो निर्भयः ॥ १९ ॥ तस्मिन् क्रौंचेऽपि स्वयं भगवान् ज्ञानी 'ज्ञानी त्वात्मैव मे मतः' इति श्रीमुखोक्तेः । यद्वा—स्वयं भगवतो हरेः भगवान् 'उत्पत्तिं प्रलयं चैव' इत्याद्युक्तलक्षणः ॥ २० ॥ २१ ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आपः पुरुषवीर्याः स्थ पुनंतीर्भूर्भुवः सुवः ॥ ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥ २३ ॥ एवं पुरस्तात् क्षीरोदात् परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमंडोदेन परीतः ॥ यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगंधस्तं द्वीपमनुवासयति ॥ २४ ॥ तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि ॥ तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनंत आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥ एतेषां वर्षमर्यादागिरयो नद्यश्च सप्तसप्तैव ॥ ईशान उरुशृंगो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति॥ अनघाऽऽयुर्दा उभयस्पृष्टिरपराजिता पंचपदी सहस्रस्रुतिर्निजधृतिरिति ॥ २६ ॥ तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणायामविधुतरजस्तमसः परमसमाधिना यजंते ॥ २७ ॥ अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ॥ अंतर्यामीश्वरः साक्षात् पातु नो यद्वशे स्फुटम् ॥ ॥ २८ ॥ एवमेव दधिमंडोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम् ॥ २९ ॥ तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिंद्रादीनां यदुपरिष्टात् सूर्यरथस्य मेरुं परिभ्रमतः संवत्सरात्मकं चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ३० ॥ तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद् भगवत्कर्मशील एवास्ते ॥ ३१ ॥

हे आपः पुरुषवीर्या ईश्वराल्लब्धसामर्थ्याः स्थ भवथ अत एव भूर्भुवः स्वस्त्रैलोक्यं पुनंत्यस्ता भवत्यो नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनंतु । यत आत्मना स्वरूपेणैवामीवघ्नीः पापहंत्र्यः ॥ २३ ॥ दध्नो मंडं रसः स एवोदकं यस्य । यस्य पर्णान्यंतःखरस्पर्शानि बहिर्मृदुस्पर्शानि स शाको नाम वृक्षः ॥ २४ ॥ २५ ॥ २६ ॥ ॥ २७ ॥ आत्मकेतुभिः प्राणादिवृत्तिभिः ॥ २८ ॥ ज्वलनशिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत ॥ २९ ॥ देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः ॥ ३० ॥ ३१ ॥

अत एवेश्वराल्लब्धसामर्थ्यत्वादेव ॥ २३ ॥ अनुवासयति सुगंधयति ॥ २४ ॥ तस्यापि शाकद्वीपस्यापि । निधाप्य स्थापयित्वा ॥ २५ ॥ २६ ॥ २७ ॥ स्फुटं व्यक्तं जगदिति यावत् ॥ २८ ॥ ततः क्रौंचद्वीपात् । द्विगुणश्चतुःषष्टिलक्षयोजनप्रमाणकः ॥ २९ ॥ तस्य पुष्करद्वीपस्य मध्ये मानसोत्तरमंडलाकारत्वात्तत्पार्श्ववर्त्तिनी द्वे वर्षे अपि मंडलाकारे एवेत्याह—अर्वाचीनेति ॥ ३० ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेण कर्मणाराधयंति इदं चोदाहरंति ॥३२॥ यत्तत् कर्ममयं लिंगं ब्रह्मलिंगं जनोर्चयेत्॥ एकांतमद्वयं शांतं तस्मै भगवते नम इति ॥ ३३ ॥ ऋषिरुवाच ॥ ततः परस्ताल्लोकालोकनामाऽचलो लोकालोकयोरंतराले परित उपक्षिप्तः ॥३४॥ यावन्मानसो त्तरमेर्वोरंतरं तावती भूमिः कांचन्याऽऽदर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्त्वपरिहृतासीत् ॥ ३५ ॥ लोकालोक इति समाख्या यदनेनाचलेन लोकालोकस्यांतर्वर्तिनाऽवस्थाप्यते ॥३६॥ स लोकत्रयांते परित ईश्वरेण विहितो यस्मात् सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनाँस्त्रीँल्लोकानावितन्वाना न कदाचित पराचीना भवितुमुत्सहंते तावदुन्नहनायामः ॥ ३७ ॥ एतावाँ ल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः कविभिः स तु पंचाशत्कोटिगणितस्य भूगोलस्य तुरीयभागोऽयं लोकालोकाचलः ॥ ३८ ॥

ब्रह्मरूपिणं कमलासनमूर्तिम् । सकर्मकेण ब्रह्मसालोक्यादिसाधनेन ॥ ३२ ॥ कर्ममयं कर्मफलरूपम् । ब्रह्म लिंग्यते यस्मात् एकस्मिन्नेव परमेश्वरेंतो निष्ठा यस्य तदत एव वस्तुतोऽद्वैतम् ॥ ३३ ॥ ततः शुद्धोदात्परस्तात् । लोकः सूर्याद्यालोकवान्देशः अलोकस्तद्रहितस्तयोरंतराले मध्ये तयोर्विभागार्थमित्यर्थः ॥ ॥ ३४ ॥ ततः परस्तादित्युक्तं तदेव कियतांतरेणेत्यपेक्षायां तदंतर्वर्तिनीं भूमिमाह । यावन्मानसोत्तरमेर्वोरंतरं सार्धसप्तलक्षोत्तरसार्धकोटि परिमितं तावती भूः शुद्धोदात्पराऽस्ति तत्र च प्राणिनोऽपि संति ततः कांचनी भूमिरन्याऽस्तीत्यर्थः । सा चैकोनचत्वारिंशल्लक्षोत्तरकोटयष्टकपरिमिता ज्ञेया । एवं हि सति मेरुलोकालोकयोरंतरं सार्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भवति । एतदेव शैवतंत्रेषूक्तम् । "कोटिद्वयं त्रिपंचाशल्लक्षाणि च ततः परम् ॥ पंचाशच्च सहस्राणि सप्तद्वीपाः ससागराः ॥ ततो हेममयी भूमिर्दशकोट्यो वरानने ॥ देवानां क्रीडनार्थाय लोकालोकस्ततः परम्॥" इति । अत्र च दशकोटित्वं पूर्वोक्त भूम्या सह द्रष्टव्यम् । सर्वसत्त्वपरिहृतेति देवव्यतिरेकेणेति विज्ञेयं देवानां क्रीडनार्थायेत्युक्तत्वात् ॥ ३५ ॥ ३६ ॥ लोकत्रयस्यांते परितो मर्यादारूपो विहितः । यस्मात्प्रतिबंधकात् । सूर्य आदिर्येषाम् । ध्रुवोपवर्गोंतो येषाम् आवितन्वानाः समंतात्प्रकाशयंतः परतो गंतुं न शक्नुवंति तावदुन्नहनमुत्सेधस्तदनुरूप आयामश्च विस्तारो यस्य । ध्रुवादप्युच्छ्रितत्वात्त्रिलोकीमर्यादाभूत इत्यर्थः ॥ ३७ ॥ सोऽयं तु लोकालोकाचलस्तुरीयभागश्चतुर्थांशः सार्धद्वादशकोटयः मेरोरेकत इति द्रष्टव्यम् ॥ ३८ ॥

सकर्मकेण यतः कर्मणा कर्माण्येवोद्भवंति न तु कर्मक्षयस्तेन सकामेनेत्यर्थः ॥ ३२ ॥ कर्ममयं 'स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचतामेति' इत्युक्तेः कर्मप्राप्यं लिंगं मूर्तिमत् ब्रह्म लिंग्यते ज्ञायते येन तत् । अत एव ब्रह्मनिष्ठत्वादेव । वस्तुतः सत्यमेवाद्वैतं 'यो यच्छ्रद्धः स एव सः' इति न्यायेन परमेश्वरादभिन्नम् ॥ ३३ ॥ परितोऽष्टदिक्षु मंडलाकारतयोपक्षिप्तो रचितः । इत्यर्थ इति । अन्यथा विभागः कथं स्यादिति भावः ॥ ३४ ॥ तत्र च मृण्मयभूमौ च । इत्यर्थ इति । अन्या मृण्मयभूम्यपेक्षया भिन्नेति भावः । एतदेवोक्तप्रमाणमेव । प्रहितोऽवगलितः ॥ ३५ ॥ समाख्या निरुक्तिः । अनेन मध्यव र्तिनाऽवस्थाप्यते तुल्यतया ज्ञाप्यते ॥ ३६ ॥ इत्यर्थ इति । त्रिलोकीमर्यादापर्यंतोन्नतावाँल्लोकालोकगिरिरिति भावः ॥ ३७ ॥ स तु लोकालोकस्तु । भूगोलकस्य भूसंवद्ब्रह्मांडगोलकस्येत्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्यस्येव भुवोप्यंडगोलकयोर्मध्यवर्त्तित्वात् । खगोलमिव भूगोलमपि पंचाशत्कोटियोजनप्रमाणं तस्य तुरीयभागः सार्द्धद्वादशकोटियोजनबिस्तारोच्छ्राय इत्यर्थः । भूस्तु चतुस्त्रिंशल्लक्षोनपंचाशत्कोटियोजनप्रमाणा ज्ञेया । यथा मेरुमध्यान्मानसोत्तरमध्यपर्यंतं सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणं मानसोत्तरमध्यात्स्वादूदकसमुद्रपर्यंतं षण्णवतिलक्षयोजनप्रमाणं ततः काञ्चनी भूमिः सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणा । एवमेकतो मेरुलोकालोकयोरंतरालमेकादशलक्षाधिकचतुष्कोटिपरिमितमन्यतोऽपि तथेत्यतो लोकालोकाल्लोकपर्यंतं स्थानं द्वाविंशतिलक्षोत्तराष्टकोटिपारिमितं लोकालोकाद्बहिरप्येकत एतावदेवान्यतोप्येतावदेव यद्वक्ष्यते योंतर्विस्तार एतेन ह्यलोकपरिमाणञ्च व्याख्यातं यद्बहिर्लोकालोकाचलादिति । एकतो लोकालोकः सार्द्धद्वादशकोटियोजनप्रमाणोऽन्यतोपि स तथेत्येवं चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटियोजनप्रमाणा भूः साब्धिद्वीपपर्यंता ज्ञेयाऽत एवांडगोलकात्सर्वतो दिक्षु सप्तदशलक्षयोजनावकाशे वर्त्तमाने सति पृथिव्याः शेषनागेन धारणं दिग्गजैश्च निश्चलीकरणं सार्थकं भवेदन्यथा व्याख्यांतरे पञ्चाशत्कोटिप्रमाणत्वादंडगोलकलग्नत्वे तत्तत्सर्वमकिंचित्करं स्यात् । चाक्षुषमन्वंतरे चाकस्मान्मज्जनं श्रीवाराहदेवेनोत्थापनं च दुर्घटं स्यादित्यादिकं विवेचनीयम् । श्रीमन्महाभारतीयभीष्मपर्वणि श्रीनीलकंठेनाप्यत्र विचारितम्–अत्रेयं शास्त्रानुभवयोरविरोधेन भूकल्पना प्रतिभाति । यथा हस्तमात्रस्य चतुरस्त्रस्य चतुर्विंशत्यंगुलानि परिणाहः षण्णवत्यंगुलानि परिधिः । किञ्चिन्न्यूनानि कर्णौ भवति एवमष्टादशसहस्राणि षट्शतानि च जंबूपर्वसंज्ञिताया भुवः प्रमाणमुक्तं तदेवात्र परिधित्वेन कल्पितं तच्चतुर्थांशत्वेन चत्वारि सहस्राणि षट्शतानि पंचाशच्च योजनानि एकैको भुज इति तदेव समचतुरस्त्रस्य विष्कंभप्रमाणम् । अस्य कर्णः शुल्बशास्त्रोक्तरीत्या षट्सहस्राणि पंचशतानि षट्सप्ततिश्च योजनानि तस्यास्य भूचतुरस्त्रस्य चतुर्भिः समुद्रैर्वेष्टितस्य कोणा दिक्षु वर्तते तेन दक्षिणस्यां दिशि रामसेतौ द्वयोः समुद्रयोः संधिः । एवमितरास्वपि दिक्षु समुद्रसंधयो ज्ञेयाः । यस्त्वत्र ज्योतिर्विदां भूपरिधिः सप्तांगनंदाब्धि ४९६७ योजनसंमितोऽभिमतः स एवास्माकं चतुरस्त्रविष्कंभः खबाणरसवेद ४६५० मितः । यत्तु एतयोरंतरं सप्तेंदुरामा ३१७ स्तदपि यजमानेनोर्ध्वबाहुना प्रपदोच्छ्रितेन समपादस्थितेन वा उन्मितस्य सूत्रस्य यः पंचमोंशः स हस्त इति विकल्पस्य कात्यायनादिभिरुक्तत्वाद्धस्तप्रमाणभेदकल्पनया योजनबहुत्वाल्पत्ववचनेन समाधेयम् । तथा भूमेश्चतुरस्त्रत्वेपि तन्मध्यस्थमत्युच्छ्रितं मेरुं प्रदक्षिणी कुर्वतः सूर्यस्य मार्गो मंडलाकारोऽस्तीति न बौद्धाभिमतं सूर्यद्वयं कल्प्यं भवति । अन्यत्सर्वं युक्त्यविरुद्धं ज्योतिर्विन्मतमेवात्रानुसर्त्तव्यम् । यत्तु पुराणे पञ्चाशत्कोटियोजनं भूगोलप्रमाणमित्युक्तं तदपि "अचिंत्याः खलु ये भावा न तांस्तर्केण साधयेत्" इत्यनेनैव प्रत्युक्तमव्यवस्थितत्वान्मतानामनिर्वचनीयवाद एव शरणीकरणीय इत्येव वरम् । यद्वा–सर्वत्र यत्प्रमाणं दृष्टं तद्दिशांशेन तद्बोद्धव्यं तेन पञ्चाशत्कोटिस्थाने सार्द्धकोटिद्वयविस्तारा भूमिः।लक्षस्थाने पञ्चसहस्त्रविस्तारो जंबूद्वीपः । नवसहस्त्रस्थाने सार्द्धचतुःशतयोजनायामं भारतखंडम् । अस्मिन्पक्षे उदाहरिष्यमाणवैष्णवादिवाक्येभ्यो जंबूद्वीपश्चतुर्दलकमलाकारस्तस्य चांतःपरिधिः षट्शताधिकान्यष्टादशयोजनसहस्राणि । त्रयस्त्रिंशच्छतानि मध्यव्यासः । तेन फलतः पंचसहस्त्रव्यासता ज्ञेया । एवं सति यदा प्रागायतो हिमाचलः पूर्वपश्चिमसमुद्रौ स्पृष्ट्वास्ति तदायं भरतवर्षस्त्रिकोणो भवति । तेन पृथिवी त्रिकोणेति लोकप्रवादोऽनुभवश्चानुसृतो भवति । अन्यथा भरतवर्षस्य धनुराकारत्वे भूमध्यरेखाया लंकातः सेतुमार्गेण प्रस्थितायाः "पुरी रक्षसां देवकन्याथ कांची सितः पर्वतः पर्यली वत्सगुल्मम् । पुरी चोज्जयिन्याह्वया गर्गराटं कुरुक्षेत्रमेषा भुवो मध्यरेखा ॥" इति स्मर्यमाणया मध्यरेखया कुरुक्षेत्रस्य रामसेतुः सन्निहितो द्वारका च दूरे स्यात् । द्वारकासमीपे सेतुश्च दूरे इति प्रत्यक्षमुपलभ्यते । भारतवर्षस्य त्रिकोणत्वमित्येषैव कल्पना साधीयसीति दिक् । इत्थं नीलकंठेन भारते तदुक्तरीत्या विचारितं विरोधोप्यपहृत इति । किञ्च "हस्तोंगुलिविंशत्या चतुरान्वितया चतुष्करो दंडः । तद्विसहस्रं क्रोशो योजनमेकं चतुष्क्रोशम् ॥" इति स्मृतिसारादौ द्वात्रिंशत्सहस्रहस्तैरेकं योजनं भवति । "द्वात्रिंशत्सहस्रैस्तु हस्तैस्स्याद्योजनं भुवः" इति संहितोक्तेः । "चतुर्विंशैरंगुलैस्तु हस्त एकोभिधीयते" इति च । अत्र च सद्योजातबालयुवाद्यंगुलभेदस्य तारतम्यवशाद्धस्तस्यापि तारतम्यं भवति तेन च क्रोशयोजनादेरपि तारतम्यं सेत्स्यति । यद्वा–"पाणिः शयः शमो हस्तः पंचशाखः करस्तथा" इति कोशात्प्रसिद्धमणिबंधादुपरितनो भागः कनिष्ठाद्यंगुलितोष्टांगुलनवांगुलान्यतरमित एव हस्तो भवति । "दानानि देयानि च विप्रहस्ते" इत्युक्तेर्भुग्नहस्तेनैव संकल्पग्रहणात्तत्रापि हस्तशब्दप्रयोगात् । सोपि भुग्नांगुलित्वे चांगुलचतुष्टयात्मकोपि भवति । बालस्य ततोऽपि तथैव न्यूनो भवति । तथा च तत्तन्मितहस्तैर्योजनगणनया ज्योतिःशास्त्रपुराणेतिहासानां विरोधो यथाकथंचित्परिहृतः स्यादेव । न हि 'व्यासो नारायणः स्वयम्' इत्यादिपुराणोक्तेः साक्षान्नारायणोक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाऽधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ३९
आशासु दिक्षु येऽधिनिवेशितास्ते आसते ॥ ३९ ॥

मुलंध्य ज्योतिःशास्त्रं प्रवृत्तम् । किञ्च 'ज्योतिषं चक्षुरुच्यते' इति साक्षाद्वेदचक्षूभूतं ज्योतिःशास्त्रमुलंध्य श्रीव्यासोऽपि प्रवृत्तस्तेन तत्तदंगुलहस्ताद्यभिप्रायैव तत्तद्योजनोक्तिस्तत्रतत्रोह्या । किञ्चासुरजनकर्तृकशास्त्रप्रवृत्तिसंकोचार्थं श्रीव्यासदेवस्तत्रतत्र ज्योतिःशास्त्रविरुद्धमिव वदति न वस्तुत इति तत्त्वमन्यथा श्रीव्यासस्य वेदांधकारता स्यादिति ध्येयं सुधीभिः ॥ ननु कथं तर्हि भागवतज्योतिःशास्त्रयोर्विरोधः भागवते लक्षयोजनमिता जंबूद्वीपभूर्वर्णिता ज्योतिःशास्त्रे पञ्चसहस्रयोजनपरिमितैवाखिलेति चेदस्य समाधिर्गोलादर्शे विहिता तदनुरोधेन सारतः किञ्चिदुच्यते—पृथिव्या आकारद्वयमस्ति एको महत्परिमाणको विशेषाकारः । द्वितीयो ज्योतिःशास्त्रोक्तः स्वल्पपरिमाणको गोलाकार एव । एवमेव परीक्षिन्महाराजेन पृष्टं श्रीशुकयोगीन्द्रेणाप्युत्तरितं भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्याम इति भूगोलकपदेन ज्योतिःशास्त्रोक्तो गोलाकारो मार्त्तिकोण्डः । विशेषपदेन मंडलाकारपुराणोक्तो हिरण्मयोण्डः । उक्तं च योगिनिर्याणे द्वितीयस्कंधे 'ततो विशेषं प्रतिपद्य निर्भयः' इति । पञ्चमेऽप्युक्तं—"काञ्चनी ततोन्यादर्शतलोपमा" इत्यादि । तृतीयेप्युक्तम् "एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः" इत्यादि । "यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्त्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते" इति सिद्धार्थदृष्टान्तेन गोलाकारत्वं प्रतीयते ॥ "प्रेक्षयित्वा भुवो गोलं यावद्यद्वै स्वसंस्थया" इति कर्दमविहारेप्युक्तम् । श्रीदशमेऽप्यष्टमाध्याये "सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः । साद्रिद्वीपाब्धिभूगोलम्" इत्यादिप्रामाण्यात्पृथिवीद्वयं स्वीकार्यम् । ननु स्वल्पा पृथिवीयं महती कुत्रास्ति परेति । उच्यते । महती तु नक्षत्रकक्षाया ऊर्ध्वं प्रतिबिम्बरूपा तन्मानं पञ्चमे लक्षोत्तरसार्द्धनवकोटियोजनं परिमंडलं भूवलयस्येति स्थूलदृष्ट्या भकक्षोर्ध्वभाग एवायाति । अथ कथं प्रतिबिम्बवत् कथमेतदाकारा स्या तद्यथा समंतात्पञ्चसहस्रयोजनात्मकस्य समंताद्योजनान्तारितोऽनलगोलस्तेन दूरकान्तवत्स्वल्पाया अप्यस्या नक्षत्रकक्षाया उपरि या कांचनी भूमिर्निर्मलरूपा तत्तेजोव्यवधानकारी तत्र महत्प्रतिबिम्बस्समंतात् यथा दूरकांते एकत्र महतोऽल्पत्वं दृश्यते परत्राल्पस्य महत्त्वम् एवं बाह्यांगानां चन्द्रादीनामल्पत्वमंतर्गतस्य भूगोलस्य महत्त्वम् । नन्वनलगोले किं प्रमाणम् । उच्यते । सवासनं प्रमाणं भूपृष्ठतः खगकक्षापर्यंतमष्टौ वायव आवहादयः संति उभयोर्योगे जलगोलः तदुक्तं पुलिशसिद्धान्ते—"भूवातोद्वहयोर्योगे जलगोलोस्ति काचवत् । दृश्यंते येन संलग्ना भिन्नाः सूर्यादिरश्मयः" इति । सूर्यसिद्धान्तेऽपि—"अत्यासन्नतया तेन ग्रीष्मे तीव्राः करा रवेः" इति अत्यासन्नत्वं दूरत्वं चानलगोलप्रतिबिंबतार्केण विना न संभवति । श्रीशुकयोगींद्रैस्तु पुराणानुगैर्महत्प्रमाणमेव व्याख्यातम् । स्वल्पप्रमाणन्तु सूचितमेव इत्थं कैश्चिद्विरोधः परिहृतः ॥ एवं खगोलविरोधोऽपि परिहृतस्तथाहि—"एतेन दिवो मानं तद्विद उपदिशंति" इति। अस्यार्थः—एतेन भूगोलकेन्द्रेण दिवो मंडलानां ग्रहनक्षत्रादिकक्षादिकक्षाणामौच्चयपरिध्यादीनामिति। "यथा द्विदलयोर्निष्पावादीनामंतरेणान्तरिक्षमुभयसंधितम्" इति। अस्यार्थः—भूगोलद्युमंडलयोः संधितम् अंतरिक्षमंतरेण मानं विनांतरिक्षस्य तु मानं नास्ति यथा द्विदलयोर्निष्पावादीनां मानं नास्ति । "यन्मध्यंगतो भगवांस्तपतां पतिः" इति । अस्यार्थः—यस्यांतरिक्षस्य मध्यमिव मध्यं जलगोलः यथांतरिक्षस्य मध्याभावस्तथा गोलरूपत्वाज्जलगोलस्यापि तत्र गतः प्रतिबिंबरूपेण संस्थित इति । बिंबरूपेण तु भूकेन्द्रात्सपादलक्षयोजनेष्वस्ति।एवं "नवकोटय एकपञ्चाशल्लक्षाणि मानसोत्तरपरिवर्तनस्योपदिशंति" इति । अस्यार्थः—मानसश्चन्द्रस्तदपेक्षया उत्तरः परः शनिस्तन्मंडलस्य मानं ज्यौतिषोक्तकरणार्थं शन्यंशयुतं जातं द्वादशकोटिमितमष्टषष्टिलक्षमिति । "सूर्य्योंडगोलयोर्मध्ये कोटयः स्युः पञ्चविंशतिः ।" अस्यार्थः—सूर्यस्य बिंबितार्कस्यांडगोलो हिरण्मयोंडपरिधिस्तयोर्मध्येंतः पञ्चविंशतिकोटयः स्युरिति । "अंडमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम्" अस्यार्थः—द्यावाभूम्योर्नक्षत्रकक्षाभूम्योर्यदंतरं तदेवांडस्य हिरण्मयांडस्य । तत्रांतः सूर्यो जलगोलप्रतिबिंबितार्को भवतीति ज्ञेयम् । एवमादि समाधानं गोलदर्पणे तत्तद्रीत्या ज्ञेयम् । अनेन यथार्थार्थसार्थसमर्थनेन निःसंशयं श्रीमद्भागवतं परमाप्तवाक्यत्वात्सर्वथा प्रमाणमेवाप्रतिहतं सकलशास्त्रसिद्धान्तसाद्गुण्यादिति हि निर्विवादम् । एतद्विरोधपरिहारो यः पूर्वमेव मायाऽलेखि स एव समीचीनः प्रतिभातीति किं बहुना ॥ ३८ ॥ तस्य लोकालोकस्योपरिष्टादुपरिदेशे परत्र वा सकललोकानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां स्वविभूतीनां लोकपालानां च विविधवीर्योपबृंहणाय भगवान् परममहापुरुषो महाविभूतिपतिरंतर्याम्यात्मनो विशुद्धसत्त्वंधर्मज्ञानवैराग्यै श्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदंडैः संधारयमाणस्तस्मिन् गिरिवरे समंतात् सकललोकस्वस्तय आस्ते ॥ ४० ॥ आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथायेत्यर्थः ॥
॥ ४१ ॥ योंतर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद् बहिर्लोकालोकाचलात् ततः परस्ताद् योगेश्वरगतिं विशुद्धामुदाहरंति ॥ ४२ ॥ अंडमध्यगतः सूर्यो द्यावाभूम्योर्यदंतरम् ॥ सूर्यांडगोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः ॥ ४३ ॥ मृतेंड एष एतस्मिन् यदभूत् ततो मार्तंड इति व्यपदेशः ॥ हिरण्यगर्भ इति यद्धिरण्यांडसमुद्भवः ॥ ४४ ॥

तेषां दिग्गजानां स्वविभूतीनां स्वांशभूतानां महेंद्रादीनां च विविधवीर्योपबृंहणाय सकललोकस्वस्तये च भगवांस्तस्मिन्नास्ते इत्यन्वयः । किं कुर्वन् आत्मनः स्वस्य यद्विशुद्धं सत्त्वं तत्संधारयमाण आविष्कुर्वन् । कीदृशम् । धर्मज्ञानादीन्यष्टमहासिद्धयश्चोपलक्षणं यस्य तत् । दोर्दंडैरुपलक्षितः सन्महाविभूतेः परमैश्वर्यस्य पतित्वादेकयैव मूर्त्या समंतादास्ते ॥ ४० ॥ नन्वंतर्यामिणांतःस्थेनैव सर्वं कर्तुं शक्यं किं तस्य बहिः समंतादवस्थानेनेत्याशंक्य तस्यार्थं स्वयमेव व्याचष्टे । आत्मनो योगमायया विरचिता या विविधलोकयात्रा तस्या गोपीथाय रक्षणाय एष भगवानेवंभूतमाकल्पं वेषं गतो लीलया प्राप्त इति समंतादास्त इत्यस्यार्थः ॥ ४१ ॥ अलोकपरिमाणं च मेरोरेकतः सार्धद्वादशकोटयः ततो लोकालोकात् अलोकाद्वा । परस्तात् विशुद्धां द्विजपुत्रानयनेऽर्जुनस्य श्रीकृष्णेन प्रदर्शिताम् ॥ ४२ ॥ विस्तरेणोक्तं ब्रह्मांडमानं सर्वतोऽपि निरूपयति । अंडमध्यगतः किं तन्मध्यं तदाह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदंतरं मध्यस्थानम् । सर्वतः पंचविंशतिकोटयः ॥ ४३ ॥ अंडमध्यावस्थाने कारणं तन्नामनिर्वचनेनाह । मृतेऽचेतने एष सूर्यो वैराजरूपेण यस्मा

स्थितिहेतवोऽन्यथा भूमेर्नमनोन्नमनादिना लोकस्थितिर्भ्रश्येतेति भावः ॥ ३९ ॥ आदिना यशःश्रियोर्ग्रहणम् । पुनरादिना नंदसुनंदादिग्रहः ॥ ४० ॥ अत्राशंकते नन्विति । 'आकल्पः कल्पने वेषे' इति मेदिनी । यद्वाऽऽकल्पपर्यंतमेवं प्रकारेण गतः लोकालोकं प्राप्त इत्यर्थः । स्वशक्त्या रचितं विश्वं स चेन्न पालयेत्तर्हि कः पालयेदिति भावः ॥ ४१ ॥ विश्वनाथस्तु–द्वाविंशतिलक्षोत्तरं कोट्यष्टकं बहि सर्वदिक्ष्वित्याह । लोकालोकात्परत्र तु तम एव "लोकालोकं तथातीत्य विवेश सुमहत्तमः" इति श्रीदशमे वक्ष्यमाणत्वाद्योगेश्वरास्तमो गच्छंतीत्यायातं तत्राहालोकाद्वेति । योगेश्वराणामावरणाष्टकं विभिद्य मुमुक्षूणां नारदादीनां वा । विशेषेणशुद्धो विशुद्धः श्रीकृष्णस्तेन दर्शितां विशुद्धाम् वृद्धिङीबभावौ त्वार्षौ ॥ ४२ ॥ द्यावाभूम्योर्भूलोकभुवर्लोकयोः । सूर्यादूर्ध्वगोलकपर्यंतं यथा पंचविंशतिकोट्यस्तथाऽधोगोलकपर्यंते चेत्यर्थः । उपरिष्टादुपपत्तिमत्र्यां व्याख्यास्यामः ॥ ४३ ॥ एष सूर्य इत्यन्तर्याम्यभेदविवक्षयोक्तम् । स एव क इत्यत आह–हिरण्यगर्भः समष्टिजीवसूक्ष्मोपाधिरूपः यद्यत एष हिरण्यांडस्य तदीयस्थूलस्य संभवः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्येण हि विभज्यंते दिशः खं द्यौर्मही भिदा ॥ स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥ ४५ ॥ देवतिर्यङ्मनुष्याणां सरीसृपसवीरुधाम् ॥
सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ४६ ॥ ॥ इति श्रीभा० महा० पंचमे भुवनकोशवर्णने समुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणो
नाम विंशतितमोऽध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः ॥ १ ॥ एतेन हि दिवो
मंडलमानं तद्विद उपदिशंति ॥ यथा द्विदलयोर्निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितम् ॥ २ ॥ यन्मध्यगतो भगवां स्तपतां पतिस्तपन
आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा ॥ स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमान
स्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ३ ॥

त्वविष्टः ॥ ४४ ॥ किं च । सूर्येणैव विभज्यंते दिशः । खमंतरिक्षम् । भिदा अन्योऽपि विभागः । स्वर्गापवर्गौ भोगमोक्षदेशौ रसौकांस्यतलादीनि ॥ ४५ ॥ उपा
सनार्थमाह । देवादीनां सूर्य आत्मा दृगीश्वरो नेत्राधिष्ठाता च ॥ ४६ ॥ इति श्रीभा० पंचमस्कंधे टीकायां विंशतितमोऽध्यायः ॥ २० ॥ एवमध्यायविंशत्या भूमर्या
दा निरूपिता ॥ अतः परं द्युमर्यादापालनं त्रिभिरुच्यते ॥ १ ॥ एकविंशे रवेः कालचक्रेण भ्रमतोऽन्वहम् ॥ स्वगत्या राशिसंचारैर्लोकयात्रा निरूप्यते ॥ २ ॥
एतावान्विस्तारेण कोटयः पंचाशत् । उत्सेधेन पंचविंशतिः ॥ १ ॥ द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मानमुपदिश्यते तद्वत् ते अंतरेण तयोर्मध्ये तदुभयसंधितं
ताभ्यामुभयतः संलग्नम् ॥ २ ॥ उदगयनादिसंज्ञाभिर्मंदक्षिप्रसमगतिभिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानो मकरादिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ३ ॥

सम्यग्विद्यमानता ॥ ४४ ॥ अन्यद्विशेषमाह—किं चेति । अत्रोपपत्तिमाह—दिशां विभागस्तूदयादिना यत्रोदेति सा प्राची यत्रास्तमेति सा प्रतीची यत्र मध्याह्नं सा दक्षिणा यत्र निशीथः सोत्तरेति यत्र दिक्स्थेन स्पृश्यते सा
विदिगिति । खदिवोस्तु विभागस्तदंतर्गत्या मह्यास्तु प्रकाश्यत्वेन तद्विदानां द्वीपादीनामपि तथैव स्वर्गापवर्गयोस्तत्प्राप्तिद्वारत्वेन सूर्यमंडलं प्राप्तस्यैव तत्प्राप्तिश्रुतेः । ‘ तरणिर्देवयानं द्वारं विमुक्तेः ’ इत्यष्टमे वक्ष्यमाणत्वात् ।
“ तेऽर्चिरभिसंभवंति ” इत्यादिश्रुतेश्च नरकरसौकसां विभागस्तु स्वप्रकाशवर्जनद्वारेति ध्येयं सुधीभिः । सर्वशः सर्वथा प्रकारेऽपि शस् अत्रार्षः ॥ ४५ ॥ “ सूर्य आत्मा जगतस्तस्थुषश्च ” इति श्रुतेः । सर्वेषां
जीवानां ये निकाया संघास्तेषामात्मा दृग् द्रष्टा च । “निकायस्तु पुमांल्लक्ष्ये सधर्मिप्राणिसंहतौ । समुच्चये संहतानां निलये परमात्मनि॥” । इति मेदिनी । तान्निर्दिशति—देवेति ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिका
प्रकाशे पञ्चमस्कन्धे विंशोऽध्यायः ॥ २० ॥ अतो भूमर्यादाकथनानंतरम् (१) कालचक्रेण शिशुमारेण सह (२) भूवलयस्येति । भुवः पर्यक् स्थितानां देशानां ग्रहणम् ॥ १ ॥ एतेन भूगोलकमानेन ।
तद्विदः ज्योतिःसिद्धांतज्ञाः । निष्पावः शूकशिंबी राजमाषो वा । तदादीनामिति तद्गुणसंविज्ञानबहुव्रीहिणा कलायादीनामित्यर्थः । “ निष्पावः शूर्पपवने राजमाषे कडंगके । पवने शिबिकायां ना निर्विकल्पेऽन्य
लिंगकः ॥ ” इति मेदिनी । ते अंतरेणेति । विनादियोगे द्वितीया । अंतरिक्षं लक्षद्वयप्रमाणमिति चक्रवर्ती । यस्यांतरिक्षस्य मध्यगतः ॥२॥ मांद्यशैघ्र्येति स्वार्थष्यजंतम् । उदगयननाम्ना मंदया गत्याऽऽरोहणस्थाने यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा मेषतुलयोर्वर्तते तदाऽहोरात्राणि समानानि भवंति यदा वृषभादिषु पंचसु च राशिषु चरति तदाऽहान्येव वर्धते ह्रसति च मासिमास्येकैका घटिका रात्रिषु॥४॥यदा वृश्चिकादिषु पंचसु वर्तते तदाऽहोरात्राणि विपर्ययाणि भवंति॥५॥यावद्दक्षिणायनमहानि वर्धते यावदुदगयनं रात्रयः॥६॥ एवं नवकोटय एकपंचाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशंति ॥ तस्मिन्नैंद्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ ७ ॥

तत्प्रपंचयति । यदेति । अत्यंतवैषम्याभावात्समानानीत्युक्तं सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य यद्यपि वृषभमिथुनयोरेवाह्नां वृद्धिः कर्कटादिषु ह्रासस्तथापि रात्र्यपेक्षयाऽधिकत्वाद्वर्धंत इत्युक्तम् । एवं रात्रिवृद्धावपि दिनापेक्षया ह्रसतीत्युक्तम् । एकैकेति स्थूलदृष्टयोक्तम् । वृद्धिह्रासयोः प्रतिमासवैषम्यात् ॥ ॥ ४ ॥ विपर्ययाणीति अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः ॥ ५ ॥ तद्वृद्धिह्रासकालमाह । यावदिति ॥ ६ ॥ एवं मंदादिगतिभिः नव कोटय इति मेरोरुभयतो मानसोत्तरस्यांतर्विस्तारेण पंचदशलक्षाधिककोटित्रयपरिमितेनेदं परिमंडलमानमुन्नेयम् । एवं पंचदशभिर्घटिकाभिरित्यादिष्वपि त्रैराशिकगणितेन तत्तन्मानमुन्नेयम् । अत्रापेक्षितो विशेषः पुराणांतरादवगंतव्यः । तत्रारोहणादिस्थानानि वायुपुराणे दर्शितानि । "सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ॥ स्थानं जरद्गवं मध्यं तथैरावतमुत्तरम् ॥ वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः" इति तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । आर्षभी गोवीथी जरद्गवी चेति वैषुवते मध्यममार्गे वीथीत्रयम् । अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयम् । तदप्युक्तं तत्रैव । "अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता ॥ रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥ पुष्याश्लेषा तथाऽऽदित्या वीथी चैरावती स्मृता ॥ एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥ तथा द्वे चापि फाल्गुन्यौ मघा चैवार्षभी मता ॥ हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दिता ॥ ज्येष्ठा विशाखाऽनुराधा वीथी जारद्गवी मता॥एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥ मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता॥श्रवणं च धनिष्ठा च मार्गी

सवनं सवनमतिक्रम्याभिपद्यमानश्चलन् मकरादिषु पंचसु राशिषु अहानि क्रमेण दीर्घाणि रात्रींश्च ह्रस्वा विधत्ते । दक्षिणायननाम्ना क्षिप्रगत्याऽवरोहणे कर्कादिषु पंचसु राशिषु अहोरात्रान् ह्रस्वदीर्घान् विधत्ते । वैषुवतसंज्ञया उत्तरायणदक्षिणायनमध्यवर्तिन्या समानया गत्याऽहोरात्रान्समानान्विधत्ते ॥ ३ ॥ तत् पूर्वोक्तम् । यदेति । एकस्य दक्षिणोत्तरगोलसंज्ञस्येत्यर्थः ॥ ४ ॥ इत्यर्थ इति । वृषादिपंचापेक्षया विपरीतानि भवंतीति भावः ॥ ५ ॥ यावद्दक्षिणायनमिति । उत्तरायणाद्दक्षिणायनपर्यंतमित्यर्थः एवमग्रेपि ॥ ६ ॥ मेरुमानसोत्तरयोरंतरस्य मानं पञ्चदशलक्षाधिककोटित्रयं सूर्यरथवर्त्मनश्च लक्षद्वयमित्येवं सप्तदशलक्षोत्तरकोटित्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रत्यानां दिवसमध्यंगत एव सदादित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥ ८ ॥

शतभिषस्तथा ॥ वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता ॥ एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते " इति । याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः । मार्गी मृगवीथी । एवं स्थिते उत्तरायणे ध्रुवेण युगाक्षकोटिनिबद्धवायुपाशद्वयाकर्षणे रथस्यारोहणम् । तदाभ्यंतरमंडलप्रवेशो गतिमांद्यं चेति दिनवृद्धी रात्रिह्रासश्च । दक्षिणायने च पाशप्रेरणादवरोहणे बहिर्मंडलप्रवेशो गतिशैघ्र्यं चेत्यहोरात्रयोर्विपर्ययः । वैषुवते तु पाशसाम्यात्समावस्थाने मध्यमंडलप्रवेशो गतिसाम्यं चेत्यहोरात्रयोः साम्यमिति । तथा च पुराणांतरे । "आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ ॥ तदाभ्यंतरतः सूर्यो भ्रमते मंडलानि तु ॥ ध्रुवेण मुच्यमानेन पुना रश्मियुगेन तु ॥ तथैव बाह्यतः सूर्यो भ्रमते मंडलानि च" इति । तदेतदुक्तम्—"यदा मेषतुलयोः" इत्यादिना । उदयास्तादिकं वक्तुमाह । तस्मिन्मानसोत्तरे मेरोः पूर्वत ऐंद्रीं पुरीमुपदिशंतीत्यनुषंगः । तासु पुरीषूद यादीन्युपदिशंति।चतुर्दिशमित्युक्ते ये मेरोर्दक्षिणे देशे तेषामैंद्रीमारभ्य पूर्वादयः। ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वे तेषां सौम्यामारभ्य ॥ ७॥ तत्रत्यानां मेरुस्थानाम् । सव्येनेति । नक्षत्राभिमुखतया स्वगत्या मेरुं वामतः कुर्वन्नपि प्रदक्षिणावर्तप्रवहाख्यवायुभ्राम्यमाणज्योतिश्चक्रवशात्प्रत्यहं दक्षिणतः करोति । अत श्चक्रगतिवशादतिदूरतो भूसंलग्नस्येव दर्शनमुदयः आकाशमारूढस्येव दर्शनं मध्याह्नः भूमिं प्रविष्टस्येव दर्शनमस्तमयः ततोऽतीवदूरगमने निशीथ इति समुद्रतीरस्थदृष्ट्या च । "अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति " इति श्रुतिर्व्यवहारो न वस्तुतः । तदुक्तं वैष्णवे । "उदयास्तमये चैव सर्वकालं तु संमुखे ॥ दिशास्वशेषासु तथा मैत्रेय विदिशासु च ॥ यैर्यत्र दृश्यते भास्वान्स तेषामुदयः स्मृतः ॥ तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः ॥ नैवास्तमनमर्कस्य नोदयः सर्वदा स्मृतः ॥ उदयास्तमनाख्यं

येण त्रिगुणीकृतेनैतत्परिमंडलमानं सर्वमंडलमानम् । एवं त्रिविधगतिभिस्त्रिविधराशिषु वर्त्तमानस्य सूर्यरथस्यैकस्मिन्नहोरात्रे मानसोत्तरशिखरे यत्परिवर्त्तमानं परितो गमनं तस्य मार्गमेकपञ्चाशल्लक्षाधिकनवकोटय इति तन्मार्गज्ञा उपदिशंतीत्यर्थः । एवं परिमंडलमानवत् । त्रैराशिको नाम सूत्रमस्ति लीलावत्यां " प्रमाणमिच्छा च समानजाती आद्यंतयोस्तत्फलमन्यजातिः । मध्ये तदिच्छाहतमाद्यहृत्स्यादिच्छाफलम् " इत्युक्तलक्षणं तच्च गणितज्ञज्ञेयमस्ति । तत्तन्मानं तस्यतस्य लंघितदेशादेः प्रमाणमुन्नेयं ज्ञेयम् । अत्र प्रकृतेऽपेक्षितोऽपेक्षाविषयो विशेषो भेदः । तत्र विशेषापेक्षायाम् । उदयमध्याह्नयोः प्रवृत्तिनिमित्तत्वं निशीथास्तमनयोर्निवृत्तिनिमि त्तत्वं समयविशेषेण संकेतविशेषेण । न हि सर्वदा संचरत उदयादिकमस्तीति भावः । " समयः शपथाचारसिद्धांतेषु तथा धियि । क्रियाकारेऽथ निर्देशे संकेते कालभाषयोः ॥ " इति मेदिनी । आभ्यंतरमंडलप्रवेशो मंदगतिश्चेति आभ्यंतरमंडलस्य स्वल्पभूमित्वात्परिवर्त्तस्य बहंशेऽपि सूर्यादिदृष्टिविषयो भवति मेढीसंनिकृष्टवृषभवद्गतेश्च मांद्यं भवतीत्यर्थः । मंडलं चेदमेतद्वर्षोपर्य्येव गच्छति उत्तरायणमध्याह्ने मूर्द्धन्येव सूर्यो दृश्यत इति । एवं बहिर्मंडलस्य बहुभूमित्वादस्तमारभ्य परिवर्तस्य स्वल्पांश एव सूर्यादिर्दृश्यते मेढीविप्रकृष्टवृषभवद्गतेश्च शैघ्र्यं भवतीत्यर्थः । एवमग्रेऽपि ॥ ७ ॥ उदयास्तमध्याह्ननिशीथानां वर्षभेदेन व्यवस्थामाह—यत्रेति । समान सूत्रनिपाते निश्चितसंमुखदेशे । निम्लोचत्यस्तं गच्छति । उदयानंतरं त्रिंशद्घटिकांते स्पंदेनाकाशमध्यस्थः सन्प्रस्वेदोद्गमेन तस्य देशस्य समानसूत्रपातविषयीभूते देशे त्रिंशद्घटिकानंतरं गतः सन्निति शेषः । प्रस्वापयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचाति यत्र क्वचन स्यंदेनाभितपाति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यंति ये तं समनुपश्येरन् ॥ ९ ॥ यदा चैंद्रयाः पुर्याः प्रचलते पंचदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्धद्वादशलक्षाणि साधिकानि चोपयाति ॥ १० ॥ एवं ततो वारुणीं सौम्यामैंद्रीं च पुनस्तथाऽन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यंति सह वा निम्लोचंति ॥ ११ ॥ एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥ १२ ॥

हि दर्शनादर्शनं रवेः ॥ शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ॥ विकर्णौ द्वौ विकर्णस्थस्त्रीन्कोणान् द्वे पुरे तथा " इति । अत एव तत्रैवोक्तम् "तस्माद्दिश्युत्तरस्यां वै दिवा रात्रिः सदैव हि॥सर्वेषां द्वीपवर्षाणां मेरोरुत्तरतः स्थितिः" इति। यतो यत्र यः पश्यति सैव तस्य प्राची तस्य वामतो मेरुस्तिष्ठतीति॥८॥यथोक्तमुदयास्तमनाद्यनियमं दर्शयति यत्रोदेतीत्यादिना । स्यंदेन स्वेदोद्गमेन । प्रस्वापयति निशीथं करोति । ये तं समनुपश्येरन् प्रस्वापसमानसूत्रस्थाः॥९॥साधिकानि पंचविंशतिसहस्राधिकानि ॥ १०॥ सह वा सहैव।यद्यपि वस्तुतः सूर्यस्यापि नक्षत्रैः सहैवोदयास्तमयौ तथापि तस्य तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तम्॥ ११ ॥त्रयीमय इत्याद्युपासनार्थम्॥ १२॥

निशीथं करोति येऽस्तमुदयञ्चानुपश्येरंस्ते जनास्तत्र गतं सूर्यं न पश्यंत्यत एव स्वपंति तेन च मेरोर्दिक्चतुष्टये स्थितेषु मध्ये यदा यत्र सूर्यस्योदयो दृश्यते तदैव तस्मात्पूर्वे वर्षे मध्याह्नः पश्चिमे वर्षे निशीथः उत्तरवर्षे निम्लोचो ज्ञेयः । एवं मध्याह्नदर्शनसमय एव पूर्ववर्षे निम्लोचः पश्चिमवर्षे उदय उत्तरवर्षे निशीथश्च ज्ञेयः । अस्तदर्शनसमये एव पश्चिमवर्षे मध्याह्नः पूर्ववर्षे निशीथ उत्तरवर्षे उदयश्च ज्ञेयः । तदेवं सर्ववर्षस्था अपि मेरोर्दक्षिणदेशस्थाने चात्मनो मन्यमानाः स्ववर्षे सूर्यस्योदयमध्याह्ननिम्लोचान्पश्यंत एवान्येषु वर्षेषु तान्पूर्वोक्तविवेकेन जानंतीति संक्षेपः । विष्णुपुराणीयश्लोकव्याख्या—यदा शक्रपुर्यां तिष्ठति तदा पुरत्रयमिंद्रयमसौम्यानां पुरं विकर्णौ द्वावीशानवह्निकोणौ स्पृशति अन्यपुरेषु विकर्णेषु च स्पर्शाभावो मेरुणा व्यवायात् ।एवं विकर्णस्थो वह्निपुरस्थो यदा भवति तदा त्रीन्वह्निनिर्ऋतीशानकोणान्द्वे पुरे इंद्रयमपुरे च स्पृशति नान्यद्वोक्तयुक्तेरिति । एवं याम्यादिपुरस्थस्यापि बोद्धव्यम्। एतद्भंग्यंतरेणाह—शक्रपुरे तिष्ठन् शक्रदिग्वर्षे मध्याह्नं दक्षिणदिग्वर्षे उदयम् उत्तरदिग्वर्षेऽस्तमनं करोतीति पुरत्रयस्पर्शः । अग्निकोणवर्षे प्रथमं याममीशानकोणवर्षे तृतीयं यामं करोतीति विकर्णद्वयस्पर्शः । विकर्णस्य अग्न्याद्यन्यतमकोणस्थः संस्त्रीन्कोणान्द्वे पुरे द्वे दिशौ च स्पृशति । तथाहि—अग्निकोणे तिष्ठन् अग्निकोणवर्षे मध्याह्नं नैर्ऋतकोणवर्षे उदयम् । ईशानकोणेऽस्तमनं करोतीति कोणत्रयस्पर्शः । तथा दक्षिणदिग्वर्षे प्रथमो यामः पूर्वदिग्वर्षे तृतीयो याम इति पुरद्वयस्पर्शो दिग्द्वयस्पर्शश्च एवमन्येषु कोणेष्वपि च द्रष्टव्यम् । अत एव रव्युदयास्तमनस्यानियतत्वादेव । तत्रैव विष्णुपुराण एव ॥ ८ ॥ ९ ॥ साधिकानीति । पादोनाष्टत्रिंशल्लक्षोत्तरकोटिद्वयमित्यर्थः । चतुर्गुणितान्येतानि योजनान्येकपञ्चाशल्लक्षाधिकनवकोटिसंख्याकानि भवंतीति तत्त्वम् ॥ १० ॥ ११ ॥ चतुस्त्रिंशदिति । मानसोत्तरमानं न त्वन्यत्र एवं पूर्वत्रापि । यत्तु ज्योतिःशास्त्ररीत्या तत्तद्देशे रव्युदयक्रमविचारेण रविपरिक्रमणीयं मंडलमिदं स्वल्पमेव प्रतीयते तत्स्वल्पचलताविदूरस्य स्वल्पस्यापि वृक्षादेः समसूत्रता बहुलदेशेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि संवत्सरात्मकं समामनंति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयंत्रचक्रवद् भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥ १३ ॥ तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन संमितस्तैलयंत्राक्षवद् ध्रुवे कृतोपरिभागः ॥१४॥ रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रविरथयुगो यत्र हयाश्छंदोनामानः सप्तारुणयोजिता वहंति देवमादित्यम् ॥१५॥ पुरस्तात् सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ॥१६॥ तथा वालखिल्या ऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवंति ॥ १७ ॥ तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवंतं सूर्यमात्मानं नानानामानं पृथङ्‌ नानानामानः पृथक्कर्मभिर्द्वंद्वश उपासते ॥ १८ ॥

द्वादश मासा अरा यस्य । षडृतवो नेमयो यस्य । त्रीणि चातुर्मास्यानि नाभयो यस्य । कृत इतरभागो यस्य । मानसोत्तरगिरौ लक्षार्धादुपरि वायुबद्धभूमाविति द्रष्टव्यं चक्रं वा तावदुच्छ्रितमिति मंतव्यम् । अन्यथाऽयुतमात्रोच्छ्रायत्वान्मानसोत्तरस्य मेरोश्चतुरशीत्युच्छ्रायत्वादक्षस्य साम्यानुपपत्तेः ॥ १३ ॥ तस्मिन्नक्षे चक्रप्रांते कृतमूलो निबद्धपूर्वभागः प्रथमाक्षो मेरुमानसोत्तरो यतः सार्धसप्तलक्षाधिकसार्धकोटिप्रमाणस्तस्य तुर्यमानेन सार्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षमानेन । ध्रुवे कृतो वायुपाशेन निबद्ध उपरिभागो यस्य ॥ १४ ॥ नीड उपवेशस्थानम् । गायत्र्यादिच्छंदोनामानः । अरुणेन योजिताः संतो देवं वहंति ॥ १५ ॥ पुरस्तात्स्थितोऽपि पश्चात्प्रत्यङ्मुख आस्ते । यद्वा । यत्सूर्यस्य पुरस्तात्तस्य वै पश्चिमत्वात्पश्चादित्युक्तम् । अश्वस्थानं च वायुनोक्तम् "सप्ताश्वरूपच्छंदांसि वहंते वामतो रविम् ॥ चक्रपक्षनिबद्धानि चक्रे चाक्षः समाहितः" इति ॥१६॥ सूक्तवाकाय सुभाषिताय ॥१७॥ एकैकशश्चतुर्दश द्वंद्वशः सप्तगणाः संतो मासिमास्युपासत इत्यन्वयः॥१८॥

नैव त्यक्तुं शक्यते तथातिदूरं व्योमगतेनापि रविणा स्वल्पभूमिसमसूत्रतेति रविचलनस्य स्वल्पत्वव्यवहारान्न विरुद्धं न च दृष्टिभ्रममात्रमिदं छायापि दृश्यमानतद्गतिमांद्यमनुकरोतीति ॥ १२ ॥ यस्य रथस्य ॥ १३ ॥ अक्षो धूः । तस्मिन्नक्षे दीर्घाक्षे ॥१४॥ रथनीडोऽत्र रथाश्रयानुगतवायुमयभूमिर्न तु सूर्योपवेशरथमध्यपीठं रथस्य स्वल्पप्रमाणत्वात् । तथैव वैष्णवे—"योजनानां सहस्राणि भास्करस्य रथो नव" इति । एवमेव हि दशसहस्रयोजनात्मकं वक्ष्यमाणं तन्मंडलं घटेतेति संदर्भः । गायत्रादीत्यादिना उष्णिगनुष्टुब्बृहतींपंक्तित्रिष्टुब्जगतीनां ग्रहः । तदुक्तं मात्स्ये पञ्चविंशाध्याये—" गायत्री चैव त्रिष्टुप् च जगत्यनुष्टुप्तथैव च ॥ पंक्तिश्च बृहती चैव उष्णिगेव तु सप्तमः । सप्ताश्वरूपाः छंदांसि वहंते वायुरंहसः ॥" इति ॥१५॥ पुरस्तात्पश्चाच्च नियुक्त इति कायव्यूहेनापि घटेतेति संदर्भः । प्रत्यङ्मुखः सूर्याभिमुख इत्यर्थः । ननु सूर्याभिमुखस्थितौ तु पूर्वाभिमुखता स्यात्सूर्यस्य प्रत्यङ्मुखत्वादित्यभिप्रेत्याह—यद्वेति । सूर्यस्य यः पुरस्तात्पुरोभागस्तस्यैव पश्चिमत्वादत उक्तं—पश्चादिति । सूर्यस्य पुरस्तात्पश्चिमाभिमुख एव स्थितः सारथ्यं करोतीत्यर्थः । यद्वा—पश्चात्पदेन प्रत्यङ् लक्ष्यते तच्च प्रत्यभिमुखमंचति प्राप्नोतीति प्रत्यङ् संमुख इत्यर्थः । नियोगोऽत्र ब्रह्मण एव ज्ञेयः ॥ १६ ॥ नियुक्ता ब्रह्मणाज्ञाप्ताः ॥ १७ ॥ तथा बालखिल्यादिवत् । ग्रामण्यो यक्षाः । यातुधाना राक्षसाः । " यक्षे ग्रामाधिपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षोत्तरं सार्धनवकोटियोजनपरिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुंक्ते ॥ १९ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रसूर्यरथमंडलवर्णनं नामैकविंशतितमोऽध्यायः ॥ २१ ॥ राजोवाच ॥ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति ॥ १ ॥ स होवाच ॥ यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रांतरे राश्यंतरे चोपलभ्यमानत्वात् ॥ २ ॥ स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसंतादिषु ऋतुषु यथोपजोषमृतुगुणान् विदधाति ॥ ३ ॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजंतोंजसा श्रेयः समधिगच्छंति ॥ ४ ॥

गव्यूतिः क्रोशद्वयं सगव्यूत्युत्तरं यथा भवति तथा ॥ १९ ॥ इति श्रीमद्भागवते पंचमे टीकायामेकविंशोऽध्यायः ॥ २१ ॥ द्वाविंशे सोमशुक्रादेः स्थानमाहोत्तरोत्तरम् ॥ तत्तद्वृत्त्यनुसारेण इष्टानिष्टे तथा नृणाम् ॥ १ ॥ राशीनामभिमुखमप्रदक्षिणं चोपवर्णितं सव्येन चलन् दक्षिणेन करोतीति वदता । अमुष्य वयं कथमनुमिमीमहि एतत्कथं ज्ञास्यामो विरुद्धत्वादित्यर्थः ॥ १ ॥ चक्रवशात्स्वतश्च गतिद्वयमविरुद्धमिति परिहारार्थः ॥ २ ॥ तत्तत्कालनियमेन कर्मणां विशुद्धेः साद्गुण्यस्य निमित्तभूतमात्मानं विभज्य । विजिज्ञास्यमानो वितर्क्यमाणः । यथोपजोषं यथाकर्मभोगम् ऋतुगुणान् शीतोष्णादीन् ॥ ३ ॥ वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्या

तक्ष्णि नापिते ग्रामणीर्मतः'' इति निरुक्तिः । 'यातुधाना रक्षांसि नैर्ऋता' इति नाममाला।देवा इहादित्या एव तदन्यानुक्तेस्तेऽपि स्वीयोपासनं कुर्वते ।'भगवंतं सूर्यमात्मानम्' इत्युक्तेश्च मासिमासि एकैकस्मिन्मासि द्वाभ्यांद्वाभ्यामृष्यादिभ्यां सप्त गणा भवंतः । अत एव द्वादशे वक्ष्यति 'संयुक्तानामधीश्वरैः' इति । एकैकस्यर्ष्यादेरेकैको नियंता नामतोऽनुक्तोऽपि संयुक्तानामधीश्वरैरित्युक्तेर्ज्ञेयः । किं च द्वंद्वशः स्त्रीसहितास्संतः । सप्तेत्यर्थांगीकारे तु महाभारतशांतिपर्वांतर्गतमोक्षधर्मोपाख्यानीयात्रेयद्विजपद्मनाभनागोपाख्यानविरोधः स्यात् तथाहि—कश्चनात्रेयो विप्रस्समागतातिथेः सकाशाद्धर्मनिश्चयमलभमानस्तत्प्रेरितो गोमतीतीरस्थनागपुरे पद्मनाभनागपार्श्वे तन्निश्चयार्थं गतः स च तत्पत्न्याऽर्चित उक्तश्च—भो विप्र मत्पतिः पद्मनाभः सूर्यरथं परिवोढुं स्वावसरप्राप्तमासि गतस्तं समाप्यात्रागमिष्यतीत्यतः स्त्रीरहिता एव सूर्यं प्रति मासमृष्यादय उपासतेऽन्यथा विरोधः स्यादस्य प्रकृतस्येति व्याख्यातृभिरपि महाविज्ञैः प्राक्तनैरित्थमव्याख्यातत्वाच्चेत्यलम् ॥ १८ ॥ संदर्भस्तु—भूवलयस्येत्येतं गद्यमाह । गव्यूतिरूपं यदुत्तरमधिकं तत्सहितं यथा भवति तथेत्यर्थः । सः सूर्यः । "निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षणः" इत्युक्तेस्त्रिनिमेषलक्षणकालेन क्षणेन । यत्तु भविष्ये उक्तं "योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्द्धेन क्रममाण नमोस्तु ते ॥" इति । तदित्थं समाधेयं निमेषौ चार्द्धे चैषां समाहारो निमेषार्द्धं तेन निमेषार्द्धेन । एकेन किंचिदधिकेनान्येन तेन द्वे शते इति लभ्यते । कर्त्तुः श्रीव्यासदेवस्योभयत्रैकत्वादेवान्यथोन्मत्तप्रलापितत्वापतेः ॥ १९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥ ॥ तत्तद्वृत्त्यनुसारेण वक्रादिरूपगत्या (१) अमुष्येति द्वितीयार्थे षष्ठी । इत्यर्थ इति । न ह्येकस्य युगपद्गतिद्वयं संभवतीति भावः ॥ १ ॥ सह भ्रमतां चक्रवैपरीत्येन चलताम् । अन्यैव स्वप्रयत्नसाध्या गतिः पृथगेव । तत्र हेतुः—प्रदेशांतरेष्विति ॥ २ ॥ स प्रसिद्धः । एष कालरूपी ॥ ३ ॥ वर्णाश्रमाचारमनुपथंतीति तथा । 'पथे—गतौ' धातुः । तमेतं सूर्यम् ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ स एष आत्मा लोकानां द्यावापृथिव्योरंतरेण नभोवलयस्य कालचक्रगतो द्वादशमासान् भुंक्ते राशिसंज्ञान् संवत्सरावयवान् मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशंति यावता षष्ठमंशं भुंजीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥५॥ अथ च यावताऽर्धेन नभोवीथ्यां प्रचराति तं कालमयनमाचक्षते ॥ ६ ॥ अथ च यावन्नभोमंडलं सह द्यावापृथिव्योर्मंडलाभ्यां कात्स्न्र्येन सह भुंजीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरामिति भानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति ॥ ७ ॥ एवं चंद्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते ॥ ८ ॥ अथ चापूर्यमाणाभिश्च कलाभिरमराणां क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते ॥ ९ ॥

आम्नातैः कर्मभिरिंद्रादिरूपं योगवितानैश्च ध्यानादिभिरंतर्यामिरूपं पूजयंतः ॥ ४ ॥ स एव स्वगत्या मासादिव्यवहारकारणमित्याह । स एष लोकानामात्मा द्यावापृथिव्योरंतरेण मध्ये यन्नभोवलयमंतरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतः । राशिभिर्मेषादिभिः संज्ञा येषाम् । चैत्रादिसंज्ञास्तु चांद्रमासानाम् । मासमाह । पक्षद्वयं मास इति चांद्रेण मानेन सपादं महानक्षत्रद्वयम् । सौरेण दिवानक्तं चाहोरात्रमिति पित्र्येण । षष्ठमंशं राशिद्वयम् ॥ ५ ॥ ६ ॥ मंडलाभ्यां सह भुंजीत । स ह स हि सूर्यः । यदा शुक्लप्रतिपदि संक्रांतिर्भवति तदा सौरचांद्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट् दिनानि वर्धंते चांद्रमानेन षट् ह्रसंतीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति। एवं पंच वर्षाणि गच्छंति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः संवत्सरो भवति । तदेवमवांतरभेदेन संवत्सरादिपंचकं समामनंति ॥ ७ ॥ सोमादीनामपि स्थानं कार्यं चाह । एवं चंद्रमा इति। अर्कगभस्तिभ्यो मंडलरूपेभ्यः सपादर्क्षाभ्यां सपाददिनद्वयेन॥८॥सर्वेषां जीवनिवहानां प्राणः अन्नमयत्वादमृतमयत्वा

अथ वाक्यालंकारे ॥ ५ ॥ अर्द्धेन मासषट्केन ॥ ६ ॥ द्यावापृथिव्योरिति । द्युमंडलपृथिवीमंडलयोर्मध्यवर्त्तिना नभोमंडलेन तुल्यत्वमेव ज्ञापितं न त्वाधिक्यम् । यदा शुक्लप्रतिपदीत्यादि तृतीयस्कंधे विवृतमेवेत्युपरम्यते ॥ ७ ॥ अर्कगभस्तयोऽर्कमंडलं ततो लक्षयोजनत इति भूतलाद्विलक्षयोजनत इत्यर्थः । यद्युग्रचारी कदाचित्स्यात्तदा द्रुततरगमनः सन् दिनेनैव पक्षभुक्तिं भुंक्तेऽन्यथा तु सार्द्धसप्तघटिकोत्तरेण दिनेनेत्यर्थः ॥ ८ ॥ आ पूर्यमाणाभिरिति । शुक्लकृष्णपक्षाभ्यां देवानामहोरात्रौ कृष्णशुक्लपक्षाभ्यां पितॄणामिति देवपितृपूजार्थमहोरात्रव्यवस्थेयम् । वस्तुतो देवाहोरात्री त्वयनद्वयेनैव ‘ वर्षेण दैवत ’ इत्युक्तेः । ओषधीशत्वेनान्नमयत्वात्प्राणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात् सर्वमय इति वर्णयंति ॥ १० ॥ तत उपरिष्टात् त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताऽष्टाविंशतिः ॥ ११ ॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात् सहैव वाऽर्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदाऽनुकूल एव प्रायेण वर्षयंश्चारेणानुमीयते स वृष्टिविष्टंभग्रहोपशमनः ॥१२॥ उशनसा बुधो व्याख्यातः तत उपरिष्टाद्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदाऽर्काद् व्यतिरिच्येत तदाऽतिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते ॥१३॥ अत ऊर्ध्वमंगारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुंक्ते यदि न वक्रेणाभिवर्तते प्रायेणाशुभग्रहोऽघशंसः ॥ १४ ॥

च अत एव जीवने हेतुत्वाज्जीवश्च ॥९॥ तदेवाह । य एष इति ॥१०॥ दक्षिणेनैव न तु तेषां पृथगन्या गतिरस्तीत्यर्थः । कालायने कालचक्रे उत्तराषाढाश्रवणसंधावभिजिन्नक्षत्रं फलविशेषेण पृथक्कल्पितं तेन सह । तथा च श्रुतिः "अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामधस्ताच्छ्रोणायाः" इति ॥ ११ ॥ पुरतः सूर्येण भोक्ष्यमाणे नक्षत्रे पश्चाद्भुंक्ते । सहैव भुज्यमाने चारेण क्रमस्थनक्षत्राद्यतिक्रमेण । वृष्टेर्विष्टंभः स्तंभनं यस्माद्ग्रहात्तमुपशमयतीति तथा ॥ १२ ॥ बुधो व्याख्यातः पुरतः पश्चात्सहैव वा चरतीति किंचिद्विशेषं चाह तत इत्यादिना । आशंसते सूचयति ॥ १३ ॥ अघशंसो दुःखसूचकः । यदि न वक्रेणाभिवर्तते तर्हि त्रिभिस्त्रिभिः पक्षैः ॥ १४ ॥

'अन्नं हि प्राणिनां प्राणः' इति स्मृतेः । अत एव जीवनहेतुत्वादमृतमयत्वाच्च जीवः ॥ ९ ॥ पुरुषः सर्वतोऽग्रगामी । 'पुर–अग्रगमने' धातुः । भगवान्सुरूपः मनोधिष्ठातृत्वान्मनोमयः । अमृतमयः जलमयः । 'पयः कीलालममृतम्' इत्यमरः । सुधामयो वा । प्राणानामाप्यायनं पूरणं स्वरश्मिभिरमृतवर्षणद्वारा धारणं तत्स्वभावत्वात्सर्वमयः सर्वपालकः ॥ १० ॥ ततः चन्द्रात् । त्रिलक्षेति । भूतलात्तु पंचलक्षयोजनतः । इत्यर्थ इति । नक्षत्राणामपि कालचक्रस्थत्वात्तद्गत्यैव तेषां गतिः । मेरुं प्रदक्षिणीकुर्वता कालचक्रेण तान्यपि प्रदक्षिणी कुर्वंतीति भावः । अभिजित्सत्त्वे प्रमाणमाह–तथा चेति । उत्तराषाढाचरमपादः श्रवणघटिकाचतुष्कश्चाभिजिन्मानं ज्योतिःशास्त्रे प्रोक्तमिति ॥ ११ ॥ ततो नक्षत्रेभ्यः । उशना शुक्रः । द्विलक्षेति । भूतलात्तु सप्तलक्षयोजनतः । वर्षयन्वर्षं कुर्वन् । क्रमस्थनक्षत्राद्यतिक्रमो यथा–अश्विनीतो भरणी गंतव्या तामुलंघ्य कृत्तिकासु गमनमित्येवंरूपः यस्माद् ग्रहाद्भौमादेः तं ग्रहम् । स्वदृष्ट्या स्वयोगेन वोपशमयति वृष्टिं कारयतीति भावः । "बुधशुक्रसमीपस्थः करोत्येकार्णवां महीम्" इत्याद्युक्तेः ॥ १२ ॥ तत उशनसः । द्विलक्षेति । भूतलात्तु नवलक्षयोजनतः । प्रायेणेत्युक्तेः । कदाचिदशुभमपि करोतीति तदाह–यदार्कादिति । व्यतिरिच्येत पृथग्भवति । अतिवाताभ्राधिक्यवर्षणाद्यभावरूपं भयम् । आदिना करकादिग्रहः ॥ १३ ॥ अतो बुधात् । योजनलक्षद्वितय इति । भूतलादेकादशलक्षयोजने । अघशंसः प्रायेणेत्युक्तया "दशमेंगारको यस्य स जातः कुलदीपकः" इत्यादिसूचितम् । यदि वक्रः स्यात्तदा बहूनपि मासानेकत्र तिष्ठतीत्यर्थः ॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत उपरिष्टाद्द्विलक्षयोजनांतरगतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ ॥ १५ ॥ तत उपरिष्टाद् योजनलक्षद्वयात् प्रतीयमानः शनैश्चर एकैकस्मिन् राशौ त्रिंशन्मासान् विलंबमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः ॥ १६ ॥ तत उत्तरस्मादृषय एकादशलक्षयोजनांतर उपलभ्यंते य एव लोकानां शमनुभावयंतो भगवतो विष्णोर्यत् परमं पदं प्रदक्षिणं प्रक्रमंति ॥ १७ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रवर्णने द्वाविंशोऽध्यायः ॥ २२॥ श्रीशुक उवाच ॥ अथ तस्मात् परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्विष्णोः परमं पदमभिवदंति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ ॥ १ ॥ स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते ॥ २ ॥ यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मंडलानि चरंत्येवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलंब्य वायुनोदीर्यमाणा आकल्पांतं परिचंक्रमंति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तंते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतंति ॥ ३ ॥

यदि न वक्रः स्यात्तर्हि परिवत्सरम् ॥ १५॥ १६॥ १७॥ इति श्रीमद्भागवते पंचमे टीकायां द्वाविंशोऽध्यायः ॥ २२॥ त्रयोविंशे ध्रुवस्थानं ज्योतिश्चकाश्रयं ततः॥ शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते॥ १ ॥ यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः।समकालमेव युज्यंत इति तथा तैर्नक्षत्ररूपैः॥ १ ॥ २॥ मेढीस्तंभे बद्धा धान्याक्र

ततोंगारकात्। द्विलक्षेति । भूतलात्त्रयोदशलक्षे । वक्रत्वे तु परिवत्सरादधिकमपि भुंक्त इत्यर्थः । प्रायेणेत्युक्तेः स्थानविशेषस्थित्या दुःखमपि ददातीत्यर्थः ॥ १५ ॥ ततो बृहस्पतेः । लक्षद्वयेति । भूतलात्तु पंचदशलक्षेति । तावद्भिस्त्रिंशद्भिः । प्रायेणेत्युक्तेस्त्रिषडायगतः शांतिकरोऽपि स्यादित्यर्थः ॥ १६ ॥ ततः शनैश्चरात्। उत्तरस्मादुत्तरदिशि सप्तम्यर्थे पंचमी । एकादशलक्षेति । भूतलात्तु षड्विंशल्लक्षयोजनेति । परमं पदं ध्रुवलोकम् ॥ १७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥ ततो ध्रुवस्थानवर्णनोत्तरम्। शिशुमारो जलचरो जीवविशेषः (१) अथेति । ध्रुवाधिक्यवर्णने । तस्मादृषिमंडलात् । त्रयोदशलक्षेति--भूतलात्त्वेकोनचत्वारिंशल्लक्षेति । ध्रुवेण समकालयुग्भिः सायुज्यभाग्भिरिति तीर्थः । आजीव्य आश्रयः कल्पजीविनो हि भृग्वादयस्तावत्कालमेव तिष्ठंति यावद्ध्रुवलोकस्तिष्ठति ध्रुवलोकस्यापि " किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः " इति हिरण्यकशिपोरभिप्रायं वर्णयद्भिर्देवैर्ब्रह्मणे प्रोक्तत्वादनित्यत्वमेवेति उपास्ते हरिमिति शेषः (१) स्थाणुरिवेति । श्लेषेण कालचक्रेण चालयितुमशक्यत्वात्स एवैको रुद्रवत्स्थिर इत्यर्थः । प्रत्युत कालचक्रस्यावष्टंभः । तेन सर्वे कालचक्राधीना ध्रुवस्तु कालचक्रमप्यधीनी करोतीति ध्वनिः । नन्वीदृशी योग्यता तस्य कथमभूत्तत्राह—ईश्वरेण कर्त्तुमकर्तुमन्यथा कर्त्तुमपि समर्थेन विहितः स्वभक्तोत्कर्षज्ञापनार्थमिति भावः ॥ २ ॥ खलमध्ये निखातस्तंभो मेढी तत्र संयोजितः कृषीवलेनेत्यर्थः । त्रिभिः सवनैर्मेढीस्तंभनिकटमध्यदूरवर्त्तिभिर्विभागैर्यथास्थानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ॥ ४ ॥ यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयंति ॥ दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति पृष्ठे त्वजवीथी आकाशगंगा चोदरतः ॥ ५ ॥ पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पश्चिमयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठा मूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युंजीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुंजीत शतभिषाज्येष्ठे स्कंधयोर्दक्षिणवामयोर्न्यसेत् ॥ ६ ॥

मणपशवो बलीवर्दाः कर्म सारथिः सहायो येषाम्॥ ३॥ईश्वराधारत्वात्पतनशंकैव नास्तीति वक्तुं मतांतरमाह। केचनेति।ज्योतिरनीकं ज्योतिश्चक्रम्।योगधारणायां स्थितमिति शेषः ॥ ४ ॥ लांगूले अग्रादधोभागे । उदगयनान्यभिजिदादीनि पुनर्वस्वंतानि चतुर्दश दक्षिणपार्श्वे । दक्षिणायनानि पुष्यादीन्युत्तराषाढांतानि चतुर्दश वामपार्श्वे ॥ ५ ॥ तदेव स्थानवि शेषेण विभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना । पुनर्वसुरुदगयनांत्यं नक्षत्रं पुष्यो दक्षिणायनस्याद्यम् आर्द्राऽश्लेषे तयोर्निरंतरे अभिजिदुत्तराषाढे उत्तरदक्षिणायनयोराद्यंत नक्षत्रे श्रवणपूर्वाषाढे तयोरुत्तरपूर्वे धनिष्ठामूलं च तयोरप्युत्तरपूर्वे मघादीनि यान्यनुराधांतानि दक्षिणायनान्यष्ट तानि वामपार्श्वावङ्क्रिषु वामपार्श्वा स्थिषु । मृगशीर्षादीनि प्रातिलो म्येन पूर्वाभाद्रपदांतानि यान्युदगयननक्षत्राण्यष्ट तानि दक्षिणपार्श्ववङ्क्रिषु । शतभिषग्ज्येष्ठे उत्तरदक्षिणायनयोर्ये अवशिष्टे ते स्कंधयोः ॥ ६ ॥

स्वस्वस्थानस्थितिमनतिक्रम्य चरंति । दार्ष्टांतिके त्रिभिः सवनैरुत्तरायणवैषुवतदक्षिणायनैः समयैः । अंतरधोधःस्थलं बहिरुपर्य्युपरितनं स्थलं तत्र योगेन स्थित्या कालचक्र एव योजिताः । यथा सप्तर्षीणामधोधःस्थित्या योजिताः शनैश्चरादयस्तथा सूर्यादीनामुपर्युपरि स्थित्या योजिताः सोमादयस्तत्रतत्रायोजिता ईश्वरेणैव । वायुना तु प्रवहादिनोदीर्यमाणाश्चाल्यमानाः पुरुषाधिष्ठितमायावशीकृताः ॥ ३ ॥ नन्वेते निरालंबाः कथं न पतंतीति शंकां निराकर्त्तुमाह—ईश्वराधीनत्वादिति । केचन योगिनः योगधारणायां विराडुपासनावेशार्थं यथेष्टकल्पनामय्याम् । अत एव मनसि चंद्र इति वक्ष्यमाणेन मनोपि कल्पयिष्यते स्पष्टमपि वक्ष्यते एतदु हैवेति ॥ ४ ॥ कुंडलीभूतदेहस्य चक्रीकृतशरीरस्य कुंडलीभूतत्वं पार्श्वतः न तु पृष्ठतः क्रीडतो वाऽत एव दक्षिणपार्श्वे उदगयनानि मंतव्यानि । अत्र यद्वैपरीत्यं दृश्यते तत्तु मंडलत्वेऽपि तिर्यगूर्ध्वाधो बहुधा वक्रत्वं मंतव्यमतो नारायणादीनां हृदयादौ स्थितत्वम् । अजवीथी दक्षिणमार्गस्य प्रथमो भागः । " मूलाषाढोत्तराषाढा अजवीथीति शब्दिते " इत्युक्तेः । यदेषां कर्णादौ स्थितिं वक्ष्यति तत्रतत्रापि तत्तदंशस्य क्रोडभागो मंतव्यः । आकाशगंगायास्तत्रागमनादिति भावः ॥ ५ ॥ श्रोण्योर्नितंबयोः वङ्क्रिषु अस्थिषु "नितंबः श्रोणिराख्यातो वङ्क्रि प्रोक्तं तथास्थिनि " इति विश्वनाथः । प्रातिलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चांगारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशनाः स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः ॥ ७ ॥ एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥ ८ ॥ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालम् ॥ नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥ ९ ॥ इति श्रीमद्भा०म०पंच० शिशुमारसंस्थानं नाम त्रयोविंशतितमोऽध्यायः ॥ २३॥ श्रीशुक उवाच ॥ अधस्तात् सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चाऽलभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हस्तस्य तात जन्मकर्माणि चोपरिष्टाद्वक्ष्यामः ॥ १ ॥

यमो नक्षत्ररूपः तथा नारायणोऽश्विनौ च । ककुदि गलपृष्ठशृंगे ॥ ७ ॥ ज्योतिषो लोकायाश्रयाय । कालायनाय कालचक्ररूपाय । नमोऽभिधीमहीति मंत्रेणोपतिष्ठेत ॥ ८ ॥ मंत्रकृतां पूर्वोक्तं मंत्रं जपताम् ॥ ९ ॥ इति पंचमे टीकायां त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ एवं त्रिभिर्द्युमर्यादापालनं वर्णितं तथा ॥ अधोभुवनमर्यादापालनं त्रिभिरुच्यते ॥ १ ॥ चतुर्विंशे रवेरर्वाक्स्वर्भान्वादिस्थितिः क्रमात् ॥ अतलादिबिलस्वर्गमर्यादाः सप्त वर्णिताः ॥ २ ॥ सूर्यमारभ्य ध्रुवांतं संनिवेशं निरूप्येदानीं सूर्यादधस्तान्निरूपयति । अधस्तादिति । स्वर्भानू राहुः । अलभत लेभे । सिंहिकायाः पुत्रः ॥ १ ॥

म्येन मृगशिरां रोहिणी : कृत्तिका भरणीत्येवं व्युत्क्रमेण । वंक्रिष्विति पाठो हि लेखकप्रमादत एव ॥ ६ ॥ उत्तराहनावुत्तरकपोलावयवेऽधरकपोलावयवे " हनुर्हट्टविलासिन्यां सूनावत्रे गदे स्त्रियाम् । द्वयोः कपोलावयवे " इति मेदिनी । यद्यप्यंगारकादीनां राश्यन्तरचलनत्वं तथापि तत्तदंगस्थितत्वमंगानां चलनत्वमननाद्बोध्यम् । केतव इति । बहुत्वं केतूनां सहस्रत्वं शतत्वं च ज्योतिःशास्त्रे वार्णतामिति तदपेक्षम् ॥ ७ ॥ न निमिषंति निमीलनं कुर्वंतीत्यनिमिषो देवाः । ' मिष–दर्शने ' इति क्विपि रूपम् ॥ ८ ॥ मंत्रं कुर्वंति वाग्विषयमिति मंत्रकृतस्तेषां पूर्वोक्तं ' नमो ज्योतिर्लोकाय ' इत्यादिकं मंत्रं जपतां पापापहम् । अधिदैविकं परमेश्वरस्य रूपमिदं नमस्यतः स्मरतो वा पुंसः पापं नश्येतेत्यन्वयः । अत्र सूर्यमंडलादष्टत्रिंशल्लक्षे ध्रुवः ध्रुवात्कोटियोजने महर्लोको महर्लोकात्कोटिद्वये जनलोको जनलोकात्कोट्यैक्यै तपोलोकस्तपोलोकाद्द्वादशकोटिषु सत्यलोकः । एवं सूर्यात्सत्यलोकपर्य्यंतमष्टत्रिंशल्लक्षोत्तरत्रयोविंशतिकोट्यः सत्यलोकाद्विषष्टिलक्षोत्तरायां कोटौ वैकुंठस्ततोंडगोलक इति विष्णुपुराणदर्शितया दिशा सूर्यात्पंचविंशती कोटिषु कटाहः। एवं सूर्याल्लक्षे भूतलं ततः सप्तसप्ततिसहस्रेषु सप्तपातालानि ततस्त्रिंशत्सहस्रेषु शेषः । एवं सूर्याल्लक्षद्वये गर्भोदः स च लक्षद्वयन्यूनपञ्चविंशतिकोटिपरिमित एवं मिलित्वोर्द्धाधः पञ्चाशत्कोटिपरिमाणमंडगोलकमिति ॥९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ तथा द्युमर्य्यादापालनवत् (१) अर्वाक् प्राक्तनदेशे । आदिना पिशाचादिग्रहः (२) एके पौराणिकाः । नक्षत्राणि यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यददस्तरणेर्मंडलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबंधः सूर्याचंद्रमसावभिधावति ॥ २ ॥ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वदंति लोकाः ॥ ३ ॥ ततोऽधस्तात् सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥ ४ ॥ ततोऽधस्तात् यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमंतरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यंते ॥ ५ ॥ ततोऽधस्ताच्छतयोजनांतर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्रिप्रवरा उत्पतंतीति ॥ ६ ॥ उपवर्णितं भूमेर्यथासंनिवेशावस्थानमवनेरप्यधस्तात् सप्त भूविवरा एकैकशो योजनायुतांतरेणायामविस्तारेणोपक्लृप्ताः ॥ अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥ ७ ॥ एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसंति ॥ ८ ॥

ग्रहणं वक्तुमाह । यददः प्रतपतस्तरणेर्मंडलम् । अमृतपाने मध्यप्रवेशेन तयोर्व्यवधानं करोतीति तथा । अत एवैताभ्यां सूचितत्वाद्वैरमनुबध्नातीति तथा ॥ २ ॥ भागवतं चक्रं परिवर्तमानं परिभ्रमदभि अभिमुखं मुहूर्तमवस्थितः सन् इत्येवमंतरा तदवस्थानमुपरागं ग्रहणं वदंति । तत्र च ऋजुवक्रस्थितिभ्यां सर्वग्रासासर्वग्रासौ न तु वस्तुतो ग्रासोऽस्ति दूरांतरत्वात् ॥ ३ ॥ तावन्मात्रे योजनायते ॥ ४ ॥ अंतरिक्षं ग्रहहीनम् । तस्यावधिमाह । यावद्वायुः प्रवाति तीव्रो वाति । तस्याप्यवधिमाह । यावन्मेघाः ॥ ५ ॥ पृथिव्या उपरि भूर्लोकावधिमाह । यावद्धंसादयः पार्थिवा विकाराः ॥ ६ ॥ योजनायुतांतरेण प्रत्येकमुच्छ्रिताः आयामो यः कटाहस्य तावद्विस्तारेण ॥ ७ ॥ सामान्येन विवराणि वर्णयति । एतेष्वित्यादिना अथातल इत्यतः प्राक्तनेन ग्रंथेन । एतेषु दैत्यादयो निवसंतीत्यन्वयः । कथंभूतेषु । अधिकः कामभोगश्च

कालचक्रयोजितानि मेरुं प्रक्रमंति तथेत्यर्थः । स्वमते तु प्रवहाख्यवायुबहिर्भूतत्वान्नक्षत्रवच्चरणं नास्ति किन्तु स्वगत्यैवेति । अतदर्होऽमरत्वानर्हः । तस्य राहोः । उपरिष्टात् षष्ठस्कंधादौ ॥ १ ॥ अदो विश्वं मंडलं रथनीडाभ्यंतरस्थितं तेजश्चक्रम् । पर्वणि अमावास्यापौर्णमास्योः । तयोर्भूतलस्थजनचक्षुषां व्यवधानं कर्तुममृतपाने तयोर्मध्यप्रवेशेन व्यवधानं पूर्वं कृतवानिति । अत एव व्यवधानकरणादेव ॥ २ ॥ तं वैरानुबंधम् । निशाम्य दृष्ट्वा। उभयत्रापि सूर्ये चंद्रे च । तत् प्रसिद्धम् । दृष्ट्वेति शेषः । आरात्। दूरात् अंतरा मध्ये। तदवस्थानं राह्ववस्थानम् । तत्र चोपरागे । “उपरागो ग्रहो राहुग्रस्ते त्विंदौ च पूष्णि च” इत्यमरः । दूरांतरत्वादयुतयोजनांतरत्वात् ॥ ३ ॥ ततो राहोरधस्तात् ॥ ४ ॥ ततः सिद्धादिस्थानादधस्तात् । अत्र प्रमाणानुक्तेः पूर्ववत्प्रमाणमुन्नेयम् । ‘अनुक्ते पूर्ववद्ग्राह्यम्’ इत्युक्तेः ॥ ५ ॥ ततो यक्षादिस्थानात् । आदिना गृध्रादिग्रहः । पतत्रिप्रवराः पक्षिगणमुख्याः । उत्पतंति स्वगत्या गच्छंति । पार्थिवानां पृथिव्यामेव गतिर्नान्यत्रेत्यर्थः ॥ ६ ॥ अधस्तादधोऽधोऽवयवेष्वित्यर्थः । भूविवरा भुवो विवरभूतान्येवातलादीनीत्यर्थः । योजनायुतावधावित्यर्थः । ‘अंतरमवकाशावधि’ इत्यमरः । भूतलाद्योजनायुतावधावतलं तस्माद्योजनायुतावधौ वितलमित्येवमायामविस्तारेण । योजनायुतावधिनोपक्लृप्ताः दैर्घ्यविशालताभ्यां समा एवेत्यर्थः । उच्छ्रिता इति । अयुतयोजनोच्छ्रिताः । प्रत्येकमतलादय इत्यर्थः ॥ ७ ॥ एतेष्वतलादिषु । बिलरूपाः स्वर्गा बिलस्वर्गास्तेषु भवनं गृहम् । आक्रीडः क्रीडास्थानम् । विहारो भ्रमणस्थानं “ विहारो भ्रमणे स्कंधे लीलायां सुगतालये ”

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येषु महाराज मयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासति ॥ ९॥ उद्यानानि चातितरां मनइंद्रियानंदिभिः कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनां लतांगाऽलिंगितानां श्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानां झषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुराविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥ १० ॥

ऐश्वर्यानंदश्च विभूतिश्च संपत्तिस्तैः सुसमृद्धा भवनादयो येषु । कथंभूताः । नित्यप्रमुदिता अनुरक्ताः कलत्रादयो येषाम् । न प्रतिहतः कामो येषाम् । मायया विनोदो येषाम् ॥ ८ ॥ किं च । हे महाराज येषु मयेन निर्मिताः पुरश्चकासतीत्यन्वयः । कथंभूताः । नाना ये मणिप्रवरास्तेषां प्रवेका मुख्यास्तैर्विरचितैर्विचित्रैर्भवनादिभिस्तथा विवरेश्वराणां गृहोत्तमैश्च समलंकृताः । कीदृशैर्गृहोत्तमैः । नागाश्वासुराश्च मिथुनभूताः पारावतादयश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः । पाठांतरे नानास्वनत्वं मिथुनविशेषणम् ॥ ९ ॥ उद्यानानि चातितराममरलोकश्रियमतिशयितानि येषु चकासतीत्यन्वयः । काभिः श्रीभिः । केषां कुसुमफलस्तबकाश्च सुभगकिसलयानि चं तैरवनता रुचिरा विटपा येषां तेषां विटपिनां लतानामंगैरालिंगितानां श्रीभिः तथा समिथुनाश्चक्रवाकादिमिथुनसहिता ये विविधा विहंगास्तद्युक्तानां जलाशयानां च श्रीभिः । कीदृशानाम्। अमलैर्जलैः पूर्णानाम्। पुनरपि कैः अतिशयितानि झषकुलोल्लंघनेन क्षुभितं यज्जलाशयानां नीरं तस्मिन्यानि नीरजादीनि तेषां वनेषु कृतं निकेतनं यैस्तेषामर्थात्पक्षिणामेकोऽखंडो यो विहारस्तेनाकुलाश्च ते मधुराश्च ते विविधाः स्वनादयस्तैर्ये इंद्रियोत्सवास्तैश्च यद्वा समिथुनेत्यादेरुत्तरेणैव संबंधः । मनइंद्रियानंदिभिरिति

इति मेदिनी ॥ ८ ॥ अन्यदाह–किञ्चेति । हे महाराजेति । तत्र त्वया न दृष्टिर्विधेया तवापि महाराजत्वात्सर्वं तादृशमेवेति भावः । ‘ प्रवेको मुख्यभिन्नयोः’ इति धरणिः । चैत्यं देवालयम् । आयतनं पाषाणबद्धवृक्षमूलस्थानम् । आदिना चत्वारादिग्रहः । कृत्रिमा भूमयः कुट्टिमभुवः । पाठांतरे ‘ नानास्वनमिथुन–’इति पाठे ॥ ९ ॥ मनइंद्रियानंदिभिरिति । पुंस्त्वमार्षम् । जलाशयेत्युक्ते पुनरमलजलपूर्णानामित्युक्त्या पुनरुक्तिमाशंक्याह–यद्वेति । अमलजलैः पूर्णानां सरसामित्यनेन संबंधः किंभूतानाममलजलपूर्णानां मिथुना द्वंद्वीभूता ये विविधा विहंगमास्तथा जलाशया मत्स्याद्यास्तैः सहितानामित्यर्थः । आर्षकल्पनाया अगतिगतिकत्वं चाशंक्याह–मनइंद्रियानंदिभिरिति । तत्र नीरजादिषु कुमुदकुवलयौ सितवर्णौ रात्रिविकाशौ । कह्लारं सौगंधिकम् । लोहितं रक्तवर्णं शतपत्रयुतं च । आदिना पुंडरीकादिग्रहः । स्वनादिभिरिहादिना गत्यादिग्रहः । इंद्रियोत्सवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥ ११ ॥ यत्र हि महाहिप्रवराशिरोमणयः सर्वं तमः प्रबाधंते ॥१२॥ न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरिंति वयोऽवस्थाश्च भवंति ॥१३॥ न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजश्चक्रापदेशात् ॥ १४ ॥ यस्मिन्प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवंति पतन्ति च ॥ १५ ॥ अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयंति यस्य च जृंभमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमिति अयुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव ॥१६॥ ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूत आस्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति ॥ तन्निष्ठयतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति ॥ १७ ॥

स्वनादीनां विशेषणम् । तत्र नीरजं सामान्येन कमलम् । लोहितं शतपत्रं तद्विशेषः ॥ १० ॥ अहोरात्रादिभिर्यद्भयं तन्नोपलक्ष्यते सूर्याद्यभावात् ॥ ११ ॥ १२ ॥ क्लमः श्रमः ग्लानिरनुत्साहः ॥ १३ ॥ कल्याणानां मंगलरूपाणाम् ॥ १४ ॥ यस्मिन् भगवत्तेजसि प्रविष्टे । पुंसवनानि गर्भाः । "आ चतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः" इति स्रावपातौ ज्ञेयौ ॥१५॥ सवर्णे रताः स्वैरिण्यः कामिन्यस्त्वसवर्णेऽपि तत्राप्यतिचंचलाः पुंश्चल्यः । बिलायनं बिलायतनम् । साधयित्वा संभोगसमर्थं कृत्वा । स्वे ये असाधारणा विलासास्तत्पूर्वकोऽवलोकस्तेनानुरागयुक्तं स्मितं तेन संलाप उपगूहनं च तदादिभिः । यस्मिन्हाटकाख्ये रसे उपयुक्ते सेविते ॥ १६ ॥ भवयोर्भवस्य भवान्याश्च ।

इंद्रियकौतुकास्तैः ॥ १० ॥ यत्र अतलादिषु ॥ ११ ॥ यत्र येषु विवरेषु ॥ १२ ॥ एतेषु वसतां पुंसां दिव्यौषधिरसरसायनयोरशनादेव हेतोरन्नपानादिभिरप्याधिव्याधयो न भवंति तथा द्विविधा वयोवस्थाश्च न तत्र प्रथमा बलिप्रभृतयश्च रसाः द्वितीया देहवैवर्ण्यादयोऽचरमा इति । रसायनं तु " वार्धघ्नं देहपुष्ट्यादेः कारकं बलदायकम् । रसायनमिह प्रोक्तं मृगांकादिभिदा बहु " इति दिव्यौषधयो विशल्याद्याः । समस्तपाठे तु देहवैवर्ण्यादिसहिता ग्लानिरिति मध्यमपदलोपी समासः ॥ १३ ॥ तेषां दिव्यौषधिरसरसायनसेविनां चक्रापदेशाच्चक्रनाम्नः ॥ १४ ॥ प्रायो बाहुल्येन समकालं वा । " प्रायो मरणानशने मृत्यौ बाहुल्यतुल्ययोः " इति मेदिनी ॥ १५ ॥ सामान्येन विवरलक्षणमुक्त्वा विशेषेणाह–अथेति । अथ आरंभे । षड्भिरधिका नवतिः षण्णवतिः । यस्य बलस्य । अपिना सवर्णेपीति । तत्रापि स्वैरिण्याद्यास्वपि पुरुषमात्रेण रतिमाकांक्षमाणाः पुरुषदर्शनमात्रेण परिप्लुतेन्द्रिया वा पुंश्चल्यः । उपगूहनमालिंगनम् । आदिना चुंबनादिग्रहः । महागजो यूथमुख्यहस्ती । कत्थते श्लाघते ॥ १६ ॥ ततः अतलात् । ब्रह्मसृष्टिवृद्ध्यै यतो यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽधस्तात्सुतल उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेंद्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा बटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकंपयै व पुनः प्रवेशित इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवंतमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥१८॥ नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे सर्वजीवनियन्तर्यात्मारामे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद् बिलनिलयैश्वर्यम् ॥ १९ ॥ यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबंधनमंजसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभंते॥२०॥

चित्रभानुरग्निः । तेन निष्ठ्यूतं फूत्कृत्य त्यक्तम् । असुरेंद्राणामवरोधेष्वंतःपुरेषु । पुरुषीभिः स्त्रीभिः ॥ १७ ॥ सुतले बलिरधुनाप्यास्त इत्यन्वयः । कथंभूतः । महेंद्रस्य प्रियं कर्तुमिच्छता भगवता प्रथमं पराक्षिप्तमपहृतं लोकत्रयं यस्य सः । पुनर्भगवतोऽनुकंपयैव तत्र प्रवेशितः सन् । कीदृशेन । योऽदितेः सकाशाद्भूत्वा बटुवामनरूपेण लब्धकायस्तेन ॥ १८ ॥ केचित्तस्य सुतलराज्यं भूमिदानफलं मन्यंते तन्निराकरोति । नो एवैतदिति । यद्बिलनिलये विवरस्थाने ऐश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं न भवत्येव । कुत इत्यपेक्षायामेवंभूतस्य दानस्य साक्षादपवर्गहेतुत्वादित्याह । यत्तत्प्रसिद्धं दानं तस्य । तदेवाह । भगवत्यशेषजीवनिकायानां जीवभूतश्चासावात्मभूतश्च सर्वजीवनियंता चासावत्मारामश्चेत्यर्थः । तस्मिन्संप्रतिपादितस्य ॥ १९ ॥ किं च । यस्य नाम क्षुतादिषु च विवशोऽपि सकृदपि गृणन्कर्मबंधं विधुनोति । कथंभूतम् । यस्य प्रतिबाधनं त्विह मुमुक्षवोऽन्यथैवोपलभंते । यन्निवृत्त्यर्थं योगसांख्यादिक्लेशाननुभवंतीत्यर्थः । तं कर्मबंधं त्यजति ॥ २० ॥

भवयोः भवानीभवयोः "पुमान् स्त्रिया" इत्यनुशासनात् । पिबति संशोष्य कठिनी करोति । तेनअग्निना निष्ठ्यूतं दाहोत्तीर्णीकृतम् । यद्वा—ताभ्यां भवभवानीभ्यां निष्ठ्यूतं भूषणेन रत्नालंकारेण सहात्यादरात् हरभवयोर्विशेषणविशेष्यभावेन पौनरुक्त्यभावो ज्ञेयः ॥ १७ ॥ ततो वितलात् । श्रवो यशः । पुण्याश्श्रवः श्लोका वर्णनार्थपद्यानि यस्य सः 'पुण्यं शोभने त्रिषु' इति मेदिनी । अपगतसाध्वसो निर्भयः । 'भीतिर्भीस्साध्वसं भयम्' इत्यमरः ॥ १८ ॥ अत्र भूमिपदेन त्रिभुवनमेवोपलक्षितम् । किञ्च—वेदविज्ञब्राह्मणमात्रे एव भूप्रदेशदानादक्षयः प्रसिद्धस्वर्गभोगो लभ्यत इति शास्त्रे श्रवणाद्भगवति त्रिभुवनदानजन्यफलस्य सुतलैश्वर्यभोग एव पर्याप्तेरसंभावितत्वादपवर्गस्यैव फलत्वम् । किञ्च—अस्यानुषंगिकस्यापि सुतलैश्वर्यभोगस्य सर्वस्वर्गभोगेभ्योऽपि परमोत्कर्षो ध्वनितः । जीवभूतो जीवनरूपो य आत्मांतर्यामी तद्भूते परमात्मनि 'विष्टभ्याहमिदं कृत्स्नम्' इत्युक्तेरंतर्यामिणोप्यंशित्वात् । साक्षादपवर्गेति । यत्र पुष्पादिदानस्यापवर्ग फलत्वं तत्र त्रिभुवनदानस्य तथात्वेऽतिकैमुत्यमिति भावः ॥ १९ ॥ त्रैलोक्यदाने का वार्त्ता भक्त्या यत्र पुष्पार्पणमपि दूरे वर्ततां नामाभ्यासोऽपि सुकृतिभिर्दुर्वारं कर्मबंधनमप्यनायासेनैव ध्वंसयतीत्याह—यस्येति । न च कर्मबंधोऽपि सुगमप्रतीकार इत्याह—यस्य कर्मबंधस्य प्रतिबाधनं सर्वथा ध्वंसनं मुमुक्षव एव न तु भूमिदानादिसुकृतकोटिमंतोऽपि । इत्यर्थ इति । सर्वथा दुःशकोपायमप्यनायासेनैव कुर्वंतीति भावः ॥ २० ॥

१—सर्वजीवनियन्तर्यात्मारामे इयान्पाठोऽधिकमिवाऽऽभाति टीकायां जीवनिकायानां जीवभूतात्मभूते इत्यस्यैव तादृशार्थकथनाद्बहुषु पुस्तकेष्वनुपलम्भाच्च ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ॥ २१ ॥ न वै भगवान् नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥ २२ ॥ यत्तद्भगवताऽनधिगतान्योपायेन याच्ञाछलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च संप्रति मुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥ २३ ॥ नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविंद्रो यस्य सचिवो मंत्राय वृत एकांततो बृहस्पति स्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यमतिगंभीरवयसः कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदम् ॥ २४ ॥ यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥ २५ ॥

तत्तस्मिन्भगवति भक्तानां ज्ञानिनां च यथायथमात्मन्यात्मदे ज्ञानदे चात्मतयैव समर्पितस्य भूमिदानस्य न तत्फलमिति पूर्वेणैव संबंधः ॥ २१ ॥ किं च । नेदं भगवदनुकंपाफलमपि किं त्वेकांतभक्तस्य तस्यांतरायमात्रमित्याह । नेति । भगवानमुष्य अमुं नैवानुगृहीतवान् । तत्र हेतुः । यदुतेति आत्मन ईश्वरस्यानुस्मृतिं मुष्णातीति तथा । तदुक्तम् । "वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं फलम्" इति ॥ २२ ॥ तस्यैकांतभक्तिं सप्रपंचामाह । यत्तदतिप्रसिद्धमिति वक्ष्यमाणमुवाच हेत्यन्वयः । कथंभूतः । अनधिगतोऽन्य उपायो येन तेन भगवता याच्ञाच्छलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य । सम्यक् प्रतिमुक्तो बद्धः अप विद्धः प्रक्षिप्तोऽपि सन् ॥ २३ ॥ बतेति खेदे । भगवान्विद्वानपि योऽसाविंद्रो यस्यैकांतेन बृहस्पतिः साचिवः सहायो यतो मंत्रार्थं वृतः सोऽपि पुरुषार्थेषु नूनं न निष्णातो न निपुणः यतः उपेंद्रेण द्वारभूतेन तमुपेंद्रं विहायात्मानं मां लोकत्रयमयाचत तं मंत्रपदं बृहस्पतिमतिहायेति वा । तस्मिन्प्रसन्ने स एव वरणीयो न लोकत्रयं यतस्तदति तुच्छमित्याह । अतिगंभीरमनंतं वयो यस्य तस्य कालस्य यन्मन्वंतरं तेन परिवृत्तं विपर्यस्तं लोकत्रयमिदं कियत् ॥ २४ ॥ प्रह्लादस्त्वेक एवार्थे निष्णात इत्याह । यस्या

तत्तस्मात्सर्वेषामात्मनि परमेश्वरे प्रतिपादितस्य भूमिदानस्य न तत्फलमिति पूर्वेणैवान्वयः । कथंभूते भगवतां नारदादीनां भक्तानामात्मदे वशीभूयात्मानमपि दत्तवति । आत्मवतां सनकादीनां ज्ञानिनामात्मतमे परमात्मानुभवरूपे इति क्रमेण प्रेमानंदब्रह्मानंददायिनस्तस्य तद्विषयानंदमात्रफलदायित्वं कथं घटेतातो बलिराजाय स्ववशीकारमेव प्रेमानंदं खलु भूमिदानस्य फलं ददौ यतः स्वभक्तस्य तस्य स्वयं द्वारपालो बभूवेति भावः ॥ २१ ॥ परमतमनूद्य खंडयति—न वा इति । यन्मायामयभोगैश्वर्यमतनुत तेनामुं बलिं प्रत्यनुजग्राहेति न किन्तुस्वसान्निध्यादिनैवेत्याह—किञ्चेति । वस्तुतस्तु—भोगैश्वर्यन्न भगवदनुकंपाफलमतो भोगैश्वर्यदानादेवेंद्रस्यैकांतिकभक्तत्वभावोऽनुमीयते इत्याह—नेति । अमुष्य अमुमिंद्रम् । तथा च बलिमेवैकांतभक्तमनुजग्राहेति भावः । भोगैश्वर्यस्यांतरायत्वे पुराणांतरसंमतिमाह—तदुक्तमिति ॥ २२ ॥ बलेस्त्वैकांतिकी भक्तिर्भगवदनुग्रहप्राप्तिश्च तद्वचनेनैव व्यक्ती बभूवेत्याह—तस्यैकांतेत्यादि ॥ २३ ॥ सोऽपि बृहस्पतिरपि न निष्णातः । यस्मादिंद्रं प्रति युक्तं नोपदिदेशेति भावः । तमुपेंद्रं विहायेति । तमेव कथं नायाचत यद्ययाचिष्यत तदा किं स दातुं नापारयिष्यत् स्वप्रभुं तं याचकं कथमकरोदिति भावः । तत्राप्याशिषो विषयसुखानीति परममोहांध इव स इति भावः । स्वेष्टदेवस्य न्यूनकर्मणि प्रेरणं सर्वथानुचितमित्याह—येद्वेति । तं बृहस्पतिमतिहायेति । बृहस्पतिं प्रेष्य तेनैव मां कथं नायाचत यदि बृहस्पतिर्मामयाचिष्यत तदा तस्मै ब्राह्मणाय त्रिलोकीं किं नादास्यं कथं स्वेष्टदेवं तं याचकमकरोदिति भावः । तस्मिन् भगवति ॥ २४ ॥ 'अनुदास्यं नय मां निजभृत्यपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥२६॥ अथ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः॥२७॥ततोऽधस्तात् तलातले मयो नाम दानवेंद्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशंचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्ध पदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते॥२८॥ ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः पतत्त्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित् प्रमत्ता विहरंति ॥ २९ ॥ ततोऽधस्तात् रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्य नीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसंति ॥ ये वै सरम येंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद् बिभ्यति ॥ ३० ॥

नुदास्यमिति । स्वपितरि उपरते मृते सति स्वपित्र्ये पदं भगवता दीयमानमपि भगवतः खलु परमन्यदिति कृत्वा न तु जग्राहेत्यर्थः ॥ २५ ॥ ननु त्वमतिवीरः कुतस्तमेव बहु मन्यसे तत्राह । तस्यानुपथमनुवर्त्म । अमृजिता अक्षीणाः कषाया रागादयो यस्य । परिहीणो भगवदनुग्रहो यस्य । स को वा उपगंतुमिच्छतीति ॥ २६ ॥ अथ शुकोक्तिः । नन्वेवंभूतश्चेद्बलिस्तर्हि तस्यैव चरितं विस्तरेण कथ्यतां तत्राह । तस्य बलेरनुचरितमुपरिष्टादष्टमे विस्तारिष्यते । यस्य द्वार्यवतिष्ठते निजजनेष्वनुकंपितं कृतानुकंपं हृदयं यस्य । द्वारपालकर्म दर्शयति । येन श्रीनारायणेन बलेर्द्वारि विशन्दशकंधर उच्चाटितः । केन । पदा तत्राप्यंगुष्ठेनैव ॥ २७ ॥ यथा हरिणा स्वभक्तो बलिः सुतले निहितः सुखमास्ते एवं महादेवभक्तोऽपि मयस्तलातले सुखमास्त इत्याह—तत इति । लब्धं पदं स्थानं येन । महीयते पूज्यते ॥ २८ ॥ नैकशिरसामनेकफणानां गणोऽस्ति । एतत्प्रपंचयति । कुहकेति । महाभोगवंतो महाकायाः । पुरुषवाहाद्धरेर्वाहनात् ॥ २९ ॥ विबुधप्रत्यनीका देवशत्रवः । सकलेष्वपि लोकेष्वनुभावो

र्श्वम्'' इत्यनेन तद्दास्यदास्यम् । स्वपित्र्यं त्रैलोक्यराज्यं यदुत अकुतोभयं पदं मोक्षं तत्तन्न वव्रे कथं भगवतः परमन्यदिति कृत्वा तदंशाभासतदंशमात्रात्मकत्वात्तयोः । कदैवं व्यवहृतमित्याकांक्षायामाह—भगवतेति । इत्यर्थ इति । राज्याभिनिवेशाद्भगवदनुरागादि नश्येदिति भावः ॥ २५ ॥ अत्राक्षिपति—नन्विति । तस्य प्रह्लादस्य न कोपीति भावः ॥ २६ ॥ विशन् दिग्विजयावसरे । उच्चाटितः प्रक्षिप्तः । अयुतायुतं कोटिः । यत्तूत्तरकांडे वाल्मीकीये उक्तं 'नैनं हन्म्यधुना पापं चिंतयित्वेति रूपधृक् । अंतर्द्धानं गतो राम ब्रह्मणः प्रियकाम्यया॥ न च तं पुरुषं तत्र पश्यते रजनीचरः । हर्षान्नादं विमुञ्चन्वै निष्क्रामद्वरुगालयात्॥ येनैव स प्रविष्टः स पथा तेनैव निर्ययौ'' इति तत्कल्पांतराभिप्रायमिति ध्येयम् ॥ २७ ॥ ततः सुतलात् ॥ २८ ॥ ततः तलातलात् । पतत्त्रिराजा हंसादयस्तेषामधिपतेर्गरुडात् । अनवरतं सदा । उद्विजमाना भीताः । कचिन्महातल प्रदेशेषु ॥ २९ ॥ ततो महातलात् । पण्यादयो दैत्यगणभेदाः । निगूढां निह्नुताम् । गां धेनुम् । हे पणयो यूयमिंद्रेण युधि हताः शयध्वं शयनं कुरुध्वमिति श्रुतिपदार्थः । बिभ्यति सभया भवंतीति ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ॥ ३१ ॥ इति श्रीभा० म० पंचम० अतलादिबिलवर्णनं नाम चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ श्रीशुक उवाच ॥ तस्य मूलदेशे त्रिंशद्यो जनसहस्रांतर आस्ते यां वै कला भगवतस्तामसी समाख्याताऽनंत इति सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षणमित्याचक्षते ॥ १ ॥ यस्येदं क्षितिमंडलं भगवतोऽनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ २ ॥ यस्य ह वा इदं काले नोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण सांकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदातिष्ठत् ॥ ३ ॥

यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषाम् । बिलेशयाः सर्पा इव इंद्रदूत्या प्रत्युक्ताभिर्मंत्ररूपाभिर्वाग्भिः एवं हि वैदिकमाख्यानम् । पणिभिरसुरैर्निगूढां गामन्वेष्टुं सरमां देवशुनीमिंद्रेण प्रहितां संधिमिच्छंतः पणयः प्राहुः । किमिच्छंती सरमेत्यादि । सा च संधिमनिच्छंतींद्रस्तुतिपूर्वकं तान्प्रति परुषमाह । हता इंद्रेण पणयः शयध्वमित्यादि । ते च तच्छ्रुत्वा बिभ्यतीति॥ ३० ॥महाभोगिनो महाफणाः । महानमर्षः क्रोधो येषाम् । पंचादिसंख्यानि शीर्षाणि येषाम् । शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षः ॥ ३१ ॥ इति श्री० भा० पंचमे टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ छ ॥ ॥ पंचविंशे ततोऽधस्तादाह शेषस्य संस्थितिम् ॥ संजिहीर्षोरिदं काले यत्र रुद्रसमुद्भवः ॥ १ ॥तस्य पातालस्य । कोऽसावनंतः । सात्वतीयाः सात्वततंत्रनिष्ठाश्चतुर्व्यूहोपासने यं संकर्षणमित्याचक्षते । तथाख्याने हेतुः । द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन । तत्कुतः ।अहमित्यभिमानो लक्षणं चिह्नमधिष्ठातुर्यस्य । अहंकाराधिष्ठानेन द्रष्टृदृश्यसंकर्षणात्संकर्षण इत्यर्थः ॥ १ ॥ अनंतत्वमाह । यस्येदमिति । यच्छब्दानां स एष भगवाननंत इत्युत्तरेणान्वयः ॥ २ ॥ तामसत्वमाह । यस्येदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते कुटिलीकृते रुचिरीकृते भ्रमंत्यौ भ्रुवौ तयोर्मध्ये उत्तंभयन्नुन्नमयन् ॥ ३ ॥

ततो रसातलात् । आर्षः ''शीर्षंश्छंदसि'' इति भगवान्पाणिनिः ॥ ३१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ ततः पातालात् । यत्र यतः (१) तस्य पातालस्य । तामसी तमःकार्यसंहारप्रवर्त्तयित्री न तु तमोमयी 'मूर्तिं नः कृपया बभार सत्त्वं संशुद्धम्' इत्यादिविरोधात् । द्रष्टृदृश्ययोर्भोक्तृभोग्ययोः । तदेकीकरणं तच्च कर्षणमहमस्य भोक्ता इदं मे भोग्यमित्यभिमानलक्षणमेव । इत्यर्थ इति । अभिमंतुरहंताममतयोः शुद्ध्यर्थं यं ध्यायंतीति भावः ॥ १ ॥ २ ॥ उपसंजिहीर्षत इति । यदैवेदं जगदाधिक्येन संहर्तुमैच्छत्तदैव मायायास्तदधीनत्वात्तदयितमःकार्यरोषात्मको रुद्रो भ्रूमध्ये प्रादुरभूत् एकादशव्यूह एकादशधाविभक्तरूपविशेषः । अमर्षविरचित इति रुद्रविशेषणं सुलोपं आर्ष इति विश्वनाथः । यथा सिसृक्षतोऽद्वितीयपुरुषस्य नाभिमध्ये रजोगुणात्मकं पद्मं प्रादुर्भवति तद्वत् ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यांघ्रिकमलयुगलारुणविशदनखमणिषडमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ॥ ४ ॥ यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणाऽवलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति ॥ ५ ॥ स एव भगवाननंतोऽनंतगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ६ ॥ ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकाऽमृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदि कृतसुभगसुंदरभुजो भगवान् माहेंद्रो वारणेंद्र इव कांचनीं कक्षामुदारलीलो बिभर्ति ॥ ७ ॥

सुभगत्वमाह । यस्यांघ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयस्तेषां षंडः समूहस्तस्य मंडलेषु । परिस्फुरतां कुंडलानां प्रभया मंडितानि गंडस्थलानि येषु तानि ॥ ४ ॥ चारुण्यंगवलये विलसिताश्च ते विशदाश्च विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भुजा एव रजतस्तंभास्तेष्वगुरुचन्दनकुंकुमानां पंक एवानुलेपस्तेनावलिंपमानाः तेषामभिमर्शनेनोन्मथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां ताः । तस्यानुरागेण मदेन च मुदितं च तन्मदेन विघूर्णिते प्रचलिते च आ ईषदरुणे करुणावलोकयुक्ते नयने यस्मिंस्तद्वदनारविंदं विलोकयंति ॥ ५ ॥ अमर्षोऽसहनं रोषः क्रोधः उपसंहृतस्तयोर्वेगो येन ॥ ६ ॥ उपासनार्थमाह । सुरादिभिर्ध्यायमानश्चिंत्यमानः । अनवरतं मदेन मुदितश्चासौ विकृतविह्वललोचनश्च । सुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदान्विबुधयूथपानां पतींश्चाप्यायमानो हर्षयन् नीले वाससी यस्य । एकमेव कुंडलं यस्य । हलस्य ककुदि पृष्ठे कृतो न्यस्तः सुभगश्च सुंदरश्च भुजो येन । उदारा लीला यस्य सः । न परिम्लानो रागः कांतिर्यस्यास्तस्या नवतुलसिकाया आमो

सुभगत्वं मनोहरत्वम् । यस्य शेषस्य ॥४॥ अंगवलये अगमंडले । विशदाः शुद्धाः । विपुला विस्तृताः । धवलाः श्वेताः । सुभगा मनोहराः । रुचिरा दीप्ताः । उन्मथिते क्षुभिते । रुचिरं भावसूचकम् । ललितं शोभनम् । तस्य शेषस्य । अनुरागेण भक्तविषयकेण । मदेन हर्षेण ॥ ५ ॥ उपसंहृतेति । संप्रति स्थितिकाले रोषस्यानौचित्यादिति भावः ॥ ६ ॥ कक्षाम् उदरबन्धम् । "कक्षा बृहतिकायां स्यात्कांच्यां मध्येभबंधने । हर्म्यादीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रंथिं सत्त्वरजस्तमोमयमंतर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावान् भगवान् स्वायंभुवो नारदः सह तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ ८ ॥ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन् ॥ यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमुह वेद तस्य वर्त्म ॥ ९ ॥ मूर्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र ॥ यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥ १० ॥ यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा ॥ हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ११ ॥

दमध्वासवेन सुरभिमधुरसेन मायतां मधुकराणां ये व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां वनमालाम् । कक्षां वरत्राम् ॥ ७ ॥ संश्लोकयामास वर्णयामास ॥ ८ ॥ अस्य जगत उत्पत्त्यादिहेतवो गुणा यस्येक्षया कल्पाः स्वस्वकार्यसमर्था आसन् । यस्य तु रूपं ध्रुवमनंतमकृतमनादि । तत्र हेतुः । यदेकमेव सदात्मन्नात्मनि नानाकार्यप्रपंचमधात् तस्य ब्रह्मरूपस्य वर्त्म तत्त्वं जनः कथमुह वेद । नैव वेदेत्यर्थः ॥ ९ ॥ तर्हि कथमसौ मुमुक्षुभिः सेव्यते तत्राह । मूर्तिमिति । यत्रेदं सदसद्विभाति स नोऽस्माकं भक्तानां बहुकृपया संशुद्धं सत्त्वं मूर्तिं बभार । स्वजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य लीलां मृगपतिः सिंह आददे अशिक्षत् । यतः उदाराणि वीर्याणि यस्य तस्मादन्यं मुमुक्षुः कमाश्रयेदित्युत्तरेणान्वयः । यद्वा कृपयेत्यत्र हेतुः । यद्यस्मात्स्वजनानां मनांस्यादातुं लीलामाददे मृगपतिरिवोदारवीर्यः । यद्वा मृग्यंत इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः ॥ १० ॥ किं च । आस्तां तस्य कृपया वपुर्धारणं तद्भजनं वा तन्नामौदार्यमेवातिचित्रमित्याह । यस्य नाम यदि पतितो महापातक्यप्यनुकीर्तयेत्तर्हि

प्रकोष्ठे च'' इति मेदिनी । माहेंद्रो वारणेंद्र ऐरावतः ॥ ७ ॥ अनुभावान् प्रभावान् । पुरुषाद्यवतारत्वेन श्लोकैस्तुष्टावेत्यर्थः ॥ ८ ॥ तत्रानाद्यादित्वे । इत्यर्थ इति । अनंतत्वादिति भावः । चक्रवर्ती—कल्पा इति । यावत्पुरुषस्य प्रकृतावीक्षणं नासीत्तावत्सत्त्वाद्या गुणा महत्तत्त्वादीनामुत्पत्त्यादिषु न समर्था अभूवन्नित्यर्थः । यस्य रूपमाकारं ध्रुवं नित्यं यतोऽकृतमकृत्रिमं चिन्मयत्वादित्यर्थः । किं च यदेकमेव स्वदेहे रोमकूपप्रदेशेषु नानाकार्यप्रपञ्चमधाद्दधार पुपोष तस्य वर्त्मतत्त्वं प्राप्तिमार्गं वेति ॥ ९ ॥ अत्राशंकते—तर्हीति । मूर्तिं रामकृष्णादिरूपाम् । यत्र यस्यां चिन्मय्यां मूर्तौ सदसदिदं जगद्विभाति । श्रीव्रजेश्वर्यापि दृष्टत्वादिति भावः । यद्यया मूर्त्या मृगपतिः सिंह इवानवद्यां लीलां ''रुदन्निव हसन् मुग्धबालसिंहावलोकनः'' इत्युक्तेः । किमर्थं स्वजनानां मनांसि हस्तिन इवाकृष्य ग्रहीतुं य एवोदारवीर्यः गिरिवरधारणादिपराक्रमवान् । संदर्भस्तु—मृगपतिः श्रीवराहः ''जहास चाहो वनगोचरो मृगः'' इति तत्रापि मृगशब्दप्रयोगात् यस्य लीलां पृथिवीधारणलक्षणां स्वीकृतवानिति परममाहात्म्यं दर्शितमिति । स्वामिव्याख्याने मनांस्यादातुमिति । मन्मूर्तिदर्शनेन तेषां मयि प्रीतिर्भविष्यतीत्यर्थः । सिंह आददे शौर्यादिलक्षणां लीलां सिंहोऽपि शेषादेवाशिक्षदित्यर्थः । सिंहे तल्लीला प्रायो न दृश्यतेऽत आह—यद्वेति । मृगपतिरिति लुप्तोपमा । मृगपतिर्यथा झटिति हस्त्यादि स्वीकरोति यथायमपि दुष्टानित्यर्थः । लुप्तोपमास्वीकारोऽप्यगतिक एवेति चेत्तत्राह—यद्वेति ॥ १० ॥ अन्यदाधिक्यमाह—यन्नामापि पतितपावनमिति किं वक्तव्यं यतः पतितमपि पावनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् ॥ आनंत्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥ १२ ॥ एवं प्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः ॥ मूले रसायाः स्थित आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १३ ॥ एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मनिर्मिताः यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥ १४ ॥ एतावतीर्हि राजन् पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत् कथयाम इति ॥ १५ ॥ इति श्रीमद्भागवते महापुराणे पंचमस्कंधे शेषमहाराजस्वरूपवर्णनं नाम पंचविंशतितमोऽध्यायः ॥ २५ ॥ छ ॥ राजोवाच ॥ महर्षे एतद् वैचित्र्यं लोकस्य कथमिति ॥ १ ॥ ऋषिरुवाच ॥ त्रिगुणत्वात् कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवंति ॥ २ ॥

स शुद्धयेदिति किमु वक्तव्यम् । यतोऽसावेव नृणामशेषमंहः सद्यो हंति । कथमनुकीर्तयेत् । अन्ततः श्रुतं वा कस्माद्वा आर्तो वा सन्प्रलंभनाद्वा परिहासात् तस्माच्छेषादन्यम् ॥ ११ ॥ गिर्यादिसहितं भूगोलं सत्त्वानि प्राणिनः । सहस्रजिह्वोऽपि गणयेत् ॥ १२ ॥ दुरंतं वीर्यं बलं यस्य । उरवो गुणा अनुभावश्च यस्य स च स च रसाया भूमेर्मूले स्थितस्तिष्ठति । आत्मतंत्र आत्माधारः ॥ १३ ॥ उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति । एता ह्येवेह कामान्कामयमानैर्नृभिरुपगंतव्या इत्यन्वयः ॥ १४ ॥ तस्य प्रपंचः । एतावत्यो विपाकगतयः फलभूता गतयस्ता व्याचख्ये व्याख्यातवानस्मि ॥ १५ ॥ इति श्रीमद्भागवते पंचमे टीकायां पंचविंशतितमोऽध्यायः ॥ २५ ॥ षड्विंशे तु ततोऽधस्तान्नरकस्थितिरुच्यते । पापिनो यत्र दह्यंते यमदूतैर्यथायथम् ॥ १ ॥ पुंसो गतय उच्चावचा विसदृशा इति भोगवैचित्र्यमुक्तं तदेतत्कुत इति पृच्छति । महर्ष इति ॥ १ ॥ कर्मणः समानत्वेऽपि श्रद्धावैचित्र्यात्फलवैचित्र्यमिति परिहरति । त्रिगुणत्वादिति । सात्त्विक्या श्रद्धया कर्तुः सुखित्वं राजस्या

करोतीति वदन्नेव शेषरूपेणापि स्तौति द्वाभ्यां यस्य नाम संकर्षण इत्यादि । सद्योंहो हंति अजामिलादौ तथा दर्शनादिति भावः ॥ ११ ॥ भगवद्विग्रहस्य मध्यमपरिमाणायमानत्वेऽपि विभुत्वाद्भूमंडलस्याणुत्वमित्याह–मूर्ध्नीति । न कोऽपीत्यर्थलब्धम् ॥ १२ ॥ एवंप्रभाव उक्तलक्षणप्रभाववान् ॥ १३ ॥ यथोपदेशं यथाशास्त्रम् ॥ १४ ॥ उच्चावचानामेकरूपत्वासंभवादाह–विसदृशा इति । वक्तव्यांशानां बहुत्वादाह–किमन्यदिति ॥ १५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे पञ्चविंशोऽध्यायः ॥ २५ ॥ ॥ ततो भूमेः । यत्र येषु नरकेषु । यथायथमपराधानुसारेण (१) महर्षे इति । ऋषीणामपि त्रिकालज्ञत्वेनैतत्कथनसमर्थत्वात्तत्र तु महर्षेस्तेषामपि पूज्यतमस्य किमुत वक्तव्यमिति भावः । पुंसो गतय उच्चावचा विसदृशा भोगवैचित्र्यमुक्तं तदेतत्कुत इति पृच्छति ॥ १ ॥ ऋषिरुवाचेति सर्वज्ञत्वाभिप्रायेण । सात्त्विक्या श्रद्धया धर्म एव भवेत्तस्माच्च कर्त्तुः सुखमेव राजस्या धर्माधर्मौ ताभ्यां सुखदुःखे तामस्याऽधर्म एव तस्माच्च दुःखमोहौ तत्रापि तासां श्रद्धानां तारतम्यात्सुखादितारतम्यं सर्वस्य सर्वा इति । न हि कश्चि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धया वैसादृश्यात् कर्मफलं विसदृशं भवति ॥ या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः ॥३॥ राजोवाच॥ नरका नाम भगवन् किं देशविशेषा अथ वा बहिस्त्रिलोक्या आहोस्विदंतराल इति ॥ ४ ॥ ऋषिरुवाच ॥ अंतराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताताद् भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसंति ॥ ५ ॥ यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति ॥ ६ ॥

सुखित्वं दुःखित्वं च तामस्या दुःखित्वं मूढत्वं च । तत्रापि तासां श्रद्धानां तारतम्यात्सुखादितारतम्यं सर्वेषामित्यर्थः ॥ २ ॥ प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्याधर्मस्य कर्तुः श्रद्धावैसादृश्यं तमसस्तारतम्यात् तत्रापि कारणं दर्शयन्नाह । अनाद्यविद्याकृतानां कामानां याः सृतयो नरकास्तासां ताः अथेदानीं ताः प्राचुर्येणानुवर्णयिष्याम इत्यन्वयः ॥ ३ ॥ किं भूमावेव देशविशेषाः त्रिलोक्या ब्रह्मांडाद्बहिर्वा आवरणेषु मध्येंतराले वा भूमिव्यतिरिक्ते ॥ ४ ॥ ५ ॥ कर्मदोषमनतिक्रम्य दोषमेव दमं

त्सर्वदैव सात्त्विकश्रद्धावानेव तिष्ठति राजसतामसश्रद्धावानेव वा अतः कालभेदेन सर्वविधस्यैव जीवस्य सर्वविधा गतयः ॥ २ ॥ तत्र शास्त्रविहितस्य धर्मस्य फलभूतानि भौमदिव्यबिलस्वर्गसुखानि दर्शितान्यत एवाधर्मस्यापि फलभूतानि नरकदुःखान्यपि विवक्षितव्यानीत्यत आह–अथेति । प्रतिषिद्धं प्रतिषेधो ''ब्राह्मणं न हन्यात्'' इत्येवंरूपो लक्षणं प्रमाणं यस्य तस्य । ''प्रमाणे नाम्नि चिह्ने च स्वरूपे ना न लक्षणम्'' इति निरुक्तिः । तथैवेति । धर्मस्य कर्तुर्यथा तथैवाधर्मस्यापि कर्तुरित्यर्थः । श्रद्धाया वैसादृश्यादिति । श्रद्धावैसादृश्येपि तमस्तारतम्यमेव कारणं तथाहि–प्रमादेनाधर्मकरणात्तमसोऽल्पत्वं ज्ञानेन मध्यमत्वं तथापि नास्तिकत्वेन पूर्णत्वं ज्ञेयं तत्रापि तमस्त्रैविध्यस्यापि कारणं दर्शयन्नाह–या इति । अनाद्यविद्यया संबंधो जीवस्य कदा कथं वेति वक्तुमशक्यम् । अनादिर्या तमआदित्रैविध्यमय्यविद्या तया कृतानां जीवसंबंधित्वेनोपपादितानां कामानां वासनानां याः सृतयः कीदृश्यस्तेषां कामानां परिणामलक्षणास्तासां मध्ये प्राचुर्येण प्राधान्येन ॥ ३ ॥ भगवन्निति । सर्वज्ञत्वाद्वक्तुमर्हसीति भावः ॥ ४ ॥ भारतखंडाद्दक्षिणसूत्रपाते भूमेः सप्तविवरवत्या अधः । जलाद्भूर्भेदसंज्ञात् । अपि च सप्तेति न्यायात् । अस्यार्थः–अपि च सप्तरौरवादयो नरकाः पापफलभूमित्वेन स्मर्य्यंते पौराणिकैस्तान्यपि नः प्राप्नुवंति न चंद्रलोकमिति सप्तेत्युपलक्षणमन्येषाम् ''वैवस्वतं संगमनं जनानाम्'' इत्यादि ''न संपरायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे'' इत्यादि च काठकं वाक्यं यमलोकगतौ लिंगम् । आदिना सोमसदादिग्रहः । तदुक्तं मनुना–''विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः । अग्निष्वात्तास्तु देवानां मारीच्या लोकविश्रुताः ॥ दैत्यदानवयक्षाणां गंधर्वोरगरक्षसाम् । सुपर्णकिन्नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः ॥ सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः । वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः ॥ सोमपास्तु कवेः पुत्रा हविष्मंतोंगिरःसुताः । पुलस्त्यस्याज्यपाः पुत्रा वशिष्ठस्य सुकालिनः ॥ '' इति । स्वानां गोत्राणामिति । तत्तयाभिमानादेव तत एव यत्किञ्चिच्छांतिर्भवतीति सत्या आशिष इत्युक्तम् । तेते तैस्तैरिहार्चिता अर्चकानामैहिकसुखानि भोजयित्वा यमलोकगतमपि धर्मराजप्रार्थनया सुखयंतीति भावः । तदुक्तं मार्कंडेये–''तृप्यंतु तस्मिन् पितरः समस्ता इच्छावतां ये प्रदिशंति कामान् । सुरत्वमिंद्रत्वमतोधिकं वा सुतान्पशून्स्वानि बलं गृहाणि ॥'' इत्यादिरुचिस्तुतिं श्रुत्वा पितृभि रप्युक्तं ''तस्य तुष्टा वयं भोगानात्मज्ञानं तथैव च । शरीरारोग्यमर्थं च पुत्रपौत्रादिकं तथा ॥'' दद्म इति शेष इति । वा परमेन समाधिना भगवन्निष्ठया परमश्वासाविनश्चेति परमेनस्तत्रा समंतात्समाधिरैकाग्र्यंपरमेन समाधिस्तेनैकपदमिदम् ॥ ५ ॥ यत्र येषु नरकेषु स्वविषयं स्वदेशं ''विषयस्तूपवर्त्तनम्'' इत्यमरः । कर्मावद्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र हैके नरकानेकविंशतिं गणयंति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः ॥ तामिस्रोंधतामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥ किं च क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दंदशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिनरका विविधयातनाभूमयः ॥ ७ ॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते ॥ अनशनानुदपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥ ८ ॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपयुंक्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति ॥ ९ ॥ यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १० ॥ ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं तत एव रुरवो भूत्वा तथा तमेव विहिंसंति तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः ॥ ११ ॥ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयंति यः केवलं देहंभरः ॥ १२ ॥

पापफलं दंडं करोति । उल्लंघितं भगवच्छासनं येन ॥ ६ ॥ मतांतरेणाष्टाविंशतिमाह । किं चेति ॥७॥ पापभेदेन च तत्तन्नरकयातनाभेदं प्रपंचयति तत्र यस्त्वित्यादिना । यात्यमानः पीड्यमानः । एकदैव तदैव ॥८॥ पुरुषं पतिं वंचयित्वा ॥ ९ ॥ एतच्छरीरमहमिति इदं धनादि ममेति मत्वा स्वं च कुटुंबमेव पुष्णाति । तेनाशुभेन॥ १०॥ रुरवो भूत्वेति कर्माण्येव तथा परिणामं प्राप्येत्यर्थः । अतिक्रूरस्य भारशृंगाख्यस्य सत्त्वस्यापदेशः संज्ञा ॥ ११ ॥ क्रव्येण निमित्तेन मांसार्थमित्यर्थः ॥ १२ ॥

कर्मदोषमनतिक्रम्य दोषमेव दोषरूपमेव । तादृशविभीषिकयापि जीवान्भगवदंतर्मुखीकर्त्तुमिति भावः । दोषमेव दमरूपेण परिणमयतीति संदर्भः । अनुल्लंघितेति । भगवानत्र ब्रह्मा । यद्वा—भगवान् वेद इति । "वेदो नारायणः साक्षात्" इति षष्ठे वक्ष्यमाणत्वात् ॥ ६ ॥ तत्र हेति सप्त प्रधानाः संतीति स्मृतिप्रसिद्धिं द्योतयति । यद्यपि प्रधानाः सप्तैव तथाप्येके पौराणिकाः । अथातस्तान्नरकांस्ते तुभ्यम् । राजन्निति । राज्ञस्तवावश्यं धर्ममार्गे स्थातव्यं स्थाप्याश्च स्वप्रजा अतस्तुभ्यं श्रावयिष्यामीति भावः । केषांचिन्मतेऽन्येपि सप्तातीव भयदा नरकाः संतीत्याह—किञ्चेति । 'यातनास्तीव्रवेदनाः' इत्यभिधानात् ॥ ७ ॥ तत्र तेषु मध्ये । तामिस्रबहुले आदिना कुदृष्ट्यादिग्रहः ॥ ८ ॥ वंचयित्वा इयं मे धर्म्मभगिनीयं मे शिष्येत्यादिवंचनां रचयित्वा यो भुंक्ते स एवमेवांधतामिस्रे निपात्यत इति पूर्वेणान्वयः । यत्र नरके । यस्मान्नष्टदृष्टिर्भवति तस्मादंधतामिस्रमिति ॥ ९ ॥ तत् कुटुंबम् ॥ १० ॥ इत्यर्थ इति । तत्तद्धिंसाजातकर्माण्येव रुरुतां प्राप्नुवंतीति भावः । रुरुशब्दस्य स्वयं मुनिनैव टीकाविधानाल्लोकेष्वप्रसिद्धोऽयं जीवविशेषः ॥ ११ ॥ केवलं भूतद्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरंधयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्ततैले उपरंधयंति ॥ १३ ॥
यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरकेऽयुतयोजनपरिमंडले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षु
त्पिपासाभ्यां च दह्यमानांतर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावंति पशुरोमाणि तावद्वर्षसहस्राणि ॥ १४ ॥ यस्त्विह वै
निजवेदपथादनापद्यपगतः पाखंडं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति तत्र हासादित इतस्ततो धावमान उभयतोधारैस्तालवना
सिपत्रैश्छिद्यमानसर्वांगो हा हतोऽस्मीति परमया वेदनया मूर्छितः पदेपदे निपतति स्वधर्महा पाखंडानुगतं फलं भुंक्ते ॥ १५ ॥ यस्त्विह वै
राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान् नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो
यथैवेहेक्षुखंड आर्त्तस्वरेण स्वनयन् क्वचिन्मूर्छितः कश्मल उपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ १६ ॥ यस्त्विह वै भूतानामीश्वरोपक
ल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जं
तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिय केचाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमासि विहतनिद्रानिर्वृतिरलब्धावस्थानः
परिक्रामति यथा कुशरीरे जीवः ॥ १७ ॥

प्राणतः सजीवान् । उपरंधयति पचति । अपकरुणं निष्कृपम् ॥ १३ ॥ खले समे देशे ॥ १४ ॥ स्वधर्महा धर्मत्यागी ॥ १५ ॥ स्वनयन् रुदन्कश्मलं मोहमुपगतो भवति । दृष्टदोषास्तेनोपरुद्धाः संतो यथा कश्मलमुपगतास्तद्वत् ॥ १६ ॥ ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनाम् । न विविक्ता विज्ञाता परव्यथा

हेणेति शेषः ॥ १२ ॥ 'कुंभी तूखाकट्फलयोः' इत्यभिधानात् । कुंभीषु पच्यंते यत्र स कुंभीपाकः । उखा कटाहभेदः ॥ १३ ॥ ब्रह्म वेदः । ''खलं भूस्थानकल्केषु खलो गर्त्तेऽधमेंबरे'' इत्यभिधानात् । तप्तगर्त्ते इत्यप्यर्थः । अधस्तादग्निरुपर्यर्कः । यद्यप्यर्कस्तत्र नास्ति तथापि पापिनां पीडार्थमन्य एव तत्र कल्पितोऽस्तीति ज्ञेयम् । न केवलं पित्रादिध्रुगेव किन्तु पश्वादिहिंसकोऽप्येवमित्याह—यावंतीति ॥ १४ ॥ निजवेदपथात्स्वस्य विहितमार्गात् । अनापदीत्युक्तेरापदि किंश्चिदनुग्रहोऽस्तीति भावः । पाखंडं वेदविरुद्धं वेदाविहितमाधुनिकैर्निजेच्छया स्वपूजार्थं कल्पितशास्त्राभासबोधितमार्गमित्यर्थः । ''कशाश्वस्य च ताडनी । प्रोक्ता कशा भूमिहिंसाशणतंत्वंशुषु'' इति निरुक्तिः । तत्र ह असिपत्रवने । असौ पाखंडानुगः । उभयतोधारैरुभयतस्तीक्ष्णाग्रैः । ''धारा तीक्ष्णाग्रपानीयवेगाश्वगतिपञ्चके'' इति कोशात् । पाखंडानुगतं पाखंडानुकूलम् । क्वचित्प्रथमांतोऽपि पाठः ॥ १५ ॥ अदंड्ये दंडाऽनर्हे । शरीरदंडस्ताडनांगच्छेदादिः । तत्र नरके । अतिबलैः यमपुरुषैः । निष्पिष्यमाणाश्चूर्णीक्रियमाणा अवयवा अंगानि यस्य । यथेक्षुपीडनयंत्रे इक्षुखंड इक्षूणां खंडः समूहः पीडनकाष्ठमध्ये दत्त्वापरत्रातिबलैराकृष्यते सचूर्णितश्च भवति तथेति ॥ १६ ॥ आदिना दंशमशकादिग्रहः । पुरुषेण श्रीहरिणा । तेषां मत्कुणादीनामभिद्रोहेण हिंसया ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥ १८ ॥ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरति अन्यस्य वाऽनापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्वचि निष्कुषंति ॥ ॥ १९ ॥ यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमाऽलिंगयंति स्त्रियं च पुरुषरूपया सूर्म्या ॥ २० ॥ यस्त्विह वै सर्वाभिगमस्तममुत्रनिरये वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति ॥ २१ ॥ ये त्विह वै राजन्या राजपुरुषा वा अपाखंडा धर्मसेतून् भिंदंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंत उपतप्यंतो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यंते ॥ २२ ॥

यैरविवेकिभिस्तेषाम् । पुरुषेण ब्राह्मणादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य । विविक्ता परव्यथा येन विवेकिना । अभिद्रुग्धा हिंसिता विहिता निद्रारूपा निर्वृतिर्यस्य । न लब्धमवस्थानं येन स तमसि परिक्रामति ॥ १७ ॥ यत्किंचन भक्ष्यादिकमुपनतं प्राप्तं तदसंविभज्य । न निर्मिताः पंचयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः । कृमिभोजनः कृमीनेव भुंजानः यावत्तत् यावंति योजनानि तत्कृमिकुंडं तावंति वर्षाणि यावद्वा तत्पातकमित्यर्थः।अप्रत्तमसंविभक्तमप्रहुतं चात्तीति तथा सः। अनिर्वेशमकृतप्रायश्चित्तम् ॥ १८ ॥ निष्कुषंति छिंदंति ॥ १९ ॥ तिग्मया तप्तया । सूर्म्या प्रतिमया ॥ २० ॥ सर्वाभिगमः पश्वाद्युपगंता ॥ २१ ॥ अपाखंडाः सत्कुलीनाः

असौ द्रोग्धा तैस्तैर्यूकादिभिः । कुशरीरे कुष्ठादिदूषितदेहे ॥ १७ ॥ अत एवानिर्मितपंचयज्ञत्वादेव । वायसतुल्यैराचारहीनैः । संस्तुतो वाऽसंविभज्य बालवृद्धादिभ्योऽदत्त्वैव । इत्यर्थ इति । प्रकर्षेणादायीति प्रत्तं न प्रत्तमप्रत्तमसंविभक्तं च अप्रहुतमाहुतिवर्जितं चात्तीति तथा । ''निर्वेशस्तु पुमान्भोगे वेतने मूर्छनेऽपि च'' इति मेदिनी । वेतनशब्देनेह प्रायश्चित्तं लक्ष्यते । यातयति पीडयति ॥ १८ ॥ अन्यस्य नापदीत्युक्तेर्ब्राह्मणस्यापद्यपीत्यायातम् । संदंशैर्यंत्रविशेषैः तप्तलोहादिग्रहणार्थं व्याघ्रमुखो द्विफालो लोहयंत्रः संदंशः । निष्कुषंति स्पर्शयंति ॥ १९ ॥ अगम्यामुद्वाहविधिग्रहणवर्जितां सर्वाम् । अगम्यं पाणिग्रहीतारं विना पुरुषमात्रमित्यर्थः । ''अगम्यः पुरुषो नार्या हस्तग्राहं विनाऽखिलः । नार्यगम्या तथा सर्वा विना पाणिगृहीतिकाम् ॥'' इति संहितोक्तेः । ''तिग्मं तीक्ष्णे च तप्ते च सूर्मी पुत्तलिका स्मृता', इति चाभिधानचिंतामणिः ॥ २० ॥ सर्वाभिः स्त्रीभिरभिगमो मैथुनं यस्य स तथा गर्दभ्यादिष्वपि रमणशीलः । वज्रवत्कंटकानि यस्याः शाल्मल्यास्ताम् । निष्कर्षंति यथा कंटकैस्तद्देहोऽतिपीडितः स्यात्तथोपरिभागतोऽधोभाग आकर्षंति ॥ २१ ॥ द्वितीयांतपाठेऽपाखंडानिति पाठे । धर्मसेतून् देवब्राह्मणगोवृत्तिरूपान् । तदर्चनरूपान्वा भिंदंति छिंदंति । अपाखंडानित्युक्तेः पाखंडवृत्त्यादिच्छेदे दोषाभाव एवासूचीति । वितरणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतंति तदेवा तिबीभत्सितमश्नंति ॥ २३ ॥ ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान् निघ्नंति तानपि संपरेताँल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यंति ॥ २४ ॥ ये त्विह वै दांभिका दंभयज्ञेषु पशून् विशसंति तानमुष्मिँल्लोके वैशसे नरके पतितान् निरयपतयो यातयित्वा विशसंति ॥ २५ ॥ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः संपाययंति ॥ २६ ॥ ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुंपंति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति ॥ २७ ॥ यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथंचित् स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिम त्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ २८ ॥ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंचंति ॥ २९ ॥

संतः। द्वितीयांतपाठे सेतुविशेषणम्। नदीं विशिनष्टि। विण्मूत्रेति ॥२२॥ पशुचर्यां स्वेच्छाचारम् ॥२३॥ अतीर्थे विहितादन्यत्र विध्यंतीति प्राणनिरोधो दर्शितः ॥ २४ ॥ निरयपतयो यमपुरुषाः ॥ २५ ॥ लालाभक्षमाह—यस्त्विति । रेतःपानं कारयंति ॥ २६ ॥ यमदूता ये श्वानः सरभसं ससंभ्रमम् ॥२७॥ द्रव्यविनिमये क्रयविक्रयादौ । निरवकाशे निरालंबे । अवीचिशब्दार्थमाह यत्रेति । वीचिस्तरंगस्तद्रहितत्वादवीचिः ॥ २८ ॥ यो विप्रस्तत्कलत्रं वा सुरां पिबत्यन्योऽपि वा व्रतस्थः सन् राजन्यो

दानं तेन तीर्यत इति वैतरणी तस्यां तदुक्तं गारुडे "दानं वितरणं प्रोक्तं तेन सा तीर्यते यतः। वैतरणीति ततः प्रोक्ता गोदानेन विशेषतः॥" इति । आत्मना यातनादेहेन । असुभिः प्राणैश्चोह्यमानाः अवियुज्यमानाः । पूयमपक्वरक्तम् । वसा मज्जा । मेदोऽपि शारीरिकधातुभेदः ॥ २२ ॥ "वेश्या सती च दासी च कुमारी स्याद्रजस्वला । संगृहीता च या भार्या वृषल्यः पञ्च कीर्त्तिताः ॥" इति स्मृतिसंग्रहे । हारीतस्तु—"पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता । सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः" इत्याह । नष्टशौचस्य 'एका लिंगे गुदे पञ्च' इत्यादिनोक्तस्याचारस्य धर्माचरणस्य यद्वा—"रागद्वेषविनिर्मुक्तैर्विद्वद्भिर्यदनुष्ठितम् । सदाचारः स विज्ञेयो धर्ममूलो मनीषिभिः ॥" इति स्कांदोक्तलक्षणस्य नियमोऽनुष्ठानं येषां ते तथा । शौचाचारपरित्याग एव पशुचर्या । तदेव पूयाद्येव । अतिबीभत्सितमतीव निंद्यं भुंजंति ॥ २३ ॥ अतीर्थे श्राद्धादिरहितकाले । तान् श्वगर्दभपत्यादीन् ॥ २४ ॥ यातयित्वा पीडयित्वा । विशसंति घ्नंति ॥ २५ ॥ पाययति वशीकरणार्थं रेतःपानं कारयति । 'रेतः पातयति' इति पाठे काममोहितः सन्सवर्णां भार्यां परित्यज्यान्यवर्णास्वेव स्त्रीषु रेतःपातं करोतीत्यर्थः ॥ २६ ॥ सारमेयादनमाह—सार्थान् पांथान् "सार्थः पांथे च संघाते समूहे वणिजां तथा" इति कोशात् । रभसो वेगस्तत्सहितम् ॥ २७ ॥ साक्ष्ये साक्षिवक्तव्ये । ॥ २८ ॥ अयःपानमाह—क्षत्रियवैश्ययोः सोमनिषेधे फलचमसविधौ च प्रमाणमाह—तथा चेति । न्यग्रोधस्य स्तिभीर्वटिकाकारफलानि आहृत्यानीय ता वटिका दध्नि दधिरूपपयोविकारे उपमृज्य मर्दयित्वा तं फल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरंता यातना ह्यश्नुते ॥ ३० ॥ ये त्विह वै पुरुषाः पुरुषमेधेन यजंते याश्च स्त्रियो नृपशून् खादंति तांश्च ते पशव इव निहता यमसदने यातयंतो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायासृक् पिबंति नृत्यंति गायंति च हृष्यमाणा यथेह पुरुषादाः ॥ ३१ ॥ ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रंभिकैरुपसृतानुपविश्रंभय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयंति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाऽभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्मरंति ॥३२॥ ये त्विह वै भूतान्युद्वेजयंति नरा उल्बणस्वभावा यथा दंदशूकास्तेऽपि प्रेत्य नरके दंदशूकाख्ये निपतंति यत्र नृप दंदशूकाः पंचमुखाः सप्तमुखा उपसृत्य ग्रसंति यथा बिलेशयान् ॥३३॥ ये त्विह वा अंधावटकुशूलगुहादिषु भूतानि निरुंधंति तथाऽमुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुंधंति ॥३४॥ यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चाऽपि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्राः कंककवटादयः प्रसह्योरुबलादुत्पाटयंति ॥ ३५ ॥

वैश्यो वा सोमपीथः कृतसोमपान इत्यन्वयः । तयोः सोमस्थाने फलचमसविधानात्सोमपाननिषेधाच्च । तथा च श्रुतिः । "न्यग्रोधस्तिभीराहृत्य ताः संपिष्य दधन्युपमृज्य तमस्मै भक्षं संप्रयच्छेन्न सोमम्" इति ॥ २९ ॥ स पूर्वमपि मृतक एव सन्मृत्वा ॥ ३० ॥ पुरुषस्य मेधेन हिंसया भैरवादीन्यजंते । याश्च स्त्रियो नरमांसं भक्षयंति । कामरूपा रक्षोगणा भूत्वा । यथेह ते पुरुषादाः संतः पूर्वमनृत्यंत तद्वत् ॥ ३१ ॥ वैश्रंभकैर्विश्वासोपायैः । उपविश्रंभय्य विश्वास्य ॥ ३२ ॥ बिलेशयान्मूषकान् ॥ ३३ ॥ सगरेण सविषेण ॥ ३४ ॥ अतिथयोऽज्ञातपूर्वा अभ्यागता ज्ञातपूर्वास्तान् । पापेन वक्रीकृतेन ॥ ३५ ॥

चमससंज्ञमस्मै क्षत्रियाय वैश्याय वा भक्षं पेयं दद्यान्न सोममिति श्रुतिपदार्थः । "स्तिभिः स्त्रियां वटादीनां सूक्ष्मबीजयुते फले । वटिकाकारसंयुक्ते समुद्रे तु स्तिभिः पुमान् ॥" इति धरणिदेवः । सुरां गौड्यादिभेदेन त्रिविधाम् । तत्कलत्रं विप्रादित्रयकलत्रं वा । अन्यो द्विजेतरोऽपि व्रतस्थः कार्त्तिकादिव्रतधारी सन् । कार्ष्णायसं लोहम् । प्रमादतोऽज्ञानात् । तेषां सुरापायिनाम् ॥ २९ ॥ स्वयं वर्णाश्रमतो न्यूनोऽपि आत्मसंभावनं मत्तोन्यः कोधिक इति मननं तेन जन्मतपआदिभिः स्वस्माद्वरीयसः श्रेष्ठान् । बहु स्वतोऽधिकं न मन्येत स मृतक एव जीवन्नपि मृत एव शास्त्राज्ञोल्लंघित्वेन लोकानिंद्यत्वात् जीवन्मृतः कोऽपयशः स्वकीयं शृणोतीति शुकप्रश्नोत्तरोक्तेः । क्षारकर्दमे लवणात्मकपंके ॥ ३० ॥ स्वधितिना छेदनशस्त्रेण अवदाय अवखंड्य । रक्षोगणभोजनोऽयं नरकः ॥ ३१ ॥ विश्वासोपायैरन्नाविकिरणादिभिः । आदिना भृगुपातनग्रहः । आदिना गृध्रादिग्रहः । शूलप्रोताख्योऽनरकः ॥ ३२ ॥ मूषिको हि बिलेशयोऽत्र ग्राह्यः । दंदशूकः सदा दंशनशीलोऽहिः ॥ ३३ ॥ अवटनिरोधनरकमाह–अंधे तमसि । अवटे भूगर्त्ते 'गर्त्तावटौ भुवः श्वभ्रे' इत्यमरः । कुशूलं सतृणमृन्निर्मितमन्नाधारकोष्टम् । गुहा कंदरा । आदिना हुडादिग्रहः ॥३४॥ "अनागतमनाहूतं देशकाले उपस्थितम् । अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः" इति स्मृतेः । "यतिश्च ब्रह्मचारी च विद्यार्थी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशंकी अर्थव्ययनाशचिंतया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापं पुरुषं धर्मराजपुरुषा वायका इव सर्वतोंगेषु सूत्रैः परिवयंति ॥ ३६ ॥ एवंविधा नरका यमालये संति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति ॥ ३७ ॥ निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ३८ ॥ श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः ॥ स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥ ३९ ॥

आढ्याभिमतिर्धनगर्वितः अहंकृतिः श्रेष्ठोऽहमिति मानी । तिर्यक्प्रेक्षणं यस्य । सर्वतो गुर्वादेरपि धनं चोरयिष्यंतीति विशंकमानः परिशुष्यमाणं हृदयं वदनं च यस्य । अनवगतोऽप्राप्तः । तस्यार्थस्योत्पादनादिभिः शमलं गृह्णातीति तथा। परिवयंति सूत्रप्रोतं कुर्वंति ॥ ३६॥ इतरत्र स्वर्गादौ इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्तम् । उभयो धर्माधर्मयोः शेषाभ्याम्॥ ३७॥ आदावेव द्वितीयस्कंधे वैश्वानरं यातीत्यादिना। उपगेयमौपनिषदं रूपम्।श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य॥ ३८॥ यथा यथावच्छ्रुत्वा॥ ३९॥

गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च षडेतेऽभ्यागताः स्मृताः ॥ '' इति स्मृतेश्चातिथ्यभ्यागतभेद ऊहनीयः । कंकादयो मृतपश्वादिमांसाशिनः पक्षिविशेषाः । तुंडं मुखाग्रम् । पर्यावर्त्तनाख्योऽयं नरकः ॥ ३९ ॥ ग्रह इव ब्रह्मराक्षसादिर्यथा निधिमन्येभ्यो रक्षंति तथाभिरक्षति। स चार्थाभिरक्षिता । उत्पादनमर्जनम् उत्कर्षणं वृद्धीकरणम् संरक्षणमन्यत्राप्रदानं तैर्यच्छमलं दुःखं पापं वा 'दुःखे पापे च शमलम्' इत्यभिधानात् । वायकाः पटच्चरैः कंथानिर्माणनिपुणा वित्तग्रहमर्थलुब्धपिशाचसमं सूत्रैः स्वर्गरजतादिसूत्रैः क्षुरधारानिशितैः संपादितधनसमतुलितैः परिवयंति ओतप्रोतक्रियया विध्यंतीत्यर्थः । यद्वा–ग्रहो यक्षः "ग्रहो यक्षे च सूर्यादावादाने प्युपरागके'' इति धरणिः । वायको वस्त्रसेवकस्तंतुवायश्चेति ॥ ३६ ॥ अवनिपते इति । यथा त्वं पापिनां कर्मानुरोधेनावनौ दंडं ददासि तथा तत्रापीति भावः । पर्यायेण कर्मक्रमेण । पुनर्भव इति निमित्ते सप्तमीति स्वामिचरणाः।पुनरपि धर्माधर्मयोर्भव उत्पत्तिर्यतस्तस्मिन्निति इहपदविशेषणमिति विश्वनाथः ॥३७॥चतुर्दशधा लोकप्रकारेण । पुराणेषु स्कान्दादिषु । उपनिषदामिति षष्ठी कृत्ययोगे कर्त्तरि । यद्रूपं तद्यः पठतीत्यादि संबंधः । अग्राह्यं ज्ञातुमशक्यम् ॥ ३८ ॥ यथा स्थूलं श्रुत्वा तथा सूक्ष्मं श्रुत्वा स्थूले रूपे आत्मानं निर्जितं कृत्वा शनैः क्रमेण सूक्ष्मं प्रति धिया व्यवसायात्मिकया बुद्ध्या नयेदित्यन्वयः । सूक्ष्ममत्र भक्तिमात्रगम्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ॥ गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यामष्टादशसाहस्र्यां संहितायां पंचमस्कंधे नरकानुवर्णनं नाम षड्विंशतितमोध्यायः ॥ २६ ॥ समाप्तोऽयं पञ्चमस्कन्धः ॥ ५ ॥

कथंभूता संस्था । सकलानां जीवनिकायानां धाम आश्रयभूतं वपुः ॥ ४० ॥ पंचमस्कंधसंबंधिपदभावार्थदीपनैः ॥ प्रीयतां परमानंदनृहरिर्बालभाषितैः ॥ १ ॥ इति श्रीमद्भागवते महापुराणे श्रीधरस्वामिविरचितायां पंचमस्कंधटीकायां भावार्थदीपिकायां षड्विंशतितमोऽध्यायः ॥ २६ ॥ समाप्तोऽयं पंचमः स्कंधः ॥ ५ ॥

रूपम् "यावन्न जायेत परावरेऽस्मिन्विश्वेश्वरे द्रष्टरि भक्तियोगः" इत्याद्युक्तेः ॥३९॥ उपसंहरति–भूद्वीपेति । संस्था रचना । निकायः समूहः ॥४०॥ दीपनं प्रकाशनम् (१) इति ॥ अथास्य श्रवणादिमहिमा "विष्णुरुवाच ॥ पञ्चमस्कंधसंभूतं फलं शृणु चतुर्मुख । तदेव हृदयं मह्यं बालहत्याविमोचकम् ॥ १ ॥ ब्रह्मोवाच ॥ बालहत्या कृता केन को मुक्तः श्रुतिमात्रतः । तन्मे वद सुरश्रेष्ठ लोकानां हितकारक ॥ २ ॥ हरिरुवाच ॥ पुरा कृतयुगे तात राजासीद्विमलो महान् । कान्यकुब्जाधिपः श्रीमान्भार्याशतयुतो विधे ॥ ३ ॥ आनपत्येन दुःखेन पीडितो गुरुमंदिरम् । जगाम रथमारुह्य संतानप्राप्तये नृपः ॥ ४ ॥ तत्र गत्वा गुरुं स्तुत्वा प्रार्थयामास संततिम् । गुरोराज्ञां समाप्राप्य पुत्रेष्टिं स चकार ह ॥ ५ ॥ ततः पुत्रशतं लेभ एकोनं नृपतिस्तदा । ज्येष्ठा भार्या पुत्रहीना दुःखिताभून्नृपस्य हि ॥ ६ ॥ सपत्नीनां पुत्रनाशं चिंतयामास सर्वदा । एकदा सहितः पत्न्या स्नानार्थं स समाययौ ॥ ७ ॥ अमाचंद्रमसोर्योगे तीर्थराजं सुखप्रदम् । मारितं बालकशतं भार्यया पुत्रहीनया ॥ ८ ॥ नृपतेर्विमलस्याथ श्रुत्वा राजातिदुःखितः । चतुरशीतिर्लक्षाणां नरकाणां तया पुनः ॥ ९ ॥ भुक्ता पापप्रभावेण चांडाली साभवन्मुहुः । दुर्भगत्वं समासाद्य विचरंत्या वनेवने ॥ १० ॥ कदाचिद्भाग्यतो वार्त्ता पञ्चमस्कंधसंभवा । हतपापा ततो जाता श्रवणस्य प्रभावतः ॥ वैकुंठलोकमगमदहो भागवतं महत् ॥११॥" इति पाद्मे । येनैतद्रचितं विश्वं निजमायाप्रभावतः । तं वंदे बल्लवीनाथं नंदगोपसुतं हरिम् ॥ १ ॥ यत्कृपावशतो दब्धो मया वंशीधरेण हि । प्रकाशः पञ्चमस्कंधे बहुटीकावलोकनात् । स कृष्णोभीप्सितं दद्यान्मम भक्तप्रियः सदा ॥ २ ॥ इति श्रीखरडपत्तनवास्तव्य पं०वंशीधरशर्म्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पञ्चमस्कन्धे षड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ समाप्तश्चायं पञ्चमस्कन्धः ॥ ५ ॥

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवतपञ्चमस्कन्धो मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"मुद्रणालये मुद्रयित्वा प्राकाट्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशः
टीकया चोपेते श्रीमद्भागवते पंचमस्कन्धः समाप्तः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते षष्ठस्कन्धप्रारंभः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षष्ठस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ राजोवाच ॥ निवृत्तिमार्गः कथित आदौ भगवता यथा ॥ क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृतिः ॥ १ ॥
प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने ॥ योसावलीनप्रकृतेर्गुणसर्गः पुनःपुनः ॥ २ ॥

श्रीगणेशाय नमः ॥ पुण्यारण्ये नृसिंहैकनामसिंहो विराजते ॥ यन्नादतः पलायंते महाकल्मषकुंजराः ॥ १ ॥ विसर्गसंभवाञ्जीवान्स्वमर्यादासु संस्थितान् ॥ विष्णुः पात्यखिलै रूपैरित्येवं पंचमे स्थितम् ॥ २ ॥ अध्यायैकोनविंशत्या षष्ठे पोषणमुच्यते ॥ अतिलंघितमर्यादभक्तलक्षणलक्षणम् ॥ ३ ॥ अजामिलो मनुष्येषु महापापो यथाऽवितः॥ विश्वरूपादिघाती च यथा देवेषु वासवः॥ ४ ॥ अजामिलस्य भक्तत्वं विष्णुदूतैर्निरूपितम् ॥ संकेतभगवन्नाम पुत्रस्नेहानुषंगजम् ॥ ५ ॥ इंद्रोऽपि भगवद्भक्तः सख्येनोपेन्द्रसेवकः ॥ तदधीनसुरैश्वर्यशत्रुनिर्जयजीवितः ॥ ६ ॥ तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते ॥ विश्वरूपकथा षड्भिरिंद्रदोषोक्तये ततः ॥ ७ ॥ इंद्रस्यैव तु दोषोक्त्यै वृत्राख्यानं ततोऽष्टभिः ॥ द्वाभ्यां च मरुदाख्यानमेवं प्रकरणक्रमः॥८॥ तत्रादौ प्रथमे विष्णोर्दूतैः पातकिमोचने ॥ तत्पापख्यापनायोक्तं याम्यैर्धर्मादिलक्षणम् ॥ ९ ॥ अथ षष्ठस्कंधो व्याख्यायते पूर्वोक्तानुवादपूर्वकं निरंतरोक्तनरकपरिहारोपायं पृच्छति निवृत्तिमार्ग इति षड्भिः । आदौ द्वितीयस्कंधे 'वैश्वानरं याति' इत्यादिना भगवता त्वया यथा यथावत् । यद्येन मार्गेण । क्रमेण योगोऽर्चिरादिप्राप्तिस्तेनोपलब्धो यो ब्रह्मा तेन सहासंसृतिर्मोक्षो भवति । "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति परं पदम् ॥ " इति वचनात् ॥ १ ॥ त्रैगुण्यं स्वर्गादिसुखं तदेव विषयः प्राप्यं यस्य न लीना प्रकृतिर्यस्य तस्य पुंसः पुनःपुनर्गुणसर्गो

ॐ स्वस्ति श्रीगणेशाय नमः ॥ योऽरक्षद्दासवं वृत्राद्यामिकेभ्यस्त्वजामिलम् ॥ स कृष्णो मां सदा पातु वृषभानुसुताप्रियः ॥ १ ॥ अधुना व्याकृतिं कुर्वे षष्ठस्कंधे गुरोः कृपाम् ॥ संप्राप्य निखिलांष्टीकाकृतो नत्वा यथामति ॥ २ ॥ पुण्यानां तीर्थयात्रादानजपादीनां वृक्षस्थानीयानामरण्ये वनवत्समूहे नृसिंहस्यैकं मुख्यं नामैव सिंहस्तत्सदृशः । यन्नादतो यदुच्चारणात् महाकल्मषा ब्रह्महत्यादय एव कुंजराः कुंजरस्थानीयाः (१) (२) अतिलंघिता मर्य्यादा स्वधर्मस्थितिर्येन स चासौ भक्तश्चेत्यतिलंघितमर्यादभक्तस्तस्य लक्षणेन रक्षणेन लक्षितं ज्ञापितं रलयोरैक्यात् । चक्रवर्त्तिनाऽपि " भक्तानां धर्ममर्यादालंघिनामपि पालनम् । यद्व वेत्तद् विद्वद्भिः पोषणं परिकीर्त्तितम्॥" इत्थमेवोक्तम् (३) आदिना वृत्रादिग्रहः । अवितो रक्षितः (४) संकेते कल्पनया स्थापितं भगवन्नाम यस्मिन्स संकेतभगवन्नाम स चासौ पुत्रश्च तत्र यः स्नेहानुषंगः स्नेहाधिक्यं तस्माज्जयत इति तथा (५) सख्येन भ्रातृभावेन । उपेंद्रो वामनस्तस्य सेवकः । सुराणामैश्वर्यञ्च शत्रूणां निर्जयश्च सुरैश्वर्यशत्रुनिर्जयौ तस्योपेंद्रस्याधीनौ च तौ सुरैश्वर्यशत्रुनिर्जयौ चेति तथा ताभ्यां जीवितः पालितस्तया (६) तत्रैकोनविंशतिमध्ये । ततोऽजामिलकथानंतरम् । इंद्रदोषो विश्वरूपहननादिः (७) ततो विश्वरूपकथानंतरम् (८) तत्र त्रिष्वपि तस्य पातकिनः पापकथनाय याम्यैर्यमदूतैः । आदिनाऽधर्मग्रहः (९) निवृत्तिमार्ग इति । तत्र पूर्वोक्तौ मार्गौ द्वौ वैदिकावैदिकभेदात् । आद्यस्तु प्रवृत्तिनिवृत्तिभेदेन द्विधा द्वितीयस्त्वेकधैवाधर्मलक्षणः । तत्र मार्गत्वं नाम क्रमयोगहेतुत्वमित्युक्तं—क्रमयोगोपलब्धेनेति । ज्ञानभक्ती तु सद्यः प्रापकत्वान्मार्गत्वेन न विवक्ष्येते तदेतदभिप्रेत्याह—प्रथमसार्द्धद्वयेन । तृतीयेऽपि ये स्वधर्मान्न दुह्यंतीत्यादिनोक्तः ॥१॥ मुने इति सर्वज्ञत्वमाह " सर्वशास्त्रावगंतारो मुनयः परिकीर्त्तिताः " इत्युक्तेः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधर्मलक्षणा नानानरकाश्चानुवर्णिताः ॥ मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥ ३ ॥ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ॥ द्वीपवर्षसमुद्राद्रीन्नद्युद्यानवनस्पतीन् ॥४॥ धरामंडलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥५॥ अधुनेह महाभाग यथैव नरकान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥६॥ श्रीशुक उवाच ॥ न चेदिहैवापचितिं यथांऽहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥ तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित् ॥ ८ ॥

भोगार्थं देहारंभरूपो यो मार्गः स च कथितस्तृतीये । “ दक्षिणेन पथाऽर्यम्णः पितृलोकं व्रजंति ते” इत्यादिना ॥ २ ॥ अनुवर्णिता निरंतराध्यायव्याख्याताश्चतुर्थस्यादौ । यतो यस्मिन् ॥ ३ ॥ द्वीपादीन्भागतो लक्षणतो मानतश्च धरामंडलस्य संस्थानं ज्योतिषां विवराणां चेदं संस्थानं विभुर्यथासृजत्तथा व्याख्यातमित्यर्थः ॥ ४ ॥ ॥ ५ ॥ नाना उग्रा यातना येषु तान्नरकान्यथा येनोपायेन नेयान्न गच्छेत्तन्मेऽधुना व्याख्यातुमर्हसि ॥ ६ ॥ तत्र तावन्मन्वाद्युक्तं प्रायश्चित्तं विना नरका दुर्निवारा इत्याह—न चेदिति द्वाभ्याम् । मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसस्तैरेवेहैवापचितिं प्रायश्चित्तं न कुर्याच्चेत्तर्हि स पुरुषः प्रेत्य मृत्वा नरकान्ध्रुवमुपैति । मे मया ये भवतः कीर्तिताः । तिग्मा दारुणा यातना येषु तान् ॥ ७ ॥ यस्मादेवं तस्मात्पापस्य निष्कृतौ प्रायश्चित्ते यतेत । कदा । मृत्योः पुरैव । तत्राप्यविपद्यताऽक्षीयमाणेनात्मना देहेन । यद्वा अविपद्विपत्तिरहितो यावत्। यतात्मना संयतेन मनसा । तत्राप्याशु । अन्यथा“अतीव चिरकाले तु द्विगुणं व्रतमर्हति” इति द्वैगुण्यापत्तेः । तत्र च पापस्य

अधर्मं लक्षयंति ज्ञापयंतीत्यधर्मलक्षणाः । मन्वंतरादिकं तु प्रासंगिकतयैव वर्णितमित्याह—मन्वंतरश्चेति सार्द्धद्वयेन ॥ ३ ॥ तच्चरितानि प्रियव्रतोत्तानपदोश्चरितानि द्वीपादीन्यथाऽसृजत्तथा व्याख्यातमित्यन्वयः । भागतो लक्षणतो मानतश्च धरामंडलसंस्थानं रचनाम् । ज्योतिषां सूर्यादीनाम् । विवराणामित्युपलक्षणं नरकाणाम् । इदं संस्थानं यथाऽसृजत्तथा व्याख्यातमित्यर्थः ॥ ४ ॥ ५ ॥ नाना उग्रा यातनाः पीडा येषु तान् । लोकानामिष्टानिष्टसाधने द्वे यथा ज्ञाते तथानिष्टपरिहारसाधनमपि ज्ञातव्यमिति भावः । महाभागेति । महाभागस्य तव संगिनोऽपि महाभागा यथा स्युस्तथा कर्तुमर्हसीत्यभिप्रायः ॥ ६ ॥ स्वशिष्यस्य परीक्षितः स्वमते व्युत्पत्तिं परीक्षमाणः कार्मिणां मते नरकप्रतीकारमाह—तत्रेति । तैरेव मनोवाक्पाणिभिरेव । मानसस्यांहसो मानसं प्रायश्चित्तमीश्वरध्यानादि । वाचिकस्य वाचिकं नामोच्चारणादि । कायिकस्योपवासादि । पाणिपदेनेह देहो लक्ष्यत इति ॥ ७ ॥ प्रायश्चित्तं तु जीवतैव कर्तुं शक्यते न तु मृतेनातः कथमुक्तमम्रियमाणेनेति चेत्तत्राह—यद्वेति । विपत्तिरहित इति । यावज्जरारोगादिभिर्व्रताद्यसामर्थ्यं न स्यादित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितम् ॥ करोति भूयो विवशः प्रायश्चित्तमथो कथम् ॥ ९ ॥ क्वचिन्निवर्ततेऽभद्रात्क्वचिच्चरति तत्पुनः ॥ प्रायश्चित्तमतोऽपार्थं मन्ये कुंजरशौचवत् ॥ १० ॥ श्रीशुक उवाच ॥ कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते ॥ अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम् ॥ ११ ॥ नाऽश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंति हि ॥ एवं नियमकृद्राजञ्छनैः क्षेमाय कल्पते ॥ १२ ॥ तपसा ब्रह्मचर्येण शमेन च दमेन च ॥ त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥

महत्त्वमल्पत्वं चावेक्ष्य तदनुरूपे प्रायश्चित्ते यतेत रुजां रोगाणां निदानविद्यथा वैद्यस्तदनुरूपं चिकित्सेत तद्वत् ॥ ८ ॥ अत्र चोदयति द्वाभ्याम् । दृष्टं राजदंडादि श्रुतं नरकपातादि ताभ्यामात्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानंतरं करोति । अथो अतः कारणाद्द्वादशाब्दादि कथं प्रायश्चित्तं तेन समूलस्य दोषस्यानिवृत्तेः निवृत्तौ वा पुनश्च पापप्ररोहायोगादिति भावः ॥ ९ ॥ किं च क्वचित्कदाचिदभद्रात्पापान्निवर्तते क्वचित्तदेव पुनराचरति यथा कुंजरः स्नातोऽपि रजोभिरात्मानं मलिनी करोति तथा पापस्य पुनर्दुर्निवारत्वेन नरकपातस्यावश्यंभावित्वात्प्रायश्चित्तं व्यर्थमिति मन्ये ॥ १० ॥ परिहरति । कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाश आत्यंतिकः समूलो न ह्रीष्यते अविद्वानधिकारी यस्मिंस्तस्य भावस्तत्त्वं तस्मात् । अतो विद्याया नाशाभावान्नष्टेऽपि तस्मिन्पापे तत्संस्कारेण पापांतरस्य पुनःपुनः प्ररोहो भवत्येव । किं तर्हि मुख्यं प्रायश्चित्तं तदाह । प्रायश्चित्तं तु विमर्शनं ज्ञानम् ॥ ११ ॥ तत्तु नित्यमप्रमत्तः शनैर्लभते नान्य इति सदृष्टांतमाह । नेति । पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधंते तथा नियमादिकर्ता क्षेमाय तत्त्वज्ञानाय समर्थो भवति॥ १२ ॥ एतदेव विशदयति द्वाभ्याम् । तपसैकाग्र्येण" मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तपः" इति स्मृतेः । ब्रह्मचर्येणाष्टांगेन । तदुक्तम् । " स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् ॥ संकल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति

तत्रापि संयतमनस्त्वेपि शीघ्रमेव । अन्यथा प्रायश्चित्तस्याशैघ्र्ये । तत्र च शैघ्र्यकरणे च । अत्र व्यवस्थापको विद्वान् धर्मशास्त्रतात्पर्यविज्ञो मृग्य इति भावः ॥ ८ ॥ अत्र प्रायश्चित्तविषये । चोदयत्याक्षिपति । चौर्य्यादिकारिणो राजदंडदर्शनेन " मृतो नरकमभ्येति ह्यगम्यागमनान्नरः " इत्यादिस्मृतिश्रवणेन च । इति भाव इति । " प्रायः पापं समाख्यातं चित्तं तस्य विसर्जनम् " इति प्रायश्चित्तलक्षणस्य तत्रासंभवात्पुनः प्रवृत्तौ तु पापनिवृत्त्यभाव एवेत्याशयः ॥ ९ ॥ १० ॥ परीक्षयोत्तीर्णं परीक्षितं पुनरपि परीक्षिष्यमाणः सिद्धांतं ज्ञापयति । आदिना चांद्रायणादिग्रहः । अविद्वान् अविद्याबद्धो जीवोऽधिकारी । अतोऽविद्यायाः पापमूलस्य विद्यमानत्वात् । तत्संस्कारेणाविद्यया पापसंस्कारेण। ज्ञानस्यैवाविद्यानिवर्तकत्वादिति भावः ॥११ ॥ ननु तर्हि पापवत्त्वेंतःकरणशुद्ध्यभावस्तस्मिंश्च सति कुतो ज्ञानप्रसंग इति चेत् । सत्यम् । ज्ञानसाधनेनापि पापोपशम इत्यभिप्रेत्याह । तत्त्विति । ज्ञानं तु । अन्यः प्रमत्तः । क्षेमाय पापनाशद्वारा शनैश्शनैरेव समर्थो भवति ॥ १२ ॥ तपसा भोगत्यागेन वा । तदुक्तं तत्त्वानुऽसंधान इति । रागपूर्वकं स्त्र्यादिविषयकं ज्ञानं दर्शनम् १ । रागपूर्वकं क्रियाविशेषजन्यं ज्ञानं स्पर्शनम् २ । रागपूर्वकं परिहासादिव्यवहारः केलिः ३ । स्त्र्यादेरनुरागपूर्वकं सौंदार्यादिवर्णनं कीर्त्तनम् ४ । रागपूर्वकं रहसि संभाषणं गुह्यभाषणम् ५ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्विताः ॥ क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः ॥ अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥ १५ ॥ न तथा ह्यघवान्राजन्पूयेत तपआदिभिः ॥ यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६ ॥ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः ॥ सुशीलाः साधवो यत्र नारायणपरायणाः ॥ १७ ॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् ॥ न निष्पुनंति राजेंद्र सुराकुंभमिवापगाः ॥ १८ ॥

मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥" इति । शमो मनसो नियमनम् । दमो बाह्येंद्रियाणाम् । त्यागो दानम् । यमोऽहिंसादिः । नियमो जपादिः ॥ १३ ॥ ॥ १४ ॥ अस्यातिदुष्करत्वान्मुख्यमेवान्यत्प्रायश्चित्तमाह। केचिदिति । केचिदित्यनेन एवंभूता भक्तिप्रधाना विरला इति दर्शयति । केवलया तपआदिनिरपेक्षया। वासुदेवपरायणा इति नाधिकारिविशेषणमेतत्किं त्वन्येषामश्रद्धया तत्राप्रवृत्तेरर्थात्तेष्वेव पर्यवसानादनुवादमात्रम् ॥ १५ ॥ एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह । न तथा पूयेत शुद्ध्येत । यथा तत्पुरुषनिषेवया कृष्णेऽर्पिताः प्राणा येन ॥ १६ ॥ तत्र हेतुः । सध्रीचीनः समीचीनोऽयं पंथा भक्तिमार्गो यतः क्षेमः क्षेमत्वे हेतुः । न कुतश्चिद्विघ्नादेर्भयं यस्मिन् । तदेवाह सुशीलाः कृपालवः साधवो निष्कामाः यत्र यस्मिन्मार्गे धर्मनिष्ठाः । अतो न ज्ञानमार्ग इवासहायतानिमित्तं भयं नापि कर्ममार्गवन्मत्सरादियुक्तेभ्यो भयमिति भावः ॥ १७ ॥ भक्तेरन्यनिरपेक्षत्वमुक्तं कृच्छ्रादीनि तु भक्तिं विना न शोधयन्तीत्याह । प्रायश्चित्तानीति । महतामप्यशोधकत्वे दृष्टान्तमाह—सुराकुंभमापगा नद्य इवेति ॥ १८ ॥

स्त्र्यादिविषयको दृढेच्छाविशेष इदं मेऽस्त्विति संकल्पः ६ । अनया रम इति निश्चयोऽध्यवसायः ७ । रागपूर्वकं स्त्र्यादिविषयकानुभवविशेषः क्रियानिर्वृतिः ८ । इति विवेकः । आदिना सत्यादिग्रहः । द्वितीयादिना स्नानादिग्रहः ॥ १३ ॥ वेणुगुल्मं वंशसमूहम् । अस्य ब्रह्मचर्यादेः ॥ १४ ॥ वेणुगुल्मानलदृष्टान्तेन पुनरपि पापप्ररोहसूचनादप्रसन्नमनसं राजानं भक्तानां मतेनाह । स्वामिचरणानाम् । वासुदेवपरायणा एवात्राधिकारिण इति न किं त्वन्येषां वासुदेवभक्तिहीनानां तत्र केवलायां भक्तौ अर्थात्तेष्वेव वासुदेवपरायणेष्वेव पर्यवसानात्तेषामेव तत्र प्रवृत्तिदर्शनादेतत्कथनमिति भावः । अत्र संदर्भः स्वमतमाह—केचिदित्यादिना तृतीयाध्यायं यावत् । अत्र भक्तिर्द्विधा संतता कादाचित्की चेति । तत्राद्या द्विधा आसक्तिमात्रयुक्ता रागमयी च । द्वितीया त्रिधा रागाभासमयी तच्छून्यस्वरूपभूताऽऽभासभूता च । तत्राभासभूताया अपि सर्वोत्तमं प्रायश्चित्तं दर्शयितुं रागमय्याः कैमुत्यबोधकमासक्तिमय्या माहात्म्यमाह—केचिदिति । कार्त्स्न्येन वासनया सहेत्यर्थः । भास्करदृष्टांतेन स्वाभाविक्या भास्थानीयया भक्त्या नीहारस्थानीयस्यागंतुकस्य स्प्रष्टुमशक्तस्याघसंघस्य चानुषंगिकतया सद्यो निःशेषधूननमिति ज्ञापितम् ॥ १५ ॥ अत्रापि पापप्रशमने तुच्छे एव वस्तुनि भक्तिमहादेव्या विनियोगोऽनुचित इति भक्तिशास्त्रतात्पर्यविज्ञानां मतेन स्वाभिमतेनान्यमताक्षेपपूर्वकमाह—नेति । कृष्णार्पितप्राण इति । पापकर्माणं मां समुचितशिक्षादंडार्थं नरके पातयतु न पातयतु वा स एव मे गतिस्तस्यैवाहमित्यात्मन एव समर्पणेन नरकप्रतीकारमपाकुर्वन् शुद्धभक्तिमान् इत्यर्थः । कृष्णार्पितप्राणत्वं कथं स्यादित्यत आह—तत्पुरुषेति । तपआदीत्यत्रादिना ब्रह्मचर्यादिग्रहः ॥ १६ ॥ न च ज्ञानयोगव्रताद्यसमर्थानामेव भक्तियोग इति वाच्यमित्याह—सध्रीचीनः । हि निश्चितम् । अयमेव सर्वतः श्रेष्ठः न ज्ञानमार्ग इवासहायतानिमित्तं नापि कर्ममार्गवन्मत्सरतादिहेतुकं भयमिति भावः । स्वामिव्याख्याने तत्रेत्यस्य कृष्णार्पितप्राणस्य महत्त्वे इत्यर्थः ॥ १७ ॥ किं चान्वयव्यतिरेकाभ्यां भक्तिरेव पापप्रशमनी न ज्ञानभक्तियोगादिरित्यभिप्रेत्याह—भक्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह ॥ न ते यमं पाशभृतश्च तद्भटान्स्वप्नेऽपि पश्यंति हि चीर्णनिष्कृताः ॥ १९ ॥ अत्र चोदा
हरंतीममितिहासं पुरातनम् ॥ दूतानां विष्णुयमयोः संवादस्तं निबोध मे ॥ २० ॥ कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ॥ नाम्ना
नष्टसदाचारो दास्याः संसर्गदूषितः ॥ २१ ॥ बंद्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः ॥ बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः ॥ २२ ॥

भक्तिः स्वल्पाऽपि पुनात्येवेत्याह। सकृदिति।तस्य गुणेषु रागमात्रमस्ति न तु ज्ञानं यस्य तन्मनः । तावतैव चीर्णं निष्कृतं प्रायश्चित्तं यैः॥ १९॥ इममर्थमितिहासेनोपपादयति अत्र चेति। मे मत्तः ॥२०॥ कान्यकुब्जे पुरे । दास्याः पतिः। नाम्नाऽजामिल इति ॥२१॥ बंदीग्रहेणाक्षैश्च द्यूतेन कैतवैर्वंचनादिभिश्च वृत्तिं जीविकां बिभ्रत्पुष्णन्यातयामास

रन्यनिरपेक्षत्वमिति । नारायणपराङ्मुखं भक्तभक्त्युत्कर्षयोः श्रुतयोरपि तत्र श्रद्धाहीनं न पुनंति भक्तिस्तु ज्ञानकर्मादिहीनमपि पुनाति केवलया भक्त्येति पूर्वोक्तेः ॥१८॥ यैरिति । अपिशब्दः प्रत्येकं संबध्यते सकृदपि किं पुनरभ्यासेन । मनः संशयात्मकमप्यंतःकरणं किं पुनर्निश्चयात्मिका बुद्धिः । पदारविंदयोः किं पुनः सर्वमूर्त्तौ । निवेशितं बलादपि किं पुनः स्वतो निविष्टम् । तद्गुणेष्वपि रागि किं पुनस्तत्स्वरूपे । यैरिहेति सामान्यवाचिभ्यां सर्वनामभ्यां मनोनिवेशने जातिदेशाद्यनपेक्षत्वं गम्यते । अत्र संदर्भः—अथ रागाभासमय्यास्ततोऽप्युत्तमत्वेनाह—सकृदिति । रागोऽत्र रत्याभासः सकृच्छब्दप्रयोगात् । साक्षाद्रतौ सत्यामसकृदेव तन्निवेशः स्यात् " दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथात्" इति श्रुतिस्तुतेरत एव स्वामिचरणैस्तस्य गुणेषु रागमात्रमस्ति न तु ज्ञानमित्युक्तम् । रागमात्रं यत्किंचिद्रागः ज्ञानञ्च याथार्थ्येनानुभव इति । अत्रैषां पूर्वेभ्य उत्तमत्वं भक्तभक्त्याभासद्भावेन यमादीनां तद्दृष्टिपथेष्वपि गंतुमशक्यत्वान्महाप्रभावरूपं दर्शितमित्याह । विश्वनाथस्तु—नात्र भक्तिभूमाप्यपेक्षणीय इत्याह—सकृदिति । किं पुनरसकृत् । मनोपि किं पुनः श्रोत्रादि । तच्च मनो गुणरागि विषयासक्तं किं पुनर्गुणरागरहितम् । स्वप्नेपि किं पुनः साक्षात् । तावन्मात्रध्यानेनैव चीर्णा निष्कृतिः प्रायश्चित्तं यैस्ते । अत्र सकृदित्यादिपदैः कस्यचिच्छुद्धभक्तस्य दैवात्पापानां पौनःपुन्येऽप्युत्खातदंष्ट्रोरगवदकिंचित्करत्वात्कुंजरशौचवदाक्षेपविषयीभावोऽनुचित एव । " अपि चेत्सुदुराचारो भजते मामनन्यभाक् " इत्याद्युक्तेः ॥ १९ ॥ नन्वेवं वैदिकानामस्तु अवैदिकानां स्त्रीशूद्रादीनां पापप्रायश्चित्तं कथं स्यादित्याशंक्य भक्त्या तेषां नामसंकीर्त्तनेन दुष्कृतनिष्कृतिः स्यादितीममर्थमितिहासेन दर्शयति—अत्रेति । भक्त्या भगवन्नामसंकीर्त्तनादपि दुष्कर्मनाशः स्यात्किमु वक्तव्यमेकमनस्कत्वेन श्रीहरिचरणस्मरणादिनेत्यतो वेममर्थमाख्यायिकया दर्शयति । अत्र वैदिकानामवैदिकानामपि भक्त्याऽभक्त्या वा नामसंकीर्त्तनादघक्षये । एवकारेणायोगं व्यवच्छिनत्ति न त्वन्ययोगं तथात्वे पूर्वोक्तास्तप आदयो व्यर्थाः स्युरित्यर्थः । ननु "इतिहासः पुरावृत्तम् " इत्यमरोक्तेः पुनः कथं पुरातनमिति चेत्तत्र शृणु—विशिष्टवाचकानां पदानां सति विशेषणसमवधाने विशेष्यमात्रपरतैवांगीकार्या । " स कीचकैर्मारुतपूर्णरंध्रैः, परिणतगजप्रेक्षणीयम् " इत्यादिवदवधेयं " कीचका वेणवस्ते स्युर्ये स्वनंत्यनिलोद्धताः " इति, " तिर्य्यग्दंतप्रहारस्तु गजः परिणतो मतः " इति । इमं वर्ण्यमानम् ॥ २० ॥ अजया प्रकृत्या ज्ञानस्य मीलो मीलनं तिरोभावो यस्य स तथा । यद्वा—अजाद्धरेः पूर्वपुण्यसंपन्नज्ञानस्यामील उन्मीलनं यस्य स तथेत्युभयथाजामिलत्वं युक्तं ह्रस्वत्वं छांदसम् । यद्वाऽजातुल्यया दास्या गोतुल्यां विप्रां त्यक्त्वा मिलति संगच्छते इत्यजामिलः 'मिल—संगमे' इत्यत इगुपधत्वात्कः । यद्वा "अनुमीमांसते पूर्वं मनसा भगवानजः " इह यमराज्यप्यजशब्दप्रयोगादजं यमराजं न मिलतीत्यजामिलः नामोच्चारणमहात्म्यतो विष्णुदूतैर्यमदूतेभ्यस्तस्य रक्षितत्वात् । अजं श्रीहरिमा समंतान्मिलति नामोच्चरणभक्त्येति वाजामिलः " हैमं विमानमारुह्य ययौ यत्र श्रियः पतिः " इत्यग्रे वक्ष्यमाणत्वात् ॥ २१ ॥ बंदीग्रहेण धनाशया धनिकान्बंदीकृत्य तेभ्यो धनग्रहणेन । यद्वा—चटकादिपक्षिणो गृहीत्वा मार्गे स्थित्वा गच्छदागच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं निवसतस्तस्य लालयानस्य तत्सुतान् ॥ कालोऽत्यगान्महाराजन्नष्टाशीत्यायुषः समाः ॥ २३ ॥ तस्य प्रवयसः पुत्रा दश तेषां तु योऽवमः ॥
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥ २४ ॥ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि ॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशम् ॥
॥२५॥ भुंजानः प्रपिबन्खादन्बालकस्नेहयंत्रितः ॥ भोजयन्पाययन्मूढो न वेदागतमंतकम् ॥ २६ ॥ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते ॥
मतिं चकार तनये बाले नारायणाह्वये ॥ २७ ॥ स पाशहस्तांस्त्रीन्दृष्ट्वा पुरुषान्भृशदारुणान् ॥ वक्रतुंडानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥
॥ २८ ॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयम् ॥ प्लावितेन स्वरेणोच्चैराजुहावाकुलेंद्रियः ॥ २९ ॥ निशम्य म्रियमाणस्य ब्रुवतो हरिकीर्तनम् ॥
भर्तुर्नाम महाराज पार्षदाः सहसाऽपतन् ॥ ३० ॥ विकर्षतोंतर्हृदयाद्दासीपतिमजामिलम् ॥ यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥

पीडयामास ॥ २२ ॥ आयुषः संबधी महान्कालोऽत्यगात् । स कियानित्यपेक्षायामाह । अष्टाशीत्या संख्यया युक्ताः समाः संवत्सराः ॥२३॥ प्रवयसो वृद्धस्य ॥२४॥ बद्धं हृदयं येन । जठरो वृद्धः ॥२५॥ एतच्च तदुपलालनादिश्रीनारायणनामोच्चारमाहात्म्येन तद्भक्तिरेवाभूदिति सिद्धांतोपयोगित्वेनापि द्रष्टव्यम् ॥ २६ ॥ २७ ॥ वक्राणि विकटानि तुंडानि मुखानि येषां तान् । ऊर्ध्वानि रोमाणि येषां तान् ॥२८॥ प्लावितेन प्लुतत्वं नीतेन ॥२९॥ हरिकीर्तनं निशम्यापतन् । यतस्तद्भर्तुर्नाम ॥३०॥३१॥

जनेभ्यः किञ्चिद् द्रव्यं स्वीकृत्य तेषां मोचनं बंदीग्रहस्तेन । चौर्य्यैः परस्वापहरणैः । गर्हितां निंद्याम् । “ वृत्तिर्विवरणाजीवकौशिक्यादिप्रवर्त्तने ” इति मेदिनी ॥ २२ ॥ अष्टाभिरधिकाशीत्या । राजन्निति तव राज्ये एतादृशा न संति सर्वेषां स्वधर्मनिष्ठत्वादिति भावः ॥ २३ ॥ प्रगतं वयो यस्य तस्य । अवमः कनिष्ठः “ कनिष्ठाधमनिःश्रीकवमिहीनेषु चावमः ” इति निरुक्तिः । पित्रोरित्युक्तेर्मातुरपि कृतार्थत्वं पितृवद्दर्शितम् ॥ २४ ॥ कलं मधुरास्फुटं भाषितुं शीलमस्येति तथा तस्मिन् । अर्भके बाले ॥ २६ अंतकं मृत्युम् । तद्भक्तिर्नारायणभक्तिः । तत्रापि हे नारायण दुग्धं पिब नारायणागच्छ त्वां स्नापयिष्यामीत्युपचारनाम्नोपलालना द्यपि पूजनवदेवेति ॥ २६ ॥ सोऽजामिलः ॥ २७ ॥ ‘ तुडं स्याल्लयनं मुखम् ’ इति कोशात् ॥ २८ ॥ क्रीडनकेष्वासक्तम् । तीर्थस्तु–दूरे ब्रह्मांडाद्बहिः स्थितं जगत्सर्जनादिलीलाविलासोपेतं पुन्नाम्नो नरकात्त्रातारं नारायणनामानं पूर्वाचरितपुण्यप्रचयेनोत्पन्नया भक्त्याकुलेन्द्रिय इत्याह ॥ २९ ॥ पार्षदा विष्णुपार्षदाः । भर्तुर्हरेः ब्रुवतः सतः ॥ ३० ॥ अजामिलं तत्संबंधिपुर्य्यष्टकं विकर्षत आकर्षतो यमदूतान् । अजमिलस्ये दमजामिलमिह वृद्धभाव आर्षः । पुर्य्यष्टकं चोक्तं स्वाराज्यसिद्धौ “ ज्ञानेंद्रियाणि खलु पंच तथापराणि कर्मेन्द्रियाणि मनआदिचतुष्टयञ्च । प्राणादिपञ्चकमथो वियदादिकञ्च कामश्च कर्म च तमः पुनरष्टधा पूः ॥ ” इति । कामोऽभिलाषः कर्म च त्रिविधं तमोमूलाज्ञानम् । जीवस्य व्यापककोटिप्रविष्टतया कर्षणं न संभवतीति ध्येयम् । ननु “ अंगुष्ठमात्रं पुरुषं विचकर्ष बलाद्यमः ” इति गारुडोक्तेः “ अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ” इति श्रुते “ अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ” इत्यादिश्रुतेश्च जीवस्यांगुष्ठमात्रप्रमाणत्वादाकर्षणं संभवत्येवेति चेत्तत्रैवमवधेयं जीवस्यांगुष्ठमात्रत्वे मध्यमपरिमाणत्वा दनित्यत्वं प्रसज्येत किञ्चाव्यापित्वे देहव्यापिचैतन्याभावात्तत्समनियतस्थानेतरस्थाने पिपीलिकादिस्पर्शज्ञानं न स्यात्तर्हि कथमुक्तं श्रुत्या तथेति चेत्तत्राभिव्यक्तिस्थानहृदयस्यांगुष्ठपरिमाणत्वात्तस्यापि तत्परिमाणत्वमुपचर्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः ॥ के यूयं प्रतिषेद्धारो धर्मराजस्य शासनम् ॥ ३२ ॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ ॥ किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ ३३ ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः ॥ किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥३४॥ सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः ॥ धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ॥ ३५ ॥ दिशो वितिमिरालोकाः कुर्वंतः स्वेन रोचिषा ॥ किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ॥ ३६ ॥ श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्तैर्वासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ॥ ३७ ॥ विष्णुदूता ऊचुः ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः ॥ ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणम् ॥ ३८ ॥ कथंस्विद् ध्रियते दंडः किं वाऽस्य स्थानमीप्सितम् ॥ दंड्याः किंकारिणः सर्वे अहोस्वित्कतिचिन्नृणाम् ॥ ३९ ॥ यमदूता ऊचुः ॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम ॥ ४० ॥

पुरःसरा भत्याः ॥ ३२ ॥ अस्य नयनं निषेधथ ॥ ३३ ॥ वयं युष्मान्न जानीम इति न कोपः कार्यो यतोऽलौकिकाद्भुतरूपा यूयमित्याहुः सर्व इति सार्धाभ्याम् । लसंत्यः पुष्करमालाः संति येषाम् ॥ ३४ ॥ नूनं नवं वयो येषां ते । निषंग इषुधिः । धनुर्निषंगादिभिः श्रीः शोभा येषां ते ॥ ३५ ॥ विगतं तिमिरमालोकश्चान्यस्य प्रकाशो यासु तथाभूता दिशः कुर्वंतः । भवतामेतदनुचितमित्याहुः । किमर्थमिति ॥ ३६ ॥ अहो दंड्यादंड्यादिज्ञानशून्या एते चोरा एवास्मद्धिया धर्मराजस्य किंकरा इत्यनृतं वदंतीति विस्मयेन प्रहस्य तान्प्रत्यूचुः । मेघस्येव निर्ह्रादो ध्वनिर्यस्यास्तया ॥ ३७ ॥ तत्त्वं स्वरूपम् । लक्षणं प्रमाणम् ॥ ३८ ॥ कथंस्वित्केन प्रकारेण । स्थानं विषयः । कारिणः कर्मिणः । नृणामिति । नरा एव न पश्वादयः । तेष्वपि कतिचिदेवेत्यर्थः ॥ ३९ ॥ वेदेन प्रणिहितो विहितो धर्मः । वेदप्रमाणक इत्यर्थः । अनेन यो वेदप्रमाणकः सः धर्मो यो धर्मः स वेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तम् । यथाऽऽह जैमिनिः "चोदनालक्षणोऽर्थो धर्मः" इति । व्याख्यातं च भट्टैः । "द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते" इति ॥ अपृष्टस्याप्यधर्मस्य स्वरूपं लक्षणं च दंडस्थानकथनायाहुः । तद्विपर्ययो यो वेदनिषिद्धः

काष्ठानलवदित्यलं प्रसक्तानुप्रसक्त्या ॥ ३१ ॥ तान् वैष्णवान् ॥ ३२ ॥ अस्य नयनमिति शेषः । सिद्धेषु योगसिद्धेषु सत्तमः ॥ ३३ ॥ ३४ ॥ नवं षोडशाब्दमितम् ॥ ३५ ॥ यद्यधर्मपालस्य वयं किंकरा भवेम तर्ह्यस्मन्निषेधो युक्तः स्यादिति भावः ॥ ३६ ॥ तान् याम्यान् ॥ ३७ ॥ ३८ ॥ अस्य दंडस्य । इत्यर्थ इति । शास्त्रस्य मनुष्यविषयत्वमेव केवलं न संभवति वालिप्रभृतिवानरेषु स्नानसंध्योपासनादिशास्त्राचरणस्य संपातिनाम्ना गृध्रराजेन वानरेभ्यः स्वभ्रातुर्जटायुषो मृतिमाकर्ण्य तिलांजल्यादिदानरूपशास्त्रं स्वीकृतमतस्तिर्यग्योनिषु पक्षिष्वपि शास्त्राचरणस्य च दृष्टत्वादिति भावः ॥ ३९ ॥ प्रकर्षेण निहित स्थापितः । इत्यर्थ इति । वेदप्रमाणं यत्र स धर्म इति भावः । 'अनेन वेदप्रणिहितो धर्मः' इति वचनेन । यथा धर्मस्य लक्षणं तथा जैमिनिः पूर्वमीमांसाचार्य्य आह—चोदनेति । "चोदना चोपदेशश्च विधिश्चैकार्थवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः ॥ गुणनामक्रियारूपैर्विभाव्यंते यथातथम् ॥ ४१ ॥
सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः ॥ कं कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः ॥ ४२ ॥

सोऽधर्मः । निषेधश्च तस्मिन्प्रमाणमित्यर्थः । वेदस्य प्रामाण्ये हेतुः । वेदो नारायणादुद्भूतोऽतः स एव साक्षादित्युपचारः स्वयंभूरिति च निःश्वासमात्रेण स्वयमेव भवतीति । तथा च श्रुतिः । "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः–" इति ॥ ४० ॥ कोऽसौ नारायणस्तत्राहुः । येन स्वधाम्नि स्वस्वरूपेऽमी भावाः प्राणिनो गुणाः शांतत्वादयो नामानि ब्राह्मण इत्यादीनि क्रियाश्चाध्ययनाद्या रूपाणि वर्णाश्रमादयस्तैर्विभाव्यंते विविच्यंते यथातथं यथावत्स नारायणः ॥ ४१ ॥ तथाऽप्यधर्मोऽनेन कृत इति कुतो ज्ञायते तत्राहुः । सूर्य इति । अहनी अहश्च रात्रिश्च कमुदकं कुः पृथ्वी दैह्यस्य जीवस्य । यथाऽऽहुः । "आदित्यचंद्रावनिलो

चिनः" इति भाट्टाः । अर्थ्यते प्राप्यते पदादिभ्य इत्यर्थः । अर्थो धर्म इत्युक्ते धनादीनां तथात्वं स्यात्तद्वारणाय चोदनेति । चोदनया विधिना लक्ष्यते ज्ञायते इति तथा । भट्टैर्मीमांसकैः । द्वयं धर्मस्वरूपं धर्मप्रमाणं च एकेन चोदनालक्षण इत्यनेन । श्रुतयः "अहरहः संध्यामुपासीत" इत्याद्याः । अत्रोपासीतेति चोदनया संध्योपासनरूपो धर्मो लक्षितः । अर्थश्च चोदना तव्यलिङ्लोट्रूपैव लक्षणं प्रमाणं यत्र स तथेत्येवंरूपा व्याख्या ताभ्यां "यावज्जीवमग्निहोत्रं जुहुयात्" अत्र जुहुयादितिचोदनैव यावज्जीवाग्निहोत्रकरणे प्रमाणं नान्यदित्यर्थः । ननु "नापृष्टः कस्यचिद् ब्रूयात्" इत्युक्तेरधर्मस्तु तैर्नापृष्टः स कथमुक्त इति चेदांह–अपृष्टस्यापीति । वेदेन निषिद्धः । "ब्राह्मणं न हन्यात्" इत्येवंरूपया श्रुत्या यो वर्जितो ब्रह्महत्यादिरूपः सोऽधर्म इति । तस्मिन्नधर्मे । इत्यर्थ इति । निषेधशास्त्रप्रमाणको वेदनिषिद्धोऽधर्म इति भावः । वेदनिःश्वसितत्वे प्रमाणमाह-तथा चेति । महतो भूम्नः भूतस्य पुरुषस्यैतान्निःश्वसितमित्यन्वयः । एतत्किमित्याकांक्षायामाह–ऋग्वेद इति । सर्वा श्रुतिः–"अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि" इति बृहदारण्यके पठितेति । तथा चेतिहासपुराणादीनामपि परमेश्वरनिश्श्वसितत्वात्तत्प्रणिहितधर्मस्यापि धर्मत्वमव्याहतमेव श्रीजैमिनिनापि वेदाविरोधेन पुराणेतिहासादीनां प्रामाण्यं साधितम् "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" इति जैमिनिसूत्रेणास्यार्थः । श्रुत्या सह विरोधे त्वनुमानं स्मृतिवाक्यमनपेक्ष्यमुपेक्ष्यं त्याज्यमिति यावत् । हि यतोऽसति श्रुतिविरोधे स्मृतिवाक्यं प्रमाणं नान्यथेति तदर्थः यद्वा-ननु कथं श्रुतिविरोधेन स्मृतिवाक्यस्याप्रामाण्यं यावता तन्मूलभूतापि काचिच्छ्रुतिरनुमास्यत इत्याशंक्याह-असतीति । प्रत्यक्षश्रुत्या सह विरोधेऽसत्येव स्मृतिमूलश्रुतेरनुमानं भवति नान्यथेत्यर्थः। शिष्टं पूर्ववत् शिष्टाकोपेऽविरुद्धमिति चेन्न "शास्त्रपरिमाणत्वात्" इति सूत्रांतरमप्यत्रैव चोद्योत्तरत्वेन व्याख्यातं भट्टपादैः । तथा हि–य त्तर्हि वेदविहितं न बाधते शिष्टान्वा न कोपयति विहाराराममंडलकरणवैराग्यध्यानाभ्यासाहिंसासत्यवचनदमदानदयादि तद् बुद्धाद्यभिभाषितमपि प्रमाणेनाविरुद्धमिति चेन्न शास्त्राणां परिमाणत्वात । परिमितान्येव हि चतुर्दशाष्टादश वा विद्यास्थानानि धर्मप्रमाणत्वेन शिष्टैः परिगृहीतानि वेदोपवेदांगोपांगाष्टादशधर्मसंहितापुराणशास्त्रशिक्षादंडनीतीतिसंज्ञकानि । न च तेषां मध्ये बौद्धार्हतवामपाशुपतादिग्रंथा गृहीतास्स्मृता वेति नास्ति तेषां धर्मे प्रामाण्यमिति श्वदृतिक्षिप्तगोक्षीरवत् वेदाविरोधी शिष्टकोपाजनकोऽप्यंशस्तेषामग्राह्य एव यदा शास्त्रांतरेणापि सोऽर्थः स्पष्टोऽवधार्यते तदा तेनैव सिद्धत्वादितरत्स्यादनर्थकमिति पूर्वमीमांसायाम् ॥ ४० ॥ यथा च तथा चानयोः समाहारो यथातथम् । असांकर्येणेत्यर्थः । यद्वा–यो यथा भवति स तथैव भवतीति यथातथमिति पृषोदरादित्वात्साधुः ॥ ४१ ॥ यद्यप्येवमस्ति तथापीत्यर्थः । अहश्च रात्रिश्चाहनी "नपुंसकमनपुंसकेन–" इति नपुंसकशेषः । द्योशब्देन द्यौः । बहुवचनात्तत्संचारिणो देवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतैरधर्मो विज्ञातः स्थानं दंडस्य युज्यते ॥ सर्वे क्रमानुरोधेन दंडमर्हंति कारिणः ॥ ४३ ॥ संभवंति हि भद्राणि विपरीतानि चानघाः ॥ कारिणां गुणसंगोऽस्ति देहवान्न ह्यकर्मकृत् ॥ ४४ ॥ येन यावान्यथा धर्मोऽधर्मो वेह समीहितः ॥ स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ॥ ४५ ॥ यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते ॥ भूतेषु गुणवैचित्र्यात्तथाऽन्यत्रानुमीयते ॥ ४६ ॥ वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको यथा ॥ एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ॥ ४७ ॥

नलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥ " इति ॥ ४२ ॥ स्थानमाहुः । एतैर्निमित्तभूतैर्विज्ञातः । दंड्यानाहुः । सर्वे इति ॥ ४३ ॥ विपरीतान्यभद्राण्यपि कर्मिणां संभवंति यतस्तेषां गुणसंगोऽस्ति । यदि कश्चिदकर्ता स्यात्तर्हि तस्याभद्राणि न स्युर्न त्वेतदस्तीत्याहुः न हि देहवानकर्मकृदस्तीति । अतः सर्वे कर्मिणः । कर्मिणां च पापस्यावश्यंभावित्वात्ते सर्वे क्रमानुरोधेन दंडमर्हंतीत्यर्थः ॥ ४४ ॥ कथंस्विद्ध्रियते दंड इत्यस्योत्तरं येनेति । धर्मो वेति दृष्टांतः । अधर्मानुसारेण दंडो धर्मानुसारेण सुखवदित्यर्थः ॥ ४५ ॥ न केवलं सूर्यादय एव धर्माधर्मज्ञापकाः किं त्वर्थापत्तिरपीत्याहुः । यथेति । हे देवप्रवराः इह जन्मनि शांतघोरमूढत्वेन वा सुखदुःखमिश्रत्वेन वा धार्मिकत्वादिना वा त्रैविध्यं भूतेषु यथोपलभ्यते तथाऽन्यत्र जन्मांतरेऽनुमीयते त्रैविध्यान्यथानुपपत्त्या कल्प्यते ॥ ४६ ॥ वर्तमानजन्मना पूर्वापरजन्मधर्माधर्मज्ञानं भवतीति सदृष्टांतमाहुः । वर्तमानो वसंतादिकालोऽन्ययोर्भूतभविष्ययोर्वसंतयोर्ये गुणाः पुष्पफलादयस्तेषामभिज्ञापको यथैवमेतज्जन्म अन्ययोर्भूतभावि

इत्यर्थः । अत्र प्रमाणमाह—यथाहुरिति । पौराणिकाः । कालः सामान्यकालाभिमानी । धर्मः कश्चिद्यमाद्भिन्नो धर्माभिमानी देवता विशेषो यमस्य पृथग्ग्रहणात् । यद्वा—'धर्मो धर्मविदुत्तमः' इति सहस्रनामसु पठितत्वाद्विष्णुरिति । वृत्तं चलनम् । साक्षिणः साक्षाद्द्रष्टारस्तद्भद्राभद्रव्यंजकाः इत्यर्थः ॥ ४२ ॥ एतैः सूर्यादिभिः । कर्मानुरोधेन स्वस्वपापकर्मानतिक्रमेण कारिणः पापकारिण एव न तु पुण्यकारिणोऽपि तेषां दंडयत्वाश्रवणात् ॥ ४३ ॥ अतो देहिनः कर्मकर्तृत्वात् । इत्यर्थ इति । पुण्यकर्मिणामपि यथाकथंचिन्नृगादिवत्पापसंबंधो भवत्येवात उक्तं सर्वे इति भावः । अनघा इति । भवंत एव भगवत्पार्षदत्वात्पापसंबंधशून्या नान्ये इति भावः ॥ ४४ ॥ इत्यर्थ इति । वाशब्दोऽत्रोपमावाचको न तु पक्षांतरवाचक इति भावः । येन नरेण यावान्यत्प्रमाणकोऽधर्मः समीहितः कृतः तावत्प्रमाणकम् ॥ ४५ ॥ अर्थापत्तिरनुपपत्तिज्ञानं तथा हि देवदत्ते पीनत्वं दिवाभोजनाभावं च जानतो रात्रिभोजनज्ञानं जायते तन्न प्रत्यक्षात् सन्निकर्षाद्यभावेनानुपलंभात् नानुमानात् तस्याप्यसंभवात् अयं रात्रिभोजी पीनत्वादित्यस्य दिवामात्रभुंजानेऽपि व्यभिचारात् दिवाऽभुंजानत्वे सति पीनत्वादित्यत्र दृष्टांताभावेन व्याप्त्यग्रहादनुमित्ययोगात् तस्माद्दिवाऽभुंजानस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनज्ञानं जायते सेयमर्थापत्तिरिति प्राभाकराः । देवप्रवरा इति । देवा अपि सर्वज्ञत्वेनेदं वृत्तं जानंति किं पुनर्देवप्रवरा भवंत इति भावः ॥ ४६ ॥ वर्त्तमान इति । एतदभिप्रायकश्श्लोकः शिशुपालवधकाव्ये श्रीकृष्णेनापि श्रीनारदं प्रति "हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः शुभैः कृतम् । शरीरभाजां भवदीयदर्शनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसैव पुरे देवः पूर्वरूपं विपश्यति ॥ अनुमीमांसते पूर्वं मनसा भगवानजः ॥ ४८ ॥ यथाऽज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि ॥ न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥ पंचभिः कुरुते स्वार्थान्पंच वेदाथ पञ्चभिः ॥ एकस्तु षोडशेन त्रीन्स्वयं सप्तदशोऽश्नुते ॥ ५० ॥ तदेतत्षोडशकलं लिंगं शक्तित्रयं महत् ॥ धत्तेऽनु संसृतिं पुंसि हर्षशोकभयार्तिदाम् ॥ ५१ ॥

जन्मनोर्धर्माधर्मौ निदर्शयतीति तथा ॥ ४७ ॥ अयं च धर्माधर्मज्ञानप्रकारोऽन्येषां धर्मराजस्तु मनसैव सर्वं पश्यतीत्याहुः । पुरे संयमिन्यां स्थित एव देवो यमो देहे स्थितोंतर्यामी वा जीवस्य पूर्वरूपं धर्माधर्मादियुक्तं विशेषेण पश्यति । अन्वनंतरमपूर्वं रूपं मीमांसते । यद्यस्यानुरूपं तद्विचारयति यतोऽसौ भगवानजः ॥ ४८ ॥ जीवस्त्वीश्वरेणोपस्थापितं वर्तमानं देहं पश्यति न तु पूर्वमपरं चेत्याहुः । यथेति । अज्ञोऽविद्योपाधिर्जीवस्तु व्यक्तमेव प्राचीनकर्माभिव्यक्तं वर्तमानमेव देहाद्युपास्तेऽहमिति मन्यते पूर्वमपरं वा न वेद । अत्र हेतुः । नष्टा जन्मनां स्मृतिर्यस्य । अत्र दृष्टांतः । तमसा निद्रया युक्तो यथा स्वप्नेऽपि व्यक्तमेव देहाद्युपास्ते न तु जाग्रद्देहादि पूर्वस्वप्नादिगतं वा तद्वदित्यर्थः ॥ ४९ ॥ एवंभूतस्य जीवस्य संसारं प्रपंचयंति पंचभिः श्लोकैः । पंचभिः कर्मेंद्रियैः स्वार्थानुपादानादीन्कुरुते । तथा पंच शब्दादीन्वेद । पंचभिर्ज्ञानेंद्रियैः षोडशेन मनसा सह सप्तदशः षोडशोपाध्यंतर्गतोऽपि स्वयं त्वेक एव सर्वेन्द्रियविषयप्रतिसंधानात् । त्रीन् ज्ञानकर्मेंद्रियमनोविषयान्प्राप्नोति ॥ ५० ॥ तदेतल्लिंगशरीरं शक्तित्रयं

व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥'' इति पठितः ॥ ४७ ॥ यमः सर्वं पश्यति चेत्तर्हि सूर्यादिसाक्षिग्रहणं व्यर्थमिति चेदत्राह–देहे स्थित इति । नवद्वारे पुरे इत्यत्र देहेऽपि पुरशब्दप्रयोगात् । यमपक्षे भगवान्सर्वज्ञः अजति पापिनः क्षिपति तिरस्करोतीत्यजः । यद्वा–अं वासुदेवं जपतीत्यजः कर्मण्युपपदे जपतेर्डः । 'प्रीतः स्वदूतान्प्रत्याह' 'स्मरन्पादांबुजं हरेः' इत्यग्रे वक्ष्यमाणत्वात् । अजः परमेष्ठी तु मनसाऽनुमीमांसते विचार्य पश्यतीत्यर्थः । इह च '' अजो ह्येको जुषमाणोऽनुशेते '' इति श्रुत्युक्तसर्वजीवसाधारणाजशब्दप्रयोगादन्ये देवा अपि यथायोग्यं जानंतीति तीर्थः । यद्वा–सुरतिर्यगादिपुरे देवः क्रीडन् भगवान्भाग्यगुणोपेतो जीवः पूर्वानुभवसंस्कारसंस्कृतेन मनसैव पूर्वरूपं धर्माधर्मसमवेतात्मरूपं विपश्यति जानाति । अपूर्वमनागतं मनसानुमीमांसते विचार्यानुमिनोति एतादृशकर्मकरणादेतादृशो भविष्यामीत्यनुमानं करोतीत्यर्थः ॥ ४८ ॥ अत्र पूर्वापराज्ञाने । अत्रोक्तार्थे । इत्यर्थ इति । तमोग्रस्तत्वेन ज्ञानाभावादिति भावः । पक्षांतरे पूर्वापरे रूपे जानाति चेत्तर्हि कथमन्यत्र मृतोऽन्यत्र जातोहमिति न जानातीत्याशंक्य श्रीहर्यनुग्रहं विना तादृशज्ञानं न सुलभं सर्वेषामित्यभिप्रेत्याहुः यथेति । अज्ञोऽविवेकी । अव्यक्तमेव प्रकृतिनिर्मितदेहमेवास्ते देहात्मनोरभेदं कल्पयति व्यक्तमेव पुरस्थितमेव जानाति न तु पूर्वापरे इति वा । तत्र हेतुः–तमसेति । विपरीतप्रत्ययापादकतमोगुणयुक्तत्वात् । अत एव पूर्वमपरञ्च न वेद यथा तथा नष्टजन्मस्मृतिः पुरुषः अन्यत्र जातोस्मीत्यादि न जानातीत्यर्थः ॥ ४९ ॥ एवंभूतस्याज्ञस्य स्वार्थान्स्वविषयान् । आदिना गत्यादिग्रहः । सर्वेंद्रियविषयाणां प्रतिसंधानात् । अहं पश्यामि शृणोमि जिघ्रामि स्पृशामि रसयामि गच्छामीत्यादिना सर्वेन्द्रियविषयानेक एव गृह्णातीत्यर्थः ॥ ५० ॥ तर्हि कस्मात्संसारोऽस्येति तत्राह–तदेतदिति । षोडशकलाः श्रोत्रादींद्रियाणि दश पंचभूतानि मनश्चेत्येवंलक्षणा यत्र, शक्तीनां प्रकाशक्रियावरणलक्षणानां त्रयं यस्मिंस्तत्तथा सत्त्वादिगुणशक्तियुक्तमित्यर्थः । अत एव पुरुषार्थाभिभवसमर्थं त्रिशक्तियुक्तत्वाद्धर्षादिप्रदं लिंगशरीरं पुंस्यानुकूल्येन संसृतिं धत्त इत्यन्वयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देह्यज्ञोऽजितषड्वर्गो नेच्छन्कर्माणि कार्यते ॥ कोशकार इवात्मानं कर्मणाऽऽच्छाद्य मुह्यति ॥ ५२॥ न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥ कार्यते ह्यवशः कर्मगुणैः स्वाभाविकैर्बलात् ॥ ५३ ॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत ॥ यथायोनि यथाबीजं स्वभावेन बलीयसा ॥ ॥५४॥ एष प्रकृतिसंगेन पुरुषस्य विपर्ययः ॥ आसीत्स एव न चिरादीशसंगाद्विलीयते ॥५५॥ अयं हि श्रुतसंपन्नः शीलवृत्तगुणालयः ॥ धृतव्रतो मृदुर्दांतः सत्यवान्मंत्रविच्छुचिः ॥ ५६ ॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुर्निरहंकृतः ॥ सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥ एकदाऽसौ वनं यातः पितृसंदेशकृद्द्विजः ॥ आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥ ददर्श कामिनं कंचिच्छूद्रं सह भुजिष्यया ॥ पीत्वा च मधु मैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपम् ॥ क्रीडंतमनुगायंतं हसंतमनयांतिके ॥ ६० ॥

गुणत्रयकार्यं महदनादि पुंसि जीवे अन्वनु संसृतिं धत्ते ॥ ५१ ॥ नेच्छन्ननिच्छन्नप्यनेनैव लिंगेन कर्माणि कार्यते । कोशकारः कीटविशेषः । मुह्यति निर्गमोपायं न जानाति ॥ ५२ ॥ कार्यत इत्यत्रानुभवं प्रमाणयंति । न हीति । गुणैर्गुणकार्यरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ॥ ५३ ॥ कर्मवशेन च तदनुरूपो देहो भवतीत्याहुः । लब्ध्वेति । अव्यक्तमदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं तदनुरूपं स्थूलं सूक्ष्मं च शरीरं भवति । यथायोनि मातृसदृशम् । यथा बीजं पितृसदृशम् । स्वभावो वासना । शुक्रशोणितयोः सर्वत्रैकत्वेऽपि कर्मवासनया मातापितृसदृशो देहो भवतीत्यर्थः ॥ ५४ ॥ संसारचक्रमुपसंहरंतो मुक्तिप्रकारमाहुः । एष इति । ईशसंगात्परमेश्वरभजनात् ॥ ५५ ॥ तदेवं सामान्यतो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्याधर्मं प्रपंचयंतो दंड्यत्वमाहुः अयं हीति यावदध्यायसमाप्ति । तत्र द्वाभ्यां तत्पूर्ववृत्तांतानुवादोऽन्यायातिरेकप्रदर्शनार्थः । शीलं सुस्वभावो वृत्तं सदाचारो गुणाः क्षमादयस्तेषामालयोऽयम् ॥ ५६ ॥ निरहंकृतो निरहंकारः ॥ ५७ ॥ तत आवृत्तो वनात्परावृत्तः ॥ ५८ ॥ भुजिष्यया भोगस्त्रिया दास्या । मैरेयं मधु पैष्टीं सुरां पीत्वा मदेनाघूर्णिते भ्रांते नेत्रे यस्याः ॥ ५९ ॥ विशेषेण श्लथंती

अधिकरणत्वमात्रप्रदर्शनाय पुंसीति सप्तमी तस्मादभिमाननिमित्तमिदं सर्वमित्यर्थः॥५१॥ आत्मनः संसारप्रकारं दर्शयति। देहीति । अवशीकृतषड्इंद्रियवर्गोऽनिच्छन्नपि गुणाधीनषड्इंद्रियैरिति शेषः।'गुणाः सृजंति कर्माणि' इत्येकादशे वक्ष्यमाणत्वात् । कार्य्यते विष्टिगृहीतवद्बलात्कार्यमाणश्चेत्स्वसंपद्विपदी वोत्ति किंनेत्याह्—कोशकार इति । यथा कोशकारः कृमिः स्वकर्मणा निर्मितकोशेनात्मानमाच्छाद्य कोश एव वसन्मुह्यति कोशनाशानाशौ न जानाति तथा देह्यपीति भावः ॥ ५२ ॥ मोहोऽस्यास्तीति कुतो ज्ञायते इत्याशंक्य पुनःपुनः कर्मकरणादित्यभिसंधिमंतः स्वोक्तार्थे प्रमाणं दर्शयंति—न हीति ॥ ५३ ॥ जन्ममरणेऽपि देहस्यैवात्मनस्तु तदभिमानादुपचर्य्येंत इत्याहुर्लब्ध्वेति । संसारनिमित्तमव्यक्तं प्रकृतिकार्यं शरीरं लब्ध्वा व्यक्ताव्यक्तमुत जन्ममरणमपि भवति जीवस्योपचारेणेति शेषः । "देहस्य सर्वथानाशादनाशाच्चेतनस्य च" इत्याद्युक्तेः । निमित्तं कारणम व्यक्तं प्रकृतिं लब्ध्वा प्राप्य व्यक्ताव्यक्तं जननमरणात्मकं शरीरं भवति । जीवस्येति शेष इति वा। यथायोनि पश्वादियोनिमनतिलंघ्य यथाबीजं कर्मराशिमनतिक्रम्य सत्त्वादिनिमित्तस्वभावेनेति तीर्थः।स्वामिभिस्तु—तदनुरूपम् अदृष्टेन सदृशम् । इत्यर्थ इति । अदृष्टेन निमित्तेन ये योनिबीजे प्राप्येते तत्स्वभावानुसारेण भवतीति भाव इत्थं व्याख्यातम् ॥ ५४ ॥ य एष जीवस्य विपर्ययः संसारः प्रकृतिसंगेन प्रकृत्यध्यासेनासीत्स एवेशभजनाद्विलीयते समूलतूलं विच्छिद्यते ॥ ५५ ॥ तत्र अध्यायसमाप्तेरर्वाचीनभागेऽपि । अतिरेक आधिक्यम् ॥ ५६ ॥ साधुः स्वधर्मनिष्ठः ॥ ५७ ॥ ५८ ॥ ५९ ॥ नीविर्वस्त्रग्रंथिः ॥ ६० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा तां कामलिप्तेन बाहुना परिरंभिताम् ॥ जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतम् ॥ न शशाक समाधातुं मनो मदनवेपितम् ॥ ६२ ॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः ॥ तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ॥ ६३ ॥ तामेव तोषयामास पित्र्येणार्थेन यावता ॥ ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥ विप्रां स्वभार्यामप्रौढां कुले महति लंभिताम् ॥ विससर्जाचिरात्पापः स्वैरिण्यापांगविद्धधीः ॥६५॥ यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनम् ॥ बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयम् ॥६६॥

नीवी यस्यास्तया सह । व्यपेतं स्वाचाराद्भ्रष्टम् ॥ ६० ॥ कामेन कामोद्दीपकेन तदंगरागेण हरिद्रादिना लिप्तेन ॥ ६१ ॥ सत्त्वं धैर्यं श्रुतं ज्ञानं तद्बलेन स्तंभयन्नपि मदनेन कंपितं मनः समाधातुं नियमितुं शक्तो नाभूत् ॥६२॥ तद्दर्शनमेव निमित्तं यस्य स्मरव्याजग्रहस्य तेन ग्रस्तः । विचेतनो गतस्मृतिः ॥६३॥ यावता समग्रेण ॥६४॥ लंभितां परिणीताम् ॥ ६५ ॥ ६६ ॥

सहसा झटित्येव॥६१॥ज्ञानं शास्त्रीयं "यस्यां योनौ पतेद्रेतः सा योनिस्तस्य जायते" इत्येवंलक्षणमतः कुयोनौ वीर्यं न पातयेदिति विचारयन्नपि मदनस्यातीव बलवत्तरत्वात्।तदुक्तम् "केचित्प्रचंडमृगराजवधेऽपि दक्षा मत्तेभकुंभदलने भुवि केऽपि शूराः।किन्तु ब्रवीमि बलिनां पुरतः प्रसह्य कंदर्पदर्पदलने विरला मनुष्याः॥" इति भर्तृहरिणा।अत्र व्यासजैमिन्याख्यायिकाप्यनुसंधेया तथाहि—कदाचिद्व्यासेनोक्तं जैमिनये कामोऽतिबलीयानतो दुर्जय इति तदाकर्ण्यजैमिनिराह को वराकःकामोहं निर्जितकामोऽस्मीति इति श्रुत्वा कदाचिद्व्यासदेवस्तत्परीक्षार्थं स्वस्य स्त्रीरूपं कृत्वा तामसीरात्रौ किञ्चिन्मेघे वर्षति जैमिन्याश्रमं गत्वोचे भो मुने सार्थच्युतातीवव्याकुला वनेऽतीवभीता त्वदाश्रमं प्राप्तास्मि रात्रिमुषित्वा प्रातः सूर्योदये स्वसार्थमन्विष्य तेन मेलिष्यामीत्याकर्ण्य स प्राह इतोऽन्यत्र गच्छ स्त्रियं नात्र वासयामीति सा चाहाहो एकाकिनी तमिस्रायां वने कुत्राहं गमिष्यामि शरणागतायाः परित्यागो हि शास्त्रनिषिद्धः सर्वज्ञस्त्वं जानास्येव ततो जैमिनिनोक्तं कुंचिकां गृहाण पार्श्वकोष्ठांतर्गत्वांतर्यंत्रितकपाटा शेष्वासूर्योदयाद्यद्यहमपि कपाटोद्घाटनार्थं वदिष्यामि तदा नोद्घाटनीयं सा चाहमित्थमेव करिष्ये इति तया तथैव कृतम् । पुनश्च मनोभवप्रेरितजैमिनिना विमृष्टमहो निर्जने रात्रावेकाकिनी सुरूपा युवतिर्दैवादेकाकिनः पार्श्वमुपागता किमर्थमनयाहं न रमे । किञ्चात्राक्रोशेपि क्रियमाणे कश्चिन्नायास्यतीति संचिंत्य पर्णशालातो बहिरागत्य तामाह सुभगे द्वारमुद्घाटयेति सा जाग्रत्येव किञ्चिन्नोचे तदा बहुशः प्रार्थितयापि यदा कपाटोद्घाटनं न कृतं तया तदा जैमिनिः कोष्ठोपरि गत्वा कोष्टभेदं विधाय यदा कोष्ठांतः प्रविष्टस्तदा श्रीव्यासदेवं तत्र स्थितं दृष्ट्वातीव सापत्रपो भूत्वा ननाम उवाच च श्रीगुरो सत्यं कामो दुर्जयो ममापराधं क्षमस्वेति । ततो व्यासदेवो निजाश्रमं जगामेति बृहत्कथादौ स्पष्टम् ॥ ६२ ॥ स्वधर्माद्विप्रजातिविहितात् । विरराम तं तत्याजेति भावः ॥ ६३ ॥ कामैर्विषयैः । ग्राम्यैः स्त्रीवशीकरणसाधनैः "ग्राम्यं स्त्रीकरणे क्लीबेऽश्लीलप्राकृतयोस्त्रिषु" इति मेदिनी । यथा सा प्रसीदेत् तथा पितृसंपादितधनेन तोषयामास तदधीनोऽकार्यमपि चकारेति भावः ॥ ६४ ॥ अप्रौढां स्वैरिणीवत्कामकेलिष्वनिपुणाम् "प्रौढः स्यायूनि निपुणे विपुले च त्रिषु स्फुटे" इति निरुक्तिः ॥ ६५ ॥ अस्याः शूद्रायाः ॥ ६६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदसौ शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः ॥ अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६७ ॥ तत एनं दंडपाणेः सकाशं कृतकिल्बिषम् ॥ नेष्यामोऽकृतनिर्वेशं यत्र दंडेन शुध्यति ॥ ६८ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे अजामिलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ श्रीशुक उवाच ॥ एवं ते भगवद्दूता यमदूताभिभाषितम् ॥ उपधार्याऽथ तान्राजन्प्रत्याहुर्नयकोविदाः ॥ १ ॥ विष्णुदूता ऊचुः ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभाम् ॥ यत्रादंडचेष्वपापेषु दंडो यैर्ध्रियते वृथा ॥२॥ प्रजानां पितरो ये च शास्तारः साधवः समाः ॥ यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ॥ ३ ॥ यद्यदाचरति श्रेयानितरस्तत्तदीहते ॥ स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते ॥ ४ ॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः ॥ स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनम् ॥ विश्रंभणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥

अघरूपमायुर्यस्य मलमेव तदीयमन्नादिकमत्तीति मलात् ॥ ६७ ॥ अकृतनिर्वेशमकृतप्रायश्चित्तम् ॥ अस्यैव च हितार्थे नेष्याम इत्याहुः । यत्रेति ॥ ॥ ६८ ॥ इति श्रीमद्भा०म० षष्ठस्कंधे टीकायां प्रथमोऽध्यायः ॥ १ ॥ छ ॥ द्वितीये वैष्णवैर्याम्यान्नाममाहात्म्यमद्भुतम् ॥ श्रावयित्वा द्विजो विष्णोर्लोकं नीत इतीर्यते ॥ १ ॥ नयकोविदा न्यायनिपुणाः ॥ १ ॥ धर्मदृशां सभामधर्मः स्पृशति । तदाहुः । यत्र सभायाम् । यैर्धर्मदृग्भिस्तेषां तां सभाम् ॥ २ ॥ पितरः पितृवत्पालकाः । शास्तारोऽनुशिक्षकाः । वैषम्यमदंड्यदंडनम् ॥ ३ ॥ एतत्प्रवर्तितमधर्ममन्योऽपि करिष्यतीति महत्कष्टमभूदित्याहुः । यद्यदिति । श्रेयान् श्रेष्ठः ॥ ४ ॥ विश्वस्तघातादपीत्याहुः यस्येति द्वाभ्याम् । निर्वृतो निश्चितः ॥ ५ ॥ विश्वासेन नितरामर्पित आत्मा येन

अघायुरिंद्रियतर्पणरतत्वात् । "अघायुरिंद्रियारामो मोघं पार्थ स जीवति" इति श्रीगीतोक्तेः । अत एव मलात् स्नानादिकर्मत्यागादिति 'अस्नाताशी मलं भुंक्ते' इति स्मृतेः । स्नानमपि मृद्गोमयादिधारणपूर्वकमंत्रकृतमेव न तु श्वादिवन्निमज्जनमात्रमप्यन्यथा मत्स्यादीनां सर्वदा निमज्जनशीलत्वादतीवधर्मवत्त्वं स्यादिति भावः ॥ ६७ ॥ यद्यतोऽसावघायुस्ततो हेतोः । यत्र दंडपाणिपार्श्वे "विष्णौ राज्ञि धर्मराजे दंडपाणिर्यतौ तथा" इति निरुक्तिः ॥ ६८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ ॥ याम्यानिति द्वितीया सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणमित्युक्तत्वादत्र श्रावयित्वेति णिजंतसंबंधेऽपि नोचिता तथापि 'अव्ययकृतो भावे' इत्युक्तत्वाच्छृणोतेरकर्मकतामभिप्रेत्य सा कृता अकर्मकादेव भावार्थप्रत्ययोत्पत्तेर्विहितत्वादिति । यद्वा—याम्यान्प्रति नाममाहात्म्यमित्यन्वयः (१) राजन्निति । त्वं तु राजत्वाद्दंड्यादंड्यव्यवहारनिपुणोऽसीति भावः । नयकोविदाः प्रायश्चित्तशास्त्रकोविदाः ॥ १ ॥ २ ॥ साधवः सदाचाराः ॥ ३ ॥ प्रजाऽनिष्टं शोचंत आहुरेतत्प्रवर्त्तितमित्यादि । श्रेयान् सर्वशास्त्रतत्त्वज्ञः ॥ ४ ॥ यस्य श्रेष्ठत्वेनाभिमतस्य पशुर्यथा सौनकेन पाल्यमानस्तस्मिन्विश्वस्तो धर्माधर्मं न वेत्ति तेन सहाघातस्थानमपि गच्छति ॥ ५ ॥ कृतमैत्रं कृतविश्वासम् । अचेतनम् अज्ञम् । सघृणः 'घृणा दयाऽनुकंपा स्यात्' इत्यमरोक्तेर्दयालुश्चेत्तर्हि कथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि ॥ यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ७ ॥
एतेनैव ह्यघोनोस्य कृतं स्यादघनिष्कृतम् ॥ यदा नारायणायेति जगाद चतुरक्षरम् ॥ ८ ॥

तं विश्रंभणीयो विश्वसनीयः सघृणश्चेत् ॥ ६ ॥ नन्वस्य पापिनो दंडे किमर्थमाक्रोशः क्रियते तत्राहुः । अयं हीति । यद्यस्माद्विवशोऽपि हरेर्नाम व्याजहारोच्चारितवान् न केवलं प्रायश्चित्तमात्रं हरेर्नामापि तु स्वस्त्ययनं मोक्षसाधनमपि । "सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ " इति स्मृतेः ॥ ७ ॥ ननु कर्मसाद्गुण्यकरं हरेर्नामेति युक्तम् "यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥ " इत्यादिवचनात् । स्वातंत्र्येण त्वघनिवर्तकं हरेर्नाम कथं स्यात्तत्राहुः । एतेनैवेति । अघोनः अघवतो मघवच्छब्दवद्रूपम् । यत् आ इति च्छेदः । आ ईषदाभासमात्रं चतुरक्षरं यन्नाम जगाद । एतेनैव केवलेन चतुरक्षरमित्यनेनाधिक्यं च दर्शितम् । कथं जगाद । नारायण आय आगच्छेत्येवं विक्रोशरूपेण पुत्राह्वानेन । अयं भावः । कर्मांगत्वेऽपि हरिनाम्नः

द्रोग्धुं जिघांसितुमर्हति न कथमपीत्यर्थः ॥ ६ ॥ अत्राशंकंते–नन्विति । आक्रोशो वाग्वादः । परिकरो दृढत्वेन कटिबंधः ॥ ७ ॥ पुनराक्षिपति–नन्विति । सद्गुणस्य भावः साद्गुण्यं कर्मणः साद्गुण्यं कर्मसाद्गुण्यं तत्करोतीति तथा । यस्य हरेः । आदिना जपादिग्रहः । आकारेणेनाह्वानेन । अत्राशयमाह–अयं भाव इति । खादिरत्वादीति । अत्र जैमिनिसूत्रम् " एकस्य तूभयार्थत्वे संयोगपृथक्त्वम्" इति । अस्यार्थः–एकस्योभयार्थत्वे तु संयोगस्य विनियोजकप्रमाणस्य पृथक्त्वमुभयत्वं नियामकमिति शेषः । यथैकस्य खादिरत्वस्य क्रत्वर्थत्वं पुरुषार्थत्वं च "खादिरो यूपो भवति" "खादिरं वीर्यकामस्य यूपं कुर्वीत" इति वाक्याभ्यां बोधितत्वात् । तथैकस्य हरिनाम्नोऽपि मुक्तेः फलांतरस्य च तत्तद्बोधकवाक्याभ्यामुभयार्थतेत्यर्थः । तथा च हरिनाम्नोऽनेकफलसंबंधेऽपि प्रायश्चित्तार्थत्वं युक्तमेवेति सुष्ठूक्तं स्वामिचरणैः । अवशेन प्रमादेन । अत्राक्षेपांतरमाह–न चैत इति । अन्यशेषता निषेधशेषता । यथाऽप्राप्तार्थत्वेनात्यंताप्राप्तत्वेन 'विधिरत्यंतमप्राप्तौ " इत्युक्तेरपूर्वविधिः कल्प्यते "अग्नयेऽष्टाकपालं निर्वपेत्" इति तथात्रापि सर्वपापापनुत्तये हरिनाम जपेदिति विधिकल्पना भवत्येवातो निषेधशेषता न कल्प्येति । अथार्थवादलक्षणमाह–प्राशस्त्यनिन्दान्यतरलक्षणया विधिनिषेधभूतं वाक्यमर्थवादः स च त्रिविधो गुणवादानुवादभूतार्थवादभेदात् । प्रमाणांतरविरुद्धार्थबोधको गुणवादः यथा "आदित्यो यूपः" इति । प्रमाणांतरप्राप्तार्थबोधकोऽनुवादः यथा "अग्निर्हिमस्य भेषजम्" इति । प्रमाणांतरबाधतत्प्राप्तिरहितार्थबोधको भूतार्थः यथा "इंद्रो वृत्राय वज्रमुदयच्छत्" इति । तत्र त्रिविधानामप्यर्थवादानां विधिस्तुतिपरत्वसमानेऽपि भूतार्थवादानां स्वार्थेऽपि प्रामाण्यम् । अबाधिताज्ञातज्ञापकत्वं हि प्रमाणं तच्च बाधितविषयत्वात् ज्ञातज्ञापकत्वाच्च न गुणावादानुवादयोर्भूतार्थवादस्य तु स्वार्थतात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं न विहन्यते देवताधिकरणन्यायात् । देवताधिकरणन्यायश्च–संवादविसंवादाभावे यत्र मंत्रादिना देवताविग्रहादिकं सिध्यति स भवति यथा "उपर्यपि बादरायणः संभवात्" इति । अस्यार्थः–देवानामनधिकारात्क्रममुक्तिसाधनेषूपासनेषु देवादिभोगद्वारा मोक्षकाममनुष्यप्रवृत्तिर्नास्तीति पूर्वपक्षे फलं सिद्धांते तादृशप्रवृत्तिरस्तीति फलं बृहदारण्यके श्रूयते "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभूत्तथर्षीणां तथा मनुष्याणाम्" इति । देवादीनां मध्ये योयो ब्रह्मप्रत्यक्त्वेन साक्षादकरोत्स एव ब्रह्मात्मनाऽतिष्ठदित्यर्थः । अत्र किं देवादीनां ब्रह्मविद्याधिकारोऽस्ति न वेति विषये शास्त्रस्य मनुष्याधिकारत्वान्नास्तीति प्राप्तेऽभिधीयते तदुपरीति । तेषां मनुष्याणामुपरिष्टाद्ये देवादयस्तेषामपि ब्रह्मविद्यायामधिकारोऽस्तीति बादरायण आचार्यो मन्यते स्म कुतः संभवादर्थित्वसामर्थ्याद्यधिकारकारणस्य संभवादित्यर्थः । देवादीनां भोगशालित्वेऽपि भोग्यवस्तुष्वनित्यत्वदोषदर्शनाद्वैराग्यादिकं निरतिशयानंदमोक्षार्थित्वं च संभवतीति भावः । इह देवताविग्रहादिकं तद्योय इति मंत्रेण साधितमस्तीति । विग्रहादिकं तु "विग्रहो हविषां भोग ऐश्वर्यं च प्रसन्नता । फलप्रदानमित्येतत्पंचकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः ॥ स्त्रीराजपितृगोहंता ये च पातकिनोऽपरे ॥ ९ ॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ॥ नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ १० ॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुध्यत्यघवान्व्रतादिभिः ॥ यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोक गुणोपलंभकम् ॥ ११ ॥

खादिरत्वादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं युक्तमेव । तथा हि । "अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः । पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥" इत्यादिपुराणे । "तावत्सहस्रशो नाम्नः स्वातंत्र्यमवगम्यते ।" न चैतेऽर्थवादा इति शंकनीयं विधिशेषत्वाभावात् । न च विध्यश्रवणादन्यशेषता कल्पनीया । "यदा ग्नेयोऽष्टाकपालो भवति" इत्यादिवदप्राप्तार्थत्वे तु विध्यनुपपत्तिः । यथा रागतः प्राप्ते भोजनादौ प्राप्तार्थत्वेन विधिकल्पनोपपत्तेः । मंत्रेषु च । "मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः । आस्य जानंतो नाम चिद्विवक्तन" इत्यादिषु नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते । उपपा दितं च मंत्रार्थवादानामपि स्वार्थे प्रामाण्यं देवताधिकरणे । तस्माच्छ्रीनारायणनामाभासमात्रेणैव सर्वाघनिष्कृतं कृतं स्यादिति ॥ ८ ॥ ननु कामकृतानां बहूनां महा पातकानां सहस्रश आवर्तितानां द्वादशाब्दादिकोटिभिरप्यनिवर्त्यानां कथमिदमेकमेव प्रायश्चित्तं स्यात्तत्राहुः स्तेन इति द्वाभ्याम् ॥ ९ ॥ सुनिष्कृतं श्रेष्ठं प्रायश्चित्त मिदमेव । तत्र हेतुः । यतो नामव्याहरणात् । तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति ॥ १० ॥ श्रेष्ठत्वमेवोपपाद यंति नेति द्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैः प्रायश्चित्तैस्तथा न शुद्ध्यति । उदाहृतैरुच्चारितैर्यथा । नामपदैरित्यनेन नमामीत्यादिक्रियायोगोऽपि नापेक्षि

विग्रहादिकम्" इति । मंत्रेषु चेति । अथ मंत्रार्थः—मर्त्ता मर्त्या मरणधर्माणो विप्रासो विप्रा वयममर्त्यस्य जातवेदसः सर्वकर्मफलदातुस्ते नाम भूरि तपोदानादिसर्वधर्मेभ्योऽधिकं मनामहे मन्यामहे । अस्य विष्णोः आ सम्यक्प्रकारेण नाम यूयं विविक्तन कीर्त्तयत किं कुर्वंतः चित्किंचिज्जानंतो नाममाहात्म्यमिति । आदिना "तमु स्तोतारः पूर्व्यं यथाविधि ऋतस्य गर्भं जनुषा पिपर्त्तन" इत्यादेर्ग्रहः । पूर्व्यं पुरातनं सर्वाधिष्ठातारं सर्वकर्तारं च ऋतस्योपनिषदस्तज्जन्यज्ञानस्य वा गर्भं जठरे वर्त्तमानं वेदांतसिद्धांतप्रत्यगभिन्नपरमात्मानं स्तोतारः स्तुध्वमिति विभक्तिविपरिणामः । न च वैदिकैरेव स्तोत्रैः स्तोतव्यमिति कश्चिदस्ति नियमः किं तु यथाविधि यथाज्ञानं यथा जानीत तथा स्तुध्वं श्रौतैरागमिकैः पौराणैः प्राकृतैर्वा स्तोत्रैः स्तुध्वमिति भावः । ततश्च जनुषा पिपर्त्तन पिपृतेति वक्तव्ये पिपर्त्तनेति छांदसं जन्म पूर्यतामिति कर्मकर्तरि प्रयोगे कर्त्तव्ये जनुषेति करणत्वनिर्देशोऽपि छांदसः । जन्मनः पूर्त्तिम्प्राप्नुत जन्मानि समापयतेति भावः । अथ वा तं देवं जनुषा स्वच्छंदरचितेन बहुविधजन्मनापि पर्तन पूरयत मत्स्याद्यवतारैरन्वितं वर्णयेतत्यर्थः । किञ्च—विधिशक्तिर्न मंत्रस्य नियोगेनानुमीयते "स्वतो विधास्यते ह्येष नियोगात्स्मारयिष्यति" इत्युक्तेरनुष्ठानार्थानामपि मंत्राणां विधायकत्वमनुरूपमेवेति मीमांसकाः । संदर्भस्तु—ननु तर्हि तन्नामकरणे प्रथमं तन्नाम्नैव जन्मकोट्यंहसां नाशोऽभू त्तदनंतरं मुहुः कृतपापस्य तत्समाप्तिरनेनाभूदिति वक्तुं युज्यते इत्याशंक्य पूर्ववाक्याभिप्रायं स्वयमेवाह—एतेनैवेति । यदि पूर्वं नोच्चारितवाँस्तथाप्येतेनैवाद्य निष्कृतं कृतं स्यादित्यन्यांगत्वं परिहृतम् ॥ ८ ॥ अत्राक्षिपति— नन्विति । स्तेनः स्वर्णस्तेयकरः । अपरे पैशुन्यदेवविप्रनिगमनिंदादिपापकर्तारः ॥ ९ ॥ तत्र अस्यैव मुख्यप्रायश्चित्तत्वे ॥ १० ॥ ब्रह्मात्र कर्मकांडमात्रं 'मुह्यंत्याम्नायवादिनः' इतिवत् । नामरूपैः पदैरेकस्य नाम्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैकांतिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे ॥ तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः ॥ १२ ॥ अथैनं मापनयत कृताशेषाघनिष्कृतम् ॥ यदसौ भगवन्नाम म्रियमाणः समग्रहीत् ॥ १३ ॥ सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥ वैकुंठनामग्रहणमशेषाघहरं विदुः ॥१४॥ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः॥ हरिरित्यवशेनाह पुमान्नार्हति यातनाम् ॥ १५ ॥

त इति दर्शितम् । किं च । तन्नामपदोच्चारणमुत्तमश्लोकस्य तद्गुणानां चोपलंभकं ज्ञापक भवति । न तु कृच्छ्रचांद्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ॥ ११ ॥ नैकांतिकं नात्यंतशोधकं तन्निष्कृतं यस्मिन्कृतेऽप्यसत्पथे पापमार्गे मनो धावति चेत्, कर्मणां पापानां निर्हारमात्यंतिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तम् । यतोऽसौ खलु सत्त्वभावनश्चित्तशोधकः ॥ १२ ॥ अथ तस्मादेनं माऽपमार्गेण नयत । कृतमशेषाणामघानां निष्कृतं येन । यद्यस्मात्समग्रहीत्संपूर्णमुच्चारितवान् । नामैकदेशेनाप्यलमिति भावः । म्रियमाण इत्यनेन पुनः पापांतरासंभव उक्तो न तु तत्कालत्वमेव विवक्षितम् । तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात् । न च विधिं विना काकतालीयनामोच्चारणं पापापहमिति प्रमाणमस्ति ॥ १३ ॥ नन्वयं पुत्रनामाग्रहीन्न तु भगवन्नाम तत्राहुः । सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनेति सावज्ञमपि च वैकुंठनामोच्चारणम् ॥ १४ ॥ ननु नायं संकल्पपूर्वकं वैकुंठनामाग्रहीत्किं तु पुत्रस्नेहपरवशः संस्तत्राहुः । पतित इति। अवशेनापि यो हरिरित्याह स यातनां नार्हति । पुमानित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तम् । अवशत्वमेवाह । पतितः प्रासादादिभ्यः । स्खलितो मार्गे । भग्नो भग्न

एव वावांतरपदैर्यथा गोवर्द्धनधारीत्यत्रावांतरपदं गोवर्द्धनेति ज्ञापकम् । यथा दीनदयालुरित्युक्ते गजनिर्मोचनादिरूपगुणानामनुभवो भवति । हे कंसारे इत्युक्ते च कंसविषयसर्वलीलानुभवो भवतीत्यर्थः । इत्यर्थ इति । चांद्रायणादिना पापक्षयस्तु भवत्येव न तु भगवल्लीलास्मरणादिकं तेन जायत इति भावः ॥ ११ ॥ न केवलं नामैव तादृक् किन्तु गुणा अपीत्याह—नैकांतिकमिति । तत् तस्मात् ॥ १२ ॥ इति भाव इति । नामपदैरित्युक्तेरयमाशयः । तत्कालत्वम् अंतकालत्वम् । अंतकाल एव नामोच्चारणं कर्त्तव्यमिति न विवक्षितम् । कुतः तदानीमंतकाले यथा कृच्छ्रादि कर्तुं न शक्यते तथा नामोच्चारणमपीति मनसोऽस्थैर्यात् । विधिं विना काकतालीयनामोच्चारणमकस्मान्नामोच्चारणं पापापहमिति प्रमाणं न चास्ति किं त्वस्त्येवात्रैव दृष्टत्वात् । काकतालीयं तु यदा काक आगतस्तदैव तालफलं पतितमित्याकस्मिको योग एव ॥ १३ ॥ पुनराक्षिपंति—नन्विति । परिहासेन कृतम् । अहो भवांस्तु साक्षान्नारायणो यतो नारे वसतीति कंचिन्नरसमूहस्थं प्रत्युपहासः । तीर्थस्तु—कोपजननाय नर्मवचनं स्तोभः यथा मधुमक्षिकासूदनासमर्थस्त्वं किं मधुं सूदितवानसौ हरिश्चेन्मधोर्वधान्मधुसूदनस्तदुपपन्नमेव ॥ १४ ॥ पुनराक्षिपति—नन्विति । अवशेन वैवश्येनापि यतस्तैरित्थमुक्तमतो हेतोः । तत्र मन्वादिग्रंथे । तथा पापानुरोधेन प्रायश्चित्तव्यवस्था यथा सुराबिंदुपानेनापि पुमान्महा

॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरूणां च लघूनां च गुरूणि च लघूनि च ॥ प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः॥१६॥तैस्तान्यघानि पूयंते तपोदानजपादिभिः ॥ नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया ॥ १७ ॥ अज्ञानादथ वा ज्ञानादुत्तमश्लोकनाम यत् ॥ संकीर्तितमघं पुंसो दहेदेधो यथाऽनलः ॥ १८ ॥ यथागदं वीर्यतममुपयुक्तं यदृच्छया ॥ अजानतोऽप्यात्मगुणं कुर्यान्मंत्रोप्युदाहृतः ॥ १९ ॥

गात्रः । संदष्टः सर्पादिभिः । तप्तो ज्वरादिना । आहतो दंडादिना ॥ १५ ॥ ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं न त्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत्तत्राहुर्द्वाभ्याम् । गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यवस्था।हरिनाम्नस्तु नेयं व्यवस्थोक्ता "विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैः" इति वचनात् । न च सुराबिंदुपाने महापातकत्वस्मरणवन्नाम्नस्तत्प्रायश्चित्तत्वस्मरणस्यायमतिभारः ॥ १६ ॥ किं च तैस्तपोदानादिभिस्तान्यघान्येव पूयंते नश्यंति । अधर्माज्जातं मलिनं तु तस्य पापकर्तुर्हृदयम् । यद्वा । तेषामघानां हृदयं सूक्ष्मं रूपं संस्काराख्यं न शुद्ध्यति । तदपीशांघ्रिसेवया कीर्तनादिना शुद्ध्यतीत्यर्थः । अयं भावः । महांत्यपि पापानि सकृदुच्चारितेनैव नाम्ना नश्यंति सकृत्प्रवर्तितेन दीपेनेव गाढध्वांतानि । तदावृत्त्या तु पापांतरस्यानुत्पत्तिः दीपधारण इव तमोंतरस्य । ततश्च वासनाक्षयाद्धृदयशुद्धिः । एतदर्थमेव तत्रतत्राऽऽवृत्तिविधानं "पापक्षयश्च भवति स्मरतां तमहर्निशम्" इत्यादिषु । तदेवात्राप्युक्तम् । "गुणानुवादः खलु सत्त्वभावनः" इति "तदपीशांघ्रिसेवया" इति च । अतोऽस्य हरिनाम्नैव सर्वपापक्षयो वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति ॥ १७ ॥ तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत्तत्राहुः । अज्ञानादिति । बालकेनाज्ञानादपि प्रक्षिप्तोऽग्निर्यथा काष्ठराशिं दहति तद्वत् ॥ १८ ॥ नन्विदमपि पर्षदनुपदिष्टं श्रद्धाहीनं च कथं प्रायश्चित्तं स्यात्तत्राहुः । यथेति । अगदमौषधम् । वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तम् । यदृच्छया श्रद्धादिहीनमुपयुक्तं भक्षितं पर्षन्मुखादजानतोऽपि स्वगुणमारोग्यं कुर्यात् । मंत्रोऽपि नामात्मकस्तथा स्वकार्यं कुर्यादेव । न हि वस्तुशक्तिः श्रद्धादिक

पातकी भवतीति स्मर्यते तथाह एकनाममात्रस्मरणमपि महापातकप्रायश्चित्तं भवतीति स्मर्यतां न नाम्नस्तद्धनने कश्चिद्भारोऽस्तीति भावः ॥ १५ ॥ १६ ॥ अन्यदपि नाम्न आधिक्यमाह–किंचेति । तच्छब्दस्य पूर्वपरामर्शित्वात्तच्छब्देन पापकर्तृग्रहणं नोपयुज्यते तस्य पूर्वं प्रक्रांतत्वाभावादत आह–यद्वेति । अत्राशयमाह–अयं भाव इति । यतो हरिनाम महत्प्रभाववदतो हेतोः ॥ १७ ॥ यद्यपि नामोच्चारणं सर्वपापप्रायश्चित्तमस्ति तथापीति ॥ १८ ॥ पुनराक्षिपति–नन्विति । पर्षत्स्वरूपं तु बृहत्पाराशर्य्याम् " वेदशास्त्रविदो विप्रा यं ब्रूयुः पञ्च सप्त वा । त्रयो वापि स धर्मः स्यादेको वाध्यात्मवित्तमः ॥ संयमं नियमं वापि उपवासादिकञ्च यत् । तद्गिरा परिपूर्णा स्यान्निष्कृतिर्व्यावहारिकी ॥ न लक्षेणापि मूर्खाणां न चैवाधर्मवेदिनाम् । लुब्धानां नाप्यविदुषां नापि वै पक्षपातिनाम् ॥ श्रुताध्ययनसंपन्नः सत्यवादी जितेंद्रियः । सदा धर्मरतः शांत एकः पर्षत्त्वमर्हति ॥" इति 'समज्या परिषद्गोष्ठी' इत्यमरः । परेरंत्यलोपे पर्षदपि साधितं "धर्मज्ञा यत्र तिष्ठंति विद्वांसो ब्राह्मणास्त्रियः । पञ्च वा सप्त वा चैकः सभा सा पर्षदुच्यते" इति धरणिदेवः । छंदोभंगभया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(पतिं वः पृच्छत भटा धर्मेऽस्मिन्यदि संशयः ॥ स वेद परमं गुह्यं धर्मस्य भगवान्यमः ॥१॥) श्रीशुक उवाच त एवं सुविनिर्णीय धर्मं भागवतं
नृप ॥ तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् ॥ २० ॥ इति प्रत्युदिता याम्यदूता यात्वा यमांतिके ॥ यमराज्ञे यथासर्वमाचचक्षुररिंदम ॥ २१ ॥
द्विजः पाशाद्विनिर्मुक्तो गतभीः प्रकृतिं गतः ॥ ववंदे शिरसा विष्णोः किंकरान्दर्शनोत्सवः ॥ २२ ॥ तं विवक्षुरमभिप्रेत्य महापुरुषकिंकराः ॥
सहसा पश्यतस्तस्य तत्रांतर्दधिरेऽनघ ॥ २३ ॥ अजामिलोप्यथाकर्ण्य दूतानां यमकृष्णयोः ॥ धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम् ॥ २४ ॥
भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः ॥ अनुतापो महानासीत्स्मरतोऽशुभमात्मनः ॥ २५ ॥ अहो मे परमं कष्टमभूदविजितात्मनः ॥ येन विप्ला
वितं ब्रह्म वृषल्यां जायतात्मना ॥ २६ ॥

मपेक्षत इत्यर्थः । तदुक्तं विष्णुधर्मेषु । "हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥ अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ॥ " इति ॥ १९ ॥ तं विप्रममूमुचन्मोचयामासुः ॥ २० ॥ प्रत्युदिता निराकृताः संतो यात्वा गत्वा यमराज्ञे यमराजाय यथावत्कथयामासुः ॥ २१ ॥ दर्शनेनोत्सवो यस्य ॥ २२ ॥ विवक्षुं वक्तुमिच्छंतं ज्ञात्वा ॥ २३ ॥ त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं कृष्णदूतानां च भागवतं भगवत्प्रणीतं शुद्धं निर्गुणं धर्ममाकर्ण्येति योज्यम् । भक्तिमासीदित्युत्तरस्यानुषंगः ॥ २४ ॥ २५ ॥ अनुतापं प्रपंचयति अहो इति चतुर्भिः । येनात्मना मया वृषल्यां पुत्रतया जायमानेन ब्रह्म ब्राह्मणजातिर्विप्लावितं नाशितम् ॥२६॥

न्मतुब्लोपः । यद्वा—मत्वर्थीयाजंतात्तमब्बोध्यः । इत्यर्थ इति । न ह्ययमग्निर्मां दहत्विति श्रद्धावंतमेवाग्निर्दहति किं तु तद्धीनमपीति भावः । तत् श्रद्धाराहित्येपि स्वकार्यकरणम् । दुष्टचित्तैः श्रद्धाहीनैः ॥ १९ ॥ ते वैष्णवाः । भागवतं भगवद्भक्तिप्रधानम् । नृपेति । नृपत्वमपि भागवतधर्मायत्तं तदभावे 'यथा राजा तथा प्रजा' इति न्यायेन सर्वे नरा नरकाधिकारिण एव स्युरिति भावः ॥ २० ॥ यमराज्ञ इति समासांतविधेरनित्यत्वात् । अरिंदमेति । कामादिशत्रुदमनशीलस्त्वं मा भैरिति भावः ॥ २१ ॥ प्रकृतिं सात्त्विकावस्थाम् । 'सत्त्वप्रकृतयो विप्राः' इत्युक्तेः । अत एव ववंद इति ॥ २२ ॥ तेन सहासंभाषणमुत्कंठां वर्द्धयित्वा सम्यग्भक्त्वापादनार्थं तदर्थमेव त्याग इति संदर्भः । अत्र विश्वनाथः—नन्वेवं चेन्म्रियमाणोऽयं नामाग्रहीत्तर्हि कथं सद्य एव पार्षदैर्वैकुंठं न निन्ये । श्रूयते हि "यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणंति । तेऽनेकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये ॥" इति । अत्रोच्यते—नामग्रहणं द्विधा केवलत्वेन स्नेहसंयुक्तत्वेन च तत्र पूर्वेणापि प्रापयत्येव सद्यस्तल्लोकं तन्नाम परेण चेत्तत्सामीप्यमपि प्रापयति । "मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते " किं च–" दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदायने " इति तद्वाक्यात् । किं तु । " नाहं तु सख्यो भजतोऽपि जंतून्भजाम्यमी षामनुवृत्तिवृत्तये" इति तद्वाक्याद्देवेषद्विलंबेन प्रापयति स्नेहत्वममीषामनुवृत्तिर्मदंनुसेवैव वृत्तिर्जीवनहेतुरिति तदर्थमयमभिप्रायो दर्शितः । तदेवं सत्यजामिलोप्यारोपिततन्नाम्नः पुत्रस्य संबंधेन तन्नाम्न्यपि स्निह्यति स्म तस्मिन्स्वनाम्नि भगवतोऽपि सांद्रोऽभिमानो दृश्यते यतस्तद्विषया मतिरित्यर्थः । यतः पार्षदानामपि तत्र महानेवादरो दृष्टः तस्मात्स्नेहसंवलनया गृहीतस्वनाम्नि तस्मिन्नुत्कंठापूर्वकसाक्षान्निजकीर्त्तनादिद्वारा साक्षान्निजस्नेहं प्रकृष्टं दत्त्वा नेतुमिच्छति प्रभुरिति ज्ञात्वा सहसात्मभिः सह नीतवंत इति सर्वं समंजसम् । अहो अहमपि राजसस्वभावत्वादघवानस्मीति शोचंतं नृपमाह—अनघेति । स त्वजामिलः पापकारित्वादघसंबंध्यपि तस्मिन्नपि भगवत एतादृश्यनुकंपा जाता किंपुनराजन्मतोऽघसंबंधशून्ये त्वयीति भावः ॥ २३ ॥ छंदोभंगभयात्प्रधानस्यापि कृष्णशब्दस्य परनिपात इत्याह—यमकृष्णयोरिति ॥ २४ ॥ अशुभं वृषलीसंगादिलक्षणम् । अनुतापः पश्चात्तापः ॥ २५ ॥ उत्कंठापूर्वकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिङ् मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम् ॥ हित्वा बालां सतीं योऽहं सुरापामसतीमगाम् ॥ २७॥ वृद्धावनाथौ पितरौ नान्यबंधू तपस्विनौ ॥ अहो मयाऽधुना त्यक्तावकृतज्ञेन नीचवत् ॥ २८ ॥ सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे ॥ धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः ॥२९॥ किमिदं स्वप्न आहोस्वित्साक्षाद्दृष्टमिहाद्भुतम् ॥ क्व याता अद्य ते ये मां व्यकर्षन्पाशपाणयः ॥ ३० ॥ अथ ते क्व गताः सिद्धाश्चत्वारश्चारुदर्शनाः ॥ व्यमोचयन्नीयमानं बद्ध्वा पाशैरधो भुवः॥३१॥अथापि मे दुर्भगस्य विबुधोत्तमदर्शने ॥ भवितव्यं मंगलेन येनात्मा मे प्रसीदति ॥३२॥ अन्यथा म्रियमाणस्य नाशुचेर्वृषलीपतेः ॥ वैकुंठनामग्रहणं जिह्वा वक्तुमिहार्हति ॥३३॥ क्व चाऽहं कितवः पापो ब्रह्मघ्नो निरपत्रपः ॥ क्व च नारायणेत्येतद्भगवन्नाम मंगलम् ॥३४॥ सोऽहं तथा यतिष्यामि यतचित्तेंद्रियानिलः ॥ यथा न भूय आत्मानमंधे तमसि मज्जये ॥३५॥ विमुच्य तमिमं बंधमविद्याकामकर्मजम् ॥ सर्वभूतसुहृच्छांतो मैत्रः करुण आत्मवान्॥३६॥मोचये ग्रस्तमात्मानं योषिन्मय्यात्ममायया ॥ विक्रीडितो ययैवाहं क्रीडामृग इवाधमः ॥३७॥ मयाऽहमिति देहादौ हित्वा मिथ्याऽर्थधीर्मतिम् ॥ धास्ये मनो भगवति शुद्धं तत्कीर्तनादिभिः ॥३८॥

दुष्कृतं दोषकर्तारम् । कुलस्य कज्जलं कलंकम् ॥ २७ ॥ नास्त्यन्यो बंधुः पुत्रादिर्ययोस्तौ । तपस्विनौ संतप्तौ । अधुना तत्क्षणमेव ॥ २८ ॥ २९ ॥ इदानीं तस्य विमर्शपूर्वकं मोक्षक्रममाह किमिदमित्यष्टभिः । साक्षात्प्रत्यक्षमिह जाग्रतैव दृष्टम् ॥ ३० ॥ ये मां व्यमोचयंस्ते च क्व गताः ॥ ३१ ॥ यद्यप्यहमस्मिञ्जन्मनि दुर्भगः पापी यानथापि जन्मांतरे नूनं पुण्यवानित्याह । विबुधोत्तमदर्शन इति निमित्तसप्तमी । तेषां दर्शनार्थं पूर्वेण मंगलेन महता पुण्येन भवितव्यम् । येन दर्शनेन ॥३२॥ अन्यथा पूर्वपुण्यं विना । कथंभूतं वैकुंठनाम । गृह्यते वशीक्रियते चित्तमनेनेति ग्रहणम् ॥३३॥ ब्रह्मघ्नो विप्रत्वनाशकः ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ अमिथ्याभूतेऽर्थे धीर्यस्य

साक्षात्तद्भजनमेवाह—अनुतापरूपत्वेन अहो इत्यादिना ॥ २६ ॥ अगां सुरतार्थं प्राप्तवानस्मि ॥ २७ ॥ २८ ॥ सोऽहमिति । स्वदोषदृष्ट्यैव नाममाहात्म्यदृष्ट्या तु वक्ष्यति—अन्यथा म्रियमाणस्येति ॥ २९ ॥ ॥ ३० ॥ भुवोऽधो नरकम् । अथाधुनार्थे । सिद्धाः कृतार्थतां प्राप्ता देवविशेषाः ॥ ३१ ॥ अथापीत्यनेन प्राचीनास्य भक्तिरस्ति किं तु केनाप्यपराधेनावृताभूदिति गम्यते । आत्मा मनः ॥ ३२ ॥ म्रियमाणस्य तत्राप्यशुचेस्तत्रापि वृषलीपतेरिति सर्वथाऽयोग्यतां सूचितवान् । नामोच्चारणं हि वशीकरणसाधनं "हरिरवशाभिहितोऽप्यघौघनाशः । प्रणयरशनया धृतांघ्रिपद्मो न सरति छिद्रवदक्षरः सतां हि" इत्येकादशे जायंतेयोपाख्याने वक्ष्यमाणत्वात् ॥ ३३ ॥ ब्रह्मेति भावप्रधानो निर्देशोऽत उक्तं विप्रत्वनाशकः । कितवो वंचकः 'कितवस्तु पुमान्मत्ते वंचके कनकाह्वये' इति मेदिनी ॥ ३४ ॥ यः कितवत्वादिविशिष्टस्स इत्यर्थः । अंधे तमसि संसारे नरके वा ॥ ३५ ॥ बंधं देहाद्यभिमानलक्षणम् ॥ ३६ ॥ यया स्त्रिया ॥ ३७ ॥ अमिथ्याभूतेऽर्थे ब्रह्मणि । "ब्रह्मैव सत्तदन्यत्सर्वं मिथ्या" इत्युक्तेः । आदिना पुत्रादिग्रहः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति जातसुनिर्वेदः क्षणसंगेन साधुषु ॥ गंगाद्वारमुपेयाय मुक्तसर्वानुबंधनः ॥ ३९ ॥ स तस्मिन्देवसदन आसीनो
योगमाश्रितः ॥ प्रत्याहृतेंद्रियग्रामो युयोज मन आत्मनि ॥ ४० ॥ ततो गुणेभ्य आत्मानं वियुज्यात्मसमाधिना ॥ युयुजे भगवद्धाम्नि ब्रह्मण्य
नुभवात्मनि ॥ ४१ ॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान्प्राग्ववंदे शिरसा द्विजः ॥ ४२ ॥ हित्वा कलेवरं तीर्थे
गंगायां दर्शनादनु ॥ सद्यः स्वरूपं जगृहे भगवत्पार्श्ववर्तिनाम् ॥ ४३ ॥ साकं विहायसा विप्रो महापुरुषकिंकरैः ॥ हैमं विमानमारुह्य ययौ यत्र
श्रियः पतिः ॥ ४४ ॥ एवं स विप्लावितसर्वधर्मा दास्याः पतिः पतितो गर्ह्यकर्मणा ॥ निपात्यमानो निरये हतव्रतः सद्यो विमुक्तो भगवन्नाम
गृह्णन् ॥ ४५ ॥ नातः परं कर्मनिबंधकृंतनं मुमुक्षतां तीर्थपदानुकीर्तनात् ॥ न यत्पुनः कर्मसु सज्जते मनो रजस्तमोभ्यां कलिलं ततोऽन्यथा
॥ ४६ ॥ य एवं परमं गुह्यमितिहासमघापहम् ॥ शृणुयाच्छ्रद्धया युक्तो यश्च भक्त्याऽनुकीर्तयेत् ॥ ४७ ॥ न वै स नरकं याति नेक्षितो यमकिं
करैः ॥ यद्यप्यमंगलो मर्त्यो विष्णुलोके महीयते ॥ ४८ ॥

तथाभूतः सन् देहादौ ममाहमिति मतिं हित्वा मनो धास्ये ॥ ३८ ॥ मुक्तं सर्वमनुबंधनं पुत्रादिस्नेहो येन सः ॥ ३९ ॥ प्रत्याहृत इंद्रियग्रामो येन ॥ ४० ॥ ततो गुणे
भ्यो देहेंद्रियादिभ्य आत्मानं वियुज्य विशोध्य । आत्मसमाधिना चित्तैकाग्र्येण । भगवतो धाम्नि स्वरूपे ॥ ४१ ॥ तस्मिन्भगवद्धाम्नि उपारता निश्चला धीर्यस्य सः । त
स्मिन्कालेऽद्राक्षीदिति वा । पुरः पुरतः । ततश्च प्रागुपलब्धानेव तानुपलभ्य प्रत्यभिज्ञाय ववंदे ॥ ४२ ॥ ४३ ॥ ४४ ॥ उपसंहरति एवमिति द्वाभ्याम् । विप्लाविताः
सर्वे धर्मा येन । हतं व्रतं स्वदारनियमादि यस्य ॥ ४५ ॥ कर्मनिबंधस्य पापमूलस्य कृंतनं छेदकमतः परं नास्ति । कस्मात्परम् । तीर्थपदस्यानुकीर्तनात् । तत्र हेतुः ।
यद्यतोऽनुकीर्तनात् । ततोऽनुकीर्तनात् । अन्यथा प्रायश्चित्तांतरे रजस्तमोभ्यां कलिलं मलिनमेव तिष्ठति यत्तन्मनः कर्मसु पुनर्न सज्जते ॥ ४६ ॥ ४७ ॥ न चेक्षितो भव

पुनरादिना स्मरणादिग्रहः ॥ ३८ ॥ नाम्नः फलमुक्त्वा साधुसंगफलमाह–इतीति । जातः सुष्ठु भगवद्भक्त्युत्पादनपूर्वत्वेन निर्वेदो यस्य सः । गंगाद्वारं कनखलसमीपवर्त्तितीर्थविशेषम् ॥ ३९ ॥ धास्ये मन इत्यादिना
यद्विचारितं तत्र कृतैस्तत्कीर्तनादिभिः । शुद्धेन मनसा पुनर्विचारितमीदृशस्यापि मनसो भगवत्पर्यन्ता मतिर्न स्यात् । 'ब्रह्मणो हि प्रतिष्ठाहम्' इति न्यायेन परात्परा हि स विशेषादवस्थितिः । तस्मान्निर्विशेषस्व
प्रकाशलक्षणब्रह्मानुभवार्थमेव यतिष्ये तदेवं विचार्य तेन यत्कृतं तदाह–स तस्मिन्निति । प्रत्याहृतो वशीकृतः । आत्मनि हरौ । युयोज योक्तुमुद्यतो बभूव ॥ ४० ॥ तत इंद्रियग्रामवशीकरणोत्तरम् । युयुजे योजयामास ।
अनुभवात्मनि ज्ञानात्मनि ॥ ४१ ॥ तच्छब्देन भगवद्धामोपादाने तर्हीति शेषीकरणे च गौरवं मत्वाह–तस्मिन्काले इति वेति । यर्ह्युपारत इत्यनेन ब्रह्मानुभवानंतरमपि वैकुंठाविर्भाव इति । समर्थ्यते ॥ ४२ ॥ स्वरूपं
निर्दोषत्वादिलक्षणमिति तीर्थः । गंगायां तीर्थे इत्यजहल्लिंगत्वात्स्त्रीत्वम् ॥ ४३ ॥ यत्र वैकुंठे ॥ ४४ ॥ नामकीर्त्तने श्रद्धातिशयं जनयन्नुपसंहरति–एवमिति । दास्याः पतिरित्याक्रोशे षष्ठी । अजामिलनाम मुक्त्वा दास्याः
पतिरित्याह्वयति लोक इत्यर्थः । गर्ह्यकर्मणा दासीगमनादिलक्षणेन । पतितो विप्रत्वजातेरधो गतः ॥ ४५ ॥ तत्र तीर्थपदानुकीर्त्तनस्य कर्मबंधमोचकश्रेष्ठत्वे । परं श्रेष्ठम् । "परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले"
इति मेदिनी । इह तु क्लीबत्वं विशेष्यनिघ्नत्वात् ॥ ४६ ॥ नामापराधयुक्तापेक्षयाह–य इति । नामापराधास्तु द्वितीयस्कंधे प्रथमाध्याये प्रथमपद्यव्याख्याशतके च वर्णिता इति ॥ ४७ ॥ अमंगलो नामापराध्यपि ॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितम् ॥ अजामिलोऽप्यगाद्धाम किं पुनः श्रद्धया गृणन् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधेऽजामिलोपाख्याने भगवन्नाममाहात्म्यवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ छ ॥ राजोवाच ॥ निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान्प्रति धर्मराजः ॥ एवं हताज्ञो विहतान्मुरारेर्नैदेशिकैर्यस्य वशे जनोऽयम् ॥ १ ॥ यमस्य देवस्य न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत् ॥ एतन्मुने वृश्चति लोकसंशयं न हि त्वदन्ये इति मे विनिश्चितम् ॥२॥ श्रीशुक उवाच ॥ भगवत्पुरुषै राजन्याम्याः प्रतिहतोद्यमाः ॥ पतिं विज्ञापयामासुर्यमं संयमनीपतिम् ॥ ३ ॥ यमदूता ऊचुः ॥ कति संतीह शास्तारो जीवलोकस्य वै प्रभो ॥ त्रैविध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ॥ ४ ॥

ति ।। ४८ ।। म्रियमाणोऽवशत्वेन श्रद्धाविहीनोऽपि ।। ४९ ।। इति श्रीमद्भागवते म० षष्ठस्कंधे टीकायां द्वितीयोऽध्यायः ।। २ ।। तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः । सांत्वयित्वा स्वदूतांस्ते वैष्णवे किंकरीकृताः ।। १ ।। विष्णुदूतैर्निर्णीतं शास्त्रार्थं यममुखेन द्रढयितुं तृतीयाध्यायारंभः । तत्र यदुक्तं यमराज्ञे यथासर्वमाचचक्षुरिति ततः किं तत्र वृत्तमिति पृच्छति । निशम्येति । मुरारेर्नैदेशिकैः किंकरैरेवं विहतान् । अत एव हता आज्ञा यस्य । यस्य वशवर्त्ययं जनः सोऽपि तान्प्रति किमाह ।। १ ।। अत्याश्चर्यमेतदित्याह । यमस्येति । हे ऋषे यमस्य दंडभंगः कुतश्चन कस्माच्चिदपि श्रुतपूर्वो नासीत् । एतदेतस्मिन्नर्थे । यद्वा न श्रुतपूर्वः । एतद्यमदूतनिराकरणं चासीत् । अतः सर्वस्यापि लोकस्य संशयो वर्तते तं त्वत्तोऽन्यो न छिनत्तीति मे निश्चितमतः कथयेति शेषः ॥ २ ॥ भगवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः ॥ ३ ॥ कति संतीत्याक्षेपोक्तिः । त्रैविध्यं त्रिविधम् । स्वार्थे ष्यञ् । यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः । तथा कर्मफलस्याभिव्यक्तिहेतवः कति संतीति ॥ ४ ॥

पुत्रे संकेतेनोपचारितं स्थापितम् । गृणन् उच्चरन् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ सांत्वयित्वा सामर्थ्यैर्बोधयित्वा । वैष्णवे विष्णुभक्ते । किंकरीकृतास्तदनुचरतां प्रापिताः । भवद्भिर्विष्णुभक्तानां कैंकर्यं कार्यं ते च मद्गुरुभ्रातर इति बोधिता इति भावः (१) तत्र पूर्वाध्याये । ततो दूतवर्णिताजामिलवृत्तांतश्रवणोत्तरम् । निदेशं कुर्वंतीति नैदेशिकाः । "निदेशः शासनेऽपि स्यात्कथनोपांतयोरपि" इति मेदिनी । एवमुक्तरीत्या । विहतान्निरस्तान् । अत एव मुरारिकिंकरताडितस्वतदूतत्वादेव ॥ १ ॥ दंडभंगः सैन्यभंग आज्ञाभंग इति यावत् । "दंडः सैन्ये प्रकांडे च व्यूहे लगुडमानयोः । ताडनेऽपि च" इति निरुक्तिः । एतस्मिन् लोके इत्यर्थः । विभक्त्यंतराश्रयणे गौरवं मत्वाह—यद्वेति । अतोऽश्रुतपूर्वत्वात् । ऋषे इति त्रिकालज्ञत्वं मुने इति सर्वशास्त्रज्ञत्वं च द्योतयन्नाह । यतः सर्वज्ञत्वात्त्वमेव वक्तुं समर्थोऽस्यतो हेतोः । लोकसंशय इत्युक्त्या स्वस्य न संशय इत्युक्तम् ॥ २ ॥ राजन्निति । यथा त्वत्पुरुषास्त्वां विज्ञापयंतीति भावः ॥ ३ ॥ प्रभो इति साभिप्राया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि स्युर्बहवो लोके शास्तारो दंडधारिणः ॥ कस्य स्यातां न वा कस्यमृत्युश्चामृतमेव वा ॥ ५ ॥ किं तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणाम् ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्तिनाम् ॥ ६ ॥ अतस्त्वमेको भूतानां सेश्वराणामधीश्वरः ॥ शास्ता दंडधरो नृणां शुभाशुभ विवेचनः ॥ ७ ॥ तस्य ते विहितो दंडो न लोके वर्ततेऽधुना ॥ चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ॥ ८ ॥ नीयमानं तवादेशादस्मा भिर्यातनागृहान् ॥ व्यमोचयन्पातकिनं छित्त्वा पाशान्प्रसह्य ते ॥ ९ ॥ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमम् ॥ नारायणेत्यभिहिते मा भैरित्यायुयुर्द्रुतम् ॥ १० ॥ श्रीशुक उवाच ॥ इति देवः स आपृष्टः प्रजासंयमनो यमः ॥ प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः ॥ ११ ॥ यम उवाच ॥ परो मदन्यो जगतस्तस्थुषश्चओतं प्रोतं पटवद्यत्र विश्वम् ॥ यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः ॥ १२ ॥

सन्तु वहवः को बाधस्तत्राहुः । यदीति । मृत्युर्दुःखममृतं सुखं तेषां विप्रतिपत्तौ ते उभे कस्य स्यातां न कस्यापि परस्परविरोधेनोभयोरपि प्रतिबंधात् । ऐकमत्ये तु कस्य वा न स्याताम् । एकः सुखं कर्तुमिच्छति दुःखं चान्यः । ऐकमत्ये च तयोः परस्परकार्यानुमोदनेनोभयोरपि प्राप्ते कस्य वा ते उभे अपि न स्यातामित्यर्थः ॥ ५ ॥ ननु बहूनां कर्मिणां व्यवस्थया बहवः शास्तारो भवंतु तथा सति नायं दोषः स्यात्तत्राहुः । बहूनां कर्मिणां व्यवस्थया शास्तृबहुत्वे शास्तृत्वं स्यात् घटेत । किं तु तदा यत्सर्वशास्तारि मुख्यं शास्तृत्वं तदेकदेश उपचारमात्रमेव स्यात् यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं मंडलवर्तिनामुपचारमात्रं निरंकुशत्वाभावात् ॥ ६ ॥ यस्मादेवं शास्तृबहुत्वं न घटतेऽत स्त्वमेक एव शास्ता । शुभाशुभे विविनक्तीति तथा ॥ ७ ॥ विप्रलंभिता वंचिता लंघितेत्यर्थः ॥ ८ ॥ तदेवाहुः । नीयमानामिति ॥ ९ ॥ ते त्वत्तः यदि नोऽस्माकं क्षमं हितं म न्यसे । अन्यथाऽज्ञानतस्तदवज्ञाने तवाप्यनर्थः स्यात् । अतर्क्यो हि तेषां प्रभावो यतो नारायणेति केवलमभिहिते मा भयं कुर्विति वदंतः शीघ्रमागताः ॥ १० ॥ प्रजाः संयमयतीति तथा ॥ ११ ॥ मत्तोऽन्यो जगतस्तस्थुषश्च परोऽधीश्वरोऽस्ति । अहं तु जंगमानामेव तत्रापि नृणामेव तत्रापि पापिनामेव तत्किंकरः सन्नीश्वरः स तु सर्वेश्वरः कोऽसौ । यत्र यस्मिन्विश्वमोतं प्रोतं चोर्ध्वतिर्यक्तंतुषु पटवत् । यस्य त्वंशेभ्यो विष्णुब्रह्मरुद्रेभ्योऽस्य स्थित्यादयो भवंति यस्य च वशे लोको वर्तते नसि नासिकायाम् ॥ १२ ॥

संबुद्धिः । त्रैविध्यमित्युक्ते न केवलं स्वार्थप्रतीतिरर्थांतरस्यापि प्रतीतेरित्यत आह—यद्वेति । सात्त्विककर्मकर्तॄणां फलदाता भिन्नो राजसादीनां च भिन्न इत्यर्थः ॥ ४ ॥ विप्रतिपत्ती विवादे एकेनोक्तमहमस्मै सुखं दास्यामि परेणोक्तं दुःखं दास्यामीत्येवंरूपे सति उभे सुखदुःखे विप्रतिपत्त्यैकमत्ये विवृणोति—एक इत्यादिना । इत्यर्थ इति । शास्तृबहुत्वे सर्वलोकविप्लवः स्यादिति भावः ॥ ५ ॥ पुनराक्षिपंति—नन्विति । स्पष्टमग्रे । मंडल वर्तिनां सामंतानाम् ॥ ६ ॥ सेश्वराणामिंद्रादिसहितानाम् । भूतानां चराचराणां जीवानाम् ॥ ७ ॥ यः सर्वभूतानामीश्वरस्तस्येत्यर्थः । इत्यर्थ इति यावत् ॥ ८ ॥ तदेव आज्ञोल्लंघनमेव ॥ ९ ॥ अथ तेषां ज्ञानाय किंचिच्चेष्टादिकमुच्यतां तत्राहुः—अतर्क्यो हीति ॥ १० ॥ प्रीतः श्रीनारायणपुरुषत्वनिर्णयात् पूर्वं त्वन्यदीयज्ञानाद्दुःखमासीदिति भावः ॥ ११ ॥ अयमर्थः—पटवत् यथा कंथापटः सूत्रे तंतौ दीर्घतया ओतस्तिर श्चीनतया प्रोतस्तंत्वाधारत्वेन स्थितः तथेदं विश्वं यत्र परमात्मनि ओतप्रोतधर्मेण तदाधारत्वेन स्थितं यस्मिन्निदं सर्वं "परमे व्योमन्सर्वाभूतानि" इति श्रुतेरेतल्लक्षणमव्याप्त्यतिव्याप्त्यादिदोषरहितं यद्यस्य धारको न स्यात्तर्हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो नामभिर्वाचि जनान्निजायां बध्नाति तंत्यामिव दामभिर्गाः ॥ यस्मै बलिं त इमे नामकर्मनिबंधबद्धाश्चकिता वहंति ॥ १३ ॥ अहं महेंद्रो निर्ऋतिः प्रचेताः सोमोऽग्निरीशः पवनोऽर्को विरिंचः ॥ आदित्यविश्वे वसवोऽथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः ॥ १४ ॥ अन्ये च ये विश्वसृजोऽमरेशा भृग्वादयोऽस्पृष्टरजस्तमस्काः ॥ यस्येहितं न विदुः स्पृष्टमायाः सत्त्वप्रधाना अपि किं ततोऽन्ये ॥ १५ ॥ यं वै न गोभिर्मनसाऽसुभिर्वा हृदा गिरा वाऽसुभृतो विचक्षते ॥ आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्ततः परम् ॥ १६ ॥ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः ॥ प्रायेण दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः ॥ १७ ॥

प्रोतबलीवर्दवत् ॥ १२ ॥ एतत्प्रपंचयति । ब्राह्मणादिनामभिर्वाचि निजायां तंत्यां दामन्यां जनान्यो बध्नाति दामभिर्गा बलीवर्दानिव त इमे जीवा नामकर्मभिर्निबंधैर्दृढबंधसाधनैर्बद्धा यस्मै बलिं वहंति यदधीना कर्म कुर्वंतीत्यर्थः ॥ १३ ॥ यस्य च लीला दुर्विभाव्येत्याह अहमिति द्वाभ्याम् ॥ १४ ॥ न स्पृष्टं रजस्तमश्च यैस्ते । ईहितमभिप्रेतं चेष्टितं वा न विदुः । तत्र हेतुः । स्पृष्टमाया मायया स्पृष्टाः । ततस्तेभ्योऽन्ये न विदुरिति किं पुनर्वक्तव्यम् ॥ १५ ॥ तन्मायया विमोहितत्वान्न जानंतीत्युक्तमविषयत्वाच्च तस्येत्याह । यमिति । गोभिरिंद्रियैर्हृदा चित्तेन न विचक्षते न पश्यंति । "यद्वाचानभ्युदितम् । यन्मनो न मनुते " इत्यादिश्रुतेः । आत्मनां जीवानामात्मानं द्रष्टारम् आकृतयो रूपाणि चक्षुर्यथा कर्मभूतं न जानंति ततः परमाकृतीनां प्रकाशकम् । न हि प्रमाता प्रमाणस्य विषय इति भावः । एवंभूतः परमेश्वरो मदन्योऽस्तीति पूर्वेणैव संबंधः ॥ १६ ॥ भवत्वेवंभूतोऽन्यः परमेश्वरो ये पुनरस्मान्निर्भर्त्स्य पापिनं रक्षितवंतस्ते के तानाह द्वाभ्याम् । तस्येति । तस्यैव रूपं गुणाः प्रभावादयः स्वभावो भक्तवा

पतिष्यति वेगाख्यसंस्काररहितशरवदित्यादितर्काच्च लक्षणांतरमाह—यदंशत इति । " यतो वा इमानि " इति श्रुतेः । 'यदायदा हि धर्मस्य ' इति स्मृतेर्व्याप्तरूपमंतरेण रूपांतरेणापि धारकत्वमस्यैवेति निश्चयाय वशशब्देन पुनर्ग्रहणम् । एवमपि जातपक्षपक्षिवत्पुनरस्याधीनं न स्यादिति चेत्तत्राह—नसीति ॥ १२ ॥ एतत् तद्वशवर्त्तित्वम् निजायां स्वस्मादभिव्यक्तायां नित्यायां वा 'निजमात्मीयनित्ययोः ' इत्यभिधानात् । चकिता भीताः । इत्यर्थ इति । स एव सर्वेश्वर इति भावः ॥ १३ ॥ अहं यमराजः ॥ १४ ॥ तेभ्यः पूर्वोक्तेभ्योऽन्ये मनुष्यादयः ॥ १५ ॥ तत्प्रसादमंतरेणादृष्टलक्ष्यवेधवच्चक्षुरादींद्रियाविषयत्वेन तद्विषयं ज्ञानं दुर्लभमित्याह—यमिति । इंद्रियाविषयत्वे प्रमाणमाह—यद्वाचेति । अनभ्युदितमुच्चारितं न भवति । मनुते विषयी करोति । अविषयत्वात् " यतो वाचो निवर्त्तंते " इत्यादिश्रुतेः । इति भाव इति । प्रमाता अन्तःकरणावच्छिन्नं चैतन्यं प्रमाणमंतःकरणवृत्त्यवच्छिन्नं चैतन्यम् । अत्र न हि प्रमाणं प्रमेयस्य विषय इति पाठः सम्यक्प्रतिभाति प्रमेयं विषयावच्छिन्नं चैतन्यमिति ॥ १६ ॥ माया लक्ष्म्या वाऽधिपतेः संधिस्त्वार्षः 'इंदिरा लोकमाता मा ' इत्यमरः । अधीशितुः सर्वेश्वरस्य । मायाधिपत्वादिसत्त्वेपि परस्य तदासक्तिशून्यस्य तत्र हेतुरात्मतंत्रस्यानन्याधीनस्य तत्रापि हेतुर्महात्मनो भूम्न इत्यर्थः । रूपं श्यामचतुर्भुजत्वादि । गुणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि ॥ रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च ॥१८॥ धर्मं तु साक्षाद्भगवत्प्रणी
तं न वै विदुर्ऋषयो नापि देवाः ॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः ॥ १९ ॥ स्वयंभूर्नारदः शंभुः कुमारः कपि
लो मनुः ॥ प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयम् ॥ २० ॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः ॥ गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वाऽमृतम
श्नुते ॥२१ ॥ एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः ॥ भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥ २२ ॥ नामोच्चारणमाहात्म्यं हरेः पश्य
त पुत्रकाः ॥ अजामिलोपि येनैव मृत्युपाशादमुच्यत ॥ २३ ॥ एतावताऽलमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नाम् ॥ विक्रुश्य
पुत्रमघवान्यदजामिलोपि नारायणेति म्रियमाण इयाय मुक्तिम् ॥ २४ ॥

त्सल्यादिर्येषां ते ॥ १७ ॥ विष्णोर्भूतानि भृत्याः । दुर्दर्शानि द्रष्टुमप्यशक्यानि लिंगानि रूपाणि येषां तानि । तद्भक्तिमतो विष्णुभक्तान् । परेभ्यः शत्रुभ्यो मत्तो म
त्सकाशात् सर्वतोऽग्न्यादिभ्यश्च रक्षंति ॥ १८ ॥ ननु विष्णुभक्ताश्चेत्कथमधर्मपक्षपातं कृतवंतस्तत्राह । धर्ममिति । ऋषयो भृग्वादयः ॥ १९ ॥ ननु केऽपि चेन्न जानंति
तस्य सत्त्वे किं प्रमाणं तत्राह । स्वयंभूरिति । कुमारः सनत्कुमारः । वयमित्यात्मानमेव भागवतत्वलाभात् बहु मन्यमानो निर्दिशति ॥ २० ॥ हे भटाः ॥ २१ ॥
तमेव धर्ममाह । एतावानिति ॥ २२ ॥ न चात्र प्रमाणं वक्तव्यं दृष्टत्वादित्याह । नामोच्चारणेति । येनैव केवलेन सकृदुच्चारितेन ॥ २३ ॥ ननु नामाभासेन कथं
सर्वपापक्षयः स्यात् । श्रद्धाभक्त्यावृत्त्यादेरपि विधानात् । तथाहि । " सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद्विमुच्यते । " इति ॥ " अनुदिनमिदमादरेण शृण्वन् " इति

आदिना ब्रह्मण्यत्वादयो ग्राह्याः । पुनरादिना नित्यनिर्दोषत्वादिग्रहः । प्रायेणेत्युक्तेः कचित्तद्रूपगुणादिकं विनापि चरंति यथा हनुमदादयः ॥ १७ ॥ 'भूतं भृत्यकुमारयोः' इत्यभिधानचिन्तामणिः । मत्तः मम सका
शादपि मदीयेभ्यो युष्मत्तोपत्यिर्थः ॥ १८ ॥ अत्राशंकते । तुशब्देन युष्माकं सूक्ष्मज्ञानं नास्तीति सूचितम् । साक्षाद्भगवत्प्रणीतं भागवतमित्यर्थः ॥ १९ ॥ पुनराक्षिपति—नन्विति । तस्य धर्मस्य ॥ २० ॥
विजानीम एव न तु निजस्मृत्यादौ स्पष्टं कथयाम इति भावः । गुह्यं लोकमर्यादारक्षणाय गोप्यम् । किञ्च—साधारणजनदुर्बोधं च तत्र हेतुः—विशुद्धं न ह्यशुद्धाः शुद्धं ज्ञातुमर्हंति गुह्यत्वे हेतुविशेषोऽयमिति।हेभटा इति।यूयं
तु सुतरां न जानीथ भटानां भृत्यानां स्वामिकार्यव्यग्रत्वेन तत्प्राप्त्यसंभवादिति भावः ॥ २१ ॥ तमेव भागवतमेव । तस्य हरेर्नामग्रहणादिभिर्भगवति यो भक्तियोग एतावानेव परो धर्मः स्मृतः " एष मे सर्वधर्माणां
धर्मोऽधिकतमो मतः । यद्भक्त्या पुंडरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ " इति स्मृतेः । आदिनाऽर्चनादिग्रहः । एवकारोऽत्र दृढीकरणार्थः ॥ २२ ॥ अत्र भागवतधर्मस्य परत्वे । हे पुत्रका इति । यूयं मे पुत्रतुल्या
अतो युष्मभ्यं मयैतदुक्तमिति भावः ॥ २३ ॥ पुनराक्षिपति—नन्विति । आवृत्त्यादेरिहादिना चिंतनादिग्रहः । नाम्नो गुणानां चासकृदुच्चारणमावृत्तिः । तत्र तत्र प्रस्तावे । तं भगवंतम् । अत्रैवाजामिलोपाख्यान
एव अत्राक्षिपति—किं चेति । तथा सति नामसंकीर्त्तनस्यैव सर्वपापनाशकत्वे सति द्वादशाब्दादीनीति । ब्रह्महत्याकर्त्ता द्वादशाब्दव्रतं कुर्यात्क्षत्रियहंता ततो न्यूनमित्यादि । कुता हेतोः । स्मरेयुः कथय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययाऽलम् ॥
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥

"श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥" इत्याद्यस्मिन्नेव पुराणे तत्रतत्र पठ्यते । पुराणांतरे च । "पापक्षयश्च भवति स्मरतां तमहर्निशम् ॥ " इति ॥ अत्रैव च । "तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसाम् ॥ महतामपि कौरव्य विद्ध्येकांतिकनिष्कृतम् ॥ " इत्यादिना सम्यक्कीर्तनादेव मुच्यते । किं च तथा सति किमिति मन्वादयो द्वादशाब्दादीनि स्मरेयुः तस्मादिदमनुपपन्नमिव तत्राह । एतावतेति । भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यदेतावता पुंसामघनिर्हरणाय पापक्षयमात्रायालमुपयोगो नास्ति । अलंशब्दोऽत्र वारणे । यथाहामरसिंहः । " अलं भूषणपर्याप्तिशक्तिवारणवाचकम् । " इति ॥ उपयोगाभावमेवाह । अजामिलो महापातक्यपि नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा तच्च पुत्रं विमृश्य न तु हरिम् । अघवानशुचिरपि म्रियमाणोऽस्वस्थचित्तोऽपि मुक्तिमवाप न त्वघनिर्हरणमात्रमतो नामाभासेनापि सर्वपापक्षय इत्येव तत्त्वम् । आवृत्तिश्रद्धादिविधयस्तु पापवासनाक्षयार्था इत्युक्तमेव 'हरेर्गुणानुवादः खलु सत्त्वभावनः' इत्यत्र ॥ २४ ॥ यत्तूक्तं व्यर्थं तर्हि द्वादशाब्दादिस्मरणमिति तत्राह । प्रायेणेति । महाजनो मन्वादिः । अयं भावः । यथा मृतसंजीवनौषधिमजानंतो वैद्या रोगनिर्हरणाय त्रिकटुकनिंबादीनि स्मरंति तथा स्वयंभूशंभुप्रमुखद्वादशव्यतिरेकेणायं महाजनोऽतिगुह्यमिदमज्ञात्वा द्वादशाब्दादिकं स्मरतीति । किं च मायया देव्या अलं विमोहितमतिरयं जनो मधु मधुरं यथा भवत्येवं पुष्पितायां पुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृताऽभिनिविष्टा मतिर्यस्य अतो महत्येव कर्मणि श्रद्धया युज्यमानो नाल्पे प्रवर्तते । दृश्यते हि । प्राकृतस्य लोकस्य महति मंत्रादौ श्रद्धाल्पे चाश्रद्धा तस्मादस्य ग्राहको नास्तीति तैर्नोक्तम् । यद्वा स्वाधीनः सिंहोऽस्त्येता

मासुः । तस्मान्मन्वादिस्मृतिविरुद्धत्वादिदं नामसंकीर्तनमेव सर्वपापहरमिति कथनमनुपपन्नमिवायुक्तवत्प्रतिभातीति । गुणानां भक्तवात्सल्यादीनां कर्मणां गोवर्द्धनोद्धरणादीनाम् नाम्नां हरिविष्ण्वित्यादीनाम् । यद्वा–गुणनाम्नां कृपासिंध्वित्यादीनां कर्मनाम्नां मधुसूदनेत्यादीनां सम्यक् कीर्त्तनं पापमात्रनाशायालं नात्र साधनांतरापेक्षेत्याह तीर्थः । सम्यक् कीर्त्तनेनैव पापक्षय इत्युपयोगो नास्ति किन्तु यथाकथंचिन्नाम्न उच्चारणमात्रादेवेति भावः । अतोऽजामिलोद्धारदर्शनाद्धेतोः । पापवासनाक्षयार्था इति । महदपराधाद्यालंबनेन या तिष्ठति पापवासना तस्याः क्षयार्था इत्थमेव द्वितीये ' एतावान्सांख्ययोगाभ्याम् ' इत्यत्र व्याख्यातम् । अंते तु परमो लाभ इति तदुक्तम् " कृष्णःकृष्णःकृष्ण इत्यंतकाले जल्पञ्जन्तुर्जीवितं यो जहाति । आद्यः शब्दः कल्पते तस्य मुक्त्यै व्रीडानम्रौ तिष्ठतोऽन्यावृणस्थौ " इति नाममाहात्म्ये ॥ २४ ॥ द्वादशोत्तरो मन्वादिः । अत्राशयमाह–अयं भाव इति । इदं भगवन्नामस्मरणम् । ननु सर्वज्ञास्ते कथं न जानंतीति चेत्तत्राह–किञ्चेति । देव्या बहुविधनाशोपेतया । अतो मायामोहितबुद्धित्वात् ननु तदुक्तौ स्वल्पसाधनायामपि लोकः कथं न प्रवर्त्तेतान्यथातिप्रसंगात्तत्राह–यद्वेति । हरिनामापेक्षया पापस्यातितुच्छत्वं दावाग्नेरग्रे तृणवदिति । ननु पापस्य तुच्छत्वेऽपि पापवासनामुक्त्यर्थं तु तेषां तत्सामर्थ्यमेवेति चेदत्राह–यद्वेति । सर्वमुक्तौ हि श्रीहरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगम् ॥ ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥२६॥
ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाऽभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे ॥ २७ ॥
तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रम् ॥ निष्किंचनैः परमहंसकुलै रसज्ञैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान् ॥२८॥ जिह्वा
न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदम् ॥ कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान् ॥ २९ ॥
तत्क्षम्यतां स भगवान्पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः ॥ स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने॥३०॥

वता श्वसृगालादिनिवारणाय तं यथा न प्रयुंजते तथाऽतितुच्छत्वात्पापस्य न तन्निरसनाय परममंगलं हरेर्नाम स्मरंति । यद्वा नाममाहात्म्यज्ञाने सर्वमुक्तिप्रसंगादित्येषा दिक् ग्रंथविस्तरभयात्तु नातिप्रपंच्यते ॥ २५ ॥ भावयोगं भक्तियोगम् । अमीषां पातकं न स्यादेव । यदि स्यात् । उरुगायस्य भगवतो वादः कीर्तनम् ॥ २६ ॥ तदेवं धर्मतत्त्वं निर्णीय भृत्याननुशास्ति । त इति । ये भगवंतं प्रपन्नास्ते देवैः सिद्धैश्च परिगीतपवित्रगाथा वर्णितपवित्रकथा अतस्तान्नोपसीदत तत्समीपमपि न गच्छत । वयः कालोऽपि न प्रभवति ॥ २७ ॥ के तर्हि दंडार्थमानेया इत्यत्राह तानिति द्वाभ्याम् । असतो दुष्टान् । तानेवाह । मुकुंदपादारविंदयोर्यो मकरंदरूपो रसस्तस्माद्विमुखान् । कथंभूतात् । निष्किंचनै रसज्ञैरजस्रं जुष्टात् । तेषां ज्ञापकमाह । निरयवर्त्मनि स्वधर्मशून्ये गृहे बद्धा तृष्णा यैस्तान् ॥ २८ ॥ किं च जिह्वेत्यादि । यद्येषां जिह्वेत्याद्यन्वयः । न कृतं विष्णुकृत्यं भगवद्व्रतं यैः ॥ २९ ॥ भगवंतं क्षमापयति तदिति । अयं भाव । नः स्वपुरुषैरस्मदीयत्वेन स्थितैः स्वी

लीलासाधनसृष्ट्यभावः स्यात्तच्चानुचितमेवेति भावः । “ लीलार्थं कुरुते सृष्टिं ब्रह्मद्वारा जनार्दनः ” इति पुराणांतरोक्तेः । प्रपंच्यते विस्तार्य्यते ॥ २९ ॥ एवं पूर्वोक्तभगवद्भक्तिमहिमप्रकारं विमृश्य विचार्य सर्वात्मना नित्यनैमित्तिकापेक्षया ॥ २६ ॥ अतो वर्णितपवित्रकथत्वात् । तान्नोपसीदत तन्निकटे पातक्यपि चेद्भवेत्तदापीति भावः ॥ २७ ॥ स्वधर्मशून्ये इत्युक्ते स्वधर्ममाश्रित्य ये गृहे तिष्ठंति ते नानेया मोक्षाधिकारित्वा तेषाम् “ स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ” इति श्रीमुखोक्तेः । निष्किञ्चनैः अपरिग्रहैः । परमहंसकुलैः ज्ञानिसमूहैः रसज्ञैः सारासारविवेकनिपुणैः ॥ २८ ॥ अन्यदाह–किञ्चेति । यस्य जिह्वा श्रीशस्य गुणं नामधेयं चैकदा जन्ममध्येऽपि न वदति चेतश्च तच्चरणारविंदं न स्मरति शिरश्च कृष्णाय कृष्णं लक्षीकृत्य नो नमति तानानयध्वं तदुक्तम् “शाठ्येनापि नमस्कारं कुर्वतः शार्ङ्गधन्वने। शतजन्मार्जितं पापं तत्क्षणादेव नश्यति॥” स्कांदे तु “ स कर्त्ता सर्वधर्माणां भक्तो यस्तव केशव । स कर्त्ता सर्वपापानां यो न भक्तस्तवाच्युत ॥ पापं भवति धर्मोऽपि तवाभक्तैः कृतो हरे । निःशेषधर्मकर्त्ता वाप्यभक्तो नरके हरे ॥ सदा तिष्ठति भक्तस्ते ब्रह्महापि विमुच्यते॥” नृसिंहपुराणे यमवाक्यम् “अहममरगणार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः । हरिगुरुविमुखान्प्रशास्मि मर्त्यान्हरिचरणप्रणतान्नमस्करोमि॥” इति । भक्तिरसामृतसिंधुबिंदावप्युक्तम् “यदि मधुमथन त्वदंघ्रिसेवां हृदि विदधाति जहाति वा विवेकी । तदखिलमपि दुष्कृतं त्रिलोके कृतमकृतं न कृतं कृतं च सर्वम्॥ ” इति ॥ २९ ॥ अत्राभिप्रायमाह–अयं भाव इति । एतदीया अपि वस्तुतो मदीया एवेति ध्यात्वा क्षम्य तामिति भ्वादिकस्य दैवादिकस्य वा रूपमाद्ये विकरणव्यत्यय आर्षः । द्वितीये त्वात्मनेपदं दीर्घाभावश्चार्षः । स्वीयानां भक्तानां नो अस्माकम् । इत्यर्थ । इति । “अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः” इत्युक्तन्यायेनेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसाम् ॥ महतामपि कौरव्य विद्ध्येकांतिकनिष्कृतिम् ॥ ३१ ॥ शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः ॥ यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः ॥ ३२ ॥ कृष्णांघ्रिपद्ममधुलिड् न पुनर्विसृष्टमायागुणेषु रमते वृंजिनावहेषु ॥ अन्यस्तु कामहत आत्मरजः प्रमार्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ॥ ३३ ॥ इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते ॥ नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततःप्रभृति स्म राजन् ॥ ३४ ॥ इतिहासमिमं गुह्यं भगवान्कुंभसंभवः ॥ कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥ इति श्रीभा०म० षष्ठस्कन्धे अजामिलोपाख्यानसमाप्तिवर्णनपूर्वकं यमेन स्वभटान्प्रति भगवद्भक्तिनाममाहात्म्यवर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥

यैरेवपुरुषैर्यस्मादसदन्याय्यं कृतं तत्तस्मात्स्वयमेव क्षम्यतां सहताम् । स्वानां स्वीयानां भक्तानां नोऽस्माकं न विदुषामज्ञानाम् । अहो गरीयसि तस्मिन्क्षांतिर्युक्तैव । मह इति पाठे स्वीयानां माहात्म्यमविदुषां नः क्षमां करोत्वित्यर्थः ॥ ३० ॥ तस्मादित्यादिः शुकोक्तिः । जगतोऽपि मंगलरूपम् ॥ ३१॥ एकांतिकत्वमेवाह । शृण्वतामिति । व्रतादिभिस्तथा न शुद्ध्येत् ॥ ३२ ॥ एतदुपपादयति । कृष्णांघ्रिपद्मयोर्मधु लेढि आस्वादयतीति तथा । मधु लिहताऽतितुच्छत्वेन विसृष्टा ये मायागुणा विषयास्तेषु पुनर्न रमते । अन्यस्तु तन्मध्वास्वादरहितोऽत एव कामाभिभूतः सन्नात्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत यतः कर्मणः पुनरपि रजः पापं स्यादेव कुंजरशौचवत सत्त्वशोधकत्वाभावात् ॥ ३३ ॥ नैव विस्मितधियो बभूवुः । किं तु सत्यमुक्तमित्येव मेनिरे । ततःप्रभृति प्रतिशंकमाना अस्मानेवैष हन्यादिति शंकां वहंतस्तं द्रष्टुमपि बिभ्यति स्म । पाठांतरे तु विस्मितधियो जाताः । ते च ततःप्रभृति बिभ्यति स्मेत्यर्थः ॥ ३४ ॥ कुंभसंभवोऽगस्त्यो मलये पर्वत आसीनोऽव्यग्रो हरिमर्चयन् । पुनःपुनर्विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थः ॥ ३५ ॥ इति श्रीमद्भागवते म०षष्ठस्कंधे टीकायां तृतीयोऽध्यायः ॥ ३ ॥ छ ॥ चतुर्थादित्रिभिर्विश्वरूपजन्मविवक्षया ॥ प्रचेतःसुतदक्षस्य वंशस्तावत्प्रतन्यते ॥ १ ॥ चतुर्थे तु प्रजासृष्ट्यै दक्षेणाराधनं हरेः ॥ तपसा हंसगुह्याख्यस्तोत्रेण च निरूप्यते ॥ २ ॥ प्रसक्तानुप्रसक्तेन स्वायंभुवसुतान्वये ॥

भावः ॥ ३० ॥ यतो विष्णुर्महांस्तस्माद्धेतोः । कौरव्येति । शुद्धकुलोद्भूतत्वात्तुभ्यं मयैतद्गुह्यमप्युपदिष्टमिति भावः ॥ ३१ ॥ उद्दामान्युत्कटानि गोवर्द्धनोद्धरणादीनि । आदिना तीर्थयात्रादिग्रहः सुष्ठु जातया भक्त्या रतिरूपया तु मुक्तिपर्यंतस्य यथा किमुत पापमात्रस्य वासनाक्षयप्रकारेणात्मा मनः शुद्ध्येत्तथा व्रतादिभिर्नेत्यर्थः ॥ ३२ ॥ एतद्भक्तिमाहात्म्यम् । तन्मध्वास्वादरहितो भगवच्चरणारविंदरसास्वादविधुरो भक्तिमात्रहीनः । अत एव तदंघ्रिपंकजमकरंदास्वादहीनत्वादेव ॥ ३३ ॥ पाठांतरे 'ते चाच्युताश्रयजनम्' इति पाठे । इत्यर्थ इति । अहो अस्माकं स्वाम्यप्येभ्यो विष्णुभक्तेभ्यो बिभेति ततोऽस्माभिः सुतरां भेतव्यमिति विचार्य सभयाः संतीति भावः ॥ ३४ ॥ कुंभसंभव इति । संहिताध्ययने द्वैपायनादश्रुतत्वादिति भगवानतीव समर्थः । 'अगस्त्यः कुंभसंभवः' इत्यमरः । एतेनायोनिजत्वमलयागासीनत्वहर्यर्चनत्वकथनेन सर्वथा सत्यता द्योत्यतेऽस्योपाख्यानस्येति ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ चतुर्थादित्रिभिः चतुर्थपञ्चमषष्ठैः (१) (२) स्वायंभुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ देवासुरनृणां सर्गो नागानां मृगपक्षिणाम् ॥ सामासिकस्त्वया प्रोक्तो यस्तु स्वायंभुवेंतरे ॥ १ ॥ तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यथा शक्त्या ससर्ज भगवान्परः ॥ २ ॥ सूत उवाच ॥ इति संप्रश्नमाकर्ण्य राजर्षेर्बादरायणिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तमः ॥ ३ ॥ श्रीशुक उवाच ॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ॥ अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृताम् ॥ ४ ॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ५ ॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ॥ राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥ ६ ॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ ॥ विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ ७ ॥

नामप्रभावमाकर्ण्य वंशव्यासं बुभुत्सते ॥ ३ ॥ देवासुरेति द्वाभ्याम् । सामासिकः संक्षिप्तो यः प्रोक्तस्तृतीयस्कंधे ॥ १ ॥ व्यासं विस्तारं ते त्वत्तो यया शक्त्या यथा ससर्ज तां शक्तिं तत्प्रकारं च ज्ञातुमिच्छामि । अनुसर्गमनुवृत्तं सर्गम् ॥ २ ॥ ३ ॥ दक्षादिरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह । यदेति । प्राचीनबर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गतास्तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः । नारदोपदेशतः प्राचीनबर्हिषो निवृत्त्याऽराजके सति कृष्याद्यभावात् ॥ ४ ॥ तपसा दीपितो मन्युर्येषां ते । तेषां द्रुमाणां दग्धुमिच्छया ॥ ५ ॥ ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान्द्रुमान् । वनस्पतीनां राजा सोम उवाच मा द्रुमेभ्य इति नवभिः ॥ ६ ॥ हे महाभागाः । विवर्धयिषवो विशेषेण

सुतः प्रियव्रतस्तस्यान्वये कथ्यमाने प्रसंगसंगत्या प्रसक्तं भूगोलखगोलनरकादिवर्णनं तत्रानुप्रसक्तं तन्निवृत्त्युपायत्वेन नाममाहात्म्यवर्णनं तेन हेतुना नामप्रभावं श्रुत्वा (३) ‘ मुह्यंति यत्सूरयः ’ इत्यत्र यदुक्तं ब्रह्माद्यज्ञेयं माहात्म्यं हरेस्तत् ‘ जन्माद्यस्य यतः ’ इत्यत्र च यः सर्गविशेषः प्रतिज्ञातः सोऽपि भगवदेकनिष्ठ इति प्रतिपाद्यतेऽस्मिन्नध्याये तत्र तृतीयादौ कथितः सर्गो भागवदेकनिष्ठ उतान्यनिष्ठ आहोस्विदन्यनिष्ठोऽपि भगवत्प्रसादायत्त इत्याभिप्रेत्य राजोक्तार्थमनूद्य तद्विस्तरं ब्रूहीत्याह—देवेति ॥ १ ॥ व्यासं तन्मन्वंतरजातदक्षानंतरशाखोपशाखारूपम् । अनुवृत्तं सर्गं पूर्वसर्गस्य केनचिद्धेतुना नष्टत्वात्पुनर्जातं सर्गम् ॥ २ ॥ शुकेन राजप्रश्नमादृत्य परिहार उक्त उतानादृत्यार्थांतरमवादीति श्रुत्वा स्मित्वा तूष्णीं स्थितं किमिति शौनकादीनां हार्दं प्रश्नं परिहरति सूत इत्याह—सूत इति । अनेन सूतशौनकादिसंवादो न समाप्तः किन्तु शौनकादिप्रश्नोप्ययमेव परिहारोप्ययमेवेति ध्वनितम् । मुनिसत्तमा इति । मननशीलश्रेष्ठा यूयमिति मयाप्यज्ञायीति भावः ॥ ३ ॥ भगवत्प्रसादायत्तत्वान्मंददृष्ट्यान्यनिष्ठवत्प्रतीयमानोऽपि तदेकनिष्ठ इति लक्षणस्य नातिव्याप्तिरिति दर्शयितुं प्रकृतार्थानुवादपूर्वकमुपक्रमते इत्याह—दक्षादीत्यादि ॥ ४ ॥ ५ ॥ चंद्रेण तत्कोपशांतिप्रकारमाह—ताभ्यामिति ॥ ६ ॥ द्रुमेभ्य इति । “ कुरूद्वह— ” इत्यादिना चतुर्थी । तत्र हेतुः । विवर्द्धयिषव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो प्रजापतिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ ८ ॥ अन्नं चराणामचरा ह्यपदः पादचारिणाम् ॥
अहस्ता हस्तयुक्तानां द्विपदां च चतुष्पदः ॥ ९ ॥ यूयं च पित्राऽन्वादिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ १० ॥
आतिष्ठत सतां मार्गं कोपं यच्छत दीपितम् ॥ पित्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ११ ॥ तोकानां पितरौ बंधुर्दृशः पक्ष्म स्त्रियाः पतिः ॥
पतिः प्रजानां भिक्षूणां गृह्यऽज्ञानां बुधः सुहृत् ॥१२॥ अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्षध्वमेवं वस्तोषितो ह्यसौ ॥१३॥
यः समुत्पतितं देह आकाशान्मन्युमुल्बणम् ॥ आत्मजिज्ञासया यच्छेत्स गुणानतिवर्तते ॥१४॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवमस्तु वः ॥
वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यताम् ॥१५॥ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप ॥ सोमो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे ॥१६॥

वर्धयितुमिच्छवः ॥ ७ ॥ प्रजापतीनां तद्भक्ष्यभोज्यदाहोऽनुचित इत्याह अहो इति त्रिभिः । ऊर्जं भक्ष्यम् । इषमन्नम् ॥ ८ ॥ ९ ॥ १० ॥ अत आतिष्ठताश्रयत सतां मार्गमुपशमं पित्रादिभिर्जुष्टम् ॥ ११ ॥ प्रजानां प्रजापतिरेव बंधुरतस्तज्जीविकानाशो न कर्तव्य इति दृष्टांतपंचकेनाह । तोकानां बालानां मातापितरौ । अज्ञानां ज्ञानदो बुध एव सुहृत् ॥ १२ ॥ ईश्वराधिष्ठानत्वाच्च भूतद्रोहो न युक्त इत्याह । अंतर्देहेष्विति । वो युष्माभिः ॥ १३ ॥ आकाशाद्देहे समुत्पतितमाकस्मिकमित्यर्थः । आत्मविचारेण यो नियच्छेत् ॥ १४ ॥ खिलानां शेषाणां वो युष्माकं च शिवमस्तु । वृक्षरक्षणार्थं तदीयां कन्यां ददाति । वार्क्षी वृक्षैः पालिता ॥ १५ ॥ आमंत्र्य सांत्वयि

इति । पतयः पातारः स्मृता यतोऽतो द्रोग्धुं मार्हथेत्यन्वयः । हे महाभागा इति । न ह्येतन्महाभागलक्षणं यन्निरपराधद्रुमदहनमिति भावः ॥ ७ ॥ ऊर्जति बली भवति चेष्टते वाऽनेनेत्यूर्जम् । अन्नातिरिक्तं फलादि भक्ष्यं वनस्पतिहेतुकम् 'ऊर्ज्—बलप्राणनयोः' अतः " अकर्तरि च कारके संज्ञायाम् " इति घञ् । इष्यते क्षुन्निवृत्तये इतीषमन्नं गोधूमाद्यौषधिहेतुकम् । 'इषु—इच्छायाम्' अतः 'घञर्थे कविधानम्' इति कः ॥ ८ ॥ चराणां पक्षाभ्यां चरतां भ्रमरादीनाम् । अचराः पुष्पाद्याः । पादचारिणां पद्भिश्चरतां गवादीनामपदस्तृणाद्याः । तेष्वेव हस्तयुक्तानां सिंहादीनामहस्ता गवाद्याः । द्विपदां पद्भ्यां चरतां मनुष्याणां चतुष्पदो मेषाद्याः ॥९॥ पित्रा प्राचीनबर्हिषा । " पित्रादिष्टाः प्रजासर्गे तेपुस्ते परमं तपः " इति चतुर्थस्कंधोक्तेः । देवदेवेन महादेवेन । तदर्थमेव योगादेशाख्यस्तोत्रोपदेशादित्यपि तत्रैवोक्तम् । अनघा इति । तपसा गतपापा भूत्वां कथमेतादृशकर्मणि प्रवृत्ता इति भावः । एतद्भवद्भिर्न कर्त्तव्यम् ' वृद्धिमिच्छतो मूलमपि नष्टम् ' इति न्यायापातप्रसंगात् ॥१०॥ सतां मार्गम् उपशमम् ॥११॥ यूयं हि प्रजापालका द्रुमादयश्च प्रजाः प्रजोपजीव्याश्चात एतान्पालयत न हि पालकानां नाशकत्वं दृष्टमित्यत्र दृष्टांतपञ्चकमाह । किञ्चानन्यशरणानां वृक्षाणां दाहे शरणागतवधदोषोऽपि युष्माकं स्यादित्याह—तोकानामिति । तोकानां बालानां बंधू रक्षकः । बुधो ज्ञानी संसाराद्रक्षकत्वाद्बंधुः । दृश इति सामान्याभिप्रायमेकत्वम् । पक्ष्म नेत्राच्छादकरोमपंक्तिः । पतिर्भर्त्ता । प्रजानां लोकानां पतिर्नृपः । अतः प्रजारक्षकत्वहेतोः । "पतिर्धवे ना त्रिष्वीशे पालके पतिते नृपे" इति कोशात् । भिक्षूणां ब्रह्मचार्यादीनाम् । गृही गृहस्थः ॥ १२ ॥ वो युष्माभिरेवं सर्वभूतदययैवासावीश्वरस्तोषितः पूर्वमिति किन्न स्मरथेति भावः । आर्षत्वात्तृतीयाबहुवचनेऽपि युष्मदो वसादेशः ॥ १३ ॥ ननु कोपकाले कुत एतावान्विचारस्तत्राह—य इति । आकाशादिव देहे । इत्यर्थ इति । यथाकाशादवितर्कितं वस्त्वापतेत्तद्वदिति भावः । यद्वा—आत्मनः परमात्मनो जिज्ञासया विचारेण "यच्च किञ्चिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा।अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुत्यर्थपर्यालोचनया भूतद्रोहेण श्रीनारायणद्रोह एव स्यादिति चिंतयेत्यर्थः । यच्छेदुपशमयेत् । सगुणानिति । अन्यथा यूयं गुणैरेव ग्रस्ता भविष्यथेति सामोक्त्या भेदश्च ध्वनितः ॥१४॥ भेदेनाप्युपशमाभावमालक्ष्य दानमाह—अलमिति ॥ १५ ॥ वरः श्रेष्ठ आरोहो नितंबप्रदेशो यस्यास्ताम् ' श्रोण्यामारोहस्स्याद्वरास्त्रियाः ' इत्यमरः । कंडोर्मुनेः । नृपेति । नृपालने सपत्नीकस्यैवाधिकार इति भावः । ते प्रचे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेभ्यस्तस्यां समभवद्दक्षः प्राचेतसः किल ॥ यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ १७ ॥ यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममावहितः शृणु ॥ १८ ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभःस्थलजलौकसः ॥ १९ ॥ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विंध्यपादानुपव्रज्य सोऽचरद्दुष्करं तपः ॥ २० ॥ तत्राघमर्षणं नाम तीर्थं पापहरं परम् ॥ उपस्पृश्यानुसवनं तपसाऽतोषयद्धरिम् ॥ २१ ॥ अस्तौषीद्धंसगुह्येन भगवंतमधोक्षजम् ॥ तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ २२ ॥ प्रजापतिरुवाच ॥ नमः परायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे ॥ अदृष्टधाम्ने गुणतत्त्वबुद्धिभिर्निवृत्तमानाय दधे स्वयंभुवे ॥ २३ ॥ न यस्य सख्यं पुरुषोऽवैति सख्युः सखा वसन्संवसतः पुरेऽस्मिन् ॥ गुणो यथा गुणिनो व्यक्तदृष्टेस्तस्मै महेशाय नमः करोमि ॥ २४ ॥

त्वा । आप्सरसीमप्सरसः प्रम्लोचायाः सुताम् ॥ १६ ॥ १७ ॥ दुहितृवत्सल इति तस्य कन्यावंश एवेत्युक्तम् । मम मत्तः ॥ १८ ॥ प्रजापतिर्दक्षः ॥ १९ ॥ अबृंहितमसंवृद्धम् । विंध्यस्य पादान्सन्निहितपर्वतान् ॥ २० ॥ २१ ॥ हंसगुह्याख्येन स्तोत्रेण कस्य दक्षस्य ॥ २२ ॥ पराय सर्वोत्तमाय नमो दधे नमनं करोमि । परत्वे हेतुः । अवितथाऽनुभूतिश्चिच्छक्तिर्यस्य । अतो गुणत्रयाभासो जीवो निमित्तं माया च तयोर्बंधवे नियंत्रे । एवमपि गुणेषु तत्त्वबुद्धिर्येषां तैर्जीवैरदृष्टं धाम स्वरूपं यस्य । तत्र हेतुः । निवृत्तं मानं यस्मात् पाठांतरे निवृत्तं निरस्तं मानमवधिश्च यस्मात् । कथं तर्हि तस्य सिद्धिरत आह । स्वयंभुवे स्वप्रकाशाय ॥ २३ ॥ अदृष्टधामत्वं दर्शयन्नाह । नेति । पुरुषः सखा जीवोऽस्मिन्पुरे देहे वसन्नप्यत्रैव संवसतः सख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकं नावैति न जानाति तस्मै । कुतः । व्यक्तदृष्टेः प्रपंचद्रष्टुः । न हि द्रष्टा

तसः ॥ १६ ॥ समभवदिति । दक्षस्य स्वायंभुवमनुवंश्यत्वात्स्वायंभुवे मन्वंतरे जन्म यस्य । प्रजाविसर्गेणेति । प्रजाविसर्गस्तस्य चाक्षुष एव “ चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे काऽलविप्लुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥” इति चतुर्थोक्तेः । तस्मान्मध्ये मन्वतरपंचकमभिव्याप्यास्य तप एव पौर्वकालिकैश्वर्यप्राप्त्यर्थमवगम्यते ॥ १७ ॥ कन्यावंश एवेत्युक्ते पुत्रवंशाभाव एव सूचितः ॥ १८ ॥ १९ ॥ 'पादाः प्रत्यंतपर्वताः' इत्यमरः ॥ २० ॥ तत्र विंध्यपादेषु । अनुसवनं त्रिकालम् । उपस्पृश्य स्नात्वेत्यर्थः । “ उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि ” इति मेदिनी ॥ २१ ॥ तद्धंसगुह्यं पूर्वसिद्धमेव न तु दक्षनिर्मितमिति ज्ञेयम् ॥ २२ ॥ परापरकामेन निष्कामेन वा परमेश्वर एव भजनीयो नान्यस्तस्य मायाजीववशीकारिशक्तित्वादन्यस्य तन्मायाधीनतुच्छशक्तित्वादिति स्ववांछासिद्धिकैमुत्यं दर्शयंस्तदर्थं स्तुतिविशेषणोपतिष्ठते—नम इति । परायेति सर्वनामसंज्ञाऽभावप्रदर्शनेन लोकवैलक्षण्यमुक्तं पूर्वादिश्च व्यवस्थायामित्युक्तेस्सा न जातेत्यवधेयम् । तदेवाह—सर्वोत्तमायेति । अवितथाऽव्यभिचरिता चिच्छक्तिर्ज्ञानेच्छाशक्तिः । एवमपि प्रकृतिपुरुषनियंतृत्वेपि अदृष्टं तर्कयितुमशक्यम् । तत्रादृष्टस्वरूपत्वे मानं प्रत्यक्षादि । पाठांतरे ' निवृत्तमानावधये ' इति पाठे निवृत्तो मानावधिः परिमाणसीमा यस्य तस्मै । न ह्येतावद्गुणरूपैश्वर्यकः परमेश्वर इति कोऽपि वक्तुं शक्नोतीति भावः । तदुक्तं ब्रह्मणा “ गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य ” इति । आशंकते—कथं तर्हीति । स्वप्रकाशाय स्वत एव प्रकाशत इत्यर्थः ॥ २३ ॥ वसन्नपि तत्सख्यमनुभवन्नपि । सख्युः आत्मारामत्वेऽपि सख्यभावात्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ २५ ॥
यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात् ॥ य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः ॥ २६ ॥
मनीषिणोंतर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः ॥ वह्निं यथा दारुणि पांचदश्यं मनीषया निष्कर्षति गूढम् ॥ २७ ॥

दृश्यो भवतीति । प्रथमांतपाठे व्यक्ते प्रपंच एव दृष्टिर्यस्य सः । गुणो विषयो गुणिनो विषयिण इंद्रियादेः सख्यं प्रकाशकत्वं यथा न वेत्ति तद्वत् ॥ २४ ॥ ननु गुणो जडत्वान्न जानातीति जीवस्तु चेतनः किमिति न जानात्यत आह । देह इति । देहश्चासवश्च प्राणा अक्षाणींद्रियाणि मनवश्चांतःकरणानि भूतानि च मात्राश्च तन्मात्राण्यात्मानं स्वरूपं दृश्यमन्यमिंद्रियवर्गं तयोः परं देवतावर्गं च न विदुः । पुमान् जीवस्तु सर्वमेतत्त्रयं वेद गुणांश्च तन्मूलभूतान्वेद तज्ज्ञोऽपि सन्यं सर्वज्ञं न वेद तमनंतमीडे स्तौमि ॥ २५ ॥ अदृष्टधामत्वमुक्त्वा स्वप्रकाशत्वमाह । यदा मनस उपरामः समाधिर्न तु सुषुप्ताविव लयो न च जाग्रत्स्वप्नयोरिव विक्षेपः । तदाह । नामरूपे रूप्येते येन तत्तथा तस्य । उपरामे हेतुः । दृष्टं दर्शनं स्मृतिश्च तयोः संप्रमोषान्नाशात् । तदा यः केवलेन स्वरूपज्ञानेन प्रतीयते तस्मै हंसाय शुद्धाय शुचि शुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः ॥ २६ ॥ एवंभूतः केषां प्रतीयत इत्यपेक्षायामाह । मनीषिण इति द्वाभ्याम् । विवेकिनो यं निष्कर्षंति विविच्य ध्यायंति स निर्वाणसुखानुभूतिर्मम प्रसीदतामिति द्वयोरन्वयः । एवं निष्कर्षतां प्रतीयत इति भावः । किमिति निकर्षंति स्वशक्तिभिर्गूढमप्रकाशमानं कतिभिर्नवभिः पुनश्च त्रिवृद्भिस्त्रिगुणाभिः सप्तविंशत्युपाधिभिर्गूढमष्टाविंशं निष्कर्षतीत्यर्थः । यद्वा नवभिः प्रकृतिपुरुषमहदहंकारपंचतन्मात्ररूपाभिः । त्रिवृद्भिस्त्रिगुणात्मिकाभिः । चकरात्षोडशविकाररूपाभिश्च । कथंभूतं निष्कर्षंति । मनीषयांतर्हृदि संनि

मितान्विषयान्भोजयितुः । अत्रैव देहे कुतो नावैति । व्यक्तदृष्टिरिति पाठे विषयो घटादिः । इंद्रियादेरिहादिर्नेद्रियाधिष्ठातृदेवग्रहः ॥ २४ ॥ अत्राशंकते—नन्विति । जीवः सर्वत्र चेतनोऽपि परमेश्वरे त्वचेतन एवेत्याह भूतानि पृथिव्यादीनि । तं जीवन्मुक्तदशायां जानातीति तज्ज्ञः तदपि । ननु तज्ज्ञ इति ब्रूषे तदपि न वेदेति कुतस्तत्राह—अनन्तमिति । अप्राकृतगुणानामनंतत्वात्तदप्यज्ञानमेव तदुक्तं 'द्युपतय एव ते न ययुरंतमनंततया' इति ॥ २५ ॥ ननु तज्ज्ञोऽपि न वेदेति यदुक्तं तत्र तदेव वेद्यं वस्तु द्विविधं सुज्ञेयं दुर्ज्ञेयञ्च तत्र सुज्ञेयं निर्विशेषस्वरूप, इति । नामरूपे प्रपंचनिष्ठे रूप्येते निरूप्येते एतत्स्वरूपस्य सुज्ञेयत्वमुक्तं ब्रह्मणा यथा "तथापि भूमन्महिमाऽगुणस्य ते विबोद्धुमर्हत्यमलांतरात्मभिः" इति ॥ २६ ॥ दुर्विज्ञेयं सविशेषस्वरूपमाह—मनीषिणः शुद्धभक्ताः । गूढम् अन्तर्हृदि संनिवेशितं "प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहम्" इत्युक्तरीत्या श्रवणभक्त्यांतर्हृदि प्रवेशितं पुनर्मनीषया प्रेमभक्त्युत्थया निष्कर्षंति अंतर्हृदयान्निष्कृष्य चक्षुरादिभिरिंद्रियैः सौंदर्यादिमाधुर्यमास्वादयंतीत्यर्थः । कीदृशं संतं निष्कर्षंति स्वशक्तिभिश्चिच्छक्तिभिः सहितं कतिभिर्नवभिर्विमलाद्याभिस्तत्रापि त्रिवृद्भिश्चिच्छक्तेरेव तिसृभिर्वृत्तिभिर्ह्लादिनीसंधिनीसंविद्भिश्च सहितं तदुक्तं विष्णुपुराणे "ह्लादिनी संधिनी संवित् त्वय्येका सर्वसंश्रये । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥" इति । यथा दारुणि काष्ठे पाञ्चदश्यमिति स्वामिव्याख्यातवत् । अस्य सविशेषरूपस्य । प्राकृतानंतगुणस्य दुर्विज्ञेयत्वं भक्तिहीनैरनुभवितुमशक्यत्वात् । भक्तैरनुभूयमानत्वेऽपि माधुर्यैश्वर्ययोः पाराज्ञानत्वात् । यदुक्तं ब्रह्मणैव "गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य" इत्याद्युक्तेः । स्वामिचरणानाम् इति भाव इति । विचारं विना तस्य प्रतीतिर्न भवतीत्याशयः । सप्तविंशतिसंख्या च षोडशविकाराः सप्तप्रकृतयस्त्रयो गुणाः पुरुषश्चेति । अष्टाविंशं परमात्मानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वै ममाशेषविशेषमायानिषेधनिर्वाणसुखानुभूतिः ॥ स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः ॥ २८ ॥ यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसा वोत यस्य ॥ मा भूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्गलक्षणः ॥ २९ ॥

वेशितं निश्चलीकृतं पांचदश्यं पंचदशसामिधेनीमंत्रैः प्रकाश्यमलौकिकं वह्निमिवाहंकारास्पदादात्मनोऽन्यं परमात्मानं निष्कर्षतीत्यर्थः ॥ २७ ॥ अशेषा विशेषा यस्याः तस्या मायाया निषेधेन निर्वाणसुखे समाधिसुखेऽनुभूतिर्यस्य । अप्रसक्तनिषेधासंभवात्प्रसक्तिमाह । स एव सर्वनामा स एव च विश्वरूप इति । तद्रूपत्वेऽपि वास्तवत्वाभावान्निषेधः संभवतीत्याह । अनिरुक्ताऽऽत्मनि शक्तिर्माया यस्य सः ॥ २८ ॥ ननु यदि केवलया स्वसंस्थया प्रतीयते तर्हि सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वागाद्यगोचरत्वादित्याशंक्य सर्वैर्नामभिर्वाच्यं प्रत्यक्षादि दृश्यं च तस्य स्वरूपं वस्तुतो मा भूत्तथापि मायया घटत इति श्लोकत्रयेणोपपाद यन्नमस्करोति । यद्यदिति । यद्यद्वचसा निरुक्तमभिहितं धिया निरूपितं व्यवसितमक्षभिर्वेंद्रियैर्निरूपितं गृहीतमुतापि मनसाऽपि निरूपितं संकल्पितं यस्य स्वप्रकाशत्वं तस्य तत्स्वरूपं मा भूत् । स्वरूपत्वाभावे हेतुः । हि यस्मात्तत्तद्गुणानामेव रूपम् । पाठांतरे गुणैर्वर्धितम् । स तु गुणव्यतिरिक्तः । यतो गुणानामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा । चेतनाधिष्ठानं विना तयोरसंभवात् । यद्वा यस्य स्वरूपं मा भून्न भवति तस्मै नम इति तृती

त्वामित्यर्थः । एतन्मतस्यासार्वत्रिकत्वादाह—यद्वेति । इत्यर्थ इति । अहंकारास्पदस्यौपाधिकत्वान्निरुपाधिकं विचारयंतीति भावः॥ २७॥ अशेषाः समग्राः । विशेषा भेदाः।निर्वाणसुखे मोक्षसुखे जीवन्मुक्त्यवस्थायामिति यावत्।तद्रूपत्वेपि सर्वरूपत्वेपि । अनिरुक्ताऽनिर्वचनीया । चक्रवर्ती तु—यत्तु तस्य मायिकं सविशेषरूपं तद्व्यतिरिक्तमेव ममोपास्यमित्याह—'स मम प्रसीदताम्' बाणा हृद्विदारका आध्यात्मिकादिदुःखशराः केऽपि न विद्यंते यत्र तस्मिन्निर्वाण सुखेऽनुभूतिर्यस्य सः । "ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" इति वैष्णवोक्तेः । स एव सर्वनामेति ब्रह्मादितृणांतानां यानि नामरूपाणि तानि तस्यैवेत्यर्थः । मायायास्तच्छक्तित्वेन मायिकविश्वस्यापि तद्रूपत्वात्तस्य स्वरूपभूता शक्तिस्तु मायाशक्तेर्मायिकाद्विश्वस्माच्चान्यो वेत्याह । अनिरुक्ता मायिकवाङ्मनसाभ्यामनिरुक्तिविषयीभूताऽऽत्मभूता शक्तिर्यस्य सः ॥ २८ ॥ अत्राक्षिपति-नन्विति । पाठांतरे "मा भूत्स्वरूपं गुणबृंहितं हि तत्" इति पाठे तयोः प्रलयोत्पत्त्योः । पूर्वव्याख्याने स्वप्रकाशत्वमित्यध्याहारे गौरवं मत्वाह-यद्वेति । अत्र विश्वनाथः-वाग्बुद्ध्यादिकं तु सर्वं मायिकमेव तेन निरूपितमपि सर्वं मायिकमेव भवेत्तत्तु न तत्स्वरूप मित्याह यद्यदिति । सर्वं स्वामिवत् । यः सृष्टिप्रलयौ करोति स ईश्वर इत्यतः सृष्टेः प्राक्प्रलयात्परत्र च तस्य सत्त्वसिद्धेः । अत्र "दृश्यते त्वग्रया बुद्ध्या" इति 'मनसैवानुद्रष्टव्य' इति 'तमेव विदित्वाऽतिमृत्युमेति' इति "आत्मा वा अरे मंतव्यः" इत्यादि । "तस्मात्सर्वात्मना राजन्भगवान्हरिरीश्वरः । श्रोतव्यः कीर्तितव्यश्च" इति परं सहस्रश्रुतिस्मृतिवाक्यविरोधादीश्वराननुगृहीतैरेव वचआदिभिरिति व्याख्येयमत एव श्रुतावग्र्ययेति विशेषणम् । "अतः श्रीकृष्णनामादि न भवेद् ग्राह्यमिंद्रियैः । सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः ॥" इत्यभियुक्तवचनं च । केचित्तु कार्त्स्न्येन निरूपणाभावान्न निरूपितमित्याहुः । "यतोऽप्राप्य निवर्त्तंते वाचश्च मनसा सह" इत्यत्रापादाननिर्देशाद्वाङ्मनसगम्यत्वम् । निवर्त्तंत इति । अंतालाभाद्वाङ्मनसागम्यत्वं चेतिवत् । संदर्भस्तु-ननु मम यन्निर्वाणसुखैकरूपं ब्रह्माख्यं स्वरूपं तस्यानुभूतिकमेव भवदतीतत्रिवृन्नवशक्तिकं भवतु यत्तु गुणरूपबृंहितं स्वरूपं तत्तु तन्मयमेव भवेज्जगत्सादृश्यात्तत्राह—यद्यदिति । त्रिकेण गुणै रूपैश्च बृंहितम् असमोर्द्ध्वबृहत्तमं यत्स्वरूपं तदपि वचआदिगोचरो यद्यद्वस्तु तन्न भवति । तत्र हेतुः स वा इति । सगुणरूपबृंहित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च ॥ परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकम् ॥ ३० ॥
यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति ॥ कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने ॥ ३१ ॥

येनान्वयः ॥ २९ ॥ तदेवं वस्तुतो गुणस्वरूपत्वाभावमंगीकृत्यानिरुक्तात्मशक्तिरित्यनेन द्योतितं मायया सर्ववाच्यत्वेन विश्वरूपत्वमाह । यस्मिन्नधिकरणे । यतोऽपादानात् । येन करणेन । यस्य संबंधि । यस्मै संप्रदानाय । यदीप्सिततमम् । यः कर्ता । कुरुते स्वतंत्रः । कार्यते चान्येन प्रयोज्यकर्त्रा । तद्ब्रह्मेति प्रत्येकं संबंधः । अत्र च सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः । यथेति च क्रियाकारकसंबंधप्रकारवाचिनामव्ययानामर्थाः । कुरुते कार्यते चेति स्वार्थपरार्थक्रियान्वयश्च सर्वेषां दर्शितः । च शब्देन भावकर्मादिविहितप्रत्ययार्थाः संगृहीताः । तद्ब्रह्मैवेति कुतस्तत्राह । तद्धेतुस्तेषां कारणम् । तत्कुतः । सर्वेभ्यः प्राक्प्रसिद्धम् । ननु ब्रह्मादयस्तद्धेतवः श्रूयंतेऽवरे च दृश्यंते तत्कथं ब्रह्मैव तद्धेतुस्तत्राह । परेषामवरेषां च हेतूनां परमं कारणम् । ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तदानीमन्यस्याभावात् । सत्यम् । निरपेक्षमेव तत्कारणमित्याह । अनन्यद्विजातीयशून्यम् एकं सजातीयशून्यं च । तस्मै नम इत्युत्तरेणान्वयः ॥ ३० ॥ नन्वेवं ब्रह्म चेद्विश्वस्य हेतुस्तर्हि 'न कदाचिदनीदृशं जगत्' इति वदंतो मीमांसकाः कुतोऽत्र विवदंते तैश्चान्ये स्वभाववादिनः संवदंते ते च ते च तत्त्वविद्भिर्बोधिता अपि कुतः पुनःपुनर्मुह्यंति तत्राह । यस्य मायाविद्यायाः शक्तयो

स्वरूपः गुणप्रलयसृष्टिभ्यां लक्ष्यते तर्क्यत एव न त्वनुभूयत इति । यद्वा—गुणानामपायोऽपगमो यस्मात्तस्मिन्विगतसर्गे नित्यसिद्धे वैकुंठे लक्ष्यते तदधिष्ठातृत्वेन दृश्यत इत्याह ॥ २९ ॥ ननु गुणमयं रूपं यदि तत्स्वरूपं न भवति तर्हि तस्यापूर्णत्वं प्रसज्येतेत्यभिप्रायेणाह—तदेवमित्यादि । विश्वनाथः-ननु चिच्छक्तीनां विमलाद्यानां नवविधानां चिच्छक्तिवृत्तीनां ह्लादिन्यादीनां त्रिविधानां तद्विलासानां वैकुंठतत्पार्षदादीनां वासुदेवसंकर्षणादीनां च नित्यसिद्धत्वश्रवणात् कालमायाजीवादृष्टानां तु जगत्कारणत्वस्य च श्रवणात्कथमेकमित्युच्यते इत्यत आह-अनन्यदिति । न विद्यतेऽन्यद्यतस्तत् । चिच्छक्तीनां तद्विलासानां च तत्स्वरूपभूतत्वाद्वासुदेवादीनां तदंशत्वात् कालमायादीनामस्वरूपभूतत्वेऽपि तच्छक्तित्वात्तदनन्यत्वमित्यर्थः । विजातीयभेदो वृक्षस्य पाषाणादेर्यथा सजातीयभेदोऽश्वत्थस्य वटादेरिति ॥ ३० ॥ नन्वत्र मते सजातीयविजातीयस्वगतभेदासहिष्णवोऽन्ये द्वैतवादिनो विवदंते । तैश्चान्ये नैयायिकाः षोडशपदार्थवादित्वाद्द्वैतवादिनो विवदंते । तैश्चान्ये वैशेषिकाः संवदंते । तैः सर्वैश्चान्ये न कदाचिदनीदृशं जगदिति वदंतो मीमांसका विवदंते।तैश्चान्ये स्वभाववादिनः संवदंते।ते च तत्त्वविद्भिर्बोधिता अपि कुतः पुनर्मुह्यंतीति तत्राह । यच्छक्तयः यस्य मायाशक्तिवृत्तयो वदतां समादधतां वादिनां तत्राक्षेपकृतां विवादस्य कचित्संवादस्य च भुव उत्पत्तिहेतवो भवंति । प्रयोजनमाह-आत्ममोहमिति । आत्मानं जिज्ञासमानानामपीत्यर्थः । मुहुरिति तत्राविच्छेदः सूचितः । अनंतगुणायेत्यनंतशब्दस्यानेकार्थत्वेनानाशवाचित्वात् । गुणानामनश्वरत्वं निःसीमत्वं चोक्तम् "इमे चान्ये च भगवन्नित्या यत्र महागुणाः" इति पृथिव्युक्तौ नित्या इति पदेन "नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः" इति सूतोक्तौ च अगुणस्येति योगेश्वरा इति पदाभ्यां "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ॥ वे अक्षितं किंचन योगसांख्ययोः समं परं ह्यनुकूलं बृहत्तत् ॥ ३२ ॥

विवादस्य क्वचित्संवादस्य भुवः स्थानानि भवंति तस्मै नमः ॥ ३१ ॥ ननु किं तद्ब्रह्म यस्य शक्तयो विवादादिभुवो भवंति तत्राह । अस्तीति । योग उपासनाशास्त्रं तत्र हि विराड्रूपेणोपासनायां पातालपादादिकमस्तीत्युपास्यत्वेन विधियिते । नास्तीति सांख्यं ज्ञानशास्त्रं तत्र ह्यपाणिपादः अचक्षुरश्रोत्रमिति च पादादि नास्तीति निषिध्यते । तयोर्योगसांख्ययोर्यत्किंचित्सममनुवर्तमानमवेक्षितं प्रतीतं तद् बृहद्ब्रह्म । विवादास्पदं ब्रह्मेत्यर्थः । विवादं स्फुटयति । भिन्नावस्तिनास्तीत्येवंभूतौ विरुद्धौ धर्मौ ययोस्तयोर्भिन्नविषयत्वेऽपि विरोधो न स्यादित्येकस्थयोरित्युक्तमेकविषययोः । कुतो वस्तुनिष्ठयोः पादादिविप्रतिषेधयोरेकवस्तुनिष्ठत्वात् । समत्वे हेतुः । परम् । हि यतो विधिप्रतिषेधयोरविषयस्तयोः पादादिविषयत्वात् । तथा तदविषयस्य सद्भावे किं प्रमाणं तदाह । अनुकूलमधिष्ठानं विना पादादिकल्पनायोगात् । अवधिं विना तन्निषेधा

इति पराशरोक्तौ च विना हेयैरित्युपन्यासेन च तदीयगुणानामप्राकृतत्वावगमेऽप्यवास्तवत्वमाचक्षाणास्तेऽपराधिनः कथमविद्यया न मोह्यंतामिति भावः ॥ ३१ ॥ ननु ते शास्त्रज्ञाः किमिति निन्द्यंते शास्त्राणामेवैकमत्याभावेन परस्परविरोधादिति चेन्मैवं वादीरित्याह-अस्तीति । योगसांख्ययोः योगो भक्तियोगशास्त्रं सांख्यं ज्ञानशास्त्रं तयोस्तत्प्रसिद्धं परं सर्वोत्कृष्टं बृहद्ब्रह्मसममनुकूलञ्च यथा स्यात्तथाऽवेक्षितं परस्परविरुद्धयोस्तयोर्द्वयोरेव शास्त्रयोररवेक्षणे किमपि वैषम्यं प्रातिकूल्यं च नास्तीत्यर्थः । तयोः कथंभूतयोः योगशास्त्रे हि "कृष्णं पिशंगांबरमंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधम्" इत्यादिना नामरूपगुणपाणिपादाद्यंगोपांगपार्षदधामादि अस्तीत्युपास्यत्वेन विधीयते । सांख्यशास्त्रे ह्यनामरूपगुणमपाणिपादमचक्षुरश्रोत्रमेकमद्वितीयमपि नामरूपादिकं नास्तीति निषिध्यते इत्येवंभूतौ भिन्नौ परस्परविरुद्धौ च धर्मौ ययोस्तयोर्भिन्नविषयत्वे विरोधो न स्यादित्येकस्थयोरित्येकस्मिन्ब्रह्मण्येव तिष्ठत इत्येकं ब्रह्मैव विषयी कुर्वतोरित्यर्थः । ननु तर्हि कथमवैषम्यमप्रातिकूल्यं वा तत्राह—वस्तुनिष्ठयोः । वस्तुनि वास्तववस्तुन्येव निष्ठा प्रतिपादकत्वलक्षणा ययोस्तेन भक्तिशास्त्रं विधिना वास्तवं वस्त्वेव प्रतिपादयति न त्ववास्तवं तथा ज्ञानशास्त्रं च निषेधेन तदेव प्रतिपादयति न त्ववास्तवं तेन भक्तिशास्त्रेण परमेश्वरस्य रामकृष्णादिमूर्तेर्नामरूपादिकवस्तुप्रतिपादने सिद्धे ज्ञानशास्त्रमपि स्वस्य वस्तुनिष्ठत्वादेव तस्य नामरूपादिकं नैव निषिध्यति किं तु तस्य मायिकमूर्तेर्विराज एवात एव पुनर्भक्तिशास्त्रमपि ज्ञानशास्त्रनिषिद्धं विराड्रूपमुपास्यत्वेन नोपादत्ते तदुक्तम् "अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते । उभे अपि न गृह्णंति मायासृष्टे विपश्चितः" इति विराड्रूपस्यापि धारणायामुपादानं तु कस्यचिदेव प्रथमदशायामेव चित्तशुद्ध्यर्थमेव न तु सर्वदोपासनार्थमिति भक्तिज्ञानशास्त्रयोर्वस्तुतस्त्वविरोध एवेति शास्त्राविरोधेऽपि विवदमानाः शास्त्रतात्पर्यमविद्वांसो दार्शनिका एव विगीता इति भावः । संदर्भस्तु-तत्र विवादावसरे तादृशगुणरूपबृंहितस्वरूपमपि सिद्ध्यतीत्याह-अस्तीति । योगः स्थूलोपासनाशास्त्रं तत्र हि भगवतो नामरूपित्वं श्रूयते तत्र दृष्टकल्पनालाघवात् । घटपटादिलक्षणाखिलनामधेयत्त्वं पातालपादादिकत्वं चेति विधीयते नास्तीति । सांख्यं ज्ञानशास्त्रं तत्र हि निषेधश्रुतिभिस्तस्य नामरूपित्वं यन्निषिध्यते तत्प्रापंचिकनामरूपित्वस्य कल्पितत्वात्सर्वथैव नास्तीति निश्चीयते तदुक्तम् "उभयमतमस्यैव प्राक्ससर्वनाम" इत्यादिना 'यद्यन्निरुक्तम्' इत्यादिना च अस्तीति नास्तीति वस्तुनिष्ठा ययोस्तमेव विवादं स्फुटयति भिन्नौ अस्तीति नास्तीत्येवंभूतौ विरुद्धौ धर्मौ ययोस्तयोः । नन्वास्तामनयोर्भिन्नविषयत्वं नेत्याह—एकस्थयोः समानविषययोः । तदेवं विवादे सति तयोर्यत्किञ्चन समं समंजसत्वेनैवावेक्षितं प्रतीतं वस्तु तद्द्वयोरपि बृहदनुकूलं भवति किं तत्समंजसं यत्परं नामरूपादत्यंतं तदभावाच्च विलक्षणं यत्र युगपन्नामरूपित्वमनामरूपित्वमपि वक्तुं शक्यते तद्विलक्षणं वस्त्वित्यर्थः । एतदुक्तं भवति—एकस्मिन्नेव वस्तुनि नामरूपित्वाविधिनिषेधाभ्यां परस्परं श्रुतयः पराहताः स्युः अत्र तु परत्वेनोभयत्रापि प्राक्तनयुक्त्या समंजसमप्राकृतप्राकृतनामरूपित्वमेव विधिनिषेधश्रुतितात्पर्येणोपस्थाप्यते इति तन्मतं विवादमात्रम् । इत्थमेव श्रीध्रुवेण निर्विवादत्वमुक्तम् "तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् । रूपं स्थविष्ठमज ते महदाद्यनेकं नात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः ॥ नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ॥ ३३ ॥
यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति ॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथम् ॥ ३४ ॥

योगाद्य । तयोरुपपादकत्वेन सिद्धमित्यर्थः तस्मै नम इति पूर्वस्यानुषंगः ॥ ३२ ॥ ननूदासीनस्य समस्य नमस्कारे को लाभस्तत्राह य इति । पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोऽपि जन्मभिरवतारैर्विशुद्धोर्जितसत्त्वानि रूपाणि कर्मभिर्नामानि च यो भेजे । तत्कुतः । भगवानचिंत्यैश्वर्यः स मह्यं प्रसीदतु ॥ ३३ ॥ ननु त्वादृशाः

॰ परं परम वेद्मि न यत्र वादः" इति स्वामिचरणैरपि निर्विवादत्वमेव व्याख्यातमित्यर्थ इत्यंतेनाधिष्ठानं विनेत्यादिनेति । 'सति कुड्ये चित्रम्' इति न्यायेनाधिष्ठानं विनेत्युक्तं यथा शतपुरुषपंक्तिमध्ये ज्ञातुमिष्टस्य पञ्चाशत्तमस्य विष्णुमित्रशर्मणो ज्ञानार्थं तद्विज्ञं पृच्छति प्रथमत आरभ्यायं विष्णुमित्रशर्माऽयं विष्णुमित्रशर्मेति वदंतं तज्ज्ञाता वदति नायंनायमिति पंचाशत्तमस्यैवमवधित्वात्तदपेक्षयान्येषां निषेधो नान्यथा 'तद्वदचक्षुरश्रोत्रम्' इत्यादिश्रुता वपीति भावः ॥ ३२ ॥ पुनराक्षिपति-नन्विति । तत् नामरूपरहितस्यापि नामरूपभजनं कुत इति । विश्वनाथस्तु-अतो नामरूपादिविधिनिषेधाभ्यां शास्त्रद्वयाविरोधं व्यंजयन्भक्तवत्सलस्य भगवतः स्वस्मिन्ननुग्रहं प्रार्थयते य इति । स्वामिवत् । संदर्भस्तु-यो नामरूपरहित एव नामानि रूपाणि प्रकटितवान् जन्मकर्मभिः सह तानि भेजे व्यतिरेके दोषमाह-अनंत इति । यदि तस्मिन्नामरूपत्वादिकं नास्ति तर्हि तच्छक्तिमत्त्वं प्रति सांतत्वं प्रसज्येतेति तदुक्तं प्रचेतोभिः "न ह्यंतो यद्विभूतीनां सोऽनंत इति गीयते" इति तत्प्रकाशने हेतुः । भगवान् भगात्मशक्तिमान् । तस्याः शक्तेर्मायात्वं निषेधति परमः पराख्यशक्तिरूपा मा लक्ष्मीर्यस्मिन् अन्यथा परम त्वव्याघातः स्यादिति भावः । तस्मान्न मायया सर्वसर्वमैश्वर्यसंभवम् । "अमायो हीश्वरो यस्मात्तस्मात्तं परमं विदुः ॥ " ननु सर्वनामविश्वरूपत्वे तद्राहित्ये च संत्येव तत्तदुपासकाः प्रमाणम् अत्र तु के स्युरित्याशंक्याह पादमूलं भजतामनुग्रहार्थमिति योगसांख्ययोस्तत्तत्त्वं न सम्यक्प्रकाशते किन्तु भक्तावेव 'भक्तिरेवैनं दर्शयति' इति श्रुतेः । तस्माद्युक्तं तयोर्विवादमात्रत्वमिति भावः । अत एव वक्ष्यतेऽनंतरमेव इतीत्यादौ प्रादुरासीदित्यनेन तान्प्रति रूपप्राकट्यात्पूर्वमपि रूपमस्त्येवेति व्यंजितम् । 'चरणं पवित्रं विततं पुराणम्' इत्यादिश्रुतेः भेज इत्यतीतनिर्देशः प्रामाण्यदार्ढ्यायानादित्वं दर्शयति अनंतस्य नामानि रूपाणि चानंतान्येवेति भावः ॥ ३३ ॥ पुनराक्षिपति नन्विति—विभूतिकामस्य तव तत्तद्विभूतिसंवलितगणपत्याद्युपाधित्वेनैव यमोपासना युक्ता कथं सर्वात्मना निरुपाधित्वेन स्तौषि तत्राह तत्रतत्रानिलवत्स्वकार्यकरत्वं भगवत एव न तूपाधेरिति स्थिते किमुपा धिभावनयेति भाव इति संदर्भः । विश्वनाथस्तु तदेवम् 'न यस्य सख्यम्' इत्यनेन 'सर्वं पुमान्वेद' इत्यनेन च जीवेश्वरयोरल्पज्ञत्वसर्वज्ञत्वाभ्यां वास्तवमेव पार्थक्यमवधारितमेव ततश्च यदापराम इत्यनेन मनीषिणोंतर्हृदीत्यनेन च तस्यैवेश्वरस्यैकस्याप्यलौकिक निर्विशेषसविशेषज्ञानगम्यत्वेन निर्विशेषं सविशेषस्वरूपं च यथामति व्यंजितं पुनश्च स वै ममाशेषेति त्रयेण मायिकवस्तूनां तद्रूपत्वेपि तत्स्वरूपभूतत्वाभाव उक्तः पुनरस्तीति नास्तीति द्वयेन भक्तिशास्त्रज्ञानशास्त्रयोरविरोधो गूढोऽपि स्पष्टी कृतः । इदानीं ये जीवेश्वरयोः पार्थक्यमुपाधिकृतमेव न वास्तवमित्याचक्षते तेषां ज्ञानिमानिनामसमंजसपथगामित्वं व्यंजयन्स्वमनोरथसिद्धिं प्रार्थ यते—य इति । यथाशयं दुष्टं शिष्टं वांतःकरणमनतिक्रम्य तद्धर्माक्रांत एव विभाति जीवरूपेण भासते यथा वायुः पार्थिवं दुष्टं शिष्टं वा गंधमाश्रित्य नानागंधवान्भाति न वस्तुत इति चक्रवर्ती । इत्यर्थ इति । तस्यैव सर्वदेवतारूपत्वात् "शैवाः सौराश्च गाणेशा वैष्णवाः शक्तिपूजकाः । मामेव प्राप्नुवंतीह वर्षापः सागरं यथा ॥ " इति स्मृतेरयं भावः । एतच्च श्रीदशमेऽक्रूरस्तुतौ विस्तरेण वर्णयिष्याम इति । 'योय' इति गीतावाक्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे॥आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः॥३५॥कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः॥ चक्रशंखासिचर्मेषुधनुष्पाशगदाधरः ॥ ३६ ॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः॥ वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः ॥ ३७ ॥ महाकिरीटकटकः स्फुरन्मकरकुंडलः॥ कांच्यंगुलीयवलयनूपुरांगदभूषितः ॥ ३८ ॥ त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः॥ वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः ॥ स्तूयमानोऽनुगायद्भिः सिद्धगंधर्वचारणैः ॥ ३९॥ रूपं तन्महदाश्चर्यं विचक्ष्याऽऽगतसाध्वसः ॥ ननाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः ॥ ४० ॥ न किंचनोदीरयितुमशकत्तीव्रया मुदा ॥ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः ॥ ४१ ॥

सकामा गणेशादीन्प्रार्थयंते त्वं तु तान्विहाय किमिति भगवंतमेव प्रार्थयसे तत्राह। प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैर्यथाशयं तत्तद्वासनानुसारेण यो देहगतोंतर्यामी। तत्तद्देवतारूपेण विविधो भाति यथा वायुः पार्थिवं गुणं चंपकादिगंधभेदमाश्रित्य नानागंधवान्विभाति रेणोर्गुणं धूसरत्वादिकमाश्रित्य नानारूपवान् प्रतीयते तद्वत्तस्यैव तत्तद्देवतारूपेण फलदातृत्वात्स ईश्वर एव मे मनोरथं सत्यं करोतु। किमंतर्गडुभिर्देवतांतरैरित्यर्थः । तदुक्तं गीतासु। "योयो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति। तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हितान् ॥ " इति। "ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम्।" इति चेति ॥३४॥ संस्तुवतो दक्षस्य स भगवान् प्रत्यक्षोऽभवत् ॥ ३५ ॥ तं वर्णयति सार्धैश्चतुर्भिः। सुपर्णस्यांसे स्कंधे कृतौ पादौ येन। प्रलंबा अष्टौ महांतो भुजा यस्य। चक्राद्यष्टायुधधरः ॥ ३६ ॥ प्रसन्नं वदनमीक्षणे च यस्य । वनमालया निवीतं कंठादिपादांतव्याप्तमंगं यस्य। लसंतौ श्रीवत्सकौस्तुभौ यस्य ॥ ३७ ॥ महांति किरीटकटकानि यस्य । स्फुरती मकरकुंडले यस्य । कांच्यादिभिर्विभूषितः। वलयमत्र पादभूषणं द्रष्टव्यं कटकस्योक्तत्वात् ॥ ३८ ॥ त्रैलोक्यमोहनं श्रीपुरुषोत्तमाख्यम्। सुरयूथपैर्लोकपालैः ॥ ३९ ॥ ४० ॥ आपूरितानि मनोद्वाराणींद्रियाणि तैः। यथा ह्रदिन्यो नद्यो निर्झरैरापूर्यंते तथा महानंदा

स्पष्टार्थत्वान्न व्याख्यातम्॥ ३४ ॥ इतीत्थं हंसगुह्यस्तोत्रेणेत्यर्थः ॥ ३५ ॥ सुपर्णांसे गरुडस्कंधे ॥ ३६ ॥ ३७ ॥ कटकं पादकटकमिति केचित् ॥ ३८ ॥ ३९ ॥ आ सर्वतो गतं साध्वसं भयं यस्य स तथा ॥४०॥ तीव्रया गाढया मुदा स्वात्मस्थिततत्प्रेमरूपयाऽऽपूरितैः सर्वेणाप्यंशेन पूरितैः सद्भिर्मनोद्वारैर्ज्ञानेंद्रियैरिति तत्तदावेशात्स्वात्मनः सर्वांशेन पूरितैर्निर्झरैर्जलनिर्गमैर्यथा ह्रदिन्य आपूर्यंते तथा । इत्यर्थ इति । आनंदपूरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं तथाऽवनतं भक्तं प्रजाकामं प्रजापतिम् ॥ चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ॥ ४२ ॥ श्रीभगवानुवाच ॥ प्राचेतसं महाभाग संसिद्धस्त
पसा भवान् ॥ यच्छ्रद्धया मत्परया मयि भावं परं गतः ॥४३॥ प्रीतोऽहं ते प्रजानाथ यत्तेऽस्योद्बृंहणं तपः ॥ ममैष कामो भूतानां यद्भूयासुर्वि
भूतयः ॥४४॥ब्रह्मा भवो भवंतश्च मनवो विबुधेश्वराः॥ विभूतयो मम ह्येता भूतानां भूतिहेतवः॥४५॥तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाऽऽकृतिः॥
अंगानि क्रतवो जाता धर्म आत्माऽसवः सुराः ॥४६॥ अहमेवासमेवाग्रे नान्यत्किंचांतरं बहिः ॥ संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥४७॥

पूर्णत्वेनावृत्तिकत्वाद्रागादीनां न किंचिदपि वक्तुं शक्तोऽभूदित्यर्थः ॥ ४१ ॥ यद्यप्यसौ नावोचत्तथाऽपि चित्तज्ञ इदं वक्ष्यमाणमाह ॥ ४२ ॥ भावं भक्तिं गतः प्राप्तः ॥ ४३ ॥ यद्यतस्ते तपोऽस्य विश्वस्योद्बृंहणं वृद्धिकरमतस्तेऽहं प्रीतः । मत्तपसो लोकसमृद्ध्यर्थत्वे त्वत्प्रीतेः किं कारणं तत्राह । ममेति । भूतानां विभूतयः समृद्ध यो भूयासुरिति यदेष एव मम कामः । अतो मत्कामपूरणादेवाहं प्रीतोऽस्मीत्यर्थः ॥ ४४ ॥ भूतिविस्तारप्रयत्नश्च तवोचित एवेत्याह । ब्रह्मेति । भवंतः प्रजापतयः भूतेरुद्भवस्य हेतवः ॥ ४५ ॥ विश्ववृद्ध्यर्थेन त्वत्तपसाऽहं प्रीत इत्युक्तं तदेव तपः स्तुवन्प्रसंगादन्यान्यपि लोकवृद्धिकराणि विद्यादीनि स्तौति । तपो यमनियमा दिसहितं ध्यानं मे हृदयम् । विद्या सांगोपांगमंत्रजपः सा ध्यानं तनोतीति तनुर्देहः । क्रिया ध्यानादिविषयः पुंव्यापारो भावनाशब्दवाच्यस्तेन हि ध्यानादिक माक्रियत इत्याकृतिः । जाताः सुनिष्पन्नाः क्रतवोंगानि "शिरो वा एतद्यज्ञस्य यत्प्रवर्ग्यो ग्रीवा उपसदश्चक्षुषी आज्यभागौ" इत्यादिश्रुतेः । धर्मः क्रत्वाद्यपूर्व मात्मा मनः । हृदयाश्रयत्वात् । सुरा यज्ञभुजस्त एवासवः प्राणाः । संतर्पणीयत्वात् ॥ ४६ ॥ तपसः संतानवृद्धिहेतुत्वं दर्शयितुं द्वितीयतृतीयोक्तमितिहास माह चतुर्भिः । अहमेवेति वस्त्वंतरव्यावृत्तिः । आसमेवेति क्रियांतरव्यावृत्तिः आंतरं ग्राहकम् । बहिर्ग्राह्यम् । संज्ञानमात्रं चैतन्यमात्रम् । अव्यक्तमिंद्रियवृत्तिभिरनभिव्य

तैर्हेतुभिः किंचिदपि वक्तुं द्रष्टुं श्रोतुं स्प्रष्टुं घ्रातुं वा न समर्थोऽभूदिति भावः ॥४१॥४२॥ प्राचेतसेति । मम भक्तानां प्रचेतसां त्वमात्मजोऽस्यत एव महाभागोऽप्यसीति तत एव तुभ्यं मया दर्शनं दत्तमितिभावः॥४३॥ प्रजानाथेति । भाविप्रजानाथत्वसूचनेन तन्मनोरथसिद्धिरप्यसूचीति भावः । इत्यर्थ इति । मदिच्छयैवते तपसः सिद्धिर्जातेति भावः ॥ ४४ ॥ नन्वकामस्य तव कथंभूतविभूतिकामनेति चेद्भक्त संबंधात्तद्वात्सल्येनैवेत्याह– ब्रह्मेति । ब्रह्मादयो भक्ता हि मम विभूतयो विशेषेण सन्निधानस्थानविशेषा एव न तु निकृष्टास्ते चान्येषां भूतिहेतव उत्पादका इति ॥ ४५ ॥ कर्मयोगे समुचितं मे रूपं शृण्वित्याह–तप इति । आदिनासनादिग्रहः । मंत्रांगानि विनियोगांगन्यासादीनि तैः सहितो जपः सा विद्या तनुः भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः । भवितुर्यागादेर्भवनानुकूल उत्पत्तिजनको भावयितुः प्रयोजकस्य अस्याविशेषानिरूपणं तु मत्कृताद्यपद्यव्याख्याशतकेऽस्तीति । तच्च तत एव निश्चेयम् । प्रवर्ग्यादय इष्टिभेदाः । धर्मः क्रत्वादेर्जातमपूर्वमदृष्टमित्यर्थः।अदृष्टद्वारैव यज्ञादेः फलजनकत्वस्योपपादितत्वात्।धर्मस्य हृदयाश्रयत्वं प्रसिद्धमेव॥४६॥द्वितीयस्कंधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मय्यनंतगुणेऽनंते गुणतो गुणविग्रहः ॥ यदासीत्तत एवाद्यः स्वयंभूः समभूदजः ॥ ४८ ॥ स वै यदा महादेवो मम वीर्योपबृंहितः ॥ मेने खिल मिवात्मानमुद्यतः सर्गकर्मणि ॥ ४९ ॥ अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणम् ॥ नव विश्वसृजो युष्मान्येनादावसृजद्विभुः ॥ ५० ॥ एषा पंचजनस्यांऽग दुहिता वै प्रजापतेः ॥ असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यताम् ॥ ५१ ॥ मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः ॥ मिथुन व्यवायधर्मिण्यां भूरिशो भावयिष्यसि ॥ ५२ ॥

कम् । अत एव प्रसुप्तमिव । विश्वतः सर्वत्र ॥ ४७ ॥ गुणतो मायातः गुणमयो विग्रहो ब्रह्मांडम् । ततस्तदैव । अजोऽयोनिजः ॥ ४८ ॥ खिलमसमर्थ मिव ॥ ४९ ॥ मे मया तपतपेत्यभिहितः सन् । येन तपसा ॥५०॥ संततिवृद्ध्युपायमाह । एषेति । अंग हे दक्ष । पंचजनाख्यस्य प्रजापतेः ॥ ५१ ॥ मिथुनस्य यो

तुं नवमाध्याये “ स आदिदेवो जगतां परो गुरुः ” इत्यादिना तृतीयस्कंधे त्वष्टमाध्यायमारभ्योक्तम् । अत्र विश्वनाथः—भक्तियोगे । समुचितं मे स्वरूपं शृण्वित्याह—अह मेव त्वया दृश्यैतत्स्वरूपवस्त्रालं कारास्त्रवाहनपार्षदादिविशिष्ट एवाग्रे सृष्टेः पूर्वमासमेव तथैवाग्रे महाप्रलयानंतरमपि भविष्याम्येवेत्यग्रे इत्यस्य पूर्वोत्तरकालवाचित्वाल्लभ्यते सांप्रतं त्वस्म्येवेत्यस्य स्वत एव प्राप्तिरिति स्वस्य त्रैका लिकी सत्ता दर्शिता । किञ्च—ममांतरं बहिश्चान्यत्किमपि नास्तीति परिच्छिन्नस्यापि मत्स्वरूपस्य व्यापकत्वादित्त्यचिंत्यशक्तिमत्त्वं च दर्शितं यद्वक्ष्यते । “ न चांतर्न बहिर्यस्य न पूर्वं नापि चापरम् । पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः ॥ तं मत्वात्मजमव्यक्तं मर्त्यलिंगमधोक्षजम् । गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥ ” इति । ज्ञानयोगे समुचितं स्वरूपं शृण्वित्याह—संज्ञानमात्रमिति ॥ ४७ ॥ स्वस्वरूपसत्त्वमुप दिश्य सृष्टौ प्रवर्त्तयितुमितिहासमाह—मयीति । ततो ब्रह्मांडमध्य एव युष्माकमाद्यः ॥ ४८ ॥ महादेवः सर्वेभ्योऽग्रजातत्वान्महान्देवः ॥ ४९ ॥ युष्मानित्युक्त्या ब्रह्मपुत्र एव महादेवापराधादिदानीं प्रचेतोभ्यः पुनर्जात इति सूचितम् ॥ ५० ॥ अंगेति । स्तुत्या प्रीतिर्द्योतितेति भावः । प्रजेशेति । पूर्वजन्मापेक्षयोक्तं भाविप्रजेशत्वाभिप्रायं वा ॥ ५१ ॥ तथाभूतायां व्यवायधर्मिण्याम् । तादृशहं सगुह्यस्तवेन स्तुतोपि दत्तनिजश्रीमूर्त्तिदर्शनप्रसादोऽप्युपदिष्टनिजतत्त्वोऽपि दक्षो भगवता यत्कर्मगम्ये विषयभोगे निःसीमके निक्षिप्तो न तु स्वप्रेमामृतसिंधौ तत्खलु स्वमहाभक्तश्रीरुद्रापराधशेषस्याभंगुरत्वेन हेतुता गम्यते । अत एवानंतराध्याये श्रीमुनींद्रेणापिविष्णुमायोपबृंहित इत्याख्यास्यमानो दक्षो नारदमप्याक्षेप्स्यतीति पुनरप्यस्य महदपराधः फलिष्यति न च कर्दमोऽपि भगवता विषयभोग एव निक्षिप्त इति वाच्यं तस्येषत्सकामत्वमालक्ष्यैव भगवता सावधिक एव विषयभोगवरो दत्तो न तु निरवधिक एव. तदुक्तं तत्रैव “ त्वञ्च सम्यगनुष्ठाय निदेशं म उशत्तम । मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे ॥ ” इति स च कर्दमोपि अनुग्रहायास्त्वयीत्यादिना भक्तिमेवांते प्रार्थयामास एवं सकामा अपि सर्वे एव भक्ता ध्रुवादयो भक्तिमेवाचकांक्षुरेव दक्षस्त्वजभक्तिं नाकांक्षति स्म भगवानपि तां न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वत्तोधस्तात्प्रजाः सर्वा मिथुनीभूय मायया ॥ मदीयया भविष्यंति हरिष्यन्ति च मे बलिम् ॥५३॥ श्रीशुक उवाच ॥ इत्युक्त्वा मिषतस्तस्य भगवा
न्विश्वभावनः ॥ स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः ॥ ५४ ॥ इति श्रीभागवते म० षष्ठ० प्रचेतसां दक्षोत्पत्तिवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥
श्रीशुक उवाच ॥ तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः ॥ १ ॥ अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा
नृप ॥ पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशम् ॥ २ ॥ तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः ॥ संगमो यत्र सुमहान्मुनिसिद्धनिषेवितः ॥ ३ ॥
तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ धर्मे पारमहंस्ये च प्रोत्पन्नमतयोऽप्युत ॥४॥ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः ॥ प्रजाविवृद्धये यत्तान्दे
वर्षिस्तान्ददर्श ह ॥ ५ ॥ उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः ॥ अदृष्ट्वांतं भुवो यूयं बालिशा बत पालकाः ॥ ६ ॥ तथैकपुरुषं राष्ट्रं बिलं
चादृष्टनिर्गमम् ॥ बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिम् ॥७॥ नदीमुभयतोवाहां पंचपंचाद्भुतं गृहम् ॥ क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमिम् ॥८॥

व्यवायो रतिः स एव धर्मो यस्य स त्वम् । तथाभूतायां तस्याम् ॥ ५२ ॥ मायया निमित्तभूतया । स्त्रिया सह मिथुनीभूय भविष्यंति पुत्रादिरूपेणोत्पत्स्यंते ॥
॥ ५३ ॥ ५४ ॥ इति श्री०भा०म०षष्ठे टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ पंचमे नारदेनाथ वाचःकूटैस्तु नाशितान् ॥ सुतानाकर्ण्य दक्षोऽमुं शशापेति
निरूप्यते ॥ १ ॥ १ ॥ अपृथग्धर्मशीला एकाचारस्वभावाः ॥ २॥ तत्र प्रतीच्यां दिशि सिंधोर्नद्याः समुद्रस्य च यत्र संगमस्तत्रस्थं नारायणसरो नाम तीर्थं प्रययुरित्यन्व
यः । सुमहदतिविस्तीर्णम् ॥ ३ ॥ विनिर्धूतो मलो रागादिर्यस्मात्स आशयो येषाम् ॥ ४ ॥ तान् शुद्धसत्त्वानपि पित्रादेशजाड्येन प्रजाविवृद्धये यत्तानुद्युक्तान्ददर्श ॥५॥
अहो कष्टं मोक्षमार्गाधिकारिणः संत एते प्रवृत्तिनिष्ठैः कर्मभिर्नश्येरन्निति कृपया तान्निगूढार्थैर्वाक्यैरुपदिशति स्म तदाह उवाचेति चतुर्भिः । पालकाः संतोऽपि बालिशा
अज्ञा यूयं प्रजाः स्रक्ष्यथ बतेति खेदे । बालका इति पाठे बालिशत्वे हेतुः ॥ ६ ॥ एक एव पुरुषो यस्मिंस्तद्राष्ट्रमदृष्ट्वेत्यनुषंगः । बिलं चेत्यादिद्वितीयांतानामविज्ञाय कथं
सर्गं करिष्यथेति तृतीयेनान्वयः ॥ ७ ॥ पंचपंचानां पंचविंशतेरद्भुतं गृहं क्षौरपव्यं क्षुरैः पविभिर्वज्रैश्च निर्मितमिवातितीक्ष्णं दृढं चेत्यर्थः । स्वयं स्वतंत्रम् । भ्रमिं भ्रमणस्वभा

ददावित्येतदेवापराधशेषस्यास्तित्वे लक्षणमिति ॥ ५२ ॥ ५३ ॥ तत्रैव यत्र दृष्ट इत्यर्थः ॥ ५४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ वाचःकूटैः प
परोक्षवादेनार्थांतरमिव प्रतीयमानैर्वचनैः । नाशितान् गृहस्थमार्गतश्चालितान् । अमुं नारदम् (१) स दक्षः । पांचजन्यां पंचजननाम्नः प्रजापतेः पुत्र्याम् ॥ १ ॥ प्रतीचीं पश्चिमाम् ॥ २ ॥ ३ ॥ तस्य तीर्थजल
स्योपस्पर्शनात्स्नानाचमनादितः उतात्यर्थमुग्रं तप इत्यग्रिमेणान्वयः । "उतात्यर्थविकल्पयोः । समुच्चये वितर्के च प्रश्ने च पादपूरणे" इति मेदिन्युक्तेः । पादपूरणार्थं वा उतेति । केचित्तु प्रोत्पन्नमतयोऽभवन्निति पेठुः ॥
॥ ४ ॥ ५ ॥ हे हर्यश्वा इति । हारिमविद्यातत्कार्यहर्त्तारमश्नुवते प्राप्नुवंतीति हर्यश्वा इत्यन्वर्थनामवंतो भवंतो भवंतु मा सूर्यभानुदेवदत्तवद्व्यर्थनामानः संत्विति भावः ॥ ६ ॥ ७ ॥ गृहं विष्णुं परमसाद्गुण्यप्रदत्वाद्भक्तानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं स्वपितुरादेशमविद्वांसो विपश्चितः ॥ अनुरूपमविज्ञाय अहो सर्गं करिष्यथ॥९॥श्रीशुक उवाच ॥ तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया॥ वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया॥१०॥ भूः क्षेत्रं जीवसंज्ञं यदनादि निजबंधनम् ॥ अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत्॥११॥एक एवेश्वरस्तुर्यो भगवान्स्वाश्रयः परः ॥ तमदृष्ट्वाऽभवं पुंसः किमसत्कर्मभिर्भवेत् ॥१२॥ पुमान्नैवेति यद्गत्वा बिलस्वर्गं गतो यथा ॥ प्रत्यग्धामाऽविद इह किमसत्कर्मभिर्भवेत् ॥ १३ ॥ नानारूपात्मनो बुद्धिः स्वैरिणीव गुणान्विता ॥ तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् ॥ १४ ॥ तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् ॥ तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १५ ॥

वम् ॥ ८ ॥ विपश्चितः सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनुरूपमविद्वांसोऽजानंतः पूर्वोक्तं चैकपुरुषं राष्ट्रमित्याद्यविज्ञायाहो कथं सर्गं कारिष्यथेत्यन्वयः ॥ ९ ॥ वाचःकूटं परोक्षवादेनार्थांतरमिव प्रतीयमानं वचनम् । औत्पत्तिकी सहजा मनीषा विचारशक्तिर्येस्यास्तया धिया स्वयमेव विममृशुर्विचारितवंतः ॥ १० ॥ नारदोक्तदशवाक्यानां तैर्विमृश्य निर्णीतानर्थानाह दशभिः । अदृष्ट्वांतं भुव इत्यत्र भूशब्दार्थमाह । भूरिति । क्षेत्रं तच्चात्र जीवसंज्ञं लिंगशरीरं यन्निजबंधनमात्मनो बंधकारणम् । अंतशब्दार्थमाह निर्वाणं नाशम् । असद्भिर्मोक्षानुपयोगिभिः कर्मभिः किं भवेन्न किमपि ॥ ११ ॥ एकपुरुषमित्यस्यार्थमाह । एक एवेति । तुर्यः सर्वसाक्षी । स्वाश्रयः स्वाधारः अभवं नित्यमुक्तम् असद्भिरीश्वरासमर्पितैः कर्मभिः ॥१२॥ बिलं चादृष्टनिर्गममित्यस्यार्थमाह । पुमान् यद्गत्वा प्राप्य बिलस्वर्गं पातालं गत इव नैवेति नावर्तते तत्प्रत्यग्धाम ज्योतीरूपं ब्रह्माविदोऽविदुषोऽसद्भिर्नैश्वरस्वर्गादिसाधनैः कर्मभिः ॥ १३ ॥ बहुरूपां स्त्रियमित्यस्यार्थमाह । नानारूपेति । स्वैरिणीव पुंश्चलीव विमोहकै रजआदिगुणैरन्विता । तन्निष्ठां तस्या अवसानं विवेकमगतस्याप्राप्तस्य । असद्भिरशांतैः ॥ १४ ॥ पुमांसं पुंश्चलीपतिमित्यस्यार्थमाह । तस्याः संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य । कुत्सिता भार्या

तानि तत्रैव स्थातुमर्हंतीति भावः । इत्यर्थ इति । क्षुरस्यातितीक्ष्णत्वाद्वज्रस्यातिदृढत्वादिति भावः ॥ ८ ॥ अनुरूपमनुकूलम् ॥ ९ ॥ वाचः कूटं वचनसमूहं वा गुह्यभाषात्मकत्वेन कैतवमिव प्रतीयमानं वाऽल्पमतिभिर्दुर्बोधं वा स्वयं परोपदेशं विना विचार्य निश्चितवंत इत्यर्थः । "कूटं तु कैतवं ज्ञेयं समूहो मेलनं तथा" इति तीर्थः ॥ १० ॥ बंधस्य जन्मादेः कारणं तस्य लिंगशरीरस्य नाशमदृष्ट्वाऽनेनोपायेनास्य नाशो भविष्यतीत्यज्ञात्वा ज्ञानेन तस्य नाशं वाऽज्ञात्वा मोक्षानुपयोगिभिरसत्कर्मभिरात्मविवेकाजनकैः कर्मभिः सर्जनादिभिरवास्तवैः कर्ममार्गैः किं तेन कर्मनिर्वाणार्थमेव यतध्वमिति भावः ॥ ११ ॥ पूर्ववाक्यस्थराष्ट्रपदेन जगद्विक्षितं तथा सति तत्र जगतीश्वरो नियंतृत्वेन स्थित इत्यर्थः । कर्मभिर्यागादिभिः । किं नित्यं फलं स्यान्नेत्यर्थः । तुर्यः विश्वतैजसप्राज्ञेभ्यो भिन्नः । यद्वा न भवो भक्तानां येन स तम् । अदृष्ट्वा भजनैरप्रत्यक्षीकृत्य तेन तमेव भजतेति भावः ॥ १२ ॥ यद्वा—प्रतीचो भगवतो धाम वैकुंठं गत्वा प्राप्य न पुनरेति । पातालं गतो यथा तत्रैवासज्य तिष्ठतीत्यर्थः । तेन वैकुंठप्राप्तये यतध्वमिति भावः ॥ १३ ॥ स्वैरिणीव कुविषयोन्मुखी न तु कृष्णविषयोन्मुखी गुणाः सौन्दर्यवैदग्ध्यादयः पांडित्यादयश्च तैरन्विता तन्निष्ठां भद्राभद्रप्रवृत्तिमगतस्याजानतोऽविचारयत इत्यर्थः । अतो विवेकेन बुद्धिं कृष्णोन्मुखीं कुरुतेति भावः ॥ १४ ॥ भ्रंशितैश्वर्यमित्यनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृष्टयप्ययकरीं मायां वेलाकूलांतवेगिताम् ॥ मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् ॥ १६ ॥ पंचविंशतितत्त्वानां पुरुषोऽद्भुतदर्शनः ॥
अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १७ ॥ ऐश्वरं शास्त्रमुत्सृज्य बंधमोक्षानुदर्शनम् ॥ विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् ॥ १८ ॥

यस्य तद्वत् । तस्या गतीः सुखदुःखलक्षणाः संसरंतं गच्छंतं जीवमबुधस्याजानतः । असद्भिर्बुद्ध्यविवेकप्रातैः ॥ १५ ॥ नदीमुभयतोवाहामित्यस्यार्थमाह । सृष्टयप्ययौ करोतीत्युभयतः प्रवाहो दर्शितः । वेलाकूलं प्रवाहपतितानां निर्गमस्थानं तपोविद्यादि तस्यांते समीपे वेगितां निर्गमप्रतिबंधाय क्रोधाहंकारादिभिः कृतवेगां मत्तस्य तद्वेगेन विवशस्यात एव तां तथाभूतामविज्ञस्याविचारयतः । असद्भिर्मायिकैः । यद्वा वेलाकूलं समुद्रस्य व्यवहारस्थानं तस्य समीपे समुद्रवृद्धिह्रासाभ्यां यथोभयतोंतर्बहिःकृतवेगा नदी भवत्येवं समुद्रतुल्यस्यात्मनो व्यवहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः । वेगिनीमिति पाठे वेगवतीम् ॥ १६ ॥ पंचपंचेत्यस्यार्थमाह । पंचविंशतितत्त्वानां पुरुषोंतर्यामी । अद्भुतदर्शन आश्चर्यरूप आश्रयः अध्यात्मं कार्यकारणसंघाताधिष्ठातारं तमबुधस्य । असद्भिर्मिथ्यास्वातंत्र्यकृतैः ॥ १७ ॥ क्वचिद्धंसमित्यस्यार्थमाह । ऐश्वरमीश्वरप्रतिपादकं विविक्तं पदं चिज्जडरूपं वस्तु येनेति हंसपदव्याख्यानम् । बंधमोक्षावनुदर्शयतीति तथा । अनेन चित्राः कथा यस्येति व्याख्यातम् । तदुत्सृज्यानभ्यस्य

जीवस्य स्वज्ञानादिस्वसामर्थ्यं दर्शितमिति संदर्भः । ऐश्वर्यं भगवज्ज्ञानादिलक्षणं शमदमादिलक्षणं वाऽत एव संसरंतं सुखदुःखे भुंजानं तद्गतीः स्वर्गनरकादिलक्षणाः । बुद्ध्यविवेकेन प्राप्तैस्तीर्थस्नानादिलक्ष गै भगवदुद्देशे नाप्रसक्तैः किं दुःखनिवृत्तिः स्यान्नेत्यर्थः । तेनात्मानमात्मनैवोद्धरतेति भावः ॥ १५ ॥ सृष्टिकाले पूर्वपूर्वतस्तत्त्वानि निःसरंति अप्ययकाले उत्तरोत्तरतः पूर्वपूर्वं प्रविशंतीत्युभयतः प्रवाहो दर्शितः वेलाकूलस्यांतः समीपं 'वेला स्यात्तीरनीरयोः' इत्यभिधानात् । अत एव विवशत्वादेव । वेलाशब्दस्यार्थांतरं गृहीत्वाह-यद्वेति । "वेला काले च सीमायामब्धेः कूलविकारयोः" इति मेदिनी । इत्यर्थ इति व्याख्या तेन लौकिकप्रतिष्ठादिकमपि परित्यज्य पारं व्रजथेति भावः ॥ १६ ॥ पुरुषो विष्णुः । अद्भुतदर्शन इति । भक्ता हि स्वचित्तादीनि पञ्चविंशतितत्त्वानि विष्णावेवार्पयंति तानि च विष्णुगतानि भूत्वा निर्मलान्यप्रकृतानि नित्यानि प्रतिबिंबतां परित्यज्य विष्णुरूपदर्शनधर्माण्येव भवंतीति विष्णुरूपदर्शनस्याद्भुतत्वम् अन्यदर्शनगतं सुखादिकं तु यथास्थितरूपं यत्तत्प्रतिबिंबमेव भवेन्न तु दर्शनगतनैर्मल्यग्राहीत्यर्थः । तं पुरुषं विष्णुमध्यात्मे आत्मन्येव वर्त्तमानमबुधस्य सेव्यत्वेनाजानतः तस्माद्देहात्मानौ हरये समर्पयतेति भावः ॥ १७ ॥ ऐश्वरं श्रीमन्महाभारतादिशास्त्रं श्रीवेदचतुष्कञ्च "सर्वे वेदा यत्पदमामनंति" इति श्रुतेः "वेदैश्च सर्वैरहमेव वेद्यः" इति स्मृतेश्च विविक्तं सर्वतः सारभूतं परमात्मवस्तु पद्यते प्राप्नोत्यनेनेति विविक्तपदं विविक्तानि विचारयुक्तानि पदानि सुप्तिङंतानि यत्रेति वाऽनेन मनुष्यवाङ्निर्मितसुप्तिङंतपदवार्जितस्य भगवत्प्रतिपादकस्यापि ग्रंथस्य शास्त्रत्वं नास्ति तत्रास्था न कार्येति द्योतितम् । यत्तु "स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि । स्तुत्वा" इति वक्ष्यत्येकादशे भगवांस्तत्स्तुतिविषयमेव न तु विचारश्रवणादिविषयम् । यद्वा-प्राकृतैः स्वाभाविकैः पुरुषसूक्तादिभिरित्यर्थः । तदुक्तं संहितायाम् "पुमान्न प्राकृतं शास्त्रमापद्यपि कदाचन । शृणुयाच्छृणुयाच्चार्षं विप्रादेव न चान्यतः ॥ प्राकृतश्रवणं व्यर्थं न पुण्यं तेन जायते । प्रत्यवायावहं किं तु केवलं स्याद्द्विजन्मनाम् ॥" इति वारतांतविना । आर्षश्रवणफलं तु हरिवंशांते वैशंपायनेनाप्युक्तम् "नरमेधाश्वमेधाभ्यां यत्फलं प्राप्यते नरैः । तत्फलं लभते नूनं पुराणश्रवणाद्धरेः ॥" "ब्रह्महा भ्रूणहा गोघ्नः सुरापो गुरुतल्पगः । सकृत्पुराणश्रवणात्पूतो भवति नान्यथा ॥" इत्यलं प्रसक्तानुप्रसक्त्येति प्रकृतमनुसरामः— एतादृशं शास्त्रमज्ञायाज्ञात्वाऽसत्कर्मभिर्बौद्धादिशास्त्रश्रवणाध्ययनादिभिर्बहिर्मुखैर्वेदविरुद्धैः किं ज्ञानलक्षणं फलं स्यान्नेत्यर्थः । तथा च वेदाविरुद्धार्षशास्त्रोक्तरीत्यैश्वरं भजतेति भावः । वेदाविरुद्धेत्युक्त्या "बृहस्पतिर्हि शुक्रो भूत्वेन्द्रस्याभयायासुरेभ्यः क्षयायेमामविद्यामसृजत्" इत्यादिमैत्रायणीयश्रुतेर्बृहस्पतिप्रणीतपाखंडशास्त्रस्यार्षत्वेऽपि वेदविरुद्धत्वादनादेयतोक्तेति । यद्वाऽसत्कर्मभिरविद्यमानसूत्रकार्यैः शास्त्राभासैः "अपदं न प्रयुंजीत" इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् ॥ स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भवेत् ॥ १९ ॥ शास्त्रस्य पितुरादेशं यो न वेद निवर्तकम् ॥ कथं तदनुरूपाय गुणविश्रंभ्युपक्रमेत् ॥२०॥ इति व्यवसिता राजन्हर्यश्वा एकचेतसः ॥ प्रययुस्तं परिक्रम्य पंथानमनिवर्तनम् ॥२१॥ स्वरब्रह्मणि निर्भातहृषीकेशपदांबुजे ॥ अखंडं चित्तमावेश्य लोकाननुचरन्मुनिः ॥२२॥ नाशं निशम्य पुत्राणां नारदाच्छीलशालिनाम् ॥ अन्वतप्यत कः शोचन् सुप्रजास्त्वं शुचां पदम् ॥ २३ ॥

अज्ञायाविदुषः । असद्भिर्बहिर्मुखैः ॥ १८ ॥ क्षौरपव्यमित्यस्यार्थमाह । कालचक्रमिति । भ्रमिर्भ्रमणात्मकम् । तीक्ष्णमिति निष्कर्षयदिति च क्षौरपव्यपदं व्याख्यातम् । तदबुधस्यात एव फलस्य नित्यबुद्ध्या काम्यकर्मानुष्ठाने वैगुण्यबाहुल्यादसद्भिः ॥ १९ ॥ स्वपितुरादेशमित्यस्यार्थमाह शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः । तदनुरूपाय निवृत्त्यनुरूपाय निवृत्तकर्मादेशं यो न वेद स कथं गुणावश्रंभी गुणमयप्रवृत्तिमार्गविश्वासवान्सन्नुपक्रमेत्सृष्ट्यादौ प्रवर्तेत । "मोक्षेशब्रह्मबुद्धीनां जीवमायांतरात्मनाम् ॥ शास्त्रकालोपदेशानामज्ञाने किमु कर्मभिः ॥" इति । वाचःकूटसंग्रहश्लोकः ॥ २० ॥ इति व्यवसिता एवं निश्चितवंतः । एकचेतस ऐकमत्ययुक्तः । तं नारदं प्रदक्षिणीकृत्यापुनरावृत्तिमार्गं प्रययुः ॥ २१ ॥ निर्भातः साक्षात्कृतो यो हृषीकेशस्तस्य पदांबुजे । अनुचरदन्वचरदित्यर्थः ॥ २२ ॥ नाशमदर्शनं स्वधर्मभ्रंशं वा शीलेन शालंते शोभंते इति तथा तेषाम् । को दक्षः । सुप्रजास्त्वं सत्पुत्रवत्त्वं शुचां शोकानां स्थानम् ॥ २३ ॥

श्रुतेः पदरहितैर्न किमपि शुभं भवतीत्यर्थः ॥ १८ ॥ क्षुरपविम्यामिव निर्वृत्तमिति क्षौरपव्यं भयप्रदत्वात्क्षौरपव्यं तीव्रत्वात्तीक्ष्णमिति तेन श्वः परश्वो वा मरिष्यथ किमिति हरिं न भजथेति भावः ॥ १९ ॥ न ह्याधानकर्त्तैव पिता किं तु शास्त्रमेव तस्य पितुरादेशो हि निवर्त्तको न तु प्रवर्त्तकोऽतो यद्यादेशं निवर्तकं न वेद तदा तदनुरूपायादेशानुरूपं कर्तुं कथमुपक्रमेत यतोऽयं गुणे प्रवृत्तिमार्गे एव विश्रंभी अयमेवादेश इति विश्वासवान् । अतः शास्त्रस्य शास्त्रानुयायिनः पितुश्च निवृत्तिधर्मे याऽऽज्ञा सैव वास्तवी तामेव पालयतेति ध्वनिः । अतः शास्त्रतात्पर्यप्रतिकूलमादेष्टुर्दक्षस्य पितृत्वाभावात्तदाज्ञाया अपालने वो नास्ति दोष इत्यनुध्वनिः । तस्मान्मत्त एव विष्णोर्मंत्रं गृहीत्वा क्वचिदेकांते उपविश्य तं विष्णुमेव भजतेति सर्वानुध्वनिः । तीर्थस्तु-'मातेव रक्षति पितेव हिते नियुंक्ते' इत्यादिवचनात्पितृवद्धितोपदेष्टृत्वात्पितृशब्देन शास्त्रमेव लक्ष्यते 'प्रातरुत्थायाथ संध्यामुपासीत' 'कलंजं न भक्षयेत्' इत्यादिश्रुतेरित्याह । मोक्षादयो दशार्थाः क्रमेण कूटसंग्रहे उक्ताः ॥ २० ॥ इत्येवं विशेषेणावसितं निश्चितं यैस्ते । प्रदक्षिणीकृत्येत्युपलक्षणं गुरुकरणे चरणामृतग्रहणदंडवत्प्रणत्यादेः अनिवर्त्तनं संन्यासानंतरमाश्रमांतराभावादनिवर्त्तकं संन्यासमित्यर्थः । मोक्षं वा "न स पुनरावर्त्तते" इति श्रुतेः ॥ २१ ॥ हंतहंतैतावंतो जीवा नरकादुद्धृतास्तत्प्रभोर्यश उपवीणयामीति नारदस्य समुद्रे निमज्जनमाह स्वराः षड्जादय एव ब्रह्म तत्र निर्भातस्य लीलागानेन साक्षात्कृतस्य हृषीकेशस्य सर्वेन्द्रियाकर्षकस्य कृष्णस्य चरणकमले । संदर्भस्तु-नारदस्य च चेष्टेयं सर्वतदुन्मुखीकरणेच्छामयेन श्रीभगवदनुरागेणैवेत्याह-स्वरब्रह्मणीति । उत्तमस्वरजातिस्वभावोयं यः सामान्यतः स्वस्वोत्कर्षविषयं स्मारयति विशेषतो भक्तानां भगवत्तत्त्वमित्यनुभवसिद्धम् । इत्यर्थ इति । अनुचरन्निहाडागमाभावस्त्वार्ष इति भावः ॥ २२ ॥ अदर्शनं पुनर्गृहागमनाभावात् । स्वस्यादर्शनेऽप्यन्येषां तद्दर्शनस्य सत्त्वादाह—स्वधर्म्माद् गृहस्थधर्म्माद्भ्रंशं पतनं वेति । गृहस्थानां मते विरक्ततैव नाश इति केचित् । अन्वतप्यत हंतहंत तादृशा मे पुत्रा नारदेन भ्रंशिता इति विषसाद । सुप्रजास्त्वमंगिरसे

॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स भूयः पांचजन्यायामजेन परिसांत्वितः ॥ पुत्रानजनयद्दक्षः शबलाश्वान्सहस्रशः ॥२४॥ तेऽपि पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः ॥ नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः ॥२५॥ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः ॥ जपंतो ब्रह्म परमं तेपुस्तत्र महत्तपः ॥२६॥ अब्भक्षाः कतिचिन्मासान्कतिचिद्वायुभोजनाः ॥ आराधयन्मंत्रमिममभ्यस्यंत इडस्पतिम् ॥२७॥ ॐ नमो नारायणाय पुरुषाय महात्मने ॥ विशुद्धसत्त्वधिष्ण्याय महाहंसाय धीमहि ॥ २८ ॥ इति तानपि राजेंद्र प्रतिसर्गधियो मुनिः ॥ उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत् ॥ २९ ॥ दाक्षायणाः संशृणुत गदतो निगमं मम ॥ अन्विच्छतानुपदवीं भ्रातॄणां भ्रातृवत्सलाः ॥ ३० ॥ भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् ॥ स पुण्यबंधुः पुरुषो मरुद्भिः सह मोदते ॥ ३१ ॥ एतावदुक्त्वा प्रययौ नारदोऽमोघदर्शनः ॥ तेऽपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ॥ ३२ ॥

अजेन ब्रह्मणा । सहस्रशः सहस्रसंख्यान् ॥ २४ ॥ २५ ॥ परमं ब्रह्म प्रणवं वक्ष्यमाणमंत्रं वा ॥ २६ ॥ इडस्पतिं वाचां मंत्राणां पतिं विष्णुमाराधयामासुः ॥ ॥ २७ ॥ विशुद्धसत्त्वाश्रयाय परमहंसाय नमो धीमहि॥२८॥ प्रतिसर्गे धीर्येषां तान् । वाचः कूटान्यदृष्टांतं भुव इत्यादीनि पूर्वोक्तानि प्राह ॥२९ ॥ हे दाक्षायणाः संशृणुतेत्यादि पुनरन्यदपि प्राह । निगममुपदेशम् अन्विच्छतावलोकयत ॥३०॥ प्रायणं प्रकृष्टं गमनम् । पुण्यमेव बंधुर्यस्य मरुद्भिर्भ्रातृवत्सलैर्देवैः॥ ३१ ॥अमोघं दर्शनं

यो अस्त्विति वैदिकप्रयोगानुकारि प्रयोग इति । शुचां पदं वियोगे दुःखप्रदत्वादिति भावः ॥ २३ ॥ सहस्रिणः सहस्रं संख्या येषां ते तथा पंचजनस्यापत्यं स्त्री पांचजन्या अपत्ये ण्यप्रत्ययः । शेन कल्याणेन बलते आच्छादयति भक्तजनानिति शबलो विष्णुस्तमश्नुवत इति शबलाश्वास्तान् । नारदोपदेशेन तन्नाम्नोप्यन्वर्थतैव भविष्यतीति ज्ञेयम् ॥ २४ ॥ तेऽपि । शबलाश्वा अपि । स्वपूर्वजाः स्वज्येष्ठभ्रातरः ॥ २५॥ 'ओमित्येकाक्षरं ब्रह्म' इति प्रणवे केवलब्रह्मत्वस्यैव भगवता प्रोक्तत्वादाह । वक्ष्यमाणम् 'ओं नमो भगवते' इत्यादिकं मंत्रं चेति ॥ २६ ॥ इडानां वाचामर्थान्मंत्राणां पतिं स्वामिनम् । इलाभिर्मंत्ररूपाभिर्वाग्भिः पाति जपतो भक्तानिति वेडस्पतिस्तम् । इडाया इडसादेशः पृषोदरादित्वात् । डलयोरैक्यादिडैलाशब्दौ पर्यायौ 'इडा भूर्धेनुवाक्षु च' इति कोशात् ॥ २७ ॥ पुरुषाय संसाररोगनाशकाय । 'पुरु रोगे च प्रचुरे' इति कोशात् । पुरुं स्यति नाशयतीति तथा । महात्मने ईश्वराय ॥ २८ ॥ प्रतिसर्गे प्रजासृष्टौ 'दक्षाद्यै रचितः सर्गः प्रतिसर्ग उदीरितः' इति कालिकापुराणात् ॥ २९ ॥ हे दाक्षायणा इति यथा पूर्वे दक्षपुत्रा आसंस्तथैव भवद्भिर्भवितव्यमित्याशयः । भ्रातृवत्सला इति । तथाकरण एव भ्रातृवत्सलत्वं स्यादिति भावः ॥ ३० ॥ मरुद्भिरित्ययं दृष्टांत एवोक्तः यूयं तु वैकुंठगामिभिरग्रजैः सह मोदिष्यध्वे इति भावः ॥ ३१ ॥ मारिषेति । तेषां तद्गतिं श्रुत्वाहो धन्यास्तेऽहं तु द्विजकोपेरितसर्पदंशमृतेर्नरकादिकमेव यास्यामीति शोचंतं श्रीशुक आह—मारिषेति । मां लक्ष्मीमियर्ति प्राप्नोतीति मारिर्विष्णुस्तं सनति भजते इति मारिषस्तत्संबुद्धौ तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सध्रीचीनं प्रतीचीनं परस्यानुपथं गताः ॥ नाद्यापि ते निवर्तंते पश्चिमा यामिनीरिव ॥ ३३ ॥ एतस्मिन्काल उत्पातान्बहून्पश्यन्प्रजापतिः ॥ पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ॥ ३४ ॥ चुक्रोध नारदायाऽसौ पुत्रशोकविमूर्च्छितः ॥ देवर्षिमुपलभ्याऽऽह रोषाद्विस्फुरिताधरः ॥ ३५ ॥ दक्ष उवाच ॥ अहो असाधो साधूनां साधुलिंगेन नस्त्वया ॥ असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ॥ ३६ ॥ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ॥ विघातः श्रेयसः पाप लोकयोरुभयोः कृतः ॥ ३७ ॥

यस्य । हे मारिष आर्य ॥ ३२ ॥ सध्रीचीनं समीचीनम् । प्रतीचीनं प्रत्यग्वृत्तिलभ्यम् । परस्य ब्रह्मणः । अनुपथमनुगुणं पंथानम् । पश्चिमा यामिनीर्गता रात्रय इव ॥ ३३ ॥ ३४ ॥ पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोऽपि प्रायशो विरक्तः स्यादिति तदनुग्रहार्थं देवर्षिस्तत्पार्श्वे गतस्तदा तमुलभ्य दक्ष आह ॥ ३५ ॥ साधोरिव लिंगं वेषो यस्य तेन त्वया नोऽस्मदीयानामर्भकाणामसाध्वकारि कृतम् । तदेवाह । साधूनां स्वधर्मे प्रवृत्तानां भिक्षोर्यो मार्गः स प्रदर्शितः ॥ ३६ ॥ ननु संन्यासिनो मार्गः साधुरेव मोक्षहेतुत्वात् । सत्यम् । ऋणत्रयापाकरणं विना तु महाननर्थ एवेत्याह । ऋणैरिति । "जायमानो वै ब्राह्मणस्त्रिभिर्वा ऋणवान् जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वासी" ति श्रुतेः । ऋणैरमुक्तानां न मीमांसितानि विचारितानि कर्माणि यैः तेषां तावदृणविमोको नास्ति । तदुत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणाद्विमुक्तिश्च नास्ति । अतो हे पाप विषयभोगत्यागादिह लोके श्रेयसो विघातः कृतः । मोक्षानधिकारित्वाच्च परलोकेऽपि श्रेयसो विघातः कृत इत्यर्थः । तथा च मनुः—"ऋणानि त्रीण्य

त्वमप्यार्योसीति भावः । 'मारिषः शाकभिद्यार्ये' इति मेदिनी ॥ ३२ ॥ परस्य परमेश्वरस्य ॥ ३३ ॥ प्रजापतिर्दक्षः ॥ ३४ ॥ देवर्षिमुपलभ्येति । स्वायंभुवस्य मनोर्वंश्याः प्रियव्रतोत्तानपादध्रुवादयः सर्वे मद्दूरेव भगवतात्मसात्कृताः महाकर्मजडः प्राचीनबर्हिरप्युद्धृतस्तस्य पुत्रा दश प्रचेतसः पौत्रा दशसहस्राणि हर्यश्वाः संहस्रं शबलाश्वोश्चोत्तीर्णाः कथमेकस्तन्मध्यवर्त्ती दक्ष एव गृहस्थकूपे खेलतीति तमप्युद्दिधीर्षामीति विमृश्य सांप्रतं च पुत्राणां पारमहंस्यनिष्ठां श्रुत्वा स्वयमेव शोचन्दक्षः प्रायो गृहे निर्विण्ण एव वर्तते तत्तमनुगृहीतुमयमेव समयः साधुः। यद्यपि सांप्रतमपि स मां नान्विष्यति तदप्यहमेव तस्य गृहं यामीति विचार्य्य तत्रागतवंतं तं नारदमुपलभ्याह ॥ ३५ ॥ साधोरिव लिंगं जपयज्ञोपवीतशमदमादिर्यस्य तेन साधुलिंगेन महादांभिकेनेत्यर्थः । साधूनामस्माकमिति गौरवेण बहुवचनं मम साधोस्तव वैरं स्वप्नेप्यकुर्वतस्त्वयाऽसाधु अभद्रमकारी त्येतावता कालेन तव महदपराधो जात इति भावः । ननु किमसाध्वकारीति तत्राह—अर्भकाणां मम बालकानां गार्हस्थ्यभोगमसहमानेन मत्सरेण च या भिक्षोर्भिक्षुकलोकस्य । अर्भकाणामित्यर्भकत्वादेव ते सरलास्तव कपटिनोऽप्युपदेशं जगृहुरिति भावः । अत्र न विद्यते साधुर्यतः हे तथाभूत साधूनि लिंगानि चिह्नानि यस्य तेन न विद्यते साधुर्यतस्तथाभूतं यथा स्यात्तथा दर्शित इति । सरस्वत्यभिप्रेतोप्यर्थो ज्ञेयः । एवमग्रिमेषु श्लोकेष्वपि ग्रंथविस्तरभयान्न विवृतम् । दक्षाभिप्रायेणासाधो इति । अवैरिणि मयि वैरकारित्वेन त्वमसाधुरिति भावः ॥ ३६ ॥ अत्राक्षिपति—नन्विति । त्रिभिर्ऋणैर्देवर्षिपितृसंबंधिभिः । ऋषिभ्य इति त्रयः पंचमीबहुवचनांताः । कर्मविचारो हि शास्त्राध्ययनेन भवति तेन चर्षिऋणनिवृत्तिः स्यात् । तदुत्तरकाले शास्त्राध्ययनोत्तरकाले । भावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं त्वं निरनुक्रोशो बालानां मतिभिद्धरेः ॥ पार्षदमध्ये चरसि यशोहा निरपत्रपः ॥ ३८ ॥
ननु भागवता नित्यं भूतानुग्रहकातराः ॥ ऋते त्वां सौहृदघ्नं वै वैरंकरमवैरिणाम् ॥ ३९ ॥

पाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥ " इति ॥ ३७ ॥ बालानां मतिं पुत्रादिविषयां भिनत्तीति तथा । एवं निरनुक्रोशो निर्घृणो हरेर्यशोनाशकः संस्तत्पार्षदानां मध्ये कथं चरसि ॥ ३८ ॥ निर्लज्जत्वमेवाह । नन्विति । ननु त्वामृते भागवताः सर्वे भूतानुग्रहपरवशास्त्वं तु

त्वाच्च । अतः ऋणत्रययुक्तानां भ्रंशात् हे पाप विश्वासघातित्वेन मित्रदोहित्वादिति भावः । मित्रद्रोहस्य महापातकत्वे भोजराजकथानुसंधेया सा चेत्थम्—कदाचिद्भोजनृपतये तदाज्ञया भानुमत्यास्तद्भार्याया मूर्त्तिं लिखित्वा कालिदासो दर्शयामास स च तां जघनदेशे तिलकांकितां दृष्ट्वा ' अनेन मद्भार्या रमिता ' इति शंकितो भूत्वा तं देशान्निःसारयामास । तदनु कदाचिन्मृगयां गतो नृपो विषमवने भयार्त्तः सैन्यपरिच्युतः क्वचिदारूढवानरवृक्षमारुरोह । वानरोऽपि तेन मैत्रीं कृतवान्स च विश्वस्य तत्रैव निशि शिश्ये । तदा च कश्चित्कपिविरोधी सिंहस्तत्रागत्य ' इमं मे देहि वैरनिर्यातनार्थम् ' इत्यूचे । स च शरणापन्नत्यागे दोषं दृष्ट्वा न ददौ । ततश्च कपिरपि सिंहाय 'अहं त्वया न प्रक्षेप्यः' इत्युक्त्वा शिश्ये । स एव राजानमुपेत्याह ' देहि मे इमं कपिं नो चेत्त्वां भक्षयिष्याम्यवतीर्णम् ' इति श्रुत्वा राजा कपिं प्रक्षिप्तवान् स च पतन्कांचिद् वृक्षशाखामालंब्य तत्रैवागत्य राजानम् ' कुष्ठी भव ' इति शशाप । पुना राज्ञा प्रसादितः ' वि, से, मे, रा ' इति वर्णचतुष्टयार्थश्रवणेन नीरोगो भविष्यसीत्युवाच । ततो नृपः सेनया गृहमागत्य वृत्तं मंत्रिभ्य उक्त्वा विद्वत्समाजमक्षरचतुष्टयार्थश्रवणार्थं चकार । तत्र च निष्कासितः कालिदासः स्त्रीवेषेण कस्यचिद्विदुषो गृहे धारायामुवास ततस्तद्वृत्तमाकर्ण्य स च पितृभूतं पंडितमित्थमुवाच 'मत्पुत्री भवदभिलाषितवर्णचतुष्टयार्थं जानाति तामाहूय पृच्छ' इति नृपाय कथय स च तथा कृत्वा स्त्रीवेषिणं तं नृपसदसि निनाय स च स्त्रीवेषी कालिदासः पृथगर्थं प्रत्येकवर्णस्योक्तवान् । तथाहि—"विश्वासप्रतिपन्नेषु ये च विश्वासघातिनः । ते यांति नरकं घोरं ताड्यमाना यमानुगैः ॥ (१) । सेतुबंधे समुद्रे च गंगासागरसंगमे । स्नात्वा पापविमुक्तः स्यान्मित्रद्रोहकरं विना ॥ (२) । मेरुतुल्यान्महापापात्कृत्वा संगं सतां नरः । मुच्यते न हि संदेहो मित्रद्रोही न मुच्यते ॥ (३) । राजन्भोः श्रृणु मद्वाक्यं यदि कल्याणमिच्छसि । देहि दानं सुविप्रेभ्यस्ततः श्रेयो भविष्यति ॥ (४) " इत्याकर्ण्य भोजराजः स्वस्थो भूत्वा स्त्रीवेषं कालिदासमुवाच " गृहे वससि भो देवि वनं नैव तु गच्छसि । पञ्चास्यकपिमद्वृत्तं कथं जानासि सुंदरि ॥ " (५) । स चो वाच " देवद्विजप्रसादेन श्रीमत्कालीप्रसादतः । सर्वं जानामि भो राजन्भानुमत्यास्तिलं यथा " (६) ॥ ततो नृपस्तं कालिदासं ज्ञात्वा प्रसाद्यानयामासेति बृहद्भोजप्रबंधे । प्रकृतमनुसरामः—इत्यर्थ इति । ऐहिकपारलौकिकौ चार्थौ तेषां नाशिताविति भावः । अत्र प्रमाणमाह—तथा चेति । अपाकृत्य संशोध्य । मोक्षे प्रव्रज्यायाम् । ऋणानि अनपाकृत्याऽसंशोध्य प्रव्रज्यां कुर्वाणो नरके विशतीत्यर्थः ॥३७॥ त्वां दुष्टं किं ब्रवीमि त्वया सेवकेन भगवतोऽपि दुर्यशोऽजनिष्टेत्याह—एवमिति । निरनुक्रोशो निर्दयः । मतिं शास्त्रविहितकर्मनिष्ठां बुद्धिं भिनत्तीति तथा। हरेर्यशोहा त्वमभूस्तेन हरावपि तवापराधः। पार्षदमध्ये इति । वैष्णवेष्वपीत्येवं मद्विधेषु महत्सु भगवति भागवतेषु च तवापराधो जातो दुर्वार एव विश्वस्तघातित्वादीनां दुष्कृतानाञ्च वार्त्ता दूरे एवेति भावः। वेदरूपभगवदाज्ञाविघातकारित्वात्तद्यशोहा चाहो कथं पार्षदमध्ये चरसीति निर्लज्जोऽयमिति भावः ॥३८॥ किञ्च—मत्संमुखमायातस्त्वं कीदृशं मुखं दर्शयितुमतो धिक् त्वां निर्लज्जमित्याह—नन्विति । आश्चर्ये संबोधने च नन्विति। ऋते त्वामिति।त्वं तु भूतमात्रद्रोहीति भावः । सौहृदघ्नमिति। सौहृदकारिणामप्यस्माकमिति भावः । इति भाव इति । वैरंकरमित्यस्माकं प्रकटमेव वैरं कृत्वाऽपि पुनः केन मुखेन प्रत्यक्षी भवसीति सत्यं निरपत्रप एवासि कति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेत्थं पुंसां विरागः स्यात्त्वया केवलिना मृषा ॥ मन्यसे यद्युपशमं स्नेहपाशनिकृंतनम् ॥ ४० ॥ नानुभूय न जानाति पुमान्विषयतीक्ष्णताम् ॥
निर्विद्येत स्वयं तस्मान्न तथा भिन्नधीः परैः ॥ ४१ ॥ यन्नस्त्वं कर्मसंधानां साधूनां गृहमेधिनाम् ॥ कृतवानसि दुर्मर्षं विप्रियं तव मर्षितम् ॥४२॥
तंतुकृंतन यन्नस्त्वमभद्रमचरः पुनः ॥ तस्माल्लोकेषु ते मूढ न भवेद्भ्रमतः पदम् ॥ ४३ ॥ श्रीशुक उवाच ॥ प्रतिजग्राह तद्बाढं नारदः साधुसंमतः ॥ एता
वान्साधुवादो हि तितिक्षेतेश्वरः स्वयम् ॥ ४४ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे दक्षचरिते नारदशापो नाम पंचमोऽध्यायः ॥ ५ ॥ छ ॥

भूतविप्रियं कुर्वन्कथं न लज्जस इति भावः ॥ ३९ ॥ ननु वैराग्याद्युपशमे उपशमाच्च भूतस्नेहपाशच्छेदनं भवति । न च विरक्तस्य ऋणत्रयापाकरणमावश्यकम् । "यदहरेव विरजेत्तदहरेव प्रव्रजेत् । यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादिश्रुतेः । अतो वैराग्योपदेशेन तेषां मयानुग्रह एव कृत इति चेत्तत्राह । नेति । यद्यपि त्वमेवं मन्यसे तथाऽपि मृषा केवलिना ज्ञानं विनाऽवधूतवेषेण त्वयेत्थं मतिचालने कृतेऽपि पुंसां विरागो नैव स्यात् । न च विरागं विनोपशमो न च तेन विना स्नेहपाशनिकृंतनमित्यर्थः ॥ ४० ॥ इत्थं विरागो न स्यादित्यत्र हेतुमाह । नानुभूयाननुभूय विषयाणां तीक्ष्णतां दुःखहेतुत्वं न जानाति । तस्माद्विषयानुभवेन तीक्ष्णत्वज्ञानात् कारणात्स्वयं यथा निर्विद्येत तथा भवादृशैः परैर्भिन्नधीर्न निर्विद्येत ॥ ४१ ॥ अतस्त्वयाऽस्माकमप्रियमेव कृतं तथापि वयं न कुर्म इत्याह । यदिति । कर्मसंधानां कर्ममर्यादानाम् । कर्तुमंधानामिति पाठे विप्रियं कर्तुमजानतामित्यर्थः । दुर्मर्षं दुःसहं यत्त्वं कृतवानसि तन्मर्षितं सोढम् ॥ ४२ ॥ तथापि तवाभद्रं भविष्यत्येवेत्याह तंतुकृंतन संतानच्छेदक । यद्यस्मादभद्रं पुत्राणां स्थानभ्रंशमचरस्तत्तस्मात्तव लोकेषु भ्रमतः पदं स्थानं न भवेदिति मृदुच्छलेन शापः ॥ ४३ ॥ बाढं तथेति स्वीकृतवान् । ईश्वरोऽपि प्रतिशप्तुं समर्थोऽपि तितिक्षेत सहेतेति यदेतावानेव ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे टीकायां पंचमोऽध्यायः ॥ ५ ॥

पुनरहं त्वां लज्जयामीत्याशयः ॥३९॥ अत्राक्षिपति—नन्विति । मत्प्रवर्त्तिताद्वैराग्यात् । तत्र स्नेहपाशनिकृंतनं तेषां वृत्तमेव । अद्यापि तव पितुरपि पार्श्वानागमनादेवानुमितं तत्कथं तेषां मोक्षेऽनधिकारः । विरक्तस्यर्णत्रयापाकरणमावश्यकं न चास्ति । इह श्रुतिं प्रमाणयति—यदहरिति । यदहो यस्मिन्दिने विरजेद्विरक्तो भवेत्तस्मिन्नेव दिने प्रव्रजेदित्यर्थः । यदि वेतरथा वैराग्यसद्भावे इत्यर्थः । अतो विरक्तस्यर्णापाकरणस्यानावश्यकत्वादेव । मयानुग्रह एव कृत इति चेन्न सत्यं महापुरुषाणां कृपया विरागः स्यादेव त्वया मृषा केवलिना ज्ञानशून्यावधूतेनाऽनन्यवैष्णवंमन्येन वा इत्थं मतिचालने कृतेऽपि सप्ताष्टवासरान् विरागो भवन्नपि नीतितो वास्तवो विरागः स्याद्यद्यपि त्वमुपशमं मन्यसे तदपि नैव स्यात्तव महापुरुषत्वाभावादिति भावः । इत्यर्थ इति । स्वतस्त्यक्तस्यैव स्नेहपाशनिकर्त्तकत्वादिति भावः ॥ ४० ॥ तदेवाह—नानुभूयाननुभूय अत्र नलोपनुडभावौ त्वार्षौ । नञर्थो नशब्दो वा । विश्वनाथः—तस्मात्त्वमनभिज्ञो राजमार्गं शृण्वित्याह—नेति । परैस्त्वादृशैर्भिन्नधीर्विदीर्णमतिः ॥ ४१ ॥ एवं त्वया यथा निर्हेतुकं वैरं कृतं तस्य प्रतिफलमहमपि तच्चतुर्गुणितं दातुं शक्नोम्येव तथापि न ददामीति पश्य गृहस्थानामप्यस्माकं तितिक्षामित्याह—यदिति। कर्मणि संधा मर्यादा येषां तेषाम् । चक्रवर्त्तिना तु—कर्त्ते कर्ममार्गे संधा येषां ते कर्त्तसंधास्तेषामिति व्याख्यातम् । साधून। सदाचारिणाम्।तव ज्ञानभक्तिमर्यादाभ्रष्टस्य परं विप्रियं कर्त्तुं चक्षुष्मतोऽसाधोः परमहंसाश्रमिणः क्षांतम् ॥ ४२ ॥ यद्यपि क्षांतं तथापीत्यर्थः । तंतुं संततिं कृंतति छिनत्तीति तंतुकृंतनस्तत्संबुद्धौ तथा अत्र मुमागमस्त्वार्षः । 'तंतुकृत्तनयानां त्वम्' इति तीर्थसंमतः पाठः 'तंतुः संतानसूत्रयोः' इति कोशात् । तंतुकृंतनो यथा तंतुसंशोधनार्थमितस्ततो भ्रमति तथा त्वमपि भ्रमणं कुरु नैकत्र ते स्थितिर्भूयादिति भावः ॥ ४३ ॥ प्रतिजग्राह बाढं तथेति स्वीचकार । साधूतां संमत इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयंभुवा ॥ षष्टिं संजनयामास दुहितॄः पितृवत्सलाः ॥ १ ॥ दश धर्माय कायेंदोर्द्विषट् त्रिणव दत्तवान् ॥ भूतांगिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः ॥ २ ॥ नामधेयान्यमूषां त्वं सापत्यानां च मे शृणु ॥ यासां प्रसूतिप्रसवैर्लोका आपूरितास्त्रयः ॥ ३ ॥ भानुर्लंबा ककुब्जामिर्विश्वा साध्या मरुत्वती ॥ वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुताञ्छृणु ॥ ४ ॥ भानोस्तु देवऋषभ इंद्रसेनस्ततो नृप ॥ विद्योत आसील्लंबायास्ततश्च स्तनयित्नवः ॥५॥ ककुभः संकटस्तस्य कीकटस्तनयो यतः ॥ भुवो दुर्गाणि जामेयः स्वर्गो नंदिस्ततोऽभवत् ॥ ६ ॥ विश्वेदेवास्तु विश्वाया अप्रजांस्तान्प्रचक्षते ॥ साध्यो गणस्तु साध्याया अर्थसिद्धिस्तु तत्सुतः ॥ ७ ॥ मरुत्वांश्च जयंतश्च मरुत्वत्यां बभूवतुः ॥ जयंतो वासुदेवांश उपेंद्र इति यं विदुः ॥ ८ ॥

षष्टे दक्षेण सृष्टायां कन्याषष्टयां प्रकीर्तिताः ॥ पृथग्वंशा यतो जातो विश्वरूपो दितेः सुतात् ॥ १ ॥ नारदात्पुत्राणां नाशमाशंकमानो दुहितॄर्जनयामास ॥ १ ॥ काय कश्यपाय द्विषट् द्विगुणाः षट् द्वादश यासु ताः । त्रयोदशेत्यर्थः । इंदोः सोमाय त्रिणव सप्तविंशतिं तार्क्ष्याय नामांतरं प्राप्ताय कश्यपायैव अपरा अवशिष्टाश्चतस्रः ॥ २ ॥ सापत्यानामपत्यसहितानाम् । मे मत्तः शृणु । प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ॥ ३ ॥ ४ ॥ ततो देवऋषभात् इंद्रसेनोऽभवत् ॥ ५ ॥ यतः कीकटाद्भुवो दुर्गाणि दुर्गाभिमानिनो देवाः । जामेयो जाम्याः पुत्रः स्वर्गस्ततः स्वर्गान्नंदिः पुत्रोऽभवत् ॥ ६ ॥ तत्सुतः साध्यानां सुतः ॥ ७ ॥ ८ ॥

साधव एवमेव सहंत इत्यर्थः । प्रसिद्धस्य साधुवादशब्दस्याप्येषैव निरुक्तिरित्याह—एतावानिति। ईश्वरः प्रतिशप्तुं समर्थोपि । ननु दक्षमनुगृहीतुमागतो दक्षेण बहुशस्तिरस्कृतस्तत्र तांस्तिरस्काराच्छ्रुत्वा नारदेन तत्समीपात्कथं नापसृतम् । उच्यते । नारदस्यायमभिप्रायः—क्रोधवशोऽयं बहुशस्तिरस्कारानपि करोतु शापं च ददातु ततश्च 'क्रोधस्यैतत्फलोदयात्' इत्युक्तेर्यदा क्रोधः शाम्येत् माञ्च प्रति तिरस्कारादिकमकुर्वाणः सर्वमेव सहमानमालोक्य हंतहंत भगवद्भक्तोयं तिरस्कृतः शप्तश्चेति वैकुंठगतानां सनकादीनामिवानुतापश्च यदा भविष्यति तदा भक्तिबीजवपनयोग्यक्षेत्रीभूतेऽस्मिन् शुद्धभक्तिबीजमुप्त्वा यामीति बुद्ध्या तावत्क्षणपर्य्यंतमपि स्थितं दक्षस्य तु तत्तद्दृष्ट्वा अहो चंद्रार्द्धमौलेरपराधविशेषप्राबल्यमिति स्मृत्वा ततोऽपसृत इति ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्टस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ ॥ कन्यानां षष्टिर्दशगुणिता षट् संख्या तस्यां यतः कन्यावंशे दितेः सुतात्त्वष्टुः (१) ततो नारदशापाद्यनंतरं पुत्रशोकेन निर्विण्णः पुनर्ब्रह्मवचनाद्गार्हस्थ्यं कुर्वन्नारदो मयि वैरं न त्यक्ष्यतीति मत्वा तस्मात्पुत्राणां नाशमाशंकमान इति पुत्रीरुत्पादयामास । नैष्ठिकोऽयं स्त्रीसंगाद्बिभेतीति भावः । प्राचेतसो दक्षः ॥ १ ॥ इत्यर्थ इति । द्वाभ्यां गुंण्यंते वर्ध्यंते इति द्विगुणास्ते षट् यासु त्रयोदशसंख्यासु ता द्विषट् । इह वैयधिकरण्ये मध्यपदलोपः । त्रयोदशसु द्वादशसंख्यायाः संभवादिति भावः । नन्वियं कल्पना कुतः कृता द्वादशैव ताः संलिखितिचेन्न । "ददौ स दश धर्माय कश्यपाय त्रयोदश । कालस्य नयनैर्युक्ताः सप्तविंशतिमिन्दवे ॥ " इति पुराणांतरोक्तेः । भूताय द्वे अंगिरसे द्वे कृशाश्वाय द्वे इति ज्ञेयम् । धर्मादयश्चैते ब्रह्मपुत्रदक्षजामातृभ्योऽन्ये ज्ञेया इति संदर्भः ॥ २ ॥ अमूषां षष्टिसंख्याकानाम् ॥ ३ ॥ सुतान् आसां पुत्रान् ॥ ४ ॥ नृपेति । नृपाणामवश्यं धर्मवंशः श्राव्य इति भावः । ततो विद्योतात् । स्तनयित्नवो मेघाभिमानिनो देवाः ॥ ५ ॥ तस्य संकटस्य । ततः स्वर्गाभिमानिनो देवात् ॥ ६ ॥ तान् विश्वान्देवान् । अप्रजान् संततिरहितान् ॥ ७ ॥ अस्योपेंद्रत्वं कल्पभेदाभिप्रायेण । चक्रवर्ती तु अदित्याः पुत्र उपेन्द्र इव जयंतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मौहूर्तिका देवगणा मुहूर्तायाश्च जज्ञिरे ॥ ये वै फलं प्रयच्छंति भूतानां स्वस्वकालजम् ॥ ९ ॥ संकल्पायाश्च संकल्पः कामः संकल्पजः स्मृतः ॥
वसवोऽष्टौ वसोः पुत्रास्तेषां नामानि मे शृणु ॥१०॥ द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ॥ द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥
॥ ११ ॥ प्राणस्योर्जस्वती भार्या सह आयुः पुरोजवः ॥ ध्रुवस्य भार्या धरणिरसूत विविधाः पुरः ॥ १२ ॥ अर्कस्य वासना भार्या पुत्रास्तर्षादयः
स्मृताः ॥ अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः ॥ १३ ॥ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः ॥ दोषस्य शर्वरीपुत्रः शिशुमारो हरेः
कला ॥ १४ ॥ वसोरांगिरसी पुत्रो विश्वकर्माऽऽकृतीपतिः ॥ ततो मनुश्चाक्षुषोऽभूद् विश्वे साध्या मनोः सुताः ॥ १५ ॥ विभावसोरसूतोषा व्युष्टं
रोचिषमातपम् ॥ पंचयामोऽथ भूतानि येन जाग्रति कर्मसु ॥ १६ ॥ सरूपाऽसूत भूतस्य भार्या रुद्रांश्च कोटिशः ॥ रैवतोऽजो भवो भीमो
वाम उग्रो वृषाकपिः ॥ १७ ॥ अजैकपादहिर्बुध्न्यो बहुरूपो महानिति ॥ रुद्रस्य पार्षदाश्चान्ये घोरा भूतविनायकाः ॥ १८ ॥

॥ ९ ॥ वसोर्वंशस्य भूयस्त्वादंते निर्देशः । मे मत्तः ॥ १० ॥ अभिमतिर्नाम पत्नी तस्या हर्षादयः पुत्राः ॥ ११ ॥ सहश्चायुश्च पुरोजवश्च पुत्राः । पुरः पुराणि ॥ १२ ॥ १३ ॥ स्कंदश्च कृत्तिकासुतोऽग्नेः पुत्रः षाण्मातुर इत्यग्निभूरिति च प्रसिद्धेः । ततः स्कंदात् विशाखादयोऽभवन् ॥ १४ ॥ आकृतीपतिः शिल्पाचार्यः । ततो विश्वकर्मणश्चाक्षुषो मनुरासीत् ॥ १५ ॥ विभावसोरुषा नाम भार्या । अथ आतपात्पंचयामो दिवसो जातः । अत एव रात्रि त्रियामा प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात् । येन दिवसेन ॥ १६ ॥ भूतस्य द्वे भार्ये तयोर्वंशमाह । सरूपेति ॥ १७ ॥ महानित्येवमेकादशरूपस्य रुद्रस्य पार्षदाः प्रेतादयोऽन्ये

ऽप्युपेन्द्रसंज्ञ इति व्याचख्यौ ॥ ८ ॥ मौहूर्त्तिका मुहूर्त्ताभिमानिनः ॥ ९ ॥ वसोर्वसुसंज्ञकन्यायाः ॥ १० ॥ हर्षाद्यभिमानिन एव हर्षादिपदैरुच्यंते । आदिना मोहादिग्रहः ॥ ११ ॥ ऊर्जस्वतीति सप्तम्यर्थे प्रथमा । ऊर्जस्वत्यां भार्यायां सहादयः पुत्राः पुराणि तदभिमानिदेवाः ॥ १२ ॥ इहोभयत्रादिपदगृहीतपुत्राः पुराणांतरादवसेयाः । अग्नेर्वसोर्धारानाम भार्या । तीर्थस्तु--वसोः पुत्रस्याग्नेर्धारा नाम स्वाहापरपर्याया भार्येति व्याचख्यौ ॥ १३ ॥ आदिपदगृहीता भारतादिभ्योऽवसेयाः । कृत्तिकानां धात्रीत्वेन तत्पुत्रत्वव्यवहारः । मुख्यतस्तु--सदाशिवपुत्र एव स इति विशेषतो वर्णितं महाभारते शार्वरीसंज्ञभार्यायां जातः पुत्रः शिशुमारसंज्ञोऽभूत् । हरेर्विष्णोः कला उपासनास्थानं च तद्विश्वनाभिमतिवर्त्त्ये विष्णोरित्युक्तेर्य एतदुहैव भगवतो मायामयं रूपमित्युक्तेश्च ॥ १४ ॥ आंगिरस्यां जातः पुत्रः अयं ध्रुववंशे जातोपि दक्षवशिष्ठादिवत्पुनरत्र जात इति गम्यते । एवं विश्वे साध्या अपि धर्मपुत्राः पुनस्तत्प्रपौत्रभावञ्च प्राप्ता इति ज्ञेयम् ॥ १५ ॥ अत एव दिवसस्य पञ्चयामत्वादेव । प्रत्येकं द्विद्विमुहूर्त्तात्मकयोः प्रत्यूषप्रदोषयोर्दिवसस्यैवाद्यंतावयवत्वम् । यत्तु 'प्रदोषो रजनीमुखम्' इति रात्र्यवयवत्वमुक्तं तन्नावयवाभिप्रायं किन्त्वाद्याभिप्रायमिति । अथ कार्त्स्न्येन येन पञ्चयामेन भूतानि जीवाः ॥ १६ ॥ द्वे सरूपासूतेत्यर्थः । कोटिषु मध्ये एकादश रैवतादयः प्रधानाः ॥ १७ ॥ अन्यस्यां भूतायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ ॥ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती ॥ १९ ॥ कृशाश्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् ॥ धिषणायां वेदशिरो देवलं वयुनं मनुम् ॥ २० ॥ तार्क्ष्यस्य विनता कद्रूः पतंगी यामिनी इति ॥ पतंग्यसूत पतगान्यामिनी शलभानथ ॥ २१ ॥ सुपर्णाऽसूत गरुडं साक्षाद्यज्ञेशवाहनम् ॥ सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः ॥ २२ ॥ कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु भारत ॥ दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः ॥ २३ ॥ पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः ॥ शृणु नामानि लोकानां मातॄणां शंकराणि च ॥ ॥ २४ ॥ अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ॥ अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला ॥ २५ ॥ मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः ॥ तिमेर्यादोगणा आसन्श्वापदाः सरमासुताः ॥ २६ ॥ सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप ॥ ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः ॥ २७ ॥ दंदशूकादयः सर्पा राजन्क्रोधवशात्मजाः ॥ इलाया भूरुहाः सर्वे यातुधानाश्च सौरसाः ॥ २८ ॥ अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः ॥ सुता दनोरेकषष्टिस्तेषां प्राधानिकाञ्छृणु ॥ २९ ॥

ऽन्यस्यां जाताः ॥ १८ ॥ अंगिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह । प्रजापतेरिति । स्वधा नाम पत्नी पितॄन्पुत्रत्वेऽकरोत् । अथ सती चाथर्वांगिरसं नाम वेदम् ॥ १९ ॥ कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह । कृशाश्व इति ॥ २० ॥ २१ ॥ सुपर्णा विनता । अनूरुमरुणम् ॥ २२ ॥ रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात्कुपितस्य दक्षस्य शापाद्यक्ष्मग्रहार्दितः क्षयरोगपीडितः संस्तास्वनपत्योऽभूत् ॥ २३ ॥ तं दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि । कथंभूताः । क्षये कृष्णपक्षे दिताः खंडिताः सतीः । दो अवखंडने धातुः । पाठांतरे क्षये सति पुनरेधितास्तेनैव वर्धिताः सतीः । अथ लोकानां मातॄणां कश्यपपत्नीनां कल्याणकराणि नामानि शृणु ॥ ॥ २४ ॥ २५ ॥ अल्पत्वेन सुगमत्वाद्यथायथं व्युत्क्रमेण तासां वंशानाह । तिमेरित्यादिना ॥ २६ ॥ २७ ॥ सौरसाः सुरसायाः पुत्राः ॥ २८ ॥ प्राधानिकान्मुख्यानष्टा

द्वितीयायां भार्यायाम् ॥१८॥१९॥ वेदशिरसा सहितो देवलो वेदशिरोदेवलस्तं वेदशिरसं देवलञ्चेत्यर्थः । तीर्थस्तु—वेदशिरा इति कृशाश्वस्य नामांतरमाह ॥ २० ॥ ननु कश्यपमुनेर्वंशे कथं पशुपक्षिदक्षादीनामुत्पत्तिस्तत्रेदमवधेयम्—"शुक्तौ मुक्ता यथोत्पन्ना गजमुक्ता गजश्रवे । मृगनाभ्यां च कस्तूरी गोकर्णे धेनुरोचनम् ॥ वंशवृक्षे तुकाक्षीरी गोमयाद् वृश्चिकोद्भवः । ऋषिभार्यासु पश्वादिजन्म ज्ञेयन्तथा बुधैः ॥" वस्तुतः सत्य संकल्पत्वादृषीणां तत्र किंचिन्न चाद्भुतमिति ज्ञेयम् । पतंगान् दीपज्वालायां ज्वलनशीलान्सूक्ष्मपक्षिणः । शलभान् कृषिभक्षणशीलाय्रक्तपीतान्सूक्ष्मपक्षिणः॥२१॥गरुडानूरू भ्रातरौ विनतापुत्रौ॥२२॥ भारतेति ।भरत। यथा स्वभार्यास्वनपत्यस्तथाऽयमपीति संदेहं मा कुर्वीति कथं स्त्रीषु विद्यमानास्वपुत्रोऽयमिति भावः ॥२३॥ पाठांतरे क्षयैधिता इति पाठे ॥२४॥२५॥ तासामदित्यादीनां व्युत्क्रमेण क्रमपरित्यागेन सूचीकटाहन्यायमाश्रित्याह—तिमेरिति । यादोगणा जलचरजीवगणाः । 'यादांसि जलजंतवः' इत्यमरः । श्वापदा हिंसाशीलचतुष्पदाः ॥२६॥ ये चान्ये द्विखुरा मृगादयः । 'शफं क्लीबे खुरः पुमान्' इत्यमरः । आदिना चिह्लादिग्रहः ॥२७॥ राजान्निति । श्रवणे देदीप्यमानांतःकरणात्वादुक्तम् । आदिना सर्पजात्यंतरग्रहः ॥ २८ ॥ द्विशफेतरा एकखुरा अश्वादिपशवः ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विमूर्धा शंबरोऽरिष्टो हयग्रीवो विभावसुः ॥ अयोमुखः शंकुशिराः स्वर्भानुः कपिलोऽरुणः ॥ ३० ॥ पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ॥ धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः ॥ ३१ ॥ स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल ॥ वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ॥ ३२ ॥ वैश्वानरसुतायाश्च चतस्रश्चारुदर्शनाः ॥ उपदानवी हयशिरा पुलोमा कालका तथा ॥ ३३ ॥ उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप ॥ पुलोमां कालकां च द्वे वैश्वानरसुते तु कः ॥ ३४ ॥ उपयेमेऽथ भगवान्कश्यपो ब्रह्मचोदितः ॥ पौलोमाः कालकेयाश्च दानवा युद्धशालिनः ॥ ३५ ॥ तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता ॥ जघान स्वर्गतो राजन्नेक इंद्रप्रियंकरः ॥ ३६ ॥ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् ॥ राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागतः ॥ ३७ ॥ अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ॥ यत्र नारायणो देवः स्वांशेनावातरद्विभुः ॥ ३८ ॥ विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उपक्रमः ॥ ३९ ॥

दश शृणु ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ वैश्वानरो दनोः पुत्रस्तस्य सुताः ॥ ३३ ॥ कः प्रजापतिः कश्यप उपयेमे इत्यन्वयः ॥ ३४ ॥ दानवीपरिणयने हेतु ब्रह्मणा चोदित इति ॥ ३५ ॥ तयोः षष्टिसहस्राणि निवातकवचा नाम पुत्रा जातास्तांश्च स्वर्गतः संस्ते पितामहोऽर्जुनो जघान ॥ ३६ ॥ राहुर्ज्येष्ठो यस्य ॥ ३७ ॥ ३८ ॥ ३९ ॥

॥ ३० ॥ ३१ ॥ नमुचिर्दैत्यः । नाहुषो नहुषपुत्रः ॥ ३२ ॥ ३३ ॥ क्रतुर्दैत्यः ॥ ३४ ॥ ननु दानवीं पौत्रीं कथं कश्यप उपयेमे इति चेत्तत्राह—"उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु पार्थिव । ऋषयोऽत्र न मुह्यंति विद्वांसश्चैव ये जनाः ॥" इति हरिवंशादिपर्वद्वितीयाध्यायात् । अस्यार्थः—भूतेषु पश्वादिषु उत्पत्तिर्नित्या स्वाभाविकी सापिंडयनियमं विना प्रजोत्पादनं स्वाभाविकं तथा मनुष्येषु निरोधो नित्यः । 'असपिंडामुद्वहेत्' इत्यादिनियमः स्वाभाविकः यद्यप्येवं तथाप्यत्र ऋषयः "प्रजापतिस्स्वां दुहितरमभ्ययात्" इत्यादिश्रुतिदार्शिनो विद्वांसश्च सापिंडयशास्त्रस्यानित्यांगमिवाचरणार्थत्वं जानाना न मुह्यंति विश्वसृजां कार्यगौरवाच्छ्रुत्यपेक्षयाधुनिकस्य सापिंडयशास्त्रस्योल्लंघने न दोष इति भावः । इत्यभिप्रेत्यैव स्वामिचरणैरपि व्याख्यातमुपदानवीपरिणयने हेतुः ब्रह्मणा 'प्रजापतिः स्वां दुहितरम्' इत्यादिवेदेन हिरण्यगर्भेण वा ॥ ३५ ॥ तयोः पुलोमाकालिकयोः । शतसहस्रायुतलक्षादीनां नियतक्लीबत्वमाश्रित्याह—षष्टिसहस्राणि यज्ञघ्नानिति । यज्ञादिकर्मनाशकान् । ते पितुरभिमन्योः पिताऽर्जुनः विद्याभ्यासार्थमिन्द्रलोकं गतो गुरुदक्षिणानिमित्तं जघानेति महाभारते वनपर्वणि वर्णितं विस्तरेण ॥ ३६ ॥ सिंहिकायां हिरण्यकशिपुभगिन्याम् । "दितेः सुतो हिरण्याक्षो हिरण्यकशिपुस्तथा । कन्या च सिंहिका नाम बभूव कुरुसत्तम ॥" इति पुराणांतरोक्तेः । केतूनां शतं यस्मिंस्तत् । एकाधिकं शतमस्य विवरणं राहुज्येष्ठमिति । केतूनां शतत्वं ज्योतिश्शास्त्रे वर्णितम् "वरुणस्य दश सुताश्चतुर्विंशा रवेः सुताः । अग्नेः पुत्राश्चतुर्विंशा यमस्य नव कीर्त्तिताः ॥ अष्टादश कुबेरस्य वायोर्विंशतिरेव च । एवं संख्या च केतूनां शतं पञ्चोत्तरं भवेत् ॥" इति ज्योतिर्निबंधे । चकारेणानुक्ता अपि पंच ग्राह्याः ॥ ३७ ॥ अथ मंगले । "अथातो ब्रह्मजिज्ञासा" इतिवदस्य वेदरूपता सूचिता । अतो दन्वादिवंशकथनोत्तरम् । यत्रादितेर्वंशे । स्वांशेन वामनरूपेण ॥ ३८ ॥ द्वादशादित्याननुक्रामति विवस्वानिति ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम् ॥ मिथुनं च महाभागा यमं देवं यमीं तथा ॥ सैव भूत्वाऽथ वडवा नासत्यौ सुषुवे भुवि ॥ ४० ॥ छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ॥ कन्यां च तपतीं या वै वव्रे संवरणं पतिम् ॥ ४१ ॥ अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः ॥ यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥ ४२ ॥ पूषाऽनपत्यः पिष्टादो भग्नदंतोऽभवत्पुरा ॥ योऽसौ दक्षाय कुपितं जहास विवृतद्विजः ॥ ४३ ॥ त्वष्टुर्दैत्यानुजा भार्या रचना नाम कन्यका ॥ सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ॥ ४४ ॥ तं वव्रिरे सुरगणा दौहित्रं द्विषतामपि ॥ विमतेन परित्यक्ता गुरुणांगिरसेन यत् ॥ ४५ ॥ इति श्रीभा० महा० षष्ठस्कन्धे दक्षकन्यावंशवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ राजोवाच ॥ कस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः ॥ एतदाचक्ष्व भगवञ्छिष्याणामक्रमं गुरौ ॥ १ ॥

असूयताजनयत् । भुवि वर्तमाना ॥ ४० ॥ ततो विवस्वतः ॥ ४१ ॥ चर्षणयः कृताकृतज्ञानवंतः । पश्यति कर्मत्वेन निघंटावुक्तेः । यत्र येषु आत्मानुसंधानविशेषेण मानुषी जातिश्चोपकल्पिता । तथा च श्रुतिः । "पुरुषत्वे चाविस्तरामात्मा" इति ॥ ४२ ॥ कुपितं हरमिति शेषः । विवृतद्विजः प्रकटितदंतः सन् ॥ ४३ ॥ ४४ ॥ यद्यदा विमतेनावज्ञातेन बृहस्पतिना परित्यक्तास्तदा द्विषतां शत्रूणां भागिनेयमपि विश्वरूपं पौरोहित्ये वृतवंतः ॥ ४५ ॥ इति षष्ठे टीकायां षष्ठोऽध्यायः ॥ ६ ॥ सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः ॥ गुरुणा संपरित्यक्तैः पौरोहित्यमथाकरोत् ॥ १ ॥ कस्य हेतोः कस्माद्धेतोरात्मनः शिष्याः सुराः परित्यक्ताः

संज्ञा विश्वकर्मपुत्री । यमीं यमुनाम् । सैव संज्ञैवाथ तत्तेजोऽसहमाना तपश्चरंती वडवा तुरंगी भूत्वा । नासत्यावश्विनीकुमारौ ॥ ४० ॥ या तपती । संवरणं राजानम् ॥ ४१ ॥ तयोरर्यममातृकयोः । चर्षणिशब्दस्य कृताकृतज्ञानवत्त्ववाचकत्वे वैदिको निघंटुः प्रमाणमित्याह—पश्यतीति । पश्यतिः कर्म यस्य स पश्यतिकर्मा तस्य भावस्तत्त्वं तेन पश्यतिपदेन तदर्थो दर्शनं ग्राह्यं दर्शनकर्त्तारश्चर्षणयः । यत्र चर्षणिषु उपकल्पिता तेषां मानुषत्वं पुरुषत्वं स्थापितमिमे पुरुषा इति लोकेषु ख्यापितमिति भावः । कृतं कर्म । अकृतं मोक्षः । नास्त्यकृतः कृतेनेति श्रुतावित्थं व्याख्यातत्वात् । पुरुषस्यात्मदर्शित्वे प्रमाणमाह—तथा चेति । पुरुषत्वे मानुषत्वे । आत्माऽतिशयेन साधनसंपत्त्या प्रत्यक्षी भवतीति श्रुतिपदार्थः ॥ ४२ ॥ अनपत्येऽपि रुद्रकोपादेव रुद्राराधनस्यैवागमशास्त्रे संततिसाधनत्वेन विधानात् "भक्त्या श्रीशिवमाराध्य पुत्रोत्पत्तिं प्रसाधयेत्" इत्युक्तेः । यः पूषा ॥ ४३ ॥ रचना नाम कन्यका या दैत्यानुजा सा त्वष्टुर्भार्यासीत् । तयोस्ताभ्यां त्वष्टृरचनाभ्यां सन्निवेशविश्वरूपनामानौ द्वौ पुत्रावभूतामित्यर्थः ॥ ४४ ॥ तं बुद्धिस्थं विश्वरूपं शत्रूणां दैत्यानाम् ॥ ४५ ॥ इति श्रीमद्भागवत भा०दी०प्र० षष्ठस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ पौरोहित्ये पुरोहितकर्मणि तत्कर्त्तुमित्यर्थः । अथ वरणानंतरम् (१) 'गुरुद्वारा प्रसादो मे' इति पुराणांतरीयभगवद्वचनाद्गुरुप्रसाद एव बलीयान्भक्तिज्ञानादिसमुद्रेकसिद्धये । तदभावः सद्योऽनर्थपरंपराहेतुरतो ज्ञानाद्यर्थिना पुरुषेण स्वप्नेऽपि गुरुर्नावमंतव्यः किन्तु निरंतरं सबहुमानं प्रसादसिद्धये निषेवणीय इत्येतदस्मिन्नध्याये निरूपयन्नाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इंद्र स्त्रिभुवनैश्वर्य मदोल्लंघितसत्पथः ॥ मरुद्भिर्वसुभी रुद्रैरादित्यैर्ऋभुभिर्नृप ॥ २ ॥ विश्वेदेवैश्च साध्यैश्च नासत्याभ्यां परिश्रितः ॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ॥ ३ ॥ विद्याधराप्सरोभिश्च किन्नरैः पतगोरगैः ॥ निषेव्यमाणो मघवान्स्तूयमानश्च भारत ॥४॥ उपगीयमानो ललितमास्थानाध्यासनास्थितः ॥ पांडुरेणातपत्रेण चंद्रमंडलचारुणा ॥ ५ ॥ युक्तश्चान्यैः पारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ विराजमानः पौलोम्या सहार्धासनया भृशम् ॥ ६ ॥ स यदा परमाचार्यं देवानामात्मनश्च ह ॥ नाभ्यनंदत संप्राप्तं प्रत्युत्थानासनादिभिः ॥ ७ ॥ वाचस्पतिं मुनिवरं सुरासुरनमस्कृतम् ॥ नोच्चचालासनादिंद्रः पश्यन्नपि सभागतम् ॥ ८ ॥ ततो निर्गत्य सहसा कविरांगिरसः प्रभुः ॥ आययौ स्वगृहं तूष्णीं विद्वाञ्छ्रीमदविक्रियाम् ॥ ९ ॥ तर्ह्येव प्रतिबुध्येंद्रो गुरुहेलनमात्मनः ॥ गर्हयामास सदसि स्वयमात्मानमात्मना ॥ १० ॥ अहो बत ममाऽसाधु कृतं वै दभ्रबुद्धिना ॥ यन्मयैश्वर्यमत्तेन गुरुः सदसि कात्कृतः ॥ ११॥ को गृध्येत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि ॥ ययाहमासुरं भावं नीतोऽद्य विबुधेश्वरः ॥ १२ ॥ ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कंचन ॥ प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः ॥ १३ ॥

अक्रममपराधम् ॥ १ ॥ स इंद्रो यदा संप्राप्तं वाचस्पतिं नाभ्यनंदत नादृतवांस्तदा स आंगिरसस्ततो निर्गत्य तूष्णीं स्वगृहमाययावित्यष्टानामन्वयः । अनादरे हेतुं मदं दर्शयितुं तं विशिनष्टि । त्रिभुवनैश्वर्यमदेनोल्लंघितः सतां पंथा येन सः ॥ २ ॥ परिश्रितः परिवृतः ॥ ३ ॥ ४ ॥ आस्थानं सभा तस्मिन्नध्यासनं सिंहासनं तदास्थितः ॥ ५ ॥ पारमेष्ठ्यैर्महाराजचिह्नैः । आसनस्यार्धे स्थितया पौलोम्या शच्या सह विराजमानः सन् ॥ ६ ॥ प्रत्युत्थानादिना नाभ्यनंदत नादृतवान् ॥ ७ ॥ न चोच्चचाल आसन एव स्थितोऽपि किंचिन्न चलितवान् ॥ ८ ॥ श्रीमदेन या विक्रिया तां विद्वान् जानन् ॥ ९ ॥ प्रतिबुध्यानुस्मृत्य ॥ १० ॥ मम कृतं कर्म अहो असाधु यद्यस्माद्दभ्रबुद्धिनाऽल्पमतिना मया कात्कृतस्तिरस्कृतः ॥ ११ ॥ विबुधानां सात्त्विकानां देवानामीश्वरोऽप्यहम् ॥ १२ ॥ ननु सिंहासनस्थो राजाऽभ्युत्थानं न कुर्या

यस्येति । भगवन्निति । वक्तुं सामर्थ्यं द्योतयति ॥ १ ॥ हे नृपेति । राज्ञां मदो भवत्येवेति स्मारयतीति ॥ २ ॥ ३ ॥ भारतेति । यथा भरतखंडस्थैस्त्वमिति भावः ॥ ४ ॥ पांडुरेण श्वेतेन ॥ ५ ॥ पौलोम्या शच्या । अर्द्धमासनमेवासनं यस्यास्तया । मृगलोचनेतिवदासनपदस्य वृत्तावंतर्भावः ॥ ६ ॥ स इन्द्रः । परमत्युत्कृष्टम् । आचार्यं बृहस्पतिम् । न केवलं देवानामपि त्वात्मनोऽपीत्यर्थः । नाभ्यनंदत नापूजयत् ॥ ७ ॥ पूज्यत्वाधिक्यबोधनाय विशेषणवाहुल्यम् । आसन एवारूढ्य स्थितोऽपीति ल्यब्लोपे पञ्चमी ॥८॥ ततः सभातः । कविरेवं भविष्यतीति भाविकार्यविज्ञः । प्रभुः शासितुं समर्थः । विद्वान् गुर्ववमानहेतुत्वेन जानन् ॥ ९ ॥ यर्हि गुरुः सभातो निवृत्तस्तर्ह्येव तदानीमेव स्वयं परप्रेरणमंतरैव प्रतिबुध्य ॥ १० ॥ सदसीत्यपराधोद्रेकतामाहा । कुत्सितः कृतः कत्कृतस्स एव कात्कृतः पृषोदरादिः ॥ ११ ॥ स्वसंपत्तिमेव तिरस्कारहेतुत्वेन ज्ञात्वा निंदति—क इति । गृध्येद्वाञ्छेत् । यया त्रिविष्टपेशसंपत्या ॥ १२ ॥ अत्राक्षिप्य समाधत्ते—नन्विति । वृद्धा इति । कुशलाः । सत्यं ते भ्रांता एवेत्याह—य इति । परं कल्याणहेतुम् ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ॥ ये श्रद्दध्युर्वचस्ते वै मज्जंत्यश्मप्लुवा इव ॥ १४ ॥ अथाहममराचार्यमगाधधिषणं द्विजम् ॥ प्रसाद
यिष्ये निशठः शीर्ष्णा तच्चरणं स्पृशन् ॥१५॥ एवं चिंतयतस्तस्य मघोनो भगवान् गृहात् ॥ बृहस्पतिर्गतोऽदृष्टां गतिमध्यात्ममायया ॥ १६ ॥
गुरोर्नाधिगतः संज्ञां परीक्षन्भगवान्स्वराट् ॥ ध्यायन् धिया सुरैर्युक्तः शर्म नालभतात्मनः ॥१७॥ तच्छ्रुत्वैवासुराः सर्वे आश्रित्यौशनसं मतम्॥
देवान्प्रत्युद्यमं चक्रुर्दुर्मदा आततायिनः ॥१८॥ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ॥ ब्रह्माणं शरणं जग्मुः सहेंद्रा नतकंधराः ॥ १९ ॥
तांस्तथाऽभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः ॥ कृपया परया देव उवाच परिसांत्वयन् ॥ २० ॥ ब्रह्मोवाच ॥ अहो बत सुरश्रेष्ठा ह्यभद्रं वः
कृतं महत् ॥ ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत ॥ २१ ॥ तस्यायमनयस्यासीत्परेभ्यो वः पराभवः ॥ प्रक्षीणेभ्यः स्ववैरिभ्यः समृद्धानां च
यत्सुराः॥२२॥मघवन्द्विषतः पश्य प्रक्षीणान्गुर्वतिक्रमात् ॥ संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः॥आददीरन्निलयनं ममापि भृगुदेवताः॥२३॥

दिति वृद्धा वदंति तत्राह । य इति द्वाभ्याम् । धिषणमासनम् ॥ १३ ॥ कुपथं दिशंत्युपदिशंतीति कुपथदेष्टारस्तेषां वचः । अश्ममयः प्लवो येषां ते यथा मज्जंतं प्लवमनु मज्जंति तद्वत् ॥ १४ ॥ अगाधा गंभीरा धिषणा यस्य तम् । निशठः शाठ्यहीनः सन् ॥ १५ ॥ अधिकया आत्ममायया ॥ १६ ॥ गुरोः संज्ञा ज्ञानोपायं परीक्ष माणोऽपि नाधिगतोऽप्राप्तः सन् ॥१७॥ आततायिन उद्यतास्त्राः ॥१८॥ निर्भिन्नान्यंगान्युत्तमांगानि शिरांसि ऊरवो बाहवश्च येषाम् ॥ १९ ॥ २० ॥ वो युष्माकं कृतं करणं महदभद्रम् । तदाह । ब्रह्मिष्ठमिति । नाभ्यनंदत नाभिनंदितवंतः ॥२१॥ परेभ्यः शत्रुभ्यो वः पराभव इति यदयं तस्यानयस्यान्यायस्य संबंधी फलरूप आसीत् । उक्तं च । "ब्राह्मणं कुलसंपन्नं भक्तं विष्णोर्महात्मनः॥आयांतं वीक्ष्य नोत्तिष्ठेत्स दुःखैः परिभूयते" इति । स्वयमेव वैरिणो हंतारो येषां तेभ्यः॥२२॥ गुरुतिरस्कारसत्कारा

अधस्तमसि नरके । पततां पतिष्यमाणानाम् । प्लवस्तरणसाधनम् ॥ १४ ॥ अस्यां विपत्तौ कः खलूपाय इति क्षणं विमृश्य स्वयमेवाह—अथाहमिति । यत एवमनर्थोऽथ तस्मात् शाठ्यहीनो निष्कपटः ॥ १५ ॥ अदृष्टामिति पाठे न विद्यते दृष्टं दर्शनं यस्यामित्यर्थः । आत्ममायया योगसामर्थ्येन ॥ १६ ॥ स्वराडिंद्रः ॥ १७ ॥ तद् बृहस्पतिकर्तृकदेवत्यजनम् । औशनसं भार्गवम् ॥ १८ ॥ तैः असुरैः ॥ १९ ॥ तान्देवान् । तथाभ्यर्दितान् दैत्यशस्त्रच्छिन्नांगान् आत्मनः परमात्मनो भवतीत्यात्मभूर्ब्रह्मा ॥ २० ॥ अहो बतेत्यव्ययद्वयं महदनर्थद्योतनार्थम् । सुरश्रेष्ठा इति साकूता संबुद्धिः । नायं सुराणां धर्मः कुतः सुरश्रेष्ठानामिति महाननर्थः कृत इति भावः । तदभद्रम् । प्रथमं तु ब्राह्मण एव मान्यः किं पुनर्ब्रह्मिष्ठो वेदार्थनिष्ठः कुतस्तरां दांतः कृतेंद्रियनिग्रह इति भावः ॥ २१ ॥ ब्राह्मणावज्ञानमनर्थहेतुरित्यत्र पुराणांतरवाक्यं प्रमाणयति—तदु क्तमिति । यो नोत्तिष्ठेत्स इत्यर्थः । हे सुरा अपि यूयं गुर्ववज्ञानादीदृशा जाताः का पुनरन्येषां गतिरिति भावः ॥ २२ ॥ मघवन्निति । मह्यते पूज्यत इति मघवेति निरुक्त्या त्वं तु स्वयं पूज्यत्वेन पूज्यपूजाव्यवहारं जानन्नपि किमर्थं तथा कृतवानिति भावः " मान्या एव हि मान्यानां मानं कुर्वंति नेतरे । रुद्रो बिभर्ति मूर्ध्नेंदुं स्वर्भानुस्तं जिघृक्षति ॥ " इति न्यायेनेत्यर्थः । अथैषामेतादृशं बलं दृश्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिविष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः ॥ न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि नरेश्वराणाम् ॥ २४ ॥ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतम् ॥ सभाजितोऽर्थान्स विधास्यते वो यदि क्षमिष्यध्वमुतास्य कर्म ॥ २५ ॥ श्रीशुक उवाच ॥ त एवमुदिता राजन्ब्रह्मणा विगतज्वराः ॥ ऋषिं त्वाष्ट्रमुपव्रज्य परिष्वज्येदमब्रुवन् ॥ २६ ॥ देवा ऊचुः ॥ वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते ॥ कामः संपाद्यतां तात पितॄणां समयोचितः ॥ २७ ॥ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सताम् ॥ अपि पुत्रवतां ब्रह्मन्किमुत ब्रह्मचारिणाम् ॥ २८ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः ॥ २९ ॥ दयाया भगिनी मूर्तिर्धर्मस्यात्माऽतिथिः स्वयम् ॥ अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः ॥ ३० ॥

वेवापचयोपचयकारणमित्यसुरदृष्टांतेनाह । मघवन्निति । द्विषतः शत्रून् । काव्यं भार्गवं गुरुमेवाऽऽसेव्योपचितान् । उपचितत्वमेवाह आददीरन्गृह्णीयुः ॥ २३ ॥ अभेद्यो मंत्रो येषाम् । अनुशिक्षितार्थाः शिष्याः । यतो विप्रा गोविंदो गावश्चेश्वरा अनुग्राहका येषां तेषामेवाभद्राणि न भवंत्यन्येषां तु भवंति ॥ २४ ॥ तत्तस्मात् । अथानंतरमेव भजत । अस्य कर्मासुरपक्षपातम् ॥ २५ ॥ उदिता उक्ताः विगतज्वरा निश्चिंताः ॥ २६ ॥ २७ ॥ २८ ॥ अतिथीनां पितॄणां च प्रशंसार्थमाहुः । आचार्य उपनीय वेदाध्यापकः । ब्रह्मणो वेदस्य मूर्तिः ॥ २९ ॥ धर्मस्यात्मा मूर्तिरतिथिः । स्वयं साक्षात् । आत्मनः श्रीविष्णोः । यद्वा आत्मनः स्वस्य । सर्वभूतेष्वात्मदृष्टिः

यथा स्मापि निलयनं सत्यलोकमाददीरन् । तत्र हेतुः—भृगुदेवता गुरुभक्ताः ॥ २३ ॥ अत्र सामदानदंडा उपाया न संभवंतो दृश्यंते भेदोप्यशक्य इत्याह—मंत्रो मंत्रणा भृगूणां शुक्राचार्याणामनुशिक्षितमेवार्थः पुरुषार्थत्वेनोपादेयो येषां ते । ननु तर्हि किं वयं मरिष्याम एवेति तत्र साश्वासमाह—न विप्रेति ॥ २४ ॥ ब्राह्मणशक्तिरचिंत्यविभवेत्याह—तदिति । यत इत्थं तत्तस्माद्धेतोः । त्वाष्ट्रं त्वष्टुरादित्यस्य त्वष्टा हि कश्यपविप्रस्यात्मजत्वाद्विप्र एव वस्तुतोऽतस्तत्पुत्रस्य सुतरां तपश्चर्यावेदाभ्यासनिष्ठत्वाद्विप्रत्वमस्तीत्याह विप्रमिति । विशेषेण प्राति पूरयति स्वसेविमनोरथानिति विप्रः "समीहितार्थार्पणकामधेनवः" इत्युक्तेः । 'प्रा—पूरणे' अतः "आतश्चोपसर्गे" इति कः । यद्वा—उप्यते बीजी क्रियते धर्ममत्रेति विप्रः औणादिकरप्रत्यये धातोरस्येत्वे रूपम् "क्षेत्रत्वाद्धर्मबीजानां सेवकाभीष्टपूरणात् ॥ ब्राह्मणः कथ्यते विप्रः शब्दार्थनिपुणैर्बुधैः ॥" इति संहितोक्तेः । आत्मवंतं ज्ञानिवरम् । स विश्वरूपः । सभाजितः श्रद्धाभक्तिभ्यामर्चितः । वो युष्माकं मनोरथान्करिष्यते । अस्य विश्वरूपस्य ॥ २५ ॥ ते देवाः । इदं वक्ष्यमाणम् ॥ २६ ॥ तातेति प्रियत्वद्योतनायोक्तम् ॥ २७ ॥ हे ब्रह्मन्निति । त्वं त्वदर्थिजनमनोरथकरणजन्यधर्म्मफलं जानास्येवेति भावः । ममात्मजो मम पितृसेवनं करिष्यत्येवाहं धर्मांतरं करिष्यामीति पुरुषेण न मंतव्यं किन्तु पुंत्रे सत्यपि स्वयं पितृसेवनं कर्त्तव्यं तस्यैव परमधर्मत्वात् । 'पितृसेवा परो धर्मः' इति पुराणांतरोक्तेः ॥ २८ ॥ पित्रादिसेवनेन रुद्रादिदेवतासेवनमपि कृतं स्यात्तेषु तेषां विशेषतः सन्निधानादित्याह—आचार्य इति "उपनीय तु यः शिष्यान्वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥" इति स्मृतेः । यद्वा—"स्वयमाचरति शिष्यानाचारे स्थापयत्यपि । आचिनोति हि शास्त्रार्थमाचार्य्यस्तेन कथ्यते" इति कुलार्णवे । प्रजापतेः स्रष्टुर्महादेवस्य वा "प्रजापतिः शिवः स्थाणुरुमेशो वृषवाहनः" इत्यभिधानात् । मरुत्पतेरिन्द्रस्य । क्षितेस्तनुर्मूर्त्तिः साक्षान्माता मूर्त्तिः संनिधानस्थानमित्यर्थः ॥ २९ ॥ विश्वनाथस्तु—अतिथिर्धर्मस्यात्मैव किं पुनर्मूर्त्तिरिति भाव इत्याह । अतिथिर्वैश्वदेवांते आगतो यः कश्चिदित्यर्थः । "शूद्रो वा यदि चांडालश्शत्रुर्वा ब्रह्मघातकः । आगतो वैश्वदेवांते सोऽतिथिः स्वर्गदायकः ॥" इति स्मृतेः । अभ्यागतो याज्ञवल्क्योक्तः षड्विधभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्पितॄणामार्तानामार्तिं परपराभवम् ॥ तपसाऽपनयंस्तात संदेशं कर्तुमर्हसि ॥ ३१ ॥ वृणीमहे त्वोपाध्यायं ब्रह्मिष्ठं ब्राह्मणं गुरुम् ॥ यथांऽजसा विजेष्यामः सपत्नांस्तव तेजसा ॥ ३२ ॥ न गर्हयंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनम ॥ छंदोभ्योऽन्यत्र न ब्रह्मन्वयो ज्यैष्ठ्यस्य कारणम्॥ ॥ ३३ ॥ ऋषिरुवाच ॥ अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः ॥ स विश्वरूपस्तानाह प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥ विश्वरूप उवाच ॥ विगर्हितं धर्मशीलैर्ब्रह्मवर्चउपव्ययम् ॥ कथं नु मद्विधो नाथा लोकेशैरभियाचितम् ॥ प्रत्याख्यास्यति तच्छिष्यः स एव स्वार्थ उच्यते ॥३५॥

कर्तव्येत्यर्थः ॥ ३० ॥ परेभ्यः पराभव एवार्तिस्ताम् ॥३१॥ संदेशमाहुः । वृणीमह इति॥ ३२॥ ननूपाध्यायत्वे कनिष्ठस्य ममाभिवंदनं करिष्यथ तच्च गर्हितं तत्राहुः । नेति । अर्थेषु प्रयोजननिमित्तं यविष्ठानामभिवादनं न निंदंति । किं च छंदोभ्यो मंत्रेभ्योऽन्यत्र वयो ज्यैष्ठ्यस्य कारणं न तु मंत्रेषु । अतोऽस्मभ्यं मंत्रदातृत्वेन त्वमेव ज्येष्ठो भविष्यसि । यद्वा छंदोभ्योऽन्यत्र वेदान्विहाय वय एव ज्यैष्ठ्यस्य कारणं न भवति किं तु वेदा एव मुख्यं कारणं तत्साम्ये तु वयः। वेदज्ञत्वाच्च त्वमेव ज्येष्ठ इत्यर्थः॥ ३३॥ ३४॥ निंदितमपीदं युष्मद्याच्ञाभंगभयेन करिष्यामीत्याह सार्धेन । विगर्हितं पौरोहित्यमिति शेषः । धर्मशीलैः अधर्महेतुत्वात् । किं च ब्रह्मवर्चउपव्ययं पूर्वसिद्धस्य ब्रह्मवर्चसो व्ययकरम् । प्रत्याख्यातुं च मादृशो नार्हतीत्याह । कथं न्विति । तेषां लोकेशानां शिष्यः शिक्षणार्हः । स एव प्रत्याख्यानाभाव एव हि शिष्यस्य स्वार्थ उच्यते ॥ ३५ ॥

क्षुको ग्राह्यः " यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः॥" इति । निरुपपदात्मशब्दस्य निजवाचकत्वमभिप्रेत्याह—यद्वेति । इत्यर्थ इति । " एक एव हि भूतात्मा भूते भूते व्यवस्थितः " इत्यादिश्रुतेरिति भावः ॥ ३० ॥ नन्वलं धर्मोपदेशस्तुतिभ्यां विवक्षितं ब्रूतेत्यत आह—तस्मादिति । यत इत्युक्तरीत्या वयं पितरस्तस्माद्धेतोः ॥ ३१ ॥ उपाध्यायं पुरोहितं पुरोहितोपाध्यायशब्दौ पर्यायावेव "वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छतः" इत्युपसंहारादुपाध्याय एव पुरोहितो भवत्यन्यथा"उपक्रमोपसंहारावेकरूपाविति स्थितिः"इति न्यायभंगप्रसंगः स्यादिति भावः।किञ्च—पुरोहितोपाध्यायाचार्यगुरुयाजकर्त्विक्छब्दानामेक एवार्थो न भिन्नस्तथादर्शनात् । ' नैतज्जानंत्युपाध्यायाः ' इति चतुर्थे " पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः । शंडामर्कौ सुतौ तस्य " इत्यत्र पुरोहितशब्दं प्रयुज्य तदग्रे " गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः " इह तत्पुत्रेषु याजकपदप्रयोगो दृश्यते तेन याजका एव पुरोहिता न त्वयाजका इति ज्ञायते सप्तमवाक्येन । किञ्च— " निमिरिक्ष्वाकुतनयो वशिष्ठमवृतर्त्विजम् " इति नवमे । श्रीदशमेऽपि 'गर्गः पुरोहितो राजन् ' इत्यत्र पुरोहितपदं प्रयुज्य तत्रैव ' यदूनामहमाचार्यः ' तत्रैवाचार्यपदं श्रीशुकः प्रायुंक्त । " पुरोहितोऽथर्वविद्वै जुहाव ग्रहशांतये " इत्यादिदशमे पुनरप्युक्तम् । किं बहुना कर्मकारयितैव मुख्यपुरोहितपदवाच्यो यश्चाधुनिकैर्महामूर्खे कंकणादिबंधके गोत्रोच्चारयितारि पुरोहितपदं प्रयुज्यते तत्पुरोहितार्थाज्ञानत एवेति ध्येयम् । ये च ग्राममात्रस्य याजकत्वेन वृतास्ते ग्रामयाजका ग्रामपुरोहिता एवोपाध्यायशब्देनोच्यंते । अत्र बहु वक्तव्यमस्ति तदस्मत्संगृहीतदाननिर्णयतोऽवसेयं विशेषश्रवणेच्छायामित्युपरम्यते । प्रकृतमनुसरामः—यथा सपत्नाञ्शत्रूंस्तव तपस्तेजसा विजेष्यामस्तथा त्वां वृणीमह इति योज्यम् ॥ ३२ ॥ अत्राक्षिपति—नन्विति । अन्यत्रान्येषु व्यावहारिककृत्येषु । यविष्ठांघ्र्यभिवादनं कनिष्ठनमनं न गर्हयंति न अपि तु गर्हयंत्येव यतो वय एव ज्यैष्ठ्यस्य कनिष्ठत्वस्य च कारणमिति अधिकवयस्त्वे ज्यैष्ठ्यमल्पवयस्त्वे कनिष्ठत्वं चेति अस्त्विदम् । वैदिककृत्येषु न तु तत्र छंदोज्ञत्वमेव ज्यैष्ठ्यस्य कारणमित्यर्थः । किञ्च—वेदविदे विप्रस्य सर्वदेवाधिष्ठानत्वेनापि पूज्यत्वं तथा च श्रुतिः—" सर्वा देवता वेदविदि ब्राह्मणे निवसंति " इति वेदाभिज्ञानमेव ज्यैष्ठ्यस्य कारणं न वय इति । इत्यर्थ इति । तस्मात्त्वां वेदाधिक्यज्ञानवत्त्वेन पौरोहित्यं कुर्वन्नोऽस्माकं मंत्रप्रदो गुरुर्भवेति भावः ॥ ३३॥ सर्वज्ञत्वेन ज्ञाततद्दैन्यत्वादृषिरित्युक्तम् । ऋषिः शुकः ॥ ३४ ॥ अधर्महेतुत्वात्प्रतिग्रहग्रहणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्तितसाधुसत्क्रियः ॥ कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥ ॥ ३६ ॥ तथाऽपि न प्रतिब्रूयां गुरुभिः प्रार्थितं कियत् ॥ भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥ श्रीशुक उवाच ॥ तेभ्य एवं प्रतिश्रुत्य विश्वरूपो महातपाः ॥ पौरोहित्यं वृतश्चक्रे परमेण समाधिना ॥ ३८ ॥ सुरद्विषां श्रियं गुप्तामौशनस्यापि विद्यया ॥ आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया विभुः ॥ ३९ ॥ यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः ॥ तां प्राह स महेंद्राय विश्वरूप उदारधीः ॥ ४० ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे इंद्रादिदेवैर्विश्वरूपस्य पौरोहित्याय वरणं नाम सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ राजोवाच ॥ यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान् ॥ क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १ ॥

ननु पौरोहित्येन धनलाभाद्धर्मः सिद्ध्येत् अन्यथा निर्धनस्य कुतो धर्मः । अत एव तेन लोको हृष्यति तत्राह । अकिंचनानां शिलोंछनं हि धनम् । क्षेत्रे स्वाम्युपेक्षितकणिशोपादानं शिलम् । हट्टादौ पतितव्रीह्यादेरुपादानमुंछनम् । इह गृहाश्रमे । तेनैव निर्वर्तिता संपादिता साधूनां सत्क्रिया येन ॥ ३६॥ कियदेतत्प्रार्थितमल्पमेव । अभ्यधिकमपि करिष्यामीत्याह । भवतामिति ॥ ३७॥ परमेण समाधिना परमोद्यमेन ॥ ३८॥ वैष्णव्या श्रीनारायणकवचात्मिकया॥ ३९ ॥ असुरचमूर्दैत्यसेनाः जिग्ये तां विद्यां तु तस्मै विश्वरूप उक्तवान्॥ ४० ॥ इति षष्ठस्कंधे टीकायां सप्तमोऽध्यायः॥ ७॥ अष्टमे विश्वरूपस्तु वर्म नारायणात्मकम् । इंद्राय प्राह येनेंद्रो गुप्तो दैत्यानथाजयत्॥ १ ॥ त्रिलोक्याः

दिना धर्मनाशकत्वात् । न केवलं धर्मस्यैव नाशोपि तु ब्रह्मतेजसोऽपीत्याह किञ्चेति । तर्हि तन्न शक्यमित्युच्यतां तत्राह—प्रत्याख्यातुमिति । नाथा इति । हे उपतप्ता इत्यर्थः । न ह्युपतप्तोपेक्षा योग्या धर्मनाशकत्वात् । ''ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः । स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा ॥'' इति चतुर्थस्कंधोक्तेः । यद्यपि विगर्हितं तथापि लोकेशत्वात्सर्वगुरूणां युष्माकं लोकांतर्गतत्वादहमपि शिष्य एवातो गुर्वाज्ञालंघनदोषभयान्निन्दितमपि पौरोहित्यं करिष्याम्येवेति भावः । स एव प्रत्याख्यानाभाव एव । शिष्यस्य स्वार्थः स्वार्थसिद्धिरिद इत्यर्थः ॥ ३५॥ अत्राक्षिपति—नन्विति । लूनसस्ये केदारे स्वामिना च परित्यक्ते एकैकावशिष्टमंजरीग्रहणं शिलं तादृशे क्षेत्रे एकैकव्रीहिग्रहणमुञ्छनम् । ''उञ्छः कणश आदानं शिलं तद्युतवल्लरेः'' इति यादवः । तेन शिलोंछनेनैव न तु प्रतिग्रहादिना निर्वर्त्तिताः साधिताः । साधूनां वेदानुयायिनां सत्यः क्रिया अग्निहोत्रादिलक्षणा येन एवंविधो विशेषेण गर्हितं पौरोधसं पौरोहित्यं कथं करोमि विगर्हितत्वं त्वस्य विगर्हितवस्तूनामाद्यक्षरनिर्मितनामत्वात् । तदुक्तं शार्ङ्गधरेण ''पुरीषस्य च रोषस्य हिंसायास्तस्करस्य च । आद्याक्षराणि संगृह्य वेधाश्चक्रे पुरोहितम्॥'' इति । किंच—पुरोहित इत्युक्ते पुरीषादिस्मरणस्य नाममात्रैकदेशन्यायेन संभवात् । 'न निषिद्धं विचिन्तयेत्' इति निषेधविषयत्वात्तच्चिंतनस्यापि प्रत्यवायजनकत्वं किमुत तत्स्वीकारस्येति भावः । अत एव श्रीरामायणे । ''श्रीराम त्वद्गुरुत्वार्थं पौरोहित्यं विगर्हितम् । स्वीकृतं हि मया नाथ तपस्तेजोयशोनुदम्'' इति श्रीवशिष्ठेनाप्युक्तम् । येन पौरोहित्येन दुर्मतिर्विषयाभिलाषी पुमानेव हृष्यति न तु सुमतिरित्यर्थः । यद्वा—दुष्टा मतिरेव हृष्यति न तु शोभना शास्त्रतात्पर्यग्राहिणीति भावः ॥ ३६ ॥ यद्यपि सर्वथानिंद्यमेतत्तथापि न प्रतिब्रूयां प्रत्याख्यास्ये । एतेन प्राणधनादिव्ययेनापि गुर्वर्थः साधनीय इत्यसूचि ॥ ३७ ॥ तेभ्यो देवेभ्यः ॥ ३८ ॥ औशनस्या उशनसि विद्यमानया। गुप्तामपि आच्छिद्य स्वीकृत्य । वैष्णव्या हयग्रीवब्रह्मविद्याख्यया । विभुस्तपोबलवान् विश्वरूपः ॥ ३९॥ यया वैष्णव्या विद्यया । तां विद्याम् ॥ ४०॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ येन नारायणवर्मणा (१) ''अकामः सर्वकामो वा मोक्षकामो यजेद्धरिम्'' इत्युक्तं प्रपञ्चयति । पूर्वाध्याये सूचितां विद्यां लोकहिताय परीक्षित्पृच्छति—राजेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवंस्तन्ममाख्याहि वर्म नारायणात्मकम् ॥ यथाततायिनः शत्रून्येन गुप्तोऽजयन्मृधे ॥ २ ॥ श्रीशुक उवाच ॥ वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते ॥ नारायणाख्यं वर्माह तदिहैकमनाः शृणु ॥ ३ ॥ विश्वरूप उवाच ॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः ॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः ॥ ४ ॥ नारायणमयं वर्म सन्नह्येद्भय आगते ॥ पादयोर्जानुनोरूर्वोरुदरे हृद्यथोरसि ॥ ५ ॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ॥ ॐ नमो नारायणायेति विपर्ययमथापि वा ॥ ६ ॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ॥ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ॥ ७ ॥ न्यसेद्धृदय ओंकारं विकारमनुमूर्धनि ॥ षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् ॥ ८ ॥

संबंधिनीं श्रियम् ॥ १ ॥ २ ॥ ३ ॥ मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यां कृतः स्वांगेषु करयोश्च न्यासो येन ॥ ४ ॥ नारायणमयं वर्म संनह्येद्बध्नीयात् । तत्राष्टाक्षरेण पादाद्यष्टांगेषु न्यासमाह । पादयोरिति सार्धेन ॥ ५ ॥ प्रणवसंपुटितमोंकाराद्येकैकमक्षरं विन्यसेत् । विपर्ययं यथा भवत्येवं शिरआदि पादांतं वा विन्यसेत् । उत्पत्तिन्यासं संहारन्यासं वा कुर्यादित्यर्थः ॥ ६ ॥ द्वादशाक्षरस्योद्धारः प्रणवादियकारांतमिति । प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोराद्यंतपर्वसु न्यसेत् ॥७॥ मंत्रांतरन्यासमाह । न्यसेदिति । षकारणकारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत् ॥८॥

वाहा अश्वाः प्रेरका वा तत्सहितान् ॥ १ ॥ भगवन्निति । साक्षाद्विष्णुरूपोऽसीति भावः । वर्म कवचम् 'वर्म स्याद्बाहुजे दंशे' इति कोशात् । दंशः कवचम् । मृधे युद्धे ॥ २ ॥ त्वाष्ट्रो विश्वरूपः ॥ ३ ॥ धौतौ प्रक्षालितावंघ्री पाणी च येन स तथा । सपवित्रः पवित्राभ्यां सहितः पवित्रस्वरूपाद्याह—"पवित्रं ब्राह्मणस्यैव चतुर्भिर्दर्भपिंजुलैः । एकैकहीनमुद्दिष्टं वर्णेवर्णे यथाक्रमम् ॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रथितं नवम् । अनामिकयोर्मध्यपर्व पवित्रस्थानमुच्यते ॥" इति हारीतः । हेमाद्री तु—"अन्यान्यपि पवित्राणि कुशदूर्वात्मकानि च । हेमात्मकपवित्रस्य कलां नार्हंति षोडशीम्" इत्युक्तम् ॥ ४ ॥ ५ ॥ प्रणवसंपुटितमुभयत्र प्रणवं दत्त्वेत्यर्थः । तथा हि—ॐ ॐ ॐ पादयोः । ॐ न ॐ जानुनोः । ॐ मो ॐ ऊर्वोः । ॐ ना ॐ उदरे । ॐ रा ॐ हृदि । ॐ य ॐ उरसि । ॐ णा ॐ मुखे । ॐ य ॐ शिरसि । इत्युत्पत्तिन्यासः । ॐ य ॐ शिरसि । ॐ णा ॐ मुखे । ॐ य ॐ उरसि । ॐ रा ॐ हृदि । ॐ ना ॐ उदरे । ॐ मा ॐ ऊर्वोः । ॐ न ॐ जानुनोः । ॐ ॐ ॐ पादयोरिति । इत्यर्थ इति । "क्रमेणोत्पत्तिराख्याता संहारो व्युत्क्रमेण हि" इत्युक्तेर्यः क्रमेण न्यासः स उत्पत्तिन्यासो यश्च व्युत्क्रमेण वैपरीत्येन न्यासः स संहारन्यास इति भावः । न्यासेंगुलिनियमोपि तंत्रसारे "ललाटे नासिकामध्ये विन्यसेन्मुखवृत्तके । तर्जनीमध्यमानामाऽवद्धनामां च नेत्रयोः ॥ अंगुष्ठं कर्णयोश्चैव कनिष्ठांगुष्ठके नसोः । मध्यास्तिस्रो गंडयोश्च मध्यमामोष्ठयोर्न्यसेत् ॥ अनामां दंतयोश्चैव मध्यमामुत्तमांगके । मुखेऽनामां मध्यमां च हस्ते पादेऽथ पार्श्वयोः ॥ कनिष्ठानामिकामध्यास्ताश्चैत्पृष्ठेऽथ विन्यसेत् । ताः सांगुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् ॥ हृदये च तलं सर्वमंसयोश्च ककुत्स्थले । अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः ॥ पादवज्जानुनोरूर्वोर्हृद्दरुदुरसि नाभिवत् । गुह्येंसवद्बाह्वोः शिरोवच्छिखायां यथायथं न्यसेत्" इति ॥ ६ ॥ ततोऽष्टाक्षरन्यासानंतरम् । द्वादशाक्षरविद्यया 'ॐ नमो भगवते वासुदेवाय' इति मंत्रेण । न्यासप्रकारमाह—प्रणवादीति । ॐ ॐ ॐ दक्षिणतर्जन्याम् । ॐ न ॐ दक्षिणमध्यमायाम् । ॐ मो ॐ दक्षिणानामिकायाम् । ॐ भ ॐ दक्षिणकनिष्ठायाम् । ॐ ग ॐ वामकनिष्ठायाम् । ॐ व ॐ वामानामिकायाम् । ॐ ते ॐ वाममध्यमायाम् । ॐ वा ॐ वामतर्जन्याम् । ॐ सु ॐ दक्षिणांगुष्ठोर्ध्वपर्वणि । ॐ दे ॐ दक्षिणांगुष्ठाधःपर्वणि । ॐ वा ॐ वामांगुष्ठोर्ध्वपर्वणि । ॐ य ॐ वामांगुष्ठाधःपर्वणीति विवेकः ॥ ७ ॥ अथ षड्वर्णमंत्रेण हृदयादिन्यासमप्याह—न्यसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु॥मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद् बुधः॥९॥सविसर्गफडंतं तत्सर्वदिक्षु विनिर्दिशेत्॥ॐ विष्णवे नम इति॥१०॥
आत्मानं परमं ध्यायेद्ध्येयं षट्शक्तिभिर्युतम्॥विद्यातेजस्तपोमूर्तिमिमं मंत्रमुदाहरेत्॥११॥ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे॥
दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः॥१२॥ जलेषु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् ॥ स्थलेषु मायाबटुवामनो
ऽव्यात्त्रिविक्रमः खेऽवतु विश्वरूपः ॥१३॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोऽसुरयूथपारिः ॥ विमुंचतो यस्य महा ट्टहासं दिशो विनेदुर्न्य
पतंश्च गर्भाः॥१४॥ रक्षत्वसौ माऽध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः ॥ रामोऽद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोव्याद्भरताग्रजोस्मान् १५॥

मकारमस्त्रमुद्दिश्य ध्यात्वा ॥ ९ ॥ तन्मकारास्त्रं मः अस्त्राय फडित्येवं दिग्बंधे विनिर्दिशेत् ॥ १० ॥ ध्येयमीश्वररूपमात्मानं ध्यायेत् । षट्शक्तिभिरैश्वर्यादिभिर्भगशब्दवाच्याभिः । विद्या च तेजश्च तपश्च मूर्तिर्यस्य तम् । इमं वक्ष्यमाणं श्रीमन्नारायणकवचाख्यम् ॥ ११ ॥ अष्टगुणोऽणिमाद्यष्टैश्वर्ययुक्तः ॥ १२ ॥ यादसां गणा एव वरुणस्य पाशस्तस्मात् ॥ १३ ॥ अटवी आजिमुखं संग्रामोपक्रमश्च आदिर्येषां तेषु संकटस्थानेषु ॥ १४ ॥ असौ प्रसिद्धो वराहो मामध्वनि रक्षतु । यज्ञैरवयवरूपैः कल्प्यते

दिति । ॐ हृदये । वि मूर्द्धनि । अनु ॐकारन्यासानंतरम् । ष भ्रुवोः । ण शिखायाम् । शिखयेति तृतीया सप्तम्यर्थे ॥ ८ ॥ वे नेत्रयोः । न सर्वांगुलिसंधिषु । सर्वांगसंधिषु न्यासाविधानात् । मकारमस्त्रमसुरनिरासं ध्यात्वा मंत्रमूर्तिर्मंत्रदेवतासांनिधानयुक्तदेहो भवेद् बुधो मंत्राधिष्ठातृदेवताविग्रहज्ञानवान् ॥ ९ ॥ सर्वपदोपादानाद्विदिक्ष्वपि मः अस्त्राय फडित्युक्त्वा प्राच्यादिदिक्षु शिरस उपरि क्षोटिकां कुर्वन्हस्तं भ्रामयेदित्यर्थः । तेन दिग्विदिक्स्थितासुरादिप्रतिबंधो भवति । वस्तुतस्तु षडक्षरेऽपि प्रणवसंपुटितमेव न्यसेत् । तथाहि—ॐ ॐ ॐ हृदये । ॐ वि ॐ मूर्द्धनि । ॐ ष ॐ भ्रुवोः । ॐ ण ॐ शिखायाम् । ॐ वे ॐ नेत्रयोः । ॐ न ॐ सर्वांगुलिसंधिषु । ॐ म ॐ सर्वदेहं भगवत्संनिधानयुक्तं ध्यायेत् । ततो मः अस्त्राय फडिति दिग्बंधं कुर्यादित्यर्थः ॥ १० ॥ आत्मन ईश्वररूपत्वेन ध्यानमन्यैरधृष्यत्वकामनयाऽहंग्रहोपासनै विद्यादिमूर्तित्वकथनेन तत्फलदायकत्वं सूचितमस्य कवचस्य ॥ ११ ॥ ॐमिति मंगलार्थे । "ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभौ ॥" इत्युक्तेः । ननु भेदनात्कुतो मांगलिकत्वमिति चेन्महतां दूषणमपि भूषणं नीलकंठवदिति गृहाण समुद्रेण सह नदीनदादिवद्द्वयेयरूपेण सहैक्यं प्राप्तोऽपि पृथग्भूयापि तिष्ठन्स्वरक्षाप्रार्थनमंत्रमुदाहरेदित्याह—हरिरिति । पतगेंद्रो गरुडः । दरः शंखः अरि चक्रम् ॥ १२ ॥ सामान्येन सर्वतो रक्षां प्रार्थ्य देशविशेषेषु तत्तदधिष्ठातृस्वरूपेण भगवतो रक्षामंत्रानाह—जलेष्विति त्रिभिः । मथ्नाति हिनस्तीति मत् हयग्रीवाख्योऽसुरस्तं स्यति नाशयतीति मत्स्यः । 'मथि—हिंसायाम्' 'शिरो ममंथ तरसा' इति प्रयोगात् । केचितु मथित्वा विलोड्य सरतीति मत्स्यः । 'मंथ—विलोडने' 'सृ—गतौ' अतो ड्यप्रत्ययः वृत्तौ मथित्वेत्यस्य मदादेशः । यद्वा—माद्यति सत्यव्रतेन सह सप्तर्षिगणो ज्ञानावाप्त्याऽनेनेति मत्स्यः । "अश्रौषीदृषिभिः सार्द्धमात्मतत्त्वमसंशयम्" इत्यष्टमे वक्ष्यमाणत्वात् । 'मदी—हर्षे' अतः स्यप्रत्यय औणादिकः । मायया देवकृपया बटुर्ब्रह्मचारी चासौ वामनो वामनरूपः । मायाबटुना रूपेण वामयति त्याजयति त्रैलोक्यश्रियं बलेरिति वा । मायया छद्मेन वटति वेष्टते बलिमिति मायावटुः 'वट—वेष्टने' स चासौ वामनश्चेति तथा ॥ १३ ॥ आदिना पर्वतादिग्रहः । नॄन् सिनोति बध्नातीति नृसिर्हिरण्यकशिपुर्विषयसमूहोऽविद्या वा तं हंति नाशयतीति नृसिंहः । खप्रत्ययो डित्वश्चार्षे । यद्वा—व्रियंते विक्षिप्यंते लोका यैस्ते नरः सिंहसर्पशत्रुरोगादयः 'नॄ—विक्षेपे' तान् हिनस्तीति नृसिंहः । "सिंहे वर्णविपर्ययः" इति व्याकरणांतरोक्तेः ॥ १४ ॥ यज्ञाः कल्पाः समर्था यतः स यज्ञकल्पः । यज्ञैर्यज्ञावयवैः कल्प्यते समर्थ्यत इति यज्ञकल्पः । "स्रुक् तुण्ड आसीत्स्रुव ईशनासयोरिडोदरे चमसाः कर्णरंध्रे" इत्याद्युक्तेः । वरमहो दिवसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातु नरश्च हासात् ॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः कर्मबंधात् ॥ १६ ॥ सनत्कुमारो ऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिवर्यः पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात् ॥ १७ ॥ धन्वंतरिर्भगवान्पात्वपथ्या द्द्वंद्वाद्भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोधवशादहींद्रः ॥ १८ ॥ द्वैपायनो भगवानप्रबोधाद् बुद्धस्तु पाखंडगणा त्प्रमादात् ॥ कल्किः कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥ १९ ॥

निरूप्यत इति तथा । उन्नीतोद्धृता धरा येन सः । अद्रिकूटेषु गिरिशिखरेषु रामो जामदग्न्यः विप्रवासे दूरप्रवासे॥ १५॥ उग्रधर्मादभिचारादिलक्षणात् । हासाद्गर्वान्नरोऽवतु । दत्तो दत्तात्रेयः । अयोगाद्योगभ्रंशात् ॥ १६॥ पथि यद्देवानां हेलनं नमस्कारमकृत्वा गमनं तस्मात् । पुरुषार्चनस्यांतराद्देवपूजाछिद्राद् द्वात्रिंशदपराधरूपा न्नारदः॥ १७॥ लोकाज्जनापवादाद्यज्ञः।जननिमित्तो योंत उपघातस्तस्माद्बलभद्रोऽवतात् । कृतांतादिति पाठे कृतांतात्कालाद्रक्षतु । क्रोधवशात्सर्पाणां गणात् अहींद्रः शेषः॥ १८॥ कालम

यत्स्मरणादिनेति वराहः । अहः पदं कालोपलक्षकम् । "तस्यर्त्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया" इत्युक्तेः समासान्तष्टजार्षः । रमते दुष्टक्षत्रहनने क्रीडते इति रामः परशुरामः । भरताग्रजो दाशरथी रामः विविधप्रवासे देशांतरगमने ॥१५ ॥ स्वपरोद्भवेभ्य उपद्रवेथः । रक्षामंत्रानाह चतुर्भिः—नारायणोऽखिलांतर्यामित्वादभिचारादिवारणसमर्थः । नारं नरसमूहमयते प्रेरयतीति व्युत्पत्तेः नरो नीतिकुशलः 'नॄ—नये 'हासो हास्ये च गर्वे च' इत्यभिधानात् । दत्तः सर्वमनोरथदातादायि सर्वमनेनेति दत्तः । योगभ्रंशाद्भक्तिविघातकोपद्रवात् । योगानां भक्तियोगादीनां नाथः । कं सुखं पाति रक्षतीति कपि ज्ञानं तल्लाति ददातीति कपिलः । कर्मबंधात्संसारात् । गुणेशो गुणनियंतृत्वात्तद्वारणेन तत्कृतकर्मबंधमपि वारयितुं समर्थः ॥ १६ ॥ सनत्कुमारस्य नैष्ठिकत्वात्तद्ध्यातॄणामपि कामपीडा न भवतीति भावः । कामेनेच्छया दीव्यति द्योतत इति कामदेवस्तस्मात् हयग्रीवः । द्वात्रिंशदपराधास्तु पञ्चरात्रे—"यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे । देवोत्सवाद्यसेवा च ह्यप्रणामस्तदग्रतः ॥ (१) । उच्छिष्टे वाऽप्यशौचे वा भगवद्वंदनादिकम् । एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणाम्॥ (२) । पाद प्रसारणं चाग्रे तथा पर्यंकबंधनम् । शयनं भक्षणं चापि मिथ्याभाषणमेव च ॥ (३) । उच्चैर्भाषा मिथो जल्पो रोदनादि च विग्रहः । निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम् ॥ (४) । कंबलावरणं चैव परनिन्दा परस्तुतिः । अश्लीलभाषणं चैव ह्यधोवायुविमोक्षणम् ॥ (५) । शक्तौ गौणोपचारश्च ह्यनिवेदितभक्षणम् । तत्तत्कालोद्भवानां च फलादीनामनर्पणम् ॥ (६) । विनियुक्तावशिष्टस्य प्रदानं व्यंजनादिके । पृष्ठी कृत्वासनञ्चैव परेषामभिवा दनम् ॥ (७) । गुरौ मौनं निजस्तोत्रं देवतानिंदनं तथा । अपराधा इमे विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः ॥ (८) " इति । कौ भूमावप्यूर्मिर्वेगो यस्य सः कूर्मः । जलचरेषु कूर्मो भूमावपि शीघ्रं चलतीति प्रसिद्धम्।यद्वा—कुत्सि तेषूर्मिर्यस्य स कूर्म इति निरुक्तेर्नारकाणां कुत्सितत्वात्तत्र तद्भयमुचितमेव निरयाद्दुःखाद्वा ॥ १७ ॥ अपथ्याद्रोगकारिद्रव्यात् । धं धनं धैर्यं वा नाशयंतीति धनवो रोगास्तेषामन्तं राति ददातीति धन्वंतरिः । द्वंद्वात्सुखदुःख स्तुतिनिंदादिरूपद्वंद्वसमूहात् । ऋष्यते ज्ञायते सर्वमनेनेति ऋषं ज्ञानम् इगुपधत्वात्कः तेन भाति शोभत इति ऋषभः । निर्जितात्मा वशीकृतेंद्रियग्रामः । 'आत्मा जीवेंद्रियग्रामधृतिबुद्धिमनस्सु च' इति कोशात् । लोक्यते भाष्यत इति लोकोऽपवादोऽकीर्त्तिरिति यावत् । यज्ञ इति । यजनकर्तुरपवादः स्वयमेव नश्यतीति भावः । इह बलभद्रस्य शेषादवताराभिप्रायेणान्यत्वं कृतांतादित्याधिकशक्तित्वं च दर्शितम् ॥ १८ ॥ अप्रबोधात्प्रबोधाभावादज्ञानात् । बुद्धस्य पाखंडप्रवर्त्तकत्वात्स एव स्वप्रवर्त्तितपाखंडसमूहाद्रक्षत्विति भावः । प्रमां यथार्थज्ञानमत्ति नाशयतीति प्रमादस्तस्मात् । 'तद्वति तत्प्रकारकानुभवो यथार्थः सैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मां केशवो गदया प्रातरव्याद्गोविंद आसंगवमात्तवेणुः॥ नारायणः प्राह्ण उदारशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः ॥२०॥देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामाऽवतु माधवो माम् ॥ दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१ ॥ श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशो सिधरो जनार्दनः ॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः ॥ २२ ॥ चक्रं युगांतानलतिग्मनेमिभ्रमत्समंताद्भगवत्प्रयुक्तम् ॥ दंदग्धिदंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः ॥ २३ ॥

लभूतात्कलेः कल्किः । धर्मावनाय धर्मरक्षणायोरुर्महान्कृतोऽवतारो येन ॥ १९ ॥ दिनस्य षट्सु भागेषु क्रमेण प्रातरादिसंज्ञेषु रात्रेश्च प्रदोषादिसंज्ञेषु रक्षाप्रार्थनम् । मां केशव इति त्रिभिः । आसंगवं संगवमभिव्याप्य ॥ २० ॥ त्रिधामा ब्रह्मादित्रिमूर्तिः श्रीमाधवः । दोषे प्रदोषे हृषीकेशोऽवतु आर्धरात्रे अर्धरात्रिपर्यंते काले निशीथे चैक एव पद्मनाभोऽवतु ॥ २१ ॥ अपररात्रे ईशः श्रीवत्सधामाऽवतु । प्रत्यूष ईशः श्रीजनार्दनः अव्यात् । श्रीदामोदरः प्रभाते । श्रीविश्वेश्वरोऽनुसंध्यम् ॥ २२ ॥ युगांतानलवत्तिग्मा तीक्ष्णा नेमिर्यस्य तच्चक्रं भगवता प्रयुक्तं सदरिसैन्यं दंदग्धिदंदग्ध्यतिशयेन दहति तस्यायं स्वभाव एव न तु तस्मात्प्रार्थनी

प्रमेत्युच्यते' इत्युक्तेः । पाखंडस्य वेदविरुद्धार्थप्रतिपादकत्वात्प्रमादत्वम् । कलिं कृणोति नाशयतीति कल्किः 'कृ—हिंसायाम्' अत औणादिको डिप्रत्ययः कलेरिकारलोपश्च ॥ १९ ॥ कालविशेषेषु तत्तदधिष्ठातृस्वरूपेण भगवतो रक्षामंत्रानाह—मामिति त्रिभिः । केशवो मथुराधिपतिः प्रातर्दिनस्य पंचमघटिकापर्यंतम् । गोविंदो वृंदावनाधिपतिः आसंगवं षष्ठघटिकामारभ्य दशमघटिकापर्यंतम् । एकादशघटिकामारभ्य पञ्चदशघटिकापर्यंतं प्राह्णस्तत्र षोडशघटिकामारभ्य विंशतिघटिकापर्यंतं मध्यंदिनं तत्रारींद्रपाणिश्चक्रधरः ॥२०॥ एकविंशतिघटिकामारभ्य पंचविंशतिघटिकापर्यंतमपराह्णस्तत्र मधुहा मधुसूदनः । षड्विंशतिघटिकामारभ्य त्रिंशद्घटिकापर्यंतं सायं तत्र त्रयः सच्चिदानंदा धामानि स्वरूपाणि यस्य सः । संदर्भस्तु—प्रातरादयः काला एवं युज्यंते प्राह्णास्तावद्दिनस्य त्रिधा विभक्तस्य प्रथमो भागः । प्रातस्संगवौ तस्यांशावेव। मध्याह्नो मध्यभागः तृतीयभागस्तु पराह्णः। सायं संध्याभ्यामवांतरभेदाभिन्नः।रात्रौ च प्रदोषः प्रथमभागः । मध्यमभागो निशीथः । अर्द्धरात्रं तु तत्रापि मध्यमघटिकाद्वयम् । अपररात्रस्तु तृतीयो भागस्तस्यैवांतिमांशद्वयं प्रत्यूषप्रभातसंज्ञम् । यथा संध्याश्च तदवांतरभेदा अपि पृथग्गण्यंते इति । क्रमगणनया तु मध्याह्नाद्यतिक्रमापत्तेः प्राह्णस्तु स्मृतौ न भिन्नत्वेन गण्यते । तथाहि—" मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः । मध्याह्नस्त्रिमुहूर्त्तोथापरात्रोऽपि तादृशः । सायाह्नस्त्रिमुहूर्त्तः स्यात्सर्वकर्मसु गर्हितः ॥ " इति ॥ २१ ॥ षोढा विभक्तां दिवसरक्षामुक्त्वा पंचधा विभक्तरात्रिरक्षामाह दोषे रात्रेश्चतुर्थघटिकापर्यंतं प्रदोषस्तत्र पंचघटिकामारभ्य चतुर्दशघटिकापर्यंतमर्द्धरात्रमंतभागस्यार्द्धरात्रत्वात्तत्र पंचदशषोडशघटिके निशीथस्तत्र श्रीवत्सो धामनि शरीरे यस्य । निशीथादूर्ध्वमरुणोदयात्प्राक् अपररात्रः । प्रत्यूषे रात्रिशेषे घटिकाचतुष्टये । अनुसंध्यं दिनरात्रिसंध्ययोः । प्रभाते प्रकृष्टप्रकाशे ॥ २२ ॥ इत्यर्थ इति । न ह्यग्निर्दहनार्थं प्रार्थ्यते तस्य दहनस्वभावत्त्वादिति भावः । संभवत्वादाह—यद्वेति । संबोध्य हे समंतात् भ्रमत् भ्रमणशीलेति संबोधनं कृत्वा दंदग्धीति वीप्साप्रार्थनायां शैघ्र्ये च ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदेऽशनिस्पर्शनविस्फुलिंगे निर्ष्पादिनिर्ष्पिढच्यजितप्रियासि ॥ कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णयचूर्णयारीन् ॥ २४ ॥त्वं यातुधानप्रमथप्रे तमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन् ॥ २५ ॥ त्वं तिग्मधाराऽसिवरारिसैन्यमीशप्रयुक्तो मम छिंधिछिंधि ॥ चक्षूंषि चर्मञ्छतचंद्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥२६॥ यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा ॥ २७ ॥ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः ॥ २८ ॥ गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९ ॥

यमित्यर्थः । यद्वा दंदग्धीति लोण्मध्यमपुरुषः । अत्र त्वमेवंभूतं चक्रमिति स्वरूपमुक्त्वा संबोध्य प्रार्थ्यतेऽतिशयेन दहेति । कक्षं शुष्कतृणम् ॥ २३ ॥अशानिवत्स्पर्शो येषां ते विस्फुलिंगा यस्याः तस्याः संबोधनं हे गदे त्वमाजितस्य प्रियाऽसि अहमच्यतस्य दासः अतः कूष्मांडादीन्निर्ष्पिढिनिर्ष्पिढि संचूर्णय संचूर्णय । अरींश्च चूर्णयचूर्णय । सर्वत्र वीप्सातिशीघ्रत्वाय ॥२४॥ हे दरेंद्र पांचजन्य त्वं यातुधानादीन्विद्रावय । विप्रग्रहा ब्रह्मराक्षसा येऽन्ये च घोरदृष्टयस्तान् ॥२५॥ तिग्मा धारा यस्य हे तिग्मधार असि वर खड्गश्रेष्ठ । त्वं ममारिसैन्यं छिंधिछिंधि । शतं चंद्राकाराणि मंडलानि यस्मिन्हे शतचन्द्र चर्मन् अघोनामघवतां द्विषां चक्षूंषि छादय पापचक्षुषां चोग्रदृष्टीनां चक्षूंषि हर ॥ २६ ॥ यत् येभ्यो भयम् । अंहोभ्यः पापेभ्यः ॥ २७ ॥ श्रेयःप्रतीपका इष्टव्याघातकाः ॥ २८ ॥ स्तोत्राणि बृहद्रथंतरादिसामानि तैः स्तोभ्यते संस्तूयत इति

अशनिर्वज्रम्। विस्फुलिंगा अग्निकणाः । यश्च केनापि न जीयते सोजस्तस्य त्वं प्रियासि । अतोऽजप्रियत्वादेव । तस्य वासस्य मे कूष्मांडादीन्रुद्रगणभेदान् । कुं भूमिमूष्मणाऽमति तापयतीति कूष्मांडः । अनुनासिकांत त्वादौणादिको डः । ' अम–रोगे ' । विघ्नानां नायको विनायकः स एव वैनायकः प्रबलतरविघ्नः । यक्षा यजंते संगच्छते कुबेरेणेति निरुक्तेरुपदेवगणाः । एवं रक्ष्यते यज्ञादिर्यतस्तानि रक्षांसि । अभूवन्रुद्रसेवार्थमिति भूतानि गृह्णन्ति बालवृद्धादीनि ग्रहाः पूतनादयो यक्ष्मादयश्च ॥ २४ ॥ यातूनि रक्षांसि दधाति पुष्णंतीति यातुधाना रक्षसां स्वजातिपोषकत्वाद्राक्षसा एव । प्रकर्षेण मथ्नंति शुद्धिमिति प्रमथा रुद्रपार्षदाः । प्रेता दुष्कर्मणा दुर्गतिं प्राप्ता जीवाः। पिशाचस्तेषामवांतरभेदः। मातरो हि ब्राह्म्यादिभिन्ना रुद्रगणान्तर्गताः स्त्रियो विकृतरूपास्ताश्च महाभारते स्कंदाविर्भावोपाख्याने वर्णिता विस्तारभियेह नोक्ताः।दृणाति स्वशब्देन विदारयति दुष्टमनांसीति दरः शंखः स चासाविन्द्रः श्रेष्ठश्चेति दरेन्द्रः । कृष्णेन पूरितो वादितः धातूनामनेकार्थत्वात्पूरी वादनेऽपीति । भीमो भयजनकः स्वनो यस्य'सः ॥ २५ ॥ ईशेन प्रयुक्तश्चालितः । शतं चंद्राश्चंद्राकारा यत्र तत्संबुद्धौ॥२६॥केतुभ्य इति बहुत्वोक्तेः सहस्त्रं केतवो ज्ञेयास्तेच ज्योतिःकल्पतरावुक्ताः–पञ्चविंशतिः प्रागपरदृश्या रविजाः२५ । चंद्रजा उत्तरदृश्याः त्रयः ३ । भौमपुत्रा उत्तरदृश्याः षष्टिः६० । बुधपुत्राः सर्वदिग्दृश्या एकपंचाशत् ५१ । एवम् १३९ । गुरुपुत्राः पंचषष्टिः६५ याम्यदृश्याः। शुक्रपुत्राश्चतुरशीतिः ८४ पुरोदृश्याः । एवं १४९ । पूर्वेण सह २८८ । शनिपुत्राः षष्टिः ६० पश्चिमदृश्याः । राहुपुत्राः रविचंद्रमंडलदृश्या त्रयस्त्रिंशत् ३३ । अग्निपुत्राः पञ्चविंशतिराग्निदिग्दृश्याः २५ । एवं ११८ । पूर्वेण सह४०६ । मृत्युपुत्राः पञ्चविंशतिर्याम्यदिग्दृश्याः२५ । भूमिपुत्रा द्वाविंशतिरीशदिग्दृश्याः २२ । एको ब्रह्मपुत्रः १ । सर्वदिग्दृश्यः। पुनराग्निपुत्रा विंशत्यधिकशतम् १२० अग्निदिग्दृश्याः । वायुपुत्राः सप्तसप्ततिर्वायुदिग्दृश्याः ७७ । प्रजापतिपुत्रा अष्ट ८ तारामंडलगाः । पुनर्ब्रह्मपुत्राश्चतुरधिकशतम् १०४ । वरुणपुत्रा द्वात्रिंशत् ३२ । स्वदि ग्दृश्याः। षण्णवतिः कालपुत्रा ९६ याम्यदृश्याः । नव विदिक्पुत्रा ९ विदिग्दृश्या भवंति । एवं सहस्त्रं केतवः सपुच्छास्ताराविशेषा एव प्रायो लोकदुःखावहास्ते इति ॥ २७ ॥ २८ ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः ॥ बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः ॥ ३० ॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः ॥ ३१ ॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयम् ॥ भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ॥ ॥ ३२ ॥ तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः ॥ पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३ ॥ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नारसिंहः ॥ प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः ॥ ३४ ॥

स्तोत्रस्तोभः । छंदोमयो वेदमूर्तिः । "सुपर्णोऽसि गरुत्मान्" इत्यादिश्रुतेः । ऐकपद्यपाठे स्तोभा गीतिपूरकाक्षराणि । स्तोत्रस्तोमेति पाठे सामाधारभूतऋक्स्तोमः ॥ २९ ॥ नामानि च रूपाणि च यानानि च वाहनानि आयुधानि च नो बुद्ध्यादीन् पांतु । पार्षदभूषणाः पार्षदमुख्याश्च पांतु ॥ ३० ॥ सच्च असच्च मूर्तामूर्तं यत्तत्सर्वं जगत् ॥ ३१ ॥ ऐकात्म्यस्यानुभावोऽनुध्यानं येषां तेषाम् । विकल्पो भेदस्तद्रहितोऽपि ॥ ३२ ॥ सत्यमानेन सत्यभूतेन प्रमाणेन ॥ ३३ ॥ पुनरपि श्रीनृसिंह एव प्रार्थ्यते । विदिक्ष्वितिपात्वित्यनुषंगः। यद्वा नारसिंहः प्रह्लादः स्वनेन श्रीनृसिंहनामगर्जनेन स्वतेजसा स्वप्रभावेण ग्रस्तानि समस्तानि दिग्गजविषशस्त्रजलवाय्वग्न्यादीनां तेजांसि प्रभावा येन सः ॥ ३४ ॥

॥ ३० ॥ यत्सदसद्रूपं जगत्तद्वस्तुतो भगवानेव तस्यैव बहिरंगमायाकार्यत्वात् । सत्येनानेन शपथेनेति । यद्येवंभूतो भगवान्सत्यः स्यात्तर्हि अस्माकमुपद्रवा नश्यंतु यदि 'वेदाः प्रमाणम्' इतिवदुक्तिरियम् ॥ ३१ ॥ ऐकात्म्यं चिन्मयत्वादेकस्वरूपत्वमेवानुभावो लक्षणं यासां तासां भूषणादीनां शक्तीनां विकल्परहितः । स्वस्य तासां च चिद्रूपत्वात् । ताभ्यो भेदरहितोऽपि भूषणाद्याख्यास्ताः शक्तीः यथा धत्ते तथा तेनैव सत्यमानेन स पात्वित्यन्वयः । तत्र भूषणानि कौस्तुभादीनि । आयुधानि चक्रादीनि । लिंगानि चतुर्भुजत्वादीनि । आख्या नामानि यासां ताः शक्तीः स्वरूपशक्तिवृत्तीर्धत्ते स्वमायया स्वरूपशक्त्या स्वरूपभूतया निजशक्त्या मायाख्यया युक्तः "अतो मायामयं विष्णुं प्रवदंति मनीषिणः" इति माध्वभाष्यप्रमाणितश्रुतेः ॥ ३२ ॥ तेनैव सत्यमानेन सत्यरूपप्रमाणेन भूषणादीनि चतुर्भुजत्वादीनि च स्वरूपशक्तिमयत्वात्स्वेनाभिन्नान्येव भगवान् धत्ते इति यदि सत्यः स्यात्तर्हि सर्वैर्हरिर्विदध्यादित्यादिमंत्रोक्तैः स्वरूपैः । सर्वत्र देशे काले च सर्वगः सन्पातु सर्वज्ञ इत्यस्मन्मनोगतमास्तिक्यं भगवानेव जानातीति शपथो दर्शितः । अत्र संदर्भः—यथेति युग्मकम् । ऐकात्म्यानुभावानां केवलपरमस्वरूपदृष्टिपराणाम् । विकल्परहितः परमानंदैकरूपपरमस्वरूपतया स्फुरन्नपि यथा येन प्रकारेण स्वेषु स्वस्वामितया भजत्सु मायया कृपया हेतुना स्वयं विचित्रशक्तिमयेन स्वस्वरूपेणैव कारणभूतेन भूषणाद्याख्याः शक्तीः शक्तिमयाविर्भावान्धत्ते गोचरयति तेनैव विद्वदनुभवलक्षणेन सत्यप्रमाणेन तद्यदि सत्यं स्यात्तदेत्यर्थः । तैरेव भूषणादिलक्षणैः सर्वैः स्वरूपैर्विचित्रस्वरूपाविर्भावैर्नः पातु । अत एव विष्णुधर्मे बलिकृतचक्रस्तुतौ "यस्य रूपमनिर्देश्यमपि योगिभिरुत्तमैः" इत्याद्यनंतरं च "भ्रमतस्तस्य चक्रस्य नाभिमध्ये महीपते । त्रैलोक्यमखिलं दैत्यो दृष्टवान्भूर्भुवादिकम् ॥" इति । एवं नवमेंबरीषेणापि स्तुतं लिंगानि गरुडाकारध्वजादीनि । अनेन यत्किंचिदाकस्मिकत्वमिव श्रूयते तदपि भगवदाविर्भाववज्ज्ञेयं तृतीयोक्तमपि 'चैतस्य तत्त्वममलं मणिमस्य कंठे' इति वाक्यमप्यसहायम् । अतो द्वादशेऽपि "कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः" इत्यादिविराड्गतत्वेनोपासनार्थमभेददृष्ट्या दर्शितमेव यथासंभवं साक्षाच्छ्रीविग्रहगतत्वेनाप्यनुसंधेयम् । तथाहि विष्णुपुराणे "आत्मानमस्य जगतो निर्लेपमगुणामलम् । बिभर्ति कौस्तुभमणिस्वरूपं भगवान्हरिः" इति ॥ ३३ ॥ एवं नानास्वरूपैः स्वरक्षां समाप्यापि पुनरपि सर्वेषां प्रतिकूलानां भीषणेनैकेनैव नृसिंहस्वरूपेण स्वरक्षामंत्रमेकमाह विदिक्ष्वित्यादि । 'पायान्नृसिंहो सुरयूथपारिः' इत्यत्रोक्त एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मघवानिदमाख्यातं वर्म नारायणात्मकम् ॥ विजेष्यस्यंजसा येन दंशितोऽसुरयूथपान् ॥ ३५ ॥ एतद्धारयमाणस्तु यंयं पश्यति चक्षुषा ॥
पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ॥ ३६ ॥ न कुतश्चिद्भयं तस्य विद्यां धारयतो भवेत् ॥ राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च
कर्हिचित् ॥ ३७ ॥ इमां विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः ॥ योगधारणया स्वांगं जहौ स मरुधन्वनि ॥ ३८ ॥ तस्योपरि विमानेन
गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥ ३९ ॥ गगनान्न्यपतत्सद्यः सविमानो ह्यवाक्छिराः ॥ सवालखिल्यवचनादस्थी
न्यादाय विस्मितः ॥ प्रास्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥४०॥ श्रीशुक उवाच ॥ य इदं शृणुयात्काले यो धारयति चादृतः॥
तं नमस्यंति भूतानि मुच्यते सर्वतो भयात् ॥ ४१ ॥ एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽ
सुरान् ॥ ४२ ॥ इति श्रीभागवते महा० षष्ठ० नारायणवर्मवर्णनं नामाष्टमोऽध्यायः ॥ ८ ॥

दंशितः कवचितः॥ ३५॥सोऽपि साध्वसाद्भयाद्विमुच्यते॥ ३६॥तस्य तु भयं न भवेदेव ॥ ३७॥ एतद्विद्याप्रभावमितिहासेनाह इमामिति सार्धैस्त्रिभिः। मरुधन्वनि निरुदके देशे । अनेन विद्यायाः क्षेत्रतीर्थानपेक्षत्वं दर्शितम्॥ ३८॥यत्र द्विजस्य क्षयो देहत्यागस्तस्योपरि॥ ३९॥ सद्यस्तत्क्षणादेव गगनान्न्यपतत् । पाठांतरे अंगनाभिः सह । वालखिल्योपदेशात्तस्यास्थीनि प्रास्य प्रक्षिप्य विस्मितः सन् स्वं धाम गंधर्वलोकं जगाम॥ ४०॥ ४१॥अधिगतः प्राप्तः सन्॥ ४२॥इति श्रीभा० षष्ठे टीकायामष्टमोऽध्यायः॥ ८॥

नृसिंहमंत्रः पुनरुक्त्या कथनं त्वधिकमेवेति चेदत्राह–यद्वेति । प्रहापयन्निति स्वार्थे णिच् । परिहरन्नित्यर्थः अस्य क्ष्रौमिति बीजसंपुटितस्य जपान्महामारी नश्यतीति ॥ ३४ ॥ उपसंहरति–मघवन्निति । देवपूज्यत्वादिदमति रहस्यमपि तुभ्यमुक्तमिति भावः ॥ ३५ ॥ सोऽपि साध्वसाद्भयात्किमुतैतद्धारयमाणः । पदा पादने ॥ ३६ ॥ ३७ ॥ कौशिकः कौशिकगोत्रे विद्यमानः । योगराधारणया योगाभ्यासेन । मरुधन्वनि निर्जलप्रदेशे॥ ३८॥ तस्येति यत्रेति पदेनान्वेति ॥ ३९ ॥ सांगन इति पाठे । अवाक्शिरा अधःशिराः । विमानपतितेन गंधर्वेण प्रार्थितैर्वालखिल्यैरुक्तमत्र कौशिकद्विजास्थीनि संति तानि पृथूदकक्षेत्रे प्राचीसरस्वत्यां प्रक्षिप तत्र स्नाहि च ततः स्वां गतिमवाप्स्यसीति तच्छ्रुत्वा स तथा कृतवान् ॥ ४० ॥ आदृतो धारयति सर्वदा जपेन धारयति तं श्रोतारमध्येतारञ्च ॥ ४१ ॥ ननु यत्फलम् 'एतद्धारयमाण' इत्यादिनोक्तं तत्कुतो नास्तीति चेदत्रेदमवधेयम्–गुरुशिष्ययोर्मिथो योग्यतावैकल्याद्योग्यत्वेऽपि "नासंवत्सरवासिने ब्रूयात्" इति श्रुतेर्गुरुकुलवासापूर्त्या गुरुप्रसादाभावेन वा लोकापकारादिना वा गुरोः प्राप्ता शिष्यस्य यथोक्तफलदा न स्यात् । तदुक्तं तीर्थेन "गुरुशिष्ययोरयोग्यत्वाद्गुरुवृत्तेरपूर्त्तितः । अप्रसादाद् गुरोर्विद्या न यथोक्तफलप्रदा " इति तर्हि गुरूपदेशमंतरेण यथा लिखितपाठादिना प्राप्ता फलदा स्यादिति चेन्न 'गुरोः प्राप्ता फलप्रदा' इत्युक्तेस्तत्रापि प्रसन्नाद् गुरोः प्राप्तैव फलदेति तत्त्वम् "सुप्रसन्नगुरोर्दत्ता या विद्याभीष्टदा हि सा" इति स्मृतेः । "अन्येनैव प्रोक्ता सुज्ञानाय प्रेष्ठा" इति काठकश्रुतेः। "यदृच्छया श्रुतं वापि च्छन्नेनाथ च्छलेन वा । पत्रे स्थितं वा गाथायां वर्जयेत्तदनर्थवत्" इति ब्रह्मवैवर्त्तोक्तेश्च। तथा च विधिवैकल्यादेव फलवैकल्यमिति यथोक्तश्रद्धादिसत्त्वे फलस्यावश्यंभावित्वनियमादित्यलम् ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत ॥ सोमपीथं सुरापीथमन्नादमिति शुश्रुम ॥ १ ॥ स वै बर्हिषि देवेभ्यो भागं प्रत्यक्षमुच्चकैः ॥ अवदद्यस्य पितरो देवाः सप्रश्रयं नृप ॥ २ ॥ स एव हि ददौ भागं परोक्षमसुरान्प्रति ॥ यजमानोऽवहद्भागं मातृस्नेहवशानुगः ॥ ॥ ३ ॥ तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः ॥ आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा ॥४॥ सोमपीथं तु यत्तस्य शिर आसीत्कपिंजलः ॥ कलविंकः सुरापीथमन्नादं यत्स तित्तिरिः ॥ ५ ॥ ब्रह्महत्यामंजलिना जग्राह यदपीश्वरः ॥ संवत्सरांते तदघं भूतानां स विशुद्धये ॥ भूम्यंबुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ॥ ६ ॥

नवमे विश्वरूपे तु हते शक्रेण कोपतः ॥ त्वष्ट्रा चोत्पादिते वृत्रे भीतैर्देवैर्हरेः स्तुतिः ॥ १ ॥ सोमस्य पीथं पानं यस्मिन् एवं सुरापीथम् । अन्नमत्तीत्यन्नादम् । “ अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् ” इत्यादिश्रुतिरनुसंधेया ॥ १ ॥ तस्यासुरपक्षपातमाह । स वा इति द्वाभ्याम् । प्रत्यक्षं प्रकटं यथा भवति तथा सविनयं देवेभ्यो हविर्भागमिंद्रायेदमग्नय इदमित्युच्चैरवदत् । अत्र हेतुः । यस्य पितरो देवाः सः ॥ २ ॥ असुरेभ्यस्तु परोक्षं गुप्तभागं ददौ । तदेवाह । देवान्यजमानोऽसावसुरान्प्रति भागमवहत् केनाप्युपायेन प्रापयामास । यतो मातृस्नेहवशेनासुराननुगच्छति ॥ ३ ॥ ४ ॥ ५ ॥ तां वारयितुं समर्थस्तथापि

त्वष्ट्रा कोपतः कोपेन (१) त्वाष्ट्रः त्वष्टुः पुत्र इति श्रुतिपदार्थः । अनुसंधेया योज्या भारतेति । शुद्धवंशोद्भूतत्वादपृष्टमपि त्वां विश्वरूपचरितं श्रावयिष्यामीति भावः॥१॥ बर्हिषि यज्ञे ‘‘बर्हिर्यज्ञे नृपे देवे हस्तमात्रकुशेऽपि च’’ इति धरणिः । स विश्वरूपः । अत्रोच्चैः कथने । नृपेति । शृणु राज्ञां स्वभावं सौजन्यपरित्यागलक्षणमिति भावः ॥ २ ॥ दत्वा च केनाप्युपायेन प्रापयामासेति भावः । तत्र हेतुः—मातृस्नेहेति ॥ ३ ॥ देवानां हेलनमवज्ञानलक्षणम् । धर्मेऽलीकं कपटमसुरभागदानरूपम् । भीतः मंत्रदत्तभागेन बलवृद्धिं विचार्य त्रस्त इत्यर्थः ॥ ४ ॥ कपिंजलः पारावतः । कलविंकश्चटकः । ‘‘कलविंकः पुमान् ग्रामचटके च कलिंगके’’ इति । तित्तिरिः प्रसिद्धः ॥ ५ ॥ आकस्मिकाभ्यां क्रोधभयाभ्यां तं हत्वैवाहो हंत महापापं बुद्धिपूर्वकमेवाकरवं महानीचो न जाने कुत्र वा नरके पतिष्यामि तदेतत्समुचितं फलं शीघ्रमेव लभेयेत्यनुतापपुंजे निममज्जेत्याह—ब्रह्मेति । स्वतेजसा मां ज्वालयेति भावः । यद्यतः । अपि अधिकृतभक्त ईश्वरविभूतिरूपस्तस्मात्कथमेवं विकर्मणोनुतापं न कुर्यादिति भावः । अधीश्वर इति पाठेऽयमर्थः । संदर्भस्तु—तादृशपापस्य तादृशेनाप्यपहरणीयत्वमाह । एवमनुतापेन क्षीणपापवेगः संवत्सरपर्यंतं तथैव विगीत एव स्थित्वा तदन्ते भूतानां स्वदेहस्थपृथिव्यप्तेजोवायूनां ब्रह्महत्यैवापवित्रीकृतानां विशुद्धये तदघं चतुर्द्धा व्यभजत् । आकाशस्यापावित्र्यासंभवात् चतुर्णामेव भूतानां शुद्धये चतुर्द्धेति न्यायः । तेनांतःकरणगतमघं तु सूक्ष्मरूपेण तस्थावेव । यदेव बीजं पुनरपि वृत्रवधेन ब्रह्महत्यां जनयिष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूमिस्तुरीयं जग्राह खातपूरवरेण वै ॥ ईरणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते॥७॥तुर्यं छेदविरोहेण वरेण जगृहद्रुमाः ॥ तेष। निर्यासरूपेण ब्रह्महत्या
प्रदृश्यते ॥ ८ ॥ शश्वत्कामवरेणांहस्तुरीयं जगृहुः स्त्रियः ॥ रजोरूपेण तास्वंहो मासिमासि प्रदृश्यते ॥ ९ ॥ द्रव्यभूयोवरेणापस्तुरीयं जगृहुर्म
लम् ॥ तासु बुद्बुदफेनाभ्यां दृष्टं तद्धरति क्षिपन् ॥१०॥ हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे॥इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ॥११॥

जग्राह । संवत्सरं तथैव स्थित्वा संवत्सरांते भूताक्रोशभीतः सन् भूतानां मध्ये विशुद्धये । लोकापवादपरिहाराय स हारिरिंद्रो भम्यादिभ्यस्तदघं व्यभजद्विभज्य ददावित्य
न्वयः ॥ ६ ॥ तुरीयं चतुर्थं भागम् । खातस्य गर्तस्य पूरः पूरणं तेन वरेण यदि खातपूरणं स्वत एव भविष्यति तर्हि ग्रहीष्यामीत्येवं भाषाबंधेन जग्राहेत्यर्थः । ईरणमूषरम् ।
अत एवोषरेऽध्ययनादि निषिद्ध्यते ॥ ७ ॥ छेदे सति पुनर्विरोहः प्ररोहो भवत्विति वरेण । निर्यासरूपेण ब्रह्महत्याया दृष्टत्वान्निर्यासो न भक्ष्यः ॥ ८ ॥ शश्वत्कामवरेण
कामः संभोगः यावत्प्रसवं गर्भानुपघातेनैव संभोगवरेण । रज इति । अत एव रजोदर्शने तत्संगादि न कार्यम् ॥ ९ ॥ द्रव्यभूयोवरेण यस्मिन्द्रव्ये क्षीरादावापो मिश्रा भवे
युस्तस्य भूयस्त्वमाधिक्यं तन्मयत्वेन स्यादिति वरेण।यद्वा स्वस्यैव उद्धरणेपि निर्झरोद्गमादिना भूयस्त्ववरेण । द्रवभूय इति पाठेऽप्ययमेवार्थः । यद्वा द्रवभूयस्त्वं सांसिद्धिकद्रवत्वं
तेन वरेण।अस्य विभागस्य "विश्वरूपो वै त्वाष्ट्रः"इत्यस्यां श्रुतावुक्तेः । तद्विभागफलमाह । तत्पापं हरति निराकरोति । कः क्षिपन् । बुद्बुदादि जलाद्बहिः प्रक्षिपन्नित्यर्थः ।
यद्वा क्षिपन् जलं पापं हरत्याहरति गृह्णातीत्यर्थः । अयं च " तस्मादापो न परिचक्ष्याः" इत्यादिश्रुत्यर्थ उक्तः । पाठांतरे हरिकिल्बिषमिंद्रपापम् ॥ १० ॥ इंद्रायेंद्रं
हंतुम् । शत्रवे शत्रूत्पत्त्यै । तदाह । इंद्रशत्रो विवर्धस्वेति । अत्र चेंद्रशत्रुपदस्याद्युदात्तत्वात् " बहुव्रीहौ प्रकृत्या पूर्वपदम् " इति स्मृतेर्बहुव्रीहिलक्षणापत्त्या इंद्र एव तस्य

तीति भावः ॥ ६ ॥ इत्यर्थ इति । यद्यपि वृष्ट्यादिनां मृत्तिकापातेन स्वयमेव पूरणं भविष्यति तथापि वरेण स्वतो वृद्ध्यापीति भावः ॥ ७ ॥ ऊषरं क्षारमृत्तिकावत्स्थलम् । अत एवोषरस्य
ब्रह्महत्याधिष्ठानत्वादेव ॥ ८ ॥ निर्यासो वृक्षच्युतोतीवचिक्कणद्रवविशेषः । 'निर्य्यासान्वर्ज्जयेत्सर्वान्' इति स्मृतेरभक्ष्य इत्यर्थः । शश्वत्कामा बहुसंभोगेऽप्यलंबुद्ध्यभावः । गर्भवत्या अपि
गर्भानुपकारकसंभोगश्च । अत एव रजसि ब्रह्महत्यायाः स्थितत्वादेव स्त्रीसंगो न कार्यः ॥ ९ ॥ न केवलं जलमिश्रण एव भूयस्त्वमन्येषां दध्यादीनां मिश्रणेऽपि भूयस्त्वस्य संभवादिति चे
दत्राह–यद्वेति । निर्झरोद्गमादिना प्रस्रवणादिना द्रवभूयस्त्वशब्दस्य प्रसिद्धार्थमादायाह–यद्वेति । अस्य चतुर्द्धाब्रह्महत्याविभागस्य । श्रुतिश्चेयं संहितायां द्रष्टव्या । संदर्भस्तु–द्रव्यशब्देनात्र द्रव एवोच्यते भावे
कृत्प्रयोगात्। स्वार्थे तद्धितान्तो वा । मिश्रा इति। इतः पूर्वं मिश्रा एव नो भवेयुरिति गम्यते। निर्झरोद्गमेति।इतः पूर्वं निर्झरोद्गमादिकमपि नेति गम्यते। सांसिद्धिकद्रवत्वमिति। इतः पूर्वं किञ्चिद्घनमासीदिति गम्यते। इत्यर्थ
इति। जलार्थी बुद्बुदादिकमपाकृत्यैव जलं स्वीकरोति न तु बुद्बुदादिसहितमिति । यदि च तद्युक्ता अपः कश्चिद्गृह्णाति तदा स पापमेव हरतीति भावः । ' क्षेपणं निन्दनम्' इति कोशादाह–यद्वेति । क्षिपन् जल
निंदां कुर्वन् । इत्यर्थ इति । जलनिन्दको जलब्रह्महत्यां गृह्णातीति भावः । अयञ्च श्रुत्यर्थ उक्त इति । यतोऽपां निंदकस्य पापावाप्तिस्तस्मादापो जलानि न परिचक्ष्या निंद्या इति श्रुतिपदार्थः । पाठांतरे ' दृष्टं तद्धरिकि
ल्बिषम्' इति पाठे ॥ १० ॥ अत्र च मंत्रे विश्वरूपस्य पिता त्वष्टा इंद्रवधकामनया वृत्रासुरोत्पादनाय " इन्द्रशत्रुर्वर्द्धस्व " इत्यनेन मंत्रेणाहुतिं दत्तवांस्तत्रेंद्रशत्रुरित्युत्तरपदप्रधानस्वरपाठेन तत्पुरुषसमासे कर्त्तव्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथान्वाहार्यपचनादुत्थितो घोरदर्शनः ॥ कृतांत इव लोकानां युगांतसमये यथा ॥ १२ ॥ विष्वग्विवर्धमानं तमिषुमात्रं दिनेदिने ॥ दग्धशैलप्रतीकाशं संध्याऽभ्रानीकवर्चसम् ॥ १३ ॥

शत्रुरभूत् । तदुक्तं श्रुत्या "यदब्रवीत्स्वाहेंद्रशत्रुर्वर्धस्वेति तस्मादस्येंद्रः शत्रुरभवत्" इति। तथा च शिक्षायाम् "मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधात् " इति ॥ ११ ॥ अन्वाहार्यपचनाद्दक्षिणाग्नेः ॥ १२ ॥ तं वीक्ष्य वित्रस्ता लोका दश दिशो विदुद्रुवुरिति

इंद्रः शत्रुः शातयिता नाशयिता यस्येति पूर्वपदस्वरपाठाद्बहुव्रीहिसिद्धेः स्वरविपर्ययाद्यजमानघातकत्वं मंत्रस्य सिद्धम्। अत्र प्रमाणमाह—तथा चेति।शिक्षायां पाणिनिशिक्षायाम् ।स्वरादिहीनो मंत्रो मिथ्या*प्रयुक्तो भवति यदर्थमुच्चार्य्यते तत्कार्यकरो न भवति किन्तु स वाग्वज्रो वाणीरूपो वज्राख्यशस्त्रं भूत्वा यजमानं हिनस्ति अत्र दृष्टांतः—यथेति । इंद्रशत्रुर्वृत्रः स्वरस्य विपर्ययोच्चारणादित्यर्थः । अत्र संदर्भः—अत्र तत्पुरुषे वृत्रस्य हंतृत्वं बहुव्रीहौ सतींद्रस्य । तत्र च तत्पुरुषत्वम् " समासस्य च " इत्यनेन समासांतस्वरस्यांतोदात्तविधिना व्यज्यते । बहुव्रीहित्वं तु तद्बाधकेन " बहुव्रीहौ प्रकृत्या पूर्वपदम् " इत्यनेन पूर्वपदे स्वभावसिद्धाद्युदात्तस्थापकेन व्यज्यते इंद्रशब्दो ह्याद्युदात्तः ' इदि—परमैश्वर्ये ' इति धातोरुदात्तगणे पठितत्वात् । तदेवं दैवादाद्युदात्तपाठेन फलवैपरीत्यं जातम् । इंद्र एव तस्य शत्रुरभूदिति । अत्र विश्वनाथः—' संवत्सरान्ते तदघम्' इति पूर्वोक्तेराश्विनमासारंभे इन्द्रो यदैव ब्रह्महत्यातो विमुक्तो बभूव तदैव तपोवनादागत्य स्वीयमाश्विनमासं संपालयितुं प्रवृत्तस्त्वष्टा स्वपुत्रवधं श्रुत्वा क्रोधशोकाभ्यामिंद्रवधोपायं चकारेत्याह—हतपुत्र इति । इंद्राय शत्रवे इंद्ररूपं शत्रुं हंतुम् । तत्र मंत्रमाह—"इंद्रशत्रो विवर्द्धस्व " इति इंद्रस्य शत्रुः सन्विवर्द्धस्वेति तत्पुरुषस्य समासस्य विवक्षितेत्वपि इंद्र एव शत्रुर्यस्येति बहुव्रीह्यर्थ एव दैवादापतितः स्वरव्यतिक्रमात् । तथाहि—'इदि—परमैश्वर्ये ' इत्यस्योदात्तगणपठितत्वादिन्द्रशब्दो ह्याद्युदात्तस्तत्र ' समासस्य च ' इति सूत्रेण समासमात्र एवांतोदात्तत्वविधानात्तत्पुरुषे शेषमनुदात्तमित्यनेनेन्द्रशत्रो इत्यस्याद्युदात्तत्वम् "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इति तद्बाधकसूत्रेण पूर्वपदस्य स्वभावसिद्धस्वरस्थापनाद्बहुव्रीहाविंद्रशत्रो इत्यस्याद्युदात्तत्वम् । त्वष्टुस्तु—दैवादाद्युदात्तस्वरतयैव पाठादिंद्र एव तस्य शत्रुर्हन्ताऽभूदिति शेषं स्वामिवत्। अयमर्थः—श्रीभगवद्गीतोपनिषत्सप्तदशाध्याये वाङ्मयतपस्त्ववर्णने प्रियहितमधुरादिविशेषणचतुष्टयवत एव वाङ्मयतपस्त्वमुक्तं श्रीशङ्करानन्दसरस्वतीभिरपि तत्र दृष्टांतत्वेनोक्तमुदात्तादिस्वरचतुष्कयुक्तोच्चारितवेदस्य यथा वेदत्वं नान्यथेति। परन्तु शिक्षायां तु पञ्चवोक्ताः स्वरास्तथाहि उदात्तोऽनुदात्तस्वरितप्रचयजात्यादिभेदात् । " अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ उदात्तं भ्रुवि पातव्यं प्रचयं नासाग्रमेव च । हृत्प्रदेशेऽनुदात्तं तु तिर्यग्जात्यादिरीरितः ॥ " अधोरक्तोऽनुदात्तोऽताम्र उदात्तः उपरिरक्तस्तिर्यग्रक्तो वा स्वारितः । स्वरितपरा अताम्राः प्रचयाः एकपदे नीचपूर्वो पूर्वो वायवान्यतरयुक्तो जात्यः । जात्ये तु पितृदानवद्दस्तमिति प्रसंगात्स्वरापराधस्योक्तम् ॥ ११॥ अथ तदनंतरमेव स्वीयपाठव्यतिक्रमेऽवगते सति अन्वाहार्यवचनात् । स्वभावप्राप्ताद्युदात्तव्यंजितबहुव्रीहिपठनानंतरमाहार्यताप्राप्ताद्यनुदात्तव्यंजिततत्पुरुषपाठाद्धेतोः । स घोरदर्शन उत्थितः स्वाभाविकपाठादिंद्रोऽस्य हंता भविष्यति पश्चादाहार्यपाठादिंद्रोप्यनेन हतो भविष्यति सवाहनस्यापि तस्यानेन निगिलिष्यमाणत्वादिति भावः । अन्वाहार्यशब्दस्य मासिकश्राद्धवाचित्वाद्व्याख्यान्तरं न घटते ॥ १२ ॥ इषुमात्रमिति । 'ईषीकाऽत्र बुधैर्ज्ञेया इषुशब्देन

* स्वरतः स्वरेण आद्यादित्वात्तसिः । मिथ्याप्रयुक्तो यदर्थप्रतिपादनाय प्रयुक्तस्ततोर्थांतरं स्वरवर्णदोषात्प्रतिपादयन्नभिमतमर्थं नाहेत्यर्थः । वागेव वज्रो हिंसकत्वात् यथेंद्रशत्रुशब्दः स्वरदोषाद्यजमानं हिंसितवानित्यर्थः । इंद्रस्याभिचारो वृत्रेणारब्धस्तत्रेन्द्रशत्रुर्वर्द्धस्वेति मंत्रसहितः । तत्रेंद्रस्य शमयिता शातयिता भवति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो न तु रूढिशब्दः शत्रुर्भवेत्यत्रार्थे प्रतिपाद्येऽन्तोदात्ते प्रयोक्तव्ये आद्युदात्त ऋत्विजा प्रयुक्त इत्यर्थांतराभिधानादिंद्र एव वृत्रस्य शातयिता संपन्नः इंद्रशत्रुत्वस्य च विधेयत्वात्संबोधनविभक्तेरनुवाद्यविषयत्वादिहाभावः । यथा राजा भव युध्यस्वेति ऊह्यमानस्य चामंत्रत्वाद्यज्ञकर्मणीति जपादिपर्युदासेन मंत्राणामेकश्रुतिर्विधीयमानेह न भवति वृत्रेणेति । अत्र विवरणकारेण फले हेतौ तृतीयेति व्याख्यातं तस्यायं भावः—तैत्तिरीये " विश्वरूपवधात्कुपितेन त्वष्ट्रा आरब्धेवीन्द्रे सोमेऽनुपहूतेनेन्द्रेण पीतस्य सोमस्यावशेषं कुद्रस्त्वष्टाऽऽहवनीयमुपावर्त्तयत्स्वाहेन्द्रशत्रुर्वर्द्धस्वेति ततो वृत्रोउदभूत् " इति । श्रूयते ततश्चाभिचारकर्तृत्वं त्वष्टुरेव न वृत्रस्येति पातञ्जलमहाभाष्यविवरणे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तप्ततामशिखाश्मश्रुं मध्याह्नार्कोग्रलोचनम् ॥ १४ ॥ देदीप्यमाने त्रिशिखे शूल आरोप्य रोदसी ॥ नृत्यंतमुन्नदंतं च चालयंतं पदा महीम् ॥ १५ ॥ दरीगंभीरवक्त्रेण पिबता च नभस्तलम् ॥ लिहता जिह्वयर्क्षाणि ग्रसता भुवनत्रयम् ॥ १६ ॥ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः ॥ वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥ १७ ॥ येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना ॥ स वै वृत्र इति प्रोक्तः पापः परमदारुणः ॥ १८ ॥ तं निजघ्नुरभिद्रुत्य सगणा विबुधर्षभाः ॥ स्वैःस्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः ॥ १९ ॥ ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः ॥ प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः ॥ २० ॥ देवा ऊचुः ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः ॥ हराम यस्मै बलिमंतकोऽसौ बिभेति यस्मादरणं ततोऽस्तु नः ॥ २१ ॥ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतम् ॥ विनोपसर्पत्यपरं हि बालिशः श्वलांगुलेनातितितर्ति सिंधुम् ॥ २२ ॥

पंचमेनान्वयः । कथंभूतम् । विष्वक्समंतत इषुविक्षेपमात्रं प्रतिदिनं वर्धमानम् ॥ १३ ॥ दग्धशैलप्रतीकाशं कृष्णवर्णम् । संध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तम् तप्तताम्रवच्छिखाः श्मश्रूणि च यस्य । मध्याह्नार्कवदुग्रे लोचने यस्य ॥ १४ ॥ रोदसी आरोप्यैवेत्यर्थः ॥ १५ ॥ दरीवद्गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमित्यन्वयः । कथंभूतेन । नभस्तलं पिबता । ऋक्षाणि जिह्वया लिहता । भुवनत्रयं ग्रसता ॥ १६ ॥ महता विस्तीर्णेन । रौद्रा दंष्ट्रा यस्मिन् ॥ १७ ॥ वृत्रनाम निर्वक्ति । येनावृता इति । त्वाष्ट्री मूर्तिर्यस्य तमसस्तेन त्वाष्ट्ररूपेणेत्यर्थः । तथा च श्रुतिः । " स इमाँल्लोकानावृणोत्तद् वृत्रस्य वृत्रत्वम् " इति ॥ १८ ॥ अग्रसद्भक्षितवान् ॥ १९ ॥ ग्रस्तं तेजो येषाम् । प्रत्यञ्चमंतर्यामिणं त्रिभुवनस्य तेन व्याप्तत्वात्क्वापि गमनासंभवात्तत्रैव स्थित्वा तुष्टुवुरित्यर्थः । " महाभये परित्राणमन्यतो न भवेदिति ॥ हरिमेव प्रपद्यंते सुराः शरणमातुराः ॥" ॥ २० ॥ वाय्वादीनि पंचमहाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयो ब्रह्मादयश्च ततोऽर्वाचीना वयं च सर्वे यस्मै अंतकाय कालायोद्विजंतः संतो बलिं हरामासावपि यस्माद्बिभेति ततः परमेश्वरादेव नोऽस्माकमरणं शरणं रक्षणमस्तु ॥ २१ ॥ तत एवेत्यवधारणे हेतुमाहुः । अविस्मितं निरहंकारं कुतूहलशून्यं वा कुतः । प्रशांतं रागादिशून्यम् । तच्च कुतः । स्वेनैव लाभेन परिपूर्णकामम् । तच्च कुतः । सममुपाधिपरिच्छेदशून्यम् । एवंभूतं परमेश्वरं विना परं यः शरणार्थमुपसर्पति

नो शरः ।' मात्रं स्थूलमिह प्रोक्तं तन्मात्रं वर्द्धते दिने ॥ " इति ज्ञेयमन्यथा जगन्नाशप्रसंगात् । समंतात्स्वस्योर्द्ध्वाधो दशदिक्ष्वित्यर्थः ॥ १३ ॥ १४ ॥ आरोप्यारोप्यैवेत्यर्थः ॥ १५ ॥ पिबतेव ॥ १६ ॥ ॥ १७ ॥ पातीति पः पालः परमात्मा धर्मो वा तस्मादपगतः पापः । नन्वग्रे तस्य " नारायणे भगवति कथमासीद्दृढा मतिः " इति राज्ञः प्रश्नेन परमभक्तत्ववर्णनात् कथमित्थमुक्तमत आह—पं परमात्मानमाप्नोतीति पापः । एवं परं केवलमदारुण इत्यपि ज्ञेयम् । श्रुतिस्तु स्पष्टार्थत्वान्न व्याख्याता ॥ १८ ॥ तं वृत्रम् ॥ १९ ॥ ततः शस्त्रग्रासानंतरम् । ते देवाः । तेन वृत्रेण तत्रैव यत्र स्थिता इत्यर्थः । शरणं रक्षकम् ॥ २० ॥ असावपि । अंतकोपि ॥ २१ ॥ सुधियान्यो नाश्रयणीय इत्याह—अविस्मितमिति । तं विनाऽपरं देवतांतरं कर्मयोगं ज्ञानयोगमपरयोगं वा शरणार्थं बालिशो महामूर्ख एवापसर्पति न तु विज्ञः । यथा शुनः पुच्छेन सिन्धुमतितर्तुमिच्छति स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्योरुशृंगे जगतीं स्वनावं मनुर्यथाऽऽबध्य ततार दुर्गम् ॥ स एव नस्त्वाष्ट्रभयाद्दुरंतात्त्राताश्रितान्वारिचरोऽपि नूनम् ॥ २३ ॥ पुरा स्वयंभूरपि संयमांभस्युदीर्णवातोर्मिरवैः कराले ॥ एकोऽरविंदात्पतितस्ततार तस्माद्भयाद्येन स नोऽस्तु पारः ॥ २४ ॥ य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वम् ॥ वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगीशमानिनः ॥ २५ ॥

स बालिशोऽज्ञः । यतोऽसौ शुनो लांगूलेन पुच्छेन समुद्रमतितितर्ति अतितर्तुमिच्छतीत्यर्थः । यथा तेन समुद्रतरणं न भवति तथा निरीश्वराश्रयणेन व्यसनार्णवतरणं न भवतीति भावः ॥ २२ ॥ महाभये स एव रक्षक इति दृष्टमित्याहुः यस्येति द्वाभ्याम् । यस्य महाशृंगे जगतीं पृथ्वीमेव स्वनावं बद्ध्वा मनुः सत्यव्रतो यथावद्दुर्गं संकटं ततार स एव वारिचरो मत्स्यमूर्तिर्नोऽस्मानप्याश्रितान्सतो नूनं त्राता रक्षिष्यति ॥ २३ ॥ संयमांभसि प्रलयोदके उदीर्णैरुद्भूतैर्वातैर्ये ऊर्मयस्तेषां रवैः कराले भयंकरे । अरविंदान्नाभिकमलात्पतितप्राय एकोऽसहाय एव तस्माद्भयाद्येन नारायणेन ततार स एव नः पारस्तारकोऽस्तु ॥ २४ ॥ किं च । वयं भगवतैव सृष्टाः पालिताश्च बहुशोऽतस्तमेव शरणं व्रजामेत्याहुः य एक इति त्रिभिः । येनानुगृहीताः संतो विश्वं सृजाम । ननु यूयमेव स्रष्टारो नान्यो युष्माकमनुग्राहकोऽस्ति तस्यादर्शनात्तत्राहुः । अस्मत्तः

स्वैव सिंधुं तर्तुं न शक्नोति किमुत तत्पुच्छग्राही प्रत्युत स्वपुच्छग्राहिणं दृष्ट्वा प्रथमं समुद्रे क्षिपति पश्चात्स्वयमपि निमज्जतीति भावः । भगवदाश्रयी तु संसारसिन्धुं यत्तरति तत्किमपि नाद्भुतमित्याह—अविस्मितमिति । न विद्यते विस्मितं किमप्यद्भुतं यत्र तं विना दुर्लंघ्यस्यापि संसारसिंधोस्तारणेऽन्यत्रातिविस्मयोऽपि तत्र न कोऽपि विस्मयः सदैव तस्य गोष्पदीकरणसामर्थ्यादिति भावः । स्वेनैव स्वस्वरूपेणैव । यो लाभः सौन्दर्यादिमाधुर्यसम्पत्कस्य यो लाभस्तेन सह परिपूर्णः कामः स्वयिह्लादिनीशक्तिदत्तो भोगो यस्य तम् । प्रशांतमनुग्रं सेवापराधे जातेऽपि भक्तवात्सल्यात्क्षंतारम् । संदर्भस्तु—अविस्मितं ततोन्यस्यापूर्वस्य वस्तुनोऽसंभवाद्विस्मयरहितम् । अतः स्वेनैव स्वीयेनैव स्वस्यैव कर्मभूतस्य क्रियाभूतेन लाभेन परिपूर्णकामं नान्यस्येत्यर्थः । अतः सर्वत्र समम् । अतः प्रशांतं चित्तदोषरहितं तथोक्तम् "रजस्तमःप्रकृतयः समशीला भजंति वा" इत्यादि । सत्यव्रतेनाप्युक्तम् "न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् । कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं वै शरणं प्रपद्ये ॥" इति । श्रीमहाभारतेऽपि "यस्तु विष्णुं परित्यज्य मोहादन्यमुपासते । स हेमराशिमुत्सृज्य पांशुराशिं जिघृक्षति ॥" इति । तदिदं भक्तिसंदर्भे विशेषेण विवृतमस्तीत्युपरम्यते । स्वामिचरणैरप्येतत्सुष्ठ्वेव विवृतम् ॥ २२ ॥ वयं त्विति । निकृष्टाः सकामा अप्यस्मिन्महाभय एव शरणं यांतोऽपि तेनैव रक्षणीया यथा पूर्वं इत्यभिप्रेत्याह—महाभय इति । यस्य मत्स्यमूर्त्तेः । यथा ततार तथा वयमपि तरेमेति भावः । वारिचरोऽपि वारिण्येव चरन्नपि तत्रैव स्थित्वा जगतीस्थानस्मानीश्वरत्वाद्रक्षतु ॥ २३ ॥ नाभिकमले स्थितस्यैव मोहोद्भवात्पतिततुल्यत्वात्पतितप्राय इत्युक्तं स्वामिचरणैः । एकाकित्वाद्द्वितीयवस्तुनोऽनुत्पन्नत्वात् । सोऽबिभेत् । "स द्वितीयमैच्छत्" इति श्रुतेः ॥ २४ ॥ स खलु सर्वत्रात्र च वर्तमानोऽप्यस्माकं बहिर्मुखेंद्रियाणामदृश्योऽपि कृपयैव दृश्यो भूत्वा रक्षत्वित्याहुः—किश्चेति । अतो भगवत्सृष्टत्वात् । अत्राक्षिपति—नन्विति । तत्र अदर्शने । विश्वनाथस्तु—पुरतोऽस्माकमत्र एव संमीहमानस्य रामकृष्णादिरूपेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योनः सपत्नैर्भृशमर्द्यमानान्देवर्षितियङ्नृषु नित्य एव ॥ कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगेयुगे च॥२६॥ तमेव देवं वयमात्म
दैवतं परं प्रधानं पुरुषं विश्वमन्यत् ॥ व्रजाम सर्वे शरणं शरण्यं स्वानां स नो धास्यति शं महात्मा ॥ २७ ॥ श्रीशुक उवाच ॥ इति तेषां महा
राज सुराणामुपतिष्ठताम् ॥ प्रतीच्यां दिश्यभूदाविः शंखचक्रगदाधरः॥२८॥आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ ॥ पर्युपासितमुन्निद्रशरदं
बुरुहेक्षणम्॥२९॥दृष्ट्वा तमवनौ सर्व ईक्षणाह्लादविक्लवाः ॥ दंडवत्पतिता राजञ्छनैरुत्थाय तुष्टुवुः ॥३०॥ देवा ऊचुः ॥ नमस्ते यज्ञवीर्याय वयसे
उत ते नमः ॥ नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये ॥३१॥ यत्ते गतीनां तिसृणामीशितुः परमं पदम्॥नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति ३२॥

पुरः पूर्वमेवांतर्यामितया समीहमानस्यापि यस्य लिंगं रूपं न पश्यामः । तत्र हेतुः । पृथक्पृथगीशा इत्यभिमानिनः ॥ २५ ॥ देवादिषूपेंद्रपरशुराममत्स्यरामादितनुभिः कृतावतारः सन्नस्मानात्मसात्कृत्वा पाति च ॥ २६ ॥ आत्मभूतं दैवतं कुतो विश्वं विश्वात्मकम् । तथापि विकारं वारयंति । अन्यम् । विश्वात्मत्वे हेतुः । परं कारणम् । ननु प्रधानं पुरुषश्च विश्वस्य कारणं तत्राहुः । प्रधानं पुरुषं च । तदात्मकोऽपि स एवेत्यर्थः । स एव स्वानां नः शं विधास्यति ॥ २७ ॥ प्रतीच्यां दिशि हृदि प्रथममाविरभूत् ॥ २८ ॥ पुनश्च तं पुरो दृष्ट्वेक्षणाह्लादेन विवशा अवनौ दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुरित्यन्वयः । कथं भूतम् । श्रीवत्सकौस्तुभौ विना स्वतुल्यैः श्रीवत्सकौस्तुभमात्रव्यतिरिक्तैः शंखचक्रादिभिः कृत्वा स्वसमानैः षोडशभिः सुनंदादिभिः परितः सेवितम् । उन्निद्रशरदंबुरुहवदीक्षणे यस्य तम् ॥ २९ ॥ ३० ॥ यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः वयसे उत तत्फलपरिच्छेदककालात्मनेऽपि । तद्विघातकेषु दैत्येष्वस्तं प्रक्षिप्तं चक्रं येन । एवंभूतैः प्रभावैः सुपुरुहूतये शोभनबहुनाम्ने ॥ ३१ ॥ ननु मम गुणातीतं रूपं विहाय गुणोपाधिकं यज्ञवीर्यत्वादि किमिति वर्ण्यते तत्राहुः । यत्त इति । यत्तव गुणत्रयस्येशितुर्नियंतुस्त्रिगुणा

लीलां कुर्वतोऽपीत्याह ॥ २५ ॥ मायया कृपया चिच्छक्त्या वा । नोऽस्मानात्मसात्कृत्वा पातीत्यत एव सांप्रतं स्वरक्षणार्थं निवेदनेऽपि न संकुचाम इति भावः ॥ २६ ॥ मायाशक्त्या विश्वं विश्वरूपं स्वरूपशक्त्याऽन्यं विश्वस्माद्भिन्नम् ॥२७॥ प्रतीच्यां दिशि पश्चिमसमुद्रकूले । देशांतरस्योत्तमस्य दैत्याक्रांतत्वात्तत्र देवैः स्थातुमशक्यत्वात्तत्रैव विविक्ते उपविश्य स्तुतत्वात् । अन्यत्र गमनासंभवेन तत्रैव स्थित्वांतर्यामिणः स्तुतत्वान्मुख्यायाः प्रतीच्या दिशोऽसंभवाल्लक्षणया हृदीति बोध्यं वा ॥ २८ ॥ श्रीवत्सकौस्तुभौ विना द्वे चिह्ने विहाय चतुर्भुजत्वादिनात्मतुल्यैः षोडशभिः ते च नंदसुनंदप्रबलोद्बलजयाविजयाविष्वक्सेनगरुडश्रुतदेवजयंतकुमुदकुमुदाक्षानिशठसात्वतपुष्पदंतदारुकाख्याः षोडशेति विवेकः ॥ २९ ॥ ३० ॥ वयसेऽभक्तानां संसारबंधदायिने 'वय–बंधने' अतोऽसुच्प्रत्ययः । श्रुतावपि वयशब्दो बंधनवाचको दृष्टः । "मा तंतुः छेदि वयतो धियं मे मात्रा मा शार्यपसः पुर ऋतोः" इति श्रुतेः । अर्थस्तु–दैवे धियं वयतो बध्नतो मे तंतुः संततिर्मा छेदि उत्सन्नो मा भूत् ऋतोः पुरः ज्ञानोत्पत्तेः पूर्वमयसः कर्मणो मात्रा मानं परिमाणं मा शारि । 'शॄ–हिंसायाम्' । फलदाने नष्टं मा भूत् "कर्मणा ज्ञानमातनोति" इति श्रुतेः । ज्ञानमनुत्पाद्य न नश्यत्वित्यर्थः । स्वकृतं बंधनं स्वयमेव हंतुं शक्तो नान्य इति ज्ञापनाय संधिकार्याभावः । नमस्ते त्रस्तचक्रायेहाप्यनन्यसाध्यकरणशक्त्याऽनित्यप्रकाशनाय संध्यभावः । सुष्ठु पुरवो बहवो हूतयो नामानि यस्य तस्मै । "नामानि सर्वाणि यमाविशंति" इति श्रुतेः। यद्वा–सुपुरुभिर्बहुभिः "इंद्रायाहि" "चित्रभानो" इत्यादिवदैर्हूतिराहूतिर्यस्य तस्मै । यद्वा–पुरुहुः शुद्धा ऊतिर्लीला यस्य तस्मै । "ऊतिर्लीला समाख्याता पुरुहुः शुद्धिरुच्यते" इत्यभिधानात् ॥ ३१ ॥ अत्राक्षिपति–नन्विति । नश्वरतुच्छस्वर्गपदप्राप्त्यर्थमेव स्तुध्वे न त्वनश्वरनित्यसुखमयवैकुंठार्थमत्र को हेतुस्तत्राहुः–यत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमस्तेऽस्तु भगवन्नारायण वासुदेवादिपुरुष महापुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक केवलजगदाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना परिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारे चित्तेऽपावृत आत्मलोके स्वयमुपलब्धनिजसुखानुभवो भवान् ॥ ३३ ॥ दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि ॥ ३४ ॥

त्मिकानां तिसृणां गतीनां परमं पदं निर्गुणस्वरूपं तद्विसर्गस्यार्वाचीन इदानींतनो हे धातर्वेदितुं नार्हति । अतः केवलं तस्मै ते नमोऽस्तु ॥ ३२ ॥ मिताक्षराणि पद्यानि न मीयंते हरेर्गुणाः ॥ इति पद्यैरतुष्यंतः सद्यो गद्येन तुष्टुवुः ॥ १ ॥ भक्त्युद्रेकेण बहुधा संबोधयंतो दुर्ज्ञेयत्वं प्रपंचयंति भगवन्नित्यादिना । परमं मंगलं शुद्धो धर्मो यस्मिन् । आत्मयोगेनाष्टांगेन यः समाधिश्चित्तैकाग्र्यं तेन परिभावितः सुशीलितः परिस्फुटो यः पारमहंस्यधर्मो भगवद्भजनं तेनोद्घाटितं तमोरूपं कपाटं यस्मिंस्तस्मिन् द्वारभूते चित्ते अपावृते प्रकटे आत्मलोके प्रत्यग्रूपे स्वयमेवोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान् ॥ ३३ ॥ ननु केवलानुभवरूपत्वे मम सृष्ट्यादिकर्तृत्वं कथं

इति । तिसृणां देवमनुष्यतिर्यग्गतीनामीशितुः प्रापकस्य तव यत्परमं पदं वैकुंठं धाम तद्विसर्गस्य सृष्टस्यार्वाचीनोऽस्मादृशो जनो वेदितुमनुभवितुं नार्हति । न हि घासतुषादिकं विना पशुरन्यत् क्षीरादिकं वांछति लभते वा कुतश्चिदिति भाव इति चक्रवर्त्ती ॥ ३२ ॥ "अपादः पदसंतानो गद्यं तच्च त्रिधा मतम् । चूर्णिकोत्कलिकाप्रायवृत्तगंधिप्रभेदतः ॥" इति त्रिविधभेदभिन्नेन गद्येन (१) पुरुहूतय इत्युक्तमतो बहुभिर्नामभिः संबोध्य स्तुवते नम इति । हे भगवन् षडैश्वर्यपरिपूर्ण परिपूर्णत्वमेवाहुः—हे नारायण त्वमेव स्वांशाधिक्यक्रमेण व्यष्टिसमष्टिप्रकृत्यंतर्यामित्वेन क्षीरोदगर्भोदकारणार्णवशायी भवसीत्यर्थः । ततोऽपि पूर्णत्वात् हे वासुदेव व्यूहानामादिभूतः । ततोपि परिपूर्णत्वात् हे आदिपुरुष परव्योमनाथ । ननु कथमेवमवगम्यते तत्राहुः—महापुरुषेषु तत्तद्भक्तेषु महांतोऽनुभावा अनुरूपमहाप्रभावा एव यस्य सः।ननु महाप्रलये मद्भक्तमद्धाममदाकाराणां का वा वार्त्ता तत्राहुः—मंगलानि प्राकृतानि परममंगलान्यप्राकृतमंगलवस्तूनि त्वद्भक्तधामादीनि तेषां परमकल्याणं कुशलित्वं यतस्तेषां कालनियम्यत्वाभावादिति भावः । 'न मे भक्तः प्रणश्यति' इति न्यायेनेति ज्ञेयम् । किञ्च—अपारैश्वर्यमाधुर्यसिंधोस्तव करुणामेव बहिर्दर्शिनो वयं कालग्रस्यमाना आश्रयाम इत्याहुः । हे परमकारुणिक अंतर्दार्शीभिस्तु तवानुपलब्धनिजसुखानुभव एव भवति कदा आत्मयोगैर्यमनियमादिभिर्यः समाधिश्चित्तैकाग्र्यं तेन परि सर्वतोभावेन भावितः कृतः परिस्फुटः पारमहंस्यधर्मो भक्तियोगस्तेनोद्घाटितं तमः कपाटं द्वारं यस्य तथाभूते चित्ते चित्तमंदिरेऽपावृतोऽपगतावरणः आत्मलोके वैकुंठधामनि वर्त्तमानः चित्तस्यैतादृशत्वे सति तन्मध्य एव सहवैकुंठलोको भवान्स्फुरतीति भावः ॥ ३३ ॥ अत्राक्षिपति—नन्विति । इवशब्दस्याव्ययत्वेनावधारणार्थमंगीकृत्य दुर्बोध एवेति व्याख्येयं विहारयोगः क्रीडायुक्तिः । अत्र प्राहुः वे किं च स्वीयवैकुंठलोके सदा विहरन्नात्मारामो गुणातीतोपि प्रपंचलोकेऽस्मदादिदुर्ज्ञेयप्रकारैः सृष्ट्यादिभिर्विहरसीत्याहुः—दुरिति । विहारयोगः क्रीडायुक्तत्वं दुरवबोध इवेति त्वद्भक्तविज्ञैः सुबोधोप्यन्यैर्दुर्बोध इत्यर्थः । कुतः । यदश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ तत्रभवान्किं देवदत्तवदिह गुणविसर्गपतितः पारतंत्र्येण स्वकृतकुशलाकुशलं फलमुपाददाति आहोस्विदात्माराम उपशमशीलः समंजसदर्शन उदास्त इति ह वाव न विदामः ॥ ३५ ॥ न हि विरोध उभयं भगवत्यपरिगणितगुणगण ईश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलांतःकरणाश्रयदुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामंतर्धाय को न्वर्थो दुर्घट इव भवति स्वरूपद्वयाभावात् ॥ ३६ ॥

तत्राहुः दुरवेति । दुरवबोध इव तवायं सृष्ट्यादिलक्षणः विहारयोगः क्रीडायोगः यद्यस्मादशरणो निराश्रयः । इदं विश्वम् । अनवेक्षितोऽस्माकं समवायो मेलनं साहाय्यं येन सः ॥ ३४ ॥ दुर्ज्ञेयांतरमाहुः अथ तत्रेति । यथेह देवदत्तो गृहादि निर्माय तत्र स्वकृतशुभाशुभयोः फलमुपादत्ते एवं भवान् ब्रह्मस्वरूपो जीवरूपेण गुणविसर्गे पतितः सन्नुपाददाति । यद्वा समंजसमप्रच्युतं दर्शनं चिच्छक्तिर्यस्य स भवानुदास्ते उदासीनः साक्षितया वर्तत इति न विदामः ॥ ३५ ॥ तदेवं विरोधेन दुर्ज्ञेयत्वमुक्त्वा तत्परिहारेण ज्ञानप्रकारमाहुः । न हीति । विरुध्यत इति विरोधः । उभयं न विरुद्धमित्यर्थः । न ह्यन्यदृष्टान्तेन त्वयि विकल्पो युज्यतेऽतर्क्यैश्वर्यत्वादित्याहुः । भगवतीति । अपरिमिता गुणगणा यस्य तस्मिन्नीश्वरे स्वतंत्रेऽनवगाह्यमतर्क्यं माहात्म्यं यस्य तस्मिन् । विकल्प एवं वा एवं वेति वितर्कः किमत्र युक्तमिति विचार इत्थमेवेति निश्चयः । तत्र प्रमाणाभासास्तदनुग्राहकाः कुतर्काश्चार्वाचीना वस्तुस्वरूपासंस्पर्शिनो ये विकल्पादयस्ते येषु शास्त्रेषु तैः कलिलं व्याकुलमंतःकरणमाश्रयो यस्य दुरवग्रहस्य दुराग्रहस्य तेन

रणोऽशरीरः शारीरचेष्टारहित एवेति । सृष्टिकर्त्ता हि साकार एव "सहस्रशीर्षा" इत्यादिश्रुतेः । नावेक्षितोऽनपेक्षितोऽस्माकमिंद्रादीनां हस्ताद्यधिष्ठातॄणां समवायः सहकारिता येन सः "संबंधे सहकारित्वे समवायः शोभनागमः" इति निरुक्तिः । आत्मनैव स्वेनैव आत्मन उपादानत्वेऽप्यविक्रियमाणेनैव । विवर्त्तवादांगीकारे त्वविक्रियमाणत्वं न चित्रं चित्रं खलु तदनंगीकारे एव अत एव वक्ष्यति गजेंद्रोपि "नमोनमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय" इति । कारणस्याद्भुतत्वं त्विदमेव यदुपादानत्वेऽपि निर्विकारत्वमेवेति । अगुणः सन्सगुणं विश्वं सृजसि कुलालादिर्हि किंचित्स्थानमवलंब्य स्वशरीरं च प्रयत्य ससहायो मृदादिवस्त्वंतरेण सगुण एव सगुणं घटादिकं सृजतीति दृष्टमितीदमेकं दुर्ज्ञेयत्वं सृष्टौ ॥ ३४ ॥ शिष्टानां पालनं हि दुष्टानां संहारं विना न भवतीत्यंतर्भूतसंहारस्य पालनस्यापि दुर्ज्ञेयत्वमाहुः—अथेति । देवदत्तः प्राकृतजीवो यथा गृहादिकं तत्र मित्रशत्रूदासीनादिगहने संसारे प्रविश्य स्वकृतधर्माधर्मफलं सुखदुःखं भुंक्ते तथैव तत्र भवानित्यादरे । त्वमपि गुणेभ्यः सत्त्वरजस्तमोभ्यो विविधः सर्गो येषां तेषु गुणविसर्गेषु देवासुरराक्षसेषु परस्परविघातिषु मध्ये पतितः उपेंद्रकृष्णरामाद्यवतारेषु शिष्टपालनदुष्टनिग्रहयोः प्रवृत्तः भोगैश्वर्यसुखं संग्रामादिश्रमदुःखं च यत्प्राप्नोषि तत्किं पारतंत्र्येण कर्माधीनत्वेन स्वकृतयोः पुण्यपापयोः कुशलाकुशलं सुखदुःखमुपाददाति स्वीकरोति आहोस्वित्किं वासमंजसदर्शनोऽप्रच्युतचिच्छक्तिक उदास्ते साक्षित्वात्र सुखदुःखं स्वीकरोतीति न विदामस्तत्त्वं न विद्मः । स्वामिव्याख्याने आहोस्विदित्यस्य यद्वेत्यर्थः ॥ ३५ ॥ वादागोचरत्वमाक्षिपति—नन्विति । एतद्विवादानवसरत्वं भवतां श्रद्धामात्रं तथात्वे युक्तिरुच्यतामिति स्वरूपद्वयाभावादिति । एकस्यैव भगवतस्तत्र निर्विशेषज्ञानगम्यत्वमेव ब्रह्मत्वम् । अलौकिकविशेषज्ञानगम्यत्वमेव भगवत्त्वमिति दूरवर्त्तिभिर्ज्ञानिभिरलौकिकविशेषग्रहणासमर्थैस्त्वमेव ब्रह्मसमीपवर्त्तिभिर्भक्तैरलौकिकविशेषग्रहणसमर्थैर्भगवानिति त्वमेवोच्यसे इत्यर्थः । तत्र कृपायाः परमाणुत्वपरममहत्वे एव दूरत्वसमीपत्वयोर्हेतू ज्ञेये इति विश्वनाथः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समविषममतीनां मतमनुसरसि यथा रज्जुखंडः सर्पादिधियाम्॥३७॥स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः
सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ॥३८॥ अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यं
दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकांतिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरंतरं निर्वृ
तमनसः कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्तः॥३९॥

वादिनां विवादस्यानवसरेऽगोचरे ननु श्रद्धामात्रमेतत् । युक्तिरुच्यतां तत्राहुः । उपरतो मायामयः संसारो यस्मिंस्तस्मिन्केवलेऽप्यात्ममायां मध्ये निधाय को न्वर्थः कर्तृ
त्वादिर्न संभवति यदि वस्तुतः कर्तृत्वादि भवेत्तर्हि विरोधः स्यान्न तु तदस्तीत्याहुः । स्वरूपद्वयाभावादिति। वस्तुतो द्वैताभावान्न विरोध इत्यर्थः ॥ ३६ ॥ अनुग्रहनिग्रहा
दिकं तु तत्तन्मतिभेदेन त्वन्मायया त्वयि स्फुरतीत्याहुः । समा विषमा च मतिर्येषां तेषां मतमभिप्रायम् । सर्पादिविषया धीर्येषां तेषां यथा रज्जुखंडस्तथातथा भाति ।
यद्वा तमेवाविरोधं पुरुषमतिभेदेन दर्शयति । समविषमेति ॥ ३७ ॥ तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाहुः । स एव हि नानारूपेण प्रतीतः । वस्तुस्वरूपः सद्रूपः ।
सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैरुपलक्षितः । ननु तैर्जीव एवोपलक्ष्यते । न । सर्वप्रत्यगात्मत्वात्सर्वजीवांतर्यामित्वात् । जडतादात्म्याध्यासेन जीवस्यापि जडप्रा
यत्वान्न तेन विना प्रकाश इति भावः पर्यवशेषितो "नेतिनेति" इत्यादिश्रुतिभिः ॥ ३८ ॥ अतस्त्वद्भक्तिरेव परमपुरुषार्थ इत्याहुः अथ हेत्यादिपर्यावर्त इत्यंतेन । यस्मादेवं
भूतस्त्वं परमेश्वरः । अथ ह वाव अत एव हि । हे मधुमथन परमभागवता एते त्वत्पादांभोजानुसेवां कथं मुहुर्मुहुर्विसृजंतीत्यन्वयः । हि यस्मात्स्वार्थे पुरुषार्थे कुशला निपुणाः
अत एव आत्मा त्वमेव प्रियः सुहृच्च येषां ते साधवो रागादिशून्याः । तत्र हेतुः । तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिंदुमात्रेण सकृदवलीढया आस्वादितया स्वमनसि निष्यं

संदर्भस्तु—स्वरूपद्वयाभावात् संसारिजीववद्बद्धत्वमुक्तत्वावस्थाविशेषाभावात् । बद्धत्वे हि मुक्तत्वं तथा दिव्यातिदिव्यतत्तदवतारादिलक्षणकोऽप्यर्थो न दुर्घटो भवति यतः आत्ममायां निजेच्छाशक्तिमंतर्द्धाय मध्ये निधाय
तत्र तत्र सहायत्वेन संपाद्य तिष्ठति सतीत्यर्थः । उभयत्र हेतवो भगवतीत्यादय इत्याह ॥ ३६ ॥ ननु स्वरूपद्वयाभावेन साम्यं चेत्तर्हि भक्तानुग्रहाभक्तनिग्रहौ कथं घटेतां तत्राह—अनुग्रहेति । पुरुषमतिभेदेनैव समेपि
त्वयि तथातथा प्रतीयते न वस्तुत इत्यत्र दृष्टांतमाह—यथेति । यथैकस्मिन्नेव रज्जुखंडे कस्यचिन्मंदांधकारे सर्पोऽयमपरस्य जलरेखेयं तदन्यस्य स्फुटितपृथ्वीयमित्यादिस्फुरणं भवति तद्वत्त्वय्यपि तत्तन्मत्यनुरोधेन तथा
तथा स्फुरणमिति भावः । ननु विरोधाभावप्रतिपादनप्रकरणेऽनुग्रहनिग्रहादिप्रतिपादनं प्रकृतानुपयुक्तमिति चेत्तत्राह—यद्वेति ॥ ३७ ॥ स परमात्मैव हि उपलक्षितोऽनुमितः तदुक्तम् "गुणप्रकाशैरनुमीयते भवान्" ॥ ३७ ॥
इति । अत्राक्षिपति—नन्विति । जडे शरीरेंद्रियादौ तादात्म्यस्य स्वरूपस्याध्यासादारोपात् । तेन परमात्मना । इति भाव इति । "अजोऽनुबद्धः सगुणैरजाया गुणात्परं वेद न ते स्वरूपम्" इति न्यायेन जीवस्यापि
जडत्वं निश्चीयत इति तात्पर्यम् । मायामायिकवस्तुमात्रनिषेधेन पर्यवशेषितः । अत्र भागवतामृतदृष्टाः "विना शारीरचेष्टत्वं विना भूम्यादिसंश्रयम् । विना सहायांस्ते कर्मा विक्रियस्य सुदुर्गमम् ॥" इत्याद्याः कारिका अनुसंधेयाः ॥ ३८ ॥
यतो ज्ञानादपि भक्तिः श्रेष्ठाऽतो हेतोः । अथ ह वावेत्यस्यार्थोऽत एव सर्वेश्वरस्वादेरेवेत्यर्थः । हे मधुमथनेति । प्रलये ब्रह्माणं भक्षितुमुद्यतस्य मधोर्मथनात्सर्वस्रष्टारं ब्रह्माणमपि त्वमेव रक्षितवानतस्तदुद्भूता वयमपि रक्ष्या एवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिभुवनात्मभवन त्रिविक्रम त्रिनयन त्रिलोकमनोहरानुभाव तवैव विभूतयो दितिजदनुजादयश्चापि तेषामनुपक्रमसमयोऽयमिति स्वात्ममायया सुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधं दंडं दंडधर दधर्थ एवमेनमपि भगवञ्जहि त्वाष्ट्रमुत यदि मन्यसे ॥ ४० ॥ अस्माकं तावकानां तव नतानां ततततामह तव चरणनलिनयुगलध्यानानुबद्धहृदयनिगडानां स्वलिंगविवरणेनात्मसात्कृतानामनुकंपाऽनुरंजितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरमुखरसामृतकलया चांतस्तापमनघार्हसि शमयितुम् ॥ ४१ ॥

दमानमतिशयेन स्रवयन्निरंतरं सुखं तेन विस्मारिता दृष्टश्रुतविषयाः सुखलेशाभासा येषां ते । अत एव भगवति त्वयि नितरां निरंतरं निर्वृतं च मनो येषां ते । यत्र यस्यामनुसेवायां सत्याम्॥ ३९॥प्रस्तुतं विज्ञापयंति त्रिभुवनेत्यादिना यावत्समाप्ति। त्रिभुवनमात्मा स्वरूपं भवनं च यस्य त्रिभुवनस्यात्मा भवनं चेति वा।त्रयो विक्रमा यस्य।त्रीँल्लोकान्नयतीति तथा। त्रयाणां लोकानां मनोहरोऽनुभावो यस्य।एवं चतुर्धा संबोध्याहुः। तेषामनुपक्रमसमय उद्यमकालो न भवतीति मत्वा। हे दंडधर पूर्वं यथा दंडं दधर्थ धृतवानस्येवमेनं त्वाष्ट्रमपि जहि यदि मन्यसे हंतुं यदीच्छसि ॥४०॥ प्रथमं तावत्त्वदीयानामस्माकमंतस्तापं शमयितुमर्हसि । तावकानामित्यत्र हेतुः । तत ततामह हे पितः हे पितामह तव चरणनलिनयुगलध्यानेनैवानुबद्धो हृदये निगडः शृंखला येषाम् । स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानाम् । केन । अनुकंपयाऽनुरंजितं सानुरागं च तद्विशदं

भावः। ये त्वत्पदांबुजं न स्मरंति ते स्वार्थघातिन एवेति भावः । अतः स्वार्थकुशलत्वात् । अत्र रागादिशून्यत्वे । अत एव विस्मारितदृष्टश्रुतविषयत्वादेव । संसारे पर्यावर्त्तः परिभ्रमणम् ॥ ३९ ॥ त्वद्भक्तेषु वयं सकामत्वादतिनिकृष्टा इति द्योतयितुं प्रस्तुतं प्रकृतम् । त्रिभुवनमात्मभवनं स्वगृहं यस्य त्वद्भक्तादेव मनुष्यादयो यत्र स्थित्वा त्वां सेवंते तदिदमसुराक्रांतमभूदिति भावः । स्वामिव्याख्याने आत्मेति पृथक्पदं तत्र च त्वत्स्वरूपमपि दैत्येनाक्रांतं त्वं कथं न बुध्यसे इति भावः । तत्रापि त्रिभुवनस्य जडत्वेन मामपि तत्स्वरूपत्वाज्जडं ब्रूतेति चेदाहुः—त्रिभुवनस्यात्मेति । अत्र च त्रिभुवनस्यात्मत्वात्त्वं तद्दुःखादिकं जानास्येव तथाप्यतिपीडिता वयं जानानमपि स्मारयाम इति भावः । त्रयो विक्रमा इति । भाविकर्मस्मारणेनाधुनापि त्वयाऽस्मदर्थं पुरुषार्थो विधेय इति भावः । त्रिविक्रमत्वे हेतुं कथयंस्तत्संबोधयंति—त्रिनयनेति । नयत्यस्मभ्यं प्रापयतीत्यर्थः । विश्वनाथस्तु—त्रिभिर्विक्रमैस्त्रीँल्लोकान् नयसीति यदेव त्रिभुवनं वामनावतारे त्रिभिरेव पादैः प्रतिगृह्य बलेः सकाशादानीयास्मभ्यं दास्यसीति भावः । त्रिलोकमनोहरानुभावेति । संप्रत्यपि त्रिलोकस्था जनास्तवानुभावं पश्यंतु दैत्यं संहरेति भावः । ननु परहिंसां समुद्दिश्य मां स्तुबीध्वे तत्राहुः—यद्यपि तवैव विभूतयस्तथापि तेषां दैत्यानामनुद्यमसमयोऽयमिति ज्ञात्वा निवेदयाम इति भावः । हे दंडधरेति । त्वमेव दुष्टदंडधर्त्ता नास्मदादय इति भावः । हेभगवन्निति । सर्वसामर्थ्यं द्योतयंत आहुरिति ॥ ४० ॥ हे तत पितः ततामह हे पितामहेति ब्रह्मैवाह देवेषु मुख्यत्वात्त्वमस्माकं पितैव वस्तुतः कंजमंतरीकृत्य पितामहोऽपि यद्वेंद्रादीनामिदं वाक्यं ब्रह्मरूपेण त्वं पितापि जलशायिरूपेण पितामहोऽपि त्वमेवास्माकं कश्यपादीनामिति भावः । एतेन ब्रह्मादयः सर्वे तव पाल्या एव तवैव सर्वज्येष्ठत्वादित्युक्तं ततामहेति । तद्धितोत्रार्ष एव पितृशब्दादेव डामहचो विधानात् । चक्रवर्त्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ ह भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामंतर्हृदयेषु बहिरपि च ब्रह्मप्रत्यगात्मस्वरूपेण प्रधानरूपेण च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयाऽनुभवतः सर्वप्रत्ययसाक्षिण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्याद्विस्फुलिंगादिभिरिव हिरण्यरेतसः ॥ ४२ ॥ अत एव स्वयं तदुपकल्पयास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥ ॥ ४३ ॥ अथो ईश जहि त्वाष्ट्रं ग्रसंतं भुवनत्रयम् ॥ ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च ॥ ४४ ॥ हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमाय ॥ सत्संग्रहाय भवपांथनिजाश्रमाप्तावंते परीष्टगतये हरये नमस्ते ॥ ४५ ॥

रुचिरं शिशिरं च स्मितं तत्सहितेनावलोकेन तथाऽनुकंपयैव विगलितो मधुरो मुखरसः प्रियवाक् सैवामृतकला तया च ॥४१॥ किं च । अस्मदभिप्रायस्त्वया ज्ञायत एव किमत्रास्माभिर्विज्ञापनीयमित्याहुः । अथ ह हे भगवंस्तवास्माभिरिह कियान्वार्थविशेषो विज्ञापनीयः स्यादित्यन्वयः । यथा हिरण्यरेतसोऽग्नेस्तदंशभूतैर्विस्फुलिंगादिभिः प्रकाशो न क्रियते तथा तवास्माभिः कार्यार्थप्रकाशनं न कार्यमित्यर्थः । अत्र हेतुगर्भाणि विशेषणानि । अखिलजगतामुत्पत्त्यादिषु निमित्तायमानया दिव्यमायया विनोदो यस्य । अत एव सर्वजीवनिकायानामंतर्हृदयेषु ब्रह्मस्वरूपेण प्रत्यगात्मांतर्यामी तद्रूपेण च बहिरपि प्रधानरूपेण देशकालदेहावस्थानविशेषाननुल्लंघ्यानुभवतः । कथम् । तेषामुपादानतया निमित्तरूपतयोपलंभकतया च उपादानस्योपलंभकतयेति वा । अत एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः । साक्षित्वे हेतुः । आकाशवदलिप्तं शरीरं स्वरूपं यस्य । अलिप्तत्वे हेतुद्वयम् । साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्धसत्त्वमूर्तेश्च ॥ ४२ ॥ अत एव सर्वज्ञत्वादेव वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः प्रापितास्तदस्माकं कार्यं स्वयमेवोपकल्पय संपादयेति । चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैर्यः संसारपरिश्रमस्तस्योपशमकरीमुपसृतानां प्राप्तानाम् ॥ ॥ ४३ ॥ पूर्वं भक्तेरुत्कर्षोक्तेस्तत्कामशंका मा भूदिति स्वकामं कथयंति । अथो अनंतरमेव ॥ ४४ ॥ शीघ्रं तद्वधाय पुनः प्रणमंति । हंसाय शुद्धाय हरये आर्तिहराय

ना तु—ततततेत्येकैव संबुद्धिः स्वीकृता व्याख्याता च पितामहेति । विशदं स्फुटम् । शिशिरं शीतलम् ॥ ४१ ॥ अन्यदाहुः—किञ्चेति । तव त्वयि । इत्यर्थ इति । अंतर्यामित्वेन प्रथममेव जानासीति भावः । अत एव दिव्यमायाविनोदित्वादेव । देशश्च कालश्च देहावस्थानविशेषा बाल्यादयश्च तानतिक्रम्य यत्र काले देशेऽवस्थायां यद्भवति तत्सर्वं तत्रतत्रानुभवतस्साक्षात्कृतवतः तेषां देवादिजीवनिकायानामुपादानतया कारणत्वेनोपलंभकतया प्रकाशकत्वेन च हृद्गतं विज्ञापनीयं जानत इत्यर्थः । उपादानोपलंभेत्यत्र हेतुद्वयांगीकारे गौरवं मत्वाह—उपादानस्य प्रकृतेरुपलंभकतया प्रकाशकतयेत्यर्थः । " मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् " इति श्रीमुखोक्तेः । अत एवं सर्वप्रकाशकत्वादेव । निरुपाधेरुपाधिसंगशून्यस्य । यथाकाशे वर्त्तमानानामपि पार्थिवरजोमेघवाय्वादीनामसंगत्वात्संगो भवति तद्वत्तवापीत्यर्थः ॥ ४२ ॥ गुरोरपि चरणच्छाया संसारदुःखहारिणी किं पुनः परमगुरोस्तवेति भावः ॥ ४३ ॥ ईशेति शंभुप्रसक्तिवारणाय । कृष्णेति । भक्तजनक्लेशकर्षणसमर्थोऽसीति भावः । चक्रवर्ती—सर्वत्रैव स्तुतिषु शुद्धभक्तेरुत्कर्षोक्तेः कदाचिद्भक्तिमेव ददाति भगवांस्तथा सति प्रेमाश्रुकंपादिमंतो वयं स्वर्गीयसुखेषु वैमुख्योदयात्पृथिव्यामेव पर्यटिष्यामोस्मद्वैरिण एवामरावतीमध्यास्य विराजिष्यंत इत्याशंकया गांभीर्याभावेन च स्पष्टं स्वकाममाहुः अथो इत्यवतरणिकामाह ॥ ४४ ॥ तव चरणयोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अथैवमीडितो राजन्सादरं त्रिदशैर्हरिः ॥ स्वमुपस्थानमाकर्ण्य प्राह तानभिनंदितः ॥ ४६ ॥ श्रीभगवानुवाच ॥ प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि ॥ ४७ ॥ किं दुरापं मयि प्रीते तथाऽपि विबुधर्षभाः ॥ मय्येकांतमतिर्नान्यन्मत्तो वांछति तत्त्ववित् ॥ ४८ ॥ न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् ॥ तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः ॥ ४९ ॥ स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि ॥ न राति रोगिणोऽपथ्यं वांछतो हि भिषक्तमः ॥ ५० ॥ मघवन्यात भद्रं वो दध्यंचमृषिसत्तमम् ॥ विद्याव्रततपःसारं गात्रं याचत मा चिरम् ॥ ५१ ॥

ते नमः । शुद्धत्वे हेतवः । दहनिलयाय हृदयाकाशनिकेताय । निरीक्षकाय बुद्ध्यादिसाक्षिणे । कृष्णाय सदानंदरूपाय । "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥" इति निरुक्तेः । आर्तिहरत्वे हेतवः । मृष्टं रुचिकरं यशो यस्य । निरुपक्रमायादिशून्यायासद्भिः संगृह्यत इति तथा तस्मै । भवपांथो भवरूपे पथि वर्तमानस्तस्य जनस्य स्वशरणप्राप्तौ निजाश्रमाप्तौ सत्यां संसारस्यांते परीष्टा सर्वतः पूजिता उत्तमा गतिः फलं यस्तस्मै ॥ ४५ ॥ अभिनंदितः संतोषितः ॥ ४६ ॥ मदीयमुपस्थानं स्तोत्रं तत्सहितया विद्यया ज्ञानेन । आत्मन ऐश्वर्यमसंसारित्वं तस्य स्मृतिर्यया । न हि विरोध उभयमित्यादिना कर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः भक्तिश्च यया भवति ॥ ४७ ॥ अथ ह भगवन्नित्यादिना भक्तेः सर्वोत्कर्षोक्तेर्भक्तमभिनंदति । किमिति ॥ ४८ ॥ यदुक्तं देवैः स्वयं तदुपकल्पयास्माकमित्यादि तत्संपादनं कृपालोर्ममानुचितमित्याशयेनाह । न वेदेति द्वाभ्याम्। गुणेषु विषयेषु तत्त्वदर्शी स आत्मनः श्रेयो न वेद तस्य तान्विषयान् । सोपि तथाविधोऽज्ञ एव ॥ ४९ ॥ कर्म न वक्ति प्रवृत्तिमार्गं न वक्ति हि । अपथ्यं यथा न राति न ददाति भिषक्तमः सद्वैद्यः ॥ ५० ॥ एवं तत्त्वकथनेनानौचित्यं परिहृत्य तदभिप्रायमनुसरन्नाह । मघवन्निति । विद्यया व्रतै

पतामः शीघ्रं जहीति वैकल्येन श्रीकृष्णरूपिणं तं सर्वमेव स्वाभिलषितमभिव्यंजयंतः प्रणमंति—हंसाय सारासारौ विमृश्य सारग्राहिणे।मृष्टयशसेऽस्मत्त्राणेन जातं यशस्ते लोका गायंत्विति भावः । निरुपक्रमाय अस्मन्निवेदितकृत्येषूपक्रमं विनैव तत्संपादनसमर्थाय । किं च—सतां भक्तानामेव प्रयासेनापि संग्रहो न चान्यवस्तूनां यस्य तस्मै 'नमोकिंचनवित्ताय' इत्युक्तेः । भववर्त्मनि वर्त्तमाना ये पान्थास्तेषामस्मदादिदुर्जीवानां शुद्धभक्तिरहितानामपि निजाश्रमस्य प्राप्तावविद्यां तीर्त्वा स्वानंदाधिगमे सतीत्यर्थः । संसारस्यांते परि सर्वतोभावेनेष्टा व्यंजिता गतिस्सायुज्यं सालोक्यं दास्यादिप्रेमा वा येन तस्मै ॥ ४९ ॥ हे राजन् भक्त्या देदीप्यमान । उपस्थानं स्तुतिम् ॥ ४६ ॥ सुरश्रेष्ठा इति । न ह्यधमानां मदुपस्थानादौ प्रीतिर्भवतीति भावः । मदुपस्थानमेव विद्येति वा ॥ ४७ ॥ अहो दौर्भाग्यं मूर्खता च युष्माकमनया विद्यया मां स्तुत्वापि भक्तिर्नार्थितेत्याह—किमिति । तत्त्वविद्वस्तुयाथार्थ्यज्ञः । अन्यन्न वाञ्छति किन्तु भक्तिमेव वाञ्छतीति भावः ॥ ४८ ॥ यद्यपि यूयं मूर्खा विषयानभिलषंतः स्वभद्राभद्रं न जानीथ तदप्यहं विज्ञो युष्मभ्यं तान्कथं ददामि न हि माता स्वपुत्रेभ्यः स्वहस्तेन विषं ददातीत्याह—नेति । तस्य तस्मै । कृपणोऽज्ञः ॥ ४९ ॥ अपथ्यं यथा ज्वरार्त्तस्य शीतजलादि । निःश्रेयसं कल्याणकरमात्मविद्यालक्षणम् ॥ ५० ॥ यदि हीन्द्रियारामत्वाद्विषयान्विना म्रियध्वे तर्हि तत्रोपायं शृणुतेत्याह—मघवन्निति । महति श्लाघते विषयसंभोगं, महति शताश्वमेधेनार्चति सर्वेश्वरं विषयाभिलाषेणेति वा मघवा तत्संबुद्धौ तथा । विषया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम् ॥ यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥ ५२ ॥
दध्यङ्ङाथर्वणस्त्वष्टे वर्माभेद्यं मदात्मकम् ॥ विश्वरूपाय यत्प्रादात्त्वष्टा यत्त्वमधास्ततः ॥ ५३ ॥

स्तपसा च सारं दृढं गात्रं शरीरं याचत याचध्वम् ॥ ५१ ॥ तत्र तदीयं विद्यातिशयमाह । स वा इति द्वाभ्याम् । एवं ह्यत्र प्रसिद्धा कथा । "निशम्याथर्वणं दक्षं प्रवर्ग्यब्रह्मविद्ययोः । दध्यंचं समुपागम्य तमूचतुरथाश्विनौ ॥ भगवन्देहि नौ विद्यामिति श्रुत्वा स चाब्रवीत् ॥ कर्मण्यवस्थितोऽद्याहं पश्चाद्वक्ष्यामि गच्छतम् ॥ तयोर्निर्गतयोरेव शक्र आगत्य तं मुनिम् ॥ उवाच भिषजोर्विद्यां मा वदीरश्विनोर्मुने ॥ यदि मद्वाक्यमुल्लंघ्य ब्रवीषि सहसैव ते ॥ शिरश्छिद्यां न संदेह इत्युक्त्वा स ययौ हरिः ॥ इंद्रे गते तथाऽभ्येत्य नासत्यावूचतुर्द्विजम् ॥ तन्मुखादिंद्रगदितं श्रुत्वा तावूचतुः पुनः ॥ आवां तव शिरश्छित्त्वा पूर्वमश्वस्य मस्तकम् ॥ संधास्यावस्ततो ब्रूहि तेन विद्यां च नौ द्विज ॥ तस्मिन्निंद्रेण संछिन्ने पुनः संधाय मस्तकम् ॥ निजं ते दक्षिणां दत्त्वा गमिष्यावो यथातथम् ॥ एतच्छ्रुत्वा तथोवाच दध्यङ्ङाथर्वणस्तयोः ॥ प्रवर्ग्यं ब्रह्मविद्यां च सत्कृतोऽसत्यशंकितः ॥" इति। ततश्चायमर्थः दध्यङ् निष्कलं शुद्धं ब्रह्माधिगतो ज्ञातवान् । पाठांतरे तु निष्कृतं नितरां कृतं भवति धनं येन तं प्रवर्ग्यं चाधिगतो ज्ञातवान् । ततोऽश्विभ्यां प्रादादित्युत्तरस्यानुषंगः । उपदिदेशेत्यर्थः । कथंभूतं ब्रह्म । यद्वा अश्वशिरसा प्रोक्तत्वादश्वाशिरो नाम प्रसिद्धम् ॥ तयोरमरतां जीवन्मुक्तत्वं व्यधात । तथा च श्रुतिः । "अश्वस्य शीर्ष्णा प्रयदीमुवाच" इति ॥ ५२ ॥ मदात्मकं वर्म श्रीनारायणकवचं चाधिगत इति पूर्वस्यानुषंगः । तत्र हेतुः । यत् यस्मात्त्वष्ट्रे प्रादात् । किं तत् । यत्त्वष्टा विश्वरूपाय पुत्राय प्रादात । कीदृशम् । यत्त्वं ततो विश्वरूपादधाः धृतवानसि । तदेवं विद्यया सारं गात्रं याचध्वमित्यर्थः ॥ ५३ ॥

भिलाषिशिरोमणिरसीति भावः । तत्र गतान्नः शापाग्निना स धक्ष्यतीत्याशंकमानं प्रत्याह–भद्रं व इति । ऋषिसत्तमं क्रोधादिरहितम् । गाय ज्ञानाय त्रायते रक्ष्यत इति गात्रम् ॥ ५१ ॥ तत्र याचने । तदीयं दाध्यञ्चम् । पाठांतरे 'ब्रह्मनिष्कृतम्' इति पाठे । कृतादनित्यपदार्थान्निष्क्रान्तामित्यर्थः । ततः स्वयं ज्ञात्वा तदनु अश्विभ्यां ब्रह्मादादिति व्याख्येयमिति विद्यादानमुपदेश इति भावः । प्रकृष्टानि पदानि यस्यां तां विद्यामिति श्रुतिपदार्थः । श्रुत्यंतरमाह–"आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतं स वां मधु प्रवोचदृतायंस्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वाम्" इति श्रुतिं चात्रोदाहरंति हेऽश्विनावाथर्वणाय दधीचेऽश्वसंबंधि शिरः प्रत्यैरयतं प्रतिसंहतमकुरुतं स दध्यङ् वां मधु ब्रह्मविद्यालक्षणं प्रवोचदसिंचत् हे दस्रौ त्वष्ट्रा विश्वरूपाय प्रोक्तं त्वाष्ट्रं कक्ष्यं रक्षणाय हितं नारायणकवचं च वामुवाच कीदृशः ऋतायन् यथातथं विद्यां जानन् विद्यां वक्ष्यामीति वचनं संपादयन्निति वा वैदिके निघंटौ कक्ष्यपदं कवचपरमुक्तमेतेन श्रीमद्भागवतलक्षणे–"हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा" इत्युक्तत्वात्तस्यानादित्वं स्फुटितमिति च ध्येयम् ॥ ५२ ॥ दधाति सर्वमिति दधि ब्रह्म तदंचति प्राप्नोति जानाति वेति दध्यङ् । अथर्ववित्त्वादाथर्वणः । तत्र वर्मज्ञाने । ज्ञानं विना कथं त्वष्ट्रे प्रादादिति भावः । त्वमिंद्रः । इत्यर्थ इति । विद्याया धारणेन तद्गात्रमतीवाभेद्यं स्वेतराभेद्यभेदकं चास्ति तदेव प्रार्थयतेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोंगानि दास्यति ॥ ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ॥५४॥ येन वृत्रशिरो हर्ता मत्तेज उपबृंहितः ॥ तस्मिन्विनिहते यूयं तेजोस्त्रायुधसंपदः ॥ भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान् ॥ ५५ ॥ इति श्रीभाग० म० षष्ठ० इन्द्रादिकृतगद्यपद्यात्मकस्तोत्रवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ इंद्रमेवं समादिश्य भगवान्विश्वभावनः ॥ पश्यतामनिमेषाणां तत्रैवांतर्दधे हरिः ॥ १ ॥ तथाऽभियाचितो देवैर्ऋषिराथर्वणो महान् ॥ मोदमान उवाचेदं प्रहसन्निव भारत ॥ २ ॥ अपि वृंदारका यूयं न जानीथ शरीरिणाम् ॥ संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः ॥ ३ ॥ जिजीविषूणां जीवानामात्मा प्रेष्ठ इहेप्सितः ॥ क उत्सहेत तं दातुं भिक्षमाणाय विष्णवे ॥ ४ ॥ देवा ऊचुः ॥ किं नु तद्दुस्त्यजं ब्रह्मन्पुंसां भूतानुकंपिनाम् ॥ भवद्विधानां महतां पुण्यश्लोकेड्यकर्मणाम् ॥ ५ ॥ नूनं स्वार्थपरो लोको न वेद परसंकटम् ॥ यदि वेद न याचेत नेति नाह यदीश्वरः ॥ ६ ॥

ननु प्रेष्टं देहं कथं दास्यति तत्राह।युष्मभ्यमंगान्यस्थीनि याचितः सन् दास्यति यतो धर्मज्ञः विशेषतोऽश्विभ्यां शिष्यप्रीत्या दास्यति।अस्थीनीत्यनेन हेयत्वं दर्शितम् । तैरस्थिभिर्विश्वकर्मणा विनिर्मित आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः॥५४॥येन भवान्वृत्रशिरो हर्ता हरिष्यति मम तेजसा उपबृंहितः सन्।तेजश्चास्त्राणि चायुधानिच संपदश्च भूयः प्राप्स्यथ।महाकायस्त्रिभुवनग्रासी स एवास्मान् हन्यादिति शंकाकुलचित्तान्प्रत्याह।मत्परांश्च केऽपि न हिंसंत्यतो युष्माकं भद्रमेवेति॥५५॥इति षष्ठस्कंधे टीकायां नवमोऽध्यायः॥९॥दशमे केशवादिष्टदध्यङ्ङस्थिजवज्रधृक्।इंद्रोऽयुध्यत वृत्रेण सासुरेण सनिर्जरः॥१॥१॥मोदमान एव तन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाण इवोवाच अपीति द्वाभ्याम्॥२॥हे वृंदारका अपि किं संस्थायां मृत्यौ योऽभिद्रोहो दुःखं तं न जानीथ॥३॥ आत्मा देहः वयं जानीम एव किं तु श्रीविष्णुरस्मन्मुखेन याचत इति चेत्तत्राह याचते विष्णवेऽपि दातुं क उत्सहेत॥४॥पुण्यश्लोकैरीड्यानि कर्माणि येषाम् ॥५॥ याचको यदि वेद तर्हि न याचेत यदीश्वरो दानसमर्थश्चेत्तर्हि सोऽपि नेति नाह । अतो

भावः ॥ ५३ ॥ अत्राक्षिपति—नन्विति ॥ ५४ ॥ येनायुधेन । तस्मिन्वृत्रे । न हिंसंतीति । वृत्रस्तदनुगासुराश्च मत्परान्युष्मान्न घ्नंति वृत्रस्य परमभक्तत्वेन मदर्थं स्वदेहमपि जिहासोर्वस्तुतो युष्मासु द्वेषो नास्त्येव यथा युष्माकं तस्मिन्निति भावः ॥ ५५ ॥ इति श्रीमद्भावतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे नवमोऽध्यायः ॥ ९ ॥ ॥ दधीचोऽस्थीनि दध्यगस्थीनि तेभ्यो जायत इति दध्यगस्थिजं तच्च तद्वज्रं चेति दध्यगस्थिजवज्रं तद्धजन्ति धारयतीति तथा 'धृज्—धारणे' तौदादिकश्चवर्गमध्यवर्णांतः । केशवेनादिष्ट आज्ञप्तश्चासौ दध्यगस्थिजवज्रधृक् चेति केशवादिष्टदध्यगस्थिजवज्रधृक् । सासुरेणासुरसहितेन । निर्ज्जरैर्देवैः सहितः सनिर्ज्जरः (१) यत्र प्रार्थितस्तत्रैव 'सुरमत्स्यावनिमिषौ' इत्यमरः । अनिमिषाणां सुराणाम् ॥ १ ॥ यथा विष्णुनोक्तं तथाऽस्थिनिमित्तं प्रार्थितः प्रहसन्निव याच्ञाप्रत्याख्यानेन तांस्तिरस्कुर्वन्निव । भारतेति । भरतो यथा भवद्वंशप्रवर्त्तकोऽर्थिनामप्रत्याख्याता 'भरतस्य महत्कर्म' इत्याद्युक्तन्यायेन तथायमपीति भवद्वंश्या अप्येतादृशा अभवन्निति भावः ॥ २ ॥ हे वृंदारका इति । दर्शने एव प्रशस्तवृंदा यूयमन्तस्तु कठिना एव यतो ब्रह्महत्यातोपि न बिभिथ । यद्वा—वृन्दं सर्वजनसमूहमिर्यति तत्तदिंद्रियाद्यधिष्ठातृत्वेन जानंत्यप्यहो कथं न जानीथाधुना मद्देहपातदुःखमिति भावः । चेतनापह बुद्धिविभ्रंशकरः ॥ ३ ॥ प्रेष्ठोऽतीवप्रियः ॥ ४ ॥ ब्रह्मन्निति । वेदवित्त्वात्परोपकारफलं जानास्येवेति भावः । भवद्विधानां त्वादृशानाम् ॥ ५ ॥ अत उभयोर्वैलक्षण्यात् । इति भाव इति । परसंकटाज्ञाने उभये सदृशा एवेत्याशयः । विश्वनाथस्तु—ऋषिराह—नूनमित्यादि न याचे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दधीचिरुवाच ॥ धर्मं वः श्रोतुकामेन यूयं मे प्रत्युदाहृताः ॥ एष वः प्रियमात्मानं त्यजंतं संत्यजाम्यहम् ॥ ७ ॥ योऽध्रुवेणात्मना नाथा न धर्मं न यशः पुमान् ॥ ईहेत भूतदयया स शोच्यः स्थावरैरपि ॥ ८ ॥ एतावानव्ययो धर्मः पुण्यश्लोकैरुपासितः ॥ यो भूतशोकहर्षाभ्यामात्मा शोचति हृष्यति ॥ ९ ॥ अहो दैन्यमहो कष्टं पारक्यैः क्षणभंगुरैः ॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः ॥ १० ॥ श्रीशुक उवाच ॥ एवं कृतव्यवसितो दध्यङ्डाथर्वणस्तनुम् ॥ परे भगवति ब्रह्मण्यात्मानं सन्नयञ्जहौ ॥ ११ ॥ यताक्षासुमनोबुद्धिस्तत्त्वदृग्ध्वस्तबंधनः ॥ आस्थितः परमं योगं न देहं बुबुधे गतम् ॥ १२ ॥ अथेंद्रो वज्रमुद्यम्य निर्मितं विश्वकर्मणा ॥ मुनेः शुक्तिभिरुत्सिक्तो भगवत्तेजसाऽन्वितः ॥ ॥ १३ ॥ वृतो देवगणैः सर्वैर्गजेंद्रोपर्यशोभत ॥ स्तूयमानो मुनिगणैस्त्रैलोक्यं हर्षयन्निव ॥ १४ ॥

यथा तव संकटं स्वार्थपरा वयं न जानीम एवं प्रत्याचक्षाणस्त्वमस्मत्संकटं न जानासीति भावः ॥ ६ ॥ मे मया प्रत्युदाहृताः प्रत्युक्ताः एषः अहं मां त्यजंतं त्यक्त्वा यांतमात्मानं देहम् ॥ ७ ॥ अध्रुवेणात्मना देहेन हे नाथाः देवाः ॥ ८ ॥ य आत्मा स्वयं भूतानां शोकेन शोचति हर्षेण हृष्यति तस्य यो धर्म एतावानेवाव्यय इत्यर्थः ॥ ९ ॥ पारक्यैः श्वसृगालादिभक्ष्यैः अस्वार्थैरात्मोपयोगशून्यैः स्वं वित्तम् । ज्ञातयः पुत्रादयः । विग्रहो देहः । तैर्नोपकुर्यादिति यत् ॥ १० ॥ कृतं व्यवसितं निश्चयो येन । आत्मानं क्षेत्रज्ञं सन्नयन्नेकीकुर्वंस्तनुं जहौ ॥ ११ ॥ यता अक्षादयो येन । तत्त्वं पश्यतीति तथा ध्वस्तानि गतानि बंधनानि यस्य ॥ १२ ॥ अथेंद्रोऽशोभतेत्युत्तरेणान्वयः । मुनेः शुक्तिभिरस्थि

तेत्यंतं देवाः प्रत्याहुः नूनमित्यादि पद्यमेव न याचेतेति । चतुरक्षरविनाभूतं ततश्चार्थांतरन्यासस्यात्र विशेषतोऽयमर्थः याचको लोको नूनं स्वार्थपरः स्वर्गाद्यैश्वर्यभोगपरः परस्य दातुः संकटं स्वदेहास्थिप्रदाने पीडां न वेद यदि देवत्वेन विवेकवत्त्वाद्वेद तर्हि न याचेतेति । तेन युष्माकं विवेकाभावान्न देवत्वं किं तु व्याघ्रादिपशुतुल्यत्वमिति ऋषिणोक्तं श्रुत्वा देवैः प्रत्युक्तं दाता लोकोऽपि नूनं स्वार्थपरः देहेंद्रियादिषु ममत्वे चिरजीवित्व सुखपरः परेषां याचकानां संकटं घोरशत्रूपद्रवादिदुःखं न वेद यद्यृषित्वेन विवेकविज्ञानदयादिमत्त्वाद्वेद तर्हि नेति नाहं दास्यामीति न ब्रूयात् । यद्यस्मादीश्वरस्तद्दानसमर्थः तेन तवापि विज्ञानाद्यभावान्नर्षित्वं प्रत्युत शोकमोहादिसद्भावाद्वृषादिपशुतुल्यत्वमिति भावः ॥ ६ ॥ धर्म्मं वः श्रोतुकामेनेति । स धर्मो युष्मत्प्रत्युत्तरेणैव श्रुतः । यद्वा—ध्वनिरयं वक्रोक्त्यैव धर्मो न श्रुतः किं—तु वाक्चातुर्यं श्रुतं भवतु तावत्स्वाभिप्रायं ज्ञापय इत्याह—एष इति । आत्मानं देहं त्यजंतमचिरादेव त्यक्ष्यंतं संत्यजामीति स देहो यावन्मां न त्यजति तावद्देहमेव तं त्यजामि युष्मभ्यं ददामीत्येतावत्तु भाग्यं मम भवत्विति भावः ॥ ७ ॥ हे नाथा इति । हे याचका उपतप्ता वा न हि याचकैरुपतप्तैर्वा परदुःखं ज्ञायते इति भावः । स्थावरैः स्तब्धैर्विवेकशून्यैरपीत्यर्थः ॥ ८ ॥ इत्यर्थ इति । परदुःखसुखाभ्यां शोकहर्षौ कृतवतः पुंसः कीर्त्तिश्चिरं रंतिदेवादिवत्तिष्ठतीति भावः ॥ ९ ॥ अदातारमुद्दिश्याह—अहो इति । मर्त्य इत्यनेन परोपकारे चिरं न कार्यं मरणनिश्चयात् । उपकारसाधनानामपि क्षणिकत्वमालक्ष्य तूर्णमेव परोपकृतौ यतेतान्यथा मक्षिकापादघर्षणन्यायेन हस्तघर्षणमेवावशिष्यत इति भावः ॥ न स्वार्थो यैरित्यस्वार्थास्तैः स्वार्थमनुद्दिश्यैव धनादिभिः परोपकारं कुर्यान्न त्वैहिकं किञ्चित्कार्यमुद्दिश्य तथा सत्युपकारत्वासंभवादिति भावः ॥ १० ॥ एवमुक्तरीत्या ॥ ११ ॥ परमं योगं भगवद्ध्यानलक्षणम् ॥ १२ ॥ अथ मुनेर्देहत्यागानंतरम् "शुक्तिः शंखे शंखनखे मुक्तास्फोटेऽस्थिमानयोः" इति धरणिः ॥ १३ ॥ इवेति । यावत्तन्मरणं न भवेत्तावद्धर्षाभावादित्यर्थः ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृत्रमभ्यद्रवच्छेत्तुमसुरानीकयूथपैः ॥ पर्यस्तमोजसा राजन्क्रुद्धो रुद्र इवांतकम् ॥ १५ ॥ ततः सुराणामसुरै रणः परमदारुणः ॥ त्रेतामुखे नर्मदायामभवत्प्रथमे युगे ॥ १६ ॥ रुद्रैर्वसुभिरादित्यैरश्विभ्यां पितृवह्निभिः ॥ मरुद्भिर्ऋभुभिः साध्यैर्विश्वेदेवैर्मरुत्पतिम् ॥ १७ ॥ दृष्ट्वा वज्रधरं शक्रं रोचमानं स्वमायया ॥ नामृष्यन्नसुरा राजन्मृधे वृत्रपुरःसराः ॥ १८ ॥ नमुचिः शंबरोऽनर्वा द्विमूर्धा ऋषभोंबरः ॥ हयग्रीवः शंकुशिरा विप्रचित्तिरयोमुखः ॥ १९ ॥ पुलोमा वृषपर्वा च प्रहेतिर्हेतिरुत्कलः ॥ दैतेया दानवा यक्षा रक्षांसि च सहस्रशः ॥ २० ॥ सुमालिमालिप्रमुखाः कार्तस्वरपरिच्छदाः ॥ प्रतिषिध्येंद्रसेनाग्र्यं मृत्योरपि दुरासदम् ॥ २१ ॥ अभ्यर्दयन्नसंभ्रांताः सिंहनादेन दुर्मदाः ॥ गदाभिः परिघैर्बाणैः प्रासमुद्गरतोमरैः ॥ २२ ॥ शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः ॥ सर्वतोऽवाकिरञ्छस्त्रैरस्त्रैश्च विबुधर्षभान् ॥ २३ ॥ न तेऽदृश्यंत संछन्नाः शरजालैः समंततः ॥ पुंखानुपुंखपतितैर्ज्योतींषीव नभोघनैः ॥२४॥ न ते शस्त्रास्त्रवर्षौघा ह्यासेदुः सुरसैनिकान् ॥ छिन्नाः सिद्धपथे देवैर्लघुहस्तैः सहस्रधा ॥ २५ ॥ अथ क्षीणास्त्रशस्त्रौघा गिरिशृंगद्रुमोपलैः ॥ अभ्यवर्षन्सुरबलं चिच्छिदुस्तांश्च पूर्ववत् ॥ २६ ॥

भिर्निर्मितम् । उत्सिक्त ऊर्जितः । मुनेरस्थिभिरिति वा पाठः ॥१३॥१४॥ असुरानीकानां यूथपैः पर्यस्तं परिवृतम् ॥१५॥ रणः संग्रामः ॥ प्रथमे चतुर्युगे त्रेतायुगस्य मुखे आरंभे ॥१६॥१७॥ नामृष्यन्नासहंतेत्युत्तरेणान्वयः ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ " शतघ्नी च चतुर्हस्ता लोहकंटकसंचिता ।। भुशुंडी सर्वतोलोहकंटकानुक्रमोन्नता ॥" इत्यभिधानम् ॥ २३ ॥ पुंखो मूलदेशः एकस्य मूलदेशमनु तत्संलग्नोऽपरस्य पुंखो यथा भवति तथा नभःस्थैर्घनैर्ज्योतींषीवेत्यनेन तेषां तदप्राप्तिः सूचिता ॥२४॥ तामेवाह । न त इति । शस्त्राणामस्त्राणां च यानि वर्षाणि तेषामोघाः नाऽऽसेदुर्न प्रापुः । सिद्धपथे आकाशे ॥२५॥ क्षीणा अस्त्राणां शस्त्राणां च ओघा

'रुद्रो हि यममपि संहर्तुं शक्नोती त्यभिप्रायेण दृष्टांतः॥ १५॥ततः वज्रप्राप्त्याद्यनंतरम्।ननु कस्मिन्काले कस्मिन्देशे च वृत्रवासवयोर्युद्धमभूदिति तत्राह—त्रेतामुखे इति।प्रथमे युगे वैवस्वतमन्वंतरस्य प्रथमे चतुर्युगे तत्रापि त्रेतामुखे त्रेतायुगस्यादौ । नर्मदायामिति । गंगायां घोष इति वल्लक्षणया नर्मदातीरे । प्रथमरणस्तु तत्रैव रणांतरं मृतिकालेऽब्धितीरेपीति विशेषो ग्रंथांतरादवसेयः ॥ १६ ॥ गणदेवानाह—"रुद्रा एकादश प्रोक्ता वसवोऽष्टौ प्रकीर्त्तिताः । आदित्या द्वादश ज्ञेया अश्विनौ द्वौ प्रकीर्त्तितौ॥पितरश्चतुर्द्धा वाता वह्नयश्चांकवेदकाः ४९ । साध्या द्वादश विख्याता विश्वेदेवा दश स्मृताः॥ऋभवो बहुसंख्याता ज्ञेयास्तु तुषितास्तथा । महाराजिकनामान आभास्वरगणोपि ते ॥ षड्विंशतिस्तु तुषिता द्वे शते विंशतिस्तथा । महाराजिकनामानश्चतुःषष्टिरभासुराः ॥ इत्येवं गणदेवा हि प्रोक्ता विज्ञैः सदातनैः ॥" इति संहितायाम् ॥१७॥ राजन्निति । युद्धरीतिं जानास्येवेति भावः ॥१८॥ कांश्चिन्नसुरान्नामतो निर्दिशति—नमुचिरिति ॥ १९ ॥ २० ॥ कार्त्तस्वरपरिच्छदाः स्वर्णालंकाराः । इंद्रसेनाया अग्र्यं भागं यद्वाऽग्रे तिष्ठतीत्यग्र्यः सेनानीस्तम् । दुरासदं दुष्प्रापम् ॥ २१ ॥ असंभ्रांता निर्भयाः ॥ २२ ॥ ॥ २३ ॥ इत्यनेन दृष्टांतेन । तेषां बाणानाम् । तदप्राप्तिर्देवांगाप्राप्तिः ॥ २४ ॥ तामेवाप्राप्तिमेव । ओघाः समूहाः 'ओघो वेगेंबुनः पुंजे' इत्यभिधानात् । लघुहस्तैः क्षिप्रचलत्करैः ॥ २५ ॥ अथ शस्त्रच्छेदानंतरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. ष. श्री. टी. ॥ ४१ ॥ | भा. दी. प्र. टीका. अ० १०

तानक्षतान्स्वस्तिमतो निशाम्य शस्त्रास्त्रपूगैरथ वृत्रनाथाः ॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरिंद्रसैनिकान् ॥ २७ ॥ सर्वे प्रयासा अभवन्विमोघाः कृताःकृता देवगणेषु दैत्यैः ॥ कृष्णानुकूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ॥ २८ ॥ ते स्वप्रयासं वितथं निरीक्ष्य हरावभक्ता हतयुद्धदर्पाः ॥ पलायनायाजिमुखे विसृज्य पतिं मनस्ते दधुरात्तसाराः ॥ २९ ॥ वृत्रोऽसुरांस्ताननुगान्मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् ॥ पलायितं प्रेक्ष्य बलं च भग्नं भयेन तीव्रेण विहस्य वीरः ॥ ३० ॥ कालोपपन्नां रुचिरां मनस्विनामुवाच वाचं पुरुषप्रवीरः ॥ हे विप्रचित्ते नमुचे पुलोमन्मयानर्वञ्छंबर मे शृणुध्वम् ॥ ३१ ॥ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया यस्य न चेह क्लृप्ता ॥ लोको यशश्चाथ ततो यदि ह्यमुं मृत्युं वरं को न वृणीत युक्तम् ॥ ३२ ॥

येषाम् । गिरिशृंगैर्द्रुमैरुपलैश्च ॥ २६ ॥ तानिंद्रसैनिकान् शस्त्राणामस्त्राणां च पूगैः समूहैरक्षतान् क्षतशून्यान्स्वस्तिमतः सुखिनो द्रुमादिभिश्चाविक्षतान्निशाम्य दृष्ट्वा । वृत्रो नाथो येषां ते तत्रसुर्भीताः ॥ २७ ॥ कृताःकृताः पुनःपुनः कृताः । कृष्णोऽनुकूलो येषां तेषु देवगणेषु । रुशतीः रुशत्यः । अकल्याण्यो रूक्षाः परुषा वाचो यथा महत्सु क्षोभकर्त्र्यो न भवंति तद्वत् ॥ २८ ॥ हतो युद्धे दर्पो येषां ते आत्तः परैर्गृहीतः सारो धैर्यं येषां ते अतिप्रसिद्धा अपि ते दैत्याः एवं ते इत्यस्यापौनरुक्त्यम् । आजिमुखे युद्धारंभे पतिं विसृज्य पलायनाय मनो दधुः । यतो हरावभक्ताः ॥ २९ ॥ प्रधावतः पलायमानान्प्रेक्ष्य आदावेव तीव्रेण भयेन पलायितं भग्नं च तद्बलं सैन्यं तच्च प्रेक्ष्य एतद्वक्ष्यमाणं बभाषे ॥ ३० ॥ तदेव विशिनष्टि । कालोपपन्नामवसरोचितां मनस्विनां रुचिरां हे मय हे अनर्वन् मे वाचं शृणुत ॥ ३१ ॥ प्रतिक्रिया निवर्तनोपायः ततो मृत्योरिह

उपलैः पाषाणैः "उपलः प्रस्तरे रत्ने शर्करायां तु योषिति" इति मेदिनी । तान् गिरिशृंगादीन् । पूर्वं यथा मार्गमध्य एव च्छिन्नास्तद्वत् ॥ २६ ॥ निशाम्य दृष्ट्वा ॥ २७ ॥ प्रयासाः प्रहारलक्षणाः प्रयत्नाः । अनुकूलोऽनुग्रहाभिमुखः 'रुश्—हिंसायाम्' रुशतीः 'यूयं शीघ्रं म्रियध्वम्' इत्येवंलक्षणाः । अकल्याण्योऽमंगळाः । परुषा 'रेरे अधमाः' इत्येवंरूपाः । महत्सु दुर्वासःप्रभृतिषु । क्षुद्रैर्हंसडिंभकादिजनकल्पैः ॥ २८ ॥ पतिं वृत्रम् ॥ २९ ॥ मनस्वी धीरः ॥ ३० ॥ विप्राणामिव धैर्यहीना चित्तिश्चित्तं यस्य हे तादृश । न मुञ्चति कातर्यमिति हे तादृश । पुरो युद्धात्प्रागेव मन्यते स्वशौर्यं न युद्धे भो एतादृश रलयोरैक्यम् । मयति सैन्यदर्शनेन कातर्यमिति हे तादृश । न अर्वापि पलायते यत्सदृशो हे एतादृश ॥ ३१ ॥ प्रतिक्रिया निवृत्त्युपायः यस्य मृत्योर्न रचिता । समीचीनमृत्युं पुनः साधयिष्याम इति चेत्तत्राह—उपस्थितपरित्यागोऽनर्ह इत्यभिप्रायेणाह—

॥ ४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वौ संमताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः ॥ कलेवरं योगरतो विजह्याद्यदग्रणीर्वीरशयेऽनिवृत्तः ॥ ३३ ॥ ॥ इति श्रीभागवते महापुराणे षष्ठ०दशमोऽध्यायः ॥ १० ॥ छ ॥ श्रीशुक उवाच ॥ त एवं शंसतो धर्म्यं वचः पत्युरचेतसः ॥ नैवागृह्णन्भयत्रस्ताः पलायनपरा नृप ॥ १ ॥ विशीर्यमाणां पृतनामासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ २ ॥ दृष्ट्वाऽतप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः ॥ तान्निवार्यौजसा राजन्निर्भर्त्स्येदमुवाच ह ॥ ३ ॥ वृत्र उवाच ॥ किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः ॥ न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ ४ ॥ यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि ॥ अग्रे तिष्ठत मात्रं मे न चेद्ग्राम्यसुखे स्पृहा ॥ ५ ॥

यशो लोकः स्वर्गादिश्च यदि स्यात् । अथ तर्हि अमुं मृत्युं युक्तं समीचीनं प्राप्तं वा ॥ ३२ ॥ ब्रह्मसंधारणया कलेवरं जह्यादिति यत्स एको मृत्युः वीरशये रणभूमाव निवृत्तोऽपराङ्मुखः सन् जह्यादिति यत्स च एकः । तौ द्वाविह शास्त्रे संमतौ मृत्यू । तथा च स्मृतिः । "द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ ॥ परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥ " इति ॥ ३३ ॥ इति श्रीभा०म०षष्ठस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥ एकादशे तु वृत्रस्य युद्ध्यमानस्य वज्रिणा ॥ भक्तिज्ञानबलोदर्का श्चित्रा वाचोऽनुवर्णिताः ॥ १ ॥ शंसतः कथयतः पत्युर्वचः ॥ १ ॥ कालानुकूलैः कालानुवर्तिभिः । काल्यमानां विद्राव्यमाणाम् ॥ २ ॥ अमर्षितोऽसहमानस्तांस्त्रिदशा न्निवार्य निर्भर्त्स्य चेदं वक्ष्यमाणमुवाच ॥ ३ ॥ तदेवाह द्वाभ्याम् । मातुरुच्चरितैः पुरीषप्रायैः । प्रथमांतपाठे देवानां संबोधनम् । पृष्ठतो हतैर्दैत्यैः वो युष्माकं किं स्यात् न किंचित् । न यशो नापि धर्मः । तदेवाह । न हीति ॥ ४ ॥ प्रधने संग्रामे । सारं धैर्यं हृदि चेत्तर्हि हे क्षुल्लकाः क्षुद्राः मात्रं क्षणमात्रमग्रे तिष्ठत । न चेदिह लोकभोगे

प्राप्तं स्वत एवागतम् ॥ ३२ ॥ मृत्युद्वयस्य संमतत्वे प्रमाणमाह—तथा चेति । सूर्यमंडलभेदिनाविति । अर्चिरादिमार्गेण ब्रह्म प्राप्नुत इत्यर्थः । योगयुक्तो ब्रह्मधारणावान् इति स्मृतिपदार्थः ॥ ३३ ॥ कुत्रचित् "जातस्य पुंसः प्रलयो ध्रुवश्च पलायमानस्य च युध्यतो वा । तस्माद्भवद्भिर्न पलायितव्यं योद्धव्यमेवात्र हरेः समीपे ॥" इत्यधिकोऽपि पाठोऽस्ति स च प्राचीनानंगीकृतत्वान्न व्याख्यातः । इति श्रीमद्भागवतभावार्थ दीपिकाप्रकाशे षष्ठस्कन्धे दशमोऽध्यायः ॥ १० ॥ भक्तिज्ञानबलेनोदर्का उत्कृष्टाः (१) धर्म्यं धर्मादनपेतम् । अचेतसो निर्विचाराः । तत्र हेतुः—भयत्रस्ता इति । नृपेति । युद्धधर्मकोविदोऽसीति भावः ॥ १ ॥ विशीर्यते हिंस्यत इति विशीर्यमाणा ताम् ॥२॥ ओजसा बलेन राजन् दीप्यन् । निर्भर्त्स्य वाचा तिरस्कृत्य च ॥ ३ ॥ पुरीषवन्मातुर्देहान्निष्क्रांतैः पुरीषं यथा स्वद्रष्टृमुखं वक्रयति स्वस्पर्शिनमशुचिं करोति तद्वदिमे कातराः स्वसमीपगं शूरमपि निजपलायनेन पलायनपरं कुर्वाणाः स्वताडनपरमप्यपवित्रयंति पलायमानताडनपरस्यातीवापवित्रनरकवासश्रवणात्तद्दुकमपि "क्षत्रियस्योरसि क्षात्रं पृष्ठे ब्रह्म व्यवस्थितम् । तेन पृष्ठं न दातव्यं पृष्ठदो ब्रह्महा भवेत् ॥" इत्यादिपुराणांतरे । तथा च पृष्ठदातॄणां ब्रह्मघ्नतुल्यत्वात्तत्स्पर्शो ह्यतीवापावित्र्यहेतुस्तत एव तद्धंतॄणां स्वर्गो न भवतीत्याह—न स्वर्ग्यः स्वर्गाय हित इत्यर्थः ॥ ४ ॥ हे क्षुल्लका इति । पलायमानताडनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं सुरगणान्क्रुद्धो भीषयन्वपुषा रिपून् ॥ व्यनदत्सुमहाप्राणो येन लोका विचेतसः ॥ ६ ॥ तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै ॥ निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ॥ ७ ॥ ममर्द पद्भ्यां सुरसैन्यमातुरं निमीलिताक्षं रणरंगदुर्मदः ॥ गां कंपयन्नुद्यतशूल ओजसा नालं वनं यूथपतिर्यथोन्मदः ॥ ८ ॥ विलोक्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदाम् ॥ चिक्षेप तामापततीं सुदुःसहां जग्राह वामेन करेण लीलया ॥ ९ ॥ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोग्रविक्रमः ॥ जघान कुंभस्थल उन्नदन्मृधे तत्कर्म सर्वे समपूजयन्नृप ॥ १० ॥ ऐरावतो वृत्रगदाभिमृष्टो विघूर्णितोऽद्रिः कुलिशाहतो यथा ॥ अपासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक्सप्तधनुर्भृशार्तः ॥ ११ ॥ न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां महात्मा ॥ इंद्रोऽमृतस्यंदिकराभिमर्शवीतव्यथः क्षतवाहोऽवतस्थे ॥ १२ ॥ स तं नृपेंद्राहवकाम्यया रिपुं वज्रायुधं भ्रातृहणं विलोक्य ॥ स्मरंश्च तत्कर्म नृशंसमंहः शोकेन मोहेन हसञ्जगाद ॥ १३ ॥ वृत्र उवाच ॥ दिष्ट्या भवान्मे समवस्थितो रिपुर्यो ब्रह्महा गुरुहा भ्रातृहा च ॥ दिष्ट्याऽनृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् ॥ १४ ॥

स्पृहाऽस्ति ॥ ५ ॥ सुरगणान् रिपून् । सुमहान्प्राणो बलं यस्य । येन विचेतसो बभूवुः ॥ ६ ॥ वृत्रस्य विस्फोटनेन नादेन ॥ ७ ॥ उद्यतं शूलं येन गां भूमिम् । नालं वनं नलानां वनम् । उद्धतो मदो यस्य स यूथपतिर्गजो यथा मर्दयति ॥ ८ ॥ ९ ॥ १० ॥ सप्तधनुःप्रमाणं देशम् ॥ ११ ॥ सन्नोऽवसन्नो वाहो यस्य तस्मै न प्रायुंक्त अमृतस्यंदी अमृतस्रावी यः स्वकरस्तेनाभिमर्शः स्पर्शस्तेन वीतव्यथो गतदुःखः क्षतो वाहो यस्येंद्रस्य स तथाभूतो योद्धुमवतस्थे ॥ १२ ॥ स वृत्रः । हे नृपेंद्र । आहवकाम्यया युद्धेच्छयाऽवस्थितम् । भ्रातृहणं भ्राता विश्वरूपस्तस्य हंतारम् । नृशंसं क्रूरं तदेवांहः पापं तस्य कर्म स्मरन् ॥ १३ ॥ यो ब्रह्महा ब्राह्मणं हतवान्विशेषतः स्वगुरुं मम च भ्रातरं स भवानग्रतः समवस्थितः एतद्दिष्ट्या भद्रं जातम् । दिष्टेत्यव्ययमानंदार्थे । हे असत्तम मम शूलेन निर्भिन्नं दृषत्तुल्यं हृत् हृदयं यस्य तेन

हि क्षुद्रधर्म इति भावः। 'क्षुल्लस्तुच्छे बुभुक्षिते' इत्यभिधानात् । स्वार्थे कः ॥ ९ ॥ विचेतसो मूर्च्छिता अभवन्निति शेषः ॥ ६ ॥ 'विस्फोटनं प्रकांडस्य ताडने निनदेऽपि च' इति तीर्थः ॥ ७ ॥ नलानां कमलानां पोटगलानां वेदं नालम् "नलः पोटगले राज्ञि पितृदेवे कपीश्वरे । कमलेपि" इति मेदिनी । यूथोत्र गजसमुदायस्तस्य पतिः उन्मदः प्रमत्तः ॥ ८ ॥ तां गदाम् ॥९॥ नृपेति । नृपालनं हि युद्धे दुष्टवधेनैव भवत्यतस्तुभ्यं युद्धकथां वदामीति भावः ॥ १० ॥ अभिमृष्टस्ताडितः । कुलिशाहतो वज्राभिहतः । अपासरत्तिर्यक् पृष्ठतो वा गतः । सप्तधनुरष्टाविंशतिहस्तप्रमाणम् ॥ ११ ॥ महात्मा धर्मयुद्धकर्त्ता ॥ १२ ॥ नृपेंद्रेति । यथा त्वं नृपेंद्रः संमुखागतं शत्रुं न सहसे तथा सोप्यसुरेंद्रः कथं तादृशारिं सहेतेति भावः । शोकेन शोकरूपेण मोहेनाज्ञानेन । यद्वा—शोकानामिनः स्वामी यो मोहोऽज्ञानं तेन ॥ १३ ॥ असत्तमेति । ब्रह्महत्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो नोऽग्रजस्यात्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य॥विश्रभ्य खङ्गेन शिरांस्यवृश्चत्पशोरिवाऽकरुणः स्वर्गकामः॥१५॥ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यम्॥ कृच्छ्रेण मच्छूलविभिन्नदेहमस्पृष्टवह्निं समदंति गृध्राः॥१६॥अन्येऽनु ये त्वेह नृशंसमज्ञा ये ह्युद्यतास्त्राः प्रहरंति मह्यम् ॥ तैर्भूतनाथान् सगणान् निशातत्रिशूलनिर्भिन्नगलैर्यजामि॥१७॥अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह॥तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये ॥ १८ ॥ सुरेश कस्मान्न हिनोषि वज्रं पुरःस्थिते वैरिणि मय्यमोघम् ॥ मा संशयिष्ठा न गदेव वज्रं स्यान्निष्फलं कृपणार्थेव याच्ञा ॥ १९ ॥ नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः ॥ तेनैव शत्रुं जहि विष्णुयंत्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ २० ॥

त्वया निमित्तभूतेनाद्याचिरादेव भ्रातुरनृणोऽहं स्यामेतच्च दिष्ट्या ॥ १४ ॥ स्वर्गकामो यो भवानवृश्चत् । स्वर्गकामो याज्ञिकः पशोरिवेति वा ॥ १५ ॥ तं त्वामस्पृष्टवह्निमदग्धदेहं समदंति । वर्तमानसामीप्ये वर्तमानवन्निर्देशः ॥ १६ ॥ अन्येऽपि ये अज्ञा इह त्वा त्वां नृशंसमनु मह्यमुद्यतास्त्राः संतो यदि प्रहरंति तैर्भूतनाथान्भैरवादीन्यक्ष्यामि । कथंभूतैः । निशातं तीक्ष्णीकृतं यन्मम त्रिशूलं तेन निर्भिन्नो गलो येषां तैः ॥ १७ ॥ अथो अथ वा । हरे भो इंद्र । यदि भवानेव मम शिरो हर्ता हरिष्यति तत्र तथा सत्यनृणो विमुक्तकर्मबंधः सन्भूतेभ्यो बलिं देहेन विधाय मनस्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि ॥ १८ ॥ जीवितादपि मृत्युरेव ममाभिमत इत्याशयेनाह । सुरेशेति । न हिनोषि नहि क्षिपसि । गदेव विफलो यास्यतीति संशयं मा कार्षीः । कृपणादर्थः प्रयोजनं यस्याः सा याच्ञा यथा निष्फला तथा न स्यात् ॥ १९ ॥ अमोघत्वे हेतुं वदंस्तं प्रोत्साहयति नन्विति । तेजितस्तीक्ष्णीकृतः । शत्रुं मां जहि । विष्णुना यंत्रितः प्रेरितः ॥ २० ॥

दोषैरतीव दुष्टोऽस्यतस्तव राज्ञोऽपि वधे मे न दोषो भविष्यतीति भावः । दृषत्तुल्यं कठिनमनार्द्रमित्यर्थः । अनृणः तत्प्रतिक्रियाकरणेनापवादरहितो भविष्यामीत्यर्थः ॥ १४ ॥ प्रथमं तु ब्रह्मवध एव महापापस्तत्राप्यात्मविदस्तत्रापि निजगुरोस्तत्राप्यपापस्य तत्रापि दीक्षितस्य कृतयज्ञदीक्षस्याहो त्वादृशपापिष्ठतमो लोके नान्योस्तीति । शिरांसीति बहुत्वेनानेकब्रह्महत्यासूचि । न हि स्वर्गकामेन ब्रह्महत्या क्रियतेऽहो अत्यनुचितं ते कर्मेत्यर्थः । “स्वर्गकामो यजेत” इति श्रुतिप्रसिद्धो यजमानो वात्र दृष्टांत इत्याह—याज्ञिक इति ॥ १५ ॥ अस्पृष्टवह्निमित्यशेषनाशोऽसूचि निःशेषं ते शरीरं चूर्णयिष्यामीति भावः ॥ १६ ॥ नृशंसं क्रूरम् ‘नृशंसो घातुकः क्रूरः’ इत्यमरः । आदिना रुद्रादिग्रहः ॥ १७ ॥ हे हरे इति । दिव्यहरितेजोऽत्रवत्त्वात्त्वमेव मां हरिष्यसीति भावः । धीराणां शूरवीराणां लोकं प्राप्स्याम्येवेति भावः । त्वं तु मृतोऽपि ब्रह्मघ्नत्वाद् दुर्गतिमेव यास्यसीति भावः ॥ १८ ॥ सुरेशेति । मामहत्वा तव सुरेशता न स्थास्यतीति भावः । प्रार्थितो हि कृपणो गालीप्रदानं विना प्रार्थितं न ददाति किं तु गालीरेव तत्र यथा याच्ञा वृथा भवति तथा वज्रं न वृथा भविष्यतीत्यर्थः । तत्र हेतुः अमोघमिति । भगवत्तेजोयुक्तास्थिनिर्मितत्वात्सफलमित्यर्थः ॥ १९ ॥ ननु निश्चये । हे शक्रेति । विष्णुसहायेन मां हन्तुं शक्तोसीति भावः । य एष तव वज्रस्तेन यतो यत्र यत्पार्श्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहं समाधाय मनो यथाऽऽह संकर्षणस्तच्चरणारविंदे ॥ त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलोकः ॥ २१ ॥ पुंसां किले कांताधियां स्वकानां याः संपदो दिवि भूमौ रसायाम् ॥ न राति यद् द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयासः ॥ २२ ॥ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र ॥ ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोन्यैः ॥ २३ ॥ अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ॥ मनः स्मरेतासुपतेर्गुणांस्ते गृणीत वाक्कर्म करोतु कायः॥२४॥न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा समंजस त्वा विरहय्य कांक्षे ॥ २५ ॥

हननेन मम पीडा स्यादित्यपि मा संशयिष्ठा इत्याह । अहमिति । संकर्षणो मत्पतिर्यथा समाधियोगमाह तथा तदीयचरणारविंदे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि । तव वज्रस्य रंहसा लुलितश्छिन्नो ग्राम्यपाशो विषयभोगलक्षणो यस्य । अपविद्धलोकस्त्यक्तदेहः ॥ २१ ॥ तर्हि भगवान्संकर्षणः स्वभृत्याय मह्यमेव स्वर्गादिसंपदो दास्यतीत्यपि मा संशयिष्ठा इत्याह । पुंसामिति । स्वर्गे भूमौ रसातले च याः संपदस्ताः किल निश्चितं न राति न ददाति। तत्र हेतुः । यथाभ्यो द्वेषादयो भवंति ॥ २२ ॥ तर्हि स्वभक्तस्य किं विधत्ते तत्राह । त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते तत आयासोपरमादनुमेयो न त्वैश्वर्यादिना । अतः सम्यग्भगवत्प्रसादाभावात्तव संपदो भविष्यंतीति भावः ॥ २३ ॥ एवमिंद्राय स्वाभिप्रायं निवेद्य भगवंतं प्रार्थयते अहमिति । तव पादावेव एकं मूलमाश्रयो येषां तेषां दासानामनुदासो भूयो भविताऽस्मि भविष्यामि भवेयम् । असुपतेः प्राणनाथस्य तव गुणान्मम मनः स्मरतु । वागपि तानेव कीर्तयतु । कायस्तवैव कर्म करोतु ॥२४॥ ननु किं दास्येन तुभ्यं महाफलानि दास्यामि तत्राह । नाकपृष्ठं ध्रुवपदं ब्रह्मलोकादिकं च हे समंजस निखिलसौभाग्य

इत्यर्थः । एवं तत इति ॥ २० ॥ यथा संकर्षणो मां पूर्वजन्मनि आह–'अहं वै सर्वभूतात्मा भूतभावनभावनः' इत्यादिना तथेत्यर्थः ॥ २१ ॥ अहो अयमनंतदासोऽस्मा एव स इंद्रैश्वर्यं कदाचिन्न दद्यादिति शोचमानं प्रत्याह–तर्हीति । याम्यः संपद्व्ययः उद्वेगस्त्रासः ससंपदं तद्धीना द्विषंति ससंपदस्सदा तन्नाशादिदृष्ट्या त्रासो मनसि पीडा त्वद्वृद्ध्याद्यर्थं मदोऽभिमानोऽहमेवोत्कृष्ट इति कलिः कलहोऽपि याचकादिना व्यसनं स्त्रीमद्यादिसेवनलक्षणम् । संप्रयासोऽतीव प्रयत्नस्तद्रक्षणाद्यर्थम् ॥ २२ ॥ यतस्तवैश्वर्येच्छा वर्त्ततेऽतो हेतोः । इति भाव इति । "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति श्रीमुखोक्तेरयमाशयः । शक्रेति । विपरी तलक्षणया त्वं विषयानुरागित्वाद्भगवत्प्रसादनेऽसमर्थोसीति भावः ॥ २३ ॥ हे हरे इति । हे भक्तक्लेशनाशिन् । यद्वा–स्वाभीष्टप्रापक । यद्वा–नामोच्चारकस्वीकर्त्तेति । " हे श्रीकृष्णेति वचनं वदंतं नंदनंदनः । स्वी करोति ममैवायं ततो हरिरिति स्मृतः ॥ " इत्यादिपुराणोक्तेः । भूयः पुनःपुनः भवितास्मीति स्वस्तनार्थशंकानिवृत्तये भविष्यामीत्युक्तं न स्वस्तन एव किन्तु यदाकदाचिद्भविष्यामीत्यत्राप्यतोषात्प्रार्थनार्थे लिङर्थे लुङयमिति बोधनायाह–भवेयमिति । गुणानामिति । "अधीगर्थदयेशां कर्मणि" इति कर्मणि षष्ठी । मे इति शेषः॥२४॥अत्राक्षिपति–। नन्विति । सार्वभौमादिव्यत्ययेन योज्यं सार्वभौमं प्रियव्रतादीनामिव । रसाधिपत्यं पातालादिस्वाम्यम्।अपुनर्भवं मोक्षमपि।अत्र नाकादिचतुष्टयस्यानुक्रमत्वं न्यूनत्वविवक्षया ततश्चोत्तरकैमुत्यमपि ध्रुवपदस्य श्रैष्ठ्यं विष्णुपदसन्निहितत्वात् योगसिद्ध्यादिद्वयं तु सार्वत्रिकमपि पश्चाद्विन्यस्तमनयोस्तूत्तरश्रैष्ठ्यम्॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ॥ प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविंदाक्ष दिदृक्षते त्वाम् ॥२६॥ ममोत्तमश्लोकजनेषु सख्यं संसारचक्रे भ्रमतः स्वकर्मभिः ॥ त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्य न नाथ भूयात् ॥ २७ ॥ इति श्रीभा० षष्ठ०वृत्रासुरेण भगवत्स्तोत्रवर्णनं नाम एकादशोऽध्यायः ॥ ११ ॥ ऋषिरुवाच ॥ एवं जिहासुर्नृप देहमाजौ मृत्युं वरं विजयान्मन्यमानः ॥ शूलं प्रगृह्याभ्यपतत्सुरेंद्रं यथा महापुरुषं कैटभोऽप्सु ॥ १ ॥

निधे त्वा त्वां विरहय्य पृथक्कृत्य न कांक्षे नेच्छामि ॥ २५ ॥ तर्हि किमिच्छसि तदाह । अजातपक्षाः खगा घूकादिभिः पीडिता यथा मातरं यथा च दाम्ना बद्धा बालवत्साः स्तन्यं पयः यथा च व्युषितं दूरदेशगतं प्रियं कामेन विषण्णा प्रिया तथा मे मनस्तापत्रयपीडितं कर्मभिर्बद्धं च कामादिभिर्विषण्णं च त्वां दिदृक्षते द्रष्टुमिच्छतीत्यर्थः ॥ २६ ॥ उत्तमश्लोकस्य तव जनेषु भक्तेष्वेव मम सख्यं भूयात् । त्वन्मायया देहादिष्वासक्तचित्तस्य भूयोऽपि तेष्वासक्तिर्न भूयात् ॥ २७ ॥ इति षष्ठस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशेऽतिविषण्णेन स्वयमुत्साहितेन तु ॥ महेंद्रेण महायुद्धे वृत्रस्य वध ईर्यते ॥१॥ महापुरुषं श्रीविष्णुम् । अप्सु प्रलयोदके ॥ १ ॥

घूक उलूकः । आदिना श्येनादिग्रहः । इत्यर्थ इति । कामाद्यार्त्तस्याप्यार्त्तिस्तव कृपयैव भवतीति भावः । अत्र संदर्भः—अत्राजातपक्षा इत्यनेनानन्याश्रयत्वं तदनुगमनासमर्थत्वं च तथा तत्सहितेन मातरमित्यनेनानन्यस्वाभाविकदयालुत्वं तदीयदयाधिक्यं च व्यंजितं तेन च मातरि तेषामपि प्रीत्यतिशयो दर्शितः । ततस्तत्साम्येऽपि तद्वदात्मनोऽपि भगवति प्रीत्याधिक्यहेतुका दिदृक्षा व्यंजिता । तथापि तन्मात्रा यद्वस्त्वंतरमुपह्रियते तदेव तेषामुपजीव्यमास्वाद्यं चेति । केवलतन्निष्कृत्यभावादपरितोषेण दृष्टांतांतरमाह—स्तन्यमिति । अत्र दिदृक्षायां योजनार्थं मातरमित्येवानुवर्त्तयितव्ये स्तन्यमित्युक्तिस्तस्यास्तैस्तदंशप्राचुर्यभावनया वस्तुतस्तस्य तदीयशरीरांशतया च तदभेदविवक्षार्था ततस्तन्यं स्तन्यरूपं तदंशमयीं मातरमित्येव लब्धे तादृशी मातैव तैरुपजीव्यते आस्वाद्यते चेति पूर्वतः श्रैष्ठ्यं दर्शितं, तथा वत्सतरा अत्यंतबालवत्सास्तत एव स्वामिबद्धतया तदनुगतावसमर्था इति साधारण्येऽपि बहु समायाति क्रमात् क्षुधार्त्ता इत्यनेन पूर्वतो वैशिष्ट्यं तथा गोजातेः स्नेहातिशयस्वाभाव्येन च तदनुसंधेयम्।अथ तथाप्युत्तरदृष्टांते स्तन्यगवोः कार्यकारणभावेन भेदं वितर्क्य दृष्टांतद्वयेऽप्यजातपक्षत्वादिविशेषणैरायत्यां तादृशप्रीतेरस्थिरतां चालोक्य दृष्टांतांतरमाह—प्रियमिति । सत्स्वपि वाचकांतरेषूभयोः प्रियशब्देनैव निर्देशात्स्वाभाविकाव्यभिचारिप्रीतिमन्तावेव गृहीतौ यत्र वार्द्धके बाल्येपि सह मरणादिकं दृश्यते ततस्तादृशी कापि प्रिया तादृशं प्रियं यथा व्युषितं दूरप्रोषितं संतमन्योपजीवित्वेन विषण्णा सती दिदृक्षते लोचनद्वारा तदास्वादाय भृशमुत्कंठते तथा मम मनोपि त्वामित्यर्थः । अत्र दार्ष्टांतिकेऽपि स्वकर्तृकत्वमनुक्त्वा मनःकर्त्तृकत्वोल्लेखेन बुद्धिपूर्वकप्रवृत्तिप्राप्तौ प्रीतेः स्वाभाविकत्वेनाव्यभिचारित्वं व्यक्तं तथारविंदाक्षेति । मनसो भ्रमरतुल्यतासूचनेन भगवतः परममधुरिमोल्लेखेन च तस्यैवोपजीव्यत्वमास्वाद्यत्वं च दर्शितमिति ॥ २६ ॥ स्वस्य भगवद्दर्शनासंभवं मन्वानः सबाष्पमिदमाह—ममेति । हे नाथेति । स्वामिना भृत्यप्रार्थितं देयमेवेति भावः ॥ २७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ अतिविषण्णेनात्याकुलेन (१) नृपेति । नृपाणां युद्धे देहत्यागो यथेप्सितस्तथा तस्यापि नृपत्वात्तथात्वमीप्सितं तस्य नृपत्वं वाल्मीकीयोत्तरकांडांते वर्णितम् । संग्राममरणस्य महाफलत्वाद्वरं श्रेष्ठं मृत्युम् । अभ्यपतत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो युगांताग्निकठोरजिह्वमाविध्य शूलं तरसाऽसुरेंद्रः ॥ क्षिप्त्वा महेंद्राय विनद्य वीरोहतोऽसि पापेति रुषा जगाद ॥ २ ॥ ख आपतत्तद्विचलद्ग्रहो ल्कवन्निरीक्ष्य दुष्प्रेक्ष्यमजातविक्लवः ॥ वज्रेण वज्री शतपर्वणाऽच्छिनद्भुजं च तस्योरगराजभोगम् ॥ ३ ॥ छिन्नैकबाहुः परिघेण वृत्रः संरब्ध आसाद्य गृहीतवज्रम् ॥ हनौ तताडेंद्रमथाऽमरेभं वज्रं च हस्तान्न्यपतन्मघोनः ॥ ४ ॥ वृत्रस्य कर्मातिमहाद्भुतं तत्सुरासुराश्चारणसिद्धसंघाः ॥ अपूजयंस्तत्पुरुहूतसंकटं निरीक्ष्य हाहेति विचुक्रुशुर्भृशम् ॥ ५ ॥ इंद्रो न वज्रं जगृहे विलज्जितश्च्युतं स्वहस्तादरिसन्निधौ पुनः ॥ तमाह वृत्रो हर आत्तवज्रो जहि स्वशत्रुं न विषादकालः ॥ ६ ॥ युयुत्सतां कुत्रचिदाततायिनां जयः सदैकत्र न वै परात्मनाम् ॥ विनैकमुत्पत्तिलयस्थिती श्वरं सर्वज्ञमाद्यं पुरुषं सनातनम् ॥ ७ ॥ लोकाः सपाला यस्येमे श्वसंति विवशा वशे ॥ द्विजा इव शिचा बद्धाः स काल इह कारणम् ॥ ८ ॥ ओजः सहो बलं प्राणममृतं मृत्युमेव च ॥ तमज्ञाय जनो हेतुमात्मानं मन्यते जडम् ॥ ९ ॥

युगांताग्निवत्कठोरा जिह्वा शिखा यस्य तत् । आविध्य भ्रामयित्वा ॥ २ ॥ तत्खे आपतदागच्छत् । विचलत्परिभ्रमत् । ग्रहश्चोल्का च ग्रहोल्कं तद्वद् दुष्प्रेक्ष्यम् । शतं पर्वाणि यस्य तेन । उरगराजो वासुकिस्तस्य भोगो देहस्तदाकारम् ॥ ३ ॥ हनौ कपोलप्रांते । अमरेभमैरावतं च ॥ ४ ॥ पुरुहूतस्य इंद्रस्य संकटम् ॥ ५ ॥ पुनश्च तमाह वृत्रः । हे हरे इंद्र ॥ ६ ॥ सदा जयो नैव किं तु कुत्रचिज्जय एकत्र कुत्रचित्कदाचिन्नैव । यद्वा कुत्रचिदपि युयुत्सतां सदा जयो नैव किं त्वेकत्रैव । कदाचिदेवेत्यर्थः । परो देह आत्मा येषां पराधीनात्मनामिति वा । आद्यमनादिम् । सनातनं नित्यम् ॥ ७ ॥ पराधीनतामेवाह । लोका इति सप्तभिः । यस्य वशे स्थिताः स्वयं विवशाः संतः श्वसंति चेष्टंते । द्विजाः पक्षिणः ॥ शिचा जालेन । कालः कलयतीति भगवान् इह जयादौ कारणम् ॥ ८ ॥ ओजआदिरूपं कालं तं हेतुमज्ञायाविज्ञाय जडं संतमात्मानं

संमुखमागच्छत् ॥ १ ॥ ततोऽभ्यागमनोत्तरम् । कठोरा दीप्ता । 'कठोरो दीप्तिपूर्णयोः' इत्यभिधानात् । पापेति । तव पापमेव त्वद्धननं करिष्यत्यहं तु निमित्तमात्रमिति भावः ॥ २ ॥ शतं पर्वाणि ग्रंथयः 'पर्व ग्रंथौ महे' इत्यभिधानात् । तदाकारं तद्वत्पुष्टम् । "भोगो विषयसेवायामहिवर्ष्मणि पालने । वर्त्तुले स्थूलतायां च जन्मन्यास्वादनेऽपि च ॥" इति वररुचिः ॥ ३ ॥ परिघेणेंद्रं हनौ चिबुकप्रांते । अथ इन्द्रताडनोत्तरम् ॥ ४ ॥ तद्वज्रपातनरूपम् । अपूजयन् प्राशंसन् । तत् स्वकरतः शस्त्रपतनरूपम् ॥ ५ ॥ हे हरे इति । मत्प्राणहरणोद्यतेति भाव्यभिप्रायेणाह । विषादश्चेतसो भंगस्तस्य कालोऽवसरः ॥ ६ ॥ एकत्रेति पदस्य कुत्रचिदित्यर्थासंभवादाह—यद्वेति । इत्यर्थ इति । एकस्मिन्काले एकत्रेति व्युत्पादनात्स्वत एव कदाचिदर्थतैकत्र पदस्य भवतीति भावः । देहस्य जडत्वेनात्मता न संभवतीति स्वयं विमृश्याह—पराधीनात्मनामिति । परस्यायत आत्मा येषामिति मध्यमपदलोपी समासः । उत्पत्त्यनंतरं लयोपादानं प्रतिक्षणं लीयमानत्वाभिप्रायम् ॥ ७ ॥ कलयति तत्तत्समयं विचारयतीति कालः ॥ ८ ॥ "स वै बलं बलिनां चापरेषाम्" इत्युक्तन्यायेन तस्यैवौज आदिरूपत्वं नान्यस्येत्यर्थः । जनः पामरः अज्ञपुरुष इत्यर्थः "जनो लोके महर्लोकात्परलोके च पामरे'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा दारुमयी नारी यथा यंत्रमयो मृगः ॥ एवं भूतानि मघवन्नीशतंत्राणि विद्धि भोः ॥ १० ॥ पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेंद्रियाशयाः ॥ शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ॥ ११ ॥ अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरम् ॥ भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम् ॥ १२ ॥ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः ॥ भवंत्येव हि तत्काले यथाऽनिच्छोर्विपर्ययाः ॥ १३ ॥ तस्मादकीर्तियशसोर्जयापजययोरपि ॥ समः स्यात्सुखदुःखाभ्यां मृत्युजीवितयोस्तथा ॥ १४ ॥ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ तत्र साक्षिणमात्मानं यो वेद न स बध्यते ॥ १५ ॥ पश्य मां निर्जितं शक्र वृक्णायुधभुजं मृधे ॥ घटमानं यथाशक्ति तव प्राणजिहीर्षया ॥ १६ ॥ प्राणग्लहोयं समर इष्वक्षो वाहनासनः ॥ अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराजयः ॥ १७ ॥ श्रीशुक उवाच ॥ इंद्रो वृत्रवचः श्रुत्वा गतालीकमपूजयत् ॥ गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः ॥ १८ ॥

देहं हेतुं मन्यते ॥ ९ ॥ १० ॥ ननु स्वारंभकप्रधानपुरुषादितंत्राणीति युक्तं तत्राह । पुरुष इति । व्यक्तं महत्तत्त्वम् । आत्माऽहंकारः ॥ ११ ॥ ननु स्वकर्मद्वारा जीव एव सृष्ट्यादिहेतुरिति मीमांसका मन्यंते तत्राह । एवमविद्याननीशमेवात्मानमीश्वरं स्वतंत्रं मन्यते । ननु पित्रादयः स्रष्टारो दृश्यंते व्याघ्रादयस्तु हंतारस्तत्राह । भूतैरिति । स्वयमीश्वरः ॥ १२ ॥ ननु त्वया पराजितस्य मम जयादिशंकैव नास्ति किमिति मां बलायुद्धे प्रवर्तयसि तत्राह । आयुरिति । तत्काले जयादिकाले । विपर्यया अकीर्त्यादयः ॥ १३ ॥ यस्मादेवं सर्वमीश्वराधीनं तस्मात्समः स्याद्धर्षविषादहीनो भवेत् ॥ १४ ॥ समदृष्टावुपायमाह । सत्त्वमिति । हर्षादिभिर्न बद्धयते ॥ १५ ॥ हर्षविषादनिवृत्त्यै तवाहमेव गुरुरित्याह । पश्येति । वृक्णमायुधं भुजश्च यस्य ॥ १६ ॥ अनियतत्वं द्यूतरूपकेणोपसंहरति । प्राण एव ग्लहः पणो यस्मिन् । इषव एवाक्षाः पाशका यस्मिन् । वाहनान्येवेतस्ततश्चाल्यमानान्यासनानि फलका यस्मिन् ॥ १७ ॥ गतालीकं निष्कपटमिति मेदिनी ॥ ९ ॥ पराधीनत्वं स्फोटयति—पुत्तलिका यथा तंत्री परावर्त्तनकर्तुर्वशे । यंत्रमयो दारुनिर्मितः । मघवन्निति । 'मघो द्वीपांतरे ज्ञाने' इत्यभिधानात् । त्वं ज्ञानी भूत्वाऽपि न जानासीति तस्य मौढ्यं व्यनक्ति भो इत्यनेन तुच्छतां चाह--ईशतंत्राणि परमेश्वराधीनानि ॥ १० ॥ अत्राक्षिपति—नन्विति । यस्येशस्यानुग्रहात् । "कालः कर्म च प्रकृतिः स्वभावो जीव एव च । यदनुग्रहतः संति न संति यदुपेक्षया ॥" इत्युक्तेः ॥ ११ ॥ पुनराक्षिपति—नन्विति । एवमविद्वान् ईशस्वातंत्र्यं जीवपारतंत्र्यं चाविद्वान् । पुनः प्रतिवंद्याक्षिपति—नन्विति । आदिना पितामहादयः । द्वितीयादिना सर्पादिग्रहः । भूतैरिति । पित्रादिभिर्व्याघ्रादिभिश्च । "जनं जनेन जनयन्मारयन्मृत्युनांतकम्" अपीति श्रीकपिलोक्तेः ॥ १२ ॥ पुनराक्षिपति—नन्विति । आयुः तद्वृद्धिः । श्रीः कांतिर्धनादि वा । या अन्या आशिषः स्त्रीपुत्रादिविषया मनोरथाः । अनिच्छोः पराजयादिकमनिच्छतोऽपि ॥ १३ ॥ सुखदुःखाभ्यामिति सप्तम्यर्थे तृतीया ॥ १४ ॥ तत्र प्रकृतिगुणे सत्त्वादौ तत्कार्ये सुखादौ च सुखादयः प्रकृतिगुणसत्त्वादिधर्मा न ममेति विचारवतो बंधनं न भवतीति भावः ॥ १५ ॥ शक्रेति । श्रीविष्णुसहायवत्वात्समर्थेति भावः । घटमानं यतमानम् ॥ १६ ॥ 'ग्लहो ग्राह्यपणे स्मृतः' इति । अत्र द्यूतलक्षणे समरे ॥ १७ ॥ तं वृत्रम् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्र उवाच ॥ अहो दानव सिद्धोऽसि यस्य ते मतिरीदृशी ॥ भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरम् ॥ १९ ॥ भवानतार्षीन्मायां वै वैष्णवीं जनमोहिनीम् ॥ यद्विहायासुरं भावं महापुरुषतां गतः ॥ २० ॥ खल्विदं महदाश्चर्यं यद्रजःप्रकृतेस्तव ॥ वासुदेवे भगवति सत्त्वात्मनि दृढा मतिः ॥ २१ ॥ यस्य भक्तिर्भगवति हरौ निःश्रेयसेश्वरे ॥ विक्रीडतोऽमृतांभोधौ किं क्षुद्रैः खातकोदकैः ॥ २२ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणावन्योन्यं धर्मजिज्ञासया नृप ॥ युयुधाते महावीर्याविंद्रवृत्रौ युधां पती ॥ २३॥ आविध्य परिघं वृत्रः कार्ष्णायसमरिंदमः ॥ इंद्राय प्राहिणो द्धोरं वामहस्तेन मारिष ॥ २४ ॥ स तु वृत्रस्य परिघं करं च करभोपमम् ॥ चिच्छेद युगपद्देवो वज्रेण शतपर्वणा ॥ २५ ॥ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोऽसुरः ॥ छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः ॥ २६ ॥ कृत्वाऽधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुम् ॥ नभोगंभीरवक्त्रेण लेलिहोल्बणजिह्वया ॥ २७ ॥ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जगत्त्रयम् ॥ अतिमात्रमहाकाय आक्षिपंस्तरसा गिरीन् ॥ २८ ॥ गिरिराट् पादचारीव पद्भ्यां निर्जरयन्महीम् ॥ जग्रास स समासाद्य वज्रिणं सहवाहनम् ॥ २९ ॥ महाप्राणो महावीर्यो महासर्प इव द्विपम् ॥ वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ॥ ३० ॥ हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः ॥ निगीर्णोऽप्यसुरेंद्रेण न ममारोदरं गतः ॥ महापुरुषसन्नद्धो योगमायाबलेन च ॥ ३१ ॥

टम् ॥१८॥ भक्तः सर्वात्मना जगदीश्वरं सेवितवानसि ॥१९॥ २० ॥ २१॥ तस्य तव खातकोदकैर्गर्तादिजलोपमैः स्वर्गादिभिः किम् ॥ २२ ॥ युधां संग्रामाणां पती मुख्यौ ॥ २३ ॥ हे मारिष श्रेष्ठ राजन् ॥ २४ ॥ २५ ॥ उत्कृत्तं मूलं ययोस्ताभ्यां रक्तं स्रवतीति तथा गोत्रः पर्वतः ॥ २६ ॥ कृत्वाधरामित्यादेर्जग्रासेति तृतीयेनान्वयः । नभोवद्गंभीरेण वक्त्रेण । लेलिहः सर्पस्तद्वदुल्बणया जिह्वया ॥ २७ ॥ कालकल्पाभिः कालतुल्याभिर्दंष्ट्राभिर्ग्रसन्निव । आक्षिपन् चालयन् ॥ २८ ॥ निर्जरयन् चूर्णयन् ॥ २९ ॥ महाप्राणो महाबलः । महावीर्यो महाप्रभावः महासर्पोऽजगरो द्विपं गजम् ॥३० ॥ महापुरुषेण कवचरूपेण श्रीनारायणेन सन्नद्धो दंशितः ।

दानवेति । सुकुलोद्भूतदनुपुत्रत्वात्त्वयि नैतदाश्चर्यम् । यद्वाऽहो दानवोऽपि भूत्वा विष्णुभक्तोऽसीत्यद्भुतामिति भावः ॥१९॥ आसुरं भावं देवद्विजश्रुतिविरोधलक्षणमहंकारादिलक्षणं वा । महापुरुषतां भक्तिज्ञानादिगुणसंपन्नत्वेन महत्त्वम् ॥ २० ॥ २१ ॥ आदिना पारमेष्ठ्यादिग्रहः । अखनिषतेति खाताः कूपादयस्त एव खातकाः ॥ २२ ॥ योद्धृयुद्धौ युधौ तेषां तेषां च पती । धर्मजिज्ञासया धर्मविचारेण । नृपेति । राज्ञां धर्मविचार एव सर्वदा कार्य इति भावः ॥ २३ ॥ हे मारिषेति । अयमेव पूज्यपुरुषाणां धर्मो यदंतेऽपि दैन्याभावप्रकटनं यथा तव ब्रह्मशापे सत्यपि " द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं, गायत विष्णुगाथाः " इत्याद्युक्तेरिति भावः ॥ २४ ॥ " कनिष्ठिकाधः करभः करिपोते च तत्करे " इत्यभिधानात् । करभोपमं गजशुंडोपमम् ॥ २५ ॥ खादाकाशात् ॥ २६ ॥ दिवि मेघाधिष्ठितमार्गे । लेलिहः ' सर्पव्याघ्रौ तु लेलिहौ ' इति निरुक्तिः ॥ २७ ॥ अतिमात्रमहाकायोऽतीवोच्चस्थूलशरीरः । तरसा बलेन ॥ २८ ॥ जग्रास निजगाल ॥ २९ ॥ ३० ॥ नारायणकवचरूपेण मंत्रमूर्त्तिनेत्यर्थः । ' मंत्रमूर्त्तिममूर्त्तिकम् ' इत्युक्तेः । योग एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भित्त्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभिद्विभुः ॥ उच्चकर्त शिरः शत्रोर्गिरिशृंगमिवौजसा॥ ३२॥वज्रस्तु तत्कंधरमाशुवेगः कृंतन्समंतात्परिवर्तमानः॥ न्यपातयत्तावदहर्गणेन यो ज्योतिषामयने वार्त्रहत्ये ॥ ३३ ॥ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षिसंघाः ॥ वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ॥३४॥ वृत्रस्य देहान्निष्क्रांतमात्मज्योतिररिंदम ॥ पश्यतां सर्वलोकानामलोकं समपद्यत ॥ ३५ ॥ इति श्रीभाग० महा० षष्ठ० वृत्रवधो नाम द्वादशोऽध्यायः॥१२॥श्रीशुक उवाच॥वृत्रे हते त्रयो लोका विना शक्रेण भूरिद॥सपाला ह्यभवन्सद्यो विज्वरा निर्वृतेंद्रियाः॥१॥

योगबलेन मायाबलेन च ॥ ३१ ॥ बलभिदिंद्रः । उच्चकर्त चिच्छेद ॥ ३२ ॥ तदेवाह । तस्य कंधरं कंधराम् । आशुवेगोऽतिवेगवान् । ज्योतिषां सूर्यादीनाम् अयने दक्षिणोत्तरगतिरूपे संवत्सरे योऽहर्गणः षष्ट्युत्तरशतत्रयात्मकस्तावताऽहर्गणेन वार्त्रहत्ये वृत्रहत्यायोग्ये काले न्यपातयत् । यद्वा स्वार्थे तद्धितः । वृत्रहत्यायां वृत्रहननार्थं परिवर्तमान इत्यर्थः ॥ ३३ ॥ "वार्त्रघ्नलिंगैर्वृत्रहंतुर्वीर्यप्रकाशकैः॥वार्त्रहत्याय शवसे पृतनाषाह्याय च"इत्याद्यैस्तमिंद्रमभिष्टुवाना अभिष्टुवंतः॥ ३४ ॥अलोकं लोकातीतं भगवंतम् ॥ ३५ ॥ इति षष्ठस्कंधे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ छ ॥ त्रयोदशे तु वृत्रस्य ब्रह्महत्यामहाभयात् ॥ चिरं नष्टोऽवितः शक्रो विष्णुनेति निरूप्यते ॥ १ ॥ १ ॥

माया तस्या बलेनैश्वर्य्येण ॥ ३१ ॥ ३२ ॥ वृत्रहत्यायोग्ये काल इत्यर्थांगीकारे काल एध तद्धननं करिष्यति किं वज्रप्रहारेण । यद्वेति । वृत्रहत्यैव वार्त्रहत्यं तस्मिंस्तथा । इत्यर्थ इति । नैमित्तिकाधारसप्तमीयमिति भावः । अयने अहर्गण इत्यत्र भवतीति क्रिया बोध्या न तु भवत इति तदुक्तमपि " प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने । प्रकृतेर्वाचकः संख्यां गृह्णाति विकृततेर्न तु ॥ " इति । यथा सुवर्णं खदिरांगारसदृशे कुंडले भवतीत्यादि । इहापि ज्योतिरयनयोर्विकृतित्वमहर्गणस्य प्रकृतित्वमहर्गणस्यैव ज्योतिरयनत्वसंभवादिति । यद्वा—ज्योतिषामयने नेत्रदृष्टीनामाश्रये भगवत्पदौ तौ यावत्ते न वीक्ष्येते तावत्तस्य शिरोऽच्छिनत् । हे अहर्गणेन अहानि गण्यंते येषां तेऽहर्गणा नरास्तेषां स्वामिन् । अत्र य इति वज्रेणान्वेति । तेन वीक्ष्येते इति शेषः । यावत्तावतोर्नित्यसंबंधादेव यावदिति ॥ ३३ ॥ " वार्त्रहत्याय शवसे पृतनाषाह्याय च " इत्याद्यैरिति । अस्यार्थः—'इंद्र त्वा वर्त्तयामति' इति मंत्रशेषः । वार्त्रहत्याय वृत्रो येन शवसा बलेन हन्यते तद्वार्त्रहत्यं शवस्तस्मै वार्त्रहत्याय शवसे । पृतनाषाह्याय च पृतनाः संग्रामस्थाः सेना येन शवसाऽभिभूयंते तत्पृतनाषाह्यं बलं तस्मै पृतनाषाह्याय सहतिरभिभवार्थः । हे इंद्र त्वामावर्त्तयामः सदेत्यर्थः । वार्त्रघ्नलिंगैरिति बहुवचनात् । " अहन्नहिं पर्वते शिश्रियाणां त्वष्टास्मै वज्रं स्वर्यं ततक्ष वाश्रा इव धेनवः स्पंदमाना अंजः समुद्रमवजग्मुराप इति । वृत्रो ह वा इदं सर्वं वृत्त्वा शिष्ये यदिदमंतरेण द्यावापृथिवी स यदिद९ सर्वं वृत्त्वा शिश्ये तस्माद्वृत्रो नामेति । तमिंद्रो जघान स हतः पूतिः सर्वत एवापोभिसुस्राव सर्वत इव ह्यय९ समुद्रस्तस्मादहैका आपो बीभत्सांचक्रिरे । ता उपर्युपर्य्यतिपुपुविरे त इमे दर्भास्ताहैता अनापूयिता आपोस्ति वा इतरासु स९ सृष्टमिव यदेनावृत्रः पूतिरभिप्रास्रवत्तदेवासामेताभ्यां पवित्राभ्यामपहत्यथ रेवाद्भिः प्रोक्षति तस्माद्वा एताभ्यामुत्पुनाति " इति शतपथश्रुतयो ग्राह्याः । स्पष्टार्था एव । तदा वृत्रशिरःपतनावसरे ॥ ३४ ॥ अरिंदमेति । त्वमप्यविद्याशत्रुदमनसमर्थो भूत्वा तादृशीं गतिं प्राप्स्यसीति भावः । लोकातीतं प्रपंचातीतम् ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ चिरं नष्टो बहुकालमदृष्टः । (१) अहो इंद्रस्य महत्त्वं यो लोकस्य वर्षणेनासुरहननेन च बहुसुखप्रदोऽस्तीति विमृशंतं राजानं श्रीमहामुनिराह—त्वमपि भूरिदोऽसीति भावः । भूरिभ्यो बहुभ्यः प्रजारक्षणेन सुखं ददाति । यद्वा—प्रार्थितादप्यधिकं ददाति सुवर्णं वा ददाति । भूरीन्दुष्टजनान् द्यति खंडयति वा भूरिदस्तत्संबुद्धौ तथा । यद्वा—त्वमिंद्रादप्यधिकोऽसि यतः स्वयमेव श्रीकृष्णेन गर्भे रक्षितोऽसि दयते पालयतीति दः 'देङ्—पालने' अतो डः । भूरिः श्रीकृष्णो दः पालको यस्य स भूरिदस्तत्संबुद्धौ तथा 'जुगोप कुक्षिं गत आत्तचक्रः' इत्यादिवक्ष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवर्षिपितृभूतानि दैत्या देवानुगाः स्वयम् ॥ प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः ॥ २ ॥ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमिच्छामि भो मुने ॥ येनासन्सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ॥ ३ ॥ श्रीशुक उवाच ॥ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः ॥ तद्वधाया र्थयन्निंद्रं नैच्छद्भीतो बृहद्वधात् ॥ ४ ॥ इंद्र उवाच ॥ स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवम् ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यां क्व माज्म्र्यहम् ॥ ५ ॥ श्रीशुक उवाच ॥ ऋषयस्तदुपाकर्ण्य महेंद्रमिदमब्रुवन् ॥ याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ॥ ६ ॥ हयमेधेन पुरुषं परमात्मानमीश्वरम् ॥ इष्ट्वा नारायणं देवं मोक्ष्यसेऽपि जगद्वधात् ॥ ७ ॥ ब्रह्महा पितृहा गोघ्नो मातृहाऽऽचार्यहाऽघवान् ॥ श्वादः पुल्कसको वाऽपि शुध्येरन्यस्य कीर्तनात् ॥ ८ ॥ तमश्वमेधेन महामखेन श्रद्धाऽन्वितोऽस्माभिरनुष्ठितेन ॥ हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ॥ ९ ॥ श्रीशुक उवाच ॥ एवं संचोदितो विप्रैर्मरुत्वानहनद्रिपुम् ॥ ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम् ॥ १० ॥ तयेंद्रः स्मासहत्तापं निर्वृतिर्नाऽमुमाविशत् ॥ ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः ॥ ११ ॥

अनिर्वृतं शक्रमपृष्ट्वा स्वयमेव प्रतिजग्मुः ॥ २ ॥ हरेरिंद्रस्य ॥ ३ ॥ तस्य दुःखहेतुं वक्तुं प्रस्तावकथामाह । वृत्रविक्रमेत्यादिना । आर्थयन्प्रार्थयंत । बृहद्वधाद्ब्राह्मणवधाद्भीतः सन् ॥ ४ ॥ एनः पापं विभक्तं विभज्य गृहीतम् । मार्ज्मि शोधयामि ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ वृषाकपिमिंद्रम् ॥ १० ॥ तया देवादिभिः कारितया ।

माणत्वात् "भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि। नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिंगकः॥" इति मेदिनी । निर्वृतमिंद्रियं मनो निर्वृतानि सुस्थितानि वेंद्रियाणि चक्षुरादीनि येषां ते तथा "निर्वृतिः सुस्थितावस्तंगमने च सुखे क्रियाम्" इति मेदिनी ॥ १ ॥ देवर्षयो नारदाद्याः । देवानुगा गंधर्वाद्याः । ततो युद्धस्थलात् ॥ २ ॥ भो मुन इति । सर्वज्ञत्त्वात्तव सर्वं विदितमिति भावः । येन वृत्रवधेन । हरोरेन्द्रस्य । "अर्कमर्कटमंडूकविष्णुवासववायवः । तुरंगसिंहशीतांशुयमाश्च हरयो दश॥" इत्यभिधानात् ॥ ३ ॥ आर्थयन्निति । अर्थप्रातिपदिकात्कृदंतात् "तत्करोति" इति णिचि कृते रूपं साधु । वृत्रस्य ब्राह्मणत्वमग्निसंभवत्वादपि "अग्निर्वै ब्राह्मणः" इति श्रुतेः । आदित्यानामपि वस्तुतो ब्राह्मणत्वेन त्वष्टुरात्मजत्वादपि तथात्वमेवेति ॥ ४ ॥ यथा. बृहस्पत्यवज्ञात्मकं पापं विश्वरूपवधात्मकपापांतरस्य जनकं जातं तथा तच्च लोकदृष्ट्या विभक्तमपि वृत्रवधात्मकपापांतरस्य जनकत्वेनावशिष्टं दृष्टमित्थमिन्द्रः स्वयमेव तदशेषमनुभूयांतर्भीत एव हि तान्प्रत्याचक्षाण उवाचेत्यभिप्रायेणाह–इंद्र उवाचेति । विभक्तं विभज्य स्वीकृतं तत्र हेतुः–अनुगृह्णद्भिरिति ॥ ५ ॥ ऋषयस्तु जगत्स्वास्थ्याय तस्याप्यासुरभावनाशाय श्रीभगवदाज्ञाबलेन प्रयोजितवन्त इत्यभिप्रेत्याह–ऋषय इति ॥ ६ ॥ तत्र वीर्यातिशयाधानज्ञापनार्थमाहुर्नारायणमिष्ट्वेति ॥ ७ ॥ कैमुत्यार्थमाह–ब्रह्महेति । कीर्त्तनमात्रात्किं पुनरसकृन्नामोच्चारणमयतद्यजनादित्यर्थः । ब्राह्मणाच्छूद्रायां जातः सुतो निषादः शूद्रायां निषादाज्जातः पुल्कसः क्षत्रियाच्छूद्रकन्यायां जाता कन्योग्री शूद्रात् क्षत्रियायां जातः क्षत्ता क्षत्तुरुग्र्यां जातः श्वाद इति मन्वादयः । अपि नाऽन्येप्यंत्यजादयः ॥ ८ ॥ महामखेन सर्वयागमुख्येन । तत्र स्वभावं दर्शयंति अस्माभिरिति । तत्र भगवत इव स्वाभिप्रायमपि व्यंजयंति–खलेति । जगतस्तस्य च भद्रीभावान्नात्र दोष इति भावः । अत्रेष्ट्वेति शेषः । ब्रह्महननस्याधिक्यसूचनाय चराद्रत्वेति पृथगुक्तम् ॥ ९ ॥ एवं तस्य पापस्यात्मनि नात्युपपत्तावपि साभिमाना तदधिष्ठात्री तु तमभिभवितुमुद्यतेत्याह–ब्रह्महत्येति । "वृषाकपिर्हरे शक्रे कृष्णे च जातवेदसि" इत्यभिधानात् ॥ १० ॥ निर्वृतिः सुखम् । अत्राक्षिपति–नन्विति । यद्यपि शत्रुवधसूचकशौर्यादिगुणाः सुखहेतवस्तथापि ते ब्रह्महत्यया ततस्य नो सुखयंति लज्जाकरत्वान्निंदाकरत्वाच्च ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां ददर्शानुधावंतीं चांडालीमिव रूपिणीम् ॥ जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटाम् ॥ १२॥ विकीर्य पलितान्केशांस्तिष्ठतिष्ठेति भाषिणीम्॥ मीनगंध्यसुगंधेन कुर्वतीं मार्गदूषणम् ॥ १३ ॥ नभोगतो दिशः सर्वाः सहस्राक्षो विशांपते ॥ प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसम् ॥ ॥ १४ ॥ स आवसत्पुष्करनालतंतूनलब्धभोगो यदिहाग्निदूतः ॥ वर्षाणि साहस्रमलक्षितोंतः स चिंतयन्ब्रह्मवधाद्विमोक्षम् ॥ १५ ॥ ताव त्रिणाकं नहुषः शशास विद्यातपोयोगबलानुभावः ॥ स संपदैश्वर्यमदां धबुद्धिर्नीतस्तिरश्चांगतिमिंद्रपत्न्या ॥ १६ ॥

स्मेत्यवधारणे । इंद्र एव तापमसहत नान्यः । अमुमिंद्रं निर्वृतिर्नाविशत् । ननु धैर्यादिगुणयुक्तस्य कुतोऽनिर्वृतिस्तत्राह । ह्रीमंतं लज्जावंतम् । वाच्यतां निंद्यताम् ॥ ११॥ यक्ष्मग्रस्तां क्षयरोगव्याप्ताम् ॥ १२ ॥ मीनस्येव गंधो यस्य स मीनगंधिः स चासावसुश्च श्वासवायुस्तस्य गंधेन ॥ १३ ॥ प्रागुदीचीं दिशं गतः संस्तूर्णं मानसं सरः ॥ ॥ १४ ॥ स इंद्रः सहस्रं वर्षाणि पुष्करनालस्य तंतून् प्रति आवसत । कथंभूतः । न लब्धो भोगो येन सः । कुतः । यद्यस्मादिह जले वसन्नग्निदूतश्च स्वयम् । अग्नेश्च स्वदूतस्य हविर्भागान्नेतुर्जले प्रवेशासंभवादलब्धभोग इत्यर्थः । पाठांतरे न लब्धो यज्ञभागो येन सः ।। १५ ।। त्रिणाकं न अकं दुःखं यस्मिन्निति नाकः पुण्यलोकः । तृतीयं नाकं स्वर्गम् । ननु मनुष्यस्य कुतः स्वर्गराज्यं तत्राह । विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यं यस्य सः । तर्हि तस्मिन्सति कथमिंद्रस्य पुनः स्वर्गप्राप्तिस्तत्राह । स नहुषः संपदैश्वर्याभ्यां यो मदस्तेनांधा बुद्धिर्यस्य स इंद्रपत्न्या शच्या तिरश्चां गतिं सर्पयोनिं नीत उपायेन प्रापितः । एवं ह्याख्यायते । नहुषः किल कदाचिदिंद्राणीमुवाच इंद्रस्तावदहमतस्त्वं मां भजेति तया चावेदितवृत्तांतो बृहस्पतिस्तामुवाच ब्राह्मणवाह्यशिबिकायामारुह्यागतं त्वां भजिष्यामीति ब्रूहि ततोऽसौ ब्रह्मशापात्पतिष्यतीति तया च तथोक्तो नहुषोऽगस्त्यादीन् शिबिकां वाहयामास । तदा शीघ्रं सर्पसर्पेत्यगस्त्यं पदा पस्पर्श तेन कुपितेन सर्पो भवेति शप्तो महासर्पोऽजगरोऽभूदिति ।। १६ ।।

असृक्पट रजस्वलामिव रक्तरंजितवस्त्राम्॥१२॥''पलितं जरसा शौक्ल्यम्'' इत्यमरः ॥१३॥ नभः सर्वा दिशश्च गतः सहस्राक्षः प्रागुदीचीं प्राच्या उदीच्याश्च मध्ये या दिक् तामीशानीमित्यर्थः । गत इत्यावृत्यायोज्यम् । नृपेति विशांपते इति चेंद्रस्य त्रिलोकीपतेर्यदीयमवस्था ब्रह्महत्यया जाता तर्हि केवलनृपतेरितरसामान्यप्रजापालकानां कथं न सा स्यादतो ब्रह्महत्याया भेतव्यमिति भावः ॥ १४ ॥ पुष्करनालस्य कमलनालस्य तंतूनिति सप्तम्यर्थे द्वितीया ''उपान्वध्याङ्वसः'' इत्युक्तेः । इत्यर्थ इति । भोगानवाप्याऽतीव कृशोऽभूदिति भावः । पाठांतरेऽलब्धभाग इति पाठे । विगतो मोक्षो यतोऽन्यत्रेति विमोक्षो विष्णुस्तम् ''वरं वृणीष्व राजर्षे ऋते कैवल्यमद्य नः॥ एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥ '' इति मुचुकुंदं प्रति देवगणोक्तेः । ब्रह्मवधाद्धेतोर्विष्णुं चिंतयन्नित्यर्थः । ऋतंभरध्यानेत्यादिवक्ष्यमाणत्वात् ॥ १५ ॥ मनुष्ये स्वर्गराज्यासंभवमाशंकते—न न्विति । नहुषः शशासेति वृत्रवधवृत्तं सप्तममन्वंतरगतं लक्ष्यते । तथापि षष्ठमन्वंतरहतानां नमुच्यादीनां कीर्त्तनं तत्प्रतिनिधिरूपत्वेन तन्नाम्नां केषांचिदपेक्षयेति ज्ञेयम् । आख्यायिकार्थस्य स्पष्टत्वमेव ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो गतो ब्रह्मगिरोपहूत ऋतंभरध्याननिवारिताघः ॥ पापस्तु दिग्देवतया हतौजास्तं नाभ्यभूदवितं विष्णुपत्न्या ॥ १७ ॥ तं च ब्रह्मर्षयोऽभ्येत्य
हयमेधेन भारत ॥ यथावद्दीक्षयांचक्रुः पुरुषाराधनेन ह ॥१८॥ अथेज्यमाने पुरुषे सर्वदेवमयात्मनि ॥ अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः॥१९॥
स वै त्वाष्ट्रवधो भूयानपि पापचयो नृप ॥ नीतस्तेनैव शून्याय नीहार इव भानुना ॥२०॥ स वाजिमेधेन यथोदितेन वितायमानेन मरीचिमिश्रैः ॥
इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः ॥२१॥ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्तनम्॥भक्त्युच्छ्रयं भक्तजनानुवर्णनं
महेंद्रमोक्षं विजयं मरुत्वतः॥२२॥पठेयुराख्यानमिदं सदा बुधाःशृण्वंत्यथो पर्वाणि पर्वणींद्रियम्॥धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं
तथायुषम् ॥२३॥ इति श्रीभा०महा०षष्ठ० इंद्राश्वमेधवर्णनं नाम त्रयोदशोऽध्यायः॥ १३॥परीक्षिदुवाच॥रजस्तमःस्वभावस्य ब्रह्मन्वृत्रस्य पाप्मनः॥
नारायणे भगवति कथमासीद् दृढा मतिः ॥ १ ॥ देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् ॥ भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥ २ ॥

स्वर्ग गतः प्राप्तः । कथंभूतः । ब्रह्मगिरा ब्राह्मणवाक्येनोपहूतः सन् । ऋतंभरः सत्यपालको हरिस्तस्य ध्यानेन निवारितमघं येन । प्रागपि तु पापो ब्रह्मवधस्तमिंद्रं नाभ्य भूत्तस्याभिभवं नाकरोत् । कुतः । दिग्देवतया प्रागुदीच्यां दिशि स्थितया श्रीरुद्रेण अवितं रक्षितं संतम् ॥ १७ ॥ पुरुषस्य हरेराराधनं यस्मिंस्तेन ॥ १८ ॥ सर्वदेव मय आत्मा मूर्तिर्यस्य तस्मिन् । सर्ववेदमयात्मनीति वा पाठः । ब्रह्मवादिभिर्विततेऽनुष्ठितेऽश्वमेधे महेंद्रेणेज्यमाने पुरुषे सति ॥ १९ ॥ तेनैव पुरुषेणैव शून्याय नीतः निःशे षनाशित इत्यर्थः ॥ २० ॥ अधिकृता यज्ञा येन तम् ॥ २१ ॥ पाठादिविधातुमाख्यानं स्तौति । इदमिति । प्रक्षाल्यतेऽनेनेति प्रक्षालनम् । तीर्थपदस्यानुकीर्तनं यस्मिन् भक्तेरुच्छ्रयो यस्मिन् । भक्तजनानामनुवर्णनं यस्मिन् महेंद्रस्य मोक्षो यस्मिन् । मरुत्वतो विशेषण जयो यस्मिन् ॥ २२ ॥ इंद्रियं तत्पाटवकरमिंद्रसंबंधीति वा आयुष मायुष्यम् ॥ २३ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ छ ॥ वृत्रस्य ज्ञानभक्त्यादि श्रुत्वा पृष्टः परीक्षिता ॥ हेतुमाह चतुर्भिस्त त्पाग्जन्मचरितोक्तिभिः ॥ १ ॥ चतुर्दशे तु सहसा कृच्छ्रलब्धे सुते मृते ॥ चित्रकेतोरतिस्नेहादतिशोको निरूप्यते ॥ २ ॥ रजश्च तमश्च स्वभावो यस्य ॥ १ ॥ २ ॥

ततो नहुषपातोत्तरम् । ब्राह्मणवाक्येन बृहस्पतिवाक्येनाग्निवाक्येन ब्रह्मवाक्येन वा । यद्यपि 'पापं किल्बिषकल्मषम्' इत्यमरोक्तेः पापशब्दस्य नियतक्लीबत्वमस्ति तथाप्यत्र पुंस्त्वं तदभिमानिजीवापेक्षयास्तीति ज्ञेयं व्याख्यातं तथा विजयध्वजेन । पापो ब्रह्महत्यालक्षणो जीवः विष्णुपत्न्या मानससरस्थितकमलवासिन्या लक्ष्म्याऽवितमिंद्रं रुद्रेण हतौजाः पापो न तिरश्चकारेत्यर्थः ॥ १७ ॥ लोकापवादरूपो यः शेषः पापप्रचारः सोऽपि ब्रह्मर्षिभिर्नोशित इति तं चेति । त्रिभिराह—तमिंद्रम् । पुरुषो विष्णुः "सहस्रशीर्षा पुरुषः" इत्यादिश्रुतेः । भारतेति "दौष्यंतिरिव यज्वनाम्" इत्युक्तेस्त्वं त्वतीव यज्ञकर्तृप्रधानभरतकुलजातत्वादिंद्रयागो महानिति विस्मयं मा कुर्विति भावः ॥ १८ ॥ अथ यज्ञदीक्षानंतरम् ॥ १९ ॥ नृपेति । नृपालनेन यथा त्वं शुद्धोऽसि तथा स्वःपालनार्थमिंद्रोऽपि यागेन शुद्धो बभूवेति भावः । इत्यर्थ इति । नाशस्यापि शून्यपदार्थत्वादिति भावः । "शून्यं स्यान्निर्जने नाशेंकासने रहितेऽपि च" इति धरणिः ॥ २० ॥ विधूतपापः सन्महानास पूज्यो बभूवेत्यर्थः ॥ २१ ॥ २२ ॥ इंद्रियपदेन तत्पाटवार्थः क्लिष्टकल्पनया लभ्योऽत आह—इंद्रसंबंधीति वृद्धयभाव आर्षः ॥ २३ ॥ इति श्रीमद्भागवतभावार्थदीपिका प्रकाशे षष्ठस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ आदिना वैराग्यग्रहः (१) सहसा झटिति मृते सति (२) ॥ १ ॥ देवानामपि श्रीकांतांघ्रिभक्तिर्दुर्लभ,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजोभिः समसंख्याताः पार्थिवैरिह जंतवः ॥ तेषां ये केचनेहंते श्रेयो व मनुजादयः ॥ ३॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तमाः ॥ मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति ॥ ४ ॥ मुक्तानामपि सिद्धानां नारायणपरायणः ॥ सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ॥ ५॥ वृत्रस्तु स कथं पापः सर्वलोकोपतापनः ॥ इत्थं दृढमतिः कृष्ण आसीत्संग्राम उल्बणे ॥ ६ ॥ अत्र नः संशयो भूयाञ्छ्रोतुं कौतूहलं प्रभो ॥ यः पौरुषेण समरे सहस्राक्षमतोषयत् ॥७॥ सूत उवाच ॥ परीक्षितोऽथ संप्रश्नं भगवान्बादरायणिः ॥ निशम्य श्रद्दधानस्य प्रतिनंद्य वचोऽब्रवीत् ॥८॥ श्रीशुक उवाच ॥ शृणुष्वावहितो राजन्नितिहासमिमं यथा ॥ श्रुतं द्वैपायनमुखान्नारदाद्देवलादपि ॥ ९ ॥ आसीद्राजा सार्वभौमः शूरसेनेषु वै नृप ॥ चित्रकेतुरिति ख्यातो यस्यासीत्कामधुङ् मही ॥ १० ॥ तस्य भार्यासहस्राणां सहस्राणि दशाभवन् ॥ सांतानिकश्चापि नृपो न लेभे तासु संततिम् ॥ ११ ॥

भक्तेर्दुर्लभत्वं प्रपंचयति रजोभिरिति त्रिभिः । पार्थिवै रजोभिः परमाणुभिः समाः संख्याता अनंता इत्यर्थः । जंतवो जीवास्तेषां मध्ये ये केचन कतिपये श्रेयो धर्ममीहंते कुर्वंति ॥ ॥ ३ ॥ मुच्येत गृहादिसंगाद्विमुच्यते । सिद्ध्यति तत्त्वं जानाति ॥ ४ ॥ ५ ॥ ६ ॥ न चेंद्रभिया कृष्णं शरणं गत इत्याह । यः पौरुषेणेति ॥ ७ ॥ ८ ॥ यथा यथावत् शृणु ॥ ९ ॥ १० ॥ भार्यासहस्राणां दशसहस्राणि कोटिरित्यर्थः । सांतानिकः स्वयं संतानार्होऽपि पुत्रोत्पादनसमर्थोऽपि तासु संततिं न लेभे । सर्वास्ता वंध्या

किमुतासुरप्रकृतेरित्यभिप्रेत्याह—देवानामिति ॥२॥ इत्यर्थ इति । "परमाणुप्रदेशेऽपि ह्यनंताः प्राणिराशयः" इति श्रवणादिति भावः । आदिना दैत्यादिग्रहः ॥३॥ तेषां धर्ममीहमानानां मध्ये मुमुक्षवो मोक्षेच्छावंतः । द्विजोत्तमेति । ब्राह्मणस्यैव त्वादृशस्य मुमुक्षुत्वमुचितम् "परीत्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात्" इति श्रुतेः । अत्र ब्राह्मणपदस्य ब्राह्मणत्वजातिविशिष्ट एवार्थोऽत्रान्यार्थकल्पना त्वशोभनैवाधुनिकत्वात् । "प्रसिद्धार्थपरित्यागो ह्यतीवागतिके क्वचित् । सर्वथा तत्परित्यागः शास्त्रविप्लवताकरः" इत्यभियुक्तोक्तेः ॥ ४ ॥ हे महामुन इति । त्वमेव जीवन्मुक्तत्वेऽपि नारायणपरायणत्वान्महामुनिरसि "प्रायेण मुनयो राजन्निवृत्ता विधिषेधतः । नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ॥" इति मां प्रत्येव त्वदुक्तेरिति भावः । "मननान्मुनिरित्युक्तस्तत्र भक्त्या महामुनिः" इति संहितोक्तेः ॥ ५ ॥ पापत्वे हेतुः—सर्वलोकोपतापन इति ॥ ६ ॥ अत्र रजस्तमःस्वभावत्वेऽपि पुनः कृष्णभक्तत्वे । हे प्रभो इति । त्वं सर्वथा वक्तुं समर्थोऽसीति भावः ॥ ७ ॥ अथ कार्त्स्न्येन संप्रश्नम् ॥ ८ ॥ राजन्निति । राज्ञामावहित्यासंभवत्वमाह—द्वैपायनादित्रयकीर्त्तने नास्याख्यानस्यानादित्वं विज्ञप्रसिद्धत्वं च सूचितम् ॥ ९ ॥ नृपेति । त्वत्सदृशनृपालनतत्पर इति भावः ॥ १० ॥ इत्यर्थ इति । दशसहस्रगुणितं सहस्रकोटिमितं स्यादिति भावः । संततिं पुत्रं पुत्रीं वा संतन्यते विस्तार्यते कुलमनयेति संततिरिति व्युत्पत्तेः पुत्र्या अपि दौहित्रादिरूपेण वंशविस्तृतिहेतुत्वात्सन्ततित्वम् । इति भाव इति । दैवयोगेन प्राक्तनकर्मणेत्याशयः । वर्षर्तुकालिकानरक्तवर्णबहुपादचित्रितोर्द्ध्वदेहाः पुंजीभूय चलनवन्तः कीटविशेषा केनचिद्गजेन स्वपादेनैकदैव मर्दितास्ते च कीटाश्चित्रकेतुवनिताभावं प्राप्ताः स गजस्तत्पुत्रतां प्रापेति । ताः स्वपूर्वजन्मवैरेण तं मारयामासुरित्यैतिह्यमप्यत्र केचिद्वदंति । तासां वंध्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः ॥ संपन्नस्य गुणैः सर्वैश्चिता वंध्यापतेरभूत् ॥ १२ ॥ न तस्य संपदः सर्वा महिष्यो वामलोचनाः ॥ सार्वभौमस्य भूश्चेयमभवन्प्रीतिहेतवः ॥ १३ ॥ तस्यैकदा तु भवनमंगिरा भगवानृषिः ॥ लोकाननुचरन्नेतानुपागच्छद्यदृच्छया ॥ १४ ॥ तं पूजयित्वा विधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीदत्सुखासीनं समाहितः ॥ १५ ॥ महर्षिस्तमुपासीनं प्रश्रयावनतं क्षितौ ॥ प्रतिपूज्य महाराज समाभाष्येदमब्रवीत् ॥ १६ ॥ अंगिरा उवाच ॥ अपि तेऽनामयं स्वस्ति प्रकृतीनां तथात्मनः ॥ यथा प्रकृतिभिर्गुप्तः पुमान्राजापि सप्तभिः ॥ १७ ॥ आत्मानं प्रकृतिष्वद्धा निधाय श्रेय आप्नुयात् ॥ राज्ञा तथा प्रकृतयो नरदेवाऽऽहिताधयः ॥ १८ ॥ अपि दाराः प्रजामात्या भृत्याः श्रेण्योऽथ मंत्रिणः ॥ पौरा जानपदा भूपा आत्मजा वशवर्तिनः ॥ १९ ॥

एव दैवयोगेन मिलिता इति भावः ॥ ११ ॥ तदेवाह । वंध्यापतेरिति ॥ १२ ॥ १३ ॥ १४ ॥ उपासीदत्तस्य समीपमुपविवेश । समाहितः संयतः ॥ १५ ॥ १६ ॥ अपि किम् । अनामयमारोग्यम् । तथात्मनः तव प्रकृतीनां स्वस्ति शुभं किम् । प्रकृत्यधीनमेव हि राज्यमिति सदृष्टांतमाह । यथा महदाद्याभिः सप्तभिः प्रकृतिभिः पुमान् जीवो नित्यं गुप्तो भवति न तु तद्व्यतिरेकेण क्षणमपि तिष्ठति तथा राजाऽपि सप्तप्रकृतिभिः "स्वाम्यमात्यौ जनपदा दुर्गद्रविणसंचयाः । दंडो मित्रं च तस्यैताः सप्त प्रकृतयो मताः ॥" इत्युक्तलक्षणाभिर्नित्यं गुप्तः सन् श्रेय आप्नुयात् इत्युत्तरेणान्वयः । तत्र स्वामी गुरुः स्वयं वा ॥ १७ ॥ आत्मानं प्रकृतिष्वद्धा साक्षान्निधाय तदनुवर्तिनं कृत्वा श्रेयो राज्यसुखं प्राप्नुयादित्यर्थः । प्रकृतीनां च सुखं राजाधीनमेवेत्याह । हे नरदेव तथा प्रकृतयोऽपि राज्ञा आहिताधयो निहितनिक्षेपा धनैः समृद्धा भवंति । पाठांतरे आ समंततो हताधयो निरस्तमनोदुःखा भवंतीत्यर्थः ॥ १८ ॥ प्रजाश्च अमात्याश्च श्रेण्यश्च समयविशेषेण संघशो वर्तमाना वणिक्प्रभृतयः । पौराः पुरवासिनः ।

त्वकारकं कर्म तु पुराणांतरान्निश्चेयम् ॥ ११ ॥ आदिना शीलादिग्रहः । सर्वथा प्रसूतिरहिता स्त्री वंध्या । चिंता पुत्राप्राप्तिजनिता ॥ १२ ॥ १३ ॥ भगवान्सर्वथा समर्थः ॥ १४ ॥ तमंगिरसम् ॥ १५ ॥ तं चित्रकेतुम् । अहो चित्रकेतुर्महान्राजासीद्यद्गृहे साक्षाद्ब्रह्मपुत्रोंगिरामुनिरागत इत्याभृशंतं परीक्षितं महामुनिरामंत्रयति हे महाराजेति । त्वं तु ततोप्यधिको महाराजोऽसि यतोऽहं त्यक्तसर्वपरिग्रहोऽपि त्वद्दर्शनाय समागतो विनैवाह्वानं मत्तोप्यधिकाः श्रीनारदबादरायणादयश्च समागताः इति ॥ १६ ॥ शुभं मंगलम् । सप्तभिर्महदहंकारपञ्चतन्मात्राभिः । तद्व्यतिरेकेण सप्त प्रकृतीर्विहायेत्यर्थः । गुरोः स्वस्योपास्यत्वात्प्रकृतिषु गणना नोचिताऽत आह—स्वयं वा राजैवेत्यर्थः । वस्तुतो राज्ञोऽन्यो न रक्षकस्तस्य स्वयमेव स्वरक्षासमर्थत्वात् "न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः" इति रघुवंशोक्तन्यायेन ॥ १७ ॥ इत्यर्थ इति । प्रकृत्यानतुकूल्ये राज्ञो महद्दुःखं भवतीति भावः । हे नरदेवेति । विना प्रकृत्यानुकूल्यं सर्वत्र स्वयं व्यग्रत्वान्नरदेवत्वमेव न सिध्यतीति भावः । पाठांतरे आहताधय इति पाठे । इत्यर्थ इति व्याख्या ॥ १८ ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यात्मानुवशश्चेत्स्यात्सर्वे तद्वशगा इमे ॥ लोकाः सपाला यच्छंति सर्वे बलिमतंद्रिताः ॥ २० ॥ आत्मना प्रीयते नात्मा परतः स्वत एव वा॥ लक्षयेऽलब्धकामं त्वां चिंतया शबलं मुखम् ॥ २१ ॥ एवं विकल्पितो राजन्विदुषा मुनिनाऽपि सः ॥ प्रश्रयावनतोऽभ्याह प्रजाकामस्ततो मुनिम् ॥२२॥ चित्रकेतुरुवाच ॥ भगवन्किं न विदितं तपोज्ञानसमाधिभिः ॥ योगिनां ध्वस्तपापानां बहिरंतःशरीरिषु ॥२३॥ तथापि पृच्छतो ब्रूयां ब्रह्मन्नात्मनि चिंतितम् ॥ भवतो विदुषश्चापि चोदितस्त्वदनुज्ञया ॥ २४ ॥ लोकपालैरपि प्रार्थ्याः साम्राज्यैश्वर्यसंपदः ॥ न नंदयंत्यप्रजं मां क्षुत्तृट्काममिवापरे ॥ २५ ॥

जानपदास्तत्तद्देशाधिकारिणः मंत्रसहायो मंत्री कर्मसहायोऽमात्य इति भेदः ॥ १९ ॥ तव मनः स्ववशे वा न वेत्यर्थात्पृच्छति । यस्यात्मा मनोऽनुवशोऽनुवर्ती अधीनः स्यात्तस्य वशगा दारादय इमे सर्वे भवंति । किं च लोकाश्च तस्य बलिं यच्छंति ॥ २० ॥ आत्मा भवान् आत्मना न प्रीयते न तुष्यति तत्किम्। परतो वा स्वतो वाऽलब्ध कामं त्वां लक्षये ॥ २१ ॥ विदुषा सर्वज्ञेनापि ॥ २२ ॥ अलब्धकामत्वं कथयन्पुत्रं याचते भगवन्निति चतुर्भिः ॥ २३ ॥ २४ ॥ अप्रजमपुत्रम् । क्षुत्तृड्भ्या

पालैरिंद्रादिभिः सहिता लोकाः 'मनोवशेऽन्ये ह्यभवन्स्म देवाः' इत्यारभ्य 'युंज्याद्वशे तं स हि देवदेवः' इत्यंतेन श्रीकृष्णो वक्ष्यति मनोजेतुस्सर्वदेवोत्तमत्वमेकादशे । किं च । स्वमनसो वशवर्त्तित्वे भृत्यादयोऽपि स्ववशगा भवंति अन्यथा कोपलोभाद्यधीनस्य तव क्रोधादिना विमनस्कीकृता भृत्यादय उक्तकारिणो न भवंतीति भावः ॥ २० ॥ आत्मना मनसा चिंतया मुखं शबलं पीतं च लक्षये ॥ २१ ॥ विकल्पितः पूर्वोक्तविकल्पपूर्वकं पृष्टः ॥ २२ ॥ हे भगवन्निति । योगैश्वर्यसंपन्नत्वाद्भवान्सर्वं वेत्तीति भावः । तपोज्ञानसमाधिभिस्स्वधर्मस्थितिशास्त्रविचाराचित्तैकाग्र्यैर्ध्वस्तपापानां योगिनां युष्मादृशां शरीरिष्वस्मा दृशेषु यद्बहिरंतश्चिंतितं तत्किन्न विदितमपि तु सर्वं विदितमेवेत्यर्थः ॥ २३ ॥ यद्यपि त्वं सर्वं जानास्येव तथापि पृच्छतो भवतः ब्रह्मन्नित्यनेन मदिष्टसंपादनसमर्थोऽसीति सूचितम् ॥ २४ ॥ साम्राज्यैश्वर्यस्य संपदो लोकपालैरन्यैर्नरेन्द्रैः । शूरसेनदेशेषु व्रजस्याप्यंतर्गतत्वात्तत्र वासार्थं लोकपालैर्ब्रह्मादिभिरपि प्रार्थ्या एवेति भावः । भूः केवलैव साम्राज्यं विनापि देवैर्वासार्थं महाफलदात्रीत्वेनार्थ्यते किं पुनस्तत्साम्राज्यमिति भावः । अहो देवप्रार्थ्या मां स्वतः प्राप्ता अपि न नंदयंति तत्र हेतुः—अप्रजमिति । कदाचित्कस्यचिन्नृपस्य कन्योद्वाहे कौतुकाविष्टच्छात्रैरार्थित एकोऽविद्वांस्तैस्समं तमीक्षितुं गच्छन्मार्गे सुवृक्षस्थं सुपर्णमपराह्णे वीक्ष्य छात्रेभ्यो भोः छात्रा एतत्समये वृक्षस्थं गरुडं यः प्रदक्षिणी कुर्यात्तस्य स तद्दिनादर्वागेव सुकन्याप्तिरर्थाप्तिश्च स्यात्सत्यमहं वसन्तराजशाकुनादिशकुनशास्त्रतो ब्रवीमीति श्रुत्वैकश्छात्रो यदा प्रदक्षिणी कर्तुमुद्यतस्तदा स गरुडस्तत उड्डीय वृक्षांतरमितः छात्रोऽपि तमनुजगाम ततः सोऽन्यत्र गत इत्थं गरुडमनुधावतश्छात्रस्य रविरस्ताचलं गतः प्रदोषो जातस्तदा रात्र्यंधवशात्तस्तार्क्ष्य एकस्मिन्वृक्षे निलीय तस्थे "वयांसि प्रबलाद्दोषाद्दोषान्धाः कौशिकादृते:।" इति पुराणात् । स च तं प्रदक्षिणीकृत्य यावत्पुरं निकषा प्राप तावत्पुरं पिहितकपाटमभूत् । तत्र प्रवेशमलभमानः पुरस्य नातिदूरे नरान्तरशून्यमंबिकामन्दिरमेत्य क्षुत्तृडर्दितः श्रान्तः सुष्वाप । मंदिरपुरोगजगन्मोहनसुते तस्मिन्नंबिकामेलनार्थमागतैर्लोकपैः कोऽयं सुप्त इत्यनुयुक्ता भगवती ब्राह्मणात्मजोऽयमतिक्षुधितः श्रांतश्च तदेनमद्योद्वाहितराजकन्याशयने निधाय तत्रत्यं तद्वरं राजकुमारमेतत्स्थाने निधाय गंतव्यम् । पुनरागच्छाद्भिरयमत्र नृपात्मजश्च तत्र पूर्ववत्क्रियताम्।प्रमाणमित्युक्त्वा छात्रं राजकन्यापार्श्वे निधाय राजकुमारं देवीमंदिरमानाय्य देव्याज्ञया लोकलीलावलोकनाय ययुः।ततो राजकन्यया स विलासार्थमुद्बोधितः।स च तदोचे"शय्या वस्त्रं चंदनं चारु हास्यं वीणावाणी दर्शनीया च नारी । न भ्राजन्ते क्षुत्पिपासातुराणां सर्वारम्भास्तण्डुलप्रस्थमूलाः॥" इत्याकर्ण्य तया क्षुधितो विज्ञाय बहुविधान्नैरतीव रम्यैः सोऽभोजि।ततः स पुनर्निद्रामाप। पुनरागत्य देवैर्देव्याज्ञया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पाहि महाभाग पूर्वैः सह गतं तमः ॥ यथा तरेम दुस्तारं प्रजया तद्विधेहि नः ॥ २६ ॥ श्रीशुक उवाच ॥ इत्याथतः स भगवान्कृपालुर्ब्रह्मणः सुतः ॥ श्रपयित्वा चरुं त्वाष्ट्रं त्वष्टारमयजद्द्विजः ॥२७॥ ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणां च भारत ॥ नाम्ना कृतद्युतिस्तस्यै यज्ञोच्छिष्टमदाद् द्विजः ॥ २८ ॥ अथाह नृपतिं राजन्भवितैकस्तवात्मजः ॥ हर्षशोकप्रदस्तुभ्यमिति ब्रह्मसुतो ययौ ॥२९॥ साऽपि तत्प्राशनादेव चित्रकेतोरधारयत् ॥ गर्भं कृतद्युतिर्देवी कृत्तिकाग्नेरिवात्मजम् ॥३०॥ तस्या अनुदिनं गर्भः शुक्लपक्ष इवोडुपः ॥ ववृधे शूरसेनेशतेजसा शनकैर्नृप ॥३१॥ अथ काल उपावृत्ते कुमारः समजायत ॥ जनयञ्छूरसेनानां शृण्वतां परमां मुदम् ॥ ३२ ॥ हृष्टो राजा कुमारस्य स्नातः शुचिरलंकृतः ॥ वाचयित्वाऽऽशिषो विप्रैः कारयामास जातकम् ॥३३॥ तेभ्यो हिरण्यं रजतं वासांस्याभरणानि च ॥ ग्रामान्हयान्गजान्प्रादाद्धेनूनामर्बुदानि षट् ॥३४॥

मन्नपानकाममपरे स्रक्चंदनादयो यथा न सुखयंति ॥ २५ ॥ पूर्वैः पित्रादिभिः सह गतं प्राप्तं तमो नरकं प्रजया यथा तरेम तत्तथा विधेहि ॥ २६ ॥ २७ ॥ यज्ञोच्छिष्टं यज्ञशेषम् ॥ २८ ॥ जन्मना हर्षं मरणेन च शोकं प्रददातीति तथा । इत्येवमुक्त्वा ययौ ॥ २९ ॥ ३० ॥ शूरसेनानामीशस्य तेजसा वीर्येण यो गर्भः स ववृधे ॥ ॥ ३१ ॥ ३२ ॥ जातकं जातकर्म ॥ ३३ ॥ अर्बुदं दश कोटयः । वेदे तु कोटिरेवार्बुदम् । नियुतं च प्रयुतं चार्बुदं चेति प्रयुतानंतरं निर्देशात् ॥ ३४ ॥

छात्रो देव्यालये राजकुमारश्च नृपकन्याशयने न्यधायि । मुहूर्त्तं सुप्त्वा जागरितोऽभूत्कन्यापि नृपस्य जागरित्वा पूर्वोक्तश्लोकस्य पूर्वार्द्धं पापठ तदुत्तरार्द्धज्ञानार्थं सा तमूचेस्वामिन्नस्योत्तरार्द्धं पठ । तदाकर्ण्य स नृपकुमारस्तामाह मया नेदं वृत्तमपाठि न जानाम्यहमेतद्वृत्तमेतदाकर्ण्य नृपसुता शयनादुत्थाय तं निजपतीतरं ज्ञात्वा स्वमात्रेऽवदन्मातर्मम शयने कश्चिन्मंत्रादिबलेन नृपात्मजवेषं कृत्वा मत्पतिमन्यत्र प्रापितवान्सत्यमहं ब्रवाणि नैनमहं स्वी करिष्ये किन्त्वाहं तं समागतं समाजमध्यतो ग्रहीष्यामि यदि सर्वेषु पटांतारितपीठगो मत्प्रश्नोत्तरं दास्यति स मे पतिर्ज्ञेयः इति।तया च राज्ञे कन्यावृत्तं कन्योक्तं समश्रावि।राज्ञापि तथैव कृतम्।तथाहि–तदग्रिमदिने पटान्तारितं पीठं निधाय समाजे उद्घोषितं केनचिच्छद्मना मंत्रादिबलेन वा राजकन्यावरवेषं विधाय वरोऽन्यत्र प्रापितः स च यदि समाजगो भवेत्तदा तं सा स्वयमेव ज्ञास्यति प्रश्नोत्तरलाभादिति श्रुत्वा क्रमतः सर्वे पटांतारितपीठं प्राप्य तत्प्रश्नं श्रुत्वा यदोत्तरं न ददुस्तदा स छात्रोऽपि पीठं प्राप । सा च "शय्या वस्त्रं चंदनं चारु हास्यं वीणावाणी दर्शनीया च नारी" इति पठित्वास्योत्तरं पठयतामित्याह यदा तदा स छात्रस्तां प्राह अस्योत्तरार्द्धं शृणु– "न भ्राजन्ते क्षुत्पिपासातुराणां सर्वारम्भास्तण्डुलप्रस्थमूलाः" इति श्रुत्वा पटमपसार्य तत्पादावग्रहीदाह च ममायं पतिस्तदा राज्ञा सा तस्मै छात्राय दत्ता राज्यखण्डञ्च दत्तम् । स च स्वाध्यापकाय ग्राममेकं दत्त्वा स्वपार्श्वेमेव रक्षितवान्प्रार्थनयेति बृहदितिहाससागरतोऽवसेयमिदम् ॥ २५ ॥ यतोऽहमित्थं शोकसागरे मग्नस्ततो हेतोः । हे महाभागेति । यथा त्वं महं भगवदाराधनलक्षणमुत्सवमा समंताद्भजसे तथा मामपि महं पुत्रजन्मोत्सवमा शीघ्रं भजामि तथा कुरुष्वेति भावः ॥ २६ ॥ पुत्रदानमिषेण वैराग्योत्पादनद्वारा भगवदभिमुखीकरणेच्छुत्वात्कृपालुरिति । तथा च वक्ष्यति 'तदैव ते परं ज्ञानम्' इत्यादि त्वाष्ट्रं त्वष्टृदैवतम् ॥ २७ ॥ भारतेति । भरतवंशोद्भूतत्वात्त्वं जानास्येव ज्येष्ठैव मान्या तत्रापि श्रेष्ठा चेदिति यथा दुष्यंतेन राज्ञा सत्यामप्यन्यस्यां ज्येष्ठायां राज्ञ्यां श्रेष्ठत्वाद्भरतमातैव शकुंतला भरताय राज्यप्रदानेन मानितैवमत्रापीति भावः । द्विजोंऽगिराः ॥ २८ ॥ अथ हुतशेषदानानंतरम् । राजन्निति । राजत्वात्त्वत्प्रार्थना न प्रत्याख्यातेति भावः । "गुरुपितृनृपाणां हि प्रत्याख्येयं न वै वचः" इत्युक्तेः ॥ २९ ॥ ३० ॥ नृपेति । यथा तव पालनतेजसा नरो वर्द्धते तथा शूरसेनेशतेजसा गर्भ इति भावः ॥ ३१ ॥ अथ गर्भपूर्त्त्यनंतरम् ॥ ३२ ॥ ३३ ॥ अत्र केरलमतेन अर्बुदानि षडित्यत्र ६९८३० पंचषष्टिसहस्राणि त्रिंशदधिकाष्टशतानीति संख्या समायाति तदानयन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ववर्ष काममन्येषां पर्जन्य इव देहिनाम् ॥ धन्यं यशस्यमायुष्यं कुमारस्य महामनाः ॥ ३५ ॥ कृच्छ्रलब्धेऽथ राजर्षेस्तनये नुदिनंपितुः ॥ यथा निःस्वस्य कृच्छ्राप्ते धने स्नेहोऽन्ववर्द्धत ॥ ३६ ॥ मातुस्त्वतितरां पुत्रे स्नेहो मोहसमुद्भवः ॥ कृतद्युतेः सपत्नीनां प्रजाकामज्वरोऽभवत् ॥ ३७ ॥ चित्रकेतोरतिप्रीतिर्यथा दारे प्रजावति ॥ न तथान्येषु संजज्ञे बालं लालयतोऽन्वहम् ॥ ३८ ॥ ताः पर्यतप्यन्नात्मानं गर्हयंत्योऽभ्यसूयया ॥ आनपत्येन दुःखेन राज्ञोऽनादरणेन च ॥ ३९ ॥ धिगप्रजां स्त्रियं पापां पत्युश्चागृहसंमताम् ॥ सुप्रजाभिः सपत्नीभिर्दासीमिव तिरस्कृताम् ॥ ४० ॥ दासीनां को नु संतापः स्वामिनः परिचर्यया ॥ अभीक्ष्णं लब्धमानानां दास्या दासीव दुर्भगाः ॥ ४१ ॥ एवं संदह्यमानानां सपत्न्याः पुत्रसंपदा ॥ राज्ञोऽसंमतवृत्तीनां विद्वेषो बलवानभूत् ॥ ४२ ॥ विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः ॥ गरं ददुः कुमाराय दुर्मर्षा नृपतिं प्रति ॥ ४३ ॥ कृतद्युतिरजानंती सपत्नीनामघं महत् ॥ सुप्त एवेति संचिंत्य निरीक्ष्य व्यचरद्गृहे ॥ ४४ ॥ शयानं सुचिरं बालमुपधार्य मनीषिणी ॥ पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ॥ ४५ ॥ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलोचनम् ॥ प्राणेंद्रियात्मभिस्त्यक्तं हताऽस्मीत्यपतद्भुवि ॥ ४६ ॥ तस्यास्तदाकर्ण्य भृशातुरं स्वरं घ्नंत्याः कराभ्यामुर उच्चकैरपि ॥ प्रविश्य राज्ञी त्वरयात्मजांतिकं ददर्श बालं सहसा मृतं सुतम् ॥ ४७ ॥

धन्यं धनकरम् । आयुष्यमायुष्करम् । महामना अत्युदारः ॥ ३५ ॥ ३६ ॥ मोहस्य समुद्भवो यस्मिन् । प्रजाकामरूपो ज्वरस्तापः ॥ ३७ ॥ दार इत्येकवचनमार्षम् ॥ ३८ ॥ आनपत्येनापुत्रत्वनिमित्तेन ॥ ३९ ॥ न गृहे संमतां न बहुमताम् । यद्वा । गृहा दाराः " दारेष्वपि गृहाः " इत्यमरः । गृहिण्येव गृहं न भार्येति संमता मित्यर्थः ॥ ४० ॥ दास्या दासी यथा तथा वयं दुर्भगाः ॥ ४१ ॥ न संमता वृत्तिर्जीवनं यासाम् ॥ ४२ ॥ विद्वेषेण नष्टा मतिर्विवेको यासां ताः । गरं विषम् । दुर्मर्षा असहमानाः ॥ ४३ ॥ ४४ ॥ धात्रीं स्तनदायिनीम् ॥ ४५ ॥ उद्गते तारके कनीनिके ययोस्ते लोचने यस्य तम् ॥ ४६ ॥ ४७ ॥

प्रकारो हि लीलाकल्पद्रुमाख्याद्यश्लोकव्याख्यायां नवमस्कंधार्थनिरूपणे रंतिदेवोपाख्याने वर्णितोऽस्माभिरिति "संख्याया विंशको ह्यंशो ग्रहीतव्यः सदा बुधैः । इतिहासपुराणादावित्येवं नीलकंठवाक्" इति भारतदीपिकायाम् । तथा च कोटित्रयं धेनूनां लभ्यते धेनुशब्देन द्रव्यधेनुग्रहणे तु न काप्यनुपपत्तिः एवमन्यत्रापि यत्रासंभवत्वं संख्यायां प्रतीयेत तत्र समाधेयमिति । यद्वा–वसुदेववत्तदा संकल्प्य पुनः शनैःशनैर्ददाविति ज्ञेयं समस्तानां तात्कालिकसमर्पणासंभवादिति ॥ ३४ ॥ अन्येषां ब्राह्मणेतरेषामपि नटनर्तकादीनाम् । कामान्वांछितान् । कुमारस्य धन्यमित्यादित्रयं क्रियाविशेषणम् ॥ ३५ ॥ कृच्छ्रलब्धे यत्नेन प्राप्ते । निःस्वस्य निर्धनस्य ॥ ३६ ॥ ३७ ॥ अन्येषु दारेषु ॥ ३८ ॥ अभ्यसूयया स्वीयसौन्दर्यादावपि कुरूपाद्यारोपणेन ॥ ३९ ॥ इत्यर्थ इति । 'गृहिण्येव गृहम्' इत्युक्तेस्तत्र भार्यादृष्टिर्न भवतीत्यर्थः ॥ ४० ॥ दुर्भगाः संततिनिस्सरणरहितस्मरमंदिराः ॥ ४१ ॥ नृपतिं प्रति दुर्मर्षाः राज्ञो वृत्तमसहमानाः ॥ ४३ ॥ ४४ ॥ हे भद्रे इति । निजपुत्रभद्रकारिणीत्वेन । यद्वा–भद्रेतिनाम्नी साऽतस्तन्नाम्नैव तामनोदयदिति भावः ॥ ४५ ॥ हतास्मीत्युक्त्वापतत् ॥ ४६ ॥ तस्या धात्र्याः । भृशमत्यर्थम् । आतुरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहांबरा ॥ ४८ ॥ ततो नृपांतःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम् ॥ आगत्य तुल्यव्यसनाश्च दुःखितास्ताश्च व्यलीकं रुरुदुः कृतागसः ॥४९॥ श्रुत्वा मृतं पुत्रमलक्षितांतकं विनष्टदृष्टिः प्रपतन्स्खलन्पथि ॥ स्नेहानुबंधैधितया शुचा भृशं विमूर्छितोनुप्रकृतिर्द्विजैर्वृतः ॥ ५० ॥ पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांबरः ॥ दीर्घं श्वसन्बाष्पकलोपरोधतो निरुद्धकंठो न शशाक भाषितुम् ॥ ५१ ॥ पतिं निरीक्ष्योरुशुचार्पितं तदा मृतं च बालं सुतमेकसंततिम् ॥ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सती दधाना विललाप चित्रधा ॥ ५२ ॥ स्तनद्वयं कुंकुमगंधमंडितं निषिंचती सांजनबाष्पबिंदुभिः ॥ विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुररीव सुस्वरम् ॥ ५३ ॥ अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ॥ परेऽनुजीवत्यपरस्य या मृतिर्विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥ ५४ ॥ न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणामस्तु तदात्मकर्मभिः ॥ यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ॥ ५५ ॥

विभ्रष्टाः शिरोरुहा अंबरं च यस्याः सा ॥ ४८ ॥ ताश्च सपत्न्योऽपि ॥ ४९ ॥ अलक्षितोंतको मृत्युहेतुर्यस्य तम् । अनुगताः प्रकृतयोऽमात्यादयो यस्य सोऽनुप्रकृतिः ॥ ५० ॥ बाष्पकलाभिरश्रुबिन्दुभिरुपरोधतः संवृतत्वेन निरुद्धः कंठो यस्य ॥५१॥ उरुशुचार्पितं बहुशोकेन व्याप्तम् । एकमेव संततिरूपम् ॥५२॥ विगलंत्यः स्रजो येभ्यस्तान् केशान् ॥५३॥ आत्मसृष्टेरप्रतिरूपमननुरूपं चेष्टसे । तदेवाह । नु अहो परे वृद्धे जीवत्यपरस्य बालस्य या मृतिस्तत् । तदा हि वृद्धस्य सृष्टिसामर्थ्याभावे बाले च मृते सति तव सृष्टिर्नष्टा स्यादित्यर्थः । ननु सांप्रतं स्वसृष्टेर्विपरीतोऽस्मीति चेत्तत्राह । विपर्ययो विपरीतोऽसि चेत्तर्हि त्वं प्राणिनामतिदुःखकारित्वात् ध्रुवो नित्यः परः शत्रुरसि । न तु कृपालुरित्यर्थः॥५४॥ननु जीवकर्मानुसारेण जन्मादि कुर्वतो मम कोऽपराधस्तत्राह । न हीति । पुत्रे जीवत्येव पिता म्रियते पितरि जीवत्येव पुत्रो जायत

दुःखजनकम् । स्वरं रोदनशब्दम् । सहसाऽवितार्कितं रोगाद्यभावात् मृतम् ॥ ४७ ॥ विभ्रष्टा इतस्ततस्स्खलिताः केशा ऊर्द्ध्वाधोवस्त्रे च ॥४८॥ ततो राज्ञीरोदनस्वरादिश्रवणोत्तरम् । तुल्यव्यसनाः सुदुःखिता इत्यंतःपुरवर्त्तिसपत्नीतरनरनारीविशेषणम् । याभिर्मारितस्ताश्च विशेषेणालीकं मृषैव रुरुदुः ॥४९॥ मृत्युहेतुर्ज्वरादिरित्यर्थः ॥ ५० ॥ ५१ ॥ यद्वा—पतिम् एका सैव संततिर्यस्य तम् । हृद्रुजं हृदि क्लेशम् । चित्रधाऽनेकधा तत्क्रीडाविनोदस्मरणपूर्वकम् ॥ ५२ ॥ कुंकुमपंकेत्यपि पाठः । कुररीवोत्क्रौंचीव " उत्क्रौंचकुररी समी " इत्यमरः । सुस्वरं स्फुटस्वरम् ॥ ५३ ॥ अननुरूपमननुकूलम् । तदेवाननुरूपत्वमेव । इत्यर्थ इति । बाला एव युवानो भूत्वा सृष्टिसंपादनसमर्था भवंति न तु वृद्धा इति भावः । अत्राक्षिपति—नन्विति । पूर्वं त्वहमनुकूल एवासं सांप्रतमधुनैव । इत्यर्थ इति । न ह्येतत्कर्मकरणशीलाः केनापि कृपालवः कथ्यंते इति भावः ॥ ५४ ॥ पुनराक्षिपति—नन्विति । त्वया किं कृत्यं अजागलस्तनवद्व्यर्थत्वात् । तत्र पुनराक्षिपति—नन्विति । 'तुष्यतु दुर्जनः' इति न्यायमाश्रित्याह भवतु नाम त्वमेवोत्पादको भव नात्रास्माकं किञ्चिद्धानिस्तथापि तत्रापि । इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम्॥अंजस्तरेम भवताऽप्रजदुस्तरं यद्ध्वांतं न याह्यकरुणेन यमेन दूरम्५६॥ उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुम् ॥ सुप्तश्चिरं ह्यशनया च भवान्परीतो भुंक्ष्व स्तनं पिब शुचो हर नः स्वकानाम्॥५७॥ नाहं तनूज ददृशे हतमंगला ते मुग्धस्मितं मुदितवीक्षणमाननाब्जम् ॥ किं वा गतोऽस्यपुनरन्वयमन्यलोकं नीतोऽघृणेन न शृणोमि कला गिरस्ते ॥ ५८ ॥ श्रीशुक उवाच ॥ विलपंत्या मृतं पुत्रमिति चित्रविलापनैः ॥ चित्रकेतुर्भृशं तप्तो मुक्तकंठो रुरोद ह ॥५९॥ तयोर्विलपतोः सर्वे दंपत्योस्तदनुव्रताः ॥ रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥ ६० ॥ एवं कश्मलमापन्नं नष्टसंज्ञमनायकम् ॥ ज्ञात्वांऽगिरा नाम मुनिराजगाम सनारदः ॥ ६१ ॥ इति श्रीभा० म० षष्ठ०चतुर्दशोऽध्यायः ॥ १४ ॥

इति च क्रमो नास्ति, कर्माधीनत्वादिति चेत्तर्ह्यात्मकर्मभिरेव तज्जन्मादिकमस्तु । किं त्वया कृत्यम् । ननु मयेश्वरेण विना जडैः कर्मभिरिदं कथं सिध्येत् । भवतु नाम तथाऽपि निजसर्गवृद्धये ते त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव विवृश्चसि छिनत्सीत्यादि क्रोशति । न ह्येवंविधं दुःखं दृष्ट्वा कश्चिदपि पुत्रादिषु स्नेहं करिष्यतीति भावः ॥५५॥ अप्रजदुस्तरमप्रजानां दुस्तरम् । ध्वांतं तमिस्रम् अंजः अनायासेन तरेम । अकरुणेन सह ॥५६॥ अशनया क्षुधा॥५७॥तनूज हे पुत्र नाहं प्रथमं त्वत्पार्श्वमागता सती तव मुग्धस्मितं वक्त्रं ददृशे दृष्टवत्यास्मि । इदानीमपि गिरो न शृणोमि । तर्हि किमु पुनरन्वयं पुनरागमनं यथा न भविष्यति तथा परलोकं अघृणेन यमेन नीतः किं वा गतोऽसि ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ इति श्रीमद्भागवते षष्ठस्कंधे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥

भाव इति । पुत्रादिषु स्नेहाभावे सृष्टिवर्द्धनमेव न भविष्यतीत्याशयः ॥ ५५ ॥ तातेति । प्रियत्वात्त्वमेव न याहि वयं ते प्रियास्त्वमस्माकं प्रियोऽतस्त्वकरुणेन निर्दयेन साकं मा याहीत्यर्थः । अप्रजसां प्रजाहीनानां ध्वांतं नारकं तमः " पुत्रेणैव जय्योऽयं लोकः " इति श्रुतेः । अत्र सलोपस्त्वार्षः । समासांतविधेरनित्यत्वाद्वासिजभावः ॥ ५६ ॥ नृपनंदनेति । त्वां विना नृपो न नंदतीति भावः ॥ ५७ ॥ तनूजेति । शरीरसंभवत्वात्तव वियोगो दुःसह इति भावः । ननु तनूजो रोगोऽप्यस्ति तद्वियोगे यथा सुखं तत्तुल्योऽहमप्यतो व्याख्यांतरमाह—तनूं जयत्युत्कर्षं प्रापयति । यद्वाऽदृश्यत्वात्तनुरधर्मफलं नरकस्तमु निश्चयेन जयत्यनेनेति तनूजस्तत्संबुद्धौ तथा । कला मधुरा स्फुटाः ॥ ५८ ॥ विलपंत्या सह मुक्तकंठोऽत्युच्चैः ॥ ५९ ॥ अचेतनमश्मवत्प्रवृत्तिशून्यम् ॥ ६० ॥ अनायकं शोकनिवर्त्तकशून्यं राजानमिति शेषः ॥ ६१ ॥ इति श्रीमद्भागवतभावार्थदीपिकप्रकाशे षष्ठस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ ऊचतुर्मृतकोपांते पतितं मृतकोपमम् ॥ शोकाभिभूतं राजानं बोधयंतौ सदुक्तिभिः ॥१॥ कोयं स्यात्तव राजेंद्र भवान्यमनुशोचति ॥त्वं चास्य कतमः सृष्टौ पुरेदानीमतः परम् ॥२॥ यथा प्रयांति संयांति स्रोतोवेगेन वालुकाः॥संयुज्यंते वियुज्यंते तथा कालेन देहिनः ॥३॥ यथा धानासु वै धाना भवंति न भवंति च ॥ एवं भूतेषु भूतानि चोदितानीशमायया ॥ ४ ॥ वयं च त्वं च ये चेमे तुल्यकालाश्चराचराः ॥ जन्ममृत्य्वोर्यथा पश्चात्प्राङ्ङ्नैवमधुनापि भोः ॥ ५ ॥ भूतैर्भूतानि भूतेशः सृजत्यवति हंत्यजः ॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोऽपि बालवत् ॥ ६ ॥

ततः पंचदशे चित्रकेतोः शोकापनोदनम् ॥ कृतं तत्त्वोपदेशेन नारदेनांगिरोयुजा ॥ १ ॥ कश्मलं शोकं प्राप्तं सर्वमनाथं ज्ञात्वा सनारदः नारदेन सह मृतकोपांते शवसमीपे ॥ १ ॥त्वं चास्य बंधूनां मध्ये कतमः सृष्टौ प्रजारूपायाम्।अयं पुत्रोऽहं चास्य पितेति चेत्तत्राहतुः।पुरेति।ये पूर्वजन्मनि पित्रादिरूपेण संयुक्ताःआसंस्त एव मरणेन वियुक्ताःसंतो वर्तमानजन्मनि कदाचित्तस्यैवान्यस्य वा पुत्रादयो भवंति ते जन्मांतरे तस्यैवान्यस्य वा कलत्रादयः शत्रुमित्रादयो वा भवंत्यतो नायं नियम इति भावः॥ २॥तमेवाभिप्रायं प्रकटयति।यथेति।स्रोतसः प्रवाहस्य वेगेन यथा प्रयांति वियुज्यंते संयांति संयुज्यंते तथा कालवेगेन देहिनो जीवा अपि॥ ३॥ तथाऽप्येतावंतं कालं मम पुत्रो नाभूद्वार्धके जातो मृत इति दुःखमिति चेत्तत्राहतुः।यथा धानासु बीजेषु धाना बीजांतराणि भवंति कासुचित्कदाचिन्न भवंति नोत्पद्यंते नश्यंति च न तु भवंत्येव तिष्ठंत्येवेति वा नियमः।एवमेव भूतानि पुत्रादिरूपाणि भूतेषु पित्रादिषु।अतो धानानां जन्यजनकत्वेऽपि यथा पितृपुत्रादिभावो नास्त्येवमत्रापीति न शोकः कार्य इति भावः । ईशमायाप्रेरितानामेव भवनमभवनं न वस्तुतः ॥ ४ ॥ तस्य च सर्वसाधारणत्वान्न पुत्र एव शोचनीय इत्याहतुः । वयं चेति । तुल्यकाला वर्तमानकालीनाः । जन्मनः प्राक् मृत्योः पश्चाच्च यथा न संत्येवमधुनापि न संति । भो राजन् । आद्यंतयोरसत्त्वात्स्वप्नवदित्यर्थः ॥ ५ ॥ असत्त्वे कथं प्रतीतिः कथं वाऽहमस्य जनक इत्याद्यभिमानस्तत्राहतुः । भूतैरिति । ईश्वरेण

ततो बालमरणोत्तरम् । अंगिरसा युनक्तीत्यंगिरोयुक् तेन तथा (१) अत्र संसारो नित्यस्तदुच्छेदो ज्ञानेनैव तदपि निरंतरोपासितश्रीनारायणानुग्रहादुत्पद्यते तदेतत्सर्वमस्मिन्नध्याये निरूप्यते । मृतकोपमं मृततुल्यम् ॥ १ ॥ इति भाव इति । यमनुशोचसि तवायं कः कीदृशो बंधुः स्यादिदानीं पुरेति भ्रांतिश्चेत्तर्हि विरिंचसृष्टौ पुरातीतकाले त्वमस्य बालस्य बंधूनां मध्ये कतमो बंधुः पिता मातुलो वा सहोदरोवाऽतः परमेष्यति कालो च कतमो बंधुः । अथ यदि पूर्वोत्तरकाले युवयोर्न कोपि संबंधस्तथेदानीमपि भ्रांतिमंतरेण न कोपि संबंधोऽतः शोको न कार्य इत्याशयः ॥ २ ॥ ३ ॥ यद्यपि संयोगवियोगौ कालाधीनौ तथापीति । यतो नियमाभावोऽतो हेतोः । इति भाव इति । जन्यजनकत्वेन शोकहेतुत्वे यूकादावतिप्रसंगो दुर्वारः स्यादित्याशयः ॥४॥ तस्य च भवनाभवस्य च जन्मना सहितो मृत्युर्जन्ममृत्युस्तस्य । यद्वा जन्म च मृत्युश्चानयोः समाहारो जन्ममृत्युस्तस्य तथा समाहारे नपुंसकमित्यस्यानित्यत्वात् । योग्यत्वाद्व्युत्क्रमेणोभयोः संबंधः । भो इत्यनेन राजन्नित्याक्षिप्यते । इत्यर्थ इति । एतत्कालीनजीवा भवनाभवनवंत आद्यंतयोरसत्त्वात्स्वप्नवदित्यनुमानादिति भावः॥५॥अत्राक्षिपति—नन्विति । इति भाव इति । न वस्तुतः पित्रादीनां जनकत्वम् 'जनं जनेन जनयन्' इत्याद्युक्तेरीश्वरस्यैव जनकत्वमित्याशयः।पुनरत्राक्षिपति—नन्विति । बालस्य यथा क्रीड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहेन देहिनो राजन्देहाद्देहोभिजायते ॥ बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ॥ ७ ॥ देहदेहिविभागोऽयमविवेककृतः पुरा ॥ जातिर्व्यक्तिविभागोऽयं यथा वस्तुनि कल्पितः ॥ ८ ॥ श्रीशुक उवाच ॥ एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः ॥ प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ॥ ९ ॥ राजोवाच ॥ कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसाम् ॥ अवधूतेन वेषेण गूढाविह समागतौ ॥ १० ॥ चरंति ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः ॥ मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः ॥११॥ कुमारो नारद ऋभुरंगिरा देवलोऽसितः ॥ अपांतरतमो व्यासो मार्कंडेयोऽथ गौतमः ॥ १२ ॥ वशिष्ठो भगवान्रामः कपिलो बादरायणिः ॥ दुर्वासा याज्ञवल्क्यश्च जातूकर्ण्यस्तथाऽरुणिः ॥ १३ ॥ रोमशश्च्यवनो दत्त आसुरिः सपतंजलिः ॥ ऋषिर्वेदशिरा बोध्यो मुनिः पंचशिरास्तथा ॥ १४ ॥ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः ॥ एते परे च सिद्धेशाश्चरंति ज्ञानहेतवः ॥ १५ ॥ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू ॥ अंधे तमसि मग्नस्य ज्ञानदीप उदीर्यताम् ॥ १६ ॥

मायया सृष्टत्वात्प्रतीतिर्निमित्तमात्रत्वेनैव च भूतानामयमभिमान इति भावः । नन्वीश्वरस्य सृष्ट्यादिभिः साध्यमस्ति चेत्तर्ह्यपूर्णकामता प्राप्ता नास्ति चेत्कुतः प्रवृत्तिस्तत्राहतुः अनपेक्षोऽपि बालवल्लीलया करोतीति ॥६॥ अयं च जन्मादिव्यवहारो देहानामेव न त्वात्मन इत्याहतुः । देहिनः पितुर्देहेन देहिनः पुत्रस्य देहो मातुर्देहिनो देहादभिजायते यथा बीजादेव बीजं जायते देही तु शाश्वत एव । अर्थो भूम्यादिर्यथा तद्वत् ॥ ७ ॥ ननु नश्वरदेहप्रतियोगित्वाद्देह्यपि न शाश्वतः स्यात्तत्राहतुः । देहदेहिनोरयं परस्परप्रतियोगिविभागः । पुराऽनादिरविवेककृतोऽज्ञानकल्पितः । जातिः सामान्यं व्यक्तिर्विशेषस्तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पितः । परस्परापेक्षासिद्धत्वेनानिरूप्यत्वात्तद्वत् ॥८॥ आधिना शोकेन म्लानं वक्त्रम्॥९॥१०॥उन्मत्तस्येव लिंगं येषां ते ॥११॥१२॥१३॥१४॥१५॥ मम प्रभू रक्षकौ बोधे समर्थाविति वा । अतो

नंकैः क्रीडने न किंचित्साध्यमस्ति तथापि क्रीडत्येव तथेशोपीति भावः । " लोकवत्तु लीलाकैवल्यम् " इति परमर्षिसूत्रात् ॥ ६ ॥ शाश्वतो नित्य एव " देही नित्यमवध्योऽयं देहे सर्वस्य भारत " इति श्रमुखोक्तेः । अर्थो भूम्यादिरिहादिना हिरण्यादिग्रहः । यथा पृथिव्या अनेके घटशरावादयः संति तथाऽपि सा तादृश्येव सत्या पृथक्प्रतीयते ' मृत्तिकेत्येव सत्यम् ' इति श्रुतेः ॥ ७ ॥ पुनरत्राक्षिपति—नन्विति । नश्वरदेहः प्रतियोगी निरूपको यस्य तस्य भावस्तत्त्वं तस्मात् । देहनिरूपितमेव देहित्वमिति सार्वजनीनं देहोऽस्यास्तीति देहीति निरुक्तेः परस्परयोः प्रतियोगिविभागः प्रतियोग्यनुयोगिविभाग इत्यर्थः । एकसंबंधिज्ञानस्यापरसंबंधिस्मारकत्वनियमात् सन्मात्रे पृथिव्यादौ कणादादिभिः कल्पित एव न तु सत्यः परस्परापेक्षा सिद्धत्वेन व्यक्तिसत्त्वे जातिसत्त्वं जातिसत्त्वे व्यक्तिसत्त्वमेकतराभावे द्वयोरसिद्धेः स्फुटत्वात् ॥ ८ ॥ आश्वासितः किंचित्स्वस्थतां प्रापितः ॥ ९ ॥ महीयसां पूज्यानां महिष्ठौ पूज्यतमौ ॥ १० ॥ ग्राम्यबुद्धीनां विषयाविष्टचेतसाम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ ज्ञानहेतवो ज्ञानकर्त्तारो लोकानामिति ॥ १९ ॥ ग्राम्यपशोः ग्राम्यपशवस्तु भीष्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगिरा उवाच ॥ अहं ते पुत्रकामस्य पुत्रदोऽस्म्यंगिरा नृप ॥ एष ब्रह्मसुतः साक्षान्नारदो भगवानृषिः ॥ १७ ॥ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे ॥ अतदर्हमनुस्मृत्य महापुरुषगोचरम् ॥१८॥ अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ॥ ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति ॥ १९ ॥ तदेव ते परं ज्ञानं ददामि गृहमागतः ॥ ज्ञात्वान्याऽभिनिवेशं ते पुत्रमेव ददावहम् ॥ २० ॥ अधुना पुत्रिणां तापो भवतैवाद्बुभूयते ॥ एवं दारा गृहा रायो विविधैश्वर्यसंपदः ॥ २१ ॥ शब्दादयश्च विषयाश्चलाराज्यविभूतयः ॥ मही राज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः ॥ २२ ॥ सर्वेपि शूरसेनेमे शोकमोहभयार्तिदाः ॥ गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः ॥ २३ ॥ दृश्यमाना विनार्थेन न दृश्यंते मनोभवाः ॥ कर्म भिध्यायतो नानाकर्माणि मनसोऽभवन् ॥ २४ ॥

युवाभ्यां ज्ञानदीपः प्रवर्त्यताम् ॥१६॥१७॥ महापुरुषगोचरं हरिभक्तं त्वाम् ॥ १८ ॥ १९ ॥ तदेव यदा पूर्वमार्गतोऽस्मि ॥ २० ॥ रायः अर्थाः ॥ २१ ॥ चला अनित्याः । किंच महीति ॥ २२ ॥ हे शूरसेन । इमे सर्वेऽपि शोकादिप्रदाः । किंच । आगमापायित्वेन गंधर्वनगरतुल्याः गन्धर्वनगरं ह्यकस्मादेव क्वचिदायात्यपयाति चेति प्रसिद्धम् । तदेवमनित्यत्वं चागमापायित्वं शोकादिहेतुत्वं चोक्तम् । मिथ्यात्वमप्याह । स्वप्नश्च माया च मनोरथश्च यथा तद्वत् ॥ २३ ॥ मनोभवा मनोमात्रविजृंभिताः । अत्र हेतुः । अर्थेन तात्त्विकस्वरूपेण विनैव दृश्यमानाः । तत्कुतः।यस्मात्क्षणांतरे न दृश्यंते तात्त्विकत्वे हि क्षणांतरे बाधो न स्यात् । अतो मनोमात्रविजृंभितत्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः। नन्वेते पुण्यापुण्यकृता इति मीमांसकाः प्राहुस्तत्कुतो मनोभवत्वं तत्राह । कर्मभिः कर्मवासनाभिरर्थान्ध्यायतः पुंसो मनस एव निमित्तात्कर्मा

पर्वणि वर्णिताः ''गौरजाविमनुष्याश्च अश्वाश्वतरगर्दभाः।एते ग्राम्याः समाख्याताः पशवः सप्त साधुभिः॥'' इति यतो यूयं ज्ञानेहेतवस्तस्माद्धेतोः । युवां युवाभ्याम् । उदीर्य्यतां प्रकाश्यताम्॥ १६॥नृपेति । नृपाणां हठस्वभावत्वादेव पुत्रमदामिति भावः । साक्षाद्ब्रह्मसुतः ॥ १७ ॥ अतदर्हं तमोमज्जनानर्हम् । तत्र महापुरुषो हरिर्गोचरो विषयो ध्येयत्वेन यस्य तम् ॥ १८ ॥ प्रभो इति ज्ञानाधिकारितामाह ॥ १९ ॥ ददामि अदामित्यर्थः । लुङर्थे लट् अन्याभिनिवेशं ज्ञानापेक्षयाऽन्यः पुत्रस्तदभिनिवेशं पुत्राविष्टचेतस्त्वम् ॥२०॥ एवं पुत्रवत्॥२१॥ राज्यविभूतीराह–राज्यमित्यादि ॥२२॥ न केवलमेते एव चला अपि तु सर्वे एवेत्याह–सर्वेपीति । शूरसेनेति । केवलं सेनयैव शूरो न तु विचारेणेति भावः । सेनया शूरः शूरसेनः। राजदन्तादिवत्समासः।क्वचित्स्वाम्येनापि स्वामित्वं लक्षिते, इति न्यायेन । हे शूरसेनेशेति।शूराणां सर्वं जेतुं समर्थानामिंद्रियाणां याः सेना वृत्तयस्ता अपि नियंतुं समर्थत्वात्त्वमीशोऽसीति भावः । अनित्यत्वादेषामित्याह–किंचेति । क्वचिदाकाशे ॥२३॥ अत्र मनोमात्रविजृंभितत्वे । तत्तात्त्विकस्वरूपेण विना दर्शनं कुतोऽवगतमिति चेत्तत्राह–यस्मादिति । इत्यर्थ इति । स्वाप्निकादि पदार्था यथा मनोमात्रविनिर्मितास्तथैतेपीति भावः । अत्राक्षिपति–नन्विति । एते दारादयो रोगाद्यश्च ''यन्मनसा मनुते तत्कुरुते'' इति श्रुतेः । पाठांतरे 'कर्माभिध्यायत' इति पाठे । इत्यर्थ इति । कर्त्तुरीप्सिततमस्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः ॥ देहिनो विविधक्लेशसंतापकृदुदाहृतः ॥ २५ ॥ तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः ॥ द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश ॥ २६ ॥ नारद उवाच ॥ एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम ॥ यां धारयन्सप्तरात्राद्द्रष्टा संकर्षणं प्रभुम् ॥ ॥ २७ ॥ यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य ॥ सद्यस्तदीयमतुलानधिकं महित्वं प्रापुर्भवानपि परं न चिरादुपैति ॥ २८ ॥ इति श्रीभा० म० ष० पुत्रशोकातुरचित्रकेतोरंगिरोज्ञानदानवर्णनं नाम पंचदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ अथ देवऋषी राजन्संपरेतं नृपात्मजम् ॥ दर्शयित्वेति होवाच ज्ञातीनामनुशोचताम् ॥ १ ॥ नारद उवाच ॥ जीवात्मन्पश्य भद्रं ते मातरं पितरं च ते ॥ सुहृदो बांधवांस्तप्तान्शुचा त्वत्कृतया भृशम् ॥ २ ॥ कलेवरं स्वमाविश्य शेषमायुः सुहृद्वृतः ॥ भुंक्ष्व भोगान्पितृप्रत्तानाधितिष्ठ नृपासनम् ॥ ३ ॥

ण्यभवन् । पाठांतरे कर्म ईप्सिततममभिध्यायत इत्यर्थः । कर्मणोऽपि मनोभवत्वात्तत्साध्या अर्था अपि मनोभवा एवेति भावः ॥ २४ ॥ तदेवं ममतास्पदानां दुःखादिहेतुत्वमुक्तं तत्र देहसंबंधो मूलमित्याह । अयं हीति । हीत्यवधारणे । अयं द्रव्यज्ञानक्रियात्मकोऽधिभूताधिदैवाध्यात्मरूपो देह एव देहिनो देहोऽहमिति मन्यमानस्य देहिनो जीवस्य विविधान्क्लेशान् सन्तापांश्च करोतीति तथा ॥ २५ ॥ स्वस्थेनाव्यग्रेण । गतिं तत्त्वम् । ध्रुवोऽयमर्थ इति विश्रंभं विश्वासं प्रणयं वा त्यज ततश्चोपशममाविशाश्रय ॥ २६ ॥ अंगिरसोपदिष्टं तत्त्वं परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारद उपदिशति । एतामिति । उपनिषण्णं परं श्रेयोऽस्यामित्युपनिषन्मंत्र एवोपनिषत्तां प्रतीच्छ गृहाण । द्रष्टा द्रक्ष्यति भवान् ॥ २७ ॥ अतुलं च तदनधिकं च समानाधिकशून्यं परं महिमानं प्रापुः । उपैत्युपैष्यति ॥ २८ ॥ इति श्रीमद्भा०षष्ठे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ छ ॥ षोडशे तत्सुतोक्त्यैव विशोकीकृत्य तं नृपम् ॥ आदिदेश महाविद्यां नारदः शेषतोषणीम् ॥ १ ॥ आदौ तावत् तत्पुत्रमुखेनैव पितृपुत्रादिसंबंधो मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मन्नित्याद्युवाच ॥ १ ॥ २ ॥ शेषमवशिष्टमायुरस्ति । अपमृत्युना

कर्मत्वादिति भावः । इति भाव इति । पृथिव्या विनाशित्वे तत्साध्या घटादयः सुतरां विनाशिन इति तात्पर्य्यम् ॥ २४ ॥ तत्र दुःखादिहेतुत्वे ममतास्पदत्वे च ॥ २५ ॥ यतो देहादिप्रपंचः क्लेशहेतुस्तस्माद्द्वैतेः । द्वैते देहादौ नैतावता पूर्यते किन्तूपशममुपरामम् । ततो द्वैतध्रुवत्वत्यागोत्तरमाश्रय ॥ २६ ॥ एतां पूर्वैरुक्ताम् अग्रे वक्ष्यमाणामित्यर्थः । सप्तरात्रात्सप्तरात्रमतिक्रम्य दिनकतिपयानंतरमित्यर्थः ॥ २७ ॥ तथोपदेशे वैशिष्ट्यमाह—यत्पादेति । नरेन्द्रेति । शर्वादयोऽतिसमर्थास्तदापुः कथमहं दीन इति मा भैस्त्वमपि नराणां शर्वादीनामिवेंद्रः समर्थोऽसि "चतुर्वर्गेषु तन्नास्ति मनुष्यो यन्न साधयेत् । गुरूक्तमार्ग उद्युक्तः" इत्यादि संहितोक्तेरिति भावः ॥ २८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ तस्य चित्रकेतोः सुतस्योक्त्या वाक्येन (१) योंगिरःप्रसादाज्जातस्तमेव । अथांगिरोबोधनानंतरम् । देवऋषिरिह ह्रस्वविधानसामर्थ्यात्संध्यभावः । राजन्निति । संपरेतोपीशप्रसादाज्जीवेदेव यथा त्वमीशेनाजीवितः । पुनरित्युक्तेरिति भावः । श्रीनारदोऽपि भगवदवतारत्वादीश एवेति ॥ १ ॥ ईशस्य सर्वव्यापित्वेन मृतशरीरेपि स्थितिरस्त्येव ज्ञानं विना तत्साक्षात्काराभावादत आह—हे जीवात्मन्निति ॥ २ ॥ अपमृत्युना हि सत्त्वेप्यायुःशेषे मृतो भवति तच्च जन्मांतरे भुज्यते यथा तैलवर्त्तियुते प्रबलवायुनिर्वापिते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीव उवाच ॥ कस्मिञ्जन्मन्यमी मह्यं पितरो मातरोऽभवन् ॥ कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ॥ ४ ॥ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्वे एव हि सर्वेषां भवंति क्रमशो मिथः ॥ ५ ॥ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः ॥ पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु ॥ ६ ॥ नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते नृषु ॥ यावद्यस्य हि संबंधो ममत्वं तावदेव हि ॥ ७॥ एवं योनिगतो जीवः स नित्यो निरहंकृतः ॥ यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ॥ ८ ॥ एष नित्योऽव्ययः सूक्ष्म एष सर्वाश्रयः स्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ॥ ९ ॥

मृतत्वादित्यर्थः ॥ ३ ॥ तदेव कलेवरं प्रविश्योत्थितो जीव उवाच । यद्वा । अंतराले प्रेतशरीरे स्थित्वेति ज्ञेयम् ॥ ४ ॥ मयि मृते पुत्रदृष्ट्या शोकश्चेच्छत्रुदृष्ट्या हर्षः किं न क्रियत इत्याशयेन संबधस्यानियतत्वमाह । बंधवो विवाहादिभिः संबंधिनः । ज्ञातयः सपिंडाः । अरयो घातकाः । मित्राणि रक्षकाः । मध्यस्था उभयव्यतिरिक्ताः साधारणाः । विद्विषो द्रव्यादिनिमित्तेन द्वेषिणः । उदासीनास्तद्व्यतिरिक्ता इति भेदः ॥ ५ ॥ कर्मभिर्भ्राम्यमाणत्वे दृष्टांतः । यथा पण्यानि क्रयविक्रयार्हाणि कर्तृषु व्यवहर्तृषु परिभ्रमंति एवं जीवोऽपि योनिषु जनकेषु ॥ ६ ॥ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वं सदृष्टांतमाह द्वाभ्याम् । नित्यस्य जीवतोऽपि अर्थस्य पश्वादेः अनित्यः अनियतः । विक्रयादिना संबंधनिवृत्तेः दृष्टत्वात् ॥ ७ ॥ एवं योनिगतः पित्रादिसंबंधं प्राप्तोऽपि स जीवो नित्यः । देहजन्मादिना तस्य जन्माद्यभावात् । अत एव वस्तुतो निरहंकृतोऽहमस्य पुत्र इत्यभिमानशून्यः । यत्र पित्रादौ संबंधिनि यावदुपलभ्येत कर्मवशेन वर्तेत तावदेव तस्य पित्रादेस्तत्तस्मिन् स्वत्वं न तु विक्रयादुत्तरकालमपि । अथ वैवं संबंधः । यदुक्तं 'कलेवरं स्वमाविश्य' इति तत्र यस्मिन् कलेवरे ममेदानीं स्वत्वं निवृत्तमिति सदृष्टांतमाह । नित्यस्य चिरकालावस्थायिनः सुवर्णादेः । योनिगतो देहं प्रविष्टः यत्र देहे तस्य जीवस्य तत्तस्मिन् देहे स्वत्वम् । न तु मरणोत्तरकालमपीत्यर्थः । शेषं समानम् ॥ ८ ॥ जीवस्य नित्यत्वं साधयति । एष

दीपेऽवशिष्टतैलादि पुनरन्येद्युः प्रवर्तितदीपेन भुज्यते तद्वदिति ज्ञेयम् । अकालमृत्योरस्वीकारे 'अकालमृत्युहणम्' इति मंत्रस्यानाप्तता स्यादिति । ''नाकालमृत्युस्तत्रास्ति यत्र राजा युधिष्ठिरः'' इति महाभारते विराट्पर्वणि भीष्मोक्तिश्च व्याकुप्येतेति भावेनैव स्वामिचरणैर्व्याख्यातं शेषमवशिष्टमायुरस्त्यपमृत्युना मृतत्वादिति । पित्रा प्रत्तान्दत्तान् स्वरांतोपसर्गाद्ददातेस्तकारादेशे रूपम् ॥ ३ ॥ ४ ॥ तस्मिंस्तदरी वा मिलिता वा मध्यस्थाः उदासीनास्तयोरपि न मिलंत इति ॥ ५ ॥ जनेषु पित्रादिषु । यथा स्वपार्श्वताश्चिरं स्थित्वा गतं दीनारादि पुनः कालांतरेणायाति तत्र यथा न ज्ञायते तदेवेदं दीनारादीति ॥ ६ ॥ ननु तर्हि हाटकादिवदनित्यत्वमापतितं जीवस्येत्याशंक्य संबंधस्यैवानित्यत्वं न तु जीवात्मन इत्याह—नित्यस्येति । यथा संबंधस्यानित्यत्वं तथा मम पुत्रोऽयमित्यादि ममत्वमप्यनित्यमित्याह—यावदस्येति । हिशब्दाभ्यां प्रत्यक्षसिद्धत्वं दर्शयति । एवकारेणायोगव्यवच्छेदं करोति ॥ ७ ॥ अत एव जीवस्य जन्माद्यभावादेव । स्वत्वं स्वकीयत्वं प्रकारांतरेण योजयति—अथेति । इत्यर्थ इति । स्वत्वस्य संबंधहेतुकत्वादिति भावः ॥ ८ ॥ एष प्रत्यक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यस्यातिप्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः ॥ १० ॥ नादत्त आत्मा हि गुणं न दोषं न क्रियाफलम् ॥ उदासीनवदासीनः परावरदृगीश्वरः ॥ ११ ॥ श्रीशुक उवाच ॥ इत्युदीर्य गतो जीवो ज्ञातयस्तस्य ते तदा ॥ विस्मिता मुमुचुः शोकं छित्त्वात्मस्नेहश्रृंखलाम् ॥ १२ ॥ निर्हृत्य ज्ञातयो ज्ञातेर्देहं कृत्वोचिताः क्रियाः ॥ तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदम् ॥ १३ ॥ बालघ्न्यो व्रीडितास्तत्र बालहत्याहतप्रभाः ॥ बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितम् ॥ यमुनायां महाराज स्मरंत्यो द्विजभाषितम् ॥ १४ ॥ स इत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः ॥ गृहांधकूपान्निष्क्रांतः सरःपंकादिव द्विपः ॥ १५ ॥

नित्यः । तत्र हेतुः अव्ययोऽपक्षयशून्यः । तत्कुतः । सूक्ष्मः जन्मादिशून्यः । तच्च कुतः सर्वाश्रयः जन्मादिमतो देहादेराश्रयः न तु देहादिरूपः । स्वदृक् यतः स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्मनो मायाया गुणैरात्मानमेव विश्वं विश्वात्मकं सृजति "तदात्मान ँ स्वयमकुरुत" इति श्रुतेः।उपादानकारणत्वात्सर्वाश्रय इत्यर्थः । जीवस्य वस्तुतो ब्रह्मत्वाद्ब्रह्मण एव चिच्छक्तिविशिष्टस्येश्वरत्वेन स्रष्टृत्वाज्जीवः सृजतीति वाचोयुक्तिः । यद्वा स्वकर्मद्वारा सृष्टिनिमित्तत्वेन स्रष्टृत्वं भोग्यस्य च सर्वस्य भोक्त्राश्रयत्वात्सर्वाश्रयत्वं चोक्तमिति द्रष्टव्यम् ॥ ९ ॥ यदुक्तं 'सुहृद्वृतः' इति 'सुहृदो बांधवांस्तप्तान्' इति च तत्राप्याह । न ह्यस्येति । तत्र हेतुः । एकः सुहृदादिसंगरहितः । तत्कुतः गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वा धियो विचित्रा बुद्धयस्तासां द्रष्टा साक्षी ॥ १० ॥ यच्चोक्तं 'भुंक्ष्व भोगान्' इत्यादि तत्राप्याह नादत्त इति गुणं सुखं दोषं दुःखं क्रियाफलं च राज्यादिकम् । उदासीनत्वे हेतुः । परावरदृक् कारणस्य कार्यस्य च साक्षी न तु भोक्ता यतः ईश्वरः देहादिपारतंत्र्यशून्यः । अत एवंभूतस्य मम च युष्माकं च संबंधाभावाच्छोकं मा कुरुतेति वाक्यार्थः ॥ ११ ॥ १२ ॥ १३ ॥ द्विजभाषितमंगिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्मरंत्यः । पुत्रकामनाशून्या निर्मत्सराः सत्य इति भावः ॥ १४ ॥ निबिडपंकतुल्यं गृहं विहाय निष्क्रमणमतिधीरस्य तस्यैव योग्यं नान्यस्येति सदृष्टांतमाह । स इत्थमिति । सरसः पंकात् द्विपो गज इव ॥ १५ ॥

श्रुतियुक्तिसिद्धः । पुनरुक्तिर्निर्द्धारणार्था । तत्र नित्यत्वे तदपक्षयशून्यत्वम् । कुतो यतः सूक्ष्मः । तच्च जन्मादि शून्यत्वं च । आत्मानं स्वयं तज्जगद्रूपमकुरुतेति श्रुतिपदार्थः । इत्यर्थ इति । "यतो वा इमानि भूतानि जायंते" इत्यादिश्रुतेरुपादानत्वं ब्रह्मण एव 'तत्त्वमसि' इत्यादिश्रुतेर्वस्तुतो जीवस्यापि ब्रह्मत्वात् । वाचोयुक्तिरिति कथनप्रकारः । ननु ब्रह्मणो "निरीहं निष्कलं शांतम्" इत्यादिश्रुतेर्निरीहत्वात्स्रष्टृत्वादिकं न संगच्छते इति चेत्तत्राह—यद्वेति ॥ ९ ॥ अस्यात्मनः । तत्रातिप्रियत्वाद्यभावे "एको देवः सर्वभूतेषु गूढः । एक एव हि भूतात्मा भूतेभूते व्यवस्थितः" इत्यादिश्रुतेर्द्वितीयाभावादेव सुहृदादयो न संपनीपद्यंत इत्यर्थः । तत् सुहृदादिसंगशून्यत्वं न हि साक्षी साक्ष्यो भवतीति भावः ॥ १० ॥ एवंभूतस्य नित्यादिरूपस्य ॥ ११ ॥ ज्ञातयस्तस्मिन् जन्मनि सपिंडाः । आत्मनां स्वेषाम् । तस्मिन्पुत्रे स्नेहरूपां श्रृंखलाम् । विस्मिता अहो. अनेन सत्यमुक्तमित्येवं विस्मयं प्राप्ताः ॥ १२ ॥ ज्ञातयो ज्ञातेः सपिंडस्य तस्य बालस्य । निर्हृत्य दग्ध्वा । उचिताः क्रियाः श्राद्धादिलक्षणाः ॥ १३ ॥ तत्र तदा । इति भाव इति । अहो अस्माभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः ॥ मौनेन संयतप्राणो ब्रह्मपुत्राववंदत ॥ १६ ॥ अथ तस्मै प्रपन्नाय भक्ताय प्रयतात्मने ॥ भगवान्नारदः प्रीतो विद्यामेतामुवाच ह ॥ १७ ॥ नारद उवाच ॥ ॐ नमस्तुभ्यं भगवते वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ १८ ॥ नमो विज्ञानमात्राय परमानंदमूर्तये ॥ आत्मारामाय शांताय निवृत्तद्वैतदृष्टये ॥ १९ ॥ आत्मानंदानुभूत्यैव न्यस्तशक्त्यूर्मये नमः ॥ हृषीकेशाय महते नमस्ते विश्वमूर्तये ॥ २० ॥ वचस्युपरतेऽप्राप्य य एको मनसा सह ॥ अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः ॥ २१ ॥ यस्मिन्निदं यतश्चेदं तिष्ठत्यप्येति जायते ॥ मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः ॥ २२ ॥ यन्न स्पृशंति न विदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्च विततं व्योमवत्तं नतोऽस्म्यहम् ॥ २३ ॥ देहेंद्रियप्राणमनोधियोऽमी यदंशविद्धाः प्रचरंति कर्मसु ॥ नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्टपदेशमेति ॥ २४ ॥

कृताः पुण्यजलक्रियाः पितृतर्पणाद्या येन । संयतप्राणो नियतेंद्रियः ॥ १६ ॥ १७ ॥ नमो धीमहि ध्यायेम मनसा नमस्याम इत्यर्थः ॥ १८ ॥ निवृत्ता द्वैतदृष्टिर्यस्मात् ॥ १९ ॥ न्यस्ता निरस्ताः शक्त्यूर्मयो मायानिमित्ता रागद्वेषादयो येन ॥ २० ॥ मनसा सह वचस्यप्राप्योपरते सति य एक एव प्रकाशते । वचसीति सर्वेंद्रियोपलक्षणम् । सोऽस्मानव्यात्सदसत्परः कार्यकारणयोः कारणम् ॥ २१ ॥ तदेवाह । यस्मिन्निति । यस्मिन्निदं कार्यकारणं तिष्ठति अप्येति प्रलीयते च यतश्च जायते मृन्मयेषु घटादिषु मृज्जातिर्मृन्मात्रमिव सर्वानुस्यूतं यत्तस्मै ॥ २२ ॥ ननु सर्वानुस्यूतं चेन्मृज्जातिवत्प्रतीयेत कथं मनोवचसोरप्राप्तिस्तत्राह । यद्ब्रह्म व्योमवद्विततमपि असवः प्राणाः क्रियाशक्त्या न स्पृशंति मनआदीनि च ज्ञानशक्त्या न विदुः तद्ब्रह्म नतोऽस्मि ॥ २३ ॥ तेषां तदज्ञाने हेतुमाह देहेंद्रियादयोऽमी विकाराः यदंशविद्धा यच्चैतन्यांशेनाविष्टाः संतः कर्मसु स्वस्वविषयेषु प्रचरंति जाग्रत्स्वप्नयोरन्यदा सुषुप्तिमूर्च्छादौ नैव प्रचरंति यथा अप्रतप्तं लोहं न दहति । अतो यथा लोहमग्निशक्त्यैव

महत्पापं कृतं मात्सर्येण मात्सर्यमपि निरयहेतुरतः पुनर्नैतादृशं कर्म कार्यमित्थं विचार्य प्रायश्चित्तं चक्रुरित्याशयः ॥ १४ ॥ १५ ॥ ब्रह्मपुत्रौ नारदांगिरसौ ॥ १६ ॥ एतां वक्ष्यमाणाम् ॥ १७ ॥ इत्यर्थ इति । मनसा नतिरेव ध्यानमिति भावः । संकर्षणस्यांते पाठस्तूपास्यत्वेन तत्रैव विश्रांतेः ॥ १८ ॥ विज्ञानमेव विज्ञानमात्रं तस्मै विज्ञानरूपाय यस्मिन्दृष्टे नान्यत्र दृष्टिः संभवतीति भावः । द्वैते दृष्टिर्येषां ते द्वैतदृष्टयो निवृत्ता द्वैतदृष्टयो यस्मात्तस्मै । अद्वैतनिष्ठैः प्राप्यायेति वा । यद्वा—निवृत्तद्वैतानां दृष्टिर्यस्मिंस्तस्मै निवृत्तद्वैतेषु दृष्टिर्यस्य तस्मै वा "यदा पुमांस्त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे" इत्येकादशे श्रीमुखोक्तेः । निवृत्तद्वैता दृष्टिर्यस्य तस्मादिति वा 'समोहं सर्वभूतेषु' इति श्रीगीतोक्तेः ॥ १९ ॥ यद्वा—न्यस्ता शक्तिर्माया ऊर्मयोऽशनादयो वा "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति" इति श्रुतेः ॥ २० ॥ "यतो वाचो निवर्तंते अप्राप्य मनसा सह" इति श्रुतिमर्थतः पठति वचसीति ॥ २१ ॥ तदेव सर्वकारणत्वनेव । तीर्थस्तु—"जातिः सामान्यजन्मनोः" इत्यभिधानात् मृदो जातिर्जन्म यस्य वृक्षादेस्स तथा यथा वृक्षादिराशिर्मृण्मयेषु मृद्विकारेषु पृथिवीपर्वतादिषु तिष्ठत्यप्येति तेभ्यो जायते तथेत्याह ॥ २२ ॥ अत्राक्षिपति—नन्विति ॥ २३ ॥ तेषां मन आदीनाम् । तदज्ञाने ब्रह्माज्ञाने । आविष्टा लब्धसामर्थ्याः । दृष्टांतमाह—यथेति । इति स्व—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सकलसात्वतपरिवृढनिकरकरकमलकुड्मलोपलालितचरणारविंदयुगल परम परमेष्ठिन्नमस्ते ॥ २५ ॥ श्रीशुक उवाच ॥ भक्तायैतां प्रपन्नाय विद्यामादिश्य नारदः ॥ ययावंगिरसा साकं धाम स्वायंभुवं प्रभो ॥ २६ ॥ चित्रकेतुस्तु विद्यां तां यथा नारदभाषिताम् ॥ धारयामास सप्ताहमब्भक्षः सुसमाहितः ॥ २७ ॥ ततश्च सप्तरात्रांते विद्यया धार्यमाणया ॥ विद्याधराधिपत्यं स लेभेऽप्रतिहतं नृप ॥ २८ ॥ ततः कतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगाम देवदेवस्य शेषस्य चरणांतिकम् ॥ २९ ॥ मृणालगौरं शितिवाससं स्फुरत्किरीटकेयूरकटित्रकंकणम् ॥ प्रसन्नवक्त्रारुणलोचनं तं ददर्श सिद्धेश्वरमण्डलैः प्रभुम् ॥ ३० ॥

दाहकं सदग्निं विना न दहति एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां प्रवर्तमाना देहादयस्तन्न स्पृशंति न विदुश्चेति भावः । जीवस्तर्हि द्रष्टृत्वात् जानातु नेत्याह । स्थानेषु जाग्रदादिषु द्रष्टपदेशं द्रष्टृसंज्ञां तदेवैति प्राप्नोति । नान्यो जीवो नामास्ति । "नान्योऽतोऽस्ति द्रष्टा" इत्यादिश्रुतेः । यद्वा द्रष्टृपदेशं द्रष्टृसंज्ञं जीवमपि तदेवैति जानाति । न तु जीवस्तज्ज्ञानातीत्यर्थः । तदुक्तं हंसगुह्यस्तोत्रे । "देहोऽसवोऽक्षा" इत्यादि ॥ २४ ॥ सकला ये सात्वतपरिवृढास्तेषां निकरः समूहस्तस्य करकमलानां कुड्मलैर्मुकुलैरुपलालितं चरणारविंदयुगलं यस्य तस्य संबोधनम् । परम उत्कृष्ट परमेष्ठिन् सर्वेश्वर ॥ २५ ॥ पूर्वं सनारदोंगिरा आजगामेत्यंगिराः प्राधान्येनोक्तः । चित्रकेतोः पुत्रप्रदत्वेन तस्य पृथगुक्तत्वात् । इह तु नारदोंगिरसा साकं ययाविति नारदस्य प्राधान्यनिर्देशः । तदुपदेशेन तस्य वैराग्योत्पत्तेः प्रभो हे समर्थ ॥ २६ ॥ यथा यथावद्धारयामास ॥ २७ ॥ विद्याधराधिपत्यं चावांतरफलं लेभे अप्रतिहतमस्खलितम् ॥ २८ ॥ कतिपयैरहोभिः विद्ययेद्धेन दीप्तेन मनसा गतिर्यस्य ॥ २९ ॥ मृणालवद्गौरं शिति

इति भाव इति । स्वस्थज्ञानेन परो ज्ञायते न परस्थज्ञानेन परो ज्ञायते यथा ब्रह्मगतमेव ज्ञानं स्वावेशादिंद्रियादीन्प्रकाशयति न तु जडा इंद्रियादयस्तत्प्रकाशका इत्याशयः । अत्राशंकते—जीवस्तर्हीति । तदेव ब्रह्मैव । अत्र जीवस्य ब्रह्मभिन्नस्यासत्त्वे प्रमाणमाह—नान्य इति । अतो ब्रह्मणोऽन्यो भिन्नो जीवो द्रष्टा नास्तीति श्रुत्यर्थः । जीवस्य जडपक्षपातित्वात्तज्ज्ञानं न संभवतीत्याह—यद्वेति । इत्यर्थ इति । जीवस्याविद्याकार्यबुद्धिप्रतिबिंबत्वेन जडत्वतज्ज्ञानासंभव इति भावः । अत्र प्रमाणमाह—तदुक्तमिति ॥ २४ ॥ सात्वतपरिवृढा भक्ताधिपाः सनकादयः । मुकुलैरिति । सर्वावयवोपेतैर्दृढहस्तैरित्यर्थः । एतेन जीवन्मुक्तोपास्यत्वं ध्वनितम् । तत्र हेतुगर्भितमामंत्रणमाह—परमेति । परमत्वं ब्रह्मादेरप्यस्तीति चेत्तत्राह—परमेष्ठिन्निति । परमे सर्वोत्कृष्टे वैकुंठे तिष्ठति । यद्वा—परमे स्वस्वरूपे तिष्ठतीति परमेष्ठी तत्संबुद्धौ । "स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनम् । स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् ॥" इत्युक्तेः सर्वेश्वरत्वं श्रीविष्णोरेव । अन्येषां तु 'ब्रह्मणोऽपि भयं मत्तः' इत्याद्युक्तन्यायेन निर्भयत्वाभावान्न परमेष्ठित्वं ब्रह्मणि परमेष्ठिपदप्रयोगो हि सृज्यप्रपञ्चान्तर्गतसर्वोत्कृष्टसत्यलोकवासित्वादेव भाक्त एवेति ध्येयम् ॥ २५ ॥ अहो चित्रकेतोः सामर्थ्यं येन नारदोक्ता विद्या गृहीतेति विमृशंतं नृपमाह—प्रभो इति । त्वमपि मदुक्तग्रहणे समर्थोसि त्यक्तसर्वपरिग्रहत्वादिति भावः । एतां नमस्तुभ्यमित्यारभ्य परमेष्ठिन्नमस्त इत्यंताम् ॥ २६ ॥ सप्ताहं यथा स्यात्तथा ॥ २७ ॥ ततो विद्याग्रहणोत्तरम् । स चित्रकेतुः । धार्यमाणया दृढविश्वासेन जप्तया । हे नृपेति । त्वमपि तादृश एव नृप इति भावः ॥ २८ ॥ ततो विद्याधराधिपत्यलाभोत्तरम् ॥ २९ ॥ "शितिः स्यात्तीक्ष्णनीलयोः" इति धरणिः ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दर्शनध्वस्तसमस्तकिल्बिषः स्वच्छामलांतःकरणोऽभ्ययान्मुनिः ॥ प्रवृद्धभक्त्या प्रणयाश्रुलोचनः प्रहृष्टरोमाऽनमदादिपूरुषम् ॥ ३१ ॥
स उत्तमश्लोकपदाब्जविष्टरं प्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमोपरुद्धाखिलवर्णनिर्गमो नैवाशकत्तं प्रसमीडितुं चिरम् ॥ ३२ ॥ ततः समाधाय
मनो मनीषया बभाष एतत्प्रतिलब्धवागसौ ॥ नियम्य सर्वेंद्रियबाह्यवर्तनं जगद्गुरुं सात्वतशास्त्रविग्रहम् ॥ ३३ ॥ चित्रकेतुरुवाच ॥ अजित जितः
सममतिभिः साधुभिर्भवाञ्जितात्मभिर्भवता ॥ विजितास्तेपि च भजतामकामात्मनां य आत्मदोऽतिकरुणः ॥ ३४ ॥ तव विभवः खलु भगव
ञ्जगदुदयस्थितिलयादीनि ॥ विश्वसृजस्तेंशांशास्तत्र मृषा स्पर्धंते पृथगभिमत्या ॥ ३५ ॥ परमाणुपरममहतोस्त्वमाद्यंतांतरवर्ती त्रयविधुरः ॥
आदावंतेऽपि च सत्त्वानां यद्ध्रुवं तदेवांतरालेऽपि ॥ ३६ ॥

वाससं नीलांबरम् । स्फुरंति किरीटादीनि यस्य । कटित्रं कटिसूत्रम् । प्रसन्नानि वक्त्राणि यस्य अरुणानि लोचनानि यस्य तं च तं च ॥ ३० ॥ दृष्ट्वा च तमादिपूरुषम
भ्ययाच्छरणं गतः । अनमन्ननाम । कथंभूतः । तस्य दर्शनेन ध्वस्तं समस्तं किल्बिषं यस्य स्वच्छममलं चांतःकरणं यस्य प्रणयेनाश्रुयुक्ते लोचने यस्य प्रहृष्टानि रोमाणि
यस्य सः ॥ ३१ ॥ तं प्रसमीडितुं स्तोतुं चिरं नैवाशकन्न शशाक । तत्र हेतुः । उत्तमश्लोकस्य पादाब्जयोर्विष्टरमासनमुपमेहयन् अभिषिंचन् प्रेम्णा उपरुद्धः अखिला
नां वर्णानां निर्गम उच्चारणं यस्य सः ॥ ३२ ॥ मनीषया बुद्ध्या मनः समाधायैतद्वक्ष्यमाणं बभाषे । प्रतिलब्धा वाग्येन सात्वतशास्त्रोक्तो विग्रहो यस्य तम् ॥ ३३ ॥
अन्योऽन्यप्रेमजानंदबिभृतान्स्वामिसेवकान् ॥ अभिनंदन्मुदा स्तौति दशभिः पंचभिर्विभुम् ॥ १ ॥ हे अजित अन्यैरजितोऽपि भवान्साधुभिर्भक्तैर्जितः स्वाधीन एव
कृतः । यतो भवानतिकरुणः । तेऽपि च निष्कामा अपि भवता विजिताः । यो भवानकामात्मनामात्मानमेव ददाति ॥ ३४ ॥ ननु भक्तैरेव जित इति कथं स्पर्धमानै
रपि सृष्ट्यादिकर्तृभिरन्यैरीश्वरैर्जेयसंभवात्तत्राह । तवेति । जगत उदयादीनि तवैव विभवो विभवनं महिमा लीलेति यावत् । आदिशब्देन प्रवेशनियमनादीनि । विश्व
सृजस्तु ब्रह्मादयो नेश्वराः किं तु ते तवांशो यः पुरुषस्तस्यांशाः । तत्र एवं स्थितेऽपि पृथक्पृथगीश्वरा वयमित्यभिमानेन वृथैव स्पर्धंते ॥ ३५ ॥ त्वमेव सृष्ट्यादिकर्ते

मुनिर्गृहीतमौनः॥३१॥तत्र स्तवनासामर्थ्ये॥३२॥ततः प्रेमवैवश्यनिवृत्त्युत्तरम्।असौ चित्रकेतुः।सात्वतशास्त्रे पंचरात्रे उक्तो विग्रहः स्वरूपं यस्य तम् । मध्यपदलोपी समासः । सात्वतशास्त्रं श्रीमद्भागवतमेव विग्रहो देहो यस्य
तम्।"लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम्" इत्युक्तेः । "तेनेयं वाङ्मयी मूर्त्तिः कृष्णस्य परमात्मनः" इति पाद्माच्च।शेषस्य साक्षान्नारायणत्वमेव तदवतारेषु"रामकृष्णाविति भुवो भगवानहरद्भरम्"इति प्रथमस्कंधे
एकस्यैव द्विरूपतोक्तिर्नासत्यवन्न विरुद्धेति वा ध्येयम्॥३३॥विभूता निश्चलात्(१)सकामानां कामनामात्रं प्रायो ददाति निष्कामानां त्वात्मानमेव ददातीत्यर्थः॥३४॥अत्राक्षिपति—नन्विति।भगवन्निति। त्वमेव भगवान्नान्य इति
भावः।"सेशं पुनात्यन्यतमो मुकुन्दात्को नाम लोके भगवत्पदार्थः" इत्युक्तेः । तत्र भगवत्त्वे एवं स्थितेपि ॥३५॥ अंतिमं कार्यं सर्वं विश्वम्। अत एवादिमध्यांतवर्त्तित्वादेव।"अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।पश्चादहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरांडकोशः ॥ यत्र पतत्यणुकल्पः सहांड कोटिकोटिभिस्तदनंतः ॥ ३७ ॥ विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् ॥ तेषामाशिष ईश तदनु विनश्यंति यथा राजकुलम् ॥ ३८ ॥ कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजानि ॥ ज्ञानात्मन्यगुणमये गुणगणतोऽस्य द्वंद्वजालानि ॥ ३९ ॥ जितमजित तदा भवता यदाह भागवतं धर्ममनवद्यम् ॥ निष्किंचना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ॥ ४० ॥

त्येतदुपपादयति । परमाणुः सूक्ष्ममूलकारणं परममहदंतिमं कार्यं तयोस्त्वमेवाद्यंतांतरवर्ती । आदावंते चांतरे मध्ये च वर्तितुं शीलं यस्य सः । अत एव त्रयविधुर आद्यंतमध्यशून्यो ध्रुवः । ते च त्वया सृज्यंते न तु ध्रुवाः । कुत इत्यत आह । सत्त्वानां सत्त्वेन प्रतीतानां कार्याणामादावंतेऽपि यद्ध्रुवमनपाय्यंतरालेऽपि च तदेव ध्रुवं सुवर्णादिवत् ॥ ३६ ॥ एवं ध्रुवत्वेन कालतः परिच्छेदो नास्तीत्युक्तम् । देशतोऽप्यपरिच्छेदमाह । क्षित्यादिभिरिति । पूर्वस्मात्पूर्वस्माद्दशगुणमुत्तरोत्तरैरधिकैरावृतो यत्र त्वय्यणुकल्पोऽणुतुल्यः पतति परिभ्रमति तत्तस्मादनंतस्त्वम् ॥ ३७ ॥ यस्मादेवं परमेश्वरस्त्वमेवान्ये देवास्तव विभूतयोऽतस्त्वां विहाय विषयकामनयाऽन्योपासका अतिमंदा इत्याह । विषयेषु तृट् तृष्णा येषां ते नराकाराः पशवः । कुतः । ये विभूतीरिंद्राद्या उपासते न तु परं त्वाम् । ततः किं तत्राह । तेषामिति । तदनु उपास्यनाशानंतरम् । यथा राजकुलमनु राजकुलनाशानंतरम् । तत्सेवकानामाशिषो नश्यंति तद्वत् । अयं च परमोऽवधिर्मध्येऽपि नश्यंत्येव ॥ ३८ ॥ विषयकामेनापि कृता त्वत्सेवा मोक्षफलैवेत्याह । कामधियो विषयकामना अपि हे परम त्वयि रचिताः कृताश्चेन्न रोहंति देहांतरोत्पत्तये न भवंति करंभबीजानि भर्जितबीजानि यथा यतोऽस्य जीवस्य गुणगणादेव द्वंद्वसमूहा भवंति अतः कामेनापि निर्गुणस्य तव भजनाच्छनैर्नैर्गुण्यं भवतीत्यर्थः ॥ ३९ ॥ फलकामनयापि त्वदाराधनं यदा मोक्षहेतुस्तदा किं वक्तव्यं भगवद्धर्ममाहात्म्यमिति वक्तुं तत्संप्रदायप्रवर्तकत्वेन च भगवंतं स्तौति । जितमिति । यदा भवान्भागवतं धर्ममाह तदा हे भगवंस्त्वया

यदेतच्च योऽवशिष्येत सोस्म्यहम्'' इति ब्रह्माणं प्रति चतुःश्लोक्युपदेशावसरे श्रीमुखोक्तेर्ध्रुवत्वमिति ॥ ३६ ॥ ३७ ॥ अतः परमेश्वरत्वात् । पशुत्वे हेतुमाशंकते—कुत इति । ततो विभूत्युपासनातः । किं कोनर्थः । तेषामिंद्राद्युपासकानाम् । अयञ्च तदंततदन्ताशीस्थितिलक्षणोऽवधिः मध्येऽपि कदाचित्तत्कोपादिना नाशसंभवादिति भावः ''तद्यथास्यां ततः क्षीयत एव'' इति श्रुतेः ॥ ३८ ॥ हे परमेति । परान् रागद्वेषादीन्निजसेवकानां मिनाति हिनस्तीति परमः रागद्वेषस्यैव मोक्षपरिपंथित्वेन तद्विनाशात्करकलित एव मोक्षो भवतीति भावः । ''इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ॥'' इति श्रीगीतोक्तेः। यतो हेतोः । इत्यर्थ इति । ''हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात्'' इत्युक्तेरिति भावः ॥ ३९ ॥ हे अजितेति । भक्त्या विना न केनापि जीयते इत्यजित इति भागवतधर्मस्यैव परमोत्कर्षोऽस्ति धर्मांतरेभ्य इति भावः । ''वशी कुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा'' इति । 'भक्त्याहमेकया लभ्यः' इत्याद्युक्तेश्च । तत्र सर्वोत्कर्षस्थितौ मां तु सकामा अपि भजंत्येव न केवलं त एवेति चेत्तत्राह—यं धर्ममिति । वेति ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति च यदन्यत्र ॥ विषमधिया रचितो यः स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ ४१ ॥ कः क्षेमो निजपरयोः कियानर्थः स्वपरद्रुहा धर्मेण ॥ स्वद्रोहात्तव कोपः परसंपीडया च तथाऽधर्मः ॥ ४२ ॥ न व्यभिचरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः ॥ स्थिरचरसत्त्वकदंबेष्वपृथग्धियो यमुपासते त्वार्याः ॥ ४३ ॥ न हि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नाम सकृच्छ्रवणात्पुष्कसकोऽपि विमुच्यते संसारात् ॥ ४४ ॥ अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणा यदुदितं तावकेन कथमन्यथा भवति ॥ ४५ ॥ विदितमनंत समस्तं तव जगदात्मनो जनैरिहाचरितम् ॥ विज्ञाप्यं परमगुरोः कियदिव सवितुरिव खद्योतैः ॥ ४६ ॥

जितं सर्वोत्कर्षेण स्थितम् । तत्र हेतुः । ये निष्किंचनाः संनत्कुमारादयो मुनयस्ते यं भवंतमपवर्गाय सेवंते तेन भवता जितम् । यं धर्ममिति वा ॥ ४० ॥ अनवद्यतामेवाह । विषमा मतिर्यत्र यस्मिन्भागवते धर्मे नास्ति यदन्यत्र यथाऽन्यस्मिन्काम्ये धर्मे । ननु सोऽपि वेदोक्तत्वादनवद्य एव तत्राह । विषमधिया शत्रुमरणादिकामनया रचितो विहितो यः स ह्यविशुद्धः रागद्वेषादिमत्त्वात् । क्षयिष्णुश्च नश्वरफलत्वात् । अधर्मबहुलश्च हिंसादिबाहुल्यात् । तदुक्तं शबर स्वामिभिः "उभयमिह चोदनायां लक्ष्यतेऽर्थोऽनर्थश्च" इत्यादि ॥ ४१ ॥ एतत्प्रपंचयति । कः क्षेमः किं कुशलं न किंचित् । निजपरयोः स्वस्य परस्य च । स्वपरद्रुहा स्वस्मै परस्मै च द्रुह्यतीति स्वपरध्रुक् तेन यतः स्वद्रोहादत्यंतकायक्लेशात्तव कोपः पीडा संभवति । तदुक्तं गीतासु । "कर्षयंतः शरीरस्थं भूतग्राममचेतसः ॥ मां चैवांतः शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥" इति । तथा परसंपीडयाऽधर्मः । चशब्दात्तव कोपश्च । अतस्त्वया रागांधमपि कथंचिद्वेदमार्गे प्रवर्तयितुं काम्यधर्मोऽभिहितो न तत्त्वदृष्ट्या ॥ ४२ ॥ भागवतधर्मेण तु न द्रोह इत्याह । नेति । न व्यभिचरति न परमार्थं जहाति । तवेक्षा दृष्टिः । अव्यभिचारे हेतुः । स्थिरेति । स्थावरजंगमप्राणि समूहेषु समबुद्धयो भागवता यं धर्मं सेवंते ॥ ४३ ॥ एवंभूतस्य भागवतधर्मप्रवर्तकस्य तव दर्शनात्सर्वपापक्षयो भवतीति किं चित्रमित्याह । न हीति ॥ ४४ ॥ अतोऽहं कृतार्थोऽस्मीत्याह । अथेति । अथ अतो हेतोः । तवावलोकनेन परिमृष्टा निरस्ता आशये चित्ते मला येषां ते । त्वद्दर्शनं च मम नारदोपदेशेन जातमित्याह । सुरऋ षिणेति ॥ ४५ ॥ यथा चाहं पूर्वमतिमूढ आसं यथा च नारदेनानुगृहीतोऽस्मि तत्सर्वांतर्यामिणस्तव मया किं प्रकाशनीयमित्याह । विदितमिति । विशेषेण ज्ञाप्यं प्रकाश

अत्राक्षिपति–नन्विति । "श्येनेनाभिचरन्यजेत" "स्वर्गकामो यजेत" इत्याद्युक्ते रागद्वेषी प्रतीयेते । क्षयिष्णुश्च "एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः । आदिना श्रमादिग्रहः । अधर्मबहुलत्वं तु श्येन याजिनः प्रायश्चित्तविधानात् । एतदग्रे विचारयिष्यामः । वेदविहितो धर्माधर्मौ द्वावेव स्त इत्यत्र प्रमाणमाह–तदुक्तमिति । इह वेदविहिते विधावित्यर्थः । अर्थः स्वर्गादिफलको धर्मोऽनर्थो नरकादिफलकोऽधर्मश्चे त्युभयमेवेत्यर्थः ॥ ४१ ॥ एतत् अर्थानर्थद्वयम् । तत् कामक्लेशेनं पीडनम् । भूतग्रामं पञ्चभूतसमुदायम् । कर्षयंतः पीडयंतः मां च कर्षयंत इति यत इत्यनेनात इति योज्यम् । रागांधं विषयानुरागिणम् । सत्त्वदृष्ट्या परमार्थदृष्ट्या ॥ ४२ ॥ ४३ ॥ एवंभूतस्य सर्वेश्वरस्य । भगवन्निति सर्वथा समर्थत्वमाह–अघटितमनुपपन्नम् । "जातो निषादाच्छूद्रायां जात्या भवति पुष्कसः" इति ब्राह्मणाच्छूद्रकन्यायां जातो निषाद इति ॥ ४४ ॥ तावकेन त्वद्भक्तशिरोमणिना यदुदितम् । "यां धारयन्सप्तरात्राद्द्रष्टा संकर्षणं प्रभुम्" इत्येवं यत्प्रोक्तम् ॥४५॥ इत्यर्थ इति । अनंतत्वात्सर्वदेशकालवस्तुपरिच्छेदरहितत्वात्तव सर्वं ज्ञातमेवेति भावः ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय ॥ दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ॥४७॥ यं वै श्वसंतमनु विश्वसृजः श्वसंति यं चेकितानमनुचित्तय उच्चकंति ॥ भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥ ४८॥ श्रीशुक उवाच ॥ संस्तुतो भगवाने वमनंतस्तमभाषत ॥ विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह ॥ ४९ ॥ श्रीभगवानुवाच ॥ यन्नारदांगिरोभ्यां ते व्याहृतं मेऽनुशासनम् ॥ संसिद्धोऽसि तया राजन्विद्यया दर्शनाच्च मे ॥ ५० ॥ अहं वै सर्वभूतानि भूतात्मा भूतभावनः ॥ शब्दब्रह्मपरं ब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥ लोके विततमा त्मानं लोकं चात्मनि संततम् ॥ उभयं च मया व्याप्तं मयि चैवोभयं कृतम् ॥ ५२ ॥ यथा सुषुप्तः पुरुषे विश्वं पश्यति चात्मनि ॥ आत्मानमेकदे शस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥

नीयं कियदिव न किमपीत्यर्थः । सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ॥ ४६ ॥ उक्तलक्षणं भगवंतं प्रणमति नम इति द्वाभ्याम् । सकलस्य जगतः स्थि त्यादीनामीशाय समर्थाय । दुरवसिताऽविज्ञाताऽऽत्मगतिर्निजतत्त्वं यस्य तस्मै । केषां कुयोगिनाम् । केन भिदा भेददृष्ट्या ॥ ४७ ॥ श्वसंति चेष्टंते । चेकितानं पश्यंत मनु चित्तयो ज्ञानेंद्रियाण्युच्चकंति स्वारूढं पश्यंति तस्मै नमोऽस्तु ॥ ४८ ॥ ४९ ॥ मे ममानुशासनं मद्विषय उपदेशः तेन तया च विद्ययाऽस्माच्च दर्शनात्संसिद्धोऽसि ॥ ५० ॥ तद्बोधदार्ढ्याय स्वयमप्युपदिशति अहमित्यादिना । सर्वभूतान्यहमेव । भूतानामात्मा भोक्ताऽप्यहमेव । भोक्तृभोगात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः । यतोऽहं भूतभावनः भूतानां प्रकाशकः कारणं च । ननु शब्दब्रह्मप्रकाशक परं ब्रह्म कारणं च प्रकाशकं च संत्य ते उभे ममैव रूपे इत्याह । शब्दब्रह्मेति । शाश्वती शाश्वत्यौ ॥ ५१ ॥ अतस्त्वमेवं पश्येत्याह । लोके भोग्यप्रपंचे भोक्तृत्वेन विततमनुगतमात्मानं लोकं चात्मनि भोग्यत्वेन संततं व्याप्तं तदुभयं च मया कारणात्मना व्याप्तम् । मयि चैवोभयं कृतं प्रकल्पितं स्मरेदिति तृतीयेनान्वयः । पश्येदित्यध्याहारो वा ॥ ५२ ॥ ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्य स्वप्नगतजाग्रदादिदृष्टांतेन संभावयन्नाह यथेति द्वाभ्याम् । यथा स्वप्ने सुप्तो विश्वं गिरिवनादिरूपं देशांतरस्थमात्मन्येव पश्यति । स्वप्नमध्ये सुषुप्तिं स्वप्नं च

परमहंसाय परेषां महं तेजः सनोति ददातीति परमहंसस्तस्मै खश्च् टिलोपश्चार्षौ। ''यत्तेजसेद्धः सूर्यस्तपति'' इत्यादिश्रुतेः । सर्वप्रकाशकाय केवलं नमस्करोम्येवेति भावः॥४७॥कित धातुर्दर्शनेपि यङन्ताच्छानाचि रूपम्। उदुपसर्ग वशाच्चकतृप्तावित्यस्यार्थांतरम् । 'धात्वर्थं बाधते कश्चित्' इत्युक्तेः । सर्षपायति सर्षपवद्वर्त्तते ॥ ४८ ॥ कुरूद्वहेति । शुद्धवंशोद्भूतत्वात्तुभ्यमिदं प्रोक्तमिति '' विशुद्धोभयवंशाय देया विद्यामनीषिणा '' इत्यु क्तेः ॥ ४९ ॥ राजन्निति । राज्ञां संसिद्धिरतिदुर्लभापि मत्कृपया जातेति भावः ॥ ५० ॥ इत्यर्थ इति । '' सर्वं खल्विदं ब्रह्म '' इति श्रुतेरिति भावः । अत्राशंकते—नन्विति । वेदराशिः शब्दब्रह्म सच्चिदानंदं पर ब्रह्मेति भेदः । '' यावद्ब्रह्मविष्ठितं तावती वाक् '' इति श्रुतेः ॥ ५१ ॥ यतोऽहमेव सर्वमतो हेतोः । एवं वक्ष्यमाणप्रकारेण । व्यवहितान्वये श्रमं मत्वाह—पश्येदित्यध्याहारो वा ॥५२॥ अत्राक्षिपति—नन्विति । सुषुप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं जागरणादीनि जीवस्थानानि चात्मनः ॥ मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा ॥ सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि माम् ॥ ५५ ॥ उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ॥ अन्वेति व्यतिरिच्येत यज्ज्ञानं ब्रह्म तत्परम् ॥ ५६ ॥ यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः ॥ ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ॥ ५७ ॥ लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवाम् ॥ आत्मानं यो न बुध्येत न क्वचिच्छममाप्नुयात् ॥ ५८ ॥

पश्यतीत्यर्थः । तथा स्वप्न एवोत्थितः सन्नात्मानमेकदेशस्थं शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ॥ ५३ ॥ एवं प्रसिद्धान्यपि जागरादीनि जीवस्थानानि जीवोपाधेर्बुद्धेरवस्थानुभूतान्यात्मनो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारमत एव परं तदवस्थारहितमात्मानं स्मरेत् ॥ ५४ ॥ ननु तेषां द्रष्टारमिति कथमुच्यते स्वापे दृश्याभावेन द्रष्टृत्वाभावात्तत्राह । येनेति । प्रसुप्तः पुरुषो जीवो येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतींद्रियं सुखं च वेद तमात्मानं ब्रह्म मामवेहि । तदा स्वापसुखयोरसंवेदने "सुखमहमस्वाप्सम्" इति स्मृतेरसंभवात् ॥ ५५ ॥ ननु स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेन्न ह्यन्येन दृष्टमन्यः स्मरति तत्राह । उभयं प्रस्वापं प्रतिबोधं च स्मरतोऽनुसंदधतः । तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत च । एकैकापायेऽप्यनपायात् । तज्ज्ञानं परं ब्रह्म तदेव न तु भिन्नमित्यर्थः । अतो बाल्ये दृष्टस्य यौवने स्मृतिवदवस्थांतरत्वेऽपि स्वापानंदयोः स्मरणं घटत इति भावः । तदेवंभूतं ब्रह्मात्मानमवेहीत्यनुषंगः ॥ ॥ ५६ ॥ विपक्षे दोषमाह । यद्यदि एतन्मद्भावं मत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशाद्भिन्नं भवति तत एतस्य पुंसः संसारो भवति । संसारस्वरूपमाह । देहाद्देहो जन्मानंतरं पुनर्जन्म मृतेरनन्तरं मृतिश्चेति ॥ ५७ ॥ योन्यंतरेपि भोगादिसंपादनं शक्यं ज्ञानार्थं त्वत्रैव यतितव्यमित्याह । लब्ध्वेति । ज्ञानं शास्त्रोक्तं

प्रसुप्तः । इत्यर्थ इति । अत्र चकारात्सुषुप्तिं केवलां गाढनिद्रां च पश्यतीति भावः । स्वप्न इति । सप्तम्येकवचनम् ॥५३॥ जीवस्य जीवोपाधेर्बुद्धेः स्थानान्यवस्था इत्यर्थः । "जाग्रत्स्वप्नौ सुषुप्तिश्च गुणतो बुद्धिवृत्तयः" इत्युक्तेः । अत एव द्रष्टृत्वादेव ॥ ५४ ॥ पुनराक्षिपति—नन्विति । स्वापकाले सुषुप्तिकाले । असंवेदनेऽननुभवे । स्मृतेरिति स्मृतेरनुभवजन्यत्वनियमात् ॥ ५५ ॥ विश्वतैजसप्राज्ञभेदेन जाग्रदादित्रयसाक्षिणः पृथक्पृथक्संभवादन्यानुभूतेऽन्यस्मृतिरपि न संभवतीत्याक्षिपति—नन्विति । ताभ्यां प्रस्वापप्रतिबोधाभ्याम् । व्यतिरिच्येत पार्थक्येन स्थितो भवेत् । एकैकयोः प्रस्वापप्रतिबोधयोरेकतरस्याभावेऽपि तस्यात्मनोऽनपायात्सत्त्वात् । इत्यर्थ इति । ज्ञानं ज्ञानरूपम् "सत्यं ज्ञानमनंतं ब्रह्म" इति श्रुतेः । परं मुक्तप्राप्यम् "ब्रह्मविदाप्नोति परम्" इति श्रुतेश्च। परं ज्ञानरूपमेव ब्रह्म न तु तदन्यदश्रवणादिति भावः । अतः साक्षिण ऐक्यात् । इति भाव इति । विश्वादिसंज्ञैव भिन्ना न तु संज्ञी संज्ञानामौपाधिकत्वादिति तात्पर्यम् ॥ ५६ ॥ विपक्षे तदज्ञाने । विस्मृतम् अनाद्यज्ञानेनाननुसंहितम् । ततो भिन्नभवनात् ॥५७॥ इह भारते खंडे । ज्ञानविज्ञानसंभवमित्यनेन ब्राह्मणजन्म लक्ष्यते तत्रैव ज्ञानविज्ञानयोः प्राधान्येन संभवात्तदुक्तं गारुडे "जातीशतेन लभते किल मानुषत्वं तत्रापि दुर्लभतरं खलु भो द्विजत्वम् । यस्तन्न पालयति लालयतींद्रियाणि तस्यामृतं क्षरति हस्तगतं प्रमादात् ॥" इति । किञ्च—"अन्यभूमौ कृतं पापं तीर्थभूमौ विशुद्ध्यति । तीर्थभूमौ कृतं पापं वज्रलेपायते द्विज ॥" इत्यादिपुराणांतरगतो न्यायोऽप्यत्रानुसंधेयः । अन्यभूमौ श्वशूकरादिजन्मनि तीर्थवच्छोधनोपायीभूतायां भूमौ मनुष्यदेहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मृत्वेहायां परिक्लेशं ततः फलविपर्ययम् ॥ अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः ॥ ५९ ॥ सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः ॥
ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥ ६० ॥ एवं विपर्ययं बुद्ध्वा नृणा विज्ञाभिमानिनाम् ॥ आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणाम् ॥
॥६१॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा ॥ ज्ञानविज्ञानसंतुष्टो मद्भक्तः पुरुषो भवेत् ॥६२॥ एतावानेव मनुजैर्योगनैपुण्यबुद्धिभिः ॥ स्वार्थः
सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनम् ॥ ६३ ॥ त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम ॥ ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ॥ ६४ ॥
श्रीशुक उवाच ॥ आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः ॥ पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे हरिः ॥ ६५ ॥ इति श्रीभागवते महापुराणे
षष्ठस्कंधे षोडशोऽध्यायः ॥१६॥छ॥ श्रीशुक उवाच ॥ यतश्चांतर्हितोनन्तस्तस्यै कृत्वा दिशे नमः ॥ विद्याधरश्चित्रकेतुश्चचार गगनेचरः ॥१॥ स
लक्षं वर्षलक्षाणामव्याहतबलेंद्रियः ॥ स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः ॥ २ ॥

विज्ञानमपरोक्षं तयोः संभवो यस्यां ताम् ॥ ५८ ॥ वैराग्यार्थमाह । ईहायां प्रवृत्तिमार्गे । तत ईहातः अनीहायां निवृत्तिमार्गे त्वभयं मोक्षो भवतीति च स्मृत्वा फलसं
कल्पाद्विरमेत् । पाठांतरे नोभयं परिक्लेशः फलविपर्ययश्च नास्तीत्येवं स्मृत्वा ॥ ५९ ॥ एतद्विवृणोति सुखायेति त्रिभिः । दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ॥ ६० ॥
विज्ञा उद्यमे प्रवीणा वयमित्यभिमानवताम् । स्थानत्रयविलक्षणां तुरीयां बुद्ध्वा ॥ ६१ ॥ दृष्टश्रुताभिर्मात्राभिरैहिकामुष्मिकैर्विषयैः स्वेन तेजसा विवे
कबलेन ॥ ६२ ॥ न चातः परः पुरुषार्थोऽस्तीत्याह । एतावानिति । योगे नैपुणं यस्यां सा बुद्धिर्येषां परस्यात्मनः एकं दर्शनमिति यदेतावानेव ॥ ६३ ॥
॥ ६४ ॥ ६५ ॥ इति श्रीभागवते षष्ठे टीकायां षोडशोध्यायः ॥ १६ ॥ ततः सप्तदशेऽमोघमहर्द्धिं प्राप्य खे चरन् ॥ विहस्य गिरिशं शापादुमाया वृत्रतां
गतः ॥ १ ॥ यतो यस्यां तस्यै दिशे नमः नमनं कृत्वा ॥ १ ॥ स चित्रकेतुर्विद्याधरस्त्रीभिर्हरिं गापयन् रेम इति द्वयोरन्वयः । अव्याहतं बलमिंद्रियपाटवं च यस्य ॥ २ ॥

वज्रस्य हीरकस्य केनचिदौषधेन द्रवीभूतस्य कृतो हेमादिधात्वलंकारे लेपः पुनरुपायसहस्रेणापाकर्तुं न शक्यते तद्वत्तत्पापं स्यादित्यर्थः । यद्वान्यभूमौ विप्रेतरमनुष्यजन्मनि तदितरजन्मनि वा कृतं तीर्थभूमौ साक्षा
त्तीर्थे ब्राह्मणदेहे विशुध्यति श्रौतजपार्चनादिना नश्यति तत्र कृतं न कुत्रापि जन्मनीति भावः ॥ ५८ ॥ पाठांतरे नोभयमिति पाठे । संकल्पादीहातः ॥ ५९ ॥ एतत् ईहानीहाफलम् । ततः क्रियातः ॥६०॥ सूक्ष्मबु
द्धिज्ञेयत्वात्सूक्ष्माम् ॥ ६१ ॥ मद्भक्तो ज्ञानविज्ञानतृप्तो भवेत् भक्तिं विना ज्ञानविज्ञानाभ्यामपि तृप्तिर्न भवतीति भावः । " भक्तिं लब्धवतः साधोर्न किंचिदवशिष्यते " इत्युद्धवं प्रति श्रीकृष्णोक्तेः ॥ ६२ ॥ यद्वा–
परस्यात्मनश्च द्वयोरेकत्वेनाभेदेन ज्ञानम् 'सकलमिदमहं च वासुदेवः' इत्येवंलक्षणमेतावानेव स्वार्थस्तदन्यत्सर्वज्ञानं न पुरुषार्थ इति भावः ॥ ६३ ॥ हे राजन्निति । नारददत्तविद्यया देदीप्यमानत्वात्त्वद्योग्यमेतदिति भावः
॥ ६४ ॥ हरिरिति । संकर्षणवासुदेवयोर्वास्तवाभेदमाह । ततो यत्र दृष्टस्तत्रैवांतर्दधे ॥ ६५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ ततोनंतोपदेशावाप्त्यनंतरम् । अमस्य क्लेश
स्यौघो वेगो यस्यां तामिति भाव्यभिप्रायेण व्याख्या (१) ॥ १ ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुलाचलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु ॥ रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरम् ॥ ३ ॥ एकदा स विमानेन विष्णुदत्तेन भास्वता ॥ गिरिशं ददृशे गच्छन्परीतं सिद्धचारणैः ॥ ४ ॥ आलिंग्यांकीकृतां देवीं बाहुना मुनिसंसदि ॥ उवाच देव्याः शृण्वंत्या जहासोच्चैस्तदंतिके ॥ ५ ॥ चित्रकेतुरुवाच ॥ एष लोकगुरुः साक्षाद्धर्मं वक्ता शरीरिणाम्॥ आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ॥ ६ ॥ जटाधरस्तीव्रतपा ब्रह्मवादी सभापतिः॥ अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ॥ ७ ॥ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति ॥ अयं महाव्रतधरो बिभर्ति सदसि स्त्रियम् ॥ ८ ॥ श्रीशुक उवाच ॥ भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप॥ तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ॥ ९ ॥ इत्यतद्वीर्यविदुषि ब्रुवाणे बह्वशोभनम् ॥ रुषाऽऽह देवी धृष्टाय निर्जितात्माभिमानिने ॥ १० ॥

नानाविधाः संकल्पेनैव सिद्धयो यासु तासु ॥३॥ अकस्माद्भूतैश्वर्यगर्वात्प्राचीनकर्मतः ॥ आसुरीं योनिमापन्नो भवानीशापतः स तु ॥ १ ॥ तदाह एकदेत्यादिना ॥ ४ ॥ अंकीकृतामुत्संगेनैकीकृत्य स्थापितां देवीं बाहुनाऽऽलिंग्य स्थितम् । उवाच जहास च । तस्यांतिके स्थितः सन् ॥ ५ ॥ धर्मं वक्ता वदति शरीरिणां मध्ये मुख्यश्च भार्यया मिथुनीभूय चास्ते ॥ ६ ॥ ७ ॥ ८ ॥ अगाधा गंभीरा धीर्यस्य सः ॥ ९ ॥ न तस्य वीर्यं प्रभावं विद्वानतद्वीर्यविद्वांस्तस्मिन् । निर्जितात्माभिमानिने । जितेंद्रियोऽ

कुलाचलेंद्रो मेरुः "कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः" इत्युक्तेः ॥ ३ ॥ तत्र प्राचीनकर्मणा महदपराधात्तस्य दुष्फलमाह–एकदेति ॥ ४ ॥ अंकीकृतां स्वोत्संगस्थापिताम् । तदंतिके तयोस्सतीश्वरयो रंतिके समीपे ॥ ५ ॥ एष शिवः लोकानां सर्वेषां गुरुर्ब्राह्मणदेवतात्वेनोपदेष्टा 'ब्राह्मणो भगवान्रुद्रः' इति पराशरपुराणोक्तेः । मंत्रशास्त्रेऽपि मनुष्ये श्रद्धाराहित्ये दक्षिणा मूर्त्तितो दीक्षाग्रहणविधानात् व्युत्पादितं चैतत्तृतीयस्कंधे चतुर्दशेऽध्याये । अत एव शरीरिणां धर्मं वक्तेति ॥ ६ ॥ प्राकृतोऽतीव मूढः ॥ ७ ॥ "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । एते जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्" इति योगसूत्रे । एतयोरर्थस्तु–तत्र प्राणवियोगप्रयोजनव्यापारो हिंसा सा च सर्वानर्थहेतुस्तदभावोऽहिंसा हिंसायाः सर्वकालमेव परिहार्य्यत्वात्प्रथमं तदभावरूपाया अहिंसाया निर्देशः । सत्यं वाङ्मनसयोर्यथार्थत्वम् । स्तेयं परस्वापहरणं तदभावोऽस्तेयम् । ब्रह्मचर्यमुपस्थसंयमः । अपरिग्रहो भोगसाधनानामस्वीकारः । एतेऽहिंसादयो यमशब्दवाच्या भवंति योगांगत्वेन निर्दिष्टाः । एषां विशेषमाह–एत इति । जातिर्ब्राह्मणत्वादिः । देशस्तीर्थादिः । कालश्चतुर्दश्यादिः । समयो ब्राह्मणप्रयोजनादिः एतैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ता अहिंसादयो यमाः । सर्वासु विक्षिप्तादिषु चित्तभूमिषु भवा महाव्रतमित्युच्यते । तद्यथा–ब्राह्मणं न हनिष्यामि, तीर्थे कंचन न हनिष्यामि, चतुर्दश्यां न हनिष्यामि, देवब्राह्मणप्रयोजनव्यतिरेकेण कमपि न हनिष्यामीत्येवं चतुर्विधावच्छेदव्यतिरेकेण किंचित्कुत्रचित्कदाचित्कस्मिंश्चिदर्थे न हनिष्यामीत्यनवच्छिन्नाः एवं सत्यादिषु यथायथं योज्यम् । इत्थमनियमकृता सामान्येनैव प्रवृत्ता महाव्रतमित्युच्यते ॥८॥ गंभीरा इयत्ताशून्या । तदभिप्रायानुसारेणैव तूष्णीं बभूवुस्तदनुव्रता इति भावः ॥ ९ ॥ वीर्यमत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पार्वत्युवाच ॥ अयं किमधुना लोके शास्ता दंडधरः प्रभुः ॥ अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ॥ ११ ॥ न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः ॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्तिनं हरम् ॥ १२ ॥ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयम् ॥ यः क्षत्रबंधुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दंड्यः ॥ १३ ॥ नायमर्हति वैकुंठपादमूलोपसर्पणम् ॥ संभावितमतिः स्तब्धः साधुभिः पर्युपासितम् ॥ १४ ॥ अतः पापीयसीं योनिमासुरीं याहि दुर्मते ॥ यथेह भूयो महतां न कर्ता पुत्र किल्बिषम् ॥ १५ ॥ श्रीशुक उवाच ॥ एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः॥प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत॥१६॥ चित्रकेतुरुवाच॥प्रतिगृह्णामि ते शापमात्मनोंजलिनाऽम्बिके ॥ देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् ॥ १७ ॥ संसारचक्र एतस्मिञ्जंतुरज्ञानमोहितः ॥ भ्राम्यन्सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा ॥ १८ ॥ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः ॥ कर्तारं मन्यते प्राज्ञ आत्मानं परमेव च ॥ १९ ॥

हमित्यभिमानवते । इति रुषा क्रोधेनाह ॥ १० ॥ विरुद्धं प्रकर्षेण करोतीति विप्रकृत् ॥ ११ ॥ अतिवर्तिनं शास्त्रमतिक्रम्य वर्तनशीलं ये नो निषेधंति न निवारयंति ॥ ॥ १२ ॥ एषां ब्रह्मादीनामनुध्येयं पदाब्जयुग्मं यस्य तम् । मंगलमंगलं परमधर्ममूर्तिम् । सूरीन्परिभूयाज्ञान्कृत्वा जगद्गुरुं यः प्रशास्ति तत्तस्मात् ॥ १३ ॥ ननु हरिभक्तोऽयं न दंडार्ह इति चेत्तत्राह । नायं साधुभिः परिषेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति । यतः संभाविता अहमधिक इति कृता मतिर्येन । अत एव स्तब्धोऽनम्रः ॥ १४ ॥ तदेवं स्वयं दंड्यत्वं निश्चित्य तं प्राह । अत इति । हे पुत्र यथा भूयो महतां किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीत्यर्थः ॥ १५ ॥ १६ ॥ पूर्वदिष्टं प्राचीनकर्मप्राप्तमेव ॥१७॥ अयं च संसारचक्रस्वभाव एव न चित्रमित्याह । संसारचक्र इति ॥ १८ ॥ अत एवात्र मम च तव न कोऽपि दोष इत्याह । नैवेति ॥१९॥

तादृशलोकचारित्रेणाच्छादितं यन्महाभागवतत्वं तदज्ञातारि । धृष्टायेति "क्रुधद्रुह–" इत्यादिना चतुर्थी । इति वक्ष्यमाणम् ॥ १० ॥ किञ्च स्त्रीनिमित्तासत्कारपरिहारः स्त्रियैव कार्य इति परमेश्वराभिप्रायं जानती सत्याह–अयमिति ॥ ११ ॥ १२ ॥ मंगलानां कल्याणहेतूनां धर्माणां मंगलं रक्षकम् "कल्याणे मंगलं प्रोक्तं सर्वतो रक्षकेऽपि च" इति हलधरात् । सूरीन्सर्वज्ञान्ब्रह्मादीन् । विद्वदपमानकर्तृत्वात्सर्वथा दंडार्होऽयमिति भावः ॥ १३ ॥ अत्राक्षिपति–नन्विति । पादमूले उपसर्पणं प्राप्तिम् । अत एव संभावितमतित्वादेव ॥ १४ ॥ इत्यर्थ इति । तद्धितकरणात्पुत्रेति संबोधनं यथा माता बहिर्गच्छंतं बालं पुत्र बहिर्व्याघ्रोऽटति तत्र न गंतव्यमिति तं निवार्य तद्धितं करोति रुदंतं कंचित्कुमारं श्रुत्वा पीडितोऽयं व्याघ्रेणातोऽत्रैव क्रीडेति वदति च । इत्थं शापरूपभयप्रदर्शनेन पुनर्महदवहेलनं करिष्यस्ययमित्यतस्तज्जन्यदुःखनिवारणकर्त्रीत्वेन हितकर्त्रीत्वात्तया युक्तमुक्तं पुत्रेति । यद्वा–जगन्मातृत्वान्मम भवतश्च जगदंतर्गतत्वान्मत्पुत्रोऽसि त्वमतस्तवैतत्कथनं सर्वथाऽनुचितं न हि पुत्रो दुश्चरिताया अपि मातुर्दुश्चरणं प्रकाशयतीति भावः । अत्र संदर्भस्तु–तं भीतं मत्वा सकृपमाह–यथेति । एतदपराधबीजेन पुनस्तु पूर्ववन्महदपराधं न जनयिष्यतीति पुत्रेति ॥ १५ ॥ भारतेति । शुद्धकुलजानामयं स्वाभाविको धर्मो यथा भरतेन शकुंतलया विनैव श्रीकण्वानुज्ञासंकेतः कृतस्ततः सोऽपि प्रसादित इति भावः ॥ १६ ॥ अंबिके इति । मातृदत्तवस्तुनोञ्जलिनैव ग्रहणमुचितमिति भावः । नात्र मम दोषोऽस्ति पूर्वदिष्टेनैव ममैषा बुद्धिर्जातेति भावः । यद्वा–तवाप्यत्र दोषो नास्ति पुरुषस्य यत्प्राक्तनं कर्म तद्वशेनैव देवा वदंति शुभाशुभमिति भावः ॥ १७ ॥ अयं च सुखदुःखादिलक्षणः । सर्वत्र जन्मसु ॥ १८ ॥ अत एव सुखदुःखयोः संसारचक्रस्वभावत्वादेव । प्रकर्षेणाज्ञः प्राज्ञः । यद्वा–प्रकृष्टः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणप्रवाह एतस्मिन्कः शापः को न्वनुग्रहः ॥ कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥२०॥ एकः सृजति भूतानि भगवानात्ममायया ॥ एषां बंधं च मोक्षं च सुखं दुःखं च निष्कलः ॥ २१ ॥ न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः ॥ समस्य सर्वत्र निरंजनस्य सुखेन रागः कुत एव रोषः ॥ २२ ॥ तथाऽपि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय ॥ बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेऽवकल्पते ॥ २३ ॥ अथ प्रसादये न त्वां शापमोक्षाय भामिनि ॥ यन्मन्यसे असाधूक्तं मम तत्क्षम्यतां सति ॥ २४ ॥

एवं तावत्सुखदुःखादिकमंगीकृत्योक्तमिदानीं तदपि वस्तुतो नास्तीत्याह।गुणानां मायामयानां प्रवाहे संसारे ॥ २० ॥ ननु मायागुणानां चेदयं प्रवाहस्तर्हि तेषां जडत्वाद्बंधमोक्षाद्यनुभवो न स्यात्तत्राह । एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति । एषां बंधादिकं च सृजति।निष्कलः स्वयं बंधादिशून्यः ॥२१॥ नन्वेवंभूतविषमसृष्टौ तस्य किं कारणं प्रियादिवैषम्याभावादित्याशंक्य यद्यपि प्रियादयो न संति तथापि तत्तत्कर्मवशात्सर्वं घटत इत्याह न तस्येति द्वाभ्याम् ॥ प्रतीपोऽप्रियः।न ज्ञातिर्बंधुश्चेत्यर्थः । तत्र हेतुः । सर्वत्र समस्य । तत्कुतः । निरंजनस्य निःसंगस्य । अत एव तन्निमित्ते सुखे रागो नास्ति रागानुबंधी रोषः कुतः स्यात् ॥२२॥ यद्यप्येवं तथाऽपि तस्य शक्त्या मायया यो विसर्गः पुण्यपापादिलक्षणं कर्म एषां शरीरिणां सुखाद्यर्थमवकल्पते समर्थो भवति । यथोक्तं गीतासु । "भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥" इति ॥ २३ ॥ अथ तस्माद्भामिनि हे कोपने त्वां केवलं प्रसादयामि न तु शापमोक्षाय । तर्हि किं प्रसादनेनात आह । ममोक्तमुक्तिं साध्वप्यसाधुवन्मन्यसे

अः वासुदेवः तं जानातीति प्राज्ञः श्रीहरितत्त्वज्ञः । परमात्मानं श्रीहरिमेव कारणं मन्यते "अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः" इति परीक्षितं प्रति धर्मोक्तेः ॥ १९ ॥ तदपि सुखाद्यपि । विचारे क्रियमाणे वस्तुतोऽसंगस्यात्मनो न शापादिस्पर्शोऽस्ति तेषां मायिकत्वादिति भावः ॥ २० ॥ अत्राक्षिपति—नन्विति ॥ २१ ॥ पुनराक्षिपति—नन्विति । एवंभूतविषमसृष्टौ सुखदुःखादियुक्तविषमसृष्टिकरणे । तस्य हरेः । इत्यर्थ इति । ज्ञात्या सहितो बंधुरिति समासोऽत्र कार्य इति भावः । तत्र दयितत्वाद्यभावे । तत्सर्वत्र समत्वम् । अत एव निःसंगत्वादेव । तन्निमित्ते प्रियत्वादिहेतुके । रागानुबंधी यत्र रागोस्ति तत्रैव कदाचित्किंचिद्द्वेषस्याद्रोषस्यावश्यंभावित्वमेव 'कामात्क्रोधोऽभिजायते' इत्याद्युक्तेः ॥ २२ ॥ यद्यप्येवं विशेषतो रागादि नास्ति कर्म्मैव सुखादिहेतुरत्र प्रमाणमाह—तदुक्तमिति । भूतानां भवनधर्मकाणां सर्वेषां स्थावरजंगमानां भावमुत्पत्तिमुद्भवं वृद्धिं च करोति यो विसर्गस्त्यागस्तत्तच्छास्त्रविहितो यागहोमात्मकः स इह कर्मसंज्ञितः कर्मशब्देनोक्त इति यावत् । तत्र देवतोद्देशेन द्रव्यत्यागो याग उत्तिष्ठद्धोमो वषट्कारप्रयोगांतः स एव उपविष्टहोमः स्वाहाकारप्रयोगांतः आसेचनपर्यंतो होमः परस्वत्वापत्तिपर्यंतः स्वस्वत्वत्यागो दानं सर्वत्र च त्यागांशोऽनुगतः तस्य च भूतभावोद्भवकरत्वम् "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥" इति स्मृतेः । "ते वा एते आहुती हुते उत्क्रामतः" इत्यादिश्रुतेश्च । उत्क्रामत आदित्यं प्राप्नुत इत्यर्थः ॥ २३ ॥ भामिनीति । सत्यवचने क्रोधो न युक्त इति भावः । अत्रार्ष "एङः पदांतादति"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति प्रसाद्य गिरिशौ चित्रकेतुररिंदम ॥ जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः ॥ २५ ॥ ततस्तु भगवान्रुद्रो
रुद्राणीमिदमब्रवीत् ॥ देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वताम् ॥ २६ ॥ श्रीरुद्र उवाच ॥ दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः ॥ महात्म्यं
भृत्यभृत्यानां निःस्पृहाणां महात्मनाम् ॥ २७ ॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति ॥ स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ २८ ॥
देहिनां देहसंयोगाद्द्वंद्वानीश्वरलीलया ॥ सुखं दुःखं स्मृतिर्जन्म शापोऽनुग्रह एव च ॥२९॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि ॥ गुणदोषविकल्पश्च
भिदेव स्रजिवत्कृतः ॥ ३० ॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणाम् ॥ ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः ॥ ३१ ॥ नाहं विरिंचो न
कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः ॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः ॥ ३२ ॥

तत्त्वया क्षम्यताम् ॥ २४ ॥ गिरिशौ भवानीशंकरौ प्रसाद्य स्मयतोर्विस्मयं कुर्वतोः सतोः ॥ २५ ॥ २६ ॥ २७ ॥ स्वर्गादावेव तुल्योऽर्थः प्रयोजनमिति
द्रष्टुं शीलं येषां ते तथा ॥ २८ ॥ तत्र तदुक्तमेव हेतुमाह द्वाभ्याम् ॥ देहिनां सुखं दुःखमित्यादिद्वंद्वानीश्वरस्य लीलया मायया भवंति । तेषु च गुणदोषविकल्पश्चे
त्यन्वयः ॥ २९ ॥ इष्टानिष्टभेद इव यः स्फुरति स आत्मन्यर्थभेदः सुखादिभेदः पुंसः स्वप्ने यथा अविवेककृतो भवति स्रजिवत्सर्पमालादिभिर्यथा तथैव कृत इत्यर्थः ।
स्रग्वदिति वक्तव्ये स्रजिवदित्यार्षम् । पाठांतरे तु सुगमम् ॥ ३० ॥ अतो भागवतानां निःस्पृहत्वमुचितमेवेत्याह । वासुदेव इति । ज्ञानवैराग्ययोर्वीर्यं बलं येषां तेषां व्य
पाश्रयो विशिष्टबुद्ध्या आश्रयणीयोऽर्थो नास्तीति ॥३१॥ अस्य च हरिदासत्वेन तत्स्वभावत्वान्नैतच्चित्रमिति वक्तुं हरेर्माहात्म्यमाह नाहमिति द्वाभ्याम् । ईहितमभिप्रायं

इत्यस्य बाधः । हे सतीति । क्रोधिनो दक्षस्य पुत्र्या उचितमेवैतदिति भावः । यद्वा—न हि साध्वीनामेतदुचितमिति भावः । 'सती साध्वी पतिव्रता' इत्यमरः ॥२४॥ हे अरिंदमेति । त्वयापि क्रोधः सर्वथा दमनीय
एव मद्दमनफलस्य दृष्टसांप्रतिकप्रभावत्वादिति भावः ॥ २५ ॥ ततस्तद्गमनानंतरम् ॥ २६ ॥ दृष्टवत्यसि भवच्छापेऽपि भयाभावेन तर्कितवत्यसि किम् । हे सुश्रोणीति । तद्विमनस्यापाकरणार्थं हास्याभिप्रायैव
संबुद्धिः । माहात्म्यं देहवियोगलक्षणावस्थाप्राप्तावप्यत्रासलक्षणम् ॥ २७ ॥ न केवलमस्यैवैतादृशं माहात्म्यमपि त्वन्येषामपीत्याह—नारायणपरा इति । तुल्यमेकमेवार्थं नारायणरूपं पुरुषार्थं द्रष्टुमनुभवितुं शीलं येषां ते
स्वामिव्याख्याने प्रयोजनं भगवद्भक्तिरेव सर्वत्र श्रेयसीत्येवं विमर्शलक्षणं ज्ञेयम् "यत्र कुत्र सतश्चेतो भूयान्मे त्वत्पदास्पदम्" इत्युक्तन्यायेन "कामं भवः स्ववृजिनैर्निरयेषु नः स्ताच्चेतोऽलिवद्यदि नु ते पदयो रमेत" इति
सनकाद्युक्तेश्च ॥२८॥ तत्र तुल्यार्थदर्शने । तदुक्तं तेन चित्रकेतुना "गुणप्रवाह एतस्मिन्कः शापः को न्वनुग्रहः" इत्यादिनोक्तमेव तदेव तेषां सर्वत्रेश्वरस्फूर्त्या भयाभावो दर्शितः । विचारेण तु नास्त्येव भयमिति तद्वाक्येनैव
दर्शयति—देहिनामिति । ईश्वरलीलया तदीक्षणादिलीलालब्धबलया मायया भवंतीत्यर्थः ॥ २९ ॥ तेषु द्वंद्वेषु गुणदोषविकल्पश्चेत्यन्वयः । इत्यर्थ इति । यथा वस्तुतः स्रजि रज्जौ सर्पादि नास्ति तथात्मनि सुखाद्यपि
नेति भावः । आत्मनोऽज्ञानकृतत्वात्तत्स्फूर्तेः । स्रजीति सप्तमी । भिदेति टाबंतम् । पाठांतरे स्रजि सर्पवदिति पाठे । स्रजि तत्कृत इत्येवंरूपे वा । अत्र तत्कृतोऽविवेककृत इत्यर्थः । दर्शितश्चैतत्पाठांतरश्चक्रवर्त्तिबालबो
धिनीकाराभ्याम् । मम त्वित्थं प्रतिभाति पुंस आत्मन्यधिष्ठाने भिदा भेदो नानाबुद्धिरर्थभेद इव मृदि घटशरावादिभेद इव च पुनः गुणदोषविकल्प इवायं घटः शोभनोऽयमशोभन इतीवाविवेककृतोऽधिष्ठानाज्ञानविजृंभित
एव । "किं भद्रं किमभद्रं वा द्वैतस्यावस्तुतः कियत्" इति श्रीकृष्णोक्तेः । किंत्वत्कृतः. स्रजिवत्कृतः । अत्र तद्धिते सप्तम्या अलुक् । यथा मालायां सर्परेखारज्जुखंडाद्यर्थभेदस्तद्गुणदोषविकल्पश्च मालाऽज्ञानविजृंभित
एव न तात्त्विकस्तद्वदात्मन्याकाशादिनानाधीः शोभनेयं भूरशोभनेयं भूरिति गुणदोषादिविकल्पो न तात्त्विक इति भावः ॥ ३० ॥ यतः सर्वमतात्त्विकमेवातो हेतोः ॥ ३१ ॥ अस्य चित्रकेतोश्च । तत्स्वभावत्वान्निः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा ॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः ॥ ३३ ॥ तस्य चायं महाभागश्चित्रकेतुः प्रियो ऽनुगः ॥ सर्वत्र समदृक् शांतो ह्यहं चैवाच्युतप्रियः ॥३४॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु ॥ महापुरुषभक्तेषु शांतेषु समदर्शिषु ॥३५॥ श्रीशुक उवाच ॥ इतिश्रुत्वा भगवतः शिवस्योमाभिभाषितम् ॥ बभूव शांतधी राजन्देवी विगतविस्मया ॥ ३६ ॥ इति भागवतो देव्याः प्रति शप्तुमलंतमः ॥ मूर्ध्ना संजगृहे शापमेतावत्साधुलक्षणम् ॥ ३७॥ जज्ञे त्वष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः ॥ वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसं युतः ॥ ३८ ॥ एतत्तेसर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ॥ ३९ ॥ इतिहासमिमं पुण्यं चित्रकेतोर्म हात्मनः ॥ माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ॥ ४० ॥ य एतत्प्रातरुत्थाय श्रद्धया वाग्यतः पठेत् ॥ इतिहासं हरिं स्मृत्वा स याति परमां गतिम् ॥ ४१ ॥ इति श्रीभागवते म० षष्ठस्कंधे चित्रकेतुशापनिरूपणं नाम सप्तदशोऽध्यायः ॥ १७ ॥

लीलां वा यदा वयं न विद्मस्तदा तस्य स्वरूपमंशकांशका अपि संतः पृथगीशमानिनो न विदुरेव ॥ ३२ ॥ अत एव हरिरपि सर्वेषां भूतानां प्रियः ॥ ३३ ॥ अयं चैवाच्युतस्य प्रियः तस्मान्ममास्मिन् क्रोधो नाभूदिति भावः ॥ ३४ ॥ ३५ ॥ ३६ ॥ प्रतिशप्तुं प्रतिशापं दातुमलंतमः समर्थतमोऽपि ॥ ३७ ॥ ३८ ॥ असुरजातेरसुरभावेनोत्पत्तेर्भगवति मतेश्च ॥ ३९ ॥ ४० ॥ एतदेतम् ॥ ४१ ॥ इति श्रीभा० षष्ठस्कंधे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥ छ ॥

स्पृहस्वभावत्वात्स्वाभाविकाविवेकवत्त्वाद्वा।एतच्छापादिग्रहणम् । वयं तत्स्वरूपा अपि यदि न जानीमस्तदांशस्य प्रकृत्यधिष्ठातुः पुरुषस्यांशका अन्ये इंद्रवरुणादयः कथं विदुर्न कथमपीति भावः।भक्ताश्च तर्हि सर्वे विदुरेवेत्यर्थः। "स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः । यो मायया संततयाऽनुवृत्त्या भजेत तत्पादसरोजगंधम् ॥" इत्युक्तेः । "येषां स एव भगवान्दययेदनंतः सर्वात्मनाश्रितपदो यदि निर्व्यलीकम् । ते वै विदंत्यतितरंति च देवमायाम" इत्युक्तेश्च ॥ ३२ ॥ अत एव सर्वभूतानामात्मत्वादेव ॥ ३३ ॥ इति भाव इति । चित्रकेतुर्हि मम स ब्रह्मचार्यस्ति स च ममातीव प्रियस्ततस्तत्र क्रोधोदयः कथं भवेदित्याशयः । तस्य हरेः ॥ ३४ ॥ यतो हरिभक्ताः समदर्शिनस्तस्माद्धेतोः । तत्र चाहमपि समदृक् शांतश्च सन्नच्युतप्रियः अतो ममान्यत्रासक्तत्वाल्लौकिकलज्जाद्यनादराच्च सभायां भवत्यालिंगनमपि न संकोचहेतुरिति भावः ॥ ३५ ॥ हे राजन्निति । हरिभक्त्या त्वमतिराजस एव न स्वस्मिंस्तद्भक्तिश्रवणेनानादतो भवेति भावः ॥ ३६ ॥ पूर्वं धृष्टायेत्यादिना निंदितं संप्रति त्वेतावत्साधुलक्षणमिति स्तुतं तच्च तस्य व्यवहृताव साधुत्वसाधुत्वमवलंब्योक्तत्वान्न विरुद्धम् । अत एवाग्रे वक्ष्यते "इतिहासमिमं पुण्यं चित्रकेतोर्महात्मनः" इति । असुरजातेः कारणं महदपराधो भगवन्मतेः कारणं महदनुग्रह इति ॥ ३७ ॥ "अग्निर्वै ब्राह्मणः" इति श्रुतेरग्नेरुत्पन्नत्वात्तस्यापि ब्राह्मणत्वमत एवोक्तम् । "ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिम्" इति "स चिंतयन्ब्रह्मवधाद्विमोक्षम्" इति च ॥ ३८ ॥ ३९ ॥ ४० ॥ एतदेतमितिहासं हरिं स्मृत्वा पठेत् ॥ ४१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ पृश्निस्तु पत्नी सवितुः सावित्रीं व्याहृतिं त्रयीम् ॥ अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् ॥ १ ॥ सिद्धिर्भगस्य भार्यांग महिमानं विभुं प्रभुम् ॥ आशिषं च वरारोहां कन्यां प्रासूत सुव्रताम् ॥ २ ॥ धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ॥ सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥ ३ ॥ अग्नीन्पुरीष्यानाधत्त क्रियायां समनंतरः ॥ चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः ॥ ४ ॥ वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ॥ अगस्त्यश्च वशिष्ठश्च मित्रावरुणयोर्ऋषी ॥ ५ ॥ रेतः सिषिचतुः कुंभे उर्वश्याः सन्निधौ द्रुतम् ॥ रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् ॥ ६ ॥

आदित्यानां चतुर्थस्य त्वष्टुर्वंशप्रसंगतः ॥ प्रोक्तमिंद्रकृतं विश्वरूपवृत्रवधादिकम् ॥ १ ॥ अदितेः पंचमादीनां पुत्राणामन्वयोक्तिभिः ॥ अष्टादशे दितेर्गर्भे शक्रेण मरुतां भिदा ॥२॥ त्वष्टुर्वंशमनुक्रम्य सप्रसंगं यथाक्रमम् ॥ आदित्यानामथान्येषां वंशानाह मुनीश्वरः ॥३॥ दक्षकन्यान्वयानुकथने अदित्या द्वादश पुत्राः प्रोक्ताः । 'विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः ॥ धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ " इति । तत्र षष्ठाध्यायांतमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्येदानीं सवितुर्वंशमाह । पृश्निस्त्विति । सावित्रीमित्यादिषु प्रासूतेत्युत्तरस्यानुषंगः । पशुं पशुयागम् । महामखान्पंचयज्ञान् ॥ १ ॥ २ ॥ धातुर्भार्या कुहूः सायं पुत्रं प्रासूत । एवं सिनीवाली दर्शमित्याद्यनुक्रमात् ॥ ३ ॥ समनंतरो विधाता क्रियायां भार्यायां पुरीष्यानग्नीन्पंचचिचीन् ॥ "पुरीष्यासो अग्नय इति पंच वा एतेऽग्नयो यच्चितयः" इति श्रुतेः । चर्षणी वरुणस्य भार्याऽऽसीत् । पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः ॥४॥ वाल्मीकिर्वरुणस्यैव पुत्रोऽभवत् । एतौ वरुणस्यासाधारणौ पुत्रौ । तथोत्सर्गादयोऽपि मित्रस्यासाधारणाः । तयोरेव साधारणौ द्वौ पुत्रावाह । अगस्त्यश्च वशिष्ठश्च ऋषी मित्रावरुणयोरभवताम् ॥ ५ ॥ यत उभावपि कुंभे रेतः सिषिचतुः "सत्रे ह जाता

आदित्यानामदितिपुत्राणां मध्ये (१) पञ्चमादीनां सवित्रादीनाम् (२) मुनीश्वरः श्रीशुकः (३) सावित्रीं गायत्र्यभिमानिनीं देवताम् । व्याहृतिं तदभिमानिनीम् । एवं त्रयीं वेदत्रयाभिमानिनीं च । एवमग्रेपि ज्ञेयम् । चातुर्मास्यो यागविशेषः । " अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्" इति श्रुतेरग्निहोत्रपशुसोमा अपि यागभेदा एव । पंचयज्ञास्तु–"पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पञ्च महायज्ञा ब्रह्मयज्ञादिनामकाः" ॥ ब्रह्मयज्ञो देवयज्ञो नृयज्ञः पितृयज्ञो भूतयज्ञश्च । "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥" इति स्मृतेः ॥१॥ अंगेति । प्रियत्वाद्व्यवहितमपि वदिष्यामीति भावः । महिमादयस्त्रयः पुत्राः आशीराख्यैका कन्या च ॥२॥३॥ पुरीष्यसंज्ञकाः पञ्च । अत्र श्रुतिं प्रमाणयति–स्पष्टार्था श्रुतिः ॥४॥ एतौ भृगुवाल्मीकी उत्सर्गादयो वक्ष्यमाणा रेवत्यामित्यादिना तयोर्मित्रावरुणयोः ॥ ५ ॥ उभौ मित्रावरुणौ । अत्र श्रुतिं प्रमाणयति–सत्रे हेति । श्रुत्यर्थस्तु पाठांतरसंदेहान्न कृतः 'सत्रेह जाताविषिनामनो मे' इति पाठः प्राचीनपुस्तके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौलोम्यामिंद्र आधत्त त्रीन्पुत्रानिति नः श्रुतम् ॥ जयंतमृषभं तात तृतीयं मीढुषं प्रभुः ॥ ७ ॥ उरुक्रमस्य देवस्य मायावामनरूपिणः ॥ कीर्तौ पत्न्यां बृहच्छ्लोकस्तस्यासन्सौभगादयः ॥ ८ ॥ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः ॥ पश्चाद्वक्ष्यामहेऽदित्यां यथैवावततार ह ॥ ९ ॥ अथ कश्यपदायादान्दैतेयान्कीर्तयामि ते ॥ यत्र भागवतः श्रीमान्प्रह्रादो बलिरेव च ॥ १० ॥ दितेर्द्वावेव दायादौ दैत्यदानववंदितौ ॥ हिरण्यकशिपुर्नाम हिरण्याक्षश्च कीर्तितौ ॥ ११ ॥ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी ॥ जंभस्य तनया दत्ता सुषुवे चतुरः सुतान् ॥ १२ ॥ संह्रादं प्रागनुह्रादं ह्रादं प्रह्रादमेव च ॥ तत्स्वसा सिंहिका नाम राहुं विप्र चितोऽग्रहीत् ॥ १३ ॥ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतम् ॥ संह्रादस्य कृतिभार्याऽसूत पंचजनं ततः ॥ १४ ॥ ह्रादस्य धमनिर्भार्याऽसूत वातापिमिल्वलम् ॥ योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलम् ॥ १५ ॥ अनुह्रादस्य सूर्म्यायां बाष्कलो महिषस्तथा ॥ विरोचनस्तु प्राह्रादिर्देव्यास्तस्याभवद्बलिः ॥ १६ ॥ बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत् ॥ तस्यानुभावः सुश्लोक्यः पश्चादेवाभिधास्यते ॥ १७ ॥

विशिता नमोभिः कुंभे रेतः सिषिचतुः समानम्" इति श्रुतेः । द्रुतं स्कन्नम् ॥६॥७॥८॥ पश्चादष्टमस्कंधे॥९॥अथेति। कश्यपस्यादितेः पुत्राणां द्वादशादित्यानां संततिमुक्त्वा दितेः पुत्रान्कथयामीत्यर्थः ॥ १० ॥ हिरण्यकशिपुर्हिरण्याक्षश्चेति प्रथमं द्वावेव तौ च कीर्तितौ तृतीयस्कंधे ॥११॥१२॥ विप्रचित्तो दानवाद्भर्तुः सकाशाद्राहुं पुत्रमग्रहीत् ॥ १३ ॥ ततः संह्रादादसूत ॥ १४ ॥ यो मेषरूपं वातापिमगस्त्यार्थं पेचे तमिल्वलम् । यं पेचे तं वातापिं चासूतेत्यन्वयः ॥ १५ ॥ १६ ॥ ततो बलेः सकाशादभवत् । तस्य बलेरनुभावः सुश्लोक्यः पुण्यकीर्त्यर्हः । यद्वा पाठान्तरेनुभाव्यते सद्भिः स्तूयत इत्यनुभावम् । सुश्लोक्यं यश इति शेषः । पश्चादष्टमस्कंधे ॥१७॥

ष्वस्ति । 'विषितानमोभिः' इति पाठोंकितपुस्तकेस्ति ॥ ६ ॥ ताततेति । श्रोतृश्रद्धाधिक्यदर्शनात्संबुद्धिः ॥ ७ ॥ तस्य बृहच्छ्लोकस्य । आदिपदोक्ताः पुराणांतरगम्याः ॥ ८ ॥काश्यपस्य तत्तस्य वामनस्य । यद्वा--कश्यप एव काश्यपस्तस्य पत्न्यां यथोरुक्रमोऽवततार तस्य कर्मादीनिति ॥ ९ ॥ अथादितिसंततिवर्णनोत्तरम् । ननु दैत्यवंशस्य कल्याणानुपयुक्तत्वात्तद्वर्णनमयुक्तमत्रेति चेदाह—यत्रेति । यत्र दितिसंततौ । प्रह्लादबलिचरितश्रवणस्य श्रेयस्साधनत्वात्तद्वर्णनं युक्तमेव "दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकम्" इति सप्तमस्कंधोक्तेः "उरुक्रमस्य चरितं श्रोतॄणामघनाशनम्" इत्यष्टमस्कंधे बलिचरितांतोक्तेश्च ॥ ॥ १० ॥ "दायादौ पुत्रबांधवौ" इत्यभिधानात् दायादौ पुत्रौ ॥ ११ ॥ जम्भेन दत्ता ॥ १२ ॥ तत्स्वसा हिरण्यकशिपोर्भगिनी "दितेः सुतो हिरण्याक्षो हिरण्यकशिपुस्तथा । कन्या च सिंहिका नाम बभूव कुरुसत्तम ॥" इति पुराणांतरोक्तेः ॥ १३ ॥ यस्य राहोः ॥ १४ ॥ वातापेर्ब्रह्मवरोस्ति मेषरूपिणं त्वां भक्षितं यदि कश्चिदाह्वयेत्तदा त्वं भक्षितुर्देहं विदार्य स्वरूपेण बहिरायास्यसीति महाभारते वर्णितमगस्त्योपाख्याने तौ चेल्वलवातापी ब्राह्मणकुलहनने प्रवृत्तौ महामुनिनाऽगस्त्येन तयोर्वातापिर्भक्षित्वा जीर्णतां नीतः इल्वलश्च स्वहनने प्रवृत्तो हुंकारेण भस्मसात्कृत इति श्रीवाल्मीकीयेऽपि वर्णितमित्यभिप्रेत्येवाह—योऽगस्त्यायेति ॥ १५ ॥ तस्य विरोचनस्य दर्वीनाम्न्या भार्यायाः सकाशात् ॥ १६ ॥ यद्वेत्यस्य स्थाने पाठांतरे इत्यपेक्षितमिति भाति । तच्च 'तस्यानुभावं सुश्लोक्यम्' इत्येवं रूपम् । अभिधास्यते कथ्यते व्यासेन द्वितीयांतपक्षे व्यास इति कर्तृप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाण आराध्य गिरिशं लेभे तद्गणमुख्यताम् ॥ यत्पार्श्वे भगवानास्ते ह्यद्यापि पुरपालकः॥१८॥ मरुतश्च दितेः पुत्राश्चत्वारिंशन्नवाधिकाः ॥ त आसन्नप्रजाः सर्वे नीता इंद्रेण सात्मताम् ॥ १९ ॥ राजोवाच ॥ कथं त आसुरं भावमपोह्यौत्पत्तिकं गुरो ॥ इंद्रेण प्रापिताः सात्म्यं किं तत्साधुकृतं हि तैः ॥ २० ॥ इमे श्रद्दधते ब्रह्मन्नृषयो हि मया सह ॥ परिज्ञानाय भगवंस्तन्नो व्याख्यातुमर्हसि ॥ २१ ॥ सूत उवाच ॥ तद्विष्णुरातस्य स बादरायणिर्वचो निशम्याहृतमल्पमर्थवत् ॥ सभाजयन्संनिभृतेन चेतसा जगाद सत्रायण सर्वदर्शनः ॥ २२ ॥ श्रीशुक उवाच ॥ हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत् ॥ २३ ॥ कदा नु भ्रातृहंतारमिंद्रियाराममुल्बणम् ॥ अक्लिन्नहृदयं पापं घातयित्वा शये सुखम् ॥ २४ ॥ कृमिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्य च ॥ भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः ॥ २५ ॥

तस्य गणेषु मुख्यतां प्राधान्यम् ॥ १८ ॥ सात्मतां समानरूपताम् ॥ १९ ॥ सात्म्यं देवत्वं प्रापिताः ॥ २० ॥ २१ ॥ आहृतं सादरम् । अल्पं मिताक्षरम् । अर्थवद्बह्वर्थयुक्तम् । सत्रमयनमाश्रयो यस्य हे सत्रायण शौनक ॥ २२ ॥ शक्रस्य पार्ष्णिग्राहेण पृष्ठतः सहायेन ॥ २३ ॥ भ्रातृहंतारमिंद्रं मारयित्वा सुखं शये स्वपिमि सुखिनी कदा स्यामिति चिंतयामास दितिः । उल्बणं क्रूरम् । अक्लिन्नहृदयं कठिनचित्तम् ॥ २४ ॥ ननु राजा स्वदेहरक्षार्थमन्येषां घातं करोत्येव किमत्र चित्रं तत्राह

दमध्याहार्यम् ॥ १७ ॥ तस्य गिरिशस्य । भगवान् गिरिश एव ॥ १८ ॥ अप्रजाः संततिहीनाः ॥ १९ ॥ अपोह्य त्याजयित्वा । हे गुरो इति । संदिग्धोर्थो हि गुरुत एव पृच्छयते इति भावः । पुराणवक्तुर्हि बृहन्नारदीयेऽष्टादशगुरुषु मुख्यत्वमुक्तम् "उपाध्यायः पिता माता ज्येष्ठभ्राता महीपतिः । मातुलश्वशुरौ चाथ मातामहपितामहौ ॥ वर्णज्येष्ठः पितृव्यश्चोपनेता ह्यन्नदस्तथा । भयत्राता हितकरो गुरुभ्रातृसुतौ तथा ॥ पुराणश्राविना चैते पुंसोऽत्र गुरवो मताः । पुराणश्राविता चैषु मुख्यो गुरुरुदाहृतः ॥ धर्माधर्मोपदेशेन जनानुद्धरते यतः । निवर्त्तयति योऽधर्माद्धर्मे चाथ प्रवर्त्तयेत् ॥ पुरावृत्तश्रावणेन स चाष्टादशसु स्फुटम् । सदा मान्यो व्यासरूपो गुरुधर्मपरायणैः ॥" इति । उत्पत्त्या जातमौत्पत्तिकम् । तत्तस्येंद्रस्य । तैर्मरुद्भिः । साधु सम्यक्त्वम् । कृतं संपादितम् ॥ २० ॥ ननु भवान्कथमिमां बहिरंगां कथां शुश्रूषते तत्राह—इम इति । मया सहेति । स्वस्य गौणत्वं बोधयंस्तथैव व्यंजितवान् । हे भगवन्निति सर्वज्ञत्वमाह ॥ २१ ॥ आहृतमृषीणामादरेण सहितम् । बह्वर्थयुक्तम् । ऋष्यभिप्रेतश्रीशुकाभिप्रेतसिद्धियुक्तम् अथ वाऽर्थवत् एतच्च भगवदाराधनविशेषसंबंधेनैव भवेदिति स्वाभीष्टयुक्तं संनिभृतेन श्रीभगवत्सुखसंपूर्णेनातस्तदपि भगवत्संबंधे योजयिष्यतीति भावः । सर्वदर्शनः सर्वज्ञः । हे सत्रायणेति । यज्ञशालागतेन शास्त्रवृत्तांतेनैव कालो नेयस्तत्त्वं शृण्विति भावः ॥ २२ ॥ पृष्ठतः सहायेन परोक्षसाहाय्यकर्त्रेत्यर्थः ॥ २३ ॥ सुखं शये सुखेन निद्रामीत्यर्थः ॥ २४ ॥ अत्राक्षिपति—नन्विति । पुत्रादिभिर्दग्धस्य पूर्वपूर्वनृपाणामपि तथा दृष्टत्वादिति भूतनिर्देशः । तत्र स्वार्थाज्ञाने । तस्मादिंद्र एव विवेकशून्य इति व्यंजयति । अथ च स्वयमेव विवेकशून्याय त इंद्रं जिघांसुः स्वयमपींद्रमेव भूतद्रुहं स्वयमक्लिन्नहृदयापींद्रमेवाक्लिन्नहृदयं स्वयं स्वार्थानभिज्ञापींद्रमेव स्वार्थानभिज्ञं मन्यते इत्यतो

१—विप्रः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः ॥ मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे ॥ २६ ॥ इतिभावेन सा भर्तुराचचारासकृत्प्रियम् ॥ शुश्रूषयानुरागेण प्रश्रयेण दमेन च ॥ २७ ॥ भक्त्या परमया राजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो जग्राह भावज्ञा सुस्मितापांगवीक्षणैः ॥ ॥ २८ ॥ एवं स्त्रिया जडीभूतो विद्वानपि विदग्धया ॥ बाढमित्याह विवशो न तच्चित्रं हि योषिति ॥ २९ ॥ विलोक्यैकांतभूतानि भूतान्यादौ प्रजापतिः ॥ स्त्रियं चक्रे स्वदेहार्धं यया पुंसां मतिर्हृता ॥ ३० ॥ एवं शुश्रूषितस्तात भगवान्कश्यपः स्त्रिया ॥ प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ॥ ३१ ॥ कश्यप उवाच ॥ वरं वरय वामोरु प्रीतस्तेऽहमनिंदिते ॥ स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ॥ ३२ ॥ पतिरेव हि नारीणां दैवतं परमं स्मृतम् ॥ मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ॥ ३३ ॥

कृमीति । ईशः प्रभुरित्यभिहितस्यापि यस्य पूर्वेषां राज्ञां देहस्य मरणानंतरं द्वित्रिदिनावस्थितस्य कृमय इति श्वादिभिर्भक्षितस्य तु विष्ठेति दग्धस्य तु भस्मेति संज्ञा आसीत्तत्कृते तस्य देहस्यार्थे यो भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद न वेदैव । तत्र हेतुः । यतो भूतद्रोहान्निरयो भवति॥ २५॥इदं देहादिकं ध्रुवं नित्यमाशासानस्य मन्यमानस्यात उन्नद्धमुच्छृंखलं चेतो यस्य तस्येन्द्रस्य यो मदस्तस्य शोषकः पुत्रो मे येन हेतुना भूयाद्भवेत् ॥२६॥ तत्र भर्तुः प्रियाचरणमेव हेतुरिति भावेन सा भर्तुः प्रियमसकृदाचचार ॥ २७ ॥ २८ ॥ विवशः स्त्रीपरतंत्रः सन्बाढं तव मनोरथं पूरयिष्यामीति यदाह तन्न चित्रम् ॥ २९ ॥ तत्र हेतुमाह । विलोक्येति । एकांतभूतानि निःसंगानि मैथुनेन सृष्टिवृद्ध्यर्थं स्वदेहार्धमेव स्त्रियं चक्रे ॥ ३० ॥ एवं स्त्रिया शुश्रूषितः सन् ॥ ३१ ॥ इह चकारात्परत्र च अगमोऽप्राप्यः ॥ ३२ ॥ ननु परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह । पतिरेवेति । ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवतमिति प्रसिद्धम् । सत्यम् । स एव स्वाधिकारेण रूपभेदैः पूज्यत इत्याह

विवेकोप्यविवेकिनामविवेकमेव द्रढयतीति दर्शितम् ॥ २५ ॥ येनैव तेन दुश्चेष्टितेन हेतुनैव तस्य मदशोषकः सुतो मे भूयादिति प्रार्थनेति चक्रवर्ती ॥ २६ ॥ भर्त्तरि तुष्यति स्त्रीणां मनोरथः सिध्यति तस्मादहं पतिमेव परितोषयामीति भावेनाभिप्रायेणेति विश्वनाथः । भर्तुः प्रियाचरणमेव स च हेतुरिति स्वाम्यभिप्रायः ॥ २७ ॥ राजन्निति । यथा राजानो नीत्या स्वकार्यं तथा सापीति भावः ॥ २८ ॥ विदग्धया पुरुषमोहनकुशलया अपिना किमविद्वानिति ध्वनितम् ॥ २९ ॥ मतिर्हृतेत्यनेन स्त्रीपदार्थोऽप्युक्तः स्तृणाति पुरुषविवेकमाच्छादयतीति स्त्रीति निरुक्तेः । स्तृणातेरपि ड्रट् प्रत्ययो बाहुलकाद्भवतीति ज्ञेयम् ॥ ३० ॥ तातेति । श्रवणोत्कंठावृद्धये संबुद्धिः ॥ ३१ ॥ वामोरु इति । त्वदूरुदर्शनस्पर्शनादिनैवाहं मोहितो वरदो जात इति भावः । अनिन्दित इति । निंदाजनको वरो न वरणीय इति भावः । कोऽगमो न कोपीति ॥ ३२ ॥ अत्राक्षिपति—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एव देवतालिंगैर्नामरूपविकल्पितैः ॥ इज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ॥ ३४ ॥ तस्मात्पतिव्रता नार्यः श्रेयस्कामाः सुमध्यमे ॥ यजंतेऽनन्यभावेन पतिमात्मानमीश्वरम् ॥ ३५ ॥ सोऽहं त्वयाऽर्चितो भद्रे ईदृग्भावेन भक्तितः ॥ तत्ते संपादये काममसतीनां सुदुर्लभम् ॥ ३६ ॥ दितिरुवाच ॥ वरदो यदि मे ब्रह्मन्पुत्रमिंद्रहणं वृणे ॥ अमृत्युं मृतपुत्राऽहं येन मे घातितौ सुतौ ॥ ३७ ॥ निशम्य तद्वचो विप्रो विमनाः पर्यतप्यत ॥ अहो अधर्मः सुमहानद्य मे समुपस्थितः ॥ ३८ ॥ अहो अर्थेंद्रियारामो योषिन्मय्येह मायया ॥ गृहीतचेताः कृपणः पतिष्ये नरके ध्रुवम् ॥ ३९ ॥ कोऽतिक्रमोऽनुवर्तंत्याः स्वभावमिह योषितः ॥ धिङ् मां बताबुधं स्वार्थे यदहं त्वजितेंद्रियः ॥ ४० ॥ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ॥ हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ॥ ४१ ॥ न हि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनाम् ॥ पतिं पुत्रं भ्रातरं वा घ्नंत्यर्थे घातयंति च ॥ ४२ ॥ प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् ॥ वधं नार्हति चेंद्रोऽपि तत्रेदमुपकल्पते ॥ ४३ ॥

मानस इति सार्धेन ॥ ३३ ॥ देवतालिंगैर्मूर्तिभिरुपलक्षितः । तान्येवाह । नाम इंद्रादि रूपं वज्रहस्तत्वादि ताभ्यां विविधं कल्पितैः ॥ ३४ ॥ ३५ ॥ ३६ ॥ इंद्रहणं इंद्रहंतारम् । अमृत्युं मृत्युशून्यम् । येनेंद्रेण विष्णुना सहायेन घातितौ ॥ ३७ ॥ ३८ ॥ ३९ ॥ स्वभावमनुवर्तमानाया योषितः कोऽतिक्रमोऽपराधः ॥ ॥ ४० ॥ स्वभावमेवाह द्वाभ्याम् । शरत्पद्मस्येवोत्सवो विकासो यस्मिन् । श्रवणे श्रुती तयोरमृतम् । क्षुरधारोपमं चित्तम् ॥ ४१ ॥ स्वाशिषात्मनां स्वार्थकामनयात्मवत्प्रेष्ठत्वेन प्रतीयमानानाम् ॥ ४२ ॥ तत्रेदमुपकल्पते योग्यं भवति । अयं भावः । वैष्णवं व्रतं तावदुपदेक्ष्यामि तेनैवास्याः शुद्धचित्ताया इंद्रं प्रति क्रोधो निवर्तिष्यते

नन्विति ॥ ३३ ॥ पुनरत्राक्षिपति—नन्विति । तानि लिंगानि इंद्राय स्वाहाऽग्नये स्वाहेत्यादिभिर्नामरूपभेदेन पुंभिः कर्मिलोकैर्भगवानेवेज्यते यथा तथा स्त्रीभिः पतिरूपेणेत्यर्थः ॥ ३४ ॥ सुमध्यम इत्यपि संबुद्धिः पूर्ववद्बोध्या ॥ ३५ ॥ भद्रे इति । भद्ररूपो वरः प्रार्थनीय इति भावः । लक्ष्मीं पश्यतीतीदृग्विष्णुस्तद्भावस्ताद्रूप्यं तेन विष्णुबुद्ध्येत्यर्थः । तत्ततः ॥ ३६ ॥ ब्रह्मन्निति । ब्रह्मा यथा प्रार्थितस्तथा वरान्ददाति त्वमपि तादृश एवातो यथा प्रार्थितं वरं देहीति भावः । हंतेर्गत्यर्थत्वात्पक्षे इंद्रानुगम् । अमृत्युं सर्वैरवध्यं पक्षे देवत्वादमरम् । ऊनपंचाशद्भिरेक एव देवो मारुत इत्येकवचनम् ॥ ३७ ॥ विमना इति । दितेरीक्षितोऽर्थो हींद्रमृतिं विना न संभवेदित्याकलय्य दुर्मना अभूदिति भावः ॥ ३८ ॥ ३९ ॥ स्वभावं क्रौर्यम् ॥ ४० ॥ को वेद न कोपीत्यर्थः । "स्त्रियाश्चारित्रं पुरुषस्य भाग्यं देवा न जानंति कुतो मनुष्याः" इत्यभियुक्तोक्तेः ॥ ४१ ॥ स्वस्याशिषा कामनयैवात्मा यत्नो यासां न तु पत्यादिसुखापेक्षयेति भावः । अलुक्समासः आशिषा शब्दष्टाबंतो वा । अर्थे स्वप्रयोजननिमित्तम् ॥ ४२ ॥ अत्राशयमाह—अयं भाव इति । इंद्रे क्रोधनिवृत्तेस्तद्वधमनाकांक्षंत्याऽनया विहितस्य वैष्णवव्रतस्य कामितदुष्फलदातानर्हत्वान्नेंद्रघाती भविष्यति । किं तु वरप्रार्थनप्रदानवाक्ययोर्हंतिधातुप्रयोगाद्धंतेश्च गत्यर्थत्वादिन्द्रानुगोऽमरः पुत्रो भविष्यति व्रतस्य दीर्घकालत्वे सत्यवश्यं वैगुण्यं च किंचिद्भविष्यतीति तेनैवास्या अविज्ञाया मनःसमाधानश्च भविष्यतीति । वस्तुतस्तु । वैष्णवव्रतस्य वैगुण्येऽपि फलसिद्धिरवश्यं भाविनीत्यस्याः श्रमश्च सफल एव भविष्यतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति संचिंत्य भगवान्मारीचः कुरुनंदन ॥ उवाच किंचित्कुपित आत्मानं च विगर्हयन् ॥ ४४ ॥ कश्यप उवाच ॥ पुत्रस्ते भविता भद्रे इंद्रहा देवबांधवः ॥ संवत्सरं व्रतमिदं यद्यंजो धारयिष्यासि ॥ ४५ ॥ दितिरुवाच ॥ धारयिष्ये व्रतं ब्रह्मन्ब्रूहि कार्याणि यानि मे ॥ यानि चेह निषिद्धानि न व्रतं घ्नंति यानि तु ॥४६॥ कश्यप उवाच ॥ न हिंस्याद्भूतजातानि न शपेन्नानृतं वदेत् ॥ न छिंद्यान्नखरोमाणि न स्पृशेद्यदमंगलम्॥४७॥ नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः ॥ न वसीताधौतवासः स्रजं च विधृतां क्वचित् ॥ ४८॥ नोच्छिष्टं चंडिकान्नं च सामिषं वृषलाहृतम् ॥ भुंजीतोदक्यया दृष्टं पिबेदंजलिना त्वपः ॥४९॥ नोच्छिष्टाऽस्पृष्टसलिला संध्यायां मुक्तमूर्धजा ॥ अनर्चितासंयतवाङ्नासंवीता बहिश्चरेत् ॥५०॥

पुत्रस्त्वमर्त्यो भविष्यति दीर्घकालत्वे च व्रतस्य कथंचिद्वैगुण्ये सतींद्रस्य वधोऽपि न भविष्यतीति ॥ ४३ ॥ ४४ ॥ हे भद्रे अंजः यथावद्यदि धारयिष्यसि तर्हीं द्रहा भविष्यति । वैगुण्ये तु देवबांधवो भविष्यति वैष्णवत्वाद्व्रतस्य कथंचिद्वैगुण्येऽपि सति सर्वथा वैकल्याभावात् ॥ ४५ ॥ कार्याण्यावश्यकानि । व्रतं यानि न घ्नंति नावश्यकानि न च निषिद्धानि किं त्वभ्यनुज्ञातानि तानि सर्वाण्यपि ब्रूहि ॥४६॥ तत्रैकत्रिंशन्निषेधानाह न हिंस्यादिति पंचभिः । न शपेन्नाक्रोशेत् । यदमंगलं कपालास्थ्यादिकं तन्न स्पृशेत् ॥ ४७ ॥ नाप्सु प्रविश्य स्नायात् । पूर्वं विधृतां स्रजं पुनर्न धारयेत् ॥ ४८ ॥ भोजने पंच निषेधानाह । नोच्छिष्टमिति । चंडिकान्नं भद्रकाल्यै निवेदितं पिपीलिकादिदूषितं वा । अंजलिना त्वपो न पिबेत् ॥४९॥ गृहाद्बहिर्निर्गमे सप्त निषेधानाह । नोच्छिष्टेति । अनर्चिता मंडनहीना । असंवीताऽप्रावृता॥५०॥

''नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्'' इति श्रीमुखोक्तेः ॥ ४३ ॥ हे कुरुनंदनेति । यथा त्वं ब्राह्मणांसे मृतोरगनिवेशनानंतरं शुद्धवंश्यत्वादात्मानमहो मया नीचमनार्यवत्कृतम् 'निरागसि ब्रह्मणि गूढतेजसि' इत्युक्तेर्गर्हितवांस्तथा कश्यपोऽपीति भावः ॥ ४४ ॥ इंद्रहा इंद्रघाती । अदेवानामसुराणाम् । बांधव इति । दितिं बोधयितुमिष्टोर्थः इंद्रहा इंद्रानुगो देवानां बांधव इति स्वाभीष्टोर्थः । भद्रे इति । दित्यभीष्टाऽकारप्रश्लेषे च स्वाभीष्टा संबुद्धिरपि ज्ञेया ॥ ४५ ॥ ब्रह्मन्निति । यथार्थवक्तृत्वमाह ॥ ४६ ॥ न हिंस्यादिति प्रथमत एवेंद्रवधाशंका निरस्ता । कपालं भिन्नघटाद्यंगम् । इहादिनांगारादिग्रहः । ॥ ४७ ॥ न कुप्यतं जातेष्यपराधे दुर्जनैर्देवद्विजवेदनिंदकैर्मद्यमांसादिप्रसक्तैर्वा ''श्रुतिस्मृतिपुराणादिदेवब्राह्मणनिंदकाः । मद्यमांसादिसक्ताश्च पिशुना दुर्जनाः स्मृताः ॥'' इति संहितोक्तेः । अधौतवासः कटिस्पृष्टं कार्पासं वासो यदि न धौतं तन्न परिदध्यात् । ''कार्पासं कटिनिर्मुक्तं कौशेयं भोजने धृतम् । क्षालनाच्छुद्धिमाप्नोति वातेनौर्णं हि शुध्यति ॥'' इति स्मृतेः । अन्येन विधृतां स्वयं विधृतां वा स्रजं पुष्पमालाम् ॥ ४८ ॥ भद्रकाली दुर्गा ननु 'न त्यजेद्देवनैवेद्यम्' इत्युक्तेः कथमुक्तं भद्रकाल्यै निवेदितं नाद्यादिति तत्राह—पिपीलिकादीति 'चंडिका स्यात्पिपीलिका' इत्यभिधानात् । आदिना मक्षिकादिग्रहः । आमिषम् 'आमिषं शूद्रशेषान्नं कन्यावित्तं तथामिषम् । आमिषं चर्मगं वारि प्रेतान्नं चामिषं स्मृतम्'' इति ''गोच्छागीमहिषीदुग्धादन्यदुग्धमिहामिषम्'' इत्यादिना सप्तमस्कंधे विस्तरेण वक्ष्यामः । वृषलेन शूद्रेण स्वधर्मविमुखेन वा नीतं वृषं धर्मं लुनातीति वृषल इति व्युत्पत्तेः । 'उदक्या तु रजस्वला' इत्यभिधानात् ॥ ४९ ॥ अस्पृष्टसलिलाऽनाचांता । असंयतवाक्—त्यक्तमौना । अपावृता वस्त्रवर्जिता ॥ ५० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाधौतपादाऽप्रयता नार्द्रपान्नो उदक्छिराः ॥ शयीत नापराङ्नान्यैर्न नग्ना न च संध्ययोः ॥ ५१ ॥ धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता ॥ पूजयेत्प्रातराशात्प्राग्गोविप्राञ्छ्रियमच्युतम् ॥ ५२ ॥ स्त्रियो वीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः ॥ पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तम् ॥ ॥ ५३ ॥ सांवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ॥ धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ॥ ५४ ॥ बाढमित्यभिप्रेत्याथ दिती राजन्महामनाः ॥ काश्यपं गर्भमाधत्त व्रतं चांजो दधार सा ॥ ५५ ॥ मातृष्वसुरभिप्रायमिंद्र आज्ञाय मानद ॥ शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः॥ ॥ ५६ ॥ नित्यं वनात्सुमनसः फलमूलसमित्कुशान् ॥ पत्रांकुरमृदोपश्च कालेकाल उपाहरत ॥ ५७॥ एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ॥ प्रेप्सुः पर्यचरज्जिह्मो मृगहेव मृगाकृतिः ॥५८॥ नाध्यगच्छद्व्रतच्छिद्रं तत्परोऽथ महीपते ॥ चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह॥५९॥

शयनेऽष्टौ निषेधानाह । नाधौतपादेति नापराक्पश्चिमाशिराः ॥ ५१ ॥ कार्याण्याह धौतवासा इति द्वाभ्याम् प्रातराशात्प्रथमभोजनात् ॥ ५२ ॥ वीरवतीर्जीवद्भर्तृकाः । आचर्य संपूज्य । कोष्ठगतं कुक्ष्यंतरगतम् ॥ ५३ ॥ पुंसवनं पुत्रोत्पत्तिकरम् । तुभ्यं तव ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ हरिरिंद्रो व्रतस्य छिद्रं प्रेप्सुः प्राप्तुमिच्छुः । जिह्मः कुटिलः साधुवेषः । मृगहा लुब्धको यथा मृगवंचनाय मृगवेषो भवति तद्वत् ॥ ५८ ॥ केन मे शिवं स्यादिति चिंतां प्राप्तः छिद्रान्वेषणे तत्परः ॥ ५९ ॥

अधौतपादा पादशौचहीना।अप्रयताऽपवित्रा ‘पवित्रः प्रयतः पूतः’इत्यमरः।आर्द्रपात् प्रक्षालनोत्तरं वस्त्रेणामार्जितपादा।उदक्छिराःउत्तराशाकृतशिराः।“प्राच्यां दिशि शिरः शस्तं याम्यायामथ वा नृप।सदैव स्वपतःपुंसो विपरीतं न शोभनम्॥’’ इति पुराणांतरात्। पुंस इत्युपलक्षणम्।अपरां पश्चिमदिशमंचति शिरसा प्राप्नोति अपराक् तादृशं यथा स्यात्तथेति क्रियाविशेषणत्वेऽपि तद्विशेषणत्वे एव तात्पर्यात्।पश्चिमशिरा इत्येवार्थः।यद्वाऽपराची प्रतीची ततो ल्यब्लोपे पंचम्यंतात् “दिक्शब्देभ्यः’’ इत्यादिना स्वार्थ एवास्तातिप्रत्ययः।तस्य च “अंचतेर्लुक्’’इति लुकि“लुक् तद्धितलुकि’’इति स्त्रीप्रत्ययस्य च लुकि अपरागिति। ते प्रतीचीमारभ्य तां पूर्वाङ्गसात्कृत्येति तथैवार्थ इति संदर्भः ॥ ५१ ॥ ५२ ॥.“युक्ता या पतिपुत्राभ्यां ज्ञेया वीरवती हि सा’’ इत्यपि केचित्॥ ५३ ॥ पुमान्सूयतेऽनेनेति पुंसवनम् । संवत्सरसाध्यं सांवत्सर अविप्लुतं सांगोपांगम् ॥ ५४ ॥ राजन्निति । राजानो यथा निजाभिलषिताप्तये परानिष्टमनसो भवंति तद्वत्साऽपीति भावः । काश्यपं कश्यपेनाहितं काश्यपं क्वचित्कश्यपादित्यपि पाठः । अंजः शीघ्रम् ॥ ५५ ॥ मातृष्वसुर्दितेः कविः स्वकार्यसंपादननिपुणः । हे मानदेति । यथा राजानो रिपोरपि पूर्वं मानं कृत्वा पश्चात्तदनिष्टं कुर्वंति तथायमपि पूर्वं मानं दत्त्वा पश्चात्तत्खंडिष्यतीति भावः । मानदेत्यत्र डुदाञ्दापोर्द्वयोरर्थावलंबनेनोभयार्थसिद्धिः ॥ ५६ ॥ पत्राणि चांकुराणि च मृच्चैषां समाहारः पत्रांकुरमृत् तेन सह अपश्च जलानि ॥ ५७ ॥ व्रतस्य छिद्रं प्रेक्षोरिंद्रस्याप्यविज्ञत्वमेव यतो विष्णोः स्मरणेन कीर्त्तनेन वा सच्छिद्रमपि निश्छिद्रं स्यात् । तस्य विष्णोरिदं व्रतं छिद्रेप्यच्छिद्रमेव भवेत् । तदुक्तं “यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमीश्वरम्’’ इति “मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः । सर्वं करोति निश्छिद्रं नामसंकीर्त्तनं तव ॥ ’’ इति वामनं प्रति भार्गवोक्तेश्च । किञ्चोपरिष्टादिंद्रेणापि व्रतस्य निश्छिद्रतामनुभविष्यता वक्ष्यते च “महापुरुषपूजायाः सिद्धिः काप्यनुषंगिणी’’ इति । तद्वत्परिचारकलोकाकृतिः । हे नृपेति । नृपो यथा मिलित्वा रिपुं तच्छिद्रान्वेषणपरो भवति तद्वदिंद्रोपीति भावः ॥ ५८ ॥ यतः छिद्रं न प्राप्तमथातः । महीपते इति । यथा प्रबलरिपुच्छिद्राप्राप्तौ महीपतेरपि चिंतापतति किमुत त्रैलोक्याधिपतेर्यदि सा भवेदिति भावः ॥ ५९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकदा सा तु संध्यायामुच्छिष्टा व्रतकर्शिता ॥ अस्पृष्टवार्यधौतांघ्रिः सुष्वाप विधिमोहिता ॥ ६० ॥ लब्ध्वा तदंतरं शक्रो निद्राऽपहृत चेतसः ॥ दितेः प्रविष्ट उदरं योगेशो योगमायया॥६१॥ चकर्त सप्तधा गर्भं वज्रेण कनकप्रभम् ॥ रुदंतं सप्तधैकैकं मा रोदीरिति तान्पुनः॥६२॥ ते तमूचुः पाट्यमानाः सर्वे प्रांजलयो नृप ॥ नो जिघांससि किं इंद्र भ्रातरो मरुतस्तव ॥ ६३ ॥ मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥ अनन्यभावान्पार्षदानात्मनो मरुतां गणान् ॥ ६४ ॥ न ममार दितेर्गर्भः श्रीनिवासानुकंपया ॥ बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ॥ ६५ ॥ सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यताम् ॥ संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ॥ ६६ ॥ सजूरिंद्रेण पंचाशद्देवास्ते मरुतोऽभवन् ॥ व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ॥६७॥ दितिरुत्थाय ददृशे कुमाराननलप्रभान् ॥ इंद्रेण सहितान्देवी पर्यतुष्यदनिंदिता ॥६८॥ अथेंद्रमाह ताताहमादित्यानां भयावहम् ॥ अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुष्करम् ॥६९॥ एकः संकल्पितः पुत्रः सप्तसप्ताभवन्कथम्॥ यदि ते विदितं पुत्र सत्यं कथय मा मृषा॥७०॥ इंद्र उवाच॥ अंब तेऽहं व्यवसितमुपधार्यागतोंतिकम्॥ लब्ध्वांतरोच्छिदं गर्भमर्थबुद्धिर्न धर्मवित् ॥७१॥

अस्पृष्टवारिश्चासावधौतांघ्रिश्च ॥ ६० ॥ निद्रयाऽपहृतं चेतो यस्याः ॥ ६१ ॥ मा रोदीरित्युपलालयन्निव तान्छकलीकृतान् पुनः एकैकं सप्तधा चकर्त चिच्छेद ॥ ६२ ॥ पाट्यमानाः छिद्यमानाः ॥ ६३ ॥ कौशिक इंद्रः । गणान्सप्त । "सप्तगणा वै मरुतः" इति श्रुतेः ॥ ६४ ॥ ६५ ॥ ६६॥ सजूः सह मातृदोषं सपत्नभावम् ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ दित्या निष्कपटमुक्ते सतींद्रोऽपि निष्कपटमेवाह । अंबेति । लब्धमंतरं येन । अर्थे एव बुद्धिर्यस्य ॥ ७१ ॥

एकदेंद्रादृष्टवशात्।विधिना विधात्रा मोहिता॥६०॥योगस्य परकायप्रवेशाख्यस्य सिद्ध्यर्था या माया तया तत्र हेतुः योगेशोऽभ्यस्तसमस्तयोगशास्त्रः॥६१॥अत्राल्पकाल एव बहुपुण्यपापभोगिनो जीवस्य योगिनो वा कायव्यूह इवैकस्य जीवस्योनपंचाशत्काय व्यापकत्वमिति केचित् । भाविदृष्ट्या प्रथममेवैकस्मिन्देहे प्रविष्टानामेकोनपंचाशज्जीवानामिंद्रकृतदेहविभागेनैकैकदेहप्राप्तिरित्यपरे । इंद्रकृतखंडेष्वन्येषामप्यष्टचत्वारिंशज्जीवानां तत्क्षण एव प्रवेशो यथा लतागुल्मानां केषांचित्खंडखंडीकृत्यैव भूमावारोपितानां पृथक्पृथक्प्ररोहोद्गमदर्शनात् पृथक्पृथग्जीवस्य प्रवेशोऽनुमीयते इत्यन्ये च प्राहुः । अयमेव न्यायो दुर्योधनादिजन्मन्यपि वर्णितो महाभारत आदिपर्वणि । "स्वोदरं घातयामास गांधारी दुःखमूर्च्छिता । ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता॥" इत्यारभ्य "सा सिच्यमाना त्वष्ठीला बभूव शतधा तदा । अंगुष्ठपर्वमात्राणां गर्भाणां पृथगेव तु ॥ " इत्यंतेन ॥ ६२ ॥ नृपेति । यथा त्वं पीडितैर्नृभिः प्रार्थ्यसे तथा तैरिंद्रोऽपीति भावः ॥ ६३ ॥ मरुतां गणत्वे श्रुतिमाह—सप्तेति । स्पष्टार्थेयम् ॥ ६४ ॥ अहो अमोघवज्रहतो दितेर्गर्भः कथं न ममार तत्राह—श्रीनिवासेति । अत्र त्वमेव दृष्टांतः 'द्रौण्यस्त्र—' इति ॥ ६५ ॥ साम्यताम् । समशब्दाच्चतुर्वर्णादित्वात्स्वार्थे ष्यञ् तदंतात्तल् समानरूपतामित्यर्थः । चक्रवर्तिसंमतस्तु सात्मतामिति पाठः ॥ ६६ ॥ मातृदोषमासुरत्वम् । सजूस्सह । 'अश्विभ्यामुषसा सजूः' इत्यादौ सजूश्शब्दः सहार्थे दृश्यते इति । हरिणेंद्रेण विष्णुना वा ॥ ६७ ॥ अनिंदिता वैष्णवव्रतप्रभावाज्जातशांतस्वभावाऽत एव पर्यतुष्यत् ॥ ६८ ॥ अथ बहुकुमारदर्शनानंतरम् । तातेति । अनिन्दितत्वादेवोक्तवती ॥ ६९ ॥ मत्पुत्रा अप्यनेन पाविता अतोऽयं पुनातीति पुत्र इत्यन्वर्थनामैवेत्यभिप्रेत्याह—हे पुत्रेति ॥ ७० ॥ अहो अनयैवाहमवधानत्यागेन रक्षितोऽस्मी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्तो मे सप्तधा गर्भ आसन्सप्त कुमारकाः ॥ तेऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ॥ ७२ ॥ ततस्तत्परमाश्चर्यं वीक्ष्याध्यवसितं मया ॥ महापुरुषपूजायाः सिद्धिः काप्यानुषंगिणी ॥ ७३ ॥ आराधनं भगवत ईहमाना निराशिषः ॥ ये तु नेच्छंत्यपि परं ते स्वार्थकुशलाः स्मृताः ॥ ७४ ॥ आराध्यात्मप्रदं देवं स्वात्मानं जगदीश्वरम् ॥ को वृणीते गुणस्पर्शं बुधः स्यान्नरकेऽपि यत् ॥ ७५ ॥ तदिदं मम दौर्जन्यं बालिशस्य महीयसि ॥ क्षंतुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥ ७६ ॥ श्रीशुक उवाच ॥ इंद्रस्तयाऽभ्यनुज्ञातः शुद्धभावेन तुष्टया ॥ मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥ ७७ ॥ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ मंगलं मरुतां जन्म किं भूयः कथयामि ते ॥७८॥ इति श्रीमद्भा० म० ष० मरुद्गणजन्मकथनं नाम अष्टादशोऽध्यायः ॥ १८ ॥ राजोवाच ॥ व्रतं पुंसवनं ब्रह्मन्भवता यदुदीरितम् ॥ तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥ १ ॥ श्रीशुक उवाच ॥ शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया ॥ आरभेत व्रतमिदं सार्वकामिकमादितः ॥ निशम्य मरुतां जन्म ब्राह्मणाननुमंत्र्य च ॥ २ ॥ स्नात्वा शुक्लदती शुक्ले वसीताऽलंकृताऽम्बरे ॥ पूजयेत्प्रातराशात्प्राग्भगवंतं श्रिया सह ॥३॥ अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते ॥ महाविभूतिपतये नमः सकलसिद्धये ॥ ४ ॥

॥ ७२ ॥ ७३ ॥ अपि परं मोक्षमपि ॥ ७४ ॥ गुणस्पर्शं विषयभोगं बुधः को वृणीते यद्यस्मान्नरकेऽपि विषयभोगः स्यात् ॥ ७५ ॥ महीयसि हे महत्तमे । मृतः सन्नुत्थितः ॥ ७६ ॥ ७७ ॥ ७८ ॥ इति श्रीमद्भागवते षष्ठस्कंधे टीकायामष्टादशोऽध्यायः ॥ १८ ॥ ऊनविंशे तु यत्प्रोक्तं कश्यपेन दितेर्व्रतम् ॥ तदेव विवृतं लोकहिताय हरितोषणम् ॥ १ ॥ तस्य प्रकारमिति शेषः ॥ १ ॥ मार्गशिरे मासे शुक्लपक्षे । आदितः प्रतिपदि ॥ २ ॥ अनुमंत्र्य पृष्ट्वा । शुक्ला दंता यस्याः सा शुक्लदती धौतदंता अलंकृता सती पूजयेत् ॥ ३ ॥ आदौ तावन्नमस्कारमंत्रानाह अलमिति त्रिभिः । ते तुभ्यमलं

त्यत इयमप्यंबति रक्षतीत्यंबेत्यन्वर्थनाम्न्येवेति विमृश्याह—अंबेति । ' अंबि—रक्षणे' धातुः । अहो त्वया मद्गर्भच्छेदेन महानधर्मः कृतस्तत्राह—अर्थबुद्धिरिति । यथा त्वयार्थबुद्ध्या मन्नाशकव्रते धर्मो न विचारितस्तथा मयापीति भावः ॥ ७१ ॥ ७२ ॥ ततो वज्रेण बहुधा भेदेपि मरणाभावात् । काप्यनिर्वचनीया आनुषंगिणी अनुषंगप्राप्ता न तु मुख्या तेन मोक्षोप्यानुषंगिक एव न तु मुख्यं फलं भक्तेरिति ध्वनितम् ॥ ७३ ॥ तदेवाह—आराधनमिति । स्वार्थकुशला इति । " सत्यं दिशत्यर्थितमर्थितो नृणाम् " इत्याद्युक्तेः ॥ ७४ ॥ देवं कालिन्दीतटक्रीडापरम् । स्वात्मानं सुन्दरतरविग्रहं श्रीकृष्णमित्यर्थः । जगतामीश्वरम् 'तावंत्येव जगंत्यमूः' इत्युक्तेः । आत्मप्रदं नंदादिभ्य आत्मानमपि दत्वा तद्गोपालनपरम् । नरके नरकवन्मलिने श्वशूकरादिदेहे । " तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः । न लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा " इति श्रीनारदोक्तेः ॥ ७५ ॥ महीयसीति । महत्स्वेव क्षांतिरस्त्यन्यथा महत्त्वमेव न स्यादिति भावः । ' क्षमासारा हि साधवः ' इत्याद्युक्तेः । मातरिति । माता तु पुत्राणामपराधसहस्रमपि न गणयतीति भावः ॥ ७६ ॥ तया दित्या ॥ ७७ ॥ मंगलं श्रवणादिना मंगलकरम् ॥ ७८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ विवृतं व्याख्यानेन स्फुटितम् (१) हे ब्रह्मन्निति । सर्वज्ञोऽसीति भावः ॥ १ ॥ २ ॥ वसीत परिदध्यात् ॥ ३ ॥ अलमतिशयेन तुभ्यं नम एवास्तु देवांतरं यथा निजैश्वर्यसिद्ध्यर्थं सेवकानपेक्षते तथा न त्वमित्याह—निरपेक्षाय स्वाभाविकमहैश्वर्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा त्वं कृपया भूत्या तेजसा महिनौजसा ॥ जुष्ट ईशगुणैः सर्वैस्ततोसि भगवान्प्रभुः ॥ ५ ॥ विष्णुपत्नि महामाये महापुरुषलक्षणे ॥
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥ ६ ॥ ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुप-
हराणीति ॥ अनेनाहरहर्मंत्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शनस्नानवास उपवीतविभूषणगंधपुष्पधूपदीपोपहाराद्युपचारांश्च समाहित उपाहरेत्
॥ ७ ॥ हविःशेषं तु जुहुयादनले द्वादशाहुतीः ॥ ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति ॥ ८ ॥ श्रियं विष्णुं च वरदावाशिषां
प्रभवावुभौ ॥ भक्त्या संपूजयेन्नित्यं यदीच्छेत्सर्वसंपदः ॥ ९ ॥ प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा ॥ दशवारं जपेन्मंत्रं ततः स्तोत्रमुदीरयेत् ॥
॥ १० ॥ युवां तु विश्वस्य विभू जगतः कारणं परम् ॥ इयं हि प्रकृतिः सूक्ष्मा माया शक्तिर्दुरत्यया ॥ ११ ॥ तस्या अधीश्वरः साक्षात्त्वमेव पुरुषः
परः ॥ त्वं सर्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान् ॥ १२ ॥ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भवान् ॥ त्वं हि सर्वशरीर्यात्मा श्रीः शरीरेन्द्रियाशया ॥
नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥ १३ ॥

पर्याप्तमेव सर्वं न किंचिदन्यैः कृत्यमस्त्यतः केवलं ते तुभ्यं नमोऽस्तु । पर्याप्तौ हेतवः ॥ निरपेक्षाय हे पूर्णकाम महाविभूतिपतये लक्ष्मीपतये सकलाः सिद्धयोऽणिमाद्या यस्मिंस्तस्मै ॥ ४ ॥ भो ईश यथा यथावत् त्वं कृपादिभिर्जुष्टः महिना महत्त्वेन अन्यैश्च सत्यसंकल्पत्वादिभिः सर्वैर्गुणैः ततस्तस्मात् ॥ ५ ॥ महापुरुषस्य परमेश्वरस्येव लक्षणानि निरपेक्षत्वादीनि यस्यास्तस्याः संबोधनम् ॥ ६ ॥ पूजामंत्रमाह । ओं नम इति ॥ ७ ॥ हविःशेषमुपहारावशिष्टम् । होममंत्रं दर्शयति । ओमिति ॥ ८ ॥ प्रकर्षेण भवंत्याभ्यामिति प्रभवौ ॥ ९ ॥ १० ॥ ११ ॥ इज्या यज्ञाभिनिवर्तकः पुरुषव्यापारो भावनाख्यः । क्रिया लौकिकी ॥ १२ ॥ प्रत्ययो नामरूपयोः

वस्त्वादित्यर्थः । एवं पूर्णकामाय ते केन नैवेद्यादिना प्रीणयामि महाविभूतिपतये तुभ्यं कैर्गृहोद्यानरथगजदासीनृत्यगीतदुंदुभिघोषाद्यैः एवं सकलसिद्धये स्वर्गापवर्गप्रेमादिसिद्धिदात्र तुभ्यं कर्मज्ञानयोगभक्त्यादिसाधनार्पणैः कथं प्रीणयामीति भावः ॥ ४ ॥ तदपि त्वत्कृपया सर्वं घटेतेत्याह—यथा त्वं कृपया जुष्टस्तथैव भूत्यादिभिश्च ततो हेतोस्त्वमेव भगवानसीत्यन्वयः । अयमर्थः—कृपया शक्त्या जुष्टः सेवितः सन्भक्तदत्ततुलसीपत्रमात्र मप्यपेक्ष्यमाणः । अहमद्य क्षुधार्त्तोस्मि किंचिद्देहीति भक्ताय याचमानोऽपूर्णकामोऽपि भवसि मम गृहोद्यानादिकं संप्रति जीर्णं क्व विलसामीत्यादिस्वप्नांतरे ब्रुवन्विभूतिशून्योऽपि भवसि अणिमादिसिद्धियुक्तोऽपि भक्तप्रेम रसनया बद्धः क्वापि गंतुमपि न शक्नोषि तथैव भूत्या महालक्ष्म्या शक्त्या तेजसा सर्वानधीनतया शक्त्या महिना विभूत्या शक्त्या च ओजसा बलेन सर्वैरन्यैश्च सत्यसंकल्पादिभिश्च सर्वत्र जगति निरपेक्षत्वपूर्णकाम त्वादिमांश्च भवसीति त्वमेव भगवांस्त्वमेव प्रभुर्भजनीय इति भावः ॥ ५ ॥ इत्थं भगवंतं प्रणम्य लक्ष्मीं प्रणमेदित्याह—विष्णुपत्नीति । विष्णुः पतिः पालको यस्यास्तत्संबुद्धौ तथा निर्भये इत्यर्थः । महामाये मायाश ब्दस्य शक्तिवाचित्वात्पराख्यशक्तिरूपे । अत एव महापुरुषेति ॥ ६ ॥ उपहाराणि समर्पयामि उपस्पर्शनमाचमनम् । उपहारो नैवेद्यम् ॥ ७ ॥ स्वाहा सुहुतं भवतु इति शब्दो मंत्रसमाप्तिद्योतक एव न तु मंत्रावयवः ॥ ८ ॥ ९ ॥ दशवारं दशावृत्त्या तदूर्द्ध्वं यथाशक्त्या तावती सर्वथापेक्षितेति । ततो जपानंतरम् । स्तोत्रं युवां त्वित्यादि वक्ष्यमाणसार्द्धचतुःश्लोकात्मकम् ॥ १० ॥ परात्परयोरपि तयोर्जगत्कारणत्वे हेतुमाह— इयमिति । इयं लक्ष्मीः सूक्ष्मा दुर्ज्ञेया दुरत्यया त्वया सह सर्वदा संगिनी "देवत्वे देवता चेयं मानुषत्वे च मानुषी" इत्युक्तेरनपायिनीत्यर्थः । मायापक्षे तव कृपां विना तरीतुमशक्या "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति श्रीमुखोक्तेः ॥ ११ ॥ तस्या मायायाः ॥ १२ ॥ गुणानां सत्त्वादीनां व्यक्तिर्यतः सा तथा । व्यंजकश्चिच्छक्त्यावेशेन मंत्राणां प्राकट्यकर्त्ता सर्वाणि शरीराणि यस्य स तथा तत्र हेतुरात्मेति । शरीरेन्द्रिया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ ॥ तथा म उत्तमश्लोक संतु सत्या महाशिषः ॥ १४ ॥ इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह ॥ तन्निः
सार्योपहरणं दत्त्वाऽऽचमनमर्चयेत् ॥ १५ ॥ ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा ॥ यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥ १६ ॥
पतिं च परया भक्त्या महापुरुषचेतसा ॥ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः ॥ बिभृयात्सर्वकर्माणि पत्न्या उच्चावचानि च ॥ १७ ॥
कृतमेकतरेणापि दंपत्योरुभयोरपि ॥ पत्न्यां कुर्यादनर्हायां पतिरेतत्समाहितः ॥ १८ ॥ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन ॥ विप्रान्स्त्रियो
वीरवतीः स्रग्गंधबलिमंडनैः ॥ अर्चेदहरहर्भक्त्या देवं नियममास्थितः ॥ १९ ॥ उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः ॥ अद्यादात्मविशुद्ध्यर्थं
सर्वकामर्द्धये तथा ॥ २० ॥ एतेन पूजाविधिना मासान्द्वादश हायनम् ॥ नीत्वाऽथोपचरेत्साध्वी कार्तिके चरमेऽहनि ॥ २१ ॥ श्वोभूतेऽप
उपस्पृश्य कृष्णमभ्यर्च्य पूर्ववत् ॥ पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा ॥ पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥ २२ ॥

प्रकाशकः अपाश्रयस्तयोराधारः ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ महापुरुषचेतसा ईश्वरबुद्ध्योपनमेद्भजेत् । पतिश्च स्वयं प्रेमशीलः सन् पत्न्याः सर्वकर्माणि
बिभृयात् । सदनुकूलो भवेदित्यर्थः ॥ १७ ॥ यतो दंपत्योर्मध्ये एकतरेण कृतमुभयोरपि भवति ॥ १८ ॥ न विहन्यान्न विच्छिद्यात् ॥ १९ ॥ २० ॥ द्वादशमासा
नित्युक्ते कदाचित्तन्मध्ये मलमासे सति तेन सह द्वादशसंख्यायां सत्यां शुद्धस्यैकस्य त्यागः स्यात् । हायनमित्युक्ते तन्मध्यपतितस्य तस्यापि प्रसंगः स्यात् । तदुभयं वार
यितुमुभयमुक्तम् । उपचरेदुपवसेत् ॥ २१ ॥ श्वोभूते प्रभाते सति । पयसि शृतेन पक्केन । पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन ॥ २२ ॥

ण्याशेरते यस्यां सा तथा । अत्रेंद्रियपदमंतरिंद्रियं मनोबुद्ध्याद्यप्युपलक्षयति नामरूपास्तिभातिप्रियाख्यपंचांशवद्वस्तुषु नामरूपे भगवती श्रीः प्रकृतिरेवात एव तयोस्त्याज्यत्वमभिहितमाचार्यैः अस्त्याद्यंशत्रयस्य प्रकाशरूपत्वा
त्वद्रूपत्वमत एव स्वामिचरणैर्व्याख्यातं प्रत्ययो नामरूपयोः प्रकाश इत्यादि ॥१३॥ परमेष्ठिनौ वस्तुतो द्वयोरेकरूपत्वात् । "तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्" इति संमोहनतंत्रोक्तन्यायेन। "द्विधा समभवद्बृहत् ॥ तयोरेक
तरो ह्यर्थः प्रकृतिः सोभयात्मिका । ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते॥" इत्येकादशे उद्धवं प्रति श्रीकृष्णोक्तेश्च । हे उत्तमश्लोकेति । मम श्रद्धाभक्त्यादिकं यादृशं तादृशमेव त्वयैव स्वस्योत्तमश्लोकतामपेक्ष्य मनोरथाः
पूरणीयाः "अपि च कृपणपक्षे त्युत्तमश्लोकशब्दः" इति साक्षाच्छ्रुत्यवतारगोपीजनोक्तेरिति भावः, ॥ १४ ॥ तदुपहरणं नैवेद्यं निस्सार्य उत्थाप्येत्यर्थः । चक्रवर्त्ती तु—तन्निःसार्य निर्माल्यापाकरणं कृत्वेत्याह पुनरर्चयेत्
॥ १५ ॥ ततः पूर्ववत्स्तोत्रेण स्तुवीत यज्ञोच्छिष्टं पूजानिर्माल्यपुष्पादि पुनरभ्यर्चयेत्त्रिकालमर्चयेदिति निर्गलितोऽर्थः पुनः पुनरर्चनविधानात् ॥ १६ ॥ तैस्तैर्यैर्यैर्वस्त्रान्नादिभिः पतिः प्रीयेत । उपनमेत्सेवेतेत्यर्थः ।
पतिरपि पत्न्यनुसारो भवेत् । इत्यर्थ इति । पतिर्हि स्त्रियां व्रतं कुर्वाणायां स्वयं तदुपयोगिवस्त्वानयनादि कुर्यात्स्त्री च पत्यौ व्रतं कुर्वाणे तथा कुर्यादिति भावः ॥ १७ ॥ अनर्हायां रजआदिना दूषितायाम् । पति
पत्न्योर्विवाहमंत्रैरेकरूपताया विधानादिति भावः ॥ १८ ॥ १९ ॥ अग्रत इति ल्यब्लोपे पंचमी । अग्रभागं यथोचितं विभज्येत्यर्थः ॥ २० ॥ उभयमुक्तमित्यस्य यस्मिन्वर्षेऽधिको मासो न स्यात्तस्मिन्वर्षे व्रतं
कुर्यादित्यर्थः । चरमेऽहनि मार्गकृष्णामायां मासाश्शुक्लादयोऽत्र ग्राह्याः 'शुक्ले मार्गशिरे पक्षे' इत्युक्तेः । शुक्ले प्रारब्धस्य कृष्णे पक्षे एव वत्सरसमाप्तिर्भवति 'हायनोऽस्त्री शरत्समाः' इत्यमरः ॥ २१ ॥ पर्वसूत्सवेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(ब्राह्मणान्भोजयेद्भक्त्या त्वन्नाद्यैर्द्वादशात्मवित् ॥ तेभ्यो दद्यात्तिलान्राजन्सोदपात्रानिडान्वितान् ॥ १ ॥) आशिषः शिरसाऽऽदाय द्विजैः प्रीतैः समीरिताः ॥ प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञया ॥२३॥ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः ॥ दद्यात्पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगम् ॥२४॥ एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह ॥ स्त्रीत्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिं यशोगृहम् ॥२५॥ कन्या च विंदेत समग्रलक्षणं वरं त्ववीरा हतकिल्बिषा गतिम् ॥ मृतप्रजा जीवसुता धनेश्वरी सुदुर्भगा सुभगा रूपमग्र्यम् ॥ २६ ॥ विंदेद्विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्पदेहम् ॥ एतत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानाम् ॥ २७ ॥ तुष्टाः प्रयच्छंति समस्तकामान्होमावसाने हुतभुक्छ्रीर्हरिश्च ॥ राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते ॥ २८ ॥ इति श्रीभागवते महापुराणेऽष्टादशसहस्र्यां संहितायां षष्ठस्कंधे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः ॥ १९ ॥ संपूर्णोऽयं षष्ठः स्कंधः ॥ ६ ॥

॥ २३ ॥ सुप्रजास्त्वं सत्पुत्रत्वकरमित्यर्थः । वाग्यतः सन् तद्यतस्तं शेषम् ॥ २४ ॥ २५ ॥ अवीरा विधवा । धनेश्वरी सत्यपि या सुदुर्भगा सा सुभगा भवति ॥ २६ ॥ य आमयावी रोगी स विरुजा विशिष्टया रुजा विमुच्यते । इंद्रियैः संहितं कल्पं देहं च विंदेदिति शेषः । पठन्यो वर्तेत तस्य पितॄणां देवतानां चानंता तृप्तिर्भवतीत्यर्थः ॥ ॥ २७ ॥ उपसंहरति । राजन्निति । महत्पुण्यं जन्म महद्व्रतं च ॥ २८ ॥ षष्ठस्कंधनिगूढार्थपदभावार्थदीपिका ॥ सद्भिरासेव्यतामेषा यतिश्रीधरनिर्मिता ॥ ॥ १ ॥ इति श्रीमद्भागवते महापुराणे षष्ठस्कंधे श्रीधरस्वामिविरचितायां टीकायां भावार्थदीपिकायामेकोनविंशोऽध्यायः ॥ १९ ॥ समाप्तोऽयं षष्ठस्कंधः ॥ ६ ॥

विवाहादिषु यत्स्थालीपाकविधानं स्मार्तसूत्रोक्तविधानं यथा " अथातो गृह्यस्थालीपाकानां कर्म " इत्यादिकात्यायनसूत्रोक्तं यत्कर्मविधानं तेन । सूत्रार्थस्तु—अथ श्रौतकर्मविधानानंतरम् । यतः श्रौतानि कर्माण्यभिहितानि स्मार्तान्यभिधेयानि अतो हेतो गृह्ये " आवसथ्याग्नौ ये स्थालीपाकास्तेषां कर्मक्रियानुष्ठानमिति व्याख्यास्यते " इति सूत्रशेषः । तत्र विधानं भूसंस्काराग्निसंस्काराघाराज्यभागव्याहृतिप्रायश्चित्तस्विष्टकृद्धोमादिरूपं सर्वकर्मसाधारणमेव " एष एव विधिर्यत्र कचिद्धोमे " इति सूत्रात् । अस्यार्थः—एष परिसमूहनादिपर्युक्षणपर्यंतो विधिरेव न मंत्राः यत्र कचन लौकिके स्मार्ते वाग्नौ होमस्तत्र वेदितव्यम् । "अन्वारब्धावाराज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतन्नित्यꣳ सर्वत्र" इति सूत्रांतराच्चेत्यलम् । प्रकृतमनुसरामः—आहुतिमंत्रः प्रागुक्त एव "पर्व क्लीबं महे ग्रंथौ प्रस्तावे लक्षणांतरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि ॥" इति मेदिनी ॥ २२ ॥ तदनुज्ञया ब्राह्मणानुज्ञया ॥ २३ ॥ इत्यर्थ इति । प्रजाशब्दस्य नृपपालनीयसमस्तस्थावरजंगमत्राचित्वमप्यस्ति तद्वारणाय सत्पुत्रत्वमित्युक्तमिति भावः । सुष्ठु सौभगं सौभाग्यं यत इति शेषविशेषणम् ॥ २४ ॥ जीवतीति जीवः स चासौ पतिश्चेति तं, यशसा युक्तान् गृहान् ॥ २५ ॥ समग्रलक्षणं बलवेषविद्यावयोवंशवृत्त्यादियुक्तं, या मृतसुता सा जीवसुता धनेश्वरी च भवति । रूपमित्यग्रिमेणान्वेति । विरूपा रूपहीना रूपं विंदेत् ' रूपं स्वभावे सौंदर्ये ' इति विश्वः । दुष्टस्वभावा सुस्वभावा भवति ॥ २६ ॥ एतन्महदुपाख्यानम् । अभ्युदये आभ्युदयिकश्राद्धादौ ॥ २७ ॥ राजन्निति । राज्ञा त्ववश्यं श्रोतव्यमभ्युदयहेतुत्वादिति भावः ॥ २८ ॥ नितरां गूढोऽर्थो येषां तेषां पदानां भावार्थदीपिका (१)। अथास्य श्रवणमाहात्म्यम्–" हरिरुवाच ॥ ब्राह्मणीगमने पापं षष्ठस्य श्रवणेन हि । द्विबाहुकंठरूपस्य मम नश्यति यद्भवेत् ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रृणु ब्रह्मन्नितीहासं कल्याणस्य प्रदायकम् । कदाचिद्देवराजो हि धृत्वा रूपमथौतुकम् ॥ २ ॥ अहल्यां गौतममुनेर्भार्यां प्राप विमोहितः । विलोक्य तं मुनिवरो महेंद्रं शप्तवांस्तदा ॥ ३ ॥ येन त्वं जार
रूपेण ह्यागतो मम मंदिरम् । अतः शक्र शरीरे ते भगानां च सहस्रकम् ॥ ४ ॥ सदनं प्राप्य शक्रः स्वं मुमोह च रुरोद च । ततो जगाम तपसे वनं वर्षसहस्रकम् ॥ ५ ॥ ततो वृत्रसमाक्रांता देवा मां शरणं
ययुः । मया प्रोक्ता हि ते देवा यत्रेंद्रस्तत्र गच्छत ॥ ६ ॥ मया सह महाभागाः स च वृत्रं वधिष्यति । तत्र गत्वाहमवचं वरं ब्रूहि पुरंदर ॥ ७ ॥ पुरंदर उवाच ॥ ब्राह्मणीकृतसंगाच्च प्रपन्नोऽहं जनार्दन ।
तत्पापं मे यथा यातु तथा त्वं कुरु माधव ॥ तथा भगसहस्रं मे शरीरस्थं विनाशय ॥ ८ ॥ विष्णुरुवाच ॥ नेत्रतां भगसाहस्रं यातु मत्कृपया हरे । यदा त्वं विश्वरूपाद्वै कवचं षष्ठसंभवम् ॥ ९ ॥ पठिष्यसि
तदा पापं सर्वं ब्राह्मणिसंगजम् । विनंक्ष्यति न संदेह इतिहासमतः श्रृणु ॥ १० ॥ सिंधुदेशेऽभवद्विप्रोऽध्येतुं स गुरुमंदिरम् । जगाम तत्र विद्यायामभ्यासं प्रचकार सः ॥ ११ ॥ ब्राह्मण्या गमनं तत्र स चकार
धृतव्रतः । निःसारितः स गुरुणा कुष्ठाक्रांतस्तदाऽभवत् ॥ १२ ॥ गर्हयन्नात्मनः कर्म मुमोहाथ धृतव्रतः । देशेदेशे भ्रमन्विप्रो बनमध्ये सरोवरम् ॥ १३ ॥ ददर्श तत्तटे तस्थौ जलपानार्थमुद्यतः । तत्र भागव
तीयं हि पुस्तकं षष्ठसंभवम् ॥ १४ ॥ दृष्ट्वा तद्वाचयामास स विप्रो दूरसंस्थितः । अर्द्धश्लोकोच्चारणाच्च कीटास्तद्देहतो गताः ॥ दिव्यदेहमनुप्राप्य ययौ वैकुंठमंदिरम् ॥ १५ ॥ " इत्थं पाद्मे स्थितं वृत्तं मया
संक्षिप्य वर्णितम् ॥ इति षष्ठस्कंधमहिमा ॥ भावार्थदीपिका टीका श्रीधरस्वामिनिर्मिता ॥ तस्याः प्रकाशो रचितः षष्ठस्कंधे मयाऽधुना ॥ १ ॥ अनुग्रहान्नंदसूनोः श्रीवंशीधरशर्मणा । यदत्र स्खलितं विज्ञास्तत्पूर्त्तिं कुर्वतां
हि ते ॥ मयि शिष्यत्वमारोप्य गुरुत्वं स्वेषु यत्नतः ॥ २ ॥ इति श्रीखरडपत्तनवास्तव्यपण्डितवंशीधरशर्मनिर्मितश्रीमद्भागवतभावार्थदीपिकाप्रकाशे षष्ठस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥ समाप्तश्चायं षष्ठस्कन्धः ॥ ६ ॥

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवतषष्ठस्कन्धो मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश टीकया चोपेते श्रीमद्भागवते षष्ठस्कन्धः समाप्तः ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश

टीकया चोपेते श्रीमद्भागवते सप्तमस्कन्धप्रारंभः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ राजोवाच ॥ समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान् स्वयम् ॥ इंद्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥ १ ॥ न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ॥ नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २ ॥ इति नः सुमहाभाग नारायणगुणान् प्रति ॥ संशयः सुमहाञ्जातस्तद्भवाञ्छेत्तुमर्हति ॥ ३ ॥

श्रीगणेशाय नमः ॥ स्वभक्तपक्षपातेन तद्विपक्षविदारणम् ॥ नृसिंहमद्भुतं वंदे परमानंदविग्रहम् ॥ १ ॥ ऊतिः पंचदशाध्यायैः सप्तमे वर्ण्यतेऽधुना ॥ ऊतिश्च वासना प्रोक्ता तत्तत्कर्मानुसारिणी ॥ २ ॥ अशुभा च शुभा चेति द्विधा सा हेतुभेदतः ॥ अशुभा महतां कोपाच्छुभा महदनुग्रहात् ॥ ३ ॥ हरेर्द्वारपयोर्यद्वद्वैकुंठे वसतोरपि ॥ चतुःसनरुषा विष्णुद्वेषाद्यशुभवासना ॥ ४ ॥ यथा च दैत्यगर्भेऽपि प्रह्लादस्य सतः स्थिरा ॥ नारदानुग्रहादास विष्णौ सद्भक्तिवासना ॥ ५ ॥ स्वभक्तं च सदा विष्णुर्द्विषंतमपि रक्षति ॥ तृतीयेऽथ भवे द्वास्थावकरोदात्मसात्पुनः ॥ ६ ॥ अतो मनीषिणा यत्नः कार्यो महदनुग्रहे ॥ इत्येतदर्थमूतीनामत्र लक्षणमुच्यते ॥ ७ ॥ तत्रादौ दशभिर्दैत्यतत्पुत्रमतिभेदतः ॥ महत्कोपानुकंपोत्थवासनाभेद उच्यते ॥ ८ ॥ सद्वासना च युज्येत कर्मभिः शुद्धचेतसः ॥ परैस्तु पंचभिस्तस्मात्क्रियते धर्मनिर्णयः ॥ ९ ॥ तत्र तु प्रथमेऽध्याये हिरण्यकशिपोः सुते ॥ विष्णुभक्ते विरोधस्तु विप्रशापज ईर्यते ॥ १० ॥ यदुक्तं पूर्वस्कंधांते "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना ॥ मन्युना शोकदीप्तेन ज्वलंती पर्यचिंतयत्" तच्छ्रुत्वा विस्मितः परीक्षित्पृच्छति । सम इति त्रिभिः । न हि समस्य सुहृदश्च वैषम्यं नामास्ति न च प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः ॥ १ ॥ किं च । यस्य यैः प्रयोजनं सिद्ध्यति स तत्पक्षपाती भवति । येभ्यो बिभेति तान्द्वेषेण हंति न तु तदत्रास्तीत्याह न हीति । निःश्रेयसं परमानंद एव आत्मा स्वरूपं यस्य । असुरेभ्यश्चोद्वेगो भयं नास्ति अतो विद्वेषोऽपि नास्त्येव । तत्र हेतुः । अगुणस्येति । गुणाधीनौ प्रीतिद्वेषावित्यर्थः ॥ २ ॥ श्रीनारायणस्य णाननुग्रहनिग्रहादीन्प्रति । तत्त्वं संशयम् ॥ ३ ॥

ॐ श्रीगणपतये नमः ॥ वंदेऽहं सर्वगोपालं बल्लवीवल्लभं हरिम् । यो भक्तं सर्वतः पाति सर्वगोऽद्भुतरूपधृत् ॥ १ ॥ यस्य ध्यानवशेनाऽज्ञो विज्ञतां झटिति व्रजेत् । तं ध्यात्वा सप्तमस्कंधविवृतिं नंदनंदनम् ॥ २ ॥ करोमि गुरुपादाब्जधृतचित्तोऽधुना स्फुटाम् । विप्रो गौडकुलोद्भूतो नाम्ना वंशीधरः कृती ॥ ३ ॥ तस्य भक्तस्य यो विपक्षो विरोधी तं विशेषेण दारयतीति तथा । अद्भुतमकस्मादाविर्भूतम् । अत् आश्चर्येऽव्ययम् । "अदि भुवो डुतच्" उ० ५ । १ । तत्र हेतुः परमानंदेति (१) तत्तत्कर्मानुसारिणी शुभाशुभकर्मानुगा (२) हेतुभेदमाह—अशुभा महतामिति (३) अशुभवासनामाह—द्वारपयोर्जयविजययोः । चतुःसनाः सनकाद्यास्तेषां रुषा क्रोधेन । आदिना तद्भक्तद्वेषादिग्रहः (४) शुभवासनामाह—यथा चेति । (५) अथातः । भवे जन्मनि । आत्मसादात्माधीनम् (६) यतो महदनुग्रहादेव शुभवासना भवत्यतो हेतोः । महदनुग्रहे इति निमित्ते सप्तमी । अत्र स्कंधे । इत्येतदर्थं महत्कोपवर्जनपूर्वकं महदनुग्रहावाप्त्यर्थम् (७) तत्र पंचदशाध्यायेषु मध्ये । दैत्यो हिरण्यकशिपुस्तत्पुत्रः प्रह्लादस्तयोर्मतिभेदतः (८) युज्येत कर्मकर्त्तरि प्रयोगः । तस्मादध्यायदशकात्परैः (९) तत्र दशसु मध्ये । विप्रशापजः सनकादिभिशापजातासुरभावजः (१०) । इत्यर्थ इति । समस्य कथं वैषम्यं प्रियस्य कथमसुरेषु प्रीत्यभावः सुहृदश्च कथं तेषु सौहार्दम् ॥ १ ॥ न हि परमानंदस्वरूपस्य कश्चिदन्यः सुखं साधयेदिति भावः । अतो भयाभावात् । तत्र विद्वेषाभावे । इत्यर्थ इति । निर्गुणस्य गुणाभावात्तद्धेतुकरागद्वेषौ कथं संभवत इति भावः ॥ २ ॥ हे सुमहाभागेति । सुष्ठु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ साधु पृष्टं महाराज हरेश्चरितमद्भुतम् ॥ यत्र भागवतमाहात्म्यं भगवद्भक्तिवर्धनम् ॥ ४ ॥ गीयते परमं पुण्यमृषिभिर्नारदा
दिभिः ॥ नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥५॥ निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाध
कतां गतः ॥ ६ ॥ सत्त्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ॥ न तेषां युगपद्राजन् ह्रास उल्लास एव वा ॥ ७ ॥

भागवतस्य प्रह्लादस्य माहात्म्यं गीयत इति संबंधः ॥ ४ ॥ कृष्णाय व्यासाय । कृष्णं मुनिं नत्वेत्यर्थः ॥ ५ ॥ यस्मात्प्रकृतेः परः अतो निर्गुणोऽत एवाजोऽत एवाव्यक्तो रागद्वेषादिनिमित्तभूतदेहेंद्रियादिरहितः सोऽपि स्वमायागुणं सत्त्वादिकमाविश्याधिष्ठाय बाध्यान्प्रति यद्वा । देवासुराणां परस्परं या बाध्यबाधकता तां गतः प्राप्तः । तत्र हेतुर्जात इत्यर्थः ॥ ६ ॥ तत्र गुणानां स्वीयत्वे सति प्राकृतपुरुषवद्विषमः स्यात्तत्तु नास्तीत्याह । सत्त्वमिति । ननु स्वेच्छया गुणाधिष्ठानेनापि पक्षपातवैषम्यं स्यादेव । न

मह्यतेऽर्च्यते इति सुमहो विष्णुस्तस्या समंताद्भागो भजनं यस्य स तथा "वैयासकिश्च भगवान्वासुदेवपरायणः" इत्युक्तेस्तथा च नारायणपरायण एव तल्लीलां वेत्ति नान्य इति भावः । 'स एव धातुः पदवीं परस्य' इत्यारम्य 'भजेत तत्पादसरोजगंधम्' इत्यंतसूतोक्तेः ॥ ३ ॥ स्वस्य महापदोपपदसंबुद्धिमाकर्ण्य श्रीशुकदेवोऽपि राजानं महापदोपपदसंबुद्ध्यैवामंत्रयति—हे महाराजेति । त्वमपि महे भगवद्गुणाकर्णनोत्सवे आराजसे इति महाराजाऽसीति भावः । "तमो विशीर्यते मह्यं हरेः कथयतः कथाम्" इति त्वदुक्तेरेव । यत्र चरिते । अत्र संदर्भः—साधु पृष्टमिति सार्द्धमेवान्वितम् । हे महाराज इदं यत्पृष्टं तत्साधु सुविचारितमेव किं तु हरेश्चरितमद्भुतमपूर्वम् अवैषम्येऽपि विषमतया प्रतीयमानत्वेन विचारातीतत्वात् । यत्र यद्धरिचरितं भगवद्भक्तिवर्द्धनं भागवतमाहात्म्यं भागवतानां श्रीप्रह्लादोपलक्षितभक्तवृंदानां माहात्म्यम् । अनेन भागवतार्थमेव सर्वं करोति भगवान् न त्वन्यार्थमित्यस्यैवार्थस्य पर्यवसानं भविष्यतीति व्यंजितम् । अत एव स्वामिचरणैरप्युक्तं स्वभक्तपक्षपातेनेति ॥ ४ ॥ अतः गीयत इति परमं पुण्यं यथा स्यात्तथा या गीयते तां कथामिति यत्तदोरध्याहारेणान्वयः । अत्र च तैर्गीयमानत्वेन भक्तैकसुखप्रयोजनत्वमेव व्यंजितम् ॥ ५ ॥ अत एव निर्गुणत्वादेव । अत एवाजत्वादेव । बाध्यबाधकत्वं परस्परमेव दृश्यते न तु हरेस्तत्कथमुक्तं बाध्यान्प्रतीति चेदाह—यद्वेति । इत्यर्थ इति । न हि सच्चिदानंदस्य बाध्यबाधकता स्वतः संगच्छते किं तु मायामंतरीकृत्य तथात्वमपि संगच्छत एव आत्ममायामतर्द्धाय को न्वर्थो दुर्घट इव भवतीत्युक्तेरिति भावः । अत्र संदर्भः—तत्र तावद्वांछितार्थानुरूपमेव प्रश्नोत्तरमाह—निर्गुणोऽपीति । निर्गुणः प्राकृतगुणरहितः । अत एवाजो नित्यसिद्धः अत एवाव्यक्तः प्राकृतदेहेंद्रियरहितत्वान्नान्येन व्यज्यत इति । स्वयं प्रकाशदेहादिरित्यर्थः । ततश्च प्रकृतिगुणेषु रागद्वेषादिरहितश्चेति भावः । एवमेवं भूतोऽपि स्वेषु भक्तेषु या माया कृपा तत्रोचितो यो गुणो लीलाकौतुकमयविशुद्धोर्जितसत्त्वाख्यस्तमाविश्यालंब्य भगवान् नित्यमेव प्रकाशितषड्गुणैश्वर्यः सन् एतदप्युपलक्षणं कदाचिददित्यादौ जातः सन् लोकेंद्रियेषु व्यक्तोऽपि सन् बाध्यबाधकतां गतः कदाचिदसुरैर्बाध्यतां पराजयं कदाचित्तु तेषां बाधकतां जयं प्रात इत्यर्थः । अत्र सत्यप्यर्थांतरे भागवतानुग्रहप्रयोजनत्वेनैवोपक्रांतत्वादुपसंहरिष्यमाणत्वाद्भक्ति सामान्याच्छलमयमायया तत्कर्तृत्वेऽप्यधिकदोषपाताच्च तन्नापेक्ष्यते । तस्माद्भक्तविनोदैकप्रयोजनकस्वैरलीलाकैवल्येनान्यत्र रागद्वेषाभावान्नात्र वैषम्यमिति भावः । अत एव बाध्यतामपि यातीति बाधकतया सहैवोक्तम् । तथा नित्यस्वरूपभक्तिविलासलक्षणलीलाविष्कारेण । सर्वेषामेव हितं पर्यवस्यतीति सुहृत्त्वादिकं च नापयातीति ध्वनितम् ॥ ६ ॥ तत्र तवाक्षेपे । अत्राशंकते—नन्विति । इत्यर्थ इति । गुणानां वृद्धिरेव तथा तथा करोति न तु भगवानिति भावः । अत्र संदर्भः—अथ तस्य बाध्यबाधकताव्यवस्थां स्थापयति द्वाभ्यां तत्र ये तु सत्त्वादयो गुणास्तेषु न तदीयत्वं न तदावेशो न च सदैकावस्थत्वं यतः पूर्वत्र पद्ये तस्य गुणस्यान्यतमत्व दर्शनाय स्वेति । आविश्येति च । विशिष्यस्वमायागुणमाविश्येत्युक्तं न तु मायागुणमुपधायेत्याह—सत्त्वमित्यर्द्धकेन । सत्त्वादयो गुणाः प्रकृतेरेव नात्मनः परमेश्वरस्य तु ये सर्वेपि नियमेनोल्लासिनो गुणास्ते तु ते न भवंती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जयकाले तु सत्त्वस्य देवर्षीन्रजसोऽसुरान् ॥ तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥ ८ ॥ ज्योतिरादिरिवाभाति संघातान्न विविच्यते ॥ विदंत्यात्मानमात्मस्थं मथित्वा कवयोंततः ॥ ९ ॥

तस्य कालकृतत्वादित्याह । न तेषामिति सार्धेन । उल्लासो वृद्धिः ॥ ७ ॥ सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् । तत्तद्देहं प्रविश्य वर्धयतीत्यर्थः । रजसो जयकाले सुरान् । तमसो जयकाले यक्षरक्षांसि तस्य कालस्यानुगुणः सन् ॥ ८ ॥ समस्यापि निमित्तभेदेन वैषम्ये दृष्टांतः । ज्योतिरादिरिव ज्योतिरग्निर्यथा काष्ठादिषु जलं यथा पात्रेषु आकाशो यथा घटादिषु तथा भगवान्नानारूप आभाति ननु तर्हि तद्वदेव विवेकेन किं न प्रतीयते तत्राह । संघातात्सुरादिदेहान्न विविच्यते न पृथक्प्रतीयते तर्हि तान्भजतीति कुतो ज्ञायते तत्राह । विदंतीति आत्मस्थं परमात्मानं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन विचार्य जानंति । अंततः स्वभावकालकर्मादिवाद निषेधेन । विंदंतीति पाठे लाभोऽपि ज्ञानमेव । अत्रापि ज्योतिरादिरेवेति द्रष्टव्यं यथा सूर्यकांतादौ दाहदर्शनाज्ज्योतिर्ज्ञायते यथा च गंधदर्शनाद्वायुरित्यादि ॥ ९ ॥

त्यर्थः । तदुक्तम् ''सत्त्वादयो न संतीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥'' इति ''ह्लादिनी संधिनी संवित्त्वय्येका सर्वसंस्थितौ । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥'' इत्यादिवचनानि भगवत्संदर्भे दर्शितानि । न तेषामिति सार्द्धकम् । यस्मान्नात्मनस्ते तस्मादेव युगपद्ध्रास एव वोल्लास एव वा नास्ति किं तु विकारित्वेन परस्परमुपमर्द्युपमर्दत्वात्कस्यचित्कदाचिद्ध्रासः कस्यचित्कदाचि दुल्लासो भवतीत्यर्थः ॥ ७ ॥ ततश्च देवादीनां तत्साहाय्येऽसुरादीनां तद्युद्धे योग्यतां दर्शयति तथा सत्त्वाद्युल्लासकाले तल्लीलायास्तदधीनत्वमेव यत्प्रतीयते न तदनुवदन् परिहरति सत्त्वस्य जयकाले देवादीन् ऋषींश्चा भजत् भजति भगवांस्तत्तद्देहेषु सत्त्वोपाधिकं निजं तेजः संचारयति येन च तान्सहायमानान्करोतीत्यर्थः । एवं रजसो जयकालेऽसुरेषु रजउपाधिकं तमसो जयकाले यक्षरक्षस्सु तमउपाधिकमिति योजनीयम् । ततश्च येन तान् यक्षादीन् प्रतियोद्धृन् भगवान्कुर्वन् देवादीन् पराजितान् करोति स्वमपि तथा दर्शयतीत्यर्थः । तदेवं भक्तिरसपोषकलीलावैचित्र्यार्थबाध्यबाधकतां यातीति दर्शितम् । यच्च क्षीरोदमथने श्रूयते ''तथा सुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् । उद्दीपन्देवगणांश्च विष्णुर्दैवेन नागेंद्रमबोधरूपः'' इति । अत्रापि तद्वैचित्र्यार्थमेव तथा तत्तदावेशस्तस्येति लभ्येत । नन्वायाता तस्य तत्तद्गुणोद्बोधककालपारवश्येनं स्वैरलीलाहानिः ततश्च गुणसंबंधातिशये वैषम्यादिकं च स्पष्टमेवेत्याशंक्याह—तत्कालानुगुण इति । तेषां सत्त्वादीनां काल एवानुगुणो यस्य सः । भगवच्छरण इतिवत्समासः । स्वैरमेव क्रीडति तस्मिन्नित्यमेव तदनुगतिकया मायया यया तदनुसारेणैवानादिसिद्धप्रवाहं तंतं जगत्कर्मसमुदायं प्रेर्य स्ववृत्तिविशेषरूपत्वेन प्रवर्त्यमानः सत्त्वादिगुणानां काल एव तदधीनो भवतीत्यर्थः । कालस्य मायावृत्तित्वमुदाहृतम् 'कालो दैवम्' इत्यादौ त्वन्मायैषेति । यद्वा—तेषां कालोऽपि सदानुगतो भक्तानुग्रहमात्रार्थं स्वैरचेष्टात्मकप्रभावलक्षणो गुणो यस्य स इत्यर्थः । ततोऽपि तच्चेष्टानुसारेणैव मायया तत्तत्प्रवर्तनमिति भावः । तदुक्तम् ''योऽयं कालस्तस्य तेऽव्यक्तबंधोश्चेष्टामाहुश्चेष्टते येन विश्वम्'' इति तथा चोभयथाऽपि न पारवश्यमित्यायातम् । इत्थमेव श्रीकपिलदेवेनाप्युक्तम् 'यः कालः पञ्चविंशकः' इति ''प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्'' इति च । तत्र मायाव्यंग्यत्वपुरुषगुणत्वलक्षणमतद्वयमुपन्यस्तवान् । अत्र चास्य चेष्टाप्रभावस्य भक्तिविनोदायैव मुख्या वृत्तिः । गुणोद्बोधादिकार्यं तु तत्र स्वत एव भवतीति तत्र प्रकृत्याभास एव ततश्च पूर्वांशः स्वयमेवेति स्वरूपशक्तेरेव विलासः परश्च तदाभासरूप एवेत्याभासशक्तेर्मायाया एवांतर्गतत्वं 'योऽयं कालः' इत्यादौ निमेषादिरित्युक्तिश्च द्वयोरभेदविवक्षयैवेति ज्ञेयम् । अत एवं व्याख्येयं यथा भृत्यस्यानुगतो भृत्योनुभृत्यः तथा तत्र तत्प्रभावलक्षणस्य गुणस्यानुगत आभासरूपो गुणोऽनुगुणः तथा च कालोऽपि अनुगुणो न तु साक्षाद्गुणोऽपि यस्येति ॥ ८ ॥ अत्राक्षिपति—नन्विति । तद्वदेव ज्योतिरादिवदेव यथा काष्ठादिभ्योऽग्न्यादि पृथक् प्रतीयते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ॥ सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥ १० ॥

तदेवं मायागुणवशेनैतद्वैषम्यं न स्वाभाविकमित्युक्तम् । तर्हि गुणपारतंत्र्यादनीश्वरत्वमाशंक्याह । यदा आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक्सृजति । विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुर्यदा तदा सत्त्वं पृथक्सृजति । शयिष्यमाणः संहारिष्यन्यदा तदा तमः पृथगीरयति तद्वदित्यर्थः । अत्र विश्वनाथः—सत्त्वादीनामाधिक्यन्यूनताभ्यामेव तदधिष्ठानस्याप्याधिक्यन्यूनते इत्यत्र दृष्टांतमाह—ज्योतिर्यथा काष्ठेषु जलं यथा पात्रेषु आकाशं यथा घटेषु अधिकेष्वधिकरूपं न्यूनेषु न्यूनरूपं तिष्ठदपि न विषममुच्यते तथैव देवनिष्ठे सत्त्वेऽधिके सति सोऽपि देवेष्वधिकरूपः । तथैवासुरनिष्ठे रजसि न्यूने तत्र न्यूनरूप इत्यसुराणां देवबाध्यत्वे देवानामसुरबाधकत्वे सति सोऽपि देवपक्षपाती सुरबाधक इत्युच्यते । एवमसुरनिष्ठे रजस्यधिके सोप्यसुरपक्षपाती देवबाधकश्चेति लोकप्रतीत्या विषमोऽप्यविषम एवेत्यर्थः । जयकाले तु सत्त्वस्य देवर्षीनभजदित्यधिकभजनमेव तत्र विवक्षितं तदेव देवपक्षपातित्वव्यंजकं न त्वजयकाले केवलमभजनमेवेति ज्ञेयम् । ननु काष्ठादिषु ज्योतिरादिर्यथाऽस्मिन्काष्ठेऽयं वह्निरित्येवं विवेकेन प्रतीयते तथा देवादिदेहेऽपि भगवान्किन्न प्रतीयते तत्राह—संघाताद्देवादिदेहान्न विविच्यते स त्वन्य इव पृथङ् न प्रत्यक्षी भवतीत्यर्थः । तर्हि स तान्भजतीति कुतो ज्ञायते तत्राह—विदंतीति । आत्मस्थं परमात्मानं कवयो निपुणा मथित्वा कार्यदर्शनलिंगेनानुमानाज्जानंति । अंततः स्वभावकर्मादिवादनिषेधेन विंदंतीति पाठे लभंते जानंतीत्येवार्थः । नन्विंद्रादिपक्षपाती भगवान्कदाचित्स्वैः प्रत्यक्षीभूत एवासुरान्हंति तथैव रजस्तमसोरपि वृद्धौ सत्यां कदाचिदसुरादीनामपि पक्षपाती भवन्देवादीन् हिनस्तु तदैवोक्तयुक्त्या तस्य साम्यं सिध्येदित्यत आह—ज्योतिरादिरिवेति । तमेव श्लोकं तंत्रेणार्थांतराभिधायकं ज्योतिरादिरिवेति ज्योतिरादिगतं रूपरसगंधस्पर्शं यथा संघाते तद्वति वस्तुनि आभाति स्पष्टतया भासते । किंचित्तथा किंचित्संघातात्तस्मान्न विविच्यते न पृथक्स्पष्टमाभाति च किन्तु तदंतर्गततयैव भाति एवमेव जगत्यस्मिन्देवासुरादिषु मध्ये भगवान् क्वचित्स्पष्टं भासते क्वचित्तदंतर्गतश्च तिष्ठतीत्यर्थः । तत्र ज्योतिषः सत्त्वप्राधान्यादनावरकत्वात् तद्गतं रूपं यथा किंचिद्दूरेऽपि शुक्लमिदं क्षीरमिति सुदूरे लक्षद्वययोजनेऽपि चंद्रोऽयं शुक्ल इति तत्रतत्र नयनेंद्रियेण गृहीतं स्पष्टमाभाति तथैव देवादेः सत्त्वप्राधान्यात्सत्त्वेनानावरणात्तद्गतो भगवांस्तत्पक्षपाती स्पष्टमेवोपेंद्रादिरूप आभाति । यथा च जलादेस्तमोरजःप्राधान्यात्तेनावरणात्तद्गतं शब्दरसगंधस्पर्शं न स्पष्टमाभाति किन्तु तद्गतः पदार्थस्य योग एवेंद्रियगोलकेषु तमोरजसोरपि किंचित्सत्त्वमत्त्वात्सर्वथावरणाभावादेव । तथा हि रसनाया रसवतो योग एव रसः । श्रोत्रे शब्दवदाकाशस्य योगे सत्येव शब्दः । त्वचि शैत्यादिमद्वस्तुयोग एव स्पर्शः । नासायां गंधवतो वायोर्योग एव गंध इति । तथैवासुरराक्षसादेरजस्तमःप्राधान्यात्तेनावरणात्तद्गतो भगवांस्तत्पक्षपाती न स्पष्टमाभाति । अत्र मेघातपाभ्यामावरणानावरणे सूर्यस्य यथा तथैव तमःसत्त्वाभ्यां भगवतो ज्ञेये । ननु तर्हि स्पष्टभानाभावेऽसुरादिपक्षपातित्वं तस्य कथं प्रतीमस्तत्राह—विदंतीति । देवपराभवादिकार्यदर्शनालिंगेन जानंतीत्यर्थः । संदर्भस्तु—नेदं मणेस्तेजः पूर्वमदर्शनात्किन्तु तदा तमःसंयोगेन सौरं तेज एवात्र प्रविष्टमिति सूर्यकांतादौ तृणादिदाहेन तदनुभविषु तदाभाति तथा वायोरयं गंधः पार्थिव एव प्रविष्ट इति तथात्रापीति । तीर्थस्तु—संघाताद्देहेंद्रियादिसंघातात् । न विविच्यते पृथग्भूतो न दृश्यते । तत्र दृष्टांतः ज्योतिरादिर्वृतादिद्रव्यं दध्यादिभ्यो मथनात्पूर्वं न विविच्यते पृथग्भूतं न ज्ञायते तथात्मापीति भावः । "तेजोऽसितं त्रेधा विधीयते" इति श्रुतेर्घृतस्य ज्योतिःशब्दाभिधेयत्वमित्याह ॥ ९ ॥ न चैवं गुणतारतम्येन तस्याधिष्ठातृत्वतारतम्यलक्षणयंत्रणेन गुणाधीनत्वमाशंक्यम् । किन्तु गुणानामपि स्रष्टुस्तस्य तत्तत्सर्वं स्वैरलीलामयमेवेत्याह—यदेति । अत्र संदर्भः—तदेवं युद्धादिनिजलीलाभिर्भक्तविनोदनमेव प्रयोजनं विश्वपालनं तु स्वत एव ततः सिध्यतीत्युक्त्वा सृष्टिप्रलययोः प्रकृतीक्षणादावपि सर्वाशंकानिरासार्थमिति दिशन् त्रिष्वप्यविशेषमाह—यदेति । यत्र स्वचेष्टालक्षणे काले । एषः परमेश्वरः स्वमायया भक्तकृपयाऽऽत्मनः पुरः प्राचीनसृष्टिगतसाधकभक्तरूपाणि स्वस्याधिष्ठानानि सिसृक्षुर्भवति प्रक्रुया सह तेषु लीनेष्वाविर्भावनार्थमीक्षां करोति तदा पृथक्स्वरूपशक्तेरितराऽसौ जीवमायाख्या शक्तिः पूर्ववत्तच्चेष्टात्मकप्रभावाभासोदीता रजः सृजति स्वांशभूताद्गुणत्रयसाम्यादव्यक्तात्तद्विक्षिपति उद्बोधयतीति

॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् ॥ य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ॥ तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः ॥ ११ ॥

प्रेरयति । आधिक्यं नयतीत्यर्थः ॥ १० ॥ यदा सिसृक्षुरित्यादिनिर्देशात्प्रतीतं कालपारतंत्र्यं वारयन्प्रधानपुरुषपारतंत्र्यमपि वारयति । कालमिति । हे नरदेव प्रधानपुंभ्यां निमित्तभूताभ्यां सत्यकृदमोघकर्ता ईशस्तयोः सहकारित्वेनाश्रयभूतं चरंतं वर्तमानं कालं स्वयमेव सृजति । स्वचेष्टारूपत्वात्कालस्य न तत्पारतंत्र्यमित्यर्थः । तथाऽपि प्रस्तुते किमायातं तत्राह । य एष कालः सत्त्वमेधयति वर्धयत्यतो हेतोरीशिताऽपीश्वरोऽपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीव तत्प्रत्यनीकानसुरान्सुरप्रतिपक्षान्प्रमिणो

वा यथा वा पृथङ्मायानुगत एव काल एव सृजति तथा सौपदेन च काल एवोच्यते । अथ विचित्रासु नानागुणवैचित्र्यवतीषु तल्लक्षणासु पूर्षु रंतुमिच्छुर्भवति तदा सत्त्वं सृजति यदा पुनस्ताभिरेव मिलित्वा शयिष्यमाणः शयितुमिच्छुर्भवतीत्यर्थः । तदासौ तमः सृजतीति ततो भक्तनिमित्तमेव सर्वा एव सृष्ट्यादिक्रियाः प्रवर्त्तंत इति भावः । यथांगीकृतमेकादशस्य तृतीये टीकाकृद्भिरपि, किमर्थं ससर्ज स्वमात्रात्मप्रसिद्धये स्वं मिमीते प्रमिमीते य उपास्ते स स्वमाता तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धये इति । शयनमत्र पुरुषावतारस्य कदाचित्प्रलयोदधौ योगनिद्रा कदाचिद्भगवत्प्रवेशो वा यद्यपि सर्वेष्वपि जीवेष्वंतर्यामितया परमेश्वरास्तिष्ठति तथापि तत्रासंसक्तत्वादस्थित एव भवति स्वभक्तेषु तु समासक्तत्वान्न तथेति । न च तत्संगादौ तस्येच्छेति यथोक्तव्याख्यानमेव बलवत्। तथा च श्रीगीतासु—"मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥ " इति । " ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् " इति च । उक्तं हरिभक्तिसुधोदये " भक्तानां हृदयं शांतं सश्रियो मे प्रियं गृहम् । वसामि तत्र शोभैव वैकुंठाख्यादिवर्णना ॥" इति ॥१०॥ अत्राभिप्रायमाह—जगत्सृष्ट्यादिकं हि तस्य लीलयैव सा च स्वेच्छाधीनैव तत्र यदा सिसृक्षा भवति तदा रजोवृद्धिसृष्टिकालो जायते यदा पिपालयिषा तदा सत्त्ववृद्धिपालनकालः यदा संजिहीर्षा तदा तमोवृद्धिनाशकाल इति कालविशेषस्तेनैव सृज्यते तत्र यदा सृष्ट्यादिकालस्तदैव सृष्ट्यादिकं स्यादिति यदाशब्दवाच्यः कालविशेष एव स तु सृज्य एवेति।जयकाले तु सत्त्वस्येत्यादिनापि प्रतीतं कालपारतंत्र्यं वा रितमिति प्रधानेन मायाशक्त्या पुरुषेण स्वांशेन च सह वर्त्तमानः एवं सर्वकारणत्वात्तस्यैव स्वातंत्र्यं तत्कार्यत्त्वाज्जगतस्तदधीनत्वम् । ननु तत्कार्यं जगदवस्त्वेव अवस्तुनः किमधीनत्वानधीनत्वविचारेणेति केचिदाहुस्तत्राह—सत्यकृत् भगवच्छक्तिकार्यस्य विश्वस्य मिथ्यात्वानर्हत्वात् कार्यमात्रस्यैव मिथ्यात्वे तदनुमेये भगवत्यपि प्रमाणाभावः प्रसज्येदिति भावः । "सत्यं ह्येवेदं विश्वमसृजत्" इति माध्वभाष्यप्रमाणिता श्रुतिश्च । हे नरदेवेति । एतादृशज्ञानमेव नरदेवत्वापादकं न केवलं राज्यमिति भावः। राजन्निति । यथा राजा स्वभृत्यैरेव सर्वं कार्यं साधयति स्वयं न किंचित्करोति तथेशोऽपि कालादिनिजशक्त्या सर्वं कुर्वन्स्वयं न किंचित्करोति राज्ञि यथा भृत्यजयपराजयावारोप्येते तथेशे सृष्ट्यादिकमिति भावः।नरदेवेत्यस्याप्ययमेव मुख्योऽभिप्रायः। इत्यर्थ इति। न कदाचिद्भृत्याधीनो राजा भवतीति भावः । इत्यर्थ इति। इवपदेनोभयत्र मुख्यं वर्द्धनादिकर्म कालस्यैवेति सूचितमिति भावः । अत्र संदर्भः—ननु यदि चेशितुः प्रयोजनं न भवति तर्हि कथं कदाप्यसुरानपि स्वपक्षान् विधाय देवैर्न युज्येतेति तत्राह—सुरप्रिय इति । सुरेषु वर्त्तमानाः प्रिया भक्ता यस्य सः सत्त्वप्रधानेषु सुरेषु प्रायशस्तेषां सर्वेषामनुगमने नैवानुगमनं कदाचिद् बृहस्पत्यादिषु महत्स्वपराधे तेषामाभित्येन सुरत्वाच्छादनात्तेषां तस्य तेष्वनुगमनं न स्यादिति । जयकाले तु सत्त्वस्येत्याद्युक्तमिति भावः। ननु कथं तेऽपि तान्नानुगच्छंति तत्राह—रजस्तमस्कानिति । अत्यंतभगवद्बहिर्मुखताकरयोस्तयोर्गुणयोररोचकत्वादेवेति भावः । तर्ह्यसौ सदैवासुराणां निग्रहमेव करोतीत्यथाप्यसामंजस्यमेवेत्याशंक्याह—उरुश्रवा इति । 'वैरेण यं नृपतयः' इत्यादि । 'अहो बकीयम्' इत्यादिभिरुरु सर्वतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ॥ प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे ॥ १२ ॥ दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ॥ वासुदेवे
भगवति सायुज्यं चेदिभूभुजः ॥ १३ ॥ तत्रासीनं सुरऋषिं राजा पांडुसुतः क्रतौ ॥ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥ १४ ॥ युधिष्ठिर
उवाच ॥ अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि ॥ वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १५ ॥ एतद्वेदितुमिच्छामः सर्व एव वयं मुने ॥
भगवन्निंदया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥ दमघोषसुतः पाप आरभ्य कलभाषणात् ॥ संप्रत्यमर्षी गोविंदे दंतवक्रश्च दुर्मतिः ॥ १७ ॥
शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम् ॥ श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः ॥ १८ ॥ कथं तस्मिन् भगवति दुरवग्राहधामनि ॥
पश्यतां सर्वलोकानां लयमीयतुरंजसा ॥ १९ ॥ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ॥ ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणम् ॥ २० ॥
श्रीशुक उवाच ॥ राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः ॥ तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः ॥ २१ ॥

ति हिनस्ति चेत्यन्वयः। उरु प्रभूतं श्रवः कीर्तिर्यस्य सः। कालशक्तिक्षुभितगुणगतवैषम्यमिह सन्निधिमात्रेण तदधिष्ठातरि स्फुरतीति प्रकरणार्थः ॥ ११ ॥ तदानीं त
योर्न सुरपक्षपातेन वधः किं तु ब्रह्मशापेनासुरीं योनिं प्राप्तयोरनुग्रहाय एवेति वक्तुमितिहासमुपक्षिपति। अत्रैवेति। अत्र द्वेषादिरहितस्यापि दैत्यवधे नारदेनेतिहासः प्रस्ता
वितः ॥ १२ ॥ चेदिभूभुजः शिशुपालस्य ॥ १३ ॥ १४ ॥ एकांतभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदत्यद्भुतं हि ॥ १५ ॥ तस्य तु वेनवन्नरकपात एवोचित
इत्याह। भगवन्निंदयेति। तमसि नरके ॥ १६ ॥ दमघोषस्य सुतः शिशुपालः कलभाषणाद्बाल्ये कोमलभाषणमारभ्य संप्रत्यधुनाऽप्यमर्षी क्रोधी मत्सरी वा ॥ १७ ॥
श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥ दुरवग्राहं दुष्प्रापं धाम स्वरूपं यस्य तस्मिँल्लयं सायुज्यमीयतुर्जग्मतुः। अभूतस्यापि दंतवक्त्रलयस्य तज्जातकप्रामाण्येन सिद्धवन्निर्देशः ॥ १९ ॥
एतदद्भुततममत एतत्प्रति मे धीर्भ्राम्यति। भगवान्सर्वज्ञस्त्वं ब्रूहि ॥ २० ॥ आभाष्य संबोध्य सीदंति निषीदंत्यस्यामिति सद् सभा तस्याः सदः सदसः शृण्वत्याः सत्याः

विस्तृतं महत्तमं वा श्रवः कीर्त्तिर्यस्य स तेषामप्यनुग्रहं करोतीति भावः ॥ ११ ॥ तदेवं सिद्धांतं प्रदर्श्य तत्र स्वभक्तानुग्रहमात्रप्रयोजनस्तत्तत्करोति परेश इति। प्रतिज्ञातार्थोदाहरणाय प्रह्लादजयविजयादिकृपासूचके
तिहासमाह—अत्रैवेति। अत्र विद्वेषराहित्येन भक्तानंदनार्थं स्वैरलीलामात्रत्वेऽसुराणामपि परमहितपर्यवसायकस्वभावत्वे च। यद्वा—साम्यसौहार्दप्रियत्वेष्वर्थेषु एवकारेण सिद्धांतांतरं व्यावर्त्यते। राजन्निति। राज्ञां प्राचीन
वृत्तप्रियत्वादिति भावः ॥ १२ ॥ सायुज्यमैक्यम् ॥ १३ ॥ तत्र क्रतौ ॥ १४ ॥ एक एवांतः समयो निर्णय इति यावत्। तेषां ते एकांतिनः भक्तिरेव पुरुषार्थसाधनं नान्यत्कर्मादिकमिति निर्णयवंतस्तेषामिति
वा ॥ १५ ॥ तस्य चैद्यस्य। मुने इति। योगिनां सर्वं ज्ञानमस्तीति भावः ॥ १६ ॥ पाप इति। भगवन्निंदकत्वादुक्तं वस्तुतस्तु पातीति पो विष्णुस्तमाप्नोतीति पाप इति ॥ १७ ॥ यत्परं ब्रह्म तद्विष्णुं कृष्णम् ॥
॥ १८ ॥ दंतवक्रस्यापि भूतत्वेन निर्देशो मुनिगणवचनेन निश्चितत्वात्। लयं तात्कालिकलोकप्रतीत्या सायुज्यं किंचित्कालमेव सहयोगं सह युज्यत इति सयुक् तस्य भावः सायुज्यं ततः परं सामीप्यमीयतुः भाविनमपि
दंतवक्रलयं नारदमुखादेव श्रुत्वा तस्य जातप्रायत्वमननात्। यद्वा—तस्य जातकं जन्मपत्रादिप्रामाण्येन तन्निश्चितमेव ॥ १९ ॥ एतत्सायुज्यम्। तत्र सायुज्ये ॥ २० ॥ अत्र बादरायणस्य सर्वज्ञत्वात्तदात्मजोपि तादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ निंदनस्तवसत्कारान्यक्कारार्थं कलेवरम् ॥ प्रधानपरयो राजन्नविवेकेन कल्पितम् ॥२२॥ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा ॥
वैषम्यमिह भूतानां ममाहमिति पार्थिव ॥ २३ ॥ यन्निबद्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः ॥ तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः ॥
परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते ॥२४॥ तस्माद् वैरानुबंधेन निर्वैरेण भयेन वा ॥ स्नेहात् कामेन वा युंज्यात् कथंचिन्नेक्षते पृथक्॥२५॥

कथाः प्राहेत्यन्वयः ॥ २१ ॥ अहो भगवन्निंदकस्य नरकपातेन भाव्यमिति वदतस्तव कोऽभिप्रायः भगवत्पीडाकरत्वेन वा तदभावेऽपि सुरापानादिवन्निषिद्धनिंद्याचरणाद्वा तत्र तावद्देहाभिमानकृतनिंदादिनिमित्तत्वात्पीडादीनां भगवतश्च तदभावान्न पीडाशंकास्तीत्याह । निंदनेति सार्द्धैस्त्रिभिः । निंदनं दोषकीर्तनम् । न्यक्कारास्तिरस्कारः । निंदास्तुत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितम् ॥ २२ ॥ तदभिमानेन भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्ये त्युत्तरेणान्वयः । दंडस्ताडनं पारुष्यं निंदा तयोर्हेतुभूतयोर्हिंसा पीडा च भवति ॥ २३ ॥ यस्मिन्निबद्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा तथा यस्याभिमानो नास्ति अतोऽस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते न केनापीति । अभिमानाभावे हेतुः । कैवल्याद्द्वितीयत्वेनाभिमंतव्याभावात् । वैषम्याभावे हेतुः । अखिलात्मनः शर्वात्मन इति । तर्हि किमिति हंति दैत्यांस्तत्राह । परस्य दमकर्तुः हितार्थं दंडं करोतीत्यर्थः ॥ २४ ॥ यस्माद्भगवतो निंदादिकृतं वैषम्यं नास्ति तस्माद्येन केनाप्युपा

एवेत्यभिप्रेत्याह–बादरायणिरिति । आभाष्य राजन्निति संबोध्य ॥ २१ ॥ अत्राक्षिपति–अहो इत्यादिना । तदभावेऽपि पीडाकरत्वाभावेऽपि । तत्र पक्षद्वयेपि ॥ २२ ॥ तदभिमानेन देहाभिमानेन । मामयं निंदति स्तौती त्यादिभिर्यथा दुःखसुखे भवतस्तथैव मामयं हिनस्तीति हिंसापि भवति कस्मिन्सति दंडताडनं पारुष्यं त्वामहं घातयिष्यामीति भर्त्सनं तयोः सतोः एवं च भूतानामिह संसारे वैषम्यं सिद्धं ममैते शत्रवो ममैते बंधवश्च अहमेतान् हन्मि एतान्पालयामि चेत्यादिप्रकारकम्। पार्थिवेति । यथा पृथिव्यां राज्ञः "ममैवयं मही कृत्स्ना न ते मूढेति वादिनः" इत्युक्तेरभिमानस्तथाऽज्ञजीवस्यापीति भावः ॥ २३ ॥ यथाऽज्ञानिनां वधो देहाभिमाना तथा यस्य कृष्णस्याभिमानः प्राकृतो नास्ति । अत्राशयमाह–यथा सर्वजीवानामनात्मा देह आत्मा जीवश्चेत्युभयं भवति तथा यदि कृष्णस्यापि स्यात्तदा कृष्णस्य जीवानामिवाविद्यकोऽभिमानोऽभविष्यदेव कृष्णस्य तु देहस्तदभिन्नः परमात्मैव तस्मिन्स्वरूपभूते कृष्णोऽहमित्यभिमानोऽपि तन्मय एव । अखिलात्मन इति । तदंशस्यांतर्यामिणोऽप्यस्वरूपभूते जीवे जीवदेहे चाभिमानो नास्तीति भावः । अत एव परस्य मायिकवस्तुजी वेभ्यो भिन्नस्यातस्तेष्वस्वरूपभूतेष्वाभिमानाभावात् । कस्तस्य द्वेष्यः को वा द्वेष्टा परमात्मभूते देहे यस्तस्याभिमानः परमात्मैवाहमित्यात्मकस्तेन स कं वा द्वेष्टु परमात्मानं जानन् तं वा को द्वेष्टु तर्हि किमिति स्वद्वेषिणः शिशुपा लादीन्हिनस्ति तत्राह–दमकर्तुः । इत्यर्थ इति । तस्य पूर्वसुहृत्त्वात्तद्धितायैव तद्दण्ड इति भावः ॥ २४ ॥ इत्यर्थ इति । 'न विषममतिर्यत्र नृणाम्' इति चित्रकेतूपाख्यानोक्तेरिति भावः । ननु मास्तु निंदादेर्भगवत्पीडा करत्वं निंदकस्य दुरदृष्टजनकत्वं तु स्यादेव तदुक्तं कैमुत्येनापि "निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः॥" इति । सत्यंनिंदा हि द्विविधा आनुकूल्यमयी प्रातिकूल्य मयी च । तत्र प्रथमा प्रेमविलासरूपैव "मृगयुरिव कपींद्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् । बलिमपि बलिमत्त्वावेष्ट्यद्ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः" इति या सा तु पुरुषार्थचूडामणिमरीचिमंजरीव व्रजदेवी तां विना न कैरपि लभ्या । द्वितीया द्विविधा भगवदभिनिवेशाख्या भगवदनभिनिवेशाख्या च । तत्र प्रथमया शिशुपालादिकृतानिंदया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् ॥ न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥

येन ध्यायतस्तेनैव ध्यानेन निंदादिकृतपापस्यापि नाशात्सायुज्यं युक्तमित्याशयेनाह । तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं केनापि यस्मिंस्तेन भक्तियोगेनेत्यर्थः । युंज्यान्मन इति शेषः यस्मादेतैरुपायैः पृथङ् नेक्षते ॥ २५ ॥ तेष्वपि वैरानुबंधः श्रेष्ठ इत्याह । यथेति । न तथा भक्तियोगेनापि ॥ २६ ॥

जन्यमानमेव दुरदृष्टं तत्कारणेनैव भगवत्यभिनिवेशेन सद्य एव विनष्टीकृत्य भक्तियोगेनापि समकक्षतां प्राप्य विधियोग्यत्वमपि प्राप्यत इत्याह—तस्मादिति सप्तभिः । यस्मान्निंदाया भगवत्पीडाकरत्वं नास्ति निंदकस्य च पापक्षयः संभवेत्तस्मात् अभिनिवेशात् वैरानुबंधादिना युंज्यात् । भगवति मन इति शेषः । निर्वैरेणेति व्याख्यातं स्वामिचरणैः । यद्वा—वैरं प्रतिपक्षत्वं निर्वैरं तत्प्रतियोगि स्वपक्षत्वं पुत्रादिभावो यः खल्वग्रिमश्लोके संबंधशब्दवाच्यत्वेन स्पष्टी भविष्यति तेन स्नेहाद्यः कामस्तेन प्रीतिजन्येन कामेनेत्येव व्याख्येयं न तु स्नेहस्य पृथक्साधनत्वं तृतीयांतत्वप्रक्रमभंगापत्तेः फलमाह कथं चिदपि तं भगवंतं पृथङ् नेक्षते किं तु स्वीयभावानुरूपमेव तं साक्षात्पश्यतीत्यर्थः । भयवैरभाववन्तावधिकारिणौ प्रति तु पृथङ् नेक्षते किं तु सायुज्यप्राप्त्या तं स्वाभिन्नमेवेक्षते इत्येवार्थः । एकस्यापि वाक्यस्य पात्रभेदादर्थभेदः श्वेतो धावतीतिवदिति न्यायात् । अत्र युंज्यादिति लिङा वैरानुबंधादिना भगवति मनोभिनिवेशं कुर्यादिति विधिरवगम्यते स च शिशुपालादिषु न संभवति तेषां रागप्राप्तत्वात् । शिशुपालादिदृष्ट्यान्येष्वेवैष विधिरित्यपि न शक्यते व्याख्यातुं भगवत्प्रातिकूल्यस्य विधानानर्हत्वात् । यदुक्तम् "आनुकूल्यस्य ग्रहणं प्रातिकूल्यस्य वर्जनम्" इति । न च शिशुपालादिभ्योऽन्येषु जनेषु विहितोऽपि वैरानुबंधो भगवदभिनिवेशं जनयति "तानहं द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥" इत्यादिपरसहस्रवचनविरोधात् । न च रागप्राप्त एव वैरानुबंधो नरकं जनयेन्न तु विहित इति वाच्यम् । शिशुपालादिषु व्यभिचारात् । न च शिशुपालादिविभिन्नेष्वेवेयं व्यवस्थेति वाच्यं विधिदृष्ट्या वैरानुबंधस्य शिष्टानुष्ठानादर्शनात् । तस्यैव वैरानुबंधो भगवदभिनिवेशं जनयति यस्य हंतृत्वेनाभिज्ञातः श्रुतो दृष्टो वा भगवान्संभावितो भवति । यथा लोके स्वहंतृत्वेन निर्द्धारितेष्वेव वैरिव्याघ्रसर्पादिषु भीतस्य चित्ताभिनिवेशो नान्येष्विति तस्मादेतत्पद्यमेवं व्याचक्षते । यस्मात्स वैरभाववतामपि हितं करोति तस्मात्तत्र वैरस्यानौचित्याद्वैरभावव्यतिरिक्तेनैव भावेन मनोभिनिवेशयेदित्याह—तस्मादिति । निःशब्दस्य नञर्थत्वान्निर्वैरेण वैरभावविभिन्नेन बंधुपुत्रमित्रादिभावेन मनो युंज्यात् कीदृशेन वैरानुबंधेन वैर इवानुबंधश्चित्ताभिनिवेशो यत्र तेन यो यस्मिन्ननुबद्धः स तस्मिन्नभिनिविष्ट एवेति ताटस्थ्यभावो वारितः । तथा स्नेहात्कामेन स्नेहैकहेतुको यः कामस्तेन कीदृशेन भयेन स्वजनार्यपथत्यागोत्थभयवता व्रजयुवतिकानुगामिना कामेनेत्यर्थः । भयेन वेति । वा शब्दान्निर्भयेन कामेन च रुक्मिण्यादिकामानुगामिना कामेनेत्यर्थः । औपपत्यदाम्पत्ययोर्द्वयोरप्यऽस्ति प्रमाणं तथा हि "जारभावेन सस्नेहं सुदृढं सर्वतोऽधिकम्" इति बृहद्वामनम् । "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्त्तारं च जगद्योनिं वासुदेवमजं विभुम् ॥" इति कूर्मपुराणञ्च ॥ २९ ॥
परमनिंद्यस्यापि वैरभावस्य चित्ताभिनिवेशांशकत्वेन महिमाऽपार एवेत्याह—यथेति । वैरे वैरभावे योऽनुबंधः सातत्यं तेन मर्त्यः पूर्वोक्तयुक्तेः स्वस्य भगवद्व्यत्वज्ञानविशिष्ट एव नान्यः तन्मयतां स्त्रीमयं कामुक इंतिवत्तदेकाभिनिवेशवत्त्वं न तथेति सद्य इति शेषः । निश्चिता मतिरिति । ममायं निश्चय एव कृत इत्यतोत्र प्रमाणं न प्रष्टव्यं यदि भक्तियोगादपि वैरभावो मनोभिनिवेशकत्वांशेनाधिकस्तदा किमुत वक्तव्यं तादृशाभिनिवेशवान्स भक्तियोग इति भावः । तेन "श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः" इति त्वया शिशुपालादीनामनिष्टसाधनत्वबुद्ध्या वैरानुबंधो निंद्यते मया त्विष्टसाधनशिरोमणेर्भक्तियोगादपि स्तूयते इति कुतः शिशुपालादीनां दुर्गतिसंभावनापीति ध्वनिः । तेन भावमार्गेष्वतिनिंद्योऽपि वैरभावो भगवदभिनिवेशशीघ्रसंपादकत्वांशेनैव भक्तियोगाच्छुद्धाद्यादि स्तूयते तदा भावमार्गेष्वतिवंद्यो वसुदेवादीनां वात्सल्यसख्यादिः किमुततरां नंदादीनामात्यंतिकतदभिनिवेशं प्रतीक्षणादिभूमसंपादकः सस इत्यनुध्वनिः । तेनार्वाचीनानामपि श्रीनंदादिभावानुसारेण वात्सल्यादिभावेप्सूनां रागानुगा भक्तिर्वैधभक्तेः सकाशादुत्कर्षवतीति पर्यनुध्वनिः ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ॥ संरंभभययोगेन विंदते तत्सरूपताम् ॥ २७ ॥ एवं कृष्णे भगवति मायामनुज ईश्वरे ॥ वैरेण पूतपाप्मानस्तमीयुरनुचिंतया ॥ २८ ॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः ॥ आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ २९ ॥

अत्र दृष्टांतः । कीटः पेशस्कृता भ्रमरेण संरंभो द्वेषो भयं च स एव योगस्तेन॥२७॥वैरेण याऽनुचिंता चिंतनं तयैव पूतः पाप्मा येषां ते तं प्रापुः॥२८॥तदघं कामादिनि

आस्तां तादृशवस्तुशक्तियुक्तस्य तेषु प्रकाशमानस्य भगवद्विग्रहाभासस्य वार्त्ता प्राकृतेऽपि तद्भावमात्रस्य भावावेशफलं महद् दृश्यते इति सदृष्टांतमाह—कीट इति । संरंभो द्वेषो भयं च ताभ्यां योगस्तदावेशस्तेन तत्स्वरूपतां तस्य स्वमात्मीयं रूपमाकृतिर्यत्र तां तत्सारूप्यमित्यर्थः । कीटोऽत्र श्यामाख्यः कीटः पेशो मुखानीतमृन्निर्मितवासस्थानं तत्करोतीति पेशस्कृत्तेन ''अंगे वासे विलासे च पेशो हि पेशसा सह'' इति द्विरूपकोशात् । 'कुड्यं भित्तौ विलेपने' इति मेदिनी । कुड्यायामिति स्त्रीत्वमार्षम् । भित्तौ विलेपने मृदंगाकारमृन्निर्मिते गृहे वा रुद्ध इत्यर्थः ॥ २७ ॥ एवमिति । नराकृतिपरब्रह्मत्वान्माययैव प्राकृतमनुजतया प्रतीयमाने । ननु कीटस्य पेशस्कृद्द्वेषे पापं न भवति अत्र तु तत्स्यादिति चेदाह—वैरेण याऽनुचिंता तदावेशस्तयैव पूतपाप्मानस्तद्ध्यानावेशस्य तादृक्छक्तित्वादिति भावः । विश्वनाथः—माया कृपा सद्गतिप्रापणी मनुजेषु स्वद्वेष्टृष्वपि यस्य तस्मिन् । यद्वा—मायया स्वरूपेणैव मनुजे स्वरूपभूतया नित्यशक्त्या मायाख्यया युत इति श्रुतेः । वैरजनितध्यानावेशेन पूतो नष्टपाप्मा तन्निंदनतिरस्कारादिर्येषां ते इत्याह ॥ २८ ॥ न च शास्त्रविहितेनैव भगवद्धर्मेण सिद्धिः स्यान्न तदविहितेन कामादिनेति वाच्यं यतः कामाद्द्वेषादिति यथा विहितया भक्त्या ईश्वरे मन आवेश्य तद्गतिं गच्छंति तथैवाविहितेनापि कामादिना बहवो गता इत्यर्थः । तदघं तेषु कामादिषु मध्ये यद्द्वेषभययोरघं भवति तद्धित्वैव भयस्यापि द्वेषसंमिलितत्वादघोत्पादकत्वं ज्ञेयम् । अत्र केचित् कामेऽप्यघं मन्यंते । तत्रेदं विचार्यते—भगवति काम एव केवलं पापावहः किं वा पतिभावयुक्तः । अथवोपपतिभावयुक्त इति । स एव केवल इति चेत् स किं द्वेषादिगणपातित्वात् तद्वत्स्वरूपेणैव वा परमशुद्धे भगवति यदधरपानादिकं यच्च कामुकत्वाद्यारोपणं तेनातिक्रमेण वा । नाद्येन ''उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः । द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥'' इत्यादौ द्वेषादेर्न्यक्कृतत्वात् तस्य तु स्तुतत्वात् । अतस्तत्र प्रिया इति स्नेहवत्कामस्यापि प्रीत्यात्मकत्वेन तद्वदेव न दोषः तादृशीनां कामो हि प्रेमैकरूपः ''यत्ते सुजात चरणांबुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु । तेनाटवीमटासि तद्व्यथते न किं स्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥'' इत्यादावतिक्रम्यापि स्वसुखं तदानुकूल्य एव तात्पर्यात् सैरंध्र्यास्तु भावो रिरंसाप्रायत्वेन श्रीगोपीनामिव च केवलं तत्तात्पर्याभावात्तदपेक्षयैव निंद्यते न तु स्वरूपतः 'सानंगतप्तकुचयोः' इत्यादौ 'अनंतचरणेन रुजो मृजंती' इति 'परिरभ्य कांतमानंदमूर्त्तिम्' इति कार्यद्वारा तत्स्तुतेः । तत्रापि ''सहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया'' इत्यत्र प्रीत्यभिव्यक्तेश्च तदेवं तस्य कामस्य द्वेषादिगणांतःपतितत्वं परिहृत्य तेन पापावहत्वं परिहृतम् । अथ कामुकत्वारोपणाधरपानादिरूपस्तत्र व्यवहारोऽपि नातिक्रमहेतुः यतः 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेन लीला तत्र स्वभावत एव सिद्धा तत्र च श्रीभूलीलादिभिस्तस्य तादृशलीलायाः श्रीवैकुंठादिषु नित्यशुद्धत्वेन स्वतंत्रलीलाविनोदस्य तस्याभिरुचितत्वावगमात् । तादृशलीलारसमोहस्वाभाविकं भगवत्ताद्यनुसंधानमपि तत्कामुकत्वादिमननमपि च तदभिरुचितत्वेनैवावगम्यते तथा तत्प्रेयसीजनानामपि तत्स्वरूपशक्तिविग्रहत्वेन परमशुद्धरूपत्वात् ततो न्यूनत्वाभावाच्च तदधरपानादिकमपि नाननुरूपं पूर्वयुक्त्या तदभिरुचितमेव तासां तत्सरूपशक्तिविग्रहत्वं श्रीकृष्णसंदर्भे दर्शितमस्ति दर्शयिष्यते श्रीदशमे । न च प्राकृतरामाजने दोषः प्रसंजनीयः तद्योग्यं तादृशं भावं स्वरूपशक्तिविग्रहं च प्राप्यैव तदिच्छयैव तत्प्राप्तेः । अथ पापश्रवणेन च न पापावहोऽसौ कामः तदश्रवणादेव अतिपतिभावयुक्ते च तत्र सुतरां न दोषः । प्रत्युत स्तुतिः श्रूयते ''याः संपर्यचरन्प्रेम्णा पादसंवाहनादिभिः । जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥ '' इति । महानुभावमुनीनामपि तद्भावः श्रूयते यथा श्रीमध्वाचार्यधृतं महाकौर्मवचनम् ''अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्त्तारं च जगद्योनिं वासुदेवमजं विभुम् ॥'' इति । अत एव वंदितम् ''पतिपुत्रसुहृद्भ्रातृपितृवन्मातृवद्धारिम् । ये ध्यायंति सदोद्युक्तास्तेभ्योऽपीह नमोनमः ॥'' इत्यनेन अथोपपतिभावेन च न पापावहोऽसौ 'यत्पत्यपत्यसुहृदामनुवृत्ति–' इत्यादिना ताभिरेवोत्तरितत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ॥ संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥ ३० ॥
कतमोऽपि न वेनः स्यात् पंचानां पुरुषं प्रति ॥ तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३१ ॥

मित्तं पापं हित्वा ॥ २९ ॥ तानाह । गोप्य इति ॥ ३० ॥ तर्हि वेनः किमिति नरके पातितः तीव्रध्यानाभावात्पापमेव तस्य फलितमित्याह । कतमोऽपीति । पुरुषं

'गोपीनां तत्पतीनां च' इत्यादिना श्रीशुकदेवेन 'न पारयेहं निरवद्यसंयुजाम्' इत्यनेन स्वयं श्रीभगवता तादृशानामन्येषामपि तद्भावो दृश्यते यथोदाहरिष्यते श्रीदशमे 'पुरा महर्षयः सर्वे दंडकारण्यवासिनः' इति । अतः पुरुषे ष्वपि स्त्रीभावेनोद्भवात् भगवद्विषयत्वात् न प्राकृतकामदेवतोद्भावितः प्राकृतकामोऽसौ किं तु 'साक्षान्मन्मथमन्मथः' इति श्रवणात् । आगमादौ तस्य कामत्वेनोपासनाच्च भगवदेकोद्भावितोऽप्राकृत एवासौ काम इति ज्ञेयम् । अत एव मुमुक्षुमुक्तनित्यपार्षदानामपि वांछनीयोऽसाविति दर्शितं श्रीदशमे 'एताः परं तनुभृतः' इत्यादिना । यतः श्रुतयोपि नित्यसिद्धगोपिकाभावाभिलाषिण्यः सत्यस्तद्रूपेणैव तद्गणांतःपातिन्यो बभूवुरिति । 'निभृतमरुन्मनोक्षे' इत्यादिश्रुतिस्तवे दर्शयिष्यते तदेवं साधु व्याख्यातं कामादित्यादौ द्वेषभययोर्यदघमित्यादि ॥ २९ ॥ अथ बहवस्तद्गतिं गता इत्यत्र निदर्शनमाह—गोप्य इति सार्द्धेन । साधकचरीणां गोपीविशेषाणां पूर्वावस्थामवलंब्योच्यते—गोप्य इति । वयमिति । यथा श्रीनारदस्य " प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् " इत्याद्युक्तरीत्या पार्षददेहत्वे सिद्धे तेन स्वयं वयमिति निजपूर्वावस्थामवलंब्योच्यते तत्रैव वैधी भक्तिः । अधुना लब्धरागस्य तस्य न मध्येकांतभक्तानां गुणदोषोद्भवाः " गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः " इति न्यायेन विध्यनधीना रागात्मिकैव विराजते इति । अत एव तद्गतिं गता इति तेषां फलप्राप्तेरप्यतीतत्वनिर्देशः । एवमेव वक्ष्यते स्वयं भगवता ' केवलेन हि भावेन गोप्यः ' इत्यादि । ' मत्कामा रमणम् ' इत्यादौ ' संगाच्छतसहस्रशः ' इति च । अत्र ता गोप्य इवाधुनिकाश्च तद्गुणादिश्रवणेनैव तद्भावा भवेयुः यथोक्तम् " श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः । उरुगायोरुगीतो वा पश्यंतीनां पुनः कुतः ॥" इति । अथ पार्षदचरस्यापि चैद्यस्यागंतुकोपद्रवाभासदर्शनेनैव साधकत्वनिर्देशः । संबंधाद्यः स्नेहो रागस्तस्माद्वृष्णयो यूयं चेत्येकम् । तस्माद्वैरानुबंधेनेत्यादौ कामादित्यादौ चोक्तस्यैवार्थस्योदाहरणवाक्येस्मिंस्तदेकार्थावश्यकत्वात् पंचानामित्यनुरोधात् । उभयत्रापि संबंधस्नेहयोर्द्वयोरपि विद्यमानत्वाच्च । संबंधग्रहणं रागस्यैव विशेषज्ञापनार्थं गोपीवदत्रापि संबंधे स्नेहे च वृष्णिविशेषाः पांडवसंबंधिविशेषाश्च पूर्वावस्थामवलंब्य साधकत्वेन निर्दिष्टाः । अतः संबंधे स्नेहोऽपि तदभिरुचिमात्रं ज्ञेयम् । भक्त्या विहितया अस्या एव प्रतिलब्धत्वेन भावमार्गे निर्देष्टुमुपक्रांतत्वात् । अत्र विश्वनाथः—कामात्स्नेहोत्थादेव न तु सामान्यतः तादृशाभिप्रायत्वे कुब्जाद्या इति प्रयुज्येत भयात्स्वस्य कृष्णवध्यत्वज्ञानत उद्भूतात् । वृष्णयो यादवाः यूयं पांडवाश्च संबंधात्पुत्रभ्रात्रादिभावात् मातुलेयभ्रातृस्वस्रीयादिभावाच्च । कीदृशात्स्नेहात्स्नेहमयादिति । सत्राजित्प्रसेनशतधन्वकर्णदुर्योधनादयो व्यावृत्ताः । न चात्र स्नेहस्य पृथक्तत्प्राप्तिसाधनत्वं व्याख्येयमुत्तरवाक्ये पंचसंख्यात्वेनैव भावानां निरूपणात् । वयं नारदादयो भक्त्या तद्गतिं गता इति पूर्वस्यैवानुषंगः । तत्र गोप्यः प्रेमवत्प्रेयसीभावम् । कंसः सायुज्यम् । चैद्यदंतवक्रपौंड्रकाः सायुज्यम् । अन्ये चारयो यथायोग्यं सायुज्यसालोक्यादिकम् । वृष्णयः पांडवाश्च सख्यादिभाववत्पार्षदत्वम् । नारदादय ऐश्वर्यज्ञानवत्पार्षदत्वमित्येवं यथासाधनं तत्तत्प्राकरणिकवाक्यदृष्ट्या निर्द्धारितां तदीयां गतिं गताः । अत्र " यादवानां हितार्थाय धृतो गिरिवरो मया " इति हरिवंशवाक्यान्नंदादिगोपानामपि वृष्णिवंशत्वादैश्वर्यज्ञानशून्यत्वेन स्नेहवत्त्वाधिक्यात्पुत्रादिसंबंधस्यातिदार्ढ्यमेषामेव प्राधान्यद्योतकं ज्ञेयम् ॥ ३० ॥ अत्राक्षिपति—तर्हीति । तत्र वेने । अत्र चक्रवर्त्ती—ननु तर्हि शिशुपालवद्भगवन्निंदान्यक्कारादिकर्त्ता वेनः किमिति नरके पतितस्तत्राह—पुरुषं भगवंतं प्रति पञ्चानां पूर्वश्लोकोक्तानां भावानां मध्ये कस्याप्यनास्पदत्वात्कतमो न भवति न तावद्गोपीव स्नेहवत्कामवान् इह हेतुः स्वामिचरणैरुक्तः पुरुषे पुरुषस्य कामासंभवादिति । न च कंसवद्भीतः । न च मां हनिष्यतीति बुद्ध्या भगवदत्यंतावेशमय्या शिशुपालवद्द्वेष्टा नापि वृष्ण्यादिष्विव कमपि संबंधं दधानो नापि नारदादिरिव भक्त इत्यर्थः । तेन शिशुपालादिभिन्नः प्रतिकूलभावं दिधीर्षुर्वेन इव नरकं यातीति सूचितम् । संदर्भस्तु—वेनस्य भगवंतं प्रति प्रासंगिकनिंदामात्रात्मकं वैरं न तु वैरानुबंधः । ततस्तीव्रध्यानाभावात्पापमेव तत्र फलितमिति स्वामी । अतोऽसुरतुल्यस्वभावैरपि तस्मिन्स्वमोक्षार्थं वैरानुष्ठानसाहसं न कर्त्तव्यमिति भावः । अत एव "ये वै

॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मातृष्वसेयो वश्चैद्यो दंतवक्रश्च पांडव ॥ पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्युतौ ॥ ३२ ॥ युधिष्ठिर उवाच ॥ कीदृशः कस्य वा शापो हरिदासाभिमर्शनः ॥ अश्रद्धेय इवाभाति हरेरेकांतिनां भवः ॥ ३३ ॥ देहेंद्रियासुहीनानां वैकुंठपुरवासिनाम् ॥ देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ॥ ३४ ॥ नारद उवाच ॥ एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया ॥ सनंदनादयो जग्मुश्चरंतो भुवनत्रयम् ॥ ३५ ॥ पंचषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः ॥ दिग्वाससः शिशून् मत्वा द्वास्थौ तान् प्रत्यषेधताम् ॥३६॥ अशपन् कुपिता एवं युवां वासं न चार्हथः ॥ रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ॥ पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ॥३७॥ एवं शप्तौ स्वभवनात् पतंतौ तैः कृपालुभिः ॥ प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम् ॥ ३८ ॥ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववंदितौ ॥ हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ३९ ॥

श्रीहरिं प्रति पुरुषे पुरुषस्य कामासंभवाद्भयादिभिर्भ्श्वितयतां पंचानां मध्ये वेनो न कतमोऽपीत्युक्तम् ॥ ३१ ॥ तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णे शिशुपालस्य वैरानुबंधे को हेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह । मातृष्वसेय इति । पदाद्वैकुंठाच्च्युतौ ॥ ३२॥ हरिदासावभिमृशत्यभिभवतीति तथा । कस्य शापः कीदृशो वा । अश्रद्धेयोऽनादरणीय इव । असंभवात् । भवो जन्म॥ ३३ ॥असंभवमेवाह । जन्महेतुभूतैः प्राकृतैर्देहेंद्रियासुभिर्हीनानाम् । शुद्धसत्त्वमयदेहानामित्यर्थः । प्राकृतदेहसंबंधेन संबद्धमेतदाख्यानमाख्यातुमर्हसि॥ ३४ ॥ ३५॥ कथंभूताः । पंच वा षड्वा हायनानि वर्षाणि येषां ते अर्भा बालास्तद्वदाभा येषां ते पूर्वेषां मरीच्यादीनामपि पूर्वजास्तेभ्यः प्रथमं जाताः । दिग्वाससो दिगंबराः । अतः शिशून्मत्वा॥ ३६ ॥वासमपि नार्हथः कुतः पुनस्तत्सेवामिति चकारार्थः । हे बालिशौ । अतो हेतोराशु यातम्॥ ३७॥ वां युवयोस्त्रिभिर्जन्मभिः लोकाय स्वस्थान

भगवता प्रोक्ता उपाया ह्यात्मलब्धये'' इत्यादेरपि तेष्वतिव्याप्तिर्व्याहन्यतेऽनभिप्रेतत्वेनाप्रोक्तत्वात् । यस्मादेवं तस्मादेवंभूते । अत्रापि पूर्ववन्निवेशयेदिति सम्मतिमात्रं न विधिः केनापि तेष्वपायेषु युक्ततमेनैकेनेत्यर्थः । अहो यस्तादृशबहुप्रयत्नसाध्यभक्तिमार्गेण साध्यतेऽसोऽचिराद्भावविशेषमात्रेण तत्र च द्वेषादिनापि विधिना सहैकार्थं ज्ञेयम् । तस्मादेवंभूते परमसद्गुणसद्भावे तस्मिन् दूरेस्तु पामरजनभाव्यस्य वैरस्य वार्ता को बाधम औदास्यमवलम्ब्य प्रीतिमपि न कुर्यादिति रागानुगायामेव तच्च युक्ततमत्वमंगीकृतं भवति ॥ ३१ ॥ चैद्यदंतवक्रौ तु नासुरौ किं तु हरेः स्वभक्तिप्रवर्त्तकविप्रकुलदाक्षिण्यमयस्वैरलीलेच्छया तदनुकारिणावेवेत्यभिप्रायं प्रश्नोत्तराभ्यां दर्शयितुमाह—मातृष्वसेय इति । पांडवेति । यथा साक्षाद्धर्मपुत्रे त्वयि पांडवत्वं तथा दंतवक्रशिशुपालयोरप्यनुकरणत्वमेव वस्तुतस्तौ पार्षदप्रवरावेवेति भावः ॥ ३२ ॥ तत्र तयोरन्यथाभावः सर्वथा न संभवतीति प्रश्नस्यार्थः । ''न स पुनरावर्तते'' इति श्रुतेः । ''अनावृत्तिः शब्दात्'' इति न्यायात् । ''मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते'' इति गीतागम्यश्च 'न मत्परा नंक्ष्यंति शांतरूप' इति श्रीकपिलोक्तेश्च स न्यायश्चासौ सिद्धांतस्तु तत्रेतिहासमात्रं तच्च पूर्वयुक्त्यैव संभवतीति तदभिप्रायः । वक्ष्यते च स्वयं 'विष्णुचक्रहतांहसौ' इति । व्याख्यास्यते च तैः तयोः पापमेव हतं न तु ताविति ॥ ३३ ॥ इत्यर्थ इति । शुद्धसत्त्वमयदेहवतां त्वाविर्भावतिरोभावावेव भवतो न तु जन्ममृती इति भावः ॥ ३४ ॥ ३५ ॥ पंच वा षट् वेति किंवदंतीन्यायेन । अतो नग्नत्वात् ॥ ३६ ॥ रजस्तमोभ्यां रहिते प्राकृतसत्त्वादिराहित्येपि तन्मात्ररहित्यस्य विवक्षितत्वात् । प्राकृतसात्त्विकत्वेनैतादृशो दोषः संभवतीति । हे बालिशाविति। अहो एतद्वैकुंठं न प्राकृतः समायाति किन्तु परमभक्त एवेति विचारमूढा बत एतादृशोऽत्र वासो नोचित इति भावः । अतो बालिशत्वादेव ॥ ३७ ॥ इत्यर्थ इति । जन्मत्रयानंतरं पुनरत्रैवागमनमेतयोर्भवत्विति भवद्भिः संपाद्यतामिति भावः ॥ ३८ ॥ तौ जयविजयौ । ततो हिरण्यकशिपोरनुजः ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ॥ हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः॥४०॥ हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ॥ जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥ सर्वभूतात्मभूतं तं प्रशांतं समदर्शनम् ॥ भगवत्तेजसा स्पृष्टं नाशक्नोद्धंतुमुद्यमैः ॥४२ ॥ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवस्सुतौ ॥ रावणः कुंभकर्णश्च सर्वलोकोपतापनौ ॥ ४३ ॥ तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ॥ रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात् प्रभो ॥ ४४ ॥ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ॥ अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ ॥ वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम् ॥ नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥

प्राप्तये कल्पतां तावताऽयं शापः समाप्यतामिति पुनः प्रोक्तावित्यर्थः ॥ ३८ ॥ ३९ ॥ धरोद्धारे निमित्ते तत्प्रतिघाती हतः ॥ ४० ॥ हिरण्यकशिपोर्वधे कारणं सूचयति। हिरण्यकशिपुः पुत्रमिति ॥ ४१ ॥ सर्वभूतानामात्मभूतम् । कुतः । समं ब्रह्मैव पश्यतीति तथा तम् । अतः प्रशांतं द्वेषादिरहितम् । अत एव भगवत्तेजसा स्पृष्टं व्याप्तम् । उद्यमैः शस्त्रास्त्रप्रहारादिभिः ॥ ४२ ॥ विश्रवसः सुतौ ॥ ४३ ॥ न्यहनत हतवानित्यर्थः । तर्हि तदेव कथनीयमित्युत्सुकं प्रत्याह । रामवीर्यमिति ॥ ४४ ॥ कृष्णचक्रेण हत

सिंहरूपिणा नृसिंहरूपिणा । एकदेशन्यायेन सिंहपदेनापि नृसिंहग्रहः ॥४०॥ यातनास्तीव्रवेदनाः ॥४१॥ सर्वभूतात्मभूतत्वे हेतुं पृच्छति–कुत इति । यद्वा–सर्वेषां भूतानामात्मभूतमात्मवत्प्रेष्ठम् । अतो ब्रह्मदर्शित्वात् । प्रशांतं स्वद्रेष्टर्यपि पितरि द्वेषाभावात् । यद्वा–स्वपरदुःखादीनां तुल्यदर्शनात्समदर्शनम् । तत एव प्रशांतत्वादेव । भगवत्तेजसा नित्यतदाविष्टभगवतः प्रभावेण ॥ ४२ ॥ ततो हिरण्यकशिपुहिरण्याक्षाख्यदेहत्यागोत्तरम् ॥४३॥ तत्रापि राक्षसत्वेपि।इत्यर्थ इति।शब्लुगभावोवत्रार्ष इति भावः । राघवो भूत्वा रघुवंशे जन्म प्राप्य । प्रभो इति । प्रकर्षेण हरिचरितश्रवणे भासीत्यतः पुनरपि तवैतादृशसंगो न दुर्घट इति ॥ ४४ ॥ इत्यर्थ इति । विष्णुचक्रेण तयोरपराध एव बहिः शिशुपालदंतवक्त्राकारतया परिणतो हतो न तु ताविति । यथा वह्निना कनकस्य मालिन्यमेव हन्यते न तु कनकं तथैव जयविजययोर्बाह्यमालिन्यावरणयोर्नष्टयोः सतोर्जयविजयावेव तेजःपुंजाकारौ श्रीकृष्णं प्रविष्टौ जनदृष्ट्येति भावः ॥ ४५ ॥ अच्युतेन सह स्थितावात्मानावाकारौ ययोस्तयोर्भावस्तत्ता तां ध्यानेनैव नीतौ पुनर्मौशललीलांते हरेर्नारायणस्य पार्श्वं जग्मतुरिति मौशललीलातः पूर्वं श्रीकृष्णशरीर एव नारायणस्यापि प्रविष्टत्वात्तत्पार्षदौ जयविजयावपि तत्रैव प्रविश्य स्थिताविति तत्त्वम् । शिशुपालदंतवक्त्रौ कृष्णसायुज्यं प्रापतुरिति लोकप्रतीतिः श्रीकृष्णेन नारायणरूपं स्वस्मिन्नेवाक्रूराय यमुनाह्रदे दर्शितमिति स तत्रैव स्थितोऽन्यथा तद्दर्शनासंभवादिति ध्येयम् । किञ्चात्रान्यदपि विचार्यं चाक्षुषमन्वंतरजातदक्षकन्यादितिपुत्रौ हिरण्यकशिपुहिरण्याक्षौ वराहनृसिंहरूपाभ्यां हरिणा हतौ तौ च मुक्तिं नेयतुः "मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः" इति प्रह्लादं प्रति श्रीनृसिंहोक्तेः स्वर्गादिलोकानेव गतौ भक्तपुलाकन्यायेन हिरण्याक्षेप्ययं न्यायो ध्येयः । तथा च यावद्रामावतारं स्वर्गादौ स्थित्वा पुनस्तौ केशिन्यां विश्रवसो रावणकुंभकर्णावभूतां पुनश्श्रीरामावतारे वैवस्वतमन्वंतरचतुर्विंशतितमयुगे श्रीरामेण हतावपि मोक्षं नापतुः 'त्रिभिर्लोकाय कल्पताम्' इत्युक्तेः । "स तस्य वाक्यैः करुणैर्महात्मा संबोधितः साधुविभीषणेन । आज्ञापयामास नरेंद्रसूनुः स्वर्गीयमाधानमदीनसत्त्वः ॥" इति श्रीवाल्मीकीययुद्धकांडोक्तेश्च । स्वर्गीयं स्वर्गार्हम् आधानं प्रेतकृत्यविधानमिति व्याख्यातं रामीयतिलके । तथा च रावणकुंभकर्णावपि देहान्ते यावत्कृष्णावतारं स्वर्गे स्थित्वा पुनः शिशुपालदंतवक्त्रौ बभूवतुः तौ च श्रीकृष्णनिहतौ स्वाधिकारं वैकुंठीयं जग्मतुरिति ज्ञेयम् । कृष्णावतारो हि वैवस्वतमन्वंतरयाष्टाविंशतितमयुगीयकलिद्वापरसंधौ जातः "कलिद्वापरयोः संधौ श्रीकृष्णोऽवातरिष्यति"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधिष्ठिर उवाच ॥ विद्वेषो दयिते पुत्रे कथामासीन्महात्मनि ॥ ब्रूहि मे भगवन् येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे जयविजयत्रिजन्मवर्णनं नाम प्रथमोऽध्यायः॥१॥ नारद उवाच ॥ भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ॥ हिरण्यकशिपू राजन् पर्यतप्यद्रुषा शुचा ॥१॥ आह चेदं रुषा घूर्णः संदष्टदशनच्छदः ॥ कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमंबरम् ॥ २ ॥ करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः ॥ शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥३॥ भोभो दानवदैतेया द्विमूर्धंस्त्र्यक्ष शंबर॥शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ॥ ४ ॥ विप्रचित्ते मम वचः पुलोमन्छकुनादयः ॥ शृणुतानंतरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥

मंहो ययोस्तौ । तयोः पापमेव हतं न तु तावित्यर्थः ॥ ४५ ॥ ४६ ॥ येन कारणेन प्रह्लादस्याच्युतात्मताच्युतैकचित्तत्वं तदपि ब्रूहीति शेषः ॥ ४७ ॥ इति सप्तमे टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये विष्णुरोषेण लोकं विप्लाव्य दानवैः ॥ तद्धतभ्रातृपुत्रादीनितिहासैरसांत्वयत् ॥ १ ॥ भगवद्द्वेष एव तद्द्वेषेऽपि कारणमित्याशये नाह । भ्रातरित्यादिना । एवं देवपक्षपातेन ॥ १ ॥ कोपेन उत अतिशयेन ज्वलद्भ्यां कोपाग्निधर्मेणैव धूम्रमंबरं निरीक्षमाणः ॥ २ ॥ करालदंष्ट्राभिर्युक्तयोग्रया दृष्ट्या

इति परमब्रह्मवैवर्त्तीयप्रथमांशोक्तेः । वस्तुतस्तु–'विष्णुचक्रहतांहसौ' इत्युक्तेश्चक्रधरहतस्यैव विष्णुलोको भवतीति ''येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । तेते गता विष्णुपुरीं नरेन्द्राः क्रोधोऽपि देवस्य वरेण तुल्यः ॥'' इत्युत्तरकांडे वाल्मीकीयोक्तेः । वराहावतारे श्रीरामावतारे चक्रधारणाभावादपि तौ मोक्षं नेयतुः यद्यपि दंतवक्रो गदानिर्भिन्नहृदयः कृत्वा हतः ''कृष्णोऽपि तमहन् गुर्व्या कौमोदक्या स्तनांतरे'' इत्याद्युक्ते स्तथापि चक्रधरत्वं कृष्णस्य तत्राप्यासीदेवेति क्वचिद्गदाया अपि चक्रत्वं निर्दिश्यते यथा गर्भस्थपरीक्षिद्रक्षणं गदयैव कृतम् 'भ्रामयंतं गदां मुहुः' इत्युक्तेः । पुनः परीक्षितैवोक्तं श्रीदशमारंभे–'जुगोप कुक्षिं गत आत्तचक्रः' इति । विष्णुपुराणे हि प्रतिपादितं ''हिरण्यकशिपोर्विष्णुरयमित्येवं मनस्यभूत् दशाननत्वेप्यनंगपराधीनतया जानकीसमासक्तचेतसो दाशरथिरूपदर्शनमेवासीन्नायमच्युत इत्यासक्तिर्विपद्यतोंतःकरणस्य मानुषबुद्धिरेव केवलमभूत्'' इति । अत एव रावणकुंभकर्णयोः शिशुपालरूपेण जन्म श्रूयते न हि भगवत्सालोक्यं प्राप्तयोरपि जन्म भवति किन्तु ब्रह्मणा सह मुक्तिरेवेति कृतं बहुविचारेण ॥ ४६ ॥ भगवान्निति । भगवदवतारत्वेन सर्वज्ञोऽसीति भावः ॥ ४७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कंधे प्रथमोऽध्यायः ॥ १ ॥ विष्णो रोषेण विप्लाव्योपद्रुतं कृत्वा तेन विष्णुना हतो यो भ्राता हिरण्याक्षस्तस्य पुत्रादीन् । आदिना भार्यादिग्रहः (१) एवं पर्यतप्यतेति संबंधः ॥ १ ॥ अंबरं निरीक्षन्निति । हरेर्निवासं वैकुंठं हरिं च स्वहस्तेनैव ध्वंसयामीति भावः । चक्षुरग्न्योर्धूमव्याप्तत्वादिति भावः ॥ २ ॥ कराला भयंकरा या दंष्ट्रास्ताभिः ॥ ३ ॥ दानवादिपदानामर्थांतरत्वे सत्त्वेप्याह । दानं वांति हिंसंतीति दानवाः । दानपदेन दातारोऽपि गृह्यंते ''सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः'' इति वक्ष्यमाणत्वात् । दितिश्छेदनं तेन सह वर्त्तत इति दैतेयाः–'संदीपयत वृश्चत' इति वक्ष्यमाणत्वात्' । द्वौ मूर्द्धानौ यस्येति । त्र्यक्षाणि यस्येति भयार्थं लोकस्य विकृताकार एव न्याय्यः । शंबं मुशलाग्रलोहं तं राति तेन ताडयतीत्यर्थः । ''शंबः स्यान्मुशलग्रंथलोहमंडलके पवौ । शुभान्विते त्रिषु'' इति मेदिनी । शंबो वज्रमस्यास्तीति शंब इंद्रो मत्वर्थीयोच् । तमपि राति गृह्णाति युद्ध इति शंबरः । यद्वा–शुभान्वितं राति गृह्णातीति 'यत्र यत्र द्विजा गावः' इत्यादिवक्ष्यमाणत्वात् । शतबाहो हयग्रीवेति भयजननार्थमेव । न मुंचंति स्वहस्तगतमिति नमुचिः । ''पाकोग्नावन्नडिम्बयोः' इत्यभिधानात् यथाग्निर्दहति सर्वं तथा त्वया भवितव्यमिति पाकपदाभिप्रायः । इलां भूमिमपि वलते अच्छादयतीति इल्वलो बाहुलकाद्वाबभावः ॥ ४ ॥ विशेषेण प्रगता चित्तिर्ज्ञानं येन विप्राणां चित्तिर्भयं यस्मात्स तथा वा 'चित्तिर्ज्ञाने भयेऽपि च' इति निरुक्तिः । पुरोऽग्रे एव मन्यते इति पुलोमा रलयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् ॥ पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥ तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ॥ भजंतं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥ मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ॥ रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥ तस्मिन् कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ ॥ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ॥ ९ ॥ तावद्यात भुवं यूयं विप्रक्षत्रसमेधिताम् ॥ सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः ॥ १० ॥

दुष्प्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३ ॥ ४ ॥ ५ ॥ समेनाप्युपधावनैर्भजनैर्निमित्तभूतैः पार्ष्णिग्राहेण सता ॥ ६ ॥ एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धतेजोमयस्यापि मायया वनौकसो वराहरूपस्य सतः । अस्थिरात्मनोऽव्यवस्थितचित्तस्य । कुतः योयो भजति तंतं भजमानस्यानुसरतः ॥ ७ ॥ तस्य रुधिरेण यावत्तर्पयिष्यामि तावद्यूयं भुवं यातेति तृतीयेनान्वयः ॥ ८ ॥ ननु देवैस्तद्वधः कारितोऽतस्ते किं न हन्यंते तत्राह । तस्मिन्हरौ कूटे कपटे अहिते प्रतिपक्षे कूटमीहितं यस्येति वा नष्टेऽदृष्टे सति देवाः शुष्यंति स्वयमेव नाशं यास्यंति । कुतः । विष्णुरेव प्राणो येषां ते । यथा कृत्तमूले वृक्षे शाखाः स्वयं शुष्यंति तद्वत् ॥ ९ ॥ तपोयज्ञादियुक्ता

रैक्यात् । आगमनात्पूर्वमेवांधकाराद्युत्पादनेन ज्ञायते भवानित्यभिप्रायः । शक्नोत्यनार्यकर्मणीति शकुनः । आदिना वृकादिग्रहः ॥ ९ ॥ समेनापीति । "देवानां दानवानां च सामान्यमधिदैवतम्" इत्युक्तेः । 'समोह सर्वभूतेषु' इति तदुक्तेश्च । उपधावनैरीति लोभवशाद्देवपक्षपाती जात इत्यर्थः ॥ ६ ॥ वास्तवोर्थस्त्वयम्—त्यक्तो भक्तेभ्यो दत्तः स्वभावः सायुज्यादिकं येन तस्य 'घृणी—ग्रहणे' इत्यस्मात् घृणेः कृपया स्वीकर्तुः माया कृपा मायेति छांदसस्तृतीयालुक् ततः सर्वत्रान्वयः । कृपयैव वनौकसः तल्लीलाविस्तारयितुः कृपयैव बालस्यैवास्थिरात्मनः भक्तभावानुरूपनानाभावविस्तारयितुः ॥ ७ ॥ मच्छूलाद्भिन्ना तदगोचरभूता ग्रीवा तदुपलक्षितो विग्रहो यस्य तस्य मे रुधिरेण श्रीनृसिंहतयाविर्भावे तस्माद्भूतमदीयरुधिरेण रुधिरप्रियं भ्रातरं तर्पयिष्ये । 'यथा तरोर्मूलनिषेचनेन' इत्यादेः ॥ ८ ॥ ननु तस्य तद्वस्तमरणादिना गतिर्ज्ञातैव किं तत्तर्पणेन तत्राह—तस्मिन्कूटे कूटस्थे एकरूपतया सर्वकालव्यापिनि हिते भक्तसुहृदि नष्टेऽदर्शनं गते सति सर्वेऽपि प्राकृताप्राकृतदिवौकसस्तदेकप्राणत्वाच्छुष्यंति सुखदनानासंपद्यपि शोषं प्राप्नुवंति तस्मात्तदाराधनमेव कार्यमिति भावः । अत्र विश्वनाथः—वयमप्युपधावाम इति चेन्मैवं कुरुध्वं यूयं तावन्मन्नियुक्ते कर्मणि तिष्ठत अहमेक एव तं हनिष्यामीत्याह—तस्येति द्वाभ्याम् । ननु हरिर्हि परमात्मोच्यते । शास्त्रैरतस्तं कथं हनिष्यसि तत्राह त्यक्तस्वभावस्य सर्वत्रौदासीन्यरूपः स्वभावो हि परमात्मनः प्रसिद्धः स यदि तेन त्यक्तस्तदा कूटस्थस्य संप्रति न परमात्मत्वमिति भावः । प्रत्युत परमात्मत्वं त्यक्त्वा पशुरभूदित्याह । घृणेः पूर्वं शुद्धतेजोमयस्यापि संप्रति मायापारवश्याद्वनौकसः मत्स्यकच्छपादिरूपस्य च । किं च भजंतं जनमात्रमेव भजमानस्य बालस्येव एकेनैव खंडलड्डुकेन वशीकृतस्येत्यर्थः । वस्तुतस्तु—भक्तवात्सल्यादेव त्यक्तेत्यादिविशेषणपंचकं भवति तच्च तस्य भूषणमेव न तु दूषणमिति भावः । घृणेः शुद्धतेजोमयस्यापि मायया कृपयेत्यादि योज्यं किं च—मच्छूलाद्भिन्ना पृथग्भूता ग्रीवा यस्येति प्राकृतस्य मच्छूलस्य तत्र प्रवेशोऽपि न संभवेदिति भावः । 'कुंकुमं रुधिरं प्रोक्तम्' इत्यभिधानात् । रुधिरेण तदंगकुंकुमेन रुधिरप्रियं तन्निर्माल्यकुंकुमप्रियं मद्भ्रातुर्भक्तत्वादिति भावः । कूटे हिते कपटचेष्टिते अंतर्दुष्टं दृश्यमानरमणीयं कूटमिति तदर्थः । वस्तुतस्तु—कूटेषु कपटिष्वपि मद्विधेषु ईहितं युद्धचेष्टा यस्य तस्मिन्नित्यहो मम भाग्यमिति भावः । देवानां तु सौभाग्यं कियद्वर्णनीयं ते तु तदेकप्राणा एवेत्याह—तस्मिन्नष्टे । दैवात्कदाचिददृष्टे सति नश्येरदर्शनार्थत्वात् छिन्नमूले वनस्पतौ यथा विटपाः शुष्यंति तथा शुष्यंति ते विष्णुरेव प्राणो येषां ते किं वा विष्णोरपि प्राणतुल्यास्ते परमधन्या एवेति भावः ॥ ९ ॥ विप्रक्षत्राभ्यां तपोबलप्रतापाभ्यां सम्यगेधितां वर्द्धितां भुवं यातः किमर्थं सूदयध्वम् ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ॥ देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥११॥ यत्रयत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः ॥ तंतं जनपदं यात संदीपयत वृश्चत ॥१२॥ इति ते भर्तृनिर्देशमादाय शिरसाहृताः ॥ तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥१३॥ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ॥ खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥१४॥ केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ॥ आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः ॥ प्रादहञ्छरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥ (त एव मनुजा भूत्वा निंदंति वैदिकान्सदा ॥) एवं विप्रकृते लोके दैत्येंद्रानुचरैर्मुहुः ॥ दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥ १६ ॥ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः ॥ कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयत् ॥ १७ ॥ शकुनिं शंबरं धृष्टं भूतसंतापनं वृकम् ॥ कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥ १८ ॥ तन्मातरं रुषाभानुं दितिं च जननीं गिरा ॥ श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वरः ॥ १९ ॥ हिरण्यकशिपुरुवाच ॥ अंबांब हे वधूः पुत्रा वीरं माऽर्हथ शोचितुम् ॥ रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥

न्सूदयध्वं घातयत ॥ १० ॥ ननु तैः किमपराद्धं तत्राह । विष्णुरिति । द्विजानां क्रियाऽनुष्ठानं मलं यस्य सः । यतोऽसौ यज्ञो धर्ममयश्च । देवादीनां परायणं परमाश्रयः । अतो यज्ञरूपस्य विष्णोर्मूलत्वान्मामनादृत्य तदाश्रयणाच्च ते वध्या इति भावः ॥ ११ ॥ तस्मात्परमं मंत्रं शृणुतेत्याह । यत्रयत्रेति । संदीपयत दहत । वृश्चत आजीव्यानां वृक्षाणां छेदं कुरुत ॥ १२ ॥ १३ ॥ पुरं हट्टादिमत् । ग्रामस्तद्रहितः । व्रजो गवां वासः । उद्यानं कृत्रिमं वनम् । क्षेत्रं व्रीह्यादेः । आरामोऽकृत्रिमं वनम् । आश्रमः ऋषीणां स्थानम् । आकरो रत्नादीनाम् । खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः । घोष आभीराणां वासः । पत्तनं राजधानी ॥ १४ ॥ खनित्रैः खननसाधनैः । आजीव्यानुपजीव्यान् जंब्वाम्रकपित्थादीन् शरणानि गृहान् ॥ १५ ॥ विप्रकृते उपद्रुते यज्ञभागानामभावाद्दिवं परित्यज्यालक्षिताः संतो भुवि चेरुः ॥ १६ ॥ तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवांस्तदाह हिरण्यकशिपुरित्यादिना । कटोदकं प्रेताय प्रदेयमुदकम् । आदिशब्दात्प्रेतश्राद्धादिकम् ॥ १७ ॥ १८ ॥ १९ ॥ हे वधूरिति भ्रातुर्भार्यां संबोधयति ॥ २० ॥

अत्राक्षिपति—नन्विति । तेषां नाशे स्वयमेव विष्णुर्नश्यतीत्यर्थः । द्विजानां नाशे तत्क्रियालोपाद्विष्णोर्मूलोन्मूलनम् । यज्ञस्य धर्मस्य च नाशात्तत्स्वरूपस्य नाशो भावी । किञ्च—देवर्ष्यादीनां तच्छोकादपि मरिष्यतीति भावः । स्वामिव्याख्याने इति भाव इति । अहो मयि सर्वेश्वरे सत्यपि मां यतो नार्चयंति तेऽतस्तेषां वधो न्याय्य एवेति तात्पर्यम् ॥ ११ ॥ यत्रयत्र जनपदे देशे 'नीवृज्जनपदो देशः' इत्यमरः ॥ १२ ॥ कदनं कष्टम् ॥ १३ ॥ पुरादयो व्याख्याता अपि प्रथमस्कंधे सौगम्यार्थं पुनर्व्याख्याताः । ददहुरित्यत्र पूर्वलोपाभावस्त्वार्षः ॥ १४ ॥ खननसाधनैः कुद्दालादिभिः । (उपजीव्यान् आम्रजंब्वादीन्) 'शरणं गृहरक्षित्रोः' इत्यमरः ॥ १५ ॥ १६ ॥ "कटः श्रोणी द्वयोः पुंसि किलिंजेतिशये शवे । समये गजगंडेपि पिप्पली तुकटी मता" इति कोशात् ॥ १७ ॥ भ्रातृपुत्रान्नामतो निर्दिशति—शकुनिमिति ॥ १८ ॥ तेषां शकुन्यादीनां मातरं रुषाभानुसंज्ञाम् । जनेश्वरेति । सर्वाश्वासनमेव राजधर्म इति भावः । सविसर्गपाठे तु दैत्यविशेषणम् । पामरेश्वर इत्यर्थः । "जनो लोके महर्लोकात्परे लोके च पामरे" इति मेदिनी । भगवति द्वेषादेव पामरत्वमिति ज्ञेयम् ॥ १९ ॥ अंबांबेति वीप्सा दुःखे । हे वधूरिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानामिह संवासः प्रपायामिव सुव्रते ॥ दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥ २१ ॥ नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित् परः ॥
धत्तेऽसावात्मनो लिंगं मायया विसृजन्गुणान् ॥२२॥ यथांभसा प्रचलता तरवोपि चला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥२३॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ॥ याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव ॥ २४ ॥ एष आत्मविपर्यासो ह्यलिंगे लिंगभावना॥
एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २५ ॥ संभवश्च विनाशश्च शोकश्च विविधः स्मृतः ॥ अविवेकश्च चिंता च विवेकास्मृतिरेव च॥२६॥
अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ यमस्यप्रेतबंधनां संवादं तं निबोधत ॥ २७ ॥

भवतु नाम तस्य श्लाध्यो वधस्तथाऽप्यस्माकं तावद्बंधुर्गत एवेति चेत्तत्राह । भूतानामिति । दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनश्च स्वैःस्वैः कर्मभिरुन्नीतानां वियोजितानाम् ॥ २१ ॥ एवं लौकिकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति । नित्य इति । आत्मा नित्यो मृत्युशून्यः अव्ययोऽपक्षयशून्यः शुद्धो निर्मलः सर्वगतः सर्ववित्सर्वज्ञश्च । सर्वत्र हेतुः परो देहादिव्यतिरिक्तः अतो मृत इति कृश इति मलिन इति वियुक्त इत्यज्ञ इति च मत्वा शोको न कार्य इत्यर्थः । कथं तर्हि तस्य संसारस्तत्राह । धत्त इति । आत्मनो मायया स्वाविद्यया लिंगं मूर्तीर्धत्ते गुणानुच्चावचान्देहान्सुखदुःखादीन्वा विशेषेण सृजन्स्वीकुर्वन् । लिंगशरीरोपाधि संसार इत्यर्थः ॥ २२ ॥ एतत्सदृष्टांतं प्रपंचयति यथेति चतुर्भिः । तरवः प्रतिबिंबिताः उपाधिधर्मा उपहिते भवंतीति दृष्टांतमुक्त्वा ग्राहकधर्मा ग्राह्ये भवंतीति दृष्टांतमाह चक्षुषेति ॥ २३ ॥ अविकलः परिपूर्ण एव तत्साम्यतां मनःसमतामित्यर्थः ॥ २४ ॥ लिंगभावना देहाभिमानः एष आत्मनो विपर्यासोऽन्यथाभावः । तमेवाह । प्रियै र्वियोगोऽप्रियैर्योगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः ॥ २५ ॥ ततश्च संभव उत्पत्तिः । विवेकस्यास्मृतिरननुसंधानम् ॥ २६ ॥ अत्रापि शोकहेतुं विना वृथैवायं

दीर्घत्वमार्षम् । रिपोरप्यभिमुखे किमुत श्रीविष्णोरिति । ईक्षितो वांछितश्च ॥२०॥ आक्षिपति—भवत्विति । 'प्रपा पानीयशालिका'' इत्यमरः । सुव्रते इति। अधुना सुष्ठु व्रतादिधर्मेणैव कालो नेतव्य इति भावः ॥ २१ ॥ तत्त्वदृष्ट्या तु हिरण्याक्षः खल्वात्मैव न तु देहः । तस्यात्मनश्च स्वरूपं श्रृण्वित्याह—जीवेपीश्वरधर्मोक्तिरासुरस्वभावत्वात् । वस्तुतस्तु—सर्वं लोकं गच्छतीति सर्वगः । सर्वं सुखदुःखादिकं विन्दतीति सर्ववित् । परो देहादि व्यतिरिक्तः । असावात्मा आत्मनः स्वस्य लिंगं देहं मायया स्वाविद्यया धत्ते किमर्थं गुणान् उच्चावचान्स्थूलदेहान् विशेषेण सृजन्स्वीकुर्वन् तथा तत्पदावृत्त्या विसृजन्स्थूलदेहान्स्वीकर्तुं त्यक्तुं चेत्यर्थः । इत्यर्थ इति । ' नष्टे लिंगेन संसारे ' इति स्मृतेरिति भावः ॥ २२ ॥ न तु चला अंभोभ्यस्तेषां भिन्नत्वात् । एवमेव लिंगधर्माः शोकमोहादयस्तदुपहित आत्मनि प्रतीयंते न त्वात्मा शोकादिमान् तस्य शोकमोहादिभ्यो भिन्नत्वादि त्यर्थः । भ्राम्यमाणेन भ्रमिदोषाक्रम्यमाणेन यथा भूताविष्टः पुरुषो भूतग्राह्य उच्यते एवं देहाविष्ट आत्मा देहग्राह्यो देहधर्माक्रांतश्चोच्यते इत्यर्थः ॥ २३ ॥ इत्यर्थ इति । मनोधर्मग्राहित्वं यातीति भावः । हे भद्रे इति । एवं विचार एव भद्रहेतुरिति भावः ॥ २४ ॥ अलिंगे देहातिरिक्ते ॥ २५ ॥ २६ ॥ प्रेतस्य कस्यचिन्मृतस्य ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः ॥ सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ ॥ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ॥ शरनिर्भिन्नहृदयं शयानमसृगाविलम् ॥ २९ ॥ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ॥ रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे ॥३०॥ उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ॥ हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहुस्तत्पदयोरुपापतन् ॥ ३१ ॥ रुदत्य उच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः ॥ विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे ॥ ३२ ॥ अहो विधात्राऽकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशाम् ॥ उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ॥ ३३ ॥ त्वया कृतज्ञेन वयं महीपते कथं विना स्याम सुहृत्तमेन ते ॥ तत्रानुयानं तव वीरपादयोः शुश्रूषतीनां दिश यत्र यास्यसि ॥ ३४ ॥ एवं विलपतीनां वै परिगृह्य मृतं पतिम् ॥ अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥३५॥ तत्र ह प्रेतबंधूनामाश्रुत्य परिदेवितम् ॥ आह तान् बालको भूत्वा यमः स्वयमुपागतः ॥ ३६ ॥

शोक इत्यस्मिन्नर्थे । प्रेतस्य मृतस्य कस्यचिद्ये बंधवस्तेषां च संवादं शृणुत ॥ २७ ॥ उपासत तत्समीपे आवृत्य स्थिताः ॥ २८ ॥ विशीर्णं रत्नमयं कवचं यस्य । विभ्रष्टान्याभरणानि स्रजश्च यस्य । शरेण निर्भिन्नं हृदयं यस्य । असृजा रक्तेनाविलं लिप्तम् ॥ २९ ॥ प्रकीर्णाः केशा यस्य । ध्वस्ते अक्षिणी यस्य । रभसा संरंभेण दष्टो दच्छद ओष्ठो येन रजसा कुंठमावृतं मुखांभोजं यस्य । छिन्नमायुधं भुजश्च यस्य ॥ ३० ॥ तस्य पदयोरुप समीपे आ समंतादपतन् ॥ ३१ ॥ ३२ ॥ विलापमेवाह अहो इति द्वाभ्याम् । अकरुणत्वमेवाहुः येन विधात्रा दृशामगोचरां दशां भवान्प्रणीतो गमितस्तेन विधात्रा त्वमधुना शुचां विवर्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥ हे महीपते त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेमेत्यर्थः । अतो हे वीर यत्र त्वं यास्यसि तत्र तेऽनुयानमनुगमनं तव पादयोः शुश्रूषां कुर्वतीनामस्माकं दिश देहि ॥ ३४ ॥ निर्हारं दाहार्थं नयनमनिच्छंतीनाम् । अस्तमस्ताचलं प्रति ॥ ३५ ॥ परिदेवितं रोदनं स्वपुर्यामेव स्थित आश्रुत्य श्रुत्वा तत्र स्वयमेवोपागतो यमो बाल

ज्ञातयः सपिंडाः॥२८॥२९॥ध्वस्ते अधोगते अक्षिणी यस्य तम्॥३०॥हे नाथेति।त्वां विना वयमनाथा जाता इति भावः॥३१॥सिंचंत्य अस्रैरिहोत्वाद्यभाव आर्षः।आक्रंदनयोच्चैरोदनेन नृणां शृण्वतां शुचं शोकमश्रु वा सृजंत्य कुर्वंत्यः॥३२॥ हे प्रभो इति। त्वं त्वस्मानपि स्वेन सार्द्धं नेतुं समर्थो भूत्वा किमधुना त्यक्ष्यसीति भावः॥३३॥मह्या आलिंगनेनास्मांस्त्यक्त्वा त्वमधुनास्या एव पतित्वं किमन्वर्थयसीति भावः॥३४॥संन्यवर्त्तत प्राप्तोऽभूत्॥३५॥ स्वयमुपागत इति । पुण्यवज्जीवानां निर्हारांत एव यमपुरगमनं प्रायः संभवतीति केचित् । तासां मध्ये काश्चिद्वैष्णवस्त्रियस्तत्सामीप्याद्यमदूतैर्नेतुं शक्यत्वाभावात् । तत्सामीप्यदूरीकरणार्थं स्वयं यम एवागत इत्यन्ये । बालको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यम उवाच ॥ अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः ॥ यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचं त्यपार्थम् ॥ ३७ ॥ अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिंतयामः ॥ अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥ य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुंपते च यः ॥ तस्याबलाः क्रीडनमाहुरीशितुश्चराचरं निग्रहसंग्रहे प्रभुः ॥ ३९ ॥

को भूत्वा तानाह । अहो इत्यादिना ॥ ३६ ॥ अहो आश्चर्यम् । अस्मत्तो वयसाऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहः । मोहमेवाह । यत्र यस्मादव्यक्तादागतस्तत्रैव गतमपार्थं शोचंति । तदुक्तं गीतासु । "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिदेवना" इति । किं च स्वयमपि सधर्माः मृतेन सह समानो मृत्युलक्षणो धर्मो येषां तथाभूता अपि ॥ ३७ ॥ अबला दुर्बला वृकादिभिरभक्ष्यमाणा वयं न विचिंतयामः । तत्र हेतुः । यो गर्भे रक्षति स एव सर्वत्र रक्षिता ॥ ३८ ॥ ननु तस्य रक्षणे किं प्रयोजनं न किंचिदपि किं तु क्रीडैव केवलमित्याह । य इति । य ईश इदं विश्वं सृजति रक्षत्यवलुंपते

भूत्वेति । अन्येषां तत्र प्रवेशासामर्थ्याद्बालभाषितस्य मधुरत्वात्तत्कर्तृकथनस्यापि विस्मयावहत्वात्तत्त्वजिघृक्षोत्पादनसमर्थत्वाच्च ॥ ३६ ॥ तत्र मृतकसंबंधिपार्श्वे । अस्माकमत्यल्पवयसामपि यो विवेकः सोऽप्येषां नास्तीति साश्चर्यमाह—अव्यक्तमव्याकृतमविद्योपहितचैतन्यमादिप्रागवस्था येषां तानि तथा व्यक्तं नामरूपाभ्यामेवाविद्यकाभ्यां प्रकटीभूतं न तु स्वेन परमार्थसदात्मना मध्यं स्थित्यवस्था येषां तानि तादृशानि भूतान्याकाशादीनि । अव्यक्ते स्वकारणे मृदीव घटादीनां निधनं प्रलयो येषां तेषु भूतेषु का परिदेवना को वा दुःखप्रलापः न कोऽप्युचित इत्यर्थः । तथा च श्रुतिः—"तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते" इत्यादि । अव्यक्तोपादानतां सर्वस्य दर्शयति । लयस्थानं तु तस्यार्थसिद्धं कारणे एव कार्यलयस्य दर्शनात् । तथाचाज्ञानकल्पितत्वेन तुच्छान्याकाशादिभूतान्युद्दिश्य शोको नोचितश्चेत्तत्कार्याणि शरीराण्युद्दिश्य नोचित इति किमु वक्तव्यमिति भावः । अथ वा सर्वदा तेषामव्यक्तरूपेणाविद्यमानत्वाद्विच्छेदाभावेन तन्निमित्तः प्रलापो नोचित इति भावः । यद्वादौ जन्मनः प्रागव्यक्तान्यनुपलब्धानि भूतानि पृथिव्यादिभूतमयानि शरीराणि मध्ये जन्मानंतरं मरणात्प्राग्व्यक्तानि उपलब्धानि संति निधने पुनरव्यक्तान्येव संति यथा स्वप्नेंद्रजालादौ प्रतिभासमात्रजीवनानि शुक्तिरूप्यादिवन्न तु ज्ञानात्प्रागूर्द्ध्वं वा स्थितानि दृष्टिसृष्ट्यभ्युपगमात् तथा च 'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा' इति न्यायेन मध्येऽपि न संत्येवैतानि एवं सति तत्र तेषु मिथ्याभूतेष्वत्यंततुच्छेषु भूतेषु का परिदेवनेति। पूर्ववत्। न हि स्वप्ने बहुविधान्बंधूनुपलभ्य प्रतिबुद्धस्तद्विच्छेदेन शोचति पृथग्जनोऽपि एतदेवोक्तं पुराणे—"अदर्शनादापतितः पुनश्चादर्शनं गतः । भूतसंवः" इति । तथा च शरीराण्यप्युद्दिश्य शोको नोचित इति भावः । न केवलमयमेव मृतो यूयमप्येतादृशा एव सर्वे इत्याह—किं चेति । सधर्मा इति । असिजभावस्तु समासांतविधेरनित्यत्वादेव ॥ ३७ ॥ युष्मत्तो वयं धन्यतमाः श्रेष्ठाः यद्यतः तत्र चिंताया अभावे यो विष्णुः सर्वत्र वनगिरिविपत्त्यादौ ॥ ३८ ॥ अत्राक्षिपति—नन्विति । भो अबला इति । न विद्यते विचाराख्यं बलं यासां ता इत्यर्थः। अतो विश्वस्य क्रीडासाधनत्वात् । अत्र विश्वनाथः—ननु त्वां गर्भे वासे ररक्ष इममस्मत्पतिं संग्रामे न ररक्षेत्यत्र को हेतुस्तत्राह—य इति । इच्छया स्वेच्छयैव न तु कस्याप्यनुरोधेनैवेति भावः । नन्वीदृशीच्छैव किंहेतुका तत्राह—ईश इति । अनन्याधीनपरमैश्वर्यवान् तत्कारणकल्पने तदैश्वर्यस्यैव तादृशत्वं न सिध्येदिति भावः । नन्वेवं सृष्ट्यादिकं किमर्थं करोति तत्राह—चराचरं तस्य क्रीडनं क्रीडनकमेवाहुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ॥ जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥
॥ ४० ॥ भूतानि तैस्तैर्निजयोनिकर्मभिर्भवंति काले न भवंति सर्वशः ॥ न तत्र हात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥
इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहम् ॥ यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥ यथाऽनलो
दारुषु भिन्न ईयते यथाऽनिलो देहगतः पृथक् स्थितः ॥ यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥ ४३ ॥ सुयज्ञो नन्वयं शेते
मूढा यमनुशोचथ ॥ यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४४ ॥

संहरति च भो अबलास्तस्येशितुश्चराचरं क्रीडासाधनमाहुः अतः स एव निग्रहे संहारे संग्रहे पालने च प्रभुः ॥ ३९ ॥ प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति । पथीति । दिष्टेन दैवेनेश्वरेण रक्षितम् । तेनेश्वरेण विहतमुपेक्षितम् । अस्य हतस्तेनोपेक्षितः ॥ ४० ॥ तदेवमात्मनो जन्ममरणादिकमंगीकृत्येश्वराधीनत्वान्न शोकः कार्य इत्युक्त मिदानीं तु देहानामेव जन्मादि न त्वात्मन इत्याह । भूतानीति त्रिभिः । भूतानि देहाः निजयोनिः स्वकारणभूतं लिंगशरीरं तन्निमित्तैः कर्मभिर्भवंति जायंते न भवंति नश्यंति च सर्वशो देवादिदेहा अपि तत्र ह तदा प्रकृतौ देहे स्थितोऽप्यात्मा तस्याः प्रकृतेर्गुणैर्देहधर्मैर्जन्मादिभिर्न निबध्यते न युज्यते यतोऽन्यतमो देहादत्यंतविलक्षणः ॥ ४१ ॥ नन्वहं कृशः स्थूल इत्यादौ वैलक्षण्यं न प्रतीयते तत्राह ॥ इदमिति । इदं शरीरं मोहजमविवेकादात्मत्वेन जातं वस्तुतस्तु पृथगेव यत ईयते दृश्यते भौतिकं च यथा गृहमित्यन्वयः । अत्रैवं प्रयोगः द्रष्टुरभौतिकाच्च पुरुषाच्छरीरं भिन्नम् । दृश्यत्वाद्भौतिकत्वाच्च यथाऽत्यंताविवेकिनः आत्मत्वेनाभिमतमपि गृहं ततः पृथक् तद्वत इति । भौतिकत्वानुमानं विवृण्वन्नात्मनो जन्माद्यभावमुपसंहरति।यथा औदकैः परमाणुभिर्जातो बुद्बुदादिर्यथा च पार्थिवैर्जातो घटादिर्यथा च तैजसैर्जातः कुंडलादिर्विनश्यति तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः पारिणतः सन्विनश्यति न त्वात्मेत्यर्थः ॥ ४२ ॥ पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टांतद्वयमाह । यथेति । यथाऽनलो दारुष्वेव स्थितोऽपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते तथा च देहगतोऽप्यनिलो मुखनासिकादिषु पृथक्स्थित एव प्रतीयते । देहस्थत्वेऽप्यात्मनस्तद्धर्मयोगाभावे दृष्टांतमाह । यथा नभो न सज्जते क्वापि संगं न प्राप्नोति तथा पुमानपि सर्वेषां गुणानां देहेंद्रियादीनामाश्रयस्तेष्वाश्रितो वा परः पृथगेवेत्यर्थः ॥ ४३ ॥ किं च हे मूढा यमनुशोचथ सोऽयं युष्मद्भर्ता सुयज्ञः शेते किमिति शोचथ । नन्वेतावंतं कालमसौ शृणोत्यनंतरं प्रतिवक्ति च । इदानीं तस्यादर्शनान्मृत इति

अकारवाच्यो हरिरेव बलं येषां तेऽबला विज्ञा इत्यर्थः ॥ ३९ ॥ ईश्वररक्षितमेवान्येन रक्ष्यते तद्धतमेवान्येन हन्यते इति भावः ॥४०॥ ननु तर्हि तस्मिन्नीश्वरे वैषम्यं प्रसक्तं कस्याप्यपेक्षणात्कस्याप्युपेक्षणादिति तत्राह—भूतानि मनुष्यपश्वादिदेहाः निजनिजयोनिकारणीभूतैः कर्मभिस्तैस्तैरनेन कर्मणा गौर्भवत्यनेन कर्मणा पुरुषो भवत्येत्रं शास्त्रप्रसिद्धैर्भवंति उत्पद्यंते न भवंति काले नश्यंति च सर्वशः सर्वाण्येव । आत्मा परमात्माऽन्यतमः पृथग्भूत एवातस्तस्या गुणैर्न निबध्यते केवलं तत्तत्कृतशुभाशुभफलं स्वसन्निधानमात्रेण जीवयतीत्येतदेव तस्यापेक्षणमुपेक्षणं चेति भावः ॥ ४१ ॥ अत्राशंकते—नन्विति । अत्र भिन्नत्वे प्रयोगोऽनुमानम् । इत्यर्थ इति । आत्मनो द्रष्टृत्वादिना भिन्नत्वान्न जन्ममरणादीति भावः ॥ ४२ ॥ इत्यर्थ इति । अतः परमेश्वरेणोपेक्षितमिमं पतिं स्वकर्मवशान्मृतं कथं नोपेक्षध्वे इति भावः ॥ ४३ ॥ नन्वयं राजा संग्रामलब्धपराजयः संप्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः ॥ यस्त्विहेंद्रियवानात्मा स चान्यः प्राणदेहयोः ॥४५ ॥ भूतेंद्रियमनोलिंगान् देहानुच्चावचान्विभुः॥ भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४६ ॥ यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिबंधनम् ॥ ततो विपर्ययः क्लेशो मायायोगोऽनुवर्तते ॥ ॥ ४७ ॥ वितथाभिनिवेशोऽयं यद्गुणेष्वर्थदृग् वचः ॥ यथा मनोरथः स्वप्नः सर्वमैंद्रियकं मृषा ॥ ४८ ॥ अथ नित्यमनित्यं वा नेह शोचंति तद्विदः ॥ नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ॥ ४९ ॥

शोचामेति चेत्स तु शोच्यो न भवति प्रागपि तस्यादर्शनादित्याह।यः श्रोतेति॥ ४४ ॥ननु मुखनासिकासंचारी प्राणः श्रोता वक्ता च दृष्ट एवेति चेन्नासौ श्रोता वक्ता वाऽचेतनत्वादित्याह । न श्रोतेति । महान्सर्वेंद्रियचेष्टाहेतुः । अत एव मुख्यः "प्राणो वै मुख्यः" इति श्रुतेः । कस्तर्हि श्रोता वक्ता च तत्राह । यस्त्विह देहेंद्रियैस्तत्तदर्थद्रष्टा आत्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव सचेतनः ॥ ४५ ॥ ननु चेतनत्वेऽन्यत्वे च तस्याहं कृशः स्थूलः काणो बधिर इत्यादिदेहधर्मोपलब्धिः कुतस्तत्राह । भूतेंद्रियमनोभिर्लिंग्यंते लक्ष्यंत इति तथा तान्देहांस्तेभ्योऽन्य एव भजत्यहमिति मन्यते । तर्हि कथं मोक्षस्तत्राह । तच्च भजनं स्वेन तेजसा विवेकबलेनोत्सृजत्यपि हीत्यनुभवं प्रमाणयति ॥ ४६ ॥ ननु विवेकानंतरमप्याहारादिकर्मसु प्रवृत्तेर्बंधः स्यादेवेत्यत आह । यावदिति । यावल्लिंगशरीरेणान्वितस्तदभिमानवानात्मा भवति तावदेव तस्य तत्कर्मनिबंधनं बंधहेतुर्भवति ततो विपर्ययो देहधर्मभाक्त्वं ततः क्लेशश्चानुवर्तते न तु लिंगाभिमाने निवृत्तेऽपि यतोऽयं मायायोगो विपर्ययादिः । मायया युज्यत इति तथा । न परमार्थ इत्यर्थः ॥४७॥ ननु सुखदुःखादीनां तत्साधनानां च सत्यत्वप्रतीतेः कुतो मायामयत्वम् । तथा च बहवो वादिनः सत्यत्वमेव वदंति तत्राह । वितथेति । वितथो मिथ्याभूतोऽयमभिनिवेशः कोऽसौ गुणेषु तत्कार्येषु सुखदुःखादिष्वर्थः । परमार्थ इति दृग्वचश्चेति यत् स कुत इत्यत आह यथेति ॥ ४८ ॥ उपसंहरति । अथेति । अथ तस्मात् नित्यमात्मानमनित्यं देहं वा तद्विदो नित्यमनित्यं च जानंतो न शोचंति । नन्वेवमुपदेष्टारोऽपि शोचंतो दृश्यंते तत्राह । तान्यथेति ।

शेते कथमिममुपेक्ष्य निःस्नेहा भवितुं शक्नुमस्तत्राह–सुयज्ञ इति । कर्हिचित् प्रागपि स दृश्यो नासीदेवेत्यर्थः। यस्तु दृश्यः स इदानीमपि दृश्यते देह इति भावः।हे मूढा इति ।मौढ्यादेव भवतीनां शोक इति भावः ॥४४॥ पुनराक्षिपंति–नन्विति । यावत्प्राणः स्थितस्तावदेव श्रोतृत्ववक्तृत्वे दृष्टे प्राणे गते सति तु न ते दृष्टे अतः प्राण एव श्रोता वक्तेति चेदाह । असौ प्राणोऽचेतनत्वाच्छ्रोता वक्ता वा नेत्यर्थः ॥ ४५ ॥ अत्राक्षिपंति–नन्विति । देहान्स्थूलसूक्ष्मान् । अत्र विश्वनाथस्तु--स तर्हि कुत्र गत्वा किं करोतीति तत्राह भूतं प्राप्तमिन्द्रियमनोरूपं लिंगं सूक्ष्मदेहो येषु तान्स्थूलदेहान् भजति प्राप्नोति त्यजति च यथेमं देहं प्राप्योदसृजदिति भावः । किञ्च स्वेन भाग्यलब्धज्ञानबलेन । तच्चापि लिंगदेहमपि कदाचिदुत्सृजतीत्याह ॥ ४६ ॥ पुनराक्षिपंति–नन्विति । ततः कर्मबंधात् । ततो देहधर्मभाक्तत्वात् । इत्यर्थ इति । मायिकस्यापरमार्थत्वादिति भावः ॥ ४७ ॥ पुनराक्षिपंति–नन्विति।वादिनो मीमांसकादयः तस्माद्यूयमपि कर्मबंधमोक्षायैव यतध्वं न तु कर्मफलाय स्वर्गाय वैषयिकसुखादेरस्थिरत्वेन स्वप्नतुल्यत्वादित्याह वितथो व्यर्थ एवाभिनिवेशोऽयं कोऽसौ यद्गुणेषु गुणकार्येषु सुखादिषु अर्थो वास्तव इति। श्रूयते च "अपामसोमममृता अभूम अप्सरोभिर्विरहिष्यामः" इत्यादिकम् । यथेति । मनोरथोपनीतस्य धनपुत्रादिलाभानंदस्य स्वप्ने स्त्रीसंभोगादिसुखस्य च तुल्यत्वादित्यर्थः । ऐंद्रियिकमिंद्रियग्राह्यं जगदिदं सर्वं मृषा मिथ्यैव सर्वं वाक्यं सावधारणमिति न्यायादेवकारसंबंधः॥ ४८ ॥नित्यं मीमांसकानां मतेऽनित्यं वेदांतिनां मते।अत्राक्षिपंति–नन्विति।इत्यर्थ इति।अदृढज्ञानिनामेव शोको न तु तद्दार्ढ्यवतामितिभावः॥ ४९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लुब्धको विपिने कश्चित् पक्षिणां निर्मितोंतकः ॥ वितत्य जालं विदधे तत्रतत्र प्रलोभयन् ॥ ५० ॥ कुलिंगमिथुनं तत्र विचरत् समदृश्यत ॥ तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता ॥ ५१ ॥ सासज्जत शिचस्तंत्यां महिष्यः कालयंत्रिता ॥ कुलिंगस्तां तथापन्नां निरीक्ष्य भृशदुःखितः ॥ स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥ ५२ ॥ अहो अकरुणो देवः स्त्रियाकरुणया विभुः ॥ कृपणं माऽनुशोचंत्या दीनया किं करिष्यति ॥ ५३ ॥ कामं नयतु मां देवः किमर्धेनात्मनो हि मे ॥ दीनेन जीवता दुःखमनेन विधुरायुषा ॥ ५४ ॥ कथं त्वजातपक्षांस्तान् मातृहीनान् बिभर्म्यहम् ॥ मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ॥ ५५ ॥ एवं कुलिंगं विलपंतमारात् प्रियावियोगातुरमश्रुकंठम् ॥ स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥५६॥ एवं यूयमपश्यंत्य आत्मापायमबुद्धयः ॥ नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ॥ ५७ ॥

ज्ञानदार्ढ्याभावात्स्वभावो न निवर्तत इत्यर्थः ॥ ४९ ॥ स्वयं सधर्मा अपीति यदुक्तं तत्रेतिहासमाह लुब्धक इत्यादिना । पक्षिणामंतक ईश्वरेण निर्मितः सन्यत्रयत्र ते तत्रतत्र तान्कणादिभिः प्रलोभयन् जालं विस्तार्य विशेषेण धृतवान् । पाठांतरे तेषामामिषादिभिः प्रलोभनं कृतवानित्यर्थः ॥ ५० ॥ कुलिंगः कंदभक्षी पक्षिविशेषः । कुलिंगयोर्मिथुनम् ॥ ५१ ॥ शिचस्तंत्यां जालस्य सूत्रेऽसज्जत बंधं प्राप तामापन्नामापदं प्राप्तां दृष्ट्वा कुलिंगः पक्षी तां मोचयितुमकल्पः सन्पर्यदेवयद्वृक्षशाखामाश्रित्य विलापं चकार ॥ ५२ ॥ आकरुणया सर्वतोऽनुकंप्यया स्त्रिया किं करिष्यति ॥ ५३ ॥ आत्मनो देहस्यार्धेन । अनेन विधुरायुषा भार्याशून्यजीवितेन दुःखं यथा भवत्येवं जीवता किं मे प्रयोजनम् । अतो मामपि कामं नयत्वित्यन्वयः ॥ ५४ ॥ न जाताः पक्षा येषां तान्बालकान्कथं बिभर्मि पुष्यामि । मंदभाग्या मे प्रजा मातरं प्रतीक्षंते ॥ ५५ ॥ शाकुनिकः पक्षिहंता विलीनः सन् ॥ ५६ ॥ आत्मापायं स्वमृत्युम् ॥ ५७ ॥

विपिने वने पाठांतरे 'तत्रतत्र प्रलोभनम्' इति पाठे । इत्यर्थ इति । 'विपूर्वो धा करोत्यर्थे' इत्युक्तेरिति भावः । तत्रतत्र वनदेशेषु ॥५०॥ तत्र विपिने । तयोः कुलिंगीकुलिंगयोर्मध्येऽन्नविकरणादिना ॥ ५१ ॥ हे महिष्य इति । महिषीवदज्ञा यूयमहो राजभार्या भूत्वापीति भावः। महिषी कुलिंगभार्येति तीर्थः । 'कृताभिषेका महिषी' इति कोशाद्राजभार्यास्वेव महिषीपदप्रयोगो युक्तः । किञ्च–कुलिंगस्य पक्षिणामधीशत्वेपि पक्षिराजत्वं गरुडस्यैव प्रसिद्धं युक्तं च 'वैनतेयः खगेश्वरः ' इति कोशात् । अन्यथा गर्दभ्यादीनामपि तथात्वं स्यादिति । पर्यदेवयत् अशोचत् ॥ ९२ ॥ देवो विधाता । "ओत्" इति प्रकृतिभावः । " अहो आहो उताहो च हंहो नो हो अथो इमे । भोस्सहितास्तथौदंता निपाता अष्टधा मताः ॥" इति वैयाकरणवृद्धाः । वा-करुणया मयि कृपावत्या दीनया क्षीणया मद्वियोगेनेति शेषः । दीङ्—क्षये॥९३॥ "भार्याहीनेऽपि विधुरो राही च विकलेऽनृजौ" इति निरुक्तिः । अतो जीवनप्रयोजनाभावात् ॥ ९४ ॥ नीडे स्वस्थाने ' नीडं स्थानकुलाययोः ' इति मेदिनी ॥ ९५ ॥ कुलिंगं दीर्घतुंडम् " दार्वाघाटो दारुकुट्टः कुलिंगो दीर्घतुंडकः " इत्यभिधानात् । निलीनो वृक्षमूले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्यकशिपुरुवाच ॥ बाल एवं प्रवदति सर्वे विस्मितचेतसः ॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥ ५८ ॥ यम एतदुपाख्याय तत्रैवांतरधीयत ॥ ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत् सांपरायिकम् ॥ ५९ ॥ ततः शोचत मा यूयं परं चात्मानमेव च ॥ क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा ॥ स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥ ६० ॥ नारद उवाच ॥ इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ॥ पुत्रशोकं क्षणात् त्यक्त्वा तत्त्वे चित्तमधारयत् ॥ ६१ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे कुलिंगकथनेन दितिशोकापनयनं नाम द्वितीयोऽध्यायः ॥ २ ॥ नारद उवाच ॥ हिरण्यकशिपू राजन्नजेयमजरामरम् ॥ आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत ॥ १ ॥ स तेपे मंदरद्रोण्यां तपः परमदारुणम् ॥ ऊर्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः ॥२॥ जटादीधितिभी रेजे संवर्तार्क इवांशुभिः ॥ तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥ ३ ॥ तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः ॥ तिर्यगूर्ध्वमधो लोकानतपद् विष्वगीरितः ॥४॥ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः ॥ निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥५॥ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ॥ धात्रे विज्ञापयामासुर्देवदेव जगत्पते ॥६॥ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ॥ तस्य चोपशमं भूमन् विधेहि यदि मन्यसे ॥ लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभूः ॥७॥

अयथोत्थितं मिथ्यैवाविर्भूतम् ॥ ५८ ॥ सांपरायिकं परलोककृत्यम् ॥ ५९ ॥ अशोचतेति पाठेऽडागम आर्षः । स्वः पर इत्यभिनिवेश एवाज्ञानं तेन विना ॥ ६० ॥ सस्नुषा स्नुषासहिता ॥ ६१ ॥ इति सप्तमे टीकायां द्वितीयोऽध्यायः ॥ २ ॥ तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः ॥ आगत्य विस्मितस्तेन संस्तुतश्च वरानदात् ॥ १ ॥ तदेवं साधूनां कदनेदानवानादिश्य बंधूनां शोकं तत्त्वनिरूपणेनापनीय यत्कृतवांस्तदाह । हिरण्यकशिपुरित्यादिना। अप्रतिद्वंद्वं प्रतिपक्षहीनमेकराजमेकमेव राजानं व्यधित्सत कर्तुमैच्छत् ॥ १ ॥ ऊर्ध्वौ बाहू यस्य। नभसि दृष्टिर्यस्य। पादांगुष्ठेनाश्रिताऽवनिर्येन ॥ २ ॥ जटानां दीधितिभिः कांतिभिः अंशुभी रश्मिभिः प्रलयकर्ताऽर्क इव रेजे। पूर्वं येऽलक्षिताः संतो भुवि चेरुस्ते देवाः पुनः स्वानि स्थानानि भेजिरे ॥ ३ ॥ विष्वगीरितः सर्वतः प्रसृतः सन् ॥ ४ ॥ द्वीपैरद्रिभिश्च सहिता भूश्चलिता ॥ ५ ॥ ६ ॥ तव बलिहाराः करप्रदाः पूजाकारिण

छन्नः ॥ ५६ ॥ ५७ ॥ अयथोत्थितं येन प्रकारेणोत्थितं तथा न तिष्ठतीत्यर्थो वा ॥ ५८ ॥ यत्राविर्भूतस्तत्रैवेत्यर्थः ॥ ५९ ॥ यतः सर्वं दृश्यमनित्यमात्मा नित्यश्च ततो हेतोः । अशोचतेति । ततोऽशोचतेति पाठे यद्वा—अ इति संबोधनेऽव्ययं हे मात्रादय इत्यर्थः ॥ ६० ॥ इतीत्थम् । स्नुषया रुषाभान्वा ॥ ६१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ तस्य हिरण्यकशिपोः (१) हे राजन्निति । राज्ञामेष स्वभाव एव यदहमेव सर्वेश्वरो भवामीति भावः । आत्मानं स्व एक एव राजत इत्येकराजस्तं वक्ष्यमाणाभिप्रायेण ब्रह्मलोकपर्यंतं स्वस्यैवैकाधिपत्यं कामयमानोऽभूदित्यर्थः ॥ १ ॥ अत एव स तेप इति ॥ २ ॥ स्थानानि स्वस्वगृहान् । शात्रोस्तस्य शात्रवमनालक्ष्येत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ तेन दैत्यतपसा देवदेवत्वाज्जगत्पतित्वाच्च त्वमेव प्रार्थनीय इति भावः ॥ ६ ॥ तस्य तपस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यायं किल संकल्पश्चरतो दुश्चरं तपः ॥ श्रूयतां कि न विदितस्तवाथापि निवेदितः॥८॥ सृष्ट्वा चरा चरमिदं तपोयोगसमाधिना ॥ अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ॥ तदहं वर्धमानेन तपोयोगसमाधिना ॥ कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः ॥ १० ॥ अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ॥ किमन्यैः कालनिर्धूतैः कल्पांते वैष्णवादिभिः ॥ ११ ॥ इति शुश्रुम निर्बंधं तपः परममास्थितः ॥ विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर ॥ १२ ॥ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते ॥ भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १३ ॥

इति वा । अभितो भवतीत्यभिभूः हे अभिभूर्हे सर्वाधिपते । पाठांतरे भो इति संबोधनम् । अभितो यावन्न नंक्ष्यंतीति संबंधः ॥ ७ ॥ ब्रह्मणस्तस्मिन्द्वेषमुत्पादयितुं तत्सं कल्पमाहुस्तस्येति चतुर्भिः । तस्य संकल्पस्तव किं न विदितोऽथाप्यस्माभिर्निवेदितस्त्वया श्रूयताम् ॥ ८ ॥ तपोयोगयोः समाधिना निष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं यथाऽध्यास्तेऽधितिष्ठति ॥ ९ ॥ तत्तथैवात्मनः साधयिष्यामि । ननु ब्रह्मणाऽतिदीर्घायुषा तपस्तप्त्वा तत्साधितमन्यः कुतस्तत्साधयेत्तत्राहुः । कालात्मनोरिति । यद्यप्यायुषोऽल्पत्वेन देहो वारं वारं म्रियेत तथाऽपि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तप्त्वा तत्पदं साधयिष्याम्येवेति ॥ १० ॥ वर्धमानेनेति यदुक्तं तदभिप्रायमाह अन्यथेति । अन्यथा सुरासुरादिव्यत्ययेन अयथापूर्वं पुण्यपापादिव्यत्ययेन इदं जगद्विधास्यामि । अन्यैर्वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनमतस्तदेव साधयिष्यामि ॥ ११ ॥ इति त्वत्पदापहरणे तस्य निर्बंधं शुश्रुम।अत एवासौ तपः परममास्थितो वर्तते यदत्र युक्तं तदनंतरमेव विधत्स्व॥ १२ ॥ अन्यथा तव स्थानभ्रंशे सति साधूनामनिष्टं स्यादिति

उपशमं परिहारमित्यर्थः । हे भूमन्निति । यद्यस्मत्संप्रार्थितं न करोषि तर्हि स एव भूमा भविष्यतीति भावः । 'बलिः पूजोपहारयोः' इति कोशादर्थांतरमाह–पूजेत्यादि । अभितो भवतीत्यभिभूः । (क्विबंतत्वेन धातुत्वान पायात् संबुद्धौ ह्रस्वाभावो धेर्लोपाभावश्च) हे अभिभूः । पाठांतरे 'तवाभिभोः' इत्येवं पाठे ॥ ७ ॥ यद्यपि तव विदितमथापि तथापीत्यर्थः । निवेदितं यथा स्यात्तथा । यद्वा–निवेदितं वाक्यम् । तीर्थस्तु–निवेद्यत इति पपाठ ॥ ८ ॥ परमेष्ठी ब्रह्मा ॥ ९ ॥ वर्द्धमानेनेति । सांप्रतिकात्परमेष्ठितो मम प्रभावोऽधिको भविष्यतीति भावः । अत्राक्षिपति–नन्विति । तत्पदं पारमेष्ठ्यासनम् ॥ १० ॥ सुरासुरादिव्यत्ययं सुराणां यज्ञादिभागानसुरेभ्यो दास्यामि असुराणां मद्यादिपानं सुरेभ्यश्चेति विपर्ययेण पुण्यपापादिव्यत्ययं पुण्यकर्मिणां नरकादिदुःखं तद्विपरीतानां स्वर्गादिसुखं च दास्यामीत्यर्थः । अत्र विश्वनाथः–ब्रह्मचर्यतपोव्रतादिभिर्ये इह लोके दुःखिनस्ते परलोकेऽपि नरकभाजो दुःखिन एव कर्त्तव्याः।ये इह लोके वैषयिकसुखभोगमात्रनिरतास्त एव परलोके स्वर्गिणः वैषयिकसुखभोगोन्मुख्यमेव पुण्यमिष्टामिष्टसाधनं च । तत्संकोच एव पापमनिष्टसाधनमित्यादिकं प्रवर्त्तनीयम् । नन्वेवं पूर्वपूर्वमहाकल्पेषु न प्रवृत्तं तत्राह–अयथापूर्वमप्योजसा स्वतेजसा विधास्ये । ननु स्वेन सिषाधयिषितं परमेष्ठ्यासनमेव किं सर्वधिष्ण्येभ्यः श्रेष्ठं मन्यसे तत्राह–किमन्यैरिति । वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनं कालनिर्धूतैरिति ध्रुवपदस्यानित्यत्वमननमसुरस्वभावत्वादेवेति भावः ॥ ११ ॥ अत एव त्वत्पदाहरणसंकल्पादेव । "निर्बंधो बंधनिर्मुक्तौ हठे ज्ञानिनि केशवे" इति निरुक्तिः । त्रिभुवनेश्वरेत्युपलक्षणम् । यद्वा–त्रयाणां ब्रह्मविष्णुरुद्राणां भुवनानि यत्र तत्त्रिभुवनं ब्रह्मलोकस्यैव शिवलोकवैकुंठलोकौ प्रदेशविशेषाविति पुराणांतरादवसेयम् । अधुना स्वयं त्रिभुवनेश्वरोप्यस्योपेक्षणेऽयमेव स स्यादिति भावः ॥ १२ ॥ अन्यथाऽस्य प्रति क्रियायां अभावे । भवाय कीदृशाय श्रेयसे उत्तमसृष्ट्यर्थमित्यर्थः । सचेदिदं प्राप्स्यति तदा विरुद्धं स्रक्ष्यतीति भावः । भूत्यै सृष्टानां लोकानां धर्मादिसंपत्त्यै तदधिकारे त्वधर्मैर्विपत्तिर्भाविनीति भावः । क्षेमाय कल्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति विज्ञापितो देवैर्भगवानात्मभूर्नृप ॥ परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥ १४॥ न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ॥ पिपीलिका भिराचीर्णं मेदस्त्वङ्मांसशोणितम् ॥१५॥ तपंतं तपसा लोकान् यथाऽभ्रापिहितं रविम् ॥ विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ॥१६॥ ब्रह्मोवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप ॥ वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥ अद्राक्षमहमेतत्ते हृत्सारं महदद्भुत म् ॥ दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते ॥ १८ ॥ नैतत् पूर्वर्षयश्चक्रुर्न करिष्यंति चापरे ॥ निरंबुर्धारयेत्प्राणान् को वै दिव्यसमाः शतम् ॥ ॥ १९ ॥ व्यवसायेन तेऽनेन दुष्करेण मनस्विनाम् ॥ तपोनिष्ठेन भवता जितोऽहं दितिनंदन ॥ २० ॥ ततस्त आशिषः सर्वा ददाम्यसुरपुं गव ॥ मर्त्यस्य ते ह्यमर्त्यस्य दर्शनं नाफलं मम ॥ २१ ॥ नारद उवाच ॥ इत्युक्त्वाऽऽदिभवो देवो भक्षितांगं पिपीलिकैः ॥ कमंडलुजलेनौक्ष द्दिव्येनामोघराधसा ॥ २२ ॥ स तत्कीचकवल्मीकात् सहओजोबलान्वितः ॥ सर्वावयवसंपन्नो वज्रसंहननो युवा ॥ २३ ॥ उत्थितस्तप्तहे माभो विभावसुरिवैधसः ॥ स निरीक्ष्यांबरे देवं हंसवाहमवस्थितम् ॥ २४ ॥

शोचंत आहुः।तव पारमेष्ठ्यमिदमासनम्। द्विजानां गवां च । भवायोद्भवाय।श्रेयसे सुखाय।भूत्यै ऐश्वर्याय । क्षेमाय लब्धपालनाय । विजयायोत्कर्षाय ॥ १३ ॥ १४ ॥ वल्मीकादिभिः प्रतिच्छन्नं प्रथमं न ददर्श।पश्चात्कथंचिद्विलक्ष्य तं प्राहेति द्वयोरन्वयः।पिपीलिकाभिराचीर्णं समंताद्भक्षितं मेदश्च त्वक्च मांसं च शोणितं च यस्य ॥१५॥ अभ्रैरपि तं छन्नं रविमिव विलक्ष्य विस्मितः प्राह ॥ १६ ॥ १७ ॥ हृत्सारं धैर्यम् । दंशैर्मक्षिकादिविशेषैर्भक्षितो देहो यस्य ॥१८॥ निरंबुर्निषिद्धमंबु येन सः । त्यक्तोदक इत्यर्थः ॥१९॥ ते त्वयाऽनेन व्यवसायेनैव तावज्जितोऽहम् । तपोनिष्ठेन भवता तु सुतरां जितः ॥२०॥ मर्त्यस्य तवामर्त्यस्य मम दर्शनमफलं निष्फलं न भवति ॥ २१ ॥ आदौ भवतीत्यादिभवो ब्रह्मा । औक्षत्प्रोक्षितवान् ॥ २२ ॥ वज्रवत्संहननमंगदार्ढ्यं यस्य । तप्तस्य हेम्न इवाभा देहकांतिर्यस्य ॥ २३ ॥ तस्य दर्शनेन महा

णाय । विजयायोत्कर्षाय । तदधिकारे त्वकल्याणपराजयावेव भाविनाविति भावः । जगत्पते इति । तवैव जगत्पतित्वं शोभनं प्रतिभाति न तु तस्येति भावः ॥१३॥ हे नृपेति । नृपो यथा स्वपदवैकल्यकर्तृवारणे प्रयतते तथा सोऽपीति भावः । आदिना मरीच्यादिग्रहः । ययाविति । तर्ह्यधुनैव वरदानेन तं तपसो निवर्त्तयामीत्याशयेन ॥ १४ ॥ पिपीलिकाभिः पिपीलिकादंशादिभिः । मेदश्चर्मांतर्गतः सारः । पिपीलिकाः सूक्ष्म कीटाः ॥ १५ ॥ ॥ अयोग्यहठात्प्रहसन् ॥ १६ ॥ हे काश्यपेति । स्वप्रपौत्रत्वात्तेऽभीप्सितं दातुमागतोऽस्मीति भावः ॥ १७ ॥ १८ ॥ इत्यर्थ इति । अहो अद्भुतं ते तप इति भावः ॥ १९ ॥ हे दिति नंदनेति । रजस्तमःप्रकृतित्वेन वरानर्हस्यापि "वरः क्रूरनिसर्गाणामहीनाममृतं यथा" इति भगवता वक्ष्यमाणत्वेन तव वरं दास्यामेवेति भावः । अत्र हेतुः—व्यवसायेनेत्यादि ॥ २० ॥ यतस्तपसाऽहं जितस्ततो हेतोः । हे असुरपुंगवेति । असून् इंद्रियाणि रांति गृह्णंति स्वाधीनानि कुर्वंतीत्यसुरास्तपस्विनस्तेषु श्रेष्ठोऽस्यत एव सर्वा आशिषो ददामीति भावः । 'इंद्रियाण्यसवः प्राणाः' इत्यमरः । "पुंगवः स्याद्बलीवर्दे प्रभे दे्प्यौषधस्य च । उत्तरस्थः स्मृतः श्रेष्ठे" इति मेदिनी । असुरत्वेऽपि मरणधर्मवत्त्वान्मर्त्यस्येत्यर्थः ॥ २१ ॥ पिपीलिकैरिति । दंशभक्षितत्वं पूर्वं पिपीलिकाभक्षितत्वं पश्चादिति ज्ञेयम् । अमोघमव्यर्थं राधः सिद्धिर्यतस्तेन यद्वादेः श्रीहरेः सकाशाद्भवो जन्म यस्य स तथा । दिव्येनालौकिकेन "दिव्यं लवंगे धात्र्यां स्त्री वल्गौ दितिभवे त्रिषु । अलौकिकेऽपि" इति कोशात् ॥ २२ ॥ स दैत्यः राधसः काष्ठात् ॥ २३ ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ उत्थाय प्रांजलिः प्रह्व ईक्षमाणो दृशा विभुम् ॥ हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणात् ॥ २५ ॥
हिरण्यकशिपुरुवाच ॥ कल्पांते कालसृष्टेन योंधेन तमसा वृतम् ॥ अभिव्यनग् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥ २६ ॥ आत्मना त्रिवृता
चेदं सृजत्यवति लुंपति ॥ रजःसत्त्वतमोधाम्ने पराय महते नमः ॥ २७ ॥ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये ॥ प्राणेंद्रियमनोबुद्धिविकारै
र्व्यक्तिमीयुषे ॥ २८ ॥ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ॥ चित्तस्य चित्तेर्मनइंद्रियाणां पतिर्महान्भूतगुणाशयेशः ॥
॥ २९ ॥ त्वं सप्ततंतून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च ॥ त्वमेक आत्मात्मवतामनादिरनंतपारः कविरंतरात्मा ॥ ३० ॥

नुत्सवो यस्य ॥ २४ ॥ हर्षेणाश्रूणि पुलकोद्भेदश्च यस्य सः ॥ २५ ॥ अंधेन निबिडेन । तत्र हेतुः कालसृष्टेन प्रकृतिगुणरूपेण न तु ध्वांतेन । तमसाऽऽवृतमिदं जगद्योऽभिव्यनगभिव्य क्तमकरोद्यश्च त्रिगुणेनात्मनेदं जगत्सृजत्यवति पालयति लुंपति संहरति च तस्मै रजःसत्त्वतमसां धाम्ने आश्रयाय महते पराय परमेश्वराय नम इति द्वयोरन्वयः ॥ २६ ॥ २७ ॥ अत्र च स्वप्रकाशत्वं जगत्प्रकाशकत्वं तत्कारणत्वं तत्सृष्टयादिकर्तृत्वं महत्त्वं परमेश्वरत्वं चेति षड्विधत्वमुक्तं तदेव प्रपंचयन्नमस्करोति । नम इति चतुर्भिः । बीजाय कार णाय । तत्र हेतुराद्याय । ज्ञानं ज्ञप्तिर्विज्ञानं विषयाकारं ज्ञानं मूर्तिर्यस्य तस्मै । अनेन स्वप्रकाशत्वं जगत्प्रकाशकत्वं च दर्शितम् । बीजायेति निमित्तत्वमुक्तम् । उपादा नत्वमाह । प्राणादयो ये विकारास्तै रूपैर्व्यक्तिं कार्याकारमीयुषे प्राप्तवते ॥ २८ ॥ एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितम् । महत्त्वमीश्वरत्वं चाह । त्वमिति । त्वमेव जगतो जंगमस्य तस्थुषः स्थावरस्य च ईशिषे नियंता भवसि । केन मुख्येन प्राणेन सूत्रात्मरूपेण । अतस्त्वं प्रजानां पतिः तासां चित्तस्य चित्तेश्च तत्परिणामभूतायाश्चेतनाया मनसश्च तन्नियम्यानामिंद्रियाणां च पतिः । अतस्त्वमेव महान् । भूतानामाकाशादीनां तद्गुणानां शब्दादिविषयाणामाशयानां तद्वासनानामीशश्च एतेनैव स्रष्टृत्वं दर्शितम् ॥ २९ ॥ इदानीं यज्ञप्रवर्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह । त्वमेव सप्ततंतूनग्निष्टोमादियज्ञान्विस्तारयसि । कथम् । त्रय्या तन्वा वेदत्रय रूपेण । कथंभूतया । चत्वारो होतारो यत्र तच्चातुर्होत्रकं कर्म तद्विषयया विद्यया । आत्मवतां प्राणिनामात्मभूतस्त्वमेवांतरात्मा चांतर्यामी । कुतः । यतः कविः सर्वज्ञः ।

प्रह्वः प्रणतः। पुलकोद्भेदः रोमांचत्वम् "पुलकः कृमिप्रभेदे प्रस्तरभेदे च मणिदोषे । रोमांचे हरिताले गजान्नपिंडे च गंधर्वे" इति मेदिनी । अगृणादस्तौत् ॥ २५ ॥ "अंधः स्यान्निबिडे ध्वान्ते चक्षुर्हीनेऽविवेकिनि" इति धरणिः ॥ २६ ॥ त्रीन् गुणान्वृणोति स्वीकरोतीति त्रिवृत् तेनात्मना ॥ २७ ॥ अत्र पूर्वोक्तपद्यद्वये । तदेव षड्विधत्वमेव । तत्र कारणत्वे । ज्ञप्तिः सामान्यं ज्ञानम् । अनेनाद्यायेत्यादिविशेषणत्रयेण ॥ २८ ॥ "वायुर्वै गौतमसूत्रम्" इति श्रुतेर्वाय्वात्मनेत्यर्थः । अतः सूत्रात्मत्वादेव । तासां प्रजानाम् । अतश्चित्तादिपतित्वात् । एतेनैवेशत्वकथनेनैव ॥ २९ ॥ आदिनाऽत्यग्निष्टोमोक्थषोडशिवाजपेयाप्तोर्यामातिरात्राणां ग्रहः । चत्वारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेव कालोऽनिमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ॥ कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥ ३१ ॥ त्वत्तः परं नापरमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति ॥ विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३२ ॥ व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वम् ॥ भुंक्षे स्थितो धामनि पारमेष्ठ्य अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥ अनंताव्यक्तरूपेण येनेदमखिलं ततम् ॥ चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥ ३४ ॥

तत्कुतः । एकोऽखंडः । तत्र हेतुरनादिरनंतपारश्चेति । नास्त्यंतः कालतः पारश्च देशतो यस्य सः ॥ ३० ॥ कालरूपेण संहर्तृत्वमाह । त्वमेवेति । लवाद्यैः कालावयवैः क्षिणोषि क्षपयसि । तदेव सृष्ट्यादिकर्तृत्वेऽपि निर्विकारत्वमेवाह । कूटस्थ इति । तत्र हेतवः । आत्मा ज्ञानरूपः परमेष्ठी परमेश्वरोऽजो जन्मशून्यो महानपरिच्छिन्नः । किं च जीवलोक एव कर्मपाशाज्जन्मादिभिर्विक्रियते त्वं तु तस्य जीवो जीवनहेतुर्यतस्तस्यात्मा नियंता ॥ ३१ ॥ तत्कुतस्तत्राह । त्वत्त इति । त्वत्तो व्यतिरिक्तं यदि किंचिद्भवेत्तर्हि तस्मात्तव जन्मादिविकारो नियम्यत्वादिकं वा भवेत्तत्तु नास्तीत्याह । परं कारणमपरं कार्यम् । तत्र चैजज्जंगममनेजत्स्थावरं च त्वद्व्यतिरिक्तं नास्ति । ननु मद्बोधकशास्त्रं व्यतिरिक्तमस्तीति चेन्न । यतो विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदंगानि तवैव तनवो न तु त्वद्व्यतिरिक्ताः । तत्कुतः । यतस्त्वं बृहद्ब्रह्मैवासि । तदपि कुतस्तत्राह । हिरण्यरूपं ब्रह्मांडं गर्भे यस्य सः त्रिपृष्ठस्त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः । "अक्षरात्परतः परः" इत्यादिश्रुतेः ॥ ३२ ॥ ननु ब्रह्मांडशरीरस्य जीवस्य मम कुतो ब्रह्मत्वं कुतो वा ब्रह्मांडगर्भत्वादि तत्राह । व्यक्तं कार्यमिदं तव शरीरं व्यक्तं सत्यमिति वा येन शरीरेण त्वमिंद्रियप्राणमनसां गुणान्विषयान् भुंक्षे किं च पारमेष्ठ्ये पारमैश्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे न त्वस्मदादिवत्स्वरूपतिरोधानेन । अतस्त्वमव्यक्त आत्मा निरुपाधिर्ब्रह्मैव पुराणः पुरुषश्चेत्यर्थः ॥ ३३ ॥ ननु ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य तत्राह । अनंतेति । हे अनंत येन त्वयाऽव्यक्तेन मनोवचनागोचरेण रूपेणेदं विश्वं ततं व्याप्तं तस्मै तुभ्यं भगवतेऽचिंत्यैश्वर्याय नमः ।

होतृद्गात्रध्वर्युब्रह्माणः । तत्सर्वज्ञत्वम् तत्राखंडत्वे ॥३०॥ अद्यपदेन क्षणघटीपलयामादिग्रहः । कूटस्थो निर्विकारत्वेन कालव्यापी । तत्र कूटस्थत्वे । अन्यदाह–किंचेति ॥३१॥ तत्सर्वात्मत्वं त्वद्व्यतिरिक्तं नास्ति "सर्वं खल्विदं ब्रह्म" इति श्रुतेः । विद्याश्च कलाश्चेति विद्याकलाः । तत् मदव्यतिरिक्तत्वम् । अथ कस्मादुच्यते ब्रह्मेति । "बृंहंतो ह्यस्मिन्गुणाः" इति श्रुतेः । तदपि ब्रह्मत्वमपि । परतः सर्वेभ्यः परस्मादक्षरादव्यक्तात्परः "अव्यक्तात्पुरुषः परः" इति श्रुतेरिति श्रुतिपदार्थः ॥ ३२ ॥ अत्राक्षिपति–अतः स्वरूपतिरोधानाभावात् । इत्यर्थ इति । स्वरूपतिरोधानेन भोगो हि जीवानामेवेति भावः ॥ ३३ ॥ पुनराक्षिपति–नन्विति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि दास्यस्यभिमतान्वरान् मे वरदोत्तम ॥ भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो ॥ ३५ ॥ नांतर्बहिर्दिवानक्तमन्यस्मादपि चायुधैः ॥ न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि ॥ ३६ ॥ व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः ॥ अप्रतिद्वंद्वतां युद्ध ऐकपत्यं च देहिनाम् ॥ ३७ ॥ सर्वेषां लोकपालानां महिमानं यथात्मनः ॥ तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ॥ ३८ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे हिरण्यकशिपोर्वरयाचनं नाम तृतीयोऽध्यायः ॥ ३ ॥ नारद उवाच ॥ एवं वृतः शतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात् तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥ १ ॥ ब्रह्मोवाच ॥ तातेमे दुर्लभाः पुंसां यान् वृणीषे वरान् मम ॥ तथापि वितराम्यंग वरान् यदपि दुर्लभान् ॥ २ ॥

भगवत्त्वे हेतुः चिदचिच्छक्तियुक्ताय चिच्छक्तिर्विद्याऽचिच्छक्तिर्माया ताभ्यां युक्तायेति ॥ ३४ ॥ ३५ ॥ अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि आयुधैर्मृत्युर्मा भूत् ॥ ३६ ॥ व्यसुभिरप्राणैः असुमद्भिः सप्राणैः । यथा आत्मनस्तवास्ति महिमा तथाऽप्रतिद्वंद्वतादिकं देहीति शेषः ॥ ३७ ॥ तपसा योगेन च प्रभावो येषां तेषां यदणिमाद्यैश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ॥ ३८ ॥ इति सप्तमस्कन्धे टीकायां तृतीयोऽध्यायः ॥ ३ ॥ ॥ चतुर्थे तु वराँल्लब्ध्वा विजित्याखिललोकपान् ॥ विष्णुद्वेषेण तान्सर्वान् दैत्येंद्रः समपीडयत् ॥ १ ॥ शतधृतिर्ब्रह्मा ॥ १ ॥ मम मत्तः । यदपि यद्यपीमे दुर्लभाः ॥ २ ॥

हे अनंतेति । अनंतरूपस्य सर्वं संगच्छत इति भावः ॥ ३४ ॥ नन्वलमेतावत्या स्तुत्या वरांस्तावद् गृहाण—तत्राह यदीति । हिरण्यकशिपोरत्रायमाशयः—यद्यहममृत्युर्भूयासमिति वरं याचिष्ये तदा वरोऽयमसंभव एव यतः कल्पांते वयं ब्रह्मादयोऽपि मरिष्याम एवेति प्रत्याख्यास्यत एवात एवं युक्त्या वरं वृणोमि यतः फलतोऽमरत्वमेव प्राप्तं भविष्यतीति । त्वद्विसृष्टेभ्य इति । सर्वेषां भूतानां ब्रह्मसृष्टत्वादपरः कोऽवशिष्ट इति भावः । संदर्भस्तु—साक्षात्त्वत्सृष्टेभ्य इत्याह ॥ ३५ ॥ मृत्युस्ततोऽपि संभवेदत आह—नांतर्बहिर्दिवा नक्तमिति । सर्वदेशकालनिषेधेन स्वाभाविको मृत्युर्वारितः साकारो वराहादिर्विष्णुर्ब्रह्मसृष्ट एव स तु निराकारः सन् यदि चक्राद्यस्त्रं चालयेत्तर्ह्यनर्थ इत्याशंक्याह—अन्यस्मादपि आयुधैर्न मृत्युः । अंतर्बहिःशब्दाभ्यां सर्वदेशस्य प्राप्तत्वेऽपि तयोः संबंधिशब्दत्वेन प्रतियोगिविशेषोपस्थापकत्वेऽनर्थ इत्याशंक्य पुनर्देशं निषिध्यति—न भूमावित्यनेन सप्तपातालानां, नांबरे इत्यनेन सप्तस्वर्गाणां च निषेधः । पुनर्दक्षादिसृष्टभूतेभ्योऽप्याशंक्याह—न नरैरिति । संदर्भस्तु—अन्यस्माद्रुद्रप्रजापत्यादिसृष्टादित्यर्थः । ब्रह्मत उपर्यन्यामननात् पुनः कर्तृगुणं निषेधति—न नरैरिति । पादत्रयेण भगवतोऽप्राकृतप्राणत्वाद्व्यसुभिर्वासुमद्भिर्वेति तत्रैव संगस्यते कर्तृकरणात् । न चैतत्करणं निषेधपरम् । अप्राणिभिः प्राणिभिर्वेत्युक्ते तस्यैव प्राप्तत्वात् । हंतुर्जीवदेहस्यापि सप्राणभागान्निष्क्रांतस्य कर्त्तनीयनखाग्रभागस्य त्यक्तप्राणत्वाच्च श्रीभगवति तन्निषेधितं श्रीरुक्मिणीदेव्या "त्वक्श्मश्रुरोमनखकेशपिनद्धमंतः" इत्यादिना प्राकृतानां निंदयाऽप्राकृतानां तेषामानंदरूपत्वं साधितम् । अत उक्तं वाराहे "न तस्य प्राकृता मूर्त्तिर्मेदोमज्जास्थिसंभवा" इत्यादि । चक्रवर्ती तु—सर्वजीवजातीनामुल्लेखनासंभवादाह—व्यसुभिः प्राणहीनैः पाषाणाद्यैः । असुमद्भिः प्राणसहितैः ग्राहाद्यैः । एवं वस्तुतोऽहममर एवाभूवमिति वरांतरं वृणोति—अप्रतीति ॥ ३६ ॥ ३७ ॥ यथा आत्मनस्तवास्ति तथा तपोयोगाभ्यां प्रभावो येषां तेषामिति व्याख्यातं स्वामिभिः । इत्यर्थ इति । मदभिलषितं सर्वं देहीति भावः ॥ ३८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ ताँल्लोकपान् (१) अथ वरप्रार्थनोत्तरम् । हिरण्यकशिपोर्हिरण्यकशिपुना । तस्य तस्मै ॥ १ ॥ अंगेति संबोधनेऽव्ययम् । तच्च तातपदेन संबध्यते । हे ताततेति-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो जगाम भगवानमोघाऽनुग्रहो विभुः॥पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ॥ ३ ॥ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ॥ भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥ स विजित्य दिशः सर्वा लोकांश्च त्रीन् महासुरः ॥ देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान ॥ ५ ॥ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् ॥ यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ॥ ६ ॥ सर्वसत्त्वपतीञ्जित्वा वशमानीयविश्वजित् ॥ जहार लोकपालानां स्थानानि सह तेजसा ॥ ७ ॥ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् ॥ महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा ॥ त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ ८ ॥ यत्र विद्रुमसोपाना महामारकता भुवः ॥ यत्र स्फाटिककुड्यानि वैडूर्यस्तंभपंक्तयः ॥ ९ ॥ यत्र चित्रवितानानि पद्मरागासनानि च ॥ पयःफेनानिभाः शय्या मुक्तादामपरिच्छदाः ॥१०॥ कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः ॥ रत्नस्थलीषु पश्यन्ति सुदतीः सुंदरं मुखम् ॥ ॥ ११ ॥ तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलोक एकराट् ॥ रेमेऽभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरूर्जितचंडशासनः ॥ १२ ॥ तमंग मत्तं मधुनोरुगंधिना विवृत्तताम्राक्षिमशेषधिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥ १३ ॥ जगुर्महेंद्रासनमोजसा स्थितं विश्वावसुस्तुंबुरुनारदादयः ॥ गंधर्वसिद्धा ऋषयोऽस्तुवन्मुहुर्विद्याधरा अप्सरसश्च पांडव ॥ १४ ॥

अमोघोऽनुग्रहो यस्य प्रजेश्वरैर्मरीच्यादिभिः ॥ ३ ॥ यदर्थं तपस्तप्तं तदाह एवमित्यादिना ॥४॥५॥६॥ सर्वेषां सत्त्वानां प्राणिजातानां येये पतयस्तान् ॥७॥ त्रिविष्टपं स्वर्गमध्यास्ते स्माधिष्ठितवान् । तत्र स्वर्गेऽपि महेंद्रभवनमध्युवासाधिवसति स्म ॥ ८ ॥ अखिलसमृद्धियुक्तत्वमेवाह । यत्रेति त्रिभिः ॥ ९ ॥ मुक्तादामानि परिच्छदाः परिकरा यासाम् ॥ १० ॥ सुदतीः सुदत्यः ॥ ११ ॥ ऊर्जितमधिकं चंडं तीव्रं शासनं यस्य ॥ १२ ॥ अंग हे राजन् उरुगंधिनोग्रगंधेन मधुना सुरया मत्तम् । अत एव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तम्।अशेषधिष्ण्यपाः सर्वलोकपाला उपायनयुक्तैः पाणिभिरुपासत सेवंते।त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतम् ॥१३॥ उपासनप्रका

बालत्वाभिप्रायिका संबुद्धिः । बालत्वादयोग्यान्दुर्लभांश्च वरान्वृणीत इति भावः ॥ २ ॥ ततो वरदानानंतरम् । भगवान्ब्रह्मा ॥ ३ ॥ हेममयं तेजोमयम् ॥ ४ ॥ ५ ॥ ६ ॥ सर्वेषां सत्त्वानां पश्वादीनामपि ये पतयः सिंहाद्यास्तान् । सत्त्वपतयो बलाधिका वा ॥ ७ ॥ तत्र त्रिविष्टपेपि । त्रैलोक्ये या लक्ष्मीः शोभा तस्या आयतनं मुख्यस्थानम् ॥ ८ ॥ सोपानमारोहणावरोहणभूमिः भुव इत्यस्य विशेषणं विद्रुमसोपाना इति ॥ ९ ॥ वितानमुल्लोचम् ॥ १० ॥ देव्यो देवांगनाः ॥ ११ ॥ प्रतापितैः स्वतेजसा संतापितैः । आदिना गंधर्वयक्षादिग्रहः ॥ १२ ॥ अत एव मधुमत्तत्वादेव ॥ १३ ॥ नारदनामा कश्चिद्गंधर्वोऽप्यस्ति तच्चार्जुनजन्मकालागतगंधर्वेषु महाभारते गणितोऽस्तीति ततो निश्चेयम् । अस्मदादय इति पाठस्तु प्राक्तनो न भाति श्रीनारदस्य विरक्तशिरोमणित्वेन दैत्याग्रे गानासंभवात् । पांडवेति । यथा पांडुं तत्र पितरं सर्वे देवादयोऽतिवधर्मशीलत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा ॥ १९ ॥ अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही ॥
तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥ १६ ॥ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥१७॥
शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः ॥ दधार लोकपालानामेक एव पृथग्गुणान् ॥ १८ ॥ स इत्थं निर्जितककुबेकराड्विषयान्प्रियान् ॥
यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः ॥ १९ ॥ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ॥ कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥
तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः ॥ अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥ २१ ॥ तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ॥
यद्गत्वा न निवर्तंते शांताः संन्यासिनोऽमलाः ॥ २२ ॥ इति ते संयतात्मानः समाहितधियोऽमलाः ॥ उदतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥
॥ २३ ॥ तेषामाविरभूद्वाणी अरूपा मेघनिःस्वना ॥ सन्नादयंती ककुभः साधूनामभयंकरी ॥२४॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ॥
मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥

रमाह । जगुरिति ॥ १४ ॥ १५ ॥ १६ ॥ तत्पत्न्यो नद्यः ऊहुर्वहंति स्म । रत्नाकरानेवाह । क्षारेति ॥ १७ ॥ आक्रीडं क्रीडास्थानम् । द्रुमाः सर्वेषु ऋतुषु गुणान्पुष्पफलादीन् । स च लोकपालानां पृथग्विधान्गुणान्वर्षणदहनशोषणादीनेक एव दधार ॥ १८ ॥ निर्जिताः ककुभो येन । यथोपजोषं यथाप्रीति ॥ १९ ॥ महान्कालः एकसप्ततियुगानि किंचिदधिकानि ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अरूपा वक्तृरहिता ॥ २४ ॥ मम दर्शनं श्रवणं सर्वेषां

त्प्रशशंसुस्तथैनं क्रूरत्वाद्भिया तुष्टुवुर्न तु प्रीत्येति भावः ॥ १४ ॥ वर्णाश्रमिभिर्ब्राह्मणादिभिर्ब्रह्मचार्यादिभिश्च । हविर्भागानिंद्रादिदेययज्ञभागान् ॥ १९ ॥ अकृष्टपच्येति । तस्य वेनस्यधर्मिष्ठत्वेऽपि तस्य राज्ये महीप्रभृतयोऽकृष्टपच्यादिगुणयुक्ता यद्बभूवुस्तदतिभयादेवान्यथा मद्यादीनां तत्कर्तृको वधः सद्य एव संभवेत् । वेनस्तु न तादृक्प्रभावोऽभूयं भृग्वादय एव भस्मी चक्रुरयं तु भृग्वादीनां तेजः प्रथममेव जहारेति विवेचनीयम् । अकृष्टपच्या सीराद्युल्लेखनं विनैव सस्यपरिपाकोपेता । द्यौः स्वर्लोकः यथेच्छभोगदोभूत् । नभोंतरिक्षं बह्वद्भुतप्रदमासीद्वं यद्वैनगरादिगमनागमनादिना ॥ १६ ॥ रत्नाकराः समुद्राः 'रत्नाकरो जलनिधिः' इत्यमरः । रत्नौघान् मुक्ताहीरकादिरत्नसमूहान् । तत्पत्न्यस्तेषां रत्नाकरादीनां पत्न्यो नद्यः कावेर्याद्या अपि स्वतरंगैः समुद्रांतर्गतरत्नौघानूहुः प्रापयामासुः । समुद्रान्नामतो निर्दिशति—क्षारो लवणम् ॥ १७ ॥ "द्रोणी पर्वतकंदरे तथा काष्ठांबुवाहिन्यां गवादिन्यां च नीवृति" इति धरणिः । वाक्यद्वयेऽपि वचनव्यत्ययेन दधुरिति संबध्यते ॥ १८ ॥ १९ ॥ महान्कालः एकसप्ततियुगानि किंचिदधिकानि तदुक्तम् । "हिरण्यकशिपोर्भीत्या प्रपलाय्य शचीपतिः । स्वर्गराज्यात्परिभ्रष्टो युगानामेकसप्ततिम्" इति वैष्णवादिषु हिरण्यकशिपुभयेन पलायितस्येंद्रस्यैकसप्ततियुगपर्यंतं राज्यभ्रंशोक्तेश्चाक्षुषारंभप्रवृत्तराज्यस्य वैवस्वतारंभे हननात्किंचिदधिकानीत्युक्तम् ॥२०॥ उग्रदंडेन संविग्ना भीताः । अन्यत्र हरेरन्यो न लब्धं शरणं रक्षिता यैस्ते तथा । अत्र प्रथमार्थे त्रल् । शरणं रक्षितारम् 'शरणं गृहरक्षित्रोः' इत्यमरः ॥२१ ॥ यद्यं हरिं गत्वा प्राप्य । 'दिशस्तु ककुभ काष्ठाः' इत्यमरः । अत्र विश्वनाथः—यत्र दिशि हरिरस्तीति सर्वदेशस्यासुरतेजोग्रस्तत्वाद्वयं कचित्पुण्यतीर्थे गत्वा तं स्तुमहे इति भावः । यद्वा—तस्मै उत्कर्षाय नमः । यस्मिन्नुत्कर्षे हरिरिति अन्ये सर्वोत्कर्षो अनेनासुरेण जिता इति भावः । 'सर्वसत्त्वपतीज्जित्वा' इत्युक्तेः । 'काष्ठोत्कर्षे स्थितौ दिशि' इत्यमरः ॥ २२ ॥ २३ ॥ अरूपा अशरीरिणी ॥ २४ ॥ विबुधश्रेष्ठा इति । बुधानामपि स्वबुद्धिबलेन भयनिवर्तनसमर्थत्वाद्भयं न भवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च ॥ तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत ॥ २६ ॥ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ॥ धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥ निर्वैराय प्रशांताय स्वसुताय महात्मने ॥ प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २८ ॥ नारद उवाच ॥ इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ॥ न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतम् ॥ २९ ॥ तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ॥ प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥ ब्रह्मण्यः शीलसंपन्नः सत्यसंधो जितेंद्रियः ॥ आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ॥ ॥ ३१ ॥ दासवत्संनतार्यांघ्रिः पितृवद्दीनवत्सलः ॥ भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ॥ विद्यार्थरूपजन्माढ्यो मानस्तंभविवर्जितः॥३२॥ नोद्विग्नचित्तो व्यसनेषु निःस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ॥ दांतेंद्रियप्राणशरीरधीः सदा प्रशांतकामो रहितासुरोऽसुरः ॥ ३३ ॥

श्रेयसामुपपत्तये भवति ॥ २५ ॥ ॥ २६ ॥ २७ ॥ ननु देवादिविद्वेषेऽप्यस्य विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात्तत्राह । निर्वैरायेति । सर्वमहं सहे न मद्भक्तद्रोहमिति भावः ॥ २८ ॥ असुरं च हतं मेनिरे । तदानीं तद्द्वेषे प्रवृत्तत्वादिति भावः ॥ २९ ॥ तमेव द्वेषं वक्तुमादौ सुतस्य महत्त्वमाह । तस्येति । गुणैर्महानभूत् । गुणानेवाह महदुपासक इत्यादिना ॥ ३० ॥ सत्या संधा प्रतिज्ञा यस्य । एक एव प्रियश्च सुहृत्तमश्च ॥ ३१ ॥ दासवत्सम्यङ् नता आर्याणामंघ्रयो येन । गुरुषु ईश्वर इति भावना यस्य ॥ ३२ ॥ व्यसनेषु प्राप्तेष्वपि नोद्विग्नचित्तः । दृष्टेषु श्रुतेषु गुणेषु विषयेषु निस्पृहः । यतस्तेष्ववस्तुदृक् दांता इंद्रि

किं विशिष्टबुधानां किंतरां तेष्वपि श्रेष्ठानामिति भावः । मद्दर्शनं श्रवणद्वाराऽपि मदनुभवः अरूपवाण्या दर्शनासंभवाद्दर्शनपदार्थोऽत्र श्रवणमेव । श्रेयोपपत्तयेऽत्र संधिरार्षः । ''सर्वे सांता अदंताः स्युस्ते पुंसि शंढके क्वचित्'' इति द्विरूपकोशाद्वा युक्तः संधिः । यद्वा—मद्दर्शनं मद्विषयं ज्ञानम् 'हरिस्मृतिः सर्वविपद्विमोक्षणम्' इति न्यायात् । ''दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु । शास्त्रदर्पणयोः'' इति मेदिनी । विश्वनाथस्तु—स्तंभान्मद्दर्शनं यावदेव न भवति तावदेव युष्माकं भयमिति भाव इत्याह ॥२५॥ दौरात्म्यं दौर्जन्यम् । दैतेयापसदस्य दैत्याधमस्य । ''नीचे साम्याधमे प्रोक्तोपसदो निर्गते सदः'' इत्यभिधानात् । ''शांतिः स्त्री मंगले चांते शमे कल्याणबंधने'' इति धरणिः ॥ २६ ॥ यद्वा यस्य देवादिषु द्वेषः स्यात्तदा स वै प्रसिद्धम् । आशु झटिति नश्यतीत्यर्थः ॥ २७ ॥ अत्राक्षिपति—नन्विति । इति भाव इति । भक्तान्तःकरणस्य मदावासत्वेन तद्दुःखेऽहमेव दुःखी स्यामतो भक्तद्रोहस्य मद्द्रोहत्वात्स्वद्रोहिणं सर्व एव नाशयंतीत्याशयः अमृतत्वादाश्चर्यप्रभावमपि संप्रति वरोर्जितमपि स्वयमेव हनिष्यामि किन्त्वहमपि तत्प्रभावलोपकाच्छिद्रविशेषं प्रतीक्ष्यमाणोस्मीत्याह—निर्वैरायेति संदर्भः ॥ २८ ॥ इति भाव इति । इतः पूर्वं दैत्ये भगवत्कर्तृको द्वेषः सामान्यत आसीद्देवप्रार्थनया तु विशेषेण प्रवृत्तोभूत्ततश्च तन्मरणनिश्चयोऽभूदित्याशयः ॥ २९ ॥ ३० ॥ 'संधा स्थितिप्रतिज्ञयोः' इति मेदिनी ॥ ३१ ॥ गुरुष्विति बहुत्वं गौरवेणैव । गुरौ श्रीभगवन्मंत्रोपदेष्टरीत्यर्थः । विद्याश्चतुर्दशैवार्थो धनमात्रं प्रशस्ते रूपजन्मनी तैराढ्यः ॥ ३२ ॥ व्यसनेषु विपत्तिषु नोद्विग्नचित्तोऽनाकुलः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्महद्गुणा राजन् गृह्यंते कविभिर्मुहुः ॥ न तेऽधुनापि धीयंते यथा भगवतीश्वरे ॥३४॥ यं साधुगाथासदसि रिपवोऽपि सुरा नृप ॥ प्रतिमानं प्रकुर्वंति किमुतान्ये भवादृशाः ॥ ३५ ॥ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते ॥ वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६ ॥ न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ॥ कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ ३७ ॥ आसीनः पर्यटन्नश्नञ्छयानः प्रपिबन्ब्रुवन् ॥ नानुसंधत्त एतानि गोविंदपरिरंभितः ॥ ३८ ॥

यादयो यस्य । रहित आसुरो भावो मत्सरादिर्यस्य सः । असुरोऽपि सन् प्रशांतकामः॥३३॥ अधुनाऽपि ते गुणा नापिधीयंते तिरोहिता न भवंति॥३४॥ साधुगाथासदसि साधुकथाप्रसंगवत्यां सभायां यं प्रह्लादम् । प्रतिमानं दृष्टांतम् । रिपवोऽपि सुराः कुर्वंति किं वक्तव्यं भवादृशा विष्णुभक्ताः ॥३५॥ सूच्यते मया केवलं द्योत्यते सुष्ठु कथ्यत इति वा॥३६॥नैसर्गिकरतेर्लिंगान्याह । न्यस्तक्रीडनक इति षड्भिः । तन्मनस्तया सदेकचित्तत्वेन॥३७॥एतान्यासनादीनि । गोविंदेन परिरंभित आत्मना एकीकृतः ॥३८॥

दृष्टश्रुतेष्वैहिकामुष्मिकेषु ॥ ३३ ॥ महतो भगवतो गुणा गांभीर्यादयोऽप्राकृताः स्वभावेनैव स्थिताः कविभिर्विवेकिभिर्गृह्यंते एते गुणा जीवनिष्ठा न भवंति किं तु भागवता एवैते शुद्धैर्मनआदींद्रियैर्विषयी क्रियंत इत्यर्थः । गुणानां नित्यत्वमाह—ते गुणा अधुनाप्येतत्कालपर्यंतमपि नापिधीयंते कालकर्मादिभिर्नाच्छाद्यन्ते एतावत्सु कालेषु गतेष्वपि प्रह्लादस्तादृग्गुणविशिष्ट एव भूतले तथा वैकुंठे महावैकुंठे च विराजत एवेति भावः ॥ ३४ ॥ नृपेति । म्रियंते विक्षिप्यंते पुरुषा एभिरिति नरश्चौरादयः सिंहादयश्च तेभ्यः पाति जनानिति नृपः । यद्वा—नरः कामादयस्तेभ्यः पात्यात्मानमिति नृपोऽतस्त्वमपि तादृशो हरिभक्त एवात्मानं शोच इति भावः । दृष्टांतं प्रह्लादतुल्योऽयं भक्त इत्येवं वदंतीत्यर्थः । साधुगाथा सदसि देवासुरमनुष्याणां मध्ये कः साधुरिति प्रसंगवत्यां सभायाम् ॥ ३५ ॥ असंख्येयैः संख्यातुमशक्यैरेव गुणैस्तस्यालं कः खलूत्कर्ष इत्यर्थः । अन्ये पुरुषा गुणैरुत्कर्ष्यंतां नाम न तु प्रह्लादस्तस्य तूत्कर्षहेतुरन्यद्वस्त्वन्तरं वर्तत इति भावः । तदेव किं तत्राह—माहात्म्यं सूच्यते सुष्ठूच्यते किन्तत् वासुदेवे इत्यादि । यद्वा—तस्य माहात्म्यं सूच्यते तदभिधातुमक्यत्वाद्व्यज्यते मात्रं 'कृष्णग्रहगृहीतात्मा' इत्याद्युत्तरग्रंथे ग्रहादिशब्देनेति भावः । तस्य कीदृशस्येत्यपेक्षायामाह—वासुदेव इति । नृसिंहाकार इति केचित् । प्रह्लादस्तुत्यनंतरम् "आविर्बभूव भगवान्पीतांबरधरो हरिः" इति वैष्णवोक्तेः । 'कृष्णग्रहगृहीतात्मा' । इति 'गोविंदपरिरंभितः' इत्यग्रिमोक्तेश्च वासुदेवे वसुदेवनंदनाकारे इत्यन्ये । प्रह्लादस्य पूर्वोत्तरदशयोः क्रमेण वासुदेवनृसिंहनिष्ठत्वमित्यपरे । नैसर्गिकी न त्वन्येषामिव पूर्वजन्मकृतैः साधनैः सिद्धेत्यर्थः । स्वामिचरणैः द्योत्यते इति 'सूच—पैशुन्ये' इत्यस्य प्रयोगाभिप्रायेणोक्तं तत्र सूचनेन कथनासामर्थ्यप्रतीतेराह—सुष्ठ्विति । संदर्भस्तु—असंख्येयैरेवालमत्यर्थं तस्य माहात्म्यं संसूच्यते वक्तुं शक्यत इत्यर्थमाह ॥ ३६ ॥ बालोऽपि त्यक्तबाल्यलीलः । तन्मनस्तया कृष्णैकाग्रमनस्कत्वेन जड इवान्यैर्लक्ष्यमाणो न चान्यभक्तैरिव तेन स्वमनः कृष्णविषयकं कृतं किन्तु कश्चिद् ग्रहो लोभ्यं द्रव्यमिव कृष्ण एव यन्मनो गृहीतवानित्याह—कृष्णेति । अत एव जगदीदृशं व्यवहारमयं न वेद किन्तु कृष्णमयमेवेत्यर्थः । अत्र संदर्भः—तन्मनस्तया कृष्णमनस्तया न्यस्तक्रीडनकः तदनंतरं तथैव जडवत्तत्तुल्यः ततः पश्चात्कृष्णग्रहगृहीतात्मा ग्रहेणेव कृष्णेनाविष्टः सन् जगदीदृशं न वेद न ददर्श । यथा लोकाः पश्यंति किन्तु तत्स्फूर्तिकरत्वेनैव ददर्शेत्यर्थः ॥ ३७ ॥ एतानि आसनवर्त्मभक्ष्यशयनीयपेयवक्तव्यानि नानुसंधत्ते न जानाति कुतः गोविंदेन परिरंभितः अतिवत्सलेन पित्रा मात्रा वा एकाब्दिको बालो यथा प्रतिक्षणमेव परिरभ्य क्रोडस्थी क्रियते तथैव प्रह्लादो भोजनशयनादिसमयेऽपि भगवताऽऽलिंग्यत इति प्रह्लाद एव पश्यति नान्य इति भावः॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिद्रुदति वैकुंठचिंताशबलचेतनः ॥ क्वचिद्धसति तच्चिंताह्लाद उद्गायति क्वचित् ॥ ३९ ॥ नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित ॥ क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥ ४० ॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः ॥ अस्पंदप्रणयानंदसलिलामीलितेक्षणः ॥ ४१ ॥ स उत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया॥तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनान्यमनः शमं व्यधात्॥४२॥तस्मिन्महाभागवते महामाये महात्मनि ॥ हिरण्यकशिपू राजन्नकरोदघमात्मजे॥४३॥ युधिष्ठिर उवाच ॥ देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ॥ यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ॥ ४४ ॥ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः ॥ उपालभंते शिक्षार्थं नैवाघमपरो यथा ॥ ४५ ॥

रुदति रोदिति रौति । वैकुंठस्य चिंतया शबला व्यामिश्रा क्षुभिता चेतना यस्य तस्य चिंतयाऽऽह्लादो यस्य ॥ ३९ ॥ क्वचिदुत्कण्ठो मुक्तकण्ठः सन् । अनुचकार तच्चेष्टादिकं स्वयं कृतवान् ॥ ४० ॥ संस्पर्शस्तद्भावापत्तिस्तेन निर्वृतः । अस्पंदः स्थिरो यः प्रणयस्तेन य आनंदस्तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्निमीलिते ईक्षणे यस्य सः ॥ ४१ ॥ आत्मनः परां निर्वृतिं तन्वन्दुःसंगेन दीनस्यान्यस्यापि मनः शमं शांतं व्यधात् ॥४२॥ अघं द्रोहमकरोत ॥४३ ॥ प्रथमाध्यायांते पृष्टमेवार्थमिति विस्मयेन पुनः पृच्छति । देवर्ष इति । तव त्वत्तस्तव वाक्यमिति वा साधवेऽघमदात साधोर्द्रोहं कृतवानिति यदेतद्वेदितुं ज्ञातुमिच्छामः ॥ ४४ ॥ उपालभंते आक्षिपंति ।

ततश्च क्वचिदिति । स्वबालकं स्वक्रोडस्थलाद्भूमौ निधाय गृहकृत्यार्थमन्यत्र गतायां मातरि स बालो यथा रोदिति तथैव मामधुनैव परित्यज्य मत्प्रभुः क्व गत इति तच्चिंतया शबला व्यामिश्रा विह्वला चेतना बुद्धिर्यस्य सः रुदति रोदिति । क्वचिच्च हसतीति तदेव पुनः स्फूर्त्तिप्राप्तेन भगवता भोः प्रह्लाद वत्स क्षणमात्रं मामनालोक्य कथमेवं रोदिषीत्युक्ते सति हसति । चिरात्प्राप्तामालिंगंतीं मातरमवलोक्य मुग्धबाल इवेत्यर्थः । तच्चिन्तेति । मत्प्रभुर्मामेव कृपया स्वदर्शनदानेन सुखयतीति चिंतयाऽऽह्लादो यस्य स तथा ॥ ३९ ॥ नदतीति । स्फूर्तिप्राप्तं हरिमतिदूरे दृष्ट्वोत्कंठमुच्चैःकृतकंठं भो प्रह्लाद वत्स त्वामनालोक्याहं नैव निर्वृणोमि यतस्त्वमेव ममाति प्रिय इत्युक्तः सन् । आनन्दातिशयेन विक्षिप्त एव विलज्जो नृत्यति तदैव स्फूर्तिभंगे सति तद्विरहखेदाधिक्येन तद्भावनातिशययुक्त उन्मादसंचारिप्राबल्येनाहमेव हरिरिति तन्मयः सन् तल्लीलां रामकृष्णाद्यवतारगतामप्यनुचकार रावणकंसादिवधादिरूपामनुकृतवानित्यर्थः ॥ ४० ॥ क्वचिदुत्पुलक इति । क्व यामि कुत्र प्रभुं प्राप्स्यामीति तद्विच्छेददुःखेन मुद्रितनेत्रोऽकस्मात्स्वहृदये एव तमालोक्य तत्पाणिस्पर्शेन निर्वृत उत्पुलकः न विद्यते स्पंदनो यस्य सः ॥ ४१ ॥ ननु तस्य हिरण्यकशिपुप्रभृतिदुःसंगवत्त्वे कथं स्थिरा भक्तिस्तत्र प्रह्लादस्य तस्य संगेनान्येऽपि दुःसंगिनस्तत्सहचरबालाः कृतार्था बभूवुः कथं तस्यैव दुःसंगशंकेत्याह—स इति । दुःसंगदीनस्यान्यस्यापि मनः शमम् ' शमो मन्निष्ठताबुद्धेः ' इति भगवद्वचनाद्भगवन्निष्ठमकरोत् ॥ ४२ ॥ महाभागवतत्वं तु दर्शितमेव महान्भागो भाग्यं नारदकृपारूपं यस्य तस्मिन् । महान्पूज्य आत्मा धैर्यगांभीर्यादियुक्तः स्वभावो यस्य तस्मिन् । राजन्निति । ' राजानः प्रायशो भुवि ' इति न्यायेन राजस्वभावं त्वं जानास्येवेति भावः ॥ ४३ ॥ देवर्षे इति । देवा अपि सर्वज्ञा भवंति तेष्वपि भवानृषिरतः सर्वथा सर्वज्ञोऽस्यत एव मां प्रति ब्रूहीति भावः । सुव्रतेति । कामक्रोधादिपरित्यागेन केवलं परोपकाररूपं व्रतं दधासीति भावः ॥ ४४ ॥ विप्रतिकूलान् विशेषेण प्रतिकूलाननुगतान् ॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् ॥ एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ॥ पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे हिरण्यकशिपुदिग्विजयप्रह्लादसाधुभाववर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ नारद उवाच ॥ पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः ॥ शंडामर्कौ सुतौ तस्य दैत्यराजगृहांतिके ॥ १ ॥ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ॥ पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥ यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुपपाठ च ॥ न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ॥ ३ ॥ एकदाऽसुरराट् पुत्रमंकमारोप्य पांडव ॥ पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥ प्रह्लाद उवाच ॥ तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ॥ हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥

अघं तु नैव कुर्वंति । अपरः शत्रुरिव ॥ ४५ ॥ अनुवशाननुकूलान् साधूनरागरोषान् । गुरुः पितैव देवता येषां तानुद्दिश्याघं न कुर्वंतीति किमु वक्तव्यमित्यर्थः । पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पित्रा कृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यदेतत्कौतूहलं विधमापाकुरु । यद्वा यद्यस्मात्पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितोऽत एतत्कौतूहलं विधमेत्यर्थः ॥ ४६ ॥ इति सप्तमस्कं० टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतम् । घातयन्द्विपसर्पाद्यैः सुतं दैत्यो न चाशकत् ॥ १ ॥ भगवद्भक्तिरेव विद्वेषे कारणमिति वक्तुमाह । पौरोहित्यायेत्यादिना । काव्यः शुक्रः । अतस्तस्य सुतौ दैत्यराजगृहांतिके न्यवसतामिति शेषः ॥ १ ॥ पाठ्यान्दंडनीत्यादीन् । पाठ्यानसुरबालकानिति वाऽन्वयः ॥ २ ॥ अनु श्रवणानंतरं तथैव पपाठ च किं तु तत्साधु न मेने । तत्र हेतुः । स्वः पर इत्यसद्ग्रहो मिथ्याभिनिवेश एवाश्रयो यस्य तत् ॥ ३ ॥ ४ ॥ हे असुरवर्य असद्ग्रहादहंममेति मिथ्याऽभिनिवेशाद्धेतोः सम्यगुद्विग्ना विषण्णा धीर्येषां ते । वनं गतः सन्हरिमाश्रयेतेति यत्त

इत्यर्थ इति । अनुकूलात्मजा हि सर्वथैवाद्रोह्या इति भावः । पुत्रस्य मरणाभावदृष्टेराह—यद्वेति । इत्यर्थ इति । न हि पितापुत्रयोर्मरणाभिप्रायको द्वेष उचित इति भावः ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे चतुर्थोऽध्यायः ॥४॥ न चाशकत् घातितुमिति शेषः(१)अतः पौरोहित्यहेतोः । शंडश्च मर्कश्च शंडामर्कावत्र दीर्घश्छांदसः । शंडो मर्क इति वेदे श्रवणात् । तस्य शुक्रस्य॥१॥ नयकोविदं विधातुमिति शेषः । भगवन्मार्गे कोविदं नयत्युत्कर्षमिति नयो भक्तिमार्ग एव 'उत्कर्षं नयनान्नयः' इत्युक्तेः । संभवत्वात्पाद्यानित्युभयार्थमाह ॥ २ ॥ यद्दण्डनीत्यादिकम् । तत्र पाठनावसरे । तत्रासाधुमनने ॥ ३ ॥ हे पांडवेति । पांडुर्यथा भवंतमंकमारोप्यापृच्छदिति भावः । कठिनपदार्थानां प्रश्ने बालस्यास्य स्तोभो भविष्यतीति मत्वा प्राह—यद्भवान् पठितानां मध्ये साधु अभ्यस्तीकृतं मन्यसे जानासि मदग्रे यद्वक्तुं शक्नोति तदेव वदत्विति हिरण्यकशिपोरभिप्रायः ॥ ४ ॥ प्रह्लादस्तु तदभिप्रायं ज्ञात्वापि जगत्यस्मिञ्जिज्ञास्यानां मध्ये भवान् किं वस्तु साधु मन्यते इति बुद्ध्या विचार्य स्वसंमतीकरोतीमं पृच्छसि चेदस्य समुचितमुत्तरं शृण्वित्याह—तदिति । अत्र यद्धरिमाश्रयेत तदेव हरिचरणाश्रयणं साधु मन्ये । गृहे स्थितोऽपि स एव गृहमंधकूपं हित्वा वनं गतः अन्यथा वनं गतोऽपि गृहमंधकूपमेव श्रित इति च व्याचक्षते । हे असुरवर्येति । इत्थं कृते भवानप्यसुरवर्यो भविष्यत्यन्यथाऽसुरैरपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः ॥ जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः॥६॥ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः ॥ विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥७॥ गृहमानीतमाहूय प्रह्रादं दैत्ययाजकाः ॥ प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ॥ ॥ ८ ॥ वत्स प्रह्राद भद्रं ते सत्यं कथय मा मृषा ॥ बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९ ॥ बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् ॥ भण्यतां श्रोतुकामानां गुरूणां कुलनंदन ॥ १० ॥ प्रह्राद उवाच ॥ स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः ॥ विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ ११ ॥ स यदानुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ॥ अन्य एष तथाऽन्योऽहमिति भेदंगताऽसती ॥ १२ ॥

देवाहं साधु मन्ये । कथंभूतं गृहम् । आत्मपातमात्मनोऽधःपातनिमित्तम् । कुतः । अंधकूपवन्मोहावहम् ॥ ५ ॥ परपक्षे विष्णौ समाहिताः परिनिष्ठिताः । हासे हेतुः । बुद्धिरिति ॥ ६ ॥ विष्णुपक्षैर्भागवतैर्हेतुभूतैः । ननु त्वद्गृहे कुतस्तेषां प्रवेशः । सत्यम् । तथापि प्रतिच्छन्नैर्वेषांतरेण छन्नैः ॥ ७ ॥ दैत्यैर्गृहमानीतम् ॥ ८ ॥ बालान्सर्वानति अतिक्रम्य । तुभ्यं तव ॥ ९ ॥ १० ॥ अहो मायामोहिता भवंतो मामाक्षिपंतीत्याशयेन तावदाह । स्वः परश्चेति । मिथ्याभिनिवेशो यदीयया माययैव कृतो न तु वास्तवः अत एव तदीयया मायया विमोहितबुद्धीनां भवतामेव दृष्टो न तु मम । तस्मै अचिंत्यमायेश्वराय नमः ॥ ११ ॥ अहो किमेतत्प्रलपसि तव बुद्धिभेदो यतो जातस्तं कथयेत्याक्षिप्तः संस्तत्प्रसादादेवेत्युत्तरमाह । स इति त्रिभिः । स भगवान्यदाऽनुव्रतोऽनुकूलो भवति तदा पशूनामविवेकिनामिव बुद्धिर्भेदगताऽसती

निंद्यो भविष्यतीति भावः ॥ ५ ॥ परपक्षे शत्रुपक्षे । बालोऽयं यो यद्धारयति तदेव धत्तेऽस्य को दोषस्तदद्यारभ्य नारदाद्या वैष्णवा नात्र प्रवेशनीया इत्यादिदेशेति भावः ॥ ६ ॥ अत्राक्षिपति–नन्विति । विधार्यतां रक्ष्यताम् ॥ ७ ॥ प्रशस्य श्लक्ष्णयेति । अन्यथा बालोऽयं भीत्या स्वोपदेशकं वैष्णवं न वक्ष्यतीति भावः ॥ ८ ॥ भद्रं त इति । त्वदिष्टं मोदकादिकं दास्याम इति भावः । हे वत्सेति । प्रियत्वाभिप्रायेणोक्तम् ॥ ९ ॥ भण्यतामिति । यद्ययं कस्यचिद्वैष्णवस्य नाम गृह्णाति तदा तं वैष्णवं ज्ञात्वा राज्ञः सभां नीत्वा घातयाम इति भावः । कुलनंदनेति । "कुलं पवित्रं जननी कृतार्था येषां कुले वैष्णवसंततिः स्यात्" इत्युक्तेः । 'हतं कुलमवैष्णवम्' इति पाद्मोक्तेश्च । स्वयं भगवान्नृसिंहदेवोऽपि वक्ष्यति "यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः" इति वास्तवोभिप्रायः ॥ १० ॥ अहो अमी मूढा इत्थं संसारे पापच्यमाना मां मूढबालकं जानंतीति मनसि विभाव्याह–परः परपक्षः स्वः स्वपक्ष इति असद्ग्राहः असदाग्रहः श्लेषेण पुंसां संसारसिंधुपतितानां ग्राहो हिंस्रजलजंतुविशेषः कृतः । मायया सृष्टः दृष्टः पूर्वमनुमित एवासीत्संप्रति तु प्रत्यक्षीकृत इत्यर्थः । अहो प्रतिक्षणं यूयं चर्वथैवेति भावः ॥ ११ ॥ बुद्धिभेदोऽयं तव कुत इत्यस्योत्तरमाह–विभिद्यते विशेषेण भिद्यते विदीर्य्यते । पशुबुद्धिरेव का तत्राह–अन्य एषोऽस्मद्विपक्षस्तथान्योऽहमेतस्य घातयितेति भेदं गताऽसती असाध्वी । "न हि गोप्यं हि साधूनाममित्रोदास्तविद्विषाम्" इति भगवदुक्तेः । वस्तुतस्त्वात्मदृष्टया सर्वजीवानामैकरूप्याद्देहदृष्ट्यापि सर्वदेहानां पञ्चभूतात्मकत्वाद्भेदो नास्त्येवेति भावः । संदर्भस्तु–यदेति । कथंचिन्महतः प्रसंगेन तत्सांमुख्ये सति यदा स हरिरनुकूलः स्यात्तदा पूर्वोक्ता पशुबुद्धिर्विभिद्यते नश्यति तां विवृत्य दर्शयति–अन्य इति । अन्योसावन्योहमस्मीति "न स वेद यथा पशुः" इति श्रुतेः । अर्थकामशास्त्रानुसारिणां भक्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ॥ मुह्यंति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥ १३ ॥ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ॥ तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥१४॥ नारद उवाच ॥ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ॥ तं निर्भर्त्स्याथ कुपितः स दीनो राजसेवकः ॥ १५ ॥ आनीयतामरे वेत्रमस्माकमयशस्करः ॥ कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥ १६ ॥ दैतेयचंदनवने जातोऽयं कंटकद्रुमः ॥ यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥ इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ॥ प्रह्रादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥

मिथ्यासंसारविषया विभिद्यतेऽभिन्नात्मनिष्ठा भवति ॥ १२ ॥ भेदस्यासत्त्वं दर्शयन्नाह । स एष परमात्मैव स्वः पर इति चाविवेकिभिर्निरूप्यते । युक्तं चैतत् । यतो यस्य वर्त्मनि जिज्ञासायां ब्रह्मादयोऽपि मुह्यंति । तत्र हेतुः । दुरत्ययं दुर्घटमनुक्रमणमनुचरितमनुवर्णनं वा यस्य ॥ १३ ॥ ननु निर्विकारस्य कथं मतिभेदकत्वं तत्राह । यथेति । यथाऽयो लोहमाकर्षस्यायस्कांतस्य समीपे स्वयमेव भ्रमति तथा मे चेतश्चक्रपाणेः सन्निधौ । तव कुतो जातस्तत्सन्निधिस्तत्राह । यदृच्छयेति । कस्य तपोदानादेः फलमेतदिति न ज्ञायत इत्यर्थः ॥ १४ ॥ राजसेवक उवाचेति शेषः ॥ १५ ॥ अरे वेत्रं कशाऽऽनीयताम् । सामदानभेददंडानां मध्ये चतुर्थो दमो दंडोऽस्य दुर्बुद्धेरुदित उक्तः शास्त्रेषु । दुर्बुद्धित्वे हेतुः । कुलांगारस्य कुलस्यांगारवन्नाशहेतोः ॥ १६ ॥ तत्कुतस्तत्राह । दैतेया एव चंदनद्रुमास्तेषां वनेऽयं कंटकद्रुमतुल्यो जातस्तदेवाह । यस्य दैतेयचंदनवनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितो नालमिवाचरत् । यथा परशोश्छेदकत्वे बब्बूलादिद्रुमनिर्मितो दंडः सहकारी तं विना छेदनासंभवात्तथाऽयं विष्णोर्दैत्यमूलोच्छेदे हेतुर्जात इत्यर्थः ॥ १७ ॥ इति तं प्रह्रादं भीषयन्धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास ॥ १८ ॥

ननुगतानां नश्वरे संघाते एवात्मतामननादिति भावः ॥१२॥ तत्र मोहे । विश्वनाथः—उक्तलक्षणपशुबुद्धिमतां सुदुर्ज्ञेय इत्याह—स इति । एष परमात्मा स्वः स्वपक्षः परो विपक्ष इति कुत्सिता बुद्धिर्येषां तैर्दुरन्वयं दुर्गमम् । अनुक्रमणमनुसरणं यस्य सः । न च सुबुद्धिभिः शास्त्रज्ञैः सुगममेव तदनुसरणमिति वाच्यमित्याह—यद्वर्त्मनि यत्प्राप्तिमार्गेऽनुसरणरूपे भक्तियोगे वेदवादिनोऽपि वेदार्थतात्पर्यविवेचका अपि मुह्यंति यूयं ज्ञानलवदुर्विदग्धाः किमुतेति भावः । एष भगवान्मे मतिं भिनत्ति युष्मन्मातिभ्यः सकाशान्मम मतिं भिन्नां करोति ॥ १३ ॥ इत्यर्थ इति । अहो मे भाग्यमिति भावः । किञ्च स एव मतेर्भेदः किमाकार इति चेत्तत्राह—यथाय इति । अयस्कांतश्चुंबकमणिः । भिद्यते युष्मच्चेतोभ्यः सकाशाद्भिन्नं भवति । यदृच्छयेति । नात्र सत्कर्मतपोदानादेर्हेतुत्वं संभवतीत्यर्थः । अयमर्थः—अयस्कांतेन स्वशक्त्यैव लोहमाकृष्य संयुक्ती क्रियते तत्र किमपि कारणं प्रयोजनं नास्तीत्ययस्कांतस्य स स्वभाव एव यथा तथैव चक्रपाणेरपि स्वभाव एवायं यत्कृपापरवशतया स्वभक्तस्य चेतसः स्वस्मिन्नाकर्षणमिति तत्र किं मम स्वातंत्र्यमस्तीति भावः । 'यदृच्छा स्वैरिता' इत्यमरः ॥ १४ ॥ १५ ॥ १६ ॥ तत् नाशहेतुत्वम् । कुत इति । ''नालो दंडे पद्मदंडे कमले नलसंहतौ'' इत्यभिधानात् । इत्यर्थ इति । न हि गृहभेदं विना कश्चित्पराजीयत इति भावः ॥ १७ ॥ आदिना ताडनादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ॥ दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतम् ॥ १९ ॥ पादयोः पतितं बालं प्रतिनंद्याशिषासुरः ॥ परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥ आरोप्यांकमवघ्राय मूर्धन्यश्रुकलांबुभिः ॥ आसिंचन् विकसद्वक्त्रमिदमाह युधिष्ठिर ॥ २१ ॥ हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमम् ॥ कालेनैतावतायुष्मन् यदशिक्षद् गुरोर्भवान् ॥ २२ ॥ प्रह्लाद उवाच ॥ श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥ इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥ क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥ निशम्यैतत् सुतवचो हिरण्यकशिपुस्तदा ॥ गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥

ज्ञातं ज्ञेयमुपायानां चतुष्टयं सामदानादि येन तं दैत्येंद्रं प्रति मात्रा मृष्टमुद्वर्त्य स्नापितमलंकृतं भूषणतिलकादिभिः ॥१९॥२०॥२१॥२२॥ पादसेवनं परिचर्या । अर्चनं पूजा । दास्यं कर्मार्पणम् । सख्यं तद्विश्वासादि । आत्मनिवेदनं स्वशरीरसमर्पणम् । यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिंता न क्रियते तथा देहं तस्मै समर्प्य तच्चिंता वर्जनमित्यर्थः ॥ २३ ॥ इति नवलक्षणानि यस्याः साऽधीतेन चेद्भगवति विष्णौ भक्तिः क्रियते सा चार्पितैव सती यदि क्रियेत न तु कृता सती पश्चादर्प्येत तदुत्तममधीतं

ग्रहः ॥ १८ ॥ ततस्त्रिवर्गाध्यापनानंतरम् ॥ १९ ॥ निर्वृतिं सुखम् ॥ २० ॥ युधिष्ठिरेति । यथा शत्रुजयार्थं युधि स्थिरोभूस्तथा हरिभक्तयशःश्रवणेऽपि स्थिरो भवेति भावः ॥२१॥ प्रकर्षेण ह्लादयति सुखयती त्यन्वर्थ नामतां दर्शयेति भावः । स्वसुतबुद्धिवैभवदर्शनादिना सुखं भवत्येवेति प्रसिद्धेः । तातेत्यायुष्मन्निति चातिप्रियत्वाद्द्विधा संबोधयन्नाह–स्वधीतमिति ॥ २२ ॥ इत्यर्थ इति । स्वदेहस्य तदनुकूलीकरणमिति भावः ॥२३॥ अत्र संदर्भः–श्रवणमिति युग्मकम् । तत्र श्रवणं नाम रूपगुणपरिकरलीलामयशब्दानां श्रोत्रस्पर्शः । एवं कीर्त्तनश्रवणयोरपि क्रमो ज्ञेयः । स्मरणं यत्किञ्चिन्मनसाऽनुसंधानम् । पादसेवनं देशकालाद्युचितपरिचर्या । अर्चनं विष्णुपूजा । वंदनं नमस्कारः । दास्यं तद्दासोऽस्मीत्यभिमानः । सख्यं बंधुभावेन तदीयहिताशंसनम् । आत्मनिवेदनं देहादिशुद्धात्मपर्यंतस्य सर्वतोभावेन तस्मिन्नेवार्पणमिति नव लक्षणानि यस्याः सा भगवति तद्विषयिका अद्धा साक्षाद्रूपा न तु कर्माद्यर्पणरूपपरंपराभक्तिरियं तत्रापि श्रीविष्णावेवार्पिता तदर्थमेवेदमिति भाविता न तु धर्मार्थादिष्वर्पिता एवमेवंभूता चेत्क्रियते तदा तेन कर्त्रा यदधीतं तदुत्तमं मन्य इत्यर्थः । तथा च श्रीगोपालतापिनी श्रुतिः–"भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यम्" इति । अत्र नवलक्षणसमुच्चयोऽनावश्यकः एकेनैवांगेन साध्याव्यभिचारश्रवणात् । तथा हि–"विष्णोस्तु श्रवणे परीक्षिदभवद्वैयासिकिः कीर्त्तने प्रह्लादः स्मरणे तदंघ्रिभजने लक्ष्मीः पृथुः पूजने । अक्रूरस्त्वभिवंदनेऽथ हनुमान्दास्येऽथ सख्येर्जुनः सर्वस्वात्मनिवेदने बलिरभूत्कैवल्यमेषां पदम् ॥ " इति प्रबोधचंद्रोदयटीकायाम् । क्वचिदन्यांगमिश्रणं तु तथापि भिन्नश्रद्धारुचित्वात् । ततो नवलक्षणशब्देन सामान्योक्त्या तन्मात्रानुष्ठानं विधीयत इति ज्ञेयम् । नवलक्षणत्वं चास्या अन्येषामप्यंगानां तदंतर्भावादुक्तम् । किञ्चिचात्र विशिष्य लिख्यते–तदेवं नामादिश्रवणभक्त्यंगक्रमः । तत्र यद्यप्येकतरेणापि व्युत्क्रमेणापि सिद्धिर्भवत्येव तथापि प्रथमं नाम्नः श्रवणमंतःकरणशुद्ध्यर्थमपेक्ष्यं शुद्धे चांतःकरणे रूपश्रवणेन तदुदययोग्यता भवति सम्यगुदिते च रूपे गुणानां स्फुरणं संपद्येत संपन्ने च गुणानां स्फुरणे परिकरवैशिष्ट्येन तद्वैशिष्ट्यं संपद्यते ततस्तेषु नामरूपगुणपरिकरेषु सम्यक्स्फुरितेषु लीलानां स्फुरणं सुष्ठु भवतीत्यभिप्रेत्य साधनक्रमो लिखितः । एवं कीर्त्तनस्मरणयोश्च ज्ञेयम् । इदं च श्रवणं श्रीमहन्मुखरितं मन्माहात्म्यं जातरुचीनां परमसुखदं तच्च द्विविधं महदाविर्भावितं महत्कीर्त्यमानं च । तत्रापि श्रवणे श्रीभागवतश्रवणं परमश्रेष्ठं तस्य तादृशप्रभावमयशब्दात्मकत्वात्परमरसमयत्वाच्च तत्र 'मूर्त्याभिमतयात्मनः' इतिवन्निजाभीष्टनामादिश्रवणं तु मुहुरावर्णयितव्यम् । तत्रापि सवासनमहानुभावमुखात्सर्वस्य श्रीकृष्णनामादिश्रवणं तु परमभाग्यादेव संपद्यते तस्य पूर्णभगवत्त्वादिति । एवं संकीर्त्तनादिष्वप्यनुसंधेयम् । तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्स्वयं संप्रति कीर्त्यते तदपि श्रीशुकदेवादिमहत्कीर्त्तितचरत्वेनानुसंधाय कीर्त्तनीयमिति तदेवं श्रवणं दर्शितं तस्य कीर्त्तनादितः पूर्वत्वं तद्विना तत्तदज्ञानात् । विशेषतश्च यदि साक्षादेव महत्कृतस्य कीर्त्तनस्य श्रवणभाग्यं संपद्यते तदैव स्वयं पृथक्कीर्त्तनीयमिति तत्प्राधान्यात् । एवमेवोक्तम् ' तद्वाग्विसर्गः ' इत्यादौ टीकाकृद्भिः । यत् यानि नामानि वक्तरि सति शृण्वंति श्रोतरि सति गृणंति अन्यदा तु स्वयमेव गायंतीति । अथातः कीर्त्तनं पूर्ववत् पूर्ववन्नामादिक्रमो ज्ञेयः । नामकीर्त्तनं चेदमुच्चैरेव प्रशस्तम् । ' नामान्यनंतस्य हतत्रपः पठन् ' इत्यादौ । अत्र यथोपदिष्टं कलियुगपावनावतारेण श्रीभगवता " तृणादपि सुनीचेन तरोरपि तितिक्षुणा । अमानिना मानदेन कीर्त्तनीयः सदा हरिः " इति । " इयं च कीर्त्तनाख्या भक्तिर्भगवतोद्रव्यजातिगुणक्रिया दीनजनैकविषयाऽपारकरुणामया " इति श्रुतिपुराणादिविश्रुतिः । कलौ तद्दीनत्वं यथा ब्रह्मवैवर्त्ते—" अतः कलौ तपोयोगविद्यायज्ञादिकाः क्रियाः । सांगा भवंति न कृताः कुशलैर्वापि देहिभिः ॥ " इति । अत एव कलौ स्वभावत एवातिदीनेषु लोकेष्वाविर्भूयताननायासेनैव तत्तद्युगगतमहासाधनानां सर्वमेव फलं ददाना सा कृतार्थयति । यत एव कलौ भगवतो विशेषतश्च संतोषो भवति । अत्र कलिप्रसंगेन कीर्त्तनस्य गुणोत्कर्ष इति वक्तव्यं भक्तिमात्रे कालदेशादिनियमस्य निषिद्धत्वात् । तस्मात्सर्वत्रैव युगे श्रीमत्कीर्त्तनस्य समानमेव सामर्थ्यं कलौ तु भगवता कृपया तद्ग्राह्यमित्यपेक्ष्यैव तत्तत्प्रशंसेति स्थितम् । अत एव यद्यन्या भक्तिः कलौ कर्त्तव्या तदा तत्संयोगेनैवेत्युक्तम् । " यज्ञैः संकीर्त्तनप्रायैर्यजंति हि सुमेधसः " इति । अत्र च स्वतंत्रमेव नामकीर्त्तनमत्यंतप्रशस्तम् । " हरेर्नामहरेर्नामहरेर्नामैव केवलम् । कलौनास्त्येवनास्त्येवनास्त्येव गतिरन्यथा ॥ " इत्यादौ । अत्र पाद्मोक्ता दशापराधास्त्याज्याः यथा सनत्कुमारवाक्ये " सर्वापराधकृदपि मुच्यते हरिसंश्रयः । हरेरप्यपराधान्यः कुर्याद्द्विपदपांसनः ॥ नामाश्रयः कदाचित्स्यात्तरत्येव स नामतः । नाम्नोऽपि सर्वसुहृदो ह्यपराधात्पतत्यधः ॥ " अपराधाश्च संक्षिप्य लिख्यंते । यथा सतां निन्दा १ । श्रीविष्णोः सकाशाच्छिवनामादेः स्वातंत्र्यमननम् २ । गुर्ववज्ञा ३ । श्रुतितदनुगतशास्त्रनिंदनम् ४ । हरिनाममाहिम्नि अर्थवादमात्रमिति मननम् ५ । तत्र प्रकारांतरेणार्थकल्पनम् ६ । नामबलेन पापे प्रवृत्तिः ७ । अन्यशुभक्रियाभिर्नामसाम्यमननम् ८ । अश्रद्दधाने विमुखेऽप्यशृण्वति नामोपदेशः ९ । नाममाहात्म्ये श्रुतेऽप्यप्रीतिरिति १० । एतेषामपराधानामनन्यप्रायश्चित्तं चोक्तं तत्रैव " नामापराधयुक्तानां नामान्येव हरंत्यघम् । अविश्रांतप्रयुक्तानि तान्येवार्थकराणि च " इति । सत्स्वपराधे तु तत्संतोषणार्थमेव संततनामकीर्त्तनादिकं समुचितम् । अंबरीषचरितादौ तदेकक्षम्यत्वे नामापराधानां दर्शनात् । उक्तं च नामकौमुद्याम् " महदपराधस्य भोग एव निवर्त्तकस्तदनुग्रहो वा " इति । अत एवोक्तं श्रीशिवं प्रति दक्षेण " योऽसौ मया विदिततत्त्वदृशा सभायाम् " इत्यादि । अस्मिन्कीर्त्तने निजदैन्यनिजाभीष्टविज्ञप्तिस्तवपाठावप्यंतर्भाव्यौ । तथात्र श्रीभागवतस्थितनामादिकीर्त्तनं तु पूर्ववदन्यदीयनामादिकीर्त्तनादाधिकं ज्ञेयम् । अथ कीर्त्तनादिभिः शुद्धांतःकरणश्चेत् 'एतन्निर्विद्यमानानाम्' इत्याद्युक्तत्वान्नामकीर्त्तनापरित्यागेन स्मरणं कुर्यात् । तदेव नामादिसंबंधित्वेन बहुविधं भवति । तच्च पंचविधं यत्किञ्चिदनुसंधानं स्मरणं सर्वतश्चित्तमाकृष्य सामान्याकारे मनोधारणं धारणाविशेषतो रूपादिचिंतनं ध्यानम् । अमृतधारावदवच्छिन्नं तत् ध्रुवानुस्मृतिः ध्येयमात्रस्फुरणं समाधिरिति क्वचिल्लीलादियुक्ते तस्मिन्नन्य। स्फूर्त्तिः समाधिः स्यात् एतद्रूपोदासादिभक्तानां पूर्वं तु प्रायः शांतभक्तानाम् । अथ रुचिः शक्तिश्च चेत्तदपरित्यागेन पादसेवा च कर्त्तव्या सेवा स्मरणसिद्ध्यर्थं सा कैश्चित्क्रियते पादसेवायां पादशब्दो भक्त्यैव निर्दिष्टः ततः सेवायां सादरत्वं विधीयते । अस्य श्रीमूर्त्तिदर्शनस्पर्शनपरिक्रमानुव्रजनभगवन्मंदिरगंगापुरुषोत्तमद्वारकामथुरादितदीयतीर्थस्थानगमनादयोप्यंतर्भाव्याः । तत्परिकरप्रायत्वाद्गंगादीनां परमभागवतत्वपक्षे तु तत्सेवादिकं महत्सेवादावेव पर्यवस्यति । तुलसीसेवा च तस्याश्चैवांतरभाव्या ततो महतामिव गंगादीनां भक्तिनिदानत्वम् । अथार्चनम् । तन्मार्गे श्रद्धा चेदाश्रितमंत्रगुरुस्तं विशेषतः पृच्छेत् यद्यपि श्रीभागवतमते पञ्चरात्रादिवदर्चनं नावश्यकं तद्विनापि श्रवणादीनामेकतरेणापि पुरुषार्थसिद्धेरभिहितत्वात् । अत्र पूर्वोक्तप्रबोधचंद्रोदयटीकापद्यमनुसंधेयम् । तथापि श्रीनारदादिवर्त्मानुसरद्भिः श्रीभगवता सह संबंधविशेषं दीक्षाविधानेन श्रीगुरुचरणसंपादितं चिकीर्षद्भिः कृतायां दीक्षायामर्चनमवश्यं क्रियेतैव । ये तु संपत्तिमंतो गृहस्थास्तेषां त्वर्चनमार्ग एव मुख्यः तदकृत्वा हि निष्किञ्चनवत्केवलं स्मरणादिनिष्ठत्वे वित्तशाठ्यप्रतिपत्तिः स्यात् । परद्वारा संपादनं व्यवहारनिष्ठत्वस्यालसत्वस्य वा प्रतिपादकं ततोऽश्रद्धामयत्वाद्धीनमेव तत् । किञ्च गृहस्थानां परिचर्यामार्गे द्रव्यसाध्यतया तदर्चनमार्गादविशेषेण प्राप्तेऽप्यर्चनमार्गस्य प्राधान्यम् अत्यंतविधिसापेक्षत्वात्तेषाम् । तथा गार्हस्थ्यधर्मस्य देवतायागरूपस्य शाखापल्लवादिसेकस्थानीयस्य मूलसेकरूपं तदर्चनमित्यपि । तदकरणे महान्दोषः दीक्षितानां च सर्वेषां तदकरणे नरकपातः श्रूयते । अशक्तमयोग्यं प्रति चाग्नेये "पूजितं पूजमानं वा यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पश्येद्भक्तितो हरिम् । श्रद्धया मोदयेद्यस्तु सोऽपि योगफलं लभेत् ॥'' इति योगोऽत्र पांचरात्राद्युक्तः क्रियायोगः । किश्चास्मिन्नर्चनमार्गेऽवश्यं विधिरपेक्षणीयः । तत्र वैष्णवसंप्रदाय एव प्रमाणम् । ननु भगवन्नामात्मका एव मंत्रास्तत्र विशेषेण नमःशब्दाद्यलंकृताः श्रीभगवता श्रीमहर्षिभिश्चाहितशक्तिविशेषाः श्रीभगवता सममात्मसंबंधविशेषप्रतिपादकाश्च तत्र केवलानि भगवन्नामानि निरपेक्षेणैव परमपुरुषार्थपर्यंतफलदानसमर्थानि । ततो मंत्रेषु नामतोऽप्यधिकसामर्थ्ये लब्धे कथं दीक्षाद्यपेक्षोच्यते, यद्यपि स्वरूपतो नास्ति तथापि प्रायः स्वभावतो देहादिसंबंधेन कदर्यशीलानां विक्षिप्तचित्तानां जनानां तत्संकोचीकरणाय श्रीमहर्षिप्रभृतिभिरत्रार्चनमार्गे क्वचित् क्वाचिन्मर्यादा स्थापितास्ति । ततस्तदुल्लंघने शास्त्रं प्रायश्चित्तत्वमुद्भावयति तत उभयमपि समंजसमिति । तदेतदर्चनं द्विविधम् । केवलं कर्ममिश्रश्च । तयोः पूर्वं निरपेक्षाणां श्रद्धावतामुत्तरम् । व्यवहारचेष्टातिशयवत्ता यादृच्छिकभक्तानुष्ठानवत्तादिलक्षणलक्षितश्रद्धानां तथा तद्वैपरीत्यलक्षितश्रद्धानामपि प्रतिष्ठितानां भक्तिवार्त्तानभिज्ञबुद्धिषु साधरणवैदिककर्मानुष्ठानलोपोऽपि मा भूदिति लोकसंग्रहपराणां गृहस्थानां दार्शितम् । अस्यांगानि चागमादौ ज्ञेयानि । तथा श्रीकृष्णजन्माष्टमीकार्त्तिकादिव्रतैकादशीव्रतादिकमत्रैवांतर्भाव्यम् । अथास्मिन्पादसेवनार्चनमार्गेऽपराधास्त्याज्यास्ते च षष्ठस्कंधे नारायणवर्मव्याख्याने वर्णिता द्वात्रिंशत्संख्याः । वाराहे च येऽन्येऽपराधास्ते संक्षिप्य लिख्यंते–''राजान्नभक्षणं, ध्वांतागारे हरेः स्पर्शः, विधिं विना हर्य्युपसर्पणं, वाद्यं विना तद्वारोद्घाटनं, कुक्कुरदुष्टभक्ष्यसंग्रहः, अर्चने मौनभंगः, पूजाकाले विड्उत्सर्गाय गमनं, गंधमाल्यादिकमदत्त्वा धूपनं, अनर्हपुष्पेण पूजनम्'' तथा ''अकृत्वा दंतकाष्ठं च कृत्वा निधुवनं तथा । स्पृष्ट्वा रजस्वलादीपं तथा मृतकमेव च ॥ रक्तं नीलमधौतं च पारक्यं मलिनं पटम् । परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतम् ॥ क्रोधं कृत्वा श्मशानं च गत्वा भुक्त्वाप्यजीर्णभुक् । भुक्त्वा कुसुंभं पिण्याकं तैलाभ्यंगं विधाय च ॥ हरेः स्पर्शो हरेः कर्मकरणं पातकावहम् ॥'' तथा तत्रैवान्यत्र च भगवच्छास्त्रानादरेण तत्प्रतिपत्तिः, अन्यशास्त्रप्रवर्त्तनं, तदग्रे तांबूलचर्वणम् , ऐरंडपत्रस्थपुष्पैरर्चनम्, आसुरकाले पूजापीठे भूमौ चोपविश्य पूजनं, स्नपनकाले वामहस्तेन तत्स्पर्शः, पर्युषितैर्वा याचितैः पुष्पैरर्चनम्, पूजायां ष्ठीवनं, तस्यां स्वगर्वप्रतिपादनं, तिर्यक्पुंड्रधृतिः, अधौतपदत्वेऽपि तन्मंदिरप्रवेशः, अवैष्णवपक्वनिवेदनम् , अवैष्णवदृष्टौ पूजनं, विघ्नेशमपूजयित्वा कपालिनं दृष्ट्वा वा पूजनं, नखांभसा स्नपनं, घर्माबुलिप्तत्वेऽपि पूजनमित्यादयः । अन्यत्र निर्माल्यलंघनभगवच्छपथादयोऽन्येऽपि बहवः । अथ तथापि प्रामादिके भगवदपराधे पुनर्भगवत्प्रसादनानि कर्त्तव्यानि । यथा स्कांदेऽवंतीखंडे श्रीव्यासवाक्यम्–''अहन्यहनि यो मर्त्यो गीताध्यायं पठेत्तु वै । द्वात्रिंशदपराधांस्तु क्षमते तस्य केशवः ॥'' इति । तत्रैव द्वारकामाहात्म्ये ''सहस्रनाममाहात्म्यं यः पठेच्छृणुयादपि । अपराधसहस्रैर्हि न स लिप्येत्कदाचन ॥'' इति । तत्रैव रेवाखंडे–''द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवम् । द्वात्रिंशदपराधान्हि क्षमते तस्य केशवः॥'' इति । तत्रैवान्यत्र–''तुलस्यारोपणं कार्यं श्रवणेन विशेषतः । अपराधसहस्राणि क्षमते पुरुषोत्तमः ॥'' इति । तत्रैवान्यत्र कार्त्तिकमाहात्म्ये–''तुलस्या कुरुते यस्तु शालग्रामशिलार्चनम् । द्वात्रिंशदपराधांस्तु क्षमते तस्य केशवः ॥'' इति । ब्रह्मपुराणे–''यः करोति हरेः पूजां कृष्णचक्रांकितो नरः । अपराधसहस्राणि नित्यं हरति केशवः ॥'' इति । अत्र द्विजपदानुपादानाच्चक्रांकितश्चतुर्थवर्ण एव ग्राह्यः । ''शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा । एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥ '' इति बृहन्नारदीये भगीरथं प्रति यमराजोक्तेः । आदिवाराहे ''संवत्सरस्य मध्ये तु तीर्थे शौकरके मम । कृतोपवासः स्नानेन गंगायां शुद्धिमाप्नुयात् ॥ मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् । अनयोस्तीर्थयोरेकं यः सेवेत्सुकृती नरः ॥ सहस्रजन्मजनितानपराधाञ्जहाति सः ॥'' इति । कौशिकसंहितीयभागवतमाहात्म्ये च–''पूजानिच्छिद्रतावाप्त्यै विष्णोर्भागवतं मुने । पुराणं श्रीशुकेनोक्तं गंगायां यत्परीक्षिते ॥ तन्नित्यं वाचयेत्किञ्चित्तेन प्रीतो जनार्दनः । द्वात्रिंशदपराधांश्च क्षमते नात्र संशयः ॥ श्रीकृष्णपूजासंपूर्त्तिर्विना भागवतं न हि । विनापि श्रीहरेः पूजां श्रीभागवतपाठतः ॥ सांगपूजाफलं नित्यं जायते नात्र संशयः । कृष्णस्य वाङ्मयी मूर्त्तिः श्रीमद्भागवतं मुने ॥ पाठोऽस्य पूजनं सांगं देवदेवस्य शार्ङ्गिणः ॥ '' इति । किञ्चार्चनमार्गे क्वचिन्मानसपूजा विहितास्ति यथा पाद्मे उत्तरखंडे–''साधारणं हि सर्वेषां मानसेज्या नृणां प्रिया ॥ '' इति गौतमीये–''संन्यासिनां मुमुक्षूणां मानसोपहृतिः परम् '' इति । तन्महिमा यथा नारदपंचरात्रे श्रीनारायणवाक्ये–''अयं यो मानसो यागो जराव्याधिभयापहः'' इत्यादौ । ''यश्चैतत्परया भक्त्या सकृत्कुर्यान्महामते । क्रमोदितेन विधिना तस्य तुष्याम्यहं मुने ॥'' इति । एषा क्वचित्स्वतंत्रापि भवति । मनोमय्या मूर्त्तेरिष्टतमायाः स्वातंत्र्येण विधानात् । ''अर्चादौ हृदये वापि यथा लब्धोपचारकैः'' इत्याविर्होत्रवचने वाशब्दात् । अत्र ब्रह्मवैवर्त्तकथा च यथा–''प्रतिष्ठानपुरे कश्चिद्विप्र आसीत् । स च दरिद्रोऽपि कर्माधीनमात्मानं मन्यमानः शांत एवासीत् । स तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरलबुद्धिः कदाचिद्विप्रेंद्राणां सदसि वैष्णवान्धर्मोच्छुश्राव । ते च धर्मा मनसापि सिद्ध्यंतीति श्रुत्वा दरिद्रः स्वयं तथैवाचँरितुमारब्धवान् । ततश्च गोदावरीस्नानपूर्वकं नित्यं कर्म समाप्य शांतमतिर्भूत्वा विविक्तासनं प्राणायामादिपूर्वकं स्थिरीभूय मनसैवाभिमतां हरिमूर्त्तिं स्थापयित्वा स्वयं दुकूलादिकं परिधाय दृढं परिकरं बद्ध्वा तत्सदनं संमार्ज्य तां प्रणम्य च राजतगौरवर्णघटैः सर्वेषां गंगादितीर्थानां जलमाहृत्य तथा नानापरिचर्याद्र व्याण्युपनीय तदीयस्नपनादिकमारार्तिकांतं महाराजोपचारं समाप्य दिनंदिनं सुखातिशयमाप्नुवन्नासीत् । तदेवं बहुषु कालेषु गतेषु कदाचिन्मनसैव घृतसहितं परमान्नं निर्माय सौवर्णपात्रे तद्भोजनार्थमुपस्थाप्य स्थितः । तप्ततया स्फुरिते तस्मिन्प्रविष्टमंगुष्ठयुग्मं दग्धं प्रतियन् हंत तदिदं दुष्टं जातमिति दुःखेन समाधिभंगेऽपि जाते दग्धांगुष्ठतया बहिरपि पीडितो बभूव । तदवधाय वैकुंठे समुपविष्टेन श्रीवैकुंठनाथेन हसता श्रीप्रभृतिभिस्तत्कारणं पृष्टेन च सता स्वनिकटं विमानेनानयामासे । तथाविधतया दर्शयामासे स्वनिकटं योग्यतया स्थापयामासे च । अथ वंदनम् । तच्च यद्यप्यर्चांगत्वेनापि वर्त्तते तथापि कीर्त्तनस्मरणवत्स्वातंत्र्येणापीत्यभिप्रेत्य पृथग्विधीयते । एवमन्यत्रापि । वंदनस्य पृथग्विधानञ्चानंतगुणैश्वर्यश्रवणात् । तद्गुणानुसंधानपादसेवादौ विधृतदैन्यानां नमस्कारमात्रे कृताध्यवसायानामर्थे स एव नमस्कारस्तस्यार्चनत्वेनाप्यतिदिष्टः । नमस्कारेणापराधाश्चैते परिहर्त्तव्या विष्णुस्मृत्यादिदृष्टया । किञ्च "एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥" इति स्मृतेः । ये खल्वेकहस्तकृतत्ववस्त्रावृतदेहत्वभगवत्तदग्रपृष्ठवामभागांशतन्निकटगर्भमंदिरगतत्वादिमया अपराधास्ते नत्यैव नश्यंतीति । किञ्च "एकहस्तप्रणामश्च एका चैव प्रदक्षिणा । अकालदर्शनं विष्णोर्हंति पुण्यं पुराकृतम् ॥" । नारदीये "सकृद्वा न नमेद्यस्तु विष्णवे शर्मकारिणे । शवोपमं विजानीयात्कदाचित्तेन नालपेत् ॥ " "भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदम्" इत्युक्तेश्च । "वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् । श्वित्री स जायते मूर्खः सप्तजन्मनि भामिनि ॥" इति वाराहोक्तेः । "अग्रे पृष्ठे वामभागे समीपे गर्भमंदिरे । जपहोमनमस्कारान्न कुर्यात्केशवालये ॥ अग्रे मृत्युमवाप्नोति पृष्ठे त्वपचयः स्मृतः । वामभागे भवेन्नाशो दक्षिणे सर्वकामदः ॥" इत्यपि तत्रैव । नमस्कारस्तु साष्टांग एव कार्य इति वक्ष्याम्येकादशव्याख्याने । " नमस्कारेण नश्यंति ह्यपराधा अनेकशः । जनार्दनस्य विधिना किं पुनः कीर्त्तनाद्धरेः ॥ " इति पुराणांतरात् । अथ दास्यम्—"जन्मांतरसहस्रेषु यस्य स्यान्मतिरीदृशी । दासोहं वासुदेवस्य सर्वाँल्लोकान्स उद्धरेत् ॥ " इतीतिहाससमुच्चयोक्तलक्षणम् । अस्तु तावत्तत्तद्भजनप्रयासः केवलतादृशत्वाभिमानेनापि सिद्धिर्भवतीत्यभिप्रेत्यैवोत्तरत्र निर्देशश्च । तस्यैतस्य कार्यभूतं परिचर्यादिकं केवलपरिचर्यारूपत्वे भेदो न स्यात् । अत एव सुदाम्नाप्युक्तम्—"दास्यं पुनर्जन्मनिज[illegible] स्यात् ॥ " इति 'हरेर्दास्यं सुदुर्लभम्' इति पुराणांतराच्च । अथ सख्यम् । यथाऽगस्त्यसंहितायाम्—" परिचर्यापराः केचित्प्रासादेषु च शेरते । मनुष्यमिव तं द्रष्टुं व्यवहर्त्तुं च बंधुवत् ॥ " इति । अत एव 'यन्मित्रं परमानंदम्' इत्यत्र मित्रपदविन्यासः कृतः । अस्य चोत्तरत्र पाठः प्रेमविस्रंभभावनामयत्वेन दास्यादप्युत्तमत्वापेक्षयैव । किञ्च—परमेश्वरेऽपि यत्सख्यं विधीयते तन्नाश्चर्यम् 'नादेवो देवमर्चयेत्' इति तद्भावस्यापि विधानश्रवणात् । किन्तु तद्भावस्तत्सेवाविरुद्ध इति भक्तैरुपेक्ष्यते सख्यं तु परमसेवानुकूलमित्युपादीयते इति । तदेतत्साक्षाद्भजनात्मकं दास्यं सख्यं च स्वामिचरणैरपि दर्शितमस्ति । " तस्यैव मे सौहृदसख्यमैत्री दास्यं पुनर्जन्मनिजन्मनि स्यात् " इति श्रीदामविप्रवाक्ये । यथा श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा भक्तिं प्रार्थयते तस्येति सौहृदं प्रेम च सख्यं हिताशंसनं च मैत्री उपकारकत्वं दास्यं सेवकत्वं च तत्समाहारे एकवचनं तस्य तत्संबंधि मे मम स्यान्न तु विभूतिरित्येतत् । अत्र दास्यसख्याभ्यां कर्मार्पणविश्वासौ न स्यातां साक्षाद्भक्तित्वाभावात् । कर्मार्पणस्य फलं भक्तिः विश्वासश्च भक्त्यभिनिवेशहेतुः'श्रवणं' कीर्त्तनम्' इत्यादौ विष्णोः श्रवणं विष्णोः कीर्त्तनमिति । अथात्मनिवेदनम् । तत्कार्यं चात्मार्थं चेष्टाशून्यत्वं तन्नास्त्यात्मसाधनसाध्यत्वं तदर्थैकचेष्टामयत्वं च इदं स्वात्मार्पणं गोविक्रयवत् विक्रीतस्य गोर्वर्त्तनार्थं विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकस्तं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यान्न पुनर्विक्रीतवतोऽपीति । अत्र केचिद्देहार्पणमेवार्पणमिति मन्यंते यथा भक्तिविवेके"चिंतां कुर्यान्न रक्षायै विक्रीतस्य यथा पशोः । तथार्पयन्हरौ देहं विरमेदस्य रक्षणात्॥" इति । केचिच्छुद्धक्षेत्रज्ञार्पणमेव यथा मयाहमेवार्पित इति । दत्तो मयाहमिति । 'यद्भगवान्स दत्त' इतिवत् । केवलात्मनिवेदनं दानसमये बलिराजे दृश्यते । भावेषु मिश्रेषु दास्येनात्मनिवेदनं श्रीमदंबरीषे । प्रेयसीभावेन श्रीरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मबंधो किमेतत्ते विपक्षं श्रयताऽसता ॥ असारं ग्राहितो बालो मामनादृत्य दुर्मते ॥ २६ ॥ संति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ॥ तेषामुदे
त्यघं काले रोगः पातकिनामिव ॥ २७ ॥ गुरुपुत्र उवाच ॥ न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रशत्रो ॥ नैसर्गिकीयं मतिरस्य राज
न्नियच्छ मन्युं कददाः स्म मानः॥२८॥नारद उवाच॥ गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम्॥न चेद्गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः॥२९॥
प्रह्लाद उवाच ॥ मतिर्न कृष्णे परतः स्वतो वा मिथोभिपद्येत गृहव्रतानाम् ॥ अदांतगोभिर्विशतां तमिस्रं पुनःपुनश्चर्वितचर्वणानाम् ॥ ३० ॥ न ते
विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ॥ अंधा यथांधैरुपनीयमाना वाचीशतंत्र्यामुरुदाम्नि बद्धाः ॥ ३१ ॥

मन्ये । न त्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किंचिदस्तीति भावः ॥ २४ ॥ २५ ॥ न विद्यते सारं यत्र तदसारम् । न विद्यते सारं यस्मादिति वास्तवोऽर्थः ॥ २६ ॥
मित्रत्वेन प्रवर्तमानस्यापि तव विरोधाचरणं नासंभावितमित्याह । संति हीति । दुष्टं मैत्रं मित्रत्वं येषां ते दुर्मैत्राः। रोग इति । "ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः॥
स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" इत्यादिस्मृत्युक्तपातकिनां काले नरकभोगानंतरं रोगो यथोदेति तथा तेषां दुर्जनानां सुजनत्वेन वर्तमानानामप्यघं विद्वेषादिक
मुदेतीत्यर्थः ॥ २७ ॥ मत्प्रणीतं मया पाठितम् । नोऽस्मभ्यं कत्कुत्सितं दोषं मास्मादाः । अडागम आर्षः । मयि दोषारोपं मा कुथा इत्यर्थः । इंद्रशत्रो इति । न हि
ब्राह्मणेषु तव कोप उचित इति भावः ॥ २८ ॥ गुरुमुखी गुरुवाक्यजनिता । हे अभद्र ॥ २९ ॥ आस्तामियं वार्ता भवादृशानां विषयासक्तानामत्रानधिकारादित्याश
येनाह । मतिरिति । परतो गुरोः स्वतो वा मिथो वाऽन्योन्यतो नाभिपद्येत न संपद्येत । केषाम् । गृहव्रतानां गृह एव व्रतं संकल्प इतिकृत्यचिंता येषाम् । अत एवादांतैरनु
परतैर्गोभिरिंद्रियैर्हेतुभूतैस्तमिस्रं संसारं विशताम् । तत्र चर्वितस्यैव चर्वणं येषाम् ॥ ३० ॥ ननु श्रीकृष्णस्य परमानंदस्वरूपत्वात्तेऽपि तन्निष्ठा एव किं न स्युरिति चेत्तदज्ञा

क्मिणीदेव्या । एवं सख्यादिनापि ज्ञेयम् ॥ २४ ॥ २५ ॥ हे ब्रह्मबंधो ब्राह्मणाभास हे दुर्मते इति संबुद्ध्योर्वास्तवोभिप्रायस्तु ब्रह्मैव श्रीकृष्ण एव बंधुः स्नेहविषयो यस्य तादृशस्त्वमसि न तु मयि स्नेहवानिति ।
दुष्टेषु दैत्येष्वपि मतिस्सुमतिर्यस्येति न तु केवलं सुवृत्तेष्वेवेति भावः ॥ २६ ॥ यद्वैरिपक्षवर्त्ती त्वमेतावद्दिनांते भद्रेणैव व्यक्तोभूस्तदद्यैव ते समुचितां दक्षिणां दास्यामीत्यर्थांतरन्यासेनाह—संतीति । इत्यर्थ इति । उप्तं
बीजं कदाचित्सलिलसंयोगादिना प्ररोहत्येवेति भावः ॥ २७ ॥ इत्यर्थ इति । अस्य नैसर्गिकभक्तत्वादिति भावः । इति भाव इति । मयि दीने ब्राह्मणे ते कोपोऽयुक्त एवेत्याशयः ॥ २८ ॥ गुरुमुखादागता
गुरुमुखी अण्णंतत्वेऽपि वृद्ध्यभाव आर्षः । हे अभद्रेति । अकारपदवाच्येन भद्रं यस्येति । यद्वा भद्रा सती सर्वोत्तमेति वास्तवोर्थः । न भाति पुमान् यैस्तानि अभानि पापानि द्रावयति निजसंगिनामपीत्यभद्रः ' दुःसं
गदीनान्यमनःशमं व्यधात् ' इति न्यायेनेति भावः ॥ २९ ॥ विश्वनाथः—सत्यमियं मतिर्भवन्मतेऽसत्येव किंचैषा मतिर्भवादृशानां कुतोऽपि कदाचिदपि नोत्पत्स्यते इति वक्रोक्त्योपहसन्नाह—मतिरिति । परत ईदृशा
द्गुरोः । अत एव गृहव्रतत्वादेव । ननु गृहव्रताः कदाचित्स्वर्गिणोऽपि भवंति तत्राह । स्वपराभ्यां चर्वितस्यैव पुनश्चर्वणं येषां तेषां वेश्यालयः स्वर्गो वा तुल्य एवेति भावः । या स्त्री चाद्यभुक्ता सैव ह्यो भुक्तापि श्वश्च तामेव
भोक्तेति चर्वितचर्वणत्वेन पशुतुल्यानां कथं भगवन्मतिर्भवेदिति भावः ॥ ३० ॥ अत्राक्षिपति—नन्विति । तदज्ञानाच्छ्रीकृष्णस्वरूपाज्ञानात् । तत्र विष्ण्वज्ञाने । पुनराक्षिपति—नन्विति । इत्यर्थ इति । न ह्यंधपृष्ठग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः ॥ महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत यावत् ॥ ३२ ॥ इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपू रुषा ॥ अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ॥ ३३ ॥ आहामर्षरुषाविष्टः कषायीभूतलोचनः ॥ वध्यतामाश्वऽयं वध्यो निःसारयत नैर्ऋताः ॥ ३४ ॥

नादित्याह । नेति । ये दुराशया विषयवासितांतःकरणास्ते हि विष्णुं न विदुः । तत्र हेतुः। स्वस्मिन्नेवार्थः पुरुषार्थो येषां तेषां गतिं गम्यम् । ननु तेऽपि गुरूपदेशाद्विष्णुं ज्ञास्यंति तत्राह । बहिर्विषयेष्वर्थो येषां ते बहिरर्थास्तानेव गुरुत्वेन मंतुं शीलं येषां तैरंधैरुपनीयमाना अंधा यथा पंथानं न विदुः किं तु गर्ते पतंति तथा तेऽपीशस्य तंत्यां दीर्घरज्ज्वां वेदलक्षणायामुरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवंतीत्यर्थः । तदुक्तम् । "विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः ॥ वारुणीदिग्गतं वस्तु व्रजन्नैंद्रीं किमाप्नुयात्" इति ॥ ३१ ननु च "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा" इत्यादिश्रुतिप्रतिपादितं विष्णुं कथं न विदुः कुतो वा तेषां तमिस्रप्रवेशस्तत्राह नैषामिति । निष्किंचनानां निरस्तविषयाभिमानानां महत्तमानां पादरजसाऽभिषेकं यावन्न वृणीत तावच्छ्रुतिवाक्यतो जाताऽप्येषां मतिरुरुक्रमस्यांघ्रिं न स्पृशति न प्राप्नोति । असंभावनादिभिर्विहन्यत इत्यर्थः । अनर्थस्य संसारस्यापगमो यदर्थो यस्या अंघ्रिस्पर्शिन्या मतेरर्थः प्रयोजनम् । महदनुग्रहाभावान्न तत्त्वनिश्चयो नापि मोक्षस्तेषामित्यर्थः ॥ ३२ ॥ निरस्यत चिक्षेप ॥ ३३ ॥ अमर्षोऽसहनं तेन सहितया रुषाऽऽविष्टो व्याप्तः कषायीभूते आताम्रे लोचने

तांधानां कदाचिदपि सुपंथा लभ्यते किन्तु पतनमेवेति भावः । अत्र प्रमाणमाह—तदुक्तमिति । वारुणीदिग्गतं पश्चिमायां स्थितं द्वारकापुरं किमैन्द्रीं व्रजन्पूर्वां गच्छन्प्राप्नोति नेत्यर्थः । अत्र विश्वनाथः—ननु रे मूढ मामिंद्रादिवंदितपदांबुपीठं पितरमपि वक्रोक्तिविषयी कुरुषे । शृणु रे मूढ शृणु शुक्राचार्यस्य शिष्या महाविद्वांसस्त्वद्गुरवः किं सर्वशास्त्रतात्पर्यं न जानंति यतस्तेभ्योऽधीतमर्थं त्वन्न साधु मन्यस इत्यत आह—नेति । ते स्वस्यार्थरूपां गतिं न विदुः किंत्वनर्थरूपां गतिं स्वर्गादिकामेव जानंतीति भावः । यतो दुराशया दुष्टांतःकरणा बहिर्विषयसुखमनर्थमेवार्थं मंतुं शीलं येषां ते । अतस्त एव यदि विष्णुं न जानंति कथं तच्छिष्या ज्ञास्यंतीति सदृष्टांतमाह—अंधैरिति । अंधोपदिष्टमार्गोऽन्धो यथा गर्ते पतति तथैव वाचि बद्धा एव भवंतीत्यर्थः ॥ ३१ ॥ अत्राक्षिपति—नन्विति । तमिस्रप्रवेशो नरकप्रवेशः । इत्यर्थ इति । असंभावनाविपरीतसंभावनादिकं हि सद्गुरूपदेशं विना न निवर्त्तते तथा सत्युपदिष्टमप्यर्थं गृहीतं न शक्नोतीति भावः । इत्यर्थ इति । "भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युतसत्समागमः । सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते रतिः॥" इति श्रीदशमेऽक्रूरेण वक्ष्यमाणत्वादिति भावः । अत्र विश्वनाथः—ननु च यदि विष्णुरेव स्वार्थरूपा गतिस्तदा त्वद्गुरूणां सर्वशास्त्रज्ञानां मतिर्विष्णुनिष्ठैवोत्पद्येतेत्यतस्तेषां विष्णुनिष्ठत्वगतित्वाभावादेव विष्णुभक्तिरशास्त्रीयेत्यनुमीयते इत्यत आह—नैषामिति । निष्किंचनानां 'मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः' इति भगवद्वाक्यविश्वासात् त्यक्तव्यावहारिकवित्तपुत्रकलत्राभिलाषकर्मज्ञानादीनां भक्तिमात्रैकव्यसनत्वेन महीयसां पादरजसा स्वस्य वैष्णवत्वेनाभिषेकं यावन्न वृणीत तावन्मतिरुरुक्रमांघ्रिं न स्पृशति "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥" इति । "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इत्यादिश्रुतिभ्यः । अनर्थस्य संसारस्यापगमो यदर्थो यस्यांघ्रिस्पर्शिन्या मतेरर्थः प्रयोजनमानुषंगिकं फलं मुख्यं फलं तूरुक्रमांघ्रिस्पर्शः स एव ॥ ३२ ॥ ३३ ॥ नैर्ऋता इति । निर्गता ऋता कृपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं मे भ्रातृहा सोयं हित्वा स्वान् सुहृदोऽधमः ॥ पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ॥ ३५ ॥ विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमंजसः ॥ सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ॥ ३६ ॥ परोप्यपत्यं हितकृद्यथौषधं स्वदेहजो प्यामयवत् सुतोऽहितः ॥ छिंद्यात् तदंगं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥ ३७ ॥ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः ॥ सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियम् ॥ ३८ ॥ नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ॥ तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ३९ ॥ नदंतो भैरवान् नादांश्छिंधि भिंधीति वादिनः ॥ आसीनं चाहनञ्छूलैः प्रह्लादं सर्वमर्मसु ॥ ४० ॥ परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ॥ युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥ ४१ ॥ प्रयासेऽपहते तस्मिन्दैत्येंद्रः परिशंकितः ॥ चकार तद्वधोपायान् निर्बंधेन युधिष्ठिर ॥ ४२ ॥

यस्य । हे नैर्ऋता राक्षसाः ॥ ३४ ॥ वध्यत्वे हेतुर्यतोऽयं मे भ्रातृहा । कुतः । यो विष्णोः पादौ दासवदर्चति तत्पक्षपातीत्यर्थः । अतः स एवायमित्यन्वयः ॥ ३५ ॥ अहो विष्णुरप्यविश्वसनीयं किमिति स्वीकृतवानित्याह । विष्णोर्वेति । अहाज्जहौ ॥ ३६ ॥ ननु तवायमपत्यं कथं वध्यस्तत्राह । परोप्यौषधमिव हितकृच्चेत्तर्ह्यपत्यमेव ज्ञेयः । सुतः स्वदेहजोऽप्यहितश्चेदामय इव ज्ञेयः । आस्तां ममतास्पदस्य कथा अंगमपि च यत्करचरणादि तदप्यात्मनोऽहितं चेच्छिंद्यादेवेत्यर्थः ॥ ३७ ॥ अतः सर्वैरुपायैर्हंतव्यः । संभोजो भोजनम् । भोजनादिषु विषादिप्रयोगैरित्यर्थः । यथा दुष्टमिंद्रियं मुनेः शत्रुः ॥ ३८ ॥ तिग्मास्तीक्ष्णा दंष्ट्रा येषां करालान्यास्यानि भयंकराणि मुखानि येषां ते च ते च । ताम्राणि श्मश्रूणि शिरोरुहाश्च येषाम् ॥ ३९ ॥ ४० ॥ परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन्प्रह्लादे तेषां नैर्ऋतादीनां प्रहारा निष्फला आसन् जाताः । तत्र हेतवः । ब्रह्मणि निर्विकारेऽनिर्देश्येऽविषये भगवति निरतिशयैश्वर्येऽखिलात्मनि शस्त्रादीनामपि नियंतर्येवंभूते परेऽपुण्यस्य निर्दैवस्य सत्क्रिया

येभ्यस्तादृशा यूयमतो बालोयं राज्ञ इति मत्वाप्यस्योपारि कृपा न कार्येति भावः ॥ ३४ ॥ ननु विष्णुस्ते भ्रातृहा कथमयं तत्राह–सोयमिति । स विष्णुरयमेवेत्यर्थः । कुतः हित्वेत्यादि । दासवदिति । राजनंदनोऽपि भूत्वेत्यर्थः । विष्णुना स्वदासेषु स्वसारूप्यसमर्पणाद्विष्णुरेवायं वध्यतामिति भावः । ' न भक्तेभ्योंतरं मम ' इति विष्णुनैवोक्तत्वात् ॥ ३५ ॥ ३६ ॥ यथौषधं तिक्तत्वेन त्याज्यमपि हितकृत्त्वाद् गृह्यते " हरीतकी मनुष्याणां मातेव हितकारिणी'' इति वचनात् । इत्यर्थ इति । हितकृदेवापत्यादि बंधुर्ज्ञेयोऽहितकृत्तु शत्रुरेवातः स त्याज्य एवेति भावः ॥ ३७ ॥ यतोऽयं शत्रुरतो हेतोः । इत्यर्थ इति । इह समुपसर्गः कुत्सार्थकोऽस्ति तेन कुभोजनैरित्यायातं कुभोजनं हि विषादिसंबंधेनैव जायते नान्यथेति भावः । आदिना कुपथ्यादिग्रहः ॥ ३८ ॥ तिग्मदंष्ट्रास्तीक्ष्णदंष्ट्राः ॥ ३९ ॥ भैरवं भयजनकम् । सर्वमर्मसु सर्वांगगतमर्मस्थानेषु । यच्छेदेन जीवनं दुर्लभं तन्मर्ममिति कथ्यते॥ ४० ॥तत्र प्रहारनिष्फलत्वे''अग्निश्च शीततां यातो जलं च स्थलतां गतम्। शस्त्राणि पुष्पभावं च हरेर्नामानुकीर्त्तनात्''इति शैवोक्तिरत्रानुसंधेया॥ ४१ ॥निर्बंधो हठः।युधिष्ठिरेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिग्गजैर्दंदशूकैश्च अभिचारावपातनैः ॥ मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ॥ ४३ ॥ हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ॥ न शशाक यदा हंतुमपापमसुरः सुतम् ॥ चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ ४४ ॥ एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ ४५ ॥ वर्तमानोऽविदूरे वै बालोप्यजडधीरयम् ॥ न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ॥ ४६ ॥ अप्रमेयाऽनुभावोऽयमकुतश्चिद्भयोऽमरः ॥ नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥४७॥ इति तं चिंतया किंचिन्म्लानश्रियमधोमुखम् ॥ शंडामर्कावौशनसौ विविक्त इति होचतुः ॥ ४८ ॥ जितं त्वयैकेन जगत्रयं भ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपम् ॥ न तस्य चिंत्यं तव नाथ चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥ ४९ ॥ इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ॥ बुद्धिश्च पुंसो वयसार्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥ ५० ॥

महोद्यमा इव ॥ ४१ ॥ ४२ ॥ दंदशूकैः सर्पैः । अभिचाराः कृत्यादयः । अवपातनानि गिरिशृंगादधःपातनानि तैः । मायाभिः शंबरनिर्मिताभिः अवटादिषु संनिरोधैश्च ॥ ४३ ॥ पर्वताक्रमणैः पर्वतानां तदुपरि क्षेपैः । बहुवचनैरभिचाराद्यावृत्तिं दर्शयति ॥ तद्धननं कर्तुं नाभ्यपद्यत न प्राप नाशक्नोदित्यर्थः ॥ ४४ ॥ चिंतामेवाह । एष इति त्रिभिः । मे मयाऽसाधु परुषं यथा भवति तथोक्तः । असद्धर्मैरपकारैरभिचारैर्वा ॥ ४५ ॥ अविदूरे समीपे वर्तमानोऽपि बालोऽप्ययमजडधीर्निर्भयचित्तो मेऽनार्यमन्याय्यं शत्रुत्वं वा न विस्मरति । अजीगर्तस्य मध्यमपुत्रः शुनःशेपो नाम पितृभ्यां हरिश्चंद्राय विक्रीतः सन्यथा तयोरपकारमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रांतरमापन्नस्तद्वत् । यद्वा स्वभावापरित्यागे दृष्टांतः । शुनः शेपः पुच्छमिवेति ॥ ४६ ॥ अप्रमेयोऽपरिमेयोऽनुभावो यस्य । न कुतश्चिद्भयं यस्य । अमरो मृत्युशून्यश्च । न वा भविता अन्यथा मृत्युनैव भविष्यतीत्यर्थः ॥ ४७ ॥ औशनसावुशनसः पुत्रौ नीतिज्ञौ । विविक्त एकांते ॥ ४८ ॥ भ्रुवोर्विजृंभणेनैव त्रस्ता समस्ता धिष्ण्यपा लोकपाला यस्मिंस्तस्य तव चिंत्यं न चक्ष्महे न पश्यामः पदमालंबनं नैवास्ति यद्वा शिशूनां वृत्तं गुणदोषयोः पदं विषयो न भवतीत्यर्थः ॥ ४९ ॥ तथापि तु बंधनमस्योचितमि

यथा त्वदर्थं दुर्योधनादिकृते युद्धेऽपि त्वं स्थिरतामेव प्राप्तो न तु मृतिं तथायमपीति भावः ॥ ४२ ॥ बहुवचनैरभिचारादीनामावृत्तिः सूचिता । आदिना भूतावेशनादिग्रहः । 'गर्त्तावटौ भुवः श्वभ्रे' इत्यमरः । सन्निरोधैर्निर्गमनैः ॥ ४३ ॥ हिमवाय्वग्निसलिलैः हिममध्यनिक्षेपैर्बहुतप्तपवनमध्यस्थापनैर्वह्निमध्यस्थापनैर्मृतीकृत्य जले निक्षेपैश्चेति विवेकः ॥ ४४ ॥ इत्यर्थ इति । उपसर्गवशादर्थांतरमत्रेति भावः । अपकारैर्भर्त्सनादिभिः । तत्रापकारकत्वाभावं विमृश्याह—अभिचारैर्वेति ॥ ४५ ॥ यद्वा मेऽनार्य्यशत्रुं विष्णुं न विस्मरतीत्यर्थः ॥ ४६ ॥ अन्यथैतद्विरोधाभावे । इत्यर्थ इति । अयमेव मे मृत्युहेतुरिति प्रतीयत इति भावः ॥ ४७ ॥ इतीति वक्ष्यमाणम् ॥ ४८ ॥ यद्वा पदं व्यवसायं न हि शिशूनां किञ्चिदपि वस्तु व्यवसितं भवतीति भावः । तेषां सारासारविचाराभावादिति भावेनैव स्वामिभिर्यद्वेत्युक्तम् । "पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु" इत्यमरः ॥ ४९ ॥ यद्यपि गुणदोषपदं बालवृत्तं न संभवति तथापीति । तुरवधारणे बंधनमेवास्य प्रह्लादस्य । ततो बंधनात् । वयसा बाल्यात्परेण । आर्याणां शास्त्रवृद्धानां सेवया । भार्गवः शुक्राचार्यः । "यस्त्वेकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ॥ धर्मो ह्यस्योपदेष्टव्या राज्ञां ये गृहमेधिनाम् ॥ ५१ ॥ धर्ममर्थं च कामं च नितरां चानुपूर्वशः ॥ प्रह्लादायो
चतू राजन् प्रश्रयावनताय च ॥ ५२ ॥ यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम् ॥ न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णिताम् ॥ ५३ ॥ यदाचार्यः
परावृत्तो गृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥ ५४ ॥ अथ ताञ्श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ॥ उवाच विद्वांस्त
न्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥ ते तु तद्गौरवात् सर्वे त्यक्तक्रीडापरिच्छदाः ॥ बाला नदूषितधियो द्वंद्वारामेरितेहितैः ॥ ५६ ॥ पर्युपासत राजेंद्र
तन्न्यस्तहृदयेक्षणाः ॥ तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादस्य नवधाभक्तिवर्णनं
नाम पंचमोऽध्यायः ॥ ५ ॥ प्रह्लाद उवाच ॥ कौमार आचरेत् प्राज्ञो धर्मान् भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ १ ॥

त्याहतुः इमं त्विति । यावद्गुरुर्भार्गव आगमिष्यति तावद्वद्धा निधेहि । ततः किमत ऊचतुः । यतः पुंसो बुद्धिश्च वयसा तथा आर्यसेवया समीचीना भवति ॥ ५० ॥
अनुज्ञाय तथेत्यंगीकृत्य ॥ ५१ ॥ ततश्च तौ प्रह्लादाय धर्मादिकमूचतुः प्रश्रितश्चासाववनतश्च तस्मै ॥ ५२ ॥ यथा यथावत्त्रिवर्गमुपशिक्षितमपि न साधु मेने तत्तां शिक्षां
च । कुतः । द्वंद्वैः रागद्वेषादिभिर्विषयेष्वारमणं येषां तैरुपवर्णिताम् ॥ ५३ ॥ परावृत्तोऽन्यत्र गतः स उपहूतः । संधिः पादपूरणार्थम् । क्रीडार्थं कृतक्षणैः कृतोत्सवैर्लब्धाव
सरैरिति वा ॥ ५४ ॥ तन्निष्ठां तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ॥ ५५ ॥ द्वंद्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषाम् । यतो बालाः ॥ ५६ ॥ तस्मिन्नेव
न्यस्तं हृदयमीक्षणं च यैः ॥५७॥ इति सप्तमे टीकायां पंचमोऽध्यायः ॥५॥ षष्ठे गुरौ गृहव्यग्रे प्रह्लादो दैत्यबालकान् ॥ अनुकंप्य परं तत्त्वं नारदोक्तमुपादिशत् ॥ १ ॥
निरर्थकक्रियाळापैरायुर्व्ययमजानताम् ॥ प्रह्लादः सदयं प्राह धर्मं भागवतं कृती ॥ २ ॥ कौमार इत्यादिना । इहैव मानुषजन्मनि धर्मानाचरेत् । यतोऽर्थदमेतत् । तत्र

स्थविरो वेत्ति न तत्तरुणकोटयः । वृद्धवाक्यमतः कुर्य्याच्छ्रुतिरेषा सनातनी'' इत्यादिपुराणात् । ५० ॥ गृहमेधिनां तत्रापि राज्ञाम् ॥ ५१ ॥ ततो हिरण्यकशिपोरनुज्ञानंतरम् । तौ गुरुपुत्रौ ॥५२॥ तत् ताम् ॥ ५३ ॥
अन्यत्राध्यापनस्थानात् । परावृत्तः । गृहमेधीयकर्मस्वग्निहोत्रादिषु व्यापृतः।तत्र तदा। स प्रह्लादः । संधिरत्र ''सोऽचिलोपे चेत्पादपूरणम्'' इति सूत्रात् । क्रीडार्थमवकाशस्त्वध्ययनानंतरमपि प्राप्यत एवात आह—लब्धावसरै
रिति । भक्तिशिक्षणार्थं प्रास्तावकाशैरित्यर्थः । ''क्षणः पर्वोत्सवव्यापारेषु मानेप्यनेहसः'' इति मेदिनी ॥ ५४ ॥ अथागतः सन् तेषां बालानां स्वस्मिन् गुरुत्वनिष्ठां जानन् प्रहसन्निव अहो इमेऽपि भगवदनुकंपाजाले
पतिता इति स्मयमानः ॥ ५५ ॥ तस्य प्रह्लादस्य गौरवादाधिक्यात् राजकुमारोऽयं यथाऽस्मभ्यं ब्रवीति तथा कार्यमेवेति तत्र गौरवमुद्दिश्येत्यर्थः । ल्यब्लोपे पंचमी । न दूषितधियोऽत्र नञर्थो न शब्दः । ईरितैर्व्या
ख्यातार्थैरीहितैस्तद्व्यापारैः ॥ ५६ ॥ तस्मिन्प्रह्लादे । राजेंद्रेति । न हि भगवत्प्रिययशश्रवणं विना राजेंद्रत्वं लभ्यत इति भावः । मैत्रः सर्वत्र द्वेषत्यागी स एषोऽसुः ''स एष प्राणः'' इति श्रुतेः । असौ मुख्यप्राणे
रमत इत्यसुरः । अत एव महाभागवतः ॥ ५७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ गृहव्यग्रे गृहकृत्यासक्ते सति 'व्यग्र आसक्त आकुलः' इति मेदिनी (१) कृती
निपुणः (२) तानाह—करुणो मैत्र इति । पूर्वमुक्तं तत्किमाहेत्यत आह—कौमारे धर्मानाचरेत् । ननु कौमारे वर्णाश्रमधर्माणामनधिकारस्तत्राह—भागवतान् श्रवणकीर्त्तनादीन् । इह भारतभूमौ । ननु तान्यौवनादावपि कृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ २ ॥ सुखमैंद्रियकं दैत्या देहयोगेन देहिनाम् ॥ सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ॥ ३ ॥ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ॥ न तथा विंदते क्षेमं मुकुंदचरणांबुजम् ॥ ४ ॥ ततो यतेत कुशलः क्षेमाय भयमाश्रितः ॥ शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥ पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः ॥ निष्फलं यदसौ रात्र्यां शेतेंधं प्रापितस्तमः ॥६॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ॥ जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥७॥ दुरापूरेण कामेन मोहेन च बलीयसा ॥ शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥ को गृहेषु पुमान् सक्तमात्मानमजितेंद्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥ को न्वर्थतृष्णां विसृजेत् प्राणेभ्योपि य ईप्सितः ॥ यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥

च कौमार एव यतस्तदप्यध्रुवम् । न चैवंभूतं जन्मांतरम् । यतो दुर्लभम् । तत्र धर्मानेवाचरेन्न सुखार्थे प्रयासान् । तत्र भागवतानेव न काम्यान् ॥ १ ॥ इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति । यथाहीति चतुर्भिः । इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथाऽनुरूपं योग्यमित्यर्थः । यद्यस्मादेष प्रिय इत्यादि॥ २॥ ननु भोगोद्यमः कथं त्याज्य इति चेत्तत्राह । सुखमिति । सर्वत्र पश्वादावपि । दैवात्पूर्वादृष्टादेव ॥ ३ ॥ अतस्तदर्थं प्रयासो न कर्तव्यः । यतः प्रयासात्परं केवलमायुषो व्यय एव यतस्तथा तेन प्रकारेण क्षेमं न प्राप्नोति ॥ ४ ॥ भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरीरं यावत्पुष्कलमस्ति न विपद्येताक्षमं न भवेन्न नश्येदिति वा तावच्छीघ्रं क्षेमाय यतेत ॥५॥ आयुर्व्ययक्रममाह पुंस इति त्रिभिः । यद्यस्माच्छेते ॥ ६ ॥ विंशतिर्वर्षाण्यायुर्याति ॥ ७ ॥ दुरापूरेण दुःखैः समंतादापूर्यमाणेन ॥ ८ ॥ ननु यौवने गृहासक्तोऽपि पश्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्य तदसंभवं दर्शयन्कौमार एवाचरेदित्येतदुपपादयति । को गृहेष्विति सप्तभिः ॥ ९ ॥ यमर्थमसुभिः क्रीणाति प्राणहानिमंगीकृत्यापि

कृतार्थी भवति तत्राह–प्राज्ञ इति । यदि कौमारांत एव मृत्युः स्यात्तर्हि ।किं भवेदिति प्रकृष्टज्ञानवान् । ननु तत्र का चिन्ता जन्मांतरं तु भावि तत्रैव भक्तिः कार्येति तत्राह–दुर्लभं मानुषं जन्म। तदपि भाग्याल्लब्धमप्यध्रुवमद्य वर्त्तमानत्वेऽपि तस्य श्वः स्थितौ निश्चयाभावात्। ननु तर्हि तावन्मात्रकालेन कुतो भक्तिसिद्धिस्तत्राह–अर्थदम् ।मुहूर्त्तमात्रव्यापि भक्तिमतामपिखट्वांगादीनां सिद्धिदर्शनात्॥ १ ॥भागवतधर्मान्केन प्रकारेणाचरेदित्यपेक्षायामाह– यथा येन प्रकारेण विष्णोः पादयोरुपसर्पणं प्राप्तिर्भवेत्तथाचरेदित्यनुषंगः । तमेव प्रकारं चतुर्विधं व्यंजयन्विष्णुं विशिनष्टि–यद्यस्मादेष प्रिय इत्यादि। तेन " येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति भगवदुक्तिप्रामाण्येन कांतभावशांतिरतिदास्यभावसख्यभावानां मध्ये येन भावेनोपसर्पितुमिच्छेत्तेनैवोपसर्पन्भागवतान् धर्मानेवाचरेदिति रागभक्तावपि विधिर्व्यंजितः । आत्मतुल्यत्वादात्मा सुत इति तंत्रेणोक्त्या पंचैव भावाः प्रह्लादेनोपदिष्टा इति वा॥ २॥ ३॥यतः सर्वत्र लभ्यतेऽतो हेतोः॥ ४ ॥तत इति।यतो मुकुंदचरणत्यागे क्षेमाभावस्ततस्तस्मादित्यर्थः॥ ५॥वर्षशतमिति श्रुतिप्रसिद्ध्योक्तं क्षणमात्रजीवनस्याप्यनिश्चितत्वाच्छीघ्रमेव क्षेमाय यतितव्यमिति भा वः । अंधं तमः सर्वज्ञानशून्यां सुषुप्तिं प्रापितः अंधं तमो यथार्थज्ञानशून्यं स्वप्नं वा प्रापितः केनचित्कर्मविशेषेणेति शेषः ॥ ६ ॥ मुग्धस्य मूढस्य । अकल्पस्यासमर्थस्य ॥ ७ ॥ दुर्गत आपूरः पूरणं यस्य तेन मोहेन पुत्राद्यासक्तिविशेषेण ॥ ८ ॥ "लोहदारुमयैः पाशैः पुमान् बद्धो विमुच्यते । पुत्रदारमयैः पाशैः पुमान्बद्धो न मुच्यते" इति गारुडात् ॥ ९ ॥ इत्यर्थ इति । तस्करा रात्रौ परगृहं, सेवको राजकीयो युद्धाभिमुखं,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् ॥ सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥ पुत्रान्स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ ॥ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीस्तु कुल्याः पशुभृत्यवर्गान् ॥ १२ ॥ त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ॥ औपस्थ्यजैह्वचं बहु मन्यमानः कथं विरज्येत दुरंतमोहः ॥ १३ ॥ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेऽर्थं विहतं प्रमत्तः ॥ सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः ॥ १४ ॥ वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः ॥ प्रेत्येह चाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी ॥ १५ ॥ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन् स्वलोकाय न कल्पते वै ॥ यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः ॥ १६ ॥

साधयति तस्करादिः । तस्मिन्नर्थे तृष्णां को नु विसृजेत् ॥ १० ॥ किं च । कथमित्यादि प्रियायाः संगादिकं स्मरन्कथं त्यजेतेति तृतीयेनान्वयः । मंत्रान्हितशिक्षालापान् । सुहृत्सु च संगम् । तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च संगम् । तेष्वनुरक्तं चित्तं यस्य ॥ ११ ॥ ताः श्वशुरगृहे स्थिताः हृदय्या हृदयंगमाः मनोज्ञा उरवः परिच्छदा येषु तान्गृहान् वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः ॥ १२ ॥ कोशस्कृत् कोशस्कारी कीटः स यथा आत्मनो हितं गृहं कुर्वाणो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणीहमानः । नन्ववितृप्तकामोऽपि दोषदर्शनेन विरक्तः संस्त्यजेत्तत्राह । औपस्थ्यं शैश्न्यं जैह्वचं च सुखं बहु मन्यमानस्तदेवाधिकं मन्यमानः अतो दुरंतो मोहो यस्य स कथं विरज्येत विरक्तः स्यात् ॥ १३ ॥ दुरंतमोहत्वं दर्शयन्नाह । कुटुंबपोषणाय वियत्क्षीयमाणं निजमायुः पुरुषार्थं च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोऽपि न निर्विंद्यते तत्र दुःखबुद्धिं न करोति यतः स्वकुटुंबे रामो रतिर्यस्य ॥ १४ ॥ प्रत्युत चौर्यं करोतीत्याह । वित्तेष्विति । नित्यमभिनिविष्टं चेतो यस्य स परवित्तहर्तुः प्रेत्य नरकलक्षणमिह च दंडादिरूपं दोषं यद्यपि विद्वान् जानन्नथाप्यशांताभिलाषस्तत्परवित्तं हरत्येव ॥ १५ ॥ तदेवं को गृहेषु पुमानित्यादिसप्तभिः श्लोकैरुपपादितं गृहादिषु प्रसक्तस्य वैराग्यासंभवमुपसंहरति । विद्वानिति । स्वलोकायात्मपरामर्शाय न कल्पते किं तु विमूढो यथा तथा विद्वा

वणिक् पोतवणिक् समुद्रं प्राणहानिमंगीकृत्यैव तदर्थं प्रविशतीति भावः ॥ १० ॥ स्त्रीपुत्राद्यासक्तेः प्राबल्यं दर्शयति—कथमिति । अनुकंपा कृपा जाता यस्यां सा अनुकंपिता तस्यास्तथा कृपापात्रीभूताया इत्यर्थः ॥ ११ ॥ दीनौ वृद्धौ । पशवो गवाश्वादयः ॥ १२ ॥ अत्राशंकते—नन्विति । अतो जैह्वचौपस्थ्यस्य बहुमननात् ॥ १३ ॥ अत एव पुरुषार्थज्ञानाभावात् ॥ १४ ॥ १५ ॥ हे दनुजा इति । 'कयाधुर्नाम दानवी' इत्युक्तेरहं दनोर्दौहित्रो यूयं च तद्वंश्यत्वान्मम बंधवः स्थेत्यतो युष्मभ्यं हितमुपदिशामीत्यभिप्रायः । विद्वान् शास्त्रज्ञोऽपि आत्मपरामर्शाय कोऽहं कुत आयातः किमधुना करोमीति स्वमवलोकितुमित्यर्थः । यथाविमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतो न कश्चित् क च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः ॥ विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः ॥ १७ ॥ ततो विदूरा त्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु ॥ उपेत नारायणमादिदेवं विमुक्तसंगैरिषितोऽपवर्गः ॥ १८ ॥ न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरा त्मजाः ॥ आत्मत्वात् सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ १९ ॥ परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु ॥ भौतिकेषु विकारेषु भूतेष्वथ महत्सु च ॥ २० ॥ गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ॥ एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥ २१ ॥

नपि तमोऽभिनिवेशमेव प्रपद्यते । तत्र हेतुः य इति । स्वीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः ॥ १६ ॥ तस्मात्कौमार एव भागवतान्धर्मानाचरेदिति सहेतुकमुपसंहरति । यत इति । यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थस्ततो नारायणमुपेत शरणं यातेत्युत्तरेणान्वयः । असामर्थ्ये हेतुः अलं दीनो लंपटः । अतः कामो दृशि यासां तासां विहारे क्रीडायां निमित्ते क्रीडामृगः । विहारमिति पृथक्पाठे तासां विहारसाधनमात्मानं यतस्तासां क्रीडामृगः स इत्यन्वयः । किं च यद्यासु निगडः श्रृंखलातुल्यो विसर्गः पुत्रपौत्रादिरूपो भवति ॥ १७ ॥ विदूराद्दूरतः संगं परिहृत्य । यद्वा अविदूराच्छीघ्रं नारायणमुपेतेत्यन्वयः । यस्मात्स एवापवर्ग इषित इष्टः ॥ १८ ॥ ननु बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राह । न हीति । बह्वायासोऽतिप्रयासः ॥ १९ ॥ आत्मत्वात्सर्वत्र सिद्धत्वादिति च हेतुद्वयमुपपादयति परावरेष्विति चतुर्भिः । ब्रह्मा अंतो येषां स्थावर आदिर्येषां तेषु भूतेषु जीवेषु भौतिकेष्वजीवेषु घटादिषु महत्सु च भूतेष्वाकाशादिषु ॥ २० ॥ गुणसाम्ये प्रधाने गुणव्यतिकरे महत्त

एडकासु स्वभावत एकरूपासु मूढ इयं कस्येयं कस्येति ज्ञातुमसमर्थः केवलं तमो ज्ञानाभावमेव प्रपद्येत तद्वत्केवलकुटुंबपोष्यपि तमो नरकहेतुमभिनिवेशमेव । तत्राभिनिवेशे ॥ १६ ॥ अतो लंपटत्वात् । न केवलं तासां क्रीडामृग एव भवत्यपि तु बद्धोऽपि स्यादित्याह—किंचेति । यद्वा याः कामदृश एव निगडो यत्र तथाविधो विशेषेण सर्गो जन्म भवेदित्यर्थः ॥ १७ ॥ दूरतस्तु स्वयमेव संगस्त्यक्त एव त्यक्तस्य त्यागासंभवमाशंक्याह—यद्वेति । अपवर्गः संसारबंधविमोचकः । यतो धर्मार्थकामैर्ब्रह्मार्पणबुद्धिचिकित्सारहितैः संसारमोक्षो न सेत्स्यति ततो हेतोरित्यर्थः । दैत्येषु दितिशब्दोपलक्षिताहिंसाविहारेषु यूयमपि तज्जातीयैरस्माभिस्तादृशैरेव भाव्यमित्याकलनां मा कुरुते त्यभिप्रायेणाह—हे दैत्या इति ॥ १८ ॥ प्रीणयतः परिचर्यया प्रीणयितुं न बहुप्रयत्नः यथा कुटुंबं प्रीणयत इति भावः । न च तस्यान्वेषणे श्रम आत्मत्वात् हृद्येव वर्तमानत्वात् । न च तत्प्रीणनेऽपि श्रमः सर्वतः सर्वै रपि प्रकारैर्मानसैरप्युपचारैस्तत्प्रीणनस्य सिद्धत्वात् । तथाऽच्युतं प्रीणयानीति संकल्पमात्रेणापि प्रीतेः सिद्धत्वात् । श्रवणकीर्त्तनाद्यन्यतमेनापि वा सिद्धत्वात् ॥ १९ ॥ न केवलं स स्वहृदय एव वर्त्तमानः परिचरणी योऽपि तु सर्वत्रैव वर्त्तमानः सर्वसंमानेनैव संतोषणीय इत्युपदेष्टुं तस्य सार्वत्रिकीं सार्वकालिकीं च सत्तामाह द्वाभ्याम् । परावरेषूत्कृष्टनिकृष्टेषु भूतेषु जीवेषु ब्रह्मान्तस्थावरादिष्वजीवेषु घटादिषु च परः भूतादिभ्यः प्राक्त तेभ्यः प्रकृतेश्च सकाशादन्य एकः परब्रह्मेति । आत्मा परमात्मा इति भगवानिति शब्दत्रयवाच्य ईश्वर ईयत इत्युत्तरेणान्वयः । कीदृशोऽव्ययः सर्वेष्वपि कालेष्वपक्षयशून्यः ॥ २० ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ॥ व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥ केवलानुभवानंदस्वरूपः परमेश्वरः ॥ माययांतर्हितैश्वर्य ईयते गुणसर्गया ॥ २३ ॥ तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम् ॥ आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥ २४ ॥ तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ॥ धर्मादयः किमगुणेन च कांक्षितेन सारंजुषां चरणयोरुपगायतां नः ॥२५॥ धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्ता॥मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः॥२६॥

त्वादौ च परो ब्रह्मस्वरूपः ॥ २१ ॥ कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदो माययेत्याह । प्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयत इत्युत्तरेणान्वयः । वस्तुतस्तु स्वयमविकल्पितोऽनिर्देश्योऽपि सन् । यद्वा अनिर्देश्योऽप्येवं निर्देश्यः सन् विकल्पित ईयत इत्यन्वयः ॥ २२ ॥ यतः केवलोनुभवात्मक आनंद एव स्वरूपं यस्य । ननु स एव चेत्सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्युपलभ्येत तत्राह । गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया माययांतर्हितमैश्वर्यं येन सः ॥ २३ ॥ यस्मादेवं तस्मात्सर्वेषु भूतेषु यथोचितं दयां सौहृदं च कुरुत । यया दयया । उन्मुच्य संत्यज्य ॥ २४ ॥ ततः किमत आह । तुष्टे च तत्र तस्मिन्किमलभ्यम् । तथापि गुणपरिणामाद्दैवादेव स्वसिद्धा अयत्नतः सिद्धा ये धर्मादयस्तैः किम् । अगुणेन च मोक्षेण कांक्षितेन किम् । तमुपगायतां नोऽस्माकमकांक्षितस्यापि तस्य सिद्धेः यद्वा मा भून्मोक्षस्तस्य चरणयोः सारंजुषां सुधां सेवमानानां तेनापि किमित्यर्थः ॥ २५ ॥ ननु च धर्मादेरपुरुषार्थत्वे किमित्याचा

स ज्ञायते चेदिदमित्थं कारेण निर्दिश्यतामित्यत आह–प्रत्यगात्मेति । प्रतीचां सर्वजीवानामात्मा परमात्मा तत्स्वरूपेण व्यापकः । दृश्यं जगत्तद्रूपेण व्याप्य इत्येव व्याप्यव्यापकनिर्देश्यः।वस्तुतः स्वयं ह्यनिर्देश्यः अनिर्देश्योऽपि विकल्पितः ॥ २२ ॥ उपासकभेदे ब्रह्म परमात्मा भगवानित्येवंविकल्पविषयीकृतोऽपि केवल एकोऽनुभवात्मक आनन्द एवं स्वरूपं यस्य सः एवं सर्वत्र स्वस्वरूपभूतैश्वर्येण प्रकटमेव विराजमानोऽपि मायया स्वाविद्याहेतुना जीवैर्दृष्टुमशक्यत्वादंतर्हितैश्वर्य ईयते कीदृश्या गुणानामिंद्रियैरनुभूयमानानां शब्दादीनां सर्गः सृष्टिर्यतस्तयेति तया स्ववृत्त्याऽविद्यया जीवदृष्टेरावरणात्तेन " दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥" इति भगवदुक्तेर्भगवद्भक्त्यैव मायातरणे सति स यथायोगं भक्तितारतम्येन निर्देश्यो भवतीति भावः ॥ २३ ॥ यतो भक्तिगम्य एव भगवान्सा च भक्तिः सर्वभूतेषु दयासौहृदाभ्यां सुस्थिरा निर्विघ्ना भवतीत्यतस्ते एव विधत्ते–तस्मादिति । सौहृदं च स्नेहं सर्वाणीमानि भूतानि भगवच्छक्तिमयत्वाद्भगवद्रूपाण्येव स्वरूपेणापि सर्वत्रैवैतेषु स मत्प्रभुर्विराजत एव श्रीमद्गुरुकृपया यदि मां भक्तिदेवी स्वीकरिष्यतीति तदा सोऽपि द्रष्टव्य इति बुद्ध्येति भावः । यया दयया सौहृदेन च । संदर्भस्तु–श्लोकचतुष्टयमिदमित्थं व्याचख्यौ तेषुतेष्विव एव पर आत्मा सर्वेषां मूलस्वरूपो भगवान्स्वरूपभूताचिंत्यशक्तिः । अत एवेश्वरो दुर्घटघटनासमर्थः । अत एवाव्ययः । स्वेनैव तत्तद्भावेऽप्यविकारी सन्स्वयमेव प्रत्यगात्मस्वरूपेण जीवरूपेण केषांचित्तन्मात्रज्ञानानामीयते केषांचित्तु ततोऽप्यधमज्ञानानां दृश्यरूपेण प्रधानरूपेण चेयते तत्र जीवरूपेण व्यापकत्वेन निर्देश्यो भवति प्रधानादिरूपेण तु व्याप्यरूपतयेत्यर्थः । केषांचित्त्वद्वैतज्ञानिनां स एव परमेश्वरोऽनिर्देश्यः सन्नविकल्पितो भेदमात्रशून्यश्च सन् केवलानुभवानंदस्वरूप एवेयते न तु स्वरूपशक्तिमयैश्वर्ययुक्तः कथं तत्राह–माययेति । तत्कृपया मायाया अंतर्द्धाने सम्यक् सत्यैवेयते न तत्प्रकाशते इति भावः । तस्यास्तच्छादकधर्मत्वमेव दर्शयति–गुणसर्गयेति । सत्त्वादिगुणविक्षेपिकयेत्यर्थः । ब्रह्मज्ञानिनामप्यस्ति सत्त्वगुण एवावरक इति भावः । तस्मात्सर्वेष्वेव भूतेषु न त्वात्ममात्रसंबंधिषु दयां कुरुत भगवत एवाधिष्ठानत्वात्सर्वेषां सौहृदमात्मीयबुद्धिं च कुरुतेति ॥ २४ ॥ ततोऽधोक्षजतोषात् । मोक्षस्यागुणत्वं तु गुणकार्यत्वाभावादेव । नन्वकांक्षितसिद्धवस्तुप्राप्तिरकिञ्चित्करैवेति चेत्तत्राह–यद्वेति । इत्यर्थ इति । ' या निर्वृतिस्तनुभृताम् ' इत्यादिध्रुवोक्तन्यायेन भगवद्भक्तैर्मोक्षो नाद्रियत इति भावः ॥ २५ ॥ अत्राक्षिपति–नन्विति । आचार्याभ्यां शंडामर्काभ्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ॥ एकांतिनां भगवतस्तदकिंचनानांपादारविंदरज साप्लुतदेहिनां स्यात् ॥ २७॥ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ॥ धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥ दैत्यपुत्रा ऊचुः ॥ प्रह्लाद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् ॥ एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः ॥ छिंधि नः संशयं सौम्य स्याच्चेद्विश्रंभकारणम् ॥ ३० ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादेन बालानां ब्रह्मज्ञानवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ नारद उवाच ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ॥ उवाच स्मयमानस्तान् स्मरन् मदनुशासनम् ॥ १ ॥

याभ्यां वेदोक्तत्वेन सत्य एवाभिहितस्तत्राह धर्मोऽर्थः कामश्चेति यस्त्रिवर्गस्तदर्थं च य ईक्षाद्या अभिहिताः । ईक्षा आत्मविद्या । त्रयी कर्मविद्या । नयदमौ तर्को दंडनीतिश्च । विविधा च वार्ता जीविका । तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वांतर्यामिणः परमस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सर्वं सत्यं मन्ये सत्यपरत्वात् । अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये । सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भगवता । " त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन " इति ॥२६॥ तेषां पुनर्विश्वासार्थं गुरुसंप्रदायमाह । ज्ञानमिति । यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इति मा शंकीत्याह । भगवत एकांतभक्तानां यत्पादरजस्तेनाप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यान्न तूत्तमानामेवेति नियमः ॥२७॥ अत एव मयाऽपि पूर्वं नारदाच्छ्रुतम् । विज्ञानसहितमनुभवपर्यंतं ज्ञानं धर्मं च श्रुतम् ॥२८॥ तत्रातिविस्मिताः पृच्छंति प्रह्लादं । हे प्रह्लाद त्वं वयमेताभ्यां शंडामर्काभ्यामृतेऽन्यं गुरुं न विद्मः । एतदागमनात्पूर्वमेवाहं नारदपार्श्वे गत इति चेत्तत्राहुः । बालानामप्यतिशिशूनामस्माकमेतावीश्वरौ नियंतारावतस्तवान्यत्र गमनं न संभवति ॥ २९ ॥ स एवात्रागत इत्यपि न संभवतीत्याहुः । बालस्येति । दुरन्वयो दुर्घटः । विश्रंभकारणं विश्वासहेतुः ॥ ३० ॥ इति श्रीमद्भागवते सप्तमे टीकायां षष्ठोऽध्यायः ॥ ६ ॥ ॥ सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितम् । प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ १ ॥ अश्रावि नारदादेतन्मया गर्भे इतीरितुम् ॥ तत्प्रस्तावकथामाह पद्यैः षोडशभिः सुधीः ॥ २ ॥ १ ॥

अन्यथा स्वात्मार्पणसाधनत्वाभावे । ननु वेदप्रतिपादितमर्थं कथमसत्यं मन्यसे तत्राह—यद्वेति । इत्यर्थ इति । निगमस्य संबंधि वेदोक्तमेव मन्ये न तु दूषयामि तादृशाधिकारिसंमतत्वात्सत्यं सतां हितं तु परमस्य पुंसः परमे पुंसि स्वात्मार्पणं स्वस्यात्मनस्तदीयत्वेनार्पणमिति ॥ २६ ॥ अमलं संसारमलनिवर्त्तकम् ॥ २७ ॥ अत एव नियमाभावादेव । ज्ञानं तत्प्रतिपादकं वाक्यं ज्ञानस्य बुद्धिविषयत्वेन श्रावणत्वाभावात् । यदेव खल्वनुभवपर्यंतफलं तत्सहायत्वेन भागवतधर्मं च श्रुतं तच्च शुद्धमेव न तु ज्ञानकर्मादिमिश्रम् ॥ २८ ॥ तत्र प्रह्लादवाक्ये । एतदागमनादेतत्पार्श्वागमनात् । अत एव बालत्वादेव । हे प्रह्लादेति । प्रकृष्टाह्लादजनकोऽसि श्रीहरितत्त्वोपदेष्टृत्वादिति भावः ॥ २९ ॥ स एव नारद एव । अत्रास्मन्मंदिरे । न हि कस्यापि सामर्थ्यं भवदीयमंदिरप्रवेशस्य हिरण्यकशिपोर्भयादिति भावः । हे सौम्येति । राजकुमारत्वाद्बहुधाप्रश्नेऽपि त्वयाऽस्मदुपरि कोपोऽपि नो कार्य इति भावः ॥३०॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे षष्ठोऽध्यायः ॥६॥ प्रत्ययो विश्वासः (१) तत्प्रस्तावकथां स्वश्रवणप्रसंगकथाम् । पद्यैः श्लोकैः (२) स्मयमानः अहो एतेऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रह्राद उवाच ॥ पितरि प्रस्थितेऽस्माकं तपसे मंदराचलम् ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान् प्रति ॥ २ ॥ पिपीलिकैरहिरिव दिष्ट्या लोको
पतापनः ॥ पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥ तेषामतिबलोद्योगं निशम्यासुरयूथपाः ॥ वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो
दिशम् ॥ ४ ॥ कलत्रपुत्रमित्राप्तान् गृहान् पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥ व्यलुंपन्राजशिबिरममरा जयकां
क्षिणः ॥ इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६॥ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ॥ यदृच्छयाऽऽगतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥
प्राह मैनां सुरपते नेतुमर्हस्यनागसम् ॥ मुंचमुंच महाभाग सतीं परपरिग्रहम् ॥ ८ ॥ इंद्र उवाच ॥ आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ॥
आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवीं गतः ॥ ९ ॥ नारद उवाच ॥ अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ॥ त्वया न प्राप्स्यते संस्था
मनंतानुचरो बली ॥ १० ॥ इत्युक्तस्तां विहायेंद्रो देवर्षमानयन् वचः ॥ अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥ ततो नो मातरमृषिः
समानीय निजाश्रमम् ॥ आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः ॥ १२ ॥

अस्माकं पितरि हिरण्यकशिपौ । स्वकृतेनैव पापेन पापोऽसावभक्षि भक्षित इति हर्षेण वदंतो युद्धोद्यमं चक्रुः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ राज्ञः शिबिरमावासं व्यलुं
पन्सर्वस्वापहारेण नाशितवंतः ॥ ६ ॥ ७ ॥ अनागसं निरपराधामेनां नेतुं माऽर्हसीति प्राह ॥ ८ ॥ अविषह्यं दुःसहम् । अतोऽनया प्रसवपर्यंतमत्रास्यताम् । ततश्चा
र्थस्य पदवीं मार्गं गतः प्राप्तः सन् । जातं पुत्रं हत्वा मोक्ष्यामीत्यर्थः ॥ ९ ॥ साक्षात्स्वगुणैरेव महान्न तु पित्रादिसंबंधात् । त्वया हेतुभूतेन संस्थां मृत्युं न यास्यति ।
तत्र हेतवो निष्किल्बिष इत्यादयः ॥ १० ॥ अनंतस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्यैनां प्रदक्षिणीकृत्य ॥ ११ ॥ इहोष्यतामित्याहेति शेषः ॥ १२ ॥

भगवन्मार्गे प्रवृत्ता इति मंदहास्येन तानभिनंदन् । मम नारदस्य । अनुशासनमुपदेशम् ॥ १ ॥ अस्माकमिति । बहुत्वं भ्रात्रपेक्षया ॥ २ ॥ ‘ दिष्ट्या शमुपजोषं च ’ इत्यमरः ॥ ३ ॥ वध्यमानाः ‘ वध– हिंसायम् ’ ॥ ४ ॥ ५ ॥ मम मातरं कयाधुनाम्नीम् ॥ ६ ॥ ७ ॥ हे सुरपते हे महाभागेति परदारहरणं त्वसुराणां कर्म न तु सुराणां किमुत सुरपतेस्तवेति भावः । महाभागस्य तवैतदन्या अपि बह्व्यः स्त्रियः संतीत्यतः किमनयाऽन्यपूर्वयेति भावः । अत्र परपरिग्रहमिति पुंस्त्वं स्त्रीलिंगविशेषणे यद्यपि नोचितं तथाप्या विष्टलिंगत्वात्तत्साधु । किञ्च परिग्रहपदार्थोक्तौ वररुचिनादावेव स्त्रीं गणित्वा ततो वृत्तांते ‘एते सर्वे परिग्रहः’ इत्युक्तं तथाहि “महिषी च सुतो भ्राता मातुलः श्यालकस्तथा । मंत्री दूताश्च सेना च सर्वे एते परिग्रहः ॥” इति । किञ्च विकृतेर्वाचकसंख्याकथनात् “प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने । प्रकृतेर्वाचकः संख्यां गृह्णाति विकृतेर्न तु ॥” इति भाष्योक्तन्यायस्यासार्वत्रिकताप्यत्राभिहिता । बहुवचनांतपाठोऽपि साधुरेव तदनुक्त्येदमेवावसीयत इति ॥ ८ ॥ अतोऽसह्यवीर्यधारिणीत्वात् । अत्र मत्कारागारे । इत्यर्थ इति । भगवन्नियं गर्भस्थकुमारहननार्थं मया धृता न तु संभोगेच्छयेति भावः ॥ ९ ॥ १० ॥ एतद्गर्भस्थहरिभक्ताय नम इति प्रणम्य च ॥ ११ ॥ यद्यपि दक्षशापान्नारदस्याश्रमो नास्ति तथापि तत्कृपया तदैवाश्रमं कल्पयित्वा तां तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथेत्यवात्सीद्देवर्षेरंति साऽप्यकुतोऽभया ॥ यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत ॥ १३ ॥ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती ॥ अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ॥ धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलम् ॥ १५ ॥ तत्तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणाऽनुगृहीतं मां नाधुनाप्यजहात् स्मृतिः ॥ १६ ॥ भवतामपि भूयान्मे यदि श्रद्दधते वचः ॥ वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः ॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥ आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ॥ अविक्रियः स्वदृग्घेतुर्व्यापकोऽसंग्यनावृतः ॥ १९ ॥

अंति समीपे॥ १३॥ अंतर्वत्नी गर्भिणी। इच्छया भर्तुरागमनानंतरं प्रसूतये। एवमपि स्वगर्भस्य क्षेमाय॥ १४॥ तस्याः शोकशांत्यै धर्मस्य तत्त्वं भक्तिलक्षणं ज्ञानमात्मानात्मविवेकस्तदुभयं प्रादात् । ईश्वरः समर्थः ॥ १५ ॥ १६ ॥ भूयाद्भवेत् । वैशारदी स्वार्थे तद्धितः । देहाद्यहंकारच्छेदनिपुणेत्यर्थः ॥ १७ ॥ काऽसौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह । जन्मेति दशभिः । जन्माद्याः जायते अस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंभूता इमे षड् भावा विकारा वृक्षे सत्येव यथा फलानां दृश्यंते तद्वदात्मनि तथैव स्थिते देहस्य दृष्टा इत्यर्थः । ईश्वरी विकारसमर्था मूर्तिर्यस्य तेन ॥ १८ ॥ तदेवं देहधर्मैस्तद्वैलक्षण्येनात्मनो देहाद्भेदो दर्शित इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहंकारादिकं त्याजयति । आत्मेति । आत्मा नित्यः "अविनाशी वारेऽयमात्मा " इति श्रुतेः । अव्ययोऽपक्षयशून्यः । " ऋचो अक्षरे परमे व्योमन् " इति श्रुतेः । शुद्धः " निरवद्यं निरंजनम् " इति श्रुतेः । एकः " एकमेवाद्वितीयम् " इति श्रुतेः । क्षेत्रज्ञः " विज्ञातारमरे केन विजानीयात्" इति श्रुतेः ।

नीतवान् । यद्वा—निजानां स्वीयानामृषीणामाश्रमो निजाश्रमस्तं निजस्य स्वस्यात्मभूतस्य हरेराश्रमो गंधमादनादिर्निजाश्रमस्तमिति वा । यद्वा—निजस्य स्वस्यैवाश्रमस्तम् "श्रुत्वैतन्नारदो वाक्यं नरनारायणोदितम् । हिमवंतं जगमाशु यत्रास्य स्वक आश्रमः" इति शांतिपर्वणि नारायणीयोपाख्यानोक्तेः । यद्वा—'उदारचरितानां तु वसुधैव कुटुंबिनी' इति न्यायात् 'अविभक्तधनाः संतः' इति न्यायाद्वा यस्य कस्याप्याश्रमो निजाश्रम एव । यद्वा—निजायास्तस्या एवाश्रमो निजाश्रमस्तामिन्द्रान्मोचयित्वा तद्गृहमेवानीय तस्यै ज्ञानमदादिति । हे वत्से इति । मातृरहितवत्सवत्पालनविषयत्वादिति तदाश्वासनार्थमुक्तमिति भावः ॥ १२ ॥ १३ ॥ एवमपि इच्छाप्रसूतावपि ॥ १४ ॥ उभयं गर्भक्षेममिच्छाप्रसवं च वा । निर्मलमिति विशेषणात् "नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम्" इत्युक्तमनुसंधेयम् ॥ १५ ॥ तर्हि त्वन्मातुश्च भक्तिः कथं न दृश्यते तत्राह—तत्त्विति । तवापि बालत्वात्कालदैर्घ्याच्च कथं न तिरोदधे तत्राह—ऋषिणेति । तेन मन्मातुस्तदनुग्रहाभावात्स्त्रीत्वकालदैर्घ्ये तत्र प्राभूतामिति भावः ॥ १६ ॥ भूयादित्याशीर्वादेन स्वस्मिन्वर्त्तमानं श्रीनारदानुग्रहं तेष्वपि भक्तिकारणत्वेनाशास्ते यदि भवन्तः श्रद्दधते तदा विशारदो भगवांस्तद्विषया । श्रद्धात इति 'श्रद्धावाँल्लभते ज्ञानम्' इति श्रीमुखोक्तेः। महदनुग्रहात् श्रद्धा श्रद्धातो भक्तिर्भक्तेः प्रेमेत्यग्रिमग्रंथादवगंतव्यम् ।स्वामिभिस्तु—विशरणं विशारोऽहंकारस्तं द्यति खंडयतीति विशारदा सैव वैशारदी स्वार्थिकाण्णंतान् ङीपि रूपमिति व्याकृतिमभिप्रेत्यैवेत्यर्थ । इत्यंतं व्याकृतम् ॥ १७ ॥ ईश्वरस्य मूर्तिः समष्टिव्यष्ट्यात्मकं शरीरं यतो भवति तेनेति विश्वनाथः ॥ १८ ॥ तदहंकारादिकं देहेऽहंभावादिकम् । जीवात्मनि षड्विकाराभावभावना त्वंपदार्थशुद्धिः सा च तत्पदार्थस्य परमात्मनश्चिंतनरूपभक्त्यैव स्यादित्यतः परमात्मस्वरूपमाह—आत्मेति द्वाभ्याम् । आत्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ॥ अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥ स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥ अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥

आश्रयः " यस्मिन्द्यौः पृथिवी चांतरिक्षम् " इति श्रुतेः । अविक्रियः " निष्कलं निष्क्रियं शांतम् " इति श्रुतेः । स्वदृक् आत्मज्योतिः " सम्राडिति होवाच " इति श्रुतेः । हेतुः "स इमाँल्लोकानसृजत" इति श्रुतेः । व्यापकः "सत्यं ज्ञानमनंतम्" इति श्रुतेः।असंगी "असंगो ह्ययं पुरुषः" इति श्रुतेः।अनावृतः"पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥ एतैर्द्वादशभिरात्मनो लक्षणैः परैः श्रेष्ठैर्विवेकसमर्थैर्देहाद्भेदम् । विद्वानसद्भावं मिथ्याबुद्धिं त्यजेत् ॥२०॥ नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवनेन ब्रह्मताप्राप्तिः कथं स्याद्यतोऽहंकारादिकं त्यजेदित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टांतमाह । स्वर्णाकरक्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैर्धमनाद्युपायैस्तदभिज्ञ उपायाभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् । आत्मयोगैरात्मप्राप्त्युपायैः । ब्रह्मगतिं ब्रह्मताम् । अध्यात्मविदात्माधिकृतकार्यकारणसंघातज्ञाता ॥२१॥ अध्यात्मविवेकमात्मप्राप्त्युपायमाह । अष्टाविति त्रिभिः । मूलप्रकृतिर्महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ त्रयः सत्त्वादयस्ते च प्रकृतिगुणा एव न तु भिन्नाः । एकादशेंद्रियाणि पंच

परमात्मा नित्यः अत्र प्रमाणमाह—अविनाशीति । अरे मैत्रेयि परमे व्योमन्यरमात्मनि । अक्षरेऽपक्षयशून्ये । ऋचः प्रतिपादिकाः संतीति । निर्गतमवद्यं मालिन्यं प्रकृतिसंगजं यत्रेति । न द्वितीयो यस्मादित्यद्वितीयम् । अरे मैत्रेयि, विज्ञातारं सर्वज्ञातारं तद्भिन्नस्य ज्ञातुरभावात्तं केन विजानीयात्स एव सर्वज्ञाता न तस्यान्यो ज्ञातास्तीत्यर्थः । यस्मिन्ब्रह्मणि द्यौः स्वर्गादिकम् । आत्मानं द्योतयतीत्यात्मज्योतिः 'तद्ब्रह्मावेदहं ब्रह्मास्मि' इति श्रुतेर्वा । श्रुतयः स्पष्टार्था एव । पूर्णत्वमादायेति बाह्याभ्यंतरत्वहीनत्वं व्यापकत्वम् । अत्र संदर्भः—एको न तु देहादिसंघातरूपः । क्षेत्रज्ञो ज्ञातृत्वादिधर्मकः इंद्रियादीनामाश्रयः स्वाभाविकज्ञातृत्वादेवाविक्रियः । स्वदृक् स्वस्मै स्वयंप्रकाशः । हेतुः सर्गादेर्निमित्तं 'हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारके' इति व्यापको व्याप्तशीलः । अंसगी अनावृतश्च स्वतःप्रकाशरूपत्वात् ॥ १९ ॥ आत्मनः परमात्मनः परैर्जीवात्मलक्षणेभ्योऽप्युत्कृष्टैर्नित्यचिंतितैरिति शेषः । देहे दैहिकेषु चासदवास्तवभावं परमात्मचिंतनं विना सत्यपि विवेके दिग्भ्रम इव मोहो न निवर्त्तत इति भाव इति विश्वनाथः । जीवगोस्वामिनस्तु—'मोहजं त्यजेत्' इति । देहाद्यधिकरणकमोहजस्यैव त्यागो न तु स्वरूपभूतस्याहमर्थस्येति व्यज्यते । तदेवं जीवस्तदंशत्वात्सूक्ष्मज्योतीरूप इत्येके । तथैव हि कौस्तुभांशत्वेन व्यंजितं तथा च स्कांदे प्रभासखंडे जीवनिरूपणे ''न तस्य रूपं वर्णो वा प्रमाणं दृश्यते क्वचित् । न शक्यं कथितुं वापि सूक्ष्मश्चानंतविग्रहः ॥ बालाग्रशतभागस्य शतधा कल्पितस्य च । तस्मात्सूक्ष्मतरो देवः स चानंत्याय कल्पते ॥ आदित्यवर्णं सूक्ष्माभमब्बिन्दुरिव पुष्करे । नक्षत्रमिव पश्यंति योगिनो ज्ञानचक्षुषा ॥'' इति ॥ २० ॥ अत्राक्षिपति—नन्विति । चक्रवर्त्ती त्वात्मशब्देनेह परमात्मानमेव गृह्णातीति ध्येयम् । आत्मप्राप्त्युपायैश्चिंतनाद्यैरित्यर्थ ॥ २१ ॥ तदुक्तं सतत्यां कृष्णमिश्रेण मूलप्रकृतिः सर्वजनिका प्रकृतिरविकृतिरजन्या तथा चाजन्यत्वे सति जनकत्वं प्रकृतित्वम् । अजन्यत्वं प्रकृतित्वमित्युक्ते पुरुषेऽतिव्याप्तिस्तत्राप्यजन्यत्वस्य सत्त्वात् । अतो जनकत्वमिति । जनकत्वं प्रकृतित्वमित्युक्ते महत्तत्त्वादावतिव्याप्तिस्तस्याप्यहंकारज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा ॥ अत्रैव मृग्यः पुरुषो नेतिनेतीत्यतत्त्यजन् ॥ २३ ॥ अन्वयव्यतिरेकेण विवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥ बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ॥ ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥

महाभूतानि चेति षोडश । पुमानात्मैकः प्रोक्तः कपिलादिभिराचार्यैः । एकत्वे हेतुः । एषु साक्षित्वेनान्वयात् । तदुक्तम् । " मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः " इति ॥ २२ ॥ जगज्जंगमम् । तस्थुः स्थावरम् । अत्रैव सर्वसंघातात्मके देह एव पुरुषो मृग्योऽन्वेष्टव्यः । सुशकं चैतदित्याह । नेतिनेतीत्यन्यापोहे क्रियमाणे स्वयमेवातत्त्यजन् । अनात्मवर्गात्पृथगुपलभ्यमान इत्यर्थः ॥ २३ ॥ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः । अत एव मणिभ्यः सूत्रस्येवैकैकव्यतिरेकश्च तयोर्द्वैक्यम् । तेन यो विवेकः पूर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः । "यतो वा इमानि भूतानि जायंते " इत्यादिश्रुत्युक्तसर्गाद्यनुसंधानेनेत्यर्थः । विमृशद्भिर्विचारयद्भिः असत्वरैरव्यग्रैर्मृग्य इति पूर्वेणान्वयः ॥ २४ ॥ विमर्शप्रकारमाह । बुद्धेरिति

नकत्वादतोऽजन्यत्वे सतीत्युक्तम् । महदाद्या महत्तत्वाहंकारपञ्चतन्मात्राणि । प्रकृतिविकृतयः तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वे सति जन्या इत्यर्थः । तत्त्वविभाजकोपाधिरहंकारत्वं तदवच्छिन्नोऽहंकारस्तज्जनकत्वं महत्तत्वेऽस्ति तस्य च प्रकृतिजन्यत्वमपीति लक्षणसमन्वयः । एवं तत्त्वविभाजकोपाधिः शब्दत्वादिस्तदवच्छिन्नश्च शब्दादिस्तज्जनकत्वमहंकारे तस्य महत्तत्त्वजन्यत्वमप्यस्तीति तथा तत्त्वविभाजकोपाधयः पृथ्वीत्वजलत्वतेजस्त्ववायुत्वाकाशस्वरूपास्तदवच्छिन्नाः पृथिव्यादयस्तज्जनकत्वं गंधतन्मात्रादेस्तस्य चाहंकारजन्यत्वमप्यस्तीति ध्येयम् । तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वं प्रकृतिविकृतित्वमित्युक्ते प्रकृतावतिव्याप्तिस्तथाहि तत्त्वविभाजकोपाधिर्महत्तत्त्वत्वं तदवछिन्नं महत्तत्त्वं तज्जनकत्वं प्रकृतेरिति अतो जन्या इत्युक्तम् । जन्यत्वं तथात्वमित्युक्ते चाकाशादावतिव्याप्तिरतस्तत्त्वविभाजकोपाध्यवाच्छिन्नजनकत्वे सतीत्युक्तम्।आकाशादीनां तत्त्वविभाजकोपाध्यवच्छिन्नजनकत्वाभावादिति । षोडशक इति । एकादशेंद्रियाणि पञ्चाकाशादीनि महाभूतानि च विकार इति । तत्त्वविभाजकोपाध्यवच्छिन्नाजनकत्वे सति जन्य इत्यर्थः । पुरुषस्तत्सर्वभोक्ता न प्रकृतिर्न विकृतिः । अजनकत्वे सत्यजन्य इत्यर्थः । आद्यविशेषणेन प्रकृतेर्निरासः । द्वितीयेनातींद्रियसामान्यादिनिरासः । अतींद्रियं महतत्त्वादि तन्निष्ठस्य जन्यत्वमेव महत्तत्त्वस्य यथा जन्यत्वं तथा तस्यापि सांख्यमते जन्यत्वम् । नैयायिकमते यथा जातिर्नित्या तथा सांख्यमते न किन्तु द्विविधाः पदार्थाः सामान्या विशेषाश्च यथा मृत्तिका सामान्या घटश्च विशेष इति । तदेवं पंचविंशतितत्त्वान्युक्तानि । सेश्वरसांख्यनये तु पुरुषपदेनैवेश्वरस्यापि ग्रहणं मायापदेन चेश्वरसंकल्प एवोच्यते जीवादृष्टं वाऽविद्याशब्देन च जीवस्य भ्रम एवोच्यते नान्यत् अतो न तदकथनकृता न्यूनतेति संक्षेप इति सांख्यकारिकार्थः । समन्वयात् सम्यगन्वयं संबंधं प्राप्य वर्त्तमान आत्मा एक एवेत्यर्थः । यद्वा—समन्वयं संबंधमतति सातत्येन प्राप्नोतीति समन्वयात् । 'अत—सातत्यगमने' क्विबंतः ॥ २२ ॥ इत्यर्थ इति । नेतिनेतीत्यादिश्रुतिभिरन्यस्येंद्रियादेस्त्यागे कृतेऽनात्मत्वेन निश्चिते स्वयमेवात्मोपलब्धिः स्यादिति भावः । विश्वनाथस्तु—तृतीयार्थे प्रथमामतत्यजद्भिरिति व्याचख्यौ ॥ २३ ॥ अत एव सर्वत्रानुस्यूतत्वादेव । तयोरन्वयव्यतिरेकशब्दयोः पूर्वोक्तो वात्मानात्मधर्मैर्यो विवेकप्रकारस्तेन च । इत्यर्थ इति । न हि विना कारणं कार्यमुत्पद्यतेऽतो जगत उत्पत्त्यादिरूपकार्येणापीश्वरोऽनुमीयते इति भावः । विश्वनाथः—ननु तर्हि देहोऽतन्मय एव तथा चातत्त्यागे शून्यमेवावशिष्यते इत्यत आह—अन्वयेति । देहे परमात्मनोऽन्वयः परमात्मनि देहव्यतिरेको यः प्रसिद्धस्तेन जडानामपि बुद्ध्यादीनां यदन्वयेनैव प्रवृत्तिः बुद्ध्यादिव्यतिरिक्तश्च यः स परमात्मा देहस्थ इति यो विवेकस्तेन तथा उशता शुद्धेन मनसेति पूर्ववत् ॥ २४ ॥ यदन्विता बुद्धिः प्रवर्त्तते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ॥ स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्वयात् ॥ २६ ॥ एतद्द्वारो हि संसारो गुणकर्मनिबंधनः ॥ अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥ तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम् ॥ बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥ तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यैरंजसा रतिः ॥ २९ ॥ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ॥ संगेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥

द्वाभ्याम् । अध्यक्षः साक्षी ॥ २५ ॥ अत एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैरनात्मधर्मत्वे निरस्तैः । बुद्धिधर्मत्वे हेतुः त्रिवर्णैस्त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात्कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः । आत्मा तु बुद्ध्यन्वयात्तदवस्थावानिवाभाति न तत्त्वत इत्यात्मनः स्वरूपं बुद्ध्येज्जानीयादित्यर्थः । अत्र दृष्टांतः । कुसुमधर्मैर्गंधैस्तदाश्रयं वायुमिव ॥ २६ ॥ ननु तर्हि यथा कुसुमोपाधिकोऽपि वायोर्गंधो विवेकज्ञानेन निवर्तते एवमात्मनः संसारो न निवर्तत इत्याशंक्याह । एतद्द्वारो बुद्धिद्वारकस्तदवस्थाद्वारको वा संसारो न स्वतः। हि यस्माद् बुद्धेर्ये गुणाः कर्माणि च तैर्निबध्यत इति तथा स चाज्ञानमूलोऽतोऽपार्थो मिथ्याभूतोऽपि स्वप्न इवेष्यते। वायोस्तु गंधद्रव्यसंबंधस्य वास्तवत्वाद्विषमो दृष्टांतः॥ २७ ॥ यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं दहनम् । किं तत् योगः। कथंभूतः। धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा ॥ २८ ॥ तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाह । तत्रेति पंचभिः । यैर्धर्मैर्यथा यथावदनुष्ठितैर्वा भगवति श्रीनारायणे रतिरिति यदयमुपायो भगवतोक्तः । तथा च गीतासूक्तम् । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्" इति " भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इत्यादि च ॥ २९ ॥ तत्रैवांतरंगान्धर्मानाह । गुरोः शुश्रूषया प्रेम्णा सर्वेषां लब्धानामर्पणेन च ॥ ३० ॥

स परमात्मा यो बुद्धावन्वितः स जीवात्मेति भेदः ॥ २५ ॥ इत्यर्थ इति । बुद्ध्यध्यासकृत एवात्मनोऽवस्थावत्त्वमिति भावः । अत्रान्यधर्मेणान्यज्ञाने ॥ २६ ॥ अत्राक्षिपति—नन्विति अतोऽज्ञानमूलत्वात् ॥ २७ ॥ तस्मान्निवृत्तये यतितव्यमित्याह—तस्मादिति उं । रुद्रं पातीत्युपो विष्णुः । 'उपोधिके च' इति सूत्राच्च सर्वाधिके हरौ रमो रमणं सर्वदा चिंतनं यत्स एव योग इति वार्थः ॥ २८ ॥ तत्र बीजनिर्हणविषये । उपायसहस्राणां मध्येऽयं भगवता श्रीनारायणेनोदितः । अन्ये तु मुनिभिरुदितत्वादतो निकृष्टा एवेति भावः । अयमेव कस्तत्राह—यदिति । यैर्गुरुशुश्रूषणाद्यंगैरुत्पन्नाद्यस्माद्भक्तियोगाद्रतिर्भवति । अयं भक्तियोग एवोपाय इत्यन्वयः । अत्र पंचम्यंतयत्पदादंजसा शब्दाच्च रतिरेव भक्तियोगस्य मुख्यं फलं बीजनिर्हरणं त्वानुषंगिकमयत्नत एव शुद्धभक्तानां भवेत् । तदुक्तं "जरयत्याशु या कोशं निगीर्णमनलो यथा" इति । संदर्भस्तु—अथ स्वप्रतिपत्तिं प्रतिपादयति—तत्रेत्यादिभिः । तत्र पूर्वोक्ते त्रिगुणात्मकर्मणां बीजनिर्हरणेष्युपायसहस्रैः सिद्धानां मध्येऽयमेवोपायो भगवता श्रीनारदेन मां प्रत्युपदिष्टः । यैरुपायसहस्रैः सिद्धाद्यस्मादुपायाद्यथा यथावदीश्वरे भगवत्यंजसा व्यवधानांतरं विनैव रतिः प्रीतिर्भवति । अतो बीजनिर्हरणमपि तस्यानुषंगिकमेव फलमिति भावः ॥ २९ ॥ तत्रैव भगवद्व्रतावेव । स्नपनसंवाहनादिरूपया गुरुसेवया साधवः सदाचारा ये भक्तास्तेषां संगेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षाऽर्हणादिभिः ॥ ३१ ॥ हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ॥ इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥ एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिम् ॥३३॥ निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ॥ ३४ ॥ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनम् ॥ मुहुः श्वसन् वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥ तदा पुमान् मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३६ ॥ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् ॥ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥

तस्य लिंगानां मूर्तीनामीक्षणमर्हणमादिर्येषां वंदनादीनां तैश्च॥ ३१ ॥ ३२॥ निर्जितः षण्णां कामक्रोधलोभमोहमदमत्सराणामिंद्रियाणां वा वर्गो यैः॥ ३३॥ भगवद्भक्तेर्लिंगान्याह। निशम्येति त्रिभिः । गुणान्भक्तवात्सल्यादीन् । अतिहर्षेणोद्गताः पुलका अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कंठो मुक्तकंठ उद्गायति॥ ३४ ॥ ३५॥ तस्य भावश्चेष्टादिस्तस्य भावो भावना तेनानुकृते आशयाकृती मनःशरीरे यस्य निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः सम्यगेति प्राप्नोति ॥ ३६ ॥ ततः किमत आह । अधोक्षजस्याऽऽलंभं मनसा स्पर्शम् । पाठान्तरे तस्याश्रयणम् । अशुभात्मनोऽशुभो रागादियुक्त आत्मा मनो यस्य । संसृतिचक्रशातनं तन्निवर्तकं बुधा विदुस्तदेव ब्रह्मणि निर्वाणं

एतेनाचाररहितानां भक्तानामपि संगो न कार्यः कल्याणेप्सुनेति द्योतितम् । भक्तिरप्याचारहीना न शोभते कृत्तनासिकस्त्रलंकृतस्त्रीव "नैवाचारं विना भक्तिः कृत्तनासा यथाबला" इति वाक्यात् ॥ ३० ॥ ३१ ॥ तैस्तदीक्षितैः कामैर्भोगैः । इतीत्थं विमृश्य ॥ ३२ ॥ ३३ ॥ कर्माणि नवनीतचौर्यादीनि । वीर्याणि गोवर्द्धनोद्धरणादीनि । प्रोत्कंठ उच्चस्वरः ॥ ३४ ॥ ग्रहग्रस्त इव भूताविष्ट इव ॥ ३५ ॥ तस्मिन्भावा दास्यसख्यादयस्तेषां भावना दासोऽहं सखाहमित्याद्यात्मना मननं तेनानुकृते अनुरूपीकृते आशयाकृती मनःशरीरे यस्य स तथा ॥ ३६ ॥ ततोऽधोक्षजालंभात् । पाठांतरे अधोक्षजालंबमिति पाठे । अत्र विश्वनाथः—ननु ब्रह्मनिर्वाणसुखमेव पुरुषार्थसार इति प्रसिद्धिः सत्यं तदप्यधोक्षजसंयोग एवांतर्भवतीत्याह—अधोक्षजस्यालंभं मनसेषत्स्पर्शं साक्षात्प्राप्तिं वा संसृतिचक्रस्य शातनं निवर्तकं विदुर्जानंति तदेव ब्रह्मनिर्वाणसुखं च विदुः । अधोक्षजस्यैव ब्रह्मत्वात् तच्चरणमाधुर्यानुभवस्यैव परमानंदरूपत्वेन निर्वाणसुखरूपत्वात् । तत्र दास्यादिभावत्वेन ममताविशेषोत्थं तु सुखमधिकमप्यपारमेव यथा सर्वजनसुभगे परमाह्लादके चंद्रे दृष्टे यः स्वभाविक आनंदस्तस्मात्कोटिगुणित आनंदः स्वपुत्रे षंढान्धबधिरेपि सर्वजनदुर्भगेपि ममतोत्थः स्यादित्यतो भगवति दास्यादिभाववत्त्वे परब्रह्मणि स्वरूपोत्थ एव परमानंदात्रधिस्तत्रैव यदि ममतोत्थोऽपि स्यात्तदा किं वक्तव्यमानंदपारावारपरंसहस्रसंमर्दमप्यपातित्वसौभगोत्कर्षः महामहत्त्वमत एवोक्तम् 'या निर्वृतिस्तनुभृताम' इति । अन्यत्र च "ब्रह्मानंदो भवेदेष चेत्परार्द्धगुणीकृतः । नैति भक्तिसुखांभोधेः परमाणुतुलामपि" इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः ॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥ रायः कलत्रं पशवः सुतादयो गृहा महीकुंजरकोशभूतयः ॥ सर्वेऽर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥ एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ॥ तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥ यदर्थ्यर्थ्येह कर्माणि विद्वन्मान्यसकृन्नरः ॥ करोत्यतो विपर्यासममोघं विंदते फलम् ॥ ४१ ॥

लयो मोक्षस्तदात्मकं सुखं विदुः । हृदीश्वरमंतर्यामिणम् ॥ ३७ ॥ भक्तिरशक्येति च न मंतव्यमित्याह । क इति । छिद्रवदाकाशवद्धृदि तिष्ठतो विषयाणामुपपादनैरर्जनैः किम् । तत्र हेतुः । सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे सूकरादिसाधारण्यापत्तेरित्यर्थः । न चैवमादौ पौनरुक्त्यदोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ॥ ३८॥ अनर्थकं विषयार्जनमित्याह । रायोर्थाः क्षणभंगुरमायुर्यस्य तस्यैते कियत्प्रियं कुर्वंति । तदुक्तमितिहासेषु । "धनं हि पुरुषो लोके पुरुषं धनमेव वा ॥ अवश्यमेकं त्यजति तस्मात्किं धनतृष्णया" इति ॥ ३९ ॥ "यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरम् ॥ अभिलाषोपनीतं च तत्सुखं स्वपदास्पदम्" इत्येवंभूताः स्वर्गादिभोगा अपि न सेवार्हा इत्याह । एवं हीति । क्षयिष्णुत्वे हेतुः क्रतुभिः कृता इति । तद्यथेह "कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः । अत एव पुण्यतारतम्येन सातिशयाः । न च निर्मलाः स्पर्धादिमत्त्वात् । न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन् ॥ ४० ॥ किं च यदर्थ्यर्थ्य यत्संकल्प्य । अतः संकल्पिताद्विपर्यासं

पाठांतरे । अधोक्षजस्यालंबो विषयालंबनं यत्र तम् । अर्थाद्दास्यसख्यादिरसं हृदीश्वरं हृदयनाथमिति दास्यादिभावविशिष्टा भक्तिर्व्यंजिता ॥ ३७ ॥ तत्र विषयोपार्जने सर्वदेहिनां पशुपक्ष्यादीनां सामान्यतस्तुल्यत्वं स्यादित्यर्थ इति । हारिभजनं विना केवलविषयसेविनस्तु द्विपदपशव एवेति भावः । " ये मानुष्यं सर्वयत्नैरलभ्यं संप्राप्यापि श्रीहरिन्नो भजंते । ते विज्ञेया मानवाः शृंगपुच्छैर्हीना लोके सैरिभा ऐंद्रियाक्ताः ॥ " इत्यभियुक्तोक्तेः । अत्र कौमारे । आचरेदित्यादिना 'न ह्यच्युतं प्रीणयतो बह्वायासः' इत्यादिपूर्वग्रंथेन चोक्तोप्ययमर्थः पुनस्तस्य कथने पुनरुक्तिदोषो नाशंक्य इत्याह । न चैवमादाविति । कथितकथनस्यैवानुवादपदार्थत्वात् । अत्र विश्वनाथः—सर्वश्रेष्ठाया अपि भक्तेः सुखसाध्यत्वमाह—कोतीति । आत्मनो जीवस्य सख्युः " सयुजा सखाया " इति श्रुतेः । न हि सख्युरुपासने किंचित्कष्टमिति भावः । उपास्यस्य स्वतो विद्यमानत्वात्प्रियत्वाच्च उपासनस्य च श्रवणादिरूपत्वात्तत्साधनानां श्रोत्रादीनां च स्वत एव विद्यमानत्वान्नहि कुतश्चन काचन तत्सामग्र्या नेतव्येति भावः । परं नरके साधनेऽपि श्रमोऽस्तीति व्यंजयन्वैषयिकसुखप्रवृत्तिं निंदति विषयाणां स्रक्चन्दनवनितादीनामुपपादनैर्द्रव्यादिनोपार्जनैः किं न किमप्याविक्यमित्यर्थः । तत्र हेतु—सर्वदेहिनामिति । स्वामिचरणोक्त एव । यद्वा—सर्वदेहिनां सामान्यतोऽसाधारणत्वेन हृदि स्थितत्वात्सख्युरिति योज्यम् ॥३८॥ आदिना पौत्रादिग्रहः । भूतिरैश्वर्यम् । धनादितृष्णात्यागे प्रमाणमाह—तदुक्तमित्यादिना ॥ ३९ ॥ संभिन्नं मिलितं ग्रस्तं विनाशि । अनंतरमव्यवहितम् । अभिलाषे सत्येवोपपन्नं तत्क्षणमेव प्राप्तं यत्सुखं तत्स्वर्गपदस्य स्वर्गशब्दस्यास्पदं वाच्यमित्यर्थः।स्वर्गपदं स्वर्गस्थानमास्पदं निवासभूर्यस्य तदिति वा इत्येवंभूता ईदृशलक्षणलक्षिता श्रुतिस्तु व्याख्यातचरा । अत एव कृतकत्वादेव । न दृष्टं श्रुतं च शास्त्रतात्पर्यज्ञैर्दूषणं यत्र तम् । आत्मलब्धये आत्मकर्तृकहरिप्राप्तये परमात्मप्राप्तये वा । यद्वात्मरूपरतस्य प्राप्तये अन्यथा तत्स्वर्गनरकादिकर्दमे क्षिप्तं नष्टमेव जानीतेति भावः । संदर्भस्तु—आत्मनो लब्धये भजतान्यथा नाशयिष्यथेति भावः ॥४०॥ हरिभजनेतरकर्मणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः ॥ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥ ४२ ॥ कामान् कामयते काम्यैर्यदर्थमिह पूरुषः ॥ स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ॥ ४३ ॥ किमु व्यवहितापत्यदारागारधनादयः ॥ राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥ किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ॥ अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ॥ ४५ ॥ निरूप्यतामिह स्वार्थः कियान् देहभृतोऽसुराः ॥ निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥ ४६ ॥ कर्माण्यारभते देही देहेनात्मानुवर्तिना ॥ कर्मभिस्तनु ते देहमुभयं त्वविवेकतः ॥ ४७ ॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ॥ भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥ सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ॥ भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥ ४९ ॥

विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥ तदेव दर्शयति । सुखायेति । ईहया इच्छया क्रियया वा यः पूर्वमनीहाया हेतोः सुखेनावृतो व्याप्त आसीत्स ईहया दुःखमाप्नोत्येव ॥ ४२ ॥ किं च कामान्भोगान्काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यो न त्वात्मीयो भंगुरश्च ॥ ४३ ॥ किमु देहाद्व्यवहिता अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यम् ॥ ४४ ॥ किं च स्वयं पुरुषार्थरूपस्य किमेतैरतितुच्छैरित्याह । किमेतैरिति ॥ ४५ ॥ भोगावसराभावाच्चैतैः क उपयोग इत्याह । निरूप्यतामिति । प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियान्स्वार्थ इति वाऽन्वयः ॥ ४६ ॥ ननु कर्मसु समाप्तेषु भोगावसरः स्यात्तत्राह । कर्माणीति । न चेदं कर्म तस्य फलं देहादिकं च परमार्थ इत्याह । उभयं कर्म च देहं च । अविवेकतोऽज्ञानेनैव तनुते ॥ ४७ ॥ अर्थादयो यदपाश्रया यदधीनाः ॥ ४८ ॥ भूतानां प्राणिनाम् । जीवसं

फलमपि व्यभिचार्येवेत्याह–किञ्चेति । यथा सुखार्थमपि कृतस्त्रीसंगादिः पुत्राद्यनुत्पत्त्यादिनाऽनर्थहेतुरेव स्यादिति भावः ॥ ४१ ॥ तदेव फलवैपरीत्यमेव ॥ ४२ ॥ भंगुरो विनाशी । याति नश्यति । उपैति पुनर्दुःखदानायोत्पद्यायाति ॥ ४३ ॥ आदिना मित्रादिग्रहः ॥ ४४ ॥ नित्यानित्ययोः संबंधोऽपि नानुरूप इत्याह–किञ्चेति । नित्यश्चासावानंदमह आनंदोत्सवस्तस्योदधेर्नित्यसुखसमुद्रस्यात्मन एतैः किं क उपयोगः । यद्वा नित्यो भजनरूपानंदरसोदधिर्यस्य भक्तजनस्यात्मनो जीवस्येत्यर्थः ॥ ४५ ॥ हे असुरा इति । इंद्रियपोषणपराणां कदापि सुखं नोत्पद्यत इति भावः । निषेकादिष्विहादिना गर्भाद्यवस्थानवकग्रहः । “ निषेकगर्भजन्मानि बाल्यकौमारयौवनम् । वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥ ” इत्येकादशस्कंधोक्तेः । प्रथमव्याख्याने कियान् स्वार्थ इह करणापेक्षानिवृत्त्यभावादाह–कर्मभिः कियान्स्वार्थ इति ॥ ४६ ॥ अत्राक्षिपति–नन्विति । स्वप्ने स्वप्नवदुभयमविवेककार्यमेवेत्यर्थः । यद्वा–देहेन मानुषदेहेन कर्मसाधकेन देहं स्वर्गिशरीरम् उभयं देहद्वयमविवेकतः तदुभयस्याहं कर्म कुर्वे इति अहंकर्मफलं स्वर्गमुपभुंज इत्यभिमानमूलत्वादभिमानस्याविवेकमूलत्वात् । आत्मानश्च देहद्वयातिरिक्तत्वादिति ॥ ४७ ॥ यस्माद्धरिभक्तिं विना सर्वमसदेव तस्माद्धेतोः । अनीहया निरुपाधिकया । अनीहं तथैव निरुपाधिकृपाकरम् । “ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ” इति वक्ष्यमाणत्वात् । यदपाश्रया यदधीनाः । अनडुहां वृषाणां कर्तृत्वभोक्तृत्वादयः स्वाम्यधीना इवेत्यर्थः ॥ ४८ ॥ यस्मात्सर्वेषां देहश्च जीवश्च परमात्मा च प्रियश्च वस्तुतो हरिरेव तस्मात्तं भजतेत्याह–सर्वेषां देवतिर्यगादीनामप्यात्मा परमात्मा स एवेश्वरः। स्वैनैव कृतैः कृतानामिति । देहोऽपि तत्कारणत्वात्स एव जीवसंज्ञा जाता यस्य सः । जीवस्य तदीयतटस्थशक्तिरूपत्वात् । यद्वा–सर्वेषां प्रियत्वादपि तमेव भजतेत्याह सर्वेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव च ॥ भजन्मुकुंदचरणं स्वस्तिमान् स्याद्यथा वयम् ॥ ५० ॥ नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः ॥ प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता ॥ ५१ ॥ न दानं न तपो नेज्या न शौचं न व्रतानि च ॥ प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनम् ॥ ५२ ॥ ततो हरौ भगवति भक्तिं कुरुत दानवाः ॥ आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥ दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ॥ खगा मृगाः पापजीवाः संति ह्यच्युततां गताः ॥ ५४ ॥ एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणम् ॥ ५५ ॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादेन दैत्यपुत्राणामनुशासने ब्रह्मस्वरूपवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥

ज्ञितोंतर्यामी॥ ४९॥ असुराणामस्माकमत्राऽनधिकार इत्यपि न वाच्यमित्याह। देव इति पंचभिः॥ ५०॥ ५१॥ अमलया निष्कामया। अन्यद्विडंबनं नटनमात्रम् ॥ ५२॥ ॥ ५३॥ अच्युततामममृतत्वम् ॥ ५४॥ अध्यायद्वयोक्तमुपसंहरति। एतावानिति। तदीक्षणं गोविंददृष्ट्या संमाननम् ॥ ५५॥ इति श्रीसप्तमे टीकायां सप्तमोऽध्यायः ॥ ७॥

भूतानां यो जीवसंज्ञो जीवनामा ततोऽपि प्रियः ॥ ४९ ॥ यस्मादेवं तस्मात्सर्व एव भक्तिं कुर्यादित्याह—देव इति। स्वस्तिमान् ऐहिकामुष्मिककल्याणभाक् यथा वयमिति। बहुत्वं तु "एकत्वं न प्रयुंजीत गुर्वात्मनि कदाचन" इति स्मृतेरहमित्यर्थः। अनेकघोपायैर्विषाग्निप्रवेशादिभिर्मार्यमाणोऽपि केवलहरिभजनप्रभावेणैव न मृत इत्यैहिकमत्र कल्याणं भवद्भिः प्रत्यक्षीकृतमेतेनैव पारलौकिकं तन्निश्चिनुतातो यूयमपि तमेव भजतेति भावः ॥ ५० ॥ द्विजत्वं त्रिवर्णत्वम्। ऋषित्वं ब्राह्मणत्वम्। वृत्तं सद्वृत्तम्। 'वृत्तं स्वरूपे चरिते' इति यादवः। बहुज्ञता पांडित्यम्। नालं न समर्थमित्यर्थः। हे असुरात्मजा इति। वयमसुरकुलोद्भूता न भक्त्यधिकारिण इति मा शंकध्वमिति भावः ॥ ५१ ॥ तपः स्वधर्मनिष्ठत्वमिंद्रियसंयमो वा। इज्या यागः। शौचं कर्मानासक्तिः 'कर्मस्वसंगमः शौचम्' इति श्रीमुखोक्तेः। व्रतानि कृच्छ्रादीनि। मलं कामस्तद्रहितया "मलं पापे च विष्ठादौ वासनायां च धारणे। कपटे मलिने सृष्टौ" इति धरणिः। नटनमात्रमनुकरणमात्रमित्यर्थः ॥ ५२ ॥ यतो भक्तिं विनान्यद्विडंबनमेव ततो हेतोः। सर्वत्र सर्वस्मिन्देशे काले च आत्मौपम्येन आत्मनि यथानुऽऽकूल्येन कायमनोवचनवृत्तिरूपं भजनं कुरुत तद्वदपि कुरुत। विश्वनाथस्तु—आत्मौपम्येनेत्यत्र सुखदुःखादिदृष्ट्येति शेष इत्याह—दानवा इत्यत्र दानं भक्त्युपदेशस्तद्योग्या इति भावः ॥ ५३ ॥ व्रजौकसः खगा मृगाश्च पापजीवा नीचजातयोऽपि व्रजवासिनः श्रीकृष्णभक्त्याऽच्युततां च्युतिराहित्यमिता इत्यन्वयः। संदर्भस्तु—व्रजौकसोऽत्र नीचसहपाठात्। 'किरातहूणांध्रपुलिंदपुष्कसा आभीरकंका यवना खसादयः' इत्यादाविव गवोपजीवना नीचजातिविशेषा एवाभीरा ज्ञेयाः। न तु "कृषिवाणिज्यगोरक्षं कुसीदं तुर्यमुच्यते। वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम्" इतिवद्वैश्यभेदा इति विशेषः प्रतिपत्तव्य इत्याह। विश्वनाथस्तु—न च भक्तिः सजात्यादिकमपेक्षत इत्याह—दैतेया इति। अच्युततां चिन्मयशरीरत्वेनाच्युततुल्यत्वम्। यद्वाऽच्युततामच्युतिं गताः कर्मिण इव न च्युता भवंति ब्रह्मादिलोकत इत्यर्थः। तदुक्तं काशीखंडे—"न च्यवंते च यद्भक्ता महत्यां प्रलयापदि। अतोच्युतोऽखिले लोके विद्वद्भिः परिकीर्त्तितः ॥" इति ॥ ५४ ॥ एकांत भक्तिरनन्याभक्तिर्यत् यस्यां भक्तौ सत्यां सर्वत्रैव स्थावरजंगमवस्तुषु तदीक्षणं भगवतो भावनापरिपाकेन भगवदीक्षणं यदुक्तम् "नारायणमयं धीराः पश्यंति परमार्थिनः। जगद्धनमयं लुब्धः कामुकः कामिनीमयम् ॥" इति। यथा प्रह्लादोऽयं स्तंभेऽपि भगवंतमपश्यत् ॥ ५५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ॥ जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥ १ ॥ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थिताम् ॥ आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयम् ॥ कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे ॥ ३ ॥ क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् ॥ आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥ प्रश्रयावनतं दांतं बद्धांजलिमवस्थितम् ॥ सर्पः पदा हत इव श्वसन्प्रकृतिदारुणः ॥ ५ ॥ हे दुर्विनीत मंदात्मन् कुलभेदकराधम ॥ स्तब्धं मच्छासनोद्धूतं नेष्ये त्वाऽद्य यमक्षयम् ॥ ६ ॥ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः ॥ तस्य मेऽभीतवन्मूढ शासनं किंबलोऽत्यगाः ॥ ७ ॥

अष्टमेऽतिरुषा सूनुं निघ्नन्दैत्यो हतः स्वयम् ॥ आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥ १ ॥ अंतः कृपासुधापूर्णो बहिःक्रोधो नृकेसरी ॥ दैत्येंद्रमरिभावेन भजंतं समभावयत् ॥ २ ॥ १ ॥ एकांतसंस्थितां प्रत्यङ्निष्ठाम् । यथा यथावत् ॥ २ ॥ स च पुत्रं हंतुं मनो दधे । कथंभूतः कोपस्यावेशेनोद्रेकेण चलद्गात्रं वपुर्यस्य सः ॥ ३ ॥ क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ॥ ४ ॥ ५ ॥ हे मंदात्मन्नल्पबुद्धे मदाज्ञाऽतिलंघिनं त्वामद्य यमालयं नेष्यामि ॥ ६ ॥ अभीतवत्

स च नृसिंहः (१) स्वमात्मानमरिभावेन भजंतम् । अभावयदमारयत् । अभावं करोतीत्यभावयति लङि चाभावयत् । यद्वा—स्वं स्वीयं पार्षदं कर्त्तुमनाशयत् । त्रिजन्मस्वेकं जन्म समापयदित्यर्थः । अरिभावेन भजंतमपि स्वं स्वीयमेवाचिंतयत् । 'भू—मिश्रीकरणचिंतनयोः ' इत्यस्य वा रूपम् । स्वं स्वीयमभावयदकरोत् स्वर्गस्थदेवेषु तमस्थापयदित्यर्थः । " मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः " इति वक्ष्यमाणत्वात् । देवा हि भगवदेकपरत्वाद्भगवता एव तेषु भगवतोऽपि स्वीयाभिमानो ' सर्वे देवा हि मामकाः ' इति पुराणांतरे भगवदुक्तेः (२) अथ प्रह्लादोपदेशादनंतरम् । तेन प्रह्लादेनानुवर्णितं विष्णुं तद्भक्तियोगं वा निरवद्यत्वाद्रागद्वेषमलराहित्येन शुद्धत्वात् स्वीचक्रुः । गुरुभ्यामुपशिक्षितं तु सावद्यत्वाद्रागद्वेषोत्पादकत्वेनाशुद्धत्वान्न स्वीचक्रुरित्यर्थः ॥ १ ॥ अथ सर्वबालकर्तृकहरिभक्तिदर्शनानंतरम् । एके मुख्यश्चासावंतोऽवधिरेकांतो विष्णुर्यद्वैकस्मिन्हरावन्तो निष्ठा यस्य स एकांतो भक्तियोगस्तत्र संस्थितां प्राप्ताम् । राज्ञे हिरण्यकशिपवे यथावदावेदयदवर्णयत् ॥ २ ॥ तद्धरूक्तं शत्रूत्कर्षस्य दुस्सहत्वमप्रियत्वं च प्रसिद्धमेव ॥ ३ ॥ परुषया निष्ठुरया ॥ ४ ॥ ५ ॥ वास्तवोर्थस्तु—दुष्टेष्वपि विशिष्टं नीतं कृपालक्षणं यस्य परदुःखासहिष्णुत्वात् । यद्वा—दुर्गता विनीतिर्विरुद्धनीतिर्यस्मात्स तथा नीतिकोविद इत्यर्थः । मंदानां मूढानामप्यात्मा मनो यत्र सर्वचित्ताकर्षकत्वात् । कुलभेदकराः कुलविशेषस्रष्टारः प्रजापतयोऽप्यधमा यस्मान्महाविभूतिमत्त्वात् । यद्वा—कुलानां सैन्यसमूहानां भेदकरा दैत्या अधमा यस्मात्स दैत्यकुलोत्तम इत्यर्थः । स्तब्धमसुरेषु पूज्यबुद्धित्वाभावात् यद्वा—स्तभ्नाति रुणद्धि सर्वं स्वस्मिन्निति स्तब्धो विष्णुः स्वोदरीकृतविश्वत्वात्तम् । यमानामष्टांगयोगांगानां क्षयं निवासभूतं त्वां नेष्ये स्वत्रायकत्वेनांगीकरिष्यामीत्यर्थः । वस्तुतो यं लोका अक्षयं क्षयरहितं विष्णुं वदंति तं प्रति नेष्ये दर्शयिष्यामीति भावः । मां शास्तीति मच्छासनो ब्रह्मा सोप्युद्धतः कंपितो वत्सपालावगूहने यस्मात्तम् । ' अनुजानीहि मां नाथ ' इत्यादितदुक्तेः ॥ ६ ॥ अभीतवन्निर्भयवत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रह्लाद उवाच ॥ न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषाम् ॥ परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥ स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेंद्रियात्मा ॥ स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९॥ जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ॥ ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणम् ॥ १० ॥ दस्यून्पुरा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश ॥ जितात्मनोऽज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥ ११ ॥ हिरण्यकशिपुरुवाच ॥ व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मंदात्मन्ननु स्युर्विप्लवा गिरः ॥ १२ ॥ यस्त्वया मंदभाग्यो क्तो मदन्यो जगदीश्वरः ॥ क्वासौ यदि स सर्वत्र कस्मात्स्तम्भे न दृश्यते ॥ १३ ॥

किं बलं यस्य स किंबलः ॥ ७ ॥ ८ ॥ वशं प्रणीता इत्यत्र हेतुः स ईश्वर इति । उरवः क्रमाः पादविक्षेपा यस्य बहुपराक्रम इति वा । ओज आदिरूपः । सत्त्वं धैर्यं बुद्धिर्वा ॥ ९ ॥ ननु मच्छत्रुरसौ कथं ममापि स एव बलं स्यादत आह । जहीति । आत्मनः स्वस्य भावं स्वभावं त्यज । यतोऽजितादात्मनो मनस ऋते विनाऽन्ये विद्विषो न संति । किं च तद्धि तदेव हि साम्येन मनसो धारणमेव समर्हणमाराधनम् ॥ १० ॥ ननु मया दिग्विजये सर्वे रिपवो जिता अतः सांप्रतं विद्विषो न संतीति चेत्सत्यं तत्राह । दस्यूनिति । एके भवादृशाः मंदाः पुराऽऽदौ लुंपतः सर्वस्वं हरतः । षडिंद्रियलक्षणान् शत्रून्न विजित्याजित्वा दश दिशः स्वयं जिता मन्यंते । साधोस्तु जितचित्तस्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ॥ ११ ॥ व्यक्तं निश्चितम् । विप्लवा अनन्विता इत्यर्थः ॥ १२ ॥ हे मन्दभाग्य मदन्यो जगदीश्वरो यद्यस्ति तर्ह्यसौ क्वास्ति । प्रह्लाद आह । स सर्वत्रास्ति । हिरण्यकशिपुराह तर्हि कस्मात्स्तंभे नास्ति

केन बलेन मदाज्ञामतिक्रांतवानसीति भावः । मूढेति । स्वस्य मूढत्वात्तथाह ‘ आत्मवन्मन्यते सर्वम् ’ इति न्यायात् ॥ ७ ॥ राजन्निति । रजोगुणपिहितदृष्टेस्तव तथा न दृश्यत इति भावः । ‘ बलं बलवतां चाहम् ’ इति श्रीगीतोक्तेः “ तस्य ह वा अक्षरस्य प्रशासने सूर्याचंद्रमसौ विधृतौ ” इत्यादिश्रुतेः । “ यः सर्वस्य वशी सर्वस्येशानः ” इत्यादिश्रुतेश्च ॥ ८ ॥ संभवत्वादाह–पराक्रमा वेति । एवं बुद्धिर्वेति ॥ ९ ॥ अन्यदाधिक्यमाह–किंचेति । अजितादवशीकृतात् । सर्वत्र स्वतुल्यादर्शनलक्षणसाम्यमेव मनसो वशीभावस्तस्मिन्सति शात्रवाभावान्न केऽपि शत्रव इति भावः । महत् सर्वाराधनोपक्षयोत्कृष्टमित्यर्थः ॥ १० ॥ अत्राक्षिपति–नन्विति । यद्वा–एके मादृशाः पुरा षट् दस्यूनविजित्य दश दिशश्च सुष्ठु अजिता मन्यंते आंतरशत्रुजयं विना बाह्यशत्रुजयमानी केवलमुपहासपदमाप्नोतीति भावः । कुतः स्युर्नकुतोऽपीति भावः ॥ ११ ॥ अतिमात्रमत्यंतं विकत्थसे हरिभक्तत्वादहमेव जितषडमित्रो न तु ममायं जनक इत्यात्मश्लाघां करोषीत्यर्थः । इत्यर्थ इति । विगतः प्लवोऽर्थो याभ्यस्ता अनर्था इति भावः । ‘ प्लुङ्–गतौ ’ अस्य रूपं प्लव इति ॥ १२ ॥ हे मंदभाग्येति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितम् ॥ १४ ॥ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्योत्पतितोऽवरासनात् स्तंभं तताडातिबलः स्वमुष्टिना ॥ १५ ॥ तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनांडकटाहमस्फुटत ॥ यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामाप्ययमंग मेनिरे ॥ १६ ॥ स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम् ॥ अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥ १७ ॥ सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन् स्तंभे सभायां न मृगं न मानुषम् ॥ १८ ॥

प्रह्लादस्तु तं स्तंभं निरीक्षमाणः नमस्यन्नाह । दृश्यत इति ॥ १३ ॥ हिरण्यकशिपुस्तु तत्र तमपश्यन्नाह । सोऽहमिति । विकत्थमानस्य विपरीतं ब्रुवाणस्य ते शिरः कायाद्धरामि पृथक्करोमि ॥ १४ ॥ प्रह्लादेन मूर्ध्नि बद्धांजलिना निरीक्ष्यमाणं स्तंभं मुष्टिना ताडितवान् ॥ १५ ॥ १६ ॥ तत्पदं तस्य ध्वनेराश्रयम् । येन नादेन ॥ १७ ॥ भगवांस्तदा स्तंभं विदार्यादृश्यत दृश्यो बभूव । किमर्थम् । निजभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुं तथाऽखिलेषु भूतेष्वात्मनो व्याप्तिं च सत्यां कर्तुं स्तंभेऽदृश्यत । तत्किमर्थम् । "भौतिकेषु च भावेषु भूतेष्वथ महत्सु च ॥ भगवानास्ते" इति तेनैव भृत्येन यद्भाषितं तत्सत्यं कर्तुम् । तथाऽत्यद्भुतं दैत्यघातकमतिघोरं रूपमुद्वहन् दधत । तत्किमर्थम् । निजभृत्यैः सनकादिभिः शापानंतरमनुतप्तैर्भाषितं यत् त्रिभिर्जन्मभिः शापमोक्षो भवत्विति तत्सत्यं कर्तुम् । तथाऽत्यद्भुतं रूपं ब्रह्मसृष्टावदृष्टमश्रुतं च रूपमुद्वहन् । तच्च न मृगाकारं न च मनुष्याकारमुद्वहन् सभायां मध्येऽदृश्यत । तत्किमर्थम् । निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितं "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो" इति तथा । "नांतर्न बहिः" इति "न नरैर्न मृगैरपि" इति च ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितं तदुभयोर्वाक्यं सत्यं कर्तुम् । न हि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा न च सभागृहस्यांतः न च प्रांगणवद्बहिः । एवं ताभ्यां यद्भाषितं तत्सत्यं कर्तुम् । यच्च हिरण्यकशिपुना भाषितं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति "अकुतश्चिद्भयोऽमरः" इति च । यच्च नारदेन निजभृत्येन भाषितमिंद्रं प्रति अयं महांस्त्वया संस्थां न प्राप्स्यति अनंतानुचरः इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुं तथाऽदृश्यत । चकारान्निजभाषितं च । किं तत् "कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति" इति । तथा

यथा जगदैश्वर्यं मम तथैव मत्पुत्रत्वात्तवापि तन्न्यायप्राप्तमिति त्वया त्यज्यत इति भावः । वस्तुतस्त्वकारप्रश्लेषेणामंदभाग्येति । महाभाग्येत्यर्थः ॥ १३ ॥ गोपायेत रक्षेत् ॥ १४ ॥ १५ ॥ तदैव दैत्यमुष्टिकृतस्तंभताडनावसर एव । येन निनदेन । अंडमेव कटाहं स्वांतर्गतप्राणिकर्मानुरोधेन फलपाकाधिकरणत्वादस्फुटदिवेति लुप्तोपमा । यं निनदम् । आदिनेंद्रादिग्रहः । स्वधाम्नामप्ययं नाशं मेनिरे । अहो अकांडसंवर्त्तः । किमागता इति शशंकिरे ॥ १६ ॥ येन निर्ह्रादेन । दैत्ययूथपा वित्रेसुः ॥ १७ ॥ तेनैव प्रह्लादेनैव । अत्र स्वामिचरणैर्बहु प्रपञ्चितमत उपरम्यते । निजेन स्वेन भ्रियते पाल्यते इति निजभृत्यो वेदः । 'श्रुतेः पालयिता ब्रह्मन्नहमेव न चेतरः' इत्यादिपुराणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स सत्त्वमेनं परितो विपश्यन्स्तंभस्य मध्यादनु निर्जिहानम् ॥ नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेंद्ररूपम् ॥ १९ ॥ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ॥ प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननम् ॥ २० ॥ करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणम् ॥ स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥ २१ ॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यम् ॥ चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥ २२ ॥ दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ॥ प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥ २३ ॥

"तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" इत्यादि तच्च सत्यं कर्तुमदृश्यतेति द्रष्टव्यम् । अलमतिविस्तरेण ॥ १८ ॥ स दैत्य एवमद्भुतं ध्वनिं श्रुत्वा तदाश्रयं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन्स्तंभमध्यान्निर्गच्छत् नृमृगेंद्रयोर्मिश्रं रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥ तस्यैवमलं भयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपो हरिः समुत्थितः । भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति प्रतप्तेत्यादिना विद्रावितदैत्यदानवमित्यंतेन । प्रतप्तं चामीकरं सुवर्णं तद्वत्पिंगानि लोचनानि यस्मिन् । सटा जटाः केसराः कंठरोमाणि स्फुरद्भिः सटाकेसरैर्जृंभितं साटोपमाननं यस्मिन् ॥ २० ॥ करालास्तुंगा दंष्ट्रा यस्मिन् । करवालः खड्गस्तद्वच्चंचला क्षुरांतवत्तीक्ष्णा च जिह्वा यस्मिन् । भ्रुकुटीयुक्तेन मुखेनोल्बणम् । स्तब्धावुन्नतौ शंकुवदूर्ध्वौ कर्णौ यस्मिन् । गिरिकंदरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् । हनू कपोलप्रांतौ तयोर्भेदेन विदारणेन भीषणम् । कर्णांतमुखविस्तारमित्यर्थः ॥ २१ ॥ दिविस्पृशन्कायो यस्मिन् । अलुक्समासः । अदीर्घा ह्रस्वा पीवरा च स्थूला ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिंस्तच्च तच्च अल्पं मध्यममुदरं यस्मिन् । चंद्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तम् । विष्वंचः सर्वतः प्रसृता भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् । नखान्येवाऽयुधानि यस्मिन् ॥ २२ ॥ दुरासदं प्राप्तुमशक्यम् । सर्वाणि च निजानि चक्रादीनीतराणि वज्रादीनि त एवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थित इति पूर्वेणैवान्वयः । तदाविर्भावप्रयोजनविमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह । सप्तभिः । प्रायेण महा

यश्रीमुखोक्तेस्तस्य भावितम् "यच्च किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेऽपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥" इत्येवंलक्षणं सत्यं कर्तुं वेत्यर्थः "यदायदा वेदपथः पुराणो बाध्येत पाखंडपथैरसद्भिः । तदा भवान्सत्त्वगुणं बिभर्ति" इति श्रीदशमेक्रूरोक्तेश्च ॥ १८ ॥ १९ ॥ चंडानि भयंकराणि ॥ २० ॥ "करालो दंतुरे तुंगे भीषणे चाभिधेयवत्" इति मेदिनी । विशसनोऽसिश्चंद्रहासः 'करवालश्च खंडनः' इत्यभिधानात् क्षुरः केशमुंडनशस्त्रं तदंतस्तद्धारा तद्वत् उल्बणं क्रूरम् । इत्यर्थ इति । सिंहस्य पञ्चास्यत्वादिति भावः ॥ २१ ॥ २२ ॥ निजानि नखानि तदपेक्षयेतराणि चक्रादीनीति विजयध्वजः । सप्तभिः 'प्रायेण (२३)' इत्यार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः ॥ अलक्षितोऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सोऽसुरस्तदा ॥ २४ ॥ न तद्विचित्रं खलु सत्त्वधामनि स्वतेजसा योऽनु पुराऽपिबत्तमः ॥ ततोऽभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया ॥ २५ ॥ तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतोऽयथाऽग्रहीत् ॥ स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः ॥ २६ ॥ असाध्वमन्यंत हतौकसोऽमरा घनच्छदा भारतसर्वधिष्ण्यपाः ॥ तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः ॥ पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥ २७ ॥ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः ॥ कृत्वाऽट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः ॥ २८ ॥ विष्वक्स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचम् ॥ द्वार्यूरआपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ॥ २९ ॥

मायिना हरिणा मेऽयमेवंभूतो वधो मृत्युहेतुः स्मृतश्चिंतितस्तथाऽप्यनेन समुद्यतेन किं न किंचित्स्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः ॥ २३ ॥ तदा सोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितोऽदृष्टोऽभूत् ॥ २४ ॥ सत्त्वधामनि सत्त्वप्रकाशे हरौ पतितस्य तमोमयस्यादर्शनं तद्विचित्रं न भवति । तत्र हेतुर्यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमो नु अहो अपिबत्तस्मिन् ॥ २५ ॥ विक्रमंतं ततस्ततः प्रहरंतम् । हस्तादुत्कलितो निःसृतः ॥ २६ ॥ तदा अमरा देवाः सर्वे धिष्ण्यपा असाध्वमन्यंत । हतान्योकांसि स्थानानि तेषां ते तद्भिया घनच्छदा मेघांतरिताः संतः यस्य हस्तात्स्वयं मुक्तस्तं नृहरिं स्ववीर्याच्छंकितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तमासज्जताभ्यपद्यतेत्यन्वयः ॥ २७ ॥ श्येनस्येव वेगो यस्य तम् । शतचंद्रवर्त्मभिः खड्गचर्ममार्गैरच्छिद्रं यथा भवत्येवमुपर्यधश्चरंतम् । अट्टहासमेवाऽऽह खरं तीव्रमुत्स्वनेन महाशब्देनोल्बणं भयंकरम् । तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी यस्य ॥ २८ ॥ ग्रहणे दृष्टांतः । व्यालो यथा आखुं मूषकम् । विदारणे दृष्टांतः अहिं गरुड इवेति । विष्वक् सर्वतः स्फुरंतं निःसरंतम् । ग्रहणेनातुरं विवशम् । इंद्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन न क्षता त्वगपि यस्य । द्वारि सभायां नांतर्नबहिः । ऊरे ऊरौ निपात्य 'गरुडो महाविषम् (२९)' इत्यंतैः ॥ २३ ॥ अभ्यपतत्संमुखगच्छत् । तदा निपतनकाले ॥ २४ ॥ तत्रादर्शने ॥ २५ ॥ २६ ॥ भारतेति । शुद्धवंश्यत्वात्तुभ्यमेतद्रहस्यं वदामीत्यभिप्रायः मद्वधमेते दिदृक्षंत इति तत्कोपभीता मेघांतरिताः हतौकसोऽसाध्वमन्यंतेति ओकांसि तु हतवानेव यदि संप्रत्ययं जीविष्यति तदावशिष्टानस्माकं प्राणानपि हरिष्यतीति भावः ॥ २७ ॥ अच्छिद्रमव्यवधानम् । शतचंद्रशब्दो हि खड्गे चर्मणि चोभयस्मिन्नर्थेऽस्ति ॥ २८ ॥ पा० ऊरुमिति सप्तम्यर्थे द्वितीया ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संरंभदुष्प्रेक्ष्यकराललोचनो व्यात्ताननांतं विलिहन्स्वजिह्वया ॥ असृग्लवाक्तारुणकेसराननो यथांत्रमाली द्विपहत्यया हरिः ॥ ३० ॥ नखांकुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ॥ अहन्समंतान्नखशस्त्रपार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान्सहस्रशः ॥ ३१ ॥ सटावधूता जलदाः परापतन्ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ॥ अंभोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥ ३२ ॥ द्यौस्तत्सटोत्क्षिप्तविमानसंकुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ॥ शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥ ३३ ॥ ततः सभायामुपविष्टमुत्तमे नृपासने संभृततेजसं विभुम् ॥ अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन ॥ ३४ ॥

न भूमौ न चांबरे । नखैर्न व्यसुभिरसुमद्भिर्वा । एवं दिवानक्तपरिहाराय संध्यायामिति द्रष्टव्यम् ॥ २९ ॥ दैत्यवधमुक्त्वा तद्भृत्यवधमाह । द्वाभ्याम् । संरंभेण दुष्प्रेक्ष्याणि करालानि लोचनानि यस्य । असृजो रक्तस्य लवैर्बिंदुभी रक्ताः सिक्ता अत एवारुणाः केसरा आननं च यस्य सः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूतस्तस्यानुचरानहन्नित्युत्तरेणान्वयः । अंत्राणां माला कंठे विद्यते यस्य ॥ ३० ॥ नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य तम् । दोर्दंडानां यूथानि समूहा यस्य सः । तं दैत्येंद्रमनु पंथा येषां तान् । अन्यानपि तत्पक्षपातिन इत्यर्थः ॥ ३१ ॥ दैत्यवधव्यग्रस्य नृहरेराटोपमाह । द्वाभ्याम् । सटाभिरवधूताः प्रकंपिता जलदा मेघाः परापतन् व्यशीर्यंत । अनेन ये मेघांतरिता देवास्ते स्पष्टं पश्यंत्वित्याज्ञां दत्तवानित्यर्थः । यस्य दृष्ट्या विमुष्टं रोचिर्येषां ग्रहाणां ते तिरस्कृतप्रभा अभवन्निति शेषः । दिगिभा दिग्गजाः ॥ ३२ ॥ तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः संकुला व्याप्ता सती प्रोत्सर्पत स्वस्थानात्प्रकर्षेणोदसर्पच्चलिता ॥ ३३ ॥ स्वभृत्यैश्वर्यमाश्चर्यमिव मत्वा

आंत्रमुदरस्थमन्नादिरसाधारमङ्गम् ॥ ३० ॥ इत्यर्थ इति । तत्संबंधिनो दैत्यानिति भावः । नखांकुरेति । यत्राहमेव प्रतिक्षणं सुखमवसं तत्र संप्रत्ययं मंदभाग्यः क्रोधादिकं तामसं कथं वासयति स्मेति द्रष्टुमिवेत्युत्प्रेक्षा सरोरुहरूपकेण व्यज्यतेऽत एवांकुररूपकं सरोरुहभंगाभावायैव बुध्यते ॥ ३१ ॥ आटोपः कोपावेशः ॥ ३२ ॥ ३३ ॥ ततो दैत्यहननोत्तरम् । नृपासने उपविष्टमिति येन यः पराभूयते तेन तदधिकारः स्वीक्रियते इति राजनीतिं दर्शयन्निव । यद्वा—शापग्रस्ते स्वभृत्ये स्वाभिमानत्यागाभावो व्यंजितः । यः किलर्षिभिरपि समर्पितानन्यानुपहतान्मंत्रपूतानप्यासनादीनुपहारान्साक्षान्नांगीकरोति स एव भगवान्स्वभक्तेनासुरभावग्रस्तेन शापभ्रष्टेनाप्यदत्तमपि तदुपभुक्तमपि सिंहासनं यत्स्वयमेवास्त तद्भक्तसौभाग्यमेव सर्वान्दर्शयामासेति तत्त्वम् । यद्वा—अयं प्रह्लादो मद्दत्तं स्वपित्र्यं सिंहासनमिति न ॥ ३३ ॥
ग्रहीष्यत्ययं मत्पिता भगवन्निंदकत्वान्महापातक्यस्त्येतदाक्रांतं सिंहासनमतिवाशुच्यस्ति तत्रोपवेशनेन स्वयमेवाहं शोधयामि ततश्च मत्प्रसादभूतं ग्रहीष्यत्येव । ननु प्रह्लादस्य स्वभ्रातृसह्लादादिभ्यस्त्रिभ्यः कनिष्ठत्वाद्राज्यं कथं दास्यतीश्वरो हरिस्तस्मै तत्रेदमयमेवाधेयं तद्भ्रातरोऽपि श्रीनृसिंहदेवेन हता एव 'दोर्दंडयूथोनुपथान्सहस्रशः' इत्युक्तेः । प्रह्लादमृते ते तु तदनुपथा एवेति ज्ञेयमन्यथा सार्वधर्मप्रवर्त्तको भगवान्कथं तं वदेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ॥ प्रहर्षवेगोत्कलिताननना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥ ३५ ॥ तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनाम् ॥ सुरानका दुंदुभयोऽथ जघ्निरे गंधर्वमुख्या ननृतुर्जगुः स्त्रियः ॥ ३६ ॥ तत्रोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः ॥ ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ ३७ ॥ मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः ॥ यक्षाः किंपुरुषास्तात वैतालाः सिद्धकिन्नराः ॥ ३८ ॥ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः ॥ मूर्ध्नि बद्धांजलिपुटा आसीनं तीव्रतेजसम् ॥ ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ ३९ ॥ ब्रह्मोवाच ॥ नतोऽस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ विश्वस्य सर्गस्थितिसंयमान्गुणैः स्वलीलया संदधतेऽव्ययात्मने ॥ ४० ॥ श्रीरुद्र उवाच ॥ कोपकालो युगांतस्ते हतोऽयमसुरोऽल्पकः ॥ तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ॥ ४१ ॥

कौतूहलेन तस्यासने उपविष्टं भयात्कोऽपि न बभाज नासेवत । न लक्षितो द्वैरथः प्रतियोद्धा येन ॥ ३४ ॥ लोकत्रयस्य मस्तकज्वरं शिरोव्यथेव दुःसहम् । प्रहर्षस्य वेगेनोत्कलितानि विकसितान्याननानि यासां ताः सुरस्त्रियः पुष्पवर्षैर्नृहरिं ववृषुः ॥ ३५ ॥ नाकिनां देवानां विमानावलिभिर्नभस्तलं संकीर्णमास । सुराणामानकाः पटहास्तैर्जघ्निरे वादिताः । स्त्रियो अप्सरसो ननृतुर्गंधर्वा जगुः ॥ ३६ ॥ ३७ ॥ गंधर्वाप्सरसश्चारणाश्चेत्यर्थः ॥ ३८ ॥ नरशार्दूलं पुरुषोत्तमम् ॥ ३९ ॥ ब्रह्मादयो नृसिंहस्य शंकयाकुलचेतसः ॥ आरादेवास्तुवन् सप्तदशश्लोकैः पृथक्पृथक् ॥ अनंतायानंतं त्वां प्रसादयितुं नतोऽस्मि । अनंतत्वे हेतुः । दुरंता अनंताः शक्तयो यस्य । तत्कुतः विचित्राणि वीर्याणि प्रभावा यस्य । तत्किमर्थं पवित्राणि श्रवणमात्रेण शोधकानि कर्माणि यस्य । विचित्रवीर्यत्वमेवाह । विश्वस्येति । संदधते सम्यक्कुर्वते । एवमप्यव्ययात्मनेऽप्रच्युतस्वरूपाय ॥ ४० ॥ रुद्रस्तु तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते । कोपेति । सहस्रयुगांतस्तव कोपस्य कालः कोपायोग्यश्चायमित्याह । अल्पकोऽत्यल्पः अतः कोपानिवृत्त्या प्रह्लादं मा हिंसीरित्याह।तत्सुतमिति । यद्वाऽकालेऽप्ययं कोपोऽस्य भक्तस्य रक्षणार्थमिति चेत्तर्हीदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः॥ ४१ ॥

" पित्र्यं स्वं स्थानमास्थाय " इति वक्ष्यमाणरीत्या ॥ ३४ ॥ ३५ ॥ तदा सिंहासनस्थे हरौ ॥ ३६ ॥ तत्र दैत्यहननदेशे ॥ ३७ ॥ अप्सरचारणा इहाप्सरशब्देऽदंतत्वमार्षम् ॥ ३८ ॥ ते प्रसिद्धाः ॥ ३९ ॥ आरादेव दूरादेव । 'आराद्दूरसमीपयोः' इत्यमरः । सनकादीन्कोपयसि, स्वभक्तौ भ्रंशयसि, मया वरान्दापयसि, दैत्यगृहे भक्तराजमाविर्भावयसि, दैत्येन भक्तं जिघांसयसि, भक्तरक्षार्थं स्वयमेवाविर्भवसीति तव विधित्सितं न कोऽपि वेत्तीत्याह—नतोस्मीति । न ज्ञातुं शक्योंतो यस्य तस्मै । तत्—दुरन्तशक्तित्वं, तत्—विचित्र प्रभावत्वम् "वदन्ति वंशस्थमिदं यतौ जरौ" इति लक्षणाद्वंशस्थच्छन्दः॥ ४० ॥ तव घोरस्वरूपं दृष्ट्वा प्रलयशंकया बिभ्यति न त्वहमित्यभिप्रेत्याह स्वामी। रुद्रस्त्विति । तत्र संहारे कर्मणि त्वदंशोहमेव वर्त्तेयेति भावः । अल्पकस्त्वदपेक्षया । यतः कोपं न त्यजसि अतो हेतोः। ननु सर्वज्ञस्त्वं कथमेवं वदसीत्याह—यद्वेति । इत्यर्थ इति । क्रोधात्यागो हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्र उवाच ॥ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यबोधि ॥ कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहापरैः किम् ॥४२॥ऋषय ऊचुः ॥ त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज॥तद्विप्रलुप्तम मुनाऽद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४३ ॥ पितर ऊचुः ॥ श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबात्ति लांबु ॥ तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ४४ ॥

इंद्रस्तु नास्माकं हविर्भागादिलाभः पुरुषार्थः किं तु त्वत्परिचर्यैव । भवता पुनरनेन संरंभेण स्वकार्यमेव साधितं तस्य च सिद्धत्वादुपसंहरैनं क्रोधमित्याशयेनाह । हे परम नोऽस्मांस्त्रायता रक्षता भवता स्वीया एव भागा दैत्यात्प्रत्याहृताः । अंतर्यामिणस्तवैव यज्ञेषु भोक्तृत्वात् । अस्मदीयं हृदयकमलं त्वद्गृहमेवैतावत्पर्यंतं भय हेतुत्वेनास्मत्स्मृतिपथे नित्यं स्थितेन दैत्येनाक्रांतं व्याप्तं सत्प्रत्यबोधि भयापाकरणेन विकासं नीतम् । ननु तव त्रैलोक्यैश्वर्यसाधनार्थमयमुद्यम इति चेत्तत्राह । कालग्रस्त मिति । ते त्वाम् । हे नारसिंह नरस्य सिंहस्य चाकाराभ्यामाविर्भूत । अपरैः स्वर्गादिभिः किम् ॥ ४२ ॥ ऋषयस्तु तपःप्रवर्तनेनास्माकं महाननुग्रहः कृत इत्याहुः । त्वं नो यदात्थ परमं ध्यानलक्षणं तपः । परमत्वे हेतुः आत्मनस्तव तेजः प्रभावरूपं तदेवाहुः । येन तपसात्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि तदमुना दैत्येन विप्रलुप्तं कुंठितं सत् हे शरण्यपाल अद्य रक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः कुरुतेत्यनुज्ञातवानसि तस्मै ते नम इत्युत्तरश्लोकचतुर्थपादस्यानुषंगः ॥ ४३ ॥ पितरस्तु श्राद्धो द्धरणेन परमोपकारिणं श्रीनृसिंहं प्रणमंति । श्राद्धानि श्रद्धायुक्तानि पिंडादीनि नोऽस्मभ्यं पुत्रैर्दत्तानि प्रसभं बलाद्यः स्वयमधिकृत्य बुभुजे । किं च तीर्थस्नानसमये दत्तं

शंकोत्पादक इति भावः । उपसृतं शरणमागतम् । हे भक्तवत्सलेति।भक्तवत्सलेन त्वयाऽयं भक्तः प्रह्लादः पालनीय एवातः क्रोधमुपसंहरेति भावः॥ ४१॥एतावद्दिनपर्यंतं त्वच्चरणस्मरणविमुख एवाहं वर्त्त इत्याह—हे परमेति । परो मा यस्मात्स परमः "पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः" इति श्रुतेः सर्वोत्कृष्टेति भावः।यद्वा—त्वद्दासानामस्माकमिंद्रादीनां वस्तुषु वस्तुतः प्रभोस्तवैव स्वत्वौचित्यात् त्वद्गृहं शश्वद्ध्यानेन तव तत्र वासात् तच्च कमलं निःश्रीकं रात्रौ तमसाऽऽक्रांतं निद्रितं भवेत्।तथैव दैत्यजन्मारभ्याद्यपर्यंतं भयाद्दैत्यस्यैव ध्यातत्वाद्दैत्याक्रांतं संप्रति तव नृसिंहसूर्यस्योदये सति प्रत्यबोधि त्वच्चरणाक्रांतं सद्यकसदित्यर्थः।यद्वा—त्वद्गृहं वैकुंठं प्रति अबोधि त्वच्चरणसेवार्थं बुद्धिं प्रापेत्यर्थः । अत्राक्षिपति—नन्विति । हे भक्ताभिमानिन्निंद्रपदं गृहाणेति तत्र सत्यमहं सकामो भक्तिशून्यो ग्रहीष्यामीत्याह—त्वन्निष्कामभक्तानां तु कालग्रस्तमिति इदमिंद्रपदम्। अपरैः योगैश्वर्यादिभिः । नारसिंहेति । नरश्च सिंहश्च नरसिंहौ ताभ्यामुभयावयवाभ्यामाविर्भूतो नारसिंहः आविर्भावेर्थेऽण्।भक्तरक्षार्थमलौकिकमपि कर्म स्वीकरोषि किमुत लौकिकमिति भावः । मंदाक्रांता छंदः "मंदाक्रांताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्" इति लक्षणात् ॥ ४२ ॥ एतावद्दिनपर्यंतमस्माभिर्न तपस्तप्तमित्याहुर्ऋषयः । नोस्माकम् आत्थ यूयं मद्ध्यानलक्षणं तपः कुरुतेति जगदिथ सृष्ट्वानसि 'सृजामि तपसैवेदम्' इति ब्रह्माणं प्रति त्वदुक्तेः । विप्रलुप्तं सौरं तेजो राहुणेव अनेन तिरोधानमेवोक्तं न तु स्वरूपतो नाशः । वसंततिलका छंदः" उक्ता वसंततिलका तभजा जगौ गः " इति लक्षणात् ॥४३॥ वयमेतावद्दिनपर्यंतमुपवासपरा एवाभूमेत्याहुः पितरः । न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहारषीद्योगतपोबलेन ॥ नानादर्पं तन्नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥ ४५ ॥
विद्याधरा ऊचुः ॥ विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम ॥ ४६ ॥
नागा ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानंद नमोस्तु ते ॥ ४७ ॥ मनव ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ॥ ४८ ॥ प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा नयेन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया भिन्नवक्षानुशेते जगन्मंगलं सत्त्वमूर्तेवतारः ॥ ४९ ॥ गंधर्वा ऊचुः ॥ वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ॥ स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५० ॥

तिलोदकमप्यपिबत् । तानि च तस्योदराद आच्छिद्याहृतवान् । कथंभूतात् नखैर्विदीर्णा वपा यस्य तस्मात् । वपाविदारणस्य तद्गतपिंडोद्धरणमेव फलमिति भावः ॥ ॥ ४४ ॥ योगसिद्धां गतिमणिमादिसिद्धिम् । नानाऽनेके दर्पा यस्य तम् । तस्मै तुभ्यं तं त्वामुद्दिश्य ॥ ४५ ॥ विद्यामंतर्धानादिलक्षणाम् । अनुराद्धां संप्राप्तां संख्ये युद्धे ॥ ४६ ॥ रत्नानि फणासु स्थितानि तथा स्त्रीरत्नानि चोत्तमाः स्त्रियः आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं पाठांतरेऽस्माकं दत्त आनंदो येनेति ॥ ४७ ॥ नृसिंहेनावलोकिताः संतो मूर्ध्नि बद्धांजलयो मनवः प्रोचुः । मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादा येषां ते । अनुशाध्यनुशिक्षय ॥ ४८ ॥ प्रजापतयोऽपि तदवलोकिताः प्रोचुः । हे परेश ते त्वया अभिसृष्टा वयं प्रजेशा येन निषिद्धाः संतः प्रजा न सृजामः । स एष भिन्नं वक्षो यस्य नु निश्चितं शेते मृतः । अतः परं प्रजाः सृजाम इति हृष्यंतः प्राहुः । हे सत्त्वमूर्ते तवायमवतारो जगतो मंगलम् ॥ ४९ ॥ गंधर्वा अपि तदवलोकिताः प्रोचुः । हे विभो वयं ते त्वदीया

केवलं पिंडादीन्येव बुभुजे किन्तु तर्पणोदकमपीत्याह–किञ्चेति । 'समयेप्यपिबत्तिलाम्बु' इति पाठः स्वामिसंमतः प्रतिभाति । इति भाव इति । वपां विदार्य पिंडतिलोदकादानिवास्मान्दर्शयानासेति तात्पर्यम् । 'वपा सुषिरमेदसोः' इति मेदिनी । छंदः प्राग्वत् ॥ ४४ ॥ योगैश्वर्यसंपत्तिहीना रंका एव वयमेतं कालं प्रतीक्षामहे इत्याहुः सिद्धाः । हे नृसिंहेति । एतद्रूपं विनाऽस्य मृत्योरसंभवं मत्वा स्वीकृतालौकिकविग्रहोऽसीति भावः । छंदः प्राग्वत् ॥ ४५ ॥ वयमप्येतावद्दिनपर्यंतं विद्यारहिता एवास्मेत्याहुर्विद्याधराः । मायानृसिंहं कृपाप्रधानं नृसिंहम् । इंद्रवज्रा छंदः " स्यादिंद्रवज्रा यदि तौ जगौ गः " इति लक्षणात् ॥ ४६ ॥ हृतधना हृतस्त्रीका वयमेतावद्दिनपर्य्यंतं संतप्ता एवास्मेत्याहुर्नागाः । हे दत्तानन्देति । सर्वानन्ददस्त्वमेवेति भावः । पाठांतरे अस्मद्दत्तानंदेति पाठे ॥ ४७ ॥ मनवोऽत्र वर्त्तमानमनुसहितास्तपःस्थिता अतीता इत्यर्थः । ते च भाविनोऽप्यात्मानमेनं मत्वा निवेदयंति स्मेति ज्ञेयम् । मंजुभाषिणी छंदः " सजसा जगौ च यदि मंजुभाषिणी " इति लक्षणात् ॥ ४८ ॥ हे परेशेति । ब्रह्मादिष्वीशत्वं भाक्तमेव मुख्यं तत्त्वय्येवेति भावः । अभिसृष्टाः प्रजासर्जनोद्देशेन रचिताः। निषिद्धा यूयं मा प्रजाः सृजतेत्याज्ञप्ताः । हे सत्त्वमूर्ते इति । इयमपि श्रीमदीया मूर्त्तिः सात्त्विक्येव प्रजापालनकर्त्रीत्वात्र दैत्यहननार्थात्तक्रोधस्यापि जगत्सुखहेतुत्वेन सात्त्विकत्वपर्यवसानादिति भावः । अजहल्लिंगत्वाज्जगन्मंगलमिति । भुजंगप्रयातं छदः । " चतुर्भिर्यकारैर्भुजंगप्रयातम् " इति तल्लक्षणात् ॥ ४९ ॥ हे विभो इति । विशेषेण सर्वदा भानं तवैव न त्वन्येषामेतादृशानामिति भावः । वंशस्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चारणा ऊचुः ॥ हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः॥ यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः॥५१॥यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ॥ स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंश ॥ ५२ ॥ किंपुरुषा ऊचुः ॥ वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः ॥ अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ ५३ ॥ वैतालिका ऊचुः ॥ सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे ॥ यस्तां व्यनैषीद् भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽमयः ॥ ५४ ॥ किन्नरा ऊचुः ॥ वयमीश किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ॥ भवता हरे सवृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव ॥ ५५ ॥

नटा नर्तका नाट्ये नृत्ये गायकाश्च येन स्वाधीनाः कृताः कथंभूतेन । वीर्यं शौर्यं बलं शक्तिस्ताभ्यामोजः प्रभावो यस्य तेन । स एष भवता इमां दशां मूर्तिं नीतः । उचितं चैतदित्याहुः । किमिति ॥ ५० ॥ भवापवर्गं संसारनिवर्तकम् । आश्रयणे हेतुः । यद्यस्मात्साधूनां हृदि भजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुरस्त्वया समापितोंतं नीतः॥५१॥ मनोज्ञैः कर्मभिस्तवानुचरेषु मुख्यास्ते वयं दितिसुतेन शिबिकावाहकत्वं प्रापिताः । पंचतां मृत्युम् । हे पंचविंश चतुर्विंशतितत्त्वानियामक ॥५२॥ किंपुरुषास्तु त्वां स्तोतुं के वयं वराका इत्याहुः । वयमिति । वयं किंपुरुषास्तुच्छप्राणिनस्त्वं तु महानद्भुतप्रभावः पुरुषः । नन्वयं महान्दैत्यो हत इति किं न वर्ण्यत इत्याशंक्य कियदेतदित्याहुः । अयमिति । यदा साधुर्भिर्भगवद्भक्तैस्तिरस्कृतस्तदैव नष्टः ॥५३॥ सत्रेषु यज्ञेषु । ते त्वया हतः एतद्दिष्ट्या भद्रं कृतम् ॥५४॥ अमुना दितिजेन विष्टिं

छंदः । “ जती तु वंशस्थमुदीरितं जरौ ” इति लक्षणात् ॥ ५० ॥ हरे इति । अविद्यादिसर्वक्लेशहारित्वात्तवांघ्रिपंकजमत्र वयमाश्रिता इति भावः । साधूनां हृदि हृच्छय्यायामपि शेते इति सः । अत एव तदसहिष्णुनेव त्वयान्तं नीतः अद्यारभ्य त्वमेव तेषां शेष्वेति भावः । प्रमाणिका छंदः । “ प्रमाणिका जरौ लगौ ॥ ” इति लक्षणात् ॥ ५१ ॥ यद्वाऽनुचराः शिवकुबेरादयस्ते मुख्याः स्वामिनो येषां तेऽनुचरास्त्वद्भक्ता एव मुख्या येषां ते इति वा । वाहकत्वं शिबिकादिषु योजनम् । हे नरहरेति । त्वमेव विक्षेपकनाशकोऽसीति भावः । ‘ नरो विक्षेपके पुंसि ’ इत्यभिधानात् । पञ्चविंशेति । जडतत्त्वेषु चैतन्यदानेन सृष्टिकर्तुस्तव सृष्टिभयकृन्नाशनमुचितमेवेति भावः । पञ्चतामित्युक्तेरेकतां नापेति ज्ञायते तेन च मोक्षाभावो लक्षितः । अत एव वक्ष्यति श्रीनृसिंहः ‘लोकान्यास्यति सुप्रजाः’ इति । मालिनी छंदः “ ननमयययुतेयं मालिनी भोगिलोकैः ” इति लक्षणात् ॥५२॥ किंपुरुषाः पुरुषाभासाः । अत्राक्षिपति–नन्विति । एतद्धननेन तवापि पापं न भविष्यतीत्याह–अयमित्यादि । यदा साधुभिर्धिक्कृतस्तदैवायं नष्टोऽभूदतो मृतमारणे न पापं भवतीत्यर्थः ॥५३॥ वेतालं बहुविधकांस्यतालवादनपूर्वकं गायनं तद्विदंतीति वैतालिकाः । तां सपर्याम् । व्यनैषीन्न्यवारयत् । हे भगवन्निति । सर्वथा समर्थस्य तवैतद्धननं न चित्रमिति भावः । आमयनिवृत्तौ यथा सुखं भवति तथाऽधुनास्माकमभूदित्यर्थः । विधारिता छंदः । “यदा जगणत्रयरी विधारिता” इति लक्षणात् ॥५४॥ ईश हरे नरसिंह नाथेति संबुद्धिचतुष्टयमत्याह्लादेनोक्तं सर्वसमर्थसर्वदुःखहर्तृभक्तप्रतिज्ञापालकसर्वेश्वरस्य तवास्मद्विधदीनदुःखहरणमुचितमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुपार्षदा ऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म ॥ सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥ ५६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते हिरण्यकशिपुदैत्यवधे नृसिंहस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥ नारद उवाच ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः ॥ नोपैतुमशकन् मन्युसंरंभं सुदुरासदम् ॥ १ ॥ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ॥ अदृष्टा श्रुतपूर्वत्वात् सा नोपेयाय शंकिता ॥ २ ॥ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके ॥ तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥ तथेति शनकै राजन् महाभागवतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृतांजलिः ॥४॥ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः॥ उत्थाप्य तच्छीर्ष्ण्यदधात् करांबुजं कालाहिवित्रस्तधियां कृताभयम् ॥ ५ ॥

निर्मूल्यं कर्मानु निरंतरं कारिताः । अतः परं नो विभवाय समृद्धये भव ॥ ५५ ॥ नोऽस्माकं भक्तानां हे शरणद आश्रयप्रद सर्वेषां लोकानां शर्म मंगलमे तदद्भुतं रूपमद्यैव दृष्टं न तु पूर्वम् । विधिकरः किंकरः ॥ ५६ ॥ इति सप्तमे टीकायामष्टमोऽध्यायः ॥ ८ ॥ नवमे ब्रह्मणा भीत्या चोदितोऽसुरबालकः ॥ कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणम् ॥ १ ॥ "उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी ॥ केसरीव स्वपोतानामन्येषामुग्रविग्रहः" इत्याद्यागमोक्तां भक्तानुकंपितामाह । एवमिति सप्तभिः । एवं दूरत एव स्थित्वा स्तुवंतः मन्युना संरंभ आवेशो यस्य तं उप समीपे गंतुं नाशक्नुवन् ॥ १ ॥ श्रीर्लक्ष्मीर्देवैः प्रेषिताऽपि महदद्भुतं तद्रूपं दृष्ट्वा शंकिता सती तं नोपजगाम । अद्भुतत्वे हेतुः । अदृष्टेति ॥ २ ॥ उपेह्युपगच्छ ॥ ३ ॥ ४ ॥ काल एवाहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत्करांबुजम् ॥ ५ ॥

वेति तद्भावः । वृजिनं पापं तद्वान्वृजिनः अर्शआद्यच् । मंजुभाषिणी छंदः ॥ ५५ ॥ विष्णुपार्षदास्तु—श्रीविकुंठानंदनसंबंधिनो ज्ञेयाः । श्रीनृसिंहेनैकीभूय वैकुंठस्य भगवतोप्यवतरणादिति संदर्भः । हरिनरयोः सिंह नरयोरवयवामिश्रितं रूपम् । हे शरणद हे ईशेति शरणागतरक्षणार्थमीशेन सर्वथा यतितव्यमिति भावः । विप्रैः सनकादिभिः शप्तः तस्यानुग्रहाय त्रिजन्मस्वेकजन्मनः समाप्तेर्यथा योजनगंतुरेकक्रोशगमनेनापि गम्यमार्गस्य न्यूनत्वे सति किंचित्सुखं भवति तद्वदिति भावः । प्रहर्षिणीछंदः । "त्र्याशाभिर्मनजरगाः प्रहर्षिणी" इति लक्षणात् ॥ ५६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ असुरबालकः प्रह्लादः (१) स्वपोतानां स्वबालकानाम् । केसरी सिंह उग्रो न प्रतीयतेऽन्येषां मृगादीनां युवावस्थापन्नानामप्युग्रः प्रतीयते तथा भक्तानामतिभयंकरवपुरपि श्रीनृसिंहोऽनुग्रः प्रतीयत इति भावः । इत्याद्यागमोक्ताम् । अयं श्लोको ह्यागमशास्त्रे पठितोऽस्ति । अथ वा गम्यते ज्ञायतेऽपूर्वार्थोऽनेनेत्यागमो दृष्टांतस्तेनोक्तामित्यर्थः । एवमुक्तरीत्या । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यभिधानान्मन्युना क्रुधावेशस्संगो यस्य स तथा। यद्वा- मन्यौ हिरण्यकशिपौ—तन्निमित्तं संरंभः कोपावेशो यस्य सः ॥ १ ॥ यद्यपि नृसिंहरूपस्य पूर्वकल्पश्रुतत्वे वैकुंठे सदैव दृष्टत्वञ्च तथापि तदानीमदृष्टाश्रुतपूर्वत्वप्रतीतिर्लीलाशक्त्यैव कारिताऽद्भुतरसास्वादप्रापणार्थमिति ध्येयम् ॥ २ ॥ तातेति । सर्वहितकारित्वेन प्रियत्वादुक्तिः । त्वदर्थमाविर्भूतोऽयं त्वत्प्रार्थनयाऽवश्यं शांतो भविष्यतीत्यर्थः ॥ ३ ॥ हे राजन्निति । हरियशश्श्रवणेन देदीप्यमानोऽसीति भावः ॥ ४ ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥ तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः ॥ प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥ प्रह्लाद उवाच ॥ ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ॥ नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥ मन्ये धनाभिजनरूपतपः श्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ९ ॥

तस्य श्रीनृसिंहस्य करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य । सपदि तत्क्षणमेवाभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं ब्रह्मदर्शनं यस्य । निर्वृतः सन् हृदि दधौ । हृष्यंती रोमांचिता तनुर्यस्य । क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य । परमपुरुषार्थतया दधौ न साधनत्वेनेत्यर्थः ॥ ६ ॥ सुसमाधिमेवाह । तस्मिन्नेव न्यस्तं हृदयमीक्षणं च येनेति ॥ ७ ॥ "स्वस्मिन्निव समस्तेषु तत्कृपामृतदृष्टये ॥ प्रह्लादः स्तौति सत्पद्यैर्द्विचत्वारिंशता हरिम् ॥ १ ॥ " तत्र तावदात्मनो भगवत्स्तुतावनधिकारमिवाशंक्याधिकारं संभावयन्नाह । ब्रह्मादय इति पंचभिः । मुनयो मननशीलाः सिद्धा ज्ञानिनोऽपि । कथंभूताः । सत्त्व एवैकस्मिंस्तानो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वक्ष्यमाणैर्गुणैरपि यमाराधयितुं न पिप्रुर्न पूर्णा न शक्ता इत्यर्थः । स हरिर्मे मम कथं तोषं प्राप्तुमर्हति । तत्र हेतुः । उग्रजातेः उग्रा घोरा आसुरी जातिर्यस्य ॥ ८ ॥ एवं हरितोषणे स्वस्यायोग्यतामाशंक्य योग्यतां संभावयति । मन्य इति द्वाभ्याम् । अभिजनः सत्कुले जन्म रूपं सौंदर्यं श्रुतं पांडित्यमोज इंद्रियनैपुणं तेजः कांतिः प्रभावः प्रतापः पौरुषमुद्यमो बुद्धिः प्रज्ञा योगोऽष्टांगः । एते धनादयो द्वादशापि गुणाः परस्य पुंस आराधनाय न भवंति । हि यतः केवलया

यद्वाऽसुरजातित्वात्तदीयस्पर्शादिप्राप्तसंभावनालक्षणमशुभं यत्पूर्वमासीत्तद्धुतं निरस्तं यस्य सः । अभिव्यक्तं पूर्वसिद्धमेव तदानीं सर्वतोव्यक्तीभूतम् । इत्यर्थ इति । भगवत्पादपद्मध्यानेनैव भगवत्प्राप्तिर्भवतीति साधनत्वेनापि तदिष्यते । इह तु तस्य प्राप्तप्राप्तव्यत्वात्साधनापेक्षा नास्तीत्यतोऽयमेव परमपुरुषार्थो नातः परमिति विमृश्य दधाविति भावः ॥६॥७॥ द्विचत्वारिंशतेति । अष्टादशपुराणषट्शास्त्रषडेदांगवेदचतुष्टयोपवेदचतुष्टयेतिहासागमधर्मशास्त्रार्थशास्त्राणि मिलित्वा द्विचत्वारिंशद्भवंतीत्येतत्सर्वशास्त्रसिद्धांततात्पर्यरूपेण तावद्भिरेव पद्यैस्तं स्तौतीति तत्त्वम् । तस्य हरेः कृपैवामृतदृष्टिस्तस्यै तदर्थमित्यर्थः (१) तत्र तावदित्यव्ययं वाक्यालंकारे । स्तुतौ निजायोग्यतायां कैमुत्यं व्यंजयन् भो दुरवगमाश्चर्य प्रभो मयि कं गुणमालंब्य कृपयसीत्याह—ब्रह्मादय इति। सात्त्विकत्वमपि न ते कृपायां कारणं किं पुनस्तामसत्वमित्याह—सत्त्वे धर्मज्ञानतपोरूपे एकतानाऽनन्यवर्त्तिनी मतिर्येषां ते किं पुनरधर्माज्ञानविषयभोगैकतानमतयो वयमिति भावः । 'एकतानोऽनन्यवृत्तिः' इत्यमरः । न च केवलं स्तुतिवादानामेव त्वत्प्रसादकत्वमित्याह वचसां प्रवाहैः पुरुगुणैर्ध्वनिगुणालंकारयुक्तैः । प्रवाहपक्षे—स्वच्छत्वशैत्यमाधुर्य्यपावित्र्याद्यैराराधितुमाराधयितुं स्वेषु संतोषयितुमित्यर्थः । इत्यर्थ इति । धातूनामनेकार्थत्वात् पालनाद्यर्थे वर्त्तमानोपि शक्त्यर्थेऽस्तीति भावः । अडागमाभावोऽत्रार्षः । अपिपुरिति लङः प्रथमपुरुषबहुवचनान्तम् । तत्र तोषाभावे ॥ ८ ॥ न च बहुधनपरिवारादिभिस्त्वं तुष्यसीत्याह—मन्य इति । नाराधनाय न संतोषणाय । तर्हि केन तुष्यसीत्यत आह—भक्त्येति । केवलया धनादिद्वादशगुणवर्जितया तुतोषेति । भूतनिर्देशान्नात्र काप्यन्या युक्तिरन्वेष्टव्या किन्तु भवतः स्वभाव एवायं भक्तेर्वा काप्यद्भुता शक्तिरिति द्योतते तेन च त्वत्संतोषोऽप्यन्यथानुपपत्त्या मय्यपि श्रीनारदकृपोद्भूतो भक्तिगंधो वर्त्तत इति व्यंजितः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठम् ॥ मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति सकुलं न तु भूरिमानः ॥ १० ॥

भक्त्यैव गजेंद्राय तुष्टोऽभवत् ॥ ९ ॥ एवं भक्त्यैव केवलया हरेस्तोषः संभवतीत्युक्तमिदानीं भक्तिं विना नान्यत्किंचित्तत्तोषहेतुरित्याह । विप्रादिति । पूर्वोक्ता धनादयो द्विषट् द्वादश गुणास्तैर्युक्ताद्विप्रादपि श्वपचं वरिष्ठं मन्ये । यद्वा सनत्सुजातोक्ता द्वादश धर्मादयो गुणा द्रष्टव्याः । तदुक्तम् । "धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ॥ यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य" इति । यद्वा "शमो दमस्तपः शौचं क्षांत्यार्जवविरक्तताः ॥ ज्ञानविज्ञानसंतोषाः सत्यास्तिक्ये द्विषड्गुणाः" इति कथंभूताद्विप्रात् अरविंदनाभस्य पादारविंदाद्विमुखात् । कथंभूतं श्वपचम् । तस्मिन्नरविंदनाभेऽर्पिता मनआदयो येन तम् । ईहितं कर्म । वरिष्ठत्वे हेतुः । स एवंभूतः श्वपचः सर्वं कुलं पुनाति । भूरिर्मानो गर्वो यस्य स तु विप्र आत्मानमपि न पुनाति । कुतः कुलं यतो भक्तिहीनस्यैते गुणा गर्वायैव भवंति

तदुक्तं शिष्टैः—" व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेंद्रस्य का का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् । कुब्जायाः किमु तत्र रूपमधिकं किं तत्सुदाम्नो धनं भक्त्या तुष्यति केवलं परमया भक्तिप्रियो माधवः॥" इति । भक्तिं विना सुशरीरादेरपि वैयर्थ्यमेवाभियुक्तैरुक्तम्—"शरीरं सुरूपं तथा वा कलत्रं धनं मेरुतुल्यं वचः काकुचित्रम् । हरेरंघ्रियुग्मे मनश्चेन्न दत्तं ततः किं ततः किं ततः किं ततः किम्" इति ॥ ९ ॥ किमन्यद्वक्तव्यं भक्त्यभावसद्भावाभ्यामेवं विविच्यत इत्याह—भक्तिहीनाद्विप्रात् । नन्वेते गुणास्तु सर्वसाधारणा एव न केवलं ब्राह्मणस्यैवेति चेदाह—यद्वेति । सनत्सुजातोपाख्यानमुद्योगपर्वणि भारते प्रसिद्धं तत्रोक्ताः धर्मश्चेत्यादि पाठ एव व्याख्यातृचतुर्द्धरनीलकंठसंमतः । ज्ञानं चेत्यादिपाठस्तु टीकांतरसंमत एव । तदर्थस्तु--धर्मो वर्णाश्रमनियतः संध्योपासनादि १ । सत्यं हिंसावर्जं यथार्थभाषणम् २ । दमो जिह्वोपस्थादि निग्रहः ३ । तपः कृच्छ्रचांद्रायणादि ४ । अमात्सर्यं परगुणासहिष्णुत्वाभावः ५ । ह्रीरकार्यविषये लज्जा ६ । तितिक्षा सत्यपि क्रोधनिमित्ते तदनुत्पादः ७ । अनसूया परगुणेषु दोषानाविष्करणम् ८ । यज्ञो ज्योतिष्टोमादिः ९ । दानं बहिर्वेदिसंविभागः १० । धृतिरत्यंतापद्यपि व्रतादेरत्यागः ११ । श्रुतमर्थग्रहणसहितं वेदाध्ययनमिति विवेकः । एते ब्राह्मणस्य ब्राह्मणत्वजातिविशिष्टस्य महाव्रताः स्वाभाविका एव नत्वन्येषामिव काम्या इत्यर्थः । यद्वा—"शमो दमस्तपः शौचं क्षांत्यार्जवविरक्तताः । ज्ञानविज्ञानसंतोषाः सत्यास्तिक्ये द्विषड्गुणाः ॥" इति पुराणांतरोक्ता वा द्वादश ग्राह्याः । अरविंदेति । तेन ज्ञानयोगादिसत्त्वे विप्रो भगवद्विमुखो नोच्यते इति मतं परास्तम् । भूरिरधिको मानो लोकेष्वादरो यस्य यद्वा—भूरिर्मानोऽहं ब्राह्मणः सर्ववर्णाश्रमेभ्य उत्कृष्ट एते सर्वेऽधमा इत्येवंलक्षणोऽभिमानो यस्य स विप्रस्त्वेकमात्मानमपि न पुनाति कुलस्य तु का वार्त्तेति भावः । इति भाव इति । एतेन भक्तिमता विनयिनैव विप्रेण भाव्यं न त्वन्यथेति विहितमित्याशयः । किञ्चेह विप्राच्छ्वपचाधिक्यवर्णनं विप्राणां हरिभक्तिप्रवृत्त्यर्थमेव न तु परमार्थतः । तथात्वे तु "ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह । तपसा विद्यया तुष्ट्या किमु मत्कलया पुनः ॥" इति मैथिलं श्रुतदेवं प्रति श्रीदशमे श्रीमुखोक्तेः पूर्वापरविरोधः "मज्जंश्च सर्वतीर्थेषु पूजयन्सर्वदेवताः । विप्रेतरो विप्रसमः कदाचिन्नैव जायते ॥" इति संहितोक्तेः ॥" अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनूः । अद्यापि श्रूयते राजन् द्वारकायामहर्निशम् ॥ " इति बहुलाश्वं प्रति नारदोक्तश्च । किञ्च "उत्पत्तिरेव विप्रस्य मूर्त्तिर्धर्मस्य शाश्वती । स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥ ब्राह्मणो जायमानो हि पृथिव्यामधिजायते । ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् । प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ एवं यद्यप्यनिष्टेषु वर्त्तंते सर्वकर्मसु । सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं महत् ॥" इति श्रीमनूक्तेश्च शास्त्रांतरविरोधश्च स्यादिति । यद्वा—हरिभक्तिः श्वपचादीनामपि शोधिनी किं पुनर्विप्रादीनामिति बोधनार्थं वा नान्यथेति भावः । अविज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते ॥ यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥
॥ ११ ॥ तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम् ॥ नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुव
र्णितेन ॥ १२ ॥ सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः ॥ क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं
भगवतो रुचिरावतारैः ॥ १३ ॥

न तु शुद्धयेऽतो हीन इति भावः ॥ १० ॥ तर्हि किं धनाद्यर्पणेन संमानं प्राकृत इव भगवानपेक्षते नेत्याह । नैवेति । अयं प्रभुरीश्वरोऽविदुषोऽल्पकाज्जनान्मानं पूजामात्मनोऽर्थे न वृणीते नेच्छति यतो निजलाभेनैव पूर्णः । तर्हि पूजां नेच्छत्येव तत्राह । करुणः कृपालुरतो वृणीते च । तत्र हेतुः । यद्यदिति । यंयं मानं यद्वा यद्यस्मायद्येन धनादिना भगवते मानं विदधीत तदेवात्मने भवति नान्यत् । यथा मुखे कृतैव तिलकादिश्रीः शोभा प्रतिबिंबस्य भवति न तु साक्षात्तस्यैव कर्तुं शक्यते तद्वत् ॥ ॥ ११ ॥ यस्मादेवं भगवान्भक्त्यैव तुष्यति तस्मादहं नीचोऽपि विगतविक्लवो गतशंकः सन्नीश्वरस्य महि महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणानुवर्णयामि । अजानतोऽपि स्तुतिकरणे हेतुमाह । येनैव महिम्नाऽनुवर्णितेनाविद्यया संसारमनुप्रविष्टः पुमान्पूयेत शुध्येत तन्महि । अन्यस्य तथा शोधकत्वाभावादित्यर्थः ॥ १२ ॥ तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं तं स्तुवन्कोपोपसंहारं प्रार्थयते । सर्वे हीति द्वाभ्याम् । भो ईश अमी उद्विजंतो बिभ्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेस्तव विधिकरास्त्वन्नियोग

यतेऽधिको जायते प्रणीतोऽप्रणीतश्च मंत्रविधिनाहितोऽनाहितश्च । अनिष्टेषु निंद्येषु इति स्मृतिपदानामर्थः ॥ १० ॥ पुनराक्षिपति–तर्हीति । अतः कृपालुत्वे तस्यैव दर्पणाद्यंतर्गतप्रतिबिंबस्यैव तिलकादि कर्तुं शक्यते । संदर्भः–भक्ताश्च श्रीभगवतोपि स्वत एव परमाभीष्टरूपा भक्तिरेव च भक्तानां सुखरूपेति भक्त्या तुतोषेत्येवोत्कर्षयन्स्वकर्त्तव्यत्वेन तामेव निगमयितुमाह–नैवेति । अयं प्रभुरात्मनो मानं पूजां जनान्निजभक्तान्न वृणीते नेच्छति । तत्र हेतुः–निजस्य भक्तस्य लाभेनैव पूर्णः परमसंतुष्टः । हेत्वंतरं–करुणः पूजार्थतत्प्रयासाद्यसहिष्णुः । कथंभूताज्जनात् अविदुषः पितुरग्रे बालकवत्तस्याग्रे न किंचिदपि जानतः । एषा स्वस्य जनैकवर्गत्वेन दैन्योक्तिः । यद्वा–तदावेशेनान्यत्किंचिदपि न जानत इत्यर्थः । उभयत्र पक्षेऽपि तस्यतस्य कारुण्यं हेतुरिति भावः । तर्हि किं जनस्तस्य मानं न कुरुत एवेत्याशंक्याह–यद्यदिति । स च जनो यद्यत् यंयं मानं विदधीत संपादयति स सर्वोप्यात्मार्थमेव तत्संमानमात्रेणैव स्वसंमानाभिमननात् । सुखं मन्यमानस्तन्मानं करोत्येवेत्यर्थः । तत्संमानमात्रेण स्वसंमानश्च तदेकजीवनस्य जनस्य युक्त एवेति दृष्टांतमाह–यथा मुखे या शोभा क्रियते तन्मात्रमेव प्रतिमुखस्य शोभायै भवति नान्यदिति ॥ ११ ॥ यस्माद्भक्त्यैव तुष्यति न तु सज्जात्यादिभिर्यस्माच्च त्वत्संमाननं खल्वात्मन एव प्रतिफलति तस्माद्धेतोः । इत्यर्थ इति । 'यमादिभिर्योगपथैः' इत्यारभ्य 'मुकुंदसेवया यद्वत्तथाद्धात्मा न शाम्यति' इत्युक्तेरयं भावः ॥ १२ ॥ नन्वेवं ब्रह्माद्या भक्ता न भवंति भवानेव तु भक्त इत्याशंक्यासुरकुलजन्मत्वाद्दैत्येनात्मानमपि तत्स्वभावत्वेन निर्दिशन्ब्रह्मादीन् प्रसादविषयीकारयितुं व्यतिरेकदृष्टांतेन तेषां भक्तत्वमेव द्रढयति–सर्वे इति । न च न तुं वयमिवासुरा इवोद्विजंतः त्वदसमोर्द्ध्ववैभवदर्शनेनोद्वेगमीर्ष्यादिभावं प्राप्नुवंतो भवंति । भवांस्तु–सर्वमंगलचरित एवेत्याह–क्षेमायेति। हे ईशेति । क्षेमकरणमेवेशधर्म इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्यच्छ मन्युमसुरश्च हतस्त्वयाद्य मोदेत साधुरपि वृश्चिकसर्पहत्या ॥ लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मरंति ॥१४॥
नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ॥ अंत्रस्रजः क्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥१५॥
त्रस्तोऽस्म्यहं कृपणवत्सल दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः ॥ बद्धः स्वकर्मभिरुशत्तम तेंघ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥ १६ ॥

कर्तारो भक्ता एव नान्ये । न च वयमसुरा इव वैरभावेनैते भक्ताः किं तु श्रद्धयैव तव रुचिरैरवतारैर्विविधं क्रीडनमस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय ॥ ॥ १३ ॥ तत्तस्मादेषां भयपरिहाराय मन्युं यच्छोपसंहर । यदर्थमयं मन्युः स चासुरः साधूनां संतोषार्थमद्य हतः । अतः परं क्रोधेन कार्याभावात्तं नियच्छ । नन्वन्येषां बधेन साधुः किं मोदेत तत्राह । वृश्चिकादेः परोपद्रवकारिणोऽन्यतो जातया हत्या वधेन तस्यैव तद्भद्रं जातमिति साधुरपि मोदेतैव । तर्हि बहूनां सुखावहत्वादमुं क्रोधं न त्यजामीति चेत्तत्राह।लोकाश्च निर्वृतिमिताः प्राप्ताः संतः प्रतियंति क्रोधोपसंहारं प्रतीक्षंते । तर्हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत्तत्राह रूपमिति । विभयाय भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्युधारणेन कृत्यमस्तीत्यर्थः ॥ १४ ॥ त्वं चेद्बिभेषि तर्हि त्यजामीति चेत्तत्राह । नाहमिति । भो अजित तेऽस्माद्रूपादहं न बिभेमि । कथंभूतात् । आस्यं च जिह्वा चार्कसदृशनेत्राणि च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्चैतान्यतिभयानकानि यस्मिंस्तस्मात् । अंत्रमय्यः स्रजो यस्मिंस्तदांत्रस्रक् तस्मात् । क्षतजाक्ताः केसरा यस्मिन् । शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात् । निर्ह्रादेन भीता दिगिभा यस्मात् । अरीन् भिंदंतीत्यरिभिंदि तानि नखाग्राणि यस्मिन् । एवंभूतादपि ते रूपादहं न बिभेमि ॥ १५ ॥ महद्भयं त्वन्यदस्तीत्याह । त्रस्तोस्मीति । दुःसहं यदुग्रं संसारचक्रे कदनं दुःखं तस्मादहं

भावः ॥ १३ ॥ यस्माद्विश्वस्य क्षेमायाभूत्तस्मादेषां ब्रह्मादीनाम् । अतो दैत्यहननेन साधुसंतोषात्परमन्यत् । अत्राक्षिपति नन्विति । अन्यतः स्वेतराज्जनात् । तस्यैव वृश्चिकादेरेव । तद्धननं भद्रं जातं लोकदुःखदानात्पापोत्पत्तिर्हि वृश्चिकादिदेहसंबंधेनैव तदभावे पापोत्पत्तेरभावात्तस्य नरकादिदुःखं न भविष्यतीति भावः । ननु तिर्यग्योनीनां न पापादिफलं विधिनिषेधशास्त्रस्य मनुष्यपरत्वादिति नात्र शंक्यं वानरजातीयवालिनः संध्योपासनादेः श्रीवाल्मीकीये श्रवणात् श्रीरामचंद्रेणापि जटायुषो दाहकरणात्प्राणिमात्रपरत्वं शास्त्रस्य बोध्यते एतद्वृत्तस्यापि तत्रैवोल्लेखाच्च । अत्र भगवानाक्षिपति–तर्हीति । इत्यर्थ इति । 'पलालमिव धान्यार्थी' इति न्यायेन क्रोधत्याग एवोचित इति । किं च तवैतद्रूपस्मरणेनैव भीता असुरा नंक्ष्यंतीति भावः । हे नृसिंहेति नामत एव सर्वेषां दुष्टानां त्रासो भवतीति भावः । अत्र संदर्भः–ननु परमसाधोस्तव हिंसकोयमिति महापापिनोप्यस्य मया हननं साधवोऽप्येतत्तत्वानभिज्ञा एते ब्रह्ममरीच्यादयो न सहेरन्नत एतेष्वपि प्रसादो न युक्त इत्याशंक्याह–मोदेतेति । अहं को वराकः किन्तु वृश्चिकादेरिव सर्वहिंसकस्यास्य हननं साधुजनोप्यनुमोदेत किमुतैते इत्यर्थः । किं वक्तव्यं त एव मोदं लब्धा इति यतो लोकाश्चेति अतो विश्वसुखदत्वात्साध्वेवानुष्ठितमिति प्रसादस्यावसरोऽयं न तु मन्योरिति भावः ॥ १४ ॥ असुरजातित्वेप्यन्येषामसुराणामिव त्वत्तो न मे भयमित्याह–नाहमिति । 'आटोपश्चोर्द्ध्वचलनम्' इत्यभिधानात् । अजितेति । यश्च केनापि न जीयते तस्मात्सर्वे बिभ्यतीति प्रसिद्धिर्यद्यप्यस्ति तथापि मे त्वत्कृपयैव न भयमिति भावः ॥ १५ ॥ किं तु त्वद्बैमुख्यप्रदा

१ शास्त्रज्ञः ।

यस्मात् प्रियाप्रियवियोगसयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः ॥ दुःखौषधं तदपि दुःखमतद्धियाहं भूमन् भ्रमामि वद मे तव दास्ययोगम् ॥ १७ ॥ सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिंचगीताः ॥ अंजस्तितंर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः ॥ १८ ॥

त्रस्तोऽस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन्प्रणीतो निक्षिप्तोऽस्मि हे कृपणवत्सल हे उशत्तम कदा नु त्वं प्रीतः सन्नपवर्गभूतं शरणं तवांघ्रिकमलं प्रति ह्वयसे मामाह्वयसि ॥ १६ ॥ दास्ये सति मत्प्रीतिरिरिति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात्त्वमेव तदुपदिशेति प्रार्थयते। यस्मात्प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि । दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह । दुःखस्यौषधं प्रतीकारस्तदपि दुःखमेव। एवमप्यतद्धिया देहाद्यभिमानेन मुह्यामि । अतो हे भूमन्विभो मे तव दास्यरूपं योगं निस्तारोपायं वद ॥ १७ ॥ ननु दास्ययोगेन प्रवृत्तस्यापि तदंतरायभूतानां पूर्वोक्तनानादुःखानां कुतः परिहारस्तत्राह । सोऽहं त्वद्दासः सन् भो नृसिंह तव लीलाकथा अनुगृणन्दुर्गाणि महादुःखान्यंजसा तितर्मि तरामि न गणयिष्यामीत्यर्थः । तत्र हेतुः गुणै रागादिभिर्विशेषेण प्रमुक्तः सन् । तत्कुतस्ते पदयुगमेवालयो येषां भक्तानां त एव हंसा ज्ञानिनस्तैः संगो यस्य मम सोऽहम् । कथंभूतस्य कथास्तत्राह प्रियस्येत्यादि । कुतो ज्ञाताः विरिंचेन गीतास्तत्संप्रदायप्रवृत्ताः । तथा चाथर्वणी श्रुतिः । " देवा ह वै प्रजापतिमब्रुवन्" इत्यादि । दास्ये प्रवृत्तस्य भवदनुग्रहेण सत्संगस्ततो वीतरागतया

यकदुःसंगादिभ्य एव भीतोस्मीत्याह—त्रस्तोऽस्मीति । दुःसहं यत्त्वन्निंदाद्वेषादिमयत्वादुग्रं संसारचक्रकदनं तस्मादेव त्रस्तोऽस्मि न तु साधारणसंसारादिति प्रह्लादाभिप्रायो व्याख्येयः । "नैवोद्विजे परदुरत्ययवैतरिण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः" इत्यग्रिमतदुक्तेः । यतो ग्रसतां त्वद्भक्तं मां भक्षितुमिच्छतामसुराणां मध्ये प्रणीतो निक्षिप्तः । ननु त्वं किं मया निक्षिप्तस्तत्र नहिनहीत्याह बद्धः सन् कर्मभिरेव अंघ्रिमूलमंघ्रिकमलं कमलस्यैव हरिनाभ्युद्भूतस्य सर्वमूलत्वान्मूलपदेन कमलपदावबोधो न विरुद्धः "मूलं कंजे निदानेभेऽग्रे मुख्यधनबुध्नयोः" इति धरणिः । 'बुध्नब्रध्नौ समानार्थौ' इति च । ह्वयसे पादसंवाहनार्थं मामाह्वास्यसीत्यर्थः । यद्वा—ते तवांघ्रिमूलं चरणारविंदयोर्नित्याधिष्ठानं श्रीवैकुंठं प्रति कदा नु ह्वयसे । हे कृपणवत्सलेति । मादृशदीनोपरि कृपैवं तवोचितेति भावः । तत्र हेतुत्वेन संबुद्ध्यंतरमाह—उशत्तमेति । उशंति सर्वेदेच्छंति दीनोद्धरणमित्युशंतो दयालवस्तेष्वपि श्रेष्ठस्त्वदपरो नास्तीति भावः ॥ १६ ॥ ननु मदंघ्रिसेवया किं करिष्यसि यद्वा—यावदाबह्वयामि तावत्पैतृकं त्रिजगदैश्वर्यसुखं भुंक्ष्वेति चेद्दुःखमेव तदतस्तत्र प्रार्थ्यमस्तीत्याह—यस्मादिति । सकलयोनिष्विति । राजदेहेऽपि तादृशशोकाग्निदाहस्य नासद्भाव इति भावः । ननु शोकाग्नेः प्रतीकारा अपि बहवो वर्त्तते इत्यत आह—दुःखौषधमिति । एवमपि दुःखस्वरूपत्वेपि । अतद्धिया दुःखबुद्ध्यैव शूकरादियोनावप्यहं सुखीति बुद्ध्या भ्रमामि । अतस्तव दास्यस्य योगमुपायं वद केनोपायेन तव दास्यं प्राप्नुयां तत्त्वमेवोपदिशेति त्वद्दास्यत्वे सति नानायोनिगतस्यापि मे किमपि दुःखं न स्यादिति भावः । यद्वा—दास्यं दासकर्म तच्च श्रीहरिप्रतिमापरिचर्या तदेव योगस्त्वत्संयोगरूपस्तं वदेत्यर्थः । हे भूमन्निति । भूम्नो दास्यं को न वांछतीति भावः । दास्यस्यैव परमपुरुषार्थत्वात्तदुक्तं ब्रह्मवैवर्त्ते "कृष्णे भक्तिः कृष्णदास्यं वरेषु परमं वरम् । श्रेष्ठा पञ्चविधा मुक्तेर्हरिभक्तिर्गरीयसी ॥ ब्रह्मत्वादपि देवत्वादिन्द्रत्वादमरादपि । अमृतात्सिद्धिलाभाच्च हरिदास्यं सुदुर्लभम् ॥" इति ॥ १७ ॥ अत्राक्षिपति—नन्विति । सांसारिकदुःखपरिहारोऽन्य एवान्वेष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः ॥ तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानाम् ॥ ॥ १९ ॥ यस्मिन् यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा ॥ भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्वरूपम् ॥ २० ॥

भगवद्गुणानुवर्णनं ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः ॥ १८ ॥ ननु दुःखैस्तप्तस्य तत्प्रतीकारो लोके प्रसिद्ध एव किं मद्दास्यादिना तत्राह । बालस्येति । भो नृसिंह तप्तस्य तत्प्रतिविधिर्दुःखप्रतीकार इह लोके योंजसेष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव न त्वात्यंतिकः । तदेवाह । बालस्य पितरौ शरणं रक्षकाविह न भवतस्ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् क्वचिदजीगर्तादिषु ताभ्यामेव तद्वधदर्शनाच्च । न चार्त्तस्य रोगिणोऽगदमौषधं शरणं कृतेऽप्यौषधे मृत्युदर्शनात् । न चोदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सह मज्जनदर्शनात् । अतस्त्वमेव शरणमित्यर्थः । अथवैवं काक्का व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वदुपेक्षितानां किमंजसेष्टोऽपि तु नेष्ट एव । यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमंजसा नैवांजसेत्यादि योज्यम् । बालस्येत्यादि पूर्ववदेव ॥ १९ ॥ ननु क्वचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोऽपि दृश्यत एवेत्याशंक्य तत्रापि तत्तद्रूपेण त्वमेव रक्षक इत्युररीकृत्य तस्यैव सर्वात्मतामाह । यस्मिन्निति । अपरोऽर्वाचीनः पित्रादिः परो ब्रह्मादिर्वा भावः कर्ता तत्तत्कारकैर्यद्यत्करोति तत्सर्वं भवत एव स्वरूपं न तु पृथक् यस्मिन्नधिकरणे यतो निमित्ताद्यर्हि यस्मिन्काले येन करणेन येन हेतुकर्त्रा संचोदितश्च यस्य संबंधि यस्मादपादानाद्यस्मै संप्रदानाय यदीप्सिततमं यः कर्तेत्येवं सप्तविभक्त्यर्थाः । यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थः । पृथक्स्वभावः

व्यस्तत्र साटोपं सप्रागल्भास्फोटं चाह—सोहं त्वदनन्यभक्तः श्रीनारदभृत्यत्वेन प्रसिद्धः प्रह्लादोऽहमन्य इव न ज्ञानकर्मादिकं स्वप्रेप्स्यंगीकरोमीति भावः । अनुगृणन्कीर्त्तयन्नेव । इत्यर्थ इति । दुःखतरणं हि तदचिंतनमेव तच्च चेतोधर्मश्चेतश्च त्वदाविष्टं न किञ्चिदपि गणयतीति भावः । तत्र दुःखागणने यद्यहं गुणातीतः स्यां तदा मे कुतो दुःखदुःखौषधञ्चेति भावः । तत् गुणातीतत्वम् । त्वद्भक्तसंगप्रसादादेव गुणातीतत्वं जातमिति भावः । तत्संप्रदायेन प्रवृत्ताः कथा इत्यत्र प्रमाणमाह—तथाचेति । देवा इंद्राद्याः । प्रजापतिं ब्रह्माणमब्रुवन्निममेव नो भगवन्नोंकारमात्मानमुपदिशेत्यादिना श्रीनृसिंहतापनीयनवमखंडे वर्णिता इति । वाक्यार्थो निर्गलितोर्थः ॥ १८ ॥ पुनराक्षिपति—नन्विति । भा नृसिंहेति । न हि गजानां सिंहं विहाय श्वभिर्हननं कर्तुं शक्यते यथा तथा दुःखौघसंघप्रतीकारोप्यौषधादिना त्वां विहाय न कर्तुं शक्य इति भावः । एवं पूर्वपद्येऽपि संबुद्ध्यभिप्राय ऊहनीयः । अजीगर्त्तो हि भार्गववंशीयो मुनिस्तेन शुनःशेफाख्यस्वपुत्र एव मारणाय विक्रीतो नवमस्कंधे चैतत्प्रकटी भविष्यति । आदिना हंसध्वजादिग्रहस्तेनापि सुधन्वाख्यः स्वपुत्रस्तप्ततैलकटाहे निक्षिप्तः प्रसिद्धमेतज्जैमिनीये रोगनाशादर्शनाच्चेति हेत्वंतरमार्त्तस्येति । यत एते न रक्षका अतो हेतोः । इत्यर्थ इति। तत्त दुःखप्रतीकारो हि त्वां विना न फलतीति भावः । तथा च यः प्रतिविधिरुपदिष्टः शास्त्रांतरे स त्वदुपेक्षितानां त्वद्बहिर्मुखानामेवापाततो धैर्यार्थमेवेत्याह—यद्वेति । किञ्च तत्रापि सर्वशक्त्याश्रयपरमशक्तिना त्वयैव रक्षणं तत्तद्द्वारेति भावः ॥ १९ ॥ पुनराक्षिपति—नन्विति । स्फोटितमेतत्स्वामिचरणैरेवात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माया मनः सृजति कर्ममयं बलीयः कालेन नोदितगुणानुमतेन पुंसः ॥ छंदोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥२१॥ स त्वं निहत्य विजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः ॥ चक्रे विसृष्टमजयेश्वरषोडशारे निष्पीड्यमानमुपकर्ष विभो प्रपन्नम् ॥ २२ ॥ दृष्टा मया दिवि विभोऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति याञ्जनोऽयम् ॥ येऽस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २३ ॥

सत्त्वादिप्रकृतिः । करोत्युत्पादयति विकरोति रूपांतरं नयतीति ॥ २० ॥ अतोऽन्यस्य रक्षकस्याभावादसंसारित्वाच्च नित्यमुक्तस्त्वमेव मां शरणागतं रक्षेति प्रार्थयते मायेति द्वाभ्याम् । त्वदंशस्य पुंसोऽनुमतेनेक्षणरूपेणानुग्रहेण मनो मनःप्रधानं लिंगं माया सृजति । कथंभूता । कालेन नोदिताः क्षोभिता गुणा यस्याः । कथंभूतं मनः । कर्ममयं कुर्वद्रूपं बलीयो दुर्जयं छंदोमयं वेदोक्तकर्मप्रधानं च । अजया जीवस्याविद्यया तद्भोगार्थमर्पिताः षोडशारा विकारा यस्मिन् यदेवंभूतं संसारचक्रात्मकं मनस्तत्कोतितरेत् । भो अज त्वदन्यस्त्वत्तः पृथक्स्थितः । त्वामभजन्नित्यर्थः ॥ २१ ॥ ननु ममापि मायासंबंधात्कर्तृत्वाद्यविशेषाच्च त्वत्तः को विशेष इत्याह । स इति । स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनो बुद्धेर्गुणा येन स हि त्वम् । यतः कालो मायाप्रेरकः । अत एव वशीकृता विसृज्यानां कार्याणां विसर्गाणां साधनानां च शक्तयो येन । अत इक्षुदंडवन्निष्पीड्यमानं मामुपकर्ष स्वसमीपं नय ॥२२॥ ननु लोकपालानां भोगान्भुंक्ष्व पित्र्यं वा राज्यमिदं दास्यामि किमिति संसारादुद्विजसे तत्राह । दृष्टा इति त्रिभिः। श्रियः संपदः । विभव उद्भवः । आयुरादयो दृष्टा इति काक्वा तुच्छत्वमुक्तम् । तदेवाह । येऽस्मत्पितुः कोपहासविकृतभ्रूभंगमात्रेण विध्वस्ताः स च त्वया

उपरम्यते ॥ २० ॥ यतस्त्वमेव सर्वरूपोऽतो हेतोः । ननु यद्यहमेव सर्वरूपस्तर्हि संसारोऽप्यहमेव कुतो मद्रूपात्संसारान्मुक्तिमिच्छसीत्यत आह—द्वाभ्याम् । माया त्वदीया बहिरंगा शक्तिः मनो महदाद्यात्मकं लिंगदेहं जीवस्योपाधिं कर्माणि लौकिकवैदिकव्यापारास्तन्मयं बलीयो दुर्जयं छंदोमयं वासनामयम् 'छंदः पद्येऽभिलाषे च' इत्यमरः । यदेव खल्विदं संसारचक्रं भवेत् । हे अजेति । न जीयते केनापीत्यजस्त्वं तु मायां पराजित्य ततः परत्रास्सेऽतस्त्वत्सेवाप्रभावेणाहमपि मायां जेतुं समर्थो भविष्यामीति भावः । इत्यर्थ इति । त्वद्भक्तस्तु "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति त्वदुक्तेरेव तां तरत्येवेति भावः ॥२१॥ पुनराक्षिपति—नन्विति । ममापीति । मायायास्त्वच्छक्तित्वात्तन्मयं संसारचक्रं यद्यपि त्वद्रूपं तदपि त्वं स्वरूपशक्त्या तस्मात्पृथग्भूत एव तस्माद्विमोच्य लोकमिमं स्वचरणांतिकं नयेत्याह—स त्वमिति । यन्माया हि गुणमयं जीवोपाधिं सृजति स त्वं चिच्छक्त्या स्वरूपशक्त्या । अत एव मायाप्रेरकत्वादेव । हे ईश्वरेत्याकर्षणसामर्थ्यमाह । विभो इति पीडाऽभिज्ञतां चाह ॥ २२ ॥ पुनराक्षिपति—नन्विति । न च त्वां विनान्यं कमप्यैश्वर्यवंतं पश्यामि यमहं प्रपद्ये यो मां संसारादुद्धरिष्यतीत्याह—दृष्टा इति काक्वेति । किं न दृष्टाः किन्तु दृष्टा एवेत्यर्थः । त्वया निरस्त इत्यसाधारणप्रभावादपि त्वमेव परमेश्वर इति जानामीति भावः । विभो इति । विशेषेण भानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादमूस्तनुभृतामहमाशिषो ज्ञ आयुः श्रियं विभवमैंद्रियमा विरिंचात् ॥ नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्य पार्श्वम् ॥ २४ ॥ कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ॥ निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः ॥ २५ ॥ क्वाहं रजःप्रभव ईश तमोधिकेऽस्मिञ्जातः सुरेतरकुले क्व तवानुकंपा ॥ न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥ २६ ॥ नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथात्मसुहृदो जगतस्तथाऽपि ॥ संसेवया सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न परावरत्वम् ॥ २७ ॥

निरस्तः ॥ २३ ॥ यस्मादेवं तस्मादाशिषो भोगान् ज्ञस्तत्परिपाकं विद्वानहमैंद्रियमिंद्रियैर्भोग्यं ब्रह्मणो भोगमभिव्याप्य किमपि नेच्छामि ते कालात्मन उरुविक्रमेण विलुलितान्विध्वस्तानणिमादीनपि ॥ २४ ॥ किं च वर्तमानकालेऽपि न भोगार्हा इत्याह । कुत्रेति । श्रुतिः श्रवणं तदेव सुखं यासु ताः मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः क्व । अशेषाणां रुजां रोगाणां विरोह उद्भवस्थानं क्व चेदं कलेवरम् । एवं चेत्सर्वोऽपि जनः किं न विरज्यते तत्राह । यदपि यद्यपीत्येवं विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति । कुतः । काम एवानलस्तं मधुतुल्यैः सुखलवैर्दुःसाध्यैरपि शमयन् कामाग्निशमनव्यग्रस्य निर्वेदावकाशो नास्तीत्यर्थः । यद्वाऽचिंत्यमिदं त्वन्मायाचेष्टितमिति भावः ॥ २५ ॥ तर्हि त्वं कथं निर्विण्णोऽसि अनर्हेऽपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाऽह क्वेति । रजसैव प्रभवो जन्म यस्य सः सतम्यंतं वा कुलविशेषणम् । तमोऽधिकं यस्मिंस्तस्मिन्नसुराणां कुले जातोऽहं क्व क्व च तावनुकम्पा । तामेवाह । ब्रह्मादीनां शिरसि यो नैवार्पितः स पद्मवत्सकलसंतापहरः करः प्रसादः पुरुषार्थरूपो मे शिरस्यर्पित इति यत् । यद्वयाऽनुकम्पयेति वा ॥ २६ ॥ न च त्वयीदमतिचित्रमित्याह । नैषेति । एते ब्रह्मादय उत्तमा अयमसुरो नीच इत्येषा परावरम

तवैवेति भावः ॥ २३ ॥ ततः किमत आह—तस्मादिति । यस्मान्मत्पिता तादृशैश्वर्यसंपत्तिमानपि निरस्तस्तस्मादहमणिमादिसिद्धीरपि निजभृत्यानां नंदसुनंदादीनां पार्श्वं समीपं नय भृत्यभृत्यं विधेहीति भावः । यद्वा—हे निजा भृत्या भक्ता यस्य तादृश 'यदात्थैकांतभक्तान्मे नानंतः श्रीरजः परः' इति । श्रीदशमे मैथिलोक्तेः । पार्श्वं स्वसमीपं दास्ये प्रवृत्तं कुर्विति । तस्यैव सर्वोत्तमपदत्वादिति भावः ॥ २४ ॥ तर्हि किमिति सर्वे लोका भोगैश्वर्यमेव वांछंति तत्राह—सर्वोप्यनभिज्ञ एवेत्याह—किवेति । मृगतृष्णा यथा दृष्टिसुखास्तथैव राज्याद्याशिषोपि श्रुतिसुखमात्रा एव स्पर्द्धाऽसूयारागद्वेषाऽपापचिंतादिभिर्वस्तुतस्सुखलेशस्याप्यभावात् । अस्तु वा सुखं तस्य भोगासामर्थ्यान्महदेव दुःखमित्याह—क्वेदमिति । तथापि विद्वानपि विचार्यापि न निर्विद्यते । मूर्खः किमुतेति भावः । इत्यर्थ इति । न हि मधुलवैरनलः शाम्यति प्रत्युत दीप्यत एव बहुप्रदीप्ते बहुयत्नं करोतीति भावः । अहो विद्वानपीत्थं कुरुते चेत्तर्ह्यविद्वानेवेत्यत आह—यद्वेति । इति भाव इति । विदुषामपि तव मायया मोहो भवतीत्याशयः ॥ २५ ॥ भगवानाक्षिपति तर्हीति । यद्यपि नास्ति कोप्यधमस्तदपि त्वं मां सर्वोत्तममकरोस्तत्ते कृपामाहात्म्यं वर्णयामीत्याह—क्वेति । संभवत्वादाह—सतम्यंतं वेति । करविशेषणत्वे स इत्यध्याहारे च गौरवादाह—यत् ययेति ॥ २६ ॥ त्वयि परमेश्वरे । इदमधमेऽपि दयालुत्वं प्राकृतस्य सामान्यपुरुषस्य । अत्र परावरमत्यभावे । एवं सत्यपि सेवानुरूपोदये सत्यपि । सेवातारतम्येनैवोदयतारतम्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रतपन् प्रसंगात् ॥ कृत्वात्मसात् सुरर्षिणा भगवन् गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २८ ॥ मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ॥ खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २९ ॥

तिर्जंतोः प्राकृतस्य यथा तथा भवतो नैव स्यात् । अत्र हेतुः जगत आत्मनः सुहृदश्च । तर्हि सर्वत्र मत्प्रसाद एवंरूपश्च किं न स्यात्तत्राह । संसेवया तव प्रसादो भवति तत्र च सेवानुरूपं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति । एवंसत्यपि वैषम्याभावे दृष्टांतः । सुरतरुर्यथा सेवकस्यैव संकल्पानुसारेण फलं ददाति न च विषमस्तद्वत् । न परावरत्वमत्र कारणमिति शेषः ॥ २७ ॥ एतच्च त्वद्भृत्यकृपया मया प्राप्तमिति त्वद्भृत्यपार्श्वमेव मां नयेत्याशयेनाह । एवमिति । यथा त्वयाऽनुकंपितोऽस्म्येवं नारदेनाऽऽत्मसात्कृत्वा पूर्वमनुग्रहीतः सोऽहं कथं नु त्वद्भृत्यसेवां विसृजामि । कथंभूतोऽनुगृहीतोऽस्मि । प्रभव एवाहियुक्तः कूपस्तस्मिन्कामानभितः कामयमानं जनं निपतितमनु तत्प्रसंगात्प्रपतन्योऽहम् । तदेवं त्वद्भृत्यस्य नारदस्यानुग्रहेण त्वयाऽत्यंतमनुकंपितोऽस्म्ययमेव च मम परमोऽनुग्रहो न पुनरिदमतितुच्छं मत्प्राणरक्षणादि ॥ ॥ २८ ॥ न चेदं त्वया मदनुग्रहार्थं कृतं किंत्वन्यार्थमित्याह । भो अनंत यदेतन्मत्प्राणरक्षणं मां हंतुमुद्यतस्य मत्पितुर्वधश्च तदुभयं स्वभृत्यऋषिवाक्यमृतं सत्यं विधातु

न परावरत्वं तूत्कृष्टानुत्कृष्टत्वमत्र कृपोदयतारतम्ये कारणमित्यर्थः । अत्र संदर्भः—यत्तु भवान्भक्ताननुगृह्णाति तच्च यद्यपि चित्रं तथापि दृष्टांतसद्भावान्नातिचित्रं मय्यनुग्रहस्तु तदभावादतीव चित्रमिव । पूर्वोक्तार्थमेवोत्कर्षयितुमाह—नैषेति ॥ २७ ॥ ननु मत्संसेवया त्वयि मम सम्यक् प्रसाद इत्यत्र सुरतरुदृष्टांतेन मद्वैषम्यं पर्यहार्षीः किन्तु संसेवायां किं कारणं तद्ब्रूहीति तत्राह—एवमिति । एवमुत्कृष्टनिकृष्टभावेन जनं सर्वमेव कामान्कामयमानं निपतितमनु तत्प्रसंगात्पतितप्रसंगात्प्रपतन्नेवाहं सुरर्षिणा नारदेनात्मसात्कृत्वाऽयं जीवो मदीयो भवत्विति मयि स्वस्वत्वमारोप्य गृहीतो बलात्स्वपाणिना गृहीत्वा ततः स्वांतिकं नीत्वा तन्मंत्रराजमुपदिश्य स्वसेवकीकृत इति भावः । सोऽहं संसारकूपपतित एव संप्रत्यहं प्रह्लादस्त्वद्भक्तो यत्प्रसादादभवं तस्य तव भृत्यस्य श्रीमद्गुरोः श्रीनारदस्य सेवां त्वत्सेवनरूपामाज्ञाम् आज्ञापालनमेव मुख्यसेवेत्यर्थः । कथं विसृजामि त्यजामि । यथा कर्मिज्ञानियोगिनः फलप्राप्तौ साधनं त्यजन्ति तथेत्यर्थः । भक्तिमार्गे हि साधनस्यापि फलीभावात् । भगवंतं प्राप्तानामपि ध्रुवादीनां साधुसंगादिस्पृहा यथा "भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानाम्" इति । "ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात्" इति च । अत एव विचार्यैव मया प्रार्थितम् । 'नय मां निजभृत्यपार्श्वम्' इति । स्वामिव्याख्यानेऽयमेव त्वत्सेवनोत्साह एवेत्यर्थः । संदर्भस्तु—अथैतादृश्याः कारणं स्मरन्नपि तदेवाभीष्टं प्रार्थयते—एवमिति । एवं त्वत्कृपायोग्यं यथा स्यात्तथाऽनुगृहीतो यः सोऽहं दृष्टभगवद्भृत्यातिशयत्वात्कथं विसृजे त्यक्तुं शक्नोमि नैवेत्यर्थः ॥ २८ ॥ इदं मत्प्राणरक्षणादिकम् । अतस्तव भक्तवश्यत्वाद्भक्तकृपानुगामिन्येव लोकेषु तव कृपा दृष्टा न तु त्वं स्वभक्तमनाश्रितान्कांश्चिदपि कृपयसीति न ते क्वापि वैषम्यं मय्यपि तव स्वभक्तानुरोधेनैव सर्व एवानुग्रह इत्याह—मदिति । स्वभृत्य ऋषिर्नारदस्तस्य वाक्यं सत्यं कर्तुमित्यहं मन्ये । मन्मात्रा मदर्थं प्रार्थितेन श्रीनारदेन त्वत्पुत्रस्य विद्वेषकनाशादिना कल्याणं भविष्यतीति वरदानात् । तदुक्तम्—"ऋषिं पर्यचरत्तत्र भक्त्या परमया सती । अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये । ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः" इति । अयुक्तं सद्धिंसनम् । कं शिरो हरामि छिनद्मि । पाठांतरे 'कं निर्हन्मि' इति पाठे । यत्पदस्य हेत्वर्थत्वे त्वन्वयकार्कश्यं मत्वाह—यद्देति । किञ्च दिग्गजादिभ्यो यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यासि मध्यतश्च ॥ सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥३०॥ त्वं वा इदं सदसदीश भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ॥ यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टि तर्वोः ॥३१॥

मित्यहं मन्ये । कुतः । यद्यस्मादसदयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत् । किं मदपरो मद्यतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामिदानीमवतु तव कं शिरोऽहं हरामीति । पाठांतरेऽप्ययमेवार्थः । यद्यदाऽवोचत्तदा मत्प्राणरक्षणमिति वाऽन्वयः । एतच्च सत्यं विधातुं निजभृत्यभाषितमित्यत्रैव बहुधा व्याख्यातम् ॥ २९ ॥ न चेदं पक्षपातेन रक्षणं दैत्यहननं च त्वयि स्वाभाविकं किं तु मायागुणोपाधिकं सर्वात्मके त्वयि स्वतस्तदयोगादित्याह एक इति । एतच्च जगत् त्वमेवैकः । यद्यतोऽमुष्यादावंते च पृथगवस्यसि विरामं करोषि सन्मात्रतया कारणत्वेनावधित्वेन च वर्तस इत्यर्थः । अतो मध्यतश्च त्वमेव । कुतस्तर्हि भेदप्रतीतिस्तत्राह । निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव रक्षक इव हंतेव चावसितः प्रतीतः । तदुक्तं स्कंधोपक्रमे । "निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान्प्रकृतेः परः ॥ स्वमायागुणमाविश्य बाध्यबाधकतां गतः" इत्यादिना ॥ ३० ॥ ननु यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यत आह । त्वं वै त्वमेवेदं सदसत्कार्यकारणात्मकं जगन्न तु त्वत्तः पृथक् । भवांस्तु ततोऽन्यः आद्यंतयोः पृथगवस्थानात् । यद्यस्मादेवमतोऽयमात्मीयोऽयं पर इति या बुद्धिः साऽपार्था मायैव । कार्यकारणाभेददृष्टांतेन साधयति । यद्यतो यस्य जन्म ईक्षणं प्रकाशश्च यस्मिन्निधनं च स्थितिश्च तद्वै तदेव । अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसुकालमात्रत्वम् । अयमर्थः । कालशब्देन नीलत्वाद्यसाधारणगुणयोगात्पृथ्वी । वसुशब्देन वस्तुमात्रं भूतसूक्ष्मम् । तत्र तरोर्यथा पृथ्वीमयबीजमात्रत्वं तस्य च यथा भूतसूक्ष्ममात्रत्वमेवं सर्वमपि कार्यं कारणात्मकं जगत्परमकारणात्मकमेवेति । तथा च पारमर्षं सूत्रम् "तदनन्यत्वमारंभणशब्दादिभ्यः" इति । श्रुतिश्च । "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ॥३१॥

मद्रक्षणं तथा तद्धस्तान्न संभवतीति मत्वा त्वया तद्वध एव कृत इत्यर्थः । ननु सोऽप्यतिबलस्तेन मद्वधः कथं न करिष्यत इत्यत आह–हे अनंतेति । न विद्यतेऽन्तः केनापि यस्य तादृशस्त्वमसीति भावः । एवं भगवतः सर्वत्र साम्येऽपि भक्तवश्यत्वं विशिष्यत इति प्रह्लादेन ज्ञापितम् ॥ २९ ॥ तदयोगात्पक्षपातायोगात् । इत्यर्थ इति । 'यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य च' इति न्यायेनेति भावः । अत आद्यंतयोर्विद्यमानत्वात् । स्कंधस्योपक्रमे प्रारंभे । विश्वनाथः वस्तुतस्तु–तमोगुण एव हंता सत्त्वगुण एव पालको रजोगुण एव स्रष्टा तेष्वौदासीन्येन त्वत्प्रवेशादेव त्वं हंतेत्यादि व्यपदिश्यते ॥ ३० ॥ अत्राक्षिपति–नन्विति । जगतो मायिकत्वेऽपि मायाया मच्छक्तित्वाज्जगतो वैषम्ये ममापि वैषम्यं किन्न स्यादित्यत आह–त्वं वा इति । या बुद्धिः सा मा मायाऽविद्या जीवस्याविद्याकल्पितैवेत्यर्थः । अपार्था सा तु मिथ्या भूतैवेत्यर्थः । अत्र मेति पृथक्पदं येति पृथक् 'मा लक्ष्मीमाययोरपि' इत्यभिधानात् । उक्तमर्थं विशदयति–अयमर्थ इति । भूतसूक्ष्मं गंधः । तत्र दृष्टांते । परमर्षेः साक्षान्नारायणावतारस्यर्षेः श्रीव्यासदेवस्येत्यर्थः । तस्मात्कारणादनन्यत्वमभिन्नत्वं कार्यस्य कुतः आरंभणशब्दादिभ्यः आरंभणशब्दो वाचारंभणमिति श्रुतिरादिपदेनैतदात्म्यमिदं सर्वमित्यादयस्तेभ्य इति सूत्रार्थः । तथा च पार्थिवपदार्थानां काष्ठपाषाणादीनां वैषम्येऽपि तत्परमकारणस्य गंधस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यस्येदमात्मनि जगद्विलयांबुमध्ये शेषे त्मना निजसुखानुभवो निरीहः ॥ योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युंक्षे ॥ ३२ ॥ तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढम् ॥ अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत् स्वकणिका वटवन्महाब्जम् ॥ ३३ ॥ तत्संभवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिंत्य ॥ नाविंददब्दशतमप्सु निमज्जमानो जातें कुरे कथमुहोपलभेत बीजम् ॥ ३४ ॥ स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः ॥ त्वामात्मनीश भुवि गंधमिवा तिसूक्ष्मं भूतेंद्रियाशयमये विततं ददर्श ॥ ३५ ॥ एवं सहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ॥ मायामयं सदुपलक्षितस न्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिंचः ॥ ३६ ॥

तत्र तावदंते पृथगवस्थानं दर्शयति । न्यस्येदमिति । इदं जगदात्मनैवात्मनि निक्षिप्य स्वसुखमेवानुभवन्निष्क्रियः सन्प्रलयोदकमध्ये शयनं करोषि । तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्राऽस्ति न हि । न हि योग एव तु बहिर्वृत्त्यभावसाम्यान्निद्रोच्यत इत्याह । योगेन मीलिते दृशौ येन । आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन । यतस्तुर्येऽवस्थात्रयातीते स्वरूपे स्थितस्त्वं न तु सुप्त इवात्मना तमो युंक्षे योजयसि न पश्यसि न जाग्रत्स्वप्नयोरिव गुणान्विषयांश्चेत्यर्थः ॥ ३२ ॥ इदानीं कारणत्वे नादावपि पृथगवस्थानं दर्शयन्मध्यतश्च त्वमेवेत्येतत्प्रपंचयति चतुर्भिः । यस्त्वमंभसि शेषे तस्यैव ते इदं जगद्वपुः स्वरूपं नान्यस्य यतस्त्वं मध्यतोऽपि तस्य कथंभूतस्य निजया कालशक्त्या संचोदिताः प्रकृतेर्धर्माः सत्त्वादयो येन । स्वरूपत्वे हेतुः । अनंतशयनाच्छेषपर्यंकाद्विरमन्समाधिर्यस्य तस्य तव नाभेः सकाशात् । एकार्णवोदके महाब्जं लोकपद्ममभूत् । कथंभूतम् । आत्मनि त्वय्येव गूढं सत् । स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥ तदेवं कारणत्वेनानुगतः सन्मध्यतश्च त्वमेव वर्तस इत्युक्तमेतदेव शुद्धसत्त्वस्य ब्रह्मणोऽनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह तस्मिन्नब्जे संभवो यस्य सः कविर्ब्रह्मा । अतः पद्माद्न्यदपश्यन् बीजमुपादानकारणभूतं त्वां स्वस्मिन्व्याप्तं संतमपि नाविंदत् । युक्तं चैतत् । उ ह अहो अंकुरे जाते सति बीजं तदनुगतं कारणं पृथक्कथं नाम पुमान्पश्येत् ॥ ३४ ॥ भवदुपासनया तु स्वस्मिन्नेव दृष्टवानित्याह । स त्विति । परावृत्त्याब्जमास्थितः सन् । तीव्रेण तपसा ध्यानेन । अनेन । सन्मात्ररूपेणोपादानतया दर्शनमुक्तम् ॥ ३५ ॥ ईश्वरत्वेन च दृष्ट्वा

न वैषम्यं तथैव जगतो वैषम्येऽपि न भगवत इति ॥ ३१ ॥ तत्र तावदाद्यंतमध्यपृथगवस्थानेषु विगतलयान्यनश्वराण्यंबूनि यस्य तस्य कारणार्णवस्य मध्ये तुरीये स्वरूपे स्थितस्तन्मात्रत्वेनात्मन्युररीकृतस्फूर्त्तिरि त्यर्थः । सुप्ते सुषुप्ते । इत्यर्थं इति । सुषुप्ताद्यभिमानिनां कारणादीनामनुभवितॄणां तुरीये लयादेवेति भावः । “ मंत्रेष्वाङ्यादेरात्मनः ” इत्यालोपः ॥ ३२ ॥ स्या भवेरित्यर्थः ॥ ३३ ॥ अंकुरे जाते तत्र स्वांशेन वर्त्तमानमपि तत्रांकुराधिरणे कथमुपलभेत किन्तु तत्तलक्षणं एवोपलभेतेत्यर्थः । कमलसूरणादीनामंकुरेषूत्पद्योत्पद्य नष्टेष्वपि बीजनाशादृष्टेः तत्तलं तु तदानीं ब्रह्मणो गम्यमेवासीदिति भावः ॥ ३४ ॥ हे ईशेति । सर्व नियंतुस्तव कृपयैव सर्वाभीष्टसिद्धिरिति भावः । भुवि कार्यभूतायां कारणं गंधमिव ॥ ३५ ॥ महापुरुषं चिदानंदविग्रहम् । यतो मायामयम् “ स्वरूपभूतया नित्यशक्त्या मायाख्यया युतम् । अतो मायामयं विष्णुं प्रव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ ॥ हत्वाऽनयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनंति ॥३७॥
इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान् विभावयसि हंसि जगत्प्रतीपान् ॥ धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥३८॥
नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रम् ॥ कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ ३९ ॥

कृतार्थोऽभवदित्याह । एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धम् । मायामयं मायाप्रधानम् । सता प्रपंचेनोपलक्षितः सान्निवेशः पादादिरचना यस्य ॥ ३६ ॥ तदा च भवांस्तस्यानुग्रहं कृतवानित्याह । तस्मा इति । हयग्रीवमूर्तिं बिभ्रत्सन् । रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्समर्पितवान् । तत्र हेतुः । सत्त्वमिति ॥ ३७ ॥ एकस्त्वमेवेत्यादिभिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधिको न तु स्वत इति तदुपसंहरति । इत्थमिति । विभावयसि पालयसि हंसि घातयसि कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः । अतस्त्रिष्वपि युगेष्वाविर्भावात्स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः ॥ ३८ ॥ तदेवं भगवतस्तत्त्वं निरूप्य स्वस्य च तद्विचारायोग्यतां निवेदयन्प्रार्थयते । नैतदिति त्रिभिः । असाधु बहिर्मुखम् । तीव्रं दुर्धरम् । हर्षशोकभयैरेषणात्रयेण चार्तं दुःखितमपि

दंति मनीषिणः ॥'' इति श्रुतेः । यद्वा—मयाया जीवस्याविद्याया आमयं रोगमिव विनाशकं सन्समुचितत्वेनोत्तमः उपाधिक्येन लक्षितः सामुद्रिकलक्षणांकितः सन्निवेशो नयनग्रीवादिविन्यासो यस्य तम् । यद्वा—कार्यकारणयोरैक्यात्सता प्रपंचेन पातालादिना सन्निवेशो यस्य तं वैराजमिति ॥ ३६ ॥ तदा सृष्टिकाले तस्य ब्रह्मणः रजस्तमश्चेति मूर्त्तिमंतौ रजोगुणतमोगुणावेव तावित्यर्थः । तत्र तयोर्हनने हेतुः—सत्वमिति । यद्यपि गुणमात्र एवोदासीनस्य हरेः सत्त्वगुणोऽपि न प्रियस्तथापि तत्स्वरूपभूते शुद्धसत्त्वे सत्त्वगुणस्य प्रातिकूल्याभावदर्शनादेव प्रियतमत्वमुत्प्रेक्षितं न तु वस्तुतः प्रियतमत्वमपि किन्तु सात्त्विकलोकपक्षपातित्वमेव तव तादृशोत्प्रेक्षायां हेतुः अतः शिष्टपालनार्थमेव तव दुष्टनिग्रहो यत्तत्खलु गुणानामेव स्वभावो न तु वस्तुतस्त्वयि वैषम्यमिति भावः ॥ ३७ ॥ यथा विरिञ्चस्य कृते हयग्रीवावतारस्तथैवान्येषामपि भक्तानां कृतेऽन्येऽवतारा इत्याह—इत्थमिति । युगेयुगेऽनुरूपं वृत्तं चरित्रं यस्य स तथा । द्वितीयांतपाठे तु धर्मविशेषणम् । छन्नोऽन्यदीयरूपभावाभ्यां बहिराच्छन्नः सत्यादियुगत्रये स्वस्य प्रख्यापनात्कलौ प्रायस्तदभावात्त्रियुग एवेति भावः। कलियुगस्याप्याद्यंतयोरवताराणां स्वरूपेण सत्त्वेपि मध्ये तु कुत्रचिदाविश्यैव यथाकथंचिद्धर्मपालनात्साक्षात्स्वरूपेणानाविर्भावात्त्रियुगत्वमुपचर्यते एव । सार्वकालिकस्य त्रियुगत्वासंभवात् । “ सत्याद्ये त्रियुगे विष्णुः साक्षाद्रूपेण जायते । गोवेदविप्रसाधूनां रक्षणाय कलौ तु सः॥स्वावेशमेव कुरुते साक्षाद्रूपं पिधाय च। द्विजातिष्वेव नान्यत्र त्रियुगत्वमतो हरेः॥'' । ''शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते । यतस्ततः कथं विष्णोरवतारो द्विजेतरे ॥'' इति वारतंतव्युक्तेः ‘ यो ब्रह्मक्षत्रमाविश्य बिभर्त्तीदं स्वतेजसा’ इति पृथूपाख्यानोक्तेश्च श्रीनंदराजस्य वैश्यत्वेऽपि वस्तुतो यादवत्वेन क्षत्रियत्वमेवेति ‘ वयं गोवृत्तयोऽनिशम् ’ इति श्रीकृष्णोक्तिर्हि वैश्यवृत्त्यभिप्रायेणैवेति श्रीदशमे श्रीनंदराजस्य यादवत्वं वर्णयिष्याम इत्यलम् । अत एवाह—हे महापुरुषेति । महांतो वेदाधिकारिणश्च ते पुरुषा महापुरुषा ब्राह्मणादयस्त्रयो वर्णास्ते विद्यंते धार्यविग्रहत्वेन यस्येति महापुरुषस्तत्संबुद्धौ तथा मत्वर्थीयोत्राच् । ‘ महान्तो वेदधारिणः ’ इत्यादिपुराणात् । एतेन ये वैष्णवाभासादयः शूद्रादिष्वपि हर्य्यावेशावतारमामनंति ते निरस्ताः । किं च कलौ प्रच्छन्न एव हरिरित्यत्र प्रमाणवचनमप्यर्थान्तराच्छन्नतयैव वक्ष्यते “ नानातंत्रविधानेन कलावपि तथा शृणु । कृष्णवर्णं त्विषा कृष्णं सांगोपागास्त्रपार्षदम् ॥ यज्ञैः संकीर्त्तनप्रायैर्यजंति हि सुमेधसः ॥'' इति साक्षाद्दर्शनाभाव एव संकीर्त्तनं भवतीति भावः ॥ ३८ ॥ तदेवं मुहुरवतीर्य त्वं स्वीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ॥ ४० ॥ एवं स्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतम् ॥ पश्यञ्जनं स्वपरविग्रहवैरमैत्रं हंतेति पारचर पीपृहि मूढमद्य ॥ ४१ ॥ को न्वत्र तेऽखिलगुरो भगवन्प्रयास उत्तारणेऽस्य भवसंभवलोपहेतोः ॥ मूढेषु वै महदनुग्रह आर्तबंधो किं तेन ते प्रियजनाननुसेवतां नः ॥ ४२ ॥

त्वत्कथासु न संप्रीयते । तस्मिन्नेवंभूते मनसि सति कथं तव तत्त्वं विचारयामि ॥३९॥ किं च जिह्वा अवितृप्ता सती भो अच्युत मा मां यतो मधुरादिरसस्तत आकर्षति उदरं तु क्षुधासंतप्तं सत्सत्य एव यत्किंचिदाहारमात्रं प्रति । चपला दृक् चक्षुः कर्मशक्तिः कर्मेंद्रियाणि । लुनंति त्रोटयंति ॥ ४० ॥ न केवलमहमेक एवैवं कष्टां दशामापन्नः किं तु महाजनोऽप्येवमेव क्लिश्यत्यतः सर्वं जनं पालयेति प्रार्थयते । एवमिति । भवः संसार एव वैतरणी यमद्वारनदी तस्याम् । अन्योऽन्यतो यानि जन्मादीनि तेभ्योऽतिभीतं स्वेषां परेषां च विग्रहेषु यथायथं वैरं मैत्रं च यस्य एवं मूढं जनं पश्यंस्त्वम् । हे पारचर तस्याः पारे स्थित नित्यमुक्त हंतेति अहो कष्टमित्येवमनुकंप्याद्य पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥ एकेन मया कथं सर्वो जनस्तारणीय इति चेत्तत्राह । को न्विति । को नु ते अत्र सर्वजनोत्तारणप्रयासो न कोऽपि । कुतः अस्य विश्वस्य भवसंभवलोपानामुत्पत्तिस्थितिसंहाराणां हेतोः ततोऽपि किमेतद्दुष्करमिति भावः । उचितं चैतदित्याह । मूढेष्विति । त्वां च त्वदीयांश्च तारयिष्यामीमं दुराग्रहं मा कृथा इति चेत्तत्राह । तव ये प्रियजना भक्तास्ताननु सेवमानानां नोऽस्माकं तेनोत्तारणेन किम् । "कोऽतिप्रयासोऽसुरबालका हरेः कोऽन्वत्र तेऽखिलगुरो भगवन्प्र

रूपगुणलीलामृतं वर्षसि तदप्यस्माकं पापिष्ठं मनस्तत्र न प्रीणाति दुर्विषयगर्ते एव मुहुः पतति किं कुर्म इत्याह–नेति त्रिभिः । ननु तव रूपगुणादीनामतिमाध्वीष्वपि कथासु किमिति न प्रीयते तत्राह–दुरितदुष्टम् । यथा पित्तदुष्टा रसना सितास्विति भावः । एषणात्रयेण पुत्रवित्तलोकैषणात्रयेण । यद्यपि महाभागवतप्रह्लादस्य मनो न प्राकृतमेतादृशम् ' त्वद्वीर्यगायनरसामृतमग्नचित्तः ' इत्यग्रिमतदुक्तेस्तदपि प्रेम्णो विविधविचित्रतरंगवत्वेनातिदैन्यादेव प्रेमिलोकस्यैव मुक्तिर्न विरुध्यत इति । हे विकुंठनाथेति । विशेषेण कुंठा विषयेष्वाकुला विकुंठा मादृशास्तेषां नाथो रक्षकस्त्वमेवासीति भावः ॥ ३९ ॥ अन्यदाह–किंचेति । मनसो दुष्टत्वे.पि मत्कीर्तनादिना जनः कृतार्थी भवतीति चेत्तत्राह–जिह्वा वागिंद्रियं रसनेंद्रियञ्च । भो! अच्युतेति। केवलं त्वमेव लोके इंद्रियाणि न च्योतसि विषयरसेनार्द्री करोषि वयं तु सर्वे एव च्योताम इति भावः। ग्राम्यकटुमिथ्यादिप्रलापं प्रति मधुरादिरसं प्रति चेति भावः । अन्यतस्ततोऽप्यन्यत्र कामिनीषु धर्मधनोपार्जनादावन्यताडनादौ वा कर्मशक्तिरित्येकवचनं बह्वर्थे कर्मशक्तय इत्यर्थः । कुतश्चित्प्रियशब्दश्रवणं परनिंदादिश्रवणं च प्रति श्रोत्रमाकर्षति । घ्राणो घ्राणेंद्रियमन्यतः केतक्यादिगंधं प्रति । अतस्त्वत्कीर्त्तनादाववकाशमेव न प्राप्नोमीति भावः ॥ ४० ॥ एवमिंद्रियपरत्वेन क्लिश्यमानम् । पारचरेति । संसारवैतरणीपाररचितक्रीडस्त्वमेवासीति हेतोरेतं जनमपि तारयेति भावः । " यस्तस्य पारेभिविराजते प्रभुः " इति गजेंद्रोक्तेः । " आदित्यवर्णं तमसः परस्तात् " इति श्रुतेश्च । संसारनदीपरतटं विचार एव तस्मिन्सत्येव भगवत्प्रकाशो जायत इति तत्त्वम् ॥ ४१ ॥ इति भाव इति । न हि विश्वोत्पत्त्यादिकर्त्तुरीशस्य तवैतत्सर्वजनतारणं दुष्करमित्याशयः । एतन्मूढजनतारणं तव योग्यमेवेत्याह–मूढेष्विति । हे. आर्त्तबंधो इति । संसारतापार्त्तिशमकस्त्वमेवासि न त्वन्य इति । अखिलगुरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवोद्विजे पर दुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहाऽमृतमग्नचित्तः ॥ शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥ ४३ ॥ प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरंति विजनेन परार्थनिष्ठाः ॥ नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनु पश्ये ॥४४॥ यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखम् ॥ तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं विषहेत धीरः ॥ ४५ ॥ मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ॥ प्रायः परं पुरुष ते त्वजितेंद्रियाणां वार्ता भवंत्युत न वाऽत्र तु दांभिकानाम् ॥ ४६ ॥ रूपे इमे सदसती तव वेदसृष्टे बीजांकुराविव न चान्यदरूपकस्य ॥ युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥

यासः । प्रह्लाद इत्थमुपमंत्र्य मिथो नराणामीशेन सख्यमकरोदपनीय मायाम्” ॥ ४२ ॥ वत्स प्रह्लाद त्वां तावत्तारयिष्यामि तावतैव कृतार्थः स्याः किमनेन निर्बंधेनेत्यत आह । नैवेति । हे पर सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोऽहं भववैतरण्या नैवोद्विजे किं तु विमूढान् शोचामि । तानेवाह । ततो महामृताद्वि मुखं चेतो येषाम् । प्रत्युतेंद्रियार्थनिमित्तं यन्मायासुखं तदर्थं भरं कुटुम्बादिभारमुद्वहतः ॥ ४३ ॥ त्वं तावन्मुक्तिं गृहाण तांस्तु तत्त्वज्ञा मुनय उपदेक्ष्यंतीति चेत्तत्राह । प्रायेणेति । न विमुमुक्षे विमुक्तिं नेच्छामि । तर्ह्यन्यं कमपि प्रार्थय मामेव किमिति निर्बध्नासीति चेदत आह । त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥ नन्वेते स्त्रीसंभोगादिना सुखिन एव न कृपणास्तत्राह । यदिति । करयोः कंडूयनेन संघर्षणेनेव दुःखमनु दुःखं यस्मिन् तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरंस्तत्राह । कृपणाः कामुका बहुदुःखभाजोऽपीह गृहमेधिसुखे न तृप्यंत्यलमिति न मन्यंते कंडूतिवत्कामस्य दुःसहत्वात् । ननु केचित्कंडूतिमपि सहंते कामं चेत्यत्राह । त्वत्प्रसादात्तु कश्चि द्धीर एव मनसिजं कामं विषहेत न तु सर्वे । अत्रापि कंडूतिवदिति दृष्टांतः ॥ ४५ ॥ ननु मौनादिभिर्मोक्षसाधनैः सुलभैव तेषामपि मुक्तिस्तत्राह । मौनेति । हे पुरुष अंतर्यामिन् ये मौनादयो दश आपवर्ग्या अपवर्गहेतवः प्रसिद्धाः । रहो विविक्तवासः । ते तु प्रायशोऽजितेंद्रियाणामिंद्रियभोगाय अर्थार्थं विक्रीणतां वार्ताः जीवनोपाया भवंति । दांभिकानां तु वार्ता अपि भवंति वा न वा । दंभस्यानियतफलत्वात् ॥ ४६ ॥ त्वज्ज्ञानं भक्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह । रूपे इति त्रिभिः । बीजांकुराविव

इति । यथैक एव परमार्थोपदेष्टा गुरुः परः परार्द्धानपि शिष्यांस्तारयितुं समर्थस्तथा त्वमप्याखिलांस्तारयितुं समर्थ इति भावः । नन्वेतावत्सामर्थ्यं मे नास्तीति चेत्तत्राह—हे भगवन्निति । षडिधैश्वर्यसंपन्नस्य ते सर्वथा सामर्थ्यमस्तीति भावः । नोऽस्माकं तु तव भक्तसेवैव तारयिष्यति तत्र तव परिश्रमं न कारयिष्याम इति भावः । उपमंत्र्य विचार्य ॥ ४२ ॥ हे परेति । न स्वीयतारणेन सर्वोत्कर्षप्राप्तिर्भवतीति भावः ॥ ४३ ॥ हे देवेति । सर्वतो मोदमानस्त्वां विना न कोऽप्यस्ति सर्वेषां स्वकार्यासक्तत्वादिति भावः ॥ ४४ ॥ अत्राक्षिपति—नन्विति । कृपणा दीनाः । ततः स्त्रीसंगादेः । पुनराक्षिपति—नन्विति। अत्रापि कामसहनेऽपि ॥ ४५ ॥ पुनरप्याक्षिपति—नन्विति । हे पुरुषेति । अंतर्यामिणे किं विज्ञापयामीति भावः । अर्थार्थं धनावाप्तये विक्रीणतां व्रतादिविक्रयं कुर्वताम् ॥ ४६ ॥ स्वस्मिन्समवेतं समवायसंबंधेन स्थितं गौरत्वादिकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं वायुरग्निरवानिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च ॥ सर्वं त्वमेव सगुणो विगुणश्च भूमन् नान्य त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४८ ॥ नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सह देवमर्त्याः ॥ आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ॥ ४९ ॥ तत्तेर्हत्तम नमःस्तुतिकर्मपूजाः कर्मस्मृतिश्चरणयोः श्रवणं कथायाम् ॥ संसेवया त्वयि विनेति षडंगया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ५० ॥

प्रवाहापन्ने इमे सदसती कार्यकारणे एव ते रूपे उपलक्षणभूते वेदेन सृष्टे प्रकाशिते । न चान्यत् स्वसमवेतं गौरत्वादिकमिव देवदत्तादेः । कुतः । अरूपकस्य प्राकृतरूपादिशून्यस्य । अतो युक्ताः संयता एव भक्तियोगेन प्रत्यक्षं त्वामुभयत्र कार्ये कारणे चानुगतं पश्यंति मथनेन दारुषु वह्निमिव । नान्यतः स्यात्त्वज्ज्ञानमिति शेषः । यद्वा ज्ञानप्रकारमेवाह । एतदुभयमन्यतः प्रधानपरमाण्वादेर्न स्यात् । "स ऐक्षत" इत्यादिश्रुतेः । अतस्त्वमेव कारणत्वात्सर्वत्रानुस्यूत इति ॥ ४७ ॥ तदेवाह । त्वं वायुरिति । हृदयं मनः । चिच्चित्तम् । अनुग्रहोऽहंकारो देवतावर्गो वा । सगुणः स्थूलः । विगुणः सूक्ष्मः । मनश्च वचश्च मनोवचः तेन निरुक्तं प्रकाशितम् । किमपि त्वत्तोऽन्यन्नास्ति ॥ ४८ ॥ अभक्तास्तु स्वस्मिन्ननुगतमपि त्वां न जानंतीत्याह । नैत इति । एते गुणाद्यभिमानिनो देवाः आद्यंतवंतो जडोपाधित्वादनाद्यंतं निरुपाधिं त्वां न विदंति । हि यस्मात्सुधियो विद्वांसः एवं विचार्य शब्दादध्ययनादिव्यापारादुपरमंति । त्वामेव समाधिनोपासत इत्यर्थः। तथा च श्रुतिः "किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इति । "नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तद्" इति । स्मृतिश्च "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंताऽसि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इत्यादिः ॥ ४९ ॥ उपसंहरति । तदिति । हे अर्हत्तम नमःस्तुतिकर्मपूजाः प्रणिपातस्तुतिसर्वकर्मार्पणानि कर्म च परिचर्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडं

यथा देवदत्तादे रूपं भवति तथा भगवतस्तवाप्येतद्गौरत्वादिकं रूपं नास्तीत्यर्थः । आदिना श्यामत्वादिग्रहः । द्वितीयादिना यज्ञदत्तादिग्रहः । प्राकृतरूपादिशून्यस्य प्रकृतिकार्यपार्थिवनीलपीतादिरूपरहितस्य । यत इमे एव तव रूपे अतो हेतोः । नान्यतो भक्तेरन्यस्मान्नेत्यर्थः । अध्याहारे गौरवं मत्वाह—यद्वेति । उभयं कार्यकारणात्मकं जगत् । सांख्या हि प्रधानतः सृष्ट्युत्पत्तिं नैयायिकाश्च परमाणुभ्यो मन्यंते । आदिना मीमांसकादीनां कर्मवादादिग्रहः । परमेश्वराज्जगदुत्पत्तौ प्रमाणमाह—स ऐक्षतेति । यतस्त्वमेव जगत्कर्ताऽतो हेतोः । कुंडलादौ :स्वर्णवत्त्वमेव सर्वत्रास्तीति भावः ॥ ४७ ॥ तदेव सर्वस्वरूपत्वमेव । अवनिर्भूमिः । मात्रास्तन्मात्राः । हे भूमन्निति । सर्वस्वरूपत्वादेव तव भूमत्वमस्तीति भावः ॥ ४८ ॥ त्वज्ज्ञानं त्वद्भक्त्यैव भवेन्न तु शास्त्राध्ययनबुद्धिकौशलादिभिरित्यभिप्रेत्याह—स्वामी अभक्तास्त्वित्यादि । जडोपाधित्वात् प्रकृतिकार्यत्वात् । यद्येते त्वां न विंदंति तर्ह्येतैरेव मनोबुद्ध्यादिभिः शास्त्राध्ययनाध्यापनादिभिर्विचार्य जीवाः कथं ज्ञास्यंतीति विमृश्य । इत्यंर्थ इति । तत्र क्लेशं ज्ञात्वा प्रवृत्तिरूपत्वान्निवृत्ता भवंतीति भावः । अत्र प्रमाणमाह—तथाचेति । कोऽर्थो येषां ते किमर्थाः । विग्लापनं श्रमार्त्तीकरणम् । स्मृतिरत्र श्रीगीता । ते बुद्धिर्यदा मोहकलिलमज्ञानजन्यमालिन्यमहमिदं ममेदमित्याद्यज्ञानविलसितमतिगहनमतितरिष्यति रजस्तमोमलमपहाय शुद्धभावमापत्स्यत इति तदा श्रोतव्यस्य श्रुतस्य च कर्मफलस्य वैतृष्ण्यं गंतासि प्राप्तासीत्यर्थः । हे उरुगायेति । सर्ववेदशास्त्रेतिहासपुराणादिभिर्यो गीयते तमहं कथं स्तौमीति भावः ॥ ४९ ॥ स्तुतिं समापयति यस्मादध्ययनादिभिस्त्वज्ज्ञानं न भवेत्तस्मात्त्वज्ज्ञानार्थमाग्रहं परित्यज्य सर्वपुरुषार्थसारस्य त्वत्प्रेम्णः साधनार्थमेव यतेतेत्याह—हे अर्हत्तमेति । पूज्यतमस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ॥ प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥ ५१ ॥ श्रीभगवानुवाच ॥ प्रह्लादं भद्र भद्रं ते प्रीतोहं तेऽसुरोत्तम ॥ वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥ ५२ ॥ मामप्रीणत आयुष्मन् दर्शनं दुर्लभं हि मे ॥ दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ॥ ५३ ॥ प्रीणंति ह्यथ मां धीराः सर्वभावेन साधवः ॥ श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम् ॥ ५४ ॥ एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ॥ एकांतित्वाद्भगवति नैच्छत्तानसुरोत्तमः ॥ ५५ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादचरिते भगवत्स्तवो नाम नवमोऽध्यायः ॥ ९ ॥ नारद उवाच ॥ भक्तियोगस्य तत् सर्वमंतरायतयाऽर्भकः ॥ मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥ १ ॥ प्रह्लाद उवाच ॥ मा मां प्रलोभयोत्पत्त्या सक्तं कामेषु तैर्वरैः ॥ तत्संगभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥ २ ॥

गया सम्यक्सेवया विना परमहंसानां गतौ प्राप्ये त्वयि जनः कथं भक्तिं लभेत । यस्मादेवं भक्तिं विना न मोक्षः । न च भक्तिः संसेवया विना अतः प्राक् प्रार्थितं त्वद्दास्ययोगमेव देहीति प्रकरणार्थः ॥ ५० ॥ एतावंतो वर्णिताः गुणाः यस्य । यतमन्युरुपसंहृतकोपः ॥५१॥ कामान्पूरयतीति तथा । यद्वा । पुरुषार्थप्रवाहोस्मीत्यर्थः ॥५२॥ अप्रीणतः अप्रीणयतः । तप्तुमपूर्णकामत्वेन शोचितुम् ॥ ५३ ॥ प्रीणंति तोषयंति ॥ ५४ ॥ एकांतित्वान्निरुपाधिकत्वात् ॥ ५५ ॥ इति श्रीमद्भागवते सप्तमस्कंधे टीकायां नवमोऽध्यायः ॥ ९ ॥ दशमे त्वनुगृह्यामुं भक्तमंतर्हिते हरौ ॥ प्रसंगाद्धरिणा रुद्रे कृतोऽनुग्रह ईर्यते ॥ १ ॥ तत्सर्वं वरजातम् ॥ १ ॥ उत्पत्त्या स्वभावे

पूजारूपा भक्तिरेव सर्वथा कार्येति भावः । नमो नमस्कारश्च स्तुतिकर्मस्तवकरणञ्च पूजाऽर्चनं च ताः । कर्मपरिचर्या च चरणयोः स्मृतिश्च कथायां श्रवणं चेत्थं षडंगवत्या साधनभक्त्या भक्तिं प्रेमाणं नैव लभेतेत्यर्थः । भक्तिमिश्रज्ञानेन मुक्तिमेव लभेतेति भावः । तस्मात्सर्वकृतार्थतामूलत्वत्प्रेमभक्तिसंपादिनीं षडंगां संसेवामेव सर्वेभ्योऽपि देहि सा दुर्लभा चेन्मुक्तिमेव दत्त्वा संसारदुःखात्तावत्सर्वांस्तारय अहं तु त्वद्भक्तसेवयैव कृतार्थीकृत एव वर्त्ते इति न काचिच्चिन्तेति भावः ॥ ५० ॥ गुणाः कारुण्यादयः । निर्गुणः प्राकृतगुणरहितः । यतमन्युः मद्भक्ताय प्रह्लादायापि द्रुह्यतीति यो दुर्वारो मन्युरभूत्स प्रह्लादस्यानंददर्शनादुपशांत इत्यर्थः ॥ ५१ ॥ हे प्रह्लादेति । प्रेम्णा नामोच्चारणमिति भावः । प्रह्लादो वक्ति भगवन्नहमसुरजातीयः कथं वरार्ह इति चेदाह—हे असुरोत्तमेति । न सुरा अपि उत्तमा यस्मात्तादृशोऽसीति भावः । कथमहमेतादृशोऽत आह—हे भद्रेति । भद्रा सर्वकल्याणसर्वसुखदात्री मद्भक्तिर्विद्यते यस्य स तथा । 'मद्भक्तियुक्तो भुवनं पुनाति' इति मदुक्तेरेव त्वं सर्वोत्तमोसीति भावः । अत्र मत्वर्थीयोच्प्रत्ययः । त इति संबंधे षष्ठी । त्वदीयानामपि भद्रं भविष्यति तव तु का कथेति भावः । अभिमतं वृणीष्वेति । मयि भृत्यवत्सले परमोदारचूडामणौ कः संकोच इति भावः । येषां कृते त्वं मां प्रार्थयसे तेषामपि नृणामहं कामपूरोऽस्मि पुरुषार्थप्रवाहरूप एव वर्त्ते किं पुनरेकां मुक्तिमेव दद इति भावः । तेन प्रह्लादबुद्धिविषयीकृतास्तात्कालिका जीवा विस्तीर्णा एव जीवनामानंत्यात्तदन्यैरेव जीवैस्तदनन्तरं ब्रह्माण्डमपूरीति ज्ञेयम् ॥ ५२ ॥ हे आयुष्मन्निति । एतत्कल्पादावेवाधिकारिपुरुषत्वेन तवाविर्भावः । पुनस्तिरोधाने सति पुनराविर्भावः पुनः सृष्टयंते तिरोभावश्चैतदभिप्रायेणैवोक्तं चतुर्थे "दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् । विधाय दुदुहुः क्षीरमयः पात्रे सुरासवम्" इति ॥ ५३ ॥ सर्वभावेन दास्यसख्यादिना ॥ ५४ ॥ एकांतित्वात् । "एकांतिनो यस्य न कञ्चनार्थं वाञ्छति" इति तल्लक्षणात् ॥ ५५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे नवमोऽध्यायः ॥ ९ ॥ ॥ अमुं प्रह्लादम् (१) तत्सर्वं वरजातम् । स्मयमान इति । मां बालकमज्ञं प्रलोभयन्प्रभुरयं मद्बुद्धिं परीक्षते इति विचारोत्थं स्मितं कुर्वाणः ॥ १ ॥ मुमुक्षुस्तान्कामान्मोक्तुमिच्छुः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ॥ भवान् संसारबीजेषु हृदयग्रंथिषु प्रभो ॥ ३ ॥ नान्यथा तेऽखिलगुरोर्घटेत करुणात्मनः ॥ यस्त आशिष आशास्ते न स भृत्यः स वै वणिक् ॥ ४ ॥ आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ॥ न स्वामी भृत्यतः स्वाम्यमिच्छन् यो राति चाशिषः ॥ ५ ॥ अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥ यदि रासीश मे कामान् वरांस्त्वं वरदर्षभ ॥ कामानां हृद्यसंरोहं भवतस्तु वृणे वरम् ॥ ७ ॥ इंद्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ॥ ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ॥ ८ ॥ विमुंचति यदा कामान्मानवो मनसि स्थितान् ॥ तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ॥ ९ ॥

नैवासक्तं माम् । तेषां कामानां संगाद्भीतः ॥ २ ॥ ननु किमहं भक्तं प्रलोभयामि न हि किन्तु वरं वृणीष्वेति वदतस्तवाभिप्रायोऽन्य एवेत्याह भृत्यलक्षणेति । हृदयस्य ग्रंथिवद्बंधकेषु । अन्यथाऽनर्थसाधने प्रवर्तनं न घटेत इत्यर्थः ॥ ३ ॥ कथमेवं भृत्यलक्षणज्ञानं स्यात्तत्राह । य इति ते त्वत्तः ॥ ४ ॥ ननु कामनयापि सेव्यसेवकयोः स्वामिभृत्यभावः प्रसिद्धः सत्यम् । सोपाधिकोऽसौ न तु तात्त्विक इत्याह । स्वामिन्यात्मन आशिषोऽपेक्षमाणो नैव भृत्यः । भृत्यहेतुकमात्मनः स्वाम्यमिच्छन्यो भृत्याय ददाति स च नैव स्वामी ॥ ५ ॥ आवयोस्तु तात्त्विकोऽसावित्याह । अहं त्विति । अनपाश्रयो निरभिसंधिः । अन्यथा कामाद्यभिसंधिनाऽर्थः प्रयोजनं नास्ति ॥ ६ ॥ ननु तथापि परमोदारस्य मम संतोषार्थं किमपि वृणीष्वेति चेदत आह । यदीति । कामांकुराणामसंरोहमनुत्पत्तिं भवतः सकाशात् ॥ ७ ॥ ननु कामो त्पत्तौ सत्यां को दोषस्तत्राह । इंद्रियादीनि यस्य जन्मना नश्यंति आत्मा देहः ॥ ८ ॥ कामाभावे गुणमाह । विमुंचतीति । भगवत्त्वाय त्वत्समानैश्वर्याय । तथा च

अत्राक्षिपति—नन्विति । इत्यर्थ इति । स्वभृत्यस्य सर्वोत्कृष्टां निष्ठां लोके ख्यापयसीति मया दीयमानान् वरान्कथं न गृह्णासीत्युक्ते मद्भृत्य एव लक्षणं कथयिष्यसीत्यभिप्रायस्तवावगम्यते इति भावः । प्रभो इति । सर्वज्ञस्य तव जिज्ञासा नोपपद्यत इत्यतः सर्वाञ्ज्ञापयितुमेवेति भावः । अखिलगुरोः सर्वहितोपदेष्टुस्तव ब्रह्मरुद्रादीनामिव यथेप्सितं न ददासि किं–तु हितकरमेवेति भावः । तत्र हेतुः करुणात्मनः दयालुशिरोमणेः ॥ ३ ॥ तद् ब्रूहि भृत्यलक्षणमिति चेत्स्वामिभृत्ययोरुभयोरेव लक्षणं ब्रवीमीत्याह–य इति । वणिगिति । तुभ्यं किञ्चित्पत्रपुष्पनैवेद्यादिकं दत्त्वा हस्त्यश्वरथादिमतीं संपत्तिं ब्रह्मेंद्रादिपदं वा जिघृक्षतीति भावः ॥ ४ ॥ उक्तमेवार्थं पुष्यन्नाक्षिप्य समाधत्ते–नन्विति ॥ ५ ॥ असौ स्वामिभृत्यभावः । यद्वाऽनपाश्रयः सेवकाधीनमपकृष्टमैश्वर्यं नाश्रयस इत्यर्थः ॥ ६ ॥ पुनराक्षिपति नन्विति ॥ ७ ॥ पुनराक्षिपति । नन्विति । यस्य कामस्य इंद्रियादीनां तन्माधुर्यग्रहणमेव कुपथगामिता सैव नाशः ॥ ८ ॥ ननु यदि कामं न कामयसे तर्हि 'वद मे तव दास्ययोगम्' इति ब्रुवन्कथं मद्दास्यं कामयसे तत्राह–विमुंचतीति । मनसि स्थितान्स्थायिभावतया वर्तमानान्कामानप्राकृतांस्त्वद्दास्यसख्यादीनपि यदा विशेषेण मुंचति । भगवत्त्वाय सायुज्याय तच्च सायुज्यं मे नाभीष्टम् "किं त्रैगुण्यव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किमगुणेन च कांक्षितेन । सारंजुषां चरणयोरुपगायता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमो भगवते तुभ्यं पुरुषाय महात्मने ॥ हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ १० ॥ नृसिंह उवाच ॥ नैकांतिनो मे मयि जात्विहाशिष आशा
सतेऽमुत्र च ये भवद्विधाः ॥ अथापि मन्वंतरमेतदत्र दैत्येश्वराणामनुभुंक्ष्व भोगान् ॥ ११ ॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामा
त्मनि संतमेकम् ॥ सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १२ ॥ भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ॥
कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबंधः ॥ १३ ॥

श्रुतिः ।"यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥ ९ ॥ निर्दोषान्कामान्दातुमिच्छंतं प्रत्याख्यास्यन्नमस्यति । नम
इति ॥ १० ॥ सत्यमेकांतभक्तस्त्वं तथापि मदाज्ञा करणीयेत्याह । नेति । मे एकांतिनः कदाचिदपीहामुत्र च मय्याशिषो न वांछंत्येव तदाप्येतन्मन्वंतरमात्रं भोगान्भुंक्ष्व
॥ ११ ॥ ननु तर्हि बंधः स्यादित्यत आह । कथा इति द्वाभ्याम् । सर्वेषु भूतेषु संतमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व । तर्ह्यनेनैवापि कर्मणा बंधः स्यान्ने
त्याह योगेन मय्यर्पणेन कर्म हिन्वंस्त्यजन्यजस्व ॥ १२ ॥ किं च भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबंधः सल्लोकानुग्रहार्थं कीर्तिं च विस्तार्य मां प्राप्स्यसि कुशलेन
पुण्याचरणेन पापं हित्वेति बिभीषामात्रमन्यथा तस्य राज्येऽप्रवृत्तेः । न तु तस्य प्राचीनं पापमस्ति "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति न्यायात्
"तत्सुकृतदुष्कृते विधुनुत" इति श्रुतेश्च । न चेदं प्रारब्धं पापाभिप्रायं तस्य भोगेनैव क्षयात्कुशलेन हित्वेति वचनानुपपत्तेः । न चासावविद्वानिति वाच्यं भगवतैव कृतार्थ

नः" इति मदुक्तेरेवातो भवद्दास्यरूपमप्राकृतं काममहं वृण एव भगवत्त्वाय भगवत्समानैश्वर्यायेति स्वामिचरणाः । अत्र प्रमाणमाह—तथा चेति । अमृतो मृतिशून्यः । अत्र देहे एव ब्रह्म प्राप्नोतीत्यर्थः ॥ ९ ॥ ननु मत्सायुज्यमात्मारामुनिभिरप्यादरणीयं किमित्यसुरबालकोऽपि भूत्वा तत्र कटाक्षयसीति भगवद्वाचा पराजितंमन्यः प्रणमति-नम इति चक्रवर्ती ॥ १० ॥ न केवलं तवैवायं स्वभावोऽपि तु सर्वेषां मद्भक्तानामिति तत्रापि त्वमधिक इत्यभिप्रायेणाह—सत्यमिति । एतन्मन्वंतरमात्रं नाधिकमतो मा क्रुध्येति भावः ॥ ११ ॥ मां विषयांधकूपे केनापराधेन क्षिपसीत्यभिप्रायेणाह—नन्विति । अत्र तीर्थः—ननु कर्दमजलस्नानानिच्छया द्वैतावंतं मया कंठशोषणमकारि तदरण्यरोदनवद् व्यर्थमभूयत त्वं तत्रैव स्नाहीत्युपदिशस्यतस्त्वदाज्ञानुलंध्या त्वमेव जानासीति शंकारोगनिर्मूलनाय सुखसाध्यमौषधं विधास्यामीत्यभिप्रायवानाह—कथा इति ॥ १२ ॥ अन्यदाह—किंचेति । पापाधिक्यशंकया तस्य प्रह्लादस्य राज्येऽप्रवृत्तिं दृष्ट्वाह—पापं हित्वेति । बिभीषामात्रं पापस्य भयमात्रमेव प्रह्लादस्यासीत्तन्निवृत्तये भगवतोक्तं पापं पुण्येन प्रायश्चित्तादिकर्मणा । अन्यथा भयनिवृत्त्यभावे पापमपि प्रारब्धमेवास्त्विति चेत्तत्राह—न त्विति । प्रारब्धाद्यभावे प्रमाणमाह—तदधीति । तस्य ब्रह्मणोऽधिगमे उत्तराघस्याश्लेषः । पूर्वाघस्य विनाशः कुतः तद्व्यपदेशात् । तयोरश्लेषविनाशयोर्व्यपदेश उपदेशः । अश्लेषस्य तद्यथा पुष्करपलाश आपो न श्लिष्यंते एवमेव विदि पापं कर्म नश्लिष्यते यद्यपि प्रह्लादस्य सदाचारित्वेन पापाभावस्तथापि बिभीषामात्रं न तु पापनिवृत्तिरिति प्रतिपाद्यते इत्यर्थः । ननु किमर्थं भक्ताय बिभीषा भगवता कृता अन्यथा बिभीषाऽभावे राज्ये प्रजापालनरूपे राजधर्मेऽप्रवृत्तेः 'स्वधर्मे निधनं श्रेयः' इति 'षष्ठांशं लभते राजा प्रजा धर्मेण पालयन्' इत्यादिशास्त्रात्प्रजापालनमेव कुशलाचरणमिह ज्ञेयं यागाद्याचरणस्य प्रोगेवो क्तत्वात् । ननु संचितं तस्य पापमस्तीत्याशंकोद्धारमाह—तदधिगम इत्यन्यत्र । विनाशस्य तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुतिभ्यामुपदेशादित्यर्थ इति सूत्रार्थः । तत्तदा शुभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ॥ त्वां च मां च स्मरन्काले कर्मबंधात्प्रमुच्यते ॥ १४ ॥ प्रह्लाद उवाच ॥ वरं वरय एतत्ते वरदेशान्म हेश्वर ॥ यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥१५॥ विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुम् ॥ भ्रातृहेति मृषा दृष्टिस्त्वद्भक्ते मयि चाघवान् ॥ ॥ १६ ॥ तस्मात् पिता मे पूयेत दुरंताद्दुस्तरादघात् ॥ पूतस्तेपांगसंदृष्टस्तदा कृपणवत्सल ॥ १७ ॥ श्रीभगवानुवाच ॥ त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ ॥ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १८ ॥ यत्रयत्र च मद्भक्ताः प्रशांताः समदर्शिनः ॥ साधवः समुदा चारास्ते पूयंत्यपि कीकटाः ॥ १९ ॥

त्वस्यानंतरं वक्ष्यमाणत्वात् । अत एव योगेन कर्म हिन्वन्निितीदमपि लोकसंग्रहार्थे कर्मणि प्रवर्तितस्यानुद्वेगमात्रायेति सर्वमनवद्यम् ॥ १३ ॥ किं च । य इति । त्वां च मां चेदं मच्चरित्रं च स्मरन्नेतत्स्तोत्रं यः कीर्तयेत्सोऽपि कर्मबंधाद्विमुच्यते कुतस्तव बंधशंकेत्यर्थः ॥ १४ ॥ ईश्वराज्ञया प्राप्तकर्माधिकारः सन्पितुर्निष्कृतिं प्रार्थयते त्रिभिः । वरं वरणीयमेतदपरं वृणे ते त्वत्तः ॥ १५ ॥ विद्धोऽमर्षेण क्रोधेनाशयो यस्य ॥ १६ ॥ तेऽपांगेन संदृष्टोऽतः पूत एव तथापि भो कृपणवत्सल कार्पण्येन प्रार्थय इत्यर्थः ॥ ॥१७॥ यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितृत्रय एव पूर्वजास्तथापि त्रिःसप्तभिः सहेति प्राक्कल्पगतपित्रभिप्रायेणोक्तम् । यद्यस्मात् ॥ १८ ॥ सम्यगुत्तम आचारो येषां

शुभे त्यजतीति श्रुत्यर्थः । इदं वचनं प्रारब्धाभिप्रायं न तस्य प्रारब्धस्य 'नाभुक्तं क्षीयते कर्म' इति श्रुतेर्भोगेनैव क्षयात् । यदि प्रारब्धमपि ज्ञानोत्तरं नश्येत्तदा कुशलेन हित्वेत्युक्तिर्विरुद्धा स्यादित्यर्थः । असौ प्रह्लादोऽज्ञ इति न च वाच्यं भगवतैव 'यत्रयत्र च मद्भक्ताः' इत्यादिना वक्ष्यमाणत्वात् । अत एव ज्ञानित्वादेव । अत्र विश्वनाथः—भोगहेतुकात्कर्मबंधात्तु नैवाशंकिष्ठास्तव पूर्वजन्मन्येव सर्वं कर्म नष्टमेवेत्याह—भोगेन सुखानुभवेन प्रारब्धं पुण्यं कुशलेन पापं कलेवरं पूर्वदेहं च हित्वा एषि मां संप्रति प्राप्नोषि । असि मुक्तबंध इति । अस्मिञ्जन्मनि मुक्तबंधो जीवन्मुक्त एव वर्त्तसे इत्यर्थः । एवं प्रह्लादस्यांशेन साधनसिद्धत्वं नित्यसिद्धत्वं च नार दादिवज्ज्ञेयम् ॥१३॥ तत्र कर्मबंधाभावे कैमुत्यं शृण्वित्याह—किञ्चेति । इत्यर्थ इति । तत्र तु सर्वथा स्वप्नेऽपि बंधशंका न संगच्छत इति भावः॥१४॥ पूर्वं संसारिणां नृणां मोक्षाय श्रीमच्चरणेषु प्रार्थितं संप्रति यद्येतादृशं सौभाग्यं मद्यमदास्तर्ह्येकस्य महापराधिनोऽपि निस्ताराय प्रार्थय इत्याह—वरमिति त्रिभिः । वरदानां ब्रह्मादीनामीशात् । अत एवाह—महेश्वरेति । वस्तुतो महेश्वरत्वम् 'अन्यतमो मुकुंदात् । को नाम लोके भगवत्पदार्थः' इति न्यायेन त्वय्येव पर्यवस्यतीति भावः । ऐश्वरं सर्वोत्कृष्टम् ॥ १५ ॥ भ्रातृहेति । मे भ्रातृहा विष्णुरिति हेतोर्यत्त्वामनिंददित्यन्वयः ॥ १६ ॥ तस्मादघात्तत्र निन्दाजन्यपापात्त्वद्भक्तविरोधजन्यपापाच्च "विष्णुद्वेषा द्विजद्वेषाद्द्वेषाच्च हरिसेविनाम् । शुद्धिर्न स्यान्महाबाहो प्रायश्चित्तशतैरपि ॥" इत्युक्तेर्दुस्तरात्तर्तुमशक्यात् । इत्यर्थ इति । यद्यपि तवापांगेनं दृष्टः पूत एव तथापि श्रीमुखात्प्रसादवाचं श्रोतुं कार्पण्यात्प्रार्थये इति भावः । हे कृपणवत्सलेति । कुत्सितजीवेष्वपि त्वं दयामेव कुरुष इति भावः । "कृपणस्तु कृमौ पुंसि मंदकुत्सितयोस्त्रिषु" इति मेदिनी ॥ १७ ॥ विश्वनाथः—त्रिःसप्तभिरित्यस्मिञ्जन्मन्ययं तव पिता पूत इति किं वक्तव्यं तव त्रिःसप्तजन्मसु ये त्रिःसप्तसंख्याः पितरोऽभूवंस्तेपि पूता इत्यर्थः । पितॄन्युनासीत्येतदपि कियत् यतस्त्वं कुलपावनः। पितृमात्रादिकुलमपि पूतमिति भावः । यद्वा—त्रिःसप्तभिः पितृभिः सहितोऽपि यदि स्यात्ते पिता तदापि पूतो भवेत्तस्य तु त्रय एव कश्यपमरीचिब्रह्माण इति पितरोऽभूवन् याक्कल्पीयानामधुना पितृत्वानुपपत्तेः जयविजययोश्चापरजन्माश्रवणाच्च ॥ १८ ॥ मद्भक्तः स्वसंगिनं देशं पुनाति किमुत पित्रादीनित्याह—यत्रेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वात्मना न हिंसंति भूतग्रामेषु किंचन ॥ उच्चावचेषु दैत्येंद्र मद्भावेन गतस्पृहाः ॥ २० ॥ भवंति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २१ ॥ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ॥ मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः ॥ २२ ॥ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ॥ मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥ २३ ॥ श्रीनारद उवाच ॥ प्रह्लादोऽपि तथा चक्रे पितुर्यत्सांपरायिकम् ॥ यथाऽऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥ २४ ॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ॥ स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २५ ॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज ॥ दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः ॥ २६ ॥ योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ॥ तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २७ ॥

ते कीकटा अपि देशास्तत्तुल्या वंशाश्च पूयंते शुद्धा भवंति ॥ १९ ॥ ननु त्वद्भक्तानामयं महिमेति न चित्रम् । अहं तु तादृशो न भवामीति चेत्तत्राह । सर्वात्मनेति द्वाभ्याम् । मद्भावेन मद्भक्त्या विगता स्पृहा येषाम् ॥ २० ॥ त्वामनुगता ये केचित्पुरुषास्तेऽप्येवंलक्षणाः संतो मद्भक्ता भवंत्यतो भवान्मे भक्तानां सर्वेषां प्रतिरूपधृगुपमानास्पदम् । श्रेष्ठः खल्वित्यर्थः ॥ २१ ॥ मदंगस्पर्शनेन सर्वशः पूतस्य ते पितुः पापशंकैव नास्ति केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥ २२ ॥ ब्रह्मवादिभिर्वेदवादिभिरुक्तमनतिक्रम्य मत्परः सन्कर्माणि कुरु ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ मम सृष्टिभिर्मया सृष्टैर्भूतैः । समस्तान्निगमान्धर्मानित्यर्थः । अहन्हतवान् स त्वया हत

कीकटाः अंगवंगाद्याः । "अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च । तीर्थयोगं विना गत्वा पुनः संस्कारमर्हति ॥" इत्युक्तेः ॥ १९ ॥ अत्राक्षिपति—नन्विति । त्वद्भक्तानामीदृङ्माहात्म्यं कुत इत्याशंक्य तपोवृद्धिक्षयहेतुहिंसाद्यभावादित्याह—सर्वात्मना यदपि । किञ्च न कृकलासादिकमपि "तस्मात्प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्य" इति श्रुतेः । तत्र निमित्तमाह—मद्भावेनेति । 'ईश्वरो जीवकलया प्रविष्टः' इत्युक्तेः । सर्वत्र मम भावो भावना निरंतरस्मरणं तेन गतस्पृहाः नष्टविषयवांछाः । स्पृहैव हिंसाकारणं निमित्ताभावे नैमित्तिकाभावस्य प्रसिद्धत्वादिति भावः ॥ २० ॥ इत्यर्थ इति । न हि त्वादृशोऽन्योऽभूदिति भावः ॥ २१ ॥ यद्यपि तव पितुः पापशंकैव नास्ति मदंगस्पृष्टत्वेन पूतत्वात्सुप्रजस्त्वाच्च । तथापि लोकसंग्रहार्थं स्वगतप्रत्यवायपरिहारार्थं वा प्रेतकार्याणि सांपरायकृत्यानि दाहपिंडदानादीनि कुरु एतेन सांपरायविधेर्नैत्यत्वं ध्वनितम् । अन्यथा स्वयं नृसिंहदेवः स्वेन हतस्य तदर्थं कथमपि नावदिष्यदिति तथा च नास्तिकानुयायिनोऽपि परास्ताः ॥ २२ ॥ यद्यपि मद्भक्तस्य तव नास्ति कर्माधिकारस्तथापि मदाज्ञयैव व्यवहाररक्षार्थं कर्माणि कुरु । मत्पर इति । अहं परः प्रमाणं यस्य स तथा "नानवाप्तमवाप्तव्यं वर्त्त एव हि कर्मणि । यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतंद्रितः ॥ मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः" इत्यादिमदुक्तेर्यथाहं कर्माणि लोकसंग्रहार्थं प्रवृत्तस्तथा त्वमपि कुर्विति भावः । किञ्च 'श्रौतं स्मार्त्तं न संत्यजेत्' 'श्रुतिस्मृती ममैवाज्ञे' इति मदुक्तेश्चापि कर्म कर्त्तव्यमेवेति तत्त्वम्॥२३॥तथा चक्रे यद्यथा भगवानाहेत्यन्वयः । हे राजन्निति । हे भक्तिप्रकाशितेति । हरिभक्तिर्हि सर्वापद्भ्य उत्तार्थ द्योतयतीति भावः ॥ २४ ॥ पवित्राभिर्वैदिकीभिः ॥ २५ ॥ ननु त्वं सुरज्येष्ठः कथं मां स्तौषीति चेदाह—हे देवदेवेति । त्वमेव सर्वेश्वरत्वात्सर्वेभ्यो महानिति भावः । अत एवाखिलाध्यक्षोऽपि त्वमेवेत्याह अखिलानामध्यक्षोऽधिपतिरित्यर्थः । "सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" इति श्रुतेः । भूतभावनोऽहं तस्यापि त्वमेव पूर्वज उत्पादकोसीति भावः । ते त्वया ॥ २६ ॥ इत्यर्थ इति । नितरां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्ट्यास्य तनयः साधुर्महाभागवतोऽर्भकः ॥ त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना ॥ २८ ॥ एतद्वपुस्ते भगवन् ध्यायतः प्रयतात्मनः ॥ सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः ॥ २९ ॥ नृसिंह उवाच ॥ मैवं वरोऽसुराणां ते प्रदेयः पद्मसंभव ॥ वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥३०॥ नारद उवाच ॥ इत्युक्त्वा भगवान् राजंस्तत्रैवांतर्दधे हरिः ॥ अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३१ ॥ ततः संपूज्य शिरसा ववंदे परमेष्ठिनम् ॥ भवं प्रजापतीन् देवान् प्रह्लादो भगवत्कलाः ॥ ३२ ॥ ततः काव्यादिभिः सार्धं मुनिभिः कमलासनः ॥ दैत्यानां दानवानां च प्रह्लादमकरोत्पतिम् ॥ ३३ ॥ प्रतिनंद्य ततो देवाः प्रयुज्य परमाशिषः ॥ स्वधामानि ययू राजन् ब्रह्माद्याः प्रतिपूजिताः ॥ ३४ ॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ॥ हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३५ ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ॥ कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३६ ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ॥ तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३७ ॥

एतद्दिष्ट्या भद्रम् ॥ २७ ॥ समितः सम्यक्प्राप्तः ॥ २८ ॥ सर्वतः संत्रासात् । गोप्तृ रक्षकम् ॥ २९ ॥ एवं वरस्त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषाम् । अमृतं क्षीरम् ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ शिशुपालदंतवक्रयोर्द्विषतोः श्रीकृष्णसायुज्यं कथमिति यत्पृष्टं तदेव तयोः पूर्वजन्मकथनादिभिरुपपादितमुपसंहरति । एवमिति सप्तभिः । दितेः पुत्रत्वं प्रापितौ । विप्रशापेनेत्युत्तरस्यानुषंगः ॥ ३५ ॥ ३६ ॥ तच्चित्तौ श्रीरामे चित्तं ययोस्तौ ॥ ३७ ॥

गमयंति प्रापयन्तीशमिति व्युत्पत्तेरिति भावः ॥ २७ ॥ २८ ॥ २९ ॥ मैवं वरोऽसुराणां त इति वरशब्दस्य द्विरुक्तिरत्र द्वितीयवरपदमुत्तमार्थपरमिति तदर्थः । नैवं वर इति बालबोधिनीपाठः । पद्मसंभवेति । पद्मो जडस्तज्जात्वात्तवापि वरदाने विचारो नेत्येकः । कमलस्यातिकोमलस्वभावत्वात्तज्जत्वेन तवाप्यतिकोमलत्वमिति द्वितीय इति संबुद्धेरभिप्रायद्वयमिति ज्ञेयम् । "अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते । अयाचिते च मोक्षे" इति मेदिनी ॥ ३० ॥ यत्रासुरहननादि कृतं तत्रैवेत्यर्थः ॥ ३१ ॥ ततो भगवदंतर्द्धानानंतरम् । भगवत्कलाः ब्राह्मणानित्यर्थः । 'भगवत्कलावीरकुलं कदर्थीकृत्य' इति भरताख्याने पञ्चमस्कंधोक्तेः । यद्वा—भगवतः कलारूपान्प्रजापत्यादीनित्यर्थः । कला शक्तिः ॥ ३२ ॥ ततः प्रह्लादकृतप्रणत्यनंतरम् ॥ ३३ ॥ राजन्निति । सर्वदा देवकार्यव्यग्रे राजकार्यं न सेत्स्यतीति भावः ॥ ३४ ॥ ३५ ॥ पुनश्च कालांतरे ॥ ३६ ॥ तच्चित्तौ तस्मिन्भगवत्येव चित्तमावामेनमग्रिमजन्मनि हनिष्याव इत्येवंलक्षणं स्मरणं ययोस्तावित्यर्थः । प्राक्तनजन्मनि हिरण्यकशिप्वादिजन्मनीत्यर्थः । यद्वा—प्राग्जन्मनि जयविजयरूपे तच्चित्तौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ॥ हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ॥ ३८ ॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ॥ जहुस्तं ते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३९ ॥ यथायथा भगवतो भक्त्या परमया भिदा ॥ नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ॥ ४० ॥ आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् ॥ दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ॥४१॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४२ ॥ प्रह्लादस्यानुचरितं महाभागवतस्य च ॥ भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४३ ॥ सर्गस्थित्यप्ययेशस्य गुणकर्मानुवर्णनम् ॥ परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४४ ॥ धर्मो भागवतानां च भगवान्येन गम्यते ॥ आख्यानेऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४५ ॥ य एतत् पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ॥ कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशाद्विमुच्यते ॥ ४६ ॥ एतद्य आदिपुरुषस्य मृगेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत ॥ दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभावमकुतोभयमेति लोकम् ॥ ४७ ॥

करूषजो दंतवक्रः।हरौ सायुज्यं समीयतुः॥३८॥ कृष्णनिंदादिना पूर्वकृतं च यदेनः पापं तद्ध्यानेन तदात्मानः संतो जहुः । तदात्मत्वे दृष्टांतः । कीटः पेशस्कृतो ध्यानेन यथा तदात्मा भवतीति॥३९॥ अभिदा भेददर्शनशून्यया हरेः सात्म्यं सारूप्यम् ॥४०॥४१॥ प्रह्लादचरितार्थमुपसंहरति । एषेति चतुर्भिः । अवतारः श्रीनृसिंहरूपस्तस्य कथाख्यातेति शेषः ॥ ४२ ॥ प्रह्लादस्यानुचरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः । अस्येत्यनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वम् । अनेन कृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः ॥ ४३ ॥ परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४४ ॥ आध्यात्मिकमात्मानात्मविवेकादि ॥ ४५ ॥ एतच्छ्रवणादिफलमाह । य इति द्वाभ्याम् । एतच्छ्रुत्वा यः कीर्तयेत् ॥ ४६ ॥ एतदेतां मृगेंद्रस्य लीलाम् । तामेवाह । दैत्येंद्रस्य यथपानां च वधं यः शुचिः

भगवच्चित्तौ तथेत्यर्थः । समीयतुरिह समुपसर्गद्योत्यमाह—सम्यग्भक्त्यैवेत्यर्थः। ''मधुकैटभौ भक्त्यभावादूरौ भगवतो मृतौ ॥ तत्र एव क्रमात्प्राप्तौ चैद्यो भक्त्या हरिं ययौ॥'' इति तीर्थः॥३७॥३८॥३९॥४०॥॥४१॥एषा कथापि कृष्णस्यैव नृसिंहस्यापि स्वाधिष्ठानकृष्णाभिन्नत्वादित्यर्थः।''यो धत्ते सर्वभावानामभवायोशतीः कलाः'' इति श्रुतिस्तुत्यंते श्रीकृष्णस्यैव सर्वावतारमूलत्वोक्तेः । ब्रह्मण्यदेवस्येति । ब्राह्मणोक्तिं पालयितुमाविष्कृतोद्भुतविग्रहस्येत्यर्थः । ब्राह्मणोऽत्र ब्रह्मा ज्ञेयः।यत्र कथायाम्॥४२॥इत्यर्थ इति।अनेन प्रह्लादेन कृतं यद्धरिगुणकर्मकीर्त्तनन्तदप्यत्र समाम्नातमिति भावः॥४३॥विपर्यासो यथा भवति सोपि समाम्नात इति योज्यम्॥४४॥येन धर्मेण गम्यते प्राप्यते॥४५॥स पुरुषः कर्मपाशैः त्यज्यत इति॥४६॥आदिपुरुषस्य मृगेंद्रलीलाम्। ऋद्धस्य राजमातंगा इतिवत्समासः। मृगेंद्रशब्देन नृमृगेन्द्रोऽत्रैकदेशन्यायेन ग्राह्यः प्रकृतत्वात् । यद्वा—य एतां मृगेंद्रलीलां पठेत स आदिपुरुषस्य विष्णोर्लोकमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति ॥ येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिंगम् ॥ ४८ ॥ स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ४९ ॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पीतः ॥ ५० ॥

सन्पठेत् । पुण्यमनुभावं प्रभावं मतिनिश्चयं वा लोकं वैकुंठम् ॥ ४७ ॥ अहो प्रह्लादस्य भाग्यं येन देवो दृष्टो वयं तु मंदभाग्या इति विषीदंतं प्रत्याह । यूयमिति त्रिभिः । येषां युष्माकं गृहान्मुनयोऽभियंति सर्वतः समायांति तत्कस्य हेतोर्येषु गृहेषु नराकारं गूढं सच्छ्रीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति ॥ ४८ ॥ ननु कृष्णोऽस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह । स वा इति । सोऽयं ब्रह्मैव । कथंभूतः । महद्भिर्विमृग्यं यत्कैवल्यनिर्वाणसुखं निरुपाधिः परमानंदस्तदनुभूतिरूपो वो युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति । विधिकृदाज्ञानुवर्ती॥४९॥ननु परं ब्रह्म चेत्कथं द्व्यष्टसहस्रस्त्रीषु रतिः कथं वा धर्माद्याचरणं तस्येत्यत आह। नेति । यस्य रूपं तत्त्वं भवादिभिरपि धिया स्वबुद्ध्या वस्तुतयेदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नः। अस्माकं तु मौनादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह । मौनेनेति। स एष सात्वतां पतिर्नः प्रसीदतु । न हि प्रह्लादस्य गृहेषु परं ब्रह्म वसति न च तद्दर्शनाय मुनयस्तद्गृहानभियंति न च तस्य ब्रह्म मातुलेयादिरूपेण वर्तते न च स्वयमेव प्रसन्न

तीत्यन्वयः । संभवत्वादाह–मतिनिश्चयं वेति ॥४७॥ विषीदंतमाकुलीभवंतं प्रति यूयं प्रह्लादात्प्रह्लादगुरोर्मत्तोऽपि अन्येभ्योऽपि भक्तेभ्यो युष्मत्पूर्वजेभ्यो यदुपुरूरवःप्रभृतिभ्यो वशिष्ठमरीचिकश्यपाद्यृषिभ्योऽपि ब्रह्मरुद्राभ्यामपि भूरिसौभाग्यवन्त इत्याह यूयं नृणां जीवानां लोकमध्ये भूरिभागा येषां युष्माकं गृहान् लोकं स्वदर्शनदानादिना पवित्री कुर्वंतोपि मुनयोभि सर्वतोभावेन स्वकृतार्थीकरणादिना हेतुनापि गच्छंति यतो गूढं सर्वतोरहस्यं यन्मनुष्यलिंगं नराकृति परं ब्रह्म तत्सम्यक्प्रकारेण युष्माभिरनाहूतमप्यासक्तिपूर्वकं येषां गृहेषु साक्षाद्वसति सदैव न हि प्रह्लादादीनां गृहेषु नराकृति परं ब्रह्म साक्षाद्वसति न च तद्दर्शनेन कृतार्थी भवितुं मुनयो गच्छंतीति भावः ॥ ४८ ॥ अत्राक्षिपति–नन्विति । अत्र विश्वनाथः–न च परं ब्रह्मैव नराकृतिः कृष्णोऽभूदिति वाच्यं किन्तु कृष्ण एव परं ब्रह्म भवतीत्याह–सोयं प्रसिद्धो नराकृतिः कृष्ण एव ब्रह्म कीदृशं महद्भिरिति स्वामिव्याख्यानवत् । ‘ कृष्णस्तु भगवान्स्वयम् ’ इतिवदनुवाद्यविधेयभावेन व्याख्येयम् । अत्र प्रमाणम् ‘ ब्रह्मणो हि प्रतिष्ठाहम् ’ इति गीतोपनिषदेव एतावदर्थस्य निश्चायकोऽत्र वैशब्दार्थः । न केवलं स युष्मद्गृहेषु वसति मात्रं किन्तु प्रियः सन्निति युष्माकं तेनानंदनीयत्वम् । सुहृदिति हिते प्रवर्त्तनीयत्वम् । मातुलेय इति । संबंधविशेषेणानुगम्यत्वम् । आत्मेति स्वीयशरीरभावेनाभिमंतव्यत्वम् । अर्हणीय इति कृपया प्रतिपाल्यत्वम् । विधिकृत्किंकर इति सारथ्यादिनोपास्यत्वम् । गुरुरित्यनुशासनीयत्वमिति । न च प्रह्लादादीनां गृहेषु स गुरुकिंकरादिभावेन तिष्ठतीति भावः ॥ ४९ ॥ अत्राक्षिपति–नन्विति । अत्र विश्वनाथः–नन्वेवं साक्षात्परब्रह्म प्रतिष्ठाभूतस्यास्य ग्राम्याणामस्मादृशानां कैंकर्य्यादौ किं कारणमिति चेत्सत्यम् अस्य महैश्वर्यस्य प्रेमवश्यत्वस्य च तत्त्वं विज्ञातुं कोऽहं वराको यतो ब्रह्माद्या अपि न जानंतीत्याह–न यस्येति । रूपं तत्त्वं वस्तुतया याथार्थ्येनेदमित्थमिति साक्षान्नोपवर्णितम् । धियेति । तत्र बुद्धेः प्रवेशादेवेति भावः । मौनेनेत्यस्मदादयो यत्प्रसादं मौनादिभिः साधनैः प्रार्थयंते स कृष्णो युष्मत्प्रसादं कैंकर्य्यादिना प्रार्थयत इति युष्मदाद्यस्मदाद्योरेतदेवांतरमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एष भगवान्राजन्य्यतनोद्विहतं यशः ॥ पुरा रुद्रस्य देवस्य मयेनानं तमायिना ॥ ५१ ॥ राजोवाच ॥ कस्मिन्कर्मणि देवस्य मयोहञ्जगदीशितुः ॥ यथा चोपचिता कीर्तिः कृष्णेनानेन कथ्यताम् ॥ ५२ ॥ नारद उवाच ॥ निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ॥ मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५३ ॥ स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५४ ॥ ताभिस्ते सुरसेनान्यो लोकांस्त्रीन् सेश्वरान् नृप ॥ स्मरंतो नाशयांचक्रुः पूर्ववैरमलक्षिताः ॥ ५५ ॥ ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ॥ त्राहि नस्तावकान् देव विनष्टांस्त्रिपुरालयैः ॥ ५६ ॥ अथानुगृह्य भगवान् मा भैष्टेति सुरान्विभुः ॥ शरं धनुषि संधाय पुरेष्वस्त्रं व्यमुंचत ॥ ५७ ॥ ततोऽग्निवर्णा इषव उत्पेतुः सूर्यमंडलात् ॥ यथा मयूखसंदोहा नादृश्यंत पुरो यतः ॥ ५८ ॥ तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ॥ तानानीय महायोगी मयः कूपरसेऽक्षिपत् ॥ ५९ ॥ सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ॥ उत्तस्थुर्मेघदलना वैद्युता इव वह्नयः ॥ ६० ॥

मतो यूयमेव ततोऽप्यस्मत्तोऽपि भूरिभागा इति भावः ॥ ५० ॥ नन्वन्यैर्दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् । स एवंभूत ईश्वरोऽप्यस्य तत्त्वं न जानातीति कथमित्यपेक्षायां तस्याप्येतत्साहाय्यादेवासौ प्रभावो न केवलस्येति वक्तुमाख्यानमुपक्षिपति । स एष इति ॥५१॥ राजा युधिष्ठिर उवाच । जगदीशितुर्देवस्य कीर्तिं कस्मिन्कर्मणि मयो हतवान् ॥ ५२ ॥ अनेन श्रीकृष्णेनोपबृंहितैः संवर्धितैः ॥ ५३ ॥ हैमी च रौप्या चायसी चेति तिस्रः पुरो निर्माय तेभ्यो ददाविति शेषः । दुर्लक्ष्यावपायसंयोगौ गमनागमने यासाम् । दुर्वितर्क्याः परिच्छदा यासु ॥ ५४ ॥ सेनान्यः सेनापतयः पूर्ववैरं स्मरंतः ॥ ५५ ॥ ५६ ॥ अस्त्रमभिमंत्रितं शरं पुरेषु व्यमुंचत ॥ ५७ ॥ ततः शरात् । सूर्यमंडलान्मयूखसंदोहा रश्मिसमूहा इव । यतो येभ्यः ॥ ५८ ॥ कूपरसे स्वयं निर्मितकुपामृते ॥ ५९ ॥ वज्रसारा वज्रवद्दृढांगाः महौजसो महाबलाः

भावः । संदर्भस्तु—ननु कैश्चिदेतद्रूपमप्यवस्तुत्वेन मन्यते तत्राह—न यस्येति । यस्य साक्षात्प्रत्यक्षमपि रूपं परमविद्वद्भिर्भवपद्मजादिभिस्तु अवस्तुतयाऽपरमार्थतया नोपवर्णितं किन्तु परमार्थतया निर्णीतमित्यर्थः । 'त्वं ब्रह्म परमं साक्षात्' इत्यादिना 'यन्मित्रं परमानंदम् इत्यादिना' 'मल्लानामशनिर्नृणां नरवरः' इत्यादौ—'तत्त्वं परं योगिनाम्' इत्यादिना च ॥५०॥ पुनराक्षिपति—नन्विति । राजन्निति । रजोगुणस्य राज्ञामाधिक्यं भवति तेन बहुधोक्तमपि विस्मरसीति भावः ॥ ५१ ॥ कीर्त्तिपदं विभक्तिविपर्यासेनोभयत्रान्वेति ॥ ५२ ॥ ५३ ॥ दुर्वितर्क्या दुर्ज्ञेयाः । परिच्छदा युद्धसामग्र्यः । हेम्नो विकारो हैमी । एवमग्रेपि ॥ ५४ ॥ ताभिः पूर्भिः । नृपेति । यथा राजानः पूर्ववैरस्मृत्या रिपुं घ्नंति तद्वदिति भावः ॥ ५५ ॥ हे विभो, हे देवेति । यद्यपि वयं समर्थास्तथापि विभुर्देवस्त्वमेवेति भावः ॥ ५६ ॥ अथ देवप्रार्थनानंतरम् ॥ ५७ ॥ ५८ ॥ तैः शरैः । तान्व्यसुपुरवासिनः ॥ ५९ ॥ ६० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलोक्य भग्नसंकल्पं विमनस्कं वृषध्वजम् ॥ तदाऽयं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥ ६१ ॥ वत्स आसीत् तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ॥ प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ ६२ ॥ तेऽसुरा ह्यपि पश्यंतो न न्यषेधन्विमोहिताः ॥ तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ ॥ ६३ ॥ स्वयं विशोकः शोकार्तान् स्मरन्दैवगतिं च ताम् ॥ देवोऽसुरो नरोऽन्यो वा नेश्वरोऽस्तीह कश्चन ॥ ६४ ॥ आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयोः ॥ अथासौ शक्तिभिः स्वाभिः शंभोः प्राधानिकं व्यधात् ॥ ६५ ॥ धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ॥ रथं सूतं ध्वजं वाहान्धनुर्वर्म शरादि यत् ॥ ६६ ॥ सन्नद्धो रथमास्थाय शरं धनुरुपाददे ॥ शरं धनुषि संधाय मुहूर्तेऽभिजितीश्वरः ॥ ६७ ॥ ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप ॥ दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः ॥ ६८ ॥ देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ॥ अवाकिरञ्जगुर्हृष्टा ननृतुश्चाप्सरो गणाः ॥ ६९ ॥ एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप ॥ ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ७० ॥ एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमात्मनः ॥ वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किम् ॥ ७१ ॥ इति श्रीम० महा० सप्तमस्कंधे युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम दशमोऽध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ॥ युधिष्ठिरो दैत्यपतेर्मुदा पुनः पप्रच्छ भूयस्तनयं स्वयंभुवः ॥ १ ॥

मेघदलना मेघभेदिनो विद्युद्रूपा वह्नय इव ॥६०॥६१॥ काले मध्याह्ने ॥६२॥६३॥६४॥ आत्मनो वाऽन्यस्य वा द्वयोरपि वा दैवेन दिष्टमुपकल्पितमपोहितुं परिहर्तुमिह कश्चिदपीश्वरः समर्थो नास्ति । असौ श्रीकृष्णः । प्रधनं संग्रामस्तत्साधनम् ॥६५॥६६॥ अभिजिति मध्याह्ने ॥६७॥ विमानशतानि संकुलानि संकीर्णानि येषां ते देवादयः ॥ ६८ ॥ ६९॥७०॥ आदित आरभ्य स्कंधार्थं निगमयति एवंविधानीति । नृलोकं नराकारमात्मनो विडंबमानस्यानुकुर्वतः ॥७१॥ इति श्रीमद्भागवते सप्तमे टीकायां दशमोऽध्यायः ॥ १० ॥ तदेवं दशभिर्ज्ञानभक्तियोगावुदीरितौ ॥ अथ पंचभिरध्यायैः कर्मयोगोऽनुवर्ण्यते ॥१॥ एकादशे नृणां धर्माः साधारण्येन वर्णिताः ॥ विशेषेण च वर्णानां मुख्यामुख्याश्च योषिताम् ॥ २ ॥ दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतमीहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ । कथंभूतस्येहितम् ।

तत्र त्रिपुरभेदने ॥ ६१ ॥ ६२ ॥ ६३ ॥ तां देवस्य विष्णोर्गतिं लीलाम् ॥ ६४ ॥ अथ रसकूपशोषणानंतरम् । असौ कृष्णः ॥ ६९ ॥ रथादिकं स्वाभिश्शक्तिभिरादिष्टक्रमेण व्यधादिति स्वशक्तीनामनश्वरत्वाज्जिष्णुत्वाच्च तदाविष्टानां रथादीनामपि तादृशत्वमेतत्स्वीयधर्मस्य भक्तियोगस्यावेशो रथे भक्तियोगाश्रितानां ज्ञानादीनां रथाश्रितेषु सूतादिषु ज्ञेयम् ॥ ६६ ॥ अभिजित्स्वरूपं तृतीयस्कंधे हिरण्याक्षवधे दर्शितम् ॥ ६७ ॥ नृपेति । नृपो यथा प्रजाविरोधिनो हंति तथेति भावः ॥ ६८ ॥ ६९ ॥ संबुद्ध्यर्थः पूर्ववत् ॥ ७० ॥ विडंबमानस्येति । अत एव मोहवशान्नृलोकस्तं न भजत इति भावः ॥ ७१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कंधे दशमोऽध्यायः ॥ १० ॥ (१) साधारण्येन सामान्येन (२) तत्र महत्तमाग्रणीत्वे । स्वयंभुवस्तनयं नारदम् ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधिष्ठिर उवाच ॥ भगवञ्छ्रोतुमिच्छामि नृणां धर्मं सनातनम् ॥ वर्णाश्रमाचारयुतं यत्पुमान् विंदते परम् ॥ २ ॥ भवान् प्रजापतेः साक्षादात्मजः परमेष्ठिनः ॥ सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥ नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ॥ करुणाः साधवः शांतास्त्वद्विधा न तथाऽपरे ॥ ४ ॥ नारद उवाच ॥ नत्वा भगवतेऽजाय लोकानां धर्महेतवे ॥ वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥ योऽवतीर्यात्मनोंशेन दाक्षायण्यां तु धर्मतः ॥ लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥ धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ॥ स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ॥ ७ ॥ सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ॥ अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥

महत्तमानामग्रण्यो मुख्यस्य । तत्र हेतुः । उरुक्रमे आत्मा मनो यस्य ॥ १ ॥ श्रवणेच्छायां हेतुः । यद्यतो धर्मादनुष्ठितात्परं ज्ञानं भक्तिं च विंदते ॥ २ ॥ ३ ॥ ननु स्मृतिकारैर्धर्म उक्त एव तत्राह । नारायणपरा इति ॥ ४ ॥ अजाय श्रीनारायणाय तस्यैव मुखाच्छ्रुतम् ॥ ५ ॥ तन्मुखादात्मनः श्रवणं संभावयन्विशिनष्टि । य इति ॥ ६ ॥ प्रथमं तावद्धर्मे प्रमाणमाह । धर्मेति । धर्मस्य मूलं प्रमाणम् । स्मृतं च स्मृतिः । तद्विदां वेदविदाम् । येन चात्मा मनः प्रसीदति तुष्यति च । तथा च याज्ञवल्क्यः । "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥ सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्" इति ॥ मनुश्च । "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ॥ आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" इति ॥ ७ ॥ तत्र तावन्नरमात्रसाधारणधर्ममाह । सत्यमिति पंचभिः । तप एकादश्युपवासादि । ईक्षा युक्तायुक्तविवेकः । शमो मनसः संयमः ।

भगवन्निति । ज्ञानसामर्थ्यमाह ॥ २ ॥ हे ब्रह्मन्निति । वेदस्वरूपतामाह ॥ ३ ॥ ननु मन्वादयोऽपि नारायणपरा एव तत्राह—गुह्यमिति । गुह्यत्वात्ते न प्रकाशयंतीत्यर्थः । त्वद्विधास्त्वत्तुल्यास्तेन सनकादिग्रहः । अपरे कश्यपादयः सृष्टिकर्माद्यासक्तत्वान्न विदुरित्यर्थः ॥ ४ ॥ आत्मवतामनुकंपया तपोव्यक्तगतिश्चरसीति पंचमस्कंधोक्तेर्धर्महेतव इत्युक्तम् । धर्मोऽत्र ज्ञानभक्तिजनको धर्मो ज्ञेयः ॥ ५ ॥ आत्मनोंशेन नरेण ॥ ६ ॥ आभ्यां स्मृतिभ्यां तद्बहिर्मुखधर्मस्यापार्थत्वं भगवद्धर्मस्यैवावश्यकत्वं चोक्तं सदाचारपदेन संतोऽप्यत्र भगवन्निष्ठा एव ग्राह्यास्तद्बहिर्मुखाचारस्यानाचारत्वात् । "धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्" इत्याद्युक्तेः मूलं कारणं प्रमाणं च हि निश्चितं भगवानेव यतः सर्ववेदेति । तद्भक्त्या विना धर्मा न सिध्यंतीति भावः । तद्विदां सर्ववेदमयभगवद्विदाम् । तेन विद्वैकादश्यादिप्रतिपादिकाः स्मृतयो व्यावृत्ता इति ध्वनितम् । येन चात्मा मनः प्रसीदतीति "स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे । अहैतुक्यप्रतिहता ययात्मा संप्रसीदति ॥" इतिवत्सुशब्दाप्रयोगात् । यथा केवलया भक्त्या न तथा कर्मादिमिश्रया भक्तिमिश्रकर्मणा वा मनः प्रसीदतीति ज्ञापितं भक्तिरहितो धर्मस्त्वग्राह्य एव तेन याज्ञवल्क्यमनूक्तिभ्याम् 'धर्ममूलं हि भगवान्' इति नारदोक्तिरेव श्रेयसी । तदुक्तं नारसिंहे—"सनकादयो निवृत्त्याख्ये ते च धर्मे नियोजिताः । प्रवृत्ताख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम् ॥" इति नारदस्यैव तेभ्य उभयेभ्यः श्रैष्ठ्यं सर्वधर्मसारविज्ञत्वं च ध्वनितम् ॥ ७ ॥ तत्र धर्मकथनप्रस्तावे । तावदादौ धर्मे भक्तियोगम् । तत्र सत्याद्या एकविंशतिर्भक्त्युपकरणीभूताः श्रवणाद्या नव तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः ॥ नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥ अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः ॥ तेष्वात्म देवताबुद्धिः सुतरां नृषु पांडव ॥ १० ॥ श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ॥ सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् ॥ ११ ॥ नृणामयं परो धर्मः सर्वेषां समुदाहृतः ॥ त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति ॥ १२ ॥ संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यम् ॥ इज्याध्ययनदानानि विहितानि द्विजन्मनाम् ॥ जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥

दमो बाह्येंद्रियाणाम् । त्यागो दानम् । स्वाध्यायो यथोचितजपः ॥ ८ ॥ संतोषो दैवलब्धेनालंबुद्धिः । समदृक्सेवा समदृशां महतां सेवा । ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः । विपर्ययेहेक्षा निष्फलक्रियाणामीक्षणम् । मौनं वृथालापनिवृत्तिः । आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसंधानम् ॥ ९ ॥ आत्मेति देवतेति च बुद्धिः ॥ १० ॥ अस्य श्रीकृष्णस्य । श्रवणादयो नव । इज्याऽर्चनम् ॥ ११ ॥ एवं त्रिंशल्लक्षणवान् धर्मः ॥ १२ ॥ इदानीं वर्णधर्मान्वक्तुं द्विजानां लक्षणमाह । संस्कारा मंत्रवंतो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः । तर्हि शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात्तत्राह । अजो ब्रह्मा यमेवंभूतसंस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मंत्रवत्संस्कारयुक्तं जगाद न चोपनयनवंतमतो नासौ द्विजः । तथा च स्मृतिः । "विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ॥ न केनचित्समसृजच्छंदसा तं प्रजापतिः" इति ।

साक्षाद्भक्तिरेवेति ज्ञेयम् ॥ ८ ॥ ९ ॥ अन्नमोदनादि आद्यं मोदकादि तत्तदादेर्वस्त्रस्रक्चंदनादेर्यथोचितं ब्राह्मणाय पादप्रक्षालनासनादिपूर्वकमेव तदितराणामप्यादरपूर्वकमेव चंडालादेर्दूरत एवेत्याद्यौचित्येन तद्देयमित्यर्थः । तेषु भूतेषु । हे पांडवेति । शुद्धवंश्यत्वात्तव बहुधाकथनेन किमिति भावः ॥ १० ॥ ११ ॥ हे राजन्निति । त्वं तु धर्मप्रवर्त्तक एवेति भावः । येन धर्मेण ॥ १२ ॥ संस्कारविच्छेदे तु द्विजबंधुः स्यादिति भावः । अजो ब्रह्मा यं सृष्ट्वा द्विजं जगाद द्विजत्वेन निर्दिदेश तज्जातिक एव संस्कारेषु लब्धेषु द्विजः स्यादिति संदर्भः । ब्रह्मसृष्ट्यारंभत एव प्रवृत्तायां द्विजजातौ विशुद्धमातापितृकं जन्मैव मुख्यलक्षणमिति भावः "ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणो मुख्य ईरितः" इति पौलस्त्योक्तेः । अतो मंत्रवत्संस्कारत्वाभावात् । अत्रप्रमाणमाह—तथा चेति । गायत्र्यामेव वर्णांतरप्रक्षेपेण त्रिष्टुब्जगत्यौ भवतः तच्च बृहत्पाराशर्य्यामुक्तम्—तत्त्वां विश्वारूपाणीति वर्णोच्चारणाद्गायत्र्यादयस्त्रयो मंत्रा विप्रादिवर्णत्रयोपदेश्याः सिद्ध्यंतीति तत्त्वं, यद्वाऽजो वेदो यं द्विजं स्वसम्बन्धेनोत्पन्नं जगाद । स च वेदः—"गायत्र्या ब्राह्मणमसृजत्" इत्यादिरूप एव बोध्यः । "अजो ब्रह्मा तथा वेदो हरिश्शंभू रघोः सुतः । वस्तः सूर्योऽथ प्रद्युम्नो वसुदेवोऽप्यजः स्मृतः ॥" इत्यनेकार्थः । "न केन चिच्छूद्रम्" इति श्रुतेर्न शूद्रः संस्काराधिकारीति भावः । गर्भाधानादयश्चाष्टचत्वारिंशत्संख्याकाः संति । तथाहि—गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानमष्टका पार्वणं श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्याग्रयणेष्टिनिरूढपशुबंधसौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमात्यग्निष्टोम उक्थः षोडशी वाजपेयोतिरात्र आप्तोर्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत्संस्काराः । अष्टावात्मगुणाः दया भूतेषु सर्वेषु क्षांतिरसूया शौचमनायासो मांगल्यमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्रह्मणः सायुज्यं प्राप्नोतीति गौतमः । संस्कारा एते यथोचितसमये एव कार्या अन्यथा प्रायश्चित्तेन पुनःकरणम् । तदुक्तमाश्वलायनेन—"आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणाम् । व्याहृत्याज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमम् ॥ एतेष्वेकैकलोपेपि पादकृच्छ्रं समाचरेत् । चूडाया अर्द्धकृच्छ्रं स्यादापदि त्वेवमीरितम् ॥" ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः ॥ राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः ॥ १४ ॥

श्रुतिश्च—"गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम्" इति। अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वादुपनयनस्य तु सर्वथा निषेधान्न तस्य द्विजत्वमित्यर्थः। पाठांतरे वैदिकादय इति गर्भाधानादय इत्यर्थः। त्रैवर्णिकानामावश्यकान्धर्मानाह। इज्येति। जन्मना विशुद्धेन कुलेन कर्मणा चाचारेणावदातानां शुद्धानां दुष्कुलानां दुराचाराणां च नैतानि विहितानीत्यर्थः। ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च। शूद्रस्य तु वर्णधर्मा एव। आश्रमभेदकृतविशेषाभावात्॥ १३ ॥ ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह। विप्रस्येति सार्धैः सप्तभिः। विप्रस्य षट् कर्माणि विहितानीत्यनुषंगः। तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका। यथाह मनुः। "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" इति। अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजन

अनापदि सर्वत्र द्विगुणं चरेत्। उपनयने तु—"आषोडषाच्च द्वाविंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां काल औपनायनिकः स्मृतः ॥" इति याज्ञवल्क्यः। अत्र "सावित्री पतिता यस्य दशवर्षाणि पंच च। सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः॥ एकविंशतिरात्रञ्च पिबेत्प्रसृतियावकम्। हविषा भोजयेच्चैव ब्राह्मणान्पञ्च सप्त वा॥ ततो यावकशुद्धस्य तस्योपनयनं स्मृतम्॥" इति व्यासः। उपनेत्रभावकृतां व्रात्यतां तु पूर्वोक्तमेकविंशतिरात्रं व्यपोहति। उपनेतृसत्त्वे कामतः पञ्चदशवर्षातिक्रमे वशिष्ठः—"पतितसावित्रीक उद्दालकव्रतं चरेत् द्वौ मासौ यावकेन मासं पयसार्द्धमासमामिक्षयाष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमब्भक्षणमहोरात्रमुपवसेत्" इति। एतदशक्तस्य व्रतप्रतिनिधिरूपगोदानं गायत्रीजपोऽपि विहितः—"प्राजापत्येन गामेकामतिकृच्छ्रे द्वयं स्मृतम्। चांद्रायणे पराके च तिस्रो गा दक्षिणाः स्मृताः ॥" इति मदनरत्ने। गायत्र्ययुतं गोदानं च सममिति च किं बहुना "पिता पितामहो भ्राता ज्ञातयो गोत्रजोऽग्रजाः। उपनायेऽधिकारी स्यात्पूर्वाभावे परः परः॥" इति गर्गेणोपनेतार उक्ताः। एतदभावे तु व्यासः—"वेदैकनिष्ठं धर्मिष्ठं कुलीनं श्रोत्रियं शुचिम्। स्वशाखीयमनालस्यं विप्रमाचार्यमाश्रयेत् ॥ पुरोहितो भवेन्नित्यमाचार्यः क्षत्रविप्रयोः" इत्यलं प्रसक्तानुप्रसक्त्या। अथ प्रकृतमनुसरामः। पाठांतरे "स द्विजो वैदिकादयः" इति पाठे। इत्यर्थ इति। सर्वेषां संस्काराणां तुल्येपि वैदिकत्वे गर्भाधानस्यैव स्वाभिचरणैर्यद्वैदिकत्वमुक्तं तत् 'वेदो नारायणः साक्षात्' इत्युक्तेर्वेदेन विष्णुसूक्तेन धार्यत्वादेवेति भावेनोक्तमिति भावः। योनिं स्पृष्ट्वा 'विष्णुर्योनिं प्रजापते' इत्यादिना विष्णुयोनिसूक्तं जपित्वा वीर्यसेकाभिधानादित्याचाराकांदौ स्पष्टम्। यद्वा—वेदेभ्यो दिनचतुष्टयोत्परत्र विहितो वैदिकः। आद्यरात्रिचतुष्टयस्य त्यक्तव्यत्वेनोक्तेः। "आद्याश्चतस्रः संत्यक्त्वा नरो युग्मासु रात्रिषु। पुत्रकामः स्त्रियं गच्छेत्" इति ज्योतिःशास्त्रात्। इत्यर्थ इति। एतेन शुद्रस्य सर्वशुभकर्मस्वधिकारो न त्वशुद्धकुलजात्यादेरिति भावः। शूद्रस्य गृहस्थेतराश्रमाभावात्तस्य जात्याश्रमधर्म एक एव "चत्वारो ब्राह्मणस्योक्ताः क्षत्रियस्य त्रयः स्मृताः। द्वौ वैश्यस्य तु शूद्रस्य ह्येक एव न चेतरः ॥" इति स्मृतेः। चत्वारो ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासा विप्रस्य। क्षत्रियस्य संन्यासेतरास्त्रयः। वैश्यस्यादिमौ द्वौ। शूद्रस्यादिमं विहाय द्वितीयं गार्हस्थ्यमेवेत्यर्थः ॥ १३ ॥ तत्र षट्सु। अत्र प्रमाणमाह—यथाहेति। अस्य विप्रस्य विशुद्धादंत्यजादीन्विहाय शुद्धादेव विप्रादेरपि न त्वशुद्धादित्यर्थः। अत्र वैदिकाख्यानं च "तं होपानिन्ये अधीहि भगव" इत्यादिश्रुतौ कृतोपनयनस्य ब्रह्मविद्याधिकारप्रतिपादनं कृत्वा पुनश्च तानर्हानुपनीयैवेत्यनुपनीतानामपि वैश्वानरविद्यायामधिकारश्रुतेरनियतमुपनयनमिति चेन्न निषेधस्य प्राप्तिपूर्वकत्वात्प्राप्तोपनयनानां प्राचीनशालादीनां द्विजातीनामेवाधिकारान्निषेधस्तु—विद्योपदेष्टुरश्वपते राज्ञो न्यूनवर्णत्वाद्द्रष्टव्यः। तान्प्राचीनशालादीनृषीननुपनीयैवाश्वपती राजोवाचेत्यर्थः। प्राचीनशालसत्ययज्ञेंद्रद्युम्नजिनबुडिलाः समेत्येत्थं मीमांसां चक्रुः को न आत्मा किं ब्रह्मेति ते च निश्चयार्थमुद्दालकमाजग्मुः सोऽपि सम्यङ्न वेदेति तेनोद्दालकेन सह वैश्वानरोऽयमिति निश्चयार्थं कैकयराजमश्वपतिमागत्योचुः को न आत्मा किं ब्रह्मेत्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषितमेव नो ब्रूहीत्युपक्रम्याम्नायते यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैश्यस्तु वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ॥ शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥

मध्यापनं चापद्यनुजानाति वक्ष्यति चानंतरमेव ऋते राजन्यमिति । श्रूयते चाश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि । प्रजापालनेऽधिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह । राज्ञ इति। आदिशब्देन दंडशुल्कादि॥ १४॥वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य । शूद्रस्य द्विजानां शुश्रूषा विहिता।स्वामिनो द्विजस्य तु शुश्रषा वृत्तिश्च भवेत्॥ १५॥

पास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमात्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्यैव मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोन्वाहार्यश्च न आस्यमाहवनीय इत्यादि संप्रत्यध्येषि सर्वदा ध्यायसि स च कैकेयराजः । द्युलोकसूर्यवाय्याकाशवारिपृथिवीनां द्युलोकादिरेकैक एव वैश्वानर इति मीमांसाकाले विवदमानाः प्राचीनशालादयः षडृषयो मत्समीपमागता इति ज्ञात्वा तादृशविपरीतबुद्धिनिरासेन सम्यग्वैश्वानरबुद्धिजिग्राहयिषया तानेव परिपप्रच्छ । औपमन्यव कं त्वमात्मानमुपास्स इत्यादिना पृष्टाश्च संतस्तत्रैक ऋषिर्द्युलोक एव वैश्वानर इत्युवाच । अन्यस्तु सूर्यो वैश्वानर इत्येवंक्रमेण पृथिवीपर्यंतमेकैकस्य वैश्वानरत्वं श्रुत्वा तेषां द्युसूर्यादीनां क्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मत्वबहुलत्वरयित्वपादत्वगुणयोगं विधाय प्रत्येकं वैश्वानरपक्षं मूर्द्धपातांधत्वप्राणोत्क्रमणदेहशीर्णतावस्तिभेदपादशोषणैर्दोषैर्निंदित्वा तेषामेव द्युसूर्यादीनां वैश्वानरपुरुषं प्रति मूर्द्धादिभावमुक्त्वा कृत्स्नं वैश्वानरोपासनमुपादिशति—यस्त्वेतमित्यादिना । अभिमुखेन विश्वं मिमीते जानातीत्यभिविमानस्तं प्रादेशपरिमाणमुपास्ते । यस्तस्य सर्वलोकाद्याश्रयं फलमित्यर्थः । लोका भोगभूमयः भूतानि तदुपाधयो भोक्तारः स्वयमात्मान इति भेदः । तत्तत्संबंधिफलमन्नशब्दार्थः । ध्यानफलमुक्त्वा ध्येयमाह—तस्येति । सुतेजस्त्वगुणा द्यौर्वैश्वानरस्य मूर्द्धा विश्वरूपत्वगुणकः सूर्यश्चक्षुः एष शुक्ल एष नील इत्यादिश्रुतेर्विश्वरूपत्वं बोध्यं पृथङ्नानावर्त्मगमनमात्मा स्वभावो यस्य वायोः स तथा । नानागतित्वगुणो वायुः प्राणः बहुलत्वगुण आकाशोऽस्य संदेहो देहमध्यमित्यर्थः । रयिर्धनं तद्गुण आपोऽस्य वास्तिर्मूत्राशयः । वैश्वानरस्य होमाधारत्वसंपादनार्थमुर एवेत्यादि । एवं सति वैश्वानरशब्दस्य "अयमग्निर्वैश्वानरो योयमंतः पुरुषः" इत्यादौ "जाठरे विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्" इत्यादावग्निसामान्ये "वैश्वानरस्य सुमतौ स्याम राजाहिकं भुवनानामभिश्रीः" इत्यादावग्निशरीराय देवतायां च प्रयोगदर्शनात् । उपक्रमे च को न आत्मेत्युपक्रमाच्च संशयः किमत्र वैश्वानरो जाठर उताग्निसामान्यमुताग्निशरीरा देवता आहोस्विच्छारीरोऽथवा परमात्मेति । श्रुत्यर्थस्तु—पुरुषे पुरुषाकारे देहे विश्वस्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चिह्नं सूर्यमकृण्वन्कृतवंतो देवास्तदुदये दिनव्यवहारादित्यर्थः । वैश्वानरस्याग्न्यधिष्ठानस्य देवस्य सुमतौ शोभनबुद्धौ वयं स्याम भवेम तस्यास्मद्विषया सुमतिर्भवत्वित्यर्थः । अत्र हेतुः—राजाहीति । यस्माद्भुवनानामयं राजा कं सुखहेतुरभिमुखा श्रीरस्येत्यभिश्रीरीश्वरः तस्मात्तस्य सुमतौ स्यामेति स्तुतिवाक्यार्थः । तत्र जाठरादौ वैश्वानरशब्दस्य प्रसिद्धत्त्वाज्जाठरादिरेव वैश्वानर इति प्राप्ते ब्रूमः वैश्वानरः साधारणशब्दविशेषादिति वैश्वानरः परमात्मैव कुतः साधारणशब्दविशेषात् साधारणशब्दयोरपि विशेषः साधारणशब्दविशेषस्तस्मादित्यर्थः । जाठराग्निसामान्यतद्देवतासु साधारणो वैश्वानरशब्दः जीवपरयोः साधारण आत्मशब्दस्तयोर्वैश्वानरात्मशब्दयोर्जाठरादौ जीवादौ च साधारणयोरपि सतोः परमात्मपरत्व एव विशेषोऽवगम्यते तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इत्यादावुक्तद्युमूर्द्धत्वादेः सर्वात्मकपरमात्मपरिग्रहे एवोपपन्नतरत्वात्तस्माद्वैश्वानरः परमात्मैवेति सिद्धम् । प्रभृतिपदात्प्रवहणादिग्रहस्तदाख्यानमपि पञ्चदशाध्यायव्याख्यायां वर्णयिष्यामः । उपदेष्टृत्वादीहादिना याजनपरिग्रहः । यथा वाल्मीकीये विश्वामित्रं प्रकृत्योक्तम् "क्षत्रियो याजको यस्य' इति वाशब्दात्कचिद्विप्रादपि 'वपनं द्रविणादानम्' इत्याद्युक्तेः।विशेष आपद्वृत्तेरेकादशे वक्ष्यति 'जीवेन्मृगययापदि' इति॥ १४॥"कृषिगोरक्षवाणिज्यं कुसीदं तुर्यमुच्यते । वार्त्ता चतुर्विधा" इति दशमे श्रीकृष्णोक्तेः । ब्रह्मकुलं ब्राह्मणकुलमनुगच्छति तदुक्तिमनतिक्रम्य स्वीयाचरणं करोतीति तथा । नित्यमिति पदेन कदाचिदपि ब्राह्मणेतरे श्रद्धां न कुर्यादित्यसूचि । ब्रह्मकुलेत्युक्तेर्ब्रह्मकुलाद्भ्रष्टं ब्राह्मणमपि नानुगच्छेदिति भावः । अन्यथा नित्यं वै ब्राह्मणानुग इत्येवोच्येतेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वार्त्ता विचित्रा शालीनयायावरशिलोंछनम् ॥ विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ॥ ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥ ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथंचन ॥ १८ ॥ ऋतमुंछशिलं प्रोक्तममृतं यदयाचितम् ॥ मृतं तु नित्ययाच्ञा स्यात्प्रमृतं कर्षणं स्मृतम् ॥ १९ ॥ सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ॥ सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवम् ॥ ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २१ ॥ शौर्यं वीर्य धृतिस्तेजस्त्याग आत्मजयः क्षमा ॥ ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥२२॥ देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् ॥ आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥२३॥ शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ॥ अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ॥ २४ ॥ स्त्रीणां च पतिदेवानां तच्छुश्रूषाऽनुकूलता ॥ तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥ २५ ॥

विप्रस्य मुख्यानुकल्पभेदेन वृत्त्यंतराण्याह । वार्तेति । वार्ता विचित्रा कृष्यादिरूपा । शालीनं धाष्टर्यं विनैव प्राप्तमयाचितम् । यायावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानम् उञ्छनमापणादिपतितकणोपादानम् । शिलोञ्छनद्वयमेकीकृत्य चतुर्धेत्युक्तम् । श्रेयसी उत्तमा ॥ १६ ॥ वृत्तिष्वेव व्यवस्थां दर्शयन्नापद्वृत्तीराह । जघन्यो नीचः उत्तमामध्यापनादिरूपाम् । ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् ॥ १७ ॥ चतुर्विधां पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह । ऋतामृताभ्यामिति ॥ १८ ॥ श्लोकं व्याचष्टे । ऋतमिति ॥ १९ ॥ तयोस्तद्वर्जने हेतुमाह । सर्ववेदमय इति ॥ २० ॥ वर्णानामभिव्यंजकरूपान्धर्मानाह । शम इति चतुर्भिः । अच्युतात्मत्वं श्रीविष्णुपरत्वम् ॥ २१ ॥ शौर्यं युद्धोत्साहः । वीर्यं प्रभावः । तेजः प्रागल्भ्यम् । त्यागो दानम् । आत्मनो मनसो जयः ॥ २२ ॥ २३ ॥ अमंत्रयज्ञो नमस्कारेणैव पंचयज्ञानुष्ठानम् । तथा च याज्ञवल्क्यः । "नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत" इति ॥ २४ ॥ स्त्रीधर्मानाह ।

विहिता शूद्रधर्मत्वेन स्वामिनो द्विजातेस्सेवैव तस्य वृत्तिरपीत्यर्थः ॥ १९ ॥ विचित्रा बहुधा । धाष्टर्यं विनैव अहमेतावन्मात्रं त्वत्तो ग्रहीष्यामि नातो न्यूनमधिकं वेति भाषाबंधो धाष्टर्यं तद्विनैव स्वभावतः प्राप्तमित्यर्थः । 'कणिशं सस्यमंजरी' इत्यमरः । उत्तरोत्तरा परापरा ॥ १६ ॥ आपत्स्विति । बहुत्वोक्तिरतीवापत्तीनामाप्तौ सर्वेषां वर्णानां सर्वशः सर्वा वृत्तयो न तु यत्किञ्चिदापदीत्यर्थः । तदुक्तम्—"कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयं कृतम् । आपत्काले स्वयं कुर्वन्नैनसा युज्यते द्विजः ॥" इत्यंगिरसा ॥ १७ ॥ इतरेषां विप्रेतरेषांमपि ॥ १८ ॥ १९ ॥ नीचसेवनं स्वनिकृष्टजातेः परिचर्या तां च वृत्तिम् । सर्वपूज्यवेददेवरूपत्वात्तयोरपि पूज्यत्वमेव न तु पूजकत्वं तेन वैश्यशूद्रयोस्त्वापदि नीचसेवनेऽपि न दोष इति भावः ॥ २० ॥ शमादयः प्रथमस्कंधे स्वामिचरणैर्व्याख्याताः ॥ २१ ॥ "अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥" इत्युक्तलक्षणं तेजः । धृतिः सत्यपि क्लेशे मनसः स्थैर्यम् । त्यागो मुक्तहस्तता । आत्मनो मनसो जयः स्वाधीनत्वम् । ब्रह्मण्यता ब्राह्मणभक्तिः । प्रसादश्चेतसः प्रफुल्लता । रक्षा प्रबलान्निर्बलानां रक्षणम् ॥ २२ ॥ देवगुरुभ्यां सहितेऽच्युते हरौ भक्तिस्सेवा त्रिवर्गस्य धर्मकामार्थस्य परिपोषणं पालनम् । आस्तिक्यं शास्त्रे विश्वासः । नैपुण्यं शुभकर्मनिष्ठत्वम् 'पुण—शुभे कर्मणि' धातुः ॥ २३ ॥ नमस्कारमंत्रेण प्रणवरहितनमोंतचतुर्थ्यंतमंत्रेण देवेभ्यो नमः पितृभ्यो नम इदमन्नमित्येवं रूपेणेत्यर्थः ॥ २४ ॥ देवः पूज्यः । तदनुकूलता तदनुकूलाचरणम् । तस्य पत्युर्यद्व्रतं गोविप्राद्यर्चनरूपो नियमस्तस्य धारणं करणम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संमार्जनोपलेपाभ्यां गृहमंडलवर्तनैः ॥ स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा ॥२६॥ कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ॥ वाक्यैः सत्यैः प्रियैः प्रेम्णा कालेकाले भजेत् पतिम् ॥२७॥ संतुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ॥ अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥२८॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ॥ हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ २९ ॥ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् ॥ अचौराणामपापानामंत्यजांतेवसायिनाम् ॥ ३० ॥ प्रायः स्वभावविहितो नृणां धर्मो युगेयुगे ॥ वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत् ॥ ३१ ॥ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत् ॥ हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३२ ॥

स्त्रीणामिति पंचभिः । पतिरेव देवो यासां तस्य पत्युरेव शुश्रूषा पादसंवाहनादिभिः । तदनुकूलता च हिताचरणं तस्य यद्व्रतं नियमस्तस्य धारणमाचरणम् । एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च ॥ २५ ॥ किंच । संमार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्युत्तरेणान्वयः । परिमृष्टा उद्वर्तनादिना निर्मलीकृताः परिच्छदा गृहोपकरणानि यया ॥२६॥२७॥ किं च । संतुष्टा यथालाभेन तावन्मात्रभोगेऽप्यलोलुपा दक्षाऽनलसा प्रिया सत्या च वाग्यस्याः सर्वत्राप्यप्रमत्ताऽवहिता। अपतितं महापातकशून्यम् । यथाह याज्ञवल्क्यः । "आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥ तत्परा सती भजेत् । श्रीर्हरिमिव हर्यात्मना पत्या सह ॥ २९ ॥ प्रतिलोमजानुलोमजानां वृत्तिमाह वृत्तिरिति । तत्तत्कुलकृता कुलपरंपराप्राप्ता । परंपराप्राप्तमपि चौर्यं हिंसादिकं च प्रतिषेधति । अचौराणामपापानां चेति । तत्तत्प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह । अंत्यजेति । "रजकश्चर्मकारश्च नटो बुरुड एव च ॥ कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः" अंतेवसायिनस्तु चांडालपुल्कसमातंगादयः । तेषां परंपराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ॥ ३० ॥ श्रेष्ठादपि परधर्मान्नीचोऽपि स्वधर्म एव श्रेयानित्याह प्राय इति । स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः शर्मकृत्सुखहेतुः स्मृतः । कैः वेद एव दृक् चक्षुर्येषां तैः । भगवता चोक्तम् । "श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्" इति ॥ ३१ ॥ ननु स्वाभाविकस्य कर्मणो बंधहेतुत्वात्कथं सुखहेतुत्वं

तद्बंधुषु श्वश्रूश्वशुरज्येष्ठादिषु अनुवृत्तिः सेवनम ॥ २९ ॥ अन्यत्स्त्रीधर्ममाह–किं चे ति । गृहे रंगवल्यादिस्वस्तिकादिमंडलरचनैः अम्लद्रव्यैः संघर्षणादिना वा प्रकाशितरीतिमयादिपात्रादिसामग्र्यो यया सा तथा ॥ २६ ॥ उच्चावचैः कामैर्भोगैः स्वन्नाद्यर्पणैः कालेकालेऽवसरेऽवसरे दिवापर्वादिरहिते समये ॥ २७ ॥ अपतितसेवने प्रमाणमाह–यथाहेति । प्रायश्चित्तेन शुद्धं पुनर्भजेदित्यर्थः ॥ २८ ॥ हरिभावेनास्मिन्पत्यौ हरिः सन्निहित इति भावेन ॥ २९ ॥ कुलपरंपराप्राप्ता यथा नापितरजकादीनां मुंडनवस्त्रनिर्णेजनादिका । अपापानामिति । कुलपरंपराप्राप्तमद्यपानविधवाविवाहादिपापवतां पापाभाव उक्तः । चौर्यंतु तेषामपि प्रतिषिद्ध मित्याह–अचोराणामिति । अचौरत्वे सत्येव वृत्तिः कुलकृता विहिता पापाभावश्चेति भावः । मध्यमांगिराः–"चंडालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा । मागधायोगवौ चैव सप्तैतेंत्यावसायिनः ॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चंडालः सर्वधर्मबहिष्कृतः ॥ क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेवच । शूद्रादयोगवं वैश्या जनयामास वै सुतम् ॥" इति । स्वामिचरणैरंत्येवसायिषु पुल्कसमातंगादयो हि ग्रन्थांतरसंमत्या गणिता इति ज्ञेयम् । इत्यर्थ इति । तेषामपि वृत्तिः परंपरागतैवेति भावः ॥ ३० ॥ प्रायःशब्दप्रयोगात् दुर्जातीनां दुराचारत्यागो नाशर्मकृद्भवतीति ज्ञेयम् ॥ ३१ ॥ अत्राक्षिपति–नन्विति । शनैर्बहु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उप्यमानं बहु क्षेत्रं स्वयं निर्वीर्यतामियात् ॥ न कल्पते पुनः सूत्या उप्तं बीजं च नश्यति ॥ ३३ ॥ एवं कामाशयं चित्तं कामानामतिसेवया ॥ विरज्येत यथा राजन्नाग्निवत्कामबिंदुभिः ॥ ३४ ॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकम् ॥ यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नामैकादशोऽध्यायः ॥ ११ ॥

तत्राह । वृत्त्येति ॥ ३२ ॥ ननु काम्यानि कर्माणि कुर्वतस्तत्फलभोगपरस्य कथं नैर्गुण्यं स्यात् । तदुक्तं प्रह्लादेन । "औपस्थ्यजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरंतमोहः" इत्यादि । तत्राधिकारिभेदेन व्यवस्थां सदृष्टांतमाह । उप्यमानमिति द्वाभ्याम् । पुनः सूत्यै सस्यप्रसवाय ॥ ३३ ॥ कामा आशेरते वासनारूपेण यस्मिं स्तत् । अयं भावः । उत्कटवासनाविष्टस्य सहसैव कामत्यागासंभवाद्वेदोक्तनियमेन बहुशः कामान्भुंजानस्यैव नित्यनैमित्तिकैर्विशुद्धचेतसस्तद्दोषदर्शनेन ययातिसौभरिप्रमुखानामिव शनैर्विरागो भवति । यथा सवीर्यं क्षेत्रं शनैर्निर्वीर्यं भवति यथा च प्रज्वलितोऽग्निर्न घृतबिंदुभिः शाम्यति महता तु घृतपूरेण शाम्यत्येव तद्वत् । प्रह्लादकृतस्तुतौ कौमार एव निवृत्त्युपदेशो मंदवासनानामधिकारेण । तदुक्तं तत्रैव । "बालानदूषितधियो द्वंद्वारामेरितेहितैः" इति । अतः सर्वमनवद्यम् ॥ ३४ ॥ शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह । यस्येति । यद्यदि अन्यत्र वर्णांतरेऽपि दृश्येत तद्वर्णांतरं तेनैव लक्षणनिमित्तेनैव वर्णेन विनिर्दिशेत् । न तज्जातिनिमित्तेनेत्यर्थः ॥ ॥ ३५ ॥ इति सप्तमे० टी० एकादशोऽध्यायः ॥ ११ ॥

भिर्जन्मभिरित्यर्थः । "स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचतामेति" इत्याद्युक्तेः ॥ ३२ ॥ अत्युत्कटवासनाविशिष्टानां तु वेदोक्तनियमेन कामभोगासंभवाद्बहुशः कामान्निषिद्धेतरान् ययातिसौभरिप्रमुखानामिव भुंजानानामकुटिलचित्तानां विरागः स्यादिति सदृष्टांतमाह द्वाभ्याम् । निर्वीर्यतामेवाह क्वचित्सूत्यै सस्यप्रसवाय न कल्पते क्वचित् उप्तमेव बीजं नश्यति ज्वलति ॥ ३३ ॥ ३४ ॥ यस्य पुंसो वर्णाभिव्यंजकं यल्लक्षणं वर्णं ब्राह्मणादिजातिमभिव्यंजयति यत् तच्च सामान्यतो विहितमेव शमदमादिकं न तु विशेषतो विहितं संध्योपास्त्यादिकं यद्यन्यत्र जात्यंतरेपि दृश्येत तज्जात्यंतरमपि तेनैव ब्राह्मणादिशब्देनैव विनिर्दिशेत् । इत्यर्थ इति । ब्राह्मणादितुल्यमादरमेव लक्षयति न तु तत्त्वेनार्चनादिकमिति । न च 'परधर्मो भयावहः' इति वाच्यं शमदमादीनां सार्ववर्णिकत्वेन परधर्मत्वाभावादिति भावः । "अहिंसा सत्यमस्तेयमकामक्रोधलोभता । भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः॥" इत्येकादशे श्रीकृष्णोक्तेः । अत्र विशेषमाह—"देहांतरं विना धर्मसादृश्येनापि वर्णता । योच्यते सा न तद्वर्णपूजोद्वाहादिषु स्थिता ॥" इति वारतंतव्युक्तेरमुख्यः क्षत्रियादिरूपो ब्राह्मणो मुख्यब्राह्मणपूजोद्वाहादिषु न योज्यः । किंतु पुरोहितोयं राजेतिवत्क्षत्रियोयं ब्राह्मण इति निर्देश्य एवेति भावः । एवमन्यत्रापि ज्ञेयम् । अन्यथा जगद्वैप्लव्यं स्यादिति । किञ्च—'ब्राह्मणो जन्मना श्रेयान्' इत्यादिभगवद्वचनमसमंजसं स्यात् । किंच "नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथंचन । ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः ॥ अभिवाद्य द्विजः शूद्रं स चैलं स्नानमाचरेत् । ब्राह्मणानां शतं सम्यगभिवाद्य विशुध्यति॥" इति शातातपोक्तिरपि भज्येत । वस्तुतस्तु—"ब्रह्मवीर्यं ब्रह्मक्षेत्रं संस्कारा ब्रह्मसंभवाः । ब्राह्मणाचरणाद्ब्रह्मविद्याभिर्ब्राह्मणो भवेत् ॥ लक्षणत्रयहीनो यस्तंत्रमार्गेण सिध्यति॥" इति मेरुतंत्रोक्तेः । पञ्चलक्षणलक्षितस्यैव ब्राह्मणत्वमिति तत्त्वम् । "ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः" इति पारिजातेऽपि कर्मतो मुख्यं ब्राह्मण्यं निरस्तमित्यलं प्रसक्तानुप्रसक्त्येति ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ ब्रह्मचारी गुरुकुले वसन्दांतो गुरोर्हितम् ॥ आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥१॥ सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ॥ उभे संध्ये च यतवाग् जपन्ब्रह्म सनातनम् ॥ २ ॥ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः ॥ उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥ मेखलाजिनवासांसि जटादंडकमंडलून् ॥ बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥ ४ ॥

द्वादशे वर्ण्यंते धर्मो ब्रह्मचारिवनस्थयोः ॥ चतुर्णामाश्रमाणां च साधारण्येन कश्चन ॥ १ ॥ वर्णादीनां धर्मा उक्ता इदानीमाश्रमधर्मा उच्यंते । तत्रास्मिन्द्वादशेऽध्याये ब्रह्मचारिवानप्रस्थयोरसाधारणाश्चतुर्णां साधारणाश्चोच्यंते । त्रयोदशे यतेर्धर्माः । चतुर्दशे गृहस्थस्य । पंचदशे सर्वधर्मसारसंग्रहः ॥ ब्रह्मचारी गुरुकुले वसन्गुर्वादीनुपासीतेत्युत्तरेणान्वयः ॥ १ ॥ तानाह । सायमिति । ब्रह्म गायत्रीं जपन् संध्यात्रयमुपासीत । उभे संध्ये तु यतवाक् । सायं प्रातः संध्याकालनिमित्तं मौनं कुर्यादित्यर्थः ॥ २ ॥ उपक्रमे आदाववसाने अंते गुरोश्चरणौ नमेत् ॥ ३ ॥ यथोदितमिति । पालाशो दंडो ब्राह्मणस्येत्यादिनिय

(१) नीचो नम्रः सन् ॥ १ ॥ चकारान्मध्याह्नेऽपि संध्यामुपासीत । इत्यर्थ इति । मौननियमेन संध्यानिषेधो न शंक्य इति भावः । द्वयोरेव संध्ययोः स्वीकारे "निशायां वा दिवा वापि यदज्ञानकृतं भवेत् । त्रिकालसंध्याकरणात्तत्सर्वं विप्रणश्यति ॥ " इति याज्ञवल्क्येन कथमत्र त्रिकालसंध्येत्युक्तम् । छांदोगपरिशिष्टे कात्यायनेनाप्युक्तम्—" एतत्संध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम् । यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥" इति । किं च "संधौ सध्यामुपासीत नोदिते नास्तगे रवौ । संध्यात्रयं तु कर्त्तव्यं द्विजेनात्मविदा सदा ॥" इति याज्ञवल्क्यः । अत एव शातातपेन मध्याह्नसंध्याकालोऽप्युक्तः—"अध्यर्द्धयामादासायं संध्या माध्याह्निकी मता" इति । यत्तु सन्धौ रात्रिदिनयोर्या ध्यायते सा संध्येति योगबलात्संध्याद्वयमेव लभ्यते न तु मध्याह्नं किं तु सायं प्रातरिति द्वयमेवेति तन्न चतुरस्रं 'रूढिर्योगमपहरति' इति न्यायात् । समुदायशक्ती रूढिः अवयवशक्तिर्योगः । संध्याशब्दस्य रूढित्वं तु "प्राह्णापराह्णमध्याह्नास्त्रिसंध्यम्' इत्यमरोक्तेः । अन्यथा प्रतियामादिसंधिमालम्बानन्ताः सन्ध्याः स्युरित्यलं प्रसक्तानुप्रसक्त्या । एकादशस्कंधे एतद्विस्तरेण वर्णयिष्यामो यदपि तथापि प्रसंगात्किञ्चित्कथनम् । तदाह—"संध्याकाले व्यतिक्रांते जप्त्वा मंत्रं पुनर्मनः । वैश्वानरमृचं वाचं ततः संध्यामुपाचरेत् ॥" इति । मंत्रास्तु—"ॐ पुनर्मनः पुनरायुर्पुनर्म्म आगन् । पुनः प्राणः पुनरात्मा म आगन् । पुनश्चक्षुः पुनः श्रोत्रम्म आगन् (१) । वैश्वानरो अदब्धास्तनूपा अग्निर्नः पातु दुरितादवद्यात् (२) । ऋचं वाचं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये वागोजः सहो नो मयि प्राणापानौ (३) इति संहितायाम् ॥ २ ॥ सुयंत्रितश्चापल्यरहितः । पाठारंभे पाठांते च शिरसा गुरोः पादौ वंदेतेत्यर्थः ॥ ३ ॥ 'पालाशो विप्रस्य बैल्वः क्षत्रियस्यौदुंबरो वैश्यस्य' इति पराशरः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सायंप्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत् ॥ भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ॥ ५ ॥ सुशीलो मितभुग् दक्षः श्रद्दधानो जितेंद्रियः ॥ यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥ वर्जयेत् प्रमदागाथामगृहस्थो बृहद्व्रतः ॥ इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः ॥ ७ ॥ केशप्रसाधनोन्मर्द स्नपनाभ्यंजनादिकम् ॥ गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥ नन्वग्निः प्रमदा नाम घृतकुंभमयः पुमान् ॥ सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥ ९ ॥ कल्पयित्वात्मना यावदाभासमिदमीश्वरः ॥ द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥ १० ॥ एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि ॥ गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु ॥ स्रग्गंधलेपालंकारांस्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥

ममनतिक्रम्य । जटाधारणं तु केशप्रसाधनाभावमात्रम् ॥ ४ ॥ ५ ॥ यावदर्थं यथोपयोगमेव ॥ ६ ॥ बृहद्व्रतो ब्रह्मचर्यवान्गृहस्थव्यतिरिक्तः सर्वोऽपि प्रमदागाथां वर्जयेत् । तत्र हेतुः । इंद्रियाणि बलवंति संयतस्यापि मनो हरंतीति ॥ ७ ॥ ८ ॥ न कारयेदित्यत्र हेतुः । नन्विति । रहः एकांते । अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकांतावसरे वा । यावदर्थं तदुक्तं कुर्यात् ॥ ९ ॥ ननु मिथ्यात्वादतिकश्मलत्वाच्च स्वयं त्यक्तशायं स्यादि जह्यादिति कोऽयमतिनिर्बंधस्तत्राह । कल्पयित्वेति । आत्मना स्वरूपसाक्षात्कारेणेदं देहेंद्रियाद्याभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीव ईश्वरः स्वतंत्रो न भवेत्तावद्द्वैतमयं पुमानियं स्त्रीत्यादिभेदो न विरमेत् ततः किमत आह । ततो हि द्वैतात् । विपर्ययो गुणाध्यासेन भोग्यताबुद्धिः । अतो जह्यादेवेत्यर्थः ॥ १० ॥ एतत्सर्वं सुशील इत्याद्युक्तं गृहस्थस्य विशेषमाह । गुरुवृत्तिरिति ॥ ११ ॥ अंजनादीनामामिषांतानां द्वंद्वैक्यम् । अंजनं शरीरस्य । अभ्यंजनं शिरसः । स्त्रियं चावलेखां च चित्रकर्म स्त्रीणां कड्यादौ लेखनं वा तन्निरीक्षणं वा अत्राभ्यंगादि स्वरू

क्वचिदपराधादिसत्त्वे ॥ ५ ॥ यावदर्थं गुरुसेवार्थं गुरुगृहे भिक्षार्थं गृहस्थगृहेषु च यथोपयोगमेव ॥ ६ ॥ ७ ॥ कारयेदिति गुरुपत्न्यो हि शिष्यमपि पुत्रमिव वात्सल्येन पश्यंत्यो यदि केशप्रसाधनादिकं स्वेच्छयैव कुर्वन्ति तदपि न कारयेदित्यर्थः ॥ ८ ॥ यावतावस्थानेनार्थः प्रयोजनं सिध्येत्तावदेव स्थितिं कुर्यादित्यर्थः ॥ ९ ॥ अत्राक्षिपति—ततो भेदोपरमाभावात् । इत्यर्थ इति । संसृतिहेतुत्वात्त्याज्य एवेति भावः । अत्र विश्वनाथः—ननु निवृत्ताभिमानस्य विजितेंद्रियस्य ज्ञानिनो युवतयः किमपकर्तुं प्रभवेयुस्तत्राह—कल्पयित्वेति ' ईश्वरो ज्ञानसमर्थोपीदं देहदैहिकविषयाभिमानादिकं बाधितानुवृत्तिन्यायेनाभासं कल्पयित्वा तत्त्वज्ञानेन विजितं नाममात्रेणैव स्थितमकिंचित्करं कृत्वापि यावदात्मना मनसा सह वर्तते तावद्द्वैतमहं पुमानियं स्त्री इदं मे प्रियमिति भेदबुद्धिर्न विरमेत् ततश्च विपर्ययः पूर्ववत्संसारावृत्तिः । यद्वा—ननु त्यक्तसुताभगिन्यादिबंधुवर्गस्य जितेंद्रियस्य किमस्माद्भयं तत्राह—कल्पयित्वेति । व्यवहारं व्यावहारिकं वस्तु च त्यक्त्वापि आत्मना मनसा यावत् यत्प्रमाणमिदमाभासमियं मे भगिन्येवेयं मातेयं सुतेत्यादिसंबंधाभासं कल्पयित्वेश्वरस्तत्तत्कृतस्नेहोत्थसुखेनेशितस्तावत्तत्प्रमाणकं द्वैतं भेदो न विरमेत् । नन्वस्य स्तोकत्वात्कल्पितत्वाच्च न काचिच्चिंता तत्राह—ततो हीति ॥ १० ॥ गुरुवृत्तिर्गुर्वनुवृत्तिः । विकल्पेन व्यवस्थितविकल्पेन प्राप्तावसरेण कदाचित्कर्तव्याऽवसराप्राप्तौ न कर्तव्येत्यर्थः ॥ ११ ॥ गंधलेपः सुगंधचंदनादिना तिलकादिविधानम् । आमिषं तु "प्राण्यंगचूर्णं चर्मांबु जंबीरं बीजपूरकम् । अयज्ञशिष्टमाषादि यद्विष्णोरनिवेदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च ॥ त्रयीं सांगोपनिषदं यावदर्थं यथाबलम् ॥ १३ ॥ दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः ॥ गृहं वनं वा प्रविशेत् प्रव्रजेत्तत्र वा वसेत् ॥ १४ ॥ अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम् ॥ भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥ एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही ॥ चरन् विदितविज्ञानः परं ब्रह्माधिगच्छति ॥ १६ ॥ वानप्रस्थस्य वक्ष्यामि नियमान् मुनिसंमतान् ॥ याना तिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा ॥ १७ ॥ न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः ॥ अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् ॥ १८ ॥ वन्यैश्चरुपुरोडाशान्निर्वपेत् कालचोदितान् ॥ लब्धे नवेनवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥ १९ ॥ अग्न्यर्थमेव शरणमुटजं वाऽद्रिकंदराम् ॥ श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ॥ २० ॥ केशरोमनखश्मश्रुमलानि जटिलो दधत् ॥ कमंडल्वजिने दंडवल्कलाग्निपरिच्छदान् ॥ २१ ॥

पतो निषिध्यते । पूर्वं तु कथंचिदापदि प्राप्तमपि स्वीकर्तृकं निषिद्धमिति भेदः ॥ १२ ॥ अंगैः शिक्षादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्यावबुध्य च तदर्थं च विचार्य। यावदर्थं स्वाधिकारानुसारेण ॥ १३ ॥ यदीश्वरः शक्तस्तर्हि गुरोः काममपेक्षितं वरं दत्त्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात्प्रव्रजेत् वा तत्रैव वसेत् । नैष्ठिकः स्या दित्यर्थः ॥ १४ ॥ स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सह तन्नियंतृतया ॥ १५ ॥ चरन्नेवमाचरन् । विदितं विज्ञानं विज्ञेयं येन सः ॥ १६ ॥ ऋषिलोकं महर्लोकम् ॥ ॥ १७ ॥ अकृष्टमकृष्टपच्यम् । अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः । अर्कपक्वं फलादि आहरेदश्नीयात् ॥ १८ ॥ वन्यैर्नीवारादिभिश्चरुपुरोडाशान् । कालचो दितान्नित्यान् । पुराणं पूर्वसंचितम् ॥ १९ ॥ हिमादीन्सहेत इति तथा ॥ २० ॥ केशादीन्मलं चाप्रक्षालनेन धारयन् । कमंडल्वादींश्च दधत् ॥ २१ ॥

तम् ॥ दग्धमन्नं मसूरं च मांसं चेत्यष्टधामिषम् । गोछागीमहिषीदुग्धादन्यदुग्धं तु चामिषम् ॥ द्विजक्रीतरसाः सर्वे लवणं भूमिजं तथा । ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम् ॥ आत्मार्थं पाचितं चान्नं तथा पर्युषितं च यत् । प्रेतान्नं शूद्रशेषान्नं कन्यावित्तं तथैव च ॥ पतितान्नं चामिषं स्यात्तत्त्याज्यं सर्वदा बुधैः ॥" इति पाद्मादौ वर्णितम् ॥ १२ ॥ आदिना कल्पा दिग्रहः । " शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः । छंदोविचितिरित्येवं षडंगो वेद उच्यते ॥" इत्युक्तेः उपनिषद्भिर्ब्रह्मप्रतिपादिकाभिः केनादिभिः । यावदर्थं स्वसामर्थ्यानुरूपं द्रव्या दियथाबलं स्वबलानुसारेण च स्वबलसाध्यं न त्वहं सुमेरुशृंगमानंयिष्यामि कुर्वाज्ञां गुरो इत्यादि न वदेदिति भावः ॥ १३ ॥ इत्यर्थ इति । यावदायुर्गुरुसेवनपूर्वकं शास्त्राभ्यासस्यैव नैष्ठिकपदार्थत्वादिति भावः ॥ १४ ॥ मुख्यप्रवेशाभावादप्रविष्टमित्यर्थः ॥ १५ ॥ एवंविधः पूर्वोक्तलक्षणलक्षितः ॥ १६ ॥ यान्नियमान् । आतिष्ठन्ननुष्ठन् ॥ १७ ॥ कृष्टपच्यं सीरोत्कृष्टक्षेत्रोद्भूतम् । अकृष्टमकृष्टपच्यम् ॥ १८ ॥ चोदितान् विहितान् । आग्रहायणिकादीष्टीरित्यर्थः । आद्यं कंदादि ॥ १९ ॥ अग्न्यर्थमग्निरक्षार्थम् । उटजं पर्णशालाम् ॥ २० ॥ मलं च दन्ताद्यधावनादि । अग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ॥ द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥२२॥ यदाऽकल्पः स्वक्रियायां व्याधिभिर्जरयाऽथ वा ॥ आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥ आत्मन्यग्नीन् समारोप्य संन्यस्याहंममात्मताम् ॥ कारणेषु न्यसेत् सम्यक् संघातं तु यथाऽर्हतः ॥ २४ ॥ खे खानि वायौ निःश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥ वाचमग्नौ सवक्तव्यामिंद्रे शिल्पं करावपि ॥ पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥ मृत्यौ पायुं विसर्गं च यथास्थानं विनिर्दिशेत् ॥ दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम् ॥ २७ ॥ रूपाणि चक्षुषा राजञ्ज्योतिष्यभिनिवेशयेत् ॥ अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥२८॥ मनो मनोरथैश्चंद्रे बुद्धिं बोध्यैः कवौ परे ॥ कर्माण्यध्यात्मना रुद्रे यदहंममता क्रिया ॥ सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥२९॥

कृच्छ्रतस्तपःक्लेशाद्यथा बुद्धिर्न नश्येत्तथा चरेत्॥२२॥द्वादशाब्दाद्यनंतरमपि यदि स्वधर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत् । यदि तु ज्ञानाभ्यासे योग्यस्तर्हि संन्यसेदित्युत्तराध्याये वक्ष्यति । तदुभयरहितस्य तु यत्कृत्यं तदाह । यदाऽकल्पोऽसमर्थः । आन्वीक्षिक्यां विद्यायां ज्ञानाभ्यासे ॥ २३ ॥ अनशनादि करिष्यतः पूर्वकृत्यमाह । आत्मनीत्यादि यावत्समाप्ति । यथाऽर्हतो यथायोग्यं स्वकारणेष्वाकाशादिषु संघातं देहं न्यसेत्प्रविलापयेत् ॥ २४ ॥ तदेव विभज्य दर्शयति । खे आकाशे खानि देहगतच्छिद्राणि । आत्मवान्धीमान् । शेषमस्थिमांसादिकठिनांशम् ॥ २५ ॥ एवं स्थूलशरीरस्य लयमुक्त्वा लिंगशरीररूपस्याध्यात्मादित्रयस्य लयमाह । वाचमित्यादिना । तत्र यद्यपि यथोद्भवं लयस्य युक्तत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहंकारादिषु लयो वाच्यस्तथापीह तेषां लयभावनेयमद्वितीयात्मप्रतिपत्तिपरेति यथाकथंचिल्लये भाव्ये देवतानां प्रवर्तकत्वेन प्राधान्यादिंद्रियतद्विषययोर्देवतासु लयः कथ्यते । वक्तव्यसहितां वाचमग्नौ न्यसेत् एवं सर्वत्र । पदानि पादौ । वयसि विष्णौ ॥२६॥ सनादेन शब्देन सह । अध्यात्मनि वायौ । अध्यात्मविदिति पाठे वायाविति ज्ञातव्यम् ॥ २७ ॥ ज्योतिष्यादित्ये । रसगंधयोरिंद्रियाद्याकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्येंद्रियस्य विषये लयमाह । प्रचेतसा सह जिह्वां रसनमप्सु रसरूपासु।घ्राणशब्देनाश्विनोरप्युपलक्षणम् अश्विभ्यां सह घ्राणं घ्रेयैर्गंधैरुपलक्षितायां क्षितावित्यर्थः॥२८॥परे कवौ ब्रह्मणि ।

परिच्छदाः दर्भसमिदादयः । यद्वा—अग्निग्रहणार्थं लोहनिर्मितद्विफालयंत्रं भस्मनिराकरणाद्यर्थं काष्ठनिर्मितमध्यदंडत्रिकोणपट्टं फूत्कारयंत्रञ्च ॥ २१ ॥ २२ ॥ आन्वीक्षिक्यां वाऽकल्प इति ॥ २३ ॥ आत्मनि स्वस्मिन् । अग्नीन् गार्हपत्यादीन् । धारणया समारोप्य । न्यासो लयभावनम् ॥ २४ ॥ तदेव न्यसनमेव । ‘ आत्मा बुद्धौ धृतौ जीवे ’ इत्यभिधानात् ॥ २५ ॥ वेति सर्वत्र प्राप्नोतीति वया विष्णुः ‘ वी—गतिव्याप्त्यादौ ’ इत्यतोऽसुच् ॥ २६ ॥ यथास्थानं स्थानमनतिक्रम्य तत्तत्स्थानं स्पृष्ट्वा विनिर्दिशेत् । प्रथमम् इमां वाचमग्नौ विलापयामीति प्रयुंजीत ततोभिनिवेशयेदित्यन्वयः ॥ २७ ॥ प्रकृष्टं चेतो यत्र स प्रचेता मधुरादिरसस्तेन सहाप्सु जलाधिष्ठातीर वरुणे इति वार्थः । घ्रेयैर्विविधगंधैः । इत्यर्थ इति । क्षितिशब्देन तदधिष्ठातृदेवता ज्ञेयाऽश्विनोरित्यर्थः ॥ २८ ॥ मनोरथैर्मननीयैर्विषयैः । बोध्यैर्बुद्धिविषयैः । कर्माणि तद्विषयान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ॥ कूटस्थे तच्च महति तदव्यक्तेऽक्षरे च तत् ॥ ३० ॥ इत्यक्षरतयात्मानं चिन्मात्रमवशेषितम् ॥ ज्ञात्वाऽद्वयोथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥ इति श्रीमद्भा० महा० सप्तमस्कंधे द्वादशोऽध्यायः ॥ १२ ॥ नारद उवाच ॥ कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ॥ ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥ बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम् ॥ त्यक्तं न दंडलिंगादेरन्यत् किंचिदनापदि ॥ २ ॥ एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छांतो नारायणपरायणः ॥ ३ ॥ पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये ॥ आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥४॥ सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक् ॥ पश्यन्बंधं च मोक्षं च मायामात्रं न वस्तुतः ॥५॥

अध्यात्मनाऽहंकारेण । अध्यात्मतामिति पाठे कर्माण्यहंकारं चेत्यर्थः । कथंभूते रुद्रे । यद्यस्मादहंममतापूर्विका क्रिया भवति तस्मिन् सत्त्वेन चेतनया गुणैर्गुणकार्यैः प्रागवशिष्टैर्देवैः सह यद्वा सत्त्वादिभिर्गुणैर्हेतुभूतैः । वैकारिकं भोक्तृत्वादिविकारवंतं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ॥ २९ ॥ ननु विकारवतः कथं परेऽविकारे लयः स्यात् विकारहेतूनां सर्वोपाधीनां लयद्वारेणेत्याह । अप्स्विति । अदो ज्योतिः । तच्च नभः कूटस्थेऽहंतत्त्वे । तच्च कूटस्थं महति महत्तत्त्वे । तदव्यक्ते प्रधाने । तच्चाव्यक्तमक्षरे परमात्मनि ॥ ३० ॥ इति सर्वोपाधिलयाद्धेतोरवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वाऽद्वयः सन्विरमेत् । दग्धकाष्ठो यथाऽनलः ॥ ३१ ॥ इति सप्तमे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान् ॥ अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥ १ ॥ एवं ध्यात्वा कल्पोऽनशनादिकं कुर्यात् । आन्वीक्षिक्यां कल्पस्त्वेवं ध्यात्वा परिव्रज्येति संबंधः । कियदत्र त्याज्यं देहव्यतिरिक्तं सर्वमित्याह । देहमात्रेति । तस्य धर्मानाह । ग्रामैकरात्रेति नवभिः ॥ १ ॥ कौपीनं गुह्यमाच्छाद्यते यावता तावन्मात्रं परं केवलमन्यदिति वा त्यक्तं प्रेषोच्चारणात्पूर्वमेव ॥ २ ॥ ३ ॥ सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥ नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः न हि बद्धमुक्तयोरैक्यं संभवति तत्राह । सुप्तेति । सुषुप्तौ हि तमसावृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते संधौ तु न तमो नापि विक्षेपः । अतस्तदाऽऽत्मदृगात्मानं लक्षीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बंधं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः ।

क्षेत्रज्ञे चित्ताधिष्ठातारि वासुदेवे वासुदेवस्य गुणकार्याभावात्तदितरैरित्यर्थः । क्षेत्रज्ञपदस्य मुख्यार्थमाह—यद्वेति । वैकारिकं क्षेत्रज्ञं जीवम् ॥ २९ ॥ अत्राक्षिपति—नन्विति । अमुं वायुम् ॥ ३० ॥ अथाद्वयत्वे सति विरमेदतः परं कृत्याभावाद्यथासर्वस्मिन्काष्ठे दग्धे ततः परं दग्धव्याभावाद्वह्निर्विरमति तद्वदित्यर्थः ॥ ३१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ साधकस्यात्मावगतौ यतमानस्य (१) तस्य यतेः ॥१॥ कौपीनं गुह्यस्थानम् 'कौपीनं स्यादकार्ये च चीरगुह्यप्रदेशयोः' इति मेदिनी । प्रैषा मंत्रविशेषाः । आपदि तु देहरक्षार्थं त्यक्तमपि धारयेदित्यर्थः ॥२॥३॥४॥ अत्राक्षिपति—नन्विति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभिनंदेद्ध्रुवं मृत्युमध्रुवं वाऽस्य जीवितम् ॥ कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥ नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ॥ वादवादांस्त्यजेत्तर्कान्पक्षं कं च न संश्रयेत् ॥ ७ ॥ न शिष्याननुबध्नीत ग्रंथान् नैवाभ्यसेद्बहून् ॥ न व्याख्यामुपयुंजीत नारंभानारभेत्क्वचित् ॥८॥ न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ॥ शांतस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥ अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्तबालवत् ॥ कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ॥ १० ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥ १२ ॥ ददर्श लोकान्विचरँल्लोकतत्त्वविवित्सया ॥ वृतोऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥ कर्मणाऽऽकृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः ॥ न विदंति जना यं वै सोऽसाविति न वेति च ॥ १४ ॥

तदुक्तं योगग्रंथे । "निद्रादौ जागरस्यांते यो भाव उपजायते ॥ तं भावं भावयन्नित्यं मुच्यते नेतरो यतिः" इति ॥५॥ अस्य देहस्य प्रभवोऽप्ययश्च यस्मात्तं कालम् ॥६॥ असच्छास्त्रेष्वनात्मपरेषु जीविकां नक्षत्रविद्यादिवृत्तिम् । वादवादान् जल्पवितंडादिनिष्ठान् । कं च कमपि पक्षं निर्बंधेन न संश्रयेत् ॥७॥ शिष्यान्नानुबध्नीत प्रलोभनादिना बलान्नापादयेत् । आरंभान्मठादिव्यापारान् ॥ ८ ॥ परमहंसस्य विशेषमाह न यतेराश्रमो धर्मार्थः । कथंभूतस्य यतेः महात्मनः । तस्य लक्षणं शांतस्येत्यादि । प्राय इत्यस्यायं भावः । ज्ञानोत्पत्तिपर्यंतं बहूदकादिलिंगमाश्रित्य सत्त्वशुद्ध्यर्थं यमान्नियमांश्चाचरन्नेव ज्ञानोत्पत्तौ यतेत । उत्पन्ने तु ज्ञाने न नियमैः कृत्यमस्ति । यमाश्च स्वत एव स्युः । अतस्तदा लिंगादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति ॥ ९ ॥ तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह । न बहिर्व्यक्तं लिंगं यस्य व्यक्तोऽर्थः प्रयोजनमात्मानुसंधानं यस्य स मनीष्यप्युन्मत्तवद्बालवच्च कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत् । ते यथोन्मत्तादिरूपं मन्येरंस्तथा वर्तेत । स्वदृष्ट्येति पाठे बाह्यानुसंधानाभावेनेत्यर्थः ॥ १० ॥ परमहंसधर्ममेवेतिहासेन स्फुटयति । अत्रापीति यावदध्यायसमाप्ति । अजगरव्रतस्य मुनेश्च ॥ ११ ॥ धरोपस्थे भूपृष्ठे सह्याद्रेस्तटे रजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥ कर्मादिभिर्जना यं न विदुस्तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्त

यतो न तमो नापि विक्षेपः अतो हेतोः । अत एवात्मगतिदर्शनादेव । तत् संधिस्थानफलम् । यो भाव उन्मनीभावः । इतरस्तद्भिन्नः ॥ ५ ॥ ध्रुवं निश्चितम् ॥ ६ ॥ अनात्मपरेषु चिकित्सालंकारादिप्रतिपादकेषु । विजिगीषुकथा जल्पः स्वपक्षस्थापनहीना वितंडा तन्निष्ठान् । निरर्थवादं न कुर्यादित्यर्थः । पक्षं वैष्णवशैवादिरूपम् ॥ ७ ॥ बहून्ग्रंथान् वेदांततदुपयोगिग्रंथेतरग्रंथान् ज्योतिःशास्त्रादीन् । व्याख्यामपि वेदांतेतरकाव्यकोशादिग्रंथव्याकृतिमपि न कुर्वीत । आदिना कृष्यादिग्रहः ॥ ८ ॥ बहूदकादीहादिना कुटीचकग्रहः । स्वामिचरणैरेवैतद्वृत्तं स्फुटीकृतम् ॥ ९ ॥ इत्यर्थ इति । लोकसंगपरिहारार्थमेवेत्थमाचरेदिति भावः ॥ १० ॥ अत्राप्यपरोक्षज्ञानियत्याचारे । इतिहासपदार्थमाह—पुरातनमिति । आजगरव्रतं नामैकत्र स्थित्या प्रारब्धभोगः ॥ ११ ॥ कावेरीनदीतटे सह्यपर्वतोपरिदेशे ॥ १२ ॥ लोकतत्त्वविवित्सया लोकव्यवहारनिरीक्षया ॥ १३ ॥ कर्मणा संध्यावंदनादिरूपेण । आकृतिभिराकारैर्लिंगैरुपवीतादिधारणाचिह्नैः । आदिना वर्णाश्रमभिन्नैरपि लिंगैः स देवदत्तोसौ न वेति यं जना जन्मभूमिवासिनोऽपि न विदुः ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं नत्वाऽभ्यर्च्य विधिवत् पादयोः शिरसा स्पृशन् ॥ विवित्सुरिदमप्राक्षीन्महाभागवतोऽसुरः ॥ १९ ॥ बिभर्षि कायं पीवानं सोद्यमो भोगवा न्यथा ॥ वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ॥ भोगिनां खलु देहोयं पीवा भवति नान्यथा ॥ १६ ॥ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नुहार्थो यत एव भोगः ॥ अभोगिनोऽयं तव विप्र देहः पीवा यतस्तद्वद नः क्षमं चेत् ॥ १७ ॥ कविः कल्पो निपुणदृक् चित्रप्रियकथः समः ॥ लोकस्य कुर्वतः कर्म शेषे तद्वीक्षिताऽपि वा ॥ १८ ॥ नारद उवाच ॥ स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ॥ स्मयमानस्तमभ्याह तद्वागमृतयं त्रितः ॥ १९ ॥ ब्राह्मण उवाच ॥ वेदेदमसुरश्रेष्ठ भवान्नन्वार्यसंमतः ॥ ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा ॥ २० ॥ यस्य नारायणो देवो भगवान्हृद्गतः सदा ॥ भक्त्या केवलयाऽज्ञानं धुनोति ध्वांतमर्कवत् ॥ २१ ॥

रेणान्वयः ॥१४॥१५॥ उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति तृतीयेनान्वयः । उद्यमं विनैव मम भोगोऽस्तीति चेत्तत्राह । वित्तं चेति ॥ ॥ १६ ॥ नु इति निश्चये । ह इति प्रसिद्धौ । तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः । यतोऽर्थादेव यतो हेतोः पीवा । क्षमं योग्यं चेत् ॥ १७ ॥ किं च वित्तार्जनायस मर्थोऽप्ययं जनस्तदर्थमुद्यमं करोति त्वं तु समर्थोऽपि किमिति न करोषीत्याह । कविर्विद्वान् । कल्पो दक्षः । निपुणदृक्चतुरः । चित्राः प्रियाः लोकरंजनाः कथाः यस्य । तथाऽपि लोकस्य कर्म कुर्वतः सतः शेषे । तद्वीक्षिताऽपि तत्सर्वं पश्यन्नपि । पाठांतरे न द्वेक्षि तत्कर्म न द्वेक्षि नौषि वा न च स्तौषीत्यर्थः ॥ १८ ॥ तस्य वागेवामृतं तेन यंत्रितो वशीकृतः सन्नाह ॥ १९ ॥ अध्यात्मचक्षुषांतर्दृष्ट्या भवान्वेदैव । आर्याणां ज्ञानिनां संमतो ननु भवान् इदमिति यदुक्तं तदेवाह । नृणामीहो परमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानीत्यर्थः ॥ २० ॥ वेदेत्यत्र हेतुः । यस्येति । हृदि प्रविष्टः सन्नज्ञानं धुनोति अर्को यथा बहिर्ध्वांतम् ॥ २१ ॥

तमवधूतं द्विजम् । विधिवत्पाद्यादिभिरित्यर्थः । इदं वक्ष्यमाणम् ॥ १९ ॥ तत्र देहस्थूलत्वे । अत्र विश्वनाथः–न च स्वभावेनैव मत्कायः पीवेति वाच्यमित्याह–उद्यमवतां वित्तं वित्तवतां भोगः भोगवतामेव देहः पीवेति पीवत्वस्यादिकारणमुद्यम एव न तु स्वभाव इत्यर्थः ॥ १६ ॥ ननु पीनो देवदत्तो दिवा न भुंक्ते इतिवन्ममोद्यमादिकमनुमीयतामिति चेत्तत्राह–नेति । इत्यर्थ इति । अर्थवांस्तूपकरणैर्ज्ञायते इति भावः । हे विप्रेति । ब्रह्मतेजसैव विप्रत्वावगमादिति भावः ॥ १७ ॥ किमेवं ते विचारेणेति चेत्त्वद्देहे सामुद्रिकसल्लक्षणदृष्ट्या कवित्वकल्पत्वादिकमनुमाय त्वया स्वं कृतार्थीकर्तुं कमप्यालापामृतमिच्छामीत्याह–किवेति । कर्म कुर्वतः कर्मोद्यमवंतमनादृत्य तमपश्यन्नेव शेषे शयनं करोषि तद्वीक्षिता कौतुकेन तं पश्यन्नेव वा । पाठांतरे 'शेषे न द्वेक्षि नौषि वा' इति पाठे । इत्यर्थ इति व्याख्या ॥ १८ ॥ स दत्तात्रेयः ॥ १९ ॥ इत्यर्थ इति । भोगार्थमुद्यमैर्देहं पुष्टीकुर्वतां लोकानां दुःखं यद्यहं नाज्ञास्यं तदोद्यममहमप्यकरिष्यमिति भावः । असुरश्रेष्ठेति । यद्यप्यसुराणामेतज्ज्ञानं न भवति तव तु तेषु तत्स्वभावमनंगीकुर्वतोऽस्त्येवेति भावः ॥२०॥ केवलया ज्ञानकर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथापि ब्रूमहे प्रश्नांस्तव राजन् यथाश्रुतम् ॥ संभावनीयो हि भवानात्मनः शुद्धिमिच्छताम् ॥२२॥ तृष्णया भववाहिन्या योग्यैः कामैरपूरया ॥ कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः ॥ २३ ॥ यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ॥ स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ ॥ २४ ॥ अत्रापि दंपतीनां च सुखायान्यापनुत्तये ॥ कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ॥ २५ ॥ सुखमस्यात्मनो रूपं सर्वेहोपरतिस्तनुः ॥ मनःसंस्पर्शजान् दृष्ट्वा भोगान्स्वप्स्यामि संविशन् ॥ २६ ॥

यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् ॥ २२ ॥ लोकः कर्मसु प्रवर्तते त्वं तु निवृत्तः सन्किं शेषे इति यदुक्तं तत्राह । तृष्णयेति चतुर्भिः । भवप्रवाहकारिण्या यथोचितैरपि विषयैः पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्त्यमानोऽहं पूर्वं नानायोनिषु प्रवेशितः ॥ २३ ॥ तयैव तृष्णयेमं लोकं मनुष्यदेहं यदृच्छया प्रापितः । कथंभूतं लोकं धर्मेण स्वर्गस्य द्वारं साधनम् । अधर्मेण तिरश्चां श्वसूकरादियोनेर्द्वारम् । मिश्राभ्यां ताभ्यां पुनरप्यस्य मनुष्यत्वस्य द्वारम् । सर्वतो निवृत्त्याऽपवर्गस्य द्वारमित्यर्थः ॥ २४ ॥ अत्रापि मनुष्यत्वेऽपि । अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥ २५ ॥ ननु प्रवृत्त्या कदाचित्सुखं स्यान्निवृत्त्या तु किं स्यादिति चेत्तत्राह । सुखमस्य जीवस्य स्वरूपमेव । तर्हि किं न प्रकाशते तत्राह । सर्वेति । तनोतीति तनुः सर्वक्रियानिवृत्तौ स्वत एव प्रकाशत इत्यर्थः । भोगांश्च मनःसंस्पर्शजान्मनोरथमात्रजानशा

द्यमिश्रया । बहिर्ध्वांतं बाह्यतमः ॥ २१ ॥ अतो मया त्वं संमाननीय एवेत्यतः सर्वत्र मौनवतापि त्वयि मौनमनादृत्यैवोच्यत इत्याह—अथापीति । यद्यपि भवान् वेदैर्वाथापीति यथाश्रुतं न तु स्वकपोलकल्पितमित्यर्थः । हे राजन्निति । हरिभक्तिरेव त्वां प्रकाशयतीति भावः । संभावनीयोहमपि श्रीप्रह्लादपदवीं कथं प्राप्नुयामिति चिंतनीयः । 'संभाषणीयः' इति पाठो हि तीर्थसंमतः ॥ २२ ॥ निवृत्तिमार्ग एव संसारोन्मूलनहेतुरीति । प्रवृत्तिमार्गस्तु—नानादुःखहेतुत्वेन हेय एव । प्रेक्षावतेत्येतत्स्वानुभवसिद्धमेवाहं श्रावयामि यदहं निरुद्यमोऽस्मि तत्र कारणं शृण्वित्याह—तृष्णयेति त्रिभिः । भवसंबंधिन्या नद्येति । यथा नद्या अंतो दुष्प्रापस्तथा तृष्णाया अपि । किञ्च नदी हींद्रेण वृष्यमाणैरंबुभिः पूर्यते इयं तु ब्रह्मणापि वृष्यमाणैः कामैर्न पूर्यत इत्याह—योग्यैरिति । यथा च नद्यां वाहितोर्थस्तृणकाष्ठपाषाणकंटकादिषु योज्यते तथैवाहमपि नानायोनिषु । यथा च नद्या ग्राहकच्छपादिभिर्भीषयित्वा तत्परित्राणाय नानासाधनानि कार्यते तथैवाहमपि कर्माणि । यथा च नद्या कदाचित्कश्चिच्चतुष्पथसैकतदेशमपि प्राप्यते तथाहमपि सांप्रतमिमं लोकं नृशरीरं प्रापितः ॥ २३ ॥ इत्यर्थ इति । इत्थं स्वबुद्ध्या विवेचनीयमिति भावः ॥ २४ ॥ निवृत्तोस्मि कर्ममात्रेभ्य इत्यर्थः । विपर्ययमिति । यथा सुखार्थं गृहाणि क्रियंते तेषां च पातलेपनादिभिरधिकमेव पूर्वतो दुःखं दृश्यते न तु सुखमिति । एवं सुखार्थमुद्वाहः क्रियते सति तस्मिन्पुत्रानुत्पत्त्या दुःखं पुत्रे सति तद्विद्याप्राप्तिविवाहधनादिसिद्धये पूर्वस्माद्बहुतरमेव दुःखं दृश्यते लोके एवमन्यत्रापि ज्ञेयम् ॥ २५ ॥ अस्य जीवस्य । सर्वा ईहा कर्माणि तद्धेतुस्तृष्णा च तासामुपरतिरेव तनुः । इत्यर्थ इति । तनुं विना यथा सुखं नोपलभ्यते तथोपरतिं विनापीति भावः । इत्यर्थ इति । तेषां क्षणभंगुरादिकावेक्षणेन तत्रारुचिरेव जातेति भावः । अत्राक्षिपति—तर्हीति । इत्यर्थ इति । स्वाभाविकनश्वरात्मसुखमुपभुंजानः स्वप्स्यामि स्वपिमि वैतृष्णादिदिव्यकुसुमशय्यायामिति स्वस्य पीनत्वे सुखभोग एव हेतुः । 'निर्वृतिः पुष्टीकरणम्'' इति वैद्यकोक्तेः । यद्वा—स्वप्स्यामि संप्रत्यपि तृष्णाभासस्यानिवृत्त्या यद्यपि सम्यगात्मसुखानुपलब्धिस्तथापि पञ्चषैर्दिनैस्तस्यापि निवृत्त्या सम्यक् संवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्येतदात्मनः स्वार्थं संतं विस्मृत्य वै पुमान् ॥ विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ॥ २७ ॥ जलं तदुद्भवैश्छन्नं हित्वाऽज्ञो जलकाम्यया ॥ मृगतृष्णामुपाधावेद्यथाऽन्यत्रार्थदृक् स्वतः ॥ २८ ॥ देहादिभिर्दैवतंत्रैरात्मनः सुखमीहतः ॥ दुःखात्ययं चानीशस्य क्रिया मोघाः कृताःकृताः ॥ ॥ २९ ॥ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ॥ मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥ पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ॥ भयादलब्धनिद्राणां सर्वतोऽभिविशंकिनाम् ॥ ३१ ॥ राजतश्चोरतः शत्रोः स्वजनात् पशुपक्षितः ॥ अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ॥ ३२ ॥ शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ॥ यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥ मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ ॥ वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ॥ ३४ ॥ विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ॥ कृच्छ्राप्तं मधुवद्वित्तं हत्वाप्यन्यो हरेत्पतिम् ॥ ३५ ॥ अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ॥ नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥ ३६ ॥

श्वतान् दृष्ट्वा स्वप्स्यामि निरुद्यमोऽस्मीत्यर्थः । तर्हि कदाचित्कथं भुंक्षे तत्राह । संविशन् । प्रारब्धभोगान्भुंजान इत्यर्थः ॥ २६ ॥ एवं चेत्कोऽपि संसारं न प्राप्नुयात्तत्राह । इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्नेव संतं पुरुषार्थं विस्मृत्य असत्यपि द्वैते ॥ २७ ॥ एतदेव दृष्टांतेन स्पष्टयति । जलमिति । तदुद्भवैस्तृणशैवालादिभिः जलकाम्यया जलेच्छया । स्वत आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् ॥ २८ ॥ एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्टेति यदुक्तं तद्विवृणोति । देहादिभिरिति पंचभिः । ईहत इच्छतः अनीशस्य निर्दैवस्य पुनःपुनः प्रारब्धाः क्रिया मोघा विफला एव भवंति ॥ २९ ॥ क्रियाणां सफलत्वेऽपि फलस्यानुपयोगमाह । आध्यात्मिकादिभिरिति । मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः ॥ ३० ॥ कृच्छ्रं विनैव प्राप्तेऽप्यर्थे दुःखं तदवस्थमित्याह । पश्यामीति ॥ ३१ ॥ भयं प्रपंचयति । राजत इति । स्वस्मान्मन्न एव कथंचित्त्यागभोगविस्मरणादिना नाशः स्यादिति प्राणवतामर्थवतां च भयं नित्यम् ॥ ३२ ॥ अतोऽनर्थहेतुत्वात्प्राणेऽर्थे च स्पृहा न कार्येत्याह । शोकेति ॥ ॥ ३३ ॥ नन्वेवमनर्थाननुभवंतोऽपि न केचिद्विरज्यंते न च यथालाभेन तुष्यंति त्वं तु कथं वैराग्यादिकं प्राप्तोऽसि तत्राह । मधुकारेति मधुमक्षिकाऽजगरौ । ययोः शिक्षया वृत्तपर्यालोचनया ॥ ३४ ॥ मधुकाराच्छिक्षितमाह । विराग इति । वित्तपतिं हत्वाऽन्यो वित्तं हरेदित्येवम् ॥ ३५ ॥ अजगराच्छिक्षितमाह । अनीह इति ।

शन् शयिष्य इत्यर्थः । 'संवेशः स्वापस्त्रीरतबंधयोः' इति मेदिन्युक्तेरत्र सामान्यत एव संभोगवाची ज्ञेयः ॥ २६ ॥ द्वैते देहादौ ॥ २७ ॥ तस्मिन् जले उद्भवैर्न तु तस्मादुद्भूतैरिवात्मन्युद्भूतैर्मायिकतृष्णादिभिश्छन्नमात्मसुखं हित्वा ॥ २८ ॥ २९ ॥ ३० ॥ तदवस्थं धनिजनस्थम् ॥ ३१ ॥ ३२ ॥ यतो नित्यं भयमतो हेतोः क्लैब्यं यन्मूलाः प्राणार्थमूलकाः प्राणोऽत्र संभोगादिप्रयोजकं बलं तेन प्राणार्थयोः स्पृहां जह्यात् शारीरबलाधिक्यार्थं धनाधिक्यार्थं च न यतेत स्वल्पेनापि बलेन धनेन च पारमार्थिककृत्यासिद्धेरिति भावः ॥ ३३ ॥ गुरुषु चतुर्विंशतिसंख्येष्वेतौ द्वावुत्तमौ ॥ ३४ ॥ ३५ ॥ नो चेद्यदृच्छोपनतं न चेत्तर्हि बह्वहानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिदल्पं क्वचिद्भूरि भुंजेऽन्नं स्वाद्वस्वादु वा ॥ क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥ श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् ॥ भुंजे भुक्त्वाथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ॥ ३८ ॥ क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ॥ वसेऽन्यदपि संप्राप्तं दिष्टभुक्तुष्टधीरहम् ॥ ३९ ॥ क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ॥ क्वचित्प्रासादपर्यंके कशिपौ वा परेच्छया ॥ ४० ॥ क्वचित्स्नातोनुलितांगः सुवासाः स्रग्व्यलंकृतः ॥ रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ॥ ४१ ॥ नाहं निंदे न च स्तौमि स्वभावविषमं जनम् ॥ एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे ॥ मनोवैकारिके हुत्वा तं मायायां जुहोत्यनु ॥ ४३ ॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ् मुनिः ॥ ततो निरीहो विरमेत्स्वानुभूत्यात्मनि स्थितः ॥ ४४ ॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ॥ व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्परः ॥ ४५ ॥ नारद उवाच ॥ धर्मं पारमहंस्यं वै मुनेः श्रुत्वाऽसुरेश्वरः ॥ पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ गृहम् ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे प्रह्लादाय दत्तात्रेयेण पारमहंस्यधर्मवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

सत्त्ववान्धैर्यवान् ॥ ३६ ॥ पीनत्वे हेतुं वदन्यदृच्छया प्राप्तात्परितोषं प्रपंचयति । क्वचिदल्पमिति षड्भिः ॥ ३७ ॥ ३८ ॥ चीरं जीर्णवस्त्रखंडम् । वसे परिदधे । दिष्टभुक् प्रारब्धकर्मफलभोगी ॥ ३९ ॥ प्रासादमध्ये पर्यंके तत्रापि कशिपौ तूलिकायाम् ॥ ४० ॥ चरे विचरामि । क्वचिद्ग्रहवद्दिगंबरो विचरामि ॥ ४१ ॥ न च मानापमानकर्तृषु मम वैषम्यमित्याह । नाहमिति । नाहं निंदामि न च स्तौमि । महात्मनि विष्णौ ॥ ४२ ॥ एवंभूतत्वेन स्थितावुपायमाह । विकल्पमिति द्वाभ्याम् । चित्तौ भेदग्राहकमनोवृत्तौ । अर्थरूपो विभ्रमो यस्मिन्मनसि तन्मनो वैकारिकेऽहंकारे । तमहंकारमन्वनंतरं महत्तत्त्वद्वारेणेत्यर्थः ॥ ४३ ॥ सत्यमेव पश्यतीति तथा ॥ ४४ ॥ मंददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या यतो भवान्भगवत्परः ॥ ४५ ॥ ४६ ॥ इति श्रीमद्भागवते सप्तमे टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥

शये ॥ ३६ ॥ भूरिगुणोपेतं षड्रसयुक्तम् ॥३७॥ यदृच्छया क्वापि श्रद्धयोपाहृतं भुक्त्वा कदाचिन्मानवर्जितं भुंजे ।अथ कस्मिंश्चिद्देशे दिवा नक्तं वा भुंजे।यद्वा–यदृच्छया कस्मिंश्चिद्दिवा भुक्त्वा नक्तं भुंजे नक्तं भुक्त्वा दिवा वा भुंजे इति योजना ॥ ३८ ॥ क्षौममातसम् ॥ ३९ ॥ धरोपस्थे धराक्रोडे ''उपस्थं शेफसि तथा क्रोडे मदनमंदिरे'' इति मेदिनी । तत्रापि पर्यंकेऽपि । कशिपौ स्वास्तीर्णे स्वाच्छाद्ये 'कशिपुरल्पपर्यंके भोजनच्छदे' इति कोशात् ॥ ४० ॥ ग्रहवत्पिशाचवत् 'गृह्णातीति ग्रहः' इति निरुक्तेः ॥ ४१ ॥ श्रेयो भक्तियोगं तस्य दुर्लभत्वमाशंक्याह–उतेति । ऐकात्म्यं मोक्षम् ॥ ४२ ॥ विविधं कल्पत इति विकल्पो व्यवहारस्तं मनोवृत्तौ तत एव तस्य प्रवृत्तेः । अर्थानां विविधं भ्रमणं यातायातं यतस्तस्मिन् । इत्यर्थ इति । अन्वित्यस्याव्ययत्वेनानेकार्थत्वादिति भावः ॥ ४३ ॥ आत्मानुभूतौ सत्यां माया नश्यत्येवेति भावः ॥ ४४ ॥ हि यतो भवान्भगवत्प्रियो महाभागवतोऽतस्त्वानेन प्रयोजनाभावः ॥ ४५ ॥ ततो मुनेः पार्श्वतः ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधिष्ठिर उवाच ॥ गृहस्थ एतां पदवीं विधिना येन चांजसा ॥ याति देवऋषे ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥ नारद उवाच ॥ गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ॥ वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ २ ॥ शृण्वन् भगवतोऽभीक्ष्णमवतारकथाऽमृतम् ॥ श्रद्दधानो यथा कालमुपशांतजनावृतः ॥ ३ ॥ सत्संगाच्छनकैः संगमात्मजायात्मजादिषु ॥ विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ४ ॥ यावदर्थमुपासीनो देहे गेहे च पंडितः ॥ विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ॥ यद्वदंति यदिच्छंति चानुमोदेत निर्ममः ॥ ६ ॥ दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितम् ॥ तत्सर्वमुपभुंजान एतत्कुर्यात्स्वतो बुधः ॥ ७ ॥ यावद्ध्रियेत जठरं तावत्स्वत्वं हि देहिनाम् ॥ अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति ॥ ८ ॥

चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते ।। देशकालादिभेदेन पुनः श्रेयो विशेषकृत् ।। १ ।। गृहस्थमुल्लंघ्य मोक्षं प्रत्यंतरंगत्वेन प्रथमं वनस्थयतिधर्मेष्वभिहितेषु तर्हि गृहस्थस्य मोक्षो न स्यादिति शंकितचित्तः पृच्छति । गृहस्थ इति ॥ १ ॥ तस्य मोक्षधर्मानाह । गृहेष्वित्यादि यावदध्यायसमाप्ति । साक्षाद्वासुदेवार्पणं यथा भवत्येवं कुर्वन्नुपासीत ॥ २ ॥ ३ ॥ स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा स्वप्नादुत्थितः पुमान्स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचति तद्वत् ॥ ४ ॥ नन्वेवंभूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहोचिताः क्रियाः स्युस्तत्राह । यावदर्थमिति । अंतस्त्वनासक्तो बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मनुष्यतां न्यसेत् । पुरुषकारमाविष्कुर्यादित्यर्थः ॥५॥ आग्रहं तु क्वापि न कुर्यादित्याह । ज्ञातय इति ॥ ६ ॥ नन्वेवं सर्वानुमोदने वित्तक्षयप्रसंगात्कुतो जीवनं कुतो वा कर्मकरणं तत्राह । दिव्यं वृष्ट्यादिभिर्जातं धान्यादि । भौमं निधानादि । आंतरिक्षमकस्मादेव प्राप्तम् । एवं स्वत एवाच्युतनिर्मितं दैवलब्धं यत् । एतत्पूर्वोक्तं कर्मादि ॥ ७ ॥ दैवाद्भूरिलाभे जातेऽपि तत्राभिमानो न कार्य

परमो मुख्यः । देशः कुरुक्षेत्रादिः । कालो वैषुवतादिः (१) तदेवं ब्रह्मचारिवानप्रस्थयतिषु त्रिष्वधिकारिषु निवृत्तधर्ममुक्त्वा प्रवृत्तधर्ममेकस्मिन्गृहस्थ एवाधिकारिणि वक्तुं प्रवर्त्तमानं मुनिं प्रत्यलं प्रवृत्तधर्मेण जन्ममृत्युप्रवाहानुकूलेन वक्तव्येन । यदि च प्रवृत्तधर्मेणापि निवृत्तधर्मफलं मोक्षं सिध्येत्तर्हि तं ब्रूहीत्याशयेनाह—गृहस्थ इति । एतां पदवीं मोक्षम् । हे देवऋषे इति । देवा अप्येतं वृत्तं जानंति कुतो देवर्षिर्भवानिति भावः ॥ १ ॥ महामुनीन्भगवद्भक्तान् ज्ञानिनो वा । हे राजन्निति । राजा त्वन्येषां धर्मेषु प्रवर्त्तकस्तस्य तत्र प्रवृत्तौ का वार्त्तेति भावः॥२॥यथाकालमपराह्णादौ । उपशांतजनावृतः सन् कथामृतमभीक्ष्णं श्रृण्वन्न तु कथाश्रवणकाले वार्त्तांतरं श्रृण्वन्नित्यर्थः । अभीक्ष्णं पौनःपुन्येन प्रतिदिनं श्रृणुयाद्धरिकथां कथायामलंबुद्धिं न कुर्यादित्यर्थः ॥ ३ ॥ विमुच्येदिति छांदसः श्यन् ॥ ४ ॥ अत्राक्षिपति—नन्विति । इत्यर्थ इति । अहो अयमतीव पुरुषार्थवानिति स्वस्य लोके ख्यातिं कारयेदिति भावः ॥ ५ ॥ निर्ममोऽनासक्त एवानुमोदेत स्वीकुर्यात् ॥ ६ ॥ अत्राशंकते—नन्विति । आदिना मूलकंदादिग्रहः । निधानादीहादिनाकरोत्थग्रहः । तत्तद्रूपेण सर्वमच्युतेनैव विनिर्मितमतो वित्तार्थं नैव चिंतां कुर्यादित्यर्थः । एतत्पूर्वोक्तं नित्यनैमित्तिकादि स्वतः स्वं वित्तं तेन कुर्यादित्यर्थः ॥ ७ ॥ यावत् यावता अधिकस्य परकीयत्वात्तत्र स्वत्वाभिमानं चौरधर्मोऽतो दंडमर्हति स परलोके दंडं प्राप्नोतीत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः ॥ आत्मनः पुत्रवत्पश्येत् तैरेषामंतरं कियत् ॥ ९ ॥ त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि ॥ यथादेशं यथाकालं यावद्दैवोपपादितम् ॥ १० ॥ आश्वाघांतेऽवसायिभ्यः कामान्संविभजेद्यथा ॥ अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥ जह्याद्यदर्थे स्वप्राणान् हन्याद्वा पितरं गुरुम् ॥ तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥ १२ ॥ कृमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरम् ॥ क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ ॥ सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ॥ शेषे स्वत्वं त्यजन् प्राज्ञः पदवीं महतामियात् ॥ १४ ॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहम् ॥ स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५ ॥ यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः ॥ वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १६ ॥

इत्याह । यावदिति । भ्रियेत पूर्येत ॥ ८ ॥ अत एव यं कमपि स्वगृहं क्षेत्रं वा प्रविश्य भुंजानं न निवारयेदित्याह । मृगेति । मर्को मर्कटः सरीसृप् सर्पः मक्षिकाश्च तैः पुत्रैरेषां मृगादीनां कियदंतरम् ॥९॥ अतिकृच्छ्रेणापाद्य न भजेत्किं तु यावद्दैवप्रापितं तावदेव भजेत् ॥ १० ॥ श्वानश्च अघाश्च पतिताः अंतेऽवसायिनश्चांडालादयस्तानभिव्याप्य यथार्हं कामान्संविभजेत्स्वभोज्याद्विभज्य दद्यात् । यद्यप्येकैवात्मनो दारा भार्या तस्यामतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्यां च नृणां स्वत्वग्रहो ममैवेयमित्याग्रहस्तामेकामपि संविभजेत् । अतिथिशुश्रूषणे नियुंजीतेत्यर्थः । न त्वन्यथा मंतव्यम् । यथार्हं विभजेदित्युक्तत्वात् ॥ ११ ॥ एवं चेत्तेनेश्वरो वशीकृतः स्यादित्याह । जह्यादिति । यदर्थे यन्निमित्तम् । अन्यैरजितोऽपीश्वरस्तेन जित एव ॥ १२ ॥ ननु कथमेवं तस्यां स्वत्वाभिमानो हातुं शक्यस्तत्त्वविचारेणेत्याह । कृमिविड्भस्मसु निष्ठा पर्यवसानमंते यस्य तदीया देहार्था रतिर्यस्यां सा स्वमहिम्ना नभोऽपि छादयतीति तथा ॥ १३ ॥ किं च । सिद्धैर्दैवलब्धैर्यज्ञावशिष्टार्थैः पंचयज्ञशेषैरन्नादिभिः । महतां निवृत्तानाम् ॥ १४ ॥ एतद्विवृण्वन्नाह । देवादीन्पंच यज्ञदेवताः आत्मानं च एवं पृथक्पुरुषमंतर्यामिणमेव यजेत ॥ १५ ॥ १६ ॥

परस्य द्रव्यं स्वमिति ब्रुवाणो ज्ञेयः स चौरो नृपदंडयोग्य इति भावः॥८॥ यतोऽधिकाभिमानो दंडहेतुरत एव सर्वांसृविति । किंवंतं यद्दंतात् । यथा पुत्रेभ्यो भोज्यं विभजेत्तथा तेभ्योऽपि विभजेत्सर्वत्रात्मन ऐक्यात् । पाञ्चभौतिकत्वेन देहतोऽप्यैक्यात्पराधीनत्वेनास्वतंत्रत्वाच्च किमप्यंतरं विचार्यमाणे न दृश्यत इति भावः ॥ ९ ॥ अतिकृच्छ्रेण शास्त्राविहितमार्गेण शूद्रांत्यजादिप्रतिग्रहलक्षणेन किन्तु स्वल्पायासेनैवावाप्तं भूरिसंभारं नापेक्षेतेत्यर्थः । अपिशब्दाद्ब्रह्मचार्यादिस्तु गुरुकुलादिषु किमुतेति भावः ॥ १० ॥ यथार्हमौचित्यानुल्लंघनेन । इत्यर्थ इति । यदि कश्चिदतिथिस्तया रतिमिच्छेत्तदर्थमपि तामाज्ञापयेदेवेति भावः । न त्वन्यथा मंतव्यमियं व्यभिचारदूषिता सर्वथा भ्रष्टेति न मंतव्यमिति । यथा सुदर्शनेन राज्ञा कुरुक्षेत्रवासिना गृहस्थेनाप्यतिथिरूपेण कालरूपब्राह्मणेन रममाणाऽपि स्वस्त्री न त्यक्ता किं तु मानितैव तेन कर्मणा तेनाजितोऽपि कालो जित इति प्रसिद्धं श्रीमहाभारते ॥ ११ ॥ एवं चेत्स्वभार्ययाप्यातिथ्यं कृतं यदि तर्हि तेनेश्वरो वशीकृतः स्यात्कालोऽपि तद्वशवर्ती स्यादत्रार्थे श्रीमहाभारतीयसुदर्शनोपाख्यानमनुसंधेयम् । स्वत्वं मद्भोग्यैवेयं नान्यस्येति हठं जह्यात् ॥ १२ ॥ यदि तस्यामभिमानत्यागेनैव स प्राप्यते तर्हि कियदेतदिति भावः ॥ १३ ॥ यावतोदरपूर्त्तिः स्यात्तावत्येव वस्तुनि स्वत्वं कुर्यादिति यदुक्तं तत्र व्यवस्थामाह—किं चेति । सिद्धैरिति ॥ १४ ॥ एवं पित्रादियजनद्वारा स्ववृत्त्यागतवित्तेन स्वजातिविहितवृत्त्यैवागतं यद्वित्तं न तु छलादिना प्राप्तं तेन ॥ १५ ॥ आत्मनः स्वस्य यज्ञाधिकारः संपदश्च स्युः । वैतानिकेन वैदिकेन "अर्थी समर्थी विद्वान्यजेत्" इति श्रुतेः ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् ॥ इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥ १७ ॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः ॥ तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु ॥ १८ ॥ कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः ॥ श्राद्धं पित्रोर्यथावित्तं तद्बंधूनां च वित्तवान् ॥ १९ ॥

न पुनरतिनिर्बंधो यज्ञार्थं कार्य इत्याह । न हीति । विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत न तथाऽग्निमुखतो हविषा इज्येत ॥ १७ ॥ ब्राह्मणेषु च देवेषु पंचयज्ञदेवतासु च मर्त्यादिष्वन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञमंतर्यामिणं ब्राह्मणाननु मर्त्यादियजने ब्राह्मणयजनानंतरमन्येषु यजस्व । पाठांतरे ब्राह्मणा आननं यस्य तम् ॥ १८ ॥ प्रौष्ठपदे

ननु मुख्यं होमाधिकरणं भगवत्प्रीतिजनकं किमिति चेत्तत्राह—न हीति। अतो यज्ञार्थमग्निसाध्ययज्ञार्थम् । राजन्निति । राज्ञां ब्राह्मणार्चनमेव मुख्यो यज्ञ इति भावः॥ १७॥ यतो ब्राह्मणा एव मुख्यं होमाधिकरणं तस्माद्धेतोः । किं च बहुजनसमाजे बहुषु ब्राह्मणेतरवृद्धेषु तिष्ठत्स्वपि तत्र ब्राह्मणे सति विभाज्यवस्तुमात्रं ब्राह्मणं विहायान्यस्मै प्राङ् न देयं किन्तु प्रथमं ब्राह्मणाय दत्त्वा पश्चादन्यस्मै देयमित्यभिप्रेत्यैवोक्तं क्षेत्रज्ञं ब्राह्मणानन्विति । क्षेत्रज्ञं प्राणिमात्रं ब्राह्मणान् ब्राह्मणेभ्योऽनु पश्चादित्यर्थः । कर्मप्रवचनीयत्वाद्द्वितीया । अयमर्थः श्रीदशमसप्ततितमाध्याये श्रीकृष्णाह्निकविवरणे स्फुटीकृतः श्रीयोगीन्द्रेण—"संविभज्य यतो विप्रान्स्रक्ताम्बूलानुलेपनैः । सुहृदः प्रकृतीर्दारानुपायुंक्त ततः स्वयम्॥" इति । श्रीकृष्णनित्याचारप्रदर्शनद्वारेति "क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत" इति श्रीमुखोक्तेः । क्षेत्रज्ञो विष्णुस्तस्य मुख्यं मुखं ब्राह्मण एव न तु वह्निःमुख्यत्वं स्वयमेव भगवता तृतीये "नाहं तथाद्मि यजमानहविर्वितानें च्योतद्घृप्लुतमदन् हुतभुग्मुखेन । यद्ब्राह्मणस्य मुखतश्चरतोऽनुवासं तुष्टस्य मय्यवहितैर्निजकर्मपाकैः ॥" इति स्फुटीकृतम् । आदिपदार्थमाह—अन्येष्वपीति । पाठांतरे 'ब्राह्मणाननम्' इति पाठे न हि मनुष्येषु ब्राह्मणात्पूर्वं कस्याप्यर्चनं कार्यं तस्यैवाग्रभोजित्वादिति भावः ॥ १८ ॥ 'मासाः शुक्लादयो ग्राह्याः' इति रामोक्तेः । पंचांगलिपेरनादरादाह—आपरपक्षीयं द्वितीयपक्षीयं सिंहार्कामातः कन्यार्कामापर्यंते मासि कृष्णपक्षे पित्रोर्मातापित्रोस्तद्बंधूनां मातृपितृबंधूनां मातुलपितृव्यादीनां च । तदुक्तं स्मृतिदर्पणे "तातांबात्रितयं सपत्नजननी मातामहादित्रयं सस्त्री स्त्रीतनयादितातजननीस्वभ्रातरस्तत्स्त्रियः । तातांबात्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः शिष्योऽमी पितरो महालयविधौ तीर्थे तथा तर्पणे॥" इति । अस्यार्थः—तातत्रयी पितृत्रयी, अंबात्रयी, सपत्नजननी मातृसपत्नी, सस्त्री स्त्रीयुतं, स्त्री पत्नी, तनयादि पुत्रादि, तातभ्राता पितृव्यो, जननीभ्राता मातुलः, स्वभ्राता प्रसिद्धः एषां स्त्रियः पितृष्वसृमातृष्वसृभगिन्योऽपत्यभर्तृसहिताः, जायापिता श्वशुरः श्वश्रूरपि ज्ञेया, सद्गुरुराचार्यः, शिष्य उपनीतः महालयविधौ तीर्थे तर्पणे चामी पितरः पूज्या इत्यर्थः । अत्र पितृशब्दो न केवलं जनकवाची किं तु सर्वसाधारण एव । "प्रेते पितृत्वमापन्ने सपिंडीकरणादनु" इति विष्णुस्मृतेः । हेमाद्रौ तु—"उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः । श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः ॥ भगिनीस्वामिदुहितृजामातृभागिनेसुताः । पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा ॥ सखिद्रव्यादशिष्याद्यास्तीर्थे चैव हिमालये । एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः ॥ इतरेषां पितृणां च पार्वणं संभवेदिति ॥" इति । तदुक्तं "पितृव्यस्य च भ्रातृणां ज्येष्ठानां पार्वणं भवेत् । एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणं मिथः । मातामहस्य तत्पत्न्यास्तथा तत्परयोरपि । पित्रादीनां त्रयाणां च पार्वणं विहितं बुधैः ॥" अशक्तस्तु—"एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत् । दश द्वादश वा पिंडान्दद्यादकरणं न हि ॥" इति पृथ्वीचंद्रोदये । एकोद्दिष्टस्वरूपन्तु—"एकोद्दिष्टं दैवहीनमेकार्घं

१ "ब्राह्मणोऽस्य मुखमासीत्" इति श्रुतेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये ॥ चंद्रादित्योपरागे च द्वादशीश्रवणेषु च ॥ २० ॥ तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके ॥ चतसृष्वप्यष्टकासु हेमंते शिशिरे तथा ॥ २१ ॥ माघे च सितसप्तम्यां मघाराकासमागमे ॥ राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥ २२ ॥ द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः ॥ तिसृष्वेकादशी वाऽऽसु जन्मर्क्षश्रोणयोगयुक् ॥ २३ ॥

भाद्रपदे ॥ १९ ॥ २० ॥ शुक्लपक्षे । अक्षय्यतृतीयायामित्यर्थः । हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टयेऽपि याश्चतस्रोऽष्टकास्तासु ॥ २१ ॥ संपूर्णचन्द्रा पौर्णमासी राका न्यूनचंद्रा सैवानुमतिः । तथा मासर्क्षाणि तत्तन्मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युतानि यदा स्युस्तदा । तदुक्तं त्रिकांड्याम् । "पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा । नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" इति ॥ २२ ॥ अनुराधा श्रवण उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा वा द्वादश्यां यदा स्यात् । आसूत्तरास्वेकादशी वा यदा स्यात्तदा च । जन्मर्क्षश्रोणयोगयुक् जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा तदा । योगग्रहणं संबंधबाहुल्यार्थम् ॥ २३ ॥

कपवित्रकम् । आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥" इति याज्ञवल्क्यः । वित्तवानिति विशेषणाद्दरिद्रेण तु यथाकथंचित्पित्रोरेव तत्कार्यमित्यर्थः ॥ १९ ॥ अयन इति । "उदगवागयनके मृगकर्किणोः क्रियतुलाधरयोर्विषुवत्स्मृतम् ॥" इति श्रीपतिः । व्यतीपाते तदाख्ययोगे । हेमाद्रौ तु—"पंचाननस्थौ गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे । मासाभिधाना करमेण युक्ता तिथिर्व्यतीपात इतीह योगः ॥ अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वे परिहाय पापम् । सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्यः ॥" इत्थमपि व्यतीपातयोग उक्तः । यद्वा—"श्रवणाश्विधनिष्ठार्द्रासार्पदैवतपंचके । यद्यमा रविवारश्च व्यतिपातस्स उच्यते ॥" इत्युक्तलक्षणे वा । "लक्षकोट्यर्बुदगुणमनंतं स्याद्यथाक्रमम् । व्यतीपातविभागेषु दानमुक्तं मनीषिभिः ॥" इति निर्णयाब्धेः । विना पक्षिणा गरुडेनातति सातत्येन गच्छतीति व्यातिर्विष्णुस्तं पातयति प्रापयतीति व्यतिपातः 'पत गतौ' । यद्वाऽतिपतनमतिपातो निरयादिपातः विगतोऽतिपातो यद्दानप्रभावेण स व्यतिपातः । दिनक्षये तिथिक्षये "दत्तं तिथिक्षये दानमनंतफलदं भवेत्" इति व्यासः । चंद्रादित्ययोरुपरागे ग्रहणे द्वादशीयुक्तेषु श्रवणेषु द्वादशीषु श्रवणेषु च तेन सर्वासु द्वादशीषु सर्वेषु वत्सरांतर्गतेषु श्रवणेषु च श्राद्धदानादि कार्यमित्यर्थः । मन्वादियुगादिकल्पादितिथयोऽपि ग्राह्यास्ताश्च—"मन्वाद्यास्त्रि३तिथी १९ मधौ तिथि १५ रवौ १२ ऊर्जे शुचौ दिक् १० तिथी १५ ज्येष्ठेऽन्त्ये च तिथि १५ स्त्विषे नव९तपस्यश्वाः ७ सहस्ये शिवा ११ ॥ भाद्रेऽग्नि३श्च सिते त्वमा ३० ष्ट ८ नभसः कृष्णे युगाद्याः सिते गो ९ ग्नी ३ बाहुलराधयोर्मदन १३ दर्शौ ३० मांद्रमावासिते ॥" इति रामः । "कल्पादिः स्यात्कृष्णपक्षे नभस्ये च त्रयोदशी" इति नारदः ॥ २० ॥ इत्यर्थ इति । सर्वासु शुक्लतृतीयासु वैशाखशुक्लतृतीयायाः परशुरामजयंतीत्वेन युगादित्वेन चाभ्यर्हितत्वादिति भावः । अथ शुक्लपक्ष एव कार्तिके नवम्या अपि युगादित्वाद् ग्रहणं "हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टम्यष्टकाः" इत्याश्वलायनसूत्रात् । केचित्तु—"अमावस्याष्टकास्तिस्रः पौषमासादिषु त्रिषु" इत्यभिप्रेत्यैव स्वामिचरणैस्तिस्र इति व्याख्यातम् ॥ २१ ॥ माघेसितसप्तम्यां रथसप्तम्याम् । मघाराकासमागमे माघ्यां पौर्णमास्याम् । "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इत्यमरः । तत्तन्मासप्रवृत्तिनक्षत्राणि चित्रादीनि यदा पूर्णचंद्रया राकया न्यूनचंद्रयाऽनुमत्या च युतानि स्युस्तदा तेष्वित्यर्थः । त्रिकांड्याममरनिर्मितनामलिंगानुशासनकोशे । एवमपरे मघया युक्ता पौर्णमासी यत्र स माघः । फाल्गुन्या युक्ता पौर्णमासी यत्र स फाल्गुनः एवं चैत्रादिष्वपि ज्ञेयम् ॥ २२ ॥ एकादशी ह्यत्रोपवासानर्हैव ग्राह्या तत्र श्राद्धनिषेधात् तदुक्तं ब्रह्मवैवर्ते—"ये कुर्वंति महीपाल श्राद्धमेकादशीदिने । त्रयस्ते नरकं यांति दाता भोक्तानुमोदकः ॥" इति । उत्तरासाहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त एते श्रेयसः काला नृणां श्रेयोविवर्धनाः ॥ कुर्यात् सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥ २४ ॥ येषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ॥ पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरम् ॥ २५ ॥ संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ॥ प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ॥ २६ ॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेयआवहान् ॥ स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ २७ ॥ बिंबं भगवतो यत्र सर्वमेतच्चराचरम् ॥ यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितम् ॥ २८ ॥ यत्रयत्र हरेरर्चा स देशः श्रेयसां पदम् ॥ यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥ सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ॥ कुरुक्षेत्रं गयशिरः प्रयागः पुलहाश्रमः ॥ ३० ॥ नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ॥ वाराणसी मधुपुरी पंपा बिंदुसरस्तथा ॥ ३१ ॥ नारायणाश्रमो नंदा सीतारामाश्रमादयः ॥ सर्वे कुलाचला राजन्महेंद्रमलयादयः ॥ ३२ ॥

न केवलं श्राद्धस्यैवैते कालाः किं तु धर्ममात्रस्येत्याह । त एत इति द्वाभ्याम् । तदेवायुषः अमोघं साफल्यमित्यर्थः ॥ २४ ॥ २५ ॥ संस्कारकाल इति । जायायाः पुंसवनादि । अपत्यस्य जातकर्मादि । आत्मनो यज्ञदीक्षादि । प्रेतस्य संस्था दहनादि । मृताहश्च सांवत्सरिकं यदा अन्यस्मिन्नप्यभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषंगः ॥ ॥ २६ ॥ यत्र यस्मिन्नेतच्चराचरमस्ति तस्य भगवतो बिंबं रूपं सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः ॥ २७ ॥ २८ ॥ २९ ॥ अर्हैरुत्तमैराश्रितानि ॥ ३० ॥ ३१ ॥ सीताया रामस्य

यास्तस्या अप्राप्तौ तु परदिने । तदुक्तं पाद्मे–"एकादश्यां तु संप्राप्ते मातापित्रोर्मृतेऽहनि । द्वादश्यां तु प्रकर्त्तव्यं श्राद्धं नैकादशीदिने ॥" पुष्करखंडे "एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत् । तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥" इति वैष्णवसिद्धांते । स्मार्त्तास्तु–"एकादश्यामपि श्राद्धं प्राप्तं कुर्यान्न च त्यजेत् । पितृशेषं समाघ्राय गवे दत्त्वा व्रतं चरेत् ॥" इत्याहुः । स्वजन्मर्क्षे श्रवणर्क्षे चावश्यं दानादि कुर्याद्यस्मिन्दिने एतयोरधिकयोगो यत्राल्पयोगस्तत्रापि कार्यमेवेति भावः ॥ २३ ॥ अमोघमिति । भावप्रधानो निर्देशः । अमोघत्वमित्यर्थः । इत्यर्थ इति । उक्तकालेषु दानाद्यकरणे जन्मैव वृथेति भावः ॥ २४ ॥ एषूक्तेषु कालेषु ॥ २५ ॥ अभ्युदयार्थकर्मणि वापीकूपादिप्रतिष्ठादिकर्मणि ॥ २६ ॥ अथ कालकथनानंतरम् । आदिनार्थकामादिग्रहः । सच्च तत्पात्रं चेति सदाचारादियुक्तं दर्शनार्चनादिना रक्षकमित्यर्थः ॥ २७ ॥ तदेवाह–यत्र हेति । तपआदियुक्तं ब्राह्मणकुलमेव सत्पात्रं नान्यत् । तदुक्तम्–"न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम् ॥" इति स्मृतेः । केचित्तु "केचिद्वदंति तपसा विद्यया केचिदेव हि । पात्रत्वं तस्य विज्ञेयं शूद्रान्नं यस्य नोदरे ॥" इत्याहुः ॥ २८ ॥ अर्चा प्रतिमा शालिग्रामादिरूपा "विश्वेदेवाः प्रस्तरेष्टाः" इति श्रुतेः । पुराणेषु श्रीभागवतादिषु । नद्यः कृष्णावेण्यादयः ॥ २९ ॥ क्षेत्राणि पुरुषोत्तमादीनि । उताथ वार्हैः पूज्यैरगस्त्यवसिष्ठादिभिराश्रितान्यधिष्ठितानि । गयशिरो गयाक्षेत्रम् । प्रयागो गंगायमुनासरस्वतीसंगमो देशः । पुलहाश्रमः हरिक्षेत्रम् ॥ ३० ॥ फाल्गुनं स्थानं कन्यातीर्थं हरपुरं वा "कन्यातीर्थं फाल्गुनं स्यात्स्थानं हरपुरं च तत्" इत्यभिधानादिति तीर्थः । पंपासरो बिन्दुसरश्च ॥ ३१ ॥ नारायणाश्रमो बदरीवनम् । नंदा नदीभेदः । कुलाचलानाह–महेंद्रेत्यादि । आदिना सह्यादिग्रहः । "महेंद्रो मलयः सह्यः शुक्तिमानृक्षवानपि । विंध्यश्च परियात्रश्च सप्तैते कुलपर्वताः ॥" इति भारतोक्तेः । सर्व इति सीतारामाश्रमादय इत्यत्रान्वेति । आदिनावतारांतर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ॥ एतान् देशान् निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ॥ धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ॥ हरिरेवैक उर्वीश यन्मयं वै चराचरम् ॥ ३४ ॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ॥ राजन्य दग्रपूजायां मतः पात्रतयाच्युतः ॥ ३५ ॥ जीवराशिभिराकीर्ण आंडकोशांघ्रिपो महान् ॥ तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥ ३६ ॥ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ॥ शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३७ ॥ तेष्वेषु भगवान्राजंस्तारतम्येन वर्तते ॥ तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ॥ ३८ ॥ दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ॥ त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ३९ ॥ ततोऽर्चायां हरिं केचित् संश्रद्धाय सपर्यया ॥ उपासत उपास्तापि नार्थदा पुरुषद्विषाम् ॥ ४० ॥

चाश्रम आदिर्येषां द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेण ॥ ३२ ॥ अर्चाश्रिताश्च स्थिरप्रतिमाश्रिताः पूर्वं तु शालग्रामशिलाद्यर्चनदेशा उक्ता इत्यपौनरुक्त्यम् । अत्र एषु देशेषु ईहितः कृतः । सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथा ॥ ३३ ॥ अथ पात्रमाह । हरिरेव पात्रं निरुक्तं निर्णीतम् ॥ ३४ ॥ तदेवाह । देवेषु च ऋषिषु चार्हत्सु च तपोयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यद्यस्मादच्युत एव पात्रतया संमतः ॥ ३५ ॥ संमतत्वे हेतुमाह । जीवराशिभिर्व्याप्तो ब्रह्मांडकोश एव योंघ्रिपः सर्वजीवानामात्मनश्च तर्पणम् ॥ ३६ ॥ एतदेव पुरुषनामनिरुक्त्या द्रढयति । पुराणीति । नृतिर्यगादि रूपाणि पुराणि शरीराणि तेष्वंतर्यामिरूपेण प्रत्यगंशेन च यतः शेतेऽतः पुरुष इति प्रसिद्धः ॥ ३७ ॥ तारतम्येन तिर्यगादिभ्यः पुरुषे यस्मादाधिक्येन वर्तते तस्मात्पुरुषः पात्रं तत्रापि यावानात्मा ज्ञानांशो यथायथा ईयते तपआदियोगेन यत्रयत्र प्रतीयते तथातथाऽसौ पात्रमित्यर्थः । तथा च श्रुतिः । "पुरुषत्वे चाविस्तरामात्मा" इत्यादि ॥ ३८ ॥ तर्हि प्रतिमादौ हरेः किमिति पूजां कुर्वंति तत्राह । दृष्ट्वेति द्वाभ्याम् । मिथोऽवज्ञानमसन्मानस्तस्मिन्नात्मा बुद्धिर्येषां भावं दृष्ट्वा क्रियायै पूजाद्यर्थम् ॥ ३९ ॥ हरिमुपासते । उपासिता

कपिलाद्याश्रमादिग्रहः । अत एव सर्वं इत्युक्तम् ॥ ३२ ॥ स्थिर प्रतिमा मन्दिरादिषु वैदिकविधिना स्थापिताः प्राक्तनर्षिदेवादिस्थापिता वा ॥ ३३ ॥ उर्वीशेति । राज्ञां बहुशास्त्रश्रवणादिसंभवात्तेषां तन्निश्चितमेव भवतीति भावः ॥ ३४ ॥ तदेव हरेः पात्रत्वमेव । हे राजन्निति । राजयति निजवृत्तश्रावणेनान्यानपीति यस्तादृशस्त्वमसीति भावः । अच्युतः सर्वथा च्युतिरहितः श्रीकृष्ण एवेत्यर्थः ॥ ३५ ॥ य आंडकोशस्तन्मूलत्वात् । 'तरोर्यथा मूलनिषेचनेन' इत्याद्युक्तेः ॥ ३६ ॥ एतदेव सर्वजीवात्मतर्पणमेव ॥ ३७ ॥ तारतम्येन न्यूनाधिकभावेन । तत्रापि पुरुषेष्वपि । आत्मशब्दस्य ज्ञानवाचकत्वं कोशादवसेयम् । इत्यर्थ इति । ज्ञानाद्याधिक्यमेव पात्रत्वे लिंगमिति भावः । पुरुषदेहे तस्य प्रत्यक्षं प्रायो भवतीत्यत्र प्रमाणमाह—तथा चेति। स्पष्टार्थो ॥ ३८ ॥ अत्राक्षिपति—तर्हीति । तेषां पुरुषोपासकानाम् । नृपेति । नृपालकत्वान्नृस्व भावं त्वं जानास्येवेति भावः । कविभिर्वेदार्थज्ञैः ॥ ३९ ॥ ततस्त्रेतात आरभ्य । केचिदित्युक्त्या बहवोऽर्चार्चनं विहाय मानसार्चनं कुर्वंतीति ध्वनितम् । इत्यर्थ इति । "यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः ॥ तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥ ४१ ॥ नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः ॥ पुनंतः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे सदाचारनिर्णये चतुर्दशोऽध्यायः ॥ १४ ॥ नारद उवाच ॥ कर्मनिष्ठा द्विजाः केचित् तपोनिष्ठा नृपापरे ॥ स्वाध्यायेऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥ १ ॥ ज्ञाननिष्ठाय देयानि कव्यान्यानंत्यमिच्छता ॥ दैवे च तदभावे स्यादितरेभ्यो यथाऽर्हतः ॥ २ ॥

ऽप्यर्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वाऽर्चिता सती साऽपि मंदाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः ॥ ४० ॥ पुरुषेष्वेव जात्या तपआदिभिश्च पुनर्विशेषांतरमाह । पुरुषेष्वपीति । यो धत्ते तं सुपात्रं विदुः ॥ ४१ ॥ एतदेव कैमुत्यन्यायेन द्रढयति नन्वस्येति ॥ ४२ ॥ इति सप्तमे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ततः पंचदशे सर्ववर्णाश्रमनिबंधनम् ॥ सारतः संग्रहेणाथ वर्ण्यते मोक्षलक्षणम् ॥ १ ॥ सर्वेषामपि मोक्षधर्माणां सारसंग्रहार्थमध्यायप्रारंभः । तत्र श्राद्धगतान्विशेषानाह । कर्मनिष्ठा इति । स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥ १ ॥ कव्यानि पितॄनुद्दिश्य देयानि । दैवे च हव्यान्यपि तस्मै देयानि । अथार्हत इति

हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् । यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम् ॥ " इति श्रीकपिलदेवोक्तेरयं भावः ॥ ४० ॥ वेद एव साक्षाद्धरेस्तनुरस्ति तद्धारकत्वाद्ब्राह्मणमेव मुख्यं पात्रं विज्ञा विदुः । राजेन्द्रेति । ब्राह्मणार्चनादेव त्वया राजेंद्रत्वं लब्धमिति भावः । ब्रह्मशब्दवाच्यं वेदं योऽधीते ज्ञानेन स ब्राह्मण इति ।" तदधीते तद्वेद " इत्यणा ब्राह्मणपदव्युत्पत्तिर्दर्शिता ॥ ४१ ॥ अस्य कृष्णस्य ब्राह्मणा महद्दैवतं ननु निश्चयेन । उद्देश्यविधेयभावत्वाल्लिंगसंख्यानियमाभावः । हे राजन्निति । ब्राह्मणार्चनेन देदीप्यमानोऽसीति भावः ' अहं द्विजदेवदेवः ' इति श्रीऋषभदेवोक्तेः । " ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो " इति सनकाद्युक्तेश्च ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ ततो गृहस्थधर्मनिरूपणोत्तरम् (१) । पूर्वत्र ब्राह्मणोत्कर्ष उक्तस्तत्र ब्राह्मणेष्वपि तारतम्यमाह—कर्मनिष्ठा गृहस्था विप्रास्तपोनिष्ठा वानप्रस्था अन्ये स्वाध्याये वेदाध्ययने प्रवचने सांगवेदाध्ययने केचिन्नैष्ठिका ब्रह्मचारिणः ज्ञानयोगनिष्ठाः संन्यासिनः समासांतर्वर्त्तिनापि निष्ठापदेनात्रानुवर्त्तिते न लक्षणया निष्ठावंतो बोध्यास्ततश्चैषां यथोत्तरं श्रैष्ठ्यं दर्शितम् ॥ १ ॥ कव्यानि पित्रुद्देश्यकवस्तूनि । दैवे च हव्यानि देवोद्देश्यकवस्तूनि च ज्ञाननिष्ठाय देयानि । आनंत्यं मोक्षं पितॄणां स्वस्य चेति मोक्षार्थिना गृहस्थेन ज्ञानिने सर्वकर्मफलमीश्वरेर्पितवते विप्रायैवाधिक्येन देयानि पञ्चाध्याय्या अस्या मोक्षप्रकरणत्वादत एव शुद्धभक्तानां कर्मानधिकाराद्गृहस्था अपि तेऽत्र कर्मज्ञानप्रकरणे पठिताः । तैश्च सुप्रतिष्ठितैर्व्यवहाररक्षा भरताम्बरीषादिभिरिव स्वप्रतिनिधिद्वारा कर्मकरणेन भक्तिमार्गनिन्दावादाद्यनुत्थानार्थमेव क्रियत इत्युक्तं पञ्चमे । एकादशे प्रतिपादयिष्यते च तस्मान्मोक्षार्थिनां यथा ज्ञानिपूजैव मुख्या पुरुषांतरपूजा तु तदभाव एव तथा प्रेमभक्त्यर्थिनामैकांतिकभक्तपूजैव मुख्येति ज्ञापितमत्रापि ' स वै पुण्यतमो देशः ' इति पद्यव्याख्यायाम् । " मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥ " इत्यादिना ज्ञानिभ्योपि तदुत्कर्षश्रवणात् । यथा च ज्ञानिनामर्चायां पूजा हि 'दृष्ट्वा तेषां मिथो नृणाम् इत्यादिना कनिष्ठाधिकारिणां व्याख्याता । तथा न भक्तानां व्याख्येया तेषां हि मुख्याधिकारिणामप्यर्चायां पूजादिकमुख्यमेव भक्त्यंगं तदुक्तमेकादशे "मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम् । परिचर्यास्तुतिप्रह्वागुणकर्मानुकीर्त्तनम् ॥ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः । वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ॥ अलं कुर्वीत सप्रेमा मद्भक्तो मां यथोचितम् ॥ "

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ भोजयेत् सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥
देशकालोचिता श्रद्धा द्रव्यपात्रार्हणानि च ॥ सम्यग् भवंति नैतानि विस्तरात् स्वजनार्पणात् ॥ ४ ॥

सर्वत्र ज्ञानादितारतम्येन ॥ २ ॥ ३ ॥ ननु विस्तरः कुतः प्राप्तो येन निषिध्यते तत्राह । स्वजनानामर्पणात् । जामाता चेन्निमंत्र्यते तत्पित्रादयः कथं वर्ज्या इत्येवं इति ।' प्रतिमा स्वल्पबुद्धीनाम् ' इत्यादिकं तु ज्ञानिपरमल्पबुद्धीनामपीति व्याख्येयं नृसिंहपुराणे ब्रह्मांबरीषादीनामपि तत्पूजाश्रवणात् । तस्या महिमाधिक्यं विष्णुधर्मे च तामधिकृत्यांबरीषं प्रति विष्णुवाक्यम्—"तस्यां चित्तं समावेश्य त्यजेतान्यान्व्यपाश्रयन् । पूजिता सैव ते भक्त्या ध्याता चैवोपकारिणी ॥ गच्छंस्तिष्ठन्स्वपन्भुंजंस्तामेवाग्रे च पृष्ठतः । उपर्यधस्तथा पार्श्वे चिंतयंस्तामथात्मनः ॥" इत्यादि । स्कांदे च—"शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम्" इति । पाद्मे च—"शालग्रामसमीपे तु क्रोशमात्रं समंततः । कीकटेऽपि मृतो याति वैकुंठभवनं नरः ॥" इति विश्वनाथः । आनंत्यं फलानंत्यं वा । तदभावे ज्ञानिविप्राभावे । यद्वा—ज्ञाननिष्ठाय श्रीगीतोक्तज्ञानलक्षणवते । तच्च"अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥इंद्रियार्थेषु वैराग्यमनहंकार एव च।जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु । नित्यं च समचित्तत्त्वमिष्टानिष्टोपपत्तिषु ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तम्" इति त्रयोदशाध्याये उक्तम् । तदभावे तादृशालाभे यथार्हत इति । अमानित्वादिबहुलक्षणवतो लाभेऽल्पलक्षणवते न देयमित्यर्थः ॥ २ ॥ दैवे वैश्वदैविके । अत्रायं भावः—द्वौ द्वौ दैवे चत्वारो जाताः । पितृकार्ये त्रीस्त्रीनिति षण्णां पितृणामष्टादश जाताः । सर्वसंयोगे द्वाविंशतिसंख्याका विप्राः समृद्धेन पार्वणे भोज्याः । स्वल्पवित्तवताऽष्टौ भोज्या उभयत्र दैवपितृकार्ये एकैकग्रहणेनेति । यद्वा—समृद्धोऽपि विस्तरं न कुर्यादिति ॥३॥ तत्र हेतुः—देशकालेति । इत्यर्थ इति । स्वजनार्पणेऽवश्यं विस्तरोपेक्ष्य इति भावः। प्रसंगाद्देशादीन्निरूपयति देशा गयादितीर्थदेशाः।"तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे' इति प्रभासखंडे । तुलसीशालग्रामादिसन्निधिमंतो देशा बहुशोभनाः । "प्रणष्टाश्रमधर्माश्च देशा वर्ज्याः प्रयत्नतः" । यमः—"रूक्षं क्रमिहतं क्लिन्नं संकीर्णानिष्टगंधिकम् । देशं त्वनिष्टशब्दं च वर्जयेच्छ्राद्धकर्मणि" ॥ शंखः—"गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि । न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु ॥ नैकवासा न च द्वीपे नांतरिक्षे कदाचन॥" इत्यादिना पवित्रभूमावेव श्राद्धीयविप्राणां भोजनादिविस्तारे सर्वथा पवित्रदेशप्राप्तिर्न स्यात्। कालमाह—"द्वौ प्रहरौ घटिकान्यूनौ द्वौ प्रहरौ घटिकाधिकौ । स कालः कुतपस्तत्र पितृणां दत्तमक्षयम्॥" इति । विस्तारे सोऽपि न लभ्यते पाकादिकरणबहुविप्राह्वानादिनेत्यर्थः । उचिता श्रद्धा अतीव श्रद्धया ब्राह्मणगृहे गत्वा स्वयं निमंत्रणादिरूपा सापि विस्तारे न स्यति बहुगृहगमनादिना वैकल्योत्पत्तेः । द्रव्याणि—"यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा । संतर्पयेत्पितन्मुद्गैः श्यामाकैः सर्षपद्रवैः ॥ नीवारैर्हरिश्यामाकैः प्रियंगुभिरथार्चयेत् ॥" । सुमंतुः—"पयो दधि घृतं चैव गवां श्राद्धेषु पावनम् । कूष्मांडं महिषीक्षीरमाढक्यो राजसर्षपाः ॥ चणका राजमाषाश्च घ्नंति श्राद्धं न संशयः॥" पूर्वं चणकस्य विधिस्तु शर्कराज्यमिलितमोदकरूपस्य । निषेधो हि केवलस्येति ज्ञेयम् । विस्तारे विहिताविहितविवेको न भवति । पात्राणि ॥ ब्राह्मणाः । "सीदद्वृत्तिः सत्यवाक्पूरुषैः स्वैर्मातापित्रोः पंचभिः ख्यातवंशः । पत्नीयुक्तो ज्येष्ठनामा पुराणवेत्ता पुत्री चेतिहासेष्वभिज्ञः ॥ योगी भिक्षुः सामगो ब्रह्मवेत्ता पञ्चाग्निश्च श्रोत्रियस्तत्सुतो वा । शंभुध्यायी श्रीशपादाब्जसेवी पांथश्चैते तूत्तमाः संप्रदिष्टाः ॥ विना मांसेन मधुना विना च दक्षिणाशिषा । परिपूर्णं भवेच्छ्राद्धं यतिषु श्राद्धभोजिषु ॥" नारदस्तु—'श्राद्धभोजी यतिर्नित्यमाशु गच्छति शूद्रताम्' इत्यादिना यतेरेव दोषमाह न दातुरिति । "पितृपुत्रौ भ्रातरौ द्वौ निरग्निं गुर्विणीपतिम् । सगोत्रप्रवरं चैव श्राद्धेषु परिवर्जयेत्॥" इत्यादि । भारते तु—'कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः । ग्रामप्रेष्यो वार्द्धुषिको गायकः सर्वविक्रयी ॥ सामुद्रिको राजभृत्यः" इत्यादिना बहवो निषिद्धाः । कुंडाशी विप्रोपि त्याज्यः । ब्राह्मे—"चतुःषष्टिपलैः प्रस्थः कुंडः प्रस्थचतुष्टयम् । भवेत्तद्यस्य रोचेत स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देशे काले च संप्राप्ते मुन्यन्नं हरिदैवतम् ॥ श्रद्धया विधिवत् पात्रे न्यस्तं कामधुगक्षयम् ॥ ५ ॥ देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ॥ अन्नं संविभजन् पश्येत् सर्वं तत्पुरुषात्मकम् ॥ ६ ॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैः स्यात् परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ॥ न्यासो दंडस्य भूतेषु मनोवाक्कायजस्य सः ॥ ८ ॥ एके कर्ममयान् यज्ञाञ्ज्ञानिनो यज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥

प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥ मुन्यन्नमारण्यं व्रीह्यादि हरिदैवतं हरये निवेदितं सत् ॥ ५ ॥ पुरुषात्मकमीश्वरस्वरूपम् ॥ ६ ॥ ७ ॥ दंडस्य न्यासो हिंसायास्त्यागो य एतादृशोऽन्यो धर्मो नास्ति ॥ ८ ॥ अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजंतीत्याह । एक इति । अनीहा निष्कामाः । ज्ञानदीपित आत्मस्फूर्तिमत्यात्मसंयमने

कुंडाशी पतत्यधः॥'' इति । विस्तारे ग्राह्याग्राह्यविचार एव नोदेति । अर्हणं विप्रपूजनम् । तदपि विस्तारे नश्यति पादप्रक्षालनमपि बहूनां न भवति कुतोर्हणमिति ॥ ४ ॥ ५ ॥ ६ ॥ आमिषमत्र मांसं ग्राह्यम् 'न तथा पशुहिंसया'इत्यग्रिमोक्तेः । तच्च सर्वथा त्याज्यम् । अत्रार्थे मोक्षधर्मीया भारतगाथानुसंधेयोपरिचरवसुसंबंधिनी तत्र च ''अजेन यष्टव्यमिति प्राहुर्देवा द्विजोत्तमान् । स च च्छागोप्यजो ज्ञेयो नान्यः पशुरिति स्थितिः॥ऋषय ऊचुः॥ बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिककी श्रुतिः । अजसंज्ञानि बीजानि छागं नो हंतुमर्हथ॥नैष धर्मः सतां देवा यत्र वध्येत वै पशुः॥'' इति । अत्र टीकायां श्रीनीलकंठेनापीत्थमेव व्याख्यातम् । ''अजसंज्ञानि बीजानि तस्मादेष एतेषां पशूनां प्रयुक्ततमो यदजस्तेजमालभंत सोजादालब्धादुदक्रामत्स इमां प्राविशत्तस्मादियं मेध्याभवत्तमस्यामन्ववायन्सोऽनुगतो व्रीहिरभवत्'' इति बह्वृचब्राह्मणम् । सर्वेषां पशूनां स यज्ञो मेध्यताख्यः । इमां पृथिवीं प्रविष्टः अन्ववायन् अन्वेषितवंतः । इयं श्रुतिः पुरोडाशस्तुतिमात्रपरा न तु पशूनाममेध्यत्वप्रतिपादनपरा । 'न हि निंदा निंद्यं निंदितुं प्रवर्त्ततेऽपि तु विधेयं स्तोतुम्' इति न्यायात् । इति भोगलोलुपानां देवतानां मतम् । वीतरागाणामृषीणां तु मानांतराविसंवादादहिंसाशास्त्रानुग्रहाच्चावांतरतात्पर्येण प्रतीयमानोऽर्थो यथाभूत एव न तु स स्वार्थेऽप्रमाणम् । यथाहुः संप्रदायविदः । ''विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥'' इति । तत्र यजमानः प्रस्तर इत्यादिः । प्रस्तरयजमानयोरभेदस्य प्रत्यक्षविरोधात्प्रस्तरस्तुत्यर्थं गुणवादोऽयम् 'अग्निर्हिमस्य भेषजम्'इति लोकावगतार्थत्वादनुवादः मेधातिथिं काण्वायनं मेषो भूत्वेंद्रो जहारेत्यादिर्विरोधानुवादयोरभावाद्भूतार्थवाद इति श्लोकार्थः । न चात्रापि ऋत्वर्थेनालंभविधिना पुरुषार्थनिषेधस्य विरोधोऽस्ति अतोर्थवादोऽप्ययं स्वार्थेऽवांतरतात्पर्यविषया देवताधिकरणन्यायेन प्रामाण्यमश्नुवीत अन्यथा भारतरामायणादीनामपि स्वार्थे प्रामाण्यं विहन्येतेति । तस्मादजस्थस्य मेधस्य बीजेषु संक्रमाद्बीजान्येवाजसंज्ञानीति युक्तम् । किञ्चैतन्निर्णयार्थं देवैरृषिभिश्चोपरिचरवसुः पृष्टः भो राजन् केन यष्टव्यमजेनाहोस्विदौषधैरिति तेन देवपक्षपाताच्छागेनाजेन यष्टव्यमित्युक्तम् । तदा कुपितैर्मुनिभिरुक्तम्—''सुरपक्षो गृहीतस्ते यस्मात्तस्माद्दिवः पत । अद्यप्रभृति ते राजन्नाकाशे विहता गतिः ॥ अस्मच्छापाभिघातेन महीं भित्त्वा प्रवेक्ष्यसि । ततस्तस्मिन्मुहूर्त्तेऽथ राजोपरिचरस्तदा॥ अधो वै संबभूवाशु भूमेर्विवरगो नृप ॥'' इत्यलमतो न मांसेन श्राद्धादि विधेयम् कलौ तु सर्वथैव न कार्यम् ''अश्वालंभं गवालंभं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेत् ॥'' इति निर्णयाब्ध्युक्तेः । मांसविधिस्तु—सर्वथान्नाभावपरतयोन्नेयः श्राद्धविधेरावश्यकत्वपरो वा पायसाद्यलाभे मांसेनापि श्राद्धं कार्यमेव न कदापि तत्त्यजेदिति तात्पर्यम् ॥ ७ ॥ परः उत्कृष्टः 'अहिंसा परमो धर्मः' इति स्मृतेः ॥ ८ ॥ इत्यर्थ इति । कर्ममययज्ञा हि मनोनियमने विघ्ना एवेति भावः । तत् कर्मत्यजनम् । सर्वज्ञसूक्तैः संक्षेपशारीरिकाचार्यैः । प्रतीचो ब्रह्मणः स्फूर्त्तिर्यस्य स कर्म संत्यजेत्किं कृत्वा तनौ सूक्ष्मरूपे ब्रह्मणि या निष्ठा तस्या विघातकं संलक्ष्य,किं भूतः तत्त्वनिष्ठेति पाठस्तूत्तानार्थ एव न कदाचिदनीदृशं जगत् इति मीमांसकमते प्रपंचस्य सत्त्वोक्तेः न सतः प्रपञ्चस्य स्फूर्त्तिर्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ॥ एष माऽकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम् ॥ १० ॥ तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित् ॥ संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः ॥११॥ विधर्मः परधर्मश्च आभास उपमा छलः ॥ अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥१२॥ धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः ॥ उपधर्मस्तु पाखंडो दंभो वा शब्दभिच्छलः ॥ १३ ॥ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात् पृथक् ॥ स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये ॥ १४ ॥

जुह्वति । मनो नियम्य तदंतरायतया त्यजंतीत्यर्थः । तदुक्तं सर्वज्ञसूक्तैः । " प्रत्यक्स्फूर्तिरसत्स्फूर्तिस्तनुनिष्ठाविघातकम् ॥ संलक्ष्य संत्यजेत्कर्म त्यजन्विघ्नहतोऽन्यथा " इति ॥ ९ ॥ मा मामेष ध्रुवं हन्यादिति । कुतः अकरुणः । तत्कुतः असुतृप्प्राणतर्पकः । तत्किम् । अतज्ज्ञ आत्मतत्त्वानभिज्ञः । तथा च श्रुतिः । " न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति " इति ॥ १० ॥ प्रस्तुतमनुवर्तयति । तस्मादिति ॥ ११ ॥ अधर्मवत्साक्षान्निषिद्धवत् ॥ १२ ॥ क्रममनादृत्य पंचापि व्याचष्टे । धर्मबाधो धर्मबुद्ध्याऽपि यस्मिन्क्रियमाणे स्वधर्मबाधः । अन्यस्य चोदितोऽन्यस्य परधर्मः । उपमेति व्याचष्टे । उपधर्मस्त्विति । शब्दस्य भिद्भेदोऽन्यथा व्याख्यानं यस्मिन् । यथा दशावरान्भोजयेदित्युक्ते दशभ्योऽवरानिति । शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यंत्या गोर्दानम् ॥ १३ ॥ स्वधर्मानुष्ठानानंतरं धर्मभयस्त्वार्थमपि परधर्मो नानुष्ठेयोऽनुपयोगादित्याह स्वभावविहित इति ॥ १४ ॥

स तथा अन्यथा ज्ञानोदयं विना कर्म त्यजन्पुमान् विघ्नैरैहिकामुष्मिकैर्निन्दानरकादिभिर्हतः स्यादुभयभ्रष्टः स्यादिति भावः ॥ ९ ॥ द्रव्ययज्ञैः पश्वादियागैर्यक्ष्यमाणं यज्ञकरणोत्सुकं भूतानि स्थावरजंगमानि जंगमस्थावराणामपि स्वशाखोच्छेदनादिना भयोत्पत्तेः 'तस्मात्पश्यंति पादपाः' इत्यादिभारतोक्तेस्तेषामपि दर्शनादिज्ञानश्रवणाच्च । अत्र देवलजैगीषव्यकथाऽनुसंधेया । स च ज्ञानयज्ञं त्यक्त्वा पुनः कर्मयज्ञप्रवृत्तस्तं दृष्ट्वा सर्वस्थावराणां शोको जातस्स पुनर्देवलो जैगीषव्योपदेशेन तत्त्यक्त्वा ज्ञानमार्गे एव प्रवृत्त इति शल्यपर्वणि । हनने हेतुमाशंकते—कुत इति । तत् अकरुणत्वमपि । तत्प्राणतर्पणमपि किं कुतः । आत्मतत्त्वानभिज्ञत्वे प्रमाणमाह—तथा चेति । जजान जनयामास । अन्यद्भिन्नं । नीहारेण तमसा । जल्प्यास्तार्किकाः । उक्थशासो मीमांसकाश्चादन्ये सांख्यादय आवृता आच्छादितास्तं न जानंतीति श्रुतिपदार्थः ॥ १० ॥ यस्माद्धिंसा न शोभना तस्माद्धेतोः संतुष्टो हिंसामकुर्वन्नित्यर्थः ॥ ११ ॥ धर्मज्ञो वेदविहितधर्मनिपुणः यथाऽधर्मस्त्यज्यते तथेमा अपि त्यजेदित्यर्थः ॥ १२ ॥ यथा रोगार्त्तेन धर्मबुद्ध्या शुद्धिधिया यथोक्तस्नानशौचादौ क्रियमाणे पापोत्पत्तेर्धर्महानिरेव "अशक्तेन शरीरेण स्नानं कुर्वंति ये बलात् । आत्महत्या कृता तैस्तु तया ते नरकाय वै ॥" इति स्मृतेः । यथा च ब्राह्मणेन धर्मबुद्ध्या ध्रियमाणे तप्तमुद्रादौ स्वधर्महानिरेव "शंखचक्रे मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥" इत्याश्वलायनोक्तेः । अन्यस्य विप्रस्य चोदितो विहितो भिक्षाटनादिरन्यस्य क्षत्रियादेस्स परधर्मः । पाखंडोऽवेदमूलकः चैत्यवंदनादिः । जटाभस्मकाषायांबरधारणादिकमपि धर्मो नास्ति तच्च धर्म इव प्रतीयते एव । तत्प्रतिपादितं पृथूपाख्यानेऽश्वहरणावसरे इंद्रप्रदर्शितम् । दशभ्योऽवरानष्ट नव वेत्यर्थस्तत्पुरुषसमासाश्रयणेन न तु बहुव्रीहिणा दशावरा अधिका येषु शतादिषु तान् दशोत्तरशतादीनित्यर्थः ॥ १३ ॥ पुंभिः शास्त्रद्विड्भिर्यः स्वेच्छयैव निर्मितः यथा शिरःसशिखमुंडनमनुष्यमात्रान्नभक्षणस्वप्रियवस्त्रधृतिवेददेवब्राह्मणनिंदनादिरूपो विचार्यमाणेन कस्मिन्नप्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धमार्थमपि नेहेत यात्रार्थं वाऽधनो धनम् ॥ अनीहानीहमानस्य महाहेरिव वृत्तिदा ॥ १५ ॥ संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखम् ॥
कुतस्तत्कामलोभेन धावतोऽर्थेहया दिशः ॥ १६ ॥ सदा संतुष्टमनसः सर्वाः सुखमया दिशः ॥ शर्कराकंटकादिभ्यो यथोपानत्पदः शिवम् ॥१७॥
संतुष्टः केन वा राजन्न वर्तेतापि वारिणा ॥ औपस्थ्यजैह्वचकार्पण्याद्गृहपालायते जनः ॥ १८ ॥ असंतुष्टस्य विप्रस्य तेजो विद्या तपो
यशः ॥ स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते ॥ १९ ॥ कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ॥ जनो याति न लोभस्य जित्वा भुक्त्वा
दिशो भुवः ॥ २० ॥ पंडिता बहवो राजन् बहुज्ञाः संशयच्छिदः ॥ सदसस्पतयोऽप्येके असंतोषात्पतंत्यधः ॥ २१ ॥ असंकल्पाज्जयेत्कामं
क्रोधं कामविवर्जनात् ॥ अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ २२ ॥

किं चाधनो धर्मार्थं धनं नेहेत नापेक्षेत धनार्थं न व्याप्रियेतेति वा । दैवोपपन्नेनैव स्वधर्मसिद्धेरुक्तत्वात् । यात्रार्थमपि नेहेतेत्येतत्प्रपंचयति अनीहेति सार्द्धैः षड्भिः ॥ १५ ॥
॥ १६ ॥ उपानहौ पादयोर्यस्य स उपानत्पात्तस्य ॥ १७ ॥ गृहपालः श्वा तद्वदाचरति ॥ १८ ॥ १९ ॥ क्षुधा तृषा च जनः कामस्यांतं याति । अन्नोदकातिरि
क्तकामांतराभावात् । क्रोधस्य वांतं याति । एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः । दिशो जित्वाऽपि भुवो भुक्त्वाऽपि लोभस्य नैवांतं यातीत्यर्थः ॥ २० ॥ २१ ॥
इदानीं कामादिजयोपायानाह असंकल्पादिति चतुर्भिः । जयेदिति यथाऽपेक्षमन्वेति । अर्थेऽनर्थदर्शनेन । तत्त्वावमर्शनादद्वैतानुसंधानेन ॥ २२ ॥

श्रमेऽपर्यवसायी स च मूर्खान्प्रति धर्म इवाभासतेऽतो धर्माभासो न तु धर्मः। अतः स्वभावविहितः 'शमो दमस्तपः शौचम्' इत्यादिना श्रीगीतासु योऽभिहितः स कस्य प्रशांतये प्रकृष्टशांतये मोक्षाय नेष्टो नेप्सितोऽपि तु सर्वस्यैव "स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" इति श्रीमुखोक्तेः ॥ १४ ॥ अन्यदाह–किंचेति । अनीहमानस्यावांछतः । अनीहा निर्व्यापारत्वं निष्कामत्वं वा महाहेरजगरस्यैव वृत्तिं भोगं ददातीति तथा ॥ १५ ॥ अर्थेहया धनेच्छया ॥ १६ ॥ १७ ॥ केन वा न वर्त्तेत अपि तु वारिणापि वर्त्तेतेत्यर्थः । यद्वा–केनांबुना येन केन वा संतुष्टः वार्यते मोक्षमार्गानुयायिभिस्त्यज्यत इति वारि भोगलांपटचं तेन न वर्त्तेत तस्यैव दैन्योत्पादकत्वात् । तदेवाह–औपस्थ्येति। उपस्थस्य कर्मौपस्थ्यं सुरतं जिह्वायाः कर्म जैह्वयं रसलेहनादि तयोस्ताभ्यां वा यत्कार्पण्यं दैन्यं तस्मात् । तद्वत्–श्ववत् 'कृशः काणः खञ्जः' इत्यादिभर्तृहरिशतकोक्तेः । ॥ १८ ॥ ब्राह्मणेन सर्वथा संतोष एव सेव्य इत्याह–असंतुष्टस्येति । तेजो ब्रह्मवर्चस्वित्वं शापानुग्रहशक्तिर्वा । अवकीर्यतेऽधः पतति ॥ १९ ॥ इत्यर्थ इति । "यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । न दुह्यंति मनःप्रीतिं पुंसः कामहतस्य वा ॥" इत्युक्तेरिति भावः ॥ २० ॥ एके बहवः । संध्यभाव आर्षः ॥ २१ ॥ असंकल्पात् स्त्रीस्मरणादिना कामोत्पत्तावपि मया नैव स्त्री भोक्तव्येति संकल्पसदृशान्निश्चयात्कामं जयेत् । सादृश्ये नञ् यथाद्य न भोक्तव्यमिति । निश्चये सत्युपवासादौ क्षुत्पिपासाजयः । कामविवर्जनात् काम इच्छाविषयः । कोऽपि न हिंसनीय इति हिंसेच्छावर्जनात्क्रोधम् । अर्थे लोभ्ये वस्तुन्यायत्यामनर्थदर्शनाभ्यासाल्लोभं यद्वैकादशे वक्ष्यमाणा 'भेदो वैरमविश्वासः' इत्यादिना पंचदशानर्थास्तेषां तत्र विचारेण 'भयं द्वितीयाभिनिवेशतः स्यात्' इत्युक्तेः "द्वितीयाद्वै भयं भवति" इति श्रुतेश्च । यद्वा–प्रारब्धफलस्यावश्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया ॥ योगांतरायान् मौनेन हिंसां कायाद्यनीहया ॥ २३ ॥ कृपया भूतजं दुःखं दैवं जह्यात् समाधिना ॥
आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ २४ ॥ रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ॥ एतत् सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् ॥ २५ ॥
यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ॥ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत् ॥ २६ ॥ एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ॥
योगेश्वरैर्विमृग्यांघ्रिर्लोको वै मन्यते नरम् ॥ २७ ॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः ॥ तदंता यदि नो योगानावहेयुः श्रमावहाः ॥ २८ ॥

आन्वीक्षिक्याऽऽत्मानात्मविवेकेन महतां सात्त्विकानां सेवया योगस्यांतरायान् लोकवार्तादीन् ॥ २३ ॥ येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन । दैवं देवोपसर्गनिमित्तं वृथा मनःपीडादि । तदुक्तं याज्ञवल्क्येन । "विमना विफलारंभः संसीदत्यनिमित्ततः" इति । आत्मजं देहजम् । योगवीर्येण प्राणायामादिबलेन । सत्त्वनिषेवया सात्त्विकाहारादिना ॥ २४ ॥ २५ ॥ ननु कथं गुरौ भक्त्या सर्वस्य जयः स्यात्तस्यापि मनुष्यत्वेन तदवस्थत्वात्तत्राह यस्येति । मर्त्यासद्धीर्मनुष्य इति दुर्बुद्धिः । तस्य शास्त्रश्रवणं कुंजरस्नानवद्व्यर्थम् ॥ २६ ॥ ननु गुरोरपि पुत्रादयस्तं नरमेव मन्यंतेऽत आह एष गुरुः साक्षाद्भगवानेव भवेत् । लोकस्य नरोऽसाविति बुद्धिर्भ्रांतिरित्यर्थः । यद्वा न हि तत्पुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानोऽपि गुरुर्भगवान्न भवेत् । यथैष श्रीकृष्ण इत्यर्थः ॥ २७ ॥ एवं सर्वैरुपायैः कामादिवेगं जित्वा नियतेंद्रियो भूत्वा ध्यानपरो भवेत् । अन्यथा तं प्रति सर्वशास्त्रवैफल्यं स्यादित्याह । षड्वर्गेति । सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः षडिंद्रियवर्गस्य यः संयमस्तस्मिन्नेवैकस्मिन्नंतो यासां

भोग्यत्वेन कः कस्य दुःखहेतुरित्यादितत्त्वविचारात् ॥ २२ ॥ आत्मनः कदापि न नाशोऽस्ति तथा नात्मनः कदापि सर्वथा स्थितिर्नास्तीत्यादिविचारेण शोकमोहौ । दंभो हि पामरजनसंगादेव पुरुषस्योदेति महतां संगे तद्दोषश्रवणादिना स्वयमेव शाम्यतीत्यर्थः । मौनिनः पार्श्वे लोकाः प्रायो न गच्छंति ततः स्वयमेव लोकवार्त्ताद्यभावोऽपि भवतीति भावः ॥ २३ ॥ येभ्यो भूतेभ्यः सर्पव्याघ्रादिभ्यः । स्वहिताहितकर्त्तारं सर्वे जानंति सर्वत्रांतर्यामिण ऐक्यादतो विरोधिनो हिताचरणे सोऽपि तदहितं न करोतीति भावः । देवोपसर्गा अग्निदाहादयस्तन्निमित्तकं वृथा मनःपीडादौ प्रमाणमाह—तदुक्तमिति । कर्मण्यारब्धे तदसिद्धौ वैमनस्यं वृथैव दैवस्य दुर्निवार्यत्वादतोऽनिमित्ततो वृथैव संसीदति दुःखी भवतीति स्मृत्यभिप्रायः । समाधिना चित्तैकाग्र्येण । देहजं वातादिवैषम्यजम् ॥ २४ ॥ सत्त्वेन सत्त्वाधिक्येन । उपशमेनौदासीन्येन । सर्वेषां मुख्यं जयप्रकारमेकमेवाह—एतत्पूर्वोक्तं कामादिकं सर्वं गुरौ सुदृढभक्त्यांजसा शीघ्रमनायासेनैव जयेत् । "सर्वरोगोपशमनमेकमेव महौषधम्" इतिवत् ॥ २५ ॥ अत्राक्षिपति—नन्विति । साक्षाद्भगवतीत्युक्तेर्भगवदंशबुद्धिरपि गुरौ नो कार्येति भावः ॥ २६ ॥ पुनराक्षिपति—नन्विति । इत्यर्थ इति । 'सर्वदेवमयो गुरुः' इत्युक्तेर्भ्रान्तस्यैव गुरौ मनुष्योऽयमिति धीरुदयत इति भावः । अग्नौ नायमग्निरिति ज्ञाने स किमग्निर्न भवतीत्याह—यद्वेति । इत्यर्थ इति । यथा वसुदेवादिपुत्रबुद्ध्या नारदादिभिः श्रीकृष्णे मनुष्यबुद्धिर्न क्रियते तथा शिष्येणापि गुरावेष साक्षाद्भगवानेवेति बुद्धिरेव कार्येति भावः ॥ २७ ॥ अन्यथा ध्यानाभावे । तं जितेंद्रियं प्रत्यपि । इत्यर्थ इति । सर्वेष्टपूर्त्तादयः षड्वर्गसंयमतात्पर्यका एवेति भावः । तावतापि षड्वर्गसंयमे सत्यपि । चरितार्थाः कृतार्थाः । तदंताः षड्वर्गसंयमैकांताः । इत्यर्थ इति । जलार्थं कूपखनने कृते जलानुत्पत्त्या यथा श्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा वार्त्तादयो ह्यर्था योगस्यार्थं न बिभ्रति ॥ अनर्थाय भवेयुस्ते पूर्तमिष्टं तथाऽसतः ॥ २९ ॥ यश्चित्तविजये यत्तः स्यान्निःसंगोऽपरिग्रहः ॥ एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः ॥३०॥ देशे शुचौ समे राजन् संस्थाप्यासनमात्मनः ॥ स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ओमिति ॥३१॥ प्राणापानौ सन्निरुंध्यात् पूरकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ॥ ३२ ॥ यतोयतो निःसरति मनः कामहतं भ्रमत् ॥ ततस्तत उपाहृत्य हृदि रुंध्याच्छनैर्बुधः ॥ ३३ ॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ॥ अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत् ॥३४॥ कामादिभिरनाविद्धं प्रशांताखिलवृत्ति यत् ॥ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥३५॥ यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गावपनात्पुनः ॥ यदि सेवेत तान् भिक्षुः स वै वांताश्यपत्रपः ॥३६॥ यैः स्वदेहः स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् ॥ त एनमात्मसात्कृत्वा श्लाघयंति ह्यसत्तमाः ॥३७॥

तदेकपरा इत्यर्थः । न च तावताऽपि चारितार्था इत्याह तदंताः सत्योऽपि यदि योगान्धारणाध्यानसमाधीन्नो आवहेयुर्न साधयेयुस्तर्हि केवलं श्रमावहा एवेत्यर्थः ॥ २८ ॥ एतदेव दृष्टांतेनाह । यथा वार्तादयः कृष्यादयोऽर्थास्तत्फलानि च योगस्यार्थं मोक्षं न साधयंति प्रत्युतानर्थाय संसारायैव । असतो बहिर्मुखस्येष्टापूर्तादि़पि तथा ॥२९॥ एवं योगं युंजतोऽपि यस्य कुटुंबादिसंगेन चित्तं विक्षिप्येत तस्य कृत्यमाह । यश्चित्तस्य विजये यत्त उद्युक्तः स भिक्षुः स्यात्संन्यसेत् । तथा च स्मृतिः । " द्वंद्वाहतस्य गार्हस्थ्यं ध्यानभंगादिकारणम् । लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन् " इति । भिक्षया प्राप्तं मितमशनं यस्य सः ॥ ३० ॥ ऋजु सममंगं यस्य सः । सुखं यथा भवत्येवमासीत । ओमित्युच्चारयन्निति शेषः ॥ ३१ ॥ ३२ ॥ ३३ ॥ एवमनिशमभ्यस्यतस्तस्य यतेश्चित्तं निर्वाणं शांतिं याति ॥ ३४ ॥ न च पुनर्विक्षिप्येतेत्याह । कामादिभिरक्षुभितं यच्चित्तं तन्नोत्तिष्ठेत । यतः प्रशांता अखिला वृत्तयो यस्य कुतः ब्रह्मसुखेन स्पृष्टम् ॥ ३५ ॥ यस्तु प्रव्रज्यां कृत्वाऽपि भोगमभिलिप्सुः स्यात्तं निंदति । य इति । त्रयाणां धर्मादीनां वर्ग आसमंतादुप्यते यस्मिंस्तस्माद् गृहात्तान्धर्मादीन् वांताशी छर्दितभोजी निर्लज्जश्च ॥ ३६ ॥ न चेदमघटितं दृष्टत्वादित्याह यैः पूर्वं स्वदे

एव जायते तथाऽत्रापीति भावः ॥ २८ ॥ एतदेव श्रमावहत्वमेव । बहिर्मुखस्य भगवद्विमुखस्यावशीकृतमनसः "असंयतं यस्य मनोऽप्रशांतं दानादिभिः किं वद तस्य कृत्यम्" इत्येकादशे भिक्षुगीतोक्तेः ॥ २९ ॥ चित्तजयोद्यतस्य संन्यासे प्रमाणमाह–तथा चेति । द्वंद्वैः सुखदुःखादिभिराहतस्य गार्हस्थ्यं ध्यानभंगादेः कारणं दृष्ट्वा तत्क्षणमेव संन्यासं कुर्यादिति स्मृत्यर्थः । विविक्तं जनसंगरहितं शरणं वासस्थलं यस्य सः ॥ ३० ॥ उच्चारयन्निति शेषः । "अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परम्" इत्युक्तेः ॥ ३१ ॥ कामान्वासना यावत्त्यजेत्तावत्पर्यंतं प्राणायामाभ्यासं कुर्यात्प्राणायामस्यापि मनोजयहेतुत्वात् । "प्राणस्पंदनिरोधश्चेत्युपाया मनसो जये" इति विद्यारण्योक्तेः । एतच्चाद्यपद्यव्याख्याशतके वर्णितं विस्तरेण ॥ ३२ ॥ यतोयतो विषयात् । उपाहृत्य संनिकृष्य । हृदि तत्रस्थे ब्रह्मणि रुंध्यात्स्थापयेत् ॥ ३३ ॥ अनिशं त्रिकालं सर्वदा वा ॥ ३४ ॥ प्रशांताखिलवृत्तित्वे हेतुं पृच्छति–कुत इति । ब्रह्मानंदे सर्वानंदानामंतर्भूतत्वात् "तस्यैवानंदस्य मात्रामुपजीवंति" इति श्रुतेः । यथा सितोपलाशिनश्चेतो द्रवीभूतासितवर्णं सितामलं प्रति कदापि नोत्तिष्ठते किन्तु तत्स्मरणेनाप्याकुलं भवति तथा ब्रह्मसुखस्पर्श्यपि चेत इतरविषयान्प्रत्युत्थानं न करोति प्रत्युत तेषां स्मरणमपि न सहत इति भावः ॥ ३५ ॥ वांताशी श्ववेत्यर्थः ॥ ३६ ॥ अनात्मा देह आत्मा न भवतीति चिंतितः । अंते विडादिभावदर्शनादधुनापि विडादिरूप एवेत्यर्थः । आत्मसादिह च्व्यर्थे सातिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि ॥ तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलौल्यता ॥ ३८ ॥ आश्रमापसदा ह्येते खल्वाश्रमविडंबकाः ॥ देवमायाविमूढांस्तानुपेक्षेताऽनुकंपया ॥३९॥ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः ॥ किमिच्छन् कस्य वा हेतोर्देहं पुष्णाति लंपटः ॥४०॥ आहुः शरीरं रथमिंद्रियाणि हयानभीषून् मन इंद्रियेशम् ॥ वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बंधुरमीशसृष्टम् ॥ ४१ ॥ अक्षं दशप्राणमधर्मधर्मौ चक्रेऽभिमानं रथिनं च जीवम् ॥ धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यम् ॥ ४२ ॥

होऽनात्मादिरूपः स्मृतश्चिंतित एव पुनरेनमात्मेति मत्वा श्लाघयंति स्तावयंति हि ॥ ३७ ॥ यतिमुपलक्षणीकृत्यान्यानपि स्वधर्मत्यागिनो निंदति । गृहस्थस्येति द्वाभ्याम् ॥ ३८ ॥ ३९ ॥ नन्वात्मतत्त्वज्ञस्य भिक्षोरिंद्रियलौल्येऽपि को दोषस्तत्राह । आत्मानं परं ब्रह्म चेज्जानीयात् ज्ञानेन धुता निरस्ता आशया वासना यस्य । तस्य ज्ञानिनो लौल्यमेव न संभवतीत्यर्थः । तथा च श्रुतिः । "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्" इति ॥ ४० ॥ अज्ञस्य तु लौल्येन नरकपातापत्तेरप्रमत्तेन सदा तत्त्वज्ञाने यतितव्यमितीममर्थम् "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादिश्रुत्युक्तरथरूपकद्वारेणाह। आहुरिति षड्भिः। इंद्रियेशं मनोऽभीषून्रश्मीनाहुः । मात्राः शब्दादीन्वर्त्मानि गंतव्यदेशानाहुः । सत्त्वं चित्तं बृहद्देहव्यापि बन्धुरं बंधनं चित्तं विना ह्यनिबद्धमिव शरीरं भवति । ईशसृष्टमिति बंधनकर्ता त्वीश एवेत्यर्थः ॥ ४१ ॥ प्राणादयः पंच । "नागः कूर्मश्च कृकलो देवदत्तो धनंजयः" इत्येवं दशविधं प्राणमक्षम् अभिमानं साहंकारं जीवं रथिनं शुद्धं जीवं

तेऽतिशयेनासाधुशिरोमणयो ज्ञेयाः ॥ ३७ ॥ क्रियात्यागो नित्यनैमित्तिकादिकर्मत्यागः व्रतस्य गुरुसेवनादित्यागः ;। ग्रामसेवा ग्रामवासतत्रत्यान्नादिसेवा । इंद्रियलौल्यमिन्द्रियैर्विषयसेवनादि ॥ ३८ ॥ आश्रमान्विडंबयंत्यनुकुर्वंतीति तथा । आश्रमस्यापसदः छद्म येषां ते । न त्वाश्रमिणस्ते तत्फलाप्राप्तेः । अनुकंपया तानुपेक्षेत तदंतिकमुपेत्य तत्त्रोपदेशादिकं कुर्यादित्यर्थः । यद्वा–भवन्त्वेत ईदृशाः किमस्माकमेतैः परमेषां संगस्यानर्थहेतुत्वादेषां संगान्न दानादिवर्जनीयमित्यपेक्षेतेत्यर्थः ॥ ३९ ॥ अत्राक्षिपति–नन्विति । इत्यर्थ इति । लौल्यहेतोरज्ञानस्य नष्टत्वादिति भावः । ज्ञानिनो लौल्याभावे प्रमाणमाह–तथा चेति । तामेव मूलकारोप्याह–लंपट उपस्थवशीभूतः । श्रुतौ अनुसंज्वरेत् क्लिश्यादित्यर्थः ॥ ४० ॥ इत्यर्थ इति । ईश्वरमायया बद्धत्वेपि तदाश्रयत्वादीश उपचर्यत इति भावः ॥ ४१ ॥ इत्यर्थ इति । प्रणवोपासनया जीवो ब्रह्म भवतीति भावः। ननु तर्हि रथादिरूपकसाहचर्यात्परब्रह्मणोऽपि लक्ष्यत्वेन शत्रुरूपकत्वमायातं शत्रुरेव रथमारुह्य शरेण भिद्यते युज्यते च तस्य जीवशत्रुत्वं स्वमायाशक्त्या जीवबंधकत्वात् सत्यम् "निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात्" इत्यरिसाहचर्येण मुनीनां मुक्तिरिव साधर्म्यं व्यनक्ति । उभयेषामपि परमेश्वरे शरनिक्षेपकत्वात् । परमेश्वरस्तु–स्वीयवीररससुखोपकारं ज्ञानांतर्वर्तिगुणीभूतस्वशक्तिकलां च्चालक्ष्योभयेभ्य एवं तेभ्यो मोक्षं ददातीति केचित् । अन्ये तु–परमात्मनो लक्ष्यत्वेऽपि द्रौपद्यादिस्वयंवरस्थराधाचक्रवर्त्तिमीनायमानत्वमेत्र न त्वन्यथा यथा चार्जुनाद्यास्तं स्वबाहुबलेनैव शरेण भित्त्वा द्रौपद्यादिकां प्रापुस्तथैव ज्ञानिनोऽपि भक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोऽवमानोऽसूया च माया हिंसा च मत्सरः ॥ ४३ ॥ रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४ ॥ यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम् ॥ ज्ञानासिमच्युतबलो दधद स्तशत्रुः स्वाराज्यतुष्ट उपशांत इदं विजह्यात ॥ ४५ ॥

शरं परं ब्रह्म लक्ष्यम् । यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ॥ ४२ ॥ रागादयो जेतव्याः शत्रवः ॥ ४३ ॥ तत्र रजोऽभिनि वेशः । क्वचिदारूढसमाधेः सत्त्वप्रकृतयोऽपि परोपकारादिप्रवृत्तयः शत्रवः ॥ ४४ ॥ नृकायरूपं रथमात्मवशः उपकल्प इंद्रियादिपरिकरो यस्मिंस्तथाभूतं यावद्धत्ते तावदेव

बलेन मुक्तिमित्याचक्षते ॥ ४२ ॥ यथा च स्वयंवरकन्याप्राप्तिबंधकदुष्टराजन्या बलिष्ठेन हन्यंते तथैव भगवद्भक्तिबलेन यतिना ज्ञानासिमादाय रागद्वेषादयो हंतव्या इत्याह--राग इति । तत्र तेषु ॥ ४३ ॥ यथा भरतस्य मृगबालककृपा सात्त्विक्यपि शत्रुरेव जातेति सत्त्वप्रकृतित्वमपि क्वचिच्छत्रुरस्तीति ॥ ४४ ॥ नृकायरूपं रथमात्मवशे उपकल्प्य इंद्रियादिपरिकरो यस्मिंस्तथाभूतं यावद्धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया तीक्ष्णं ज्ञानखड्गं बिभ्रदच्युतभक्तिबलः सन्नेव निरस्तशत्रुर्भूत्वा स्वाराज्यस्य स्वानंदस्य प्राप्त्या तुष्टो भवन्निदं रथादिकं त्यजेदुपयोगाभावादेवेत्यर्थः । अत्र यथा साध्यस्य शक्रजयस्य स्वाराज्यलाभस्य च सिद्धौ रथादिकाद्धनुःशरा दिकाच्च पुरुषो वियुज्यते तथा शारीराद्बलान्न वियुज्यते । एवमेव ज्ञानी प्राधानिकादुपाधेर्मुक्तिसाधनाज्ज्ञानाच्च वियुज्य ज्ञानांतर्भूतया केवलया भक्तिकलया सहित एव परमात्मनि सायुज्यं लभते न तु ततो वियुज्यते । तस्याः स्वरूपशक्तिवृत्तित्वेन परमात्मैक्यात् । ज्ञानाज्ञानयोस्तु मायाशक्तिवृत्तित्वात्तद्द्वयोपेक्षा समुचितैव । अत एव " धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यम् " इत्यत्रापि यथा रथादिभ्यो धनुषश्च वियु ज्यापि शरः पुरुषबलेन वेगरूपतामापन्नेन सहैव तत्प्रभावादेव लक्ष्ये प्रविशति तथैव शुद्धजीवो देहेन्द्रियादिकमशुद्धजीवश्चाज्ञानस्वरूपामविद्यां त्यक्त्वा मुक्तिसाधनज्ञानकारणप्रणवस्वरूपां विद्यां च त्यक्त्वाऽशुद्धजीववर्तिन्या भक्तिकलयैव केवलया तत्सहितस्तत्प्रभावादेव परमात्मानं ज्ञात्वा तत्र सायुज्यं लभते तदुक्तं भगवता " ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥ " अस्य पद्यद्वयस्यायमर्थः--भक्तिमिश्रज्ञानपरिपाकेनोपाध्यपगमे ब्रह्मभूतोऽनावृतचेनत्वेन ब्रह्मरूप इत्यर्थः । गुणमालिन्यापगमात् । प्रसन्नश्चासावात्मा चेति सः । ततश्च पूर्वदशायामिव नष्टं न शोचति न चाप्राप्तं कांक्षति देहाद्यभिमानाभावादिति भावः । भूतेषु भद्राभद्रेषु समः बाह्यानुसंधानाभावादिति भावः । ततश्च निरिन्धनाग्नाविव ज्ञाने प्रातेऽप्यनश्वरां ज्ञानांतर्भूतां मद्भक्तिं लभते तस्या मत्स्वरूपशक्तिवृत्तित्वेन मायाशक्तिभिन्नत्वात् । अविद्याविद्ययोरपगमेऽप्यनपगमात् । अत एव परां निष्कामकर्मज्ञानाद्युर्वरितत्वेन केवलां लभते इति । पूर्वं ज्ञानवैराग्यादिषु मोक्षसिद्ध्यर्थं कलया वर्तमानाया अपि सर्वभूतेष्वंतर्यामिण इव तस्याः स्पष्टोपलब्धिर्नासीदिति भावः । अत एव कुरुत इत्यनुक्त्वा लभत इति प्रयोगः । माषमुद्गादिषु मिलितां कालेन तेषु नष्टेष्वप्यनष्टां काञ्चनमणिकामिव तेभ्यः पृथ क्तया केवलात् लभत इतिवत् संपूर्णायाः प्रेमभक्तेस्तु तदानीं लाभसंभावना नैवास्ति नापि तस्याः फलं सायुज्यमित्यतः परां प्रेमलक्षणामिति न व्याख्येयम् । ननु तया लब्धया भक्त्या तस्य किं स्यादित्यतोऽर्थांतरोप न्यासेनाह--भक्त्येति । अहं यावान् यश्चास्मि तं मां तत्पदार्थं ज्ञानी वा नानाभिधो भक्तो वा तत्त्वतो भक्त्यैवाभिजानाति 'भक्त्याहमेकया ग्राह्यः' इत्यादिमदुक्तेः । यस्मादेवं तस्मात्ततस्तया भक्त्यैव तदनंतरं विद्योपरमोत्तरकाल एव मां ज्ञात्वा मां विशते मत्सायुज्यसुखमनुभवति मायातीतत्वात् विद्यायाश्च मायात्वाद्विद्ययाप्यहमगम इति भावः । यत्तु " सांख्ययोगौ च वैराग्यं तपो भक्तिश्च केशव । पञ्चपर्वेति विद्येयं यया विद्वान्हरिं विशेत् ॥ " इति विद्यावृत्तित्वेन भक्तिः श्रूयते मत्सायुज्यसुखमनु तत्खलु ह्लादिनीभक्तिवृत्तेर्भक्तेरेव कला काचिद्विद्यासाफल्यार्थं विद्यायां प्रविष्टा यथा कर्मसाफल्यार्थं कर्मयोगेऽपि प्रविशति तया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपंति ॥ ते दस्यवः सहयसूतममुं तमोंधे संसारकूप उरुमृत्युभये क्षिपंति ॥ ४६ ॥ प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ आवर्तेत प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतम् ॥ ४७ ॥ हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशांतिदम् ॥ दर्शश्च पूर्णमासश्च चातुर्मास्यं पशुः सुतः ॥ ४८ ॥ एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ॥ पूर्तं सुरालयारामकूपाजीव्यादिलक्षणम् ॥ ४९ ॥ द्रव्यसूक्ष्मविपाकश्च धूमो रात्रिरपक्षयः ॥ अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥

गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रदच्युताश्रयः सन्निरस्तशत्रुरुपशांतः स्वानंदेन तुष्टो भूत्वेदं रथादिकमुपेक्षेतेत्यर्थः ॥ ४५ ॥ अच्युताश्रयाभावे बाधकमाह । नो चेदिति । असंतो बहिर्मुखा ये इंद्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षिपंति हयैः सूतेन च सह वर्तमानं तमोंधे तमसा व्याप्ते । उरु मृत्युभयं यस्मिन् ॥ ४६ ॥ ननु वेदविहितेष्टापूर्तादिकारिणः पुंसः कथमेवमनर्थप्राप्तिः स्यादित्याशंक्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन्फलभेदमाह । प्रवृत्तं चेति दशभिः ॥ ४७ ॥ हिंस्रं श्येनादिकर्म । अशांतिदमत्यासक्तियुक्तम् । आदिशब्दार्थविवरणं दर्शश्चेति । पशुः पशुयागः । सुतः सोमयागः ॥ ४८ ॥ हुतं वैश्वदेवम् । प्रहुतं बलिहरणम् । एतत्सर्वमिष्टमुच्यते एतदेव यदि काम्यमशांतिदं च तर्हि प्रवृत्ताख्यमपीत्यर्थः । आजीव्यं प्रपादि ॥ ४९ ॥ प्रवृत्तेन कर्मणाऽऽरोहावरोहाभ्यामावृत्तिप्रकारमाह । द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहांतरारंभको येन संपरिष्वक्तो गच्छति य एव श्रुतावप्छब्देनोक्तः "इति तु पंचम्यामाहुतावापः पुरुषवचसो भवंति" इति । पाठांतरे द्रव्यशब्देन तेजोमात्राशब्दोक्तानींद्रियाणि । ऊष्मविपाकशब्देन हृदयाग्रप्रद्योतः । तथा च श्रुतिः । "स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्वक्रामत्" इति । तथा "तस्य हैतस्य हृदयाग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति" इति । धूमादिशब्दैस्तत्तदभिमानिन्यो देवताः । तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः । तत्र भुक्तभोगस्यावरोहणप्रकारमाह । दर्श इत्यादि । विपरीतलक्षणया विशिष्टभोगक्षयशोकाग्निना देहलयेनादर्शनमुच्यते । एतदुक्तं भवति । "भूतसूक्ष्म

विना कर्मज्ञानयोगादीनां श्रममात्रत्वोक्तेरतो निर्गुणा भक्तिः सत्त्वगुणमय्या विद्याया वृत्तिर्वस्तुतो न भवतीति । किञ्च–'सत्त्वात्संजायते ज्ञानम्' इति स्मृतेः 'सत्त्वं ज्ञानं विद्यैव यथा तथा भक्त्युत्थं ज्ञानं भक्तिरेवेति ज्ञानमपि द्विविधं द्रष्टव्यम् ॥ ४५ ॥ अच्युताश्रयाभावे बाधकं साध्यासिद्धिमाह–नो चेद्यदि रथिनो बलं न स्यात्पक्षे यदि जीवस्य भक्तिर्न स्यादित्यर्थः । प्रमत्तं जीवं; बलाभावेपि लक्ष्यवेधार्थं रथारोहणमेव प्रमादः दस्युषु चौरेषु । ते विषयाख्याः ॥ ४६ ॥ अत्राक्षिपति–नन्विति । अधिकारिभेदात्फलभेदाच्च व्यवस्था ज्ञेयेत्याह–प्रवृत्तं चेति ॥ ४७ ॥ ४८ ॥ ४९ ॥ आरोह ऊर्ध्वगमनमवरोहोऽधोगमनम् । इति तु इह तु । पुरुषवचसः पुरुषसंज्ञकाः । अत्र सूत्रेणैतदर्थं स्फोटयति "तदंतरप्रतिपत्तौ रंहति परिष्वक्तः प्रश्ननिरूपणाभ्याम् ।" अस्यार्थः–तदंतरप्रतिपत्तौ देहांतरप्रतिपत्तौ तदारंभकभूतैः परिष्वक्तो रंहति गच्छति कुतः प्रश्ननिरूपणाभ्यां तथाहि–"लोकपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निष्वग्निरूपतयोपासनाख्यपंचाग्निविद्याप्रस्तावे प्रवहणाख्यराज्ञः सभां प्रविष्टं श्वेतकेतुं राजा पप्रच्छ "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवंति" इति । अयमर्थः–अस्मिँल्लोके जलमय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नं रेत इति क्ष्मेश पितृयानं पुनर्भवः ॥ एकैकश्येनानुपूर्वं भूत्वाभूत्वेह जायते ॥ ५१ ॥ निषेकादिश्मशानातैः संस्कारैः संस्कृतो द्विजः ॥ इंद्रियेषु क्रियायज्ञाञ्ज्ञानदीपेषु जुह्वति ॥ ५२ ॥ इंद्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ॥ वाचं वर्णसमाम्नाये तमोंकारे स्वरे न्यसेत् ॥ ओंकारं बिंदौ नादे तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥

युक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितस्तद्भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधिवीरुधादिसाम्यापत्तिक्रमेण जायते । एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्गः" इति ॥ ५० ॥ क्ष्मेश हे भूपते । पुनर्भवमेवाह । एकैकश्येन प्रत्येकं क्रमेण भूत्वा तत्तत्सान्निध्यं प्राप्येह भूमौ जायते ॥ ५१ ॥ तत्राधिकारिणमाह । निषेकादीति । अन्यस्त्विष्टादिकार्यप्येवं जन्म न लभत इत्यर्थः । निवृत्तकर्मनिष्ठस्योपासनादिविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह । इंद्रियेष्वित्यादिना । यद्वा द्रव्ययज्ञेषु हिंसाया दुर्निवारत्वादतिमुख्यं निवृत्तं कर्मैव दर्शयन्नाह । ज्ञानेन दीप्यंत इति तथा तेषु । इंद्रियव्यापाराणामिष्टापूर्तादीनामिंद्रियतावन्मात्रतां भावयतीत्यर्थः।एवमुत्तरत्रापि ॥ ॥ ५२ ॥ ऊर्मौ दर्शनादिसंकल्परूपे मनसि वैकारिकं विकारयुक्तं मनो वाचि विध्यादिलक्षणया वाचा हि मनः कर्तृत्वादिविकारं भजति । वर्णानां समाम्नाये समुदाये

दधिपयःप्रभृतिद्रव्यकहोमे श्रद्धाकृते तद्धुतं जलं यजमानं प्राप्य तद्द्वारा द्युलोकाख्याग्निं गच्छच्छ्रद्धाख्याहुतित्वमापन्नं यजमानेंद्रियाधिष्ठातृदेवास्तस्मिन्नग्नौ जह्वति तच्च हुतं जलं सोमाख्यदेहात्मना परिणमते स च जलमयो देहः पर्जन्येऽग्नौ वृष्ट्यभिमानिदेवविशेषे हुतः स वृष्टिर्भवति तदेव जलं सोमाख्यदेहभावं वृष्टिभावं चापन्नं पृथिव्यामग्नौ हुतं सद्व्रीहियवाद्यन्नभावमाप्नोति ताश्च व्रीह्यादिभावमापन्ना आपः पुरुषाग्नौ हुताः सत्यो रेतोभाव माप्नुवंति । ताश्च रेतोभावमापन्नाः पञ्चमाहुतिरूपा आपो योषिदग्नौ हुता गर्भात्मना स्थिताः पुरुषसंज्ञां लभंत इति जानन्राजा पप्रच्छास च पितरं गौतममागत्योवाच एवमहं राज्ञा पृष्टोऽस्मि तदुत्तरं न जानामीति । गौतमः स्वयमप्यज्ञो राजसमीपं गत्वा तां विद्यां ब्रूहीत्युवाच । स च तामुवाचैवं प्रश्ननिरूपणाभ्यामवादि । भूतसंपरिष्वक्तो रंहतीति गम्यत इति । पाठांतरे 'द्रव्यसूक्ष्मविपाकश्च' इति पाठे । द्रव्यादिपदाभ्यां तत्तदर्थग्रहणे प्रमाणमाह—तथा चेति । स योगी तेजोमात्रा राजसाहंकारकार्याणींद्रियाणि समभ्याददानस्सहैव गृहीत्वा हृदयमन्वाक्रमत् अन्वगच्छत् । "तस्य हैतस्य योगिनं हृदयाग्रं हृदयेऽग्रमग्रनाडीमुखं प्रद्योतते प्रकाशते । शतं चैका हृदयस्य नाड्यस्तासां चैका मूर्द्धानं निस्सृतास्तयोर्द्ध्वमायन्नमृतत्वमेति" इत्यादिश्रुतेः । तत्तदभिमानिन्यो धूमाद्यभिमानिन्यः । तत्र तेषु । तत्र सोमलोके । भुक्तभोगस्य अतिवाहिकदेवताः सगुणब्रह्मगमयितृदेवताः एतत्तृतीयस्कन्धे 'गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति" इत्यत्र निरूपितम् ॥ ५० ॥ क्ष्मेशेति। क्ष्मापालनासक्तस्य राज्ञ एव यज्ञादिनिष्ठत्वेन विशेषत एतन्मार्गगामित्वमिति भावः । प्रत्येकं धूमादिक्रमेण ॥ ५१ ॥ तत्र प्रवृत्तिमार्गेऽधिकारिणं मुख्याधिकारिणम् । अन्यस्तु विवेकी तु । इत्यर्थ इति । वैदिकमार्गप्रवृत्त्यर्थं कर्म कुर्वन्नपि तत्रासक्त्यभावाज्जन्मादिकं नाप्नोति । 'तस्य पुत्रा दायम्' इत्यादिश्रुतेः । स च कर्मफलं न भुंक्त इति भावः । 'अहिंसा परमो धर्मः' इति स्मृतेर्निवृत्तस्यानासक्तस्यापि यागादौ हिंसासत्त्वे परमधर्मित्वे न सेत्स्यतीत्यत आह—यद्वेति । इत्यर्थ इति । इंद्रियव्यापार एव यागादिरतो व्यापारस्य व्यापारिनांतरीयकत्वेंद्रिय भिन्नस्तद्व्यापारोपि न सेत्स्यतीति भावः ॥ ५२ ॥ इंद्रियाणां प्रवृत्तिर्मनोधीनाऽतो तान्यपि मन एव न ततो भिन्नानीत्यर्थः । वाचं श्रुत्वैव मनसि कर्तृत्वादिविकारो भवति अतो मनोऽपि वागधीनं न ततो भिन्नम् । तद्विशेषत्वाद्वर्णविशेषत्वात्—वर्णेभ्यो भिन्नाया वाचोऽनुपलब्धेः "ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम्" इत्युक्तेः । सर्ववर्णानामोंकारात्मकत्वात्तद्भिन्नत्वं नास्ति 'बिंदौ गुरुप्रसादगम्ये योगशास्त्रप्रसिद्धे स्वरे तं बिंदुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निः सूर्यो दिवा प्राह्णः शुक्लो राकोत्तरं स्वराट् ॥ विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४ ॥ देवयानमिदं प्राहुर्भूत्वाभूत्वा नुपूर्वशः ॥ आत्मयाज्युपशांतात्मा ह्यात्मस्थो न निवर्तते ॥ ५५ ॥ य एते पितृदेवानामयने वेदनिर्मिते ॥ शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ ५६ ॥ आदावंते जनानां सद्बहिरंतः परावरम् ॥ ज्ञानं ज्ञेयं वचो वाच्यं तमो ज्योतिस्त्वयं स्वयम् ॥ ५७ ॥ आबाधितोऽपि ह्याभासो यथा वस्तुतया स्मृतः ॥ दुर्घटत्वादैंद्रियकं तद्वदर्थविकल्पितम् ॥ ५८ ॥

तद्विशेषत्वाद्वाचः स्वरेऽकारादिस्वरत्रयात्मके ॐकारं बिंदौ तं च नादे प्राणे सूत्रात्मनि महति ब्रह्मणि ॥ ५३ ॥ अग्निरिति । तत्तदभिमानिन्यो देवतास्ताः प्राप्नोतीति पूर्ववत् दिवाऽह्नः प्राह्णस्तस्यैवांतः । राका शुक्लपक्षस्यांतः । यद्वा प्राह्णो राका इति च पुराणमतम् । उत्तरं त्वयनम् । स्वराट् ब्रह्मा । एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह । विश्व इति । विश्वः स्थूलोपाधिः । स स्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति । सूक्ष्मं कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति । कारणं च सर्वसाक्षित्वेनान्वयात्साक्षिस्वरूपे विलाप्य तुर्यो भवति । तेषां च व्यभिचारिणां साक्ष्याणां लये शुद्ध आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥ यथेतरो भूत्वा निवर्तते तथा न निवर्तत इत्यर्थः ॥ ५५ ॥ वेदेन निर्मिते ते धूममभिसंभवंतीत्यादिना ते अर्चिरभिसंभवंतीत्यादिना च निश्चयेन विविच्य ज्ञापिते इत्यर्थः । जनस्थोऽपि देहस्थोऽपि न मुह्यति ॥ ५६ ॥ तत्र हेतुमाह । आदाविति । जनानां देहानामादौ कारणत्वेनांते चावधित्वेन यत्सत्तथा बहिर्भोग्यमंतर्भोक्तृ परमवरं चोच्चनीचम् । तमोऽप्रकाशः ज्योतिः प्रकाशः तत्तु सर्वमयं ज्ञानी स्वमेव न तस्माद्व्यतिरिक्तं वस्तु किंचिदस्ति येन मुह्येदित्यर्थः ॥ ५७ ॥ ननु तर्हि कथं पृथगर्थस्तस्यापि प्रतीयते तत्राह । आबाधित

नादे नादाख्ये स्वरविशेषे । प्राणे 'प्राणत एव नादोत्पत्तिः' इति योगशास्त्रे प्रोक्तम् । अमुं प्राणं धारणाप्रकारेण ब्रह्मणि परमात्मनि जुहुति इत्थं सर्वं तत्रैव भावयंति कार्यकारणात्मकं सर्वं विश्वं ब्रह्मैवेति भावः ॥ ५३ ॥ इत्थं भावयतो देहादुत्क्रमणे गतिमाह—अग्निरिति । एतौ प्राह्णराकाशब्दौ भिन्नदेवतापरौ न किन्तु दिवा शुक्लपक्षाभिमानिदेवपरावेवेति वैदिकाः । यद्वा—पौराणिकमते भिन्नदेवपरावेवेति ज्ञेयम् । ब्रह्मलोकभोगावसाने स्वयं प्रभाताख्यवेदविचारेण मोक्षप्रकारमाह—विश्व इति । स्थूलशरीराभिमानी तेषां विश्वादीनां साक्षी विद्यते येषां ते साक्ष्यास्तेषां तुरीयसाक्षिकाणामित्यर्थः । इत्यर्थ इति । तुरीयावशेषस्यैव मोक्षत्वादिति भावः ॥ ५४ ॥ अर्चिरादिमार्गस्थो भूत्वाभूत्वाऽनुपूर्वशः श्रुत्युक्त्यानुपूर्व्या । इत्यर्थ इति । यथेतरो धूमादिमार्गसंचारी कर्मनिष्ठश्चंद्रलोकं गत्वा निवर्त्तते तथार्चिरादिमार्गगो न निवर्त्तत इति भावः ॥ ५५ ॥ ते कर्मनिष्ठा धूमं तदभिमानिनमभिसंभवंति प्राप्नुवंति । आदिना रात्र्यादिग्रहः । ते निवृत्तिनिष्ठाः । आर्चिरग्निम् । इत्यर्थ इति । स्फुटं बोधिते इति भावः ॥ ५६ ॥ तत्र मोहाभावे । इत्यर्थ इति । 'सकलमिदमहं च वासुदेवः' इति ज्ञानेन भेदोन्मूलनान्मोहः कथं भवेदिति भावः ॥ ५७ ॥ अत्राक्षिपति—नन्विति । विश्वनाथः—आबाधित इति । अत्राद्वयं ज्ञानमेव ब्रह्मेति ब्रह्मोपासनायां पद्धतिः सा च विविधशक्तिवैचित्र्यमयस्य विश्वस्य सत्यत्वप्रतीतौ न सिद्ध्येदतस्तदर्थं ज्ञानिनमधिकारिणं विश्वस्य मिथ्यात्वं प्रत्याययितुं विवर्त्तवादोयमष्टभिः प्रस्तूयते । यथा भक्तिमते 'तस्मात्केनाप्युपायेन मनः कृष्णे विनेशयेत्' इत्युक्तं तथैव ज्ञानिमतेऽयमुपायो ज्ञानिमनोब्रह्ममात्रग्रहणार्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षित्यादीनामिहार्थानां छाया न कतमापि हि ॥ न संघातो विकारोऽपि न पृथङ्नान्वितो मृषा ॥ ५९ ॥ धातवोऽवयवित्वाच्च तन्मात्रावयवैर्विना ॥ न स्युर्ह्यसत्यवयविन्यसन्नवयवोंततः ॥ ६० ॥

स्तर्कविरोधेन सर्वतो बाधितोऽप्याभासः प्रतिबिंबादिर्वस्तुतया यथा स्मृतस्तद्वदैंद्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः । दुर्घटत्वात् ॥ ५८ ॥ तदेवाह । क्षित्यादीनां पंचभूतानां छाया ऐक्यबुद्ध्यालंबनरूपं देहादिसंघातारंभपरिणामानां मध्ये कतमाऽप्यन्यतमाऽपि न भवति । न तावत्तेषां संघातो वृक्षाणामिव वनम् । एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः । न ह्येकस्मिन्वृक्ष आकृष्टे सर्ववनमाकृष्यते । न च विकार आरब्धोऽवयवी । अपिशब्दान्न परिणामोऽपि । कुतः स किं स्वावयवेभ्यः परिणतेभ्यो वा पृथक् तदन्वितो वा । न तावदत्यंतं पृथक् । तथाऽप्रतीतेः न चान्वितः स किं प्रत्यवयवं सर्वोऽप्यन्वेत्यंशेन वा । आद्ये अंगुलिमात्रेऽपि देहबुद्धिः स्यात् । द्वितीये तस्याप्यंशांगीकारे सत्यनवस्था स्यादतो मृषैवेत्यर्थः ॥ ५९ ॥ एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह । धारयंतीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः । अवयवित्वात्तेषामपि । तर्ह्यवयवः सत्य इति चेत्तत्राह । उक्तप्रकारेणावयविन्यसत्यवयवोऽप्यंततोऽसन्नेव स्यात् । अवयविप्रतीत्यन्यथानुपपत्तेः

विश्वस्य सत्यत्वे मनसा निश्चिते तेन निरालंबेन मनसा विश्वस्याग्रहणं निषेधकोटिभिरपि दुर्घटमित्यतोऽत्र विवर्त्तवादेऽपि शास्त्रतात्पर्यमित्यवसेयम् । विश्ववदेव भगवद्धामनामरूपादेरसत्यत्वमनने तु ज्ञानिनोप्यधःपात इति प्राक्प्रतिपादितं प्रतिपादयिष्यते च यथास्थानमुपरिष्टादपि । श्रीभरतेनापि रहूगणप्रबोधनार्थम् 'अयं जनो नाम चलन्पृथिव्याम्' इत्यादिना विश्वस्य मिथ्यात्वमुक्त्वा तर्हि किं सत्यमित्यपेक्षायम् 'भगवच्छब्दसंमं यद्वासुदेवं कवयो वदंति' इत्युपसंहृतम् । अथ प्रकृतमनुसरामः । आभासः सूर्यादिप्रतिबिंब आबाधितः स्वातंत्र्यसत्तायाः सकाशान्निरस्तोपि बालादिभिः पृथक्प्रकाशमानतादर्शनाद्वस्तुतया स्वतंत्रपदार्थतया स्मृतः कल्पितः तद्वदैंद्रियकं सर्वं मूढैः स्वतंत्रार्थत्वेन विविधं कल्पितं तत्तु न तत्त्वदृष्ट्या स्वातंत्र्यनिरूपणस्य दुर्घटत्वादित्यर्थः ॥ ५८ ॥ तदेव दुर्घटत्वमेव । विकारः पंचभूतैरारब्धोऽवयवीत्यर्थः । सोऽवयवी किं वाऽथ वा परिणतेभ्यो भूतेभ्यः अवयवानां पार्थक्येऽवयवदर्शनमेव न संभवतीत्यर्थः । अंगुलिमात्रे देहबुद्धौ तन्नाशे देहनाशोप्यापद्येत । इत्यर्थ इति । कस्यापि पक्षस्यासिद्धेर्मृषात्वमेव शिष्यत इति भावः । "आरंभवादः कणभक्षपक्षः संघातवादस्तु भदंतपक्षः । सांख्यस्य पक्षः परिणामवादो वेदांतपक्षस्तु विवर्त्तवादः ॥" इति वृद्धाः । भदंतश्चार्वाकः । अतात्त्विकोऽन्यथाभावो विवर्त्त इति ॥ ५९ ॥ इत्यर्थ इति । अवयविनं विनाऽवयवः कथं सिद्ध्येदिति भावः । अत्र संदर्भः—उक्तप्रकारेणावयविनि निरूपयितुमसति अवयवोंततोऽसन्नेव स्यात्तस्मादैक्यबुद्ध्यालंबनरूपं यत्प्रतीयते तत्सर्वत्र परमात्मलक्षणं सर्वकारणं वस्त्वेवेति साधूक्तम् 'आदावंते जनानां सत्' इत्यादिना । एवमेव तृतीयेऽप्युक्तम् "इति तासां स्वशक्तीनां सतीनामसमेत्य सः । प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः॥कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः । त्रयोविंशतितत्त्वानां गणं युगपदाविशत् ॥सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम् । भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ॥" इति । अत एव "यस्य पृथिवी शरीरम्" इत्यादिश्रुतौ परमात्मशरीरत्वेन प्रसिद्धिः।परमात्मनस्तु शरीरित्वेन तदेवमवयवरूपेण प्रधानपरिणामः सर्वत्रावयवी तु पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यात् सादृश्यभ्रमस्तावाद्विकल्पे सति वस्तुनः ॥ जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥ भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं यथात्मनः ॥ वर्तयन् स्वानुभूत्येह त्रीन् स्वप्नान् धुनुते मुनिः ॥ ६२ ॥ कार्यकारणवस्त्वैक्यमर्शनं पटतंतुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥

विना तत्सद्भावे प्रमाणाभावादित्यर्थः । तदुक्तं पंचमस्कंधे । एवं निरुक्तं क्षितिशब्दवृत्तमित्यादि ॥ ६० ॥ नन्ववयविनोऽभाव आगमापायिषु बाल्यादिषु सोऽयं देवदत्त इति प्रत्यभिज्ञानं न स्यात् । तदुक्तं भट्टैः । "आविर्भावतिरोभावधर्मकेष्वनपायि यत्" । तद्धर्मीति । तत्राह । स्यादिति । वस्तुनः परमात्मनो विकल्पे भेदेऽसति । यद्वा वस्तुनोऽविद्यया विकल्पे सति पूर्वपूर्वारोपसादृश्यात्स एवेति भ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः । ननु सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधकता कथं तत्राह । स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ॥ ६१ ॥ इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति भावाद्वैतमिति चतुर्भिः । वर्तयन्नालोचयन् । स्वानुभूत्या आत्मतत्त्वानुभवेन । त्रीन् जाग्रदादीन् । "त्रय अवस्थास्त्रयः स्वप्नाः" इति श्रुतेः । यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः । ततस्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः । ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः । तान्धुनुते निवर्तयति ॥ ६२ ॥ कार्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तंतुरेव न पट इति ॥ ६३ ॥

मात्मवस्त्वेवेति सिद्धं ततोप्यमिथ्यात्वमेव जगत उपपद्यत इति ॥ ६० ॥ अत्राक्षिपति—नन्विति । इदंतातत्तावगाहिज्ञानं प्रत्यभिज्ञानम् । तदवयविलक्षणम् । भट्टैर्मीमांसकैः । स्पष्टार्थम् । परमात्मैक्ये तु न कस्यापि संदेह इति चेदाह—यद्वेति । पुनराक्षिपति—नन्विति । अत्र विश्वनाथः—ननु तदपि क्षित्यादीनां सत्यत्वेन प्रतीतिः कुतस्तत्राह—स्यादिति । विकल्पे क्षित्यादावसति मिथ्याभूतेऽपि वस्तुनः सत्यभूतस्य भगवन्नित्यधामक्षित्यादेः सादृश्येन भ्रमः सत्यस्य जलस्य मरीचिकायामिवेत्यर्थः । न च भगवद्धाम्न्यपि विवर्त्तः प्रवर्त्तते इति तदप्यसत्यं स्यादिति वाच्यम् "भूगोलचक्रे सप्तपुर्यो भवंति तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हि" इति गोपालतापिनीश्रुत्या गोपालपुर्या ब्रह्मस्वरूपभूतत्वप्रतिपादनात् । तासामिति निर्द्धारणषष्ठ्या साक्षादिति ब्रह्मेति पदयोश्च वैयर्थ्यादन्यवस्तूनामिव ब्रह्मणि गोपालपुर्यारोपितत्वमिति व्याख्यातुमशक्यत्वात् । किञ्चार्वाचीना अद्वैतवादिनश्च मायाशक्त्यतिरिक्तामंतरंगाह्लादिन्यादिशक्तिं तद्विलासान् भगवन्नित्यधामक्षित्यादींश्चामन्यमाना अंधपरंपरयैव विवर्त्ते मिथ्याभूतस्यैव सादृश्यभ्रममाचक्षाणा विगर्हित एव । नन्वेवं जगतो मिथ्यात्वे सर्वज्ञेनापि वेदेन विधिनिषेधौ कथमुच्येते न हि मरीचिकाजलस्य गुणदोषौ विज्ञेनोपदिश्येते इत्यत आह—जाग्रत्स्वप्नाविति । स्वप्नमध्ये यथा जाग्रत्स्वप्नव्यवस्था तथैव मिथ्याभूते जगति तावपि मिथ्याभूतावेव 'यादृशो यक्षस्तादृशो बलिः' इति न्यायेनेत्यर्थः । अविद्वदधिकारित्वात् "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन" इत्युक्तेः ॥ ६१ ॥ जाग्रदादित्रयाणां स्वप्नत्वे श्रुतिं प्रमाणयति—त्रय इति । आवसथाः अवस्थाः त्रयाणां स्वप्नत्वे जाग्रदादिभेदत्रयविधानं व्यर्थं स्यादिति चेदाह—यद्वेति । वस्तुनि ब्रह्मणि भेदबुद्धिः । ततो भेदबुद्धेः । एतस्य कर्मणोऽहमधिकारीत्यर्थः । ततोऽधिकारभेदेन कर्मणि कृते मत्कर्तृकर्मजातत्वादेतत्फलं ममैव भोग्यमिति ॥ ६२ ॥ अवस्तुत्वादसत्त्वात् ॥ ६३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्ब्रह्मणि परे साक्षात् सर्वकर्मसमर्पणम् ॥ मनोवाक्तनुभिः पार्थ क्रियाद्वैतं तदुच्यते ॥ ६४ ॥ आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ॥ यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥ यद्यस्य वा निषिद्धं स्याद्येन यत्र यतो नृप ॥ स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ॥ गृहेऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ् नरः ॥ ६७ ॥ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ॥ यत्पादपंकेरुहसेवया भवानहारषीन्निर्जितदिग्गजः क्रतून् ॥ ६८ ॥ अहं पुराऽभवं कश्चिद्गंधर्व उपबर्हणः ॥ नाम्नाऽतीते महाकल्पे गंधर्वाणां सुसंमतः ॥ ६९ ॥ रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः ॥ स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलंपटः ॥ ७० ॥ एकदा देवसत्रे तु गंधर्वाप्सरसां गणाः ॥ उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥ अहं च गायंस्तद्विद्वान् स्त्रीभिः परिवृतो गतः ॥ ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ॥ याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ ७२ ॥ तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम् ॥ शुश्रूषयानुषंगेण प्राप्तोऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥ धर्मस्ते गृहमेधीयो वर्णितः पापनाशनः ॥ गृहस्थो येन पदवीमंजसा न्यासिनामियात् ॥ ७४ ॥

मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा उद्देश्यफलभेदो हि क्रियाभेदे हेतुः । ईश्वरार्पणे च तदभावात्क्रियाणामद्वैतम् ॥ ६४ ॥ आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोर्देहादीनां पंचभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेनार्थकामयोर्यदैक्यदर्शनमित्यर्थः ॥ ६५ ॥ उक्तानाश्रमधर्मान्संक्षिप्याह । यदिति । यद्द्रव्यम् । येनोपायेन । यतः सकाशात् ॥ ६६ ॥ प्रस्तुतमुपसंहरति । एतैरिति । अस्य श्रीकृष्णस्य गतिम् । तद्भक्तिभाक् तस्य भक्तः ॥ ६७ ॥ एतत्सर्वसाधारणमुक्तम् । भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पांडवानेव लक्षीकृत्याह । यथा हीति । हे नृपदेव नृपैर्देवैश्च सहायैर्दुस्त्यजादिति वा । आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः । अडभाव आर्षः । उत्कर्षेणातरतेत्यर्थः । यथा यथावत् । तमेव भजतेति शेषः । यद्वा यथाऽऽपद्गणादुत्तीर्णस्त्वम् ॥ यथा च क्रतूनहार्षीस्तथा श्रीकृष्णादेव तारकात्संसारादप्युत्तरतेत्यर्थः ॥ ६८ ॥ श्रीकृष्णसेवा महतामवज्ञया भ्रश्यति तत्कृपया च सिध्यतीति दर्शयन्पूर्ववृत्तांतमाह । अहमिति सार्धैः पंचभिः ॥ नाम्ना उपबर्हणः ॥ ६९ ॥ पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥ ७० ॥ ७१ ॥ तदाह्वानं विद्वानुन्मत्तः सन् गायन्नेव गतः ॥ ७२ ॥ ७३ ॥ ७४ ॥

कृतानामिति पदाध्याहारापेक्षया लाघवमाह—तैर्मनोवाक्तनुभिरिति । तदभावादुद्देश्यफलाभावात् ॥ ६४ ॥ इत्यर्थ इति । यावेव स्वार्थकामौ साधनसाध्ये स्वस्य तावेव सर्वेषामैक्यात् स्वस्यार्थकामवदन्येषामपि संपादयेत्ताविति भावः ॥ ६५ ॥ यत्र देशे काले च । नृपेति । त्वया तथैव शिक्षणीयाः सर्वे नृपालकत्वादिति भावः । नान्यैर्निषिद्धैः ॥ ६६ ॥ गृहेपि गृहस्थोऽपि यदि तद्भक्तः स्यादित्यर्थः ॥ ६७ ॥ नृपेषु दीव्यति द्योतत इति नृपदेवस्तादृशस्य तवापत्तरणं न दुर्घटमिति भावः । तथा च देवार्चनसहायादिभिरापत्तरणं न दुर्घटमिति चेदाह—नृपैर्देवैरिति । इत्यर्थ इति । उत्कर्षप्राप्तिपूर्वकमापदं तीर्णवंत इति भावः । क्रियापदाध्याहारे गौरवं मत्वाह—यद्वेति । अहार्षीत् अकरोत् । इत्यर्थ इति । श्रीकृष्णपोते सति संसारार्णवतरणचिंता न कार्येति भावः । दिग्गज इति । तत्तद्दिग्गतराज्ञामुपलक्षणम् ॥ ६८ ॥ सुसंमतः संमान्यः ॥ ६९ ॥ पुरु अधिकं लंपटः स्त्रैणः ॥ ७० ॥ हरिगाथोपगायने हरिलीलागानार्थमित्यर्थः ॥ ७१ ॥ विश्वसृजो मरीच्यादयः ॥ ७२ ॥ तत्रापि दासीपुत्रत्वेपि । शुश्रूषया योऽनुषंगः संबंधस्तेन ॥ ७३ ॥ न्यासिनां पदवीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति ॥ येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगम् ॥ ७५ ॥ स वा अयं ब्रह्म मह द्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियः सुहृद्वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ॥ मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥ श्रीशुक उवाच ॥ इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ॥ पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥ कृष्णपार्थावुपामंत्र्य पूजितः प्रययौ मुनिः ॥ श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥ ७९ ॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ॥ देवासुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥ इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते युधिष्ठिरनारदसंवादे सदाचारनिरूपणं नाम पंचदशोऽध्यायः ॥ १५ ॥ समाप्तोऽयं सप्तमः स्कंधः ॥ ॥

त्वं तु कृतार्थ एवेति हर्षेण पुनः पूर्वश्लोकानेव पठति।यूयमिति शेषं स्पष्टम्॥७५॥७६॥७७॥७८॥७९॥८०॥ सप्तमस्कंधगूढार्थपदभावार्थदीपिका॥संसेव्यतां सदा सद्भिर्य तिश्री धरनिर्मिता॥१॥इति श्रीमद्भागवते महापुराणे सप्तमस्कंधे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां टीकायां पंचदशोऽध्यायः ॥१५॥ समाप्तश्चायं सप्तमस्कन्धः॥७॥

मुक्तिम् ॥ ७४ ॥ ७५ ॥ ७६ ॥ ७७ ॥ अहो अयं श्रीकृष्णो मम भ्रातेति प्रेम्णा विह्वलो विवशोऽभूत्। चकारान्नारदश्च ॥ ७८ ॥ पूर्वन्तु तद्बहुत्वश्रवणेन विस्मित एवासीत् अधुना तु परमबृहत्त्वज्ञानेन परमविस्मितः अहो परं ब्रह्मापि योगिध्यानागम्योपि मम कैंकर्यादौ प्रवृत्तो न जाने कस्य पुण्यकर्मणः फलमिति परं विस्मितो बभूवेति भावः ॥ ७९ ॥ यत्र येषु वंशेषु ॥ ८० ॥ अथास्य महिमा—"हरिरुवाच ॥ श्रीमद्भागवते स्कन्धः सप्तमो मे मुखं स्मृतम्। श्रवणात्तस्य स्त्रीघातपापान्मुच्येन्नरो ध्रुवम् ॥ १ ॥ अत्रेतिहासं शृणु भो महापापप्रणाशकम् । सौवीरदेशे नृपतिः प्रतीप इति विश्रुतः ॥ ॥ २ ॥ तस्य भार्याद्वयं चासीदंगकालिंगदेशजम्। अंगजाभूद्भानुमती नाम्ना पतिपरायणा ॥ ३ ॥ कलिंगजा चंद्रवती नाम्ना चंद्रसमानना। प्रतीपो गणिकासक्तो मद्यपो मांसभुक् तथा ॥ ४ ॥ बभूव दैवतो वेश्योच्छिष्टतोयान्नभुक् तदा। कामार्तश्चैकदा राजा चोत्थायार्द्धनिशं गतः ॥ ५ ॥ उत्तिष्ठ मे प्राणसमे द्वारस्योद्घाटनं कुरु। नृपतेर्वाक्यमाकर्ण्य शयनस्थाऽब्रवीदिदम् ॥ ६ ॥ स्वगेहं गच्छ नृपते स्वस्त्रीभी रतिमाचर। मम संगे रतिश्चेत्ते स्वपत्न्योः शिरसी नय ॥ ७ ॥ इति श्रुत्वा पापमतिर्गृहीत्वा मस्तके द्वयोः। खड्गेन छित्त्वा कामार्त्तो दर्शयामास तां नृपः ॥ ८ ॥ ते दृष्ट्वा सा हृष्टमना राज्ञी नरपतेरभूत्। कोलाहलः प्रभातेऽभूत्स्वपत्न्यौ मारिते इति ॥ ९ ॥ नृपेण गणिकासक्त्या तं धिक्तां धिक्च सर्वथा। श्रुत्वा राजा गर्हयित्वा चात्मानं निर्गतः पुरात् ॥ १० ॥ तत्पुत्रस्तु कृतो राजा मंत्रिभिः स मृतो यदा। गणिकाऽपि मृता तावदुभौ तौ नरकं गतौ ॥ ११ ॥ नरकांते तु गणिका किरातीत्वं समागमत्। तद्गृहे हि प्रतीपोभून्मार्जारः पापकर्मतः ॥ १२ ॥ गोपीचंदनसंस्पर्शात्तया ज्ञातो ह्ययं पतिः। गृहीत्वा तं च मार्जारं काशीपुर्यां जगाम सा ॥ १३ ॥ तत्र भागवती गाथा श्रुता सप्तमसंभवा। ताभ्यां, तत्पुण्यतो यातौ त्यक्त्वा देहं हरेः पदम् ॥ १४ ॥" इति सप्तमस्कंधमहिमा पाद्मे वर्णिता ॥ श्रीधरस्वामिभावार्थदीपिकोद्योतकारकः। प्रकाशो रचितो यत्नाद्बहुटीकावलोकनैः ॥ १ ॥ श्रीवंशीधरविप्रेण खर्डपत्तनवासिना। प्रीयतां राधिकानाथोऽनेन श्रीनंदनंदनः ॥ २ ॥ इति श्रीखरडपत्तनवास्तव्यपण्डितवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे सप्तमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवतसप्तमस्कन्धो मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते सप्तमस्कन्धः समाप्तः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते अष्टमस्कन्धप्रारंभः ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते वासुदेवाय ॥ राजोवाच ॥ स्वायंभुवस्येह गुरो वंशोऽयं विस्तराच्छ्रुतः ॥ यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः ॥ १ ॥ यत्रयत्र हरेर्जन्म कर्माणि च महीयसः ॥ गृणंति कवयो ब्रह्मंस्तानि नो वद शृण्वताम् ॥ २ ॥ यद्यस्मिन्नंतरे ब्रह्मन्भगवान्विश्वभावनः ॥ कृतवान्कुरुते कर्ता ह्यतीतेऽनागतेऽद्य वा ॥ ३ ॥ ऋषिरुवाच ॥ मनवोऽस्मिन्व्यतीताः षट् कल्पे स्वायंभुवादयः ॥ आद्यस्ते कथितो यत्र देवादीनां च संभवः ॥४॥ आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः ॥ धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ॥५॥ कृतं पुरा भगवतः कपिल स्यानुवर्णितम् ॥ आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्वह ॥ ६ ॥ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ॥ विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन् ॥ तप्यमानस्तपो घोरमिदमन्वाह भारत ॥ ८ ॥

श्रीगणेशाय नमः ॥ ॥ नमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामचंद्राय ॥ अथाष्टमे चतुर्विंशत्यध्यायैर्मनुवर्णनम् ॥ तत्सुतै ऋषिदेवैर्हरेर्मूर्तिभिश्च हरेः सह ॥ १ ॥ प्रतिमन्वंतरं चैव मन्वाद्याः षट् पृथक्पृथक् ॥ प्रवर्तयंति सद्धर्मान्पालयंत्याचरंति च ॥२॥ अतो मन्वंतरस्योक्तं सद्धर्म इति लक्षणम् ॥ येन वै क्रियमाणेन नरो न निरयं व्रजेत् ॥ ३ ॥ तत्र तु प्रथमे स्वायंभुवः स्वारोचिषस्तथा ॥ उत्तमस्तामसश्चेति चतुर्मनुनिरूपणम् ॥ ४ ॥ स्वायंभुवेंतरेऽनंतदुरंतगुणवर्ण नात् ॥ मुदितः परिपप्रच्छ सर्वमन्वंतरस्थितिम् ॥ ५ ॥ स्वायंभुवस्येति त्रिभिः । यत्र विश्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिसर्गः ॥ १ ॥ महीयसो हरेः । अत्र क्वचिद्बहुपाठांतरमस्ति तदुपेक्षितमस्माभिः ॥ २ ॥ यस्मिन्नतीते यत्कृतवान् यस्मिन्ननागते यत्कर्ता करिष्यत्यद्य वा वर्तमाने यत्कुरुते तद्वदेत्यन्वयः ॥ ३ ॥ अस्मिन्कल्पे षण्मनवो व्यतीता गताः ॥ ४ ॥ तस्य मनोर्दुहित्रोः देवहूत्याम् आकूत्यां च कपिलयज्ञमूर्त्तिभ्यां पुत्रतां गतः प्राप्तः ॥५॥६॥७॥ घोरं दुश्चरं तपस्तप्यमानः । समाधावनु

ॐ श्रीगणपतये नमः ॥ यः कृष्णो बहुभी रूपैरपात्सर्वान्व्रजेश्वरः । मन्वंतरान्नन्दसूनुस्तं वंदे राधिकापतिम् ॥ १ ॥ मनूनां त्रैकालिकानां स्वायंभुवादीनां वर्णनम् । तत्सुतैर्मनुसुतैः । ऋषयश्च देवाश्चें द्राश्चेति तैः (१)। संतः श्रौताश्च ये धर्मास्तान् (२)। यतस्सद्धर्मपालनादि मनुकर्म अतो हेतोः । येन सद्धर्मेण (३)। तत्र चतुर्विंशत्यध्यायेषु । चत्वारो मनवश्चतुर्मनवस्तेषां निरूपणम् (४)। अनंतस्य हरेर्दुरन्ता अपारिमिता ये गुणा भक्तवात्सल्यादयस्तेषां वर्णनात्। मुदितो विस्मृतानशनक्लेशः । सर्वेषां मन्वंतराणां स्थितिं मर्यादापालनम् (५)। इह कल्पे । गुरो इति।भगवत्तत्त्ववर्णनान्मदज्ञाननाशकोऽसीति संबुद्ध्यभिप्रायः । यत्र स्वायंभुवमन्वंतरे । विश्वसृजां मरीच्यादीनाम् । अन्यान्स्वायंभुवव्यतिरिक्तान् ॥ १ ॥ यत्रयत्र मन्वंतरे । ब्रह्मन्निति दयालुतामाह । तानि कर्माणि । महीयसो महत्तमस्य ॥ २ ॥ यत् कर्म ॥ ३ ॥ "भूतं भव्यं वर्तमानं यो वेत्ति द्विजसत्तमः । स ऋषिः प्रोच्यते विज्ञैर्धातुर्ज्ञाने ऋषिर्मतः॥" इति निरुक्तिप्रकाशोक्तेः । कल्पे ब्रह्मदिवसे । यत्राद्ये स्वायंभुवे । आदिना दैत्यादिग्रहः ॥ ४ ॥ तस्य स्वायंभुवस्य । 'धर्मोपदेशो यज्ञेन कृतो मनव' इति तु ग्रंथांतरादवसेयः ॥ ५ ॥ पुरा तृतीयस्कंधे कृतं चरितं यत्कर्म मनुरक्षणादि ॥ ६ ॥ ७ ॥ 'त्रिधा भिन्ना विष्णुपदी सुनंदेति प्रकीर्त्तिता' इति तीर्थः । निद्रितस्य योगनिद्रानिमीलिताक्षस्य हरेरुच्छ्वसितं वेदस्तद्वत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुरुवाच ॥ येन चेतयते विश्वं विश्वं चेतयते न यम् ॥ यो जागर्ति शयानेऽस्मिन्नायं तं वेद वेद सः ॥ ९ ॥
आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् ॥ तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनम् ॥ १० ॥

भूतमिदं वक्ष्यमाणं निद्रितोच्छ्वसितवद्विस्मित इवोपदिशन्निवानुवदन्निव चाष्टभिः श्लोकैरन्वाह ॥ ८ ॥ येन चिदात्मना विश्वं चेतयते चेतनीभवति । विश्वं तु यं न चेतयते न चेतनीकरोति स्वत एव चिद्रूपत्वात् । तत्र हेतुः । अस्मिन् शयाने स्वपति यो जागर्ति साक्षितया वर्तते । अहो चित्रं नायं जनस्तं वेद स तु इमं वेद ॥ ९ ॥ तस्येश्वरत्वं दर्शयन् लोकस्य हितमुपदिशति । आत्मना ईश्वरेणावास्यं स्वसत्ताचैतन्याभ्यां संव्याप्यं विश्वं सर्वं जगत्यां लोके यत्किंचिज्जगद्भूतजातमतस्तेनैवेश्वरेण यत्किंचित्त्यक्तं दत्तं धनं तेनैव भुंजीथाः भोगान्भुंक्ष्व । यद्वा तेन हेतुना त्यक्तेनेश्वरार्पणेनैव भुंजीथाः न स्वार्थम् । कस्य स्वित्कस्यचिदपि धनं मा गृधो माभिकांक्षीः । यद्वा

वेदस्य साक्षाद्धरेरुच्छ्वसितत्वादत्र वतिना निर्देशः वेदस्याध्यत्वान्मनूक्तेः ''यन्मनुरवदत्तद्भेषजम्'' इति श्रुतेर्वेदतुल्यत्वम् । भगवदैश्वर्यस्मरणाद्विस्मित इव उपदिष्टस्य 'ईशावास्यम्' इत्यादिना प्राग्वेदेनोक्तस्योपदेशादुपदिशन्निव कथितकथनस्यैव कथनादनुवदन्निवेति चोक्तिः । अन्वाहेत्युक्तेरिवत्रयोपलब्धिरिति प्रतीयते इदमत्राहेति पाठांतरानुपादानात् । यद्वा—निद्रितो यथा विवशः श्वासान्मुंचति तद्वद्वाचमुच्चारयतीत्यर्थः ॥ ८ ॥ तत्र स्वतश्चिद्रूपत्वे । अस्मिन् विश्वस्मिन् । य आत्मा । साक्षिता च तैजसरूपेण न ज्ञेया किं तु परमात्मरूपेण । अयं जनो जीवस्तं परमात्मानम् । स तु परमात्मा तु । इमं जीवम् ''सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे'' इति प्राचेतसोक्तेः । भगवज्ज्ञाननाशाभावे ''स्वाभाविकी ज्ञानबलक्रिया च'' इति श्रुतिर्मानं ज्ञेयम् ॥ ९ ॥ अत्र विश्वनाथः—स्वपुत्रपौत्रादिकमुद्दिश्य हितमुपदिशति—जगत्यां त्रिभुवने यत्किंचिज्जगत्स्थानं स्त्रीयदेहेंद्रियादिकं तत्सर्वं भगवत एवात्मशब्दवाच्यस्यावास्यमावासविषयीभूतं कर्मणि ण्यत् । सम्यग्वासार्हमिति । तेनैव स्वक्रीडास्पदत्वेन सृष्टत्वादिति भावः । अतस्तत्रतत्र स्थाने भगवन्मंदिरं तदर्चां संस्थाप्य तदनुज्ञां संप्राध्यैव स्ववासगृहं ततो निकृष्टमेव सेवकबुद्ध्या निर्मीयतां न तु तत्र स्वस्यैव स्वत्वमारोप्य तन्मंदिरमनिर्मायैवेति ध्वनिः । एवं बहुधनसत्त्वेऽपि तेन परमेश्वरेण यत्त्यक्तं कर्मकारेभ्यो वेतनमिव यद्दत्तं तेनैव भुंजीथा भोगान्भुंक्ष्व मा गृधः । अदत्तमधिकं वा मा कांक्षीः तत्सेवायां तद्भक्तसेवायां च बहुधनं पर्याप्तीकृत्य तच्छेषेणैव पुत्रमित्रकलत्रादीनां स्वस्य चोदरभरणं कुर्विति भावः । ननु ते पुत्रकलत्रादयो नात्र व्यवस्थायां संमन्येरंस्तत्र संतर्जनमाह—स्वित्प्रश्ने अरे कस्य धनं? स्वगृहे स्थिमपि धनं परमेश्वरं विना कस्य न कस्यापीत्यर्थः। ''यावद्भ्रियेत जठरं तावत्स्वत्वं हि तस्य तत् । अधिकं योऽभिमन्येत स स्तेनो दंडमर्हति॥'' इति नारदोक्तेः। तस्य भगवतः । यत ईश्वरेण व्याप्तमतो हेतोः । तेनैवेश्वरदत्तेनैव । प्रारब्धाधिकाप्तिस्तूद्यमसहस्रेणापि नास्तीत्यत एतदुक्तिः पुनरुक्तिमिव भातीत्यत आह—यद्वेति । ''भुंजते ते त्वघं पापा ये पंचंत्यात्मकारणात्'' इति स्वार्थपाकादेर्दोषश्रवणात् । ''यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः'' इति भगवदर्पिताशनादेर्माहात्म्यश्रवणाच्च । अत्र च पचिः क्रियांतराणामशनं च भोगांतराणामुपलक्षणम् । परकीयवस्तुनि नृणां दर्शनादि नेच्छोत्पद्यते परकीयत्वाभावे सा नोचितेत्याह—यद्वेति । इत्यर्थ इति । ''तत्त्वमसि'' इत्यादिश्रुतेरात्मनः सर्वत्रैकत्वात्परकीयत्वं धनादौ न संभवत्यत इच्छा व्यर्थैवेति भावः । उक्तमर्थं श्रुत्यारूढं करोति—तथा चेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं न पश्यति पश्यंतं चक्षुर्यस्य न रिष्यति ॥ तं भूतनिलयं देवं सुपर्णमुपधावत ॥ ११ ॥ न यस्याद्यंतौ मध्यं च स्वः परो नांतरं बहिः ॥ विश्वस्यामूनि यद्यस्माद्विश्वं च तदृतं महत् ॥१२॥ स विश्वकायः पुरुहूत ईशः सत्यः स्वयंज्योतिरजः पुराणः ॥ धत्तेऽस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते ॥ १३ ॥ अथाग्रे ऋषयः कर्माणीहंतेऽकर्महेतवे ॥ ईहमानो हि पुरुषः प्रायोऽनीहां प्रपद्यते ॥ १४ ॥

कस्य स्विदिति अहो कस्यान्यस्य धनमस्ति यतो धनाकांक्षा क्रियेतेत्यर्थः । तथाच श्रुतिः । "ईशावास्यम्"इति यथाश्लोकमेव ॥ १० ॥ ननु यदि स सर्वं व्याप्नोति तर्हि चक्षुरादिभिः किं न प्रतीयते तत्राह । यं पश्यंतं जनश्चक्षुर्वा न पश्यति चक्षुराद्यविषयत्वात् । न हि प्रमातारं प्रमाणं विषयी करोतीति भावः । तथा च श्रुतिः । "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्यादि । ननु तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञानं नश्येत्तत्राह । यस्य तु पश्यतश्चक्षुर्ज्ञानं न रिष्यति न नश्यति । तत्तदाकारेणोत्पन्नाया वृत्तेरेव नाशो न स्वतःसिद्धज्ञानस्य न हि सवितृप्रकाशः प्रकाश्यनाशे नश्यतीति भावः । भूतानि निलयो यस्य तं सर्वांतर्यामिणं तथापि सुपर्णं शोभनपतनमसंगमुपधावत भजध्वम् ॥ ११ ॥ तस्य स्वरूपस्य नित्यत्वमेवोपपादयन्नाह । न यस्येति । अमून्याद्यंतादीनि विश्वस्य यस्माद्भवंति विश्वं च यत् यद्रूपमत एवाव्यभिचारित्वात्तदृतं सत्यं महत्परिपूर्णं ब्रह्म ॥ १२ ॥ ननु विश्वं चेत्तद्रूपं तर्हि तस्य कुतो जन्माद्यभावः स्वप्रकाशत्वं वा कुतः कथं वा जगज्जन्मादिकर्तृत्वेन विकारिणः सत्यत्वं पूर्णत्वं च तत्राह । स ईशोऽजः सत्यश्च स्वप्रकाशश्च पुराणश्च निर्विकारो विश्वं कायो यस्य पुरूणि हुतानि नामानि यस्य तथाविधोऽपि यतोऽस्य विश्वस्य जन्मादि स्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्ययोदस्य हित्वा निष्क्रिय एवास्ते ॥ १३ ॥ यस्मादेवमीश्वरः कर्म कृत्वा संत्यज्य नैष्कर्म्येणास्ते अथास्माद्धेतोः ऋषयोऽप्यग्रे आदौ कर्माणि कुर्वंति । किमर्थमकर्महेतवे मोक्षार्थम् । पाठांतरे कर्मनाशाय हि यस्मात

श्लोकमनतिक्रम्य यथाश्लोकं तथाहि श्लोके तु ईशावास्यमित्यस्य प्रतिपदमात्मावास्यमिति । सर्वमित्यस्य प्रतिपदं विश्वमिति । यत्किंचेत्यस्य प्रतिपदं यत्किंचिदिति ॥ १० ॥ सर्वव्यापकत्वमाक्षिपति—नन्विति । अविषयत्वमगोचरत्व प्रमातांतःकरणावच्छिन्ना चितिः प्रमाणमंतःकरणवृत्त्यवच्छिन्ना चितिरिति वेदांतिनो वदंति तथाप्यत्र प्रमीयते ज्ञायते रूपादीति प्रमाणं चक्षुरादि प्रमाति प्रकर्षेणेंद्रियसंबंधं विनैव सर्वं जानातीति प्रमाता परेशः । इति भाव इति । "त्वमकरणः स्वराडखिलकारकशक्तिधरः" इत्याद्युक्तेरित्याशयः । अत्र प्रमाणमाह—तथा चेति । पुनराक्षिपति—नन्विति । तद्विषयं घटविषयम् । तत्तदाकारेण घटपटाद्याकारेण । इति भाव इति । ईश्वरस्य ज्ञाननाशांगीकारे तु तत्स्वरूपहान्यापत्त्या जगदांध्यं प्रसज्जेतेति तात्पर्यम् ॥११॥ अत एव ब्रह्मरूपत्वादेव ॥१२॥ पुनराशंकते—तद्रूपं ब्रह्मरूपम् । तस्य ब्रह्मणः । पुरूणि बहूनि "सर्वे नामा सर्वे कर्मा" इत्यादिश्रुतेः । तथाविधोऽपि अजादिस्वरूपोऽपि । यतः यया । तां मायाम् ॥ १३ ॥ पाठांतरे 'कर्महंतवे' इति पाठे । हनधातोस्तुमर्थे "तुमर्थे से—" इत्यादिना तवेन् प्रत्ययः । ईहमानेन इत्युक्त्या "कुर्वन्नेवेह कर्माणि जिजीविषेत्" इत्यादिश्रुतिर्गृहीता । हिशब्देन तु "आचार्यकुलाद्वेदमधीत्य यथाविधानंगुरोः कर्माणि रतिविशेषेण समावृत्य कुटुंबी शुचौ देशे स्वाध्यायमधीयानो धार्मिको विदधदात्मनि सर्वेंद्रियाणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईहते भगवानीशो नहि तत्र विषज्जते ॥ आत्मलाभेन पूर्णार्थो नावसीदंति येऽनु तम् ॥ १५ ॥ तमीहमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितम् ॥ नॄञ्छिक्षयंतं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति मंत्रोपनिषदं व्याहरंतं समाहितम् ॥ दृष्ट्वाऽसुरा यातुधाना जग्धुमभ्यद्रवन्क्षुधा ॥१७॥ तांस्तथावसितान्वीक्ष्य यज्ञः सर्वगतो हरिः ॥ यामैः परिवृतो देवैर्हत्वाऽशासत्त्रिविष्टपम् ॥१८॥

ईहमानः कुर्वाणः अनीहाम् अकर्मत्वम् ॥ १४ ॥ नन्वीहमानः कर्मभिरवगुंठितः कोशकार इव बध्येतैव तत्राह । ईहत इति । अतस्तमनुवर्तमाना ये ते नावसीदंति न विषज्जंते ॥ १५ ॥ तदेवं लोकानुग्रहाय विश्वसृष्ट्यादि यः करोति श्रीरामकृष्णाद्यवतारैश्च वेदोक्तमप्याचरति तं शरणं व्रजामीत्याह । तमिति । निजं वर्त्म नरावतारानुरूपो मार्गस्तत्र सम्यक् स्थितमत ईहमानं कर्माचरंतम् । तथाऽपि जीववैलक्षण्यमाह । निरहंकृतं निराशिषमनन्यचोदितमिति च । निरहंकारत्वे हेतुः । बुधम् । निराशीष्ट्वे हेतुः । पूर्णम् । अनन्यनियुक्तत्वे हेतुः । प्रभुम् । तथाऽपि कर्मानुष्ठाने हेतुः । नॄन्स्वाचारेण शिक्षयंतम् । तत्किमर्थं तत्राह । अखिलान्धर्मान्भावयति प्रवर्तयतीति तथा तम् ॥ १६ ॥ समाहितमपि संतं मंत्रोपनिषदं मंत्ररहस्यं व्याहरंतं दृष्ट्वा सुप्तोच्छ्वसितवद्विवशमिव मन्वाना असुरा यातुधानाश्च क्षुधा निमित्तेन जग्धुमत्तुमभ्यद्रवन्नभिदुद्रुवुः ॥ ॥ १७ ॥ यामैः स्वपुत्रैः । त्रिविष्टपं स्वर्गमपालयत् । स्वयमेवेंद्रो बभूवेत्यर्थः । तत्र प्रतिमन्वंतरं मन्वादयः षडन्येऽन्ये भवंति । तथाहि सूतो द्वादशे वक्ष्यति । "मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ॥ ऋषयोंशावतारश्च हरेः षड्विधमुच्यते" इति । तत्राद्ये स्वायंभुवो मनुः । प्रियव्रतोत्तानपादौ मनुपुत्रौ । यामादयो देवाः । मरीचिप्रमुखाः सप्त ऋषयः । यज्ञो हरेरवतारः । इंद्रश्च स एवेति तन्मन्वंतरं पंचविधमेव तच्चतुर्थस्कंधोपक्रमे निरूपितम् ॥ १८ ॥

संप्रतिष्ठाप्याहिंसन्सर्वाभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वेदं वर्त्तयन्यावदायुषम्" इति श्रुतिश्चात्तेति ॥ १४ ॥ पुनराशंकते—नन्विति । अवगुंठितः परिवेष्टितः । तस्य कर्माणि लोकसंग्रहार्थानि न त्वासक्तिपूर्वकाणीति वदति । ईहते कर्माणि करोति । तत्र कर्मसु । तत्र हेतुः—आत्मलाभेनेत्यादि । अत आसक्त्यभावात् । तम् ईशम् । एतेन कैमुत्यमुक्तं ये तमनुवर्तमानास्तेऽपि नावसीदंति किमुतेश इति ॥ १५ ॥ अतो नरानुरूपमार्गे स्थितत्वात् । तथापि कर्मकतृत्वेपि । पुनस्तथापि निरहंकृतत्वाद्यवत्त्वेपि । तत् नृशिक्षणम् । ननु नृशिक्षणमपि बहिरावेश एव तत्राह—निजा भक्तास्तेषां वर्त्मनि संस्थितं तदनुकूल्यायैव सर्वं कुर्वंतमित्यर्थः । अखिलधर्मप्रवर्त्तकमिति नृशिक्षणे हेतुः ॥ १६ ॥ मंत्रवर्णेन युक्तामुपनिषदं गोप्यविद्यां व्याहरंतमुच्चारयंतम् । यथा सुप्तोत्थितो घूर्णितनेत्रो विवशत्वेन किंचिद्वदतीति भावः ॥ १७ ॥ तानसुरादीन् । तथावसितान् हंतुं कृतनिश्चयान् । सर्वगत इति । यातुधानेष्वपि स एवेत्याह । तेनात्महननदोषप्रसक्तिवारणायाह—हरिरिति । स्वनामोच्चारयतामपि सर्वदोषहर्तुः कुतो दोषप्रसंगः "हरिरित्यवशेनाह पुमान्नार्हति यातनाम्" इत्याद्युक्तेः । इत्यर्थ इति । तदाऽन्यस्य तदधिकारिणोऽभावात्स्वयमेवेंद्रपदं पालयामासेति भावः । तत्र चतुर्दशमनुष्वेतन्मन्वंतरं पंचविधमेवेत्यन्वयः । तत्र चतुर्दशस्वाद्ये प्रथमे । स एव यज्ञावतार एव ॥ १८ ॥ ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः ॥ १९ ॥ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ॥ ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥ ऋषेस्तु वेदशिरसस्तुषितानामपत्न्यभूत् ॥ तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ २१ ॥ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ॥ अन्वशिक्षन्व्रतं तस्य कौमारं ब्रह्मचारिणः ॥ २२ ॥ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ॥ पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप ॥२३ ॥ वशिष्ठतनयाः सप्त ऋषयः प्रमदादयः ॥ सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित् ॥ २४ ॥ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः ॥ सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥ २५ ॥ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ॥ भूतद्रुहो भूतगणांस्त्ववधीत्सत्यजित्सखः ॥ २६ ॥ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः ॥ पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २७ ॥ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ॥ ज्योतिर्धामादयः सप्त ऋषयस्तामसेंतरे ॥ २८ ॥ देवा वैधृतयो नाम विधृतेस्तनया नृप ॥ नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥ २९ ॥ तत्रापि जज्ञे भगवान्हरिण्यां हरिमेधसः ॥ हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात् ॥ ३० ॥ राजोवाच ॥ बादरायण एतत्ते श्रोतुमिच्छामहे वयम् ॥ हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥ ३१ ॥ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभम् ॥ यत्रयत्रोत्तमश्लोको भगवान्गीयते हरिः ॥ ३२ ॥

द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादिष्टकमाह । स्वारोचिषो द्वितीयस्त्विति यावद्गजेंद्रमोक्षप्रश्नम् ॥ १९ ॥ २० ॥ २१ ॥ विभोरसाधारणं चरितमाह । अष्टाशीतिसहस्राणीति ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ सत्यजित इंद्रस्य सखा सन् ॥ २६ ॥ उत्तमस्तृतीयो मनुस्तस्य भ्राता तामसश्चतुर्थो मनुः ॥ २७ ॥ त्रिशिखनामा ईश्वर इंद्रः आसीत् ॥ २८ ॥ अन्यानपि विशिष्टपराक्रमान्देवानाह । देवा वैधृतय इति ॥ २९ ॥ हरिमेधसः पत्न्यां हरिण्यां नाम्ना हरिरित्याहृतो व्याहृतः । ग्रहात् ग्राहात् ॥ ३० ॥ अमूमुचत् मोचयामास ॥ ३१ ॥ श्रवणेच्छायां हेतुः । तत्कथासु तासु कथासु । सा कथैव वा सुमहत्पुण्यम् ।

तस्य स्वारोचिषस्य ॥ १९ ॥ तत्र स्वारोचिषेंतरे । आदिना पारावतादिग्रहः । द्वितीयादिना प्राणादिग्रहः । तदुक्तं मार्कंडेये "देवाः पारावताश्चैव तथैव तुषिता द्विज । ऊर्जस्तंबस्तथा प्राणो दत्तोलिर्ऋषभस्तथा ॥ निश्चरश्चार्ववीरश्च तत्र सप्तर्षयोऽभवन् ।" इति ॥ २० ॥ तस्यां तुषितायाम् । ततो वेदशिरसः ॥ २१ ॥ तस्य विभोः । व्रतं ब्रह्मचर्यं ये तेन्वशिक्षन् ॥ २२ ॥ तत्सुता उत्तमसुताः । आदिनोर्जादिग्रहः ॥ २३ ॥ आदिना द्युमदादिग्रहः ॥ २४ ॥ २५ ॥ स सत्यसेनः ॥ २६ ॥ आदिना शांतादिग्रहः ॥ २७ ॥ आदिना काव्यादिग्रहः । "ज्योतिर्द्धामा पृथुः काव्यश्चैत्रोऽग्निर्बलकस्तथा । पीवरश्च तथा ब्रह्मन्सप्त सप्तर्षयोऽभवन् ॥" इति मार्कंडेये ॥ २८ ॥ २९ ॥ तत्रापि तामसेंतरेपि । 'ग्रहग्राही तोयजीवे' इति निरुक्तिः ॥ ३० ॥ एतत् कथानकम् ॥ ३१ ॥ पूर्वव्याख्यातेऽवतारांतरकथापकर्षप्रतीतेराह—सा कथैवेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ॥ उवाच विप्राः प्रतिनंद्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम् ॥ ॥ ३३ ॥ इति श्रीभा० महा० अष्टमस्कंधे मन्वंतरानुचरिते प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ॥ क्षीरोदेनावृतः श्रीमान्योजनायुतमुच्छ्रितः ॥ १ ॥ तावता विस्तृतः पर्यक्त्रिभिः शृंगैः पयोनिधिम् ॥ दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥ ॥२॥ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसाम् ॥ ३ ॥ स चावनिज्यमानांघ्रिः समंतात्पयऊर्मिभिः ॥ करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥ सिद्धचारणगंधर्वविद्याधरमहोरगैः ॥ किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ॥ ५ ॥ यत्र संगीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंति हरयः श्लाघिनः परशंकया ॥ ६ ॥ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ॥ ७ ॥ सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः ॥ ८ ॥

पुण्यस्य विशेषणं धन्यमित्यादि ॥३२॥ ३३ ॥ इति श्रीमद्भागवते म० अष्टमस्कंधे टीकायां मन्वंतरानुचारितं नाम प्रथमोऽध्यायः ॥ १ ॥ तुर्ये मन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणम् ॥ द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥१॥ द्वितीये तु गजेंद्रस्य गजीभिः क्रीडतो जले ॥ दैवाद्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते ॥२॥ आसीदस्ति॥१॥ तावता योजनायुतेन । पर्यक् परितः । त्रिकूटसमाख्याबीजमाह । त्रिभिः शृंगैर्मुख्यैः ॥ २ ॥ अन्यैश्च शृंगैर्निर्झरांभसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्त इति पूर्वेणैवान्वयः । कथंभूतैः शृंगैः । रत्नैर्धातुभिश्च विचित्रितैः । नानाविधानां द्रुमलतानां गुल्मा येषु तैः ॥ ३ ॥ पयस ऊर्मिभिः समंतादवनिज्यमाना अंघ्रयो मूलप्रांता यस्य । हरिद्भिः पलाशवर्णैः ॥ ४ ॥ ५ ॥ किन्नरादीनां संगीतसन्नादैर्नदंत्यो गुहा यस्मिन्प्रदेशे तमभिगर्जंति । हरयः सिंहाः । अमर्षया असहनेन परमशंकया प्रतिस्पर्धिसिंहशंकया ॥ ६ ॥ नाना ये आरण्याः पशवस्तेषां व्रातैः संकुलाभिर्द्रोणीभिरलंकृत आस्ते । किं च चित्रा द्रुमा येषु तेषु सुरोद्यानेषु कलकंठा मधुरस्वना विहंगमा यस्मिन् ॥ ७ ॥ किं च स्वच्छोदकैः सरित्सरोभिर्युतः । मणय इव वालुका येषु तैः पुलिनैश्च युतः । देवस्त्रीणां मज्जनेन य आमोदस्तेन सौरभयुक्तान्यंबून्यनिलश्च तैश्च युत

अजहल्लिंगत्वात्स्त्रीत्वम् । उद्देश्यविधेयभावत्वाल्लिंगांतरविशेषणं न दोषायेति ॥ ३२ ॥ एवं हरिकथोत्कर्षवर्णनरीत्या ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे अष्टमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ तत् गजेंद्रमोक्षणम् (१) । दैवात्प्राक्पुण्योदयात् (२) । आसीदिति वर्तमाने लङार्षः । उच्छ्रित उच्चः ॥ १ ॥ २ ॥ ककुभो दिशः 'दिशस्तु ककुभः' इत्यमरः । रत्नैर्मण्यादिभिर्धातुभिर्गैरिकादिभिः । गुल्मास्तम्बाः ॥ ३ ॥ स च त्रिकूटः । अवनिज्यमानाः प्रक्षाल्यमानाः । मरकतः पाषाणभेदः ॥ ४ ॥ जुष्टकंदरः सेवितगुहः ॥ ५ ॥ यत्र पर्वतप्रांते । श्लाघिनः प्रख्यातबलाः । परशंकया सिंहांतरभ्रांत्या ॥ ६ ॥ पशवो मृगादयः । व्रातैः समूहैः । संकुलाभिर्व्याप्ताभिः । द्रोणीभिः कंदराभिः "द्रोणी काष्ठांबुवाहिन्यां पर्वतांतरनीवृतोः" इति निरुक्तिः । अन्यदाविष्क्यमाह–किञ्चेति । सुरोद्यानेष्विति बहुत्वोक्तेः सर्वलोकपालानां तत्रोद्यानानि संति ' तस्य द्रोण्यां भगवतो वरुणस्य ' इति वक्ष्यमाणोक्तिरुपलक्षणार्था । अन्यथा स्वामिव्याख्याव्याकोपः स्यादिति ॥७॥ अन्यदाह–किञ्चेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ॥ उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥ ९ ॥ सर्वतोऽलंकृतं दिव्यैर्नित्यंपुष्पफलद्रुमैः ॥ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः ॥ १० ॥ चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ॥ क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः ॥ ११ ॥ मधूकैः साल तालैश्च तमालैरसनार्जुनैः ॥ अरिष्टोदुंबरप्लक्षैर्वटैः किंशुकचंदनैः ॥ १२ ॥ पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः ॥ द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः ॥ १३ ॥ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः ॥ तस्मिन्सरः सुविपुलं लसत्कांचनपंकजम् ॥ १४ ॥ कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितम् ॥ मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः ॥ १५ ॥ हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् ॥ ॥ १६ ॥ मत्स्यकच्छपसंचारचलत्पद्मरजः पयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतम् ॥ १७ ॥ कुंदैः कुरबकाशोकैः शिरीषैः कुटजेंगुदैः ॥ कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥ १८ ॥ मल्लिकाशतपत्रैश्च माधवीजालकादिभिः ॥ शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलं द्रुमैः ॥ १९ ॥ तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् ॥ सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् ॥ २० ॥

आस्ते ॥ ८ ॥ तस्य द्रोण्यां वरुणस्योद्यानमास्ते सुरयोषिताम् आसमंतात् क्रीडा यस्मिन् । नाम्ना ऋतुमत् ॥९॥ गिरिवनादि सर्वं ध्येयमिति वक्ष्यत्यतो गिरिमुपवर्ण्य वनं वर्णयति । सर्वतोऽलंकृतमिति । नित्यं पुष्पाणि च फलानि च येषु तैर्द्रुमैः । अत एव ऋतुमदिति समाख्यायुक्तम् । पुनर्गिरिं वर्णयति मंदारैरिति चतुर्भिः । मंदारादिभिर्वृत इत्यन्वयः ॥१०॥ चूताम्रयोरवांतरभेदः॥११॥१२॥ अक्षो बिभीतकः अभया हरीतकी आमलो धात्री तैः ॥ १३ ॥ तस्मिन् गिरौ सर आस्ते । तद्वर्णयति सुविपुलमित्या दिसार्धैः पंचभिः । लसंति कांचनपंकजानि यस्मिन् ॥ १४ ॥ कुमुदादीनां श्रिया ऊर्जितं समृद्धम् । कलः स्वनो येषां तैः शकुंतैश्च निर्घुष्टम् ॥ १५ ॥ चक्राह्वैश्चक्रवाकैः सारसैरप्याकीर्णम् । जलकुक्कुटादीनां कुलैः कूजितम् ॥ १६ ॥ मत्स्यानां कच्छपानां च संचारेण चलतां पद्मानां रजसा युक्तं पयो यस्मिंस्तत् ॥ १७ ॥ १८ ॥ नित्यमृतवः फलपुष्पादिसंपत्तिहेतवो येषां तैरलं शोभितम् ॥ १९ ॥ तत्रैवं सत्येकदा तद्गिरिकाननाश्रयो वारणयूथपः करेणुभिर्हस्तिनीभिः सह चरंस्तृषार्दितेन स्वयूथेन

मणय इव देदीप्यमाना वालुकाः सिकताः पुलिनैस्तोयोत्थितसैकततटैः " वालुका सिकतासु स्यात्पुलिनं तोयनिर्गतम् । तटम् " इति कोशः ॥ ८ ॥ तस्य त्रिकूटस्य । ऋतवो हेमंतादयो विद्यंते नित्यं यत्र तदृतुमत् । नित्ययोगे मतुप् । तदेवाह—नित्यपुष्पेति ॥ ९ ॥ १० ॥ चूतैः अम्लैः । आम्रैः मधुरैः । क्रमुकैः पूगैः ॥ ११ ॥ अरिष्टो बृहत्पत्रो निंबः । किंशुकः पलाशः ॥ १२ ॥ पिचुमन्दो निम्बः । सरलो गुग्गुलुः । रंभा कदली ॥ १३ ॥ आदिना तिंदुकादिग्रहः ॥ १४ ॥ शकुंतैः पक्षिभिः ॥ १५ ॥ समासांतर्गतमपि क्वचिदन्वेति प्रतिपादितं चैतदधस्तात् । कोयष्टिरपि जलपक्षी । दात्यूहश्चातकः ॥ १६ ॥ नलः पोतगलः । नीप कदंबौ किंचिद्भिन्नौ । वंजुलो झावुको वेत्रभेदो वा ॥ १७ ॥ कुरबकः अशोको द्विविधः सितरक्तपुष्पभेदेन । कुटजो गिरिमल्लिका । इंगुदी तापसतरुः । कुब्जकं भ्रमरीपुष्पम् । स्वर्णः कृतमालः ॥ १८ ॥ शतपत्रं कमलाद्भिन्नम् । जालकं मुकुलिता लता । " अलंद्रुमः स विज्ञेयो नित्यपुष्पफलोद्गमः " इत्युक्तेर्वृक्षविशेषो वा ॥ १९ ॥ तत्रेत्यव्ययमेवं सतीत्यर्थे । तत्रोद्याने वा । ते वर्णिते गिरिकानने आश्रयो निवासस्थलं यस्य स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः ॥ महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः शरभाश्चमर्यः ॥ २१ ॥ वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च ॥ अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण ॥ २२ ॥ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ॥ गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ २३ ॥ सरोऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ॥ वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद् द्रुतम् ॥ २४ ॥ विगाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितम् ॥ पपौ निकामं निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः ॥ २५ ॥ स पुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही ॥ घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ॥ २६ ॥ तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत् ॥ यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥ २७ ॥ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ॥ विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ॥ २८ ॥

वृतः सरोवरस्याभ्याशं समीपमगमदिति पंचमेनान्वयः । किं कुर्वन् । कीचकवेणुवेत्रवंतं विशालं महांतं गुल्मं लतादिसंदर्भं वनस्पतींश्च प्ररुजन्प्रभंजन् ॥ २० ॥ कथंभूतः । यस्य गंधमात्राद्धरयः सिंहा गजेंद्रादयश्च भयाद् द्रवंति पलायंते॥ २१ ॥वृकादयः क्षुद्रा अल्पाः प्राणिनोऽन्यत्र तद्दृष्टिपथं त्यक्त्वा चरंति ॥ २२॥ पुनः कीदृशः । घर्मतप्तः । मदच्युन्मदस्रावी । कलभैः करिशावकैरनुगतः । गरिम्णा गुरुत्वेन । मदमश्नंतीति तथा तैः ॥ २३ ॥ पंकजपरागमिश्रं सरःसंबंधिनं वायुं जिघ्रन् ॥ २४॥ निजेन पुष्करेण कराग्रेणोद्धृतम् । गतक्लमः सन्निकामं पपौ ॥ २५ ॥ २६ ॥ २७ ॥ दीनधियः करेणवस्तं केवलं विचुकुशुः । अपरे गजास्तु पार्ष्णिग्रहाः संतोऽपि तं तारयितुं

तथा । वारणानां हस्तिनां यूथपः । करेणुभिरिभीभिः ‘ करेणुरिभ्यां स्त्री नेभे ’ इत्यमरः ॥२०॥ आदिना चित्रकादिग्रहः । व्यालमृगाः सर्पाकारा मृगाः । खड्गो गंडकः । गौरकृष्णचमर्यो मृगभेदाः । शरभोष्टापदः सिंहहंता ॥ २१ ॥ वृको व्याघ्रभेदः । शल्यः श्वावित् । अभीताः सिंहादिभयहीनाः । यदनुग्रहेण गजेंद्रकृपया ॥ २२ ॥ स हस्तींद्रः । घर्मतप्तः सूर्यातपतप्तः । ‘ कलभो हस्तिशावकः ’ इत्यमरः । गरिम्णा स्वांगगौरवेण । मदाशनैर्दानभोजनैः ॥ २३ ॥ सरस्संबंध्यनलो वायुस्तं पंकजानां रेणुभिः परागै रूषितं युक्तम् । द्रुतं शीघ्रम् ॥ २४ ॥ विगाह्य विलोड्य । तस्मिन् सरसि । अमृतांबु सुधास्वादुजलम् ॥२५ ॥ करेणूः कलभांश्च । निपाययन् पानं कारयन् । स्नपयन् स्नानं च कारयन् । यथा गृहस्थः स्वपुत्रादींस्नपयति पाययति च तद्वदित्यर्थः । घृणी सानुकंपः । ‘‘घृणा जुगुप्साकृपयोः’’ इति मेदिनी । दुर्मदो मत्तः । कृपणः मूढः ‘‘मूढे दीने कातरे च निंदिते कृपणः खलः’’इति धरणिः॥२६॥तं गजेंद्रम् । तत्र सरसि । यदृच्छया दैवेच्छया । एवं व्यसनं पादग्रहणदुःखम् । स गजः । यथाबलं स्वबलानुरूपम् । विचक्रमे विक्रमं चकार॥२७॥तथातुरं पादग्रहाद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः शांताय घोराय मूढाय गुणधर्मिणे ॥ निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥ १२ ॥ क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ॥ पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥ १३ ॥ सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ॥ असताच्छाययोक्ताय सदाभासाय ते नमः ॥ १४ ॥ नमोनमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवाय नमोऽपवर्गाय परायणाय ॥ १५ ॥ गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ॥ नैष्कर्म्यभावेन विवर्जितागमस्वयंप्रकाशाय नमस्करोमि ॥ १६ ॥ मादृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय नमोऽलयाय ॥ स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥ १७ ॥

त्वाः" इति श्रुतेः । प्रतिलभ्याय प्रत्यक्त्वेन प्राप्याय । निर्वाणसुखसंविदे मोक्षानंदानुभूतये ॥ ११ ॥ शांताय सत्वानुसारिणे घोराय रजोऽनुसारिणे मूढाय तमोगुणधर्मिणे सत्त्वादिधर्मानुकारिणे । ज्ञानघनाय चेति निर्विशेषत्वेऽपि प्रधानवैलक्षण्यमुक्तम् ॥ १२ ॥ साक्षिण इति सर्वाध्यक्षत्वेऽपि निर्विकारत्वमुक्तम् । आत्मनां क्षेत्रज्ञानां मूलाय मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे । तत्र हेतुः । पुरुषाय पूर्वमेव सते । तथा च श्रुतिः । "पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वम्" इति । पूर्णायेति वा ॥ १३ ॥ सर्वेंद्रियाणां ये गुणा विषयास्तेषां द्रष्ट्रे । सर्वे प्रत्यया इंद्रियवृत्तयो हेतवो ज्ञापका यस्य तस्मै । तदेवाह । असताऽहंकारादिप्रपंचेन । छाययाऽसद्रूपया उक्ताय जलस्थप्रतिबिंबेन बिंबं यथा सूच्यते तथा सूचिताय । तत्र हेतुः सद्रूपो विषयेष्वाभासो यस्य तस्मै । तदुक्तं तृतीये 'यथा जलस्थ आभासः' इत्यादिना । पाठांतरे असत्यस्य छाययाऽध्यासेनाक्ताय युक्ताय तदधिष्ठानायेत्यर्थः ॥ १४ ॥ अखिलकारणाय सर्वकारणरूपाय । अत एव स्वयं निष्कारणाय । कारणत्वेऽपि मृदादिवद्विकारं वारयति । अद्भुतकारणायेति । एवंभूतत्वे प्रमाणमाह । सर्वे आगमाः पंचरात्रादय आम्नायाश्च वेदास्तेषां महार्णवाय स्रोतसामिव पर्यवसानस्थानाय । अपवर्गाय मोक्षरूपाय । अतः परायणायोत्तमानामाश्रयाय ॥ १५ ॥ गुणा एवारणिस्तया छन्नश्चिदूष्मपो ज्ञानाग्निस्तस्मै । तेषां गुणानां क्षोभे कार्ये विस्फूर्जितं बहिर्वृत्तिकं मानसं यस्य । "सोऽकामयत बहु स्याम्" इति श्रुतेः । नैष्कर्म्यमात्मतत्त्वं तस्य भावेन भावनया विवर्जिता आगमा विधिनिषेधलक्षणा यैस्तेषु स्वयमेव प्रकाशो यस्य तस्मै ॥ १६ ॥ मादृक् मद्विधश्चासौ

माह—संन्यासेत्यादि । प्रत्यक्त्वेन जीवाभिन्नत्वेन ॥ ११ ॥ ज्ञानघनाय ज्ञानाकाराय ॥ १२ ॥ तत्र प्रकृत्युद्भवहेतुत्वे । सर्वपूर्वत्वे प्रमाणमाह—तथा चेति । आत्ममूलायेत्युक्तेरेवैतदर्थसिद्धेराह—पूर्णाय वेति ॥ १३ ॥ सर्वेन्द्रियाणां श्रोत्रादीनाम् । विषयाः शब्दादयः । द्रष्ट्रे साक्षिणे । तदेव इंद्रियवृत्तिज्ञाप्यत्वमेव । अहंकारादिप्रपंचरूपया छायया सूचिताय यथा प्रतिबिम्बेन बिम्बः सूच्यते तथा बिंबस्थानीयो हरिः प्रतिबिम्बस्थानीयोऽहंकारादिप्रपंच इति विवेकः । तत्राहंकारादिप्रपञ्चसूचितत्वे । पाठांतरे 'असत्यच्छाययाक्ताय' इति पाठे । इत्यर्थ इति । वस्तुतः प्रपञ्चसंबंधशून्यत्वेपि विवर्त्ताधिष्ठानत्वेन तत्संबंधिवत्प्रतीयमानायेति भावः ॥ १४ ॥ सर्वाणि कारकाणि कर्तृकर्मकरणसंप्रदानापादानाधिकरणाख्यानि तद्रूपाय । अत एव सर्वकारकरूपत्वादेव । स्वस्य कारणांतररहिताय । अद्भुतमन्यत्रादृष्टश्रुतचरं यादृक् तादृक् कारणत्वं यस्मिन्स तथा भावप्रधानो निर्देशः । एवंभूतत्वेऽद्भुतकारणत्वे । आदिना विष्णुयामलादिग्रहः । पर्यवसानस्थानाय सर्वशास्त्रतात्पर्यरूपाय । सर्वैः शास्त्रैरित्थमेव प्रतिपादितायेति भावः । अतो मोक्षरूपत्वात् । उत्तमानां भक्तियोगादिनिष्ठानामाश्रयाय प्राप्याय ॥ १५ ॥ अरणिर्मथनकाष्ठरूपा तस्मै ज्ञानाग्निरूपाय । बहिर्वृत्तिमानसत्वे श्रुतिमाह—स इत्यादि । नैष्कर्म्येत्यादेरद्वैतज्ञानप्राप्यायेत्यर्थः ॥ १६ ॥ तत्र मोक्षणे । करुणा दया । अतो भूरिकरुणत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ॥ तथाऽपि लोकाप्ययसंभवाय यः स्वमायया तान्यनुकालमृच्छति ॥ ८ ॥ तस्मै नमः परेशाय ब्रह्मणेऽनंतशक्तये ॥ अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥ नम आत्मप्रदीपाय साक्षिणे परमात्मने ॥ नमो गिरां विदूराय मनसश्चेतसामपि ॥ १० ॥ सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ॥ नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥

भूतानामात्मभूता भूतेष्वात्मदृष्टयः संतः । स मे गतिरस्तु ॥७॥ दुरत्ययानुक्रमणत्वं प्रपंचयन्प्रणमति न विद्यत इत्यादिना । लोकानामप्ययः प्रलयः संभवो जन्म तयोर्द्वंद्वैक्यम् । तदर्थं यस्तानि जन्मादीनि स्वीकरोति तस्मै नम इत्युत्तरेणान्वयः ॥ ८ ॥ ब्रह्मणेऽरूपाय । अनंतशक्तये उरुरूपाय अत आश्चर्याणि कर्माणि यस्य तस्मै परेशाय नमः ॥ ९ ॥ आत्मप्रदीपाय प्रकाशांतरस्याविषयाय । कुतः । साक्षिणे प्रकाशकाय । परमात्मने जीवनियंत्रे । अत एव गिरां विदूरायाप्राप्याय । चेतसां चित्तवृत्तीनाम् । तथा च श्रुतिः । "यतो वाचो निवर्तंते अप्राप्य मनसा सह " इति ॥ १० ॥ एवमपि विपश्चिता निपुणेन । नैष्कर्म्येण संन्यासेन । सत्त्वेन शुद्धेन । " संन्यासयोगाद्यतयः शुद्धस

सदाचारप्रवृत्ताः । सुहृदो दयालवः । गतिर्गम्यः ॥७॥ गुणेन सहितो दोषो गुणदोषः । 'गुणदोषम्' इति पाठे समाहारद्वंद्वः । यद्यप्येवं वस्तुतोऽस्ति तथापीति । यद्वेतरेतरयोगेप्येकत्वम् "ऊकालोज्झस्वदीर्घप्लुतः" इतिवत् । संभवः सृष्टिः । स्वमायया मायिकतमोरजोभ्यां रुद्ररूपेण ब्रह्मरूपेण च । तानि जन्मकर्मादीनि । अनुकालं प्रतिप्रलयसृष्टिसमये । ऋच्छति प्राप्नोति । अत्र लोकस्थित्यर्थं विष्णुजन्मादीनि न निर्दिष्टानि तेषां मायिकत्वाभावात् । अमायिकजन्मादीनि तु नानेन निषिध्यंते । तानि देवक्यादिजन्म गोवर्द्धनधारणादिकर्म रामकृष्णादि नाम रूपाणि स्वरूपभूतान्येव न निषेद्धुं शक्यंते । श्रुत्यापि "निष्क्रियं निष्कलं शांतं निरवद्यं निरंजनम् । अशब्दमस्पर्शमरूपमव्ययम्" इत्यादौ मायिकं निषिध्य "स सर्वकर्मा सर्वगंधः सर्वरसः सर्वकामः" इत्यमायिकं कर्मादि विधीयते इति । अत एव श्रीवैष्णवे 'गुणांश्च दोषांश्च मुने व्यतीतः' इत्युक्त्वा पुनराह—'सम स्तकल्याणगुणात्मको हि' इति। तथा "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥" इति । पाद्मोत्तरखंडे च—"योऽसौ निर्गुण इत्युक्तः शास्त्रेषु जगदीश्वरः । प्राकृतैर्हेयसंयुक्तैर्गुणैर्हेयत्व मुच्यते ॥" इति । हेयसंयुक्तैर्हेयत्वसंयुक्तैः । प्राकृता गुणा हि हेया भवंतीति भावः । नाम्नश्चिन्मयत्वं श्रुतिराह यथा "ॐ आस्य जानंतो नाम चिद्विविक्तन महस्ते विष्णो स्वमतिं भजामहे ॐ तत्सत्" इति । श्रुत्यर्थस्तु—हे विष्णो ते तव नाम चित् चित्स्वरूपम् । अत एव महः स्वप्रकाशरूपं तस्मादस्य नाम्न आ ईषदेव जानंतो वयं न तु सम्यक् उच्चारणमाहात्म्यादिपुरस्कारेणेत्यर्थः । तथापि विविक्तन ब्रुवाणाः केवलं तदभ्यासमात्रं कुर्वाणाः । सुमतिं शोभनां तद्विषयां बुद्धिं भजामहे प्राप्नुमः । यतस्तदेव नाम ॐ प्रणवः । सत्स्वतःसिद्धमिति अनुकालं नित्यमेव । ननु कथं जन्मकर्मणोर्नित्यत्वं ते हि क्रिये सा चारंभसमाप्तिभ्यामेव सिध्यति ते विना क्रियात्वासिद्धेः । नैवं दोषः श्रीभगवति सदैवाकारानंत्यात् जन्मकर्मलक्षणलीलानंत्यादनंतप्रपंचानंतवैकुंठगततत्तल्लीलास्थानपरिकराणां व्यक्तिप्रकाशयोरानंत्याच्च । अत एवोक्तं ब्रह्मणा 'को वेत्ति भूमन्भगवन्परात्मनः' इत्यादि । क्वचिल्लीलारंभः क्वचित्समाप्तिश्चेत्यविच्छेदान्नित्यतैवेति श्रीगीतास्वपि "जन्म कर्म च मे दिव्यम्' इत्यादिना तथैवोपपादितमिति संदर्भः ॥ ८ ॥ परेषां ब्रह्मादीनामीशः । परश्चासावीशश्चेति वा तथा तस्मै । अरूपाय वस्तुतो रूपरहिताय । अतोऽरूपत्वे बहुरूपत्वात् । अरूपाय प्राकृतरूपरहिताय । उरुरूपाय अप्राकृतचिन्मयरामकृष्णादिबहुरूपायेति विश्वनाथः ॥ ९ ॥ प्रकाशांतरस्य सूर्यादेरगोचराय प्रत्युत सूर्यादिरेव तद्गोचरः "येनेद्धः सूर्यस्तपति" इत्यादिश्रुतेः । तत्र हेतुमाह—कुत इति । अत एव साक्षित्वादेरेव । प्रमाणं चात्र तथा चेति ॥ १० ॥ एवमपि वाचाद्यगोचरत्वेपि । नैष्कर्म्यादिप्राप्यत्वे श्रुति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः ॥ समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः ॥ २९ ॥ ततो गजेंद्रस्य मनो बलौजसां कालेन दीर्घेण महानभूद्व्ययः ॥ विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ॥ ३० ॥ इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया ॥ अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥ ३१ ॥ न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवंति मोचितुम् ॥ ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ॥ ३२ ॥ यः कश्चनेशो बलिनोंतकोरगात्प्रचंडवेगादभिधावतो भृशम् ॥ भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ॥ ३३ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णने गजेंद्रोपाख्याने द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ॥ जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥ १ ॥ गजेंद्र उवाच ॥ ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् ॥ पुरुषायादिबीजाय परेशायाभिधीमहि ॥ २ ॥

नाशकन् ॥ २८ ॥ २९ ॥ मन उत्साहशक्तिर्बलं शारीरमोज ऐंद्रियं तेषाम् । सकलं बलादि । विपर्ययो विपरीतमधिकम् । जलौकसो ग्राहस्य ॥ ३० ॥ स इत्थं यदा प्राणस्य संकटमाप । यतो देही ॥ ३१ ॥ तां बुद्धिमेवाह । न मामिति । अहं न च प्रभवामि यतो ग्राहरूपेण केवलं विधातुः पाशेनावृतस्तथाऽपि तं परं परमेश्वरं परेषां ब्रह्मादीनामयनमाश्रयभूतं यामि शरणं व्रजामि ॥ ३२ ॥ कोऽसौ यं शरणं यासि तत्राह । यः कश्चनेति । अंतक एवोरगस्तस्मात् । तमरणं शरणमीमहि व्रजेम । यद्भयादित्यत्र श्रुतिः । "भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषाऽस्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचमः ॥" इति ॥ ३३ ॥ इति श्रीमद्भागवते म० अष्टमस्कंधे टीकायां गजेंद्रोपाख्याने द्वितीयोऽध्यायः ॥ २ ॥ तृतीये तु गजेंद्रेण स्तुतो हरिरुपेत्य तम् ॥ समुद्दधार तं ग्राहाद् ग्राहं देवलशापतः ॥ १ ॥ जाप्यं जप्यं स्तोत्रम् । प्राग्जन्मनि इंद्रद्युम्नसंज्ञे ॥ १ ॥ तस्मै नमो नमनमभिधीमह्यभिध्यायेम केवलम् । ग्राहगृहीतत्वेन कायप्रणतेरशक्यत्वात् । स्वस्य तज्ज्ञानं संभावयितुं विशिनष्टि । यतश्चिद्रूपादे तद्देहादिचिदात्मकं चेतनं भवति । तदुक्तम् । "येन चेतयते विश्वम्" इति । तत्र हेतुः । पुरुषाय पूर्षु कारणत्वेन प्रविष्टाय । ननु प्रकृतिपुरुषौ कारणमिति प्रसिद्धं तत्राह ।

वशम् । बलीयसा ग्राहेण । तरसा बलेन 'तरो बले च रोगे च' इति मेदिनी । पार्ष्णिग्रहाः सहायाः ॥ २८ ॥ अंतरतो ग्राहः । बहिर्गजः । सप्राणयोः सबलयोः "प्राणो हृन्मारुते जीव बले वायौ रमेश्वरे" इति धराणिः ॥ २९ ॥ ततः अन्योन्ययुद्धोत्तरम् । दीर्घेण सहस्रवर्षपरिमाणेन । महान् अतीव । व्ययो ह्रासः ॥ ३० ॥ यतो हेतोः । देहिनां द्वंद्वसंबंधस्यावश्यंभावित्वात् । अपारयन्नशक्नुवन् । इमां वक्ष्यमाणाम् ॥ ३१ ॥ प्रभवंति समर्था भवंति । यद्यपीत्थं तथापीति । यः कश्चनेत्यनिर्वचनीयतामाह । उरगः सर्पः ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ तं गजेंद्रं ग्राहाद् ग्राहं च देवलशापतः समुद्धारेति योज्यम् (१) । एवम् उक्तरीत्या । व्यवसितः कृतनिश्चयः ॥ १ ॥ तत्र विश्वचेतयितृत्वे । "पूर्वमेवमिहासमिति तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः । सर्वाप्रभवत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ॥ योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ॥ ३ ॥ यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितम् ॥ अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥४॥ कालेन पंचत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ॥ तमस्तदासीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ॥ ५ ॥ न यस्य देवा ऋषयः पदं विदुर्जंतुः पुनः कोऽर्हति गंतुमीरितुम् ॥ यथा नटस्याकृतिभिर्विचेष्टितो दुरत्ययानुक्रमणः स मावतु ॥ ६ ॥ दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः सुसाधवः ॥ चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः ॥ ७ ॥

आदिः प्रकृतिर्बीजं पुरुषस्तद्रूपाय । प्रविष्टत्वेऽपि जीववत्पारतंत्र्यं वारयति । परेशायेति ॥ २ ॥ परमैश्वर्यं विवृण्वन्नाह यावत्समाप्ति । यस्मिन्नधिष्ठाने यत उपादानाद्येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति । अस्मात्कार्यात्परस्मात्कारणाच्च यः परस्तं स्वयंभुवं स्वतःसिद्धं प्रपद्ये शरणं व्रजामि ॥ ३ ॥ विश्वहेतुत्वं स्वतःसिद्धत्वं चोक्तमिदानीं विश्वप्रकाशकत्वं वर्णयन्प्रार्थयते । यः स्वात्मनीति । विभातमभिव्यक्तं सत्क्वचित्प्रलये तिरोहितं लीनं सत् । तदुभयं कार्यं कारणं च साक्षी सन्नीक्षते । साक्षित्वे हेतुः । अविद्धदृगलुप्तदृष्टिः । आत्ममूलः स्वयंप्रकाशः । कुतः । परात्प्रकाशकाच्चक्षूरादेरपि परस्तस्यापि प्रकाशक इत्यर्थः । "चक्षुषश्चक्षुः" इत्यादिश्रुतेः ॥ ४ ॥ तिरोहितमीक्षत इत्येतत्प्रपंचपूर्वकं दुर्ज्ञेयत्वं वदन्प्रार्थयते कालेनेति द्वाभ्याम् । पंचत्वमितेषु नाशं प्राप्तेषु । गहनं दुरवगाहम् । गभीरमनंतम् । तस्य तमसः । "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः ॥ ५ ॥ अत एव देवादयो यस्य स्वरूपं न विदुः । जंतुरर्वाचीनः कोऽपि गंतुं ज्ञातुमीरितुं वक्तुं वा । दुरत्ययं दुर्गममनुक्रमणं चरितं कथनं वा यस्य सः । मा माम् ॥ ६ ॥ कथं तर्हि "तमेव विदित्वाऽतिमृत्युमेति" इत्यादिश्रुतिरित्याशंक्य तज्ज्ञानोपायं कथयन्नाह । दिदृक्षव इति । अलोकव्रतं ब्रह्मचर्यादि । अव्रणमच्छिद्रम् ।

त्कारणत्वम् । अंत्राशंकते–नन्विति । तद्रूपाय प्रकृतिपुरुषौ न ततो भिन्नावित्यर्थः । परेशाय स्वतंत्राय ॥ २ ॥ यस्मिन्नधिष्ठाने–" परमे व्योमन्सर्वा भूतानि " । यतश्चेदं–" यतो वा इमानि भूतानि" येनेदं–"येन जातानि जीवंति " इति । य इदं–"सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतिभ्यः योऽस्मात्प्रपंचात्परस्माच्च तद्धेतुभूतात्प्रकृतेः परोन्यः " यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः । अतोऽस्मि वेदे लोके च प्रथितः पुरुषोत्तमः ॥ " इति श्रीमुखोक्तेः । " अक्षरात्परतः परः" इति श्रुतेश्च ॥ ३ ॥ इत्यर्थ इति । जडानां स्वतः प्रकाशो न भवतीति भावः । अत्र मानम्–" चक्षुषश्च " इत्यादिश्रुतिः । " पुरुषान्न परं किञ्चित् " इति श्रुतेश्च ॥ ४ ॥ सर्वहेतुषु महदादिषु । नाशं प्राप्तेषु कारणतां गतेषु । तमःपारप्रकाशत्वे प्रमाणमाह–आदित्येति । आदित्यवर्णं ज्योतिःस्वरूपं तमसोऽविद्यातः ॥ ५ ॥ अत एव दुर्ज्ञेयत्वादेव । " पदं स्थानस्वरूपांघ्रिलक्ष्मनिश्चयहेतुषु " इति कोशात् । आकृतिभिर्हनुमदाद्याकारैः । विविधां चेष्टां कुर्वतो नटस्य यथा स्वरूपं न ज्ञायते तद्वदित्यर्थः ॥ ६ ॥ यद्येवं सर्वथा दुर्ज्ञेय एव तर्हि श्रुतिविरोधः स्यादित्याह–कथं तर्हीति । तमात्मानं विदित्वा ज्ञात्वा मृत्युं संसारमत्येयुलंघ्य मुक्तो भवतीति श्रुत्यर्थः । तज्ज्ञानोपायं दुर्ज्ञेयस्याप्यात्मनो ज्ञानयत्नम् । यस्य भगवतः । सुमंगलममंगलहरम् । सुसाधवोऽतिशयेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसंगविवर्जिताय ॥ मुक्तात्मभिः स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥ १८ ॥ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमाप्नुवंति ॥ किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् ॥१९॥ एकांतिनो यस्य न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः ॥ अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्रमग्नाः ॥ २० ॥ तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ॥ अतींद्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे ॥ २१ ॥ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ॥ नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥ २२ ॥

प्रपन्नः पशुस्तस्य पाशोऽविद्या तस्य विशेषेण मोक्षणं येन । तत्र योग्यतामाह । मुक्ताय । मोचने हेतुः । भूरिः करुणा यस्य । अतस्तत्रार्थेऽलयायानलसाय । स्वांशेनांतर्यामिरूपेण सर्वेषां तनुभृतां मनसि प्रतीता प्रख्याता या प्रत्यक् दृक्तस्मै । तथा च श्रुतिः । "य आत्मनि तिष्ठन्नात्मानमंतरो यमयति" इति । भगवते सर्वेषां तनुभृतां नियमने समर्थाय । तेषां मनःस्थितत्वेऽपि बृहतेऽपरिच्छिन्नाय ॥ १७ ॥ अंतःस्थत्वेऽपि देहादिष्वासक्तैर्दुष्प्रापणाय प्राप्तुमशक्याय । तत्र हेतुः । गुणसंगेन विवर्जिताय अत एव मुक्तात्मभिर्देहादिष्वनासक्तैश्चिंतिताय । तैः परिभावितं रूपमाह ज्ञानात्मन इत्यादि ॥ १८ ॥ इष्टां गतिं कामितं धर्मादिफलं प्राप्नुवंत्येव न तु तावदेव । किं तु यास्तैरकामिता अन्या अप्याशिषो राति । देहमप्यव्ययं राति । एवं योऽदभ्रदयः स मे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थये ॥ १९ ॥ एतावदप्यहं भक्तिसुखानभिज्ञत्वेन वांछामि । यस्यैकांतभक्ता न कंचिदर्थं वांछंति तं परेशं परमेश्वरमीडे स्तौमीत्युत्तरेणान्वयः । तेषां निष्कामत्वे हेतुः । ये वै भगवतः सर्वज्ञानयुक्तान्प्रपन्नाः सेवितवंतः ॥ २० ॥ अत्यद्भुतसुमंगलत्वप्रदर्शनार्थमक्षरत्वादीनि विशेषणानि ॥ २१ ॥ परिपूर्णत्वं प्रदर्शयन्नाह त्रिभिः । यस्येति । यस्य फल्ग्व्या च स्वल्पयैव कलयांशेन

तत्र मोचनरूपेऽर्थे । प्रत्यग्रूपत्वे प्रमाणमाह—य इत्यादि । श्रुतिस्तु व्याख्यातप्रायैव। यद्वा मुक्ताय मादृग्भिरेतावंतं कालमसेविताय तदपि मादृग्भ्यो न तु क्रुध्यते प्रत्युत भूरिकरुणाय तत्र हेतुः—अमलाय प्राकृतानामिवेर्ष्याहीनत्वादिति भावः ॥ १७ ॥ आप्ताः प्रियसुहृदः । तत्र प्राप्तुमशक्यत्वे । अत एव गुणसंगविवर्जितत्वादेव । भावितं चिंतितम् । यद्वा—मुक्तात्मभिरात्मघातिभिः । परिभाविताय मायिकविग्रहोऽयमिति दृष्ट्या तिरस्कृताय । वस्तुतस्तु—ज्ञानात्मने ज्ञानं पूर्णं चिदेवात्मा वपुर्यस्य तस्मै ॥ १८॥ अदभ्रदयोऽत्यंतकृपालुः। आशिषः सामीप्याद्याः । अव्ययमनश्वरं देहं पार्षददेहं ध्रुवादिभ्य इव रात्येव विमोक्षणं संसाराद्ग्राहाच्च नित्यसिद्धदेहं प्रेमभक्तिं च ददात्विति भावः ॥ १९ ॥ तेषामेकांतिनाम् ॥ २० ॥ अक्षरम् " एतस्याक्षरस्य " इत्यादिश्रुतेः । परम् " अक्षरात्परमः परः " इति। " अव्यक्तमचलं शांतम् " इति । " अध्यात्मयोगेन सुनिश्चितेन " यद्वात्मानं तमेवाधिकृत्य यो योगो भक्त्याख्यस्तेन गम्यम् ' भक्त्याहमेकया ग्राह्यः ' इति तदुक्तेः। " ज्ञात्वा देवं शोकमोहौ जहाति " इति । " यतो वाचो निवर्त्तंते " इति । " सूक्ष्मात्सूक्ष्मतरं प्रपद्ये " इति । " तद्दूरे तदंतिके " इति । "सत्यं ज्ञानमनन्तम्" इति । "यो देवानां प्रथमं पुरस्तात्" इति। "पूर्णमदः पूर्णमिदम्" इत्यादिश्रुतिः । "पूर्णस्य पूर्णत्वमादाय" इत्यादिश्रुतिप्रतिपादितार्थेनात्र स्तुतिः ॥२१॥ यस्य हरेः । अंशेन मायारूपेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाऽर्चिषोऽग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरोचिषः ॥ तथा यतोऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥ २३ ॥ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षंढो न पुमान्न जंतुः ॥ नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥ २४ ॥ जिजीविषे नाहमिहाऽमुया किमंतर्बहिश्चावृतयेभयोन्या ॥ इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षम् ॥ २५ ॥ सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ॥ विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥ २६ ॥

कृताः स जयतादिति तृतीयेनान्वयः ॥ २२ ॥ कथं कृता इत्यपेक्षायां दृष्टांतौ । यथाऽर्चिषोऽग्नेरिति प्रवाहे दृष्टांतः । सवितुर्गभस्तय इत्यानंत्ये । निर्यांत्युद्गच्छंति । संयांति लीयंते । गुणसंप्रवाहमेवाह । बुद्धिर्मन इति । खानि करणानि शरीरसर्गाः कार्यदेहप्रवाहाश्च यतो भवंति सः ॥ २३ ॥ अत एव देवादीनां मध्ये कोऽपि न भवति । न जंतुर्लिंगत्रयशून्यं प्राणिमात्रमपि किं तु सर्वस्य निषेधेऽवधित्वेनावशिष्यत इति निषेधशेषो मायया अशेषोऽशेषात्मकश्च जयतान्मद्विमोक्षणायाविर्भवतु ॥ २४ ॥ न च ग्राहाच्छरीरस्य मोक्षणेनाहं जीवितुमिच्छामि । तत्र हेतुः । अमुया अंतर्बहिश्चाविवेकेन व्याप्तया गजजात्या किं प्रयोजनम् । आत्मलोकस्यात्मप्रकाशस्य यदावरणमज्ञानं तस्यैव तु मोक्षमिच्छामि । यस्य मोक्षस्य कालेन नाशो नास्ति । यद्वा । देहस्य बंधो देहनाशे गजयोनिर्नश्येदेव किं तन्मोक्षप्रार्थनेन । आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति ज्ञानैकनिवर्त्यत्वात् । अतस्तस्यैव मोक्षमिच्छामीत्यर्थः ॥ २५ ॥ सोऽहं मुमुक्षुः । विश्वं विश्वरूपम् । अविश्वं विश्वव्यतिरिक्तं च । विश्वं वेदो धन

"कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया" इति वैतथ्योक्तेः । विश्वनाथस्तु—कला द्विधा फल्गुरफल्गुश्च । तत्राद्या ब्रह्मेंद्ररुद्रादिजीवरूपा । द्वितीया मत्स्यकूर्मादीश्वररूपा चेति स एव सर्व इत्यर्थः । वेदास्तु तन्निःश्वासत्वेन तद्रूपत्वादफल्गव एवेत्याह ॥२२॥ "यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंति" इत्यादिश्रुतिप्रतिपादितार्थमाह—यथेति । "यतो वा इमानि" इत्यादिश्रुतेश्च ॥२३॥ अत एव सर्वाधिष्ठानत्वादेव । निषेधशेषोऽप्युच्छिष्टवन्न त्याज्य इत्याह—अशेष इति । "सर्वात्मकः स एष आत्मा नेतिनेति" इत्यादिश्रुतेः ॥२४॥ तत्र ग्राहाच्छरीरमोक्षेच्छाराहित्ये । मोक्षस्य स्वरूपज्ञानलक्षणस्य । 'ज्ञानी त्वात्मैव मे मतम्' इति गीतोक्तेर्ज्ञानिनो भगवद्रूपत्वात्कालस्य च वह्निविस्फुलिंगवत्तदंशत्वान्न तेन तन्नाश इति भावः । ननूपस्थितदेहबंधमोक्षस्य तात्कालिकसुखहेतुत्वात्स कथं तेनार्थित इति चेदाह—यद्वेति । अतो ज्ञानैकनिवर्त्यत्वादेव । तस्यैवाज्ञानस्यैव । इत्यर्थ इति। "अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत्" इति न्यायेन देहबंधस्य स्वतो निवृत्तेस्तदर्थं प्रयासो न कार्य इति भावः । यद्वात्मनस्तव लोकस्य वैकुंठस्य यदावरणं द्वारकपाटादि तस्य मोचनं मन्निष्ठायास्तत्प्राप्त्ययोग्यताया नाशमिति विश्वनाथः ॥२५॥ वैकुंठेच्छा चेत्तर्हि भक्तिः क्रियतां तत्राह—भक्तिमप्यहं कर्तुं पशुत्वाद्विपद्ग्रस्तत्वाच्च न शक्नोमि तस्माद्यत्किंचिच्चक्षुरादिभिरिदं जानामि तस्य यः कर्ता तं केवलं मनसैव नमामीत्याह—सोऽहमिति। सोहं प्रसिद्धः पशुः । दुर्ज्ञेयत्वं विश्वामित्रादिविशेषणैराह । विश्वरूपम् " सर्वं खल्विदं ब्रह्म " इति श्रुतेः । विश्वव्यतिरिक्तमध्यस्तादधिष्ठानस्य रज्जुभुजंगादौ पृथग्दर्शनात् । उपकरणं ज्ञानसाधनं कार्यात्कारणमनुमीयते विश्वकार्येण तत्कारणस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगरंधितकर्माणो हृदि योगविभाविते ॥ योगिनो यं प्रपश्यंति योगेशं तं नतोऽस्म्यहम् ॥ २७ ॥ नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालाय दुरंतशक्तये कादिंद्रियाणामनवाप्यवर्त्मने ॥ २८ ॥ नायं वेद स्वमात्मानं यच्छक्त्याऽहंधिया हतम् ॥ तं दुरत्ययमाहात्म्यं भगवंतमितोऽस्म्यहम् ॥ २९ ॥ श्रीशुक उवाच ॥ एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाऽभिमानाः ॥ नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ॥ ३० ॥ तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ॥ छंदोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेंद्रः ॥ ३१ ॥

मुपकरणं यस्य तम् । विश्वस्यात्मानं च । केवलं प्रणतोऽस्मि न तु तं जानामि ॥ २६ ॥ योगं विना दुर्ज्ञेयत्वादित्याह । योगेन भगवद्धर्मेण रंधितानि दग्धानि कर्माणि येषां ते यं प्रपश्यंति ॥ २७ ॥ तर्हि सर्वेऽपि योगमेव किं नास्थितास्तत्राह नम इति द्वाभ्याम् । असह्यो वेगो रागादिलक्षणो यस्य तथाभूतं शक्तित्रयं यस्य तस्मै । बहिश्चाखिलधियां सर्वेन्द्रियाणां गुणाय शब्दादिरूपेण प्रतीयमानाय । अतः कदिंद्रियाणां कुत्सितानींद्रियाणि येषां तेषामनवाप्यं वर्त्म यस्य ॥ २८ ॥ यच्छक्त्या यस्य मायया या अहंधीस्तया हतमावृतमयं जनो न वेद दुरत्ययं माहात्म्यं यस्य । तमितोऽस्मि आश्रितो भवामि ॥ २९ ॥ उपवर्णितं निर्विशेषं मूर्तिभेदं विना परं तत्त्वं येन तम् । विविधा चासौ लिंगभिदा मूर्तिभेदस्तस्यामभिमानो येषां ते । अत एते यदा नोपजग्मुः । तत्र तदा । अखिलामरमयः सर्वदेवमयमूर्तिः ॥ ३० ॥ उपलभ्य ज्ञात्वा

तस्यापि ज्ञानसंभवात्।आत्मानं नियंतारम् "यः पृथिवीमंतरो यमयति" इत्यादिश्रुतेः। परं पदं ततः परं प्राप्यांतराभावात्॥२६॥रंधितानि नष्टानि॥२७॥अत्राक्षिपति–तर्हीति।शक्तित्रयं रजआदित्रयम्।प्रतीयमानाय ।विषयाय। अत इंद्रियविषयत्वात्। कुत्सितानि कुत्सितशब्दादिविषयाणि॥२८॥२९॥मूर्त्तिभेदं विना समं ब्रह्म अवतारावतारिरूपोऽपि विशेषो यत्र नास्ति तदिति वा"पूर्णमदः पूर्णमिदम्" इति श्रुतेः।यद्वा–विविधानि लिंगानि पद्मवज्रादीनि वा हंसवृषभादीनि एवं भिदया भेदेन योऽभिमानो वज्रपाणिरहं पद्मपाणिरहमित्येवंलक्षणो येषां स्रष्टृत्वसंहर्तृत्वादिलक्षणो येषां ते तथा। अत एव त्रिविधलिंगभिदाभिमानित्वादेव गजेंद्रेण वयं न त्वीषदपि स्तुताः प्रत्युत यस्य ब्रह्मादयो देवाः फल्गवा कलया कृता इत्याद्युक्त्या तुच्छीकृता अतो यमयं स्तौति स एव भगवानेनं रक्षतु स तु न शीघ्रं प्रत्यक्षी भविष्यति दुराराध्यस्य तस्य स्वभावं वयं जानीम एवातो ग्राहग्रस्तोयं मरिष्यत्येवेत्येवं दुरभिमानेनौदासीन्यं यदा व्यंजयामासुस्तदा तत्क्षणमेव तत्र हरिर्निखिलात्मकत्वाद्धेतोरखिलामरमय इति। तरुमूलसेकेन पल्लवाद्यासेक इव विष्णुस्तुत्यैव सर्वे स्तुता इति ते तत्त्वमविद्वांस एवेति भावः । यतो यत्र गजेंद्रः । निखिलात्मकत्वात्सर्वव्यापकत्वात् । तत्स्थ एव तत्र प्रत्यक्षीभूतो न तु दूरादागत इति । यद्वा–ब्रह्मादीनामनागमने निमित्तमिति निखिलेति सर्वस्वामित्वाद्धरेः पूर्वगमने प्रयोजनासिद्धेः । यद्वा–निखिलात्मनां सर्वजीवानां कं सुखं येन स तथा तस्य भावस्तत्त्वं तस्मात्सर्वजीवसुखहेतुत्वाद्वाविरासीत् ॥ ३० ॥ छंदोमयेन छंदसामुच्चारणवज्झटिति गमनशीलेन गरुडमपि मंदगतिमालक्ष्य तत्पृष्ठादुत्तीर्य सहसा झटित्येव । तं गजेंद्रं तद्वत् बाह्याभ्यंतरकर्षणापकर्षणप्रकारेणार्त्तं पीडितम् । चक्रायुध इति । नक्रतंतिच्छेदार्थं केवलं धृतचक्रः । आश्विति । देवतागमनप्रतीक्षोत्तरकाले । शैघ्र्यमाह–भक्तवात्सल्यत्वाद्देवतांतरमननुज्ञाप्य वह्निकुंडप्रविश्यमाणराजपुत्रन्यायेन स्वयमेव झटिति जगाम । यथा राजसभास्थ वह्निकुंडे पततं स्वात्मजं वीक्ष्य सिंहासनात्स्वयमुत्थाय झटित्येव पार्श्वस्थाननाज्ञाप्यैव कश्चिन्नृपस्तमात्मजं स्नेहपारवश्याज्जग्राह तथा भगवानपीति न्यायार्थः । अत्र शेषादीनामप्यागमनं ज्ञेयं दिविजैः सह संस्तुवद्भिरित्युक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोंतःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ॥ उत्क्षिप्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते॥३२॥
तं वीक्ष्य पीडितमजः सहसाऽवतीर्य सग्राहमाशु सरसः कृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुस्रियाणाम् ॥३३॥
इति श्रीमद्भा० महा० अष्टमस्कंधे गजेंद्रमोक्षणे तृतीयोऽध्यायः ॥३॥ श्रीशुक उवाच ॥ तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः ॥ मुमुचुः कुसुमासारं
शंसंतः कर्म तद्धरेः ॥१॥ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ॥ ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् ॥ २ ॥ योऽसौ ग्राहः स वै सद्यः परमा
श्चर्यरूपधृक् ॥ मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ॥ ३ ॥ प्रणम्य शिरसाऽधीशमुत्तमश्लोकमव्ययम् ॥ अगायत यशोधाम कीर्तन्यगुणसत्कथम् ॥
॥ ४ ॥ सोऽनुकंपित ईशेन परिक्रम्य प्रणम्य तम् ॥ लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबं
धनात् ॥ प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥ ६ ॥ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः ॥ इंद्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥

स्तोत्रं च निशम्य श्रुत्वा दिविजैर्देवैः सह छंदोमयेन छंदांसि सामानि तन्मयेनेति शैब्यायोक्तम् ॥ ३१ ॥ उरुबलेन ग्राहेण । खे दृष्ट्वा । उपात्तमुद्यतं चक्रं येन ॥ ३२ ॥ गरुडोऽपि मंदगतिरिति ततः सहसाऽवतीर्यारिणा चक्रेण विपाटितं मुखं यस्य । उस्रियाणां देवानाम् ॥ ३३ ॥ इति श्रीमद्भागवते अष्टमस्कंधे टीकायां तृतीयोऽध्यायः ॥ ॥ ३ ॥ चतुर्थे तु तयोर्ग्राहः प्राप गंधर्वतां पुनः ॥ गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदम् ॥ १ ॥ १ ॥ २ ॥ हूहूसंज्ञो गंधर्वसत्तमः असौ देवलस्य शापेन ग्राहो जातः । स वै स तु ततः सद्यो मुक्तः सन्नुत्तमश्लोकमगायतेत्यन्वयः । एवं हीतिहासोत्तमे कथा । सरसि स्त्रीभिः क्रीडन्नसौ हूहूः स्नातुं प्रविष्टं देवलं पादे प्रगृह्य विचकर्ष स च प्रकुपितो ग्राहो भवेति शशाप तेन च प्रसादितः सन्नुवाच एवमेव गजेंद्रं गृह्णीष्व ततश्च गजेंद्रमुद्धरन्हरिस्त्वामपि मोचयिष्यतीति ॥ ३ ॥ कथंभूतम् । यशसो धाम आश्रयम् । अतः कीर्तन्याः कीर्तनीया गुणाः सती कथा च यस्य तम् ॥ ४ ॥ स्वं लोकं गंधर्वलोकम् ॥ ५ ॥ ६ ॥ स गजेंद्रः पूर्वं द्रविडेषु सत्तमः श्रेष्ठः पांड्यदे

प्रह्लादोऽपि नित्यभक्तः ब्रह्महृदेऽक्रूरेण दृष्टत्वात् । मत्स्याद्यवतारकृतानि गंधर्वैस्तदानीं गीयमानानि प्रणवादिकमपि तत्प्रसंगेन कीर्त्यमानं ज्ञेयमेवमन्यदपि ॥ ३१ ॥ सांबुजकरमिति । सपर्यार्थं गृहीतकमलं येनेतादृशं करं शुंडादंडमुत्क्षिप्योर्ध्वं कृत्वा ॥ ३२ ॥ तं गजम् " उस्रिया विजया देवा आदित्या अमरास्सुराः " इत्यभिधानात् । ' उच्छ्रियाणाम् ' इति पाठे उत्कृष्टा श्रीः शोभा येषां नरापेक्षया ते उच्छ्रिया इति । निपातना दार्षत्वाद्वा समासांतप्रत्यय इयङादेशः । समीचीनपाठस्तु ' उस्रियाणाम् ' इत्येव भाति ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ तयोर्गजग्राहयोः । पुनरिति पूर्वं सिद्धमाह (१) । यदा हरिणा गजो मोचितस्तदेत्यर्थः । कुसुमासारं पुष्पधारापातम् " धारासंपात आसारः " इत्यमरः । तद्गजेंद्रमोक्षणरूपम् ॥ १ ॥ २ ॥ असौ हूहूः । स च देवलः । तेन हूहूा । एव मेव मत्पादग्रहणवत् । ततो गजेंद्रग्रहणात् ॥ ३ ॥ अतो यशोधामत्वात् ॥ ४ ॥ स गंधर्वः । तम् ईशम् । स्वं गांधर्वम् ॥ ५ ॥ भगवत्स्पर्शाद्भगवत्कर्मकस्पर्शात्तत्र मनोवचोभ्यां स्पर्शादज्ञानबंधतो मुक्तः । स्थूल देहेन स्पर्शात्स्पर्शमणिन्यायेन भगवतो रूपं प्राप्तो ध्रुव इवेति ज्ञेयम् । देहमव्ययं करोत्विति पूर्वप्रार्थनात् ॥ ६ ॥ इदानीं गजेंद्रयोनिनिमित्तमाह–स वा इति । स गजेन्द्रः । पांड्यो द्रविडदेशांतर्गतपांड्यदेशीयः । द्रविडेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एकदाऽऽराधनकाल आत्मवान्गृहीतमौनव्रत ईश्वरं हरिम् ॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः ॥ तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥ तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य ॥ विप्रावमंता विशतां तमोंधं यथा गजः स्तब्धमतिः स एव ॥ १० ॥ श्रीशुक उवाच ॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः ॥ इंद्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ॥ ११ ॥ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीम् ॥ हर्यर्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः ॥ १२ ॥ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ॥ गंधर्वसिद्धविबुधैरुपगीयमानकर्माऽद्भुतं स्वभवनं गरुडासनोऽगात् ॥ १३ ॥ एतन्महाराज तवेरितो मया कृष्णानुभावो गजराजमोक्षणम् ॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वताम् ॥ १४ ॥ यथाऽनुकीर्तयंत्येतच्छ्रेयस्कामाद्विजातयः ॥ शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशांतये ॥ १५ ॥ इदमाह हरिः प्रीतो गजेंद्रं कुरुसत्तम ॥ शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥ १६ ॥

शाधिपतिः इंद्रद्युम्न इति ख्यातो राजाभूत् ॥ ७ ॥ कुलाचले मलयाद्रावाश्रमो यस्य ॥ ८ ॥ तूष्णीं रहस्युपासीनं वीक्ष्य ऋषिरगस्त्यः ॥ ९ ॥ शापमेवाह । असाधुरित्यादि । अकृताऽशिक्षिता बुद्धिर्यस्य गजो यथा स्तब्धमतिस्तथैवायमतः स एव गज एव भवत्विति शेषः ॥ १० ॥ दिष्टं दैवप्रापितं तदुपधारयन्नालोचयन् ॥ ११ ॥ कौंजरीं योनिमापन्नः । तर्हि पश्चात्कथं स्मृतिर्जाता तत्राह । हरेरर्चनस्यानुभावेनेति ॥ १२ ॥ अद्भुतं स्वभवनमगात् ॥ १३ ॥ एतद्गजराजमोक्षणं नाम कृष्णानुभावस्तवेरितः । कथंभूतं तत्राह । स्वर्ग्यमित्यादि । दुःस्वप्नं नाशयतीति तथा ॥ १४ ॥ अतः श्रेयस्कामा ये एतद्यथावदनुकीर्तयंति ॥ १५ ॥ अनेन श्रेयो भवतीति कुतो

सत्तमः श्लाघ्यः ॥ ७ ॥ स इंद्रद्युम्नः । आराधनकाले पूजनोचितसमये । आत्मवान् । स्थिरचित्तः ॥ ८ ॥ तत्र मलये । महत् समुद्रपानविंध्यपातनवाताप्यशनादिलक्षणं यशो यस्य स महायशा अगस्त्यः ' एवं शप्त्वा गतोऽगस्त्यः ' इति वक्ष्यमाणत्वात् । तमिंद्रद्युम्नम् । न कृतमर्हणादिकमभ्युत्थानासनादिकं येन स तथा तम् । कोपोयं विध्यतिक्रमतः कृपामय एवेति बोध्यं भगवद्दर्शनजनकत्वाद्धेतोः । किं च 'विप्रावमंता' इत्युक्तेः पूर्वमपि स विप्रावज्ञाकर्त्तेति गम्यते विप्रावमंतुः पूजादिकं वृथैव "यो वा को वापि विप्रेन्द्र विप्रद्वेषपरायणः । समर्चयति गोविंदं तस्य पूजा वृथा भवेत् ॥" इति नारदीयोक्तेः । "विप्रोत्कर्षासहा ये च नरा लोके नराधिप । ते मद्द्वेष्या न संदेहः सर्वधर्मबहिष्कृताः ॥ भक्तिं तेषां न मन्येहं न दानं न व्रतादिकम् । तीर्थसेवां जपं ज्ञानं यदन्यत्सुकृतं कृतम् ॥ मत्पूज्यद्वेषिणस्तान्वै प्रक्षिपामि मुहुर्मुहुः । घोरे बहुक्लेशकरे नरके भृशदारुणे ॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् । सर्वं सहे महाराज विप्रनिंदां विना प्रभो ॥ जारजातः स विज्ञेयो यो निन्दत्यनपत्रपः। ब्राह्मणं मम सर्वस्वं सर्वदेवमयं परम्॥ दानं व्रतं तथा स्नानं श्राद्धं विप्रमृते वृथा । विप्रस्य देहो राजेंद्र सर्वदेहिषु सर्वदा ॥ परः शुचिर्विना कर्म सुकृतं किमु कर्मणा । नैव विप्रात्परं मन्य आत्मानं किमुतापरम् ॥ " इत्यादिपुराणोक्तेश्च ॥ ९ ॥ तस्मै राज्ञे । इमं वक्ष्यमाणम् । अतो गजवत्स्तब्धमतित्वात् ॥ १० ॥ तच्छापप्रापणम् ॥ ११ ॥ कौञ्जरीं हस्तिसंबंधिनीम् ॥ १२ ॥ तेन गजयूथपेन ॥ १३ ॥ तव तुभ्यम् ॥ १४ ॥ अतः स्वर्गादिफलकत्वात् ॥ १५ ॥ प्रीतः स्वभक्तोद्धारजातपरमानंदः । इदं वक्ष्यमाणं वाक्यजातम् ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ ये मां त्वां च सरश्चेदं गिरिकंदरकाननम् ॥ वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥ १७ ॥ शृंगाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥ १८ ॥ श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ॥ सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरम् ॥ १९ ॥ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम् ॥ ब्रह्माणं नरदमृषिं भवं प्रह्लादमेव च ॥ २० ॥ मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ॥ कर्माण्यनंतपुण्यानि सूर्यं सोमं हुताशनम् ॥ २१ ॥ प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययम् ॥ दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २२ ॥ गंगां सरस्वतीं नंदां कालिंदीं सितवारणम् ॥ ध्रुवं ब्रह्मऋषीन्सत पुण्यश्लोकांश्च मानवान् ॥ ॥ २३ ॥ उत्थायापररात्रांते प्रयताः सुसमाहिताः ॥ स्मरंति मम रूपाणि मुच्यंते ह्येनसोऽखिलात् ॥२४॥ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये ॥ तेषां प्राणात्यये चाहं ददामि विमलां मतिम् ॥ २५ ॥ श्रीशुक उवाच ॥ इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् ॥ हर्षयन्विबुधानीकमारुरोह खगाधिपम् ॥ २६ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे गजेंद्रमोक्षणं नाम चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ राजन्नदितमेतत्ते हरेः कर्माघनाशनम् ॥ गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु ॥ १ ॥

ज्ञातं साक्षाद्भगवद्वचनादेवेत्याह इदमाहेत्यादिना यावत्समाप्ति ॥ १६ ॥ प्रसंगादन्यस्यापि स्मरणे फलमुच्यते । सर्वेषां द्वितीयांतानां स्मरंतीत्यष्टमेनान्वयः ॥ १७ ॥ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ अव्यक्तं मायाम् । अव्ययं धर्मं भक्तिलक्षणम् । सोमकश्यपयोरपि । पत्नीर्दाक्षायणीः ॥ २२ ॥ सितवारणमैरावतम् ॥ २३ ॥ प्रयताः सिद्धाः । सुसमाहिता एकाग्रचित्ताः । मम रूपाणि मद्विभूतीः ॥ २४ ॥ २५ ॥ जलजोत्तमं शंखवरं प्रध्माय वादयित्वा ॥ २६ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते ॥ स्वभक्तपक्षपातेन यत्र योषायितं प्रभोः ॥ १ ॥ पंचमे पंचमं चाथ षष्ठं चाकथयन्मनुम् ॥

प्रसंगाद्दुःस्वप्नादिहरणप्रसंगात् । अन्यस्यापि दुःस्वप्नादिहरपदार्थस्य ॥१७॥१८॥१९॥ मत्कलां वराकारां मन्मूर्तिं सूक्ष्मां दुर्ज्ञेयां विना मत्प्रसादम् । “ अवजानंति मां मूढा मानुषीं तनुमाश्रितम् । परं भावमजानंतः ” इत्यादिगीतोक्तेः ॥२०॥२१॥ प्रणवं प्रणवस्य सर्ववेदात्मकत्वात्तद्ध्यानेन सर्ववेदध्यानस्य निष्पन्नत्वात् । “ ॐकारो वै सर्वा वाक् ” इत्यादिश्रुतेः । अव्यक्तध्यानं तन्निवृत्त्यर्थम् । दाक्षायणीर्दक्षकन्याः अश्विन्याद्या अदित्याद्याश्च । मूर्तिज्ञानाभावे नामोच्चारणमात्रमेव ध्यानं नामाक्षरध्यानं वा वर्णानां मंत्रात्मकत्वाद्देवानां मंत्रमूर्तित्वाच्च प्रतिपादितं चैतदधस्तात् ॥ २२ ॥ ब्रह्मऋषीन् वशिष्ठादीन् । पुण्यश्लोकान्नलयुधिष्ठिरवैदेहादीन् ॥ २३ ॥ ॥ १० ॥
अपररात्रांतेऽरुणोदये ॥ २४ ॥ निशात्यये परारात्रंते । विमलामज्ञाननिवर्तिकाम् ॥ २५ ॥ २६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ यत्रामृताख्याने योषायितं योषावदाचरितम् (१) । एतत्प्रतिपदोक्तम् ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमो रैवतो नाम मनुस्तामससोदरः ॥ बलिविंध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥ विभुरिंद्रः सुरगणा राजन्भूतरयादयः ॥ हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सुरसत्तमैः ॥ तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयम् ॥ ४ ॥ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः ॥ रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ॥ तस्यानुभावः कथितो गुणाश्च परमोदयाः ॥ भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ॥ ६ ॥ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ॥ पूरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥ इंद्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः ॥ मुनयस्तत्र वै राजन्हविष्मद्वीरकादयः ॥ ८ ॥ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः ॥ अजितो नाम भगवानंशेन जगतः पतिः ॥ ९ ॥ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ॥ भ्रममाणोंभसि धृतः कूर्मरूपेण मंदरः ॥ १० ॥

विप्रशापाच्च निःश्रीकैः कृतां देवैर्हरेः स्तुतिम् ॥ २ ॥ १ ॥ तामसश्चतुर्थो मनुस्तस्य सोदरो भ्राता ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ तस्य वैकुंठसंज्ञस्य हरेरनुभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां वराहादिरूपेण युद्धादिलक्षणः गुणाश्च ब्रह्मण्यतादयः परमोदयाश्च महर्द्धयः कथितास्तृतीयस्कंधादिषु ॥६॥७॥८॥९॥१०॥

तस्य रैवतस्य । आदिना महावीर्यादिग्रहः ॥ २ ॥ आदिना सुमेधसादिग्रहः । आदिना वेदश्र्यादिग्रहः "हिरण्यरोमा वेदश्रीरूर्द्ध्वबाहुस्तथाऽपरः । वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥ वशिष्ठश्च महाभागो वेदवेदांगपारगः । एते सप्तर्षयश्चासन्रैवतस्यांतरे मनोः ॥ " इति मार्कण्डेयोक्तेः ॥ ३ ॥ तयोर्विकुंठाशुभ्रयोः ॥ ४ ॥ येन वैकुंठेन स्वनाम्ना वैकुंठः कल्पितः प्रकटितः न तु रचितः । ' ब्रह्मलोकः सनातनः ' इत्युक्तेः । तत्प्रियकाम्यया लक्ष्मीप्रीत्यर्थम् । संदर्भस्तु—यथा भगवत आविर्भावमात्रं जन्मेति भण्यते तथा वैकुंठस्यापि कल्पनमाविर्भावनमेव न तु प्राकृतवत्कृत्रिमत्वम् । किञ्च श्रीविकुंठासुतस्यैवेदं वैकुंठं मूलवैकुंठं तु सृष्टेः प्राग्ब्रह्मणा दृष्टमिति द्वितीयस्कंधे प्रसिद्धम्' स तन्निकेतं परिमृश्य शून्यम् ' इति । यन्निर्दिष्टं तत्तु स्थानं सर्गादिगतमेवेति ज्ञेयम् ॥ ५ ॥ भूरेणुसंख्यावद्विष्णुगुणवर्णनमप्यशक्यमिति भावः ॥ ६ ॥ चक्षुष इति । पूर्वजन्मनि परमेष्ठिचक्षुषो जातत्वादत्राप्यस्य चाक्षुषत्वमेवेति मार्कंडेये विस्तरेणोक्तम् । यत्तु "स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह" इति चतुर्थस्कंधे सर्वतेजस उत्पत्तिकथनमस्य तदप्येतदभिप्रायकमेवेति बोध्यं सुधिया ॥ ७ ॥ तत्र चाक्षुषेंतरे । आदिना परावततुषितादयो ज्ञेयाः । " देवाः परावताश्चैव तथैव तुषितादयः " इत्यन्यत्रोक्तेः । तत्र तदा । आदिना भृग्वादिग्रहः ॥८॥ तत्रापि चाक्षुषेंतरेपि ॥९॥ येनाजिताख्यहरिणा । ' पयः स्यात् क्षीरनीरयोः' इत्यभिधानात्'पयोधिं येन निर्मथ्य' इति योगीन्द्रास्योक्तं श्रुत्वा श्रीराजेन्द्रशिरोमणिनापि "यथा भगवता ब्रह्मन्मथितः क्षीरसागरः" इत्यमेव पृष्टं किञ्च "क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः" इति । 'ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम् ' इति । देवस्तुतमहेशेनाप्युक्तम् "अहो बत भवान्येतत्प्रजानां पश्य वैशसम् । क्षीरोदमथनोद्भूतात्कालकूटात्" इति सर्वथा क्षीराब्धिमथनं प्रतीयतेतः कथमुक्तम् " ययौ जलांते उत्सृज्य हरिणा स विसर्जितः" किञ्च ' प्रविश्य तोयं गिरिमुज्जहार ' इति ।' अब्धिं मुदान्विताः ' इति ' निर्मथ्यमानादुदधेरभूद्विषम् ' इति । किञ्च " तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः " इति । ' अथोदधेर्मथ्यमानात् ' इत्यारभ्य 'धन्वंतरिरिति ख्यातः' इति चेत्तत्र कौशिकवाक्येन विरोधं परिहरति " सर्वे दुग्धार्थकाः शब्दा ज्ञेयाः पानीयवाचकाः । पानीयवाचकाः सर्वे ज्ञेया दुग्धार्थका बुधैः ॥ " इति । तेन न किञ्चिद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ यथा भगवता ब्रह्मन्मथितः क्षीरसागरः ॥ यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ॥ ११ ॥ यथाऽमृतं सुरैः प्राप्तं किं चान्यदभवत्ततः ॥ एतद्भगवतः कर्म वदस्व परमाद्भुतम् ॥ १२ ॥ त्वया संकथ्यमानेन महिम्ना सात्वतां पतेः ॥ नातितृप्यति मे चित्तं सुचिरं तापतापितम् ॥ १३ ॥ सूत उवाच ॥ संपृष्टो भगवानेवं द्वैपायनसुतो द्विजाः ॥ अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥ १४ ॥ श्रीशुक उवाच ॥ यदा युद्धे सुरैर्देवा बाध्यमानाः शितायुधैः ॥ गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयशः ॥ १५ ॥ यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप ॥ निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः ॥ १६ ॥ निशाम्यैतत्सुरगणा महेंद्रवरुणादयः ॥ नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयम् ॥ १७ ॥ ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः ॥ सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने ॥ १८ ॥ स विलोक्येंद्रवाय्वादीन्निःसत्त्वान्विगतप्रभान् ॥ लोकानमंगलप्रायानसुरानयथा विभुः ॥ १९ ॥ समाहितेन मनसा संस्मरन्पुरुषं परम् ॥ उवाचोत्फुल्लवदनो देवान्स भगवान्परः ॥ २० ॥ अहं भवो यूयमथोऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः ॥ तस्यावतारांशकला विसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥ २१ ॥

यतो हेतोः अंबुचरात्मना कूर्मरूपेण ॥ ११ ॥ सुराणां साधिता सुधेत्युक्त्या युद्धाद्यपि सूचितमतः पृच्छति । किं चान्यदिति ॥ १२ ॥ १३ ॥ १४ ॥ नोत्तिष्ठेरन्न पुनर्जीवंति स्मेत्यर्थः ॥ १५ ॥ दुर्वाससा हि कदाचिन्मार्गे गच्छंतमिंद्रं दृष्ट्वा स्वकंठस्था माला तस्मै दत्ता तेन च श्रीमदेनानादृत्यैरावतस्य कुंभयो र्निक्षिप्ता स च गजो मत्तः पद्भ्यां तां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति । तदेतदाह । यदा दुर्वाससः शापादिति । इज्यादयो यागाद्याः ॥ १६ ॥ १७ ॥ १८ ॥ असुरान् अयथा देववैलक्षण्येन बलपुष्ट्यादियुक्तान्विलोक्येत्यर्थः ॥ १९ ॥ हरिं शरणं गताः संतो यथापूर्वं सर्वं प्राप्स्याम इति हर्षेणोत्फुल्लं विकसितं वदनं यस्य ॥ २० ॥ मनुष्यादयो जरायुजांडजोद्भिज्जस्वेदजाः । यस्यावतारः पुरुषस्तस्यांशो ब्रह्मा तस्य कला मरीच्यादयस्ताभि

रोधः न हि केवलपयःशब्द एवोभयार्थकः किन्तु नीरक्षीरपर्यायवाचका अपीत्यर्थः । प्रमाणं चात्र प्रयुक्तोभयशब्द एवान्यथाब्धिपयोधिपदाभ्यां समुद्रद्वयमथनापत्तिः स्यादिति ॥ १० ॥ यदर्थं यत्प्रयोजनाय ॥ ११ ॥ ततस्तत्र । एतत्समुद्रमथनादिरूपम् ॥ १२ ॥ तापैराध्यात्मिकादिदुःखैः । तापितं क्लेशितम् ॥ १३ ॥ १४ ॥ यदाशब्दयोस्तत्र नेशुरित्यनेनान्वयः ॥ भूयश इति पुनरर्थेऽव्ययं निपातनाच्छसि भूयसस्सलोपः ॥ १५ ॥ तत्र तदा । नेशुर्नष्टा बभूवुः । 'णश–अदर्शने' लिट् ॥ १६ ॥ एतद्दुर्वासःशपनम् । विनिश्चयं स्वश्रेयस्साधननिश्चयं यदा नाध्यगच्छंस्तदा ब्रह्मसभां जग्मुरित्यग्रिमेण योज्यम् ॥ १७ ॥ सर्वं शापादिकारणम् ॥ १८ ॥ इत्यर्थ इति । प्राप्तजयत्वात्सुप्रभानिति भावः ॥ १९ ॥ २० ॥ सर्गादयः 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेनैवेति भावः । तदुक्तम् "सर्गादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानंदो यथा मत्तस्य नर्त्तनम् ॥" इति ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयाऽऽदरणीयपक्षः॥अथापि सर्गस्थितिसंयमार्थं धत्ते रजःसत्त्वतमांसि काले॥२२॥अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम्॥तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः॥२३॥श्रीशुक उवाच ॥ इत्याभाष्य सुरान्वेधाः सह देवैररिंदम ॥ अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥ २४ ॥ तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो ॥ स्तुतिमब्रूत दैवीभिर्गीर्भिस्त्ववहितेंद्रियः ॥ २५ ॥ ब्रह्मोवाच ॥ अविक्रियं सत्यमनंतमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ॥ मनोऽग्रयानं वचसा निरुक्तं नमामहे देववरं वरेण्यम् ॥ २६ ॥ विपश्चितं प्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणम् ॥ छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥

विसर्जिताः पुत्रपौत्रादिद्वारा जनिताः ॥ २१ ॥ ननु तर्हि सर्वेष्वसौ समः स्यात्किं तच्छरणाश्रयेण । सत्यम् । यद्यप्येवं तथाऽप्यस्मत्पक्षपाती भविष्यतीत्याशयेनाह न यस्येति द्वाभ्याम् ॥ २२ ॥ स्थितिपालनस्य क्षणः कालः अतः सुरप्रियः सन्स्वीयानां नः शं सुखं करिष्यति ॥ २३ ॥ यत्र क्षीराब्धौ हरेर्वासस्तदेव तमसः परं पदं स्थानम् । यद्वा लोकालोकात्परतो यत्तमस्ततः परं स्थानं जगाम ॥ २४ ॥ दैवीभिर्लोकेऽप्रसिद्धाभिर्वैदिकीभिर्गीर्भिस्स्तुतिमकरोत् ॥ २५ ॥ देववरं त्वां नमामहे नमाम । हे देववर त्वां नमामेति वा । वरत्वे हेतुः सत्यम् । कुतः । अविक्रियम् । तत्कुतः । अनंतमाद्यं चानादिम् । आद्यंतवंतो हि वृद्ध्यादिविक्रियायुक्ता भवंति । किं च गुहाशयं सर्वांतरम् । कुतः । निष्कलं निरुपाधिम् । तत्कुतः । अप्रतर्क्यम् । तत्कुतः । मनोऽग्रयानं मनसोऽपि जविष्ठम् । मनःप्राप्ये स्थाने ततः प्रागेव विद्यमानत्वात् । तथा च श्रुतिः । “ अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्शत् ॥ तद्धावतोऽन्यानत्येति तिष्ठत् ” इति । वचसा अनिरुक्तम् अविषयत्वात् । “ यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ” इति श्रुतेः । मनोवचसोरगोचरत्वादप्रतर्क्यम् । यथेष्टं वा सर्वेषां हेतुहेतुमद्भावः ॥ २६ ॥ किं च प्राणादीनां विपश्चितं ज्ञातारम् । आत्माऽहंकारो देहो वा न तु

सर्वस्रष्टृत्वादस्य साम्यमेव सर्वत्रेत्याशंकते—नन्विति।यद्यप्येवं सर्वत्र साम्येपि तस्य तथापीति।ननु“परः पूर्वेषाम्”इति श्रुतेर्देवानां भगवत्पक्षत्वावगमादितिचेन्न, भक्तिवशः पुरुषः“यमेवैष वृणुते तेन लभ्यः”इत्यादिश्रुतेर्देवानामनुग्राह्यत्वात्तत्पक्षो न स्वार्थ इति ध्येयम् ॥ २२ ॥ अतः स्थितिपालनकालत्वादेव । तस्मात्सत्त्वसेवित्वात् । सुरप्रियः सुरेष्वेव तद्भक्तप्राचुर्यादस्मास्वेव तदनुग्रहः पर्यवस्यतीति भावः ॥ २३ ॥ अजितस्य विकुंठासुतस्य पदं तेनैव प्रकाशितं वैकुंठविशेषं तमसः परं प्रपंचांतर्गतत्वेऽपि भगवद्विग्रहवत्प्रकृत्या न स्पृष्टं यद्वा मत्समीपदेशं प्रापेत्यर्थः । क्षीराब्धौ तमोऽश्रवणाद्वाह—यद्वेति ॥ २४ ॥ तत्र स्थाने न दृष्टं स्वरूपं यस्य तस्मै । पूर्वं श्रुतः श्रुतपूर्वस्तस्मै । अदृष्टस्वरूपं श्रुतपूर्वं प्रभुमनुकूलयितुं स्तुतिमब्रूत ॥ २५ ॥ आत्मनेपदार्षत्वकल्पनानावश्यकत्वादाह—हे देवेति । सत्यम् “सत्यं ज्ञानम्” इति श्रुतेः । तत्रापि हेतुं पृच्छति—कुत इति । अविक्रियम् “निरवद्यं निरंजनम्” इति श्रुतेः । तन्निर्विकारत्वमपि कुतस्तत्राह—अनंतमित्यादि । “अनंतं ब्रह्म आत्मा इदमग्र आसीत्” इति श्रुतेः । अन्यदाह—सर्वांतरम् “यो वेद निहितं गुहायां हृदय आहितं यत्” इत्यादिश्रुतेः । निरुपाधिम् “निष्क्रियं निष्कलं शांतम्” इति श्रुतेः । तन्निरुपाधित्वम् । ततः मनसः । मनोग्रयानत्वे प्रमाणमाह—तथा चेति । श्रुत्यर्थस्तु तद्ब्रह्म अनेजत्कंपोपलक्षितगतिहीनं जवीयोऽतिवेगवत्तरम् । एतद्ब्रह्म । देवा इंद्रियाणि । पूर्वमर्शत् पूर्वमेव गच्छत् । तिष्ठत् स्थिरस्वभावं तत् धावतोऽन्यान्वागिंद्रियादीन् अतिक्रम्य गच्छतीत्यर्थः । यद्ब्रह्म अनभ्युदितं वक्तुमशक्यं येन ब्रह्मणा अभ्युद्यते स्वव्यापारसमर्था भवतीति श्रुतिपदार्थः । देववरत्वे च ‘एष सर्वेश्वर’ इति । वरेण्यमिति ‘तत्सवितुर्वरेण्यम्’इति लिंगात् ।“यतो वाचो निवर्तंते अप्राप्य मनसा सह” इति । “नैषा मतिस्तर्केणापनेया” इत्यादिश्रुतेरप्रतर्क्यम्॥२६॥अन्यदाह—किं चेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु ॥ त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥ २८ ॥ य एकवर्ण तमसः परं तदलोकमव्यक्तमनंतपारम् ॥ आसांचकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥ २९ ॥ न यस्य कश्चातितितर्ति मायां यया जनो मुह्यति वेद नार्थम् ॥ तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतम् ॥ ३० ॥

तद्व्यतिरिक्तं ज्ञेयमस्तीत्याह । अर्थो विषयः इंद्रियाणि तद्ग्राहकाणि तदुभयरूपेणाभासत इति तथा तम् । तथाऽप्यनिदं स्वप्नद्रष्टृवदज्ञानरहितम् । कुतः । अव्रणमदेहम् । अत एवाक्षरं खमाकाशमिव व्यापिनं च । सर्वत्र हेतुः । यत्र यस्मिन्गृध्रपक्षौ जीवपक्षपातिनौ छायातपावविद्या च तन्निवर्तिका विद्या च नास्ति तं त्रियुगं त्रिषु युगेष्वाविर्भवंतं शरणं व्रजामहे ॥ २७ ॥ तदेवमविक्रियत्वादिभिः सर्वज्ञत्वादिभिश्च सत्यत्वं वरेण्यत्वं चोक्तं संसारचक्राधारत्वेनापि तदेव दर्शयन्नाह । अजस्य जीवस्य चक्रं चक्रवदावर्तमानं देहाद्यजया मायया प्रेर्यमाणं योऽक्षो यस्य यदक्षं यदधिष्ठानमाहुस्तमृतं सत्यं प्रपद्ये । कथंभूतं चक्रम् । मनोमयं मनःप्रधानम् । दशेंद्रियाणि पंचप्राणाश्चेत्येवं पंचदश अरा यस्य । आशु शीघ्रगम् । त्रयो गुणा नाभिरिव मध्ये यस्य । विद्युदिव चलं न स्थिरम् । अष्टौ प्रकृतयो नेमय इवावरणानि यस्य ॥ २८ ॥ सर्वजीवनियंतृत्वादिना च वरिष्ठत्वमाह । य इति । य उपसुपर्णं जीवसमीपे तन्नियंतृत्वेनासांचकारास्ते स्म । " द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते " इति श्रुतेः । यद्वा भक्तरक्षणार्थं गरुडस्योपरि य उपविष्ट इत्यर्थः । तर्हि देहस्थत्वाद्भक्तरक्षणादिक्रियावेशाद्वा जीवसाम्यं स्यात्तत्राह । एकवर्णं ज्ञानैकस्वरूपं तमसः प्रकृतेः परमलोकं दृश्यमव्यक्तं निर्विकल्पमनंतपारं कालतो देशतश्चापरिच्छिन्नं तद्ब्रह्मैव यः । अप्रच्युतस्वरूपत्वान्न जीवसाम्यम् । " तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति " इति विशेषश्रवणादित्यर्थः । अत एव यमेनं धीरा योगेन रथेन प्राप्तिसाधनेनोपासते भजंते तं नमामेत्युत्तरेणान्वयः ॥ २९ ॥ मायानियंतृत्वेनापि जीवसाम्यं परिहरन्वरिष्ठ

ज्ञातारम् । ''प्राणस्य प्राणम्'' इत्यादिश्रुतेः । तथापि विषयादिरूपेण प्रकाशमानत्वेपि । अज्ञानरहितत्वे हेतुं पृच्छति—कुत इति । अदेहं देहरूपं न । अत एवादेहरूपत्वादेव । गृध्यति विषयानभिकांक्षतीति गृध्रो जीवः । आवरणस्वभावत्वाच्छायाशब्देनाविद्याप्रकाशस्वभावत्वादातपशब्देन विद्या ज्ञेया । यद्वाऽर्थानिन्द्रियाणि च भासयति दीपयतीत्यर्थेंद्रियाभासः । अर्थेंद्रियाणां सन्निकर्षमुत्पाद्य तद्विषयं ज्ञानं जनयतीत्यर्थः । ''यस्य भासा सर्वमिदं विभाति'' इति श्रुतेः ॥ २७ ॥ तदेव सत्यत्ववरेण्यत्वम् । अजस्य जीवस्य ''अजो ह्येको जुषमाणः'' इति श्रुतेः । यः परमात्मा । अक्षश्चक्राधारो ध्रूः ॥ २८ ॥ जीवसमीपस्थत्वे प्रमाणमाह—द्वेति । श्रुतिप्रसिद्धार्थस्य सुज्ञज्ञेयत्वाल्लोकप्रसिद्धार्थमाह—यद्वेति । इत्यर्थ इति । ''भक्ताभीष्टप्रदानाय निर्गुणः सगुणोऽभवत्'' इत्याद्युक्तेरिति भावः । अत्राक्षिप्य समाधत्ते—तर्हीति । इत्यर्थ इति । जीवेश्वरवैलक्षण्यस्य श्रुतिसिद्धत्वादिति भावः । यद्वा—प्रणवपक्षे योजनीयं यदेकवर्णं यदोमित्येतदक्षररूपं स्वरव्यंजनविभागविवक्षामंतरेण व्यक्तेरेकत्वमन्यथा षोडश स्वरा इति संख्यानुपपत्तिः । ओमित्येतदक्षरमिदं सर्वम् । ''प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम् । सर्वव्यापिनमोंकारम्'' इत्यादिश्रुत्यर्थमाह—अनंतः पारो मात्रासमूहो यत्र तत् । ''अमात्रोऽनंतमात्रश्च'' इति श्रुतेः । उपसुपर्णं जीवसमीपे । आसांचकार । " सर्वस्य हृदये स्थितम्'' इति श्रुतेः । एनमोंकारं योगरथेन मांडूक्योक्तध्यानेनोपासते धीरा मुनयः । ''ओंकारो विदितो येन स मुनिर्नेतरो जनः'' इति श्रुतेर्मुनित्वलाभाय प्रणव एवोपास्य इत्युक्तं भवति ॥ २९ ॥ भूतेषु समं चरंतम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमे वयं यत्प्रिययैव तन्वा सत्त्वेन सृष्टा बहिरंतराविः ॥ गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥ ३१ ॥ पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः ॥ स वै महापूरुष आत्मतंत्रः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३२ ॥ अंभस्तु यद्रेत उदारवीर्यं सिद्ध्यंति जीवंत्युत वर्धमानाः ॥ लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३३ ॥ सोमं मनो यस्य समामनंति दिवौकसां वै बलमंध आयुः ॥ ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ॥ ३४ ॥ अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकांडनिमित्तजन्मा ॥ अंतःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः ॥ ३५ ॥ यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् ॥ द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः ॥ ३६ ॥

त्वमाह । यस्य मायां कश्च कश्चिदपि नातितितर्ति नातिक्रामति । कथंभूताम् । जनो यया मुह्यति । अर्थमात्मस्वरूपं न तु वेद । निर्जित आत्मा आत्मशक्तिर्माया च तद्गुणाश्च येन तम् ॥ ३० ॥ अर्थं न वेदेति यदुक्तं तत्प्रपंचयन्नाह । इमे वयं देवा ऋषयश्च यस्य प्रियया तन्वा सत्त्वेनैव सृष्टा अपि बहिरंतश्च सत्ताप्रकाशाभ्यामाविः प्रकटामपि सूक्ष्मां गतिं निरुपाधिस्वरूपं न विद्मः । इतरप्रधाना रजस्तमोमयाः । कुतो विदुः । तं नमामेति पूर्वेणान्वयः ॥ ३१ ॥ इदानीं वैराजरूपेण स्तुवन्प्रार्थयते पादौ महीति द्वादशभिः । यत्र मह्यां जरायुजादिभूतसर्गः सा मही यस्य पादौ स नः प्रसीदतु । आत्मतंत्रः पादादिमत्त्वेऽपि न तत्परतंत्रः । कुतः । ब्रह्म अप्रच्युतरूपः । तत्कुतः महती विभूतिरैश्वर्यं यस्य सः ॥ ३२ ॥ उदारं वीर्यं शक्तिर्यस्य तदंभो यस्य रेतः स नः प्रसीदतु । उदारवीर्यतामाह । यतोंभसो लोकादयः सिध्यंति जायंते ॥ ३३ ॥ यः सोमो देवानामंधोऽन्नम् अत एव बलमायुश्च नगानां वृक्षाणाम् । प्रकर्षेण जनयति वर्धयतीति प्रजनः तं यस्य मनः समामनंति स नः प्रसीदतु ॥ ३४ ॥ अग्निर्यस्य तु मुखं जातः । कथंभूतः । जातं वेदो धनं यस्मात् । क्रियाकांडं तत्प्रतिपाद्यं कर्म तन्निमित्तं जन्म यस्य । अंतःसमुद्रे उदरमध्ये स्वधातून्पाकाहार्नेवान्नादीननुपचन् प्रसिद्धसमुद्रेऽपि वाडवरूपेणोदकान्येवानुपचन्नग्निर्यस्य मुखं सः ॥ ३५ ॥ एष तरणिरादित्यो यस्य चक्षुरासीत् । कथंभूतः । देवयानमर्चिरादिमार्गदेवता । "त्रयीमयः

"एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतेः । परेशम् "एष सर्वेश्वरः" इति श्रुतेः । न वेदेति "अनीशया शोचति मुह्यमानः" इति श्रुतेः । शक्तिशक्तिमतोरग्निर्दहतीत्यादिष्वभेदोपचारादत्राप्यात्मपदेनात्मशक्तिग्रहः ॥ ३० ॥ विद्मह इति तङार्षः ॥ ३१ ॥ अपरतंत्रत्वे हेतुर्ब्रह्मेति । तदप्रच्युतस्वरूपत्वमपि कुत इति । अपरिच्छिन्नशक्तित्वादिति । "पादोस्य विश्वा भूतानि" इति पादवत्त्वे मानम् ॥ ३२ ॥ "यद्यत्प्रथमममृतं तद्वसव उपजीवन्ति" इति श्रुत्यर्थमाह—अंभ इति ॥ ३३ ॥ अत एवान्नत्वादेव "चंद्रमा मनसो जातः" इत्यादिश्रुतेः ॥ ३४ ॥ "मुखादग्निरजायत" इति श्रुतेः । "अग्निर्वै देवानां मुखम्" इति श्रुतेश्च । स्वधातून् स्वाधीनानि चतुर्विधान्नानि । "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं भवति योणुस्तन्मनः" इति श्रुतेः ॥ ३५ ॥ त्रयीमयत्वे मानं च 'सैषा' इति श्रुतिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः ॥ अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ॥ ३७ ॥ श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ॥ प्राणेंद्रियात्मासुशरीरकेतं प्रसीदतां न स महाविभूतिः ॥ ३८ ॥ बलान्महेंद्रस्त्रिदशाः प्रसादा न्मन्योर्गिरीशो धिषणाद्विरिंचः ॥ खेभ्यश्च छंदांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ॥ ३९ ॥ श्रीर्वक्षसः पितरश्छायया ऽऽसन्धर्मः स्तनादितरः पृष्ठतोऽभूत् ॥ द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात्प्रसीदतां नः स महाविभूतिः ॥ ४० ॥ विप्रो मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ॥ ऊर्वोर्विडोजोंघ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः ॥ ४१ ॥ लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः ॥ भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥

सैषा त्रय्येव विद्या तपति'' इति श्रुतेः । ब्रह्मणो धिष्ण्यमुपासनास्थानम् । ''य एषोंतरादित्ये हिरण्मयः पुरुषः'' इति श्रुतेः । मुक्तेर्द्वारं देवयानत्वात् अमृतं च पुण्यलोकत्वात् । मृत्युश्च कालात्मकत्वात् । एवंभूतस्तरणिर्यस्य चक्षुः स नः प्रसीदतु ॥ ३६ ॥ कथंभूतो वायुश्चराचराणां सहआदिधर्मवान्प्राणः यं प्राणं वयं बुद्ध्याद्यधिष्ठातारो देवाः सम्राजं भृत्या इवान्वास्मानुसृत्य स्थिताः । एवंभूतो वायुर्यस्य प्राणादभूत्सः तत्र सहो मनस उत्साहः । बलं शारीरम् । ओज ऐंद्रियम् ॥ ३७ ॥ खानि देहगतानि छिद्राणि प्राणः पंचवृत्तिः इंद्रियाणि च आत्मा मनश्च असवो नागकूर्मादयः शरीरं च तेषां केतमाश्रयभूतं खं यस्य पुरुषस्य नाभ्याः प्रजज्ञे सः ॥ ३८ ॥ यस्य बलान्महेंद्रो जज्ञे । त्रिदशा देवाः धिषणाद् बुद्धेः । छंदांसि ऋषयश्च खेभ्यः । कः प्रजापतिः ॥ ३९ ॥ इतरोऽधर्मः ॥ ४० ॥ विड्वैश्यः । ओजो नैपुणं तस्य वृत्तिः अंघ्रिः अंघ्रिजावित्यर्थः । अवेदशूद्रौ अवेदो वेदव्यतिरिक्ता शुश्रूषा तद्वृत्तिमान् शूद्रश्च । 'ऊर्वोर्विशोंघ्रेरभवंश्च शूद्राः' इति पाठांतरं सुगमम् ॥ ४१ ॥ उपर्युत्तरोष्ठात् । नस्तो नासिकातः । द्युतिः

'अंतरादित्ये' सूर्यमध्ये इति श्रुतिपदार्थः । मुक्तेर्द्वारम् 'सूर्यद्वारेण ते यांति' इत्युक्तेः । ''अमृतं मर्त्यं च'' इति श्रुतेः । यस्य चक्षुः ''चक्षोः सूर्योऽजायत'' इति श्रुतेः ॥ ३६ ॥ यस्य भगवतः प्राणादात्मनः ''प्राण वा आत्मा'' इति श्रुतेः । वायुः प्राणवायुः । ''आत्मन एष प्राणो जायते तान्वरिष्ठप्राण उवाच मा मोहमापद्यथ अहमेवैतत्पंचधात्मानं विभज्यैतद्वारमवष्टभ्य धारयामीति ते प्रीताः प्राणं स्तुवंत्येषोऽग्निस्तपत्येष सूर्यः प्राणैक ऋषिरत्ता विश्वस्य सत्पतिः वयमासाद्य दातारः पिता त्वं मातरिश्वनः'' इति श्रुतेश्च । ''अनुप्राणंति यं प्राणाः प्राणं तं सर्वजंतषु । अपानंतमपानंति नरदेवमिवानुगाः ॥'' इत्युक्तेश्च ॥ ३७ ॥ ''नाभ्या आसीदंतरिक्ष ँ दिशश्श्रोत्रात्'' इत्यादिश्रुत्यर्थं संगृह्याह—श्रोत्राद्दिश इति । ''ब्रह्मणो वा एतानि करणानि एतत्सर्वं परे आत्मनि संप्रतिष्ठते पृथिवी च'' इत्यारभ्य ''प्राणश्च विधारयितव्यं च'' इत्यंतकाठकवाक्यार्थोऽप्यत्र संगृहीतः ॥ ३८ ॥ धिषणाद्धिषणाया बुद्धेः पुंस्त्वमार्षम् । 'धिषणा विरिञ्चः' इति पाठे पञ्चम्याश्छांदसो लुक् ॥ ३९ ॥ विहारात् क्रीडातः ॥ ४० ॥ भुजयोर्भुजाभ्याम् । ऊर्वोरूरुभ्याम् । इत्यर्थ इति । ''पद्भ्या ँ शूद्रः'' इति श्रुतेरिति भावः । पाठांतरम् ''ऊर्वोर्विशोंऽघ्रेरभवंश्च शूद्राः'' इत्येवंरूपम् ॥ ४१ ॥ हितः प्रियः 'हितं पथ्ये प्रिये धृते' इति कोशात् । शिश्नोदरपरत्वात्पशूना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्यं वयः कर्मगुणान्विशेषं यद्योगमायाविहितान्वदंति ॥ यद्दुर्विभाव्यं प्रबुधापबाधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥ नमोऽस्तु तस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय नभस्वदूतये ॥ ४४ ॥ स त्वं नो दर्शयात्मानमस्मत्क रणगोचरम् ॥ प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखांबुजम् ॥ ४५ ॥ तैस्तैः स्वेच्छाधृतै रूपैः कालेकाले स्वयं विभो ॥ कर्म दुर्विषहं यन्नो भगवां स्तत्करोति हि ॥ ४६ ॥ क्लेशभूर्यल्पसाराणि कर्माणि विफलानि च ॥ देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥ ४७ ॥ नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः ॥ कल्पते पुरुषस्यैष स ह्यात्मा दयितो हितः ॥ ४८ ॥

कांतिः । पशव्यः पशूनां हितः कामः स्पर्शेनाभूत् ॥ ४२ ॥ द्रव्यं भूतानि । वयः कालम् । विशेषं भौतिकप्रपंचम् । यद्यस्माद्दुर्विभाव्यम् । कुतः । प्रबुधापबाधं विद्वद्भिरपोह्यमानम् । पाठांतरे प्रबुधानां मायेत्यवबोधो यस्मिन्नित्यर्थः ॥ ४३ ॥ तदेवं सप्रपंचमुपवर्ण्य निष्प्रपंचमनुवर्णयन्प्रणमति । नमोस्त्विति । वृत्तिभिर्दर्शनादिभिः । नभस्वान्वायुस्तस्येव ऊतिर्लीला यस्य तस्मै ॥ ४४ ॥ ते सस्मितं मुखांबुजं दिदृक्षूणां नोऽस्मच्चक्षुरादिकरणगोचरं यथा भवत्येवं चात्मानं दर्शय ॥ ४५ ॥ भक्तेच्छानुवर्तित्वं च तव बहुशो दृष्टमेवेत्याह । तैस्तैरिति । यन्नो दुर्विषहमशक्यं कर्म तद्भगवान्स्वयमेव करोति हि ॥ ४६ ॥ न च बहिर्मुखानामिव त्वद्भक्तानामस्माकं त्वय्यर्पितानि पूर्वपुण्यानि विपरीतफलानि भवितुमर्हन्तीत्याह । क्लेशो भूरिर्येषु अल्पं सारं फलं येषु । यद्वा विफलान्येव सकामानां कर्माणि त्वय्यर्पितं तु नैव तथा ॥ ४७ ॥ तत्रावैफल्यमुपपादयति । अवमोऽल्पोऽपि कर्मकल्पः कर्माभासोऽपीश्वरार्पितश्चेद्विफलायासाय न कल्पते हि यस्मात्स एष ईश्वरः पुरुषस्यात्मा । अत एव दयितो हितश्च । न

मिति भावः । स्पर्शेन गुणेन । 'पशुर्मूढे मृगादौ च' इति धरणिः ॥ ४२ ॥ यद्यतो द्रव्यादि सर्वं दुर्विभाव्यमेतदेवंविधमिति वक्तुमशक्यं खपुष्पायमाणत्वादित्याह–कुत इति । अपोह्यमानम् ''नेतिनेति'' इत्यादिना त्यज्यमानम् । पाठांतरे 'प्रबुधावबोधम्' इति पाठे । यद्वा–द्रव्यं नवत्वसंख्याविशिष्टं पृथिव्यादि । वयति जानाति नीलो घट इत्यादिव्यवहारमनेनेति वयः समवायः । कर्म उत्क्षेपणापक्षेपणादिरूपं पंचत्वसंख्याविशिष्टम् । गुणाः शब्दस्पर्शरूपरसाद्याश्चतुर्विंशतिः । विशेषो व्यावर्त्तकः पदार्थस्स च सामान्यरूपो विशेषरूपश्च । वीयते ज्ञायते परोक्षापरोक्षतयेति वयोऽभावोपि सप्तमपदार्थो वयःशब्देनैव ग्राह्यः । एतान्सर्वान् यस्य भगवतो योगमायया गौतमादिभिर्विहितान् । 'अविद्यया मनसा कल्पितास्ते' इत्याद्युक्तेः । 'जनिमसुत' इत्यादिना वक्ष्यते वेदस्तुतौ च ॥ ४३ ॥ स्वाराज्यलाभः स्वात्मानंदानुभवस्तेन प्रतिपूरितः पूर्ण आत्मा स्वरूपं यस्य तस्मै । ननु कथं तर्हि सृष्ट्याद्यासक्तिस्तत्राह–गुणेष्विति । वृत्तिभिर्दर्शनादिभिः । वायुर्यथा सर्वत्र गच्छन्नपि न कुत्राप्यासज्जते तद्वल्लीला यस्य तस्मै ॥ ४४ ॥ ४५ ॥ तैस्तैर्मत्स्यकूर्मादिभिः । यद्दुष्टदनुजादिहननलक्षणं नोऽशक्यमसुरादेर्वाऽशक्यम् । कालेकाले इति । 'यदायदा हि धर्मस्य ग्लानिः' इत्याद्युक्तेः ॥ ४६ ॥ अल्पफलप्रदत्वेऽपि विफलोक्तिर्न युज्यत इति चेदाह–यद्वेति । 'कामधियस्त्वयि रचितान् परम रोहति' इत्युक्तेस्त्वदर्पितकर्मणां मोक्षफलत्वं च प्रथमस्कंधेऽप्युक्तम् । ''एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवात्मविनाशाय कल्पंते कल्पिताः परे'' इति ॥ ४७ ॥ तत्र भगवदर्पितकर्मणि । अवैफल्यं साफल्यम् । अत एवात्मत्वादेव ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा हि स्कंधशाखानां तरोर्मूलावसेचनम् ॥ एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥ नमस्तुभ्यमनंताय दुर्वितर्क्यात्मकर्मणे ॥ निर्गु
णाय गुणेशाय सत्त्वस्थाय च सांप्रतम् ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधेऽमृतमथने पंचमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥
एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥ १ ॥ तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः ॥ नापश्यन्खं दिशः
क्षोणिमात्मानं च कुतो विभुम् ॥ २ ॥ विरिंचो भगवान्दृष्ट्वा सह शर्वेण तां तनुम् ॥ स्वच्छां मरकतश्यामां कंजगर्भारुणेक्षणाम् ॥३॥ तप्तहेमावदा
तेन लसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवम् ॥ ४ ॥

ह्यात्मनि दयिते हिते चार्पितं निष्फलं स्यात् ॥ ४८ ॥ अनंतफलत्वमाह । यथा हि मूलावसेचनं स्कंधानां शाखानां च भवति ॥ ४९ ॥ एवं सत्यपि त्वदर्पितकर्मणां त्वद्भक्तानामस्माकं किंनिमित्तमिदं दुःखमिति त्वमेव वेत्सीत्याशयेनाह । नम इति । दुर्वितर्क्याण्यात्मकर्माणि स्वभावचेष्टितानि यस्य तस्मै ॥ ५० ॥ इति श्रीमद्भागवते म० अष्टमस्कंधे टीकायां पंचमोऽध्यायः ॥ ५ ॥ षष्ठे पुनः स्तुतिर्विष्णावाविर्भूते सुरैः कृता ॥ तन्मंत्राचासुरैः साकममृतार्थे महोद्यमः ॥ १ ॥ सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य ॥ १ ॥ महसा तेजसा प्रतिहतानीक्षणानि चक्षूंषि येषाम् ॥ २ ॥ तामाविर्भूतां तनुं विरिंचो दृष्ट्वा तुष्टावेति पंचमेनान्वयः । कंजगर्भवदरुणे ईक्षणे यस्याः । ॥ ३ ॥ तप्तहेमवदवदातेन पीतेन लसता कौशेयवाससा युक्ताम् । प्रसन्नानि चारूणि सर्वाण्यंगानि यस्याः । शोभनं मुखं यस्याः सुन्दरे भ्रुवौ यस्याः ॥ ४ ॥

फलितमाह—न हीति । कर्माभासः अंगवैकल्ययुतं कर्म ॥ ४८ ॥ सर्वेषामिंद्रादीनाम् । आत्मनः स्वस्य च तृप्तिकरं स्यादित्यर्थः ॥ ४९ ॥ त्वदर्पितकर्मणामेवं सत्यप्यनंतफलप्रदत्वे सत्यपि यन्निमित्तं यत इदं जातं निर्गुणाय वस्तुतो गुणसंबंधरहिताय गुणेशाय मायया सर्वगुणप्रेरकत्वेप्यधुना सत्त्वस्थत्वादस्मान्पालयेति भावः । अत्र विश्वनाथः—अस्मदभीप्सितं पूरयिष्यति न वेत्यंतेन प्राप्नुम इत्याहुः । अनंताय सर्वज्ञानामप्यस्माकं त्वयि सार्वज्ञं नास्त्येव संप्रति त्वत्करिष्यमाणं कर्मानुमानेनापि न विद्म इत्याहुः—दुर्वितर्क्येति । ननु मत्कृपामेव हेतूकृत्य मद्भक्तानामिंद्रादीनामभीष्टसिद्धिरनुमीयतां तत्र नेत्याहुः निर्गुणाय । कृपयैव गुणजन्यां संपत्तिमनर्थहेतुं न ददासि । गुणेशायेति । कृपयैव गुणजन्यां संपत्तिं ददास्यपीति तयैव त्वद्दयानुमानसंभवात् । तर्ह्येवं संशये कथं स्तौषि तत्राह—सत्त्वस्थायेति । सत्त्वगुणस्य संप्रति वृद्धिकाल इति सात्त्विकान्देवान्वर्द्धयितुमर्हसीति । एषाञ्च शुद्धभक्त्यभावाद्विषयभोगविच्छेदं कर्तुञ्च नार्हसीति निश्चयोऽपि वर्त्तत इति भावः ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे अष्टमस्कंधे पञ्चमोऽध्यायः ॥ ५ ॥ तन्मंत्राद्विष्णुमंत्रोपदेशात् (१) । तेषां सुरगणानां मध्ये ॥ १ ॥ तेनैव सहस्रार्कोदयसमेन । आत्मानमित्येकत्वं सामान्यापेक्षम् । आत्मनः स्वानित्यर्थः ॥ २ ॥ “विरांचिर्ना विरिंचोऽपि वैकुंठे परमेष्ठिनि” इति मेदिनी ॥ ३ ॥ “अवदातोऽरुणे पीते श्वेते श्यामे च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महामणिकिरीटेन केयूराभ्यां च भूषिताम् ॥ कर्णाभरणनिर्भातकपोलश्रीमुखांबुजाम् ॥ ५ ॥ कांचीकलापवलयहारनूपुरशोभिताम् ॥ कौस्तुभा भरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ॥ ६ ॥ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् ॥ तुष्टाव देवप्रवरः सशर्वः पुरुषं परम् ॥ सर्वामरगणैः साकं सर्वांगैरवनिं गतैः ॥ ७ ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय ॥ अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमोनमस्ते ॥ ८ ॥ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण ॥ योगेन धातः सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ॥ ९ ॥ त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे ॥ त्वमादिरंतो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ॥ १० ॥

महांतो मणयो यस्मिंस्तेन किरीटेन। कर्णाभरणे कुंडले ताभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीमुखांबुजे यस्याः ॥ ५ ॥ कौस्तुभ आभरणं कंठे यस्याः। लक्ष्मीं वक्षसि बिभ्रतीम् ॥६॥ देवप्रवरो ब्रह्मा । सर्वांगैरवनिं गतैः साष्टांगं प्रणतैः ॥७॥ अनाविराविरासेयं नाभूताऽभूदिति ब्रुवन् ॥ ब्रह्माऽभिप्रैति नित्यत्वविभुत्वे भगवत्तनोः ॥ १ ॥ श्रीमूर्तेरयमाविर्भाव एव न त्वस्मदादिवज्जन्मादि तवास्तीत्याह । न जाता जन्मादयो यस्य । कुतः अगुणाय । अतो निर्वाणसुखस्यार्णवाय । अपारमोक्षसुखरूपायेत्यर्थः । तथाऽप्यणोरप्यणिम्नेऽतिसूक्ष्माय दुर्ज्ञानत्वात् । वस्तुतस्त्वपरिगण्यमियत्तातीतं धाम मूर्तिर्यस्य तस्मै । न चैतदसंभावितम् । यतो महानचिंत्योऽनुभावो यस्य तस्मै ॥ ८ ॥ तन्मूर्तेः सनातनत्वमपरिमेयत्वं चोपपादयति। रूपमिति । हे पुरुषर्षभ हे धातः एतत्तव रूपं वैदिकेन तांत्रिकेण च योगेनोपायेन श्रेयोर्थिभिः सदेज्यं पूज्यम् । अतो नेदमिदानीमपूर्वं जातमिति भावः । ननु यूयं देवाः पूज्यत्वेन प्रसिद्धाः । सत्यम् । सर्वेऽप्यत्रैवांतर्भूता इत्याह । उ अहो । ह स्फुटम् । अमुष्मिंस्त्वयि नोऽस्मांस्त्रीन् लोकांश्च सह पश्यामि । तत्र हेतुः । विश्वं मूर्तौ यस्य । अतस्तवैतद्रूपं परिच्छिन्नमपि न भवतीति भावः ॥ ९ ॥ विश्वमूर्तित्वमेवाह । त्वयीति।घटस्य मृत्तिका यथा आदिरंतश्च मध्यं च तथा त्वमस्य जगतः ।

कंथ्यते'' इत्यभिधानात् । ''अवदातः सिते गौरे विशुद्धेप्यन्यलिंगके'' इति मेदिनी ॥ ४ ॥ ५ ॥ कलापो भूषणविशेषः 'कलापः संहतौ तूणे कांच्यां भूषणबर्हयोः' इति कोशात् ॥ ६ ॥ ७ ॥ ब्रह्मा भगवत्तनोर्नित्यत्वविभुत्वे अभिप्रैति निश्चिनोति किं कुर्वन्निति ब्रुवन् इति किमियं मूर्त्तिरनाविः पूर्वमनाविर्भूता नाविर्भूता किं च पूर्वमभूताऽविद्यमानाऽधुना नाभूत्किं तु पूर्वमाविर्भूतैवाधुनाविर्भूता पूर्वं सत्येवाधुनाभूदित्यर्थः । अनित्यं वस्तु पूर्वमसदुत्पद्यते परिच्छिन्नं चानाविर्भूतमाविर्भवतीति भगवतो नित्यापरिच्छिन्नत्वात्तदुभयं नास्तीति भावः । अजातजन्मादित्वे हेतुमाशंकते—कुत इति । अतो निर्गुणत्वादेव । इत्यर्थ इति । गुणसंबंधवतो मोक्षसुखाऽसंभवादिति भावः । तथापि मोक्षसुखरूपत्वेपि । एतदपरिगण्यधामत्वम् । यतो हेतोः ॥ ८ ॥ तन्मूर्त्तेर्भगवन्मूर्त्तेः । इति भाव इति । यतोऽनादिवैदिकतांत्रिकविधिविहिताच्यैर्यं मूर्त्तिरतः सदातनीयमिति तात्पर्यम् । अत्राक्षिपति—नन्विति । अत्रैव त्वन्मूर्त्तौ पुरुषत्वेन प्रसिद्धेष्वस्मास्वृषभस्त्वमेवेति 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' इति प्रसिद्धेरित्यभिप्रेत्याह—पुरुषर्षभेति । धातारिति च । सर्वकारणत्वादर्च्यत्वमाह—नोस्मानिति । निजमूर्त्तिसहितानित्यर्थः । तत्र निजमूर्त्तिसहितत्रिलोकाधारत्वे । यतस्त्वं विश्वमूर्त्तिरतो हेतोः । इति भाव इति । न हि परिच्छिन्नस्य विश्वमूर्त्तित्वं संभवतीति तात्पर्यम् ॥ ९ ॥ तत्रादिमध्यांतत्वे । 'अव्यक्तात्पुरुषः परः' इति श्रुतेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं माययात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः ॥ पश्यंति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ॥११॥ यथाऽग्निमेधस्य मृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिम् ॥ योगैर्मनुष्या अधियंति हि त्वां गुणेषु बुद्ध्या कवयो वदंति ॥ १२ ॥ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभाऽतिचिरेप्सितार्थम् ॥ दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गांगमंभः ॥ १३ ॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्था स्तव पादमूलम् ॥ समागतास्ते बहिरंतरात्मन्किं वान्यविज्ञाप्यमशेषसाक्षिणः ॥ १४ ॥ अहं गिरित्रश्च सुरादयो ये दक्षादयोऽग्नेरिव केतवस्ते ॥ किं वा विदामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमंत्रम् ॥ १५ ॥

तत्र हेतुः । परस्मात्प्रधानादपि परः ॥ १० ॥ मृत्तिकादृष्टांतेन परिणामं प्राप्तं वारयति । त्वमिति । स्वया स्वाधीनया । अत एव गुणानां व्यवाये परिणामेऽप्यगुणमेव त्वां युक्ताः पश्यंति । मनीषिणो विवेकिनः । विपश्चितः शास्त्रज्ञाः ॥ ११ ॥ एतदेव सदृष्टांतमाह । यथाऽग्निं काष्ठे मथनेन । अमृतमाज्यं गोषु दोहनादिना । भुव्यन्नं व्रीह्यादिकर्षणादिना अंबु च खननेन । उद्यमने पुरुषकारे वाणिज्यादिना वृत्तिं जीविकाम् । यद्वा अंबु उद्यमने घटीयंत्रादिनोद्धरणे । योगैरुपायैर्मनुष्या अधियंति प्राप्नुवंति यथा कवयस्त्वां बुद्ध्या गुणेष्वधियंति वदंति च ॥ १२ ॥ हे नाथ हे सरोजनाभ अतिचिरादीप्सितमर्थं तं योगैकप्राप्यं त्वां सम्यगुज्जिहानमाविर्भवंतं प्रत्यक्षतो दृष्ट्वाऽद्य वयं निर्वृतिं गताः । दवार्ता दावाग्निपीडिताः॥ १३ ॥यद्विधेयं तत्कथयेति चेत्तत्राह ।स त्वमिति । हे अंतरात्मन् अशेषसाक्षिणस्ते बहिः किं वाऽन्यैर्विज्ञाप्यमस्ति॥ १४ ॥ यूयमेव किंचित्कुरुतेति चेत्तत्राह । अहमिति । अग्नेः केतवो विस्फुलिंगा इव ते त्वत्तो वयं पृथग्विभाताः संत आत्मनः शं श्रेयः किं वा विद्मः । अतस्त्वमेव

मृत्स्ना प्रशस्ता मृत् "सस्नौ प्रशंसायाम्" इति सूत्रात् ॥ १० ॥ परिणता मृत्स्ना यथा घटस्तथा परिणतं ब्रह्मैव जगद्भवत्विति वारयति स्वया निजया तत्रापि स्वाधीनया । अत एव स्वाधीननिजमायया कर्तृत्वादेव । "व्यवायो व्यवधाने च परिणामे च मैथुने" इत्यभिधानात् । शक्तिपरिणतौ शक्तिमतः परिणामासंभवादगुणम् । युक्ता योगिनः । मनसा मननेन । "मनः स्याद्भूमननयोः" इति तीर्थः । यद्वा मनसाऽग्र्यबुद्ध्या युक्ताः "दृश्यते त्वग्र्यया बुद्ध्या" इति श्रुतेः । 'मनश्चित्ते मनीषायाम्' इति मेदिनी । मनीषिविपश्चिच्छब्दौ परावरविद्यावत्त्वमाहतुः । सगुणा गुणविद्यानिपुणाश्शब्दब्रह्मपरब्रह्मज्ञा इति भावः । "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः ॥ ११ ॥ एतदेव सर्वत्रानुप्रविष्टत्वमेव । योगैरुपायैः कृष्णादिभिर्मनुष्याव्राप्तिमिति यथाक्रमसंभवे भुव्यन्नांबुद्वयकल्पनमयुक्तमिति चेदाह—यद्वेति । गुणेषु गुणमये जगति निर्गुणं त्वां योगैः 'भक्त्याहमेकया ग्राह्यः' इति त्वदुक्तभक्तिभेदैराधियंति प्राप्नुवंति। बुद्ध्या त्वद्दत्तया 'ददामि बुद्धियोगं तम्' इत्याद्युक्तेर्वदंति वयं भगवत्समीपं प्राप्ता इत्येवं ब्रुवंति च यथा मंथनेन काष्ठेऽग्निं तथा श्रवणकीर्तनादिभक्त्या मनोमंथनेन त्वां पश्यंति तदुक्तं पञ्चमे "यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् । मथ्नंति मथ्ना मनसा दिदृक्षवः" इति सत्सहायभूयस्त्वे त्वल्पायासेनैव त्वत्प्राप्तिरिह दृष्टांतः । गोष्वमृतं दुग्धं दोहनेन यथेति वत्समुखसंस्पृष्टापीनप्रस्नुता मित्यर्थः । प्राचीनभक्तिबीजसद्भावे तु भक्तिबाहुल्यप्राप्त्यैव त्वत्प्राप्तिरिह दृष्टांतस्तु भुव्यन्नं कर्षणादिना यथा प्राचीनसत्संगबहुभक्तिसद्भावे तु प्रतिबंधकाभाव एव त्वत्प्राप्तिरिह दृष्टांतः । अंबु जलं खननात्तदावरकमृत्तिका दिदूरीकरणेन यथेति लब्धभक्तीनां तु भजनमात्रेण नित्यमेव त्वत्प्राप्तिरिह दृष्टांतः । उद्यमेन वृत्तिं नर्तकगायकादीनां प्रतिस्वशिल्पोद्यमेनैव जीविकां यथेति विश्वनाथः ॥ १२ ॥ नाथ सरोजनाभेति संबुद्धिद्वयेन प्रभुत्वं जनकत्वं च द्योतयन्स्वस्मिन्कृपामुत्पादयति ॥ १३ ॥ यं दृष्ट्वा वयं निर्वृतिमिताः स त्वमित्यर्थः ॥ १४ ॥ यथा विस्फुलिंगा न किञ्चित्कर्तुं समर्थास्तथा वयमपीति भावः । इत्यर्थ इति । त्वदुपदेशेन तु

॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं विरिंचादिभिरीडितस्तद्विज्ञाय तेषां हृदयं यथैव ॥ जगाद जीमूतगभीरया गिरा बद्धांजलीन्संवृतसर्वकारकान् ॥ १६ ॥ एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः ॥ विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ॥१७॥ श्रीभगवानुवाच ॥ हंत ब्रह्मन्नहो शंभो हे देवा मम भाषितम् ॥ शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथा सुराः ॥ १८ ॥ यात दानवदैतेयैस्तावत्संधिर्विधीयताम् ॥ कालेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः ॥१९॥ अरयोऽपि हि संधेयाः सति कार्यार्थगौरवे ॥ अहिमूषकवद्देवा अर्थस्य पदवीं गतैः ॥ २० ॥ अमृतोत्पादने यत्नः क्रियतामविलंबितम् ॥ यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोऽमरो भवेत् ॥ २१ ॥ क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ २२ ॥ सहायेन मया देवा निर्मंथध्वमतंद्रिताः ॥ क्लेशभाजो भविष्यंति दैत्या यूयं फलग्रहाः ॥ २३ ॥ यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः ॥ न संरंभेण सिध्यंति सर्वेऽर्थाः सांत्वया यथा ॥ २४ ॥

द्विजानां देवानां च मंत्रं विधत्स्व । इदं कुरुतेत्युपायमुपदिशेत्यर्थः ॥ १५ ॥ तत् हृदयं मंत्र उपदेष्टव्य इत्यभिप्रेतं यथा तथैव विज्ञाय जगाद । संवृतानि नियमितानि सर्वाणि कारकाणींद्रियाणि यैस्तान् ॥ १६ ॥ ईश्वरस्यापि तथैवाभिप्रेतमित्याह । सुरेश्वरो भगवान् एक एवेश्वरः समर्थोऽपि सुरासुरैः सह विहर्तुकामः तानाह ॥१७॥ हे सुरा हे देवा अन्ये च गंधर्वादयः ॥ १८ ॥ वः आत्मनः स्वतो यावद्भवो वृद्धिर्भवति ॥१९॥ अर्थस्य प्रयोजनस्य पदवीं सिद्धिं प्राप्तैः ततः पश्चादहिमूषकवद्वध्यघातकभावेन वर्तितव्यमिति शेषः । यद्वा सर्पग्राहिणा पेटिकायां निरुद्धोऽहिर्यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेण संधिं विधत्ते पश्चात्तमेव कदाचिद्भक्षयति तथाऽर्थमार्गप्रवृत्तैः प्रथमं संधेया इत्यर्थः ॥ २० ॥ ततस्तैः सह यत्कार्यं तदाह । अमृतोत्पादन इति । यस्यामृतस्य पीतस्य सतः ॥ २१ ॥ नेत्रं रज्जुम् ॥ २२ ॥ ननु तर्हि तेऽप्यमृतपानेनामराः स्युस्तत्राह । क्लेशभाज इति ॥ २३ ॥ बालिभिः सहकारिभिः साध्या अर्थास्तदनुसरणं विना न सिध्यंतीति कृत्वा सामादिकमुपदिशति यूयमिति द्वाभ्याम् ।

वयमपि कर्त्तुं शक्नुयाम अस्माकं बुद्धिचातुर्यं तु रसातलं गतमित्यर्थः ॥१५॥ तत्पूर्वोक्तम् ' विधत्स्व शम् ' इत्यादिरूपम् । जीमूतगभीरयां मेघशब्दवदूर्जितया ॥ १६ ॥ तथैव यथा देवानामित्यर्थः । तस्मिन् देवजयसंपादनरूपे । सुरेश्वरो विष्णुः । इन्द्रस्य कर्मजसुरेश्वरत्वान्मुख्यः सुरेश्वरो विष्णुरेवेति । तान् देवान् । आदिनामृतपानादिग्रहः ॥ १७ ॥ हंतेति वाक्यारंभे । यथा येन प्रकारेण वः श्रेयः स्यात्तं प्रकारं शृणुत ॥ १८ ॥ तैर्दैतेयैः ॥ १९ ॥ कार्यार्थस्य कर्त्तव्यप्रयोजनस्य । गौरवे गुरुत्वे सति । पूर्वव्याख्याने गौरवं मत्वाह—यद्वेति । इत्यर्थ इति । " यावन्मयूरसंत्रस्तः सर्पो मूषिकवेश्मनि । निलीय निर्भयः पश्चाद्भक्षित्वा मूषिकं गतः ॥ " इति न्यायाद्वेति भावः ॥ २० ॥ ततः संधेरनंतरम् । तैर्दैत्यैः ॥ २१ ॥ मंथानं मंथनदंडम् । " नेत्रं पथि गुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां तु नेत्री नेतारि वाच्यवत् ॥ " इति मेदिनी ॥ २२ ॥ अत्राशंकते—नन्विति । फलग्रहा अमृतपायिनः ॥ २३ ॥ तदनुसरणं बलवत्सहकार्यनुकूलाचरणम् । आदिना दानग्रहः । संभ्रमेण कोपेन ' संरंभः कोपवेगयोः ' इति हलायुधः । ' सांत्वं सामप्रयोगे स्यात् ' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न भेतव्यं कालकूटाद्विषाज्जलधिसंभवात् ॥ लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु ॥ २५ ॥ श्रीशुक उवाच ॥ इति देवान्समादिश्य
भगवान्पुरुषोत्तमः ॥ तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः ॥ २६ ॥ अथ तस्मै भगवते नमस्कृत्य पितामहः ॥ भवश्च जग्मतुः स्वंस्वं धामो
पेयुर्बलिं सुराः ॥ २७ ॥ दृष्ट्वारीनप्यसंयत्ताञ्जातक्षोभान्स्वनायकान् ॥ न्यषेधद्दैत्यराट् श्लोक्यः संधिविग्रहकालवित् ॥ २८ ॥ ते वैरोचनिमासीनं
गुप्तं चासुरयूथपैः ॥ श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥ २९ ॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा महामतिः ॥ अभ्यभाषत तत्सर्वं
शिक्षितं पुरुषोत्तमात् ॥ ३० ॥ तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः ॥ शंबरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ॥ ३१ ॥ ततो देवाऽसुराः
कृत्वा संविदं कृतसौहृदाः ॥ उद्यमं परमं चक्रुरमृतार्थे परंतप ॥ ३२ ॥ ततस्ते मंदरगिरिमोजसोत्पाट्य दुर्मदाः ॥ नदंत उदधिं निन्युः शक्ताः
परिघबाहवः ॥ ३३ ॥ दूरभारोद्वहश्रांताः शक्रवैरोचनादयः ॥ अपारयंतस्तं वोढुं विवशा विजहुः पथि ॥ ३४ ॥ निपतन्स गिरिस्तत्र बहूनमर
दानवान् ॥ चूर्णयामास महता भारेण कनकाचलः ॥ ३५ ॥ तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥
॥ ३६ ॥ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥ ३७ ॥ गिरिं चारोप्य गरुडे हस्तेनैकेन
लीलया ॥ आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥ ३८ ॥

हे सुराः । संरंभेण संभ्रमेण । सांत्वया साममार्गेण यथा सिध्यंति ॥ २४ ॥ वस्तुषु मथनादुत्पन्नेषु ॥ २५ ॥ २६ ॥ सुरास्तु बलिमुपेयुरुपजग्मुः ॥२७॥ असंयत्तान
युद्धोद्यतानपि दृष्ट्वा । श्लोक्यः कीर्त्यर्हः ॥ २८ ॥ वैरोचनिं बलिम् । जितमशेषं त्रैलोक्यं येन तम् ॥ २९ ॥ तत्सर्वममृतोन्मथनादि ॥ ३० ॥ तत्र ये अन्ये चासुरा
धिपाः पौलोमकालेयादयः शंबरादयश्च तेभ्यश्चारोचत ॥३१॥ संविदं समयम् ॥३२॥ परिघा इव बाहवो येषाम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

च । स्त्रीत्वमार्षम् ॥ २४ ॥ कालकूटात् हलाहलात् । कालः कूटो गुप्तो यस्मिंस्तत्तथा ' कूटोऽस्त्री गुप्तदंभयोः ' इति । वो युष्माभिर्युष्माकं वा " कृत्यानां कर्त्तरि वा " इत्यनुशासनात् । कामोऽभिलाषः ॥ २९ ॥
इतीत्थम् । तेषां देवानां मध्ये स्वच्छंदा स्वायत्ता गतिर्यस्य स तथा ॥ २६ ॥ अथ हर्यंतर्द्धानानंतरम् । तस्मै अंतर्हिताय ॥ २७ ॥ असंयत्तान् असंनद्धान् । स्वनायकान् स्वसेनामुख्यान् । निषेधे हेतुः—श्लोक्य इति ॥
॥ २८ ॥ ते देवाः ॥ २९ ॥ यत्पुरुषोत्तमाच्छिक्षितम् । आदिना मंदरानयनादिग्रहः । दैत्यानिति शेषः ॥ ३० ॥ तत्र बलिसभायाम् । तत् समुद्रोन्मथनादि । अरोचत संमतमभवत् । उत्पत्स्यमानममृतमेतान्निर्बलांस्तिर
स्कृत्य वयमेव ग्रहीष्याम इत्यभिप्रायेणेति भावः ॥ ३१ ॥ ततोन्योन्यसंभाषणानंतरम् । संविदं प्रतिज्ञाम् । ' संविदागूः प्रतिज्ञानम् ' इत्यमरः । "संविद्युद्धे प्रतिज्ञायामाचारे नाम्नि तोषणे । संतोषणे क्रियाकारे संकेतज्ञान
योरपि ॥ " इत्यजयश्च ॥ ३२ ॥ ततः संविदनंतरम् । परिघा अर्गला इव लंबाः "परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः" इति मेदिनी ॥ ३३ ॥ दूरदेशं प्रति भारो भरणं यस्य स दूरभारो गिरिस्तस्योद्वहो धारणं तेन
श्रांताः । तं गिरिम् । अपारयंतोऽशक्नुवंतः । विजहुस्तत्यजुः ॥ ३४ ॥ तत्र तदा । कनकाचलो हेममयः कनकमयत्वादेवाचलः कनकस्य प्रस्तरापेक्षया भाराधिक्यात् ॥ ३५ ॥ तान् देवासुरान् । भग्नमनसो नष्टो
त्साहान् । तत्र तदा । गरुडध्वजः गरुडवाहनः 'ध्वजो वाहनीचह्नयोः । न द्वयोः शौंडिके पुमान् ' इति कोशात् । आविरिति शेषः ॥ ३६ ॥ ईक्षयाऽमृतदृष्ट्या ॥ ३७ ॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः ॥ ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधेऽमृतमथने मंदराचलानयनं नाम षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फलभागेन वासुकिम् ॥ परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥ १ ॥ आरेभिरे सुसंयत्ता अमृतार्थं कुरूद्वह ॥ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥ २ ॥ तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितम् ॥ न गृह्णीमो वयं पुच्छमहेरंगममंगलम् ॥ ३ ॥ स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ॥ इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ॥ ४ ॥ कृतस्थानविभागास्त एवं कश्यपनंदनाः ॥ ममंथुः परमायत्ता अमृतार्थं पयोनिधिम् ॥ ५ ॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ध्रियमाणोऽपि बलिभिर्गौरवात्पांडुनंदन ॥ ६ ॥ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ॥ आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥ ७ ॥ विलोक्य विघ्नेशविधिं तदेश्वरो दुरंतवीर्योऽवितथाभिसंधिः ॥ कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार ॥ ८ ॥

विसर्जितः प्रस्थापितः । सुपर्णे तत्र स्थिते वासुकेरागमनायोगादिति भावः ॥ ३९ ॥ इति श्रीमद्भागवते अष्टमस्कंधे टीकायां षष्ठोऽध्यायः ॥ ६ ॥ सप्तमे मथनोद्भूतविषभीत्याऽखिलैर्जनैः ॥ स्तुतः सन्कृपया रुद्रः पपौ विषमितीर्यते ॥ १ ॥ फलभागेन तवाप्यमृते भागो भविष्यतीत्यामंत्र्य संमंत्र्य वासुकिं नेत्रं गिरौ परिवीय संवेष्ट्याब्धिं मंथितुमारेभिरे ॥ १ ॥ वासुकेर्मुखं तीव्रं दैत्यान्ग्राहयितुमेव पूर्वं हरिः पुरस्तान्मुखे जगृहे । देवा अपि ततोऽभवन्मुखं जगृहुः ॥ २ ॥ ३ ॥ ४ ॥ कृतो धारणे स्थानविभागो यैः ॥ ५ ॥ ६ ॥ दैवेन हेतुना स्वपौरुषे नष्टे सति ॥ ७ ॥ विघ्नेशस्य विधिं तेन रचितं विघ्नम् । अवितथः सत्योऽभिसंधिः संकल्पो यस्य ॥ ८ ॥

जलांते जलमध्ये ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे षष्ठोऽध्यायः ॥६॥ (१) । ते देवासुराः । तस्मिन् मंदराख्ये ॥१॥ ततो मुखपार्श्वे ॥ २ ॥ तत् स्वयं मुखग्रहणेनास्मानयमशुच्यंगं ग्राहयतीत्येतत् ! तदेवाह–नेति ॥३॥ इत्युक्त्वा विषज्वालया यूयमेव म्रियध्वमित्यभिप्रायेण स्मयमान इति ॥ ४ ॥ ५ ॥ ६ ॥ ते देवासुराः ॥ ७ ॥ विघ्नेशस्य गणेशस्य विधिम् । 'कार्यारंभे गणेशश्च पूजनीयः प्रयत्नतः' इत्यादिशास्त्रविहितपूजनलक्षणविधिं तदकरणात्तेन गणेशेन रचितं कृतम् "देवासुरास्तथा मर्त्या यत्कुर्वंति जगत्पते । अनाराध्य गणाध्यक्षं तन्न सिध्यति कर्हिचित्॥ " इति कृष्णं प्रति नारदोक्तेः । तदा मंथनारंभे । लोकं ग्राहयितुं गणेशं संपूज्य सत्यसंकल्पः । विश्वनाथस्तु–विघ्ने ईष्टे समर्थो भवतीति विघ्नेशो यो विधिस्तं विलोक्यास्मिन्विघ्नेऽयमेव प्रकारो योग्य इति विचार्य काच्छपं वपुः कृत्वोज्जहारोर्द्ध्वं नीतवान् । कच्छपजातेरेव जलाधस्थवस्तूर्द्ध्वानयने योग्यता स्वभाविकीति विमृश्येति भावः । संदर्भस्तु–विघ्नेशविधिशब्दस्य विघ्नवाचित्वमात्रे तात्पर्यन्तु विघ्नेशरचितत्वे स्थलजलरुहशब्दवत् तस्यापि देवतास्वेकत्वादित्याह । स हरिरद्भुतमदृष्टश्रुतचरम् ॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः ॥ दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ॥ ९ ॥ सुरासुरेंद्रैर्भुज वीर्यवेपितं परिभ्रमंतं गिरिमंग पृष्ठतः ॥ बिभ्रत्तदावर्त्तनमादिकच्छपो मेनेंगकंडूयनमप्रमेयः ॥ १० ॥ तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमी रयन् ॥ उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेंद्रमबोधरूपः ॥ ११ ॥ उपर्यगेंद्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः ॥ तस्थौ दिवि ब्रह्मभवेंद्रमुख्यै रभिष्टुवद्भिः सुमनोऽभिवृष्टः ॥ १२ ॥ उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः ॥ ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षोभि तनक्रचक्रम् ॥ १३ ॥ अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः ॥ पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् ॥ १४ ॥ देवांश्च तच्छ्वासशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान् ॥ समभ्यवर्षन्भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः ॥ १५ ॥ मथ्यमानात्तथा सिंधोर्देवासुरवरूथपैः ॥ यदा सुधा न जायेत निर्ममंथाजितः स्वयम् ॥ १६ ॥ मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्वि लुलितकचः स्रग्धरो रक्तनेत्रः ॥ जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः ॥ १७ ॥

लक्षयोजनः प्रस्तारो विस्तारोऽस्यास्तीति तथा तेन पृष्ठेन ॥ ९ ॥ तस्य गिरेरावर्तनं भ्रमणमंगकंडूयनं मेने ॥ १० ॥ आसुरेणासुराकारेण दैवेन देवाकारेण रूपेणाविशत् ॥ ११ ॥ १२ ॥ आत्मनि देवदैत्यमध्ये तत्तदाकारेण । गोत्रे दार्ढ्यरूपेण नेत्रे अभेद्याबोधरूपेण । परेण हरिणा । क्षोभितं नक्राणां चक्रं समूहो यस्मिन् ॥ १३ ॥ दृशश्च मुखानि च श्वासाश्च । अहींद्रस्य साहस्रमपरिमिताः कठोरा ये दृगादयस्तेभ्यो निर्गताभ्यामग्निधूमाभ्यामाहतं वर्चो येषां ते । सरला द्रुमविशेषाः ॥ १४ ॥ देवांस्तु भगवद्वशा घनाः समभ्यवर्षन् । समुद्रोर्मिभिरुपगूढा वायवश्च शीतला ववुर्वांति स्म । कथंभूतान् । तस्याहींद्रस्य श्वासशिखाभिर्हता प्रभा येषाम् । धूम्राण्यंबरादीनि येषाम् ॥ १५ ॥ १६ ॥ धृतोऽद्रिर्येन स धृताद्रिर्भगवान्परमपुरुषोऽनंतरमशोभतेत्यन्वयः । कथंभूतः । कनकपरिधिः पीतवासाः । कर्णयोर्विद्योतमाना विद्युत्कुंडललक्षणा यस्य । तथा मूर्ध्नि भ्राजंतो विलुलिताः

तं मन्दरम् । कुलाचलं तेषु गणितम् ॥ ९ ॥ पृष्ठतः पृष्ठेन तृतीयार्थे तसिः । आदिकच्छपो यः शेषाधारः कूर्मरूपो भगवान्स एव तदा निजां तां मूर्त्तिं मंदरधृतये प्रादुश्चकारेति "कूर्मो बिभर्त्ति धरणिं निजपृष्ठभागे । कृत्वां तरानंतभुजंगराजम्" इत्याद्युक्तेः । कतिपयक्षणोत्तरं देवानां मंथनासामर्थ्यं गिरिसंघर्षजपीडया वासुकेश्च प्राणत्यागमिवालक्ष्य कृपया स्वयमेव प्रभुस्तं गिरिं दधारेत्यर्थः ॥ १० ॥ अथ कूर्मरूपेण गिरिधारणानंतरम् । तेषाम सुराणाम् । नागेंद्रं वासुकिम् । अबोधमज्ञातं रूपं यस्य स तथा । अतिबलवदाकर्षणेऽपि ज्ञानं विना यद्भेदो न जायते तादृग्रूपो वा गिरिसंघर्षजपीडाज्ञानमस्य मा भवत्वित्यबोधरूपो वा ॥ ११ ॥ एकेन रूपेणागेंद्रमा क्रम्य । हस्तेन हस्तैः एकत्वं सामान्याभिप्रायम् 'सहस्रबाहुः' इत्युक्तेः । अन्यो गिरिराडिवोपरि तस्थौ अन्यथा कूर्मपृष्ठस्य नतोन्नतत्वात्तत्र गिरिस्थितेरसंभवात् । ब्रह्मभवेंद्रेभ्योऽपि मुख्यैः श्रेष्ठैर्विष्णुपार्षदैरित्यर्थः । यद्वा—भवस्य कैलासे दिवि चेंद्रादीनां क्षीरोदतीरे स्वर्गे च कायव्यूहो ज्ञेयः । सुमनोभिः पुष्पैरभिवृष्टः ॥ १२ ॥ उपरि सहस्रबाहुरूपेणाधः कूर्मरूपेण । ते देवासुराः । तरसा बलेन ॥ १३ ॥ वर्चस्तेजः 'वर्चः स्याद्रूपतेजसोः' इति धरणिः ॥ १४ ॥ १५ ॥ तदेति पाठः सुबोधः ॥ १६ ॥ परितो धीयते धार्यते इति परिधिः " कांची कंचुकशाखोपसूर्यकाब्धिषु कथ्यते । परिधिः परिखायां च । " इति निरुक्तिः । कनकमिव परिधिर्यस्येति कन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः ॥ संभ्रांतमीनोन्मकरादिकच्छपात्तिमिंद्विपग्राहतिमिंगिलाकुलात् ॥ १८ ॥ तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति ॥ भीताः प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥ १९ ॥ विलोक्य तं देववरं त्रिलोक्या भवाय देव्याऽभिमतं मुनीनाम् ॥ आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥ २० ॥ प्रजापतय ऊचुः ॥ देवदेव महादेव भूतात्मन्भूतभावन ॥ त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥ २१ ॥

कचा यस्य स तथा । जैत्रैर्जिष्णुभिः । दंदशूकं सर्पम् । मथ्ना मंदराख्येन मथ्नन् प्रतिगिरिः प्रतिद्वंद्वी पर्वतः ॥ १७ ॥ हालाहलमित्याह्वा नाम यस्य । संभ्रांता मीना उद्गता मकरादयश्च यस्मिंस्तस्मात् । तिमयो मत्स्यास्तदादिभिराकुलाच्च ॥ १८ ॥ तद्विषम् । अप्रति अप्रतिमं प्रतिक्रियाशून्यमिति वा । कुतः । उग्रो वेगो यस्य । तदेवाह दिशिदिशीति । दिशिदिशि सर्वासु दिक्षु विसर्पत् विसारि । यद्वा उग्रा वेगा रोमांचस्वेदादयो यस्मादत एवासह्यवीर्यं विलोक्य भीता अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुर्जग्मुः ॥ १९ ॥ त्रिलोक्या भवाय उद्भवाय देव्या सहाद्रौ कैलासे आसीनं तथाऽपि मुनीनामभिमतं तेषामेवापवर्गाय तपो जुषाणम् ॥ २० ॥ "निर्गुणं सगुणं चैव शिवं हरि

कस्य परिधिर्यस्येति वा । कांचीकंचुकयोर्ग्रहणमत्र । यद्वा–विशिष्टो द्योतो दीप्तिर्ययोस्ते विद्योते कुंडले कर्णयोर्विद्योते कर्णविद्योते ताभ्यां विद्योतते दीप्यते इति कर्णविद्योतविद्युत् । 'कचो रोम्णि च जीवजे' इति धरणिः । कचा रोमाणि । अथो सुधोत्पत्त्यभावानंतरम् । धृताद्रिः कूर्मरूपेण वा ॥ १७ ॥ "हालाहलं हालहलं तथैव च हलाहलम्" इति द्विरूपकोशात् । वीरुदादिषु विषस्यामृतस्य च सत्त्वात्प्रथमं मंथनेन विषभाग एव पृथक्कृत इति ज्ञेयम् । संभ्रांताः केयं विपत्तिरागतेत्याविग्नाः मीनादयो यस्मिंस्तस्मात् । उन्मकरो उत्कृष्टमकरः । तिमिः शतयोजनो मत्स्य इति । द्विपोऽप्यत्र जलजीव एव न तु हस्ती तन्मध्यपतितन्यायेन । ॥ १८ ॥ तद्विषम् । तदेवोग्रवेगत्वमेव । तत्रोग्रवेगकल्पने । तदाधारेऽपि तत्प्रसंगादाह–यद्वेति । अत एवोग्रवेगत्वादेव । उपसर्पणं च शनैरेव ज्ञेयं शीघ्रत्वे झटिति सृष्टिनाशापत्तेः । प्रजाश्चात्र देवासुरा एव ग्राह्याः साधारणानां झटिति कैलासगत्यसंभवात् । अत्र भगवता चंद्रमौलये तादृशकीर्त्तिं दातुं स्वयं विषात्प्रजा न रक्षिता इति ज्ञेयम् ॥ १९ ॥ अभिमतम्मान्यम् । तेषामेव मुनीनामेव । तच्छिक्षणार्थं तद्दृष्ट्वा तेषां तत्र प्रवृत्तेर्मोक्षसंभवात् । "आत्मविद्या तपोमूलम्" इत्यादिश्रुतेः "तपसैव परं ज्योतिरंजसा विंदते पुमान्" इति स्मृतेश्च ॥ २० ॥ हरिपराक्रमैः विष्णोः पराक्रमैः पालनादिरूपैः । तयोर्हरिहरयोरंतरं भेदं प्रजेशाना दक्षादयः । हरिपराक्रमैरित्युक्तेर्हरेरेव मूलत्वमायातमत एव यत्तदन्तरमस्ति तदपि स्तुतितात्पर्यान्नामन्यतेत्यायाति । स्तुतिश्च 'महिम्ना स्तूयमाना हि देवा वीर्येण वर्द्धंते' इति वैदिकन्यायेन कालकूटनाशार्थैव श्रीहरमूलत्वं तु श्रीशिवेनैव वक्ष्यते "पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः । प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥" इति। नवमेऽपि "वयं न तात प्रभवाम भूम्नि यस्मिन्परेन्येप्यजजीवकोशाः । भवंति कालेन भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥" इति । "एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः" इति। पंचमेपि। देवा एतद्विषाद्रक्षणेऽशक्ता अतस्त्वां देवदेवं वयं प्रपन्ना इत्याहुः–देव देवेति । देवानामपि देवोसीत्यभिप्रायः। ननु देवदेवा इंद्राद्यन्येऽपि संतीत्यत आहुर्महादेवेति । न हि त्वत्तो महान्कश्चिद्देवोस्तीत्यभिप्रायः । तत्र हेतुः–भूतानामाकाशादीनामात्मा धारकस्त्वमेव "परमे व्योमन्सर्वा भूतानि" इति श्रुतेः। तत्रापि हेतुः–भूतानि भावयत्युत्पादयति स्वस्मादिति भूतभावनोपि त्वमेवासि "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुतेः । चक्रवर्त्ती तु–हे महादेव त्राहि । ननु महादेवो न त्रायते किं तु संहरति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः ॥ तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥ गुणमय्या स्वशक्त्याऽस्य सर्गस्थित्यप्ययान्विभो ॥ धत्से यदा स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधाम् ॥ २३ ॥ त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः ॥ नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥२४॥ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेंद्रियद्रव्यगुणस्वभावः ॥ कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनंति ॥ २५ ॥ अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजम् ॥ कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ॥ २६ ॥

पराक्रमैः ॥ स्तुवंतस्तु प्रजेशाना नामन्यंतांतरं तयोः ॥१॥"॥ २१ ॥ २२ ॥ नन्वेवंभूतो विष्णुरिति प्रसिद्धं तत्राहुः । गुणमय्येति । अस्य जगतो यदा सर्गादीन्धत्से तदा हे भूमन्स्वदृक् स्वतःसिद्धज्ञानस्त्वं ब्रह्मादिसंज्ञां धत्से ॥ २३ ॥ तत्र हेतुः । त्वं ब्रह्मेति । सदसतो भावान्देवतिर्यगादिरूपान्भावयतीति तथा सृज्यं तु त्वद्व्यतिरिक्तं नास्तीत्याहुः । आत्मैव त्वं नानाशक्तिभिर्जगद्रूपेणाभातस्तस्मादीश्वरः ॥ २४ ॥ स्वतःसिद्धज्ञानत्वमुपपादयंतो जगदात्मना आभानप्रकारमाहुः । त्वं शब्दस्य वेदस्य योनिरतः स्वतःसिद्धज्ञानः । त्वं जगदादिर्महत्तत्त्वम् । आत्मा चाहंकारः । कथंभूतः । प्राणेंद्रियद्रव्याणां कारणभूता गुणा यस्य । राजसादित्रिविध इत्यर्थः । स्वभावादयश्च त्वमेव । तत्र क्रतुः संकल्पः सत्यमृतं चेति यो धर्मः स च त्वम् । महदादिस्वरूपत्वे हेतुः त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधानं त्वयि त्वदाश्रयं तदामनंति । यद्वा एवंभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाहुरित्यर्थः॥२५॥अखिलदेवतात्मा । "अग्निः सर्वा देवता" इति श्रुतेः । सोऽग्निस्ते मुखम् । हे लोकभव । द्वितीयांतेषु विदुरित्यस्य संबंधः॥२६॥

संहारावतारव्यक्तित्राहुः–भूतात्मन्निति । भूतानि चेतयसि हे भूतभावन भूतानि पालयस्येव । एतादृक्तु विष्णुरेव तमेव शरणं यातेति तत्राहुस्त्वमेकः । न हीश्वरा बहवः संत्यतस्त्वं विष्णुश्चैक एव मायागुणस्पर्शास्पर्शाभ्यामेव भेद इति भावः ॥ २१ ॥ "बंधको भवपाशेन भवपाशाच्च मोचकः । विष्णुरेव परं ब्रह्म" इति स्कांदोक्तेः । कुशलाः शास्त्ररहस्यज्ञाः । गुरुं हितोपदेष्टारम् ॥ २२ ॥ अत्राक्षिपति–नन्विति । एवंभूतो भवबंधमोक्षकर्त्ता । तत्राक्षेपे । भूमन्निति । त्वमेव तत्तद्रूपेण प्रतीयसे न त्वत्तो विष्णुर्भिन्नोऽस्तीति भावः ॥ २३ ॥ तत्र विष्णुभिन्नत्वे । भावयति उत्पादयति वर्द्धयति संहरति चेति सदसद्भावभावनः "यतो वा इमानि भूतानि जायंते" इत्यादिश्रुतेः । सृज्यं विश्वं नानाशक्तिभिः सत्त्वादिभिः । आभातस्त्वमेव जगत् ईश्वरः मायाशक्तिमान् 'मायिनं तु महेश्वरम्' इति श्रुतेः ॥ २४ ॥ योनिः कारणम् "अस्य वै महतो भूतस्य निःश्वसितं यदृग्वेदः–" इत्यादिश्रुतेः । अतो वेदकारणत्वात् । द्रव्यपदं महाभूतार्थकम् । इत्यर्थ इति । गुणत्रयकारणीभूतप्रधानमाश्रयोऽपि त्वमेवेति भावः । प्राणेंद्रियेत्याद्युक्त्यैव प्रधानाश्रयत्वमागतं पुनस्तत्कथने पुनरुक्तिसंभवादाह–यद्वेति । एवंभूते वेदादिकारणीभूते । त्रिवृत् अकारोकारमकाररूपेण त्रिप्रकारम् । इत्यर्थ इति । "य ॐकारः स प्रणवो यः प्रणवः स प्राणो यः प्राणः स सर्वव्यापी सोऽनंतो योनंतस्तत्तारं यत्तारं तच्छुक्लं यच्छुक्लं तत्सूक्ष्मं यत्सूक्ष्मं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्म यत्परं ब्रह्म स एको य एकः स रुद्रो यो रुद्रः स ईशानो य ईशानः स भगवान्महेश्वरः स परमशिवः" इत्यादिश्रुतेः ॥ २५ ॥ लोकानां भव उत्पत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभिर्नभस्ते श्वसनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्म रेतः ॥ परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवञ्छिरस्ते ॥ २७ ॥ कुक्षिः समुद्रा गिरयोऽस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते ॥ छंदांसि साक्षात्तव सप्त धातवस्त्रयीमयात्मन्हृदयं सर्वधर्मः ॥ २८ ॥ मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यं परमार्थतत्त्वं देवः स्वयंज्योतिरवस्थितिस्ते ॥ २९ ॥ छाया त्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि ॥ सांख्यात्मनः शास्त्रकृतस्तवेक्षा छंदोमयो देवऋषिः पुराणः ॥ ३० ॥ न ते गिरित्राखिललोकपालविरिंचवैकुंठसुरेंद्रगम्यम् ॥ ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्रह्म निरस्तभेदम् ॥ ३१ ॥

परे अवरे च ये आत्मानो जीवास्तेषामाश्रयस्तवात्माऽहंकारः ॥ २७ ॥ त्रयीमयात्मन्वेदत्रयमूर्ते ॥ २८ ॥ पंचोपनिषदस्तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मंत्राः । यैर्मुखैरष्टोत्तरत्रिंशन्मंत्राणां वर्गः । तेषामेव मंत्राणां पदच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मंत्रा इत्यर्थः । अवस्थितिरुपरतावस्था ॥ २९ ॥ अधर्मस्योर्मिषु दंभलोभादिषु ते छाया । यैरूर्मिभिर्विसर्गः प्रतिसर्गः संहारः । यद्वा यैः सत्त्वादिभिर्विविधः सर्गस्तानि ते नेत्रत्रयम् । हे देव छंदोमय ऋषिर्वेदः स तवेक्षा ईक्षणम् । साक्षान्मनुरिति पाठे मनुर्वेदः । तमेवाह । छंदोमय इति ॥ ३० ॥ हे गिरित्र ते परं ज्योतिरखिलानां लोकपालादीनां गम्यं न भवति । कुतः । यत्र रजआदि नास्ति । किं तज्ज्योतिः ।

र्यस्मात्स तथा । इत्यभिप्रेत्यैवं स्वामिनोक्तं लोकभावनेति । अखिलदेवतात्मा सर्वदेवतास्वरूपः । प्रमाणमाह—अग्निरिति । जलेशं वरुणम् । रसनं रसनेंद्रियम् ॥ २६ ॥ २७ ॥ स प्रसिद्धः ॥ २८ ॥ तेषां पंचानामेव परिच्छेदेन पदच्छेदेन । इत्यर्थ इति । "तत्पुरुषाय विद्महे शांत्यै १ । महादेवाय धीमहि विद्यायै २ । तन्नो रुद्रः प्रतिष्ठायै ३ । प्रचोदयात् धृत्यै ४ । अघोरेभ्यस्तमा० ५ । अथ घोरेभ्यो मोहा० ६ । अघोरेभ्यो रक्षा० ७ । अघोरतरेभ्यो निद्रा० ८ । सर्वेभ्यः सर्वव्याध्यै ९ । सर्वसर्वेभ्यो मृत्यवे १० । नमस्तेऽस्तु क्षुधा० ११ । रुद्ररूपेभ्यस्तृष्णा० १२ । वामदेवाय रजा० १३ । ज्येष्ठाय स्वाहा० १४ । श्रेष्ठाय रत्यै १५ । रुद्राय कल्याण्यै १६ । कालाय कामा० १७ । कलविकरणाय संधिन्यै १८ । बलविकारणाय क्रिया० १९ । बलाय वृद्ध्यै २० । बलच्छाया० २१ । प्रमथनाय धात्र्यै २२ । सर्वभूतदमनाय भ्रामण्यै २३ । मनःशोषिण्यै २४ । उन्मनाय ज्वरा० २५ । सद्योजातं प्रपद्यामि सिद्ध्यै २६ । सद्योजाताय वैनमः ऋद्ध्यै २७ । भवेदित्यै २८ । अभवे लक्ष्म्यै २९ । नातिभवे मेधा० ३० । भजस्व मां कांत्यै ३१ । भव स्वधा० ३२ । उद्भवाय प्रभा० ३३ । ईशानः सर्वविद्यानां शशिन्यै ३४ । ईश्वरः सर्वभूतानाम् अभयदा० ३५ । ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मन् ब्रह्मेष्टदा० ३६ । शिवो मे अस्तु मरीच्यै ३७ । सदाशिवः ज्वालिन्यै ३८ ।" "ईशानस्य कलाः पञ्च चतस्रः पुरुषस्य हि । अष्टौ प्रोक्ता अघोरस्य वामस्याथ त्रयोदश ॥ सद्योजातकला अष्टावष्टात्रिंशत्कला इमाः" इत्युक्तं पूर्त्तकमलाकरे । मुखैर्मंत्ररूपैः । यत्तदिति वक्तुमशक्यं शिवाख्यं ब्रह्माख्यं परमार्थतत्त्वं सत्यस्वरूपं स्वयं प्रकाशम् । यद्वा यच्छिवाख्यं तत्तेवस्थितिरिति योज्यम् ॥ २९ ॥ दंभाद्या ऊर्मयो धर्मार्णवतरंगभूताः छायेत्यर्थः । विरुद्धः सर्गः विसर्गः तदेवाह—प्रतिसर्ग इति । "अंते त्वधर्महरमन्युवशासुराद्याः" इत्युक्तेः । प्रसिद्धार्थपरित्यागमसहमान आह—यद्वेति । छंदोमयो गायत्र्यादिछंदःप्रचुरः । "ऋषिर्वेदे वशिष्ठादौ दीधितौ च पुमानयम्" इत्युक्तेः । सांख्यात्मनो ज्ञानरूपस्य शास्त्रकृतो वेदोद्भावयितुः ॥ ३० ॥ तव भक्ताभीष्टदत्वात्पार्वतीप्रीतये दग्धो गिरित्रातोऽतोऽस्मानपि त्राहीत्यभिप्रायेणाह्वः—गिरित्रेति । यत्र ज्योतिषि । सगुणमेव वस्तु गोचरी भवतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते ॥ यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं न वेद ॥ ३२ ॥ ये त्वात्मरामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं चरंतमुमया तपसाभितप्तम् ॥ कत्थंत उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥ ३३ ॥ तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ॥ ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रम् ॥३४॥ एतत्परं प्रपश्यामो न परं ते महेश्वर ॥ मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥ श्रीशुक उवाच ॥ तद्वीक्ष्य व्यसनं तासां कृपया भृशपीडितः ॥ सर्वभूतसुहृद्देव इदमाह सतीं प्रियाम् ॥ ३६ ॥

यन्निरस्तभेदं ब्रह्म ॥ ३१ ॥ कामश्चाध्वरश्च दक्षयज्ञस्त्रिपुरादयश्च ये अनेकभूतद्रुहस्तान् क्षपयतः संहरतस्ते तत्कर्म स्तुतये न भवति । अत्यल्पमेतदित्यर्थः । गरक्षपणस्याप्यवश्यंभावित्वेन सिद्धवन्निर्देशः । स्तुतयेऽलं न भवतीत्यत्र हेतुः । यस्तु भवान्स्वनेत्रवह्निविस्फुलिंगस्य शिखयेदं जगद्भसितं भस्मसाज्जातं न वेद नालोचयत्यपि ॥ ३२ ॥ तदेवं नित्यं परानुग्रहव्यग्रं त्वां ये निंदंति तेऽतिमूर्खा इत्याहुः । ये तु उमया सह चरंतं तस्यां नितरां रतं कामिनं कत्थंते प्रलपंति तथा श्मशाने चरंतमुग्रं क्रूरं परुषं च हिंस्रं कत्थंते । कथंभूतम् । आत्मारामाश्च ते गुरवो विश्वहितोपदेष्टारस्तैर्हृदि चिंतितमंघ्रिद्वंद्वं यस्य तथाभूतमपि तपसाऽभितप्तमपि । ते नूनं तवोतिमविदन्निति काकुः । त्वल्लीलां नैव विदुरित्यर्थः । अतो हातलज्जास्त्यक्तत्रपाः । कथमात्मारामैः सेवितचरणयुगलस्य ते कामित्वं संभवति कथं वा तपसाऽभितप्तस्य शांतस्योग्रत्वं परुषत्वं वा संभवतीत्यविचार्यैव प्रलापादित्यर्थः ॥ ३३ ॥ आस्तां तावन्निंदकानां वार्ता महांतोऽपि तव तत्त्वं न जानंतीत्याहुः । तत्तस्मात्तव स्वरूपस्य गमने ज्ञाने ब्रह्मादयोऽपि न समर्थाः संस्तवने तु कुतः शक्ताः स्युस्तत्र वयं कथं प्रभवेम । यतस्तेषां सर्गेऽत्यंतार्वाचीनाः । तथापि यदेतत्तव स्तवनमेतदात्मशक्तिपरिमितमात्रमित्यर्थः ॥ ३४ ॥ तदेवाहुः एतत्परमिति । न परं रूपं तथाऽपि त्वद्दर्शनादेव कृतार्था वयमित्याहुः । मृडनाय हीति । अव्यक्तकर्मणः अतर्क्यलीलस्य ॥ ३५ ॥ ३६ ॥

भावः ॥ ३१ ॥ कालगरं मृत्युकरं विषम् । आदिनांधकादिग्रहः । यद्वा—कालो मृत्युः मृत्युंजयाभिधानत्वात् । इत्यर्थ इति । यथा त्रैलोक्यांधकारहर्तू रवेर्गृहांधकारशमकत्वं न स्तुतिस्तद्वदिति भावः । भाविकथनं त्रिकालज्ञत्वाद्देवानामित्याह—गरक्षपणेत्यादि । नालोचयति तुच्छत्वदृष्ट्येति भावः । कालगरौ दैत्यौ वा काले मृत्युः गरं विषं वा । तस्यावश्यसंहार्यत्वेन सिद्धवन्निर्देशः ॥ ३२ ॥ गुरवो नारदादयः । तथाभूतमपि विश्वगुरुध्यातांघ्रिद्वंद्वमपि । लोकसंग्रहार्थं तपोरतमपि । इत्यर्थ इति । त्वन्निंदका खेरुलूका इव तव प्रभावं न जानंतीति भावः । अतोऽज्ञत्वात् । इत्यर्थ इति । सारमेयाः साधु पथिकमिव ते केवलं भषंतीति भावः ॥ ३३ ॥ दुर्ज्ञेयत्वत्वमाहुः—आस्तामित्यादिना । यतो दुर्ज्ञेयोऽसि तत्तस्मात् । सदसतोः कार्यकारणयोः । परतः परायाः प्रकृतेरपि परस्य "अव्यक्तात्पुरुषः परः" इति श्रुतेः । अंजो याथार्थ्येन भूम्नस्ते ज्ञानं विना स्तवनासंभवदाह—किमुतेति । तत्र त्वयि । यतो हेतोः तेषां । ब्रह्मादीनाम् । अत्यंतार्वाचीना अतीवांतरिताः ब्रह्मसर्गो मरीचिस्तत्सर्गः कश्यपस्ताद्विषयास्तत उद्भूता इति गणनयेति । यद्यपि तव प्रभावमजानंतो वयं तथापीति । इत्यर्थ इति । "नभः पतंत्यात्मसमं पतत्रिणः" इति न्यायमाश्रित्यास्मत्स्तुतिर्भक्तिप्रकटनार्थेति भावः ॥ ३४ ॥ तदेवात्मशक्तिमात्रत्वमेव एतत्पक्षमेव ते रूपं परं वागाद्यगोचरं नेति यद्यपि पररूपादर्शनमस्माकमस्ति तथापि सगुणरूपदर्शनादेव अव्यक्तकर्मणः कर्मपारतंत्र्यरहितस्य ते व्यक्तिर्देहप्रकटनम् । तथा च विषसंहारेण सर्वलोकान्सुखयेति भावः 'मृड—सुखने । धातुः ॥ ३५ ॥ तासां प्रजानाम् । तद्विषोद्भूतम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशिव उवाच ॥ अहो बत भवान्येतत्प्रजानां पश्य वैशसम् ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितम् ॥ ३७ ॥ आसां प्राणपरीप्सूनां विधेयमभयं हि मे ॥ एतावान्हि प्रभोरर्थो यद्दीनपरिपालनम् ॥ ३८ ॥ प्राणैः स्वैः प्राणिनः पांति साधवः क्षणभंगुरैः ॥ बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥ पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ॥ प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥ तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे ॥ ४० ॥ श्रीशुक उवाच ॥ एवमामंत्र्य भगवान्भवानीं विश्वभावनः ॥ तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत ॥ ४१ ॥ ततः करतलीकृत्य व्यापि हालाहलं विषम् ॥ अभक्षयन्महादेवः कृपया भूतभावनः ॥ ४२ ॥ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः ॥ यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥ ४३ ॥ तप्यंते लोकतापेन साधवः प्रायशो जनाः ॥ परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥ ४४ ॥ निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः ॥ प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ॥ ४५ ॥

मत्प्रभावमविचार्य विषपाने प्रवृत्तं मां कथंचिदियं प्रिया वारयेदिति शंकया तामनुज्ञापयन्नाह अहो बतेति सार्धैश्चतुर्भिः । वैशसं दुःखम् ॥ ३७ ॥ प्राणपरीप्सूनां प्राणरक्षणेच्छूनाम् । मे मया । प्रभोः समर्थस्य । अर्थः कार्यम् ॥ ३८ ॥ किं च बद्धवैरेषु भूतेषु परस्परं जिघांसत्सु ॥ ३९ ॥ कृपयतः कृपां कुर्वतः पुंसः । मे मत्तः स्वस्तिः शोभना सत्ता । सुखेन जीवितमस्त्वित्यर्थः ॥ ४० ॥ जग्धुमत्तुम् ॥ ४१ ॥ करतलीकृत्य करतलपरिमितमात्रं कृत्वा ॥ ४२ ॥ जलकल्मषो जलदोषो विषम् । यस्मात्तं गले नीलं चकार । साधोः कृपालोः ॥ ४३ ॥ ४४ ॥ ४५ ॥

व्यसनं दुःखम् । इदं वक्ष्यमाणम् । गृहस्थैर्भार्यया सह संमंत्र्यैव सर्वं कर्म कर्त्तव्यमिति द्योतयति–सतीमिति ॥ ३६ ॥ तदेव स्फुटयति ॥ ३७ ॥ ३८ ॥ साधुवृत्तमाह–किञ्चेति । "अपकारिषु यः साधुः स साधुः सद्भिरुच्यते" इत्युक्तिमाश्रित्याह–बद्धवैरेष्विति ॥ ३९ ॥ कृपां कर्त्तुः फलमाह–पुंस इति । 'वासुदेवः सर्वम्' इति भगवतोक्तेः । सचराचरोऽहमपि तत्प्रीत्यैव प्रीतो भवामीत्यर्थः ॥ ४० ॥ तत् समुद्रमथनोद्भूतम् । प्रभावज्ञा संसारविषहर्तुरेतदकिंचित्करमिति जानती । इत्यर्थ इति । विषे पीते एवैते जीविष्यंति नान्यथेति भावः ॥ ४१ ॥ ततो भवान्यनुमोदोत्तरम् । स्वप्रभावेण व्याप्यपि विषं करतलीकृत्य करतलस्थित्यर्हं कृत्वा हलहलेन पुनःपुनश्चालनेनार्थान्माथनेन जातं हालाहलम् । अणि पूर्वपदे वृद्धिः उत्तरवर्णदीर्घस्तु पृषोदरादित्वात् 'हल–विलेखने' धातुः ॥ ४२ ॥ तस्यापि शंकरस्यापि । तं हरम् । गले इति सप्तम्या अलुक् कंठेकाल इतिवत् । तच्च नीलत्वं भूषणमेव न तु दूषणं महतां दूषणमपि भूषणमिति भावः ॥ ४३ ॥ प्रायश इत्युक्तेः प्रलयकाले सर्वलोकतापेपि तापाभावो द्योतितः । एतेन मृदुलतरत्वं सच्चेतस उक्तं तदुक्तम् "मृदुलं किमु वस्तु हे सखे नवनीतादपि सज्जनस्य हृत् । तदिदं द्रवते स्वतापनात्परतापाद् द्रवते सतां मनः ॥" इत्यभियुक्तैः । तद्धि परतापेन तपनं हि ॥ ४४ ॥ मीढुषोऽखिलाभिलषितसेक्तुः । प्रजा जगत् । दाक्षायणी सती । यद्वा–प्रजाविशेषणम् । तद्विषभक्षणरूपम् । निशम्यालोच्य ह्रस्वत्वमार्षम् । शशंसिरे इत्युक्ते रुद्रयशोर्थे विष्णुना विषं न पीतम् "रुद्रस्य यशसे विष्णुर्न विषं पीतवान् स्वयम्" इति ग्रंथांतरोक्तेः ॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत् ॥ वृश्चिकाहिविषौषध्यो दंदशूकाश्च येपरे ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे
अमृतमथने शिवकृतगरादननिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ पीते गरे वृषांकेण प्रीतास्तेऽमरदानवाः ॥ ममंथुस्तरसा सिंधुं
हविर्धानी ततोऽभवत् ॥ १ ॥ तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः ॥ यज्ञस्य देवयानस्य मेध्याय हविषे नृप ॥ २ ॥ तत उच्चैःश्रवा नाम हयो
ऽभूच्चंद्रपांडुरः ॥ तस्मिन्बलिः स्पृहां चक्रे नेंद्र ईश्वरशिक्षया ॥ ३ ॥ तत ऐरावतो नाम वारणेंद्रो विनिर्गतः ॥ दंतैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो
महिम् ॥ ४ ॥ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः ॥ तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलंकरणे मणौ ॥ ५ ॥ ततोऽभवत्पारिजातः सुरलोक
विभूषणम् ॥ पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥ ६ ॥ ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः ॥ रमण्यः स्वर्गिणां वल्गुगतिली
लावलोकनैः ॥ ७ ॥

प्रस्कन्नं गलितम् । अपरे च ये सविषास्तेऽपि जगृहुः । अनेन विषस्य तीव्रतोक्ता ॥ ४६ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे मथ्यमा
नेऽब्धौ लक्ष्म्या विष्णौ वृतेऽसुरैः ॥ धन्वंतरेर्हृते सोमे मोहिन्युद्भव ईर्यते ॥ १ ॥ हविर्धानी सुरभिः ॥ १ ॥ देवयानस्य ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य संबंधिने
हविषे ॥ २ ॥ ईश्वरशिक्षया प्रागेव कृतया ॥ ३ ॥ भगवतो यः श्वेताद्रिः कैलासस्तस्य महिं महिमानम् । दंतैः शिखरकल्पैर्हरंश्चंद्रवत्पांडुर इत्यनुषंगः ॥ ४ ॥
॥ ५ ॥ ६ ॥ वल्गुभिर्गत्यादिभिः स्वर्गिणां रमण्यो रतिकर्त्र्यः ॥ ७ ॥

विषौषध्यो लांगलीप्रभृतयः । अनेन वृश्चिकादिग्रहणकथनेन । तीव्रता तीक्ष्णता॥४६॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ धन्वंतरेः सकाशात् (१)। हविर्धृतं धीयते निधीयतेऽस्यामिति
हविर्द्धानी कामधेनुः । ततो मथनात् ॥१॥ आग्निहोत्रीमग्निहोत्रसाधनभूताम् । अग्नौ हूयते स्रुवादिना दीयते इत्यग्निहोत्रं घृतं तदस्यामस्तीत्याग्निहोत्रीति व्युत्पत्तेः । ज्योत्स्नादित्वादण् । मेध्याय शुद्धाय ॥२॥ ततोऽनंतरम् ।
चंद्रपांडुरः शशिवच्छ्वेतः। तस्मिन् हये । ईश्वरस्य हरेः शिक्षया 'लोभः कार्यो न वो जातु' इत्यादिरूपया॥३॥ततस्तदनु भगवतो महादेवस्य॥४॥कुं भूमिं स्तुम्नाति रुणद्धि निजमौल्येनेति कुस्तुभस्स एव कौस्तुभः। यद्वा—कौ
भूमौ स्तूयते इति कौस्तुर्विष्णुस्तत्र भातीति कौस्तुभः।यद्वा—कुं स्तुम्नाति जलेन रुणद्धीति कुस्तुभः समुद्रस्तस्मादाविर्भूतः कौस्तुभः स आख्या यस्य तत्तथा। पद्म इव तन्मध्यमिव रागो यस्य स तथा पुंस्त्वमजहल्लिंगत्वात् ।
"पद्मरागः पीतमणौ पीते वर्णेऽथ सारसे" इत्यभिधानात् । यद्वा—पद्मरागो रत्नांतरम् । तस्मिन् कौस्तुभे॥५॥ततस्तदनु पारिजातः कल्पवृक्षः। यः पारिजातः अर्थिनो याचकान् । अर्थैरभिलषितैः॥६॥"निष्कोऽस्त्री साष्टहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चाविरभूत्साक्षाच्छ्री रमा भगवत्परा ॥ रंजयंती दिशः कांत्या विद्युत्सौदामनी यथा ॥ ८ ॥ तस्यां चक्रुः स्पृहां सर्वे ससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ९ ॥ तस्या आसनमानिन्ये महेंद्रो महदद्भुतम् ॥ मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि ॥ १० ॥ आभिषेचनिका भूमिराहरत्सकलौषधीः ॥ गावः पंच पवित्राणि वसंतो मधुमाधवौ ॥ ११ ॥ ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि ॥ जगुर्भद्राणि गंधर्वा नट्यश्च ननृतुर्जगुः ॥ १२ ॥

सुदामा पर्वतस्तत्रैकस्यां दिशि जाता सौदामनी । स्फटिकादिमयगिरिशृंगेष्वधिकं स्फुरंती विद्युदिव कांत्या दिशो रंजयंती श्रीः संपत्साक्षान्मूर्तिधारिणी सती सैव भगवत्परा रमा आविरभूदित्यर्थः ॥ ८ ॥ तस्या रूपादिमहिम्ना आक्षिप्तं चेतो येषाम् ॥ ९ ॥ भगवद्वक्षसि स्थितया श्रिया विलोकितानां सुराणां यथा पूर्वं संपत्प्राप्तिमसुराणां च तद्विपर्ययं वक्तुमभिषेकादिमहोत्सवपूर्वकं ब्रह्मादिपरिहारेण भगवत्प्राप्तिप्रकारमाह तस्या आसनमित्यादिना। अथासीद्वारुणीत्यतः प्राक्तनेन ग्रंथेन ॥ १० ॥ आभिषेचनिका अभिषेकोचिताः पंच पवित्राणि पंचगव्यानि । मधुमाधवौ चैत्रवैशाखभवं फलपुष्पादि । पाठांतरेऽपि द्वंद्वैक्ये स एवार्थः । मधुमासे भवं मध्विति वा ॥ ११ ॥ अभिषेकमभिषेकोचितं विधिम् ।

मशते दीनारकर्षयोः । वक्षोऽलंकरणे हेमपात्रे हेमपलेऽपि च ॥'' इति मेदिनी ॥ ७ ॥ इत्यर्थ इति । सर्वसंपदां व्यक्तिर्यत्कटाक्षपाताद्भवति सा हरिप्रीतये समुद्रादाविरासेति भावः । श्रीस्संपत्तिः साक्षान्मूर्त्तिमतीत्यर्थः । रमा हरिं रमयंती हरेः प्रेयसीरूपा च प्रादुर्भूता कीदृशी भगवती चासौ परा पूर्वस्याः सकाशाच्छ्रेष्ठेति पूर्वस्या एतद्विभूतित्वमिति भावः । पूर्वा यथा विद्युत् उत्तरा यथा सौदामनी स्फटिकमयसुदामपर्वतभवत्वात्पूर्वस्याः सकाशादधिककांतिमती कांत्येति । संपत्तिपक्षे कभिरिच्छार्थको धातुः आमेलाषेणेत्यर्थः । दिशस्तस्या दिग्वर्त्तिनो जनान्रंजयंती संपत्तिरस्माकं भूयादिति रागवतीः कुर्वती । पक्षे दिशः पूर्वाद्याः कांत्या स्वरोचिषा रंजयंती ॥ ८ ॥ तस्यां लक्ष्म्याम् । वा–तस्यां पूर्वस्याम् संपद्रूपायामेव स्पृहां न तूत्तरस्याम् ''तस्याः श्रियस्त्रिजगतो जनको जनन्याः'' इति वक्ष्यमाणवाक्येन तस्या जगज्जननीत्वज्ञापनात् । किञ्च–तस्या अपि रूपादीनां महिना महिम्ना मा आक्षिप्तानि नैवासक्तानि चेतांसि येषां ते यतस्ते तस्याः सकाशाद्राज्यभोगादिप्रेप्सव इति भावः ॥ ९ ॥ तस्या रमायाः । सरिच्छ्रेष्ठा गंगाद्याः गंगादिजलस्य स्वभावशुचित्त्वाच्छुचि उज्ज्वलम् । तद्विपर्ययं संपदभावम् ॥ १० ॥ अभिषेकोचिताः । सर्वौषध्याद्या विष्णुक्रांताद्याश्च । ताश्च–''कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंदनम् । वचाचंपकमुस्ताश्च सर्वौषध्यो दश स्मृताः ॥ विष्णुक्रांता सहदेवा तुलसी च शतावरी । मूलानीमानि गृह्णीयात्सर्वाभावे विशेषतः ॥'' इत्याद्युक्तेः गाव इति बहुत्वोक्तेः । ''पयः कांचनवर्णाया नीलायाश्च घृतं तथा । दधि च कृष्णवर्णायाः श्वेताया गोमयं तथा ॥ गोमूत्रं ताम्रवर्णाया इत्येतत्पंचगव्यकम् ।'' इति स्मृतेः । पञ्चवर्णास्ता ग्राह्याः । पाठांतरेपि 'मधुमाधवम्' इति पाठेपि । 'वृत्तेरवृत्तिर्न्याय्या' इति न्यायेन पदद्वयम् । पक्षे–माधवं मधुमासे चैत्रे भवम् । मधु मकरंदम् ''मधुश्चैत्रे मधुर्दैत्ये मधुपुष्परसं विदुः'' इत्यनेकार्थमंजर्याम् ''कृत्तद्धितसमासैकशेषसनाद्यंतधातुरूपाः पञ्च वृत्तयः'' इति शाब्दिकाः ॥ ११ ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेघा मृदंगपणवमुरजानकगोमुखान् ॥ व्यनादयञ्छंखवेणुवीणास्तुमुलनिस्वनान् ॥ १३ ॥ ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम् ॥ दिग्गिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ॥ १४ ॥ समुद्रः पीतकौशेयवाससी समुपाहरत् ॥ वरुणः स्रजं वैजयंतीं मधुना मत्तषट्पदाम् ॥ १५ ॥ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः ॥ हारं सरस्वती पद्ममजो नागाश्च कुंडले ॥१६॥ ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना ॥ चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनम् ॥ १७ ॥ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितम् ॥ ततस्ततो नूपुरवल्गुसिंजितैर्विसर्पती हेमलतेव सा बभौ ॥ १८ ॥ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणम् ॥ गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंदत ॥ १९ ॥ नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितम् ॥ कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥ २० ॥

नट्यो नटानां स्त्रियः ॥ १२ ॥ शंखवेणुवीणाश्च व्यनादयन् । तुमुलो निस्वनो येषां तान्मृदंगादीन् ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ पदमाश्रयं पतिरूपम् । ध्रुवं नित्यमव्यभिचारिणो नित्याः संतो गुणा यस्मिंस्तं नान्वविंदत । क्वचिदपि कस्यचिद्दोषस्य सद्भावात् ॥ १९ ॥ तदेवाह नूनमिति त्रिभिः । मन्युनिर्जयो

मेघा देवाः 'मेघो देवाभ्रवारिषु' इति निरुक्तिः । यद्वा–मेघा एव तत्तद्वाद्यानुकारिध्वनिं चक्रुरित्यर्थः ॥१३॥ दिग्गिभा ऐरावताद्याः । आकाशगंगादिजलपूर्णकुंभैः । 'जलैश्चाकाशगंगायाः' इत्याद्यन्यत्रोक्तेः ॥१४॥ पीतेति । अभिषेकानंतरं पीतवस्त्रस्यैव विहितत्वात् । वाससी वस्त्रयुगम् । वैजयंतीं पञ्चवर्णपुष्पमालाम् ''श्वेतैः पीतैस्तथा नीलैर्लोहितैर्हरितैस्तथा । पुष्पैर्विरचिता माला वैजयंतीति कथ्यते॥''इत्युक्तेः॥१५॥नागा वासुक्याद्याः॥१६॥ कृतं स्वस्त्ययनं स्वस्तिवाचनं यस्या सा तथा । यद्वाऽकृतमनादित एव स्वस्ति सर्वकालमंगलं हरिवक्ष एवायनमास्पदं यस्याः सा स्वप्रतिच्छविरूपा गुणमयीव स्थिराः संपदो ब्रह्मादिभ्यो ददानापि स्वयं गुणातीता चिन्मयसंपद्रूपा लक्ष्मीः श्रीनारायणमेकमेव सदाश्रिता वर्त्तते तथैवानादित एव कमपि गुणं नोपाधीकृत्य स्वभावत एव तस्मिन्प्रेमवती तत्सर्वेंद्रियसुखसंपादयित्री प्रेयसीरूपापि वर्त्तत इत्यर्थः । तदपि द्विविधैव लक्ष्मीः समुद्रं जनकीकृत्य प्रादुर्भूता पुनरेकीभूता सती स्वनित्यप्रियं हरिं वरयितुं स्वयं चचालेति विश्वनाथः ॥ १७ ॥ स्तनद्वयं च बिभ्रती । निरंतरं सूत्रलंघनानर्हम् । ततस्ततस्तत्रतत्र देवसमीपे । विसर्पती गच्छंती ॥ १८ ॥ नान्वविंदत न प्राप ॥ १९ ॥ तदेव दोषसद्भावनमेव । अत्र वरपरीक्षणे दृष्टांतविधयाऽतीताऽनागतसन्निहिताऽसन्निहितानामपि गणनास्ति न तु सन्निहिततात्कालिकानामेव तथात्वे हिरण्यकशिपुप्रभृतिगणनानौचित्यप्रसंगात् । यद्वा–कल्पांतरीयाब्धिमंथने सर्वेषां तत्र संनिधिरेवासीत् इति स्वामिचरणाभिप्रायः । यद्वा–हार्दब्रह्मविद्यामनुसृत्यैव सर्वज्ञशिरोमणिभूतया श्रीरमादेव्या सर्वेभूतभविष्या अपि दृष्टांतविधया वर्णिताः । तत्र हि श्रूयते ''त इमे सत्याः कामा अनृतापिधानाः'' इति । तस्मादहराकाशं प्रकृत्य ''एतत्सत्यं ब्रह्मपुरमस्मिन्सर्वे कामाः समाहिताः'' इति । तथा ''योयो ह्यस्येतः प्रैति न तमिह दर्शनायोपलभते'' इत्युपक्रम्य ''ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विंदते'' इत्यादि । सत्यं ब्रह्मपुरमित्यम्बरमित्यर्थः । समस्तः सदासन्नेवास्त्यत एव तत्र मुनयः पश्यंत्यतीतादिकं मिथ्याब्रह्मपुरं शरीरममुना सत्यपुरं छादितं सर्वेण स्त्रगिवेत्यमुष्य विलये सत्यं पुरं प्रकाशते । एतत्सर्वमाश्रमवासपर्वणि धृतराष्ट्रादेः पुत्रादिदर्शनप्रकृते श्रीमहाभारतटीकाकृता श्रीनीलकंठाचार्येण बहुधा विवृतमतोऽतीतानागतमपि विदुषां प्रत्यक्षवद्भातीत्यनवद्यम् । यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम् ॥ वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं नहि द्वितीयो गुणसंगवर्जितः ॥ २१ ॥ क्वचिच्चिरायुर्नहि शीलमंगलं क्वचित्तदप्यस्ति न वेद्यमायुषः ॥ यत्रोभयं कुत्र च सोऽप्यमंगलः सुमंगलः कश्च न कांक्षते हि माम् ॥ २२ ॥ श्रीशुक उवाच ॥ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतया गुणाश्रयम् ॥ वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्षमीप्सितम् ॥ २३ ॥

नास्ति तपस्विषु दुर्वासःप्रभृतिषु । क्वचित् गुरुशुक्रादिषु । संगवर्जितं ज्ञानं नास्ति महत्त्वेऽपि ब्रह्मसोमादौ न कामनिर्जयः । परतो व्यपाश्रयः परापेक्ष इंद्रादिः । स किमीश्वरः ॥ २० ॥ न भूतसौहृदं परशुरामादिषु । न मुक्तिकारणं त्यागः शिबिप्रभृतिषु । पुंसः कार्तवीर्यादेर्वीर्यमस्ति । तत् अजवेगनिष्कृतं कालवेगेन परिहृतं तु न भवति । गुणसंगवर्जितः सनकादिर्द्वितीयो मम वरो नहि समाधिनिष्ठत्वात् ॥ २१ ॥ चिरायुष्यपि मार्कंडेयादौ शीलमंगलं च नास्ति इंद्रियदमनशीलत्वात् । क्वचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ आयुषः स्थैर्यं न वेद्यं दुर्ज्ञातम् । भगवद्द्वेषेणाकस्मादेव मृत्युसंभवात् । यत्र कुत्र च श्रीरुद्रे मार्कंडेयादिवदिंद्रियदमनाद्यभावाच्छीलमंगलं चायुर्निश्चयश्चेत्युभयमस्ति न चान्यः पूर्वोक्तः कश्चिद्दोषस्तथाऽपि सोऽप्यमंगलः श्मशानवासाद्यमंगलचेष्टितः । श्रीमुकुंदं लक्षीकृत्याह । कश्चेति । कश्चित्सुमंगलो निरवद्यश्च स तु मां नहि कांक्षते आत्मारामत्वात् ॥ २२ ॥ एवं विमृश्य रमा निरपेक्षमपि मुकुंदमेव वरं वव्रे । तत्किम् । अव्यभिचारिभिः सद्भिर्धर्मज्ञानादिभिर्गुणैर्निजैकाश्रयतया च नैरपेक्ष्येण वरं सर्वोत्तमम् । तत्र हेतुः । अगुणाश्रयं प्रकृतिगुणातीतम् । पाठांतरेऽप्ययमेवार्थः । अत एव स्वस्य ईप्सितम् । किं च सर्वैर्गुणैरणिमादिभिरपेक्षितं वृतम् । अयं भावः । यद्यपि स्वयमात्मारामत्वेनान्यनिरपेक्षस्तथाप्याश्रिता अणिमादिसिद्धीर्यथा नोपेक्षते तद्वन्मामपि नोपेक्षेत तावतैव तत्सेवयाऽहं कृतार्था स्यां किमन्यैः प्राकृतैरिति

दुर्वासआदेः । तपश्चांद्रायणादि तदुक्तम् "विधिनोक्तेन मार्गेण कृच्छ्रचांद्रायणादिभिः । शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् ॥ " इति । प्रभृतिपदेन च्यवनादिग्रहः । क्वचिद्बृहस्पत्यादिषु संगो राजसप्रवृत्तिः । आदिना कश्यपादिग्रहः । "प्रजापतिः स्वां दुहितरमभ्यध्यायत्" इत्यादिश्रुतेः । परापेक्ष उपेन्द्राद्यपेक्षः । यद्वा—परतः शत्रुतो हेतोः व्यपाश्रयो व्यपगतास्पदो मुहुर्मुहुर्भवतीति सर्वपुराणप्रसिद्धेः । आदिना कुबेरादिः ॥ २० ॥ धर्मः पित्राज्ञापालनादिरूपः । मात्रादिवधकत्वाद्भूतसौहृदं नास्ति । भगवदनर्पितबुद्ध्यानुष्ठितत्वान्मुक्तिकारणं नेत्यर्थः । कालवेगेन परिहृतं तु न भवति कालवेगविजयि न भवतीत्यर्थः । सनकादीत्यादिना नारदादिग्रहः । यद्वा—द्वितीयो मुकुंदादन्यो गुणसंगवर्जितः प्राकृतगुणासक्तिरहितो नहि नास्तीत्यर्थः । 'हरिर्हि निर्गुणः साक्षात्' इत्युक्तेः ॥ २१ ॥ आदिनाऽश्वत्थामादिग्रहः । शीलं स्त्री योग्यं मंगलमपि तादृशमेव । तदप्यस्ति शीलं मंगलं चाप्यस्ति । आदिना रावणादिग्रहः । पूर्वोक्तः क्रोधवशत्वादिलक्षणः । तथापि पूर्वोक्तदोषरहितत्वेपि । कश्चानिर्वचनीयः । आत्मारामत्वान्निरवच्छिन्नस्वानंदानिष्ठत्वात् पूर्वपूर्ववदस्मिन्नर्थे को दोषोस्तीति व्याजस्तुत्या दोषमाह—न कांक्षत इति । निरपेक्षत्वलक्षणः सर्वविलक्षणो महागुणोत्रैव दृष्ट इति भावः ॥२२॥ तत्किं तद्वरणम् । कुतः । नैरपेक्ष्यं सर्वेश्वरत्वात् । तत्र सर्वोत्तमत्वे । प्राकृतगुणाधीनस्तत्तमोऽपि न भवति

१—भोगादि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यांसदेश उशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ॥ तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता ॥२४॥ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ॥ श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतीं त्रिलोकान् ॥ २५ ॥ शंखतूर्यमृदंगानां वादित्राणां पृथुः स्वनः ॥ देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥ २६ ॥ ब्रह्मरुद्रांगिरोमुख्याः सर्वे विश्वसृजो विभुम् ॥ ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः ॥ २७ ॥ श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ॥ शीलादिगुणसंपन्ना लेभिरे निर्वृतिं पराम् ॥ २८ ॥ निःसत्त्वा लोलुपा राजन्निरुद्योगा गतत्रपाः ॥ यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ २९ ॥ अथासीद्वारुणी देवी कन्या कमललोचना ॥ असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥ ३० ॥ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ॥ ३१ ॥ दीर्घपीवरदोर्दंडः कंबुग्रीवोऽरुणेक्षणः ॥ श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥ ३२ ॥ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः ॥ स्निग्धकुंचितकेशांतः सुभगः सिंहविक्रमः ॥ ३३ ॥

तमेव वृतवतीति ॥ २३ ॥ तदेवाह । तस्यांसदेशे कमनीयां नवकंजमालां निधाय तदनुग्रहं प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ । कथंभूतां मालाम् । माद्यंतो ये मधुव्रतास्तेषां वरूथस्य गिरा उपघुष्टां नादिताम् । कथंभूता श्रीः सव्रीडहासेन विकसत्प्रफुल्लं यन्नयनं तेन तस्योरः स्वधाम याता सती । वक्षःप्रतीक्षमाणा तस्थावित्यर्थः ॥ ॥ २४ ॥ भगवानपि त्रैलोक्याभिवृद्धये स्ववक्षस्तस्याः स्थानं ददावित्याह । तस्या इति । विशिष्टा भूतयो विभवा यस्याः तस्यास्त्रिजगतो जनन्याः श्रियः त्रिजगतो जनको हरिः । परमं सुस्थिरम् । यत्र वक्षसि ऐधयतावर्धयत ॥ २५ ॥ २६ ॥ तल्लिंगैर्विष्णुप्रतिपादकैः अवितथैर्यथार्थैः ॥ २७ ॥ २८ ॥ २९ ॥ वारुणी वरुणदैवत्यं यदन्नं तन्मयी सुरा ॥ ३० ॥ ३१ ॥ दीर्घौ पीवरौ दोर्दंडौ यस्य । कंबुग्रीवः शंखनाभिरिव त्रिरेखा सुवृत्ता ग्रीवा यस्य ॥ ३२ ॥ स्निग्धः कुंचितः केशानामंतो

कुतः सर्वोत्तमत्वम् । पाठांतरे 'निजैकाश्रयतागुणाश्रयम्' इति पाठे । स एव इह तृतीयाया लुगार्षः । अत एव पूर्वोक्त एव सर्वोत्तमत्वादेव । स्वस्यात्मनः । न केवलं स्वस्यैवापेक्षितं किं त्वन्येषामपीत्याह—किञ्चेति । अत्राशयमाह—अयं भाव इति । निरपेक्षोऽप्यप्राकृताव्यभिचारिसद्गुणत्वाद्भक्तवत्सलतया मां स्वीकरिष्यतीति भावः ॥२३॥ तदेव वरणमेव । वरूथः समूहः "वरूथो रथगुप्तौ ना समूहे चर्मवेश्मनोः" इति चिंतामणिः । इत्यर्थ इति । सर्वदा हरिवक्षसि वस्तुकामा तदेव निरीक्षयामासेति भावः । तदुक्तम् "एष ब्रह्मातिवृद्धस्तपति दिनपतिश्चञ्चलो मातरिश्वा दिग्वासा नीलकंठः सुरपतिरसमो गर्वितः क्षीयतेऽब्जः । इत्थं देव्या विचिंत्य भ्रमरकुलकलागीतशब्दप्रफुल्ला दत्ता माला मुरारेः सुरतरुकुसुमालंकृता पातु युष्मान्" इत्याभित्युक्तेः ॥ २४ ॥ तस्या वक्षो निरीक्षमाणायाः । यत्र हरिवक्षसि ॥ २५ ॥ "काहले गोमुखे तूर्यं दुंदुभी च प्रचक्षते" इति तीर्थः ॥ २६ ॥ विष्णुप्रतिपादकैः । "श्रीश्च ते लक्ष्मीश्च पत्न्यौ" इत्यादिभिः ॥ २७ ॥ २८ ॥ यदोपेक्षितास्तदैवेत्यर्थः ॥ २९ ॥ वारुणमन्नं यवादि तन्मयी तद्विकारप्राया 'सुरा तु मलमन्नानाम्' इत्युक्तेः । वरुणप्रेषिता वा अथासीदाविर्बभूव सुराभिमानिनी देवता कन्यारूपेणाब्धेः प्रादुरभूदित्यर्थः । अनुमतेन अनुज्ञानेन तेऽसुराः ॥ ३० ॥ अथ वारुण्युत्पत्त्यनंतरम् ॥ ३१ ॥ ३२ ॥ ३३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमृतापूर्णकलशं बिभ्रद्वलयभूषितः ॥ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ॥ ३४ ॥ धन्वंतरिरिति ख्यात आयुर्वेददृगिज्यभाक् ॥ तमालोक्यासुराः सर्वे कलशं चामृताभृतम् ॥ लिप्संतः सर्ववस्तूनि कलशं तरसाऽहरन् ॥ ३५ ॥ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ॥ विषण्णमनसो देवा हरिं शरणमाययुः ॥ ३६ ॥ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृत् ॥ मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ॥ ३७ ॥ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसाम् ॥ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ॥ ३८ ॥ देवाः स्वं भागमर्हंति ये तुल्यायासहेतवः ॥ सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३९ ॥ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः ॥ दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ॥४०॥ एतस्मिन्नंतरे विष्णुः सर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥ ४१ ॥ प्रेक्षणीयोत्पलश्यामं सर्वावयवसुंदरम् ॥ समानकर्णाभरणं सुकपोलोन्नसाननम् ॥ ४२ ॥ नवयौवननिर्वृत्तस्तनभारकृशोदरम् ॥ मुखामोदानुरक्तालिझंकारोद्विग्नलोचनम् ॥ ४३ ॥ बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकाम् ॥ सुग्रीवकंठाभरणं सुभुजांगदभूषितम् ॥ ४४ ॥

यस्य ॥ ३३ ॥ ३४ ॥ इज्यभाक् यज्ञभागभोक्ता । अमृतेन आभृतं परिपूर्णम् ॥ ३५ ॥ ३६ ॥ मिथो दैत्यानां परस्परं कलहोत्पादनेन योगमायया च मोहिन्या वोऽर्थं साधयिष्याम्यतो मा खिद्यतेत्याहेति शेषः ॥ ३७ ॥ तदेवाह । मिथ इति । तर्षः कामस्तद्युक्तानि चेतांसि येषाम् । इत्येवं समबलानां कलिरभूत् ॥ ३८ ॥ दुर्बलानां त्वाक्रोशप्रकारमाह देवा इति द्वाभ्याम् । ये देवास्तुल्येनायासेन हेतवः साधकाः । तुल्य आयासो हेतुश्च धनादिर्येषामिति वा । सत्रयागे यथा सर्वेषां समं फलं तद्वत् । तथा च श्रुतिः । "ऋद्धिकामाः सत्रमासीरन्" इति । "ये यजमानास्त ऋत्विजः" इति च ॥ ३९ ॥ ४० ॥ ४१ ॥ तद्रूपं वर्णयति पंचभिः । प्रेक्षणीयमुत्पलमिव श्यामम् । सर्वेष्ववयवेषु सुंदरम् । समानयोः कर्णयोराभरणे यस्मिन् । सुकपोलं च तदुत्कृष्टनासिकं चाननं यस्मिन् ॥ ४२ ॥ नवयौवननिर्वृत्तयोः स्तनयोर्भारेण च कृशमुदरं यस्मिन् ॥ ४३ ॥ सुष्ठु ग्रीवा यस्मिन्कंठे आभरणं यस्मिंस्तच्च तच्च । शोभना ग्रीवा येन तत्कंठाभरणं यस्मिन्निति वा । सुभुजयोरंगदाभ्यां भूषितम् ॥ ४४ ॥

अमृतेनापूर्णं पूरितं कलशम् । वलयाभ्यां कंकणाभ्यां भूषितः "वलयः कंठरोगे ना कंकणे पुंनपुंसकम्" इति मेदिनी । अनेन भावि स्त्रीत्वमुक्तं प्रायः स्त्रीभिरेव वलयानि धार्यंत इति भावः । स धन्वंतरिः । विष्णोरंशः समुद्रो विरजापुत्रत्वात् । गोलोके राधाशापेन विरजा नदी तत्पुत्राश्च जलरूपाः समुद्रा आसन्निति संहितायां स्पष्टम् । समुद्रसंभवत्वेन तदंशांशो धन्वंतरिरिति ॥३४॥तं धन्वंतरिकरस्थम् ॥३५॥३६॥३७॥ तदर्थेऽमृतनिमित्तम् ॥३८॥ साधकत्वं न केवलं तेषामेवेति चेदाह–तुल्य आयास इति । एष समविभागलक्षणः । अत्र प्रमाणं–तथाचेति । सत्रकर्मणा यजमानार्त्विजोस्सममेव फलमस्तीति श्रुतिपदार्थः ॥ ३९ ॥ ४० ॥ अनिर्देश्यम् अतीवाद्भुतत्वाद्वर्णयितुमशक्यम् ॥ ४१ ॥ ४२ ॥ नवयौवनेन निवृत्तः निष्पन्नो यस्तनभारस्तेन युतं कृशमुदरं यस्मिंस्तत्तथा । यद्वा–नवयौवनेन निर्वृत्तः स्तनभारो यस्मिंस्तच्च कृशमुदरं यस्मिंस्तच्च तथा । मुखामोदेऽनुरक्ता येऽलयस्तेषां झंकारेणोद्विग्नं त्रस्तं मानसं यस्मिंस्तत्तथा ॥ ४३ ॥ ग्रीवायाः स्वतः शोभनत्वे कंठाभरणमप्रयोजकमिति चेदाह–शोभनेति ॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरजांबरसंवीतनितंबद्वीपशोभया ॥ कांच्या प्रविलसद्वल्गुचलच्चरणनूपुरम् ॥ ४५ ॥ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ॥४६॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे अष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥ तेऽन्योन्यतोऽसुराः पात्रं हरंतस्त्यक्तसौहृदाः ॥क्षिपंतो दस्युधर्माण आयांतीं ददृशुः स्त्रियम् ॥१॥अहो रूपमहो धाम अहो अस्या नवं वयः॥इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः॥२॥ का त्वं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि ॥ कस्यासि वद वामोरु मथ्नंतीव मनांसि नः ॥ ३ ॥ न वयं त्वाऽमरैर्दैत्यैः सिद्धगंधर्वचारणैः ॥ नास्पृष्टपूर्वां जानीमो लोकेशैश्च कुतो नृभिः ॥४॥ नूनं त्वं विधिना सुभ्रूः प्रेषितासि शरीरिणाम् ॥ सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥५॥ सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ॥ ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ॥ ६ ॥ वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ॥ विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ ७ ॥ इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः ॥ प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत् ॥ ८ ॥ श्रीभगवानुवाच ॥ कथं कश्यपदायादाः पुंश्चल्यां मयि संगताः ॥ विश्वासं पंडितो जातु कामिनीषु न याति हि ॥ ९ ॥

विरजांबरेण निर्मलवाससा संवीतो नितंब एव द्वीपो विशालत्वात्तत्र शोभा यस्यास्तया कांच्या प्रकर्षेण विलसत् । वल्गु यथा भवत्येवं चलतोश्चरणयोर्नूपुरे यस्मिन् ॥ ॥ ४५ ॥ सव्रीडेन स्मितेन सह विक्षिप्ता कंपिता या भ्रूस्तस्या विलासेन सह यान्यवलोकितानि तैर्दैत्ययूथपानां चेतस्सु मुहुः काममुद्दीपयत् ॥ ४६ ॥ इति श्रीमद्भागवते अष्टमस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥ नवमे मोहितैर्दैत्यैरर्पितेऽमृतभाजने ॥ तद्वंचनेन देवेभ्योऽमृतं दत्तं तयेर्यते ॥ १ ॥ १ ॥ अहो रूपं सौंदर्यं धाम द्युतिरिति संभ्रमेण वदंतः का त्वमित्यादि पप्रच्छुः ॥२॥ मथ्नंतीव क्षोभयंतीव ॥३॥ कस्यासीत्ययुक्तमुक्तमस्माभिर्यतस्त्वं न केनचिद्भुक्तपूर्वेत्याहुः नेति द्वाभ्याम् । त्वा त्वाममरादिभिरस्पृष्टपूर्वां न जानीम इति नापि तु जानीम एव ॥ ४ ॥ आस्तामिदं त्वद्दर्शनं त्वीश्वरेणैव संपादितमित्याहुः । नूनमिति । सर्वेंद्रियाणां च मनसश्च प्रीतिं विधातुं सघृणेन प्रेषिताऽसि किं वा यदृच्छयैवाऽऽगतासि नैवं नूनं प्रेषितैवेत्यर्थः ॥ ५ ॥ ६ ॥ भेदो विग्रहो यथा न भवेत्तथा ॥ ७ ॥८ ॥ संगता अनुसृताः ॥ ९ ॥

विगतं रजो यस्मात्तद्विरजं तच्चाम्बरं तेन संवीत आच्छादितः ॥ ४५ ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ तद्वंचनेन दैत्यप्रलंभनेन । तया मोहिन्या (१) । अन्योन्यं पात्रं हरंतोऽन्योन्यं त्यक्तसौहृदा अन्योन्यं क्षिपंतश्च संतः स्त्रियं ददृशुरित्यन्वयः ॥ १ ॥ अहो अस्या नवमित्याद्युक्त्वा नवं स्तुत्यं सर्वरत्नरूपत्वात् "हास्यं शंखनिभं नितंबतुरगौ रंभादि जंघाद्वयं वैद्यस्ते हृदयं धनुश्च भ्रुकुटी मद्यं च ते दर्शनम् । वक्त्रं पूर्णशशी सुधाधरलता दंता मणिश्रेणयः कांतिः श्रीर्गमनं गजः परिमलस्ते पारिजातद्रुमः ॥ वाणी कामदुघा कटाक्षलहरी तत्कालकूटं विषं हे तन्वंगि मुधैव किन्नु मथितो मूढैः सुरैः सागरः॥" इत्यभियुक्तोक्तेः ॥ २ ॥ ३ ॥ स्वोक्तौ दोषमुद्भावयंत आहुः—कस्यासीत्यादिना ॥४॥ इदं त्वन्नामाधिपत्यादिप्रश्नादि । प्रीतिं तृप्तिम् । सघृणेन दयालुना । इत्यर्थ इति । त्वादृश्या यदृच्छागमनमसंभूतमिति भावः ॥ ५ ॥ एकवस्तुनि सुधायाम् ॥ ६ ॥ ७ ॥ इदं वक्ष्यमाणम् ॥ ८ ॥ पुमांसश्चलंति कंपंति यस्यास्सा पुंश्चली विष्णुमूर्त्तिरतीव शौर्यसंपन्नत्वेन दैत्यपुरुषचालनशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः॥सख्यान्याहुरनित्यानि नूत्नंनूत्नं विचिन्वताम्॥१०॥श्रीशुक उवाच॥इति ते क्ष्वेलितैस्तस्या आश्वस्तम
नसोऽसुराः ॥ जहसुर्भावगंभीरं ददुश्चामृतभाजनम् ॥ ११ ॥ ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ॥ यद्यभ्युपेत क्व च साध्व
साधु वा कृतं मया वो विभजे सुधामिमाम् ॥ १२ ॥ इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुंगवाः ॥ अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥१३॥
अथोपोष्य कृतस्नाना हुत्वा च हविषाऽनलम् ॥ दत्त्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥१४॥ यथोपजोषं वासांसि परिधायाऽहतानि ते ॥
कुशेषु प्राविशन्सर्वे प्रागग्रेष्वभिभूषिताः ॥ १५ ॥

हे सुरद्विषः ॥ १० ॥ भावेन केनाप्यभिप्रायेण गंभीरं यथा भवत्येवं जहसुः ॥ ११ ॥ ईषत्स्मितेन शोभा यस्यास्तया । मया कृतं साधु वा असाधु यद्यभ्युपे तांगीकुरुत तर्हि विभजे ॥ १२ ॥ असुरपुंगवा दैत्यश्रेष्ठाः । प्रमाणमियत्तामजानंतः ॥१३॥१४॥ यथोपजोषं यथाप्रीति । अहतस्य लक्षणम् । "अहतं यंत्रनिर्मुक्तमुक्त

लायां मयि यूयं दैत्याः कथं वैरिणि संगता इति वास्तवोर्थः । कश्यं मद्यं पिबंतीति कश्यपास्तेषां दायो दानीयो मद्यपदार्थस्तमदंतीति कश्यपदायादा मद्यार्हाः कथममृतं पातुं प्रवृत्ताः । पंडितो देयादेय विवेकवान् । कामिभिरयोग्येप्सुभिर्नीयंते प्राप्यंते कामिन्यो धूर्त्तास्तेषु । क्विबंतात्काम्युपपदान्नयतेः प्रयोगः । कथमहं धूर्त्तेभ्यो भवद्भ्योऽमृतं दास्यामीति भावः । उत्तानार्थो ज्ञातप्राय एव ॥ विश्वनाथस्तु—कश्यपस्य दायादाः पुत्रा इति । पिता युष्माकमृषिर्यूयं कथमेवं कामिनोऽभूवन्निति हासो ध्वनितः । सत्यं वयं स्त्रीजातिमात्रेणैव भावैर्वशीकर्त्तुमशक्याः भवत्या परमशुद्धस्वरूपया तु स्वपावित्र्येणैव वयं विजिता वर्त्तामहे इति चेत्तत्राह— पुंश्चल्यामिति । हंतहंत भवत्या निष्कामत्वस्यावधिं किं स्तुमहे यतस्त्वमाबाल्यं समाघ्रातपुरुषगंधापि स्वं गोपयंत्येव खल्वेवं ब्रूषे, स्त्रीजातिः पुंश्चल्यपि स्वं सतीमेव प्रथयतीति स्त्रीजातिविलक्षणस्वभावायै भवत्यै निष्कपटायै सर्वस्व मपि दित्सामहे इति स्वगतोक्त्या विस्मयस्तिमितदृष्टींस्तानालक्ष्याह—विश्वासमिति । भोः पंडिता मयि विश्वासं मा कुरुत यद्यात्मनां भद्रमिच्छथेति भावो बाह्यः।आभ्यंतरस्तु—सर्वमहं विपरीतलक्षणयैव ब्रवीमीति पंडिता भवंतो ज्ञात्वा यदुचितं तत्कुर्वंत्विति भावः । पूर्वत्रोत्तरत्राप्याभ्यंतरो ध्वनिः । एवमेव ज्ञेयं कामिनीष्विति । यद्यप्यहं युष्मदनुभवेन शुद्धैव भवामि तथापि यौवनवत्त्वादाभ्यंतरः कामोऽनुमेय एव । कामवत्त्वे स्त्रीत्वे च कामिनीपति पित्राद्यावरणाभावात्स्वैरिण्यपि कथं न भवामीत्यविश्वास्यैव सर्वथा भवद्भिरहमिति भावः ॥ ९ ॥ स्वैरिभिर्विरक्तैर्नीयंत इति स्वैरिण्यो विवेकिनस्तेषां सख्यानि साहचर्याणि 'तथापि तस्यांघ्रियुगं नवंनवम्' इत्याद्युक्तेः । परमेशं विचारयतां तथा च यदि मंदघ्रिसेवकैरपि " सपदि गृहकुटुंबं दीनमुत्सृज्य दीनः " इत्याद्युक्तेः सख्यं न क्रियते तत्कुतोऽहं करिष्यामीति भावः । ततः किं श्रृणुत तत्त्वमित्याह—शालेति । ' शालावृका कपिक्रोष्टुश्वानः ' इत्यमरः । इति विश्वनाथः ॥ १० ॥ क्ष्वेलितैः छद्मवचनैः " छद्मोक्तौ क्ष्वेलितं प्रोक्तं सविषान्ने किले तथा " इति निरुक्तिः । आश्वस्तमनसो विश्वस्तचित्ताः । केनाप्यनिर्वचनीयेन कामाक्रांतचेतसेत्यर्थः । गंभीरमविदु षामप्रवेशं यथा स्यात्तथा जहसुः । हे सर्वगुणमंडिते किमस्मान्परीक्षसे वयमविश्वासिनोऽशुद्धांतःकरणा नैव भवामस्तदिदममृतकुंभं गृहाणास्मभ्यं विभज्य देहि स्वयं वा पिबान्यत्र वा क्षिप यथेच्छं कुरु अस्मांस्तु स्वसाद्गुण्य रतानात्मीयानेव जानीहीति भावः ॥ ११ ॥ ततस्तेभ्यः ॥ १२ ॥ इतीत्थम् । तस्या मोहिन्याः । असुरेषु पुंगवा बलीवर्द्दा इव निर्बुद्धय इत्यर्थः । तद्वचनम् । अन्वमंसत स्वीचक्रुः ॥ १३ ॥ अथ मोहिन्युक्तिस्वीकरणो त्तरम् । उपोष्य भोजनाद्यकृत्वा । भूतेभ्यो दीनेभ्यः । पौष्टिककृत्यविधिरेतेन सूचिता ॥ १४ ॥ यंत्रनिर्मुक्तं वयनयंत्रादुद्धृतं परिहृतान्नादिविलेपम् । तावन्मात्रे मंगलकर्मकृतिवेलायामेव । यद्वा " ईषद्धौतं नवं श्वेतं सदशं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च ॥ धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥ १६ ॥ तस्यां नरेंद्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ सा कूजती कनकनूपुरसिंजितेन कुंभस्तनी कलशपाणिरथाविवेश ॥ १७ ॥ तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्याम् ॥ संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकांताम् ॥ १८ ॥ असुराणां सुधादानं सर्पाणामिव दुर्नयम् ॥ मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥ १९ ॥ कल्पयित्वा पृथक्पंक्तीरुभयेष। जगत्पतिः ॥ तांश्चोपवेशयामास स्वेषुस्वेषु च पंक्तिषु ॥ २० ॥

वासः स्वयं भुवा ॥ शस्तं तन्मांगलिक्येषु तावन्मात्रेण सर्वदा ॥" इति । प्रागग्रेषु कुशेषु विविशुः ॥ १५ ॥ धूपैरामोदितायां सुरभीकृतायां शालायाम् ॥ १६ ॥ अथ तस्यां शालायां हे नरेंद्र सा कलशपाणिराविवेश । कथंभता । "मणिबंधादाकनिष्ठं करस्य करभो बहिः ॥ " करभसदृशौ सुवृत्तावूरू यस्याः सा । उशत्कमनीयं दुकूलं यस्मिंस्तेन श्रोणीतटेन । विशालया श्रोण्या अलसा मंदा गतिर्यस्याः सा । पाठांतरे करभसदृशयोरूर्वोर्लसद्दुकूलं यस्याः सा चासौ श्रोणीतटेनालसगतिश्च । मदेन विह्वले अक्षिणी यस्याः॥ १७॥ तां श्रियः सखीं संवीक्ष्य देवासुराः संमुमुहुः । कथंभूताम् । कनकमये कुंडले यस्याः सा चासौ चारवः कर्णादयो यस्याः सा च ताम् । विगलितः स्रस्तः स्तनपट्टिकाया अंतो यस्याः॥ १८॥एवं तान्मोहयित्वा यत्कृतवांस्तदाह त्रिभिः।असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयमन्याय्यं मत्वा तां सुधां तेभ्यो न व्यभजत् । अयं भावः । दैत्यैर्मदीयं साध्वसाधु वा सर्वमनुमतमेवातो मद्भक्तान्देवानेव सुधां पाययिष्यामि । किं च तैर्यथान्यायं विभजस्वेत्युक्तं न चैतेभ्यो जात्यैव क्रूरेभ्यो दानं न्याय्यमतस्तेभ्यः सुधां न दद्यामिति ॥ १९ ॥ पंक्तीः पृथग्विविक्ताः कल्पयित्वा विधाय । तासु पंक्तिषु स्वेषुस्वेषु तत्समजातीयेषु । तांश्चासुरानपि प्रतारणार्थमेवोपवेश

यन्न धारितम् । अहतं तद्विजानीयात्पावनं सर्वकर्मसु ॥" अस्यार्थः—ईषद्धौतं क्षारं विना धौतम् । नवं तद्दिनधौतं प्रत्यहं नवस्यासंभवात् । सुदशमकृत्रिमदशं तथा च "अकृत्रिमदशं वस्त्रं प्रशस्तं वर्सकर्मसु । अकृत्रिमा दशा ज्ञेया सिद्धा वाधनकर्मणि ॥ " इति स्मृतिसमुच्चयोक्तेः ॥ १५ ॥ १६ ॥ अथोभयपंक्तिनिवेशानंतरम् । पाठांतरे 'करभोरुलसद्दुकूले' इति पाठे ॥ १७ ॥ स्तनपट्टिका कंचुकी ॥ १८ ॥ तान् देवासुरान् । अत्राशयमाह—अयं भाव इति । सर्वं कर्म । अतोऽनुमतत्वादेव । दैत्येभ्योऽमृताऽदाने कारणांतरमाह—किञ्चेति । यतो जात्यैव दैत्याः क्रूरा अतो हेतोः । दृष्टांते 'पयःपानं भुजंगानां केवलं विषवर्द्धनम्' इत्युक्तिरनुसंधेया । किञ्च दैत्यैर्यथान्यायं विभजस्वेत्युक्तमतो न्यायश्चायमेवेति भावः ॥ १९ ॥ पंक्तिषु मध्ये यया पंक्तयोः येषांयेषां स्वानि धनवत्स्वीयानि स्युस्तेषु स्वेषु स्वत्वविशिष्टासु पंक्तिष्वित्यर्थो विधेयः । अन्यथा स्वासुस्वासु चेति वक्तव्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैत्यान्गृहीतकलशो वंचयन्नुपसंचरैः ॥ दूरस्थान्पाययामास जरामृत्युहरां सुधाम् ॥ २१ ॥ ते पालयंतः समयमसुराः स्वकृतं नृप ॥ तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥ २२ ॥ तस्यां कृतातिप्रणयाः प्रणयापायकातराः ॥ बहुमानेन चाबद्धा नोचुः किंचन विप्रियम् ॥ २३ ॥ देवलिंगप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ॥ प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च सूचितः ॥ २४ ॥ चक्रेण क्षुरधारेण जहार पिबतः शिरः ॥ हरिस्तस्य कबंधस्तु सुधयाऽप्लावितोऽपतत् ॥ २५ ॥ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ॥ यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः ॥ २६ ॥ पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः ॥ पश्यतामसुरेंद्राणां स्वं रूपं जगृहे हरिः ॥ २७ ॥ एवं सुराऽसुरगणाः समदेशकालहेत्वर्थकर्ममतयोपि फले विकल्पाः ॥ तत्राऽमृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजःश्रयणान्न दैत्याः ॥ २८ ॥

यामास ॥ २० ॥ उपसंचरैर्बहुमानप्रियवाक्यादिना तानतिक्रम्यातिक्रम्य गमनैः । दूरस्थानपि देवान् ॥ २१ ॥ तया कृतः स्नेहो येषु । स्त्रिया सह विवादस्य जुगुप्सया ॥२२॥ कृतोऽतिप्रणयः स्नेहो यैः । प्रणयापायेन कातरा भीताः । एते तावत्कृपणाः पूर्वं किंचित्पिबंतु यूयं तु धीराः क्षणं प्रतीक्षध्वमित्यादिबहुमानेनाऽऽबद्धा नियंत्रिताः । समयपालनादिभिः षड्भिरेतैः कारणैरप्रियं किंचिदपि नोचुः किं तु तूष्णीमासन् ॥ २३ ॥ देवपंक्तौ चंद्रार्कयोर्मध्ये प्रविष्टः सोमममृतमपिबत् ॥ २४ ॥ हरिस्तस्य शिरो जहार । अप्लावितोऽसंस्पृष्टः ॥ २५ ॥ ग्रहं सूर्यादिवद्ग्रहत्वाधिकारिणम् ॥ २६ ॥ २७ ॥ हरिभक्तानामेवोद्यमः फलति नान्येषामित्येवमाख्यानतात्पर्यमाह । एवमिति ।

स्यात्स्वशब्दस्य सर्वादित्वेन त्रिलिंगत्वात् ॥ २० ॥ यद्वा—उप निकटे संचरैः संचरणैर्भ्रूभंगिनेत्रस्मितव्रीडामुखार्द्धाच्छादननूपुरादिभूषणवसनसंचालनपूर्वकैश्चरणसंचलनैः किञ्चिन्मात्रप्रदानेन दूरस्थदेवानामुत्कंठां निवर्त्त्य संपूर्णमस्मानेव संपाययिष्यतीति प्रत्यायनैः । वञ्चयन्निति । अस्माभिः श्रोत्रनेत्रमनोभिर्यदिदममृतं पीयतेऽतोऽधिकं सामुद्रममृतं न भविष्यतीति तदलं तेन एतस्या आनुकूल्यमेवाकांक्षणीयमित्यपि तेषां मनसि विचारं प्रापयामासेति भावः। आदिना उपरितनं लघु देवेभ्यो दत्त्वा घनमधोगतं वो दास्यामीत्याग्रहः॥२१॥समयं संकेतम् । 'स्त्रीवादो लघुताहेतुः' इत्युक्तेः । तदुक्तं "बालसखित्वमकारणहास्यं स्त्रीजनवादसुदुष्कृतसेवा । गर्दभयानमसंस्कृतवाणी षट् त इमे लघुताजनका वै ॥" ॥२२॥ षड्भिः समयपालनतत्कृतस्नेहत्वस्त्रीविवादजुगुप्सितत्वस्वकृतस्नेहत्वप्रणयापायकातरत्वबहुमानाबद्धत्वरूपैः ॥ २३ ॥ तदेवं मोहिनीमूर्त्या भगवता सद्य एवामृतप्रभावं दर्शयितुं स्वर्भानुं विना सर्वे दैत्या मोहिताः । स च मोहिन्यभिप्रेतं ज्ञात्वा देवपंक्तौ प्रविष्ट इत्याह—देवलिंगेति । अत एव देवास्तं पूर्वं परिचेतुं न शेकुः उपविष्टे तु चंद्रार्काभ्यां परिचितोपीतोऽन्यत्र पंक्तावुपविशेति तद्भयान्नोक्तमिति ज्ञेयं, यदाऽमृतमपिबत्तदाऽसुरोऽसाविति भ्रूभंग्या सूचितम् ॥२४॥ चक्रेण तदैव स्मरणादाविर्भूतेन कबंधोऽपतदिति केतुस्तु छायारूपो ग्रहो न तु कबंधरूपः " राहुच्छाया स्मृतः केतुः " इति भुवनदीपिकोक्तेः ॥ २५ ॥ योऽजक्लृप्तराहुरूपो ग्रहः । पर्वणि पूर्णिमामावास्यारूपे ॥२६॥ स्वरूपं प्राक्तनं स्त्रीरूपेतरपुंरूपम् ॥ २७ ॥ देशः क्षीराब्धिः । कालस्तत्तत्क्षणसमूहः । हेतुर्मथनसाधनं मंदरादिः । अर्थः समुद्रक्षितवीरुदादि । कर्म मथनम् । मतिरमृतकामना । इत्यर्थ इति । "हठाद्यत्क्रियते कर्म तत्तु सिध्यति कर्हिचित्" इत्युक्तेरिति भावः । तदेव फलवैषम्यमेव । यस्य हरेः । इत्यर्थ इति। तदालाभेपि नित्यसंबंधादेव लाभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् ॥ तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥२९॥
इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे अमृतमथनेऽमृतदाननिरूपणं नाम नवमोऽध्यायः॥९॥श्रीशुक उवाच ॥ इति दानवदैतेया नाविंदन्नमृतं
नृप ॥ युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥ साधयित्वाऽमृतं राजन्पाययित्वा स्वकान्सुरान् ॥ पश्यतां सर्वभूतानां ययौ गरुडवा
हनः ॥ २ ॥ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः ॥ अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥ ३ ॥ ततः सुरगणाः सर्वे सुधया पीतयै
धिताः ॥ प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥ ४ ॥ तत्र दैवासुरो नाम रणः परमदारुणः ॥ रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ॥ ५ ॥

समा देशादयो येषाम् । हेतुर्मंदराद्रिः । अर्थः समुद्रे क्षिप्तं वीरुत्तृणादि । विविधः कल्पः फलं केषांचिज्जातं केषांचिन्नेति वैचित्र्यमेषां ते फलवैषम्यवंतो बभूवुरि त्यर्थः । तदेवाह । तत्र तेषु यस्य पादपंकजरजःश्रयणाद्देवा अमृतं फलमापुः स एव सेव्य इत्यर्थः । यत्तदोर्नित्यसंबंधात्॥ २८॥एतदेवोपपादयति । यदिति । असुः। प्राणः । वसु धनम् । प्राणादिभिर्देहात्मजादिषु नृभिर्यद्युज्यते प्रयुज्यते देहाद्यर्थं यत्क्रियत इत्यर्थः । तदसद्व्यर्थं भवति । कुतः । पृथक्त्वाद्भेदाश्रयत्वात् ।शाखानिषेचनवत्तैरेव प्राणा दिभिरीश्वरोद्देशेन यत्क्रियते तत्तु सन्महाफलं भवति अपृथक्त्वादीश्वरस्य सर्वत्रानुगतत्वात् । तत्र दृष्टांतः । यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कंधशाखादेरपि भवतीति। यद्वा ल्यब्लोपे पंचम्यौ । पृथक्त्वं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत्क्रियते तदसत् । अपृथक्त्वं पर्यालोच्येश्वरदृष्ट्या तैरेव तेष्वेव च यत्क्रियते तत्सद्भवतीति शेषं समानम् ॥ ॥ २९ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां नवमोऽध्यायः ॥ ९ ॥ दशमे मत्सराद्दैत्यैरारब्धे तु मृधे सुरैः ॥ दैत्यमायाविषण्णेषु देवेष्वाविर्बभौ हरिः ॥ १ ॥ तदेवम मृतावाप्तिर्नाभक्तानामितीरितम् ॥ भक्तमत्सरतः प्राणहानिः पुनरुदीर्यते ॥ २ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ रणः संग्रामः । उदन्वतः समुद्रस्य । रोधसि तीरे बभूव ॥ ५ ॥

इत्यर्थः । सेव्य इति शेष इति ज्ञेयमत्रेति॥२८॥एतदेव हरिसेव्यत्वमेव। इत्यर्थ इति तात्पर्यम्। तत्रेश्वरस्य सर्वानुगतत्वे 'फलं कर्त्तुरभिप्रायात्' इत्युक्तेरभिप्रेतं फलं कर्त्तुर्भवत्येवेत्याशयेनाह–यद्वेति। भेदाभेदयोरसत्सत्त्वात्तद्दृष्ट्या कृतकर्मणामपि तथात्वमेवेति वृक्षाच्छाखा भिन्नेति बुद्ध्या मूलं विहाय यथा शाखा निषिच्यते तथैव भगवंतं विहाय देहाद्याः परिचर्यंते मूढैः। मूलाच्छाखा न भिन्नेति बुद्ध्या यथा मूलमेव सिच्यते तथैव भगवानेव परिचर्यते विज्ञैरिति भावः ॥ २९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्वे नवमोऽध्यायः ॥ ९ ॥ मत्सराद्देवोत्कर्षासहनात् (१) । भक्तानां देवानां मत्सरतः (२) । इति भगवच्चदनाश्रयणात् । यत्ताः कृतप्रयत्नाः । अमृतानाप्तौ हेतुः–वासुदेवेति ॥ १ ॥ ययावद्दृश्योऽभूत् ॥ २ ॥ ३ ॥ ततः दैत्योत्थानोत्तरम् ॥ ४ ॥ तत्र तदा । तुमुलो भयंकरः ' तुमुलः कलिवृक्षे ना भयदे रणसंकुले ' इति ॥ ५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे ॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥ शंखतूर्यमृदंगानां भेरीडमरिणां महान् ॥ हस्त्यश्वरथपत्तीनां नदतां निस्वनोऽभवत् ॥ ७ ॥ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ॥ हया हयैरिभाश्चेभैः समसज्जंत संयुगे ॥ ८ ॥ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ॥ केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥ शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ॥ बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ११ ॥ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ॥ सेनयोरुभयो राजन्विविशुस्तेऽग्रतोऽग्रतः ॥ १२ ॥ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्बार्हचामरैः ॥१३॥ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ १४ ॥ देवदानववीराणां ध्वजिन्यौ पांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥ १५ ॥ वैरोचनो बलिः संख्ये सोऽसुराणां चमूपतिः ॥ यानं वैहायसं नाम कामगं मयनिर्मितम् ॥ १६ ॥ सर्वसांग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ॥ अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ॥ १७ ॥

अन्योन्यं समासाद्य निजघ्नुः ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥११ ॥ १२ ॥ चित्रध्वजपटादिभिश्च वीराणां मालाभिश्च राजिभिर्देवदानववीराणां ध्वजिन्यौ यादसां मालाभिः सागराविव रेजतुरिति त्रयाणामन्वयः । यादोभिरिति वा । सितैरमलैरातपत्रैश्च बर्हैश्चामरैश्च व्यजनैश्च ॥ १३ ॥ वातेनोद्धूतैरुत्तरीयैरुष्णीषैश्च सूर्यरश्मिभिः सुतरां स्फुरद्भिः ॥ १४ ॥ १५ ॥ संख्ये युद्धे । असुराणां या चमूस्तस्याः पतिः स बलिर्यानमास्थितः ॥ १६ ॥ १७ ॥

तत्र रणे॥ ६ ॥डमरी डमरुः डमडमेत्येवं रौतीति व्युत्पत्तेः। णिनिप्रत्यये टिलोपस्त्वार्षः॥ ७ ॥तत्र रणे। 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायेन हयेभशब्दौ तदारूढपरौ।उष्ट्रस्थवस्तुनि क्रीते उष्ट्रः क्रीत इतिवत्॥ ८ ॥गौरमृगो मृगःश्यामभृगेतरः। हरयो वानरा अश्वा वा 'हरी कीशतुरंगमौ' इति केशवः ॥ ९ ॥ श्येनतुल्यभासाः श्येनभासाः । श्येनैर्युक्ता भासा वा गृध्रादयो भासांताः पक्षिभेदाः ।:तिमिंगिलैर्मत्स्यैः। शरभैस्सिंहाशिभिः । खड्गैर्गंडकैः । अरुणोऽपि मृगभेदः ॥ १० ॥ आखुर्मूषिकः ॥ ११ ॥ विकृतो भयंकरो विग्रहो देहो येषां तैस्सत्त्वैर्जीवैः 'सत्त्वं जंतौ गुणे बले' इति धरणिः ॥ १२ ॥ समासांतर्गतपदभेदेनान्वयं त्वगतिकगतिकं मत्वाह—यादोभिरिति। अयं तु पाठः श्रेयान् । बार्हैर्बार्हिपक्षरचितैः ॥ १३ ॥ १४ ॥'ध्वजिनी वाहिनी सेना' इति कोशात् ॥ १५ ॥स यानम् आस्थित इति तृतीयश्लोकगेनान्वयः ॥ १६ ॥ सर्वैः सांग्रामिकैः संग्रामसाधनभूतैः शस्त्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ॥ बालव्यजनछत्राग्र्यै रेजे चंद्र इवोदये ॥ १८ ॥ तस्यासन्सर्वतो यानैर्यूथानां पतयोऽसुराः ॥ नमुचिः शंबरो बाणो विप्रचित्तिरयोमुखः ॥ १९ ॥ द्विमूर्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसंतापो वज्रदंष्ट्रो विरोचनः ॥ २० ॥ हयग्रीवः शंकुशिराः कपिलो मेघदुंदुभिः ॥ तारकश्चक्रदृक्‌ शुंभो निशुंभो जंभ उत्कलः ॥ २१ ॥ अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ॥ अन्ये पौलोमकालेया निवातकवचादयः ॥ २२ ॥ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः ॥ सर्वे एते रणमुखे बहुशो निर्जितामराः ॥ ॥ २३ ॥ सिंहनादान्विमुंचंतः शंखान्दध्मुर्महास्वनान् ॥ दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृशम् ॥ २४ ॥ ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट् ॥ यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २५ ॥ तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः ॥ लोकपालाः सह गणैर्वाय्वग्निवरुणादयः ॥ ॥ २६ ॥ तेऽन्योन्यमभिसंसृत्य क्षिपंतो मर्मभिर्मिथः ॥ आह्वयंतो विशंतोऽग्रे युयुधुर्द्वंद्वयोधिनः ॥ २७ ॥ युयोध बलिरिंद्रेण तारकेण गुहोऽस्यत ॥ वरुणो हेतिनाऽयुध्यन्मित्रो राजन्प्रहेतिना ॥ २८ ॥ यमस्तु कालनाभेन विश्वकर्मा मयेन वै ॥ शंबरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥ २९ ॥ अपराजितेन नमुचिरश्विनौ वृषपर्वणा ॥ सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ॥ ३० ॥

उदयगिरिशिखरे स्थितश्चंद्र इव रेज इतित्रयाणामन्वयः ॥ १८ ॥ १९ ॥ २०॥२१॥२२॥२३॥२४॥ स्रवंति प्रस्रवणानि यस्मिन्निति मदधारासादृश्यम् ॥ २५ ॥ नानावाहनादीनि येषां ते देवाः असुराश्च मिथोऽभिसंगम्य नामभिर्नामानि गृहीत्वा क्षिपंतस्तिरस्कुर्वंतो युयुधुः ॥ २६ ॥ २७ ॥ द्वंद्वान्येवाह युयोधेति सप्तभिः । अस्यत आस्यद्युध्यतेत्यर्थः ॥ २८ ॥ २९ ॥ सूर्यो देव एक एव शतेन बलिसुतैः । बाणो ज्येष्ठो येषां तैः ॥ ३० ॥

दिभिरुपेतम् । सर्वाश्चर्याणि प्रधानानि यत्र तत् । तदेवाह–अप्रतर्क्यमित्यादि ॥ १७ ॥ वालव्यजनैश्चामरैः ॥ १८ ॥ तस्य बलेः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अहर्पतिः ॥ २५ ॥ तस्य इंद्रस्य ॥ २६ ॥ ते देवासुराः ॥ २७ ॥ इत्यर्थ इति । क्षेपणमपि युद्धमेवेति भावः ॥ २८ ॥ २९ ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ॥ निशुंभशुंभयोर्देवी भद्रकाली तरस्विनी ॥ ३१ ॥ वृषाकपिस्तु जंभेन महिषेण विभावसुः ॥ इल्वलः सहवातापिर्ब्रह्मपुत्रैररिंदम ॥ ३२ ॥ कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह ॥ बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ॥ ३३ ॥ मरुतो निवातकवचैः कालेयैर्वसवोऽमराः ॥ विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ॥ ३४ ॥ त एवमाजावसुराः सुरेंद्रा द्वंद्वेन संहत्य च युध्यमानाः ॥ अन्योन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ॥ ३५ ॥ भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिंदिपालैश्च शिरांसि चिच्छिदुः ॥ ३६ ॥ गजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखंडिताः ॥ निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥ ३७ ॥ तेषां पदाघातरथांगचूर्णितादायोधनादुल्बण उत्थित स्तदा ॥ रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ॥ ३८ ॥ शिरोभिरुद्धूतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः ॥ महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ॥ ३९ ॥

निशुंभशुंभाभ्यां देवी ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ॥ ३५ ॥ ३६ ॥ आरोहंतीत्यारोहास्तैः सहिता अन्ये च वाहाः पूर्वं तु केवलं गजादय उक्ताः कथंभूताः । निकृत्ता बाह्वादयो येषाम् । छिन्नानि ध्वजादीनि येषां ते ॥ ३७ ॥ तेषां देवादीनां पदाघातै रथांगैश्च चूर्णितादायोधनाद्रणभूमेरुत्थितो रेणुर्दिशः खं द्युमणिं च सूर्यं छादयंस्तदैव खादेर्न्यवर्तत । कथंभूतात् । असृक्स्रुतिभिः रक्तक्षरणैः परिप्लुतात्सिक्तात् । यद्वा परिप्लवनाद्धेतोर्न्यवर्तत । भावे क्तः । रक्तधाराणां तत्पर्यंतमुच्छलना दित्यर्थः । प्रथमांतपाठे रेणोर्विशेषणम् ॥ ३८ ॥ शिरोभिर्महाभुजैश्च करभसदृशैरूरुभिश्च सा रणभूः प्रकर्षेणास्तृता सती बभौ । कथंभूतैः शिरोभिः । उद्धूतान्युत्प तितानि किरीटानि कुंडलानि च येभ्यस्तैः संरंभयुक्ता दृशो येषु तैः । परिदष्टा दच्छदा ओष्ठा येषु तैः ॥ ३९ ॥

तरस्विनी अतीवतेजस्विनी ॥ ३१ ॥ ब्रह्मपुत्रैः सनकाद्यैरिति न व्याख्येयं तेषां विरक्तत्वेन योद्धृत्वं न युक्तमतो वशिष्ठाद्यैरिति ध्येयम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ एवमुक्तरीत्या ॥ ३५ ॥ ३६ ॥ ३७ ॥ खादे राकाशादेः । उपसर्गवशादर्थांतरमित्याह—यद्वेति । इत्यर्थ इति । यावत्पर्यंतं रेणुर्गतस्तावदिति भावः ॥ ३८ ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कबंधास्तत्र चोत्पेतुः पश्यंतः स्वशिरोक्षिभिः ॥ उद्यतायुधदोर्दंडैराधावंतो भटान्मृधे ॥ ४० ॥ बलिर्महेंद्रं दशभिस्त्रिभिरैरावतं शरैः ॥ चतुर्भिश्चतुरो वाहानेकेनारोहमार्छयत् ॥ ४१ ॥ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः ॥ चिच्छेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव ॥ ४२ ॥ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे ॥ तां ज्वलंतीं महोल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ॥ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः ॥ यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ॥ ४४ ॥ ससर्जाऽथासुरीं मायामंतर्धानगतोसुरः ॥ ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ॥ ४५ ॥ ततो निपेतुस्तरवो दह्यमाना दवाग्निना ॥ शिलाः सटंकशिखराश्चूर्णयंत्यो द्विषद्बलम् ॥ ४६ ॥ महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ॥ ४७ ॥ यातुधान्यश्च शतशः शूलहस्ता विवाससः ॥ छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो ॥ ४८ ॥ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः ॥ सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥ ५० ॥ ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ॥ प्रचंडवातरुद्धूततरंगावर्तभीषणः ॥ ५१ ॥ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥ ५२ ॥ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ॥ ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ॥ ५३ ॥ ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ॥ ५४ ॥

पतितानि यानि स्वशिरांसि तत्रत्यैरक्षिभिस्तैः पश्यंत इत्यर्थः । उद्यतान्यायुधानि यैस्तैर्दोर्दंडैर्युक्ताः ॥ ४० ॥ वाहानैरावतपादरक्षकान् । आरोहं गजयंतारमार्छयद्विव्याध ॥ ४१ ॥ ४२ ॥ दुर्मर्षोऽसहनो बलिः ॥ ४३ ॥ ४४ ॥ ४५ ॥ टंकवत्तीक्ष्णाग्रैः शिखरैः सहिताः ॥ ४६ ॥ ४७ ॥ ४८ ॥ स्तनयित्नवः सनिर्घाता महामेघा अंगारान्मुमुचुरित्यनुषंगः ॥ ४९ ॥ अधाक् आर्षः । अधाक्षीदित्यर्थः ॥ ५० ॥ उद्धूतैस्तरंगैरावर्तैश्च भीषणः ॥ ५१ ॥ एवमन्यैश्च दैत्यैः सृज्यमानासु ॥ ५२ ॥ यत्र यदा । तत्र तदा । तैर्ध्यातः सन् ॥ ५३ ॥ अष्टावायुधयुक्ता बाहवो यस्य । श्रीश्च कौस्तुभश्च अनर्घ्यं किरीटं च कुंडले च उल्लसंति

इत्यर्थ इति । पश्यंत इत्यक्षिपदोक्तेरायातमिति भावः । तत्र युद्धे ॥ ४० ॥ ४१ ॥ तान् शरान् ॥ ४२ ॥ तस्येंद्रस्य ॥ ४३ ॥ ततः शक्तिच्छेदोत्तरम् । ततः शूलच्छेदोत्तरम् । ततः प्रासच्छेदोत्तरम् । ऋष्टय ऋष्टीः । विभुः इंद्रः ॥ ४४ ॥ अथ सर्वशस्त्रच्छेदोत्तरम् । ततो मायासृष्टेः ॥ ४५ ॥ ततः शैलात् । टंकवत्पाषाणभेदनशस्त्रवत् " सार्द्धं माषत्रयं टंकष्टंकोऽस्त्री ग्रावभेदने " इति धरणिः ॥ ४६ ॥ ४७ ॥ ४८ ॥ स्तनयित्नवः सनिर्घातमेघाः ॥ ४९ ॥ इत्यर्थ इति । आर्षत्वात्सिजभावो तिपो लोपश्चेति भावः ॥ ५० ॥ ततो देवसेनादहनोत्तरम् ॥ ५१ ॥ परसैनिका देवसैनिकाः ॥ ५२ ॥ प्रतिविधिं निवर्त्तनोपायम् ॥ ५३ ॥ ततो हरिप्रादुर्भूतेरनंतरम् ॥ ५४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ॥ स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५५ ॥ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ॥ तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ ५६ ॥ माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ॥ आहत्य तिग्मगदयाऽहनदंडजेंद्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाऽऽद्यः ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे दशमोध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकंपया ॥ जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तांरणे यैरभिसंहताः पुरा ॥ १ ॥ वैरोचनाय संरब्धो भगवान्पाकशासनः ॥ उदयच्छद्यदा वज्रं प्रजा हाहेति चुक्रुशुः ॥ २ ॥ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरस्स्थितम् ॥ मनस्विनं सुसंपन्नं विचरंतं महामृधे ॥ ३ ॥ नटवन्मूढमायाभिर्मायेशान्नो जिगीषसि ॥ जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनम् ॥ ४ ॥ आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवम् ॥ तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः ॥ ५ ॥

श्रीकौस्तुभादीनि यस्मिन् ॥ ५४ ॥ असुराणां कूटकर्म मंत्रादिप्रयोगस्तस्माज्जाताः । महिना महिम्ना । हरेः स्मृतिरेव सर्वासां विपदां मोक्षणरूपा किमुत हरेः प्रवेश इत्यर्थः ॥ ५५ ॥ इभारिवाहः सिंहवाहः । अहिनोच्चिक्षेप । लीलयैव तद्गृहीत्वा अहनदहन् । हे नृप ॥ ५६ ॥ यस्य चक्रेण कृत्तशिरसौ पेततुस्तं तथाभूतमप्याहत्य संघट्यांडजेंद्रं गरुडमहनत् । तं हंतुं गदामुन्निन्य इत्यर्थः । आद्यो हरिः ॥ ५७ ॥ इति श्रीमद्भागवते अष्टमस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥ एकादशे तु देवेषु दैत्यघातिषु नारदः ॥ देवानवारयच्छुक्रो मृतान्दैत्यानजीवयत् ॥ १ ॥ १ ॥ उदयच्छदुन्निन्ये ॥ २ ॥ ३ ॥ निबद्धान्यक्षीणि येषां तान्बालान् जित्वा नटः कपटवृत्तिर्यथा तेषां धनं हरति तथा हे मूढ मायेशानस्माञ्जेतुमिच्छसि ॥ ४ ॥ मत्प्रभावं शृण्वित्याह । आरुरुक्षंत्यारोढुमिच्छंति । ये चोत्सिसृप्संत्युल्लंघयितुमिच्छंति । मोक्षमिच्छंती

तस्मिन् हरौ । असुराणां कूटकर्मणा जाताः । महीयसो हरेर्महिना तेजसा । प्रतिबोधे जागरणे ॥५५॥ इभस्य गजस्यारिः सिंहः वाहो यस्य स तथा । अथ शूलप्रक्षेपादनंतरम् । सवाहं ससिंहम् । त्र्यधीशो हरिः ॥५६॥ अथोभयपतनानंतरन् । संघट्य मिलित्वा । इत्यर्थ इति । यावदहंस्तावदेव हननात्प्रागित्यागतमिति भावः । अरिणा चक्रेण ॥ ५७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे दशमोऽध्यायः ॥ १० ॥ (१)। अभिसंहता युद्धाय मिलिताः ॥ १ ॥ संरब्धः कुपितः ॥ २ ॥ तं वैरोचनम् ॥ ३ ॥ मायेशान्सर्वमायाविशारदान् । नटतुल्यमायस्य तव मायया वयं न जेया इत्यर्थः ॥ ४ ॥ इत्यर्थ इति । मुमुक्षूणामेव स्वर्गादीच्छा नोदयते इति भावः । पूर्वस्माच्च पदादिति । पादमेकमपि गंतुं प्रवृत्तं ततः प्रागेव पादोत्थानसमय एव तं पातयामीत्यर्थः । केचित्पूर्वस्मात्सर्वलोकपूर्वाद्रसातलात्पदादध इत्याहुस्तच्चेत्थं रसातलादधो रसाया भूमेस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ॥ शिरो हरिष्ये मंदात्मन्घटस्व ज्ञातिभिः सह ॥ ६ ॥ बलिरुवाच ॥ संग्रामे वर्तमानानां कालचोदितकर्मणाम् ॥ कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥ ७ ॥ तदिदं कालरशनं जनाः पश्यंति सूरयः ॥ न हृष्यंति न शोचंति तत्र यूयमपंडिताः ॥ ८ ॥ न वयं मन्यमानानामात्मानं तत्र साधनम् ॥ गिरो वः साधु शोच्यानां गृह्णीमो मर्मताडनाः ॥ ९ ॥ श्रीशुक उवाच ॥ इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः ॥ आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥ १० ॥ एवं निराकृतो देवो वैरिणा तथ्यवादिना ॥ नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥ ११ ॥ प्राहरत्कुलिशं तस्मा अमोघं परमर्दनः ॥ सयानो न्यपतद्भूमौ छिन्नपक्ष इवाचलः ॥ १२ ॥ सखायं पतितं दृष्ट्वा जंभो बलिसखः सुहृत् ॥ अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥ १३ ॥ स सिंहवाह आसाद्य गदामुद्यम्य रंहसा ॥ जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥ १४ ॥ गदाप्रहारव्यथितो भृशं विह्वलितो गजः ॥ जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥ १५ ॥ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः ॥ आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥ तस्य तत्पूजयन्कर्म यंतुर्दानवसत्तमः ॥ शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥ १७ ॥ सेहे रुजं सुदुर्मर्षां सत्त्वमालंब्य मातलिः ॥ इंद्रो जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥ जंभं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ॥ नमुचिश्च बलः पाकस्तत्रापेतुस्त्वराऽन्विताः ॥ १९ ॥ वचोभिः परुषैरिंद्रमर्दयंतोऽस्य मर्मसु ॥ शरैरवाकिरन्मेघा धाराभिरिव पर्वतम् ॥ २० ॥ हरीन्दशशतान्याजौ हर्यश्वस्य बलः शरैः ॥ तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥

त्यर्थः । अधो विधुनोमि पातयामि ॥५॥६॥७॥ कालरशनं कालयंत्रितम् । अतो न हृष्यंति । तत्र एवं विवेके यूयमपंडिता अनिपुणाः ॥८॥ तत्र कीर्तिजयादावात्मानं साधनं मन्यमानानां वो गिरो न गृह्णीमः । मर्मसु ताडनं याभिस्ताः ॥ ९ ॥ विभुमिंद्रम् । वीरो बलिः ॥ १० ॥ तोत्रमंकुशस्तेनाहत इव ॥ ११ ॥ सयानो विमानसहितः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥१८॥ नमुचिर्बलः पाकश्चेति त्रय आजग्मुः ॥१९॥२०॥ त्रयाणां पृथग्विक्रमानाह हरी

लादधो नरक इत्यर्थः ॥ ५ ॥ घटस्व यत्नं कुरुष्व ॥ ६ ॥ ७ ॥ तदिदं जगत् कीर्त्यादि वा काल एव रशना बंधनरज्जुर्यत्र तत्तथा । अतः कालाधीनत्वात् । यतस्सूरीणां हर्षादि नास्त्यतो हेतोः एवं विवेके कालाधीने को हर्षः को वा शोक इत्येवं ज्ञाने ॥ ८ ॥ मर्मसु पीडाऽसहावयवेषु । "शरीरावयवे मर्म पीडनासहने हृदि" इति कोशात् । यथा यूयं जीवंतोऽपि साधुभिः शोच्यध्वे तथा वयं मृता अपि न शोच्यामहे इति भावः ॥ ॥ ९ ॥ आक्षेपैर्दुरुक्तैः ॥ १० ॥ 'तोत्रं प्राजनसृण्योश्च' इति यादवः ॥ ११ ॥ तस्मै बलये । कुलिशं वज्रम् ॥ १२ ॥ १३ ॥ स जंभः ॥ १४ ॥ १५ ॥ ततो गजकश्मलोत्तरम् । विभुरिंद्रः ॥ १६ ॥ तस्य मातलेः । तत्कर्म झटिति रथानयनरूपम् । तं मातलिम् ॥ १७ ॥ सत्त्वं धैर्यम् ॥ १८ ॥ तस्य जंभस्य । तत्र इन्द्रसमीपे ॥ १९ ॥ २० ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शताभ्यां मातलिं पाको रथं सावयवं पृथक् ॥ सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे ॥ २२ ॥ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः ॥ आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥ २३ ॥ सर्वतः शरकूटेन शक्रं सरथसारथिम् ॥ छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः ॥ २४ ॥ अलक्षयंतस्तमतीव विह्वला विचुक्रुशुर्देवगणाः सहानुगाः ॥ अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथाऽर्णवे ॥ २५ ॥ ततस्तुराषाडिषुबद्धपंजराद्विनिर्गतः साश्वरथध्वजाग्रणीः ॥ बभौ दिशः खं पृथिवीं च रोचयन्स्वतेजसा सूर्य इव क्षपात्यये ॥ २६ ॥ निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे ॥ उदयच्छद्रिपुं हंतु वज्रं वज्रधरो रुषा ॥ २७ ॥ स तेनैवाष्टधारेण शिरसी बलपाकयोः ॥ ज्ञातीनां पश्यतां राजञ्जहार जनयन्भयम् ॥ २८ ॥ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रं नृपते चकार परमोद्यमम् ॥ २९ ॥ अश्मसारमयं शूलं घंटावद्धेमभूषणम् ॥ प्रगृह्याभ्यद्रवत्क्रुद्धो हतोऽसीति वितर्जयन् ॥ प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥ ३० ॥ तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ॥ तमाहनन्नृप कुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ॥ ३१ ॥ न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ॥ तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधरत्वचा ॥ ३२ ॥ तस्मादिंद्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः ॥ किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥ ३३ ॥ येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ॥ कृतो निविशतां भारैः पतत्रैः पततां भुवि ॥ ३४ ॥

निति त्रिभिः । हर्यश्वस्येंद्रस्य । तावद्भिर्दशभिः शतैः ॥ २१ ॥ २२ ॥ आहत्येंद्रं विद्ध्वा ॥ २३ ॥ प्रावृट्कालीनं सूर्यम् ॥ २४ ॥ वणिक्पथा वणिजः । भिन्ना नौर्येषां ते भिन्ननाव इत्यर्थः ॥ २५ ॥ तुराषाडिंद्रः । अश्वादिसहितो विनिर्गतः । अग्रणीः सारथिः ॥ २६ ॥ २७ ॥ २८ ॥ शोकामर्षाभ्यां युक्तया रुषा क्रोधेनान्वित इंद्रं हंतुं परमोद्योगं चकार ॥ २९ ॥ घंटावत् घंटाभिर्युक्तम् ॥ ३० ॥ ३१ ॥ अतिवीर्यं वृत्रमभिनदिति तथा ॥ ३२ ॥ ३३ ॥ तथा पतत्रैः पक्षैः ॥ ३४ ॥

तत् सकृत्संधानेन मोक्षणम् ॥ २२ ॥ २३ ॥ २४ ॥ इत्यर्थ इति । आर्षत्वाद्ध्रस्व इति भावः ॥ २५ ॥ ततो. देवगणाक्रोशोत्तरम् । क्षपात्यये रात्र्यंते ॥ २६ ॥ २७ ॥ स इंद्रः । तेनैव वज्रेणैव ॥ २८ ॥ तयोर्बलपाकयोर्वधम् अमर्षोऽसहसनम् ॥ २९ ॥ ३० ॥ तत् शूलम् । तं नमुचिम् ॥ ३१ ॥ तस्य नमुचेः । तत् नमुचित्वगभेदनं परमाश्चर्यम् । नमुचेः शिरोधरस्य कंठस्य त्वचा तिरस्कृतो विमानितोऽभूदिति शेषः ॥ ३२ ॥ तस्मान्नमुचेः । यतो यस्मात् । भूतं जातम् ॥ ३३ ॥ येन वज्रेण । मे मया ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः ॥ अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः॥३५॥सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके ॥ नाहं तदा ददे दंडं ब्रह्मतेजोऽप्यकारणम ॥ ३६ ॥ इति शक्रं विषीदंतमाह वागशरीरिणी ॥ नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥ ३७ ॥ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ॥ अतोऽन्यश्चिंतनीयस्त उपायो मघवन्रिपोः ॥ ३८ ॥ तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ॥ ३९ ॥ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः ॥ तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुम् ॥ ४० ॥ गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू ॥ देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥ ४१ ॥ अन्येऽप्येवं प्रतिद्वंद्वान्वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ॥ ४२ ॥ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप ॥ वारयामास विबुधान्दृष्ट्वा दानवसंक्षयम् ॥ ४३ ॥ नारद उवाच ॥ भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः ॥ श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥ ४४ ॥ श्रीशुक उवाच ॥ संयम्य मन्युसरंभं मानयंतो मुनेर्वचः ॥ उपगीयमानानुचरैर्ययुः सर्वे त्रिविष्टपम् ॥ ४५ ॥ येऽवशिष्टा रणे तस्मिन्नारदानुमतेन ते ॥ बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ॥ ॥ ४६ ॥ तत्राऽविनष्टावयवान्विद्यमानशिरोधरान् ॥ उशना जीवयामास संजीविन्या स्वविद्यया ॥ ४७ ॥ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः ॥ पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे देवासुरसंग्रामवर्णनं नाम एकादशोऽध्यायः ॥ ११ ॥ श्रीबादरायणिरुवाच ॥ वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ॥ मोहयित्वाऽसुरगणान्हरिः सोममपाययत् ॥ १ ॥

सारमयं वीर्याधिकं त्वाष्ट्रं तप एव वृत्रः स येन वज्रेण मया विपाटितः ॥ ३५ ॥ दंडं लगुडतुल्यं कुलिशम् । ब्रह्मतेजो दधीचेः सामर्थ्यम् ॥ ३६ ॥ ३७ ॥ आर्द्रशुष्काभ्यां मृत्युर्नैवेति ॥ ३८ ॥ ३९ ॥ उभयात्मकत्वमेवाह । न शुष्केण न चार्द्रेण फेनेन तथा च श्रुतिः—"अपां फेनेन नमुचेः शिर इंद्रोदवर्तयत्" इति॥४०॥४१॥४२॥४३॥४४॥ अनुचरैरनुगीयमाना इत्यर्थः । उपगीयमानैरनुचरैः सहेति वा ॥४५॥४६॥ अविनष्टा अवयवा येषाम् । विद्यमाना शिरोधरा येषां तान् ॥ ४७ ॥ प्रत्यापन्नानि पुनः प्राप्तानींद्रियाणि स्मृतिश्च येन सः ॥ ४८ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकम् ॥ भवं संमोहयामास हरिः पुनरसांत्वयत् ॥१॥ अमुह्यन्नसुरा विष्णुमायया न तदद्भुतम् ॥ इति वक्तुं महादेवमोहोऽयमुपवर्ण्यते ॥ २ ॥ हरिः सोम

त्वष्ट्रा तपसोत्पादितत्वाद्वृत्रस्य तपोरूपत्वं कार्यकारणयोरभेदोपचारात् ॥ ३५ ॥ लगुडः काष्ठदंडः । अकारणं निष्फलम् ॥ ३६ ॥ ३७ ॥ अत आर्द्रशुष्काभ्यामन्यः ॥ ३८ ॥ "अपां फेनं न शुष्कं न चार्द्रम्" इति श्रुतेः ॥ ३९ ॥ स्वाम्युपन्यस्तश्रुतिस्थोदवर्तयदित्यस्य चिच्छेदेत्यर्थः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ इत्यर्थ इति । छांदसत्वात् संधिरिति भावः । गौरवं मत्वाह—उपगीयमानैरिति । उद्गीयंत इत्युद्गीयमानास्ते चानुचरास्तैः उद्गीयमानाऽनुचरैरित्यपि क्वचित्पाठः ॥ ४५ ॥ विपन्नं मृतम् ॥ ४६ ॥ तत्र रणे ॥ ४७ ॥ स्पृष्टो मंत्रेणेत्यर्थः । लोकतत्त्वे लोकानां जयादेः कर्माधीनत्वमिति विचारे ॥ ४८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ पुनर्मोहितम् (१) ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः ॥ सोमया च ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥ २ ॥ सभाजितो भगवता सादरं सोमया भवः ॥ सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हारिम् ॥३॥ श्रीमहादेव उवाच ॥ देवदेव जगद्व्यापिञ्जगदीश जगन्मय ॥ सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥ ४ ॥ आद्यंतावस्य यन्मध्यमिदमन्यदहं बहिः ॥ यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ॥ ५ ॥ तवैव चरणांभोजं श्रेयस्कामा निराशिषः ॥ विसृज्योभयतः संगं मुनयः समुपासते ॥ ६ ॥ त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् ॥ विश्वस्य हेतुरुदयस्थिति संयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ७ ॥

मपाययदितीदं निशम्य स यत्रास्ते तत्र तद्रूपं द्रष्टुं ययावित्युत्तरेणान्वयः ॥ १ ॥ २ ॥ सोमया उमया सह ॥ ३ ॥ "त्वयि किंचिन्न चाश्चर्यं वयं त्वाश्चर्यमानसाः ॥ इति वक्ष्यन्महादेवस्तुष्टाव हारिमष्टभिः ॥ १ ॥" त्वयि महामायाविनि परमेश्वरे नहि किंचिदघटितमिव । वयं तु परमकौतूहलेन द्रष्टुमागता इति बहुधा संबोधयन्स्तौति । हे देवदेव । कुतोऽहं देवानां देव इत्यत आह । हे जगद्व्यापिन् । तत्कुतः हे जगन्मय । तर्हि किं प्रधानम् । न । हे जगदीश । तच्च कुतस्तत्राह । सर्वेषामपि त्वं हेतुरत ईश्वरः आत्मा च आत्मत्वाच्च न जडं प्रधानं त्वमित्यर्थः ॥ ४ ॥ ननु जगन्मयत्वोक्त्या जगत उत्पत्त्यादिना सत्यत्वेन जाड्येन च ममापि किं तथात्वं ब्रूषे नहिनहीत्याह । आद्यंतौ मध्यं चास्य जगतो यतो ब्रह्मणो भवंति । यस्य चाव्ययस्यैतान्याद्यंतमध्यानि न संति । यच्च ब्रह्म इदंकारास्पदं दृश्यमहंकारास्पदं द्रष्टृ च बहिर्भोग्यमन्यद्भोक्तृ च अयं च धर्मो जगत एव न त्वव्ययस्य तत्तस्मात्सत्यं च चिद्रूपं च ब्रह्मैव भवानतो न तव विकारादिशंकेत्यर्थः ॥५॥ तवैवंभूतत्वे मुमुक्षूणामाचारः प्रमाणमित्याह । तवैवेति । उभयत इहामुत्र च संगं त्यक्त्वा ॥ ६ ॥ ननु ब्रह्मैव चेदहं तर्ह्यसंगोदासीनस्य मम चरणांभोजोपासनया किं तेषां तत्राह । त्वमिति । ब्रह्मत्वेऽपि त्वं नात्यंतमुदासीनः ।

सहार्थे गम्यमाने तृतीया स शिवः उमया सहेत्यर्थः । सोषामविंददित्यादिवत्संधिः । यत्र स्थाने ॥ २ ॥ सोमयेति पूर्ववत् ॥ ३ ॥ तज्जगद्व्यापित्वम् । जगन्मयत्वमाक्षिपति–तर्हीति । तदपाकरोति नहीति । तच्च जगदीशत्वञ्च । अतः सर्वहेतुत्वात् । 'यो विश्वकर्त्ता स हि सर्वेशः' इत्यादिश्रवणात् । इत्यर्थ इति । न ह्यचेतने प्रधान ईशत्वं कारणत्वं च भवतीति भावः ॥ ४ ॥ अत्र भगवानाक्षिपति–नन्विति । तथात्वमसत्त्वं जडत्वमुत्पत्त्यादिमत्त्वं च ब्रह्मणः सकाशादित्यत्र "यतो वा इमानि भूतानि जायंते" इत्यादिश्रुतिर्मानम् । यतः सर्वं ब्रह्मैवातो हेतोः । इत्यर्थ इति । न हि विवर्त्ताधिष्ठाने विवर्तकृतविकारादि संभवतीति भावः ॥ ५ ॥ एवंभूतत्वे निर्विकारब्रह्मरूपत्वे । श्रेयस्कामा मुमुक्षवः 'श्रेयो निःश्रेयसामृतम्' इत्यमरः । निराशिषो धनपुत्राद्यभिलाषरहिताः । तत्र हेतुः–विसृज्येति । इहामुत्र संगं राज्यस्वर्गादिष्वासक्तिम् ॥ ६ ॥ पुनरत्राक्षिपति–नन्विति । तेषां मुनीनाम् । तदुपाधीनामुत्पत्त्याद्युपाधीनाम् । तत्तत्फलदाता कर्मानुसारेण सुखदुःखादिभोजयिता । पुनराक्षिपति–तर्हीति । नहीति द्विरुक्त्या सर्वथानपेक्षत्वमेवोक्तम् । अनपेक्षत्वेप्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः॥अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणैर्व्यतिकरो निरुपाधिकस्य॥८॥
त्वां ब्रह्म केचिदवयंत्युत धर्ममेक एके परं सदसतोः पुरुषं परेशम् ॥ अन्येऽवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रम् ॥ ९ ॥

किं तु विश्वस्य प्रपंचस्योदयादीनां हेतुस्तदुपाधीनामात्मनां जीवानामीश्वरश्च तत्तत्फलदाता । तर्हि किं राजादिवत्कयाऽप्यपेक्षया सेवकेभ्यः फलं ददामि नहिनहि अनपेक्ष एव त्वम् । तर्हि किमीश्वरत्वेन तत्राह । तैरात्मभिस्तत्फलदानार्थमपेक्ष्यत इति तदपेक्षस्तस्य भावस्तदपेक्षता तया । अनपेक्षत्वमेव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि । पूर्णममृतं च सुखरूपम् । विषयसुखवैलक्षण्यार्थमाह । अविकारं नित्यमानंदमात्रं च । कुतः । विशोकम् । तत्कुतः । विगुणम् । किं च अनन्यत् न विद्यतेऽन्यद्यस्मात् । ब्रह्मव्यतिरिक्ताभावादपि निरपेक्षस्त्वमित्यर्थः । तर्हि सर्वात्मकत्वे तत्तद्विकारप्रसंगो दुर्वारस्तत्राह । अन्यत्सर्वतो व्यतिरिक्तं च कारणत्वात् । न ह्येवंभूतसुखात्मकब्रह्मस्वरूपस्य तवान्यापेक्षाऽस्त्यतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः ॥ ७ ॥ अन्यत्वमनन्यत्वं चैकस्य कुत इत्याशंक्य दृष्टांतेनोपपादयति । सदसत्कार्यकारणरूपं द्वयमद्वयं च परमकारणं त्वमेवैकः कृतं कुंडलादिरूपं द्वयमकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति । कथं तर्हि भेदप्रतीतिस्तत्राह । अज्ञानत इति । कुतः । यस्मान्निरुपाधिकस्यैव तवायं गुणैर्व्यतिकरो भेदो न स्वतः ॥ ८ ॥ अत एव त्वां बहुधा वर्णयंति तत्त्वतस्तु केऽपि न जानंतीत्याह द्वाभ्याम् । त्वां ब्रह्म वेदांतिनोऽवयंति मन्यंते । त्वामेव धर्मं मीमांसका मन्यंते । प्रकृतिपुरुषयोः परं पुमांसं सांख्याः । विमलोत्कर्षणी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा

क्षिपति—तर्हीति । तत्रेश्वरत्वे । आनंदमात्रत्वे हेतुं पृच्छति—कुत इति । तद्विशोकत्वम् । विगता गुणा यस्मात्तत्तथा । निरपेक्षत्वं प्रकारांतरेणाह—किं चेति । इत्यर्थ इति । भिन्नवस्तुन एवापेक्षोत्पद्यते दर्शनादौ स्वाभिन्ने तस्मिन्न सेति भावः । पुनराक्षिपति—तर्हीति । सर्वात्मकत्वे घटपटादिरूपत्वे । तत्तद्विकारो घटाद्युत्पत्त्यादौ तदुत्पत्त्यादिप्रसंगापत्तिः स्यादिति । तत्राक्षेपे । कारणत्वादिति । कारणात्कार्यं न पृथक् कार्याच्च कारणं पृथगेवेति भावः । सर्वात्मकत्वमत्रैवंभूतपदार्थः यतस्त्वं सर्वथानपेक्षोऽस्यतो हेतोः । इत्यर्थ इति । निरपेक्षैश्वर्यं परार्थमेव भवतीति भावः ॥ ७ ॥ न हि परस्परविरोधि तेजस्तिमिरमिवान्यत्वानन्यत्वमेकत्र स्थातुं समर्थमित्याशंकामुद्धाट्य परिहरन्नाह—अनन्यत्वमित्यादिना । द्वयं द्वैतम् । अज्ञानतः वस्तुस्वरूपाज्ञानात् । वस्तुतो निरुपाधिकस्यात्मनः स कुत इति चेदाह—गुणैर्मायागुणकार्यदेहेंद्रियाद्यध्यासैरेव न स्वतः स्वाभाविकः अध्यासनिवृत्तौ तन्निवृत्तेरिति भावः ॥ ८ ॥ अत एव वस्तुस्वरूपाज्ञानादेव । कवयस्तत्तच्छास्त्रज्ञाः । "तमेकं संतं बहुधा वदंति" इत्यादिश्रुतेः । "नीहारेण प्रावृता जल्प्याः" इत्यादिश्रुतेः । तत्त्वतो यथार्थतः । वेदांतिनोऽद्वैतनिष्ठाः । पांचरात्रा वैष्णवाः । महापुरुषं पुरुषविशेषम् । पातंजला योगशास्त्रनिष्ठाः । "क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" इति सूत्रात् ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहं परायुर्ऋषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्त्वसर्गाः ॥ यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्र वृत्ताः ॥ १० ॥ स त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ ॥ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मक तयाऽवगमोऽवरुंत्से ॥ ११ ॥ अवतारा मया दृष्टा रममाणस्य ते गुणैः ॥ सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतम् ॥ १२ ॥ येन संमोहिता दैत्या पायिताश्चामृतं सुराः ॥ तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥ श्रीशुक उवाच ॥ एवमभ्यर्थितो विष्णुर्भगवाञ्छूलपाणिना ॥ प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत ॥ १४ ॥ श्रीभगवानुवाच ॥ कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः ॥ पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥

चेत्येवं नवशक्तियुतं परं पांचरात्राः । महापुरुषं पातंजलाः ॥ ९ ॥ परायुर्ब्रह्मा । सत्त्वसर्गाः सत्त्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु तत्त्वतो न जानंति किं पुनस्त्वाम् । हे ईश अभद्रं राजसं तामसं च वृत्तमुत्पत्तिर्येषां ते न जानंतीति किमु वक्तव्यम् ॥ १० ॥ किं तु त्वं तत्सर्वं जानासीत्याह । स त्वं सर्वमवरुंत्से व्याप्नोषि जानासि । किं तत्सर्वम् । समीहितं स्वकृतमदः स्थितिजन्मनाशममुष्य जगतो जन्मादिभूतानामीहितं च जगतो भवबंधमोक्षौ च व्याप्तौ दृष्टांतः । चराचराख्यं देहजातं खं च यथा वायुराविशति तथा । कथमवरुंत्से । तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः । आत्मत्वे हेतुः । अवगमो ज्ञानरूप इति ॥ ११ ॥ एवं स्तुत्वा प्रस्तुतं विज्ञापयति अवतारा इति द्वाभ्याम् ॥ १२ ॥ १३ ॥ १४ ॥ सुरकार्याणि योषिद्वेषेण भविष्यंतीति पश्यता । अयं भावः । अवश्यं तावदुन्मत्तान्दैत्यान्वंचयित्वा देवेभ्योऽमृतं देयं न

परायुस्सर्वोत्कृष्टायुस्तेन द्विपरार्द्धो लक्ष्यते । "द्विपरार्द्धावसाने हि प्रलयो ब्रह्मणः स्मृतः" इत्युक्तेः । 'वृत्तं स्त्रीजीविकोत्पत्त्योः' इति दंडी । कैमुत्येन राजसतामसेषु भगवल्लीलाज्ञानस्यात्यंतासंभव उक्तः ॥ १० ॥ भगवति सर्वज्ञत्वं समर्थयति—किं त्विति । उपसर्गवशाद्रुधेर्व्याप्तिज्ञानोभयार्थता च । सम्यगीहितं चेष्टितं स्वेनेहितं समीहितं वा स्वशब्दस्य समादेशो हि पृषोदरादित्वात् । पृषोदरादिश्चाकृतिगणः । इत्यर्थ इति । सर्वात्मरूपत्वेन सर्वत्र व्याप्तोसीति तात्पर्यम् । अवगम्यते सर्वमनेनेत्यवगमः "ज्ञानमेवात्मनो रूपं सर्वं तद्विषयं जगत्" इति वचनात् ॥ ११ ॥ प्रस्तुतं प्रकृतम् । येन दृष्टाः सोऽहमित्यर्थः । ते त्वया ॥ १२ ॥ येन वपुषा । तद्वपुः । आयाता इति । गणापेक्षं बहुत्वम् । कौतूहलम् उत्कंठा । प्रहस्येति।स्वस्य योगेश्वरत्वं लोकेषु प्रख्यापयितुं मोहिनीरूपं दिदृक्षसे चेत्सत्यं ते तव सर्वं व्यक्तीभविष्यतीति भावः । भाव गंभीरं महादेवेनापि दुःप्रवेशम् ॥ १३ ॥ कौतूहलाय मोहनाय हर्षाय वा "कौतूहलं कौतुके तु हर्षमोहनकांतिषु" इति कोशात् । अत्राशयमाह—अयं भाव इति । ननु स्वाभाविकरूपपरित्यागे को हेतुरिति चेदाह—न चेति । एवं वैषम्यं दैत्यवंचनपूर्वं देवेभ्योऽमृतदानलक्षणं वैषम्यं रूपांतरेण स्त्रीरूपं विना । यत इत्थमत इति ॥ १४ ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ॥ कामिनां बहुमंतव्यं संकल्पप्रभवोदयम् ॥ १६ ॥ श्रीशुक उवाच ॥ इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया॥१७॥ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे॥ विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलाम् ॥ १८ ॥ आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदेपदे ॥ प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥१९॥ दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् ॥ स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननाम् ॥ २० ॥ श्लथद्दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना ॥ विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्ममायया ॥ २१ ॥ तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमंतिक उमां स्वगणांश्च वेद ॥ २२ ॥ तस्याः कराग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ॥ वासः ससूत्रं लघु मारुतोऽहरद्भवस्य देवस्य किलानुपश्यतः ॥ २३ ॥

चैवं वैषम्यं रूपांतरेण कर्तुमुचितम् अतो वंचनमोहनादिसारं कामिनीरूपं मया धृतमिति ॥ १५ ॥ तद्रूपं दर्शयिष्यामि संकल्पप्रभवः कामस्तस्योदयो यस्मात्॥ १६ ॥ १७॥ विचित्राणि पुष्पाण्यरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिन् । लसद्दुकूलेन पर्यस्ते परिवृते नितंबे मेखला यस्यास्ताम् ॥ १८ ॥ उत्पतत्पतत्कंदुकलीलावशेन ये आवर्तनोद्वर्तने नमनोन्नमने ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्ये प्रभज्यमानामिव चलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयंतीम् ॥ १९ ॥ दिक्षु भ्रमतः कंदुकस्य चापलैश्चांचल्यैर्भृशं प्रोद्विग्नतारे आयते लोले चंचले लोचने यस्याः । स्वकर्णाभ्यां विभ्राजिते ये कुंडले ताभ्यामुल्लसंतौ कपोलौ ताभ्यां नीलालकैश्च मंडितमाननं यस्याः ॥ २० ॥ संनह्यंतीं बध्नंतीम् । जगद्विमोहयंतीम् ॥ २१ ॥ तां वीक्ष्य देवः श्रीरुद्र आत्मानमंतिके स्थितामुमां स्वगणांश्च न वेद । कथंभूतः इति एवंभूतया कंदुकलीलया या ईषद् व्रीडा तयाऽस्फुटं स्मितं तेन सह विसृष्टो यः कटाक्षस्तेन मुष्टो वंचितः अत एव स्वयं यत् स्त्रियाः प्रेक्षणं तया च यत् प्रतिसमीक्षणं ताभ्यां विह्वल आत्मा मनो यस्य ॥ २२ ॥ तं कंदुकमनुव्रजंत्याः स्त्रियाः । लघु सूक्ष्मं वासः ससूत्रं कांचीसहितम् ॥ २३ ॥

संकल्पाच्चिन्तनात्प्रभवतीति तथा दैत्यानां कौतूहलायेति । तादृशानामेव मोहजनकं तदतिविस्मयास्पदं योषिद्वपुर्युष्माकं योगेश्वराणां तु तदकिञ्चित्करं न हि मृगो मृगयुं हिंसितुं क्षमते इति भावः । दैत्यानामिति । तत्रैव स्थिताः सात्त्विकत्वाद्देवा नैव मुमुहुरिति भावः । ननु तुच्छानां दैत्यानां कृते कोयं ते यत्नस्तत्राह—पश्यतेति । गत्यंतराभावादिति भाव इति विश्वनाथः । भवतु यथा तथा तथापि तदर्थमेतावद्दूरदेशागमनं तव न वृथा भवितुमर्हतीत्याह—तदिति । दिदृक्षोरिति । दिदृक्षाऽभावे तत्रैव तव विशिष्टबुद्धिर्नापयास्यतीति भावः । कामिनां बहु मंतव्यं भवतु कामशत्रोस्तव काम उद्भवितुं नैव शक्नोति तदपि कौतुकं चेत् पश्येति भावो बाह्यः । आंतरस्तु कामजेतुरपि योगीश्वरस्यापि कामसिंधुमहावर्त्तनिक्षेपे तद्दिदृक्षैव हेतुरभून्मम नात्र दोष इति भावः ॥ १६ ॥ तत्रैव परस्परवार्त्तास्थल एव । चारयन् चालयन् ॥ १७ ॥ तत इतस्ततश्चक्षुश्चालनोत्तरम्। वरस्त्रियं सुरूपां स्त्रीम् । कंदुकस्य वस्त्रनिर्मितदृढसूत्रबद्धपिंडाकारक्रीडनकस्य लीलयेतस्ततः प्रक्षेपपूर्वकधारणेन ॥ १८ ॥ प्रभज्यमानामिव त्रुट्यमानामिव । ततस्ततस्तत्रतत्र ॥ १९ ॥ २० ॥ दुकूलमुत्तरीयम् । कबरीं केशपाशम् । मायाया बहिरंगशक्त्या जगन्मोहयंती संप्रति जितमायमात्माराममपि शंभुमात्मस्वरूपेणैव मोहयंतीमिति भावः ॥ २१ ॥ अत एव वंचितत्वादेव विह्वल आकुलः ॥ २२ ॥ तस्या मोहिन्याः ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तां रुचिरापांगीं दर्शनीयां मनोरमाम् ॥ दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल ॥ २४ ॥ तयाऽपहृतविज्ञानस्तत्कृतस्मरविह्वलः ॥ भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ ॥ २५ ॥ सा तमायांतमालोक्य वित्रस्ता व्रीडिता भृशम् ॥ निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत ॥ २६ ॥ तामन्वगच्छद्भगवान्भवः प्रमुषितेंद्रियः ॥ कामस्य च वशं नीतः केरणुमिव यूथपः ॥ २७ ॥

विषज्जंत्यां कुंचितकटाक्षैरात्मानं निरीक्षमाणायाम् ॥ २४ ॥ तत्पदं तस्याः समीपं ययौ ॥ २५ ॥ २६ ॥ २७ ॥

कुंचितं वक्रम् ॥ २४ ॥ तस्या मोहिन्याः । पदं समीपम् "पदं व्यवसितत्राणलक्ष्मनैकव्यत्रस्तुषु । शब्दे वाक्ये च चरणे प्रमाणे सूक्ष्मशस्तयोः ॥" इति धराणिः ॥ २५ ॥ सा मोहिनी । तं भवम् । निलीयमानात्मानं गोपायंती । नान्वतिष्ठत एकत्र न तस्थौ ॥ २६ ॥ 'करेणुरिभ्याम्' इत्यमरः । करेणुपदसान्निध्याद्यूथपोत्र हस्ती ग्राह्यः । सन्निधेरपि शक्तिग्राहकत्वात् । तदुक्तं काव्यप्रकाशे—"संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य संनिधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥" इति । अनवच्छेदेऽनिश्चये बाहुल्ये वा सति विशेषो विवक्षितार्थस्तस्य स्मृतिर्ज्ञानं तस्य हेतव इत्यर्थः । आदिनाऽभिनयो ग्राह्यः । विप्रयोगः संयोगध्वंसो विभागो वा । विरोधस्सहानवस्थानं वध्यघातकत्वं च । अर्थः प्रयोजनम् । प्रकरणं बुद्धिस्थत्वम् । लिंगमसाधारणधर्मः । अन्यस्य शब्दस्य संनिधिः सामानाधिकरण्यम् । सामर्थ्यं कारणत्वम् । औचिती योग्यता । व्यक्तिः स्त्रीनपुंसकादिः । स्वर उदात्तादिः । संयोगोदाहरणम् 'सशंखचक्रो हरिः' । विप्रयोगस्य 'अशंखचक्रोहरिः' इति । अत्र हरौ शंखचक्र इति व्यत्यासो ज्ञेयः । अन्यथाऽन्यशब्दसामानाधिकरण्येन पौनरुक्त्यं स्यादिति देवनाथकाव्यप्रदीपौ अशंखे संयोगपूर्वकत्वात्तद्ध्वंसस्य च तेन विष्णुधीरित्यर्थः । साहचर्यस्याह—'रामलक्ष्मणौ' इति । दाशरथौ । लक्ष्मणसाहचर्याद्रामो न भार्गवादिः । रामसाहचर्याच्च लक्ष्मणो न सारसः किं तूभावपि दाशरथी वर्त्तेते इत्यर्थः । विरोधस्याह—'रामार्जुनगतिस्तयोः' इति । भार्गवकार्त्तवीर्ययोः । अर्जुनविरोधाद्रामो भार्गवः तद्वध्यत्वाच्चार्जुनः कार्त्तवीर्यः । तद्वृत्तयोर्योद्ध्रोर्गतिः प्रकारः । सहानवस्थाने तु छायातपावित्युदाहार्यम् । अर्थस्याह—'स्थाणुं भज भवच्छिदे' इति हरे । छिदे छेदाय क्विप् । भवच्छेदस्य फलस्य वृक्षाद्यसाध्यत्वात्स्थाणुपदं शिवपरम् । प्रकरणस्याह—'सर्वं जानाति देवः' इति । युष्मदर्थे । राजामररूपनानार्थस्य देवपदस्य राजानं संबोध्य कथाप्रवृत्तौ प्रकृतराजपरत्वं स एव युष्मदर्थः बुद्धिस्थत्वात् । लिंगस्याह—'कुपितो मकरध्वजः' इति । कामे । कुपितपदात्सर्वकोपवतां प्राप्तौ मकरध्वजेन चिह्नेन कुपितपदं कामपरं यच्च मकरो ध्वजश्चिह्नं केतुर्वास्येति समुद्रे राज्ञि वा विरहिकोपस्य बाधात्कामपदं मकरध्वजपरमिति परमानंदादयस्तन्न मकरध्वजपदस्य समुद्रादौ काव्यप्रयोगात् । अन्यशब्दसन्निधेराह—'देवस्य पुरारातेः' इति । शंभौ । अन्यस्य देवपदार्थस्य त्रिपुरभेदाभावाद्देवपदं शंभुपरं यद्यपि भवच्छिद इत्यत्रान्यशब्दसंनिधिस्तुल्यस्तथापि सामानाधिकरण्याभावादगतार्थता 'सशंखचक्रम्' इत्यादौ तत्सत्त्वेपि व्यत्यासो ज्ञेय इत्युक्तम् । केचित्तु पुरारातिपदं न नृपे किं तु शंभौ नियम्यत इत्याहुः । सामर्थ्यमाह—'मधुना मत्तः कोकिलः' इति । वसंते । कोकिलमदहेतुत्वस्यान्यत्राभावान्मधुर्वसंत एव न सुरादिः । औचित्यस्याह—'पातु वो दयितामुखम्' इति । सांमुख्ये । मुखपदं सांमुख्यपरं न वदनपरं कामत्राणायोगात् । यद्यपि वदनमपि कामत्रायकं तथापि सांमुख्यमेत्र योग्यमन्यथा वैरस्यात् । न च सामर्थ्येन गतार्थत्वं तत्र फलोपधानस्यात्र स्वरूपयोग्यताया विवक्षणात् । देशस्याह—'भात्यत्र परमेश्वरः' इति । राजधानीरूपाद्देशाद्राजनि अत्र राजधानीदेशे परमेश्वरो राजा न विष्णुस्तस्य सर्वगतत्वादत्रेति वैयर्थ्यात् । कालस्याह—'चित्रभानुर्विभाति' इति । दिने रवौ रात्रौ वह्नौ । चित्रा भानवः किरणा यस्येत्यविशेषेपि दिने रविः रात्रौ वह्निस्तयोस्तत्रैव दीप्त्याधिक्यात् । व्यक्तेराह—'मित्रं भाति' इति । सुहृदि । 'मित्रो भाति' इति । रवौ । 'मित्रं सुहृदि मित्रोर्कः' इत्यनुशासनात्तत्तत्परत्वं भातीति पदाच्च लिंगनिर्णयः । अन्यथा द्वितीयैकवचने पुंस्त्वेपि तत्सत्त्वात् । स्वरस्याह—'इंद्रशत्रुः' इत्यादौ वेदे एव न काव्ये स्वरोर्थविशेषप्रतीतिकृदिति । इंद्रशत्रुपदेंतोदात्ते इंद्रस्य शत्रुः शातयिता मारयितेति षष्ठीतत्पुरुषार्थः । 'समासस्य' इति सूत्रात् । आद्युदात्ते तु इंद्रः शातयिता यस्येति बहुव्रीह्यर्थः । "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इत्युक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतीं स्त्रियम् ॥ केशबंध उपानीय बाहुभ्यां परिषस्वजे ॥ २८ ॥ सोपगूढा भगवता करिणा करिणी यथा ॥ इतस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा ॥ २९ ॥ आत्मानं मोचयित्वांऽग सुरर्षभभुजांतरात् ॥ प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥ ३० ॥ तस्याऽसौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ॥ प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ ३१ ॥ तस्यानुधावतो रेतश्चस्कंदामोघरेतसः ॥ शुष्मिणो यूथपस्येव वासितामनुधावतः ॥ ३२ ॥ यत्रयत्रापतन्मह्यां रेतस्तस्य महात्मनः ॥ तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥ ३३ ॥ सरित्सरःसु शैलेषु वनेषूपवनेषु च ॥ यत्र क्व चासन्नृषयस्तत्र सन्निहितो हरः ॥ ३४ ॥ स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ॥ जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ॥ ३५ ॥ अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥ अपरिज्ञेयवीर्यस्य न मेने तदुहाद्भुतम् ॥ ३६ ॥

॥ २८ ॥ २९ ॥ अंग हे राजन् ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ एवं तामनुधावन् हरः सरित्सरस्सु शैलादिषु च सन्निहितो बभूव ॥ ३४ ॥ ३५ ॥ जगदात्मनोऽवगतं माहात्म्यं येन स

इति । एवं ह्यर्थविषावगमे श्लेषभंगापत्तेः । यथा श्लेषे वक्ष्यति च 'काव्यमार्गे स्वरो न गण्यते' इति । ननु काव्येऽपि स्वरोऽर्थधीहेतुरस्त्येव तथाहि ध्वनेः पाठविशेषात्स्वरे विशेषधीः । यथोक्तम् 'वीरबीभत्सरौद्रेषु स्वरितोदात्तं कुर्यात्'इति । काकोश्च मथ्नातीत्यादिषु व्यंजकत्वं वक्ष्यति कुस्वराच्च रोधनादिर्धीः।'दृष्टे प्रसीदाधुना' इति दृष्टे इत्यत्र प्लुते मयीति व्यावृत्तेः कांतादृष्टिर्वार्थः।अतः कथं न काव्य इत्युक्तम् । अत्र लाटभास्करः—स्वरशब्देनोदात्तादिरेव विवक्षित इत्याह । अर्वाचस्तु—यथा वेदे बाहुल्येन स्वरादर्थधीर्न तथा काव्ये किं तु क्वचिदित्याहुः । मधुमतीकारादयस्तु—अभिधानियामकः स्वरो वेद एव अनुशासनात् । न काव्ये तत्र तु काक्कादिसहकृतादर्थाद्व्यंजनयार्थधीर्नाभिधयेत्याहुरित्यलं प्रसक्तानुप्रसक्त्या ॥ २७ ॥ स शिवः ॥ २८ ॥ सा मोहिनी । भगवता रुद्रेण ॥ २९ ॥ 'मम माया दुरत्यया' इत्याद्युक्तेर्मायाया देवो विष्णुस्तेन विनिर्मिता स्वस्वरूपात्प्रकटिता सेति योज्यम ॥ ३० ॥ तस्य मोहिनीरूपस्य । मोहिनीरूपत्वे हेतुरद्भुतकर्मण इति । इवशब्देन वस्तुतः कामात्पराजयाभाव उक्तः । तेनैव कामनाशस्य शास्त्रे श्रवणात् ॥ ३१ ॥ चस्कंद पपात । अमोघरेतस इत्यनेन पतदपि तद्रेतो लोके बहुकार्यकार्यभूदित्युक्तम् 'तानि रुद्रस्य हेम्नश्च' इति वक्ष्यमाणत्वात् । हेमत्वादिना परिणाम एवामोघरेतस्त्वमिति भावः । शुष्मिणो मत्तस्य हस्तींद्रस्य । वासितां हस्तिनीम् 'वासिता करिणीनार्योः' इति मेदिनी ॥ ३२ ॥ तानि रुद्ररेतःपातस्थलानि । रुद्रस्य रजतस्य पारदस्य च क्षेत्राण्युत्पत्तिस्थलानि । 'रुद्री स्तो रजतस्थाणू रुद्री पारददुष्कृती' इति निरुक्तिः ॥ ३३ ॥ यत्र सरिदादिषु ऋषय आसंस्तत्र सर्वत्र संनिहितो निकटः तत्रतत्र धावनं तु हरस्य योगभ्रंशमृषिभ्यो दर्शयितुमेवेति ध्वनिः । तेन योगारूढैरपि मुनिभिस्स्वजितमपि मनो युवतिषु न विश्वसनीयमित्यनुध्वनिः ॥ ३४ ॥ "विषादक्लेशपापेषु कश्मलं बाधने त्रिषु" इति कोशात् ॥ ३५ ॥ अथ रेतःपातोत्तरम् । आत्मनः स्वस्य । तत् मोहिन्यनुगमनादि । उहेति वितर्के । अद्भुतमननाभावे हेतुः—जगदात्मनो भगवतोऽवगतं माहात्म्यं स्वमोहविवेकौ हर्यायत्ताविति महत्त्वं येन स तथा । अपरिज्ञेयवीर्ये भगवति सर्वं मम मोहनादिकं नासंभवीति ज्ञातवानित्यर्थः । "मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते" इत्याद्युक्तेः । यद्वात्मनः स्वस्यावगतमाहात्म्यो ज्ञातयोगैश्वर्यप्रभावः । तज्जडीकरणं विवेकप्रदानं चाद्भुतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥ उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुम् ॥ ३७ ॥ श्रीभगवानुवाच ॥ दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः ॥ यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यंग मायया ॥ ३८ ॥ को नु मेऽतितरेन्मायां विषक्तस्त्वदृते पुमान् ॥ तांस्तान्विसृजतीं भावान्दुस्तरामकृतात्मभिः ॥ ३९ ॥ सेयं गुणमयी माया न त्वामभिभविष्यति ॥ मया समेता कालेन कालरूपेण भागशः ॥ ४० ॥ श्रीशुक उवाच ॥ एवं भगवता राजन्श्रीवत्सांकेन सत्कृतः ॥ आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४१ ॥ आत्मांशभूतां तां मायां भवानीं भगवान्भवः ॥ शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ॥ ४२ ॥ अयि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥ अहं कलानामृषभो विमुह्ये ययाऽवशोऽन्ये किमुतास्वतंत्राः ॥ ४३ ॥ यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै ॥ स एष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥ ४४ ॥

आत्मनः तदु ह देवमायया जडीकरणम् अद्भुतं न मेने ॥ ३६ ॥ अविक्लवं स्वस्थम् ॥ ३७ ॥ आत्मना स्वयं स्वां निष्ठां प्रकृतिम् ॥ ३८ ॥ विषक्तो मोहपाशयंत्रितः त्वदृते त्वां विना । भावान् चेष्टाविशेषान् ॥ ३९ ॥ कालेन सृष्ट्यादिनिमित्तेन मया कालरूपेण । भागशो रजआद्यंशेन । समेता मदधीना सती ॥ ४० ॥ ४१ ॥ विष्णोरंशभूतां तां स्तुवतां सतां हे भारत ॥ ४२ ॥ अयि हे प्रिये व्यपश्यः दृष्टवत्यसि । कलानां विभूतीनाम् ऋषभोऽप्यवशोऽपरवशोऽपि विमुह्ये ॥ ४३ ॥ वर्षसहस्रांते योगात्समाधेरुपारतं

न मेने । तत्र हेतुः जगदात्मनः जगन्मध्यवर्तिनं मामपि मोहयितुं बोधयितुं च समर्थस्येत्यर्थः । ॥ ३६ ॥ अविक्लवमनाकुलमव्रीडं तदनुधावनेऽप्यप्राप्तलज्जं हंतहंत महायोगेश्वरोऽप्यहं विषयांध एवाभूवमित्यनुतापराहित्याद विक्लवं स्वांतर्यामिणि का लज्जेत्यव्रीडम् । अयं भावः । नाहमन्येन केनापि मोहयितुं शक्यः मत्प्रभुणा मन्मोहनं न दूषणावहं प्रत्युत भूषणावहमेव भक्त्युत्कर्षहेतुत्वादिति विश्वनाथः । मधुसूदन इति । महादेवस्य योगेश्वरत्वाहंकारासुरसूदकः । तं रुद्रम् । पौरुषीं पुरुषसंबंधिनीम् ॥ ३७ ॥ प्रकृतिं ज्ञानलक्षणां भक्तिलक्षणाम् "क्वचिन्मोहितोऽप्यंग मायया" इत्यपि पाठः । स च शोभनो भाति क्वचिच्च 'मोहितो नांग मायया' इति पाठः । स च सुबोध एव । स्वैरं स्वेच्छया स्त्रीरूपयेति योज्यम् । यद्वा स्वैरं लीलयैव मोहितोऽसि न वस्तुत इत्यर्थः । यद्यतो मे मम स्वां निष्ठां निरहंकारतां वा । यद्वा—स्वां निष्ठां स्वस्थानस्थितिरूपां न तु मद्रूपदर्शनमोहित इतश्चचालेत्युपहासो वा । आत्मना स्वरूपत्वेन स्थितः । यद्वात्मना स्वभावेनैवेत्यर्थः ॥ ३८ ॥ विषक्तो विषयासक्तः । त्वदिति पंचमी । त्वां विहाय न कोपि मन्मायां तरितुं समर्थः त्वदाराधनबलेन विषयासक्तोऽपि तरेदिति भगवता रुद्रस्य स्वरूपत्वं दर्शितम् । अन्यथा "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इत्युक्तिरसमंजसा स्यादिति भावः । तांस्तान्कामोद्दीपकान्भावानभिप्रायान् । अकृतात्मभिरसंयतचित्तैः ॥ ३९ ॥ सेयमिति । या साक्षादनुभूतेत्यर्थः । सृष्ट्यादिनिमित्तेन । विश्वसृष्टिस्थितिसंहृतिहेतुना सृष्टिप्रलयादौ त्वां माया न तिरस्करिष्यतीत्यर्थः । मया समेता सम्यक्प्रेरिता मदधीनेति यावत् । समाङ्पूर्वादिणः क्तप्रत्यये रूपं समेतेति ॥ ४० ॥ श्रीवत्सांकेनेत्यनेन प्रणतमुत्थाप्य वक्षसालिंगितवानिति सूचितम् । तं श्रीवत्सांकम् ॥ ४१ ॥ आत्मनोंऽशोर्द्धं तद्रूपाम् । "अर्द्धो वा एष आत्मनो यत्पत्नी" इति श्रुतेः । यद्वांशः शक्तिः । तां भगवता दर्शितां मायाम् । शंसतां कथयताम् । तान्निवर्त्य अनादरे षष्ठी ॥ ४२ ॥ कलानां भगवदंशभूतानाम् । देवानां मध्ये । यया मायया । अवशो भगवदधीनः ॥ ४३ ॥ समासहस्रांते सहस्रवर्षान्ते । योगात्समाधेरुपारतं निवृत्तं त्वं समाधौ कं ध्यायसीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति तेऽभिहि तस्तात विक्रमः शार्ङ्गधन्वनः ॥ सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ॥४५॥ एतन्मुहुः कीर्तयतोऽनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ॥ ४६ ॥ असदविषयमंघ्रिं भावगम्यं प्रपन्नानमृतममरवर्यान्नाशयत्सिंधुमथ्यम् ॥ कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोऽस्मि ॥ ४७ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे शंकरमायामोहनं नाम द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ॥ सप्तमो वर्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ॥ नरिष्यंतोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥ करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ॥ ३ ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ॥ ४ ॥ कश्यपोऽत्रिर्वशिष्ठश्च विश्वामित्रोऽथ गौतमः ॥ जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥ ५ ॥ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ॥ आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥ ६ ॥ संक्षेपतो मयोक्तानि सप्त मन्वंतराणि ते ॥ भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ॥ ७ ॥

मां किं ध्यायसीति त्वं यमपृच्छः स एष यत्र कालो न विशते अपरिच्छिन्नत्वात् । न च वेदः अगोचरत्वात् ॥ ४४ ॥ अष्टाध्यायार्थनिगमनम् । इतीति ॥ ४५ ॥ एतत्कीर्तनादौ फलमाह । एतदिति ॥ ४६ ॥ भगवता कृतं भक्तपक्षपातं स्मरन्नमस्करोति । असतामविषयम् । भावो भजनं तेन गम्यमंघ्रिं प्रपन्नान् शरणागतान्सिंधुमथ्यं सिंधोर्मथनेन जातममृतं य आशयदभोजयत् ॥ ४७ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ त्रयोदशे तु वर्ण्यंते सप्तमादीन्यनुक्रमात् ॥ मन्वंतराणि सर्वाणि षड्विधानि पृथक्पृथक् ॥ १ ॥ सप्तमादिमन्वंतराण्याह मनुरित्यादिना यावदध्यायसमाप्ति ॥ १ ॥ २ ॥ ३ ॥ आदित्यादयो देवा इत्यन्वयः ॥ ४ ॥ ॥ ५ ॥ भगवतो जन्म अवतारः । तमेवाह । आदित्यानां विवस्वानर्यमा पूषेत्याद्युक्तानां मध्ये अवरं जन्म यस्य सः ॥ ६ ॥ शक्त्याऽवतारेणान्वितानि ॥ ७ ॥

पृष्टवती वेदोऽपि यं तात्पर्येणैव बोधयति न साक्षादविषयत्वात् । स एष इत्यर्थः ॥ ४४ ॥ निगमनं बोधनम् । येन शार्ङ्गधन्वना । कूर्मरूपेण ॥ ४५ ॥ न रिष्यते न नश्यति । रिष्यतेस्तङार्षः । यद्यतः । समस्तः समग्रो यः संसारपरिश्रमः शोकमोहादिरूपस्तमपहंतीति तथा ॥ ४६ ॥ असतां कुटिलमनसामविषयमगम्यम् । अशेः प्रत्यवसानार्थत्वादणिकर्त्तुः कर्मत्वममरवर्यानिति । कपटेन छद्मना युवतिवेषो यस्य स तथा । तादर्थ्यचतुर्थ्या वा समासः । सुरारीन्दैत्यान् । उपसृतानां शरणं प्राप्तानाम् । कामानभिलषितान्पूरयतीति तथा तम् ॥ ४७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ षड्विधानि मन्वंतरं मनुपुत्रा इत्याद्युक्तलक्षणानि (१) । तदपत्यानि श्राद्धदेवपुत्रान् ॥ १ ॥ २ ॥ ३ ॥ तेषामादित्यादीनाम् ॥ ४ ॥ ५ ॥ अवरं पश्चिमम् ॥ ६ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ॥ संज्ञा छाया च राजेंद्र ये प्रागभिहिते तव ॥ ८ ॥ तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ॥ यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ॥ ९ ॥ सावर्णिस्तपती कन्या भार्या संवरणस्य या ॥ शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ ॥ १० ॥ अष्टमेंऽतर आयाते सावर्णिर्भविता मनुः ॥ निर्मोकविरजस्काद्याः सावर्णितनया नृप ॥ ११ ॥ तत्र देवाः सुतपसो विरजा अमृतप्रभाः ॥ तेषां विरोचनसुतो बलिरिंद्रो भविष्यति ॥ १२ ॥ दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम् ॥ राद्धमिंद्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥ १३ ॥ योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ॥ निवेशितोऽधिके स्वर्गादधुनास्ते स्वराडिव ॥ १४ ॥ गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ॥ ऋष्यशृंगः पिताऽस्माकं भगवान्बादरायणः ॥ १५ ॥ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः ॥ इदानीमासते राजन्स्वे स्व आश्रममंडले ॥ १६ ॥ देवगुह्यां सरस्वत्यां सार्वभौम इति प्रभुः ॥ स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः ॥ १७ ॥ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तिकेतुरित्याद्यास्तत्सुता नृप ॥ १८ ॥

अष्टमं मनुं वक्तुं कथामाह विवस्वत इति त्रिभिः ॥८॥ एके वडवां तृतीयामाहुः मम तु संज्ञैव वडवेति मतम् । तदुक्तं षष्ठे । "सैव भूत्वाऽथ वडवा नासत्यौ सुषुवे भुवि" इति । यमश्च यमी च यमुना श्राद्धदेवश्चेति त्रयः सुताः ॥ ९ ॥ सावर्णिः पुत्रः ॥ १० ॥ ११ ॥ १२ ॥ पदत्रयं याचमानायेमां सर्वां महीं सप्तमे मन्वंतरे दत्त्वाऽष्टमे मन्वंतरे विष्णोः प्रसादेन च राद्धं लब्धमिंद्रपदं हित्वेत्यर्थः ॥१३॥१४॥ रामः परशुरामः । द्रोणपुत्रोऽश्वत्थामा ॥१५॥ इदानीं तु स्वयोगत आसते ॥ १६ ॥ १७ ॥ १८ ॥

प्राक् षष्ठस्कंधे ॥८॥ एके केचित् । तासां तिसृणां मध्ये सुतौ च सुता चेत्येकशेषः । एवमग्रेपि ॥९॥ संवरणस्य राज्ञः ॥१०॥ आयाते आगामिनि । सावर्णिश्छायासूनुः । आदिनार्ववीरादिग्रहः । "वीरजाश्चार्ववीरश्च निर्मोहस्सत्यवाक् कृतिः । विष्ण्वाद्याश्चैव तनयाः सावर्णेश्च मनोः स्मृताः" इति मार्कंडेयोक्तेः । हरिवंशे तु "वरीयांश्चावरीयांश्च संमतो धृतिमान् वसुः । चरिष्णुरप्यधृष्णुश्च वाजः सुमतिरेव च ॥ सावर्णस्य मनोः पुत्रा भविष्या दश भारत॥" इत्युक्तम् । नामभेदस्तु कल्पांतराभिप्रायको ज्ञेयः सर्वत्र ॥११॥ तत्र सावर्णेरंतरे । तेषां सुतपआदीनाम् ॥१२॥ इमां भुवम् । राद्धं लब्धम् ततो विष्णोः सिद्धिं भोगमोक्षरूपाम् । इत्यर्थ इति । शतक्रतून् विनेंद्रपदस्थितिर्दुर्लभाऽतो भगवता दानमिषेणानंताश्वमेधफलं तस्येंद्रपदस्थितये दातुं स्वयं गृहीतं पदत्रयमिषेण त्रैलोक्यमिति भावः ॥ १३ ॥ योऽसौ बलिः बुद्धिस्थत्वेन सन्निहितत्वादसावित्युक्तिः । स्वराडिव इंद्रवत् । तत्र नित्यं द्वारपवद्भगवत्सांनिधित्वात्स्वर्गाधिक्यम् "नित्यं मां तत्र द्रष्टासि गदापाणिमवस्थितम्" इत्युक्तेः । यद्यपि स्वर्गेप्युपेंद्ररूपेण नित्यं भगवतः स्थितिरस्ति तथापि तत्र द्वारपरूपेण नास्त्यतस्तत आधिक्यमिति ॥१४॥१५॥ इमे वक्ष्यमाणाः । तत्र सावर्णेरंतरे । स्वयोगतो निजयोगबलेन । इदानीं त्वदीयकाले ॥ १६ ॥ अंतर्जलवाहिनीत्वेन देवैरप्यलक्ष्यायां सरस्वत्याम् तत्तटे जातः । वस्तुतस्तु—'देवगुह्यात्सरस्वत्याम' इति पाठः शोभनः प्रतिभाति । यद्वा—सरस्वतीनाम्न्यां मातरि । सार्वभौमनामा प्रभुरीश्वरावतारः । स्थानं स्वर्गम् ॥ १७ ॥ वरुणसंभवो वरुणपुत्रः । यत्तु मार्कंडेयादौ "दक्षपुत्रश्च सावर्णिर्भावी यो नवमो मनुः" इत्युक्तं तत् कल्पांतराभिप्रायं दक्षस्यैव वरुणेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारा मरीचिगर्भाद्या देवा इंद्रोऽद्भुतः स्मृतः ॥ द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः ॥ १९ ॥ आयुष्मतोंबुधारायामृषभो भगवत्कला ॥ भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥ दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् ॥ तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥ हविष्मान्सुकृतः सत्यो जयो मूर्तिस्तदा द्विजाः ॥ सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः ॥२२॥ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति ॥ जातः स्वांशेन भगवान्गृहे विश्वसृजो विभुः ॥ २३ ॥ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ॥ अनागतास्तत्सुताश्च सत्यधर्मादयो दश ॥ ॥ २४ ॥ विहंगमाः कामगमा निर्वाणरुचयः सुराः ॥ इंद्रश्च वैधृतिस्तेषामृषयश्चारुणादयः ॥ २५ ॥ आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ॥ वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥२६॥ भविता रुद्रसावर्णी राजन्द्वादशमो मनुः ॥ देववानुपदेवश्च देवश्रेष्ठादयः सुताः ॥ २७ ॥ ऋतधामा च तत्रेंद्रो देवाश्च हरितादयः ॥ ऋषयश्च तपोमूर्तिस्तपस्व्यग्नीध्रकादयः ॥ २८ ॥ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ॥ अंतरं सत्यसहसः सूनृतायाः सुतो विभुः ॥ २९ ॥

अद्भुत इंद्रः ॥ १९ ॥ २० ॥ २१ ॥ हविष्मत्प्रमुखा इत्युक्तानामेव केषांचिन्नामान्याह । हविष्मानिति ॥ २२ ॥ विषूच्यां जातः सन् ॥ २३ ॥ एकादशम इत्यादिरार्षः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ तस्य मनोरंतरं साधयिष्यति । सत्यसहसः या सूनृता स्त्री तस्याः सुतः सन् ॥ २९ ॥

नामांतराभिप्रायम् । तत्सुता दक्षसावर्णिपुत्राः । आदिना पंचहोत्रादिग्रहः "मनोः पुत्रो धृष्टकेतुः पंचहोत्रो निराकृतिः । पृथुश्रवा भूरिधामा ऋर्चाकोष्टगतो गयः ॥ एते हि दक्षसावर्णेर्नव पुत्रा महौजसः ॥" इति हरिवंशोक्तेः ॥१८॥ आदिना सुधर्मग्रहः । "पारा मरीचिगर्भाश्च सुधर्माणस्तथा सुराः। एते त्रिधा भविष्यंति सर्वे द्वादशका गणाः ॥" इति मार्कंडेयोक्तेः । अद्भुतनामा "अद्भुतो नाम शक्रोऽसौ भावी तस्यांतरे मनोः" इति च । तत्रैव द्युतिमान्प्रमुखो येषां ते तथा । तदुक्तं मार्कंडेये "मेधातिथिर्वसुः सत्यो ज्योतिष्मान्द्युतिमांस्ततः । सप्तर्षयोऽन्यः सबलस्तथाऽन्यो हव्यवाहनः॥" इति । ततस्तत्र ॥१९॥ अंबुधारायां तन्नाम्न्याम् । ऋषभस्तन्नामा भगवतः कलाऽवतारः । येनर्षभेण । संराद्धां साधिताम् ॥२०॥ उपश्लोकेति । ब्रह्मणो नामांतरम् । 'मन्वंतरे तु दशमे ब्रह्मपुत्रस्य धीमतः ।' इति मार्कंडेयोक्तेः । तत्सुता ब्रह्मसावर्णिसुताः । आदिना सुक्षेत्रादयो ज्ञेयाः । तदुक्तं मार्कंडेये—"सुक्षेत्रश्चोत्तमौजाश्च भूमिसेनश्च वीर्यवान् । शतानीकोऽथ वृषभो ह्यनमित्रो जयद्रथः । भूरिद्युम्नस्सुपर्वा च तस्यैते तनया मनोः ।" इति ॥ २१ ॥ मार्कंडेये तु "आपो मूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च । नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः॥" इत्युक्तम् । आपो मूर्त्तिरिति नामद्वयं जय इत्यापस्य नामात्रेति । आदिना सुखग्रहः । "सुखाः सीनानि रुद्धाश्च त्रिप्रकाराः सुराः स्मृताः । शतसंख्या हि ते देवाः" इति मार्कंडेयात् ॥ २२ ॥ शंभोरिंद्रस्य । विश्वसृजो मरीच्यादिष्वन्यतमस्यानिर्दिष्टनाम्नः ॥ २३ ॥ अनागता भविष्याः । आदिना क्षेमधन्वादिग्रहः । "संवर्तकः सुशर्मा च देवानीकः पुरूद्वहः । क्षेमधन्वा दृढायुश्च ह्यादर्शः पंडको मनुः॥" इति हरिवंशात् ॥ २४ ॥ 'एकादशे त्रिधा देवा एकैकस्त्रिंशतो गणः' इति मार्कंडेये । आदिना हविष्मदादिग्रहः "हविष्मांश्च वरिष्ठश्च ऋषिरन्यस्तथारुणिः । निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः ॥ सप्तर्षयोंतरे तस्मिन्नग्निदेवश्च सप्तमः ।" इति मार्कंडेयोक्तेः ॥ २५ ॥ तत्रैकादशे धर्मसावर्णेरंतरे । आर्यकस्य पितुः । वैधृतायां मातरि ॥ २६ ॥ आदिना विदूरथादिग्रहः । तदुक्तं मार्कंडेये "देववानुपदेवश्च देवश्रेष्ठो विदूरथः । मित्रवान्मित्रविंदश्च भाविनस्तत्सुता नृपाः ॥ इति" ॥ २७ ॥ तत्र रुद्रसावर्णेरंतरे । आदिना सुधर्मादिग्रहः । "सुधर्माणः सुमनसो हरिता रोहितास्तथा । सुवर्णाश्च सुरास्तत्र पंचैते दशका गणाः ॥" इति मार्कंडेयोक्तेः । तृतीयादिना द्युत्यादिग्रहः । तदुक्तं तत्रैव "द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः । तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ॥" इति ॥ २८ ॥ तन्मनो रुद्रसावर्णिमनोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३० ॥ देवाः सुकर्मसुत्रामसंज्ञा इंद्रो दिवस्पतिः ॥ निर्मो कतत्त्वदर्शाद्या भविष्यंत्यृषयस्तदा ॥ ३१ ॥ देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ॥ योगेश्वरो हरेरंशो बृहत्यां संभविष्यति ॥ ३२ ॥ मनुर्वा इंद्रसावर्णिश्चतुर्दशम एष्यति ॥ उरुगंभीरबुद्ध्याद्या इंद्रसावर्णिवीर्यजाः ॥ ३३ ॥ पवित्राश्चाक्षुषा देवाः शुचिरिंद्रो भविष्यति ॥ अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥ ३४ ॥ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः ॥ वितानायां महाराज क्रियातंतून्वितायिता ॥ ३५ ॥ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ॥ प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे मन्वंतरानुवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ राजोवाच ॥ मन्वंतरेषु भगवन्यथा मन्वादयस्त्विमे ॥ यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे ॥ १ ॥ ऋषिरुवाच ॥ मनवो मनुपुत्राश्च मुनयश्च महीपते ॥ इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २ ॥ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप ॥ मन्वादयो जगद्यात्रां नयंत्याभिः प्रचोदिताः ॥ ३ ॥ चतुर्युगांते कालेन ग्रस्ताञ्छ्रुतिगणान्यथा ॥ तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः ॥ ४ ॥ ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ॥ युक्ताः संचारयंत्यद्धा स्वेस्वे काले महीं नृप ॥ ५ ॥

॥ ३० ॥ ३१ ॥ दिवस्पतेरिंद्रस्योपहर्ता संपादकः देवहोत्रस्य बृहत्यां संभविष्यति ॥ ३२ ॥ ३३ ॥ ३४ ॥ क्रियातंतून् कर्मसंततीः वितायिता विस्तारयिष्यति ॥ ३५ ॥ युगसाहस्रेण पर्ययः परिवर्तो यस्य युगसहस्रप्रमाण इत्यर्थः ॥ ३६ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशे तु सर्वेषां मन्वादीनां यथायथम् ॥ पृथक्कर्माणि वर्ण्यंते भगवद्वशवर्तिनाम् ॥ १ ॥ १ ॥ पुरुषेणेश्वरेण यज्ञाद्यवतारैः शास्यंते नियुज्यंते इति तथा ॥ २ ॥ तदेवाह । यज्ञादय इति ॥ ३ ॥ ऋष्यादीनां कर्माण्याह चतुर्युगांत इति चतुर्भिः । यतो येभ्यः श्रुतिगणेभ्यः ॥ ४ ॥ उदिता उक्ताः युक्ताः संयताः संतो महीं धर्मं संचारयंति । मह्यां

अंतरं कालम् । सत्यसहसः पितुः ॥ २९ ॥ त्रयोदशमाह–देहजाः पुत्राः । आदिना नयत्यादिग्रहः "चित्रसेनो विचित्रश्च नयतिर्निर्भयो दृढः । सुनेत्रः क्षत्रबुद्धिश्च सुव्रतश्चैव तत्सुताः ॥" इति मार्कंडेयोक्तेः ॥ ३० ॥ आदिना धृतिमदादिग्रहः । तदुक्तं तत्रैव "धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः । निर्मोहः सुतपाश्चैव निष्प्रकंपश्च सप्तमः ॥" इति ॥ ३१ ॥ योगेश्वरनामा ॥ ३२ ॥ चतुर्दशमाह–आदिना भरतादिग्रहः । "गुरुगंभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा । स्त्रीमानी च प्रतीरश्च विष्णुः संक्रंदनस्तथा ॥ तेजस्वी सुबलश्चैव ह्यंत्यस्यैते मनोः सुताः ॥" इति मार्कंडेयोक्तेः ॥ ३३ ॥ आदिनाग्नीध्रादिग्रहः "अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः । शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥" इति मार्कंडेयात् ॥ ३४ ॥ तदा चतुर्दशे मन्वंतरे । वितानायां मातरि जातः ॥ ३५ ॥ परिवर्त्तः पर्यावृत्तिः । इत्यर्थ इति । चतुर्युगसहस्रपरिमाणकब्रह्मदिनापरपर्यायः कल्प इति । त्रिकालं भूतभविष्यवर्तमानलक्षणमनुगतानि प्राप्तानीत्यर्थः ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ यथायथं यस्य यस्य यद्यत्कर्म तत्तदित्यर्थः (१) । ॥ १ ॥ २ ॥ पुरुषस्येश्वरस्येमाः पौरुष्यः । जगद्यात्रां जगन्निर्वाहम् । नयंति कारयंति ॥ ३ ॥ यथा यथावत् । धर्मः सिद्ध इति शेषः ॥ ४ ॥ तत ऋष्युपदिष्टदिशा । ताभ्यः श्रुतिभ्यः । इत्यर्थ इति । सप्तम्यर्थे द्विती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पालयंति प्रजापाला यावदंतं विभागशः ॥ यज्ञभागभुजो देवा ये च तत्रान्विताश्च तैः ॥ ६ ॥ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम् ॥ भुंजानः पाति लोकांस्त्रीन्कामं लोके प्रवर्षति ॥ ७ ॥ ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ॥ ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ॥ ८ ॥ सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः ॥ कालरूपेण सर्वेषामभावाय पृथग्गुणः ॥ ९ ॥ स्तूयमानो जनैरेभिर्मायया नामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते ॥ १० ॥ एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितम् ॥ यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः ॥ ११ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे मनुवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ राजोवाच ॥ बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत ॥ भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबंध तम् ॥ १ ॥ एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः ॥ यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः ॥ २ ॥

धर्मं प्रवर्तयंतीत्यर्थः ॥ ५ ॥ प्रजापाला मनुपुत्रास्तं धर्मं पालयंति । यावदंतं यावन्मन्वंतरावसानम् । विभागशः पुत्रपौत्रादिक्रमेण । ये चान्ये द्यावापृथिव्यादयो यत्र कर्मणि भोक्तृत्वेनान्वितास्तैश्च सह ॥ ६ ॥ ७ ॥ प्रसंगाद्रूपांतरैरपि जगद्यात्राप्रवर्तनमाह ज्ञानमिति द्वाभ्याम् । सिद्धाः सनकादयः । ऋषयो याज्ञवल्क्यादयः । योगेशा दत्तात्रेयादयः तत्तद्रूपः सन् ज्ञानं कर्म च योगं च ब्रूते ॥ ८ ॥ प्रजेशा मरीच्यादयस्तेन रूपेण सर्गं करोतीति शेषः । स्वराड्वपू राजमूर्तिः । सर्वेषामभावाय भवति । पृथग्विधा गुणाः शीतोष्णादयो यस्य ॥ ९ ॥ नामरूपात्मिकया मायया विमोहितात्मभिरेभिर्जनैर्नानादर्शनैः अनेकशास्त्रैः स्तूयमानो निरूप्यमाणोऽपि नैव दृश्यत इत्यर्थः ॥ १० ॥ प्रासंगिकं निरूप्य प्रस्तुतमेवोपसंहरति । एतदिति । कल्पविकल्पस्यावांतरकल्पस्य एतत् प्रमाणमुक्तं यत्र चतुर्दश मन्वंतराण्याहुः ॥ ११ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ बलिं पंचदशे विश्वजिताचार्या अयाजयन् ॥ ततोऽसौ स्वर्गमयजद्भयाद्देवा निलिल्यिरे ॥ १ ॥ अत्रेर्यते नवाध्याय्या वामं वामनचेष्टितम् ॥ निग्रहच्छलतो यत्र बलेर्भूयाननुग्रहः ॥ २ ॥ ईश्वरः स्वयं कृपणवत्कस्माद्धेतोरयाचत लब्धार्थो भूत्वाऽपि तं कस्माद्बबंध ॥ १ ॥ २ ॥

येति व्याख्या ॥ ५ ॥ यावदन्तं मन्वंतरावतारपर्यन्तम् । विभागशः पुत्रपौत्रादिरूपेणेति चक्रवर्ती ॥ ६ ॥ ऊर्जितामुत्कृष्टाम् ॥ ७ ॥ हरिरेव मन्वादिरूपेण सर्वं करोतीति ज्ञापयन्मन्वादिषट्कमपि न नियतमित्युक्तानुक्तं संक्षेपेणाह—ज्ञानमिति । सिद्धा भक्तिज्ञानाभ्यां प्राप्तोत्कर्षाः । त्रिकालदर्शिन ऋषयः । योगसिद्धिमंतो योगेशाः ॥ ८ ॥ दस्यून्म्लेच्छचौरादीन् "दस्युश्चौरे म्लेच्छजातौ क्षयितेऽपि च कथ्यते" इति निरुक्तिः ॥ ९ ॥ इत्यर्थ इति । शास्त्रिणामपि भ्रमवत्त्वोक्तेः । उपदिशंति त आरूपितैरिति वक्ष्यमाणत्वादिति भावः ॥ १० ॥ कल्पे महाकल्पे विकल्प्यते विविधत्वेन कल्प्यत इति कल्पविकल्पस्तस्य । यत्रावांतरकल्पे । पुराविदः व्यासादयः । "स कल्पो यत्र मनवश्चतुर्दश विशांपते" इति वक्ष्यमाणत्वात् ॥ ११ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ विश्वजिता यागेन । आचार्या भृगवः । ततो विश्वजिद्यागबलात् । असौ बलिः । निलिल्यिरे इतस्ततो गुप्ता बभूवुः(१) । वामं मनोहरम् 'वामं वल्गुप्रतीपयोः' इति कोशात् । निग्रहो बंधनम् "निग्रहो भर्त्सनेऽपि स्यान्मर्यादायां च बंधने" इति मेदिनी । यत्र वामनचेष्टिते । 'चेष्टितं गतिलीलयोः' इति (२)। हरिर्हरणसमर्थः । ईश्वरः सर्वथा समर्थः । कृपणवद्दीनवत् । लब्धार्थः प्राप्तावाप्तव्यः । तं बलिम् ॥ १ ॥ एतद्वामनचारितम् । हि यतः । यज्ञेश्वरस्य सर्वयज्ञपतेः । पूर्णस्य विष्णोः एतद्याचनम् । अनागसो बलेर्बंध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ पराजितश्रीरसुभिश्च हापितो हींद्रेण राजन्भृगुभिः स जीवितः ॥ सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्माऽर्थनिवेदनेन ॥ ॥ ३ ॥ तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रिणाकम् ॥ जिगीषमाणं विधिनाऽभिषिच्य महाऽभिषेकेण महानुभावाः ॥ ४ ॥ ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ॥ ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥ ५ ॥ धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम् ॥ पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥ ६ ॥ एवं स विप्रार्जितयोधनार्थस्तैः कल्पित स्वस्त्ययनोऽथ विप्रान् ॥ प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामन्त्र्य नमश्चकार ॥ ७ ॥ अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ॥ सुस्रग्धरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥ ८ ॥ हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः ॥ रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥ ९ ॥

तत्र तावद्बलेस्त्रिलोकीमपहर्तुं याच्ञादिच्छलनं कृतवानिति वक्तुं ब्राह्मणाराधनबलेन बलेरकांड एव स्वर्गविजयक्रममाह पराजितश्रीरित्यादिना यावदध्यायसमाप्ति । युद्धे पराजिता श्रीर्येन सः । इंद्रेणासुभिश्च त्याजितः सन् । भृगून्भृगोर्वंश्यान् शुक्रादीन् । महात्मा उदारचित्तः । अर्थानां निवेदनेनार्पणेन ॥ ३ ॥ त्रिणाकं स्वर्गं जेतुमिच्छंतं विश्वजिता यागेनायाजयन् । महाभिषेकेणैंद्रेण बह्वृचब्राह्मणप्रसिद्धेन ॥ ४ ॥ हर्यश्वस्येंद्रस्य ये तुरंगास्तेषामिव वर्णो हरितो येषाम् ॥ ५ ॥ पुरटं सुवर्णम् । तूणाविषुधी । आरिक्ता वक्षय्यशरौ । पितामहः प्रह्लादः । जलजं शंखम् ॥ ६ ॥ विप्रैरर्जितः संपादितो योधनार्थो युद्धपरिकरो यस्य तैरेव कल्पितं कृतं स्वस्त्ययनं मंगलवाचनादि यस्य । आमंत्र्य पृष्ट्वा ॥ ७ ॥ अथारुह्य रराजेति द्वयोरन्वयः । सुस्रग्धरः शोभनमालाधरः संनह्य कवचं न्यस्य ॥ ८ ॥ हेमांगदाभ्यां लसंतौ बाहू यस्य । धिष्ण्यस्थो वने

नं च एतत्पदमावृत्त्य योज्यमत्र ॥ २ ॥ तत्र नियोगे । तावदादौ । अकाण्डेऽनवसरे एव " कांडः स्तंबे तरुस्कंधे बाणेवसरनीरयोः " इति मेदिनी । यैर्भृगुभिः । स जीवितो जीवं प्रापितस्तानित्यर्थः ॥ ३ ॥ तं बलिम् । विश्वजिता सर्वस्वदक्षिणावता यागेन ॥ ४ ॥ ततो यागात् । पट्टानि पत्राणि । " पट्टः पेषणपाषाणे व्रणबंधनपत्रयोः । राजार्पितलिपौ पीठे " इति कोशात् ॥ ५ ॥ कवचं संनाहः ॥ ६ ॥ तैरेव विप्रैरेव ॥ ७ ॥ अथ स्वस्त्ययनादुत्तरक्षणे ॥ ८ ॥ रथमारूढः । हव्यं हुतं वहति प्राप्नोति विशेषेणेति तथा । धिष्ण्यस्थो वेदिकास्थो वा । स्वामिचरणैः पूर्वव्याख्याने धिष्ण्यशब्दस्य वने प्रयोगादर्शनादेवार्थांतरः कृतः कुंडस्थ इत्यादिना तत्राहवनीयपदमुपलक्षणम् । यद्वा—आहवनीय एवाग्नौ विशेषतो हूयते तेन वा स गृहीतः " यजावाहवनीयाग्नौ हूयते बहुधा यतः । तत आहवनीयः स कथ्यते शब्दपारगैः ॥ " इत्युक्तेः ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः ॥ पिबद्भिरिव खं दृग्भिर्दहद्भिः पारधीनिव ॥ १० ॥ वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः ॥ ययाविंद्रपुरीं स्वृद्धां कंपयन्निव रोदसी ॥ ११ ॥ रम्यामुपवनोद्यानैः श्रीमद्भिर्नंदनादिभिः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ १२ ॥ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ॥ हंससारसचक्राह्वकारंडवकुलाकुलाः ॥ नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः ॥ १३ ॥ आकाशगंगया देव्या वृतां परिखभूतया ॥ प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ॥ १४ ॥ रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ॥ जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ॥ १५ ॥ सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् ॥ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ १६ ॥ यत्र नित्यवयोरूपाः श्यामा विरजवाससः ॥ भ्राजंते रूपवन्नार्यः अर्चिर्भिरिव वह्नयः ॥ १७ ॥

प्रज्वलितः कुंडस्थ आहवनीय इवेति वा ॥ ९ ॥ तुल्यमैश्वर्यं नियंतृत्वं बलं च श्रीश्च येषां तैर्निजयूथभूतैर्दैत्ययूथपैर्वृतो ययाविति द्वयोरन्वयः । पारधीन् दिशः ॥ १० ॥ स्वृद्धामतिसमृद्धाम् ॥ ११ ॥ धिक् ग्राम्यसुखं तथाविधामपि पुरीमकस्मादेव पारित्यज्येंद्रादयः पलायिता इति वैराग्यार्थमिंद्रपुरीमनुवर्णयति रम्यामिति सार्द्धैरेकादशभिः । उपवनानि फलप्रधानानि निकटानि वा उद्यानानि पुष्पप्रधानानि दूरस्थानि वा तै रम्याम् । कूजंति विहंगमिथुनानि येषु । गायंतो मत्ता मधुव्रता येषु ॥ १२ ॥ प्रवालादीनामुरुर्भारो यासु ताः शाखा येषां तेऽमरद्रुमा येषु तैः । यत्र यासु सुरसेविताः प्रमदाः क्रीडंति ता हंसादिकुलैराकुला व्याप्ता नलिन्यः सरांसि यत्र येषु संति तैरुपवनोद्यानै रम्यामिति पूर्वेणैवान्वयः ॥ १३ ॥ किं च परिखाभूतया आकाशगंगया वृताम् । प्राकारेण सौवर्णेन चावृताम् । अट्टालाः प्राकारोपारि रचितान्युन्नतानि युद्धस्थानानि तत्सहितेन ॥ १४ ॥ पट्टमुपरिबंधः रुक्मपट्टानि कपाटानि येषु तैर्द्वारैरवांतरैः स्फटिकमयैर्गोपुरैश्च पुरद्वारैर्जुष्टाम् । विभक्ताः प्रपथा राजमार्गा यस्याम् ॥ १५ ॥ सभा उपवेशस्थानानि चत्वराण्यंगणानि रथ्या उपमार्गास्तैराढ्यां संपन्नाम् । न्यर्बुदं दशकोटयस्तैर्गणनीयैरनंतैर्विमानैर्युताम् । वज्रविद्रुममय्यो वेदयो येषु तैः शृंगाटकैश्चतुष्पथैर्युताम् ॥ १६ ॥ नित्यं वयस्तारुण्यं रूपं च सौकुमार्यं यासां ताः श्यामाः षोडशवर्षाः वीरजानि दिव्यानि वासांसि यासां ताः रूपवन्नार्यः स्वलंकृताः स्त्रियः यत्र यस्यां भ्राजंते ॥ १७ ॥

"परिधिर्ना द्रुशाखायां ककुभि चोपसूर्यके" इति कोशात् ॥ १० ॥ ध्वजिनीं सेनाम् । विभुर्विशेषद्युतिमान् ॥ ११ ॥ आदिना पुष्पभद्रकवैस्रंभकादिग्रहः । "वैस्रंभके सुरसने नंदने पुष्पभद्रके" इत्याद्युक्तेः । फलप्राधान्यं दूरस्थेष्वप्यस्तीत्यत आह–निकटानि वेति । पुष्पप्राधान्यं निकटस्थेऽप्यस्तीत्यत आह–दूरस्थानि वेति ॥ १२ ॥ प्रवालानि नवपत्राणि " प्रवालोऽस्त्री किसलये वीणादंडे च विद्रुमे " इति मेदिनी । नलिन्यः सरस्यः ॥ ॥ १३ ॥ परिखभूतया इह ह्रस्वत्वमार्षम् । क्वचित् ' पारिधिभूतया ' इत्यपि पाठः ॥ १४ ॥ रुक्मस्य हेम्नः पट्टानि पत्राणि येषु तानि तथा ॥ १५ ॥ न्यर्बुदैरित्युपलक्षणमनंतैरित्यर्थः ॥ १६ ॥ यत्रेंद्रपुरि । " वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम् ' इति मेदिनी ।" रूपं स्वभावे सौंदर्ये सौकुमार्ये बलाकृतौ " इति च ॥ श्यामाः षोडशवार्षिक्यः । यद्वा ' अप्रसूतांगना श्यामा ' इति मेदिन्यादौ । चक्रवर्त्तिकारस्तु " शीतकाले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजाम् ॥ यत्रामोदमुपादाय मार्गं आवाति मारुतः ॥१८॥ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना ॥ पांडुरेण प्रतिच्छन्नमार्गे यांति सुरप्रियाः ॥ १९ ॥ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ॥ शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलाम् ॥ २० ॥ मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम् ॥ २१ ॥ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः ॥ मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् ॥ २२ ॥ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया ॥ आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन्भयमिंद्रयोषिताम् ॥ २३ ॥ मघवांस्तमभिप्रेत्य बलेः परममुद्यमम् ॥ सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥ भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः ॥ अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ॥ २५ ॥ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः ॥ पिबन्निव मुखेनेदं लिहन्निव दिशो दश ॥ दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥ २६ ॥ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ॥ ओजः सहो बलं तेजो यत एतत्समुद्यमः ॥ २७ ॥

सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगंधिकस्रजामामोदमुपादाय ॥ १८ ॥ हेमगवाक्षेभ्यो हिरण्मयगवाक्षेभ्यो निर्गच्छता धूमेन । सुरप्रिया अप्सरसः ॥ १९ ॥ मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च ध्वजैर्नानापताकायुक्ताभिर्वलभीभिश्च विमानानां पुरोभागैरावृतां व्याप्ताम् । वैमानिकस्त्रीणां कलगीतैर्मंगलाम् ॥ २० ॥ उपदेवानां गंधर्वादीनां गीतकैश्च मनोरमाम् । जिता प्रभा साक्षाद्दीप्त्यधिष्ठात्री देवता यया ताम् । अन्यैरजितप्रभामिति वा। पाठांतरे जिता ग्रहाः सूर्यादयो यया ॥ २१ ॥ यत याम् ॥ २२ ॥ पृतन्यया सेनया ॥ २३ ॥ २४ ॥ केन हेतुनैवं तेजसोर्जित आसीत् ॥ २५ ॥ प्रतिव्योढुमपाकर्तुम् ॥ २६ ॥ यतः कारणादेतस्य ओजआदि

भवंत्युष्णा उष्णकाले च शीतलाः । स्तनौ सुकठिनौ यासां श्यामास्ताः परिकीर्त्तिताः ॥ " इत्याह । रूपवन्नार्यः सुंदरस्त्रियः वह्नयो यथाऽर्चिर्भिर्दीप्तिभिस्तथाऽर्चिर्भिः स्वांगकांतिभिरित्यर्थः । नार्यः अर्चिर्भिरिह संध्यमावस्त्वार्षः॥१७॥ "सौगंधिकं तु कह्लारे स्थूलचंपकके पुमान्" इति कोशात् । नवस्थूलचंपकमालानाम् । आमोदं गंधम् 'आमोदो गंधहर्षयोः' इति मेदिनी ॥ १८ ॥ १९ ॥ कलगीतै रम्यगायनैर्मंगलां मंगलाढ्याम् ॥ ॥ २० ॥ दीप्त्यधिष्ठातृदेवताजयस्याप्रसिद्धत्वादाह–अन्यैरिति । अकारप्रश्लेषेण अन्यैः स्वेतरैर्लोकपालपुरैः । पाठांतरे जितग्रहामिति पाठे ॥ २१ ॥ खला निष्कारणविरोधिनः । शठा वंचकाः । एभिरगमनेहेतुभिरधर्मादिभिः ॥ २२ ॥ पृतन्यया पृतनया । स्वार्थिकोत्र यत् ॥ २३ ॥ तं पुरीनिरोधादिरूपम् ॥ २४ ॥ ऊर्जित आप्यायितः ॥ २५ ॥ एनं बलिम् । इदं जगत् । संवर्तः प्रलयः ॥ २६ ॥ यत इत्यावृत्त्या योज्यम् ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरुरुवाच ॥ जानामि मघवञ्छत्रोरुन्नतेरस्य कारणम् ॥ शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥ २८ ॥ भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिम् ॥ नास्य शक्तः पुरः स्थातुं कृतांतस्य यथा जनाः ॥ २९ ॥ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम् ॥ यात कालं प्रतीक्षंतो यतः शत्रोर्विपर्ययः ॥ ३० ॥ एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः ॥ तेषामेवापमानेन सानुबंधो विनंक्ष्यति ॥ ३१ ॥ एवं सुमंत्रितार्थास्ते गुरुणार्थानुदर्शिना ॥ हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥ ३२ ॥ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम् ॥ देवधानीमधिष्ठाय वशं निन्ये जगत्रयम् ॥ ३३ ॥ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ॥ शतेन हयमेधानामनुव्रतमयाजयन् ॥ ३४ ॥ ततस्तदनुभावेन भुवनत्रयविश्रुताम् ॥ कीर्तिं दिक्षु वितन्वानः स रेज उडुराडिव ॥३५॥ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभिताम् ॥ कृतकृत्यमिवात्मानं मन्यमानो महामनाः ॥३६॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे पंचदशोऽध्यायः ॥ १५ ॥

तत् कारणं ब्रूहि । यत ओजआदेः । एतस्य बलेः समुद्यमः ॥ २७ ॥ उपभृतं संचितम् ॥ २८ ॥ २९ ॥ तत्रोचितं मंत्रमाह । तस्माद्यूयं त्रिविष्टपमुत्सृज्य निलयमदर्शनं यात । यतः कालात् ॥ ३० ॥ केनास्य विपर्ययः स्यादित्यत आह । एष इति । विप्राणां बलेनोदर्क उत्तरोत्तरमधिकं फलं यस्य सः ॥ ३१ ॥ सुमंत्रितोऽर्थः कार्यं येषां ते निलयं जग्मुः ॥ ३२ ॥ ३३ ॥ एवं प्राप्तमिंद्रपदं स्थिरीकर्तुमयाजयन् । अनुव्रतमनुवर्तिनम् ॥ ३४ ॥ ३५ ॥ द्विजदेवैर्ब्राह्मणैरुपलंभितां प्रापिताम् ॥ ॥ ३६ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां पंचदशोऽध्यायः ॥ १५ ॥

शिष्याय शिष्यं संवर्द्धयितुं स्वीयं तेज एव तस्मिन्नुपभृतं निहितमित्यर्थः । चक्रवर्त्तौ तु शिष्याय श्रद्धाभक्त्यतिशयेन सर्वस्वोपहारकाय बलये स्वीयमेव तेज उपभृतं प्रत्युपहारत्वेन दत्तमिति व्याचख्यौ ॥ २८ ॥ २९ ॥ यतोऽयं महाबलस्तस्माद्धेतोः । "स्थानादर्शनसंगेषु निलयः प्रलयेऽपि च" इति निरुक्तिः । भविष्यतीति शेषः ॥ ३० ॥ तद्विपर्ययं पृच्छति–केनेति । "उदर्के एष्यत्कालीनफले मदनपादपे" इति मेदिनी । येषां विप्राणाम् । सानुबंधः सवर्गः । यद्यपि भगवत्पक्षपातेन व्यावहारिकगुरूणां वचनातिक्रमरूपावमानो न दोषावहः 'गुरुर्न सतस्यात्' इत्याद्युक्तेस्तथापि केवलं व्यवहारदृष्ट्यैवैवमुक्तम् । वस्तुतस्तु विष्णुभक्त्यनुकूलः स विप्रावमानस्तस्य महाकीर्त्तिस्वर्गाधिकसुतलभोगद्वारपालीकृतविष्णुत्वभाविमन्वंतरेंद्रत्वाद्यर्थसंपादक एवाभूदिति संदर्भविश्वनाथौ ॥३१॥ अर्थान्कर्त्तव्याकर्तव्यरूपान्पश्यतीति तथा तेन । निलयमिति शेषः ॥३२॥ अथ कार्त्स्न्येन । देवा धीयंते निधीयंतेऽत्रेति देवधानी अमरावती ॥ ३३ ॥ एवं प्राप्तं शतक्रतून्विनैव केवलबलेनावाप्तम् ॥३४॥ ततः शतक्रतुयाजनोत्तरम् । तेषां विप्राणाम् । अनुभावेन प्रतापेन । स बलिः ॥३५॥ द्विजेषु दीव्यंति द्योतंत इति द्विजदेवा भृगवः । इवेन सर्वथा कृतकृत्यत्वाभाव उक्तः । विष्णुपक्षपातेन देवजयावश्यंभावनिश्चयादिति भावः ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा ॥ हते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥ १ ॥ एकदा कश्यपस्तस्या आश्रमं भगवानगात् ॥ निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् ॥ २ ॥ स पत्नीं दीनवदनां कृतासनपरिग्रहः ॥ सभाजितो यथान्यायमिदमाह कुरूद्वह ॥ ३ ॥ अप्यभद्रं न विप्राणां भद्रे लोकेऽधुनागतम् ॥ न धर्मस्य न लोकस्य मृत्योश्छंदानुवर्तिनः ॥ ४ ॥ अपि वा कुशलं किंचिद्गृहेषु गृहमेधिनि ॥ धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥ ५ ॥ अपि वाऽतिथयोऽभ्येत्य कुटुंबासक्तया त्वया ॥ गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥ ६ ॥ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ॥ यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ॥ ७ ॥ अप्यग्नयस्तु वेलायां न हुता हविषा सति ॥ त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ॥ ८ ॥ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः ॥ ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥ ९ ॥ अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि ॥ लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम् ॥ १० ॥

षोडशे पुत्रनाशेन शोचंत्या अदितेः पतिः ॥ प्रार्थितः कश्यपः प्राह पयोव्रतमितीर्यते ॥ १ ॥ इदानीं श्रीवामनावतारप्रसंगमाह एवमित्यादि यावत्समाप्ति । नष्टेष्वदृष्टेषु सत्सु ॥ १ ॥ २ ॥ स कश्यपः पत्नीमिदमाह ॥ ३ ॥ दीनवदनत्वादिकमालक्ष्य बहुधा विकल्पयन्पृच्छति अप्यभद्रमिति सप्तभिः । हे भद्रे मृत्योश्छंदमिच्छामनुवर्तत इति तथा । मृत्युवशवर्तिनो जनस्येत्यर्थः ॥ ४ ॥ हे गृहमेधिनि । अपि वा किं वा गृहेषु धर्मादेः किं चिदकुशलमिति काका प्रश्नः । यत्र येषु गृहेषु । अयोगिनामपि योगः स्वधर्मादिना योगफलं भवति ॥ ५ ॥ किं वा त्वयाऽपूजिता एवाभ्येत्य गृहाद्याताः ॥ ६ ॥ नार्चिता अनर्चिताः संतो यदि निर्गच्छंति ते गृहाः फेरुराजः सृगालराजस्तदीयविवरतुल्याः ॥ ७ ॥ वेलायां होमकाले कर्हिचिन्न हुताः किम् ॥ ८ ॥ ९ ॥ भवत्या आत्मानं

(१) । पतिना तस्याः सनाथत्वमुक्तम् ॥ १ ॥ तस्या अदितेः । भगवान् भूतगत्यागत्यादिज्ञः ॥ २ ॥ सभाजितोऽर्चितः ॥ ३ ॥ अपीति संभावनायाम् । विप्रादीनामभद्रं किं नागतम् । इत्यर्थ इति । छंदश्शब्दस्य "छंदः पद्ये च वेदे च स्वेच्छाचाराभिलाषयोः" इत्युक्तेरनेकार्थत्वेनात्रेच्छार्थो ग्राह्य इति भावः ॥४॥ काकुश्शोकभीत्यादिना ध्वनिविकृतिः । सा च किंशब्दद्योत्या । योगफलं मोक्षः "गृहेष्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः" इत्युक्तेः । "मद्वार्त्तायातयामानां न बंधाय गृहा मताः" इत्याद्युक्तेश्च ॥ ५ ॥ वाप्यर्थे । प्रत्युत्थानेनाप्यपूजिता इत्यर्थः । यद्वा—प्रत्युत्थानमुपलक्षणमासनान्नदानादेः ॥ ६ ॥ अतिथ्यनर्चनेन गृहस्थो न शोभते इत्याह—गृहेष्विति ॥ ७ ॥ ८ ॥ यत्पूजया यस्य वह्नेरर्चनेन अतिथिषु ब्राह्मणस्यैव मुख्यत्वमभिप्रेत्य वा ब्राह्मणार्चनेन । कामदुघान्स्वर्गब्रह्मलोकादीन् । तत्र हेतुः ब्राह्मणोग्निश्चेत्यादि ॥ ९ ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदितिरुवाच॥भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च॥त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे॥११॥अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः॥
सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १२ ॥ को नु मे भगवन्कामो न संपद्येत मानसः ॥ यस्या भवान्प्रजाध्यक्ष एवं धर्मान्प्रभाषते ॥ १३ ॥
तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः ॥ समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः ॥ १४ ॥ तस्मा
दीश भजंत्या मे श्रेयश्चिंतय सुव्रत ॥ हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो ॥ १५ ॥ परैर्विवासिता साऽहं मग्ना व्यसनसागरे ॥ ऐश्वर्यं
श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १६ ॥ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः ॥ तथा विधेहि कल्याणं धिया कल्याणकृत्तम ॥ १७ ॥
श्रीशुक उवाच ॥ एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ॥ अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥ १८ ॥ क्व देहो भौतिकोऽनात्मा क्व चात्मा
प्रकृतेः परः ॥ कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ १९ ॥ उपतिष्ठस्व पुरुषं भगवंतं जनार्दनम् ॥ सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥ २० ॥

मनः अस्वस्थमप्रकृतिस्थं लक्षणैर्मुखम्लान्यादिभिर्लक्षयामि ॥ १० ॥ अस्वास्थ्यकारणमन्यदस्तीति वक्तुं त्वत्पृष्टमभद्रादिकं नास्तीत्याह भद्रमिमि । द्वाभ्याम् । इमे गृहास्त्रिवर्गस्य परं क्षेत्रमुद्भवस्थानम् । त्रिवर्गोऽपि यथावद्वर्तत इत्यर्थः ॥ ११ ॥ भगवतस्तवानुध्यानं यन्मया क्रियते तस्मादग्नयोऽतिथय इत्यादि सर्वं न रिष्यति न हीयते ॥ १२ ॥ प्रस्तुतं विज्ञापयितुमाह । को न्विति ॥ १३ ॥ संपाद्यं काममाह तवैवेति चतुर्भिः ॥ १४ ॥ सपत्नैर्दैत्यैर्हृता श्रीर्येषाम् । हृतं स्थानं येषामिति पुत्राभिप्रायेण बहुवचनम् ॥ १५ ॥ १६ ॥ १७ ॥ कः कश्यपः । प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्याजेनैव तत्त्वमुपदिशति अहो इति सार्धेन ॥ १८ ॥ १९ ॥ अत्रापारितुष्यंतीं

इत्यर्थ इति । गृहमेधिन्नित्युक्तेर्भवतो यदि गृहे मेधा तर्हि कुतस्त्रिवर्गहानिर्भवेदिति भावः ॥ ११ ॥ १२ ॥ यस्या मे । एवं धर्मान् गृहस्थेन कर्तुं योग्यान् ॥ १३ ॥ तासु प्रजासु । असुरा आदयो यासां देवादीनां तासु । यद्यपि समस्तथापीत्यर्थः । मारीचेति पितृक्रमागतं सामर्थ्यं सूचयति । यद्यपि सर्वत्र जगति समोऽपि भगवान्यथा भक्तं भजते तथा पुत्रेषु समोपि भवानिंद्रमेव पालयितुमर्होऽस्तीति भावः ॥ १४ ॥ यत ईशो भजंतं भजति तस्मादित्यर्थः । सुव्रतेति । दयामुत्पादयितुमाह—न इति । बहुत्वं पुत्रसाहित्यमाह । प्रभो इति । तपोबलेन सर्वं मदभीष्टं दातुं समर्थोसीत्याह ॥ १५ ॥ व्यसनसागरे विपत्त्यर्णवे ॥ १६ ॥ साधो इति । परकार्यसाधकत्वात्त्वमन्वर्थनामासीत्याह । धिया विचारेण । परोपकरणसदृशान्यकल्याणाभावात्तत्कर्तृत्वेन भवान्सर्वकल्याणकृतां मध्ये श्रेष्ठोऽस्तीति भावः ॥ १७ ॥ एवमात्मज व्यसनापनुत्यर्थप्रार्थनप्रकारेण । स्मयन्निव विस्मयं प्राप्त इव । तदेवाह—अहो इति । यद्वा—स्मयन्निवेतीवेन न स्मयमानस्तस्या दुःखेनांतर्दुःखितत्वात् ॥ १८ ॥ मोहो यथार्थज्ञानाभावः । कारणं संसृतेरिति शेषः । एव हीति निपातद्वयं तद्दृढयति ॥ १९ ॥ अत्र तत्त्वोपदेशे। पुत्रस्नेहेन रुदंतीं प्रत्याह—उपतिष्ठस्वेति। पुरुषं वस्तुतः पतिम् । अहं तु लौकिक एव ते पतिरिति भावः । भगवंतं सर्वज्ञमिति । त्वत्पुत्राणां कल्याणोपायमपि स एव जानातीति भावः । जननाम्नोऽसुरस्यार्दनं त्वत्सपत्नान्हंतुमपि स एव समर्थ इति भावः । जनं स्वभक्तं बलिं त्रिलोकीमप्यर्दयिष्यतींद्रार्थं याचिष्यत इति तु वास्तवोर्थः । सर्वभूतेति । बलेरंतःकरणं प्रेर्य गुरुहेलन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स विधास्यति ते कामान्हरिर्दीनानुकंपनः ॥ अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥ २१ ॥ अदितिरुवाच ॥ केनाहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम् ॥ यथा मे सत्यसंकल्पो विदध्याच्च मनोरथम् ॥ २२ ॥ आदिश त्वं द्विजश्रेष्ठ विधिं तदुपधावनम् ॥ आशु तुष्यति मे देवः सीदंत्याः सह पुत्रकैः ॥ २३ ॥ कश्यप उवाच ॥ एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ॥ यथाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥ २४ ॥ फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ॥ अर्चयेदरविंदाक्षं भक्त्या परमयान्वितः ॥ २५ ॥ सिनीवाल्यां मृदाऽऽलिप्य स्नायात्क्रोडविदीर्णया ॥ यदि लभ्येत वै स्रोतस्येतं मंत्रमुदीरयेत् ॥ २६ ॥ त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता ॥ उद्धृतासि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥ निर्वर्तितात्मनियमो देवमर्चेत्समाहितः ॥ अर्चायां स्थंडिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥ नमस्तुभ्यं भगवते पुरुषाय महीयसे ॥ सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥ नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ॥ चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥ ३० ॥ नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे ॥ सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥ ३१ ॥

प्रत्याह उपतिष्ठस्वेति द्वाभ्याम् ॥ २० ॥ नन्वेवंभूतकामप्राप्तिहेतुर्देवांतरसेवा प्रसिद्धा तत्राह । अमोघेति ॥ २१ ॥ यथा च मे मनोरथं विदध्यात् ॥ २२ ॥ यथा च मे आशु तुष्यति तथा तत्सेवाप्रकारमादिश ॥ २३ ॥ मे मया पृष्टः पद्मजो मे यद्व्रतमाह एतत्ते तव प्रवक्ष्यामीत्यन्वयः ॥ २४ ॥ अमले शुक्ले ॥ २५ ॥ तत्रादौ पूर्वेद्युःकृत्यमाह सिनीवाल्यामित्यादिना ब्रह्मचार्यथ तद्वाऽत्र्यमित्यंतेन ग्रंथेन । यदि लभ्येत तर्हि क्रोडविदीर्णया वन्यवराहोत्खातया आलिप्य ॥ ॥ २६ ॥ तत्र मंत्रः "त्वं देवि" इति । हे देवि त्वं रसाया उद्धृतासि ॥ २७ ॥ निर्वर्तित आत्मनियमो नित्यनैमित्तिको येन ॥ २८ ॥ तत्रावाहनादौ नव मंत्रानाह । नमस्तुभ्यमिति । पाद्यादौ विशेषतस्तु द्वादशाक्षरं वक्ष्यति ॥ २९ ॥ चतुर्विंशतिगुणास्तत्त्वानि जानातीति तथा तस्मै । गुणसंख्यानस्य हेतवे सांख्यप्रवर्तकाय ॥ ३० ॥ एवं सामान्यतो नत्वा गुणावतारान्प्रणमति त्रिभिः । तत्रादौ मंत्रोक्तयज्ञरूपेण विष्णोः प्रणामो नम इति । द्वे शीर्षे यस्य । त्रयः पादा यस्य । तंतवे फलविस्तारकाय । त्रय्यां

मापि तं कारयिष्यत इति भावः । वसुदेवे शुद्धसत्त्वे आविर्भवतीति वासुदेवमिति । भक्त्या स्वांतःकरणं शुद्धीकृत्य तत्रैव तं ध्यायंत्यां त्वयि स दयासिंधुराविर्भवितुमपि न विलंबिष्यत इति भावः । जगद्गुरुमिति । तव मम बलेरिंद्रस्य सर्वजगतोऽपि गंगाप्रादुर्भावादिना हितं विधास्यतीति भावः ॥२०॥ स हरिः । अत्राशंकते–नन्विति । तत्राक्षेपे । अमोघा वैगुण्येपि फलजनिका नेतरा देवतांतरसेवा तु सांगोपांगैव फलदेति भावः ॥ २१ ॥ ब्रह्मन्निति । वेदवित्त्वेन विधिबोधनकुशलोसीत्याह ॥ २२ ॥ तस्य हरेरुपधावनं सेवनविषयं विधिं प्रकारं तमादिश येन मे देव आशु तुष्यतीति योज्यम् ॥ २३ ॥ २४ ॥ पयसो व्रतं नियतभक्ष्यादि यस्य स तथा ॥ २५ ॥ सिनीवाल्यां दृष्टचंद्रायाममायामर्थाच्चतुर्दशीयुक्तामायामित्यायातम् । स्रोतसि स्रवतोनिस्सृतांबुसरआदौ 'स्रोतोंबुसरणं स्वतः' इत्यमरः ॥ २६ ॥ रसायाः रसातलात् ॥ २७ ॥ निर्वर्तितो निष्पादितः । स्थंडिले वालुकानिर्मितवेद्याम् ॥२८॥ तत्र अर्चने । आदिना पाद्यार्घ्याचमनीयस्नानपुनराचमनीयगंधपुष्पधूपदीपनैवेद्यानां ग्रहः । महीयसे ज्यायसे ॥ २९ ॥ ३० ॥ गुणावतारान्ब्रह्मविष्णुरुद्रान् । तत्र तेषु । यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः शिवाय रुद्राय नमः शक्तिधराय च ॥ सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२ ॥

विद्यायामात्मा यस्येति त्रिधा बद्ध इत्यस्यार्थ उक्तः । तथा च मंत्रः । "चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश ॥" इति "मार्गमुद्गवदालूनः सोऽयं प्राज्ञैर्यथायथम् ॥ विष्णुस्तु यज्ञरूपेण स्तूयतेऽनेन तत्त्वतः ॥" तथा च यास्कः—चत्वारि शृंगेति । वेदा वा एत उक्ता स्त्रयोऽस्य पादाः सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्तहस्तासः सप्तच्छंदांसि त्रिधा बद्धस्त्रेधा बद्धो मंत्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति महोदेव इत्येष हि महान् देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनायेति ॥ ३१ ॥ ३२ ॥

मंत्रे स्वरूपमुक्त तं मंत्रमाह—तथा चेति । शृंगा इति छांदसत्वाच्छेराकार आगमजस्यापि नुमो नस्य लोपे सिध्यति । अस्य व्याख्यानं यास्केन कृतमपि प्रकारांतरेणाह—वृषभो धर्मस्वरूपो महादेवो यज्ञमूर्त्तिर्विष्णुर्मर्त्यान्मनुष्यानाविवेश । स च वृषभो रोरवीति अत्यर्थं शब्दं करोति । "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इत्यादिनोपदिशति । अस्य वृषभस्य । चत्वारि ब्रह्मोद्गातृहोत्राध्वर्युरूपाणि शृंगाणि । अस्य त्रय ऋग्यजुःसामाख्याः पादाः । द्वे हविर्द्धानमहावीराख्ये शीर्षे । सप्त होता मैत्रावरुणो ब्राह्मणाच्छंशी ग्रावस्तोता पोता अच्छावाक् नेष्टा एतेस्य हस्ताः । किंभूतः प्रातःसवनादित्रिभिर्बद्ध इति । केचित्तु महादेवः शब्दो मर्त्यानाविवेश । चत्वारि नामाख्यातोपसर्गनिपाताख्यान्यस्य शृंगाणि । त्रयो भूतभविष्यद्वर्त्तमानाख्याः काला अस्य पादाः । द्वे शब्दात्मानौ शीर्षे । सप्त विभक्तयो हस्ताः । त्रिषु स्थानेषूरःशिरःकंठेषु बद्धः । कामानां वर्षणाद्वृषभः । रोरवीति अतिशयेन वदतीत्यर्थः । स्वामिश्लोकव्याख्या—निवृत्तिमार्गमलभ्यमजानंतः प्रवृत्तिमार्गे मुदं गच्छंतीति मार्गमुद्गास्तत्प्रवर्तकाचार्यास्ते विद्यंते येष्वर्वाचीनेषु ते मार्गमुद्गवंतस्तैराच्छन्नो व्यवच्छिन्नः । यद्वा—मार्गे मुदं वहंतो ये तैरालूनः पृथक्त्वेनोपासितः । अत्र पक्षे पाठस्तु 'मार्गमुद्वहदालूनः' इति । 'मार्गमुग्धवदालूनः' इति पाठे मार्गे विचारमार्गे ये मुग्धाः सुंदरा विवेकिनस्तद्वद्विस्तच्छिष्यैश्चालूनः स्वरूपत्वेनोपासित इत्यर्थः । यद्वा—मार्गमुग्धो मार्गानभिज्ञः पथिकः 'मुग्धः सुंदरमुढयोः' इति विश्वः । तद्वत् । स यथा प्राज्ञैः पांथलुंठननिपुणैर्यथायथं तस्य कर्णभूषणमाच्छिद्य कंठालंकृतिं त्यक्त्वा हस्तभूषणमाछिद्यते तदनु पादभूषणं तदनु कटिभूषणमित्यादिक्रमव्यतिरेकेणैवालूयते तथैवानेन मंत्रेणापि प्राज्ञैर्मंत्रावयवैर्यज्ञरूपो विष्णुरंगवर्णनक्रममतिहाय स्तूयते । न हि शृंगवर्णनानंतरं पादवर्णनमुचितं तयोरुत्तमनिकृष्टत्वेनासमत्वात् । किन्तु शृंगवर्णनोत्तरं शीर्षवर्णनं तदनु हस्तवर्णनं तदनु च पादवर्णनं न्याय्यमिति प्रतीयते इति।'मार्गमुद्गरता लूनः' इति पाठे मार्गं कर्ममार्गमुद्गरता जैमिनियास्कादिना यथायथं यथैवालूनो मंत्रमार्गेण प्रकाशितस्तथैवैतत्कालीनैरपि सायनप्रभृतिभिर्वर्ण्यत इत्यर्थः । मंत्रो व्याख्येयरूपो ब्राह्मणश्च तद्व्याख्यानरूपः । यथा 'यो वेद निहितं गुहायाम्' इति मंत्रः । 'अन्योंतर आत्मा' इति तद्ब्राह्मणश्च कल्पो बौधायनादिपद्धतिग्रंथ इति यास्कव्याख्योक्तमंत्रादिपदत्रयार्थः । यद्यतः । एनं यज्ञम् । शंसंति श्लाघंते इति ॥ ३१ ॥ तमोगुणावतारं स्तौति—नम इति । शिवाय सुकृतिनां शुभफलदात्रे । रुद्राय दुष्कृतिनां रोदकाय । "त्वं कर्मणां मंगलमंगलानां कर्तुस्स्म लोकं तनुषे स्वः परं वा ।

१—व्युत्पत्त्यव्युत्पत्ती ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमो हिरण्यगर्भाय प्राणाय जगदात्मने ॥ योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥ नमस्ते आदिदेवाय साक्षिभूताय ते नमः ॥ नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥ नमो मरकतश्यामवपुषेधिगतश्रिये ॥ केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥ त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ॥ अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥ ३६ ॥ अन्ववर्तंत यं देवाः श्रीश्च तत्पादपद्मयोः ॥ स्पृहयंत इवामोदं भगवान्मे प्रसीदताम् ॥ ३७ ॥ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतम् ॥ अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥ अर्चित्वा गंधमाल्याद्यैः पयसा स्नपयेद्विभुम् ॥ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ गंधधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ॥ ३९ ॥ शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ॥ ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥ ४० ॥ निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयम् ॥ दत्त्वाचमनमर्चित्वा तांबूलं च निवेदयेत् ॥ ४१ ॥ जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥ कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दंडवन्मुदा ॥ ४२ ॥ कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ॥ द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितम् ॥ ४३ ॥ भुंजीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ॥ ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि ॥ ४४ ॥

प्राणाय सूत्रात्मने । योगैश्वर्यं शरीरं यस्य ॥ ३३ ॥ ३४ ॥ अधिगता प्राप्ता श्रीर्यस्य तस्मै ॥ ३५ ॥ ३६ ॥ तत्पादपद्मयोरामोदं स्पृहयंत इव देवाश्च श्रीश्च यमन्ववर्तंत स मे प्रसीदतु ॥ ३७ ॥ आवाहने पुरस्कृतं संमानितम् ॥ ३८ ॥ ३९ ॥ पयसि शृतं पक्वं पायसम् । मूलविद्यया द्वादशाक्षरेणैव ॥ ४० ॥ ४१ ॥ पूर्वोक्ताभिरन्याभिश्च स्तुतिभिः ॥ ४२ ॥ तस्य शेषं निर्माल्यम् । द्वाववरौ येषां तान् । असंभवे द्वावपि भोजयेदित्यर्थः ॥ ४३ ॥ सभाजितैस्तैरनुज्ञातः सन् । सेष्टो

अमंगलानां च तमिस्रमुल्बणम्' इति दक्षोपाख्यानोक्तेः । शक्तिरुमा शस्त्रं वा ॥ ३२ ॥ रजोगुणावतारं स्तौति–नम इति । हर्य्यंत इति हिरण्यं ब्रह्मांडं गर्भे यस्य तस्मै ॥ ३३ ॥ ३४ ॥ ३५ ॥ यतस्त्वं पुंसां सर्ववरदः अतो हेतोः । पादाभ्यां पादरेणोः प्रस्वेदादिना रोमकूपमार्गेणांतःप्रवेशादंतरघनाशकत्वेन महत्त्वम् । "यत्पादपंकजरजः श्रुतिभिर्विमृग्यं पादारविंदरजसाप्लुतदेहिनां स्युः । यावन्महत्पादरजोभिषेकम्" इत्याद्युक्तेः ॥ ३६ ॥ यमन्ववर्त्तंत स भगवान् ॥ ३७ ॥ उपस्पर्शनमाचमनम् ॥ ३८ ॥ प्रथमं पाद्यादिभिरर्चित्वा पयसा दुग्धेन स्नापयेत् । ततः स्नापयित्वा वस्त्रोपवीताभरणपरिधापनोत्तरं पुनरपि पाद्यादिभिरित्यर्थः । पाद्यादौ सर्वत्र द्वादशाक्षरः "ॐ नमो भगवते वासुदेवाय" इत्येवमुक्तो मंत्रो ज्ञेयः ॥ ३९ ॥ शाल्यन्नं सुगंधिशुक्लतंडुलौदनम् । विभवे धनिकत्वे । सर्पिः घृतम् । नैवेद्यं दत्वा जुहुयात् ॥ ४० ॥ तद्भक्ताय विष्णुभक्ताय । तन्निवेदितमिति वा । भक्तालाभे स्वयमपि भुंजीत वा प्रसादबुद्ध्या । अर्चित्वा पूजनं समाप्य । यद्वाऽर्चित्वा नीराजनं कृत्वा भोजनांतेऽपि नीराजनस्य सर्वपूजनरूपस्य विहितत्वात् । तदुक्तम् "उत्थाने पूजनांते च भोजनांते दिनांतके । शयनादौ निशि कार्यं वै मुख्यं नीराजनार्चनम्" इति गोविंदार्चनपद्धतिग्रंथोक्तेः ॥ ४१ ॥ जपेद्द्वादशाक्षरमेव ॥ ४२ ॥ तस्य हरेः । निर्माल्यमर्पणोत्तरमुत्तारितपुष्पादि । अवरावधिकौ द्वादशद्वाविंशतिद्वात्रिंशदित्येवंरूपान् । यद्वा–द्वाववरौ न्यूनौ येषां तांस्त्र्यादीन्भोजयेदित्यर्थः । असंभवे ब्राह्मणालाभे निस्स्वत्वे च । इत्यर्थ इति । सर्वथा ब्राह्मणभोजनस्यावश्यकत्वेन द्वावेव वा भोजयेदिति भावः । यथोचितं विप्रानिति योज्यम् । तेन भोजनार्हान्संध्योपास्त्यादिस्वकर्मनिष्ठानेव भोजयेन्न त्वनुपनीतधूमपानादिरतानित्युक्तम् ॥ ४३ ॥ तस्यां रात्र्यां यस्मिन्दिने व्रतमारब्धं तद्दिवसरात्र्याम् । प्रथमेऽहनि अद्यादिने । प्रभाते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥ पयसा स्नापयित्वाचैंद्यावद्व्रतसमापनम् ॥ ४५ ॥ पयोभक्षो व्रतमिदं चरेद्विष्णवर्चनादृतः ॥ पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥ ४६ ॥ एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ॥ हरेराराधनं होममर्हणं द्विजतर्पणम् ॥ ४७ ॥ प्रतिपदिनमारभ्य यावच्छुक्लत्रयोदशी ॥ ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४८ ॥ वर्जयेदसदालापं भोगानुच्चावचांस्तथा ॥ अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥ ४९ ॥ त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥ ५० ॥ पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ॥ चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥ ५१ ॥ शृतेन तेन पुरुषं यजेत सुसमाहितः ॥ नैवेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदम् ॥ ५२ ॥ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥ ५३ ॥ भोजयेत्तान्गुणवता सदन्नेन शुचिस्मिते ॥ अन्यांश्च ब्राह्मणाञ्छक्त्या ये च तत्र समागताः ॥ ५४ ॥ दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथाऽर्हतः ॥ अन्नाद्येनाऽश्वपाकांश्च प्रीणयेत्समुपागतान् ॥ ५५ ॥

बंधुभिः सहितः । तस्यां रात्र्यां ब्रह्मचारी सन् । श्वोभूते प्रभाते सति ॥ ४४ ॥ ४५ ॥ पय एव भक्ष आहारो यस्य ॥४६॥४७॥ अधः स्वमं शयनम् ॥४८॥४९॥ पंचकैः पंचामृतैः ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

सति पूर्ववत्स्नानादि कुर्यादित्यर्थः ॥४४॥ यथोक्तेन प्रथमदिनसदृशेन ॥ ४५ ॥ पयः गोक्षीरं भक्षो भोजनं यस्य स तथा सन् । 'व्रते क्षीरादि गोभवम्' इति स्मरणात् ॥ ४६ ॥ द्वादशाहमहरहः ॥ ४७ ॥ त्रिषवणं त्रिकालम् ॥ ४८ ॥ असतोऽनृतस्यासद्भिर्दुश्चरणैश्चालापम् । उच्चावचान् हस्त्यारोहनेपालकंबलहेमालंकारसुगंध्यादीनुच्चान् । गर्दभारोहजीर्णवस्त्रधृत्यादीनवचांश्च ॥ ४९ ॥ अथ व्रतसमाप्तेरनंतरम् । शास्त्रदृष्टेनेत्युक्तेस्तत्तन्मंत्रेण तत्तद्द्रव्येण स्नपयेत् । न त्वेकदैव सर्वद्रव्याणि संयोज्य विना तत्तन्मंत्रैस्तथाकरणे पञ्चामृतत्वासंभवात् ।"श्रीविष्णोरुत्सवे कार्यं मंत्रैः पञ्चामृतं पृथक्" इति संहितोक्तेः । विधिकोविदैर्विप्रैरेव स्वयं मंत्राद्यज्ञाने तद्विदो विप्रानाहूय तैः कारयेत् । विप्रपदानुक्तावपि याजनस्य तदधिकारत्वाद्विप्र एवात्र ज्ञेयो न तु कोविदः क्षत्रियादिरिति । "याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" इति विप्रमुद्दिश्य मनुनोक्तत्वादिति ॥ ५० ॥ महापूजाया द्रव्यनिर्णयस्त्वेकादशस्कंधव्याख्याने वक्ष्यते । चरंति भक्षंति देवा यमिति चरुर्घृतं पयसि क्षीरे निरूप्य कृत्वा विष्णवे जुहुयादिति शेषः । यच्च गयाश्राद्धपद्धतावुक्तम् "ओदने परमान्ने च पात्रमासाद्य मूढधीः । घृतेन पूरयेत्पात्रं तद् घृतं रुधिरं भवेत् ॥"इति । तच्छ्राद्धपरं न तु होमपरं विना घृतं द्रव्यांतर होमस्यैवानुक्तत्वात्सर्वं द्रव्यं घृतेनैव जहुयात् 'अन्यथा नोपतिष्ठते' इति स्मृतेर्निषिद्धत्वादित्यलमधिकोक्त्या । शिपिषु रश्मिषु यज्ञपशुषु वा विष्टः शिपिविष्टः 'शिपिर्यज्ञ एव पशुषु प्रविष्टः' इति श्रुतेः । "शैत्याच्छयनयोगाच्च शीति वारि निगद्यते । तत्पानाद्रक्षणाच्चैव शिपयो रश्मयो मताः॥ तेषु प्रवेशाद्विश्वेशः शिपिविष्ट इहोच्यते" । इति भाष्यात् । यद्वा येन चरुणा शृतेन पुरुषं यजेत विष्णवे नैवेद्यं च दद्यात् । अतिगुणवत् मधुरादिगुणयुक्तमन्यदपि नैवेद्यं दद्यादिति द्वयोरन्वयः ॥ ५१ ॥ ५२ ॥ ऋत्विजो होमसमये वृतान्ब्रह्मादीन् । तत् आचार्यर्त्विक्तोषणम् ॥ ५३ ॥ तान् आचार्यादीन् । गुणवता षड्रसेन । सदन्नेन पायसाद्यन्नेन । शक्त्या सामर्थ्यानुरोधतः । तत्र भोजनकाले । ये ब्राह्मणास्समागतास्तानन्यांश्च ॥ ५४ ॥ गुरवे व्रतोपदेष्ट्राचार्याय । यथार्हतः यथा तेषां दक्षिणा विहिता तदनुसारेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुक्तवत्सु च सर्वेषु दीनांधकृपणेषु च ॥ विष्णोस्तत्प्रीणनं विद्वान्भुंजीत सह बंधुभिः ॥ ५६ ॥ नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ॥ कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ॥ ५७ ॥ एतत्पयोव्रतं नाम पुरुषाराधनं परम् ॥ पितामहेनाभिहितं मया ते समुदाहृतम् ॥ ५८ ॥ त्वं चानेन महाभागे सम्यक्चीर्णेन केशवम् ॥ आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ॥ ५९ ॥ अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ॥ तपःसारमिदं भद्रे दानं चेश्वरतर्पणम् ॥ ६० ॥ त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥ तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥ ६१ ॥ तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥ भगवान्परितुष्टस्ते वरानाशु विधास्यति ॥ ६२ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधेऽदितिपयोव्रतं नाम षोडशोऽध्यायः ॥ १६ ॥ श्रीशुक उवाच ॥ इत्युक्ता साऽदिती राजन्स्वभर्त्रा कश्यपेन वै ॥ अन्वतिष्ठद्व्रतमिदं द्वादशाहमतंद्रिता ॥ १ ॥ चिंतयंत्येकया बुद्ध्या महापुरुषमीश्वरम् ॥ प्रगृह्येंद्रियदुष्टाश्वान्मनसा बुद्धिसारथिः ॥ २ ॥ मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ॥ वासुदेवे समाधाय चचार ह पयोव्रतम् ॥ ३ ॥ तस्याः प्रादुरभूत्तात भगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ॥ ४ ॥ तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम् ॥ ननाम भुवि कायेन दंडवत्प्रीतिविह्वला ॥ ५ ॥

॥ ५६ ॥ ५७ ॥ मया च ते समुदाहृतम् ॥ ५८ ॥ ५९ ॥ सर्वयज्ञाख्योऽयं यज्ञः सर्वव्रतमिति च स्मृतमेतद्व्रतम् ॥ ६० ॥ ६१ ॥ ६२ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां षोडशोऽध्यायः ॥ १६ ॥ ततः सप्तदशेऽदित्या कृते तस्मिन्व्रते हरिः ॥ तत्कामपूरणायादौ तत्पुत्रोऽभूदितीर्यते ॥ १ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

"दद्याद्गोमिथुनान्यष्टावाचार्याय सुभक्तिमान् । चतुर्विंशतिसंख्याकैर्हेमगद्याणकैः सह॥ ब्रह्मणे निष्कषट्काढ्यं दद्याद्गोमिथुनद्वयम् । एकैकमन्यऋत्विग्भ्यो दद्याद्गोमिथुनं समम् ॥ निष्कत्रयसमायुक्तं वस्त्रालंकारसंयुतम् ।" इति मंत्रशास्त्रात् । "चतुर्भिर्माषकैर्निष्कः षड्भिर्गद्याणको भवेत्" इति मानचंद्रिकायाम् । आदिनांबुग्रहः ॥ ९५ ॥ कृपणाः कदर्याः । आदिना दरिद्रादिग्रहः । तत् दीनादिभोजनम् ॥ ९६ ॥ स्वस्तिवाचकैर्मंत्रैः । तत्कथाभिः पुराणेतिहासगाथाभिः ॥ ९७ ॥ ९८ ॥ सम्यक्चीर्णेन यथावदाचरितेन ॥ ९९ ॥ इदं सारं श्रेष्ठं तप इदं सारं दानं च । विश्वनाथस्तु—सर्वयज्ञोऽयं यज्ञः अनेनैकेनैव कृतेन सर्वे यज्ञाः कृता भवंतीत्यर्थः । एवमिदं सर्वव्रतं तपःसारं तेन यज्ञसारदानसारव्रतसारशब्दानामपीदं वाच्यमिति द्योतितम् । किंभूतमिदम् ? ईश्वरं तर्पयति प्रीणयतीतीश्वरतर्पणम् ॥ ६० ॥ ईश्वरतोषकधर्माणामेव धर्मत्वमित्याह—त एवेति । "तपः संतोष आस्तिक्यं दानमीश्वरपूजनम् । सिद्धांतश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ॥ एते तु नियमाः प्रोक्ताः" इति । "अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् । क्षमा धृतिर्मिताहारः शौचं चैते यमा स्मृताः ॥" इति । एकादशे त्वेते प्रकारांतरेण वक्ष्यंते भगवता । यैर्हरितोषस्त एव यमादयः श्रेष्ठा अन्यथा श्रम एव "श्रमः स्यात्सर्वथा धर्मो यो न प्रीतिकरो हरेः" इत्यादिपुराणात् ॥ ६१ ॥ यत एतद्व्रतमीश्वरतर्पणं तस्माद्धेतोः ॥ ६२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे षोडषोऽध्यायः ॥ १६ ॥ ततः कश्यपोपदेशानंतरम् । तस्मिन् पयोव्रते । तस्या अदितेः । कामपूरणायाभीष्टदानाय । तस्या अदितेः पुत्रः (१)। अतंद्रिता अनलसा ॥ १ ॥ प्रगृह्य प्रग्रहरूपेण मनसा वशीकृत्येत्यर्थः 'मनो रश्मिर्बुद्धिसूतः' इत्युक्तेः । एकया स्थिरया ॥ २ ॥ ३ ॥ तस्या आदित्याः । अग्रे इति शेषः ॥ ४ ॥ तं भगवंतम् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोत्थाय बद्धांजलिरीडितुं स्थिता नोत्सेह आनंदजलाकुलेक्षणा ॥ बभूव तूष्णीं पुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥ प्रीत्या शनै
र्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ॥ उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥ अदितिरुवाच ॥ यज्ञेश
यज्ञपुरुषाच्युत तीर्थपाद तीर्थश्रवः श्रवणमंगलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश भगवन्नसि दीननाथः ॥ ८ ॥ विश्वाय
विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ॥ स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥ आयुः परं
वपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाः सकलयोगगुणास्त्रिवर्गः ॥ ज्ञानं च केवलमनंत भवंति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥ १० ॥

प्रीतिविह्वलत्वादेव सा बद्धांजलिः सती स्थिता केवलमीडितुं पुनर्नोत्सेहे न शशाकापि तु तूष्णीं बभूव । कथंभूता । आनंदजलैराकुले ईक्षणे यस्याः । पुलकैराकुला आकृतिर्देहो यस्याः । तस्य दर्शनेन योऽत्युत्सवस्तेन गात्रे वेपथुः कंपो यस्याः ॥ ६ ॥ तुष्टाव पिबतीवोद्वीक्षमाणेति च क्रियाभेदात्से त्यस्य पदस्य द्विरुक्तिरदोषः ॥ ७ ॥ "अयत्नतो विनिर्जित्य दैत्यानत्यूर्जितानपि ॥ भक्तान्रक्षितुमीशस्त्वमित्यस्तौददितिस्त्रिभिः ॥ " यज्ञेशेत्यादिदशभिः संबोधनैस्तवाशक्यं किमपि नास्तीति वदंती प्रार्थयते । शं नः कृधि कुरु । यतो दीनानां नाथोऽसि त्वम् । तीर्थं श्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य आपन्नानां शरणागतानां वृजिनोपशमायोदयो यस्य ॥ ८ ॥ हे आद्य भूम्ने महते नमः । महत्त्वे हेतवः विश्वाय विश्वस्य भवनस्थि तिसंयमार्थं स्वैरं गृहीताः पुरुशक्तेर्मायाया गुणा येन तस्मै । तथाऽपि स्वस्थायाप्रच्युतस्वरूपाय । कुतः । शश्वदुपबृंहितो नित्योर्जितो यः पूर्णबोधस्तेन व्यापादितं नित्यनिरस्तमात्मनि तमो मायालक्षणं येन तस्मै ॥ ९ ॥ अस्मदीयमनोरथपूरणमीषत्करमेव तवेति कैमुत्यन्यायेनाह । आयुः परं ब्रह्मायुः । पुनरपि द्यौश्च

सा अदितिः । पुलकैः रोमांचैः "पुलकः कृमिप्रभेदे प्रस्तरभेदे च मणिदोषे । रोमांचे हरिताले गजान्नपिंडे च गंधर्वे ॥" इति मेदिनी । तस्य भगवतः ॥६॥ सेति पदस्य ॥७॥ अत्यूर्जितानतीव बलिनः । भक्तान् देवान् । कृधीत्यार्षः । यज्ञानामीशः फलदाता । न्यूनेऽपि तस्मिंस्त्वं स्वरूपात्पूर्णमेव फलं ददासीत्याह- यज्ञपुरुषेति । तत्र हेतुः—अच्युतेति । सर्वथा च्युतिरहितोऽसीति । तीर्थं श्रीगंगा स्वाभीष्टघ्नसकलदुष्कृतनाशिनी पादयोर्यस्य स तथा । यद्वा—तीर्थवच्छोधकौ ध्यानेनैवाखिलाघहरौ पादौ यस्य स तथेति । ध्यानेप्यसमर्थानां हितकरोऽसीत्याह—तीर्थं पावनं श्रवो यस्येति तथा । तत्रापि मननाद्यपेक्षा नास्तीत्याह—श्रवणमंगलेति । केवलश्रवणादेव मंगलं करोषीति । आद्यत्वात्सर्वविदासि ईशत्वात्सर्वथा समर्थोऽसीत्यर्थः ॥ ८ ॥ विश्वाय तद्रूपाय तथापि विश्वोत्पत्त्याद्यर्थं मायया दर्शितब्रह्मादिमूर्त्तित्रयत्वेन पृथगिव प्रतीताय । पुनस्तथात्वेपि अप्रच्युतस्वरूपत्वे हेतुं पृच्छति—कुत इति । भुजंगाधिष्ठानरज्जुवत्सर्वथा निर्विकारायेत्यर्थः ॥ ९ ॥ भगवन्महिमानं वदंती तत्प्रभुत्वं द्योतयति—अस्मदीयेति । रसेति पाठे निर्विसर्गपाठे । द्यौर्भूरसेति त्रीणीति । गुणाः कार्याणि ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अदित्यैवं स्तुतो राजन्भगवान्पुष्करेक्षणः ॥ क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ॥ ११ ॥ श्रीभगवानुवाच ॥ देवमातर्भवत्या मे विज्ञातं चिरकांक्षितम् ॥ यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥ तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥ इंद्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषाम् ॥ स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १४ ॥ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १५ ॥ प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः ॥ यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १६ ॥ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ॥ ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥ १७ ॥ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः ॥ स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधिष्ठितः ॥ १८ ॥ उपधाव पतिं भद्रे प्रजापतिमकल्मषम् ॥ मां च भावयती पत्यावेवंरूपमवस्थितम् ॥ १९ ॥ नैतत्परस्मा आख्येयं पृष्टयाऽपि कथंचन ॥ सर्वं संपद्यते देवि देवगुह्यं सुसंवृतम् ॥ २० ॥

भूश्च रसातलं च द्योर्भूरसाः । द्यौरिति पृथक्पाठे भूश्च रसाश्च बिलस्वर्गा इति विग्रहः । रसेति पाठे त्रीणि पदानि । सकला योगगुणा अणिमादयः ॥ १० ॥ क्षेत्रज्ञोंतर्यामी ॥ ११ ॥ सपत्नैर्हृता श्रीर्येषां स्वधामतश्च्यावितानां च पुत्राणां संबंधि यत्त्वद्भवत्याश्चिरमाकांक्षितं मया विज्ञातम् ॥ १२ ॥ कांक्षितमेवाह तानिति त्रिभिः । प्रतिलब्धो जयश्च श्रीश्च यैस्तैः पुत्रैः सहोपासितुमेकत्र स्थातुमिच्छसि ॥ १३ ॥ १४ ॥ प्रत्याहृतं यशश्च श्रीश्च यैस्तान् ॥ १५ ॥ अपारणीया अनतिक्रमणीयाः । यद्यस्मात् अनुकूल ईश्वरः कालो येषां तैर्विप्रैर्गुप्ता रक्षिताः । अनुकूलैरीश्वरैः समर्थैर्विप्रैर्गुप्ता इति वा ॥ १६ ॥ मम मया चिंत्य एव । तत्र हेतुः । संतोषितस्येत्यादि । श्रद्धानुरूपमिच्छानुसारेण फलहेतुत्वात् ॥ १७ ॥ मारीचस्य तपस्यधिष्ठाय स्थितः सन् । गोप्तास्मि पालयिष्यामि ॥ १८ ॥ अतः पतिमुपधाव भजस्व ॥ १९ ॥ देवानां गुह्यं रहस्यं

इति वक्ष्यमाणरीत्या ॥ ११ ॥ १२ ॥ १३ ॥ आसाद्य स्वं स्थानं प्राप्य ॥ १४ ॥ १५ ॥ प्रथमव्याख्याने भवतु विप्राणामनुकूल ईश्वरस्तस्य तत्प्रतिकूलत्वे त्वस्मत्कार्यं सेत्स्यत्येवेत्याह—अनुकूलैरित्यादि । तत्र असुरेषु ॥ १६ ॥ यद्यपि विक्रमकालोऽधुना न तथापीत्यर्थः । तत्र चिंत्यत्वे । फलस्य हेतुरेव फलहेतुकस्तस्य भावस्तत्त्वात् ॥ १७ ॥ अनुगुणं यथोचितम् । सुतानिंद्रादीन् । मारीचः कश्यपः । तपस्यधिष्ठितः तपश्चर्यया प्रसन्न इत्यर्थः ॥ १८ ॥ भाविकल्याणं सूचयन्नामंत्रयति—भद्र इति । भावयंती चिंतयंती । एवंरूपं संप्रतिदर्शितरूपसदृशरूपम् । यतोऽहं मारीचतपस्यधिष्ठितो गोप्तास्मि अंतोहेतोः ॥ १९ ॥ एतत् मदुक्तम् । देवानां त्वत्पुत्राणाम् । रहस्यं गुप्तकार्यम् । कचित्पुस्तकेष्वत्र सार्द्धत्रयश्लोकाः प्रक्षिप्तास्संति ते च "नाहं वोढुं क्षमा देव त्वामाद्यं पुरुषं परम् । ब्रह्मांडकोटिसाहस्रं रोमकूपे तवाव्यय (१) । महापातकयुक्तोऽपि यन्नामस्मृतिमात्रतः । प्रयाति मुक्तिं देवेश तं कथं धारयाम्यहम् (२) । श्रीभगवानुवाच । सत्यमुक्तं महाभागे त्वया नास्त्यत्र संशयः । पतिव्रताः पतिप्राणाः पतिभक्तिपरायणाः (३)। वहंति सततं बाले स्त्रियोऽपि त्यक्तमत्सराः" ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत ॥ अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ॥ २१ ॥ उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् ॥ स वै समाधियोगेन कश्यपस्तदबुद्ध्यत ॥ २२ ॥ प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ॥ सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतम् ॥ समाहितमना राजन्दारुण्यग्निं यथाऽनिलः ॥ २३ ॥ अदितेर्धिष्ठितं गर्भं भगवंतं सनातनम् ॥ हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥ २४ ॥ ब्रह्मोवाच ॥ जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते ॥ नमो ब्रह्मण्यदेवाय त्रिगुणाय नमोनमः ॥ २५ ॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ॥ त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥ २६ ॥ त्वमादिरंतो भुवनस्य मध्यमनंतशक्तिं पुरुषं यमाहुः ॥ कालो भवानाक्षिपतीश विश्वं स्रोतो यथांतःपतितं गभीरम् ॥ २७ ॥

सर्वं सुसंवृतं सुगुप्तं सत्संपद्यते सिध्यति ॥ २० ॥ प्रभोर्हरेरात्मनि जन्म लब्ध्वा ॥ २१ ॥ २२ ॥ अवितथमीक्षणं दृष्टिर्यस्य सः । अनिलो यथा सर्वत्र समोऽपि दारुणि संघर्षेण वनदाहकमग्निमाधत्ते एवं स्वयं पुत्रेषु सर्वेषु समोऽपि दैत्यक्षपणं वीर्यमाधत्तेत्यर्थः ॥ २३ ॥ धिष्ठितमधिष्ठाय स्थितम् । समीडे तुष्टावेत्यर्थः ॥ २४ ॥ २५ ॥ अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्या गर्भायार्भकाय । तत्रापि वेदा गर्भे यस्य । यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः । त्रयो लोका नाभौ यस्य स त्रिनाभस्तस्मै । त्रयाणां लोकानां पृष्ठे उपरि स्थिताय । शिपिशब्देन पशवो जीवास्तेष्वंतर्यामितया प्रविष्टाय । "यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति" इति श्रुतेः । यद्वा शिपयो रश्मयस्तैर्वेष्टितायेत्यर्थः । तथापि विष्णवे व्यापिने ॥ २६ ॥ अंतःपतितं तृणादि यथा गंभीरं स्रोत आक्षिपत्याकर्षति

इति । परं चैते स्वामित्यक्ता एव ॥२०॥ तत्रैवादितिपयोव्रतदेश एव ॥२१॥ तत् तं हरेरंशमात्मनि प्रविष्टमबुध्येतेति द्वयोरन्वयः । स कश्यपः ॥२२॥ इत्यर्थ इति । समाहितमनस्त्वात्स्वेच्छानुरूपं वीर्यमाहितवानिति भावः । वीर्यं भगवद्रूपं तेजः । समाहितमना भगवद्रूपैकाग्रचित्तः । अनिलो यथा संघर्षेण दारुस्थमग्निमेव मूर्तं दारुगर्भे प्रकटीकरोति तथैव कश्यपोऽप्यंतःकरणस्थं भगवंतमेव स्वदेहसंगेन तदीयगर्भे स्थिरीचकारेत्यर्थः । यथैवाग्निरनिलदार्वंशो न भवति तथैव भगवद्देहोऽपि कश्यपादित्यंशो न भवतीति शुक्रशोणितसंबंधो निरस्त इति विश्वनाथः ॥ २३ ॥ गुह्यनामभिर्वेदोक्तनामभिः । इत्यर्थ इति । प्रथमपुरुषस्थान उत्तमपुरुषप्रयोगोऽत्रार्ष इति भावः । यद्वा—भगवतो भक्तिवश्यतां विज्ञाय नामसंकीर्त्तनलक्षणां भक्तिमेव चकारेति भावः ॥ २४ ॥ उरुभिर्महद्भिर्गीयत इत्युरुगायः । उरवः क्रमाः पादन्यासा यस्येति भाविकर्मसूचनम् । त्रयो गुणाः प्रकृत्यधिष्ठातृत्वेन यस्य स तथा ॥ २५ ॥ त्रयाणामूर्द्ध्वाधोमध्यवर्त्तिनां लोकानां पृष्ठ उपरिष्टे वैकुंठे स्थितायेत्यर्थः । वेदगर्भत्वं ब्रह्मणोऽप्यस्ति "त्वयाहं तोषितः सम्यग्वेदगर्भसिसृक्षया" इति ब्रह्माणं प्रति विष्णूक्तेरत आह—वेदानामिति । इत्यर्थ इति । "सर्वे वेदा यत्पदमामनंति" इति श्रुतेः 'वेदैश्च सर्वैरहमेव वेद्यः' इति स्मृतेश्चेति भावः । शिपिविष्टपदं व्याख्यातचरम् । अत्रत्यमानभूता श्रुतिः स्पष्टार्था । शिपिशब्दो लोके जीवार्थकोऽप्रसिद्धोऽतः प्रसिद्धार्थपरत्वेन व्याचष्ट इत्यत आह—यद्वेति । यद्यपि रश्मिवेष्टितत्वेन परिच्छिन्नतायाति तथापीति । औपाधिकपरिच्छेदवत्त्वेप्याकाशवद्वस्तुतोऽपरिच्छिन्नायेत्यर्थः ॥ २६ ॥ दृष्टान्तमाह—स्रोतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामसि संभविष्णुः ॥ दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे अदितिवरदानं नाम सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ॥ चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः ॥ १ ॥ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् ॥ श्रीवत्सवक्षा वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः ॥ २ ॥ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः ॥ प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कंठनिविष्टकौस्तुभः ॥ ३ ॥ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ॥ द्यौरंतरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥ ४ ॥

तथा कालात्मा भवान्विश्वमाक्षिपति ॥ २७ ॥ प्रजापतीनां च त्वमेव संभविष्णुरुत्पादनशीलोऽसि । अयं भावः । न ह्येवंभूतस्य तव जन्मादिसंभवः किं तु देवानां प्रजापतीनां प्रजानां च परमाश्रयत्वेन तत्कार्यसाधनायावतारोऽयमतस्तान्स्वर्गच्युतान्पुनः स्वर्गे स्थापयेति ॥ २८ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥ ततस्त्वष्टादशे भूत्वा वामनः सत्कृतोऽखिलैः ॥ यज्ञं गतस्ततस्तेन सत्कृत्योक्तो वरान् वृणु ॥ १ ॥ इत्थं विरिंचेन स्तुतं कर्म देवकार्यलक्षणं वीर्यं च प्रभावो यस्य स हरिरदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः । अमृतभूर्मृत्युजन्मशून्यः । शंखगदाब्जचक्राण्यस्य संतीति तथा । अर्शआदित्वेन मत्वर्थीयोऽच् प्रत्ययः । अविसर्गपाठे स चासौ पिशंगवासाश्च ॥ १ ॥ श्यामावदातः श्यामेषु प्रवरः । झषराजो मकरस्तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीर्वदनांबुजे यस्य । श्रीवत्सो वक्षसि यस्य । वलयैरंगदैश्च सहोल्लसंति किरीटादीनि यस्य ॥ २ ॥ श्रीमत्या वनमालया विराजितः । वेश्मगतं तमः ॥ ३ ॥ अग्निजिह्वा देवाः । नगाः पर्वताः ॥ ४ ॥

नद्यादिप्रवाहः । आकर्षति तीरं प्रत्यानयति ॥ २७ ॥ परायणमुत्कृष्टाश्रयः । अत्राशयमाह—अयं भाव इति । एवंभूतस्य सर्वोत्पत्त्यादिकारणस्य । यतो देवकार्यार्थमेवावतारोऽतो हेतोः। तान् देवान्॥ २८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥ ततो देवप्रार्थनानंतरम् । ततो यज्ञे गमनोत्तरम् । तेन बलिना (१) । इत्थं जयोरुगायेत्यादिरीत्या । मृतं मृतिः भूः भवनं जनिः मृतं च भूश्च मृतभुवौ न मृतभुवौ यस्य सोऽमृतभूः । यद्वा—प्राकृतानामिव न मृता नाशवती भूरुत्पत्तिर्यस्य 'जन्म कर्म च मे दिव्यम्' इत्युक्तेः । अविसर्गपाठे चक्रपिशंगेति पाठे ॥ १ ॥ २ ॥ प्रजापतेः कश्यपस्य । वेश्मगतं गृहगम् । स्वरोचिषा स्वांगतेजसा । तदाह—कंठनिविष्टेति । कौस्तुभादीनां सहैवाविर्भूतत्वेनांगत्वमेव हस्तादिवत् ॥ ३ ॥ तदा वामनाविर्भावसमये । सलिलाशया ह्रदाः । ऋतव इति बहुत्वेन कृष्णाविर्भावकालवत्सर्वर्त्तवस्तदा स्वस्वकालीनपुष्पादिरूपगुणान् दर्शयामासुः ! द्यौः स्वर्गोऽपि स्वस्वामींद्रप्राप्त्याशया प्रससाद । द्यौरिति तत्स्थगंधर्वादिपरं वा अग्निजिह्वानां पृथगुपदेशात् । अंतरिक्षप्रसादस्तु निर्मलोडुगणान्वितत्वादिरूपो ज्ञेयः । क्षितिरपि तत्स्थद्विजेतरगवितरनगेतरपरा द्विजादीनां पृथग्गणनात् । यद्वा—पादस्पर्शेनाहं सर्वोत्कृष्टा स्यामिति प्रसादः । नगप्रसादो नैर्मल्येन प्रतीतिस्तदधिष्ठातृदेवा वा ग्राह्याः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ॥ सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ॥५॥ द्वादश्यां सवितातिष्ठन्मध्यंदिनगतो नृप ॥ विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥ ६ ॥ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः ॥ चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥ ७ ॥ प्रीताश्चाप्सरसोऽनृत्यन्गंधर्वप्रवरा जगुः ॥ तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ॥८॥ सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः ॥ चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ९ ॥ गायंतोऽतिप्रशंसंतो नृत्यंतो विबुधानुगाः ॥ अदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥१०॥ दृष्ट्वाऽदितिस्तं निजगर्भसंभवं परं पुमांसं मुदमाप विस्मिता ॥ गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥ ११ ॥ यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः ॥ बभूव तेनैव स वामनो बटुः संपश्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥ तं बटुं वामनं दृष्ट्वा मोदमाना महर्षयः ॥ कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ॥ १३ ॥ तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥ १४ ॥

तत्प्रादुर्भावसमयमाह । श्रोणायामिति । भाद्रपदशुक्लद्वादशी श्रवणद्वादशीति प्रसिद्धा तस्याम् । तत्रापि श्रोणायां श्रवणस्थे चंद्रे इत्यर्थः । तत्रापि श्रवणस्य प्रथमांशेऽभिजिति नक्षत्रे । तच्च श्रुत्या दर्शितम् । "अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामधस्ताच्छ्रोणायाः" इति । एवंविशिष्टे मुहूर्ते सुसमये प्रभुः प्रादुर्बभूवेत्यर्थः । किं च नक्षत्राण्यश्विन्यादीनि । ताराशब्देन ग्रहा गुरुशुक्रादयस्ते आद्या येषां ते सूर्यादयोऽपि सर्वे तस्य जन्म दक्षिणमुदारं चक्रुः । जन्ममुहूर्ते गुणा बहवो बभूवुरित्यर्थः ॥ ५ ॥ विशेषांतरमाह । यस्या द्वादश्यां हरेर्जन्म तत्तस्यामहन्येव विदुः । तदा च मध्यंदिनगतः सविताऽतिष्ठत् । अनेन अभिजिन्मुहूर्ते जन्म उक्तं सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ॥ ६ ॥ शंखादयो ये तेषामन्येषां च चित्रतूर्याणां निर्घोषोऽभवत् ॥ ७ ॥ देवा मनव इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ॥ ८ ॥ ९ ॥ ॥ १० ॥ ११ ॥ विस्मयांतरमाह । यत्तदिति । यत्तद्वपुर्हरिरधारयत्प्रकटितवांस्तेनैव वपुषा मातापित्रोः संपश्यतोरेव वामनो बटुर्बभूव । दिव्यगतिरद्भुतचेष्टितः । स्वयं कथंभूतः । अव्यक्तचिद्रूपः । कथमधारयत् । भातिर्दीप्तिर्विभूषणानि चायुधानि च तैर्व्यक्तं यथा भवति तथा ॥ १२ ॥ कर्माणि जातकर्मादीनि ॥ १३ ॥ १४ ॥

तत्रापि भाद्रशुक्लद्वादश्यामपि । इत्यर्थ इति । श्रोणापदश्रवणर्क्षपरत्वस्य श्रुत्या दर्शितत्वाद्यद्दिने यन्नक्षत्रमस्ति तद्दिने तत्रैव चंद्रस्तिष्ठतीति भावः । तच्च श्रवणर्क्षप्रथमांशस्याभिजित्त्वम् । आषाढानामुत्तराषाढानां बहुत्वं तारापेक्षम् 'पूर्वाषाढे तथोत्तरे त्रयम्' इति काशीनाथोक्तेः । इत्यर्थ इति । पूर्वश्लोकोक्तं क्रियापदमत्रानेयमिति भावः । अन्यदाधिक्यमाह–किंचेति, तस्य । "दक्षिणः सरलोदारे निपुणे चंदनद्रुमे" इति विश्वः । इत्यर्थ इति । अतीव शोभनसमये भगवानाविर्बभूवेति भावः ॥५॥ विशेषांतरमाधिक्यांतरम् । तत् जन्म । तस्यां द्वादश्याम् । तदा च तस्मिन्दिने च । अत्र 'मध्यंदिनगतोऽहनि' इति पाठोऽपेक्षितो भाति स्वामिचरणैः । यस्यां द्वादश्यां हरेर्जन्म तत्तस्यामहन्येव विदुरित्यन्वयोक्तेः । विश्वनाथोऽपि अहनि मध्यंदिनगतः सविता यदाऽभूत्तदा जन्मेति शेष इति योजनां कुर्वन्नुक्तमेव पाठमभिप्रैति । दृष्टश्चायं पाठः केषुचित्पुस्तकेषु ॥ ६ ॥ तुमुलो रोमहर्षोत्पादकः ॥७॥ गंधर्वेषु प्रवरा हाहाहूहूप्रभृतयः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ व्यक्तं सहजातत्वात्तैर्दीप्त्यायैरीशोऽयं नान्यत्र भूषणायुधादीनां सहजत्वमिति प्रकटितम् ॥ १२ ॥ बटुं बालम् "बटू स्तो बालवर्णिनौ" इति धरणिः । प्रजापतिं ब्रह्माणं कश्यपं वा ॥ १३ ॥ तस्य वामनबटोः । उपनीयमानस्य योपनयनक्रियां प्राप्तस्य । ब्रह्मसूत्रमुपवीतम् । मेखलां प्रवरग्रंथियुतां मौंजीं कांचीम् 'मेखला खड्गबंधे स्यात्कांची शैलनितंबयोः' इति मेदिनी ॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः ॥ कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥ १५ ॥ कमंडलुं वेदगर्भः कुशान्सप्तर्षयो ददुः ॥ अक्षमालां महाराज सरस्वत्यव्ययात्मनः ॥ १६ ॥ तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ॥ भिक्षां भगवती साक्षादुमाऽदादंबिका सती ॥ ॥ १७ ॥ स ब्रह्मवर्चसेनैवं सभां संभावितो बटुः ॥ ब्रह्मर्षिगणसंजुष्टामत्यरोचत मारिषः ॥ १८ ॥ समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् ॥ परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः ॥ १९ ॥ श्रुत्वाऽश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ॥ जगाम तत्राखिलसारसंभृतो भारेण गां सन्नमयन्पदेपदे ॥ २० ॥ तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञके ॥ प्रवर्तयंतो भृगवः क्रतूत्तमं व्यचक्षतारादुदितं यथा रविम् ॥ २१ ॥ त ऋत्विजो यमानः सदस्याः हतत्विषो वामनतेजसा नृप ॥ सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥ २२ ॥ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः ॥ छत्रं सदंडं सजलं कमंडलुं विवेश बिभ्रद्धयमेधवाटम् ॥ २३ ॥ मौंज्या मेखलया वीतमुपवीताजिनोत्तरम् ॥ जटिलं वामनं विप्रं मायामाणवकं हरिम् ॥ २४ ॥

वनस्पतिर्वनानां पतिः सोमः ॥ १५ ॥ १६ ॥ पात्रिकां भिक्षापात्रीम् ॥ १७ ॥ स एवं संभावितो मारिषः श्रेष्ठो बटुर्ब्रह्मवर्चसेन ब्रह्मर्षिगणसंजुष्टां तां सभामतिक्रम्यारोचत ॥ १८ ॥ १९ ॥ यदर्थं बटुर्बभूव तदाह श्रुत्वेत्यादि यावत्समाप्ति । यजमानं यजंतम् । भृगूणां भृगुभिः । उपकल्पितैः प्रवर्तितैः । अखिलेन सारेण बलेन संभृतः संपूर्णः ॥ २० ॥ नर्मदाया उत्तरे तटे भृगुकच्छसंज्ञके क्षेत्रे क्रतूत्तमं प्रवर्तयंतो ये बलेर्ऋत्विजो भृगवस्ते तं व्यचक्षतापश्यन् । आरात्समीप एवोदितं रविमिव ॥ २१ ॥ तम् ऋत्विगादयः सूर्यः किलेत्येवमादि व्यतर्कयन्निति शेषः ॥ २२ ॥ हयमेधवाटमश्वमेधमंडपं विवेश ॥ २३ ॥ उपवीताजिनमुपवीतवद्धृतमजिनमेवोत्तरमुत्तरीयं

कौपीनं गुह्यप्रदेश आच्छाद्यतेऽनेनेति कौपीनाच्छादनं चीरम् ''कौपीनं स्यादकार्येऽपि चीरगुह्यप्रदेशयोः'' इति मेदिनी । यद्वा–कौपीनं चाच्छादनमंसधार्यं वस्त्रं चेति कौपीनाच्छादनं वस्त्रद्वयमित्यर्थः । द्यौः तदभिमानिनी देवता ॥ १५ ॥ वेदगर्भो ब्रह्मा । अक्षमाला जपमाला । ''आदिक्षांताक्षरमिता जपमालाक्षमालिका'' इति मंत्रकोशात् ॥ १६ ॥ यक्षराट् कुबेरः । उमेति । 'उमा सस्यविशेषः स्याद्धिमालयसुताऽपि च' इति हट्टः । इति सस्यरूपार्थान्तरवारणाय आह–अम्बिकेति । मातृवारणायाह–सती दक्षात्मजेति ॥ १७ ॥ संभावितः पूज्यः ॥ १८ ॥ परिसमूहनं कुशैर्भूमिसमूहनं कृत्वा आहितं स्थापितम् वह्निं परिस्तीर्य आग्नेयादीशानांतं ब्रह्मणोग्निपर्यंतमित्याद्युक्तरीत्या परिस्तरणं विधाय समिद्भिः प्रादेशमितसमित्त्रयेण समभ्यर्च्य अजुहोत् । शेषहोममकरोत् ॥ १९ ॥ ततः कश्यपाश्रमात्तत्र जगाम यत्र बलिर्यागमकरोदिति ॥ २० ॥ उत्तरे तटे परपारे । तं वामनम् ॥ २१ ॥ विभावसुरग्निः '' विभावसुः पुमान्सूर्ये हारभेदे च पावके '' इति मेदिनी ॥ २२ ॥ सशिष्यैर्भृगुभिरित्यर्थः । ' छत्रं सदंडम् ' इति पाठस्तु प्राचीनः । हयमेधशालाम् ॥ २३ ॥ मायया माणवकं बालम् '' माणवको हारभेदे बाले कुपुरुषे तथा '' इति मेदिनी । वस्तुतो हरिं सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः ॥ प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा ॥ २५ ॥ यजमानः प्रमुदितो दर्शनीयं मनोरमम् ॥ रूपानुरूपावयवं तस्मा आसनमाहरत् ॥ २६ ॥ स्वागतेनाभिनंद्याथ पादौ भगवतो बलिः ॥ अवनिज्यार्चयामास मुक्तसंगं मनोरमम् ॥ २७ ॥ तत्पादशौचं जनकल्मषापहं स धर्मविन्मूर्ध्न्यदधात्सुमंगलम् ॥ यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥ २८ ॥ बलिरुवाच ॥ स्वागतं ते नमस्तुभ्यं ब्रह्मन्किं करवाम ते ॥ ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरम् ॥ २९ ॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ॥ अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ॥ ३० ॥ अद्याग्नयो मे सुहुता यथाविधि द्विजात्मजत्वच्चरणावनेजनैः ॥ हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ३१ ॥

यस्य तम् ॥ २४ ॥ संक्षिप्ता अभिभूताः संतः ॥ २५ ॥ रूपस्यानुरूपा अवयवा यस्य तम् । दृष्ट्वेति शेषः ॥ २६ ॥ २७ ॥ चंद्रमौलिश्चेत्यन्वयः । अप्यर्थे चकारः चंद्रमौलिरपि गंगारूपं यन्मूर्ध्ना दधारेत्यर्थः ॥ २८ ॥ हे आर्य त्वा त्वां साक्षात्प्रत्यक्षं ब्रह्मर्षीणां तप एव मन्ये । कथंभूतं तपः वपुर्धरं मूर्तिधारि ॥ २९ ॥ ३० ॥ त्वच्चरणावनेजनैर्वार्भिर्हतमंहो यस्य तस्य मे । पुनीता पवित्रीकृता ॥ ३१ ॥

स्वहरम् । ननु ‘ सशिखक्कृतक्षौरमुपनयेत् ’ इत्युक्तमुपनयनपद्धतौ ‘ सशिखं वपनं कृत्वा व्रतं कुर्यात् ’ इति स्मृतेस्तत्त्वेत्थम् “ रिक्तो वा एषो न पिहितो यन्मुंडस्तस्यैतदापिधानं यच्छिखा ” इति । तासां मध्यशिखावर्जे मुपनयने वपनं कार्यम् । “ प्रतिदिशश्च वपति ” इति श्रुतेः । श्रीवामनस्यापि “ तस्योपनीयमानस्य सावित्रीं सविताब्रवीत् ” इत्युक्तेरुपनीतत्वाज्जटिलमित्युक्तिः कथं संगच्छेत । “ जटिला पिप्पलीमांस्योर्जटायुक्ते तु वाच्यवत्” इति मेदिन्युक्तेः । अत्रेदमवधेयम् । जटिभिर्जटायुक्तैस्तपस्विभिर्लीयते गृह्यत इति जटिलस्तम् “ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्द्धरम्” इत्युक्तेः तपोमूर्त्तिमित्यर्थः । यद्वा—बहुकर्तृकोपनयने मुंडनाभाव एवास्ति जटिलमित्युक्त्यैव ज्ञाप्यत इति किञ्चिन्मायया स्वरूपशक्त्यैव बालम् “ स्वरूपभूतया नित्यशक्त्या मायाख्यया युतम् ” इति श्रुतेः ॥ २४ ॥ प्रत्यगृह्णन्पाद्यार्घ्यादिदानेन संमानयामासुः । “ प्रतिग्रहस्स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे । द्विजेभ्यो विधिवद्देये ” इति मेदिनी ॥ २५ ॥ अनुरूपा योग्याः शरीरानुसारिहस्तपादादयोऽवयवाः । तस्मै वामनाय ॥ २६ ॥ मुक्तसंगानामात्मारामाणां मनो रमयति स्वानुरागि करोतीति तथा तम् ॥ २७ ॥ कलिः कलहो युगश्च । यद्वा—कलिसंबंधिकल्मषापहम् । कुलेति पाठे कुलस्य वंशस्य कल्मषापहम् । एकोऽपि यदि तत्स्पृशेत्तर्हि कुलमेव तदीयं निष्पापं भवेदित्यर्थः । क्वचिज्जनकल्मषेति पाठः । स च सुबोध एव । स बलिः । इत्यर्थ इति । अहो तन्माहात्म्यं सकलदेवर्षिवंद्यो महादेवोऽपि तद्दधारेति भावः । चंद्रमौलिरिति । ललाटधृतचन्द्रोऽपि चंद्रस्योपरि दधारेति भावः ॥ २८ ॥ आर्य पूज्य ॥ २९ ॥ स्विष्टः सुपूजितः । यद्यतः ॥ ३० ॥ तनुभिः सूक्ष्मैः । पुनीतेति प्रयोगस्त्वार्षः ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यद्वटो वांछसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये ॥ गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्र कन्याम् ॥ ग्रामान्समृद्धांस्तुरगान्गजान्वा रथांस्तथाऽर्हत्तम संप्रतीच्छ ॥ ३२ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे बलिवामनसंवादेष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच ॥ इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतम् ॥ निशम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत् ॥ १ ॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करम् ॥ यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः ॥ २ ॥ नह्येतस्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमान् ॥ प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥३॥ न संति तीर्थे युधि चार्थिनार्ऽथिताः पराङ्मुखा ये त्वमनस्विनो नृपाः॥ युष्मत्कुले यद्यशसाऽमलेन प्रह्राद उद्भाति यथोडुपः खे ॥ ४ ॥ यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् ॥ प्रतिवीरं दिग्विजये नाविंदत गदायुधः ॥ ५ ॥ यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम् ॥ नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ६ ॥ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ॥ हंतुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥ ७ ॥ तमायांतं समालोक्य शूलपाणिं कृतांतवत् ॥ चिंतयामास कालज्ञो विष्णुर्मायाविनां वरः ॥ ८ ॥

मे मत्तः प्रतीच्छ गृहाण । हे अर्हत्तम पूज्यतम ॥३२॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे टीकायामष्टादशोऽध्यायः ॥१८॥ ऊनविंशे तु हरिणा याचिते च पदत्रये ॥ प्रतिश्रुते च बलिना जानन्भृगुरवारयत् ॥ १ ॥ १ ॥ "दातुः स्तुतिः स्वयंतुष्टिरित्यादिप्रस्तुतोचितम् ॥ वक्तव्यमिति भिक्षूंस्तु शिक्षयन्नाह वामनः ॥१॥" वचस्तवैतदिति षोडशभिः । हे जनदेव सांपराये पारलौकिके धर्मे पितामहश्च प्रह्लादः प्रमाणम् ॥२॥ निःसत्त्वस्य लक्षणं यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्ता । कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य यो वा न दातेति ॥ ३ ॥ तीर्थे दानावसरे । यद्यस्मिन्युष्मत्कुले ॥ ४ ॥ यतो यस्मिन् जातः ॥५॥ क्ष्मोद्धारे भूम्या उद्धरणे ॥ ६ ॥ ७ ॥ ८ ॥

गुणवत् शीतोष्णवृष्टिकालेषु सुखदं तेन शीतकाले उष्णमुष्णकाले शीतं वर्षासु वाय्वागमनयुतं जलस्रावहीनमित्युक्तम् । 'गुणवाय्यवस्त्रम्' इति पाठे तु गुणवन्नानावर्णतंतुनिर्मितम् । मृष्टं शुद्धम् समृद्धान्बहुसस्योत्पत्तिमत्क्षेत्रवतः वाशब्दाद्यदन्यदभीप्सितं तदपि गृहाणेति भावः ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ प्रतिश्रुते प्रतिज्ञाते (१) । स्वयंतुष्टिः स्वस्य संतोषः (२) । स वामनः । सूनृतं प्रियसत्ययुतम् । "सूनृतं मंगलेऽपि स्यात्प्रियसत्ये वचस्यपि" इति मेदिनी ॥ १ ॥ यस्य तत्र ॥ २ ॥ स्तुत एव सर्वोऽभीष्टदो भवतीति सूचयन्नाह—न हीति ॥३ ॥ अर्थिना विप्रेण दानावसरे युधि त्वर्थिना क्षत्रियेण चार्थिताः प्रार्थिता अमनस्विनोऽनुदारचित्ताः पराङ्मुखाश्च न संतीति क्रमेण योज्यम् । 'ये तु मनस्विनः' इति पाठः शोभनः प्रतिभाति । तत्र च ये नृपा मनस्विनः स्थिरचित्तास्ते तीर्थे युधि चार्थिताः पराङ्मुखा न संतीति योजना । नैतादृशास्तव कुले संतीति भावः उडुपश्चंद्रः॥४॥५॥कुर्वंतीति कृतः कृतिनस्तानयत्याश्रयतीति कृच्छ्रो यत्नस्तेनेति वास्तवोर्थः । जयिनं न मेने । तज्जन्मद्वयजयस्यावशिष्टत्वात् । तीर्थस्तु—क्ष्माया भूमेरुद्धारो येन स तथा । विष्णुर्नो परपुरुषः । यं विनिर्जित्य तत्स्वीयं वीर्यं भूर्यनंतं स्मरन् आत्मानं जयशीलोपेतम कृच्छ्रेणागतं प्राप्तम्। यद्वा—तद्वीर्यं स्मरन्नेवात्मात्मानं जयिनं न मेने किन्तु ततः प्रागपि नित्यजयित्वात्स्वस्य 'विष्णुर्जयति नासुरः' इति गारुडाच्च ॥ ६ ॥ तद्वधं हिरण्याक्षवधम् । निलयं श्वेतद्वीपादिरूपम् ॥ ७ ॥ तं हिरण्यकशिपुम् । मायाविनां कृपालूनां ज्ञानिनां वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतोयतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ॥ अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥ ९ ॥ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेंद्र ॥ श्वासानिलांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः ॥ १० ॥ स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ॥ क्ष्मां द्यां दिशः खं विवरान्समुद्रान्विष्णुं विचिन्वन्न ददर्श वीरः ॥ ११ ॥ अपश्यन्निति होवाच मयाऽन्विष्टमिदं जगत् ॥ भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ॥ १२ ॥ वैरानुबंध एतावानामृत्योरिह देहिनाम् ॥ अज्ञानप्रभवो मन्युरहंमानोपबृंहितः ॥ १३ ॥ पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः ॥ स्वमायुर्द्विजलिंगेभ्यो देवेभ्योऽदात्स याचितः ॥ १४ ॥ भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ॥ ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ॥ १५ ॥ तस्मात्त्वत्तो महीमीषद्वृणेऽहं वरदर्षभात् ॥ पदानि त्रीणि दैत्येंद्र संमितानि पदा मम ॥ १६ ॥

पराग्दृशो बहिर्दृष्टेः ॥ ९ ॥ अतो हृदये स्थितं मां न ज्ञास्यतीत्येवं निश्चित्य श्वासानिलेंतर्हितः सूक्ष्मो देहो यस्य । विग्निमतिकंपितं चेतो यस्य । अकंपितचित्त इति वास्तवोऽर्थः ॥ १० ॥ न ददर्श अंतःप्रविष्टत्वात् ॥ ११ ॥ पुमान्यतः सकाशान्नावर्तते तद्ब्रह्मैव नूनं गतो नित्यमुक्तत्वादिति वास्तवोऽर्थः ॥ १२ ॥ एवं मृत्युपर्यंतमखंडं विष्णोर्वैरं यत्कृतवांस्तदुचितमेव तस्याप्रतिद्वंद्वमहाबलपराक्रमस्य शूराहंमानविजृंभितक्रोधानुबंधस्य कथं नामासौ शूरशिरोमणिर्जीवन्नेव कातरवद्वैरमुपेक्षितवानित्याशंक्याह । वैरानुबंध एतावानामृत्योर्भवति । देहिनां देहे निगूढाभिमानवतां शूराणां तथाऽहंमानेनोपबृंहितो मन्युश्च भवत्येव । यतोऽज्ञानप्रभवः अज्ञाननिवृत्तेः प्राक् पौरुषत्यागो मांद्यमेवेत्यर्थः ॥ १३ ॥ तदेवं पूर्वजान्स्तुत्वा तत्पितरं स्तौति । पितेति । द्विजवेषधारिणो मद्वैरिणो देवा एते न तु द्विजा इति तद्विद्वानपि स याचितः सन्स्वीयमायुर्देवेभ्योऽपि वैरिभ्यो ददौ ॥ १४ ॥ १५ ॥ मम पदा संमितानीति त्रिविक्रमपदाभिप्रायेण । न चानृतवादः । तत्रापि स्वपदत्वानपगमात् ॥ १६ ॥

' माया स्याज्ज्ञानकृपयोः ' इति विश्वादिः ॥ ८ ॥ यतो हेतोः । यतो यत्र अहं गमिष्यामि तत्रासौ हिरण्यकशिपुः जीवेश्वरयोरेकत्र समावेशस्य नित्यत्वात् ''समानं वृक्षं परिषस्वजाते '' इति श्रुतेः । अतो हेतोः । परं दूरमंचतीति पराक् तत्स्थं पश्यतीति तथा दूरदर्शिनो वा तथा च दूरदर्शित्वाद्धृदयस्थमतिनिकटं मामयं न चक्षुरंजनमिव द्रक्ष्यतीति भावः ॥ ९ ॥ हे असुरेंद्र बले विशब्दस्य गतार्थत्वस्वीकारेण विगतं विग्नं भयं यस्मात् तद्विविग्नं तादृशं चेतो यस्य स तथा । इदानीं नायं मारणीय एतद्भोगस्यावशिष्टत्वादित्यनुकंपितोऽभूदिति भावः ॥ १० ॥ निकेतं परिमृश्य दृष्ट्वा सोऽसुरः तमपश्यमानः शून्यं यथा स्यात्तथा ननादेति संबंधः । कुतो न ददर्श यतो वीरः विगतमीरं ज्ञानं यस्य स तथा । एतेन पराग्दृक्त्वं समर्थितम् ॥ ११ ॥ १२ ॥ तत् वैरकरणम् । तस्यासुरस्य । अत्राक्षिपति–कथं नामेति । असौ हिरण्यकशिपुः । इत्यर्थ इति । ज्ञानिनस्तु कृतकृत्यत्वात्किंचित्कर्तव्यं नास्ति लोकसंग्रहमंतरेणेति भावः ॥ १३ ॥ प्रह्लादस्य पुत्रो विरोचनः । पुराणांतरे चेयं कथा युद्धपरित्रस्तैर्देवैर्विरोचनं ब्रह्मण्यं ज्ञात्वा विप्रवेषेण तत्पार्श्वमागत्य तदायुर्याचितं तेन च तत्कपटं ज्ञात्वाऽपि तद्दत्तमिति ॥ १४ ॥ ब्राह्मणैर्दध्यङ्ङादिभिः । पूर्वजैः पित्रादिभिः । अन्यैः शूरैर्दानशूरैर्हरिश्चंद्रादिभिः । उद्दामकीर्तिभिर्विजृंभितयशोभिः । आचरितान् अनुष्ठितान् ॥ १५ ॥ यस्मात्त्वं पुण्यवतां कुले जातोऽसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नान्यत्ते कामये राजन्वदान्याज्जगदीश्वरात् ॥ नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः ॥ १७ ॥ बलिरुवाच ॥ अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः ॥ त्वं बालो बालिशमतिः स्वार्थे प्रत्यबुधो यथा ॥ १८ ॥ मां वचोभिः समाराध्य लोकानामेकमीश्वरम् ॥ पदत्रयं वृणीते यो–बुद्धिमान्द्वीपदाशुषम् ॥ १९ ॥ न पुमान्मामुपव्रज्य भूयो याचितुमर्हति ॥ तस्माद्वृत्तिकरीं भूमिं बटो कामं प्रतीच्छ मे ॥ २० ॥

यावदर्थमेव प्रतिग्रहो यस्य सः ॥१७॥ ईश्वरस्यापि याच्ञाप्रकारं चोक्त्वा बलेर्बंधनप्रश्नोत्तरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह अहो इति त्रिभिः । ते तव वाचो वृद्धानां संमतास्त्वं तु बालो बालिशमतिश्च । बालिशानामज्ञानामिव मतिर्यस्य । अत एव स्वार्थे प्रति यथावदबुधः । वस्तुतस्तु बाल इवाबालिशमतिश्चेति छेदः । स्वार्थे प्रत्यबुध इति च भक्तानामेवार्थे बुध्यसे न स्वार्थम् । परिपूर्णस्य तव तद्व्यतिरेकेण स्वार्थाभावादित्यर्थः ॥ १८ ॥ अबुधत्वमेवाह । मामिति । द्वीपस्य दाशुषं दातारम् । अबुद्धिमान्वस्तुतस्तु बुद्धिमानित्येव छेदः ॥ १९ ॥ कामं यथेच्छं सम्यक्पादप्रसारणेनेत्यर्थः । अत एव तथा करिष्यति ॥ २० ॥

तस्माद्धेतोः । पदानीति बहुवचनोक्त्या भीतो मा भूरित्याह–त्रीणीति । तेषां महत्त्वेन भयशंका तद्वदर्स्थैवेति चेत्तत्राह–संमितानीति । नन्वल्पवपुर्दर्शयित्वा पुनर्भूमाने दीर्घकरणेनानृतवादित्वं स्यादत आह–न चेति । तत्रापि दीर्घवपुष्यपि ॥ १६ ॥ इतोऽप्यधिकं गृहाण दास्यामीति चेदाह- वदान्याद्दानशौंडात् ''वदान्यो दानशौंडे स्याच्चारुवादिनि वाच्यवत्'' इति मेदिनी । 'दशसूनासमो नृपः' इत्युक्ते राजप्रतिग्रहात्तव दोषः किं न स्यात्तत्राह- यावदर्थमिति । यावताऽर्थः प्रयोजनं सिध्यति तावतः प्रतिग्रहो यस्य स तथा । एनो दूषणम् ''न वा अजीवी स्यामिमां च खादन्'' इति श्रुतेः । इमां जाघनीम् । अजीवी जीवरहितो नाहं स्यामिति विश्वामित्रः । विद्वान् प्रतिग्रहदोषापाकरणज्ञानवान् । यद्वा– यावतस्तवार्थास्तेषां परिग्रहो यस्य स तल्लक्षणो विद्वानेनः कष्टं नाप्नोतीति वास्तवोर्थः ॥ १७ ॥ ब्राह्मणस्य दायादः पुत्रः 'दायादौ पुत्रबांधवौ' इति विश्वः । एतेनादीर्घदर्शित्वमुक्तम् । ''अदीर्घदर्शिनो विप्राः परशुरामस्य शापतः'' इत्युक्तेः । यद्वा–ब्राह्मणाय दीयत इति ब्राह्मणदायस्तमत्तीति ब्राह्मणदायादस्तत्सम्बुद्धौ तथा ''ब्राह्मणोऽस्य मुखमासीत्'' इति श्रुतेर्मुखदत्तमेव भुज्यते न तु बाह्वादिदत्तमपि । उक्तमपि''यद्ब्राह्मणस्य मुखतश्चरतोऽनुघासम्'इत्यादिना तृतीयादौ । तथा ब्राह्मणो भूत्वैव मम यज्ञ आगतोस्यतोऽहमपि दास्याम्येवेति भावः। अवृद्धानां वासुदेववर्द्धितानां भक्तानां संमताः । यद्वाऽवृद्धानामज्ञानां संमताः । कुतस्तत्राह–त्वं बाल इति । ननु बुद्धिवैशद्ये बालत्वमप्रयोजकमिति चेदाह–बालिशो जडमतिः स्वप्रयोजनज्ञानहीनः । कथमेतदवगतं तत्राह–मां बचोभिरित्यादि । अबुद्धिमानिति स्वामिचरणव्याख्यातमाह । बंधनप्रश्नः लब्धार्थोऽपि बबंध तमिति प्रश्नः । तस्योत्तरत्वे गर्वाधिक्येनाधिक्षेपो निंदामिश्रितवचः । अत एव बालिशमतित्वादेव । इत्यर्थ इति । भक्तार्थ एव तवार्थः ''आप्तकामः'' इति श्रुतेरिति भावः ॥ १८ ॥ १९ ॥ स्वाधिक्यमाह–नेति । उपव्रज्य याचित्वा । यतोऽहं बहुदाता तस्माद्धेतोः । इत्यर्थ इति । भगवति यथेच्छत्वानुज्ञापनेन दीर्घपादभूप्रमापणेऽपि न दोष इति भावः । अत एव यथेष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ यावंतो विषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियम् ॥ न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप ॥ २१ ॥ त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते ॥ नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥ २२ ॥ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः ॥ अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतम् ॥ ॥ २३ ॥ यदृच्छयोपपन्नेन संतुष्टो वर्तते सुखम् ॥ नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥ पुंसोऽयं संसृतेर्हेतुरसंतोषोऽर्थकामयोः ॥ यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः ॥ २५ ॥ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः ॥ २६ ॥ तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात् ॥ एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम् ॥ २७ ॥ श्रीशुक उवाच ॥ इत्युक्तः स हसन्नाह वांछातः प्रतिगृह्यताम् ॥ वामनाय महीं दातुं जग्राह जलभाजनम् ॥ २८ ॥ विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरम् ॥ जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदां वरः ॥ २९ ॥ शुक्राचार्य उवाच ॥ एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः ॥ कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ ३० ॥ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ॥ न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥ ३१ ॥ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम् ॥ दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ॥ ३२ ॥ त्रिभिः क्रमैरिमाँल्लोकान्विश्वकायः क्रमिष्यति ॥ सर्वस्वं विष्णवे दत्त्वा मूढ वर्तिष्यसे कथम् ॥ ३३ ॥ क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः ॥ खं च कायेन महता तार्तीयस्य कुतो गतिः ॥ ३४ ॥

पुनरपि निःस्पृहत्वमेवाविष्कुर्वन्नाह यावंत इति सप्तभिः ॥ २१ ॥ नववर्षसमेतेन द्वीपेनापि । सप्तानां द्वीपवराणामिच्छया ॥ २२ ॥ तृष्णाया अंतं न गता इत्यस्माभिः श्रुतम् ॥ २३ ॥ असंतुष्टस्तु प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्तते ॥ ५४ ॥ २५ ॥ आशुशुक्षणिरग्निः ॥ २६ ॥ सिद्धोऽहं कृतार्थः एतावतैव । सर्वस्वापहारसिद्धेरिति गूढोऽभिप्रायः । तदेवाह । वित्तं हि यावत्प्रयोजनमेव सुखम् । अधिकस्य क्लेशावहत्वादित्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ अनयोऽन्यायः ॥ ३१ ॥ अन्यायमेवाह । एष इति ॥ ३२ ॥ ननु मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राह । त्रिभिरिति । क्रमतामिति चेत्तत्राह । सर्वस्वमिति ॥ ३३ ॥ तथाऽपि प्रतिश्रुतं संपादनीयमेवेति

मनुज्ञानादेव । तथा यथेच्छम् ॥ २० ॥ भगवान्स्वस्यालालसत्वं द्योतयन्नाह–यावंत इति । प्रतिपूरयितुमलंबुद्धिं कारयितुम् । नृपेत्यधिकाभिलाषुकत्वमाह ॥ २१ ॥ द्वीपेन जंबूद्वीपेन । नवभिर्वर्षैः समेतेन सप्तद्वीपवरेच्छया हेतुना ॥ २२ ॥ सप्तद्वीपानेव गृहाणेति चेदाह–सप्तद्वीपेति । आदिना प्रियव्रतादिग्रहः ॥ २३ ॥ यदृच्छया स्वत एव । उपसादितैः प्राप्तैः ॥ २४ ॥ अयमिति । साक्षाद्दृश्यमानः ॥ २५ ॥ तेजो बलादिकं ब्राह्मं वा । तत्तेजः । "अशुशुक्षणिरर्केऽग्नौ यजनेष्यासुतीवले" इति हलायुधः ॥ २६ ॥ यतोऽहं संतुष्टस्तस्माद्धेतोः । इत्यर्थ इति । "आये दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः" इत्युक्तेरिति भावः ॥ २७ ॥ अहो अधिकगृहीताप्ययं किमर्थं तन्मद्दत्तं न गृह्णातीति विस्मयेन हसन्नाह–वांछातः वांछितम् ॥ २८ ॥ विदुषा गुरुणा शिष्याय हितं वाच्यमिति शिक्षयन्नाह–उशना शुक्रः । क्ष्मां भूमिम् ॥ २९ ॥ एष वामनबटुः ॥ ३० ॥ अनर्थं वंचनारूपम् । यत्प्रतिश्रुतं तदहं न साधु मन्य इत्यन्वयः । अन्यायो दुःखहेतुः ॥ ३१ ॥ ३२ ॥ अत्राक्षिपति–नन्विति । तत्राक्षेपे । स्ववासयोग्यभूमेरप्यरक्षणान्मूढोसीत्यभिप्रायः ॥ ३३ ॥ यद्यप्यहं मूढस्तथापीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् ॥ प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ॥ ३५ ॥ न तद्दानं प्रशंसंति येन वृत्तिर्विपद्यते ॥ दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ॥ ३६ ॥ धर्माय यशसेऽर्थाय कामाय स्वजनाय च ॥ पंचधा विभजन् वित्तमिहामुत्र च मोदते ॥ ३७ ॥ अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम ॥ सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३८ ॥ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते ॥ वृक्षे जीवति तन्न स्यादनृतं मूलमात्मनः ॥ ३९ ॥

चेत्तत्राह क्रमत इति द्वाभ्याम् । एकेन पदा पादन्यासेन भूमिं क्रममाणस्येत्यर्थः । तार्तीयस्य तृतीयपादन्यासस्य ॥ ३४ ॥ ३५ ॥ तथाऽपि सर्वस्वदानात्कीर्तिस्ता वद्भविष्यतीति चेत्तत्राह । न तद्दानमिति । तपस्विचैकाग्र्यम् । कर्म पूर्तम् ॥ ३६ ॥ ३७ ॥ ननु तर्हि प्रतिश्रुत्य नेति कथमनृतं वाच्यं तत्राह अत्रापीति सार्धैः षड्भिः । अत्रापि सत्यानृतव्यवस्थायाम् । बह्वृचैर्ऋग्वेदिभिः । बह्वृचश्रुत्या हि "प्रथममोमिति सत्यं नेत्यनृतम्" इत्यादिना सत्यानृतयोर्लक्षणपूर्वकं स्तुतिनिंदाभ्यां सत्यं विहितमनृतं च निषिद्धम् । अनंतरं च " पराग्वा एतद्रिक्तमक्षरम् " इत्यादिना सत्ये दोषाननृते च गुणानुक्त्वा " तस्मात्काल एव दद्यात्कालेन दद्यात्तत्सत्यानृते मिथुनीकरोति " इत्युपसंहारेण वृत्तिसंकटादिष्वनृतमप्यनुज्ञातम् । तमिमं श्रुत्यर्थं दर्शयन्नाह । ओमित्यंगीकारेण यत्प्रोक्तं तत्सत्यम् । नेति यदाह तदेवानृतम् ॥ ३८ ॥ तत्तु सत्यमीष दनृतं विना न सिध्यतीत्याशयेनाह । सत्यं पुष्पफलं विद्याज्जानीयात् । आत्मवृक्षस्य देहरूपस्य वृक्षस्य । कुतः । गीयते श्रुत्योच्यते इत्यर्थः । आत्मवृक्षस्य जीवत इति पाठांतरं तु सुगमम् । यद्यपि श्रुत्या वाचः सत्यं पुष्पं फलं चेत्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वादात्मवृक्षस्येति प्रस्तुतानुसारेणोक्तम् । भवतु पुष्पफलस्थानीयं सत्यम् । ततः किमत आह । वृक्षे देहेऽजीवति तत्पुष्पफलं न स्यात् । सा नस्यादिति पाठे श्रुत्युक्ताया वाचः परामर्शः । अतो देहश्चानृतेन रक्षणीय इत्याह । अनृतं त्वात्मनो

इत्यर्थ इति । सर्वा भूमिरेकपादाधो यास्यतीति भावः । ऊर्द्ध्वं स्थितस्य भूप्रमापणे खस्यार्थलब्धत्वात्कायेन तदादानेऽपि न त्रिपदप्रतिज्ञा हीयत इति ॥ ३४ ॥ निष्ठां नितरां स्थितिम् । प्रतिश्रुतमदातुस्ते नरके निरये "विप्रसंकल्पितद्रव्यापूरणे निरयो नृणाम्" इत्युक्तेः । यद्वा-हे नर बले प्रतिश्रुतं भूपादत्रयम् आय वासुदेवाय प्रदातुस्ते के स्वर्गे निष्ठां मन्ये भावींद्रत्वात् । यो भवान् प्रतिश्रुतस्य प्रतिपादयितुं न ईशो यस्मात्सोऽनीशः समर्थः 'भक्तानां किन्न सिद्ध्यति' इत्युक्तेः । यद्यपि 'सुतलं स्वर्गिभिः प्रार्थ्यम्' इत्युक्तेस्सुतललोकस्य स्वर्गाधिक्यं प्रतीयते तथापि तस्य मायामयभोगस्थानत्वाद्भगवत्प्रतिपादितदानफलत्वं नास्ति तद्वर्णितं तथैव पंचमस्कंधे । तत्फलं तु भगवत्सन्निधिरेव । तथा च के सुखरूपे ब्रह्मणि निष्ठां मन्य इति वास्तवोर्थः । सुतलेऽधोमगनसाम्यान्नरकशब्दप्रयोगः ॥ ३५ ॥ यद्यप्यहं पूरयितुमसमर्थस्तथापीति । विपद्यते नश्यति । यतो हेतोः ॥ ३६ ॥ पंचधा धनविनियोगीहामुत्र सुखभाग्भवतीत्याह—धर्मायेति । अर्थाय कोशवृद्धये ॥ ३७ ॥ अत्राशंकते—नन्विति । अनंतरं सत्यानृतविधिनिषेधानंतरम ॥ ३८ ॥ इत्यर्थ इति । कुत इत्यस्याग्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ॥ एवं नष्टानृतः सद्य आत्मा शुष्येन्न संशयः ॥ ४० ॥ पराग्रिक्तमपूर्णं वा अक्षरं यत्तदोमिति ॥ यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान् ॥ ४१ ॥ भिक्षवे सर्वमों कुर्वन्नालं कामेन चात्मने ॥ अथैतत्पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ॥ सर्वं नेत्यनृतं ब्रूयात्स दुष्कीर्तिः श्वसन्मृतः ॥ ४२ ॥

देहस्य मूलम् ॥ ३९ ॥ एतदेव दृष्टांतेन स्पष्टयति । तद्यथा वृक्ष उत्पाटितमूलः शुष्यत्यचिरादेवोद्वर्तते पतति च एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत् । यद्यपि च श्रुत्या एवमेवानृतं वदन्नात्मानमाविर्मूलं करोतीत्येवं निंदयाऽनृतं निषिद्धं तथाऽप्युपसंहारानुसारेण तत्केवलानृतविषयमित्यभिप्रेत्यैवं व्याख्यातम् । 'दयेत त्वेतेन' इति च तयैवोक्तेः । तथा च श्रुतिः । "ओमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं स हेश्वरो यशस्वी कल्याणकीर्तिर्भविता पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद्दयेत त्वेतेन" इति । एतेनानेन त्वनृतेन दयेत संकटेष्वात्मानं रक्षेदिति श्रुत्यर्थः ॥ ४० ॥ सर्वथा सत्यवचनेन देहो न निर्वहेदिति स्फुटीकर्तुं सत्यस्य दोषाननृतस्य च गुणानाह परागिति द्वाभ्याम् । यदोमित्यक्षरं तत्पराक् परांचति दूरेऽर्थं गृहीत्वा व्रजतीति पराग्रिक्तमिति श्रुतिपदस्य व्याख्यानमपूर्णं वै इति । तत्तस्मादर्थिने यत्किंचिदोमिति ब्रूयात्तेन रिच्येत न्यूनो भवेत् । किञ्च भिक्षवे सर्वमों कुर्वन्दास्यामीत्यंगीकुर्वन्नात्मने कामेन नालं पर्याप्तो न भवति । तस्य भोगो न सिध्यतीत्यर्थः । तथाच श्रुतिः । "पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमों कुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यात्" इति ॥ ४१ ॥ नेति यदनृतं वच एतत्पूर्णमर्थव्ययाभावात् । अभ्यात्मं चेति चकारान्वयः । आत्मनोऽभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मम् । यो हि नित्यं मम किंचिदपि नास्ति सीदामीति ब्रूते स हि तेनानृतेन परेषामर्थानाकर्षतीति प्रसिद्धम् । ननु तर्हीदमनृतमेव सर्वदा सेव्यं स्यान्नेत्याह । सर्वमिति । तथा च श्रुतिः "अथैतत्पूर्णमभ्यात्मं यन्नेति स यत्सर्वं नेति ब्रूयात्पापिकाऽस्य कीर्तिर्जायेत

यत इति शेषः । कुतो जानीयात् यतः श्रुत्योच्यत इति भावः । पाठांतरे जीवतः सप्राणस्य देहनिर्वाहाधीनत्वाद्देहान्वयव्यतिरेकित्वात् । ततः पुष्पफलस्थानीयत्वात् ॥ ३९ ॥ एतदेव अनृतस्य देहमूलत्वमेव । तदिति वाक्यालंकारे । आविर्मूलं प्रकटितजटम् । वृक्षो हि यावद्भूमिष्ठमूलत्वेनानाविर्मूलो भवति तावद्वर्द्धतेऽन्यथा खननादिनाविर्मूलः पतत्येवेति तन्निषेधनम् । तयैव श्रुत्यैव । तामेव श्रुतिं दर्शयति—तथा चेति । स सत्यवक्ता । ह स्फुटम् ॥ ४० ॥ रिक्तं पृथक्कृतमार्थिने दत्तमित्यर्थपरं श्रुतिस्थस्यास्मै तद्रिच्यत इत्यस्य व्याख्यानं च । अन्यदाह—किञ्चेति । आत्मने स्वस्मै । इत्यर्थ इति । सर्वस्वदानाद्भोगाभावः प्रसिद्ध एव भोगस्य धनसाध्यत्वादिति भावः । अत्र प्रमाणमाह—तथा चेति । अत्रैवेहैव । अस्मै पुरुषाय तद्रिच्यते तन्न प्राप्नोतीत्यर्थः ॥ ४१ ॥ अथ चार्थे । अत्राक्षिपति—नन्विति । सर्वदानृतस्य दोषमाह श्रुतिः—तथा चेति स्पष्टार्था ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥ गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे वामनप्रादुर्भावे एकोनविंशोऽध्यायः ॥ १९ ॥ श्रीशुक उवाच ॥ बलिरेवं गृहपतिः कुलाचार्येण भाषितः ॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम् ॥ १ ॥ बलिरुवाच ॥ सत्यं भगवता प्रोक्तं धर्मोयं गृहमेधिनाम् ॥ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥ २ ॥ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् ॥ प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥ ३ ॥ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियम् ॥ सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥ ४ ॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ॥ ५ ॥ यद्यद्धास्यति लोकेऽस्मिन्संपरेतं धनादिकम् ॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ॥ ६ ॥

सैनं तत्रैव हन्यात् " इति ॥ ४२ ॥ अतो वृत्तिसंकटादिष्वनृतं न दोषायेत्युपसंहरति । स्त्रीषु प्रोत्साहनेन वशीकरणे । नर्मणि परिहासे । विवाहे च वरादिस्तुतौ । गवां ब्राह्मणानां च हितार्थम् । हिंसायां च कस्यचित्प्राप्तायाम् । तथा च याज्ञवल्क्यः । " वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् " इति । तथा च श्रुतिः । " तस्मात्काल एव दद्यात्कालेन दद्यात्तत्सत्यानृते मिथुनीकरोति " इति ॥ ४३ ॥ इति श्रीमद्भागवते अष्टमस्कंधे टीकायां वामनप्रादुर्भावे एकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ विंशे त्वनृतभीतोऽसौ ज्ञात्वाऽपि कपटं हरेः ॥ ददावेव ततो विष्णुः सहसाऽवर्धताद्भुतम् ॥ १ ॥ १ ॥ भगवता त्वया प्रोक्तं सत्यम् । किं तत् । योऽर्थकामादिकं न बाधेत सोयं हि गृहमेधिनां धर्म इति ॥ २ ॥ कथं प्रत्याचक्षे निराकरोमि ॥ ३ ॥ ४ ॥ नन्वप्रत्याख्याने दोषा उक्तास्तत्राह । नाहमिति । अधन्याद्दारिद्र्यान्मृत्योरपि ॥ ५ ॥ किं च यद्यद्धनादिकं तत्सर्वं संपरेतं मृतं पुरुषं हास्यति त्यक्ष्यत्येव । तत्किमिति जीवतैव स्वयं न देयमिति भावः । तथाऽपि तावद्वृत्तिसंकटपरिहारार्थमर्धं दीयतामिति चेत्तत्राह । तस्येति । विप्रश्चेत्तेनार्थेन दत्तेनापि न तुष्येत्तर्हि तस्यार्धस्य त्यागे दाने किं निमित्तं न किंचित् । याचितादल्पस्य दाने विप्रस्यासंतोषेण दानं व्यर्थमेव स्यादतस्त

यतस्सर्वदा निषिद्धमतो हेतोः । अनृतादोषत्वे स्मृतिमाह–तथा चेति । श्रुतिमप्यत्र प्रमाणयति–यस्मात्सर्वदा दानादाने निषिद्धे तस्माद्धेतोः । काले समृद्ध्यवसरे । द्वितियकालपदं दारिद्र्यावस्थापरम् । तत्ततोऽवसरभेदेन सत्यानृते योजयतीत्यर्थः ॥ ४३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे एकोनविंशोध्यायः ॥ १९ ॥ ततो दानग्रहणानंतरम् । सहसा शीघ्रम् (१) । अहो गुरुणा किमर्थमित्थमुक्तमिति विमर्शाय तूष्णीमासेति ॥ १ ॥ २ ॥ यथा कितव इति । धूर्त्तवत् "यश्चोक्त्वा न प्रकुर्वीत कितवः प्रोच्यते हि सः" इति ॥ ३ ॥ अलीकपरमनृतपरम् ॥ ४ ॥ अत्राशंकते–नन्विति । अप्रत्याख्यानेंगीकारे । दोषा अर्थकामादिबाधादिरूपाः । यत्त्वयोक्तम् 'निष्ठां ते नरके मन्ये' इति ततोऽहं न बिभेमि । असुखार्णवाद्दुःखसमुद्रात् । स्थानस्य स्वर्गादेश्च्यवनाच्च्युतेः । प्रलंभनं वंचनम् ॥ ५ ॥ इति भाव इति । जीवतः स्वयं प्रदातुर्दत्तं सुखाय भवतीत्याशयः । तदुक्तं भर्तृहरिणा "अवश्यं यातारश्चिरतरमुषित्वापि विषया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् । व्रजंतः स्वातंत्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनंतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रेयः कुर्वंति भूतानां साधवो दुस्त्यजासुभिः ॥ दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥ ७ ॥ यैरियं बुभुजे ब्रह्मन्दैत्येंद्रैरनिवर्तिभिः ॥ तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि ॥ ८ ॥ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः ॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥ ९ ॥ मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः ॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो बटोरस्य ददामि वांछितम् ॥ १० ॥ यजंति यज्ञक्रतुभिर्यमादृता भवंत आम्नायविधानकोविदाः ॥ स एव विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ॥ ११ ॥ यद्यप्यसावधर्मेण मां बध्नीयादनागसम् ॥ तथाप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥ १२ ॥ एष वा उत्तमश्लोको न जिहासति यद्यशः ॥ हत्वा मैनां हरेद्युद्धे शयीत निहतो मया ॥ १३ ॥

याचितं सर्वं देयं न किंचिदिति भावः ॥ ६ ॥ तर्हि न देयमेवेति चेत्तत्राह । श्रेय इति । दुस्त्यजैरसुभिरपि । को विकल्पो विचारः ॥ ७ ॥ यैर्दैत्येन्द्रैर्युद्धेऽनिवर्तिभिरियं भूर्बुभुजे उपभुक्ता तेषामिह लोकान्परलोकांश्च भोगानिति वा कालोऽग्रसीत्संहृतवान्न तु भुवि तैरधिगतं प्राप्तं यशोऽग्रसीत् । अतः कीर्तिरेव साध्या नान्यदिति भावः ॥ ८ ॥ देहत्यागादपि धनत्यागे कीर्तिर्भवतीत्याह । सुलभा इति । तनुं त्यजंतीति तनुत्यजः । तथा तीर्थे पात्रे अतोऽतिदुष्करो धनत्याग एव मया कार्य इति भावः ॥ ९ ॥ तर्हि निर्धनत्वेन दैन्यं स्यादिति चेत्तत्राह । मनस्विन इति । यादृशतादृशानामप्यर्थिनां कामोपनयेन कामपूरणेन दुर्गतिर्दैन्यमिति यत्तच्छोभनं भद्रमेव भवादृशानां तु कामोपनयेन दुर्गतिः शोभनमिति किं पुनर्वक्तव्यमित्यर्थः ॥ १० ॥ ननु नायं बटुः किं तु विष्णुस्तव शत्रुरित्युक्तं तर्हि सुतरामेव दास्यामीत्याह । यजंतीति । परः शत्रुर्वाऽस्तु ॥ ११ ॥ १२ ॥ यद्यदि यशो न जिहासति तर्हि युद्धेऽयं मा मां हत्वैनां भूमिं हरेच्छयीत वा । सम्यग्ज्ञातः सन्मम चित्ते शयीतेति वास्तवोऽर्थः ॥ १३ ॥

विदधते ॥ '' इति । यद्यपीत्थं तथापीति । तेनार्द्धेन तस्यार्द्धस्य निमित्तं फलम् '' हेतौ चिह्ने फले चैव निमित्तं निश्चितेऽपि च'' इति धरणिः । यतो याचितादानं व्यर्थम् अतो हेतोः । इति भाव इति । ब्राह्मण तृप्तिरेव दानफलमिति तात्पर्यम् ॥ ६ ॥ प्रभृतिपदादुञ्छवृत्त्यादिग्रहः । आदिना वसुरत्नादिग्रहः ॥ ७ ॥ दैत्येंद्रैर्हिरण्यकशिपुप्रभृतिभिः । इति भाव इति । 'यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते । तावत्प्रमोदते स्वर्गे '' इति स्मृतेः । परलोकसुखहेतुत्वादपि कीर्तिरेव संपाद्येत्याशयः ॥ ८ ॥ ''तीर्थं मंत्राद्युपाध्यायशास्त्रेष्वंभसि पावने । पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः ॥'' इति यादवः । इति भाव इति । तस्करसेवक वणिजो धनार्थं प्राणत्यागमंगीकुर्वंत्यतः प्राणाद्धनस्य प्रियत्वं प्रतीयते । तत्त्यागः प्राणत्यागादपि दुष्कर इत्याशयः । अनिवृत्ताः पृष्ठादर्शयितारः । ये श्रद्धया धनत्यजस्ते न सुलभा इत्यर्थः ॥ ९ ॥ मनस्विन उदारस्य । यतोऽयं बटुरपि भवादृशस्ततो हेतोः । दुर्गतिर्दारिद्र्यम् । इत्यर्थ इति । कैमुत्येन सर्वथा देययोग्यत्वमस्येति भावः ॥ १० ॥ पुनराक्षिपति—नायमिति । यं विष्णुम् । मुने इति । नायं दाननिवारणरूपो मुनिधर्म इत्याह ॥ ११ ॥ एनं बटुम् । अहिंसने हेतुः—भीतमिति । तत्रापि हेतुः—ब्रह्मतनुमिति । मां ब्राह्मणशरीरमवध्यं ज्ञात्वा बलिर्न प्रहरिष्यतीति भावः ॥ १२ ॥ वात्राध्याहार्यम् । युद्धजयस्यानिश्चितत्वाद्वात्र स्वरूपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ॥ शशाप दैवप्रहितः सत्यसंधं मनस्विनम् ॥ १४ ॥ दृढं पंडितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया ॥ मच्छासनातिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ १५ ॥ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ॥ वामनाय ददावेनामर्चित्वोदकपूर्वकम् ॥ १६ ॥ विंध्यावलिस्तदाऽऽगत्य पत्नी जालकमालिनी ॥ आनिन्ये कलशं हैममवनेजन्यपां भृतम् ॥ १७ ॥ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा ॥ अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥ १८ ॥

अश्रद्धितमजातश्रद्धम् ॥ १४ ॥ १५ ॥ १६ ॥ जालकं मुक्ताभरणविशेषस्तन्मालावती । अवनेजनीनामपां कलशम् । भृतं पूर्णम् ॥ १७ ॥ १८ ॥

प्रकटय्य युद्ध्यतो मच्छस्त्रघातेन मरणस्यापि संभवाच्छयीतेत्यर्थः । यद्वा—एष उत्तमश्लोकत्वात्स्वयशो न जिहासत्यतो भूर्न देयेति मयोक्ते याच्ञाभंगपराभवमसहमानेन तर्हि युद्धं देहीति प्रार्थिते मयि चोमित्युक्तवति सति युद्धे मां हत्वैमां भूमिं हरेदेव । ननु महावीरात्त्वत्तोऽस्य पराभवोऽपि संभवेदेवेति चेत्तत्राह—शयिष्यति मया निहतो युद्धे शयीतेति काकुः । नैव शयीत विष्णोर्मृतिशून्यत्वादिति भावः । यद्वा—मेत्यस्यावृत्त्याऽस्मदर्थे निषेधार्थे च वर्तनाद्विनापि काकुं संगतिः ॥ १३ ॥ अनादेशकरमाज्ञालंघिनम् ॥ १४ ॥ स्तब्धोऽनम्रः । पंडितानां माननीयः, न ज्ञो यस्मात्सः । अस्मत्कर्तृकयोपेक्षयापि स्तब्धो भयाभावादनम्रः मच्छासनमतिक्रम्य गच्छसि विष्णुमिति भावः । तस्मान्न चिरात् अचिरस्थायिश्रियो भ्रश्यसे भगवद्दत्ता नित्याः संपदः प्राप्स्यस्येवेति वास्तवोर्थः ॥ १५ ॥ उदकसंकल्पपूर्वकम् "संकल्पं तु सदा कुर्यात्स्नानदानव्रतादिके । अन्यथा पुण्यकर्माणि निष्फलानि न संशयः ॥" इति मार्कंडेयोक्तेः । तत्स्वरूपं निर्णयसुधाकरे—"ॐ तत्सदद्येत्युक्त्वादौ देशकालादिकीर्त्तनम् । कृत्वा स्वनामगोत्रोक्तिं प्रवरोक्तिं विधाय च ॥ देयनामाधिपावुक्त्वा स्वेहितोच्चारणं तथा । यत्र वाक्ये संप्रादाननामाद्युक्तिर्भवेत्तथा ॥ सतोयकुशमादाय संकल्पः स प्रकीर्त्तितः ।" इति । "मासपक्षतिथीनां च निमित्तानां च सर्वशः । उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत् ॥" इत्यन्यत्रोक्तेश्च संकल्पस्यावश्यकत्वात् । यद्वा—गुरुणा भृगुणा शप्तः 'उकारः शंभुरुदितः' इत्येकाक्षरादुः शिवस्तं महतेऽर्चयतीत्युमहो ब्राह्मणः स चेह वामनो ज्ञेयः । यद्वा—उना शंभुना मह्यते पूज्यत इत्युमहः "अतो महेशोपि विहाय भेदबुद्धिं सदा सेवत एव विष्णुम्" इति विद्वन्मोदतरंगिण्युक्तेः । स चात्र वामन एव "त्वं हि भगवन्देवेषु ब्राह्मणोऽहं मनुष्येषु ब्राह्मणो ब्राह्मणो हि ब्राह्मणमुपधावति" इति जाबालश्रुतेः । उमहेनानिति चेष्टत इत्युमहान् बलिस्तदाज्ञाधारित्वात् । छांदसत्वात् "न लोपः प्रातिपदिकांतस्य" इत्यनेन न लोपः । एनां पूर्वोद्दिष्टां भुवमुदकपूर्वकं पाद्यादिना समर्च्य । अन्वादेशादेनादेशः । किंभूतेन गुरुणा ? संत्यज्यते दीयते वस्तुजातमेभिरिति सत्याः घनरसास्तान् । संपूर्वात्त्यजेर्डः समो मलोपस्त्वार्षः । 'मेघपुष्पं घनरसः' इत्यमरः । चालयतीति चलित् औणादिक इति प्रत्ययः । तडिद्वच्चलित् न चलिन्नचलित्तथा सत्यास्तोयानि तेषां नचलित्सत्यान्नचलित्तेन तथाऽर्थाद्दानजलं निरोधयता नञर्थोऽत्र नशब्दः । पुनर्विपरीतलक्षणया सुष्ठु अगुरुणाऽहितोपदेष्टृत्वात् । यद्वा—न गौर्नेत्रं दर्भाग्रप्रहारेणेत्यगुः रुणति रुणद्धीति रुण् स चासौ स च गुरुण् तेन तथा ॥ १६ ॥ तन्मालावती तच्च मस्तकधार्यं तत्रैव मुक्ताभरणपंक्तिसत्त्वात् । तदा संकल्पदानवेलायाम् । परमलज्जावत्यसूर्यंपश्यापि भर्तुर्भक्तिनिष्ठामवगम्यानंदाश्रुस्तिमिता हर्षोत्थचापल्यं निह्नोतुमशक्नुवती दासीरनपेक्षमाणा स्वयमेव कलशं वहंती बहिर्निश्चक्रामेत्याह-विंध्यावलीति । यद्वा-'जालकं कोरकः पुमान्' इत्यमरः । चंपकादिकुड्मलमालावती । यद्वा—जालकेन मुक्ताभरणेन मालते शोभत इति तथा । अवनेजनीनां शुचीनां पादप्रक्षालनादियोग्यानाम् ॥ तदुक्तं बृहन्नारदीये "मायामाश्रित्य तस्तम्भ धारां दानकमंडलोः । भार्गवः शिष्यराज्यस्य स्थित्यै योगेन भूरिद ॥ तदेरितो वामनेन कुशेनाशोधयद्बलिः । कुशाग्रभिन्ननेत्रोऽसौ त्यक्त्वा पात्रमुखं मुनिः ॥ प्रापाक्ष्णस्तु वैकल्यं सद्यो दानस्य वारणात् ।" । एवमन्यत्रापि "अत्युग्रपुण्यपापानामिहैव फलमश्नुते । त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।" इति यामघटयादीनामप्युपलक्षणम् । अत्युग्रत्वं तु "विप्रस्य वृत्तिहननात्कोटिगोघातजं फलम्" इत्युक्तेरित्यनुसंधेया पुराणांतरकथेति ॥ १७ ॥ यजमानो बलिः । तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदासुरेंद्रं दिवि देवतागणा गंधर्वविद्याधरसिद्धचारणाः ॥ तत्कर्म सर्वेऽपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदाऽन्विताः ॥ १९ ॥ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिन्नरा जगुः ॥ मनस्विनाऽनेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयम् ॥ २० ॥ तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्रयात्मकम् ॥ भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥ २१ ॥ काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ॥ ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्तम् ॥ २२ ॥ रसामचष्टांघ्रितलेऽथ पादयोर्महीं महीध्रान्पुरुषस्य जंघयोः ॥ पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिंद्रसेनः ॥ २३ ॥ संध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीञ्जघने आत्ममुख्यान् ॥ नाभ्यां नभः कुक्षिषु सप्तसिंधूनुरुक्रमस्योरसि चर्क्षमालाम् ॥ २४ ॥ हृद्यंग धर्मं स्तनयोर्मुरारेरृतं च सत्यं च मनस्यथेंदुम् ॥ श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरेफान् ॥ २५ ॥

॥१९॥२०॥ अवर्धत 'वांच्छातः प्रतिगृह्यताम्' इति बलिना पूर्वमुक्तत्वात् । गुणत्रयमात्मनि यस्य तत् । अत एव भूः खमित्यादयो यद्यस्मिन्नासत स्थितवंतः ॥२१॥ ऋत्विगादिसहितो बलिस्तस्य हरेः काये एतद्विश्वं ददर्श ॥ २२ ॥ तदेव प्रपंचयति रसामिति पादोनैः सप्तभिः । रसामधस्तलम् । मारुतं गणं वायुसंघम् । इंद्रस्य सेनेव सेना यस्य सः । इंद्रपदे स्थितत्वात । अचष्ट ऐक्षत ॥ २३ ॥ आत्मा स्वयं बलिर्मुख्यो येषां तानसुरान् । ऋक्षमालां नक्षत्रपंक्तिम् ॥ २४ ॥ अंग हे राजन् समस्तान्

वामनस्य । अवनिज्य प्रक्षाल्य । तदपः पादावनेजनीरपः ॥ १८ ॥ तदा संकल्पदानसमये । तत्कर्म ज्ञात्वापि गुरुतः श्रवणेन पुनश्शात्रवे भूदानरूपम् । आर्जवमकौटिल्यं च ॥ १९ ॥ यत् यतः ॥ २० ॥ येन रूपेण संकल्पो गृहीतस्तदेव रूपमवर्द्धत । "जले तु पतिते हस्ते वामनोभूदवामनः" इति हरिवंशोक्तेः । हरेर्हरणशीलस्य । अनंतस्येयत्ताशून्यस्य । आत्मनि देहे । "आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि । यत्नेऽर्केऽग्नौ मतौ वाते " इति यादवः ॥ २१ ॥ त्रिगुणं गुणत्रयकार्यम् । गुणात्मके सगुणे । अर्थाः शब्दादयो विषयाः । आशयश्चतुर्विधमंतःकरणम् । जीवश्चिदाभासः ॥ २२ ॥ रसा रसातलम् । एकदेशोच्चारणन्यायेन मह्याः पृथङ्निर्देशात् । महीध्रान्पर्वतान् । पतत्रिणः पक्षिणः ॥ २३ ॥ २४ ॥ "ऋतं च सूनृता वाणी सत्यञ्च समदर्शनम्" इत्येकादशे वक्ष्यमाणत्वात् । सामानि गीतिशब्दान् । रेफशब्दोपलक्षितवर्णमयान् शब्दानित्यर्थः । रेफोपलक्षितानकारादिसर्ववर्णानिति चक्रवर्त्ती । यद्वा—रेफस्य सर्वाक्षरेषून्नतत्वाद्रेफग्रहणेन सर्वाक्षरग्रहणं यथा "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते" इति श्रुतौ ब्राह्मणस्य सर्ववर्णोन्नतत्वात्तद्ग्रहणेन क्षत्रियादिग्रहणं तद्वत् रेफस्योन्नतत्वं सर्ववर्णोपरि विराजमानत्वं तदपि रामनामसंयोगत्वादेव तदुक्तम् "राम त्वन्नामसंयोगान्नरः के नोन्नतिं गताः । रकारः सर्ववर्णानामुपरिष्टात्प्रवर्त्तते ॥" इति । अन्यत्रापि "यन्नामसंसर्गवशाद्रवर्णो नष्टस्वरो ह्यूर्द्ध्वगतिं प्रयाति । तन्नामपादं हृदि संनिधाय देही कथं नोर्द्ध्वगतिं प्रयाति" । इत्यलं प्रसक्तानुप्रसक्त्या ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि ॥ केशेषु मेघाञ्छ्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥२६॥ वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ॥ अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ॥२७॥ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ॥ छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च ॥ २८ ॥ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ॥ प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः ॥ २९ ॥ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरंग ॥ सुदर्शनं चक्रमसह्य तेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ॥ ३० ॥ पर्जन्यघोषो जलजः पांचजन्यः कौमोदकी विष्णुगदा तरस्विनी ॥ विद्याधरोऽसिः शतचंद्रयुक्त स्तूणोत्तमावक्षयसायकौ च ॥ ३१ ॥ सुनंदमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालाः ॥ स्फुरत्किरीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तममेखलांबरैः ॥ ॥ ३२ ॥ मधुव्रतस्रग्वनमालया वृतो रराज राजन्भगवानुरुक्रमः ॥ क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ॥३३॥ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ॥ उरुक्रमस्यांघ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥ ३४ ॥ इति श्रीमद्भा० म० अष्टम० भूमिदानविश्वरूपदर्शनं नाम विंशतमोऽध्यायः ॥ २० ॥

रेफांश्च शब्दान् ॥ २५ ॥ द्यौश्च द्यां च ॥ २६ ॥ रसे रसने ॥ २७ ॥ रेतसो रेतसि । क्रमणेषु पादन्यासेषु । ओषधिजातय ओषधिजातीः ॥ २८ ॥ प्राणेष्विंद्रियेषु ॥ २९ ॥ सर्वात्मनीत्यादिवाक्यांतरम् । सुदर्शनमित्यादीनामीशमुपतस्थुरित्युत्तरेणान्वयः ॥ ३० ॥ विद्याधरसंज्ञोऽसिः ॥ ३१ ॥ मकरकुण्डले मीनकुंडले । स्फुरंति किरीटादीनि यस्य सः ॥ ३२ ॥ मधुव्रतानां स्रजो यस्यां तया वनमालया श्रीवत्सादिभिश्चावृतो व्याप्तः । उरुक्रमत्वमेवाह । क्षितिमिति ॥ ३३ ॥ द्वितीयं पदं क्रमतो विक्षिपतस्त्रिविष्टपं तदीयं किंचिन्मात्रं जातम् । तृतीयाय तु न किंचिदपि । तत्र हेतुः । उरुक्रमस्यांघ्रिस्त्रिविष्टपादुपर्युपरि गच्छन्महर्जनलोकाभ्यां तपसश्च परं गतः सत्यलोकं गत इति ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे टीकायां विंशोऽध्यायः ॥ २० ॥

ककुभो दिशः ॥२६॥ छंदांसि गायत्र्यादीनि । भ्रुवोर्मस्तकाधस्तननेत्रोर्ध्वदेशयोः । मन्युं क्रोधम् ॥२७॥ रेतस इति सप्तम्यर्थे षष्ठी । सर्वा ओषधीरित्यर्थः ॥२८॥ वाक्यांतरमापुरित्युत्तरेणान्वयि ॥ २९ ॥ ३० ॥ जलजः शंखः पांचजन्य इति संज्ञा । नंदकस्यैव नामांतरं विद्याधर इति । शतचंद्रप्रतिबिंबयुक्तः । यद्वा शतचंद्रांकितकोशयुक्तः । केचित्तु वैद्याधर इति वदंति तदर्थश्च कस्माचिद्विद्याधरादात्त इति ॥३१॥ ३२ ॥ स्रजः पंक्तयः । न च पदत्रयमितभूमेरेव ग्राह्यत्वात् नभआदिव्यापनमन्याय्यमिति वाच्यम् । तावत्यां भूमावूर्ध्वावस्थितेरप्यपेक्षितत्वेन तस्यार्थसिद्धत्वादित्युक्तमपि प्राक् ॥ ३३ ॥ तत्र तृतीयपदार्थे तदीयत्वाभावे । द्वितीयपदं कियद् वृद्धमभूदित्यपेक्षायामाह–तपसः परमिति । सत्यलोकमित्यर्थः । तदीयनखस्तु ब्रह्मांडकटाहं बिभेदेत्यर्थः । "वामपादांगुष्ठनखनिर्भिन्नांडकटाहविवरेण प्रविष्टा या बाह्यजलधारा" इति पंचमस्कन्धोक्तेः । अष्टावरणानि भित्त्वा विरजाजले प्रविष्ट इत्यन्यत्र ॥ ३४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे विंशोध्यायः ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ सत्यं समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ॥ मरीचिमिश्रा ऋषयो बृहद्व्रताः सनंदनाद्या नरदेव योगिनः ॥ ॥ १ ॥ वेदोपवेदा नियमान्विता यमास्तर्केतिहासांगपुराणसंहिताः ॥ ये चापरे योगसमीरदीपितज्ञानाग्निना रंधितकर्मकल्मषाः ॥ ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकम् ॥ २ ॥ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकम् ॥ समर्च्य भक्त्याऽभ्यगृणच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयम् ॥ ३ ॥ धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र ॥ स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥ ४ ॥ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः ॥ सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥५॥ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलांकुरैः ॥ ६ ॥ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः ॥ नृत्यवादित्रगीतैश्च शंखदुंदुभिनिस्वनैः ॥ ७ ॥ जांबवानृक्षराजस्तु भेरीशब्दैर्मनोजवः ॥ विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥ ८ ॥

एकविंशे पदापूर्तिमिषेण बलिबंधनम् ॥ विष्णुना कृतमुत्कर्षं तस्य ख्यापयितुं जने ॥ १ ॥ उरुक्रमस्यांघ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह । सत्यं सत्यलोकं प्राप्तं तमंघ्रिं समीक्ष्याब्जभवोऽभ्यगात् । तथा मरीचिमिश्रादयश्चेति द्वयोरन्वयः । कथंभूतोऽब्जभवः । हरेरंघ्रेर्नखा एवेंदवस्तैर्हता स्वधाम्नो द्युतिर्यस्य स स्वयं च तैरावृतश्छन्नः । हे नरदेव । बृहद्व्रता योगिनश्च ॥ १ ॥ अंगानि शिक्षादीनि । पुराणानि तत्संहिताश्च योग एव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्मकल्मषं कर्ममलं येषाम् ॥ २ ॥ ते च सर्वे तमंघ्रिं ववंदिरे । यस्यांघ्रेः स्मरणानुभावतः । अकर्मकं कर्मभिरप्राप्यम् । विष्णोरंघ्रये । स्वयं यस्य नाभिपंकेरुहसंभवस्तस्य विष्णोरंघ्रिं समर्च्य ॥ ३ ॥ लोकत्रयं निमार्ष्टि पवित्रयति ॥ ४ ॥ संक्षिप्ता उपसंहृतात्मविभूतिः स्वविस्तारो येन तस्मै । यथापूर्वं वामनरूपेण स्थितायेत्यर्थः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

पदानामपूर्त्तिमिषेण । तस्य बलेः (१) । ततः तपसः परं गतेरनन्तरम् । वृत्तं जातम् । सत्यं सत्यलोको विद्यते प्राप्तत्वेन यस्य स सत्यस्तं मत्वर्थीयोच्प्रत्ययः । अभ्यगुरिति वचनव्यत्यासेनान्वयः । बृहद्व्रता नैष्ठिकाः ॥ १ ॥ "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः । छंदसां लक्षणं चैव षडंगो वेद उच्यते ॥" इत्युक्तानि । पुराणानि ब्राह्मादीनि । उपपुराणानि सांबपुराणादीन्यपि पुराणपदेनानुक्तानि ज्ञेयानि । उपवेदा गांधर्वादयः । तर्कपदेन सांख्यमीमांसादीनामपि ग्रहस्तेषामपि तर्कगर्भत्वात् ॥ २ ॥ शुचिश्रवाः पूतकीर्त्तिः । अभ्यगृणात् तुष्टाव ॥ ३ ॥ यद्धातुः कमंडलुजलं तत्स्वर्धुनी गंगा । पंचमस्कन्धे तु वामनपदनखनिर्भिन्नांडकटाहबाह्यजलधारैव गंगाऽभूदित्युक्तम् । क्वचित्संहितादौ—साक्षाच्छ्रीकृष्ण एव गंगारूपेण द्रुतोभूदित्युक्तम् । "श्रीगंगाद्रवरूपेण त्रैलोक्यं व्याप्य तिष्ठति" इति श्रीशंकरोक्तिरपि संमोहने । तथा च जलत्रयं मिलितमेव गंगेति ध्येयम् । नभसि व्योम्नि । पतती पतंती ॥ ४ ॥ इत्यर्थ इति । कार्यकारणोत्तरं स्थविष्ठरूपप्रयोजनाभावादिति भावः ॥ ५ ॥ अक्षतास्तु शालिग्रामार्चन एव निषिद्धा इति न दोषः । अंकुरं दूर्वांकुरम् ॥ ६ ॥ तद्वीर्यस्य महिम्नांकितैः "त्रिविक्रम नमस्तुभ्यम्' इत्यादिस्तोत्रैः ॥ ७ ॥ सर्वासु दिक्ष्वित्यनेन प्रदक्षिणं लक्ष्यते । तच्च वाल्मीकीये प्रतिपादितं सीतान्वेषणार्थगताब्धितटस्थवानरकृतस्वस्ववीर्यप्रकाशनावसरे जांबवताप्युक्तम्—"वृद्धोऽहमधुना वामनावतारे यूना मयैकविंशतिप्रदक्षिणा विश्वरूपधारिणो भगवतः कृताः" इति ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महीं सर्वां हृतां दृष्ट्वा त्रिपद्व्याजयाच्ञया ॥ ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ॥ ९ ॥ न वा अयं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः ॥ द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥ १० ॥ अनेन याचमानेन शत्रुणा बटुरूपिणा ॥ सर्वस्वं नो हृतं भर्तुर्न्यस्तदंडस्य बर्हिषि ॥ ११ ॥ सत्यव्रतस्य सततं दीक्षितस्य विशेषतः ॥ नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ॥ १२ ॥ तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः ॥ इत्यायुधानि जगृहुर्बलेरनुचराऽसुराः ॥ १३ ॥ ते सर्वे वामनं हंतुं शूलपट्टिशपाणयः ॥ अनिच्छतो बले राजन्प्राद्रवञ्जातमन्यवः ॥ १४ ॥ तान भिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ॥ प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥ नंदः सुनंदोऽथ जयो विजयः प्रबलो बलः ॥ कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट् ॥ १६ ॥ जयंतः श्रुतदेवश्च पुष्पदंतोऽथ सात्वतः ॥ सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् ॥ १७ ॥ हन्य मानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ॥ वारयामास संरब्धान्काव्यशापमनुस्मरन् ॥ १८ ॥ हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः ॥ मा युध्यत निवर्तध्वं न नः कालोऽयमर्थकृत् ॥ १९ ॥ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ॥ तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥ २० ॥ यो नो भवाय प्रागासीदभवाय दिवौकसाम् ॥ स एव भगवानद्य वर्तते तद्विपर्ययम् ॥ २१ ॥ बलेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः ॥ सामादि भिरुपायैश्च कालं नात्येति वै जनः ॥ २२ ॥

त्रिपादव्याजयाच्ञया त्रिपदविषया या व्याजयाच्ञा कपटयाच्ञा तया स्वभर्तुर्बलेर्महीं हृतां दृष्ट्वाऽत्यमर्षिताः संतः ऊचुः ॥ ९ ॥ किमूचुस्तदाह न वै इति सार्धैस्त्रिभिः ॥ ॥ १० ॥ ११ ॥ १२ ॥ अनुचराश्च ते असुराश्च ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ अर्थकृदनुकूलः ॥ १९ ॥ पौरुषैस्तं कालमतिवर्तितुं पुमानीश्वरः समर्थो न भवति ॥ २० ॥ २१ ॥ २२ ॥

अत्यमर्षिता असहमानाः ॥ ९ ॥ तत् वंचनम् । ब्रह्मबंधुरित्यनेनाधमोऽपि ब्राह्मण एतादृशं कर्म नाचरति यादृशमनेनाचरितमित्युक्तम् । किन्तु द्विजविडंबनमात्रमेवास्येति भावः ॥ १० ॥ बर्हिषि यज्ञे "स्याद्बर्हिः कुशाक्रत्वर्चिर्नृपभेदमुनिष्वथ" इति धरणिः ॥ ११ ॥ १२ ॥ यतोऽयं कपटरूपेण हृतवांस्तस्माद्धेतोः । अस्य छद्मविप्रस्य । क्वचिद्वधे इति सप्तम्यंतः ॥ १३ ॥ १४ ॥ तान्बल्यनु चरान् ॥ १५ ॥ ननु जयविजययोः शापवशादधःपातादत्र तयोः कथं संभव इत्याशंक्य भगवतो ब्रह्मण्यत्वस्य भक्तानामपराधविभीषिकायाश्च प्रदर्शनार्थमेवानयोः प्रकाशावेव वैकुंठादधः पेततुर्न साक्षादिति समाहितं चक्रवर्त्तिना । अन्यथा 'न मत्परा नंक्ष्यंति शांतरूपाः' इत्युक्तेर्व्याकोपः स्यादिति ॥ १६ ॥ १७ ॥ संरब्धान्कुपितान् ॥ १८ ॥ १९ ॥ यः कालः । तं कालम् ॥ २० ॥ भवाय समृद्धये । ततो भवाद्विपर्ययं यथा स्यात्तथेति ॥ २१ ॥ बलेन सैन्येन दैहिकेन वा । सचिवैः सहायैः 'सचिवो मंत्रिचेटयोः । सहाये च' इति मेदिनी । आदिना यंत्रादिग्रहः । आदिना दानभेददंडानां ग्रहः । नात्येति नातिक्रमति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ॥ दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः ॥ २३ ॥ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति ॥ तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २४ ॥ श्रीशुक उवाच ॥ पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः ॥ रसां निर्विविशू राजन्विष्णुपार्षदताडिताः ॥ २५ ॥ अथ तार्क्ष्यसुतो ज्ञात्वा विराट् प्रभुचिकीर्षितम् ॥ बबंध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतौ ॥ २६ ॥ हाहाकारो महानासीद्रोदस्योः सर्वतो दिशम् ॥ निगृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ २७ ॥ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः ॥ नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ॥ २८ ॥ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर ॥ द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय ॥ २९ ॥ यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः ॥ यावद्वर्षति पर्जन्यस्तावती भूरियं तव ॥ ३० ॥ पदैकेन मया क्रांतो भूर्लोकः खं दिशस्तनोः ॥ स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना ॥ ३१ ॥ प्रतिश्रुतमदातुस्ते निरये वास इष्यते ॥ विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ॥ ३२ ॥ वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः ॥ प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलंभते ॥ ३३ ॥

हरेरनुचरा देवाः । दैवेन ऋद्धैः समृद्धैर्भवद्भिः ॥२३॥ अर्थत्वायानुकूल्याय ॥२४॥२५॥ विषु पक्षिषु राजत इति विराट् । प्रभोश्चिकीर्षितं ज्ञात्वा । अयमर्थः अस्य सर्वस्वापहारेण ममेत्यभिमानं संत्याज्येदानीं देहस्वीकारेणाहंकारमपि त्याजयित्वा परमानुग्रहं कर्तुमिच्छति । न चानेन तुल्योऽन्यः कोऽपि सत्यसंधो धीरो वाऽस्तीति तद्यशःप्रख्यापनार्थं किंचित्पातयितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वा तं बबंधेति । सौत्येऽहनि सोमाभिषवदिने ॥२६॥ रोदस्योर्द्यावापृथिव्योः ॥२७॥२८॥२९॥ असौ सूर्यः ॥३०॥ मया आत्मनेत्यन्वयः । व्यापिनेत्यर्थः । खं च दिशश्च । तनोः तन्वा । ते स्वं त्वदीयं सर्वस्वम् ॥३१॥ गुरुणा शुक्रेणानुमोदितः सन् ॥३२॥ एवमुक्तेऽपि निरयपरिहारार्थं स्वर्गभ्रं

अप्रतिक्रियत्वात् । 'यस्य नेह प्रतिक्रिया' इत्युक्तेः ॥ २२ ॥ ये बहुशो निर्जितास्त एव ॥ २३ ॥ यतोऽधुना दैवप्रातिकूल्यं नोऽस्ति तस्मादित्यन्वयः ॥ २४ ॥ रसां रसातलम् ॥ २५ ॥ अथ दैत्यरसातलप्रवेशोत्तरम् । अत्राभिप्रायमाह—अयमर्थ इति । अस्य बलेः । पातयितुमधः पातयितुम् । 'यातयितुम्' इति पाठे यातनाः प्रदातुम् । 'याचयितुम्' इति पाठे तु अवशिष्टं तृतीयं पादमित्यर्थः ॥ २६ ॥ निगृह्यमाण इत्यक्षराधिक्यमार्षम् ॥ २७ ॥ वारुणैर्नागैः ॥ २८ ॥ उपकल्पय देहि ॥ २९ ॥ ३० ॥ इत्यर्थ इति । व्यापिनेति भावः । पश्यत इति । न तु त्वत्तः परोक्षं किंचित्कृतमित्यर्थः ॥ ३१ ॥ निरये 'निर्निश्चयनिषेधयोः' इति कोषात् निश्चयेनायः शुभावहोऽहं विष्णुर्यत्र स निरयस्तस्मिन् 'नित्यं मां तत्र द्रष्टासि' इति मयैव वक्ष्यमाणत्वात् । प्रतिश्रुतमदातुरिति व्याख्यातचरम् । यतः प्रतिश्रुतमदाता तस्मात् । गुरुणापि 'निष्ठां ते नरके मन्ये' इत्यादिनाऽनुमोदितः कथित इत्यर्थः । अत्र विश्वनाथः—तर्हि मया किं कर्त्तव्यमिति चेन्निरये वासः क्रियतामिति । तस्य धीरत्वं निरूप्यापि भक्तिनिष्ठां च लोके ख्यापयितुमाह—प्रतीति । निरये नरके । गुरुणानुमोदिते इति किमहं युक्तं ब्रवीम्ययुक्तं वेति तत्त्वं स्वगुरुं विद्वांसं शुक्राचार्यमेव पृच्छेति भावः । वस्तुतस्तु—भक्ताभासस्यापि नरकासंभवात्प्रतिश्रुतमदातुरपि ते निरये रलयोरैक्यान्निलये मदीये वैकुंठे वास इष्यत उचितो भवति यद्यपि तदपि निलयं मया दीयमानं सुतलाख्यं मदीयस्थानविशेषं त्रिशत्वदधिकारांते एव वैकुंठे त्वां वासयिष्यामीति भावः । गुरुणा शुक्रेण यद्यपि त्वं विमुखो ज्ञात्वा संप्रत्यवमन्यसे तदपि स त्वद्विषयकस्नेहभरेणैव लुप्तविवेको मयातिप्रियः एवावगतः अतस्तेन सहैव विशेत्यर्थः ॥ ३२ ॥ विप्रलंभते वंचते । तस्य विप्रलब्धुः । तस्य प्रसिद्धमद्भक्तस्य भवत इंद्रपदमवाप्तव्यमिति मनोरथो वृथैव यतस्त्वत्तो वैकुंठस्थाद्दूरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना ॥ तद्व्यलीकफलं भुंक्ष्व निरयं कतिचित्समाः ॥३४॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे बलिनिग्रहो नामैकविंशोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ एवं विप्रकृतो राजन्बलिर्भगवताऽसुरः ॥ भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥१॥ बलिरुवाच ॥ यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते ॥ करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥ २ ॥

शपरिहारार्थं च मनोरथं कुर्वंतं प्रत्याह । वृथेति । यः प्रतिश्रुतस्यादानेन याचकं विप्रलंभते तस्य मनोरथो वृथैव स्वर्गश्च तस्य दूर एव । स चाधः पतत्येव ॥ ३३ ॥ त्वया चाहं विप्रलब्धस्तस्माद्व्यलीकस्यानृतस्य फलं निरयं भुंक्ष्वेत्यर्थः ॥ ३४ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां बलिनिग्रहो नामैकविंशोऽध्यायः ॥ २१ ॥ द्वाविंशे तु प्रसन्नः सन्प्रस्थाप्य सुतलं बलिम् ॥ दत्त्वा वरान्हरिर्न्यूनं मत्वा तद्द्वारपोऽभवत् ॥१॥ समर्पिततनूवित्तनिर्मलाचलभक्तितः । छलितो बलिना चित्रं स्वमेवार्पयदच्युतः ॥२॥ विप्रकृतोऽपकृतः । भिद्यमानः सत्त्याच्चाल्यमानः ॥ १ ॥ हे उत्तमश्लोकेति कटाक्षः । मम वच ईरितं प्रतिश्रुतं न तावद्व्यलीकम् । त्वया कपटेन वामनतया भिक्षित्वा रूपांतरस्याविष्कृतत्वात् । एवमपि यदि भवान् व्यलीकं मन्यते तथाऽपि ऋतमेवाहं करोमि । मदुक्तं विप्रलंभनं न भवतु । मे शीर्ष्णि निजं तृतीयं पदं कुरु न च द्वाभ्यां विश्वं क्रांतवतो

स्वर्गोयं पतति संप्रत्यपि भवान् सुतलं प्रस्थाप्यमानोऽपि स्वर्गादूर्द्ध्वमधिरोहसि सुतलभोगस्य स्वर्गेप्यविद्यमानत्वादिति भावः । यो भवान्स्वदेहात्मसर्वस्वसमर्पणात्प्रतिश्रुतस्य आ सम्यक्प्रकारेण दानेन मामर्थिनं पुरुषार्थचतुष्टयवंतमपि विशेषतः प्रकर्षेण लभते, त्वदीयद्वारपालो भूत्वा स्थास्यामीति भावः ॥ ३३ ॥ आढ्यैर्भक्तिधनाढ्यैर्मान्यते पूज्यत इत्याढ्यमानी तेन । विशेषेण प्रकृष्टतया लब्धः विप्रलब्धः । यत इत्थं तस्माद्धेतोः । विगतमलीकमनृतं यस्मात्कर्मणस्तद्व्यलीकं तस्य फलं निरयं सुतलं कतिचिदित्युक्तेस्त्वदभिलषितेंद्रराज्यादि संपाद्य ततस्त्वां मोक्षयिष्यामीति भावः । उत्तानार्थस्तु स्पष्ट एव । तत्रापि भगवता प्रतिश्रुतादातुर्निरयोऽवश्यं भवतीति बोधितम् ॥ ३४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥ ॥ न्यूनमात्मानं प्रतिज्ञाताधिकग्रहणेन ज्ञात्वा । तस्य बलेर्द्वारपः (१) । चित्रमद्भुतम् । तदाह—छलितुं प्रवृत्तः स्वयमेव छलित इति । समर्पिते तनूवित्ते यस्यां सा समर्पिततनूवित्ता निर्मला चासावचला चेति निर्मलाचला सा चासौ भक्तिश्चेति निर्मलाचलभक्तिः पुनः समर्पिततनूवित्ता चासौ निर्मलाचलभक्तिश्चेति समर्पिततनूवित्तनिर्मलाचलभक्तिस्तस्याः । स्वमेवात्मानमेव (२) । अपकृतो निंदित इवोपालब्धोपि । असुरः असून्त्रातुं दातुं प्रवृत्त इत्यर्थः । अविक्लवं सत्यधर्मयुतम् ॥ १ ॥ कटाक्ष इति । न ह्येतादृशकर्मकृतामुत्तमश्लोकत्वोक्तिः शोभत इति भावः । एवमपि स्वयं कपटं कृत्वापि । विप्रलंभनं विरुद्धम् । स्वयमेवाक्षिप्य समाधत्ते—न चेत्यादिना । पदपर्याप्तं पदपूर्त्तिकरम् । इदं मच्छिरः । इति भाव इति । 'स्वात्स्वामी द्विगुणोऽधिकः' इति वाक्यादित्यभिप्रायः । उत्तमश्लोकेति । स्वप्रभौ सनर्मोक्तिः स्वस्य वामनस्य त्रिभिः पदैः परिमितां भुवं भिक्षित्वा स्वरूपांतरस्य त्रिविक्रमस्य त्रिभिः पदैः प्रतिग्रहीतुं प्रयतमानस्य निर्लोभस्य विप्रबटोस्तव निःस्पृहत्वं व्यक्तीभूतमित्येतां कीर्त्तिसुधामेव निरपायं पायंपायमेव भक्ता वयमानंदमग्ना भवाम यदहो लक्ष्मीकांतोऽपि मां तावदतिरंकमपि भूमिं भिक्षते तत्रापि छलेनाधिका जिघृक्षा तत्रापि बटुवेषेण बटुजनानां कपटमर्थस्पृहामशांतिमप्राप्त्या दातारि दंडं च स्वाभाविकं धर्ममभिव्यज्य तेषां विडंबनं शास्त्राभिज्ञानां सद्गुरूणामपि बुद्धिलोपं स्वकृपापरिमाणुमात्रस्पृष्टेष्विंद्रादिषु स्वपक्षत्वव्यंजना स्वरूपामृतमहोदधिमध्यग्नेमयि विपक्षत्वव्यंजनेत्येवमादय एवोत्तमाः श्लोकाः कविभिः श्लोकैर्गास्यंत इति भावः । यदि भवान्मद्वचो मिथ्या मन्यते स्वभक्तमन्यायेनापि जिगीषुणा त्वया तत् स्वभक्तवचो मिथ्या कर्त्तुमशक्यमेव "स्वनिगममपहाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् ॥ नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥ ३ ॥ पुंसां श्लाघ्य तमं मन्ये दंडमर्हत्तमार्पितम् ॥ यं न माता पिता भ्राता सुहृदश्चादिशंति हि ॥ ४ ॥ त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः ॥ यो नोऽनेकमदां धानां विभ्रंशं चक्षुरादिशत् ॥५॥ यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः ॥ बहवो लेभिरे सिद्धिं यामुहैकांतयोगिनः ॥ ६ ॥ तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ॥ बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥ ७ ॥ पितामहो मे भवदीयसंमतः प्रह्राद आविष्कृतसाधुवादः ॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ॥ ८ ॥

मे तव शिरः पादपर्यांतं न भवतीति मन्येथाः । वित्तेन चेत्पदद्वयं जातं तर्हीदमधिकमेव स्यात् । वित्तादपि वित्तवतोऽधिकत्वादिति भावः ॥ २ ॥ ननु च “ आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि॥आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥” इत्यादिवचनादात्मभयपरिहाराय सर्वस्वं त्यज्यते त्वं तु कुतो भीतः सन्नात्मानमर्पयस्यत आह । बिभेमीति । पदच्युतः स्थानभ्रष्टो असाधुवादादपकीर्तेर्यथाऽहं भृशमुद्विजे निरयादिभ्यो न तथा बिभेमि व्यसनाद्दुःखात् अर्थकृच्छ्राद्दारिद्र्यात् निग्रहाद्दण्डादपि ॥ ३ ॥ ननु मया निगृहीतत्वात्तवापकीर्तिर्जातैव नैवेत्याह । पुंसामिति । अर्हत्तमैरर्पितम् । यं दंडं मात्रादयोऽपि नह्यादिशंति नैवार्पयंति । हितैषिणा त्वया निगृहीतोऽहं श्लाध्य एवास्मीति भावः ॥४॥ नन्वहं देवानां हितैषी नासुराणां तत्राह । त्वं नूनमिति । पारोक्ष्यः शत्रुच्छलेन वर्तमानः ॥ ५ ॥ शत्रुत्वं पुनर्भक्तानिवास्माननुग्रहीतुमेवेत्याह । यस्मिन्निति । उ अहो । ह प्रसिद्धम् ॥ ६ ॥ अतो नात्र मम लज्जा नापि दुःखमित्याह । तेन गुरुणा भवता ॥ ७ ॥ किं च योऽयं दंडरूपो ममानुग्रहस्त्वया कृतः स तु त्वद्भक्तपौत्रत्वेन न त्वहमनुग्र

मत्प्रतिज्ञामृतमधिकर्तुम्” इति भीष्मोक्तेरिति भावः । हे सुरवर्येति । सुरैर्वरणीयत्रैलोक्यं भिक्षित्वा बलेः सकाशादानीयास्मभ्यं भोगार्थं देहीति सुरैर्मन्ये वरं प्रार्थितो भवानभूदिति भावः । तद्वचः सत्यं करोमि मदुक्तं हि प्रलंभनं न भवेत् यथा, स्वांघ्रिप्रेमामृतमददानस्य तव वचस्त्रिवर्गमात्रप्रदायकत्वात्सुरप्रलंभकमिति भावः । अन्यत्स्वामिवत् ॥ २ ॥ अत्राक्षिपति भगवान्—नन्विति । कुत इत्यात्मनोऽधिकपदार्थाभावमाह । पदाद्राज्याच्च्युतेः । व्यसनाद्विपदः ध्वंसाद्वा । “व्यसनं विपदि ध्वंसे’ इति कोशात् । दुरत्ययात् चिरस्थायिनः । अर्थकृच्छ्राद्धनहानेः । भवतस्त्वत्कृतात् । विनिग्रहाद्दंडात् । विश्वनाथः—ननु वारुणपाशबंधभयान्नरकभयाद्वाऽऽत्मानं दातु मिच्छसीति तत्राह—अर्थकृच्छ्राद् द्रव्योपार्जनकष्टात् । असाधुवादात् भगवद्भक्ता ब्राह्मणवंचका भवंतीति यथा बलिरिति वैष्णवलोकदुष्कीर्त्तिवादात् ॥ ३ ॥ पुनराक्षिपति—नन्विति । इति भाव इति । “परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः । बालो न वेद तत्तन्वि बंधुकृत्यमर्मषणः” ॥ इत्युक्तेः । “बिभर्षि दंडं खलनिग्रहाय हिताय चेच्छातनुभिः शरीरिणाम्” इतींद्रोक्तेश्चेत्याशयः ॥ ४ ॥ पुनराक्षिपति—नन्विति । गुरुर्हितकर्त्ता । विभ्रंशं मदभ्रंशरूपम् । चक्षुर्ज्ञानम् ‘चक्षुर्ज्ञाने दृगिंद्रिये’ इति धरणिः । देवानां तत्कामितैश्वर्यदानात्परमहितैषी नेति भावः ॥५॥ यस्मिन् त्वयि । रूढेन दृढेन । वैरस्यानुबंधेनाधिक्येन । विबुधेतरा दैत्याः ‘विबुधा दैत्यबुद्धज्ञेतराः’ इति कोशात् । सिद्धिं भुक्तिमुक्तिलक्षणाम् ॥ ६ ॥ ७ ॥ स्वस्य संबंधित्वं द्योतयन्नाह—किं चेति । त्वद्भक्तः प्रह्रादः । तत्पुत्रो विरोचनस्तत्पुत्रत्वादहं पौत्रः भवदीयानां भक्तानां सम्मतः मान्यः । हिंसां विषदानमत्तगजाग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमात्मनाऽनेन जहाति योंततः किं रिक्थहारैः स्वजनाख्यदस्युभिः ॥ किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम् ॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तमः ॥ १० ॥ अथा हमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः ॥ इदं कृतांतांतिकवर्ति जीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ११ ॥ श्रीशुक उवाच ॥ तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः ॥ आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः ॥ १२ ॥ तमिंद्रसेनः स्वपितामहं श्रिया विरा जमानं नलिनायतेक्षणम् ॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥ १३ ॥ तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ॥ ननाम मूर्ध्नाऽश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥ १४ ॥ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितम् ॥ उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविह्वलः ॥ १५ ॥ प्रह्लाद उवाच ॥ त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम् ॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १६ ॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ॥ तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे ॥ १७ ॥

हस्य पात्रमित्याशयेनाह । पितामह इति । भवदीयानां संमतः । यत आविष्कृतः साधुवादो यस्य । त्वमेव परमः आश्रयो यस्य सः । अतो भवतो विपक्षेण विद्विषा हिर ण्यकशिपुना विचित्रवैशसं हिंसां संप्रापितोऽपि देहादीनामसारतां निश्चित्याकुतोभयं ध्रुवं च भवतः पादपद्ममेव प्रपेदे । अथ तस्मादहमपि दैवेन तस्यैव भाग्येन तवांतिकं नीत इति चतुर्णामन्वयः ॥ ८ ॥ अंतत आयुषोंते । रिक्थहारैः पुत्रैः । इह गेहेषु केवलमायुषो व्यय एव न तु सुखं किंचित् ॥ ९ ॥ स प्रसिद्धो महान् । स्वपक्षं दैत्य कुलं क्षपयतीति तथा तस्यापि ॥ १० ॥ प्रसभं बलात्त्याजिता श्रीर्यस्य । यया श्रिया स्तब्धमतिः सन्पुमानिदं जीवितमध्रुवं न बुध्यते । कथंभूतम् । कृतांतस्यांतिकवर्ति मृत्योः सन्निहितम् ॥ ११ ॥ राकापतिः पूर्णेंदुः ॥ १२ ॥ अंजनत्विषं श्यामम् ॥ १३ ॥ स्वकृताहंकारादिरूपापराधस्मरणेन सव्रीडं नीचीनमधोमुखं यस्य सः ॥ १४ ॥ शिरसा नमन्नेवोपेत्य मूर्ध्ना ननाम । बलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिश्च विक्लवो विह्वलः ॥ १५ ॥ त्वयैवेति । न ह्यैंद्रं पदमेतदीयं त्वयाऽपहृतं किं तु स्वीयमेव पुनः स्वीकृतं तच्च शोभनमेव कृतम् । तत्र हेतुः । मन्य इति । यद्यस्माच्छ्रीरेव यदात्ममोहनं तस्माद्विभ्रंशितः ॥ १६ ॥ मोहनत्वमेवाह । यया श्रिया विद्वानपि यतः

प्रक्षेपादिना । तस्यैव प्रह्लादस्यैव ॥ ८ ॥ आत्मना देहेन । संसृतेर्हेतुभूतया "पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः" इत्यत्र स्त्रीसंगस्य संसृतिहेतुभूतहृदयग्रंथिशब्दवाच्यत्वोक्तेः । 'भिद्यते हृदयग्रंथिः' इत्यत्र हृदयग्रंथिभेद एव संसृतिनाशको ध्वनितोतः संसृतिकारणं स्त्र्येवेति ॥ ९ ॥ १० ॥ स्तब्धमतिरुच्छृंखलधीः ॥ ११ ॥ तस्य बलेः ॥ १२ ॥ सुभगं सर्वलोकप्रियम् । पिशंगम्पीतम् ॥ १३ ॥ तस्मै प्रह्लादाय ॥ १४ ॥ स प्रह्लादः । 'हरिं सुनंदाद्यनुगैः' इत्यपि क्वचित्पाठः ॥ १५ ॥ तच्च स्वीकरणम् । तत्र शोभनत्वे ॥ १६ ॥ संयतः जितेंद्रियः । न चात्र तव दत्तापहारलक्षणो दोषोऽपि स्नेहेन पुत्रहस्ते दत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृतांजलेः ॥ हिरण्यगर्भो भगवानुवाच मधुसूदनम् ॥ १८ ॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ॥ प्रांजलिः प्रणतोपेंद्रं बभाषेऽवाङ्मुखी नृप ॥ १९ ॥ विंध्यावलिरुवाच ॥ क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युः ॥ कर्तुः प्रभोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥ २० ॥ ब्रह्मोवाच ॥ भूतभावन भूतेश देवदेव जगन्मय ॥ मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥ २१ ॥ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ॥ निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥२२॥ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्याम् ॥ अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥ २३ ॥

संयतोऽपि मुह्यति तत्तस्यां सत्यां कोऽन्यः पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे पश्यति । तस्मै महाकारुणिकाय ॥१७॥ तस्य प्रह्लादस्यानुशृण्वत उवाचेति ॥ किंचिद्वक्तुं प्रवृत्त इत्यर्थः ॥१८॥ तदैव विंध्यावलिरपि वक्तुं प्रवृत्ता तां च संमानयन्हिरण्यगर्भः क्षणं तूष्णीं स्थितोऽतस्तस्या एव वाक्यं प्रथममवतारयति । बद्धं वीक्ष्येति ॥ १९ ॥ त्रिजगतः कर्तुः प्रभोः पालकस्यास्यतः संहर्तुश्चेश्वरस्य तवान्ये किमावहंति किं समर्पयंति । त्वयाऽवरोपितः कर्तृवादः कर्तारः स्वतंत्रा वयमिति वादमात्रमपि येषां ते । तथापि त्यक्तलज्जास्तत्र स्वाम्यं कुर्युः । अयं भावः । लोकत्रयं मयाऽर्पितं तृतीयपादाय देहं समर्प्य प्रतिश्रुतमृतं करोमीति देहादिषु स्वाम्याविष्कारेण भुवनत्रयं कुर्वद्भिर्निर्लज्जश्च यतस्त्वमेव सर्वस्यापि स्वामी अतो मंदबुद्धिमेनं केवलं कृपया विमुच्य पालयेति ॥ २० ॥ तदेवं प्रह्लादस्य विंध्यावलेश्च परमार्थोक्त्या प्रसन्नो हरिः । ब्रह्मा तु लोकदृष्ट्यैव विज्ञापयति भूतभावनेति त्रिभिः ॥ २१ ॥ निग्रहानर्हत्वे हेतुः । कृत्स्नेति । सर्वस्वमेवाह । आत्मेति अविक्लवया अविह्वलया ॥ २२ ॥ तदेव कैमुत्यन्यायेनाह । यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वोऽपि जन उत्तमां गतिं प्राप्नोति तस्मै तुभ्यमसौ बलिस्त्रिलोकीं दाश्वान्दत्तवान्स आर्तिं कथं प्राप्नुयात् ॥ २३ ॥

स्यापि मोदकादेरहिताशंकया पुनराच्छिद्य नीतवतः पितुर्यथा तथेत्यर्थः ॥ १७ ॥ इत्यर्थ इति । अन्यथा बद्धं वीक्ष्येति वक्ष्यमाणवचनं विरुध्येतेति भावः ॥ १८ ॥ तदैव ब्रह्मोक्तिसमये एव । तां विन्ध्यावलिम् । अतः सांत्वनार्थत्वादेव । तस्या विंध्यावल्याः । ननु ब्रह्मसंमुखे वक्तुं कथं प्रवृत्ता तस्यातिज्येष्ठत्वादिति चेद् ग्रथांतरसंमत्या तन्न दोष इत्याह–"अन्यत्र लज्जा कर्त्तव्या स्त्रिया श्वशुरसंनिधौ । गुणानुकथने विष्णोस्त्यक्तलज्जा सदा भवेत् ॥" इति श्वशुरपदं गुरुजनोपलक्षकम् । अवाङ्मुखी अधोमुखी । राजपत्नीनां सभ्यसंभाषणं न दोषाय द्रौपद्यादिषु दृष्टत्वादिति त्वं जानास्येवेति द्योतयन्नाह–नृपेति ॥ १९ ॥ अत्राशयमाह–अयं भाव इति । अयं मत्पतिः ॥ २० ॥ निग्रहं बंधनम् ॥ २१ ॥ आत्मा देहस्तद्रूपं सर्वस्वमित्यर्थः ॥ २२ ॥ तदेव निग्रहानर्हत्वमेव । अशठधीर्निष्कपटमनाः । अविक्लवमना अव्याकुलचेताः ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहम् ॥ यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते ॥ २४ ॥ यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः ॥ नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥ २५ ॥ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः ॥ २६ ॥ मानस्तंभनिमित्तानां जन्मादीनां समंततः ॥ सर्वश्रेयःप्रतीपानां हंत मुह्येन्न मत्परः ॥ २७ ॥ एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः ॥ अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥ २८ ॥ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥ ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥ २९ ॥ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः ॥ छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ॥ ॥ ३० ॥

तस्य विशोऽर्थान्। नन्वर्थापहारः कोऽयमनुग्रहस्तत्राह। यन्मदः यैरर्थैर्मदो यस्य सः। अत एव स्तब्धोऽनम्रः सन्। मदस्तंभहेतूनामर्थानामपहार एवानुग्रह इत्यर्थः ॥ २४ ॥ दुर्लभं पुरुषजन्म कथंचिल्लब्धवतो जीवस्य जन्मादिनिमित्तो गर्वो महाहानिकरस्तस्य च नाशो मदनुग्रहादेवेत्याह यदेति द्वाभ्याम्। अनीशः परतंत्रः स्वनिजैः कर्मभिर्नाना योनिषु कृमिकीटकादिषु संसरन् ॥ २५॥ तत्र पौरुष्यां गतौ जन्मादिभिरपि यस्य यदि स्तंभो न भवेत्तर्ह्ययं मदनुग्रह एव ॥ २६॥ कथं तर्हि ध्रुवादिभ्योऽर्थसंपदो ददासीति चेत्तत्राह। मान एव स्तंभोऽनम्रता तस्य निमित्तभूतानां समंततः सर्वशः सर्वश्रेयःप्रतिकूलानां जन्मादीनां सत्त्वेऽपि जन्मादिभिरिति वा । हंतेति खेदे। हे ब्रह्मन्मत्परो न मुह्येदतो भक्तस्येच्छया संपदोऽपि ददामि। अभक्तस्तु मुह्येदिति तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः॥ २७ ॥ अस्य चेदानीं मत्परत्वादन्यैर्दुष्प्रापमपि दास्यामीति वक्तुं तस्य मोहाभावमाह एष इति त्रिभिः ॥ २८ ॥ २९ ॥ न ह्येतस्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमानित्यादिना छलैरेव मया धर्म उक्तस्तथाऽपि तं धर्ममयं न त्यज

अर्थापहारस्यानुग्रहत्वे आक्षिपति–नन्विति । अत एवार्थमत्तत्वादेव । इत्यर्थ इति । "अनुग्रहोऽयं भवता कृतो हि नो राज्यानुबंधाय दमो यदृच्छया" इति कृष्णं प्रति जरासंधबद्धराजन्योक्तेः । "असतः श्रीमदांधस्य दारिद्र्यं परमञ्जनम् " इति श्रीदशमोक्तेश्चेति भावः। विशो धनानि "विट् पुंसि मनुजे वैश्ये प्रजापुत्रीहरित्सु च। स्त्रियां प्रवेशे वा पुंसि धने चाथ नपुंसकम् ॥" इति ॥ २४ ॥ न च सर्वस्यानुग्राह्यजीवस्य धनानि हराम्येव कस्यचिन्न हरामि कस्मैचिदतिशयेन ददामीति मदनुग्रहस्य लोकैरतर्क्यस्यानेकविधत्वमस्तीति मुख्यं मदनुग्रहं शृण्वित्याह–यदेति। तस्य गर्वस्य ॥ २५ ॥ आदिना परिजनग्रहः। अस्य जीवस्य । स्तंभो गर्वः। " स्थूणाभिमानौ स्तंभौ स्तः स्तम्बौ तु पत्रगुच्छकौ ॥" इति निरुक्तेः ॥ २६ ॥ अत्र प्रतिवंद्याशंकते–कथमिति । सत्त्वेपीति । पदद्वयानयनापेक्षया तृतीयांते समस्ते पदे बोध्ये। ' मानस्तंभनिमित्तैश्च जन्मादिभिः समंततः ' इति पाठकल्पना कार्या । इति भाव इति। अभक्तस्याज्ञत्वेन मोहसंभवात्तन्मोहनिवृत्त्यर्थमुचितमेव तत्संपदपहरणमिति तात्पर्यम् ॥ २७ ॥ अस्य बलेः । सीदन्नपि धनापहारबंधनादिना पीडितोऽपि ॥ २८ ॥ क्षिप्तः तिरस्कृतः। यातनां तीव्रवेदनाम्। अनुयापितः प्रापितः ॥ २९ ॥ भर्त्सितो वाचा तिरस्कृतः । अतो धर्मत्यागाभावात् ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष मे प्रापितः स्थानं दुष्प्रापममरैरपि ॥ सावर्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ॥ ३१ ॥ तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम् ॥ यन्नाधयो व्याधयश्च क्लमस्तंद्रा पराभवः ॥ नोपसर्गा निवसतां संभवंति ममेक्षया ॥ ३२ ॥ इंद्रसेन महाराज याहि भो भद्रमस्तु ते ॥ सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ ३३ ॥ न त्वामभिभविष्यंति लोकेशाः किमुतापरे ॥ त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ॥ ३४ ॥ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् ॥ सदा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान् ॥ ३५ ॥ तत्र दानवदैत्यानां संगात्ते भाव आसुरः ॥ दृष्ट्वा मदनुभावं वै सद्यः कुंठो विनंक्ष्यति ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे बलिवामनसंवादो नाम द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ इत्युक्तवंतं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः ॥ बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युद्गलो गद्गदया गिराऽब्रवीत् ॥ १ ॥ बलिरुवाच ॥ अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥

त्यतः सत्यवाक् ॥ ३० ॥ मे मया । अहमेवाश्रयः पालको यस्य सः ॥ ३१ ॥ स्थानं प्रापित इति यदुक्तं तदेव स्थानमाह । तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तामधिवसत्वित्यर्थः । यद्यस्मिन्वसतां व्याध्यादयो ममेक्षया न संभवंति ॥ ३२ ॥ एवं ब्रह्माणं प्रत्युक्त्वा करुणापरवशः साक्षाद्बलिं प्रत्याह इंद्रसेनेति चतुर्भिः ॥ ३३ ॥ त्वच्छासनमतिगच्छंत्यतिवर्तंत इति तथा तान् ॥ ३४ ॥ तथाऽपि भगवद्वियोगात्तदनिच्छंतं प्रत्याह । सदेति ॥ ३५ ॥ संगाद्य आसुरो भावः स सद्यः कुंठो मंदः सन् विनंक्ष्यति ॥ ३६ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ त्रयोविंशे बलौ याते सुतलं सपितामहे ॥ उपेंद्रेण दिवं गत्वा पूर्ववन्मोदते हरिः ॥ १ ॥ बाष्पस्य कलाभिर्बिंदुभिराकुले ईक्षणे यस्य । भक्त्या उद्गल उत्कंठः ॥ १ ॥ अहो त्वत्प्रणाममहिमा यदर्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां

अमरैरपि विनाश्वमेधशतं प्राप्तुमशक्यम् ॥ ३१ ॥ इत्यर्थ इति । यावदिंद्रत्वं न यास्यत्ययं तावत्सुतललोके वसत्विति भावः । क्लमः ग्लानिः । तंद्रा आलस्यम् । उपसर्गाः पिशाचादिकृतोपद्रवाः । ईक्षया दर्शनेन ॥ ३२ ॥ किं मृतवदेक एव यास्यामीति चेदाह—ज्ञातिभिरिति ॥ ३३ ॥ ननु तत्र गतं मामिंद्रादयः पराभविष्यंत्येव तत्राह—न त्वामिति । तत्रत्यदैत्या मे शासनं न करिष्यंति बद्ध्वा पातितत्वादित्यत्राह—त्वदिति ॥ ३४ ॥ तथापि भगवता सांत्वितेऽपि । तत्र सुतले ॥ ३५ ॥ ननु तत्र कुसंगदोषोऽस्त्येवेति चेदाह—तत्र लोके । आसुरोऽहंकारमदादिरूपः । अनुभावं प्रभावं दर्पघ्नत्वादिरूपम् । दृष्ट्वा ज्ञात्वा । कुंठः छिन्नः ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥ उपेंद्रेण वामनेन सह । हरिरिंद्रः (१) । बाष्पस्य नेत्रजलस्य ॥ १ ॥ अभक्तेऽपि मयीत्यहो अद्भुतम् । अपसदेऽधमे । “ असभ्याधमपुण्येषु सुखिन्यपसदो मतः ” इति वारतान्तवेः। अत्राशयमाह—अयं भाव इति ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः ॥ विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥३॥ एवमिंद्राय भगवान्प्रत्यानीय त्रिविष्टपम् ॥ पुरयित्वाऽदितेः काममशासत्सकलं जगत् ॥४॥ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम् ॥ निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ ५ ॥ प्रह्लाद उवाच ॥ नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते ॥ यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरपि वंदितांघ्रिः ॥ ६ ॥ यत्पादपद्म मकरंदनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः ॥ कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥ चित्रं तवेहित महोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य ॥ सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥

योऽर्थस्तस्य विधावभक्तेऽपि तस्य संपादने समाहितोऽप्रमत्तः स्थितः । कुतः । यद्येनोद्यमेन लोकपालैरमरैः सत्त्वप्रधानैरप्यलब्धपूर्वस्त्वदनुग्रहोऽपसदे नीचेऽसुरे राजसे मय्य र्पितः । अयं भावः । परमेश्वराय तुभ्यमहं वराकस्त्रिलोकीं दत्तवानित्येतदास्तां प्रणामोऽपि न सम्यक्कृतः । किं तु तदर्थमुद्यममात्रं कृतं तेन च कर्मतपोदानादिकोटिभिरप्यल भ्यस्त्वदनुग्रहः संपादितः अहो त्वत्प्रणामप्रभावाश्चर्यमिति ॥ २ ॥ ३ ॥ अशासदुपेंद्रः सन् पालयामास ॥ ४ ॥ ५ ॥ दुर्गपालोऽसि 'रक्षिष्ये सर्वतोऽहं त्वाम्' इत्युक्त त्वात् ॥ ६ ॥ हे शरणदाश्रयप्रद । ये कुसृतयो दुर्वृत्ताः खलयोनय उग्रजातयश्च ते वयं तस्य भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः बहुमानेन चित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयतां प्रापिताः ॥ ७ ॥ भक्तप्रियत्वादिति चेत्तर्ह्येवं तवेहितमहो चित्रम् । किं तत् । सर्वात्मनः समदृशश्च स्वभावो विषम इति यत् । सर्वा त्मत्वे चित्रचरितत्वे हेतुः । अमिताऽचिंत्या योगमाया तस्या या लीला तया विसृष्टानि विरचितानि भुवनानि येन तस्य । अहो इत्यत्र संधिरार्षः । समदृक्त्वे हेतुः ।

ततो हर्य्यादिनत्युत्तरम् । मुक्तः वारुणपाशैरिति शेषः । विवेश गंतुमुद्यतोभूदित्यर्थः । अन्यथा बलिना सह प्रह्लादस्य "वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम्" इति 'प्रविवेश महीबिलम्' इत्युक्तं प्रवेशनं न संगच्छत इति ॥ ३ ॥ प्रत्यानीय समर्प्य ॥ ४ ॥ निशाम्य दृष्ट्वा । भक्त्या प्रवणो नम्रः । 'क्रमनिम्नमहीभागोदरप्रह्वचतुष्पथे । प्रवणः' इति मेदिनी ॥ ५ ॥ दुर्गेभ्यो दुःखेभ्यः पालयतीति तथा । द्वारपालो वा ॥ ६ ॥ अश्नुवते प्राप्नुवंति भुंजते वा अनेकार्थत्वाद्धातूनाम् । कुत्सिता सृतिः पंथा येषां ते कुसृतयः 'सृतिः स्त्री गमने मार्गे' इति मेदिनी ॥ ७ ॥ तत् ईहितम् । लीला विलासः 'लीला केलिविलासयोः' इति मेदिनी । अकारप्रश्लेषेणाह—अथ वेति । अविषमस्वभाव इति छेदः । इत्यर्थ इति । नहि कल्पतरोः केनचिदपि सार्द्धं प्रीतिर्द्वेषो वा यतो वैषम्यं स्यात्तथापि ये तमाश्रितास्तानेव फलैरापूरयति तद्वत्त्वमपीति भावः । न केवलं मादृशभक्तेष्वेव तवैतावाननुग्रहः किं तु भक्तमात्रेषु येषु केष्वपीत्याह—चित्रमिति । हेऽमितयोग अपरिमितयोगैश्वर्य । तवेहितं चारित्रमहो चित्रमत्याश्चर्यं युक्तयतीतमित्यर्थः । किं तत् समदृशोऽपि तव विषमस्वभाव इति यत् । किं मे समदृक्त्वलक्षणं तत्राह—मायायाः स्वीयमायाशक्तेर्लीलया विसृष्टानि भुवनानि येन तस्य सर्वस्रष्टुरित्यर्थः । विशारदस्य सर्वाभिज्ञस्य । सर्वात्मनः सर्वेषां चेतयितुः । तेन सर्वेषां तव सृज्यत्वादभिज्ञेयत्वाच्चेतयित व्यत्वाच्च सर्वेषु तेषु तव समदृक्त्वमेव दृष्टमित्यर्थः । किं मे वैषम्यं दृष्टं तत्राह—भक्तप्रियो यदसीति तेषु सृष्टेषु मध्ये ये भक्तास्तेष्वेव प्रीणाति नान्येष्विति यत् एतदेव वैषम्यमित्यर्थः । तर्हि किं ममैष दोष एव स्थाप्यते नहिनहि किन्तु महागुण एवेत्याह—कल्पतरुस्वभाव इति । कल्पतरुर्यथाश्रितानामेव कामं पूरयति न त्वनाश्रितानां तथैव त्वं भक्तेष्विति भजनवत्स्वेव तव प्रीतिरिति । वस्तुतस्ते साम्यमेवायातं तदुक्तं त्वयैव "समोऽहं सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयम् ॥ मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥ नित्यं द्रष्टासि मां तत्र गदापाणिमव स्थितम् ॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः॥१०॥श्रीशुक उवाच ॥ आज्ञां भगवतो राजन्प्रह्लादो बलिना सह ॥ बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः ॥११॥ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ॥ प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥१२॥ अथ होशनसं राजन्हरिर्नारायणोंतिके ॥ आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥ १३ ॥ ब्रह्मन्संतनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ॥ यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥१४॥ शुक्र उवाच ॥ कुतस्तत् कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ॥ यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥ १५ ॥ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः ॥ सर्वं करोति निश्छिद्रमनुसंकीर्तनं तव ॥ १६ ॥

विशारदस्य सर्वज्ञस्य । अथवा भक्तप्रियत्वेऽपि तव वैषम्यं नास्त्येव यतः कल्पतरुस्वभावः सन् भक्तप्रियोऽसि । न हि कल्पतरुराश्रितानामेव कामान्पूरयन्नपि विषमो भवतीत्यर्थः ॥ ८ ॥ ९ ॥ मद्दर्शनेन यो महाह्लादस्तेन ध्वस्तं कर्मनिबंधनमज्ञानं यस्य ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ कर्म वितन्वतः शिष्यस्य यच्छिद्रमंतरं न्यूनं जातं तत्संतनु विस्तारय संधत्स्व । यजमानं विना कथं संधातव्यमिति न वाच्यमित्याह । यत्तदिति । ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव समं भवेत् । किं पुनरनुष्ठितमित्यर्थः ॥ १४ ॥ भवान्यस्य सर्वेणापि भावेन देहगेहादिना वस्तुमात्रेण पूजितस्तस्य कर्मसु कुतो वैषम्यम् । कथंभूतः । कर्मणामीश्वरः प्रवर्तकः यज्ञेशो यज्ञफलप्रदः । यज्ञमयश्च पुरुषः ॥ ॥ १५ ॥ आस्तां तावत्पूजा । यस्मान्मंत्रतः स्वरादिभ्रंशेन । तंत्रतो व्युत्क्रमादिना । देशतः कालतश्च अर्हतः पात्रतः । वस्तुतश्च दक्षिणादिना यच्छिद्रं न्यूनं तत्सर्वं तव

भूतेषु न मे द्वेष्योस्ति न प्रियः । ये भजंति च मां भक्त्या मयि ते तेषु चाप्यहम् ॥'' इति विश्वनाथः ॥ ८ ॥ वत्स प्रिय “ वत्सं वक्षः प्रिये पुंसि तर्णके पुत्रवर्षयोः ” इति धरणिः ॥ ९ ॥ ननु मां किमर्थमधोलोके त्वद्दर्शनशून्ये प्रेषयसीति चेदाह—नित्यमिति । तत्र सुतले । गदापाणिमिति । तत्रागतभवद्रिपुनाशार्थं सशस्त्र एव स्थास्यामि ‘ रक्षिष्ये सर्वतोऽहं त्वाम् ’ इति प्रतिज्ञातत्वात् । ननु गदया बाह्यशत्रुनाशेप्यंतस्थाज्ञानशत्रुनाशः कथं स्यादितिचेदाह—मद्दर्शनेति । महाह्लादः स्वरूपसाक्षात्कारानंदलक्षणं ज्ञानम् “ विज्ञानमानंदं ब्रह्म ” इति श्रुतेरानंदापरपर्यायमहाह्लादज्ञानशब्दयोरेकार्थत्वात्तेन ध्वस्तं नष्टं कर्मभिर्निबध्नातीति कर्मनिबंधनमज्ञानं यस्य स तथा । तथा च मद्दर्शनजसाक्षात्कारेणाज्ञाननिवृत्त्या तव जीवन्मुक्तिसुखमपि भविष्यतीति भावः ॥ १० ॥ मूर्ध्न्याधायेत्यपि क्वचित्पाठः ॥ ११ ॥ तेन भगवताऽनुज्ञातः ‘वत्स प्रह्लाद भद्रं ते’ इत्यादिना ज्ञतः ॥ १२ ॥ अथ बलिसुतलप्रवेशानंतरम् । लोकसंग्रहार्थमुशनसं भार्गवम् । अंतिके समीपे स्थितम् ॥ १३ ॥ शिष्यस्य बलेः । इत्यर्थ इति । ब्राह्मणकृतं सर्वेषां सर्वफलप्रदं भवतीति भावः । तदुक्तम् ''विप्रैः संपादितं यस्य तीर्थस्नानव्रतादिकम् । उपवासः क्रतुर्होमः संपन्नं तस्य तत्फलम्'' इति धर्मविवृतौ ‘ब्रह्मविद्ब्रह्म ईरितम्’ इति कोशात् । समं न्यूनाधिक्यवर्जितं परिपूर्णमित्यर्थः । ‘समस्तुल्ये च पूर्णे च लक्ष्मीनारायणेभ्ययोः’ इति निरुक्तिकोशात् ॥ १४ ॥ १५ ॥ निश्छिद्रं पूर्णं करोतीत्यर्थः । तदुक्तम् ''यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति तं वंदे हरिमच्युतम् ॥'' इति । किञ्च ''प्रमादात्कुर्वतां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाऽपि वदतो भूमन्करिष्याम्यनुशासनम् ॥ एतच्छ्रेयः परं पुंसां यत्तवाज्ञाऽनुपालनम् ॥ १७ ॥ श्रीशुक उवाच ॥ अभिनंद्य हरेराज्ञामुशना भगवानिति ॥ यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥ १८ ॥ एवं बलेर्महीं राजन्भिक्षित्वा वामनो हरिः ॥ ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतम् ॥ १९ ॥ प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च ॥ २० ॥ कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च ॥ लोकानां लोकपालानामकरोद्वामनं पतिम् ॥२१॥ वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः ॥ मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ ॥ २२ ॥ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये ॥ तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ॥ २३ ॥ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनम् ॥ लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः ॥ २४ ॥ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः ॥ श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥ २५ ॥ ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ॥ पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥२६॥ सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतम् ॥ धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥२७॥ सर्वमेतन्मयाख्यातं भवतः कुलनंदन ॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनम् ॥ २८ ॥ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ॥ किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥

नामानुकीर्तनमात्रमेव निश्छिद्रं करोतीति ॥ १६ ॥ १७ ॥ हरेराज्ञां प्रतिनंद्य बलेर्यज्ञच्छिद्रं समाधत्त संदधे । पाठांतरे समाधाय तदाज्ञां संपादितवानिति शेषः ॥१८॥ ॥ १९ ॥ देवाश्च ऋषयश्च भूमिपाश्च मनवस्तैः सहितः ॥ २० ॥ २१ ॥ ननु लोकादीनां पतिरिंद्रोऽस्त्येव । सत्यम् । तथाऽपि वेदादीनां कल्पं पालने दक्षं वामनमुपेंद्रं कल्पयांचक्रे ॥ २२ ॥ २३ ॥ देवयानेन तत्संज्ञकमार्गेण विमानेनेति वा ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ एतच्चरितमाख्यातमिति विशेषोक्त्याऽन्यान्यपि संतीत्युक्तम् ॥ २८ ॥ तानि तर्हि निःशेषाणि वर्णनीयानीत्यपेक्षायामाह । पारमिति । उरु बहुधा विक्रमतो विष्णोर्महिम्नः पारं यो गृणानो भवति स मर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान् । यथा पार्थिवपरमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमप्यशक्यमित्यर्थः । तथा च मंत्रः । " विष्णोर्नु कं वीर्याणि " इति । एतदेव मंत्रांतरार्थं सूचयन्नाह । यस्य पुरुषस्य पूर्णमहिम्नः पारं मंत्रदृगृषिर्वसिष्ठ इति एवमाह । कथम् । किं जायमानो जातो वा उपैति न कोऽपीति वदन्ननंतत्वेनैवाहेत्यर्थः । तथा च मंत्रः ।

कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥" इति ॥ १६ ॥ यद्यपि तव नामस्मरणाद्येव सर्वकर्मसांगतापादकं किं पुनस्तव साक्षाद्दर्शनादिकं तथापीति । भूमन्निति । सर्वोत्कृष्टस्य तवाज्ञापालनमुचितमेवेत्याह ॥ १७ ॥ पाठांतरे 'समाधाय' इत्येवंरूपे सम्यगवसंधाय ॥ १८ ॥ महीं भिक्षित्वा पृथ्वीभिक्षामिषेण त्रिलोकीं भिक्षित्वा ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ तदा उपेंद्रकल्पनावसरे ॥ २३ ॥ तत उपेंद्रकल्पनोत्तरम् ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ निःशेषाणि समग्राणि । इयर्थ इति । पार्थिवपरमाणुगणनं तु कथंचिच्छक्यमपि विष्णुगुणगणनं तु सर्वथाऽशक्यमनंतत्वादिति भावः । अत्र प्रमाण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य इदं देवदेवस्य हरेरद्भुतकर्मणः ॥ अवतारानुचरितं शृण्वन्याति परां गतिम् ॥ ३० ॥ क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ॥ यत्रय
त्रानुकीर्त्यंत तत्तेषां सुकृतं विदुः ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणेऽष्टमस्कंधे वामनावतारचरिते त्रयोविंशतितमोऽध्यायः ॥ २३ ॥
राजोवाच ॥ भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः ॥ अवतारकथामाद्यां मायामत्स्यविडंबनम् ॥ १ ॥ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितम् ॥
तमःप्रकृति दुर्मर्षं कर्मग्रस्त इवेश्वरः ॥ २ ॥ एतन्नो भगवन्सर्वं यथावद्वक्तुमर्हसि ॥ उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥ सूत उवाच ॥
इत्युक्तो विष्णुरातेन भगवान्बादरायणिः ॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतम् ॥ ४ ॥ श्रीशुक उवाच ॥ गोविप्रसुरसाधूनां छंदसामपि
चेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः ॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ६ ॥

“न ते विष्णो जायमानो न जातो देव महिम्नः परमं तमाप” इति ॥ २९ ॥ य इदं शृण्वन् भवति स परां गतिं याति ॥ ३० ॥ सुकृतं यथावत्कृतं विदुः ॥ ३१ ॥
इति श्रीमद्भागवते अष्टमस्कंधे टीकायां त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः ॥ लीलोच्यते यतः सत्यव्रतरक्षा महार्णवे ॥ १ ॥
तनुं तनुं विदर्श्यादौ निजैश्वर्यनिदर्शनात् ॥ मत्स्यं पृच्छति पृथ्वीशो लीलया वामनोपमम् ॥ २ ॥ मायया मत्स्यविडंबनं मत्स्यरूपानुकरणं यस्यां निरूप्यते ताम् ॥ १ ॥
ननु कस्मादकस्मादेव मत्स्यावतारश्रवणेच्छा श्रीवामनसादृश्यादित्याह यदर्थमिति द्वाभ्याम् । दुर्मर्षं दुःसहम् ॥ २ ॥ बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृत्वा ववृध
इति युक्तमुक्तं यदर्थं तु लोकजुगुप्सितं मात्स्यं रूपमधारयदेतन्नो यथावद्वक्तुमर्हसीत्यर्थः ॥३॥४॥ सामान्येनावतारप्रयोजनमाह । गोविप्रेति ॥ ५ ॥ जुगुप्सितत्वं परि

माह—तथा चेति । व्याख्यातोऽयं मंत्रो द्वितीयस्कंधाष्टमाध्याये स्वामिचरणैरित्युपरम्यते । एतदेव विष्णुगुणगणनाशक्यत्वमेव । इत्यर्थ इति । गणनाशक्यत्वादनंतमित्याहेति भावः । अत्र प्रमाणं मंत्रांतरमाह—तथां
चेति । स्पष्टार्थोयं मंत्रः ॥ २९ ॥ इदं पूर्वमुक्तम् ॥ ३० ॥ दैवे यज्ञादौ । पित्र्ये श्राद्धादौ । मानुषे विवाहादौ । तेषां कीर्तयताम् । तत् कर्म । यथावत्कृतं यथोक्तफलदम् । विदुः शास्त्रज्ञा इति शेषः ॥ ३१ ॥
इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ “मनवे ह वै प्रातः अवनेज्यमुदकमाजहुर्यथेदं पाणिभ्यामवनेजनायाहरंत्येव तस्यावनेनिजानस्य मत्स्यः पाणी आपेदे स हास्मै वाचमुवाच
बिभृहि मा पारयिष्यामि त्वेति कस्मान्मा पारयिष्यसीत्यौघ इमाः सर्वाः प्रजा निर्वोढा ततस्त्वां पारयितास्मीति कथं ते भृतिरिति स होवाच यावद्वै क्षुल्लका भवामो बह्वी वैनस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति
कुंभ्यां मयि बिभरासि स यदा तामतिवर्द्धा अथ कर्षूं खात्वा तस्यां मा बिभरासि स यदा तामतिवर्द्धा अथ मा समुद्रमभ्यवहरासि तर्हि वातिनाष्ट्रो भवितास्मीति शश्वद्ध झष आस स हि ज्येष्ठं वर्द्धते अथ
तिथिं॰ स मां तदौघ आगंता तन्मा नावमुपकल्प्योपासासै स ओघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मि” इत्यादिशतपथब्राह्मणप्रथमकांडाष्टमाध्याये षष्ठप्रपाठके वार्णितां कथामनुवदति श्रीव्यासः ।
प्रसंगेनावतारकथाप्रसंगेन । यतः येन कृतेति शेषः (१) । तनुं सूक्ष्मम् । तनुं शरीरम् । आदौ पूर्वम् । पश्चान्निजैश्वर्यनिदर्शनात् लीलया वामनोपमं मत्स्यम् (२) । आद्यां दशावतारेष्वादेर्मत्स्यावतारस्येमामाद्याम् ।
मायामत्स्यस्यानुकरणमेव स्वयं त्वमायिक एव मत्स्य एवेति भावः । यद्वा—स्वस्यालौकिकैः प्रभावैर्मायामत्स्यस्य विडंबनं तिरस्कारो यस्याः सा तथा ॥१॥ अत्राशंकते—नन्विति । तिर्य्यग्योनित्वान्निंद्यम् । कर्मग्रस्तो जीवः ॥२॥
इत्यर्थ इति।इह कस्यानुग्रहार्थं लोकनिंद्यं रूपं धृतवानिति वदेति भावः॥३॥४॥साधवो वैदिकाचारनिष्ठाः।छंदसां वेदानाम्। अर्थस्य शिष्टानां सुमार्गसंपादितधनस्य चौरादिभ्यो रक्षार्थमित्यर्थः॥५॥धियो गुणैः “सत्त्वं रजस्तम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः ॥ समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥७॥ कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ॥ मुखतो
निःसृतान्वेदान्हयग्रीवोंतिकेहरत् ॥ ८ ॥ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितम् ॥ दधार शफरीरूपं भगवान्हरिरीश्वरः ॥ ९ ॥ तत्र राज
ऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ॥ नारायणपरोऽतप्यत्तपः स सलिलाशनः ॥ १० ॥ योऽसावस्मिन्महाकल्पे तनयः स विवस्वतः ॥ श्राद्ध
देव इति ख्यातो मनुत्वे हरिणाऽर्पितः ॥ ११ ॥ एकदा कृतमालायां कुर्वतो जलतर्पणम् ॥ तस्यांजल्युदके काचिच्छफर्येकाऽभ्यपद्यत ॥ १२ ॥
सत्यव्रतोंजलिगतां सह तोयेन भारत ॥ उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥ १३ ॥ तमाह साऽतिकरुणं महाकारुणिकं नृपम् ॥ यादोभ्यो
ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ॥ कथं विसृजसे राजन्भीतामस्मिन्सरिज्जले ॥ १४ ॥ तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम् ॥
अजानन्रक्षणार्थाय शफर्याः स मनो दधे ॥ १५ ॥ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ॥ कलशाप्सु निधायैनां दयालुर्निन्य आमश्रम् ॥
॥ १६ ॥ सा तु तत्रैकरात्रेण वर्धमाना कमंडलौ ॥ अलब्ध्वात्मावकाशं वा इदमाह महीपतिम् ॥ १७ ॥ नाहं कमंडलावस्मिन्कृच्छ्रं वस्तुमिहो
त्सहे ॥ कल्पयौकः सुविपुलं यत्राहं निवसे सुखम् ॥१८॥ स एनां तत आदाय न्यधादौदंचनोदके ॥ तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत ॥ १९ ॥

हरति । धियो गुणैर्यान्युच्चावचानि भूतानि तेषु नियंतृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् । कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशंकेति भावः ॥ ६ ॥
विशेषतो मत्स्यावतारप्रयोजनमाह आसीदिति त्रिभिः । ब्रह्मणो निद्रायां भवो ब्राह्मस्तेनैव निमित्तेन जातो नैमित्तिकः । समुद्रे उपप्लुता निमग्नाः ॥ ७ ॥ अंतिके
निःसृतान् ॥ ८ ॥ शफरीरूपं मत्स्यरूपम् ॥ ९ ॥ प्रयोजनांतरं लीलाप्रकारं चाह तत्र राजऋषिरित्यादि यावत्समाप्ति ॥ १० ॥ स एव श्राद्धदेव इति ख्यातः ॥ ११ ॥
कृतमालायां नद्याम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ यत्राहं सुखं निवसामि तदोकः स्थानं कल्पय ॥ १८ ॥ औदंचनोदके मणि

इति गुणा बुद्धेर्न चात्मनः" इति वक्ष्यमाणत्वात्सत्त्वादिभिर्यानि भूतानि जायंते तेषु धीपदं प्रकृतिपरमत्र ज्ञेयम् । निर्गुणत्वात् प्रकृतेः परस्तात् । "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः ॥ ६ ॥ तत्र लये ।
नृपालनव्यग्रत्वात्त्वैतज्ज्ञानं नास्तीत्याह—नृपेति ॥ ७ ॥ हयग्रीवो दैत्यः ॥ ८ ॥ तत् वेदहरणरूपम् ॥ ९ ॥ तत्र तदा ॥ १० ॥ महाकल्पो हि यद्यपि ब्रह्मण आयुर्षोंते भवति तथापि दर्शितव्याकस्मिककल्पापेक्षया
दैनंदिनकल्पस्यापि महाकल्पत्वमस्तीत्युक्तमस्मिन्महाकल्प इति । अर्पितः स्थापितः ॥ ११ ॥ तस्य सत्यव्रतस्य । 'प्रोष्ठी तु शफरी द्वयोः' इत्यमरादत्र स्त्रीपुंसप्रयोगोक्तौ न विरोधः शंक्यः ॥१२॥ १३ ॥ तं सत्यव्रतम् ।
ययादोभ्यो जलजंतुभ्यः । 'यादांसि जलजंतवः' इत्यमरः ॥ १४ ॥ तं विष्णुम् । स सत्यव्रतः ॥ १५ ॥ तस्याः शफर्याः । स राजा । एनां मत्सीम् ॥ १६ ॥ सा मत्सी । तत्र कलशजले । कमंडलावलब्धात्मावकाशं
यथा स्यात्तथा । इदं वक्ष्यमाणं वचः ॥ १७ ॥ यत्र ओकसि ॥ १८ ॥ स राजा । एनां मत्सीम् । ततः कमंडलुजलात् । न्यधात्स्थापितवान् । "पात्रं हस्तत्रयव्यासमुदंचनमुदीरितम्" इति स्वामी । तत्र औदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न म एतदलं राजन्सुखं वस्तुमुदंचनम् ॥ पृथु देहि पदं मह्यं यत्त्वाऽहं शरणं गता ॥ २० ॥ तत आदाय सा राज्ञा क्षिप्ता राजन्सरोवरे ॥ तदावृत्त्यात्मना तोयं महामीनोऽन्ववर्धत ॥ २१ ॥ नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ॥ निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥ २२ ॥ इत्युक्तः सोऽनयन्मत्स्यं तत्रतत्राविदासिनि ॥ जलाशये संमितं तं समुद्रे प्राक्षिपज्झषम् ॥ २३ ॥ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ॥ अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि ॥ २४ ॥ एवं विमोहितस्तेन वदता वल्गुभारतीम् ॥ तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् ॥ ॥ २५ ॥ नैवंवीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि च ॥ यो भवान्योजनशतमह्नाऽभिव्यानशे सरः ॥ २६ ॥ नूनं त्वं भगवान्साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ २७ ॥ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ॥ २८ ॥ सर्वे लीलाऽवतारास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ २९ ॥ न तेऽरविंदाक्ष पदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ३० ॥ श्रीशुक उवाच ॥ इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियम् ॥ ३१ ॥

कस्थे जले ॥१९॥२०॥२१॥ रक्षायोगेन रक्षाया योगेनोपायेन । यथा महाह्रदप्राप्तेरर्वाक् जलं विना न शुष्येयं तेनोपायेन निधेहि । अविदासिनि अनुपक्षये ॥२२॥ संमितं तत्तज्जलाशयपरिमितम् ॥ २३ ॥ २४ ॥ २५ ॥ अभिव्यानशेऽभितो व्याप्तवान् ॥ २६ ॥ २७ ॥ मुख्यः सत्य आत्मा च गतिश्चाश्रयः ॥ २८ ॥ २९ ॥ हे अरविंदाक्ष पृथगात्मनां देहाद्यभिमानिनां सतामितरेषां पदोपसर्पणं यथा मृषा भवेत्तथा सर्वसुहृत्प्रियात्मनस्तव पदोपसर्पणं मृषा न भवेत् । यद्यस्मान्नो भक्तानामद्भुतं वपुरदीदृशो दर्शितवानसि । पाठांतरे पृथगात्मनो भेददर्शिनः पुंसः । असतां परिच्छिन्नानां पदोपसर्पणं यथा मृषेत्यर्थः ॥३०॥ एकांतजना भक्ताः प्रिया यस्य ॥ ३१ ॥

चने ॥ १९ ॥ यत् यतः ॥ २० ॥ तत उदंचनात् । सा मत्सी । तत् तस्य सरोवरस्य । आत्मना देहेन । आवृत्य व्याप्य । 'सोयम्' इत्यपि पाठः । तत्र सोऽयं मत्स्य इत्यर्थः ॥ २१ ॥ अविदासिनीति । विपूर्वकस्य 'दसु–उपक्षये' इत्यस्य विदास इति घञि रूपं विदास उपक्षयस्तदभावोऽविदासस्तद्वतीत्यर्थः ॥ २२ ॥ स राजा । तत्रतत्र तस्मिंस्तस्मिन् ॥ २३ ॥ तं राजानम् । इदं वक्ष्यमाणम् । न हि वीराः शरणागतं त्यजंतीति सूचनायाह–वीरेति । इह समुद्रे । आदिना शिशुमारादिग्रहः ॥ २४ ॥ तेन मत्स्यरूपिणा । तं मत्स्यम् ॥ २५ ॥ एवंवीर्यो दिनसमाप्तितोऽर्वाग्बहुयोजनवर्द्धनशीलः । योजनशतं सरो द्वीपांतरापेक्षया समुद्रैकदेशभूतमेव ग्राह्यमन्यस्य तथा संभवाभावादश्रुतेः । 'अह्नाय व्यानशे' इति पाठे । अह्नाय झटिति ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ पाठांतरे 'पृथगात्मनोऽसताम्' इति पाठे । इत्यर्थ इति व्याख्येयम् । उभयोः सेव्यसेवकयोरयोग्यत्वादिति भावः ॥ ३० ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकम् ॥ ३२ ॥ त्रिलोक्यां लीयमानायां संवर्ताभसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३३ ॥ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ॥ सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ॥ ३४ ॥ आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः ॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५ ॥ दोधूयमानां तां नावं समीरेण बलीयसा ॥ उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ॥ ३६ ॥ अहं त्वामृषिभिः साकं सहनावमुदन्वति ॥ विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ॥ ३७ ॥ मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ ३८ ॥

अप्ययांभोधौ प्रलयार्णवे । भूर्भुवआदिकमित्यर्थः ॥ ३२ ॥ संवर्ताभसि प्रलयोदके । त्वामुपस्थास्यति प्राप्स्यति ॥ ३३ ॥ ओषधीः आदायेति शेषः ॥ ३४ ॥ ऋषीणामेवालोकेन विचरिष्यसि ॥ ३५ ॥ महाहिना वासुकिना ॥ ३६ ॥ ३७ ॥ मे मयाऽनुगृहीतं प्रसादीकृतं हृदि अपरोक्षं वेत्स्यसि ज्ञास्यसि । त्वया कृतैः संप्रश्नैर्मया

इत्यर्थ इति । संधिरत्रार्षः । यद्वा—भूर्भुव आदिर्यस्य तत् कं स्वर्गमित्यर्थः ॥ ३२ ॥ तदा तस्मिन् । मत्प्रेरिता नौः ॥ ३३ ॥ तावत् निश्चितम् ॥ ३४ ॥ आलोकेन तपस्तेजसा ॥ ३५ ॥ ॥ ३६ ॥ भीतमुत्साहयन्नाह--प्रभो इति । मत्कृपया समर्थो भविष्यसीत्यभिप्रायः । ब्राह्मी निशेति । यद्यप्ययं ब्रह्मदिनगतचाक्षुषमन्वंतरमध्य एव भगवदिच्छयैवाकस्मिकप्रलयोऽभूत् तदपि त्रैलोक्यमज्जनाद्दैनंदिनप्रलयसाम्यदृष्ट्या भगवत्क्रीडेच्छामंतःस्मृत्य निर्व्याकुलो ब्रह्मापि कञ्चित्कालं सुष्वाप । तदनुसारेण गौण्या वृत्त्या ब्राह्मी निशेत्युक्तमिति भागवतामृतानुसारी संदर्भः । तत्र भागवतामृतं यथा "मध्ये मन्वंतरस्यैव मुनेः शापान्मनुं प्रति । प्रलयोऽसौ बभूवेति पुराणे क्वचिदीर्यते ॥ अयमाकस्मिको जातश्चाक्षुषस्यांतरे मनोः । प्रलयः पद्मनाभस्य लीलयैवेति कुत्रचित् ॥" इति । किं च दक्षस्य मानसकायिकप्रजासृष्ट्यन्यथानुपपत्तेरेव प्रलयोयमवश्यं मंतव्य एव तदुक्तं चतुर्थे "चाक्षुषे त्वंतरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥" इति । प्रलयस्य चातुर्विध्यमपि नानुपपन्नम् । अस्य क्षुद्रप्रलयस्य नैमित्तिक एवांतर्भावात् । अत एव पृथिव्युद्धरणे हिरण्याक्षवधोऽपि श्रीवराहदेवेन चाक्षुषप्रलयान्त एव स्वायंभुवान्ते पृथिव्युद्धरणे हिरण्याक्षसंभवाभावात्तदुक्तं तत्रैव "उत्तानपादवंश्यानां तनयस्य प्रचेतसाम् । दक्षस्यैव दितिः पुत्री हिरण्याक्षो दितेः सुतः ॥ कल्पारंभे तदा नास्ति सुतोत्पत्तिर्मनोरपि । क्वासौ प्राचेतसो दक्षः क्व दितिः क्व दितेः सुतः ॥ यतः कालद्वयोद्भूतं श्रीवराहस्य चेष्टितम् । एकत्रैवाह मैत्रेयः क्षत्तुः प्रश्नानुसारतः" ॥ इति । एवमिहापि कल्पद्वयोद्भूतं मत्स्यचेष्टितं स्पष्टमविविच्य खल्वेकीकृत्यैवाह श्रीमन्मुनींद्रः । वस्तुतस्तु 'आसीदतीतकल्पान्ते' इत्यादिनोक्ता या शफरी वेदानयनार्था सान्या सत्यव्रतांजलिगता तु चाक्षुषमन्वंतरीयान्यैवेति ज्ञेयम् । श्रीसूतस्तु चाक्षुषीयमत्स्यमेवावतारगणमध्ये गणितवांस्तथा हि "रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् ॥" इति । श्रीस्वामिचरणास्तु—अत्रेदं चिंत्यमित्युक्त्वा ब्राह्मो लय इति योऽसावस्मिन्महाकल्पे इति चोक्तेरयं महाप्रलयश्चेन्न महाप्रलये पृथिव्यादीनामवशेषः संभवति 'यावद्ब्राह्मी निशा" इत्युक्तेरयं दैनंदिन एवेति चेन्न सांवर्तकैरनावृष्ट्यादिभिर्विनाऽकस्मादेव सप्तमेहनि त्रैलोक्यं निमज्जतीति मत्स्योरनुपपत्तेस्तस्मात्सत्यव्रतस्य ज्ञानाद्युपदेशार्थमाविर्भूतो भगवान्वैराग्यार्थं माययैव मार्कंडेयमिव तत्प्रलयं दर्शयामासेत्याहुरिति विश्वनाथः ॥ ३७ ॥ मदीयं महिमानं महत्त्वं तस्य गुणत्वेनाधेयत्वादाधारस्तस्याहमेव 'ब्रह्मणो हि प्रतिष्ठाहम्' इति श्रीमुखोक्तेर्यदि कश्चिदत्र ब्रह्मपदमाम्नायपरं वदेत्तदापि न दोषः 'वेदो नारायणः साक्षात्' इत्युक्तेः । 'शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू:' इत्युक्तेश्च । शब्दितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्थमादिश्य राजानं हरिरंतरधीयत ॥ सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥ ३९ ॥ आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः ॥ निषसाद हरेः पादौ चिंतयन्मत्स्यरूपिणः ॥ ४० ॥ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीम् ॥ वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥ ध्यायन्भगवदादेशं ददृशे नावमागताम् ॥ तामारुरोह विप्रेंद्रैरादायौषधिवीरुधः ॥ ४२ ॥ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवम् ॥ स वै नः संकटादस्मादविता शं विधास्यति ॥ ४३ ॥ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ॥ एकशृंगधरो मत्स्यो हैमो नियुतयोजनः ॥ ४४ ॥ निबद्ध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा ॥ वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूदनम् ॥ ४५ ॥ राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः ॥ यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥

विवृतं प्रकाशितं संतम् ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ वरत्रेण दोरकरूपेण ॥ ४५ ॥ "सागरं तारयिष्यंतं तरिष्यन्निव सागरम् ॥ सत्यव्रतो गुरुत्वेन तुष्टाव हरिमष्टभिः॥" अत्रेदं चिंत्यम् । किमयं महाप्रलयो दैनंदिनो वेति । तत्र तावद् ब्राह्मो लय इति योऽसावस्मिन्महाकल्पे इति चोक्तेर्महाप्रलय इति प्राप्तम् । नेति ब्रूमः । महाप्रलये पृथिव्यादीनामवशेषासंभवात् । यावद्ब्राह्मी निशेत्याद्युक्तिविरोधाच्च । अतो दैनंदिन इति युक्तम् । न चैतदपि संगच्छते सांवर्तकैरनावृष्ट्यादिभिर्विना अकस्मादेव सप्तमेऽहनि त्रैलोक्यं निमंक्ष्यतीति मत्स्योक्तेरनुपपत्तेः । यच्चोक्तं प्रथमस्कंधे । " रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे ॥ नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम् " इति । तदपि तदा दुर्घटम् । न हि प्रलयद्वयेऽपि महीमय्यां नाव्यारोहः संभवति । न च चाक्षुषमन्वंतरे प्रलयोऽस्ति । तथा च सति सप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् । त्वं तावदोषधीः सर्वा इत्यादिनिर्देशोऽपि न संगच्छते । न हि तदा ओषध्यादीनां सत्त्वानां चावशेषः संभवति । तस्मादन्यथा वर्ण्यते नैवायं वास्तवः कोऽपि प्रलयः । किं तु सत्यव्रतस्य ज्ञानोपदेशायाविर्भूतो भगवान्वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास । यथाऽस्मिन्नेव वैवस्वतमन्वंतरे मार्कंडेयाय दर्शितवान् । तदपेक्षयैव महाकल्पेऽस्मिन्निति विशेषणं संगच्छते। तथा च "ततः समुद्र उद्वेलः सर्वतः समदृश्यत"इति । तस्यैव तथा दर्शनमुक्तमित्येषा दिक् । प्रस्तुतं स्तोत्रं व्याख्यास्यामः ।

वेदांतनिष्ठैः कथितम् ॥ ३८ ॥ स राजा । अन्ववैक्षत प्रत्यैक्षत ॥ ३९ ॥ प्राचि कूलं मूलं येषां तांस्तथा "कूलं मूले तटे सैन्यपृष्ठे सूपतडागयोः" इति कोशात् । प्रागुदीचोर्मध्ये ऐशान्यां शीघ्रप्रसादेनाधिष्ठितायां मुखं यस्य सः । यद्वा–प्राक् पूर्वमुदङ्मुखो निषसाद । पश्चादिगंतरमुखोऽप्यद्भुतदर्शनाद्बभूवेत्यर्थः ॥ ४० ॥ ततो नृपतिकर्तृकहारीचिंतनोत्तरम् । उद्वेलस्त्यक्तमर्यादः ॥ ४१ ॥ विप्रेंद्रैः ऋषिभिः ॥ ४२ ॥ ४३ ॥ सः केशवः ॥ ४४ ॥ दोरकरूपेण रज्जुरूपेण । 'वरत्रा रज्जुकक्षयोः' इति मेदिनी । पुंस्त्वमार्षम् ॥ ४५ ॥ सागरं संसारसागरम् । इवेति दर्शितसागरस्य मिथ्यात्वमाह । अत्र प्रलये । इदं विकल्पादि । चिंत्यं विचार्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनोऽबुधोयं निजकर्मबंधनः सुखेच्छया कर्म समीहतेऽसुखम् ॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिंद्याद्धृदयं स नो गुरुः ॥ ४७ ॥ यत्सेवयाऽग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः ॥ भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥ ४८ ॥ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम् ॥ कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥ अचक्षुरंधस्य यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः ॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥ ५० ॥

तत्र नानायोनिषु संसरतः स्वस्य भगवत्कृपयैव तत्प्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते। अनादिर्याऽविद्या तयोपहता आवृताऽऽत्मनः संविद्येषां तेऽत्र एवाविद्यामूलैः संसारपरिश्रमैरातुरा इह संसारे यदृच्छया यदनुग्रहादेवोपसृता आश्रिताः संतो यमाप्नुयुः प्राप्नुवंति स भवानेव साक्षान्नो गुरुः सन् ग्रंथिं भिंद्यादित्युत्तरेणान्वयः ॥४६॥ ननु वैराग्यं विना कुतो मुक्तिस्तर्हि तस्य त्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह । जन इति । अबुधोऽयं जनः असुखं यथा भवति तथा कर्म समीहते तां सुखेच्छाम् । नो हृदयरूपं ग्रंथिं स भिंद्यात् । यतः स एव परमो गुरुः ॥ ४७ ॥ ननु यज्ञदानादिभिः सत्त्वशुद्धिं विना कथं ग्रंथिभेदः स्यात्तत्राह । यत्सेवयेति । यस्य सेवयैव पुमानात्मनो मनसो मलं तमो विजह्यात् । एष हीनमलो निजं वर्णं च स्वरूपं भजेत् । स ईशो नो गुरुर्भूयात् । यतः स एव गुरोरपि परमो गुरुः । मलहाने दृष्टांतः । रुद्ररोदनं रुद्रस्य रोदनं रजतम्। "यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ॥ यदश्रवः शीर्यंत तद्रजतं हिरण्यमभवत्" इति श्रुतेः । तद्यथाऽग्नेः संपर्कान्मलं जहाति स्वं वर्णं भजते न तु क्षालनादिभिस्तथा न यज्ञादिभिर्मलत्यागः किं तु त्वत्सेवयैव तेषां तु सेवांगत्वमिति भावः ॥ ४८ ॥ परमेश्वरत्वं परमगुरुत्वं च प्रपंचयन्नाह । नेति । यत्प्रसादस्यायुतभागस्तस्य लेशमात्रमप्यन्ये देवादयः सर्वे समेता अपि स्वयं तन्निरपेक्षाः संतः कर्तुं न प्रभवंति ॥ ४९ ॥ तदेव दृष्टांतेन स्पष्टयन्नाह । अचक्षुरिति । अविदुषो जनस्याबुधोऽविद्वान्गुरुस्तथैव । त्वं तु अर्कप्रकाशवत्स्वत एव दृग्ज्ञानं यस्य सोऽर्कदृक्। अतः सर्वदृशां सर्वेंद्रियाणां समीक्षणः प्रकाशकः अत एव स्वगतिं बोद्धुमिच्छद्भिर्नोऽस्मा

तत्र तावदिति प्रथममित्यर्थे । प्राप्तं खंडयति—नेति ब्रूम इत्यादिना । एतदपि दैनंदिनोऽयं लय इत्यपि । तदपि प्रथमस्कंधोक्तमपि । तदा उपस्थितलये । तथा च सति चाक्षुषमन्वंतरे प्रलयांगीकारे सति । यतो दैनंदिनमहाप्रलययोरयं कोऽपि न तस्माद्धेतोः । अन्यथा प्रकारांतरेण । तदपेक्षयैवाकस्मिकाल्पकालिकदर्शितप्रलयापेक्षयैव । इति दिक् सिद्धांतदेशः । तत्रादौ । संवित् ज्ञानम् । परमपदमत्रत्यमुत्तरत्रान्वेति तेनात्र श्लोके गुरुरूपत्वमुक्तम् ॥ ४६ ॥ अत्राशंकते—नन्विति । तस्य वैराग्यस्य । यस्य तव सेवया हृत् अयते गच्छतीति हृदयोऽहंकारस्तद्रूपम् । पूर्वश्लोकस्य परमपदान्वयादत्र श्लोके परमगुरुरूपत्वमुक्तम् ॥४७॥ पुनराक्षिपति—नन्विति । गुरोरपि परमो गुरुरनेनात्र श्लोके परात्परगुरुत्वमुक्तम्। रजतस्य रुद्ररोदनत्वे श्रुतिं प्रमाणयति—यदिति । स्पष्टार्था श्रुतिः । तेषां यज्ञादीनाम् । इति भाव इति । सेवैवांगी यज्ञादयस्तदंगा इति तात्पर्यम् ॥४८॥४९॥ तदेव त्वां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ॥ त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदम् ॥ ५१ ॥
त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ॥ तथापि लोको न भवंतमंधधीर्जानाति संतं हृदि बद्धकामः ॥ ५२ ॥
तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ॥ छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ॥ ५३ ॥ श्रीशुक उवाच ॥
इत्युक्तवंतं नृपतिं भगवानादिपूरुषः ॥ मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवीत् ॥ ५४ ॥ पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम् ॥
सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥ ५५ ॥ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् ॥ नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनम् ॥ ५६ ॥
अतीतप्रलयापाय उत्थिताय स वेधसे ॥ हत्वाऽसुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ॥ ५७ ॥ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ॥ विष्णोः प्रसादा
त्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः ॥ ५८ ॥ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः ॥ संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ॥ ५९ ॥
अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः ॥ संकल्पास्तस्य सिध्यंति स याति परमां गतिम् ॥ ६० ॥

भिर्गुरुर्वृतोऽसि ॥५०॥ किं च प्राकृतो गुरुरनर्थहेतुरित्याह । जन इति । आदिशते उपदिशति । असतीं मतिमर्थकामादिमतिम् । तमः संसारम् ॥५१॥ ननु तर्हि सर्वोऽपि लोको मामेव किं नोपसरति अज्ञानादित्याह। त्वमिति । प्रियश्चासावीश्वरश्च ॥ ५२ ॥ अहं तु त्वामेव शरणं यामीत्याह । तं त्वामिति ॥ प्रतिबोधनायोपदेशाय । अर्थदीपैः परमार्थप्रकाशकैः । हृदये भवान् ग्रंथीनहंकारादीन् । स्वमोकः स्वं रूपं विवृणु प्रकाशय ॥ ५३ ॥ नृपतिं प्रति ॥ ५४ ॥ पुराणसंहितां मत्स्यपुराणमशेषतोऽब्रवीदित्यनुषंगः ॥ ५५ ॥ ५६ ॥ अतीतः पूर्वो यः प्रलयस्तस्यापायेऽवसाने ॥ ५७ ॥ ५८ ॥ ५९ ॥ योऽयं हरेरवतारस्तं यः प्रकीर्तयेत् ॥ ६० ॥

विना कोऽपि किंचित्कर्तुं न समर्थ इत्युक्तमेव । तथैव अंधानुगांधवत् । एतेन "श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुत्यर्थः सूचितः ॥ ५० ॥ विद्वानेव गुरुः कार्य इत्याह–किं चेति । एतेन यद्वदंति लोका यादृश तादृशगुरुरपि शिष्यभावनया कल्याणकृद्भवतीति प्रत्युक्तम् । न हि क्लीबसेवया कदापि स्त्री गर्भं धृत्वा पुत्रं प्रसूते तथैवाज्ञगुरुसेवया कदाचिदपि शिष्यो ज्ञानं प्राप्य मोक्षं न प्राप्नोति । यथा स्त्री दृढांगयुवपुरुषसेवया सद्य एव गर्भं धृत्वा संततिमुत्पादयति तथैव विद्वद्गुरुसेवया ज्ञानं प्राप्य मोक्षमपीति भावः । यादृशो गुरुः कर्त्तव्यस्तन्निरूपितमस्माभिराद्यपद्यव्याख्याशतके । एकादशस्कंधे च निरूपयिष्याम इत्यलम् ॥ ५१ ॥ पुनराक्षिपति–ननु तर्हीति । 'अवजानंति मां मूढाः' इत्यादिना श्रीगीतासूक्तेः । 'न ते जानंति मां मूढा हृदिस्थं य इदम्' इत्याद्युक्तेः ॥ ५२ ॥ वरेण्यं वरणीयम् ॥ ५३ ॥ ५४ ॥ सांख्ययोगक्रियावतीं ज्ञानभक्तिकर्मयोगप्रतिपादिकाम् । आत्मनां जीवानाम् । गुह्यं गोप्यमात्मतत्त्वमश्रौषीदिति परेणान्वेति ॥ ५५ ॥ तत्किमिति चेदाह–सनातनं ब्रह्मेति ॥ ५६ ॥ ५७ ॥ ज्ञानं शास्त्रीयम् । विज्ञानमनुभवः ॥ ५८ ॥ ५९ ॥ तस्य कीर्त्तयितुः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा ॥ दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि ॥६१॥ इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्र्यां संहितायामष्टमस्कंधे मत्स्यावतारचरितानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

दितिजं हयग्रीवं हत्वा तेनापनीतं श्रुतिगणं प्रत्युपादत्त प्रत्यानीतवान् । सत्यव्रतानां सत्यव्रतस्य ऋषीणां च । छत्रिणो गच्छंतीतिवल्लिंगसमवायाद्बहुवचनम् । जिह्ममीनं मायामत्स्यम् ॥ ६१ ॥ इति श्रीमद्भागवतेऽष्टमस्कंधे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ समाप्तोऽयमष्टमस्कंधः ॥८॥

स च कीर्त्तयिता ॥ ६० ॥ लिंगस्य छत्रादिचिह्नस्य । समवायः समुदाये प्रवेशस्तस्मात् । एतच्च पंचमस्कंधे वर्णितमपि विशेषतः श्रीदशमस्कंधे 'श्यालः स्वस्रोरथाग्रहीत्' इत्यत्र वर्णयिष्याम इति । दितिजमसुरमित्यर्थः । 'रूढिर्योगमपहरति' इति न्यायात् ॥ ६१ ॥ ॥ अथास्य माहात्म्यम् ॥ "विष्णुरुवाच । अष्टमस्कन्ध इह मे नेत्रद्वयमुदाहृतः । तस्य श्रवणमात्रेण ब्रह्महा शुद्धिमाप्नुयात् ॥ १ ॥ अत्र ते वर्णयिष्यामि कथां पापविनाशिनीम् । विदर्भनगरे राजा जिष्णुजित्संज्ञकोभवत् ॥ २ ॥ मृगयासक्तचेताः स जगाम गहनं वनम् । ददर्श राक्षसं तत्र शूलहस्तं नरांतकम् ॥ ३ ॥ तत्संमुखं जगामाशु जयाकांक्षी धरापतिः ॥ दैत्य उवाच ॥ किमर्थमागतो ह्यत्र मंदभाग्य नराधिप ॥ ४ ॥ तुरगं मम भक्षार्थं दत्वा सत्वरमन्यतः । स्वगेहं वा याहि राजन्मात्र तिष्ठ ममाग्रतः ॥ ५ ॥ न चेत्त्वामपि भक्षामि श्रुत्वेत्थं धनुरग्रहीत् । दैत्योपि वृक्षमुत्पाटय युयुधे तेन सत्वरम् ॥ ६ ॥ छिन्ने वृक्षे मुष्टिघातं राज्ञि दैत्यश्चकार ह । तदा च कुपितो राजा पत्रिणा तच्छिरोऽच्छिनत् ॥ ७ ॥ देवांतकश्च तद्भ्राता निशम्य भ्रातरं मृतम् । रुरोद बहुधा तत्र भ्रातृघ्नं घातये कथम् ॥ ८ ॥ इति संचिंत्य मनसा सूदो भूत्वा जगाम तम् । उवाच भूमिपायेत्थं मत्समः पाचको भुवि ॥ ९ ॥ न विद्यतेऽन्यो राजेंद्र नाहश्चानृतवाचकः । मत्कृतपाकार्पणेनैव तृप्यंति पितृदेवताः ॥ १० ॥ श्रुत्वा राजा दैत्यवचः पाकाध्यक्षं चकार तम् । एकदा श्राद्धदिवसे पक्त्वा दत्त्वा नरामिषम् ॥ ११ ॥ ब्राह्मणानां भोजनार्थं भ्रातृप्रतिचिकीर्षया । तज्ज्ञात्वा तद्गुरुर्विप्रः शशाप श्रीधरो नृपम् ॥ १२ ॥ राक्षसो भव दुर्बुद्धे नरमांसप्रदानतः । स गुरोर्वचनं श्रुत्वा प्रोवाचेंद्रजितो नृपः ॥ १३ ॥ शापयोग्यस्त्वहं नास्मि नापराधोऽस्ति मे गुरो । दत्तं नृमांसं सूदेनेत्युक्त्वा राजा पपात ह ॥१४॥ श्रीगुरोः पादयोस्तर्हि गुरुस्तुष्टमना नृपम् । उवाच द्वादशाब्दांते तव शापः प्रणश्यति ॥ १५ ॥ ततः स राक्षसो भूत्वा नदीतीरे चरन् क्षुधा । बभक्ष ह मुनेः पुत्रं ब्रह्महत्यायुतोऽभवत् ॥ १६ ॥ शापांते तां विचार्याशु त्यक्तराज्यो वनं गतः । ब्रह्महत्याविनाशार्थं शोचमानः सदा नृपः ॥ १७ ॥ तीर्थाटनं कृतवता कदाचिद्गौतमाश्रमे । अष्टमस्कंधजा तेन श्रुता भागवती कथा ॥ १८ ॥ ब्रह्महत्या गता तस्य मृतो वैकुंठमाययौ । संदेहो नात्र कर्तव्यो नासत्यं मम भाषितम् ॥ १९ ॥ " इति यो यज्ञाद्यवतारैश्च ह्यरक्षन्निखिलान्मनून् । भक्तसर्वाघशमनं तं वंदे नंदनंदनम् ॥ १ ॥ भावार्थदीपिकाटीकाप्रकाशोष्टमकांडगः । यथामति कृतो गौडश्रीवंशीधरशर्मणा ॥ २ ॥ ॥ इति श्रीखरडपत्तनवास्तव्यपण्डितवंशीधरशर्मविरचित श्रीमद्भागवतभावार्थदीपिकाप्रकाशेऽष्टमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ समाप्तश्चायमष्टमस्कन्धः ॥ ८ ॥

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवताष्टमस्कन्धो मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये " श्रीवेङ्कटेश्वर " (स्टीम्) मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते अष्टमस्कन्धः समाप्तः ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते नवमस्कन्धप्रारंभः ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवमस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ राजोवाच ॥ मन्वंतराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ॥ वीर्याण्यनंतवीर्यस्य हरेस्तत्र कृतानि च ॥ १ ॥ योऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ॥ ज्ञानं योऽतीतकल्पांते लेभे पुरुषसेवया ॥ २ ॥ स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् ॥ त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥ ३ ॥ तेषां वंशं पृथग्ब्रह्मन्वंश्यानुचरितानि च ॥ कीर्तयस्व महाभाग नित्यं शुश्रूषतां हि नः ॥ ४ ॥ ये भूता ये भविष्याश्च भवंत्यद्यतनाश्च ये ॥ तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥५॥ सूत उवाच ॥ एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ॥ पृष्टः प्रोवाच भगवाञ्छुकः परमधर्मवित् ॥६॥ श्रीशुक उवाच ॥ श्रूयतां मानवो वंशः प्राचुर्येण परंतप ॥ न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥७॥

श्रीगणेशाय नमः ॥ गुणा यं गुणतावाप्त्यै वृणते करुणानिधिम् ॥ तमहं शरणं यामि परमानंदमाधवम् ॥ १ ॥ त्रिगुणाष्टभिरध्यायैर्वैवस्वतसुतान्वयः ॥ नवमे कृष्णसत्कीर्तिप्रसंगाय वितन्यते ॥ २ ॥ एवमुक्तोऽष्टमस्कंधे सद्धर्मः सत्त्वशोधकः ॥ कर्तृपालकवक्त्रादिमन्वादीनां निरूपणैः ॥ ३ ॥ सद्धर्मशुद्धसत्त्वानामंतरंगेशसत्कथा ॥ सूर्यसोमान्वयाख्यानैरधुना संगतोच्यते ॥ ४ ॥ तत्र च । त्रयोदशभिरध्यायैः सूर्यवंशोऽनुवर्ण्यते ॥ एकादशभिरध्यायैः सोमवंशस्ततः परैः ॥ ५ ॥ तत्र तु प्रथमेऽध्याये वैवस्वतसुतान्वये ॥ सोमवंशप्रवेशोक्त्यै सुद्युम्नस्त्रीत्वमुच्यते ॥६॥ उक्तानुवादपूर्वकं वैवस्वतमनोर्वंशं पृच्छति । मन्वंतराणीति पंचभिः ॥१॥२॥३॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

ॐ स्वस्ति श्रीगणेशाय नमः ॥ यशोदानंदनं नत्वा गोपीचीरहरं मुदा ॥ तासामभीप्सितं दातुं कात्यायन्यर्चनार्थितम् ॥ १ ॥ गुणाः सत्यशौचादयः प्रथमस्कंधे पृथिव्युक्ता भक्तवात्सल्यादयो वा । यं करुणायाः कृपायाः निधिम् अधिष्ठानम् । वृणते सेवंते । गुणतायाः श्लाघाहेतुताया द्रव्यनिष्ठाधिकरणतानिरूपिताधेयताया वाऽवाप्त्यै प्राप्त्यर्थम् । यदि भगवानस्मभ्यं स्वस्मिन्वासं दास्यति तर्हि वयं गुणा अन्यथा त्वगुणा एव स्याम इति । न्यायनये हि द्रव्याश्रयस्यैव गुणत्वमिष्यते ते चेश्वरमपि द्रव्यमेवाहुरिति । तमिति यमित्यत्रान्वेति (१)। त्रिभिर्गुण्यंत इति त्रिगुणाः ते च तेऽष्टेति त्रिगुणाष्टौ तैः चतुर्विंशतिभिरित्यर्थः । वैवस्वतः श्राद्धदेवस्तस्य सुतानामिक्ष्वाकुप्रभृतीनाम । यद्वा—विवस्तेजोऽस्यास्तीति विवस्वांश्चंद्रस्तस्य सुतो वैवस्वतो बुधस्तस्यान्वयः । वैवस्वतस्य सुता इला तस्या अन्वयो वंशः पुरूरवआयुप्रभृतिप्रवृत्तः । एतेन सूर्येंद्वोरुभयोर्वंशवर्णनमत्र क्रियते इति सिद्धम् । वंशवर्णनप्रयोजनं तूपोद्घात एवेत्याह—कृष्णेति । कृष्णकथाप्रसंगाय वंशकथनमिति (२)। सतां वेदानुयायिनां मन्वादीनां धर्मः । कर्त्तारो ब्राह्मणादयः । पालका राजानः । वक्तारो मनुयाज्ञवल्क्यादयः । आदिनाऽनुमोदितारश्शिष्टा गृह्यंते । द्वितीयादिना तद्वंशावतारादिग्रहः (३)। पूर्वार्द्धस्य संगतेति पदेनान्वयः । संगता प्राप्ता भवति अशुद्धसत्त्वानां तत्र श्रद्धानुदयात् । सा च सूर्यादिवंशकथनैरुच्यते (४)। तत्र च वंशकथने च । ततः परैस्त्रयोदशतः परैः (५)। तत्र तु त्रयोदशस्वपि । प्रवेशस्योक्त्यै (६)। सर्वाणि चतुर्दशसंख्याकानि । तत्र मन्वंतरेषु । कृतानि वीर्याणि प्रभावबोधककर्माणि । चोत्र पादपूरणे ॥ १ ॥ असौ बुद्धिस्थोऽष्टमस्कंधांताध्यायोक्तप्रभावः । पुरुषसेवया मत्स्यमूर्त्युपासनया ॥ २ ॥ त्वत्तोऽष्टमस्कंधे मनुवर्णनप्रसंगे । तस्य श्राद्धदेवाख्यमनोः ॥ ३ ॥ तेषाम् इक्ष्वाकादीनाम् ॥ ४ ॥ तेषां मध्ये पुण्यकीर्त्तीनां सर्वेषाम् । पुण्यकीर्त्तयश्च भगवद्भक्ता एव तेषामेव यशश्श्रवणं श्रवणेंद्रियसार्थक्यकरम् "श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोर्थः । तत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषाम् ॥" इत्युक्तेः । हरिभक्तेतरराजकथाश्रवणस्यायुरसद्व्ययत्वात् । "किमन्यैरसदालापैरायुषो यदसद्व्ययः" इत्युक्तेश्च । विक्रमान् चरितानि ॥ ५ ॥ परमधर्मो भक्तिलक्षणः "स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे" इत्युक्तेः । तद्वित् तज्ज्ञाता ॥६॥ प्राचुर्य्येण प्राधान्येन 'प्राचुर्य्यं स्फिरमुख्ययोः' इत्यभिधानात् "प्रधानाधिक्ययोश्चौरमुख्येऽपि प्रचुरः स्मृतः" इत्यन्यत्रोक्तेश्च । अनंतशाखत्वात्तद्वंशो विस्तारेण वक्तुं न शक्यत इत्याह—न शक्यत इति ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परावरेषां भूतानामात्मा यः पुरुषः परः ॥ स एवासीदिदं विश्वं कल्पांतेन्यन्न किंचन ॥ ८ ॥ तस्य नाभेः समभवत्पद्मकोशो हिरण्मयः ॥ तस्मि
ञ्जज्ञे महाराज स्वयंभूश्चतुराननः ॥ ९ ॥ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः ॥ दाक्षायण्यां ततोऽदित्यां विवस्वानभवत्सुतः ॥ १० ॥
ततो मनुः श्राद्धदेवः संज्ञायामास भारत ॥ श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ॥ ११ ॥ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरि
ष्यंतं पृषध्रं च नभगं च कविं विभुः ॥ १२ ॥ अप्रजस्य मनोः पूर्वं वशिष्ठो भगवान्किल ॥ मित्रावरुणयोरिष्टिं प्रजार्थमकरोत्प्रभुः ॥ १३ ॥ तत्र
श्रद्धा मनोः पत्नी होतारं समयाचत ॥ दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥ १४ ॥ प्रेषितोऽध्वर्युणा होता ध्यायंस्तत्सुसमाहितः ॥ हविषि
व्यचरत्तेन वषट्कारं गृणन्द्विजः ॥ १५ ॥ होतुस्तद्व्यभिचारेण कन्येला नाम साऽभवत् ॥ तां विलोक्य मनुःप्राह नातिहृष्टमना गुरुम् ॥ १६ ॥
भगवन् किमिदं जातं कर्म वो ब्रह्मवादिनाम् ॥ विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया ॥ १७ ॥ यूयं मंत्रविदो युक्तास्तपसा दग्धकिल्बिषाः ॥
कुतः संकल्पवैषम्यमनृतं विबुधेष्विव ॥ १८ ॥

अनुक्तं वंशं वक्तुं पूर्वोक्तमेव तावद्वंशं तत्प्रवर्तकं श्रीनारायणमारभ्यानुस्मारयति । परावरेषामिति पंचभिः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ नाभागं चेति पाठेऽपि नभग एव नाभागः ॥ १२ ॥ सूर्यपौत्रस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवःप्रभृतिसोमवंशसंचारं वक्तुं सप्रस्तावमिलोपाख्यानमाह । अप्रजस्य मनोः पूर्वमित्यादिना यावदध्या यसमाप्ति । पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् ॥ १३ ॥ दुहित्रर्थं मम कन्या यथा भवेत्तथा यजेति होतारं सम्यगयाचत पय एव व्रतमाहारो नियतो यस्याः ॥ १४ ॥ अध्वर्युणा होतर्यजेति प्रेषितो होता तेन गृहीते हविषि सति तत्तया प्रार्थितं ध्यायन्व्यचरदयजत । पाठांतरे तत आध्यायत् । वाचा वषट्कारं गृणन्वौषडित्युच्चारयन् ॥ ॥ १५ ॥ १६ ॥ ब्रह्मविक्रिया मंत्रान्यथात्वम् ॥ १७ ॥ १८ ॥

कल्पांते प्रलये । अन्यत् स्थूलसूक्ष्मम् । किंचिन्नासीदित्यर्थः “ नो सदासीन्नासदासीत् ” इति श्रुतेः ॥ ८ ॥ तस्य परमात्मनः । हिरण्मयः प्रकाशबहुलः । तस्मिन् पद्मकोशे । स्वयंभूशब्दस्य “ विष्णुः स्वयंभूरथभु क्खभूर्विश्वपतिर्हरिः ” इत्युक्तेर्विष्णावपि वृत्तेस्तद्वारणाय चतुरानन इति ॥ ९ ॥ तस्य ब्रह्मणः । तस्यापि मरीचेरपि । ततः कश्यपात् ॥ १० ॥ ततो विवस्वतः । स श्राद्धदेवः । आत्मवान् निपुणः ॥ ११ ॥ अष्टम स्कंधोक्तनभगवसुमतोरेव नामांतरे नृगकवी इति न विरोधः शंक्यः । क्वचिद्विभुमिति पाठे कविविशेषणम् ॥ १२ ॥ चंद्रवंशांकुरं सूचयन्नाह–अप्रजस्येति ॥ १३ ॥ तत्र इष्टौ ॥ १४ ॥ तेन होत्रा गृहीते इति शेषः । तया श्रद्धया । प्रार्थितं कन्याभवनम् । पाठांतरे ‘ ऽऽध्यायत्तत्सु समाहितः ’ इति पाठे ॥ १५ ॥ स चासौ व्यभिचारस्तेन । यद्वा–तस्य कर्मणो व्यभिचारेणान्यथोच्चारणरूपेण । वाङ्निमित्तत्वाद्व्यभिचारस्य वाङ्नाम्नीला “ वाणी सरस्वती भाषा वागिरेला प्रकीर्त्तिता ” इत्यभिधानात् । तां कन्याम् ॥ १६ ॥ वो युष्माकम् । इदं विपर्ययं कर्म । किं कथम् । ब्रह्मविदां क्रिया कर्म ब्रह्मवित्क्रियेति पा० । मैवं मा भूदित्यर्थः ॥ १७ ॥ भवत्सु कथंचिदप्यन्यथात्वं न युक्तमित्याह–मंत्रविदः । “ मैत्रावरुणीमिष्टिं कुर्यात्पुत्रकामः ” इत्यादिमंत्रज्ञाः । किञ्च “ यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट् करिष्यन् ” इति मनोयोगयुक्ताः । न च दोषादन्यथात्वं मनस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्निशम्य वचस्तस्य भगवान्प्रपितामहः ॥ होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनम् ॥ १९ ॥ एतत्संकल्पवैषम्यं होतुस्ते व्यभिचारतः ॥ तथाऽपि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा ॥ २० ॥ एवं व्यवसितो राजन् भगवान् सुमहायशाः ॥ अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥२१॥ तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः ॥ ददाविलाऽभवत्तेन सुद्युम्नः पुरुषर्षभः ॥ २२ ॥ स एकदा महाराज विचरन् मृगयां वने ॥ वृतः कतिपयामात्यैरश्वमारुह्य सैंधवम् ॥ २३ ॥ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ॥ दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥ २४ ॥ स कुमारो वनं मेरोरधस्तात्प्रविवेश ह ॥ यत्रास्ते भगवान् रुद्रो रममाणः सहोमया ॥ २५ ॥ तस्मिन् प्रविष्ट एवासौ सुद्युम्नः परवीरहा ॥ अपश्यत् स्त्रियमात्मानमश्वं च वडवां नृप ॥ २६ ॥ तथा तदनुगाः सर्वे आत्मलिंगविपर्ययम् ॥ दृष्ट्वा विमनसोऽभूवन् वीक्षमाणाः परस्परम् ॥ २७ ॥ राजोवाच ॥ कथमेवंगुणो देशः केन वा भगवन् कृतः ॥ प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥ २८ ॥ श्रीशुक उवाच ॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ॥ दिशो वितिमिराभासाः कुर्वंतः समुपागमन् ॥ २९ ॥ तान् विलोक्यांबिका देवी विवासा व्रीडिता भृशम् ॥ भर्तुरंकात समुत्थाय नीवीमाश्वथ पर्यधात् ॥ ३० ॥ ऋषयोऽपि तयोर्वीक्ष्य प्रसंगं रममाणयोः ॥ निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥ ३१ ॥ तदिदं भगवानाह प्रियायाः प्रियकाम्यया ॥ स्थानं यः प्रविशेदेतं स वै योषिद्भवेदिति ॥ ३२ ॥

प्रपितामहो वशिष्ठः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ विगतं तिमिरमाभासः प्रकाशश्चान्यस्य यासु तथाभूता दिशः कुर्वंतः ॥ २९ ॥ ३० ॥ प्रसंगं रत्यभिनिवेशम् । स्त्रीप्रसंगदर्शनकलुषितमनसः संतस्तत्प्रसंगशून्यं नरनारायणाश्रमं ययुः ॥ ३१ ॥ ३२ ॥

इत्याह–तपसेत्यादि । एवंविधेषु भवत्सु संकल्पस्य चिंतितस्य वैषम्यमन्यथात्वं कुतो न कुतोऽपि संभाव्यते विबुधेषु देवेषु ज्ञानिषु वानृतं दृष्टचरं न हीति । तस्मात् "अनृतं न वदेत्" इति श्रुतेर्देवेष्वनृतमिव सर्वथैतद संभावितमिति भावः ॥ १८ ॥ तस्य मनोः । तत् पूर्वोक्तम् । मनोः पिता सूर्यः पितामहः कश्यपः प्रपितामहो मरीचिः वशिष्ठस्य ब्रह्मपुत्रत्वेन मरीचिभ्रातृत्वात्प्रपितामहत्वम् । यद्वा–शुकस्य पिता व्यासः पितामहः पराशरः प्रपितामहश्शक्तिस्तत्पिता वशिष्ठोऽस्ति । यद्यपि वशिष्ठस्य शुकवृद्धप्रपितामहत्वं तथापि "आत्मैव पुत्रनामासि" इति श्रुतेः शक्तिरूपत्वं तत्र संभाव्य प्रपितामह इत्युक्तम् । यद्वा–भगवानिति विशेषणं तत्र प्रपितामहत्वं सूचयति । व्यतिक्रममन्यथाकरणम् । रविनंदनं श्राद्धदेवम् ॥ १९ ॥ व्यभिचारतः ध्यानस्यान्यथाकरणलक्षणात् । यद्यपीत्थं तथापीति ॥ २० ॥ स भगवान्वशिष्ठः ॥ २१ ॥ तस्मै वशिष्ठाय । तेन कामवरेण॥२२॥स सुद्युम्नः । सैंधवं सिंधुदेशजम् ॥२३॥ दंशितो बद्धकवचः ॥२४॥ स सुद्युम्नः । मेरोरधस्तादिलावृतखंडे । यत्र इलावृतवने ॥२५॥ तस्मिन् वने ॥२६॥ तथा सुद्युम्नवत् । तदनुगाः सुद्युम्नानुचराः ॥२७॥ एवंगुणः पुंस्त्वविपर्यायकः ॥ २८ ॥ तत्र इलावृतवने ॥ २९ ॥ तान् ऋषीन् । नीवीं कट्यावरकवस्त्रम् ॥ ३० ॥ तयोः गौरीशंकरयोः । तस्मात् स्थानात् । नरनारायणाश्रमं बदरिकाश्रमम् ॥ ३१ ॥ तत् तदा ॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयंति हि ॥ सा चानुचरसंयुक्ता विचचार वनाद्वनम् ॥ ३३ ॥ अथ तामाश्रमाभ्याशे चरंतीं प्रमदोत्तमाम् ॥ स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ॥ ३४ ॥ सापि तं चकमे सुभ्रूः सोमराजसुतं पतिम् ॥ स तस्यां जनयामास पुरूरवसमात्मजम् ॥३५॥ एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ॥ सस्मार स्वकुलाचार्यं वशिष्ठमिति शुश्रुम ॥३६॥ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ॥ सुद्युम्नस्याशयन् पुंस्त्वमुपाधावत शंकरम् ॥ ३७ ॥ तुष्टस्तस्मै स भगवानृषये प्रियमावहन् ॥ स्वां च वाचमृतां कुर्वन्निदमाह विशां पते ॥३८॥ मासं पुमान् स भविता मासं स्त्री तव गोत्रजः ॥ इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ॥ ३९ ॥ आचार्यानुग्रहात् कामं लब्ध्वा पुंस्त्वं व्यवस्थया ॥ पालयामास जगतीं नाभ्यनंदन् स्म तं प्रजाः ॥ ४० ॥ तस्योत्कलो गयो राजन् विमलश्च सुतास्त्रयः ॥ दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥ ॥ ४१ ॥ ततः परिणते काले प्रतिष्ठानपतिः प्रभुः ॥ पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे इलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ॥ पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥ १ ॥ ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् ॥ इक्ष्वाकुपूर्वजान् पुत्राँल्लेभे स्वसदृशान् दश ॥ २ ॥

प्रासंगिकमुक्त्वा प्रस्तुतमनुवर्णयति । अनुचरीसंयुक्तेति वक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ आशयन्निच्छन् ॥ ३७ ॥ ३८ ॥ ३९ ॥ नाभ्यनंदन् स्त्रीत्वे लज्जया मासंमासं निलीयावस्थानात् ॥ ४० ॥ ४१ ॥ ४२ ॥ इति श्रीमद्भा० नवमस्कंधे टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये मनुपुत्राणां द्वावपुत्रौ विरागतः ॥ करूषकादिपंचानां वंशानाह लघुक्रमात् ॥ १ ॥ वैवस्वतो मनुः श्राद्धदेवः ॥ १ ॥ इक्ष्वाकुः पूर्वजो येषां तान्दश पुत्राँल्लेभे ॥ २ ॥

ततः शिवशापात् । ऊर्द्ध्वम् अनंतरम् । सा च प्राप्तपूर्वभावेला ॥३३॥ अथ अतोऽनंतरम् । बुधः चंद्रसुतः । चकमे रंतुमैच्छत् ॥३४॥ स बुधः । तस्याम् इलायाम् ॥३५॥३६॥ स वशिष्ठः । तस्य सुद्युम्नस्य । उपाधावत सिषेवे ॥ ३७ ॥ स शिवः । तस्मै वशिष्ठाय ॥ ३८ ॥ इत्थं व्यवस्थया अनया मर्यादया । गोत्रजः शिष्यः " गोत्रं वंशे नाम्नि शिष्ये पर्वते च महेश्वरे " इति निरुक्तिः । मासमिति " कालाध्वनोरत्यंतसंयोगे " इति द्वितीया ॥ ३९ ॥ कामं काम्यमानम् ॥ ४० ॥ तस्य सुद्युम्नस्य । दक्षिणापथो देशः ॥ ४१ ॥ ततः पुत्राद्युत्पत्त्युत्तरम् । परिणते वृद्धत्वे । प्रतिष्ठानं नगरम् । पुरूरवसे स्त्र्यवस्थायां जाताय । गां भूमिं दत्त्वा ॥४२॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ द्वौ कविपृषध्रौ । लघुक्रमात् संक्षेपात् (१) । एवं पुत्राय राज्यं दत्त्वा । अथ अनंतरम् ॥ १ ॥ तपस्स्वरूपमाह—तत इति । ततः तस्मिंस्तपसि । सप्तम्यर्थे तसिः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ॥ पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥ ३ ॥ एकदा प्राविशद्गोष्ठं शार्दूलो निशि वर्षति ॥ शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥ ४ ॥ एकां जग्राह बलवान् सा चुक्रोश भयातुरा ॥ तस्यास्तत्क्रंदितं श्रुत्वा पृषध्रोऽभिससार ह ॥ ५ ॥ खड्गमादाय तरसा प्रलीनोडुगणे निशि ॥ अजानन्नहनद्बभ्रोः शिरः शार्दूलशंकया ॥ ६ ॥ व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः ॥ निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥ ७ ॥ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा ॥ अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥ ८ ॥ तं शशाप कुलाचार्यः कृतागसमकामतः ॥ न क्षत्रबंधुः शूद्रस्त्वं कर्मणा भवितामुना ॥ ९ ॥ एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृतांजलिः ॥ अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥ १० ॥ वासुदेवे भगवति सर्वात्मनि परेऽमले ॥ एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्समः ॥ ११ ॥ विमुक्तसंगः शांतात्मा संयताक्षोऽपरिग्रहः ॥ यदृच्छयोपपन्नेन कल्पयन् वृत्तिमात्मनः ॥ १२ ॥ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः ॥ विचचार महीमेतां जडांधबधिराकृतिः ॥ १३ ॥

तत्र पृषध्रस्य वंशो नाभवदिति सहेतुकमाह । पृषध्रस्त्वित्यादिना । कविः कनीयानित्यतः प्राक्तनेन ग्रंथेन । खड्गपाणेः सतस्तिष्ठतो जागरणं वीरासनं तदेव व्रतं यस्य यत्तोऽवहितः सन् गाः पालयामास ॥ ३ ॥ शार्दूलो व्याघ्रः ॥ ४ ॥ ५ ॥ प्रलीना उडुगणा यस्मिंस्तस्मिन्समये । बभ्रोः कपिलाया गोः ॥ ६ ॥ गां कामतो न जघानेति ख्यापयितुं वृक्णश्रवण इत्याद्युक्तम् ॥ ७ ॥ व्युष्टायां प्रभातायाम् ॥ ८ ॥ क्षत्रबंधुरपि त्वं न भविताऽपि तु शूद्रो भवितेति ॥९॥१०॥११॥१२॥१३॥

तत्र दशसु ॥ ३ ॥ ४ ॥ एकां गाम् । तस्या गृहीतायाः । तत् दीनम् । क्रंदितं शब्दम् ॥ ५ ॥ "बभ्रुर्गौः सौरभेयी च माहेयी गोमतल्लिका" इति यादवः । गोशिरश्छेदे हेतुमाह–निशीति । रात्रावपि नक्षत्राद्युद्योतेन ज्ञानं भवत्येवेत्यत्राह–प्रलीनेति । अभ्रच्छायया तदपि नाभूदित्यर्थः ॥ ६ ॥ वृक्णं छिन्नं श्रवणं कर्णं यस्य सः । निर्गतस्त्रिंशद्भ्योंगुलिभ्य इति निस्त्रिंशः खड्गः । ततो गोष्ठात् ॥ ७ ॥ ८ ॥ तं पृषध्रम् । कुलाचार्यो वशिष्ठः । कामतोऽविधिना गोहनने तु म्लेच्छस्स्यादिति "अविधिना कामतो गां यो हन्यात्स म्लेच्छ उच्यते" इत्युक्तेः । "अज्ञानाद्गां द्विजो हत्वा द्विजत्वाद्धीयते ध्रुवम्" इत्युक्तेश्च । अकामतोऽनिच्छातोपि कृतापराधं शशापैव न तु प्रायश्चित्तं दिदेश कोपावेशवशेन विचारापगमात् । यतः कुलाचार्यः कुलपौरोहित्यस्य तमोबहुलत्वात् । "कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं ह्रेष्यति येन दुर्मतिः" इति विश्वरूपोक्तेः ॥ ९ ॥ कृतांजलिरिति । शापं महाप्रसादमिव प्रत्यगृह्णादिति गुरुभक्तिलक्षणं न तु त्वमपरामृश्य मह्यं किमिति वृथा शपसीति प्रत्युवाचेति भावः । तेन परित्यक्तोपि गुरौ भक्तिमान्निष्प्रत्यूहं तरतीति सिद्धांतो द्योतितः । मुनिप्रियं त्यागरूपं व्रतं यदूर्ध्वरेतस्त्वरूपम् ॥१०॥ मुनिप्रियत्वमेवाह–वासुदेव इति । एकांतित्वं परप्रेमत्वम् ॥११॥१२॥ आत्मनि परमेशे । आत्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितम् ॥ तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥ १४ ॥ कविः कनीयान् विषयेषु निःस्पृहो विसृज्य राज्यं सह बंधुभिर्वनम् ॥ निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥ १५ ॥ करूषान्मानवादासन् कारूषाः क्षत्रजातयः ॥ उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥ धृष्टाद्धार्ष्टमभूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ ॥ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥ १७ ॥ वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता ॥ कन्या चौघवती नाम सुदर्शन उवाह ताम् ॥ १८ ॥ चित्रसेनो नरिष्यंताद्दक्षस्तस्य सुतोऽभवत् ॥ तस्य मीढ्वांस्ततः कूर्च इंद्रसेनस्तु तत्सुतः ॥ १९ ॥ वीतिहोत्रस्त्विंद्रसेनात्तस्य सत्यश्रवा अभूत् ॥ उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥ २० ॥ ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः ॥ कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ॥ २१ ॥ ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप ॥ नरिष्यंतान्वयः प्रोक्तो दिष्टवंशमतः शृणु ॥२२॥ नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः ॥ भलंदनः सुतस्तस्य वत्सप्रीतिर्भलंदनात् ॥ २३ ॥

उपयुक्तकरणो दग्धदेहः ॥ १४ ॥ कवेरपि वंशो नाभवदित्याह । कविरिति । बंधुभिः सह राज्यं विसृज्य ॥ १५ ॥ १६ ॥ ब्रह्मभूयं ब्राह्मणत्वम् । नृगस्य वंशः पुत्रः सुमतिस्ततो भूतज्योतिस्ततो वसुः ॥ १७ ॥ ओघवतः पिता तत्पुत्रोऽप्योघवानेवेत्यर्थः ॥ १८ ॥ तदेवं त्रिभिः श्लोकैः करूषधृष्टनृगाणां वंशा उक्ताः । नरिष्यंतस्य वंशमाह । चित्रसेन इति सार्धैस्त्रिभिः । तत इत्यादेर्यत्राधिक्यं स्यात्तत्रानंतर्ये तत इत्यादि पदं व्याख्येयम् । यत्र तु न्यूनत्वं तत्र पूर्वस्य परस्य वाऽनुषंगादिभिर्व्याख्येयम् ॥ १९ ॥ २० ॥ अग्निवेश्य एव कानीन इति जातूकर्ण्य इति च विख्यातः ॥ २१ ॥ २२ ॥ दिष्टस्य पुत्रो नाभागो वक्ष्यमाणनाभागादन्य इति भ्रांतिव्युदा

नमाधायैकीकृत्य ब्रह्मास्मीति निश्चित्य । ज्ञानेतृप्त इत्युक्तेर्भक्तावतृप्त इति भावः ॥ १३ ॥ एवंवृत्तो अंगीकृतजडाद्याकारः । तेन दावाग्निना । "करणं साधकतमे शरीरेंद्रिययोरपि" इति हैमः । "ब्रह्मैव सन्ब्रह्माप्येति" इति श्रुतेर्देहत्यागेन विदेहलक्षणां मुक्तिमापेत्यर्थः ॥ १४ ॥ कनीयान् ततः कनिष्ठः । पुरुषं नारायणम् । तत्प्रसादेन परं ब्रह्मभावं प्राप्तोऽभूदित्यर्थः ॥ १५ ॥ १६ ॥ 'वंशो वेणौ समीपे च संघे पुत्रे कुले तथा' इति विश्वः । ततो भूतज्योतिषः ॥ १७ ॥ तत्पुत्रः प्रतीकपुत्रः । इत्यर्थ इति । पितृपुत्रयोस्समनामतैवाभूदिति भावः । सुदर्शनोग्निपुत्रो येन गृहस्थेनैव मृत्युर्जितोऽतिथये भार्याप्रदानेनेति प्रसिद्धं महाभारते । तामोघवतीम् ॥ १८ ॥ करूषादित्रयवंशमुक्त्वा नरिष्यंतस्याह– तस्य चित्रसेनस्य । तस्य दक्षस्य । अनुषंगादिभिरिहादिना प्रक्रमग्रहः । अग्रिमस्यानयनमनुषंगः पूर्वस्यानयनं प्रक्रम इति । ततो मीढुषोऽनंतरं कूर्चः ! तत्सुतः कूर्चपुत्रः ॥ १९ ॥ तस्य वीतिहोत्रस्य । तस्य सत्यश्रवसः । तत उरुश्रवसोऽनंतरम् ॥ २० ॥ ततो देवदत्तात् । स्वयमग्निरेव तन्नाम्ना जातः स एव कानीनो जातूकर्ण्यश्चोच्यते ॥ २१ ॥ ततो जातूकर्ण्यात् । अतो नरिष्यंतान्वयोक्तेरनंतरम् ॥ २२ ॥ अनुवादमात्रम् 'नाभागो नभगापत्यम्' इत्युक्तभेदस्य कथनात् । कर्मणा वैश्यकन्योद्वाहकर्मणा । कथा चेयं मार्कंडेयपुराणे–[कस्याचिद्वैश्यस्य कन्यां दृष्ट्वा दिष्टपुत्रो नाभागः पित्रनुमतिं विना तां राक्षसेन विधिना जहार । तत्पित्रा प्रार्थितो दिष्टस्तं त्यजेमामित्युवाच । स न तत्याज ततः पित्रा युध्यमानस्तं जिग्ये । ततोंतरिक्षादागत्य केनचिन्मुनिनोक्तं त्वं युद्धाद्विरमायं व्युत्क्रमेण वैश्यकन्योद्वहनाद्वैश्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः ॥ खनित्रः प्रयतेस्तस्माच्चाक्षुषोऽथ विविंशतिः ॥ २४ ॥ विविंशतिसुतो रंभः खनिनेत्रोऽस्य धार्मिकः ॥ करंधमो महाराज तस्यासीदात्मजो नृपः ॥ २५ ॥ तस्यावीक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ॥ संवर्तोऽयाजयद्यं वै महायोग्यंगिरःसुतः ॥२६॥ मरुत्तस्य यथा यज्ञो न तथाऽन्यस्य कश्चन ॥ सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शोभनम् ॥ २७ ॥ अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः ॥ मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥ २८ ॥ मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्धनः ॥ सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥ तत्सुतः केवलस्तस्माद्बंधुमान् वेगवांस्ततः ॥ बंधुस्तस्याभवद्यस्य तृणबिंदुर्महीपतिः ॥ ३० ॥ तं भेजेऽलंबुषा देवी भजनीयगुणालयम् ॥ वराप्सरा यतः पुत्राः कन्या चेडविडाऽभवत् ॥ ३१ ॥ तस्यामुत्पादयामास विश्रवा धनदं सुतम् ॥ प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ॥ ३२ ॥ विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः ॥ विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीम् ॥ ३३ ॥ हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः ॥ तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ॥ ३४ ॥ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिम् ॥ इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ॥ ३५ ॥

सार्थमनुवादमात्रम् ॥ २३ ॥ २४ ॥ २५ ॥ अंगिरसः सुतो महायोगी संवर्तो यमयाजयत्सः मरुत्तः ॥ २६ ॥ अस्य यत्किंचित्पात्रादिकमस्ति तत्तु सर्वं हिरण्मयं शोभनमासीत् ॥ २७ ॥ अमाद्यदहृष्यत् ॥ २८ ॥ २९ ॥ ३० ॥ यतो यस्यां तृणबिंदोः पुत्रा अभवन् ॥ ३१ ॥ ३२ ॥ तानेवाह । विशाल इति । तस्य तृणबिंदोः सुताः ॥ ३३ ॥ सहदेवजः देवजेन सहितः । पाठांतरे नामान्यत्वमात्रमर्थस्तु स एव ॥ ३४ ॥ ३५ ॥

जातोऽतो वैश्येन मा युध्यस्वेति । "यस्यायस्या हि हीनायाः कुरुते पाणिसंग्रहम् । अकृत्वा वर्णसंयोगं सोऽपि तद्वर्णभाग्भवेत् ॥ सोऽयं वैश्यत्वमापन्नस्तव पुत्रः सुमंदधीः । नास्याधिकारो युद्धाय क्षत्रियेण त्वया सह ॥"] इत्युक्तेः । तस्य नाभागस्य ॥ २३ ॥ तत्सुतं प्रांशुसुतम् । तस्मात् खनित्रात् । अथ चाक्षुषात् ॥ २४ ॥ अस्य रंभस्य । करयोर्धमनेन सेनोत्पादकत्वेन करंधमः [कदाचित्सर्वभूपनिरुद्धं स्वपुरं दृष्ट्वा करौ मुखाग्रतः कृत्वा स निशश्वास । ततो धर्मप्रसादतः सेनोत्पत्तिर्जाता इत्युक्तं मार्कंडेये—"अपश्यमानः शरणं सबलो द्विजसत्तम" इत्यरभ्य "धुतयोः करयोर्जज्ञे यतस्तस्यारिदाहदम् । बलं करंधमस्तस्मात्सबलाश्वोऽभिधीयते॥" इत्यंतेन] ॥ २५ ॥ तस्य करंधमस्य । यस्य अवीक्षितः । यं मरुत्तम् ॥ २६ ॥२७॥२८ ॥ तस्य दमस्य । तत्सुतो राज्यवर्द्धनसुतः ॥२९॥ तत्सुतः नरसुतः । तस्मात् केवलात् । ततो बंधुमतः । तस्य वेगवतः । यस्य बंधोः ॥ ३० ॥ तं तृणबिंदुम् । अलंबुषानाम्नी वराप्सरा अप्सरासु श्रेष्ठा ॥ ३१ ॥ तस्याम् इडविडायाम् । योगेश्वरात्पितुः पुलस्त्यात् । परमाम् ऐहिकामुष्मिकफलप्रदाम् ॥ ३२ ॥ ३३ ॥ तस्य विशालस्य । तस्य हेमचंद्रस्य। तत्पुत्रात् धूम्राक्षपुत्रात् । पाठांतरे 'सहदेवकः' इति पाठे । केचित्तु सहदेवाज्जातस्सहदेवजः कृशाश्व इति व्याचख्युः । तथा च संयमात्सहदेवस्तस्मात्कृशाश्व इति फलितम् ॥ ३४ ॥ यः सोमदत्तः । इडस्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः ॥ एते वैशालभूपालास्तृणबिंदोर्यशोधराः ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंन्धे द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह ॥ यो वा अंगिरसां सत्त्रे द्वितीयमह ऊचिवान् ॥ १ ॥ सुकन्या नाम तस्यासीत्कन्या कमललोचना ॥ तया सार्धं वनगतो ह्यगमच्च्यवनाश्रमम् ॥ २ ॥ सा सखीभिः परिवृता विचिन्वंत्यंघ्रिपान्वने ॥ वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषी ॥ ३ ॥ ते दैवचोदिता बाला ज्योतिषी कण्टकेन वै ॥ अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहु ॥ ४ ॥ शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् ॥ राजर्षिस्तमुपालक्ष्य पुरुषान् विस्मितोऽब्रवीत् ॥ ५ ॥ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् ॥ व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥ ६ ॥ सुकन्या प्राह पितरं भीता किंचित्कृतं मया ॥ द्वे ज्योतिषी अजानंत्या निर्भिन्ने कंटकेन वै ॥ ७ ॥ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः ॥ मुनिं प्रसादयामास वल्मीकांतर्गतं शनैः ॥ ८ ॥ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः ॥ कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः ॥ ९ ॥ सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् ॥ प्रीणयामास चित्तज्ञा अप्रमत्ताऽनुवृत्तिभिः ॥ १० ॥ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ ॥ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥ ११ ॥

वैशालभूपाला विशालस्यान्वये जाताः ॥ ३६ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां द्वितीयोऽध्यायः ॥ २ ॥ तृतीये मनुपुत्रस्य शर्यातेः कीर्त्यतेऽन्वयः ॥ यत्र सौकन्यमाख्यानं रैवतं च महाऽद्भुतम् ॥ १ ॥ ब्रह्मिष्ठो वेदार्थतत्त्वज्ञः । तदेवाह । यो वा इति । द्वितीयमहो द्वितीयेऽह्नि क्रियमाणं कर्म ऊचिवानुवाच । तस्य वंशम् " उत्तानबर्हिरानर्तः " इत्यादिना वक्ष्यति ॥ १ ॥ आदौ तावत्तत्कन्यावृत्तांतमाह । सुकन्या नामेत्यादिना ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ भार्गवस्य च्यवनस्य । अभद्रमपराधः ॥ ६ ॥ ७ ॥ ८ ॥ मुग्धेयं मम कन्या क्षंतव्यं त्वयेत्युच्यमाने कति वर्षाण्यस्या विवाहः कृतो न वेत्यादिवाक्यैस्तदभिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात् ॥ ९ ॥ १० ॥ हे ईश्वरौ सद्वैद्यौ युवां मह्यं वयस्तारुण्यं दत्तं संपादयतम् ॥ ११ ॥

तिम् अन्नपतिं भूपतिं वाक्पतिं वा "इडा स्यादन्नवाक्पृथ्वीयज्ञपात्रे बुधस्त्रियाम्" इति निरुक्तिः । इडाया इडसादेशस्त्वार्ष एव । योगेश्वरा नारदादयस्तानाश्रितः । अग्र्यां मोक्षरूपाम् ॥ ३५ ॥ तत्सुतः सुमतिपुत्रः । एते हेमचंद्राद्याः ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ यत्र शर्यात्यन्वये (१) । यो वा शर्यातिः ॥ १ ॥ तस्य शर्यातेः । तया सुकन्यया ॥ २ ॥ विचिन्वंती मृगयंती । ज्योतिषी ज्योतिराश्रये चक्षुषी ॥३॥ ते ज्योतिषी । दिष्टप्रेरिता सती मुग्धभावेन बालभावेन । ततो वाल्मीकरंध्रद्वारा चक्षुर्भ्याम् । असृक् रुधिरम् ॥४॥ राजर्षिः शर्यातिः । तं शकृन्मूत्रनिरोधम् । उपालक्ष्य दृष्ट्वा ॥५॥ अभद्रम् अयुक्तम् । न विचेष्टितं न कृतं किं तु कृतमेव । "अभद्रमपराधेपि मंगलाभावमंगले" इति निरुक्तिः । व्यक्तं निश्चितम् । नः अस्माकं मध्ये । अत इदं सेनाशकृन्मूत्रस्तंभनं भार्गवस्य विचेष्टितमिति व्यक्तमित्यावृत्त्यापि योज्यम् ॥ ६ ॥ ७ ॥ प्रजातं साध्वसं भयं यस्य सः ॥ ८ ॥ तं च्यवनम् ॥ ९ ॥ परमकोपनमत्यंतक्रोधिनम् । अनुवृत्तिभिरनुकूलाचरणैः । संध्यभाव आर्षः ॥ १० ॥ कालस्य संयोगे इति शेषः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ॥ क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम् ॥ १२ ॥ बाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ ॥ निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते ॥ १३ ॥ इत्युक्त्वा जरया ग्रस्तदेहो धमनिसंततः ॥ ह्रदं प्रवेशितोऽश्विभ्यां बलीपलितविप्रियः ॥ १४ ॥ पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः ॥ पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवाससः ॥ १५ ॥ तान्निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः ॥ अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥ १६ ॥ दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ॥ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपम् ॥ ॥ १७ ॥ यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ॥ ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥ १८ ॥ राजा दुहितरं प्राह कृतपादाभिवंदनाम् ॥ आशिषश्चाप्रयुंजानो नातिप्रीतमना इव ॥ १९ ॥ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लोकनमस्कृतो मुनिः ॥ त्वं यज्जराग्रस्तमसत्यसंमतं विहाय जारं भजसेऽमुमध्वगम् ॥ २० ॥

असोमपोः सोमपानरहितयोरपि वां युवयोः सोमस्य ग्रहं सोमपूर्णं पात्रं ग्रहीष्ये दास्यामीति । युवां सोमेन यक्ष्य इत्यर्थः । "ऐंद्रवायवं गृह्णाति" इत्यादिषु द्रव्यदेवतासंबंधानुपपत्त्या गृह्णातेर्यागपर्यवसायित्वात् ॥ १२ ॥ बाढमित्यभिनंद्य भवानस्मिन्निमज्जतामित्यूचतुः ॥ १३ ॥ ह्रदं प्रवेशितः । तावपि तमपि वृद्धं गृहीत्वा प्रविष्टावित्यर्थः ॥ १४ ॥ १५ ॥ अश्विनौ शरणं ययौ युवां पृथक् स्थित्वा मत्पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ प्रलंभितो वंचितः । हे असति । असंमतमनभीष्टम् ॥ २० ॥

नासत्यावाश्विनेयौ । युवां दत्तम् । "वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्" इति मेदिन्युक्तेर्वयो यौवनम् ॥ ११ ॥ तव वयोदानेनावयोः किं फलमिति चेदाह–ग्रहमिति । इत्यर्थ इति । यज्ञभागिनौ कारिष्यामीति भावः । ग्रहेर्यागार्थाभावेपि मंत्रप्रामाण्यात्तदाह–ऐंद्रेति । इंद्रवायुदेवताकद्रव्यस्य पुरुषकर्तृकग्रहणं न युज्यतेऽतोऽत्र गृह्णातेर्यजतीत्यर्थे पर्यवसानम् ॥ १२ ॥ भिषक्तमौ स्वर्वैद्यौ । सिद्धेन सिद्धौषधियोगेन विनिर्मितेऽस्मत्संपादिते । यद्वा–सिद्धा प्रत्यक्षफलप्रदा या विद्या तया निर्मिते अत्र द्वेत्यस्य लोपश्छांदसः ॥ १३ ॥ धमनिसंततः शिराव्याप्तः । बलीभिर्जराश्लथचर्मभिः पलितैश्श्वेतरोमभिश्च विप्रियो विरूपः "वलिर्दैत्यप्रभेदे च करचामरदंडयोः । उपहारे पुमान्स्त्री तु जरया श्लथचर्मणि॥" इति मेदिनी । "पलितं जरसा शौक्ल्यम्" इत्यमरः ॥ १४ ॥ अपीच्याः सुंदराः । षोडशवर्षप्रायाः ॥ १५ ॥ सरूपान् तुल्यरूपान् । इत्यर्थ इति । मत्पातिव्रत्यभंगो न कार्यो युवाभ्यामित्येवं तौ देवौ प्रार्थयांचकारेति भावः ॥ १६ ॥ तस्यै सुकन्यायै अन्वर्थनामवत्यै । ऋषिं च्यवनम् ॥ १७ ॥ यक्ष्यमाणो यज्ञं करिष्यमाणः ॥ १८ ॥ नातिप्रीतमना व्याभिचारशंकया व्यथित इवेति पुत्र्याः स्वास्थ्यदर्शनेन वस्तुतस्तथा नेत्याह ॥ १९ ॥ असति दुर्वृत्ते । अनभीष्टत्वे हेतुः–जराग्रस्तमिति । अध्वगं पांथममुं मत्संमुखस्थम् ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं मतिस्तेऽवगतान्यथा सतां कुलप्रसूते कुलदूषणं त्विदम् ॥ बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः ॥ २१ ॥ एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ॥ उवाच तात जामाता तवैष भृगुनंदनः ॥ २२ ॥ शशंस पित्रे तत्सर्वं वयोरूपाभिलंभनम् ॥ विस्मितः परमप्री तस्तनयां परिषस्वजे ॥ २३ ॥ सोमेन याजयन् वीरं ग्रहं सोमस्य चाग्रहीत् ॥ असोमयोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥ हंतुं तमाददे वज्रं सद्योमन्युरमर्षितः ॥ सवज्रं स्तंभयामास भुजमिंद्रस्य भार्गवः ॥ २५ ॥ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ॥ भिषजाविति यत्पूर्वं सोमाहुत्या बहिष्कृतौ ॥ २६ ॥ उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः ॥ शर्यातेरभवन्पुत्रा आनर्ताद्रेवतोऽभवत् ॥ २७ ॥ सोंतः समुद्रे नगरीं विनिर्माय कुशस्थलीम् ॥ आस्थितोऽभुंक्त विषयानानर्तादीनरिंदम ॥ २८ ॥ तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमम् ॥ ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ॥ २९ ॥

हे सतां कुलप्रसूते तव मतिरन्यथा तद्विपर्ययेण कथमवगतावसन्नाऽध्यवसितेति वा । तदेवाह । कुलदूषणं त्विदमित्यादि ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ सद्यस्तत्क्षणमेव मन्युर्यस्य स इंद्रः ॥ २५ ॥ २६ ॥ २७ ॥ विषयान्देशानानर्तादीनभुंक्तापालयत ॥ २८ ॥ ककुद्मी ज्येष्ठो यस्मिंस्तत् पुत्रशतम् । विभुं

सतां शुद्धक्षत्रियाणाम् । तद्विपर्ययेण सत्कुलप्रसूतिस्वभाववैपरीत्येन । अवसन्ना नष्टा । नष्टमत्यास्तु तव नत्यापि किमिति चेदाह—अध्यवसिता कृतनिश्चयेत्यर्थः । तदेवाह वैपरीत्यमेवाह । इदम् औपपत्यम् यत् यतः । जरयति शोषयत्युभयकुलमिति जारस्तम् । तदेवाह—पितुश्चेति । अधस्तमो नरकम्॥२१॥शुचिस्मिता शोभनस्मितयुक्ता । स्मयमाना विस्मिता चाशोभनश्रुतेः । तातेति । तवाग्रे कथनं ममानुचितमित्याह—भृगुनंदनश्च्यवनः॥ ॥ २२ ॥ तत्सर्वं नासत्यागमनादि । वयसो रूपस्य चाभिलभनं येन तत् ॥ २३ ॥ सोमेन सोमवता यागेन । वीरं शर्यातिम् । असोमयोः पूर्वं सोमभागशून्ययोः । ग्रहं पात्रम् । अग्रहीत् अंतर्भावितण्यर्थः अग्राहयत् । अश्विनोरिति षष्ठी तृतीयार्थे । अश्विभ्यामित्यर्थः । तेजसा तपोबलेन ॥ २४ ॥ तं च्यवनम् । अमर्षितोऽसहमानः । भार्गवश्च्यवनः ॥ २५ ॥ तत इंद्रभुजस्तंभनोत्तरम् । सर्वे देवाः । अन्वजानन् अनुज्ञां ददुः । तयोः पूर्वं सोमग्रहाभावः कथमिति चेदाह—भिषजाविति । "भिषजां गणकानां च गायकानां च नृत्यताम् । हव्यकव्ये न दातव्ये गर्हिता वृत्तयस्त्विमाः ॥" इति स्मृतेः ॥ २६ ॥ प्रकृतमनुसरति—उत्तानबर्हिरिति ॥ २७ ॥ स रेवतः । अंतःसमुद्रे समुद्रद्वीपे । कुशस्थलीं यज्ञयोग्यत्वादन्वर्थनाम्नीम् । समुद्रे नगर्यादिनिर्माणसामर्थ्यं तु तस्य तपःप्रभावाज्जातं तथा हि—[कदाचिदानर्तेनोक्तं पुत्र मया मही कष्टेन जिता पालिता चातस्त्वमपि यत्नेन पालयेति श्रुत्वाह पितः पृथ्वीपालयिता श्रीश एक एव न ततोन्यः पालयिता जेता चातो मया पालितेति वृथाभिमानं त्यजेति पुत्रवाक्यं श्रुत्वा यावदंतं मे भूमिराज्यं ततो निर्गच्छ नवां श्रीशादेव तां गृहीत्वा तत्रैव वसेत्युक्तः स समुद्रतटे तपश्चकार तत्तपसा तुष्टः श्रीहरिस्सर्वां भूमिं तत्पितुर्ज्ञात्वा निजवैकुंठाच्छतयोजनं विभज्यांशेन सुदर्शनोपरि तं भूखंडं समुद्रे स्थापयामास तं चानर्तः शशास] इति पुराणांतरादवसेयम्। आदिनाऽन्यानपि देशानित्यर्थः । "नीवृज्जनपदो देशो विषयस्तूपवर्तनम्" इत्यमरः । अरिं संसारासक्तिलक्षणं मोहं दाम्यतीति तथा एवंविधसामर्थ्यवत्त्वाद्भवानपि हरिभक्तोऽस्तीति तात्पर्यम् ॥ २८ ॥ तस्य रेवतस्य ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतम् ॥ आवर्तमाने गांधर्वे स्थितोऽलब्धक्षणः क्षणम् ॥ ३० ॥ तदंत आद्यमानम्य स्वाभिप्रायं न्यवेदयत् ॥
तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥ ३१ ॥ अहो राजन् निरुद्धास्ते कालेन हृदि ये कृताः ॥ तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ॥
॥ ३२ ॥ कालोभियातस्त्रिणवचतुर्युगविकल्पितः ॥ तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥ ३३ ॥ कन्यारत्नमिदं राजन्नररत्नाय देहि भोः ॥
भुवो भारावताराय भगवान् भूतभावनः ॥ ३४ ॥ अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः ॥ इत्यादिष्टोऽभिवंद्याजं नृपः स्वपुरमागतः ॥ ३५ ॥
त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ॥ सुतां दत्त्वाऽनवद्यांगीं बलाय बलशालिने ॥ बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमम् ॥ ३६ ॥
इति श्रीभागवते महापुराणे नवमस्कंधे तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ नाभागो नभगापत्यं यं ततं भ्रातरः कविम् ॥ यविष्ठं व्यभजन्
दायं ब्रह्मचारिणमागतम् ॥ १ ॥

ब्रह्माणम् ॥ २९ ॥ न लब्धः क्षणोऽवसरो येन ॥ ३० ॥ आद्यं ब्रह्माणम् ॥ ३१ ॥ ते त्वया हृदये ये कृतास्ते सर्वे कालेन विरुद्धाः संहृताः ॥
॥ ३२ ॥ त्रिणव सप्तविंशतिः चतुर्युगाणि तैर्विकल्पितो विभक्तः । यो देवदेवस्यांशोऽस्ति तस्मै नररत्नाय देहि ॥ ३३ ॥ तदेवाह । भुव इति ॥ ३४ ॥ पुण्य
जनत्रासाद्यक्षभयात्पूर्वमेव चिरं पुरं तद्भ्रातृभिस्त्यक्तम् ॥ ३५ ॥ ३६ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां तृतीयोऽध्यायः ॥ ३ ॥ चतुर्थे मनुपुत्रस्य नभगस्य
कथोच्यते ॥ तत्सूनोश्चांबरीषस्य कृत्या प्रतिहता यतः ॥ १ ॥ नभगस्य वंशमाह । नभगस्यापत्यं नाभागः । नाभागादंबरीषो महाभागवतोऽभूदिति वक्ष्यंस्तद्धेतुत्वेन वंश
प्रवर्तकस्य नभगस्य निष्कपटं चरितं तेन तु श्रीरुद्रप्रसादमाह यं ततमित्यादिना । ब्रह्मचारिणं बहुकालं गुरुकुले वसंतं नैष्ठिकोऽसाविति मत्वा विभागसमये तस्मै भागम प्रक

अपावृतं सर्वोत्कृष्टत्वात्प्रकाशबहुलम् ॥ ३० ॥ तदंते गांधर्वांते । स्वाभिप्रायं कन्यादानलक्षणममुकस्मै दास्याम्यमुकस्मै वेत्येवंरूपम् । तच्छ्रुत्वा तदुक्तं राज्ञां नामाद्याकर्ण्य । तं ककुद्मिनम् ॥ ३१ ॥ ये राजानः । न केवलं त
एवापि तु तत्पुत्रादयोऽपीत्याह–तत्पुत्रेति । नप्ता पौत्रपुत्रः । गोत्राणि कुलानि वा नामानि 'गोत्रं कुलाख्ययोः' इति मेदिनी । शृण्महे तद्वार्षः ॥ ३२ ॥ तर्हि किं करोमि कन्या चावश्यं देयैव कस्मै दास्यामीति चेदाह–तद्ग
च्छेति । यतस्त्वच्चिंतितानां न कोप्यवशिष्टस्तत्तस्मात् । गच्छ भूलोकमिति शेषः । देवदेवस्य हरेश्चतुर्व्यूहमूर्तेरंशः संकर्षणरूपश्चतुर्थी मूर्त्तिः तस्मै बलेन प्रकाशमानाय । रत्नं रत्नेनैव योज्यमित्याह–कन्यारत्नमिति ॥ ३३ ॥
तदेव भगवदंशत्वमेव । निजांशेन संकर्षणेन सह ॥ ३४ ॥ स्वपुरं कुशस्थलीम् । तत्स्थानप्रतिष्ठापितद्वारवतीमित्यर्थः ॥ ३५ ॥ अनवद्यांगीं शोभनावयवाम् ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे
तृतीयोऽध्यायः ॥ ३ ॥ तत्सूनोर्नभगसूनोर्नाभागस्यांबरीषस्य चेति त्रयाणां कथा । यतो अंबरीषात् । कृत्या मारणसमर्था मंत्राद्युत्पादिता देवप्रतिकृतिः (१) । तद्धेतुत्वेनांबरीषकारणत्वेन । तस्मै नाभागाय मनुपुत्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातरोऽभाक्त किं मह्यं भजाम पितरं तव ॥ त्वां ममार्यास्तताभाक्षुर्मा पुत्रक तदादृथाः ॥ २ ॥ इमे अंगिरसः सत्रमासतेऽद्य सुमेधसः ॥ षष्ठंषष्ठमु
पेत्याहः कवे मुह्यंति कर्मणि ॥ ३ ॥ तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः ॥ ते स्वर्यंतो धनं सत्रपरिशेषितमात्मनः ॥ ४ ॥ दास्यंत्यथ ततो
गच्छ तथा स कृतवान् यथा ॥ तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितम् ॥ ५ ॥ तं कश्चित्स्वीकरिष्यंतं पुरुषः कृष्णदर्शनः ॥ उवाचोत्तरतोऽ
भ्येत्य ममेदं वास्तुकं वसु ॥ ६ ॥ ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः ॥ स्यान्नौ ते पितरि प्रश्नः पृष्टवान्न पितरं तथा ॥ ७ ॥

ल्प्यैव भ्रातरः सर्वे दायं विभज्य गृहीत्वा पश्चाद्गुरुकुलादागतं यं भागार्थिनं कविं विद्वांसं यविष्ठं प्रति ततं तातं पितरं दायं व्यभजन्नित्यर्थः ॥ १ ॥ एतदेव प्रश्नोत्तराभ्यां दर्शयति । तत्र नाभागः पृच्छति । हे भ्रातरो मह्यं किमभाक्त व्यभजत कं भागं मदर्थं यूयं प्रकल्पितवंतः । भ्रातर आहुः । तदा विस्मृतमस्माभिरिदानीं तु तव पितरं विभजाम त्वं पितरं गृहाणेत्यर्थः । स च पितरं गत्वाऽऽह । तत हे तात आर्याः श्रेष्ठा मे मम त्वामभाक्षुर्भागं चक्रुः । मदीयो भागस्त्वमित्यर्थः । पाठांतरे हे तात किमिद ममाभाक्षुः भजाम पितरं तवेत्युक्तवंत आर्यास्त्वां मह्यं किमर्थं ददुरित्यर्थः । पिताऽऽह । हे पुत्रक तत्तैरुक्तं मादृथाः प्रतारणमात्रं तैः कृतं तस्मिन्नादरं मा कार्षीः । न ह्यहं दाय इव भोगसाधनमित्यर्थः ॥ २ ॥ तथाऽपि तैर्भागत्वेन दत्तोऽहं तव जीवनोपायमुपदेक्ष्यामीत्याह । इम इति सपादाभ्यां द्वाभ्याम् । “ अभिप्लवः षडहो भवति पृष्ठ्यः षडहो भवति ” इति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठंषष्ठमहः कर्मोपेत्य प्राप्य कर्मणि तदनुष्ठाने । सुमेधसोऽपि ते सूक्तविशेषाज्ञानेन मुह्यंति । कवे हे विद्वन् ॥ ३ ॥ तान्महात्मनोऽपि त्वम् “ इदमित्थारौद्रम् ” इति च “ ये यज्ञेन दक्षिणया ” इति च वैश्वदेवे द्वे सूक्ते शंसय पाठय । ततः कर्मणि समाप्ते सति ते स्वर्यंतः स्वर्गं गच्छंतः स्वसत्रे परिशेषितमवशिष्टमात्मनो धनं तुभ्यं दास्यंति अथ तस्मात्तान्गच्छेति । तथेत्यादि शुकवाक्यम् । यथावत्कृतवान् । सत्रपरिशेषितं सत्त्रावशिष्टं धनम् ॥ ४ ॥ ॥ ५ ॥ पुरुषः श्रीरुद्रः दृश्यत इति दर्शनं शरीरं कृष्णं दर्शनं यस्य सः वास्तुकं यज्ञभूमिगतं वसु धनं ममेत्युवाच ॥ ६ ॥ तर्हि स्म तदैव ममेदमिति मानवो नाभाग

दायं भ्रातृदेयं भागम् । यं नभगं मानवम् । यविष्ठं कनिष्ठम् । इत्यर्थ इति । भागकाले तत्स्मरणाभावात्पितरमेव भागत्वेन कल्पयामासुरिति भावः ॥ १ ॥ एतदेवं दायविस्मरणे पितृविभजनमेव । तत्र आदौ । इत्यर्थ इति । सर्वेषामविभक्तं साधारणं स्वत्वाधिकरणं पितरमेव भागं स्वीकुर्वीति भावः । इत्यर्थ इति । मह्यं भ्रातृभिस्त्वं भागः कल्पित इति भावः । पाठांतरे ‘किं मे आर्यास्तताभाक्षुः’ इति पाठे । इत्यर्थ इति तेष्वन्यतमेन किमर्थं न गृहीत इति भावः । इत्यर्थ इति भोगसाधनस्य दायत्वं भवति न हि भोक्तुरिति भावः ॥ २ ॥ यद्यपि पुत्र तैरनुचितं कृतं तथापीति । अभिप्लवोऽभिप्लवनामको यागः षडहः षड्भिर्दिवसै भवतीत्यर्थः । एवं पृष्ठ्यः पृष्ठ्यनामकोपीति श्रुतिपदार्थः । तदनुष्ठाने यथावत्करणे ॥ ३ ॥ “इदमित्थं रौद्रमिति च” इत्यादिकमेकम् “ये यज्ञेन दक्षिणया” इति चेत्यादिकं द्वितीयम् । इत्थं द्वे सूक्ते । ततः सूक्तशंसनात् ॥ ४ ॥ दास्यंतीति पूर्वान्वयि । अथ अतः । ततः तानंगिरसः । स नभगः । यथा पित्रोक्तं तथा । तस्मै नभगाय ॥ ५ ॥ तं नभगम् ॥ ६ ॥ यथा रुद्रेणोक्तम् ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् ॥ चक्रुर्विभागं रुद्राय स देवः सर्वमर्हति ॥ ८ ॥ नभगस्तं प्रणम्याह तवेश किल वास्तुकम् ॥ इत्याह मे पिता ब्रह्मञ्छिरसा त्वां प्रसादये ॥ ९ ॥ यत्ते पिताऽवदद्धर्मं त्वं तु सत्यं प्रभाषसे ॥ ददामि ते मंत्रदृशे ज्ञानं ब्रह्म सनातनम् ॥ १० ॥ गृहाण द्रविणं दत्तं मत्सत्रे परिशेषितम् ॥ इत्युक्त्वांतर्हितो रुद्रो भगवान् सत्यवत्सलः ॥ ११ ॥ य एतत् संस्मरेत् प्रातः सायं च सुसमाहितः ॥ कविर्भवति मंत्रज्ञो गतिं चैव तथात्मनः ॥ १२ ॥

उवाच । पुनश्च रुद्र उवाच । नौ आवयोरस्मिन्विवादे ते पितरि प्रश्नः स्यादिति । पृष्टवानिति शुकोक्तिः ॥ ७ ॥ पृष्टस्य मनोर्वाक्यं यज्ञवास्तुगतमिति । उच्छिष्टमुर्वरितम् । क्वचिदिति दक्षाध्वरे । "उच्छेषणभागो वै रुद्रः" इति श्रुतेश्च । किं च स देव ईश्वरः सर्वमप्यर्हति किं पुनर्यज्ञावशिष्टमित्यर्थः ॥ ८ ॥ ९ ॥ श्रीरुद्र आह । यत्ते इति ॥ १० ॥ इदमाख्यानं श्रुतिप्रसिद्धम् । तथाहि बह्वृचब्राह्मणम् । " नाभानेदिष्ठं शंसति नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निरभजन्सोऽब्रवीत् " इत्यादि ॥ ११ ॥ अस्याख्यानस्य

इत्यर्थ इति । सर्वयोग्यस्यावशिष्टयोग्यता तु कैमुत्यसिद्धेति भावः ॥ ८ तं रुद्रम् ॥ ९ ॥ मंत्रदृशे वैश्वदेवसूक्ते दृष्टवते ज्ञातवत इत्यर्थः । ब्रह्म महत् ॥ १० ॥ ११ ॥ एतत् श्रुतिप्रसिद्धमाख्यानम् । कविः क्रांतदर्शी । गतिं स्वरूपम् । आख्यानं चैतद्बह्वृचब्राह्मणेऽस्ति तथाहि । "नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसंतं भ्रातरो निरभजन् सोऽब्रवीदेत्य किं मह्यमभाक्त त एनमब्रुवन् भजान पितरं तवैतमेव निष्ठावमव वदितारमित्यब्रुवंस्तदप्येतर्हि पितरं पुत्रानिष्ठावावदितेत्येवाचक्षते । त्वामंतरेणाभांक्षन् त्वां ह वाव मह्यं तताभांक्षुः तं पिताब्रवीन्मा पुत्रक तदादृथाः अंगिरसो वा इमे स्वर्गाय लोकाय सत्त्रमासते ते षष्ठंषष्ठमेवाहरागत्य मुह्यंति तानेते सूक्ते षष्ठेऽहनि शंसय तेषां यत्सहस्रं सत्त्रपरिवेषणं तत्ते स्वर्यंतो दास्यंतीति तथेति तानुपैत् । प्रतिगृम्णीत मानवं सुमेधस इति तमब्रुवन् किंकामो वदसीतीदमेव वः षष्ठमहः प्रज्ञापयामीत्यब्रवीदथ यद्व एतत्सहस्रं सत्त्रपरिवेषणं तत्ते स्वर्यंतो दत्तेति तथेति तेनैते सूक्ते षष्ठेहन्यशंसयत् ततो वेति प्रयज्ञमजानन्प्रस्वर्गं लोकं तद्यदेते सूक्ते षष्ठेहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्यानुख्यात्या इति ते स्वर्यंतोऽब्रुवन्नेतत्ते ब्राह्मणसहस्रपरिवेषणं तदेनं समाकुर्वाणं पुरुषः कृष्णशवास्युत्तरतयोत्थायाब्रवीन्मम वा इदं मम वै वास्तुहमिति सोब्रवीन्मह्यं वा इदमदुः तमब्रवीत्तद्वै नो तवैव पितरि प्रश्न इति स पितरमैत तं पिताब्रवीत्ततु ते पुत्रकादुरित्यदुरेव स इत्यब्रवीत्तत्तु मे पुरुषः कृष्णशवास्युत्तरत उपोदतिष्ठन्मम वा इदं मम वै वास्तुहमित्यादत्तवानिति । तं पिताब्रवीत्तस्यैव पुत्रक तत्तुभ्यं दास्यतीति स पुनरेत्याब्रवीत्तव ह बाव किल भगव इदमिति मे पिताहेति सोब्रवीत्तदहं तुभ्यं ददामि य एवं सत्यमवादीरिति तस्मादेवं विदुषा सत्यमेव वदितव्यमिति स एष सनिर्मंत्रो यत्राभानेदिष्ठ उपैतं सहस्रं नमति प्रषष्ठेनाह्ना स्वर्गं लोकं जानाति य एवं वेद" इति ब्राह्मणम् । नाभानेदिष्ठं नभगं मानवं मनुपुत्रं ब्रह्मचर्यमुद्दिश्य गुरुकुले वसंतं निरभजन् दायविभागमकृषत स तानुवाच मम भागं किमर्थं विभक्तवंतः को मम भागः कल्पित इत्यप्राक्षीत् ते भ्रातर एनं नाभानेदिष्ठं पितरं भज । अन गच्छ 'अन–चेष्टायाम् ' यदि तव विभागापेक्षा तर्हि गच्छ तं प्रसाद्य विचारय वयं चागत्य पृच्छाम इत्यर्थः । एतमेव पितरमेव । निष्ठावं व्यवस्थागमकम् अत एवावगम्य वदितारं पितरमब्रुवन्नित्यर्थः । यतो नाभागादयो निश्चयार्थं पितरं गत्वाब्रुवंस्तस्मादेतर्हि अद्यापि पुत्राः पितरं निर्णीय व्यवस्थापका इत्याहुरित्यर्थः । स नभगो गत्वा भ्रातृभिस्सह पितरमपृच्छत् त्वां विना कथमभाक्षुः । किञ्च त्वां ह बावेति स्फुटनिश्चयेऽव्ययद्वयं हे तत स पिताह हे पुत्रक तत्तस्मिन्दायविभागे मा आदरमकार्षीरिति । तर्हि मम जीवनोपायः क इत्यत आह–अंगिरस इति स्फुटार्थः । हे सुमेधसः मानवं मां प्रतिगृम्णीत स्वीकुरुतेति मंत्रमुक्त्वा कस्मिन्धने विद्यायामप्यस्मदपेक्षिते विद्योपदेशे कामो यस्य स किं कामः युष्मदधिकविद्यावित्त्वाद्वितीयोऽधुना नाभिगत इति तृतीयकाम इत्याह–इदमेवेति । प्रथमविकल्पकामोऽपि भवामीत्याशयेनाह–यदिति । सर्वयज्ञेषूपयोगमाह–तद्यदिति । अनुख्यातिः प्रकाशः । हे ब्राह्मण वेदविद्याविशारद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभागादंबरीषोऽभून्महाभागवतः कृती ॥ नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित ॥ १३ ॥ राजोवाच ॥ भगवञ्छ्रोतुमिच्छामि राजर्षे स्तस्य धीमतः ॥ न प्राभूद्यत्र निर्मुक्तो ब्रह्मदंडो दुरत्ययः ॥ १४ ॥ श्रीशुक उवाच ॥ अंबरीषो महाभागः सप्तद्वीपवतीं महीम् ॥ अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥ १५ ॥ मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतम् ॥ विद्वान् विभवनिर्वाणं तमो विशति यत्पुमान् ॥ १६ ॥ वासुदेवे भगवति तद्भक्तेषु च साधुषु ॥ प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतम् ॥ १७ ॥ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने ॥ करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ १८ ॥ मुकुंदलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंगसंगमम् ॥ घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ १९ ॥

स्मरणे फलमाह । य एतदिति । आत्मनो गतिं च प्राप्नोतीति शेषः ॥ १२ ॥ क्वचिदपि न प्रतिहतो ब्रह्मशापोऽपि ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोऽपि यं नास्पृशत् अतोऽसौ महाभागवतोऽत एव कृती पुण्यवान् ॥ १३ ॥ तस्य श्रोतुमिच्छामि । चरितमिति शेषः । ब्रह्मदंडः कृत्यानलो न प्राभून्न समर्थो बभूव ॥ १४ ॥ श्रियं संपदम् । विभवमैश्वर्यम् । अतुलं निरुपमम् ॥ १५ ॥ पुंसामतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्तुतं निरूपितमनुपादेयं मेने । तत्र हेतुः । विभवस्य निर्वाणं नाशं विद्वान् यथेन विभवेन तन्नाशेन वा पुमांस्तमो विशति मोहे निमज्जति ॥ १६ ॥ नन्वेवं जानंतोऽपि विभवैषिणो दृश्यंते तत्राह । वासुदेव इति । भावं भक्तिं प्राप्तः येन भावेनेदं विश्वं लोष्टवदतितुच्छं स्मृतम् ॥ १७ ॥ भक्तिमेव सर्वेंद्रियाणां भगवत्परत्वकथनेन प्रपंचयति स वा इति त्रिभिः । श्रुतिं श्रोत्रमच्युतस्य सत्कथानामुदये श्रवणे चकारेत्यस्य सर्वत्रान्वयः ॥ १८ ॥ मुकुंदस्य लिंगानामालयाः स्थानानि तेषां दर्शने दृशौ नेत्रे श्रीमत्यास्तुलस्यास्तत्पादसरोजेन यत्सौरभं तस्मिन् ।

समाकुर्वाणं राशीकृत्य स्वीकुर्वाणं कृष्णशरीरवाससी वास्तुहं वास्तवं मूलभद्रभाषायां हकारवकारयोः पर्यायत्वांगीकारात् । मानवस्तर्हि यदि ममेदमिति वदसि ऋषिभिरिदं मम दत्तमित्याह सोऽब्रवीदिति स नभगम् । हे मानव नौ आवयोः ऐत्प्राप हे पुत्रक तेंगिरसस्तवादुर्न दत्तवंत एव किमिति पृष्टे स नभगः मे अदुरेव न तत्र संदेह इत्यब्रवीत् । तर्हि किमत्र बाधकमत्राह—तत्तु म इति । सत्रपरिशेषितं यद्धनं तन्ममैवेत्युक्त्वा आदत्तवान्स्वीकृतवान् इत्युक्ते पिता तमाह—य इह नाभानेदिष्टः स एष सहस्रसनिः 'षन—दाने' सहस्रेत्युपलक्षणमनेकजनाय धनदाता मंत्रो मंत्रज्ञानी पुरुषः एवमुक्तमितिहासार्थं वेद एनं पुरुषमुद्दिश्य सहस्रमुपनमति षष्ठेनाह्नानापेक्षितसूक्तपूर्वकक्रतकर्मणा स्वर्गं सुखज्ञानात्मकं लोकं सर्वाधारं हरिं प्रजानातीति भावः ॥ १२ ॥ अंबरीषपदार्थमन्वर्थयति अंबादिकं रीषं नश्वरमिति ज्ञानं यस्य सोम्बरीषः रीषोऽपि हिंसार्थे गतौ च मत्वर्थीयोऽच् । यद्वाम्बरवदीषं ज्ञानं यस्य स तथा विस्तृतज्ञान इत्यर्थः । अं ब्रह्म तस्य वरिर्वरणं तत्रेच्छा यस्य स तथा वा । अत एव महाभागवतत्वादेव ॥ १३ ॥ तस्य अम्बरीषस्य । यत्र अंबरीषे ॥ १४ ॥ १५ ॥ तत्र अनुपादेयत्वे । विभवस्य धनादेः । विभवेऽज्ञो व्यसनैस्तमो नरकं तन्नाशे भोगनाशाच्च ॥ १६ ॥ अत्राक्षिपति—नन्विति । विभवैषिणो धनादीच्छावंतः । तद्भक्तेषु वासुदेवभक्तेषु । साधुषु सदाचारवत्सु । "लोष्टः पिंडे मृदस्तुच्छे लेपनोच्छिष्टगोमये" इति धरणिः । एतेन भगवद्विमुखा एव वैभवेच्छव इत्युक्तम् ॥ १७ ॥ सः अंबरीषः । आदिना पुष्पतुलस्यादानादिग्रहः ॥ १८ ॥ लिंगानां मत्स्यादिरूपाणां स्थानानि प्रतिमाशालग्रामादीनि । तद्भृत्या हरिभक्ताः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने ॥ कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥२०॥ एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ॥ सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥२१॥ ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः ॥ ततैर्वशिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥ २२ ॥ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः ॥ तुल्यरूपाश्चानिमिषा व्यदृश्यंत सुवाससः ॥ २३ ॥ स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः ॥ शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥ २४ ॥

तदर्पिते तस्मै निवेदितान्नादौ ॥ १९॥ कामं स्रक्चंदनादिसेवां दास्ये निमित्ते तत्प्रसादस्वीकाराय न तु कामकाम्यया विषयेच्छया । कथं चकार । उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा । अनेन तद्भक्तेषु च परं भावं प्राप्त इत्येतत्स्फुटीकृतम् ॥ २० ॥ सर्वत्रात्मेति भावो भावना यस्मिंस्तमात्मनः स्वस्य कर्मणां कलापं समूहं भगवति विदधत्समर्पयंस्तन्निष्ठैर्भागवतैर्विप्रैरभिहितः शिक्षितः सन् महीं शशास पालयामास । अनेनाधिकृतो धर्मोऽपि यथावद्दर्शितः ॥ २१ ॥ किं च । यज्ञाधिष्ठातारमीश्वरमश्वमेधैरीजे आराधयामास । महाविभूत्योपचितान्यंगानि दक्षिणाश्च येषु तैः वशिष्ठादिभिर्हेतुभूतैस्तैर्विस्तृतैः । धन्वनि धन्वदेशे निरुदके । सरस्वतीमभिस्रोतम् । तस्याः प्रतिलोममित्यर्थः ॥ २२ ॥ किं च । यस्य क्रतुषु सदस्यादयो गीर्वाणैः सह भूषणादिभिस्तुल्यरूपा व्यदृश्यंत स इत्थमिति चतुर्थेनान्वयः । न च देवानां निमेषाभावाद्वैलक्षण्यं यतोऽनिमिषाश्च व्यदृश्यंत । न निमिषंतीति तथा । आश्चर्यदर्शनौत्सुक्येन तेषां निमेषोपरमादिति भावः ॥ २३ ॥ यस्य यदीयैर्मनुजैरपि स्वर्गो न प्रार्थितस्तस्य तु का

तत्पादसरोजेन तत्पादसरोजसंबंधेन भगवच्चरणार्पिततुलसीगंधेनेत्यर्थः । तस्मै कृष्णाय । आदिना जलादिग्रहः ॥ १९ ॥ क्षेत्रेषु मथुरादिषु पदानि केशवदेवादिस्थलानि तत्रानुसर्पणे गमने । हृषीकेशस्य पदानां चरणानां भक्तानां वाभिवंदने उत्तमश्लोकजनानाश्रयतीति तथा । अनेन भक्तजनरत्युत्पादनेन ॥२०॥ यद्वा सर्वेष्वाब्रह्मादिष्वात्मभावमात्मैक्यं सर्वात्मनि हरावात्मभावं भक्तिं वा यथा तथा । तस्मिन्हरौ निष्ठा स्थितिर्येषां तैस्तन्निष्ठैः।अनेन भागवतशिक्षया भूपालनेन । अधिकृतस्य स्वीकृतस्य राज्यस्य धर्मः । विश्वनाथस्तु—हरिभक्तिनिष्ठब्राह्मणेनाभिहितस्त्वमष्टावेव यामान्निर्विक्षेपेण सर्वात्मना हरिं भज राज्यकर्मणि स्वनियुक्तयोग्यपुरुषैरेव महीं शाधीति शिक्षितः सन्नित्याह ॥ २१ ॥ अन्यराजधर्ममाह—किञ्चेति । असितो व्यासः । धन्वन्निति ङिलोपस्त्वार्षः । तस्याः सरस्वत्याः । इत्यर्थ इति । यजतः सरस्वतीप्रवाहो यथा संमुखो भवेत्तथा तत्तटेष्विति भावः । अत्र संदर्भः—ननु कथं स वै मन इत्यादौ सति यज्ञक्रिया स्यादेकात्मत्वात्तत्राह—वशिष्ठादिभिः । वशिष्ठादिद्वारा कृतैः "विप्रैः संपादितं यस्य यज्ञदानव्रतादिकम् । पाणिग्रहं परित्यज्य तत्तस्यैव न संशयः॥" इति स्मृतेः । सरस्वतीमिति। कर्ममार्गे तस्याः प्रधानत्वात् "सरस्वत्यास्तटे कर्म कृतमक्षय्यमीरितम्" इत्यादिपुराणात् ॥ २२ ॥ यज्ञाधिक्यमाह—किं चेति । गीर्वाणैर्देवैः 'गीर्वाणा दानवारयः' इत्यमरः । सनिमेषाणां देवसादृश्यं न संगच्छत इत्याह—न चेति । यतस्तेऽप्यनिमेषा अतो वैलक्षण्यं नेत्यर्थः । इति भाव इति । यज्ञे साक्षाद्देवागमनदर्शनान्निर्निमेषा एवाभवन्निति तात्पर्यम् ॥ २३ ॥ यस्यांबरीषनृपतेः । का वार्त्ता किं कथनम् । तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समर्धयंति तान्कामाः स्वाराज्यपरिभाविताः ॥ दुर्लभा नापि सिद्धानां मुकुंदं हृदि पश्यतः ॥ २५ ॥ स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः ॥ स्वधर्मेण हरिं प्रीणन् संगान्सर्वाञ्छनैर्जहौ ॥ २६ ॥ गृहेषु दारेषु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिपत्तिषु ॥ अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिम् ॥ २७ ॥ तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् ॥ एकांतभक्तिभावेन प्रीतो भृत्याभिरक्षणम् ॥ २८ ॥ आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया ॥ युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतम् ॥ २९ ॥

वार्ता ॥ २४ ॥ आस्तां स्वर्गप्रार्थनशंकाऽपि यतः मुकुंदं हृदि पश्यतस्तान् जनान्कामा विषया न समर्द्धयंति न हर्षयंति । कथंभूताः । स्वाराज्येन स्वरूपसुखेन परिभाविता अतिशायिताः अत एव सिद्धानामपि दुर्लभाः । यानिति पाठे यान्मनुजान् । स्वाराज्येत्यत्रापि द्वितीयांतपाठे मनुजानां विशेषणम् । यमिति पाठे यमंबरीषम् । पश्यतामिति पाठे सिद्धानां विशेषणम् ॥ २५ ॥ एवं भगवदाराधनपरस्य कामाद्युपेक्षा नैव चित्रमित्युपसंहरति स इत्थमिति द्वाभ्याम् ॥ २६ ॥ २७ ॥ नन्वेवंभूतोऽसौ कथं प्रतिपक्षान् जयेत्तत्राह । तस्मा इति ॥ २८ ॥ तदेवं तस्य वैराग्यादिकं हरिभक्तिं चोक्त्वा ब्रह्मदंडो यत्र न प्राभूदिति यदुक्तं तदेव द्वादशीव्रतनिष्ठां कथयन्नाह । आरि

हेतुः—शृण्वद्भिरिति । अनेन हरिकथाश्रवणगानात्स्वर्गो नाधिकसुखद इति ध्वनितम् ॥ २४ ॥ विषयेप्सूनामेव स्वर्गाद्याकांक्षितं भवति तेषामतथात्वात्तन्नेत्याह—आस्तामिति । आस्तां तिष्ठतु । स्वरूपसुखेनात्मानंदावाप्त्या । अतिशायिताः उपेक्षणत्वादधिकवृद्धिमिताः उपेक्षितरोगादिवद्वृद्धिं प्राप्ताः । अत एव अधिकवृद्धिमत्त्वादेव । सिद्धानां योगादिसिद्धानाम् । द्वितीयांतपाठे 'स्वाराज्यान्' इति पाठे । स्वे आत्मनि राज्यं सुखं स्वराज्यं तद्विद्यते येषामिति मत्वर्थेऽण् । ते स्वाराज्यास्तान् ज्ञानिन इत्यर्थः । यमिति पाठे 'समर्द्धयन्ति यं कामाः' इति पाठे । 'हृदि पश्यताम्' इति पाठे ॥ २९ ॥ सः अम्बरीषः । स्वधर्मेण प्रजापालनलक्षणेन । राज्ञः प्रजापालनमेव धर्म इत्युक्तेः । संग आसक्तिर्विद्यते येषु ते संगास्तान् स्त्रीपुत्रराज्यादीन् । तेष्वासक्तिं तत्याजेत्यर्थः ॥ २६ ॥ तदेव प्रपंचयति—गृहेष्विति । अक्षय्या अनंता ये रत्नादयस्तेषु । आदिना वस्त्रादिग्रहः । वस्तुपदेन द्विपाद्युपकरणादि ज्ञेयम् । रत्नादयः शारीरका ज्ञेयाः कोशानां पृथग्ग्रहणात् । असन्मतिं ममत्वधियम् ॥ २७ ॥ राज्यस्यातीवासक्तिसाध्यत्वात्तस्य तत्कथमित्याक्षिप्य भगवदनुग्रहादिति समाधत्त इत्याह—नन्विति । एवंभूतो विषयासक्तिरहितोऽसावंबरीषः । प्रतिपक्षान् शत्रून् । तस्मै अंबरीषाय । एकांतभक्तिरनन्यसेवा तया भावः स्नेहस्तेन । भृत्यादीत्यादिना राज्यादिग्रहः ॥ २८ ॥ सांवत्सरं संवत्सरनिर्वर्त्यं लोकानां भगवद्व्रतेषु प्रीत्युत्पादनार्थं संवत्सरनियमरूपेण सदा व्रतकरणश्रद्धावतां सांवत्सरं त्ववश्यं कार्यमिति शिक्षणार्थं तावन्मात्रकमपि दधारेत्यर्थः । न तु तावत्कालमेव हरिभक्तानां विप्रादीनां संध्योपासनादिवदेकादशीव्रतं नित्यमेव तत्त्यागे प्रत्यवायश्रवणात् ।''पापानि निखिलान्यन्नमायांति हरिवासरे । भक्तैस्तत्र न भोक्तव्यं भुक्त्वा भवति नारकी॥''इत्याद्युक्तेः । द्वादशीव्रतं द्वादशीमिलितैकादशीव्रतमित्यर्थः । एतेन दशमीवेधरहितमित्युक्तम् । अन्यथा 'मुहूर्त्तार्द्धावशिष्टायां द्वादश्याम्' इत्युक्तिरसंगता स्यादिति भावः । वेधादिनिर्णयस्त्वाद्यपद्यव्याख्याशतके श्रीदशमे च नंदव्रतोपाख्याने मया बहुशः प्रपञ्चितमित्युपरम्यते । यद्वा—महाभारतानुशासनपर्वोक्तसांवत्सरद्वादशीव्रतं कृतवानिति ज्ञेयम् । वस्तुतस्तु—श्रीमहाभारतानुशासनपर्वनवाधिकशततमाध्यायोक्तद्वादशीव्रतमेव कृत्वा तदन्ते त्रिरात्रोपवासः कृतः । तत्प्रकारश्च मार्गशीर्षेऽहोरात्रमुपोष्य केशवनाम्ना संपूज्याश्वमेधफलं, पौषे नारायणनाम्नार्चनाद्वाजपेयफलं, माघे माधवनाम्ना राजसूयफलं, फाल्गुने गोविंदनाम्नाऽतिरात्रफलं, चैत्रे विष्णुनाम्ना पौण्डरीकफलं, वैशाखे मधुसूदननाम्नाग्निष्टोमफलं, ज्येष्ठे त्रिविक्रमनाम्ना गोमधफलम्, आषाढे वामननाम्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतांते कार्तिके मासि त्रिरात्रं समुपोषितः ॥ स्नातः कदाचित्कालिंद्यां हरिं मधुवनेऽर्चयत् ॥३०॥ महाभिषेकविधिना सर्वोपस्करसंपदा ॥ अभिषिच्यांबराकल्पैर्गंधमाल्यार्हणादिभिः ॥ ३१ ॥ तद्गतांतरभावेन पूजयामास केशवम् ॥ ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥ ३२ ॥ गवां रुक्मविषाणीनां रूप्यांघ्रीणां सुवाससाम् ॥ पयःशीलवयोरूपवत्सोपस्करसंपदाम् ॥३३॥ प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् ॥ भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमम् ॥३४॥ लब्धकामैरनुज्ञातः पारणायोपचक्रमे ॥ तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ॥३५॥ तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः ॥ ययाचेऽभ्यवहाराय पादमूलमुपागतः ॥ ३६ ॥ प्रतिनंद्य स तद्याच्ञां कर्तुमावश्यकं गतः ॥ निममज्ज बृहद्ध्यायन्कालिंदीसलिले शुभे ॥ ३७ ॥ मुहूर्तार्धावशिष्टायां द्वादश्यां पारणं प्रति ॥ चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ॥ ३८ ॥

राधायिषुरित्यादिना यावदध्यायसमाप्ति ॥ २९ ॥ अर्चयत् अडागमाभाव आर्षः ॥ ३० ॥ ३१ ॥ ब्राह्मणांश्च पूजयामास । सिद्धार्थानाप्तकामान्पूजाऽनपेक्षानपि ॥ ३२ ॥ रूप्यांघ्रीणां रूप्यखुराणाम् । पयःशीलादिसंपदो यासां तासाम् ॥ ३३ ॥ न्यर्बुदानि षट् षष्टिकोटीः ॥ ३४ ॥ तर्हि तदैव दुर्वासा अतिथिः साक्षात्प्रत्यक्षोऽभूत् ॥ ३५ ॥ आनर्चार्चितवान् । अभ्यवहाराय भोजनाय ॥ ३६ ॥ आवश्यकं नैयमिकं माध्याह्निकं कर्म कर्तुं गतः । बृहद्ब्रह्म ॥ ३७ ॥ ३८ ॥

नरमेधफलं, श्रावणे श्रीधरनाम्ना पंचयज्ञफलं, भाद्रे हृषीकेशनाम्ना सौत्रामणिफलम् , आश्विने पद्मनाभनाम्ना गोसहस्रदानफलं, कार्तिके दामोदरनाम्ना गवां यज्ञफलमिति ॥ २९ ॥ मार्गमासादरभ्य कार्त्तिके व्रतांते प्राप्ते त्रिरात्रं नवमीत एकादश्यंतम् । यद्वा—तस्य स्वायुःपर्यंतमेकादशीव्रतनिष्ठत्वेऽपि संवत्सरमात्रं तु मथुरायामेव कर्त्तव्यमित्यभिलाष आसीदतस्तत्समाप्तौ सत्यां व्रतांते इति दशमीद्वादश्योर्वीर्हितेतरभोजनाभावेनैकादश्यां निराहारत्वेन च त्रिरात्रमुपोषित इत्युक्तमिति विश्वनाथः ॥ ३० ॥ साम्राज्याभिषेकप्रकारो महाभिषेकविधिस्तेन । यद्वा—महाभिषेको महास्नानं तच्च "स्नाने पलशतं देयमभ्यंगे पञ्चविंशतिः । पलानां द्वे सहस्रे तु महास्नानं प्रकीर्त्तितम् ॥दातव्यं येन सर्वासु दिक्षु निर्याति तद्गुतम् । " इति दधिघृतजलमधुपयसां समुदितानां भिन्नानां वा शक्त्यनुसारेण मानं शर्करां तु यथासंभवं देया "घृतं क्षीरं दधि चैव गवामेव प्रयोजयेत् । यथासंभवमानेन माहिष्यादि विवर्जयेत्॥" इति विष्णुधर्मेषु "पंचकृष्णलका माषस्ते सुवर्णस्तु षोडश । सुवर्णानां च चत्वारः पलमित्यभिधीयते ॥" कृष्णलो गुंजा ॥३१॥ तद्गतांतरभावेन हरिनिष्ठमनस्कत्वेन । "तपोविद्यादयायुक्ता हरिनिष्ठिकचेतसः । प्रतिग्रहनिवृत्ता ये महाभागा द्विजाः स्मृताः॥" इत्युक्तलक्षणान्महाभागान् ॥ ३२ ॥ उपस्कराणि घंटाचामरदोहनपात्रादीनि ॥ ३३ ॥ साधुविप्रेभ्यो देवपितृपूजनहोमपरायणबालकुटुंबानाढ्येभ्यः । तदुक्तं महाभारते "स्वाध्यायाढ्यं शुद्धयोनिं प्रशांतं वैतानस्थं पापभीरुं बहुज्ञम् । गोषु क्षांतं नातितीक्ष्णं शरण्यं वृत्तिग्लानं तादृशं पात्रमाहुः ॥ वृत्तिग्लाने सीदति चातिमात्रं कृष्यर्थे वा हौम्यहेतोः प्रसूतेः । गुर्वर्थं वा बालसंवृद्धये वा धेनुं दद्याद्देशकाले विशिष्टे॥" इति । अग्रे दानात्पूर्वं दक्षिणात्वेन समर्पयामासेत्यर्थः । गुणवत्तमं षड्रससंयुक्तम् । प्राहिणोदित्युक्तेः पूर्वोक्तमहाभागलक्षणवत्त्वेन ते साक्षाद्दानं न गृह्णंतीत्यतस्तद्गृहेषु प्रेषयामास मनसा पात्रमुद्दिश्य संकल्पोदकं क्षिप्त्वेत्यर्थः। तदुक्तम् । "मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत् । भवेच्च सागरस्यान्तं दानस्यांतं न जायते॥"इति स्मृतिकौमुद्यामतो हस्तदानाज्जले दानमनंतफलदमिति भावः । अत एव तीर्थदानमप्येवं कार्यं तदुक्तं तत्रैव "तीर्थे संकल्पितं द्रव्यं यद्यन्यत्र प्रदीयते । दाता तीर्थफलं भुंक्ते प्रतिग्राही न दोषभाक्॥" इति ॥३४॥ लब्धकामैः प्राप्तदक्षिणैर्विप्रैः । पारणाय व्रतांतभोजनाय । "समाप्तौ पारणा प्रोक्ता व्रतांताभ्यवहारके" इति निरुक्तिः । तस्य भोक्तुमुद्यतांबरीषस्य । भगवानतीतानागतादिज्ञः ॥३५॥ तं दुर्वाससम् ॥३६॥ स दुर्वासाः । ब्रह्म अघमर्षणसूक्तम् । निममज्ज सस्नौ ॥ ३७ ॥ धर्मसंकटे धर्मरूपापत्तौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ॥ यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ॥ ३९ ॥ अंभसा केवलेनाथ करिष्ये व्रतपारणम् ॥ प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ॥४०॥ इत्यपः प्राश्य राजर्षिश्चिंतयन्मनसाऽच्युतम् ॥ प्रत्यचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ॥४१॥ दुर्वासा यमुनाकूलात्कृतावश्यक आगतः ॥ राज्ञाऽभिनंदितस्तस्य बुबुधे चेष्टितं धिया ॥ ४२ ॥ मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः ॥ बुभुक्षितश्च सुतरां कृतांजलिमभाषत ॥ ४३ ॥ अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत ॥ धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ॥ ४४ ॥ यो मामतिथिमायातमातिथ्येन निमंत्र्य च ॥ अदत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ॥ ४५ ॥ एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ॥ तया स निर्ममे तस्मै कृत्यां कालानलोपमाम् ॥ ४६ ॥ तामापतंतीं ज्वलतीमसिहस्तां पदा भुवम् ॥ वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृपः ॥ ॥ ४७ ॥ प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ॥ ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ॥ ४८ ॥ तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलम् ॥ दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥ ४९ ॥

धर्मसंकटमेवाह । यद्यतो ब्राह्मणातिक्रमे दोषोऽधर्मः द्वादश्यामपारणेऽपि दोषो व्रतवैगुण्यम् । यत्कृत्वा यस्मिन्कृते ॥३९॥ एवं द्विजैः सह विचार्य निश्चिनोति । अंभसेति । व्रतस्य पारणं समाप्तिम् । तदशितमाहुरशितं नेति चाहुः । श्रुतिश्च । "अपोऽश्नाति तन्नैवाशितं नैवानशितम्" इति ॥ ४० ॥ प्रत्यचष्ट प्रत्यैक्षत ॥ ४१ ॥ ४२ ॥ प्रचलत्कंपमानं गात्रं यस्य । भ्रुकुटीभ्यां कुटिलमाननं यस्य ॥४३॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ क्रुद्धमहिं पावको दावाग्निरिव ॥४८॥ निष्फलमुद्वीक्ष्य॥४९॥

प्राप्तायाम् "एकादशीव्रतं कृत्वा द्वादश्यां यो न पारयेत् । व्रतं सांवत्सरं तस्य व्येति कंदर्पपारणात्॥" इति स्मृतेः । कंदर्पस्त्रयोदशी ॥ ३८ ॥ साधु उभयदोषपरिहारेण श्रेयः । तत् द्विजैश्चिंतयामासेति पूर्वेणान्वयः ॥ ॥३९॥तत् अपामशनम् । अशितं भुक्तम् । अत्र प्रमाणं श्रुतिश्चेति—यः पुमानपो जलमश्नाति तदपामशनम् अनशितमभुक्तमिति श्रुत्यर्थः । यद्वा—विप्रांस्तूष्णीं स्थितानालक्ष्य स्वयमेव निश्चितमाह—अंभसेति । हे विप्राः । आहुर्धर्मशास्त्रज्ञाः ॥ ४० ॥ सः अंबरीषः ॥ ४१ ॥ तस्य अंबरीषस्य । चेष्टितं व्रतपारणलक्षणम् ॥ ४२ ॥ ४३ ॥ नृभिः शंसः स्तुतिर्यस्य तस्य । श्रियाऽपि उन्मत्तस्य मत्तं मदमुत्तीर्णस्य । न भक्तो यस्मात्तस्य । ईशं स्वेष्टदेवं मानयतीति तस्य । यद्वेशैरिंद्रादिभिर्मान्यत इति तस्य । धर्मस्य व्यतिक्रमं विगतोऽतिक्रमो लंघनं व्यतिक्रमस्तं पश्यतेति वास्तवोर्थः ॥ ४४ ॥ तस्य निमंत्र्य भोक्तुस्ते "अभुक्ते भुक्तवत्तोयं भुक्ते तोयमभुक्तवत्" इति स्मृतेः ॥ ४५ ॥ तया जटया ॥ ४६ ॥ तां कृत्याम् । वेपयंतीं कंपयंतीम् । पदान्न चचालेति ब्रह्मतेजसः प्रतिकर्तुमनर्हत्वं सर्वथा सहनार्थत्वं च विभाव्येति भावः ॥ ४७ ॥ दिष्टम् आज्ञप्तम् । पुरुषेण हरिणा । तां जटानिर्मिताम् । चक्रं कर्तृ । कृत्यां ददाह । ननु किं राज्ञा स्वरक्षार्थं निवेदितं सद्ददाह नहिनहि प्रागंबरीषभजनप्रारंभदशायामेव क्वापि स्वापकारिलोकेऽप्यनपकरण स्वभावं तस्यालक्ष्य पुरुषेण भक्तवत्सलेनैव भगवतादिष्टं हे चक्र यदास्य प्राणसंकटमापतेत्तदा त्वं स्वयमेवास्याभिहंतारं जहीत्यादिष्टमिति विश्वनाथः ॥ ४८ ॥ तच्चक्रम् । उद्वीक्ष्येत्युभयत्रान्वेति ॥ ४९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमन्वधावद्गगवद्रथांगं दावाग्निरुद्भूतशिखो यथाऽहिम् ॥ तथानुषक्तं स निरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः ॥ ५० ॥ दिशो नभः क्ष्मां विवरान् समुद्राँल्लोकान् सपालांस्त्रिदिवं गतः सः ॥ यतोयतो धावति तत्रतत्र सुदर्शनं दुष्प्रसहं ददर्श ॥ ५१ ॥ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचित्तोऽरणमेषमाणः ॥ देवं विरिंचं समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो माम् ॥ ५२ ॥ ब्रह्मोवाच ॥ स्थानं मदीयं सहविश्वमेतत्क्रीडावसाने द्विपरार्धसंज्ञे ॥ भ्रूभंगमात्रेण हि संदिधक्षोः कालात्मनो यस्य तिरो भविष्यति ॥ ५३ ॥ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ॥ सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ॥ ५४ ॥ प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः ॥ दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ॥ ५५ ॥ श्रीरुद्र उवाच ॥ वयं न तात प्रभवाम भूम्नि यस्मिन् परेऽन्येऽप्यजजीवकोशाः ॥ भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥ ५६ ॥ अहं सनत्कुमारश्च नारदो भगवानजः ॥ कपिलोऽपांतरतमो देवलो धर्म आसुरिः ॥ ५७ ॥ मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शनाः ॥ विदाम न वयं सर्वे यन्मायां माययावृताः ॥ ५८ ॥ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ॥ तमेव शरणं याहि हरिस्ते शं विधास्यति ॥ ५९ ॥ ततो निराशो दुर्वासाः पदं भगवतो ययौ ॥ वैकुंठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥ ६० ॥

अनुषक्तं पृष्ठतः संसक्तम् । मेरोर्गुहां विविक्षुरधावत् ॥ ५० ॥ ५१ ॥ अरणमेषमाणः शरणमिच्छन् । अजिततेजसो हरेश्चक्रात् ॥ ५२ ॥ एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरो भविष्यति । कदा । क्रीडाया अवसाने तदपि कदा द्विपरार्धसंज्ञे काले ॥ ५३ ॥ अतो वयं सर्वे यस्य नियममाज्ञां प्रपन्नाः प्राप्ताः संतो लोकहितं यथा भवत्येवं तन्नियमं मूर्ध्न्यर्पितं वहामः । अतस्तद्भक्तद्रोहिणं त्वां रक्षितुं न समर्थोऽहमिति शेषः यत्तदोर्नित्यसंबंधात् ॥ ५४ ॥ ५५ ॥ श्रीरुद्रोपि प्रत्याचष्टे वयमिति चतुर्भिः । भूम्नि महति । महत्त्वमेवाह । यस्मिन्परमेश्वरे अजा ब्रह्माणस्त एव जीवास्तेषां कोशा उपाधिभूता ब्रह्माडविग्रहा ईदृशा दृश्यमानब्रह्मांडप्रमाणा अन्येऽपि भवंति जायन्ते नश्यन्ति च । यत्र येषु ब्रह्माण्डेषु लोकेशाभिमानिनो वयं भ्रमामः ॥ ५६ ॥ ननु सर्वज्ञस्य तव भ्रमः कुतस्तत्राह । अहमिति ॥ ५७ ॥ पारदर्शनाः सर्वज्ञा अपि यस्य मायां न विद्मः ॥ ५८ ॥ ५९ ॥ ६० ॥

तं दुर्वाससम् । तथा धावनविधया । मुनिर्दुर्वासाः ॥ ९० ॥ चक्रानुषक्तो मुनिरेतान्देशान्बभ्रामेत्याह—दिश इति ॥ ९१ ॥ स दुर्वासाः ॥ ९२ ॥ यस्य हरेः ॥ ९३ ॥ यतस्त दाज्ञाकारका अतो हेतोः । तद्भक्तेत्यादिशेषकरणे हेतुः—यत्तदोरिति ॥ ९४ ॥ प्रत्याख्यातोऽस्वीकृतः ॥ ९९ ॥ तातेति । प्रियत्वेप्यसामर्थ्यमाह । जीवाः समष्ट्यभिमानित्वाद्धिरण्यगर्भस्य जीवत्वम् ॥ ९६ ॥ अत्राक्षिपति—नन्विति । अपांतरतमो व्यासः ॥ ९७ ॥ ९८ ॥ तमेव चक्रेश्वरमेव ॥ ९९ ॥ ततः कैलासात् । निराश इति । शिवशिव मम ब्रह्मतेजस्वित्वाभिमानो रसातलं गतोऽन्येन ब्रह्मादिना केनाप्यहं न त्रातः मदिष्टदेवः शंभुर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संदह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ॥ आहाच्युतानंत सदीप्सित प्रभो कृतागसं माऽव हि विश्वभावन ॥ ६१ ॥ अजानता ते परमानुभावं कृतं मयाघं भवतः प्रियाणाम् ॥ विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥ ६२ ॥ श्रीभगवानुवाच ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज ॥ साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ६३ ॥ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ॥ श्रियं चात्यंतिकीं ब्रह्मंस्तेषां गतिरहं परा ॥ ६४ ॥

हे सतामीप्सित मा माम् अव पाहि ॥ ६१ ॥ अपराधं निवेदयन्प्रार्थयते । अजानतेति । अघं दुःखम् । अपचितिं निष्कृतिम् । मद्भक्तद्रोहे निष्कृतिं न पश्यामीति चेत्तत्राह । यस्य तव नाम्नि कीर्तिते नरकस्थोऽपि मुच्यते तस्य तव किमशक्यमिति भावः ॥ ६२ ॥ ६३ ॥ न आशासे न स्पृहयामि ॥ ६४ ॥

त्रास्यतीत्याशासीत्सापि व्यर्था जाता संप्रति यस्य भक्तेनैतां दुरवस्थां प्रापितस्तस्यैव विष्णोः सन्निधिर्मम प्राणरक्षार्थं कर्त्तव्यो बभूव धिङ् मे लज्जां प्राणांश्चेति निर्वेदो ध्वनितः ॥ ६० ॥ तस्य विष्णोः । पादमूले चरणाग्रे "मूलं प्रांते जटायां चाधोदेशे भाग्रहेतुषु" इति निरुक्तिः । अवहीत्यार्षत्वाद्धेरलुक् हीति पृथक्पदं वाऽऽवश्यकेर्थे । विश्वभावन सर्वपाल ॥ ६१ ॥ तस्याघस्यापचितिं प्रायश्चित्तम् "भवेदपचितिः पूजा व्ययनिष्कृतिहानिषु" इति मेदिनी । अघापाकरणसामर्थ्यं तवैवेति स्वयमेवाह—मुच्येतेति । नारको नरकीयसमदेहं प्राप्तः श्वपचादिरपि । "चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बंधम्"इत्युक्तेः । नरकस्थानां तन्नामोच्चारणासंभवान्नरकस्थस्यात्र न ग्रहणम् । इति भाव इति । प्रभुत्वात्तव न किंचिदघटितमित्याशयः॥ ६२॥इवेन स्वातंत्र्यमेव स्वस्याह । द्विजेति पश्चाद्द्विजत्वमाह । पर्शुरामस्य शापेन 'पश्चाद्धीर्ब्राह्मणोऽभवत्' इति पुराणांतरोक्तेः । स्वतंत्रस्यास्वातंत्र्ये हेतुः—भक्तैर्ग्रस्तहृदयो वशीकृतचेता इति। यथा मदधीनत्वेनास्वातंत्र्याद्ब्रह्मरुद्रादयस्त्वां त्रातुं नाशक्नुवंस्तथैवाहमपि पराधीनत्वात्त्वां त्रातुं न शक्नोमीत्याह—अहमिति।ननु त्वं स्वयमेव भक्तपराधीनो भवसि न तु भक्तैस्त्वं पराधीनी कर्त्तुमिष्टोऽतस्त्वं स्वतंत्र एवासि।सत्यम् । स्वतंत्रोऽप्यहं स्वेच्छयैव भक्तपरतंत्रो भवामीति स्वस्वभावस्य प्रायो दुस्त्यजत्वादिवशब्दः। एतादृशमद्दुःखदर्शनेपि तव करुणा नोदयत इति चेत्सत्यम् । करुणा खलु यस्य धर्मस्तन्मन एव मम नास्तीत्याह—साधुभिर्मोक्षांतकामनाशून्योत्तमभक्तैर्ग्रस्तमात्मवशीकृतं हृदयं मनो यस्य सः। दित्सितं मोक्षादिकमरोचकत्वात्तेषामयोग्यमालक्ष्य मया स्वहृदयमेव बलाद्दत्तं तैरपि तद्गृहीत्वा स्वहृदयेनैकीकृत्य सादरं स्थापितमिति ध्वनिः । अत एव तेषामनुकंप्य एव ममानुकथ्य इति भक्तकृपानुगामिनी भगवत्कृपेति सर्वलोकप्रसिद्धिस्त्वया ज्ञायत एवेति प्रतिध्वनिः। भक्तानां जना अपि प्रिया यस्य किमुत त इति । हे द्विज विप्रबटो इदमपि किन्न परामृशसीति भाव इति विश्वनाथः ॥ ६३॥ तदेवाह—नाहमिति । नाशासे नेच्छामि । तदप्रिये मम शरीरधारणेन किमपि प्रयोजनं नास्तीति भावः । यदा चात्मानमपि नाशासे तदा श्रियं नाशासे इति किं वक्तव्यमित्याह— श्रियं चेति । येषां भक्तानाम् । परा गतिः परायणम् । ननु भक्तास्ते कियत्प्रीतिविषया इति चेच्छृणु यत्राऽऽरमणादहमात्माराम इति प्रसिद्धस्तमात्मानमपि न कांक्षे मत्स्वरूपभूतानंदादपि सद्भक्तस्वरूपानंदोऽतिस्पृहणीय इति द्वयोरपि चिद्रूपत्वेपि भक्तवर्त्तिन्या भक्तेरनुग्रहाख्यचिद्वृत्तिविपाकरूपायाः सर्वचित्सारभूतत्वान्ममानंदस्वरूपस्याप्यानंदकत्वादाकर्षकत्वाच्च । श्रियं षडैश्वर्यसंपत्तिमात्यंतिकीं नित्यामपि यैर्विना वंध्यामिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम् ॥ हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ ६५ ॥ मयि निर्बद्धहृदयाः साधवः समदर्शनाः ॥ वशे कुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ६६ ॥ मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ॥ नेच्छंति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतम् ॥ ६७ ॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ॥ मदन्यत्ते न जानंति नाहं तेभ्यो मनागपि ॥ ६८ ॥ उपायं कथयिष्यामि तव विप्र शृणुष्व तत् ॥ अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ॥ साधुषु प्रहितं तेजः प्रहर्तुः कुरुतेऽशिवम् ॥ ६९ ॥ तपो विद्या च विप्राणां निःश्रेयसकरे उभे ॥ ते एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥ ७० ॥

इमं परं च लोकं हित्वा ॥६५॥६६॥ प्रतीतं प्राप्तमपि ॥ ६७ ॥ ६८ ॥ आत्मनस्तवैवाभिचारो हिंसा यतोऽभूत्तमेव यातु । अशिवमनर्थम् ॥ ६९ ॥ तपोविद्यासंपन्नस्य

वेद्मीति भावः । येषां भक्तानामहमेव गतिरुपादेय इत्यर्थः ॥६४॥ कीदृशास्ते भक्ता इति चेत्तानाह—य इति । इमं लोकं परं च स्वर्गादिकम् । यद्वा—ब्रह्मण्यदेव मां नोपेक्षस्वेति चेत्सत्यं तर्हि किं भक्तानुपेक्षे भक्तापकारकस्य तव रक्षणेन स्वत एव ते त्यक्तास्स्युस्तत्तु नोपपद्यत इत्याह—य इति । भक्ताः खलु मदर्थं दुस्त्यजदाराद्यासक्तिमत्यजन् ब्राह्मणस्त्वं किं मदर्थमत्यजस्तद्ब्रूहीति भावः । न चांबरीषेण न किमपि त्यक्तमिति वाच्यं यदा त्वयांबरीषवधार्थं कृत्या विनियुक्ता तदा तेन स्वदेहरक्षार्थं पदमात्रमपि नाभिद्रुतं त्वया त्वात्मारामेण महाविरक्तेन स्वदेहरक्षार्थं जगदेव परिक्राम्यता ब्रह्मादयोऽपि प्रार्थिताः एतेनैव स्वस्य तस्य च मूल्यं जानीहि किमधिकं त्वमबुधो बोधयितव्य इति ॥ ६५ ॥ युष्माभिर्ब्रह्मवादिभिरप्यहं दुर्वशस्तैर्वशीकृत एवाहमस्मीत्याह—मयीति । मय्येव हृदयस्य निर्बद्धत्वात्साधवो निष्कामाः स्वस्य परेषां च दुःखादिकं समं पश्यंतः ॥ ६६ ॥ तेषां निष्कामत्वस्य परमकाष्ठामाह—मत्सेवयेति । यद्वा—अत्यागे कारणं तु नैरपेक्ष्यमेवेत्याह—मदिति । प्रतीतं स्वतः प्राप्तमपि । कुतोऽन्यदिति सालोक्यादीनां कालेनाविद्रुतत्वं दर्शयति । कालविद्रुतं पारमेष्ठ्यादि ॥ ६७ ॥ किं च मां संतापयते तुभ्यं समुचितं फलं दित्सन्नपि यन्न ददामि एतामेव मे परां ब्रह्मण्यतामेवेहीत्याह—साधव इति । मह्यं ममांबरीषं ज्वलयितुमिच्छंस्त्वं मद्धृदयमेव ज्वालयितुं प्रवृत्तोऽभूरित्यर्थः । तर्हि त्वदपराध एवायं चेत्तर्हि त्वच्चरणे पतामि प्रसीदेत्यत आह—साधूनां हृदयं त्वहं साधुहृदयप्रसादे सत्येव मत्प्रसाद इत्यतो याहि तमंबरीषमेव प्रसादयेति भावः । नन्वंबरीषो मां निमंत्र्याभोजयित्वा स्वयं भुक्तवांस्तद्दोषं कुतो न पश्यसि तत्राह—मदन्यत्ते न जानंतीति । मच्चिकीर्षितमेवांबरीषेण कृतमिति भावः । तर्हि त्वामेवाहं पृच्छामि ब्रूहि ब्राह्मणद्वादश्योर्मध्ये कस्यादरो धर्म इति चेद्याहि तमंबरीषमेव पृच्छ स एव त्वां धर्मशास्त्रानभिज्ञं बोधयिष्यति मात्र लज्जां कामपि कार्षीस्तादृशो नाहमपि विज्ञ इत्याह—नाहं तेभ्यो मनागप्यधिकं जानामीत्यर्थः । तेन श्रुतौ पानीयस्याशितत्वानशितत्वयोस्तुल्यत्वदर्शनाद्द्वादशीब्राह्मणयोस्तुल्य एवादरः कृतो भद्भक्तेनांबरीषेण त्वं त्वनभिज्ञस्तन्न जानासीति ध्वनिः । दुर्वासास्तु फलदर्शनेन द्वादश्या एव भक्तित्वात्सर्वधर्माधिक्यं निर्द्धारयन्नंबरीषं किमपि नो पृष्टवानित्यनुध्वनिः । हृदयं प्रियाः ' वेदाः प्रमाणम् ' इतिवत्संबंधः । मदन्यत् प्रियमिति शेषः । 'स्वांते हृद्ये प्रिये बुक्के हृदयं हार्दवक्षसोः'' इति धरणिः । मनाक् ईषदर्थे॥ ६८॥किं च तन्निस्तारोपायं स्पष्टमेव ब्रवीति—अयमिति । यद्वधार्थं त्वयाभिचारः कृतः स एव त्वां त्रास्यते नान्य इति भावः । यतो नृपाद्धेतोः।तमेव नृपम् । यद्वा ते तव । आत्मनकृतोऽभिचारः कृत्या । यतो यस्मै तमिति संबंधः । ननु तस्मै कृतो मह्यं कथमाप्त इति चेदाह—साधुष्विति । यद्वा न चांबरीषं त्वं दुःखदं मन्येथा इत्याह—साधुष्विति । प्रहितं प्रयुक्तम् । क्षुद्रोपद्रवलक्षणं तेजः प्रभावा 'तेजो बले प्रभावे च' इति ॥६९॥ ननु तपोविद्यासंपन्नस्य मम कुतः क्षत्रियात्त्राणं युज्यत इति चेदपात्रस्य तव तपोविद्ये नैव स्तः प्रत्युत ते विपरीते एवेत्याह—तप इति । यद्वा—ममैतदयुक्तमित्याक्षिपति—तपोविद्येति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मंस्तद्गच्छ भद्रं ते नाभागतनयं नृपम् ॥ क्षमापय महाभागं ततः शांतिर्भविष्यति ॥ ७१ ॥ इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्र्यां संहितायां नवमस्कंधे अंबरीषचरिते चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ एवं भगवतादिष्टो दुर्वासाश्चक्रतापितः ॥ अंबरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥ १ ॥ तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः ॥ अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥ २ ॥ अंबरीष उवाच ॥ त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः ॥ त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च ॥ ३ ॥ सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय ॥ सर्वास्त्रघातिन् विप्राय स्वस्ति भूया इडस्पते ॥ ४ ॥ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् ॥ त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥ ५ ॥ नमः सुनाभाखिल धर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे ॥ त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ॥ ६ ॥

मम कथमनर्थः समजनीति मा स्म विस्मयं कार्षीरित्याह । तप इति ॥ ७० ॥ ७१ ॥ इति नवमस्कंधे टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे विष्णुचक्रं तु प्रसाद्य प्राणसंकटात् ॥ दुर्वासा रक्षितस्तेन तथा तद्वृत्तमीर्यते ॥ १ ॥ १ ॥ स उद्यमनमिति छेदः । सुलोपः पादपूरणार्थः ॥ २ ॥ ज्योतिषां नक्षत्राणां पतिः सोमस्त्वम् । मात्राणींद्रियाणि च । त्वच्छक्त्यैवाग्न्यादयः स्वंस्वं कार्यं कुर्वंतीत्यर्थः ॥ ३ ॥ सहस्रमरा यस्य हे सहस्रार । स्वस्ति शरणं भूयाः । इडस्पते पृथ्वीपते ॥ ४ ॥ ब्राह्मणरक्षणं तव युक्तमेवेत्याह । त्वं धर्म इति । न च तवेयमतिस्तुतिरित्याह । पौरुषं पुरुषस्येश्वरस्य परं तेजः सामर्थ्यं त्वम् । अयं भावः । "स ऐक्षत" इत्यादिश्रुतिप्रसिद्धं भगवतः शोभनं दर्शनं सुदर्शनं तत एव सर्वं जातमतस्त्वमेव सर्वात्मेति ॥ ५ ॥ हे सुनाभ अद्भुतकर्माणं त्वां कः स्तोतुं समर्थोऽतस्तुभ्यं केवलं नमो गृण इत्यन्वयः । अद्भुतकर्मत्वमेवाह । अखिलानां धर्माणां सेतवे मर्यादारूपाय । अत एवाधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपायतीति तथा । विशुद्धमत्युज्ज्वलं

ते एव तपोविद्ये एव । दुर्विनीतस्य विनयशून्यस्य । कर्त्तुः पुंसः । अन्यथाऽनर्थकरे । कल्पेते भवतः ॥७०॥ ब्रह्मन्निति । ब्राह्मणत्वात्तवेदं ब्रवीमीत्याह । यतोऽहं भक्ताधीनत्वान्न किंचित्कर्त्तुं समर्थस्तत्तस्मात् । नृपमंबरीषम् । ततो नृपादेव । शांतिः कल्याणम् । 'शान्तिः कल्याणनाशयोः' इति निरुक्तिः ॥ ७१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे चतुर्थोऽध्यायः ॥४॥ तेन अंबरीषेण । तद्वृत्तमंबरीषधर्मस्थितिरूपम् (१) । तत्पादावंबरीषांघ्री ॥ १ ॥ तस्य दुर्वाससः । सः अंबरीषः । उद्यमनं स्तवनायुद्यमम् । तत् सुदर्शनम् ॥२॥ इत्यर्थ इति । "यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति भावः ॥३॥ अराणि नेमिनाभ्यंतरालगतानि चक्रांगानि " अरं शीघ्रे च चक्रांगे शीघ्रगे पुनरन्यवत् " इति मेदिनी । इडस्पत इति व्याख्यातचरम् ॥ ४ ॥ परतेजस्त्वाभिप्रायमाह–अयं भाव इति । दर्शनं विमर्शरूपम् । तत एव भगवदीक्षणलक्षणसुदर्शनादेव । सर्वं जातम् "स इमाँल्लोकानसृजत" इति श्रुतेः । यतस्सुदर्शनाच्छोभनेक्षणात्सर्वोत्पत्तिः अतो हेतोः ॥ ५ ॥ सुष्ठु नाभिरराक्षाधिकरणस्थानं यस्य तत्तथा । "अच् प्रत्यन्वव–" इत्यत्राजितियोगविभागात् समासांतोच् । ननु भक्तिधर्मपालकाय तुभ्यं दुह्यंतमेनं विप्रमवश्यं तापयामि तत्राह–अधर्मशीलेति । धर्मशीला असुरा अधर्मशीला विप्रा अपि त्वया रक्षणीया इति भावः । अतः स्तुत्यसमर्थत्वात् । अत एव सर्वधर्माधारत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनाम् ॥ दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत्सदसत्परावरम् ॥ ७ ॥ यदा विसृष्टस्त्व मनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवम् ॥ बाहूदरोर्वंघ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने विराजसे ॥ ८ ॥ स त्वं जगत्त्राणखलप्रहाणये निरूपितः सर्वसहो गदाभृता ॥ विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥ ९ ॥ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ॥ कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः ॥ १० ॥ यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः ॥ सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥ ११ ॥ श्रीशुक उवाच ॥ इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् ॥ अशाम्यत् सर्वतो विप्रं प्रदहद्राजयाच्ञया ॥ १२ ॥ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ॥ प्रशशंस तमुर्वीशं युंजानः परमाशिषः ॥ १३ ॥

वर्चस्तेजो यस्य तस्मै ॥ ६ ॥ तदेव प्रपंचयति त्वत्तेजसेति द्वाभ्याम् । सूर्यादीनां प्रकाशश्च त्वयैव रूप्यते प्रकाश्यत इति त्वद्रूपम् ॥ ७ ॥ हे अजितानंजनेन श्रीहरिणा यदा विसृष्टस्त्वं तदा दैत्यदानवानां बलं प्रविष्टः संस्तेषां बाह्वादीन्भिदन्विराजसे । पाठांतरे ऊर्जिता दैत्यदानवा यस्मिंस्तद्बलम् । पूर्वपदेन संधिरार्षः ॥ ८ ॥ किं च । त्वया भगवन्नियुक्तेन खलानामेव दंडः कार्यः साधवस्तु रक्षणीया अतो विप्रस्य रक्षणेनास्माननुगृहाणेत्याह । स त्वमिति । हे जगत्त्राण स एवंभूतस्त्वं खलानामेव प्रहारार्थं निरूपितो नियुक्तः अतोऽस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि तदेव नोऽनुग्रहः ॥ ९ ॥ सर्वसुकृतार्पणेन विप्ररक्षां प्रार्थयते यद्यस्तीति द्वाभ्याम् । विप्रो दैवं देवता यस्मिंस्तत् ॥ १० ॥ ११ ॥ राज्ञस्तस्यैव यच्ञया ॥ १२ ॥ १३ ॥

देव ॥ ६ ॥ गिरां वेदलक्षणानां पतेऽवैदिकसंहर्तृत्वेन पालक । तमोऽधर्मलक्षणम् । प्रकाशो धर्मप्रवर्तनम् । महति वेद आत्मा बुद्धिर्येषां तेषां शिष्टानामित्यर्थः । नन्वस्य तेजस्विमानिनो विप्रस्य चिकित्सावश्यं कर्त्तव्यैव तत्राह–त्वद्रूपमिति । त्वं साक्षात्परमेश्वरोसि तत एवान्यत्र स्वतेजो न दर्शनीयं सर्वस्य त्वद्रूपत्वादिति भावः ॥ ७ ॥ ननु तदप्यनेन सह विहर्त्तुकामोऽस्मीति चेन्मैवं तत्रासुरसंग्राम एव विहाररंगभूमिरित्याह–यदेति । अंजनमुपाधिस्तद्रहितेन । पाठांतरे 'ऊर्जितदैत्यदानवम्' इति पाठे । पूर्वपदेन प्रविष्ट इति पदेन । प्रधने संग्रामे ॥ ८ ॥ धर्ममयतजस्त्वमाह–किञ्चेति । जगतां त्राणो येन यस्माद्वा स तथा । एवं भूतः साधुरक्षणा साध्वरक्षणप्रभावः । अतः खलहंतृत्वादेव । 'दैवं दिष्टं भागधेयं भाग्यं स्त्री' इत्यमरः । मन्निमित्तं ब्रह्महत्ययास्मत्कुलमेव नश्यतीति भावः । तदेव ब्राह्मणरक्षणमेव । सर्वसहत्वाद्विप्रापराधस्त्ववश्यं सहनीय एव त्वयेत्यर्थः । नन्वहं त्वद्विद्वेषिसंहाराय भगवता नियुक्तस्तत्राह–हे जगत्त्राण खलानां संहाराय सर्वसहः सर्वबलस्वरूपः । यद्वा–वात्सल्यात्सर्वमप्यस्माकमपराधं सहसे इति सर्वसहः । अस्य विप्रस्यापराधः क्षम्यतामिति । न चास्य मद्द्वेषित्वमित्याह–अस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहीति विश्वनाथः ॥ ९ ॥ ब्रह्मण्यदेवानुयायित्वेन स्वकुलस्यापि ब्रह्मण्यदेवत्वमाह–चेदस्ति तर्हि विज्वरो निरुपद्रवः ॥ १० ॥ सर्वभूतेष्वात्मभावेन भगवद्दृष्ट्या यदि नो भगवान्हरिः ॥ ११ ॥ राज्ञोंबरीषस्य । याच्ञया प्रार्थनया । प्रदहद्भस्मीकुर्वत् ॥ १२ ॥ योऽतीव दुःसहक्रोधः स दुर्वासाः । ततः अस्त्रतापनिवृत्त्यनंतरम् । तम् अम्बरीषम् । उर्वीशं धरापतिम् । परं स्वस्मादुत्कृष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्वासा उवाच ॥ अहो अनंतदासानां महत्त्वं दृष्टमद्य मे ॥ कृतागसोऽपि यद्राजन्मंगलानि समीहसे ॥ १४ ॥ दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम् ॥ यैः संगृहीतो भगवान् सात्वतामृषभो हरिः ॥ १५ ॥ यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः ॥ तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ १६ ॥ राजन्ननुगृहीतोऽहं त्वयाऽतिकरुणात्मना ॥ मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः ॥ १७ ॥ राजा तमकृताहारः प्रत्यागमनकांक्षया ॥ चरणावुपसंगृह्य प्रसाद्य समभोजयत् ॥ १८ ॥ सोऽशित्वाऽऽदृतमानीतमातिथ्यं सार्वकामिकम् ॥ तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥ १९ ॥ प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै ॥ दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा ॥ २० ॥ कर्मावदातमेतत्ते गायंति स्वःस्त्रियो मुहुः ॥ कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियम् ॥ २१ ॥ श्रीशुक उवाच ॥ एवं संकीर्त्य राजानं दुर्वासाः परितोषितः ॥ ययौ विहायसाऽऽमंत्र्य ब्रह्मलोकमहैतुकम् ॥ २२ ॥ संवत्सरोऽत्यगात्तावद्यावता नागतो गतः ॥ मुनिस्तद्दर्शनाकांक्षो राजाऽब्भक्षो बभूव ह ॥ २३ ॥ गते च दुर्वाससि सोंबरीषो द्विजोपयोगातिपवित्रमाहरत् ॥ ऋषेर्विमोक्षं व्यसनं च बुद्धा मेने स्ववीर्यं च परानुभावम् ॥ २४ ॥

॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ राजेत्यादिश्लोकद्वयं शुकोक्तिः ॥ १८ ॥ १९ ॥ प्रीतोऽस्मीति श्लोकद्वयं पुनश्च विप्रोक्तिः । आत्मनि मेधा येन तेनातिथ्येन ॥ २० ॥ भूरियं तत्रस्थो जनः कीर्तयिष्यति ॥ २१ ॥ २२ ॥ तस्य धैर्यातिशयमाह । गतो मुनिर्यावता नागतस्तावत्संवत्सरोऽतिक्रांत इति ॥ २३ ॥ द्विजस्योपयोगेन भोजनेनातिपवित्रमाहरद्बुभुजे । स्ववीर्यं च धैर्यादिलक्षणं परानुभावं भगवतः प्रभावं मेने ॥ २४ ॥

प्रभावम् । यद्वा—परमा ऐहिकामुष्मिकहिताः । आशिषः शुभवाचः । युंजानो वदन् ॥ १३ ॥ स्वानुभूतं हरिभक्तोत्कर्षमाह—अहो इति । महत्त्वं महिमा । कृतापराधस्यापि यतो मम मंगलानि प्राणरक्षणादीनि । संमीहसे कुरुषे ॥ १४ ॥ कोऽनुग्रहः दुष्करो न कोपीति । कोऽपराधो दुस्त्यज इति । साधुमहात्मशब्दौ परोपकृतिदयालुतावस्त्वरूपप्रवृत्तिनिमित्तभेदादेकार्थावपि पृथक्पतितौ । यैः साधुभिः । संगृहीत इति । यथान्यैर्धनादिस्संगृह्यते तथेत्यर्थः । हरिः संगृहीतोपि तदीयचेतश्चोरयतीत्यर्थः ॥ १५ ॥ हरिभक्तानां नैतदाश्चर्यमित्याह—यन्नामेति ॥ १६ ॥ १७ ॥ तं दुर्वाससं प्रसाद्य ॥ १८ ॥ स दुर्वासाः । अशित्वा भुक्त्वा । आदृतं यथा स्यात्तथा नीतमतिथ्यर्थमन्नादिकमातिथ्यमतिथिप्रियं, सर्वे कामाः काम्यमाना रसा यस्मिंस्तत्सार्वकामिकम् ॥ १९ ॥ मेधा बुद्धिः । पूर्वं त्वद्दर्शनादिभिः कर्तृभिरहं नानुगृहीतः प्रीतश्चाभवं यतो रुषांधः कृत्यां ससृजे इदानीं त्वनुगृहीतः । तत्र हेतुः—भक्तकर्माणि तद्विषयकभक्त्युत्थानि यदि दर्शनादीनि स्युस्तदैव ज्ञानितपस्विविप्राननुगृह्णंति नान्यथा इत्यत्राहमेव दृष्टांत इत्यसूचि । आत्ममेधसा आत्मनो मम मेधसा ईदृग्बुद्ध्या । यद्यहमंबरीषवचनमग्रहीष्यं तदा कथमित्थमभविष्यं तेन चक्रतापोपि मम परोपकारकः संसारतारको भक्तिपथज्ञापकोऽभूदिति भावः ॥ २० ॥ एतत् सुदर्शनान्मन्मोक्षणरूपम् । तत्रस्थो भूमिष्ठः 'तात्स्थ्यात्ताच्छद्व्यम्' इति न्यायात् । यावद्भूः स्थास्यति तावदेतत्ते कर्मापीति भावः ॥ २१ ॥ अहैतुकं कर्मालभ्यम् ॥ २२ ॥ अब्भक्षः पारणकालिकजलमात्रमेव भक्षो भोजनं यस्य स तथा ॥ २३ ॥ २४ ॥

॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ॥ क्रियाकलापैः समुवाह भक्तिं ययाऽऽविरिंचान्निरयांश्चकार ॥ २५ ॥ अथांबरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ॥ वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः ॥ २६ ॥ इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपतेः ॥ संकीर्तयन्ननुध्यायन् भक्तो भगवतो भवेत् ॥ २७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे अंबरीषचरिते पंचमोऽध्यायः ॥ ५ ॥ श्रीशुक उवाच ॥ विरूपः केतुमाञ्शंभुरंबरीषसुतास्त्रयः ॥ विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः ॥ १ ॥ रथीतरस्याप्रजस्य भार्यायां तंतवेऽर्थितः ॥ अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥ २ ॥ एते क्षेत्रे प्रसूता वै पुनस्त्वांगिरसाः स्मृताः ॥ रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ ॥ क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ॥ तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ॥ ४ ॥ तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ॥ पंचविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥ ५ ॥

एवंविधा अनेके गुणा यस्य सः । आविरिंचान्विरिंचपदसहितान्भोगान्निरयप्रायानपश्यदित्यर्थः ॥ २५ २६ ॥ २७ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां पंचमोध्यायः ॥ ५ ॥ षष्ठारंभेंबरीषस्य वंशमुक्त्वा ततः परम् ॥ षष्ठाद्यष्टभिरध्यायैरिक्ष्वाकोर्वंश उच्यते ॥ १ ॥ तत्र षष्ठे शशादादिर्मांधात्रंतो निरूप्यते ॥ प्रसंगात्सौभरेराख्या मांधातृतनयापतेः ॥ २ ॥ १ ॥ तंतवे संतानार्थम् ॥ २ ॥ ये अंगिरसा जनिता एते रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः संतोंगिरसो वीर्येण प्रसूतत्वादांगिरसाश्च । पुनरपि रथीतराणामन्येषां जातानां प्रवरा मुख्याः स्मृताः । यतः क्षत्रोपेता ब्राह्मणा इत्यर्थः ॥ ३ ॥ तदेवं मनोर्दशसु पुत्रेषु पृषध्रश्च कविश्च विरंक्त्वान्न वंशप्रवर्तकौ करूषादीनां च सप्तानां वंशास्तारतम्यक्रमेणोक्ताः इदानीमतिविततमिक्ष्वाकोर्वंशमाह । क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावः । क्षुतं कुर्वतो मनोर्घ्राणतो जज्ञे । श्रद्धायां जनयामास दश पुत्रानिति पूर्वोक्तं बाहुल्याभिप्रायेणेति द्रष्टव्यम् । पुत्राणां शते ज्येष्ठाः ॥ ४ ॥ "आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः" तस्मिन्पुर

एवंविधा दुर्वासोमोक्षणसदृशाः । इत्यर्थ इति । भक्तिरसानंदमग्नस्य पुनरावृत्तिमत्सु ब्रह्मलोकपर्यंतलोकभोगेषु । निरयवन्नेच्छाप्युदयत इति भावः ॥ २५ ॥ अथ लोकेषु निरयदृष्ट्या वैराग्योत्पत्त्यनंतरम् । गुणप्रवाहस्संसारः ॥ २६ ॥ आख्यानफलमाह—इतीति ॥ २७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे पंचमोऽध्यायः ॥ ५ ॥ ॥ ततोंबरीषवंशोक्तेः (१) । तत्र अष्टसु मध्ये । आख्या कथा (२) । तत्पुत्रः पृषदश्वसुतः ॥ १ ॥ २ ॥ इत्यर्थ इति । क्षत्रधर्मयुता ब्राह्मणा एव रथीतरगोत्रप्रवरा बभूवुर्न तु क्षत्त्रिया इति । यद्वा—द्वे जाती येषां ते इत्यन्वर्थसंज्ञा बभूवुः ॥ ३ ॥ क्षुतं छिक्काम् 'क्षुवं क्षुते राजिकायाम्' इति मेदिनी । घ्राणतो घ्राणाधिकरणनासिकातः । पूर्वं श्रद्धायां तदुत्पत्तिकथनं तु तस्यां बहुपुत्रोत्पत्तिकथनप्रसंगात्केवलपितृजस्यापि मातृसहोदरत्वाभावेप्येकपितृजत्वेन सहोदरत्वोपचाराद्दशसु निवेशात् । भारते तु मनोः प्रसंधिः प्रसंधेः क्षुपस्तस्मादिक्ष्वाकुरित्युक्तम् तच्चेत्थमनुसंधेयम्—मनोः घ्रं भगमर्णाति प्राप्नोत्यनेनेति घ्राणः पुत्रस्तस्मात् प्रसंधेर्जातात् क्षुवतः क्षुवनामक पुत्रादिक्ष्वाकुर्जात इति "घ्रो घोषो मदनश्चूतो भगो ज्ञो यामिनीपतिः" इति सौभरिः । क्षुवक्षुपनाम्नि वर्णभेद उच्चारणकृत एव कल्पांतराभिप्रायेण यथाश्रुत एव वास्त्विति ॥ ४ ॥ "आ समुद्रात्पुरस्तात्तु आ समुद्रात्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एकदाऽष्टकाश्राद्ध इक्ष्वाकुः सुतमादिशत् ॥ मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरम् ॥ ६ ॥ तथेति स वनं गत्वा मृगान्हत्वा क्रियार्हणान् ॥ श्रांतो बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥ ७ ॥ शेषं निवेदयामास पित्रे तेन च तद्गुरुः ॥ चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥ ८ ॥ ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाऽभिहितं नृपः ॥ देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ॥ ९ ॥ स तु विप्रेण संवादं जापकेन समाचरन् ॥ त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् ॥ १० ॥ पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ॥ शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥ ११ ॥ पुरंजयस्तस्य सुत इंद्रवाह इतीरितः ॥ ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥ १२ ॥ कृतांत आसीत्समरो देवानां सह दानवैः ॥ पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥ १३ ॥ वचनादेवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ॥ वाहनत्वे वृतस्तस्य बभूवेंद्रो महावृषः ॥ १४ ॥

स्तात्समुद्रपर्यंतं मंडलविभागेन पंचविंशतिर्नृपा अभवन् । हे नृप तथैव पश्चाच्च पंचविंशतिः । मध्ये तु ज्येष्ठास्त्रयः । अपरे त्वन्यतो दक्षिणोत्तरादिषु ॥ ५ ॥ विकुक्षिरेव शशाद इति विश्रुत इति वक्ष्यति तत्र हेतुमाह । एकदेति चतुर्भिः ॥ ६ ॥ क्रियार्हणान् श्राद्धार्हान् । आददभक्षयत् ॥ ७ ॥ तद्गुरुर्वसिष्ठः । प्रोक्षणाय श्राद्धोचितसंस्काराय ॥ ८ ॥ त्यक्तो विधिः सदाचारो येन तम् ॥ ९ ॥ स त्विक्ष्वाकुः जापकेन वशिष्ठेन । राज्यभोगेन विरक्तो योगी संस्तेन योगेन कलेवरं त्यक्त्वा स यत्परं तत्त्वं तदवाप ॥ १० ॥ शासत्पालयन्हरिमीजे ॥ ११ ॥ दैत्यपुरस्य जयात्पुरंजयः इंद्रो वाहो यस्येतींद्रवाहः ककुदि स्थितत्वात्ककुत्स्थ इति च शशादसुतस्य त्रीणि नामानि तत्तत्कर्मनिमित्तानि ॥ १२ ॥ तान्येव व्याचक्षाण आह कृतांत इहि सप्तभिः । कृतं विश्वमंतयतीति तथा । पार्ष्णिग्राहः सहायः ॥ १३ ॥ इंद्रो यदि मम वाहनं

पश्चिमात् । तयोरेवांतरं गिर्योरार्यावर्त्तं प्रचक्षते ॥'' इति केचित् । मध्ये मध्यदेशे । अपरे सप्तचत्वारिंशन्नृपाः ॥ ५ ॥ यस्य घ्राणतो जन्म स इति । तत्र शशादत्वे मेध्यं श्राद्धार्हम् ॥ ६ ॥ पितृवचस्तथेति गृहीत्वा । अदने हेतुः—अपस्मृतिस्तत्रापि श्रांतस्तत्रापि बुभुक्षित इति ॥ ७ ॥ तेन पित्रा । तत्तस्येति वा स चासौ गुरुः प्रसिद्धगुरुः तद्गुरुः । अकर्मकं कर्मानर्हम् ॥ ८ ॥ तत्कर्म मांसोच्छिष्टकरणरूपं कर्म ॥ ९ ॥ स योगी अभूदिति शेषः । तेन स इत्यस्य पौनरुक्त्यं न वाक्यभेदात् ॥ १० ॥ शासदिति । जक्षादित्वाच्छतरि नुमभावः ॥ ११ ॥ तस्य शशादस्य । ककुदि वृषस्कंधोच्चदेशे ''वृषांगे राजचिह्ने च ककुच्च ककुदो वरे'' इति निरुक्तिः ॥ १२ ॥ तान्येव नामान्येव । व्याचक्षाणो व्याख्यातुकामः । यद्वा—कृतस्य युगस्यांते त्रेतादौ । सप्तम्यंतपाठांगीकारे एवायमर्थः ॥ १३ ॥ तव वाहनत्वम् । तस्य शशादात्मजस्य । इत्यर्थ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स संनद्धो धनुर्दिव्यमादाय विशिखाञ्छितान् ॥ स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥ १५ ॥ तेजसाऽऽप्यायितो विष्णोः पुरुषस्य परा
त्मनः ॥ प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरम् ॥ १६ ॥ तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणम् ॥ यमाय भल्लैरनयद्दैत्यान् येऽभियु
मृधे ॥ १७ ॥ तस्येषुपाताभिमुखं युगांताग्निमिवोल्बणम् ॥ विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ॥ १८ ॥ जित्वा पुरं धनं सर्वं सश्रीकं
वज्रपाणये ॥ प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः ॥ १९ ॥ पुरंजयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ॥ विश्वरंधिस्ततश्चंद्रो युवनाश्वश्च
तत्सुतः ॥ २० ॥ शाबस्तस्तत्सुतो येन शाबस्ती निर्ममे पुरी ॥ बृहदश्वस्तु शाबस्तिस्ततः कुवलयाश्वकः ॥ २१ ॥ यः प्रियार्थमुतंकस्य धुंधुना
माऽसुरं बली ॥ सुतानामेकविंशत्या सहस्रैरहनद्वृतः ॥ २२ ॥ धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः ॥ धुंधोर्मुखाग्निना सर्वे त्रय एवावशे
षिताः ॥ २३ ॥ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ॥ दृढाश्वपुत्रो हर्यश्वो निकुंभस्तत्सुतः स्मृतः ॥ २४ ॥ बर्हणाश्वो निकुंभस्य
कृशाश्वोऽथास्य सेनजित् ॥ युवनाश्वोऽभवत्तस्य सोऽनपत्यो वनं गतः ॥ २५ ॥ भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः ॥ इष्टिं स्म वर्तयां
चक्रुरैंद्रीं ते सुसमाहिताः ॥ २६ ॥ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ॥ दृष्ट्वा शयानान् विप्रांस्तान् पपौ मंत्रजलं स्वयम् ॥ २७ ॥

स्यात्तर्हि दैत्यान्हनिष्यामीति तेन वाहनत्वेन वृतः सन्निंद्रो लज्जया तदनंगीकुर्वन्विष्णोर्वचनात्तस्य वाहनत्वाय महान्वृषो बभूवेत्यर्थः ॥ १४ ॥ १५ ॥ १६ ॥
येऽभिमुखं ययुस्तान् यमं दर्शयितुं सदेहानेव भल्लैरनयदित्यर्थः ॥ १७ ॥ तच्च दृष्ट्वाऽन्ये दुद्रुवुः । स्वमालयं पातालम् ॥ १८ ॥ इति एतैः कर्मभिः पुरंजयादिनामभिः
आहूतो व्याहृतः । पाठांतरे आहूत इत्यर्थः ॥ १९ ॥ २० ॥ शावस्तिः शावस्तस्य पुत्रः कुवलयाश्वक एव धुंधुमार इति ख्यातः ॥२१॥ तत्र कारणमाह । य इति ।
सुतानामेकविंशत्या सहस्रैर्वृतः सन्हतवान् ॥२२॥ धुंधुमार इति चेति चकारस्यान्वयः ॥२३॥२४॥ अथ तस्मान्निकुंभात्कृशाश्वः ॥ २५ ॥ भार्याणां शतेन सह अस्य
पुत्रार्थमिंद्रदैवत्यामिष्टिं वर्तयामासुः । स्मेत्याश्चर्ये ॥२६॥ तदेवाह राजेति षड्भिः । तर्षितस्तृषितः सन् जलार्थं प्रविष्टो मंत्राभिमंत्रितं जलं पत्न्यै देयं स्वयं पपौ ॥ २७ ॥

स्वकार्यार्थमकृत्यमपि स्वीचकारेति भावः । "अवमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः । स्वकार्यं साधयेद्धीमान्कार्यध्वंसेन मूर्खता ॥" इति राजशास्त्रोक्तेः ॥ १४ ॥ स शाशादिः । विशिखान्बाणान् । स्तूयमानः
देवैस्तदनुगैश्च ॥१५॥ आप्यायितः वर्द्धितः । न्यरुणत् रुरोध ॥ १६ ॥ तैर्दैत्यैः । तस्य शाशादेः । तुमुलं भयंकरम् । इत्यर्थ इति । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥ २ ॥ ३ ॥ १४ ॥" इति चतुर्थी ।
तद्बाणपातभीत्या पलायंतो यमपुरं जीवंत एव ययुरिति भावः ॥१७॥ तच्चेष्वभिमुखागतानां यमपुरगमनं च । तस्य शाशादेः । इषुपाताभिमुखं बाणपातसांमुख्यं विसृज्य ॥ १८ ॥ एतैः पुरजयादिकर्मभिः । पाठांतरे
'आहुतः' इति पाठे । इत्यर्थ इति ह्रस्वत्वमार्षमिति भावः ॥ १९ ॥ तत्सुतोऽनेनसः पुत्रः । ततः पृथोः । तत इत्युभयत्रान्वेति । ततो विश्वरंधेश्चंद्रः । तत्सुतश्चंद्रसुतः ॥ २० ॥ तत्सुतो युवनाश्वपुत्रः । ततो बृहद
श्वात् ॥ २१ ॥ यः कुवलयाश्वकः । धुंधुमार इति च ख्यातः । द्वितीयेनान्वयः । उत्तंकस्य मुनेः ॥ २२ ॥ तत्सुतास्ते एकविंशतिसहस्रसंख्याकाः । समुद्रतटवालुकांतर्गतो धुंधुनामा दैत्यः स्वनिश्वासेनोद्धृतवालु
काभिरुत्तंकाश्रममुपद्रवितं चक्रे । तपोव्ययभयादुत्तंकस्तमशपन्नेव तन्नाशार्थं कुवलयाश्वाकं ययाचे । स च स्वपुत्रैस्सह तेन युयुधे स्वसुतदाहोत्तरं तं विनाशयामासेति प्रसिद्धं विस्तरेण भारते । ते चेत्यत्र पठितश्चकार
इति शब्दात्परत्रान्वेति ॥ २३ ॥ तत्सुतः हर्यश्वसुतः ॥ २४ ॥ अस्य कृताश्वस्य । तस्य सेनजितः । स युवनाश्वः ॥ २५ ॥ अस्य युवनाश्वस्य ॥ २६ ॥ तदेव पुत्रार्थयजनमेव । तत् प्रकृतम् । पत्न्यै गर्भधार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्थितास्ते निशम्याथ व्युदकं कलशं प्रभो ॥ पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥ २८ ॥ राज्ञा पीतं विदित्वाथ ईश्वरप्रहितेन ते ॥ ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥ २९ ॥ ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणम् ॥ युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ ३० ॥ कं धास्यति कुमारोऽयं स्तन्यं रोरूयते भृशम् ॥ मां धाता वत्स मा रोदीरितींद्रो देशिनीमदात् ॥ ३१ ॥ न ममार पिता तस्य विप्रदेवप्रसादतः ॥ युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥ ३२ ॥ त्रसद्दस्युरितींद्रोंग विदधे नाम तस्य वै ॥ यस्मात्रसंति ह्युद्विग्ना दस्यवो रावणादयः ॥ ३३ ॥ यौवनाश्वोथ मांधाता चक्रवर्त्यवनीं प्रभुः ॥ सप्तद्वीपवतीमेकः शशासाच्युततेजसा ॥ ३४ ॥ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः ॥ सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ॥३५॥ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः ॥ धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकम् ॥ ॥ ३६ ॥ यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति ॥ सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ॥ ३७ ॥ शशबिंदोर्दुहितरि बिंदुमत्यामधान्नृपः ॥ पुरुकुत्समंबरीषं मुचुकुंदं च योगिनम् ॥ ३८ ॥ तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिम् ॥ यमुनांऽतर्जले मग्नस्तप्यमानः परंतपः ॥ ३९ ॥

व्युदकं निरुदकम् । पुंसवनं पुत्रोत्पत्तिकारणम् ॥ २८ ॥ अहो दैवबलमेव मुख्यं बलं पुरुषबलं तु न किंचिदिति वदंत ईश्वराय नमस्कारं चक्रुः ॥ २९ ॥ ३० ॥ अयं कं धास्यति पास्यतीति दुःखितैर्विप्रैरुक्ते सति तस्यामिष्टयामाराधित इंद्रो मां धाता पाता हे वत्स मा रोदीरिति ब्रुवन् देशिनीं तर्जनीमदादित्यर्थः ॥ ३१ ॥ तस्य पिता युवनाश्वो भिन्नकुक्षिरपि न ममार किंतु कालांतरे तपसा सिद्धिमन्वगात् ॥ ३२ ॥ मांधातुर्महिमानमाह त्रसद्दस्युरिति षड्भिः । अंग हे राजन्यस्मान्मांधातुर्दस्यव उद्विग्नाः कंपिताः संतस्त्रसंत्यत इंद्रो यस्य त्रसद्दस्युरिति नाम विदधे स मांधाताऽवनीमेकः शशासेत्युत्तरेणान्वयः ॥ ३३ ॥ अच्युतस्य तेजसा । अप्रच्युततेजसेति वा ॥ ३४ ॥ आत्मविदपि स यज्ञं विष्णुमीजे । तमेव विशिनष्टि सर्वदेवमयमिति सार्द्धेन ॥ ३५ ॥ ३६ ॥ प्रतितिष्ठत्यस्तं गच्छति ॥ ३७ ॥ ३८ ॥ प्रसंगात्सौभरेश्चरितमाह तेषा

णार्थं देयं दातुमर्हम् । स्वयं राजा ॥ २७ ॥ निशाम्य दृष्ट्वा । व्युदकं जलशून्यम् । इदं जलपानरूपम् । पुमान्सूयतेऽनेनेति पुंसवनम् ॥ २८ ॥ अथ जलपानज्ञानोत्तरम् । ते ऋषयः ॥ २९ ॥ ततः गर्भभवनोत्तरम् । काले प्रसूतिकाले । उपावृत्ते प्राप्ते । जजानेति परस्मैपदमार्षम् ॥ ३० ॥ अयं बालः । स्तन्यमुद्दिश्य रोरूयते भृशं रोदिति । 'स्तन्ये' इति पाठे सप्तमी निमित्ते ज्ञेया । इत्यर्थ इति । निजाराधनतुष्टस्तस्मायमृतपूर्णां निजांगुलीं पानाय तन्मुखे ददाविति भावः ॥ ३१ ॥ तस्य बालस्य । विप्राणां देवानां च प्रसादतः विप्रा एव देवा इति वा । अथ स्वस्मात्पुत्रोत्पत्तेरनंतरम् । लज्जया राजधानीमगत्वा तत्रैव मुन्याश्रम एव सिद्धिं मोक्षलक्षणाम् ॥ ३२ ॥ तस्य बालस्य । अतो दस्युत्रासकर्तृत्वात् । आदिनाऽन्यदैत्यादिग्रहः ॥ ३३ ॥ अथ नामप्राप्त्यनंतरं प्राप्तयौवनभावः सन् । अच्युतस्य हरेः । विष्णुतेजसा सर्वे एव राजानश्शासति तत्र को विशेष इति चेदाह—अच्युतं प्रगल्भं यत्तेजस्तेनामृतपानेन विलक्षणप्रभावेणेति ॥ ३४ ॥ स मांधाता ॥ ३५ ॥ यदात्मकं हर्यात्मकम् "सर्वं खल्विदं ब्रह्म" इति श्रुतेः ॥ ३६ ॥ यावत् क्षेत्रं भूभागम् । उदेति उदयेन प्रकाशयति । अस्तं गच्छति यावत्प्राप्यास्तमेति । एतेनोदयाचलादस्ताचलपर्यंतं क्षेत्रमिव क्षेत्रं यथा स्वक्षेत्रं कर्षकोऽन्वहं गत्वा निरीक्ष्य स्वगृहमायाति तथा मांधातापीति प्रसिद्धं महाभारतादौ । "क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" इति मेदिनी ॥ ३७ ॥ शशबिंदो राज्ञः । योगिनं योगफलीभूतश्रीकृष्णदर्शित्वात् ॥ ३८ ॥ तेषां पुरुकुत्सादीनाम् । सौभरेर्विवाहमाक्षिपति—नन्विति । जरया जर्जरं जीर्णम् । तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ॥ जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ॥ ४० ॥ सोऽप्याह गृह्यतां ब्रह्मन्कामं कन्यास्वयंवरे ॥ स विचिंत्याप्रियं स्त्रीणां जरठोऽयमसंमतः ॥ बलीपलित एजत्क इत्यहं प्रत्युदाहृतः ॥ ४१ ॥ साधयिष्ये तथात्मानं सुरस्त्रीणामपीप्सितम् ॥ किं पुनर्मनुजेंद्राणामिति व्यवसितः प्रभुः ॥ ४२ ॥ मुनिः प्रवेशितः क्षत्रा कन्यांतःपुरमृद्धिमत् ॥ वृतश्च राजकन्याभिरेकः पंचाशता वरः ॥ ४३ ॥ तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदम् ॥ ममानुरूपो नायं व इति तद्गतचेतसाम् ॥ ४४ ॥ स बह्वृचस्ताभिरपारणीयतपःश्रियाऽनर्घ्यपरिच्छदेषु ॥ गृहेषु नानोपवनामलांभःसरस्सु सौगंधिककाननेषु ॥ ४५ ॥ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ॥ स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजभृंगवंदिषु ॥ ४६ ॥

मिति यावत्समाप्ति । तेषां स्वसारो मांधातुः कन्याः । ननु महातापसस्य कुतो विवाहप्रसंगः कथं वा जराजर्जरं तं राजकन्या वव्रिरे तदाह । यमुनांतर्जल इति षड्भिः । ॥ ३९ ॥ नृपं मांधातारम् ॥ ४० ॥ सोऽपि मांधाता स्वयंवरे कामं गृह्यतामित्याह । स विप्रः स्त्रीणामप्रियं मां विचिंत्यानेनाहं प्रत्युक्तोऽत आत्मानं तथा साधयिष्यामीति व्यवसितो निश्चितवानिति द्वयोरन्वयः । अप्रियत्वे हेतुः । जरठो वृद्धः बलीभिर्युक्तः पलितश्च । एजत्कः कंपमानशिराः । तापसत्वादिना वाऽसंमतोऽहमिति कृत्वा ॥ ॥ ४१ ॥ तथेत्यस्य प्रपंचः । सुरस्त्रीणामपीप्सितं किं पुनर्मनुजेंद्राणां याः स्त्रियस्तासामिति ॥ ४२ ॥ ततः किं वृत्तं तदाह मुनिरिति द्वाभ्याम् । क्षत्त्रा प्रतीहारेण । पंचाशताऽपि राजकन्याभिः स एक एव वरो वृतः ॥४३॥४४॥ तस्य गार्हस्थ्यं वर्णयति । स इति चतुर्भिः । बह्वृच इति मंत्रसामर्थ्यमुक्तम् । ताभिः सह रेमे इत्युत्तरेणान्वयः । क्व रेमे । अपारणीयं दुरंतं यत्तपस्तस्य श्रिया समृद्ध्याऽनर्घ्याः परिच्छदा येषु तेषु गृहेषु तथा नानाविधेषूपवनेषु च अमलान्यंभांसि येषां तेषु सरस्सु च । कथंभूतेषु । सौगंधिकानां कह्लाराणां च काननानि स्तोमा येषु ॥ ४५ ॥ कथंभूतेषु गृहादिषु । स्वलंकृताः स्त्रियः पुरुषाश्च येषु । अनुगायंतो द्विजाश्च पक्षिणो भृंगाश्च

सौभरिम् । तत् वरणम् । यमुनांतर्जले श्रींवृंदावनदेशे ॥ ३९ ॥ निर्वृतिं मैथुनानंदम् ॥ ४० ॥ प्रत्युक्तः प्रत्याख्यातः । यथा सुरस्त्रीणामपीप्सितो भवेत्तथेत्यर्थः । असंमतोऽननुमतः ॥ ४१ ॥ प्रभुः सर्वसामर्थ्ययुतः ॥ ४२ ॥ "क्षत्ता शूद्राक्षत्रियजे प्रतीहारे च सारथौ । भुजिष्यातनयेऽपि स्यात्" इति मेदिनी । स मुनिः ॥ ४३ ॥ तासां मांधातृकन्यानाम् । तदर्थे सौभरिवरणार्थे । अपोह्य त्यक्त्वा । अयं मुनिर्ममानुरूपो योग्यो वो युष्माकं नेति पृथक्पृथक् तस्मिन्मुनौ गतं चेतो यासां तासाम् । कलिः कलहः । "कलिः स्त्री कलिकारंगे शूराजिकलहे युगे" इति कोशात् ॥ ४४ ॥ स सौभरिः । स्तोमाः समूहाः ॥ ४५ ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. न.
श्री. टी.
॥ १६ ॥

भा. टी. प्र.
टीका.
अ० ६

यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ॥ विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितः ॥ ४७ ॥ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः ॥ सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥ ४८ ॥ स कदाचिदुपासीन आत्मापह्नवमात्मनः ॥ ददर्श बह्वृचाचार्यो मीनसंगसमुत्थितम् ॥ ४९ ॥ अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ॥ अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥ ५० ॥ संगं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि ॥ एकश्चरन्रहसि चित्तमनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ॥ ५१ ॥ एकस्तपस्व्यहमथांभसि मत्स्यसंगात्पंचाशदासमुत पंचसहस्रसर्गः ॥ नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥ ५२ ॥ एवं वसन्गृहे कालं विरक्तो न्यासमास्थितः ॥ वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥ ५३ ॥ तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥ ५४ ॥

वंदिनश्च येषु । कथंभूतः । महार्हशय्यादिभिरुपलक्षितः सन् ॥ ४६ ॥ स्तंभं गर्वम् ॥ ४७ ॥ आज्यस्तोकैर्घृतबिंदुभिः ॥ ४८ ॥ इदानीं तस्यानुतापपूर्वकं वानप्रस्थाश्रममाह स कदाचिदिति सप्तभिः । आत्मनो मनसो हेतोरात्मनोपह्नवं तपोहानिं ददर्श ॥ ४९ ॥ संश्चासौ चारितव्रतश्च योऽहं तस्य ब्रह्म तपः ॥ ५० ॥ मिथुनव्रतिनां दांपत्यधर्मवताम् । चेद्यदि प्रसंगस्तर्हि । तद्व्रतिषु ईश्वरार्थधर्मपरेष्वेव कार्य इति शेषः ॥ ५१ ॥ संगाज्जातं दोषं प्रपंचयति । एक इति । पंचाशता भार्याभिः संबंधात्पंचाशदासमभूवमित्यर्थः । ततश्च सुतैः पंचसहस्रसर्ग आसम् । प्रत्येकं तासु पुत्रशतरूपेणोत्पत्तेः । उभयकृत्यान्यैहिकपारत्रिकाणि कर्माणि तद्विषयाणां मनोरथानाम् । अर्थभावः पुरुषार्थबुद्धिमान् ॥ ५२ ॥ न्यासोऽत्र संगत्याग एव । वानप्रस्थधर्म इत्यर्थः ॥ ५३ ॥ ५४ ॥

अन्वितमनुप्राप्तम् ॥ ४७ ॥ ४८ ॥ तस्य सौभरेः । "आत्मा ब्रह्मणि जीवे च यत्नधृतितपोधियि" इति कोशादात्मापह्नवं तपोहानिमिति स्वामी ॥ ४९ ॥ 'ब्रह्म वेदस्तपस्तत्त्वम्' इति कोशात् ॥ ५० ॥ साधुषु निर्मत्सरेषु । "संगः सर्वात्मना त्याज्यश्चेत्त्यक्तुं शक्यते नहि । सत्स्वेव स विधातव्यः संतः संगस्य भेषजम् ॥' इत्युक्तेः ॥ ५१ ॥ इत्यर्थ इति । संगादेकस्यापि बहुत्वं जातमिति भावः । तत एकपञ्चाशद्भवनोत्तरम् । सुतैः पञ्चसहस्राणि सर्गा देहा यस्य स तथा । यद्वा—पुत्त्राणां विवाहादि कन्यानां प्रदानादीत्युभयं कृत्यं तत्र ये मनोरथाः अस्य विवाह एतस्मिन्कुले इयं चास्मै शोभनाय वराय देयेत्यादयः । यद्वोभयेन स्त्रीपुरुषद्वयेन यत्कृत्यं तत्र ये मनोरथास्तेषामन्तमवसानम् ॥ ५२ ॥ इत्यर्थ इति । वानप्रस्थेऽपि वित्तगृहादिविषयत्यागसाम्यान्न्यासशब्दो न विरुद्ध इति भावः । एवं कालमेतावत्पर्यंतम् ॥ ५३ ॥ तत्र वानप्रस्थाश्रमे । आत्मने देहादेः कर्षणं कृशत्वापादकं शोषणमिति यावत् । अग्निभिर्गार्हपत्यादिभिरात्मानं देहं दग्ध्वा परमात्मनि युयुजे सायुज्यमोक्षमवापेत्यर्थः । आत्मपदमावृत्त्या वा योज्यम् । आत्मानं देहमग्निभिः तथात्मानं जीवं परमात्मनि

॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताः स्वपत्युर्महाराज निरीक्ष्याध्यात्मिकीं गतिम् ॥ अन्वीयुस्तत्प्रभावेण अग्निं शांतमिवार्चिषः ॥ ५५ ॥ इति श्रीमद्भागवते महापुराणे नवम स्कंधे षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ मांधातुः पुत्रप्रवरो योंबरीषः प्रकीर्तितः ॥ पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ॥ हारीतस्तस्य पुत्रोऽभून्मांधातृप्रवरा इमे ॥ १ ॥ नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः ॥ तया रसातलं नीतो भुजगेंद्रप्रयुक्तया ॥ ॥ २ ॥ गंधर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् ॥ नागाल्लब्धवरः सर्पादभयं स्मरतामिदम् ॥ ३ ॥ त्रसदस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् ॥ हर्यश्वस्तत्सुतस्तस्मा दरुणोऽथ निबंधनः ॥ ४ ॥ तस्य सत्यव्रतः पुत्रस्त्रिशंकुरिति विश्रुतः ॥ प्राप्तश्चांडालतां शापाद्गुरोः कौशिकतेजसा ॥ ५ ॥

आध्यात्मिकीं गतिं ब्रह्मणि लयम् ॥ ५५ ॥ इति नवमस्कंधे टीकायां षष्ठोऽध्यायः ॥ ६ ॥ मांधातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते ॥ पुरुकुत्सस्य चाख्यानं हरिश्चंद्रस्य चोत्तमम् ॥ १ ॥ पुत्रप्रवरः पुत्रश्रेष्ठः । स पितामहेन युवनाश्वेन प्रवृत्तः पुत्रत्वेन स्वीकृतः अत एव तस्य मांधातृप्रवर्ग्यत्वम् । तत्सुतोंबरीषस्य सुतः । इमे यौवनाश्वांबरीषहारीता मांधातृगोत्रस्य प्रवरा अवांतरविशेषप्रवर्तकाः । यद्वा यौवनाश्वविशेषणम् । पितामहेन मांधात्रा सह आर्षेयवरणे प्रवृत्तः मांधाता प्रवरो येषां ते इमे अंबरीषयौवनाश्वहारीताः । यथाऽऽहाश्वलायनः । "हरितकुत्सपिंगदर्भभैमगवानामांगिरसांबरीषयौवनाश्वेति मांधातारं हैके ब्रुवते ॥ अतीत्यांगिरसं मांधात्रंबरीषयौवनाश्वेति" इति ॥ १ ॥ पुरुकुत्सस्य वंशं कथयिष्यन्नादौ तावत्तस्य विवाहं प्रभावं चाह । उरगैर्भ्रातृभिर्या दत्ता नर्मदा तया ॥ २ ॥ वध्यान्वधार्हान् । स च पुरुकुत्सो नागाल्लब्धवरोऽभूत् । वरमाह । इदं नर्मदया रसातलानयनादिकं स्मरतां सर्पादभयमिति ॥ ३ ॥ देहकृत्पिता । त्रसदस्योः सुतोऽनरण्य इत्यर्थः ॥ ४ ॥ त्रयः शंकव इव दुःखहेतवो दोषा यस्यासौ त्रिशंकुः । तदुक्तं हरिवंशे । "पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च ॥ अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः" इति । परिणीयमानविप्रकन्याऽपह

च युयुजे योजयामासेत्यर्थः ॥ ५४ ॥ ता मांधातृसुताः । तत्प्रभावेण पत्युर्भक्त्या तामेव गतिमनुगता इत्यर्थः ॥ ५५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ यत्र मांधातुरन्वये (१) । नन्वंबरीषस्य मध्यमपुत्रत्वात्कथं प्रवरत्वं तत्राह—पितामहेनेति । अत एव पितामहस्वीकारादेव । तस्य अंबरीषस्य (२) । तस्य यौवनाश्वस्य । तपोविद्यादिना प्रभाववत्त्वेऽवांतरगोत्रप्रवर्त्तकत्वं प्रवरत्वं न केवलं पितामहप्रवरणात्प्रवरत्वमित्याह—यद्वेति । आर्षेयवरणे प्रकृष्टतपश्चर्यादिना गोत्रप्रवर्त्तकत्वे प्रवृतः स्वीकृतः शिष्टैरित्यर्थः । तत्र प्रमाणमाह—यथा हेति । ह स्फुटम् । एके केचित् ॥ १ ॥ तस्य पुरुकुत्सस्य । तया नर्मदया । भुजगेंद्रो वासुकिः ॥ २ ॥ तत्र रसातले ॥ ३ ॥ तत्सुतोऽनरण्यसुतः । तस्माद्धर्यश्वात् । अथ अरुणात् ॥ ४ ॥ तस्य निबंधनस्य । 'शंकुः संख्याभिदि कीले' इति । कीला इवेत्यर्थः । अत्र मानमाह—तदुक्तमिति । दोग्ध्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ॥ पातितोऽवाक्शिरा देवैस्तेनैव स्तंभितो बलात् ॥ ६ ॥ त्रैशंकवो हरिश्चंद्रो विश्वामित्रवशिष्ठयोः ॥ यन्नि मित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकम् ॥ ७ ॥ सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः ॥ वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ॥ ८ ॥

रणात्क्रुद्धस्य गुरोः पितुः शापात् । कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेण ॥ ५ ॥ तेनैव कौशिकेन ॥ ६ ॥ पक्षिणोराडीबकयोः । विश्वामित्रो राजसूयदक्षिणाछलेन हरिश्चंद्रं सर्वस्वमपहृत्य यातयामास तच्छ्रुत्वा कुपितो वशिष्ठोऽपि विश्वामित्रं त्वमाडी भवेति शशाप सोऽपि त्वं बको भवेति वशिष्ठं शशाप तयोश्च युद्धमभूदिति प्रसिद्धम् ॥ ७ ॥ " हरिश्चंद्रो ह वैधस ऐक्ष्वाको राजा पुत्र आस " इत्यादिश्रुतिप्रसिद्धं हरिश्चंद्रस्य चरितमाह । सोऽनपत्य इत्यादि यावत्समाप्ति । कथं शरणं यातस्त

धेनुः । अप्रोक्षितमांसस्य दानात् ॥ ९ ॥ ६ ॥ प्रसिद्धं मार्कंडेयादौ ॥ ७॥ ह स्फुटम् । वेधा विष्णुस्तं सेवते इति वैधसः ''वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि'' इति मेदिनी । विष्णुभक्त इत्यर्थः । स हरिश्चंद्रोऽपुत्रः 'अपुत्रस्य गतिर्नास्ति' इति स्मृतेः ''नापुत्रस्य लोकोऽस्ति'' इति श्रुतेश्च । वैदिकीं गाथामाह–[अथैनमुवाच वरुणं राजानमुपधाव पुत्रो मे जायतां तेन त्वा यजा इति । तथेति स वरुणं राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति । तथेति तस्य ह पुत्रो जज्ञे रोहितो नामेति । तं होवाचाजनि वै ते पुत्रो यजस्व माननेति । स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशोऽन्वस्त्वथ त्वा यजा इति । स ह निर्दश आस तं होवाच निर्दशोऽन्वथाभूद्यजस्व माननेति । स होवाच यदा वै पशोर्दंता जायंते अथ स मेध्यो भवति दंतान्वस्य जायंतामथ त्वा यजा इति । तस्य ह दंता जज्ञिरे । तं होवाच जाता वा अस्य दंता यजस्व माननेति । स होवाच यदा वै पशोर्दंता पद्यंते अथ स मेध्यो भवति दंतान्वस्य पद्यंतामथ त्वा यजा इति । तस्य ह दंताः पेदिरे । तं होवाचापतन्सुतता अस्य दंता यजस्व माननेति । स होवाच यदा वै पशोर्दंताः पुनर्जायंतेऽथ स मेध्यो भवति दंतान्वस्य पुनर्जायंतामथ त्वा यजा इति । तस्य ह दंताः पुनर्जज्ञिरे । तं होवाच जाता वा अस्य पुनर्दंता यजस्व माननेति । स होवाच यदा वै क्षत्रियः सान्नाहिको भवत्यथ स मेध्यो भवति सन्नाहं नु प्राप्तोऽन्वथ त्वा यजा इति । स ह सन्नाहं प्राप । तं होवाच सन्नाहं नु प्राप्तो यजस्व माननेति । स तथेत्युक्त्वा पुत्रमामंत्रयामास नताय वै मह्यं त्वामददाद्धंत त्वयाहमिमं यजा इति । स ह नेत्युक्त्वा धनुरादायारण्यमगात्तस्थौ स संवत्सरमरण्ये चचार । अथ हैक्ष्वाकं वरुणो जग्राह तस्य होदरं ज इति पुरुषरूपस्तमेत्य इंद्रो वृद्धविप्रो भूत्वा तं रोहितमेत्य पर्युवाच नानाश्रांताय श्रीरस्तीति । नृषद्वरोनुक्तकारीति शुश्रुम चरत इंद्र एव सखा भवतीत्यतश्चरैव द्वितीयं संवत्सरमरण्ये चचार । पुष्पिण्यौ जंघे चरतः भूष्णुः पुरुषः सततं पर्यटन्फलग्रहिः प्रपथे हता अस्य सर्वे पाप्मानः शेरे इति । आसीनस्य भगोप्यास्ते तिष्ठतो भग ऊर्द्धस्तिष्ठति पुरुषच्छायेव निपद्यमानस्य भगः शेते चरतो भगश्चराति कलिः शयानः द्वापरः संजिहानः त्रेतोत्तिष्ठन् कृतः कृतं चरन्संपद्यते । चरन्मधुविंदति वै स्वादिष्ठमुदुंबरं चरन् यश्चरन्न तंद्रयते तस्य सूर्यस्य पप्रिमाणं पश्य तावप्येवमरण्ये चरतः । जीवनक्षेमं षष्ठं संवत्सरमरण्ये चचार सोऽजीगर्त्तं सौयवसिमृषिमशनया परीतमरण्य उपेयाय । तस्य ह त्रयः पुत्रा आसुः शुनःपुच्छः शुनःशेफः शुनोलांगूल इति । तं होवाच ऋषेहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा इति । स ज्येष्ठं पुत्रं निगृह्वान उवाच न त्विममिति नो एवेममिति । कनिष्ठं माता तौ ह मध्यमे संपादयांचक्रतुः शुनःशेफे तस्य ह शतं दत्त्वा स तमादाय सोऽरण्याद् ग्राममेयाय स पितरमेत्योवाच तत हंताहमनेनात्मानं निष्क्रीणा इति । स वरुणं राजानमुपससारानेन त्वा यजा इति । तथेति भूयान्वै ब्राह्मणः क्षत्रियादिति वरुण उवाचेति । तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच एतमभिषेचनीयं पुरुषमालभ इति । सोऽनुलेभे तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वशिष्ठो ब्रह्मायास्य उद्गातेति] अत्र केषांचित्पदानामर्थः प्रकाश्यते–पदिरे पद्यंते पद्यंतामपत्यस्यतेत्येषां पतनमर्थः । सन्नाहः शस्त्रास्त्रयोग्यता ।

१–सायं गृहम् । २ गवाम् । ३ पुत्रेण आत्मनो निष्क्रयं करोमीत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि वीरो महाराज तेनैव त्वां यजे इति ॥ तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ॥ ९ ॥ जातः सुतो ह्यनेनांग मां यजस्वेति सोऽब्रवीत् ॥ यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ॥ १० ॥ निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् ॥ दंताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ॥ ११ ॥ जाता दंता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति ॥ १२ ॥ पशोर्निपतिता दंता यजस्वेत्याह सोऽब्रवीत् ॥ यदा पशोः पुनर्दंता जायंतेऽथ पशुः शुचिः ॥ १३ ॥ पुनर्जाता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ॥ सान्नाहिको यदा राजन्राजन्योऽथ पशुः शुचिः ॥ १४ ॥ इति पुत्रानुरागेण स्नेहयंत्रितचेतसा ॥ कालं वंचयता तंतमुक्तो देवस्तमैक्षत ॥ १५ ॥ रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् ॥ प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत ॥ १६ ॥ पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम् ॥ रोहितो ग्राममेयाय तमिंद्रः प्रत्यषेधत ॥ १७ ॥ भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः ॥ रोहितायादिशच्छक्रः सोऽप्यरण्येवसत्समाम् ॥ १८ ॥

दाह। पुत्रो मे जायताम्॥८॥यदि वीरः पुत्रो मे जायेत तर्हि तेनैव पुरुषपशुना त्वां यजे यजामीति भाषया तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः॥९॥ जाते पुत्रे स वरुणो जातः सुतो मामनेन यजस्वेत्यब्रवीत्। यदा पशुर्निर्दशो निर्गतदशादिवसः स्यादित्यत्र स राजाऽब्रवीदित्यनुषंगः ॥१०॥११॥१२॥१३॥ राजन् हे वरुण राजन्यः पशुर्यदा सान्नाहिकः कवचसंबंधार्हः संग्रामसमर्थः अथ तदा शुचिः ॥ १४ ॥ इत्येवं तंतं कालं वंचयता राज्ञोक्तः प्रार्थितो देवो वरुणस्तंतं कालं प्रत्यैक्षतेत्यर्थः ॥१५॥ चिकीर्षितमात्मना पशुना वरुणयजनम् ॥१६॥ ततश्च कुपितेन वरुणेन ग्रस्तमत एव जातं महदुदरं यस्य तं पितरं श्रुत्वा ॥ १७ ॥ समां वर्षम् ॥१८॥

नताय पूजते । ज्ञो वरुणः । पुरुषरूपः प्रशस्तपुरुषः विप्र इत्यर्थः । प्रशंसायां रूपप्प्रत्ययविधानात् । पर्युवाचेत्यत्र परि निषेधे न गंतव्यमित्युक्तवान् । तत्र हेतुमाह—पुण्यतीर्थनिषेवणेन नानाविधेन श्रांतस्य श्रीरैहिकामुष्मिकसंपदस्तीति । नृषद्वरः चर्मकारोऽतिपापो वा । अनुक्तकारी गुर्वादिवचनमश्रृण्वन्स्तंभवत्तिष्ठन्नित्यर्थः । एकाकिनश्चरतश्चोरादिभयमपि नेत्याह—चरत इति । चरैव त्वमटनं कुरुष्वैव कश्चिद्ब्राह्मणो मामवोचत् । पुष्पिणी गर्भिणी जंघयोर्बलाच्चरति नैकत्रास्ते यथा भूष्णुर्बुभूषुः पुरुषः आत्मा फलं गृह्णातीति । फलग्रहिस्तथा किं फलमाप्नोतीति तत्राह—प्रपथे महामार्गे । तीर्थयात्राश्रमेण हता अस्य पुंसः शेरे शीर्णा भवंतीत्यतस्त्वमपि चरन्फलं लभस्वेत्यर्थः । चरैवेत्युक्तार्थम् । आसीनस्य निर्व्यापारस्य । भगो भाग्यमप्यास्ते आसीनं भवति समृद्धं न भवति ।तिष्ठत उत्थानं कुर्वतः । ऊर्ध्वस्तिष्ठत्युत्थानं करोति । निपद्यमानस्य निकृष्टं गच्छतः । शेते निकृष्टो भवति । चरतः पुण्येन यथा संचरमाणस्य चरति तं प्राप्नोति कलिः कलिजातः शयानस्तामसत्वेन शुभप्रवृत्तिशून्यः । सांजिहानः संशयानः । इदं वाऽदो वा तत्त्वमिति न निश्चिनोति । उत्तिष्ठन् धर्मार्थकार्ययोगिक्तं विहितं चरन्संपद्यते ज्ञानसंपन्नो भवतीत्यतस्त्वं चरको भवेत्यर्थः । मधु सुखम् । अशनक्लेशोऽपि नास्तीत्याह—स्वादिष्टं चरन्भक्षयन् । भूमिपर्यटनं कुर्वंत इत्थंभावमाह—चरन्निति । श्रवणमननाभ्यां स्वादु पुनःपुनः सेवाबुद्धिजनकम् । उदुंबरम् अत्यंतं वरं वरणीयं सर्वगुणाभिरामं हरिं चरन् शरणं गच्छन्निति वा । नित्यमटन्कोऽस्तीति चेदाह—सूर्यस्येति । चरन्नविरतमटन् न तंद्रयते आलस्यं न करोति । परिमाणमव्याहतगमनम् शिक्षां सुगममन्यदिति । अथ प्रकृतमनुसरामः—स्पष्टार्थोयमध्यायोऽनेनैव तथापि कचिद्व्याख्यास्यामः ॥ ८ ॥ "वीरः पुत्रे रसे शूरे भ्रातृपक्षिद्वयोरपि" इति निरुक्तिः ॥ ९ ॥ स हरिश्चंद्रः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ इत्यर्थ इति । आत्मयागकालप्रतीक्षां चकारेति भावः ॥ १५ ॥ तत् निजबलिदानरूपम् ॥ १६ ॥ तं रोहितम् ॥ १७ ॥ 'हायनोऽस्त्री शरत्समाः इत्यमरः ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं द्वितीये तृतीये चतुर्थे पंचमे तथा ॥ अभ्येत्याभ्येत्य स्थविरो विप्रो भूत्वाह वृत्रहा ॥ १९ ॥ षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीम् ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ॥ २० ॥ शुनःशेपं पशुं पित्रे प्रदाय समवंदत ॥ ततः पुरुषमेधेन हरिश्चंद्रो महायशाः ॥ २१ ॥ मुक्तोदरोऽयजद्देवान् वरुणादीन् महत्कथः ॥ विश्वामित्रोऽभवत्तस्मिन् होता चाध्वर्युरात्मवान् ॥ २२ ॥ जमदग्निरभूद्ब्रह्मा वशिष्ठोऽयास्यसामगः ॥ तस्मै तुष्टो ददाविंद्रः शातकौंभमयं रथम् ॥ २३ ॥ शुनःशेपस्य माहात्म्यमुपरिष्टात् प्रचक्ष्यते ॥ सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥ २४ ॥ विश्वामित्रो भृशं प्रीतो ददावविहतां गतिम् ॥ मनः पृथिव्यां तामद्भिस्तेजसाऽपोऽनिलेन तत् ॥ २५ ॥

द्वितीये च वर्षे वृत्रहा अभ्येत्याभ्येत्य तथैव तं प्रतिषेधन्किंचित्किंचिदाह ॥ १९ ॥ २० ॥ २१ ॥ वरुणेन मुक्तमुदरं यस्य । महत्सु कथा यस्य सः । आत्मवान् जमदग्निरध्वर्युरभूत् ॥ २२ ॥ अयास्यो मुनिः सामग उद्गाता अभूदित्यर्थः ॥ २३ ॥ उपरिष्टाद्विश्वामित्रसुताख्यानप्रसंगेन ॥ २४ ॥ अविहतां गतिं ज्ञानम् । तामेव गतिमाह सार्द्धाभ्याम् । मनः पृथिव्यां धारयन् ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहंस्तां च हित्वा मुक्त्वा मुक्तबंधनस्तस्थावित्यन्वयः । मनोमूलो हि संसारः मनश्चान्नमयम् । "अन्नमयं हि सोम्य मनः" इति श्रुतेः । अतोऽन्नशब्दवाच्यायां पृथिव्यां मनो धारयन्नेकीकुर्वंस्तां पृथिवीमद्भिरेकीकुर्वन्नपस्तेजसा तत्तेजोऽ

॥ १९ ॥ अजीगर्त्ताद्भार्गवादृषेः ॥ २० ॥ क्वचित्फांतं नाम । ततः पुरुषपशुप्राप्त्युत्तरम् ॥ २१ ॥ तस्मिन् त्यागे ॥ २२ ॥ अयास्यश्चासौ सामगश्चेति तथा यद्वार्षो विभक्तिलोपः । इत्यर्थ इति । सामगातैवोद्गाताः भवतीति भावः । तस्मै शुनःशेपाय शुनःशेपस्येति वाक्यशेषात् । शातकौंभमयं सौवर्णम् ॥ २३ ॥ सत्यसारामित्यत्रोपयुक्ता पुराणांतरगीता कथास्ति तथाहि–[हरिश्चंद्रेण यज्ञे सर्वा भूर्विश्वामित्राय दत्ता तद्दक्षिणायां सौवर्णं शाकटायुतभारं च दत्तवांस्तांश्च विश्वामित्रो ययाचे तदर्थं सभार्यपुत्रो हरिश्चंद्रस्तमुक्तवान्भगवन्नस्मान्विक्रीय दक्षिणां गृहाण । तेन च तद्भार्यापुत्रौ काश्यां कस्मैचिद्ब्राह्मणाय मूल्येन दत्तौ हरिश्चंद्रश्च शववस्त्रापहारिणे विक्रीतः । स च तेन शववस्त्रग्रहार्थं श्मशाने स्थापितः । तत्र च कदाचित्पुष्पार्थं धनिप्रेषितो विक्रीतहरिश्चंद्रात्मजोऽहिना दष्टो ममार । तं दाहार्थमादाय जीर्णवस्त्रवेष्टितं तन्माता श्मश्मानं रात्रौ जगाम । तदा तां रुदंतीं श्रुत्वा हरिश्चंद्रस्तत्रागत्य तद्वस्त्रमुत्तारयितुं प्रवृत्तस्तयोक्तं मा जीर्णवस्त्रं गृहाण तेन तदनादृत्य वस्त्रं हृतं सा तदाहाहो विधातरहं हरिश्चंद्रनृपतेर्भार्योऽयं तस्य पुत्रो ययोरीदृग्दशा जातेति तच्छ्रुत्वा तां तं च परीक्ष्येतस्ततः श्मशानकाष्ठान्यादाय तैश्चितिं कृत्वा पुत्रं तत्र संस्थाप्य स्वयमपि सभार्यस्तेन सहैव दाहार्थं प्रवृत्तस्तदैवागत्य विश्वामित्रो निवार्य तत्पुत्रं च संजीव्य तस्मै राज्यं दत्त्वा हरिश्चंद्राय ज्ञानं च ददौ । सत्यस्थित्या तुष्टः] इति स्कांदादौ स्फुटमित्युक्तम्–सत्यसाराम् । सत्यमेव सारो यस्यां ताम् । धृतिं धैर्यम् ॥ २४ ॥ तां ज्ञानरूपाम् । 'मनः संसृतिकारणम्' इत्युक्तेः । अन्नमयं पार्थिवम् । 'तेज आपोन्नमात्मनः' इत्यादावन्नशब्दः पृथिवीवाचको दृश्यते ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि ॥ तस्मिञ्ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहन् ॥ २६ ॥ हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा ॥ अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबंधनः ॥ २७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे हरिश्चंद्रोपाख्यानं नाम सप्तमोऽध्यायः ॥ ॥ ७ ॥ श्रीशुक उवाच ॥ हरितो रोहितसुतश्चंपस्तस्माद्विनिर्मिता ॥ चंपापुरी सुदेवोऽतो विजयो यस्य चात्मजः ॥ १ ॥ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः ॥ सोऽरिभिर्हृतभू राजा सभार्यो वनमाविशत् ॥ २ ॥ वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यती ॥ और्वेण जानतात्मानं प्रजावंतं निवारिता ॥ ३ ॥ आज्ञायास्यै सपत्नीभिर्गरो दत्तोंऽधसा सह ॥ सह तेनैव संजातः सगराख्यो महायशाः ॥ ४ ॥ सगरश्चक्रवर्त्यासीत् सागरो यत्सुतैः कृतः ॥ यस्तालजंघान् यवनाञ्छकान् हैहयबर्बरान् ॥ ५ ॥ नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः ॥ मुंडाञ्श्मश्रुधरान् कांश्चिन्मुक्तकेशार्धमुंडितान् ॥ ६ ॥ अनंतर्वाससः कांश्चिदबहिर्वाससोऽपरान् ॥ सोऽश्वमेधैरयजत सर्ववेदसुरात्मकम् ॥ ७ ॥

निलेन ॥ २५ ॥ तं च खे आकाशे तच्च भूतादावहंकारे तं च भूतादिमहंकारम् । महात्मनि महत्तत्त्वे तस्मिन्विषयाकारं व्यावर्त्य ज्ञानकलां ज्ञानांशमात्मत्वेन ध्यात्वा तया ध्यानवृत्तिरूपयाऽऽत्मावरकमज्ञानं विनिर्दहन् ॥ २६ ॥ निर्वाणसुखसंविदा तां च हित्वा मुक्तबंधः सन्ननिर्देश्येनाप्रतर्क्येण स्वेन भावेन स्वस्वरूपेण तस्थौ ॥ २७ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे रोहितस्योक्तो वंशो यत्राभवन्नृपः ॥ सगरः कपिलाक्षेपान्निर्दग्धा यस्य सूनवः ॥ १ ॥ चंपस्तस्मादभूत् येन चंपापुरी निर्मिता । अतश्चंपात्सुदेवः ॥ १ ॥ हृता भूर्यस्य ॥ २ ॥ और्वेण ऋषिणा । आत्मानं देहम् । प्रजावंतं सगर्भम् ॥ ३ ॥ गरो विषम् । तेन गरेण सहैव जातः ॥ ४ ॥ ५ ॥ गुरुवाक्येनौर्ववचनेन । कांश्चिदहत्वैव विकृतवेषिणश्चक्रे । तदेवाह । मुंडानिति । मुक्तकेशानर्धमुंडितांश्च ॥ ६ ॥ ७ ॥

तस्मिन्महत्तत्त्ववाच्ये चेतसि । आत्मत्वेनात्मरूपत्वेन ॥ २६ ॥ निर्वाणसुखसंविदा मोक्षानंदज्ञानेन । अनिर्देश्येन निर्देशानर्हेण । अप्रतर्क्येण तर्काविषयेण ॥ २७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ ॥ यत्र रोहितान्वये । कपिलस्याक्षेपादवज्ञानात् । यस्य सगरस्य (१) । तस्माद्धारितात् । येन चंपेन । यस्य सुदेवस्य ॥ १ ॥ तत्सुतः विजयसुतः । तस्माद्भरुकात् । तस्यापि वृकस्यापि । स बाहुकः ॥ २ ॥ तं बाहुकम् । अनुमरिष्यती अनुमरणं कर्तुमिच्छंती । सगर्भं पुत्त्रवंतम् ॥३॥ अस्यै सगर्भायै । अंधसाऽन्नेन ॥ ४ ॥ यत्सुतैः सगरसुतैः । कृतः खात्वा संपादितः । यः सगरः । तालजंघहैहयौ यवनशकबर्बराश्च म्लेच्छभेदाः ॥ ५ ॥ पामरान्मा वधीरित्यौर्ववाक्येन विकृतो विरूपो वेषो नेपथ्यादि येषां ते "वेषो व्याप्तौ च नेपथ्ये शृंगारे वृत्तशीलयोः" इति निरुक्तिः । तदेव विकृतवेषत्वमेव । मुंडानकेशान् । मुक्तकेशान् इतस्ततः प्रसृतकेशान् । अर्द्धं शिरःपूर्वार्द्धं परार्द्धं च मुंडितं येषां तान् । श्मश्रुधरान्केवलं श्मश्रुधरान् ॥ ६ ॥ धौतवस्त्रस्य नाभ्यधोदेशकच्छस्य तत्समानसूत्रनिपातदेशे धारणमंतर्वासस्त्वं तन्न विद्यते येषां ते तथा । धौतवस्त्रस्य नाभ्यधोदेशकच्छस्यार्द्धभागस्य च यत्नेन स्थापनं बहिर्वासस्त्वं तन्न विद्यते येषां ते तथा । तथा च मुक्तकच्छान् द्विकच्छकांश्च चक्रे । " विशिखो द्विशिखश्चैव मुक्तकच्छो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ॥ तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरंदरः ॥ ८ ॥ सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ॥ हयमन्वेषमाणास्ते समंतान्न्यखनन् महीम् ॥ ९ ॥ प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके ॥ एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥ १० ॥ हन्यतांहन्यतां पाप इति षष्टिसहस्रिणः ॥ उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥ ११ ॥ स्वशरीराग्निना तावन्महेंद्रहृतचेतसः ॥ महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥ १२ ॥ न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्त्वधामनि ॥ कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥ १३ ॥ यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम् ॥ भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः ॥ १४ ॥ योऽसमंजस इत्युक्तः स केशिन्यां नृपात्मजः ॥ तस्य पुत्रोंऽशुमान् नाम पितामहहिते रतः ॥ १५ ॥

और्वेणोपदिष्टो योग उपायस्तेन ॥८॥ तस्य द्वे भार्ये सुमतिः केशिनी च । तत्र सुमत्याः पुत्राणां प्रभावं मृत्युं चाह । सुमत्या इति षड्भिः ॥९॥ १० ॥ एष वाजिहर इति ब्रुवंतोऽभिययुः । षष्टिसहस्राणि परिच्छेदकतया संति येषाम् । उन्मिमेष लोचनोन्मीलनं चकार ॥ ११ ॥ १२ ॥ केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति तन्निराकरोति । नेति । कुत इत्यत आह । सत्त्वधामनि शुद्धसत्त्वमूर्तौ । जगतः पवित्रः शुद्धिकर आत्मा यस्य तस्मिन्कथं विभाव्यते संभाव्यते । असंभावनायां दृष्टांतः । भुवो रजः खे कथं संभाव्यते इति ॥१३॥ किं च । यस्य येनेरिता प्रवर्तिता तस्य विपश्चितः सर्वज्ञस्य कथं पृथङ्मतिररिमित्रादिभेददृष्टिः ॥ १४ ॥ तदेवं सुमत्याः पुत्रेषु

द्विकच्छकः । तावद्भवति चांडालो यावद्गंगां न मज्जति ॥'' इति स्मृतेश्चांडालान्साभिज्ञानांश्चकारेत्यर्थः । यद्वाऽनंतर्वाससो नीवीसूत्रवत्पादाग्रधार्याधोवस्त्रयुतानित्यर्थः । अत एव ब्राह्मणं प्रकृत्य वात्स्येनाप्युक्तम् ''ऊर्ध्ववस्त्रादधोवस्त्राद्धूमपानात्तथैव च । षड्भिर्विप्राः प्रणश्यंति हालाहलहलाहलैः॥'' इति ।''स्त्रीणामेव धृतिः कार्या ऊर्ध्वाधोवाससां क्वचित्'' । क्वचिदित्युक्तेः तासामपि सदा धार्ये इति । यद्वा-''चतुर्द्वादशकाष्ठाभिरंगुलैर्विस्तृतं तु यत् । व्यामदीर्घं गुदोपस्थच्छादकं वस्त्रमिष्यते ॥ अंतर्वासो बुधैः कव्याच्छादकं बहिरेव तत्'' इति स्मृत्यंतरोक्तेर्बहून् गुदोपस्थावरककौपीनमात्रानेव कटिवेष्टनादिरहितांश्चक्रे बहूंश्च तद्रहितकेवलकटिवेष्टनवस्त्रयुतांश्च चक्रे । एतेन कटिवेष्टनरहितकौपीनधारिणः केवलकटिवेष्टनधारिणश्च यवनसमा इत्यपि ध्वनितम् । ''दृष्ट्वा संमीलयेच्चक्षुर्विकृतान्सगरभूभुजा'' इति निषेधाच्च तस्य धर्मस्थितिमाह--स इति । स सगरः । सर्वे वेदाः सुराश्चात्मा स्वरूपं यस्य स तम् ॥ ७ ॥ तस्य सगरस्य ॥८॥ तस्य सगरस्य । तत्र तयोर्मध्ये । सुमत्या गरुडस्वसुः । न्यखनन् अन्वेषयामासुः । भूमिं खात्वा वा मार्गयामासुः ॥९॥ प्रागुदीच्याम् ऐशान्याम् ॥ १० ॥ परिच्छेदकतया भेदकतया । तदा हननशब्दोच्चारणसमये ॥ ११ ॥ स्वशरीराग्निना निजदेहोद्भूतवह्निना । तावत्साकल्येन । महेंद्रेण लोकार्त्तिकरत्वात्तेषां हृतं चेतो विचारसामर्थ्यं येषां ते तथा । महतः श्रीपुरुषोत्तमावतारस्य कपिलस्य व्यतिक्रमो हन्यतां चौरोऽयमित्युक्तिलक्षणस्तेनैव हताः । यद्वा-महतामृषीणां लोकानां च व्यतिक्रमाद्धताः । नारदादिपुराणेषु तेषां व्यतिक्रमोऽपि वर्णित इति । भस्मसात् सर्वे भस्मराशयो बभूवुः ॥ १२ ॥ मतांतरमपाकरोति-केचित्त्वित्यादिना । भर्जिता दग्धाः । मुनिकोपदग्धत्वे हेतुं पृच्छति-कुत इति । आत्मा स्वभावः ''आत्मा देहे धृतौ जीवे स्वभावेशमतिष्वपि'' इति यादवः ॥ १३ ॥ तमोगुणकार्यस्य कोपस्य हरावनवसरमाह-यस्येति । यया सांख्यनावा । मृत्योः पंथा यत्र तं दुरत्ययं विना ज्ञानमत्येतुमशक्यम् । परात्मभूतस्य नारायणावतारस्य ॥ १४ ॥ न समंजसो योग्यो यस्मात्स तथा । तस्य असमंजसस्य । पितामहस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असमंजस आत्मानं दर्शयन्नसमंजसम् ॥ जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः ॥ १६ ॥ आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् ॥ सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयञ्जनम् ॥ १७ ॥ एवंवृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ॥ योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ ॥ १८ ॥ अयोध्यावासिनः सर्वे बालकान् पुनरागतान् ॥ दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन्वतप्यत ॥ १९ ॥ अंशुमांश्चोदितो राज्ञा तुरंगान्वेषणे ययौ ॥ पितृव्यखातानुपथं भस्मांति ददृशे हयम् ॥ २० ॥ तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजम् ॥ अस्तौत्समाहितमनाः प्रांजलिः प्रणतो महान् ॥ २१ ॥ अंशुमानुवाच ॥ न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्यापि समाधियुक्तिभिः ॥ कुतोऽपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥ २२ ॥

मृतेषु केशिन्याः पौत्रेणाश्वः समानीतः पितृव्योद्धरणप्रयत्नश्च कृत इति दर्शयितुमाह । योऽसमंजसः । इत्युक्तः केवलमज्ञैर्वस्तुतस्तु समंजस एव । स तु केशिन्याः सुतः क्षेत्रजत्वमिव प्रतीतं वारयति । तस्यैव नृपस्यात्मनो देहाज्जातः ॥ १५ ॥ तस्य कथामाह चतुर्भिः । असमंजसः पुरा पूर्वजन्मनि योगी सन्संगाद्धेतोर्योगाद्विचालितोऽत इदानीं जातिस्मरः सन्संगपरिहाराय जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् क्रीडतो बालान्सरय्वां प्रास्यत्प्राक्षिपदिति द्वयोरन्वयः ॥ १६ ॥ १७ ॥ एवंविधं वृत्तं कर्म यस्य सः ॥ १८ ॥ १९ ॥ पितृव्यखातमनु यः पंथास्तं ययौ भस्मांति भस्मसमीपे ॥ २० ॥ २१ ॥ अजानंतोऽवजानंतोऽप्यनुकंप्या वयं त्वितिि ॥ तुष्टाव षड्भिरीशानमंशुमानेवमाशयः ॥ अजनोऽजो ब्रह्माऽपि त्वामद्यापि न पश्यति न च बुध्यते । कथंभूतम् आत्मनः स्वस्मात्परं परमेश्वरम् । कैर्हेतुभिः । समाधियुक्तिभिः समाधिनाऽप्यपरोक्षं न पश्यति युक्तिभिः परोक्षमपि सम्यङ् न बुध्यत इत्यर्थः । अपरेऽर्वाचीनास्तु कुतस्त्वां पश्येयुः । अर्वाचीनत्वे हेतुः । तस्य ब्रह्मणो मनश्च शरीरं च धीश्च सत्त्वतमोरजःकार्याणि ताभिर्ये विविधा देवतिर्यङ्नराणां सर्गास्तेषु सृष्टास्तत्रापि वयमप्रकाशा अज्ञाः कुतः पश्यामेत्यर्थः ॥ २२ ॥

॥ १६ ॥ यतो योगाद्विचालितोऽतो हेतोः । इदानीं वर्तमानजन्मनि जातिं पूर्वजन्म स्मरतीति तथा । योगादीश्वरोपासनारूपात् ॥ १६ ॥ उद्वेजयन् भीषयन् ॥ १७ ॥ एवंविधं नद्यां बालप्रक्षेपलक्षणम् । तान् नगरः ॥ १९ ॥ ... दीजलमग्नान् । एते युष्मद्बाला इति दर्शयित्वा ततोऽयोध्यातः । अयोध्यावासिन इत्यग्रे वक्ष्यमाणत्वात् ॥ १८ ॥ राजा सगरः । अन्वतप्यत पुत्रगमनेन पश्चात्तापं प्रापत् ॥ १९ ॥ २० ॥ तत्र भस्मसमीपे । महान् महदादरकर्त्ता ॥ २१ ॥ एवमाशयः—श्रो ज्ञानुकंपिहरिप्रसादाकांक्षिचेतास्तुष्टाव स्तुतिं चकार। स्तुतिश्च द्वेधा विद्यमानगुणविषयाऽविद्यमानगुणविषया च । तत्र द्वितीया विद्वदविद्वद्विषयभेदेन द्विधा । उभयतोपि तस्याः स्तुतेः फलं न लभ्यते विदुषः । आत्मन्यविद्यमानगुणकथनेन स्तोतारि द्वेषसंभवात् । अविदुषोऽज्ञानेन मुखविकाशादिसंभवेऽपि स्तोतुः स्तुतिफलप्रदानसामग्र्यभावादतः प्रथमैव श्रेयसीति भावेन स्तौति—न पश्यतीति । ब्रह्मादिदुर्ज्ञेये मादृशानां इत्यर्थ इति । "कः छंदसां योग मा वेद धीरः को धिया प्रतिवाचं पपार" इति श्रुतेरिति भावः । ताभिर्मनआदिरूपेण परिणतसत्त्वादिशक्तिभिः । तत्रापि तेषु सर्गेष्वपि । इत्यर्थ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये देहभाजास्त्रिगुणप्रधाना गुणान् विपश्यंत्युत वा तमश्च ॥ यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिःप्रकाशाः ॥ २३ ॥ तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः ॥ सनंदनाद्यैर्मुनिभिर्विभाव्यं कथं हि मूढः परिभावयामि ॥ २४ ॥ प्रशांतमायागुणकर्मलिंगमनामरूपं सदसद्विमुक्तम् ॥ ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणम् ॥ २५ ॥ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु ॥ भ्रमंति कामलोभेर्ष्यामोहविभ्रांतचेतसः ॥ २६ ॥ अद्य नः सर्वभूतात्मन् कामकर्मेंद्रियाशयः ॥ मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥ २७ ॥

अपरे तर्हि किं पश्यंति तदाह । ये देहभाजस्ते स्वस्मिन्सम्यक् स्थितमपि त्वां न विदुः किं तु गुणानेव विपश्यंति । अथ वा न गुणानपि तु तम एव पश्यंति । यतस्त्रिगुणा बुद्धिरेव प्रधानं येषामतो बहिरेव प्रकाशो ज्ञानं येषाम् । बुद्धिपरतंत्रतया जाग्रत्स्वप्नयोर्विषयान्पश्यंति सुषुप्तौ तम एव केवलं न तु निर्गुणं त्वाम् । सर्वत्र हेतुः । यद्यतः यस्य तव माययेति वा मोहितं चेतो येषां ते ॥ २३ ॥ तथाऽप्यहं विचारेण ज्ञास्यामीति चेत्तत्राह । तं त्वामहं विमूढः कथं परिभावयामि विचारयामि । कथंभूतम् । ज्ञानघनं शुद्धज्ञानमूर्तिम् । स्वत एव प्रध्वस्तौ मायागुणनिमित्तौ भेदमोहौ येषां तैर्विभाव्यं विचिंत्यम् । अयं भावः । ज्ञानघनत्वान्न तावज्ज्ञानविषयत्वम् । विचारविषयत्वेऽपि मायागुणैरभिभूतोऽहं न विचारे समर्थ इति ॥२४॥ हे प्रशांत तस्मात्त्वां पुरुषं पुराणं केवलं नमामेत्यन्वयः । पुराणपुरुषत्वे हेतुः । मायाया गुणाः कर्माणि च विश्वसृष्ट्यादीनि लिंगानि च ब्रह्मादिरूपाणि यस्य तम् । प्रशांतत्वे हेतुः । सदसद्भ्यां कार्यकारणाभ्यां पुण्यपापाभ्यां वा विमुक्तम् । अतोऽनामरूपं तत्तत्कृतनामरूपशून्यं किं तु ज्ञानोपदेशाय गृहीतः प्रकटितो देहः शुद्धसत्त्वमूर्तिर्येन तम् । यद्वा हे प्रशांतमायेति हे अगुणेति च संबोध्य कर्मभिः सृष्ट्यादिकार्यैर्लिंगानि यस्येति योज्यम् । यद्वा प्रशांता मायागुणादयो यस्मिन्नित्येकमेव पदम् ॥२५॥ स्वभाग्यं श्लाघते त्वन्मायेति द्वाभ्याम् । कामादिभिर्विभ्रांतानि चेतांसि येषां ते इमे सर्वे गृहादिषु भ्रमंति ॥२६॥ हे सर्वभूतात्मन्

तज्ज्ञानं कथं स्यादिति भावः ॥ २२ ॥ अतस्त्रिगुणप्रधानत्वात् ॥ २३ ॥ यद्यपि त्वं दुर्ज्ञेयस्तथापीति । अत्राशयमाह–अयं भाव इति । ज्ञानस्वरूपस्य ज्ञानविषयत्वे त्वात्माश्रयोऽनात्मत्वं च स्यादतो विमृश्य एवेत्याह–विचारविषयत्वेपीति । विचारो निदिध्यासनम् । ज्ञानं श्रवणादीति भेदः ॥ २४ ॥ यतो विचारासमर्थोऽहं तस्माद्धेतोः । बहुत्वं पितामहाद्यभिप्रायम् । गुणाः सत्त्वादयः । पुरुषस्य स्वतोऽसंगत्वान्मायया सृष्ट्यादिहेतुत्वात्प्राकालिकत्वाच्च पुराणत्वं कार्यकारणाकारेण प्रतीयमानत्वात्कथं तद्विमुक्तमिति चेदाह–पुण्यपापाभ्यां विमुक्तम् असंगम् तत्कृताभ्यां कार्यकारणकृताभ्याम् नामरूपाभ्यां शून्यं वस्तुतो नामरूपशून्यत्वेपि भक्तानुग्रहाय तद्धाति "योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः । नामानि रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदताम् ॥" इत्युक्तेरित्याह–किं त्विति । ननु प्रशांते मायागुणादिसंबंधो न संगच्छते तत्संबंधे प्रशांतत्वस्यैवासम्भवादित्यत आह–यद्वेति । पुनरपि तद्दोषतादवस्थ्यमेव प्रशांतमायागुणयोर्मायागुणकृतसर्गादिलिंगासंभवादत आह–यद्वेति ॥ २५ ॥ कामो विषयेच्छा । लोभो धर्मादिविपयार्थत्यागानिच्छा । ईर्ष्याऽक्षमा । मोहो वैचित्यम् एतैः । गृहादिष्वित्यादिना अर्थादिग्रहः ॥ २६ ॥ सर्वभूतात्मनः सर्वांतर्यामिणः । मोहमयोऽज्ञानहेतुकः । इत्यर्थ इति । भगवत्प्रसादादप्राप्यमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्थंगीतानुभावस्तं भगवान् कपिलो मुनिः ॥ अंशुमंतमुवाचेदमनुगृह्य धिया नृप ॥ २८ ॥ श्रीभगवानुवाच ॥ अश्वोऽयं नीयतां वत्स पितामहपशुस्तव ॥ इमे च पितरो दग्धा गंगांभोऽर्हंति नेतरत् ॥ २९ ॥ तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ॥ सगरस्तेन पशुना क्रतुशेषं समापयत् ॥ ३० ॥ राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबंधनः ॥ और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥ ३१ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे सगरोपाख्यानेऽष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥ अंशुमांश्च तपस्तेपे गंगानयनकाम्यया ॥ कालं महांतं नाशक्नोत्ततः कालेन संस्थितः ॥ १ ॥ दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान् ॥ भगीरथस्तस्य पुत्रस्तेपे स सुमहत्तपः ॥ २ ॥ दर्शयामास तं देवी प्रसन्ना वरदाऽस्मि ते ॥ इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ॥ ३ ॥ कोऽपि धारयिता वेगं पतंत्या मे महीतले ॥ अन्यथा भूतलं भित्त्वा नृप यास्ये रसातलम् ॥ ४ ॥

नोऽस्माकं त्वत्कृपयैव घटितात्त्वद्दर्शनादतिदृढोऽपि मोहमयः पाशश्छिन्नः । कथंभूतः । कामादीनामाशय आश्रयः । त्वत्प्रसादेन कृतार्थोऽस्मीत्यर्थः ॥ २७ ॥ २८ ॥ अश्वं लब्ध्वाऽपि साकांक्षं प्रत्याह । इमे चेति ॥ २९ ॥ तं परिक्रम्येति शुकोक्तिः ॥ ३० ॥ ३१ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥ नवमेंशुमतो वंशः खट्वांगावधि वर्ण्यते ॥ गंगां भूतलमानिन्ये यस्य पौत्रो भगीरथः ॥ १ ॥ यथा सगरः पौत्राय राज्यं दत्त्वा तपस्तेपे तथांशुमांश्च स्वपुत्राय राज्यं दत्त्वा महांतं कालं तपस्तेपे इति चकारस्यार्थः । नाशक्नोत् गंगामानेतुमिति शेषः । संस्थितो मृतः ॥ १ ॥ कालं मृत्युमेयिवान्प्राप्तः ॥ २ ॥ तं प्रत्यात्मानं दर्शयामास । ते वरदास्मीति गंगयोक्तः सन्स्वमभिप्रायं पूर्वजोद्धरणं शशंस कथयामास ॥ ३ ॥ आह गंगा । कोऽपि गगनात्पतंत्या मे वेगं धारयिता धारयिष्यति ॥ ४ ॥

प्राप्यते इति भावः ॥ २७ ॥ नृपाणां महदाराधनमेव धर्म इति संबुद्ध्यभिप्रायः ॥ २८ ॥ वत्सेति । प्रियात्वास्पदतामाह । तदेवाह–गंगांभ इति । अर्हन्ति अपेक्षन्ते । विप्रावमानहतत्वात्तदुक्तम् । "ब्रह्मावज्ञाहतानाञ्च शुद्धिर्नेह कथंचन । विना गंगांभसो राजन्प्रायश्चित्तशैरपि ॥" इति पुराणांतरे ॥ किञ्च "गंगा हिमवतो ज्येष्ठा दुहिता पुरुषर्षभ । तस्यां कुरु महाबाहो पितॄणां सलिलक्रियाम् ॥ चांडालादुदकात्सर्पाद्वैद्युताद्ब्राह्मणादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥ उदकं पिंडदानं च न तु तेषां विधीयते ॥" इति स्मृतेः । "श्रीगंगाजलस्पृष्टानां प्रायश्चित्तं विनैव हि । और्ध्वदैहिकयोग्यत्वं जायते पापमृत्युतः ॥" इत्युक्तेः । "पापमृत्युमृतानां च गंगायामुदकक्रिया । भवेद्येषां ते नरा हि गच्छंति कृतिनां पदम् ॥" इत्युक्तेश्च । नेतरत् गंगोदकेतरदेषां तरणसाधनं नास्तीत्यर्थः ॥२९॥ तं कपिलम् । तेन अंशुमदानीतेन । पशुनाऽश्वेन ॥३०॥ अनुत्तमां मोक्षलक्षणाम् ॥ ३१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कंधेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ यस्यांशुमतः (१) ततो गंगानयनं विनैव तपसोऽनंतरम् ॥ १ ॥ तत्सुतोंऽशुमत्सुतः । तद्वदंशुमद्वत् । गंगामानेतुमशक्तः । तस्य दिलीपस्य ॥ २ ॥ तं भगीरथम् ॥ ३ ॥ कोपि कश्चिदपि ब्रह्मापि वा न कोपीति । अन्यथा मद्वेगधारयित्रभावे । त्वं तु नृप एव न त्वमरेष्वसमत्सदशेषु तत्राज्ञास्तीति संबुद्ध्यभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं चाहं न भुवं यास्ये नरा मय्यामृजंत्यघम् ॥ मृजामि तदघं कुत्र राजंस्तत्र विचिंत्यताम् ॥ ५ ॥ भगीरथ उवाच ॥ साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपावनाः ॥ हरंत्यघं तेंगसंगात् तेष्वास्ते ह्यघभिद्धरिः ॥ ६ ॥ धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् ॥ यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तंतुषु ॥ ७ ॥ इत्युक्त्वा स नृपो देवं तपसाऽतोषयच्छिवम् ॥ कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥ ८ ॥ तथेति राज्ञाभिहितं सर्वलोकहितः शिवः ॥ दधारावहितो गंगां पादपूतजलां हरेः ॥ ९ ॥ भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् ॥ यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥ १० ॥ रथेन वायुवेगेन प्रयांतमनुधावती ॥ देशान्पुनंती निर्दग्धानासिंचत्सगरात्मजान् ॥ ११ ॥ यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अपि ॥ सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥ १२ ॥

किं च आमृजंति क्षालयंति तत्रोपायो विचिंत्यताम् ॥ ५ ॥ अघं हरंति हरिष्यंति । अघं भिनत्तीत्यघभित् ॥ ६ ॥ आत्मा कथंभूतः । यस्मिन्निदं विश्वमोतं ग्रथितमूर्द्धतंतुषु शाटीव पट इव प्रोतं च तिर्यक्तंतुषु पट इव । असौ सर्वाधारस्त्वद्वेगं धारयिष्यतीत्यर्थः ॥ ७ ॥ इत्येवं गंगामुक्त्वा । तच्छ्रुत्वेति पाठे श्रावयित्वेत्यर्थः ॥ ८ ॥ राज्ञाऽभिहितं तथेत्यंगीकृत्य । हरेः पादेन पूतं जलं यस्याः ॥ ९ ॥ १० ॥ ११ ॥ प्रसंगाद्गंगामाहात्म्यमाह चतुर्भिः । यस्या जलस्पर्शमात्रेण तच्च केवलं देहभस्माभिरेव न

प्रायः ॥ ४ ॥ तत्रानागमने कारणांतरमाह–तत् मनुष्यत्यक्तम् । कुत्र स्थले मृजामि मार्ज्मि शब्लुगभावोऽत्रार्षः। तत्र मदघमार्जननिमित्तम् । नरास्तु मय्यघं निक्षिप्य शुद्धा भविष्यंति स्वाघमहं कुत्र निक्षिप्य शुद्धा भविष्यामीति विचार्यतामिति भावः ॥ ५ ॥ प्रथमं द्वितीयप्रश्नस्योत्तरमाह–साधवः शास्त्रानुयायिनः । न्यासिनः भगवदर्पितसर्वकर्मफलाः । शांताः शमादिसाधनसंपन्नाः । ब्रह्मिष्ठा इति ब्रह्म जातिर्वेदो वात्मध्यानं वा विद्यते येषां ते ब्रह्मवन्तोऽतिशयेन ब्रह्मवंतो ब्रह्मिष्ठाः । "विन्मतोर्लुक्" इतीष्ठनि मतुपो लुक् । तथा च वेदाभ्यासरता हरिभक्ता ब्राह्मणा इत्यायातम् । ब्रह्मणि स्थिता इत्यर्थस्वीकारे ब्रह्मस्था इत्येव स्यात् । तदेव समर्थयति । लोकपानिंद्रादीनप्यवंति बृहस्पत्यादिरूपेण याजयितृरूपेण वेति तथा । यद्वा–लोकान्पावयंति सन्मार्गोपदेशेनेति वा । 'ब्राह्मणेभ्यो नमस्यामः' इत्यारभ्य "श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः । शुद्ध्येरन्नंत्यजाश्चापि किमु संभाषणादिभिः ॥ " इति मार्कंडेयं प्रति शंकरोक्तेः । अंगसंगात्त्वयि स्नानात् । तर्हि ते पापिनो भविष्यंतीति चेदाह–तेष्विति । सर्वव्यापिनोऽपि हरेस्तेषु ज्ञातत्वेन साक्षात्स्थितत्वात्तस्य च हरति पापमित्यन्वर्थनामत्वान्न तेषां पापसंसर्गो भवितुमर्हति । "विषशीतापहौ मंत्रवह्नी किं दोषभागिनौ" इति न्यायाद्ब्रह्मनिष्ठावतां संगादन्यस्यापि पापो नोत्पद्यते किं तेषामिति भावः । पापहारित्वं भगवत आह–अघभिदिति । स्वत एव पापानि तान्नोपसर्पंति भेदकत्वाद्बिडालं मूषिका इवेत्यर्थः ॥ ६ ॥ द्वितीयस्योत्तरं दत्त्वा प्रथमप्रश्नोत्तरमाह–धारयिष्यतीति । रूणि दुःखानि द्रावयति सर्वेषामिति रुद्रः । दयालुत्वान्ममोपर्यपि दयां करिष्यति स मद्दुःखद्रावणेन । इत्यर्थ इति । सर्वविश्वधारिणो विश्वैकदेशभूतायास्तव धारणं नाद्भुतमिति भावः । "पटे शाटी शंकरस्य भार्यायां धौतवाससि" इति निरुक्तिः ॥ ७ ॥ इत्यर्थ इति । आर्षत्वादिति भावः । स भगीरथः । शीघ्रप्रसादत्वमाह–कालेनेति ॥ ८ ॥ अवहित इति । अतिदुर्लभमिदं भगवत्पादांभ इतस्ततो मा गच्छेदिति सावधानः ॥ ९ ॥ तत्र निन्ये इति योज्यं यत्तदोर्नित्यसंबंधात् ॥ १० ॥ प्रयान्तं भगीरथमनुधावती पृष्ठतो गच्छंती । देशान्मार्गागतान् ॥ ११ ॥ तच्च स्पर्शनमपि । भस्मीभूतेति । अत एवोक्तम् "दशाहाभ्यंतरे यस्य गंगातोयेऽस्थि मज्जति । गंगायां मरणं यादृक्तादृक्फलमवाप्नुयात् ॥ " इति नारदीये ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भस्मीभूतांगसंगेन स्वर्याताः सगरात्मजाः ॥ किं पुनः श्रद्धया देवीं ये सेवंते धृतव्रताः ॥ १३ ॥ न ह्येतत् परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ॥ अनंतचरणांभोजप्रसूताया भवच्छिदः ॥ १४ ॥ संनिवेश्य मनो यस्मिञ्छ्रद्धया मुनयोऽमलाः ॥ त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम् ॥ ॥ १५ ॥ श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ॥ सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥ १६ ॥ ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् ॥ दत्त्वाऽक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः ॥ १७ ॥ ततः सुदासस्तत्पुत्रो मदयंतीपतिर्नृपः ॥ आहुर्मित्रसहं यं वै कल्माषांघ्रिमुत क्वचित् ॥ वशिष्ठशापाद्रक्षोऽभूदनपत्यः स्वकर्मणा ॥ १८ ॥ राजोवाच ॥ किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः ॥ एतद्वेदितुमिच्छामः कथ्यतां न रहो यदि ॥ १९ ॥ श्रीशुक उवाच ॥ सौदासो मृगयां किंचिच्चरन्रक्षो जघान ह ॥ मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥ २० ॥ स चिंतयन्नघं राज्ञः सूदरूपधरो गृहे ॥ गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् ॥ २१ ॥

साक्षात् । ब्रह्मणि स्वकृतेन दंडेन हता अपि ॥ १२ ॥ तत्प्रपंचयति । भस्मीभूतेनांगेन यः संगस्तेन तां श्रद्धया ये सेवंते ते इति शेषः ॥ १३ ॥ १४ ॥ अनंतस्य विशेषणं संनिवेश्येति । त्रैगुण्यं देहसंबंधम् ॥ १५ ॥ १६ ॥ नलस्य सखा । अयात्प्राप्तः । तत्सुतः ऋतुपर्णस्य सुतः ॥ १७ ॥ तत्पुत्रः सौदासः ॥ १८ ॥ न रहो न रहस्यम् ॥ १९ ॥ मृगयां चरन्कंचिद्राक्षसं जघान तस्य भ्रातरं मुमोच । स भ्राता पलाय्य गतः ॥ २० ॥ अघमनिष्टम् । सूदः पाचकस्तद्रूपधरः सन् राज्ञो गृहे वर्तमानः ॥ २१ ॥

तां गंगाम् । ब्रह्मदण्डहतस्यापरिहार्यनरकवासत्वादित्यपिनोक्तम् "न ब्रह्मदण्डदग्धस्य न भूतभयदस्य च । नारकाश्चानुगृह्णंति यांयां योनिमसौ व्रजेत् ॥" इति वचनान्नारकाः श्वशूकरगर्दभादयोऽपि तं न स्पृशंत्यतिगर्हितत्वादिति ॥ १२ ॥ तत् श्रद्धया सेवनम् । ते यदि स्वर्गं प्राप्नुवंतीति किमु वक्तव्यं पुनरिति कैमुत्यमुक्तम् ॥ १३ ॥ यन्माहात्म्यं स्वर्धुन्या इहोदितमेतदाश्चर्यं न किं त्वितोऽप्यधिकं तच्चाद्यपद्यव्याख्याशतके निरूपितम् । तत्र हेतुः—अनन्तेत्यादि । अनन्तोद्भूताया माहात्म्यानंत्यमुचितमेव । कारणगुणानां कार्येनुवृत्तिदर्शनात् । भवच्छिदः संसारच्छेत्र्याः । "इदं हि गांगं त्यजतामिहांगं पुनर्न चांगम्—" इत्याद्युक्तेः ॥ १४ ॥ यस्मिन्ननंते वा तदुद्भूतगांगप्रवाहे । "स्मरणादेव गंगाया मुक्तिभागी भवेन्नरः" इत्युक्तेः । दुस्त्यजं ज्ञानं विना त्यक्तुमशक्यम् । तदात्मतामनंतस्वरूपताम् । "—यदि वापि चांगम् । करे रथांगं शयनेभुजंगं याने विहंगं चरणेऽम्बु गांगम् ॥" इति गंगापक्षे "स्थित्वास्यामंतकालेपि ब्रह्म निर्वाणमृच्छति" इत्यनंतपक्षे ॥ १५ ॥ तस्य श्रुतस्य । अपरो मानवसुतादन्यः । ततो नाभात् । तस्मात्सिंधुद्वीपात् । ततोऽयुतायुषः । ऋतुपर्ण इत्यग्रिमेण संबंधः ॥ ॥ १६ ॥ य ऋतुपर्णः । अश्वानां दूरदेशचालनपालनचिकित्सादिरूपां विद्याम् । अस्मै नलाय । अक्षाणां पाशकानां हृदयमभिलाषानुरूपपातनमंत्रम् ॥ १७ ॥ ततः सर्वकामात् । तत्पुत्रः सुदासपुत्रः । यं सौदाम् । क्वचित्कारणांतरे । रक्षः राक्षसः ॥ १८ ॥ महात्मनो दयायुक्तस्य "दिशः खमवनिं सर्वं पश्यञ्जविमयं नृपः" इति वक्ष्यमाणत्वात् । एतच्छापकारणम् ॥ १९ ॥ अथ सुदासात्मजान्मुक्तेरनन्तरम् । स रक्षोभ्राता । प्रतिचिकीर्षया भ्रातृहननप्रतीकारेच्छया । गतः सौदासमिति शेषः । यद्वा—स भ्रातरं मृतं मुमोचेति "ततः पलायनं कृत्वा गतश्च प्रतिचिकीर्षया । " इत्युक्तेः ॥ २० ॥ गुरवे वशिष्ठाय ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिवेक्ष्यमाणं भगवान् विलोक्याभक्ष्यमंजसा ॥ राजानमशपत्क्रुद्धो रक्षो ह्येवं भविष्यसि ॥ २२ ॥ रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम् ॥
सोऽप्यपोंजलिनादाय गुरुं शप्तुं समुद्यतः ॥ २३ ॥ वारितो मदयंत्यापो रुशतीः पादयोर्जहौ ॥ दिशः खमवनीं सर्वं पश्यञ्जीवमयं नृपः ॥ २४ ॥
राक्षसं भावमापन्नः पादे कल्माषतां गतः ॥ व्यवायकाले ददृशे वनौकोदंपती द्विजौ ॥ २५ ॥ क्षुधार्तो जगृहे विप्रं तत्पत्न्याऽऽहाऽकृतार्थवत् ॥
न भवान्राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥ २६ ॥ मदयंत्याः पतिर्वीर नाधर्मं कर्तुमर्हसि ॥ देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजम् ॥
॥ २७ ॥ देहोऽयं मानुषो राजन्पुरुषस्याखिलार्थदः ॥ तस्मादस्य वधो वीर सर्वार्थवध उच्यते ॥ २८ ॥ एष हि ब्राह्मणो विद्वांस्तपःशीलगुणा
न्वितः ॥ आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ॥ सर्वभूतात्मभावेन भूतेष्वंतर्हितं गुणैः ॥ २९ ॥ सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद्विभो ॥ कथम
र्हति धर्मज्ञ वधं पितुरिवात्मजः ॥ ३० ॥ तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ॥ कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान् ॥ ३१ ॥

अभक्ष्यमंजसा विलोक्य एवं नरमांसव्यवहारेण ॥ २२ ॥ वशिष्ठ एव तं शापं द्वादशवार्षिकं चक्रे ॥ २३ ॥ रुशतीस्तीक्ष्णा अपः स्वपादयोर्जहौ नान्यत्र तत्र हेतुः । दिश इति । एवमनेन मित्रसहत्वमपि दर्शितम् । मित्रस्य कलत्रस्य वाचः सहनात् ॥ २४ ॥ तदेवं राक्षसत्वे कल्माषांघ्रित्वे च कारणमुक्त्वा स्वकर्मणाऽनपत्य इति यदुक्तं तत्प्रपंचयति । व्यवायकाल इत्यादिना कर्मणा अप्रजा इत्यंतेन । वनमोको निवासो ययोस्तौ वनौकसौ च तौ दंपती च । पृथक्पदत्वे सकारलोप आर्षः ॥ २५ ॥ अकृतार्थवद्दीनवत् ॥ २६ ॥ अकृतार्थमसमाप्तरतिम् ॥ २७ ॥ २८ ॥ सर्वभूतानामात्मेति भावनयाऽऽराधयितुमिच्छुः । यद्वा सर्वभूतानामात्मभावेन भूतेषु स्थितमपि गुणै रंतर्हितं ब्रह्मेति संबंधः । पाठांतरे अंतर्हितः सोऽयमित्युत्तरेणान्वयः ॥ २९ ॥ ३० ॥ भ्रूणस्य श्रोत्रियस्य । गर्भस्य सत इति वा । बभ्रोर्गोः । सतां मतो भवान्वधं कथं

नरामिषं नरमांसम् ॥ २१ ॥ भगवान्सर्वज्ञो वशिष्ठः । परिवेक्ष्यमाणं भोजनपात्रे क्रियमाणम् ॥ २२ ॥ न मयेदं कारितं नरामिषं किन्तु सूदेन स्वेच्छया कृतमिति राजकथनं तत्पदार्थः । सोऽपि सौदासोपि ॥ २३ ॥ तत्र पादयोस्त्यागे । एवम् इत्थम् । अनेन अन्यत्र शापजलात्यागेन । रुशतीर्हिंसयंतीर्मंत्रितत्वात् । यद्वा हतं प्रतिचिकीर्षाम इति शब्दायमानाः "माघमासे रटंत्यापः' इति वचनात् । 'रुश–हिंसायां शब्दे च' इति धातुपाठात् ॥ २४ ॥ कल्माषतां वनमाषवर्णवत्ताम् । व्यवायकाले मैथुनावसरे ॥ २५ ॥ तत्पत्नी ब्राह्मणी । राक्षसस्य कृपाजननायावध्यत्वेऽनेककारणान्याह–न भवानिति । साक्षाद्राक्षसो न किं त्विक्ष्वाकूणां महारथः ॥ २६ ॥ यथा त्वं मदयंत्या अनपत्यायाः प्रियस्तथाऽयं ममेति । अकृतार्थम् अगतपितृणम् ॥ २७ ॥ अखिलार्थदश्चतुर्वर्गप्रदः । यत इत्थं तस्मात् । अस्य मनुष्यदेहस्य । सर्वार्थवधश्चतुर्वर्गहानिकरः ॥ २८ ॥ ॥ २२ ॥
अस्य तु सर्वथा वधोऽकार्य एवेत्याह–एष इत्यादि । ब्राह्मणत्वेऽपि विद्वान् धर्माधर्मज्ञः । तत्रापि तप इत्यादि । महापुरुषः सर्वनियंतेति संज्ञा जाता अस्य तद्ब्रह्म । सर्वभूतात्मभावेनाराधायितुमिच्छुरित्यन्वयः ।: ब्रह्माराधनं तु "सर्वं खल्विदं ब्रह्म" इति श्रुतेः सर्वभूतात्मभावेनैव भवति । पुनः कथनं पुनरुक्तमिव प्रतीयत इत्याह–यद्वेति । पाठांतरे 'अंतर्हितो गुणैः' इति पाठे ॥ २९ ॥ ३० ॥ गर्भस्य सत इदानीमेव मयि गर्भरूपेणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्ययं क्रियते भक्षस्तर्हि मां खाद पूर्वतः ॥ न जीविष्ये विना येन क्षणं च मृतकं यथा ॥ ३२ ॥ एवं करुणभाषिण्या विलपंत्या अनाथवत् ॥ व्याघ्रः पशुमिवाखादत्सौदासः शापमोहितः ॥ ३३ ॥ ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् ॥ शोचंत्यात्मानमुर्वीशमशपत्कुपिता सती ॥ ॥ ३४ ॥ यस्मान्मे भक्षितः पाप कामार्तायाः पतिस्त्वया ॥ तवापि मृत्युराधानादकृतप्रज्ञ दर्शितः ॥ ३५ ॥ एवं मित्रसहं शप्त्वा पतिलोकपरायणा ॥ तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ॥ ३६ ॥ विशापो द्वादशाब्दांते मैथुनाय समुद्यतः ॥ विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ॥ ३७ ॥ तत ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजाः ॥ वशिष्ठस्तदनुज्ञातो मदयंत्यां प्रजामधात् ॥ ३८ ॥ स वै सप्त समा गर्भमबिभ्रन्न व्यजायत ॥ जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ॥ ३९ ॥ अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ॥ नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥ ४० ॥

साधु मन्यते इत्यर्थः ॥ ३१ ॥ क्षणमपि येन विना न जीविष्यामि सोऽयं यदि भक्षः क्रियते तर्हि मृतकं यथा मृतशायां मां पूर्वं भक्षय ॥ ३२ ॥ ३३ ॥ दिधिषुं गर्भाधानकर्तारम् ॥ ३४ ॥ आधानान्मैथुनात् । हे अकृतप्रज्ञ मृत्युर्मया दर्शितः ॥ ३५ ॥ ३६ ॥ ३७ ॥ तदेवं कर्मणा अप्रजाः ॥ ३८ ॥ अबिभ्रद्धारेत्यर्थः । न व्यजायत न प्रासूत अतो वशिष्ठ एव तस्या उदरमश्मना जघान । स उत्पन्नः सुतोऽश्मकः ॥ ३९ ॥ स्त्रीभिः संवेष्ट्य परशुरामात्परिरक्षितोऽतो नारीकवच इत्युक्तः । निःक्षत्रे सति

त्पत्स्यमानत्वाद्गर्भरूपस्य सत इत्यर्थः । "अथ भ्रूणो गार्भिण्यां श्रोत्रिये द्विजे । अर्भके त्रैणगर्भे च" इति हैमः । भ्रूणस्य श्रोत्रियस्येत्यर्थः । "जन्मना ब्राह्मणो ज्ञेयः संस्कारात्तु द्विजो भवेत् । वेदाभ्यासाद्भवेद्विप्रस्त्रिभिश्श्रोत्रियशब्दभाक् ॥" इति याज्ञवाल्क्योक्तेः । ब्रह्मद्विषस्तु 'जन्मना जायते शूद्रः' इति वदन्ति ते तु 'ब्राह्मण्यां ब्राह्मणज्जातो ब्राह्मणः परिकीर्त्तितः' इति जातूकर्ण्योक्त्या परिहार्याः। न हि गौर्वृषभसङ्गाद्छ्वानं रासभं वा जनयितुं कदापि कल्पा भवितुमर्हति किं तु गोरूपमेव वत्सं जनयति तथैव ब्राह्मणी ब्राह्मणाद्ब्राह्मणमेव जनयति न कदापि शूद्रमिति भावः । इत्यर्थ इति । न हि सत्संभावितस्य ते ब्राह्मणहननमुचितमिति भावः । "माहेयी सौरभेयी च बभ्रुरघ्न्या रमाश्रयः" इति धरणिः ॥ ३१ ॥ पूर्वत इति सप्तम्यर्थे तसिः । पूर्वस्मिन्काले इत्यर्थः ॥ ३२ ॥ अखादत् तमिति शेषः ॥ ३३ ॥ "पत्यौ धैर्यहरे पुंसि दिधिषुर्धारणेच्छके । द्विरूढायाः स्त्रिया: पत्यौ दीर्घांतोऽप्ययमिष्यते ॥" इति कोशात् ॥३४॥ "आधानं मैथुने स्थाने पात्रे गर्भस्य धारणे" इति निरुक्तिः । दर्शितः मया शापेनेति शेषः । अकृता शिक्षाहीना प्रज्ञा यस्य स तथा ॥३५॥ तदस्थीनि पत्यस्थीनि । प्रास्य प्रक्षिप्य ॥ ३६ ॥ स मित्रसहः ॥ ३७ ॥ ततः शापादूर्ध्वम् । स्त्रीसुखं व्यवायम् । कर्मणा व्यवायप्रवृत्तविप्रभक्षणलक्षणेन अप्रजोऽभूदित्यर्थः । तद्वंशप्रवृत्तिः कथं जातेति चेदाह—वशिष्ठ इति । तदनुज्ञातः मित्रसहप्रार्थनया मद्भार्यायां पुत्त्रमुत्पादयेत्येवं रूपया ॥ ३८ ॥ सा मदयंती । समा वत्सरान् । इत्यर्थ इति । भृञः पोषणार्थो नात्र ग्राह्य इति भावः । यतो न व्ययजायत आतो हेतोः। तस्या मदयंत्याः । अश्मना पाषाणेन । तेनाश्मना कुट्टनेन हेतुनाश्मकः पृषोदरादित्वादत्र कादेशो आकृष्टशब्दस्य ॥ ३९ ॥ अतः स्त्रीरक्षणात् । निःक्षत्त्रे परशुरामेण दुष्टक्षत्त्रसंहारे सति । क्षत्त्रमूलं यतोऽतो हेतोः ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो दशरथस्तस्मात् पुत्र ऐडविडस्ततः ॥ राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत् ॥ ४१ ॥ यो देवैरर्थितो दैत्यानवधीद् युधि दुर्जयः ॥ मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ॥ ४२ ॥ न मे ब्रह्मकुलात्प्राणाः कुलदैवान्न चात्मजाः ॥ न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ॥ ॥ ४३ ॥ न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् ॥ न पश्याम्युत्तमश्लोकादन्यत्किंचन वस्त्वहम् ॥ ४४ ॥ देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ॥ न वृणे तमहं कामं भूतभावनभावनः ॥ ४५ ॥ ये विक्षिप्तेंद्रियधियो देवास्ते स्वहृदि स्थितम् ॥ न विंदंति प्रियं शश्वदात्मानं किमुतापरे ॥ ४६ ॥ अथेशमायारचितेषु संगं गुणेषु गंधर्वपुरोपमेषु ॥ रूढं प्रकृत्याऽऽत्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥ ४७ ॥ इति व्यवसितो बुद्ध्या नारायणगृहीतया ॥ हित्वाऽन्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥४८॥ यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् ॥ भगवान्वासुदेवेति यं गृणंति हि सात्वताः॥४९॥इति श्रीमद्भा०महा०नवम०सूर्यवंशानुवर्णने नवमोऽध्यायः॥९॥ श्रीशुक उवाच॥ खट्वांगाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः॥ अजस्ततो महाराज तस्माद्दशरथोऽभवत् ॥१॥ तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः॥ अंशांशेन चतुर्धाऽगात्पुत्रत्वं प्रार्थितः सुरैः ॥२॥

क्षत्रवंशस्य मूलमभवदतो मूलक इति चोक्तः ॥ ४० ॥ ४१ ॥ प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते खट्वांगेनोक्तं प्रथमं तावन्ममायुः कथ्यतामिति । देवैश्चोक्तं मुहूर्तमात्रमिति । तज्ज्ञात्वा देवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे संदधे ।। ४२ ।। एतदेव स्वस्य साधुवृत्तानुस्मरणपूर्वकं तत्कृतेन निश्चयेन दर्शयति । नेति सप्तभिः । कुलदैवाद्ब्रह्मकुलात्सकाशान्मे प्राणादयो नातिवल्लभा नातिप्रियाः ॥ ४३ ॥ मह्यं मम ॥ ४४ ॥ भूतभावनो हरिस्तस्मिन्नेव भावना यस्य सोऽहं तं कामं न वृणे ॥ ४५ ।। तत्र हेतुः । य इति विक्षिप्तानींद्रियाणि धीश्च येषां ते देवा अपि ।। ४६ ।। अथ तस्मात्प्रकृत्या स्वभावेनात्मनि रूढं गुणेषु संगं विश्वकर्तुर्भावेन हित्वा तमेवाहं प्रपद्ये ।।४७।। अन्यभावं देहाद्यभिमानरूपमज्ञानं हित्वा ॥ ४८ ॥ स्वं भावमेवाह । यत्तदिति । शून्यवत्कल्पितं वागाद्यविषयत्वात् । वासुदेव इति यं गृणंति । ब्रह्मण एव भक्तानुग्रहार्थमाविष्कृततनोर्वासुदेवत्वात् ॥ ४९ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां नवमोऽध्यायः ॥ ९ ॥ दशमे प्राह खट्वांगवंशे श्रीरामसंभवम् ॥ तच्चरित्रं च लंकेशं हत्वाऽयोध्यागमावधि ॥ १ ॥ खट्वांगाच्च दीर्घबाहुः ॥ १ ॥ २ ॥

ततो मूलकात् । तस्माद्दशरथात् । तत ऐडविडात् । यस्य विश्वसहस्य ॥ ४१ ॥ यः खटांगः ॥४२॥ एतदेव परमेशे मनःसंधानमेव । तत्कृतेन खट्वांगकृतेन ॥४३॥ ४४ ॥ भावना चेतोवृत्तिः ॥४५॥ तत्र कामावरणे । विक्षिप्तानि विषयाकुलानि देवानामपि परेशज्ञानाभावात्तदन्यवरदाने प्रवृत्तेः । अपरे सात्त्विकदेवेतरराजसतामसा मनुष्यादयः ॥४६॥ तस्माद्विक्षिप्तेंद्रियदेवदत्तवराणां विक्षेपकत्वात् । गुणेषु तत्कार्येषु देहादिषु । गंधर्वपुरोपमेषु नश्वरेषु । रूढं दृढम् । संगं स्नेहलक्षणं पाशम् । भावेन भक्त्या । तमेव विश्वकर्त्तारमेव ॥ ४७ ॥ ततः अज्ञानहानोत्तरम् । स्वं भावमात्मज्ञानलक्षणमाश्रितो भवामीति शेषः ॥ ४८ ॥ यत्तदिति । यत्तच्छब्दद्योत्यमनिर्वचनीयम् । अशून्यं शून्यसाक्षिणम् । वासुदेवेति । संधिरार्षः ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे नवमोऽध्यायः ॥ ९ ॥ तच्चरित्रं श्रीरामचरितम् (१) । तस्माद्दीर्घबाहोः । पृथुश्रवा महायशा इति रघुविशेषणम् । ततो रघोः । तस्मात् अजात् ॥ १ ॥ तस्यापि दशरथस्यापि । एष इति बुद्धिसन्निहितत्वात् । साक्षाद्ब्रह्ममयः मयडत्र स्वरूपे । भक्तार्तिहरत्वात्पृथ्वीभारहरत्वाच्च हरिः । साक्षादित्युक्तेः परिपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञया ॥ तस्यानुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः ॥ श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥ ३ ॥ गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरींद्रानुजाभ्याम् ॥ वैरूप्याच्छूर्पणख्याः प्रियविरहरुषारोपि तभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोशलेंद्रोऽवतान्नः ॥ ४ ॥

ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं त्वया मुहुः श्रुतं तथापि संक्षेपतः कथ्यमानं शृणु ॥ ३ ॥ "ग्रंथकोटिभिराकीर्णमद्भुतं रामविक्रमम् ॥ अध्यायद्वयतो वक्ष्यन्नेकश्लोके

स्वरूप एवावतीर्णो न त्वंशत इति ध्येयम्। ('एते चांशकलाः पुंसः' इत्यत्र चकारश्श्रीरामसमुच्चयार्थक एवान्यथा 'ते ह्यंशकळाः पुंसः' इत्यमेव वदेदिति भावः)। "रमंते योगिनोऽनंतनित्यानंदे चिदात्मनि । इति राम पदेनासौ परब्रह्माभिधीयते ॥" इत्यादिना रामतापनीयाथर्वशिराशि श्रीरामस्य साक्षाद्ब्रह्मतोक्तेः । अंशांशेन पायसरूपवैष्णवतेजोंशांशेनेत्यर्थः । तदुक्तं कालिदासेन "स तेजो वैष्णवं पत्न्योर्विभजे चरुसंज्ञितम्। द्यावा पृथिव्योः प्रत्यग्रमहर्पतिरिवातपम ॥ अर्चिता तस्य कौशल्या प्रिया केकयवंशजा । अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः ॥ ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः । चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे ॥सा हि प्रणयवत्यासीत्सपत्न्योरपि"इति रघुवंशे। अत एव पाद्मे "युगं बभूवतुस्तत्र सुस्निग्धौ रामलक्ष्मणौ। तथा भरतशत्रुघ्नौ पायसांशवशात्स्वतः ॥"इत्युक्तम्। चरोरर्द्धार्द्धभागाभ्यां स्वलब्धांशसंबंध्यर्द्धार्द्धभागाभ्यामित्यर्थः । यद्वा— पायसांशेन स्वयं पायसांशांशेन भरतादिरूपमित्यर्थः । तदुक्तं वाल्मीकीये "कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा । अर्द्धादर्द्धं ददौ चापि सुमित्रायै नराधिपः ॥ कैकय्यै चावशिष्टार्द्धं ददौ पुत्रार्थकारणात्। प्रददौ चावशिष्टार्द्धं पायसस्यामृतोपमम् ॥ अनुचिंत्य सुमित्रायै पुनरेव महामतिः । एवं तासां ददौ राजा भार्याणां पायसं पृथक् ॥" इति बालकांडे । प्रथमोऽर्द्धशब्दः समविभागार्थकः । अर्द्धादर्द्धं तुरीयां शमित्यर्थः । अवशिष्टार्द्धमवशिष्टस्य तुरीयांशस्यार्द्धमष्टमांशमित्यर्थः । पुनरवशिष्टार्द्धमष्टमांशमित्यर्थः । अनुचिंत्येति । कैकेय्यपेक्षया ज्येष्ठत्वं कौशल्यापेक्षया कनिष्ठत्वं च सुमित्राया विचार्य पादोनार्द्धांशदानमिति भावः । सुरैः प्रार्थितश्चतुर्द्धा पुत्रत्वमगात्। तदुक्तम्। "राज्ञो दशरथस्य त्वमयोध्याधिपतेर्विभो । धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः॥ अस्य भार्यासु तिसृषु ह्रीश्रीकीर्त्युपमासु च । विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम् ॥" इति वाल्मीकीये । आत्मानं सोपकरणमात्मानमित्यर्थः । "अन्येद्युः पांचजन्यात्मा कैकेय्यां भरतोऽभवत्। तदन्येद्युः सुमित्रायामनंतात्मा च लक्ष्मणः । सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत्प्रिये ॥" इति पाद्मोक्तेः । अत्रात्मानमित्युक्त्या शंखचक्रानंतानामपि भगवद्रूपतैव सूचिता । चातुर्विध्यविधानं रावणेंद्रजिल्लवणगंधर्वाणां चतुर्णां वधार्थमिति भावः । रामलक्ष्मणभरतशत्रुघ्ना इति संज्ञयेति । एकस्यैव संज्ञाभेदेप्यर्थैक्यादैक्यमेव । अरायीति राः बाहुलकात्कर्मणि विच् । राः गृहीता पत्नीत्वेन मा लक्ष्मीस्सीता येन स रामः । 'सीता साक्षात्स्वयं लक्ष्मीः' इत्युक्तेः । एवं रा आत्ता मारीचवधावसरे मा सीता रक्षणार्थं रामाज्ञया येन स रामो लक्ष्मणोपि राम एव । तथा रा आत्ता मा राज्यलक्ष्मीर्निक्षेपभूता येन स भरतोपि राम एव। तथा रा आत्ता मा शोभा लवणवधमथुरानिवेशजा येन स शत्रुघ्नोपि राम एव।यद्वा—रं रेफममंति प्राप्नुवन्तीति चत्वार एव रेफाढ्यनामवत्त्वाद्रामा एव लक्ष्मणे लकारोऽपि रेफ एव रलयोरैक्यात्। तथा लक्ष्मीर्विद्यतेऽस्येति लक्ष्मणः श्रीरामोऽपि लक्ष्मण एव"लक्ष्म्या अच्च"। लक्ष्माणि युद्धपतितशत्रांकानि यद्वा—परममंगलश्रीरामसेवाबोधकहस्तरेखादीनि यस्य स लक्ष्मणः सौमित्रिः । तथा भरतोऽपि लक्ष्मीः सौभ्रात्रलक्षणा कीर्त्तिर्विद्यतेऽस्येति लक्ष्मण एव 'न भरतेन समो भ्राता' इति श्रीवाल्मीक्युक्तेः । तथा शत्रुघ्नोऽपि लक्ष्माणि राजचिह्नानि छत्रचामरादीनि संत्यस्येति लक्ष्मण इति लक्ष्मण एव 'शत्रुघ्नः श्वेतछत्राढयश्चामरांदोलितो ययौ' इति पाद्मोक्तेः । एवं भरेण राज्यभरेण ताम्यति ग्लायतीति भरतः । भरपूर्वात्ताम्यतेर्डः । वृत्तं चैतद्रामायणे स्पष्टम्। तथा भरात्तारयति भुवमिति । श्रीरामोऽपि भरत एव "यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितः" इति ब्रह्मांडोक्तेः । तथा भरं भरणं तनोति वन्यमूलफलाद्यानयनेन श्रीसीतारामयोर्वनवास इति लक्ष्मणोऽपि भरत एव । तथा भरं ज्येष्ठभ्रात्रनुरोधेन नानादुःखसहन भारं तनोति निजांग इति शत्रुघ्नोऽपि भरत एवेति। एवं शत्रुं लवणाख्यं हंतीति शत्रुघ्नः। स्तथा शत्रून् रावणप्रभृतीन्रागद्वेषादीन्वा हंतीति रामोऽपि शत्रुघ्न एव । तथा शत्रून् गंधर्वादीन्हंतीति भरतोऽपि शत्रुघ्न एव। एवं शत्रून्मेघनादादीनालस्यं वा हंति सदा श्रीरामसेवायां प्रवृत्तत्वाल्लक्ष्मणोऽपि शत्रुघ्न एवेति कृत्वा चतुर्णां नामार्थसाम्येनैक्यमेवेति तत्त्वम् ॥ २ ॥ तस्य चतुर्विधात्मनः श्रीरामस्य ॥ ३ ॥ आकीर्णं व्याप्तम्। वर्णितमिति यावत्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ॥ पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुंगवाः ॥ ५ ॥ यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयं वरगृहे त्रिशतोपनीतम् ॥ आदाय बालगजलील इवेक्षुयष्टिं सज्जीकृतं नृप विकृष्य बभंज मध्ये ॥ ६ ॥ जित्वानुरूपगुणशीलवयोंगरूपां सीताऽभिधां श्रियमुरस्यभिलब्धमानाम् ॥ मार्गे व्रजन्भृगुपतेर्व्यनयत्प्ररूढं दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥ ७ ॥ यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ॥ राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसंगः ॥ ८ ॥

समस्यति ॥ " स कोशलेंद्रः श्रीरामो नोऽस्मानवतात्पातु । कथंभूतः । यो गुर्वर्थे पितुः सत्यस्य पालनार्थं त्यक्तराज्यः सन् । पद्मवदतिसुकुमाराभ्यां पद्भ्याम् । तदेवाह । प्रियायाः पाणिनाऽपि स्पर्शे नास्ति क्षमा ययोस्ताभ्यां प्रतिवनं व्यचरत् । हरींद्रो हनुमान्सुग्रीवो वाऽनुजो लक्ष्मणस्ताभ्यां मृजिताऽपनीता पथरुजा मार्गश्रमो यस्य । शूर्पणख्या वैरूप्यात्कर्णनासिकाच्छेदाद्धेतोः तया प्रलोभितेन रावणेनापहारात्प्रियेण कलत्रेण विरहस्तेन रुट् तयाऽऽरोपितयोर्भ्रुवोर्विजृंभेणैव त्रस्तोऽब्धिर्यस्मात् । ततस्तद्विज्ञापनेन बद्धः सेतुर्येन । ततः खला रावणादय एव दवो वनं तस्य दहनः ॥ ४ ॥ संक्षेपतो वर्णितं रामचरितमादित आरभ्य विस्तरेणाह । विश्वामित्राध्वर इत्यादिना यावदुत्तराध्यायसमाप्ति । पश्यत एव लक्ष्मणस्य । तमप्यनपेक्ष्यैव हता इत्यर्थः । यच्छब्दानां स कोशलेंद्रोवतादित्यनेनैवान्वयः ॥ ५ ॥ लोके ये वीरास्तेषां समितौ समाजे ऐशं त्रैयंबकं धनुरिक्षुयष्टिमिव लीलयैवादाय सज्जीकृतमारोपितं विकृष्य मध्ये बभंज । हे नृप । उग्रं कठिनं गारिष्ठम् । तदाह । वाहकानां त्रिभिः शतैरुपनीतम् । बालगजस्य लीलेव लीला यस्य सः ॥ ६ ॥ अनुरूपाणि स्वयोग्यानि गुणशीलादीनि यस्यास्तां सीतासंज्ञां पूर्वमुरस्यभिलब्धो मानो यया तां श्रियं जित्वा धनुर्भंगमहानादश्रवणक्षुभितस्य भृगुपतेर्दर्पं व्यनयदपनीतवान् । कथंभूतस्य । त्रिःसप्तकृत्वो राजबीजशून्यां महीं योऽकरोत्तस्य ॥ ७ ॥ इदानीं गुर्वर्थ इति श्लोकं

"चरितं रघुनाथस्य शतकोटिप्रविस्तरम् । एकैकमक्षरं पुंसां महापातकनाशनम्॥" इत्युक्तेः । समस्यति संक्षेपेण कथयाति (१) । सत्यस्य केकैयीदत्तवरदानद्वयस्य । तदेवातिसुकुमारत्वमेव । प्रियायाः सीतायाः । प्रतिवनं बहुवनम् । हरीणां वानराणामिंद्रः । परमसुखदः परमसुखदत्वेपींद्रपदं राज्येवोचितमिति चेदाह–सुग्रीवो वेति । शूर्पणख्याः सीताभक्षणप्रवृत्ताया रावणस्वसुः । तया शूर्पणख्या । प्रलोभितेन सीतासौंदर्यश्रावणोत्सादिततदानयनलोभेन । कलत्रेण सीतारूपेण । विरहो वियोगः । रुट् रोषः । आरोपितयोरुच्चतां नीतयोर्भ्रुवोर्भ्रूदेशयोः । विजृंभेण प्रसरणेन । त्रस्तो भीतः ! तत अब्धिभीतेरनंतरम् । तद्विज्ञापनेनाब्धिप्रार्थनया । सेतुः आलिः । 'सेतुरालौ पुमान्स्त्रियाम् ' इत्यमरः । ततः सेतुबंधोत्तरम् । 'दवदावौ वनानिलौ' इत्यमरः । दहनो वह्निः ॥ ४ ॥ इत्यर्थ इति । केवलस्यैव सर्वसमर्थत्वान्नान्यापेक्षा तस्यास्तीति भावः । येन रामेण ॥ ५ ॥ गरिष्ठमतिदुर्भरम् । तदेव गरिष्ठत्वमेव । वाहकानां नराणाम् । इक्षुयष्टिं रसालदंडम् । "इक्षुस्त्विच्छायुते ज्ञाते गुडादीनां च कारणे" इति निरुक्तिः ॥ ६ ॥ पूर्वं चिह्नरूपेणोरसि वक्षसि । भृगुपतेः परशुरामस्य । प्ररूढं प्रकृष्टम् ॥ ७ ॥ पूर्वोक्तं स्मारयति–इदानीमिति । परिवीतस्य परिवेष्टितस्य । पितुर्दशरथस्य । निवासमयोध्याम् । मुक्तसंग इति । "असंगो ह्ययं पुरुषः" इति श्रुत्यर्थमाह । असूनिति त्यागानर्हता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबंधून् ॥ जघ्ने चतुर्दशसहस्रमपारणीयकोदंडपाणिरटमान उवास कृच्छ्रम् ॥ ९ ॥
सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकंधरेण ॥ जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कमुग्रः ॥ १० ॥
रक्षोधमेन वृकवद्विपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् ॥ भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसंगिनां गतिमिति प्रथयंश्चचार ॥ ११ ॥ दग्ध्वा
त्मकृत्यहतकृत्यमहन् कबंधं सख्यं विधाय कपिभिर्दयितागतिं तैः ॥ बुद्ध्वाथ वालिनि हते प्लवगेंद्रसैन्यैर्वेलामगात्स मनुजोऽजभवार्चितांघ्रिः ॥ १२ ॥

विवृण्वन्नाह । य इति । कदाचित्कैकेय्यास्तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतम् । ततः श्रीरामस्य युवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने वासः प्रार्थितस्तदा सत्यपाशेन परिवीतस्य पितुर्निदेशमाज्ञां शिरसा जगृहे । ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ । दुस्त्यजस्यापि सहर्षत्यागे दृष्टांतः । मुक्तसंगो योगी असून्प्राणानिवेति ॥ ८ ॥ रक्षसो रावणस्य स्वसुः शूर्पणखाया अशुद्धबुद्धेः सीतां जिघृक्षोः कामातुराया इति वा रूपं व्यकृत विकारमनयत् । तस्याः । खरत्रिशिरदूषणमुख्या बंधवो येषु तांश्चतुर्दशसहस्रं जघान । अपारणीयमलंघ्यमसह्यं कोदंडं पाणौ यस्य सः ॥ ९ ॥ सीतायाः कथाश्रवणेन दीपितो हृच्छयो यस्य तेन सीतां हरिष्यता स्वस्माद्भीतेन स्वस्याश्रमादपकर्षणार्थं सृष्टं निसृष्टं मारीचं विलोक्य जघान । कथंभूतम् । अद्भुतैणवपुषा स्वर्णहरिणदेहेनोपलक्षितम् । अत एव प्रलोभनेनाश्रमतस्तेनापकृष्टः सन् कं दक्षं यथा उग्रः श्रीरुद्रः ॥ १० ॥ ततश्च रक्षोऽधमेन रावणेनासमक्षमपनीतायाम् । प्रियया वियुक्तो भ्रात्रा लक्ष्मणेन सह कृपणवद्वने चचार । किमभिप्रायः सन् इत्यनेन प्रकारेण स्त्रीसंगिनां दुःखोदर्कां गतिं प्रख्यापयन् ॥ ११ ॥ आत्मार्थेन कृत्येन कर्मणा रावणेन सह युद्धेन हतं कृत्यं शास्त्रीयं दहनादिकं यस्य तं जटायुषं पुत्र इव दग्ध्वा कबंधं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन् । अथ वालिनि हते तैः कपिभिर्दयिताया गतिं बुद्ध्वा अजभवाभ्यामर्चितावंघ्री यस्य स मनुजो वेलां समुद्रतीरमाह ॥ ८ ॥ रक्षोधर्मत्वात्सीताग्रहणेनाशुद्धित्वं तद्बुद्धेरित्यत आह—कामातुराया वेति । व्यभिचारेच्छावती धीरशुद्धैवेत्यर्थः । विकारमंगन्यूनतापादनम् । स रामः । तस्याः शूर्पणख्याः । अटमानो वने विचरन् ॥ ९ ॥ कथा सौन्दर्यकथा तस्याः शूर्पणखामुखाच्छ्रवणेन । हृच्छयः कामः । स्वस्माद्रामात् । स्वस्य रामस्य । सर्वात्मत्वाद्रामे स्वशब्दः स्वामिचरणैः प्रयुक्त इति । सृष्टं मृगरूपतया रचितं प्रेरितम् "सृष्टं त्यक्ते प्रेरिते च कृत्रिमे वाच्यलिंगभाक्" इति निरुक्तिः । अत एव हेममृगदेहोपलक्षितत्वादेव । तेन मृगरूपमारीचेन । अपकृष्टो दूरं नीतः । 'उग्रः कपर्दी श्रीकंठः' इत्यमरः । कं ब्रह्माणं सरस्वत्यनुगतम् । यद्वा—उग्रः श्रीनृसिंहः अकं सर्वदुःखदं हिरण्यकशिपुं यथा । "उग्रो जज्ञे वीर्याय स्वधावान्" इति श्रुतेः ॥ १० ॥ ततश्च मारीचमरणोत्तरं च । वृकवद्व्याघ्रवत् स यथानन्तर्हितं गृह्णाति तथा । असमक्षम् अप्रत्यक्षम् । वैदेहराजदुहितरि सीतायाम् । अपनीतायां हृतायाम् । कृपणवत् दीनवत् । किमर्थमित्थं चकारेत्यनुयुनक्ति—किमिति । अत्रेति शब्दः प्रकर्षे । तं ग्रंथांतरसंमत्याह—"भोभो वृक्षाः पर्वतस्था गिरिगहनलतावायुना घूर्णमाना रामोऽहं व्याकुलात्मा दशरथतनयः शोकतोऽतीवदग्धः । बिंबोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या हा सीता केन नीता मम हृदयगता क्वापि केनापि दृष्टा ॥" इत्याद्युक्तप्रकारेणेत्यर्थः । दुःखोदर्कां दुःखपर्यवसानाम् ॥ ११ ॥ कबंधं वक्षोमुखम् । तैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरो भयगीर्णघोषः ॥ सिंधुः शिरस्यर्हणं परिगृह्य रूपी पादारविंदमुपगम्य बभाष एतत् ॥१३॥ न त्वां वयं जडधियो नु विदाम भूमन् कूटस्थमादिपुरुषं जगतामधीशम् ॥ यत्सत्त्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूतपतयः स भवान् गुणेशः ॥१४॥ कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीम् ॥ बध्नीहि सेतुमिह ते यशसो वितत्यै गास्यंति दिग्विजयिनो यमुपेत्य भूपाः ॥ ॥ १५ ॥ बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपींद्रकरकंपितभूरुहांगैः ॥ सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लंकां विभीषणदृशाऽविशदग्रदग्धाम् ॥ ॥१६॥ सा वानरेंद्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटंका ॥ निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटका गजकुलैर्ह्रदिनीव घूर्णा ॥१७॥ रक्षःपतिस्तदवलोक्य निकुंभकुंभधूम्राक्षदुर्मुखसुरांतनरांतकादीन् ॥ पुत्रं प्रहस्तमतिकायविकंपनादीन् सर्वानुगान्समहिनोदथ कुंभकर्णम् ॥ १८ ॥

रमगात ॥ १२ ॥ तत्र त्रिरात्रमुपवासेन प्रतीक्षितोऽपि सिंधुर्यदा नोपस्थितस्तदा यस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन संभ्रांता नक्रा मकराश्च यस्मिन् । भयेन गीर्णो ग्रस्तः स्तंभितो घोषो येन स सिंधुरेतद्वक्ष्यमाणं बभाषे । अर्हणमर्घ्यादिकम् । रूपी मूर्तिमान् ॥ १३ ॥ भाषणमेवाह । न त्वामिति द्वाभ्याम् । एतावत्पर्यंतं नु निश्चितं त्वां न विदाम न जानीम इत्यर्थः। इदानीं तु ज्ञातोऽसीत्याह। यदिति पृथक् पदम् । यस्येत्यर्थः । यद्वशेभ्यः सत्त्वादिभ्यः सुरगणादयो भवंति स भवान् इति ॥ १४ ॥ कामं यथेच्छं जलमाक्रम्यापि प्रयाहि । अवमेहं पुरीषप्रायम् । त्रैलोक्यं रावयत्याक्रंदयतीति तथा तं जहि । हे वीर यद्यपि तव जलं प्रतिबंधकं न भवति तथापीह सेतुं बध्नीहि । तर्हि किमर्थम् । ते यशसो विस्ताराय । तदेवाह । यं सेतुमुपेत्य दुष्करं कर्मावेक्ष्य त्वद्यशो गास्यंति भूपास्तम् ॥ १५ ॥ तद्वाक्यमभिनंद्य यत्कृतं तदाह । बद्ध्वेति । विविधैरद्रीणां कूटैः शृंगैः । सेतुं बद्ध्वाऽग्रे सीतान्वेषणे हनुमतैव दग्धां लंकामाविशत् कथंभूतैः शृंगैः । कपींद्राणां करैः कंपितानि भूरुहाणामंगानि शाखादीनि येषु तैः । विभीषणस्य दृशा बुद्ध्या कैः सहाविशत् । सुग्रीवादयः प्रमुखा येषां तैरनीकैः ॥ १६ ॥ ततश्च सा लंका घूर्णा प्रचलिता बभूव । कथंभूता वानरेंद्राणां बलै रुद्धा विहारादयो यस्याम् । निर्भज्यमाना धिषणादयो यस्यां सा । तत्र विहारः क्रीडास्थानम् । कोष्ठं धान्यागारादि । श्रीः कोशः । द्वारं गृहादीनाम् । गोपुरं पुरद्वारम् । सदः सभा । वलभी प्रासादादिपुरोभागच्छादिनी । विटंकः कपोतपालिका । धिषणं वेदिकादि । शृंगाटकं चतुष्पथम् ॥१७॥ रक्षःपती रावणः । पुत्रमिंद्रजितं

संख्यस्थापितैः ॥ १२ ॥ तत्र वेयालायाम् । विवृतः प्रसृतः । संभ्रांता इतस्ततोनवस्थिताः । मूर्तिमान् करचरणाद्यवयवोपेतः ॥ १३ ॥ इत्यर्थ इति । आर्षत्वाद्गुणाभावो वर्तमानार्थता च लोट इति भावः । जडधियः ज्ञानपूर्वप्रवृत्तिशून्याः । कूटस्थं लयविक्षेपशून्यम् । मन्योस्तमोगुणाच्च कार्येण कारणग्रहात् । भूतपतयो ब्रह्मराक्षसादयः । परब्रह्मत्वेन ज्ञानाभावेपि । त्वदीक्षणवशादेव त्वां गुणनियंतारं यथा कथंचिज्जानीम इत्याह–स भवानिति ॥ १४ ॥ पुरीषप्रायं पुरीषसमम् । यथा पुरीषं देहनिर्गतं शुनामुपभोगाय भवति तथायमपि विश्रवसो देहान्निर्गतत्वेनावमेहस्थानीयस्त्वच्छरनिर्भिन्नदेहः शुनामशनाय भवत्वित्यत उक्तं विश्रवसोऽवमेहम् । परमेशस्य तव जलेशस्यैवाज्ञाकारित्वान्न तदधीनजलस्य प्रतिबंधकत्वमिति सेतुबंधने को लाभ इत्याक्षिपति–तर्हीति । तमेव यशोविस्तारमेव ॥१५॥ तद्वाक्यं समुद्रवाक्यम् । 'दृग्ज्ञानेक्षणचक्षुषी' इति कोशात् । प्रमुखा अग्रण्यः । 'अनीकं सैन्ययुद्धयोः' इति निरुक्तिः ॥ १६ ॥ ततः सैन्यप्रवेशात् । तत्र तेषु ॥ १७ ॥ तत् वानरेंद्रसेनाकृतं कर्म । प्रहस्तं सेनापतिम् । अथ निकुंभादिसर्वमरणानंतरम् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां यातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गाम् ॥ सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरन्वितोऽगात् ॥ १९ ॥
तेऽनीकपा रघुपतेरभिपत्य सर्वे द्वंद्वं वरूथमिभपत्तिरथाश्वयोधैः ॥ जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याः सीताऽभिमर्शहतमंगलरावणेशान् ॥ २० ॥
रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रामम् ॥ स्वःस्यंदने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः
क्षुरप्रैः ॥ २१ ॥ रामस्तमाह पुरुषादपुरीष यन्नः कांताऽसमक्षमसताऽपहृता श्ववत्ते ॥ त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल
इव कर्तुरलंघ्यवीर्यः ॥ २२ ॥ एवं क्षिपन् धनुषि संधितमुत्ससर्ज बाणं स वज्रमिव तद्धृदयं बिभेद ॥ सोऽसृग् वमन् दशमुखैर्न्यपतद्विमा
नाद्धाहेति जल्पति जने सुकृतीव रिक्तः ॥ २३ ॥ ततो निष्क्रम्य लंकाया यातुधान्यः सहस्रशः ॥ मंदोदर्या समं तस्मिन् प्ररुदत्य उपाद्रवन् ॥
॥ २४ ॥ स्वान्स्वान् बंधून् परिष्वज्य लक्ष्मणेषुभिरर्दितान् ॥ रुरुदुः सुस्वरं दीना घ्नंत्य आत्मानमात्मना ॥ २५ ॥

प्रहस्तादींश्च समहिनोत्प्रायुंक्त ॥ १८ ॥ असिशूलादिभिर्दुर्गमां तां यातुधानपृतनां सुग्रीवादिभिरान्वितः श्रीरामोऽभ्यगात् । मरुत्सुतो हनूमान् । ऋक्षो जांबवान् ॥ १९ ॥
ते रघुपतेरनीकपा अंगदाद्याः सर्वे रावणस्येभादिभिर्यद्वरूथं सैन्यं तत्र द्वंद्वं यथा भवति तथाऽभिपत्य संगम्य द्रुमादिभिर्जघ्नुः । कान्। सीताया आभिमर्शेन हतं मंगलं यस्य सः
रावण ईशो येषां तान् ॥ २० ॥ स्वबलस्य नष्टिं नाशमवेक्ष्य रुष्टः क्रुद्धः सन्यानकं पुष्पकं विमानं रथं वाऽऽरुह्य श्रीराममभिससार । अथ तं स्वःस्यंदने स्वर्गस्थे
इंद्रस्य रथे मातलिनेंद्रसारथिनोपनीते द्युमति दीप्तियुक्ते विभ्राजमानमहनदहन् ॥ २१ ॥ हे पुरुषादपुरीष राक्षसपुरीषप्राय । यद्यस्मादपहृता । श्ववत् श्वा यथाऽसमक्षं गृहं
प्रविश्य किमपि हरति तद्वत् । तस्माज्जुगुप्सितस्य कर्मणः कर्तुस्तेऽद्य काल इवालंघ्यवीर्योऽहं फलं यच्छामि । अधर्मकर्तुः पुंसः कालो यथा यच्छतीति वा ॥ २२ ॥
रिक्तः क्षीणपुण्यः सुकृती विमानादिव । विमानात्पुष्पकान्न्यपतदिति वा ॥ २३ ॥ राक्षसस्त्रीणां विलापमाह तत इति पंचभिः । मंदं स्वल्पमुदरं यस्यास्तया
रावणभार्यया सह ॥ २४ ॥ २५ ॥

प्रासः कुंतः । तोमरं लोहफालं काष्टदंडम् ॥ १९ ॥ २० ॥ यानकमिह कप्रत्ययस्य स्वार्थिकत्वात्सामान्यदानमाहात आह—रथं वेति । अथ रामसंमुखागमनोत्तरम् । तं रामम् । विषमयुद्धं विलोक्येंद्रप्रेरितेन मातलिना ।
अहनत् अडत्रार्षः । क्षुरप्रैः 'अर्द्धचंद्रः क्षुरप्रः स्यात्' इत्यभिधानात् । अर्द्धचंद्राकारैर्बाणैः॥२१॥ ''पुरीषमपकृष्टं स्याद्विष्ठानिष्टयूतमप्युत'' इति तीर्थः । पुरुषाद पुरीषप्रायपुरुषादाधमेत्यर्थः । असताऽप्रशस्तकर्मणा ॥२२॥
क्षिपन् धिक्कुर्वन् । स बाणः । तद्धृदयं रावणहृदयम् । स रावणः । दार्ष्टांतिक उपलब्धं दृष्टांतेन योज्यमिति न्यायादाह—पुष्पकादिति ॥ २३ ॥ ततो रावणपतनोत्तरम् । समं सह ॥ २४ ॥ अर्दितान् हिंसितान् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हा हताः स्म वयं नाथ लोकरावण रावण ॥ कं यायाच्छरणं लंका त्वद्विहीना परार्दिता ॥ २६ ॥ नैवं वेद महाभाग भवान् कामवशं गतः ॥ तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥२७॥ कृतैषा विधवा लंका वयं च कुलनंदन ॥ देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥२८॥ श्रीशुक उवाच ॥ स्वानां विभीषणश्चक्रे कोशलेंद्रानुमोदितः ॥ पितृमेधविताननेन यदुक्तं सांपरायिकम् ॥२९॥ ततो ददर्श भगवानशोकवनिकाश्रमे ॥ क्षामां स्वविरहव्याधिं शिंशपामूलमास्थिताम् ॥ ३० ॥ रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकंपत ॥ आत्मसंदर्शनाह्लादविकसन्मुखपंकजाम् ॥ ३१ ॥ आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ॥ विभीषणाय भगवान् दत्त्वा रक्षोगणेशताम् ॥ ३२ ॥ लंकामायुश्च कल्पांतं ययौ चीर्णव्रतः पुरीम् ॥ अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ ३३ ॥ उपगीयमानचरितः शतधृत्यादिभिर्मुदा ॥ गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलांबरम् ॥३४॥ महाकारुणिकोऽतप्यज्जटिलं स्थंडिलेशयम् ॥ ३५ ॥ भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम् ॥ ॥ ३६ ॥ नंदिग्रामात् स्वशिबिराद्गीतवादित्रनिस्वनैः ॥ ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ॥ ३७ ॥

परैरर्दिता पीडिता ॥ २६ ॥ २७ ॥ गृध्राणामन्नं भक्ष्यः । नरकहेतवे नरकभोगाय ॥ २८ ॥ सांपरायिकमौर्ध्वदेहिकम् ॥ २९ ॥ ३० ॥ आत्मगः स्वस्य संदर्शनेन य आह्लादस्तेन विकसन्मुखपंकजं यस्यास्ताम् ॥३१॥ यानं पुष्पकम् । भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्याम् ॥ ३२ ॥ आयुश्च दत्त्वा तेनापि सहैव ययौ ॥ ३३॥ गोमूत्रपक्वयवान्न भोजिनं भ्रातरं भरतम् ॥ ३४ ॥ ३५ ॥ ३६ ॥ स्वशिबिराद्ग्रामं विनाऽयोध्यामप्रविशन् स्वस्य वासं यत्र निर्मितवांस्तस्मात्सकाशाद्गीतादिभिर्युक्तो रामं प्रत्युद्यतो

आत्मानमुदरम् । आत्मना करेण अवयवावयविनोरभेदोपचारात् । करेणेत्यकत्वं सामान्याभिप्रायम् । 'घ्नंत्यः कराभ्यामुर उच्चकैरपि' इत्यन्यत्रोक्तेः ॥ २९ ॥ अर्दिता पीडिता ॥ २६ ॥ येन सीतातेजोनुभावेन । तं न वेद ॥ २७ ॥ गृध्रप्राणरक्षणेन पुण्यं स्यादिति चेदाह—नरकेति । यद्यपि श्रीरामहतस्य "येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । तेते गता विष्णुपुरं नरेन्द्राः क्रोधोऽपि देवस्य वरेण तुल्यः ॥ " इत्याद्युक्तेः "स्वर्गं प्रयांतु रिपवोऽपि हि शस्त्रपूताः" इत्युक्तेश्च रावणस्य नरको न संभावी तथापि व्यभिचारिणां तदवश्यंभावद्योतनायेयमुक्तिः । यद्वा—रामचंद्रहतस्यापि ते परदारप्रवृत्तत्वेन मोक्षो न भविष्यति किं तु नरक इव परिणामदुःखदो भोगिकुलजन्मैव भविष्यतीत्यर्थः ॥ २८ ॥ पितृमेधस्य पितृयागस्य वितानं विधानम शवदाहादारभ्य सपिंडनांतं तेन । यदुक्तं श्रुतिस्मृतिभ्यां विहितम् । और्द्ध्वदेहिकं भाविदेहप्राप्यम् । "संपरायः परे लोके युद्धापत्स्वायतिष्वपि" इति कोशात् । कोशलेंद्रो रामः ॥ २९ ॥ ततः पितृमेधवितानोक्तरावणादिदाहानंतरम् । "क्रीडा यत्र वने स्त्रीभिरशोकवनिका तु सा" इति कोशात् । सैवाश्रमोऽशोकवनिकाश्रमस्तत्र । क्षामां कृशाम् । स्वस्य विरह एव व्याधिर्यस्यास्ताम् । शिंशपा स्निग्धपत्रो वृक्षविशेषः ॥ ३० ॥ ३१ ॥ ३२ ॥ कल्पांतं यावत्कल्पम् । "स कल्पो यत्र मनवश्चतुर्दश विशांपते" इत्युक्तेर्ब्रह्मैकदिनजीविनं चकारेत्यर्थः । चीर्णव्रतः पूर्णप्रतिज्ञातवनवाससंकल्पः । पुरीमयोध्याम् ॥ ३३ ॥ गोमूत्रयावकमस्ति भोज्यत्वेनास्येति मत्वर्थीयोच् । भ्रातरं भरतम् । स्थंडिलेशयं मृन्निर्मितवेदिकाशय्यम् ॥ ३४ ॥ पादुके चित्रकूटस्थरामानयनगतभरतप्रार्थितश्रीरामदत्तकाष्ठमयपादरक्षके ॥ ३५ ॥ नंदिग्रामोऽयोध्याप्रांतग्रामविशेषः ॥ ३६ ॥ स्वर्णकक्षाः स्वर्णसूत्रसंबद्धाः पताकाः ॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः ॥ सदश्वै रुक्मसन्नाहैर्भटैः पुरटवर्मभिः ॥ ३८ ॥ श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥ पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ॥ ३९ ॥ पादयोर्न्यपतत् प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥ पादुके न्यस्य पुरतः प्रांजलिर्बाष्पलोचनः ॥ ४० ॥ तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ॥ रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ॥ तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४१ ॥ धुन्वंत उत्तरासंगान् पतिं वीक्ष्य चिरागतम् ॥ उत्तराः कोशला माल्यैः किरंतो ननृतुर्मुदा ॥ ४२ ॥ पादुके भरतोऽगृह्णाच्चामरव्यजनोत्तमे ॥ विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥ ४३ ॥ धनुर्निषंगाञ्शत्रुघ्नः सीता तीर्थकमंडलुम् ॥ अबिभ्रदंगदः खड्गं हैमं चर्मर्क्षराण् नृप ॥ ४४ ॥ पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च बंदिभिः ॥ विरेजे भगवान् राजन् ग्रहैश्चंद्र इवोदितः ॥ ४५ ॥ भ्रातृभिर्नंदितः सोऽपि सोत्सवां प्राविशत् पुरीम् ॥ प्रविश्य राजा भवनं गुरुपत्नीः स्वमातरम् ॥ ४६ ॥ गुरून्वयस्यावरजान्पूजितः प्रत्यपूजयत् ॥ वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥ ॥ ४७ ॥ पुत्रान्स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः ॥ आरोप्यांकेऽभिषिंचंत्यो बाष्पौघैर्विजहुः शुचः ॥ ४८ ॥ जटा निर्मुच्य विधिवत् कुलवृद्धैः समं गुरुः ॥ अभ्यषिंचद्यथैवेंद्रं चतुःसिंधुजलादिभिः ॥ ४९ ॥

ऽभिमुखं ययौ ब्रह्मघोषेण महता घोषेण पठद्भिः स्वर्णरसाक्ताः कक्षाः प्रांता यासां ताभिः पताकाभिः हैमैरिति चत्वारि रथविशेषणानि ॥ ३७ ॥ ३८ ॥ पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि ॥ ३९ ॥ प्रेम्णा प्रक्लिन्नं हृदयमीक्षणे च नेत्रे यस्य ॥ ४० ॥ नेत्रजैर्जलैः स्नापयन्नाश्लिष्य येऽर्हसत्तमाः कुलवृद्धास्तेभ्योऽपि नमनं चक्रे ॥ ४१ ॥ ४२ ॥ अयोध्याप्रवेशप्रकारमाह । पादुके इति सार्द्धैस्त्रिभिः ॥ ४३ ॥ धनुश्च निषंगौ च तान् । ऋक्षराट् जांबवान् ॥ ४४ ॥ ४५ ॥ गुरुपत्नीः कैकेय्याद्याः ॥ ४६ ॥ वयस्यानवरजांश्च । यथावदनुक्रमेण समुपेयतुः ॥ ४७ ॥ बाष्पौघैरभिषिंचंत्यः शुचः शोकान्विजहुः । शेषं स्पष्टम् ॥ ४८ ॥ ४९ ॥

रुक्मसन्नाहैः स्वर्णसूत्रसंबद्धकौशेयरज्जुबंधनैरश्वैः । पुरटवर्मभिः स्वर्णकवचैर्भटैः योद्धभिः । पुरटं स्वर्णम् "पुरोगे पुरटः प्रोक्तः सुवर्णे प्राग्दिशि स्थिते" इति कोशात् । श्रेणीभिस्सजातीयशिल्पिसंघैः । "श्रेणी स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ" इति मेदिनी ॥ ३८ ॥ ३९ ॥ तं भरतम् ॥ ४० ॥ ४१ ॥ उत्तरासंगमुत्तरीयवस्त्रम् । धुन्वंतः कंपयंतः । यद्वोत्तरासंगं कंठगृहीतवाद्यं हस्ताभ्यां वादयंतः "प्रावारमुत्तरासंगं वाद्यं यत्कंठलंबितम् । चर्मावनद्धं हस्ताभ्यां वाद्यते मर्दलादि तत् ॥" इति कोशात् ॥ ४२ ॥ ४३ ॥ तीर्थकमंडलुं तीर्थोदकसंभृतकरकाम् । ऋक्षराट् जांबवान् ॥ ४४ ॥ ४५ ॥ सोपि भरतोपि । रामो वा । श्रीरामे गते भरतोऽप्ययोध्यां नाविक्षदिति प्रसिद्धेः । स्वमातरं कौशल्याम् ॥ ४६ ॥ समुपेयतुः नमस्कारादि यथोचितं चक्रतुः ॥ ४७ ॥ गतान्प्राणानवाप्य तन्वः शरीराणि ॥ ४८ ॥ गुरुर्वसिष्ठः । निर्मुच्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं कृतशिरःस्नानः सुवासाः स्रग्व्यलंकृतः ॥ स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥ ५० ॥ अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ॥ प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ॥ जुगोप पितृवद्रामो मेनिरे पितरं च तम् ॥ ५१ ॥ त्रेतायां वर्त्तमानायां कालः कृतसमोऽभवत् ॥ रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥ ५२ ॥ वनानि नद्यो गिरयो वर्षाणि द्वीपसिंधवः ॥ सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ॥ ॥ ५३ ॥ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ॥ मृत्युश्चानिच्छतां नासीद्रामे राजन्यधोक्षजे ॥ ५४ ॥ एकपत्नीव्रतधरो राजर्षिचरितः शुचिः ॥ स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरन् ॥ ५५ ॥ प्रेम्णानुवृत्त्या शीलेन प्रश्रयावनता सती ॥ धिया ह्रिया च भावज्ञा भर्तुः सीताऽहरन्मनः ॥ ५६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे श्रीरामचरिते दशमोऽध्यायः ॥ १० ॥ श्रीशुक उवाच ॥ भगवानात्मनात्मानं राम उत्तमकल्पकैः ॥ सर्वदेवमयं देवमीज आचार्यवान्मखैः ॥ १ ॥ होत्रेऽददादिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः ॥ अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥ २ ॥ आचार्याय ददौ शेषां यावती भूस्तदंतरा ॥ मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥ ३ ॥ इत्ययं तदलंकारवासोभ्यामवशेषितः ॥ तथा राज्ञ्यपि वैदेही सौमंगल्यावशेषिता ॥ ४ ॥ ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम् ॥ प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥ ५ ॥

॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४॥५५॥५६॥ इति नवमस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥ ततश्चैकादशेऽयोध्यामावसन्ननुजैः सह ॥ यज्ञादि यच्चकारेशो रामस्तदनुवर्ण्यते ॥ १ ॥ १ ॥ २ ॥ तदंतरा तासां दिशां मध्ये यावती भूस्तां ब्राह्मण एवार्हतीति मन्यमानः ॥ ३ ॥ अयं श्रीरामः । तत्तदा । सौमंगल्यमाभरणादिकं तावन्मात्रमवशेषितं तस्याः तद्व्यतिरिक्तं हिरण्यादि सर्वं ददावित्यर्थः ॥ ४ ॥ ५ ॥

मोचयित्वा । आदिना तीर्थांतरांबुग्रहः ॥ ४९ ॥ ५० ॥ भ्रात्रा भरतेन ॥ ५१ ॥ कृतसमः सत्ययुगतुल्यः ॥ ५२ ॥ ५३ ॥ ग्लानिर्मालिन्यम् । क्लमः श्रमः ॥ ५४ ॥ राजर्षीणां मन्वादीनां चरितमिव चरितं यस्य स तथा ॥ ५५ ॥ अनुवृत्त्या शुश्रूषया । शीलेनानुकूलाचरणेन । प्रश्रयेण विनयेनावनता नम्रा । धिया सद्बुध्या । ह्रियाऽसत्कृत्यलज्जया ॥ ५६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे दशमोऽध्यायः ॥ १० ॥ तत् यज्ञादि (१) । उत्तमाः कल्पकाः सामग्र्यो येषु तैः । आचार्यवान् इत्यनेन गुरुकुलवासित्वं शिक्षितत्वं च सूचयति । "आचार्यवान्पुरुषो वेद" इति श्रुतेः ॥ १ ॥ स रामः ॥ २ ॥ ३ ॥ सौमंगल्यं सुमंगलतापादकं । हारवलयादि । इत्यर्थ इति । स्वपरिहितालंकारवस्त्रादीनामुच्छिष्टत्वेन दातुमयोग्यत्वात्तदितरत्सर्वधनं ब्राह्मणेभ्यो ददाविति भावः ॥ ४ ॥ ननु "दत्त्वा दानं द्विजाग्र्याय पुनर्गृह्णाति योऽधमः । स सर्वयातनां भुक्त्वा तैर्यक्त्वं याति चानिशम ॥" इति स्मृतेः । श्रीरामेण कथं भूर्गृहीतेति चेन्न गां दत्त्वा विप्रेभ्यस्ततो जगृहे इति कथमेतदवगतमिति चेदेतच्छ्लोकव्याख्यानादित्याह–तथाहि । ब्रह्मणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रत्तं नस्त्वया किन्नु भगवन् भुवनेश्वर ॥ यन्नोंतर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥ ६ ॥ नमो ब्रह्मण्यदेवाय रामायाकुंठमेधसे ॥ उत्तमश्लोकधुर्याय न्यस्तदंडार्पितांघ्रये ॥ ७ ॥ कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः ॥ चरन् वाचोऽशृणोद्रामो भार्यामुद्दिश्य कस्यचित् ॥ ८ ॥ नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ॥ स्त्रीलोभी बिभृयात् सीतां रामो नाहं भजे पुनः ॥ ९ ॥ इति लोकाद्बहुमुखाद्दुराराध्यादसंविदः ॥ पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥ अंतर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ॥ कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥ ११ ॥ अंगदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ॥ तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥ १२ ॥ सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ॥ गंधर्वान् कोटिशो जघ्ने भरतो विजये दिशाम् ॥ १३ ॥ तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ॥ शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ॥ हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥ १४ ॥ मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ॥ ध्यायंती रामचरणौ विवरं प्रविवेश ह ॥ १५ ॥ तच्छ्रुत्वा भगवान् रामो रुंधन्नपि धिया शुचः ॥ स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः ॥ १६ ॥

किमप्रत्तं किमदत्तं सर्वं दत्तमित्यर्थः । विश्य प्रविश्य ॥६॥ न्यस्तदंडैर्मुनिभिरर्पितौ चित्ते न्यस्तावंघ्री यस्य तस्मै । तेष्वर्पितावंघ्री येनेति वा ॥७॥८॥९॥ असंविदोऽज्ञात् । प्राचेतसो वाल्मीकिस्तस्याश्रमं प्राप्ता ॥१०॥ अंतर्वत्नी गर्भिणी । क्रिया जातकर्माद्याः ॥११॥१२॥१३॥ १४ ॥ १५ ॥ ईश्वरोऽपि शुचो रोद्धुं नाशक्नोत् ॥१६॥

ब्राह्मणे साधुर्ब्रह्मण्यः स चासौ देवश्चेति तस्य । ब्राह्मणदेवस्येति पाठः प्रचुरः स च स्पष्टार्थ एव । संस्तुतं चरितं समस्तभूदानलक्षणं वीक्ष्य प्रीताः । वत्साय लाति ददाति पयस्तमाददाति स्नेहाद्वेति वत्सला सैव वात्सल्यं स्वार्थिकोष्यत् । धेनुरूपं द्रव्यं त्वं प्रत्यर्प्य अस्मभ्यं देहि भूप्रतिनिधित्वेनेदं वाक्यं बभाषिरे । 'अर्प—अतिसर्जने' दैवादिकः । "एकत्र पृथिवी सर्वा सशैलवनकानना । तस्या गौर्ज्यायसी प्रोक्ता" इति पराशरोक्तेः । यद्वा—विप्रैर्भगवतः स्वरूपज्ञानमादाय गुरुदक्षिणात्वेन पुनः स्वस्य तत्पालनेऽयोग्यतां च मत्वा ददे । यद्वा—प्रीतिदानं न दोषायेति वाल्मीकीयोत्तरकांडेऽगस्त्योक्तेः । 'प्रीताः प्रत्यर्पयामासुः' इति भावः ॥ ९ ॥ भगवत्त्वं भुवनेश्वरत्वं च तवैव क्षत्रियत्वाद्योग्यमिति संबुद्धिद्वयतात्पर्यम् । यद्यतः । अंतश्चित्ते । स्वरोचिषा निजज्ञानप्रकाशेन । तमोऽज्ञानलक्षणम् । अतः सर्वं दत्तमिति भावः ॥ ६ ॥ त्वयस्म्यममश्वरं धनं दत्तवान्वयं तत्प्रतिकर्त्तुमसमर्थाः संतः केवलं नमनमेव कुर्म इत्याशयेनाहुः—नम इति । ननु न्यस्तदंडानां निष्कामत्वात्तदंघ्रिध्यानं किमर्थमित्याक्षेपनिवृत्त्या आह—तेषु न्यस्तदंडेषु । अर्पितौ समर्पितावंघ्री ज्ञानवैराग्यलक्षणे गती येनेति वा ॥ ७ ॥ कस्यचित्पुंसः रजकस्येति जैमिनीये ॥ ८ ॥ असतीमसाध्वीं तदेवाह—परवेश्मगामिति "नित्यं स्वं वेश्म संत्यज्य परगेहं प्रयाति या । सा नारी सर्वथा त्याज्या प्रख्यद्ं पुत्रसूरपि ॥" इत्यादिपुराणात् ॥ ९ ॥ दुराराध्यात् 'कः सर्वमाराधयितुं समर्थः' इत्युक्तेः । पत्या श्रीरामेण भीतेन लोकापवादादिति शेषः । 'मृत्युश्च को वाऽपयशः स्वकीयम्' इति शुकोक्तेः । स्वयं स्वापवादश्रवणं जीवन्मृतत्वापादकं तन्निवृत्तये सा सीता त्यक्तेति ॥ १० ॥ कुशलवनाम्नोरन्वर्थता च वाल्मीकीयोत्तरकांडे "कुशमुष्टिमुपादाय लवं चैव तु स द्विजः । वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम् ॥ कुशानामग्रभागस्तु कुशमुष्टिरिहोच्यते । अधोभागः कुशानां तु लवः प्रोक्तो मनीषिभिः ॥ कुशमुष्ट्या मार्जितो यः स कुशः प्रोक्त आख्यया । लवेन मार्जितो यो वै स लवः परिकीर्त्तितः ॥" इति । तयोः कुशलवयोः ॥ ११ ॥ १२ ॥ १३ ॥ तदीयं गंधर्वीयम् । राज्ञे श्रीरामाय ॥ १४ ॥ विवासिता त्यक्ता । विवरं भूबिलम् ॥ १५ ॥ तत् सीताया बिलप्रवेशनम् । वाल्मीकीये तु रामसंमुखमेव नागामीतविमानमारुह्य पृथ्व्या गृहीता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीपुंप्रसंग एतादृक् सर्वत्र त्रासमावहः ॥ अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥ १७ ॥ तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः ॥ त्रयोदशाब्द
साहस्रमग्निहोत्रमखंडितम् ॥ १८ ॥ स्मरतां हृदि विन्यस्य विद्धं दंडककंटकैः ॥ स्वपादपल्लवं राम आत्मज्योतिरगात्ततः ॥ १९ ॥ नेदं यशो
रघुपतेः सुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः ॥ रक्षोवधो जलधिबंधनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः ॥ २० ॥

न चातिचित्रमेतत् । स्त्रीपुंसोः प्रसंग आसक्तिः । त्रासमावहतीति तथा विभक्तेरलुगार्षः । पाठांतरं सुगमम् । किमुतेति प्रासंगिकोक्तिः ॥१७॥ अग्निहोत्रमजुहोत् । प्रभुः
रामः ॥१८॥ आत्मज्योतिर्निजं धाम ॥ १९ ॥ जलधिबंधनमस्त्रपूगैश्च रक्षसां वध इतीदं कविभिराश्चर्यमिव वर्णितमपि यशः स्तुतिर्न भवति । तत्र हेतुः । अधिकसाम्याभ्यां

पातालं जगामेति तत्कल्पांतराभिप्रायम् । शुचोऽश्रूणि । तस्याः सीतायाः । तांस्तान् सौशील्यप्रश्रयादीन् ॥ १६ ॥ एतादृक् वियोगे क्लेशकर एव । पाठांतरम् ‘ सर्वत्रैव भयावहः ’ इत्येवरूपम् । भयं शोकमोहादि
॥ १७ ॥ ततः सीताभूनिवेशानंतरम् । पूर्वं क्वचित्खंडितमिति न ध्येयं किन्तु ततः पूर्वमपि तथा ब्रह्मचर्यमित्यस्याप्यूर्ध्वरेतस्त्वं नार्थः किन्तु ब्रह्मणा लक्ष्म्या सीतया सह चर्यं चरणं वर्तनं बाहुलकाद्भावे यत् । धारयन्कु
र्वन्नेव ‘ मम योनिर्महद्ब्रह्म’ इति वचनात् । अन्यथा त्रयोदशाब्दसाहस्रमित्युक्तिरयुक्ता स्यात् । सर्वात्मना राज्यकरणस्य तावन्मात्रत्वात् । नाक्षत्रमासस्य सप्तविंशतिदिनात्मकस्य गणनयात्र गणना त्रयोदशाब्दसहस्राणाम् ।
यद्वाऽग्निर्हूयतेऽत्रेत्यग्निहोत्रं भूमंडलम् । अखंडितं ब्रह्मलोकसमं तल्लोकसममर्यादम् । त्रयोदशाब्दसाहस्रं धारयन् ब्रह्मचर्यं सीतासाहचर्यमजुहोत् स्वीचकार । ब्रह्मलोकस्याखंडितत्वं वेदानां तत्र मूर्त्तिमत्त्वश्रुतेः । जुहोतेः
स्वीकारार्थस्तु ‘ हु—दानाऽदनयोः ’ अत्र आदाने चेत्येके इत्युक्तेः । “ नक्षत्रमासगणितं त्रयोदशसहस्रकम् । ब्रह्मलोकसमं चक्रे समस्तं क्षितिमंडलम् ॥ ” इति तीर्थः । मम त्वित्थं प्रतिभाति—ननु पृथ्व्यर्थितब्रह्मादि
प्रार्थनानंतरं श्रीवाल्मीकीये “ दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमाम् ॥ ” इति श्रीभगवतैव प्रतिश्रुतं तत्कथं त्रयोदशाब्दसाहस्रमिति तत्राह—तत्रापि पृथिवीपालन एवैतत्काल
प्रतिज्ञा श्रूयते तेन तदनंतरमग्निहोत्रादिकरणं समंजसमेव । “ आयुर्वर्षाणि लक्षं स्युः कृते नृणां महात्मनाम् । त्रेतायामयुतं तच्च सहस्रं द्वापरे ततः । कलौ शतं पापवशात्तस्यापि ह्यनवस्थितिः ॥” इति पुराणांतरोक्तिविरोध
परिहारस्तु “ तपसा दानधर्मेण योगाभ्यासेन वर्द्धते । आयुर्द्धनं सुखं चेह चिकीत्सा नेह विद्यते ॥ ” इत्युक्तेर्ध्येयः । तथा च “ अग्निहोत्रं परो धर्मो न तस्माद्विद्यते परम् ” इत्युक्तेस्तस्मिन्नायुर्वर्द्धनं न चित्रमन्यथा “षष्टि
वर्षसहस्राणि जातस्य मम कौशिक ” इति विश्वामित्रं प्रति दशरथोक्तिः कथं संगच्छेतेति । यच्च “ शतायुर्वै पुरुषः ” इति श्रुतौ शतपदं तदानंत्यमाह प्रतिपादितं चैतन्नीलकंठेन श्रीमहाभारते । “ आनंत्यार्थाः
स्मृताः सर्वे प्रायश्शब्दाः शतादयः । इति हासपुराणेषु वाच्यार्थं ब्रुवते क्वचित् ॥ ” इत्युक्तेः । श्रौतं शतपदं कृतादित्रिष्वानंत्यपरं कलौ वाच्यार्थपरमिति न किंचिदसमंजसम् । यद्वा—त्रयोदशाभिः सहितमब्दसाहस्रं त्रयोद
शाब्दसाहस्रं तथा च त्रयोदशाब्दन्यूनायुताब्दपर्यंतं राज्यं कृत्वा त्रयोदशाधिकसहस्राब्दं यावदग्निहोत्रं चकार तेन “ दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके ” इति प्राचेतसोक्तिः “ दशवर्षसहस्राणि
रामो राज्यमचीकरत ” इति पुराणांतरोक्तिश्च समंजसा भवेदिति । यद्वा—त्रयेण प्रभावोत्साहमंत्ररूपेण शक्तित्रयेणोदश्नाति भुंक्ते राज्यमिति त्रयोदशो नृपस्तत्संबुद्धौ । तथा अब्द सहस्रमग्निहोत्रमजुहोत् । अखंडितं ब्रह्म
चर्यं धारयन्नित्यन्वयः ॥ १८ ॥ विन्यस्य निधिवन्निधाय । आत्मना स्वयमेव ज्योतिःप्रकाशो यत्र तद्वैकुंठम् “ यद्भ्राजमानं स्वरुचैव सर्वतः ” इत्युक्तेः । ब्रह्माख्यं स्वरूपं वा “ न तत्र सूर्यो भाति ” इत्यादिश्रुतेः ॥१९॥
स्तुतिराधिक्यं न । तत्र आधिक्याभावे । अधिकसाम्येत्यत्राधिकेति भावप्रधानो निर्देशः । आधिक्यसाम्याभ्यामित्यर्थः । अधिकसाम्यविमुक्तत्वं तु श्रीमहादेवस्यापि ध्येयत्वात्तदुक्तं तेनैव पाद्मे “ रामरामेतिरामेति रमेरा मे
मनोरमे । सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ १ ॥ ” अस्यार्थस्तु—रमा लक्ष्मीस्तस्या ईरणमीः कंपनम् ‘ ईर—गतौ कंपने च ’ इति धातोर्भावे क्विप् । यया सा रमेः रूपसंपत्तिस्तया रमेराऽर्थाद्रूपसंपत्त्या मनोरमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्याऽमलं नृपसदस्सु यशोऽधुनाऽपि गायंत्यघघ्नमृषयो दिगिभेंद्रपट्टम् ॥ तं नाकपालवसुपालकिरीटजुष्टपादांबुजं रघुपतिं शरणं प्रपद्ये ॥२१॥ यैः संस्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ॥ कोशलास्ते ययुः स्थानं यत्र गच्छंति योगिनः॥२२॥पुरुषो रामचरितं श्रवणैरुपधारयन् ॥ आनृशंस्य परो राजन्कर्मबंधैर्विमुच्यते ॥२३॥ राजोवाच ॥ कथं स भगवान्रामो भ्रातॄन्वा स्वयमात्मनः ॥ तस्मिन्वा तेऽन्ववर्तंत प्रजाः पौराश्च ईश्वरे ॥२४॥

विमुक्तं धाम प्रभावो यस्य तस्य किं कपयः सहायाः अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथैवेदमपि । युक्तं चैतदित्याह । सुराणां याच्ञयाऽऽत्ता स्वीकृता लीलार्था तनुर्येन तस्य ॥ २० ॥ एवंविधलीलाप्रयोजनं दर्शयन्प्रणमति । यस्य यशो नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो मार्कंडेयादयो गायंति । दिगिभेंद्राणां पट्टवदाभरणरूपम् । तत्पर्यंतं व्याप्तमित्यर्थः । नाकपाला देवाः वसुपाला वसुधापालाश्च तेषां किरीटैर्जुष्टं पादांबुजं यस्य तं रघुपतिम् । पाठांतरे तत्तस्य रघुपतेर्नाकपालादिभिर्जुष्टं पादांबुजं प्रपद्य इत्यर्थः॥ २१ ॥स रामः । संविष्ट उपवेशितोऽनु गतो वा यैस्ते कोशलदेशवासिनः सर्वेऽपि यत्र योगिनो गच्छंति तत्स्थानं ययुः॥ २२॥आनृशंस्यपर उपशमनिष्ठः सन्विमुच्यते ॥२३॥स रामः स्वयं कथमवर्तत भ्रातॄन्प्रति वा कथमवर्तत। कथंभूतान् आत्मनः आत्मांशभूतान् । तस्मिन्वा ईश्वरे ते भ्रात्रादयोऽनु अनंतरं कथमवर्ततेति प्रश्नत्रयम्।।२४॥

सुंदरि संबुद्धिरियं पार्वतीं प्रति शिवस्य । वरानने सुमुखे रामनामास्ति मुखसौष्ठवं रामनाम्नैव नान्यथेति भावः । तदुक्तम् ''मथुरार्णविलोमेन मध्यमं नो यदक्षरम्। यो न स्मरति तच्छिष्टं यन्मध्यं तच्च तन्मुखे॥'' इति शिष्टिः यद्वा–मे वरानने इति योज्यं किंभूतं रामनाम रामस्य दाशरथे रामा सीता तस्या इतिर्गमनं यत्र तद्रामरामेति लंकापुरं रामरामेतिनि रामो रमणं यस्य स रामरामेतिरामो रावणस्तस्येतिः समाप्तिर्येन तद्रामरामेतिरामेति संज्ञासं ज्ञिनोरभेदोपचारो हि सूर्यादिशब्दवत् । मीमांसकैर्मंत्रस्यैव देवताविग्रहत्वेन स्वीकृतत्वात् । पुनः किंभूतं सहस्रैरनंतैर्नम्यत उच्चार्यत इति सहस्रनाम 'णम–प्रह्वत्वे शब्दे च' इत्यन्प्रत्ययः । यद्वा–'म्ना–अभ्यासे' इतो मन् । पुनः किंभूतं तेन ब्रह्मणा तुल्यं तत्तुल्यम् " तदिति ब्रह्मणो नाम " इति श्रुतेः । यथा ब्रह्माभ्यासान्मोक्षस्तथा रामनामतोऽपीति भावः । यदुक्तमभियुक्तैः ''यन्नामसंसर्गवशाद्वर्णो नष्टस्वरोऽप्यूर्द्ध्वगतिं प्रयाति । तन्नामपादं हृदि संनिधाय देही कथं नोर्द्ध्वगतिं प्रयायात् ॥'' इति।अपरोऽप्यर्थोऽस्यास्ति तथाहि–हे वराननेऽहं रामे श्रीदाशरथावतिरमेऽतिशयेन तं सेवे।किंभूते रामेऽतिक्रांतो रामो जामदग्न्यो येन सोतिरामस्तस्मिन्नतिरामे पुनर्मनोरमेऽतिसुंदरे संबुद्धिर्वेयम् । किंभूतोऽहं रामो रा धनं यस्य स रामराः । किं च मे यत्सहस्रनाम तत्तुल्यं रामनाम यत्तदोर्नित्यसंबंधात् । यन्मे नामसहस्रोच्चारणफलं तत्सकृद्रामनामोच्चारणेन भवतीति भावः । अत्र छेदस्तु– " रामराऽमेतिरामेऽतिरमे रामे मनोरमे । सहस्रनाम तत्तुल्यं रामनाम वरानने॥ " इति । किं सहाया अपि तु न । यतो न सहायाः अतो हेतोः । इदमपि जलधिबंधनाद्यपि । लीलामात्रास्वीकारे वालिभयार्दितसुग्रीवस्य निजकार्यं कर्तुमशक्तस्य किं परकार्यसहायकत्वं स्यादिति व्यंग्यमत्र ॥ २० ॥ यस्य श्रीरामस्य । वसुपाला इत्यत्र धालोप आर्षः । वसुधारकत्वेन वसुपदं वा वसुधां लक्षयति तेन राजान इत्यर्थः । तीर्थस्तु वसुपालाः कुबेरादय इत्याह । मूलपाठे तमिति छेदः । पाठांतरे 'पादांबुजं रघुपतेः' इति पाठे तदिति छेदः । इत्यर्थ इति । तत्पदं षष्ठ्या विपरिणमनीयमिति भावः ॥ २१ ॥ स यैरिति पाठः प्रचुरः । स्पृष्टो नमनादिना । कोशला अयोध्यावासिनः । योगिनो भक्तिज्ञानयोगसिद्धाः ततः । वैकुंठापरपर्यायं सांतानिकमिति प्राचेतसः ॥ २२ ॥ आसमंतान्नृशंस्यं क्रौर्यं तत्परो वानेन ''रामोरामोराम इति सर्वेषामभव त्तदा । सर्वो राममयो लोको यदा रामोऽभवन्नृपः ॥ '' इति वाक्यमसूचि । तथा च पुरुषमात्रस्य श्रवणमात्रेणापि नाम्ना कर्मबंधविमोकोऽभूदिति भावः ॥ २३ ॥ कथं केन योगेन भ्रात्रादिषु रामो रमयितृत्वेनौरसवत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अथादिशद्दिग्विजये भ्रातृंस्त्रिभुवनेश्वरः ॥ आत्मानं दर्शयन् स्वानां पुरीमैक्षत सानुगः ॥ २५ ॥ आसिक्तमार्गां गंधोदैः करिणां मदसीकरैः ॥ स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥ २६ ॥ प्रासादगोपुरसभाचैत्यदेवगृहादिषु ॥ विन्यस्तहेमकलशैः पताकाभिश्च मंडिताम् ॥ २७ ॥ पूगैः सवृंदे रंभाभिः पट्टिकाभिः सुवाससाम् ॥ आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥ २८ ॥ तमुपेयुस्तत्रतत्र पौरा अर्हणपाणयः ॥ आशिषो युयुजुर्देव पाहि मां प्राक् त्वयोद्धृताम् ॥ २९ ॥ ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥ आरुह्य हर्म्याण्यरविंदलोचनमतृप्तनेत्राः कुसुमैरवाकिरन् ॥ ३० ॥ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥ अनंताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ ३१ ॥ विद्रुमोदुंबरद्वारैर्वैडूर्यस्तंभपंक्तिभिः ॥ स्थलैर्मारकतैः स्वच्छैर्भातं स्फटिकाभित्तिभिः ॥ ३२ ॥ चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः ॥ मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः ॥ ३३ ॥

तत्र श्रीरामस्य भ्रात्रादिषु प्रवृत्तिप्रकारमाह । अथेति अनेनैव भ्रातॄणामपि तदाज्ञाऽनुसारितया प्रवृत्तिरुक्ता । अथ सिंहासनस्वीकारानंतरम् ॥ २५ ॥ पुरीं वर्णयति त्रिभिः । गंधोदकैर्मदबिंदुभिश्चासिक्ता मार्गा यस्याम् । सुतरां मत्तामिव समृद्धाम् । वा इति वितर्के । पाठांतरे वासितगां वासितां कामोन्मत्तां गामिवेत्यर्थः ॥२६॥२७॥ २८ ॥ पौराणां तस्मिन्वृत्तिमाह । तमुपेयुरिति वराहरूपेण त्वयोद्धृतामिमां पृथ्वीं पाहीति॥२९॥प्रजानां तस्मिन्वृत्तिमाह । ततः प्रजा इति ॥ ३० ॥ स्वयं कथमवर्ततेत्यस्योत्तरमाह । अथेति यावत्समाप्ति । स्वगृहं प्रविष्टः संस्तस्मिन् रेम इति पंचमेनान्वयः । गृहं वर्णयति । सार्द्धैस्त्रिभिः । अनंता येऽखिलानां रत्नादीनां कोशास्तैराढ्यम् । अनर्घ्या उरवः परिच्छदा यस्मिन् ॥ ३१ ॥ विद्रुममया उदुंबरा देहल्यो येषु तैर्द्वारैः । स्वच्छैः स्थलैः । तृतीयांतानां मंडितमिति तृतीयेनान्वयः ॥ ३२ ॥ वाससां मणिगणानां चांशुकैर्दीप्तिभिः । चित् चैतन्यं तद्वदुल्लासैरुज्ज्वलैः । यद्वा चिदिति क्वचित् वैडूर्यस्तंभादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मंडितमित्यर्थः । कांताः कमनीयाः कामोपपत्तयो भोगसाध

यथौरसः स्वदेहोत्पन्नः पितरं रमयति तद्वदिति तार्थः ॥ २४ ॥ तत्र त्रिषु प्रश्नेषु ॥ २५ ॥ आदिना प्रजादिग्रहः । अथ राज्यप्राप्तेरनंतरम् । अनेन दिग्विजयाज्ञापनेन । अनुवर्त्तिनं प्रत्येवाज्ञा दीयते न त्वननुवर्त्तिनमिति । स्वानां प्रजादीनाम् । पाठांतरे 'वासितगाम्' इति पाठे । इत्यर्थ इति व्याख्या ॥ २६ ॥ चैत्यं पाषाणादिबद्धं वृक्षमूलस्थलं बुद्धशालास्थलं वा । आदिना प्रजागृहादिग्रहः ॥ २७ ॥ संवृतैः क्रमुकफलगुच्छैः । सवृंदैः 'सुवृंदैः' इति पाठेऽप्ययमेवार्थः । रंभाभिः कदलीस्तंभैः । सुवाससां बहुमूल्यवस्त्राणाम् । पट्टिका अल्पध्वजाः । यत्र कुत्र न्यस्तैरादर्शैर्दर्पणैः । स्रग्भिर्मालाभिः । वस्त्रैरापणमार्गस्तृतैः । एभिस्सह कृतकौतुकानि विरचितमंगलानि च तोरणानि गृहाग्रभागाणि यस्यां ताम् । "गृहाणामग्रभागेऽपि तोरणं पल्लवस्राजि" इति धरणिः ॥ २८ ॥ तस्मिन्रामे । तं श्रीरामम् । तत्रतत्र स्थले स्थिताः ॥ २९ ॥ तस्मिन् श्रीरामे । ततो रामराज्यावाप्तेरुत्तरम् ॥ ३० ॥ अथ पुरीदर्शनोत्तरकाले । अनर्घ्या अमूल्याः । उरवो बहवः । परिच्छदा उपकराः ॥ ३१ ॥ "उदुंबरस्तु देहल्यां वृक्षभेदे च पंडके । कुष्टभेदे पि च पुमांस्ताम्रे तु स्यान्नपुंसकम् ॥" इति मेदिनी । "विद्रुमो रत्नवृक्षेऽपि प्रवालेऽपि पुमानयम्" इति च । भाता दीप्ता याः स्फटिकभित्तयस्ताभिः । क्वचित् 'भ्राजत्स्फटिक'–इत्यपि पाठः ॥ ३२ ॥ पट्टिकाभिर्वितानैः । "लाक्षायां च वितानेऽपि पट्टिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडनैः ॥ स्त्रीपुंभिः सुरसंकाशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥ तस्मिन् स भगवान्रामः स्निग्धया प्रिययेष्टया ॥ रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५ ॥ बुभुजे च यथाकालं कामान्धर्ममपीडयन् ॥ वर्षपूगान्बहूनृणामभिध्याताङ्घ्रिपल्लवः ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीरामोपाख्यानं नामैकादशोऽध्यायः ॥ ११ ॥ छ॥ श्रीशुक उवाच कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ॥ पुंडरीकोऽथ तत्पुत्रः क्षेमधन्वाऽभवत्ततः ॥ १ ॥ देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ॥ ततो बलः स्थलस्तस्माद्वज्र नाभोऽर्कसंभवः ॥ २ ॥ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ॥ ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥ शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः ॥ योगं महोदयमृषिर्हृदयग्रंथिभेदकम् ॥ ४ ॥ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोऽभवत् ॥ सुदर्शनोऽग्निवर्णश्च शीघ्रस्तस्य मरुः सुतः ॥ ५ ॥ योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः ॥ कलेरंते सूर्यवंशं नष्टं भावयिता पुनः ॥ ६ ॥ तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः ॥ महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोऽन्वजायत ॥ ७ ॥ ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः ॥ ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥ ८ ॥

नानि ताभिः ॥ ३३ ॥ भूषणानां भूषणभूतैः ॥ ३४ ॥ ३५ ॥ नृणां मध्ये । यद्वा नृणां नृभिरभिध्यातमंघ्रिपल्लवं यस्येति ॥ ३६ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे रामपुत्रस्य कुशस्यान्वय उच्यते ॥ एवमिक्ष्वाकुपुत्रस्य शशादस्येरितोऽन्वयः ॥१॥ कुशस्य रामपुत्रस्यातिथिः सुतोऽभवत ॥ १ ॥ अर्कसंभवोऽर्कस्यांशात्संभूतः ॥ २ ॥ ततो विधृतेर्हिरण्यनाभः । कथंभूतः । जैमिनेः शिष्यो योगाचार्यः ॥ ३ ॥ तदाह । यतः सकाशात् कौशल्यो याज्ञवल्क्यऋषिराध्यात्मं योगमध्यगात् । महांत उदयाः सिद्धयो यस्मिंस्तम् । हृदयग्रंथेर्भेदकं च ॥४॥५॥ मरुं विशिनष्टि । योऽसाविति । पुनर्भावयिता भावयिष्यति ॥६॥७॥ पित्राऽभिम

स्पध्वजेंशुके" इति निरुक्तिः । यद्वा–चिदव्ययं क्वचिदर्थे । इत्यर्थ इति । शुद्धचैतन्यवद्देदीप्यमानामिति भावः ॥ ३३ ॥ ३४ ॥ तस्मिन् गृहे । प्रियामनआह्लादकरी चेष्टा व्यवहारो यस्यास्तया । स्वारामधीराणां ज्ञानिनाम् । ऋषभः प्रियः ॥ ३५ ॥ निर्द्धारणार्थषष्ठीस्वीकारे भगवतो नरत्वमापतेत्तद्वारणाय यद्वेति । तृतीयार्थे षष्ठी ज्ञेया ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥ एवम् इत्थम् उक्तरीत्या (१) । तस्मात् अतिथिः । तत्सुतो निषधसुतः । अथ नभस्य । तत्पुत्रः पुण्डरीकपुत्रः । तत इत्यग्रिमेणान्वेति । तथा च क्षेमधन्वनो देवानीकः ॥ १ ॥ ततो देवानीकात् । अथानीहादनंतरम् । तत्सुतोऽनीहसुतः । ततः पारियात्रात् । तस्माद्बलात् । ततः स्थलाद्वज्रनाभः ॥ २ ॥ तत्सुतो वज्रनाभसुतः । तस्मात् खगणात् । ततो विधृतेः ॥ ३ ॥ शिष्य इति पूर्वान्वयि । तत् योगाचार्यत्वम् । यतो हिरण्यनाभात् । कौशल्यः कोशलदेशवासी ॥ ४ ॥ ततः पुष्यात् ध्रुवसन्धिः । ततः सुदर्शनः । ततः अग्निवर्णः । ततः शीघ्रः । तस्य शीघ्रस्य । तस्येत्यावृत्त्या योज्यम् ॥ ५ ॥ यो मरुः । असावित्युक्तिस्त्वधुनापि तत्सत्त्वात् । कलापग्रामो बदरिकाश्रमे ऋषिग्रामः ॥ ६ ॥ तस्मान्मरोः । तस्य प्रसुश्रुतस्य। तस्यापि संधेरपि । तत्सुतोऽमर्षणसुतः । तस्मान्महस्वतः ॥ ७ ॥ ततो विश्वसाह्वात् । तस्मात्प्रसेनजितः । ततस्तक्षकात् । यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते हीक्ष्वाकुभूपाला अतीताः शृण्वनागतान् ॥ बृद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥ ९ ॥ उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति ॥ प्रति
व्योमस्ततो भानुर्दिवाको वाहिनीपतिः ॥ १० ॥ सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् ॥ प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥ ११ ॥
भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ॥ तस्यांतरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥ १२ ॥ बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतंजयः ॥ रणं
जयस्तस्य सुतः संजयो भविता ततः ॥ १३ ॥ तस्माच्छाक्योऽथ शुद्धोदो लांगलस्तत्सुतः स्मृतः ॥ ततः प्रसेनजित्तस्मात्क्षुद्रको भविता ततः ॥
॥ १४ ॥ रणको भविता तस्मात्सुरथस्तनयस्ततः ॥ सुमित्रो नाम निष्ठांत एते बार्हद्बलान्वयाः ॥ १५ ॥ इक्ष्वाकूणामयं वंशः सुमित्रांतो भवि
ष्यति ॥ यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ १६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे इक्ष्वाकुवंशवर्णनं नाम द्वादशोऽ
ध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ निमिरिक्ष्वाकुतनयो वशिष्ठमवृतर्त्विजम् ॥ आरभ्य सत्रं सोऽप्याह शक्रेण प्राग् वृतोऽस्मि भोः ॥ १ ॥ तं
निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय ॥ तूष्णीमासीद्गृहपतिः सोपींद्रस्याकरोन्मखम् ॥ २ ॥

न्युना ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ तत्तस्मादमित्रजित् ॥ १२ ॥ १३ ॥ १४ ॥ निष्ठा वंशस्य स्थितिस्तस्या अंतः ॥ १५ ॥ तदेवाह । इक्ष्वाकूणा
मिति ॥ १६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ इक्ष्वाकोरेव पुत्रस्य निमेर्वंशस्त्रयोदशे ॥ वर्ण्यंते जज्ञिरे यत्र ब्रह्मज्ञा जन
कादयः ॥ १ ॥ निमेरौरसः पुत्रो नाभूदिति दर्शयन्कथामाह निमिरित्येकादशभिः । सत्रमारभ्य वशिष्ठमृत्विजमवृत वव्रे ॥ १ ॥ तं शक्रस्य मखं निर्वर्त्य प्रतिपालय

बृहद्बलः । ते पित्राऽभिमन्युना । समरे महाभारतयुद्धे॥८॥अनागतान्भविष्यतः॥९॥ततो बृहद्रणात् । तस्योरुक्रियस्य। ततो वत्सवृद्धात् । पुनस्ततः प्रतिव्योमात् । पुनर्भानोः पुनर्दिवाकात्॥१०॥ततो वाहिनीपतेः । पुनः
सहदेवात् । पुनर्वीरात् । अथ बृहदश्वात् । पुनर्भानुमतः । तत्सुतः सुप्रतीकसुतः । परेणान्वेत्ययम् ॥११॥ अथ मरुदेवात् । अथ सुनक्षत्रात् । तस्य पुष्करस्य । तत्पुत्रोन्तरिक्षपुत्रः । तत्तस्मात्सुतपसः॥१२॥तस्याप्यमित्र
जितोपि । तस्माद्बर्हिषः । तस्य जयस्य । ततो रणंजयात् ॥ १३ ॥ तस्मात्संजयात् । अथ शाक्यात् । तत्सुतः शुद्धोदसुतः । ततो लांगलात् । तस्मात्प्रसेनजितः । तत इति परेणान्वेति क्षुद्रकादित्यर्थः ॥ १४ ॥
तस्मात् रणकात् । ततः सुरथात् । अंतो वंशावधिभूतः । बृहद्बलस्यान्वयो वंशः तत्र भवा बार्हद्बलान्वयाः॥१५॥तदेव वंशावसानमेव । अयं बुद्धिसन्निहितः सुमित्रोंतेऽवसाने यस्य स तथा । यतो यस्मात् । तं सुमित्रम् ।
संस्थां समाप्तिम् "संस्थाव्यवस्थाप्रणाविसमाप्त्याचारमंत्रिषु" इति हलायुधः ॥१६॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ वंशावसानमुक्त्वा पुनस्तस्य कथनं ज्ञातित्वेन अनौरसत्वेन
वैलक्षण्यार्थमित्याह—इक्ष्वाकोरेवेति । तदेवाह—यत्र निमिवंशे । ब्रह्मज्ञा जीवन्मुक्ताः(१) । ऋत्विजं यज्ञकर्तारम् । सत्रं यागम् । सोऽपि वशिष्ठोऽपि । प्राक् तव यज्ञार्थवरणतः पूर्वम् । भो निमे॥१॥निर्वर्त्य समाप्य ।"गृहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निमिश्चलमिदं विद्वान् सत्रमारभतात्मवान् ॥ ऋत्विग्भिरपरैस्तावन्नागमद्यावता गुरुः ॥ ३ ॥ शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ॥ अशप त्पततादेहो निमेः पंडितमानिनः ॥ ४ ॥ निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने ॥ तवापि पततादेहो लोभाद्धर्ममजानतः ॥ ५ ॥ इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः ॥ मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥ ६ ॥ गंधवस्तुषु तद्देहं निधाय मुनिसत्तमाः ॥ समाप्ते सत्रयागेऽथ देवानूचुः समागतान् ॥ ७ ॥ राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि ॥ तथेत्युक्ते निमिः प्राह माभून्मे देहबंधनम् ॥ ८ ॥ यस्य योगं न वांछंति वियोगभयकातराः ॥ भजंति चरणांभोजं मुनयो हरिमेधसः ॥ ९ ॥ देहं नावरुरुत्सेहं दुःखशोकभयावहम् ॥ सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥ १० ॥ देवा ऊचुः ॥ विदेह उष्यतां कामं लोचनेषु शरीरिणाम् ॥ उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः ॥ ११ ॥ अराजकभयं नृणां मन्यमाना महर्षयः ॥ देहं ममंथुः स्म निमेः कुमारः समजायत ॥ १२ ॥ जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः ॥ मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥ १३ ॥

प्रतीक्षस्वेति । गृहपतिर्निमिः ॥ २ ॥ इदं जीवितं चलमस्थिरं विद्वान् ॥३॥ इंद्रस्य मखं निर्वर्त्यागतो गुरुः शिष्यस्य व्यतिक्रममन्यायं वीक्ष्य निमेर्देहः पतत्वित्यशपत् ॥ ॥ ४ ॥ ५ ॥ उर्वशीदर्शनात्स्कन्नं रेतस्ताभ्यां कुंभे निषिक्तं तस्मात्प्रपितामहो वशिष्ठो जज्ञे । तदाह । मित्रावरुणयोरिति । तथा च श्रुतिः । "कुंभे रेतः सिषिचतुः समानम्" इति ॥ ६ ॥ ७ ॥ यदि प्रसन्नाः प्रभवः समर्थाश्चेत्तर्हि जीवत्वित्यूचुः ॥ ८ ॥ यस्य देहस्य योगं न वांछंत्यपि तु मोक्षायैव भजंति ॥ ९ ॥ १० ॥ निमिर्विदेह एव सन्नुष्यतां वसतु कामं यथेच्छम् । एवं सति युष्माभिः प्रार्थितं जीवितमस्य भविष्यति न च देहबंध इति भावः। स चाध्यात्मसंस्थितो लोचनयोः स्थितः सन्नुन्मेषणनिमेषाभ्यां तत्प्रवर्तकत्वेन लक्षितो वर्तत इति शेषः॥ ११॥ तदेवं मृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति । अराजकभयमिति॥ १२॥तस्यान्वर्थानि त्रीणि नामान्याह । जन्मनाऽ

यज्ञे सद्मनि च देहे स्वीकृतवस्तुनि । भूमंडलेऽपि " इति निरुक्तिः । सोऽपि वशिष्ठोऽपि ॥ २ ॥ आत्मवान् विवेकी स्वतंत्रो वा । यावता कालेन । अपरैर्वशिष्ठेतरैः ॥ ३ ॥ पंडितमानिनः मूर्खस्य ॥ ४ ॥ अधर्मवर्त्तिने लोभिने । तदेवाह—लोभादिति ॥ ५ ॥ मित्रावरुणसंभवत्वे प्रमाणमाह—तथा चेति । उर्वशीदर्शनस्कन्नस्य मित्रावरुणौ रेतसस्सेकं कुंभे चक्रतुः । समानं समकालम् ॥ ६ ॥ तस्य निमेर्देहम् । गंधवस्तुषु गंधवासितहरिद्रादियुततैलेषु ॥ ७ ॥ देवैस्तथेत्युक्ते ॥ ८ ॥ यस्य देहस्य । हरिस्सूर्यस्तद्वत्प्रकाशमाना मेधा बुद्धिर्यस्य तस्य विष्णोः । यद्वा—हरिर्भक्तजनतापहरणशीला मेधा धारणावती धीरेते मया पापान्मोचनीया इत्येवंरूपा यस्य तस्य ॥ ९ ॥ नावरुरुत्से स्वीकर्त्तुं नेच्छामि । दुःखं तीव्रवेदना । शोक इष्टवियोगजः क्लेशः । भयं संचलनम् । इतोऽपि देहं नेच्छामीत्याह—सर्वत्रेति । जले महाजलचरात्स्थले वासायोग्यत्वाच्च ॥ १० ॥ निरधिष्ठानवासोऽस्य कथं संभवेत्तत्राह—लोचनेष्विति । एवं सति लोचनयोर्वासे सति । इति भाव इति । उभयोर्मनोरथः संपद्यत इत्याशयः । कथमस्य सद्भावो ज्ञेय इत्यत्राह उन्मेषेति । स च निमिः । लोचनशब्दोक्तचक्षुरिंद्रियस्याध्यात्मत्वात्तत्र वासेनाधिभूतदेहसंबंधो न संभवतीति भावः । " चक्षुराध्यात्ममुच्यते । अधिभूतं ततो रूपं सूर्यस्तत्राऽधिदैवतम् " इति महाभारतोक्तेः । परंपरासंबंधस्य गौणसंबंधत्वान्मुख्यसंबंधाभाव एव तदभिप्रेत इति ध्येयमत्रेति ॥ ११ ॥ वेनात्पृथुवंशवद्वंशप्रवृत्तिमाह—तदेवमिति ॥ १२ ॥ तस्य मृतदेहोद्भूतकुमारस्य । अन्वर्थानि यथार्थानि । असाधारणेनान्यत्राविद्यमानेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. न. श्री. टी. ॥ ३१ ॥

तस्मादुदावसुस्तस्य पुत्रोऽभून्नंदिवर्धनः ॥ ततः सुकेतुस्तस्यापि देवरातो महीपते ॥ १४ ॥ तस्माद्बृहद्रथस्तस्य महावीर्यः सुधृत्पिता ॥ सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥ १५ ॥ मरोः प्रतीपकस्तस्माज्जातः कृतिरथो यतः ॥ देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः ॥ १६ ॥ कृतिरातस्ततस्तस्मान्महारोमाथ तत्सुतः ॥ स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥ १७ ॥ ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम् ॥ सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः ॥ १८ ॥ कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः ॥ धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥१९॥ कृतध्वजात्केशिध्वजः खांडिक्यस्तु मितध्वजात् ॥ कृतध्वजसुतो राजन्नात्मविद्याविशारदः॥२०॥खांडिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद्द्रुतः॥ भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः॥२१॥ शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोऽभवत् ॥ ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरुजित्सुतः ॥२२॥

भा. टी. प्र. टीका. अ० १३

साधारणेन । जन एव जनकः । यद्वा स्वदेहद्वारा जनकत्वात्स निमिर्जनकोऽभूदित्यर्थः । मिथिला येन निर्मिता इत्यनेन व्युत्पत्त्यंतरमथार्दुक्तम्॥ १३॥ १४॥सुधृत् सुधृतिस्तस्य पिता ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ तस्य केशिध्वजस्य भानुमान् ॥ २१ ॥ २२ ॥

स्वार्थिककप्रत्ययेन जनक इति । असाधारणत्वं तु तत्र नास्ति पृथुराज्ञि तद्दर्शनादत आह–यद्वेति । इत्यर्थ इति। 'जनयतीति जनकः' इति निरुक्तेः । स्वयमेव देहं द्वारीकृत्याध्यात्मसंस्थितत्वात्कुमारं जनयामासेति भावः । अत्राध्यात्मसंस्थित इत्यनुवृत्त्य तस्य च योगसंस्थित इति व्याख्या कार्येति । मथनेन भवनं यस्येति मिथिलो निपातनात् । शवानां शयनं यत्रेति श्मशानमितिवत् । यद्वा–मिथिला पूरस्ति निर्मेयाऽस्येति मिथिलः अर्शआदित्वादच् । इत्यभिप्रेत्यैव स्वामिचरणैरुक्तम्–इत्यनेन व्युत्पत्त्यंतरमित्यादि॥ १ ३॥तस्मान्मिथिलात् । तस्योदावसोः । ततो नंदिवर्द्धनात् । तस्यापि सुकेतोरपि ॥ १४ ॥ तस्माद्देवरातात् । तस्य बृहद्रथस्य महावीर्यः स एव सुधृत्पिता सुधृतेः पितेत्यर्थः। सुधृच्छब्दस्तांत इदंतश्चेत्याह–सुधृतेरिति । अथ धृष्टकेतोः । ततो हर्यश्वात्॥ १ ५॥तस्मात्प्रतीपकात् । 'कृतरथः' इत्यपि पाठः । यतः कृतिरथात् । तस्य देवमीढस्य । अथ विश्रुतात्॥ १ ६॥ ततो महाधृतेः । तस्मात्कृतिरातात् । अथानंतरम् । तत्सुतो महारोमसुतः । तस्य स्वर्णरोमा ॥ १ ७॥ततो ह्रस्वरोम्णः । सीरो हलं तदेव ध्वजः कीर्त्तिव्यंजको यस्य स सीरध्वजः । तस्मात्सीराग्रतः सीताख्यकन्योपलब्धिरूपध्वजाद्गमकात् । 'ध्वज–गतौ' इति धातुः । ननु तत्र कर्षणभूमौ कन्या कुतः समागतेति चेदत्राद्भुतरामायणीयोपाख्यानात्तज्जानीहि तच्चेत्थम्–[कदाचित्सर्वदिग्विजयं कृत्वा रावणः सभागतान्सप्तर्षीनाह भवतो विना सर्वे देवासुरादयः मां करं ददति यूयं तं कथं न दत्थ त ऊचुरकिंचना वयं किं दास्यामस्तच्छुत्वा स आह । यद्येवं तर्हि स्वरुधिरं दत्त तच्छ्रुत्वा ते तन्नाशार्थं स्वरुधिरं गात्रेभ्यो निःस्राव्य पात्रे कृत्वा तस्मै ददुः स च तत्पात्रं पृच्छंत्याः किमिदमिति मंदोदर्याः समक्षं तस्या अप्रदर्श्यैवैकांते भूदेशे निखात्वा स्थापितम् । रावणे क्वचिद्गते स्त्रीत्वात् सा च तत्पात्रमुद्धृत्य विधिवशात्तत्रत्यं रुधिरं पपौ । तेन तस्याः कन्यागर्भो बभूव । तं दृष्ट्वा रावणभीता राक्षसविद्याबलात्कुरुक्षेत्रदेशमागत्य गर्भोत्कन्यां निस्सार्य पात्रे कृत्वा भूमौ तत्संस्थाप्य लंकामाययौ । तत्रैव यज्ञार्थं काकतालीयन्यायेन ह्रस्वरोमनाम्ना मिथिलेशेन भूमिं कर्षता सा लब्धा सीराग्रतो लब्धत्वात्तस्याः सीतेति नाम कृतम्] 'सीता लांगलपद्धतिः' इति कोशादिति संक्षेपः ॥१८॥ तस्य सीरध्वजस्य । ततः कुशध्वजात् ॥१९॥ इहात्मविशारद इति । खांडिक्यस्य तदभावप्रदर्शनार्थमुक्तम् । वस्तुतः सर्वेषां मैथिलानामात्मविशारदत्वस्याध्यायांतिमपद्ये कथनात् ॥२०॥ केशिध्वजाद्भीतस्त्रस्तः । कारणांतरे तेन जितो गतः पलायितः । 'द्रुतः' इत्यपि पाठः । तत्सुतो भानुमत्सुतः ॥२१॥ तत्तनयः शतद्युम्नपुत्रः ततस्तदनंतरम् । तस्माच्छुचेः । अथोर्द्ध्व

॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथो यस्य क्षेमधिर्मिथिलाधिपः ॥२३॥ तस्मात्समरथस्तस्य सुतः सत्यरथस्ततः ॥ आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः ॥ २४ ॥ वस्वनंतोऽथ तत्पुत्रो युयुधो यत्सुभाषणः ॥ श्रुतस्ततो जयस्तस्माद्विजयोऽस्माहतः सुतः ॥ २५ ॥ शुनकस्तत्सुतो जज्ञे वीतहव्योधृतिस्ततः ॥ बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी ॥ २६ ॥ एते वै मैथिला राजन्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि ॥२७॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे निमिवंशानुवर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ श्रीशुक उवाच ॥ अथातः श्रूयतां राजन् वंशः सोमस्य पावनः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः ॥ १ ॥ सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात ॥ जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥ २ ॥ तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः किल ॥ विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥३॥

तत्तस्मात्सुपार्श्वकः ॥ २३ ॥ अग्निसंभवोऽग्नेरंशात्संभूतः ॥ २४ ॥ यद्यस्मात्सुभाषणः ॥ २५ ॥ २६ ॥ योगेश्वरा याज्ञवल्क्यादयस्तेषां प्रसादेन ॥ २७ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशादिभिः सोमवंशमाहासमान्वितः ॥ यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः ॥ १ ॥ चतुर्दशे गुरोः पत्न्यां तारायां सोमजाद् बुधात् ॥ जातश्चैलः षड्डुर्वश्यामायुमुख्यानजीजनत् ॥ २ ॥ १ ॥ २ ॥ दृग्भ्यः आनंदाश्रुभ्यः अत एवामृतमयः । किलेत्याश्चर्ये । पाठांतरे दृशो नेत्रात् । वक्ष्यमाणदर्पकारणमाह । विप्रेति ॥ ३ ॥

केतोः ॥ २२ ॥ तस्यापि पुरुजितोपि । पुनस्तस्य श्रुतायुः । तस्माच्छ्रुतायुषः । ततः सुपार्श्वकात् । यस्य चित्ररथस्य ॥ २३ ॥ तस्मात् क्षेमधियः। तस्य समरथस्य । ततस्सत्यरथात् । तस्मादुपगुरोः ॥ २४ ॥ अथोपगुप्तात् । तत्पुत्रः वस्वनंतपुत्रः । यस्माद्युयुधात् । ततः सुभाषणात् । तस्माच्छ्रुतात् । पुनस्तस्माज्जयात् । अस्माद्विजयात् ॥२५॥ तत्सुतः ऋतसुतः । पूर्वश्लोके कचित् 'विजयोऽस्मात्ततः सुतः' इत्यपि पाठः । तत्र चेत्थं ज्ञेयम् । अस्माज्जयाद्विजयः ततो विजयात्सुतः शुनकः । तत्सुतः शुनकसुतः । ततो वीतहव्यात् । तस्य बहुलाश्वस्य । अस्य कृतेः ॥ २६ ॥ एते मिथिलप्रभृतयः खांडिक्यं विना । आदिना पंचशिखासुर्यादिग्रहः । द्वंद्वै रागद्वेषादिभिः । गृहेष्वपि गृहस्था अपि मुक्ता आत्मारामा इत्यर्थः ॥ २७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ आसमाप्तितः स्कंधसमाप्तिपर्यंतम् । यस्मिन्सोमवंशे (१) । गुरोर्बृहस्पतेः । ऐलः पुरूरवाः । षट् पुत्रान् (२) । अथात इति । अथ सूर्यवंशकथनानंतरम् । यतः वंशकथनं पुरुषार्थसाधनमतो हेतोरित्यर्थः । ज्ञानं पुरुषार्थसाधनं सर्वत्र श्रूयते कथं वंशश्रवणं तद्भवेदिति चेदाह–पावन इति अंतःकरणशुद्धिकरः । तत्र हेतुः–यस्मिन्निति । पुण्यकीर्त्तिनरयशःश्रवणस्य पुरुषार्थत्वं तु शौनकादिप्रश्नतोऽवसीयते तथाहि–"तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् । अथ वास्य पदांभोजमकरंदलिहां सताम् ॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः" इति ॥ १ ॥ सर्वमूलकारणीभूतहरिरेवास्य मुख्यादिपुरुष इति स्मारयति–सहस्रशिरस इति । "सहस्रशीर्षा पुरुषः" इत्यादि श्रुतिप्रतिपादितस्य पुंसः पुरुषस्य । पितृसमो ब्रह्मणा तुल्यः । गुणैः तपःप्रभावादिभिः ॥ २ ॥ तस्य अत्रेः । अत एवानंदाश्रुजलोद्भूतत्वादेव । अमृतस्वरूपः अमृतं जलं सुधास्वीकारे तु क्षयो न भवेत् । यद्वा–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽयजद्राजसूयेन विजित्य भुवनत्रयम् ॥ पत्नीं बृहस्पतेर्दर्पात्तारां नामाहरद्बलात् ॥ ४ ॥ यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ॥ नात्य जत्तत्कृते जज्ञे सुरदानवविग्रहः ॥५॥ शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम्॥हरो गुरुसुतं स्नेहात्सर्वभूतगणावृतः॥६॥ सर्वदेवगणोपेतो महेंद्रो गुरुम न्वयात्॥सुरासुरविनाशोऽभूत्समरस्तारकामयः ॥७॥ निवेदितोऽथांगिरसा सोमं निर्भर्त्स्य विश्वकृत्॥तारां स्वभर्त्रे प्रायच्छदंतर्वत्नीमवैत्पतिः॥८॥ त्यजत्यजाशु दुष्प्रज्ञे मत्क्षेत्रादाहितं परैः ॥ नाहं त्वां भस्मसात्कुर्यां स्त्रियं सांतानिकः सति॥९॥ तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ॥ स्पृहामां गिरसश्चक्रे कुमारे सोम एव च ॥ १० ॥ ममायं न तवेत्युच्चैस्तस्मिन् विवदमानयोः ॥ पप्रच्छुरृषयो देवा नैवोचे व्रीडिता तु सा ॥ ११ ॥ कुमारो मातरं प्राह कुपितोऽलीकलज्जया ॥ किं न वोचस्यसद्वृत्ते आत्मावद्यं वदाऽऽशु मे ॥ १२ ॥ ब्रह्मा तां रह आहूय समप्राक्षीच्च सांत्वयन् ॥ सोम स्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥ १३ ॥ तस्यात्मयोनिरकृत बुध इत्यभिधां नृप ॥ बुद्ध्या गंभीरया येन पुत्रेणापोडुराण्मुदम् ॥ १४ ॥

सोमस्य पुत्रो बुध इति कथाद्वारेणाह । पत्नीमिति सार्धैर्नवभिः ॥ ४ ॥ तत्कृते तन्निमित्तम् ॥ ५ ॥ सुराणां दानवानां च विग्रहे कारणमाह । शुक्र इति । असुरैः सहितः उडुपमग्रहीदित्यर्थः । संधिरार्षः गुरोः सुतं बृहस्पतिमग्रहीत । अंगिरसः सकाशात्प्राप्तविद्यो हर इति प्रसिद्धिः ॥ ६ ॥ ७॥ निवेदितो विज्ञापितः । विश्वकृद्ब्रह्मा । अवैदबुध्यत ॥ ८ ॥ बृहस्पतिराह । त्यजत्यजेति । परैराहितं गर्भम् । गर्भे त्यक्ते भस्मीकरिष्यतीति बिभ्यतीं प्रत्याह । नाहमिति । सांतानिकः संतानार्थी । सांतानिके इति पाठे हे सत्पुत्रे इत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ रहः एकांते ॥ १३ ॥ पुरूरवस उर्वश्यामायुप्रमुखा षड्पुत्रा जाता इति वक्तुं कथामाह ।

भगवन्मायाया अघटनघटनापटीयस्त्वात्सुधावत्त्वेपि क्षयो नाद्भुतमिति । पाठांतरे 'तस्य दशोऽभवत्' इति पाठे ॥ ३ ॥ स सोमः । बृहस्पतिभार्याहरणं स्वज्येष्ठभ्रातृतत्थ्यभार्यागमनादेव जातमिति ब्रह्मवैवर्त्ते स्फुटम् ॥ ४ ॥ स सोमः । अभीक्ष्णशः मुहुर्मुहुः । मदाद्गर्वात् । तत्कृते तारानिमित्तम् ॥ ५ ॥ इत्यर्थ इति । असुरानुमतेन चंद्रं रक्षणार्थं स्वीचकारेति भावः । यलोपस्यासिद्धत्वेन गुणस्याकर्त्तव्यत्वादाह--संधिरिति । बृहस्पतिर्हरगुरुसुत इत्यत्र पुराणांतरसंमतिमाह--अंगिरसो भार्या केनचित्कर्मदोषेण मृतवत्सासीत्सा च विरिंच्याज्ञया कृष्णव्रतं पुंसवनं वर्षमेकं चकार । तत्तुष्टेन श्रीकृष्णेन बृहस्पतिः पुत्रो दत्तः स च कृष्णस्यापि वरजः पुत्र एव तदुक्तम् ''वरजो वीर्यजश्चैव क्षेत्रजः पालितस्तथा । विद्यामंत्रसुतानां च गृहीता सप्तमः सुतः॥''इति । कृष्णश्च शिवस्य गुरुरभूत् तदुक्तम्--''श्रीकृष्णो हि गुरुः शंभोः परात्परतमः स्वयम् । अतो हि तत्सुरगुरुर्गुरुपुत्रः शिवस्य च ॥'' इति । यद्वा--सत्यां मृतायां दक्षयज्ञे तच्छोकेन सर्वं स्वज्ञानं शिवो विस्मृतवान् तदा तद्बोधनाय कृष्णप्रेरितोंगिरास्तं बोधयामास । तस्माच्छिवगुरुरेव स एवं तत्पुत्रो बृहस्पतिः शिवगुरुसुत एतत्सर्वं ब्रह्मवैवर्ते स्फुटम् ॥ ६ ॥ तारैव तारका तस्या हेतोरागतः प्राप्तस्तारकामयः ''मयट् च'' इति हेतुवाचकादागत इत्यर्थे मयट् ॥ ७ ॥ अथ युद्धानंतरम् स्वभर्त्रे बृहस्पतये । पतिर्बृहस्पतिः ॥ ८ ॥ इत्यर्थ इति । श्रेष्ठे पुत्रे सति त्वां न भस्माहं करोमीति भावः । प्रथमांतपाठेऽसतीति संबुद्धिः ॥ ९ ॥ १० ॥ तस्मिन् तारागर्भनिर्गते पुत्रे । विवदमानयोर्गुरुचंद्रयोः सतोः । सा तारा ॥ ११ ॥ अलीकलज्जया अप्रियकर्मलज्जया । ''अलीकमप्रियेऽपि स्यादयोग्यासत्ययोस्तथा'' इति कोशात् । न वोचसि वदसि 'वुच--परिभाषणे' भ्वादिः । असद्वृत्ते दुराचारे अमंगलस्वरूपे वा''वृत्तं स्वरूपे चरिते वृत्तं छंदोविधासु च'' इति हलायुधः । आत्मावद्यं निजदोषम् । 'अवद्यं पापदोषयोः' इति निरुक्तिः ॥ १२ ॥ सांत्वयन् प्रसह्य परपुरुषसंगो न दोषायेत्यादि साम प्रयुंजन् । तं कुमारम् । तावत्तदा ॥ १३ ॥ तस्य कुमारस्य ।यावत्समाप्ति स्कंधसमाप्तिपर्यंतम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पुरूरवा जज्ञे इलायां य उदाहृतः ॥ तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥ १५ ॥ श्रुत्वोर्वशींद्रभवने गीयमानान् सुरर्षिणा ॥ तदंतिकमुपेयाय देवी स्मरशरार्दिता ॥ १६ ॥ मित्रावरुणयोः शापादापन्ना नरलोकताम् ॥ निशम्य पुरुषश्रेष्ठं कंदर्पमिव रूपिणम् ॥ १७ ॥ धृतिं विष्टभ्य ललना उपतस्थे तदंतिके ॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ॥ उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥ १८ ॥ राजोवाच ॥ स्वागतं ते वरारोहे आस्यतां करवाम किम् ॥ संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥ १९ ॥ उर्वश्युवाच ॥ कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुंदर ॥ यदंगांतरमासाद्य च्यवते ह रिरंसया ॥ २० ॥ एतावुरणकौ राजन् न्यासौ रक्षस्व मानद ॥ संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥ २१ ॥ घृतं मे वीर भक्ष्यं स्यान्नेक्षे त्वाऽन्यत्र मैथुनात् ॥ विवाससं तत्तथेति प्रतिपेदे महामनाः ॥ २२ ॥

तस्येत्यादिना यावत्समाप्ति ॥ १४ ॥ १५ ॥ १६ ॥ ननु देवी कुतो मनुष्यस्यांतिकमुपागच्छेत्तत्राह । मित्रावरुणयोः शापान्नरलोकतां मनुष्यभावमापन्ना सती ॥ १७ ॥ १८ ॥ नौ आवयो रतिरस्त्विति ॥ १९ ॥ यस्य तवांगांतरं वक्ष आसाद्य रिरंसया रंतुमिच्छया ह स्फुटं न च्यवते नापयाति । यद्यस्मादिति वा ॥ २० ॥ शापावसाने भाषाभंगमिषेण जिगमिषोस्तस्या भाषाबंधमाह एताविति द्वाभ्याम् । उरणकौ मेषौ न्यासौ निक्षेपरूपौ रक्षस्व । यः श्लाघ्यः स एव स्त्रीणां वरः स्मृतः । अतो विजातीयत्वं न दोष इति भावः ॥ २१ ॥ हे वीर घृतं मे भक्ष्यं स्यात् । "अमृतं वा आज्यम्" इति श्रुतेः। देवानां चामृताशित्वात् । मैथुनादन्यत्र विवाससं त्वां नेक्षिष्ये । इति प्रतिपेदेंगीकृतवान् ॥ २२ ॥

आत्मा परमात्मा योनिः कारणं यस्य स ब्रह्मा । अभिधां नाम । तत्र निमित्तमाह—बुद्ध्येति । सदसद्विचारो बुद्धिः । येन बुद्धिसंपन्नपुत्रेण । उडुराट् चंद्रः ॥ १४ ॥ ततो बुधात् । य उदाहृतः प्रथमाध्याये तस्य पुरूरवसः ॥ १५ ॥ तदंतिकं पुरूरवःसमीपम् ॥ १६ ॥ तदागमनमाक्षिपति—नन्विति । स्मरार्दितमित्रावरुणाभ्यां स्वर्थं प्रार्थितोर्वशी तौ नाभ्यनंदंती त्वां मनुष्यो भोक्ष्यतीति शशापेति स्पष्टं पुराणांतरे इत्यत आह—मित्रावरुणयोरिति ॥ १७ ॥ धृतिं धैर्यम् । विष्टभ्य विहाय । स पुरूरवाः । तामुर्वशीम् । श्लक्ष्णया शोभनया ॥ १८ ॥ शाश्वतीः समा बहून्संवत्सरान् । रतिः ग्राम्यविषया क्रीडा ॥ १९ ॥ अंगस्य देहस्यांतरं मध्यभागोऽर्थाद्वक्षःस्थलम् । पूर्वार्द्धस्थनन्नुत्तरार्धेऽपि योज्यम् । यद्यस्मात्। हे अंग राजन् । अंतरमवकाशमासाद्य प्राप्य मनश्च्यवते रिरंसया विकृतीभवतीति विश्वनाथः ॥२०॥ तस्या उर्वश्याः । भाषाबंधः प्रतिज्ञा । कालांतरस्वीकार्यं विश्वस्तस्थापितं वस्तु न्यासः । "मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके" इत्यमरः । उरणावेवोर्णकौ । इति भाव इति । स्त्रीणां पतित्वे श्लाघ्यत्वं रतिसमर्थयुवत्वादीलक्षणमेव कारणं न वै जात्यादीति तात्पर्यम् ॥ २१ ॥ समयं बध्नाति—घृतमिति । ननु देवभोज्यं त्वमृतमस्ति तत्कथं घृतमशिष्यसीति च घृतमेवामृतमित्यत्र श्रुतिं प्रमाणयति—अमृतमिति । विवाससं शिश्नाच्छादकवस्त्रहीनम् । इतोऽन्यथाकरणे नाहमत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो रूपमहो भावो नरलोकविमोहनम् ॥ को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥ २३ ॥ तया स पुरुषश्रेष्ठो रमयंत्या यथार्हतः ॥ रेमे सुर विहारेषु कामं चैत्ररथादिषु ॥ २४ ॥ रममाणस्तया देव्या पद्मकिंजल्कगंधया ॥ तन्मुखामोदमुषितो मुमुदेऽहर्गणान्बहून् ॥ २५ ॥ अपश्यन्नुर्वशी मिंद्रो गंधर्वान्समनोदयत् ॥ उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥ २६ ॥ त उपेत्य महारात्रे तमसि प्रत्युपस्थिते ॥ उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥ २७ ॥ निशम्याक्रंदितं देवी पुत्रयोर्नीयमानयोः ॥ हतास्म्यहं कुनाथेन नपुंसा वीरमानिना ॥ २८ ॥ यद्विश्रंभादहं नष्टा हृता पत्या च दस्युभिः ॥ यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् ॥ २९ ॥ इति वाक्सायकैर्विद्धः प्रतोत्रैरिव कुंजरः ॥ निशि निस्त्रिंशमा दाय विवस्त्रोऽभ्यद्रवद्रुषा ॥ ३० ॥ ते विसृज्योरणौ तत्र व्यद्योतंत स्म विद्युतः ॥ आदाय मेषावायांतं नग्नमैक्षत सा पतिम् ॥ ३१ ॥ ऐलोऽपि शयने जायामपश्यन्विमना इव ॥ तच्चित्तो विह्वलः शोचन्बभ्रामोन्मत्तवन्महीम् ॥ ३२ ॥ स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ॥ पंच प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ ३३ ॥ अहो जाये तिष्ठतिष्ठ घोरे न त्यक्तुमर्हसि ॥ मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ ३४ ॥

तदेवाह । अहो इति ॥ २३ ॥ २४ ॥ पद्मकिंजल्कस्य गंध इव गंधो यस्यास्तया मुखामोदेन मुषितः प्रलोभितः सन् ॥ २५ ॥ मह्यं मम ॥ २६ ॥ महारात्रे मध्यरात्रे । "महानिशा द्वे घटिके रात्रौ मध्यमयामयोः" इति स्मृतेः ॥ २७ ॥ जिगमिषोस्तस्याः परुषोक्तिमाह । हतास्मीति सार्धेन । नपुंसा नपुंसकेन ॥ ॥ २८ ॥ यथा नारी तथा संत्रस्तः शेते ॥ २९ ॥ ३० ॥ विद्युतो विशिष्टद्युतिमंतो व्यद्योतंत दीप्तिमकुर्वत । यद्वा तदैव तडितः प्राकाशंतेत्यर्थः । नग्नमैक्षत अतो भाषाभंगान्निर्जगामेति ज्ञेयम् ॥ ३१ ॥ ३२ ॥ तस्याः सखीश्च पंच वीक्ष्य । सूक्तं शोभनं वचनम् । "हये जाये" इत्यादि ॥ ३३ ॥ तदेवार्थत आह । अहो इति

वक्ष्यामीति भावः । स च तदुर्वश्युक्तं सर्वं तथेति॥२२॥तदेवांगीकरणमेव । भावः शृंगारादिः । न रीयंते स्रवंति रेतोरूपेणेति नरास्तपस्विनस्तेषां लोकः समूहस्तं विमोहयतीति तथा । मनुज इति दौर्लभ्य माह ॥२३॥ तयोर्वश्या । स ऐलः । यथार्हतः मानपूर्वं सुराणां विहारो येषु । आदिना नंदनवैभ्राजादिग्रहः ॥२४॥ तस्या उर्वश्याः । मुखामोदेन निश्वाससुरभिगंधेन । क्वचित् 'मुमुहे' इति पाठः ॥२५॥आस्थानं सभा । इति पदमध्या हार्यम्॥२६॥ ते गंधर्वाः । मध्यमयामयोर्द्वितीययामांतैकघटिका तृतीययामाद्यैकघटिकेति द्वे ॥२७॥ तस्या उर्वश्याः । परुषोक्तिं कठोरवाक्यम् । पुत्रयोः पुत्रवत्पाल्यमानयोः ॥२८॥ यः पुमान्सन्नपि यथा नारी निशि तथा संत्रस्तः भीतः । यद्वा—दिवैव पुमान्न तु रात्राविति । यतः संत्रस्तः शेते । यद्विस्रंभात् वीरोऽयमिति विश्वासात् ॥२९॥ वाक्सायकैर्वचनबाणैः । प्रतोत्रैरंकुशैः । कुंजेषु रमत इति कुंजरो गजः । यद्वा—कुञ्जो हस्तिहनुः सोऽस्यास्तीति "खमुखकुञ्जेभ्य उपसंख्यानम्" इति रः । ॥ ३० ॥ ते गंधर्वाः । तत्र तस्मिन्समये देशे वा विद्युतः प्रकाशकदीप्तीः व्यद्योतंत चक्रुः । यद्वा—दीप्ता बभूवुः । विद्युत इवेति लुप्तोपमात्र । सा ऊर्वशी । स्वामि व्याख्याने विशिष्टदीप्तिमंतश्चेत्तर्हि पूर्वमेव कथं न ज्ञाता इति चेदाह—यद्वेति। इत्यर्थ इति । पूर्वं प्रकाशं गोपायित्वा मेषदानोत्तरं राज्ञो नग्नदर्शनार्थं पश्चात्प्रकाशं चक्रुरिति भावः । यतो नग्नदर्शनं जातमतो हेतोः । प्रतिज्ञाभं गादनुक्तमपि तद्गमनमत्र ज्ञेयम्॥३१॥तदेवाह—बभ्राम इतस्ततो धावनं चकार । तच्चित्त उर्वशीनिक्षिप्तचेताः । विह्वलोऽस्वस्थः॥३२॥स ऐलः। हये इत्यादि—"हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु न नौ मंत्रा अनुदितास एते मयस्करन्परतरे च नाहन्"इत्येवंरूपं सूक्तं व्याख्यातं चेदमेकादशस्कधषड्विंशाध्याये॥३३॥तदेव सूक्तमर्थतो व्याख्यानेनाह—हे घोरे सुरतशौंडे । निर्वृतिमानंदम् । पाठांतरे'अनिर्वर्त्य'इति पाठे।विषयेभ्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुदेहोऽयं पतत्यत्र देवि दूरं हृतस्त्वया॥खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥३५॥ उर्वश्युवाच ॥ मा मृथाः पुरुषोसि त्वं मा स्म त्वाद्युर्वृका इमे ॥ क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥३६॥ स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ॥ घ्नंत्यल्पार्थेऽपि विश्रब्धं पतिं भ्रातरमप्युत ॥ ३७ ॥ विधायालीकविश्रंभमज्ञेषु त्यक्तसौहृदाः ॥ नवंनवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः ॥ ३८ ॥ संवत्सरांते हि भवानेकरात्रं मयेश्वर ॥ वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भोः ॥ ३९ ॥

द्वाभ्याम् । अनिर्वृत्य मत्कृतां निर्वृतिमप्राप्य । पाठांतरे मां निर्वृतिमगमयित्वा मंत्राननुक्त्वेति वा । वचांसि कृणवावहै गोष्ठीः करवावहै ॥३४॥ सुदेहोऽतिकमनीयोऽयं मम देहः ॥३५॥"पुरूरवो मा मृथाः" इत्यादि तस्याः सूक्तं तदप्यर्थंत आह मा मृथा इति चतुर्भिः । मा म्रियस्व पुरुषोऽसि अतो धैर्यमावहेति भावः । इमे वृकाः प्रसिद्धा इंद्रियाणि वा त्वा इति त्वां मा स्म अद्युर्भक्षयेयुः । इंद्रियवशो मा भवेत्यर्थः ॥३६॥ प्रिये निमित्ते साहसं यासाम् ॥ ३७ ॥३८॥ तं सांत्वयति । संवत्सरांत इति ॥३९॥

निर्वृतिस्तु सर्वथा दुःशकेति चेदाह–मंत्रानिति । गुप्तभाषणानि ॥ ३४ ॥ अत्र कुरुक्षेत्रे अस्यामवस्थायां वा । एनं मद्देहम् । अत्र काश्चन वाचो विहाय सारार्थमाह–" सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गतवा उ अथाशयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युरिति किमेता वाचा कृणुवः अहमुषसामग्र्येव प्राक्रमिषम् " हे देवि परावतम् परवंतं दीर्घश्छांदसः । परमां गतिं गतवे उर्गंतुमें सुदेवः सुष्ठु ज्ञानसाधनं शरीरं प्रपतेत्प तिष्यति । कुतः अनावृत् आधारहीनः । अथ पतनोत्तरम् । निर्ऋतेर्भूमेरुपस्थे पृष्ठे शयीत पतेत् । अथ परावतं पराधीनं निर्जीवमेनं शरीरं रभसासः भक्षणसंभ्रमाकुला वृका अद्युः खादंति । पतित्वापि कथंचित्सप्राणं चेद्वृका इंद्रियाणि बाधंत इत्यर्थः । हये जाये इत्यस्या उत्तरमाह–किमिति । तवैतया वाचा किं कृणुव किं कुर्वः । आवयोः पूर्ववत्संगमानुपपत्तेः। किंनिमित्तं तत्राह–अहमिति । अहमुषसां प्रातरादीनामग्रे प्रथममेव प्राक्रमिषं यथा प्रथमोषसोऽतिक्रांतत्वात्पाश्चात्यानामुषसां योगो न घटते तथाऽवयोरपीत्यर्थः । तर्ह्यहं किं करोमीति तत्राह–'पुरूरवः पश्चादस्तं परेहि दुरापना यथा वात' इति । अस्तं गृहं परेहि गच्छ इदानीमेवं कर्तव्यमित्यर्थः । "अस्तमेयाय"इति श्रुतेः । किमर्थं पश्चाद्गमनं तत्राह–दुरापनेति । यथा वातो वायुर्ग्रहीतुमशक्यस्तथाहमपि दुरापना दुर्ग्रहेत्यर्थः ॥३९॥ मृदुवचनोत्तरेणायं गृहं न यास्यतीत्यभिसंधाय कठिनोत्तरेण निवर्तयिष्यामीत्याह–मा मृथेति । हे पुरूरवः पुरुषस्य बलिष्टत्वात्कामनिमित्तं मरणं नोचितमबलायाश्चाबलत्वेन कथंचित्संभावितं स्यादित्यर्थः । अनेनार्थतः "माप्रपप्त इत्येतद्विवृतं भवति पुरूरवो म मृथा मा प्रपप्तो मा त्वा वृकासो अशिवास उक्षन् न वै स्त्रैणानि सख्यानि संति शालावृकाणं हृदयान्येताः" इत्युत्तरत्वेनोर्वश्योक्तम् । व्याख्यातं चेदमेकादशस्कंधे ऐलोपाख्याने । यथा वृकाणां हृदयं क्रूरं तथा स्त्रीणामपीति । इत्यर्थइति । पुरुषस्येंद्रियाणां क्लीबत्वेन तदधीनत्वमयुक्तमिति भावः ॥ ३६ ॥ दुर्गतं मर्षः सहनं यासां ताः । साहसं बलात्कारलक्षणं कर्म । एतदेवाह–घ्नंतीति । अल्पस्तुच्छोर्थो व्यभिचारलक्षणस्तन्निमित्तम् । "अस्वर्ग्यं मयशस्यं च फल्गु कृच्छ्रं भयावहम् । जुगुप्सितश्च सर्वत्र औपपत्यं कुलस्त्रियाः ॥" इत्युक्तेर्व्यभिचारस्याल्पत्वम् ॥ ३७ ॥ अलीकविस्रंभं कपटविश्वासम् । पुंश्चल्यः पुरुषमात्रभोक्त्र्यः । अस्यैव विवरणं स्वैरवृत्तय इति ॥ ३८ ॥ तमैलम् । वत्स्यति सुरतक्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम् ॥ पुनस्तत्र गतोऽब्दांत उर्वशीं वीरमातरम् ॥ ४० ॥ उपलभ्य मुदा युक्तः समुवास तया निशाम् ॥ अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥ ४१ ॥ गंधर्वानुपधावेमांस्तुभ्यं दास्यंति मामिति ॥ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ॥ उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन् वने ॥४२॥ स्थालीं न्यस्य वने गत्वा गृहांस्तां ध्यायतो निशि ॥ त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ॥४३॥ स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ॥ तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥ ४४ ॥ उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तराम् ॥ आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ॥ ४५ ॥ तस्य निर्मंथनाज्जातो जातवेदा विभावसुः ॥ त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितत्रिवृत् ॥ ४६ ॥ तेनायजत यज्ञेशं भगवंतमधोक्षजम् ॥ ऊर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिम् ॥ ४७ ॥ एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ॥ देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥ ४८ ॥

अपराणीति वचनादंवर्तत्नीमुपालक्ष्य ज्ञात्वा ॥ ४० ॥ ४१ ॥ अनेनाग्निना कर्म कृत्वा तद्वशादुर्वशीं प्राप्स्यतीत्यभिप्रायेणाग्निस्थालीं ददुः । स तु तां स्थालीमेवोर्वशीं मन्यमानस्तया सहितो वने विचरन्नेयमुर्वशी किं त्वाग्निस्थालीत्यबुध्यत ॥ ४२ ॥ ततश्च । तां स्थालीं वने स्थापयित्वा गृहान्गत्वा निशि नित्यं तामेवाध्यायतस्तस्य मनसि त्रेतायां त्रयी अवर्तत कर्मबोधकं वेदत्रयं प्रादुरभूत् ॥ ४३ ॥ ततः स्थालीस्थानं गतः सन् शम्या गर्भे जातमश्वत्थं विलक्ष्यास्मिन्नसावग्निरस्तीति विशेषेण लक्षयित्वा तेनाश्वत्थेन द्वे अरणीकृत्वाऽग्निं ममंथेति शेषः । "शमीगर्भादग्निं ममंथ" इति श्रुतिः ॥ ४४ ॥ मथनप्रकारमाह । अधरारणिमुर्वशीं ध्यायन्नुत्तरारणिमात्मानं ध्यायन्नुभयोर्मध्ये यत्काष्ठं तत्प्रजननं पुत्रं ध्यायन् । तथा च मंत्रः । "उर्वश्यस्यायुरसि पुरूरवाः" इति ॥ ४५ ॥ तस्य तेन कृतान्निर्मंथनाद्विभावसुरग्निर्जातः । कथंभूतः । जातं वेदो धनं भोग्यं यस्मात् । स च त्रय्या विद्यया विहितेनाधानसंस्कारेण । त्रिवृदाहवनीयादिरूपः सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात् ॥ ४६ ॥ तदाह । तेनेति ॥ ४७ ॥ नन्वनादिर्वेदत्रयबोधितो ब्राह्मणादीनामिंद्राद्यनेकदेवयजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः कथं सादिरिव वर्ण्यते तत्राह एक एवेति द्वाभ्याम् ।

डामनु भविष्यतीत्यर्थः । ते तव । मयि अपराण्यन्यानि ॥ ३९ ॥ स ऐलः । यत्र कुरुक्षेत्रदेशे सा पूर्वं दृष्टा तत्रेत्यर्थः ॥ ४० ॥ तयोर्वश्या । समुवास सुरतमनुभूतवान् । अथ रात्र्यंते । इमान्मया सहागतान् । उपधाव शरणं गच्छ । 'धावु—गतिशुद्ध्योः' । "इति त्वा देवा इमे आहुरैल यथेमे तद्भवसि मृत्युबंधुः प्रजा ते देवान् हविषा यजाति स्वर्ग उत्त्वमपि मादयास" इति श्रुतेः ॥ ४१ ॥ तस्यैलस्य । अग्निना सहितां स्थालीमग्निस्थापनयोग्यपात्रम् । तया स्थाल्या ॥ ४२ ॥ ततश्चाग्निस्थाल्येवेयं नोर्वशीति ज्ञानानंतरम् । परस्मिन्दिवसे । त्रेतायां सम्प्रवृत्तायां त्रेतायुगारंभे जाते सति । तामेवोर्वशीमिव । तस्यैलस्य ॥ ४३ ॥ ततो मनसि प्रवृत्तेरनंतरम् । असौ वृक्षः । अरणी अग्निमन्थसाधनकाष्ठे । शमीगर्भेऽग्निरस्तीत्यत्र प्रमाणमाह शमीगर्भादिति ॥ ४४ ॥ प्रजननं पुत्रम् । अत्र प्रमाणं—तथा चेति । उर्वश्या अप्सरस उरसि उपरिभागे पुरूरवा आस्तेति मंत्रार्थः ॥ ४५ ॥ तस्येति तृतीयार्थे षष्ठीत्याह—तेनैलेन । स चाग्निः । आदिना गार्हपत्यदक्षिणयोर्ग्रहः ॥ ४६ ॥ तत् पुत्रधर्मत्वम् । तेन त्रिवृदग्निना ॥ ४७ ॥ अत्राक्षिपति—नन्विति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरूरवस एवासीत् त्रयी त्रेतामुखे नृप ॥ अग्निना प्रजया राजा लोकं गांधर्वमेयिवान् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे ऐलोपाख्याने चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीशुक उवाच ॥ ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप ॥ आयुः श्रुतायुः सत्यायू रयोऽथ विजयो जयः ॥ १ ॥ श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतंजयः ॥ रयस्य सुत एकश्च जयस्य तनयोऽमितः ॥ २ ॥ भीमस्तु विजयस्याथ कांचनो होत्रकस्ततः ॥ तस्य जह्नुः सुतो गंगां गंडूषीकृत्य योऽपिबत् ॥ जह्नोस्तु पूरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ॥ ३ ॥ ततः कुशः कुशस्यापि कुशांबुर्मूर्तयो वसुः ॥ कुशनाभश्च चत्वारो गाधिरासीत् कुशांबुजः ॥ ४ ॥ तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः ॥ वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥ ५ ॥ एकतः श्यामकर्णानां हयानां चंद्रवर्चसाम् ॥ सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥ ६ ॥

पुरा कृतयुगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव वेदः देवश्च नारायण एक एव । अग्निश्चैक एव लौकिकः । वर्णश्चैक एव हंसो नाम ॥ ४८ ॥ वेदत्रयी तु पुरूरवसः सकाशादासीत् । एयिवान्प्राप । अयं भावः । कृतयुगे सत्त्वप्रधानाः प्रायशः सर्वेऽपि ध्याननिष्ठाः रजःप्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूवेति ॥ ४९ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ततः पंचदशे गाधिरैलपुत्रान्वयेऽजनि ॥ यद्दौहित्रसुतो रामः कार्तवीर्यमहन् रुषा ॥ १ ॥ १ ॥ सुग्रहत्वायाल्पादिक्रमेण श्रुतायुप्रभृतिषण्णां वंशानाह श्रुतायोरित्यादिना । एक एकसंज्ञः । अमितस्तत्संज्ञः ॥ २ ॥ जह्नोः पूरुस्तस्य बलाकस्तस्याजकः ॥ ३ ॥ ४ ॥ गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभूदित्युत्तराध्यायांते वक्ष्यति 'गाधेरभून्महातेजाः' इत्यादिना । तत्र तावत्तदुपोद्घातत्वेन भृगुवंशसंभवस्य ऋचीकस्य चरितं प्रसक्तानुप्रसक्तेन च परशुरामावतारचरितमाह । तस्य सत्यवतीमित्यादिना । विसदृशमननुरूपम्।भार्गवमृचीकम्॥५॥ दक्षिणवामयोरेकतः

" ॐकार एव सर्वा वाक् " इति श्रुतेः ॥ ४८ ॥ अत्राशयमाह—अयं भाव इति । इत्यर्थ इति । अनादिरपि कर्ममार्गो ग्राहकाभावान्न प्रादुरभूत्कृतयुग इति भावः । वस्तुतस्तु—ब्रह्ममुखेभ्य एवाविर्भूता त्रयी सा च कर्मप्रचुरत्वात्कृतयुगेऽनाविर्भूतेवातिष्ठतेति प्रतिमन्वंतरकृतादिषु प्रायस्त एव राजानोऽन्ये च प्रादुर्भवंति " यथापूर्वमकल्पयत् " इति श्रुतेः । त्रयीशब्दोऽत्र तदुक्तकर्मैव वक्ति कारणेन कार्यग्रहणात् ' गोभिः श्रिणीत मत्सरम् ' इति न्यायात् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ तत ऐलस्य गंधर्वलोकगमनानंतरम् । गाधिरजनि जातः । यस्य गाधेर्दौहित्रस्य जमदग्नेः सुतः ; रुषा क्रोधेन (१) । अथ रयानंतरम् ॥ १ ॥ सुग्रहत्वाय झटिति बोधाय । तत्संज्ञोऽमितनामा ॥ २ ॥ अथ भीमस्य । ततः कांचनस्य । तस्य होत्रकस्य । यो जह्नुः । यज्ञसामग्रीप्लावनात्कुपितः प्रवाहभूतां भगीरथानुयांतीं गंगां गंडूषीकृत्य योगबलेन चुलकीकृत्यापिबदिति प्रथितं वाल्मीकीये । तत्पुत्रः पूरुपुत्रः । आत्मजः बलाकात्मजः ॥ ३ ॥ ततः अजकस्य । कुशांबोर्जायत इति तथा । कुशांबुर्नेंद्रतुल्यात्मजकामनया तपः कृतं ततो मत्सदृशो मे राज्यं हरिष्यतीति शंकमान इन्द्र एव स्वांशेन गाधिनाम्ना तत्पुत्रतामवाप । तत एवेंद्रः कौशिक इत्युच्यत इति हरिवंशे ॥ ४ ॥ तत्र विश्वामित्रस्य ब्रह्मर्षित्वे । प्रसक्तं जमदग्निचरितं तत्रानुप्रसक्तं परशुरामचरितम् । तस्य गाधेः ॥ ५ ॥ इदं सहस्रश्यामकर्णाश्वदानमपि पर्याप्तं पूर्णं शुल्कं न । श्यामकर्णलक्षणन्तु "सर्वश्वेतो हयो यस्तु श्यामैकश्रवणो भवेत् । स वाजी वाजिमेधार्हः श्यामकर्णः प्रकी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणांतिकम् ॥ आनीय दत्त्वा तानश्वानुपयेमे वराननाम् ॥ ७ ॥ स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया ॥ श्रपयित्वोभयैर्मंत्रैश्चरुं स्नातुं गतो मुनिः ॥८॥ तावत् सत्यवती मात्रा स्वचरुं याचिता सती ॥ श्रेष्ठं मत्वा तयाऽयच्छन्मात्रे मातुरदत्स्वयम् ॥ ९ ॥ तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः ॥ घोरो दंडधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥ १० ॥ प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः ॥ अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ॥ ११ ॥ सा चाभूत्सुमहापुण्या कौशिकी लोकपावनी ॥ रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥ १२ ॥ तस्यां वै भार्गवऋषेः सुता वसुमदादयः ॥ यवीयाञ्जज्ञ एतेषां राम इत्यभिविश्रुतः ॥१३॥ यमाहुर्वासुदेवांशं हैहयानां कुलांतकम् ॥ त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १४ ॥ दुष्टं क्षत्रं भुवो भारमब्राह्मण्यमनीनशत् ॥ रजस्तमोवृतमहन्फल्गुन्यपि कृतेंहसि ॥ १५ ॥

श्यामः कर्णो येषाम् । सर्वस्मिन्नंगे चंद्रस्येव वर्चो येषाम् । न चेदमपि पर्याप्तमस्मत्कन्यायाः । यतः कुशिकाः कौशिका वयम् ॥ ६ ॥ ७ ॥ उभयैर्मंत्रैः पत्न्यै ब्राह्मैर्मंत्रैः श्वश्र्वे तु क्षात्रैरित्यर्थः ॥ ८ ॥ यावत्स्नात्वा मुनिर्नागतस्तावद्भार्यायां भर्तृस्नेहाधिक्यात्पुत्र्याः सत्यवत्याश्चरुं श्रेष्ठं मत्वा तया मात्रा सत्यवती याचिता सती ब्राह्ममंत्राभिमंत्रितं स्वचरुं मात्रे अयच्छत्प्रादात् । मातुश्चरुं क्षात्रमंत्राभिमंत्रितं स्वयमददादत्त ॥ ९ ॥ कष्टं जुगुप्सितम् । तदेवाह । ते पुत्रो घोरो भविष्यति भ्राता तु ब्रह्मवित्तमो भविष्यतीति ॥ १० ॥ एवं मा भूदिति प्रसादितो भार्गव आह । अथ तर्हि पौत्रो घोरो भविष्यति । जमदग्निः पुत्रोऽभवदित्यर्थः ॥ ११ ॥ सा च सत्यवती कौशिकी नद्यभूत ॥ १२ ॥ भार्गवऋषेर्जमदग्नेः सुताः ॥ १३ ॥ १४ ॥ अनीनशन्नाशयामास । तदेवाह । रजस्तमोवृतमिति । पाठांतरं

र्त्तितः ॥'' इति नकुलशास्त्रे । यतो हेतोः । कुं कुत्सितं श्यति नाशयति प्रजाया यथाशास्त्रपालनेन, कौ भूमौ शेते तपश्चर्याहेतोर्वा, कोर्भूमेः शं कल्याणं विशेषधर्मप्रवर्तकतया येन वा स कुशस्तस्य वंशोद्भूता वयमन्यराजकुलापेक्षया प्रशस्ततमकुलीना अतः सर्वभूसमर्पणमपि नास्मत्कन्याशुल्कतां प्राप्स्यतीति । एतच्च केवलं वरसामर्थ्यपरीक्षणार्थं न तु वयं शुल्केन कन्याप्रदास्तस्यातीव गर्हितत्वात् ''कन्याशुल्कगृहीतारः पतंति नरके भृशम्'' इत्याद्युक्तेः ॥ ६ ॥ तन्मतं मच्छ्यापर्भीतेनेदमुक्तमयोग्योयमिति मत्वेति तदभिप्रायम् । तान् श्यामकर्णान् । उपयेमे स्वीचकार ॥ ७ ॥ स ऋचीकः । पत्न्या सत्यवत्या । ब्राह्मैर्वैष्णवैः सात्त्विकैः । क्षात्रैः रौद्रै राजसैः । इत्यर्थ इति । मत्पुत्रो ब्राह्मणो मच्छ्यालश्च क्षत्रियो भवत्वित्यभिप्रायेणोभयविधचरुं पक्त्वानिति भावः ॥ ८ ॥ ९ ॥ तच्चरुविनिमयलक्षणं कर्म । तदेव जुगुप्सितत्वमेव । घोरो भयंकरकर्मकरः । ब्रह्मवित्तमः वेदविदां वरः ॥ १० ॥ अथ पुत्रानंतरम् । ततः सत्यवत्याः । इत्यर्थ इति । तपःप्रभावादन्यथा चकारेति भावः ॥ ११ ॥ रेणुनाम्नः इक्ष्वाकुसुतस्य ''इक्ष्वाकुपुत्रो रेणुश्च तत्सुता रेणुका स्मृता'' इति हरिवंशादौ । तस्यैव प्रसेनजिदित्यपि नामांतरमिति भारते । यामुवाह तस्यामिति परेणान्वयः ॥१२॥ भार्गवऋषेर्जमदग्नेः । आदिना वसुसुषेणरुमण्वतां ग्रहः । एतेषां वसुमदादीनाम् ।यवीयान् कनिष्ठः॥१३॥ यं रामम् । हैहयानां हैहयसंबंधिनां क्षत्रियाणाम्॥१४॥क्षत्रं क्षत्रियजातिम् । (अनीनशत् नाशयामास) । तदेव दुष्टत्वमेव । पाठांतरम् 'अब्रह्मण्यमधार्मिकम्' इत्येवंरूपम् । क्वचित् 'दृप्तं क्षत्रम्' इति पाठः । फल्गुनि तुच्छे ''तुच्छे तीर्थविशेषे च मलघ्वां फल्गुवाच्यवत्'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ किं तदंहो भगवतो राजन्यैरजितात्मभिः ॥ कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥ श्रीशुक उवाच ॥ हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ॥ दत्तं नारायणस्यांशमाराध्य परिकर्मभिः ॥ १७ ॥ बाहून्दशशतं लेभे दुर्धर्षत्वमरातिषु ॥ अव्याहतेंद्रियौजःश्रीस्तेजोवीर्यं यशो बलम् ॥ १८ ॥ योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः ॥ चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥ १९ ॥ स्त्रीरत्नैरावृतः क्रीडन्रेवांभसि मदोत्कटः ॥ वैजयंतीं स्रजं बिभ्रद्रुरोध सरितं भुजैः ॥ २० ॥ विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत तस्य तद्वीर्यं वीरमानी दशाननः ॥ २१ ॥ गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः ॥ माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथा ॥ २२ ॥ स एकदा तु मृगयां विचरन्विपिने वने ॥ यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥ २३ ॥ तस्मै स नरदेवाय मुनिरर्हणमाहरत् ॥ ससैन्यामात्यवाहाय हविष्मत्यास्तपोधनः ॥ २४ ॥ स वीरस्तत्र तद्दृष्ट्वा आत्मैश्वर्यातिशायनम् ॥ तन्नाद्रियताग्निहोत्र्यां साभिलाषः स हैहयः ॥ २५ ॥ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् ॥ ते च माहिष्मतीं निन्युः सवत्सां क्रंदतीं बलात् ॥ २६ ॥

सुगमम् ॥ १५ ॥ १६ ॥ कार्तवीर्यार्जुनेन कृतमपराधं वक्तुं तस्य दर्पहेतुमैश्वर्यादिकमाह । हैहयानामिति षड्भिः । परिकर्मभिः परिचर्यादिभिर्दत्तं दत्तात्रेयमाराध्य ॥ १७ ॥ अव्याहतमिंद्रियादिकं च लेभे ॥ १८ ॥ यत्र यस्मिन्नैश्वर्येऽणिमादयो गुणाः ॥ १९ ॥ रेवांभसि नर्मदाजले सरितं नर्मदाम् ॥ २० ॥ रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वंस्तेन प्रवाहस्यावरोधात्प्रतिस्रोतसः सत्यास्तस्याः सरितो जलैर्विप्लावितं स्वशिबिरमालक्ष्य तद्वीर्यं न सेहे ॥ २१ ॥ ततश्च कृतकिल्बिषः क्रीडंतमभिभवितुं प्रवृत्तः सन्गृहीतो माहिष्मत्यां स्वपुर्यां कपिरिव सन्निरुद्धश्च पुनश्चावज्ञया येन मुक्तः ॥ २२ ॥ इदानीं तत्कृतमपराधं दर्शयन्नाह स एकदेत्यादिना ॥ २३ ॥ अर्हणमातिथ्यादि । हविष्मत्या कामधेन्वा ॥ २४ ॥ तदर्हणं नाद्रियत तस्मिन्नातुष्यत् । यतोऽग्निहोत्र्यां होमधेनौ साभिलाषः सहैहयो हैहयैः सह वर्तमानः ॥ २५ ॥ दर्पाद्धेतोः ऋषेर्हविर्धानीमग्निहोत्र

इति निरुक्तिः । अंहसि अपराधे 'अंहः पापापराधयोः' इति धरणिः ॥ १५ ॥ येन अपराधेन ॥ १६ ॥ तस्य कार्त्तवीर्यस्य ॥ १७ ॥ दुर्द्धर्षत्वमपराजितत्वम् ॥ १८ ॥ अव्याहताऽनिवार्या गतिर्गमनं यस्य स तथा ॥ १९ ॥ वैजयंतीम् अष्टधामौक्तिकमयीं पञ्चरत्नमयीं वा ॥ २० ॥ तस्य कार्त्तवीर्यस्य । तद्वीर्यं प्रतिस्रोतसा शिबिराप्लावनरूपम् । प्रति प्रतीपं स्रोतः प्रवाहो यस्याः सरितस्तस्या जलैः "स्रोतोंबुनिर्गमद्वारइंद्रियेषु जलप्लुतौ" इति हलायुधः ॥ २१ ॥ ततश्शिबिराप्लावनाद्धेतोः । अवज्ञया उपेक्षया । मुक्तस्त्यक्तः । येन कार्त्तवीर्येण ॥ २२ ॥ तत्कृतं कार्त्तवीर्यकृतम् । स कार्त्तवीर्यः । एकदा कदाचित् । वेपंति प्रवेष्टुमपि कंपंति जना अत्रेति विपिनं वनविशेषणम् । आर्षो ह्रस्वः । 'विजने' इति पाठः क्वचित् । यदृच्छया दैवेच्छया ॥ २३ ॥ तस्मै कार्तवीर्याय । स जमदग्निः । तपोधन इति । सर्वसाधनसमर्थतामाह ॥ २४ ॥ स कार्त्तवीर्यः । तत्र वने आश्रमे । आत्मनः स्वस्यैश्वर्यस्यातिशायनमतिक्रम्य वर्तमानमधिकम् । तत् मुनेरैश्वर्यम् ॥ २५ ॥ प्रथमं साम्ना प्रार्थने तस्या अदाने पुनर्दर्पादिति । ते च तत्पुरुषाः । क्रंदंतीं सवत्सत्वात्तस्याः वत्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ राजनि निर्याते राम आश्रम आगतः ॥ श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः ॥ २७ ॥ घोरमादाय परशुं सतूणं चर्म कार्मुकम् ॥
अन्वधावत दुर्धर्षो मृगेंद्र इव यूथपम् ॥ २८ ॥ तमापतंतं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम् ॥ ऐणेयचर्मांबरकर्मधामाभिर्युतं जटाभिर्द
दृशे पुरीं विशन् ॥ २९ ॥ अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ॥ अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवा
नसूदयत् ॥ ३० ॥ यतो यतोऽसौ प्रहरत्परश्वधो मनोनिलौजाः परचक्रसूदनः ॥ ततस्ततश्छिन्नभुजोरुकंधरा निपेतुरुर्व्यां हतसूतवाहनाः ॥
॥ ३१ ॥ दृष्ट्वा ससैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः ॥ विवृक्णचर्मध्वजचापविग्रहं निपातितं हैहय आपतद्रुषा ॥ ३२ ॥ अथार्जुनः
पंचशतेषु बाहुभिर्धनुःषु बाणान्युगपत्स संदधे ॥ रामाय रामोऽस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समम् ॥ ३३ ॥ पुनः स्वहस्तैरचला
न्मृधेंऽघ्रिपानुत्क्षिप्य वेगादभिधावतो युधि ॥ भुजान्कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं त्वहेरिव ॥ ३४ ॥ कृत्तबाहोः शिरस्तस्य गिरेः
शृंगमिवाहरत् ॥ हते पितरि तत्पुत्रा अयुतं दुद्रवुर्भयात् ॥ ३५ ॥ अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा ॥ समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्प
यत् ॥ ३६ ॥ स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च ॥ वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥ ३७ ॥ रामराम महाबाहो भवान्पापमका
र्षीत् ॥ अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ॥ ३८ ॥

धेनुं हर्तुं नरानचोदयत्प्रेरितवान् ॥ २६ ॥ २७ ॥ सतूणं कार्मुकं चर्म चादाय ॥ २८ ॥ ऐणेयं चर्म कृष्णाजिनमंबरं यस्य ॥ २९ ॥ ३० ॥ प्रहरन्परश्वधो यस्य । मनश्चानिलश्च तयोरिवौजो वीर्यं यस्य । परेषां चक्रं सैन्यं सूदयतीति तथा । छिन्ना भुजा ऊरवः कंधराश्च येषाम् । हता सूता वाहनानि च येषां ते वीरा निपेतुः ॥ ३१ ॥ विवृक्णाश्चर्मादयो यस्य ॥ ३२ ॥ पंचशतेषु धनुःषु सोऽर्जुनो रामाय संदधे । एकमेव धनुर्यस्य सः । पाठांतरे एक एव बंधः संधानं येषां तैरिषुभिः । तानि धनूंषि समं सह तत्क्षणमेवाच्छिनत् ॥ ३३ ॥ मृधे साधनभूतानचलानंघ्रिपांश्चोत्क्षिप्याभिधावतस्तस्य भुजांश्चिच्छेद । अहेः फणा इवेत्यर्थः ॥ ३४ ॥ ३५ ॥ समर्पयत्समार्पयत् ॥ ३६ ॥ ३७ ॥ ३८ ॥

विनैवेति महाभारते ॥ २६ ॥ अथ धेनुहरणानंतरम् । राजनि कार्त्तवीर्ये । तस्य कार्तवीर्यस्य । तत् गोहरणलक्षणम् ॥ २७ ॥ 'तूणी नील्यां निषंगे ना' इति मेदिनी ॥ २८ ॥ तं रामम् ॥ २९ ॥ ३० ॥ यतोयतो यस्मिन्यस्मिन् देशे । असौ रामः । चक्रं सेनाम् "चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथांगयोः" इति मेदिनी ॥ ३१ ॥ ३२ ॥ अथ स्वसैन्यपातानंतरम् । पाठांतरे 'एकबंधेषुभिः' इति पाठे ॥ ३३ ॥ इत्यर्थ इति । फणा इति पदमध्याहार्यम् । 'फणा द्वयोः' इत्यमरः ॥ ३४ ॥ उपावर्त्य निवर्त्त्य परिक्लिष्टामितस्तत आकर्षणादिना खिन्नाम् ॥ ३५ ॥ ३६ ॥ तत्स्वकर्म ससैन्यसहस्रबाहुवधरूपं निजकर्म । तत् रामकर्म ॥ ३७ ॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः ॥ यया लोकगुरुर्देवः पारमेष्ठ्यमियात्पदम् ॥ ३९ ॥ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा ॥ क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥४०॥ राज्ञो मूर्धाऽवसिक्तस्य वधो ब्रह्मवधाद् गुरुः ॥ तीर्थसंसेवया चांहो जह्यंगाच्युतचेतनः ॥ ४१ ॥ इति श्रीमद्भागवते महा॰ नवमस्कंधे परशुरामचरिते पंचदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ पित्रोपशिक्षितो रामस्तथेति कुरुनंदन ॥ संवत्सरं तीर्थयात्रां चरित्वाश्रममाव्रजत् ॥ १ ॥ कदाचिद्रेणुका याता गंगायां पद्ममालिनम् ॥ गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत ॥ २ ॥ विलोकयंती क्रीडंतमुदकार्थं नदीं गता ॥ होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ॥ ३ ॥ कालात्ययं तं विलोक्य मुनेः शापविशंकिता ॥ आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ॥ ४ ॥ व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् ॥ घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ॥ ५ ॥ रामः संचोदितः पित्रा भ्रातॄन् मात्रा सहावधीत् ॥ प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ॥ ६ ॥ वरेणच्छंदयामास प्रीतः सत्यवतीसुतः ॥ वव्रे हतानां रामोऽपि जीवितं चास्मृतिं वधे ॥ ७ ॥

अर्हणतां पूज्यताम् ॥ ३९ ॥ सौरी सूर्यस्य प्रभेव ॥ ४० ॥ तीर्थसंसेवया चकाराद्यमनियमैश्च । अच्युते चेतना चित्तं यस्य सः ॥ ४१ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ षोडशेऽथार्जुनसुतैर्जमदग्नौ हते मुहुः ॥ रामात्क्षत्रवधः प्रोक्तो विश्वामित्रस्य चान्वयः ॥ १ ॥ १ ॥ २ ॥ किंचिदीषच्चित्ररथे गंधर्वराजे स्पृहा यस्याः सा । किंचिन्न सस्मारेति वा ॥ ३ ॥ कलशं पुरोधायाग्रे निधाय ॥ ४ ॥ व्यभिचारं मानसं ज्ञात्वा ॥ ५ ॥ आज्ञाऽतिलंघिनां भ्रातॄणां मातुश्च वधे संचोदितः सन् मुनेर्यः समाधिस्तपश्च तयोः प्रभावज्ञः । यदि न हन्यां तर्हि मामपि शप्तुं समर्थः यदि तु हन्यां तर्हि मयि संतुष्टः संस्तानपि जीवयितुं समर्थ इति जानन्नित्यर्थः ॥ ६ ॥ ७ ॥

यया क्षमया । लोकगुरुर्ब्रह्मा ॥ ३९ ॥ ब्राह्मी ब्राह्मणसंबंधिनी लक्ष्मीः संपत् शोभा वा 'लक्ष्मीः संपत्तिशोभयोः' इति मेदिनी ॥ ४० ॥ मूर्ध्नि मस्तकेऽवसिक्तो वैदिकमंत्रैर्यः स मूर्द्धावसिक्तः । यद्वा चक्रवर्त्ती " मूर्द्धावसिक्तो नृपती ब्राह्मणे चक्रवर्त्तिनि " इति निरुक्तेः । ब्रह्मवधाद्ब्राह्मणहननात् । गुरुर्महान् । तीर्थानां गंगादीनाम् । सम्यक्सेवया चाद्यमनियमादिभिः । यद्वा—न च्युता चेतना चिच्छक्तिर्यस्य तथाभूत ईश्वरोऽपि लोकसंग्रहार्थमिति विश्वनाथः ॥ ४१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥ अथार्जुनमरणानंतरम् । अन्वयो वंशः (१) ॥ १ ॥ गंधर्वराजं चित्ररथम् ॥ २ ॥ स्पृहाया ईषत्वे होमवेलास्मरणाभावो न संगच्छेतेत्यत आह—किंचिन्न सस्मारेति । किञ्चिदिति नः सस्मारेत्यत्रान्वेति होमवेलायाः किञ्चिन्मात्रविस्मरणमभूत्तत्र हेतुः चित्रमये रथे दर्शनकौतुकार्थं स्पृहा यस्याः सेति ब्रह्मांडे दर्शितमिति विश्वनाथसंदर्भौ ॥ ३ ॥ होमवेलातः प्रागेव जलमानयिष्यामीति तस्या वचनस्य व्यभिचारं ज्ञात्वा स्वनित्यकर्मासिद्ध्या च प्रकर्षेण कुपितः ॥ ४ ॥ घ्नत हत मारयतेति यावत् । ते पुत्राः ॥ ५ ॥ इत्यर्थ इति । पितुराज्ञापालनं सर्वाभीष्टप्रदमिति विचार्य भ्रात्रादीनवधीदिति भावः ॥ ६ ॥ सत्यवतीसुतो जमदग्निः । छंदयादास प्रीणयामास । हतानां भ्रात्रादीनाम् अस्मृतिं वयं रामेण हताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तस्थुस्ते कुशलिनो निद्रापाय इवांजसा ॥ पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम् ॥ ८ ॥ येऽर्जुनस्य सुता राजन् स्मरंतः स्वपितुर्वधम् ॥
रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥ ९ ॥ एकदाश्रमतो रामे सभ्रातरि वनं गते ॥ वैरं सिषाधयिषवो लब्धच्छिद्रा उपागमन् ॥ १० ॥
दृष्ट्वाग्न्यगार आसीनमावेशितधियं मुनिम् ॥ भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥ ११ ॥ याच्यमानाः कृपणया राममात्राऽतिदारुणाः ॥
प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबंधवः ॥ १२ ॥ रेणुका दुःखशोकार्ता निघ्नंत्यात्मानमात्मना ॥ रामरामेहि तातेति विचुक्रोशोच्चकैः सती ॥
॥ १३ ॥ तदुपश्रुत्य दूरस्थो हा रामेत्यार्तवत् स्वनम् ॥ त्वरयाऽऽश्रममासाद्य ददृशे पितरं हतम् ॥ १४ ॥ तद्दुःखरोषामर्षार्तिशोकवेगविमो
हितः ॥ हा तात साधो धर्मिष्ठ त्यक्त्वाऽस्मान् स्वर्गतो भवान् ॥ १५ ॥ विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् ॥ प्रगृह्य परशुं रामः क्षत्रां
ताय मनो दधे ॥ १६ ॥ गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् ॥ तेषां स शीर्षभी राजन् मध्ये चक्रे महागिरिम् ॥ १७ ॥ तद्रक्तेन
नदीं घोरामब्रह्मण्यभयावहाम् ॥ हेतुं कृत्वा पितृवधं क्षत्रेऽमंगलकारिणि ॥ १८ ॥ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ॥ स्यमंतपंचके
चक्रे शोणितोदान् ह्रदान्नव ॥ १९ ॥

नन्वतिनिंदितं तत्कथं कृतवांस्तत्राह । पितुर्विद्वानिति पूर्वोक्त एवाभिप्रायः ॥ ८ ॥ सर्वक्षत्रियवधे कारणं वक्तुमाह येऽर्जुनस्य सुता इत्यादिना ॥ ९ ॥
॥ १० ॥ भगवत्यावेशिता धीर्येन तम् ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ दुःखादीनां वेगेन विमोहितः ॥ १५ ॥ १६ ॥ ब्रह्मघ्नैरवहता श्रीर्यस्यास्ताम् ।
हे राजन्स रामस्तेषां शीर्षभिर्माहिष्मत्या मध्ये महांतं गिरिं चक्रे ॥ १७ ॥ येषां रक्तेनाब्रह्मण्यानां भयावहां घोरां नदीं चक्रे । तथाऽपि सर्वक्षत्रियवधे किं कारणं
तदाह हेतुं कृत्वेति सार्धेन । अमंगलकारिण्यन्यायवर्तिनि सति ॥ १८ ॥ त्रिःसप्तकृत्वो रेणुकया दुःखावेशादुरस्ताडनं कृतं ततो रामस्तावत्कृत्वः क्षत्रमुत्सादितवा

संतः पुनरुज्जीवनं प्राप्ता इति स्मृतिशून्यत्वलक्षणं च वरम् ॥ ७ ॥ अत्राक्षिपति—नन्विति । तत् भ्रात्रादिहननम् ॥ ८ ॥ निरपराधायाः पतिव्रताशिरोमणे रेणुकाया वधमादिष्टवतो जमदग्नेरपि तदपराधफलं वधं दर्शयति—येऽर्जुनस्येति ॥ ९ ॥ लब्धच्छिद्राः प्राप्तावसराः ॥ १० ॥ ११ ॥ राममात्रा रेणुकया ॥ १२ ॥ एहि शीघ्रमागच्छ ॥ १३ ॥ तत् मातृकृतम् ॥ १४ ॥ तेन पितृमरणजेन दुःखेन । यो रोषादीनां वेगस्तेन विमोहितः ॥ १५ ॥ क्षत्राणामविशेषेणांताय परशुं शत्रुनाशकरं शस्त्रभेदम् ॥ १६ ॥ ब्रह्मघ्नैर्ब्राह्मणं हतवद्भिः । राज्ञामेतत्स्वभावताद्योतनार्थमाह—हे राजन्निति ॥ १७ ॥ तेषाम् अर्जुनात्मजानाम् । तदाह—कारणमाह ॥ ॥ १८ ॥ भारते तु पञ्चह्रदकरणमुक्तं तद्विरोधापहाराय नूयते स्तूयते सूतमागधबंदिभिरिति नवस्तत्संबुद्धौ तथेति । ह्रदानगाधप्रदेशान् "ह्रदोगाधजले देशे घट्टे तीर्थे ध्वनावपि" इति निरुक्तिः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितुः कायेन संधाय शिर आदाय बर्हिषि ॥ सर्वदेवमयं देवमात्मानमयजन्मखैः ॥ २० ॥ ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् ॥ अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥ २१ ॥ अन्येभ्योऽवांतरदिशः कश्यपाय च मध्यतः ॥ आर्यावर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥ २२ ॥ ततश्चावभृथस्नानविधूताशेषकिल्बिषः ॥ सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥ २३ ॥ स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणम् ॥ ऋषीणां मंडले सोऽभूत् सप्तमो रामपूजितः ॥२४॥ जामदग्न्योऽपि भगवान् रामः कमललोचनः ॥ आगामिन्यंतरे राजन्वर्तयिष्यति वै बृहत्॥२५॥ आस्तेऽद्यापि महेंद्राद्रौ न्यस्तदंडः प्रशांतधीः ॥ उपगीयमानचरितः सिद्धगंधर्वचारणैः ॥ २६ ॥ एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः ॥ अवतीर्य परं भारं भुवोऽहन् बहुशो नृपान् ॥ २७ ॥ गाधेरभून्महातेजाः समिद्ध इव पावकः ॥ तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥२८॥

निति प्रसिद्धिः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ संज्ञानं स्मृतिस्तदेव लक्षणं चिह्नं यस्य तं स्वदेहं लब्ध्वा स ऋषीणां मंडले सप्तम ऋषिरभूत् ॥ २४ ॥ बृहद्ब्रह्म वेदम् । वेदप्रवर्तकेषु सप्तर्षिष्वेकतमो भविष्यतीत्यर्थः ॥ २५ ॥ २६ ॥ भुवो भारमहन् । भारमेवाह । नृपानिति ॥ २७ ॥ तदेवं प्रसक्तानुप्रसक्तं समाप्य

बर्हिषि यज्ञे । 'स्याद्बर्हिर्यज्ञदर्भयोः'इति धरणिः।आत्मानं स्वरूपभूतं हरिम् । मखैरवांतरेष्टिप्रभेदैः॥२०॥२१॥अन्येभ्य ऋत्विग्भ्यः प्रस्तोत्रादिभ्यः।अवांतरदिशः आग्नेय्यादिविदिशः।मध्यतो मध्यदेशम् । उपद्रष्ट्रे न्यूनातिरिक्तकर्मद्रष्ट्रे । सदस्येभ्यो विधिदर्शिभ्यः ततो मध्यदेशात् । परम् अवशिष्टदेशम् ॥ २२ ॥ तत ऋत्विगादिभ्यो भूसमर्पणानंतरम् । अवभृथस्नानेत्यत्र स्नानपदं तु विशिष्टवाचकानां पदानां सति विशेषणसमवधाने विशेष्यमात्रपरतायाः स्वीकारात् 'सकीचकैर्मारुतपूर्णरंध्रैः' इत्यादिवद्विज्ञेयम् ॥ २३ ॥ स्मृतिः पूर्वपरानुसंधानरूपा ॥ २४ ॥ अंतरे सावर्णिमन्वंतरे । 'महति बृहदित्युक्तं, वेदब्राह्मणराजसु' इति निरुक्तिः । इत्यर्थ इति । मुख्यत्वेन वेदाचार्यो भविष्यतीति भावः ॥ २५ ॥ अद्यापि चिरजीवित्वात् ॥ २६ ॥ २७ ॥ महद्विश्वरचनसमर्थं तेजो यस्य स तथा । तपसा चरुनिष्ठब्राह्ममंत्रप्रभावप्रेरणाचरितानुष्ठानेन । तच्च भारतादौ प्रसिद्धं, तथाहि–(कदाचिद्वशिष्ठाश्रमं विचरन्विश्वामित्रःससैन्यमाप । तं च वशिष्ठस्स्वाश्रमागतमातिथ्येनानर्च । स च तदातिथ्यमलौकिकं वीक्ष्य स्वानुचरानाह कथमनेनाकिंचनेनेदृगदृष्टश्रुतचरपदार्थैरस्माकमातिथ्यं कृतं निरीक्ष्यतां भवद्भिरिति । ते च तदाज्ञप्ता मुनिकुट्यामनेकद्रव्यं दुहंतीं गां नंदिनीं दृष्ट्वा विश्वामित्रायाचख्युः । स च श्रुत्वा मुनेस्तां धेनुमनेकधेन्वादिविनिमयेन याचमानो यदा तां न प्राप तदा भृत्येभ्यो गृह्यतां मुनेरियं धेनुरित्यादिदेश । तां तैर्गृह्यमाणां दृष्ट्वा यदा मुनिर्न किंचिदूचे तदा धेन्वोक्तं किमर्थं मामुपेक्षसे मुने इत्युक्तो मुनिराह नंदिनि मे सेना नास्ति यया त्वामितो मोचयानि । इति श्रुत्वा गौराह भगवन्मामाज्ञापयाहमनेकधा सेनां प्रकटयामीत्युक्तस्स तथेति तामाह । सा च स्वांगेभ्यो नानाशस्त्रयुतं म्लेच्छादिसैन्यं प्रादुष्कृत्य विश्वामित्रसैन्यं नाशयामास । स च निवृत्य पुनः सेनामादाय वशिष्ठाश्रमं युद्धाय ययौ । पुनरपि गवोद्भूतसैन्येन तथैव तत्सैन्यं नाशितमेव । एवं सप्तकृत्वो ययौ । ततश्च कृशाश्वन्यस्तनानाविधशस्त्रास्त्रजालैः स्वयमेव वशिष्ठं पराभवितुम्प्रवृत्तः । तं तथाविधं दृष्ट्वा वशिष्ठेन ब्रह्मदंडोऽग्रे कृतस्तं प्राप्य विश्वामित्रस्य सर्वं शस्त्रास्त्रजालं मुधा बभूव । तदंते तन्नाशाय वशिष्ठोद्यतं ब्रह्मदंडं स्वयमागत्य ब्रह्मा निवर्त्तयामास । तदा व्रीडितो विश्वामित्र आह 'धिक् च मे क्षत्रियबलं ह्यहो ब्रह्मबलं बलम् । एकेन ब्रह्मदंडेन सर्वास्त्राणि हतानि मे ॥'' इति । अतोहमपि ब्राह्मण एव स्यामित्युक्त्वा महत्तपश्चकार । ब्रह्मणा तत्तपसा प्रीतेनोक्तोऽपि त्वं ब्राह्मणस्तथापि वशिष्ठाद्यैरनुक्तः पुनःपुनस्तपश्चकार पृथग्लोकरचने प्रवृत्तं वारयितुं ब्रह्मणोक्तो वशिष्ठोऽपि तं ब्रह्मर्षित्वेनोपजुहावेति प्रसिद्धं वाल्मीकी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वामित्रस्य चैवासन् पुत्रा एकशतं नृप ॥ मध्यमस्तु मधुच्छंदा मधुच्छंदस एव ते ॥२९॥ पुत्रं कृत्वा शुनःशेपं देवरातं च भार्गवम् ॥ आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥ ३० ॥ यो वै हरिश्चंद्रमखे विक्रीतः पुरुषः पशुः ॥ स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाशबंधनात् ॥ ३१ ॥ यो रातो देवयजने देवैर्गाधिषु तापसः ॥ देवरात इति ख्यातः शुनःशेपः स भार्गवः ॥ ३२ ॥ ये मधुच्छंदसो ज्येष्ठाः कुशलं मेनिरे न तत् ॥ अशपत् तान् मुनिः क्रुद्धो म्लेच्छाः भवत दुर्जनाः ॥ ३३ ॥

प्रस्तुतमाह । गाधेरिति । महातेजा विश्वामित्रः ॥ २८ ॥ ते सर्वे लिंगसमवायन्यायेन । प्राणभृत उपदधातीतिवन्मधुच्छंदस एवोच्यंते । तथा च श्रुतिः । "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पंचाशदेव ज्यायांसो मधुच्छंदसः पंचाशत्कनीयांसः" इत्यादि । तत्र च विश्वामित्रपुत्रेषु भार्गवस्याजीगर्तस्य देवरातस्य ज्येष्ठत्वमवगम्यते । तथा अश्वलायनबौधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तम् । प्रवरश्च तस्मिन्नेव वंशेऽवांतरभेदो न तु वंशांतरम् । तथा च स्मृतिः । "एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वं विना भृग्वंगिरोगणात्" इति ॥ २९ ॥ तत्कुतो भृगुवंशसंभवस्य देवरातस्य कौशिकप्रवरत्वमित्याशंक्य तदुपपादयन्नाह । पुत्रं कृत्वेत्यादि यावत्समाप्ति । पूर्वमजीगर्तसुतत्वे मध्यमत्वेन पितृभ्यां ममतां विहाय विक्रीतत्वात्तस्य कृपया सुतानाह । ज्येष्ठ एष प्रकल्प्यतामिति ॥ ३० ॥ एतदेव स्पष्टयितुं विशिनष्टि य इति द्वाभ्याम् । मुमुचे अमुच्यत ॥ ३१ ॥ भार्गवोऽपि गाधिषु गाधेर्वंशजेषु देवरात इति ख्यातः ॥ ३२ ॥ तत्तस्य ज्येष्ठत्वं कुशलं न मेनिरे । मध्यमस्यानर्थावहत्वं दृष्ट्वा नांगीकृतवंतः । मुनिर्विश्वा

येपि ॥ २८ ॥ ते सर्वे । एकोत्तरशतसंख्याका एव एकश्च शतं चानयोः समाहार एकशतम् । चयनयागे मंत्रेण संस्कृता एकैवेष्टिका प्राणभृच्छब्देनोच्यते तत्र तस्याः प्राधान्येनान्या अपीष्टिकाः प्राणभृत उच्यंते तथा मधुच्छंदसः प्राधान्यात्सर्वे मधुच्छंदस इत्यर्थः । अत्र प्रमाणमाह—तथा चेति । आसुरासन् । मध्यमापेक्षया ज्यायस्त्वकनीयस्त्वमत्रेति । तत्र च तेषु च । यथा देवरातस्य ज्येष्ठत्वं तथाश्वलायनादिभिरुक्तमिति संबन्धः । प्रवरस्य वंशावांतरत्वे स्मृतिमाह—तथा चेति । भृग्वंगिरोगणेष्वेकऋषित्वेपि भिन्नगोत्रता भवतीति ज्ञेयं प्रवरमंजर्यादिभ्यः ॥ २९ ॥ यदुक्तं देवरातस्य प्रवरत्वं तत्कुत इति योऽयं पूर्वमजीगर्त्तेत्यादिहरिश्चंद्रोपाख्याने प्रतिपादितमधस्तात् । तीर्थस्त्विदं पद्यमित्थं व्याचख्यौ । अत्र किंवदंती विश्वामित्रेणोक्तमाजीगर्ताय त्वं मे पुत्रो भव तेनोक्तं यदि सर्वपुत्रज्येष्ठं मां करिष्यसि तदा ते पुत्रो भविष्यामीति तदा तेनोक्तमेव मस्त्विति । ततो विश्वामित्रस्तं पुत्रं कृत्वौरसानाह—एष शुनःशेपो युष्माभिर्ज्येष्ठः प्रकल्प्यतां शुनःशेपशब्दं श्रुत्वा शुनीजातोयं किमित्यन्यथा प्रतीतिं वारयितुमाह—भार्गवमिति । तथापि कथं निवारितेत्यत आह—आजीगर्तमजीगर्तपुत्रम् । तर्हि तव पुत्रत्वे का संगतिरित्यत आह—देवै रातमिति । दत्तकपुत्रत्वेन संबंध इति ॥ ३० ॥ प्रजेशो ब्रह्मा पाशबंधनात्पशुत्वेन बल्यर्थं वंशे बद्धा स्थापितस्तद्बंधनादित्यर्थः । मुमुचे कर्मकर्त्तरि प्रयोगः । "कस्य नूनं कतमस्यामृतानां मनामहे चारुदेवस्य नाम" इत्यारभ्य "अस्य रयिं निधारये" इत्यंतवेदवाक्येन स्तुत्वेत्यर्थः ॥ ३१ ॥ रातो रक्षितस्तैरेव । 'गाधिसुताय सः' इति पाठे स दत्त इत्यर्थः ॥ ३२ ॥ मध्यमस्य मधुछंदसोऽनर्थावहत्वं गोत्रांतरस्य निजगोत्रप्रवेशदानोत्सुकत्वेनानर्थकरत्वं दृष्ट्वा । यद्वा—मध्यमेन मधुच्छंदसा वयं ज्येष्ठाः संतोऽनेन कनिष्ठाः स्यामो यदि मध्यमो न स्यात्तदा तु सर्वे वयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स होवाच मधुच्छंदाः सार्धं पंचाशता ततः ॥ यन्नो भवान् संजानीते तस्मिंस्तिष्ठामहे वयम् ॥ ३४ ॥ ज्येष्ठं मंत्रदृशं चक्रुस्त्वामन्वंचो वयं स्म हि ॥ विश्वामित्रः सुतानाह वीरवंतो भविष्यथ ॥ ये मानं मेऽनुगृह्णंतो वीरवंतमकर्त माम् ॥ ३५ ॥ एष वः कुशिका वीरो देवरातस्तमन्वित ॥ अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥ ३६ ॥ एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधम् ॥ प्रवरांतरमा पन्नं तद्धि चैवं प्रकल्पितम् ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ श्रीशुक उवाच ॥ यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः ॥ नहुषः क्षत्रवृद्धश्च रजी रंभश्च वीर्यवान् ॥ १ ॥

मित्रः ॥ ३३ ॥ पंचाशता कनिष्ठैः साकं स मध्यमो मधुच्छंदा उवाच । नोऽस्माकं यज्ज्येष्ठत्वं कनिष्ठत्वं वा भवान्पिता संजानीते मन्यते तस्मिन्वयं तिष्ठामेति ॥ ३४ ॥ एवमुक्त्वा मंत्रदृशम् "कस्य नूनं कतमस्यामृतानाम् " इत्यादिमंत्राणां द्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः । तदाह । वयं सर्वे त्वामन्वंचः स्म हि अनुगंतारः कनिष्ठाः स्म इत्यर्थः । ततः प्रसन्नो विश्वामित्रस्तान्सुतानाह । वीरवंतः पुत्रवंतो भविष्यथ । ये यूयं मे मानं पूज्यत्वमनुगृह्णंतोऽनुवर्तमानाः संतो मां वीरवंतं पुत्रवंतमकर्त कृतवंत इत्यर्थः ॥ ३५ ॥ हे कुशिका एष देवरातो वो युष्मदीयः कौशिक एव । यतो वीरो मत्पुत्रस्तमेनमन्वितानुगच्छत । अन्ये चाष्टकादयस्तस्य सुता आसन् ॥ ३६ ॥ उपसंहरति । एवमिति । एके शप्ता एकेऽनुगृहीता अन्यस्तु पुत्रत्वेन स्वीकृत इत्येवं कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं तच्च प्रवरांतरमापन्नं प्राप्तम् । हि यस्मादेवं देवरातज्येष्ठत्वेन तत्प्रकल्पितम् ॥ ३७ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां षोडशोऽध्यायः ॥ १६ ॥ आयोः सप्तदशे त्वैलज्येष्ठपुत्रस्य पंचसु ॥ सुतेषु क्षत्रवृद्धादिचतुर्णां वंशवर्णनम् ॥ १ ॥ इह श्रीकृष्णावतारप्रस्तावाय वंशानुक्रमणमैलादिक्रमेण प्रक्रांतमिति यस्य वंशे कृष्णावतारस्तस्य वंशोऽतिविततत्वादंते निरूप्यते । अतः पुरूरवसः पुत्राणां पंचानां कनिष्ठान

तुल्या एवातो मध्यमोऽस्माकमनर्थकर इति वा । म्लेच्छत्वं च " गोमांसभक्षको यश्च वेदवाह्यं च भाषते । सर्वाचारपरिभ्रष्टो म्लेच्छ इत्यभिधीयते ॥" इति हरिदीक्षितः । दुर्गता जना ये स्पर्शादिपरिहारेण ते दुर्जनाः ॥ ३३ ॥ ततः शापश्रवणोत्तरम् । हेत्यनेन ब्राह्मणानुकरणम् । स विश्वामित्रः । पंचाशता सार्द्धं मधुच्छंदसमुवाच । तदुत्तरं स होवाचेति । तिष्ठामहे "प्रकाशनस्थेयाख्ययोश्च" इत्यात्मनेपदम् ॥ ३४ ॥ इत्यर्थ इति । त्वदाज्ञया ज्येष्ठा अपि कनिष्ठाः स्यामेति भावः । ततः पुत्रोक्तिश्रवणात् । तान् आज्ञास्वीकर्तॄन् । इत्यर्थ इति । सत्यपि बहुपुत्रत्वे पुनरीर्षात्यागेनापुत्रमपि पुत्रं मानयामासुरिति भावः ॥ ३५ ॥ आदिना गालवादिग्रहः ॥ ३६ ॥ कौशिकगोत्रप्रवरा अप्युक्ताः प्रवरग्रंथेषु 'कौशिकानां विश्वामित्रदेवरातकौशिका' इति ॥ ३७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ आयोः तन्नाम्नः (१) नन्विदं वंशनिरूपणं किमर्थं कृतमिति चेदाह–इदमिति । यस्य यदोः । यतस्तस्यांते निरूपणमतो हेतोः प्रथमस्य आयोः । य उक्तस्तस्येत्यन्वयः । उक्तमर्थमन्यत्रातिदिशति–एवमिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनेना इति राजेंद्र शृणु क्षत्रवृधोऽन्वयम् ॥ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः ॥ २ ॥ काश्यः कुशो गृत्समद इति गृत्समदादभूत् ॥ शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ॥ ३ ॥ काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता ॥ धन्वंतरिर्दीर्घतम आयुर्वेदप्रवर्तकः ॥ ४ ॥ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ॥ तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥ ५ ॥ दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ॥ स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ॥ तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥ ६ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ नालर्कादपरो राजन्मेदिनीं बुभुजे युवा ॥ ७ ॥ अलर्कात्संततिस्तस्मात्सुनीथोऽथ सुकेतनः ॥ धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ॥ ८ ॥ धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः ॥ वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृपः ॥ ९ ॥

वंशानुक्त्वेदानीं प्रथमस्य वंशमाह । य इति । एवं नहुषययातियदुप्रभृतिष्वपि द्रष्टव्यम् ॥ १ ॥ क्षत्रवृधः क्षत्रवृद्धस्य ॥२॥३॥ दीर्घतमसः पिता ॥४॥ स्मृतमात्र एवार्तिरोगदुःखं नाशयतीति तथा ॥ ५ ॥ प्रतर्दनादिशब्दवाच्याद्द्युमतः सकाशादलर्कादयः ॥६॥७॥ अलर्कात्संततिसंज्ञः ॥ ८ ॥ सत्यकेतोर्धृष्टकेतुस्तस्मात्सुकुमारस्तस्माद्वी

यथा विस्तृतवंशनिरूपणमिहांते प्रतिज्ञातं स्वल्पानां प्रथमं निरूपणं कृतमियमेव रीतिर्नहुषादिवंशनिरूपणेऽपि ज्ञेया सूचीकटाहन्यायेन ॥ १ ॥ वृद्धवृत्–(धृ) शब्दौ पर्यायाविति मत्वाह–क्षत्रवृध इति ॥ २ ॥ ननु पुरूरवःपौत्रस्य क्षत्रवृधोन्वये जातेन द्वादशस्कन्धे मार्कण्डेयोपाख्याने शौनकेन "स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन्भार्गवर्षभ" इत्यनेन स्वस्य भार्गवत्वं कथमुक्तमिति चेत्रेदमवधेयं–गृत्समदो राजा प्रतिपक्षनृपभीतो भार्गवाश्रममाविश्य भृगुं प्राह भगवन्मत्पृष्ठलग्नान्मत्प्रतिपक्षनृपान्मां रक्ष मद्वंशक्षयंकरात्तच्छ्रुत्वा तं मा भैरित्याश्वास्याश्रमाद्बहिरागत्य तं नत्वा स विपक्षनृपो भगवन्मद्विरोधिनं स्वाश्रमप्रविष्टं नृपं मह्यं देहीत्याकार्ण्य मुनिस्तमिह सर्वे ब्राह्मणा एव सन्तीत्यूचे । तदाकर्ण्य तेनोक्तं यदीह सर्वे ब्राह्मणा एव तर्हि जितं मया तज्जातित्याजनादित्युक्त्वा मुनिं नत्वा स गतवांस्तदा गृत्समदो भार्गववचनाद्भार्गवत्वमापेति महाभारते मार्कंडेये च प्रथितं, वाक्यानि विस्तरभिया नो लिखितानि । अत एव शौनकं प्रति हे भार्गव हे भृगूद्वहेति सम्बुद्धिर्न विरुद्धेति ॥ ३ ॥ तत्पुत्रः काशिपुत्रः । अयमेव समुद्रादमृतं गृहीत्वा प्रादुर्बभूवेत्यपि ज्ञेयं, केचित्तमन्यमाहुरिति ॥ ४ ॥ तत्पुत्रः धन्वंतरिपुत्रः । अस्य केतुमतः । ततो भीमरथात् ॥ ५ ॥ तस्माद्दिवोदासात् । प्रकर्षेण दुष्टनाशकत्वात्प्रतर्दनः । 'तृद–हिंसायामनादरे च' दुष्टानादरकत्वाद्वा । स एव द्युमानेवेति प्रतर्दनादिपंचभिरन्वेति । लोकप्रियत्वाद्वत्स इति । सत्यपरत्वादृतध्वज इति । तथा प्रतर्दनादिवत्स एवेति योज्यम् । कुर्भूमिस्तदेव वलयं कंकणाकारत्वाद्भूमंडलस्य अश्नुते यशसा व्याप्नोति राज्यत्वेनाश्नाति भुंक्ते वेति कुवलयाश्वः । संधिरार्षः ॥ ६ ॥ षट्षष्टिसहस्राणि । युवा सन् । अपरोऽलर्कभिन्नः ॥ ७ ॥ तस्मात्संततेः । अथ सुनीथात् । तस्मात् सुकेतनात् । पुनस्तस्माद्धर्मकेतोः ॥ ८ ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ॥ रंभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः ॥ १० ॥ तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ॥ शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः ॥ ११ ॥ ततः शांतरयो जज्ञे कृतकृत्यः स आत्मवान् ॥ रजेः पंच शतान्यासन्पुत्राणाममितौजसाम् ॥ १२ ॥ देवैरभ्यर्थितो दैत्यान्हत्वेंद्रायाददाद्दिवम् ॥ इंद्रस्तस्मै पुनर्दत्त्वा गृहीत्वा चरणौ रजेः ॥ १३ ॥ आत्मानमर्पयामास प्रह्रादाद्यरिशंकितः ॥ पितर्युपरते पुत्रा याचमानाय नो ददुः ॥ १४ ॥ त्रिविष्टपं महेंद्राय यज्ञभागान्समाददुः ॥ गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः ॥ १५ ॥ अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः ॥ कुशात्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ॥ १६ ॥ ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ॥ सहदेवस्ततोऽहीनो जयसेनस्तु तत्सुतः ॥ १७ ॥ संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः ॥ क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषात् ॥ १८ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे चंद्रवंशानुवर्णने सप्तदशोऽध्यायः ॥ १७ ॥

तिहोत्रस्तस्य भर्गः । अतो भर्गाद्भार्गभूमिः ॥९॥ काशयः काशेर्वंश्याः काशेः प्रपितामहस्य क्षत्रवृद्धस्यान्वयमयंते यांतीति तथा ॥ १० ॥ ततोऽनेनसः शुद्धो जज्ञे ॥ ११ ॥ कृतकृत्यः सः यत आत्मवान् ज्ञानी । अतः पुत्रोत्पादनं न कृतवानित्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ तेषां मतिभ्रंशाय गुरुणा बृहस्पतिनाऽभिचारविधानेनाग्नौ हूयमाने सति ॥१५॥ सिंहावलोकनेनाह । क्षात्रवृद्धात्क्षत्रवृद्धपौत्रात्कुशात्प्रतिः । प्रतेः संजयः ॥ १६ ॥ १७ ॥ १८ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥

आयुचतुर्थपुत्रस्य रंभस्य वंशमाह–रंभस्येति । तत इत्यावृत्त्या योज्यम् । रभसाद्गंभीरः गंभीरात् अक्रियः ॥ १० ॥ तस्य अक्रियस्य । क्षेत्रे भार्यायाम् । ब्रह्म ब्राह्मणजातिः । अनेनस आयुपंचमपुत्रस्य । तस्माच्छुद्धात् । ततस्त्रिककुत् । ततो धर्मसारथिः । केचिद्धर्मसारथिरिति त्रिककुद्विशेषणमाहुः ॥ ११ ॥ ततो धर्मसारथेः । इत्यर्थ इति । ज्ञातसंसारस्वरूपत्वाद्विरक्तोऽभूदिति भावः । आयुतृतीयपुत्रस्य वंशमाह–रजेरिति । अमितौजसाममिति बलवताम् ॥ १२ ॥ एकदा देवासुरसंग्रामे प्रवृत्ते उभयोर्ब्रह्माणं प्रति जयपराजयप्रश्ने ब्रह्मणोक्तम् "यतो रजिर्धृतिस्तत्र श्रीश्च तत्र यतो रजिः । श्रीश्च धृतिश्च यत्रैव तत्र धर्मस्तथा जयः ॥" इत्येवं ब्रह्मवाक्यं श्रुत्वा रजेः पार्श्वं देवा दैत्याश्च गत्वोचुः त्वमस्मत्सहायो भवेति । स चाह यो मामिंद्रं करिष्यति तत्सहायो भविष्यामि । दैत्यैरुक्तं न वयं सैंहिकेयदौहित्रं त्वामिंद्रं करिष्यामः किं तु प्रह्लादमिंद्रं करिष्यामः । देवैरुक्तं त्वामेवेति । ततो देवानां सहायं कृत्वा दैत्यान् विजित्येंद्रो बभूव । इन्द्रश्च रजेः पुत्रतां जगामेति हरिवंशे प्रसिद्धां कथामाश्रित्याह–देवैरिति । तस्मै रजये ॥ १३ ॥ अर्पयामास रजिपुत्रत्वमाजगाम । उपरते मृते । याचमानाय अहमपि रजेः पुत्रोऽतो मामेवेंद्रं स्थापयतेति प्रार्थयते इंद्राय त्रिविष्टपं स्वर्गं नो ददू रजेः पुत्रा इति परेणान्वयः ॥ १४ ॥ गुरुणांगिरसेन ॥ १५ ॥ मार्गाद्धर्ममार्गात् । बृहस्पतिना नास्तिकमतप्रवृत्तिजनकस्वनिर्मितसूत्रोपदेशेन धर्माद्भ्रंशितानिंद्रोऽवधीदिति हरिवंशे । तत्सुतः संजयसुतः ॥ १६ ॥ ततो जयात् । ततो हर्यवनात् । तत्सुतोऽहीनसुतः ॥ १७ ॥ तस्य जयसेनस्य । पुनस्तस्य संस्कृतेः । तस्य पुनर्जयस्य । महारथ इति क्षत्रधर्मविशेषणम् । भूपा उक्ताः । नाहुषात् नहुषपुत्राद्ययातेरारभ्य 'नाहुषम्' इति पाठे तु स्पष्टोर्थः ॥ १८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः ॥ षडिमे नहुषस्यासन्निंद्रियाणीव देहिनाम् ॥ १ ॥ राज्यं नैच्छद्यतिः पित्रा दत्तं
तत्परिणामवित् ॥ यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥ २ ॥ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः ॥ प्रापितेऽजगरत्वं वै ययातिरभ
वन्नृपः ॥ ३ ॥ चतसृष्वादिशद्दिक्षु भ्रातॄन् भ्राता यवीयसः ॥ कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥ ४ ॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान् काव्यः
क्षत्रबंधुश्च नाहुषः ॥ राजन्यविप्रयोः कस्माद्विवाहः प्रतिलोमकः ॥ ५ ॥ श्रीशुक उवाच ॥ एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका ॥ सखी
सहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥ ६ ॥ देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले ॥ व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ॥ ७ ॥ ता जला
शयमासाद्य कन्याः कमललोचनाः ॥ तीरे न्यस्य दुकूलानि विजहुः सिंचतीर्मिथः ॥ ८ ॥ वीक्ष्य व्रजंतं गिरिशं सह देव्या वृषस्थितम् ॥ सह
सोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥ शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ॥ स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥
अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसांप्रतम् ॥ अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥ यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये ॥
धार्यते यैरिह ज्योतिः शिवः पंथाश्च दर्शितः ॥ १२ ॥

अष्टादशे ययातेस्तु नाहुषस्य कथोच्यते ॥ यस्य पंचसु पुत्रेषु कनीयानग्रहीज्जराम् ॥ १ ॥ १ ॥ तस्य राज्यस्य परिणाममनर्थावहत्वं वेत्तीति तथा । तत्र हेतुः । यत्रेति ॥ २ ॥ स्थानात्स्वर्गात । द्विजैरगस्त्यादिभिः ॥ ३ ॥ यवीयसो भ्रातॄनादिशत । काव्यस्य शुक्रस्य वृषपर्वणश्च कन्याभ्यां कृतदारः सन् ॥ ४ ॥ ५ ॥ नात्र प्रतिलोमतादोष ईश्वरघटनादिति दर्शयन्कथामाह । एकदेत्यादिना प्रतिजग्राह तद्वच इत्यंतेन । गुरोः शुक्रस्य पुत्र्या देवयान्या च व्यचरदिति द्वयोरन्वयः ॥ ६ ॥ कलगीता अलयो येषु तानि नलिनीपुलिनानि यस्मिंस्तस्मिन्पुरोद्याने । अबला शर्मिष्ठा ॥ ७ ॥ सिंचतीः सिंचंत्यः ॥ ८ ॥ ९ ॥ अजानती स्वीयं मत्वा गुरुपुत्र्या वासः समव्ययत्पर्यधात् ॥ १० ॥ असांप्रतमन्याय्यम् ॥ ११ ॥ अन्यायमेव ब्राह्मणोत्कर्षवर्णनेन व्यनक्ति यैरिति त्रिभिः । ये ब्राह्मणाः परस्य पुंसो मुखं मुखा

यस्य ययातेः । कनीयान्पूरुः (१) ॥ १ ॥ तात्रानर्थावहत्वे । यत्र राज्ये ॥ २ ॥ पितारि नहुषे । धर्षणात् मैथुनार्थं प्रार्थनात् ॥ ३ ॥ चकारः कन्याभ्यामिति चात्र शेषः । कृतदारः कृतोद्वाहः । दारपदमत्र दारकर्म लक्षकम् ॥४॥ प्रातिलोम्येनोद्वहनमसंगतं मत्वा पृच्छति–ब्रह्मर्षिरिति । भगवानिति ब्रह्मर्षिष्वप्याधिक्यमाह । प्रातिलोमको विपरीतकः ॥५॥ प्रातिलोम्येपि दोषाभावमाह–नात्रेति । अत्र विवाहे । दानवेंद्रस्य वृषपर्वणः ॥६॥ नलिनीपुलिनानि । सकमलसरसीतोयोत्थितसैकततटानि । पुरोद्याने नगरोपकंठवने ॥ ७ ॥ सिंचंत्योऽन्योन्यं जलक्षेपं कुर्वंत्यः ॥ ८ ॥ सहसा झटिति । पर्यधुराच्छादितवत्यः ॥ ९ ॥ इदं वक्ष्यमाणम् ॥ १० ॥ दास्याः दासीतुल्यायाः । असांप्रतमनुचितम् । "चिरे चानुचिते प्रोक्तमसांप्रतमिति ध्वनिः" इति निरुक्तिः । अध्वरे यज्ञे । हविर्देवदेयचरुभागम् ॥ ११ ॥ यैर्ब्राह्मणैर्मरीच्यादिभिः । इत्यर्थ इति । निजाशनद्वारा भगवतस्तृप्ति ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यान् वंदंत्युपतिष्ठंते लोकनाथाः सुरेश्वराः ॥ भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥१३॥ वयं तत्रापि भृगवः शिष्योऽस्या नः पिताऽसुरः ॥ अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥१४॥ एवं शपंतीं शर्मिष्ठा गुरुपुत्रीमभाषत ॥ रुषा श्वसंत्युरंगीव धर्षिता दष्टदच्छदा ॥१५॥ आत्मवृत्तम विज्ञाय कत्थसे बहु भिक्षुकि ॥ किं न प्रतीक्षसेऽस्माकं गृहान् बलिभुजो यथा ॥ १६ ॥ एवंविधैः सुपरुषैः क्षिप्त्वाचार्यसुतां सतीम् ॥ शर्मिष्ठा प्राक्षिपत्कूपे वास आदाय मन्युना॥१७॥ तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ॥ प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥ दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे ॥ गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥ १९ ॥ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ॥ राजंस्त्वया गृहीतो मे पाणिः परपुरंजय ॥ २० ॥ हस्तग्राहोऽपरो मा भूद्गृहीतायास्त्वया हि मे ॥ एष ईशकृतो वीर संबंधो नौ न पौरुषः ॥ २१ ॥ यदिदं कूपमग्नाया भवतो दर्शनं मम ॥ न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ॥ कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा ॥ २२ ॥

दुत्पन्नत्वेन तृप्तिद्वारत्वेन श्रेष्ठा इत्यर्थः । ज्योतिर्ब्रह्म । पंथा वेदमार्गः ॥ १२ ॥ १३ ॥ तदेवं ब्राह्मणमात्रमेव तावत्पूज्यं तत्रापि भृगवः । अस्याश्च पिता नः शिष्यः । एवं सत्यप्यस्माभिर्धार्यं वास इयमसती धृतवती ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ निषिद्धोऽयं प्रतिलोमसंबंध इति चेत्तत्राह । एष इति॥२१॥ ब्राह्मणमेव त्वं वृणीहि किमनेनाग्रहेणेति चेत्तत्राह । न ब्राह्मण इति । बृहस्पतेः सुतः कचः शुक्रान्मृतसंजीवनीं विद्यामध्यगात् । तदा च देवयानी तं पतिं चकमे । स च गुरुपुत्री मम पूज्येति न तामुदवहत् । ततश्च कुपिता सती तवेयं विद्या निष्फला भवत्विति तं शशाप । स च तव ब्राह्मणः पतिर्न भवेदिति तां शशाप । तदेतदाह ।

जनकत्वेन न ब्राह्मणसमं किंचिदस्तीति भावः । ते ब्रह्मपर्यः आत्मसाक्षात्कारोस्ति येषामित्यर्थः ॥ १२ ॥ यान् ब्राह्मणान् । वंदंति वंदंते लोकनाथा जगत्प्रार्थ्याः । सुरेश्वरा इंद्राद्याः । अपिना किमन्ये इत्युक्तम् । यद्वा–विश्वात्मापि पावनोऽपि श्रीनिकेतनोऽपीति । एतेन पूज्यतमत्वमुक्तम् ॥ १३ ॥ तत्रापि ब्राह्मणेष्वपि । भृगवोऽतितपस्विनो वा यत्पादताडनं सर्वेश्वरेणापि सोढं तद्वंश्याः । अस्याः शर्मिष्ठायाः । एवं सत्यपि सर्वथास्माकमुत्कर्षे ज्ञातेऽपि । असती अनुत्कृष्टा ॥ १४ ॥ शपंतीमाक्रोशंतीम् । धर्षिता तुच्छीकृता । दष्टदच्छदा दंताक्रांताधरा । उरंगी सर्पिणी ॥ १५ ॥ आत्मवृत्तं निजजीवनम् । कत्थसे व्यर्थं वदसि । बलिभुजः काकाः श्वानो वा ॥ १६ ॥ सुपरुषैरतिकठोरोक्तिभिः । क्षिप्त्वा तिरस्कृत्य ॥ १७ ॥ तस्यां शर्मिष्ठायाम् । तां शर्मिष्ठाक्षिप्तां देवयानीम् ॥ १८ ॥ उत्तरमुत्तरीयम् । तस्यै कूपपतितदेवयान्यै । विवाससे नग्नायै ॥ १९ ॥ तं ययातिम् । औशनसी शुक्रात्मजा । निर्भरः पूर्णः । "गुरौ पूर्णे लघौ पालयितारि निर्भरः स्मृतः" इति निरुक्तिः ॥ २० ॥ ईशकृतो दैवकृतो नारायणकृतो वा । पौरुषः पुरुषकारकृतः । सर्वस्यैवं संबंधस्येशकृतत्वान्न कस्यापि पापं स्यात् । तत्रेदमवधेयम्–न हि भगवदेकाश्रयाणामधर्मे मतिप्रवेशः कदापि तेषां यदि तत्र प्रवृत्तिः सा धर्मरूपैव ये मामेवात्मानं समर्पयंति न तेषां मतिमधर्मे प्रेरयामीति सिद्धांतितं भगवता श्रीगीतादौ ॥ २१ ॥ तदा विद्यासमाप्तौ । तं कचम् । चकमे इयेष । स च कचः । तां देवयानीम् । ततो विवाहानंगीकारात् । सा देवयानी । तं कचम् । स च कचश्च । तां देवयानीम् । तदेतद्वृत्तमभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ययातिरनभिप्रेतं दैवोपहृतमात्मनः ॥ मनस्तु तद्गतं बुद्धा प्रतिजग्राह तद्वचः ॥२३॥ गते राजनि सा वीरे तत्र स्म रुदती पितुः ॥ न्यवेदयत्ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥ २४ ॥ दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ॥ स्तुवन् वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥ २५ ॥ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ॥ गुरुं प्रसादयन् मूर्ध्ना पादयोः पतितः पथि ॥ २६ ॥ क्षणार्धमन्युर्भगवाञ्छिष्यं व्याचष्ट भार्गवः ॥ कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥ तथेत्यवस्थिते प्राह देवयानी मनोगतम् ॥ पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ ॥ २८ ॥ स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवम् ॥ देवयानी पर्यचरत् स्त्रीसहस्रेण दासवत् ॥ २९ ॥ नाहुषाय सुतां दत्त्वा सह शर्मिष्ठयोशनाः ॥ तमाह राजञ्शर्मिष्ठामाधास्तल्पे न कर्हिचित् ॥ ३० ॥

यमहमशपं तस्य शापात ॥ २२ ॥ अशास्त्रीयत्वादनभिप्रेतमपि दैववोपहृतं प्रापितं बुद्धा तद्गतं तस्यां सकामं स्वं मनश्च बुद्धा न ह्यधर्मे मदीयं मनः प्रविशेदिति तस्या वचः प्रतिजग्राहांगीकृतवान ॥ २३ ॥ शर्मिष्ठासंबंधोऽपि दैववशादेवाभवदिति दर्शयन्नाह गते राजनीति नवभिः । उक्तं भिक्षुकीत्यादि । कृतं कूपे प्रक्षेपादि ॥ २४ ॥ कापोतीमुंछवृत्तिम ॥ २५ ॥ प्रत्यनीका देवास्ते विवक्षिता जयं प्रापणीया इत्यभिप्रेतं यस्य तथाभूतं ज्ञात्वा । प्रत्यनीकानां विवक्षितमिति वा ॥२६॥२७॥ सानुगा सखीसहिता शर्मिष्ठा मामनुयात्विति ॥ २८ ॥ तत्तस्मान्निर्गताच्छुक्रात्संकटं वीक्ष्य । तत्तस्मादवस्थितादर्थस्य प्रयोजनस्य गौरवं च वीक्ष्य ॥ २९ ॥ तल्पेनाधाः नोपगच्छे

प्रेत्याह–यं कचम् ॥ २२ ॥ अशास्त्रीयत्वान्निषिद्धत्वात् । अनभिप्रेतमवांछितम् । दैवेनेशेनोपहृतम् । तस्या देवयान्याः । बाल्यमारभ्य कदापि मेऽधर्मे प्रवृत्तिर्नाभूत् । तदेकशरणस्य मे मन ईशोऽपि न प्रवेशयेदिति 'धर्मस्य सूक्ष्मा गतिः' इति निश्चित्य नायमधर्मो भविष्यतीति तस्या वचो जग्राहेति संदर्भः ॥ २३ ॥ राजनि ययातौ । तत्र तदा । सा देवयानी । ततः कूपोत्तारणानंतरम् । ततस्तया वा शर्मिष्ठया । यद्वा–तते राजनीति योज्यम् ॥ २४ ॥ पौरोहित्यं पुरोहितत्वम् । कपोतः पक्षी तद्वत्संग्रहयाचनादिशून्यां वृत्तिमित्यभिप्रेत्याह–वृत्तिमिति । दुहित्रा सह । स काव्यः । २५ ॥ तं शुक्रम् । प्रत्यनीकाः शत्रवोऽर्थाद्दैत्यानामिति, ते च देवा एव विवक्षिता विवक्षाविषया विवक्षा च यूयं मया जयं प्रापणीया इत्येवंरूपा बोध्या । भार्गवाभिप्रायस्य दुर्ज्ञेयत्वं मत्वाह–प्रत्यनीकानामिति । विवक्षितं त्यक्तदैत्यस्त्वमस्माकं जयमाशास्वेत्येवंरूपं वक्तुमिष्टम् ॥ २६ ॥ "प्रणिपातप्रतीकारः संरंभो हि महात्मनाम्" इत्यभिप्रायेणाह–क्षणार्द्धमन्युः अग्निस्थदुग्धोद्गमसमकोपः । शिष्यं वृषपर्वाणम् । अस्या देवयान्याः । कामोऽभिलषितः । एनां मातृहीनाम् ॥ २७ ॥ तथेत्यवस्थिते यदस्या अभीष्टं तत्करिष्ये इत्थमुक्त्वा वृषपर्वणि स्थितवति सति । मनोगतं स्वाभीष्टम् । तदेवाह–पित्रेति । यतो यस्मै वराय यास्ये प्राप्स्यामि तमेव वरम् अनु यातु दासी भूत्वा गच्छतु ॥ २८ ॥ निर्गतात् गृहं विहाय गतात् । संकटं यद्यहमेनां नानुगमिष्यामि तदा गुरुद्रोहान्मत्पितृकुलं नंक्ष्यतीत्येवंरूपं क्लेशम् । स्वानां निजपितृकुलादीनाम् । अवस्थितान्मत्पितृगेहस्थितात्तस्माच्छुक्रात् । प्रयोजनस्य गुरुप्रसादपितृकुलवृद्धिरूपस्य । गौरवमाधिक्यम् । स्त्रीसहस्रेण सखीसहस्रेण । दासवद्दासीवत् । क्लीबभावश्छांदसः ॥ २९ ॥ नाहुषाय ययातये । तं ययातिम् ! तल्पे शय्यायाम् । इत्यर्थ इति । अनया मैथुनं न कार्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलोक्यौशनसीं राजञ्शर्मिष्ठा सप्रजां क्वचित् ॥ तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥ ३१ ॥ राजपुत्र्यार्थितोऽपत्ये धर्मं चावेक्ष्य धर्मवित् ॥
स्मरञ्शुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥
गर्भसंभवमासुर्या भर्तुर्विज्ञाय मानिनी ॥ देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ॥ ३४ ॥ प्रियामनुगतः कामी वचोभिरुपमंत्रयन् ॥ न प्रसाद
यितुं शेके पादसंवाहनादिभिः ॥ ३५ ॥ शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुष ॥ त्वां जरा विशतां मंद विरूपकरणी नृणाम् ॥ ३६ ॥ यया
तिरुवाच ॥ अतृप्तोऽस्म्यद्य कामानां ब्रह्मन् दुहितरि स्म ते ॥ व्यत्यस्यतां यथाकामं वयसा योभिधास्यति ॥ ३७ ॥ इति लब्धव्यवस्थानः पुत्रं
ज्येष्ठमवोचत ॥ यदो तात प्रतीच्छेमां जरां देहि निजं वयः ॥ ३८ ॥ मातामहकृतां वत्स न तृप्तो विषयेष्वहम् ॥ वयसा भवदीयेन रंस्ये कति
पयाः समाः ॥ ३९ ॥ यदुरुवाच ॥ नोत्सहे जरसा स्थातुमंतरा प्राप्तया तव ॥ अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥

रित्यर्थः ॥ ३० ॥ ३१ ॥ अपत्यार्थमृतुकाले प्रार्थनात्तस्याः कामपूरणं धर्ममवेक्ष्य शुक्रस्य वचश्च स्मरन् दिष्टं दैवप्रापितमेव तत्संगमभ्यपद्यत । न तु कामत इत्यर्थः ॥ ३२ ॥ ३३ ॥ आसुर्याः शर्मिष्ठायाः । भर्तुः सकाशात ॥ ३४ ॥ उपमंत्रयन्प्रसादयन् ॥ ३५ ॥ विकृतं रूपं करोतीति तथा ॥ ३६ ॥ ते दुहितरि कामैरद्याप्यतृप्तोऽस्मि कामानां भोगैरिति वा । शुक्र आह । तर्हि योऽभिधास्यत्यभितो धारयिष्यति तस्य वयसा यथाकामं व्यत्यस्यतां यथेच्छं जराव्यत्ययं यातु । व्यत्ययं नीयतामिति वा । यद्वा व्यत्यस्येति छेदः । तां जरां व्यत्यस्य व्यत्यासं गमयेत्यर्थः ॥ ३७ ॥ इति लब्धं व्यवस्थानं जराया व्यवस्थितिर्येन सः ॥ ३८ ॥ ३९ ॥ ४० ॥

मिति ॥ ३० ॥ तमेव ययातिम् ॥ ३१ ॥ अपत्ये संताननिमित्तम् । धर्मं श्रौतम् । "न कांचन परिहरेत्तद्व्रतम्" । इति श्रुतेः । अनन्यपूर्विकां गम्यां कांचनस्त्रियमृतुमतीं याचमानां न परिहरेत्प्रत्याचक्षीतेति तदपरित्यागो व्रतं व्रततुल्यफलदमिति श्रुत्यर्थः । इत्यर्थ इति । दिष्टमेवात्र कारणमिति निश्चित्य तत्संगं चकारेति भावः ॥ ३२ ॥ व्यजायत उत्पादयामास ॥ ३३ ॥ ३४ ॥ ३५ ॥ तं ययातिम् । अनृतपुरुष असत्यवादिपुरुष । विकृतं चर्मश्लथपलितविशीर्णदंतादिना विरूपम् ॥ ३६ ॥ कामानामिति तृतीयार्थे षष्ठी । भोगैरिति शेषेण वा । यद्येवं तर्हीति । कर्मकर्तरि प्रयोगापेक्षया कर्मणि प्रयोगस्य सुगमत्वादाह—व्यत्ययं नीयतां त्वया । ततोपि सौगम्यमाह—यद्वेति । इत्यर्थ इति । व्यत्यस्येति व्यतिपूर्वस्यास्यतेर्मध्यमपुरुषस्यैकवचनम् । आत्मनेपदं त्वार्षत्वान्न । यः पुमान्स्वीयेन वयसा धारयिष्यति तत्रैतां स्थापयेति भावः । यद्वा तां जरां व्यत्यस्य संक्रमय्य यथाकाममहं भुंज इति ॥ ३७ ॥ प्रतीच्छ प्रतिगृहाण । तातेति । पुत्राणां पितृवाक्यकरणमेवोचितमित्यभिप्रायेण संबोधयति ॥ ३८ ॥ मातामहेन शुक्रेण कृताम् । वत्सेत्यपि पूर्वाभिप्रायैव ॥ ३९ ॥ अंतरा मध्ये । अविदित्वाऽननुभूय । वैतृष्ण्यं वैराग्यम् । अविदित्वेत्यस्यायमभिप्रायः—मम विधित्सितभगवद्भक्त्यनुकूलं विषयवैतृष्ण्यमपेक्षितं वर्त्तते तच्च भोगबाहुल्यं विना प्रायो न भवेत् तत्र यद्यपि कालविलंबे सति त्वं स्वीयां जरां गृहीत्वा मद्यौवनं दास्यस्येवेति जानामि तदपि निरंतरायहरिभजनस्योत्कृष्टस्य मम कालविलंबस्यासह्यत्वात्पितुरपि तवेमामाज्ञां न पालयामात्र यद्भवेत्तद्भवत्विति । अत एव "यदोश्च धर्मशीलस्य' इति राजा दशमे वक्ष्यते । परमधर्मापेक्षया पितुराज्ञापालनधर्मस्य प्राकृतस्य सनकादिभिरिव त्यागात् । अत एव संतुष्यंस्तद्वंशे भगवान्स्वयमेवावततार 'यदोः प्रियस्यान्ववाये' इति कुंतीस्तुतेश्च । या तूत्तरश्लोकेऽधर्मज्ञा इति शुक्रोक्तिः सा तु तुर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्वे सुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ॥ प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥ अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकम् ॥ न त्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥ पूरुरुवाच ॥ को नु लोके मनुष्येंद्र पितुरात्मकृतः पुमान् ॥ प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परम् ॥ ४३ ॥ उत्तमश्चिंतितं कुर्यात्प्रोक्तकारी तु मध्यमः ॥ अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥ ४४ ॥ इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ॥ सोऽपि तद्वयसा कामान्यथावज्जुजुषे नृप ॥ ४५ ॥ सप्तद्वीपपतिः सम्यक् पितृवत्पालयन्प्रजाः ॥ यथोपजोषं विषयाञ्जुजुषेऽव्याहतेंद्रियः ॥ ४६ ॥ देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ॥ प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥ ४७ ॥ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ॥ सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥४८॥ यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ॥ नानेव भाति नाभाति स्वप्नमायामनोरथः ॥४९॥

यतो न धर्मज्ञाः अनित्ये च यौवने नित्यबुद्धयः ॥ ४१ ॥ त्वां जरां किं ग्रहीष्यसीत्यपृच्छत् । प्रत्याख्यानं मा कृथा इत्याह । न त्वमिति ॥ ४२ ॥ आत्मकृतः स्वदेहकर्तुः प्रत्युपकारं कर्तुं को नु क्षमः ॥ ४३ ॥ तथाऽपि पितुर्यच्चिंतितं कुर्यात्स उत्तमः । यस्तु प्रोक्तकारी स मध्यमः । यस्त्वश्रद्धया कुर्यात्सोऽधमः । अकर्ता पितुरुच्चरितं पुरीषप्रायः ॥ ४४ ॥ जुजुषे सेवितवान् ॥ ४५ ॥ यथोपजोषं यथाप्रीति जुजुषे ॥ ४६ ॥ ४७ ॥ ४८ ॥ नानेव भाति यावदिंद्रियप्रवृत्तिः । तदुपरमे नाभाति ।

स्वादीन्प्रत्येवेति चक्रवर्त्ती ॥ ४० ॥ अनित्ये क्षणभंगुरे नित्यबुद्धयः स्थायीदमिति मतयः ॥ ४१ ॥ वयसोनं कनिष्ठम् । प्रत्याख्यातुमपाकर्त्तुम् ॥ ४२ ॥ को नु क्षमः न कोपीति । यस्य पितुः । परं तद्दत्तदेहेन मोक्षं विंदते प्राप्नोति । यद्वा—मातापित्रोस्साक्षाल्लक्ष्मीनारायणस्वरूपत्वात्तत्सेवनं शालग्रामादिसेवनवन्मोक्षोपयोगिज्ञानसिद्धिप्रदम् । तदुक्तं जैमिनीये "पितृभक्त्या विना किंचिल्लभ्यते भुवि नो नरैः । लक्ष्मीनारायणावेतौ पितरौ चिंतयाम्यहम् ॥" इति चंद्रहासोक्तेः । महाभारतेपि धर्मव्याधोपाख्याने मातापितृसेवामाहात्म्यं बहुधा वर्णितम् । श्रीवाल्मीकीयेपि श्रीरामचंद्रेण सीतां प्रत्युक्तम्—"न सत्यं दानमानौ वा यज्ञो वाप्यात्तदक्षिणः । तथा बलकराः सीते यथा सेवा पितुर्मता ॥ स्वर्गो धनं वा धान्यं वा विद्याः पुत्राः सुखानि च । गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम् ॥ देवगंधर्वगोलोकान्ब्रह्मलोकांस्तथापरान् । प्राप्नुवंति महात्मानो मातापितृपरायणाः ॥" इत्ययोध्याकांडे ॥४३॥ "एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ । शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः ॥ इति । "पुत्राणां हि परो धर्मः पितुराज्ञानुपालनम्" इत्यादि बहु प्रपंचितम् । किं च "जीवतोर्वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् । गयायां पिंडदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥" इति स्मृतेः । पुत्रत्वं पितुराज्ञाकरणेनैव अन्यथा मलत्वं स्यादित्याह । 'उच्चरितं गुदानिर्गतम्' इति कोशः॥४४॥इतीत्युक्त्वा । सोपि ययातिरपि । तद्वयसा पूरुववसा ॥ ४५ ॥ ४६ ॥ प्रेयसो भर्त्तुः ॥ ४७ ॥ सर्ववेदमयं सर्ववेदप्रधानम् । 'वेदैश्च सर्वैरहमेव वेद्यः' इति श्रीगीतासूक्तेः ॥ ४८ ॥ इत्यर्थ इति । यथा स्वप्नमायामनोरथा असंतोपि भांति तद्वदसदेव प्रतीयत

१ 'ऋणापकरणात्तथा' इत्यपि क्वचित्पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् ॥ नारायणमणीयांसं निराशीरयजत्प्रभुम् ॥ ५० ॥ एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखम् ॥ विदधा
नोऽपि नातृप्यत्सार्वभौमः कदिंद्रियैः ॥ ५१ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे अष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच ॥
स इत्थमाचरन्कामान्स्त्रैणोपह्नवमात्मनः ॥ बुद्धा प्रियायै निर्विण्णो गाथामेतामगायत ॥ १ ॥ शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ॥
धीरा यस्यानुशोचंति वने ग्रामनिवासिनः ॥ २ ॥ बस्त एको वने कश्चिद्विचिन्वन्प्रियमात्मनः ॥ ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥ ३ ॥
तस्या उद्धरणोपायं बस्तः कामी विचिंतयन् ॥ व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसी ॥ ४ ॥ सोत्तीर्य कूपात्सुश्रोणी तमेव चकमे किल ॥
तया वृतं समुद्वीक्ष्य बह्व्योऽजाः कांतकामिनीः ॥ ५ ॥ पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ॥ स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः ॥
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥ ६ ॥

स्वममायाभ्यां सहितो मनोरथ इवेत्यर्थः ॥ ४९ ॥ ५० ॥ मनःसुखं कामभोगम् । कदिंद्रियैः कुत्सितैः पराङ्मुखैरिंद्रियैः ॥ ५१ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायामष्टादशोऽध्यायः ॥ १८ ॥ ऊनविंशे ययातिः स्वं चेष्टितं नन्वजोपमम् ॥ देवयानीं समाश्राव्य विरक्तो मुक्तिमाप्तवान् ॥ १ ॥ भुक्तभोगामजां हास्यन्नजवद्वृत्त मात्मनः ॥ विडंबयन्प्रियामाह निर्वेदयितुमात्मवान् ॥ २ ॥ कामानाचरन्नुपभुंजानः । गाथामितिहासम् ॥ १ ॥ मद्विधेन मत्सदृशेनाचरितामनुष्ठिताम् । मद्विधस्याच रितं यस्यामिति वा । यस्य ग्रामनिवासिनः कामिनो मद्विधस्याचारितं वने स्थिता धीराः शोचंति तस्य गाथां शृणु ॥ २ ॥ आत्मानमतुलक्ष्याह । बस्त इति । प्रियामनु लक्ष्याह । अजामिति । वने संसारे । प्रियं विषयम् ॥ ३ ॥ रोधसि तटे । विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थनिर्गमाय मार्गं व्यधत्त ॥४॥ बह्व्य इति शर्मिष्ठाप्रमुखाः काम यामासुः कांतं प्रति कामिनीः कामवत्यः ॥ ५ ॥ पीवानं पुष्टम् । श्मश्रुलं श्मश्रुबहुलम् । रतिसमर्थमित्यर्थः । मीढ्वांसं रेतःसेक्तारम् । याभे कोविदमभिज्ञमत एव प्रेष्ठम् ।

इति भावः ॥ ४९ ॥ तमेव यस्मिन्प्रपञ्चः कल्पितस्तमित्यर्थः । निराशीर्निष्कामः ॥ ५० ॥ विदधानः कुर्वाणोऽपि सार्वभौमोऽपि वर्षसहस्राण्यपीति त्रिधा योज्यम् । कथमन्येषामल्पकालाल्पवित्तादिभिस्तृप्तिर्भवेदिति भावः ॥ ५१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ अजेन बस्तेनोपमीयेत इति तथा (१) । हास्यन् त्यजन् 'ओहाक्–त्यागे' विडंबयन्ननुकुर्वन् । आत्मवान् प्राप्तज्ञानः । (२) । स ययातिः । स्त्रैणः स्त्रीवशवर्ती । अपह्नवं नित्यसुखहानिलक्षणं नाशम् । प्रियायै देवयान्यै । एतां वक्ष्यमाणत्वेन बुद्धिसन्निहिताम् ॥ १ ॥ भार्गवि भृगुकुलोद्भूते । मद्विधेन स्त्रैणेन । न केनापि तं विनाचरि तेत्यसत्यानिवृत्त्यर्थमाह–मद्विधस्येति ॥ २ ॥ अत्र वनकूपशब्दौ संसारलक्षकौ । बस्ताजाशब्दौ च प्रकृतिपुरुषलक्षकौ ॥ ३ ॥ तस्या अजायाः । रोधसि कूपतीरे । तीर्थम् उद्धरणस्थानम् "तीर्थं मंत्राद्युपाध्यायशास्त्रेष्वं भसि पावने । पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः ॥" इति यादवः ॥ ४ ॥ सा अजा । तमेवोद्धारकमेवाजम् ॥ ५ ॥ इत्यर्थ इति । युवावस्थत्वाद्रतियोग्यमिति भावः ।तीर्थस्तु 'यावकोविदम्' इति पपाठ । 'याव:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेव प्रेष्ठतमया रममाणमजाऽन्यया ॥ विलोक्य कूपसंविग्ना नामृष्यद्वस्तकर्म तत् ॥ ७ ॥ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ॥ इंद्रियाराम मुत्सृज्य स्वामिनं दुःखिता ययौ ॥ ८ ॥ सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् ॥ कुर्वन्निडविडाकारं नाशक्नोत्पथि संधितुम् ॥ ९ ॥ तस्यास्तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा ॥ लंबंतं वृषणं भूयः संदधेऽर्थाय योगवित् ॥ १० ॥ संबद्धवृषणः सोऽपि ह्यजया कूपलब्धया ॥ कालं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ॥ ११ ॥ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः ॥ आत्मानं नाभिजानामि मोहितस्तव मायया ॥ १२ ॥ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ न दुह्यंति मनःप्रीतिं पुंसः कामहतस्य ते ॥ १३ ॥ न जातु कामः कामानामुपभोगेन शाम्यति ॥ हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १४ ॥ यदा न कुरुते भावं सर्वभूतेष्वमंगलम् ॥ समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ १५ ॥

नावबुध्यत नान्वबुध्यत ॥ ६ ॥ ७ ॥ स्वामिनमिति शुकाभिप्रायेणाह ॥ ८ ॥ इडविडाकारं बस्तजातिशब्दम् । संधितुं प्रसादयितुम् ॥ ९ ॥ वृषणमच्छिनज्जरया संभोगासमर्थमकरोत् । अर्थाय स्वपुत्र्याः कामोपभोगाय । योगविदुपायज्ञः । जराव्यत्ययेन रतिशक्तिं ददावित्यर्थः ॥ १० ॥ कूपलब्धया सह कामैः सेव्यमानैर्न तुष्यति ॥ ११ ॥ १२ ॥ ननु तर्हि पुनरपि बहवो विषयाः सेव्यंतां ततो मनसि प्रीते सति कामोपशांत्या मोहो निवर्तेतेति चेत्तत्राह यदिति द्वाभ्याम् । न दुह्यंति न पूरयंति ॥ १३ ॥ हविषा घृतेन कृष्णवर्त्माऽग्निरिव ॥ १४ ॥ तर्हि कदा केनोपायेन वा मनसः संपूर्णा प्रीतिः स्याद्यया कामोपशमः स्यादित्यत आह यदेति षड्भिः । अमंगलं

॥ ६ ॥ अन्यया प्रेष्ठतमया स्वतोऽप्यधिकप्रियया । तत् अन्यासक्तिलक्षणम् ॥ ७ ॥ केवलकुल्माषे बलके तोयपर्णिके' इति कोशात्कुल्माषादिभक्षणसक्तमिति व्याचख्यौ । मीढ्वांसमित्यनेन पुनरुक्तित्वात् । अजेषु वृषः श्रेष्ठः ॥ ६ ॥ अन्यया प्रेष्ठतमया स्वतोऽप्यधिकप्रियया । तत् अन्यासक्तिलक्षणम् ॥ ७ ॥ दुर्हृदं दुष्टहृदयं शत्रुं वा । स्वामिनं शरीरोत्पादकत्वेन स्वत्ववंतं पितरम् । अत्र विश्वनाथः—स्वामिनमिति । विरुद्धमतिकृद्दोषस्त्वार्षत्वादत्र सोढव्यः । यद्वा—"स्वामिन्नैश्वर्ये" इति पाणिनिस्मरणान्न केवलं भर्तृपर्याय एव पतिशब्दः । यद्वा—स्वामिनं ययातिमुत्सृज्येति योजना । प्रतिज्ञात्यागेन दुःखिता ॥८॥९॥ तत्र तदा । वृषणं शिश्नम् । वृष्यते सिच्यते रेतोऽनेनेति व्युत्पत्तेः। याऽजा तस्याः स्वामी द्विज इति योज्यम् । तस्य तत्रेति पाठस्तु सुगमः । "शिश्ने शिश्नासने चैव वृषणं कामनाप्रदे" इति निरुक्तिः । वस्तुतस्तु—मैथुनसामर्थ्यं वृषणपदेन लक्ष्यते । जराप्रदानेन मैथुनायोग्यं चकारेति भावः । संदधे युयुजे । इत्यर्थ इति । योगबलेन पुनः समर्थं चकारेति भावः ॥१०॥ सोप्यजोपि । संबद्धवृषणोऽन्यत्र जराव्यत्यासेनाप्तभोगसामर्थ्यः । बहूनां संख्यापूरकम् "बहूपूगे—" इति तिथुक् ॥ ११ ॥ यथा सोजस्तथेत्यर्थः ॥ १२ ॥ व्रीहियवमित्येकवद्भावः । ते व्रीह्यादयः न दुह्यंति न पूरयंति 'दुह—प्रपूरणे' प्रपूरणं नामोधसो रिक्तीकरणं पात्रस्य पूर्णीकरणम् । अतः स्त्रीपुंसयोरुभयोरपि कामभोगादिनाऽलंबुद्धिर्न भवतीति भावः ॥ १३ ॥ ननु प्रावृडुपरमे नदीजलह्रासवत्कामानामुपभोगेन शांतिः स्यादित्यत आह—नेति "हविर्गव्ये घृते तोये हविष्ये हेम्नि चौषधे" इति यादवः॥१४॥भावं स्वभावम् । "पदार्थमात्रे सत्तायां भाव आत्मस्वभावयोः" इति यादवः । सुखमयाः सुखप्रापकाः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ॥ तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ॥ बलवानिंद्रियग्रामो विद्वांसमपि कर्षति ॥ १७ ॥ पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ॥ तथाऽपि चानुसवनं तृष्णा तेषूपजायते ॥ ॥ १८ ॥ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ॥ निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह ॥ १९ ॥ दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संविशेत् ॥ संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥ २० ॥ इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ॥ दत्त्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥ २१ ॥ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ॥ प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरम् ॥ २२ ॥ भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ॥ अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥ २३ ॥ आसेवितं वर्षपूगान्षड्वर्गं विषयेषु सः ॥ क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥ २४ ॥ स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः ॥ परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥ २५ ॥

भावं रागद्वेषादिवैषम्यम् ॥ १५ ॥ दुःखानि नितरां वहतीति तथा ताम् ॥ १६ ॥ स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह । मात्रेति । अविविक्तं संकीर्णमासनं यस्य सः । कर्षत्याकर्षति ॥ १७ ॥ १८ ॥ १९ ॥ ननु तृष्णात्यागस्यातिदुष्करत्वात्कथं ब्रह्मणि मनस आधानं स्यात्तत्राह । दृष्टमिति । यो नानुध्यायेन्न संविशेन्न चोपभुंजीत । तत्र दृष्टश्रुतयोरनुध्यानादौ । स आत्मदृक् भवति ॥ २० ॥ २१ ॥ २२ ॥ तस्य पूरोर्वशे स्थापयित्वा ॥ २३ ॥ विषयेषु शब्दादिष्वासेवितं षड्वर्गं षडिंद्रियसुखं मुमुचे तत्याज । यद्वा विषयेष्वासेवितं सेवां कारितं षण्णामिंद्रियाणां वर्गं मुमुचे उपेक्षतेत्यर्थः॥ २४ ॥ विधुतं निरस्तं त्रिगुणात्मकं लिंगं येन । प्रतीतः प्रख्यातः॥ २५॥

ननु स्थाविर्ये निराहारत्वे वा विषयतृष्णां त्यजतो मुक्तिः स्वयमेव स्यादिति चेत्सत्यं तृष्णात्यागे मुक्तिः स्यात्स एव नास्ति तस्मात् ज्ञानेन तत्त्याग एवापाद्य इत्याह–शर्मकामः कल्याणेच्छुः। जीर्यतोऽनशनेन वयसा वा जरामाप्नुवतः॥ १६ ॥किमुतान्यया तथा किमुताविद्वानिति कैमुत्यं सूचितम्॥ १७ ॥तथापि वर्षसहस्रं सेवितेपि। विषयग्रामे । अनुसवनम् अनुकालम् "सवनं त्वध्वरे स्नाने सोमाभिषवकालयोः"इति । तेषु विषयेषु॥ १८ ॥यतस्तृष्णा विषयप्रीतिकरास्तस्माद्धेतोः । एतां तृष्णाम् । मृगयंते तत्त्वमिति मृगा ज्ञानिनस्तैः ॥ १९ ॥ दृष्टं राजादि । श्रुतमिंद्रादि । अनुध्यायेत् तद्विषयं चिंतयेत् । आदिनोपभोगग्रहः । आत्मनाशं स्वरूपज्ञाननाशम् ॥ २० ॥ तदीयं पूरुसंबंधिनम् । तस्मात्पूरोः ॥ २१ ॥ दक्षिणेति संबुद्धिः परीक्षितं प्रति । दक्षिणो निपुणः "दक्षिणो दक्षिणोद्भूते स्वच्छंदनिपुणर्जुषु" इति कोशात् । स्वर्वंश्यपराक्रमाकर्णने मा सक्तोभूस्तेषामीदृशानामपि कथैवावशिष्टेति विचारयेति द्योतयति दक्षिणेति संबोधयन् । यथाश्रुते तु एकस्य विदिशोऽन्येषां दिशां राज्यार्पणेन वैषम्यं स्यादिति ॥ २२ ॥ अर्हत्तममभिषिच्य चक्रवर्त्तिनं कृत्वेत्यर्थः । एतेन पितुराज्ञाकरणं कनिष्ठस्यापि ज्येष्ठत्वसंपादकं तदकरणं तु ज्येष्ठानामपि कनिष्ठत्वसंपादकमिति ध्वनितम् । विमृष्टं चैतन्महाभारते–"यः पुत्रस्त्वानुवर्त्तेत स राजा पृथिवीपतिः । शुक्रेणायं वरो दत्तः" इत्यंतेन ॥ २३ ॥ नन्वासेवितत्यागस्तु सर्वथा दुष्कर इति चेदाह–यद्वेति। इत्यर्थ इति । स्वयमेव सेवां कर्तुं प्रवृत्तं षड्वर्गं नाम्यनंददिति भावः ॥ २४ ॥ स ययातिः । तत्र तदा । लिंगं शरीरम् । यद्वा–विधुतं त्रिलिंगमाध्यात्मिकादित्रयं येनेति । भागवतीं भगवदभेदलक्षणाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः ॥ स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितम् ॥ २६ ॥ सा सन्निवासं सुहृदां प्रपायामिव गच्छताम् ॥ विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभोः ॥ २७ ॥ सर्वत्र संगमुत्सृज्य स्वप्नौपम्येन भार्गवी ॥ कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः ॥२८॥ नमस्तुभ्यं भगवते वासुदेवाय वेधसे ॥ सर्वभूताधिवासाय शांताय बृहते नमः ॥ २९ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे एकोनविंशोध्यायः ॥१९॥ श्रीशुक उवाच ॥ पूरोर्वंशं प्रवक्ष्यामि यत्र जातोसि भारत ॥ यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥ १ ॥ जन्मेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः ॥ प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥ २ ॥ तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः ॥ संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥ ३ ॥ ऋतेयुस्तस्य कुक्षेयुः स्थंडिलेयुः कृतेयुकः ॥ जलेयुः संततेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥ दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ॥ घृताच्यामिंद्रियाणीव मुख्यस्य जगदात्मनः ॥ ५ ॥

प्रस्तोभमेवाह । परिहासमिवेति । यद्वा प्रस्तोभं निवृत्तिमार्गे प्रोत्साहनं मेने ॥ २६ ॥ २७ ॥ २८ ॥ कथं समावेश्य तदाह । नम इति नमनादिभिः समावेश्येत्यर्थः । शुको वा नमस्करोति ॥ २९ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायामेकोनविंशोऽध्यायः ॥ १९ ॥ विंशे पितृप्रसादान्नराजासनमहोन्नतेः ॥ पूरोर्वंशे हि दौष्यंतेर्भरतस्येर्यते यशः ॥१॥ १ ॥ २ ॥ तत्सुतः अहंयातेः सुतः ॥ ३ ॥ धर्मेयुश्च व्रतेयुश्च सत्येयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥ वनेयुश्चावमः स्मृतः एवं दशैते ऋतेयुप्रमुखास्तस्य

प्रतीतो हृष्टो वा "प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोरपि" इति मेदिनी ॥ २९ ॥ प्रस्तोभमुपालंभम् "प्रस्तोभो वंचने रागपूर्त्त्युपालभयोरपि" इति निरुक्तिः । विकलविक्लवौ पर्यायौ । स्नेहस्य वैकल्यभयादित्यर्थः । सत्युपरमे उपालंभो नोचित इति चेदाह—यद्वेति ॥ २६ ॥ सा देवयानी । 'प्रपा पानीयशालिका' इत्यमरः ॥ २७ ॥ सर्वत्र पतिपुत्रराज्यादिषु । कृष्णे परब्रह्मणि । लिंगं शरीरम् । व्यधुनोत् व्यमुंचत् ॥ २८ ॥ मनःसमावेशप्रकारं पृच्छति—कथमिति । तत् मनःसमावेशनम् । आदिना ध्यानादिग्रहः । इत्यर्थ इति । नतिस्तुतिध्यानैर्निजमनस्तन्मयं चकारेति भावः । प्रकृतं समाप्य पुनस्तत्कथनं समाप्तपुनरात्तदोषावहं भवति 'व्यधुनोल्लिंगमात्मनः' इति प्रकृतसमाप्त्युक्तेरत आह—शुको वेति । अत्रेदमवसेयम्—यदांबरीषः सप्तद्वीपाधिपतिश्चक्रवर्त्ती तदैव ययातिस्तन्मंडलाध्यक्षः प्रायो भारतवर्षभूपतिरित्यवसीयते । ब्रह्ममरीचिकश्यपविवस्वच्छ्राद्धदेवन भगनाभागांबरीषास्तथा ब्रह्मात्रिचंद्रबुधपुरूरवआयुनहुषययातय इति वक्ष्यंते तयोरष्टमपुरुषत्वात् । तथा चांबरीषसंगप्रभावादेव तादृशविषयलंपटस्यापि ययातेस्तादृशी भक्तिर्ययातेश्च संगाद्देवयान्याश्च किंचैवमेव सूर्यवंश चंद्रवंशयोर्युगपत्प्रवृत्तयोर्यदा सूर्यवंश्यः सप्तद्वीपाधिपतिश्चक्रवर्त्ती स्यात्तदा चंद्रवंश्यस्तन्मंडलाध्यक्षो राजा यदा चंद्रवंश्यश्चक्रवर्त्ती तदा सूर्यवंश्यो राजेत्युभयवंश्यानां व्यवस्थया चक्रवर्त्तित्वराजत्वे ज्ञेये इति विश्वनाथः ॥२९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥ पितृप्रसादेनाप्ता राजसंबंध्यासनरूपा महोन्नतिर्ज्येष्ठापेक्षया महदौन्नत्यं येन स तथा तस्य दुष्यंतपुत्रस्य (१)। यत्र पूरोर्वंशे । वंश्या राजर्षयः । ब्रह्म ब्राह्मणजातिर्वंश्ये येषां ते ब्रह्मवंश्या ब्राह्मणाश्च जज्ञिरे इत्यर्थः ॥ १ ॥ तत्सुतो जन्मेजयसुतः । ततः प्रचिन्वतः । अथ प्रवीरात् । तस्मान्नमस्योः ॥ २ ॥ तस्य चारुपदस्य । तस्मात्सुद्योः । ततो बहुगवात् । तस्य संयातः ॥ ३ ॥ तस्य रौद्राश्वस्य । ऋतेय्वादयो दश पुत्रा इत्यग्रिमेणान्वयः । धर्मेषु सत्येय्वोरवयवलोप आर्षः । यद्वा धर्मश्च सत्यश्च व्रतश्च धर्मसत्यव्रतास्तैः सहिता इयवो धर्मसत्यव्रतेयवः । द्वंद्वांते युपदस्य त्रिभिरन्वयः । 'द्वंद्वांते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते' इति न्यायात् ॥ ४ ॥ अवमः कनिष्ठः । ते च तदनुगा इति शेषः । इं

॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋतेयो रंतिभारोऽभूत्त्रयस्तस्यात्मजा नृप ॥ सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥ ६ ॥ तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजा तयः ॥ पुत्त्रोऽभूत्सुमते रैभ्यो दुष्यंतस्तत्सुतो मतः ॥ ७ ॥ दुष्यंतो मृगयां यातः कण्वाश्रमपदं गतः ॥ तत्रासीनां स्वप्रभया मंडयंतीं रमामिव ॥ ८ ॥ विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ॥ बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥ ९ ॥ तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ॥ पप्रच्छ कामसंतप्तः प्रहसञ्श्लक्ष्णया गिरा ॥ १० ॥ का त्वं कमलपत्राक्षि कस्यासि हृदयंगमे ॥ किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥ ॥ ११ ॥ व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ॥ न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥ १२ ॥ शकुंतलोवाच ॥ विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ॥ वेदैतद्भगवान्कण्वो वीर किं करवाम ते ॥ १३ ॥ आस्यतां ह्यरविंदाक्ष गृह्यतामर्हणं च नः ॥ भुज्यतां संति नीवारा उष्यतां यदि रोचते ॥ १४ ॥ दुष्यंत उवाच ॥ उपपन्नमिदं सुभ्रु जातायाः कुशिकान्वये ॥ स्वयं हि वृणुते राज्ञां कन्यकाः सदृशं वरम् ॥ १५ ॥

रौद्राश्वस्य घृताच्यामप्सरसि पुत्राः जाताः । अप्सरस इति षष्ठी सप्तम्यर्थे । वशवर्तित्वे दृष्टांतः जगदात्मनो जगत आत्मभूतस्य मुख्यस्य प्राणस्येंद्रियाणीव ॥५॥६॥७॥ दुष्यंतस्य शकुंतलायां भरतः पुत्रोऽभवदिति कथाद्वारेणाह दुष्यंतो मृगयामिति पंचदशभिः । तमाश्रमं मंडयंतीम् ॥ ८ ॥ स्त्रियं विलोक्य मुमुहेऽमुह्यत ॥ ९ ॥ तस्या दर्शनेन प्रमुदितोऽत एव सन्निवृत्तः परिश्रमो यस्य ॥ १० ॥ ११ ॥ पौरवाणां चेतो न ह्यधर्मे रमते अतो मच्चेतसस्त्वयि रमणादेवाहं त्वां राजन्यतनयां वेद्मि ॥ १२ ॥ विश्वामित्रस्यात्मजाऽहं मेनकायां जाता तया च स्वर्गं गच्छंत्याऽत्र त्यक्ता । अतो राजकन्येवाहमित्यर्थः ॥ १३ ॥ १४ ॥ किं करवामेत्यादिवाक्या त्तदभिप्रायं ज्ञात्वाऽऽह । उपपन्नमिति ॥ १५ ॥

त्वेभिप्रेत्याह–वशवर्तित्व इति । मुख्यस्य महाप्राणस्य । “ अनुप्राणंति यं प्राणाः प्राणंतं सर्वजंतुषु । अपानंतमपानंति नरदेवमिवानुगाः ॥ ” इत्युक्तेः ॥ ५ ॥ तस्य रंतिभारस्य ॥ ६ ॥ तस्य कण्वस्य । तस्मान्मेधातिथेः । तत्सुतो रैभ्यसुतः । पूर्वमत्र परत्र च ‘ दुष्कंत ’ इत्यपि पाठो बहुपुस्तकेषु दृश्यते परं च दुष्यंत इति पाठो भारतादिसंमत इति ॥ ७ ॥ तत्र कण्वाश्रमे ॥ ८ ॥ ९ ॥ अत एव प्रमुदितत्वादेव ॥ १० ॥ हृदयंगमे सुंदरि ॥ ११ ॥ १२ ॥ इत्यर्थ इति । ब्राह्मणत्वावाप्तये तपश्चरतः क्षत्त्रियत्वाभिमानवतो विश्वामित्राज्जातत्वात्क्षत्रियात्मजाहमिति भावः ॥ १३ ॥ नीवारा देवव्रीहयः ॥ १४ ॥ तस्याः कन्याया अभिप्रायम् । उपपन्नमुचितम् ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओमित्युक्ते यथाधर्ममुपयेमे शकुंतलाम् ॥ गांधर्वविधिना राजा देशकालविभागवित् ॥ १६ ॥ अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे ॥
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥ १७ ॥ कण्वः कुमारस्य वने चक्रे समुदिताः क्रियाः ॥ बद्ध्वा मृगेंद्रांस्तरसा क्रीडति स्म स बालकः ॥
॥ १८ ॥ तं दुरत्ययविक्रांतमादाय प्रमदोत्तमा ॥ हरेरंशांशसंभूतं भर्तुरंतिकमागमत् ॥ १९ ॥ यदा न जगृहे राजा भार्यापुत्रावनिंदितौ ॥ शृण्वतां
सर्वभूतानां खे वागाहाशरीरिणी ॥ २० ॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ भरस्व पुत्रं दुष्यंत माऽवमंस्थाः शकुंतलाम् ॥ २१ ॥
रेतोधाः पुत्रो नयति नरदेव यमक्षयात् ॥ त्वं चास्य धाता गर्भस्य सत्यमाह शकुंतला ॥ २२ ॥

गांधर्वविधिना मिथः समयपूर्वकेण ॥ १६ ॥ १७ ॥ १८ ॥ दुरत्ययं विक्रांतं विक्रमणं यस्य ॥ १९ ॥ २० ॥ भस्त्रा चर्मपात्रं तद्वन्माता आधारपात्रम् । पितुरेव तु पुत्रः । तत्र हेतुः । येनेति । "आत्मा वै पुत्रनामासि" इति श्रुतेः । भरस्व पुषाण । अनेन भरतनाम निरुक्तम् ॥ २१ ॥ किं च रेतोधा रेतःसेक्ता वंशकृत्पुत्रो यमक्षयात्पितरं नयति तारयति । तथा च श्रुतिः । "पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा" इति पाठांतरे मातापित्रोः पुत्रं प्रति विवादे यमक्षयाद्धर्मनिर्णेतुर्यमस्य सभायाः सकाशाद्रेतोधा रेतःसेक्ता पितैव धर्मेण विजित्य पुत्रं नयति न तु मातेत्यर्थः । ततश्च भार्यापुत्रौ स्वीकृतवानिति ज्ञेयम् ॥ २२ ॥

तया ओमित्युक्तेंगीकृतं भवदुक्तमिति कथिते । यथाधर्मं राज्ञां गांधर्वराक्षसादिविहितत्वाद्धर्मानतिक्रमेण तदुक्तं मनुना "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥ षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥ पृथक्पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गांधर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥ " इति ॥ १६ ॥ कालेन प्रसूतियोग्यसमयेन । सा शकुंतला ॥ १७ ॥ समुदिता वेदविहितजातकर्मादिकाः । तरसा बलेन ॥ १८ ॥ अंतिकं समीपम् ॥ १९ ॥ २० ॥ यथा कारुशाला चुल्लीस्थाग्निशक्त्युद्दीपकत्वेनाग्नेराधारमात्रं भस्त्रा चर्मयंत्रम् 'भस-भरणदीप्त्योः' इति त्रन् । तथा भर्त्राहितं वीर्यमाधाय करचरणाद्यवयवविशिष्टदेहाकारेण परिणममानस्य वीर्यस्य प्रथमाधारभूतत्वात् । मातुः पुत्रत्वमौपचारिकं तर्हि कस्य मुख्यपुत्रत्वं तत्राह—पितुरिति । तत्र पितृपुत्रत्वे । येन पित्रा । प्रमाणं चात्राह—आत्मेति । श्रुत्यंतरं च " तज्जायाया जायात्वं यदस्यां जायते पुनः " इति । पितृदेहस्यैकदेशोपादानत्वद्योतनाय पितुरित्युक्तम् । अन्यथा पिता पुत्र इति प्रयोगस्याप्यसंभवात् । प्रकृते किमपेक्षितं तत्राह—भरस्वेति । स्वीकुरु । शकुंतला स्वैरिणीति माऽवमंस्था मावज्ञातां कुरु । अनेन भरस्वेति वचनेन भ्रियते इति भरत इति नामव्युत्पादनमुक्तम् ॥ २१ ॥ धारणे फलांतरं चाह—किंचेति । यमस्य क्षयान्निवासात् । प्रमाणमाह—तथा चेति । स्पष्टार्था । पाठांतरे 'पुत्रं नयति' इति पाठे । इत्यर्थ इति । सर्वधर्मनिर्णेत्रा पक्षपातहीनेन श्रीयमराजेनापि पुत्रे पितृस्वत्वमेवापादितमिति भावः । ततश्च श्रुत्यादिप्रमाणश्रवणाच्च । तीर्थस्तु—"पुत्रः रेतोधाः रेतोधातारं पितरं यं लोकमक्षयं वदंति तं वैकुंठं नयति प्रापयति यस्मात्पुत्रमनुशिष्टं लोकमाहुस्तस्मादेनमनुशासति " इति श्रुतेः । रेतोधा इति प्रथमा द्वितीयार्थे । " द्वितीया सर्वविभक्तिषु" इति क्वचिदुक्तेः आर्षत्वाद्वा । यद्वा रेतोधा रेतःसेक्ता वंशकृत्पुत्र एव पितरं तारयति न तु वंशत्यागीत्यत्र जरत्कारुतत्पितृसंवादरूपा भारतीया रुचितत्पितृसंवादरूपा मार्कंडेयीया कथा चानुसंधेया । व्याख्यानि विस्तरभिया नोक्तानि । यद्वा—"प्राप्ते च द्वादशे वर्षे या गर्भं न बिभर्त्ति हि । धारितं तु तया रेतो रेतोधाः सा प्रकीर्त्तिता ॥ " इति पराशरोक्तेः । रेतोधाः पुत्रं नयति स्वीकरोति । यमक्षयमुद्दिश्य "अपुत्रस्य गतिर्नास्ति" इति न्यायेन, ल्यब्लोपे पञ्चमी ।

॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितर्युपरते सोऽपि चक्रवर्ती महायशाः ॥ महिमा गीयते तस्य हरेरंशभुवो भुवि ॥ २३ ॥ चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ॥ ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड् विभुः ॥ २४ ॥ पंचपंचाशता मेध्यैर्गंगायामनु वाजिभिः ॥ मामतेयं पुरोधाय यमुनायामनु प्रभुः ॥ २५ ॥ अष्टसप्ततिमेध्याश्वान्बबंध प्रददद्वसु ॥ भरतस्य हि दौष्यंतेरग्निः साचीगुणे चितः ॥ सहस्रं बद्वशो यस्मिन्ब्राह्मणा गा विभेजिरे ॥ २६ ॥ त्रयस्त्रिंशच्छतं ह्यश्वान्बद्ध्वा विस्मापयन् नृपान् ॥ दौष्यंतिरत्यगान्मायां देवानां गुरुमाययौ ॥ २७ ॥

चक्रवर्ती बभूवेति शेषः । "तस्य महिमा गीयते तदप्येते श्लोका अभिगीताः" इत्यादिबह्वृचश्रुत्या । हरेरंशभुवोंशाज्जातस्य ॥ २३ ॥ तत्र लिंगमाह । चक्रमिति ॥ ॥ २४ ॥ गंगायामनुलोमं पंचपंचाशता वाजिभिरीजे । पुरोधाय पुरोहितं कृत्वा । यमुनायामनु च यमुनायाश्चानुलोमम् ॥ २५ ॥ अष्टाधिकसप्ततिं मेध्यानश्वान्बबंध । किं कुर्वन् । वसु धनं प्रकर्षेण ददत् । साचीगुणे प्रकृष्टगुणवति देशेऽग्निश्चितोऽभूत् । यस्मिन्नग्निचयने देशे वा सहस्रं ब्राह्मणा भरतेन भूरिदानेन दत्ता गा बद्वशः प्रत्येकं बद्वंबद्वं विभेजिरे विभज्य जगृहुः । चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकं बद्वं भवति । तथा हि "हिरण्येन परिवृतान्कृष्णाञ्शुक्लदतो मृगान् ॥ मष्णारे भरतोऽददाच्छतं बद्वानि सप्त च" इति श्रुत्युक्तानि सप्ताधिकशतं बद्वानि श्रीशुकेनोत्तरश्लोके चतुर्दशलक्षत्वेन संगृहीतानि "अदात्कर्मणि मष्णारे नियुतानि चतुर्दश" इति । एवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्वमित्युक्तम् । इयं च बद्वसंख्या श्लोकेन संगृह्यते । "चतुर्दशानां लक्षणां सप्ताधिकशतांशकः ॥ बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश" ॥२६॥ देवानामपि मायां वैभवमत्यगादत्यशेत । यतः गुरुं पूज्यं हरिमाययौ प्राप्तः तदंशभवत्वात् । मायवत्तर इति पाठे ह्रस्वः श्रुत्यनु

यद्वा—रेतोधा अपि या स्त्री त्रयोदशादिवर्षेषु गर्भं दधाति तस्या अपि यः पुत्रः सोऽपि यमक्षयात्पितरं नयति तारयति । न केवलं द्वादशाब्दगृहीतरेतस एवेति भावः । यद्वा—रेतो दधाति गर्भ इति रेतोधाः स्त्री यच्छति नियच्छतीति यमो भर्त्ता तस्य क्षयान्मृतेरनंतरं पुत्रं नयति न तु तस्मिन् जीवतीति । अतस्त्वं पुत्रं गृहाणेति भावः।यद्वा—ऊर्ध्वरेता इतिवत् रेतः अधोऽर्थात्पतति यस्य स रेतोधा गृहस्थः स पुत्रं नयति"हरिवंशकथां श्रुत्वा शतचंडीविधानतः । भक्त्या श्रीशिवमाराध्य पुत्रोत्पत्तिं प्रसाधयेत्॥ " इत्यादिवाक्येभ्यः स्वस्य पुत्रं साधयति यमक्षयमुद्दिश्य " पुत्रेण जयति लोकान् " इत्यादिश्रुतेः ॥२२॥ तस्य शाकुंतलस्य । केन गीयते तत्राह—तदपीति । तदपि तस्यापि भरतस्यापि । एते बह्वृचब्राह्मणे पठितास्श्लोका यशोवाचयानि श्रुत्याऽभिगीतास्ते च वेदादवसेयाः ॥२३॥ तत्र हरेरंशोद्भूतत्वे । लिंगं गमकम् । "यस्याप्रतिहतं चक्रमंशः स परमेष्ठिनः" इत्युक्तेः । "पादयोररविंदश्च तं वै मेने हरेः कलाम्" इत्युक्तेः । महाभिषेकश्चक्रवर्त्तिपदस्थापनकालिको वेदविहितोऽभिषेकप्रकारस्तेन॥२४॥मामतेयं ममतात्मजमुतथ्योद्भूतं दीर्घतमसम् । अनुलोमेन प्रवाहगत्यनुसारेण । मेध्यैर्यज्ञार्हैः ॥ ॥२५॥ साचीत्यव्ययं प्रकर्षे । अग्निचयनस्य कर्मत्वात्तत्र विभागसंभवादाह—देशे वेति । स्फुटमग्रे ॥ २६ ॥ 'माया वैभवकूटयोः' इति कोशात् । अत्यशेतातिक्रांतवान् । कुत इत्याकांक्षायामाह—यत इति । श्रुत्यनुसारेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृगान्छुक्कदतः कृष्णान्हिरण्येन परीवृतान् ॥ अदात् कर्मणि मष्णारे नियुतानि चतुर्दश ॥ २८ ॥ भरतस्य महत्कर्म न पूर्वे नापरे नृपाः ॥ नैवापुर्नैव प्राप्स्यंति बाहुभ्यां त्रिदिवं यथा ॥ २९ ॥ किरातहूणान्यवनानंध्रान्कंकान्खशाञ्छकान् ॥ अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान् ॥ ३० ॥ जित्वा पुराऽसुरा देवान्ये रसौकांसि भेजिरे ॥ देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥ ३१ ॥ सर्वकामान्दुदुहतुः प्रजानां तस्य रोदसी ॥ समास्त्रिणवसाहस्त्रीर्दिक्षु चक्रमवर्तयत ॥ ३२ ॥ स सम्राट् लोकपालाख्यमैश्वर्यमधिराट्श्रियम् ॥ चक्रं चास्खलितं प्राणान्मृषेत्युपरराम ह ॥ ३३ ॥

सारेण । मायावतां श्रेष्ठो हरिरेवासाविरत्यर्थः ॥ २७ ॥ मृगान् श्रेष्ठगजान् । भद्रमंद्रमृगादयो गजजातिभेदाः मष्णारे इत्यस्य श्रुतिपदस्य व्याख्यानं कर्मणीति कस्मिंश्चित्कर्मविशेषे केचित्तु मष्णारे तीर्थं इति व्याचक्षते ॥ २८ ॥ २९ ॥ ३० ॥ पुरा देवान् जित्वा येऽसुरा रसौकांसि रसातलादिस्थानानि भेजिरे तैः प्राणिभिर्बलिभिर्देवस्त्रियो रसातलं नीताः सतीः पुनराहरदानिन्ये । प्राणिभिरन्यैर्मनुष्यादिभिः सह नीता इति वा । पाणिभिरिति पाठे पणयोऽसुरास्तैर्नीताः सतीः । यद्वा पणयो दूतास्तैर्दूतान्प्रस्थाप्याहरदित्यर्थः ॥ ३१ ॥ त्रिणवसाहस्त्रीः समाः सप्तविंशतिसहस्रं वत्सरान् । चक्रं सेना आज्ञा वा ॥ ३२ ॥ तस्य वैराग्येण मोक्षप्रकारमाह । स इति । मृषेति विचा

बहृचश्रुत्यनुरोधेन । तत्र 'मायवताम्' इति पाठोस्तीति । इत्यर्थ इति । अंशांशिनोरभेदोपचारादिति भावः ॥२७॥ "भद्रा मंद्रा मृगाश्चेति विज्ञेयास्त्रिविधा गजाः । क्रमेण हिमवद्विंध्यसह्याद्रिप्रभवा हि ते॥" इति रामोक्तेः । आदिना संकीर्णगजग्रहः। नियुतानि लक्षाः॥२८॥ हे न पूर्व नपूर्वो नियोजको यस्मात्स नपूर्वस्तत्संबुद्धौ तथा । नृपत्वात्स एव सर्वनियोजक इति भावः । इनेत्यपि संबुद्धिरेव हे इन स्वामिन् । यद्वा--नो नकारः पूर्वो यस्य नाम्नः स तथा हे नरेशेत्यर्थः । यद्वा—न पूर्वेनेत्येकमेव संबोधनं नो नकारः पूर्वो यस्य स नपूर्वो नारायणः स इनः स्वामी यस्येति नपूर्वेनस्तत्संबुद्धौ । नञर्थेन नशब्देन समासः। तस्य भरतस्य । महत्कर्म यज्ञदानशत्रुजयहारिस्मरणलक्षणम्। त्वं भर धारय तवापि भगवद्भक्तत्वात् । अपरे नृपाः पूर्वकालिका उत्तरकालिकाश्च नैव प्राप्स्यंति यथा बाहुभ्यां त्रिदिवमिति। यद्वा- भरतस्य महत्कर्मापरे नृपा नैवापुर्नैव प्राप्स्यंतीति । यद्वा—पूर्वे महत्कर्म नैवापुरिति न किं त्वापुरेव यद्भरतस्य तन्न अपरे महत्कर्म नैव प्राप्स्यंतीति न ।किं तु प्राप्स्यंत्येव यद्भरतस्य तन्नेति भावः । यद्वा—नकारद्वयस्य दार्ष्टांतिकद्वयस्य च दृष्टांतेऽन्वयो विधेय इति । केचित्तु नः पूर्वो येषां ते न पूर्वे नहुषादयः । नोऽपरस्मिन्येषां ते नापरेऽर्जुनादयस्ते भरतस्येति पूर्ववदिति व्याचख्युस्तन्मते सर्वकार्यमप्यार्षत्वादेवेति । यद्वा—हे न पूर्वोऽग्रणीरिनः स्वामी प्रेरको यस्य स नपूर्वेनस्तत्संबुद्धौ तथाऽर्थाद्धे सम्राट् परीक्षित्त्वं तस्य भरतस्य महत्कर्म वैराग्यलक्षणं भर धारय यथा स विरक्त आसीत्तथेदानीं भव । "स सम्राट् लोकपालाख्यमैश्वर्यं देवदुर्लभम् । चक्रं चास्खलितं प्राणान्मृषेत्युपरराम ह॥" इत्युक्तेः । किञ्च परे नृपाः तस्य कर्म। नैवापुर्नैव प्राप्स्यंतीति स्पष्टमग्रे ॥ २९ ॥ किरातादीन् म्लेच्छविशेषान् । अब्रह्मण्यान् ब्राह्मणविरोधिनः ॥३०॥ प्रयोगाप्राचुर्यादाह—अन्यैरिति । "पणिर्दैत्यसमूहे स्यात्स्तुतौ दूते क्रयादिके" इति धरणिः ॥ ३१ ॥ तस्य भरतस्य । "चक्रं सैन्ये जलावर्ते चक्रमाज्ञारथांगयोः" इति हलायुधः ॥३२॥ तस्य भरतस्य । लोकपालैस्वाख्यायते स्तूयत इति लोकपालैराख्यायते वेति लोकपालाख्यम् । षष्ठ्यंतपाठोऽपि बहुत्रास्ति । मृषा नाशशिरस्कम् ॥ ३३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यासन्नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसंमताः ॥ जघ्नुस्त्यागभयात्पुत्रान्नानुरूपा इतीरिते ॥ ३४ ॥ तस्यैवं वितथे वंशे तदर्थं यजतः सुतम् ॥ मरुत्सोमेन मरुतो भरद्वाजमुपाददुः ॥ ३५ ॥ अंतर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः ॥ प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥ ३६ ॥ तं त्यक्तुकामां ममतां भर्तृत्यागविशंकिताम् ॥ नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥ ३७ ॥ मूढे भरद्वाजमिमं भरद्वाजं बृहस्पते ॥ यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३८ ॥

र्येति शेषः॥ ३३॥ नानुरूपा मत्सदृशा न भवंतीति भर्त्रा ईरिते सति व्यभिचारशंकयाऽस्मांस्त्यक्ष्यतीति भयात्पुत्रान् जघ्नुः पुनः पुत्राणां दर्शने वैसादृश्यानुसंधानेन त्यजेन्ना न्यथेत्याशयेन हतवत्यः ॥ ३४ ॥ वितथे व्यर्थे सति । तदर्थं पुत्रार्थं मरुत्स्तोमेन यागेन यजतस्तस्य प्रसन्नाः संतो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पयामासुः ॥ ३५॥ मरुतां भरद्वाजागमप्रकारं प्रदर्शयन्नाह अंतर्वत्न्यामिति चतुर्भिः । अंतर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां चौर्येण मैथुनाय कदाचित्प्रवृत्तो बृहस्पतिस्तदा द्विती यगर्भस्यावकाशाभावादाक्रोशपूर्वकं गर्भस्थेन वारितस्ततः क्रुद्धो बृहस्पतिरंधो भवेति तं गर्भं शप्त्वा बलाद्वीर्यं न्यषिंचत्ततो बृहस्पतेः शापाद्गर्भस्थो दीर्घतमा अंधो बभूव तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं सद्य एव कुमारोऽभवत ॥ ३६॥ तं च परवीर्यजं भर्तुस्त्यागाद्विशंकितां सतीं त्यक्तुकामां ममतां प्रति सुरा एनं बृहस्पतेर्ममतायाश्च विवादरूपं श्लोकं जगुः । किमर्थं जगुरत आह । तस्य नाम निरुच्यते येन तत् । तन्नामनिर्वचनेनैव भर्तुस्त्यागशंकामपाकर्तुमित्यर्थः ॥ ३७॥ तत्र पुत्रं त्यक्त्वा यांतीं ममतां बृहस्पतिराह । हे मूढे इमं पुत्रं भर पुषाण । भर्तुर्बिभेमीति चेत्तत्राह । द्वाजमेकस्य क्षेत्रेऽन्यस्य बीजादित्येवं द्वाभ्यां जातमतस्तस्याप्ययं पुत्र इति न तस्माद्भयशंकेत्यर्थः । एवमुक्ता सती तं प्रत्याह । हे बृहस्पते त्वमिमं भर यतो द्वाजं द्वाभ्यामावाभ्यामन्यायतो जातम् । अतो नाहमेकाकिनी भरामीत्यर्थः । यद्यस्मादेव मुक्त्वा पितरौ ममताबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति । पाठांतरे यस्य त्यागदुःखात्पितरौ यातावित्यर्थः ॥ ३८ ॥

वैदर्भ्यो विदर्भराजपुत्र्यः । ईरिते उक्ते ॥ ३४ ॥ तस्य भरतस्य । यागेन यागविशेषेण ॥ ३५ ॥ तेन दीर्घतमसा । तद्वीर्यं बृहस्पतिरेतः । पार्ष्णिः पादपश्चाद्भागः ॥ ३६ ॥ तन्नामनिर्वचनेन तस्य नामनिरुक्तया । इत्यर्थ इति । यथा स्कंदधर इत्यादौ क्रियापदस्य सुबंतयोगेन 'धरं क्रौञ्चगिरिं स्कन्द पातय' इत्यर्थप्रत्यायकत्वात्कार्त्तिकेयेन गिरिदारणं स्वीकृतं तेन तन्नामत्वं च जातमेवमत्रापि क्रियापदसुबंतयोगस्य द्वाभ्यां जातत्वरूपार्थ प्रत्यायकतया तन्नामत्वं तदंगीकार्यत्वं च भवत्विति भावः ॥ ३७ ॥ तत्र तयोर्मध्ये । अतः क्षेत्रजत्वात् । इत्यर्थ इति । क्षेत्रजपुत्रस्यापि विहितत्वात्त्वां स न त्यक्ष्यतीति भावः । तं बृहस्पतिम् । इत्यर्थ इति । तवाप्ययं पुत्रो यतस्त्वं न भरसि तर्हि कथमहं द्वयोः समसंबंधस्य एकाकिनी धारयामीति भावः । पाठांतरे "यद्दुःखात्पितरौ" इति पाठे । इत्यर्थ इति । लोकापवादभीतौ तं त्यक्त्वैव गताविति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् ॥ व्यसृजन्मरुतोऽबिभ्रन्दत्तोऽयं वितथेऽन्वये ॥ ३९ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे विंशोऽध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥ १ ॥ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन ॥ रंतिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥ वियद्वित्तस्य ददतो लब्धंलब्धं बुभुक्षतः ॥ निष्किंचनस्य धीरस्य सकुटुंबस्य सीदतः ॥ ३ ॥ व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ॥ घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥ ४ ॥ कृच्छ्रप्राप्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः ॥ अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥ ५ ॥ तस्मै संव्यभजत्सोऽन्नमादृत्य श्रद्धयान्वितः ॥ हरिं सर्वत्र संपश्यन्स भुक्त्वा प्रययौ द्विजः ॥ ६ ॥ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते ॥ विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ॥ ७ ॥

वितथं व्यभिचारसंभवात्तमात्मजं वितथं निरर्थकं मत्वा ममता व्यसृजत्तत्याज । पाठांतरे आदिजं प्रथमजं भर्तुर्वीर्याज्जातमेव मुख्यमात्मजं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः । एवं तया त्यक्तं मरुतोऽबिभ्रन्नबिभरुः । तदेवं मरुद्भिः प्राप्तोऽयं भरतस्यान्वये वितथे सति दत्तः ॥ ३९ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां विंशोऽध्यायः ॥ २० ॥ एकविंशे तु दौष्यंतेः सुतस्यान्वय उच्यते । रंतिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते ॥ १ ॥ भरतस्यान्वये वितथे सति दत्तत्वाद्वितथसंज्ञो भरद्वाजः स च ब्राह्मणोऽपि भरतस्य दत्तः पुत्रो जात इति तद्वंशोऽनुक्रम्यते । वितथस्य सुतो मन्युस्तस्माद्बृहत्क्षत्रजयमहावीर्यनरगर्गाः पंच पुत्रा बभूवुः ॥ १ ॥ २ ॥ वियद्वित्तस्य वियतो गगनादिवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य । यद्वा वियद्व्ययं प्राप्नुवद्वित्तं भोग्यं यस्य तदेवाह । बुभुक्षतोऽपि सतो लब्धंलब्धं ददतः । तत्प्रपंचयति । निष्किंचनस्येत्यादिसार्द्धैः पंचदशभिः ॥ ३ ॥ अपिबतो जलपानमप्यकुर्वतः । घृतादित्रयाणां द्वंद्वैक्यम् । तोयं च ॥ ४ ॥ ५ ॥ ६ ॥ अथान्यो वृषलाऽतिथिरागमत् । विभक्तस्य कुटुम्बार्थम

भावः ॥ ३८ ॥ पाठांतरे 'मत्वा दितरमात्मजम्' इति पाठे 'मत्वा चादिजमात्मजम्' । इति पाठे वा । इत्यर्थ इति । व्यभिचारजात्मजधारणस्य निंदितत्वात्तं त्यक्तवतीति भावः । हरिवंशे तु "ततोऽथ वितथो नाम भरद्वाजसुतोऽभवत् । ततोथ वितथे जाते भरतस्तु दिवं ययौ । वितथं चाभिषिच्याथ भरद्वाजो वनं ययौ ॥" इत्युक्तम् । एतदानुकूल्यं त्वयं भरद्वाजो वितथेऽन्वये पुत्रे सति वनं ययाविति शेषेण स्यादित्यर्थः ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे विंशोऽध्यायः ॥ २० ॥ यत्र दौष्यंत्यन्वये (१) । ततो मन्योः ॥ १ ॥ शुद्धवंशोद्भूतत्वेनाधिकारित्वात्त्वां ब्रवीमीत्यभिप्रेत्याह—पांडुनंदनेति ॥ २ ॥ ननु राज्ञ एतन्न संभवतीति चेदाह—यद्वेति । तदेव भोग्यशून्यत्वमेव । तत् लब्धलब्धदानम् । संचयाभावाद्भिक्षुकवत्कृपणः स्यात्तत्राह—धीरस्येति । धिया रममाणस्य विषयचिंताशून्यस्येत्यर्थः । एकाकिनः का चिंतेति चेदाह—सकुटुंबस्य । अत एव सीदतः पीडामाप्तवतः ॥ ३ ॥ तत्र हेतुमाह—अपिबत इति ॥ ४ ॥ काले भोजनावसरे ॥ ५ ॥ तस्मै अतिथये । स राजा ॥ ६ ॥ अथ ब्राह्मणातिथिभोजनानंतरम् । विभक्तस्य प्राप्तविभागस्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः ॥ राजन्मे दीयतामन्नं सगणाय बुभुक्षते ॥ ८ ॥ स आहृत्यावशिष्टं यद्बहुमानपुरस्कृतम् ॥ तच्च दत्त्वा
नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥ ९ ॥ पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम् ॥ पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥ १० ॥ तस्य
तां करुणां वाचं निशम्य विपुलश्रमाम् ॥ कृपया भृशसंतप्त इदमाहामृतं वचः ॥ ११ ॥ न कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा ॥
आर्तिं प्रपद्येऽखिलदेहभाजामंतः स्थितो येन भवंत्यदुःखाः ॥ १२ ॥ क्षुत्तृट् शमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः ॥ सर्वे निवृत्ताः
कृपणस्य जंतोर्जिजीविषोर्जीवजलार्पणान्मे ॥ १३ ॥ एवं प्रभाष्य पानीयं म्रियमाणः पिपासया ॥ पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥
॥ १४ ॥ तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ॥ आत्मानं दर्शयांचक्रुर्माया विष्णुविनिर्मिताः ॥ १५ ॥ स वै तेभ्यो नमस्कृत्य निःसंगो
विगतस्पृहः ॥ वासुदेवे भगवति भक्त्या चक्रे नमः परम् ॥ १६ ॥ ईश्वरालंबनं चित्तं कुर्वतोऽनन्यराधसः ॥ माया गुणमयी राजन्स्वप्नवत्प्रत्यली
यत ॥ १७ ॥ तत्प्रसंगानुभावेन रंतिदेवानुवर्तिनः ॥ अभवन्योगिनः सर्वे नारायणपरायणाः ॥ १८ ॥ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यव
र्तत ॥ दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः ॥ १९ ॥

न्नादिकं विभक्तवतः ॥ ७ ॥ सगणाय श्वयूथसहिताय ॥ ८ ॥ ९ ॥ उच्छेषमुर्वरितम् । एकमेव तर्पयतीति तथा ॥ १० ॥ ११ ॥ परदुःखासहिष्णुतया सर्वेषां दुःखं
स्वयं भोक्तुमाशास्ते । नेति । अणिमाद्यष्टसमृद्धियुक्तां गतिमपि मोक्षमपि चाहं न कामये । तर्हि किं कामयसे तदाह । अखिलदेहभाजामार्तिं दुःखं तत्तद्भोक्तृरूपेणांतः
स्थितः सन्नहं प्रपद्ये प्राप्नुयामित्येवं कामये येन तद्दुःखभोक्त्रा मया हेतुभूतेन ते सर्वेऽदुःखा भवंति ॥ १२ ॥ ननु दुःखं किमिति प्रार्थयसे परदुःखनिवृत्त्यैवमम सर्वदुःखनि
वृत्तिरित्याह । क्षुत्तृडिति । कृपणस्य जंतोर्जीवनहेतोर्जलस्यार्पणान्मे सर्वे क्षुत्तृडादयो निवृत्ताः ॥ १३ ॥ इत्येवं प्रभाष्य ॥ १४ ॥ त्रिभुवनाधीशा ब्रह्मादयः । मायास्तदी
यधैर्यपरीक्षाऽर्थं प्रथमं मायया वृषलादिरूपेण प्रतीताः संत इत्यर्थः ॥ १५ ॥ परं केवलं वासुदेवे भक्त्या नमश्चक्रे न तु तान्किमपि याचितवान् ॥ १६ ॥ अनन्यराधस
ईश्वरातिरिक्तफलांतरानपेक्षस्य । प्रत्यलीयतात्मन्येव लीना बभूव ॥ १७ ॥ १८ ॥ मन्युसुतस्य नरस्य वंशमुक्त्वा तत्सुतस्यैव गर्गस्य वंशमाह । गर्गादिति । महावीर्यस्य

तस्मै वृषलः शूद्रस्तद्रूपायातिथये ॥ ७ ॥ बुभुक्षते भोक्तुमिच्छते ॥ ८ ॥ ९ ॥ पुल्कसो म्लेच्छभेदः । अशुभस्य दानाद्ययोग्यस्य ॥ १० ॥ तस्य पुल्कसस्य । करुणां दीनाम् । विपुलश्रमामतिश्रमेणोच्चारिताम् । इदं
वक्ष्यमाणम् । अमृतवच्छ्रोत्राह्लादकरम् ॥ ११ ॥ १२ ॥ अत्राक्षिपति—नन्विति । श्रमो मानस आयासः । क्लमो ग्लानिः । एतेन क्षुदादिमते दातुः क्षुदादिमतेऽतिथयेऽन्नादिदाने तन्निवृत्तिस्तददाने तदनिवृत्तिरि
त्यन्वयव्यतिरेकौ दर्शितौ ॥ १३ ॥ निसर्गेण स्वभावेन करुणो दयालुः ॥ १४ ॥ तस्य रंतिदेवस्य । इत्यर्थ इति । न केवलं तेऽतिथ्यादय एव किन्तु मायया विष्णुना विनिर्मिता देवा एव परीक्षणार्थमागता इति
भावः ॥ १५ ॥ स राजा । तेभ्यो विष्णुमायानिर्मितदेवेभ्यो वासुदेवस्वरूपा एवेमे न तद्भिन्ना इत्येवं भक्त्या ॥ १६ ॥ गुणमयी संसाराढ्या ॥ १७ ॥ तस्य रंतिदेवस्य । प्रसंगः प्रकृष्टसंगस्तस्यानुभावेन प्रभावेण ।
"अनुभावः प्रभावे स्यान्निश्चये भावसूचके" इति यादवः । योगिनो भक्तियोगिनः । तदेवाह—नारायणेति ॥ १८ ॥ प्रस्तुतमनुसरति—गर्गादिति । तत्सुतस्यैव मृत्युसुतस्यैव । ब्रह्म ब्राह्मणकुलम् । अवर्तत प्रवृत्तोभूदित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ॥ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरम् ॥ २० ॥ अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ॥
अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥ २१ ॥ अजमीढाद् बृहदिषुस्तस्य पुत्रो बृहद्धनुः ॥ बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥
॥ २२ ॥ तत्सुतो विशदस्तस्य सेनजित्समजायत ॥ रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥ २३ ॥ रुचिराश्वसुतः पारः पृथुसे
नस्तदात्मजः ॥ पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥ २४ ॥ स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ॥ स योगी गवि भार्यायां
विष्वक्सेनमधात्सुतम् ॥ २५ ॥

वंशमाह । दुरितक्षयस्तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः ॥ १९ ॥ कथंभूताः । ये अत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्मणरूपतां गतास्ते । मन्युपुत्राणां पंचानां ज्येष्ठस्य वंशमाह । बृहत्क्षत्रस्येति । यद्येन हस्तिनापुरं कृतमित्यर्थः ॥ २० ॥ अजमीढादयस्त्रयो हस्तिनः पुत्राः ॥ २१ ॥ अजमीढादेवान्यः पुत्रो बृहदिषुर्नामाऽभवत् ॥ ॥ २२ ॥ २३ ॥ पारस्य तनयो नीपः । नीपस्य पुत्रशतम् ॥ २४ ॥ स एव कृत्व्यां कृत्वीसंज्ञायां शुककन्यायां ब्रह्मदत्तं जनयामास । तदुक्तं हरिवंशादिषु । "पराशर कुलोत्पन्नः शुको नाम महायशाः । व्यासादरण्यां संभूतो विधूमोऽग्निरिवोज्ज्वलन् ॥ स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति । कृष्णं गौरप्रभं शंभुं तथा भूरिश्रुतं जयम् ॥ कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरम् ॥ ब्रह्मदत्तस्य जननीं महिषीमणुहस्य च ॥" इति । यद्यपि शुक उत्पत्त्यैव विमुक्तसंगो निर्गतस्तथाऽपि विरहातुरं व्यासमनुयांतं

महावीर्यस्य मन्युसुतस्य । तस्य दुरितक्षयस्य ॥ १९ ॥ इत्यर्थ इति । कृतमिति शेष इति भावः ॥ २० ॥ २१ ॥ तस्य बृहदिषोः । ततो बृहद्धनुषः । तस्य बृहत्कायस्य ॥ २२ ॥ तत्सुतो जयद्रथसुतः । तस्य विशदस्य । तत्सुताः सेनजित्सुताः । रुचिराश्वादयश्चत्वारः ॥२३॥ तदात्मजः पारात्मजः । तस्य नीपस्य ॥ २४ ॥ स एव नीप एव । नीपस्याणुह इत्यपि नामांतरम् । तदुक्तमित्यत्रादिना विष्णुपुराणादिग्रहः । किं च हरिवंशे तु नीपात्सप्तमोणुहस्तस्य ब्रह्मदत्तः पुत्र इत्युक्तम् । अत्र तु नीपस्य पुत्र इत्युक्तमिति विरोधस्तु कल्पांतरव्यवस्थया वार्य इति । यद्वाऽरण्युद्भूतच्छायाशुकाभ्यामन्यस्तृतीयः शुकोऽपि मुख्यः ब्रह्मवैवर्त्ते व्यासात्मज उक्तस्तदभिप्रायं गार्हस्थ्यमिति ध्येयम्। तथाहि–["प्राप्ते कलियुगे व्यासश्चक्रे यो जगतः कृते । महाभारतमाख्यानं सर्ववेदार्थसंग्रहम् ॥" इत्याद्युक्त्वा "ब्रह्मचर्यपरिभ्रंशे मातृवाक्यादुपस्थिते । स्वयं पितृऋणात्मानं द्विपवत्सोढुमक्षमः ॥ विचिंत्य मनसा चक्रे भार्यां जाबालिकन्यकाम् । वीटिकाख्यां ददौ तस्मै सोऽपि वैखानसाश्रमी ॥ चक्रे तया सह तप ऋतुगामी तदिच्छया । अथ गर्भोऽभवत्तस्मात्तस्यां स ववृधे शनैः ॥ कलाभिः शुक्लपक्षे वै हिमद्युतिरिव द्विज । द्वादशाब्दानि जातानि न प्रसूते स्म सा तदा ॥ कृष्णद्वैपायनप्रोक्तं वेदवेदार्थसंग्रहम् । पुराणं भारतं धर्मशास्त्रं यदश्रृणोद्विज ॥ तत्सर्वं प्रज्ञया गर्भश्चक्रे हृदि पपाठ च । गर्भसंस्थोऽपि कुरुते न तु निष्क्रमणे मतिम् ॥ सा च गर्भभराक्रांता बभूवातीव पीडिता । अथ द्वादशमे वर्षे कृष्णद्वैपायनो मुनिः ॥ उपविश्य कृतस्नानो गर्भमामंत्र्य सामभिः । संबोधयामास तदा वचोभिर्भक्तिभावितैः ॥ व्यास उवाच ॥ यत्त्वं मदीयगृहिणीमिधुनाति कालमाविश्य पीडयसि गर्भ तथा यथार्थम्। तद्ब्रूहि निष्क्रमासि नाम कथं न मूढ किं मारयिष्यसि विरुद्धकरस्त्वमेताम् ॥ गर्भ उवाच ॥ रक्षोऽहमस्मि सुरयक्ष–इत्यादि। "भ्रांतोऽहं तेषु सर्वेषु कोऽहं त्वां च ब्रवीमि किम्। सांप्रतं मानुषो भूत्वा जठरेऽस्या ह्यवस्थितः ॥ तद्व्यास न करिष्यामि गर्भान्निष्क्रमणं बहिः । नात्मानं वेष्टयिष्यामि दीनचित्तो हि मायया ॥" इत्यादि। "व्यास उवाच ॥ यद्येवमस्त्यभिमतं तव तर्हि निंद्यान्निष्क्रम्य तुलयनरकादिह गर्भवासात् । सम्यक्स ॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जैगीषव्योपदेशेन योगतंत्रं चकार ह ॥ उदक्स्वनस्ततस्तस्माद्ब्रह्मादो बार्हदीषवाः ॥ २६ ॥ यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ॥ नाम्ना
सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥२७॥ सुपार्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ॥ कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् ॥२८॥

दृष्ट्वा छायाशुकं निर्णय गतवांस्तदभिप्रायणैव गार्हस्थ्यादिव्यवहार इत्यविरोधः । स ब्रह्मदत्तो योगी । गवि वाचि सरस्वत्याम् ॥ २५ ॥ स एव योगतंत्रं चकार । बार्हदीषवो बृहदिषोर्वंश्या इमे दीर्घत्वमार्षम् ॥ २६ ॥ सुपार्श्वकृत्सुपार्श्वस्य पिता ॥ २७ ॥ प्राच्यसाम्नां षट् संहिता जगौ विभज्याध्यापि

माश्रय महोदयहेतुमेकं श्रीप्राणनाथमुभयोः कुरु वा विवेकम् ॥ गर्भ उवाच॥ज्ञानं विवेकभवमस्ति च तावदेव वैराग्यमन्यभवसंस्मरणञ्च तावत् । यावन्न निष्क्रमति जंतुरितो निबद्धो देवस्य चित्तनिलयस्य न मायया स्यात्''॥ इत्यादि।'' व्यास उवाच॥माया भविष्यति न ते पुरुषोत्तमस्य वक्त्रं प्रदर्शय निजं मम वत्स शीघ्रम्''इत्यादि। ''गर्भ उवाच॥ यद्येत्य मे स भविता प्रतिभूर्मुरारिर्मायाप्रहाणविषये यदुवंशनाथः।गर्भं विहाय तदहं बहिरद्य भावी नैवान्यथा कथमपीति विनिश्चयो मे'' इत्यादि । ''सूत उवाच ॥ इत्थं तदीयवचनं द्विज शुश्रुवान्स व्यासोतिदुःखितमनाः प्रययौ तदानीम् । नारायणं व्यवसितो हृदि तस्य हेतोरानेतुमीषदनिवृत्तमतिर्भवाब्धेः॥तत्र त्रिलोक महितेन कृतप्रणामः कृष्णेन विश्वसुहृदा द्विजदैवतेन । प्राप्तार्हणो निखिलमात्महृदिस्थमस्मै व्यासो न्यवेदयदसावपि प्रत्यपेदे ॥ कर्त्तव्यमेतदिह नाम कियन्मदीयं गेहं पवित्रयितुमद्य तवागतस्य । तीर्थस्य जंगमगतिं दधतो तरंगजंबालशोधनपटोरिति चाह वाचम् ॥ नारायणाय चिंतिभाजनमेवमेष भूत्वा ययौ द्विजवरः सह कृष्णयुक्तः । प्राह प्रविश्य पुनरेव स कांदिशीकः किंचित्परानुभवधिष्ठितगर्भशंकी ॥ व्यास उवाच ॥ अयमस्त्या विर्भावो वै द्वारावत्या गदाधरः । गृहीत्वैनं प्रतिभुवं निष्क्रमं कुरु पुत्रक ॥ गर्भ उवाच । त्वं ब्रूहि माधव जगन्निगडोपमेयं मायाखिलस्य न विलंघ्यतमा त्वदीया । बध्नाति मां न यदि गर्भमिमं विहाय यास्यामि संप्रति बहिः प्रतिभूस्त्वमत्र॥आब्रह्म विश्वमखिलं तव माययेव बद्धं त्वयैव भवदुःखहरस्त्वमेव॥'' इत्यादि । 'सूत उवाच ॥ इत्थं तदीयवचसा भगवान्प्रतीतः प्राह प्रहस्य शनकैरिति वाचमीशः । मन्मायया न भवति तव संप्रयोगो योगावृतांग कुरु निष्क्रमणं विशंकम् ॥ गंतासि मोक्षमधुनैव मम प्रसादाज्जीवन्नवाप्स्यसि महोदयसौख्यमंग । यं तं वदंति मुनयो बहुदुःखयोगबुद्धेर्वियोगमवियोगकरं मया तत् ॥ वाक्यावसानमनुविश्य ततस्तु गर्भात्तस्मा ज्झटित्यथ विनिर्गत एव योगी। स द्वादशाब्दमतिवेषवयाः प्रणम्य व्यासं हरिं स्वजननीमथ संप्रतस्थे॥ततश्च पितृपुत्रसंवादानंतरम् । ''श्रीभगवानुवाच॥व्यास त्वदीयतनयः शुकवन्मनोज्ञं ब्रूते वचो भवतु तच्छुक एव नाम्ना । हर्म्ये च वत्स्यति तथापि न मायया मे स्पृष्टः पथो मम कृथा हृदि मास्य शोकम्॥यामो गृहं वयमपि प्रकुरुष्व वाक्यं यत्त्वासयं परमभावयतोभ्युवाच ॥'' इत्यादि । ''इत्थं जगत्त्रयगुरुः पुरुषोत्तमस्त्वं संबोध्य बोधनिधिमाशु रथाधिरूढः । आमंत्र्य भारत कविर्द्विजवर्यमुख्यैस्तां द्वारकां सुरपुरीं द्रुतमाजगाम ॥''] इति ब्रह्मवैवर्त्ते । किञ्च—पुराणानां कल्पभेदेनैव व्यवस्था स्कंदपुराणादावुक्ता ''कथावैचित्र्यमखिलं सत्यमेव न संशयः । पुराणानां यतः कर्त्ता व्यासः साक्षात्स्वयं हरिः॥ कल्पभेदं समादाय कथाभेदं जगाद ह । धीदोषकल्पनं चात्र सर्वज्ञे न हि संभवेत् ॥ क्वचिदासुरमोहार्थं व्यत्यासेनापि संजगौ ॥ नार्थवाददृशिः कार्या यतः सा पुण्यकर्त्तरि ॥ इतिहास पुराणा हि वेदभागो न संशयः॥'' इति वारतंतव्युक्तेः । किञ्च ''पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणः स्मृतम् । अनंतरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीत्तदा कल्पांतरेनघ । त्रिवर्गसाधनं पुण्यं शतकोटि प्रविस्तरम् ॥ अंगानि चतुरो वेदाः पुराणं न्यायविस्तरम् । मीमांसा धर्मशास्त्रञ्च परिगृह्य मया कृतम्॥प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः । कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप॥व्यासरूपमहं कृत्वा संहरामि युगेयुगे । चतुर्लक्षप्रमाणेन द्वापरेद्वापरे सदा॥ तथाष्टादशधा कृत्वा भूर्लोकेऽस्मिन्प्रकाश्यते । अद्यापि देवलोकेऽस्ति शतकोटिप्रविस्तरम् । तदर्थोत्र चतुर्लक्षसंक्षेपेण निरूपितम् ॥'' इति मात्स्ये त्रिपंचाशत्तमाध्याये मनुं प्रति श्रीमत्स्योक्तेश्च ॥२५॥ स एव ब्रह्मदत्त एव । जैगीषव्यो मुनिः । योगतंत्रमष्टांगयोगप्रतिपादकं शास्त्रम् । ततो विष्वक्सेनात् । तस्मादुदक्सेनात् ॥ २६ ॥ हस्तिपुत्रद्विमीढस्य वंशमाह—यवीनर इति । तत्सुतो यवीनरसुतः । यस्य कृतिमतः । पुनर्यस्य सत्यधृतेः ॥ २७ ॥ तस्य सुमतेः । ततः संनतिमतः । यः कृती । हिरण्यनाभात्कौसल्यात् । जैमिनिशिष्याद्राज्ञः । योगं ज्ञानकर्मादिरूपम् । ''ततो हिरण्यनाभोभूद्योगाचार्यस्तु जैमिनेः । शिष्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संहिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः ॥ तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः ॥ २९ ॥ ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् ॥ नलिन्यामजमीढस्य नीलः शांतिः सुतस्ततः ॥ ३० ॥ शांतेः सुशांतिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् ॥ भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः ॥ ॥ ३१ ॥ यवीनरो बृहदिषुः कांपिल्यः संजयः सुताः ॥ भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि ॥ ३२ ॥ विषयाणामलमिमे इति पंचालसं ज्ञिताः ॥ मुद्गलाद्ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥ ३३ ॥ मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् ॥ अहल्या कन्यका यस्यां शतानंदस्तु गौतमात् ॥ ३४ ॥ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ॥ शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ॥ ३५ ॥ शरस्तंबेऽपतद्रेतो मिथुनं तद भूच्छुभम् ॥ तद्दृष्ट्वा कृपयाऽगृह्णाच्छंतनुर्मृगयां चरन् ॥ कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे सोमवंशानुकीर्तने एकविंशोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ मित्रेयुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ॥ सुदासः सहदेवोऽथ सोमको जंतुजन्मकृत् ॥ १ ॥ तस्य पुत्रशतं तेषां यवीयान्पृषतः सुतः ॥ द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥ २ ॥

तवान् ॥ २८ ॥ २९ ॥ अजमीढस्य वंश्या प्रियमेधादयः। केचिद्ब्राह्मणा बभूवुर्बृहदिषुप्रभृतयः क्षत्रियाश्चेति वंशद्वयमुक्तम्। तस्यैव वंशांतरमाह। नलिन्यामिति यावत्समाप्ति ॥ ३० ॥ ॥ ३१ ॥ मुद्गल एको यवीनरादयश्चत्वार इत्येवं पंच ॥ ३२ ॥ ३३ ॥ भार्म्याद्भर्म्याश्वपुत्रात्। मिथुनं चाभूत्। तदेवाह। दिवोदासः पुमानहल्या च कन्यकेति ॥ ३४ ॥ ३५ ॥ ३६ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायामेकविंशतितमोऽध्यायः ॥ २१ ॥ द्वाविंशे तु दिवोदासवंशमुक्त्वाऽथ वर्णिताः ॥ ऋक्षवंशे जरासंधपार्थदुर्योधनादयः ॥ १ ॥ १ ॥ तस्य सोमकस्य

कौसल्य आध्यात्म्यं याज्ञवल्क्योध्यगाद्यतः । योगं महोदयम्" इत्युक्तेः ॥ २८ ॥ प्राच्यसाम्नामेतत्संज्ञसाम्नाम् । ततः कृतिनः । ततो नीपात् । तस्योग्रायुधस्य । तस्य क्षेम्यस्य । पुनः सुवीरः ॥ २९ ॥ ततः रिपुंजयस्य । अथो हस्तिपुत्रः । पुरुमीढः । पुनरजमीढस्यैव वंशमाह—ततो नीलात् ॥ ३० ॥ तत्पुत्रः सुशांतिपुत्रः । ततः पुरुजात् । तस्यार्कस्य । पुनस्तस्य भर्म्याश्वः ॥ ३१ ॥ ३२ ॥ विषयाणां देशानाम् । "नीवृज्जनपदो देशो विषयस्तूपवर्तनम्" इत्यमरः ॥ ३३ ॥ तदेव मिथुनम् । यस्यामहल्यायाम् ॥ ३४ ॥ तस्य शतानंदस्य । तत्सुतः सत्यधृतिसुतः । यस्माच्छरद्वतः ॥ ३५ ॥ शरस्तंबे तेजनकगुल्मे । "शरस्तेजनके बाणे दध्यग्रे नाशरंजले" इति । तद्रेतः । शुभं दीप्तिमत् । मिथुनं कन्याकुमाररूपम् तन्मिथुनम् ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥ ॥ अथ दिवोदासवंशवर्णनोत्तरम् (१) । प्रसंगाद्भगिनीवंशमुक्त्वा भ्रातृवंशमाह—पूर्वोक्तभार्म्यदिवोदासात् । तत्सुतो मित्रेयुसुतः । पुनस्तत्सुतः सुदासस्तत्सुतः सहदेवः । अथ सहदेवात् । जंतुनाम्नो जन्मकृत्पिता । सोमकाज्जंतुः पुत्रोऽभूदित्यर्थः ॥ १ ॥ यद्वा—तस्य जंतोः शरीरहोमात् पुत्रशतं तच्छरीरोद्भवत्वात्पुत्रत्वोक्तिः । वस्तुतस्तु—जंत्वाख्यैकपुत्रवता सोमकेन स्त्रीशतवता बहुपुत्रेच्छया कस्यचिदृषि वचनेन जंतुशरीरं हुत्वाहुततच्छरीरगंधग्रहणेन स नारीशतकेन शतपुत्रतां लेभे । जंतुरपि सचिह्नः पूर्वस्यामेव निजमातरि जज्ञे । अन्ये तद्भ्रातरोऽपि तच्छरीरोद्भवत्वेन तत्पुत्रत्वेनोक्ता इति विस्तृतं महाभारते । तेषां शतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पंचालका इमे ॥ योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ॥ ३ ॥ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः ॥ ४ ॥ सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथ ततः कृती ॥ वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥ ५ ॥ कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ॥ बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ॥ ६ ॥ जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ॥ अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥ ७ ॥ ते मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते ॥ जीवजीवेति क्रीडंत्या जरासंधोऽभवत्सुतः ॥ ८ ॥ ततश्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योऽभूत्सुरथो नाम जाह्नवः ॥ ९ ॥ ततो विदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् ॥ जयसेनस्तत्तनयो राधिकोऽतोऽयुतो ह्यभूत ॥१०॥ ततश्च क्रोधनस्तस्माद्देवातिथिरमुष्य च ॥ ऋष्यस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ॥ ११ ॥

पुत्राणां शतं बभूव । तेषां जंतुर्ज्येष्ठो यवीयान्पृषतः ॥ २ ॥ अजमीढस्यैव वंशांतरमाह । य इति । ततः संवरणात्कुरुः ॥ ३ ॥ ४ ॥ तस्य कृतिनः उपरिचरो वसुः । ततो वसोः बृहद्रथो मुखमादिर्येषाम् ॥ ५ ॥ तानेवाह । कुशांबेति । तत्सुतः पुष्पवान् जज्ञे । तस्यापत्यं सत्यहित इति योज्यम् ॥६॥७॥ जरया राक्षस्या ॥ ८ ॥ यद्यस्मात्सोमापेः श्रुतश्रवाः कुरोः पुत्रः परीक्षिदनपत्यः । जाह्नवो जह्नोः पुत्रः ॥ ९ ॥ अतो राधिकादयुतोऽभूदित्यर्थः ॥ १० ॥ ११ ॥

मध्ये यवीयान् कनिष्ठः । पृषतस्य द्रुपदः । तस्य द्रुपदस्य । आदिना शिखंड्यादिग्रहः ॥ २ ॥ भार्म्या भर्म्याश्ववंशजाः । 'एकदेशविकृतमनन्यवत्' इति न्यायेन भर्म्याश्वस्यैव भर्म्य इत्यपि नाम ज्ञेयम् । पचालकाः पंचालसंज्ञदेशराजानः । पुनः सिंहावलोकनन्यायेनाजमीढवंशं स्मारयति ऋक्षपर्वतोद्भूतर्क्षैं रक्षितत्वादृक्ष इति महाभारते । ततः ऋक्षस्य ॥ ३ ॥ कुरुक्षेत्रं पाति तत्र यजनादिनिमित्तमधिकस्थित्या रक्षतीति तथा । सार्वभौमोऽप्येकदेशपतित्वेनाधिकस्थित्योच्यते ॥ ४ ॥ अथ सुहोत्रात् । ततश्च्यवनात । तस्य कृतिनः । ततः उपरिचरवसोः ॥ ५ ॥ तानेव बृहद्रथमुखान् । आदिनान्येपि । तस्य कुशाग्रस्य ॥ ६ ॥ इति योज्यं ग्रंथांतरसंमत्येति तथोक्तं हरिवंशे "वृषभस्य तु दायादः पुष्पवान्नमपार्थिवः । दायादस्तस्य विक्रांतो राजा सत्यहितः स्मृतः ॥" इति । वृषभ इति संज्ञर्षभस्यैवेति । तत्सुतः सत्यहितसुतः । किञ्च अन्यस्यां वस्वादिजननीतरस्याम् । यद्वा–चोनुक्तसमुच्चायकस्तेनान्यस्यामन्यस्यां द्वयोरित्यर्थः । तथैवोक्तं महाभारते–काशिराजसुते यमजे परिणीय बृहद्रथोऽलब्धपुत्रो गौतमात्मजचंडकौशिकं सपत्नीको वने गत्वाराध्य पुत्रं प्रार्थयामास स चाम्रतले स्थितो ध्यानं कुर्वन्नकस्मात्पतितमाम्रफलं राज्ञे ददौ स चावैषम्यं पत्न्योर्वर्त्तमानः फलं द्विधा विधायैकैकं भागं ताभ्यां ददौ ते च तदशनात्सगर्भे भूत्वा समये शकलद्वयं देहस्य सुषुवाते ते च ताभ्यां धात्रीद्वारा बहिरुत्सृष्टे जराराक्षस्या भक्षणार्थं गृहीत्वा संयोज्य शिरसि धृते ते च मुनिवरप्रभावात्कुमारोऽतिबलो भूत्वा शब्दं चक्रतुः । जरा तु गृहपूजया प्रसन्ना राज्ञे ददौ । राजा च जरया संधितत्वात्तन्नाम जरासंध इति चकारेत्यलम् ॥७॥८॥ ततो जरासंधात् । यद्यस्मात्सहदेवात् । पुनर्यतः सोमापेः॥९॥ ततः सुरथात् । तस्माद्विदूरथात् । ततः सार्वभौमात् । तत्तनयो जयसेनतनयः । अतो राधिकात् ॥१०॥ ततोऽयुतात् । तस्मात्क्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवापिः शंतनुस्तस्य बाह्लीक इति चात्मजाः ॥ पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥ १२ ॥ अभवच्छंतनू राजा प्राङ् महाभिषसंज्ञितः ॥
यंयं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ १३ ॥ शांतिमाप्नोति चैवाग्र्यां कर्मणा तेन शंतनुः ॥ समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥
॥ १४ ॥ शंतनुर्ब्राह्मणैरुक्तः परिवेत्ता त्वमग्रभुक् ॥ राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १५ ॥ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् ॥
तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥ १६ ॥ वेदवादातिवादान्वै तदा देवो ववर्ष ह ॥ देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ १७ ॥ सोम
वंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥ १८ ॥ शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् ॥ सर्व
धर्मविदां श्रेष्ठो महाभागवतः कविः ॥ १९ ॥

तस्य प्रतीपस्य देवापिशंतनुबाह्लीकाः ॥ १२ ॥ प्राक् पूर्वजन्मनि महाभिष इति संज्ञा यस्य सः ॥ १३ ॥ यदा देवो न ववर्ष तदा शंतनुस्तत्र कारणं ब्राह्मणान्पप्रच्छ
॥ १४ ॥ ब्राह्मणैश्चैवमुक्तः । "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः" इति स्मृतेर्योऽग्रभुक् भुवमग्रतो भुनक्ति अयं त्वादृ
शोऽपि परिवेत्तैव भवति । अतस्तद्दोषपरिहाराय राज्यमग्रजाय देहि ततो वृष्टिर्भविष्यतीत्येवमुक्तः शंतनुर्वनं गत्वा ज्येष्ठं छंदयामास राज्ञः प्रजापालनादिः परो धर्मोऽतस्त्वं
राज्यं स्वीकुर्विति प्रार्थितवान् । ततः पूर्वमेव तस्य मंत्रिणा अश्मरावसंज्ञेन देवापिं पाखंडीकृत्य राज्यानर्हं कर्तुं ये प्रहिता विप्रास्तैः पाखंडमताश्रयया गिरा वेदाद्विभ्रंशितः
सन् वेदवादस्यातिवादान्निंदावचनानि सोऽब्रवीत् । ततस्तस्य पातित्येन राज्यानर्हत्वे जाते शंतनोर्दोषाभावाद्देवो ववर्षेत्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ ततः सोमदत्ताद्भू
रिर्भूरिश्रवाः शलश्चेति त्रयः ॥ १८ ॥ १९ ॥

धनात् । अमुष्य देवातिथेः । तस्यर्क्षस्य । तस्य दिलीपस्य ॥ ११ ॥ १२ ॥ महाभिष इक्ष्वाकुवंश्यो राजा । यंयं जीर्णं वृद्धम् ॥ १३ ॥ अग्र्यामुत्कृष्टां यद्वाऽग्र्यां वृद्धभावात्प्राक्कालिकीं शांतिं सुखं तत्स्पृष्ट
आप्नोतीति पूर्वान्वयि । तेन यौवनजननलक्षणेन । तद्राज्ये शंतनुराज्ये । समा वर्षाणि । तत्रा वर्षणे ॥ १४ ॥ दारसंयोगमग्निहोत्रसंयोगम् । अग्रजे ज्येष्ठभ्रातरि । स कनिष्ठः । पूर्वजो ज्येष्ठ इति
स्मृतिपदार्थः । राज्ञो भूपतित्वेन भुवोऽपि दारत्वादग्रजे स्थिते दारसंयोगकर्तृत्वादयं भवान् भवादृशोन्योऽपि परिवेत्तैवेत्यर्थः । यतस्त्वं परिवेत्ताऽतो हेतोः । तद्दोषपरिहाराय परिवेत्तृत्वनिवृत्तये । राज्यं दारसमर्पण
वत् । अग्रजाय देवापये ॥ १५ ॥ एवमुक्तरीत्या । स देवापिः । वेदवादातिवादान्यदाब्रवीत्तदेत्युत्तरेणान्वयः । यतो धर्मोऽतो हेतोः । ततः पूर्वमेव शंतनुप्रार्थनातः प्रागेव । तस्य शंतनोः । अयं शंतनुवद्रस
दनुरोधी भविष्यति न वेति शंकया पूर्वमेव वेदनिंदां कारयित्वा राज्यानर्हतां प्रापित इति भावः । "ग्रहीता श्रुतिधर्माणां श्रुतिनिंदनतत्परान् । सर्वथा हंति यो नित्यं स राजा क्षत्रियो भवेत् ॥" इत्यादि
पुराणात् ॥ १६ ॥ निंदावचनानि "त्रयो वेदस्य कर्त्तारो मुनिभंडनिशाचराः" । "स्वर्गः कुत्र च कुत्र दैवतकुलं कुत्राथ जन्मांतरम्" इत्यादीनि । ततो वेदनिंदनात् । तस्य देवापेः । पातित्येन पतितत्वेन । इत्यर्थ
इति । "आम्नायस्मृतिशास्त्राणामितिहासपुराणयोः । कुत्सया विप्रदेवानां महापातकितामियात् ॥ तद्दर्शनस्पर्शनाद्यैः प्रायश्चित्ती भवेन्नरः" इति नारदीयोत्तरभागोक्तेरिति भावः ॥ १७ ॥ १८ ॥ गंगायां ब्रह्म शापतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ॥ शंतनोर्दाशकन्यायां जज्ञे चित्रांगदः सुतः ॥ २० ॥ विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः ॥ यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥ २१ ॥ वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ॥ हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः ॥ २२ ॥ मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ ॥ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ॥ २३ ॥

रामो जामदग्न्यः । दाशकन्यायामिति । उपरिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना दाशैः कैवर्तैः पालिताऽतो दाशकन्येति प्रसिद्धायां सत्यवत्याम् ॥ २० ॥ नाम्ना तत्समाननाम्ना चित्रांगदेन गंधर्वेण युद्धे हतः । यस्यां सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव ॥ २१ ॥ वेदा गुप्ता येन । यतोऽहं जात इदं भागवतं चाध्यगामधिगतवानस्मि ॥ २२ ॥ २३ ॥

मनुषीभावं प्राप्तायाम् ॥ १९ ॥ येन भीष्मेण । अत्र चेयं कथानुसंधेया–[यदा भीष्मेण काशिराजस्यांबिकांबालिकांबेति सुतात्रयं स्वयंवरे जित्वा विचित्रवीर्याय भ्रात्रे दत्तं तदांबोवाच मया तु मनसा पूर्वमेव शाल्वो वृतोऽतो नाहमेनं वरिष्य इति । तदा भीष्मेण सा तत्र प्रेषिता स च तामागतां वीक्ष्य नाहं भीष्मजितां वरिष्येऽतस्तमेव गच्छ । सा च पुनरागत्योवाच भीष्म त्वज्जितां मां शाल्वो न गृह्णात्यतस्त्वमेव मां गृहाण । स प्रोवाच न चान्यमनसं ग्रहीष्ये । तदा सा ऋषिमंडलमागत्य तद्गुरुं परशुरामं याचितवती रामः । स्वशिष्याय भीष्मायाहं त्वां दास्यामीत्युवाच । ततस्तां गृहीत्वा रामो भीष्ममागत्योवाच–भो शिष्य स्वजितामेनां त्वमेव गृहाण । स चोवाच भगवन्मया पितुरर्थे विवाहपरित्यागः कृतोऽतो नाहं प्रतिज्ञामतिहायैनामुद्वहिष्येऽन्यमनसं भ्रात्रेऽपि नदास्येऽत एनामन्यस्मै कस्मैचिद्देहीति श्रुत्वा कुपितो राम उवाच मद्वचनादेनां गृहाणान्यथा युद्धेनाधुनैव त्वां नाशयिष्यामीत्याकर्ण्य भीष्मो भगवन्युद्धं त्वया सह करिष्ये नैनां ग्रहीष्ये इति । ततः कुरुक्षेत्रे एकविंशतिदिनं यावद्युद्धं कृत्वा रामं भीष्मो जितवान् । सा च वनं गत्वा तपस्तप्त्वा शिखंडी भूत्वा । भीष्मं महाभारतयुद्धे मारितवती] इति विततं महाभारते। ननु व्यासमाता शंतनुं कथं प्राप्तेत्यत्राप्याह–[कदाचिच्छंतनुर्मृगयां चरन्कालिंदीतीरस्यामतीव सुंदरीं दृष्ट्वा तद्रूपगंधहृतचेता मम शंकेयं देवी गांधर्वी वेति विमृशन्नपि न निश्चयं प्राप तद्दर्शनाद्दूरं गां मनसा स्मरन्का त्वमिति तां पप्रच्छ । सोवाच दाशकन्याहं मत्पिता मामत्र तरीवाहनार्थे निधाय स्वगेहं गतोऽधुना । स तदाकर्ण्य तां यतःप्रभृति मद्भार्या गंगा मां त्यक्त्वा गता ततःप्रभृति पत्नीरहितोऽहमतस्त्वं मां राजानं वरयाहं च तव दासोस्मीत्यादि बहुशः कथयामास । सा चाह मत्पितरं ब्रूह्येवं पितैव कन्याप्रद इति प्रसिद्धेः । तच्छ्रुत्वा स नृपो दाशगेहं गतस्तं वीक्ष्य दाशस्तमानर्च पप्रच्छ च प्रभो मम दरिद्रस्य गेहे कथं श्रीमत आगमनम् । ततो राजा तं त्वं मह्यं निजपुत्रीं देहीत्युवाच । ततो दाशः प्रभो त्वादृशो वरो महाभाग्येन लभ्यते परन्तु ममैका विज्ञप्तिरस्ति तां श्रुत्वेमां गृहाण । कथयेति नृपेणोक्ते । मत्पुत्रीपुत्रं यदि राज्येभिषिंचेः तदेनां गृहाणेति दाशः प्रोवाच । तच्छ्रुत्वा गांगेयं राज्याधिकारिणं मनसा स्मृत्वा गेहं राजा ययौ । आगत्य च भोजनादि त्यक्त्वा शोकाकुलो मौनी संस्तस्थौ । तदोचे भीष्मः पितरं किमर्थं शोकाकुलोसीत्युच्यतां श्रीमतः शोकमहमपनेष्ये रामादिवत् । तदाकर्ण्यापि स न किंचनोवाच । तदा मंत्रिभ्यस्तद्वृत्तं श्रुत्वा स दाशगेहमागत्य मम पित्रे स्वपुत्रीं प्रयच्छेत्याह–स च त्वं गृहाण त्वदुद्भूतोऽस्याः पुत्रो राजा भविष्यत्यन्यथा नेति तच्छ्रुत्वाह नाहं दारपरिग्रहं करिष्य इति सत्यं मद्वचः । ततो दाशः शंतनवे सत्यवतीं ददौ । शंतनुश्च सुतकर्मणा तुष्टस्तस्मै स्वच्छंदमृत्युतां ददौ] इति भारतादौ ॥ २० ॥ २१ ॥ २२ ॥ परं गुह्यं सर्ववेदार्थोपबृंहितत्वादतीव गोप्यम् । अत एव मह्यं ददौ । अतीव प्रियधनं सुवृत्तपुत्रायैव दीयत इति भावः । किंच मयापि वैकुंठाज्ञयेयं संहिताधीतेति वैकुंठगतं मां तदीश इत्थं प्रोक्तवान् । तथा हि–"आकल्पांतं तपःसंस्थौ नरनारायणावृषी । तयोर्निदेशतो व्यासो जनकस्तव सुव्रत ॥ कर्ता भागवतं शास्त्रं तदधीष्व भुवं व्रज । स तप्यति तपस्त्वय पर्वते गंधमादने ॥ त्वद्वियोगेन खिन्नात्मा तं प्रसादय मत्प्रियम् । एवमुक्तः शुको विप्रं नमस्कृत्य चतुर्भुजम् ॥ यथागतो निवृत्तोऽसौ पितुरंतिकमागमत् । पुत्रं प्राप्य प्रहृष्टात्मा नारायणनियोगतः ॥ चकार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वयंवरादुपानीते अंबिकांबालिके उभे ॥ तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥ २४ ॥ क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ॥ धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् ॥ २५ ॥ गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप ॥ तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥ २६ ॥ शापान्मैथुनरुद्धस्य पांडोः कुंत्यां महारथाः ॥ जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥ २७ ॥ नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः ॥ द्रौपद्यां पंच पंचभ्यः पुत्रास्ते पितरोऽभवन् ॥२८॥ युधिष्ठिरात्प्रतिविंध्यः श्रुतसेनो वृकोदरात् ॥ अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ ॥२९॥ सहदेवसुतो राजञ्छ्रुतकर्मा तथाऽपरे ॥ युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ॥ ३० ॥ भीमसेनाद्धिडिंबायां काल्यां सर्वगतस्ततः ॥ सहदेवात्सुहोत्रं तु विजयाऽसूत पार्वती ॥ ३१ ॥ करेणुमत्यां नकुलो निरमित्रं तथार्जुनः ॥ इरावंतमुलूप्यां वै सुतायां बभ्रुवाहनम् ॥ मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ॥ ३२ ॥

स्वयंवराद्भीष्मेण बलादुपानीते ॥ २४ ॥ मात्रा सत्यवत्योक्त इति निषेधाभावमाह । "अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्ता ऋतुमतीयात्" इत्यादिवचनात् ॥ ॥ २५ ॥ दुःशला नाम कन्या च जज्ञे ॥ २६ ॥ अरण्ये मृगशापान्मैथुनेन रुद्धस्य प्रतिबद्धस्य ॥ २७ ॥ नासत्यदस्राभ्यामश्विनीकुमाराभ्याम् । पंचभ्यो युधिष्ठिरादिभ्यः पंचाभवन् ॥ २८ ॥ २९ ॥ तथाऽपरे भार्यांतरेषु ॥ ३० ॥ काली चान्या भीमस्य भार्या तस्यां ततो भीमसेनात्सर्वगतो नाम पुत्रोऽभवदित्यर्थः ॥ ३१ ॥ उलूप्यां नागकन्यायाम् । मणिपूरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसूत अतस्तत्पुत्रः सन्नपि स पुत्रिकासुतः मातामहसुत इत्यर्थः ॥ ३२ ॥

संहितां दिव्यां नानाख्यानसमन्वितताम् । वेदतुल्यां भागवतीं हरिभक्तिविवर्द्धनीम् ॥ निवृत्तिनिरतं पुत्रं शुकमध्यापयच्च ताम् । त्वन्मुखेन समावाप्तामष्टादशसहस्रिकाम् ॥" इति नारदपुराणे सनत्कुमारेण नारदं प्रत्युक्तं सुमेरौ । अथेति मंगले सार्द्धेनाह ॥ २३ ॥ तयोरंबिकांबालिकयोः । यक्ष्मणा क्षयरोगेण । गृहीतो ग्रस्तः ॥ २४ ॥ अप्रजस्यापुत्रस्य । क्षेत्रे भार्यायाम् । भ्रातुर्वैचित्रस्य । समासांतविधेरनित्यत्वान्नासिच् । "क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" इति मेदिनी । ननु सत्यवत्या कथमकार्ये प्रयुक्त इति चेदाह–अपतिरिति । अपतिर्विधवा । अपत्यलिप्सुस्संततीच्छुः । देवरात्पतिभ्रातुः । गुरुप्रयुक्ता श्वसुराद्याज्ञप्ता । "ऋतुस्नाता प्राप्नुयात्" इत्यादिश्रुतिस्मृतिप्रमाणत्वान्नाकार्यत्वमित्यर्थः । "श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ" इत्यमरः । दास्या अपि क्षेत्रत्वमनेन बोध्यतेऽत एव विदुरोपि त्रिषूक्तः ॥ २५ ॥ तत्र शतमध्ये ॥ २६ ॥ मृगशापान्मृगरूपमुनेः शापात् । धर्मानिलेंद्रेभ्यो दुर्वासोदत्तमंत्राहूतेभ्यः । शास्त्रस्य मनुष्यपरत्वान्न देवेषु पितृभुक्तस्त्रीसंगे दोषः पूर्वं सूर्यभुक्तकुंत्याः पुनस्सूर्यात्मजधर्मराजसंगलक्षणो नोद्भावनीय इति ॥ २७ ॥ २८ ॥ तथा हि–युधिष्ठिरादिति ॥ २९ ॥ तथापरे पञ्चानां पुत्राः पौरव्यां पूरुवंश्याम् । अथ भीमसेनात् । घटः शिर उत्कचो रोमरहितो यस्य स घटोत्कचः । "घटः । समाधिभेदेभाशिरः कूटकुटेषु च" इति मेदिनी ॥ ३० ॥ इत्यर्थ इति । विवेचनीयमिति भावः ॥ ३१ ॥ पार्वती पर्वतदेशजा । इरावान्राक्षसयुद्धे भारते हतः । सुतायांचित्रांगदायाम् । अतः पुत्रिकाधर्मेण दत्तत्वात् । तत्पुत्रोऽर्जुनपुत्रः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तव तातः सुभद्रायामभिमन्युरजायत ॥ सर्वातिरथजिद्वीर उत्तरायां ततो भवान् ॥ ३३ ॥ परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ॥ त्वं च कृष्णानुभावेन सजीवो मोचितोंतकात् ॥ ३४ ॥ तवेमे तनयास्तात जनमेजयपूर्वकाः ॥ श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ॥३५॥ जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् ॥ सर्पान्वै सर्पयागाग्नौ स होष्यति रुषाऽन्वितः ॥ ३६ ॥ कावषेयं पुरोधाय तुरं तुरगमेधयाट् ॥ समंतात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥ ३७॥ तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् ॥ अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ॥ ३८ ॥ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ॥ असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ॥३९॥ गजाह्वये हृते नद्या कौशांब्यां साधु वत्स्यति ॥ उक्तस्ततश्चित्ररथस्तस्मात्कविरथः सुतः ॥ ४० ॥ तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ॥ सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ॥ ४१ ॥ परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ॥ नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति ॥ ४२ ॥ तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः ॥ शतानीकाद्दुर्दमनस्तस्यापत्यं बहीनरः ॥४३॥ दंडपाणिर्निमिस्तस्य क्षेमको भविता नृपः ॥ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः ॥ ४४ ॥ क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ अथ मागधराजानो भवितारो वदामि ते ॥ ४५ ॥

॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ तुरसंज्ञं पुरोहितं कृत्वा ॥ ३७ ॥ भविष्यानाह । तस्य पुत्र इति यावत्समाप्ति । याज्ञवल्क्यात्क्रियाज्ञानं परं चात्मानं शौनकात्प्राप्स्यत्यस्त्रज्ञानं च कृपाचार्यादिति द्रष्टव्यम् । "याज्ञवल्क्यात्रयीमधीत्य कृपादस्त्राण्यवाप्य" इति वैष्णवोक्तेः । क्वचित्तु अस्त्रज्ञानं कृपाचार्यादित्येव पाठः ॥३८॥ ३९ ॥ ॥ ४० ॥ यद्यस्मात्सुखीनलः पुत्रः ॥ ४१ ॥ तस्मात्परिप्लवात्सुनयस्तस्यात्मजो मेधावीत्यर्थः ॥ ४२ ॥ तस्मात्सुदासस्ततः शतानीक इत्यर्थः ॥४३॥ ४४ ॥ ४५ ॥

इत्यर्थ इति । "अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ॥" इत्युक्तेरिति भावः ॥ ३२ ॥ तातः पिता । ततोऽभिमन्योः ॥ ३३ ॥ अंतकान्मृत्योर्मोचयित्वा सजीवः कृत इत्यर्थः ॥ ३४ ॥ इम इति । सन्निहितत्वादंगुल्या निर्दिष्टाः ॥ ३५ ॥ होष्यति आहुतिस्थानापन्नान्करिष्यति । स प्रसिद्धः ॥ ३६ ॥ कवषस्य कवषाया वा अपत्यं कावषेयस्तम् । तुरगमेधेन यजतीति तथा । अध्वरैर्ज्योतिष्टोमादिभिः । देवानिति शेषः । यद्वा–'सर्वा स्याद्देवसंहतौ' इति धरण्युक्तेः सर्वदेवपंक्तिः तत्तद्यागैः ॥ ३७ ॥ तस्य जनमेजयस्य ॥ ३८ ॥ तत्पुत्रः शतानीकपुत्रः । ततः सहस्रानीकात् । तस्याप्यश्वमेधजस्यापि । तत्सुतोऽसीमकृष्णसुतः ॥ ३९ ॥ नद्या गंगया । हृते प्लाविते सति । कौशांब्यां नगर्याम् । ततो निमिचक्रस्य चित्ररथः सुत उक्तः । तस्माच्चित्ररथात् ॥ ४० ॥ तस्मात्कविरथात् । तस्य वृष्टिमतः । अथ सुषेणात् । तस्य सुनीथस्य ॥ ४१ ॥ तस्मात्सुखीनलात्पारिप्लवः । पुनस्तस्मात्सुतः । इत्यर्थ इति व्याख्येयम् । ततो मेधाविनः पुनस्ततो नृपंजयात् दूर्वः । तस्मात् दूर्वात् । इत्यर्थ इति । तस्माद् बृहद्रथात् । ततः सुदासात् इति व्याख्येयम् ॥ ४२ ॥ तस्य दुर्मनसस्य । पुनस्तस्य वहीनरस्य ॥ ४३ ॥ तस्य दंडपाणेः । ततो निमेः ॥ ४४ ॥ संस्थां समाप्तिम् । पूर्वोक्तं स्मारयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ॥ ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ॥ ४६ ॥ सुनक्षत्रः सुनक्षत्राद् बृहत्सेनोऽथ कर्मजित् ॥
ततः सृतंजयाद्विप्रः शुचिस्तस्य भविष्यति ॥ ४७ ॥ क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः ॥ द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः ॥
॥ ४८ ॥ सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः ॥ बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे
द्वाविंशोऽध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ॥ सभानरात्कालनरः सृंजयस्तत्सुतस्ततः ॥ १ ॥ जन्मे
जयस्तस्य पुत्रो महाशीलो महामनाः ॥ उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ २ ॥ शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ॥ वृषादर्भः
सुवीरश्च भद्रः कैकेय आत्मजाः ॥ ३ ॥ शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ॥ ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ ४ ॥ अंगवं
गकलिंगाद्याः सुह्मपुंड्रांध्रसंज्ञिताः ॥ जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ ५ ॥ चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते ॥ खनपानो
गतो जज्ञे तस्माद्दिविरथस्ततः ॥ ६ ॥ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः ॥ रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥ शांतां स्वकन्यां
प्रायच्छदृष्यशृंग उवाह ताम् ॥ ७ ॥

बृहद्रथस्य जरासंधस्य सहदेवस्तस्य मार्जारिः यस्मान्मार्जारेः श्रुतश्रवाः ॥ ४६ ॥ ४७ ॥ ४८ ॥ सहस्रसंवत्सरमेते भाव्या भूपालास्ततः परं भाव्यान् द्वादशस्कन्धे वक्ष्यति ॥ ४९ ॥
इति श्रीमद्भागवते महापुराणे नवमस्कंधे टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ त्रयोविंशे त्वनोर्द्रुह्योस्तुर्वसोश्चान्वयः क्रमात् ॥ यदोश्च वंशोऽनुक्रांतो यावज्ज्यामघसंभवः ॥ १ ॥
तदेवं ययातेः पुत्राणां पंचमस्य पुरोर्वंशोऽनुक्रांत इदानीं चतुर्थस्य वंशमनुक्रामति । अनोरिति । कर्णस्य जगतीपतेरित्यन्वेन ॥ १ ॥ तस्य जन्मेजयस्य महाशीलस्तस्य
महामनाः ॥ २ ॥ चत्वार उशीनरात्मजाः । संधिरार्षः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

अथ पूरुवंशांतर्गतमिव । मागधराजानो मगधदेशराजानः । भवितारो भविष्या ये तांस्ते वदामीत्यन्वयः ॥ ४९ ॥ भविता भविष्यति । ततः श्रुतश्रवसः । तस्याप्ययुतायोरपि । पुनस्ततो निरमित्रात् । अथ बृहत्सेनात् ॥
॥ ४६ ॥ ततः कर्मजितः । तस्य विप्रस्य ॥ ४७ ॥ अथ शुचेः । तस्मात् क्षेमात् । ततो धर्मसूत्रात् । ततः शमात् । अथ द्युमत्सेनात् । ततः सुमतेः ॥ ४८ ॥ ततः पुनः सुबलात् । अथ सुनीथात् । अथ पुनस्सत्य
जितः । यद्यस्माद्विश्वंजयात् । बार्हद्रथाः बृहद्रथवंशभवाः । भाव्या भविष्याः । सहस्रवत्सरमेव साहस्रवत्सरं स्वार्थिकोण् । "कालाध्वनोरत्यंतसंयोगे" इति द्वितीया । सहस्रसंवत्सरमिते काले एते भविष्यंतीत्यर्थः ।
ततो रिपुंजयात्परमग्रे भाव्यान्प्रद्योतादीन् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥ यावज्ज्यामघसंभवो ज्यामघोत्पत्तिपर्यंतम् (१) । तत्सुतः कालनरसुतः । ततः सृंज
यात् ॥ १ ॥ तस्य जन्मेजयस्य । तस्य महाशीलस्य ॥ २ ॥ संधिरार्षः । शिबेरात्मजाश्चत्वार इत्यग्रिमेणान्वेति ॥ ३ ॥ तितिक्षोर्महामनसः पुत्रात् । ततो रुशद्रथात् । अथ हेमात् ॥ ४ ॥ बलेर्महीक्षितो राज्ञः ।
क्षेत्रे भार्यायाम् । दीर्घतमसः उतथ्यात्मजात् ॥ ५ ॥ इमान् अंगादीन् । प्राच्यकान् भारतवर्षप्राग्दिग्वर्त्तिनः । तस्मात्खानपानात् । ततो दिविरथात् ॥ ६ ॥ यस्य धर्मरथस्य । तस्मै रोमपादाय । दशरथोऽज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतम् ॥ नाटचसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ॥ ८ ॥ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ प्रजा मदाद्दशरथो येन लेभेऽप्रजाः प्रजाः ॥ ९ ॥ चतुरंगो रोमपादात्पृथुलाक्षस्तु तत्सुतः ॥ १० ॥ बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुतः ॥ आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ ११ ॥ विजयस्तस्य संभूत्यां ततो धृतिरजायत ॥ ततो धृतव्रतस्तस्य सत्कर्माऽधिरथस्ततः ॥ १२ ॥ योऽसौ गंगातटे क्रीडन्मंजूषांतर्गतं शिशुम् ॥ कुंत्यापविद्धं कानीनमनपत्योऽकरोत्सुतम् ॥ १३ ॥ वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः ॥ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ १४ ॥ आरब्धस्तस्य गांधारस्तस्य धर्मसुतो धृतः ॥ धृतस्य दुर्मनास्तस्मात्प्रचेताः प्राचेतसं शतम् ॥ १५ ॥ म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ॥ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥ १६ ॥ त्रिभानुस्तत्सुतोऽस्यापि करंधम उदारधीः ॥ मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ १७ ॥ दुष्यंतः स पुनर्भेजे स्ववंशं राज्यकामुकः ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ॥ १८ ॥ वर्णयामि महापुण्यं सर्वपापहरं नृणाम् ॥ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ १९ ॥ यत्रावतीर्णो भगवान्परमात्मा नराकृतिः ॥ यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥ २० ॥ चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः ॥ महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥ २१ ॥

॥८॥९॥१०॥११॥१२॥१३॥१४॥१५॥१६॥ १७ ॥ स दुष्यंतः । स्वं वंशं पौरवं वंशम् ॥ १८ ॥ १९ ॥ २० ॥ प्रथमस्य सहस्रजित आत्मजः ॥ २१ ॥

पुत्रः । प्रायच्छत्पुत्रीत्वेन ददौ । ऋष्यो मृगस्तद्वच्छृंगे यस्य स विभांडकात्मजो मुनिः । तां दशरथदत्तां रोमपादपुत्रीं शांताम् ॥ ७ ॥ अवर्षति वर्षणमकुर्वाणे सति । यम् ऋष्यशृंगम् । रामा वारांगनाः । हरिणीसुतं कांचिदप्सरसं दृष्ट्वा जलच्युतविभांडकवीर्यपानतो हरिणीजातम् ॥ ८ ॥ स ऋष्यशृंगः । राज्ञो दशरथस्य । येन मरुत्वद्यागेन । प्रजाश्चतुरः पुत्रान् ॥ ९ ॥ तत्सुतश्चतुरंगसुतः ॥ १० ॥ तत्सुताः पृथुलाक्षसुताः । आद्याद्बृहद्रथात् । तस्माद्बृहन्मनसः ॥ ११ ॥ तस्य जयद्रथस्य । संभूत्यां तत्संज्ञायाम् । ततो विजयात् । ततो धृतेः । तस्य धृतव्रतस्य । ततः सत्कर्मणः ॥ १२ ॥ योऽधिरथः । अपविद्धं लोकं लज्जया त्यक्तम् । कन्याभावे जातं कर्णमित्यर्थः ॥ १३ ॥ अथ ययातिपुत्रस्य द्रुह्योर्वंशमाह–तस्य बभ्रोः । ततः सेतोः ॥ १४ ॥ तस्यारब्धस्य । तस्य गांधारस्य । ततो धर्मस्य । तस्माद्दुर्मनसः । प्रचेतसोऽग्रे वंशो मालिन्यमित इति ॥ १५ ॥ यायातस्य तुर्वसोर्वंशमाह–अथ भर्गात् ॥ १६ ॥ तत्सुतो भानुमत्सुतः । अस्यापि त्रिभानोरपि । तत्सुतः करंधमसुतः । पौरवं पुरुवंशोद्भूतं दुष्यंतमेव पुत्रमन्वभूत् स्वीचकार ॥ १७ ॥ सः प्रसिद्धः । पुनस्त्यक्तमपि स्वं वंशं राज्यं कुलं वा "वंशो राज्ये कुले वेणौ पृष्ठांगसुतसंहतौ" इति धरणिः।पृष्ठांगादीनां समाहारद्वंद्वः । सूचीकटाहन्यायेनाल्पवंशान्वर्णयित्वा कृष्णावतारसंगतिलाभाय यदुवंशमाह–ययातेरिति ॥ १८ ॥ सर्वपापहरत्वं श्रीकृष्णाविर्भावाधिकरणत्वात् ॥ १९ ॥ तदेवाह यत्रेति । नराकृतिरिति । लीलामाधुर्यमाह ॥ श्रुताः प्रसिद्धाः ॥ २० ॥ तत्र चतुर्षु प्रथमः सहस्रजित्तदात्मजः शतजि

१ तालव्यमध्योपि क्वचित्पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिता ततः ॥ सोहंजिरभवत्कुंतेर्महिष्मान्भद्रसेनकः ॥ २२ ॥ दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः ॥ कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥ २३ ॥ अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् ॥ दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः ॥ २४ ॥ न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ॥ यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥ २५ ॥ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः ॥ अनष्टवित्तस्मरणो बुभुजेऽक्षय्यषड्वसु ॥ २६ ॥ तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे ॥ जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥ २७ ॥ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् ॥ क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृतम् ॥ २८ ॥

कुंतेः सोहंजिः सोहंजेर्महिष्मान्महिष्मतो भद्रसेनकः॥ २२॥ भद्रसेनस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ। कृतवीर्यसूः कृतवीर्यस्य जनकः। कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः॥ २३॥ २४॥ २५॥ अनष्टमविनाशं वित्तं येन तथाविधं स्मरणं यस्य सः। अक्षय्यं षड्वसु षडिंद्रियविषयं बुभुजे॥ २६॥ २७॥ और्वस्य तेजसा सगरेणोपसंहृतमित्यर्थः॥ २८॥

दित्यर्थः । तत्सुताश्शतजित्सुताः ॥ २१ ॥ ततो धर्मात् । कुंतेः पिता नेत्रोभूत् । धर्मान्नेत्रो नेत्रात्कुंतिरित्यर्थः ॥ २२ ॥ तस्य भद्रसेनकस्य । कृतवीर्यं सूत उत्पादयतीति कृतवीर्यसूरित्यभिप्रेत्योक्तं स्वामिचरणैः कृतवीर्यस्य जनक इति । इत्यर्थ इति । कृतवीर्यसूरिति तस्य नाम न मंतव्यमिति भावः ॥ २३ ॥ अंशादंशावतारात् । प्राप्तयोगस्य यमाद्यष्टांगस्य महागुणास्तज्जन्यसिद्ध्युत्कर्षा येन स प्राप्तयोगमहागुणः ॥ २४ ॥ तपः कृच्छ्राद्यनुष्ठानम् । श्रुतं शास्त्राभ्यासः । वीर्यं बलम् । आदिना दुष्टदलनादिग्रहः ॥ २५ ॥ समा वर्षाणि । अविनाशं विनाशराहितम् । वित्तं धनम् । "कार्त्तवीर्योर्जुनो नाम राजा बाहुसहस्रवान् । तस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते ॥ " इति मंत्रशास्त्रादस्य जपेनापि हृतनष्टाप्तिरिति । अस्य पुरश्चरणीविधस्तु-आदौ दत्तात्रेयाय मूलमंत्रेण सहस्रनतीः कृत्वाऽनुलोममातृकामालामादौ प्रतिलोममातृकामालाञ्चान्ते जपेत् । ॐ क्रौं वीं क्लीं भूं आं ह्रीं क्रौं श्रीं हुं फट् कार्त्तवीर्यार्जुनाय नमः । अस्य प्रत्यहं पञ्चसहस्रजपः । पञ्चत्रिंशत्संख्याकपीततन्तुनिर्मितवर्तियुक्तचतुर्दिशमुखस्ताम्रपात्रदीपः कार्यः । गोघृतेन तिलतैलेन वाऽन्वहं सपादपलमितेन । अस्य मंत्रस्य दत्तात्रेय ऋषिर्गायत्री छंदः सहस्रबाहुर्देवताऽमुककार्यार्थे जपे विनियोगः। ॐ कार्त्तवीर्याय नमः अंगुष्ठाभ्यां नमः । सहस्राक्षाय तर्जनी० । कृतवीर्यसुताय मध्यमा० । बलिनेऽनामिका० । सहस्रबाहवे कनि० । शत्रुघ्नाय करतलकरपृ० । रक्तवाससे हृदयायनमः । धनुर्द्धराय शिरसे स्वाहा । रक्तगंधाय शिखायै वषट् । रक्तमाल्याय कवचाय हुम् । राज्ञे नेत्रत्रयाय वौषट् । स्मर्तुरभीष्टदायास्त्राय फट् । ध्यानं तु-रक्तवर्णं रक्तभूषावस्त्रावृत्तं पञ्चशतधनुर्द्धरं ध्यायेत् । इमं दीपं प्रज्वलयामि तूर्णं मे नष्टं वस्त्वानयेति वाच्यम् । सर्वतोभद्रे कलशं संस्थाप्यानुष्ठानारंभः सुदिने एव कार्यः । अत्र यंत्रे दीपः स्थाप्यः । दीपोपि पूर्वोक्तमंत्रेणैव देयः । किं च "कार्त्तवीर्यः सहस्राक्षः कृतवीर्यसुतो बली । सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्द्धरः ॥ रक्तगंधो रक्तमाल्यो राजा स्मर्तुरभीष्टदः । द्वादशैतानि नामानि कार्त्तवीर्यस्य यः स्मरेत् ॥ अनष्टद्रव्यता तस्य नष्टस्य पुनरागमः । संपदस्तस्य जायंते जनास्तस्य वशे सदा ॥" इति ग्रंथांतरोक्तेः । षष्ठांशं वसु षड्वसु षड्भ्यो गुणेभ्यः संधिविग्रहादिभ्यो लब्धं वसु वा षड्वसु । अक्षय्यं क्षेतुमशक्यं यत् षड्वसु तदक्षय्यषड्वस्विति वा । प्रथमसमासस्तु पृषोदरादिरवधेयः ॥ २६ ॥ तस्य कार्त्तवीर्यस्य । पुत्राणां सहस्राण्ययुतं तेषु "हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात्" इत्युक्तेः॥ २७ ॥ तस्य तालजंघस्य । यत् पुत्रशतकुलम् । इत्यर्थ इति । यद्वा-और्वादवाप्तं तेज आग्नेयास्त्रं येन स और्वतेजः । समासांतोऽत्र डः । सगरस्तेनोपसंहृतं नाशितम् । "आग्नेयमस्त्रं लब्ध्वा च भार्गवात्सगरो नृपः । जिगाय पृथिवीं हत्वा तालजंघान्सहैहयान्।" इति हरिवंशोक्तेः ॥ २८ ॥

कार्तवीर्यदीपस्थापनयन्त्रम्.



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ॥ तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलम् ॥ २९ ॥ माधवा वृष्णयो राजन्यादवाश्चेति संज्ञिताः ॥ यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥ ३० ॥ श्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः ॥ शशबिंदुर्महायोगी महाभोजो महान भूत् ॥ ३१ ॥ चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥ तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥ ३२ ॥ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ॥ तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ॥ ३३ ॥ धर्मो नामोशनास्तस्य हयमेधशतस्य याट् ॥ तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु ॥ ३४ ॥ पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ॥ ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात ॥ ३५ ॥ नाविंदच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् ॥ रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षिता ॥ ३६ ॥

तेषां तालजंघपुत्राणां ज्येष्ठः । तस्य मधोः पुत्रशतम् । वृष्णिर्ज्येष्ठो यस्मिन् । यतो मधोर्वृष्णेर्यदोश्च हेतोरिदं कुलम् ॥ २९ ॥ ३० ॥ ३१ ॥ चतुर्दश महारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः । तानि च मार्कंडेयपुराणे वर्णितानि "गजवाजिरथस्त्रीषुनिधिमाल्यांबरद्रुमाः ॥ शक्तिपाशमणिच्छत्रविमानानि चतुर्दश" इति । दशानां पत्नीसहस्राणां भार्यायुतस्य प्रत्येकं लक्षंलक्षमित्येवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास ॥ ३२ ॥ पृथुश्रवाः पृथुकीर्तिः पृथुयशा इत्यादयः षट् प्रधानाः श्रेष्ठा येषां तेषां मध्ये ॥ ३३ ॥ पंच आत्मजा आसंस्तान् शृणु ॥ ३४ ॥ तानेवाह । पुरुरिजिदिति । भार्याभयादेवैकभार्यस्य वंध्यापतेर्ज्यामघस्यापुत्रस्य तद्भयमेव पुत्रप्रदमभवदिति दर्शयन्नाह । ज्यामघस्त्विति ॥ ३५ ॥ ३६ ॥

तेषां तालजंघानाम् । सुजोतभोजतौंद्विकेर इत्याद्यभिधानां मध्ये । अथार्जुनात्मजस्य मधोः पुत्रो वृष्णिर्ज्येष्ठस्तादितरे नवनवतिश्चेति वंशप्रवृत्तिः ॥ २९ ॥ ततो वृजिनवतः ॥ ३० ॥ ततः श्वाहेः । तस्य रुशेकोः । ततश्चित्ररथात् । महान्भगवद्भक्तिलक्षणो ब्रह्मावाप्तिलक्षणो वा योगो यस्य स महायोगी । यमाद्यष्टांगयोगवान् । वा महानामुत्सवानामासमंताद्भोजो भोगो यस्य स महाभोजः । यद्वा—महानां पूज्यानां देवानामाभोगः सर्वदा यजनं यस्य स तथा । अत एव महान्पूज्यः ॥ ३१ ॥ तानि च रत्नानि च । इषुर्बाणः । निधयो महापद्मादयः । माल्यानि दिव्यपुष्पाणि । अंबराणि धारणाज्जरामयादिहराणि वस्त्राणि । द्रुमः कल्पद्रुमः । मणयः पद्मरागादयो न तु कौस्तुभस्तस्य सर्वदा भगवत्कंठस्थत्वेन पार्श्ववर्त्तिपार्षदेष्वप्यविद्यमानत्वात् । "आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ" इत्युक्तेः । स्त्रियोऽप्सरसो न तु श्रीस्तस्या अपि भगवदनपायात् । "अनपायिनी भगवतः श्रीः साक्षादात्मनो हरेः" इत्युक्तेः । तस्य शशबिंदोः । प्रत्येकं लक्षंलक्षामितिवदिति शेषेणान्वयः कार्य इत्यभिप्रेत्यैव स्वामिचरणैः प्रत्येकमित्याद्युक्तमन्यथाक्षरसंगतिर्दुर्घटा स्यादिति । मम त्वत्र तीर्थपाठः सम्यग्भाति । स च "तस्य पत्नीसहस्राणां दशासन्सुमहायशः" इति । सुबोधश्चायम् ॥ ३२ ॥ तेषां दशलक्षसहस्राणां वृन्दमितसंख्याकानां शतकोटीनामिति यावत् । आदिना पृथुश्रवादिग्रहः । पृथुश्रवसः षट्स्वाद्यस्याग्रिमेण धर्मपदेनान्वयः ॥ ३३ ॥ तस्य धर्मस्य । तत्सुत उशनस्सुतः । तस्य रुचकस्य ॥ ३४ ॥ भयाद्भार्याभयात् ॥ ३५ ॥ नाबिंदन्न प्राप । भोज्यां भोजवंश्यां भोगार्हां वा । शत्रुभवनात् विरोधिनृपगृहात् । बलात्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केयं कुहक मत्स्थानं रथमारोपितेति वै ॥ स्नुषा तवेत्यभिहिते स्मयंती पतिमब्रवीत् ॥ ३७ ॥ अहं वंध्याऽसपत्नी च स्नुषा मे युज्यते कथम् ॥ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते ॥ ३८ ॥ अन्वमोदंत तद्विश्वेदेवाः पितर एव च ॥ शैब्या गर्भमधात्काले कुमारं सुषुवे शुभम् ॥ स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥ ३९ ॥ इति श्रीमद्भागवते नवमस्कन्धे यदुवंशानुवर्णने त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीशुक उवाच ॥ तस्यां विदर्भोऽजनयत्पुत्रौ नाम्ना कुशक्रथौ ॥ तृतीयं रोमपादं च विदर्भकुलनंदनम् ॥ १ ॥ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत ॥ उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृप ॥ २ ॥ क्रथस्य कुंतिः पुत्रोऽभूद्वृष्टिस्तस्याथ निर्वृतिः ॥ ततो दशार्हो नाम्नाऽभूत्तस्य व्योमः सुतस्ततः ॥ ३ ॥ जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः ॥ ततो नवरथः पुत्रो जातो दशरथस्ततः ॥ ४ ॥ करंभिः शकुनेः पुत्रो देवरातस्तदात्मजः ॥ देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ॥ ५ ॥

॥३७॥ यदि मे सपत्नी स्यात्तर्हि स्नुषेयं युज्येतापि न त्वेतदस्तीत्याह । असपत्नी चेति । अतिभयव्याकुल आह जनयिष्यसीति ॥ ३८ ॥ भार्याभयप्रकंपमानस्विन्नसर्वांगस्य राज्ञः प्राणसंकटमालोक्यानुकंपितास्तेन पूर्वं बहुकालमाराधिताश्च विश्वेदेवाः पितरश्च तथेत्यन्वमोदंत । ततश्च देवताप्रसादेन जनयिष्यसीति प्रतिवचनमुहूर्तगुणेन च निवृत्तरजस्काऽपि शैब्या गर्भमधात् तस्य च महिमा पराशरादिभिरुक्तः । यथोक्तम् । ' 'भार्यावश्यास्तु ये केचिद्भविष्यंत्यथ वा मृताः ॥ तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभूनृप'' इति ॥ ३९ ॥ इति श्रीमद्भागवते नवमस्कंधे टीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ चतुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवाः ॥ वंशा नानामुखाः प्रोक्ता रामकृष्णोद्भवावधि ॥ १ ॥ १ ॥ चैद्यादयो दमघोषादयः ॥ २ ॥ ३ ॥ ततो दशरथाच्छकुनिः । पुराणांतरादेवमादिविशेषो द्रष्टव्यः ॥ ४ ॥ ततः कुरुवशादनुः ॥ ५ ॥

रेण जहार । तां कन्याम् ॥ ३६ ॥ मत्स्थानं वामभागे ॥ ३७ ॥ ३८ ॥ अनुकंपिता जातानुकंपा । तेन ज्यामघेन । तद्राज्ञो वचनम् । अन्वमोदंत पुत्रं दत्तवंत इति भावः । यतो विश्वदेवपितृभिरनुमोदितं ततो हेतोः । यद्वा—ततो विश्वदेवाद्यनुमोदनादनंतरम् । यस्मिन्काले तेन जनयिष्यति यमित्युक्तं स कालोऽपि वचनसिद्धिकरोऽभूत् । तन्माहात्म्याच्च निवृत्तरजस्कापि निवृत्तार्त्तवापि । ''अभाव्यं भाव्यतां याति मुहूर्त्ताधिपतौ शुभे । भाव्यं त्वभाव्यतां याति ह्यशुभे कालनायके ॥'' इति गणकमंडनोक्तेः । तस्य च ज्यामघस्य च । आदिना वशिष्ठादिग्रहः वाक्यमाह—यथोक्तमिति । तु शब्दाद्वर्त्तमानकालिकग्रहः । तेषां त्रिकालवर्त्तिनां भार्यानुयायिनां मध्ये श्रेष्ठो भार्यावंध्यात्वापाकरणादानीतास्वीकाराच्चेति भावः ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे त्रयोविंशोध्यायः ॥ २३ ॥ पुत्रत्रयात्समुद्भवो येषां ते तथा (१) । तस्यां स्वयंवराज्ज्यामेघानीतायाम् । विदर्भश्शैब्याजातः ॥ १ ॥ तत्सुतः कृतिसुतः । तस्मात्कुशिकात् । पुनश्चेदेः । आदिना ग्रंथातरोक्ततद्भ्रातृपुत्रादिग्रहः ॥ २ ॥ क्रथस्य विदर्भात्मजस्य । तस्य कुंतेः । अथ वृष्टेः । ततो निवृत्तेः । तस्य दशार्हस्य । ततो व्योम्नः व्योमेति नांतम् । ''दशार्हस्य सुतो व्योमा व्याम्नो जीमूत उच्यते'' इति हरिवंशात् ॥ ३ ॥ तस्य जीमूतस्य । यस्य विकृतेः । ततो भीमरथात् । ततो नवरथात् ॥ ४ ॥ पुराणांतराद्धरिवंशविष्णुपुराणादितः । ''तस्य चासीद्दशरथश्शकुनिस्तस्य चात्मजः'' इति हरिवंशोक्तेः । तदात्मजः करंभ्यात्मजः । ततो देवरातस्य । तस्य देवक्षत्रस्य । पुनस्तस्य मधोः कुरुवंशः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः ॥ भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोंधकः ॥ ६ ॥ सात्वतस्य सुताः सप्त महाभोजश्च मारिष ॥ भजमानस्य निम्लोचिः किंकिणो धृष्टिरेव च ॥ ७ ॥ एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः ॥ शताजिच्च सहस्राजिदयुताजिदिति प्रभो ॥ ८ ॥ बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठंत्यमू ॥ यथैव शृणुमो दूरात् संपश्यामस्तथांतिकात् ॥ ९ ॥ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः ॥ पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्ट च ॥ १० ॥ येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ॥ महाभोजोऽपि धर्मात्मा भोजा आसंस्तदन्वये ॥ ११ ॥ वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परंतप ॥ शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥ १२ ॥ सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ॥ अनमित्रसुतो योन्यः शिनिस्तस्याथ सत्यकः ॥ १३ ॥ युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ॥ युगंधरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः ॥ १४ ॥ श्वफल्कश्चित्ररथश्च गांदिन्यां च श्वफल्कतः ॥ अक्रूरप्रमुखा आसन्पुत्रा द्वादश विश्रुताः ॥ १५ ॥

अनोः पुत्रः पुरुहोत्रः ॥ ६ ॥ महाभोजश्चेत्येवं सप्त । मारिष हे आर्य ॥ ७ ॥ ८ ॥ ९ ॥ ततस्तदुपदेशेन ये पंचषष्ट्यादिसंख्याः पुरुषास्ते अमृतत्वं मोक्षं प्राप्ताः ॥ ॥ १० ॥ ११ ॥ तस्य युधाजितः शिनिरनमित्रश्च ॥ १२ ॥ १३ ॥ सत्यकस्य पुत्रो युयुधानस्तस्य जयस्तस्य कुणिस्ततः कुणेर्युगंधरः । अनमित्रस्यैवापरो वृष्णिर्नामपुत्रः ॥ १४ ॥ अक्रूरः प्रमुखो येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिः ॥ १५ ॥

तस्य पुरुहोत्रस्य । तत आयोः । भजमानान्महाभोजांताः सप्त ॥ ६ ॥ 'मारिषः शाकभिद्यार्ये' इति मेदिनी ॥ ७ ॥ एकस्यां बाह्यकसृंजय्याम् । अन्यस्यामुपबाह्यकसृंजय्याम् । "भजमानस्य सृंजय्यौ बाह्यकार्थोपबाह्यका । आस्तां भार्ये तयोस्तस्माज्जज्ञिरे बहवः सुता ॥" इति हरिवंशात् ॥ ८ ॥ तयोर्बभ्रुदेवावृधयोः पितृपुत्रयोः । श्लोकौ प्राक्सिद्धे पद्ये पठंति पौराणिकाः । 'श्लोकः पद्ये यशस्यपि' इति मेदिनी । अमू द्वौ पितापुत्रौ । यथाऽनेकधात्मानं योगेन कृत्वा चरंतौ शृणुमस्तथांतिकात्समीपात् ॥ ९ ॥ त्रिसप्तत्युत्तरषट्सहस्राणि पुरुषाः ॥ १० ॥ तदन्वये महाभोजवंशे । भोजा भोजसंज्ञकाः ॥ ११ ॥ वृष्णेः सात्वतात्मजस्य ॥ १२ ॥ अन्यः युधाजिदात्मजाद्भिन्नः । तस्य शिनेः । अथानंतरम् ॥ १३ ॥ तस्य युयुधानस्य । तस्य जयस्य । अपरः सात्वतात्मजादन्यः । ततो वृष्णेर्द्वौ श्वफल्कचित्ररथौ पुत्रौ ॥ १४ ॥ गां प्रत्यहं दास्यतीति गांदिनी भविष्यत्यर्थे किन् । काशिराजसुता तया गर्भे चिरं स्थितं, स्वपूर्वजन्मनि श्रुतगोदानमाहात्म्यया नाहं गर्भान्निर्जिगमिषामीत्यूचे । तत्पित्रा पृष्टं कुतस्ततस्तयोक्तमन्वहं यदि कश्चिन्मत्तो विप्राय गां दापयिष्यति तदाहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसंगः सारमेयश्च मृदुरो मृदुविद्गिरिः ॥ धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः ॥ १६ ॥ शत्रुघ्नो गंधमादश्च प्रतिबाहुश्च द्वादश ॥ तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि ॥ १७ ॥ देववानुपदेवश्च तथा चित्ररथात्मजाः ॥ पृथुर्विदूरथाद्याश्च बहवो वृष्णिनंदनाः ॥ १८ ॥ कुकुरो भजमानश्च शुचिः कंबलबर्हिषः ॥ कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ॥ १९ ॥ कपोतरोमा तस्यानुः सखा यस्य च तुंबुरुः ॥ अंधको दुंदुभिस्तस्मादरिद्योतः पुनर्वसुः ॥ २० ॥ तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ॥ देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ २१ ॥ देववानुपदेवश्च सुदेवो देववर्धनः ॥ तेषां स्वसारः सप्तासन् धृतदेवादयो नृप ॥ २२ ॥ शांतिदेवोपदेवा च श्रीदेवा देवरक्षिता ॥ सहदेवा देवकी च वसुदेव उवाह ताः ॥ २३ ॥ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहुस्तथा ॥ राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥ २४ ॥ कंसा कंसवती कंका शूरभू राष्ट्रपालिका ॥ उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ॥ २५ ॥ शूरो विदूरथादासीद्भजमानः सुतस्ततः ॥ शिनिस्तस्मात्स्वयं भोजो हृदीकस्तत्सुतो मतः ॥ २६ ॥

अतोऽक्रूरातिरिक्तान् द्वादश दर्शयति आसंग इति ॥ १६ ॥ १७ ॥ पृथुरेकः विदूरथाद्या अन्ये च बहवः विपृथुधामाद्या इति पाठे आद्यशब्देन विदूरथोऽप्युक्त स्ततश्च शूरो विदूरथादासीदिति वक्ष्यमाणनिर्देशोपपत्तिः कुकुरादयश्चत्वारोंधकस्य सुता इति ज्ञेयम् । तथा च पराशरः । "कुकुरभजमानशुचिकंबलबर्हिषाख्यास्तथांधकस्य पुत्राः" इति ॥ १९ ॥ अनेरंधकोंधकाद्दुंदुभिरित्यपि तद्वचनादेव ज्ञेयम् ॥ २० ॥ २१ ॥ धृतदेवा आदिर्यासां शांतिदेवादीनां षण्णां ताः सप्त ॥ २२ ॥ ताः सप्त ॥ २३ ॥ औग्रसेनय उग्रसेनस्य सुताः ॥ २४ ॥ वसुदेवस्य ये अनुजा देवभागादयस्तेषां स्त्रियो भार्याः ॥ २५ ॥ अंधकसुतानां चतुर्णां प्रथमस्य कुकुरस्य वंश उक्तो

बहिरायास्यामीति तच्छ्रुत्वा तत्पित्रोक्तं हे देवि बहिरागच्छैवमेव करिष्यामीति । ततः सा बहिरागता गांदिनीति प्रसिद्धाभूदिति हरिवंशे ॥ १९ ॥ यतोऽतद्गुणसंविज्ञानो बहुव्रीहिरतो हेतोः । अक्रूरादतिरिक्तान् भिन्नान् ॥ १६ ॥ तेषामक्रूरादीनाम् । 'सुचाराख्या' इति क्वचित्पाठः ॥ १७ ॥ यथा श्वफल्कस्यात्मजा बहवस्तथा तद्भ्रातुश्चित्ररथस्यात्मजा बहव इति ॥ १८ ॥ कुकुरादीनामंधकात्मजत्वे प्रमाणमाह—तथा चेति । हरिवंशेऽपि "अंधकात्काश्यदुहिता चतुरोऽलभतात्मजान् । कुकुरं भजमानं च शुचिं कंबलबर्हिषम् ॥" इति । अंधकश्च सात्वतसुतः । ततो वह्नेः ॥ १९ ॥ पुनस्ततो विलोम्नः । तस्य कपोतरोम्णः । यस्यानोः । तुंबरुर्गंधर्वः । तद्वचनात्पराशरवाक्यात् । तस्माद्दुंदुभेः । पुनस्तस्मादरिद्योतात् ॥ २० ॥ तस्य पुनर्वसोः । देवकोग्रसेनौ आहुकात्मजौ ॥ २१ ॥ ॥ तेषां देववदादीनाम् । तद्गुणसंविज्ञानो बहुव्रीहिरित्याह—धृतदेवा इत्यादि ॥ २२ ॥ ताः सप्तैव उवाह उपयेमे ॥ २३ ॥ नवोग्रसेनपुत्राः ॥ २४ ॥ पुत्र्यः पंच वसुदेवस्यानुजानां देवभागादीनां स्त्रियः पत्न्यः ॥ २५ ॥ आदिना हरिवंशादिग्रहः । तथा च—"भजमानस्य पुत्रोऽथ रथमुख्यो विदूरथः । राजाधिदेवश्शूरस्तु विदूरथसुतोऽभवत्" इति हरिवंशे । यद्वेति । विकल्पश्च कल्पांतरापेक्षः । ततः शूरात् । पुनस्ततः भजमानात् । तस्माच्छिनेः । तत्सुतः स्वयंभोजसुतः ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवबाहुः शतधनुः कृतवर्मेति तत्सुताः ॥ देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ २७ ॥ तस्यां स जनयामास दश पुत्रानकल्मषान् ॥ वसुदेवं देवभागं देवश्रवसमानकम् ॥ २८ ॥ सृंजयं श्यामकं कंकं शमीकं वत्सकं वृकम् ॥ देवदुंदुभयो नेदुरानका यस्य जन्मनि ॥ २९ ॥ वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिम् ॥ पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥ ३० ॥ राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः ॥ कुंतेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥ ३१ ॥ साऽऽप दुर्वाससो विद्यां देवहूतिं प्रतोषितात् ॥ तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिम् ॥ ३२ ॥ तदैवोपागतं देवं वीक्ष्य विस्मयमानसा ॥ प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ॥ ३३ ॥ अमोघं दर्शनं देवि आधत्से त्वयि चात्मजम् ॥ योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ॥ ३४ ॥

द्वितीयस्य भजमानस्य वंशमाह । शूरो विदूरथादिति "भजमानाच्च विदूरथः पुत्रोऽभूद्विदूरथाच्च शूरः" इति पराशरादिवचनात् । यद्वा पृथुर्विदूरथाद्याश्चेति पूर्वोक्ताच्चित्ररथात्मजाद्विदूरथात् ॥ २६ ॥ देवमीढस्य यः शूरो नाम पुत्रस्तस्य । देवमीढो हृदीकस्यैव सुतः ॥ तथाह पराशरः । "तस्यापि कृतवर्मशतधनुर्देवमीढुषाद्या बभूवुः देवमीढुषस्य शूरस्यापि मारिषा नाम पत्न्यभवत्तस्यां चासौ दशपुत्रानजनयद्वसुदेवपूर्वान्" इति ॥ २७ ॥ २८ ॥ आनकाश्च नेदुः ॥ २९ ॥ हरेः प्रादुर्भावस्य स्थानम् ॥ ३० ॥ पृथायाः कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह कुंतेरिति पंचभिः ॥ ३१ ॥ कदाचिद्गृहमागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास ततश्च सा तस्माद्देवहूतिं देवाह्वानहेतुं विद्यामवाप तदाह । साऽऽपेति ॥ ३२ ॥ देवमुपागतं वीक्ष्य सा प्राह । प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ता न तु त्वया किंचित्कार्यमित्यभिसंधिनाऽतो याहीति ॥ ३३ ॥ एवमुक्तो रविरुवाच । अमोघं दर्शनमिति । कन्याऽहमिति चेत्तत्राह । यथा योनिर्न दुष्येत तथाऽहं कर्ता करिष्यामि ॥ ३४ ॥

तत्सुता हृदीकसुता । देवमीढस्य हृदीकपुत्रत्वे प्रमाणमाह–यथाहेति । तस्यापि हृदीकस्यापि । आदिना देवबाह्वादिग्रहः । तस्यापि शूरस्यापि ॥ २७ ॥ तस्यां मारिषायाम् । स शूरः ॥ २८ ॥ यस्य वसुदेवस्य ॥ २९ ॥ तम् आनकदुंदुभिम् । हरेः श्रीकृष्णस्य । "सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः" इति शंकरोक्तेर्विशुद्धसत्त्वस्यावतारमेव वसुदेवं वदंतीति तस्यैव हरेराविर्भावयोग्यत्वम् ॥ ३० ॥ एतेषां वसुदेवादीनाम् । शूरेण स्वमित्रायानपत्याय कुंतिराजाय प्रतिज्ञातं प्रथमापत्यं तुभ्यं दास्यामीति । प्रथमं च पृथा जाता सा तेन कुंतये पुत्र्यर्थं दत्ता । इति महाभारते प्रसिद्धां कथां सूचयति–कुंतेरिति ॥ ३१ ॥ आदिना चित्तप्रसादादिग्रहः । ततश्च दुर्वासःपरितोषानंतरम् । तस्मात् दुर्वाससः । तत् वृत्तम् । सा पृथा । देवा हूयंते आहूयंते यया सा देवहूतिस्ताम् । तस्या विद्यायाः । वीर्यस्य प्रभावस्य परीक्षार्थम् । शुचिः ऋतुस्नाता । तस्यास्तदैव स्त्रीधर्मसद्भावः सूर्यप्रभावाज्जात इत्यनुसंधेयं महाभारतात् ॥ ३२ ॥ तदैव मंत्रप्रयोगसमकालमेव । विस्मयमाश्चर्यम् । 'अगता प्राप्ता । क्वचित् विस्मितमानस' इति पाठः । परीक्षार्थं विश्वासार्थम् । प्रयुक्ता प्रयोजिता । त्वया भगवता । अभिसंधिनाऽभिप्रायेण । अतः कार्याभावात् ॥ ३३ ॥ किमिच्छसीति कुंत्योक्ते रविराह । आधत्स इति । मैथुनयोग्यतारुण्यादर्शनाच्छिन्नयोनिरहं दूषिता स्यामिति कुंत्यभिप्रायं वीक्ष्याह–योनिरिति । तथाहं कर्तेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः ॥ सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ॥ ३५ ॥ तं साऽत्यजन्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती ॥ प्रपितामहस्तामुवाह पांडुर्वै सत्यविक्रमः ॥ ३६ ॥ श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् ॥ यस्यामभूद्दंतवक्र ऋषिशप्तो दितेः सुतः ॥ ३७ ॥ कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविंदत ॥ संतर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ॥ ३८ ॥ राजाधिदेव्यामावंत्यौ जयसेनोऽजनिष्ट ह ॥ दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥ ३९ ॥ शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः ॥ देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥ ४० ॥ कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ॥ कंका यामानकाज्जाताः सत्यजित्पुरुजित्तथा ॥ ४१ ॥ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् ॥ हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥ ४२ ॥ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा ॥ तक्षपुष्करशालादीन्दुर्वाक्ष्यां वृक आददे ॥ ४३ ॥ सुमित्रार्जुनपालादीन्शमीकात्तु सुदामिनी ॥ कंकश्च कर्णिकायां वै ऋतधामजयावपि ॥ ४४ ॥ पौरवी रोहिणी भद्रा मदिरा रोचना इला ॥ देवकीप्रमुखा आसन्पत्न्य आनकदुंदुभेः ॥ ४५ ॥ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥ ४६ ॥ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ॥ पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥ ४७ ॥ नंदोपनंदकृतकशूराद्या मदिरात्मजाः ॥ कौशल्या केशिनं त्वेकममूत कुलनंदनम् ॥ ४८ ॥ रोचनायामतो जाता हस्तहेमांगदादयः ॥ इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ॥ ४९ ॥ विपृष्ठो धृतदेवायामेक आनकदुंदुभेः ॥ शांतिदेवात्मजा राजन्छ्रमप्रतिश्रुतादयः ॥ ५० ॥

॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ आवंत्यौ विंदानुविंदौ ॥ ३९ ॥ तदेवं वसुदेवस्य भगिनीनां पतीन्पुत्रांश्चोक्त्वा तद्भ्रातॄणां नवानां पत्नीः पुत्रांश्चाह । देवभागस्येति नवभिः श्लोकार्धैः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ वसुदेवस्य पत्नीः पुत्रांश्चाह पौरवीत्येकादशभिः ॥ ४५ ॥ ४६ ॥ ४७ ॥ कौशल्या भद्रा ॥ ४८ ॥ ४९ ॥ ५० ॥

निजैश्वर्यप्रभावेण पुनस्ते कन्यात्वं संपादयिष्यामीति भावः ॥ ३४ ॥ इत्युक्त्वा । तस्यां पृथायाम् । स रविः । दिवं गताम् अंतरिक्षस्थां निजमूर्त्तिं प्रविष्टः । तस्मिन् गते सद्यस्तत्क्षणमेव ॥ ३५ ॥ तं कुमारम् । लोकस्यापवादादिति शेषः । तां पृथाम् । त इति शेषः प्रपितामहः पितामहस्यार्जुनस्य पिता पांडुः ॥ ३६ ॥ कारूषः करूषदेशाधिपः । यस्यां श्रुतदेवायाम् । ऋषिभिः सनकादिभिर्वैकुंठे शप्तो जयो दितेः सुतः प्राक् हिरण्यकशिपुः सन्निदानीं दंतवक्रोऽभूदित्यर्थः ॥ ३७ ॥ कैकेयः केकयदेशाधिपः । तस्यां श्रुतकीर्त्याम् । आदिना प्रतर्दनादिग्रहः ॥ ३८ ॥ अजनिष्ट जनयामास । आवंत्यावुज्जयिनीराजौ ॥ ३९ ॥ तस्याः श्रुतश्रवसः । तस्य शिशुपालस्य । कथितः सप्तमस्कंधे ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ अतो वसुदेवात् ॥ ४९ ॥ ५० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजानः कल्पवर्षाद्या उपदेवासुता दश ॥ वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ॥ ५१ ॥ देवरक्षितया लब्धा नव चात्र गदादयः ॥ वसुदेवः सुतानष्टावादधे सह देवया ॥ ५२ ॥ पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव ॥ वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ॥ ५३ ॥ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरम् ॥ ५४ ॥ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल ॥ सुभद्रा च महाभागा तव राजन्पितामही ॥ ५५ ॥ यदायदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः ॥ तदा तु भगवानीश आत्मानं सृजते हरिः ॥ ५६ ॥ न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ॥ आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥ ५७ ॥ यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ॥ अनुग्रहस्तन्निवृत्ते रात्मलाभाय चेष्यते ॥ ५८ ॥

॥ ५१ ॥ ५२ ॥ ५३ ॥ ५४ ॥ अष्टमस्तु स्वयमेवासीन्न तु कर्मादिना हेतुना ताभ्यां जनितो वा । यतोऽसौ हरिः ॥ ५५ ॥ तदेवोपपादयति यदेति त्रिभिः ॥ ५६ ॥ ईशस्य मायानियंतुः । परस्यासंगस्य । द्रष्टुः साक्षिणः । आत्मनः सर्वगस्य । न ह्येवंभूतस्य मायाविनोदं विना जन्मनः कर्मणो वा हेतुः संभवतीत्यर्थः ॥ ५७ ॥ किं च यस्य मायाचेष्टितं पुंसो जीवस्यानुग्रहस्तस्य जीवानुग्राहकस्य कुतः कर्मादिपारतंत्र्येण जन्मादिसंभवः । अनुग्रहमेवाह । हि यस्मात्तदेव स्थित्यादये इष्यते । प्रलये लीनोपाधेर्जीवस्य धर्माद्यसंभवादुपाधिसृष्ट्यादिना धर्मादिसंपादनेनानुग्रहः । तथाऽऽत्मलाभाय मोक्षाय चेष्यते । तत्र हेतुः । तेनैव श्रूयमाणेन तस्य स्थित्यादेर्निवृत्तेः ॥५८॥

॥५१॥सह देवया सह मिलित्वा॥५२॥५३॥५४॥तयोर्निमित्तभूतयोः । ताभ्यां देवकीवसुदेवाभ्याम् । यतोऽसौ हरिः । स्वसेविनामपि जनिहरणशीलस्य कुतो जन्मेति भावः ॥५५॥ तदेव वास्तवजन्माभवनमेव । पाप्मनोऽधर्मस्य । तदुक्तं श्रीगीतासु ''यदायदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥'' इति ॥५६॥ ननु यदि हरिरपि जीववज्जन्मकर्माणि भजते तर्हि तस्य सेवया कथं जीवानां मोक्षः स्यादिति चेदाह—जीवस्य तु पापपुण्ये जन्मादिकारणविधिबद्धत्वात् । ईशस्य तदभावात्ते न स्त इति । 'न हि कार्यमकारणम्' इति न्यायात्कारणं वक्तव्यं चेत्तर्हि लोकानुग्रहोद्बुद्धात्मेच्छैवेति ब्रूम इत्याशयेनाह—नहीति । एवंभूतस्य मायानियंतृत्वादिधर्मवतः । आत्मसु जीवेषु । माया कृपा तदुद्धरणेच्छा तां विनाऽन्यो हेतुः काल्पयितुं न शक्यते ''भवेस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः । श्रवणस्मरणार्हाणि करिष्यन्निति केचन॥'' इति प्रथमस्कंधोक्तेः । ''आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि इति यादवः । ''मायेच्छाकृपयोर्दंभे विष्णुशक्तींद्रजालयोः'' इति च ॥ ५७ ॥ जीवानुग्रहार्थमेव हरेर्जन्मादीति प्रपञ्चयति—किंचेति । यस्य हरेर्मायायाश्चेष्टितम् । तदेवमायाचेष्टितमेव। स्थितिरादिर्यस्योत्पत्त्यप्ययस्य स स्थित्यादिस्तस्मै स्थित्यादये । लीनोपाधेर्देहेंद्रियाद्युपाधिरहितस्य । उपाधिसृष्ट्यादिनेति । इहादिना स्थितिभंगग्रहः । द्वितीयादिना मोक्षग्रहः । तत्र हरिमायाचेष्टितस्य मोक्षकारणत्वे । तेनैव मायाचेष्टितेनैव । ''मायां वर्णयतोऽमुष्य ईश्वरस्यानुमोदतः । शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥'' इति ब्रह्मोक्तेः । मायामोहेनैव सृष्ट्यादिप्रवृत्तिस्तन्निवृत्तौ तन्निवृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अक्षौहिणीनां पतिभिरसुरैर्नृपलांछनैः ॥ भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ॥ ५९ ॥ कर्माण्यपरिमेयाणि मनसाऽपि सुरेश्वरैः ॥ सह संकर्षणश्चक्रे भगवान्मधुसूदनः ॥ ६० ॥ कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ६१ ॥ यस्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ॥ श्रोत्रांजलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥ ६२ ॥ भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः ॥ श्लाघनीये हितः शश्वत्कुरुसृंजयपांडुभिः ॥ ६३ ॥ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥ ६४ ॥ यस्याननं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सुविलासहासम् ॥ नित्योत्सवं न ततृपुर्दृशिभिः पिबंत्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६५ ॥

तस्य चेष्टितं भूमेरनुग्रह इत्याह अक्षौहिणीनामिति द्वाभ्याम् । अभाराय भारपरिहाराय ॥ ५९ ॥ सुरेश्वरैरपि मनसाऽप्यपरिमेयाण्यवितर्क्याणि । संकर्षणसहितश्चक्रे ॥ ६० ॥ संकल्पमात्रेण भूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह कलाविति द्वाभ्याम् । दुःखशोकतमांसि नुदतीति तथा तद्यशो व्यतनोत् ॥ ६१ ॥ यस्मिन्सतां कर्णपीयूषे यशोरूपे तीर्थवरे श्रोत्रमेवांजलिः पानसाधनं यस्य स पुरुषः सकृदप्युपस्पृश्याचमनमात्रं कृत्वा तत्सौंदर्याकृष्टचित्तः कर्मवासनां धुनुते ॥ ६२ ॥ तदेवाह द्वाभ्याम् । भोजादिभिः श्लाघनीयमीहितं यस्य ॥ ६३ ॥ सर्वैरंगै रम्यया मूर्त्या च ॥ ६४ ॥ तत्प्रदर्शनार्थं मुखशोभामाह । यस्याननं दृशिभिर्नेत्रैः पिबंत्यो नार्यो नराश्च न ततृपुर्न तृप्ताः निमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्तुर्निमेः कुपिताश्च बभूवुः । कथंभूतमाननम् । मकरकुंडलाभ्यां चारू कर्णौ भ्राजंतौ कपोलौ च तैः सुभगम् । सविलासो

तिः अग्न्यपाये तापापायवत्प्रथितैवेति भावः ॥ ५८ ॥ तस्य हरेः । नृपाणां लाञ्छनं नाम चिह्नं वा येषां तैः कंसादिभिः । 'लांछनं नामचिह्नयोः' इति मेदिनी ॥ ५९ ॥ अवितर्क्याणि दावानलपानादीनि । यतो लोकहिताय मधुनामानं दैत्यं हतवानिति ॥ ६० ॥ तदेवाह—दुःखमैहिकामुष्मिकं संसृत्यनुभवः शोकः संसारस्तमस्तद्धेतुरज्ञानम् । सुपुण्यं तीर्थदानतपआदिभ्योऽतिपवित्रम् "तीर्थं दानं तपो यागो न समं यशसा हरेः" इत्यादिपुराणात् ॥ ६१ ॥ सकृदपि किं बहुकृत्वः । कर्मवासनानिवृत्तेस्तत्रैव प्रीत्यतिशयोऽभवति । "कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् । सत्संगान्मुक्तदुस्संगो हातुं नोत्सहते बुधः ॥" इत्युक्तेः ॥ ६२ ॥ तदेव कर्मवासनाधूननमेव । ईहितं चेष्टितम् ॥ ६३ ॥ स्निग्धस्मितेक्षितेनोदारै रम्यैः । विक्रमस्य शौर्यस्य लीलया विलासेन नृलोकं जनसमूहं नृणाति भक्तिपूर्वकं तत्त्वं जानंतीति नरो ज्ञानिस्तेषां लोकस्समूहस्तं वा ॥ ६४ ॥ तत्प्रदर्शनार्थं भक्तपुलाकन्यायेन सर्वांगरम्यत्वदर्शनाय । यस्य कृष्णस्य । पिबंत्यः सादरं पश्यंत्यः । नरपक्षे लिंगव्यत्यासेन पिबंत इति । सुभगं शोभनम् । न तृप्ता नालंबुद्धिं प्रापुः । निमेरिति । निमेषोन्मेषकर्तृत्वेन तत्र स्थितं निमिराजं प्रतीत्यर्थः । उत्सवो द्रष्टृजनाह्लादः नृष्वपि व्रजवासिनस्तेष्वपि गोप्यस्तत्प्रियसखायश्च । तन्माधुर्यपानप्रवराः परमधन्यतमा इत्याह—यस्येति । सर्वेष्वङ्गेष्वपि मध्ये परममधुरमानतं तदाननमप्यूर्ध्वाधोभागाभ्यां द्विधा विभक्तं महामाधुर्यं भवति । तत्रापि सर्वमहामाधुर्याणां चक्रवर्ती हास्यामृतमहामधुरिमा तदधरभागमध्ये निवसतीत्यधरभागं वर्णयति—मकरकुंडलाभ्यां चारु देदीप्यमानौ यौ कर्णौ ताभ्यां भ्राजंतौ यौ कपोलौ ताभ्यां सुभगं दृष्टजनमनोहरं विलासैर्हर्षौत्सुक्यचापलादिभिर्द्योत्यमानैः सहितो हासो यत्र तत् । यद्वा—मकरकुंडलाभ्यामपि चारुकर्णौ 'भूषणभूषणांगम्' इत्युक्तेस्तयोरपि शोभावर्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः ॥ उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथयञ्ज नेषु ॥ ६६ ॥ पृथ्व्याः स वै गुरुभरं क्षपयन्कुरूणामंतःसमुत्थकलिना युधि भूपचम्वः ॥ दृष्टचा विधूय विजये जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात्स्वधाम ॥ ६७ ॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टादशसाहस्र्यां वैयासिक्यां नवमस्कंधे श्रीसूर्यसोमवंशानुकीर्तने यदुवंशानुवर्णनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ समाप्तश्चायं नवमस्कंधः ॥

हासो यस्मिन् । नित्यमुत्सवो यस्मिन् ॥ ६५ ॥ श्रीकृष्णस्य चरितं समासतो वर्णयति जात इति द्वाभ्याम् । जातो निजेन रूपेण पश्चात्पुरुषो मनुष्याकारः सन् व्रजं गतः व्रजवासिनामेधिता अर्था येन तेषु दारेषु सुतानां शतान्युत्पाद्य । आत्मनिगमं स्वकीयं वेदमार्गम् ॥ ६६ ॥ अंतःसमुत्थेन कलिना निमित्तेन गुरुभारं क्षपयन् दृष्टचैव भूपचमूर्विधूय विजये जयमर्जुनेन जितमित्येवमुद्घोषं कृत्वा परं तत्त्वमुद्धवायोपदिश्य स्वधाम सम्यक् स्वेनैव रूपेण जगामेति ॥ ६७ ॥ इति श्रीमद्भागवते नवमस्कंधे श्रीधरस्वामिविरचितायां भावार्थदीपिकायां टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ समाप्तश्चायं नवमस्कंधः ॥ ९ ॥

कत्वात् । अंतर्वर्त्तिचर्व्यमानतांबूलस्य पार्श्वस्थयोर्हासकुंडलयोश्च छविसंगात् तांबूलहेतुकदरोत्तुंगिमवदेकतरत्वादतिस्वच्छत्वादतिसुकुमारत्वाच्च । अर्थान्मकरकुंडलाभ्यां सकाशादपि सविलासो हासः बिंबाधरदशनसृक्किणीशोभानुरंजितत्वात्सर्वमाधुर्यमहाराजचक्रवर्त्तित्वाच्च ज्योत्स्नाप्रवाहनिर्वापितसर्वसंतापश्रेणीकत्वात्सर्वभक्तश्वेतश्चकोराभिलोभनीयत्वात् युवतिजनकामांबुधिवर्द्धकत्वात् व्रजकुलकलाकुलजातिधर्मधैर्यध्वंसकमहोन्मादप्रवर्तककार्मणधर्मत्त्वात् यत्र तत् दृशिभिर्नेत्रांजालिभिः पिबंत्योऽपि न ततृपुः । निमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्त्तुर्निमेः कुपिता बभूवुरिति निमेषासहत्वेन रूढमहाभावलक्षणेनात्र स्त्रियो गोप्य एव नान्याः । नराः कृष्णप्रियनर्मसखाः सुबलादयो ज्ञेया नान्ये । इह प्रमाणवाक्यानि तूज्ज्वलनीलमणौ दृश्यानि इति विश्वनाथः ॥ ६९ ॥ समासतः सूत्ररूपेण पितृगृहान्मथुरातः । व्रजं गोकुलम् । अथ ते के जन्मकर्मणी इत्यपेक्षायां युगपत्स्फुरितं तच्चरितमापाततो निजौत्कंठ्यकुंठनेच्छया राजौत्कंठ्यवर्द्धनेच्छया च समासेन वर्णयति– पितुर्वसुदेवस्य गृहाद्व्रजं गतः किमर्थमेधितः प्रकटीकृत्य वर्द्धितो वृद्धिसीमां प्रापितोऽर्थः । सर्वपुरुषार्थशिरोमणिः । प्रेमा येन सः । संदर्भस्तु– एधितः पूर्वतोऽपि समेधितोऽर्थः श्रीमन्नंदादौ पितृत्वादिरूपो येन सः । वक्ष्यते च 'पुत्रीभूते जनार्दने । नंदस्त्वात्मज उत्पन्ने । नंदः किमकरोद्ब्रह्मन्' इत्यादौ प्रेमाख्यापनस्यैवावतारस्य मुख्यप्रयोजनत्वात्प्रेम्णश्च व्रज एव वृद्धिसीमां प्राप्तत्वाच्च । रिपून्हत्वेति । रिपुभ्यो मोक्षप्रदानमप्येकं प्रयोजनमिति । तेषु दारेषु सुतशतान्युत्पाद्येत्यादिना वर्णाश्रमधर्मस्थापनं च दर्शितं नराकृतिपरब्रह्मरूपत्वात् पुरुष आत्मानमीजे इष्टवान् । इज्यमानस्यान्यस्याभावात् । किमर्थं समीजे तत्राह–स्वकीयं वेदमार्गम् । भूपचमूहनने प्रयोजनं त्वर्जुनेन जितमिति प्रख्यापनमेव ॥ ६६ ॥ स कृष्णः । गुरुभरमसुरलक्षणभारम् । उद्घोषं कृत्वा डिंडिमं वादयित्वा । तेनैव रूपेणेति न तु तत्त्यक्त्वाति भावः । भक्तिज्ञानवैराग्यप्रख्यापनमप्यवतारप्रयोजनं दर्शयति–प्रोच्येति । स्वधाम द्वारकां समगात्संगतस्तैर्मिलितः । प्रपंचगोचरतां परित्यज्य नारायणस्वरूपमेव स्वधाम वैकुंठं चागादिति चक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्त्ती ॥ ६७ ॥ अथास्य माहात्म्यम्–"हरिरुवाच । मत्कपोली च भृकुटिर्नवमस्कन्ध इष्यते । एतस्य श्रवणाद्गोघ्नः सद्गतिं लभतेतराम् ॥ १ ॥ इतिहासं चात्र शृणु वंगदेशे कृषीवलः । विश्राम इति विख्यातो बभूव द्विजपूजकः ॥ २ ॥ नानान्नमुप्त्वा भूमौ स प्रोत्पन्नं तन्नृपाय वै । ददौ करार्थं तच्छेषं स्वगृहं चानयत्पुनः ॥ ३ ॥ गृहं गत्वा ब्राह्मणेभ्यो ददौ चान्नं कृषीबलः । कदाचित्पक्विते क्षेत्रे स्थिता गा निशि दृष्टवान् ॥४॥ दंडेन तास्तताडेति मत्क्षेत्रं भक्षितं हि वः । निशम्य तद्ध्वनिं गावो दुद्रुवुस्तु दिशो दश ॥ ५ ॥ एका वृद्धा मृता धेनुस्तां दृष्ट्वा दुःखितोभवत् । उत्थाप्य तां नदीतीरे दूरे प्रक्षिप्तवान्पुनः ॥ ६ ॥ प्रायश्चित्तं न कृतवाँल्लोके ख्यातिभयात्तदा । देहांते नरकाँल्लेभे बहुकालं स पादजः ॥ ७ ॥ पुनश्चांडालतां प्राप्ते मृता माता मृतः पिता । मातृष्वसृगृहे सोंधो भूत्वा कुष्ठरुजा जितः ॥ ८ ॥ उवास दश वर्षाणि ततो मातृष्वसा मृता । ततो यष्टिं गृहीत्वांधो गेहेगेहे क्षुदन्वितः ॥ ९ ॥ भ्रमन्दैवात्कदाचित्स ब्राह्मणस्य गृहं गतः । तत्र भागवती गाथा नवमस्कंधजा श्रुता ॥ १० ॥ तदा ववर्ष जलदो बहुधारासमन्वितः । स चांडालो मार्गगतः श्लोकार्द्धं नवमस्य हि । शुश्राव च्छायामाश्रित्य ततः पंके पपात ह ॥ ११ ॥ तदैव स मृतो लोकं वैकुंठं प्रजगाम वै । श्लोकार्द्धश्रवणेनैव मुक्तो गोवधपापतः । अत एतादृशं शास्त्रं न लोके पापराशिनुत् ॥ १२ ॥" यो रक्षसां वंशविनाशनाय श्रीरामरूपोर्ककुले बभूव । स एव तं भूभरनाशहेतोश्श्रीकृष्णरूपींदुकुले नतोस्मि ॥ १ ॥ श्रीस्वामिचरणव्याख्या नवमस्कंधगा च या । तस्या वंशीधरेणेयं कृता वृत्तिर्यथा मति ॥ २ ॥ इति श्रीखरडपत्तनवास्तव्यपंडितश्रीवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे नवमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावर्थदीपिकासमेतश्रीमद्भागवतनवमस्कन्धो
मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"
(स्टीम्) मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते नवमस्कन्धः समाप्तः ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाश
टीकया चोपेते श्रीमद्भागवते दशमस्कन्धपूर्वार्धप्रारंभः ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितम् । श्रीकृष्णाख्यं परं धाम जगद्धाम नमाम तत् ॥ १ ॥

ॐ स्वस्ति श्रीगणेशाय नमः । वन्दे देवं पार्वतीजं महेशं वाचं सूर्यं मां गुहं राधिकेशम् । विद्यातीर्थान्सर्वतश्च प्रणम्य व्याख्यां कुर्वे श्रीधरस्वामिवृत्तेः ॥ १ ॥ हरिविधिवशिष्ठशक्तिपराशरव्यासशुकदेवान् । वैशंपायनमुग्रश्रवसं च नुमः पुराणगुरुमुख्यान् ॥ २ ॥ त्रय्यारुणिं कश्यपञ्च सावर्णिमकृतव्रणम् । रोमहर्षणहारीतौ मैत्रेयं च मृकंडजम् ॥ ३ ॥ शेषं सांख्यायनं चाथ चतुरः सनकादिकान् । सर्वोष्टीकाकृतश्चार्यान्कणादं जैमिनिं मुनिम् ॥ ४ ॥ पतंजलिमक्षपादं व्यासञ्च कपिलं हरिम् । छन्दःकृतः कोशकृतस्साहित्यकृतिनोऽखिलान् ॥ ५ ॥ श्रीनृसिंहं प्रणम्यैव श्रीधरस्वामिनः कृतेः । विवृतिं श्रीधरस्यैव प्रसादादधुना ब्रुवे ॥ ६ ॥ श्रीधरस्वाम्यभिप्रायं श्रीधरो वेत्ति सर्वथा । भविष्यति तत्कृपया तदभिव्यक्तिराशु मे ॥ ७ ॥ क्वचिच्च श्रीधरत्यक्तपदानामपि वर्णनम् । यथामति माथुराणां प्रेरणातो मुहुर्मुहुः ॥ ८ ॥ करिष्यामि विदां प्रीत्यै क्षमंतां ते मम त्वराम् । पूर्वाचार्यानुग्रहान्मे सर्वेर्थाः प्रतिभान्तु वै ॥ ९ ॥ वृन्दारण्यांतर्गते नंदजेन सेवाकुञ्जे संयुतां कीर्त्तिजाताम् । नत्वा तस्याः प्राप्य चाज्ञां स्वबुद्धया कुर्वे व्याख्यां श्रीधरस्वामिवृत्तेः ॥ १० ॥ प्रथमं दशमस्कंध व्याख्यां कुर्वे कुतूहलात् । श्रीकृष्णलीलामाधर्य्यसेवनासक्तचेतसः ॥ ११ ॥ वंशीधरः कौशिकगोत्रगौडवंश्यः कृती श्रीधरवृत्तिवृत्तिम् । करोम्यहं कृष्णपदप्रसादात्तथा गुरूणामनुकंपयैव ॥ १२ ॥ अथ स्कंधादौ प्रतिस्कंधव्याख्यावसरनमस्कृतश्रीरामप्रणतिं चेतस्यागतातिरम्यश्रीकृष्णलीलास्मृतिविभ्रमेण विहायैव श्रीदशमस्कंधमुख्यवर्णनीयश्रीकृष्णं श्रीधरस्वामी प्रणौति विश्वसर्गेति । वयं तदनिर्वचनीयमित्वतया गुणरूपादिना वेयदीदृगिति वक्तुमशक्यं धाम तेजो रूपं ब्रह्म नमाम बहुत्वं शिष्याभिप्रायम् नमतेः "विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् लोट् च" इति प्रार्थनायां लोट् नमनेन प्रार्थयाम इत्यर्थः । न तु यत्तदोर्नित्यसंबंधादत्र यच्छब्दोपादानं कथं न कृतमिति चेत्तत्राह "तत्त्वमसि" इति श्रुतौ तच्छब्दस्य ब्रह्मवाचकत्वदर्शनात्तच्छब्दोऽत्र ब्रह्मवाचको प्रसिद्धः 'सोहं हंसः' इत्यत्र च । ततश्चात्र यच्छब्दोपादानं नापेक्षते "प्रक्रांतप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते" इति काव्यप्रकाशोक्तेः । यथा कुमारसंभवे "कला च सा कांतिमती कालावतः" इत्यत्रेति 'गृहदेहत्विट्प्रभावा धामानि' इत्यमरः । किंभूतं श्रीयते सेव्यते ब्रह्मादिभिः श्रीकृष्णेन वेति श्री राधा । "सर्वैराधूज्यते देवी राधा वृंदावने वने" इति ब्रह्माण्डे ब्रह्मोक्तेः "यच्चिंत्यमखिलेश्वरैः" इति तत्रैव नारदोक्तेश्च 'राधैवाराध्यते' इति श्रीकृष्णोक्तेश्च "राध्यते सा भगवता राधा इत्यभिधा स्फुटम्" इत्यादिपुराणोक्तेश्च । श्रीशब्दो राधार्थकः । यद्वा—श्रयति राध्नोति सर्वदा वृंदावननिकुंजगं श्रीनंदनंदनमिति श्री राधा । 'वृंदावने निकुंजस्थो राध्यते सर्वदा यया । नंदसूनुरतो राधा सोच्यते मुनिसत्तम ॥ इति पुराणांतरात् । कृषति निजसमीपमाकर्षति वेणुरवेण बल्लवीगणमिति कृष्णो यशोदानन्दनः । ननु मधुरगीतादिना त्वन्येपि प्रमदागणमाकर्षंति तत्र को विशेष इत्यरुच्याह—कृषति विलिखति निजानां संसारमिति कृष्णः । सदानंदस्वरूपो भक्तजनपापौघनाशकश्च । "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥" इति श्रुतेः सदानंदरूपः । "कोटिजन्मकृतं पापं कृषिरित्युच्यते बुधैः । तन्नाशनकरो देवः कृष्ण इत्यभिधीयते" इति ब्रह्मवैवर्त्तात्पापनाशकरूपश्च कृष्णपदार्थः । श्रिया सहितः कृष्णः श्रीकृष्णः यद्वा—"श्रीश्च ते लक्ष्मीश्च ते पत्न्यौ" इति श्रुतौ श्रीशब्देन राधा लक्ष्मीशब्देन रमा चात्सरस्वती ग्राह्या 'केशवस्य प्रियां देवीम्' इति बृहस्पत्युक्तेः । तथा च श्रीश्च श्रीश्च श्रीश्चेत्येकशेषसमासेन श्रियः इति स्यात् ततः श्रीभिः राधारमागीर्भिः सहितः कृष्णः श्रीकृष्णः । स आख्याऽभिधा यस्य तच्छ्रीकृष्णाख्यम् । पुनः विश्वसर्गविसर्गादिनवलक्षणलक्षितम् । सर्गश्च विसर्गश्च सर्गविसर्गौ विश्वस्य. सर्गविसर्गौ विश्वसर्गविसर्गौ । तौ आदी येषां स्थानादीनां तानि विश्वसर्गविसर्गादीनि तानि च नव लक्षणानि विश्वसर्गविसर्गादिनवलक्षणानि तैर्नवभिर्लक्षितं लक्ष्यत्वेन ज्ञापितम् । यद्यपि "अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः । मन्वन्तरेशानुकथा विरोधो मुक्तिराश्रयः॥" इति लक्षणानि दशोक्तानि तथापीहाश्रयरूपस्य दशमस्य लक्ष्याभिप्रायेण नवेत्युक्तिर्बोध्या । नामरूपत्वेपि माया तत्कार्यास्पृष्टत्वमाह—परमिति । परं सर्वस्मात् परतमम् । "इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥" इति श्रुतेः । यद्वा—परं निर्भयं अन्येषां देवानां गृहीतशस्त्रत्वेन सभयत्वप्रतीतेः श्रीकृष्णस्य वंशीविभूषितकरत्वान्निर्भयत्वं स्फुटमिति । पुनः जगतो धामेति सत्पुरुषस्तु जगदधिष्ठानत्वेन लक्ष्यरूपतामाह—जगंति स्थावरजंगमात्मकानि सर्वाणि धामानि यस्येति तत्तथेति समासस्तु सर्वांतर्यामितामाह । अत एव वक्ष्यति "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् । क्रीडद्यदुकुलांभोधौ परानंदमुदीर्यते ॥ २ ॥

इति । यद्वा–परं धामेति मुक्तप्राप्यत्वमाह "यद्गत्वा न निवर्त्तंते तद्धाम परमं मम" इति श्रीमुखोक्तेः । यद्यपि "तस्मा इदं भागवतं पुराणं दशलक्षणम्" इत्युक्तेः सर्गादीनि दशमहापुराणलक्षणानि श्रीमद्भागवतस्यैव संति कथं तानि श्रीकृष्णस्य संजाघटति तथापि "इदं भागवतं नाम पुराणं ब्रह्म सांमितम्" इत्युक्तेः "तेनेयं वाङ्मयी मूर्त्तिश्श्रीकृष्णस्य न संशयः" इति पाद्मोक्तेश्च श्रीकृष्णश्रीभागवतयोर्भेदाभावेनैकरूपत्वात्तत्रापि तानि न विरुद्धानीति । किंचैतानि च सर्गादीनि सर्वमहापुराणसाधारणलक्षणानि श्रीभागवतस्य संति यदसाधारणलक्षणं तत्तु प्रथमस्कंधे "ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः॥" इत्यनेन स्वामिचरणैः प्रथमस्कन्धे प्रथमश्लोकव्याख्याने प्रपञ्चितमेव । लक्षणत्वं च लक्ष्यतावच्छेदकसमनियतत्वं, लक्ष्यं च यदुद्दिश्य लक्षणं प्रवर्त्तत इति । इह च महापुराणं लक्ष्यं तत्र लक्ष्यतावच्छेदकं महापुराणत्वं तत्समनियतत्वं सर्गादिदशकस्येति समन्वयः । श्रीभागवतस्य महापुराणत्वं तु द्वादशे वक्ष्यति–" श्रीमद्भागवतं नाम सर्गादिदशलक्षणम् । महापुराणमल्पञ्च पञ्चलक्षणमिष्यते ॥ " इति । यत्त्वमरसिंहेन ' पुराणं पंचलक्षणम् ' इत्युक्त्वा पञ्चलक्षणस्यैव पुराणत्वं प्रतिपादितं तदल्पपुराणविषयमेवान्यथा " दशलक्षणसंयुक्तं पुराणं कवयो विदुः । केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया ॥ " इति व्यासोक्तिर्व्याकुप्येतेति (१) । अथ दशमस्कन्धवर्णनीयमाह–दशम इति । दशमे दशमस्कंधे । दशमं लक्ष्यमुदीर्यते किंभूतम् आश्रितानां जगतामाश्रयः "आभासश्च निरोधश्च यतश्चाध्यवसीयते । स आश्रयः परं ब्रह्म" इत्युक्तलक्षणो विग्रहः स्वरूपं यस्य तत्तथा । एतादृक् लक्ष्यं श्रीकृष्णे एव इत्येतदप्यतो लभ्यते । तथाहि–अं वासुदेवमाश्रिताऽऽश्रिता रमा राधा गीर्वा तस्या आश्रयो विग्रहो देहो यस्य लक्ष्यस्य तत्तथा । यद्वा–वीनां पक्षिणामाश्रय आश्रय विर्गरुडः । राजदंतादिवत्समासः । आश्रित आश्रयविर्येन स आश्रिताश्रयविर्वैकुंठनायको विष्णुरुपलक्षणमेतन्नृसिंहयज्ञनरनारायणरामचंद्राणाम् । तं गृह्णाति स्वस्मिन्प्रविलापयतीत्याश्रिताश्रयविग्रहम् । प्रथितमेतद्वृत्तं गर्गसंहितागोलोकखंडे । अनेन नंदनंदनस्यैव लक्ष्यत्वमायातम् । अत एव परान्ब्रह्मरुद्रादीनानंदयति निजलीलया तद्विपदाहरणेन वेति परानंदम् । सृष्ट्याद्याख्यानवृकासुराद्याख्यानैरेतत्प्रसिद्धमत्रान्यत्र वेति । यद्वा–"को ह्येवान्यात्कः पराण्याद्यदेष ह्यानंदो न स्यात्" इत्यादिश्रुतेः । परानंदस्वरूपम् । यद्वा–पिपर्ति पालयतीति परः पिता स चात्र नंदराजस्तमानंदयति निजलीलयेति परानंदम् " नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम् " इत्यादि बहुशो वक्ष्यमाणत्वात् । पुनः यदुकुलमेवांभोधिरित्युपमानोत्तरपदसमासस्तत्र क्रीडतीति क्रीडत् ' क्रीडृ–विहारे ' शतृप्रत्ययः । प्रसिद्धांभोधौ शशिवदिति व्यज्यते । नंदगोपकुलमपि यदुकुलमेव तथाहि–अथ सर्वश्रुतिपुराणादिकृतप्रशंसस्य यदुकुलस्यावतंसः श्रीदेवमीढनामा परमगुणधामा मथुरामध्यासामास । तस्य भार्याद्वयमासीत् प्रथमा द्वितीयवर्णा द्वितीया तृतीयवर्णेति । तयोश्च पुत्रद्वयं प्रथमं बभूव शूरः पर्जन्य इति च । तत्र शूरस्य श्रीवसुदेवादयः अत एवोक्तं श्रीमुनिना " वासुदेव उपश्रुत्य भ्रातरं नंदमागतम् " इति । श्रीपर्जन्यस्तु ' मातृवद्वर्णसंकरः ' इति न्यायेन " प्रायेण हि जनाः सर्वे यांति मातामहीं तनुम् " इति न्यायेन च वैश्यतामेवाविश्य गोवृत्तिपूर्वकं बृहद्वन एवासांचकार । स च बाल्यादेव ब्राह्मणदर्शी पूजयति । मनोरथपूरं देयानि वर्षति । वैष्णववेदं रिनह्यति । यावज्जीवं हरिमर्चयति स्म । तस्य मातुर्वंशश्च व्याप्तसर्वदिशां विशामत्रतंसतया परमशंसनीय एवमेत्र च गोपवंशोपीति पाद्मे सृष्टिखंडे स्पष्टीकृतः । स च श्रीमान्पर्जन्यो वैश्यांतरसाधारण्यं निजैश्वर्येणातीयाय । यस्य भार्या नाम्ना वरीयसीत्यासीत् यस्य च श्रीमदुपनंदादयः पञ्चात्मजा जगदेवानंदयामासुः । तथा च वंदिन उपमांति स्म " उपनंदादयश्चैते पितुः पंचैव मूर्त्तयः । यथानंदमयस्यामी वेदांतेषु प्रियादयः " इति । तस्य पुत्रसंपत्तिस्तु परमरमणीयतामवाप मध्यमसुतसंपत्तिस्तु सुतराम् । तदेवं सुमुखनाम्ना केनचिद्गोपमुख्येन श्रीपर्जन्यमध्यमसुताय श्रीनंदाय परमधन्या कन्या दत्ता । या खलु स्वगुणवशीकृतस्वजना यशांसि ददाति शृण्वद्भ्यः पश्यद्भ्यः किमुततरां भक्तिमद्भ्यः। ततश्च तयोर्दांपत्येन सर्वेषामपि सुखसंपत्तिरजायत किमुत पित्रादीनाम्। तदेवमानंदितसर्वजनः पर्जन्यः स्वयमपि सुखमनुभूय श्रीगोविंदपदारविंदभजनमात्रान्वितां देहयात्रामभीष्टां मन्यमानः सर्वज्यायसे सुताय स्वकुलतिलकतां दातुं श्रीवसुदेवादिनरदेवगर्गादिभूदेवकृतप्रभायां सभायां स्वजनानाहूतवान् । स च ज्यायांस्तत्र सदसि मध्यमं निजानुजं नंदनामानं पितुराज्ञया कृतकृत्यः सन् गोकुलराजतया सभाजयामास । अथ संकुचिते तत्रानुजे सविस्मये सर्वजने पितरि रोचमानलोचने च स चोवाच मयेदं स्नेहसद्गुणपराधीनेनाचरितमिति राजायमस्माकम् । ततो देवैस्तदुपरि पुष्पवृष्टिरकारि सदस्यैश्च । ततोऽसौ पर्जन्यः श्रीगोविंदमाराधयितुं सभार्यो वृंदावनं प्रविवेश । तत्काले शास्त्रसारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते । धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजाम् ॥ ३ ॥ प्राकृतादिश्चतुर्धा यो निरोधः स तु वर्णितः । तत्तत्प्रसंगतः सृष्टिसंहारादिनिरूपणैः ॥ ४ ॥ कृता नवतिरध्याया दशमे कृष्णकीर्तये । आदौ चतुर्भिरध्यायैर्ब्रह्मप्रार्थनयाऽवनेः । भारं हर्तुं हरेर्जन्म सप्रसंगं निरूप्यते ॥ ५ ॥

पृच्छतः पुत्रानुपदिदेश । तथाहि—" किं भयमूलमदृष्टं किं शरणं श्रीहरेर्भक्तः । किं प्राथ्यं तद्भक्तिः किं सौख्यं तत्परप्रेम ॥ " इति । श्रीमानुपनंदः श्रीनंदव्रजमहेंद्रसदसि मंत्रितया तस्थिवान् । तस्य च श्रीनंदराजस्य श्रीगोलोकेशश्रीकृष्णो द्वादशीव्रतचर्यातुष्टः पुत्रतामवापेति । इत्थं नंदगोपकुलं यदुकुलमिति । अथ प्रकृतमनुसरामः—एतद्विशेषणसार्थक्यायाश्रितेत्यादेरर्थांतरमाह—आश्रितभक्ष्यत्वेन आश्रयो येन स आश्रिताशयोग्निः 'आश्रयाशो बृहद्भानुः ' इति कोषादग्नेराश्रयाशत्वप्रसिद्धेः । यद्वा—आश्रितः आश्रयो येन निराधिष्ठानाग्नेरदृष्टत्वात् । आश्रिताश्रयोऽशनं यस्य आश्रिताश्रयाशनः । स चासौ विः आश्रिताश्रयविश्चकोरः । मध्यपदलोपी समासः तेन गृह्यते प्रियत्वेन सेव्यत इत्याश्रिताश्रयविग्रहश्चन्द्ररूपमित्यर्थः । ' आश्रिताश्रयलक्षणम् ' इति पाठस्तूत्तानार्थः । किञ्चाश्रयस्य दशमस्य लक्षणेषूक्तत्वेऽपि पुनर्लक्ष्यत्वेन कथनं तु क्वचिल्लक्ष्यलक्षणयोरभेदेऽपि छंदोग्रंथेषु वृत्तरत्नाकरादिषु ' मो नारी रो भृंगी' इत्याद्युदाहृत्या लक्ष्यलक्षणभेदव्यवहारवद्बोध्यम् । किञ्च—अवसरसंगतिप्राप्तमष्टमं निरोधरूपलक्षणवर्णनं विहायेहाश्रयरूपस्य दशमस्य वर्णनं तु यदुवंशवर्णनप्रसंगसंगत्या कृतमिति बोध्यम् । संगतिश्च अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः संगतिरित्युक्तलक्षणा । सा च " सप्रसंग उपोद्घातो हेतुत्वावसरस्तथा । निर्वाहकैककार्यत्वे षोढा संगतिरिष्यते॥ " इत्युदयनोक्तेः षोढा । स्मृतस्योपेक्षानर्हत्वं प्रसंगत्वम् । १ । वर्णनीयमर्थम्मनसि निधाय तदर्थमर्थांतरकल्पनमुपोद्घातत्वम् । २ । वर्णितार्थे कारणजिज्ञासोत्पादकत्वं हेतुत्वम् । ३ । शुश्रूषांतरराहित्यपूर्वकप्रकृतग्रंथे शुश्रूषोत्पादकत्वमवसरत्वम् ।४। उक्तार्थसाधकत्वं निर्वाहकत्वम् । ५ । द्वयोरेककार्यकरत्वेनैकत्र वर्णनमेककार्यत्त्वम् । ६ । एषामुदाहरणानि ग्रंथे यथायथमवधेयानि (२) । अथ लक्ष्यवर्णनावांतर्गतं सर्गादिवर्णनावसरप्राप्तं भाक्तमवांतरमदर्शनसाम्या दुष्टसंहाररूपनिरोधमाह—दशमे इति । दुष्टभूभुजां कंसादीनाम् । निरोधः संहाररूपोऽनुवर्ण्यते ' निरोधो नाशरोधयोः' इति मेदिनी । किंभूतः धर्मस्य त्रयीविहितस्य ग्लानिः क्षयो निमित्तं यस्य स तथा । तेषां धर्मनाशकत्वेन श्रीकृष्णेन ते हता इति तात्पर्यम् । कृष्णस्य रागिमुक्तमुमुक्ष्वादिसंकलानंदकरी सती या कीर्त्तिस्तस्या वितानाय विस्ताराय । दुष्टनाशेन सर्वधर्मप्रवृत्तेः सत्कीर्तेर्विस्तारः स्फुट एव । तुरत्रार्थांतरे तच्च लक्ष्यस्य वर्ण्यत्वं प्रतिज्ञाय पुनर्लक्षणवर्णनरूपं चतुर्विधनिरोधवैलक्षण्यरूपं वेति (३) । ननु मुख्यं निरोधं विहाय भाक्तनिरोधः कथमत्र वर्णितस्तत्राह—प्राकृतादीति । आदिना नित्यनैमित्तिकात्यंतिकानां ग्रहः । प्रकृतौ तत्कार्यब्रह्मांडस्य लयः प्राकृतिकः ब्रह्मणो निद्रां निमित्तीकृत्य जायमानो लोकत्रयप्रलयो नैमित्तिकः । देहस्य प्रतिक्षणमवस्थाभेदेन वर्त्तमानो यः स नित्यः । ज्ञानेनाविद्यां सकार्यां छित्त्वा स्वरूपेणावस्थानमात्यंतिक इति विवेकः । स च स चानयोस्समाहारस्तत्तत् । तत्तच्चासौ प्रसंगश्चेति तत्तत्प्रसंगस्तस्मिंस्तथा । सप्तम्यर्थे तसिः । तस्मिंस्तस्मिन्प्रसंगे । सृष्टिसंहारावादी येषां युद्धविचारादीनां तेषां निरूपणैः । वर्णितः 'वर्ण—वर्णने' अतो भविष्यत्यपि क्तप्रत्ययो बोध्यः "उणादयो बहुलम्" इतिबाहुलकात् । तथा चैकादशे द्वादशे च वर्णितो वर्णयिष्यते इत्यर्थः सृष्टिसंहारप्रसंगे ' सहस्रयुगपर्यन्तम् ' इत्यादिना नैमित्तिकः प्रथमे सूचितः । आत्यंतिकोऽपि प्राकृतमिश्रो युधिष्ठिरमहानुगमने तत्रैवोक्तः । तृतीयेऽप्येकादशेऽष्टमे चाध्याये नैमित्तिक एवोक्तः । ' चतुर्युगानां च सहस्रमप्सु ' इत्यादिना ' तमेवान्वापिधीयंते लोकाः ' इत्यादिना च सप्तमेऽप्यवधूताख्याने आत्यंतिक एवोक्तस्तत्रैवानावृत्तिप्रकारोऽपि स एव चतुर्थे पृथूपाख्याने पृथोरपि प्राकृतमिश्र आत्यंतिक एव । अष्टमे मत्स्यावतारप्रसंगे 'यावद्ब्राह्मी निशा' इत्याद्युक्तेर्नैमित्तिक एव । एवं नवमे सौभर्युपाख्याने हरिश्चंद्रोपाख्याने चात्यंतिक एव प्रतीयत एवमन्यत्रापि ज्ञेयम् (४) । ननु कियदध्यायो दशमस्कंधस्तत्राह—कृता इति सार्द्धेन । नवानां दशकं नवतिरिति "पंक्तिविंशति—" इत्यादिना साधु । "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः" इत्यमरः । 'तासु चानवतेः स्त्रियः' इति च । विंशत्यादीनां नवतिपर्यंतानां नित्यं स्त्रीत्वम् 'मुखं पुंसः परस्य ये' इतिवत् । यद्वा—वेदाः प्रमाणमितिवन्नवतिरध्याया इति संबंधः । 'समानलिंगविभक्तिसंख्याकानामेवान्वयः' इति शिष्टोक्तिस्तूद्देश्यविधेयभावं विनैव चरितार्था भवति । "यत्रोद्देश्यविधेयत्वं तत्रायं नियमो न हि । रामदाराश्च सीतेयं करुणाभाजनं हरिः॥"इत्याद्युदाहृतेः । चतुर्भिराद्यैः प्रथमाच्चतुर्थपर्यंतैः । सप्रसंगं प्रसंगश्च मथुरावर्णनपुरस्सरदेवक्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोकुले मथुरायां च द्वारवत्यां ततः क्रमात् । कृष्णलीला त्रिधा प्रोक्ता तत्तद्भेदैस्त्वनेकधा ॥ ६ ॥ सपंचत्रिंशदध्यायैर्बृहद्वृंदावनादिषु । गोकुले वसतो लीला वर्ण्यते सुरदुष्करा ॥ ७ ॥ एकेन यमुनावारिण्यक्रूरेण कृता स्तुतिः । एकादशभिराख्याता लीला मधुवने कृता ॥ ८ ॥ शेषैर्द्वारवतीलीला तन्निर्माणादि वर्ण्यते । एवं नवतिरध्याया दशमे विशदार्थकाः ॥ ९ ॥ तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् । श्रुत्वा भीतोऽवधीत्तस्याः षड्गर्भानिति वर्ण्यते ॥ १० ॥ कृष्णावतारचरितश्रवणामृतनिर्वृतः । उक्तानुवादेनौत्सुक्याद्राजा पृच्छति तत्पुनः ॥ ११ ॥

द्वाहादिरूपः । अवनेर्भूमेः 'क्ष्मावनिर्मेदिनी मही' इत्यमरः । हर्तुमपाकर्तुम् । कीर्त्यते वर्ण्यते व्यासाद्यैरिति कीर्त्तिर्लीला कृष्णस्य कीर्त्तिः कृष्णकीर्त्तिः । तस्यै कृष्णलीलायै । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । कृष्णकीर्त्तिं वर्णयितुमित्यर्थः (५) । सा च त्रेधेत्याह–गोकुल इति । गोकुललीलामथुरालीलाद्वारकालीलाभेदात् त्रिधा त्रिप्रकारा । ततो हरिजन्मानंतरम् । क्रमाद्गोकुललीलाक्रमात् । गोकुललीला च जन्मोत्सवपूतनावधशकटपातनादिभेदैरनेकधा । मथुरालीलापि धनुर्भंगमल्लत्रयकुवलयापडिकंसवधपित्रादिमोचनादिभेदैरनेकधा । एवं द्वारकालीलापि द्वारकानिर्माणकालयवनादिवधरुक्मिणीहरणस्यमंतकोपादानादिभेदैरनेकधैव (६) । अथ पुनरध्यायसंख्यया लीलापार्थक्यमाह–सपंचेति त्रिभिः । पञ्चभिः सहिता त्रिंशत्सपंचत्रिंशत्तया । बृहच्च वृंदा च बृहद्वृंदे ते च ते वने बृहद्वृंदावने ते आदिनी येषां मधुतालादीनां तानि बृहद्वृंदावनादीनि तेषु । इह वृंदाशब्दो वृंदाख्यदेव्यधिष्ठितवनपरो लक्षणया बोध्यः । वनानि च मधुतालकुमुदबहुलाकाम्यखदिरवृंदाभद्रभांडीरबिल्वलोहमहावनभेदाद्द्वादश संति व्रजमंडले । उपवनसहितानि चतुर्विंशतिश्च तानि निधुवनकोकिलादीनि ज्ञेयानि । सपंचत्रिंशताध्यायैः पञ्चमत एकोनचत्वारिंशदन्तैः । संबंधस्तु पूर्ववत् । गवां कुलानि यूथानि यत्र तद्गोकुलं मथुरां विहाय सर्वं व्रजमंडलं तेन नंदग्रामबृहत्सानुपुरप्रभृतीनामखिलानां ग्रहः । तत्र वसतः कृतनिवासस्य श्रीकृष्णस्येत्यर्थः । सुरदुष्करा देवैरपि कर्तुमशक्या गोवर्द्धनोद्धरणाल्पप्रदेशगोगोपीयूथनिवेशनादिरूपा (७) । पुनरेकेन चत्वारिंशदाख्येन एकादशभिरेकचत्वारिंशत्तएकपञ्चाशदन्तैः । मधुपुरे मथुरायाम् । वने स्थापितं वनस्थापितम् । मधोर्दैत्यस्य लवणपितुर्वनं स्थापितं मधुवनस्थापितं तच्च तत्पुरं मधुपुरम् । मध्यपदलोपी समासः । वनस्थापितपदस्य समासकृतैकपदत्वात्तत्र पदद्वयत्वं मा शंक्यं तास्मिंस्तथा । "शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् । हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥" इति नवमोक्तेः । मधूनां यदूनां पुरं मधुपुरमिति वा "राजधानी ततः साभूत्सर्वयादवभूभुजाम्" इति वक्ष्यमाणत्वात् । यद्वा । 'वीरहा माधवो मधुः' इति भारतोक्तेर्मधोर्विष्णोः पुरं मधुपुरम् "मथुरा भगवान्यत्र नित्यं संनिहितो हारिः" इति वक्ष्यमाणत्वात् (८) । शेषैरेकोनचत्वारिंशदध्यायैर्द्विपंचाशत्तो नवतिपर्यंतैरित्यर्थः । द्वारवतीलीलामाह–तस्या द्वारवत्या निर्माणं रचना आदि यस्य रुक्मिणीहरणादिरूपलीलावृंदस्य तत्तन्निर्माणादि "निर्माणं रचनायां च प्रमाणरहिते तथा ।" इति धरणिदेवः । विशदार्थकाः स्फुटार्थकाः । (९) । तत्र तेषु तेषु अध्यायेषु मध्ये । स्वमृत्युं निजमृतिम् । तस्या देवक्याः । षट् च ते गर्भा अर्भकाः षड्गर्भास्तान् "गर्भो भ्रूणेऽर्भके कुक्षौ संधौ पनसकंटके" इति मेदिनी । अवधीत् अहिंसीत् (१०) । कृष्णवतारः कृष्णाविर्भावः "अवतारोऽवतरणे पुष्करिण्यादितीर्थयोः । आविर्भावे तारिण्यां स्त्री क्लीबं ज्ञाने प्लवेऽध्वनि" इति धरणिदेवः । तस्य चरितं बाललीलारूपं तदेव श्रवणयोः कर्णयोरानंदजनकत्वादमृतं तद्वत्स्वादु तेन निर्वृतो जातानंदः । राजा परीक्षित् । संक्षेपेण कथितस्य व्यासेन कथनमनुवादः । उक्तस्य 'जातो गतः पितृगृहाद्व्रजम्' इत्यादिना नवमस्कंधांते संक्षेपेणोक्तस्य कृष्णचरितस्यानुवादेन हेतुना । हेतौ तृतीया । औत्सुक्यात् तत्परायणत्वात् 'इष्टार्थोद्यत उत्सुकः' इत्यमरः । अधिकाभिलाषत इति यावत् (११) ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः ॥ राजोवाच ॥ कथितो वंशविस्तारो भवता सोमसूर्ययोः ॥ राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥१॥ यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ॥ तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥ २ ॥

कथितो वंशविस्तार इति ॥ १ ॥ अंशेनेति प्रतीत्यभिप्रायेणोक्तम् ॥ २ ॥

तत्कृष्णचरितं पुनर्द्वितीयवारं पृच्छति । कथित इत्यादिना । वंशविस्तारो वंशव्यासः "विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः" इत्यमरः । यद्यपि "एकत्वं न प्रयुंजीत गुर्वात्मनि कदाचन" इति स्मृतेः पुराणोपदेष्टरि सर्वगुरुमुख्ये श्रीशुकदेवे भवतेत्येकवचनप्रयोगोऽनुचितस्तथापि तस्यात्यानन्दकन्दश्रीकृष्णचरितश्रवणव्यग्रत्वेन तदितराननुसंधानवशान्न दोषः । सोमसूर्ययोरिति । ननु "सूर्याचंद्रमसौ धाता" इति श्रुतौ "तस्याक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ" इति श्रुतौ च 'सूर्या चंद्रमसोर्योगे' इति गर्गस्मृतौ च सूर्यशब्दस्य पूर्वनिपातदर्शनात् । "सैषा त्रय्येव विद्या तपति" इति श्रुतेः सूर्यस्य सर्वधर्ममूलत्रयीरूपत्वात् "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः सर्वात्मकत्वेन सर्वधर्मप्रवर्तकत्वात् "यस्योदयेनेह जगत्प्रबुद्ध्यते प्रवर्तते चाखिलकर्मसिद्धये" इत्यादिस्मृतेश्च अभ्यर्हितत्वात् वंशनिरूपणावसरेऽपि प्रथमं सूर्यवंशस्यैव निरूपितत्वाच्च । सूर्यशब्दस्य पूर्वनिपात उचितस्तथापि " पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः " इति रसवर्द्धकत्वात्सोमस्य रसशोषकरवेः प्रधानत्वात् । ब्रह्मणो मरीचिस्ततः कश्यपस्ततो रविरिति । ब्रह्मप्रपौत्राद्रवेर्ब्रह्मणोऽत्रिस्ततश्चंद्र इति । ब्रह्मपौत्रत्वेन ' सोमोऽभूद्ब्रह्मणोंऽशेन ' इत्युक्तेः सर्वस्रष्टृ ब्रह्मांशत्वेन सूर्यवंशस्यापि श्रीभगवद्रामेण स्वीकृतत्वेऽपि " कृष्णस्तु भगवान्स्वयम् , स्वयं त्वसाम्यातिशयस्त्र्यधीश " इति " अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल " इति च " अर्जुने तु नरावेशः कृष्णो नारायणः स्वयम् " इत्यादि बहुश उक्तत्वात्स्वयं भगवता श्रीकृष्णेन स्वीकृतवंश्यताकत्वेन " सोमोऽस्माकं ब्राह्मणानां राजा " इति श्रुतेः । सर्ववेदाविकरणविप्रकुलराजत्वेन सर्वदेवगुरुणा श्रीशिवेन उमया सह वर्तत इति सोमः शिवः । सोऽस्त्याधारत्वेन यस्य स सोमः । तस्य स्वमूर्द्ध्नि धृतत्वाच्च सोमस्यैवाभ्यर्हितत्वात्पूर्वनिपातः 'आत्मानं श्लाघते सर्वः' इति न्यायेन "सर्वेषामेव लोकेषु स्वेष्टदेवः परो मतः" इति न्यायेन च राज्ञस्तदिष्टदेवस्य श्रीकृष्णस्य च सोमवंश्यत्वाद्वा पूर्वनिपातः । (उभयोः सोमसूर्ययोर्वंशौ उभयवंशौ तत्रभवाः उभशब्दस्य द्विवचनपरत्वाभावे वृत्तिविषये स्वार्थे नित्यमयच् ' उभयोन्यत्र ' इत्युक्तेः) यद्वा—उभाववयवौ यस्य स उभयः स चासौ वंशश्च जातित्वादेकत्वम् । उभयवंशः तत्र भवाः उभयवंश्याः । तेषाम् । परमाद्भुतं श्रोतॄणां सुद्युम्नैलादिचरिताकर्णनेनात्याश्चर्यकरम् ॥ १ ॥ च पुनर्यदोश्चरितं कथितमिति लिंगव्यत्यासेनान्वयः यद्यपि "उत्तमश्चिंतितं कुर्यात्प्रोक्तकारीच मध्यमः । अधमोऽश्रद्धया कुर्यादकर्त्तोच्चरितं पितुः ॥ " इत्युक्तेः पित्राज्ञोल्लंघिनो यदोर्द्धर्मशीलत्वं न प्रतीयते तथापि " स्नातं तेन समस्ततीर्थसलिले दत्ता च सर्वावनिर्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः । संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् " इत्युक्तेस्तस्य श्रीदत्तात्रेयावाप्तात्मतत्त्वत्वाद्धर्मशीलत्वमेव । किञ्च—अन्यथाकारिपित्राज्ञोल्लंघनस्य दोषत्वे प्रह्लादस्याप्यधर्मितापत्तेः । यद्वा—मद्वयसा मन्मातरं भोक्ष्यतीत्यतो मम मातृगामितापत्तिर्भविष्यत्यतो न दास्यामि वयस्तेन धर्मशीलत्वमेव । यद्वा—'धर्मो धर्मविदुत्तमः' इत्युक्तेर्धर्मो विष्णु स्तत्र शीलं समाधिर्यस्य स तथा तस्य । ' शील—समाधौ ' पचाद्यच् । हरिभक्तस्येत्यर्थः । नितरामतिशयेन धर्मशीलस्येति संबंधः । मंतारो वेदार्थावगंतारो मुनयो भृग्वादयस्तेषु संतः श्रेष्ठा वेदोक्तकारिणः कर्दमादयः मुनिसन्तस्तत्रापि तदुपदेष्टारः पराशरादयो मुनिसत्तरास्तत्रापि भगवन्निष्ठा भवदादयो मुनिसत्तमाः संति 'वैयासकिश्च भगवान्वासुदेवपरायणः' इत्युक्तेर्भवान्मुनिसत्तमोऽस्तीति राज्ञः संबुद्ध्यभिप्राय इति । तत्र यदुवंशे । अंशेनेति प्रतीत्यभिप्रायेण सुज्ञेतरप्रतीत्यभिप्रायेण । सा च प्रतीतिरहो यतोऽनेन सर्वथा नरैः कर्तुमशक्यं पूतनावधाद्यकारि ततोऽयं नारायणांश इत्येवंरूपोन्नेया यद्वा—योंऽशेन विष्णुस्तस्य परिपूर्णतमस्येत्यर्थः । "रमा राधांशतो ज्ञेया विष्णुः कृष्णांशतः स्फुटम्" इति ब्रह्मवैवर्त्ते । तथाहि "विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः । प्रथमं महतः स्रष्टृ द्वितीयं त्वंड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतीर्य यदोर्वंशे भगवान्भूतभावनः ॥ कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ॥ ३ ॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोऽभिरामात् ॥ क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्नात् ॥ ४ ॥

ननूक्तानि "जातो गतः पितृगृहाद्व्रजमेधितार्थः" इत्यादिना। सत्यम्। पुनर्विस्तरेण वदेत्याह। अवतीर्येति ॥ ३ ॥ अत्र लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयैषिणश्चेति। तेषां मध्ये न कस्याप्यलं प्रत्यय इत्याह। निवृत्ततर्षैः गततृष्णैर्मुक्तैरित्यर्थः। मुमुक्षूणामयमेवोपाय इत्याह। भवौषधादिति। विषयैषिणां परमो विषयोऽयमेवेत्याह। श्रोत्रमनोभिरामादिति। अपगता शुक् शोको यस्मात्तमात्मानं हंतीत्यपशुघ्नस्तस्मात् पशुघातिन इति वा ॥ ४ ॥

संस्थितम् ॥तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते॥''इति। "पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्। 'ततोभवन्महत्तत्वम्' इत्याद्युक्तेः। "एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः" इत्युक्तेः। "पुरुषोंडं विनिर्भिद्य यदादौ स विनिर्गतः" इत्युक्तेश्च त्रिष्वेवांशता प्रतीयते। वक्ष्यति च"नारायणोंगं नरभूजलायनात्" इत्यादिना। यद्वांशानां मत्स्यादीनामिनः स्वामी अंशेन स चासाववतीर्णोंशेनावतीर्णस्तस्य वीर्याणि प्रभावप्राकट्यकराणि कंसहननादीनि। यद्वा—अंशेष्विनः सूर्य इव प्रकाशकोंशेनः पुनः कर्मधारयः। यद्वा—अंशेनैकदेशरूपेण वीर्याणि साकल्येन तु न कोपि श्रोतुं वक्तुं वा प्रभुरिति भावः "अंशः स्यादेकदेशेऽपि वस्तुनो वंटके त्वणौ" इति धरणिदेवः। यद्वा—अंशेन बलदेवादिना 'वासुदेवकलानंतः' इत्याद्युक्तेः 'आदिष्टा प्रभुणांशेन' इत्याद्युक्तेश्च। 'अंशः शक्तिसमावेशः' इत्यादिपुराणात्। विष्णोः सर्वव्यापकतया परिपूर्णतापर्यवसानस्य स्वयं भगवतः श्रीकृष्णस्येति यावत्। वीर्याणि महाप्रभावमयचारितानि। न इति बहुत्वं तच्छुश्रूषयात्मनो बहुमननात्। यद्वातोस्माकं पांडवानां विष्णोर्वीर्याणीति अनेन तत्र स्वस्य भक्तिश्चासूचि ॥ २ ॥ अवतीर्याविर्भूय ॥ ३ ॥ अत्र मानुषे। अलंप्रत्ययोत्र श्रवणारुचिरूपो ज्ञेयः। निवृत्तस्तर्षोऽभिलाषो येषां ते तथा तैः 'कामोऽभिलाषस्तर्षश्च' इत्यमरः। भवौषधात्संसारव्याधेरौषधरूपात्। निवृत्ततर्षैर्यदेव निषेव्याविगततृष्णाव्याधिभिस्तृष्णैव संसारस्तस्मान्मुक्तैरुपाधिक्येन गीयमानाद्भोभो वयमिवैतन्निषेव्यनिरामया भवतेत्युच्चैरुपदिश्यमानात्। निवृत्ततर्षशब्देन शुद्धभक्ता एव ज्ञेया न तु ज्ञानिनस्तेषां निदिध्यासननिष्ठत्वेन गानासंभवात्। मुमुक्षूणां मोक्षमिच्छतामयमेव श्रीकृष्णगुणानुवाद एव भवः संसारस्तस्यौषधान्निवर्तकात्। "संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यं प्लवो भगवतः पुरुषोत्तमस्य। लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य॥" इत्युक्तेः। विषयस्तुच्छपरमभेदाद्विधा क्षयिष्णुफलकस्तुच्छो विनाशिफलकः सर्वकर्मफलरूपो वा परमः "इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः। अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम्॥" इत्याद्युक्तेः। अथ वा स्वसंबद्धेंद्रियानुरागजनको विषयः परमविषय इत्यभिप्रेत्याह—श्रोत्रेति। श्रोत्रमनसोरभिरामोतीव प्रियस्तस्मात्। "अविनाश्यरे अयमात्मा" इति श्रुतेः "नैनं छिन्दन्ति शस्त्राणि"इत्यादिस्मृतेश्चात्मनो नाशासंभवेऽपि देहोत्पत्तिनाशादिनात्मन्यपि तथात्वोक्तिः। "निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान्। अंतः प्रविष्ट आधत्त एवं देहगुणात्परः॥" इति "म्रियते चामरो भ्रांत्या यथाग्निर्दारुसंयुतः" इति च वक्ष्यति स्वयं भगवान् किञ्च "तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः" इह श्रुतावप्यात्महन इति पदमात्मनाशं वक्ति यत् तदात्माज्ञानमेवात्मघात इति वक्ति। "न चेदवेदीर्महतीर्विनष्टीः" इति श्रुतेर्न हि निरवयवस्य साक्षान्नाशः संबोभवीतीति। एतदभिप्रेत्याह अपगता शुगित्यादि। ननु त्रिविधजनानुक्त्वा पुनरात्मघातिपशुघातिनौ द्वावुक्तौ ततश्च पञ्चविधा जाता अपि नैतेन त्रिविधप्रतिज्ञाहानिः शंक्या तयोर्विषयिष्वंतर्भावात्कथमिति तत्राह—विषयिणोऽपि विषयभेदाद्विधैव परमविषयिणस्तुच्छविषयिणश्च। भगवत्यनुरागिणः परमविषयिणोऽत्र ज्ञेयाः। देहाद्यात्मदर्शिनः कर्मिणश्च तुच्छविषयिण इति। परमरागिणस्तु न विरज्यंते "को नाम लोके पुरुषार्थसारवित्पुरा कथानां भगवत्कथासुधाम्। आपीय कर्णांजलिभिर्भवापहामहोविरज्येत विना नरेतरम्" इत्युक्तेः। तुच्छविषयिणस्तु विरज्यंत एवेत्यभिप्रायेणाहापशुघ्नात्पशुघ्नाद्वेति। पशुघ्नः स्वर्गकामी कर्मी ततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः ॥ दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतरन्वत्सपदं स्म यत्प्लवाः ॥ ५ ॥ द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानाम् ॥ जुगोप कुक्षिगत अत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥ ६ ॥ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पूरुषकालरूपैः ॥ प्रयच्छतो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ॥ ७ ॥

किं चास्मत्कुलदैवतं श्रीकृष्णोऽतोपि तत्कथैव नित्यं श्रोतव्येत्याशयेनाह॥ पितामहा इति। अमरा।अयंति ये तैः।देवव्रतो भीष्मस्तदाद्यैरातिरथैस्तिमिंगिलैस्तिमिंगिलमत्स्यतुल्यैर्दुरत्ययं दुस्तरं वत्सपदमिव अत्यल्पं कृत्वा तुच्छीकृत्येत्यर्थः । अतरन् स्म । यः श्रीकृष्ण एव प्लवो नौका येषां ते । तस्य वीर्याणि वदस्वेति तृतीयश्लोकगते नान्वयः॥ ५॥ न केवलं पांडवाने वारक्षदिदं मम शरीरमपि यो रक्षितवानित्याह । द्रौण्यस्त्रविप्लुष्टमिति ॥ द्रौणेरश्वत्थाम्नो ब्रह्मास्त्रेण दग्धमिदं मच्छरीरं च कुरूणां पांडवानां च संतानस्य निदानं मम मातुः कुक्षौ प्रविष्टो धृतचक्रो यो जुगोपेति॥ ६॥ अखिलदेहभाजां सर्वप्राणिनाम् अंतश्च बहिश्च पुरुषरूपेण कालरूपैश्च । अंशाभिप्रायेण बहुवचनम् । मृत्युं संसारम् उत अपि अमृतमपि प्रय

विना स तु विरज्यत एव तदुक्तम् ''त्रैवार्गिकास्ते पुरुषा विमुखा हरिमेधसः'' इति । पुमानित्यनेन स्त्री चास्वातंत्र्यात्क्लीबश्चांगवैकल्याद्विरज्येतां नामेत्यर्थः । यद्वा—पुमान् जीवस्तेनाविकार्यपेक्षानिरस्ता । यद्वा—पशुघ्ना द्व्याधात्। तस्य हि विषयत्वसंभवेऽपि हिंसादिक्लेशाविद्धबुद्धिः तेन लोकद्वयसुखविवेकासिद्ध्या विषयिताया अप्यभावः।अत एवोक्तं ''राजपुत्र चिरंजीव मा जीव ऋषिपुत्रक। जीव वा मर वा साधो व्याध मा जीव मा मर'' इति। तस्माद्यो विरज्यते स लोकद्वयेष्वात्मक्लेशित्वेन तद्विरागात्परेष्वपि शल्यवदर्पणेन व्याध एवेति गालिप्रदान एव तात्पर्यम् ॥ ४ ॥ अन्ये विरज्यंतु नामास्माकं तत्र विराग उचित इत्याह—किंचेति । यतः कुलदैवतमतस्तत्कथा कृष्णकथा प्लवस्तरणसाधनम् ''प्लवः प्लक्षे प्लुतौ कपौ''शब्दे कारंडवे म्लेच्छजातौ भेलकभेकयोः । क्रमनिम्नमहीभागे कुलके जलवायसे॥जलांतरे प्लवंगे च तृणमुस्तकभिद्यपि''इति हैमः । 'अस्त्रियां समरानीकरणाः' इत्यमरः । तिमिर्दशयोजनो मत्स्यस्तं गिलति निगरतीति तिमिंगिलः । देवानां विश्वदेवानामिव व्रतं नियमः संतत्यनुत्पादनरूपं यस्य स देवव्रतो भीष्मः । महारथोऽयुतयोद्धातिरथः । वदस्वेति ''भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः'' इत्यनेनोपसंभाषायामात्मनेपदम् । उपसंभाषा सांत्वनम् । तृतीयश्लोकगतेन वीर्याणीत्यादिश्लोकगतेनेत्यर्थः ॥ ५ ॥ आत्तं स्वीकृतं भ्रामणेन चक्रवद्वर्तुलं गदारूपमस्त्रं येन स आत्तचक्रः । यथाश्रुतार्थे तु 'परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः' इत्युक्तिव्याकोपः स्यादिति ''चक्रं रथांगे कोके च सैन्येऽस्त्रे जलसंभ्रमे'' इति मेदिन्यादयः । प्रायश्चक्रादानस्य सार्वदिकत्वाद्वात्तचक्र इत्युक्तम् । कुरुचेदिपांडवानां पृथगुक्तिर्ब्राह्मणपरिव्राजकवत् मेय । इत्येकपदं वा मेयः मद्दग्गोचरः इत्यर्थः ॥ ६ ॥ कालरूपैरिति । बहुत्वोक्तिः । अंशाभिप्रायेणेति काल स्यांशा युगकल्पवर्षमासादिभेदाद्बहवः संति तदभि प्रायेण मृत्युं मरणं तत्तुल्यं दुःखं वा तत्तत्समये तत्तददृष्टवशाज्जीवानां भवतीति भावः । प्रयच्छतो ददतुः 'दाण—दाने' प्रपूर्वाच्छतरि यच्छादेशः । वीर्याणि लोककंटकायमानासुरहननादीनि । एतेन किमायातं तत्राहयं भाव इति । अंतर्दृष्ट्या तत्परचेतसेति । मायामनुष्यस्य लीलार्थं धृतमनुष्यशरीरस्य । ''माया लीलाकृपाशक्तिदंभेष्वथ'' इति कोशात् । विद्वन्निति श्रीशुकस्य कथनसामर्थ्यं द्योतयति विश्वनाथस्तु—अखिलदेहभाजां मध्ये येंतरंगा भक्ता ये च बहिरंगा भक्तद्रोहिणस्तेभ्योऽमृतं मृत्युं च प्रयच्छतो वीर्याणीति योज्यं तत्रांतरंगेभ्यो वसुदेवादिभ्यः पुरुषरूपैश्चतुर्भुजद्विभुजपुरुषाकारैरमृतं परमानंदं बहिरंगेभ्यः कंसादिभ्यः कालरूपैः । 'कालोऽय मिति विह्वलः' इति 'मृत्युर्भोजपतेर्विराट्' इत्याद्युक्तरीत्या मत्स्यंडिकाखंडैः पित्तदूषितरसनया तिक्तरसैरिव साक्षान्मारकत्वेन भातैर्मृत्युमुतानंतरममृतं मोक्षं च प्रयच्छत इति वर्त्तमानसामीप्ये वर्त्तमानत्वं किं वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया ॥ देवक्या गर्भसंबंधः कुतो देहांतरं विना ॥ ८ ॥ कस्मान्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः ॥ क्व वासं ज्ञातिभिः सार्धं कृतवान्सात्वतां पतिः ॥ ९ ॥ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः ॥ भ्रातरं चावधीत्कंसं मातुरद्धाऽतदर्हणम् ॥ १० ॥ देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः ॥ मधुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥ ११ ॥ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितम् ॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतम् ॥ १२ ॥ नैषातिदुस्सहा क्षुन्मां त्यक्तोदमपि बाधते ॥ पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतम् ॥ १३ ॥

च्छतो वीर्याणि वदस्व ब्रूहि । अयं भावः । अंतर्यामिरूपेण अंतर्दृष्टीनां मुक्तिं बहिर्दृष्टीनां च कालरूपेण मृत्युं ददाति यतोऽवो विषयदृष्टिं विहायांतर्दृष्ट्या तद्वीर्याण्येव श्रोतव्यानीति ॥ ७ ॥ ननु 'बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्'' इति रोहिण्यास्तनयो रामः प्रोक्तः ''वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् । कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः । मृदुं संतर्दनं भद्रं संकर्षणमधीश्वरम् । अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल ॥'' इति पुनर्देवक्यां गर्भसंबंधस्तस्यैवोक्तः स कुतो घटत इत्याक्षेपः ॥ ८ ॥ कस्मादिति । भगवतः कंसभयशंकाया असंभवात् इत्यर्थः ॥ ९ ॥ मातुर्भ्रातरं कंसं तस्मादतदर्हणं वधानर्हम् अद्धा साक्षात्कस्मादवधीत् ॥ १० ॥ ११ ॥ १२ ॥ ननु क्षुत्तृड्भ्यां पीडितस्य तव कुतः श्रवणावकाशस्तत्राह । नैषेति । त्यक्तोदकस्यापि मम जीवनं हरिकथामृतपाननिमित्तम् ।

ललिाया नित्यत्वज्ञापनार्थं वर्त्तमानप्रयोगः । मायया स्वरूपेणैव मनुष्यस्य स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः ''अतो मायामयं विष्णुं प्रवदंति मनीषिणः'' इति माध्वभाष्यप्रमाणितश्रुतेः ॥ ७ ॥ एकस्य देहांतरमंतरेण गर्भद्वयसंबंधो न घटत इत्याह–नन्विति । तस्यैव बलस्यैव । स संबंधः । कुतो हेतोः । घटते चरितार्थो भवेत् । इत्याक्षेप इत्याशंका । संदिग्धपदार्थनिर्णयजिज्ञासादिनानुयोग आक्षेपः ''आक्षेपो भर्त्सनाकृष्टयाशंकालंकृतिषु स्मृतः'' इति मेदिनी ॥ ८ ॥ अन्यदप्याक्षिपति–कस्मादिति । कस्माद्धेतोरिति हेतौ पंचमी । पितुर्गेहान्मथुरांतर्गतात् । मुकुंद इति । सर्वमोचनकर्तुर्भगवतः पितृमोचनमकृत्वा गमनानौचित्यमाह । यद्वा–मुकुंदः कंसस्य मुक्तिं दातुं पुर्य्यामेव स्थानं योग्यो न व्रजं गंतुमिति भावः । पितुर्वसुदेवस्येति जन्मानुकरणदृष्ट्या भगवत्तत्त्वदृष्ट्या तु नंदः स्वपुत्रमादाय प्रोष्यागत इति मुनींद्रेण वक्ष्यते ज्ञातयो गोपा यादवाश्च ततो बृहद्वनं परित्यज्य गोपैः समं यत्र वासं कृतवांस्तथा मथुरां परित्यज्य यादवैः समं यत्र तस्य वृंदावनाख्यस्य द्वारकाख्यस्य च वैशिष्ट्यमुच्यताम् । व्रजं गोकुलम् । ''व्रजो गोष्टाब्दवृंदेषु '' इति मेदिनी । क्व कुत्र ज्ञातिभिर्नन्दसजातीयैर्वसुदेवसजातीयैर्वा वासं निवासम् ॥ ९ ॥ केशव इति ब्रह्मेशासेव्यतामाह–को ब्रह्मा ओ विष्णुरीशः शंभुः कश्चाश्वेशश्च केशा ब्रह्मविष्णुशिवास्तेषां वो बिंबः केशवः 'वो बिम्बे' इति सौभरिकोशात् । अर्थाद्ब्रह्मविष्णुशिवानां प्रतिबिंबानां बिंबः कारणं साक्षाद्ब्रह्मसर्वव्यापिनस्तस्य व्रजे मधुपुर्यां च कैमार्थिकी स्थितिरपारिच्छिन्नस्य प्रदेशविशेषस्थितिः संशयहेतुस्स एव प्रश्नबीजम् । यदूनां पुर्य्यां मथुरायां द्वारकायां च ॥१०॥ मानुषं देहमाश्रित्य मनुष्यमानेन कति वर्षाणीत्यर्थः । ''परमात्मा नराकृतिः, परं ब्रह्म नराकृतिः, गूढं परं ब्रह्म मनुष्यलिंगम्'' इत्यादिषु मनुष्यस्यैव स्वरूपलक्षणात् । कति कियत्संख्याकानि । त्रिलिंगत्वात्पत्नीपदेनापि संबंधो नानुचित इति ॥ ११ ॥ एतद्यत्पृष्टमन्यद्यदपृष्टम् । सर्वज्ञेति संबुद्धिः पृष्टापृष्टकथने हेतुः । ''अश्रद्धाय तु नो वाच्यं वाच्यं चेन्मितमेव हि'' इत्युक्तेर्मह्यं श्रद्धालवे विस्तारेणैव वाच्यमित्याह विस्तृतमिति ॥ १२ ॥ एषेति या क्षुद्ब्रह्मण्यमपि मां मुनिकंठेऽहिं न्यधापयदिति द्योतयति त्यक्तोदमाचमनं विनेति बोध्यमन्यथा संध्योपासनादिविहिताचमनाकरणाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातम् ॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १४ ॥ श्रीशुक उवाच ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥ १५ ॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७ ॥ गौर्भूत्वाऽश्रुमुखी खिन्ना क्रन्दंती करुणं विभोः ॥ उपस्थितांतिके तस्मै व्यसनं स्वमवोचत ॥ १८ ॥ ब्रह्मा तदुपधार्याऽथ सह देवैस्तया सह ॥ जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥ १९ ॥ तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ २० ॥

तदुपरमे सद्य एव जीवितं न स्यादिति भावः ॥ १३ ॥ एवं साधुवादं समीचीनं प्रश्नम् । भागवतप्रधानो भागवतेषु श्रेष्ठः ॥ १४ ॥ व्यवसिता कृतनिश्चया । यद्यतो बुद्धेः ॥ ॥ १५ ॥ १६ ॥ तत्र तावत्प्रथमं भगवदवतारकारणमाह । भूमिरित्यादिभिर्नवभिः श्लोकैः । दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानामयुतैर्यो भूरिभारस्तेनाक्रांता ॥ १७ ॥ विभोः अंतिके उपस्थिता सती ॥ १८ ॥ १९ ॥ २० ॥

शुचेः श्रवणाधिकार एव न स्यादिति । पिबंतमिति वर्त्तमाननिर्देशेन क्षणमपि पानविगमे सैव विवेकहारिणी क्षुत्प्रादुर्भविष्यतीति ज्ञापयति । इहांभोजपदेन कथामृतस्य मधुरत्वमारोपितं तेन च तस्य मादकत्वं व्यज्य स्वस्य मत्तत्वादेव विप्रशापादिसर्वदुःखविस्मारकत्वं ध्वनितम् । यद्वा—अमृतपदेन मुखांभोजस्य चंद्रत्वमारोपितं तेन मुखस्यांभोजत्वात्सौरभ्यं चंद्रत्वादाह्लादकत्वं सर्वश्रोतृतमोहारित्वं स्वस्य चकोरत्वं च व्यंजितं सर्वथैव श्रीकृष्णकथासक्तिर्द्योतितेत्यन्ये ॥ १३ ॥ प्रत्यर्च्य संश्लाघ्य । व्याहर्त्तुं वक्तुम् । भागवता भगवद्भक्ता एव प्रधानानि यस्य स तथा । 'प्रधानं प्रकृतौ मुख्ये' इति कोशात् । 'नित्यं विष्णुजनप्रियः' इत्युक्तेः ॥ १४ ॥ निश्चलतया स्थितिर्निष्ठा तद्वती नैष्ठिकी उत्कर्षवती वा सर्वोत्कृष्टश्रीकृष्णचरितानुयोगात् । 'निष्ठोत्कर्षे व्यवस्थायाम्' इति यादवः ॥ १५ ॥ तत्पादसलिलं श्रीगंगा शालग्रामतीर्थं वा । गंगा तु त्रीन् स्वर्गमर्त्यपाताललोकान्पुनातीति । यद्वा "—गंगेति श्रवणात्प्रश्नात्कथनाच्च शुचिर्भवेत् । किं पुनर्दर्शनात्स्नानान्माहिमानं ब्रुवे ततः ॥" इत्यादिपुराणाच्च । एवं "शालग्रामशिलातोयं सर्वेषां सर्वपापहम्" इत्यपि ज्ञेयम् । "शालग्राममणौ यंत्रे स्थंडिले प्रतिमायां वा विष्णुमर्चयेत् । शालग्रामशिलातोयं यः पिबेत्तस्य पापं न विद्यते कोटिजन्मावनाशनं विष्णुपादोदकमवश्यं पेयम् । भूमौ बिंदुपातनादष्टगुणपापवृद्धिः" इति तैत्तिरीयगौतमगृह्यसूत्रचतुर्दशाध्याये पूजाप्रकरणोक्तेः । शालग्रामः साक्षाद्विष्णुमूर्त्तिरेवेति तज्जलं गंगावत्पादजलमेव "शालिग्रामशिलातोयं यो ददाति करोति यः । यो वा पिबति विप्रेंद्र न स गर्भगृहे वसेत्" इति त्रिपावनत्वं श्रूयते विष्णुधर्मे गंगावत् । ॥ १६ ॥ तत्र तेषु तत्रांशेनावतीर्णस्येत्यादिप्रश्नेषु तावत्सकलप्रश्नेषु "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः । अयुतैरनंतैर्न तु तावन्मात्रसंख्याकैः । "संख्या स्वार्थमनंतत्वं चाह सर्वा शतादिका" इति धरणिदेवः । ब्रह्माणं मेरुमूर्द्धस्थं न तु सत्यलोकस्थं "जगाम धरणी मेरोः समाजे त्रिदिवौकसाम्" इति पराशरोक्तेः । दृप्ता गर्विता ये नृपव्याजा नृपापदेशाः 'व्याजोऽपदेशो लक्ष्यम्' इत्यमरः । शरणं रक्षितारम् 'शरणं गृहरक्षित्रोः' इत्यमरः ॥ १७ ॥ खिन्ना दीना । तस्मै विभवे ब्रह्मणे व्यसनं निजापत्तिम् "व्यसनं विपदि ध्वंसे पानस्त्रीमृगयादिषु" इति मेदिन्यादयः । तद्व्यसनम् ॥ १८ ॥ उपधार्य्य मत्कर्म तु सृष्टिरेव पालनं तु विष्णोः स च क्षीराब्धौ तदपि किंचित्संहारं विना न सेत्स्यतीति सत्रिनयनस्यैव तत्र गमनमुचितमित्यालोच्येत्यर्थः । तया भूम्या ॥ १९ ॥ तत्र क्षीरसागरे । पुरुषं पुरुषसूक्तेन "सहस्त्रशीर्षा"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिरं समधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ॥ गां पौरुषीं मे शृणुताऽमराः पुनर्विधीयतामाशु तथैव मा चिरम् ॥ २१ ॥ पुरैव पुंसाऽवधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ॥ स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥ २२ ॥ वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः ॥ जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः ॥ २३ ॥ वासुदेवकलानंतः सहस्रवदनः स्वराट् ॥ अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ २४ ॥ विष्णोर्माया भगवती यया संमोहितं जगत् ॥ आदिष्टा प्रभुणांऽशेन कार्यार्थे संभविष्यति ॥ २५ ॥

पौरुषीं पुरुषेण भगवता प्रोक्तां गां वाचं मे मत्तः आशु शृणुत मा चिरमविलंबितं तथैव विधीयतां चेति ॥ २१ ॥ विज्ञतेः पुरैव पुंसांतर्यामिणा ईश्वरेण धराया ज्वरस्तापोऽवधृतो ज्ञातः ॥ २२ ॥ २३ ॥ २४ ॥ देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थे यशोदायां संभविष्यति ॥ २५ ॥

इत्यादिषोडशर्चमंत्रेणोपतस्थे ''उपान्मंत्रकरण'' इत्यादिनात्मनेपदम् । जगन्नाथत्वं राजादेरप्यस्ति तद्वारणाय–देवदेवमिति । इंद्रादिवारणाय वृषाकपिम् । वर्षत्यभीष्टमिति वृषः अकाद्दुःखात्पाति तत्पिनष्टीति वाऽकपिः स चासावकपिश्चेति वृषाकपिस्तम् । यद्वा–काज्जलाद्भूमिमपादिति कपिः ''कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते । तस्माद्वृषाकपिं प्राह कश्यपो मां प्रजापतिम्॥'' इति व्यासोक्तेः । यद्वा–वर्षतीति वृषा 'वासवो वृत्रहा वृषा' इत्युक्तेरिंद्रस्तमकाद्ब्रह्महत्यादुःखात्पातीति वृषाकपिस्तम् 'इंद्रं च वृत्रवधतस्तमासि प्रविष्टम्' इत्याद्युक्तेः । समाहितः समाधिनिष्ठः । गिरं समाधाविति प्रतिपदं वक्ष्यमाणत्वात् ॥ २० ॥ समाधाविति तादर्थ्ये सप्तमी । देवकार्यसमर्थनार्थम् ''समाधिर्ध्यानसंधानप्रतिज्ञासु समर्थने'' इत्यभिधानचिंतामणिः । पौरुषीं पुरुषेण भगवता प्रोक्ताम् । गच्छति श्रोत्रमिति गौर्वाक् तां तथैव यथाहं ब्रवीमीति विधयितां क्रियताम् ॥२१॥ अवधृतो निश्चितः ॥ २२ ॥ वसुना धनेनार्थाद्बोधनेन दीव्यति व्यवहरति द्योतने मोदते इति वा वसुदेवो नंदः यशोदा च ''जातं परमबुद्ध्यत'' इत्युक्तेः । ''देवभेदे नले रश्मौ वसू रत्ने धने वसु'' इत्यमरः । ''धनं वित्ते गोधने च'' इति मेदिनी । ''नृपयादवगोपेशधनिकश्रीदगोकुले । समुद्रशशिसूर्येषु वसुदेव उदीरितः ॥'' इति निरुक्तात् । आनकदुंदुभिर्वा तस्य गृहे भार्यायाम् ''गृहं गृहाश्च पुंभूम्नि कलत्रेपि च सद्मनि'' इति मेदिनी । वसुदेवो गृह्यते निरुद्ध्यतेऽत्रेति वसुदेवगृहं कंसकारागृहं तत्र वा ॥ २३ ॥ वासुदेवाय कं सुखं शय्यारूपत्वेन लाति ददातीति वासुदेवकला तच्छय्याभूतोऽनंतः शेषः 'शेषोनंतः' इत्यमरः । अत एव वक्ष्यति 'शेषाख्यं धाम मामकम्' इति स्वेन हरिणा स्वान् वा राजते राजयति वा स्वराट् । प्रियचिकीर्षया प्रलंबादिवधद्वारा श्रीभगवत्प्रतिज्ञताभूभारहरणरूपप्रियकर्माकरणेच्छयेत्यर्थः ॥ २४ ॥ यशोदामोहनादीत्यत्रादिशब्देन द्वारपनगरस्थकंसादयो ग्राह्याः । मायाशब्देन योगमाया ग्राह्येह 'योगमायां समादिशत्' इति वक्ष्यमाणत्वात् । प्रभुणा कृष्णेन । अंशेन स्वांशभूतबहिरंगमायासहितैव प्रादुर्भविष्यति यया स्वांशभूतया मायया । जगदपि स्वस्वांशभेदाद्द्विधा तद्द्विविधैर्ज्ञेयं स्वरूपं जगत्तु ब्रह्मणे दर्शयिष्यति चतुर्दशेऽध्याये स्वांशभूतं सर्वमेव प्रसिद्धं कार्यार्थं इति । कार्यमपि द्विविधं तत्र प्रथमं देवकीगर्भाकर्षणयशोदास्वापादितद्योगमायाया एव न तु मायायाः काल्याः स्वनियंतुर्बलदेवस्याकर्षणे प्रभुत्वायोगात् । यशोदा स्वायस्य राजसत्वाभावात् । तदुक्तम् ''व्यतीत्य तुर्यामपि संश्रितानां तां पञ्चमीं प्रेममयीमवस्थाम् । न संभवत्येव हरिप्रियाणां स्वप्नो रजोवृत्तिविजृंभितो यः'' इति द्वितीयं तु देवकीकन्यारूपेण कंससंभाषणादिरूपं तन्मायाया एव । तादृशदुष्टेषु तदनुपयोगादेव सैव कंसहस्तादुत्प्लुत्य विंध्यवासिन्यादिरूपेण ''बहुनामनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्यादिश्याऽमरगणान्प्रजापतिपतिर्विभुः ॥ आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥ २६ ॥ शूरसेनो यदुपतिर्मथुरामावसन्पुरीम् ॥ माथुराञ्छूरसेनांश्च विषयान्बुभुजे पुरा ॥ २७ ॥ राजधानी ततः साऽभूत्सर्वयादवभूभुजाम् ॥ मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः ॥ २८ ॥

॥ २६ ॥ भोजेंद्रबंधनागारेऽवताराय प्रस्तावकथामाह । शूरसेन इत्यादिना यावदध्यायसमाप्ति । मथुरामावसन् मथुरायां वसन् । विषयान्देशान् ॥ २७ ॥ २८ ॥

केतेषु बहुनामा बभूव ह'' तदुक्तं स्वयमेव मायया । ''वैवस्वतेंतरे प्राप्ते अष्टाविंशतिमे युगे । नंदगोपगृहे जाता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी'' इति । तथा रासलीलासिद्ध्यर्थं भगवत्प्रेयसीनां पतिपश्वादिमोहनं योगमायाया एव कार्यं न तु मायायास्तेषां भगवद्वैमुख्यादर्शनात् । मायामोहितत्वे तद्वैमुख्यस्यावश्यंभावात् । 'योगमायामुपाश्रितः' इति तत्रोक्तेश्च । दुर्योधनादिशाल्वाद्यसुरेषु विश्वरूपगरुडवाहनादित्वदर्शिष्वपि नायमीश्वरः किं तु धृष्टो यादव इति मोहनं माययैव न तु योगमाययेति तेषां भगवद्वैमुख्यदर्शनात् । एवं तत्तत्स्थले भगवदभिमुखविमुखमोहनं योगमायातदंशीभूतमायाकृतमूह्यम् । यत्तु वात्सल्यादिमहाप्रेमवतां यशोदानंदादीनाम् । विश्वरूपवरुणलोकादिदर्शनांते वात्सल्याधिक्यैश्वर्यज्ञानेप्यसंभ्रमादेवैश्वर्याननुसंधानलक्षणं मोहनं तद योगमायाया नापि मायायाः किं तु प्रेम्ण एव स स्वभाव इति ''वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः'' इति तु मोहसाधर्म्यात्तत्र मायाशब्दप्रयोग इति ॥ २५ ॥ प्रजापतीनां मरीच्यादीनां पतिर्ब्रह्मा गीर्भिः गीयन्त इति ग्यः गायतेः क्विपीत्वम् ''गीर्वाणी च सुरा पत्नी गीं रम्या गीः सुधाभिधा'' इति सौभरिः । ईर्य्यन्त उच्चार्य्यन्त इतीरः । ''ईर्वाक् प्रोक्ता तथेरा च भूमौ मद्ये शुभे स्त्रियाम्'' इति द्विरूपकोशः । तथा च ग्यो रम्याश्च ता ईरो वाचो गीरस्ताभिः रम्यवाग्भिः । आश्वास्य सांत्वयित्वा । परमं ब्रह्मांडांतर्वर्त्तिसर्वलोकेभ्यो भूरादिभ्य उत्कृष्टं परतमं परं मा यस्मात्तदिति व्युत्पत्तेः ॥ २६ ॥ शूरसेनः कार्तवीर्यसुतः ''तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे । जयध्वजः शूरसेनो वृषभो मधुरूर्जितः'' इति नवमस्कंधोक्तेः । मथुरां मथुरायाम् ''उपान्वध्याङ्वसः'' इत्याधारस्य कर्मत्वाद्द्वितीया । मथुरायाः प्रांते माथुरास्तान् । शूरसेनेनाधिष्ठिताः शूरसेनास्तान् । श्रीवाल्मीकीये तु शत्रुघ्नकृतलवणवधोत्तरं वरदानार्थमागतदेवेभ्यः शत्रुघ्न इमं वरं वव्रे । ''इयं मधुपुरी रम्या मथुरा देवनिर्मिता । निवेशं प्राप्नुयाच्छीघ्रमेष मेऽस्तु वरः परः ॥ तं देवाः प्रीतमनसो बाढमित्येव राघव । भविष्यति पुरी रम्या शूरसेना न संशयः॥'' किञ्च—''स पुरा दिव्यसंकाशो वर्षे द्वादशमे शुभे । निविष्टः शूरसेनानां विषयश्चाकुतोभयः'' इति तथा च । शूरा सेना यस्यां शूरस्य शत्रुघ्नस्य वा सेना यस्यां सा शूरसेना मथुरैवेति ज्ञायते । तत्प्रान्तदेशश्च तेनैव निवेशितः शूरसेनसंज्ञोऽभूदिति । विषयान्देशान् ''नीवृज्जनपदो देशो विषयस्तूपवर्तनम्'' इत्यमरः ॥ २७ ॥ ततः शूरसेनमारभ्येत्यर्थः । राजधानी ''राज्ञो नित्यं यत्र वासो राजधानी तु सा पुरी'' इत्यभिधानात् । यद्वा ''राज्ञां प्रधाननगरं राजधानीति कथ्यते'' इति शब्दार्णवः । ''मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा । तत्सारभूतं यद्यस्यां मथुरा सा निगद्यते॥'' इति तापनीयश्रुतेः । ''मथुरायां स्थितिर्ब्रह्मन्सर्वदा मे भविष्यति । मथुरायां विशेषेण मां ध्यायन्मोक्षमश्नुते'' इति स्मृतेश्च । यत्र मथुरायां संनिहितः स्थितः । 'नित्यं संनिहितः' इत्यनेन स्वयं भगवान्परिपूर्णः कृष्णस्तत्र स्वधामनि सदा वर्त्तमान एवाविर्भूय प्रपंचगोचरीभवति न तु कुतश्चिद्वैकुंठादिभ्य आगत्यावतरतीति व्यंजितम् । किं च तदाविर्भावसमये वैकुंठश्वेतद्वीपादिभ्यस्तदंशा आगत्य तत्र मिलिता भवंति लीलांते पुनस्तत्रतत्र यान्तीति तेषामेव वैकुंठादिभ्योऽवतरणं चेति प्रसिद्धिर्ज्ञेया ''परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान्यथाग्निः'' इत्यादिषु तृतीये तथा व्याख्यानात् । इति विश्वनाथः । श्रीसनातनगोस्वामी तु नित्यं कालादिदोषेणान्यत्रेवांतर्द्धानं निरस्तम् । अस्याश्च नित्यत्वं पाद्मनिर्वाणखंडे । ''अहो न जानंति नरा दुराशयाः पुरीं मदीयां परमां सनातनीम् । सुरेंद्रनागेंद्रमुनींद्रसंस्तुतां मनोरमां तां मथुरां पराकृतिम्'' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ॥ देवक्या सूर्यया सार्धं प्रयाणे रथमारुहत् ॥ २९ ॥ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया ॥ रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः ॥ ३० ॥ चतुःशतं पारिबर्हं गजानां हेममालिनाम् ॥ अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम् ॥ ३१ ॥ दासीनां सुकुमारीणां द्वे शते समलंकृते ॥ दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ॥ ३२ ॥ शंखतूर्यमृदंगाश्च नेदुर्दुंदुभयः समम् ॥ प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलम् ॥ ३३ ॥ पथि प्रग्रहिणं कंसमाभाष्याऽऽहाऽशरीरवाक् ॥ अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ॥ ३४ ॥ इत्युक्तः स खलः पापो भोजानां कुलपांसनः ॥ भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ॥ ३५ ॥ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम् ॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ॥ ३६ ॥

सूर्यया नवोढया । प्रयाणे प्रयाणार्थम् ॥ २९ ॥ रश्मीन्प्रग्रहान् ॥ ३० ॥ पारिबर्हमुपस्करम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ आभाष्य रेरे कंसेति संबोध्य हंता हनिष्यति ॥ ३४ ॥ कुलपांसनः कुलदूषणः आरब्ध उद्युक्तः कचे केशबंधे ॥ ३५ ॥ नृशंसं क्रूरम् । महाभाग इति । अयं भावः । स्वजन्मनि हर्षेण देवैरानकदुंदु

तापिन्यामपि तासां मध्ये साक्षाद्ब्रह्मगोपालपुरीहीति ॥ २८ ॥ सूर्यया "सूर्या स्यादौषधीभेदे सूर्यभार्यानवोढयोः" इति धरणिदेवः । तस्यां मथुरायाम् । कृतोद्वहः कृतविवाहः ॥ २९ ॥ रश्मीन्प्रग्रहान् "रश्मिः पुमान् दीधितौ च पक्षप्रग्रहयोरपि" इति मेदिनी । विवाहकाले रथरश्मिग्रहणमत्यंतबंधुना कार्यमिति दर्शनार्थं रश्मिग्रहणं कृतवानिति व्यज्यते । रौक्मैः सौवर्णैः । 'रुक्मं तु कांचने लोहे' इति मेदिनी ॥ ३० ॥ विवाहकाले दुहित्रे यद्दीयमानं राजयोग्यं धनं तत्पारिबर्हम् । "पारिबर्हो राजयोग्यदेयद्रव्यपरिच्छदे" इति मेदिनी । अयुतं दशसहस्राणि । "अयुतं दशसाहस्रे विविक्ते त्रिषु वैष्णवे" इति धरणिः । त्रयश्च षट् च त्रिषट् तानि शतानि यत्र पारिबर्हे स तथा तम् । यद्वा—त्रिगुणितानि षट् त्रिषट् तानि शतानि यत्रेति वा नवशतान्यष्टादशशतानि वेति ज्ञायते ॥३१॥ सुकुमारीणां मृद्वीनाम् ' सुकुमारो मृदौ त्रिषु ' इति मेदिनी । देवकः कंसपितृव्यः । याने स्वगृहात्कन्यागमने ॥ ३२ ॥ प्रयाणप्रक्रमे गमनारंभे । तावदादौ । वरवध्वोः सुमंगलं यथा भवति तथा शंखाद्याः सममेकदैव नेदुः ॥ ३३ ॥ प्रग्रहो हयरश्मिः सोऽस्यास्तीति प्रग्रही तम् "प्रग्रहस्तु तुलासूत्रे वंद्यां नियमने भुजे । हयादिरश्मौ रश्मौ च सुवर्णालुमहीरुहे" इति मेदिनी । अस्या देवक्याः । "अशरीरं वा वसंतम्" इति श्रुतेरशरीरः परमात्मा तद्रूपा वाक् । यद्वाऽस्य वासुदेवस्य शरीरमशरीरं तत्संबंधिनी वाक् यद्वा । न लक्षितं शरीरं योगतपोभ्यां विना येषां तेऽशरीरा देवास्तेषां वागशरीरवाक् । पुत्र इति वक्तव्ये गर्भ इत्युक्तिस्तु कृष्णस्य सप्तमपुत्रत्वार्थाष्टमगर्भत्वार्थौ ज्ञेयेति ॥ ३४ ॥ कुलं पंसति नाशयतीति कुलपांसनः ' पसि—नाशने ' कर्त्तरि ल्युट् दीर्घो निपातनात् । पंसतीति पंसनः पंसन एव पांसनः कुलस्य पांसनः कुलपांसन इति वा । कुलं पांतीति कुलपा उग्रसेनादयस्तानंसति विभजत इतस्ततः करोतीति कुलपांसनस्तमिति वा । ' अंस—विभागे' अत एव । कुलदूषण इत्येवार्थः स्वामिचरणैः प्रकाशितः । ' कचः केशे गुरोः सुते ' इति मेदिनी ॥ ३५ ॥ महाभागास्त्वन्येऽपि महान् भागो भाग्यं शुभाशुभं यस्येति व्युत्पत्तेः ' भागो भाग्यैकदेशयोः ' इति रुद्रः । अत आह—इत्ययं भाव इति । यद्वा—स्वपत्नीवधे प्रवृत्तमपि दृष्ट्वा क्रोधानुदयान्महाभाग इति । ननु तादृशः क्रूरः कथं सांत्वयितव्यस्तत्राह—महाभाग इति । भाग्यवतः प्रातिकूल्यं तुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुदेव उवाच ॥ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः ॥ स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥ ३७ ॥ मृत्युर्जन्मवतां वीर देहेन सह जायते ॥ अद्य वाऽब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः ॥ देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥ ॥ ३९ ॥ व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति ॥ यथा तृणजलूकैवं देही कर्मगतिं गतः ॥ ४० ॥

भिध्वंनिकरणाद्धाविभगवदवतारेण शक्यप्रतीकारता संभवतीति । सांत्वयन् स्तुत्या कृपाविषयत्वेनोपपत्तिभिश्च साममार्गेण संबोधयन् ॥ ३६ ॥ श्लाघनीयाः स्तुत्या गुणा यस्य सः । भोजकुलस्य यशःसंपादकः । स्त्रियं तत्रापि भगिनीं तत्राप्युद्वाहपर्वणि ॥ ३७ ॥ ननु मरणभयान्निहन्मीति चेत् तथापि मरणस्यापरिहरणीयत्वाद्देहांतरस्यावश्यं भावित्वात्तत्रापि च भोगप्रेमास्पदत्वादीनामविशेषान्मरणभयेन पापाचरणमयुक्तमित्यभिप्रेत्याह । मृत्युर्जन्मवतामित्यादिना । देहेन सहेति विधात्रा ललाटे लिखितत्वादिति । तत्रापि कालविलंबार्थं हन्मीति चेत्तत्राह । अद्य वेति । अवश्यंभाविनि मरणे विलंबमात्राय पापाचरणमयुक्तमिति भावः ॥ ३८ ॥ किं च । अस्मिन् देहे गते यदि देहांतरं न स्यात्तदा युज्येत पापेनापि तत्पालनम् । न तु तदस्तीत्याह । देहे पंचत्वमिति । आपन्ने आपन्नप्राये कर्मवशादयत्नत एव प्रथमं देहांतरं प्राप्य पश्चात् प्राक्तनं वपुः पूर्वदेहं त्यजतीत्यर्थः ॥ ३९ ॥ अत्र दृष्टांतः । व्रजन्निति यथा व्रजन्पुरुषः एकेन अग्रतो निहितेन पदा तिष्ठन्भुवमवष्टभ्य देहं बिभ्रत्पश्चादन्येन पूर्वप्रदेशादुत्थाप्य पुरोनिहितेन पदा गच्छति तद्वत् । अत्र च स्वीकारपरित्यागौ नात्यंतभिन्नविषयाविति स्पष्टम् । दृष्टांतांतरमाह । तथा तृणजलूकेति । सा हि यथा देहार्धेन

व्याघ्रादिरपि न करोतीति वा । स्वजन्मनि वसुदेवजन्मनि हेत्वादिभिः संभवदर्थप्रतिपादनमुपपत्तिः । सांत्वयन् साममार्गेण संबोधयन्प्रबोधयन् ॥ ३६ ॥ सामप्रकारमाह—"संबंधलाभाभेदाश्च गुणकीर्तनमेव च । उपकारश्च पंचैव सामभेदा इहोदिताः ॥ " इति । श्लाघनीयेति । गुणकीर्त्तनं, भोजेति संबंधः भगिनीमित्यभेदः, स्वहंतृजनन्या अपि स्त्रिया अवधेन धार्मिकत्वयशोरूपलाभः, मम भार्यादानेनोपकारश्च । स्त्रियं तत्रापि भगिनीं तत्राप्युद्वाहपर्वणि तत्रापि भवान्महायशस्वीति हनने ऐहिकं दुर्यशोमुत्र नरकपातश्चेति दृष्टादृष्टलक्षणभेदोपि दर्शितः । वास्तवार्थस्तु—विपरीतलक्षणया श्लाघनीयेषु गुणः कोर्थः शून्यः ' गुणः शून्ये च शब्दादौ' इति कोशात् । भोजाः कलहप्रियाः प्रसिद्धास्तेषां यशः कलहाधिक्यम् । स कथं भगिनीं हन्यादपि तु सर्वं कुलमिति ॥ ३७ ॥ तत्रापि देहांतरेपि । अविशेषात्तुल्यत्वात् । तद्भयेन मरणभयेन । अयुक्तमनुचितम् । 'विधात्रा ललाटे ' इति "लिखिता चित्रगुप्तेन ललाटेऽक्षरमालिका । आयुः कर्म च वित्तं च विद्या निधनमेव च ॥ " इत्युक्तेः । यद्यपि ' जातस्य हि ध्रुवो मृत्युः ' इत्याद्युक्तेर्मृत्युरप्रतीकार्य्यस्तथापीति तत्र कालविलंबे अवश्यंभाविनीति । " अवश्यं भाविभावानां प्रतीकारो यदा भवेत् । तदा दुःखैर्न युज्येरन्नलरामयुधिष्ठिराः ॥ " इत्याद्युक्तेः । इति भाव इत्याशयः । हे वीरेति । त्वं मृत्योर्भेतुं नार्हसि । यद्वा—नहि वीराः स्त्रीषु प्रहरंतीति भावः ॥ ३८ ॥ अत्र विषयेऽन्यदप्याह—किञ्चेति । तत्पालनं देहपालनम् । तदस्तीति देहांतराभवोस्तीति । अवश इति कर्मानुगत्वात् । यद्वाऽवशो भगवद्वशः । त्यजत इत्यार्षमात्मनेपदम् ॥ ३९ ॥ अत्र पूर्वदेहपरित्यागदेहांतरस्वीकारे । व्रजन् गच्छन्नित्यर्थः । अवष्टभ्य गृहीत्वा । अत्र च भूमिदृष्टांते च । नात्यंतभिन्नविषयौ एकस्या एव पृथिव्या विषयत्वात् । जलूकेति षष्ठस्वरमध्यपाठोपीति । आहितसंस्कारेण स्थापितसंस्कारेण तदेव श्रुतदृष्टं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाऽभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यां मनसाऽनुचिंतयन्प्रपद्यते तत्किमपि ह्यपस्मृतिः ॥ ४१ ॥ यतोयतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु ॥ गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥ ४२ ॥ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ॥ एवं स्वमायारचितेष्वसौ पुमान्गुणेषु रागानुगतो विमुह्यति ॥ ४३ ॥ तस्मान्न कस्यचिद्द्रोहमाचरेत्सतथाविधः ॥ आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयम् ॥ ४४ ॥

तृणांतरमवष्टभ्य पूर्वं तृणं त्यजति एवं कर्मपथे वर्तमानो जीवोपि ॥ ४० ॥ देहविषयावेव स्वीकारपरित्यागौ दर्शयितुं दृष्टांतांतरमाह । स्वप्न इति । दृष्टं राजादिदर्शनं श्रुतमिंद्रादिश्रवणं ताभ्यामाहितसंस्कारेण मनसा तदेवानुचिंतयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमप्यनिरुक्तं पश्यति क्षणांतरे च तदेवाहमिति प्रपद्यतेऽभिमन्यते ततश्च जाग्रद्देहादपगतस्मृतिर्भवति पुरुषो यथा तथेति । जाग्रत्येव तद्दर्शयितुं दृष्टांतांतरमाह । मनोरथेनेति । अत्रापि दृष्टश्रुताभ्यामित्यादि सर्वं योज्यम् । तथा च वक्ष्यति "जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः । जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः । स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ ॥" इत्यादि । तद्वदत्रापि कर्मवशाद्देहांतरं प्राप्य प्राक्तनं त्यजतीति ॥४१॥ ननु विचित्रदेहहेतूनां कर्मणां कृतत्वाद्देहविशेषप्राप्तौ किं कारणमत आह । यतोयत इति । देहस्य पंचत्वसमये पंचसु गुणेषु भूतेषु मायया नानादेहरूपेण रचितेषु दैवेन फलाभिमुखेन कर्मणा चोदितं प्रेरितं नानाविकारात्मकं मनो यतोयतो यंयं देहं देवतिर्यगादिरूपं प्रतिधावति धावच्च सत् यंयम् आप अभिनिवेशेन प्राप्तं तत्रतत्र असौ देही जायते । ननु मनसः कर्तृत्वात्तदेव जायतां न त्वकर्ताऽऽत्मेत्यत आह ।प्रपद्यमान इति । तदेवाहमिति मन्यमानस्तेन मनसा सह जायते।।४२।।ननु सत्यं भविष्यत्येव किमपि देहमात्रं तथाप्यस्यातिप्रियस्य राजदेहस्य रक्षणायाकृत्यमपि क्रियत इति चेत्तत्राह।ज्योतिरिति।अदश्चंद्रादिज्योतिः उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु प्रतिबिंबत्वेन स्थितं समीरस्य वायोर्वेगमनुगतं कंपादियुक्तं प्रतीयते यथा एवं स्वाविद्यारचितेषु गुणेषु देहेषु रागेणानुगतः प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति । आत्मनस्तावद्देहाद्यध्यासाज्जन्मोक्तं सह तेन जायत इति।ततश्चान्योन्यधर्माध्यासाद्यथा देहादिधर्माः कार्श्यादय आत्मनि प्रतीयंते एवमात्मधर्माः प्रेमास्पदत्वादयोपि देहादिष्विति राजसूकरदेहयोर्विशेषाभावाद्व्यर्थो मृत्युप्रतीकार इति भावः॥४३॥एवमुक्तं सामोपायमुपसंहरन्भेदमाह—तस्मादिति । परतोऽ

ततश्चाहमिति मननाच्च । तद्वदत्रापीति । स्वप्नमनोरथवन्मरणावस्थायामपीति । प्राक्तनं पूर्वम् ॥ ४० ॥ ४१ ॥ कर्मणा देहमात्रप्राप्तिरवश्यं भाविन्यपि देहविशेषाप्तिः कथमित्याशंकते—नन्वित्यादिना । तत्र कारणमाह—यत इत्यादिना । पंचत्वसमये मृत्युकाले । चोदितं प्रेरितम् । यंयं देहं तत्रतत्र तस्मिंस्तस्मिन्देहे । देही जीवः "यंयं वापि स्मरन्भावं त्यजत्यंते कलेवरम् । तंतमेवैति कौन्तेय" इत्यादिस्मृतेः । जीवस्य जननमयुक्तमित्याह—नन्वित्यादिना । तदेव मन एव । मनोध्यासेनात्मनो जन्मेति भावः ॥४२॥ उदकेन युक्ताः पार्थिवा उदकपार्थिवा घटदयस्तेषु तथा घटादीनामस्वच्छद्रव्यत्वात्प्रतिबिंबग्राहित्वं न संगच्छत इत्यरुच्याह—यद्वेति । एवं तद्वत् । अशोभने शोभनाध्यासो रागस्तेन उक्तार्थतात्पर्यमाह—अयं भाव इति । तावत्साकल्येन । ततश्चाध्यासाच्च । विशेषाभावाद्भेदाभावात् । प्रतीकारो निवृत्त्युपायः ॥ ४३ ॥ एवं पूर्वोक्तरीत्या । यस्मादात्मा कर्मफलभोक्ता

॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषा तवानुजा बाला कृपणा पुत्रिकोपमा ॥ हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ॥ ४५ ॥ श्रीशुक उवाच ॥ एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः ॥ न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ॥ ४६ ॥ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः ॥ प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४७ ॥ मृत्युर्बुद्धिमताऽपोह्यो यावद्बुद्धिबलोदयम् ॥ यद्यसौ न निवर्तेत नापराधोऽस्ति देहिनः ॥ ४८ ॥ प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमाम् ॥ सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ॥ ४९ ॥ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया ॥ उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ॥ ५० ॥

भिद्रुह्यमाणात् । तत्संबंधिनश्च यमादपि इहामुत्र च भयमिति भेदो दर्शितः॥ ४४॥ पुनः सामाऽऽह—एषेति । पुत्रिकोपमा दारुमयीव अचेतनप्रायेत्यर्थः ॥ ४५॥ बोध्यमानः उपदिश्यमानः।स्वयं दारुणः पुनः पुरुषादान्दैत्याननुसृत इति॥ ४६ ॥ आनकदुंदुभिरिति पदं महाभाग इत्यत्रोक्ताभिप्रायम् । प्रतिव्योढुं प्रतिकर्तुं वंचयितुमित्यर्थः॥ इदं वक्ष्यमाणमपत्यार्पणमन्वपद्यत ज्ञातवान् ॥ ४७ ॥ ननु खलोयमेतदपि न मन्येतेत्याशंक्य स्वस्मिन्नेवाह—मृत्युरिति ॥ ४८ ॥ तस्मादुपेक्षादोषपरिहारायैवं करिष्यामीत्याह । प्रदायेति। मृत्यवेऽस्मै कंसाय । नन्विदमपि नैव न्याय्यमित्याशंक्याह—सुता इति । अस्यां यदि सुता मे जायेरंस्तदा यद्भावि तद्भवतु जीवनं तु तावदस्या भवेदेव । तदंतरा यद्ययमेव म्रियेत तदा न किंचिदन्याय्यम् ॥ ४९ ॥ यदि च सुता भविष्यंति न चायं म्रियेत तदा मत्पुत्रादेवास्य मरणमिति विपर्ययो वा किं न स्यात् । ननु प्रौढस्य कंसस्य तव बालकात्कथं मृत्युः स्यात्तत्राह । गतिरिति । "अस्यास्त्वामष्टमो गर्भो हंता" इत्युक्तवतो धातुः । अत इदानीमपत्यार्पणप्रतिज्ञैव मंत्रः । तथा सति उपस्थितो

तस्मादिति । स आत्मा तथाविधः कर्मानुरूपदेहादिगृहीता । परतः परलोके वा भयं दुःखलक्षणम् । भेदस्तु ऐहिकपारलौकिकभयप्रदर्शने स्वीकृतहठान्निवर्त्तनम् । प्रत्युग्रे संस्तुतिसामैवोचितमिति पुनस्तदेवाह—एषेति । नवोढा कृपणा भयेन रोदनादिपरा पुत्रिकोपमा पुत्रीसमेति दयां जनयति । यद्वा—पुत्तलिकासदृशी अचेतना भद्राभद्रानभिज्ञा । इमामेनां कल्याणीं निरपराधां दीनवत्सल इति श्लेषेण दीनं मृतप्रायं वत्समेव लाति विप्रेभ्यो ददाति । यद्वा—दीनादपि वत्समपि लाति गृह्णातीति इमां त्वं हंतुं नार्हसि काकार्हस्येवेति निंदैव ॥ ४४ ॥ ४५ ॥ यज्ञादिकर्मकर्तृशुद्धकुरुवंशोद्भूतस्य तव तुल्यता तस्य नास्तीत्याह—हे कौरव्येति । पुरुषादाननुव्रतः तत्स्वभावमापन्नः ॥ ४६ ॥ तस्य कंसस्य निर्बंधं हठम् । "निर्बंधो हठमुक्तयोः" इति धरणिः । विचिंत्य इत्थमयं पापो बोधनीय इति विचार्य ॥ ४७ ॥ आर्यविमृष्टाप्यर्थो नार्यैर्नांगीक्रियत इत्याशंकते—नन्वित्यादिना । अयं कंसः । एतत् मद्विचारितम्। वक्ष्यमाणसुतार्पणादिना भार्यामोक्षणम्। स्वयमेव वसुदेव इत्यर्थः । प्राह मृत्युरित्यादिना । अपोह्यो निराकर्त्तव्यः । बुद्धिश्च बलं चोदयश्च ते बुद्धिबलोदयाः ज्ञानसामर्थ्यवैभवाः यावंतो बुद्धिबलोदयास्तावंतो मृत्युप्रतीकारा इति यावद्बुद्धिबलोदयम् । "यावदवधारणे" इत्यव्ययीभावः । असौ मृत्युः । बुद्धिवैभवादिसत्त्वेऽकार्येणापि मृत्युप्रतीकारः कार्योऽन्यथाऽपराधो दोषः स्यादिति । यद्वा—अकार्येणापि मृत्यावनिवृत्तेऽकार्यकरणलक्षणापराधो न भवति प्रतिकर्तुरिति भावः ॥ ४८ ॥ यतो मृत्यूपेक्षणे दोषस्तस्माद्धेतोः । उपेक्षा औदासीन्यम् । एवं वक्ष्यमाणप्रकारम् । अहो पुत्रप्रदानं मारकायान्याय्यमेवेति चेत्तत्राह—नन्विति । अन्याय्यम् अयुक्तम् ॥ ४९ ॥ विपर्ययो वैपरीत्यम् । विपर्ययोऽसंभव इत्याह—नन्विति । 'प्रौढो युवातिबलयोः' इति मेदिन्यादयः । तत्र बालकादपि प्रौढमरणे धातुर्गतेर्वैचित्र्यमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ॥ एवं हि जंतोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥ एवं विमृश्य तं पापं यावदात्मनिदर्शनम् ॥ पूजयामास वै शौरिर्बहुमानपुरःसरम् ॥ ५२ ॥ प्रसन्नवदनांभोजो नृशंसं निरपत्रपम् ॥ मनसा दूयमानेन प्रहसन्निदमब्रवीत् ॥ ५३ ॥ वसुदेव उवाच ॥ न ह्यस्यास्ते भयं सौम्य यद्वै साहाशरीरवाक् ॥ पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितम् ॥ ५४ ॥ श्रीशुक उवाच ॥ स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् ॥ वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहम् ॥ ५५ ॥ अथ काल उपावृत्ते देवकी सर्वदेवता ॥ पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥ ५६ ॥

मृत्युरयं तावन्निवर्तेत । निवृत्तः पुनः कालांतरे आपतेच्चेत्तदा नापराधो ममेत्यर्थः । अथ वाऽस्य मत्पुत्राद्उपस्थितो यो मृत्युरस्या वधान्निवर्तेत अन्यथा स्याच्चदा स पुनरनेन मम मंत्रेण निवृत्तोप्यापतेत् । भवेदेव तदिष्टमित्यर्थः । यद्वा गतिर्धातुर्दुरत्ययेत्येतस्यैव प्रपंच उपस्थित इति ॥ ५० ॥ प्राणिनामदृष्टं च पुनर्दुर्वितर्क्यमिति सदृष्टांतमाह । अग्नेरिति । वने वृक्षान्प्रदहन्वह्निः सन्निहितानपि वृक्षान्परित्यज्य कदाचिद्दूरस्थानपि दहति ग्रामे गृहान्वा न ह्यस्य प्राण्यदृष्टव्यतिरेकेण किंचिन्नियामकमस्ति यथा । एवं जंतोर्जन्ममरणयोरपि हेतुर्दुर्विभाव्योऽचिंत्यः अत एतदुपर्यस्या अदृष्टमेव हेतुरिति भावः ॥ ५१ ॥ यावदात्मनिदर्शनं स्वप्रज्ञावधि विचार्य ॥ ५२ ॥ तस्य विश्वासाय विकसितमुखांभोजः प्रहसन्नब्रवीत् ॥५३॥ यत् यथा अशरीरिणी वागाह तथा हि निश्चितम् । अस्याः सकाशात्ते भयं नास्ति । यतो येभ्यः पुत्रेभ्यस्ते भयमुत्थितम् । अष्टमो हंतेत्युक्तेरन्योन्यापेक्षया सर्वेप्यष्टमा भवेयुरिति सर्वानपि तानस्याः पुत्रान्समर्पयिष्ये ॥५४॥ तद्वाक्ये सारः उपपत्तिः तद्वित् निववृते निवृत्तः ॥५५॥ प्रसूतिकाले उपावृत्ते

धातुरीश्वरस्य दुरत्ययाऽतिक्रांतुमशक्या यतोऽतः कारणात् । तथा सति अपत्यार्पणप्रतिज्ञामंत्रे सति । उपस्थित इदानीमागतः । 'भक्षितेऽपि लशुने व्याधिर्नो नष्टः' इति न्यायेनापत्यार्पणेपि जीवति दुर्मतिकंसे कालांतरे मृत्युभयं तदवस्थमित्यस्वरसादाह—अथ वेति । अस्य कंसस्य । अस्या देवक्याः । न हि मंत्रौषधाद्यैः कालोऽतिक्रम्यतेऽतः किं मंत्रेणेत्यरुच्या ह—यद्वेति । प्रपंचः विस्तारेण कथनम् ॥ ९० ॥ नन्वदृष्टमेव जनिमृतिहेतुस्तच्च ज्ञातुं न शक्यमित्याह—प्राणिनामिति । अदृष्टं शुभाशुभं कर्म दुर्वितर्क्यं ज्ञातुमशक्यं दृष्टांतप्रपंचोग्नेरिति । सन्निहितान्निकटवर्त्तिनः । अस्य दहनस्य । नियामकं विनिगमकम् । एवं वृक्षादिवत् । जंतोः प्राणिमात्रस्य । दुर्विभाव्यः दुर्वितर्क्यः ॥ ९१ ॥ नृशंसं क्रूरम् "नृशंसो घातुकः क्रूरः" इत्यमरः । दूयमानेन तप्यमानेन । विहसन्निति बाह्यानंदमाह । महतां सत्यपि क्लेशे नो विकृतिः(क्रोधादिरूपा) इति भावः॥९२॥ ॥ ९३ ॥ यतो येषां पुत्राणां ते तव सकाशाद्भयं मृत्युरूपमागतं तानस्याः पुत्रान्समर्पयिष्ये श्रीकृष्णस्य तद्भयाभावात्तदसमर्पणेऽपि न वसुदेवस्य मिथ्यावादित्वं स्यादिति वास्तवोर्थः प्रतीयते । यद्वा—श्रीकृष्णस्य न कस्यापि पुत्रत्वमस्ति "न माता न पिता तस्य न भार्या न सुतादयः" इत्यग्रे वक्ष्यमाणत्वात् । यथाश्रुतेऽपि न दोषः । 'भगवान्देवकीसुतः' इत्युक्तिस्तु देवक्यां सुतवदाविर्भूतत्वादाविर्भावपरा । आविर्भावमेवाग्रे वक्ष्यति—"आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः" इति ॥ ९४ ॥ तद्वाक्ये वसुदेववाक्ये ॥ ९५ ॥ न हि तस्या एव भगवान्देवता तस्य सर्वेषां दैवतत्वादित्यरुच्याह—सर्वदेवमयीति । 'सर्वदेवमयो हरिः'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः ॥ अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ॥५७॥ किं दुःसहं नु साधूनां विदुषां किमपेक्षितम् ॥ किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनाम् ॥ ५८ ॥ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिम् ॥ कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत् ॥ ५९ ॥ प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयम् ॥ अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥६०॥ तथेति सुतमादाय ययावानकदुंदुभिः ॥ नाभ्यनंदत तद्वाक्यमसतोऽविजितात्मनः ॥ ६१ ॥ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः ॥ वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥ ६२ ॥ सर्वे वै देवताप्राया उभयोरपि भारत ॥ ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ॥ ६३ ॥

प्राते सर्वः सर्वात्मा भगवानेव देवता यस्याः सा तथा । सर्वदेवतामयीति वा भगवदाश्रयत्वात् ॥ ५६ ॥ ५७ ॥ मृत्यवे पुत्रं कथमर्पितवानित्यपेक्षायामाह—किं दुःसहमिति । साधूनां सत्यसंधानाम् । पुत्रलालनसुखापेक्षा कथं त्यक्तेत्यत आह—विदुषामिति । भगवानेव तत्त्वं नान्यदिति जानतामित्यर्थः । ननु स्वयं नीते सति कंसो बालं न हन्यादिति मत्वा नीतवानिति किं न स्यादिति नेत्याह—किमकार्यमिति ॥ ननु देवकी कथं पुत्रं तत्याजेत्यत आह—दुस्त्यजमिति । चित्ते धृत आत्मा हरिर्यैस्तेषाम् ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ कंसस्य शांतिर्देवकार्यानुगुणा न भवतीति नारदस्य प्रत्यवस्थानमासीत् । तदाह—नंदाद्या इत्यादित्रयेण ॥ ६२ ॥ उभयोर्वसुदेवनं

इत्युक्तेः सर्वदेवस्वरूपहरेस्तदंतर्निविष्टत्वात् ॥ कन्यां सुभद्राम् । अनुवत्सरं वत्सरेवत्सरे एकैकम् । अष्टसु वर्षेष्वित्यर्थः । प्रतिवर्षमिति वीप्सा तु न व्याख्येया एकैकस्मिन्वर्षेऽष्टपुत्रोत्पत्तिप्रसक्तेः । पुत्रसमसंख्यकन्योत्पत्तिप्रसक्तेश्च । ननु वसुदेवेनैतादृशपुत्रनाशदुःखेन गार्हस्थ्यं किन्न त्यक्तमिति चेत्तत्रेदं बोध्यम् । हरिर्मदात्मजो भावी तन्मुखदर्शनं मम भविष्यतीत्याशया न तत्याज किंचाष्टमपुत्रोत्पत्तिसमयो झटिति भवत्वित्यौत्क्यंठ्येनैव प्रतिवर्षमेकैको गर्भ आधीयते स्मेति भावः ॥ ५६ ॥ "द्वादशेऽहनि पिता नाम कुर्यात्" इति श्रुतेरजातेऽपि नामकरणे कीर्तिमदित्यादीनि तेषां भावीनि कल्पांतरीयाणि वा श्रीयोगिराजशुकदेवेनोक्तानीत्यदोषः । यद्वा—नामकर्मोत्तरं कंसाय ददावित्यर्थः । अतिविह्वलः अतिविक्लवः 'विक्लवो विह्वलः स्यात्तु' इत्यमरः । "वाचा विचालितं येन सुकृतं तेन हारितम्" इति स्मरणात् । "यदुक्त्वा विनिवर्तेत न तदास्यं गुदं हि तत् । इलेशे ह्यनुगः स्त्री स्याचटकेशेन भाषितम्" इत्यभियुक्तोक्तेश्च ॥ ५७ ॥ मारणाय पुत्रार्पणम् । "प्रजासवः प्राणभृतो हि ये ते" इति वक्ष्यमाणत्वादत्यसह्यमित्याशयेनाह—मृत्यवे कंसाय । "साधू रम्ये सज्जने च पुंसि सत्यपरे हरौ" इति धरणिदेवः । सत्यसंधानां सत्यप्रतिज्ञानाम् 'संधा संधिप्रतिज्ञयोः' इति धरणिः । तत्त्वं सत्यम् । अकार्यम् अकर्त्तव्यम् । कदर्याणां कुसंगिनां दरिद्राणां वा ॥ ५८ ॥ शौरेर्वसुदेवस्य तत्पुत्रार्पणरूपं समत्वं द्वंद्वसहिष्णुत्वं पुत्रे ममत्वाभावात् । इदं वक्ष्यमाणम् ॥ ५९ ॥ प्रतियातु स्वगृहमिति शेषः ॥ ६० ॥ असतः खलस्याविजितात्मनोऽव्यवस्थितचित्तस्य । तत् वाक्यम् । 'प्रतियातु कुमारोयम्' इत्यादिरूपम् । नाभ्यनंदत् सत्यं न मेने । "अव्यवस्थितचित्तानां प्रसादोऽपि भयंकरः" इत्यभियुक्तोक्तेः ॥ ६१ ॥ कंसे सुवृत्ते सति देवकार्यं न सेत्स्यतीत्याह—कंसस्येति । शांतिर्दयालुतादिरूपा चित्तवृत्तिः । अनुगुणाऽनुरूपा योग्येति यावत् । इति हेतोः । प्रत्यवस्थानं कंसपार्श्वे गमनम् । तदेवाह—त्रयेण नंदाद्या इत्यारभ्य वधोद्यममित्यंतश्लोकत्रयेणेत्यर्थः । अमीषां नंदादीनाम् । योषितो यशोदाद्याः ॥ ६२ ॥ केषांचित्कंसकंकादीनां दैत्यरूपत्वात्प्रायशब्दप्रयोगः । ते गोपा यदवश्च । उभयोर्यदुकुलगोपकुलयोः । ये चाक्रूराद्याः अनुव्रतास्तदनुसाराः कंसामंत्रणपक्षे भा ज्ञानं तत्रारत । भारतत्वादेवैतज्ज्ञानं तव नास्तीति भावः ॥ ६३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्कंसाय भगवाञ्छशंसाभ्येत्य नारदः ॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमम् ॥ ६४ ॥ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवकीगर्भसंभूतं विष्णुं च स्ववधं प्रति ॥ ६५ ॥ देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ॥ जातंजातमहन्पुत्रं तयोरजनशंकया ॥ ६६ ॥ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥ ६७ ॥ आत्मानमिह संजातं जानन्प्राग्विष्णुना हतम् ॥ महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ ६८ ॥ उग्रसेनं च पितरं यदुभोजांधकाधिपम् ॥ स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ॥ ६९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे श्रीकृष्णावतारोपक्रमे श्रीकृष्णजन्म हेतुनिरूपणं नाम प्रथमोऽध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ २ ॥ ते पीडिता निविविशुः कुरुपंचालकेकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ॥ ३ ॥ एके तमनुरुंधाना ज्ञातयः पर्युपासत ॥ हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ ४ ॥

दकुलयोः ॥ ६३ ॥ वधोद्यमं दैवतकृतमिति शेषः ॥ ६४ ॥ ६५ ॥ निगडैः शृंखलैः अजनो विष्णुस्तच्छंकया ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये कंसघाताय देवक्या गर्भगो हरिः । ब्रह्मादिभिः स्तुतः सा च सांत्वितेति निरूप्यते ॥ १ ॥ यदुभिः स व्यरुध्यतेत्युक्तं तमेव विरोधं प्रपंचयति त्वरया देवकीगर्भस्यान्यत्र संचारेण भगवतः प्रवेशं वक्तुम् प्रलंबेत्यादिसार्धश्लोकत्रयेण महाशनोघासुरः ॥ १ ॥ २ ॥ ३ ॥ अनुरुंधाना अनु

एतत् नंदाद्या इत्यादि यदुक्तम् । गोपकुलयदुकुलयोः । द्वेषोत्पत्त्या झटिति भगवदवतारेण कंसस्य मृत्युर्भविष्यतीति ज्ञानवत्त्वाद्भगवानिति ।"उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्।वेत्ति विद्यामविद्यांश्च स वाच्यो भगवानिति" इति लक्षणस्य तत्र सत्त्वादिति । 'चातकानां वामतो गतिः' इति वद्देवानामपि गतिर्वामैवातः प्रथमस्यैवाष्टमत्वमायाति । यद्वा–द्वितीयतो गणने प्रथमस्य तृतीयतो गणने द्वितीयस्यैवमग्रेपि गणनात्सर्वेषामष्टमत्वमायातीत्थं च शशंसेति संबंधः ॥ ६४ ॥ ऋषेर्नारदस्य । विनिर्गमे गमने सति । स्ववधं प्रति मत्वा च ॥ ६५ ॥ निगडैरंदुकैः 'अंदुको निगडोऽस्त्री स्यात्' इत्यमरः । निगृह्य निरुद्ध्य । अयमेव मत्संहर्ता विष्णुरिति शंकया । जातंजातमुत्पन्नमुत्पन्नम् । हतवान्न तु जन्मकाल एव । तथा सति नामकरणासंभवे कीर्तिमंतमित्युक्तेरसांगत्यं स्यादिति भावः । युग्मम् ॥ ६६ ॥ परप्राणैः स्वप्राणांस्तर्पयंति ये तेऽसुतृपः । राजानस्तु प्रायशो बाहुल्येन "मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद । सुजनानुत वा बंधून्न पश्यति ययांधदृक् ॥" इति वक्ष्यमाणत्वात् ॥ ६७ ॥ प्राक्पूर्वजन्मनि जानन् नारदोक्तेरिति शेषः । स कंसः ॥ ६८ ॥ चात्तत्संबंधिनोपि । स्वयं बुभुजे न केनचिदभिषिक्त इत्यर्थः ॥ ६९ ॥ इतिश्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे प्रथमोऽध्यायः ॥ १ ॥ गर्भगः तदंतः (चित्ते) प्रविष्टः "गर्भो भ्रूणे ध्वनौ धाष्टर्ये सेक्तारि ज्ञानबालयोः । मध्ये कुक्षौ हंतृसंध्योः पनसस्य च कंटके ॥ चित्ते गर्त्ते मुखे चापि" इति धरणिः । सा च देवकी च । सांत्विता निर्भया कृता इति (१) । त्वरया वेगेन । अन्यत्र रोहिण्याम् । संचारेण प्रापणेन । सार्द्धश्लोकत्रयेण प्रलंबेत्यारभ्य पर्युपासत इत्यंतेन ॥१॥ २ ॥ ते यदवः । निविविशुः निवेशं चक्रुः । परस्मैपदमार्षम् "नोर्विशः" इत्यात्मनेपदे प्राप्ते ॥ ३ ॥ एकेऽक्रूरादयः । तं कंसम् । औग्रसेनिना कंसेन ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते ॥ गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥५॥ भगवानपि विश्वात्मा विदित्वा कंसजं भयम् ॥ यदूनां निजना थानां योगमायां समादिशत् ॥ ६ ॥ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतम् ॥ रोहिणी वसुदेवस्य भार्याऽऽस्ते नंदगोकुले ॥ अन्याश्च कंससं विग्ना विवरेषु वसंति हि ॥ ७ ॥ देवक्या जठरे गर्भं शेषाख्यं धाम मामकम् ॥ तत्संनिकृष्य रोहिण्या उदरे सन्निवेशय ॥ ८ ॥ अथाऽहमंशभागेन देवक्याः पुत्रतां शुभे ॥ प्राप्स्यामि त्वं यशोदायां नंदपत्न्यां भविष्यसि ॥ ९ ॥

वर्तमानाः ॥ ४ ॥ धाम कला तदेव सप्तमो गर्भो बभूव । किं तद्धामेत्यत आह—यमनंतमिति । हर्षशोकविवर्धनः । आनंदरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारणदृष्टया च शोक इति ॥ ५ ॥ ६ ॥ ७ ॥ ननु सा गोकुले किमित्यास्ते अत आह—अन्याश्चेति । न केवलं सैव अन्या अपीति । विवरेषु अलक्ष्यस्थानेषु । जठरे संतम् । ननु गर्भं आकृष्यमाणः कथं जीवेदत आह—मामकं धामेति । तत्तः ॥ ८ ॥ किमर्थमेवं कार्यमित्यत आह—अथेति । अनंतरमेवेत्यर्थः । अंशभागेनेति । अंशैः शक्तिभिर्भजतेऽ धितिष्ठति सर्वान्ब्रह्मादिस्तंबपर्यंतानित्यंशभागस्तेन परिपूर्णेन रूपेणेत्यर्थः । यद्वा अंशैर्ज्ञानैश्वर्यबलादिभिर्भाजयति योजयति स्वीयानिति यथा तेनेति । यद्वा अंशेन पुरुषरूपेण मायाया भागो भजनमीक्षणं यस्य तेन । यद्वा अंशेन मायया गुणावतारादिरूपा भागा भेदा यस्य तेन । यद्वा अंशा एव मत्स्यकूर्मादिरूपा भजनीया न तु साक्षात्स्वरूपं

कला अंशः । शयनीयत्वाद्वा धामेति ॥ ५ ॥ निज आत्मैव नाथो येषां ते तथा तेषाम् ॥ ६ ॥ नंदगोकुले बृहद्वनाख्ये ॥ ७ ॥ मम धामत्वेन तस्याविनाशित्वमेवेत्याह—मामकं धामेति ‘भवानेकश्शिष्यते शेषसंज्ञः’ इत्यग्रे वक्ष्यमाणत्वात् । ततो गर्भात् । ननु शुद्धस्वरूपायां भगवत्प्रकाशिकायां महाशक्तौ देवकीदेव्यां प्राकृतानां षड्गर्भाणां कथं प्रवेशस्सत्यं शुद्धस्वरूपे श्रीभगवति समष्टिव्यष्टीनां प्रविष्टत्वेऽपि यथा न तद्योगस्तथैव देवक्यामपि षड्गर्भाणामित्यर्थः । तदुक्तम् ‘मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्’’ इति । किन्तु जनेषु भक्तिपरिपाटीप्रदर्शनार्थैवेयं लीलेत्यवगम्यते । तथाहि भक्तजने श्रवणकीर्तनादिरूपा भक्तिस्तिष्ठति तद्गर्भ एव तदानुषंगिकफलभूतत्वात् षड्विषयभोगाश्च तिष्ठंति हत एतैरेव संसारांधकूपे पतिष्यामीति । ततः प्रकटीभूताद्भयात्कालेन ते निवर्त्तंते च ततो भगवद्यशः श्रवणकीर्त्तनपरिचर्यादिमयी भक्तिरतिप्रवृद्धा भवति तस्यां च भगवान्रूपगुणमहोदधिः प्रादुर्भवति भक्तेर्भगवत्प्रकाशकशुद्धसत्त्वस्वरूपत्वात् ‘‘भक्तिरेवैनं दर्शयति’’ इति श्रुतेः । एवमेव ‘मरीचिर्मनसोऽभवत् ’ इति श्रवणान्मरीचेर्मनोऽवतारत्वं तत्पुत्राणां षण्णां षड्विषयावतारत्वं देवक्या भगवत्प्रादुर्भावकत्वाद्भक्त्यवतारत्वं ‘भयात्कंसः’ इत्युक्तेर्भयमयत्वेन कंसस्य भयावतारत्वम् अतो भक्तिगर्भगतानां षड्विषयाणां संसारभयमेव निवर्त्तकं तथैव षड्गर्भाणां कंसो हंता विषयनिवृत्तौ सत्यां यथा भक्तिगर्भे भगवद्यशः परिचर्यादिमयी प्रेमभक्तिरेव भवेत्तथैव देवक्यां षड्गर्भनिवृत्त्यनंतरं सप्तमो गर्भो भगवद्यशोनिवासशय्यासनच्छत्रादिरूपोऽनंतः ततः प्रेमभक्त्याविर्भावानंतरं यथा भगवत्साक्षात्कारो भक्तेरष्टमो गर्भस्तथैव ‘देवक्याश्चाष्टमो गर्भो भगवान्’ इति तत्त्वमत्र द्रष्टव्यमिति विश्वनाथः ॥८॥ एवं गर्भसंकर्षणमित्यर्थः । अथेत्यव्ययस्य मंगलादिरूपबह्वर्थकत्वादनंतरार्थमेवात्र ग्राह्यमित्याह—अनंतरमेवेति । पूर्वव्याख्याने शक्तिभिरित्युक्तेः काः शक्तय इति जिज्ञासोत्पत्तेर्ब्रह्मादिषु कथंचिच्छक्तिदर्शनेऽपि स्तंबादिषु तददर्शनाच्चास्वरसप्रतीतेः पुनराह—यद्वेति । इहापि स्वीयानित्युक्तेः पक्षपातित्वेन वैषम्यनैर्घृण्ययोः प्रतीतेररुच्या पुनराह—यद्वेति । इहापि पुरुषरूपेणेत्युक्तेर्जीवस्यापि “ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ” इति श्रीमुखोक्तेः । पुरुषरूपत्वेन मायाभागित्वं स्यात् । किञ्च भागशब्दस्येक्षणार्थे वृत्तेरदर्शनादप्यस्वरसप्रतीतेः पुनराह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीम् ॥ धूपोपहारबलिभिः सर्वकामवरप्रदाम् ॥ १० ॥ नामधेयानि कुर्वंति स्थानानि च नरा भुवि ॥ दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥ ११ ॥ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च ॥ माया नारायणीशानी शारदेत्यंबिकेति च ॥ ॥ १२ ॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि ॥ रामेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥ १३ ॥

यस्य तेन । यद्वा अंशैर्ज्ञानबलादिभिर्भजनमनुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विवक्षितम् "कृष्णस्तु भगवान्स्वयम्" इत्युक्तत्वादिति । तां प्रोत्साहयति त्वं यशोदायामिति त्र्यक्षरोनसार्धचतुष्टयेन ॥ ९ ॥ सर्वान्पुत्रादीन्कामयंते ये तेषां वरामीश्वरीं श्रेष्ठां नियंत्रीमर्चकानां सर्वान्कामवरान्प्रददाति या ताम् ॥ १० ॥ ११ ॥ १२ ॥ त्वद्विक्रमेण च तस्य व्यपदेशा भविष्यंतीत्याह—गर्भसंकर्षणादित्यादिना । रामेति च संबोधनं करिष्यंति । त्वया संकृष्टेन तेन लोकस्य रमणाद्रत्युत्पादनात् ॥ १३ ॥

यद्वेति । इहापि मायासंबंधप्रतीतेर्मायिकत्वमायाति तादृशस्य तु न सर्वथा परिपूर्णत्वं सेत्स्यतीत्यरुच्या पुनराह—यद्वेति । न तु साक्षात्स्वरूपम् । ". यतो वाचो निवर्त्तंते " इत्यादिश्रुतेर्वाङ्मनसाऽगोचरत्वात् । तेन निर्गुणं स्वरूपं लभ्यते तत्र चांशादिकल्पनमप्ययुक्तमयोग्यत्वात् योग्य एव पृथिव्यादावंश्यंशादिकल्पना दृश्यते नायोग्ये वियदादाविति अतोऽयमर्थोऽपि न तोषकर इत्यरुच्या पुनराह—यद्वेति । इह भक्तेष्वित्युक्तेऽपि राग द्वेषादयस्तत्र नैवोह्याः कल्पवृक्षादिवदिति । सर्वथा सर्वप्रकारेण । तां योगमायाम् । प्रोत्साहयति सोत्साहां करोति—त्वमित्यारभ्योच्छ्रयादित्यंतेन सार्द्धचतुष्कश्लोकेन ॥ ९ ॥ नियंत्रीं प्रेरिकां स्वामिनीमिति यावत् ॥ १० ॥ नामधेयानि नामानि । दुःखेन गम्यते प्राप्यत इति दुर्गा । भद्रं कल्याणं कलयति सृजति भक्तानामिति भद्रकाली । यद्वा—भद्रा मंगलरूपा चासौ काली नीलरूपेति भद्रकाली । विजयते सर्वदुःखानि सर्वदुष्टदैत्यान्वेति विजया । विष्णोरियं शक्तिर्वैष्णवी ॥ ११ ॥ कौ भूमौ मुद्धर्षोऽनयेति कुमुदा । शत्रुषु चंडति कोपं करोतीति चंडिका । ' चंडिकोपे ' । सदानंदरूपत्वात्कृष्णा कृष्णभगिनीत्वाद्वा । ' अदृश्यतानुजा विष्णोः ' इति वक्ष्यमाणत्वात् । " नंदगोपगृहे जाता यशोदागर्भसंभवा " इति मार्कंडेयाच्च कृष्णवर्णत्वाद्वा कृष्णेति । मधुवंशे जातत्वान्माधवी मधोर्भगवतो भगिनीत्वेन दयितत्वाद्वा माधवी । कं सुखं नयति प्रापयति दुष्टदैत्य नाशनेन सर्वं जगदिति कन्या ' जगत्स्वास्थ्यमतीवाप ' इति मार्कंडेयोक्तेः । ' णीञ्–प्रापणे ' अतः कः । यद्वा—कनति तत्तद्रूपेण द्योतसे सर्वत्रेति कन्या ' कनी—दीप्तौ ' कन्यैव कन्यका । स्वार्थे कप्रत्ययः । ' मायः पीतांबरेऽपि स्यात् ' इति कोशान्मायस्येयं माया । मीयते कार्यान्यथानुपपत्त्या ज्ञायते इति माया । अघटनघटनापटीयसी भगवच्छक्तिः । तद्रूपा नारस्य जनसमुदायस्यायनं प्रवृत्तिर्यया सा नारायणी " जलायना नराधारा समुद्रशयनाऽपि वा । नारायणी समाख्याता नरनारीप्रवर्त्तिका ॥ " इति देवीपुराणोक्तरीत्या नारायणीपदं व्याख्येयम् । ईष्टे इतीशाना । सर्वेश्वरी सर्वदेवस्तुत्यत्वात् । तथात्वम् 'शक्रादयः सुरगणाः' इत्यादिना ' देव्या हते तत्र महासुरेन्द्रे ' इत्यादिना च मार्कंडेये स्फुटतरम् । शीर्यते ज्ञानेनेति शारः संसारः । ' शॄ—हिंसायाम् ' तं द्यति खंडयतीति शारदा ' सैषा प्रसन्ना वरदा नृणां भवति मुक्तये । सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ " इत्युक्तेः । " या मुक्तिहेतुरविचिन्त्यमहाव्रता च " इत्याद्युक्तेश्च । यद्वा—शरणं शारो हिंसा तं ददाति महिषादिदैत्येभ्य इति शारदा । शरद्वती पूज्यत्वाद्वा शारदा । ' शरत्काले महापूजा क्रियते या च ' इति मार्कंडेयोक्तेः । अम्ब्यते शब्द्यते दुःखे या सा अम्बा ' अबि—शब्दने ' यद्वा—अम्ब्यते स्नेहेनोपगम्यते या सा ' अबि—गतौ ' " अकर्त्तरि च कारके संज्ञायाम् " इत्युभयत्रापि स्त्रियां घञ् ततष्टाप् स्वार्थिके आम्बिकेति ॥ १२ ॥ तत्पुरुषार्थोत्कर्षमाह—त्वदिति । तस्याकृष्टगर्भस्य । व्यपदिश्यत उच्चार्यतेऽर्थादाहूयते यैस्ते व्यपदेशा नामानि । रत्युत्पादनात्प्रीत्युत्पादनात् । बलवतामुच्छ्रयात् उन्नतत्वात् । तम् आकृष्टगर्भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ संदिष्टैवं भगवता तथेत्योमिति तद्वचः ॥ प्रतिगृह्य परिक्रम्य गां गता तत्तथाऽकरोत् ॥ १४ ॥ गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ॥ अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः ॥ १५ ॥ भगवानपि विश्वात्मा भक्तानामभयंकरः ॥ आविवेशांशभागेन मन आनक दुंदुभेः ॥ १६ ॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः ॥ दुरासदोऽतिदुर्धर्षो भूतानां संबभूव ह ॥ १७ ॥ ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी ॥ दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनंदकरं मनस्तः ॥ १८ ॥

तथेति पुनरप्योमित्यादरेण प्रतिगृह्य गां पृथ्वीम् ॥ १४ ॥ विस्रंसितो विभ्रष्टो विस्रस्त इत्यर्थः । इति विचुक्रुशुर्न तु तद्विदुरित्यर्थः ॥ १५ ॥ मन आविवेश मनस्याविर्बभूव । जीवानामिव न धातुसंबंध इत्यर्थः ॥ १६ ॥ धाम श्रीमूर्तिम् ॥ १७ ॥ जगन्मंगलं जगतो मूर्तिमन्मंगलम् । अच्युतांशमच्युताच्युतिरहिता अंशा ऐश्वर्यादयो यस्य तम् । यद्वा अच्युतस्यांश इव अंशः भक्तानामनुग्रहार्थं परिच्छिन्नवपुरित्यर्थः । सम्यग्भूतमेवाहितं वैधदीक्षयाऽर्पितं देवी द्योतमाना शुद्धसत्त्वेत्यर्थः । सर्वात्मकं सर्वस्यात्मानम् । अत एवात्मभूतं स्वस्मिन्नादावेव संतम् । मनस्तो मनसैव दधार धारणया धृतवती । अत्रानुरूपं दृष्टांतमाह । यथा काष्ठा प्राची दिगानंदकरं

जं प्राहुः वदिष्यंति । " वर्तमानसामीप्ये वर्त्तमानवद्वा " इति लट् । ॥ १३ ॥ एवं पूर्वोक्तरीत्या संदिष्टाज्ञप्ता । तथेति यथोक्तं श्रीमता तथा करोमीत्यर्थः । पुनरपि ओमित्यादरेण प्रतिगृह्य ' ओमित्यंगीकारे ब्रह्मणि च ' गां भूमिम् " दिग्दृष्टिदीधितिस्वर्गवज्रबाग्वाणिवारिषु । भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः ॥ " इत्यनेकार्थध्वनिमंजर्याम् ॥ १४ ॥ विस्रस्त इत्यर्थः । कंसेनैव केनचिन्मंत्रौषधाद्युपायेन श्रावित इत्यर्थः । विचुक्रुशुः देवक्यां स्नेहवत्तया विलेपुः । इत्यर्थ इति । योगमायाकृत्यस्य देवैरपि दुर्विज्ञेयत्वादित्यर्थः । योगमायैव योगनिद्रा निद्रावत्सकलबोधहरणात् । तया प्रकर्षेण नीते देवक्या दुःखादिकं रोहिण्याश्च विस्मयादिकं गोकुलवासिनां च तज्ज्ञानादिकं किमपि नाभूदिति द्योतितम्। किञ्च हरिवंशाद्यनुसारेणात्र ज्ञेयं प्रागेव वसुदेवाहितगर्भायाः श्रीरोहिण्याः पश्चाद्गोकुलं गतायाः सप्तमे मासि तं गर्भमपसार्य देवकीजठरात्सप्तमासिकं गर्भमलक्षितमाकृष्य रोहिण्युदरे नीत इति ॥ १५ ॥ इत्यर्थ इति । धातुसंबंधे हि जीवत्वं दुर्वारं तथाऽजत्वव्याघातश्च स्यादित्यर्थः ॥ १६ ॥ श्रीमूर्त्ति पुरुषाकारीभूतं तेज इत्यर्थः । दुरासदः प्राणिभिरासन्नीभवितुमशक्यः । दुर्द्धर्षः कंसादिभिरभिभवितुमशक्यः । पौरुषं धाम पुरुषोत्तमस्य प्रभावं दधानः । स्वस्मिन्प्रादुर्भूतं कृष्णं पश्यन्तीत्यर्थः । " धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः " इति विश्वः ॥ १७ ॥ जगतो मूर्त्तिमन्मंगलम् । जगद्रिरक्षया मंगलेन मंगलानां च मंगलमित्युक्तदिशा परममंगलेन श्रीभगवता मूर्त्तिर्धृतेत्यर्थः । अपरिच्छिन्नैश्वर्यस्य परिच्छिन्नमनसा धारणमशक्यमित्यस्वारस्येन पुनराह—यद्वेति । इत्यर्थः इति परिच्छिन्न इव वपुर्न तु परिच्छिन्नो जीवत्वापत्तेरित्यर्थः । सम्यग्भूतमेव न किञ्चित्तारतम्याद्यं वैधदीक्षयार्पितं ध्यानमात्रेणैव देवकीचित्ते वसुदेवेन चेतसा प्रापितमित्यर्थः । वैधदीक्षा तु कुलार्णवतंत्रे दीक्षाकथनप्रकृते कथिता । तथा हि—"स्पर्शदीक्षा वैधदीक्षा दृग्दीक्षा चेति भेदतः । दीक्षा तु त्रिविधा प्रोक्ता पार्वत्यै शंकरेण वै ॥ यथा पक्षी स्वपक्षाभ्यां शिशून्संवर्द्धयेच्छनैः । स्पर्शदीक्षोपदेशस्तु तादृशः कथितः प्रिये ॥ यथा कूर्मः स्वतनयान् ध्यानमात्रेण पोषयेत् । वैधदीक्षोपदेशस्तु मनसः स्यात्तथाविधः ॥ स्वापत्यानि यथा मत्स्यो वीक्षणेनैव पोषयेत् । दृग्दीक्षाया उपदेशस्तादृशः कथितः शिवे ॥ " इति । शुद्धसत्त्वेत्यर्थः । देवीपदस्य क्रीडमानेत्याद्यर्थो मा भूदित्यर्थः । अत एव सर्वात्मकत्वादेव । यद्वात्मनैव भूतं स्वयमाविर्भूतं न तु योगिवद्यत्नेन मनस्यानीतं तेन जीववज्जननीजठरसंबंधो वारित इति । धारणया ध्यानेनेत्यर्थः । मनस्त इति । तृतीयार्थे तसिः । अत्र धारणेऽनुरूपं योग्यम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे ॥ भोजेंद्रगेहेऽग्निशिखेव रुद्धा सरस्वती ज्ञानखले यथा सती ॥ १९ ॥ तां वीक्ष्य कंसः प्रभया जितांतरां विरोचयंतीं भवनं शुचिस्मिताम् ॥ आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥ २० ॥ किमद्य तास्मिन्करणीय माशु मे यदर्थतंत्रो न विहंति विक्रमम् ॥ स्त्रियाः स्वसुर्गुरुमत्या वधोयं यशः श्रियं हंत्यनुकालमायुः ॥ २१ ॥

चंद्रमिति ॥ १८ ॥ सर्वजगन्निवासस्य श्रीहरेर्निवासभूता सत्यपि नितरां सर्वजनाह्लादकतया न रेजे किं तु स्वयमेवानंदमन्वभवत् । यतः कंसस्य गृहे रुद्धाऽन्यैर्न दृश्यते । घटादिषु रुद्धाऽग्निशिखा दीपकलिकेव तथा सती शोभमाना सरस्वती ज्ञानखले ज्ञानवंचके रुद्धा यथाऽन्येषामनुपकारिणी न राजते तद्वत् ॥ १९ ॥ प्रभया भवनं विरोचयंतीम् । अजितोंतरा कुक्षिमध्ये यस्यास्ताम् । एष विरोचमानो ध्रुवं हरिरेव यद्यस्मादीदृशीयं पुरा पूर्वं नासीत् ॥ २० ॥ ननु संति सामादय उपायाः नेति स्वयमेवाह । अयमर्थतंत्रो देवकार्यप्रधानो विक्रमं न विहंति । मद्वधे पराक्रमं करिष्यत्येवेत्यर्थः । यद्वा तर्हीदानीमेवेयं हन्यतामिति विचिंत्याह । अर्थतंत्रोऽपि पुमान्स्वं विक्रमं न

आनंदोऽमृतं यद्रूपाः करा रश्मयो यस्य तम् । काष्ठा प्राची यथा स्वतस्सिद्धं चंद्रमाकाशे दधाति तथा हृदयाकाशे “ स्वतस्सिद्धं सर्वभूतांतरात्मा ” इत्यादिश्रुतेर्दधारेत्यर्थः । चंद्रपक्षे तु अंधकारनाशकत्वेन जगन्मंगलम् । अच्युतांशं पूर्णकलम् । शूरः सूर्यस्तस्य सुतः । सुषुम्नाख्यो रश्मिस्तेन समाहितं निष्पादितम् । अमायां सूर्यलीनश्चंद्रस्तस्य सुषुम्नाख्यरश्मिनाभिव्यज्यत इति शास्त्रांतरप्रसिद्धेः । सर्वासामौषधीनामंकुरजनकत्वात्सर्वात्मकम् । आत्मनो मनसोऽभिमानित्वादात्मभूतमिति योज्यम् ॥ १८ ॥ सर्वजगदाह्लादकतया निखिलविश्वानंदजनकत्वेन न रेजे न शुशुभे । स्वयमेवैकाकिन्येव । ज्ञानवंचकेऽधीत्यापि शास्त्रमनध्यापकेन्येषां तद्विद्वानामनुपकारिणी अदत्ता सती न कस्यापि पठनपाठनजन्यपुण्योत्पात्तिं करोतीत्यर्थः । यद्वा—ज्ञानेन शास्त्रीयोपदेशेन लोकान्धर्मे प्रवर्त्तयन्नपि स्वोपकारार्थं स्वयं स्वप्नेऽपि धर्मवार्त्तामपि यो न करोति सोऽपि ज्ञानवंचकस्तस्मिन्यथाशास्त्रं न शोभते तद्वदिति । यद्वा—ज्ञानवंचको दांभिकस्तत्र यथा सरस्वती न शोभते दांभिककथितं न कोपि सत्यं मनुते वंचकत्वात्तस्य । किञ्च यथाग्निशिखा प्रबला सती रोधकगृहं दहति तथा देवक्यपि कंसस्यैश्वर्यं धक्ष्यतीत्यर्थः । यथा च सती सरस्वती पापातिशयेन स्वरोधकं कालेन नाशयति तथैव देवकी कंसमिति भावः ॥ १९ ॥ प्रभया स्वदेहकांत्या । भवनं गृहम् । अजितो विष्णुरंतरा कुक्षिमध्ये कुष्यते निष्कृष्यते विचार्यते शुभाशुभमनेनेति कुक्षि मनस्तन्मध्येऽन्यथा मनस्त इत्युक्तिविरोधस्स्यादिति । कंसदृष्ट्या यथाश्रुतमेवास्तु । शुचि स्वाभाविकमानंदोत्थं न तु पूर्ववत्सकपटं स्मितं यस्यास्ताम् ॥ २० ॥ अधुना किं कार्यमिति चेत्तत्राह—नन्विति । आदिशब्दात् दानभेददंडा ज्ञेयाः । स्वयमेव कंसः । अयं गर्भगो हरिः । अथ चोपायेषु दंडस्य कार्यसिद्धिकरत्वेऽप्यनर्थहेतुत्वमाह—यद्वेति । इयं देवकी । इदानीमेवाधुनैव । न नाशयति रक्षत्येवेत्यर्थः । तन्नाशो विक्रमनाशः । स्यादिति भाव इत्यस्य तात्पर्यमाह । स्वार्थपरोऽपि लोको विक्रमं न विहंति संप्रत्यस्या वधेन मम वीरत्वव्यंजको विक्रमो नंक्ष्यत्येवास्यां जीवंत्यां ततो जातप्रवृद्धतरुणीभूतेनास्या बालेन सह युद्धे जये पराजये वा समविक्रमः स्थास्यत्येव सगर्भस्त्रीवधे तु को विक्रम इति भावः । न केवलं विक्रमहानिरेव धर्मादिहानिर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एष जीवन्खलु संपरेतो वर्तेत योऽत्यंतनृशंसितेन ॥ देहे मृते तं मनुजाः शपंति गंता तमोंऽधं तनुमानिनो ध्रुवम् ॥२२॥ इति घोरतमाद्भावात्सं निवृत्तः स्वयं प्रभुः ॥ आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबंधकृत् ॥ २३ ॥ आसीनः संविशंस्तिष्ठन्भुंजानः पर्यटन्महीम् ॥ चिंतयानो हृषीकेशमप श्यत्तन्मयं जगत् ॥ २४ ॥ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः ॥ देवैः सानुचरैः साकं गीर्भिर्वृषणमैडयन् ॥ २५ ॥ देवा ऊचुः ॥ सत्य व्रतं सत्यपरं त्रिसत्यं सत्त्यस्य योनिं निहितं च सत्ये ॥ सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥ २६ ॥

विहंति न नाशयति स्त्रीवधे तन्नाशः स्यादिति भावः । तदेवाह । स्त्रिया इति । गुरुमत्या गुर्विण्याः ॥ २१ ॥ किं च । स एष जीवन्नपि मृतः स्यात् । नृशंसितेन क्रौर्येण यो वर्तेत तं जीवंतमेव मनुजाः शपंति दुर्वाक्यैर्धिक्कुर्वंति स च देहे मृते तनुमानिनः पापिनो नरस्य नरकं गच्छति । अथवा शापप्रकारमेवाह । तनुमानिनोऽस्य देहे मृतेऽयं ध्रुवमंधं तमो गमिष्यतीति ॥ २२ ॥ २३ ॥ संविशन् शयानः ॥ २४ ॥ रम्याभिर्गीर्भिर्वृषणं कामवर्षिणमैडयंस्तुष्टुवुः ॥ २५ ॥ प्रतिश्रुतं सत्यं कृतमिति हृष्टाः संतः सत्यत्वेनैव प्रथमं स्तुवंति । सत्यव्रतमिति । सत्यं व्रतं संकल्पो यस्य तम् । सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिंस्तम् । त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानंतरं च स्थिति समये च सत्यमव्यभिचारेण वर्तमानम् । तदेवाहुः । सत्त्यस्य योनिमिति सच्छब्देन पृथिव्यप्तेजांसि । त्यच्छब्देन वाय्वाकाशौ । एवं सच्च त्यच्च सत्यं भूतपंचकम् । "तत्सत्य

पत्याह—स्त्रिया इति । प्रथमं स्त्रीवध एव महत्पापं तत्रापि स्वसा सापि सगर्भेति सर्वथा धर्मादिहानिरेवेति । गुर्विण्याः "आपन्नसत्त्वा स्याद्गुर्विण्यंतर्वत्नी च गर्भिणी" इत्यमरः ॥ २१ ॥ अत्र लोके क्रूरकर्मणामपि श्र्यायुरादयो यद्यपि संति तथापि ते सतां न श्लाघ्या इत्याह—किञ्चेति । धिक्कुर्वंति निंदान्ति धिक्कारमाह—स चेति । स च धिक्कार ईदृश इत्याह—देह इति । शपंतीत्यस्य धिक्कुर्वंतीत्यर्थकल्पनातः प्रसिद्धार्थ एव वर इत्याह—अथवेति । तनुमानिनः प्राणिहिंसया स्वतनुं मानयतो लालयतोऽस्य जनस्य । अयं तनुमानी ध्रुवमतिशयेन यदंधं तमो नरकस्तद्गंता गमिष्यतीति मनुजाः शपंति (निन्दन्ति) इत्यन्वयः ॥२२॥ इति पूर्वोक्तविचारेण । घोरभावः सामान्यस्त्रीहिंसा घोरतरभावो भगिनीहिंसा घोरतमस्तु सगर्भायास्तस्या हिंसा इति भावात्कर्मणः "भावो लीला क्रिया चेष्टा भावः सत्ता भवोऽपि च । भावो भक्तिः समाख्याता पदार्थो भाव उच्यते" इति हलायुधः । स्वयं प्रभुः स्वयमेव स्वीकृतराज्यत्वात् । 'उग्रसेनं च पितरम्' इत्याद्युक्तेः । ज्ञानित्वाभिमानित्वाद्वा स्वयं प्रभुः । तज्जन्माष्टमगर्भजन्म । प्रतीक्षन् कदोत्पत्स्यत इति मृशन् । वैरं विरोधस्तदनुबंधस्तदा धिक्यं तं करोतीति तथा निरंतरवैरकृदित्यर्थः ॥ २३ ॥ वैरानुबंधजनितभयेन कंसस्य चित्तावेशमाह—आसीन आसने स्थितः तिष्ठन्कुत्रचित्स्थित उत्थितो वा । पर्यटन् इतस्ततो विचरन् । हृषीकेशं सर्वेन्द्रियप्रवर्त्तकं सर्वेन्द्रियग्राह्यविषये तमेव ददर्शेत्यर्थः । तन्मयत्वदर्शनं तु प्रेम्णा सदा परमानंदजनकं भयेन तत्कालं परमदुःखजनकमिति भक्तवैरिणोर्भेदः ॥ २४ ॥ तत्र कंसकारागारे । एत्य प्राप्य । ब्रह्मा भवः सा च पृथिवी देवैः ऐडयन् इति संबंधः । अन्यथा बहुत्वासिद्धेः । अनुचरंतीत्यनुचरास्तैर्देवविशेषणमिदम् । गीर्भिरिति पूर्वं व्याख्यातमेव । ईडेः प्रयोजकणिजंताल्लङ् स कर्मकत्वात्प्रयोज्यकर्त्तरि तृतीया देवैरिति ॥ २५ ॥ प्रतिश्रुतं भूभरनिवृत्तये वसुदेवगृहे भविष्यामीत्येवंरूपम् । तदेव त्रिकालावस्थायित्वमेव । "तत्" इत्यादिश्रुतेरर्थमाह—तत् भूतपञ्चकं सत्यं सत्यशब्दवाच्यमित्याचक्षते वदंतीत्यर्थः । तस्य भूतपञ्चकस्य । अनेन भूतपंचकोत्पादक त्वेन । तस्मिन्नेव भूतपंचके एव । अनेन भूतपंचकांतर्यामित्वेन । तस्यैव भूतपञ्चकस्यैव । पारमार्थिकं यथार्थम् । तन्नाशे भूतपंचकनाशे । अनेनावशिष्यमाणत्वेन । इति यावत् इति सिद्धांतः । एवं पूर्वोक्तप्रकारेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकायनोऽसौ द्विफल स्त्रिमूलश्चतूरसः पंचविधः षडात्मा ॥ सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः ॥ २७ ॥

मित्याचक्षते" इति श्रुतेः । तस्य योनिं कारणम् । अनेन पूर्वं वर्तमानतोक्ता । तथा सत्ये तस्मिन्नेव निहितमंतर्यामितया स्थितम् । अनेन स्थितिसमयेऽपि सत्यत्वमुक्तम् । तथा सत्यस्य सत्यं तस्यैव सत्यस्य सत्यं पारमार्थिकं तन्नाशेऽप्यवशिष्यमाणरूपम् । अनेन प्रलयेष्ववधित्वेन सत्यत्वं दर्शितम् । एवं त्रिसत्यत्वमुपपादितम् । तथा ऋतसत्य नेत्रम् ऋतं सूनृता वाणी सत्यं समदर्शनं तथा भगवता व्याख्यास्यमानत्वात् । "सत्यं च समदर्शनम् । ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ॥" इति । तयोर्नेत्रं नयनसाधनं नेतारं प्रवर्तकमिति यावत् । एवं सर्वप्रकारेण सत्यात्मकं त्वां भगवन्वयं शरणं प्रपन्नाः प्राप्ता इति ॥ २६ ॥ ननु भवंतोऽपि लोकेश्वरा मत्तुल्या एव किमिति मां शरणं प्रपद्यंते नैवं वाच्यं त्वमेवैकः सर्वेश्वरः सर्वसृष्ट्यादिकारणत्वात् वयं तु त्वदेकशरणा एव लोकादिरूपं द्वैतं च सर्वं त्वद्व्यतिरेकेण नास्तीति वक्तुं द्वैतप्रपंचं वृक्षरूप

प्राप्ता इति । सर्वथा प्राप्ता इत्यर्थः । अर्थांतरमाह–सत्यमनृताप्रियहीनं यथार्थकथनं व्रतं नियमो यस्य तम् "सत्यसंहिता वै देवाः" इति श्रुतेः । 'सत्यो धर्म उदाहृतः' इति कोशात्सत्यस्य धर्मस्य परं पालकम् । यद्वा–सत्तिरवसादनं ततोऽपरमन्यं तद्रहितमित्यर्थः । "अविनाशी वा अरे अयमात्मा" इति श्रुतेः । त्रिषु लोकेषु सत्यं तेषु नष्टेष्वप्यनष्टम् । सत्यस्य मुख्यप्राणस्य योनिं कारणम् "आत्मन एष प्राणो जायते" इति श्रुतेः । सत्ये निहितं सन्निहितम् । 'सत्येन प्राप्यते हरिः' इत्याद्युक्तेः । सत्यस्य प्रपंचस्य सत्यमबाधितस्वरूपम् "अद्वैतं परमार्थतः" इति श्रुतेः । सत्या देवा नेत्रं शिष्यादिषु नेतारो यस्य तम् । "तं देवाः प्रापयंते" इति श्रुतेः । यद्वा–सत्यं नेत्रं प्रकाशकं यस्य न ह्यसत्यवादिनां तत्प्रकाशो जायत इति भावः । सत्यमबाधितमात्मनः कं स्वरूपसुखं यस्य तम् "एष ह्येव हि परमानंदः" इति श्रुतेः यद्वा–स्वभक्तपालनैकव्रतत्वा न्नित्यसत्यत्वाच्च त्वमेव प्रपत्यर्ह इत्याहुः–सत्यं व्रतं यस्य तं "सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम" इति त्वदुक्तेः । न च स्वभक्तपालकदेवतांतरवत्त्वमनित्योऽनुत्कृष्टश्चेत्याहुः–सत्यः सर्वकालदेशवर्त्ती । परः श्रेष्ठश्च तम् । यद्वा–सत्यं सत्यनामानम् । "सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम् । सत्यात्सत्यो हि गोविंदस्तस्मात्सत्यो हि नामतः" इत्युद्योगपर्वोक्तेः । परं परमेश्वरम् । त्वद्बुद्धि बलोदयोऽपि सत्य एवेत्याहुः–तिस्रः ज्ञानबलक्रियाः शक्तयस्सत्या यस्य तम् । "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः । त्वदंशा अपि सत्या इत्याहुः । सत्यस्य मत्स्यकूर्माद्यवतारवृंदस्य योनिमुद्गमस्थानमवतारिणमित्यर्थः । त्वद्धामापि नित्यमित्याहुः–निहितं सन्निहितं स्थितमित्यर्थः । सत्ये मथुरावैकुंठादिलोके । किञ्च सारस्य सार इतिवत् समस्तचिद्वस्तुसारस्त्वमेवेत्याहुः–सत्यस्य सत्यमिति । यद्वा–सत्यस्य यत्किंचित्कालवर्त्तिनो मायिकप्रपंचस्य प्रकाशकत्वात्सत्यं त्रिकालवर्त्तिनम् "चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रम्" इति वत् "सत्यं ह्येवेदं विश्वमसृजंत" इति श्रुतेर्माध्वभाष्यप्रमाणितायाः । हे ऋत नित्य सत्यस्वरूप । सत्यं नेत्रं सर्वेन्द्रियोपलक्षकं नयनेंद्रियं यस्य तम् । सत्य आत्मा श्रीविग्रहो यस्य तम् इति विश्वनाथः ॥ २६ ॥ "निर्बलाः शरणं यांति समर्था न कदाचन" इत्यभियुक्तोक्तिमाश्रित्य शंकते–नन्विति । किमिति कुतः । देवा ऊचुर्नैवमिति । त्वदेकशरणः त्वमेकः शरणं रक्षिता येषां ते तथा त्वद्व्यतिरेकेण त्वत्पार्थक्येन वृक्षरूपकेण रूपकालंकारेण । तल्लक्षणं च "यत्रोपमानचित्रेण सर्वथाप्युपरज्यते । उपमेयमयीभित्तिस्तत्र रूपकमिष्यते ॥" इति । तच्चानेकधा इह च समस्तं सादृश्यरूपकमस्ति "पृथक्कथितसादृश्यं दृश्यं सादृश्यरूपकम्" इति तल्लक्षणात् । समस्तत्वं चास्य एकायनोसावित्यादीनां सर्वेषां समासवत्त्वादिति ध्येयम् । आदिः सनातनश्चासौ वृक्ष आदिवृक्षः । अनेनानादित्वं समर्थितं प्रवाहापन्नत्वात् । यद्वाऽऽदेर्हरेर्वृक्षस्तथा "आराममस्य पश्यंति" इत्यादिश्रुतेः । यद्वाऽऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमेक एवास्य सतः प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहश्च ॥ त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये ॥ २८ ॥
बिभर्षि रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य ॥ सत्त्वोपपन्नानि सुखावहानि सतामभद्राणिमुहुः खलानाम् ॥ २९ ॥

केण निरूपयंति । एकायन इति । असौ प्रपंच आदिवृक्षः । वृश्च्यत इति वृक्षः समष्टिव्यष्टिदेहरूपः । कथंभूतः एकायनः एका प्रकृतिरयनमाश्रयो यस्य सः । द्वे सुखदुःखे फले यस्य सः । त्रयो गुणा मूलानि यस्य सः । चतूरसो धर्मार्थकाममोक्षाश्चत्वारो रसा यस्य सः । पंचेंद्रियाणि विधा ज्ञानप्रकारा यस्य सः । षडूर्मयः कोशा वा आत्मानः स्वभावा यस्य सः । सप्त धातवस्त्वचो यस्य सः । पंच भूतानि मनोबुद्ध्यहंकाराश्चेत्यष्टौ विटपाः शाखाविस्तारा यस्य सः । नव द्वाराण्यक्षाश्छिद्राणि यस्य सः । दश प्राणाः छदाः पत्राणि विद्यंते यस्य स दशच्छदी । द्वौ जीवेश्वरौ खगौ यस्मिन्स द्विखगः ॥ २७ ॥ एवंरूपस्य संसारवृक्षस्य सतः कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मात्स प्रसूतिस्त्वं कारणमित्यर्थः । त्वं सन्निधानं त्वमेव सम्यङ् निधीयतेऽस्मिन्निति । सन्निधानं लयस्थानम् । त्वमेवानुग्रहश्चानुगृह्णासीति पालकः । ननु ब्रह्मविष्णुरुद्रा एवंभूताः प्रसिद्धाः कथमहमेवेति चेत्तत्राहुः—त्वन्माययेति । संवृतं पिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यंति । ये तु विपश्चितो विद्वांसस्ते तथा न पश्यंति ॥ ॥ २८ ॥ ननु देवकीपुत्रं मां कथमेवं वर्णयथेति चेत्तत्राहुः । बिभर्षीति । अवबोधैकस्वरूप आत्मा त्वमेव रूपाणि मूर्तीर्बिभर्षि धत्से । न तु त्वं कस्यापि पुत्र इत्यर्थः ।

दिना ज्ञानेन वृश्च्यत इति तथा "तमेव विदित्वातिमृत्युमेति" इति श्रुतेः । ज्ञानस्यादित्वं तु परमपुरुषार्थादिकारणत्वात् । यद्वाऽऽदिरदनार्हो वृक्षस्तथा भोग्यरूपत्वेन विनाशित्वादिति "तयोरन्यः पिप्पलं स्वाद्वत्ति" इति श्रुतिरपीह यथाकथंचिदुन्नेयेति । धर्मार्थकामाः प्रवृत्तानां रसास्त्रयो निवृत्तानां त्वेको मोक्ष एव रस एवं चत्वारः संतीति । पंचेंद्रियैरेव सर्वं शब्दादि ज्ञायतेऽत उक्तं पंचविधा इति । षडूर्मयः क्षुत्पिपासे शोकमोहौ जरामृत्यू इत्याख्या आत्मानः स्वभावा यस्य । अन्येप्यस्तित्वादयः स्वभावाः संत्यस्य कथमुक्तं षडूर्मय इति तत्राह—कोशा वेति । कोशशब्दोत्र षड्भावविकारपरः । तच्चिंतापि कोशवदात्मावरकैवातस्तेऽपिकोशा एव ते चास्ति जायते वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवंरूपा ज्ञेयाः । यद्वा—पंचकोशा अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्याः षष्ठश्चाहंकारस्तस्याप्यात्मावरकत्वेन कोशत्वं कैश्चित्स्वीकृतमेते वा षट्कोशाः "कोशोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके । जातिकोपेऽर्थसंघाते वेश्यां शब्दादिसंग्रहे ॥" इति मेदिनी । सप्त धातवः त्वङ्मांसरुधिरस्नायुशुक्रास्थिमज्जाख्याः । नवद्वाराणि सप्त चक्षुरादीन्युपरिष्ठानि द्वे पायूपस्थरूपे अधोगे अक्षाः छिद्राणि । "अक्षो ज्ञानार्थशकटावयवेषु च पाशके । रुद्राक्षेंद्राक्षयोः सर्पे व्यवहारे बिभीतके ॥ चक्रे कर्षे तथा छिद्रे तुल्ये सौवर्चलेंद्रिये" इति यादवमेदिन्यौ । दशप्राणाः प्राणापानसमानव्यानोदाननागकूर्मकृकलदेवदत्तधनंजयाख्याः छदाः पत्राणि यस्य "छदः पलाशे गरुति ग्रंथिपर्णतमालयोः" इति मेदिनी ॥ २७ ॥ कारणमित्यर्थः—इत्यस्योत्पादकमित्यर्थः ननूत्पत्तिस्थानमिति । पुनराशंकते—एवंभूता उत्पत्तिस्थितिलयकर्त्तारः । तत्र ब्रह्मादीनामेवंभूतत्वे । आहुः देवा इति शेषः । किमाहुस्तत्राह—त्वन्माययेति । पिहितमाच्छादितम् । तथा नाना ॥ २८ ॥ यूयं विद्वांसश्चेत्तर्हि किमर्थमेवं स्तुवंति गर्भगमिति शंकते भगवान्—नन्विति । एवंजगदुत्पत्त्यादिकर्त्तारम् । तत्र देवकीपुत्रत्वे । आहुः (कारणमिति शेषः) बिभर्षीति पद्येन । अवबोधैकस्वरूपो ज्ञानैकस्वरूपः । इत्यर्थ इति । न हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वय्यंबुजाक्षाखिलसत्त्वधाम्नि समाधिनाऽऽवेशितचेतसैके ॥ त्वत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिम् ॥ ३० ॥ स्वयं समुत्तीर्य सुदुस्तरं द्युमन्भवार्णवं भीममदभ्रसौहृदाः ॥ भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥ ३१ ॥ येऽन्येऽरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ॥ आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोनादृतयुष्मदंघ्रयः ॥ ३२ ॥

क्षेमाय पालनाय । सतां धर्मवर्तिनां सुखकराणि । खलानामभद्राणि नाशकानि॥२९॥न केवलमेतावत् । भक्तानां मोक्षार्थमपीत्याहुः—त्वयीति । त्वयि समाधिना आवेशितचेतसा निमित्तेन त्वत्पादपोतेनाश्रितेन । एके मुख्या विवेकिनः । महद्भिः कृतेन सेव्यतया संपादितेन । यद्वा इदमपि मायामयमित्यनादरं परित्यज्येदमेव महत्सर्वोत्कृष्टमिति मनसि कृतेन बहुमतेनेत्यर्थः । भवाब्धिं तुच्छीकुर्वंति । अनायासेनैव भजनानुसारिणी तेषां मुक्तिरित्यर्थः ॥ ३० ॥ ननु तेन पोतेन पूर्वे चेत्पारं गतास्तर्हीदानींतनानां का गतिस्तत्राहुः—स्वयमिति । अयमर्थः । हे द्युमन्स्वप्रकाश त्वत्पादपोतसामीप्यमात्रेण भवांबुधौ वत्सपदचिह्नमात्रे जाते अतस्तन्निरपेक्षं स्वयमेवान्येषां भीमं दुस्तरमपि भवार्णवं समुत्तीर्य भवत्पदांभोरुहरूपां नावमत्रैव निधाय । भक्तिमार्गसंप्रदायं प्रवर्त्येत्यर्थः । पारं याताः तत्किम् । यतोऽदभ्रसौहृदाः सर्वभूतेष्वतिप्रीतियुक्ताः अतस्तेऽन्येषां तरणाय निधाय याता इति कथं मत्पादपोतश्रयणमात्रेण तीर्णा अत उक्तम् । भवान्सदनुग्रहः सतो भक्ताननुगृह्णातीति ॥ ३१ ॥ ननु विवेकिनां किं मद्भजनेन

मूर्त्तिधारणेनान्यथात्वं जायतेऽन्यथा करकाणामपि जलत्वत्यागेन पार्थिवत्वं स्यादिति भावः । क्षेमाय तत्तत्कालप्राप्तविपत्परिहाररूपपालनाय । ‘ क्षेमो ना प्राप्तरक्षायाम् ’ इति यादवः ॥ २९ ॥ एतावत् सत्पालनखलहननमात्रमेव । किन्तु भक्तानां मोक्षार्थमपीति त्वयीति पद्येनाहुः । पादावेव पोतो वहित्रं तेन अभेदरूपकेण पादयोर्वहित्रत्वम् । ‘ पोतः शिशौ वहित्रे च ’ इति मेदिनी । कृतेनेत्युक्तेः कृत्रिमस्य मायामयत्वं स्यादित्याह—यद्वेति । इत्यर्थ इति तात्पर्यम् । भवस्संसार एवाब्धिस्तं यथा वत्सचरणभरकृतनिम्नस्थितजलमयत्नेन तरंति तथा भवाब्धिमपीत्याह—तुच्छीकुर्वंति । भवाब्धेरस्तित्वमपि न जानंतीति भावः । “ भवः क्षेमेशसंसारसत्तासु प्राप्तिजन्मनोः ” इति मेदिनी । मुक्तिरित्यर्थ इति भावः ॥ ३० ॥ ते तु मुक्ता अन्येषां का गतिरिति शंकते—नन्विति । तेन त्वत्पादरूपेण । पारं गता मुक्ताः । इदानींतनानाम् । आधुनिकानाम् । का गतिः कथं मोक्षः । तत्र इदानींतनमोक्षे । स्वयमिति पद्येन । न केवलं स्वयं मुक्ताः किन्त्वन्यजनमोक्षार्थमुपायं कृत्वैव स्वयं मुक्तिमिता इत्याह—अयमर्थ इति । ततो वत्सपदमात्रत्वात् । तन्निरपेक्षं पोतनिरपेक्षम् । अन्येषामभक्तानाम् । निधाय इत्यस्यायमर्थ इति बोधयतीत्यर्थ इत्यंतेन न तु संस्थाप्येति ‘निपूर्वः स्थापने मतः’ इत्युक्तेः । तत्संप्रदायप्रवर्त्तनं किं किमर्थम् । अत्र किमव्ययं प्रश्ने “ किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि ” इति मेदिनी । यतो हेतोः । अर्थान्तरमाह—द्युमन् हे सूर्येति । त्वं येषामन्तःकरणे नोदेषि तेषामेव तमःपुंजरूपः संसारोऽर्णवतुल्यो भीमो दुस्तरश्च भवति प्रेमभक्त्युदयपर्वते त्वय्युदिते समस्ततमसि स्वयमेवनष्टे सति स्वयमेव तरणं भवेदतो भवत्पदांबुरुहनावमत्रैव कूले निधाय याताः । यथाऽन्येप्येवं तरेयुरित्यभिप्रायेणैवोत्प्रेक्ष्यत इति भावः । अत्र संसारस्य सामस्त्येन नष्टत्वेऽपि वयं संसारिण एवेति भक्तानां मिथ्याभिमान एव गोवत्सपदाकारः । यथा च गोवत्सपदजलं पावनं श्लाघनीयं च भक्त्यैव तेषां सोऽभिमानोप्यन्येषां भक्तमानिनामभिमानरोगहरोऽभिज्ञजनैः श्लाघनीयश्च भवतीति यतः सत्सु भक्तेष्वेवैतादृशोऽनुग्रहो यस्य नान्येष्विति भावः ॥ ३१ ॥ मुक्तानां भजनमकिंचित्करमिति शंकते—नन्विति । विवेकिनां ज्ञानिनाम् । ते विवेकिनः । तत्र भजनाकरणे । भावो भक्तिः । इत्यर्थ इति तु सत्तादिरूपो भावपदार्थोऽत्र न ग्राह्य इत्याह—किं च पदच्छेदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः ॥ त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्धसु प्रभो ॥ ३३ ॥

मुक्ता एव हि ते तत्राहुः—येऽन्य इति । विमुक्तमानिनो विमुक्ता वयमिति मन्यमानाः । त्वयि अस्तो निरस्तोऽत एवासन् यो भावस्तस्मात् । भक्तेरभावादित्यर्थः । न
विशुद्धा बुद्धिर्येषां ते तथा । यद्वा त्वयि अस्तभाः इति च्छेदः । अस्तमतयो वादेष्वेव विशुद्धबुद्धयः । कृच्छ्रेण बहुजन्मतपसा । परं पदं मोक्षसन्निहितं सत्कुलतपःश्रुतादि ।
पतंति विघ्नैरभिभूयंते । न आदृतौ युष्मदंघ्री यैस्ते ॥ ३२ ॥ त्वदीयास्तु न कदाचिदपि पतंतीत्याहुः । तथा नेति । विनायका विघ्नहेतवस्तेषामनीकानि स्तोमास्तानि

नार्थाधिक्यमाह—यद्वेति । छेद इति । अस्ता भा मतिर्येषां ते तथा भाति दीप्यते पुमाननयेति भा बुद्धिः । अधोऽवाक् तिर्यग्योनौ श्वश्रृगालादियोनौ रविंदोंधकारस्तद्भिन्नोऽरविंदः प्रकाशः ज्ञानमिति यावत् । "अंध
कारो रविंदांधतिमिरं तम उच्यते" इत्युत्पलः । स एवाक्षिणी यस्य सोऽरविंदाक्षस्तत्संबुद्धौ हे ज्ञानलोचन । किञ्च हरिभक्तानामेव भवार्णवो गोष्पदी भवति ये तु तव शुद्धसत्त्वमयवपुषि मायाभानवंतो ज्ञानिनस्तेषां तु
सुदुस्तरो भीमश्च 'कृच्छ्रो महानिह भवार्णवमप्लवेशाम्' इत्यादिसनत्कुमारोक्तेः 'क्लेशोऽधिकतरस्तेषाम्' इति भगवता 'नैष्कर्म्यमप्यच्युतभाववर्जितम्' इति नारदेनापि तथैव देवा अप्याहुः । अन्ये त्वदनुगृहीतसद्भ्यो
भिन्नाः अरविंदाक्षेति त्वत्कृपावलोकनमाधुर्याननुभाविन इति भावः । विमुक्तमानिनस्त्वद्भक्ता यथा संसारोत्तीर्णा अपि संसारिमानिनस्तथैवैते संसारमध्ये पतिता अपि विमुक्तमानिनस्तत्र हेतुस्त्वय्यरविंदाक्षे मधुराकारेऽस्तभा
वान्मायाशाबल्यमननेन प्रीत्यभावात् । "अवजानंति मां मूढा मानुषीं तनुमाश्रितम्" इति भगवदुक्तेर्मौढ्यादविशुद्धज्ञानाः कामादिनिर्जयमूलकांतःकरणशुद्धिमत्त्वादुत्पन्नमपि ज्ञानं न विशुद्धं तदपि कृच्छ्रेण तपःशमदमा
दिकृच्छ्रजनितेन ज्ञानेन परं पदं जीवन्मुक्तदशायामारुह्येत्येषां गुणीभूतभक्त्या युक्तत्वं ज्ञेयं तां विना परमपदारोहासंभवात् 'श्रेयः सृतिं भक्तिमुदस्य' इत्याद्युक्तेस्तां विना ज्ञानस्य मरीचिकाजलायमानत्वात्ततोऽधः पतंति । ननु
भक्तिसत्त्वे कथमधः पतंति तत्राहुः नादृतौ मायिकत्वबुद्ध्या युष्मदंघ्री यैस्ते । अयमर्थः—ज्ञानिनां ज्ञानांगभूता भक्तिर्द्विधा भक्तिं विना ज्ञानं न सिध्येदिति शास्त्राज्ञयैव किञ्चिन्मात्रीक्रियमाणा भजनीयभगवद्विग्रहादिषु मायिकबु
द्ध्याऽनादरवती अनादररहिता च। आद्यया तेषां तपःशमदमादिमतां बहुकालेनाविद्यानिरसनीं विद्यामुत्पाद्य ब्रह्मभूतत्वदशामुत्पाद्य च सहसैवांतर्द्धीयते ते विमुक्तमानिन एवोच्यन्ते न तु वस्तुतो जीवन्मुक्ताः 'भक्त्याहमे
कया ग्राह्यः' इति भगवदुक्तेर्भक्तिं विना तत्पदार्थस्यापरोक्षानुभवाभावात् भगवदपराधसंभवाच्च दग्धानामपि कर्मणां पुनः प्ररोहादधः पतंति तदुक्तं रथयात्राप्रसंगे विष्णुभक्तिचंद्रोदये "नानुव्रजति ये मोहाद्व्रजंतं परमेश्वरम् ।
ज्ञानाग्निदग्धकर्मापि स भवेद्ब्रह्मराक्षसः ॥" इति । वासनाभाष्ये "जीवन्मुक्ता अपि पुनर्बंधनं यांति कर्मभिः । यद्यचिंत्यमहाशक्तौ भगवत्यपराधिनः ॥" इति द्वितीयया तु तेषां ब्रह्मभूतत्वदशायविद्याविषयोरुपरामेप्यनुपर
मत्या तत्पदार्थसाक्षात्कारमनुभाव्यमाना जीवन्मुक्ताः सिद्धा एव स्युः। तदुक्तम् "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो
मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति विश्वनाथः॥ ३२॥ हरिभक्तानां पतनशंकैव नेत्याहुः—त्वदीयाः इति । 'विनायकस्तु हेरंबे तार्क्ष्ये विघ्नेऽजिने गुरौ' इति हरिदीक्षित इति । विघ्नहेतव उपद्रवहेतवस्ते तु विघ्ना
एवमेषां स्तोमाः समूहाः 'स्तोमः स्तोत्रेऽध्वरे वृंदे' इति रुद्रः । इत्यर्थ इत्यस्य कोर्थः । न हि विचरतेर्गत्यर्थोत्र कार्य इति । ननु ज्ञानिन एव केवलं किमित्याक्षिप्यंते भरतेंद्रद्युम्नचित्रकेत्वादिदृष्टया भक्ता अप्याक्षिप्यंतामित्यत
आहुः—तथेति । यथा विमुक्तमानिनोऽधः पतंति तथा तावका मार्गाद्भक्तियोगान्न भ्रश्यंति किमुत मृग्यात्त्वत्त इत्यर्थः । यदि वा भ्रश्यंति तदपि त्वय्येव बद्धसौहृदा एव भवंति चित्रकेतुभरतेंद्रद्युम्नादीनां भ्रंशे सति वृत्रादित्वे
प्रेम्णः शतगुणीभावदर्शनाद्भक्तानां भ्रंशोपि प्रेमाधिक्यहेतुरेव दृष्टः । यद्वा—तथा न भ्रश्यंति यतो भ्रष्टत्वेपि त्वयि बद्धसौहृदाः 'न मे भक्तः प्रणश्यति' इति प्रतिज्ञातव्रता ममोद्धरिष्यते च मत्प्रभुणा । ममायं भ्रंशः कृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रेय उपायनं वपुः ॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ॥ ३४ ॥ सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम् ॥ गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन वा गुणः ॥ ३५ ॥ न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः ॥ मनोवचोभ्यामनुमेयवर्त्मनो देवक्रियायां प्रतियंत्यथापि हि ॥ ३६ ॥

पांति ये तेषां मूर्धसु विचरंति विघ्नाञ्जयंतीत्यर्थः ॥ ३३ ॥ सतां सुखावहानि रूपाणि धारयसीत्युक्तं बिभर्षि रूपाणीति तत्केन प्रकारेण सुखावहत्वमित्यपेक्षायामाहुः— सत्त्वं विशुद्धमिति । सत्त्वं वपुः श्रयत इत्यन्वयः । श्रेय उपायनं कर्मफलदातृ । कथम् । येन वपुषा जनस्तवार्हणं पूजामीहते करोति । कैः । वेदाश्च क्रियायोगाश्च तपश्च समाधिश्च तैश्चतुराश्रमधर्मैरित्यर्थः । वपुषोऽनाश्रयणेऽर्हणासंभवान्न कर्मफलसिद्धिः स्यादिति ।। ३४ ।। त्वय्यंबुजाक्षेत्यादिना श्लोकत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं तत्र कर्मफलं भक्तिं विना माभून्मोक्षस्य तु ज्ञानैकसाध्यत्वात्किं भक्त्येति सानुशयान्प्रत्याहुः । सत्त्वं न चेदिति । हे धातरिदं सत्त्वं निजं तव वपुर्न भवेच्चेत्तर्हि विज्ञानं विशिष्टमपरोक्षं ज्ञानं न भवेदित्यनुषंगः । कथंभूतम् अज्ञानभिदापमार्जनमज्ञानं च तत्कृता भिदा च तयोरपमार्जनं निवर्तकम् । यद्वा अज्ञानं भिनत्तीत्यज्ञानभिद्विज्ञानं मार्जनं नाशमाप प्राप्तमेवेति । ननु जडानां बुद्ध्यादीनां यतः प्रकाशस्तद्ब्रह्मेति ज्ञानं भवेदेवेति चेन्न । गुणप्रकाशैर्गुणावच्छिन्नैः प्रकाशैर्भवान्सर्वसाक्षी परिपूर्णः केवलमनुमीयते कल्प्यते न तु साक्षात्क्रियत इत्यर्थः । अनुमानप्रकारमाहुः । प्रकाशते यस्य च येन वा गुण इति । यस्य संबंधी अयं आभ्यन्तरो बुद्ध्यादिगुणः प्रकाशते । यो गुणसाक्षीत्येवं येन वा बुद्ध्यारूढेन प्रमात्रा बुद्ध्यधिष्ठात्रा बाह्यो गुणः प्रकाशते इत्यनुमीयत इत्यर्थः । शुद्धसत्त्ववपुषि त्वयि सेव्यमाने तु तदाकारेंतःकरणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः ॥ ३५ ॥ एवं तावद्भक्तानामभ्युदयापवर्गार्थं रूपाणि बिभर्षीत्युक्तं तान्यपि भजनीयानि केवलं न तु ज्ञातुं शक्यंते अनंतत्वादतर्क्यत्वाच्च मनोवचसो

इति त्वयि विश्वस्तमतयः ततश्चाभितस्त्वया रक्षिता विनायकानां विघ्नकारिणामनीकानि पांति ये तेषामपि मूर्द्धसु विचरंति तानभिभवंतीति । यद्वा—तच्चरणांस्तेऽपि भक्त्या मूर्द्धसु धारयंतीत्यर्थः ॥ ३३ ॥ तत्सुखावहत्वं केन प्रकारेणेति संबंधः । इत्यन्वय इति योजना वेदशब्देन तदभ्यासः चतुराश्रमधर्मैः क्रमाद्ब्रह्मचारिगृहस्थवनस्थयतिधर्मैर्वेदाभ्यासादिभिरित्यर्थ इत्याह—अर्हणासंभवात्पूजनाभावात् ॥ ३४ ॥ सानुशयान् सहवान् "भवेदनुशयो द्वेषे पश्चात्तापानुबंधयोः " इति मेदिनी । अनुबंधो हठः । अनुषंगः पुनः संबंधः ननु किमर्थमनुषंगः कार्यः 'ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेणादर्शनायोगात्' इति न्यायमाश्रित्याह—यद्वेति । अचेतनचेतनेनात्मज्ञानं स्यादेवेति शंकते—नन्विति । अनुमानं विशदयति—अत्रेमौ प्रयोगौ बुद्ध्यादयः स्वातिरिक्तभास्याः प्रकाशरूपत्वाभावे सति प्रकाशमानत्वात् । जडत्वाद्वा घटादिवत् । बुद्धिकृतघटादिप्रकाशः तद्गतप्रकाशात्मप्रतिबिंबप्रयुक्तः स्वतोऽप्रकाशस्वच्छद्रव्यहेतुकप्रकाशत्वात् । स्वतोऽप्रकाशजलादिस्वच्छद्रव्यहेतुकमित्यादिप्रकाशस्यादित्यप्रतिबिंबयुक्तवदिति । अनुमीयत इत्यर्थ इत्यस्यायमनुमानोऽर्थ इति । न हि केवलमनुमीयतेऽपि तु प्रत्यक्षी भवतीत्याह—इति भाव इति ॥३५॥ पूर्वोक्तरीत्येत्येवं पदार्थः । अभ्युदयः संपत्संतत्यादिरूपः । अपवर्गो मोक्षः । अप्रतर्क्यत्वात्तर्काविषयत्वात् । अगोचरत्वादविषयत्वात् । अनुमेयमनुमातुं योग्यं वर्त्म मार्गो यस्य 'वर्त्म नेत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृण्वन्गृणन्संस्मरयंश्च चिंतयन्नामानि रूपाणि च मंगलानि ते ॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय कल्पते ॥ ३७ ॥ दिष्ट्या
हरे स्या भवतः पदो भुवो भारोपनीतिस्तव जन्मनेशितुः ॥ दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकंपिताम् ॥ ३८ ॥ न ते
भवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ॥ भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयाऽऽत्मनि ॥ ३९ ॥

रगोचरत्वादित्याहुः । न नामरूपे इति । गुणाश्च जन्मानि च कर्माणि च तैर्निरूपितव्ये निरूपणार्हे न भवतः । कुतः । अनुमेयं वर्त्म मार्गो यस्य तवेति । तत्रापि हेतुः । तस्य साक्षिण इति । न हि साक्षिणस्तत्त्वं मनोवचोगोचरमित्यर्थः । हे देव बहुधा द्योतमान । अथापि क्रियायामुपासनादिलक्षणायां त्वां प्रतियंत्युपासकाः साक्षात्पश्यंति । हि प्रसिद्धिं सूचयति ॥ ३६ ॥ तस्माद्भक्त्यैव मोक्ष इत्युपसंहरति । शृण्वन्निति । अन्यानपि संस्मारयन् । क्रियासु देवार्चनादिकर्मसु ॥ ३७ ॥ विशेषतः श्रीकृष्णावतारमभिनंदंति । दिष्ट्येति । दिष्ट्या भद्रम् । तव पदः पादभूतायाः । ईश्वरस्य तव जन्ममात्रेणापनीत एव । किं च । त्वत्पदकैः कोमलैः पदैः सुशोभनैर्वज्रांकुशादिशुभलक्षणैः । ग। पृथ्वीं द्यां स्वर्गं च तव त्वयाऽनुकंपिताम् ॥ ३८ ॥ तव जन्मना भारोऽपनीत इत्युक्त्या ममापि किं जीववत्संसार उक्तो नहि नहीत्याहुः । नेति । बत हे ईशासंसारिणस्ते जन्मनः कारणं क्रीडां विना न तर्कयामः । किं च । हे अभयाश्रय न भयमाश्रयत इति तथा तत्संबोधनम् । हे नित्यमुक्त इत्यर्थः । तव जन्मकारणं नास्तीति किं

च्छदे मार्गे ' इति मेदिनी । तत्रापि अनुमेयवर्त्मत्वे । तस्य नामरूपस्य । इत्यर्थ इति भावः । यद्यपि त्वं मनोवचोगोचरोऽथापि तथापि विश्वनाथस्तु—केवलमेतद्रूपमेव ते विशुद्धसत्त्वात्मकमपि त्वेतस्य वाचकं नामापि ते च नामरूपे भक्त्यैवानुभवितुं शक्ये नान्यथेत्याहुः—नेति । गुणैः श्यामसुंदररक्तपाद्मलोचनेति । कर्मभिर्गोवर्द्धनोद्धरणत्रिभंगिललितेति । जन्मभिर्नंदनंदनवसुदेवनंदनेति। ये तव नामरूपे ते यद्यपि यथाकथंचिद्वाच्यध्येये भवतस्तदपि साक्षिणो विषयद्रष्टुर्जीवस्य निरूपितव्ये.साक्षादनुभवनीयमाधुर्य्ये न भवतः तयोर्माधुर्य्याननुभव एव तदननुभवः यथा पित्तदूषितरसजनेन चर्वितस्यापि मत्स्यांडिक्यखंडस्य स्वादालाभादननुभव एव। एवं च भक्तिरहितजीवकर्तृकानुभवा शक्तेरेव हेतोर्नामरूपयोर्द्वयोरपि विशुद्धसत्त्वात्मकत्वमेव गतमिति भावः ॥ ३६ ॥ यस्मादुपासकास्त्वां साक्षात्पश्यंति तस्माद्धेतोरित्यर्थः । भक्त्यैव भक्तिद्वारेणैव । एव शब्दो भक्तिं विना मोक्षहेतुज्ञानासिद्धिमाह । तद्वक्ष्यति—"श्रेयः श्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥" इति ॥ ३७ ॥ विशेषतः तृतीयार्थे तसिः । अभिनंदंति श्लाघंते दिष्ट्येत्यव्ययं भद्रे । पदः पादभूतायाः कार्याकारणाभेदाभिप्रायेण वा "पद्भ्यां भूमिः" इति श्रुतेः पद इत्युक्तम् । "भूः पादौ द्यौः शिरः" इत्युक्तेः । अपनीतोऽपास्त एव अधुनैव कंसादीन्हतान् जानीम इत्याह—भारः कंसादिहेतुकस्तवावतारमात्रेणैवाद्य नीत इदं विज्ञापनचातुर्य्यं देवानां ज्ञेयम् अन्यदपि सुखमनुभविष्याम इत्याह—दिष्ट्येति । त्वत्पदकैः तव कोमलैः पादैरिह पदशब्दात्कोमलेऽर्थे बाहुलकात्कः । सुष्ठु शोभनानि शोभाकराणि वज्रादीन्येषु तैः । यद्यपि ' मया हतांस्त्वं जहि मा व्यथिष्ठाः ' इति रीत्या तव जन्मनैव भारोपनीतस्तथापि बहिस्तल्लीलादर्शनार्थमस्माकमियं प्रार्थनानि । द्यां स्वर्गम् ' सुरलोको द्योदिवौ ' इत्यमरः । कदाचित्पारिजातहरणाद्यर्थं तत्र गतस्य पारिजातपरागादिषु पदानामुदयात्स्वर्गमपि पदांकितं द्रक्ष्याम इत्यर्थः । अनुकंपा जाता यस्येति ताम् । जातार्थे इतच् ॥ ३८ ॥ जीववज्जन्माद्युक्तेः कुपितमिव प्रसादयतां संभ्रमान्नहिनहीति द्विरुक्तिः । नेति । बत हे ईश " बतामंत्रणसंतोषखेदानुक्रोशविस्मये " इति मेदिनी । बत संबुद्धौ ज्ञेयोऽत्र त्वयि विषये याऽविद्या तया कृताः जीवस्यापि वस्तुतस्त्वद्रूपत्वात्त्वदज्ञानकल्पिता इत्याह—न परमार्थत इति ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ॥ त्वं पासि नस्त्रिभुवनं च यथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ॥ ४० ॥ दिष्ट्यांब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः ॥ माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ॥ ४१ ॥ श्रीशुक उवाच ॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ॥ ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम् ॥ ४२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे गर्भगतविष्णोर्ब्रह्मादिकृतस्तुतिर्नाम द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ अथ सर्वगुणोपेतः कालः परमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकम् ॥ १ ॥

वक्तव्यं यतो जीवात्मन्यपि भवादयस्त्वयि विषये या अविद्या तया कृता न परमार्थतः संतीति ॥ ३९ ॥ प्रस्तुतं प्रार्थयंते । मत्स्याश्वेति । नोऽस्मांस्त्रिभुवनं चान्यदा यथा पासि तथाऽधुनाऽपि पाहीति वंदनं ते इति च वदंतः सर्वे शिरोभिः प्रणमंति ॥ ४० ॥ देवकीं प्रत्याहुः । दिष्ट्येति । नोऽस्माकं भवायोद्भवाय साक्षात्परः पुमांस्ते कुक्षिं गतोऽतो भयं माभूदिति ॥ ४१ ॥ यस्य रूपमनिदं सर्वप्रत्यग्भूतम् । यथा यथावत् । अस्मान्वंचयित्वा एताविह स्थास्येते इति मन्यमाना ब्रह्मेशानौ पुरोधाय पुरतः कृत्वा ययुरिति ॥ ४२ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां द्वितीयोऽध्यायः ॥ २ ॥ तृतीये निजरूपेण संभूतस्तु हरिः स्वयम् ॥ पितृभ्यां संस्तुतो नीतः पित्रा भीतेन गोकुलम् ॥ १ ॥ अथेति मंगलार्थम् । यर्हि सर्वगुणोपेतः कालो बभूव तदा देवक्यां विष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः । परमशोभनत्वमेवाह यर्हीत्यादिना ।

प्रस्तुतं भूभारनिराकरणम् । अन्यदा इदानींतनकालादन्यस्मिन्काले । अश्वो हयग्रीवः । विप्रो जामदग्न्यः । विबुधो यज्ञः । कृतोऽवतारो येन स तथा । वयं तु तव नतिं विना किंचिदपि प्रतिकर्त्तुं न क्षमाः इत्याहुः—वंदनमिति । यदव उत्तमा उद्धृतक्लेशा येन स तथा तत्संबुद्धौ तवाविर्भावेण यदूनां क्लेशो नंक्ष्यत्यतो झटित्याविर्भवेति संबुद्ध्यभिप्रायः ॥ ४० ॥ प्रत्याहुः सांत्वयामासुः । यदूनाम् अंशेनापि भोजपतेः कंसस्य सकाशाद्भयं मा भूत् किं तु हर्यवतारेण सर्वं तेषां भयं नष्टं भविष्यतीति । यद्वा—योंऽशेनः परः पुमान्प्रकृतीक्षणकर्त्ता पुरुषः स साक्षादिति संबंधः । अन्यथा ' कृष्णस्तु भगवान्स्वयम् ' इत्युक्तिरसमंजसा स्यादिति भावः । हे अम्बेति । भगवन्मातृत्वेन परमवंद्यत्वात्। यद्यपि मनस्तो दधारेत्युक्तं तथापि मातारि कुक्षिगत इति तथैव वक्तुं योग्यत्वादुक्तम् । अंशेन श्रीबलदेवेन तस्यापि तस्यां जन्म प्रकाशितमिति यद्वांशेन मत्स्यादिना योऽस्माकं भवाय भवेत्स एव साक्षात्ते कुक्षिगत इति दिष्ट्या । ननु कंसस्य दुश्चेष्टाभरेण बिभेमि तत्राहुः—मुमूर्षोरिति । निकटापातमृत्युत्वादेवं चेष्टत इति भावः । ते भयं मा भूत्त्वं भयं मा कुर्वित्यर्थः । ननु जाने तावदेव किमनिष्टं स्यात्तत्राहुः—यदूनां सर्वेषामपि किं पुनस्तव श्रीवसुदेवादीनां तस्य स्वस्य चेत्यर्थः । एवं नित्यमेव देवास्तां स्तुवंतीति ज्ञेयं तदुक्तं वैष्णवे " अदृष्टाः पुरुषस्त्रीभिर्देवकीं देवतागणाः । विप्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् ॥ " इति विश्वनाथः ॥ ४१ ॥ सर्वप्रत्यग्भूतं सर्वांतरम् । यद्वानिदम् । इदंतया वक्तुमशक्यं प्रत्यक्षजगद्विलक्षणम् । ' एताविह स्थितौ किंचिद्रहस्यं मा द्रक्ष्यत' इति मन्यमाना देवा ब्रह्मेशानौ पुरोधायैव ययुरिति भावः ॥ ४२ ॥ गर्भस्य देवक्यष्टमगर्भस्य स्तुतिर्यस्मिन् स गर्भस्तुतिः अस्य द्वितीयाध्यायस्य नामेत्यर्थः ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वितीयोऽध्यायः ॥ २ ॥ निजरूपेण स्वाभाविकेन रूपेण । स्वयं हारिः । परिपूर्णतमः । पितृभ्यां मातापितृभ्यां देवकीवसुदेवाभ्याम । पित्रा वसुदेवेन (१) । शोभनकालस्तु हरिभक्ताविर्भावयुतः परमशोभनत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ॥ मही मंगलभूयिष्ठपुरग्रामव्रजाकरा ॥ २ ॥ नद्यः प्रसन्नसलिला ह्रदा जलरुहः श्रियः ॥ द्विजालिकुलसन्नादस्तवका वनराजयः ॥ ३ ॥ ववौ वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः ॥ अग्नयश्च द्विजातीनां शांतास्तत्र समिंधत ॥ ४ ॥ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहाम् ॥ जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि ॥ ५ ॥ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः ॥ विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ॥ ६ ॥ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ॥ मंदंमंदं जलधरा जगर्जुरनुसागरम् ॥ ७ ॥ निशीथे तम उद्भूते जायमाने जनार्दने ॥ देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ॥ आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ॥ ८ ॥

अजनान्नारायणाज्जन्म यस्य प्रजापतेस्तस्य ऋक्षं रोहिणिनिक्षत्रम् । कथंभूतम् । शांतानि ऋक्षाण्यश्विन्यादीनि ग्रहाश्च तारकाश्च यस्मिंस्तत् । यर्हीति सर्वत्रानुषज्जते ॥ १ ॥ निर्मलानामुडुगणानामुदयो यस्मिंस्तत्तथा । मंगलभूयिष्ठाः पुरादयो यस्यां सा ॥ २ ॥ जलरुहैः श्रीः शोभा येषां ते । द्विजालिकुलानां पक्षिभृंगसमूहानां सन्नादो येषु ते स्तवका यासु ताः ॥ ३ ॥ समिंधत । आडागमोऽत्र द्रष्टव्यः समैंधतेति । सम्यग्दीप्ता बभूवुरित्यर्थः ॥ ४ ॥ असुरद्रुहां देवानां कंसादिव्यतिरिक्तानां सर्वप्राणिनां चेति । स्वर्गे तु विशेषमाह । जायमान इति । अजने जायमाने ॥ ५ ॥ तदा आसन्नः प्रसवो यस्मिंस्तस्मिन्समये ॥ ६ ॥ अनुसागरं सागरनादमनुलक्ष्य मन्दं जगर्जेति ॥ ७ ॥ तमसोद्भूते घनतमसि

कालस्य हर्याविर्भावत एवेति ज्ञेयम् । ग्रहाः सूर्यादयः । तारकाः सप्तर्षिमंडलादिरूपाः । सर्वत्र दिशः प्रसेदुरित्यादिषु सर्वेषु वाक्येष्वनुषज्यते संबध्यते । यद्वा—यर्ह्येवाजनस्य प्राकृतजन्मरहितस्य भगवतो जन्मनक्षत्रमभूत्तदैव सर्वगुणोपेतकालोऽभूदिति योज्यम् । क्लिष्टत्वेनोक्तिः । 'जन्मर्क्षं न प्रकाशयेत्' इति नीतिशास्त्रोक्तेर्गोपनार्थेति ज्ञेयम् ॥ १ ॥ 'दिशः प्रसेदुः' इत्यादिना वर्षास्वपि शरद्गुण उक्तः । 'निर्मलोडुगणोदयम्' इत्यनेनोर्द्ध्वस्थ प्रसाद उक्तः । 'मही मंगल'—इत्यादिनाधस्थप्रसाद उक्तः ॥ २ ॥ 'ह्रदा जलरुह'—इत्यादिना रात्रावपि दिनगुणयुक्तः । 'द्विजालिकुल' इत्यादिना वर्षास्वपि वसंतगुण उक्तः ॥ ३ ॥ 'सुखस्पर्शः' इत्यनेन शैत्यम् । 'पुण्यगंधवहः' इति सौरभ्यम् । शुचिरिति मांद्यं धूल्याद्यसंपर्केण निर्मलत्वं चोक्तम् । इत्यर्थ इति । सम्यग्दक्षिणावर्त्तत्वेन दीप्ता बभूवुरिति भावः । द्वापरेपि त्रेतागुण उक्तः 'त्रेतायां यजतो मखैः'—इत्याद्युक्तेः ॥ ४ ॥ क्लिष्टकल्पनां परित्यज्याह—देवानां वेति । अजने वस्तुतो जनिरहिते तस्मिन्भगवति जायमाने आसन्नप्रसवे आसन्नोऽतिनिकटः प्रसव आविर्भावो यस्मिन्समय इत्यर्थ इत्युक्तेर्जाते सतीत्यर्थो न विधेयः ॥ ५ ॥ समं सार्द्धम् । तदा भगवदाविर्भाववेलायाम् ॥ ६ ॥ सुमनांसि पुष्पाणि अनुसागरम् । अनुकृतं सदृशीकृतं सागरः तद्गर्जनं यत्र तद्यथा स्यात्तथेति ॥ ७ ॥ निशीथेऽर्द्धरात्रे । जनार्दने जनभयंकरे । जायमाने सति तत्र हेतुः—तम इत्यादिः । यद्वा—जनैरर्द्यते प्राथ्यर्ते उदयो यस्येति जनार्दनश्चंद्रः । यद्वा—जनानां सर्वज्ञभक्तमुनिदेवादीनामर्दने भगवन्नाविर्भवाविर्भवसमयोऽयमिति याचने जायमाने सति । वस्तुतस्तु—जनान्दुष्टजनानर्दयति नाशयति स्वांशैरिति जनार्दनः स्वयं भगवति नंदनंदने श्रीगोलोकस्वामिनि जायमाने तत्कालमेवाविर्भूते सति । स्फुटमेवात्रावतारद्वयं भगवत उक्तमिति एवं जायमानेऽजने तस्मिन्नित्यत्रापि ज्ञेयम् । देवस्य विष्णोरिव रूपं सच्चिदानंदघनं वर्तते यस्यास्तस्यामाविरासीत् । सर्वासु गुहासु गुहावदसदगम्यस्थलेषु मथुरावैकुंठादिषु जीवांतःकरणेषु वा सर्वजनापरोक्षत्वाच्छेत इति तथा सः । अन्यो बालो यथा गर्भादायंत्रितः सन्निस्सरति तथा नेत्यत्र दृष्टांतः । किञ्च—दृष्टांतदार्ष्टांतिकयोर्युगपदाविर्भावमाह—तद्दिने (अष्टमीतिथौ) निशीथे प्राच्यां दिशि इंदुरपूर्णोपि मद्वंशं मत्प्रभुर्जन्मनालंचकारेतीत्यानंदोद्रेकेण पुष्कलः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदार्युदायुधम् ॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगम् ॥ ९ ॥ महार्हवैदूर्यकिरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलम् ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥ १० ॥

निशीथे । यथा यथावदैश्वरेणैव रूपेण ॥ ८ ॥ तमद्भुतं बालकं वसुदेव ऐक्षतेति द्वितीयश्लोकेनान्वयः । अद्भुतत्वे हेतुगर्भाणि विशेषणान्यंबुजेक्षणमित्यादीनि । श्रीवत्सलक्ष्मं श्रीवत्सलक्ष्माणम् । गलेन शोभत इति गलशोभी स कौस्तुभो यस्मिन् ॥ ९ ॥ परिष्वक्तसहस्रकुंतलं किरीटकुंडलादीना त्विषा स्फुरदपरिमितके

पूर्णिमेंदुरिव सन्यथाविरासीत्तथैव देवक्यां विष्णुरपि सर्वांशकलापरिपूर्ण आविरासीदित्यर्थः । आविर्भावश्च कंसवंचनार्थमष्टमे मासि । तदुक्तं हरिवंशे "गर्भकाले त्वसंपूर्णे ह्यष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा ॥" इति खमानिक्यग्रंथे श्रीकृष्णजन्मपत्री चोक्ता—"उच्चस्थाः शशिभौमचांद्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलावृषक्रमवशात्पूषोशनोराहवः । नैशीथः समयोऽष्टमी बुधदिनं ब्रह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमंबुजेक्षणमभूदाविः परं ब्रह्म तत् ॥" इति ॥ ८ ॥ उदिति झटिति कंसादिहिंसनक्षपणाय । उद्यतान्यायुधानि यस्य तं तथा । आयुधक्रमश्च गौतमीये "दक्षस्योर्ध्वे स्मरेच्चक्रं गदां च तदधः करे । वामस्योर्ध्वे शार्ङ्गधनुः शंखं च तदधः स्मरेत्" ॥ इति ""शंखचक्रगदापद्मश्रिया जुष्टम्" इति वक्ष्यमाणानुसारेण शार्ङ्गस्थाने पद्मं ज्ञेयं तत्र शार्ङ्ग पदोपादानमुपासनाविशेषार्थमेवेति ध्येयम् । श्रीवत्सं लक्ष्म चिह्नं यस्य स तथा तम् । अत्र समासांतो डः । 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः ।"दक्षिणावर्त्तरोमालिः श्रीवत्सं दक्षभागगम् । वक्षसि भृगुपादांकं कैश्चिच्छ्रीवत्समुच्यते ॥ वत्सं नाम उरः प्रोक्तं श्री रमा प्रोच्यते मुने । श्रिया युक्तं तु यदुरस्तच्छ्रीवत्समुदाहृतम्" इत्यादिपुराणीयवृंदावनमाहात्म्ये । ननु सर्वादिकारणहिरण्य गर्भस्य जनके श्रीभगवति कथं बालक इति प्रयुक्तमिति चेन्नहि स्तनंधयवाच्ययं प्रयुक्तोऽपि तु स्वयं भगवदर्थक एव । तथा हि—बालः को ब्रह्मास्येति बालकः । "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः । बालानां गोपानां कं सुखं येनेति वा । बालानामज्ञानामपि कं सुखं यन्नामोच्चारणादिनेति "अज्ञानादपि यन्नाम स्मृतं सर्वार्थसाधकम्" इति स्मृतेः । बालेषु रोमसु

श्रीकृष्णजन्माङ्गम् ।

कानि ब्रह्मांडानि यस्येति वा । "ईदृग्विधाविगणितांडपराण्डचर्यावाताध्वरोमविवरस्य च ते महित्वम्" इति वक्ष्यति ब्रह्मा । बालयति चालयति वातादीनिति वा । "यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात्" इति । "भीषास्माद्वातः पवते" इत्यादिश्रुतेश्च । यद्वा—बलानां सेनानां समूहो बालं रावणादिसैन्यं तदालयति वारयति नाशयतीति यावत् बालो लक्ष्मणस्तेन कं सुखं रामावतारे यस्येति वा "बालोऽज्ञे लक्ष्मणे शिशौ" इति धरणिः । स एव बालकः । बालान् क्रुन्तति छिनत्ति रुक्मिण इति वा"चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन् विरूपयन्" इत्युक्तेः । के प्रलयजले बालो वटपत्रपुटशायीति वा । राजदंतादित्वा त्परनिपातः । बालानां मेध्यानां कं शिरो मुख्यमिति यावत् । 'पवित्राणां पवित्रं यः' इति स्मृतेः । 'अलंकारांतरे मेध्ये बालो रोमाणि' इति विश्वः । वा वक्रा अलकाः केशा यस्येति वा 'वो वक्रे हिंसके वरे' इति धरणिः । बायां नर्मदायां लिनाति श्लिष्यतीति बालः शिवः 'नर्मदायां सदाशिवः' इति पुराणात् । 'बा स्यान्नर्मदा नदी' इति सौभारिः । तेन कायते स्तूयते इति बालकः । सर्वत्र डप्रत्ययः । बालान् कारयति स्वभक्तविरोधिस्त्रीणां केशान् विक्षेपयतीति वा "केशान्विकीर्य पदयोः पतिताश्रुमुख्यः" इत्युक्तेः । बान् बालान् लाकयत्यास्वादयति स्वभोजनमिति वा बालकः । 'लक—आस्वादनोपार्जनयोः' । किमनंतमहिम्नोऽल्पा थैरित्यलम् । सांद्रपयोदः अंदति प्लुतधृतं बध्नातीत्यंद्रं जलं तेन सहवर्त्तत इति सांद्रः स चासौ पयोदश्चेति तथा । सजलमेघस्तद्वत्सौभगं सुंदरम् 'सांद्रं वने घने मृदौ' इति मेदिनी । काठिन्ये संहतौ च घनः ॥ ९ ॥ महार्हमनर्घं यद्वैदूर्यं नीलपीतरक्तच्छविरत्नं तद्युते किरीटकुंडले तत्त्विषा तद्भास्वत एवोद्भूतानि सा । इत्यर्थ इति तात्पर्यम् । "कुंतलश्चषके बाले जवे पुंभूम्नि नीवृति" इति मेदिनी । उद्दामानि स्वतंत्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम् ॥ ११ ॥ अथैनमस्तौदवधार्य पूरुषं परं नतांगः कृतधीः कृतांजलिः ॥ स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् ॥ १२ ॥ वसुदेव उवाच ॥ विदितोऽसि भवान्साक्षात्पुरुषः प्रकृतेः परः ॥ केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥ स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् ॥ तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ १४ ॥

शमित्यर्थः ॥ १० ॥ विस्मयेनोत्फुल्ले विकसिते लोचने यस्य सः गवामयुतमस्पृशन्मनसा दत्तवान् कंसनिगृहीतस्य दानासंभवात् । स्पृष्टौ हेतुः कृष्णावतारेति । मुदा आप्लुतो व्याप्तः स्नात इति वा ॥ ११ ॥ कृतधीः शुद्धबुद्धिः ॥ १२ ॥ वसुदेवः प्रथमं पुत्रबुद्ध्या पश्यंस्तां परित्यज्याऽऽह । विदितोऽसीति । कथं विदितोऽस्मि । भवान्प्रकृतेः परः पुरुष इति । ननु किमाश्चर्यं पुरुषस्य प्रकृतेरन्यत्वादेवेत्यत आह । साक्षादिति । प्रत्यक्षत इत्यर्थः । नन्वक्षिसन्निकृष्टं प्रत्यक्षतःउपलभ्यते किं चित्रमित्यत आह । केवलेति । केवलश्चासावनुभवश्च स चासावानंदश्च तदेव स्वरूपं यस्य सः । किं च सर्वबुद्धिदृक् न ह्येवंभूतो दृश्यो भवतीत्यर्थः ॥ १३ ॥ ननु देवकीजठरे प्रवि

यानि कांच्यंगदकंकणादीनि तैः । " उद्दामो बंधरहिते स्वतंत्रे च प्रचेतसि " इति मेदिनी । कांची मेखला "कांची स्यान्मेखलादाम्नि प्रभेदे नगरस्य च" इति मेदिनी । अंगदं केयूरम् "अंगदः कपिभेदे ना केयूरे तु नपुंसकम्" इति च । "कंकणं करभूषणम् कंकणं करभूषायां सूत्रमंडनयोरपि" इति च । आदिनांगुलीयकादयो ज्ञेयाः ॥१०॥ स्पृष्टौ दाने "विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यमरात्स्पृशिर्दानेपि । सामान्यबालस्यापि जन्मनि पिता दानाद्युत्सवं करोति मम तु श्रीकृष्णः साक्षात्परब्रह्मैव पुत्रो जातः संप्रत्यहं कमुत्सवं करोमीति प्राप्तसंभ्रमः प्रसिद्धार्थमाह–स्नात इति । 'आप्लुतः स्नातके स्नातः' इति मेदिनी । विस्मयैरुत्फुल्ले सुप्रकाशे विलोचने यस्य स तथा विस्मयानाह–अहो मुनींद्राणामपि दुर्लभदर्शनो मम पुत्रत्वेन दृश्यो बभूवेति हेतोर्विस्मयः प्रथमः । सर्वव्यापकं परं ब्रह्मापि मानुषगर्भादजनिष्टेति द्वितीयः । विविधास्त्रवस्त्रभूषणविशिष्ट एवं गर्भान्निष्क्रांत इति तृतीयः । साक्षान्महाभयस्यापि भीषण आदिपुरुषो भगवानपि मां कंसभीतं पितृत्वेनांगीचक्र इति चतुर्थ इत्येवमनंता एव विस्मयास्तस्यासन्निति । 'विस्मयोद्भुतमाश्चर्यम्' इत्य मरः ॥११॥ गतभीर्निर्भयः । तत्र हेतुः–प्रभावविदिति । ईशोयमनंतोऽयं सर्वांतकर इत्याद्यैश्वर्यज्ञानवान् ॥ १२ ॥ तां पुत्रबुद्धिम् । अक्षिसन्निकृष्टं नेत्रगोचरम् । यद्वा–विदितोस्यद्य मयोपलब्धोसीत्याह–यः प्रकृतेः परस्तद्द्रष्टा पुरुषः स भवान् यथा यः केवलानुभवानंदस्वरूपः परब्रह्माख्यो निर्विशेष आत्मा सोऽपि भवान्यश्च सर्वबुद्धिदृक् सर्वांतर्यामी परमात्मा सोऽपि भवानिति तत्तद्रूपकत्वात्स्वयं भगवत्त्वेन ज्ञातोऽसि तत्रापि साक्षाद्विदितोऽसि चक्षुषा दृष्टोसीत्यहो मे भाग्यमहिमेति भाव इति तोषिण्याम् । इत्यर्थ इति । नहि द्रष्टा दृश्यतां यातीति भावः । केवलो द्वितीयोऽनुभवो ज्ञानं आनन्दसुखं कथमेतादृशस्तत्राह–किंचेति ॥ १३ ॥ केवलद्रष्टृरूपस्य कथं जन्मादीति शंकते–नन्विति । जठरम् उदरम् । उक्तस्वरूपः केवलानुभवानंदस्वरूपः । इत्यर्थ इति । न ह्येतादृशस्य जठरे प्रवेशः संभवतीति भावः । पुनराशंकते–नन्विति । तदनु सृष्टिमनु । किमेतद्ब्रह्म किमधिकं कथ्यतेऽप्रविष्ट इति । अतो हेतोः । पुनराह–स्वप्रकृत्या स्वमाययाऽघटनघटनापटीयस्या स्वशक्त्या । पुनराशंकते–नन्विति । श्रुत्या वक्ष्यमाणया प्रत्यक्षतो योगिभिरेवान्यैः कथं लक्ष्य इत्यांशंकानिवृत्तये सद्रूपेण आकाशः सन्वायुः सन्नित्यादिरूपेण सर्वैर्लक्ष्यते इति भावः । अत्र विश्वनाथः–ननु भो तात त्वद्गृहे प्रविष्टं परिच्छिन्नमेव जातमेव जानास्यतः किमपि मे तत्त्वं न जानासीत्याशंक्य स्वज्ञानमाविष्कुर्वन्नाह–स एवोक्तस्वरूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथेमेऽविकृता भावास्तथा ते विकृतैः सह ॥ नानावीर्याः पृथग्भूता विराजं जनयंति हि ॥ १५ ॥ संनिपत्य समुत्पाद्य दृश्यंतेऽनुगता इव ॥ प्रागेव विद्यमानत्वान्न तेषामिह संभवः ॥ १६ ॥ एवं भवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः ॥ अनावृतत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ १७ ॥

ष्टस्य किमियमतिस्तुतिः क्रियतेऽत आह । स एवेति । स एव उक्तस्वरूप एव त्वमसि न देवकीजठरे प्रविष्ट इत्यर्थः । ननु विश्वं सृष्ट्वा तदनु प्रविष्टस्य किमेतद्वद्वत आह । स्वप्रकृत्येति । स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एवेति । ननु तर्हि कथं श्रुत्योच्यते "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यत आह । प्रविष्ट इवेति । भाव्यसे निरूप्यसे प्रत्यक्षतो वा सद्रूपेण वा प्रविष्ट इव लक्ष्यसे ॥ १४ ॥ अत्र दृष्टांतः । यथेति । इमेऽविकृता भावा महदादयो यथा तथेति । दृष्टांतं विवृणोति । ते विकृतैरिति । ते महदादयः विकृतैः षोडशविकारैः सह संनिपत्य विराजं ब्रह्मांडं जनयंति । संनिपतने हेतुः । यतः पृथग्भूताः संतो नानावीर्या विशिष्टकार्यसमर्था भवन्तीत्यर्थः ॥ १५ ॥ अतः संनिपत्येति । एवं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यंते न पुनः प्रविष्टाः । कुतः । उत्पत्तेः प्रागेव कारणतया विद्यमानत्वान्न तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति ॥ १६ ॥ दार्ष्टांतिकेऽतिदिशति । एवं भवानिति । ननु यद्यहमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्ते तर्हि तेष्विंद्रियैर्गृह्यमाणेषु मम ग्रहणं किं नास्ति तत्राह । बुद्ध्यनुमेयलक्षणैरिति । बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं येषां तैर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैर्विषयैः सह सन्नपि वर्तमानोऽपि तद्गुणाग्रहस्तैर्गुणैः सह न गृह्यते भवान् । अयं भावः । नहि ग्राह्यैः सहभावमात्रं ग्रहणे कारणं किं त्विंद्रियाणां शक्तिः सा च कार्यैकसमधिगम्या यथा कार्यमेव कल्प्यते अतो यथा चक्षुषा रूप

एव स्वप्रधानशक्त्येदं विश्वं सृष्ट्वा तदनु प्रविष्ट इवाप्रविष्टं इव च निरूप्यसे जगतोंतरुपलभ्यमानत्वादप्रविष्ट इव न त्वप्रविष्टः बहिश्चोपलभ्यमानत्वात्प्रविष्ट इव न तु प्रविष्ट इत्यर्थः । एवमेव वर्त्तमानस्त्वं मद्गृहे प्रविष्ट इव न तु प्रविष्टः सर्वदैव वर्त्तमानस्त्वं जात इव न तु जातस्तेन च सर्वव्यापकमूर्त्तेस्तव कंसः किमपि कर्त्तुं न शक्नुयादितिजानाम्येवेति ॥ १४ ॥ अत्राप्रविष्टस्यापि प्रवेशे महदादयः सप्त महदहंकारपंचतन्मात्रारूपाः । विवृणोति स्फुटयति । सन्निपत्य मिलित्वा । विशिष्टकार्यसमर्था ब्रह्मांडोत्पादनसमर्थाः ॥ १५ ॥ अतो हेतोः । एवं समुत्पाद्य मिलित्वोत्पाद्य ॥ १६ ॥ यमुद्दिश्य दृष्टांतः प्रदीयते स दार्ष्टांतिकः । अतिदिशति साम्येन कथयति । एवमनेन प्रकारेण भवानपि । यथा ते महदादयो ब्रह्मांडप्रविष्टा अपि न प्रविष्टास्तत्र पुनर्जातवत्प्रतीता अपि न जातास्तथैव त्वमपीत्यर्थः । पुनराशंकते—नन्विति । तेषु कार्येषु मम कारणस्य किं नास्ति कुतो नेत्यर्थः । तत्र कार्यग्रहणेऽपि कारणाग्रहणे गुणैरिति पदमावृत्त्या योज्यं गुणैर्विषयैः अनुमेयमनुमातुं योग्यम् अनुमानं तु रूपाद्युपलंभः करणसाध्यः क्रियात्वात् छिदिक्रियावदिति । किं–च याया क्रिया सासा करणसाध्येति व्याप्तेर्वा स्यादिरूपकरणसाध्यच्छिदिक्रियायां दृष्टत्वादिंद्रियसिद्धावित्थं बोध्यम् । अयं भावः इदमत्र तात्पर्यम् । तदाह—नहीति । कार्यैकसमधिगम्या कार्यद्वारेणैव केवलं ज्ञेया । यथा कार्यं कार्यानुसारेण । यतः कार्यानुसारेण कल्प्यतेऽतः कारणात् । यथाम्रफले दृष्टे तद्गतनीलपीतादिवर्णविशिष्टाकारमात्रं चक्षुषा गृह्यते न तदंतर्वर्तिरसोऽपि तद्वदित्यर्थः । अविषयत्वेन द्रष्टृरूपत्वादगोचरत्वेन । ग्रहणानर्हत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतो बुधः ॥ विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥ १८ ॥
त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदंत्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः ॥ १९ ॥

ग्रहणेऽपि रसादिग्रहणं नास्ति एवं सहभावेऽपि जिह्वया रस एव गृह्यते न तु रूपं तथैव विषयग्रहणे त्वद्ग्रहणमपीति । अविषयत्वेन च ग्रहणानर्हत्वमुक्तमेव सर्वबुद्धिदृगित्यत्र एवं तावत्प्रागेव विद्यमानत्वात्प्रवेशो नास्तीत्युक्तम् । किं च परिच्छिन्नस्य नीडे पक्ष्यादेरिव प्रवेशो भवेत्तव त्वनावृतत्वादपरिच्छिन्नत्वेन बहिरंतर्भेदो नास्ति । कुतः प्रवेश इत्याह । अनावृतत्वादिति । अनावृतत्वे हेतूनाह । सर्वस्येति नहि सर्वस्वरूपस्यान्यदावरकमस्ति सर्वात्मनः । न ह्येकेनावृतोऽन्यस्यात्मा भवेत् । आत्मवस्तुन इति आत्मनो वस्तुनश्चेति हेतुद्वयम् ॥ अत सातत्यगमन इत्यस्मादतति व्याप्नोतीत्यात्मा नहि व्यापकस्यावरणं घटते । तथा वस्तुनः परमार्थवस्तुन आवरणं न घटत इत्यर्थः । आवृतं हि न प्रकाशेत । तस्मात्त्वांतर्यामितया प्रवेशो न मुख्योऽस्ति कुतस्तरां गर्भे प्रवेशः अतः केवलानुभवानंदस्वरूप एव त्वं विदितोऽसीत्याश्चर्यं मम भाग्यमित्यर्थः ॥ १७ ॥ नन्वेतद्धेतुचतुष्टयं प्रपंचस्यावस्तुत्वे घटेत तत्तु न संभवति सत्यत्वेन प्रतीतेरित्याशंक्याह । य इति । आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकत आत्मव्यतिरेकेण पृथक्सन्नयं देहादिरिति व्यवस्यते निश्चिनोति यः पुमान्सोऽबुधोऽविद्वान् व्यतिरेकदर्शनात् । किं च मनीषितं विचारितं तद्देहादि सर्वं यतो विनानुवादं वाचारंभणमात्रं विना सम्यङ् न भवति । अतोऽवस्तुत्वेन त्यक्तं बाधितमेव वस्तुबुद्ध्या उपाददत्स्वीकुर्वन्नबुध इत्यर्थः ॥ १८ ॥ एवं परमेश्वरदृश्यस्य तद्व्यतिरेकेणासत्त्वमुक्तं परमेश्वरोपादानत्वादपि तद्व्यतिरेकेणासत्त्वमित्याह । त्वत्तोऽस्येति । न चैवं सत्यपि विकारित्वमित्याह । अनीहादिति । अगुणत्वादनीहत्वं ततो विका

ज्ञानाविषयत्वम् । एवमनया रीत्या तावत् निश्चयेन साकल्येन वा । अन्यदप्याह—किं चेति । परिच्छिन्नस्य परिमितस्य नीडे तृणादिरचितपक्ष्यावासे । पक्ष्यादेरिहादिना सर्पादिग्रहः । अनावृतत्वादावरणहीनत्वात् । अपरिच्छिन्नत्वेनापरिमितत्वेन । बहिरंतर्भेदो बाह्याभ्यंतरभेदः । कुतः प्रवेशः कथं प्रवेशः संगच्छेदित्यर्थः । इत्यर्थ इति । अवस्तुनो जगतः परिच्छिन्नत्वेनावरणं संजाघटयादेवेति न हि परमार्थरूपत्वात्सर्वव्यापकस्येति तात्पर्यम् । यस्मात्त्वांतर्यामितया मुख्यः प्रवेशो नास्ति तस्मात्कुतस्तरां गर्भे प्रवेश इति संबंधः । यतो गर्भे न प्रवेशोऽतो हेतोः । इत्यर्थ इति । न हि परपुण्योत्कर्षं विनैतद्रूपस्य दर्शनादि भवतीति भावः ॥ १७ ॥ मीमांसकमतेन प्रपंचसत्यत्वमंगीकृत्य पुनराशंकते—नन्विति । एतत्पूर्वोक्तं हेतुचतुष्टयं सर्वस्वरूपत्वात्सर्वात्मत्वादात्मत्वाद्वस्तुत्वादित्येवं रूपाणां हेतूनां चतुष्कम् । अवस्तुत्वेऽपरमार्थत्वे घटेत संगच्छेत । तत्तु अवस्तुत्वं तु । व्यतिरेकदर्शनात् भेददर्शनात् । भेददर्शनं त्वविचारचार्वित्याह—किञ्चेति । सर्वं जगत् । इत्यर्थ इति । असति सद्बुद्धिकर्त्ता मूर्ख इति भावः ॥ १८ ॥ दृश्यस्य द्रष्टारं विहाय निष्पत्तेरनुपलंभादुपादेयस्योपादानाव्यतिरिक्तत्वाच्चासत्त्वमस्तीत्याह—एवमित्यादिना । एवं सत्यपि जन्माद्युपादानत्वे सत्यपि । विकारित्वं सविकारत्वम् । तत्र हेतुः—अनीहत्वादिति । अचेष्टत्वादित्यर्थः । ततोऽनीहत्वात् । इत्यर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ॥ सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥ २० ॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेवतीर्णोऽसि ममाखिलेश्वर ॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमूः ॥ २१ ॥ अयं त्वसभ्यस्तव जन्म गृहेनौ श्रुत्वाऽग्रजांस्ते न्यवधीत्सुरेश्वर ॥ स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाऽधुनैवाभिसरत्युदायुधः ॥ २२ ॥ श्रीशुक उवाच ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणम् ॥ देवकी तमुपाधावत्कंसाद्भीता शुचिस्मिता ॥ २३ ॥

रित्वमित्यर्थः । नन्वनीहत्वे कथं कर्तृत्वं कर्तृत्वे वा कुतोऽविकारित्वं तत्राह । त्वयीश्वर इति । ब्रह्मत्वादविकारित्वमीश्वरत्वात्कर्तृत्वमिति । नन्वेतदपि विरुद्धमेव नेत्याह । त्वदाश्रयत्वादिति । गुणैः कुर्वद्भिस्त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते गुणाश्रयत्वात् । यथा भृत्यकृत्यं राजनीति ॥ १९ ॥ एवंभूतस्यैव तव यथा विश्वस्थितिसर्गप्रलयार्थं त्रिवर्णा गुणावतारा एवमयं भूभारापनयनार्थमिति ज्ञातमित्याह स त्वमिति श्लोकद्वयेन ॥ २० ॥ रिरक्षिषुः रक्षितुमिच्छुरवतीर्णोऽसि ॥ कृष्णेन वर्णेन अतः साधूनां रक्षणार्थं राजन्यसंज्ञा येऽसुरकोटियूथपास्तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेना निहनिष्यसे संहरिष्यसि ॥ २१ ॥ किं तु तथाप्यप्रमत्तेन त्वया भाव्यमित्याह । अयं त्विति । असभ्यः खलः । समर्पितं कथितम् । अभिसरत्यागमिष्यति ॥ २२ ॥ उपाधावदस्तौत् ॥ २३ ॥

इत्थं हेतुहेतुमद्भाव इति भावः । पुनस्तत्रैवाशंकते–नन्विति । संभवमाह–त्वयीति । निरुपाधित्वादकर्तृत्वेपि नियंतृत्वेन कर्तृत्वं तवास्त्येव तर्हि ईश्वरत्वेपि एतत्कर्तृत्वं विरुद्धमेव लोके ईशो राजादिर्न हि कार्यकर्त्ता दृश्यते किं-तु भृत्यादिरेवात ईशः कर्त्तेति विरुद्धं तत्राह–नेति । त्वयि त्वद्विषये । उपचर्य्यत आरोप्यते । तदाश्रयत्वाद्गुणाश्रयत्वात् । यद्यपि गुणाश्रयत्वं प्रकृतेरेव तथापि तस्या अपि त्वच्छक्तिरूपत्वेन त्वदाश्रयत्वात्तदाधारा अपि पारंपर्येण त्वदाश्रया एव त इत्यर्थः । भृत्यकृतं योद्धृकृतं जयपराजयादिकर्म ॥ १९ ॥ एवं भूतस्यैव निर्विकारस्यैव त्रयः शुक्लरक्तकृष्णा वर्णा येषां ते त्रिवर्णाः गुणैरवतीर्यंत इति गुणावतारा ब्रह्मविष्णुरुद्राख्याः । एवमयं तथैवाधुना मद्दृग्गोचरो यस्तेऽवतारः । अपनयनमपाकरणम् ॥ २० ॥ यतोऽवतीर्णोसि अतो हेतोः ॥ २१ ॥ यद्यपि खलप्रहाणयेऽवतीर्णोसि तथाप्यन्यच्छृण्वित्याह–किंत्विति । अप्रमत्तेन सावधानेन भाव्यं भवितव्यम् । अयं कंसः । कंसस्य बालहननादि दुश्चरितं पश्यद्भिरपि सुरैर्न किञ्चित्तद्दमनं कृतमतस्त्वां प्रार्थयामीति सुरेश्वरसंबुद्ध्यभिप्रायः । अभिसरति अभिमुखमेवागतप्रायं तं पश्यामीत्यतोऽधुनैवेदं रूपमुपसंहर समागते तु तस्मिन्नुपसंजिहीर्षतः पूर्वं किं भविष्यतीति । उदायुध उद्धृतायुध इति । मे महान्कंप इति भावः ॥ २२ ॥ अथ वसुदेवस्तुत्यनंतरम् । एनमित्यन्वादेश एतद एनदादेशः । यो वसुदेवेन स्तुत एनं महापुरुषो विष्णुस्तस्य लक्षणानि शंखचक्रादीनि यस्य तम् । यद्वा–अथ पत्युर्भयं दृष्ट्वा समीपं भीतेति । स्वरूपमुपसंहरंतं स्मयमानं तमालक्ष्य परमेश्वरत्वाहंकारेण कंसभयं न गणयति तदहं किं करोमीति विह्वलेत्यर्थः । सुविस्मितेत्यस्य परमेश्वराग्रे कोयं खलु वराकः कंसस्तदप्यावयोर्भयं वर्द्धत एवेति कोयमविवेको दुस्तर इति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवक्युवाच ॥ रूपं यत्तत्प्राहु रव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ॥ सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥ २४ ॥

त्वयि भयशंकैव तावन्नास्तीति श्लोकचतुष्टयेनाह देवकी किंचिद्विज्ञापयितुम् । रूपमिति । यत्तत्किमपि रूपं वस्तु प्राहुर्वेदाः । किं तद्वस्तु तदाह । अव्यक्तम् । अत्र हेतुः । आद्यं कारणम् । किं परमाणवः न ब्रह्म बृहत् । किं प्रधानं न ज्योतिश्चेतनम् । किं वैशेषिकाणामिव ज्ञानगुणं न निर्गुणम् । किं मीमांसकानामिव ज्ञानपरिणामि न निर्विकारम् । किं पुष्कराक्षादीनामिव शक्तिविक्षेपपरिणामि न सत्तामात्रम् । तर्हि किं सामान्यं न निर्विशेषम् । तर्हि किं कारणत्वात्सक्रियं न निरीहम् । सन्निधिमात्रेण कारणं एवंभूतं किमपि कार्यकल्प्यं यद्वस्तु स एव साक्षात्त्वं विष्णुरिति । न केवलं कार्यकल्प्यत्वम् अपरोक्षश्चेत्याह । अध्यात्मदीप इति । बुद्ध्यादिकरणसंघातप्रकाशक इत्यर्थः । अथवा अव्यक्तं न केनापि प्रकारेण व्यज्यत इत्यव्यक्तम् । कथं उत्पत्त्या तावन्न व्यज्यत इत्याह । आद्यं सर्वस्य कार्यस्याद्यं कारणम् । अनादीत्यर्थः । तथा ब्रह्म ज्योति निर्गुणं निर्विकारमिति चतुर्भिः पदैर्देशेन प्रकाशेन च गुणेन च विकारेण च व्यक्तिं निराकरोति । तथा सत्तामात्रमिति विशेषेण निर्विशेषमिति सामान्येन निरीहमिति

शुचिस्मितेति पाठे । अहो मे भाग्यं साक्षात्परब्रह्मैव पुत्रतामाप्त इत्याह्लादेन शोभनेषद्धासमुखीत्यर्थः ॥ २३ ॥ अथ देवकी परमात्मनि निर्भयतां निवेदयंती स्तौतीत्याह—त्वयीति । तावत्सर्वथा । विज्ञापयितुं बोधयितुम् । रूप्यते निरूप्यत इति रूपम् । तदाह—वस्तु वक्ति न व्यज्यते वेदातिरिक्तमानेन प्रकाश्यत इत्यव्यक्तम् । अत्राव्यक्तत्वे । "आद्यं कारणं कोऽद्धा वेदकः प्रावोचत्" इत्यादिश्रुतेः । तार्किकैः परमाणव एव जगत्कारणत्वेन स्वीक्रियंते तन्निरस्यंत्याह—न ब्रह्मेति । ननु तर्हि "अजामेकां लोहितकृष्णशुक्लां बह्वीः प्रजाः सृजमानाम्" इत्यादिश्रुतेः "मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । संभवः सर्वभूतानां ततो भवति भारत ॥ " इति श्रीमुखोक्तेश्च । किं प्रधानं सांख्यैरपि तदेव जगत्कारणत्वेनांगीक्रियते तन्निरस्यंत्याह न ज्योतिरिति । चेतनं प्रधानं त्वचेतनत्वान्न कारणमिति निरूपितमाद्यश्लोकव्याख्याने "ईक्षतेर्नाशब्दम्" इति परमर्षिसूत्रेण वैशेषिका अपि तार्किका एव ते ईश्वरं ज्ञानुगुणकं मन्यंते तदाक्षिपंत्याह—न निर्गुणमिति । मीमांसकास्तु "विक्रिया ज्ञानरूपास्य नित्यत्वेन विरोत्स्यते " इत्यादिवाक्यैर्ज्ञानपरिणामिनमात्मानमभ्युपगच्छंति तन्मतं घ्नंत्याह—न निर्विकारमिति । पुष्कराक्षा[1] उत्तरमीमांसकैकदेशिनस्तु शक्तिविक्षेपेण मायानिष्ठविक्षेपशक्त्या परिणामिनमात्मानमभ्यर्हंति तन्मतमनंगीकुर्वंत्याह—स सत्तामात्रमिति । सत्स्वरूपं सर्वदैकरसमिति यावत् । तर्हि किं सामान्यं तन्निरस्यंत्याह—न निर्विशेषमिति सामान्यस्य परापररूपाविशेषवत्त्वात् । तार्किकैः परापरभेदेन सामान्यद्वयमूरीक्रियते परं सत्ताऽपरं द्रव्यत्वादीति । कारणत्वं समर्थ्य पुनराशंकते—तत्र तर्हीति । तर्हीह वाक्यालंकारेऽव्ययमिति ध्येयम् अव्ययानामनेकार्थत्वात् । निरीहं निष्क्रियं सन्निधिमात्रेण चुंबकाश्मवदिति । एवंभूतं सन्निधिमात्रेणैव कारणतावत् । किमपि अनिर्वाच्यम् । कार्येण जगदुत्पादनादिरूपेण कल्प्यत इति कार्यकल्पम् "यतो वा इमानि भूतानि जायंते " इत्यादिश्रुतेः । साक्षात् अपरोक्षः प्रत्यक्षः । इत्यर्थ इति । जडानां चेतनमंतरा प्रकाशासंभवादिति भावः । पूर्वव्याख्याने नानामतनिरासप्रयासात्तद्विहाय शुद्धवेदांतमतमेव श्रेयोऽतस्तत्प क्षमाह—अथ वेति । केनापि प्रकारेण प्रत्यक्षानुमानादिरूपेणेत्यर्थः । तावत्प्रथमम् । इत्यर्थ इति । आदिमत एव व्यक्तिर्भवति न त्वनादेरिति तात्पर्यम् । तथा दर्शयति चतुर्भिर्विशेषणैः । ब्रह्म व्यापकं नहि व्याप

१ क्वचित्पुष्कराक्षाणां स्थाने भास्करीयाणामित्यपि पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ॥ व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यतेऽशेषसंज्ञः ॥ २५ ॥
योयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वम् ॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ २६ ॥

क्रियया च व्यक्तिं निराकरोति । अन्यत्समानम् । एवंभूतस्य तव न भयशंकेति भावः ॥ २४ ॥ किं च महाप्रलयेऽप्यवशिष्यमाणस्य कुतो भयमित्याह । नष्टे लोक इति । चराचरे लोके महाभूतेषु लीने तेष्वप्यादिभूतं भूतसूक्ष्मं प्रविष्टेषु तस्मिन्नपि व्यक्तेऽव्यक्तं प्रधानं प्राते । अशेषसंज्ञः अशेषात्मके प्रधाने संज्ञा प्रज्ञा यस्य । एवं मयि लीनमिदमस्ति पश्चादेवमुद्बोधनीयमिति प्रज्ञा यस्येत्यर्थः । सोऽशेषसंज्ञ इति वा ॥ २५ ॥ किं च एवं प्रलयहेतुर्योयं काल एनम् । हे अव्यक्तबंधो प्रकृतिप्रवर्तक । तस्य प्रलयावधिभूतस्य ते तव चेष्टां लीलाम् आहुः । चेष्टते विपरिवर्तते पुनः पुनर्वत्सरावृत्त्या । महीयान् द्विपरार्धरूपः । यस्य चेष्टामाहुस्तं त्वा त्वां क्षेमधामाभयस्थानं प्रपद्ये शरणं व्रजामि ॥ २६ ॥

कस्य कस्मिंश्चिद्देशे एव व्यक्तिरस्ति व्यापकत्वव्याघातादिति भावः। ज्योतिः सर्वप्रकाशकम् "येनेद्धः सूर्यस्तपति" इत्यादिश्रुतेः।सर्वप्रकाशकस्य कश्चित्परिच्छिन्नप्रकाशो व्यक्तिं कर्तुं न शक्नोतीत्यर्थः । निर्गुणं निर्गुणस्य न केनापि गुणेन व्यक्तिः संभवतीति निर्गुणत्वहानेः निर्विकारम् । सविकारस्य प्रकृत्यादेर्महदादिद्वारेणाभिव्यक्तिर्भवति निर्विकारस्य तु सा कथमपि न संभवतीत्यर्थः । तथैव सत्तामात्रम् । सत्तास्वरूपस्य व्यक्तिकारको न कश्चिद्विशेषोऽस्ति तस्यैव सर्वव्यंजकत्वात् । तच्च घटः सन् पटः सन्निति सत्तयैव घटादयो व्यज्यंते न तु घटादिभिः सत्तापीति तेषामसत्त्वात् । असतोऽपि व्यंजकत्वे वंध्यात्मजोऽपि स्वरूपादि व्यंजयेदिति भावः । निर्विशेषं सविशेषस्यैव सामान्येन घटत्वादिना घटादेर्व्यक्तिर्दृश्यते न तु निर्विशेषस्य ब्रह्मणोऽपीति विशेषोऽत्रावयवादिर्ज्ञेयो न तु तार्किकाभिमतपंचमपदार्थ इति । निरीहम् । सचेष्टस्यैव क्रियया कर्मणा व्यक्तिर्दृश्यतेऽपिहितकपाटकोष्ठांतर्गतस्य यथा कपाटोद्घाटनकर्मणा न तु निश्चेष्टस्याकाशादेरपीति । अन्यद्विवृतावशिष्टं रूपं यत्तदित्यादि । एवंभूतस्य सर्वथा परब्रह्मरूपस्य । इति भात्र इति । न हि ' यद्बिभेति स्वयं भयम् ' इत्युक्तेः ' भीरपि यद्बिभेति ' इत्युक्तेश्च " मृत्युश्चरति यद्भयात् " इति श्रुतेः " यस्य मृत्युरुपसेचनम् " इति श्रुतेश्च कालस्यापि त्वत्तो भीतत्वात्कथमपि तव भयशंकैव नोदेति भयं तु कथं स्यादिति तात्पर्यम ॥ २४ ॥ महाभयस्थलेऽपि तव निर्भयत्वादन्यत्र कथं तत्स्यादित्याह—किंचेति । तेषु महाभूतेषु । तस्मिन्नपि भूतसूक्ष्मेपि । व्यक्तेव्यक्तसंज्ञके भूतसूक्ष्माहंकारमहत्तत्त्वानां प्रकृतेर्व्यज्यमानत्वाद्व्यक्तत्वं तथा चादिभूतपदं चात्रोपलक्षकं महदहंकारयोरपि अशेषात्मके सर्वकारणे प्रधाने प्रकृताविति । यद्वाऽशेषाः संज्ञा यस्य सः " नामानि सर्वाणि यमाविशंति " इति श्रुतेः । न शेषो यस्मात्सोऽशेषः सर्वात्मा स एव संज्ञा यस्येति वा न शेषोऽर्थात्प्रपंचस्य यत्र सोऽशेषः प्रलयस्तस्मिन्संज्ञा ज्ञानं यस्येति वा । प्रलयेऽपि यज्ज्ञानं न नश्यतीत्यर्थः । प्रधानेऽशेषात्मकत्वासंभवं पर्यालोच्याह—शेषसंज्ञ इति । शिष्यतेऽस्थूलमनण्वित्यादिना सर्वनिषेधेऽवधित्वेनेति शेषः । परमात्मा स एव संज्ञा यस्येति । अनंतस्यापि प्रलये श्रूयमाणत्वात्तत्संज्ञो वेत्यर्थः ॥ २५ ॥ कालस्यैव ' यतो भिन्नदृशां भयम् ' इत्यादिना सर्वभयहेतुत्वं श्रूयते स तु तव चेष्टैवातस्तव कथं भयं न हि स्वकरादिचालनं स्वस्य भयकरमित्याह—किंचेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्त्यो मृत्युव्यालभीतः पलायँल्लोकान्सर्वान्निर्भयं नाध्यगच्छत् ॥ त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥ २७ ॥ स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान्भृत्यवित्रासहाऽसि ॥ रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः ॥ २८ ॥ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन ॥ समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥ २९ ॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकम् ॥ शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥ ३० ॥ विश्वं यदेतत्स्वतनौ निशांते यथावकाशं पुरुषः परो भवान् ॥ बिभर्ति सोयं मम गर्भगोभूदहो नृलोकस्य विडंबनं हि तत् ॥ ३१ ॥ श्रीभगवानुवाच ॥ त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति ॥ तदायं सुतपा नाम प्रजापतिरकल्मषः ॥ ३२ ॥

क्षेमधामत्वमेवाह ॥ मर्त्य इति । मृत्युः संसारः स एव व्यालः तस्माद्भीतः लोकान्प्रति यदृच्छया केनापि भाग्योदयेन । हे आद्य अस्मात्त्वत्पदाब्जादपैति पलायते । "मृत्युर्धावति पंचमः" इति श्रुतेः ॥ २७ ॥ प्रस्तुतं विज्ञापयति । स त्वमिति । भृत्यानां वित्रासं हंतीति भृत्यवित्रासहा भृत्यविदिति वा छेदः । पौरुषमैश्वरं ध्यानधिष्ण्यं ध्यानास्पदम् । मांसदृशां मांसचक्षुषां प्रत्यक्षं मा कृथाः ॥ २८ ॥ मा विद्यात् न जानातु । भवत एव हेतोर्निमित्तादहं कंसात्समुद्विजे बिभेमि यतोऽधीरचित्ता ॥ ॥ २९ ॥ ३० ॥ किमित्युपसंहर्तव्यमेवंभूतेन मया पुत्रेण तव महती श्लाघा स्यादिति तत्राह । विश्वमिति । निशांते प्रलयावसाने । यथावकाशमसंकोचतः असंभावितत्वादुपहास्यतैव स्यादित्यर्थः ॥ ३१ ॥ चतुर्भुजेन रूपेणाविर्भावे कारणं तावदाह त्वमेवेत्यादिचतुर्दशभिः । पूर्वसर्गे प्रथमजन्मनि । अभूः आसीः । पृश्निर्नाम । स्वायंभुवे

एव महाभूतादिलयप्रकारेण । ईशानं कालस्यापि नियंतारम् ॥ २६ ॥ यद्वा—त्वत्पाद एवाब्जो धन्वंतरिस्तं प्राप्य व्यालदष्टं यथा धन्वंतरिः पाति तथा मृत्युग्रस्तं त्वत्पादाब्जं रक्षकमिति भावः । "अब्जोऽस्त्री शंखे ना निचुले धन्वंतरौ हिमकरणे च पद्मे क्लीबम्" इति मेदिनी ॥ २७ ॥ प्रस्तुतं प्रकृतम् । विज्ञापति बोधयति । भृत्यवित्रासहंतृत्वेन भगवति वैषम्यमाशंक्याह—भृत्यवित् त्रासहेति छेदम् । भक्तवत्सलः सामान्यतस्सर्वत्रासहर इति । यद्वा—भृत्यानामपि त्वं विविधत्रासं भयं हंसि आवयोः पित्रोरंतर्भयं कुतो न हंसीति भावः ॥ २८ ॥ भवत एवेति । यदीश्वरं मां जानासि तर्हि किमर्थमुद्विजसे तत्राह—यतोऽधीरधीश्चलबुद्धिः अलौकिकं लोकेष्वविद्यमानं शंखादीनां श्रिया कांत्या जुष्टं सेवितं यतः । यद्वा—शंखादिभिः सहिता श्रीश्चिह्नरूपा रमा तया उपसंहर अंतर्द्धेहि । अत्र विश्वनाथः—भो मातर्यदीदं रूपमंतर्धापयामि तदा कंस आगत्य गर्भस्ते क्व गत इति गर्भचौर्यापराधेन त्वामधिकं ताडयिष्यतीति चेत्तत्र मम का शंकेत्यत आह—ते जन्म मा जानातु । हे मधुसूदनेति । मधुं हतवतो मम कंसवधे कः प्रयास इति मामंस्थाः । स्तदानींतनांन्मधोरप्ययमिदानीतनः कंसः कोटिगुणबलाधिक इति भावः । भवद्धेतोरिति मदपराधं प्रकल्प्य मत्ताडनादिकं कुर्याच्चेत्करोतु केवलं भवतः कल्याणमाशास इति भावः तर्हि 'रूपं यत्तत्' इत्यादिना मदैश्वर्यं वृथा—किमवादीः सत्यं पुत्र भवन्माताहमधीरधीरिति मातृवात्सल्येनैवेदं रूपमुपसंहरेति भावः ॥ २९ ॥ ३० ॥ एतादृशं पुत्रं सर्वे वांछंति त्वं किमेवं वदसीत्याह—किमिति । एवंभूतेन शंखादिशोभितेन नृलोकस्य मनुष्यलोकस्य विडंबनमुपहास एवेत्यर्थः । इत्यर्थ इति । उचितेनैव श्लाघा न त्वसंभविनेति भावः ॥ ३१ ॥ तावदादौ चतुर्दशभिः 'त्वमेव—इत्यारभ्य 'मद्गतिं पराम्' इत्यंतैः ॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युवां वै ब्रह्मणाऽऽदिष्टौ प्रजासर्गे यदा ततः ॥ सन्नियम्यैंद्रियग्रामं तेपाथे परमं तपः ॥ ३३ ॥ वर्षवातातपहिमघर्मकालगुणाननु ॥ सहमानौ श्वासरोधविनिर्धूतमनोमलौ ॥ ३४ ॥ शीर्णपर्णानिलाहारावुपशांतेन चेतसा ॥ मत्तः कामानभीप्संतौ मदाराधनमीहतुः ॥ ३५ ॥ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करम् ॥ दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ॥ ३६ ॥ तदा वां परितुष्टोऽहममुना वपुषानघे ॥ तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥ ३७ ॥ प्रादुरासं वरदराड् युवयोः कामदित्सया ॥ व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ ३८ ॥ अजुष्टग्राम्यविषयावनपत्यौ च दंपती ॥ न वव्राथेऽपवर्गं मे मोहितौ देवमायया ॥ ३९ ॥ गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतम् ॥ ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ ॥ ४० ॥ अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समम् ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥ ४१ ॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ॥ ४२ ॥

मन्वंतरे । तदा अयं वसुदेवः ॥ ३२ ॥ तेपाथे तपः कृतवंतौ ॥ ३३ ॥ ३४ ॥ ईहतुः कृतवंतावित्यर्थः ॥ ३५ ॥ तप्यतोराचरतोः । ईयुर्गतानि । मदात्मनोर्मच्चित्तयोः ॥ ३६ ॥ अमुना वपुषा प्रादुर्भूतोऽस्मि ॥ ३७ ॥ वरदराट् वरदेषु श्रेष्ठ इत्यर्थः । तेन सकृद्वरेण च वारंवारमाविर्भावे कारणमुक्तम् । कामस्य दित्सया दातुमिच्छया । मादृशो मया सदृशः ॥ ३८ ॥ मे मत्तोऽपि युवामपवर्गं न वव्राथे न वृतवंतौ ॥ ३९ ॥ वरं दत्त्वा मयि गते ॥ ४० ॥ ४१ ॥ अदित्यां कश्यपाद्वामन

प्रजासर्गे तादर्थ्ये सप्तमी तेपाथे आत्मनेपदमार्षम् ॥ ३३ ॥ तपसः परमत्वमाह--आतपः सौरतापः घर्मो निदाघोत्थतापः । वर्षाद्या घर्मांताश्च ते, कालगुणास्तान् । श्वासरोधेन प्राणायामेन विनिर्धूतं निरस्तं मनोमलं चांचल्यं याभ्यां तौ तथा ॥ ३४ ॥ शीर्णपर्णानि वायुपातितपत्राणि । ईहतुश्चक्रतुः 'ईह–चेष्टायाम्' परस्मैपदमार्षं तत्त्वादेवाममभावश्च ॥ ३५ ॥ एवं वर्षादिसहनादिप्रकारेण । वां युवयोः ॥ ३६ ॥ अमुना इदानीं दर्शितेन । वपुषा शरीरेण ॥ ३७ ॥ वरदेषु ब्रह्मादिषु राजत इति वरदराट् विष्णुरहम् । इत्यर्थ इति । आत्मप्रदत्वात्सर्ववरदोत्तम इति तात्पर्यम् । "सर्वान्ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य" इत्युक्तेः । तेन वरदश्रेष्ठत्वेन हेतुना । सकृद्वरेण च चोप्यर्थे । एकवारवरेणाऽपि यतोऽहं वरदश्रेष्ठस्तत एवैकवारवरेण वारंवारं प्रादुर्भूत इति । वां युवाभ्याम् ॥ ३८ ॥ अजुष्टग्राम्यविषयौ अननुभूतमैथुनादिसुखौ । देवस्य मम मायया पुत्रस्नेहमय्या । "वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः" इत्युक्तेः । पुत्रस्नेहोपि मायाशब्देनोच्यते । मोहितौ तदास्वादानंदेन विचित्तीकृतौ । अत्रोत्तरश्लोकगत युवामिति पदम न्वेत्यन्यथा तत्र पुनरुक्तिदोषो भविष्यतीति ॥ ३९ ॥ ४० ॥ अन्यतमं कमपि शीलं वृत्तम् । औदार्यं माहात्म्यम् । गुणा वात्सल्यादयः । वां युवयोः ॥ ४१ ॥ तद्रूपयोः पृश्निसुतपोरूपयोरेवादितिकश्यपयोः । अहमेव यः पृश्निगर्भः स एवाहमित्यर्थः इति । यः पूर्वमवतीर्णः स एव पुनरप्यवतीर्णोऽस्मीतिभावः । वामनत्वाद्ध्रस्वत्वात्सुंदरत्वाद्वा "वामनः सुंदरे खर्वे हरावंकोट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीयेऽस्मिन्भवेऽहं वै तेनैव वपुषाऽथ वाम् ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥ ४३ ॥ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जायते ॥ ४४ ॥ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ॥ चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥ ॥ ४५ ॥ (यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय ॥ मन्मायामानयाशु त्वं यशोदागर्भसंभवाम् ॥ १ ॥) श्रीशुक उवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ ४६ ॥ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाऽजनि नंदजायया ॥ ४७ ॥

आसेति यत्तदपि तद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः ॥ ४२ ॥ ४३ ॥ प्राक्प्रथमं तावदेतद्रूपं मे जन्मेति स्मरणाय ज्ञानाय दर्शितम् । मद्भवं मद्विषयम् । अनंतरं त्वदिच्छया बालोऽपि भविष्यामीति भावः ॥ ४४ ॥ ननु त्वयि प्रसन्नेऽपि कथमावयोः पुनःपुनर्जन्मेत्यतः परं न भविष्यतीत्याह । युवामिति ॥ ४५ ॥ ४६ ॥ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदायाश्च तां कन्यां मन्मायामानयेति प्रथममेव भगवता प्रचोदितो वसुदेवो यदा गंतुमैच्छत्तदैवाजाऽपि या योगमाया सा नंद

पादपे'' इति धरणिः ॥ ४२ ॥ अस्मिन्वर्तमानकालीने भवे जन्मनि । तेनैव शंखाब्जादियुतेन भूयः पुनस्तयोरेव पृश्निसुतपसोरेव नामांतरेण देवकीवसुदेवयोर्वां युवयोः । हे सति । व्याहृतं कथितम् ॥ ॥ ४३ ॥ अन्यथा मदिच्छां विना । मर्त्यलिंगेन मनुष्यदेहेन । इति भाव इति । मदिच्छया भवद्भ्यां मद्दर्शनं जातं भक्तवत्सलत्वान्मम त्वदिच्छापि कार्यैवेति तात्पर्यम् ॥ ४४ ॥ ''तस्मिन्प्रसन्ने सकलाशिषां पतौ किं दुर्लभं ताभिरलं लवात्मभिः'' इत्याद्युक्ते रावयोर्जन्मावृत्तिः कथं जातेत्याशंकते—नन्विति । 'न हि वस्तुशक्तिर्बुद्धिमपेक्षते' इति न्यायेन पुत्रभावेनापि परां पुनरावृत्तिरहिताम् । यास्येथे आत्मने पदमार्षं यास्यथ इत्यर्थः । एवं स्वपितृत्वात्स्वमंत्रोपासनापटलोक्तवसुदेवादिध्यानपूजादीनां सार्वकालिकत्वप्रदर्शनमप्यन्यथानुपपत्तिसिद्धं तयोर्नित्यासिद्धत्वं संगोप्यप्रेमवर्द्धनार्थं साधकत्वं ख्यापयन् सिद्धिं प्रतिश्रुत्यानंदयति—युवामिति । वस्तुतस्त्वयमर्थः—मम प्रथमा गतिरद्यतनी गोकुलं प्रति यात्वेकादशे वर्षे मथुरां प्रति तां परां मद्गतिं युवां यास्येथे । सांप्रतं तु मया सह युवयोर्विच्छेद एव भवतीति भावः ॥ ४५ ॥ यद्वा प्रळयेति कृतः प्राकृतः इह पृषोदरादित्वात्प्रलयस्य प्रा इत्यादेशः 'बटपत्रपुटे तोकं शयानम्' इत्युक्तेः । प्रकर्षेणाकृतः स्वतस्सिद्धः प्राकृतः । यद्वा—प्रकृतेः प्रवर्तकः प्राकृतिकोपि शिशुः शिशुवद्बभूवेति । यद्वा—प्राकृतः प्रकृतिश्च स्वरूपं च स्वभावश्चेति पर्यायात् ''प्रकृतिसिद्धमिदं हि महात्मनाम्'' इति शिष्टप्रयोगाच्च । स्वभावसिद्ध इत्येवार्थः । अर्थांतरं तु 'न चांतर्न बहिर्यस्य' इत्यारभ्य 'बबंध प्राकृतं यथा' इत्यग्रिमवाक्ये दृष्टांतदार्ष्टांतिकाभ्यां निरसिष्यतीति ॥ ४६ ॥ अजनि प्रादुर्भूता किं च ''गर्भकाले त्वसंपूर्णे ह्यष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा'' इति हरिवंशवाक्ये समं समकालं सुषुवात इत्यर्थावगमात् । अत्र तु देवकीप्रसवोत्तरकाले एव यशोदाप्रसवदर्शनादुभयोरेव शास्त्रवाक्ययोः । प्रामाण्यादेवमवसायते यदैव देवकी विष्णुं सुषुवे तदैव यशोदापि कृष्णं तदनंतरं योगमायां च सुषुव इति कालभेदेन तस्या द्विः प्रसव एवेत्यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ॥ ४८ ॥ ताः कृष्ण वाहे वसुदेव आगते स्वयं व्यवर्यंत यथा तमो रवेः ॥ ववर्ष पर्जन्य उपांशु गर्जितः शेषोन्वगाद्वारि निवारयन्फणैः ॥ ४९ ॥ मघोनि वर्षत्यस कृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला ॥ भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः पतेः ॥ ५० ॥ नंदव्रजं शौरिरुपेत्य तत्र ता न्गोपान्प्रसुप्तानुपलभ्य निद्रया ॥ सुतं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ॥ ५१ ॥

जायया निमित्तमात्रभूतया अजनि जाता ॥ ४७ ॥ हृताः प्रत्ययार्थाः सर्वा वृत्तयो येषाम् अथवा हृताः प्रत्यया अन्याश्च सर्वा वृत्तयो येषां जाग्रतामपि । तथाभूतेषु द्वार पालेषु सत्सु बृहत्सु कपाटेषु लोहकीलकयुक्तशृंखलैर्बृहद्भिः कपाटादिभिर्दुरत्यया इति वा ॥ ४८ ॥ स्वयमेव व्यवर्यंत विवृता इत्यर्थः । व्यव्रियंतेति वक्तव्ये गुणश्छां दसः । रवेर्निमित्तात ॥ ४९ ॥ यमानुजा । गंभीरो यस्तोयौघस्तस्य जवेन ये ऊर्मयस्तैः फेनिला फेनव्याप्ता । भयानकैरावर्तशतैर्व्याप्ताऽपि । श्रियः पतेः सीतापतेः ॥ ५० ॥ निद्रया अजया ॥ ५१ ॥

एव 'अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा'' इति वक्ष्यते । किं तु यशोदाप्रसवस्य चतुर्भुजत्वाद्यनुक्तेर्नराकृतिपरब्रह्मत्वाच्च द्विभुजत्वमेव बुध्येत वक्ष्यति च ''तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधम्'' इति ब्रह्मा ''गूढं परं ब्रह्म मनुष्यलिंगम्'' इति च ॥४७॥ प्रत्ययार्थाः पदार्थप्रत्यायकाः बुद्ध्यादिवृत्तयः । क्लिष्टकल्पनयाऽरुचेरर्थांतरमाह अथवेति । प्रत्ययाः प्रतीतयो ज्ञानानीति यावत् । अन्याः सर्वा वृत्तयोऽध्यवसायाद्याः । यद्वा—प्रतीयंते पदार्था यैस्ते प्रत्ययाः चक्षुरादींद्रियाणि तेषां वृत्तयो रूपादिज्ञानहेतुका इति । तथाभूतेषु निर्वृत्तिकेषु सत्सु पूर्वसमासे कार्कश्यं दृष्ट्वा समासांतरमाह—बृहद्भिरित्यादि ॥ ४८ ॥ कृष्णवाहे उत्संगीकृतकृष्णे । व्यवर्यंत व्यव्रियंतेति वक्तव्ये गुणः छांदसः । इत्यर्थ इति । न तु त्रुटिता इति भावः । उपांशुगर्जितोल्पगार्जितः । यद्वोपांशुरहसि शेषोन्वगादिति संबंधः ॥ ४९ ॥ यमानुजा यमुना ॥ ५० ॥ तत्र नंदव्रजे । तान् नंदप्रभृतीन् । किञ्च—यदा वसुदेवः स्वपुत्रं गृहीत्वा नंदालयमितस्तदा तेन यशोदासूनुर्भगवद्योगमायापिहितदृष्टिना तत्र स्थितो नावलोकितोऽपि तु तदुपरि स्वसुतं न्यधापयत्स च तदा तस्मिन्नेवांतार्हितोऽभूदिति तदाह—सुतमिति । यशोदया सह यशोदायां वा प्रादुर्भावात्प्राक् शेते इति यशोदाशयनः गोलोकेशः परतमो द्विभुजाकृतिः श्रीकृष्णस्तस्मिन्निधाय वसुदेवनंदनस्तु वैकुंठेशो विष्णुस्तस्य गोलोकेशेन्तर्धानं प्रपंचितं श्रीगर्गाचार्यैर्गोलोकखंड इति । किं च यावदक्रूरागमनं तावत्स तत्रैवांतार्हितस्तस्थावक्रूरेण साकन्तु वसुदेवनंदन एव ययौ 'तां संप्रविष्टौ वसुदेव नंदनौ' इति वक्ष्यमाणत्वात् नन्दनन्दनस्तु तत्रैव तस्थौ ''वृंदावनं परित्यज्य पादमेकं न गच्छति'' इत्युक्तेर्गोपीनां तद्वियोगस्तु द्वारकास्थपट्टराज्ञीवत्प्रातिभासिक एव न तु वास्तव इति ध्येयम् । तत्सुतां यशोदासुताम् । किं च कंसात्स्वपुत्ररक्षणार्थं मित्रपुत्र्यावधानर्थं जानतोऽपि परमधार्मिकस्यापि वसुदेवस्यायमन्यायो न दूषणं प्रत्युत भूषणमेव पुत्रीभूते भगवति वार्द्धिष्णुस्नेहेनैव तादृशविवेकापहारात् । तथा चकारेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम् ॥ प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥ ५२ ॥ यशोदा नंदपत्नी च जातं परमबुद्ध्यत ॥ न तल्लिंगं परिश्रांता निद्रयाऽपगतस्मृतिः ॥ ५३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे कृष्णजन्मनि तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ बहिरंतः पुरद्वारः सर्वाः पूर्ववदावृताः ॥ ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥ २ ॥ स तल्पात्तूर्णमुत्थाय कालोऽयमिति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः ॥ ॥ ३ ॥ तमाह भ्रातरं देवी कृपणा करुणं सती ॥ स्नुषेयं तव कल्याण स्त्रियं मा हंतुमर्हसि ॥ ४ ॥ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयताम् ॥ ५ ॥

पदोः पादयोः लोहं निगडं प्रतिमुच्य बद्धा आस्ते स्म ॥ ५२ ॥ जातं किंचिदिति परं केवलमबुध्यत न तु पुत्रः कन्या वेति तल्लिंगम् । यतो योगनिद्रया चापगतस्मृतिः ॥ ५३ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां कृष्णजन्मनि तृतीयोऽध्यायः ॥ ३ ॥ चतुर्थे चंडिकावाक्यमाकर्ण्यातिभयाकुलः ॥ दुर्मंत्रिभिर्हितं मेने कंसो बालादिहिंसनम् ॥ १ ॥ १ ॥ तदष्टमं जन्म ॥ २ ॥ कालो मृत्युः ॥ ३ ॥ ४ ॥ ५ ॥

भावः । अत्र गृहं भार्या 'गृहिण्येव गृहं प्रोक्तम्' इत्युक्तेः बहुत्वं तस्या मुहुश्चिंतनात् । कंसकारागृहस्य वसुदेवगृहाभावात् ॥ ५१ ॥ दारिकां कन्याम् ॥ ५२ ॥ नंदपत्नी चेति चकारोनुक्तसमुच्चायकः । यथा वसुदेवपत्नी तथा नंदपत्नी च जातं स्वगर्भादुत्पन्नमपत्यं परं सर्वोत्कृष्टमबुध्यत तन्माधुर्यास्वादशक्त्यैव तद्वत्तया तदीयस्वरूपभूतानंदमनुभवगोचरी चकारेत्यर्थः । किं तु तस्य लिंगं परमेश्वरोऽयमेवेति विशेषं नाबुध्यतेति भेदः । ननु तस्या गर्भजः कृष्ण इति न प्रसिद्धं तत्राह—यशोदेति । तद्यशो ददाति देवक्यै सखीभावात् । "द्वे नाम्नी नंदभार्याया यशोदा देवकीति च । अतः सख्यमभूत्तस्या देवक्या शौरिजायया ॥" इत्यादि पुराणादिति व्याख्यातं भागवतामृतवैष्णवतोषिण्यानन्दवृन्दावनचम्प्वादिसंतत्यैवेति नोपेक्षणीयम् । परिश्रांताऽतिसौकुमार्यात्प्रसवोत्थश्रमयुता प्रसवांते चानंदेन श्रमोपशांत्या निद्रयेत्याहेति वा ॥ ५३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे तृतीयोऽध्यायः ॥ ३ ॥ दुर्मंत्रिभिरहितोपदेष्टृत्वात्कुमंत्रिभिः । आदिपदेन गोविप्रादयो ग्राह्याः (१) । ततो द्वारावृत्यनंतरम् । बालध्वनिं रोदनशब्दम् । गृहपाला इति श्लेषेण श्वान इव । यथा श्वानः किञ्चिच्छब्दादि श्रुत्वा भषंते तद्वत्तेऽपीति भावः । 'श्वस्वामिनी सद्मपाली इतिवरतंतुः ॥१॥ यदष्टमम् । उद्विग्नस्त्रस्तः । प्रतीक्षते कदोत्पत्स्यत इत्येवं मृशति ॥ २ ॥ यद्वा—बालकं हंतुमयं कालः समयः । कालांतरे किं भविष्यतीति विह्वल आकुलः । प्रस्खलन्नित्यपशकुनं कालांतरे तत एव तन्मृत्युसूचकमिति ॥ ३ ॥ स्वपुत्रस्य गोपितत्वादन्तर्द्योतमाना सख्याः कन्येयमपि जीवत्विति कृपणा सती तत्प्रतारणे कोविदा 'सन् सुधी कोविदो बुधः' इत्यमरात् । स्नुषा तव भाविनः पुत्रस्य वधूरियं भविष्यतीति बुद्ध्या तदपि बलादाच्छिद्य । जिघृक्षंतमाह—स्त्रियं पश्येयमबला । हे कल्याणेति । स्त्रीवधोत्थपापेन तवाकल्याणं मा भवत्विति भावः ॥ ४ ॥ बहव इति निर्दयत्वमुक्त्वा शंकमानाह—दैवेति । ममैवैतद्दुर्दिष्टं तव को दोष इति भावः । प्रदीयतामिति । त्वमपि मां शून्यक्रोडां मा कुर्वित्यर्थः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वहं ते ह्यवरजा दीना हतसुता प्रभो ॥ दातुमर्हसि मंदाया अंगेमां चरमां प्रजाम् ॥ ६ ॥ श्रीशुक उवाच ॥ उपगुह्यात्मजामेवं रुदंत्या दीनदी
नवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥ ७ ॥ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुताम् ॥ अपोथयच्छिलापृष्ठे स्वार्थो
न्मूलितसौहृदः ॥ ८ ॥ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता ॥ अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ॥ ९ ॥ दिव्यस्रगंबरालेपरत्ना
भरणभूषिता ॥ धनुःशूलेषुचर्मासिशंखचक्रगदाधरा ॥ १० ॥ सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः ॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥
॥ ११ ॥ किं मया हतया मंद जातः खलु तवांतकृत् ॥ यत्र क्व वा पूर्वशत्रुर्मा हिंसीः कृपणान्वृथा ॥ १२ ॥ इति प्रभाष्य तं देवी माया
भगवती भुवि ॥ बहुनामनिकेतेषु बहुनामा बभूव ह ॥ १३ ॥ तयाऽभिहितमाकर्ण्य कंसः परमविस्मितः ॥ देवकीं वसुदेवं च विमुच्य प्रश्रितो
ऽब्रवीत् ॥ १४ ॥ अहो भगिन्यहो भाम मया वां बत पाप्मना ॥ पुरुषाद इवापत्यं बहवो हिंसिताः सुताः ॥ १५ ॥ स त्वहं त्यक्तकारुण्यस्त्यक्त
ज्ञातिसुहृत्खलः ॥ कांल्लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् ॥ १६ ॥ दैवमप्यनृतं वक्ति न मर्त्या एव केवलम् ॥ यद्विश्रंभादहं पापः स्वसु
र्निहतवाञ्छिशून् ॥ १७ ॥ मा शोचतं महाभागावात्मजान्स्वकृतंभुजः ॥ जंतवो नस दैकत्र दैवाधीनास्तदाऽऽसते ॥ १८ ॥

अंग हे भ्रातः ॥ ६ ॥ दीनदीनवत् दीनादपि दीनवन्न तु तथा । पुत्रस्यान्यत्र नीतत्वात्सा च योगमायेति ज्ञातत्वात् । याचितोऽप्याचिच्छिदे हस्तादाकृष्य जग्राह ॥ ७ ॥
अपोथयद्बलेन चिक्षेप ॥ ८ ॥ सद्य एव देवी भूत्वा ॥९॥१०॥११॥ कृपणानिति अन्याञ्छिशून्हनिष्यतीति ज्ञात्वा वारयति । पाठांतरे मा मां कृपणां वृथाऽहिंसीर्हिं
सितवानसीति ॥ १२ ॥ बहुनामनिकेतेषु वाराणस्यादिस्थानेषु ॥ १३ ॥ परमविस्मितः कथं दैवी वागनृता जातेति ॥ १४ ॥ भाम हे भगिनीभर्त्तः । पुरुषादो राक्षसो
यथा स्वापत्यमेव हिनस्ति तद्वत् ॥ १५ ॥ १६ ॥ १७ ॥ हे महाभागौ स्वकृतंभुजः स्वारब्धकर्मभोक्तॄन् स्वात्मजान्मा शोचतम् । किं च जंतवः प्राणिनः सदा

चरमाम् । इतोग्रे मम संतत्याशा नेति भावः ॥ ६ ॥ बलाद्ग्रहणे हेतुः–खल इति ॥ ७ ॥ 'अर्थी दोषं न पश्यति' इति न्यायमाश्रित्याह–स्वार्थेति ॥ ८ ॥ सा कन्या जनैरदृश्यतेति । समुत्प
त्याधः क्षिप्यमाणापि बलादुत्प्लुत्य । "कंसासुरस्योत्तमांगे पाद दत्त्वा गता दिवम्" इति भविष्योत्तरे । अनुजा विष्णोरिति कृष्णस्यापि यशोदागर्भजत्वं सूचयति सायुधाष्टेति तस्य भीषणार्थं स्ववाचि विश्वासोत्पत्त्यर्थञ्च ॥
॥ ९ ॥ १० ॥ उपाहृता उपानीता उरवो वलयः पूजा यैस्ते तथा ॥ ११ ॥ पाठांतरे 'कृपणाम्' इति पाठे । यद्यहं हता स्यां तदापि मया हतया किं तव मरणस्यावश्यंभावित्वादित्याह–जात इति । यत्र
क्व वेति वक्तुमनर्हदेशे तद्देशकथनेन देवकीवसुदेववधेऽस्य प्रवृत्तिरधुना मा भूदिति भावः ॥ १२ ॥ इति एवं "इति हेतुप्रकरणप्रकाशादिसमाप्तिषु" इति यादवोक्तेरिति अत्र प्रकारे ॥ १३ ॥ दैवी वागाकाश
वाणीरूपा ॥ १४ ॥ "भामस्तु भगिनीभर्ता" इत्यमरः ॥ १५ ॥ ब्रह्महा ब्राह्मणहंता । मृतः श्वसन् । जीवन्मृतः ॥ १६ ॥ दैवं देववचः । यद्वा–देवानां हेतुः कारणं परब्रह्म 'तन्मूला देवताः सर्वाः'
इत्युक्तेः । 'नभोलिंगमलिंगमीश्वरम्' इत्युक्तेश्च । विस्मित आह–शुद्धसत्त्वस्वभावा देवा अपि तमोधर्ममनृतं वदंतीत्याश्चर्यम् । यद्विस्रंभात् । यद्विश्वासात् ॥ १७ ॥ कृतेप्यपराधे महात्मानोऽपराधिनं नोपालभंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुवि भौमानि भूतानि यथा यांत्यपयांति च ॥ नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥ १९ ॥ यथाऽनेवंविदो भेदो यत आत्मविपर्ययः ॥ देहयोगवियोगौ च संसृतिर्न निवर्तते ॥ २० ॥ तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ॥ माऽनु शोच यतः सर्वः स्वकृतं विंदतेऽवशः ॥२१॥ यावद्धतोऽस्मि हंतास्मीत्यात्मानं मन्यतेऽस्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ॥ २३ ॥

नासते किं त्वल्पकालमेव तदाऽप्येकत्र नासते किं तु वियुज्यंते यतो दैवाधीनाः ॥ १८ ॥ सदा नासत इत्यनेन यदुक्तं जन्ममरणादि । तदपि देहानामेव नात्मन इत्याह । भुवीति । भूतानि देहा एव यांत्यपयांति च । भवंति न भवंति चेत्यर्थः । यथा भुवि भौमानि घटादीनि तद्वत् । एतेषु भूतेषु जन्मादिभिर्विक्रियमाणेष्वयमपरोक्षतया प्रत्यभिज्ञायमानो न विपर्येति विपर्ययं न प्राप्नोति । एकरूप एव वर्तत इत्यर्थः । भौमेषु विक्रियमाणेषु यथा भूस्तथेति ॥ एवं विचार्यमाणे सति न शोकाद्यवकाशः ॥ १९ ॥ अज्ञानतस्तु न निवर्तत इत्याह । यथेति । यथा यथावदनेवंविद एवमजानत आत्मविपर्ययो देहात्मबुद्धिर्भवति यतो विपर्ययाद्भेदो भवति । देहाहंकारेण ह्यात्मनि परिच्छिन्ने सतीदंकारास्पदं भिन्नं भवति यतो भेदात्पुत्रादिदेहैर्योगो वियोगश्च ततः संसृतिः सुखदुःखे इति यावदज्ञानं न विवर्तत इत्यर्थः ॥ २० ॥ एवमुक्तप्रकारेण नैते तव तनया अहं तु तावन्न घातितवांस्तथाप्यज्ञानदृष्ट्या स्वतनयान्मया व्यापादितानपि माऽनुशोचेति सांत्वयति । तस्मादिति । अज्ञानाश्रयमेव कर्मवादमाह । यत इति ॥ २१ ॥ कथं तर्हि ब्राह्मणादिहंतुस्तद्वध्यस्य च प्रायश्चित्तश्रवणमज्ञानमूलमेवेत्याह । यावदिति । अस्वदृक् देहाभिमानी । तावत्तदभिमानी तस्य देहस्य हननमात्मन्यभिमन्यमान इत्यर्थः ॥ ॥२२॥ श्यालः कंसः । स्वस्रोरिति । स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनगणनद्वारा मिथुनीलक्षणया स्वसृतत्पत्योरभिधानम् । लिंगसमवायन्यायेन प्राणभृत उपदधाती

इत्यभिप्रायेणाह—हे महाभागाविति । स्वकर्मभुजामपि नैकत्र स्थितिरित्याह—किञ्चेति । दैवाधीना दिष्टायत्ताः । दुर्गादिंव्येवावयोरात्मजाभूत्किमन्यैः सुतैः स्वकृतभुग्भिरिति विमर्शेनापि मा शोचतमिति भावः ॥ १८ ॥ दृष्टांतादिनाह—भुवीति । इत्यर्थ इति । न हि भूतशब्देनाकाशादयोऽत्र ग्राह्यास्तेषामाप्रलयस्थितेरिति भावः । भौमेषु भूविकारेषु । घटशरावादिषु विक्रियमाणेषूत्पन्नात्रिनष्टेषु यथाभूर्न विक्रियते तथेति ॥ १९ ॥ यावदज्ञानं यावत्कालपर्यंतमज्ञानं तिष्ठति तावत्संसृतिर्न निवर्त्तत इत्यर्थस्येत्युक्ते देहैरेव पुत्रादिभिर्योगः । सुखकारणं वियोगो दुःखकारणमियमेव संसृतिरिति भावः ॥ २० ॥ एवमुक्तप्रकारेण देहादिव्यतिरिक्तात्मज्ञानेन । एते ये मृता यद्यपि ते तनया न तथाप्यज्ञानदृष्ट्या देहादिष्वात्मबुद्ध्या व्यापादितान्मारितान् । सांत्वयति साम्ना बोधयति । यत इति हेतौ सर्वः प्राणिमात्रम् । यद्वा 'सर्वः शर्वः शिवः स्थाणुः' इति सर्वपदस्य शिवपर्यायत्वेपीन्द्रादिदेवपरत्वमेवोपलक्षणत्वेन ज्ञेयम् । श्रीशिवस्य परमेश्वरतया कर्मानधीनत्वात्तत्परत्वेन नेयम् । अवशः कर्मवशः हरिवशो वा देवादिरपि स्वकृतं भुंक्तेऽन्येषां तु का कथेति भावः ॥ २१ ॥ यदि देहादावात्मबुद्धिर्विपर्ययज्ञानमस्ति तर्हि ब्राह्मणादिदेहहंतुर्द्वादशाब्दादिप्रायश्चित्तश्रवणमनर्थकं स्यादित्याशंकते कथमिति । तद्वधस्य ब्राह्मणादिवधस्य । इत्यर्थ इति । अज्ञत्वात्सविपर्ययज्ञानवशेन बाध्यबाधकतां नाश्यनाशकतां यातीति भावः ॥ २२ ॥ मयि पुत्रहंतृत्वमारोप्याधिना रोदिषि चेत्तर्हि सत्यमहं दुष्ट एव बुद्धिपूर्वकं पापमकरवमेव तत्रापि निष्कृतिर्युष्मत्कृपयैवेत्याह—क्षमध्वमिति । स्वसृशब्देन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोचयामास निगडाद्विश्रब्धः कन्यकागिरा ॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदम् ॥ २४ ॥ भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी ॥ व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह ॥ २५ ॥ एवमेतन्महाभाग यथा वदसि देहिनाम् ॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥ २६ ॥ शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥ मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः ॥ २७ ॥

तिवद्देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्यर्थः । श्यालशब्देन वा कथंचिद्वसुदेवाभिधानम् ॥ २३ ॥ आत्मसौहृदं प्रियवादादिना दर्शयन् ॥ २४ ॥ २५ ॥ २६ ॥ स्वपरभेददर्शने किं भवति तदाह । शोकहर्षेति । भावैरेव निमित्तभूतैर्मिथो भावान् घ्नंतं भावमीश्वरं पृथग्दृशस्ते न पश्यंति किं त्वहमेव हंता हतश्चेति मन्यंत इत्यर्थः ॥ २७ ॥

स्वसृतत्पत्योर्भगिनीभामयोरभिधानं कथनं द्विवचनानुपपत्या एकत्र द्विवचनप्रयोगायोग्यतया मिथुनगुणद्वारा द्वित्वसंख्यां द्वारीकृत्य मिथुने द्वये लक्षणया वृत्त्या लिंगसमवायेन 'लिंगसमवायात्' इति जैमिनिसूत्रेण प्राणभृत उपदधातीतिवदिति दृष्टांतः । लिंगं वाच्योर्थस्तस्य समवायः समुदाये प्रवेशस्तेन । यथा छत्रिणो यांतीति । एकस्मिन्नपि समुदाये छत्रिणि सति सर्वेषु यथा छत्रिपदं प्रयुज्यते तद्वदेकस्यामेव स्वसृपदवाच्यायामत्र सत्यामपि द्वयोस्तत्प्रयोग इति । एकस्वसृशब्देन स्वसृपतिर्लक्ष्यते इत्येकः स्वसृशब्दो लक्षकोऽन्यो वाचकस्तयोरेकशेषात् वसुदेवदेवक्योः प्रत्येकं पादावग्रहीदित्यर्थः । प्राणभृत इत्यस्य विवरण माह–ग्रंथांतरसंमत्या । "सृष्टिवत्प्राणभृत्तत्र सादृश्यं लिंगभूमतः । अत्रैकमंत्रगो लिंगसमवायो विशिष्यते" इति (१) प्राणभृतं उपदधातीत्यत्रापि सृष्टिन्यायेन सृष्टिप्रतिपादकसूत्रेण मंत्रविधिरिति पूर्वः पक्षः । लिंगप्रकरणप्राप्तमंत्रानुवादेनेष्टकोपधानविधिः एतस्यैव प्राणान्दधातीत्यस्य वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मंत्रानुवादः । पूर्वत्र सृष्टिन्याये द्वितीयादिमंत्रेषु सृष्टिलिंगानां बाहुल्यमस्ति इह तु प्रथम मंत्र एव प्राणभृल्लिंगमाम्नायते "अयं पुरोभुवस्तस्य प्राणो भौवायनः" इत्येकस्यैव मंत्रस्य प्राणभृत्त्वेपि छत्रिणो यांतीतिवत्तत्सहचरिताः सर्वे मंत्राः प्राणभृच्छब्देनोच्यंते तद्वदत्रापीति ध्येयम् । तदेवाह–देवकीत्यादि । इत्यर्थ इति । न द्वयोरेकैकं पादं गृहीत्वा द्वौ पादावग्रहीदिति वाच्यम् । कथंचित् कयापि रीत्या श्यालस्वस्रोरित्येकं पदं कृत्वा । लोके हि भामसमीपे पृष्टः श्यालोऽयं ते क इति श्यालोयं ममेत्युत्तरं ददातीति लोकरीत्या वसुदेव एव श्यालपदेन ग्राह्य इत्यर्थाश्रयणेन्यायाश्रयणश्रमो नास्तीत्यर्थः ॥ २३ ॥ निगडाद्बंधनशृंखलातः ॥ २४ ॥ समनुतप्तस्याहो मया वृथैव भागिनेया हताः केवलं पापमेवोपार्जितमित्येवं पश्चात्तापं कृतवतः कंसस्य सतः क्षांतो रोषो यस्याः सा तं व्यसृजद्विसर्जयामास । 'क्षांता रोषं च देवकी' इति पाठस्तु विजयध्वजसंमतस्स च सुगम एव ॥ २५ ॥ हे महाराजेति शास्त्रज्ञानं त्वयि घटतेवेति भावः । पक्षेन राजत इत्यराजा महांश्चासावराजश्चेति । हे अत्यंतशोभमान मृत्युसान्निध्यादिति भावः । महाभागेति पाठे परमदुर्भगेत्यर्थः । एतत्त्वदुक्तम् । "भुवि भौमानि भूतानि" इत्यादिरूपम् । एवमित्थमेव नान्यथेत्यर्थः । यतः यथाऽहंधिया ॥ २६ ॥ तदाह–यद्वत्वति तद्धूते भावैरेव नृपरोगव्याघ्रादिरूपैर्भावान्मनुष्यगवादिकान् । 'भावः सत्तात्मजन्मसु' इति कोशाद्भावत्र ईश्वरः । इत्यर्थ इति । ईशकृतं स्वस्मिन्नारोपयंतीति

१ मातृपितृप्रभृतिको मिथुनगणः । २ पूर्वमीमांसायां प्रथमाध्यायचतुर्थपादाष्टादशाधिकरणं तत्समवायात् इति । "प्राणभृत उपदधाति" इति यैर्मंत्रैरिष्टका रच्यंते ते 'मंत्राः प्राणभृतस्तद्रचिता इष्टका अपि प्राणभृन्नाम्न्यस्त उपदधाति रचयति । तदेवं यजमानकार्यसिद्ध्यादयो गुणवृत्तिहेतवो निर्णीताः । तदुक्तम् "तत्सिद्धिजातिसारूप्यप्रशंसालिंगभूमिभिः । षड्भिः सर्वत्र शब्दानां गौणी वृत्तिः प्रकल्पिता ॥ " इति । अत्र लिंगस्य समवायोस्ति । ३ "सृष्टीरुपदधाति" इतिवत् । ४ "सृष्टीरुपदधाति, व्युष्टीरुपदधाति, चित्रिणीरुपदधाति, वज्रिणीरुपदधाति" इति । ५ प्राणभृच्छब्देन तन्मंत्रसंस्कृतेष्टिकोच्यते बहुत्वानुपपत्त्या च तद्गणपातिन्योऽपि गृह्यंते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहम् ॥ २८ ॥ तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः ॥ तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया ॥ २९ ॥ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः ॥ देवान्प्रतिकृतामर्षा दैतेया नातिकोविदाः ॥ ३० ॥ एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु ॥ अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ॥ ३१ ॥ किमुद्यमैः करिष्यंति देवाः समरभीरवः ॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥ ३२ ॥ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः ॥ जिजीविषवं उत्सृज्य पलायनपरा ययुः ॥ ३३ ॥ केचित्प्रांजलयो दीना न्यस्तशस्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ॥ ३४ ॥ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंवृतान् ॥ हंस्यन्यासक्तविमुखान्भग्नचापानयुद्धयतः ॥ ३५ ॥ किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा ॥३६॥ किमिंद्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ॥ तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ॥ ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ॥३७॥ यथाऽऽमयोंऽगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ॥ यथेंद्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते ॥३८॥

विशुद्धं यथा भवति ॥ २८ ॥ २९ ॥ नातिकोविदा दृष्टमात्रमतयो न दीर्घदर्शनाः ॥ ३० ॥ न निर्गतानि दश दिनानि येषां तानन्यांश्च ॥ ३१ ॥ ३२ ॥ अस्यतो विध्यतः सतः । उत्सृज्य रणं त्यक्त्वा ॥ ३३ ॥ ३४ ॥ अन्यासक्तान्विमुखांश्चेति न हंसि न हिनस्सि ॥ ३५ ॥ क्षेमे निर्भयदेशे शूरैः संयुगादन्यत्र विकत्थनं प्रौढिवादो येषां तैः । ननु हरेर्बिभेमि शंभोश्चेति । चेत्तत्राहुः । रहोजुषेति सर्वस्याप्यंतःप्रविष्टेन क्वचिदपि बहिरदृष्टेनेत्यर्थः । पुरुषप्रवृत्तिरहितमिलावृतवनमोको यस्य- तेन शंभुना वा ॥ ३६ ॥ यद्यप्युद्यमैर्देवा न किंचिदपि कर्तुं समर्थास्तथापि नीतिरनुसर्तव्येत्याहुः तथापीति ॥ ३७ ॥ रूढपदो बद्धमूलः ॥ ३८ ॥

भावः । हंतुं साक्षादवतीर्णमपि तं त्वद्विधा न पश्यंतीति श्लेषार्थः ॥ २७ ॥ अनुज्ञातो विसृष्टः ॥ २८ ॥ तेभ्यो मंत्रिभ्यः । यदुक्तम् । 'किं मयाहतया' इत्यादि ॥ २९ ॥ दृष्टमात्रमतयो धर्माधर्मविचारहीनाः ॥ ३० ॥ राजेंद्रेति । इंद्रतुल्यस्य सर्वे राजानोऽर्चका एव न कोप्युद्यतो भविष्यति । 'भोजेंद्र' इति पाठे । यादवाः सर्वे त्वत्तो भीता एव तेष्वपि न कोपि वारितुं समर्थ इति भावः । आदिपदेन खेटखर्वटादयो ज्ञेयाः ॥ ३१ ॥ ज्याघोषैर्गुणशब्दैः ॥ ३२ ॥ अस्यत इत्यादिना सूचितः कदाचित्कंसकृतदेवगणजयो ज्ञेयस्तदुक्तं विष्णुपुराणे "किं न दृष्टोऽमरपतिर्मया संयुगमेत्य सः । पृष्ठेनैव वहन्बाणानपगच्छन्न वक्षसा ॥ मद्राष्ट्रे वारिता वृष्टिर्यदा शक्रेण किं तदा । मद्बाणभिन्नैर्जलदैर्नापो मुक्ता यथेप्सिताः" इति कंसवाक्यम् ॥ ३३ ॥ मुक्ते कच्छशिखे यैस्ते तथा कच्छं धौतवस्त्रस्य बंधनप्रदेशः । शिखा प्रसिद्धा ॥ ३४ ॥ विमुखान् अन्यत्र मुखान् ॥३५॥ प्रौढिवादो वृथावाग्वादः । देवेषु विष्णुशिवेंद्रब्रह्माण एव सबलास्तेभ्यो भयमाशंकते—नन्विति । इत्यर्थ इति । न हि संमुखमनागतस्य दर्शनागोचरस्य भयं दृष्टचरमिति भावः यद्वा—यदि बलं स्यात्तर्हि किमिति मर्कटीभूयं युद्ध्यते किमिति लोकानामंतःकरणे प्रविश्य निह्नूयत इति भावः ॥ ३६ ॥ नीती राजनीतिः । अनुसर्त्तव्याऽनुगंतव्या ॥ ३७ ॥ आमयो ज्वरादिः । चिकित्सितुमपनेतुम् ॥ ३८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः ॥ तस्य च ब्रह्मगोविप्रास्तपोयज्ञाः सदक्षिणाः ॥ ३९ ॥ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ॥४०॥ विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ॥ श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥४१॥ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः ॥ तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥ अयं वै तद्वधोपायो यदृषीणां विहिंसनम् ॥ ४२ ॥ श्रीशुक उवाच ॥ एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः ॥ ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ॥ ४३ ॥ संदिश्य साधुलोकस्य कदने कदनप्रियान् ॥ कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ॥ ४४ ॥ ते वै रजःप्रकृतयस्तमसा मूढचेतसः ॥ सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥ ४५ ॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च ॥ हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे कंसोद्यमनिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ॥ आहूय विप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः ॥ १ ॥

देवानां मूलं विष्णुः स च यत्र धर्मस्तत्राऽऽस्ते । तस्य धर्मस्य मूलं वेदादय इति ॥ ३९ ॥ ४० ॥ ४१ ॥ किं च विप्रादयो हरेरेव तनवो मूलं च यस्मात्तस्मादय मेव तद्वधोपाय इत्याहुः । अयमिति ॥ ४२ ॥ ४३ ॥ ४४ ॥ आरात्समीपमागतो मृत्युर्येषां ते ॥ ४५ ॥ सतां विद्वेषो न मृत्युमात्रहेतुः किं तु बह्वनर्थकारीत्याह । आयुः श्रियमिति ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे टीकायां कंसोद्यमनिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवम् ॥ गत्वाऽथ मथुरां प्राप वसुदेवागमोत्सवम् ॥ १ ॥ महामना उदारचित्तः ॥ १ ॥

यत्र सनातनो वेदविहितो धर्मस्तत्र देवानां मूलं विष्णुरास्ते इति शेषं कृत्वान्वयः । तस्य धर्मस्य ॥ ३९ ॥ सर्वात्मना सर्वप्रकारेण । हविर्दुघा यज्ञोपयोगिघृतादिदात्र्यः ॥ ४० ॥ तपः स्वधर्मः । तनूस्तनवः शरीराणि अंगानि वा ॥ ४१ ॥ स हि हरिः । तन्मूला विष्णुमूलाः । सेश्वराः सशिवाः ॥ ४२ ॥ अंगेषु नष्टेष्वंगी स्वत एव नश्यतीत्याह–किञ्चेति । अयं कस्तत्राह–यदिति । कार्यायतिमनालोच्य कर्तारो दुर्मंत्रिणस्ते चेह केश्यादयः । दुर्मंत्रिसंग्रहात्स्वयमपि दुर्मतिः । हितं हितकरम् । कुतो मेने यतः कालपाशावृतः "गतश्रीर्गणकान्द्वेष्टि गतायुश्च चिकित्सकान् । गतश्रीश्च गतायुश्च ब्राह्मणान्द्वेष्टि भारत ।" इत्युक्तेः ॥ ४३ ॥ कदने कदननिमित्तम् 'कदनं मर्दप्रापयोः' इति मेदिनी । मर्दनार्थमिति यावत् । कदनप्रियान्पापप्रियान् । संदिश्याज्ञाप्य ॥ ४४ ॥ मूढचेतसः कर्त्तव्याकर्त्तव्यानुसंधानहीनाः ॥ ४५ ॥ ते तु मृत्युतोप्यधिकानर्थकरे कर्मणि प्रवृत्ता इत्याह· सतामिति । महदतिक्रमः पूज्यापराधः । "किमुत्पथस्थः कुशलाय कल्पते" इत्याद्युक्तेः । श्रियं संपदम् । धर्मं पूर्वकृतं पुण्यं लोकान्स्वर्गादीन् । आशिषो धनपुत्राद्यभिलाषान् । किं बहुना सर्वाणीति ऐहिकपारत्रिकश्रेयस्कराणि ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ सूनोः पुत्रस्य । महोत्सवं जातकर्मादौ महद्दानादिरूपम् (१) । नंदस्त्विति युग्मम् । आत्मनो हृदयाज्जायत इत्यात्मजः "हृदयादभिजायते" इति श्रुतेः । आत्मजत्वं चेह पुत्रभावेनात्मनि प्रादुर्भूतत्वमेव नान्यद्ग्राह्यं तत्खलु "आविवेशांशभागेन मन आनकदुंदुभेः–ततो जगन्मंगलमच्युतांशं समाहितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ॥ कारयामास विधिवत्पितृदेवार्चनं तथा ॥२॥ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलंकृते ॥ तिलाद्रीन्सप्त रत्नौघशातकौंभांबरावृतान् ॥३॥ कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया ॥ शुद्ध्यंति दानैः संतुष्ट्या द्रव्याण्यात्माऽऽत्मविद्यया ॥४॥

॥२॥ नियुते द्वे लक्षे सप्त तिलपर्वतांश्च प्रादात । कथंभूतान् । रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सुवर्णरसाक्तैरंबरैश्चावृतान् ॥३॥ द्रव्याणां गोहिरण्यादीनां मध्ये केषांचिद्दानैरेव शुद्धिर्यथा तथाऽन्नदानादियुक्तजातकर्मादिसंस्कारैरेव गर्भाणां शुद्धिरिति दर्शयितुं प्रतिनियतानि शोधकानि दृष्टांतत्वेनोदाहरति । कालेनेति । कालेन भूम्यादि । स्नानेन देहादि । शौचेनामेध्यलिप्तादि । संस्कारैर्गर्भादि । तपसा इंद्रियादि । इज्यया ब्राह्मणादि । दानैर्द्रव्याणि । संतुष्ट्या मनः । आत्मा त्वात्मविद्यया शुध्यति ॥४॥

शूरसुतेन देवी" इत्यादिवच्छ्रीनंदयशोदयोरपि गम्यते "यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥ " इति श्रुतेः । इत्याह—महामना इति 'भक्तिःस्यान्नौ महादेवे' इत्यग्रे वक्ष्यमाणत्वाद्वृत्त्या अत्यंततादात्म्यापत्त्या महच्छ्रीकृष्ण एव मनो यस्य सः । यद्वा—श्रीकृष्णधारणसामर्थ्येन महन्मनो यस्य । यद्वा—महान् श्रीकृष्णो मनसि यस्येति चंद्रशेखरवत्समासः । उपलक्षणं चैतच्छ्रीयशोदाया अपि । उत्पन्नत्वं नाम तथात्मनोर्बहिस्तादृशतत्प्राकटयमेव तच्चानयोरतन्निर्विशेषमेव । ननु 'नंदस्त्वात्मज उत्पन्ने' इह विनापि तुशब्दं पादपूर्त्तेस्तदर्थं तुकारकल्पना व्यर्थेति न च तुकारस्तर्हि व्यर्थ एव आत्मनो जात आत्मजस्तस्मिन् जनिधातुप्रयोगादेवाभीप्सितसिद्धेर्न तुशब्दो नंदगृहे उत्पत्तिं साधयतीति बाच्यम् । 'उपगुह्यात्मजामेवं' इहान्योत्पन्नेप्यात्मजप्रयोगात् । किं च नाडीछेदात्पूर्वमेव जातकर्मोपक्रमश्रवणात् नाडीछेदस्तु गर्भजत्वं विना कथं संभवेत् । किं च कृष्णस्य नंदपुत्रत्वे नैकद्वाः प्रयोगः । किं तु बहव एव न तु सर्वेऽमुख्यार्थी भवितुमर्हंति । तथाहि 'अदृश्यतानुजा विष्णोः' इति समर्थितं चैतद्ब्रह्मणापि 'पशुपांगजाय' इति देवर्ष्यवतारभूतैर्गोपैरपि च "आघ्राहतो महाव्यालो यशोदानंदसूनुना" इति गोपानां देवर्ष्यवतारत्वम् 'नैते सुरेशा ऋषयो न चैते' इति श्रीबलदेवोक्तेर्ज्ञेयम् । साक्षाच्छ्रुत्यवतारैर्गोपीभिरप्ययमर्थ उपबृंहितोऽस्ति "नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः" इति "नंदसूनुरनघे तव वत्सः" इति "व्रजस्त्रियः पुत्र न तु स्त्रियो हि नूनं श्रुतीनामथ मूर्त्तयस्ताः । नाहं शिवो वा कमला कदाचित्समाश्च ताभिः कुत एव चान्ये ॥" इत्यादिपुराणे नारदं प्रति ब्रह्मवाक्येन गोपीनां श्रुतिरूपत्वं ध्येयम् । आगमेपि 'नंदगोपतनयो देवता' इति । गर्गेणापि सर्वज्ञमुनिना "प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः" इत्ययमर्थ आविष्कृतः । नीलकंठेनापि महाभारतटीकायामादिपर्वणि नंदनंदनोपासनमुक्तं मोक्षकारणम् । किञ्च तुकारेण वसुदेव आत्मज उत्पन्न जाताह्लादोपि कंसभयात्संकुचितमना जातकर्मादि कर्त्तुं न प्राभून्नंदस्तु कारयामास । तुकारादेवैतन्मात्रे वसुदेवाद्भेदे प्राप्ते नंदगृहेपि श्रीकृष्णस्योत्पत्तिः । श्रीमन्मुनींद्राभिप्रेतावगम्यतेऽन्यथा 'नंदस्त्वात्मज आयाते' इत्येवं कथं न प्रावोचदिति । पुत्रेण सहाह्लादोऽपि जात इति सहोक्तिः । पुत्रव्याजेनाह्लाद एव जात इत्युत्प्रेक्षा च । शुचिरूर्द्ध्वपुंड्राचमनादिना पवित्रः । जातकर्म पुत्रोत्पत्तिकाले क्रियमाणं वैदिकं कर्मविशेषम् । तैराहूतैर्विप्रैः कारयामास तेषामेव तत्र कर्त्तृत्वविधानात् । तत्र च कर्मफलं प्रयोक्तरीति न्यायात्फलं तस्यैव यथाविधि स्वयमकरणे जाताह्लाद इत्यनेनानंदजाड्यमेव हेतुः । यद्वा—महे उत्सवे पुत्रोत्पत्तिकालिकहर्षे असमंतात् । मनो यस्य । यद्वा—महति परमेश्वरे वा मनो यस्येति महत आत्त्वमार्षम् ॥१॥२॥ तिलाद्रिप्रमाणं भविष्ये—"उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिर्मतः । त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्त्तितः॥" इति द्रोणपरिमाणम् । "खारी द्रोणाढकप्रस्थाः कुडवं च पलं पिचु । शाणको माषकश्चेति यथापूर्वं चतुर्गुणाः " इति ॥ ३ ॥ अथ गर्भशुद्ध्युपोद्घातरूपामन्यपदार्थशुद्धिमाह--द्रव्याणामिति । प्रतिनियतानि प्रातिस्विकानि । येषां द्रव्याणां यानि शोधकानीति

१ नन्दयशोदयोस्ताभ्यां देवकीवसुदेवाभ्यां सममेव ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौमंगल्यगिरो विप्राः सूतमागधबंदिनः ॥ गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ॥ ५ ॥ व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥ ६ ॥ गावो वृषा वत्सतरा हरिद्रातैलरूषिताः ॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥ ७ ॥ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥ ८ ॥ गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम् ॥ आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ॥ ९ ॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥ १० ॥ गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः ॥ नंदलयं सवलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ॥ ११ ॥

सौमंगल्यगिरः स्वस्तिवाचका विप्रादयो बभूवुः । तत्र " सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः ॥ बंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ " इति ॥ ५ ॥ संमृष्टानि संसिक्तानि च द्वारादिकानि यस्मिन्सः । तत्र अजिराण्यंगणानि गृहांतराणि गृहमध्यानि च यस्मिन्स तथा । चित्रध्वजेषु पताकानां स्रजश्च चैलपल्लवतोरणानि च तैर्भूषितः ॥६॥ हरिद्रातैलै रूषिता लिप्ताः । विचित्रा धातवश्च बर्हस्रजश्च वस्त्राणि च कांचनमालाश्चालंकारतया विद्यंते येषां ते । तथाभूता गवादयो बभूवुरित्यर्थः ॥७॥ ॥८॥ आकल्पा अलंकाराः ॥ ९ ॥ नवकुंकुमकिंजल्कैर्मुखपंकजेषु भूतिः श्रीर्यासां ताः ॥ १० ॥ सुमृष्टान्युज्ज्वलितानि मणिमयानि कुंडलानि यासां ताः । निष्काः पदकानि कंठेषु यासां ताश्च । शिखाभ्यश्च्युतानि माल्यवर्षाणि यासां ताः । नंदालयं व्रजतीर्व्रजंत्यः पथि विरेजुः । सवलयाः कंकणभूषिताः । व्यालोलैः कुंडला

यावत् । भूम्यादि--आदिपदेन जलादयो ज्ञेयाः । यत्र भूमौ मलाद्युत्सृष्टं तत्र विनापि लेपादिना शोधकेन बहुकालेन स्वयमेव शुद्ध्यति सेत्यर्थः । तथा जलानामपि कालेन " कालं मेघोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि । अकाले दशरात्रं तु ततः शुद्धिः " इत्युक्तेः । देहादि आदिपदे वस्त्रादि । अमेध्यमशुचिद्रव्यं तेन लिप्तम् आदिना स्पृष्टम् । शौचेन मृज्जलादिना शोधनेन । संस्कारैः पुंसवनसीमंतजातकर्मादिभिः । आदिना देहादि । इज्यया देवार्चनयागादिना । " ब्राह्मणः सर्वदा शुद्धः पितृदेवार्चने रतः " इत्युक्तेः । आदिना क्षत्रियादि । " यतो दानं न जायेत तद्द्रव्यं मलवत्स्मृतम् " इति स्मृतेर्द्रव्याणामन्नादिरत्नांतानां दानेनैव शुद्धिर्नान्यथेति भावः । इंद्रियाणि वागादीनि । तपसा मौनादिरूपेण । यद्वा--तपसैकादश्युपवासादिना आदिना देहपरिग्रहः । मनः संतुष्ट्या । ' संतोषेण मनः शुचि ' इति वाक्यात् । आत्मा जीवः । आत्मविद्ययाऽध्यात्मविचारेण । शुद्धस्वरूपावाप्त्या जीवभावरूपामशुचितां जहातीत्यर्थः । दीपकोऽत्रालंकारः । " प्रस्तुताप्रस्तुतानाञ्च तुल्यत्वे सति दीपकम् " इति तल्लक्षणात् । अत्र प्रस्तुतगर्भशुद्धेरप्रस्तुतानां भूम्यादीनामपि शुद्धेर्वर्णनादिति समन्वयः ॥ ४ ॥ स्वकृतस्तुतिपाठकाः सूताः । परकृतस्तुतिजीविनो मागधाः । प्रबंधस्तुतिपाठिनो वंदिन इति ॥ ५ ॥ संमृष्टानि संमार्जितानि । तोरणं द्वारबहिर्भागः ' तोरणोऽस्त्री बहिर्द्वारम् ' इत्यमरः । पताकानां स्रजः पंक्तयः । भूषित इति शेषः ॥ ६ ॥ बर्हस्रजः शिखिपिच्छमालाः । इत्यर्थ इति । क्रियाशेषेणान्वयः कार्य इति तात्पर्यम् ॥ ७ ॥ कंचुकं चोलकं शिरो विहाय सर्वांगावरकं वस्त्रम् " कंचुको वारबाणे स्यान्निर्मोके करभेपि च । वर्द्धीयकगृहीतांगास्थितवस्त्रे च चोलके " इति मेदिनी । उष्णीषं शिरोवेष्टनवस्त्रम् "उष्णीषं तु शिरोवेष्टे किरीटे लक्षणांतरे " इति च ॥८॥ "आकल्पः कल्पने वेशेऽलंकारे शक्तिमन्तरे " इति धरणिः । आदिना चंदनादिग्रहः ॥ ९ ॥ नवकुंकुमकिंजल्काः नूतनकेशरपत्राणि । बलिभिः स्वर्णरत्नादिभिर्युताः पृथुश्रोण्यो विशालकटितटाः अपि हर्षौत्सुक्याद्वेगेन जग्मुरिति भावः ॥ १० ॥ वर्णिता अपि गोपीर्भक्तिभरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके ॥ हरिद्राचूर्णतैलाद्भिः सिंचंत्यो जनमुज्जगुः ॥ १२ ॥ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरेऽनंते नंदस्य व्रजमागते ॥ १३ ॥ गोपाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः ॥ आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥ १४ ॥ नंदो महामनास्तेभ्यो वासोऽलंकारगोधनम् ॥ सूतमागधवंदिभ्यो येऽन्ये विद्योपजीविनः ॥ १५ ॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥ रोहिणी च महाभागा नंदगोपाभिनंदिता ॥ व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता ॥ १७ ॥ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥ १८ ॥ गोपान्गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥ १९ ॥

दिभिः शोभा यासां ताः ॥ ११ ॥ जनं सिंचंत्यः अजनमुज्जगुरिति वा ॥ १२ ॥ १३ ॥ १४ ॥ तेभ्यः प्रादात् ॥ १५ ॥ यथोचितमन्यानप्यपूजयत् ॥ १६ ॥ ॥ १७ ॥ हरेर्निवासेन ये आत्मनि व्रजे गुणाः सर्वप्रियत्वादय आसंस्तै रमाया आक्रीडं विहारस्थानम् ॥ १८ ॥ वार्षिक्यं प्रतिवर्षदेयम् ॥ १९ ॥

णातृप्त्या वर्णयति व्रजतीः प्रथमार्थे द्वितीया ॥ ११ ॥ किमुज्जगुरित्यपेक्षानिवृत्तयेऽजनं श्रीकृष्णमित्यर्थांतरम् । ता गोप्यो बालके इत्याशिषं प्रयुंजाना इति किम् । राजपुत्रत्वाद्राजा भूत्वा चिरं पाहीति । ‘ परस्येष्टार्थप्रशंसनमाशीः ’ इति लक्षणात् ॥ १२ ॥ आगते प्राप्ते ॥ १३ ॥ हृष्टा गोपाः परस्परं विचिक्षिपुरिति संबंधः । यद्वा—क्षीरादिभिरासिञ्चंतो नवनीतैर्विलिम्पंतो दधि चिक्षिपुः । यद्वा—नीतैर्गृहीतैर्दध्यादिभिर्नवशब्दोपलक्षितान्नवनंदांस्तत्संबंधिनश्च विचिक्षिपुरित्यर्थः ॥ १४ ॥ तेभ्यः गोपेभ्यः सूतादिभ्यश्च । विद्यास्तु चतुर्दशधा धर्ममीमांसादिरूपास्ताभिरुप जीवंतीति तथा ॥ १५ ॥ तैस्तैर्यान्या न याचंते त्यर्थः । यथोचितं विद्यागौरवमनतिक्रम्येत्यर्थः । आराधनार्थाय संतोषाय । अनेन दानादिना विष्णुः प्रसीदतु तत्प्रसादेन मत्पुत्रः कुशल्यस्त्विति संकल्पयन्नित्यर्थः । चकारान्नवग्रहदिक्पालादिप्रसादोऽपि ध्येयः ॥ १६ ॥ महाभागा वसुदेवपत्नीभ्यस्सर्वाभ्योऽपि श्रीकृष्णबाल्यलीलोत्सवलाभादिति भावः । नंदगोपेन नंदराजेन ‘ गोपो भूपेपि ’ इत्यमरः । यद्वा—नंदशब्देन नवनंदा ग्राह्यास्तेषां राज्ञा “ नवलक्षमिता गावो यद्गृहे संति सर्वदा । स नंदो नंदराजस्तु ज्ञेयोऽसंख्यगवाधिपः ॥ ” इति गर्गोक्तेः । अभिनंदिता त्वदागमनादेव मत्पुत्रोऽयं जात इति श्लाधिता व्यचरत्समागतव्रजिनसंमाननार्थमितस्ततश्चचार । दिव्यवासादिभिश्श्रीयशोदानंदाभ्यां दत्तैर्भूषिता पत्युर्बंधनादिदुःखं स्वस्य च तद्विच्छेदादिदुःखं कृष्णजन्मोत्सवानंदेन विस्मृत्यैवेत्यर्थः ॥ १७ ॥ नन्वभिमतपूरणं तु धनदेनाप्यशक्यं कथं नंदेन कृतम् । तत्राह—तत इति । गुणाः सर्वपालनादयः । रमायाः सर्वसंपत्तेः ‘ रमा श्रीसर्वसंपदोः ’ इति यादवः । यदा सर्वसंपत्तिरेव क्रीडितुमारेभे तदा कस्य देयवस्तुनस्तत्राभाव इति भावः । यद्वा—‘नायं श्रियः ’ इत्याद्युक्तरीत्या वैकुंठश्रीतोऽपि व्रजदेवीनामेव परमरमात्वोक्तेस्तासामपि परमरमा श्रीराधा तस्या अपि तदानीमाविर्भावात्तस्याश्च क्रीडास्थानं तदारभ्याभूदिति । किञ्च चिंतामणिसद्मादीनामापि निगूढनित्यक्रीडायां श्रवणात्तद्रमाक्रीडमेवेति तत्त्वम् । तदुक्तं “ चिंतामणिप्रकरसद्मसु कल्पवृक्षलक्षावृतेषु सुरभीरभिपालयन्तम् । लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं गोविंदमादिपुरुषं तमहं भजामि ॥” इति ब्रह्मसंहितायाम् ॥ १८ ॥ चिरात्सर्वमनोहरपुत्रोत्पत्त्या प्राप्तमहानिधिरिव ‘श्रेयांसि बहुविघ्नानि’ इति विमृश्य श्रीनंदराजो यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुदेव उपश्रुत्य भ्रातरं नंदमागतम् ॥ ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनम् ॥ २० ॥ तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतम् ॥ प्रीतः प्रियतम दोर्भ्यां सस्वजे प्रेमविह्वलः ॥ २१ ॥ पूजितः सुखमासीनः पृष्ट्वाऽनामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥ २२ ॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥ २३ ॥ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्लभं प्रियदर्शनम् ॥ २४ ॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ॥ ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥ २५ ॥ कच्चित्पशव्यं निरुजं भूर्यम्बुतृणवीरुधम् ॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ २६ ॥

भ्रातरं सखायम् । तदवमोचनं तस्य नंदस्य वसतिस्थानम् ॥२०॥२१॥२२॥२३॥ पुनर्भवः पुनर्जात इव । तत्र हेतुगर्भं विशेषणं संसारचक्रे वर्तमान इति दुर्लभमिति च ॥ २४ ॥ दुर्लभत्वमेवाह । नैकत्रेति । प्रियश्चासौ संवासश्च प्रियसंवासः हे प्रियेति वा स्रोतस ओघेन नीयमानानां प्लवंतीति प्लवास्तृणकाष्ठ दयस्तेषां यथैकत्र स्थितिर्नास्ति तद्वत् ॥ २५ ॥ कच्चिदिति । पशव्यादिरूपे तस्मिन्वने निर्दोषगोपयोदध्यादिप्रभूतगोपिकास्तन्यादिना पुत्रक्षेमजिज्ञासया पृच्छति । 'प्रसक्तधीः स्वात्मजयोः'

पितृदिक्पालग्रहादीन्पूजादिभिः प्रसादयामास तथा देशाध्यक्षं दुष्टनृपं कंसमपि स्वर्णमुद्राद्युपहारेण प्रसादयितुं वार्षिककरदानमिषेण।तत्समीपं गंतुं न विलंब इत्याह–गोपानिति । हे कुरूद्वहेति । यथा कुरुकुलसंतानैकहेतोस्तव रक्षार्थं श्रीयुधिष्ठिरादयो व्यग्रास्तथेति संबुद्ध्यभिप्रायः ॥ १९ ॥ भ्रातरं वैश्यकन्यायां शूरमात्रेयभ्रातुर्जातत्वादिति भारततात्पर्ये श्रीमध्वाचार्यैरुक्तं ब्रह्मवाक्यम् । "तस्मै मया स वरः संनिसृष्टः स चास नंदाख्य उतास्य भार्या । नाम्ना यशोदा स च शूरतातसुतस्य वैश्याप्रभवोथ गोपः॥" इति वैश्याप्रभव इति पितामह्याः स्तज्जातित्वात् । अत एव "यादवानां हितार्थाय धृतो गिरिवरो मया " इति भगवद्वाक्यम् "यादवेषु च सर्वेषु भवंतो मम वल्लभाः" इति तद्वत्तं प्रति बलदेववाक्यम । "भ्राता सहोदरे मित्रे पितृव्यादिसुतेऽपि च " इति धरणिः । अव समंतान्मुच्यते शकटादिकं यत्र तत्कृतावासस्थानमित्यर्थः । 'त्यागे स्थानेऽवमोचनम् ' इति च । यद्वा–'मार्गवासोऽवमोचनम् ' इति कोशाच्छिबिर (डेरा) मित्यर्थः ॥ २० ॥ प्रियतमं प्रियतरपुत्ररक्षकत्वात् । पुत्रस्मृतिजप्रेम्णा विवशः पूजितः पाद्यादिना नंदेनार्चित स्वस्थानागतत्वात् ॥ २१ ॥ वर्णज्येष्ठस्यापि वसुदेवस्य श्रीनंदेनाकृतनमस्कारत्वाद्वयसाऽनुजत्वं गम्यते । अनामयं कुशलं नंदेनादृतः कृतादरः । तत्कुशलप्रश्नमिषेण निजात्मजयोरतत्पृच्छतीत्याह–स्वात्मजयोरिति ॥ २२ ॥ प्रगतं वयो यस्य स प्रवया वृद्धस्तस्य ' प्रवयःस्थविरौ समौ ' इत्यमरः । इतः पूर्वमप्रजस्य निःसंतानस्य पुत्रो जात इत्युक्ते मिथ्योक्तिः कन्येत्युक्ते नंदस्याप्रतीतिरिति हेतोर्मत्पुत्रन्यासं स्वकन्याचौर्यं कथंचिन्नंदो जानाति न वेति शंकयापि प्रजाशब्दप्रयोगेणाह–प्रजेति ॥२३॥ बंधनादिक्लिष्टस्य मम पुनर्भवो वर्तमानोऽयं पुनर्जन्मैवाभूदित्यर्थः । यतो भवानुपलब्ध इत्येतावत्कालपर्यंतमहं भवदनुपलंभान्मृत इवेति भावः॥२४॥संवास इह समुपसर्गेणैव वासे प्रियत्वावगतेः पुनः प्रियशब्देन समासो न श्रैष्ठ्याधायक इति हेतोराह–हे प्रियेति वा । तद्वत्सुहृदामपीत्यर्थः॥२५॥ गूढाभिसंध्या पृच्छति । कच्चिदिति । बृहद्वनं महावनम् । पशव्य पशुभ्योहितम् । निर्ग

१–द्रोणः । २ धरा । ३ देवमीढस्य द्वे भार्ये एका क्षत्रिया तस्या शूरः परा वैश्या तस्यां पर्जन्य इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ॥ तातं भवंतं मन्वानो भवद्भ्यामुपलालितः ॥ २७ ॥ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥ २८ ॥ नन्द उवाच ॥ अहो ते देवकीपुत्राः कंसेन बहवो हताः ॥ एकाऽवशिष्टा वरजा कन्या साऽपि दिवं गता ॥ २९ ॥ नूनं ह्यदृष्टनिष्ठोऽयमदृष्टपरमो जनः ॥ अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति ॥ ३० ॥

इत्युक्तत्वात् ॥ २६ ॥ भवद्भ्यामुपलालितः सन्कच्चिद्वर्तत इति शेषः ॥२७॥ पुत्रादर्शनक्लेशानाह । पुंस इति । सुहृदो बंधून्प्रत्यनुभावितः तदर्थं संपादितो यस्त्रिवर्गः स हि पुंसो विहितो युक्तः शास्त्रेण वा प्रोक्तो न स्वमात्रपर्यवसितः । अतस्तेषु क्लिश्यमानेषु स त्रिवर्गोऽर्थाय न कल्पते सुखाय न भवतीत्यर्थः ॥ २८ ॥ नंदो वसुदेवं सांत्वयन्नाह । अहो इति ॥ २९ ॥ अदृष्टे एव निष्ठा समाप्तिर्यस्य सः यदैव पुत्रादिसुखप्रदमदृष्टं हीयते तदैव ते पुत्रादयो न भवंतीत्यर्थः । तथा अदृष्टपरमः अदृष्टमेव परमं यस्य सः । यद्यपि पुत्रादयो वियुक्तास्तथाऽपि तानदृष्टमेव पुनः संगमयतीत्यर्थः । एवमदृष्टमात्मनस्तत्त्वमव्यभिचारिकारणं सुखदुःखयोर्यो वेद स न मुह्यति तस्मादिदानीं त्वया न दुःखं भावनीयं मृतानामपि वियुक्तानामपि च कालांतरे दर्शनयोगयोः संभवात् । अस्मदादिभिरपि कालांतरे तद्वियोगे सत्यप्यत एव न दुःखं संभावनीयमिति नंदस्य दैवी वागेषा भावि सूचिका ॥ ३० ॥

ता रुक् गोगोपीभ्यो यत्र तत्तथा समासांतोऽच्प्रत्ययः । यद्वा—भागुरिमतेन टापि निर्गता रुजेति व्याख्येयम् । भूयोऽधिका अंबुतृणवीरुधो यत्रेति ॥ २६ ॥ मम सुत इत्येकत्वेऽपि ममेति पदं द्वित्वमेव सूचयतीति । मात्रा रोहिण्या ॥ २७ ॥ त्रिवर्गः धर्मकामार्थरूपः । युक्त उचितः । औचित्यं कथमित्याकांक्षायामाह—शास्त्रेण । इत्यर्थ इति । लोकगर्हाहेतुत्वादिति भावः । तदुक्तम् "येन जीवेन जीवंति विप्रा मित्राणि बांधवाः । सफलं जीवितं तस्य स्वात्मार्थे को न जीवति ॥" इति । तोषिण्यां तु मित्रपुत्रादीनामपि पालनादिना भवतः परमकृतार्थता वृत्तैव अहं त्वधुना धनादिमानपि पुत्रकलत्रमित्रादिदुःखेनाकृतार्थ एवेत्याह वसुदेवः—पुंसः पुंमात्रस्य श्लेषेण तदेव पौरुषमिति भावः । हि एव अनुभावित एव निष्पादित एव । क्लिश्यमानेषु क्लेशं प्राप्तवत्सु । अर्थाय सुखाय न कल्पते किं तु दुःखायैवेति भावः । तेषां दुःखे सति धर्मस्याप्यनादरणीयत्वात् । "वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः । अप्यकार्य्यशतं कृत्वा भर्त्तव्यौ मनुरब्रवीत् ॥" इति स्मृतेः ॥ २८ ॥ नंद इति श्रुत्वा । सांत्वमाह त्वत्पृष्टमद्व्रजे क्षेममहं किं ब्रवीमि यदहं त्वद्दुःखेनैव महादुःखीत्याह—अहो इति । किञ्च मत्पुत्रन्यासादिकमस्य न विदितमिति ज्ञात्वा वसुदेवो गताशंकोंतरानंदितो बभूवेत्यपि ज्ञेयश्चात्र ॥ २९ ॥ इत्यर्थ इति । अदृष्टाधीनमेव दुःखादीत्यर्थः । अदृष्टं प्राचीनं कर्म । इत्यर्थ इति । संयोगवियोगावप्यदृष्टाधीनाविति भावः । मृतानामपीति जमदग्निसत्यवदादौ तथा दृष्टत्वादिति भावः । अस्मदादिभिरपि तद्वियोगे रामकृष्णावियोगे । कालांतरे आगामिनि समये । न दुःखं विभावनीयमिति संबंधः । यद्वा—न मृषेति हेतोर्हरिं मनोहरं स्वसुतं पथि विशेषतो न जाने तत्र किं वृत्तमिति चिंतयन् शरणं निजगृहं जगाम । दैवी दैवोच्चारिता । एषाऽस्मदादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुदेव उवाच ॥ करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं च वः ॥ नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले ॥३१॥ श्रीशुक उवाच ॥ इति नंदादयो गोपाः प्रोक्तास्ते शौरिणा ययुः ॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् ॥ ३२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे नंदवसुदेव संगमो नाम पंचमोऽध्यायः ॥५॥ श्रीशुक उवाच ॥ नंदः पथि वचः शौरेर्न मृषेति विचिंतयन् ॥ हरिं जगाम शरणमुत्पातागम शंकितः ॥ १ ॥ कंसेन प्रहिता घोरा पूतना बालघातिनी ॥ शिशूंश्चचार निघ्नंती पुरग्रामव्रजादिषु ॥ २ ॥ न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु ॥ कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि ॥ ३ ॥ सा खेचर्येकदोपेत्य पूतना नंदगोकुलम् ॥ योषित्वा माययाऽऽत्मानं प्राविशत्कामचारिणी ॥ ४ ॥

तां बुद्ध्वा वसुदेवो दुःखं त्यक्त्वा नंदमाह । करो वै इति । वो युष्माभिः ॥ ३१ ॥ ३२ ॥ इति श्रीभा० म० दशमे पू० टीकायां पंचमोऽध्यायः ॥ ५ ॥ षष्ठे सख्युर्गिरां नदो व्रजं गच्छन्मृतां पथि ॥ दृष्ट्वा तु राक्षसीं तस्या मृत्युं श्रुत्वाऽथ विस्मितः ॥ १ ॥ १ ॥ २ ॥ कृष्णविषये शंकमानं राजानं प्रत्यविषये प्रवृत्ता सैव मरिष्यतीति सूचयन्नाह । न यत्रेति । यत्र श्रीकृष्णस्य श्रवणादीनि न संति तत्रैव तासां शक्तिः ॥ साक्षात्तस्मिन्नेव सति का शंकेति भावः ॥ ३ ॥ योषित्वा वेषतो वरां नारीमिवात्मानं

भिरपीत्यादिरूपा । भाविसूचिका भविष्यद्बोधिका ॥ ३० ॥ तां नंदप्रोक्तां वाचम् । इह मथुरायाम् । बहुतिथं चिरकालं पूरणप्रत्यये डटि तिथुगागमः "बहुपूगगणसङ्घस्य तिथुक्" इति सूत्रेणेति । उत्पाता अनर्थ सूचका उपद्रवाः ॥ ३१ ॥ अनोभिः शकटैः "अनः स्याद्वासुदेवान्ये जनन्यां शकटेऽपि च" इति धरणिः । अनडुद्युक्तैर्वृषयुक्तैः ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पञ्चमोऽध्यायः ॥ ५ ॥ सख्युर्वसुदेवस्य । तस्या राक्षस्याः (१) । शौरेर्वसुदेवस्य । हरिं शरणं जगाम । हे हरे मम गृहे कश्चिदुत्पातो न भवेद्यदि भवेत्तर्हि त्वमेवास्माकं रक्षक इति प्रार्थयामासेत्यर्थः ॥ तव तुल्यः कोऽत्र विवेक्यस्ति । अतो मोहो नोचित इति भावः ॥ १ ॥ प्रहिता प्रेषिता निघ्नंती मारयंती । तदुक्तं वैष्णवे "यस्मैयस्मै स्तनं रात्रौ पूतना संप्रयच्छति । तस्यतस्य क्षणेनांगं बालकस्योपहन्यते॥" इति । आदिना सार्थादिग्रहः ॥ २ ॥ तत्प्रेषणे राजशंकामपानुदति अविषये मारणाद्यगोचरे । सैव पूतनैव । बाहुभ्यां समुद्रं तरान्निवेति दृष्टांतोऽत्र ध्येयः । यत्र यस्मिन्स्थाने । तत्रैव श्रीकृष्णश्रवणादिवर्जितस्थान एव । तासां यातुधानीनाम् । तस्मिन्नेव श्रीकृष्ण एव । इति भाव इति । दृष्टादृष्टकर्मण्यपि वर्त्तमाना जना यत्र श्रवणादीनि कुर्वंति तत्रैव प्रभवंति किमुत यत्र प्राधान्येन कुर्वंति तत्र न प्रभवंतीति किमुततरां यत्र कैवल्येन कुर्वंति किमुततमां साक्षादेव यत्र स प्रादुर्भूयास्त इति तात्पर्यम् । यातुधानीपदमत्रोपलक्षणम् "न तत्र दानवाः संति न पिशाचा न राक्षसाः । यक्षकिन्नरवेतालभूतप्रेतविनायकाः ॥ यत्र देवो गृहे विष्णुः कीर्त्यते हि सदा सताम्" इति रामायणात् । यत्र स्वकर्मसु यज्ञादिषु । सात्वतां भर्तुर्हरेः । श्रवणादीनि नरा न कुर्वंति तत्र हि यातुधान्यः संतीत्यन्वयः । किंभूतानि रक्षोघ्नानि रक्षआदिनिवर्तकानि । यद्वा—स्विव्त्यव्ययं शोभनेर्थे पृथगेव पदं यत्र रक्षोघ्नानि सात्वतां भर्त्तुः श्रवणादीनि न तत्रैव यातुधान्यः स्वकर्म मारणादिरूपम् । सुशोभनं कुर्वंतीत्यन्वयः ॥ ३ ॥ सा या प्रेषिता खेचरी बकी । "अहो बकीयं किल कालकूटम्" इत्यत्र श्रवणात् । नारीणां हि पर

१ 'पापेभ्योऽनः सुतानिव' इति मार्कंडेयात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां केशबंधव्यतिषक्तमल्लिकां बृहन्नितंबस्तनकृच्छ्रमध्यमाम् ॥ सुवाससं कंपितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननाम् ॥ ५ ॥ वल्गुस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसाम् ॥ अमंसतांभोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिम् ॥ ६ ॥ बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहेऽसदंतकम् ॥ बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि ॥ ७ ॥ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः ॥ (महीसुरत्वेऽपि च बालभावं विभावयन्किंचिदुवाच न प्रभुः ॥ अजानमानाथ निशाचरी हरिं विसर्गविज्ञानजगद्विचेष्टितम् ॥ १ ॥) अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥

विधाय । ननु निर्लज्जा निर्विशंका च सती कथं परसद्मनि प्रविष्टेत्यत आह । कामचारिणीति । नहि कामचारिणीष्विदं चित्रमित्यर्थः ॥ ४॥ तां वनितां पतिं द्रष्टुमागतामतिरूपवतीं श्रियमिव गोप्योऽमंसतेत्युत्तरश्लोकस्थेनान्वयः । श्रीसाम्यार्थानि विशेषणानि । केशबंधव्यतिषक्तमल्लिकां धम्मिल्लसंसक्तमल्लिकाकुसुमाम् । बृहता नितंबेन स्तनाभ्यां चोभयत आक्रांतमिव कृच्छ्रं कृशं मध्यममुदरं यस्यास्ताम् । सुवाससं शोभने रमणीये वाससी यस्यास्ताम् । कंपितयोः कर्णभूषणयोस्त्विषोल्लसद्भिः कुंतलैर्मंडितमाननं यस्यास्ताम् ॥ ५ ॥ वल्गुस्मितापांगविसर्गवीक्षितैः वल्गु रम्यं स्मितं येषु ते तथाभूता अपांगविसर्गा येषु तैर्वीक्षितैर्व्रजौकसां मनो हरंतीम् । अतो गोपाहृतमनस्त्वेन तां न निवारितवंत इत्युक्तं भवति । गोप्यश्च श्रियमिव मत्वा तूष्णीमासन् । अतः केनाप्यनिवारिता सती प्रविवेशेति भावः ॥ ६ ॥ बालग्रहः पूतना असदंतकं बालं ददर्श । असतामंतकं दृष्ट्वा कथं न बिभेति तत्राह । प्रतिच्छन्ननिजोरुतेजसं बालनाट्येन प्रतिच्छन्नं तिरोहितं निजमुरु तेजो येन तम् । कमिव । भसि भस्मन्याहितमग्निमिवेति ॥ ७ ॥ चराचरात्मत्वादेव तां विबुध्य निमीलितेक्षण आस । स्वयमनंतं दुष्टानामंतकं बालं मत्वा एवमपि सांकमारोपयत् । यथोरगं सुप्तमबुद्धिश्वासौ

गृहप्रवेशे लज्जाशंके भवतस्तस्यास्ते कथं नेति शंकते—नन्विति । कामेनेच्छया चरितुं शीलमस्या इति कामचारिणी । स्वेच्छानुरूपवपुःकरणसमर्था । योषित्वा योषयित्वा णिज्लोपस्त्वार्षः । निजसौंदर्येण सर्वजनान्मोहयित्वा गृहांतःपुरादिषु सहसा प्रवेष्टुमिति भावः । यद्यपि जगन्मोहिनी मायापि तत् सिद्धभक्तान्मोहयितुं न क्षमा तथापि कृष्णलीलाशोभासिद्ध्यर्थमैंद्रजालिकमायेन तानपि पूतनादिमाया भगवदिच्छयामोहयतीति भावः । इत्यर्थ इति । स्वच्छंदेष्विदमेवोचितमिति भावः 'गोपित्वा' इति पाठे विधायेत्यर्थः ॥ ४ ॥ तां स्वेच्छारूपं कृत्वा गताम् । श्रीसाम्यार्थानि श्रीतुल्यताबोधकानि । उभयतः पार्श्वद्वयतः । आक्रांतं भेदशंकयेव निरुद्धम् ॥ ५ ॥ श्रियं मूर्त्तिमतीं रत्नादिधनसम्पात्तिमिवांभोजकरेणोपलक्षितां पतिं श्रीव्रजेंद्रस्येष्टदेवं नारायणं द्रष्टुमिवागतामममंसत वनितामत्यनुरागवतीम् । "वनिता जनितात्यर्थानुरागायां च योषिति" इत्यमरः । अहो रूपमहो अनुराग इति व्रजौकसां मनो हरंतीम् । इति भाव इति । सुरूपवस्त्रालंकारयुतनिवारणम् । गृहे विशतो भाग्यवच्छंकया न केनचिदपि क्रियते किं तु विरूपालंकारवस्त्रहीनस्यैव तत्क्रियते इति तात्पर्यम् ॥६॥ पूतनारेवतीज्येष्ठाकोटराभीषणास्याशुष्कानंदादिभेदैः षोडश बालग्रहा बालतंत्रे प्रोक्ताः । बालग्रहः—पुस्त्वमाविष्टलिंगत्वात् ॥ ७ ॥ निमीलितेक्षणः संमीलितलोचनः । अत्रायं भावः—येन नेत्रयोगो भवेत्पुनस्तस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यांतरा कोशपरिच्छदासिवत् ॥ वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठताम् ॥ ९ ॥ तस्मिन्स्तनं दुर्जरवीर्यमुल्बणं घोरांकमादाय शिशोर्ददावथ ॥ गाढं कराभ्यां भगवान्प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥ सा मुंचमुंचालमिति प्रभाषिणी निष्पीड्यमानाऽखिलजीवमर्मणि ॥ विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥ तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ॥ रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनिपातशंकया ॥ १२ ॥ निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि ॥ प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप ॥ १३ ॥

रज्जुधीश्च सोऽज्ञानतो रज्जुबुद्ध्या गृह्णाति तद्वदिति ॥ ८ ॥ ननु यशोदारोहिण्यौ तां कथं न न्यवारयेतां तत्राह । तामिति । वामं वल्गु जनन्या इव चेष्टितं यस्यास्तां वरस्त्रियं च सहसैवांतरा गृहमध्ये वीक्ष्य । अंतस्तैक्ष्ण्ये बहिर्मार्दवे च दृष्टांतः कोशपरिच्छदासिवत । मृदुचित्रचर्ममयः कोशः परिच्छद आवरणं यस्यासेः खड्गस्य तद्वत् । तत्प्रभया च धर्षिते अभिभूते । अहमस्य जननीयं वेति मोहिते च सत्यौ जननी जनन्यौ निरीक्षमाणे एव केवलमतिष्ठतां न तु निवारितवत्यौ ॥ ९ ॥ तस्मिन्स्थाने दुर्जरं वीर्यं विषं यस्मिंस्तं स्तनं श्रीकृष्णमंकमादाय सा घोरा तस्मै शिशवे ददौ । अथानंतरमेव प्रपीड्य केवलं विषमपथ्यमिति मत्वेव तस्याः प्राणैः सहापिबत् ॥ १० ॥ चरणौ भुजौ च मुहुर्मुहुः क्षिपंती । प्रस्विन्नानि स्वेदयुक्तानि गात्राणि यस्याः सा ॥११॥ रसाः रसातलानि च ॥१२॥ व्यादाय मुखं विवृत्य केशादीन्प्रसार्य । निजरूप

निष्टं नोत्पादनीयम् । 'प्रीतिर्नयनयोगतः' इत्युक्तेर्मित्रद्रोहता मयि मा भवेदित्यालोच्य नेत्रनिमीलनं कृतवान् । यद्वा—विषप्रभावो यथा शिवे न जातस्तथा मय्यपि मा भूदिति नेत्रमीलनेन शिवं दध्यौ विषजर्जरतात्तय इति । यद्वा—बालघ्न्या दुष्टाया दर्शनमन्याय्यमिति । यद्वा—स्वस्यात्यंतबालत्वभीरुत्वज्ञापनाय । यद्वा—मद्दृष्टिस्वभावत एवैतद्विधभयजनिका भीतेयं मा निवर्ततामिति । यद्वा—मातृभावदर्शिकायास्तस्याः स्वकर्तृकवधे लज्जानुत्पत्त्यै चेति विश्वनाथः । ततश्चानंतं तमंकमारोपयत् अंतकं स्वस्येति संहारशक्तेः सेवावसरोत्र यस्य देशतः कालतश्चांतो नास्ति तमनंतमप्यंकमारोपयदत्र विरोधेनाद्भुतरसो व्यंजितः । अंतकमनंतमिति शब्दविरोधः ॥८॥ कृष्णमातरौ कुत्र गते तदेत्यभिप्रेत्याह—नन्विति । तां पूतनाम् 'वामः क्रूरे मनोहरे' इति यादवः । जननीति द्विवचनम् ''कृदिकारादक्तिनः'' इति ङीबभावपक्षेऽयं प्रयोगः । यद्वा—आर्षत्वादेकत्वम् । ''कोशोऽस्त्री कुड्मले पात्रे दिव्यखड्गपिधानके । जातिकोपेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे ॥ '' इति मेदिनी । 'परिच्छद आवरणे सांविधाने विवस्त्रके' इति धरणिः ॥ ९ ॥ शिशोरिति चतुर्थ्यर्थे षष्ठी । तत आह शिशवे । ''अहिफेनं रामठेन युक्तं त्वविषवद्भवेत्'' इत्यादिवाक्यैः केवलं विषमपथ्यमिति रोषसमन्वित इति रोषः—मदीयव्रजबालकानपीयं जिघांसतीति रोषमयी दुष्टसंहारिका भगवच्छक्तिः तस्या अपवित्रान्प्राणानपिबत् न तु सः कुठारसमन्वितो वृक्षमच्छिनादितिवत् ॥ १० ॥ अखिलजीवमर्मणि सर्वस्मिन् जीवस्थाने ''यस्मिन्कृत्ते मर्दिते च जीवो नश्यति देहतः । तदंगं मर्म विज्ञेयं सूक्ष्मं दुर्ज्ञेयमेव तत् ॥'' इति वाक्यात् । कंठवृषणादीनि मर्माणि । नेत्रे विवृत्य प्रसार्य । मुंचमुंचेतिवदलमित्यपि वारणेत्र वीप्साया अभावस्तु वक्तुमशक्यत्वादेव ॥ ११ ॥ वज्रनिपातो विद्युत्पातः ॥ १२ ॥ निजरूपमुलूकिकारूपम् । गोष्ठे लक्षणया तत्समीपदेशे गोदोहार्थाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतमानोऽपि तद्देहस्त्रिगव्यूत्यंतरद्रुमान् ॥ चूर्णयामास राजेंद्र महदासीत्तदद्भुतम् ॥ १४ ॥ ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकम् ॥ गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजम् ॥ १५ ॥ अंधकूपगभीराक्षं पुलिनारोहभीषणम् ॥ बद्धसेतुभुजोर्वंघ्रि शून्यतोयह्रदोदरम् ॥ १६ ॥ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरम् ॥ पूर्वं तु तन्निस्वनितभिन्नहृत्कर्णमस्तकाः ॥ १७ ॥ बालं च तस्या उरसि क्रीडंतमकुतोभयम् ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः ॥ १८ ॥ यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः ॥ रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः ॥ १९ ॥ गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भकम् ॥ रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः ॥ २० ॥

मास्थिता । मरणसमये कपटमयुक्तमिति भावः । वृत्रो वज्राहत इव ॥१३॥ पतन्नपि तस्या देहः षट्क्रोशमध्यवर्तिनो द्रुमांश्चूर्णीचकार ॥ १४ ॥ ईषामात्रोग्रदंष्ट्रास्यं ईषा लांगलदंडस्तत्प्रमाणोग्रा दंष्ट्रा यस्मिंस्तत्तथाभूतमास्यं यस्मिंस्तत्तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च संतत्रसुः । संत्रासहेतुत्वेन पुनरष्टभिः पदैर्विशिनष्टि । गिरिकंदरवन्नासिके यस्मिंस्तत् । गिरेश्च्युतौ स्थूलोपलौ गण्डशैलौ ताविव स्तनौ यस्मिंस्तत् । रौद्रं घोरम् । प्रकीर्णा अरुणा मूर्द्धजा यस्मिंस्तत् ॥१५॥ अंधकूपाविव गभीरे अक्षिणी यस्मिंस्तत् । पुलिनवदारोहौ जघने ताभ्यां भीषणम् । बद्धाः सेतव इव भुजौ ऊरू अंघ्री च यस्मिंस्तत् । शून्यतोयह्रद इवोदरं यस्मिंस्तत् ॥ १६ ॥ पूर्वमेव तस्याः शब्देन भीताः पुनर्दर्शनेनातितत्रसुरित्याह । पूर्वं त्विति । तस्या निःस्वनितं शब्दस्तेन निर्भिन्नानि हृत्कर्णमस्तकानि येषां ते ॥ १७ ॥ १८ ॥ १९ ॥ द्वादशांगेषु ललाटा

रोधनस्थले न तु जनवासे च न तु द्रुमाणामेव चूर्णितत्वेनोक्तत्वात् । चरणयोः पक्षात्मकभुजयोश्च विक्षेपणोत्पातात् "सा खेचर्येकदोपेत्य" इति पूर्वोक्तेः एतादृशकथोद्बोधनेन त्वं नूनमासीति संबुद्ध्यभिप्रायः । निजरूपाश्रयणं तु मृत्युपीडितायास्तस्या मायाया नष्टत्वात्तद्रूपस्य च 'योषित्वा माययात्मानम्' इत्युक्तेर्मायिकत्वात्कारणाभावे कार्यं स्वयमेव नश्यतीति भावः । व्यसुः सत्यपतत् ॥ १३ ॥ पतमानः पीडावैयग्र्यवशादन्तःपुरात्तस्मादुत्प्लुत्य ग्राममप्युल्लंघ्य तद्बहिःप्रदेशेऽपतन्नित्यर्थः । अपिकारेण न केवलं जीवंत्येव सा जीवान् जघानापि तु मृतापीति भावः । षट्क्रोशमध्यवर्त्तिनो द्रुमान् । तावतां द्रुमाणां चूर्णनं द्रुममात्रचूर्णनं ग्रामोल्लंघनं च भगवल्लीलाशक्तेरेव महिमेत्यवगमयितुं स्तौति—हे राजेंद्रेति । हे भक्तिराजमानमुख्येत्यभिप्रायः । द्रुमाश्च ते कंसारामस्थास्तद्भोग्यफला एवेति विश्वनाथः । "गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः ॥ १४ ॥ ईषा लांगलदंडो रथावयवोपि । "गंडशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः ॥ १५ ॥ गभीरे निम्ने 'निम्नं गभीरं गंभीरम्' इत्यमरः । शून्यं तोयं यत्र स चासौ ह्रदश्च ॥ १६ ॥ तत्कलेवरं वीक्ष्येति संबंधः ॥ १७ ॥ तूर्णं शीघ्रम् । जातसंभ्रमाः जातसंवेगाः "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी ॥ क्रीडंतं हस्तपादनर्त्तनादिना क्रीडां कुर्वंतम् । गोप्यः श्रीयशोदा सवयस्का यशोदारोहिण्यौ मोहव्याप्ते परित्यज्य मातृवत्स्नेहाकुला मृतपूतनादेहात्कृष्णमुत्तार्य गृहमानिन्युः ॥ १८ ॥ समं सार्द्धम् । सर्वशः सर्वप्रकारेण । रक्षाविधाने यशोदारोहिण्योरप्राधान्यं तु शोकाविष्टत्वात्तयोस्तत्राशक्तेरिति ज्ञेयम् ॥ १९ ॥ आदिना सर्षपनिर्मंछनसूर्पस्पर्शादिग्रहः । प्रकारमेवाह—गोमूत्रेणेत्यादि । गोशकृता गोमयेन । 'शकृते' इति पाठे गोरिति शेषः । द्वादशांगेषु द्वादशतिलकस्थानेषु । नामभिस्तत्तत्तिलकविहितैः । तथाहि "ललाटे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् ॥ न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत ॥ २१ ॥ अव्यादजोंऽघ्रिमणिमांस्तव जान्वथोरू यज्ञो ऽच्युतः कटितटं जठरं हयास्यः ॥ हृत्केशवस्त्वदुर ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥ २२ ॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहाऽजनश्च ॥ कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समंतात् ॥ २३ ॥

दिषु केशवादिद्वादशनामभिः ॥ २० ॥ अनाचांता एव प्रथममतिसंभ्रमेणैवं रक्षां कृत्वा किंचिल्लब्धश्वासाः पुनस्तात्पर्येण बीजन्यासमकुर्वतेत्याह । गोप्य इति । संस्पृष्टसलिला आचांताः आत्मनि प्रथममंगेषु करयोश्च पृथक् अजाद्येकादशबीजानां मध्ये करशुद्धौ त्रीणि करयोः संधिषु चत्वारि चत्वारि तथा अंघ्र्यादावेकैकस्मिन्नंगे अजाद्येकैकं बीजं न्यस्य बालस्याप्यंगेषु तथैवाकुर्वत॥ २१ ॥ अंघ्रिम् अंघ्री । जानु जानुनी । भुजं भुजौ । कं शिरः॥ २२॥ तथा दिक्षु रक्षामकुर्वन्नित्याह ॥ चक्र्यग्रत इति । चक्र

केशवः पातु नाभौ नारायणोऽवतु । माधवः पातु हृदये गोविंदः कंठतस्त्वधः ॥ दक्षकुक्षौ तथा विष्णुस्तद्भुजे मधुसूदनः । त्रिविक्रमस्तु तत्कंठे वामकुक्षौ तु वामनः ॥ श्रीधरो वामबाहौ च हृषीकेशस्तु तद्गले । कट्यां वै पद्मनाभस्तु ककुद्दामोदरोऽवतु'' इति ॥ २० ॥ संभ्रमेण कृत्वापि पुनरसंभ्रमेण चक्रुरित्याह—अनाचांता एवातिसंभ्रमेणैव रक्षां कृतवंत्यो गोप्यः पुनर्यथाविधानमेव रक्षां चक्रुः । बीजन्यासमजादीनामाद्यक्षरस्य सानुस्वारनमोंतस्य न्यासं तेन अंनमोऽजस्तवाघ्री अव्यात् । मं नमः मणिमांस्तव जानुनी अव्यादित्येवमणिमान्नामा भगवतः प्रादुर्भावविशेष इति विश्वनाथः । हृत् जीवाधारपद्मम् । त्रीणि अजो मणिमान्यज्ञश्च मे करौ शोधयंत्विति वाच्यम् । अच्युतहयास्यकेशवेशा मे दक्षिणकरसंधीन् शोधयंतु । इनविष्णूरुक्रमेश्वरा मे वामकरसंधीन् शोधयंत्विति ॥ २१ ॥ अज इति “ न जातोऽहं न जायेयं न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ॥ ” इति महाभारते । मणिमान्कौस्तुभधरः ‘ मणिधरः क्वचिदागणयन्गाः ’ इत्यग्रे वक्ष्यमाणत्वाद्वा । गोगणनार्थं तुलस्यादिमणिधर इति कल्पांतरीयानुपूर्व्या भाविनामसूचनम् । “ यज्ञो वै विष्णुः ” इति श्रुतेर्यज्ञावतार आकूतिसूनुः । इज्यते मखेषु तत्तद्देवतारूपेणेति व्युत्पत्तेः । सर्वदेवरूपो वा । अच्युतः यास्कोक्तषड्भावविकारहीनः । “ शाश्वतं शिवमच्युतम् ” इति श्रुतेः । जठरमुदरम् । हयास्यो हयग्रीवः । केशसंज्ञिताः सूर्यादिसंक्रांता अंशवस्तद्वत्तया केशवः । “ अंशवो ये प्रकाशंते ममैते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः ॥ ” इति भारते । ब्रह्मविष्णुरुद्राख्याः शक्तयः केशसंज्ञितास्तद्वत्तया वा केशवः । “को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिनाम् । आवां तवांशसंभूतस्ततः केशवनामवान् ॥ ” इति हरिवंशे । कश्चेशश्च केशौ तौ वेति जनयति ‘वी गतिव्याप्तिप्रजने’ इत्याद्यर्थकधातोः प्रयोगः । त्वदुरस्तव वक्षः । ईष्टे इतीशः सर्वाधिपः एष सर्वेश्वरः । इनः सूर्यरूपः “स्यादिनः स्वामिसूर्ययोः” इति वैजयंती । “ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः” इति भविष्ये । वेवेष्टि व्याप्नोतीति विष्णुः “विष्लृ—व्याप्तौ” नुक् प्रत्ययः । वेति दीव्यतीति वीगत्यादौ कांत्यर्थाद्वेतेः ष्णुप्रत्ययो धातोर्ह्रस्वश्च । विशेषेण क्रामतीति विपूर्वात्क्रमेः ष्णुप्रत्ययो धातुलोपश्च पृषोदरादित्वादिति । तदुक्तं महाभारते— “व्याप्ते मे रोदसी पार्थ कांतिश्चाप्यधिका स्थिता । क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ॥ ” इति । उरु अधिकमेकैकपादेनैकैकं भुवनं क्रामति प्रमातीत्युरुक्रमो वामनः । “इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्” इति श्रुतेः । ईश्वरः सर्वशक्तिमान् “एषोऽनंतशक्तिः” इति श्रुतेः ॥ २२ ॥ यथांगेषु रक्षां गोप्योऽकुर्वंस्तथा दिक्ष्वप्यकुर्वन्नित्यर्थः । धनुरसिशब्दौ तद्वति लाक्षणिकौ शंखोस्यास्तीति शंखः

१ कश्च अश्च ईशश्च केशाः । २ अहंकाराभिमानी रुद्रः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु ॥ श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥२४॥ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः ॥ क्रीडंतं पातु गोविंदः शयानं पातु माधवः ॥ २५ ॥ व्रजंतमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः ॥ भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः ॥ २६ ॥ डाकिन्यो यातुधान्यश्च कूष्मांडा येऽर्भकग्रहाः ॥ भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २७ ॥

सहितो हरिस्तवाग्रतोऽस्तु । सहगदो गदासहितो हरिस्तव पश्चादस्तु । त्वत्पार्श्वयोर्धनुर्धरो मधुहाऽसिधरोऽजनश्चैतावास्ताम् । शंखधर उरुगायश्चतुष्कोणेषु । क्षितावधस्तादित्यर्थः ॥ २३ ॥ एवं बही रक्षां कृत्वांतरंगामकुर्वन्नित्याह । इंद्रियाणीति ॥ २४ ॥ आत्मानमहंकारम् ॥ २५ ॥ २६ ॥ २७ ॥

मत्वर्थीयोच् । विजयध्वजस्तु—मधुहादयश्चत्वारश्चतुःकोणेष्विति जगाद उपरिदेशे "ममोपरि यथेंद्रत्वं स्थापितो गोभिरीश्वरः । उपेंद्र इति कृष्ण त्वां गास्यंति भुवि देवताः" इति हरिवंशे ॥ २३ ॥ अंतरंगां शरीरांतर्देशेष्वित्यर्थः । इंद्रियाणि श्रोत्रादीनि "सूर्याचंद्रमसौ शश्वदंशुभिः केशसंज्ञितैः । बोधयन्स्वापयंश्चैव जगदुत्तिष्ठते पृथक् ॥ बोधनात्स्वापनाच्चैव जगतो हर्षणं भवेत् । अग्निषोमकृतैरेवं कर्मभिः पांडुनंदन ॥ हृषीकेशो हमीशानो वरदो लोकभावनः ॥" इति भारते । नरः परमात्मा ततो जातानि । आकाशादीनि नाराणि "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुतेः । तान्ययते कारणात्मना व्याप्नोतीति नारायणः । "यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥" इति मंत्रात् । श्वेतद्वीपपतिरनिरुद्धः । योगेश्वरः कपिलः ॥२४॥ आत्मानमहंकारम् । परः पुरुषः "पुरुषान्न परं किंचित्" इति श्रुतेः । आत्मानं स्वम् । परो भगवान्स्वयं भगवानित्यर्थः । सरस्वतीसंवादश्चायं तेषां तदंशत्वेन ममतास्पदत्वात्स्वस्य स्वयं भगवत्त्वेनैवाहंतास्पदत्वाच्चांशेनांशस्य रक्षा भवतु स्वयं च स्वस्येति प्रार्थयामहे इत्यर्थः । अतस्तत्तदंगावतारास्तदावरणरूपाश्च ते ते इति भाव इति विश्वनाथसंदर्भौ । "नष्टां वै धरणीं पूर्वमविंदं यद्गुहागताम् । गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुतः ॥" इति मोक्षधर्मे । "अहं किलेंद्रो देवानां त्वं गवामिंद्रतां गतः ।गोविंद इति लोकास्त्वां स्तोष्यंति भुवि शाश्वतम् ॥" इति । यद्वा—"गौरेषा भवतो वाणी तां च वेद यतो भवान् । गोविंदस्तु ततो देव मुनिभिः कथ्यते सदा ॥" इति हरिवंशे । "मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामासि धवः स्वामीति कीर्त्तितः ॥" इत्यपि तत्रैव ॥२५॥ विगता कुंठा नाशो यस्य तद्विकुंठं ज्ञानं स्थानं वा तद्विद्यते स्वरूपत्वेनाश्रयत्वेन वास्येति वैकुंठः । ज्योत्स्नादित्वादण् यद्वा—जगदारंभे विश्लिष्टानि भूतानि संश्लेषयंस्तेषां गातिं प्रत्यबध्नादिति वैकुंठः ।"मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना । वायुश्च तेजसा सार्द्धं वैकुंठत्वं ततो मम ॥"इति शांतिपर्वणि । यज्ञं भुनक्ति ब्रह्मरूपेण पालयतीति यज्ञभुक् "एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोभिरक्षति" इति श्रुतेः । सर्वे गृह्णंति स्वायत्तं कुर्वंत्यनवधानमिति ग्रहा ब्रह्मराक्षसादयः सर्वे च ते ग्रहास्तेषां भयंकरः नरसिंहः ॥ २६ ॥ डाकिनी कालखंडं मन्त्रबलेन निष्कास्य भक्षति या सा भवतीति । कौ पृथिव्यामूष्मा यस्मात्तदंडं येषां ते कूष्माण्डास्ते चोपद्रवविशेषाः विनायका नायकहीना विघ्नविशेषाः "विनायकस्तु हेरंबे तार्क्ष्ये विघ्ने जिने गुरौ" इति कोशात् । डाकिन्यादयो मातृकाद्यन्ता येऽर्भकग्रहा बालग्रहाः अर्भकरूपेण ये प्राणिनो गृह्णंति तेऽर्भकग्रहाः पिशाचभेदा इति केचिदाहुः 'अर्भकः कथितो बाले मूर्खेऽपि च' इति मेदिनी । ये उन्मादा देहस्मृतिविघातका अपस्माराः ये च देहादिनाशकाः महोत्पाता धूमकेतूदयादयस्तद्द्वयसूचका ये स्वप्नदृष्टा गर्दभयानकर्दमपातादयः । वृद्धा ये बालग्रहाः वृद्धा विद्यंते ग्राह्यत्वेन येषां ते मत्वर्थीयोऽच् । कासश्वासादयो रोगविशेषास्ते सर्वे नामग्रहणेनैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोटरा रेवती ज्येष्ठा पूतना मातृकादयः ॥ उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः ॥ २८ ॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये ॥ सर्वे नश्यंतु
ते विष्णोर्नामग्रहणभीरवः ॥ २९ ॥ श्रीशुक उवाच ॥ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् ॥ पाययित्वा स्तनं माता संन्यवेशयदात्मजम् ॥
॥ ३० ॥ तावन्नंदादयो गोपा मथुराया व्रजं गताः ॥ विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥३१॥ नूनं बतर्षिः संजातो योगेशो वा समास सः ॥
स एव दृष्टो ह्युत्पातो यदाहाऽऽनकदुंदुभिः ॥ ३२ ॥ कलेवरं परशुभिश्छित्त्वा तत्ते व्रजौकसः ॥ दूरे क्षिप्त्वाऽवयवशो न्यदहन्काष्ठवेष्टितम् ॥ ३३ ॥
दह्यमानस्य देहस्य धूमश्चागुरुसौरभः ॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥ पूतना लोकबालघ्नी राक्षसी रुधिराशना ॥ जिघांस
यापि हरये स्तनं दत्त्वाऽऽप सद्गतिम् ॥३५॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ॥ यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥३६॥

॥२८॥२९॥ संन्यवेशयत छादयामास ॥३०॥३१॥ विस्मयमेवाह । नूनमिति । बत विस्मये । सांप्रतं स वसुदेव ऋषिस्तपःप्रभाववान् योगेशो ज्ञानी वा सम्यगास । यतः यत् यं आह स एवोत्पातो दृष्ट इति ॥३२॥३३॥ विस्मयांतरमाह । दह्यमानस्येति । कृष्णेन निर्भुक्तोऽत एव सपद्याहतः पाप्मा यस्य ॥३४॥ प्रसंगात्कैमुत्यन्यायेन भक्तिवैभवमाह । पूतनेति ॥ ३५ ॥ श्रद्धया आस्तिक्येन । भक्त्या प्रेम्णा । रक्ताः स्निग्धाः । तन्मातर इति वत्साहरणलीलाभिप्रायेण बहुवचनम् । तत्र हि गोगोपिका

भीरवो भीताः संतो नश्यंत्विति द्वयोः संबंधः ॥ २७ ॥ २८ ॥ २९ ॥ स्तनशब्दोऽत्र स्तन्ये लाक्षणिकः प्रणयरशनया बद्धाभिः । स्तनपानेनैवार्भकस्वास्थ्यज्ञानात्तदपाययदित्यर्थः ॥३०॥ यावन्माता संन्यवेशयत्तावन्नंदादय इति संबंधः ॥ ३१ ॥ विस्मयमभिनयति—इह यमिति तच्छब्दश्रुतेर्ज्ञेयम् । विस्मयमाह—किं शक्रेण भ्रमादच्छिन्नपक्षः कोपि पर्वतो नभोव्यापिनोप्यत्रत्यान्द्रुमांश्चूर्णयित्वा पपात । किं वा—वयमेव साहजिकया भ्रांत्या कयापि योगिन्या वा देशांतरं प्रापिताः स्मः । किं वा—कस्याप्यैंद्रजालिकस्येदं कर्मेति संदिहाना इत्यर्थः । व्रजं व्रजदर्शनयोग्यं देशं प्राप्ता अन्योन्यमूचुः वसुदेवः प्रागेतादृशो नासीदधुना ऋषिरास ऋषिवाक्यस्यैव प्रामाण्यात्सर्वज्ञत्वादनुमीयते योगेशो वा भास दीप्यते स्म 'आस दीप्तौ' ॥ ३२ ॥ तत् षड्योजनगम् । अवयवशस्तत्तत्पादहस्ताद्यवयवं पृथक्पृथक् अत्राधेरकारलोपश्छान्दसः व्रजौकस उपनंदाद्यादिष्टा अत्यंता निश्शेषेण देहं पुनर्जीवनशंकया विषधरजीवानां दाहेनैवोपशांतेः ॥ ३३ ॥ अन्यदप्यद्भुतमाह—निर्भुक्तः पानसंबंधेन भोगविषयीकृतः ॥ ३४ ॥ भक्तिवैभवं भक्त्युत्कर्षम् ॥ ३९ ॥ जिघांसयापि किमतौदासीन्येन किमुततरां श्रद्धया किमुततमां श्रद्धया भक्त्येत्यर्थः । हरये भगवत्प्रादुर्भावमात्राय किमुत कृष्णाय परमात्मने सर्वपरमस्वरूपायावतारिणे विषस्तनमपि किमुत विषेतरवस्तु किमुततरां प्रियं किमुततमां प्रियतरं किमुतातितमां प्रियतमम् । पूतनानाम्नी राक्षस्यपि किमुत मानुष्यः किमुततरां भक्ताः किमुततमां रक्ता अनुरागयुक्ताः तत्रापि किमुततमां तन्मातरोऽतिवत्सला वत्साहरणलीलागतास्तास्त्वप्यतितमा अनिर्वाच्यत्वाच्छ्रीयशोदा तु दूरत एव प्रणतिपात्रीकृत्यैव स्थापिता न तु लिखितेति करणसंप्रदानकर्मकर्तृपदेषु कैमुत्यमंडलीयम् । प्रियतमं पायसादि यच्छन् ददत् । किन्तु किञ्चित् । विजयध्वजस्तु—किञ्चित्प्रियतमम् इत्येव पपाठ लोकवंदितैर्ब्रह्मादिभिः ।

॥ ३२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः ॥ अंगं यस्याः समाक्रम्य भगवानपिबत्स्तनम् ॥ ३७ ॥ यातुधान्यपि सा स्वर्गमवाप जननीगतिम् ॥ कृष्णभुक्तस्तनक्षीराः किमु गावो नुमातरः ॥ ३८ ॥ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलम् ॥ भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥ ॥ ३९ ॥ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम् ॥ न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ॥ ४० ॥ कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः ॥ किमिदं कुत एवेति वदंतो व्रजमाययुः ॥ ४१ ॥ ते तत्र वर्णितं गोपैः पूतनागमनादिकम् ॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ॥४२॥ नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ॥ ४३ ॥

स्तदा तन्मातरोऽभवन्निति ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

यस्याः पूतनायाः । सा पूतना । जननीगतिं मातृयोग्यां गतिं अपिना तस्यास्तदयोग्यत्वं सूच्यते । नहि पापकृतां रक्षसां स्वर्गो लब्धु योग्य इति भावः । द्वयोरन्वयः ॥ ३६ ॥ कृष्णेन भुक्तं पीतं स्तनक्षीरं यासां तास्तथा स्तनपदेन गवादिपयोनिवृत्तिः । भगवतो निष्कारणकृपादत्तं पूतनासौभाग्यं पश्यतेत्याह—पद्भ्यामिति द्वाभ्याम् । भक्तहृदिस्थाभ्यामिति पूतना न भक्ता नाप्यभक्ता किं तु वैरिणीति । ब्रह्मरुद्रादिभिरपि वंद्याभ्यामिति । पूतनया तु पादौ न वंदितौ नाप्यवंदितौ किं तु मरणसमये स्वहृदयान्निष्कासयितुमशक्नुवत्या स्वपाणिभ्यां यथाबलं ताडितावेवेति भावः । स्वर्गं वैकुंठं "ब्रह्मादयो लोकपालाः स्वर्वासं मेभिकांक्षिणः" इतिवत् 'पूतनापि सकुला त्वामेव देवापित'इति ब्रह्मोक्तेश्च । तदपि जनन्याः यशोदायाः प्रकाशभेदेन गतिर्यत्र तमिति गोलोकमेव न तु जननीसंबंधिनीं गतिमिति ।'रक्तास्तन्मातरो यथा'इति पूर्वत्र'किमु गावो नु मातरः' इत्युत्तरत्र चोक्तेस्तन्मातॄणामन्यासामपि तत आधिक्यप्रतिपादनात् । 'लेभे गतिं धात्र्युचिताम्' इत्युद्धवोक्तेश्च जननीपदेनात्र धात्र्येव ग्राह्येति ॥ ३७ ॥ ३८ ॥ पुनर्द्वाभ्याम्—यासां गवां गोपीनाम् । देवकीयशोदा वसुदेवभार्या वा द्वयोर्देवकीनामवत्त्वात् । चतुर्वर्गांतत्वेपि कैवल्यस्य प्रेमपारवश्यात्कैवल्यादीत्युक्तं .महामुनिना । यद्वा—कैवल्यमादि प्रधानं यत्र ते कैवल्यादयस्ते च तेऽखिलास्तत्प्रदः । कैवल्यस्यादिकारणं धर्म स्ततोऽखिला अर्थकाममोक्षास्तत्प्रदः ॥ ३९ ॥ अविरतं सततम् । 'संततविरतानिशम्' इत्यमरः । सुतेक्षणं पुत्रदृष्टिम् । निरंतरं सुतदृष्ट्या भगवत्स्मृतेरज्ञानस्य नष्टत्वात्तत्कृतसंसारः कथं भवेदिति भावः । देववयाः सकाशादपि तासामाधिक्यं ध्वनितं देवकीपुत्रोपि तासां स्तनमपिबन्न तु तस्या इति न च तासां संसारध्वंसरूपं फलं दातव्यमिति वाच्यं संसारो हि देहगेहपतिपुत्राद्यासक्तिलक्षणस्तत्रासां देहसंबंधि स्तन्यामृतं कृष्णः पिबति । गेहे कृष्णः खेलति पतिः कृष्णस्य पिता पुत्रः स्वयं कृष्ण एवेति तदाद्यासक्तेः संसारत्वं न घटतेति । अज्ञानसंभव इति ज्ञानिनां ब्रह्मानुभव एव संसारित्वाभावकरः । ब्रह्मानुभवतोऽपि ब्रह्मतया भगवदनुभवः श्रेष्ठ इति ॥४०॥ कटधूमस्य शवधूमस्य "शवे श्रोणौ किलिंजे च गजगंडे भृंशे कटे" इति शाश्वतः । किमिदमिति । किमेतावानगुरुधूम इन्द्रपुरान्निस्सृत्य भूतलमपि भित्त्वा सुतलं प्रवेष्टुमुत्सहते किं वा बलिसद्मनो निर्गत्यामरावतीमधिरोहति । किं वा कुबेरपुराद्वरुणपुराद्वेति बहुधा संदिहानाः धन्यो वसुदेव इत्येवं वदतोऽहो विना विष्णुं कोद्य बालरक्षां कुर्यादिति च वदंत आययुः ॥ ४१ ॥ ते नंदादयः । तत्र व्रजे तन्निधनं पूतनामरणम् ॥ ४२ ॥ प्रोष्य प्रवासं कृत्वा ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतम् ॥ शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिम् ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे पूतनामोक्षनिरूपणं नाम षष्ठोऽध्यायः ॥ ६ ॥ राजोवाच ॥ येन येनावतारेण भगवान्हरिरीश्वरः ॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो ॥ ॥ १ ॥ यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः ॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् ॥ २ ॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम् ॥ मानुषं लोकमासाद्य तज्जातिमनुरुंधतः ॥ ३ ॥ श्रीशुक उवाच ॥ कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् ॥ वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती ॥ ४ ॥

एतदार्भकचरितम् । किं तत् । पूतनामोक्षमिति ॥ ४४ ॥ अत्तुं दैत्यकुलानीशः पूतनायाः शिशुच्छलात् ॥ स्तन्यापोशनतः प्राणैः प्राणाहुतिमकल्पयत् ॥ १ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां पूतनामोक्षो नाम षष्ठोऽध्यायः ॥ ६ ॥ उत्क्षिपञ्छकटं व्योम्नि तृणावर्तमधः क्षिपन् ॥ दर्शयन्विश्वमास्ये च कृष्णः क्रीडति सप्तमे ॥ १ ॥ कृष्णार्भकसुधासिंधुसंप्लवानंदनिर्भरः ॥ भूयस्तदेव संप्रष्टुं राजाऽन्यदभिनंदति ॥ २ ॥ येनयेनेति ॥ येनयेन मत्स्याद्यवतारेणापि यानियानि कर्माणि करोति तानि नः कर्णसुखावहानि मनःप्रीतिकराणि च भवंत्येव ॥ १ ॥ तथापि यच्छृण्वतः पुंसः पुरुषमात्रस्यारतिर्मनोग्लानिस्तन्मूलभूता विविधा तृष्णा चापगच्छति । तथा सत्त्वशुद्धिर्हरिभक्तिर्हरिदाससख्यानि च भवंति तदेव हारं हरेश्चरितं मनोहरं वा वद । मन्यसे चेत् अनुग्रहं यदि करोषीति ॥ २ ॥ अत्यौत्सुक्येन पुनर्विशिनष्टि । अथेति । अनुरुंधतोऽनुकुर्वतः ॥ ३ ॥ उत्थानं शिशोरंगपरि

अद्भुतमतीव बालेनातिविस्तृतदेहपातनस्य दुर्घटत्वादाश्चर्यकरम् ॥ ४४ ॥ इति । शिशुच्छलात् बालच्छद्मना ईशः दैत्यकुलान्यत्तुं भोक्तुमादौ स्तन्यापोशानतो राक्षस्या दुग्धरूपापोशानेन पूतनायाः प्राणैः पंचभिः प्राणाहुतिं पंचप्राणाहुतिमकल्पयदकरोदित्यर्थः । आपोशानप्राणहुतीर्विना भोजननिषेधात् । तदुक्तम् " आपोशानं विना भुंक्ते यो भुंक्ते दक्षिणामुखः । प्राणहुत्या विना चैव स भुंक्ते केवलं मलम् ॥ " इति स्मृतेः । पूतनावधे श्रुतिः—" हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने शन्नो गोभ्यः पुरुषेभ्यश्चास्तु मानो हिंसीदिह देवाः कपोतः " इति । अर्थस्तु—हेतिरायुधवद्वधकारिणी पक्षिणी पूतना बकीरूपा अस्मान् व्रजस्थान् न दभाति नाभिभवति प्रत्युताग्निधाने जाठराग्नेर्धाने निमित्ते शिशोर्जाठरमग्निं स्तनदानेन तर्पयति । आष्ट्र्याम् 'अस गतिदीप्त्यादानेषु' आसयति परलोकं गमयति मृत्युना ग्राहयति वा देहं दीपयतीति वा आष्ट्री कृष्णतनुस्तस्यां पदं स्थानं कृणुते कृष्णं पाययितुं स्वमृत्युरूपां तां तनुं स्पृशति स्मेत्यर्थः ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे षष्ठोध्यायः ॥ ६ ॥ उत्क्षिपन्नूर्द्धं क्षिपन् (१) । कृष्णार्भक एव सुधासिंधुरमृताब्धिस्तत्र संप्लवः स्नानं तेनानंदनिर्भरमानंदाधिक्यं यस्य स तथा । तदेव कृष्णार्भकमेव । अन्यान्यावतारचारितमभिनंदति श्लाघते (२) । कर्णरस्यानि श्रोत्रसुखावहानि । क्वचित्कर्णरम्याणीति पाठस्तस्याप्ययमेवार्थः ॥ १ ॥ तथापि कर्णमनोरम्यत्वेपि । यच्चरितं शृण्वतस्तदेवेति हरचरितभ्रांतिवारणाय पक्षांतरं मनोहरम् । स्वेति । मनोग्लानिश्चित्तवैकल्यम् । यद्वाऽरतिर्वासुदेवप्रीतिर्भवति । सत्त्वमंतःकरणम् । श्लेषेण हारं हारमिव हृदये धार्यम् । यद्यपि भगवच्चरितमात्रस्यारत्यादिनिवृत्त्या प्रेमांतवस्तुप्रापणे सामर्थ्यमस्ति तथापि श्रीकृष्णबाल्यादिचरितमचिरेणैव तत्तत्प्रापयतीति मन्यसे चेत् यदि तवैतत्संमतं स्यादिति भावः ॥ २ ॥ अत्यौत्सुक्येनात्युत्कंठया । तोकेन बालेन । आचरितं कृतम् । तज्जातिं गोपजातिम् ॥ ३ ॥ मंत्रान्ब्रुवन्तीति मंत्रवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षमशीशयच्छनैः ॥ ५ ॥ औत्थानिकौत्सुक्यमना मनस्विनी समागतान्पूजयती व्रजौकसः ॥ नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत् ॥ ६ ॥ अधःशयानस्य शिशोरनोऽल्पकप्रवालमृद्वंघ्रिहतं व्यवर्तत ॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् ॥७॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ॥ नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ॥ ८ ॥ (इति ब्रुवंतोऽतिविवादमोहिता जनाः समंतात्परिवव्रुरार्तवत्) ॥ ऊचुरव्यवसितमतीन्गोपान्गोपींश्च बालकाः ॥ रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥९॥ न ते श्रद्दधिरे गोपा बालभाषितमित्युत अप्रमेयं बलं तस्य बालकस्य न ते विदुः ॥ १० ॥ रुदंतं सुतमादाय यशोदा ग्रहशंकिता ॥ कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥ ११ ॥

वर्तनं तत्र करणीये कौतुकाप्लवे उत्सवाभिषेके तथा तस्मिन्नेव दिने जन्मर्क्षस्यापि योगेऽतिमहोत्सवे समवेतयोषितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः शोभितमभिषेचनं सती यशोदा चकार ॥ ४ ॥ अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगलम् । संजातनिद्रे अक्षिणी यस्य तमशीशयच्छायितवती । शकटस्याधस्तात्प्रेंखे ॥ ५ ॥ उदक्षिपदूर्ध्वं चालितवान् ॥६॥ तदधः शयानस्य शिशोरल्पकश्चासौ प्रवालवन्मृदुश्च योंघ्रिस्तेन हतमनः शकटं तदाकारोऽसुरः व्यवर्तत विपरीतमपतत् । कथम् । विध्वस्तानि नानारसवंति कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि भाजनानि यथा भवंति तथा । चक्रे च अक्षश्च चक्राक्षाः व्यत्यस्ताश्चक्राक्षा यस्मिन् विभिन्नः कूबरो युगंधरो यस्य तच्च तच्च यथा भवति तथा व्यवर्ततेति ॥ ७ ॥ अद्भुतदर्शनेनाकुला बभूवुः । तदेवाह । कथमिति । विपर्यगाद्विपरीतमपतदिति ॥ ८ ॥ अव्यवसितमतीननिश्चितमतीन्संशयारूढानित्यर्थः ॥ ९ ॥ न श्रद्दधिरे विश्वासं न जग्मुः । उत अपि । बालस्यैतन्न संभवति एते च बालाः किं जानंतीति ॥ १० ॥ रक्षोघ्नैः सूक्तैः कृत्वा ॥ ११ ॥

चकाः । "ब्रुवो वचिः" । द्विजेषु मंत्रवाचका द्विजमंत्रवाचकाः । पुनर्वादित्रादिभिर्द्वंद्वः ॥ ४ ॥ कृतस्वस्त्ययनं कृतमांगल्यवचनम् । शकटस्याधस्तात्प्रेंखे इत्ययमर्थः स्वामिचरणैरक्षरैर्न गृहीतः किन्तु "कथं स्वयं वै शकटं व्यपर्यगात्" इत्युक्तेरिति ज्ञेयम् । शनैरिति । निद्राभंगशंकया क्रोडे निस्पंदं धृत्वैव स्वयमपि शायित्वाऽशीशयत् । प्रेंखे आंदोलनयंत्रे ॥ ५ ॥ औत्थानिके औत्सुक्यं मनो यस्याः सा तथा ॥ ६ ॥ तदधः शकटाधोदेशे । कुप्यम् । 'ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरः । ताभ्यां हेमरूप्याभ्याम् । यद्वा--द्वीपांतरीयमृद्रचितानि पात्राणि कुप्यानि । अक्षश्चक्रप्रोतो लोहादिरचितो दंडः । 'अनः शयानस्य' इति पाठं तु विजयध्वजो व्याचख्यौ । क्वचित्तु 'शिशोरनोल्पके' इति पाठः । बहुषु पुस्तकेषु 'शिशोरथाल्पके' इति पाठस्तत्रान इति शेषः । शकटं व्यपर्यगादिति वक्ष्यमाणत्वाद्वा ज्ञेयम् । 'शकटासुरभंजनः' इति ब्रह्मांडोक्तेः शकटस्यासुराविष्टत्वेन भूप्रविष्टचक्रत्वमलक्ष्य तं पादाग्रेणाहन् अंतर्द्धाने नाविष्टमंतर्द्धानेनैवाहन् बाल्यलीलायामपि निजैश्वर्यदर्शनाच्छ्रीकृष्णमहिमाऽद्भुततम एव तदुक्तं विष्णुधर्मेऽर्जुनेन" तालोच्छ्रिताग्रगुरुभारसारमायामविस्तारवदद्य जातः । पादाग्रविक्षेपविभिन्नभांडः चिक्षेप कोन्यः शकटं यथा त्वम् ॥" इति ॥ ७ ॥ अद्भुतदर्शनाकुला आश्चर्यदर्शनेन त्रस्ताः । तदेवाद्भुतमेत्र । इतोऽग्रेर्द्धश्लोकोऽधिकोस्ति बहुषु पुस्तकेष्वनुपलंभादिति ॥ ८ ॥ अव्यवसितमतीन् अनिश्चितबुद्धीन् । अनेन शकटाधः स्थप्रेंखस्थेन ॥ ९ ॥ एतच्छकटपातनम् । अप्रमेयं प्रमातुमशक्यमियदिति ज्ञातुमशक्यम् । तस्य कृष्णस्य । ते गोपाः ॥ १० ॥ ग्रहशंकिता केनचिद्ग्रहेण रक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदम् ॥ विप्रा हुत्वाऽर्चयांचक्रुर्दध्यक्षतकुशांबुभिः ॥ १२ ॥ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः ॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥ १३ ॥ इति बालकमादाय सामर्ग्यजुरुपाकृतैः ॥ जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥१४॥ वाचयित्वा स्वस्त्ययनं नंदगोपः समाहितः ॥ हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणम् ॥ १५ ॥ गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः ॥ आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुंजत ॥ १६ ॥ विप्रा मंत्रविदो युक्तास्तैर्याः प्रोक्तास्तथाऽऽशिषः ॥ ता निष्फला भविष्यंति न कदाचिदपि स्फुटम् ॥ १७ ॥ एकदाऽऽरोहमारूढं लालयंती सुतं सती ॥ गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ॥ १८ ॥

भगवत्प्रभावानभिज्ञविप्रचेष्टितं विडंबयन्नाह पूर्ववदित्यादिना । बलिभिः शक्तैः। यद्वा अष्टदिक्षु बलिभिः सहितं सपरिकरं यथा पूर्वं स्थापितं विप्राः दध्यादिभिरर्चयामासुः । हुत्वा ग्रहादिहोमं विधाय ॥ १२ ॥ असूया गुणेषु दोषाविष्करणम् । ईर्ष्या अक्षांतिः । तेषामाशिषः कृतास्तैः प्रयुक्ताः ॥ १३ ॥ इत्येवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैरभिमंत्रितैः । पवित्रा औषधयो येषु जलेषु तैः कृत्वा द्विजोत्तमैः कर्तृभिरभिषिच्याभिषेकं कारयित्वा ॥ १४ ॥ हुत्वा हावयित्वा ॥ १५ ॥ गावो गाश्च प्रादात् । अन्वयुञ्जत आशिषो युयुजुः ॥ १६ ॥ तास्तथैव बभूवुरित्यर्थः ॥ १७ ॥ उत्क्षिप्य मृदुपादेन शकटं व्योम्नि लीलया ॥ तृणावर्तं पदाऽऽपीड्य भुव्यपातयदर्भकः ॥

आदिनेदं पातितमिति शंकाकुलाः । रक्षोघ्नैः " कृणुष्वपाज--" इत्यादिमंत्रैः " रक्षोहणंवलगहनम् " इत्यादिभिश्च ॥ ११ ॥ बहवस्तु निर्बला अपि महत् कार्यं कुर्वंति 'वर्त्रटतृणहस्तिबंधनन्यायेन' पुनर्बलिभिरिति बहुत्वस्य चमत्कृत्यनाधायकत्वादर्थांतरमाह--यद्वेति ॥ १२ ॥ अनृतमसत्यभाषणम् । दंभो लोकवंचनार्थं मिथ्यानुष्ठानम् । हिंसा प्राणवियोगानुकूलव्यापारः । मानमभिमतिः ॥ १३ ॥ उपाकृतैः संस्कृतैः । ओषधयः विष्णुक्रांतादिबीजानि । प्रादादिति द्वयोः संबंधः ॥ १४ ॥ महागुणमनेकरसवत् ॥ १५ ॥ सर्वगुणोपेताः अल्पाशनातिमिष्टाधिकदुग्धदानसमीपागतताताडनदोहनानभिज्ञदोहप्रदानादिरूपबहुविधगुणयुक्ताः गाः । अभ्युदयः समृद्धिः कल्याणमिति यावत् ॥ १६ ॥ मंत्रविदोऽधीतवेदाः । युक्ताः संयताः । ता आशिषः । यथा प्रोक्तास्तथेत्यर्थः । अथ शकटपातने श्रुतिः--"पृथु रथो दक्षिणाया अयोजितं देवासो अमृतासो आस्थुः कृष्णादुदस्थादर्या विहायाश्चिकित्संती मानुषाय क्षयाय " इति । अस्या अर्थः--पृथुर्महान् । रथः शकटं दक्षिणाया दिशः संबंधी मृत्युकर इत्यर्थः । अयोजि योजितः । शत्रुभिरित्यर्थाल्लभ्यते तमेनं रथं देवासो देवाः । अमृतासोऽमृताः । आसमंतात् अस्थुः परिवार्य स्थितवंतः । एतास्मिन्नंतरे स रथः कृष्णात्कृष्णं प्राप्य तत्प्रेरणेन उदस्थात् उत्थितः । विहायाः आकाशाश्रितः विशेषेण हयते गच्छतीति वा यंत्रोत्सृष्टगोलकवदाकाशमार्गेणोत्थाय पतितः सन्नष्ट इत्यर्थः । ततश्च अर्या ईश्वरी स्वामिनी माता तत्रत्यप्रजा वा चिकित्संती संशयवती मानुषाय मानुषस्य क्षयाय नाशाय । एतेन पतता रथेनालं बालकः कथं न नाशित इत्यत्र कारणविशेषमपश्यंती माता संदिहानैवातिष्ठन्न त्वीश्वरकृत्यमेतदित्यवेदीदित्यर्थः ॥ १७ ॥ अर्भको नंदबालः (१) । गिरिकूटवदद्रिश्रृंगवत् । " कूटोऽस्त्री निश्चले राशौ लोहमुद्गरदंभयोः । मायाद्रिश्रृंगयोस्तुच्छे सीरावय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूमौ निधाय तं गोपी विस्मिता भारपीडिता ॥ महापुरुषमादध्यौ जगतामास कर्मसु ॥ १९ ॥ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रणोदितः ॥ चक्रवातस्वरूपेण जहारासीनमर्भकम् ॥ २० ॥ गोकुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ॥ ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः ॥ २१ ॥ मुहूर्त्तमभवद्गोष्ठं रजसा तमसाऽऽवृतम् ॥ सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः ॥ २२ ॥ नापश्यत्कश्चनात्मानं परं चापि विमोहितः ॥ तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः ॥ २३ ॥ इति खरपवनचक्रपांसुवर्षे सुतपदवीमबला विलक्ष्य माता ॥ अतिकरुणमनुस्मरंत्यशोचद्भुवि पतिता मृतवत्सका यथा गौः ॥ २४ ॥ रुदितमनु निशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्य नंदसूनुं पवन उपारतपांसुवर्षवेगे ॥ २५ ॥ तृणावर्तः शांतरयो वात्यारूपधरो हरन् ॥ कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत् ॥ २६ ॥ तमश्मानं मन्यमान आत्मनो गुरुमत्तया ॥ गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकम् ॥ २७ ॥

आरोहमुत्संगम् ॥ १८ ॥ तृणावर्तात्स्वमृत्युपरिहाराय कृष्णेनैवात्मन उत्संगादुत्ताराय कृतं भारमजानत्युत्पातशंकया महापुरुषमादध्यौ । श्रीकृष्णोदरवर्तिनां जगतां भारेण पीडिता विस्मिता च सती । यद्वा जगतां मध्ये कर्मसु आस बभूव । न तु जगदुदरं तं वेदेत्यर्थः ॥ १९ ॥ २० ॥ ईरयन्निनादयन्नित्यर्थः ॥ २१ ॥ यतो यत्र न्यस्तवती तस्मिन्स्थाने नापश्यत् ॥ २२ ॥ २३ ॥ खरपवनचक्रात्पांसुवर्षे सति ॥ २४ ॥ उपारतः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र तस्या रुदितमनुनिशम्य गोप्यो रुरुदुः ॥ २५ ॥ वात्या चक्रवातस्तद्रूपधरः कृष्णं हरन् शांतरयः कथंचिन्नभोगतस्ततः परं गंतुं नाशक्नोदित्यर्थः ॥ २६ ॥ गुरुमत्तयाऽतिगौरवेण तं तथा अश्मा

वयंत्रयोः । अनृते च '' इति मेदिनी । गारिमाणं गुरुत्वम् ॥ १८ ॥ महापुरुषं भगवंतम् । योगमायया मोहिता तदंतस्थविश्वमजानंती । कर्मसु गृहकृत्येष्वास । जगतां भारेणेत्युक्तेः सर्वलोकभारस्य यशोदाकर्तृकधारणासंभवं मत्वार्थांतरमाह—जगतां संसारिणां मध्ये कर्मसु संसारप्रदेषु यज्ञादिष्वेवास न तु ज्ञानमार्ग इति भावः । इत्यर्थ इति । जगदुदरभगवद्वेदने तु स्वप्नेऽपि जगत्कर्माणि प्रीतिर्नोदयत इति तात्पर्य्यम् ॥ १९ ॥ चक्रवातश्चक्राकार उद्धृतबहुधूलिर्वायुस्तेन स्वरूपेण जहार उत्थाप्य जगाम ॥ २० ॥ मुष्णन् हरन् । प्रदिशो विदिश आग्नेय्यादयः । दिशः प्राच्यादयः । ईरयन् सशब्दाः कुर्वन्नित्यर्थः ॥ २१ ॥ न्यस्तवती स्थापितवती ॥ २२ ॥ शर्कराभिः अतिसूक्ष्मपाषाणखंडैः ॥ २३ ॥ खरपवनश्चंडवायुस्तस्य चक्रात् । यद्वा—खरपवने चक्रपांसवो मंडलीकृतरजांसि तेषां वर्षे समूहे । सततमनुस्मरंती निरंतरं चिंतयंती ॥ २४ ॥ तत्र नंदगृहे । तस्या यशोदायाः ॥ २५ ॥ ततो नभोगमनात्परम् । उपरिष्टाद्गंतुं कंससमीपं वा इत्यर्थ इति भावः ॥ २६ ॥ अश्मशब्दो लक्षणया तद्वत्परोऽत्रात आह—अश्मवंतामिति ॥ विश्वनाथस्तु—'अश्मन्तम्' इति पाठं मत्वा अश्मन्तम् अश्मवन्तम् इति व्याचख्यौ तत्र वर्णलोपश्छान्दसः । आत्मनः स्वस्य । तं कृष्णम् । इत्यर्थ इति । न ह्यतिगुरुमद्गृहीतोऽजगरग्रस्तमंडूकवदात्मानं मोक्तुं प्रभवतीति भावः ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ॥ अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे ॥ २८ ॥ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालम् ॥ पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदंत्यो ददृशुः समेताः ॥ २९ ॥ आदाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानम् ॥ तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तम् ॥ गोप्यश्च गोपाः किल नंदमुख्या लब्ध्वा पुनः प्रापुरतीव मोदम् ॥ ३० ॥ अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः ॥ हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ॥ ३१ ॥ किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुत भूतसौहृदम् ॥ यत्संपरेतः पुनरेव बालको दिष्ट्या स्वबंधून्प्रणयन्नुपस्थितः ॥ ३२ ॥ दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने ॥ वसुदेववचो भूयो मानयामास विस्मितः ॥३३॥ एकदार्भकमादाय स्वांकमारोप्य भामिनी ॥ प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥३४॥

नमश्मवंतं पर्वतप्रायं मन्यमानस्तेनैवात्मनो गले गृहीतो धृतस्तं त्यक्तुमिच्छन्नपि नाशक्नोदित्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ तस्योरसि लंबमानं कृष्णमादाय मात्रे प्रतिहृत्य समर्प्य विस्मिताश्च बभूवुरिति । विहायसा गगनमार्गेण पुरुषादेन दैत्येन नीतं तथापि मृत्युमुखात्प्रमुक्तं पुनर्लब्ध्वा मोदं प्रापुरिति ॥ ३० ॥ परस्परं हर्षकथामाहुः । अहो बतेति । निवृत्तिं गमितो मृत्युं प्रापितोपि । कोऽत्र विस्मयो युज्यत एवैतदिति तेष्वेव केचिदाहुः । हिंस्र इति ॥ ३१ ॥ नोऽस्माभिश्चीर्णं कृतम् । पूर्तं वापीकूपादिनिर्माणम् । इष्टं पंचयज्ञाग्निहोत्रादि । दत्तं दानम् । यद्यस्मात्संपरेतः । प्रणयन्हर्षयन् ॥ ३२ ॥ ३३ ॥ ३४ ॥

निर्गतलोचनो बहिरागतनेत्रमांसपिंडः । अव्यक्तरावः वचनावृत्तिवर्जितः ॥ २८ ॥ पुरं त्रिपुरसंज्ञं मयेन रचितम् ॥ २९ ॥ मृत्युमुखात्प्रमुक्तमित्यनेन स्वस्याधोक्षजत्वं प्रकटीकृतम् । " अधो न क्षीयते यस्माज्जातु तस्मादधोक्षजः " इति भारतात् । लब्धाशिषः श्रीकृष्णप्राप्त्याऽवाप्ताभिलषिताः ॥ ३० ॥ कोऽत्र विस्मयः किमत्राश्चर्यम् । युज्यत एव युक्तमेव । एतत् बालागमनं रक्षोमरणं च । तेष्वेव विस्मितगोपेष्वेव । केचिद्विज्ञा इत्यर्थः । हिंस्रो हिंसाशीलः । समत्वेन समदृष्ट्या ' द्वितीयाद्वै भयं भवति ' इति श्रुतेः ॥ ३१ ॥ " अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥ शरणागतसंत्राणं भूतानां चाप्यहिंसनम् । भूतसौहृदमित्युक्तं तत्सर्वत्र सुखावहम् ॥ बहिर्वेदि च यद्दानं तद्दत्तमभिधीयते" ॥ ३२ ॥ वसुदेववचः ' संत्युत्पाताश्च गोकुले ' इत्येवंरूपं मानयामास । अहो वसुदेवः कश्चिद्योगिराज एवातीतानागतवित्त्वात् तृणावर्त्तवधमाह श्रुतिः—" साकं यक्ष्म प्रपत चाषेण किकिदीविना साकं वा तस्य ध्राज्या साकं नश्य निहाकया " इति । अर्थस्तु–खेचरत्वेन यज्ञं पूज्यमिवात्मानं मनुते मिमीते तोलयति वा यक्ष्म हे यक्ष्म राक्षस तद्वत्पीडकेति वा । चाषेण तद्वर्णेन हरिणा तव हंत्रा साकं प्रपत भूमाविति शेषः किकिनाज्ञः सन् दीव्यतीति किकिदीविः । औणादिकः किप्रत्ययः उपधादीर्घश्च किधातोर्बाहुलकात्किप्रत्यये लिङ्भावे च चुत्वाभावे किकिर्विद्वान् तेन वा । तस्य वायोर्ध्राज्या गत्या यया धूलिवात्यारूपया एनमुपरि नीतवानसि तया साकं नश्यनाशं प्राप्नुहि । निहाकया गत्या च साकं वा साहित्यं पतन एव न तु नाशेऽतस्तेन सह पतितः सन्स्वयमेक एव नाशं प्राप्नुहीत्यर्थः । एवं देवैरुक्तस्तृणावर्तः पपात ममार चेत्यर्थः ॥ ३३ ॥ भामिनी तेजस्विनी । ' भामः क्रोधे रवौ दीप्तौ भगिनीदयिते प्रिये ' इति धरणिः ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पीतप्रायस्य जननी सा तस्य रुचिरस्मितम् ॥ मुखं लालयती राजञ्जृंभतो ददृशे इदम् ॥ ३५ ॥ खं रोदसी ज्योतिरनीकमाशाः सूर्यें
दुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ॥ ३६ ॥ सा वीक्ष्य विश्वं सहसा राजन्संजातवेपथुः ॥ संमील्य
मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे शकटतृणावर्तमोक्षो नाम सप्तमोऽध्यायः ॥ ७ ॥
श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन्यदूनां सुमहातपाः ॥ व्रजं जगाम नंदस्य वसुदेवप्रचोदितः ॥ १ ॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतां
जलिः ॥ आनर्चाधोक्षजधिया प्रणिपातपुरःसरम् ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिम् ॥ नंदयित्वाऽब्रवीद्ब्रह्मन्पूर्णस्य करवाम
किम् ॥ ३ ॥ महद्विचलनं नृणां गृहिणां दीनचेतसाम् ॥ निःश्रेयसाय भगवन्कल्पते नान्यथा क्वचित् ॥ ४ ॥ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञान
मतींद्रियम् ॥ प्रणीतं भवता येन पुमान्वेद परावरम् ॥ ५ ॥

तृणावर्तागमे दृष्टगौरवाशंकिनीं प्रसूम् ॥ बोधयन्दर्शयामास जृंभमाणो मुखे जगत् ॥ १ ॥ पीतप्रायस्य पीतः प्रायः स्तनो येन तस्य ॥ ३५ ॥ नगा
न्गिरींस्तेषां दुहितॄर्नदीः ॥ ३६ ॥ ३७ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे नामकर्मास्य बालक्री
डाकुतूहले ॥ मृद्भक्षणाभियोगे च विश्वरूपं निरूप्यते ॥ १ ॥ विश्वरूपादिबालस्य निशाम्याऽऽशंकिनः पितुः ॥ नामकृद्गर्गवाक्येन निजं तत्त्वमसूसुचत् ॥
॥ २ ॥ १ ॥ २ ॥ ३ ॥ पूर्णश्चेत्कथं धनिनां गृहमागतस्तत्राह । महद्विचलनमिति । महतां स्वाश्रमादन्यत्र विचलनं न स्वार्थं किन्तु गृहिणां मंगलाय ।
ननु तर्हि त एव महद्दर्शनार्थं किमिति नागच्छंति तत्राह । दीनचेतसां कृपणानां क्षणमपि गृहं त्यक्तुमशक्नुवतामित्यर्थः ॥ ४ ॥ त्वया बालयोर्नामकरणादि

प्रसूं मातरं यशोदां बोधयन्नीश्वरत्वं ज्ञापयन् । पीतप्रायः पीत इव स्तनो येन कृष्णेन तस्य "प्रायः सादृश्यबाहुल्यप्राणांतानशनेषु च" इति शाश्वतः । स्तनवदस्य लोपस्त्वार्षः । जृंभतो मुखं प्रसारयतः । इदं दृश्यं विश्वम्
॥३५॥ रोदसी द्यावाभूमी । ज्योतिषां ताराणामनीकं गणम् । श्वसनो वायुः ॥३६॥ सा यशोदा । सहसेत्याकस्मिके मृग एणस्तच्छावस्तद्बालस्तत्तुल्यनेत्रा संमील्येति । विष्णोर्ध्यानार्थं भगवन्नारायण रक्षरक्ष मत्सुतमस्मादु
त्पातादिति वित्रस्तदृष्टित्वान्मृगशावाक्षीति भावः ॥ ३७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे सप्तमोऽध्यायः ॥ ७ ॥ बालक्रीडायाः कुतूहले कौतूके मृदशनसंबंधे च (१) । आशंकिनः ।
शंकावतः । पितुः नंदस्य । निजं तत्त्वं स्वमैश्वर्यम् (२) । सुमहातपाः सर्वतपस्विमुख्यः ॥ १ ॥ अधोक्षजधिया " अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि " इत्युक्तेः ॥ २ ॥ सूनृतया यथार्थमधु
रया । पूर्णस्य कृतकृत्यस्य । नंदयित्वा श्लाघयित्वा ॥ ३ ॥ पूर्णत्वमाशंक्य समाधत्ते महदित्यादि । निश्श्रेयसत्वमाशंकते—नन्विति । यदि महद्विचलनं गृहिमंगलं तर्हि तदा । त एव गृहिण एव । इत्यर्थ इति । इदं
कृतमिदं करिष्य इत्येवमिति कृत्यासक्तत्वात्तेषां नहि महद्दर्शनावकाश इति भावः ॥४॥ बालनामकरणाद्यर्थं गर्गं श्लाघते नंद इत्याह—त्वयेति । गर्गेण इत्यर्थ इति । अयनशब्देन शिशुमारादि न ग्राह्यं किन्तु शास्त्रमेवेति तात्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान्कर्तुमर्हसि ॥ बालयोरनयोर्नॄणां जन्मना ब्राह्मणो गुरुः ॥ ६ ॥ गर्ग उवाच ॥ यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा ॥ सुतं मया संस्कृतं ते मन्यते देवकीसुतम् ॥ ७ ॥ कंसः पापमतिः सख्यं तव चानकदुंदुभेः ॥ देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥ ८ ॥ इति संचिंतयञ्छ्रुत्वा देवक्या दारिकावचः ॥ अपि हंताऽऽगताशंक स्तर्हि तन्नोऽनयो भवेत् ॥ ९ ॥ नंद उवाच ॥ अलक्षितोऽस्मिन्रहसि मामकैरपि गोव्रजे ॥ कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकम् ॥ १० ॥

करणीयमिति वक्तुं तस्य ज्ञानातिशयमाह । ज्योतिषामयनमिति ॥ यदतींद्रियज्ञानसाधनं ज्योतिषामयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः । तत्साक्षाद्भवता प्रणीतं येनान्योऽपि पुमान्परावरं परं कारणं पूर्वजन्मकृतं कर्म अवरं कार्यं तस्मिन् जन्मनि भाविफलं तद्वेद । उक्तं च जातके । "यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ॥ व्यंजयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥" इति ॥ ५ ॥ विवक्षितमाह । त्वं हीति । दैवज्ञो मंत्रविच्च त्वमतो नामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः । नन्वेतद्गुरुणा करणीयमिति चेत्तत्राह । नृणामिति ॥ ६ ॥ अत्युत्साहिनं नंदं प्रति गुप्तमेतत्कार्यमित्यभिप्रायेण प्रत्याचक्षाण इवाह । यदूनामिति । भवतु तथापि त्वमत्रागत इति को विद्यादिति चेदत आह । ख्यातश्चेति । ततः किमत आह । सुतमिति । कंसो मन्यते मन्येत कल्पयेदित्यर्थः ॥ ७ ॥ ननु यदुकुमार इति कथंचिज्जानातु । तत्र वसुदेवस्य सुतस्तत्रापि देवक्यां जात इति कुतो जानीयात्तत्राह । पापमतिरित्यादि ॥ ८ ॥ 'किं मया हतया मंद' इत्यादि देवकीकन्यावचः श्रुत्वा "देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति" इति नित्यं संचिंतयन्सामान्येन क्वचिदस्तीति ज्ञात्वा युवयोश्च सख्यं संचिंतयंस्त्वद्गृहे भवेदिति संभाव्य मत्संस्कारलिंगेन चागताशंकः आगता आशंका यस्य सः । अपि यदि हंता हनिष्यति तर्हि तत्तदा नो महाननयः स्यादिति ॥ ९ ॥ द्विजातिसंस्कारं द्विजाती

र्यम् । येन ज्योतिःशास्त्रेण अन्योऽर्वाचीनोपि । जातके बृहज्जातके । उपचितं संपादितम् । अन्यजन्मन्येतत्कालिकजन्मप्राग्जन्मनि । व्यंजयति प्रकाशयति । ग्रहाणां स्थानयोगदृष्ट्यवस्थादिवशादिति । एतज्ज्योतिः प्रकाशकं शास्त्रमित्यर्थः ॥ ५ ॥ इत्यर्थ इति । उभयविद एव संस्कारकरणेऽधिकारो न त्वेकैकविद इति भावः । पुनराशंकते--नन्विति । नृणामिति जन्मना ब्राह्मण इत्युक्तेः " यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकम् । यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ " इत्यपास्तं तथा च जातितो यो ब्राह्मणस्तपोविद्यायुतः स एव गुरुः कार्यो न तु क्षत्त्रियादिः । " संस्कर्त्ता चोपदेष्टा च विप्र एव न चेतरः । सर्वैर्विप्रगुणैर्युक्त इत्याह भगवान्मनुः ॥ " इति । किञ्च " वर्णानामाश्रमाणां च मुख्योऽभूद्ब्राह्मणो गुरुः । अन्योन्यगुरवो विप्रा न ह्येषामपरो गुरुः ॥ " इति वरतंतूक्तेः ॥ ६ ॥ एतत्संस्कारादि प्रत्याचक्षाण इव निवर्त्तयन्निव । नंदो वक्ति भवत्विति । ख्यातः प्रसिद्धः । ततः ख्यातेः । इत्यर्थ इति । मन्यतेः संभावनार्थत्वमत्रेति तात्पर्यम् ॥ ७ ॥ कंस इति । 'कसि—हिंसायाम्' इति धातुः हिंसाशीलस्तादृशस्य पापमतित्वं सहजमेव पापिनां मनस्यनंतशंकोदयस्य संभवादिति भावः । द्वयोरन्वयः ॥ ८ ॥ ९ ॥ अस्मिन् गोव्रजे गोकुले तत्रापि रहसि मामकैर्मदीयसंबंधिभृत्यादिभिरप्यलक्षितोऽज्ञातः ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ॥ चकार नामकरणं गूढो रहसि बालयोः ॥ ११ ॥ गर्ग उवाच ॥ अयं हि रोहिणी पुत्रो रमयन्सुहृदो गुणैः ॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः ॥ यदूनामपृथग्भावात्संकर्षणमुशंत्युत ॥ १२ ॥ आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १३ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ १४ ॥

नामवश्यं कर्तव्यं संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वकं कुर्विति ॥ १० ॥ ११ ॥ यदूनामपृथग्भावात्कुतश्चिद्धेतोर्विप्रतिपद्यमानाना यदूनामपृथग्भावात् । भावो भावनं तस्मात् । अन्योन्यशिक्षया सर्वैकमत्यकरणादित्यर्थः । सम्यक्कर्षत्येकीकरोतीति संकर्षणमप्युशंति इच्छन्ति वक्ष्यंतीत्यर्थः । गर्भसंकर्षणं तु न प्रकाशयति स्म ॥ १२॥ अस्य तव पुत्रस्य । अतः कृष्ण इत्येकं नाम भविष्यति ॥ १३ ॥ प्रागयमिति । तवायमात्मजः प्रागिति सामान्योक्त्या ऋषिरयं जन्मांतरगतं नाम कथयतीति नंदो मन्यते स्म ।

तन्नामकरणं स्वचिकीर्षितमेव निजाभिलषितमेव ॥ ११ ॥ गुणैर्निजसौशील्यवात्सल्यादिभिः । रमयन्नानंदयन् । वस्तुतस्तु—"रमन्ते योगिनोनंते नित्यानंदे चिदात्मनि । इति रामपदेनासौ परं ब्रह्माभिधीयते ॥" इति । यद्वा—राति गृह्णाति जगत्कुक्षौ ददाति वा भक्ताभीष्टमिति राः 'रा—दानग्रहणयोः' अम्यते मुक्तैर्गम्यत इत्यमः । 'अम—गत्यादौ' राश्चासावमश्चेति रामो जगज्जन्मादिकर्ता मुक्तप्राप्यः परमात्मेत्यर्थः । अस्यापि " वृष्णिषु प्राप्य जन्मनी । रामकृष्णौ"इति भगवदवतारत्वात्परब्रह्मतैव । बलमधिकमस्येति मत्वर्थीयोच् । "भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने । संबंधेस्तिविवक्षायां भवंति मतुबादयः ॥ " इति भर्तृहरिवाक्यादत्र भूमार्थेऽच् । यद्वा—बलते संवृणोति सर्वेषां धृतिमिति बलः । यद्वा—रमयति लोकान्स्वस्वव्यापारे प्रवर्त्तयतीति रामः । सर्वेषु बलवत्स्वाधिकबलवत्त्वाद्वा बलः । "रामेति लोकरमणाद्बलं बलवदुच्छ्रयात्" इति वक्ष्यमाणत्वात् ॥ १२ ॥ विप्रतिपद्यमानानां संजातविरोधानामपृथग्भावात् भेदापाकरणात् । इत्यर्थ इति ॥ तात्पर्यं न त्वेकीकरणं बहूनां मर्दनं विनैकीभावासंभवादिति । किं च संकर्षति कालिंदीं हास्तिनपुरं वा गंगायां गगनगं बल्वलदैत्यं जरासंधादिसैन्यं वा प्रलये सर्वाः प्रजा वा हलाग्रेणाकर्षतीति संकर्षणः । तनूः शरीराणि । अनुयुगं युगेयुगे । किञ्च "कलिः शयानो भवति संजिहानस्तु द्वापरः । उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन् ॥ " इतिश्रुतेर्यो विद्यानिद्रायां शेतेऽतिमूढः स पुमान्कलिस्तदनुग्रहार्थमस्मिन्नीश्वरः कृष्णः कृष्णावताररूपी भवति किञ्चिच्छ्रेयोदर्शी अर्द्धप्रबुद्धो यः स द्वापरस्तं प्रति पीतवर्णः हिरण्यवन्मनोहरो भवति । स किञ्चिद्वृत्तयुन्मुखो भवतीत्यर्थः । यस्तु श्रेयोर्थं यतते स त्रेता तदनुग्रहार्थं रक्तोऽनुरक्तो मातृवद्भवति । यस्तु युधिष्ठिरादिवदत्यंत भक्तस्तं प्रति शुक्लः स्वीयं शुद्धमेव रूपं प्रकाशयतीति । यथाश्रुतव्याख्यानं तु सर्वेषु युगेषु सर्वेषां रूपाणां सत्त्वान्न युज्यत इति ॥ १३ ॥ मथुरायां कारागृहे इति गोपित्वोक्तं क्वचिदिति ऋषिरयं गर्गः । जन्मांतरगतमन्यावतारीयम् ; अत एव वसुदेवजातत्वादेव । वासुदेव इति । 'कमादमुं नारद इत्यबोधि सः' इतिवन्निपातेनोक्तत्वात्प्रथमा । अभिज्ञा वैयाकरणाः । वस्तुतस्तु—वसति सर्वभूतेष्वंतर्यामितया स्वविभूतिभिर्विश्वं वासयत्याच्छादयति वा वासुः दीव्यति क्रीडते विजिगीषते व्यवहरते द्योतते स्तूयते काम्यते गच्छति देवः वासुश्चासौ देवश्चेति वासुदेवः । "छादयामि बृहद्विश्वं भूत्या सूर्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः ॥ वसनात्सर्वभूतेषु वसुत्वाद्देवयोनितः । वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः ॥" इत्युद्योगपर्वणि । "सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहूनि संति नामानि रूपाणि च सुतस्य ते ॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः॥१५॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥ १६ ॥ पुरानेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥ १७ ॥ य एत स्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः ॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ १८ ॥ तस्मान्नंदाऽऽत्मजोऽयं ते नारायणसमो गुणैः ॥ श्रिया कीर्त्याऽनुभावेन गोपायस्व समाहितः ॥ १९ ॥

अत एनं वासुदेव इति संप्रचक्षत इति ॥ १४ ॥ गुणानुरूपाणि ईश्वरः सर्वज्ञ इत्यादीनि । कर्मानुरूपाणि गोपतिर्गोवर्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि नो वेद जना अपि नो विदुरिति ॥ १५ ॥ जातकफलमाह । एष इति । आधास्यदाधास्यति ॥ १६ ॥ अनेन रक्ष्यमाणाः समेधिताश्च दस्यून्विजिग्युरिति ॥१७॥१८॥१९॥

परिपठ्यते ॥" इति विष्णुपुराणे । वसंति देवा अत्रेति वासुः करणग्रामस्तं देवयति द्योतयतीति वा वासुदेवः । "वासुः स्यात्करणग्रामस्तेषु देवनिवासतः । तत्प्रकाशकरो देवो वासुदेव इति स्मृतः ॥" इति पुराणांतरात् "योंतः प्रविश्य मम वाचमिमां प्रसुप्तां संबोधयत्यखिलशक्तिधरः परात्मा । अन्यांश्च हस्तचरणश्रवणत्वगादींस्तस्मै नमो भगवते" इति ध्रुवोक्तेश्च ॥ १४ ॥ प्रथमादादिपदात् भक्तवत्सलदीनदयालुरित्यादयो ग्राह्याः । द्वितीयात् मुरारिमधुसूदनेत्यादयश्च ॥ १५ ॥ एष कृष्णः । गोपगोकुले नंदयतीति तथा । यदि यूयममुमचक्ष्यत तर्हि एष वश्श्रेय आधास्यत् "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति । आदधाते र्लृङ् । सर्वदुर्गाणि निखिलदुःखानि । अंजः सम्यक् ॥ १६ ॥ पुरा पृथ्ववतारे । अराजके राष्ट्रे समेधिता वर्द्धिताः । दस्यून् नास्तिकान् । वेनेन सर्वे स्वराज्यकाले वेदनिंदनान्नास्तिकाः कृतास्ते च दस्यवश्चौरा भवंत्येव धर्मचौर्यतः । तेषां चोरत्वमभियुक्तैरुक्तम् । " वेदे कांचनपत्तने परिलसद्वेदांतदुर्गो महान्मीमांसा परिखा विभाति परितः शाब्दं लसद्गोपुरम् । योगो यामिनिजागरूकनिचयः सांख्यं विवेकात्मको धर्मं चोर यितुं विशंति सुगता नैयायिकाः कुक्कुराः ॥" इति । पुरा जन्मांतरे । प्रकटार्थे साधवो देवा दस्यवो दैत्याः । अराजके इंद्रस्य पदच्युतौ इति संदर्भचक्रवर्तितोषिणीकाराः ॥ १७ ॥ एतस्मिन् तव पुत्रे विष्णुपक्षान्विष्णु सहायान् । "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति यादवः । परमपुण्यवति यद्वा—हे महाभागे इति यशोदासंबोधनम् 'सस्त्रीको धर्ममाचरेत्' इति न्यायात् । अरयो बाह्याः प्रतिपक्षजना आंतराः कामाद्याश्चेति तोषिण्याम् ॥ १८ ॥ यस्मादेतस्मिन्प्रीतिमतोऽरयो नाभिभवंति तस्मादेनं गोपाय स्वप्रीत्या रक्ष । अयं तवाग्रे स्थितस्तवात्मजो गुणादिभिर्नारायणेन समः । वस्तुतस्तु नारायणस्समो येन स नारायणसमः । साम्यत्वोक्त्या नारायणतोस्याधिक्यं सूचितं यथा चंद्रसमं मुखमित्युक्तेर्नहि मुखस्य चंद्रता भवति किन्तु चंद्रस्याधिक्यं मुखस्य न्यूनत्वमेव लक्ष्यते । 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्' इत्यस्यैव तुल्यत्वलक्षणात् । आह्लादा दिजनकत्वेन चंद्रसाम्यता न तु प्रकाशकत्वादिनापि । एवं नारायणस्यापि पालकत्वादिना नंदनंदनसाम्यं न तु सर्वथा तदंशत्वात् "नारायणोंगं नरभूजलायनात्" इति वक्ष्यमाणत्वात् । इह सर्वज्ञसर्वथा सत्यवादिश्रीगर्गेणात्मज इत्युक्तं तेन पूर्वोक्तं नंदगृहे सर्वेश्वरावतार इति न विस्मर्त्तव्यमित्याह—श्रीशुकदेव इति । आत्मनेपदमार्षम् । यद्वा—गोपानामये शुभावहविधौ स्वेनैव समाहितोयम् । यद्वा—गोपानामाये योगे स्वे क्षेमे च समाहितः नारायणसाम्येन तन्नामान्यस्य नामानि तथा ततो वैशिष्ट्येनान्यान्यपि भविष्यंतीति । अतः श्रीनंदेनैव गोकुले विख्यापितानि मुकुंदादिनामानि च श्रीगोपादयो वदंतीति ज्ञेयम् । नंदेति श्लेषेण यस्मान्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते ॥ नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम् ॥ २० ॥ कालेन व्रजताऽल्पेन गोकुले रामकेशवौ ॥ जानुभ्यां सहपाणिभ्यां रिंगमाणौ विजह्रतुः ॥ २१ ॥ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंति मात्रोः ॥ २२ ॥ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्याम् ॥ दत्त्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मितालपदशनं ययतुः प्रमोदम् ॥ २३ ॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः ॥ वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः ॥ २४ ॥ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुम् ॥ गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थाम् ॥ २५ ॥

इति चात्मानं प्रति समादिश्य । आत्मानं कृष्णं वा । गर्गे गते सति आशिषामाशीर्भिः ॥ २० ॥ बालक्रीडाचमत्कारैः कृष्णो रामेण संयुतः ॥ परमानंदमाधत्त व्रजे नंदयशोदयोः ॥ १ ॥ पूर्णत्वमेव दर्शयन्नाह । कालेनेति ॥ २१ ॥ अनुकृष्य पुनःपुनराकृष्य । सरीसृपंतावतिशयेन चलंतौ । कथम् । घोषाः कटिपादभूषणकिंकिण्यस्तेषां प्रघोषेण निनादेन रुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टं मनो ययोस्तौ । लोकमितस्ततो गच्छंतं जनमनुसृत्य त्रिचतुराणि पदान्यनुगम्य मुग्धवत्प्रभीतवन्मात्रोरंति समीपे उपेयतुरुपजग्मतुः ॥ २२ ॥ तदा च तन्मातरौ निजसुतौ दोर्भ्यामुपगृह्य प्रमोदं ययतुः । कथंभूते । घृणया कृपया स्नुवंत्यौ पयःपूर्णपयोधरे सत्यौ । पंकेनांगरागेण च रुचिरौ । कथंभूतं मुखं निरीक्ष्य । मुग्धं मंदं स्मितं यस्मिन् अल्पा दशनाश्च यस्मिंस्तच्च तच्च ॥ २३ ॥ यर्ह्यंगनानां दर्शनीया कुमारलीला ययोस्तथाभूतौ जातौ तदांतर्व्रजे व्रजस्य मध्ये तदबला व्रजांगनास्तौ प्रेक्षंत्यः प्रेक्षमाणा विस्मृतगृहकृत्या हसंत्यो जहृषुर्दृष्टा बभूवुः । कथंभूतौ । ताभ्यां प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ ॥ २४ ॥ अतिचलावतिचपलौ तौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्तुं यत्र यदा तज्ज

रायणसमस्तस्मात्त्वमधुनानंद आनन्दं कुर्वित्यर्थः ॥ १९ ॥ आत्मानं नंदम् । यद्वा—आत्मशब्दस्य बह्वर्थभ्रमवारणाय कृष्णं वेति । "आत्मा पुंसि स्वभावेऽपि प्रयुक्तमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपि ॥" इति मेदिनी ॥ २० ॥ चमत्कारैश्चमत्कृतिजनकैः कर्मभिः (१) पूर्णत्वमवतारित्वम् । रिंगमाणौ गच्छंतौ ॥ २१ ॥ तौ कृष्णबलदेवौ । मुग्धवदज्ञवत् । 'मुग्धः सुंदरमूढयोः' इति विश्वः । "आभीरपल्लींकिंकिण्योर्घोषो गोपालशब्दयोः" इति शाश्वतः ॥ २२ ॥ दशना दंताः ॥ २३ ॥ लक्षणया गृहशब्देन गृहकृत्यं बोध्यं तच्च मार्जनपेषणगोदोहनादिरूपम् ॥ २४ ॥ शृंगिणो गवादयः । दंष्ट्रिणः श्वादयः । असिः खड्ग । द्विजाः पक्षिणः शुकादयः । अनवस्थां बोधैकनिष्ठत्वदेकाकारतया समाधिविलयम् । पराकाष्ठेति । अतः परं गृहिणां न सुखम् । यद्बाललीलादर्शनेन मनस्याह्लाद इति ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले ॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा ॥ २६ ॥ ततस्तु भगवान्कृष्णो वयस्यैर्व्रजबालकैः ॥ सह रामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदम् ॥ २७ ॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम् ॥ शृण्वत्याः किल तन्मातुरिति होचुः समागताः ॥ २८ ॥ वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे स गृहकुपितो यात्युपक्रोश्य तोकान् ॥ २९ ॥ हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ॥ ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥ ३० ॥

नन्यौ न शेकाते तदालं मनसोऽनवस्थामापतुरिति गृहसौख्यस्य पराकाष्ठा दर्शिता ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ "कृष्णचापलचौर्याणि सहैवाखिलसद्मतः ॥ प्रजल्पंत्यः समागत्य गोप्यो गोप्यै मुदं ददुः ॥" असमयेऽदोहकाले । क्रोशे संजातहासः संजातो हासो यस्य सः । स्तेयं चौर्यार्जितं न तु दत्तं तत्रापि स्वादु नेतरत् दधि च पयश्चात्ति । किं च भोक्ष्यन्मर्कान्मर्कटान्प्रति विभज्य ददाति तेषां मध्ये तृप्तत्वेन कोऽपि नात्ति चेत्तर्हि भांडं भिनत्ति । क्वचिद्द्रव्यस्यालाभे सति स गृहाय धक्ष्यामीति कुपितो याति । यद्वा सगृहा गृहिणस्तेभ्यः कुपितस्तेषां तोकान्बालान्पर्यंकादिषु सुप्तानुपक्रोश्य रोदयित्वा यातीति॥ २९॥ कल्पितैः स्तेययोगैरित्युक्तं तत्प्रपंचयति । हस्ताग्राह्य इति । तुंगशिक्यस्थभांडेष्वंतर्निहिते दध्यादौ वयुनं ज्ञानं यस्य स छिद्रं रचयति । तद्विच्छिद्ररचनादिवित् । ध्वांतयुक्ते गृहे स्वांगमेवार्थं प्रदीपं रचयति विशेषतो

न घृष्टानि यानि जानूनि अष्ठीवंति तानि तथा तैः बहुत्वं तूभयापेक्षम् । विचक्रमतुः विचेलतुः । अंजसा शीघ्रम ॥ २६॥ ततः पद्भिश्चलनानंतरम् ॥ २७ ॥ कौमारे यच्चापलं चपलत्वम् । तन्मातुर्यशोदायाः ॥२८॥ अखिलसद्मतः सकलगृहेषु । सप्तम्यर्थे तसिः । 'सद्मागारगृहावस्त्ये' इति कोशात् । गोप्यो—विधुंतुदा रागरंगा विधिमता सुरागिणी कामकंदा सुनंदा नंदिनी नादनंदिनी नेत्रसौभाग्यसुभगा मोदमाला मनस्विनी मनोभवा पिरागी हरदूरा रतिप्रदा धानी धनेश्वरी धामा भामा भावप्रमोदिनी मुक्ता मनोहरा माध्वी मालती मलयाश्रया मंदालसा मनोभीष्टा मनोज्ञा मानसी बला चित्रा वेत्रवती भीमा भावभेदविदा चला चंचला चपला कांता कला कामप्रबोधिनी इत्याद्या बह्व्यः । गोप्यै यशोदायै । कृष्णस्य चापलयुक्तानि चौर्याणि चोरकर्माणि (१) । स्वयं भक्षतु वयं तं न वारयामः । परन्तु निरर्थकमपि क्षिपतीत्याहुः—किञ्चेति । भोक्ष्यन् भोजयिष्यन् । मर्कान् बालमार्जारवानरान् "मर्कौ मनसि वायौ च तोके मार्जारकीशयोः" इति यादवः । स कृष्णः । गृहाय सद्मने । इति कुपितो याति इति । किं हे गृह त्वां धक्ष्यामि भस्मसात्करिष्यामीति । जडोपरि कोपमनुचितं मन्वानोऽर्थांतरमाह—यद्वेति । गृहेण सह वर्तंत इति सगृहाः । तोकान्बालान् 'तोकः पुत्र सुतायाश्च' इति मेदिनी ॥ २९ ॥ तुंगशिक्यस्थभांडेषु । उच्चरज्जुनिर्मितलंबमानयंत्रगपात्रेषु । अंतर्निहिते मध्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं धाष्टर्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥ इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्या तार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ॥३१॥ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः ॥ कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥३२॥ सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी ॥ यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ॥ ३३ ॥ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः ॥ वदंति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम् ॥ ३४ ॥ नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥ ३५ ॥

धृतमणिगणम् । यर्हि यस्मिन्काले ॥ ३० ॥ रेरे चोरेत्याक्षिप्तः सन्नुशति जल्पति त्वमेव चोरोऽहं गृहस्वामीत्यादीनि धाष्टर्यानि प्रागल्भ्यानि । अथवा उशति हे कमनीये यशोदे । यद्वा उशति वास्तौ स्वचिंते गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते । एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः त्वत्समीपे सुप्रतीकः साधुरिवास्ते । सभये नयने यस्मिंस्तच्च तच्छ्रीयुक्तं मुखं च तदालोकिनीभिः स्त्रीभिरित्थं व्याख्यातार्था प्रख्यापितजन्मफला तत्तत्कर्मफला वा उपालब्धुमाक्षेप्तुं नैच्छत् ॥ ३१ ॥ कदाचिदपराधांतरे उपालभत तदा तु महदाश्चर्यमभूदिति कथयन्नाह । एकदेति ॥ ३२ ॥ उपालभ्य निर्भर्त्स्य । भयेन संभ्रांतप्रेक्षणे चपलनिरीक्षणे अक्षिणी यस्य तम् ॥ ३३ ॥ अदांतात्मन् चपलगात्र । रह एकांते ॥ ३४ ॥ नाहं भक्षितवानिति । न हि बाह्यं किंचिन्मया भक्ष्यते मत्कुक्षावादावेव सर्वमस्तीति भावः । समक्षं प्रत्यक्षम्

स्थापिते । " वयुनं गमने ज्ञाने लाभे ब्रह्मणि शाश्वते " इति धरणिः । गृहकृत्येषु पेषणमार्जनादिषु ॥ ३० ॥ उशति ' उश—व्यक्तायां वाचि' तौदादिको धातूनामनंतत्वात् । उशधातोरप्रसिद्धत्वादर्थांतरमाह—अथवेति । क्रोधावेशे श्लाघ्यसंबोधनासंभवं मत्वा पुनरर्थांतरम् । यद्वेति । पुरीषोत्सर्गादीनीत्ययमर्थस्तु स्वमिभिरभिप्रायांतरेण कृतः प्रतीयते स चेत्थं प्रतिभाति पुरीषस्य गोः पुरीषस्योत्सर्गमितस्ततः क्षेपणं काष्ठादिना वा लांतरेण वा शुष्कश्वबिडालमयूरकपोतादिपुरीषस्य वान्यत आनीयोत्सर्गं वा करोति । आदिपदाच्छुष्कास्थिचर्मादिग्रह इति । न तु स्वयं स्वोदरान्मलमुत्सृजति तथात्वे " जगज्जनमलध्वंसिश्रवणस्मृतिकीर्त्तनाः । मलमूत्रादिरहिताः पुण्यश्लोकाः प्रकीर्त्तिताः ॥ " इत्यादिपुराणविरोधः । " त्वक्श्मश्रुकेशरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफवातपित्तम् । जीवच्छवं भजति कांतमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री ॥ " इति रुक्मिणीवाक्यविरोधश्च स्यादिति । यद्वा—बाललीलाविनोदार्थं मृषैव प्रपंचितानीति ज्ञेयम् । तोषिण्यां तु मे मम उशति कमनीये वास्तौ ह स्फुटं नादीनि नादयुक्तानि धाष्टर्यानि । लेपादिनोशति सुंदरे मेहनं पूर्णकुंभादिभ्यो जलादिसेचनम् । आदिना धूल्यादिक्षेपः । यद्वा—ईहनं चेष्टां मा कुरुते किं तु नेत्रहस्तादिभिः कुरुत एव । यद्वा—कुरुते कुत्सिते रुते शब्दे त्वां ताडयामीत्यादिरूपे उशति कथिते सति मेहनादीनि शिश्नप्रदर्शनादीनि कुरुते मम शिश्नं ताडयेत्येवमादीनि वदतीत्यर्थः ' शिश्नं मेहनशेफसी ' इत्यमरः । एवं स्तेयोपायैः पूर्वश्लोकोक्तैः पीठकोलूखलाद्यैः । सुष्ठु प्रतीकोऽवयवसंघो वा कर्म यस्य स तथा " प्रतीकः प्रतिकूलेऽथावयवावयविनोरपि । विलोमे कर्मणि ज्ञाने क्लीबमन्यत्र पुंसि च ॥ " इति वरतंतुः । साधुः यथाशब्द इवार्थे । साधुरिव नायं साधुः । श्रिया युक्तं मुखं श्रीमुखम् । आक्षेप्तुं वाचाऽपि ताडयितुम् । किञ्च धाष्टर्यानीति बहुत्वादन्यान्यपि पृष्ठत आगत्य नेत्रनिमीलनं गोपीभिर्गृहीतस्य यशोदापार्श्वे तत्तत्पुत्रपत्यादिरूपधारणं हारादित्रोटनं गोपीमुखे गंडूषादिप्रक्षेपणमित्यादीनि बहूनि ज्ञेयानि ॥ ३१ ॥ अपराधांतरे मृदशनरूपे । गोपा उपालभंत यशोदायै कृष्णकर्म निवेदयाञ्चक्रुः । गोपदारका गोपबालाः ॥ ३२ ॥ हितैषिणी मृदशनेन कश्चिद्रोगो माभूदिति हेतोस्ततो निवारयंतीत्यर्थः ॥ ३३ ॥ अग्रजो बलदेवः ॥ ३४ ॥ इति भाव इति । भक्षणं तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान्हरिः ॥ व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥ ३६ ॥ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः ॥ साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नींदुतारकम् ॥ ३७ ॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणींद्रियाणि मनो मात्रा गुणास्त्रयः ॥ ३८ ॥ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदम् ॥ सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकाम् ॥ ३९ ॥ किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः ॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥ ४० ॥

॥ ३५ ॥ यद्येवं तर्हि व्यादेहि मुखं प्रसारयेति । व्यादत्त प्रसारितवान् ॥ ३६ ॥ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श । तत्प्रपंचयति । जगज्जंगमं स्थास्नु स्थावरं खमंतरिक्षलोकं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगोलं भूर्लोकं वायुः प्रवहः अग्निर्वैद्युतः इंदुश्च तारकाश्च तत्सहितम् ॥ ३७ ॥ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवाः मन इति वैकारिकशब्देन गृहीतमपि देववैलक्षण्यात्पुनरुक्तम् । इंद्रियाणि च तैजसानि मात्रास्तामसाः शब्दादयः ॥ ३८ ॥ एवमेतद्विचित्रं विश्वं सहैकदैव वीक्ष्य विचित्रतामाह । जीवश्च गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारभूतः आशयश्च एतैर्लिंगानां चराचरशरीराणां भेदो यस्मिंस्तत् । तत्र व्रजं च सहात्मानं स्वसहितं क्वचिद्वीक्ष्य सूनोस्तनावल्पे विदारिते आस्ये शंकामवाप ॥ ३९ ॥ तामेवाह । किं स्वप्न इति । परितो विलोक्याह । नायं स्वप्नः ।

बाह्यस्थवस्तुनो मुखे प्रवेशनरूपं तत्तु मया न कृतमिति तात्पर्यम् । किञ्च हे अंब अहं न भक्षितवान् । मुखेन भक्षितं प्राणरक्षार्थं मुखप्राणयोरेव भक्षकत्वं मम तु ‘ स चान्यः प्राणदेहयोः ’ इत्युक्तेः आत्मरूपत्वात्ताभ्यां भिन्नत्वान्न भक्षकत्वम् । आत्मरूपत्वं तु ‘ अहमात्मा गुडाकेश ’ इति गीतासूक्तेः । प्रथितमेव यद्येते सत्यगिरस्तर्हि येन मुखेन भक्षितं तत्समक्षं प्रत्यक्षं पश्येति संबंधः । आत्मनस्तु “ एष आत्मा विहतपाप्मा विजरो विशोको विमृत्युर्विजिघत्सो विपिपासः ” इत्यादिश्रुतेर्न भक्षकत्वम् । यद्वा—यदि यतः । न द्यति बध्नात्यावरणशक्त्या।चिदंशमिति नहा माया तस्या इदं कार्यं नाहम् ‘ मायाकार्यमिदं जगत् ’ इत्युक्तेस्सर्वं विश्वं नाहम् । यद्वा—नह्यते बध्यतेऽज्ञानेन यत्रेति नहः प्रपञ्चस्स एव नाहस्तं प्रलये भक्षितवानस्मि तर्हि ततः सर्वेऽमिथ्याभिशंसिनः सत्यवचनाः । मे मुखं हे अंब सम्यगक्षं ज्ञानं यत्र तत्समक्षं मद्दत्तदिव्यदृष्टिपूर्वकं पश्य । अक्षति व्याप्नोति सर्वत्रेत्यक्षं ज्ञानं वस्तुमात्रस्य ज्ञानव्याप्यत्वादिति । किंभूतस्य सच्च त्यच्च सत्यं पञ्चभूतात्मकं जगत् “ सच्च त्यच्चाभवत् ” इति श्रुतेः । तद्गिरति भक्षतीति सत्यगीस्तस्य तथा । ‘ अत्ता चराचरग्रहणात् ’ इति न्यायात् । यद्वा क्रुद्ध आह—यदि मिथ्याभिशंसिनः सर्वे तव कोऽर्थस्त्वदीया अहं च न तव न त्वदीयस्तर्हि हे अनंब वैरिणि सत्यगिरः सत्यवक्तुर्मम मुखं समक्षं सम्यग्दृष्टियुक्तं न त्वपराधिन इव परावर्त्तितं पश्येति । किंभूतं मुखं भक्षितुं शीलमस्येति भक्षीत्यर्थः । यद्वाहं ना पुरुषः भक्षितवानेते सर्वेऽमिथ्याभिशंसिन एव हे सति यद्येतेऽगिरोभक्षकास्तर्हि ममैव मुखं पश्येति ‘ सर्वं वाक्यं सावधारणम ’ इति न्यायात् । इत्थमन्वयेन सर्वथा श्रीकृष्णस्य सत्यवक्तृत्वमेवान्यथा “ न मयोदितपूर्वं वा अनृतं तदिमे विदुः ” इति वक्ष्यमाणविरोधः स्यादित्यर्थः ॥ ३५ ॥ यद्येवं सत्यवक्तासि । अव्याहतैश्वर्योऽविनाशिसामर्थ्यवान् ईश्वर इति यावत् ॥ ३६ ॥ प्रवहः येन प्रेरितं ज्योतिश्चक्रं भ्रमति । वैद्युतस्तडिद्रूपोविंधनः । प्रसिद्धौ वाय्वग्नी त्वग्रे वक्ष्यमाणावेवात एतयोर्ग्रहणम ॥ ३७ ॥ नभस्वान्वायुः । वियदाकाशम् ॥ ३८ ॥ एवमुक्तरीत्या एतत् दृश्यमानम् एतैर्जीवादिभिः सह । तत्र विश्वस्मिन्मुखे वा । यद्वा—जीवादिभेदांतानां द्वंद्वं कृत्वा पुनर्मत्वर्थीयोऽच् तत्र लिंगं सूक्ष्मशरीरं भेदस्तत्तद्व्यावर्तकधर्मः ॥ ३९ ॥ तां शंकामभिनयेनाह—किं स्वप्न ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताऽस्मि तत्पदम् ॥ ४१ ॥
अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती ॥ गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ॥ ४२ ॥

तर्हि किं देवस्य हरेर्मायेति । तथा चेदन्ये किं न पश्यंति । तर्हि किं वा मदीय एव कश्चिद्बुद्धिमोहो धीविपर्यासो दर्पणे मुखवत् । एवं तर्ह्ययं कृष्णोऽपि कथमंतः प्रतीयते नहि दर्पणे दर्पणप्रतीतिः । अंतर्बहिश्चैकरूपेण च कथं जगत्प्रतीयते । तथा सति बिंबप्रतिबिंबयोरिव परस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति । अथो इति । अथ वा ममैवामुष्यार्भकस्यापि सतो यः कश्चनाचिंत्य आत्मयोगः स्वीयमैश्वर्यम् । औत्पत्तिकः स्वाभाविकः ॥ ४० ॥ चरमं पक्षमाश्रित्यायमीश्वर इति निश्चित्याह । अथो इति । चेतश्चित्तम् । तदादिभिर्न वितर्कगोचरम् । जगद्यदाश्रयं यदधिष्ठानम् । येन करणाधिष्ठात्रा । यतो बुद्धिवृत्त्यभिव्यक्तात् । नन्विदमवितर्क्यं भवतु तत्पदं कीदृगत आह । सुदुर्विभाव्यमिति । इदमत्यंतमचिंत्यमित्यर्थः ॥ ४१ ॥ एवं प्रपंचप्रतीत्योन्नीतं तत्त्वं पुनर्जीवसंसृतिहेतुमायाश्रयत्वेनोन्नयंत्याह । अहमिति । यशोदानामाऽहमसौ मम पतिः । अमुष्य व्रजेश्वरस्याखिलवित्तपा अहं सती जाया एष कृष्णो मे सुतः गोप्यादयश्च मदीया इतीत्थं कुमतिर्यन्मायया स एष मे शरणमिति ॥ ४२ ॥

इति । तथा चेत् माया यदि तां मदन्ये एवं तर्हि दर्पणदृष्टांते सति दर्पणस्थानीयोऽयं कृष्णः कथमन्तः स्वमुखे न हि दर्पणे दर्पणं प्रतीयतेऽपि तु तद्भिन्नं सर्वं किञ्च दर्पणांतर्मुखप्रतिबिंबं दर्पणद्रष्टुरभिमुखं भवे देतत्तु ततो वैपरीत्येन भातीत्याह—तथा सति एकरूपत्वेन प्रतीतिसद्भावे सति । अन्यथा प्रकारांतरेण । वितर्कयति विमृशति । यद्वात्मनो योगोऽपूर्वार्थप्राप्तिः “योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु । वपुःस्थैर्ये प्रयोगे च विष्कुंभादिषु भेषजे ॥ विस्रब्धघातके द्रव्योपायसन्नहनेष्वपि । कर्मणेऽपि च” इति मेदिनी ॥ ४० ॥ चरमं पक्षममुष्यायं स्वाभाविक आत्मयोग इति पक्षम् । वितर्कगोचरं विचारविषयः । करणाधिष्ठात्रा इंद्रियाधिपेन । बुद्धिवृत्तावभिव्यक्तः प्रतिबिंबितः ! स्तस्माच्चेतनत इत्यर्थः । अस्तु जगदवितर्क्यमित्याशंकते—नन्विति । पद्यते ज्ञायतेऽनेनेति पदं स्वरूपम् । तस्य जगदधिष्ठातुः पदं तत्पदम् । इत्यर्थ इति । अचिंत्यस्य कथनमशक्यमिति भावः । यद्वा—अदो वस्तु यादृशं तत्तादृशं चेतो ब्रह्मात्मनो रुद्रः कर्म इंद्रो वचो गुरु इति स्मरणादेतैर्ब्रह्मादिभिरंजसा साक्षाद्वितर्कगोचरं चिंतनानुमानविषयं न विरुद्धतर्कविषयं वा । तर्हि देवैरपि यदि न ज्ञायते तर्हि शून्यप्रायमेव तदिति चेत्तत्राह—यदाश्रयं यत्पदमाश्रयो यस्य तज्जगदिति शेषः । प्रलये जगद्यपाश्रयं भवति स्थितौ येन जीवतीत्यर्थः । सृष्टौ यतः प्रतीयत उत्पद्यते “यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति” इति श्रुतेः । ननु घटादिवत्किमिति न ज्ञायते इति चेत्तत्राह—सुदुर्विभाव्यं सुखेन दुःखेन च विभाव्यं विभावनीयम् ‘सुदुः शोभनदुःखयोः’ इति यादवः । “नैषा मतिस्तर्केणापनेया प्रोक्तान्येव सुज्ञानाय प्रेष्ठे” इति श्रुतेः । यद्वा—सगुणोपासकैः सुखेन निर्गुणोपासकैश्च दुःखेन विभाव्यम् “क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्” इति गीतासूक्तेः । अव्यक्तासक्तचेतसां निर्गुणोपासकानामित्यर्थः । एतेन सगुणोपासकैस्सुखेनैव विभाव्यत इति तात्पर्यम् । प्रगतास्मीत्यनेन नम्यनंतृभावः । सगुणोपासन एवेति सूचितम् ॥ ४१ ॥ एवं पूर्वोक्तरीत्या प्रपंचप्रीत्या जगत्प्रसिद्ध्या उन्नीतं ज्ञातं तत्त्वं यथार्थस्वरूपं जीवानां संसृतेर्हेतुभूता या मायातस्याश्रयत्वेनाविष्ठानत्वेनोन्नयंती जानती । अखिलवित्तपा समग्रधनरक्षिणी इत्थं कुमतिर्भ्रमतिः । यन्मायया यस्य भगवतश्शक्त्या स एष भगवान् शरणं रक्षितेति ‘शरणं गृहरक्षित्रोः’ इति विश्वः । हंतहंत स एव सुतस्य दाता स एव रक्षितापि भवेदेव तत्र मम पुनरज्ञायाः किमहंकारममकाराभ्यामिति तौ जिहासंती विष्णुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥ ४३ ॥ सद्यो नष्टस्मृतिर्गोपी साऽऽरोप्यारोहमात्मजम् ॥ प्रवृद्धस्नेहकलिलहृदयाऽऽसीद्यथा पुरा ॥४४॥ त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्त्वतैः ॥ उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम् ॥४५॥ राजोवाच ॥ नंदः किमकरोद्ब्रह्मञ्छ्रेय एवं महोदयम् ॥ यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४६ ॥

वैष्णवीं स्वीयाम् ॥ ४३ ॥ प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पुरेवासीत् ॥ ४४ ॥ मायाबलोद्रेकमाह । त्रय्येति । त्रय्या कर्मकांडरूपया इंद्रादिरूपेण । उपनिषद्भिर्ब्रह्मेति । सांख्यैः पुरुष इति । योगैः परमात्मेति । सात्वतैर्भगवानित्युपगीयमानं माहात्म्यं यस्य तम् ॥ ४५ ॥ अतिविस्मयेन पृच्छति । नंद

प्रपद्यमाना प्राह—अहमखिलवित्तपा निखिलव्रतरक्षणाभिमानवतीत्यर्थः । गोपाश्चेति गोपानां गोपीनां सर्वगोधनानाञ्चाहमेव महाराज्ञीत्यभिमानो यथा कुमतिस्तथैव लोकोत्तरस्यास्यैं व्रजजनप्राणभूतस्य बालस्याहं माता पालयित्री दानधान्यादिभिर्विप्रदेवाद्याराधनैर्नित्यं विष्णुपूजनैश्च सर्वानिष्टेभ्यो रक्षामहमेव सततं कारयंती भवामि ततोऽस्य स्वस्तीत्याद्यभिमानोपि कुमतिः एतावता गोकुलैश्वर्यस्य श्रीविष्णुनैव दत्तत्वात्तत्र यथा ममाभि मानानौचित्यं तथा तेनैव कृपया दत्ते पूतनाद्यरिष्टेभ्यः प्रतिक्षणं पाल्यमाने च परमलोकोत्तरेऽस्मिन्सुते लौकिक्या गोपजातेर्निकृष्टाया अत्ययोग्याया मातृत्वरक्षायित्रीत्वाद्यभिमानोनौचित्यात्कुमतिरेवेति विवेकजिघृक्षैव श्रीयशोदायाः क्षणिकीयं न तु विवेकः । यथा महामोहांधानामपि व्यावहारिकलोकानां कादाचित्कपारमार्थिकप्रसंगभवा स्त्रीपुत्राद्यासक्तिजिहासेति ज्ञेयमिति विश्वनाथः ॥ ४२ ॥ स कृष्णः विदितं ज्ञातं तत्त्वं यया तस्याम् ॥ ४३ ॥ सा यशोदा । आरोहं कटिभागं पुरेव निजगृहकार्यासक्ता बभूवेत्यर्थः ॥ ४४ ॥ उद्रेक आधिक्यम् । यद्वा—सांख्यं तस्य योगश्चिंतनं यत्र ते सांख्ययोगा ब्रह्मसूत्राणि तैः सात्वतैर्नारदादि भिर्वा पंचरात्रादिवैष्णवशास्त्रैः एतैरपि माहात्म्यमेव यस्य गीयते न तु साक्षाज्ज्ञायते तं सा यशोदात्मजममन्यताहोऽस्या भाग्यमिति भावः । अत्र विश्वनाथः । देवक्याः सकाशात्तस्या उत्कर्षमभिव्यंजयितुमैश्वर्यदर्श नादपि स्वीयवात्सल्यप्रेम्णः संकोचाभावमाख्यायैश्वर्यश्रवणादप्याह—त्रय्या यज्ञपुरुषत्वेनोपनिषद्भिर्ब्रह्मत्वेन सांख्यैः पुरुषत्वेन योगैः परमात्मत्वेन सात्वतैः पाञ्चरात्रैर्भगवत्त्वेन इत्येवं कर्मिप्रभृतिगीयमानमाहात्म्यं तस्यास्समक्ष मसमक्षं वोपाधिक्येन गीयमानैश्वर्यं हरिं सात्मजममन्यतास्मदभीष्टदैवतेनावयोर्व्रतनियमार्चनादिसंतुष्टेन पर्जन्याभिधमदीयश्वशुरकृतनिरवद्यब्रह्मतपःसंतोषितेन श्रीनारायणेन कृपया दत्तो लोकोत्तरः पुत्रोयं यत्कर्मिप्रभृतिभि स्त्रय्यादिप्रतिपाद्यत्वेन स्तूयते तत्र ‘नारायणसमो गुणैः’ इति सर्वत्र गर्गेण गीतया नारायणसाम्यप्रथयाऽन्यदुःष्करपूतनादिवधानामेतत्कर्तृकत्वप्रथया चायमेव नारायण इति तेषां विश्वास एव हेतुर्वस्तुतस्त्वयं मत्पुत्र एव मां मातरं क्षणमप्यदृष्ट्वा विकलीभवत्यहं चैनं स्वनिमेषव्यवहितं ज्ञात्वा विह्वली भवामीत्यावयोर्जन्यजनन्योरनुभव एवात्र प्रमाणमिति मनसि सा समाधत्ते । किंच कर्मिप्रभृतयस्त्रय्यादिभिर्यथा हरिं मन्यंते तथैवेयं वात्सल्यप्रेम्णा हरि मात्मजं मन्यते तेभ्यस्तु तत्तदनुरूपं फलं ददानस्तेषामनुग्राहको वशयिता सन्नीष्टेस्यै तु वात्सल्यप्रेम्णोनुरूपं फलं दातुमसमर्थ ऋणी भवन्नस्या अनुग्राह्योऽवश्य ईशितव्यत्वेन तिष्ठन्स्वानंदतुष्टोप्यस्याः स्तन्यामृतार्थं रोदिती त्यादिविशेष उत्तराध्याये स्पष्टीभविष्यति ।पद्यमिदं कृष्णलीलायां परिभाषासूत्ररूपं ज्ञेयम् परिभाषा यथा शास्त्रैकदेशस्था सकलं शास्त्रं प्रकाशयति यथा वेश्म प्रदीप इति“इको गुणवृद्धी” इति यत्रयत्र गुणवृद्धी श्रूयेते तत्रतत्रै क्परिभाषोपतिष्ठते यथा तथैव कौमारकैशोरमाथुरकुरुक्षेत्रादिगतलीलासु यत्रयत्रैश्वर्यप्रसंगस्तत्रेदमुपतिष्ठते इति ॥ ४५ ॥ नंदभाग्यमभिनंदन्पृच्छति राजा । उदय उद्भवः समुन्नतिरिति यावत् । “उदयस्तु पुमान्पूर्वपर्वते च समुन्नतौ” इति मेदिनी । श्रेयः पुण्यम् “स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः” इत्यमरः । महान् भागो भाग्यं यस्यास्सा तथा ‘भागाभाग्यांशतुर्यांशाः’ इति यादवः । यस्य स्मरणेनान्यस्यापि स्तनपानं न जायते

१ जन्म लक्ष्यतेऽनेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितम् ॥ गायंत्यद्यापि कवयो यल्लोकशमलापहम् ॥ ४७ ॥ श्रीशुक उवाच ॥ द्रोणो वसूनां प्रवरो धरया सह भार्यया ॥ करिष्यमाण आदेशान्ब्रह्मणस्तमुवाच ह ॥ ४८ ॥ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ ॥ भक्तिः स्यात्परमा लोके ययाञ्जो दुर्गतिं तरेत् ॥ ४९ ॥ अस्त्वित्युक्तः स भगवान्व्रजे द्रोणो महायशाः ॥ जज्ञे नंद इति ख्यातो यशोदा सा धराऽभवत् ॥ ५० ॥

इति । महोदयं महानुदय उद्भवो यस्मात तत् ॥४६॥ ययोः प्रसन्नोऽवतीर्णस्तौ पितरावपि यं नान्वविंदेतां न प्राप्नुताम् । कृष्णस्योदारं महदर्भकेहितं बाललीलाम् । यच्च कवयो गायंति तयोरविंदत्स किं श्रेयोऽकरोदिति ॥ ४७ ॥ ब्रह्मण आदेशान्गोपालत्वादिलक्षणान् ॥ ४८ ॥ ४९ ॥ स एवेह द्रोणो जज्ञे । स च नंद इति ख्यातः ।

स स्वयमेव यस्याः स्तनं पपावहो तस्या भाग्यमिति भावः । तोषिण्यां तु—महानुदयः सर्वतः स्नेहोत्कर्षो यस्मात् महाभागेति ततोप्यस्याः श्रेयोऽधिकमभिप्रेत्याह--पपाविति । 'पीतशेषं गदाभृतः' इत्युक्त्या श्रीदेवक्या अपि तथा वत्सहरणलीलायां वत्सगोपरूपेणान्यासां गोगोपीनां स्तनपाने सत्यपि देवक्या यथा कथंचिदसमये सकृदेव गोप्यादिषु रूपांतरेण च तत्रोभयत्र तादृशस्नेहाभावादत्रैव स्तनपानं सम्यगभिप्रेतम् ॥ ४६ ॥ ययोर्देवकीवसुदेवयोः । प्रसन्नो 'युवां मां पुत्रभावेन' इत्यादि तदुक्तेः । पितरावपीत्यपिना नंदयशोदयोरपितृत्वं न ज्ञेयं किन्तु तावपि पितरौ वैकुंठेशस्य तयोर्जातत्वात् परं तु तस्य नंदनंदनाविष्टत्वात्तौ नान्वविंदेताम् । विदंतिरत्र लाभार्थे 'विदेर्ज्ञाने च वेत्तीति विदेर्लाभे च विंदति' इति वचनात् । 'उदारो दातृमहतोः' इत्यमरः । स किं श्रेयोकरोदिति द्वयोरन्वयः । अत्र विश्वनाथरूपगोस्वामिनौ—पितरौ पितृत्वेन प्रसिद्धौ श्रीदेवकीवसुदेवौ श्रीकृष्णस्योदारं 'राजन्पतिर्गुरुः' इत्यादौ "अस्त्येवमंग भजतां भगवान्मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" इत्युक्तदिशा परमोदयस्यापि दातृ यदर्भकेहितं तदनु पश्चादपि नाविंदेतां मथुरायां गतेन बाल्यलीलासंवरणात् किं वाच्यं तस्य साक्षादनुभवमाहात्म्यं यच्च कवयो ब्रह्मादयः पूर्वपरार्द्धादौ श्रीनारदादीन्प्रत्युपदेशमारभ्याद्यापि गायंति अहो सर्वेषामपि तद्भाग्यविशेषहेतुरित्याह—यदेवाद्य कलिकाले लोकमात्रस्य शमलापहम् एकत्रापि गीयमानेन संबंधपरंपरया कृतार्थीकरणात् मद्भक्तियुक्तो भुवनं पुनातीति । अत एवोक्तं श्रीसूतेनापि 'कृष्णचरितं कलिकल्मषघ्नम्' इति। यद्वा—कत्रय आत्मारामशिरोमणयोपि भवद्विधा महाभागवता अनादितः श्रुतिपुराणगीयमानमपि अद्यापि गायंति परमानंदभरेण यत्र तत्राप्युन्मत्ता इव गायंत एव वर्त्तंते न च कथयंति मात्रं यच्च लोकस्यातिदीनस्यापि मद्विधस्य यच्छमलं तदंतरायकं कर्म तस्य हंतृ यच्छ्रवणमात्रेण मद्विधोपि मम परमकृतार्थतां मन्यते इत्यर्थः । तत् यो या चाविन्दत्स सा च किं श्रेयः किं श्रेयोऽकरोदिति पूर्वेणान्वयः । एवं महाविस्मयो व्यंजितः ॥ ४७ ॥ "आदेशो वर्णविकृतौ नियोगे चातिसर्जने" इति धरणिः । करिष्यमाण इति । यदि मां गवां पालनमपि भवानाज्ञापयिष्यति तदप्यहं सर्वथा करिष्यामीति कथयन् तं ब्रह्माणमुवाच ह वक्ष्यमाणं वाक्यमिति शेषः ॥ ४८ ॥ नौ आवयोः भुवि जातयोर्महादेवे भक्तिः स्यादिति । अनेन भूलोक एव भक्तिस्थानं न ब्रह्मलोकादीति सूचितं शंकरव्यावृत्त्यर्थं विश्वेश्वर इति पुनरपि तत्रैव प्रसक्तं विश्वेश्वरत्वेन हरस्यैव प्रसिद्धेः । तद्व्यावृत्त्यर्थं हराविति । परमात्युत्कृष्टा यया परमभक्त्यांजो विनैव प्रयासम् । तातयोर्भाविनि जन्मनीति लभ्यते । महान्देवः क्रीडा यस्य तस्मिन् भुवि स्थितो यो विश्वेश्वरस्तस्मिन् विश्वेऽपीश्वरा यत्र तस्मिन् परावरेशो महदंशयुक्त इत्युद्धवोक्तेः पूर्णेऽवतारिणीत्यर्थः । 'हरावावयोर्मनश्चौरे परमेति फलेन फलकारणमनुमीयते' इति न्यायात् स्वहृदयविचारिता पितृत्वोचितवात्सल्यमयीत्यर्थः । ययास्मद्भक्त्या भविष्यंत्या तच्छ्रवणकीर्त्तनादिनाऽन्योपि सर्वोपि लोको दुर्गतिं तरेदिति शुद्धप्रेमभक्तिप्रार्थनया तज्जन्मनि तयोस्तदनुरूपासाधनभक्तिरप्येका शुद्धैवासीदित्यवगम्यते । न तु पृश्निसुतपसोरिव भक्तिस्तपोयोगी चेति विश्वनाथः ॥ ४९ ॥ स एव येन ब्रह्मा प्रार्थितः । सा च द्रोणभार्या स एव सेत्यनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो भक्तिर्भगवति पुत्रीभूते जनार्दने ॥ दंपत्योर्नितरामासीद्गोपगोपीषु भारत ॥ ५१ ॥ कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः ॥ सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥ ५२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे विश्वरूपदर्शनं नामाऽष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥ एकदा गृहदासीषु यशोदा नंदगेहिनी ॥ कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि ॥ १ ॥ यानि यानीह गीतानि तद्बालचरितानि च ॥ दधिनिर्मंथने काले स्मरंती तान्यगायत ॥ २ ॥ क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः ॥ रज्ज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ॥ ३ ॥

सा च धरा यशोदाऽभवत् ॥ ५० ॥ गोपगोपीनामपि वस्तुस्वभावादस्त्येव भक्तिस्तयोः पुनर्नितरामिति ॥ ५१ ॥ स्वलीलया पुत्रभावानुकारिण्या ॥ ५२ ॥ इति श्रीभा० म० दश० पूर्वार्धटीकायां नामकरणादिविश्वरूपदर्शनं नामाष्टमोऽध्यायः ॥ ८ ॥ नवमे पयउद्रिक्तौ गत्वा गोप्यथ तत्कृतम् ॥ विलोक्य भांडभंगादि कृष्णं दाम्ना बबंध तम् ॥ १ ॥ तनूदराश्रितं विश्वं दृष्ट्वा विस्मितचेतसः ॥ बंधनद्व्यंगुलापूर्त्या पूर्णतामन्वदर्शयत् ॥ २ ॥ स्वयं दधि निर्ममंथ ॥ १ ॥ तदा चागायतेति चकारान्वयः ॥ २ ॥ सूत्रनद्धं कांचीबद्धम् । रज्ज्वोराकर्षेण श्रमो ययोस्तयोर्भुजयोश्चलंतौ कंकणौ च । कबरात्केशपाशाद्विगलंत्यो मालत्यो यस्याः सा ॥ ३ ॥

नित्यसिद्धयोर्यशोदानंदयोः साधनसिद्धौ धराद्रोणौ प्रविष्टावभूतामिति विश्वनाथः ॥ ५० ॥ पुत्रीभूतं पुत्रभावं प्राप्ते नितरामतिशयेन । तयोर्नंदयशोदयोः भक्तिः स्यात् । परमेति प्रार्थनाद्भगवान्पुत्रतामगान्निजदेहादपि पुत्रदेहे प्रीत्यतिशयदर्शनात् । "कामं दहतु मां नाथ मा मे गर्भो निपात्यताम्" इत्युत्तरोक्तेः । "ससैन्योहं गमिष्यामि न रामं नेतुमर्हसि" इति विश्वामित्रं प्रति दशरथोक्तेश्च । वस्तुस्वभावात् । अतिकमनीयतमे सर्वेषां प्रीतिर्भवतीति भावः । जनान् गोपीजनान्प्रेम्णा पीडयति नवनीतचौर्याद्युपद्रवैरुद्वेजयति वा स्तन्यरसयाचमाने वा गोपगोपीषु मध्ये दंपत्योर्यशोदानंदयोर्नितरामासीत् । गोपा गोप्यश्चापि धराद्रोणानुवर्तिनस्तादृशसाधनवंतः पूर्वतन्मत्याऽसन्निति ज्ञापितमिति विश्वनाथः ॥ ५१ ॥ आदेशमाज्ञामस्त्वित्युक्तिरूपाम् 'परमा भक्तिरस्तु' इति वरम् । व्रजे वसन् तेषां गोगोपीनंदयशोदानाम् ॥ ५२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टमोऽध्यायः ॥ ८ ॥ उत्सिक्ते पात्राद्बहिर्निस्सृते । तत्कृतं कृष्णकृतम् । आदिना नवनीतप्रक्षेपादयो ग्राह्याः । तं येन भांडभंगादिकृतमिति दाम्ना रज्ज्वा (१) । तनूदराश्रितमल्पजठरगम् । अद्भुतधियो यशोदायाः बंधने द्व्यंगुलस्यापूर्त्या न्यूनतया पूर्णतां सर्वत्र परिपूर्णः कथं बध्येतेत्यन्वर्थताम् (२) । नंदगेहिनी नंदभार्या । कर्मांतरेषु गृहमार्जनोक्षणादिरूपेषु नियुक्तासु योजितासु । अत्र विश्वनाथः— एकदा दीपमालिकामहोत्सवदिने कार्तिकमासोपास्यदामोदरलीलायास्समकालत्वादिति तोषिणीकाराः । गृहदासीषु यावद्गृहकर्माधिकारिणीषु सर्वास्वेव कर्मसु नैमित्तिकेतरकर्मसु नियुक्तासु दधिषु चाखिलेषु निर्मथ्यमानेषु एवं दधि पुत्रश्रेयोनिबंधेन दासीनामविज्ञत्वं संभाव्य पुत्रोपभोगाय स्वयं ममंथ । अस्याः पद्मगंधिपयसः केवलतृणंचराया दुग्धं नीरोगमनेन मत्पुत्रश्रेयो भविष्यतीति हेतोः । अन्यथा लोकशास्त्रप्रसिद्धाऽसंख्यधेनुमतल्लिकादुग्धानां तयैकया दध्नः मथनस्यासंभवात् । ममंथेत्युपलक्षणं दोहनतापादीनामपि ॥ १ ॥ कविभिर्गीतानि कविभिरिति शेषः । यदा स्वयं दधि निर्ममंथ तदाऽगायतेति द्वयोः संबंधः । चकारोऽत्रानुक्तसमुच्चायकस्तेन यदा तदेति लब्धम् ॥ २ ॥ क्षुमा अतसी तत्संभवं क्षौमं 'अतसीस्यादुमा क्षुमा' इत्यमरः । यद्वा—"क्षुमः कृमिविशेषेऽपि क्षुमी स्यात्तिलसाधने"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः ॥ गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ॥ ४ ॥ तमंकमारूढमपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखम् ॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ॥ ५ ॥ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंडभाजनम् ॥ भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयंगवमंतरंगतः ॥ ६ ॥ उत्तार्य गोपी सुश्रृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकम् ॥ भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥ ७ ॥ उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितम् ॥ हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥ ८ ॥

॥ ४ ॥ अधिश्रिते चुल्लिमारोपिते उत्सिच्यमाने अतितापेनोद्रिच्यमाने ॥ ५ ॥ दृषदश्मना शिलापुत्रेण । अंतरं गृहमध्यं गतः रह एकांते नवनीतमभक्षयत् ॥ ६ ॥ सुश्रृतं सुतप्तम् । दधिमंथनस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा ॥ ७ ॥ उलूखलांघ्रेः परिवर्तितस्योलूखलस्योपरि । शिचि शिक्ये । चौर्येण विशंकितं चंचलमीक्षणं यस्य तं सुतम् ॥ ८ ॥

इति कोशात्क्रमितंतुनिर्मितम् "सूत्रं कार्पासजे कांच्यां साधने शास्त्रसूचके" इति धरणिः । "कबरः केशसंघाते वर्णभेदे सुखाधिके" इत्यपि । मालत्यो जातिपुष्पाणि । 'सुमना मालती जातिः' इत्यमरः । "पुष्पे जातिप्रभृतयः स्वलिंगा व्रीहयः फले" इत्यमरोक्तेर्मालती पुष्पेऽपि स्त्रीलिंगातैव कात्तिके मालत्या एव प्राधान्यात् कप्रत्ययहस्वाभावस्त्वार्षः । जातं कंपो यत्र तज्जातकंपं द्वितीयांतानां बिभ्रतीपदेनान्वयः । यद्वा—जातं कं घृतं यस्मात्तज्जातकं दधि 'कं जलं कं घृतं शिरः' इति कोशात् । सुभ्रूः यशोदाहर्षसूचनायेयमुक्तिः ॥ निर्मंमंथ । किंभूता पञ्च वस्तूनि बिभ्रती । तान्याह—वासः पृथुकटितटे । पुत्रस्नेहस्नुतकुचयुगम् । रज्ज्वाकर्षश्रमभुजचलत् कंकणौ कुंडले वक्त्रं चेति । अपरं पूर्ववत् ॥ ३ ॥ न्यषेधन्निवारितवान् । आसाद्य प्रातरंतर्गृहात्प्रबुध्य बहिर्निस्सृत्य क्षुधा रुदन्मुखः सन्नित्यर्थः । मंथानं मथनदंडं गृहीत्वेति मातर्मा मथानेति । स्ववचनममानयिष्यंतीं मातरमभिज्ञायेति भावः । अतस्तच्चातुर्य्यं ज्ञात्वा या मातुः प्रीतिस्तामावहन् इति विश्वनाथः ॥ ४ ॥ अधिश्रितेऽधिकपक्के वा पयो वरोपयितुमिति शेषः । अहो बालस्यास्य बुद्धिरित्युक्त्वा मथनादुपरम्योपविष्टा स्वयमंकमारूढं तमुत्सृज्य ययौ । ननु श्रीकृष्णादपि तस्या दुग्धमीतममतास्पदमभूत् यदनुरोधेनातृप्तः कृष्णोऽप्युपेक्षितः । सत्यम् । तत्पयश्च तस्यैव "यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्तत्कृते" इत्युक्तेः । बालोऽयं न कामपि स्वसंपत्तिं रक्ष्यां जानातीत्यतो मयैव सा रक्ष्येति तत्त्यागस्तत्स्नेहमयः गोपजातीनां च सर्वतो दुग्धसंपत्तावेवाग्रह इति । यथात्मसंपत्त्यर्थं सह्यमानेष्यात्मदुःखे स्नेहविशेष एवात्मनि गम्यते तद्वदिहापि ज्ञेयम् । पितरौ च पुत्रस्यापातदुःखं सोढ्वाप्युदर्कधनदेहविद्यादिसंपत्त्यर्थकर्माणि सदैवेहेते तच्चौषधपायनस्नपनादौ प्रसिद्धमिति तोषिणी ॥ ५ ॥ 'दधिमंडो भवेन्मस्तु' इति हलायुधः । 'दृषदश्माल्पपाषाणे' इति धरणिः । हैयंगवं नवनवनीतं ह्यो गोदोहोद्भवं घृतम् । हैयंगवीनम् संज्ञायाम्" इति निपाताद्धैयंगवीनं हैयंगवमितित्वार्षम् ॥ ६ ॥ उत्तार्य चुल्ल्या अन्यत्र निधाय । तत् सर्वम् । तं सुतम् । तत्र दधिमंथनस्थाने । विलोक्य वामतर्जन्या नासाग्रं स्पृष्ट्वेति भावः ॥ ७ ॥ पश्चात्पृष्ठतः काकादिभयाद्विवर्त्य स्थापितोलूखलोपरि स्वस्तिकासनेनोपविष्टम् । अंतर्गृहप्रवेशानंतरं यत्किंचिद्भुक्त्वा सत्वरमवशिष्टं हैयंगवीनं सभांडमेव गृहीत्वा मातृवंचनाय पश्चाद्द्वारेण निर्जनं गृहपश्चाद्देशं गत्वेति शेषः । पूर्वं शिक्ये स्थापितं यत्तदेवेति चौर्येणानीतमित्यर्थः । चौर्याद्धेतोर्मातृताडनभयाद्विशंकिते तदागमनानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार भीतवत् ॥ गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ॥ ९ ॥ अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेन विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥ कृतागसं तं प्ररुदंतमक्षिणी कर्षंतमंजन्मषिणी स्वपाणिना ॥ उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वाभिषयंत्यवागुरत् ॥ ११ ॥ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्नाऽतद्वीर्यकोविदा ॥ १२ ॥

तपसा ऐकाग्र्येणेरितं तदाकारतां नीतमत एव प्रवेष्टुं क्षमं योग्यं योगिनां मनोऽपि यं नाप तम् । अथ वा अन्वधावत्केवलं न त्वाप । यतो योगिनां मनोऽपि यं प्रवेष्टुं न क्षममिति ॥ ९ ॥ अन्वंचमाना एवं कृष्णमनुगच्छंती । बृहत्योश्चलयोः श्रोण्योर्भरेण भारेणाक्रांता स्तब्धा गतिर्यस्याः सा । विस्रंसितात्केशबंधनाच्च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा । यद्वा जवेन कंपितात्केशबंधात्पुरः पतितानि प्रसूनान्यनुभयमुत्पादयन्ती पश्चाद्गतिर्यस्याः सा परामृशद्धृतवती ॥ १० ॥ अंजन्मषिणी अंजंती सर्वतः प्रसरंती मषी ययोस्ते अक्षिणी स्वपाणिना कर्षंतं संमर्दयंतम् । भिषयंती ह्रस्वश्छांदसः । भीषयंती भयमुत्पादयन्ती अवागुरदभर्त्सयत् ॥ ११ ॥ इयेष ऐच्छत । अतद्वीर्य

संधानपरे ईक्षणे यस्य तं गृहांतर्गतैरतिर्यग्ग्रीवं निरीक्ष्य तद्दृष्टिवंचनार्थं तत्पृष्ठतस्तं जिघृक्षंती । शनैः स्वपादशब्दाभावार्थम् ॥ ८ ॥ आत्तयष्टिं स्वीकृतयष्टिकाम् । तत उलूखलांघ्रेः । भीतवदिति । न हि तस्य कुतोपि भयमपि तु तस्यैव "भीषास्माद्वातः पवते" इत्यादिश्रुतेः । सर्वभयहेतुत्वमाह । अपससार धावनं चकार । मनोगोचरस्य हस्तादिना ग्रहणं सर्वथाऽसंभावीत्यत आह—अथवेति । कुतो नापेत्याकांक्षायामाह—यतो हेतोः "नैतन्मनो विशति" इत्यादिवक्ष्यमाणत्वात् । यं प्रवेष्टुं यत्र प्रवेशं कर्तुं विषयीकर्तुम् । "यतो वाचो निवर्त्तंते अप्राप्य मनसा सह" इति श्रुतेः । यद्वा—साहजिकमातृस्नेहभरज्ञानेन तत्त्वतोंतर्भयाभावात् । यद्वा—भीतवदिति । मतुबन्तं भययुक्तं यथा स्यात्तथा दुद्राव 'भयभावनया स्थितस्य' इति कुंत्युक्तेः । गोपी यशोदा । योगः संमाधिस्तद्वतां मनस्तपसा ज्ञानेनेरितमपि प्रवेष्टुं ब्रह्माणि लीनीभवितुं क्षममपि यं नाप 'नायं सुखापः' इत्यग्रे वक्ष्यमाणत्वात् ॥ ९ ॥ प्रसूनैरसहानुगमनं सर्वथाऽयोग्यं प्रसूनानां जडत्वादतोऽर्थांतरमाह—यद्वेति ॥ १० ॥ मषी दीपकज्जलम् "मषी लेखनद्रव्ये दीपकज्जलसुवीरयोः" इति धरणिः। यद्वा—अवागुरत्ताडनार्थं हस्तमुद्धृतवती न केवलं योगिप्रापं धृतवत्येव किं तु ब्रह्मादिभिरनिशं स्तूयमानं तमभर्त्सयदपि । महाकालयमादीनामपि भयहेतुं यष्ट्याताडयच्चेत्याह—कृतागसमिति । यद्वाग्वागुरत् । भो अशांतप्रकृते वानरबंधो मंथनीस्फोटक अद्य नवनीतादिकं कुतः प्राश्नासि तथा बध्नाम्यद्य यथा बालैः खेलितुं नवनीतमपहर्तुं च न प्रभविष्यसि । इदानीं यष्टिताडनात्किंबिभेषि इति तर्जयंती यष्ट्युत्थानेन ताडनोद्यमं चकार न तु तताड 'गुरी–उद्यमे' ॥ ११ ॥ मातर्मा मा ताडयेत्युक्ते ताडने यदि विशेषभीस्ते तर्हि किमद्य दधिभाण्डमभांक्षीः । मातरेवमथनैव करिष्ये पातय कराद्यष्टिमिति पुत्रोक्तिकातर्यविक्लवमना हंत कदाचिदयं मन्युना वनं प्रविशेदिति शंकया तन्निरोधार्थमुपायं निश्चिकायेत्याह—त्यक्त्वेति । तस्य कृष्णस्य वीर्यं तद्वीर्यं तत्र कोविदा ज्ञानवती तद्वीर्यकोविदा तद्भिन्ना तथा । यद्वा—तद्वीर्यकोविदा तच्चापल्यभरदुर्वारताद्यभिज्ञा ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चांतर्न बहिर्यस्य न पूर्वं नापि चापरम् ॥ पूर्वापरं बहिश्चांतर्जगतो यो जगच्च यः ॥ १३ ॥ तं मत्वाऽऽत्मजमव्यक्तं मर्त्यलिंगमधोक्षजम् ॥ गोपिकोलूखले दाम्ना बबंध प्राकृतं यथा ॥ १४ ॥ तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः ॥ द्व्यंगुलोनमभूत्तेन संदधेऽन्यच्च गोपिका ॥१५॥ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे ॥ तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनम् ॥ १६ ॥ एवं स्वगेहदामानि यशोदा संदधत्यपि ॥ गोपीनां सुस्मयंतीनां स्मयंती विस्मिताऽभवत् ॥ १७ ॥ स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत्स्वबंधने ॥ १८ ॥

कोविदा तत्प्रभावानभिज्ञा ॥ १२ ॥ अकोविदत्वमाह न चांतरिति पंचभिः । बंधनं हि बहिःपरिवृतेन दाम्ना अंतरावृतस्य भवति । तथा च पूर्वापरविभागवतो वस्तुनः पूर्वतो दाम धृत्वा परितः परिवेष्टनेन संभवति न त्वेतदस्तीत्याह । न चांतरिति । किं च व्यापकेन व्याप्यस्य बंधो भवति तच्च विपरीतमित्याह । पूर्वापरमिति । किं च तद्व्यतिरिक्तस्य चाभावान्न बंध इत्याह । जगच्च य इति ॥ १३ ॥ तं मर्त्यलिंगमधोक्षजमात्मजं मत्वा बबंधेति ॥१४॥ द्व्यंगुलोनं द्वाभ्यामंगुलाभ्यामूनमपूर्णम् ॥ १५॥ १६॥ स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्मयमाप ॥ १७ ॥ १८ ॥

को वेत्ति मत्तोऽधिकमित्यात्मानं मन्यमानः कोविद इति । इगुपधत्वात्कः बाहुलकाद्विभक्तेरलुक् 'विद—ज्ञाने' तद्भिन्नत्वमवाह । अन्यदाह—किञ्चेति । पुनरन्यदाह । किञ्चेति । तद्व्यतिरिक्तस्य कृष्णभिन्नस्य । जगतां ब्रह्मांडानां चयः समूहो यस्मिन्स जगच्चय इति । यद्वा—यः कृष्ण एव जगत् " सर्वं खल्विदं ब्रह्म " इति श्रुतेः । तद्भिन्नं किञ्चिन्नास्तीति भावः । यो बंधस्स जगतः यः कृष्णश्च सोऽजगत् जगन्न । तस्य जगदीश्वरत्वात् । यद्वा—योजनं योऽजो आर्षत्वात्कुत्वाभावः बंधस्तं गच्छतीति योजगत् । न योजगदयोजगदिति सर्वबंधननिवर्त्तकस्य कुतो बंधनमिति भावः ॥ १३ ॥ मर्त्यलिंगमिति । मर्त्यस्य लिंगमेव न तु मर्त्यं यतोऽधोक्षजमिद्रियजन्यज्ञानाविषयमत एवाव्यक्तं न केनापि प्रमाणेनौपनिषदं विना व्यज्यत इत्यव्यक्तम् । यथा प्राकृतं सामान्यनरबालमनेनापि तस्याप्राकृतत्वं सिद्धमिति । यस्य विभुत्वेन सर्वेण जगतापि बंधनं न संभवेत्तस्य जगदेकदेशीभूतेन दाम्ना कथं बंधनं भवेदिति । न च साकारत्वेन तस्य विभुत्वं संभवेदिति वाच्यम् । साकारस्यैव तस्योदरे सर्वजगतो यशोदया दृष्टत्वात् । तर्हि सा कथं बबंध तत्राह—आत्मजं मत्वाऽसाधारणवात्सल्यप्रेमविषयीकृत्येत्यर्थः । तस्य प्रेमाधीनत्वाद्विभुत्वेप्यचिंत्यशक्त्यैव बंधनमिति भावः । अव्यक्तं प्रेमवश्यत्वादेव प्रच्छन्नीभूतमहैश्वर्यं मर्त्यलिंगं मनुष्याकारं तदप्यधोक्षजमतींद्रियं यथा प्राकृतं बध्नाति तथैव चित्पुंजमपि तं बबंधेत्यहो प्रेमबलं तस्या इति भावः ॥ १४ ॥ यावद्द्वैतं न निवर्तते तावन्नाहं वश्यो भवामीत्यंगुलद्वयोनत्वेन द्योतितमिति भावः । यद्वा—नाहं रज्जुभिर्बद्धुं शक्यः किन्तु द्वावेव मेबंधनहेतू भक्तिवैराग्यरूपाविति ॥ १५ ॥ यत्संधितमासीत्तदपि । तेन संधितसंधितेन ॥ १६ ॥ विस्मयमाप कोऽयं देवो यक्षो दैत्यो वा यतो बंधं नाप्नोतीति विस्मिता बभूव । न तु तस्य स्वाभाविकीं महिमरूपां सिद्धिं वेदेति भावः ॥ १७ ॥ स्वमातुः कृपया स्वबंधने आसीत् स्वयं बद्धोऽभूदित्यर्थः । खिन्नगात्राया इत्यनेन तस्या वैराग्यं सूचितम् । 'एकसंबंधिज्ञानमपरमसंबंधिस्मारकम्' इति न्यायेन ज्ञानमपि तस्या जातमिति ज्ञानवैराग्ययोः सदा साहचर्यनियमात् विस्मयमाह—मुष्टिपरिमितमप्यस्योदरं शतहस्तमितदाम्नाऽपि न वेष्ट्यतेऽहो उदरं तिलमात्रमपि न विपुलीभवति दामाप्यंगुलिमात्रमपि न न्यूनीभवति तदपि वेष्टनं न पूर्य्यत इत्येको विस्मयः । प्रतिवारमेव वेष्टने द्व्यंगुलन्यूनतैव न तु त्र्यंगुलादिन्यूनतेति द्वितीयो विस्मयः । ततश्चाहो मणिमयानतिदीर्घकिंकिणीवेष्टितावलग्नस्य गृहस्थितसर्वदामभिरपि यद्बंधनं न निष्पद्यते तदस्य शुभं यद्बालकस्य ललाटे विधात्रा बंधनं न लिखितमित्यनुमीयते तदतो हे यशोदे विरम्यतामिति पुरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥ नेमं विरिंचो न भवो न श्रीरप्यंगसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥ २० ॥ नायं सुखापो भगवान्देहिनां गोपिकासुतः ॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २१ ॥

न चैवं स्वातंत्र्यभंग इत्याह । एवं संदर्शितेति । सेश्वरमिदं विश्वं वशे यदधीनमित्यर्थः ॥ १९ ॥ भगवत्प्रसादमन्येऽपि भक्ता लभंते इदं त्वतिचित्रमिति सरोमांचितमाह । नेममिति । विरिंचः पुत्रोऽपि । भवः स्वात्माऽपि । श्रीर्जायाऽपि ॥ २० ॥ फलितमाह । नायमिति । देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निवृत्ताभिमानानामपि ॥ २१ ॥

श्रीजनप्रतिबोधितयापि यशोदयाद्य संध्यापर्य्यंतमद्येतद्ग्रामस्थैरपि दामभिर्ग्रथितैरेतदुदरस्यावधिराधिजिगमिषणीय इति प्रौढवादवत्या पुत्राभिमत्या परमेश्वरबंधनोद्यमे परित्यक्ते सति भक्तभगवतोर्मध्ये भक्तहठ एव तिष्ठेदित्यतो मातुः श्रममालक्ष्य मातृवत्सलो भगवानेव स्वहठं तत्याजेत्याह—स्वमातुरिति । कृपयेति । सर्वशक्तिचक्रवर्त्तिनी परमभास्वती कृपाशक्तिरेव भगवच्चित्तं नवनीतमिव विद्रुतीकृत्य सत्यसंकल्पताविभुताशक्ती सहसैवांतर्द्धापया मासेत्यर्थः । परिश्रमं कृपयेत्याभ्यामित्यसूचि । यावद्भक्तनिष्ठा भजनोत्था श्रांतिस्तद्दर्शनोत्था स्वनिष्ठा कृपा चेति द्वाभ्यामेव भगवान्बद्धोभवेत् । ते द्वे यावन्नाभूतां तावद्द्व्यंगुलोनताऽऽसीत्तयोरुद्भूतयोस्तु बद्धोऽभूदिति प्रेम्णा स्वबंधनप्रकारः स्वयमुदाहृतो भगवतेति ॥ १८ ॥ ननु स्वतंत्रो भगवानिति सर्वैर्गीयते बंधने च तस्य स्वतंत्रतानाशेन परतंत्रता स्यादिति चेत्तत्राह—न चैवमिति । एवमुक्तरीत्या । अंग हे नृप । स्वस्यात्मनो वशो वशवर्त्ती तेन न हि तस्यान्यो वशकर्त्ता " सर्वस्य वशी " इत्यादिश्रुतेः । यस्य कृष्णस्येदं विश्वं वशे तदुक्तम् " ससुरासुरगंधर्वसयक्षोरगराक्षसम् । जगद्वशे वर्त्ततेदः कृष्णस्य सचराचरम् " इति । भगवतः परमपारमैश्वर्ये सत्यपि प्रेमवश्यतानिबंधनं बंधनमिदं परमचमत्कारित्वाद्भूषणमिदं न तु दूषणमित्याह—एवं हरिणा स्वस्यात्मारामत्वे बुभुक्षया पूर्णकामत्वेप्यतृप्त्या शुद्धसत्त्वस्वरूपत्वेपि कोपेन स्वाराज्यलक्ष्मीवत्त्वेऽपि चौर्य्येण महाकालयमादिभयदत्वेऽपि भयपलायनाभ्यां मनोग्रयानत्वेऽपि मात्रा बलाद्ग्रहणेन आनंदमयत्वेऽपि दुःखरोदनेन सर्वव्यापकत्वेऽपि बंधनेन भक्तवश्यता स्वाभाविक्येव स्वस्य सम्यग्दर्शिता । अज्ञान्प्रति दर्शनायोपयोगा भावाद्ब्रह्मभवसनत्कुमारादीन्विज्ञानप्यातिचमत्कारं प्रापय्यानुभावितेति नेदमनुकरणमात्रत्वेन व्याख्येयम् " दर्शयंस्तद्विदां लोके आत्मनो भक्तवश्यताम् " इत्यत्र तद्विदामिति प्रयोगादिति भावः । स्ववशेन स्वाधीनेन कुतः स्वाधीनत्वं तत्राह—यस्य चिच्छक्तिसारभूतेन प्रेम्णैतस्यानंदातिशयप्रदर्शनार्थमेव भक्तवशत्वं निष्पद्यते नान्यथेति ज्ञेयम् । इति चक्रवर्ती ॥ १९ ॥ लेभिरे उलूखले यद्यं प्रसादं गोपी यशोदाऽऽप तं विरिंच्यादयो नापुरिति भावः । 'लेभिरं धान्यकुट्टनम्' इति निघंटुः । अत एवोक्तमभियुक्तैः " यशोदायाः परं नास्ति देवता इति मे मतिः । यस्या उलूखले बद्धो मुक्तिदो मुक्तिमिच्छति ॥ " इति । यथाश्रुतस्तु स्वामिचरणै व्याख्यात एव ॥ २० ॥ फलितं लब्धम् ॥ आत्मभूतानाम् । 'ज्ञानी त्वात्मैव मे मतः' इत्युक्तेर्भगवद्रूपाणामपि ज्ञानिनामयमिति शृंगग्राहिकया दर्शयति—गोपिकासुतो यशोदासूनुरित्यनेन सगुणविग्रह इत्युक्तम् । ज्ञानिनस्त्वव्यक्तविग्रहोपासका अत एवोक्तम् " क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् " इति भगवद्गीतासु । 'या निर्वृतिस्तनुभृतां तव पादपद्म'—इत्यादिध्रुवोक्तेश्च सुखेन भक्तिमतामेव लभ्यः 'भक्त्या लभ्यस्त्वनन्यया' इत्युक्तेः । " भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः " इति स्मृतेश्च । " भक्तिरेवैनं दर्शयति " इति श्रुतेश्च । गोपिकासुत इत्यपि भक्त्यैव गोपीसुततामाहेति अत्र श्रीभागवते भगवत्प्रेमैव सर्वपुरुषार्थशिरोमणित्वेन वर्ण्यते तस्य स्थितिर्नित्यासिद्धभक्तेष्वेव तेष्वपि गोकुलवासिन एव श्रेष्ठा इत्याह—नायमिति । देहिनां देहाध्यासवतां भक्तिमतां ज्ञानिनां देहाध्यासरहितानामात्मारामभक्तानां तथाभूतत्वे सत्येव प्राप्तियोग्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ॥ अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥ २२ ॥ पुरा नारदशापेन वृक्षतां प्रापितौ मदात् ॥ नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ ॥ २३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे गोपीप्रसादोलूखलबन्धनं नाम नवमोऽध्यायः ॥ ९ ॥ राजोवाच ॥ कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् ॥ यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः ॥ १ ॥ श्रीशुक उवाच ॥ रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ॥ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ ॥ २ ॥ वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥ ३ ॥ अंतः प्रविश्य गंगायामंभोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ॥ ४ ॥ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव ॥ अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ॥ ५ ॥

भक्तैर्बद्धस्याप्यन्यमोचकत्वमाह । कृष्णस्त्विति ॥ २२ ॥ २३ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पू० टीकायां गोपीप्रसादोलूखलबन्धनं नाम नवमोऽध्यायः ॥ ९ ॥ दशमेऽपातयद्रिंगन्नंतरा यमलार्जुनौ ॥ तत्रत्याभ्यां च देवाभ्यां कृष्णः स्तुत इतीर्यते ॥ १ ॥ यद्विगर्हितं कर्म येन वा देवर्षेर्भागवतोत्तमस्यापि तमः क्रोधस्तदेतत्कथ्यतामिति ॥१॥२॥३॥ गंगायामंतर्मध्ये । कथंभूते । अंभोजानां वनानि तेषां राजयस्ता विद्यंते यत्र तस्मिन् ॥४॥ अपश्यत् दृष्ट्वा च क्षीबाणौ मत्तौ समबुद्धयत ॥ ५ ॥

तायां निषेधसंभवात् । आत्मभूतानां पूर्वश्लोकोक्तानां विरिंचिभवश्रियाम् तत्र विरिंचिभवयोः स्वावतारत्वाल्लक्ष्म्याः । स्वरूपशक्तित्वेनात्मभूत्वम् । एवं त्रिविधजनानां गोपिकासुतो भगवान्न सुखापः किं तदिति विकुंठकौशल्यादिसुत एव दुःखमेवाभिव्यंजयति एषामिह श्रीयशोदायामेतदुपलक्षितेषु वात्सल्यसख्यकांतभावाश्रयेषु व्रजलोकेषु या भक्तिः ' श्रिय उरगेंद्रभोगभुज ' इत्यादिना 'यथा त्वल्लोकवासिन्यः' इत्यादिना च श्रुत्यादिभिरनुगतिमयी तद्वतां यथा सुखापस्तथा तेषान्नेति । तेन गोपिकाद्यनुगतिमयन्यूनतादुःखांगीकारस्तु विरिंचिभवलक्ष्म्यादिभिरीश्वराभिमानिभिः स्वस्वलोकस्थितैर्दुश्शक एव । अन्येषां तादृशोपदेशस्यालाभादरोचकत्वाद्वा तदनुगत्यभाव एवेति भाव इति चक्रवर्त्ती ॥ २१ ॥ अद्भुतमाह–भक्तैरिति । व्यग्रायां लग्नायाम् । अर्जुनौ ककुभवृक्षौ । पूर्वं गुह्यकौ पूर्वजन्मनि यक्षौ ॥ २२ ॥ शापहेतुमाह–मदादिति । तत्रापि हेतुः श्रियान्वितामिति । " श्रुतिचक्षुर्वाग्विहीनं कुरुते लक्ष्मीर्जनस्य को दोषः । गरलसहोदरजाता यन्न मारयति तच्चित्रम् " इत्युक्तेः ॥ २३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे नवमोऽध्यायः ॥ ९ ॥ यमलौ युग्मौ च तावर्जुनौ चेति कर्मधारयः द्वितीया त्वंतरायोगात् । अंतरा मध्ये ' रिगणं स्खलनं समे ' इत्यमराद्रिंगन् हस्तपादादिभिश्चलन् तत्रत्याभ्यां यमलार्जुनस्थाभ्यां देवाभ्यां नलकूबराभ्याम् । " अर्जुनः ककुभे पार्थे कार्त्तवीर्यमयूरयोः । मातुरेकसुतेऽपि स्यात्पुंल्लिंगो धवलेन्यवत् " इति मेदिनी (१) । भागवतोत्तमस्याप्यसंभावितततमसोपि । विगर्हितं निंदितम् । येन कर्मणा । तदेतत्कर्म ॥ १ ॥ सुदृप्तौ गर्वितौ । मंदाकिन्यां गंगायाम् । मदेन धनादिजेनोत्कटावुच्छृंखलौ ॥ २ ॥ वारुणीं वरुणाज्जातां कदंबादिसंभवाम् ' वारुणी वृक्षकोटरात् ' इति वक्ष्यमाणत्वात् । यद्वा–'ततोऽभूद्वारुणी देवी ' इति समुद्रमथनाख्यानोक्तेः । वरुणदेवताकं यदन्नं तन्मयी सुरेति स्वामिचरणाः ॥ ३ ॥ अंभोजानां सरोजानाम् । राजयः पंक्तयः । ' करेणुरिभ्यां नेमे स्त्री ' इत्यमरः । करेणुभिर्गजीभिः ॥ ४ ॥ तत्र गंगातटे । क्षीबाणावश्लीलभाषिणौ वा "अश्ली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः ॥ वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥ ६ ॥ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥ ७ ॥ नारद उवाच ॥ न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः ॥ श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूत मासवः ॥ ८ ॥ हन्यंते पशवो यत्र निर्दयैरजितात्मभिः ॥ मन्यमानैरिमं देहमजरामृत्यु नश्वरम् ॥ ९ ॥ देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितम् ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ १० ॥ देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव च ॥ मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ॥ ११ ॥

कुत इत्यत आह । तं दृष्ट्वेति ॥ ६ ॥ अनुग्रहार्थाय अनुग्रहश्च मदनाशोऽर्थश्च श्रीकृष्णदर्शनं तदर्थं इदं वक्ष्यमाणं न ह्यन्य इत्यादि ॥ ७ ॥ जोष्यान्प्रियान्विषयाञ्जुषतः सेवमानस्य पुंसः श्रीमदादन्य आभिजात्यादिसत्कुलविद्यादिजनितो मदः । अन्यो वा रजोगुणो रजःकार्यहास्यहर्षादिरूपो न हि तथा बुद्धिभ्रंशो बुद्धिं भ्रंशयतीति तथा किं तु श्रीमद एवेति । तदाह यत्रेत्यादिचतुर्भिः । यत्र श्रीमदे ॥ ८ ॥ इमं नश्वरं देहमजरामृत्यु अजरश्च अमृत्युश्च यथा तथा मन्यमानैः ॥ ९ ॥ नरदेवभूदेव संज्ञितमपि श्वादिभिर्भक्षितं विट्संज्ञितं दग्धं भस्मसंज्ञितमन्यदा कृमिसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक् भूतद्रोग्धा यतो भूतद्रोहान्निरयो भवति स किं स्वार्थं वेद न वेदैवेत्यर्थः ॥ १० ॥ इदानीं देहेऽहंभावोऽपि न घटत इत्याह । देह इति । निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे । क्रेतुर्मूल्यं दत्त्वा ग्रहीतुः ॥ ११ ॥

लभाषी स्यात्क्षिबा मदमत्तोऽथ हिंसकः " इति धरणिः । हे कौरवेति । शुद्धवंशजत्वादेव त्वामिदं गोप्यं वक्ष्यामीति भावः ॥ ५ ॥ पर्यधुर्वेष्टितवत्यः । तत्र हेतुः तं दृष्ट्वेति ॥ ६ ॥ अनुग्रहार्थयोः समाहारद्वंद्वः ॥ ७ ॥ मद इति । शेषकल्पनातो वरं श्लोकांतर्गतपदेनान्वयः । ' ऋजुमार्गेण सिद्ध्यतोर्थस्य वक्रेण साधनायोगात् ' इति न्यायात् । अत आह—अन्यो वेति । श्रीमद एव सर्वपर इत्याह—किन्त्विति । स्त्रीशब्देन परस्त्रीसंगः स्वस्त्रीसंगस्य शास्त्रीयत्वात् । द्यूतपदेन तत्क्रीडा । आसवपदेन च तत्पानं लक्ष्यते ॥ ८ ॥ यत्र येषु हयादिषु सत्सु पशवो भूतानि " पशुर्वै स देवानाम् " इति श्रुतेः । पशुशब्दो मनुष्येऽपि वर्तते । हननमपि मारणधन हरणप्रवासनापमानादिभेदाद्बहुविधं ज्ञेयम् । यथाऽतिवत्सलो जनकादिरतिमधुरं क्षीरादिकं भोजयितुं पुत्रादिकं निद्राणमालक्ष्य तन्निद्राभंगार्थं नखद्वयाघातं करोति तद्वत् ॥ ९ ॥ निरयो निर्गतोऽयः सुखं यतः स निरयो नरकः । यद्वा—तत्कृते अंतः कामक्रोधलोभाक्रांतचित्ततया स्वयमज्ञानीभूय विहितत्यागपूर्वकं लोके निजज्ञानितां प्रकटय्य लोकान्कर्मतः प्रचाय्याहं ब्रह्मास्मीति मामेवेश्वरं जानीत "तत्त्वमसि" इति श्रावयित्वा च त्वमपीश्वरोऽसीति देहपूजां कारयितुं भूतं नित्यभूतं परमात्मानं स्वस्य तत्तुल्यभावनया गृह्यतोर्ष्यतीति भूतध्रुक् स किं स्वार्थं स्वस्यानीशतां वेद यतो भगवद्द्रोहान्निरयो भवति राजाभिमानितंतुवायस्य राजदंडवद्यमदंडो भवतीति भावः । 'भूतध्रुक् को लभेत शम्' इति 'तदवध्यायी न क्वचित्सुखमेधते' इति च कंसभार्याभिर्वक्ष्यमाणत्वात् । इत्यर्थ इति । स तु सर्वथा स्वार्थापरिज्ञानीति भावः ॥ १० ॥ अन्नदातुर्नित्यं भोजनप्रदस्य निषेक्तुर्गर्भाधानकर्तुः पितुरिति स्वामिचरणाः । बलिनो बलात्कारेण ग्रहीतू राज्ञादेः क्रतुर्द्रव्यं दत्त्वा मौल्येन ग्रहीतुः । अग्नेः अंत्ये तस्य तत्रैवाहुतिनिक्षेपात् । शुन इत्युपलक्षणं गृध्रादेरपि । आहुत्यभावे तैरेव भक्ष्यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं साधारणं देहमव्यक्तप्रभवाप्ययम् ॥ को विद्वानात्मसात्कृत्वा हंति जंतूनृतेऽसतः ॥ १२ ॥ असतः श्रीमदांधस्य दारिद्र्यं परमंजनम् ॥ आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ॥ १३ ॥ यथा कंटकविद्धांगो जंतोर्नेच्छति तां व्यथाम् ॥ जीवसाम्यं गतो लिंगैर्न तथाऽविद्धकंटकः ॥ ॥ १४ ॥ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह ॥ कृच्छ्रं यदृच्छयाऽऽप्नोति तद्धि तस्य परं तपः ॥ १५ ॥ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः ॥ इंद्रियाण्यनुशुष्यंति हिंसाऽपि विनिवर्तते ॥ १६ ॥ दरिद्रस्यैव युज्यंते साधवः समदर्शिनः ॥ सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति ॥ १७ ॥ साधूनां समचित्तानां मुकुंदचरणैषिणाम् ॥ उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः ॥ १८ ॥

अव्यक्तप्रभवाप्ययमव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययो यस्य तमात्मसात्कृत्वा आत्मेति मत्वा । असतो मूढादृते ॥ १२ ॥ एवं श्रीमदविचेष्टितमुक्त्वा तत्प्रतीकारं निश्चिनोति । असत इति । दारिद्र्यमेव । परं श्रेष्ठं परं केवलमिति वा । कुत इत्यत आह । आत्मौपम्येनेति । ततो न द्रुह्यतीति भावः ॥ १३ ॥ सदृष्टांतमाह । यथेति । मुखम्लान्यादिलिंगैः सर्वेषां जीवानां सुखदुःखे समे इति ज्ञातवानित्यर्थः ॥ १४ ॥ किं च दारिद्र्यं मोक्षमपि साधयतीत्याह दरिद्र इति श्लोकचतुष्टयेन । निरहंस्तंभो निर्गतोऽहंकाररूपः स्तंभो यस्मात्सः ॥ १५ ॥ १६ ॥ युज्यंते स्वत एव संगच्छंते । तर्षं तृष्णाम् ॥ १७ ॥ ननु साधूनामपि धनिकः प्रियः स्यान्न दरिद्र इति चेत्तत्राह । साधूना

इति तेषामपि स्वत्वं तत्र । अपि वेत्युक्तेः मृदि निखनने कृम्यादिभिर्भक्ष्यतं तदतस्तेषामपि स्वत्वमिति ज्ञेयम् ॥ ११ ॥ एवमुक्तप्रकारेण । साधारणमनेकस्वत्वास्पदम् । अव्यक्तात्प्रकृतेः "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव" इति स्मृतेः ॥ १२ ॥ तत्प्रतीकारं श्रीमदनाशकं दारिद्र्यस्य श्रैष्ठ्यमसहमानोर्थांतरमाह-केवलमिति । एकमित्यर्थः । तत्र हेतुमाशंकते—कुत इति । आत्मौपम्येन स्वसादृश्येनेति । इति भाव इति । सुखदुःखे स्ववन्मन्यत इति तात्पर्यम् ॥ १३ ॥ तां कंटकव्यथां मुखम्लान्यादिलिंगैः दुःखसूचकैर्मुखकार्ष्ण्यादिभिः सुखसूचकैर्मुखविकासादिभिश्चिह्नैः । इत्यर्थ इति । न हि दुःखं विना मुखमालिन्यं सुखं विना वा मुखविकाशो भवतीति जानातीति भावः । तथाऽविद्धकंटको नेति । स त्वित्थं वदति किं ते शक्तिप्रहारो जातः किमर्थमल्पकंटकक्षतेन रोदिषीति भावः ॥ १४ ॥ दरिद्रमुद्दिश्यान्यदप्याह—किञ्चेति । स्तंभो गर्वः 'गर्वरोधनयोस्तंभः' इति हलायुधः । सर्वमदैः विद्याभिजनादिमदैः सर्वैरनादृतत्वाद्दारिद्रस्य सत्कुलमदादयोऽपि प्रायो नश्यंतीति भावः । यदृच्छया दैवेच्छया । तत् कृच्छ्रम् । तस्य दरिद्रस्य । "एतद्वै परं तपो यद्व्यथितस्तप्यते" इति श्रुतेः ॥ १५ ॥ ननु कृच्छ्रानुभवः कथं तप इति चेत्तत्राह—अनुशुष्यंति । देहशोषमनुशोषं गच्छंति । इंद्रियप्राबल्यदौर्बल्ये प्रवृत्तिनिवृत्ती ते चान्नसत्ताऽभावाभ्यां स्तः अन्नाप्राप्त्यैंद्रियप्राबल्यानुविधायिहिंसालक्षणा प्रवृत्तिर्नश्यति हिंसानाश एव महत्तप इति । "नातः परं तपो ब्रह्मन्यद्धिंसाविनिवर्त्तनम्" इत्युक्तेः ॥ १६ ॥ ततस्तृष्णाक्षयात् । आराच्छीघ्रम् । सिध्यति मुक्तो भवतीत्यर्थः । 'आराद्दूरसमीपयोः' इति विश्वः । ननु दरिद्रस्य तृष्णैव सर्वदोषमयीति वाच्यं तस्या अपि प्रतीकारसंभवादित्याह—दरिद्रस्यैवेति । धनित्वदारिद्र्ययोस्तुल्यदर्शित्वेनोभयेषामपि गृहे विरक्तसंचारस्य संभवेऽपि साधवो दरिद्रस्यैव युज्यंते दरिद्रकर्तृकस्यैव तद्वंदनसंतोषणसंवादादिसंभवात्तस्यैव ते स्वयं संयोगजनितफलदायका भवंति न तु धनिनो मदांधस्य । अत्रानयोः संनिधौ वर्तमानोऽहमेव प्रमाणमिति भावः । ततश्च सद्भिः सत्संयोगमहिम्नैव तं तर्षं तृष्णां दरिद्रः स्वयमेव क्षिणोति क्षीणीकरोति तत्कृपालब्धस्य भक्त्यमृतस्य तृष्णाहरस्वभावत्वादिति विश्वनाथः ॥ १७ ॥ साधुसमागमे शंकते—नन्विति । धनिको धनी उपेक्ष्यै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः ॥ तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः ॥ १९ ॥ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ ॥ न विवाससमात्मानं विजानीतः सुदुर्मदौ ॥ २० ॥ अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः ॥ स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥ २१ ॥ वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ॥ वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः ॥ २२ ॥ श्रीशुक उवाच ॥ एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमम् ॥ नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ ॥ २३ ॥ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः ॥ जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥ २४ ॥ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ॥ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥ २५ ॥ इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ ॥ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ॥ २६ ॥ बालेन निष्कर्षयताऽन्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ ॥ निष्पेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ ॥ २७ ॥

मिति । धनेन स्तंभो गर्वो येषां तैः ॥ १८ ॥ तमोमदमज्ञानकृतमदम् ॥ १९ ॥ तमःप्लुतौ तमोव्याप्तौ ॥ २० ॥ शपति । अतोऽर्हत इति । अनुगृह्णाति स्यातां नैवमित्यादिना । मत्प्रसादेन स्मृतिः स्यात् ॥ २१ ॥ स्वर्लोकतां देवत्वं पुनर्लब्ध्वा मदनुग्रहाल्लब्धभक्ती भविष्यत इति ॥ २२ ॥ २३ ॥ प्रस्तुतमाह । ऋषेरिति ॥ २४ ॥ किमिति सत्यं कर्तव्यं तत्राह । देवर्षिरिति । यद्यतः तत्ततः ॥ २५ ॥ यमयोर्यमलयोः सहजातयोः । आत्मनः कृष्णस्य तन्मध्ये प्रवेशमात्रेण ॥ २६ ॥ अनु अंचतीत्यन्वक् । तत्र हेतुः । दामोदरेणेति । उत्कलित उत्पाटितोंघ्रिबंधो मूलबंधो ययोस्तौ । परमस्य श्रीकृष्णस्य विक्रमितं विक्रमस्तेनातिवेपः कंपो येषु ते स्कंधप्रवालविटपा

स्यक्तप्रायैः । तत्र हेतुः असद्भिर्धनमदावज्ञातसज्जनैः । तत्रापि हेतुः असतां विटनटपिशुनवेश्यादिजनानामाश्रयैः । ''प्रायेण व्यसनासक्ता धनिनो व्यसनिप्रियाः'' इति संग्रहात् ॥ १८ ॥ नन्वस्त्वेतदत्र भवानेतयोर्दंडमुपेक्षां वा करिष्यतीत्यपेक्षायां दंडमेवैतयोर्हितत्वात्करिष्यामीत्याह–तदिति । स्त्रैणयोः स्त्रीवशवर्तिनोः । अजितात्मनोरवशीकृतमनसोः ॥ १९ ॥ लोकपालस्य कुबेरस्य । विवाससं नग्नम् । आत्मानं देहम् । तत्र हेतुः सुदुर्मदौ मदिरामत्तौ ॥ २० ॥ शपति शापं ददाति । यतः सुदुर्मदौ अतः स्थावरतां वृक्षतां प्राप्तमिति शेषः । अनुगृह्णाति–अनुग्रहं करोति । एवं विवाससौ पुनर्न स्यातां भवेताम् । तत्रापि स्थावरत्वेपि ॥ २१ ॥ दिव्यशरच्छते दैविकवर्षशते वृत्तेऽतीते सति । वासुदेवस्य सान्निध्यं श्रीकृष्णनैकट्यं यथास्यात्तथा । तावत्कालस्यैव भगवदवतारे शिष्टत्वात् भूयः पुनः स्वर्लोकतां देवत्वं लब्ध्वा मदनुग्रहादिति पूर्वश्लोकगतमिह संबध्यते । तस्मिन्देवत्वे । लब्धा भक्तिर्याभ्यां तौ लब्धभक्ती भविष्यथ इति संबंधः । यद्वा–लब्धभक्ती संतौ स्वर्लोकतां भविष्यथः प्राप्स्यथः । भुवः प्राप्तौ परस्मैपदमार्षं वासुदेवस्य सांनिध्यं लब्ध्वेति योज्यम् ॥ २२ ॥ यमलार्जुनौ सहोत्पन्नककुभौ ॥ २३ ॥ प्रस्तुतं प्रसंगम् । ऋषेर्नारदस्य । वचः 'वासुदेवस्य सांनिध्यम्' इत्यादिरूपम् ॥ २४ ॥ वचःसत्यकरणे हेतुमाशंकते–किमितीति । महात्मना नारदेन यद्यथा गीतं तत्तथा साधयिष्यामीति ॥ २५ ॥ अंतरेण मध्ये । सप्तम्यर्थे एनच् । तिर्यक् तिरश्चीनं गतं जातम् ॥ २६ ॥ तत्स्वस्मिन्बद्धमुलूखलम् । निष्कर्षताऽऽकृष्टवता । बालेन यमलार्जुनौ निष्पेततुः । अनुरत्र वीप्सितोऽस्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः ॥ कृष्णं प्रणम्य शिरसाऽखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म ॥२८॥ कृष्णकृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः ॥ व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ॥ २९ ॥ त्वमेकः सर्वभूतानां देहाऽस्वात्मेंद्रियेश्वरः ॥ त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ॥ ३० ॥ त्वं महान्प्रकृतिः सूक्ष्मा रजःसत्त्वतमोमयी ॥ त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ॥ ३१ ॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ॥ को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ॥ ३२ ॥

यपोस्तौ ॥ २७ ॥ ककुभः प्रति सर्वतः स्फुरंतावित्यर्थः । यद्वा दिशः प्रकाशयंताविति । तत्र कुजयोर्वृक्षयोः स्थितोऽग्निर्यथा मूर्तिमानुपैति तथोपेत्य । विरजसौ निर्गतमदौ निरहंकारिणौ नष्टगर्वाविति यावत् ॥ २८ ॥ गोपालं मां युवां देवौ किमिति प्रणताविति चेत्तत्राहतुः । हे कृष्णकृष्ण महायोगिन्नचिंत्यप्रभावस्त्वं न गोपालः किं तु परः पुरुषः । यतः आद्यः कारणभूतः । तत्रापि न निमित्तमात्रं किं तूपादानमपि त्वमेवेत्याशयेन तुष्टुवतुः । व्यक्ताव्यक्तमिति । स्थूलसूक्ष्ममिदं रूपं ते तव ब्राह्मणा ब्रह्मविदो विदुरिति ॥२९॥ नियंतापि त्वमेवेत्यूचतुः । त्वमेक इति । देहः असवः प्राणाः आत्माऽहंकारः इंद्रियाणि च तेषामीश्वरः । नन्वस्य कालो निमित्तं प्रकृतिरुपादानं प्रकृतेर्जातो महान्विश्वात्मतया परिणमते पुरुषः कर्ता नियंता च किमत्राहमत आहतुः त्वमेव काल इत्यादिना सार्धेन । यतो भगवानीश्वरो विष्णुस्त्वत्तः कालो नाम तव लीला ॥ ३० ॥ प्रकृतिः शक्तिः। पुरुषोंशः महान्कार्यं अतस्त्वमेव सर्वमित्यर्थः ॥ ३१ ॥ नन्वहमेव चेत्सर्वं तर्हि घटादिज्ञाने मज्ज्ञानं किं न भवतीति चेत्सर्वोऽपि ब्रह्मवित्स्यादतश्चाहतुः । गृह्यमाणैरिति । दृश्यत्वेन वर्तमानैर्बुद्ध्यहंकारेंद्रियादिभिर्द्रष्टा त्वं न गृह्यस इति भावः । ननु तर्हि जीवो जानातु नैवेत्याहतुः । को न्विहेति । जीवा

पश्चादर्थे अन्वक् पृष्ठगामि । तत्र पृष्ठगामित्वे न हि बद्धोदरपाशबद्धवस्त्वग्रतश्चलत्यसंभवादिति भावः । परमस्य ब्रह्मादिध्येयस्य हरेः । स्कंधप्रवालविटपाः स्कंधो महाशाखाश्रयः । प्रवालानि पत्राणि । विटपोऽल्पशाखाश्रयस्तवयवः । चंडशब्दो भयंकरशब्दः ॥ २७ ॥ तत्र तदा पतनानंतरमिति यावत् । ककुभः सर्वा दिशः । 'प्रतिर्द्वितीयया' इति प्रतिशब्द उपतिष्ठते तृतीयया सहशब्दवत् । स्फुरंतौ देदीप्यमानौ गच्छन्तौ वा इत्यर्थ इति । इहाध्याहृतप्रतियोगे कर्मप्रवचनीयत्वेन द्वितीया । अध्याहारे श्रमं विमृश्यार्थांतरमाह—यद्वेति । निर्मदौ शापक्षयाद्गतरजस्त्वेन सात्त्विकौ । इदं वक्ष्यमाणम् ॥ २८ ॥ स्तुतिं कुर्वाणौ दृष्ट्वा निजवैभवं गोपयितुमाह—गोपालमिति । सर्वतो निकृष्टं पशुपालनं कुर्वंतमिति भावः । देवौ सर्वोत्तमौ । तत्र तस्यामाशंकायाम् । आदरे वीप्सा कृष्णकृष्णेति । कृषंति निजापदं नाशयंतीति कृष्णा देवास्तेषामपि कृष्ण हे देवदेवेत्यर्थः । अचिंत्यप्रभावः वक्तुमशक्यैश्वर्यो महायोगिन्नित्यस्यायमर्थः । यतो यस्मात् । तत्रापि कारणत्वेपि । न केवलं निमित्तमात्रं किंत्विति ब्राह्मणा वेदतात्पर्यविदो व्यासाद्याः ॥ २९ ॥ नियंता प्रेरकः । स्वविषयशक्तिप्रदः । एतादृशस्तु कालो भवतीति चेत्तत्राहतुः--त्वमेवेति । विष्णुर्व्यापनशीलः । व्यापकस्याप्याकाशस्योत्पत्तिविनाशवत्त्वादहं न तादृशस्तत्राहतुः--अव्यय इति । तत्कुतस्तत्राहतुः—ईश्वरोंतर्यामी ॥ ३० ॥ किं चान्येषामेव निमित्तोपादानादिरूपताप्रसिद्धास्तानाह—नन्विति । अत्र निमित्तोपादानादौ अहं किम् । इत्यर्थ इति । शक्तिशक्तिमतोरभेदोऽप्यादौ दृष्टः । लीलापि शक्तिकार्यत्वाच्छक्तिरेव । अंशांशिनोरप्यभेद एव वह्निस्फुलिंगस्य वह्निरूपत्वदृष्टेरिति भावः । सर्वक्षेत्राणां विकाराणि जन्मादिषट् वेत्ति साक्षितया पश्यतीत्ति तथा ॥ ३१ ॥ स्वस्य सर्वरूपत्वे शंकांतरमुद्घाटयति—नन्वहमिति । प्राकृतैः प्रकृतिकार्यभूतैः गुणैर्लिंगैः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ॥ आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३३ ॥ यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ॥ ३४ ॥ स भवान्सर्वलोकस्य भवाय विभवाय च ॥ अवतीर्णोंऽशभागेन सांप्रतं पतिराशिषाम् ॥ ३५ ॥ नमः परमकल्याण नमः परममंगल ॥ वासुदेवाय शांताय यदूनां पतये नमः ॥ ३६ ॥ अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ ॥ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥ ३७ ॥ वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥ ३८ ॥

युत्पतेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा विजानाति यतो गुणसंवृतो देहाद्यावृतः ॥ ३२ ॥ अतो दुर्ज्ञेयत्वात्केवलं प्रणमतः । तस्मै तुभ्यमिति । आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैश्छन्नो महिमा यस्य अभ्रैरिव रवेस्तस्मै ॥ ३३ ॥ अहो अहमीश्वर इति कुतो ज्ञातं तत्राहतुः । यस्येति ॥ ३४ ॥ भवायाभ्युदयायोद्भवाय वा । विभवाय विगतो भवो यस्मिंस्तस्मै । कैवल्यायेत्यर्थः ॥ ३५ ॥ ३६ ॥ नौ आवाम् । अनुचरः कुबेरो नारदो वा तस्य किंकरौ । भगवतस्तव दर्शनम् ॥ ३७ ॥ तत्र गतयोरावयोः पूर्वस्वभावो माऽभूत्किं तु वाणी गुणानुकथन इत्यादि । नः "अस्मदो द्वयोश्च" इति द्विवचनस्थाने बहुवचनम् । अस्मत्संगिनां सर्वेषामपीति वा

इति भाव इति । दृश्यस्य द्रष्टृता द्रष्टुर्दृश्यत्वं च न भवतीति तात्पर्यम् । एते जडत्वान्न जानंतु जीवः कथं न जानाति चेतनत्वादिति शंकते न कोपीत्यर्थः । "को अद्धा वेद कः प्रावोचत्कुत आयाता इयं विसृष्टिः" इत्यादिश्रुतेः । "क इह नु वेदवतावरजन्म लयो" इत्यग्रे वक्ष्यमाणत्वाच्च । अज्ञाने हेतुः—गुणसंवृतो देहाद्याविष्टमनस्त्वादवकाश एव विचारस्य नेति भावः । "विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः । वारुणीदिग्गतं वस्तु कथमैंद्रीं व्रजँल्लभेत् ॥" इति मैत्रेयोक्तेः ॥ ३२ ॥ यतो ज्ञानाविषयोतो हेतोः । महिमा महत्त्वम् ॥ ३३ ॥ अहो आश्चर्यम् अशरीरिणः प्राकृतशरीररहितस्यानाशिनो वा । "अशरीरं वा वसंतम्" इत्यादिश्रुतेः । अशरीर एवानपेक्षितास्मत्समवाय इति वृत्रोपाख्यानोक्तेश्च । 'देहीवाभाति मायया' इति । 'न हन्यते हन्यमाने शरीरे' इत्याद्युक्तेश्च । शरीरेषु तिर्यगादिदेहेषु । तैस्तैः प्रसिद्धैस्तच्छब्दावृत्तिर्बहुत्वापेक्षया । अतुल्यातिशयैः साम्याधिक्यवर्जितैरसाधारणैर्देहिषु शरीरिषु असंगतैरसंभावितैः भूम्युद्धरणमंदरगोवर्द्धनधारणदावानलपानादिरूपैः । वीर्यैः पराक्रमैः ॥ ३४ ॥ यस्यावतारा ज्ञायंते स भवानीति संबंधः । भवो जन्म । इत्यर्थ इति । जन्मनिवृत्तिरेव कैवल्यपदार्थ इति तात्पर्यम् । सर्वलोकस्येति केचिद्दृष्ट्वा केचित्स्पृष्ट्वा केचित्स्मृत्वा केचिज्ज्ञात्वा केचिन्मम कर्माण्येव श्रुत्वा स्मृत्वा च संसारान्मुच्यंत इत्याह—अंशभागेनेति व्याख्यातचरम् । आशिषामभीप्सितानाम् । पतिर्दाता । गीतोक्तार्त्तादिचतुर्विधभक्ताभीष्टद इति भावः । स भवानवतारी खल्वेव भवति हस्तिसहस्रेणापि दुरुत्पाटनयोरावयोरर्जुनयोरर्जुनसमौजसोर्बाल्यलीलोदितबललवेनाप्युत्पाटनात् । रज्जूलूखलयोरपि तादृशशक्त्यर्पणादिति भावः । अंशांशेन ब्रह्मरुद्रादिना । आशिषां सर्वकामानां पतिर्दाता यः स एव भवानित्यर्थः ॥ ३५ ॥ इदमेव रूपं परतमं मत्वा नमंतः नम इति परमं कल्याणं यस्मात्तत्तथा मोक्षप्रदेत्यर्थः । परममंगल ऐहिकामुष्मिकप्रत्यूहवारकः । तदेवाहतुः—शांताय इति । मोक्षप्रदत्वमाह—वासुदेवाय यदूनां पतये इति । परममंगलत्वमाह "मंगलाय च लोकानाम् । आस्ते यदुकुलांभोधावाद्योनंतसखः पुमान्" इत्याद्युक्तेः । परमस्य महादेवस्यापि मंगलम् "यच्छौचनिस्सृतसरित्प्रवरोदकेन शिवः शिवोऽभूत्" इत्युक्तेः । वासुदेवाय नंदनंदनाय । शूरसेननंदनाय वा । यदूनां क्षत्रियाणां गोपानां वा पतये ॥ ३६ ॥ कुबेरस्य महादेवानुचरत्वं विमृश्याह—नारदो वेति । ऋषेर्नारदस्य ॥ ३७ ॥ तत्रालकायाम् । पूर्वस्वभावो विषयप्रवणता इत्यादि भवतु । न इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्थं संकीर्तितस्ताभ्यां भगवान्गोकुलेश्वरः ॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥ ३९ ॥ श्रीभगवानुवाच ॥ ज्ञातं मम पुरैवैतदृषिणा करुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ॥ ४० ॥ साधूनां समचित्तानां सुतरामकृतात्मनाम् ॥ दर्शनान्नो भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ४१ ॥ तद्गच्छतं मत्परमौ नलकूबरसादनम् ॥ संजातो मयि भावो वामीप्सितः परमो भवः ॥ ४२ ॥ श्रीशुक उवाच ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनःपुनः ॥ बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तराम् ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे मारदशापयमलार्जुनमुक्तिनिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

बहुवचनम् । तव निवासभूतं यज्जगत्तस्य प्रणामे । त्वन्निवासभूतामिति बहुमानेन जगतः प्रणामे शिरोस्त्वित्यर्थः । भवत्तनूनां भवतो मूर्तीनाम् ॥ ३८ ॥ संकीर्तितः संस्तुतः ॥ ३९ ॥ वाग्भिर्न ह्यन्यो जुषतो जोष्यानित्यादिभिः श्रीविभ्रंशरूपोऽनुग्रहः कृत इति ॥ ४० ॥ युक्तमेवैतदित्याह । साधूनां स्वधर्मवर्तिनां समचित्तानामात्मविदां सुतरां मत्कृतात्मनां मय्यर्पिताचित्तानां तेषां कृपातिरेकात्सुतरामित्युक्तम् । सवितुर्दर्शनादक्ष्णोर्यथा बंधो न भवेत्तद्वत् ॥ ४१ ॥ प्राधान्यादेकस्य संबोधनम् । हे नलकूबर युवां तत्तस्मात्सादनं स्वनिकेतं मत्परमौ संतौ गच्छतम् । वां युवयोरीप्सितोऽपेक्षितो मयि प्रेमा जात एव । अभवः न भवो यस्मिन्सः ॥४२॥ बद्धोलूखलं बद्धमुलूखलं यस्मिंस्तम् ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायां यमलार्जुनमुक्तिनिरूपणं नाम दशमोऽध्यायः ॥ १० ॥

बहुवचनम् । "अस्मदो द्वयोश्च" इति सूत्रेण । यद्वा—क्लिष्टकल्पनातोर्थांतरमेव वरं तदाह—अस्मदित्यादि । इत्यर्थ इति । सर्वत्रास्माकं भगवद्दृष्टिर्भवत्विति तात्पर्यम् । तव पादयोः स्मृत्यां मन इति संबंधः । सतां यथाशास्त्रं वर्तमानानाम् । निवासो वहति स्थानं जगद्यस्य तस्य संबोधनम् । यद्वा—त्वन्निवासभूतानां जगतां जंगमानां नारदादिभक्तानां प्रणामे शिरोस्त्विति । यद्वा—त्वन्निवासोऽयं यो व्रजस्तत्रस्थस्य जगतः सर्वस्य प्रणाम इति संदर्भविश्वनाथौ ॥ ३८ ॥ गोकुलेश्वर इति । दाम्ना चोलूखले बद्ध इति च भक्तिवशवर्त्तित्वमाह—भक्त्यधीनो गोपालत्वं दामबंधनं चापि स्वीकृतवानिति ॥ ३९ ॥ अनुग्रहः कृतः श्रीभ्रंशे भवत्स्मृत्यादिसंभवादिति भावः । "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति वक्ष्यमाणत्वात् ॥ ४० ॥ एतदनुग्रहकरणम् । कृपातिरेकाद्दयाधिक्यात् । तद्वत्साधूनां दर्शनादपि बंधो न किं तु बंधनिवृत्तिरेव तत्कृपया मत्स्मरणदर्शनादिनेति भावः । दर्शनांत इति पाठे दर्शनपर्यंत एव । यद्वा—दर्शनेनांतो नाशो यस्य सः । इह सवितुर्दर्शनादप्यंधानां तमो यथा न नश्यति यथा नानापराधमलिनचेतसामसुराणां श्रीनारदादिदर्शनादपि न बंधक्षय इत्यप्यसूचि ॥ ४१ ॥ प्राधान्याद्वा लिंगसमवायेन यस्मात्साधुदर्शनं बंधहेतुर्न तस्माद्धेतोः । भवः संसारः ॥ ४२ ॥ उलूखले बद्धो बद्धोलूखलः । आहिताग्न्यादित्वात्साधुः । उलूखलस्यापि तच्छत्तयावेशात्तस्मा अपि प्रणामादि कृतम् । तदुक्तं पाद्मे "नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने" । इत्यादिना उत्तरां दिशं तत्रत्यामलकाम् ॥ ४३ ॥ "यत्र मंथां मां विबध्नते रश्मीन् यमितवा इव उलूखलसुतानामवेद्विंद्रजल्गुलः ताता अद्यवनस्पती ऋष्वा वृष्वेभिः सोतृभिः इंद्राय मधुमत्सुतम्" इति श्रुतिर्यमलार्जुनपातमाह । अर्थः—यत्र उलूखले मंथां मंथानमिव मंथानं लोकक्लेशकरं मां विबध्नते विशेषेण बध्नंति मातरः रश्मीनादाय रश्मिभिरित्यर्थः । यमितवा इव विनिग्रहीतुमिव न तु वस्तुतो निग्रहीतुं मातृत्वेन मयि स्निग्धत्वात् तेनोलूखलेन सुतानां पीडितानाम् । कर्मणि षष्ठी । उलूखलपीडितानस्मान् हे इंद्रमोचनसमर्थ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवम् ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः ॥ १ ॥ भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणम् ॥ २ ॥ उलूखलं विकर्षंतं दाम्ना बद्धं च बालकम् ॥ कस्येदं कुत आश्चर्यमुत्पात इति कातराः ॥ ३ ॥ बाला ऊचुरनेनेति तिर्यग्गतमुलूखलम् ॥ विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ॥४॥ न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ॥ बालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ॥ ५ ॥ उलूखलं विकर्षंतं दाम्ना बद्धं स्वमात्मजम् ॥ विलोक्य नंदः प्रहसद्वदनो विमुमोच ह ॥ ६ ॥ गोपीभिः स्तोभितो नृत्यद्भगवान्बालवत्क्वचित् ॥ उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयंत्रवत् ॥ ७ ॥

एकादशे समागत्य वृंदावनमथार्भकैः ॥ वत्सान्पालयतानेन हतौ वत्सबकासुरौ ॥ १ ॥ निर्घातो वज्रपातः स्यादिति भयेन शंकिताः ॥ १ ॥ तल्लक्ष्यं प्रत्यक्षतो दृश्यं पुरतो दृष्ट्वापीत्यर्थः । पतनकारणमविज्ञाय बभ्रमुः ॥२॥ लक्ष्यं कारणं दर्शयति उलूखलमिति । भ्रमप्रकारमाह । कस्येदं राक्षसादेरिदं कर्म कुतो वा कारणादाश्चर्यमुत्पातोऽयमिति कातरा भीताः संतो बभ्रमुरित्यर्थः ॥ ३ ॥ मध्यगेन वृक्षयोर्मध्यगतेन । न केवलमेतावत् । वृक्षाभ्यां निर्गतौ दिव्यौ पुरुषावप्यचक्ष्महि । दृष्टवंतो वयमिति ॥ ४ ॥ केवलं तार्किकास्ते न जगृहुरेव अन्ये तु संदेहयुक्तचित्ता बभूवुरिति ॥५॥ भगवन्मायाविमोहितस्य नंदस्य तत्राचरितमाह । उलूखलमिति ॥६॥ ज्ञास्यंते मामिति शंकमानोऽतीव

अव रक्ष । पादादित्वादाद्युदात्तमाख्यातम् । इदु एवमेव त्वं जल्गुलोसि एनं मुंचामीति जल्पितुं मां च गोपितुं त्रातुं लातुं आदातुं स्वाधीनं कर्त्तुं च समर्थोऽसि यतोऽतोऽवमामित्यर्थः । एवं यदा सर्वान्प्रार्थयन्नपि न मोचनं लभते तदा वनस्पत्योरंतरो गत्वा बंधनदाम त्रोटितुं यावद्बलं करोति तावद्वनस्पती एवोन्मूलितौ । दृष्ट्वा वदति ताता इति । तातो नोस्माकं व्रजवासिनां वनस्पतिप्रसिद्धौ यमलावर्ज्जुनजातीयौ भो वनस्पती अद्यें द्रायेंद्रं प्रति गंतुं सुतं तदुन्मूलनेनात्मानं पीडयतं तदेव मधुमत अमृतयुक्तमतिसम्यगित्यर्थः । यत ऋष्टौ गतिमंतौ युवां स्थावरत्वान्मुक्तौ स्थ इत्यर्थः । ऋष्वेभिर्गतिमद्भिर्जंगमैर्जनैः सोतृभिरस्मद्बंधनकरैरुपलक्षिताविति ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे दशमोऽध्यायः ॥ १० ॥ अर्भकैः सुबलस्तोककृष्णादिभिः । अनेन श्रीकृष्णेन (१)। शंकिता जातशंकाः ॥ १ ॥ श्रीनंदादित्रासावेशेन ततो रक्षितमिव संबोधनं हे कुरुश्रेष्ठेति । यद्वा—अनुचराणां गोपानां किंकरावनुजानीहि । एषां किंकरं कृत्वात्रैव रक्षेत्यर्थः । पतनकारणं तच्छ्रीकृष्णरूपं लक्ष्यं साक्षान्नेत्रगोचरमपि बभ्रमुः । अहो भूमिकंपातिबलवायुचलनादि विना कथमेतौ पेततुरिति भ्रांतिं जग्मुः ॥ २ ॥ इत्यर्थ इति । पूर्वेण संबंधोत्र क्रियापदेन कार्य इत्यर्थः ॥ ३ ॥ विकर्षताऽनेन हेतुना कर्त्रा वा निष्कासिताविति शेषः ॥ ४ ॥ ते गोपाः । तदुक्तं बालोक्तमिति न जगृहुरिति किं तस्यातिबालस्य तत्प्रत्यक्षं तर्वोर्वृक्षयोरुत्पाटनं समूलयोर्भूमेर्निष्कासनं न घटेत संगच्छेत । तार्किकास्तर्कप्रधानाः । अन्ये तु तार्किकेतरे तु पूर्वकृतपूतनामारणशकटोच्चाटनादिना तस्मिन्ससंदेहा जाता अनेनैवैतत्कृतमुत्पाततो वा जातमिति द्विचित्ता बभूवुरिति भावः ॥ ५ ॥ मायाविमोहितत्वाच्छोकं न चक्रे किं तु प्रहसन्मुखस्तमुलूखलात्पृथक् चकार । अहो किमर्थं बाल उलूखले बद्ध इत्येवं वदन्निति भावः "प्रहसद्वदनाम्" इति पाठोपि विष्णुपुराणोक्तरीत्या श्रेयान् "नवोद्गताल्पादंतांशुमितहासं च बालकम्" इति तस्य प्रकटहासश्च पितृतोपि शंकमानस्य तत्प्रसाददर्शनेन स पुनः पितृसंतोषार्थं निजदुःखाभाव बोधनाय जात इति तोषिणीकारः ॥ ६ ॥ ज्ञास्यंते मा अयं महत्पुरुषः साक्षादक्लिष्टकारित्वादिति गोपादयो बोधिष्यंते एतन्माभूदिति शंकमानस्तेषां प्रीत्यर्थमतीव बाल्यं बालभावम् । तद्बालभावम् । बालवदित्युक्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकम् ॥ बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥ ८ ॥ दर्शयं स्तद्विदां लोक आत्मनो भृत्यवश्यताम् ॥ व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ॥ ९ ॥ क्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्युतः ॥ फलार्थी धान्यमादाय ययौ सर्वफलप्रदः ॥ ॥ १० ॥ फलविक्रयिणी तस्य च्युतधान्यकरद्वयम ॥ फलैरपूरयद्रत्नैः फलभांडमपूरि च ॥ ११ ॥ सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् ॥ रामं च रोहिणी देवी क्रीडंतं बालकैर्भृशम् ॥ १२ ॥ धूलिधूसरितांगस्त्वं पुत्र मज्जनमावह ॥ जन्मर्क्षं तेऽद्य भवति विप्रेभ्यो देहि गाः शुचिः ॥ ॥ १३ ॥ पश्यपश्य वयस्यांस्ते मातृमृष्टान्स्वलंकृतान् ॥ त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः ॥ १४ ॥ नोपेयातां यदाहूतौ क्रीडासंगेन पुत्रकौ ॥ यशोदां प्रेषयामास रोहिणी पुत्रवत्सलाम् ॥ १५ ॥ क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजम् ॥ यशोदाऽजोहवीत्कृष्णं पुत्रस्नेहस्नुत स्तनी ॥ १६ ॥ कृष्णकृष्णारविंदाक्ष तात एहि स्तनं पिब ॥ अलं विहारैः क्षुत्क्षांतः क्रीडाश्रांतोऽसि पुत्रक ॥ १७ ॥ हे रामागच्छ ताताशु सानुजः कुलनंदनः ॥ प्रातरेव कृताहारस्तद्भवान्भोक्तुमर्हति ॥ १८ ॥ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः ॥ एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः ॥ १९ ॥ श्रीशुक उवाच ॥ इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप ॥ हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयम् ॥ २० ॥ गोपवृद्धा महोत्पाताननुभूय बृहद्वने ॥ नंदादयः समागम्य व्रजकार्यममंत्रयन् ॥ २१ ॥ तत्रोपनंदनामाह गोपो ज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः ॥ २२ ॥ उत्थातव्यमितोऽस्माभिर्गोकुलस्य हितैषिभिः ॥ आयांत्यत्र महो त्पाता बालानां नाशहेतवः ॥ २३ ॥ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥ २४ ॥

बाल्य मनुकरोति स्म तदाह । गोपीभिरिति । स्तोभितः करतालादिना प्रोत्साहितः ॥७॥ इदमानयेत्याज्ञप्त आनेतुमसमर्थ इव बिभर्ति केवलं पीठादि । बाहुक्षेपं करचालनं च । तद्विदां चेति चकारान्वयः ॥ ८ ॥ तदैश्वर्यं विदंति ये तेषाम् । एवं व्रजस्य हर्षमुवाहेति ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ ॥१८॥१९॥२०॥ रंतुं वृंदावनं गंतुमंतः कृष्णेन यंत्रिताः ॥ स्वतंत्रा इव नंदाद्या मंत्रमेतममंत्रयन् ॥ १ ॥ व्रजकार्यं गोकुलस्य हितकृत्यम् ॥२१॥२२॥२३॥२४॥

न तु स बालः किं तु सर्वकर्त्ता । मुग्धः सुंदरः । तद्वशो गोपीवशः । तद्वशत्वमेवाह ॥७॥ पीठकं काष्ठपीठम् । उन्मानं प्रस्थम् । पादुकं पादपीठं पादरक्षणं वा ॥८॥ ऐश्वर्यम् ईश्वरभावम् । यद्वा—साक्षात्स्वयं भगवाने वैषावतीर्ण इति जानतां नारदादीनाम् । उवाह प्राप ॥ ९ ॥ अतः परं प्रक्षिप्तः पाठोऽस्ति गोपवृद्धा महोत्पाता नित्यतोर्वाक् अतो न व्याख्यायते ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ ॥१६॥१७॥१८॥१९॥२०॥ अंतश्चेतसि । यंत्रिताः प्रेरिताः । एतं वक्ष्यमाणम (१) ॥ २१ ॥ तत्र तेषु नंदादिषु ॥२२॥ इतो बृहद्वनात् । गोकुलस्य । गोयूथस्य अत्र बृहद्वने ॥२३॥ अनः शकटम् ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्रवातेन नीतोऽयं दैत्येन विपदं वियत् ॥ शिलायां पतितस्तत्रः परित्रातः सुरेश्वरैः ॥ २५ ॥ यन्न म्रियेत द्रुमयोरंतरं प्राप्य बालकः ॥ असा वन्यतमो वापि तदप्यच्युतरक्षणम् ॥ २६ ॥ यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः ॥ तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः ॥ २७ ॥ वनं वृंदावनं नाम पशव्यं नवकाननम् ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम् ॥ २८ ॥ तत्तत्राद्यैव यास्यामः शकटान्युंक्त मा चिरम् ॥ गोधनान्यग्रतो यांतु भवतां यदि रोचते ॥ २९ ॥

विपदं वीनां पक्षिणां पदं विहारस्थानं विगतप्रतिष्ठं वा । वियन्नभः ॥ २५ ॥ अन्यतमो वा कश्चिद्बालः । अच्युतेनैव रक्षणमासीत् ॥ २६ ॥ अरिष्टोऽनर्थः । इतः स्थानात् ॥ २७ ॥ पशव्यं पशुभ्यो हितम् । यतः नवानि काननान्यवांतराणि विद्यंते यस्मिंस्तत् ॥ २८ ॥ २९ ॥

पक्षिणां विहारो न केवलमाकाशे किं तु—भूमावपीत्यरुच्या विगता प्रतिष्ठावमानं यस्य तद्विगतप्रतिष्ठमनंतपदवाच्यत्वाद्वियतः तत्र तदा ॥ २५ ॥ असौ कृष्णो बालकः । अन्यतमः कृष्णाद्भिन्नः । यन्न म्रियेत तदच्युतरक्षणमिति योजना ॥ २६ ॥ औत्पातिकः उत्पातप्रभवोऽरिष्टोऽशुभसूचकः “अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च” इति मेदिनी । अन्यत्र स्थानांतरे ॥ २७ ॥ अवांतराणि निधुवनबिल्वादीनि । यद्वा—कः ककार आनने मुखे आदौ येषां ते काननाः कदंबकपित्थकेशरकालस्कंधादयो वृक्षा नवा नित्यनूतनाः कानना यत्र तत्तथा । यद्वा—नवसंख्याकाः काननाः कदंबकर्णिकारकमलकेसरकांचनारकालस्कंधकपित्थकुंजराशनकेतकरूपा यत्र तत्तथा । भाविलीलाभिप्रायेणाह—यद्वा—न बकस्यासुरस्याननं मुखं यत्र तत्तथा । बकमुखस्यात्रैवोत्पाटनात् । अत्र पक्षे नञर्थेन नशब्देन समासवबयोस्सावर्ण्यं चानुध्येयम् । यद्वा—पुण्याद्रयः गोवर्द्धनबृहत्सान्वादयः । पुण्यतृणानि कुशकाशोशीरादीनि । पुण्यवीरुधो विष्णुक्रांतामाधव्याद्याः । यद्वाद्रिपदेन द्रुमा ग्राह्याः “अद्रयो द्रुमशैलार्काः” इत्यमरः । तथा च पुण्यद्रुमाः कदंबतमालादयः । पुण्या अद्रितृणवीरुधो यत्र तत्तथा “समासांतोच्” ॥ २८ ॥ यतस्तद्वनमेतादृशं ततस्तत्र वने युंक्त योजयत यूयम् । नूयते स्तूयते इति नवं स्तुतं कं जलं यस्याः सा नवका कालिंदी “न जलं यमुनावारि साक्षाद्ब्रह्मैव केवलम्” इत्युक्तेः । नवकाऽऽननेऽग्रे यस्य तत्तथेति “मुखाग्रचेष्टाकृष्णास्येष्वाननं चलनेऽपि च” इति यादवः । नवानां हर्यादियोगेश्वराणां कं सुखं यया सा नवका भक्तिस्तस्या आननं चेष्टनं यत्रेति वा । नवानां जंबूद्वीपस्थखंडानां कं शिरः कर्मभूमित्वेन मुख्यत्वान्नवकं भारतखंडं तस्याननं मुखमिव श्रेष्ठम् । “भारते व्रजभूः श्रेष्ठा तत्र वृंदावनं परम्” इति वा नौतीति नवं कस्याननं काननं नवं स्तुवत्काननं यत्र इति वा नवकाननम् । यद्वा—नवसु खंडेषु कीयते गीयते मत्स्यादिरूपैरिति नवको हरिस्तस्याननं चेष्टाऽत्रेति नवकाननम् । नवानां नंदानां कं सुखं येन स नवकस्तस्याननं चेष्टनं नवकाननं तद्विद्यते नित्यमत्रेति तथा मत्वर्थीयोच् । न च नंदीश्वरोऽस्मत्प्राचीनराजधानीं गंतुं शक्यः यद्भयान्नंदीश्वरात्पलाय्यात्र महावने वसामस्तस्याविष्टस्य संप्रत्यपि तत्रैव स्थितेर्न च व्रजभूमेरन्यत्र यियासा संभवत्यरोचकत्वादेव तस्मान्नंदीश्वरमहावनयोर्मध्यवर्त्तिस्थानमेव वासार्थं युज्यते इति विचार्याहवनमिति । “नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत्” इति नीत्या च वृंदायाः पाद्मोर्जमाहात्म्योक्तरीत्या भगवत्प्रेयसीत्वं प्राप्ताया वनं नवकाननमित्युक्तेर्बृहद्वनस्य जीर्णत्वं प्राप्तं किं च कारस्करादीनामपुण्यवृक्षादीनामपि तत्र जातत्वात्पुण्यत्वमेवेति । तत्र विशेषस्तु हरिवंशीयकृष्णवाक्यतोऽवसेयः । तथाहि “श्रूयते हि वनं रम्यं पर्याप्ततृणसंभवम् । नाम्ना वृंदावनं नाम स्वादुवृक्षफलोदकम् । अझिल्लिकंटकवनं सर्वैर्गुणगणैर्युतम् । कदंबपादपप्रायं यमुनातीरसंस्तुतम् । स्निग्धशीतानिलवनं सर्वर्त्तुनिलयैर्युतम् । गोपीनां सुखसंचारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छ्रुत्वैकधियो गोपाः साधुसाध्विति वादिनः ॥ व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छदाः ॥ ३० ॥ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च ॥ अनस्स्वारोप्य गोपाला यत्ता आत्तशरासनाः ॥ ३१ ॥ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वत ॥ तूर्यघोषेण महता ययुः सहपुरोहिताः ॥ ३२ ॥ गोप्यो रूढरथा नूत्नं कुचकुंकुमकांतयः ॥ कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः ॥ ३३ ॥ तथा यशोदारोहिण्यावेकं शकटमास्थिते ॥ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥ ३४ ॥ वृंदावनं संप्रविश्य सर्वकालसुखावहम् ॥ तत्र चक्रुर्व्रजावासं शकटैरर्धचंद्रवत् ॥ ३५ ॥ वृंदावनं गोवर्धनं यमुनापुलिनानि च ॥ वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ॥ ३६ ॥ एवं व्रजौकसां प्रीतिं यच्छंतौ बालचेष्टितैः ॥ कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ॥ ३७ ॥

एकधियो विप्रतिपत्तिरहिताः । व्रजान्छकटयूथान् । रूढाः शकटादिष्वारोपिताः परिच्छदा यैस्ते ॥ ३० ॥ यत्ताः कृतप्रयत्नाः ॥ ३१ ॥ ३२ ॥ नूत्नैर्नवीनैः कुचगतैः कुंकुमैः कांतिर्यासां ताः । नूत्नेषु कुचेषु यत्कुंकुमं तेन कांतिर्यासामिति वा ॥ ३३ ॥ ३४ ॥ व्रजावासं गोकुलस्य वसतिस्थानम् ॥ ३५ ॥ ३६ ॥ स्वकालेन वत्सपालनयोग्यकालेन ॥ ३७ ॥

चारुचित्रवनांतरम् । तत्र गोवर्द्धनो नाम नातिदूरे गिरिर्महान् । राजते दीर्घशिखरो नंदनस्येव मंदरः । मध्ये चास्य महाशाखो न्यग्रोधो योजनोच्छ्रितः । भांडीरो नाम शुशुभे नीलमेघ इवांबरे । तत्र गोवर्द्धनं चैव भांडीरं च वनस्पतिम् । कालिंदीं च नदीं रम्यां द्रक्ष्यावश्च यतः सुखम्'' इति । अत्र नातिदूर इति नातिप्रांते न च मध्ये किं तु पार्श्वदेश एवेत्यर्थः । "अहो वृंदावनं रम्यं यत्र गोवर्द्धनो गिरिः'' इति स्कांदात् । यत्तु भांडीरमध्यस्थितत्वमुक्तं तदित्थं प्रतिपद्यते । स खलु वृंदावनसीमस्थात्क्रीडनकुट्टिमादुत्तरस्य योजनद्वयांते यमुनातीरे दक्षिणे संप्रति च भांडीरतया प्रसिद्धो देशो योजनप्रमाणोस्ति एवं योजनत्रये लब्धे तत्परस्य योजनद्वयस्य मिश्रणया वृंदावनस्य पंचयोजनप्रमाणत्वं सिध्यति तदुक्तं गौतमीये—वृंदावनमुद्दिश्य भगवता "पंचयोजनमेवास्ति वनं मे देहरूपकम् ॥'' इति चक्रवर्त्तितोषिणीकारौ ॥ २९ ॥ विप्रतिपत्तिरहित विरुद्धोक्तिवर्जिताः । "गृहे वस्त्रे संविधायां तिरस्कारे परिच्छदे'' इति कोशः । परिच्छदा दोहपात्रमंथन्यादयः ॥ ३० ॥ अनस्सु शकटेषु । सर्वोपकरणानि भोजनपात्रशय्यापेषणकिर्त्तनयंत्रादिरूपाणि ॥ ३१ ॥ शृंगाणि शृंगाकाराणि वाद्यानि मृगशृंगाणि वा । यद्वा—"शृंगं तु गवलं हेमनिबद्धाग्रिमपश्चिमम् । रत्नजालस्फुरन्मध्यं मंत्रघोषाभिधं स्मृतम् ॥'' इति भक्तिरसामृतोक्तलक्षणं शृंगमत्र ज्ञेयम् । 'गवलं माहिशृंगम् ।' इत्यमरः । केचित्तु गोरिदं गवलमिहालप्रत्ययो बाहुलकात् स पुरोहिताः शांडिल्यसहिताः "शांडिल्यः सर्वधर्मज्ञो नंदादीनां पुरोहितः'' इति स्कांदोक्तेः ॥ ३२ ॥ आद्यसमासे कुचपदे लक्षणाकरणत्समासांतरमाह—नूत्नेष्विति । निष्कं पदकसंज्ञं हेमभूषणम् ॥ ३३ ॥ तत्कथा कृष्णरामकथा तल्लीलेति यावत् ॥ ३४ ॥ अर्द्धचंद्रवदर्द्धचंद्राकारम् । अर्द्धचंद्रवदिति पश्चाद्भागे प्रतिस्वद्रव्यस्थापनार्थमग्रभागे विस्तीर्णगवादिसुखनिर्गमार्थं शकटीवाटपर्यंतश्चंद्रार्द्धाकारसंस्थित इति विष्णुपुराणे एवं तद्दिने शकटैरेव चक्रुः दिनांतरे तु यथा श्रीहरिवंशे "कंटकीभिः प्रवृद्धाभिस्तथाकंटकिभिर्द्रुमैः । निखातोच्छ्रितशाखाभिरभिगुप्तं समंततः ॥'' इति । कालियह्रदाद्दक्षिणप्रायदिशि चतुःक्रोशीविस्तीर्णोष्टक्रोशीदीर्घो व्रजावासगोवर्द्धनमग्रे विधायैव इति ज्ञेयम् ॥ ३५ ॥ राममाधवयोः बलकृष्णयोः । उत्तमाऽत्यंता हे नृपेति संबोधन तु प्रहर्षाधिक्यादेव उत्तमा वैकुंठाद्यपेक्षाया "अहो मधुपुरी धन्या वैकुंठाच्च गरीयसी'' इति प्राप्तैतादृशमाहात्म्या मधुवनमहावनापेक्षया चेति ज्ञेयम् ॥ ३६ ॥ कलवाक्यैर्मधुरास्फुटैर्वचनैः "ध्वनौ तु मधुरास्फुटे । कले''

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिदूरे व्रजभुवः सह गोपालदारकैः ॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ॥३८॥ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ॥ क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः ॥ ३९ ॥ वृषायमाणौ नर्दंतौ युयुधाते परस्परम् ॥ अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृतौ यथा ॥ ४० ॥ कदाचि द्यमुनातीरे वत्सांश्चारयतोः स्वकैः ॥ वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥ ४१ ॥ तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ॥ दर्शयन्बल देवाय शनैर्मुग्ध इवाऽऽसदत् ॥ ४२ ॥ गृहीत्वाऽपरपादाभ्यां सहलांगूलमच्युतः ॥ भ्रामयित्वा कपित्थाग्रे प्राहिणोद्गतजीवितम् ॥ स कपित्थैर्म हाकायः पात्यमानैः पपातह ॥ ४३ ॥ तं वीक्ष्य विस्मिता बालाः शशंसुः साधुसाध्विति ॥ देवाश्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥ ४४ ॥ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ सप्रातराशौ गोवत्सांश्चारयंतौ विचेरतुः ॥ ४५ ॥ स्वंस्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ॥ गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलम् ॥ ४६ ॥ ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ॥ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिव च्युतम् ॥ ४७ ॥ स वै बको नाम महानसुरो बकरूपधृक् ॥ आगत्य सहसा कृष्णं तीक्ष्णतुंडोऽग्रसद्बली ॥ ४८ ॥

कौमारलीलां निरूपयति अविदूर इत्यादिना ॥३८॥ क्षेपणैर्बिल्वामलकादि क्षिपतो दूरे चालयतः। किंकिणीयुक्तैः पादैः क्षिपतस्ताडयतः ॥ वृक्षादीनिति शेषः। वत्सपाला एव द्वित्राः कंबलादिपिहिता वृषरूपमनुकुर्वंति तैः सह स्वयमपि तथैव ॥ ३९ ॥ वृषायमाणौ नर्दंतौ तदनुकारिशब्दान्कुर्वंतौ युयुधाते इत्यर्थः। रुतैः शब्दैः। जंतून् हंस मयूरादीन् ॥ ४० ॥ ४१ ॥ मुग्ध इवाजानन्निवाऽऽसदत्समीपमागमत् ॥४२॥ सहलांगूलं यथा भवति तथा अपरपादाभ्यां गृहीत्वा ॥४३॥४४॥ सर्वेषां लोकानामेकौ मुख्यौ पालकौ। प्रातराशः प्रातर्भोज्यमन्नं तत्सहितौ ॥ ४५ ॥ अभ्याशं समीपम् ॥ ४६ ॥ ४७ ॥ ४८ ॥

इत्यमरः। तद्योग्यकालेन वत्सपालनार्हसमयेन ॥ ३७ ॥ कौमारलीलां कुमारावस्थलीलाम्। अविदूरे समीपे। चारयामासतुः तृणानि भक्षयांचक्रतुः ॥ ३८ ॥ क्षेपणे रश्मयंत्रैर्वा कृत्रिमगोवृषैर्मृदादिनिर्मित गोवृषैर्वा ॥ ३९ ॥ इत्यर्थ इति। नहि केवलं शब्दं युद्धं विना वृषाः कुर्वंतीति भावः। अनुकृत्य विडंब्य ॥ ४० ॥ जिघांसुः हननेप्सुः ॥ ४१ ॥ तं दैत्यं मुग्ध इवाज्ञात इव ॥ ४२ ॥ अपरपादाभ्यां पश्चिमपादाभ्याम्। कपित्थाग्रे दधिफलसंज्ञवृक्षोपरि प्राहिणोच्चिक्षेप। कपित्थाग्रे प्रक्षेपणं तु तदानींतनक्रीडोपयोगिफलपातनार्थमेवेति तोषिणीकारः। स दैत्यः। अन्यैः कपित्थैः। कपित्थशाखायुक्तफलैर्वा ॥ ४३ ॥ तं पतितं दैत्यम् ॥ ४४ ॥ तौ कृष्णबलौ। 'एके मुख्यान्यकेवलाः' इत्यमरः। सर्वलोकैकपालकावपि भक्तवात्सल्याद्वत्सपालकौ। सप्रातराशौ प्रातर्भोजनसहितौ। प्रातःशब्दोऽत्र पूर्वाह्णपरः। "सायं प्रातर्मनु ष्याणामशनं देवनिर्मितम्" इति स्मृतौ तथा व्याख्यातत्वादन्यथा आद्ययामे न भुंजीत' इति विरोधः स्यात्। मध्याह्नकर्त्तव्यभोजनसहिताविति तात्पर्यम्। बालत्वाद्यथाश्रुतमेवास्तु वा ॥४५॥ जलं पाययिष्यंतः पानं कार यिष्यंतः। जलस्याशयः स्थानं महासरः तच्च नंदीश्वरगिरेः पूर्वतः प्रसिद्धं बकस्थलम्। तदभ्याशम् 'स्थानेऽभिप्राय आशयः' इति यादवः ॥ ४६ ॥ ते गोपाः। तत्र जलाशयाभ्याशे। महत् सत्त्वं पराक्रमो व्यवसायो वा यस्य तमसुरम्। "सत्त्वोऽस्त्री जंतुषु क्लीबे व्यवसाये पराक्रमे। आत्मभावे पिशाचे च रदे द्रव्यस्वभावयोः॥" इति यादवः। दृष्ट्वा च तत्रसुस्त्रेसुः। उद्विग्ना बभूवुरिति यावत् ॥ ४७ ॥ स महासत्त्वो नाम्नापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ॥ बभूवुरिंद्रियाणीव विना प्राणं विचेतसः ॥ ४९ ॥ तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः ॥ चच्छर्द सद्योऽतिरुषाऽक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ॥ ५० ॥ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः ॥ पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसाम् ॥ ५१ ॥ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः ॥ समीडिरे चानकशंखसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ॥ ५२ ॥ मुक्तं बकास्यादुपलभ्य बालका रामादयः प्राणमिवेंद्रियो गणः ॥ स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ॥ ५३ ॥ श्रुत्वा तद्विस्मिता गोपा गोप्यश्चातिप्रियादृताः ॥ प्रेत्यागतमिवौत्सुक्यादैक्षंत तृषितेक्षणाः ॥ ५४ ॥ अहो बतास्य बालस्य बहवो मृत्यवोऽभवन् ॥ अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयम् ॥ ५५ ॥ अथाप्यभिभवंत्येनं नैवैते घोरदर्शनाः ॥ जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत् ॥ ५६ ॥

राम आदिर्येषां ते न तु रामः ॥ ४९ ॥ ५० ॥ तुंडयोश्चंच्वोः । वीरणवद्ग्रंथितृणविशेषवत् ॥ ५१ ॥ समीडिरे तुष्टुवुः । आनकैः शंखैरन्यैश्च संस्तवैः सह ॥ ५२ ॥ स्वस्थानमागतं प्राणमिव कृष्णम् । प्रणीय एकीकृत्य ॥ ५३ ॥ अतिप्रियेणातिप्रीत्या आदृताः सादराः । प्रेत्यागतमिव लोकांतरादागतमिव । तृषितान्यतृप्तान्यमृतं पिबंतीवेक्षणानि येषां ते ॥ ५४ ॥ अहो बतेत्यादिश्लोकत्रयस्य इति नंदादय इत्यनेनान्वयः । अपि एवमपि तेषामेवानिष्टमासीत् यतस्तैः पूर्वमन्येषां भयं कृतम् ॥ ५५ ॥ अथ ते घोरदर्शना अपि नाभिभवंति न धर्षयंत्येव ॥ ५६ ॥

बको रूपमपि बकस्यैव दध्रे इति भावः । सहसा शीघ्रम् ॥ ४८ ॥ राम आदिर्येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिरत आह—न तु राम इति विचेतसो ज्ञानहीनाः पाषाणतुल्याः । यद्वा—रामस्यापि तादृशत्वे भ्रातृस्नेह एव हेतुः रुक्मिणीहरणे तदुक्तम् । 'श्रुत्वैतद्भगवान्रामः' इत्यारभ्य 'भ्रातृस्नेहपरिप्लुतः' इति । तदपि तद्योगमाययैवेति ध्येयम् ॥ ४९ ॥ जगद्गुरोर्ब्रह्मणः । तुंडेन चंचुना ॥ ५० ॥ 'वीरणं श्रीतृणं विदुः' इति कोशात् । कटोपादानभूतमिति प्रसिद्धम् । यस्य मूलमुशीरं तद्वीरणमिति तोषणी ॥ ५१ ॥ बकारिं कृष्णम् । तत् बकहिंसनरूपं वा तत् । तन्मरणोत्तरं पुष्पवृष्ट्यादि ॥ ५२ ॥ परिरभ्य आलिंग्य । तत् बकहिंसनम् ॥ ५३ ॥ तत् बकमारणम् । दर्शनेऽलंबुद्धिरहिता इति तृषितेक्षणार्थः ॥ ५४ ॥ अहो आश्चर्ये । बत खेदे । मृत्यवो मृत्युहेतवः । एवमपि बहुविधमृत्युहेतौ सत्यपि । तेषां मृत्युहेतूनाम् । यतः कारणात् । तैर्मृत्युहेतुभिः पूतनादिभिः । पूर्वमन्यजन्मनि । अन्येषां लोकानाम् । भयं दुःखम् । 'भुंक्ते जनो यः । परदुःखदस्तत्' इत्युक्तेः । "यो हि यस्य विषमं विचिंतयेत्प्राप्नुयात्सकुमतिर्हि तत्फलम्" इति हारिविलासोक्तेश्च । यद्वाऽनेन श्रीकृष्णेन पूर्वमभयं भयनिवर्त्तकं कर्म कृतम् ॥ ५५ ॥ यद्यपि घोरदर्शना । अथापि तथापि । एनं श्रीकृष्णम् । धर्षयंति तिरस्कुर्वंति । जिघांसया हननेच्छया । पतंग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित् ॥ गर्गो यदाह भगवानन्वभावि तथैव तत् ॥ ५७ ॥ इति नंदादयो गोपाः कृष्णरामकथां मुदा ॥ कुर्वंतो रममाणाश्च नाविंदन्भववेदनाम् ॥ ५८ ॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥ ५९ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे वत्सबकवधो नामैकादशोऽध्यायः ॥ ११ ॥ श्रीशुक उवाच ॥ क्वचिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान् ॥ प्रबोधयञ्छृंगरवेण चारुणा विनिर्गतो वत्सपुरःसरो हरिः ॥ १ ॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः ॥ स्वान्स्वान्सहस्रोपरि संख्ययाऽन्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा ॥ २ ॥ कृष्णवत्सैरसंख्यातैर्यूथीकृत्य स्ववत्सकान् ॥ चारयंतोऽर्भलीलाभिर्विजह्रुस्तत्रतत्र ह ॥ ३ ॥

गर्गो यदाह " तस्मान्नंदाऽऽत्मजोऽयं ते नारायणसमो गुणैः " इत्यादि ॥ ५७ ॥ ५८ ॥ ५९ ॥ वत्सयूथगतं हत्वा वत्सदंभासुरं हरिः ॥ मुनियूथगतं चाहन्नग्रण्यं दंभिनां बकम् ॥ १ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे पूर्वार्धे टीकायां वत्सबकवधो नामैकादशोऽध्यायः ॥ ११ ॥ द्वादशे तु महासर्पवपुर्धरमघासुरम् ॥ वत्सपालगिलं क्रुद्धो गलेऽहन्निति वर्ण्यते ॥ १ ॥ महावकगलक्रीडा केवलस्य न कौतुकम् ॥ इतीवाघासुरमुखे ससखः प्राविशद्धरिः ॥ २ ॥ क्वचित्कदाचिद्वनाशाय वने एव प्रथमं भोजनं कर्तुम् ॥ १ ॥ तेनैव शृंगरवेण श्रीकृष्णेन वा सह पृथुकाः बालाः । स्निग्धाः स्नेहयुक्ताः । रम्याः शिग्वेत्रादयो येषां ते शिक्शिक्यम् । सहस्राधिकसंख्यया युक्तान्वत्सान् ॥ २ ॥ ३ ॥

वच्छलभवत् । " पतंगः शलभे शालिप्रभेदे पक्षिसूर्ययोः " इति मेदिनी । " असद्ब्रह्मेति चेद्वेद: स्वयमेव भवेदसत् " इति श्रुतिरिवेति भावः ॥ ५६ ॥ अहो ब्राह्मणानां प्रभाव इत्यभिप्रेत्याह–गर्ग इति ॥ ५७ ॥ इति पूर्वोक्तरीत्या । रममाणास्साह्लादाः । भववेदनां संसारदुःखम् ॥ ५८ ॥ कौमारैर्बालावस्थाभवैः विहारैः क्रीडाविशेषैः । कश्चित्स्तंभादिमूले निलीय तिष्ठति तमपरोन्विष्य गृह्णातीति या क्रीडा तन्निलायनं स्वशरीरेण मृद्दार्वाद्यैर्जलरोधनं सेतुबंधः । यथा वृक्षाद्वृक्षांतरमुत्प्लवते तथोत्तुंगमृत्तिकानिर्मितशिशुमाराकारोपरि शिरसि पदं निधाय पतनमुत्प्लवनम् । पांशुभित्तौ मणिं निधाय तदुपरि हस्तं निदधाति कश्चित्कश्चित्तमन्विष्य गृह्णातीतियमपि काचित्क्रीडास्ति साऽस्रादिपदाज्ज्ञेया । अन्या वाऽऽधुनिकबालप्रसिद्धा वीटाक्षेपकंदुकक्षेपादिरूपा इति ॥ ५९ ॥ वत्सस्य दंभः छद्म यस्य स वत्सदंभस्स चासावसुरश्चेति तथा । अग्रण्यं मुख्यम् । यत्र बकस्स्थितस्तत्रर्षयोप्यतिष्ठंस्तपः कुर्वाणा इति ज्ञेयम् (१) ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकादशोऽध्यायः ॥ ११ ॥ वत्सान्पालांश्च गिलति निगिरतीति तथा तं गले प्रविश्याहन्निति (१) । न कौतुकं न कुतूहलम् । इति हेतोः (२) । शृंगरवेण प्रबोधयन् । वत्साः पुरस्सरा यस्य सः ॥ १ ॥ शृंगरवेण साहित्यासंभवादर्थांतरमाह--श्रीकृष्णेनेति । रामस्तु जन्मर्क्षकशांतिस्नानार्थं मात्रा गृह एव रक्षित इति विश्वनाथः । 'पृथुकौ बालचिपिटौ' इति कोशः । श्रंसतेश्शिरादेशः कुडागमः प्रत्ययलोपश्चार्षः ॥ २ ॥ तत्रतत्र यमुनातटगोवर्द्धनादिषु सहस्रस्योपरि संख्याऽयुतादिस्तयाऽन्वितान् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलप्रवालस्तबकसुमनःपिच्छधातुभिः ॥ काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ॥ ४ ॥ मुष्णंतोऽन्योन्यशिक्यादीन्ज्ञातानाराच्च चिक्षिपुः ॥ तत्रत्याश्च पुनर्दूराद्धसंतश्च पुनर्ददुः ॥ ५ ॥ यदि दूरं गतः कृष्णो बनशोभेक्षणाय तम् ॥ अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ॥ ६ ॥ केचिद्वेणून्वादयंतो ध्मांतः शृंगाणि केचन ॥ केचिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः परे ॥ ७ ॥

काचादिभिः पूर्वं मातृभिर्भूषिता अपि पुनः स्वयं फलप्रवालादिभिरात्मानमभूषयन्नित्यर्थः ॥ ४ ॥ मुष्णंतश्चोरयंतः ॥ ५ ॥ यदि दूरं गतः कृष्णो भवति तर्हि ॥ ६ ॥ ध्मांतो वादयंतः । भृंगैः सह ॥ ७ ॥

एवं वत्सानां बालानाञ्चासंख्येयत्वमुक्तम् । इत्थं वने बालैः पाल्यमानानामपि वत्सानां यदियत्ता नाऽभूत्तर्हि व्रजे रुद्धानां तर्णकानां तथा गोसंगतानां तथा तत्तन्मातॄणामन्यासां च गवां तथा वत्सतरीणां वत्सतराणां वृषाणां च श्रीगोपालदेवप्रभावेण नित्यं विवर्द्धमानानामियत्ता कथमस्तु । महिष्यादयः पशवश्च केन वा गण्यास्तदनुसारेण गोप्यो गोपादयश्चानंता ज्ञेयास्तथा चागमे रासध्यानम् ‘ प्रमदाशतकोटिभिराकलितः ’ इति तत्तत्समावेशादिकं त्वचिंत्यैश्वर्यादेव । कृष्णस्य तु वत्सैरसंख्यातैरसंख्यसंख्यातैरित्यर्थः । असंख्यसंज्ञसंख्या क्षीरस्वामिदृष्ट्या ज्ञेया । यथा “ एकं दशशतसहस्राण्ययुतं प्रयुताख्यलक्षमथ नियुतम् । अर्बुदकोटिर्न्यर्बुदपद्मे खर्वः निखर्वमिति दशभिः ॥ गणनान्महाब्जशंखसमुद्रमध्यांतं परार्द्धञ्च । स्वहतं परार्द्धसमितं तत्स्वहतं भूर्य्यतोऽसंख्यम् ॥ ” इति प्रयुतसंज्ञं लक्षम् । अर्बुदसंज्ञा कोटिरित्यर्थः । परार्द्धपर्यंताष्टादशसंख्या दशदशगुणिता ज्ञेयाः । तत्र च द्वंद्वैक्यं महाब्जादिकं संख्यापंचकं ज्ञेयम् । स्वहतं स्वेन गुणितमित्यर्थः । परार्द्धेन गुणितं परार्द्धं भूरिसंज्ञं भूरिणा गुणितं भूरिचासंख्यसंज्ञमिति सिद्धम् । ततश्च कृष्णवत्सैर्महायूथैः सह स्वकान्स्वकान्परार्द्धादिसंख्यान्वत्सान्पृथक्पृथग्यूथीकृत्येत्यर्थः । न च षोडशक्रोशीमात्रस्य वृंदावनस्य प्रदेशे तावंतो वत्सा नैव मांतीति वाच्यं भगवद्विग्रहस्येव धाम्नश्चास्य तथापरिमितत्वेप्यचिंत्यशक्त्या विभुत्वात् । तत्प्रदेशैकदेशेऽपि पंचाशत्कोटिपरिमाणब्रह्मांडार्बुदानां भगवतैव ब्रह्मणे एतदुत्तराध्याये दर्शयिष्यमाणत्वात् । अत एवोक्तं भागवतामृते—“ एवं प्रभोः प्रियाणाञ्च धाम्नश्च समयस्य च । अविचिंत्यप्रभावत्वादत्र किंचिन्न दुर्घटम् ॥” इति तोषिणीचक्रवर्त्तिकारौ ॥ ३ ॥ काचो मृद्विकारविशेषः । गुंजा कृष्णाग्राखिलरक्तबीज औषधिविशेषः । मणयो विद्रुमादयः । इत्यर्थ इति । बालत्वादेव पूर्वभूषणान्याच्छादयामासुरिति तात्पर्यम् । स्वस्वगृहसमृद्ध्यपेक्षया काचादयो ज्ञेयाः ॥ ४ ॥ आरात् दूरम् । तत्रत्या दूरस्थाः शिक्यादीनिति । शिक्येभ्य उत्तार्य प्रथममेवान्नादिपात्राणि मुद्रितमुखत्वात्पिपीलिकादिदुःप्रवेशानि कचित्तरुतले कंटकादिभिरावृत्य स्थापितानीति ज्ञेयम् । तानेव ज्ञातान्सतः आराद्दूरे चिक्षिपुः । तत्रैव विद्रुत्य न तु प्रापिते सति तत्रत्या बालास्ततोपि दूरं चिक्षिपुरेवमनवस्थया स्वस्वद्रव्यमप्राप्नुवतो बालान्रुदन्मुखानालोक्य त एव हसंतो ददुः ॥ ५ ॥ पूर्वमहं कृष्णं स्पृशामि त्वत्तोऽपि पूर्वमहं स्पृशामीत्युक्त्या तं संस्पृश्य ॥ ६ ॥ वेणून् त्रिविधान् । तदुक्तम् “ एष त्रिधा भवेद्वेणुर्मुरली[1]वंशिके[2]ति च । पावकाख्यो भवेद्वेणुर्द्वादशांगुलदैर्घ्यभक् ॥ स्थौल्येंगुष्ठमितः षड्भिरेष रंध्रैः समन्वितः” पावकं पावकवदुद्दीपकम् । कामबीजमाख्याति वक्तीति पावकाख्यः । अत एवोक्तम् । “ वे ब्रह्मसुखमित्युक्तं णुः कामसुखवाचकः । त उभे यत्र सततं वेणुः स इह कथ्यते ॥ ” इति । “ सप्तच्छिद्रा स्वरैर्युक्ता मुरली चारुनादिनी । शरचंद्रांगुला दैर्घ्ये स्थौल्ये वेणुसमा स्मृता ॥ ततांगुलेंतरे यत्र मुखरंध्रं तथांगुलम् । शिरो वेदांगुलं पुच्छं त्र्यंगुलं सा तु

---

१ मुरंति वेष्टयंत्याच्छादयंति श्रोतॄणां दुःखमिति मुराः निषादादिस्वराः तैर्लीयंत आश्लिष्यंते सदावासेन या सा मुरली ‘ मुर वेष्टने—लीङ् श्लेषणे ’ धातू । २ वंशयति श्रोतॄन्स्वानुकूली करोतीति वंशिका ‘ वशि वशीकरणे’ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विच्छायाभिः प्रधावंतो गच्छंतः साधुहंसकैः ॥ बकैरुपविशंतश्च नृत्यंतश्च कलापिभिः ॥ ८ ॥ विकर्षंतः कीशबालानारोहंतश्च तैर्द्रुमान् ॥ विकुर्वं तश्च तैः साकं प्लवंतश्च पलाशिषु ॥ ९ ॥ साकं भेकैर्विलंघंतः सरित्प्रस्रवसंप्लुताः ॥ विहसंतः प्रतिच्छायाः शपंतश्च प्रतिस्वनान् ॥ १० ॥ इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ॥ मायाश्रितानां नरदारकेण साकं विजह्रुः कृतपुण्यपुंजाः ॥ ११ ॥ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः ॥ स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमतोव्रजौकसाम् ॥ १२ ॥

विच्छायाभिः पक्षिच्छायाभिः । कलापिभिर्मयूरैः ॥ ८ ॥ कीशबालान् वृक्षशाखासु लंबमानानि वानरलांगूलान्याकर्षंतो लांगूलममुंचंतस्तैः सह द्रुमानारोहंतः । तैः सहवि कुर्वंतो दंतदर्शनभ्रूविजृंभादिभिस्तैः सह विकारान्कुर्वंतः । पलाशिषु वृक्षेषु प्लवंतः शाखायाः शाखांतरमुद्गच्छंतः ॥९॥ प्रतिच्छायाः प्रतिबिंबानि ॥ १० ॥ तानतिविस्मयेन श्लोकद्वयेनाभिनंदति । इत्थमिति । सतां विदुषां ब्रह्म च तत्सुखं चानुभूतिश्च तया । स्वप्रकाशपरमसुखेनेत्यर्थः । भक्तानां परदैवतेनात्मप्रदेन नाथेन मायाश्रितानां तु नरदार कतया प्रतीयमानेन सह विजह्रुः, कृतानां पुण्यानां पुंजा राशयो येषां ते । ब्रह्मविदां तदनुभव एव भक्तानामतिगौरवेणैव भजनम् एते तु तेन सह सख्येन विजह्रुः । अहो भाग्यमिति भावः ॥ ११ ॥ बहुजन्मभिः कृच्छ्रेण धृत आत्मा मनो यैस्तैरपि ॥ १२ ॥

वंशिका ॥ नवरंध्रा स्मृता सप्तदशांगुलमिता बुधैः '' इति भक्तिरसामृतात् । कूजंतः शब्दं कुर्वंतः ॥ ७ ॥ कलापो बर्हैति येषां ते कलापिनः " कलापः संहते बर्हे वाण्यां भूषणतूणयोः ॥ '' इति मेदिनी ॥ ८ ॥ कीशो वानरः । 'मर्कटो वानरः कीशः' इत्यमरः ॥ ९ ॥ भेकैर्मंडूकैः । विलंघंतः प्लवंतः । शपंतः गालीप्रदानादिपूर्वकमाक्रोशंतः ॥ १० ॥ तान् गोपान् । श्रीशुकोऽभिनंदति श्लाघते इत्यर्थ इति । ज्ञानिभिर्यत्स्वप्रकाशसुखरूपं मन्यते तेनेति भावः । मायाश्रितानां साधारणपुंसाम् । इति भाव इति । ज्ञानिभक्तान्यपुरुषेभ्यो गोपा एव महद्भाग्या भगवतस्तदनुवर्तित्वादिति तात्पर्यम् । एवं तेषां क्रीडां निर्वर्ण्य व्रजौकसामित्युत्तरश्लोकोक्त्या तदादिव्रजवासिमात्राणां सर्वेभ्योऽधिकं सौभाग्यं स्तौति—इत्थमिति । अत्र जगति प्रायस्त्रिविधा जना गण्यंते ज्ञानिनो भक्ताः कर्मिणश्च । तत्र सतां भक्तिमत्त्वेन सच्छब्देनो च्यमानानां ज्ञानिनां ब्रह्म च तत्सुखं चानुभूतिश्च तया सह कृष्णशरीरस्यैव ब्रह्मसुखानुभूतित्वं तेनैव सह तेषां विहारात् । तस्मात्तदाकारस्य प्राकृतत्वमाचक्षाणा ज्ञानिमानिनोऽन्ये सच्छब्देनैवोच्यंते इति ज्ञेयम् दास्यं गतानां केवलभक्तिमतां सतां परदैवतेनेष्टदेवेनेति तदानींतना व्रजस्थजनभिन्नाः प्रायो दासभक्ता एवेति त एव निर्दिष्टाः मायां वैषयिकं सुखमाश्रितानां कर्मिणां नरदारकेण प्राकृतमनुष्यबालतया प्रतीयमानेन कृष्णेन सह विजह्रुरिति ज्ञानिनां तदनुभव एव न तु तेन सह विहारस्संभवेत् भक्तानां गौरवेण तद्भजनमेव न तु विहारयोग्यता कर्मिणां तु न तदनुभवः प्रीत्यभावान्न तत्तद्भजनमपि कुतस्तेन विहार इत्येते तु विजह्रुः विहारै स्तमानंदपरिपूर्णमपि प्रेमविलासमयमानंदविशेषं प्रापय्यैव स्वयमपि सर्वतो विलक्षणमाननंदुरित्यर्थः । अतः सर्वेभ्यः सकाशादेत एव कृतपुण्या इति किं वक्तव्यं कृतपुण्यपुंजा एवेति लोकप्रतीत्यैवोक्तिर्न तु नित्यसिद्धानां तेषां निखिलेभ्यो ज्ञानिभ्यो भक्तेभ्यश्चोत्कृष्टानां न तत्र प्राचीनपुण्यवत्त्वं वस्तुतो हेतुरिति ज्ञेयम् । पुण्यशब्देन भगवत्प्रियाचरणं वा लक्षणीयं तद्वशीकारातिशयरूपप्रयोजनलाभाय ॥ ११ ॥ तेन सार्द्धं विहारवार्त्ता दूरे तावदास्तां तत्संबंधिवस्तुमात्रमपि दुर्लभमित्याह—यस्य पादपांसुरेकोऽपि धूलिकणः । यद्वा—यस्य पादपानां विहारास्पदवृंदावनीयवृक्षाणामंशुरेकः किरणोऽपि । यद्वा—यत्पादौ पिबंति सप्रेम निरीक्षंते ये भक्तविशेषास्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथावनामाऽभ्यपतन्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः ॥ नित्यं यदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते ॥ १३ ॥ दृष्ट्वाऽर्भ
कान्कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः ॥ अयं तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं सबलं हनिष्ये ॥ १४ ॥ एते यदा मत्सुहृदो
स्तिलापःकृतास्तदा नष्टसमा व्रजौकसः ॥ प्राणे गते वर्ष्मसु काऽनुचिंता प्रजासवः प्राणभृतो हि ये ते ॥ १५ ॥ इति व्यवस्याऽऽजगरं बृहद्वपुः
स योजनायाममहाद्रिपीवरम् ॥ धृत्वाऽद्भुतं व्यात्तगुहाननं तदा पथि व्यशेत ग्रसनाशया खलः ॥ १६ ॥ धराधरोष्ठो जलदोत्तरोष्ठो दर्याननांतो
गिरिशृंगदंष्ट्रः ॥ ध्वांतांतरास्यो वितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः ॥ १७ ॥

सुखक्रीडनवीक्षणे नास्ति क्षमा यस्य सः । कथंभूतः । यस्यांतरं छिद्रं पीतामृतैरपि ततो मृत्युभीतैरमरैः प्रतीक्ष्यते कथं मरिष्यति कदा वेति । यद्वा कथंभूतं सुख क्रीडनम् । यदंतर्हृदये अमरैः प्रतीक्ष्यते विचिंत्यते पीतामृतैरपि पुनर्निजजीवितेप्सुभिः । अयं भावः । नामृतपानमात्रेण जीवनं सफलं भवति किं तु भगवल्लीलानुस्मरणेनेति तदेव नित्यमंतश्चिंत्यत इति ॥ १३ ॥ कृष्णप्रमुखानर्भकान् दृष्ट्वा स इति व्यवस्य निश्चित्याऽऽजगरं वपुर्धृत्वा तेषां ग्रसनाशया पथि व्यशेतेति तृतीयेणान्वयः । कंसेनानु शिष्टः प्रहितः बकी पूतना । कथं व्यवस्य तदाह अयं त्विति सार्धेन । मम तयोर्द्वयोः सोदरयोः स्थाने एनं कृष्णं सबलं ससैन्यं वत्सतत्पालसहितं हनिष्यामि ॥ १४ ॥ ननु तथापि व्रजस्थास्त्ववशिष्येरन्नेत्याह । एत इति । तिलापःकृतास्तिलोदकतया कल्पिताः । वर्ष्मसु देहेषु । प्रजा एवासवो येषां ते तथा ॥ १५ ॥ सयोजनायामं योजनप्रमाणेन दैर्घ्येण युक्तं च तन्महाद्रिवत्पीवरं च । व्यात्तं प्रसारितं गुहातुल्यमाननं यस्मिंस्तत ॥ १६ ॥ अद्भुतमिति यदुक्तं तद्दर्शयितुं विशिनष्टि । धराधरोष्ठ इति । धरायामधरोष्ठो यस्य सः । जलदेषूत्तरोष्ठो यस्य सः । दर्याविवाननस्यांतौ सृक्किणी यस्य सः । गिरेः शृंगाणीव दंष्ट्रा यस्य सः । ध्वांतवदंतरास्यं यस्य सः । वितताध्ववज्जिह्वा

मंशुर्दूरतः किरणच्छटापि धृतात्मभिरेकाग्रीकृतचित्तैर्लब्धुमनर्हः । ‘ नायं सुखापो भगवान् ’ इतिपूर्वोक्तेः । स्वयं स्थित इति । स्वदर्शनसाधनमनपेक्ष्येत्यर्थः । दिष्टं भाग्यम् । यद्वा—दिष्टमहः दिष्टस्य तेज उत्सवो वेति विश्वनाथः [illegible] स्थितमिवावलोक्याह—स एष इति । येषां नेत्रगोचरः । स्वयं कृष्णः । अहो इत्यानंदे । दिष्टं दैवम् ॥ १२ ॥ पीतामृतानां यदि मृतिभयं तदाऽमृतस्यामृतत्वव्याघातः स्यादतोऽर्थांतरमाह—यद्वेति । अय भाव इति । ‘ निजं स्वीये च नित्ये च ’ इति कोशान्निजं नित्यमर्थात्सफलं यज्जीवितं तदिच्छुभिरिति । न ह्यमृतपानेन नित्यजीवनमपि तु मादकत्वात्तस्य भगवद्वैमुख्यापादकत्वेनानित्यजीवनं भवति । किन्तु हरेरंतश्चिंतनमेव नित्यजीवनमिति तात्पर्यम् ॥ १३ ॥ अयं कृष्णः । तयोर्बकीबकयोः । पिण्डदानार्थमिति शेषः । उत्तरश्लोकदृष्ट्या कल्प्यः । बलशब्देनात्र बलदेवो न ग्राह्यस्तस्य वत्सपालावगूहनलीलायामनागतत्वात् । अत एव स वक्ष्यति ‘ केयं वा कुत आयाता दैवी वा ’ इत्यादिना ॥ १४ ॥ एतेषां हनने तत्पितरोऽन्यानेतादृशानुत्पादयिष्यंतीति चेत्तेषां तत्र सामर्थ्यमेव नंक्ष्यत्येतच्छोकाकुलत्वादित्याह—नन्विति । तथापि एतेषां ह ननेपि । ‘वर्ष्म संहननं वपुः’ इति कोशात् ॥ १५ ॥ आजगरमजगरसंबंधि । तदा तेषां क्रीडाकाले ॥ १६ ॥ धरायां भूमौ । दर्यौ गुहे । ‘प्रांतावोष्ठस्य सृक्किणी’ इत्यमरः । ध्वांतवत्तमोयुक्तम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा तं तादृशं सर्वे मत्वा वृंदावनश्रियम् ॥ व्यात्ताजगरतुंडेन ह्युत्प्रेक्षंते स्म लीलया ॥ १८ ॥ अहो मित्राणि गदत सत्त्वकूटं पुरः स्थितम् ॥ अस्मत्संग्रसनव्यात्तव्यालतुंडायते न वा ॥ १९ ॥ सत्यमर्ककरारक्तमुत्तराहनुवद्घनम् ॥ अधराहनुवद्रोधस्तत्प्रतिच्छाययारुणम् ॥ २० ॥ प्रतिस्पर्धेते सृक्किभ्यां सव्यासव्यनगोदरे ॥ तुंगशृंगालयोप्येतास्तद्दंष्ट्राभिश्च पश्यत ॥ २१ ॥ आस्तृतायाममार्गोऽयं रसनां प्रतिगर्जति ॥ एषामंतर्गतं ध्वांतमेतदप्यंतराननम् ॥ २२ ॥ दावोष्णखरवातोऽयं श्वासवद्भाति पश्यत ॥ तद्दग्धसत्त्वदुर्गंधोऽप्यंतरामिषगंधवत् ॥ २३ ॥ अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति ॥ क्षणादनेनेति बकार्युशन्मुखं वीक्ष्योद्धसंतः करताडनैर्ययुः ॥ २४ ॥

यस्य सः । परुषानिलवच्छ्वासो यस्य सः । दववदीक्षणयोरुष्णः दाववद्दृष्टिरित्यर्थः । परुषानिलश्वासश्वासौ दवेक्षणोष्णश्च तथा ॥ १७ ॥ वस्तुतोऽजगरमेव व्यात्ततुंडं दृष्ट्वा वृंदावनस्य श्रीः संपदेवैषेति भ्रांत्या मत्वा विपरीतं व्यात्ताजगरास्यसादृश्येनोत्प्रेक्षितवंतः ॥ १८ ॥ उत्प्रेक्षामेव प्रश्नोत्तराभ्याश्चाहुः । अहो इति । सत्त्वकूटं सत्त्वाभासमिदं वा न वा तत्राप्यस्मत्संग्रसनाय व्यात्तं यद्व्यालतुंडं तद्वदाचरति न वा ॥ १९ ॥ निश्चितं तथैवेत्याहुः । सत्यमिति । अर्ककरैरारक्तं घनमुत्तरोष्ठवत्पश्यत । तस्य घनस्य प्रतिच्छाययारुणं रोधः स्थलमधरोष्ठवत्पश्यत । पश्यतेति सर्वत्रान्वेति ॥ २० ॥ सृक्किभ्यामोष्ठप्रांताभ्यां प्रतिस्पर्द्धेते तत्तुल्यतया वर्तेते । नगोदरे गिरिदर्यौ । एतास्तुंगशृंगालयस्तस्य दंष्ट्राभिः स्पर्धमानाः ॥ २१ ॥ आस्तृयाममार्गे विस्तृतो दैर्घ्यवान्मार्गः । प्रतिगर्जति प्रतिस्पर्धते । एषां शृंगाणामंतर्गतं मध्यगतं ध्वांतमन्धकारमेतदंतराननमाननस्य मध्यं प्रतिगर्जति ॥ २२ ॥ दावेनोष्णः खरो वातोऽयम् । तेन दावेनाग्निदग्धानां सत्त्वानां यो दुर्गन्धः । स एव सर्पांतर्गतामिषगंधवद्भाति ॥ २३ ॥ एवं सत्यमप्यजगर

अंतरास्यं मुखमध्यम् । विततायध्ववद्विस्तृतमार्गवत् । परुषानिलवत्कठोरवातवत् । 'निष्ठुरे परुषम्' इत्यमरः । दववत् वनाग्निवत् । 'दवदावौ वनानलौ' इत्यमरः । इत्यर्थ इति । दाववद्दावाग्निवदिति तात्पर्यम् ॥ १७ ॥ तम् अघम् । तादृशं पूर्वोक्तविशेषणविशिष्टम् । तमघासुरं दृष्ट्वा महासर्पबुद्ध्या कांश्चित्पलायमानान्दृष्ट्वाऽन्ये तानाहुः रे मूढा एतावत्प्रमाणः सर्पो न संभवतीत्यतो वृंदावनशोभातिशयाधायको जंतुविशेषो विधात्रैव रचितः । किं–तु महासर्पप्रसारिततुंडाकार इति निश्चिताः उत्प्रेक्षितवंत उत्प्रेक्षां कुर्वतः ॥ १८ ॥ कांश्चिन्मुख्यसखीन्संबोध्य स्वनिश्चयस्य प्रामाण्यार्थं पृच्छंति–अहो इति । 'उत्प्रेक्षो न्नीयते यत्र हेत्वादिर्निह्नवं विना' इति चंद्रालोकोक्तेः । सत्त्वकूटं निश्चलः प्राणिविशेषः कूटशब्दस्य पूर्वनिपाताभावस्त्वार्षः । यद्वा–सत्त्वं कूटमिवेति समासः । अत्र कूटपदं गिरिशृंगवाचकं ज्ञेयम् । ''कूटोऽस्त्री निश्चले राशौ लोहमुद्गरदंभयोः । मायाद्रिशृंगयोस्तुच्छे सीरावयवयंत्रयोः ॥ अनृते च'' इति मेदिनी। अस्मत्संग्रसनायास्माकं भक्षणाय । व्यात्तं प्रसृतम् । 'व्यालो दुष्टगजे सर्पे' इति मेदिनी । संशयोत्प्रेक्षयोरत्र संसृष्टिः । मित्राणीति क्लीबत्वम् 'मित्रं सुहृदि न द्वयोः' इत्युक्तेः ॥ १९ ॥ तथैव उक्तानुसारेण यथा यूयं मन्यध्वे तथैवेति । 'सत्यं निश्चितसत्ययोः' इति यादवः । उत्तरोष्ठवदुपरितनोष्ठवत् । प्रतिच्छायया प्रतिबिंबेन अरुणं रक्तम् । अधरोष्ठवदधस्तनोष्ठवत् ॥ २० ॥ तुंगशृंगालय उच्चशृंगपंक्तयः ॥ २१ ॥ 'अंधकारोऽस्त्रियां ध्वांतम्' इत्यमरः ॥ २२ ॥ खरस्तीक्ष्णः 'तिग्मं तीक्ष्णं खरं तद्वत्' इत्यमरः । सत्त्वानां जीवानाम् । आमिषं मांसम् ॥ २३ ॥ एवमुक्तप्रकारेण । संतं सत्यम् । अन्यथाऽसत्यम् । अयमजगरवत्प्रतीयमानो जीवविशेषः । तथा चेत् ग्रसने कृते सति दूरस्थस्य मुखं दृष्ट्वाऽस्मदृष्टिगोचर एव कृष्ण आस्ते का चिंतेति । लब्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं मिथोऽतथ्यमतज्ज्ञभाषितं श्रुत्वा विचिंत्येत्यमृषा मृषायते ॥ रक्षो विदित्वाऽखिलभूतहृत्स्थितः स्वानां निरोद्धुं भगवान्मनो दधे ॥ २५ ॥ तावत्प्रविष्टास्त्वसुरोदरांतरं परं न गीर्णाः शिशवः सवत्साः ॥ प्रतीक्षमाणेन बकारिवेशनं हतस्वकांतस्मरणेन रक्षसा ॥ २६ ॥ तान्वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्च मृत्योर्जठराग्निघासान्घृणार्दितो दिष्टकृतेन विस्मितः ॥२७॥ कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां विहिंसनम् ॥ द्वयं कथं स्यादिति संविचिंत्य तज्ज्ञात्वाऽविशत्तुंडमशेषदृग्घरिः ॥ २८ ॥ तदा घनच्छदा देवा भयाद्धाहेति चुक्रुशुः ॥ जहृषुर्ये च कंसाद्याः कौणपास्त्वघबांधवाः ॥२९॥ तच्छ्रुत्वा भगवान्कृष्णस्त्वव्ययः सार्भवत्सकम् ॥ चूर्णीचिकीर्षोरात्मानं तरसा ववृधे गले ॥ ३० ॥

मन्यथोत्प्रेक्ष्य निर्भया ययुः । किं ग्रसिता ग्रसिष्यति । अनेन श्रीकृष्णेन हंत्रा । बकारेरुशत्कमनीयं मुखम् ॥ २४ ॥ अमृषा वस्तुतः सर्पवपुरसुर एव मृषायते स्वानां सर्पसादृश्यगोचरत्वेन प्रतीयते इति तान्निरोद्धुं वारयितुं यावन्मनो दधे तावत्प्राविष्टा इत्युत्तरेणान्वयः ॥ २५ ॥ तावत्प्रविष्टा एव केवलं न तु तेन गीर्णा गिलिताः । जीर्णा इति पाठेऽपि स एवार्थः । कथंभूतेन । हतयोः स्वकयोरंतं स्मरत्यनुध्यायतीति तथा तेन । अत एव बकारेः श्रीकृष्णस्य प्रवेशं प्रतीक्षमाणेन ॥ २६ ॥ स्वकरादवच्युतान्विनिःसृतान् । विस्मितः सन्कृत्यं किमत्रेत्यादि विचिंत्य तत्रोपायं ज्ञात्वा स्वयमप्यविशदित्युत्तरेणान्वयः ॥२७॥ कथं विचिंत्य । अस्य जीवनममीषां च विहिंसनमिति द्वयं वै निश्चितं कथं न स्यादिति॥२८॥घनच्छदा मेघांतरिताः । कौणपाः कुणपाशिनो राक्षसाः । कोणपो निर्ऋतिः तदीया इति वा ॥ २९ ॥ चूर्णीकर्तुमिच्छोस्तस्य गले

विश्वासाः एतद्बिलमध्ये किमप्यस्ति भोः सखायस्तदवश्यं पश्याम इति बाल्यचापलकौतुकोल्लासात्करताडनैर्निजनिर्भयत्वद्योतनाय करताडनं हास्यांगं सति सर्पे तत्पलायनं वाभिप्रेतम् ॥ २४ ॥ अतथ्यम् असत्यम् । न तं जानंतीत्यतज्ज्ञास्तेषां भाषितम् ॥ २५ ॥ स्वकयोः बकीबकयोः । प्रतीक्षमाणेन कदा प्रवेक्ष्यतीति विचार्यमाणेन । न चात्र भगवतः सत्यसंकल्पता व्यभिचरतीति शंकनीयम् । अस्मान्किमत्र ग्रसिता निविष्टानयं तथा चेद्बकवद्विनंक्ष्यति इति तद्भक्तसंकल्पस्याप्यत्र वर्तमानत्वात् । मत्संकल्पमद्भक्तसंकल्पयोर्मध्ये मद्भक्तसंकल्पस्यैव गरीयस्त्वमिति भक्तवश्येन भगवतैव प्राकृकृताया मर्यादायास्तथा लीलाशक्तेश्च सर्वोपमार्दिन्याः । सर्वदा जागरूकत्वात् ॥ २६ ॥ घृणार्दितो दयायुक्तः । 'घृणा जुगुप्साकृपयोः' इति मेदिनी । दिष्टकृतेन लीलाशक्त्यनुकूलकालकृतेन तत्प्रदेशकर्मणा विस्मितः । 'कालो दिष्टोऽप्यनेहापि' इत्यमरः । अहो न तावदेषां प्रारब्धकर्म सम्भवति । न च तद्विनाप्यत्र कर्मणि अंतर्यामी प्रवर्त्तये तस्य मत्स्वरूपत्वेन मत्प्रातिकूल्यानर्हत्वाच्च । तस्मान्मत्सहचारानप्येतादृशीर्दुरवस्था दर्शयंत्या मत्प्रातिकूल्येप्यशंकमानायाः प्रेमपूर्णं मां करुणरसनिमग्नं कर्त्तुकामाया मदीयलीलाशक्तेरेवेदं कर्म मयि पुरुषोत्तमे रसमयमूर्तौ तस्या एवैतावत्प्रभविष्णुत्वमिति बंधुविच्छेदशोकार्तत्वेपि विस्मयेनेषत् विस्मितोभूदिति ॥ २७ ॥ अस्याघस्य । अमीषां गोपानाम् । तत् द्वयम् । अशेषदृक् सर्ववित् ॥ २८ ॥ कुणपाशिनः शवभक्षका येघबांधवास्तेषां भक्ष्यप्राप्तेर्हर्ष उचित एव तत्कर्मनिरीक्षणाय कंसप्रेषिता अन्ये दैत्याः कंसायापि तत्कर्म शशंसुरिति कंसादीनामपि हर्षः । कंसाघयोर्भयान्मेघांतरिता देवा भगवत्यनिष्टशंकया हाहेति चुक्रुशुः । देवानामैश्वर्यज्ञानेपि भक्तत्वाद्भक्तेश्च प्रीत्यात्मकत्वात्प्रीतेश्च विवेकहरस्वभावत्वान्न देवसार्वज्ञहानिः । यद्यपि 'नैर्ऋतो यातुरक्षसी' इत्यमरोक्तेर्नैर्ऋतीया अपि राक्षसा एव तथापि तदीयानामघबांधवेभ्यो भेदविवक्षया स्वामिचरणैर्विकल्पः कृत इति प्रतीयते ॥ २९ ॥ ननु शकटतृणावर्तवधदामबंधनादिलीलायां स्तोकेनैव बालवपुषा किञ्चिदप्यवर्द्धमानेन तत्तद्वयासिचं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतास्त्वितस्ततः ॥ पूर्णोंतरंगे पवनो निरुद्धो मूर्द्धन्विनिष्पाट्य विनिर्गतो बहिः ॥ ३१ ॥ तेनैव सर्वेषु
बहिर्गतेषु प्राणेषु वत्सान्सुहृदः परेतान् ॥ दृष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्रान्मुकुंदो भगवान्विनिर्ययौ ॥ ३२ ॥ पीनाहिभोगोत्थितमद्भुतं
महज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश ॥ प्रतीक्ष्य खेऽवस्थितमीशनिर्गमं विवेश तस्मिन्मिषतां दिवौकसाम् ॥ ३३ ॥ ततोऽतिहृष्टाः स्वकृतोऽ
कृतार्हणं पुष्पैः सुरा अप्सरसश्च नर्तनैः ॥ गीतैः सुगा वाद्यधराश्च वाद्यकैः स्तवैश्च विप्रा जयनिःस्वनैर्गणाः ॥३४॥ तदद्भुतस्तोत्रसुवाद्यगीतिकाज
यादिनैकोत्सवमंगलस्वनान् ॥ श्रुत्वा स्वधाम्नोंत्यज आगतोऽचिराद्दृष्ट्वा महीशस्य जगाम विस्मयम् ॥३५॥ राजन्नाजगरं चर्म शुष्कं वृंदावनेऽद्भुतम् ॥
व्रजौकसां बहुतिथं बभूवाऽऽक्रीडगह्वरम् ॥३६॥ एतत्कौमारजं कर्म हरेरात्माहिमोक्षणम् ॥ मृत्योः पौगंडके बाला दृष्ट्वोचुर्विस्मिता व्रजे ॥ ३७ ॥

आदावेव तरसा ववृधे अवर्धत ॥ ३० ॥ निरुद्धो मुखादीनां मार्गभूतः कंठो यस्यास्ति तस्योद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्यांतरंगे देहमध्ये । पूर्णः परिभृतः । मूर्धन् मूर्धनि
ब्रह्मरंध्रं निर्भिद्य बहिर्विनिर्गतः ॥ ३१ ॥ प्राणेष्विंद्रियेषु । स्वयाऽमृतवर्षिण्या दृष्ट्यैव ॥ ३२ ॥ अहिदेहोत्थितं शुद्धसत्त्वमयं ज्योतिर्निर्गत्य खेऽवस्थितं तस्मिन्नीशे
विवेश ॥ ३३ ॥ स्वकृतः स्वकार्यकृतः श्रीकृष्णस्यार्हणमकृताकुर्वत पूजामकुर्वन् । सुगाः सुष्ठु गायंतीति सुगाः गंधर्वादयः ॥ ३४ ॥ किं च तेषां यान्यद्भुतस्तोत्रादीनि
तेषां नैकोत्सवा ये मंगलस्वनास्तान्स्वधाम्नोंऽति समीपे श्रुत्वाऽजो ब्रह्माऽचिरादागत ईशस्य श्रीकृष्णस्य महि महिमानं दृष्ट्वा विस्मयं प्रापेति ॥३५॥ बहुतिथं बहुकालम् ।
आक्रीडगह्वरं क्रीडार्थं महाबिलम् ॥ ३६ ॥ अन्यच्चातिचित्रं वृत्तमित्याह । एतदिति । "कौमारं पंचमाब्दांतं पौगंडं दशमावधि ॥ कैशोरमापंचदशाद्यौवनं तु ततः

चोः स्वयं भगवतो विभोरस्य किमघासुरकंठव्याप्तिरशक्या यतो ववृध इत्युच्यते सत्यं तत्रतत्र नरबाललीलत्वलक्षणमाधुर्यस्य भक्तजनलोचनास्वाद्यत्वावलौकिकं तादृशत्वमेवोचितम् । अत्र तु तादृशमाधुर्य
ग्राहकद्रष्टृजनाभावात्स्वयं भगवतापि तेन लौकिक्येव रीतिराललंब इति तत्त्वम् । तद्देवाक्रंदमसुराह्लादम् । तरसा वेगेन । सार्भवत्सकमात्मानमिति संबंधः ॥ ३० ॥ अतिकायस्य योजनविस्तृतदेहस्य ॥ ३१ ॥
परेतान् स्वविरहात्जाठरानलज्वालया मूर्च्छितान् न तु मृतान् चिच्छक्त्यालिंगितत्वात् । तदन्वितः । वत्सगोपयुतः । मुकुंद इति तन्मोक्षसूचनार्थम् ॥ ३२ ॥: स्वतेजसा दश दिशो ज्वलयत् ईशनिर्गमं प्रतीक्ष्य
कंचित्कालं दृष्ट्वा । जीवस्य निराकारत्वेपि तत्कालप्राप्तभगवच्छक्त्यालिंगितत्वात्तथा दृश्यत्वमिति तोषिण्याम् । परब्रह्मणो व्यापकमहाज्योतिःस्वरूपमिव जीवस्यापि ज्योतिःस्वरूपं मायिकलोचनागम्यमपि तदानीं
भगवता स्वेच्छयैव स्वस्यासुरमुक्तिप्रदगुणस्य सर्वलोकप्रत्यक्षीकरणार्थं प्रदर्शम् इत्यर्थः । भागवतीं गतिमित्युपरिष्टादुक्तेरघासुरः सारूप्यमुक्तिं प्राप्य न तु सायुज्यं भगवति प्रवेशस्तु शिशुपालादिवज्ज्ञेय इति ॥ ३३ ॥
ततो भगवद्देहे तत्प्रवेशानंतरम् । अर्हणं पूजाम् ॥ ३४ ॥ अन्यदप्याह–किं च इति तेषां सुरादीनाम् । स्वधाम्नः सत्यलोकस्य ॥ ३५ ॥ अन्यदद्भुतमाह–राजन्निति कथाश्रुतौ देदीप्यमानमित्यर्थः। आक्रीडगह्वर
त्वमपि वत्सरांतरवज्ज्ञेयम् ॥ ३६ ॥ इतोप्यद्भुततरमाह–अन्यच्चेत्यादिना । वृत्तं जातम् । दशमावधि दशमवर्षपर्यन्तम् । आपंचदशात्पंचदशवर्षपर्यंतम् । ततः पंचदशवर्षात् । आत्मनां सगोपवत्सानाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैतद्विचित्रं मनुजार्भमायिनः परावराणां परमस्य वेधसः ॥ अघोऽपि यत्स्पर्शनधौतपातकः प्रापात्मसात्म्यं त्वसतां सुदुर्लभम् ॥ ३८ ॥ सकृद्यदं
गप्रतिमांतराहिता मनोमयी भागवतीं ददौ गतिम् ॥ स एव नित्यात्मसुखानुभूत्यभिव्युदस्त मायोंतर्गतो हि किं पुनः ॥ ३९ ॥ सूत उवाच ॥
इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रम् ॥ पप्रच्छ भूयोऽपि तदेव पुण्यंवैया सकिं यन्निगृहीतचेताः ॥ ४० ॥ राजोवाच ॥ ब्रह्म
न्कालांतरकृतं तत्कालीनं कथं भवेत् ॥ यत्कौमारे हरिकृतं जगुः पौगंडकेऽर्भकाः ॥ ४१ ॥ तद् ब्रूहि मे महायोगिन्परं कौतूहलं गुरो ॥ नूनमेतद्ध
रेरेव माया भवति नान्यथा ॥ ४२ ॥ वयं धन्यतमा लोके गुरोऽपि क्षत्रबंधवः ॥ यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतम् ॥ ४३ ॥

परम् ॥" हरेः कौमारजं पंचमाब्दकृतं कर्म तदेव दृष्ट्वा पौगंडके षष्ठेऽब्दे बाला अद्यैवैतद्वृत्तमित्यूचुः । किं तत्कर्म । मृत्योः सकाशादात्मनामहेश्च मोक्षणम् । तत्रात्मनां प्रसिद्धान्मृत्योरहेस्तु संसारलक्षणात् । अघासुरज्योतिषः श्रीकृष्णे प्रवेशमपि तदा दृष्टं कथितवंत इत्यर्थः ॥३७॥ नैतद्विचित्रमिति । किं तदित्यपेक्षायामाह । अघोऽपीति । आत्मसात्म्यं स्वसमानरूपताम् ॥ ३८ ॥ यस्यांगं मूर्तिस्तस्य प्रतिमा प्रतिकृतिस्तत्रापि केवलं मनोमयी साऽपि बलादंतरहिता सती भागवतीं गतिं ददौ प्रह्लादादिभ्यः स एव साक्षात्स्वयमंतर्गतः किं पुनः नित्या चासावात्मसुखानुभूतिश्च तयाऽभितो व्युदस्ता माया येन सः ॥ ३९ ॥ येन श्रवणेन निगृहीतं वशीकृतं चेतो यस्य सः ॥ ४० ॥ कालांतरे कौमारे कृतं पौगंडके कथं ज्ञात्वोचुरित्यर्थः ॥ ४१ ॥ ४२ ॥ ४३ ॥

इत्यर्थ इति । अहो अद्यास्माभिर्महदाश्चर्यं दैत्यदेहनिर्गतं तेजः कृष्णे प्रविष्टं दृष्टमिति भावः ॥ ३७ ॥ मनुजार्भस्य मायाछलमस्यास्तीति मनुजार्भमायी तस्य ब्रह्मादिमनुष्यांतानां स्रष्टुः परमस्यात्मसाम्यम् । यस्य कृष्णस्य स्पर्शनेन धौतं निवृत्तं पातकमसुरतापादकं प्राक् कृतं कर्म यस्य सः । असतां पापिनाम् ॥ ३८ ॥ प्रतिकृतिः प्रातिनिधिविग्रहः । तत्रापि प्रतिकृतित्वे । अंतराहिता ध्याता । स एव यस्य प्रतिकृतिर्मोक्षं ददाति । आत्मसुखानुभूतिरात्मानंदानुभवः । व्युदस्तापाकृता । माया कारणाज्ञानम् । किं पुनर्वक्तव्यमिति शेषः । यस्य प्रतिकृतिर्जगन्नाथमदनगोपालगोविंदादिरूपा मनसैव ध्याता तत्रांपि सकृदेव खट्वांगादिभ्यो भागवतीं गतिं ददौ। ननु खट्वांगादीनां तत्प्राप्तौ भक्तिरेव कारणमघासुरादीनां प्रातिकूल्याद्भक्त्यभाव एव तत्प्राप्तिप्रतिबंधी भक्त्याहमेकया ग्राह्य इति भगवत्कृतनियमात् । सत्यम् । स च नियमोऽन्यस्मिन्नेव समये। कृष्णावतारसमये तु पूर्णायाः कृपाशक्तेरुदयोद्रेकात्तत्संबंधमात्रेणैव तत्प्राप्तिः । तद्वक्ष्यते—"कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव वा । नित्यं हरौ विदधतो यांति तन्मयतां हि ते ॥ न चैवं विस्मयः कार्यो भवता भगवत्यजे । योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते॥" इति कृष्णस्य पूर्णत्वे लक्षणमिदमसाधारणं यद्वैरिभ्योपि मोक्षं ददातीति विश्वनाथः ॥ ३९ ॥ यादवदेवेन श्रीकृष्णेन दत्तः परीक्षित्। स्वरातुः कृष्णस्य तदेव श्रीकृष्णचरितमेव । हे द्विजा इति । हरिलीलामृतपानमेव द्विजातिधर्म इति संबुद्ध्यभिप्रायः ॥ ४० ॥ इत्यर्थ इति । पूर्वकालिकस्य परकालिकत्वसंभवादिति भावः । ब्रह्मन्निति सर्वज्ञतामाह ॥ ४१ ॥ "अनागतमतीतं च सम्यक्पश्यंति योगिनः" इत्युक्तेः । सर्वं वर्णयितुं भवान् समर्थोस्तीत्याह—हे महायोगिन्निति । तत्तस्माद्ब्रूहि यतः परं कौतूहलमाश्चर्यम् । एतत् पूर्वकालिकस्य परकालिकत्वम् । अन्यथा मायां दुर्घटघटनाशक्तिं विना ॥ ४२ ॥ क्षत्रबंधवोपीति संबंधः । यत् यतः । श्रवणार्थमत्यौत्सुक्येन गुरुं प्रोत्साहयति—वयमिति । बहुत्वं बंधुवर्गापेक्षया क्षत्रबंधवः क्षत्रियाधमा अपि एतच्चात्यंतविनयात् तत्र गुणविशेषं दर्शयति—त्वत्त इति । हे गुरो त्वच्छिष्यत्वेनैव धन्याः कृतार्थाः विशेषतश्च त्वत्तः कृष्णकथामृतपानेन धन्यतराः मुहुः पानेन च धन्यतमा इत्यर्थः । विश्वनाथस्तु हे गुरो इति मम त्वच्छिष्यत्वात् "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत" इति विधेरव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः ॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तम ॥ ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धेऽघासुरवधो नाम द्वादशोऽध्यायः ॥ १२ ॥ श्रीशुक उवाच ॥ साधु पृष्टं महाभाग त्वया भागवतोत्तम ॥ यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः ॥ १ ॥ सतामयं सारभृतां निसर्गो यदर्थवाणी श्रुतिचेतसामपि ॥ प्रतिक्षणं नव्यव दच्युतस्य यत्स्त्रिया विटानामिव साधुवार्ता ॥ २ ॥ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ३ ॥ तथाऽघवदनान्मृत्यो रक्षित्वा वत्सपालकान् ॥ सरित्पुलिनमानीय भगवानिदमब्रवीत् ॥ ४ ॥

तेन यः स्मारितोऽनंतस्तेन हृतान्यखिलेंद्रियाणि यस्य सः तथाभूतोऽपि कथंचिल्लब्धबहिर्दृष्टिः । हे भागवतोत्तमोत्तम हे शौनक ॥ ४४ ॥ इति श्रीभा० म० दशमस्कंधे पूर्वार्धे टीकायां द्वादशोऽध्यायः ॥ १२ ॥ त्रयोदशेऽहरद्ब्रह्मा वत्सान्पालांश्च मायया ॥ तदा तत्सर्वरूपोऽब्दं कृष्णः पूर्ववदाचरत ॥ १ ॥ नूतनयसि नव्यवत्करोषि ॥ १ ॥ तथाहि सारभृतां सारग्राहिणामयं निसर्गः स्वभावः । कोऽसौ । अच्युतस्य वार्ता श्रुता सती प्रतिक्षणं साधु नव्यवद्भवतीति यत्सः । विटानां स्त्रैणानां स्त्रियाः कामिन्या वार्तेव । कथंभूतानामपि सताम् । या अच्युतवार्ता सैवार्थो येषां तानि वाणी श्रुतिचेतांसि येषां तथाभूतानामपि ॥ २ ॥ ३ ॥ ४ ॥

श्यवक्तव्यत्वं व्यंजितं पिबाम इति स्वशक्तिव्यंजनया स्वस्य स्निग्धत्वञ्च ॥ ४३ ॥ हृतान्यंतर्मुखीकृतानि । तथाभूतोपि हरिस्मृत्यंतर्मुखेंद्रियोपि । कथंचिन्महता यत्नेन कृच्छ्रादुच्चैः करतालशंखभेरीदुंदुभिनिशाना दिवाद्ययुक्तकीर्त्तनोद्घोषैर्बहुलप्रयासेन लब्धबहिर्दृशिर्जातेंद्रियबहिर्वृत्तिरित्यर्थः । पुनरित्यनेन पूर्वमपि वारंवारमीदृशो जातोस्ति इति बोध्यते । तत्र तत्रैव तातेति वारंवारं संबोधनमित्यभिज्ञा आहुः । तदर्थे श्रीपरीक्षिता महाव्यग्रेण सता निजांतिके तत्तद्वाक्यादि श्रीकृष्णकीर्त्तनसामग्री श्रीजनमेजयतो रक्षितास्तीति आख्यायिका प्रसिद्धा । शनैरिति । तदानीमनुवर्त्तमानेन प्रेमभरेणाक्रांतत्वात् हे भागवतोत्तमोत्तमेति । परमगुह्यमपि श्रोतुमर्हतीति भावः । भागवताः साधारण्येन हरिभक्तास्तदुत्तमास्तच्चरिताकर्णनपरास्तदुत्तमाः पौनःपुन्येन तद्विषयकानुयोगेन श्रवणेऽलंबुद्धिशून्याः । "सामान्येन हरौ भक्तः प्रोक्तो भागवतो बुधैः । तदीहा श्रुतिसंयुक्ता विप्रो[1] भागवतोत्तमाः ॥ मुहुर्मुहुः पृच्छति यो मुरारेर्लीलां समस्ताघहरीं प्रसक्तः । सदा ह्यलं धीरहितोऽत्र वाच्यः स ब्राह्मणो भागवतोत्तमोत्तमः ॥" इति ब्रह्मसंहितोक्तेः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वादशोऽध्यायः ॥ १२ ॥ पालान् गोपान् । तदा हरणोत्तरकाले । तेषां सर्वेषां गोपवत्सानां रूपमिव रूपं यस्य सः । अब्दमिति । "कालाध्वनो रत्यन्तसंयोगे" इति द्वितीया । यावद्वर्षमित्यर्थः । पूर्ववत् यथापूर्वं लीलां करोति तद्वदित्यर्थः (१) । महाभाग्यं विना हरिकथायाः प्रश्नो न संभवतीति भावः । अस्यैव विवरणरूपं भागवतोत्तमेति कथं मे भागवतोत्तमत्वं तत्राह—यदिति । यत् यतः । नूतनं करोषि नूतनयासि तत्करोतीति णिजन्ताच्छतरि ॥१॥ "विटोऽद्रौ लवणे खिंगे मूषिके खदिरेऽपि च" इति मेदिनी । स्त्रिया इति । परमघृणास्पदस्यापि स्त्रीपदार्थम्[2] । नवनवमधुरतास्फूर्त्तावनुराग एव कारणं चेन्नित्यनूतनायमानस्य परमानंदैकरसस्य श्रीभगवतः किमुतेति भावः ॥ २ ॥ राजन्निति । हे बुद्ध्यादिना प्रकाशमान । एजत्कथानकं वक्ष्यमाणं बोद्धुं त्वमर्हसीति भावः ॥ ३ ॥ तथा पूर्वोक्तप्रकारेण भो वयस्या मम सखीनां भवतामेव भोजनयोग्यमेतदिति भावः । पुलिनं तोयात्सद्यो निर्गतं तटम् "तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्" इत्यमरः ॥ ४ ॥

---

१ विप्रपदमुपलक्षणं क्षत्रियवैश्ययोरत्र । २ स्त्रैणे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहोऽतिरम्यं पुलिनं वयस्याः स्वकेलिसंपन्मृदुलाच्छवालुकम् ॥ स्फुटत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलम् ॥ ५ ॥ अत्र भोक्तव्य मस्माभिर्दिवारूढं क्षुधार्दितैः ॥ वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणम् ॥ ६ ॥ तथेति पाययित्वार्भा वत्सानारुद्ध्य शाद्वले ॥ मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ॥ ७ ॥ कृष्णस्य विष्वक्पुरुराजिमंडलैरभ्याननाः फुल्लदृशो व्रजार्भकाः ॥ सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः ॥ ८ ॥ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकुरैः फलैः ॥ शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥ ९ ॥ सर्वे मिथो दर्श यंतः स्वस्वभोज्यरुचिं पृथक् ॥ हसंतो हासयंतश्चाभ्यवजह्रुः सहेश्वराः ॥ १० ॥

भोजनविधानाय पुलिनं स्तौति । अहो इति । स्वीयानां केलीनां संपदो विद्यंते यस्मिंस्तत् । मृदुला अच्छा वालुका यस्मिंस्तत् । किं च स्फुटद्विकसत्सरः । सरोजबाहुल्ये नोपचारतः सर एव विकसदित्युक्तम् । तस्य गंधस्तेन हृता आकृष्टा अलयः पत्रिणश्च ये तेषां के उदके ध्वनयस्तेषां प्रतिध्वानास्तैर्लसंतो द्रुमास्तैराकुलं व्याप्तम् ॥ ५ ॥ दिवारूढं वेलातीतेत्यर्थः ॥ ६ ॥ आरुद्ध्य संरुद्ध्य । शाद्वले हरिततृणे देशे ॥ ७ ॥ तदा ते विरेजुः । कृष्णस्य विष्वक् परितः पुरुराजिमंडलैर्बहुभिः पंक्तिमंडलैः सह नैरंतर्येणोपविष्टाः । श्रीकृष्णाभिमुखान्याननानि येषां ते । फुल्लदृशो विकसितनयनाः । कमलकर्णिकायाः परितः पत्राणि यथा तथेति ॥ ८ ॥ पुष्पैस्तद्दलैः अन्यैश्च पत्रैः कृतानि भाजनानि यैस्ते ॥ ९ ॥ रुचिं स्वादविशेषम् । अभ्यवजह्रुर्बुभुजिरे । सहेश्वराः श्रीकृष्णसहिताः ॥ १० ॥

विधानं करणम् । संपदोऽत्र तृणकंटकशर्कराराहित्यरूपा ज्ञेयाः । केलीनां क्रीडानाम् । अन्यदाह—पत्रिणः पक्षिणः । 'कं शिरोम्बुनोः' इति विश्वः ॥५॥ अत्र पुलिने । दिवाऽव्ययं दिवसे । तेन समासः । दिनमारूढम् । एतदर्थस्स्वामिचरणैः स्फुटितार्थांतरोक्त्या । हे क्षुधार्दिताः चरंतु भक्षयंतु तृणमित्येकत्वं सामान्याभिप्रायेण ॥६॥ यच्छ्रीमतोक्तं तत्तथास्त्वित्युक्त्वा अर्भा बालाः ॥ ७ ॥ यदा बुभुजुस्तदेत्यर्थः । परितः सर्वतः । अभ्याननाः प्रेम्णा सर्वेषांमुख्यस्पृहावतो भगवतः सत्यसंकल्पता शक्त्यैवोद्भारितेनाचिंत्यवैभवेन निष्पादितानां मुखाद्यंगानां प्रतिदिक्षु प्रकाशात्कृष्णस्याभिमुखे सन्निहितपंक्तौ वयमेव वर्त्तामहेऽन्ये तु व्यवहितपंक्तिषु पार्श्वतः पृष्ठतश्चोपविष्टा इति सर्व एवाभिमानवंत इत्यर्थः । तेन च "सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् " इति श्रुत्यर्थो दर्शितः । छदाः पत्राणि । यथा कंजकर्णिकायाः परितो मिलितीभूय तिष्ठंति तथेत्यर्थः ॥ ८ ॥ अंकुरैर्दूर्वादिभिः । फलैः कारीरादिभिः । पत्रादिभिर्भोजननिर्माणं बालानां प्रत्येकापूर्वरचना कौतुकेच्छयेवेति ज्ञेयम् ॥ ९ ॥ सहेश्वराः सकृष्णा एव सर्वे स्वस्वभोज्यस्य स्वस्वगृहानीतान्नव्यंजनादेः स्वादं दर्शयंतः स्वीयवटिकशाकरसालादिकं स्वयं किंचिद्भुक्त्वा स्वादमनुभूय भो सखे कृष्ण भोः श्रीदामन् भोः सुबल पश्यत मदयिवटिकादिकं कीदृशं स्वाद्विति स्वभक्ष्यपात्रादुद्धृत्य कृष्णादीनां हस्तेषु ददान, स्तांस्तदा स्वादमनुभावयंत इत्यर्थः । हसंतो हासयंत इति जातीमालत्यादिपुष्पाणि वटिकांतरे लक्षितान्यपर्ययित्वा भो सखाय एता अति स्वादुतमा वटिका आस्वादयतेत्युक्तिविश्वासात्सस्पृहं गृहीत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु ॥ तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः ॥ ११ ॥ भारतैवं वत्सपेषु भुंजानेष्वच्युतात्मसु ॥ वत्सास्त्वंतर्वने दूरं विविशुस्तृणलोभिताः ॥ १२ ॥ तान्दृष्ट्वा भयसंत्रस्तानूचे कृष्णोऽस्य भीभयम् ॥ मित्राण्याशान्मा विरमतेहानेष्ये वत्सकानहम् ॥ १३ ॥ इत्युक्त्वाऽद्रिदरीकुंजगह्वरेष्वात्मवत्सकान् ॥ विचिन्वन्भगवान्कृष्णः सपाणिकवलो ययौ ॥ १४ ॥ अंभोजन्मजनिस्तदंतरगतो मायार्भकस्येशितुर्द्रष्टुं मंजु महित्वमन्यदपि तद्वत्सानितो वत्सपान् ॥ नीत्वाऽन्यत्र कुरूद्वहांतरदधात्खेऽवस्थितो यः पुरा दृष्ट्वाऽघासुरमोक्षणं प्रभवतः प्राप्तः परं विस्मयम् ॥ १५ ॥

यज्ञभुगपि तेषु बुभुजे । बालानामिव केलिर्यस्य सः । तदाह । उदरवस्त्रयोर्मध्ये वेणुं बिभ्रद्दधदिति सर्वत्र संबध्यते । वाम इति कक्षपाण्योर्विशेषणम् । मसृणं स्निग्धं दध्योदनकवलम् । तदुचितानि बिल्वामलकादिफलान्यंगुलिसंधिषु । कर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् स्वस्य परित उपविष्टान् सुहृदः स्वैर्नर्मभिः परिहासवाक्यैः । स्वर्गे स्वर्गनिवासिनि जने मिषत्याश्चर्येण पश्यति सति लोके जनमध्ये बुभुजे ॥ ११ ॥ १२ ॥ भीभयं भयहेतुभ्यो भयमस्यापास्य । यद्वा अस्य विश्वस्य भियोऽपि भयं यः श्रीकृष्णः । आशाद्भोजनात् । अस्मिन्पादे अक्षराधिक्यमार्षम् ॥ १३ ॥ अद्रिषु तेषां दरीषु । कुंजेषु लतादिपिहितोदरविवरेषु । गह्वरेषु च ॥ १४ ॥ अंभोजन्मनः पद्माज्जनिर्यस्य स ब्रह्मा तदंतरे तस्मिन्नवसरे गत आगतस्तच्छिद्रं प्राप्तो वा । मंजु मनोहरमन्यदपि महित्वं महिमानं द्रष्टुं तस्य वत्सानितः स्थानात्पुलिनाद्वत्सपां

तान्भुंजानान्कटूकृतमुखान् दृष्ट्वा हसंतो हासयंतः चकारात्तैः सहर्षकौतुकं ताडयमानाश्च ॥ १० ॥ अहो गोपभाग्यं यतो यज्ञेऽतिपवित्रतासंपादितान्नं यो भुंक्ते स तेषु बुभुजे इति भावः । 'चिक्कणं मसृणं स्निग्धम्' इत्यमरः । तदुचितानि गोपयोग्यानि । अंगुलिबंधनार्हाण्यल्पानीत्यर्थः । विश्वनाथस्तु—वामे पाणौ बृहद्दध्योदनग्रासं बिभ्रत् तत्फलानि तत्प्रयोजनीभूतान् क्षुद्रग्रासान्दक्षिणपाण्यंगुलिषु बिभ्रत् मुखप्रवेशयोग्यान्बहून् ग्रासांस्ततः पृथक्कृत्य ग्रहीतुमेव वामे पाणौ बृहत्कवलग्रहणमिति स्वैर्नर्मभिरिति भो भृंगाः किं मन्मुखाभिमुखं धावथ सुकुमारं मधु मंगलं पिबत भो वयस्य ब्राह्मणबाल मां किं भृंगैः खादयसि मन्ये ब्रह्महत्यायामपि ते न भयमिति । भो एतद्वनस्थवानरा युष्मासु बुभुक्षुषु जाग्रत्स्वपि मत्प्रियसखानिर्विघ्नं भुंजतेऽतोऽलक्षितमागच्छतेति । तस्य नर्म सत्यसंकल्पताशक्तिलीलाशक्तिभ्यामपि—भोः । स्वामिन्कौतुकार्थं यदि भोजनविघ्नमीहसे तर्ह्यावाभ्यां ब्रह्मा संप्रत्येवानीयत इत्यलक्षितमनुमोदितमिति ज्ञेयम् । बालैः केलिर्मिथोभुक्त्यन्नादानप्रदानभोजनश्लाघनानंदनमयी यस्य स तथा ॥ ११ ॥ कृष्णलीलारूपभायां कांत्यां रतोऽसि यतस्तत एव तुभ्यमिदं गुह्यं वच्मीति 'वाच्यं श्रद्धालवे तत्त्वम्' इत्यभिप्रायेणाह—हे भारतेति । अच्युतात्मस्वित्युक्तेर्न तेषां चेतोवत्सविनिवर्तनादिष्वस्तीति ध्वनिः । अंतर्वने वनमध्ये ॥ १२ ॥ भयहेतुभ्यो व्याघ्रादिभ्यः । समास एव ल्यब्विधेरत्र ल्यबनौचित्यं मन्वानोऽर्थांतरमाह—यद्वेति ॥ १३ ॥ पाणौ कवलं पाणिकवलं तेन सह वर्तत इति सपाणिकवलो हस्तगृहीतग्रासः । विचिन्वन् अन्विष्यन् ॥ १४ ॥ अंभोजन्मजनिरिति जडवंश्यत्वात्सचेतनोऽपि जड एव यद्भगवत्यपि स्वमायां ततानेति । ततः पूर्वमेव ब्रह्मण आगतत्वाद्गतशब्दप्रसिद्धार्थत्यागानौचित्याद्वार्थांतरमाह—प्राप्तो वेति । 'अंतरोऽवसरे छिद्रे'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् ॥ उभावपि वने कृष्णो विचिकाय समंततः ॥ १६ ॥ क्वाप्यदृष्ट्वांतर्विपिने वत्सान्पालांश्च विश्ववित् ॥ सर्वं विधिकृतं कृष्णः सहसाऽवजगाम ह ॥१७॥ ततः कृष्णो मुदं कर्तुं तन्मातृणां च कस्य च ॥ उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥ १८ ॥ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषांबरम् ॥ यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोंगवदजः सर्वस्वरूपो बभौ ॥१९॥ स्वयमात्माऽऽत्मगोवत्सान्प्रतिवार्यात्मवत्सपैः ॥ क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजम् ॥२०॥

श्चान्यत्र नीत्वा स्वयं तिरो बभूव । प्रभवतः श्रीकृष्णस्य ॥ १५ ॥ उभावपि वत्सान्वत्सपांश्चेत्यर्थः । विचिकायान्वीक्षितवान् ॥ १६ ॥ विधिकृतं ब्रह्मणा कृतम् ॥१७॥ उभयायितं वत्सतत्पालरूपेण वर्तमानमित्यर्थः । तस्य ब्रह्मणः । अयं भावः । यदि तूष्णीमासे तर्हि तन्मातृणां विषादः स्याद्यदि च तानेवानयिष्यामि तर्हि ब्रह्मणो मोहो न स्यादिति तदुभयप्रीतये परमदयालुस्तथा चक्रे इति ॥ १८ ॥ तदेव दर्शयति । यावदिति । वत्सपानां वत्सकानां चाल्पकं वपुः यत्प्रमाणकं प्रमाणमनतिक्रम्येत्यर्थः । एवमुपर्यपि योज्यम् । तत्र दलं पर्णरूपो वाद्यविशेषः । यद्वात्र वेणुदलं वेणुखण्डम् । शिक् शिक्यम् । यद्वा यावद्वत्सपादिवपुस्तावन्मात्रमपि सर्वस्वरूपोऽजः कृष्णो बभावित्यर्थः। उत्तरत्राप्येवम् । कथम् । 'सर्वं विष्णुमयं जगत्' इत्यत्र प्रसिद्धा या गीस्तस्या अंगवत्सा गीरेवार्थस्वरूपेण प्रत्यक्षा यथा तथा बभूवेत्यर्थः ॥ १९ ॥ एवं सर्वात्मा सन्व्रजं प्राविशत् । कथं स्वयमात्मैव प्रयोजकः । आत्मरूपान् गोवत्सानिति कर्मापि स्वयमेवेत्युक्तम् । आत्मरूपैर्वत्सपैः प्रतिवार्य प्रयोज्यकर्ताऽपि स्वयमेव आत्मविहारैः क्रीडन्निति

इति हलायुधः । श्रीकृष्णस्य सकाशात् ॥ १५ ॥ ततस्तत्र वनादिष्वित्यर्थः ॥ १६ ॥ विश्ववित्सर्वज्ञः ॥ १७ ॥ ततो विधिकृतकर्मज्ञानानंतरम् । उभय इवाचरतीति उभयायते ततोऽकर्मकत्वात्कर्तरि क्तः । उभयायितमिति । इत्यर्थ इति निष्कर्षः । किमर्थमुभयायितमिति चेत्तत्राह—अयं भाव इति । तूष्णीं स्थितौ तत्तन्मातृणां तत्तद्वियोगजः क्लेशस्तेषामानयने विधिमोहश्च न भावीत्येतदर्थं तथा चक्र इति तात्पर्यम् । विश्वकृदिति तत्र परिश्रमाभावमाह ॥ १८ ॥ अल्पमेवाल्पकं तच्च वपुरल्पकवपुः वत्सपवत्सकानामल्पकवपुर्वत्सपवत्सकाल्पकवपुः । यावत् प्रमाणमतिक्रम्य वत्सपवत्सकाल्पकवपुर्यावद्वत्सपवत्सकाल्पकवपुः "यावदवधारणे" इत्यव्ययीभावः । समासे श्रमदर्शनात्प्रकारांतरमाह—यद्वेति । यावत्तावतोर्नित्यसंबंधात् । उपर्युत्तरत्रशब्दावग्रपरौ ज्ञेयौ । सर्वं विष्णुमयमेतदग्र इति शब्दं प्रक्षिप्यान्वयो विधेयः । 'मुख्यार्थप्रतिपत्तये पदांतराध्याहारः' इति न्यायात् । अंगवत् शरीरवत् । इत्यर्थ इति । सर्वं विष्णुमयमिति वाक् साक्षाच्छरीरिणीवार्थतः प्रत्यक्षा जातेति तात्पर्यम् । यद्वा—तस्या वाचोंगवदेकदेशवत् । नहि सर्वं जगद्विष्णुमयं तदा जातं किन्तु नंदव्रजस्यैव वत्सपवत्साश्चेति कृत्वैकदेशवदित्युक्तम् । यद्वा—सर्वस्वरूपोऽजो बभौ । कथं सर्वं विष्णुमयमिति गिरोंगवत् यथाऽज ओंकारोंगवत् अंगावयवसकलवर्णस्वरूपेण भातीत्यर्थः । तद्यथा शकुनैः सर्वाणि पर्णानि संतृणानि एवमोंकारेण सर्वा वाक्संधिता " ओंकार एवेदं सर्वम् " इति श्रुतेः । अथ वा सर्वं विष्णुमयं मत्वेति शेषः । अजः कृष्णः । सर्वस्वरूपो बभौ । कथं गिरोंगवत् यथा सकलशब्दजातं मात्रात्रयेण व्याप्योंकारो भाति तदुच्चारणादृते वेदाध्ययनादेरसंभवाच्च तस्य गिरोंगवत्त्वं वर्णसमूहरूपत्वाद्वा " ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम् " इत्यग्रे वक्ष्यमाणत्वात् ॥ १९ ॥ एवमुक्तरीत्या । प्रयोजकः प्रेरकः । इत्यर्थ इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तद्वत्सान्पृथङ्नीत्वा तत्तद्गोष्ठे निवेश्य सः ॥ तत्तदात्माऽभवद्राजंस्तत्तत्सद्म प्रविष्टवान् ॥ २१ ॥ तन्मातरो वेणुरवत्वरोत्थिता उद्धृत्य दोर्भिः परिरभ्य निर्भरम् ॥ स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा परं ब्रह्म सुतानपाययन् ॥ २२ ॥ ततो नृपोन्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः ॥ संलालितः स्वाचरितैः प्रहर्षयन्सायंगतो यामयमेन माधवः ॥ २३ ॥ गावस्ततो गोष्ठमुपेत्य सत्वरं हुंकारघोषैः परिहूतसंगतान् ॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यः स्रवदौधसं पयः ॥ २४ ॥ गोगोपीनां मातृताऽस्मिन्सर्वा स्नेहर्द्धिकां विना ॥ पुरोवदास्वपि हरेस्तोकता मायया विना ॥ २५ ॥

क्रियाऽपि कारकाण्यपि स्वयमेवेत्यर्थः ॥ २० ॥ तत्तदात्मा तत्तद्गोपबालरूपोऽभवत् । ततस्तत्तत्सद्म प्रविष्टः ॥ २१ ॥ गोपिकामोहनमाह । तन्मातर इति । तदा तन्मातरो वेणुरवेण त्वरयोत्थिताः सत्यः सुतान्मत्वा परं ब्रह्मैव दोर्भिरुत्थाप्योद्धृत्य पयःसुधासवं पय एव सुधावत्स्वादु आसववन्मादकं स्नेहस्नुतं स्तन्यं पयः पाययामासुरित्यर्थः ॥ ॥ २२ ॥ एवं यामयमेन तत्तत्कालक्रीडानियमेन सायं गतः प्रातः स्वाचरितैः स्वस्याचरितैः शोभनैराचरितैर्वा ॥ मातॄः प्रहर्षयंस्ततस्ताभिरुन्मर्दनादिभिरुपलालित इति ॥ २३ ॥ गवां मोहनमाह । गाव इति । परिहूता आहूताश्च ते संगताश्च प्राप्तास्तान् ॥ २४ ॥ एतावत्तु वैषम्यं कृष्णस्यापि दुर्निवारमासीदित्याह । गोगोपीनामिति । गवां गोपीनां चास्मिन्वत्सपालरूपे कृष्णे मातृता उपलालनादिरूपा पुरोवदेवासीत्किं तु स्नेहर्द्धिकां विना । स्नेहाधिक्यं त्विदानीं विशेष इत्यर्थः । आसु गोगोपीषु हरेस्तोकता

क्रियाकारकरूपेण स एव तदासीदिति भावः ॥ २० ॥ तत्तदात्मा श्रीदामसुदामसुबलमंगलमधुमंगलादिस्वरूपः गोष्ठे गोबंधनादिस्थले । स कृष्णः ॥ २१ ॥ तदा गोपीनामतिस्नेहः प्रादुरासीदित्याह—तन्मातर इति । इत्यर्थ इति । पयस्यपि तदा वैलक्षण्यमभूदिति भावः । निर्भरमतिशयेन स्नेहस्नुतत्वेन स्नेहमयम् । तत्प्रेमास्वादमहारसिकः कृष्णः सुधामिव स्वादु आसवमिव मादकं पिबन् पिबन्ननुबभूव तल्लोभेन तस्यापि तत्पुत्रीभाववासना प्रागासीत्सापि ब्रह्ममोहनप्रसंगे एव सिद्धेति । अत एव स्वसखीनपि वर्षपर्यंतं मोहयामासेति ज्ञेयम् । अत एव स्तन्यामृतं 'पीतम्' इति ब्रह्मोक्तिश्च संगंस्यते ॥ २२ ॥ स्वस्याऽऽचरितैः नित्यं क्रियमाणैः स्वविहारैरिति । नित्यविहाराणां हर्षजनकत्वासंभवं मत्वाऽर्थांतरमाह—शोभनैरिति । शोभना एव हर्षजनका भवंति नित्यविहारापेक्षया विलक्षणत्वादिति भावः । ततः पयःपायनानंतरम् । ताभिर्गोपीभिः ॥ २३ ॥ तथैव गवामपि स्नेहाधिक्यमाह—गाव इति । परिहूतेनाह्वानेन संगतान्प्राप्तान् । मुहुर्लिहंत्य इति स्नेहाधिक्यमाह । ऊधः स्तनाधिकरणं गवामवयवस्तत्र भवमौधसम् ॥ २४ ॥ एतावद्वक्ष्यमाणम् । वैषम्यमाह—किञ्चेति । इत्यर्थ इति । स्नेहाधिक्यमेव वैषम्यमिति भावः । इत्यर्थ इति । मायायाः स्वाश्रयमोहकत्वाभावादिति भावः । ननु श्रीदामादिषु तन्मातॄणां यावान्स्नेहस्तावानेव पुत्रीभूते श्रीकृष्णेऽपि भवितुमर्हति । 'यावच्छीलगुणाभिधाकृतिवयः' इत्याद्युक्तेः । अत्रोच्यते—कृष्णो महामहेश्वरत्वात्स्वाधीनीकृतब्रह्मादिपर्यंतोऽपि प्रेम्णः खल्वधीन एव । प्रेमा तु न तस्याधीन इति प्रेम्णि तस्य प्रभुत्वाभावात्तेन प्रेमा संकुचितीकर्त्तुमशक्यमत एव स्वामिचरणैरप्युक्तम् । एतावत्तु वैषम्यं कृष्णस्यापि दुर्निवारमिति । स च प्रेमा वात्सल्यादिरूपस्तन्मातृषु विराजत एव इति कृष्णः स्वमात्रादिसमीपे स्वैश्वर्यमनुसंदधानोऽधीनीभूत एव सदा तिष्ठति यथा चक्रवर्त्तिनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रजौकसां स्वतोकेषु स्नेहवल्ल्याऽऽब्दमन्वहम् ॥ शनैर्निस्सीम ववृधे यथा कृष्णे त्वपूर्ववत् ॥ २६ ॥ इत्थमात्माऽऽत्मनाऽऽत्मानं वत्सपालमिषेण सः ॥ पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः ॥ २७ ॥ एकदा चारयन्वत्सान्सरामो वनमाविशत् ॥ पंचषासु त्रियामासु हायनापूरणीष्वजः ॥ ॥ २८ ॥ ततो विदूराच्चरतो गावो वत्सानुपव्रजम् ॥ गोवर्धनाद्रिशिरसि चरंत्यो ददृशुस्तृणम् ॥ २९ ॥ दृष्ट्वाथ तत्स्नेहवशोऽस्मृतात्मा स गोव्रजो ऽत्यात्मपदुर्गमार्गः ॥ द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुंकृतैरास्रपया जवेन ॥ ३० ॥

च बालभावनादि पूर्ववदेवासीत्किं तु मायया विना । ममेयं माताऽहमस्याः पुत्र इति पूर्वं मोह आसीत्तं विनेत्यर्थः ॥ २५ ॥ स्नेहर्धिमेव दर्शयति । व्रजौकसामिति । यथा कृष्णे यशोदानंदने स्वपुत्रेभ्योऽपि स्नेहाधिक्यं यथा पूर्वमासीत् तथेदानीं स्वतोकेष्वपि तथैवावर्धतेत्यर्थः । आअब्दं यावत्संवत्सरम् । निःसीम यथा भवति ॥ २६ ॥ एवमात्मा श्रीकृष्णो वत्सपो भूत्वा तत्रापि वत्सानां पालानां च मिषेणात्मानमात्मना पालयन् क्रीडितवानित्यर्थः ॥ २७ ॥ एतावत्पर्यंतं रामस्यापि मोह एवासीत्संवत्सरांते तु स कथंचिज्ज्ञातवानिति दर्शयन्नाह । एकदेति । पंचषासु पंचसु वा षट्सु वा रात्रिषु हायनस्यापूरणीषु पूरकतयाऽवशिष्टास्वित्यर्थः ॥ २८ ॥ ततो दूरत एव गोवर्धनशिखरे चरंत्यो गावो व्रजसमीपे तृणं चरतो वत्सान्ददृशुः ॥ २९ ॥ तदैव स गोव्रजो गवां कलापस्तत्स्नेहवशस्तेषां वत्सानां स्नेहेनाकृष्टोऽत एव न स्मृत आत्मा देहो येन स जवेनोपव्रजमगात् । कथंभूतः । अत्यात्मपदुर्गमार्गः अतिक्रांत आत्मपान् गोपालान्यः सोऽत्यात्मपः तथा दुर्गो दुर्गमो मार्गो यस्य सः स च स च । तथा परस्परयुक्ताभ्यां पद्भ्यां धावन् द्विपादिव प्रतीयमानः । ककुद्याकुंचिता ग्रीवा यस्य सः । उदास्यपुच्छः उन्नमितान्यास्यानि पुच्छानि च येन सः । आस्रुपयाः सर्वतः स्रवंति

पार्श्वे मंडलेश्वरः।न च तस्यैवं पारतंत्र्यं दूषणमिति वाच्यम् प्रत्युत भूषणमेव। यथा जीवस्य मायापारतंत्र्यं दुःखार्थकं तथैवेश्वरस्यानंदरसमयस्यापि प्रेमपारतंत्र्यं प्रतिक्षणवर्द्धमाननिरतिशयानंदार्थकमेवेति महानुभावैरनुभूतम् । श्रीयशोदायां तु श्रीकृष्णोहमिति प्रतिपादनेऽप्यासु श्रीदामाहमित्यादिच्छद्मप्रतिपादनान्मायाधिक्यमेवेति ज्ञेयम् ॥ २५ ॥ इत्यर्थ इति । स्वतोकत्वेन प्रतीयमानस्यापि यशोदानंदनत्वादिति तात्पर्यम् । निर्गता सीमा मर्यादा यत्र कर्मणि तत्तथेति ॥ २६ ॥ इत्थं पूर्वोक्तरीत्या । तत्रापि वत्सपत्वेपि । मिषेण छद्मना । इत्यर्थ इति । क्रीडां चक्र इत्येवार्थः ॥ २७ ॥ एतावत्पर्यंतं किंचिन्न्यूनाब्दपर्यंतम् । कथंचित् भगवत्सूचनेन । अजः कृष्णः । हायनस्य वर्षस्य । ‘ हायनोऽस्त्री शरत्समाः ’ इत्यमरः । इत्यर्थ इति । अब्दपूर्त्तेः पञ्चषारात्रिभ्यः प्रागिति तात्पर्यम् ॥ २८ ॥ ततस्तदा उपव्रजमिति । गोवर्द्धनेशानकोणकोटिस्थारिष्टमर्दनकुंडसमीपप्रायप्रदेशे । तदंतिके व्रजस्य व्याप्तेः सद्दीकराख्यप्रदेशादृजुमार्गेण चतुःक्रोशमयत्वात् । “ अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ” इति वक्ष्यमाणाच्च ॥ २९ ॥ स गोवर्द्धनमूर्द्धगः । उपव्रजमिति पूर्वानुषंगः । ककुदि किंचिदुन्नतवृषस्कंधावयवे “ककुद स्त्री ककुदश्च वृषांगे राड्ध्वजेवरे” इति मेदिनी । वृष उपलक्षणं गोरपि । आकुंचिता संकोचिता । उन्नमितान्यूर्ध्वं कृतानि । प्रथमे पाठे ‘स्रु–गतौ’ द्वितीये ‘ष्णु–प्रस्रवणे’॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समेत्य गावोऽधो वत्सान्वत्सवत्योऽप्यपाययन् ॥ गिलंत्य इव चांगानि लिहंत्यः स्वौधसं पयः ॥ ३१ ॥ गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना ॥ दुर्गाध्वकृच्छ्रतोऽभ्येत्य गोवत्सैर्ददृशुः सुतान् ॥ ३२ ॥ तदीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् ॥ उदूह्य दोर्भिः परिरभ्य मूर्धनि घ्राणैरवापुः परमां मुदं ते ॥ ३३ ॥ ततः प्रवयसो गोपास्तोकाश्लेषसुनिर्वृताः ॥ कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ॥ ३४ ॥ व्रजस्य रामः प्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणम् ॥ मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिंतयत् ॥ ३५ ॥ किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि ॥ व्रजस्य सात्मनस्तोकेष्वपूर्वं प्रेम वर्धते ॥ ३६ ॥ केयं वा कुत आयाता दैवी वा नार्युतासुरी ॥ प्रायो मायास्तु मे भर्तुर्नान्या मेऽपि विमोहिनी ॥ ३७ ॥

पयांसि यस्य सः । आस्नुपयाः इत्यपि पाठे स एवार्थः । गोव्रज इत्यनेन वृषभादयोऽप्यगुरित्युक्तम् ॥ ३० ॥ तत्र विशेषतो धेनूनां चेष्टितमाह । समेत्येति । गोवर्धनस्याधः । वत्सवत्यः पुनः प्रसूता अपि ॥ ३१ ॥ रामेण दृष्टं वत्सेषु गवां स्नेहातिशयमुक्त्वा गोपानामपि दर्शयितुमाह । गोपा इति । तासां गवां रोधने य आयासस्तस्य मौघ्येन मोघत्वेन लज्जया सहोरुमन्युना दुर्गमार्गजनितक्लेशेन चाभ्येत्य गोवत्सैः सह सुतान् ददृशुः ॥ ३२ ॥ ततश्च तेषामीक्षणेनोद्गतो यः प्रेमरसस्तस्मिन्नाप्लुता निमग्ना आशया येषां ते । लज्जामन्युकृच्छ्रैस्तानपि ताडयितुमागताः संतोऽपि गतमन्यवः प्रत्युत जातोऽनुरागो येषां ते मूर्धनि घ्राणैरवघ्राणैः परमां मुदमवापुः ॥ ३३ ॥ कृच्छ्रात्ततोऽपगता निवृत्ताः । तेषां सुतानामनुस्मृत्योद्गच्छंत्यश्रूणि येषां ते ॥ ३४ ॥ प्रेमर्द्धेरौत्कण्ठ्यमतिशयम् । मुक्तस्तनेष्वपत्येषु वीक्ष्य हेतुमजानन्नचिंतयत् ॥ ३५ ॥ चिंतामेवाह किमेतदिति द्वाभ्याम् । वासुदेवे यथा पुरा प्रेम तथा स्वतोकेष्वपि व्रजस्यापूर्वं प्रेम वर्द्धते किमेतदद्भुतमिति । किं च सात्मनो मत्सहितस्य व्रजस्य ममाप्येतेषु प्रेमातिशयस्तत्र कारणं किमिति भावः ॥ ३६ ॥ केयं माया देवानां वा नराणां वा असुराणां वा कुतो वा कस्मात्प्रयुक्ता । तत्रान्यमाया न संभवति यतो ममापि मोहो वर्ततेऽतः प्रायशो मत्स्वा

तत्र गोव्रजे लिहंत्य आस्वादयंत्यः ॥ ३१ ॥ रामाय गोस्नेहतोऽपि गोपस्नेहाधिक्यं सूचयन्नाह–गोपा इति ॥ ३२ ॥ ततः सुतदर्शनानंतरम् । गतमन्यवो विगतक्रोधाः ॥ ३३ ॥ ततस्तेभ्यः प्रवयसो वृद्धा ॥ ३४ ॥ अनुक्षणं प्रतिक्षणम् । अतिशयमाधिक्यम् ॥ ३५ ॥ अत्यद्भुतमाह–किञ्चेति । इति भाव इति । शुद्धसत्त्वस्वरूपे मयि मोहः कथं जात इत्यहं न जाने इति तात्पर्यम् ॥ ३६ ॥ संभावयति–कल्पयति । यद्यपि श्रीबलदेवस्य कारणार्णवशायित्वेन परमांशित्वेन तात्कालिकज्येष्ठत्वेन वञ्चनानौचित्यं तथापि यावदब्दं श्रीदामादिप्रियसुखविच्छेददुःखदानमनुचितं मत्वा पञ्चषरात्रशेषे एव तत्तस्मै प्राबोधयत् । तदेव मायापि शनैरंशांशेनोपरराम । प्रथमांशोपरमे किमेतदित्यचिंतयत्ततः द्वितीयांशोपरमे मायेयं पुनराह–दैवीति । देवा ब्रह्माद्या ऐश्वर्यपरीक्षणार्थं किं वत्सपाला भूत्वाऽस्माकं चित्तं स्वेषु स्नेहयंति नैते श्रीदामाद्याः नरा ऋष्यादयः किमस्मज्ज्ञानपरीक्षणार्थं वत्साद्या अभूवन् । किं वा सुराः कंसाद्या एव बलेनापारयंतः छलेनास्माकं हिंसनार्थमेतेऽभूवन् । ततस्तृतीयमायांशोपरमे सति प्राय इत्याद्याह । श्रीकृष्णस्यैवेयं योगमायास्त्विति चतुर्थांशस्याप्युपरमे सति कृष्णरूपानेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति संचिंत्य दाशार्हो वत्सान्सवयसानपि॥सर्वानाचष्ट वैकुंठं चक्षुषा वयुनेन सः॥३८॥नैते सुरेशा ऋषयो न चैते त्वमेव भासीश भिदाश्रयेऽपि ॥
सर्वं पृथक्त्वं निगमात्कथं वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत् ॥ ३९ ॥ (ब्रह्मापि यातः स्वस्थानं तत्रस्थेन हि शौरिणा ॥ मोहितैर्द्वारपालैश्चपरिभूतो
न्यवर्तत॥१॥) तावदेत्यात्मभूरात्ममानेन त्र्युटयनेहसा ॥ पुरोवदब्दं क्रीडंतं ददृशे सकलं हरिम् ॥४०॥ यावंतो गोकुले बालाः सवत्साः सर्वं एव
हि॥ मायाशये शयाना मे नाद्यापि पुनरुत्थिताः॥४१॥इत एतेऽत्र कुत्रत्या मन्मायामोहितेतरे ॥ तावंत एव तत्राब्दं क्रीडंतो विष्णुना समम् ॥४२॥
मिनः श्रीकृष्णस्यैव मायेयमस्त्विति संभावयति ॥ ३७ ॥ सवयसान्सखीनपि वयुनेन ज्ञानमयेन चक्षुषा वैकुंठं श्रीकृष्णमेवापश्यत् ॥ ३८ ॥ एवं कृष्णरूपान्सामान्यतो
ज्ञात्वा कृष्णं पृष्ट्वा कृष्णोपदेशेन विशेषतो ज्ञातवानित्याह । नैत इति । अयमर्थः । पाल्यमानास्तावद्वत्सा ऋषीणामंशाः पालाश्च देवानामंशा इति तावदहं वेद्मि । इदानीं
तु न तथा किं त्वस्मिन् भिदाश्रयेऽपि त्वमेवाद्वितीयो भासि अतस्त्वं सर्वं कथं वृत्तं तत् पृथक् वद विविच्य ब्रूहीत्युक्तेन प्रभुणा वक्त्रान्निगमात्संक्षेपत एवोक्तं वृत्तं बलोऽ
वैद्विदितवानित्यर्थः ॥ ३९ ॥ ततः किं वृत्तमित्यपेक्षायामाह । तावदिति । वर्षे जातेऽपि आत्मनो मानेन त्रुटयनेहसा त्रुटिमात्रेण कालेन । सकलं कलाभिः सहितं सानुचरं
हरिं ददर्श ॥ ४० ॥ दृष्ट्वा च व्यतर्कयदित्याह । यावंत इति द्वाभ्याम् । मे मायाशये मन्मायातल्पे ॥ ४१ ॥ मन्मायामोहितेभ्य इतरे कुत्रत्याः ॥ ४२ ॥
तानपश्यदित्याह । वयुनेन समाहितज्ञानेनेति विश्वनाथः । यद्वा—प्रायो दैवी नार्यासुरी वान्या वा मायास्तु भर्तुः सर्वपालकस्य मे केयं विमोहिनी अपि तु नेति योज्यम् ॥ ३७ ॥ स रामः ॥ ३८ ॥ ज्ञात्वापि सिद्धांतं
कर्तुं श्रीकृष्णं प्रत्याह—नैत इति । अयमर्थ इति । अस्यायं भाव इत्यर्थः । " वत्साः सर्वे गोकुलेऽत्र ऋषे ऋषय एव हि । गोपाः सर्वे देवरूपा जाता ब्रह्माज्ञया ध्रुवम् ॥ " इत्यादिपुराणात् । तावत्सकलम् ' याव
त्तावच्च साकल्ये ' इत्युक्तेः । इह त्वन्यथैव भातीत्याह—किंत्विति । भिदाश्रये गोपवत्सदेहे । यतस्त्वमेव भासि अतो हेतोः । कथं वृत्तमेतत्कथं जातमिति इत्युक्ते बलदेवेनेत्थमुक्तेन । प्रभुणा कृष्णेन । इत्यर्थ इति ।
वेत्तेर्बह्वर्थत्वादत्र ज्ञानार्थता ज्ञेयेति भावः । यद्वा—निगमाद्वेदात् । " सर्वं खल्विदं ब्रह्म " इत्येवंरूपात् । विविच्य विचार्य सर्वं दृश्यादृश्यं पृथक् कथमिति त्वं वदेत्युक्तेनेत्थमुक्तवता सता प्रभुणा बलो वृत्तं तात्का
लिकं ब्रह्मणे निजवैभवदर्शनरूपमवैदिति। ततश्च कृष्णस्यैवं वत्सबालकीभावे किं कारणं प्रयोजनञ्च ते वत्सपाला वा क्व गता इति बहुतरसमाधिनापि यत्स्वयं ज्ञातुं नेष्टे तत्र माया न कारणं किं तु स्वयं भगवतः कृष्णस्य
खल्वैश्वर्यमसाधारणमित्थंस्वरूपमेव सर्वत्र सर्वज्ञा अपि नारायणादयः परमेश्वराः स्वांशा अपि यद्विषयकमल्पज्ञत्वमेव बिभ्रति न तु सर्वज्ञत्वं स्वत इत्यत्र प्रमाणं द्वारकावासिब्राह्मणबालहर्त्ता भूमा महापुरुषोऽप्यग्रे आख्या
स्यते तस्माच्छ्रीबलदेवः कृष्णं दृष्ट्वैव सर्वं तत्त्वमवगतवानित्याह—नैत इति । सुरेशा ब्रह्माद्या एव मायया वत्सबालाकारा एते न संभवंति नापि ऋषयः चान्नाप्यसुराः किन्तु भिदाश्रयेऽपि विविधभेदास्पदेपि वत्सबालादि
समूहत्वमेवैका भास्ति एकस्यापि तव पृथक्त्वं वत्सपालादिरूपत्वं कथं तन्निगमात्संक्षेपतो वदेत्युक्तेन पृष्टेन प्रभुणा श्रीकृष्णेन हेतुना बलोऽवैद्ब्रह्ममोहनादिवृत्तं ज्ञातवान् ॥ ३९ ॥ पुनरुत्सुकः पृच्छति—तत इति । ततो
बलबोधनानंतरम् । वर्षे संवत्सरे । आत्मनो ब्रह्मणः । मानेन प्रमाणेन । त्रुट्यनेहसा " त्रसरेणुत्रयं भुंक्ते यः कालः स त्रुटिः स्मृतः " इत्युक्तलक्षणकालेन । आत्मभूर्ब्रह्मा । पुरोवत्पूर्ववत् । अब्दं यावद्व
र्षम् । सानुचरं गोपगोवत्ससहितं हरिं श्रीकृष्णमेव । अत्रापि बलदेवो मात्रा जन्मर्क्षशांत्यर्थं रक्षित इति पूर्ववज्ज्ञेयम् ॥ ४० ॥ व्यतर्कयद्विचारितवान् । यावन्तो यत्प्रमाणकाः । श्रीकृष्णसहागताः गोकुले चारणार्था
नीतवत्ससमूहे । अद्यापि इदानीमपि वर्तमानदिनार्थकत्वेद्याव्ययस्य त्रुट्यनेहसेत्युक्त्याविरोधः स्यादिति ॥ ४१ ॥ इत इह । सप्तम्यर्थे तसिः । एते दृश्यमानाः । अत्रेत्युक्तिस्तु संभ्रमान्न तेषां पौनरुक्त्यं शंक्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः ॥ सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंचन ॥ ४३ ॥ एवं संमोहयन्विष्णुं विमोहं विश्वमोहनम् ॥ स्वयैव मायया ऽजोऽपि स्वयमेव विमोहितः ॥ ४४ ॥ तम्यां तमोवन्नैहारं खद्योतार्चिरिवाहनि ॥ महतीतरमायैश्यं निहत्यात्मनि युंजतः ॥४५॥ तावत्सर्वे वत्सपालाः पश्यतोऽजस्य तत्क्षणात् ॥ व्यदृश्यंत घनश्यामाः पीतकौशेयवाससः ॥ ४६ ॥

इति वितर्कयन्नमुह्यदित्याह एवमिति द्वाभ्याम् । एवमेतेषु भेदेषु चिरं ध्यात्वा । स आत्मभूरिति पाठः ॥ ४३ ॥ ४४ ॥ ननु मायाश्रयस्य तस्य कुतो मोह इत्यत आह । तम्यामिति । महामायाविनि भगवत्यन्यमायाया आवरणविक्षेपकत्वाभावे दृष्टांतद्वयमितम् । तम्यां तमिस्रायां रात्र्यां नैहारं हिमकणप्रभवं तम इव । तद्धितार्थोपसर्जनस्यापि तमसो नैहारमिति विशेषणं छांदसम् । तत्तमो यथा पृथगावरणं न करोति किं तु तत्रैव लीयते यथा च खद्योतार्चिरहनि पृथक् प्रकाशं न करोति एवं महति पुरुषे युंजतः पुंस इतरा नीचा माया तत्र न किंचित्करोति किंत्वात्मनि स्वस्मिन्नेव ऐश्यं सामर्थ्यं निहंतीति ॥ ४५ ॥ अन्यदप्याश्चर्यमाह । तावदिति । वत्सपालाः वत्साः पालाश्च

कुत्रत्याः कुतः समागता इत्यर्थः । तावंतस्तत्प्रमाणका एव । यतो मया हृतास्तत्रेत्यर्थः ॥ ४२ ॥ इति इत्थम् । वितर्कयन्विमृशन् । भेदेषु भिन्नत्वेन प्रतीयमानेषु गोपवत्सेषु । आत्मनि चेतासि । ध्यानशब्देन चेतोर्थकात्मपदलाभात्पुनरुक्तिसंभावनया पाठांतरं चक्लृपे—आत्मभूरिति । भेदेष्विति । किमेते इह प्रकृतास्तत्राह—कृष्णसृष्टाः किंवा एत एव कृष्णसृष्टास्तत्र ते प्रकृताः किं वा उभय एव कृष्णसृष्टाः प्रकृतास्तु कृष्णेनैव क्वापि ब्रह्माडांतरे चालिताः किं वा कृष्णेन वत्सपालानां प्रकाशद्वयीकरणात् उभय एव प्रकृताः किं वा मयि तत्र गत्वा तत्र पश्यति सति एत एव कृष्णेन तत्र नीयंते पुनरत्रागच्छति मयि त एवात्रानीयंते भवतु तर्हि युगपदेवोभयत्र दृष्टिं निक्षिपामीति तथा कृत्वापि तानुभयत्र दृष्ट्वा चिरं ध्यात्वापि एतेषु मध्ये भगवत्स्वरूपभूताः सत्या बहिरंगमायासृष्टाः सत्या नेतीमं भेदं तु कथंचन ज्ञातुं न शशाक ॥ ४३ ॥ विमोहं मोहानधिकरणम् । विश्वमोहनं सर्वमोहकरम् । अजोऽपीत्यपिना ब्रह्मणोपि यदा मोहस्तदा कान्येषां कथेति ध्वनितम् । स्वया स्वकृतया स्वस्य हरेर्वा ‘ आत्मात्मीययोः स्वः ’ इति कोशांतरात् । मोहितस्यापि ब्रह्मण एव विह्वलीकरणे भगवति मायाप्रयोगरूपापराध एव हेतुरिति भावः ॥ ४४ ॥ मायायाः स्वाश्रयव्यामोहकत्वस्येंद्रजालीयमायादृष्टांतेन प्रसिद्धत्वाद्ब्रह्मणोऽपि मायायश्रत्वान्मोहो न घटत इत्याशंकते—नन्वित्यादिना । ‘ रजनी यामिनी तमी ’ इति कोशात्साधारणरात्रिपरोऽपि तमीशब्द इहार्थस्वारस्यात्तमिस्रापरो ज्ञेयः । तथा च तम्यां तमोयुक्तायां रात्रौ । महामायाविनीति । ‘ मायिनामपि मायिनि ’ इत्युक्तेः । अन्यमायाया भगवदितरमायायाः । आवरणविक्षेपशक्तिद्वयविशिष्टा भगवत एव माया नान्यस्येति भावः । तमसा तुल्यं तमोवदिति तुल्यार्थे वतिस्तद्धितः । ‘ विशेष्यं तु प्रधानं स्यात् ’ इत्युक्तेः । प्राधान्यमत्र तद्धितार्थस्यैव न तु तमसः । तथा च कथमत्र तमसो विशेष्यत्वं तदभावे नैहारमिति विशेषणं कथम् । तत्राह—छांदसमिति । यद्वा—वदव्ययमिवार्थेऽस्ति । तत्र महति ॥ ४५ ॥ अतोप्यद्भुतमाह—तावत्तदा सकला वा सर्वशब्दस्य षष्ट्यादिपरत्वेन व्याख्यानात् व्यदृश्यंत ब्रह्मणेति शेषः । विश्वनाथस्तु—यावदेवं ब्रह्मा मीमांसमानो व्यामुह्यति स्म तावदित्यर्थः । वत्सा पालाश्च पश्यतोऽजस्य पश्यंतमप्यजमनादृत्येति । भोः सत्यलोकवासिन् अज सत्यं त्वमज एवासि ईदृश्यैव बुद्ध्या विश्वं सृजसि अस्मान्मायया मोहितुमिच्छसि कथंचिज्ज्ञातुमपि तावन्न शक्नोषि पश्येति व्यदृश्यंत वयं वृंदावनीयास्तृणं चरंतो वत्सा अपि वत्सांश्चारयंतो गोपबाला अप्येव भवाम इति ज्ञापयंत इव तद्दृष्टिगोचराः स्वय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्भुजाः शंखचक्रगदाराजीवपाणयः ॥ किरीटिनः कुंडलिनो हारिणो वनमालिनः ॥ ४७ ॥ श्रीवत्सांगददोरत्नकंबुकंकणपाणयः ॥ नूपुरैः कटकै र्भाताः कटिसूत्रांगुलीयकैः ॥ ४८ ॥ आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः ॥ कोमलैः सर्वगात्रेषु भूरिपुण्यवदर्पितैः ॥ ४९ ॥ चंद्रिका विशदस्मेरैः सारुणापांगवीक्षितैः ॥ स्वकार्थानामिव रजःसत्त्वाभ्यां स्रष्टृपालकाः ॥ ५० ॥ आत्मादिस्तंबपर्यंतैर्मूर्तिमद्भिश्चराचरैः ॥ नृत्यगीताद्यनेकार्हैः पृथक्पृथ गुपासिताः ॥ ५१ ॥ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः ॥ चतुर्विंशतीभिस्तत्त्वैः परीता महदादिभिः ॥५२॥ कालस्वभावसंस्कारकामकर्मगुणा दिभिः ॥ स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ॥ ५३ ॥ सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः ॥ अस्पृष्टभूरिमाहात्म्या अपि ह्युपनिषद्दृशाम्॥५४॥

सर्वे यष्टिविषाणादयश्च ॥ ४६ ॥ ४७ ॥ श्रीवत्सप्रभायुक्तान्यंगदादीनि दोष्षु येषां ते रत्नमयानि कंबुवत्त्रिधाराणि कंकणानि पाणिषु येषां ते ते च ते च ॥४८॥ तथा भूरिपुण्यं भूरि बहुजन्मार्जितं पुण्यं तद्युक्तैर्जनैरर्पितैः ॥ ४९ ॥ चंद्रिकाविशदस्मितयुक्तैः सहारुणगुणेन च वर्तमाना येऽपांगास्तैर्वीक्षितैः । स्वकार्थानां स्वभक्तमनोरथानां रजःसत्त्वाभ्यां स्रष्टृपालका इव व्यदृश्यंत । सत्त्ववद्विशदस्मितेन पालका इव । रजोवदरुणगुणेन च स्रष्टार इव । तादृक्कटाक्षैर्द्योतमाना इत्यर्थः ॥ ५० ॥ आत्मा ब्रह्मा तदादिस्तंबपर्यंतैः । अनेकार्हैरनेकार्हणैः ॥ ५१ ॥ अजायाभिर्मायाविद्यादिभिर्विभूतिभिः शक्तिभिः । महदादिभिरिति । महत्सूत्रयोः पृथक्त्वविवक्षया चतुर्विंशतितत्त्वै र्जगत्कारणैः ॥ ५२ ॥ कालादिभिश्च तत्सहकारिभिः । तत्र कालः क्षोभकः । स्वभावः परिणामहेतुः । संस्कारो वासनाया उद्बोधकः । स्वमहिध्वस्तमहिभिर्भगवन्म हिम्ना तिरस्कृतस्वातंत्र्यैरुक्तैः सर्वैरणिमाद्यैः ॥ ५३ ॥ सर्वेषां मूर्तिमत्त्वेऽपि विशेषमाह । सत्यज्ञानेति । सत्याश्च ज्ञानरूपाश्चानंताश्चानंदरूपाश्च तत्रापि तदेकमात्रा विजा तीयसंभेदरहितास्तत्रापि चैकरसाः सदैकरूपा मूर्तयो येषां ते । यद्वा सत्यज्ञानादिमात्रैकरसं यद्ब्रह्म तदेव मूर्तयो येषां ते इति । अत एवोपनिषदात्मज्ञानं सैव दृक् चक्षुर्येषां

मेवाभूवन् स्वप्रकाशत्वादिति भावः ॥ ४६ ॥ राजीवं कमलम् 'बिसप्रसूनराजीव–' इत्यमरः ॥ ४७ ॥ अंगदानि केयूराणि । "अंगदं बाहुभूषायामंगदो वालिजेऽपि च" इति धरणिः । 'कटको वलयोऽस्त्रियाम्' इत्युक्तेः करभूषणमपि कटकोऽत्र नूपुरसाहचर्यात्पादभूषणपरः । कटिसूत्राणि क्षुद्रघंटिकायुक्तानि सूत्रप्रोतकटिभूषणानि ॥ ४८ ॥ भूरिपुण्यानि नारायणकीर्तनादीनि, तद्वद्भिर्भक्तसहस्रेणार्पितैः । तुलसीनवदामभिर्वनमालाभिरित्यर्थः । तुलस्या उपलक्षणत्वात्, "तुलसीकुंदमंदारकरवीरसरोरुहैः । पंचभी रचिता माला वनमाला प्रकीर्तिता ॥" इति लक्षणात् । अंघ्री च मस्तकं चांघ्रिमस्तकम् । तदभिव्याप्येत्यर्थः । आङ्योगे द्वितीया । अनेन "पत्रपुष्प मयी माला या स्यादामस्तकात्पुनः । आपादं लंबमाना सा वनमाला प्रकीर्तिता ॥" इति द्वितीयलक्षणमपि वनमालाया अत्र संपन्नम् ॥ ४९ ॥ चंद्रिकाविशदास्मितयुक्तैः कौमुदीधवलेषद्धासयुतैः । अपांगाः कटाक्षाः "अपांगो ह्यंगहीने स्यात्कटाक्षे विष्णुरक्षिते" इति यादवः । इत्यर्थ इति–द्योतमाना इति पदशेषेणायमर्थः शोभनो भवतीति भावः ॥ ५० ॥ स्तंबः स्कंधहीनवृक्षस्तृणसमूहो वा " स्तंबोऽप्रकांडद्रुगुच्छतृणकीचकगह्वरे " इति धरणिः । एकैकस्याग्रे भिन्नभिन्नब्रह्मरुद्रादयो देवास्सर्वे स्थावरजंगमाश्च स्वस्वमूर्तिभेदैः स्तुवंतीति भावः ॥ ५१ ॥ आदिपदात् श्रीकीर्तिपुष्टिकांतिगिरादयो ज्ञेयाः । महिमभिः सिद्धिभिः । अणिमाद्यैरत्राप्यादिपदान्महि मगरिमादयो ज्ञेयाः ॥ ५२ ॥ कामो वासना । कर्म अदृष्टम् । गुणाः सत्त्वादयः ॥ ५३ ॥ विशेषं ब्रह्मादिभ्यो भेदम् । तत्रापि सत्यादिरूपत्वेपि । विजातीयभेदो घटात्पटस्य तद्वन्न किन्त्वेकजातीया एवेति । तत्राप्येक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान् ॥ यस्य भासा सर्वमिदं विभाति सचराचरम् ॥ ५५ ॥ ततोऽतिकुतुकोद्वृत्य स्तिमितैकादशेंद्रियः ॥ तद्धाम्नाऽभूदजस्तूष्णीं पूर्देव्यंतीव पुत्तिका ॥ ५६ ॥ इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके परत्राजातोऽतन्निरसनसुखब्रह्मकमितौ ॥ अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति चच्छादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम् ॥ ५७ ॥

तेषामपि हि निश्चितमस्पृष्टभूरिमाहात्म्या न स्पृष्टं स्पर्शयोग्यं भरि माहात्म्यं येषां ते तथाभूताः संतो व्यदृश्यंतेति ॥ ५४ ॥ एवं सकृदेकदैव ददर्श । परब्रह्मणो विशेषणं यस्येति ॥ ५५ ॥ अतिकुतुकेनाश्चर्येणोद्वृत्य दृष्टीः परावृत्य गंसपृष्ठे निपत्येति वा । कुतुकशब्दे तृतीयायाश्छांदसो लुक् । यद्वा उद्वृत्यः इति छेदः । अतिकुतुकेन उद्वृत्यो विचाल्यो विलोड्यो विपर्यस्तः स्वस्मिन्निति यावत् । पाठांतरे त्वतिकुतुकेनोद्वृत्तः क्षुभितः तेषां धाम्ना तेजसा स्तब्धसर्वेंद्रियो ब्रह्मा तूष्णीमभवन्निश्चलोऽभत् । अत्र दृष्टांतः । पूर्देवी व्रजाधिष्ठात्री काचिद्देवता तस्या अंति समीपे पुत्तिका चतुर्मुखी कृतकप्रतिमेव ॥ ५६ ॥ एवं मोहमग्नमजमुज्जहारेत्याह । इतीति । इरेशे इरा सरस्वती तस्या ईशे ब्रह्मणि किमिदमिति मुह्यति सति पश्चात्तद्द्रष्टुमप्यनीशे सति परमोऽजः श्रीकृष्णः सपद्यजाजवनिकां मायारूपां तिरस्करिणीं यथाऽद्भुतं दर्शितं तां चच्छाद तिरोधत्त । अपसारितवानित्यर्थः । अथ वा अयं लोकाभिमानी ममैश्वर्यं द्रष्टुमयोग्य इति तस्योपरि मायां प्रसारितवानिति । कस्मिन्स्वरूपे मुमोह तदाह । अतर्क्ये तर्कागोचरे निजोऽसाधारणो महिमा यस्य तस्मिन्निति मोहे हेतुद्वयमुक्तम् । दर्शनायोग्यत्वाय त्रीणि विशेषणानि । स्वप्रमितिके स्वप्रमिति स्वप्रकाशं च तत्कं सुखं च

जातीयत्वेपि । किञ्च सति ज्ञाने स्वरूपावाप्त्या जीवा अपि सत्यज्ञानानंतादिरूपा जायंतेऽतस्तेषु जीवविशेषशंकामपानुदन्नर्थांतरमाह—यद्वेति । व्यदृश्यंतेति पूर्वेणान्वयः । न चैतत्सर्वं भगवता मायया दर्शितमिति मंतव्यमित्याह—"सत्यं विज्ञानमानंदं ब्रह्म" इति, "सत्यं ज्ञानमनंतं ब्रह्म" इति, "आनंदं ब्रह्मणो रूपम्" इत्यादिश्रुत्युक्तं सत्यादिरूपं यद्ब्रह्म तदेव मूर्तयो येषां ते तथा । उपनिषदः पश्यंति भक्त्यभावान्न तु तदर्थं जानंतीत्युपनिषद्दृशो दार्शनिकास्तैर्न स्पृष्टं भूरि माहात्म्यं येषां ते । 'भक्त्याहमेकया ग्राह्यः' इति, "भक्त्या मामभिजानाति" इति "न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति, "आदित्यवर्णं तमसः परस्तात्" इति, "आनंदमात्रमजरं पुराणमेकं संतं बहुधा दृश्यमानम्" इति, "बहुमूर्त्यैकमूर्तिकम्" इति, "सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥ परमानंदसंदोहा ज्ञानमात्राश्च सर्वतः ।" इत्यादिश्रुतिस्मृतिगम्यं ब्रह्मणोऽप्यप्राकृतरूपगुणादिमत्त्वं तदिच्छया भक्तिमच्चक्षुर्गम्यमस्तीति ज्ञेयम् । अन्यथा मार्कण्डेयपुराणीयसप्तशतीस्तवोक्तवाराहनृसिंहाविष्णुशरीरप्रादुर्भूतवाराह्यादिशक्तिकृतरक्तबीजादियुद्धमप्यसंगतं स्यात् । अतः सर्वदैव सर्वे भगवदवतारादिविग्रहाः संतीति निश्चेयम् ॥ ५४ ॥ यस्य ब्रह्मणः "यस्य भासा सर्वमिदं विभाति" इति श्रुतेः ॥ ५५ ॥ उपसर्गयोगेन धातोरन्यार्थताद्योतनाय—निपत्येति वेति । छांदसाश्रयणस्यागतिकगतिकत्वात्प्रकारांतरमाह—विलोड्यो विलोडितुं योग्यः । तृतीयातत्पुरुषः । 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति विसर्गलोपः । पाठांतरे तु 'अतिकुतुकोद्वृत्तः' इति पाठे तु । तेषां सत्यादिरूपाणां वत्सपालानां तेजसा । ध्वस्तसर्वेंद्रियश्चकितेंद्रियः । अत्र निश्चलस्तूष्णीम्भावे । "पुत्तिका भूमिदंशे स्यात्तथा कृत्रिममूर्तिके" इति सात्वतः । 'पुत्रिका' इति पाठे पूर्देवी बहुलोकैः पूज्यमाना ग्रामदेवता तस्या अंति निकटे । पुत्रिका बालकैः खेल्यमानाऽपूजिता क्षुद्रा मृन्मयी पंचालिकेवेति विश्वनाथः ॥ ५६ ॥ एवमुक्तप्रकारेण । मोहमग्नं मोहितम् । अजं ब्रह्माणम् । उज्जहारोद्दधार । इरा सरस्वती ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः ॥ कृच्छ्रादुन्मील्य व दृशौ व्यचष्टेदं सहात्मना ॥ ५८ ॥ सपद्येवाभितः पश्यन्दिशोऽपश्यत्पुरः स्थितम् ॥ वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियम् ॥ ५९ ॥ यत्र नैसर्गदुर्वराः सहासन्नृमृगादयः ॥ मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम् ॥ ६० ॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधम् ॥ वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ॥ ६१ ॥

यस्मिन् अत एवाजातः प्रकृतेः परत्र परस्मिन् । अत एव अतन्निरसनमुखेन ब्रह्मकैः श्रुतिशिरोभिर्मितिर्ज्ञानं यस्मिंस्तस्मिन्स्वरूपे ॥ ५७ ॥ अर्वाक् बहिः प्रतिलब्धान्यक्षीणि येन सः । परेतवन्मृतो यदि कथंचित्पुनरुत्तिष्ठति तथा दृष्टिर्नेत्राणि ॥ ५८ ॥ जनानामाजीव्यैर्द्रुमैराकीर्णम् । समाप्रियं संततान्यासमंतात्प्रियाणि यस्मिंस्तत् ॥ ५९ ॥ तदाह यत्रेति । नैसर्गदुर्वैराः स्वाभाविकाप्रतिकार्यवैरवंतोऽपि नराः सिंहादयश्च मित्राणीव यत्र सहैवासन् । अजितस्यावासेन द्रुताः पलायिता रुट्तर्षादयः क्रोधलोभादयो यस्मात्तथाभूतं वृंदावनमपश्यदिति ॥ ६० ॥ तत्र च परमेष्ठी ब्रह्मा इव पुरा पूर्ववदेव ब्रह्म अचष्टापश्यत् । कथंभूतम् । पशुपवंशशिशुत्वं नाट्यमुद्वहत् । नाट्यमित्यत्र हेतुः—अद्व

"इरा सरस्वतीमद्यजलकामप्रदेषु च" इति धरणिः । पश्चान्मोहादनु । तत् सत्यानंदमूर्तिव्यूहम् । "प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा" इत्यमरः । अपसारितवान्दूरीचकार । इत्यर्थ इति—'सति प्रसिद्धेऽर्थेऽप्रसिद्धार्थकल्पनमन्याय्यम्' इति हेतोः प्रसिद्धार्थपरतया व्याचख्यौ—अथ वेति । महिमाधिक्यम् । अतर्क्येऽद्भुतवभवे मोहो भवत्येवेति अतर्क्यत्वादिति हेतुरूहनीयः । अतन्निरसनमुखेनातद्व्यावृत्त्या । इरा सरस्वती तस्या ईशे महाबुद्धिमत्यपीत्यर्थः । ज्ञात्वा स्वैश्वर्यरसानुभवे तदयोग्यतां वीक्ष्य अजाजवनिकां योगमायातिरस्कारिणीं चच्छाद । यया पुलिने भुंजानाञ्श्रीदामादिबालकांस्तृणं चरतो वत्सान्वत्सान्वेषकं स्वं चाच्छाद्य स्वरूपभूतान्वत्सबालकादीन्पुनस्तानेव चतुर्भुजादित्वेन दर्शयामास तामंतर्धापयदित्यर्थः । या वास्तवं वस्त्वावृणोति अवास्तवं च दर्शयति सा माया, या तु वास्तववस्तूनामपि मध्ये किमप्यावृणोति किमपि दर्शयति सा योगमायेति मायायोगमाययोर्भेदादजाशब्देनात्र बहिरंगा माया न व्याख्येयेति विश्वनाथः ॥ ५७ ॥ ततो मायाच्छादनानंतरम् । को ब्रह्मा । आत्मना भगवता सहेदं वक्ष्यमाणं वृंदावनमाचष्ट ददर्श ॥ ५८ ॥ सपदि झटित्येव । आजीव्यैराम्रजंब्वादिभिः । यद्वा—जनानाजीवयंति क्षेत्रकर्षणादिनेति जनाजीव्या वृषास्तेषां द्रुमा द्रुमवदुत्पादका गावस्ताभिराकीर्णम् । यद्वा—जनाजीव्यं जलं तस्य द्रुमा द्रुमवद्धात्री कालिंदी तया जनाजीव्या भक्तिः सैव द्रुमो मोक्षफलप्रदत्वेन तयाकीर्णमिति वा । प्रियकराणि पुष्पपत्रादीनि । मा लक्ष्मीस्तस्याः प्रियो हरिस्तेन सहेति समाप्रियम् । मा लक्ष्मीः प्रियाशब्दोदिता श्रीराधा ताभ्यां सहेति पूर्ववत् । मा लक्ष्मीस्तस्याः प्रिया गावस्तासु नित्यं सन्निहितत्वात्तस्यास्ताभिस्सहेति ॥ ५९ ॥ तत्समाप्रियत्वम् । अप्रतीकार्यं निवर्तनाशक्यम्, यथा गोव्याघ्राखुबिडालादीनाम् । यत्र वृंदावने । तदपश्यदिति पूर्वेण संबंधः ॥ ६० ॥ तत्र वृंदावने । इत्यथ इति—नाट्यं विनाद्वयस्य वत्सविचयनम्, एकस्य सखिविचयनम्, अगाधबोधस्य विचयनम्, अनंतस्य परितो विचयनं, परस्य शिशुत्वं, ब्रह्मणः सपाणिकवलत्वं च कदाचिदपि न संपनीपद्यत इति भावः । ततः स्वरूपभूतानि चतुर्भुजत्वादीनि योगमाययैवाच्छाद्य प्रकटमेवाद्वयं ब्रह्म श्रुत्युक्तं दर्शितसर्वस्वरूपमूलभूतं स्वरूपं दर्शयामास । कीदृशम्—पशुपवंशशिशुत्वेपि प्रौढपरमचतुरोचितं नाट्यं मत्प्रभुर्मया मोहित एवेति ब्रह्माणं मिथ्याभिमानं ग्राहयितुं शाद्वले वत्सानदृष्ट्वापि पुलिनेऽपि सखीनदृष्ट्वाप्यदर्शनाभिनयं नटानां कर्मोद्वहत् । दर्शितानां ब्रह्मादिस्तंबपर्यंतानामाच्छादनादद्वयं सर्वमूलस्वरूपत्वात्परं दर्शितेभ्यश्चिद्वैभवेभ्योऽप्यपरेषां चिदानंदमयपरः सहस्रमहावैभवानां विद्यमानत्वादनंतं परमेष्ठिनो वराकस्य का गणना, श्रीबलदेवाद्यैरवतारैरपि दुःप्रवेशत्वादगाधबोधम् उक्तलक्षणान्नाटयाद्वत्सान्सखींश्च पुरैव परित इतस्ततो विचिन्वदिति वत्सबालान्वेषणं पूर्ववर्षे ब्रह्मणा मायामोहितत्वाद्यथार्थमेवावगतम् । अधुना तु मायासक्तत्वाच्छाद्वलतृणं चरतो वत्सान्पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा त्वरेण निजधोरणतोऽवतीर्य पृथ्व्यां वपुः कनकदंडमिवाभिपात्य ॥ स्पृष्ट्वा चतुर्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभिषेकम् ॥ ६२ ॥ उत्थायोत्थाय कृष्णस्य चिरस्य पादयोः पतन् ॥ आस्ते महित्वं प्राग्दृष्टं स्मृत्वास्मृत्वा पुनःपुनः ॥ ६३ ॥ शनैरथोत्थाय विमृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः ॥ कृतांजलिः प्रश्रयवान्समाहितः सवेपथुर्गद्गदयैलतेलया ॥ ६४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे ब्रह्ममोहनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदंबराय गुंजावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजाय ॥ १ ॥

यमित्यादि । अद्वयं च वत्सान्विचिन्वत् । एकं च सखीन् । अगाधबोधं च विचिन्वत् । अनंतं च परितो विचिन्वत् । परं च शिशुत्वमुद्वहत् । ब्रह्म च सपाणिकवलमिति नाट्यमेवोद्वहदित्यर्थः ॥ ६१ ॥ निजधोरणतः स्ववाहनात्त्वरेण वेगेनावतीर्य दंडवन्नत्वा चतुर्णां मुकुटानामग्रैरंघ्रियुग्मं स्पृष्ट्वा मुदश्रुसुजलैरानंदाश्रुरूपैः सुजलैरभिषेकमकरोदिति ॥ ६२ ॥ चिरस्य चिरं पादयोः पतन्नास्ते ॥ ६३ ॥ सवेपथुः सकंपः अत एव गद्गदया अनुकरणमेतत् । इलया वाचा ऐलताऽस्तौत् ॥ ६४ ॥ इति श्रीभा०म० दशमस्कंधपूर्वार्धे टीकायां ब्रह्ममोहनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशेऽद्भुतं दृष्ट्वा पूर्वागंतुकनिश्चयम् ॥ अनीशः कर्तुमस्तौषीत्कृष्णं ब्रह्मा विमोहितः ॥ १ ॥ स्वकृतापराधेन भिया

लिने च भुंजानान्बालान्पश्यता स्वापहृतान्मायिकवत्सबालांश्चापश्यता तेन मन्मोहनार्थमभिनयमात्रमित्यवगतम् । अत एव 'नौमीड्य ते' इत्यग्रिमस्तुतिवाक्येन वत्सबालान् विचिन्वत इति विशेषणं नोपन्यस्तम् । स्वरूपभूतानां वासुदेवमूर्तीनां स्वभेदानां योगमाययैवाच्छादनादेकं भक्तमनोहरमाधुरीलीलामयत्वात्सपाणिकवलम् । अत्र कस्मिंश्चिदधिकारिणि निकृष्टे धर्मधर्मिभावरहितं निराकारं ज्ञानमात्रं यद्ब्रह्मेति प्रसिद्धं तदपि योगमाययैव तद्दृष्टीः प्रति चिदानदमयानामपि रूपगुणनामलीलापरिकरधामादीनामाच्छादनाज्ज्ञानमात्रस्यैव प्रकाशनात्संगतमित्येवमेव मिथो विरुद्धार्था अपि श्रुतयो निर्विरोधमेव संगमयितव्या इति दिक् । तत्र पशुपवंशशिशुत्वनाट्यमेवोद्वहन्न तु स्वरूपमिति श्रीभागवतस्य मोहिनीत्वप्रतिपादकमेव व्याख्यानमत एव स्वामिनोऽपि स्तुतौ भगवतः कर्मत्वे ज्ञाते प्रयोजनापेक्षायां भगवानेव प्रयोजनमिति व्याख्यातत्वान्निराकारत्वं नाभिमतम्, न ह्यवास्तवीभूतं वस्तु स्तुतिप्रयोजनीक्रियत इति तत्त्वमिति चक्रवर्ती ॥ ६१ ॥ 'युग्यं पत्रं च धोरणम्' इत्यमरः । कनकदंडमिव हेमयष्टिरिव । इदमेव नराकृति परं ब्रह्म सर्वमूलभूतमित्यवगम्य त्वरया वाहनादुत्तीर्य देहाभिमानं परित्यज्य भूमौ दंडवत्पपात । भक्त्युद्भूताश्रूणां पावित्र्यात्सुप्रयोगः ॥ ६२ ॥ महित्वमनंतब्रह्मांडप्रदर्शनरूपम् ॥ ६३ ॥ अत एव सकंपत्वादेव । एतद्गद्गदयेत्येतत्, अनुकरणं वाच एव तच्च तद्वत्तन्नेतिलक्षणकम् । ईड्यतेऽनयेति ईडा डलयोरैक्यत्वादीलेति । ह्रस्वेकारादिरप्ययं वाग्वाचकोस्ति । ऐलत 'ईड्–स्तुतौ' ॥ ६४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रयोदशोऽध्यायः ॥ १३ ॥ पूर्वस्मिन्नध्याये आगंतुकं संप्राप्तं यद्भगवतो वत्सपालीभूय पुनः सत्यज्ञानादिरूपेण प्रतिभानं तस्य निश्चयम् किमिदं कथमेतदिति व्यवसितुम् अनीशोऽकल्पः । विमोहितो विशेषेण मोहितः (१)। अनवगाहमानो याथातथ्येनाजानन् । छांदसाश्रयणतो यत्नांतरं वरमित्यभिप्रेत्याह–अथ वेति । प्रस्तुतस्य प्रसंगागतस्य । परानंदरसं त्वां विना पुरुषार्थांतरासंभवात्त्वमेव प्रयोजनमिति धनाप्तये धनस्येव न हि तत्प्राप्तये तत्स्तुतिरुचितेत्यस्वारस्यादाह–यद्वेति । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी । अभ्रवन्मेघवत् श्यामस्निग्धसुंदरं सर्वजीवजीवनानंद साभिवर्षि वपुर्यस्य तस्मै । तडिद्वत्सचमत्कारे पीते चंचले अंबरे वस्त्रे यस्य तस्मै "अवतंसः कर्णपूरे न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोऽपि ॥ नेशे महि त्ववसितुं मनसांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः॥२॥

सकंपतया भगवन्महिमानमनवगाहमानस्तावद्यथादृष्टस्वरूपमेव कीर्तयन्नाह । नौमीति । हे ईड्य स्तुत्य ते तुभ्यं नौमि स्तौमि । द्वितीयार्थे चतुर्थ्यः । अथ वा नौमीत्युक्त्वा प्रस्तुतस्य भगवतः कर्मत्वे ज्ञाते प्रयोजनापेक्षायामेवंभतो भगवानेव प्रयोजनमिति तादर्थ्ये चतुर्थी । यद्वा तुभ्यं त्वामेव प्रसादयितुं त्वामेव स्तौमीत्यर्थः । अभ्रवद्वपुर्यस्य तस्मै । तडिद्वदंबरं यस्य तस्मै । गुंजाभिरवतंसौ कर्णभूषणे परि परितः पिच्छं च बर्हापीडं तैर्लसन्मुखं यस्य तस्मै । वन्याः स्रजो यस्य तस्मै । कवलादिभिर्लक्ष्मभिः श्रीः शोभा यस्य तस्मै । मृदू पादौ यस्य तस्मै । पशुपस्य नन्दस्यांगजाय ॥ १ ॥ ननु नौमीति प्रतिज्ञाय किं स्वरूपानुवादमात्रं क्रियतेऽत आह । अस्यापीति । भो देव अस्यापि सुलभत्वेन प्रकाशितस्यापि तव वपुषोऽवतारस्य महि महिमानमवसितुं ज्ञातुं कोऽपि को ब्रह्मा अहमपि नेशे न शक्नोमि । यद्वा कश्चिदपि नेशे न समर्थ आसीत् । सुलभत्वाय विशेषणद्वयम्।मदनुग्रहस्य ममानुग्रहो यस्मात्तन्मदनुग्रहं तस्य । किं च स्वेच्छामयस्य स्वेषां स्वीयानां भक्तानां यथायथेच्छा तथातथा भवतः । तर्हि किमिति ज्ञातुं न शक्यतेऽत आह । न तु भूतमयस्याचिंत्यशुद्धसत्त्वात्मकस्य । यदाऽस्यैवं तदा किमुत कथं पुनः साक्षात्तव केवलस्यात्मसुखानुभूतेरेव स्वसुखानुभवमात्रस्यावतारिणो गुणातीतस्य महिमानमांतरेण निरुद्धेनापि मनसा को वा ज्ञातुं समर्थो भवेत् । अथ वा भूतमयस्यास्यापि तु विराड्रूपस्य तव त्वन्नियम्यस्य वपुषो महि महिमानमेवावसितुं कोऽपि नेशे तदा साक्षात्तवैवासाधारणस्य नियम्यनियंतृभेदरहितस्योक्तलक्षणस्यास्य महिमानमवसितुं कोऽपि नेशे इति किमु वक्तव्यमित्यर्थः ॥ २ ॥

स्त्रियां शेखरेऽपि च " इति मेदिनी । वन्याः पत्रपुष्पमय्यः । स्रजो मालाः । वेत्रं वेतसदंडम् । विषाणं शृंगम् । मृदू लक्ष्म्या अपि करस्पर्शाऽसहौ, पापमर्दनशीलौ वा । पशुपो नंदस्तस्यांगाज्जायते इति तथा तस्मै । यद्वा—पशुपो नंदस्तस्यांगं मित्रं वसुदेवस्तज्जाय । यद्वा—पशुपां गोपानां मध्ये गजाय मुख्याय " माने मतंगजे मुख्ये वस्तुभेदे गजोऽचले " इति धरणिः । यद्वा—" पशुर्वै स देवानाम् " इति श्रुतेः पशवः कर्मजडास्तान्पांतीति पशुपा देवास्तेंगजा यस्य । यद्वा—पशुपो रुद्रः सोंगं शरीरं यस्य स पशुपांगो ब्रह्मा तं जनयतीति तथा । मम जनकायेत्यर्थः । अत्र वैकुंठीयानर्घ्यरत्नालंकारेभ्योऽपि वृंदावनीयगुंजादीनामुत्कर्षः । वन्या वृंदावनीया एव पत्रपुष्पमय्यः स्रजो यस्येति नैःश्रेयसवनस्थपारिजातादिभ्योऽप्युत्कर्षः सूचितः । कवलेत्यादिना तदीयसर्वाचरणेभ्यो गोपालचरणस्यैव श्रैष्ठ्यम् । पशुपांगजायेति वसुदेवादिभ्यः श्रीनंदराजस्य सौभाग्याधिक्यं व्यंजितमिति चक्रवर्ती ॥ १ ॥ शंकते—नन्विति । अनुवादः पुनःपुनः कथनम् । त्वं मा समर्थो भूरन्ये तु संतीति शंकोपनोदव्याजेनार्थांतरमाह—यद्वेति । इहाडभाव आर्षः । सर्वान्विहाय तवानुग्रहे पक्षपातः स्यादिति चेदाह—किंचेति । इह प्राधान्ये मयट् । यद्येतादृशस्तर्हीति । अचिंत्यशुद्धसत्त्वात्मकस्य ज्ञानं दुर्घटमिति भावः । यदाऽस्य शुद्धसत्त्वतनोरेवं महिमा ज्ञातुमशक्यस्तदा को वा न कोपीत्यर्थः । भूतमयस्यापि ज्ञानं दुर्घटं न केवलं शुद्धसत्त्वाचिंत्यरूपस्यैवेत्यभिप्रेत्याह—अथ वेति । भूतमयस्योक्तलक्षणस्य विराज इत्यर्थः । त्वन्नियम्यवपुषस्त्वदायत्तस्य । इत्यर्थ इति—कैमुत्यन्यायेन बोधयति । ब्रह्मेति—ननु भो ब्रह्मन् त्वं जगदैश्वर्याधिपतिरहं तु वन्यगोपालपुत्रः, त्वं पुरातनोऽहं तु बालः, त्वं वेदार्थतात्पर्यज्ञत्वात्परमविद्वान्सदाचारपरायणोऽहं तु वत्सचारकत्वाज्ज्ञानशून्यस्मार्ताचारगंधमप्यजानंस्तिष्ठन् भ्राम्यन्नप्योदनकवलं भुंजानः, त्वं मायी परमसुखी साक्षात्परमेश्वर एवाहं तु त्वन्मायामोहितो मनोदुःखेन वनं पर्यटंस्तव स्तवं कर्तुं नार्हामीति ब्रह्मा तदुक्तिमाशंक्य—सत्यम्, अज्ञानान्महापराधमहमकरवमिति व्यंजयन्नाह—अस्येति । हे देव अस्यापि बालचेष्टामयस्य प्रकटितमौग्ध्यस्यापि तव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदीयवार्ताम् ॥ स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्य सितैस्त्रिलोक्याम् ॥ ३ ॥ श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये ॥ तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघा तिनाम् ॥ ४ ॥ पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजकर्मलब्धया ॥ विबुद्ध्य भक्त्यैव कथोपनीतया प्रपेदिरेंजोऽच्युत ते गतिं पराम् ॥ ५ ॥ तथापि भूमन्महिमाऽगुणस्य ते विबोमद्धुर्हत्यमलांतरात्मभिः ॥ अविक्रियात्स्वानुभवादरूपतो ह्यनन्यबोध्यात्मतया न चान्यथा ॥ ६ ॥

तर्ह्यज्ञाः कथं संसारं तरेयुरत आह। ज्ञान इति। उदपास्य ईषदप्यकृत्वा सद्भिर्मुखरितां स्वत एव नित्यं प्रकटितां भवदीयवार्तां स्वस्वस्थान एव स्थितास्तत्सन्निधिमात्रेण स्वत एव श्रुतिगतां श्रवणं प्राप्तां तनुवाङ्मनोभिर्नमंतः सत्कुर्वंतो ये जीवंति केवलं यद्यपि नान्यत्कुर्वंति तैः प्रायशस्त्रिलोक्यामन्यैरजितोऽपि त्वं जितः प्राप्तोऽसीति किं ज्ञानश्रमेणेत्यर्थः ॥ ३ ॥ भक्तिं विना ज्ञानं तु नैव सिद्ध्येदित्याह । श्रेयःस्रुतिमिति । श्रेयसामभ्युदयापवर्गलक्षणानां स्रुतिः स्रवणं यस्याः सरस इव निर्झराणां तां ते तव भक्तिमुदस्य त्यक्त्वा । श्रेयसां मार्गभूतामिति वा । तेषां क्लेशलः क्लेश एवावशिष्यते । अयं भावः । यथा अल्पप्रमाणं धान्यं परित्यज्यांतःकरणहीनान्स्थूलान्धान्याभासांस्तुषानेवावघ्नंति तेषां न किंचित्फलमेवं भक्तिं तुच्छीकृत्य ये केवलबोधाय क्लिश्यंति प्रयतंते तेषामपीति ॥ ४ ॥ भक्त्यैव ज्ञानं नान्यथेत्युक्तं तत्र सदाचारं प्रमाणयति । पुरेति । हे भूमन्नपरिच्छिन्न इह लोके पूर्वं योगिनोऽपि संतो योगैर्ज्ञानं प्राप्यापि पश्चात्त्वदर्पितेहास्त्वय्यर्पिता लौकिक्यपीहा चेष्टा यैस्ते निजकर्मलब्धया त्वदर्पितैर्निजैः कर्मभिर्लब्धया त्वय्यर्पिता ईहा च निजानि कर्माणि च तैर्लब्धयेत्येकं पदं वा । कथोपनीतया कथया त्वत्समीपं प्रापितया भक्त्यैव विबुध्य विश्वव्यापकमात्मानं ज्ञात्वा अंजः सुखेनैव ते परां गतिं प्राप्ताः ॥ ५ ॥ एवं तावत्सगुणनिर्गुणयोरुभयोरपि ज्ञानं दुर्घटमिति त्वत्कथाश्रवणादिनैव त्वत्प्राप्तिर्नान्यथेत्युक्तम् । इदानीं यद्यप्युभयोरविशेषेण

वपुषो महिमानं ज्ञातुं नेशे, किमुत कैशोरलीलस्य प्रकटयिष्यमाणमहाचातुर्यस्य वपुषः, किमुतात्मनो मनसो या सुखानुभूतिस्तस्या निरतिशयानंदमयोपि वत्सचारणादिना यादृशं सुखमनुभवसि तस्येति चक्रवर्ती ॥ २ ॥ यदि ज्ञातुमशक्यस्तर्हि तदा "ऋते ज्ञानान्न मुक्तिः" इति श्रुतेरज्ञानां कदापि संसारविरामो न भवेदिति चेदत आह—ज्ञान इति । ज्ञानसाधने शमदमादौ । इत्यर्थ इति—तव कथैव मोक्षदेति भावः । ज्ञाने त्वदीयस्वरूपैश्वर्यमहिमविचारे । स्थाने निवास एवाव्यग्रतया स्थिता न तु तीर्थयात्रादिक्लेशान्कुर्वन्तः । तन्वादिभिः सत्कुर्वन्तः । तन्वा सत्कारः श्रवणसमयेऽञ्जलिबन्धादिः, वाचाऽनुमोदनादिः, मनसा चास्तिक्यादिः । सन्मुखरितां सन्तोऽनृतोक्त्यादिपरिहारार्थं प्रायो मौनशीला अपि मुखरिता मुखरीकृता यया ताम् । यद्वा—भवदीयानां श्रीव्रजराजादीनां वार्ताम् । यद्वा—भवदीयवार्ता जीवन्ति उपजीवन्ति तदेकजीवनत्वेन सद्भ्यः श्रुत्वा श्रावयन्ति । यद्वा—तन्वादिभिस्तत्तच्चेष्टयाऽजित अप्राप्य स्वप्रकाशेनेन्द्रियाद्यगोचरत्वात् । यद्वा—तन्वादिभिः कृत्वा तैरपि जितोऽसि तत्तद्वृत्तौ सदा स्फुरसीत्यर्थः । यद्वा—तन्वादिभिरेव साक्षात्प्राप्तो भवसि । तत्र तन्वा प्राप्तिः स्वहस्तादिना श्रीपादाब्जादिस्पर्शादिः, वाचाह्वानादिना समागमनादिः, मनसा च सङ्कल्पेनैव दर्शनादिः । यद्वा—तन्वादिभिः सह जितस्तव तन्वादीन्यपि तैर्वशीकृतानि । तत्र तनोर्वशीकरणं तद्भक्तपार्श्वे सदाऽवस्थित्यादिः, वाचस्तद्गुणकथनादिः, मनसश्च तच्चिन्तनादिरिति तोषिण्याम् ॥ ३ ॥ भक्तिरेव ज्ञानहेतुरित्याह—केवलबोधलब्धये इति । जीवोपाधित्यागेन केवलस्य शुद्धचिदानन्दघनस्य तव ज्ञानाय । अयं भाव इति—तण्डुलप्राप्तये धान्यमिव मुक्त्यवाप्तये भक्तिरेवादर्तव्येति भावः । "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥" इत्यादिगीतोक्तेः, 'भक्त्याहमेकया लभ्यः' इत्यग्रिमोक्त्या च । तपआदिपूर्तेस्तत्फलस्य ज्ञानस्य च भक्त्यधीनतया तेषां क्लेश एवेति तत्त्वम् ॥ ४ ॥ इत्यत्र अस्मिन्स्थले । पृथक्पृथक्समासे भ्रमादाह—एकपदं वेति । परां गतिं जीवमुक्तिरूपां परां भक्तिं वेति ॥ ५ ॥ हे भूमन् भूः प्रादुर्भावस्तद्युक्तैतन्मधुररूपप्रादु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणात्मनस्तेऽपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेऽस्य ॥ कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः खे मिहिका द्युभासः ॥ ७ ॥

दुर्ज्ञेयत्वमुक्तं तथापि गुणातीतस्य ज्ञानं कथंचिद्भवेन्न तु सगुणस्य तवाचिंत्यानंतगुणत्वादिति स्तौति श्लोकद्वयेनं । तथाऽपीति । हे भूमन्नपरिच्छिन्नगुणस्य ते महिमा अमलैरंतरात्मभिः प्रत्याहृतेंद्रियैर्विबोद्धुं बोधगोचरीभवितुमर्हति योग्यो भवति । अथ वा विबोद्धुं ज्ञातुमर्हति अर्ह्यते शक्यत इत्यर्थः । यद्वा । महिमेति महिमानं कश्चिद्बोद्धुमर्हतीत्यर्थः । कथम् । स्वानुभवादात्माकारांतःकरणसाक्षात्कारात् । नन्वंतःकरणमपि सविकारमेव विषयीकरोतीति कथमात्माकारता तस्येत्यत आह । अविक्रियादिति । विक्रिया विशेषाकारस्तद्रहितात् । एवंभतात्स्वानुभवात् । विशेषपरित्याग एवात्माकारतेत्यर्थः । नन्वंतःकरणसाक्षात्कारविषयत्वेनात्मत्वप्रसंगः स्यादत आह । अरूपत इति । रूपं विषयः अविषयात् । वृत्तिविषयत्वमेवात्मनो न फलविषयत्वमतो नायं दोष इति भावः । कथं तर्हि स्फूर्तिः अनन्यबोध्यात्मतया स्वप्रकाशत्वेनैव न त्वन्यथा । इदं तदिति विषयत्वेनेत्यर्थः । अथ वा मा सर्वतोंतरंगा लक्ष्मीरप्यगुणस्य ते महि महिमानममलैरंतर्वृत्तिभिरिंद्रियैरपि तथा यादृग्वस्तुतस्तेन रूपेण विबोद्धुं ।कमर्हति नार्हत्येवेत्यर्थः । कथं तर्ह्यर्हति तत्राह स्वानुभवादित्यादिना । उक्तार्थमेवैतत् ॥ ६ ॥ गुणात्मनो गुणानामात्मनो गुणाधिष्ठातुस्ते

भावन्न् । अगुणस्य प्राकृतगुणरहितस्य तव महिमा महित्वं बृहत्त्वरूप एको धर्मः । "मदाय महिमानञ्च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे" इति मत्स्यावतारे त्वदुक्तेः, "सा ब्रह्माणि स्वमहिमन्यपि नाथ मा भूत्" इति ध्रुवोक्तेश्च महिमशब्देन प्रसिद्धं परं ब्रह्म स्वयमेव ।वबाध्या भवितुमर्हति । पच्यते ओदनः स्वयमेवेतिवत् कर्मणः कर्तृत्वम्, यथा कुठारः स्वयमेव वृक्षं छिनत्तीत्यत्र करणस्य कर्तृत्वं विवक्षितम् । कस्मान्निमित्तात् । अमलैः शुद्धैरंतरात्मभिः । स्वकर्मकादनुभवात् । नन्वनुभवः खल्वंतःकरणवृत्तिः सा च सूक्ष्मदेहविकारमयी निर्विकारं ब्रह्म कथं विषयीकुर्यादित्यत आह—अविक्रियात्, न विद्यते विकारो यत्र तथाभूतात् । विकारो हि मायाधर्मः स च विषयोपरमे कथं स्यादिति लिंगदेहाभाव एव व्यंजितः । ननु तदपि ब्रह्मणोऽविषयत्वेनानुभवविषयानौचित्यादतः पुनर्विशिनष्टि—अरूपतः, रूपं विषयस्तदितराद्विषयाकारत्वरहिताद्ब्रह्माकारादित्यर्थः । ब्रह्मणो ब्रह्माकारानुभवविषयत्वं न दोष इति । नन्वरि. किं तद्बोध प्रकारांतरं तत्राह—अनन्यबाध्यम् आत्मस्वरूपं यस्य तत्तथा । स विबोध्यो भवितुमर्हतीत्यवगन्तव्यम् । गुणातीतस्य निर्गुणस्य । सकर्मकस्याकर्मकत्वापादनमनुचितं मत्वार्थांतरमाह—अथ वेति । अत्रापि कर्त्रर्थकप्रत्ययस्य कर्मत्वापादनं छांदसाश्रयणं विना न संभवेदित्यस्वरसात्प्रकारांतरमाह—यद्वेति । इहापि द्वितीयार्थे प्रथमा ज्ञेया । आशंकते—नन्विति । इत्यर्थ इति तात्पर्यम् । पुनराशंकते—नन्विति । इत्यर्थ इति—अविषयत्वात्तस्येति भावः । वृत्तिविषयत्वमिति फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं वृत्तिव्याप्यत्वमेवास्य स्वीकृतं श्रौतसंमतम् । तथा चोक्तं विद्यारण्यैः—"बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्यदाभासन घटः स्फुरेत् ॥" इति । इयं व्यवस्थाऽनात्मनि, आत्मनि तु—"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता । स्वयं स्फुरणरूपत्वान्नाभासस्तत्र युज्यते ॥" इति मनुष्यादिर्ज्ञातुं न शक्नोतीति नाद्भुत ।कन्तु तदर्द्धांग्यपि लक्ष्मीः सापि ज्ञातुं न कल्पेति । इत्यर्थ इति—काकूक्त्या लभ्योऽर्थ इति । यद्वा—जिज्ञासुः कर्मयोगेन भक्त्या चामलैरन्तर्मुखैर्ब्रह्मादिभिः संपादितात् अविक्रियात् । विक्रियाभेदहेतुर्जीवे शोपाधिस्तद्भागत्यागरूपादविरुद्धचिदानंदस्वरूपानुभवान्महावाक्यप्रमाणजप्रमारूपाद्विशेषेण प्रत्यगभेदेनापरोक्षतया बोद्धुमर्हति । अरूपत इति—रूप्यते प्रकाश्यतेऽनेनेति रूपं चिदाभासः, वृत्तौ तत्सत्त्वेपि स्वप्रकाशे तदनुपयोगे तदज्ञानावरणनिवृत्तावेव वृत्तेरुपक्षीणतया तज्ज्ञानं स्वप्रकाशतयैव नेदंतयेति भावः ॥ ६ ॥ निपुणाः सर्वं कर्तुं समर्था इत्याशङ्कते—नन्विति । 'प्रालेयं मिहिका चाथ' इत्यमरः । दिवि भासन्त इति द्युभासः गुणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तेऽनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकम् ॥ हृद्वाग्वपुर्भिर्विदधन्नमस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ ८ ॥ पश्येश मेनार्यमनंत आद्ये परात्मनि त्वय्यपि मायिमायिनि ॥ मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियानैच्छमिवार्चिरग्नौ ॥ ९ ॥ अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः ॥ अजावलेपांधतमोंधचक्षुष एषाऽनुकंप्यो मयि नाथवानिति ॥ १० ॥

तव पुनर्गुणान्विमातुमेतावन्त इति गणयितुमपि के ईशिरे समर्था बभूवुर्दूरतस्तद्विशेषवार्ता । कथंभूतस्य तव । अस्य विश्वस्य हिताय पालनाय बहुगुणाविष्कारेणावतीर्णस्य । ननु कालेन निपुणैः किमशक्यमत आह । कालेनेति । वा शब्दो वितर्के । सुकल्पैरतिनिपुणैर्बहुजन्मना महता कालेन भूपरमाणवो विमिता विशेषेण गणिता भवेयुः । तथा खे नभसि मिहिका हिमकणा अपि तथा द्युभासो दिवि नक्षत्रादिकिरणपरमाणवोऽपि ॥ ७ ॥ तस्माद्भक्तिरेव संगच्छत इत्याह । तत्तेऽनुकंपामिति । सुसमीक्षमाणस्तव कृपा कदा भविष्यतीति बहु मन्यमानः स्वार्जितं च कर्मफलमनासक्तः सन् भुंजान एव नातीव तपआदिना क्लिश्यन्नेवं यो जीवेत स मुक्तौ दायभाग्भवति । भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदुपयुज्यत इति भावः ॥ ८ ॥ तदेवं स्तुत्वा भगवंतं क्षमापयितुं स्वापराधं निवेदयति । पश्येति । हे ईश मेऽनार्यं दौर्जन्यं पश्य । यदहं मायिनामपि मायिनि विमोहके त्वय्यपि स्वमायां प्रसार्यात्मवैभवमात्मैश्वर्यमीक्षितुमैच्छमभिलषितवान् । अहो एवं कर्तुं त्वय्यहं कियान्न किंचित् । यथाग्नेरुद्भूता ज्वाला अग्नौ न किंचित्तद्वदिति ॥ ९ ॥ रजोभुवो रजसो जातस्यातोऽजानतोऽत एवाजावलेपांधतमोंधचक्षुषः अजोऽहं जग

आत्मा स्वरूपं यस्य तस्येति गुणानां नित्यत्वमप्राकृतत्वञ्चोक्तम् । तथा च ब्रह्मतर्के—"गुणैः स्वरूपभूतैश्च गुण्यसौ हरिरीश्वरः" इति । ईशिर इहामभावस्त्वार्षः । किञ्च—"सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानद्य प्रसीदतु ॥" इति वैष्णवे च । "मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं सर्वभूतानां साम्यासङ्गादयो गुणाः ॥" इत्येकादशे वक्ष्यति चेति तोषिणी ॥ ७ ॥ यतस्त्वमनन्तकल्याणगुणनिलयो भजतां मोक्षदोऽसि तस्माद्भक्तिरेवेति । तादित्युक्तार्थः । हृद्वाग्वपुरित्यनेन साष्टाङ्गा नतिलक्ष्यते "दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥" इति लक्षणात् । इति भाव इति—भक्तिं कुर्वतो जीवतोऽपि मोक्षो, देहावसाने तु तच्छङ्कैव नास्तीति भावः । भुञ्जान एव समये दुःखं सुखञ्च भवदनुकम्पाफलमेवेदमिति जानन्, पिता यथा स्वपुत्रं समये दुग्धं पाययति, निम्बञ्च भक्षयति, आश्लिष्य चुम्बति, पाणितलेन प्रहरति चेत्येवं मम हिताहितं पुत्रस्य पितेव मत्प्रभुरेव जानाति न त्वहं, मयि तद्भक्ते नास्ति कालकर्मादीनां केषामप्यधिकार इत स एव कृपया सुखं दुःखञ्च भोजयति स्वं सेवयति चेति विमृश्य "यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम्" इति पृथुरिव प्रत्यहं विज्ञापयन् हृदादिभिर्नमस्कुर्वन्नातीव क्लिश्यन्यो जीवति स मुक्तिश्च पदञ्च तयोर्द्वन्द्वैक्यं तस्मिन्संसारमुक्तौ त्वच्चरणसेवायाञ्चेत्यानुषङ्गिकमुख्यफलयोर्दायभाग्भवति । यथा पुत्रस्य दायप्राप्तौ जीवनमेव कारणं तथा भक्तस्य जीवने । तच्च भक्तिमार्गस्थितिरेव 'दृतय इव श्वसन्त्यसुभृतः' इति वेदस्तुत्युक्तेरिति विश्वनाथः ॥ ८ ॥ तत् तदा । ईक्षितुं द्रष्टुम् । अहं तु भक्तिलेशमपि न कुर्वेऽपि त्वपराधपुञ्जमिति सानुशयमाह—हे ईशेति ॥ ९ ॥ यतस्त्वं महानतो हेतोः क्षमस्व 'क्षान्तिर्महीयसि' इत्युक्तेः । अतो राजसत्वात् । अत एवाज्ञत्वादेव । 'ध्वान्ते गाढेऽन्धतमसम्' इत्यमरः । अन्धीभूतनेत्रस्य नष्टज्ञानस्य । अतो ज्ञानहीनस्य अजानत इत्यत्र सामान्यतोऽज्ञस्य, इह तु विशेषतोऽज्ञस्येति न पुनरुक्तिः । इत्यर्थ इति—अपराधेऽप्यज्ञभृत्योपरि कृपैवोचितेति भावः । दौर्जन्योचितस्य दण्डस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वाहं तमोमहदहंखचराग्निवार्भूसंवेष्टितांडघटसप्तवितस्तिकायः ॥ क्वेदृग्विधाऽविगणितांडपराऽणुचर्यावाताध्वरोमविवरस्य च ते महित्वम् ॥ ११ ॥
उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजाऽऽगसे ॥ किमस्तिनास्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनंतः ॥ १२ ॥

त्कर्ताहमिति मदेन गाढतमोरूपेणांधीभूते नेत्रे यस्यातस्त्वत्तः पृथगीशमानिनः । अन्यत्र प्रभुत्वेन वर्तमानोऽपि मयि नाथे सति नाथवान्मद्भृत्य एवायमत एषोनुकंप्य इति मत्वा क्षमस्वेत्यर्थः ॥ १० ॥ ननु ब्रह्मांडविग्रहस्त्वमपीश्वर एवेति चेत्तत्राह । क्वाहमिति । तमः प्रकृतिर्महान् महत्तत्त्वमहंकारः खमाकाशः चरो वायुः अग्निर्वार्जलं भूश्च प्रकृत्यादिपृथिव्यंतैरष्टभिरेतैः संवेष्टितो योंडघटः स एव तस्मिन्वा स्वमानेन सप्तवितस्तिः कायो यस्य सोऽहं क्व क्व च ते महित्वम् । कथंभूतस्य । ईदृग्विधानि प्रकृत्यादिभिः संवेष्टितानि यान्यविगणितान्यंडानि त एव परमाणवस्तेषां चर्या परिभ्रमणं तदर्थं वाताध्वानो गवाक्षा इव रोमविवराणि यस्य तस्य तव । अतोऽतितुच्छत्वात्त्वयाऽनुकंप्योऽहमिति ॥ ११ ॥ अपि च गर्भगतस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराधाय भवति लोके । अस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां स्थूलसूक्ष्मकार्यकारणशब्दैर्वा भूषितमभिहितम् । एतेषां शब्दानां भवि विषये उषितं स्थितमिति वा । सर्वं वस्त्वित्यर्थः । हे अधोक्षज तव कुक्षेरनंतर्बहिः कियदपि किंचिन्मात्रमपि किमस्ति

मौढ्योचितायाः क्षमायाश्च सामर्थ्यं त्वय्येवास्तीति दयालोस्तव क्षमैवोचितेत्याह—अत इति । हे अच्युत यतस्त्वं महाकृपालुत्वादिगुणैभ्यश्च्युतिरहितः, अहं च महानीचः अतो ममापराधं क्षमस्व ‘ नीचे दयाऽधिके स्पर्धा ’ इति नीतेरिति भावः । महानीचत्वमाहुः—रजोभुवः श्लेषेण रजसो धूलेः पुत्रस्यात एवाज्ञातस्यात एव त्वत्तः पृथगेव ईशोऽहमित्यभिमानवतः । ईशमानित्वं विवृणोति—अजावलेपोऽजन्यत्वमद एवान्धतमः समासान्ताभावस्त्वार्षः । तेनान्धानि चक्षूंषि यस्य तेन मयि कारुण्यचन्द्रोदयेनैव मद्वर्वतमस्यपहृते सति त्वं दृश्यो भविष्यसि नान्यथेति भावः । केन विचारेण क्षमे इति चेत्तत्राह—एष ब्रह्माऽनुकम्प्योऽनुकम्पार्हः यतोऽन्यत्र नाथत्वाभिमानवानपि मयि तु नाथवान् दास एव । यद्वा—मौढ्यान्मय्यपि स्वातन्त्र्यं कुर्वन्नपि वस्तुतो मन्मायाधीनत्वादधीन एवेति मत्वा । ‘ परतन्त्रः पराधीनः परवान्नाथवानपि ’ इत्यमरः ॥ १० ॥ ब्रह्माण्डं विग्रहे वपुषि यस्य स त्वं ब्रह्माण्डाविर्भावयितापीश्वर इति चेद्भवदुक्तिः स्यात्, तत्र तदुक्तौ ब्रह्माह—तदन्तर्गतप्रतीतेस्तस्मिन्नण्डे घटे वा । ‘ वितस्तिर्द्वादशाङ्गुलम् ’ इत्यमरः । द्वौ क्वशब्दौ महदन्तरं सूचयतः । ईदृग्विधानि मत्स्वरूपभूतब्रह्माण्डसदृशानि मदधिकरणीभूतांबुसदृशानि वा । त एवेति विधेयापेक्षं पुंस्त्वम् । तदर्थं भ्रमणार्थम् । ‘ वातायनं गवाक्षोऽथ ’ इत्यमरः । यतस्त्वं महानहं न अतो हेतोः । तेन ममैश्वर्यं पराक्रमो वा त्वां प्रति शलभस्य गरुडं प्रतीव न गणनार्हमिति भावः ॥ ११ ॥ अनुकम्प्यत्वे कारणान्तरमाह—अपि चेति । इन्द्रियगोचरीभूतपदार्थानामस्तित्वे व्यपदेशेऽपि तदगोचराणां परमाण्वादीनां नास्तित्वव्यपदेशो मा भूदित्येतदर्थमाह—स्थूलेत्यादि । भूषितशब्दस्य कथने वृत्तेरनुपलब्धेः प्रकारान्तरेण व्याचष्टे—एतेषां किमस्ति नास्तीत्येतेषाम् । भुवि लोके, एकत्वं सामान्याभिप्रायम् ‘ भूः स्थानमात्रे कथितो धरण्यामपि योषिति ’ इति मेदिनी । इत्यर्थ इति—वस्तुमात्रस्य लोकान्तर्गतत्वादिति तात्पर्यम् । अक्षेभ्योऽधोऽधोक्षजमिन्द्रियविषयं ब्रह्माण्डं तज्जनयति जानाति वेत्यधोक्षजस्तत्सम्बुद्धौ तथा हे सर्वजनक सर्वज्ञ वेति । एतेन सर्वज्ञस्य तव ज्ञापनमपि पुनरुक्तिरेवेति सूचितम् । यद्वा—अन्तर्मध्ये न विद्यते यत्तदनन्तः “ सह सुपा ” इति शास्त्रात्समासः । अन्तर्मध्येर्थेऽव्ययम् । इत्यर्थ इति—सर्वजनकत्वात्तवेति भावः । अतः सर्वजनकत्वात् । तथात्वात्तव कुक्षिगत्वात् । इति भाव इति—मातृवदानन्द एव विधेयो न तु कोप इति तात्पर्यम् । अत्र विश्वनाथः—ममापराधोऽवश्यं सोढव्य एव यतस्त्वं माता सर्वस्य त्वत्कुक्षिगतत्वात् “ पिताऽहमस्य जगतो माता धाता पितामहः ” इति त्वदुक्तेः ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् ॥ विनिर्गतोऽजस्त्विति वाङ न वै मृषा किं त्वीश्वर त्वन्न विनिर्गतोऽस्मि ॥ १३ ॥ नारायणस्त्वं न हि सर्वदेहिनामात्माऽस्यऽधीशोखिललोकसाक्षी ॥ नारायणोंगं नरभूजलायनात्तच्चापि सत्यं न तवैव माया ॥ १४ ॥ तच्चेज्जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव ॥ किं वा सुदृष्टं हृदि मे तदैव किन्नो सपद्येव पुनर्व्यदर्शि ॥ १५ ॥

न किंचिदस्तीत्यर्थः । अतः सर्वस्य तव कुक्षिगतत्वेन ममापि तथात्वान्मातृवत्त्वया मेऽपराधः सोढव्य इति भावः ॥ १२ ॥ किं च विशेषतोऽपि त्वत्तो मम जन्म प्रसिद्ध मित्याह । जगत्त्रयेत्यादि । जगत्त्रयस्यांते प्रलये य उदधीनां संप्लवः संश्लेषस्तस्मिन्नुदे उदके नारायणस्योदरे नाभिस्तस्य नालादजो विनिर्गत इति या वाक्सा तावन्मृषा न भवति । वै निश्चितम् । तथापि तु हे ईश्वर त्वत्त्वतोऽहं किं न विनिर्गतो नोत्पन्नोऽस्मि । अपि तु त्वत्त एवोत्पन्न इत्यर्थः ॥ १३ ॥ तर्हि नारायणस्य पुत्रः स्यास्त्वं मम किमायातं तत्राह । नारायणस्त्वमिति न हीति काक्का त्वमेव नारायण इत्यापादयति । कतोऽहं नारायण इति चेदत आह । सर्वदेहिनामात्माऽसीति । एवमपि किं नारा यणो न भवसि नारं जीवसमूहोऽयनमाश्रयो यस्य स तथेति । त्वमेव सर्वदेहिनामात्मत्वान्नारायण इति भावः । हे अधीश त्वं नारायणो न हीति पुनः काकुः । अधीशः प्रवर्तकः । ततश्च नारस्यायनं प्रवृत्तिर्यस्मात्स तथेति पुनस्त्वमेवासाविति । किं च त्वमखिललोकसाक्षी अखिलं लोकं साक्षात्पश्यसि अतो नारमयसे जानासीति त्वमेव नारा यण इत्यर्थः । नन्वेवं नारायणपदव्युत्पत्तौ भवेदेवं तत्त्वन्यथा प्रसिद्धमित्याशंक्याह । नारायणोंगमिति । नरादुद्भूता येऽर्थास्तथा नराज्जातं यज्जलं तदयनाद्यो नारायणः प्रसिद्धः सोऽपि तवैवांगं मूर्तिः । तथा च स्मर्यते । " नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः ॥ तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः ॥ " इति । तथा " आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ " इति च । ननु मन्मूर्तेरपरिच्छिन्नायाः कथं जलाश्रयत्वमत आह । तच्चापि सत्यं नेति ॥ १४ ॥ अपरिच्छेदमेवोपपादयति । तच्चेदिति । जगदाश्रयभतं तव तद्वपुर्जलस्थमित्येवं यदि सत्सत्यं स्यात्तर्हि तदैव कमलनालमार्गेणांतः प्रविश्य संवत्सर

सर्वजनप्रख्यातवृत्तमाह—किञ्चेति । विशेषतः सर्वापेक्षया । त्वत्तो भवतः । नालात् पद्मदण्डात् ' नालं नालीपद्मदण्डे ' इति सात्वतः । तावदिदानीम् । इत्यर्थ इति—तव नाभ्युद्भूतकञ्जाज्जातोऽपि त्वत्त एव जात इति भावः ॥ १३ ॥ तर्हि भगवन्नाभिकमलोद्भूतत्वे । स्याः त्वं भवेः । मम नन्दनन्दनस्य किमागतम् । तत्र तदा । इति भाव इति—सर्वात्मन एव नारायणपदार्थत्वमिति तात्पर्यम् । पुनरर्थान्तरेणापि तत्समर्थयति—अधीश इति । त्वमेव नन्दात्मजरूप एवासौ नारायण इति । पुनस्तथैवाह—किञ्चेति । इत्यर्थ इति—सर्वज्ञत्वात्त्वमेव स इति भावः । यशोदासूनुराशङ्कते—नन्विति । व्युत्पत्तौ व्युत्पादने । एवमुक्तप्रकारेणाप्यर्थो भवेदेव । तत नारायणत्वं भगवतः । अन्यथा उक्तार्थव्यतिरेकेण प्रसिद्धं न त्वनेन पूर्वोक्तव्युत्पादनेन । आशङ्क्य स्वयमेव शङ्कित्वा पुनराह । एतदर्थस्वीकारे भगवानाशङ्कते—नन्विति । अपरिच्छिन्नाया देशकालवस्तुपरिच्छेदत्रयशून्यायाः । तच्चापि जलाश्रयं वपुरपि ॥ १४ ॥ तदैव प्रलयोत्तरकाले एव । तत्र जले । चक्षुर्विषयं तन्नेत्याह—किन्त्विति । तदा तदात्वेऽन्तःकरणदृश्यत्वे इति यावत् । पुनस्तदैवेति व्याख्यातमेवात्र । यतः कादाचित्कोऽतो हेतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रैव मायाधमनाऽवतारे ह्यस्य प्रपंचस्य बहिः स्फुटस्य ॥ कृत्स्नस्य चांतर्जठरे जनन्या मायात्वमेव प्रकटीकृतं ते ॥ १६ ॥ यस्य कुक्षाविदं सर्वं सात्म भात यथा तथा ॥ तत्त्वय्यपीह तत्सर्वं ।कामद मायया विना ॥ १७ ॥ अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितमेकोऽसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि ॥ तावंतोऽसि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावंत्येव जगंत्यभूस्तदमितं ब्रह्माद्वयं शिष्यते ॥ १८॥

शतं विचिन्वताऽपि मया हे भगवन्नचिन्त्यैश्वर्य तत्र किमिति न दृष्टम् । न च बाह्यदृश्यं सद्वपुः किन्त्वन्तःकरणदृश्यमेवेति चेत्तदा हृद्यपि किमिति नो व्यदर्शि न दृष्टम् । तदैव तपःकरणानंतरं सपद्येव सुदृष्टमतो मायैव । अतस्त्वन्मर्तेर्देशविशेषपरिच्छेदः सत्यो न भवतीत्यथः ॥ १५ ॥ अपि च यदि जलादिप्रपंचः सत्यः स्यात्तर्हि तेन तव परिच्छेदो भवेत् स तु मायाविलसित इति त्वयैव दर्शितमित्याह श्लोकत्रयेण । हे मायाधमन मायोपशमन । अत्रैवावतारे बहिः स्फुटस्यापि आत्मनो जठरमध्ये जनन्याः प्रदर्शनेन ॥ १६ ॥ ननु बहिः सत एवांतर्जठरे प्रतिबिंबोऽस्तु तत्कुतः सर्वथा मायात्वं तत्राह । यस्येति । यस्य तव कुक्षौ सर्वमिदं यथा भाति तत्सर्वमिहापि बहिरपि तथैव भाति । किं च सात्मं त्वत्सहितं तदिदं सर्वं त्वयि मायया विना किं घटेत । अयं भावः । त्वयि प्रतिबिंबश्चेत्तर्हि बाह्याद्विलोमतया प्रतीयेत न तु तदस्ति तव चादर्शस्थानीयस्य त्वयि प्रतीतिर्न स्यादतः सर्वथा मिथ्यात्वमेवेति ॥१७॥ अपि च न केवलं जनन्या ममापि तथैव दर्शितमित्याह । अद्येवेति । त्वदृते त्वां विना । अस्य विश्वस्य मायात्वं त्वया ममैव च तदप्यद्यैव किं न दर्शितं ।किं तु दर्शितमेव । तथाहि एकोऽसीत्यादि । तत्ततो मया सहाखिलैस्तत्त्वादिभिरुपासितास्तावंतश्चतुर्भुजा असि । जगंति ब्रह्मांडानीति प्रागनुक्तमपि दृष्टमिति ज्ञातव्यम् ॥ १८ ॥

मायैव ‘ भावाभावविषयिणी माया ’ इति लक्षणात् सत्यं नेत्यर्थः । यतो मायाऽतो हेतोः । इत्यर्थ इति—न हि सिकतातोयस्य शीतत्वादि ज्ञातुं शक्यमसत्यत्वादेवमत्रापि वपुषो मायात्वे तत्परिच्छेदस्य सुतरां मायात्वमिति भावः ॥ १५ ॥ इहैव विमर्शेन तमेवार्थमाह—अपि चेति । तेन प्रपञ्चेन । स तु प्रपञ्चस्तु । विलसितः प्रकाशितः ॥ १६ ॥ अत्राशङ्कते—नन्विति । सतो विद्यमानस्य । तत्र आक्षेपे । अद्भुतमाह—किञ्चेति, अयं भाव इति । तत् विलोमतया दर्शनम् । यतस्त्वमप्यत्र प्रतीयसे अतो हेतोः । न हि प्रतिबिम्बाधिकरणमपि प्रतिबिम्बावलोकने युगपत्प्रतीयतेऽन्यथादर्शोऽप्यादर्शः प्रतीयेत इति तात्पर्यम् ॥ १७ ॥ इहैवान्यदाह—अपि चेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजानतां त्वत्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायाम् ॥ सृष्टाविवाहं जगतो विधान इव त्वमेषोंत इव त्रिनेत्रः ॥१९॥ सुरेष्वृषिष्वीश तैथव नृष्वपि तिर्यक्षु यादस्स्वपि तेऽजनस्य ॥ जन्माऽसतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्रहाय च ॥ २० ॥ को वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम् ॥ क्व वा कथं वा कति वा कदेति विस्तारयन्क्रीडासि योगमायाम् ॥ २१ ॥ तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ॥ त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवावभाति ॥ २२ ॥

ननु ब्रह्मंस्तव मया दर्शितं शुद्धमेव चैतन्यं कथं प्रपंचवन्मायेत्युच्यते। सत्यम्। किं त्वद्वितीये त्वयि नानात्वं गुणावतारमत्स्याद्यवतारेष्विव कार्यवशेन स्वतंत्रमायानिबंधनमित्याह श्लोकद्वयेन । अजानतामिति । त्वत्पदवीं तव स्वरूपमजानतामनात्मनि प्रकृतौ स्थित आत्मैव त्वमात्मनैव स्वातंत्र्येण मायां वितत्य भासि । कथम् । जगतः सृष्टावहमिव ब्रह्मेव । विधाने पालने च एष त्वमिव । अंते संहारे त्रिनेत्र इवेति ॥ १९ ॥ सुरेषु उपेंद्रः । ऋषिषु परशुरामः । नृष्वपि रामः ॥ २० ॥ ननु च स्वातंत्र्ये कथं कुत्सितेषु मत्स्यादिषु जन्म कथं वा वामनाद्यवतारे याच्ञादिकार्पण्यं कथं वाऽस्मिन्नेव कदाचिद्भयपलायनादि अत आह । को वेत्तीति । अन्वर्थैः संबोधनैर्दुर्ज्ञेयत्वमेवाह भूमन्नित्यादिभिः । भवत ऊतीर्लिलास्त्रिलोक्यां को वेत्ति क्व वा कथं वा कदा वा कति वेति । अचिंत्यं तव योगमायावैभवमिति भावः ॥२१॥ ननु भवत्ववताराणामचिंत्यो महिमा प्रपंचस्य ह्यसत्त्वे कथं सत्त्वप्रतीतिरितीमामाशंकां सपरिकरमुपसंहरन्परिहरति । तस्मादिति । अस्तधिषणं निरस्तप्रतिभासं त्वय्येवोद्यदुद्भवदपि यन्नश्यत् सदिवे

तथैव मातृवत् । तत् तदनु ॥ १८ ॥ भगवतः शङ्कान्तरमाह—नन्विति । स्वीकृत्य किञ्चिदाह—सत्यं, किं त्विति । स्वतन्त्रमायानिबन्धनं स्वाधीनमायाहेतुकम् । त्रिनेत्रो रुद्रः ॥ १९ ॥ सुरेषु उपेन्द्रः । ऋषिषु परशुरामादिः । तथैव देवादिष्विव । तिर्यक्षु वाराहादिः । यादस्सु मत्स्यादिः ‘ यादांसि जलजन्तवः ’ इत्यमरः । असतां रावणादीनाम् ॥ २० ॥ अत्राशङ्कते—नन्विति । अतः अत्र । अन्वर्थैरर्थानुगतैर्यथार्थैरिति यावत् । क्व कुत्र । कथं केन प्रकारेण । कदा कस्मिन् काले । कति कियत्सङ्ख्याका ऊतीः करोति चक्रे करिष्यति वेत्यर्थः । इति भाव इति—अघटनघटनापटीयस्यां मायातोऽपि योगमाया प्रबला ‘परास्य शक्तिर्विविधैव श्रूयते’ इत्यादिश्रुतेरित्यर्थः । ननु कृष्णस्य मम भूभारहरणार्थमेव जन्म, रामस्य रावणवधार्थमेव, शुक्लाद्यवतारगणस्य तत्तत्समयधर्मप्रवर्त्तनार्थमेवेति प्रसिद्धिर्न तु ज्ञानिमानिनां दुर्मदनाशार्थं—सत्यम्, तव प्रादुर्भावादिलीलानां कुत्रकुत्र विषये किंकिं प्रयोजनं कदाकदा वा कियन्त्यो वा ता इति कार्त्स्न्येन ज्ञातुं कोऽपि न प्रभवतीत्याह—हे भूमन् विश्वव्यापकानन्तमूर्ते, हे भगवन् भूमत्वेऽपि षडैश्वर्यश्रीपूर्ण, हे परमात्मन् भगवत्त्वेऽपि परमात्मस्वरूप, हे योगेश्वर योगमाययैवानुभाव्यमानभूमत्वादिमहैश्वर्य । ऊतीर्जन्मादिलालीः । त्रिलोक्यां त्रिलोकीमध्यवर्तिनीर्लीलाः । को वेत्ति न कोऽपीति । यतः क्वेत्यादि । ननु तवानन्ता एव मूर्त्तयो विश्वव्यापिकाः षडैश्वर्यवत्यः परमात्मस्वरूपा न तु भौतिकाः, त्रिलोकीवर्त्तिनीरेव भक्तविनोदार्था लीलाः कुर्वत्यः सर्वा एव सदैव युगपदेव क्रीडन्तीति कथं संभवेदित्यत आह—विस्तारयन्निति । अचिन्त्यशक्त्या योगमाययैव तत्तदुपासकभक्तान्प्रति तासां यथाकालं प्रणाशनावरणाभ्यां क्रीडानिर्वाह इत्यर्थ इति विश्वनाथः ॥ २१ ॥ तदङ्गीकृत्याप्याशङ्कते—नन्विति । सपरिकरं सानुबन्धम् । तत्र सत्यत्वप्रतीतौ । इत्यर्थ इति—अधिष्ठानगुणेन प्रपञ्चे सत्प्रतीतिर्न तु स्वत इति भावः ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः ॥ नित्योऽक्षरोऽजस्रसुखो निरंजनः पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः ॥ २३ ॥

त्युपलक्षणमेतत् । नित्यमिव सुखमिव चेतनमिव चाधिष्ठानभूतस्य तव गुणैस्तथा तथा भातीत्यर्थः ॥ २२ ॥ त्वमेव तु सत्य इत्याह । एकस्त्वं सत्यः । कुतः आत्मा दृश्यमसत्यं दृष्टं न चात्मा दृश्योऽतः सत्यः । किं च यद्विकारवत्तदसत्यम् । न च त्वयि जन्मादयो विकाराः संतीत्याह । आद्यः कारणमतो न जन्म । आद्यत्वे हेतुः । पुराणः पुरापि नवः कार्यात्पूर्वमपि वर्तमान इत्यर्थः । अत्र हेतुः पुरुष इति । तथा च श्रुतिः । "पूर्वमेवाहमिहासम्" इति, "तत्पुरुषस्य पुरुषत्वम्" इति । जन्मानंतरास्तित्वलक्षणं विकारं वारयति । नित्य इति । सनातन इत्यर्थः । पूर्णोऽजस्रसुखोऽक्षरोऽमृत इति चतुर्भिः पदैः क्रमेण वृद्धिविपरिणामापक्षयविनाशान्वारयति । पूर्णत्वे हेतुः । अनंतोऽद्वय इति च । देशकालपरिच्छेदरहितो वस्तुपरिच्छेदरहितोऽपीत्यर्थः । अमृतत्वोपपादनाय चतुर्विधक्रियाफलत्वं वारयति स्वयंज्योतिर्निरंजन उपाधितो मुक्त इति पदत्रयेण । अयं भावः । तत्रोत्पत्तिराद्य इत्यनेनैव निराकृता । प्राप्तिरपि क्रियया ज्ञानेन वा भवेत् । क्रियया प्राप्तिरात्मपदेनैव निराकृता । ज्ञानतः प्राप्तिं वारयति । स्वयंज्योतिरिति । विकृतिरपि तुषापाकरणेनावघातेन व्रीहीणामिवोपाध्यपाकरणेन भवेत्तत्त्वसंगत्वान्न संभवतीत्याह । मुक्त उपाधित इति । संस्कारोऽपि किमप्यतिशयाधानेन

एवं जगतो मिथ्यात्वेन बोधसामानाधिकरण्ये "नैतदात्म्यमिदं सर्वम्" इत्यादिश्रुतिसिद्धं विजातीयभेदाभावमभिधाय 'सृष्टाविवाहम्' इत्यत्र स्वगतभेदं च वारयित्वा जीवैर्मुख्याभेदं दर्शयन्सजातीयभेदमपनुदति—एक इति । अतो दृश्यवात् । सत्यत्वेऽन्यदप्याह—किञ्चेति । अतः परमकारणत्वात् । इत्यर्थ इति—पुराणशब्दोऽत्र जीर्णार्थपरो नेत्यर्थः । इहास्य जगत इति यत्पूर्वभवनं तदिति श्रुतिपदार्थः । इत्यर्थ इति—सनातनस्यैव नित्यपदार्थत्वादिति भावः । परिच्छेदः परिमितिः । उत्पाद्याप्यविकार्यसंस्कार्यरूपाणि चतुर्विधानि क्रियाफलानि । अयं भाव इति—तत्र चतुर्षु आत्मनो विनैव क्रियां स्वरूपत्वेन प्राप्तत्वात्, स्वयंप्रकाशस्य ज्ञानाविषयत्वादित्याह—ज्ञानत इत्यादि । तुषाणामपाकरणं येन अवघातेनावहननेन । तच्च उपाध्यपाकरणम् । तत्र तयोः । इत्यर्थ इति—निर्मले मलसत्त्वे निर्मलत्वव्याघातादित्यर्थः । अत्र विश्वनाथः—बहिर्मुखानां मते तु त्वमपि मायोपाधिर्मायामय एव, दुर्गममहिम्नस्तव चिन्मयजगतां तु मायिकत्वे का वार्तेति । त्वत्पदवीं त्वत्प्रापकं वर्त्म 'भक्त्याहमेकया लभ्यः' इति त्वदुक्तेः । भक्तियोगमजानतां ज्ञानिमानिनां तु मते त्वमनात्मनि प्रकृतौ स्थित एवात्मैव त्वमात्मनैव स्वातन्त्र्येणैवेति तव जीवाद्विशेषः । मायां वितत्यैव भासि, आकारशून्योऽप्याकारवत्त्वेन जातो भवसि, सृष्टौ रजोगुणेन यथाऽहंविधानेन पालने सत्त्वेन एष त्वं विष्णुरिव अन्ते तमसा त्रिनेत्रो रुद्र इवेति निराकारस्यात्मनो यथा मायिकाकारा ब्रह्मविष्णुरुद्रा

---

१ "योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव । ब्रह्मास्मीति धिया शेषा त्वहधीर्विनिवर्तते ॥ नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितम् । सामानाधिकरण्यस्य बाधार्थत्वं तनोस्तु तत् ॥ सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् । अहं ब्रह्मेति जीवेन सामान्याधिकृतिर्भवेत् ॥" इति । योऽयं स्थाणुरेष पुमानेष इत्यत्र पुरुषत्वबोधन स्थाणुधीबाधो जायते एवं सर्वं ब्रह्मेति वाक्ये सर्वशब्दोपलक्षितजगद्बाधेन ब्रह्मावशिष्यत इत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते ॥ गुर्वर्कलब्धोपनिषत्सुचक्षुषा ये ते तरंतीव भवानृतांबुधिम् ॥ २४ ॥ आत्मानमेवात्मतयाऽविजानतां तेनैव जातं निखिलं प्रपंचितम् ॥ ज्ञानेन भूयोऽपि च तत्प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा ॥ २५ ॥ अज्ञानसंज्ञौ भवबंधमोक्षौ द्वौ नाम नान्यौ स्त ऋतज्ञभावात् ॥ अजस्रचित्याऽऽत्मनि केवले परे विचार्यमाणे तरणाविवाहनी ॥ २६ ॥ त्वामात्मानं परं मत्वा परमात्मानमेव च ॥ आत्मा पुनर्बहिर्मृग्य अहोऽज्ञजनताऽज्ञता ॥ २७ ॥

मलापाकरणेन वा तत्रातिशयाधानं पूर्णत्वेनैव निराकृतम् । मलापाकरणं निवारयति । निरंजन इति । निर्मल इत्यर्थः ॥ २३ ॥ तस्मादेवंभूतज्ञानान्मुच्यंत इत्याह । एवंविधमिति । त्वां ये विचक्षते सम्यक् पश्यंति । कथम् आत्मात्मतया आत्मा प्रत्यक्चैतन्यं तस्य स्वरूपेण । न चैतत्पुत्रादिष्विव गौणमित्याह । सकलात्मनामपि स्वात्मानम् । केन । गुरुरेवार्कस्तस्माल्लब्धा उपनिषज्ज्ञानं तदेव सुचक्षुस्तेन भव एवानृतांबुधिस्तं ते तरंतीव ॥ २४ ॥ तत्र च ज्ञानेन तरंतीति तच्च तरंतीवेति तच्चात्मात्मतया ज्ञानेनेत्यर्थत्रयं प्रतिज्ञातं क्रमेणोपपाद्यते तत्रात्मानमेवात्मतयेत्यनेन श्लोकेन ज्ञानेन तरंतीत्येतदुपपाद्यते । अज्ञानसंज्ञावित्यनेन तरंतीवेत्येतत् त्वात्मानमित्यादिश्लोकद्वयेन त्वात्मात्मतयेत्येतदुपपाद्यते । ननु ज्ञानेन कथं भवं तरंतीति तस्याज्ञानमूलत्वादित्याह । आत्मानमेवेति । तेनैवाज्ञानेनैव । प्रपंचितं प्रपंचः । रज्ज्वामहेर्भोगभवाभवौ सर्पशरीरस्याध्यासतदपवादौ रज्ज्वज्ञानेन यथेति ॥ २५ ॥ ननु ज्ञानेन तरंत्येव किमिदमुच्यते तरंतीवेति तत्राह । अज्ञानसंज्ञाविति । अज्ञानेन संज्ञा ययोस्तौ भवबंधमोक्षौ भवेन बंधस्तस्मान्मोक्षश्च तौ द्वौ नाम प्रसिद्धौ ऋतज्ञभावात् ऋतश्चासौ ज्ञश्च यो भावस्तस्मादन्यौ न स्तः । ननु कथं महानपलापः क्रियते । परमार्थविचारादित्याह । अजस्रेति । अखंडानुभवरूपे परे शुद्धे आत्मन्यज्ञानं न च बंधः । अत एव न ज्ञानं न च मोक्षः तरणौ सूर्ये रात्र्यहनी इवेति ॥ २६ ॥ ननु परमार्थज्ञानादज्ञानकृतो

स्तथा मायिकमेव जलस्थं नारायणरूपमवताराश्च सर्वे मायिकरूपा माययैव वत्सबालचतुर्भुजादीन् क्षणिकान्दर्शयामासेति ते प्राहुः॥२३॥ यस्मात्त्वं सर्वविकारादिशून्यस्तस्माद्धेतोः । एवंविधं सत्यज्ञानादिरूपम् । प्रत्यक् जीवः । आत्मशब्दोऽत्र स्वरूपपरः । एतत् आत्मदर्शनम् । पुत्रे आत्मदृष्टिर्यथा गौणी न तथेत्याह–सकलेति । अनृतत्वादेव तरन्तीवेत्युक्तम्॥२४॥तत्र भवसन्तरणेऽर्थत्रयं प्रतिज्ञातमिति योजनीयम् । तत्र तेषु । ज्ञानेन संसारतरणे शङ्कते–नन्विति । तस्य संसारस्य॥२५॥ पुनराशङ्कते–नन्विति । तत्र तस्मिन्नाक्षेपे । ऋतः सत्यः ज्ञो ज्ञानरूपः यो भाव आत्मा, भावशब्द आत्मवाचकोऽप्यस्ति व्युत्पादितमधस्तात् । सदन्यत्वे त्वसत्त्वापत्तेः ज्ञभेदे भानापत्तेश्चान्यौ न स्तः । पुनराशङ्कते–नन्विति । अपलापो निह्नवः । परमार्थविचारात्सत्यविमर्शात् । अज्ञानस्यैव बन्धकत्वात्तदभावे बन्धाभावः स्फुट एव । अत एव बन्धाभावादेव । बद्ध एव मुच्यते न त्वबद्धोऽपीति तस्य स्वत एव मुक्तत्वादित्यर्थः । तरणौ नित्यप्रकाशरूपे सूर्ये रात्र्यभावात्तद्विविक्तदिनस्याप्यभावात् । अहनी रात्रिश्चाहश्चाहनी, एकशेषस्त्वार्षः । सम्बन्धस्य मृषात्वेन तद्विविक्तमोक्षानुपपत्तेर्द्वौ न स्त इति भावः । अजस्रचिति व्यभिचारिण्यवस्थात्रयेऽपि निरन्तरं तत्साक्षिचिदात्मना भासमाने॥२६॥ पुनराशंकते–नन्विति । आग्रहो हठः । यस्याध्यासात्, अन्यत्रान्यदृष्टिरध्यासः । अस्फूर्तिरज्ञानम् । तदपवादेन अध्यस्तापवादेन । अपवादस्त्वारोपितापाकरणम् । तत्रैव यत्रापवादः कृतस्तस्मिन्नेव । आक्रोशन् उच्चैर्वदन् । अध्यस्य प्रकल्प्य । अत्र देहे । बहिर्वनादौ । मृग्यतेऽन्विष्यते । इत्यर्थ–इति भावः । ये आत्मविन्मन्याः पुरुषाकारं त्वां नाद्रियंते त एव पूर्वोक्ताः स्थूलतुषावघातिन इत्याह–त्वामिति । चोऽप्यर्थे, परमात्मानमेवापि त्वां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्भवेऽनंत भवंतमेव ह्यतत्त्यजंतो मृगयंति संतः ॥ असंतमप्यंत्यहिमंतरेण संतं गुणं तं किमुयंति संतः ॥ २८ ॥

बंधो निवर्ततामात्मात्मतयैव ज्ञानादिति कोऽयमाग्रह इत्याशंक्य यदध्यासादात्मनः पररूपास्फूर्तिस्तदपवादेन तत्रैव ज्ञानं युक्तमितीममर्थं विस्मयेनाक्रोशन्निवाह । त्वामिति । त्वामात्मानं परं देहाहिरूपं मत्वा आत्मनि देहादिमध्यस्य तथा परं देहादिमात्मानं मत्वा देहादावात्मानमध्यस्येत्यर्थः । एवमन्तर्नष्ट आत्मा बहिर्मृग्य इत्यहो चित्रम् । न हि गृहे नष्टं वने मृग्यत इत्यर्थः ॥ २७ ॥ विवेकिनस्तु प्रत्यक्स्वरूपे एव परमात्मानं विचिन्वंतीत्याह । अंतर्भव इति । भवतीति भवश्चिज्जडात्मकं शरीरं तन्मध्य एव हि प्रसिद्धं त्वां मृगयंति । कथम् अतज्जडं त्यजंतोऽपवदंतः । ननु सतो ज्ञानेनालं किमसतोऽपवादेनेत्याशंक्याध्यस्तापवादं विनाऽधिष्ठानतत्त्वं न ज्ञायत इति सतां व्यवहारे

पुरुषाकारं परं शुद्धपरमात्मतोप्यन्यं मायाशबलमात्मानं मत्वा आत्मा परमात्मा पुनस्त्वत्तो बहिरेव मृग्यः, अहो तस्या अज्ञजनताया अज्ञताऽत्यद्भुतेत्यर्थः । अयमर्थः—विवर्त्तपरिणामादयो वादाः खलु चिद्भिन्ने मायिके जगत्येव प्रवर्त्तंते न तु पूर्णचिति ब्रह्मणि । तथा ' शाब्दं ब्रह्म वपुर्दधत् ' इति तृतीयात् । " यत्तद्वपुर्भाति विभूषणायैरव्यक्तचिद्व्यक्तमधारयद्विभुः । बभूवतेनैव स वामनः" इत्यष्टमात् । "सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः" इति दशमात् गोविन्दं सच्चिदानंदविग्रहं वृंदावनसुरभूरुहतलासीनमिति । " तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हि " इति गोपालतापिनीश्रुतेश्च पूर्णब्रह्मात्मके भगवद्वपुष्यग्रमादावपि । ये तु श्रुतिस्मृतीक्षणाभावादंधास्तत्रतत्रापि विवर्तमंधपरंपरयैव प्रवर्त्तयंतो भ्रश्यंति ते त्वहोशब्देन ब्रह्मणा स्वसृष्टौ शोच्येषु मध्ये विस्मयरसविषयीचक्रिरे इति विश्वनाथः ॥ * ॥ ये तु सकलात्मनामप्यात्मानं त्वामात्ममात्रया विचक्षते ते त्वतिमूर्खा एवेत्याह—त्वामिति । परमात्मानमेव त्वां परं केवलमात्मानं शुद्धजीवरूपं मत्वा । अप्यर्थे चकारः । "आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" इति । स भवानपि अपुनर्बहिर्मृग्यः स्यात् । ' अभावे नह्यनो ना च' इत्यमरः । न पुनर्बहिर्वृंदावने मृग्यते किं तु शुद्धजीवस्वरूपभेदेन देहान्तरे एव मृग्यते इत्यर्थः । आहो विस्मये । इयमज्ञजनताया अज्ञता पूर्वोक्तस्य विविधवैलक्षण्यस्य हानाननुसंधानात् । यद्वा—आत्मानं सर्वेषां मूलस्वरूपं त्वां परमनात्मानं मत्वा तथापरं त्वत्तोऽन्यमेव तादृशमात्मानं मत्वा यः कश्चिदन्यो भवेदिति कल्पयित्वा बहिस्त्वत्पादाब्जसदनादस्मादन्यत्रात्मा मृग्यो भवति मृग्यत इत्यर्थः । इयमहो अज्ञजनताया अज्ञता । यद्वा—त्वं केवलमात्मानं जीवस्य शुद्धस्वरूपमेव मत्वा तत उत्कर्षावाप्तौ परमात्मानमंतर्यामिमात्रञ्च त्वां मत्वा तथातथा वा यदि मन्यते तदापीत्यर्थः । अज्ञजनताया अज्ञतैव परिशिष्यते । " विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " इति भगवद्वाक्याननुसंधानात् । यश्चात्मा मुख्यवृत्त्या तत्तच्छब्दवाच्यो बहिर्मृग्य एवेति तर्जनीयुगलेन चरणकमलयुगलं दर्शयति । यद्येवं न स्यात्तदाहमपि स्वसदन एव स्थित्वा मनसि समाधास्यं न पुनरत्र श्रीवृंदावने समायास्यम् । न हि गृहे नष्टं वने मृग्यत इति भावः । संधिश्छन्दोनुरोधेन । जन्मन्यज्ञानताया अज्ञतेति वा । यद्वा—ये जीवतत्त्वेश्वरतत्त्वविदोपि सर्वं परित्यज्य तादृशं श्रीकृष्णं संप्रति श्रीवृंदावन एव मृगयंते तान् स्तौति । प्रथमं तावत् परं केवलमद्वैतोपासनया त्वामात्मानं जीवस्वरूपानतिरिक्तमनुभूय ततः परमात्मानञ्चाऽनुभूय पुनरधुना आत्मा तल्लक्षणं सर्वेषां मूलस्वरूपं बहिश्चक्षुरादिगोचरे मृग्यः सम्पद्यते । तस्मादहो विज्ञजनताया विज्ञतेति । ' अज्ञजनताऽज्ञता ' इति क्वचित्पाठः । तत्राज्ञशब्देनाऽनुत्तमशब्दवद्विज्ञ एवात्र व्याख्येयः । अत्र मृग्ये । अहो इत्यत्र रोरुत्वाभावः । सदैन्यरोदनवचनत्वेन मृग्य इत्यकारस्य प्लुतत्वात् "अतो रोरप्लुतादप्लुते" इति सूत्रं न प्रवर्तते इति ॥ २७ ॥ प्रत्यक्स्वरूपे जीवे । विचिन्वंति पश्यंति । " तत्त्वमसि " इत्यादिषु तच्छब्दश्चेतनपरस्तद्भिन्नमतत् । अत्राक्षिपति—नन्विति । तत्त्वं स्वरूपम् । असंतमविद्यमानमपि । तन्निषेधं नायं सर्प इत्येवंरूपं निषेधम् । इत्यर्थ इति—अंतरेणेत्यव्ययस्य वर्जनार्थत्वादिह तृतीयाभ्रमो न कार्य इति तात्पर्यम् । " गुणास्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुषु " इति वैजयंती । तंतुशब्देन रज्जुरपि लक्ष्यतेऽत एव गुणं रज्जुम् । असतः समीपत्वासंभवं मन्वानः

इतोऽग्रे * एतच्चिह्नतः परं प्रतिपद्यं सतोषिणीविश्वनाथव्याख्यानुसारिणी व्याख्या बोध्या ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णाह । असंतमिति । अंति समीपे असंतमप्याहिमंतरेण तन्निषेधं विनेत्यर्थः । संतं गुणं रज्जुं संतः किमु यंति जानंति । अंति संतमपि गुणमिति वा न जानंतीत्यर्थः ।

प्रकारांतरेण योजयति—अंतीत्यादि । इत्यर्थ इति—किमुना निपातद्वयेन प्रकृतिविरुद्धोऽर्थो द्योत्यत इति भावः । यस्मादध्यस्तापवादो वस्तुयाथात्म्यबोधी तस्मात् । आत्मतया स्वरूपतया । इति भाव इति । अहं ब्रह्मास्मीत्येवं जीवभावनापरित्यागपूर्वकं स्वस्मिन्ब्रह्मभावेनैव मोक्षहेतुरिति तात्पर्यम् ॥ * ॥ पूर्वत्र हेतुमाह—हे अनंत सर्वव्यापिन्, हि यस्मादंतर्भवे व्यष्टिसमष्टिरूपस्य भवस्य जगतो मध्ये संतो विवेकवंतो भवन्तं श्रीकृष्णमेव मृगयंति सर्वदोषहीनं सर्वगुणपूर्णमेव प्राप्तुं तेषां मनोरथः स्वयं भगवान्भवानेव च तादृश इति । किं कुर्वन्तः । अतत् तद्व्यतिरिक्तमन्यदन्यदपरितोषेण त्यजंतः । ननु जगदेव ममावरणं तत्कथमत्र मत्प्राप्तिस्स्यात्, उच्यते—भवेदेवमविवेकिनां, विवेकिनां तु गूढस्य कारणस्य तव तत्तद्गुणलेशाभासभावितं तदेव कार्यभूतं प्रत्यायकं, तत्र चास्तु नाम सद्रूपमसद्रूपमप्यन्विष्यन्, तदाश्रयलाभो दृश्यते इत्याह-असंतमपीति । संत इति साधारणविवेकिनः पूर्वेषां तद्विशेषाणां दृष्टांताः। अत्र च तदंशत्यागे व्यष्टिप्रक्रियेयं—प्रथमतो देहादीनां जडमलिनादित्वात् क्रमशस्त्यागेन तच्चेतनादिहेतुः शुद्ध आत्मोपलभ्यते। निर्विशेषब्रह्मदृष्टिस्तु "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्" इत्यादिध्रुववाक्यादिभ्यः, 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादिश्रीगीतादिभ्यश्च परिहृतैव। ततः शुद्धजीवस्यापि प्रकाशकः "केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् । चतुर्भुजम्" इति द्वितीयोक्तस्तदंतर्यामी तस्यापि तत्राल्पगुणोल्लासेन ततः पूर्णो गर्भोदशायी तृतीये वर्णितः । समष्ट्यंतर्यामी तदवतारश्च ततोपि सर्वब्रह्मांडसमष्ट्यंतर्यामी 'आद्योवतारः पुरुषः परस्य' इति सूचितः । कारणार्णवशायी प्रथमपुरुषः ततः 'विष्टभ्याहमिदं कृत्स्नम्' इत्यादि "यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता" इत्यादिदृष्ट्या साक्षात्त्वमेव । अथ समष्टावपि पूर्वमिंद्रचंद्रादिमयं विराड्रूपं मामेवेश्वरं मन्यंते, पश्चात्तस्यापि नश्वरत्वादिना तदंतर्यामीत्यादि पूर्ववत् । तस्मादधुना केनापि भाग्योदयेन साक्षात्त्वैव लाभे सति साधूक्तं—त्वामात्मानमित्यादि । अत्रेयं श्रीवैष्णवप्रक्रिया—यद्येव यदेकं चिद्वस्तु मायाश्रयं विद्यामयं तद्येव तन्मायाविषयमविद्यापरिभूतं चेत्युक्तमयुक्तमिति जीवात्मपरमात्मनोर्विभागोऽवगतः । ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तद्द्वितयं मिथो विलक्षणस्वरूपमेवेत्यायातम् । न च परिच्छेदप्रतिबिंबादिव्यवस्थया विभागः स्यात्, तत्र यद्यनादिविद्यकत्वेनोपाधेर्वास्तवत्वं तर्ह्यविषयस्य तस्य कथमपि परिच्छेदविषयत्वासंभवः । निर्द्धर्मकस्य व्यापकस्य निरवयवस्य प्रतिबिंबत्वायोगोप्युपाधिसंबंधाभावात्प्रतिबिंबभेदाभावात् दृश्यत्वाभावाच्च । उपाधिपरिच्छिन्नाकाशस्य ज्योतिरंशस्यैव प्रतिबिंबो दृश्यते न त्वाकाशस्य । दृश्यत्वाभावादेव तथा वास्तवपरिच्छेदादौ सति सामानाधिकरण्यज्ञानमात्रेण न तत्त्यागश्च भवेत्, शास्त्रे क्वचित्प्रतिबिंबत्वाद्यंगीकारस्तु तत्सादृश्येनैव अंबुवद्ग्रहणात् । वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवेति न्यायेन । उपाधेराविद्यकत्वे तु वास्तवपरिच्छेदाद्यभावात् प्राक्तनो मायाश्रयमित्युभयात्मको विरोधस्तदवस्थ एव स्यात् । तथा शुद्धायां चितावविद्याकल्पितोपाधौ तस्यामीश्वराख्यायां विद्येत्यसमंजसा च कल्पना स्यादित्याद्यनुसंधेयम् । तस्मादेकमेव तत्परमतत्त्वं स्वाभाविकाचिंत्यशक्त्या सर्वदैव चतुर्द्धावतिष्ठते । सूर्यान्तर्मंडलस्थतेज इव बहिर्मंडलतद्बहिर्गतरश्म्यादिरूपेण । अचिंत्यशक्तित्वं च मणिमंत्रमहौषधादीनां कारणगुणकारणे तस्मिन्नाश्चर्य्यम् । 'श्रुतेश्च शब्दमूलत्वात्' इति । 'आत्मनि चैवं विचित्राश्च हि' इति च न्यायेन 'आत्मेश्वरोऽतर्क्यसहस्रशक्तिः' इति षष्ठेप्येतद्दर्शितम् । अतस्तत्तत्समावेशाद्यनुपपत्तिश्चाचिंत्यशक्तित्वेनैव पराहता, दुर्घटघटकत्वमचिंत्यत्वं, येन खलु सा शक्तिरपरिच्छिन्नमपि परिच्छिन्नत्वेन दर्शयति । यथैव दर्शयिष्यते 'एकदेशस्थितस्याग्नेः' इति । सा शक्तिश्च त्रिधा । अंतरंगा, तटस्था, बहिरंगा चेति । अत्रान्तरंगया स्वरूपशक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुंठादिवैभवेन चावतिष्ठते । तटस्थया रश्मिस्थानीयचिदेकात्मरूपशुद्धजीवरूपेण । बहिरंगया मायाख्यया आभासगतवर्णशाबल्यस्थानीयतदीयबहिरंगवैभवजडात्मप्रधानस्वरूपेण चेति चतुर्धात्वम् । यथोक्तं श्रीवैष्णवे—"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्" इति । श्रुतौ च—"यस्य भासा सर्वमिदं विभाति" इति । अत एव तदात्मत्वेन जीवस्यैव तटस्थशक्तित्वं, प्रधानस्य मायांतर्भूतत्वमभिप्रेत्य शक्तित्रयं तत्रैव दर्शितम् "विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा । अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥" इति । तत्र परा—'यातीतगोचरा वाचाम्' इत्यनेनोक्ता । क्षेत्रज्ञाख्या जीवभूता सेयमपरा, प्रथमातृतीययोर्मध्यवर्त्तिनी तृतीया सेयमपरेति वा । तथा च श्रीगीतासु—"भूम्यादितया भेदं प्राप्ता प्रकृतिरष्टधा" इत्युक्त्या प्राह, "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूताम्" इति 'सर्वभूतेषु सर्वात्मन्' इत्यनेनोक्ता तु अविद्या कर्म कार्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथापि ते देव पदांबुजद्वयप्रसादलेशानुगृहीत एव हि ॥ जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ॥ २९ ॥
तदस्तु मे नाथ स भूरिभागो भवेऽत्र वाऽन्यत्र तु वा तिरश्चाम् ॥ येनाहमेकोऽपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवम् ॥३०॥

तस्मादात्मात्मतयैव ज्ञानान्मुक्तिरिति भावः ॥ २८ ॥ नन्वेवं ज्ञानैकसाध्ये मोक्षे किमिति भक्तिरुद्बोधिताऽत आह । अथापीति । यद्यपि हस्तप्राप्यमिव ज्ञानमुक्तं तथापि हे देव तव पदांबुजद्वयमध्ये एकदेशस्यापि यः प्रसादलेशोऽपि तेनानुगृहीत एव भगवतस्तव महिम्नस्तत्त्वं जानाति । हे भगवँस्ते महिम्नस्तत्त्वमिति वा । एकोऽपि कश्चिदपि चिरमपि विचिन्वन्नप्यतदंशापवादेन विचारयन्नपीत्यर्थः॥ २९ ॥तत्तस्मात् भूरिभागो महद्भाग्यम्।अत्र भवे ब्रह्मजन्मनि तिरश्चामपि मध्ये यज्जन्म तस्मिन्वाऽन्यत्र येन भाग्येन

यस्याः । अपरायाः सा तत्संज्ञा मायेत्यर्थः । अत एव जीवस्य रश्मिस्थानीयत्वात् । मंडलविलक्षणं मायाव्यवधानतिरोधापनीयत्ववैभवत्वं युक्तम् । तदंतरं ह्युक्तम् ''यथा क्षेत्रज्ञशक्तिः सा तारतम्येन वर्त्तते'' इति । अत्रां तरंगत्वतटस्थत्वबहिरंगत्वादिनैव तेषामेकात्मकानां तत्र साम्यं न तु सर्वात्मनेति तत्तत्स्थानीयत्वमेवोक्तं न तु तत्तद्रूपत्वं, ततस्तत्र दोषा अपि नावकाशं लभंते । अत्र विशेषविवेकाः श्रीभागवतसंदर्भतट्टीकयोरवलोकनीया इति दिक् । **विश्वनाथस्तु**–विज्ञास्तु त्वां मायोपाधित्वे न मन्यंते किं तु जीवात्मानमेव, अतस्तमेव मायामालिन्यतो विच्युतीकर्त्तुं तमेव केवलं शुद्धं मृगयंतीत्याह–अंतर्भवे शरीरमध्ये एव वर्त्तमानम्।अनन्ताः असंख्याता भवा नाना योनिषु जन्मानि यस्य तं प्रसिद्धम् अल्पज्ञं जीवात्मानं मृगयंति । किं कुर्वन्तः । अतत् आत्मभिन्नं मायिकं मायाञ्चापवदंतः, न तु चिन्मयस्य जीवात्मनो ज्ञानेनालं, किंचिद्भिन्नस्यापवादेनेत्याशंक्याध्यस्तापवादं विनाऽधिष्ठानतत्त्वं सम्यङ् न ज्ञायत इति सत्यम्, व्यवहारेणाह–असंतमिति । अंतरेण नायं सर्प इत्यपवादं विनेत्यर्थः । अन्यत्तैः । ''असंगो ह्ययं पुरुषः'' इति श्रुतेर्जीवात्मनो हि स्थूलसूक्ष्मदेहसंबंधो नैवास्ति, तत एव देहो दैहिकाः शोकमोहादयश्च तस्य नैव संति, तदप्यविद्ययैव तस्मिञ्जीवात्मनि देहोऽध्यस्तः । ततश्च कदाचिदुद्भूतेन ज्ञानेन 'नायमात्मा देहः' इति देहस्यासतोप्यपवादं विना तथैव शुद्धं सत्यं जीवात्मानं किं जानंति नैव जानन्ति, यथै वाहिमनपवाद्य रज्जुं न जानंतीत्यर्थः ॥ २८ ॥ पुनराशंकते–नन्विति । एवम् उक्तरीत्या । ज्ञानैकसाध्ये केवलज्ञाननिर्वर्त्ये । 'श्रेयःस्रुतिम्' इति, 'भक्त्याहमेकया लभ्यः' इत्यादिवाक्यैः उद्बोधिता विशेषेण कथिता । यतो भक्तिरेव ज्ञानजनिकाऽतो हेतोः । समासे पुनरुक्तिमाशंक्यावग्रहेणाह–हे इति । इहापिशब्दोऽस्यैव भार्येति वक्ष्यमाणैवकारसंबंधवच्चतुर्भिः संबध्यते सूत्रमणिन्यायेनेति । इत्यर्थ इति । अतदंशापवादस्यैव विचारपदार्थत्वादिति भावः । हे देवेति । सर्वप्रकाशक सर्वत्र प्रकाशमानेति । यद्वा–दीव्यति सदा वृंदावने क्रीडतीति । हे भगवन्निति हे निजकारुण्यादिगुणप्रगटनपरेत्यर्थः ॥ * ॥ किञ्च, तस्य जीवस्य ब्रह्मसुखानुभवस्तु केवलेन त्वद्भक्तिलेशे नापि भवति नान्यथेत्याह–तथापीति । यद्यपि मायामायिकसमस्तांशविच्युतः स्यात्तथा स जीवात्मा तदपि तव पदाब्जप्रसादलेशेनानुगृहीत एव भगवतस्तव यो महिमा महिमशब्दवाच्यं ब्रह्म, तस्य तत्त्वं जानाति । तदुक्तं त्वयैव मत्स्यरूपेण–''मदीयं महिमानञ्च परं ब्रह्मेतिशब्दितम् । वेत्स्यस्यनुगृहीतम्मे'' इत्यादि । व्याख्यातं च तैः[1] । तथा च श्रीगीतासु–'ज्ञानञ्च मयि संन्यसेत्' इति । ज्ञानमपि त्यक्त्वा तत उर्वरितां भक्तिमेव केवलां बहु मानयंस्तामेवाभ्यसेत् । यो ज्ञानी, तमेव प्रसादलेशरूपो भक्तियोगोऽनुगृह्णातीत्यर्थः । यस्तु फलप्राप्तौ सत्यां न साधनोपयोग इति मत्वा ज्ञानं भक्तिञ्च त्यक्त्वा केवलब्रह्मानुभव एवोद्यतः स एकोऽपि मुख्योपि ज्ञानिसहस्र गुरुर्भवन्नपीत्यर्थः । चिरं विचिन्वन् बहुशास्त्राभ्यासयोगाभ्यासाभ्यां विचारयन्नपि ॥ २९ ॥ यतो भवत्पदसेवैव मुक्तिहेतुस्तस्मादिति ॥ * ॥ भो ब्रह्मन् साध्यसाधनतत्त्वज्ञशिरोमणे स्तुत्यैव व्यंजितलक्षणयोर्भक्तिज्ञानयोर्मध्ये तव कुत्र स्पृहाऽत आह–तदस्त्विति । हे नाथेति संबोधनेनैव व्यंजितायां सत्यामपि दास्यस्पृहायां भो ब्रह्मन् उत्कर्षनिकर्षौ सम्यग्विचार्य्यैव सर्वोत्कृष्टं वस्तु स्पष्टं प्रार्थयस्वेति चेत्स एव मे भूरिभागो महदेव भाग्यं मनसा

१ तैः श्रीधरस्वामिभिर्व्याख्यातामिति तात्पर्यम् । एवमग्रेऽप्यूह्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा ॥ यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः ॥ ३१ ॥

भवदीयानां जनानामेकोऽपि यः कश्चिदपि भूत्वा निषेवेऽत्यर्थं सेवेय इति ॥ ३० ॥ देवादिजन्मनोऽपि यत्र कुत्रचित्त्वद्भक्तिमज्जन्मैव श्रेष्ठमित्यौत्सुक्येन सप्तभिः श्लोकैर भिनंदति अहोऽतिधन्या इत्यादिभिः । व्रजगोरमण्यः व्रजस्था गावो रमण्यो गोप्यश्च । ते त्वया वत्सतरात्मजात्मना वत्सानामात्मजानां च रूपेण यस्य तव तृप्तये सर्वेऽपि

निर्द्धारितमेव वर्त्तते इति भावः । येन भूरिभागेनात्र भवे ब्रह्मजन्मनि वा तिरश्चामपि मध्ये यज्जन्म तस्मिन्वेति। ब्रह्मजन्मारभ्य तिर्यग्योनिपर्यन्तं यावंति जन्मानि संभवंति तेष्वपि क्वापि जन्मनीति भावः । 'गजो गृध्रो वणि क्पथः' इति वचनात्तिर्यग्योनावपि भक्तिश्रवणात् । तिरश्चामपीति बहुवचनेनापिशब्देन च मोक्षाय जलांजलिं दत्त्वा स्वस्य त्वत्रार्थे सहस्रजन्मप्रार्थनापि व्यंजिता । भवदीयानां जनानां मध्ये एको यः कश्चिदपि नितरां साध कत्वसिद्धत्वदशयोः सेवेत। तदेवम् 'नौमीड्य ते' इत्येकेन माधुर्यम्, ''अस्यापि देव'' इत्यादिभिः, 'तदस्तु मे नाथ' इत्यंतैः पद्यैरैश्वर्यं विवृतवता ब्रह्मणा तन्मध्य एव 'ज्ञाने प्रयासम्' इति 'तत्तेऽनुकम्पाम्' इत्याभ्यां केव लाया भक्तेरुत्कर्षः । 'त्वामात्मानं परं मत्वा' इति, 'अजानतां त्वत्पदवीम्' इत्याभ्यां केवलज्ञानस्याक्षेपः । 'श्रेयःस्रुतिम्' इति, 'परेह भूमन्' इत्याभ्यां केवलयोर्ज्ञानभक्त्योर्वैफल्यसाफल्ये । 'अन्तर्भवेऽनन्त' इति, 'अथापि हे देव' इत्याभ्यां भक्तिमिश्रं ज्ञानम् । 'एवंविधं त्वाम्' इत्यनेन शांतभक्तिः । 'तदस्तु मे' इत्यनेन दास्यभक्तिश्चाभ्यधायि । अतः परं माधुर्यसिन्धावेव निपातिष्यता ब्रह्मणा 'अहोतिधन्याः' इत्यादिभी रागात्मकवात्सल्यादिरति मन्त एव स्तोष्यंत इति स्तुत्यर्थतात्पर्यनिष्कर्षः । अत्र **तोषिणी**—मम तु तादृशप्रसादस्य फलं यज्ज्ञानं तस्यापि यत्फलमुपासनं तस्यापि यत्फलं साक्षात्कारः स एव सहसा संवृत्तस्तस्मादेतदेव प्रार्थयते इति । 'नौमि' इत्यादिप्रतिज्ञामेव संगमयन्सर्वं प्रकरणं तादृशे श्रीकृष्ण एव पर्यवसाययन्नाह यावत्समाप्ति । तत्तस्मान्नाथ हे सर्वकामपरिपूरक । पारमेष्ठ्यपदप्रापकं यन्मे भाग्यं तन्महन्न भवति किन्तु स एव भूरिभागः यद्भवज्जनानां मध्ये एकोऽपीति सेवायाः सम्यक्त्वापेक्षया, अत एव निश्शब्दः, तत्र च तत्र ब्रह्मजन्मनि, अन्यत्र तत्प्रतियोगिहरिणादितिर्यग्योनौ वा न मम ग्रहः, किं तु त्वद्भक्तावेवेतिवाशब्दाभ्यां सूच्यते । हरिणादियोनौ सेवा च स्नेहेन रजआदिमार्जनायावहेलनादिरूपा गम्या, सा च तद्विधानादृष्टैव किल प्रार्थ्यते । पद्यद्वयमिदमित्थं वा संगमनीयम्-यद्यप्येवं तव महिमाऽथापि त्वत्पदांबुजद्वयस्य यः प्रसादोऽनुग्रहस्तस्य लेशोऽपि यत्र, किमुत पूर्णः, स तेनानुगृहीत एव भवज्जनानामनुगतरूप एकोऽपि कश्चनापि भूत्वेति च ॥ ३० ॥ यत्र कुत्र यस्मिन्कास्मिन्योनौ । ते त्वयेति । तृतीयैकवचनेप्यादेश आर्षः । किञ्च, त्वद्भक्तेष्वतिनिकृष्टस्य ममैतावत्येव प्रार्थना समुचिता, त्वत्प्रसादात्सा सफलीभूयात् । ये तु त्वद्भक्तेष्वतिप्रकृष्टास्तेषां त्वयि शुद्धवात्सल्यादिरतिभाजां पदवीं प्रार्थयितुमयोग्यास्मदादिभिरतिदुर्लभा केवलं स्तूयत एवेत्याह—अहोतिधन्या इति ॥ * ॥ ननु भवेयं नाम सर्व पूर्णस्त्वयापि सेवितुमन्वेषणीयः, किन्तु भवान् परमेष्ठी मज्जनाश्चात्र गोपा गोरक्षका एव, तस्मात्कथंचिद्यादवासंग एव त्वम्प्राप्तुमर्हिष्यसीत्याशंक्य एषामेव महिमा सर्वतः पर इति तदेकदेशोदाहरणेन व्यंजयति, तेन च स्वाभिलाषं सूचयति—अहो इति । प्रथमत एव विस्मयवाचकप्रयोगोयमतीव विस्मयेन । अतिधन्याः कृतार्थतापरमकाष्ठां प्राप्ताः । कास्ताः—व्रजगोरमण्य इति । बहुत्वमन्यत्रैव कस्या अपि तथा भाग्यं दुर्लभमिति बोधयति। कथं धन्यास्तत्राह—हे विभो परिपूर्ण । ते त्वयापि यासां स्तन्यामृतं पीतम् । विभुत्वमेवाह—अथ कात्स्न्यें, सर्वेप्यध्वरा इत्यर्थः।ते यस्य तवाद्यापि वेदस्यानादित्वात्तद्विहितानामध्वराणामप्यनादिकालतोऽद्यपर्यंतं तृप्तये संतोषमा त्राय नालम् न समर्थाः, परिपूर्णत्वादेवेति भावः।तथाभूतेनापि पीतम्, अन्यामृताशिनोऽपि यज्ञभागमात्रापजाविनस्तत्तु (त्र) तत्र च तेषु च न सादरः। अहो किमिदममृतमिति भावः। तत्रापि स्तन्यमित्यनेन तादृशस्यापि तस्य तच्छरीरोद्भवरसविशेषास्वादनमिति । तथा पीतमित्यर्थवैशिष्टयेन स्वयं स्वमुखेन चूषितमिति । तत्र चातीवेत्यनेनात्यंतमिति, तत्र च मुदेत्यनेन परमामोदपूर्वकमिति । तत्रापि वत्सवत्सपरूपेणेत्यनेन परमलोभेन कोटिधा भूत्वे

१ मेहना० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसाम् ॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम् ॥ ३२ ॥

यज्ञा अद्यापि नालं न शक्तास्तेन त्वया प्रतिक्षणं तृप्यता यासां स्तन्यममृतरूपं पीतमिति ॥३१॥ अहो इति पुनरुक्त्या भाग्यस्य सर्वथाऽपरिच्छिन्नत्वमुक्तम् ॥ ३२ ॥

त्येवमुत्तरोत्तरचमत्कारवैशिष्ट्यं बोधयति । न केवलमस्मिन् व्रजे तासामेव परमविशिष्टानां कादाचित्कमेवेदृशं भाग्यम्, न च कर्मकांडमात्रानुसारेण 'यत्तृप्तयेऽद्याप्यथ नालमध्वराः' इति यदेव भगवन्माहात्म्यं मद्विधचमत्कारकरम्, अपि तु तद्वासिमात्रेष्वेव नित्यमेव च किमपि तद्विराजते, ब्रह्मकांडानुसारेण भगवन्माहात्म्यमपि न तावन्मात्रतत्तायोग्यमित्यास्ति ॥ ३१ ॥ अपरिच्छिन्नत्वम् महत्त्वम् । परमानंदमित्यादिपदैर्नंदनन्दनस्य सर्वथा पारतम्यं, व्रजवासिनाञ्च पूर्वजन्मापादितसकलज्ञानसाधनीभूतयज्ञतपसां परमसाफल्यमत्यानंदमग्नो ब्रह्माभिनंदतीति ज्ञेयम् । अत्र विश्वनाथः—रागात्मकवात्सल्यवतीस्स्तुत्वा रागात्मकसख्यवतः स्तुवन्नाह—अहो भाग्यमिति । इह वीप्साऽत्यानंदे । परमानंदमिति क्लीबत्वमार्षम्, तेन च "सत्यं विज्ञानमानंदं ब्रह्म" इतिश्रुतिवाच्यं ब्रह्म सूचयति। परमपदेन कृष्णस्य तत्प्रतिष्ठाभूतत्वं, पूर्णपदेन ब्रह्मस्वरूपाणामंशावताराणां व्यावृत्तिः। एतादृशं ब्रह्म येषां श्रीदामादिबालकानां मित्रं सखा ।:मित्रत्वस्य तत्कालभवत्वं वारयति—सनातनं सार्वकालिकमिति। मित्रत्वस्य सार्वकालिकत्वेन श्रीदामादीनामपि सार्वकालिकत्वं ज्ञापितम्। 'अयं तूत्तमो ब्राह्मणः' इत्युक्तेर्ब्राह्मणस्यैवोत्तमत्वात्तद्विशिष्टोप्युत्तम इतिवदत्रापि मित्रत्वस्यैव सनातनत्वं विवक्षितं, तथा मित्रशब्दस्य बंधुमात्रवाचकत्वादेव व्याख्येयम् । श्रीमन्नन्दराजव्रजवासिमात्राणां पशुपक्षिपर्यंतानां सर्वेषामेवाहो भाग्यं, किं पुनर्नन्दस्य, तदीयगोपानां च । किं तत; येषां वात्सल्यादिसर्वविधप्रेमवतां परमानन्दं ब्रह्म सनातनं मित्रं बन्धुः बंधुत्वोचितप्रीतिकर्त्तृ, वक्ष्यते च गोपैः—"दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम्। नन्द ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥" इत्यत एषु व्रजवासिष्वौत्पत्तिकानुराग्येव पूर्णं ब्रह्मेत्यर्थ आयातः । तेन परमानंदमप्यानंदयति व्रजवासिन इति ते सच्चिदानंदमया एव, अथ च परमविस्मयरसविषयीभूता इति ध्वनितम् ॥ * ॥ अतिशयांतरमपीति स्मरन्निव सचमत्कारमाह—अहो इति । अहो आश्चर्ये, भाग्यमनिर्वचनीयस्त्वत्प्रसादः, वीप्सातदातिशायिता प्रागल्भ्येन पुनःपुनश्चमत्कारावेशात् । ननु कथं प्रथमतश्चमत्कारमात्रं व्यंजयासि, येषां तत्तान् कथय तत्राह—श्रीमन्नन्दराजव्रजवासिमात्राणां पशुपक्षिपर्यंतानां, कथमाश्चर्यं कथं वा भाग्यं तत्राह—परमानंदम्, तदेव येषां मित्रं स्वाभाविकबंधुजनोचितप्रेमकर्तृ तादृशप्रेमविषयश्चेत्यर्थः । तथा च वक्ष्यते श्रीगोपैः—" दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् । नंद ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥" इति । आनंदस्य क्लीबत्वं छान्दसम् । तेन च "विज्ञानमानंदं ब्रह्म" इति श्रुतिवाच्यं तत्सूचयति। यत्र काप्यानंद एव खलु तादृशप्रेमकर्त्तारो दृश्यंते न त्वानंदः कुत्रचित्, एष त्वानंदोऽपि तत्कर्त्ता तत्र च श्रुतिमात्रवेद्यत्वेन परमः खंडामृततारतम्यवत्स्वरूपत एवालौकिकमाधुर्यः, अत आश्चर्यं भाग्यं चेति भावः । अन्यदप्याश्चर्यमयमिदमित्याह—सनातनं, तत्तादृशमपि नित्यं, कस्यचित्क्षुद्रानंदोऽपि न नित्यो दृश्यते एषां तु तादृशोपि । पुनः कथंभूतं ब्रह्म—" अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति च " इति श्रुतेः " बृहत्वाद् बृंहणत्वाच्च यद्ब्रह्म परमं विदुः" इति विष्णुपुराणाच्च बृहत्तमत्वेन ब्रह्मसंज्ञमपि "अथानंदास्य मीमांसा भवति" इत्यारभ्य ' ये ते शतम् ' इति वारंवारं मनुष्यानन्दान्मर्त्यपर्यन्तानंदं दशधा शतशतगुणाधिक्येन गणयित्वा मत्तोऽपि शतगुणमानंदं परब्रह्मणः प्रोच्यापि संभ्रमेण " यतो वाचो निवर्त्तंते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन " इत्यनेनानंत्यं स्मृत्वा वाङ्मनसातीते सर्वतो बृहत्तमत्वेन श्रुतिर्भिगीतमपीत्यर्थः । तत आनंदस्यैतादृशत्वमेतादृशबृहत्तापि क्वचिन्मित्रत्वमिति भावः । न चैतावदेव पूर्णमप्यमृतं सौरभादिभिरिव स्वाभाविकगुणरूपैश्वर्यलीलामाधुरीभिः सर्वाभिरेव पूरितं सत् एतदपि कुत्रापि न दृष्टं श्रुतं, न च तादृशामित्रमित्यर्थः । अत्राऽपरोक्षेपि श्रीकृष्णे परोक्षवन्निर्देशः कौतुकविशेषाय । किञ्च, मित्रत्वमत्र विधेयं, परमानन्दत्वमनूद्यम्, ततश्चानूद्यधर्मा विधेयवैशिष्ट्याय प्रयुज्यन्ते इति मित्रताया अपि तत्तद्द्वारा लभ्यन्ते । मनोरमं सुवर्णमिदं कुण्डलं जातमितिवत्प्रयुज्यते, युज्यते चानूद्यस्य विधेयतादात्म्यापन्नत्वेन विवक्षितत्वात् । तत्र च परमानंदत्वं पूर्णत्वं च तस्या सिद्धमेव तत्प्रेमरूपत्वात् । सनातनत्वमपि तस्य सनातनत्वात्, निरुपाधित्वेनोक्तत्वात्, कालवैशिष्ट्यानिर्देशेन कालसामान्यलाभात्, अन्यत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषां तु भाग्यमहिमाऽच्युत तावदास्तामेकादशैव हि वयं बत भूरिभागाः ॥ एतद्धृषीकचषकैरसकृत्पिबामः शर्वादयोंऽघ्र्युदजमध्वमृतासवं ते ॥ ३३ ॥

किं च । एषां भाग्यस्य तावन्महिमा आस्तां कस्तं वक्तुं शक्नोति शर्वादयः शर्वोऽहंकाराधिष्ठाता आदिर्येषां चंद्रादीनामेकादशानां ते तथा वयं च :। वयमित्यात्मानमेव बहुमन्यमान आह । एवं मनोबुद्ध्यहंकारचक्षुराद्यधिष्ठातारस्त्रयोदश देवा एव तावद्धताहो भूरिभागाः यस्मादेतेषां नंदगोपव्रजौकसां हृषीकाणींद्रियाण्येव चषकाणि पानपात्राणि तैस्ते तव चतुर्दशस्य चित्ताधिष्ठातुरंघ्री एव उदजे वारिजे तयोर्मधु मकरंदस्तदेवामृतं स्वाद्वासवं मादकं पिबामः । एतदुक्तं भवति । यदा प्रत्येकमिंद्रियाभिमानिनो

श्रीरुक्मिण्यादौ दृष्टत्वात्, एषामपि तथैव श्रुतितन्त्रादौ दृष्टत्वाच्च । एवं पूर्ववत् श्रीकृष्णस्य स्वभगवत्त्वमपि दर्शितं तथा निजाभिलाषस्य युक्तता चेति ॥ ३२ ॥ तेषां भाग्यमहत्त्वं तु परतममेव, परं त्वस्माकमपि भाग्यं परमेवेत्याह—किञ्चेति । एतेषां गोपानाम् । तावदधुना । त्रयोदश—शर्वचन्द्रब्रह्मदिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाख्याः । बत हर्षे । अहो अद्भुतम् । ' चषकोऽस्त्री पानपात्रम् ' इत्यमरः । चित्ताधिष्ठातुर्वासुदेवस्यास्य । एतदुक्तमित्यारभ्य भाग्यमित्यंतेन नन्दव्रजवासिभ्यो ब्रह्माण्डे न कोऽपि भाग्यविशेषवानस्तीति बोध्यते ॥ * ॥ अहो एषां माहात्म्यं को नाम वर्णयितुं शक्नुयात्, वयमप्येषां सम्बन्धेनैव कृतार्था जाता इत्याह—एषामिति । तुर्भिन्नक्रमे । अंघ्र्युदकजमधु श्रीचरणारविन्दमाधुर्य्यं, तत्पानं तु तदीयाभिमानाध्यवसायसंकल्पदर्शनश्रवणादिरूपम् । देवताश्च—शर्वब्रह्मचंद्रदिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रका इति । यद्वा—गुह्येंद्रियद्वयस्यानुपयोगादश्लीलत्वाच्च तदधिष्ठात्रोर्मित्रप्रजापत्योस्त्याग एव, पादाधिष्ठातोपेंद्रस्तु तदीयधारणशक्त्यावेशावतारो देवताविशेष एव कश्चित्, चित्ताधिष्ठातारं श्रीवासुदेवं विना तेषां सर्वेषामपाकर्तुं क्षमत्वेन तृतीये कथनात् । तस्य तु तत्समीपगतानुभवसुखं श्रीगोपादीनां स्वयं भगवतो नित्याप्राकृतपरिकरत्वादेतेषां च प्राकृताधुनिकत्वात्तदसंभवेऽपि तन्नित्यावरणस्थदेवगणाऽभेदविवक्षयेदमुक्तं तदावेशिरूपात्तेषाम्, तथा च पाद्मोत्तरखण्डे—" नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः । ते वै प्राकृतलोकेस्मिन्ननित्यास्त्रिदिवेश्वराः ॥ " इति । " उभयथापि तस्य च नित्यत्वात् " इत्यत्र करणपक्षस्यैव हि देवता, न भोक्तृपक्षस्येति शारीरकनिर्णयः । श्रीगोपादीनामन्तरंगपरिकरत्वेन सर्वशक्तित्वमिति श्रीकृष्णोपासनाशास्त्राभिप्रायः । पूर्ववदश्लीलपरिहारः, सूर्यादीनां नयनादिकोटिभिर्युगपद्दर्शनादिसुखाधिक्यसातत्यपरिहारस्तु विरुध्यते । ततश्चेयं वा व्याख्या । श्रीमन्नन्दराजव्रजौकसां तादृशं भाग्यमेव कैमुत्येन स्तोतुं कादाचित्केनापि तन्माधुरीमात्रलाभेन स्वेषामपि भाग्यमभिनंदति, तेन च तादृशनिजाभिलाषमपि द्रढयति—एषामिति । यद्वैकाऽद्वितीयाऽनुपमेत्यर्थः । तदेतद्व्रजे प्रथमानं तदेतदित्यर्थः । ते तवांघ्र्युदजमधु हृषीकचषकैर्निजनिजचक्षुरादिभिरेव पानपात्रैः शक्त्या भक्त्या च, प्राधान्यात् शर्व आदिर्येषां ते दशदिक्पालदेवता वयमसकृत्पुनःपुनरिहागत्य पिबामः । वक्ष्यते च—' वंद्यमानचरणः ' इत्यादि । कीदृशम्—अमृतासवं परमस्वादुत्वादिनाऽमृतं परममादकत्वेन चासवं तयोर्द्वैक्यं तद्रूपम् । यद्वा—एते च ते हृषीकचषकाश्च तैः, एतच्छब्दप्रयोगश्चात्यन्तचमत्कारेण । अमृता मृत्युहीना मुक्तास्तेषामप्यासवं मादकम् । किञ्च, व्रजवासिभिर्वयमपि भूरिभाग्याः क्रियामहे । एतद्धृषीकैस्तत्रत्याऽभिमानाध्यवसायसंकल्पशब्दस्पर्शरूपरसगन्धकीर्त्तनसंवाहनातिकगत्यात्मकं तदेवामृतासवं स्वादु मादकं गुह्येंद्रियद्वयस्याश्लीलत्वाच्चित्ताधिष्ठातुर्वासुदेवस्य त्वदभेददृष्ट्या त्यागादेकादशैवेति । यद्यप्यत्रैषामन्तरात्मन एव विषयभोगो न तु तत्तत्कर्तॄणामिंद्रियाधिष्ठातॄणामित्यध्यात्मसिद्धान्तस्तथापि बुद्धौ ब्रह्मा तिष्ठति, चक्षुषि सूर्यश्च । तमधिष्ठातारं विना तत्तदिन्द्रियं श्रीकृष्णनिष्ठानामपि रूपरसादीनां ग्राहकं न स्यादिति सामान्यदृष्ट्याध्यात्मविदां प्रवादोऽपि श्रीकृष्णे रत्यौत्कंठावतां ब्रह्मादीनामानंदहेतुः कर्तृत्वमात्रेणैव भोक्तृत्वाभिमानांगीकारात्, तथैव स्वेषां प्राकृतत्वेप्यप्राकृततत्तद्रिन्द्रियाधिष्ठातृत्वाभिमानाच्च । प्रेम्णामेव विलक्षणप्रक्रियेयं, दृश्यते चान्यत्र पद्यावल्यादौ—'मिथ्यापवादवचसाप्यभिमानसिद्धेः ' इत्यादि । अन्यथा चिदानंदमयवपुषामपि श्रीभगवत्परिवाराणामिंद्रियादीनामपि भगवत इव तन्मयत्वमेव न तु प्राकृतत्वं संभवेत्, कुतस्तत्र प्रपंचगतानां ब्रह्मादीनां प्रवेश इति ज्ञेयम् । अत्रैतादृशपदेन गुह्येंद्रियद्वयस्याश्लीलत्वादनुपयोगाच्च तदधिष्ठात्रोर्मित्रप्रजापत्योस्त्याग एव ध्वनितः । यद्वा—कादाचित्केनापि तन्माधुरीलाभेन स्वेषामपि भाग्यमभिनन्दन्ति, एषां भाग्यमहिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि कतमांघ्रिरजोभिषेकम् ॥ यज्जीवितं तु निखिलं भगवान्मुकुंदस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव॥३४॥

वयं कीर्तिसौंदर्यसौगंध्याद्येकदेशसेविनोऽपि कृतार्थास्तदा सर्वेंद्रियैः सर्वसेविनामेतेषां किं वर्ण्यते भाग्यमिति ॥ ३३ ॥ अतो मया प्रार्थितं ‘ तदस्तु मे नाथ स भूरिभागः’ इति यत्तदेतदेवेत्याह । तद्भूरिभाग्यमिति । किं तत् । इह मनुष्यलोके यत्किमपि जन्म तत्राप्यटव्यां यत्तत्रापि गोकुले यत् । अहो सत्यलोकं विहायात्र जन्मनि जाते को लाभोऽत आह । अपि कतमांघ्रिरजोभिषेकमिति । गोकुलवासिनां मध्येऽपि कतमस्य यस्य कस्याप्यंघ्रिरजसाऽभिषेको यस्मिंस्तत् । ननु कुतो गोकुलवासिन एव अति धन्यास्तत्राह । यदिति । येषां जीवितं निखिलं भगवान्मुकुंदः । मुकुंदपरमेव जीवनमित्यर्थः । दुर्लभतामाह । अद्यापीति । श्रुतिमृग्यं वेदैरपि मृग्यत एव न तु दृश्यत

एकाऽद्वितीयाऽनुपमेत्यर्थः । दशैव वयं दशदिक्पाला भूरिभागा भवामः । कुत इत्यत आह—एतदिति । स्वतर्जन्या स्वनेत्रश्रोत्रं स्पृशति । वत्सचारणाय व्रजान्निष्क्रांतस्य तव चरणसौन्दर्यामृतं नेत्रश्रोत्रैः पिबामः । असकृत् पौनःपुन्येन । ‘वन्द्यमानचरणः पथि वृद्धैः’ इत्युक्तेः ‘ शक्रशर्वपरमेष्ठिपुरोगाः ’ इत्युक्तेश्चेति **विश्वनाथः** ॥ ३३ ॥ यतो व्रजवासिन एव धन्या अतः कारणात् । यस्य कस्यापीत्यनेनोच्चनीचभेदो निरस्तः । “स्त्री राधा पुरुषः कृष्णो विज्ञेयो व्रजमध्यगः । न तत्र सर्वजातेषु विशेषो विद्यते क्वचित् ॥” इति संहितोक्तेः । अत्राशंकते—नन्विति । तत्र क्षेपे । निखिलं सर्वात्मतया । इत्यर्थ इति । अहर्निशं कृष्णैकताना एत इति भावः । इत्यर्थ इति । अहो तेषां भाग्यं, ये प्रत्यक्षं पश्यंतीति भावः ॥ * ॥ तस्माज्जगदैश्वर्याय प्राप्ताय, प्राप्तव्याय मोक्षाय च मया जलाञ्जलिर्दत्तः । केन प्रकारेणैषां व्रजवासिनां चरणधूलयो लभ्यंत इति विभाव्य सनिश्चयमाह—तदेव मे भूरिभाग्यं भवत्विति शेषः । यदि श्रीमत्कृपाकटाक्षा उदारा भवंतीति भावः । किं तत् । इहाटव्यां वृन्दावने यत्किमपि कोमलतृणदूर्वादिजन्म, यदुपरि त्वत्प्रियसखादिव्रजवासिजन चरणविन्याससौभाग्यं संभवेत् । नन्वास्मिन्नतिदुर्लभे लोभं विहाय स्वयोग्यमन्यत्प्रार्थयस्वेति चेत् तर्हि गोकुलेऽपि त्वन्नगरप्रांतादावपि कतमस्य त्वदीयशौचिककालारुहद्द्विपाद्येकतरस्यांघ्रिरजसोऽभिषेको यत्र तथाभूतं शिलापीठ पट्टिकादिजन्म भवतु । नन्वेषां व्रजवासिनामेतावन्माहात्म्ये को हेतुः, कथं वा जगत्पूज्यस्य जगत्स्रष्टुः परमेष्ठिनस्तवैषां नीचजातीनां पादधूलिलिप्सायां नास्ति लज्जेति तत्राह—येषां जीवितं भगवान् ‘भगः श्रीकाममाहात्म्य—’ इत्यमरनानार्थवर्गात् । सौन्दर्य्यसौस्वर्य्यादिगुणविशिष्टो भवान् । मुकन्दः मुखे कुन्दवद्धास्यं यस्य स इति । त्वत्सौन्दर्य्यमन्दहसिताद्येवैकजीवनोपायः, तेन विना सद्य एवामी म्रियन्त इति भावः । निखिलमिति । किञ्चि दपि जीवितं न भोजनपानादिहेतुकमित्यर्थः । अतोऽद्यापि येषां पादरजः श्रुतिभिर्मृग्यत एव न तु प्रायः प्राप्यत इत्यतोऽहं ब्रह्मापि किं वेदेभ्योऽधिको यतः एतत्प्रार्थने मम लज्जा स्यादिति भावः । अतो मया ‘तदस्तु मे नाथ’ इति यत्पूर्वं प्रार्थितं तत् स्वस्य वैधभक्तिमत्त्वे एव । यदि व्रजजनानुगतिमत्त्वेन मां रागानुगामृताम्भोधौ निमज्जयति तदेवं प्रार्थितम् ॥ अत्र **तोषिणी**—तदेवं तेषां महामाहात्म्यमनुवदन् जातदैन्यस्त्वज्जनान्तःपाति तया त्वच्चरणसेवेच्छामपि धार्ष्ट्येनैवाकरवमिति व्यञ्जयन् यत्किञ्चित्त्वज्जनचरणरज एव बहु मन्यमानः प्रार्थयते-तदिति । तत्प्रातिकूलं मुक्त्यादिपञ्चकम् इहेत्यादिपदपञ्चकेन निरस्तम् । जन्मेति । मुक्तिरिह मथुरामण्डल इति वैकुण्ठादिकमपीति सारूप्यादि, अटव्यामिति मथुरादि, गोकुल इति मधुवनादि । तत्रापि किमपि दूर्वादिमृदुतृणत्वमित्यभिप्रायः । तत्रैवांघ्रिरजोभिः सम्यगभिषेकसिद्धेः त्वच्चरणसेवायामन्तरीणाभिलाषाच्च । अभिषेक इति सर्वाङ्गसाफल्यलोभादुक्तम् । ननु कथं साक्षाद्गोपादिजन्मैव न प्रार्थ्यते, तत्राह—यदिति । यस्य गोकुलस्य तद्वासिमात्रस्य निखिलं भगवान् मुकुन्द एव, तत्र यः स्वयं भगवान् परात्परत्वात्साधयितुमशक्य इत्यर्थः । साधितोऽपि यो मुकुन्दः प्रायशो मुक्तिमेव दाता न तु भक्तियोगमात्रमपि तमेतं विना सज्जनः क्षणमपि न जीवितुं शक्नोतीत्यर्थः, इति परमप्रेमविशेषवत्त्वमुक्तम् । आस्तां तावदन्यैर्दुस्साध्यत्वं दुर्लभप्रेमत्वं च, यस्य पादरजः श्रुतिभिरद्यापि त्वयि साक्षादत्रावतीर्णेऽपि दृश्यत एव कतमं रजः कियान्महिमेति ज्ञातुमिष्यत एव, न तु तदन्तः प्राप्यत इत्यर्थः । “यतो वाचः” इत्यादिश्रुतेः । अतः परमप्राचीनतादृशसर्वज्ञानप्रदश्रुतिदुर्लभज्ञाने त्वत्पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषां घोषनिवासिनामुत भवान्किं देवरातेति नश्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्ययन्मुह्यति ॥ सद्वेषादिव पूतनापि सकुला त्वामेव देवाऽऽपिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते ॥ ३५ ॥

इत्यर्थः ॥ ३४ ॥ अपि च किं वर्ण्यते कृतार्थत्वमेतेषां येषां भक्त्या भवानपि ऋणीवास्ते । ननु किं दातुमसमर्थोऽहं येन ऋणी स्यामत आह । उत अपि भवानपि एषां कुत्रापि किं विश्वफलात्सर्वफलात्मकात्त्वत्तः परं फलं राता दास्यतीति नश्चेतः अयत्सर्वत्र गच्छद्विचारयत् मुह्यति । ननु मामेव दत्त्वाऽनृणः स्यामिति चेन्नहिनहि । सद्वेषादिव सतां भक्तानां यो वेषस्तदनुकरणमात्रेण पापिष्ठा पतनाऽपि त्वामेवापिता प्रापिता तर्हि एतत् महद्रूपं फलम् एतत्संबंधिनामपि नंदादीनामपीत्यर्थः । मां दास्या

दरजस्यपि प्रार्थना मेऽनुपयुक्ता, कुतः पुनः प्रेमतरवशीकृतत्वत्पादाब्जश्रीगोपादिजन्मप्रार्थनेति भावः । एवम्‘अहोऽतिधन्याः’ इत्यारभ्य श्रीव्रजवासिभेदानां यथापूर्वमाहात्म्यकैमुत्यं दर्शयित्वा श्रीव्रजेश्वरयोस्तु तदवीव बोधितं, साक्षात्तदप्रस्तावश्च तौ प्रशंसितुमपि कोऽहं वराक इति विवक्षया । सखायस्तु—स्वापराधजभयलज्जाभ्यां न प्रस्तुता एव । अतश्च तदाच्छादनाय लब्धानन्दविशेषा जन्मान्तर एव प्रथमत उपन्यस्ता इति ज्ञेयम् ॥ ३४ ॥ अन्यदपि तेषामलौकिकमहत्त्वमाह—अपि चेति । अत्राशङ्कते—नन्विति । एषां व्रजवासिनाम् कुत्रापि कस्मिन्स्थाने । सर्वफलात्मकात् सर्वाभ्युदयस्वरूपात् । त्वत्तो भवतः । परम् अन्यत्, किं फलमित्यन्वयः । मुह्यति आकुलीभवति । माम् आत्मानम् । नहिनहीति द्विरुक्त्या सर्वथाऽऽनृण्याऽभाव उक्तः । यदि पूतनैकाकिनी मुक्ता तर्हीति । तत्राक्षेपे । बकाघभ्रातृसहिता सापि सकुलैव ‘‘कुलं समूहे देहे च वंशसम्बन्धिनोरपि’’ इति धरणिः । एषां व्रजवासिनाम् । तावदेव पूतनातुल्यमेव ददासि चेत्तर्हि अपर्याप्तं न्यूनमेव तत् । येषां व्रजवासिनाम् । धाम गृहम् । अर्थो वसु । सुहृदः सम्बन्धिनः । प्रिया भार्या । आत्मा देहः । आशयोन्तःकरणम् । त्वदिति षष्ठ्यर्थे—तव । कृते इति विभक्तिप्रतिरूपकमव्ययं तादर्थ्ये । इत्यर्थ इति । न हि सर्वात्मभावेन सर्वसमर्पिणां परमभक्तानां मारणार्थमागतपापपूतनया साम्यमुचितमिति भावः ॥ * ॥ ननु भवद्विधायापि यद्येवं चरण रज एव परमफलत्वेन दास्ये, किञ्च पूर्वं भवता त्वां लब्धुमेव त्वां स्तौमीति प्रतिज्ञातमधुना पुनरेतच्चरणरज एव प्रार्थ्यते, भद्रेयं निष्ठा भवद्विधानामिति सनर्मप्रश्नमाशंक्य तथैवाह । एषां पूर्वोक्तमाहात्म्यानाम् । उत प्रश्ने । विश्वफलादपीत्यपिशब्दान्वयः । ततश्चास्याः श्रीव्रजभूमेरूर्द्ध्वं तव स्थानं नास्ति एतत्स्वरूपादूर्ध्वञ्च फलं नास्तीति कुत्र च दातेत्यर्थः । अयदिति नञ्पूर्वमिण्धातोरूपम् । त्वत्तः परं फलं कुत्राप्यजानदित्यर्थः । मुह्यतीति । निश्चयाशक्तेः सत्यं मद्भावयुक्तानां व्रजवासिविशेषाणां धात्री जनानां वेशात् ‘ लेभे गतिं धात्र्युचितां ततोन्याम् ’ इति तृतीयोक्तेः । इवेति हिंसामयदम्भेनैव न तु भक्त्येत्यर्थः । अतः समानफलत्वं कथं स्यादिति भावः । पूतनापि अन्यस्य का वार्तेत्यर्थः । अपिशब्दोऽयं यथायोगमन्यत्रापि योज्यः । सकुलेति । प्राक्तनाधुनिकतत्कुलोत्पन्नसाहेता गोकुलप्रतिकक्षत्वेन निर्देशात् । बकाघयोस्तु स्वतन्त्र एव तत्स्पर्शोऽस्त्यन्येष्विव त्वामेवेति । पूतनायाः साक्षात् अन्येषां तु भगवद्वेषिणां पूतनाऽनुवर्तित्वेनैव । बकाघयोस्तु विरोधिवेशान्मुक्तिमात्रमिति ज्ञेयम् । आपिता त्वयैवेति शेषः । सुहृन्निरुपाधिहितकारी, प्रियः तादृशप्रीतिविषयः । त्वत्कृत इति । प्रत्येकं स्वाभाविकमेव तेषां तदेकार्थत्वं, तव पुनस्तत्तद्भेदेनानेकप्रियजनार्थत्वामित्यर्थः । तदेवं ते पूर्णा एव । श्रीभगवच्चरणास्तु—प्रत्युपकारासामर्थ्येनाऽपूर्णा इवातस्तेभ्यः किमिव दास्यन्त्यतोऽहमपि भवतामृणित्वेन पारवश्यमाशङ्क्य तादृश निजामिलाषसिद्धये तच्चरणरजश्शरण एव भवितुं युक्त इति भावः । तदेवमपि श्रीकृष्णतद्वासिनोरव्यभिचारित्वमेव व्यञ्जितम् । तथा पूर्वपक्षतयैवायं परमसिद्धान्तः सूचितः । तादृशत्वद्वशीकारमयप्रेम्ण एव परमफलत्वात् ॥ **विश्वनाथस्तु**—किञ्च, येषां पादरजो मया लोभात्प्रार्थ्यते तल्लभ्यतां न लभ्यतां वा मयेति स्पष्टं न ब्रूषे चेत्, मा ब्रूहि, किं त्वन्यदेकं यत्पृच्छ्यते तदुत्तरमवश्यमेव देहीत्याह—एषामेभ्यो भवान् किं रातेति किं फलं दास्यतीति । उत प्रश्ने, इत्यहं पृच्छामीत्यर्थः । ननु सर्ववेदार्थतत्त्वज्ञेन त्वयैव चेतसि विचार्य स्वयमेव ज्ञायतां तत्राह—नोऽस्माकं चेत इति । बहुवचनेन न केवलं ममैव अपि तु रुद्रसनकादीनां नारदादीनां च सर्वेषामेव सर्वज्ञानां चेतो मुह्यति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावद्रागादयः स्तेनास्तावत्कारागृहं गृहम् ॥ तावन्मोहोंघ्रिनिगडो यावत्कृष्ण न ते जनाः ॥ ३६ ॥

मीति चेत्तत्राह । सकुलेति । बकाघासुरसहिता एषामपि तावदेव चेदपर्याप्तमित्याह । यदिति । येषां धामादयस्त्वत्कृते त्वदर्थमेवेत्यर्थः ॥ ३५ ॥ ननु वीतरागादिदोषाणां संन्यासिनामपि न मत्तः परं किंचिदस्ति कथमेषामपर्याप्तमित्यत आह । तावदिति । हे कृष्ण रागादयस्तावदेव स्तेनाश्चोरा भवंति । तथा तावद्गृहमपि करागृहं बंधनागारम् । मोहोऽपि तावदेवांघ्रिनिगडः पादशृंखला । यावत्ते त्वदीया जना न भवंति । त्वदीयानां तु रागादयोऽपि त्वन्निष्ठा मोचका एवेति न यतिभ्यो विशेषो भजनं त्वधि

चेतः कीदृशम्—किं च फलात्सर्वफलात्मकात्त्वत्तोऽपि अपरमन्यत्फलं कुत्रापि देशे काले वा यत् बुद्ध्या बहुधाऽन्विष्याऽपि अप्राप्नुवत् ' इण्—गतौ ' शत्रन्तः । अयमर्थः—सर्वफलरूपमेभिरनादित एव पुत्रादिरूपेण प्राप्त एव वर्तसे अत एव मयैषां भवानिति षष्ठी प्रयुक्ता । यदि तु त्वत्तोऽप्यधिकमन्यत्किञ्चन वस्तु प्रशस्तमस्थास्यत् तदैवैतेभ्यो देयत्वेन योग्यमभविष्यत्, तत्तु नास्तीत्यस्माकं चेतोमोहहेतुरिति । ननु ब्रह्मन् सत्यं तत्त्वानभिज्ञ एवासि मयैतेषां भविष्यन्तीमनुरागमयीं भक्तिं जानतैव तत्साध्यफलभूतस्त्वात्मा पुत्रादिरूपः प्रथममत्र दत्त इत्यन्ये खलु कृतज्ञाः, अहं तु करिष्यमाणविज्ञ इति मयैव जितमिति चेत्सत्यं, प्रभो तदपि त्वं न्यायेन जीयस एवेत्याह—सद्वेषादिव सद्वेषादेवेत्यर्थः । पूतना पापिष्ठापि स्वकुलसहितापि त्वामेवापिता त्वयैव त्वां स्वात्मानं प्रापिता, तथा येषां धामादयो ममतास्पदाहंतास्पदानि त्वत्कृते त्वदर्थमेव ते चैते व्रजवासिनोऽपि त्वया त्वामेवापिता इति वाक्यशेषो नासानेत्रभ्रूग्रीवाभंग्यैव ज्ञापितः । ययैव स्वात्माऽतिनिकृष्टायै पापिष्ठायै पूतनायै दत्तः स एव स्वात्माऽतिप्रकृष्टेभ्यः पुण्यवच्छिरोमणिभ्यो व्रजवासिभ्यो दत्त इति प्रथमतो दानेप्यनुचितानुष्ठितिर्दुर्वारा एवेत्येषामृणित्वस्वीकार एव तत्र निष्कृतिरिति भावः ॥ ३५ ॥ पुनराक्षिपति—नन्विति । एषामेव कथमपर्याप्तं तेषामप्येतत्तुल्यत्वादपर्याप्तमेवेति । रागोऽत्यंताभिनिवेशः ' कारा स्याद्बंधनागारे ' इति यादवः । मोहः पुत्रादिषु स्नेहविशेषः । इति भाव इति । केवलज्ञानिभ्यस्तव भक्ता एवाधिका इति तात्पर्यम् । " या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्" इति ध्रुवोक्तेः । नन्वेते गृहस्थाः पुत्रकलत्रादिसंसारज्ञाने निपतिता इति संन्यासिभिरुच्यते, सत्यं, त्वल्लक्षणपुत्रत्वद्भक्तलक्षणकलत्रादिमन्त एते गृहस्था वर्ततां, देशान्तरस्था ये त्वद्भक्तास्तेऽपि सन्न्यासिभ्योऽधिका इत्याह—तावदिति । रागादयो रागद्वेषाभिनिवेशाः, ते च महाचौरा जीवनिष्ठज्ञानानंदादिमहाधनान्यपहृत्य परमेश्वरे राजनि एते मा कूत्कुर्वन्त्विति बुद्ध्या कर्माधिकारमये गार्हस्थ्यकारागृहे मोहनिगडेन बद्धा जीवाः स्थाप्यन्ते । हे कृष्ण जना जीवा यावत्ते त्वद्भक्तानुग्रहभाजनत्वेन त्वदीया न भवन्ति तावदेव रागादयः स्तेनाः, त्वदीयत्वे सति तेषां त्वद्भक्तेष्वेव रागः भक्तिप्रतिकूले वस्तुन्येव द्वेषः त्वय्येवाभिनिवेश इति । प्रत्युत त्वन्निष्ठज्ञानानंदादिकमप्यानीय दधानास्त एव परमसाधवो भूत्वा नित्यमुपकुर्वते । एवमेव गृहं भद्राभद्रकर्मसाधनं यत्कारागारमासीत्तदेव तेषां त्वत्परिचर्याकीर्तनादिसाधनं त्वदीयनित्यधामप्रापकं भवेत् । एवं मोहविषयस्य त्वद्भक्तत्वात्सोऽपि चेत्प्रेमानुभावरूपमोहप्रापक इति कथमेतत्समकक्षतां संन्यासिनो लभंताम् । ये ' कृच्छ्रे महानिह भवार्णवमप्लवेशाम् ' इत्यादिना मत्पुत्रेण सनत्कुमारेणापकर्षितास्तेभ्यः संन्यासिभ्योऽपि भक्ताः परमाधिकाः, ये देशांतरगृहस्थभक्तास्तेभ्यः परं सहस्रगुणतोऽपि प्रेम्णाऽधिकतमास्ते व्रजवासिनः तैरेभिस्त्वं साक्षात्पूर्णस्वरूपोऽपि पुत्रादिरूपेण स्वाधानीकृत एव वर्तस इति भावः ॥ * ॥ ननु धामादीनां मदेकार्थतयैव यदि तेषां महिमा तर्हि भवानपि निजगृहं तथैवाचरेदिति चेत्, आस्तां तावत्, एषां स्वात्मनोऽपि त्वदेकार्थत्वेनात्मारामगणेभ्योऽपि महत्तरं भावमाहात्म्यम्, मादृशां तु भवदुन्मुखत्वमपि दुर्घटमित्याह—तावदिति।अयमर्थः—रागो विषयप्रीतिः, तदादयस्तन्मयविषयलाभालाभहानिषु हर्षविषादशोकाद्याः, गृहं विषयमात्रं, मोहो रागादिहेतुरविवेकः, ते च तत्तद्विक्रियायां रागमुखनिरीक्षका एव सर्वे इति प्रथमं स एवोक्तः । तत्र निरुपाधिप्रेमास्पदस्यात्मनोऽप्यात्मत्वेन त्वमेव रागस्य स्वाभाविकपरमयोग्याश्रयः। अतस्तल्लक्षणनिजस्वामिनमुपलभ्यैव भ्रमन्नसौ जनानां शुभवासनारूपां त्वद्भजनसामग्रीं हरंश्चौर एव, ततस्तदनुवर्त्तिनोऽपि तादृशाः । अथ गृहमयो विषयोऽप्यवशिष्टदण्डनायैव कारागारीकृतः स्यात् । त्वत्पादानुस्मरणाविरोधिबोधप्रद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रपंचं निष्प्रपंचोऽपि विडंबयासि भूतले ॥ प्रपन्नजनताऽऽनंदसंदोहं प्रथितुं प्रभो ॥ ३७ ॥ जानंत एव जानंतु किं बहूक्त्या न मे प्रभो ॥ मनसो वपुषो वाचो वैभवं तव गोचरः ॥ ३८ ॥

कमिति भावः ॥ ३६ ॥ नन्वत एवाहमेषां पुत्रादिरूपेण वर्ते इति चेत्तत्राह । प्रपंचमिति । प्रपन्ना या जनता जनसमूहस्तस्याश्चानंदानां संदोहं समूहं प्रथयितुमिति । न हि कपटपुत्रत्वादिना तादृग्भक्तेरानृण्यं संपद्यत इत्यर्थः ॥ ३७ ॥ तदेवमादित आरभ्याचिंत्यानंतगुणत्वेन स्वयं दुर्ज्ञेयत्वमुक्तम् । केचित्तु वयं जानीम इति स्थितास्तानुपह

त्वात् । मोहोप्यसौ तेन तेनावस्थावैशिष्ट्यं प्राप्तस्तत्र स्वयं निगडायते । नष्टेऽपि तादृशकारागृहे रागादिमयस्य तस्यावशेषेणापि त्वत्पादानुसरणोन्मुखत्वाशक्तेः । तदेवं त्वदीयानुसृतौ ते तावत्तादृशा भवंति यावज्जनास्ते तव न भवन्ति त्वया न स्वीक्रियंत इत्यर्थः । जाते तु तावकत्वे रागादीनामप्यात्मनोऽप्यात्मनस्तव प्राप्तौ सत्यां तैर्नात्माप्याश्रियते इति स्वयमेव ते दोषा अपगच्छन्तीत्यर्थः । अत्र रागस्य तत्प्राप्तिः "या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु ॥" इत्यनुसारेण गृहस्य त्वदर्पितत्वेन मोहस्य च त्वत्प्रेममयत्वेनेति । अत एव ते तावत्तावकानां शिरोमणयो, मादृशास्त्वेतच्चरणरेणुस्पर्शिगणे यत्किंचित्प्राप्तावप्यभिलाषिण एव, कथमेतत्कक्षां प्राप्नुयुरिति भावः । यद्वा– ननु तेषां प्रत्युपकारासमर्थमपि मां सदा सेवमानास्त एव दूषणीयास्तत्राह–हे कृष्ण सर्वचित्ताकर्षक यावत्ते तव जना न भवन्ति, साक्षात्सेवां न प्राप्नुवन्तीत्यर्थः । अर्थात्त्वद्भक्तास्तावत्तेषां त्वत्स्मृतौ स्वाभाविकभोजनेच्छादयो निवासस्थानं कदाचिन्निद्रादिना त्वद्विस्मृतिलक्षणो मोहोऽपि तावत्परमदुःखदा एव न भवन्ति । यद्वा–तव रागादयस्तव लीलास्थानमपि त्वत्प्रेममूर्च्छापि तावत्परमदुःखदा भवन्ति । यावत्साक्षात् त्वत्सेवां न प्राप्नुवन्तीति पूर्ववत् । तदेवं सति तव मोहनत्वमेवैषां व्रजवासिनां तवानुसरणे कारणं तस्मादेषां को दोष इति भावः । किमर्थं–तत्राह–प्रपन्नजनता निजव्रजजनरूपा मदादिरूपा च । प्रथितुं प्रथयितुम् । ऐश्वर्यलीलातोऽप्यस्या लीलाया भक्तजनपरानंदत्वादित्यर्थः । तदुक्तम्–'नंदः किमकरोद्ब्रह्मन्' इत्यादि, "गायंतेऽद्याऽपि कवयो यल्लोकशमलापहम्" इति, 'येन येनावतारेण' इत्यादि, 'यच्छृण्वतोऽपैत्यरतिर्वितृष्णा' इत्यादि ॥ ३६ ॥ समर्थयन्नाशङ्कते–नन्विति । यत एते यतिभ्योऽधिका अत एव । तत्राक्षेपे । तादृग्भक्तेः परप्रेमभक्तेः । इत्यर्थ इति । निष्कपटभक्तेषु सकपटव्यवहृत्या दोषस्तु भवति कुत आनृण्यमिति तात्पर्य्यम् । भूतल इति । वैकुण्ठीयलीलातोऽपि विस्तृतीकर्तुं विडम्बयसीति । अयं भावः–प्रकाशे दीपो नातिशोभते यथान्धकारे, श्वेतराजतपात्रे हीरकरत्नं नातिशोभते यथा नीलकाचादिपात्रे, तथैव चिन्मये वैकुण्ठे चिन्मयी लीला नातिचमत्करोति यथा मायामये प्रपञ्चे इति । यद्यपि व्रजमण्डलमपि चिन्मयमेव तदपि कृष्णस्य प्राकृतपुरुषसाधर्म्यमिव भूतलस्थव्रजमण्डलस्यापि प्राकृतभूतलसाधर्म्यमेव दृष्टमतो न लीला चमत्करोत्येवेति । हे प्रभो इति । मामपि प्रपन्नमध्ये गणयेति भावः ॥ * ॥ ननु व्रजेऽस्मिन्नेतत्पुत्रादिभावं पूर्णब्रह्मणो मम न वस्तुत इति केचिन्मन्यन्ते, सत्यं, ते भ्रान्ता एवेत्याह–प्रपञ्चमिति । प्रपञ्चातीतोऽपि त्वं भूतले सदा स्थितस्सन् प्रपञ्चं प्रपञ्चस्थपुत्रादिभावं प्रपञ्चयसि अनुकरोषि । प्रापञ्चिकेषु पित्रादिषु प्रापञ्चिकाः पुत्रादयो यथा चेष्टन्ते तथैव त्वमपि चेष्टस इत्यर्थः । तेन जीवानां यथा पितृपुत्रादिभावो ह्यवास्तवस्तथा तव न, तत्र तु सनिष्प्रपञ्चत्वाद्वास्तवो नित्य एवेति । तव लीला नित्या प्रपंचातीताऽपि प्रपञ्चानुकरणमयीति सिद्धान्त उक्तः। किमर्थं विडम्बयसि । प्रपन्ना या जनता तस्या यस्तादृशलीलास्वादनोत्थ आनन्दसन्दोह आनन्दपुञ्जस्तं ब्रह्मानन्दाद्वैकुण्ठीयेत्येतत्पर्यायतोऽवसेयम् ॥ ३७ ॥ तदेवम्–तद् वाक्यालङ्कारे, एवम् प्रकारे । यद्वा–तद्दुर्ज्ञेयत्वमिति योजना। वैभवम् ऐश्वर्य्यम् । गोचरो विषयः ॥ * ॥ सत्यं तर्हि मत्स्वरूपस्य मद्व्रजवासिनां मदीयलीलाया मद्भक्तेश्च सर्वमेव तत्त्वं मदग्रेऽपि सप्रतिममेवं व्याचक्षाणा भवद्विधा अस्मिञ्जगति कियन्तो वर्त्तन्ते, तान् जिज्ञासे कथयेति वक्रोक्तिमाशङ्क्य सत्रपं सकम्पं सानुतापमाह–जानन्त एवेति । ये जानन्तस्ते जानन्तु, अहं तु महामूर्ख एवास्मीति भावः । ननु तर्हि कथमेतावत्क्षणपर्यन्तं ब्रूत एव, तत्राह–किम्बहूक्त्येति । त्वदग्रे बह्वूक्तिरेव मूर्खत्वद्योतिनीत्यर्थः । ननु ब्रह्मन् निष्कपटं ब्रूहीति तत्राह–नेति । तव वैभवमैश्वर्यं मम मनसो न गोचर इति ध्यानेनान्तप्राप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुजानीहि मां कृष्ण सर्वं त्वं वेत्सि सर्वदृक् ॥ त्वमेव जगतां नाथो जगदेतत्तवार्पितम् ॥ ३९ ॥ श्रीकृष्ण वृष्णिकुलपुष्करजोषदायिन्क्ष्मानिर्जर द्विजपशूदधिवृद्धिकारिन् ॥ उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमार्कमर्हन्भगवन्नमस्ते ॥ ४० ॥

सन्निवाह । जानंत इति । न तु मे मनआदीनां तव वैभवं विषय इति ॥ ३८ ॥ जगदीशत्वाद्यभिमानं परित्यज्याह । अनुजानीहीति । स्वमहिमानमस्मदादीनां च ज्ञानबलादि सर्वं त्वमेव वेत्सि यतः सर्वदृक् जगतां नाथस्तु त्वमेवेत्येतावज्ज्ञातमतो ममतास्पदं जगदेतच्छरीरं च तवार्पितम् ॥ ३९ ॥ तदेवं किंकरं मां प्रस्थापयेत्यत्यादरेण नमस्करोति । श्रीकृष्णेति । वृष्णिकुलपद्मस्य प्रीतिदातृत्वेन हे सूर्योपम । क्ष्मा चावनिर्निर्जरा देवाश्च द्विजाश्च पशवश्च त एवोदधयस्तेषां वृद्धिकारित्वेन हे चंद्रोपम । उद्धर्मः पाखंडधर्मस्तदेव शार्वरं तमस्तद्धरतीति तथा अनेन द्वयोपम हे क्षितिराक्षसध्रुक् क्षितौ राक्षसाः कंसादयः उद्यन्नेव तेभ्यो द्रुह्यतीति पुनः सूर्योपम । सूर्याद्युपमाऽपि न्यूनेति

भावात् । वपुष इत्यधुनैव चक्षुषाऽपि, वाच इति 'गुणात्मनस्तेऽपि गुणान् विमातुम्' इति मया तावदुक्तमेव । यद्वा—तव मनसो वैभवं मम न गोचर इति त्वन्मनसि यत्किमप्यास्ति तत्किं मया ज्ञातुं शक्यते 'साक्षात्तवैव किमुतात्मसुखानुभूतेः' इति पूर्वमेव मदुक्तेः । एवं त्वद्वपुष इति त्वद्वपुषि किमस्तीति तव वाच इति तव वेदलक्षणायां वाचि किमस्तीति, साक्षात्तव तु मयि मौनवत्त्वाद्वचनगन्धस्याऽप्राप्तिरेव । तस्मात्के खलु तवाग्रे मदाद्यो वराका इति भावः ॥ ३८ ॥ स्वन्यूनताद्योतनेन भगवतो महत्त्वमाह—जगदीशेति । अनुजानीहि अनुज्ञां देहि ॥ * ॥ ननु मम वैभवं तव मास्तु गोचरस्तव वैभवमहं वेद्मि न वेति तत्र किमहमत्र प्रत्युत्तरं कुर्यामिति व्यञ्जयन्सलज्जं सनिर्वेदमाह—अनुजानीहीति । अन्तर्भावितण्यर्थः, अनुज्ञापयेत्यर्थः । अत्र स्थले क्षणमपि स्थातुमयोग्यमतिनीचं मामाज्ञापय, यादृशोऽहं तादृशं स्थलं सत्यलोकमेव गच्छेयमिति भावः । हे कृष्ण चित्तं त्वस्माकमत्राकर्षस्येव । किन्तु, 'तद्भूरिभाग्यमिह जन्म' इति मत्प्रार्थनायां दृगिङ्गितेनाप्यास्त्विति श्रीमच्चरणैर्नोक्तमतः । किं कुर्वे, तस्मात्तत्पुलिनभोजनकेलेरन्तरायं कुर्वन्नयमपराधी त्वल्लीलाप्रातिकूल्यादेव श्रीमुखोद्गतवचनसुधालेशमप्यनाप्नुवन्नहमितो झटिति दूरमपसरामि, त्वं वत्सान्पालयित्वा पुलिने भुञ्जानैः प्रियसखैः सह सहासोक्तिप्रत्युक्तिकौतुकं भोजनलीलाशेषं समापयेति ध्वनयः । अयमहं त्वतितारल्यात्पुनःपुनः किं वा विज्ञापयामीत्याह—सर्वमस्मदादीनां मनोवपुर्वाचां वैभवं त्वमेव वेत्सि । किञ्च, नाहमस्य जगतः स्रष्टृत्वान्नाथः । किन्तु त्वमेव जगतामन्येषां बहूनां नाथः । अत एतच्च जगत्क्षुद्रतरं तव त्वदीयमेव त्वयार्पितम्, यमिच्छसि योग्यमस्य जानासि तमस्याधिकारिणं कुर्विति भावः ॥ ३९ ॥ तदेवमित्युक्तार्थम् । पशवो गावश्च । उद्गतो धर्मो यत्र स उद्धर्मः । शर्वर्यां भवं शार्वरम् ॥ * ॥ यद्यपि मामपराधिनं विज्ञाय न ब्रूषे तदपि स्वनेत्राभ्यां सानुग्रहावलोकनामृतं तु मह्यं देहि, यथा तेनैवाहारेण नित्यं प्राणान्रक्षन्कल्पपर्यन्तं जीवितुं प्रभविष्यामीति व्यञ्जयन्प्रणमति—श्रीकृष्णेति । सूर्यस्वरूपं दक्षिणं नेत्रमालक्ष्याह—वृष्णिकुलपद्मस्य पोषं प्रफुल्लत्वं तत्प्रदायिन् । मामपि पद्मसन्तानं कृपया प्रफुल्लयेति भावः । चन्द्रस्वरूपं वामं नेत्रमालक्ष्याह—क्ष्मा तत्रत्या मनुष्यादयः, निर्जराः स्वर्गस्था देवाः, द्विजाः पशवश्च वृन्दावनस्थाः, पशवो गावश्च त एवोदधयस्तेषां वृद्धिकारिन् । मामपि देवाधमं कृपया वर्द्धयेति भावः । युगपदेव नेत्रे द्वे एव पुष्पवन्तावालक्ष्याह—उद्धर्मः पाषण्डधर्मः स एव शार्वरमन्धतमसम् 'शार्वरं त्वन्धतमसे' इत्यमरः । तद्धरतीति तथा । तेन स्वप्रभौ त्वय्यपि मायाचिकीर्षालक्षणं पाषण्डं मम हर कृपया, यथा पुनरेवं न कुर्यामिति भावः । क्षितिराक्षसाः अघासुरादयस्तेभ्यो द्रुह्यति द्रोहेणापि स्वर्गतिं ददासीत्यतस्त्वद्वयस्यवृन्दवत्सवृन्दद्रोहित्वात्सत्यलोकब्रह्मराक्षसं मामपि दण्डप्रदानेनापि संस्कुरुष्वेति भावः । स्वप्रभोरनुग्रहं निग्रहं वा दृष्ट्वा दासो जीवितुमुत्सहते, औदासीन्यं दृष्ट्वा तु न प्राणान्धर्तुमीष्ट इति भावः । हन्तहन्त महामहेश्वरोऽपि वेत्रगुञ्जागैरिकपिच्छादिरचिताकल्पो गोचारकबालकैः समं खेलन् हृष्यतीत्यनौचित्यं मत्प्रभोरिति पूर्वं विचारितवता त्वनभिज्ञेन मया येष्वपराद्धं तानपि प्रसादयामीति मनसि विभाव्याह—आकल्पं त्वदीयगुञ्जादिवेशमभिव्याप्य । आर्कम् आर्को नाम वृक्षो भगवदनर्हपुष्पोऽपि तमभिव्याप्य । हे अर्हन् मत्पूज्य, किं वा हे योग्य कृपाकृपाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः ॥ नत्वाऽभीष्टं जगद्धाता स्वधाम प्रत्यपद्यत ॥ ४१ ॥ ततोऽनुज्ञाप्य भगवान्स्वभुवं प्रागवस्थितान् ॥ वत्सान्पुलिनमानिन्ये यथापूर्वसखं स्वकम् ॥ ४२ ॥

मत्वाह । आर्कमर्कमभिव्याप्य सर्वेषामर्हन् पूज्य भगवन्नाकल्पं कल्पपर्यंतं ते तुभ्यं नम इति ॥ ४० ॥ ससखिवत्सकमोक्षणकौतुकद्रुतविलंबितपुत्रमुदेऽद्भुतम् ॥ निखिलरूपमतो दधदच्युतोऽवतु स वः कलयन्व्रजमंगलम् ॥ १ ॥ पादयोर्नत्वा । अभीष्टं सर्वतः पूजितमभिप्रेतं वा ॥ ४१ ॥ अनुज्ञाप्यानुज्ञां प्रदाप्य पृष्ट्वेत्यर्थः । स्वभुवं

मद्भद्राभद्रं कर्तुं समर्थ ते तत्तत्सहिताय तुभ्यं नमः। "सर्वसंशयहृत्सर्वभक्तिसिद्धान्तसन्ततिः । अस्तु ब्रह्मस्तुतिश्चित्तभित्तौ मे चारुचित्रिता॥" इति **विश्वनाथः। तोषणीकारास्तु**–प्रीतिसादरसर्वसम्पदनुभवपूर्वकं प्रणामाय प्रथमतः कृष्णेतिस्वरूपनाम्ना सम्बोधनम्, पुनः क्रमेण बहिर्बहिर्विशेषणं व्यञ्जयञ्जन्मकर्मनामभिरपि सम्बोधयति–वृष्णीत्यादिना । वृष्णिकुलं श्रीवसुदेवादिकं श्रीनन्दादिकञ्च पूर्वोक्तप्रामाण्यात् । तत्र प्रस्तुतत्वेन श्रीनन्दादिकमेवात्र मुख्यं ज्ञेयं, पशुपाङ्गजायेति प्रतिज्ञातत्वात् । क्ष्मेत्यविशेषेण प्राप्तत्वेऽपि विशेषविवक्षया द्विजपश्वोरुपादानं गोब्राह्मणहितावतारताप्रसिद्धेः । उद्धर्मो भगवद्विमुखो धर्मः, क्षितिराक्षसाः उद्धर्मप्रवर्तकाः कंसादयश्च । चन्द्रसूर्यरूपोभयत्वेन रूपकव्यंजिका सर्वशुभकारिता विवक्षया कीर्तिप्रतापप्रशंसाद्योतनेच्छया च । हे भगवन् एवम्भूतश्रीकृष्णरूपत्वेन स्वयं भगवन्नित्यर्थः । तथार्कम् स्वर्भुवर्भूर्लोकव्यापकप्रकाशमर्कमारम्य महावैकुण्ठपर्यन्तम् । अर्हन् पूज्य । यद्वा–एतच्चापूर्वं दृष्टं त्वमेव कर्तुमर्हसि नान्यः कोऽपीत्याह–अर्हतीत्यर्हन् हे सर्वं कर्तुं योग्य समर्थेति वा । अत आकल्पं मञ्जीवनकालकल्पानभिव्याप्य । यद्वा–आकल्पं त्वदीयगुंजावतंसबर्हापीडादिकं वामहस्तस्थकवलादिकं च भूषणमभिव्याप्य । तथार्कमिति पूर्ववत् ॥ ४० ॥ ससखवत्सकमोक्षणेन यत्कौतुकं तेन द्रुतं गतं बिलम्बितं विलंबो यस्य स तथा । यद्वा–द्रुतः शीघ्रतायुतश्चासौ बिलम्बितो जातविलम्बश्चेति द्रुतविलम्बितः वत्सपालावलोकनार्थं भगवदवलोकनार्थं वा प्रथमं द्रुतो दृष्ट्वा च संशयितः सन् विलम्बितोऽभूदिति, स चासौ पुत्रो ब्रह्मा चेति तथा । यद्वा–द्रवति निसर्गेण निम्नं गच्छतीति द्रुतं तोयम्, द्रुते विलम्बते ऊर्ध्वदेशे तिष्ठतीति द्रुतविलम्बितं कमलम्, तस्य पुत्रस्तथा तस्य मुदे । यद्वा–द्रुतोऽतिवेगवान् विः पक्षी हंसो यस्य स द्रुतविर्ब्रह्मा, लंबनं लंबा क्रीडा, सा च–जंघाधोभागेन लघु काष्ठदंडं दूरे निक्षिप्य तदानयनार्थगतबालात्प्रागेव वृक्षशाखां गृहीत्वा ततोऽप्यूर्द्ध्वशाखायामालंबनरूपा, सैव मर्कटोत्प्लवनशब्देन लक्षिता, सा च गोपालेषु प्रायोऽस्ति, लंबा जाता येषां ते लंबितास्ते पुत्रा यस्य गोपीजनस्य स लंबितपुत्रः, ससखवत्सकमोक्षणेन कौतुकं यस्य स तथा स चासौ द्रुतविश्चेति तथा, ससखवत्सकमोक्षणकौतुकद्रुतविश्च लंबितपुत्रश्चेति समाहारद्वंद्वस्तस्य मुदे 'तन्मातृणां च कस्य च' इत्युक्तेः । यतो निखिलरूपं रूपे निजरूपे निखिलं निखिलरूपं निखिलानां रूपमिति वा दधत् अतो हेतोः व्रजमंगलं कलयन् रचयन् सः प्रसिद्धोऽनेकरूपत्वेप्यच्युतो निर्विकारः वोऽध्येत्रध्यापकानवतु (१) । भूमानं सर्वेश्वरम् । त्रिर्नत्वा त्रिरभिष्टूय वेति संबन्धः । यथोक्तान्वये तु "एका चंड्या रवेः सप्त तिस्रो गणपतेः स्मृताः । चतस्रः केशवस्योक्ताः शिवस्यार्द्धा प्रदक्षिणा ॥" इति विरोधः स्यात् । सर्वतः पूज्यत्वे नास्तिकाभावप्रसङ्गं मन्वानोऽर्थांतरं ब्रूते–अभिप्रेतं वेति । स्वधाम सत्यलोकम् । प्रत्यपद्यत प्राप ॥ * ॥ भूमानं सर्वथैवापरिच्छिन्नम् । अभीष्टं भगवता प्रस्थापयितुमिति शेषः । यतो जगद्धाता अन्यथा सहसा तत्पदत्यागे विश्वसृष्टेरसिद्धेः, ततश्च 'यावदधिकारमवस्थितिराधिकारिकाणाम्' इति न्यायेनाधिकारान्ते तदभीष्टं सेत्स्यतीति बुद्ध्यते ॥ ४१ ॥ ततः स्तवनानन्तरम् । इत्यर्थ इति । प्रयोजकणिजन्ताज्ज्ञपेर्ल्यप् "नाऽन्ये मितोऽहेतौ" इति मित्वाभाव इहायमर्थो बोध्यः प्रदाप्य दापयित्वेति । वस्तुतः स्वभुवं स्वोद्भूतमपि मनुष्यनाट्याभिप्रायेण लोकसंग्रहार्थं वा पृष्टवानिति भावः ॥ * ॥ स्वभुवं मौनेनैवानुज्ञाप्य 'अनुजानीहि मां कृष्ण' इत्याज्ञाप्रार्थने कृते 'मौनं सम्मतिलक्षणम्' इति ब्रह्मणा सहसावगमात् । मौनत्यागाभावस्तु–पशुपवंशशिशुत्वदशायामङ्गीकृतस्य ब्रह्ममोहनार्थमंगीकृतस्य नाट्यस्यारंभपरिसमाप्तिसिद्ध्यर्थम् । तत्र "ततो वत्सानदृष्ट्वैत्य पुलिनेऽपि च वत्सपान् । उभावपि वने कृष्णो विचिकाय समंततः ॥" इति वत्सबालकान्वेषण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्मिन्नपि यातेऽब्दे प्राणेशं चांतरात्मनः ॥ कृष्णमायाहता राजन्क्षणार्धं मेनिरेऽर्भकाः ॥ ४३ ॥ किंकिं न विस्मरंतीह मायामोहितचेतसः ॥ यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकम् ॥ ४४ ॥ ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा ॥ नैकोऽप्यभोजि कवल एहीतः साधु भुज्यताम् ॥ ॥ ४५ ॥ ततो हसन्हृषीकेशोऽभ्यवहृत्य सहार्भकः ॥ दर्शयंश्चर्माजगरं न्यवर्तत वनाद्व्रजम् ॥ ४६ ॥

ब्रह्माणम् । यथापूर्वं स्थिताः सखायो यस्मिंस्तत्स्वकं पुलिनम् प्रागवस्थितान्वनं प्रति पूर्ववदवस्थितान्वत्सानानिन्ये ॥ ४२ ॥ नन्वेतावंतं कालं कथं तत्रैवोपविष्टाः कथं च क्षुत्पिपासादिविस्मरणमत आह एकस्मिन्निति श्लोकद्वयेन । अब्देऽपि याते प्राणेशं कृष्णमंतरा च विनापि प्रियविरहे क्षणोऽपि वर्षाधिको भवति तथापि मायाहताः क्षणार्धं मेनिरे ॥ ४३ ॥ ययया मायया मोहितं जगदभीक्ष्णं पुनःपुनर्विस्मृतात्मकं विस्मृत आत्मैव येन तत्तथा ॥ ४४ ॥ अत एवमूचुश्च ते त्वयाऽतिवेगेन स्वागतं सम्यग्वत्सानानीय आगतम् । एकोपि ग्रासस्त्वां विनाऽस्माभिर्नाभोजि न भुक्तः । इत एहि साधु अविक्षेपेण भुज्यतामिति ॥ ४५ ॥ अभ्यवहृत्य भुक्त्वा ॥ ४६ ॥

नाट्यारंभः । ' नौमीड्य० ' इत्यादिब्रह्मस्तुतौ प्रवृत्तायां कुतस्त्योयं चतुर्मुखः किं तिष्ठते किं वा मुहुर्ब्रूते इति स्ववत्सान्वेषणव्यग्रोऽहं गोपशिशुर्न बुध्ये इति व्यञ्जकेन मौनेनैव तस्यैव नाट्यस्य समाप्तिरिति स्वाधीनब्रह्मणोग्रे निजमहैश्वर्यस्याज्ञानमभिनीयते स्मेति तन्नाट्यशब्देनोच्यते । ' तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यम् ' इत्यादिना वात्सल्यरसपरिकरव्रजेश्वर्यादीनामग्रे तु तत्प्रेमाधीनेन श्रीकृष्णेन निजमहैश्वर्यस्य तन्महाप्रेममाधुर्यरसाच्छादितस्याज्ञान याथार्थ्यमेव, तत्र न तस्याभिनय इति न तन्नाट्यशब्देन वाच्यमिति विवेचनीयम् । प्राक् प्राग्वदेव । तृणचरणादिचेष्टादिभिरवस्थितान् स्वकं स्वभोजनस्थानं पुलिनमानिन्ये । यथापूर्वं पूर्वोपवेशादिकमनतिक्रम्यापरित्यज्य वर्तमानाः सखायो यत्र तत्, समासान्त आर्षः । यद्वा–यथा यथावदेव स्थिताः पूर्वसखाः स्वरूपभूतसखेभ्यः पूर्वसखायो यत्र तत् । एतत्सर्वसमाधानञ्च श्रीकृष्णेच्छासंवलितमायावैभवमेव, तथा मात्रादिभिर्व्यवहारौपयिकं ह्यस्तनादि तत्तद्बालकादिचारितं स्मृतमपि प्राचीनेषु स्मारयितुं नेष्टमित्यादि बोध्यम् ॥ ४२ ॥ कौतुकाविष्टः शङ्कते–नन्विति । ते गोपाः । तत्रैव पुलिने । अब्दे वर्षे । आत्मनो जीवमात्रस्य । प्राणेशं स्वामिनम् । मायात्र योगमाया तयैव सर्वेषां गोपगोपीनन्दादीनामब्दकालोऽपि मुहूर्तयामदिनमासर्त्वादिपरिवृत्तिं विनैव पञ्चपलात्मकक्षणार्धकाल एव साधितमिति न तस्या अचिन्त्यवैभवायाः किमपि दुःसम्पाद्यमिति ॥ * ॥ ० ॥ ४३ ॥ इह संसारे अभीक्ष्णं सुषुप्तौ शास्त्रे वा ज्ञातस्यापि देहद्वयातिरिक्तस्य तस्य मुहुर्विस्मरणादिति योगमायैव बहिरंगमायात्वेनात्र ज्ञेया । अतो भगवदिच्छाबलायास्तस्यास्तादृशेष्वपि मोहनत्वं घटत एवेति भावः ॥ * ॥ ० ॥ ४४ ॥ अतो मायामोहितत्वात् । स्वागतं सर्ववत्सानयनपूर्वकं सुखेनागतमित्यर्थः । एवं वर्षेऽप्यतीते तथैव कवलादिस्थितिः श्रीकृष्णेच्छयैव जातेति ज्ञेयम् । अतिरंहसेति–दूरगतवत्सानयने घटिकैका त्ववश्यं गमिष्यतीत्यस्माभिर्विचारितम्, त्वया तु क्षणार्द्धेनैवागतमिति भावः । एकोऽपि ग्रासस्त्वया नाभोजि श्रीहस्ते पूर्वकवलवृत्तेः, अत इतः अस्मिन् सर्वेषामस्माकं मण्डलस्थाने एहि प्रावश साधुवत्साद्यन्वेषणे वैयग्र्यं त्यक्त्वा सम्यग्यथा स्यात्तथा भुज्यतामिति तोषिणीचक्रवर्तीकारौ ॥ * ॥ ० ॥ ४५ ॥ ततो बालोक्तिश्रवणानन्तरम् । आजगरम् अघासुरदेहसम्बन्धि । हसन्निति तदानन्ददर्शनात् । अभ्यवहृत्येति । वर्षे गतेऽप्यत्र व्यञ्जनादीनां क्षणार्द्धमात्रपरिणामित्वं जातम् । दर्शयन्नित्याह–हे सखायः अद्य मृतोऽयं सर्पः वसारक्तादिकलिलो वर्त्तत इति पश्यत । तद्वधस्य व्रज प्रख्यापनार्थमेतावत्कालपर्य्यन्तं तत्तदाच्छादनं सर्वं योगमायाकृत्यमेवेति ॥ * ॥ ० ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बर्हप्रसूननवधातुविचित्रितांगः प्रोद्दामवेणुदलशृंगरवोत्सवाढ्यः ॥ वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठम् ॥४७॥ अद्यानेन महाव्यालो यशोदानंदसूनुना ॥ हतोऽविता वयं चास्मादिति बाला व्रजे जगुः ॥ ४८ ॥ राजोवाच ॥ ब्रह्मन्परोद्भवे कृष्णे इयान्प्रेमा कथं भवेत् ॥ योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यताम् ॥४९॥ श्रीशुक उवाच ॥ सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः ॥ इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ५०॥

प्रोद्दामो वेण्वादिस्तस्य रवैरुत्सवस्तेनाढ्यः संपन्नः । गृणन्नुपलालनैराह्वयन् । गोपीदृगुत्सवदृशिः गोपीदृशामुत्सवरूपा दृशिर्दर्शनं यस्य सः ॥ ४७ ॥ यशोदानंदसूनुनेति बहूनामुक्तिः सहैव दर्शिता । केचिदाहुर्यशोदासूनुनेति । अपरे नंदसूनुनेति । यद्वा यशोदां नंदयतीति यशोदानंदः स चासौ सूनुश्चेति तथा तेन । अस्मान्महाऽद्या लाद्वायं चाविता रक्षिताः ॥ ४८ ॥ "व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहम् ॥ शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववत्" इत्यादिना स्वतोकेभ्योऽपि परपुत्रे कृष्णे प्रेमाधिक्यमुक्तं तत्र पृच्छति । ब्रह्मन्निति ॥ ४९ ॥ श्रीकृष्णस्य साक्षादात्मत्वात्तस्मिन्नात्मीयेभ्यः प्रेमाधिक्यं युज्यत इति वक्तुं प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमन्येषां

नव धातवस्तु—हरितालगैरिकहिंगलुमनःशिलसौराष्ट्रीसौवीरसौभाग्यतुत्थवोलाख्याः । यद्वा—नूयन्ते इति नवा देवद्विजादयः, तैर्धीयन्ते धार्यन्त इति नवधातूनि चन्दनानि, दधातेस्तुः । तानि च—श्वेतरक्तागुर्वादिभेदेनाऽनेकानि तैर्विचित्रिताङ्गः । प्रोद्दामो महान् । उपलालनैरोष्ठसंयोगजशब्दादिभिः ॥ * ॥ इति निजप्रियसहचरबालकवत्ससङ्गतिजनितहर्षभरतो वन्यवेशादिविशेषेण व्रजस्त्रीजनानां नेत्रानन्दं सञ्जनयन् व्रजान्तर्जगामेत्याह—बर्हेति । वन धातुर्गैरिकादिः । वनपदं गृहलभ्यसुवर्णादिव्यवच्छेदार्थम् । प्राचीनपुस्तकेषु तु 'नवधातुः' इति पाठ एव, सोऽप्यर्थैक्येन सम्यगेवेति । बर्हादिभिर्विशेषेण चित्रितानि भूषितान्यङ्गानि येन, किं वा सखिभिर्यस्य । अतः प्रोद्दामोऽत्युच्चो यो वेणुदलशृङ्गाणां रवस्तेन स एवोत्सवः किं वा स चोत्सवश्च नृत्यक्रीडागीतादिरूपस्तेनाढ्यः परमसमृद्धिमान् । अतएवानुगैस्तैरेव बालकैर्गीता हर्षभरेण गीतवत्सुस्वरं तालादिसंयुतमुच्चैः कीर्त्तिता पवित्रा निर्मला जगत्पावनी वा अघासुरादिवधरूपा यस्य । गोपीशब्देन श्रीयशोदाद्याः सर्वा एव व्रजस्त्रियः, तासामपीदानीमेव श्रीकृष्णहर्षभरेणाधिकं नेत्रानन्दोत्पत्तेः ॥ ४७ ॥ लोके मातापित्रोरुभयोर्नामग्रहणपूर्वकं पुत्रनामोच्चारणं प्रायो न दृश्यत इत्यस्वारस्येनाह—यद्वेति । केचिद्यशोदासुहृदः, अपरे नन्दसुहृदः, पितृतो मातुरधिकस्नेहाद्बालानां वृद्धनामोच्चारणस्याऽयोग्यत्वाद्वा मातृनाम्नैव नामग्रहणं वरमिति मत्वाह पुनर्यद्वेति । नन्दयति स्वचरितैराह्लादयति । यद्वा—यशोदायामेव नन्दाज्जात इति बोधनार्थं महामुनिनोक्तं यशोदानंदसूनुनेति । अनेनापि नंदगृहे भगवदवतारो दृढीकृत इति । मातृकुलोत्पन्नास्तु—यशोदासूनुरयमिति वदन्ति । तदन्ये नंदसूनुरिति तोषिणीकाराः । विश्वनाथस्तु—यशोदानंदयोर्भाग्यमानंदो यशो वा यस्मात्तथाभूतेन सूनुना शाकपार्थिवादित्वान्मध्यमपदलोपिकर्मधारयमाह ॥ * ॥ ० ॥ ४८ ॥ लोके हि अतिगुणवत्तमादपि परपुत्राद्गुणहीनेऽपि स्वपुत्रे प्रेमाधिक्यं दृश्यते तच्चात्र विरुद्धम्, यतः स्वपुत्रेभ्योऽपि परस्य नंदस्य पुत्रे प्रेमाधिक्यमिति कथमिति संदिहानः पृच्छति—हे ब्रह्मन्निति । साक्षाद्भगवद्रूपत्वात्त्वं सर्वं जानासीति संबुद्ध्याशयः । इयान् एतत्प्रमाणकः । तदाह—योभूतेत्यादि ॥ * ॥ स्नेहस्तावत्त्रिधा । विषयसौंदर्येण ममताविशेषेण स्वाभाविकदैहिकसंबन्धविशेषेण च । तत्र प्रथमं प्राग्वदेव 'यावद्वत्सप' इत्याद्युक्तेः । द्वितीयश्च तद्वदेव तत्तत्संबंधस्यानतिरेकात् । यश्च तृतीयः श्रीप्रद्युम्नागमने तन्मातरि श्रुतः स त्वत्र विपरीत एव, तर्हि 'व्रजौकसां स्वतोकेषु' इत्यादिकमुक्तमित्यभिप्रेत्य विशेषबुभुत्सया परबुबोधयिषया वा पृच्छति—ब्रह्मन्निति । श्रीदामादिनामरूपाभ्यां व्यक्ते, न तु स्वस्वरूपेण व्यक्ते तस्मिन् । यः यावान् । अत्र परोद्भवत्वं 'नंदस्त्वात्मज उत्पन्ने' इत्युक्तसिद्धांतानुसारेणैवोक्तम्, अन्यथा श्रीमन्नंदयशोदे प्रत्यप्ययं पूर्वपक्षः प्रसज्जेत, स च पुराणकृत इति । यद्वा—'यथा कृष्णे त्वपूर्ववत्' इति दृष्टांतिते श्रीकृष्ण एव पूर्वपक्षः । एतत्पक्षे विषयसौंदर्यस्याधिक्यमस्त्येव । किं तु, ततोऽपि ममतादेहसंबंधयोराधिक्यं विवक्षितम्, तच्च सिद्धान्तविशेषबुभुत्सयेति ज्ञेयम् ॥ ४९ ॥ आत्मीयेभ्यः देहपुत्रादिभ्यः "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुत्यभिप्राये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्राजेंद्र यथा स्नेहः स्वस्वकात्मनि देहिनाम् ॥ न तथा ममतालंबिपुत्रवित्तगृहादिषु ॥ ८१ ॥ देहात्मवादिनां पुंसामपि राजन्यसत्तम ॥ यथा देहः प्रियतमस्तथा न ह्यनु ये च तम् ॥ ८२ ॥ देहोऽपि ममताभाक्चेत्तर्ह्यसौ नात्मवत्प्रियः ॥ यज्जीर्यत्यपि देहेऽस्मिञ्जीविताशा बलीयसी ॥ ८३ ॥

तु तदुपाधिकमिति दर्शयति पंचभिः । सर्वेषामपीति ॥ ५० ॥ कुतः तथा दर्शनादित्याह—तदिति । तस्मादेव कारणात्स्वस्वकात्मन्यहंकारास्पदे देहे ॥ ५१ ॥ आत्माध्यासतारतम्येन प्रेमतारतम्यं दृश्यमानं तन्निबंधनमेवेति दर्शयितुं मूढामूढभेदेन विशेषमाह । देहात्मवादिनामिति द्वाभ्याम् । तं देहमनुलक्ष्य भवंति ये पुत्रादयस्ते तु न तथा प्रियतमाः किं तु देहः प्रियतमः तदर्थत्वेन ते प्रिया इत्यर्थत्वेन ते प्रिया इत्यर्थः ॥५२॥ यद्यस्माज्जीर्यत्यप्यासन्नमरणेऽपि जीविताशा भवति । अयं भावः । न जीवि

णाह—अन्येषामिति । तदुपाधिकम् आत्मोपाधिकम् । पंचभिः 'सर्वेषाम' इत्यारभ्य 'चराचरम्' इत्यंतैः ॥ * ॥ परमात्मा श्रीकृष्णोऽसौ सर्वेषामेव प्रियादात्मनोऽप्यधिकप्रियः, किमुतात्मीयेभ्यः सुखदविषयेभ्यः इति वक्तुमादा वात्मनस्स्वतः प्रेष्ठत्वमन्येषां तदुपाधिकमेवेत्याह—सर्वेषामिति पञ्चभिः । अतः प्रथमं स्वात्मेति । देहदेह्यविवेकेनाहन्तास्पदमात्रमुच्यते, ममतास्पदे प्रेमव्यवच्छेदार्थं, स्वशब्दश्च प्रतिस्वमनुभवापेक्षया । हे नृपेति । तादृशस्यास्य स्वधर्मतः प्रजापालनमपि तथैवेति भावः । भूतानामित्यौपचारिकभेदेन । हीति तत्रानुभवप्रामाण्यं बोधयति ॥ ९० ॥ कुतः—सर्वेभ्यः आत्मा प्रियः । तथादर्शनात् सर्वाधिकप्रेमदर्शनात् । यत आत्मैव प्रियस्तस्मात् । अहं कारास्पदे आत्मत्वेन स्वीकृते न त्वात्मनि यथा ममतां ममत्वमालम्बन्त आश्रयन्त इति ममतालम्बीनि तानि च पुत्रादीनि तेषु तथा न स्नेह इत्यन्वयः ॥ * ॥ तदेव व्यतिरेकेणाह—तदिति । तत्राऽहङ्कारास्पद इत्यन्तैव तेषां व्याख्या परत्र पद्ये तु अहङ्कारास्पदे हे आत्मेत्यादिका ज्ञेया । पाठान्तरं न संमतम् अस्यैव विवक्षितत्वात् । ममतावलम्बीति षष्ठ्यर्थस्य व्यवहितत्वान्न्यूनता योग्यैवेत्यर्थः । हे राजेन्द्रेति । साम्राज्येऽप्यात्मवत्स्नेहो नास्तीति भवता ज्ञायत एवेति भावः ॥ ९१ ॥ तारतम्यम् न्यूनाधिक्यभावः । तन्निबन्धनमात्महेतुकम् । मूढामूढौ अज्ञज्ञौ । राजन्यं प्रायेण देहात्मवाद्येव, त्वं तु तेषु सत्तमोसीति न तव देहाध्यास उचित इति संबुद्ध्यभिप्रायः । साम्राज्येप्यात्मवत्प्रेमा नास्तीति त्वया ज्ञायत एवेति भावः । पूर्वश्लोकस्थराजेन्द्रेत्यस्याप्ययमेवाभिप्रायः । इत्यर्थ इति । प्रियं धनादि, प्रियतरं पुत्रादि, प्रियतमो देह इति भावः ॥ * ॥ देह एवात्मेतिवादिनामत्यन्ताविवे किनामित्यर्थः । तन्मतेप्यात्मन एव प्रियतमत्वं पर्यवस्येत् आत्मतयैव देहेऽभिमानेन प्रियतमत्वात् । हि निश्चये । त्वथ चकारः । हे राजन्यसत्तमेति । केचिद्राजन्या देहात्मवादिनोऽसन्त एव, आत्मवादिनश्च सन्तः, ईश्वरवादिनः सत्तरास्तेषु । श्रीकृष्णैकप्रियत्वात्त्वं तु सत्तम इति भावः ॥ ९२ ॥ अज्ञवृत्तमुक्त्वा ज्ञवृत्तमाह—अयं भाव इति । न हि विवेकिनो देहाद्यसज्जडेऽध्यासो भवति चिन्निष्ठत्वात्तस्येति तात्पर्यम् । ननु विवेकदशातः प्राक् तु तेषामपि देहाध्यासोऽस्त्येवेति चेत्तत्राह—अथ वेति । सोऽपि ममताश्रयो देहोऽपि । तदा ममत्वसमयेपि प्रियो न, विनाशित्वनिश्चयात् । अतो विनाशित्वादेव । तत्र देहे । नातीवास्था नात्यन्तं स्नेह इत्यर्थः ॥ * ॥ ममेति देहं मन्यमानानामविवेकिनां मतमालम्ब्याह—देहोपीति । तैर्व्याख्यातम् । तत्र प्रथमपक्षे अपीति सम्भावनायां पुत्राद्यपेक्षया समुच्चये वा, द्वितीयपक्षेऽविवेकदशायामिति बलीयसीति विशेषणेनाक्षिप्यते, एतत्प्रतियोगि तया विवेकिन इत्यपि । असौ देहोपीत्यनयोरन्वितयोरर्थं व्याचष्टे—सोपीति । नातीवास्था इति—म्रियतां जीवतु वेत्यपेक्षाधिक्यं नास्तीत्यर्थः । इदं नात्मवत्प्रिय इत्यस्य व्याख्यानमिति । यद्वा—आत्मवत्पूर्वमविवेकेनात्मतया गृही तोऽहन्ताविषयो देहस्तद्वत्प्रियो न भवतीत्यर्थः । यद्यस्माज्जीर्यति रोगादिनाभिभूते ममतास्पदेऽस्मिन्देहविषये जीविताशा अयं देहश्चिरं तिष्ठत्विति वाञ्छापि अबलीयसी पूर्वापेक्षया स्वल्पापि भवति, विवेकतोऽस्मिन्नात्मताप गमेनातिप्रियत्वाभावात् । **विश्वनाथस्तु**—देहात्मवादिनां तेषामपि कदाचिदीषद्विवेके सति आत्मैव प्रियः स्यान्न तथा देह इत्याह—देहोपि । अहंतास्पदीभूतोऽपि देह ईषद्विवेकेन यदि ममताभाक् स्यात्तदाऽसौ देह आत्म वत्प्रियो न भवेत् किन्त्वात्मानुरोधेनैव प्रियः स्यादित्यर्थः । तत्र लोकानुभवमेव प्रमाणयति—यदिति । सर्वत्र देहत्यागे आत्मनोऽतिकष्टं दृष्ट्वा तदतिकष्टं ममात्मनो मा भवत्विति बुद्ध्यैव आत्मन्यतिस्नेहादेव देहे जीविताशाधिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्प्रियतमः स्वात्मा सर्वेषामपि देहिनाम् ॥ तदर्थमेव सकलं जगदेतच्चराचरम् ॥ ५४ ॥ कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् ॥ जगद्धिताय सोप्यत्र देहीवाभाति मायया ॥ ५५ ॥

ष्यतीति निश्चितेऽपि देहे यत्प्रेमास्पदत्वं तदात्मगतमेव न तु देहगतं तस्य मरणोन्मुखत्वात् बीभत्सत्वाच्च । अथ वा तयस्मिन्देहे जीर्यत्यपि जीविताशा अविवेकदशायां बलीयस्यासीत्सा तु विवेकिनो यदा ममताभाग्भवति तदात्मवत्प्रियो न भवत्यतस्तत्र नातीवास्थेति ॥ ५३ ॥ तदर्थमेव सकलं प्रियमित्यर्थः ॥ ५४ ॥ प्रस्तुतमाह ।

भवतीत्यर्थः ॥ ५३ ॥ यत आत्मनोऽन्यः कोऽपि न प्रियतमस्तस्मात् । स्वात्मा प्रियतमो निरुपाधिप्रेमास्पदः, प्रज्वलति गृहे स्थितं पुत्रादिकमानेतुं प्रवेशादर्शनादिति भावः । तदर्थम् स्वात्मार्थम् । इत्यर्थ इति । पूर्वोदाहृतश्रुतेरीरति भावः ॥ * ॥ तस्मादिति । चरं पुत्रकलत्रादि, अचरं गृहघटादि, तेन लोकदृष्ट्या पुत्रादिभ्यः सकाशादात्मन एवात्यंतिकप्रीतिविषयत्वं प्रतिपादितम् ॥ ५४ ॥ यदर्थमेतदुक्तं तदाह—अखिलात्मनां सर्वजीवानाम् । ननु सर्वान्तर्यामिणोऽदृश्यत्वात्कथं देहिरूपेण प्रतीतिस्तत्राह—मायया कृपया । तत्र हेतुः—जगतां निजदर्शनश्रवणवताम् । हिताय बंधनिवृत्तये । निर्गुणरूपस्य ज्ञातुमशक्यत्वाद्भक्तकृपया सगुणविग्रहमाविश्चकारेति भावः ॥ * ॥ विवक्षितं सिद्धान्तं प्रतिपादयंस्तत्त्वदृष्ट्या तस्याप्यात्मत्वेनापेक्षिकप्रीतिविषयत्वमेव, आत्यंतिकप्रीतिविषयत्वं तु केवलं श्रीकृष्णस्यैवेत्याह—कृष्णमिति । अखिलानामात्मनां जीवानामप्यात्मानं परमात्मानमेव कृष्णमवेहि, तेन पुत्रादिषु प्रीतिर्यथा देहानुरोधेन देहे च प्रीतिर्यथात्मानुरोधेन तथैवात्मन्यपि प्रीतिः परमात्मानुरोधेन । स च परमात्मा कृष्ण एव मूर्तः पूर्ण एव । यदुक्तम्—" विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " इत्यतः कृष्णस्यैवात्यंतिकप्रीतिविषयत्वात्तत्रैव प्रीतेः परा काष्ठेति स्वपुत्रेभ्योऽपि तत्र यत्प्रेमाधिक्यं तदुपपादितम् । किञ्च, जीवानां भक्त्यभावान्मायया ज्ञानावरणाच्च भक्त्यैकप्राकाश्ये तस्मिंस्तादृशत्वेनानुभवो मायिकजीवानामभक्तानां कथमस्त्वित्यतः पुत्रादिष्वेव लोकानां प्रीतिविषयत्वेनानुभवो न तस्मिन् । व्रजवासिनां तु मायातीतत्वाद्भक्तिपूर्णत्वाच्च यथार्थत एवानुभव इत्यतस्तेषां स्वपुत्रादिभ्योऽपि तस्मिन् प्रेमाधिक्यं स्वाभाविकं वर्तत एवेति समाधेयम् । जगद्धितायावतीर्णः स कृष्णोऽपि मायया देहीवाभाति स्वाविद्यया मूढैर्जीव इव भौतिकदेहवान्प्रतीयते इत्यर्थः । यद्वा—माययैव यो देहस्तद्वानिव मायोपाधिरिव प्रतीयते न तु स मायोपाधिरित्यर्थः । अत एव मधुसूदनसरस्वतीपादैरपि " सच्चित्सुखैकवपुषः पुरुषोत्तमस्य नारायणस्य महिमा नहि मानमेति, चिदानंदाकारं जलदरुचिसारं श्रुतिगिरां व्रजस्त्रीणां हारम् " इत्यादि बहुशो वर्णितम् । यद्वा—ननु परमात्मा खल्विन्द्रियग्राह्यो न भवेत् कृष्णश्च सर्वैर्दृश्यत एवेति तत्राह—जगत एव हिताय मायया निर्हेतुकाचिंत्यया कृपया सोऽपि अत्र जगज्जनेंद्रियेषु देहीवाभाति स्वयमेव तद्ग्राह्यत्वेन प्रकाशत इति अतर्क्यतदिच्छया तद्गृहीतैरिंद्रियैरेव स गृह्यते न पुनरिंद्रियैः स्वयमेव शब्दादिरिव ग्रहीतुं शक्य इति भावः । अत एव भागवतामृतधृतं नारायणाध्यात्मवचनम् । " नित्याव्यक्तोऽपि भगवानीक्ष्यत निजशक्तितः । नामृते परमानंदं कः पश्येतामितं प्रभुम् ॥ " इति तत्रत्या कारिका च । ततः स्वयं प्रकाशत्वशक्त्या स्वेच्छाप्रकाशया " सोऽभिव्यक्तो भवेन्नेत्रे न नेत्रविषयत्वतः " इति । अत्र हितमन्यदेशीयानामनुकूलजनानां स्वकृपादृष्टिदानेनैव स्वमाधुर्यग्राहणम्, प्रतिकूलानां कंसाद्यसुराणां तु पित्तदूषितरसनया मत्स्यंडिकाभोजनमिव प्राकृतैरेवेंद्रियैस्तन्माधुर्यग्रहणरहितमेव दर्शनं ध्यानावेशासिद्ध्यर्थम् । आवेशफलञ्च सर्वापराधोपशमनपूर्वको मोक्षः, स एव तेषां हितम् । किञ्च, व्रजस्थानामैश्वर्यज्ञानशून्यानामन्येषामनुकूलप्रतिकूलानामपि स देहीवाभाति । तदपि " देहदेहिविभागोऽत्र नेश्वरे विद्यते क्वचित् " इति मध्वाचार्यधृतमहावाराहवचनादेव । शास्त्रज्ञैर्देहीति वक्तुमयोग्यत्वादिवशब्दप्रयोगः । **तोषिणी** तु—माययेति आत्मारामाणां तत्प्रियजनानाञ्चात्माधिकनिरुपाधिपरमप्रेमास्पदसर्वांशत्वेन तद्व्यतिरिक्तवस्तुसंभेदाभावादिति भावः । निरुपाधिपरमप्रेमास्पदत्वं खल्वात्मत्वमानन्दत्वं चेति । अत एव **श्रीमध्वाचार्य**धृतमिति पूर्ववत् । तदेवमसुरादीनां मायावरणान्न तथा भाति " नाहं प्रकाशः सर्वस्य योगमायासमावृतः " इति भगवद्गीतोक्तेश्च । तत्र योगमायादुर्घटनाकारि किमपि मम बुद्धिसौष्ठवमिति । **श्रीस्वामिचरणाश्च** तत्प्रियजनानां तत्प्रेमभावितान्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च ॥ भगवद्रूपमखिलं नान्यद्वस्त्विह किंचन ॥५६ ॥
सर्वेषामपि वस्तूनां भावार्थो भवति स्थितः ॥ तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम् ॥ ५७ ॥

कृष्णमेनमिति ॥ ५५ ॥ न केवलमात्मनामात्माऽपि तु जडानामपीत्याह । वस्तुत इति । सर्वजगत्कारणमिति । कृष्णं जानतां पुंसां स्थावरं जंगमं च सर्वं भगवद्रूपं भगवानेव स्वरूपं यस्य तन्नान्यत् ॥ ५६ ॥ कत इति तदाह । सर्वेषामिति । भावार्थः सद्रूपार्थः परमार्थ इत्यर्थः । भवतीति भवत्परिणामं प्राग्भुवत्कारणं तस्मिन् भवति परिणामिनि स्थितः "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतेः । तस्यापि भवतः कारणस्यापि भगवान्कृष्णो भवत्कारणम् । अतः किमतत्

करणे क्षीरे सितोत्पलवदेकजातीयत्वेन प्रेमास्पदतास्वभावोऽसौ स्वमाधुरीभिरधिकमाभाति । अन्यत्र यथोचितमिति स्थिते सर्वातिशयितप्रेमस्वभावानां श्रीव्रजवासिनां किमुतेति भावः ॥ ५५ ॥ ननु केवलात्माऽऽत्मत्वे तु सर्वव्यापिता नश्येदिति चेत्तत्राह—न केवलमिति । वस्तुतो याथात्म्येन । अत्र लोके । अन्यत् कृष्णेतरत् ॥ * ॥ न केवलं सर्वेषां क्षेत्रज्ञानामेव परमस्वरूपमपि तु अन्ते सर्वेषां जडानामादौ सर्वेषां साक्षात्तद्रूपाणां चेति वक्तुं तस्य भूमत्वमाह—वस्तुत इति । वस्तुतः तत्त्वतः । कृष्णमत्र जगति जानतां विचारयतां तद्विचारज्ञानामित्यर्थः । सत् स्थावरजङ्गमरूपमखिलं यच्च भगवतो रूपं नारायणाद्यभिधमखिलं तत्तत्सर्वमिह श्रीकृष्ण एव तत्तदन्तर्भूतत्वेनैव स्फुरतीत्यर्थः । नान्यत्किञ्चन, यत्तत्र नास्ति तन्नास्त्येवेत्यर्थः । कारणांशिनोर्विज्ञानेन कार्यांशयोर्विज्ञानात्, तद्व्यतिरेकेण तद्व्यतिरेकाच्च । महासमुद्रस्य सागरतरंगफेनादिवत् । सूर्यान्तरीणमण्डलात्मकस्य बहिर्मण्डलकिरणपरमाणुगणमरीचिकादिवदिति ज्ञेयम् । तदुक्तं द्वितीये—" सोऽयं तेऽभिहितस्तात भगवान्विश्वभावनः । समासेन हरेर्नान्यदन्यस्मात्सदसच्च यत् ॥ " इति । **विश्वनाथस्तु**—किञ्चापेक्षिकप्रेमास्पदानि ये चात्मदेहपुत्राद्यास्तेपि विचारवतः स एवेत्यापेक्षिकप्रेमास्पदत्वमपि तस्यैवेत्याह—वस्तुत इति । वस्तुतस्त्वित्यर्थः । कृष्णं जानतां पुंसां मते स्थावरजङ्गमञ्च सर्वं तद्रूपमेव तस्यैव सर्वकारणत्वात्, कारणस्यैव कार्याकारत्वादिति भावः ॥ ५६ ॥ सर्वं कृष्ण एवेति कुतस्तत्सर्वात्मत्वम् । यद्वा—भवत्यस्मादिति भवत् तस्मिन्नुपादाने मृत्तन्त्वादिष्विव घटपटादीनां भावार्थः सत्यताकारणं परमकारणं परपरकारणान्वेषणे कारणतायास्तत्रैव विश्रान्तत्वादिति जगद्विवर्तस्य तस्यैवाधिष्ठानत्वादिति भावः । यतः कृष्ण एव परमकारणमतो हेतोः । अयमेवार्थः श्रीनीलकण्ठेनापि भारतसभापर्वटीकायां दृढीकृतः । तथाहि—बीजाङ्कुरतरूपमेषु ईशसूत्रविराट्स्वनन्तबीजगर्भफलोपमः श्रीकृष्णो नन्दनन्दन एव महामायावी सुप्तिप्रलयकैवल्येषु कर्मोपरमे सति जगदिन्द्रजालं स्वमूर्त्या सह तिरोधायास्तसमस्तविशेषं ब्रह्मात्मानं प्रापयति, कर्मशेषसत्त्वे पुनरुद्भावयतीति ॥ * ॥ विचारमेवाह—सर्वेषामिति । सर्वेषामपि प्राकृताप्राकृतवस्तूनां भावरूपो योऽर्थः सत्ता सम्भवति तत्सत्ताश्रयसत्तावत्युपादानादौ वस्तुनि स्थितं स्यात् । एवं यद्यत् उपादानाद्यात्मकं वस्तु तस्य सर्वस्यापि प्राकृताप्राकृतस्य भगवान् तत्सर्वशक्तिविशिष्टः श्रीकृष्ण एकस्तादृश इत्यर्थः । 'अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वम्' इत्यादिकस्य श्रीब्रह्मणैवानुभूतत्वादिति भावः । तस्मादेतत्सर्वकारणादित्वेन स्वयं भिन्नादपि तस्मादन्यत्किं वस्त्विति तन्निरूप्यतामित्यर्थः । तदेवं तस्य सर्वमूलात्मकत्वे सिद्धे तेषां बालवत्सानां च तत्प्रादुर्भावत्वे स्थिते स्वभावत एव तादृशप्रेमास्पदत्वं पूर्वयुक्त्या श्रीव्रजवासिषु तत्राधिकं युक्तमेवेति ज्ञापितम् । अथ वा—ननु कथमेषु श्रीयशोदानन्दन एव सर्वात्मोच्यते, यदि भगवद्रूपत्वेनोच्यते तर्हि सन्त्यन्यानि तद्रूपाणि बहूनीत्याशङ्क्याह—वस्तुत इति । सहस्रशीर्षादिचारिष्णु तत्तदवतारादि तत्तदखिलं भगवद्रूपमिह श्रीकृष्ण एवेत्यादि पूर्ववत् । किञ्च, सर्वेषां भावानां पदार्थानां मध्ये भावः प्रेमा तद्रूप एवार्थः पुरुषार्थः स्थितः पर्यवसितो भवति । तात्पर्यपर्यवसानविषयो भवतीत्यर्थः । तस्य प्रेम्णोऽपि । भगवान् श्रीकृष्ण इति पूर्ववत् । तं तिरोहितसर्वविलक्षणगुणरूपत्वेऽपि सर्वतः पूर्णपरमानन्दस्वरूपं विना तस्याप्यलब्धप्रतिष्ठत्वात्, तस्मात्ततोऽन्यद्वस्तु निरूप्यतां यत्प्रेमयोग्यं स्यादिति । तदेवमपि पूर्ववत्स्वाभाविकप्रेमास्पदत्वमेव स्थापितमिति । **विश्वनाथस्तु**—सर्वेषामपि स्थावरजङ्गमानां भावः भवत्यस्मादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः ॥ भवांबुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषाम् ॥ ५८ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ॥ यत्कौमारे हरिकृतं पौगंडे परिकीर्तितम् ॥ ५९ ॥ एतत्सुहृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च ॥ व्यक्तेतरद्रूपमजोर्वभिष्टवं शृण्वन्गृणन्नेति नरोखिलार्थान् ॥ ६० ॥

श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यताम् ॥ ५७ ॥ तस्माच्छ्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणानामयत्नसिद्धो मोक्ष इति प्रकरणार्थमुपसंहरति समाश्रिता इति । पुण्यं यशो यस्य स पुण्ययशाः स चासौ मुरारिश्च तस्य पदपल्लव एव प्लवस्तं ये सम्यगाश्रिताः । कथंभूतम् । महत्पदं महतां पदमाश्रयम् । यद्वा महच्च तत्पदं चेति तथा । तेषां भवांबुधिर्वत्सपदमात्रं भवति किं च परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति । विपदां यत्पदं विषयस्तत्पुनः कदाचिदपि तेषां न भवति । न ततः पुनरावर्तंत इत्यर्थः ॥ ५८ ॥ ५९ ॥ सुहृद्भिश्चरितं 'मुष्णंतोऽन्योन्यशिक्यादीन' इत्यादिनोक्तम् । अघार्दनं च शाद्वले जेमनं भोजनं च व्यक्तेतरत् व्यक्ताज्जडप्रपंचादितरच्छुद्धसत्त्वात्मकं वत्सतत्पालरूपम् । यद्वा व्यक्तेतरच्चिद्विलासस्तदेव रूप्यत इति रूपम् । अजस्य उरुर्महानभिष्टवः स्तवस्तं ब्रह्मकृतां स्तुतिम् । एतच्छृण्वन्गृणन्गायन्नरः सर्वपुरुषार्थान्प्राप्नोति ॥ ६० ॥

भावः कारणं प्रधानम्, तद्रूपोऽर्थः स्थितः स्थिरो भवति तस्यापि भावस्य भावः कारणं श्रीकृष्ण एव, अतः किमतत् श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यताम् । यद्वा—वस्तूनां बुद्धीन्द्रियाणां भावार्थो व्यङ्ग्योर्थः आत्मा स्थिरो भवति, तस्याप्यंशत्वात्तद्व्यंग्योंशी श्रीकृष्णः, अतः किमतत् तद्भिन्नं वस्तु किम, किमर्थं रूप्यतां स एव सेव्यतां केवलमित्यर्थः ॥ ५७ ॥ यतः श्रीकृष्ण एव सर्वस्वरूपस्तस्मात् । प्लवः तरणसाधनम् । महतामाश्रयत्वं तु स्वर्गादेरप्यस्ति तन्निवृत्तये समासान्तरमाह—यद्वेति । वत्सपदमयत्नतार्थमित्यर्थः । न हि केवलमेतदेव वैकुण्ठानन्दानुभवाद्यपि तेषां भवति । ततो वैकुण्ठात् । इत्यर्थ इति । जन्ममरणशून्याः सन्तस्तत्रैव तिष्ठन्तीति भावः ॥ * ॥ तदेवं प्रेमदस्वभावादपि श्रीकृष्णादघासुरादिवदवयुक्तानामेव मोक्षमात्रं परमं फलम्, तस्मादेवान्येषां तत्तन्माधुर्य्यज्ञानेन मोचकतामात्रं गुणमुपादायापि तत्पदमाश्रयतां श्रीब्रह्मादिवत्परमप्रेम्णा तदुचितपरमतत्पदप्राप्तिरेव परमं फलम् । मोक्षस्तु भावी भवन्भूतो वेति तदाश्रयामोदेन नानुसन्धातुं शक्यः स्यादिति । सर्वप्रकरणार्थमुपसंहरति—समेति । पुण्यं तद्वेतु चारु वा यशो यस्य । तादृशतया मद्विधवर्ण्यमानगुणो य इत्यर्थः । यश्च नरकासुरसेनापतेर्मुरस्य हन्ता । अवनरकसदृशानेकमोक्षदातेत्यर्थः । तस्य श्रीकृष्णस्य पदमेव पल्लवः । सौकुमार्य्यादिगुणैः स्वतः परमसुखद इत्यर्थः । स एव प्लवः तादृशसुखदत्वाज्ज्ञानेन तत्तरणो पायमात्रतया जात इत्यर्थः । अत्र पल्लवपदेन तेषां क्रूरत्वादिकं पदस्य महौषधिपल्लववन्महाप्रतापत्वं च सूचितम् । तादृशं तं तथा ये समाश्रितास्तेषामपि । यस्तु स्वभावतः सुखोदयेन भवाम्बुधिर्वत्सपदं तर्तव्यतीर्णवस्तुभानानास्पदं भवति तस्य न तत्फलमित्यर्थः । किन्तु, परं पदं तन्नित्यधाम श्रीवृन्दावनवैकुण्ठादि निजप्रेमानुसारेण पदं परमास्पदं भवति । विपदां पदं यत् दुर्विषयं जगद्वा तत् खलु तेषां कदाचिदपि न भवति, यतस्तेषां मतिस्ततोऽन्यत्र नासज्जते इत्यर्थः । किं भूतम्—महतां तन्नित्यपार्षदानां पदमित्यर्थः ॥ ५८ ॥ यत् त्वयाहं पृष्टोऽस्मि एतत् । इह संदेहे ॥ * ॥ ० ॥ ५९ ॥ शाद्वलजेमनम् नवतृणानां वत्सरूपेण भोजनम् । 'शाद्वलो नवघासः स्यात्' इति कोशात् । यद्वा—शाद्वलाशनेन सहितं जेमनं गोपीयभोजनं शाद्वलजेमनम् । मध्यमपदलोपी समासः । अत एव स्वामिचरणैः शाद्वलजेमनं भोजनं चेति व्याख्यातम् । शुद्धसत्त्वात्मकरूपस्यापि व्यक्तांतःपातित्वादर्थान्तरमाह—यद्वेति । चितो विलासस्तद्रूपेण भवनम् । सर्वपुरुषार्थान् धर्मार्थकाममोक्षान् ॥ * ॥ब्रह्मणस्तत्प्रार्थितं सेत्स्यति न वेति संदिहानं प्रति कैमुत्येनाह—एतदिति । व्यक्तेतरत् व्यक्तादितरत् । प्रपञ्चातीतमित्यर्थः । सर्वत्राप्यन्वितमिदम् अघार्दनादीनां सर्वेषां श्रीभगवत्स्वरूपशक्तिविलासत्वात् । अकारान्तत्वमार्षम् । शृण्वन् गृणन् । तत्तत्प्रवृत्तिमात्रेणैवेत्यर्थः । तदैव सूक्ष्मतया फलोत्पत्तेश्च । नर इति चाधिकारानपेक्षत्वमुक्तम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥ ६१ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे ब्रह्मकृतस्तुतिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥

॥६१॥ इति श्रीपरमानंदनृसिंहपदषट्पदः । व्याकरोच्छ्रीधरस्वामी यथामति विधिस्तुतिम् ॥ १ ॥ इति श्रीभा० म० पु० दशमपूर्वार्धे टीकायां चतुर्दशोऽध्यायः॥ १४॥

विश्वनाथस्तु–सुहृद्भिश्चरितम् 'मुष्णंतोऽन्योन्यशिक्यादि–' इत्यादिनोक्तम् । व्यक्तात्प्रपञ्चादितरत्।अदन्तत्वमार्षम् ॥ ६० ॥ एतत्पद्यस्य पुनरुक्तिस्त्वस्या लीलायां बाल्यलीलान्तर्गतत्वबोधनायैवेत्यलम् ॥ * ॥ कौमारलीलामुपसंहरति– एवमेतदुपलक्षणकैरित्यर्थः । जहतुः संवृतवंतौ । व्रज इति । कदाचिदप्यन्यत्र कौमारलीलासंबन्धो नास्तीति व्रजस्योत्कर्षं सूचयति । निलायनं नाम कश्चिन्निलीय स्थितोऽन्येन परिमृग्य दृश्यत इत्येवम् । मर्कटोत्प्लवनमादि येषां तैः । सेतुबन्धैरिति । श्रीरघुनाथलीलानुकरणं खल्विदम् । बहुत्वं पौनःपुन्यात् । एवं चाल्यमानयन्त्रमन्त्रवारणादीति युद्धमुद्राद्यनुकरणमपि गम्यम् । आदिना क्षीरंधिमंथनादिलीलावतारांतरकृतापि ज्ञेया (॥६१॥) श्रीपरमानंदनृसिंहयोः पदेषु पंकजस्थानेषु षट्पदो भ्रमरस्थानीयः । इति एवम् । व्याकरोत् विवृतवानिति (१) । यत्तु काश्चदुक्तं ब्रह्मणो मोहासंभवादध्यायत्रयं प्रक्षिप्तमिति, तदसत् "भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित्" इत्युक्तेर्मोहासंभवेपि भगवल्लीलायां तदसंभवाभावात् । वस्तुतस्तु–भगवदिच्छाधीनप्रवृत्तेः 'द्रष्टुं मंजुमहित्वमन्यदपि ते' इत्युक्तेश्च मोहाभाव एव । यथाश्रुतमोहकल्पने तु सर्वज्ञस्यापि भगवतः तदवज्ञा अन्वेषणे मोहापत्तेः तेषामेवानयनाभावे सर्वशक्तेरशक्तत्वापत्तेश्च । सिद्धांतदर्पणेप्येतच्छंकित्वा समाहितम् । तथाहि–"किं त्वध्यायत्रयं त्वस्मिन्नघासुरवधादिकम् । ब्रह्मणो मोहकथनाद्विवर्तस्य च वर्णनात्॥१॥ संगतेः परिदृष्टत्वाद्बाल्यपौगण्डलीलयोः । सूचनेऽनुक्तितश्चापि प्रक्षिप्तमिव भाति मे॥ २ ॥" व्याख्या–अघविमोक्षं सखिभिः सह संपृक्तां भुक्तिं च वीक्ष्य तदीश्वरत्वे संदिहानो ब्रह्मा मोहं प्राप्नोति तत्र वर्णितम् । स मोहस्तु न संभवति "भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित्" इति तं प्रति भगवद्वचनात्, "न भारती मेंग मृषोपलभ्यते न वै क्वचिन्मे मनसो मृषा गतिः" इत्याद्युक्तेश्च । 'आत्मानमेवात्मतया विजानताम्' इत्यादौ रज्जुसर्पन्यायेन प्रपञ्चस्य ब्रह्मविवर्तित्वं वर्णितम् । तत्र तद्वादश्च वैष्णवसिद्धान्तविरोधी । 'एवं विहारैः' इत्यारभ्य 'मर्कटोत्प्लवनादिभिः' इत्यंतैकादशाध्यायान्तिमपद्येन कौमारीं लीलां समाप्य पञ्चदशाध्यायादौ 'ततश्च पौगण्डवयःश्रितौ' इत्यादिना बाल्यपौगण्डलीलयोः सङ्गतेर्दृष्टत्वाद्द्वादशस्कन्धोक्तानुक्रमणिकायामनुक्तेश्च ॥ १ ॥ २ ॥ "मैवं वादीर्महाबुद्धे ब्रह्ममोहस्तृतीयके । एकादशे विवर्त्तोक्तिर्वैराग्यप्रतिपादिका ॥ ३ ॥" अर्थः–'भवान् कल्प–' इति यो वरो भगवता ब्रह्मणे दत्तः स किल कल्पेषु ये विकल्पाः सर्गास्तेषु वैषम्यादिदोषेण भवान्न विमुह्यतीत्यर्थकः, न तु मन्मायया न विमुह्यतीत्यर्थकश्च । तथा बलश्रियोस्तदभ्यधिकयोरपि मोहदर्शनात् । अन्यथा 'नैते सुरेशा ऋषयो न चैते' इत्याद्युक्तेः, 'सा नोपेयाय शङ्किता' इत्याद्युक्तेश्च तृतीये ईश्वरत्वाभिमानपरिहारफलकं सरस्वत्यनुगमनेन तन्मोहवर्णनं 'छाया प्रत्याह्वयामास' इत्येकादशे विवर्त्तवर्णनं च प्रक्षिप्तं स्यात् । ननु भवतां विवर्त्तवर्णने का सङ्गतिस्तत्राह–वैराग्येति । अविषये भ्रमाऽसम्भवादेवेति भावः ॥ ३ ॥ नन्वेवमवस्थालीलयोः संगतेरांतरालिकाध्यायत्रयं प्रक्षिप्तं स्यादिति चेत्तत्राह–"यत्समाप्यापि कौमारीं लीलां तां स्मृतिगां मुनिः । अपूर्वां प्रार्थितां प्राख्यत्तेन किंचिन्न दूषणम् ॥ ४ ॥" अर्थः–तां कौमारीमेवाघासुरवधादिकां लीलामपूर्वां पूर्वमनुक्तामाश्चर्यां वेत्यर्थः । प्रार्थितां परीक्षिता वाञ्छिताम् । स्मृतिगां स्मृतिपथमारूढाम् । एतदुक्तं भवति–न चाघासुरवधाद्या लीलात्रासंगता, कौमारलीलानंतरत्वात् पौगंडलीलामुक्त्वानुक्तेश्च । न च पुनरुक्तत्वादसंगता प्रागनुक्तेः । न च समाप्यापि तदुक्तिः शंकाहेतुः श्रोतृप्रेष्ठाया विचित्रायाः स्मृतिपथमारूढायास्तस्याः कथने समाप्योक्तिदोषव्युदासात् । श्रोतृप्रेष्ठत्वं च 'तथान्यदपि कृष्णस्य तोकाचरितमद्भुतम्' इत्यादितदुक्तेः । किञ्च,–समाप्तपुनरात्तत्वदोषः पुराणादौ नादर्त्तव्यस्तस्य काव्यालंकारविषयत्वात् ॥ ४ ॥ ननु द्वादशस्कंधे भागवतार्थानुक्रमणिकायामेतस्या असूचनादिदमध्यायत्रयं प्रक्षिप्तं स्यात्तत्राह–"गोपीगीतादिषु स्पष्टनवस्य ह्यतिरीक्ष्यते । लीलास्थानप्रसिद्धेश्चान्यत्रापीयमतोन्यथा ॥ ५ ॥ आचारादिकथानां च तत्ते प्रक्षिप्तताभवेत् । तस्मादत्र स्युरध्यायाः पञ्चत्रिंशच्छतत्रयम् ॥ ६ ॥ गोपीगीते तावत् 'विषजलाप्ययाद्व्यालराक्षसात्' इति व्यालराक्षसोऽघासुर एव निर्दिष्टः । "यत्र व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येन्यविषयाः कुकथा मतिघ्नीः" इति तृतीयेऽघभिदिति तद्वधचरितनिमित्तकं नामोक्तमभेदनं मूर्त्तस्यैव न त्वमूर्त्तस्यामूर्त्तपापाभिप्रायत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयंतौ सखिभिः समं पदैर्वृंदावनं पुण्यमतीव चक्रतुः ॥ १ ॥
तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ॥ पशून्पुरस्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनम् ॥ २ ॥ तन्मंजुघोषा
लिमृगद्विजाकुलं महन्मनःप्रख्यपयःसरस्वता ॥ वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ॥ ३ ॥

ततः पंचदशे धेनुपालनं धेनुकार्दनम् ॥ कालियक्ष्वेडतो गोपरक्षणं च निरूप्यते ॥ १ ॥ अहिवक्त्रप्रवेशेन वृथाखिन्नान्सखीनतः ॥ कृष्णः प्रावेशयत्पक्वफलं तालालिकाननम् ॥
॥ २ ॥ पशुपालसंमतौ पशूनां पालने संमतौ पशुपालानां वा संमतौ । ईषद्वयोबलातिरेकमनुकृतवंताविल्यर्थः । अतीव चक्रतुः सर्वतः प्रसर्पणेन ॥ १ ॥ स्वयशो गृणद्भि
र्गोपैर्वृतस्तद्वनं प्राविशत् ॥ २ ॥ तद्वनं निरीक्ष्य रंतुं मनो दधे । कथंभूतम् । मंजुघोषा येऽलिमृगद्विजा भ्रमरमृगपक्षिणस्तैराकुलं व्याप्तम् । महन्मनःप्रख्यपयःसरस्वता
महतां मनसा प्रख्यं तुल्यं स्वच्छं पयो यस्मिंस्तत्सर आश्रयत्वेनास्ति यस्य तेन वा तेनेति शैत्यमुक्तम् । शतपत्रगंधिनेति परिमलवत्त्वं जुष्टं वनमिति मांद्यं च सूचितम् ॥ ३ ॥

त्वघहरेरित्येवं ब्रूयात् । 'अघः स्याद्दैत्यपापयोः' इति धरणिधरेणापिदैत्यवाचकोघशब्दो वर्णितः । न चासुरमुक्तेः सिद्धांतविरुद्धत्वादेतत्प्रतिपादकाध्यायत्रयमिदं प्रक्षिप्तमेव न तदार्षमिति वाच्यं, कृष्णमारितेषु सर्वेषु दृष्टत्वात् ।
"आसुरीं योनिमापन्ना मूढा जन्मनिजन्मनि । मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिम् ॥" इत्यादिष्वपि मां श्रीकृष्णलक्षणमप्राप्यैव न तु प्राप्येत्याद्यंगीकारात् । तथा चोक्तम्—"ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुज
पौण्ड्रकाद्याः । अन्ये च शाल्वकपिबल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ॥ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकेकयसृंजयाद्याः । यास्यंत्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयम् ॥"
इति । न च पुराणांतराप्रसिद्धत्वेन सा लीला न संभाव्या पाद्मब्रह्मांडयोः स्पष्टत्वात् । न च भक्तिगतिसाम्येन तेषां सा प्राप्तिरसमंजसा शुद्धभक्तैस्तादृशप्राप्तेरनुपादेयत्वात् 'नात्यंतिकं विगणयंत्यपि ते प्रसादम्' इत्याद्युक्तेः । "अघासुर
विघाती च पूतनामोक्षदायकः" इति श्रीशंकरेणापि संमोहने गोपालसहस्रनामसु पठितमिति ॥ ६१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे चतुर्दशोऽध्यायः ॥ १४ ॥ ततो ब्रह्मस्तुतेरनंतरम् । 'क्ष्वेडस्तु गरलं
विषम्' इत्यमरः (१) । यतो वृथा खिन्नास्ततः कारणात् । तालानामालिः पंक्तिर्यत्र कानने तत्तथा । 'तृणराजाह्वयस्तालः' इत्यमरः (२) । 'पौगंडं दशमावधि' इत्युक्तेः पंचमवर्षतो दशमाब्दांतं पौगंडम् । पशु
पालने संमतस्यापि पालकांतराप्रीत्या तेषु प्रवेशो दुर्घट इति मत्वा समासांतरम् । इत्यर्थ इति । वयोबलाभावे पशूनां निवर्त्तनस्थापनादि न संभवतीति भावः । गोचारणस्य प्रथमदिने कार्तिकशुक्लाष्टमीति पाद्मे ।
तथाहि—" शुक्लाष्टमी कार्तिके तु स्मृता गोपाष्टमी बुधैः । तद्दिनाद्वासुदेवोऽभूद्गोपः पूर्वं तु वत्सपः ॥" इति ॥ १ ॥ बलान्वितः सरामः । कुसुमाकरं पुष्पखनिरूपम् । तद्वनं वृंदावनम् । श्लेषेण माधवं
इति वसंतवत्तदुल्लासक इत्यर्थः ॥ २ ॥ मंजुघोषा मनोहरशब्दाः । 'मनोज्ञं मंजु मंजुलम्' इत्यमरः । महतां हरिपराणां मनसा प्रख्यं तुल्यं स्वच्छं पयो जलम् 'विमर्दोत्थे परिमलो गंधो जनमनोहरे' इत्यमरः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान्वीक्ष्य वन स्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥४॥ श्रीभगवानुवाच ॥ अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणम् ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोऽपहत्यै तरुजन्म यत्कृतम् ॥ ५ ॥ एतेऽलिनस्तव यशोऽखिललोकतीर्थं गायंत आदिपुरुषानुपदं भजंते ॥ प्रायो अमी मुनिगणा भवदीयमुख्या गूढं वनेऽपि न जहत्यनघात्मदैवम् ॥ ६ ॥ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कुर्वंति गोप्य इव ते प्रियमीक्षणेन ॥ सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान्हि सतां निसर्गः ॥ ७ ॥

अरुणपल्लवश्रिया सह । स्पृशंत्यः शिखाः शाखाग्राणि येषां तान् ॥ ४ ॥ तरुजन्म येन तमसा कृतं तस्य तमसः पापस्यापहत्यै नाशाय । अथ वा येन त्वयेश्वरेण सर्वोप कारकं तरुजन्म कृतं तं त्वां नमंति । एवं श्लाघ्येऽपि जन्मनि यदज्ञानरूपं तमोऽस्ति तस्यापहत्यै ॥ ५ ॥ हे अनघ वने गूढमपि त्वां न त्यजंति । त्वयि मनुष्यवेषेण निगूढे सति मुनयोऽप्यलिवेषेण निगूढास्त्वां भजंतीत्यर्थः ॥ ६ ॥ इयान् हि सतां निसर्ग इति । यदस्ति स्वस्मिंस्तद्गृहमागताय महते महापुरुषाय समर्पयंतीति ॥ ७ ॥

'शतपत्रं कुशेशयम्' इत्यमरः । वनस्य सघनत्वाद्वायोर्वेगस्तत्र मंदीभवतीति भावः ॥३॥ आदिपुरुष इति अनुजत्वेऽपि वस्तुतस्तदादिरेवेत्याह । स्मयन्निव विस्मित इव । वनस्पतीन्, अत्र भक्तिभरभग्नग्रीवा नरा यथा पुष्पादिना हरिचरणारविंदमर्चयंति तथैवेमे वृक्षा इति ध्वनितम् । विवक्षितवनस्पत्युत्कर्षस्य स्वोत्कर्ष एव पर्यवसानं, स्वोत्कर्षस्य स्वयमुक्तावनौचित्यात् । मुदानंदजनितेन गांभीर्याभावेन स्थातुमशक्तेश्च । रामे सख्यभावोत्थेन स्मितेनानेन स्वमहोत्कर्षारोपस्तत्रैव व्यंजितः । अत एवाग्रिमश्लोके आदिपूरुषेति स्वनाम्नापि संबोधनम् । तस्य करिष्यते इवेति मदभिप्रायं मदग्रजो मा बुध्यतामिति स्मितनिह्नववान्न तु स्मयन्नित्यर्थः । तथाहि—''श्रीवृंदावनतद्वासिसाधुर्यो ल्वणचेतसा । तत्स्तवे हरिणारब्धे निजोत्कर्षावसायिनम् ॥ तमालोच्य ततो राममपदिश्य व्यधायि सः । अतोऽत्र नैव तात्पर्यं रामोत्कर्षानुवर्णने । सख्यभावात्तदा रामे नर्मणेदमुदीरितम् ॥'' इति भागवतामृतीयकारिकाः ॥ ४ ॥ तदेवाह—येन पापेन । न हि पापिनो भगवद्दृष्टिगोचरीभवंतीत्यरुच्यार्थांतरमाह—अथ वेति । श्रीवृंदावनतरूणामुपासनाप्राप्तद्रुमरूपाणाम् 'वृंदावने किमपि गुल्मलतौषधीनाम्' इत्याद्युक्तेर्ब्रह्मादिभिरपि प्रार्थ्यमानजन्मनां तमोऽभावात्, लोके सजातीयतरूणां यत्तमोजन्यं जन्म तत्तमोपहत्यै इति वा । यद्वा—तमसोऽपराधस्यापहत्यै, येनापराधेन कृतं तरुजन्म । हंतास्माभिरपराध एव कश्चित्कृतः यत्कृष्णसन्निधिगमनासमर्थमस्माकं तरुजन्म विधात्रा कृतमिति तेषामनुरागोत्थं वचनमेवान्ववोचद्भगवान् । वस्तुतस्तु—ब्रह्मादिप्रार्थ्यवृंदावनीयतरुजन्म नापराधफलमिति तत्त्वम् ॥ ५ ॥ अनघेति । गोपवेषत्वेऽप्यपरिमितैश्वर्यत्वं तवेति संबुध्यभिप्रायः । अलिनो भ्रमराः ''भ्रमराणां पक्ष मूलमलमाहुर्मनीषिणः'' इत्युक्तेरलमस्ति येषामित्यलिनः । इत्यर्थ इति । 'प्रकाशे प्रकाशं गुते गुतम्' इति न्यायेन गुप्तस्य गुप्तवेषेणैव भजनमुचितमिति भावः । ''वेत्ता सर्वस्य वेद्यस्य मुनिः सद्भिरुदाहृतः'' इत्युत्पलः । मुनिगणा रहस्यलीलागमनार्थं भ्रमरीभवंति, तेन भो भ्रमरा मदतिरहस्यकुंजमपि प्रविश्यास्मत्सौरभ्यमास्वादयत मा संकुचतेति तान्प्रति प्रसादो ध्वनितः । अखिललोकानां मुक्तमुमुक्षवादीनां तीर्थं सेव्यं शोधकं वा । यद्वा—अखिलोऽनल्पः लोको ज्ञानं येषां तेषां सर्वज्ञानामपि सेव्यम् । अनघानां निर्दुःखानां मुक्तानामात्मदैवं प्राप्यत्वेन निश्चितम् 'मुक्तानां परमा गतिः' इत्युक्तेः । 'दुःखैनोव्यसनेष्वघम्' इत्यमरः । आदिपुरुषसर्वकारणकारणा भजने पातित्यं मा भूदित्यर्थः । आत्मप्रभवमीश्वरं न भजंत्यवजानंति 'स्थानाद्भ्रष्टाः पतंत्यधः' इत्युक्तेः । पूर्वोक्तमुनिगणपक्षेऽपि योजनास्येति ॥६॥ सतां निसर्ग इति । नृत्यसहर्षावलोकप्रियवचनैर्गृहागतस्य साधोः संमाननमिति सतां विदुषां स्वाभाविको धर्म इत्यर्थः । शिखिनो मयूरा यद्वा—केशशिखाधारिणः । हरिण्यः मृग्यः । पक्षे हरिं नयंति प्राप्नुवंति इति हरिण्यः हरिभक्ताः । सूक्तैः कर्णप्रियैर्वचोभिः । पक्षे कः ब्रह्मा, ओ विष्णुः, उः शिवः, तेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः ॥ नद्योऽद्रयः खगमृगाः सदयावलोकैर्गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ॥
॥ ८ ॥ श्रीशुक उवाच ॥ एवं वृन्दावनं श्रीमत्प्रीतः प्रीतमनाः पशून् ॥ रेमे संचारयन्नद्रेः सरिद्रोधस्सु सानुगः ॥ ९ ॥ क्वचिद्गायति गायत्सु मदां
धालिष्वनुव्रतैः ॥ उपगीयमानचरितः स्रग्वी संकर्षणान्वितः ॥ १० ॥ क्वचिच्च कलहंसानामनुकूजति कूजितम् ॥ अभिनृत्यति नृत्यंतं बर्हिणं
हासयन्क्वचित् ॥ ११ ॥ मेघगंभीरया वाचा नामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥ १२ ॥ चकोरक्रौंचचक्राह्व
भारद्वाजांश्च बर्हिणः ॥ अनुरौति स्म सत्त्वानां भीतवद्व्याघ्रसिंहयोः ॥ १३ ॥

तृणवीरुधश्च तव पादौ स्पृशंतीति तथा करजाभिमृष्टा नखैः स्पृष्टाः । सदयैरवलोकनैः । श्रीरपि यस्मै स्पृहयति केवलं तेन भुजयोरंतरेण वक्षसा गोप्यो धन्या इति॥८॥ एवं श्रीमद्वृंदावनं प्रति प्रीतः सन्नद्रेः समीपवर्तिसरित्तटेषु पशून्संचारयन्सानुगो गोपैः सह वर्तमानः प्रतिमना रेमे ॥ ९ ॥ तामेव रतिमाह क्वचिदित्यादिभिर्दशभिः ॥१०॥ बर्हिणं नृत्यंतमन्वभिनृत्यति बर्हिणमभिमुखो नृत्यतीति वा । सखीन्हासयन् ॥ ११ ॥ १२ ॥ चकोरादीननुकृत्य रौति । कदाचिच्च सत्त्वानां मध्ये व्याघ्रसिंहयोस्ताभ्यां

किलो वार्त्ता येषां ते कोकिला इंद्रादयः, तान् गणयंति पूजनार्थमिति कोकिलगणा यज्ञादिकरणशीलाः । 'वार्त्तासंभाव्ययोः किल' इति शाश्वतः । इयान् एतावान् । सतां शास्त्रश्रद्धावताम् । निसर्गः स्वभावः । यद्गृहागतायातिथये सुदृष्टिसुवचोनमनादिना पूजनमिति, अन्यथा "अतिथिर्यस्य भग्नाशो गृहाद्याति ह्यपूजितः । तस्य पूर्वकृतं पुण्यं नाशमायाति सर्वतः ॥" इत्यादिस्मृतिर्व्याकुप्येतेति ॥ ७ ॥ वक्षसा तत्संबंधेन लक्षितलक्षणया भुजांतरेण वक्षःसंयोगो लक्ष्यते । धन्येयं भूमिर्धन्याश्चात्रत्याः पदार्था इति भावः । यद्वा—सन् अयः शुभावहो विधिर्येभ्यस्तथाभूतैरवलोकैः सहिता । यतः किञ्चित्सुगंधशीतलां गोपीपर्यायां सारिवां वल्लीं वक्षसि कौतुकेन ध्रियमाणां विलोक्याह—गोप्यः श्यामवल्ल्योऽपि भुजयोरंतरं वक्षस्तेन सहिता यतः श्रीः शोभापि यस्मै स्पृहयति सा या वल्ली शोभामपि शोभयतीत्यत एव वक्षसि त्वया ध्रियत इति भावः । पक्षे गोप्यो व्रजसुंदर्यः यत्स्पृहा यस्मै भुजांतराय लक्ष्मीरपि स्पृहयति, तदुक्तं भागवतामृते—"सदा वक्षःस्थलस्थापि वैकुंठेशितुरिंदिरा । कृष्णो वः स्पृहयास्यैव रूपं विवृणुतेऽधिकम् ॥ पौराणिकमुपाख्यानमत्र संक्षिप्य लिख्यते । श्रीः कृष्णं प्रेक्ष्य सौन्दर्यं तत्र लुब्धा ततस्तपः । कुर्वतीं प्राह तां कृष्णः किं ते तपसि कारणम् ॥ विजिहीर्षे त्वया गोष्ठे गोपीरूपेति सा ब्रवीत् । तद्दुर्लभमिति प्रोक्ता लक्ष्मीस्तं पुनरब्रवीत् ॥ स्वर्णरेखेव ते नाथ वस्तुमिच्छामि वक्षसि । एवमस्त्विति सा तस्य तद्रूपा वक्षसि स्थिता ॥" इति विश्वनाथः ॥ ८ ॥ एवम् एवंप्रकारम् । अद्रेर्गोवर्द्धनस्य । यद्वा—इत्थमग्रजं परितोष्य गोप्योंतरेण भुजयोरिति निजोक्त्यैवोद्दीप्तकंदर्पस्तत्संगं एव गाः सखींश्च नियुज्य भोः श्रीमदार्य क्षणमत्र सुबलेन सार्द्धं गोवर्द्धनकंदरारोधसि विश्रम्यागंतास्मि त्वमग्रे कालिंदीरोधस्सु तावद्विहरेत्युक्त्वा ततो वियुज्य पौगंडेऽपि कैशोराविर्भावाद्रहसि व्रजबालाभिः सार्द्धं रेमे इत्याह—एवमग्रजं स्तुत्वा तद्द्वारैव पशून्वृंदावनं संचारयन्नद्रेः सरितो मानसगंगाया रोधस्सु रेम इत्यन्वयः । श्रीमती व्रजयोषिन्मुख्याऽस्यैव प्रीता प्रेमवता यस्मिन्सः कुलालकर्तृको घट इतिवत् प्रीतेत्यस्य विशेष्यत्वविवक्षया परनिपातः । अत एव प्रीतमनाः अनुगाभिः सखीभिः सहितः । व्याख्यानस्यास्य रहस्यत्वादेतस्यावरकं रत्नस्य कनकसंपुटामिव व्याख्यांतरमवतारिकां विनैवास्ति । तद्यथा श्रीमंतो बलदेवाद्याः प्रीता यस्मिन्सः । सानुगोनुगैस्सहितः । अन्यत्समानम् ॥ ९ ॥ या वृंदावने रतिः कृता तामित्यर्थः । अनुव्रतैः सखिभिः । स्रग्वी वनमालाधरः ॥ १० ॥ बर्हिणम् मयूरम् अभिनृत्यति तत्तुल्यं नृत्यति सर्वतो वा । मयूरतुल्यत्वं पक्षैर्विनाऽसंभवं मत्वार्थांतरमाह—अभिमुखेति । हासयन् हासं जनयन् ॥ ११ ॥ नामभिः प्रसूतिवारप्रयुक्तादिलक्षणैः—हे सूर्ये, हे सोमे । यद्वा—हे अश्विनि, हे यमुने, हे कृष्णे, हे पीते इत्येवंरूपैः । गवां गोपालानां मनसः प्रियया ॥ १२ ॥ चकोरो जीवंजीवश्चंद्रप्रियः पक्षी, क्रौंचो जलचरः पक्षी,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचित्क्रीडापरिश्रांतं गोपोत्संगोपबर्हणम् ॥ स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः ॥ १४ ॥ नृत्यतो गायतः क्वापि वल्गतो युध्यतो मिथः ॥ गृहीतहस्तौ गोपालान्हसंतौ प्रशशंसतुः ॥ १५ ॥ क्वचित्पल्लवतल्पेषु नियुद्धश्रमकर्शितः ॥ वृक्षमूलाश्रयः शेते गोपोत्संगोपबर्हणः ॥ १६ ॥ पादसंवाहनं चक्रुः केचित्तस्य महात्मनः ॥ अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥ १७ ॥ अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः ॥ गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः ॥ १८ ॥ एवं निगूढात्मगतिः स्वमायया गोपात्मजत्वं चरितैर्विडंबयन् ॥ रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितः ॥ १९ ॥ श्रीदामा नाम गोपालो रामकेशवयोः सखा ॥ सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् ॥ २० ॥ रामराम महाबाहो कृष्ण दुष्टनिबर्हण ॥ इतोऽविदूरे सुमहद्वनं तालालिसंकुलम् ॥ २१ ॥

भीतवद्द्रवति । सत्त्वेषु पलायमानेषु पलायत इत्यर्थः । तयोः सत्त्वानां बलोद्रेकाणां भीतवद्द्रवतीति वा ॥ १३ ॥ आर्यमग्रजं विश्रमयति विगतश्रमं करोति ॥ १४ ॥ मिथो नृत्यादीन्कुर्वतो गोपान्प्रशशंसतुः ॥ १५ ॥ १६ ॥ व्यजनैः पल्लवादिनिर्मितैः ॥ १७ ॥ १८ ॥ ईशचेष्टित इति । विगूढस्वभावत्वेऽप्यंतरांतरा ईशस्यैव चेष्टितानि दृश्यंते यस्मिन्सः ॥ १९ ॥ ईशचेष्टितत्वमेव दर्शयितुमाह । श्रीदामेति । स्तोकः कृष्ण इति कश्चित् ॥ २० ॥ तालालिसंकुलं तालानां पंक्तिभिर्व्या

चक्राह्वः कोकः, भारद्वाज ऊर्द्ध्वाधश्चंचुश्चित्रितांगः पक्षी । सत्त्वानां जीवानां 'सत्त्वं जीवे बले गुणे' इति कोशात् । व्याघ्रसिंहयोरिति पञ्चम्यर्थे षष्ठी । इत्यर्थ इति । सत्त्वेषु मृगादिषु धावत्सु स्वयमपि तथैव धावति न तु भीत इति भावः । अन्येऽपि सर्पादयो भयहेतवो बहवः संति द्वयोरेवोपादानं कथमित्यस्वरसादर्थांतरमाह—तयोर्व्याघ्रसिंहयोः । सत्त्वानां सकाशाद्भीतवदिति । यद्यप्यन्ये भयहेतवः संति, न तेष्वेतयोस्तुल्यं बलमिति भावः । सत्त्वानां प्राणिनां मध्ये व्याघ्रसिंहयोः शब्देन भीतवद्द्रवति सखिषु पलायमानेषु स्वयमपि पलायते । वस्तुतस्तु स्वस्य स्वाभाविकशौर्येण भयाभावो वतिनोक्त इति विश्वनाथः ॥ १३ ॥ गोपस्योत्संग उपविष्टस्योरुजंघायोग उपबर्हणमुपधानं शिरःपीठं यस्य तम् ॥ १४ ॥ नृत्यत इत्यादीनां चतुर्णां द्वितीयांतानां गोपालानित्यनेन संबंधः । वल्गतः प्लवतः 'वल्ग—प्लवने' धातुः । स्खलनादिविषये हसंतौ । प्रशशंसतुः तुष्टुवतुः ॥ १५ ॥ नियुद्धं बाहुग्रहणादिना द्वंद्वयुद्धम् ॥ १६ ॥ पादसंवाहनम् चरणमर्दनम् । तस्य हरेः । महात्मनः ब्रह्मादिपूज्यस्य । केचित्सुबलादयः । अपरे श्रीदामादयः । हतपाप्मानो जन्मांतरार्जितानंतपुण्याः । व्यजनैः वस्त्रपत्रादिरचितैः ॥ १७ ॥ अन्ये मनःसौख्यादयः । तदनुरूपाणि तयोः प्रियाणि गीतानि । स्नेहेन क्लिन्ना रागवती धीर्येषां ते तथा ॥ १८ ॥ एवं गोपलीलया । निगूढात्मगतिः प्रच्छन्नात्मस्वरूपः । ग्राम्यैर्गोपैः 'ग्राम्यो नैपुण्यवर्जितः' इति कोशः । ईशचेष्टितः प्रादुष्कृतनिजैश्वर्यः । अंतरांतरा मध्येमध्ये दैत्यदलनादिना स्वकीयेश्वरतामपि बोधयतीति भावः ॥१९॥ शेषकार्यमाह—। आद्यशब्दात् वृंदबंधु—देवभद्र—विनोदार्जुन—कामकंद—प्राणभानु—दृष्टिभानु—चंद्रभानु—जयभानु—कलोत्तान—वीरसेन—कीर्त्तिसिंधु—कमलाकर—सुखसागर—संजयादयो ज्ञेयाः । श्रीदाम्नः प्राङ् निर्देशः सखिषु मुख्यत्वात् । स्तोककृष्ण इति चतुरक्षरमेव नाम ज्ञेयम् । तत्र चेदमेव लक्ष्यते बालस्यास्य रूपं कृष्णमनुगच्छदेव वर्त्तते तस्मान्नाम च तमनुगमिष्यत्प्रणयविशेषाय संपत्स्यत इति विचार्य्य सम्यगुल्लसता तत्पित्रा तादृशं नाम प्रकाशितमिति । प्रेम्णेति न तु तालफललोभेन न तु दुष्टवधार्थं वेति, किं तु प्रियजनप्रीतिविशेषार्थमेवेति ॥ २० ॥ दुष्टानां निबर्हण उन्मूलक: । अविदूरे निकटे । इतः अस्मात्प्रदेशात् । हे रामेति रमसे क्रीडसीति तन्नामनिरुक्तेरेतामप्यशक्यां क्रीडां कुरु । किं वा—रमयसि क्रीडयासि सुखयासि वेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलानि तत्र भूरीणि पतितानि पतंति च ॥ संति किं त्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥ सोऽतिवीर्योऽसुरो राम हे कृष्ण खररूपधृक् ॥ आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥ २३ ॥ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन् ॥ न सेव्यते पशुगणैः पक्षिसंघैर्विवर्जितम् ॥ २४ ॥ विद्यंते ऽभुक्तपूर्वाणि फलानि सुरभीणि च ॥ एष वै सुरभिर्गंधो विषूचीनोऽवगृह्यते ॥ २५ ॥ प्रयच्छ तानि नः कृष्ण गंधलोभितचेतसाम् ॥ वांछास्ति महती राम गम्यतां यदि रोचते ॥ २६ ॥ एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया ॥ प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू ॥ २७ ॥ बलः प्रविश्य बाहुभ्यां तालान्संपरिकंपयन् ॥ फलानि पातयामास मतंगज इवौजसा ॥ २८ ॥ फलानां पततां शब्दं निशम्यासुररासभः ॥ अभ्यधावत्क्षितितलं सनगं परिकंपयन् ॥ २९ ॥ समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां बलं बली ॥ निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ॥ ३० ॥ पुनरासाद्य संरब्ध उपक्रोष्टा पराक्स्थितः ॥ चरणावपरौ राजन्बलाय प्राक्षिपद्रुषा ॥ ३१ ॥

नम् ॥ २१ ॥ ॥ २२ ॥ २३ ॥ २४ ॥ विषूचीनः सर्वतः प्रसृतः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ सनगं सवृक्षम् ॥ २९ ॥ प्रत्यग्द्वाभ्यां पश्चिमाभ्याम् । काशब्दमिति गर्दभजातिशब्दानुकरणम् । पर्यसरत्परितोऽधावदित्यर्थः ॥ ३० ॥ उपक्रोष्टा गर्दभः । पराक् प्रतिमुखः । अपरौ पश्चिमौ । बलाय बलं हंतुम् ॥ ३१ ॥

तयाऽस्मात्क्रमयेति भावः । वीप्सादरे । महासत्त्वेति[1] तव किमप्यशक्यं नास्तीति भावः । हे कृष्णेति परमानंदप्रदस्वभावत्वेन सर्वाकर्षकत्वादस्माकमपि सुखं कर्तुमर्हसीति भावः । दुष्टनिबर्हणेति । वत्सासुरादीनां तस्मात्साक्षाद्दृष्टेः । इतो गोवर्द्धनादविदूरे क्रोशचतुष्टयांतरे'तारफरा—तालसी' इतिख्यातप्रदेशगतं वनम् । "अस्ति तालवनं नाम धेनुकासुररक्षितम् । मथुरापश्चिमे भागे ह्यदूरादेकयोजनम् ॥" इति वाराहोक्तेः । पश्चिमे पश्चाद्भवे भागे नैर्ऋतकोण इति व्याख्येयं, तत्रैव दर्शनात् । श्लेषेण तालानामलिवर्णत्वेनातिस्वादुजातीयत्वं ध्वनितम् । हे राम तव महासत्त्वपरीक्षा हे कृष्ण तवापि दुष्टनिबर्हणपरीक्षा, अद्य कर्त्तव्येति भावोयं तयोः सख्यभावेन बलिष्ठत्वज्ञानान्न प्रेम्णि विरुध्यते, प्रत्युत वीररसोत्साहाद्दीपनत्वेन संरुध्यत एवेति ज्ञेयम् ॥ २१ ॥ तत्र तालवने । यद्यपर्येव पाकं गतानि तर्हि तरस्माकं किमिति चेत्तत्राह—पतितानीति । तर्ह्यानीय भुज्यतामिति चेत्तत्राह—धेनुकेनेति । तर्हि तं पृष्ट्वानीयतामिति चेदाह—दुरात्मनेति । प्रार्थितोऽपि दुरात्मा न प्रसीदतीति भावः ॥ २२ ॥ तत्र गत्वा प्रसह्य भुज्यंतामिति चेदाह—अतिवीर्य इति। एकाकिनं तं निष्कास्य पुनः स्वकार्यं क्रियतामिति चेदाह—आत्मतुल्यबलैरिति ॥ २३ ॥ तत्र तु गमनमेवास्माकं दुर्घटमित्याह—तस्माद्धेनुकात् । वनमिति शषः । त्वमेव तादृशानां हंतेत्याहुः-हे अमित्रहन् शत्रुनाशक ॥ २४ ॥ विष्वक्सर्वत्रांचति प्रसरतीति विषूचीनः । पृषोदरादिरयम् । विशेषेण गृह्यते घ्राणेनेति शेषः ॥ २५ ॥ यद्वा—कदाप्यस्माकं लोभो नासीत्, नवनीतादिलुब्धस्यास्य संपर्कादेव लोभितचेतसो वयं जाता इति रामं प्रत्युक्तिर्गोपानामित्याह—कृष्णस्य गंधेन लोभितं चेतो येषां तेषां तथा 'गंधो गन्धे हिंसने च लेशसंपर्कयोरपि' इति कोशात् । अदनाकांक्षा चेत्तर्हि कालांतर नेष्यामि तत्राहुः—वांछेति ॥ २६ ॥ एवम् गम्यतां यदि रोचत इत्येवंप्रकारम् । प्रभू कृष्णबलदेवौ ॥ २७ ॥ मतंगजो हस्ती । ओजसा अवष्टंभेन बलेन वा 'ओजोऽवष्टंभबलयोः' इति यादवः ॥ २८ ॥ असुरश्चासौ रासभः खरः ॥ २९ ॥ इत्यथ इति । शीघ्रगतिद्योतनार्थं पर्यधावदिति तु छंदोभंगभयान्नोक्तमिति ॥ ३० ॥ उपक्रोष्टेति । क्रोष्टुवदत्युच्चध्वनि

१—महासत्त्वेति पाठोऽस्येष्टः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना ॥ चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितम् ॥ ३२ ॥ तेनाहतो महातालो वेपमानो बृहच्छिराः ॥ पार्श्वस्थं कंपयन्भग्नः स चान्यं सोऽपि चापरम् ॥ ३३ ॥ बलस्य लीलयोत्सृष्टखरदेहहताहताः ॥ तालाश्चकंपिरे सर्वे महावातेरिता इव ॥ ३४ ॥ नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ॥ ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ॥ ३५॥ ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये ॥ क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबांधवाः ॥ ३६ ॥ तांस्तानापततः कृष्णो रामश्च नृप लीलया ॥ गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ॥ ३७ ॥ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः ॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलम् ॥ ३८ ॥ तयोस्तत्सुमहत्कम निशम्य विबुधादयः ॥ मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ॥ ३९ ॥

तृणराजस्तालः ॥ ३२ ॥ ३३ ॥ उत्सृष्टेन खरदेहेन हतैस्तालैराहताः चकंपिरे अकंपंत ॥ ३४ ॥ यस्मिन्निदं विश्वमोतमूर्ध्वतंतुषु पट इव ग्रथितं प्रोतं तिर्यक्तंतुषु पटवदेव संग्रथितम् । सर्वतोऽनुस्यूतं वर्तत इत्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥ घनैर्नभ इव भुवस्तलं रराज । तत्र फलप्रकरसंकीर्णमिति दैत्यदेहैश्च सतालाग्रैः संकीर्णमित्यनेन

त्वात् । रासभे गौणी लक्षणा । प्राहिणोत् चिक्षेप ॥ ३१ ॥ सः बलः । तम् दैत्यम् । प्रपदाः पादाग्रयोः 'पादाग्रं प्रपदम्' इत्यमरः ॥ ३२ ॥ तेन खरासुरदेहेन । बृहच्छिराः अतितुंगः । भग्नः त्रुट्यन् । पार्श्वस्थम् तालम् ॥ ३३ ॥ हतैर्भग्नैः । आहता भग्नाः ॥[1] ३४ ॥ एतत्तालादिपातनम् । यस्मिन् बल । इत्यर्थ इति । सर्वाधारत्वेन तस्य तन्नाद्भुतमिति भावः । "न तस्य चित्रं परपक्ष्यनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते इत्येवं" वक्ष्यमाणरीत्या प्रतियोधाद्यनुकरणमात्रशक्तिप्रकाशकारिण्या नरलीलयैवदं कृतमित्याश्चर्यत्वेन वर्ण्यते, न त्वैश्वर्यलीलयेत्याह—नैतदिति । अचित्रत्वे हेतुः—भगवति शक्त्या समग्रैश्वर्यादियुक्तेऽनंते स्वरूपतोऽप्यपरिछिन्ने तथोपाधिसंबंधेनापि जगदीश्वरे ओतं प्रोतमित्यादिलक्षणे च दृष्टांतेऽपि तंतूनां कारणत्वेन पटादन्यत्वम् । अत्र तादृशभगवत्त्वादिकं श्रीकृष्णांशेषु मुख्यत्वाद्युक्तमेवेति भाव इति तोषिणी ॥ ३५ ॥ क्रोष्टारः स्वजातिस्वनं कुर्वाणाः । ततः धेनुकपतनानंतरम् । संरब्धाः कुपिताः 'संरंभः कोपवेगयोः' इति विश्वः। कृष्णमित्यादावुक्तिः श्रीबलदेवस्य पराक्रमदृष्ट्या भयात्तत्त्यागेन तदभिद्रवणात् । यद्वा—अग्रजप्रेम्णा स्वयमेवाग्रे गमनात् । रामश्चेति पश्चादनुजस्नेहेन तस्यापि तत्पार्श्वे गमनात् । अभिद्रवणे तु द्वयोरपि प्राधान्याच्चकारौ । क्रोष्टारः महाक्रोशनं कुर्वणाः । हतबांधवा इति । शोकेनाप्यतिक्रोधाच्छत्त्यतिशयं कुर्वन्त इति भावः ॥ ३६ ॥ तांस्तान् धेनुकबांधवान् । हे नृपेति । नृपा यथा नरपालनार्थं दुष्टान्हंतीत्येवं श्रीकृष्णेनाप तत्कृतमिति भावः । यद्वा—नृपस्येव लीलया राजानोऽपि मृगयाक्रीडाकौतुकेन मृगान् घ्नन्तीत्यनायास एव तात्पर्यात् ॥३७॥ भूरिति । तलमित्यनेन व्यवहितेनापि संबध्यते। षष्ठ्यर्थे प्रथमा बोध्येत्याशयेन भुवस्तलमिति स्वामी । फलानां प्रकरण समूहेन संकीर्णं मिलितम्।तत्र भूतले । दैत्यदेहैरित्यनेन संकीर्णमित्यस्य समासांतर्गतस्यापि "भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्" इतिवत्संबंधः । यद्वा—दैत्यदेहैः सह फलप्रकरसंकीर्णमिति संबंधः । पूर्णोपमेयम् उपमानोपमेयसादृश्यधर्मोपमावाचकपदानां चतुर्णामेवोपादानात् । यद्वा—नभस्तलं नभःस्वरूपम् 'तलं स्वरूपाधारयोः'इति विश्वः ॥३८॥ तयोः

१–प्राहिणोद्दुषेति पाठाभिप्रायमेतत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ तालफलान्यादन्मनुष्या गतसाध्वसाः ॥ तृणं च पशवश्चेरुर्हतधेनुककानने ॥ ४० ॥ कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः ॥ स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत् ॥४१॥ तं गोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ॥ वेणुं क्वणंतमनुगैरनुगीतकीर्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ॥ ४२ ॥ पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ॥ तत्सत्कृतिं समधिगम्य विवेश गोष्ठं सव्रीडहासविनयं यदपांगमोक्षम् ॥ ४३ ॥ तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले ॥ यथाकामं यथाकालं व्यधत्तां परमाशिषः ॥ ४४ ॥ गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः ॥ नीवीं वसित्वा रुचिरां दिव्यस्रग्गंधमंडितौ ॥ ४५ ॥ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ ॥ संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ॥ ४६ ॥ एवं स भगवान्कृष्णो वृंदावनचरः क्वचित् ॥ ययौ राममृते राजन्कालिंदीं सखिभिर्वृतः ॥ ४७ ॥ अथ गावश्च गोपाश्च निदाघातपपीडिताः ॥ दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितम् ॥ ४८ ॥

चारुणश्वेतनीलघनसादृश्यसंपादनम् ॥ ३८ ॥ ३९ ॥ आदन्नभक्षयन् ॥ ४० ॥ ४१ ॥ गोरजोभिश्छुरितेषु कुंतलेषु बद्धं बर्हं वन्यानि प्रसूनानि च यस्य रुचिरे ईक्षणे चारुहासश्च यस्य तं च तं च दिदृक्षितदृशो दिदृक्षिता दर्शनोत्कंठायुक्ता दृशो यासां ताः॥४२॥मुकुंदस्य मुखपद्मगतं सारघं मधु । अह्नि यो विरहस्तस्माज्जातं तापम् । स च तासां सत्कृतिं पूजाम् । कां सत्कृतिं कथं वा कृतां तामाह । सव्रीडेति । सव्रीडेन सलज्जेन हासेन विनयो यथा भवति तथा यदेतत् । किं तत् । अपांगमोक्षं कटाक्षदर्शनम्

रामकृष्णयोः । तद्दैत्यहननतालपातनरूपम् । नरकृत्यायोग्यत्वान्महत् । आदिना गंधर्वर्षयो ग्राह्याः ॥ ३९ ॥ हतधेनुकस्य कानने चेरुः बभक्षुः । मनुष्यास्तत्रत्याः पुलिंदादय एव न तु गोपाला आदन्, गर्दभरक्तोक्षितत्वेन फलेषु घृणोत्पत्तेः ॥ ४० ॥ कृष्ण इति व्रजस्थानां चित्ताकर्षणं, कमलपत्राक्ष इति नेत्रनासयोराकर्षणम । पुण्ये धन्ये श्रवणे कर्णौ यतस्तादृक्कीर्तनं वेणुगानं यस्येति श्रोत्रस्याप्याकर्षणं सूचितम् । अनुगैः देवरूपैरित्यर्थः ॥ ४१ ॥ तम् श्रीकृष्णम् । गोरजोभिः छुरितेषु व्याप्तेषु कुन्तलेषु केशपाशेषु बद्धं बर्हं मयूरपक्षो यस्य स इत्युत्तरेण कर्मधारयः । 'छुरितं व्याप्तिभेदयोः' इति धरणिः । दिदृक्षा जाता यासां ता दिदृक्षिताः दृशः स्वयमेव कर्तृत्वं भेजुः, करणत्वं त्यक्त्वेति ध्वनिः । ताः दृशो यासामिति ॥ ४२ ॥ सरघाभिः संचितं सारघम् 'सरघा मधुमक्षिका' इति हलायुधः । मधु मकरंदं, मुखं लक्षणया पद्ममाह,सारघपदमपि लक्षितलक्षणया मकरंदमाह ॥ ४३ ॥ तयो रामकृष्णयोः । यथाकामं तदिच्छानुसारेणेत्यर्थः । परमाशिषस्तत्तद्वांछितानि । व्यधत्ताम् अकुरुताम् ॥ ४४ ॥ अध्वनोऽयमाध्वनः स चासौ श्रमश्चेत्याध्वनश्रमः, गत आध्वनश्रमो ययोस्तौ तथा । विश्वनाथस्तु—न श्रमोऽश्रमः स चेश्वरत्वान्नरलीलया तस्याभावोऽनश्रमः, गतोऽध्वनोऽनश्रमः ययोस्तावित्याह । तत्र गोकुले सुषुपतुरिति द्वयोः संबंधः । नीवीं धौतवस्त्रम् ''नीवी स्त्री कटिबंधेऽपि वणिग्मूलधने तथा । दृढबद्धे धौतबद्धे कटिदत्तकुशात्रये ॥ जितेंद्रियायां नार्यां च श्रीभक्तायाश्च कथ्यते'' इति शारदः ॥ ४५ ॥ संविश्य पतित्वा । यद्यपि संपूर्वविशतेः शयने वृत्तिर्दृश्यते 'स्वप्नः संवेश इत्यपि' इत्यमरोक्तेस्तथाप्युपसर्गाणामनेकार्थत्वादत्र पतनेऽर्थे । वरशय्यायाम् मृदुवस्त्राच्छादितपर्यंके ॥ ४६ ॥ क्वचित् कदाचित्[1] । राममृते बलभद्रं विना[2] । एवं कुर्वन्निति शेषः ॥ ४७ ॥ निदाघो ग्रीष्मर्तुस्तत्संबंध्यातपो रविकरभवोष्णत्वविशे

१–कदाचित् निदाघर्त्तौ । २–श्रीबलदेवस्तु जन्मर्क्षशान्त्यर्थं तद्दिने गृह एव स्थितोऽभूदिति बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषांभस्तदुपस्पृश्य दैवोपहतचेतसः ॥ निपेतुर्व्यसवः सर्वे सलिलांते कुरूद्वह ॥ ४९ ॥ वीक्ष्य तान्वै तथाभूतान्कृष्णो योगेश्वरेश्वरः ॥ ईक्षया ऽमृतवर्षिण्या स्वनाथान्समजीवयत् ॥ ५० ॥ ते संप्रतीतस्मृतयः समुत्थाय जलांतिकात् ॥ आसन्सुविस्मिताः सर्वे वीक्षमाणाः परस्परम् ॥५१॥ अन्वमंसत तद्राजन्गोविंदानुग्रहेक्षितम् ॥ पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ॥५२॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे धेनुकवधो नाम पंचदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥ विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः ॥ तस्या विशुद्धिमन्विच्छन्सर्पं तमुदवासयत् ॥ ॥ १ ॥ राजोवाच ॥ कथमंतर्जलेऽगाधे न्यगृह्णाद्भगवानहिम् ॥ स वै बहुयुगावासं यथाऽसीद्विप्र कथ्यताम् ॥ २ ॥

तथा तां सत्कृतिं प्राप्येति ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ संप्रति सद्य एव इता प्राप्ता स्मृतिर्यैस्ते संप्रतीतस्मृतयः । यद्वा सम्यक्प्रतीता प्रतिप्राप्ता स्मृतिर्यैस्ते तथेति ॥ ५१ ॥ ५२ ॥ इति श्री भा० म० दशमे पूर्वार्धे टीकायां पंचदशोऽध्यायः ॥ १५ ॥ षोडशे कालियस्योक्तो निग्रहो यमुनाह्रदे । तत्पत्नीभिः स्तुतेनाथ कृष्णेनानुग्रहः कृतः ॥ १ ॥ हत्वा रासभदैतेयाञ्जग्ध्वा तालफलान्यलम् ॥ प्रीतोऽनृत्यत्फणारंगे कालियस्य कलानिधिः ॥२॥ उदवासयन्निःसारितवान् ॥ १ ॥ बहूनि युगान्यावासो यस्य तमहिम् । स वै अहिरजलचरोऽपि तस्मिन्नंतर्जले यथा येन प्रकारेणासीत् अथ वा बहूनि युगान्यावासो यथा भवति तथा

षस्तेन पीडिता व्याकुला इत्यर्थः । अथ कार्त्स्न्येन । अथेति मंगलानंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु । दुष्टम् विकृतिजनकम् । तत्र हेतुः । विषदूषितमिति । तस्याः कालिन्द्याः ॥४८॥ तत् दुष्टम् । विषेण युतमंभो विषांभो मध्यपदलोपी समासः । दैवोपहतचेतसः दिष्टनाशितज्ञानाः । सलिलांते जलनिकटे । कृष्णकृपया कुरुवंशेऽपि दुर्योधनदत्तविषेण भीमो जलांते पतित्वा यथोत्थितस्तथेमेऽप्युत्थास्यंतीति बोधयितुं संबोधयति महामुनिः—कुरूद्वहेति[४] ॥ ४९ ॥ तान् गोगोपान् । तथाभूतान् गतप्राणान् । स्व आत्मैव नाथो येषां तान् । मृतसंजीवनं तु योगिनोऽपि, स तु योगेश्वरेश्वर इति नात्राद्भुतमिति भावः । ईक्षया दृष्ट्या ॥ ५० ॥ आद्यसमासे क्लिष्टकल्पनां मन्वानः समासांतरमाह—यद्वेति । स्मृतिरत्र 'अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ' इति गर्गाचार्यवचनस्मरणम् । केनापीदमुक्तं वचनं तेन सर्वैर्ज्ञातं श्रीकृष्णेनैव पुनर्जीविता वयमिति ॥ ५१ ॥ विषं सविषं जलम् । विषं विद्यतेऽत्रेति मत्वर्थीयोऽच्प्रत्ययः । परेतस्य मृतस्यात्मनः यत्पुनरुत्थानं तद्गोविंदानुग्रहेक्षितम् । अन्वमंसत ज्ञातवंतः । हे राजन्निति भवादृशामेतद्युक्तमिति भावः । यथा त्वमात्मनोश्वत्थामास्त्रहतस्य पुनरुज्जीवनं कृष्णानुग्रहं मनुषे तथा तेऽपीति भावः ॥ ५२ ॥ अत्र धेनुकवधलीलायां श्रुतिमाह—"समिंद्र गर्दभं समृणे" इति । अर्थः—हे इंद्र गर्दभं तद्रूपं धेनुकं समृण मारयेत्यर्थः ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पञ्चदशोऽध्यायः ॥ १५ ॥ अथ श्रुतिप्रोक्तं कालियदमनमाह—"योहन्नहिमन्वपस्ततर्देत्यपादहस्तो अपृतन्यदिद्रम्" इति । अर्थस्तु—योऽहिः सर्पोऽपो यमुनाजलानि ततर्द विषसंपर्केण नाशितवान्, तमिंद्रोऽहन् हिंसितवान् पीडनमात्रमत्र हंत्यर्थः । स चाहिरपात् पादहीनः अहस्तः श्वसन् इंद्रम् अपृतन्यत् अयोधयत् । इयमेवाहिरूपत्वाद्वृत्रस्य तद्वधमप्याह।अत्रेंद्रः कृष्णस्तत्र वासव इति ॥ निग्रहो दंडः । तत्पत्नीभिः कालियभार्याभिः (१) । जग्ध्वा भुक्त्वा । अलं प्रीतोऽतिप्रीतः । फणारंगे स्फटारूपक्रीडाभूमौ । कलानां नृत्यादीनां वक्ष्यमाणानां निधिराधारः (२) । श्रीशुक इह श्रीपदेन शुको यथाज्ञातमेव वदति तथा सोऽपि व्रजजनदुःखानुसंधानेन विस्तार्य नोवाच राज्ञः श्रीकृष्णप्रियत्वात् । कृष्णाहिना श्यामसर्पेण । कृष्णाम् यमुनाम् "कृष्णा स्याद्द्रौपदी नीली कालिन्दी मरिचेषु च । कणाद्राक्षासुभद्रासु" इति धरणिः । तस्याः कृष्णायाः । विशुद्धिम् निर्विषतोयताम् ॥ १ ॥ सः कालियः । अगाधेऽतलस्पर्शे । सर्पविशेषणत्वे त्वजलचरस्य जले चिरं स्थित्यसंभवात्प्रकारांतरमाह—अथ वेति । यथा येन प्रकारेण बहुयुगावासं बहुयुगान्यावासो यत्र तद्बहुयुगावासं स्यात्त

४—'प्रधाने तूद्वहो मतः' इति धरणिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मन्भगवतस्तस्य भूम्नः स्वच्छंदवर्तिनः ॥ गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥ ३ ॥ श्रीशुक उवाच ॥ कालिंद्यां कालियस्यासीद्ध्रदः कश्चि
द्विषाग्निना ॥ श्रप्यमाणपया यस्मिन्पतंत्युपरिगाः खगाः ॥ ४ ॥ विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियंते तीरगा यस्य प्राणिनः स्थिरजं
गमाः ॥ ५ ॥ तं चंडवेगविषवीर्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ॥ कृष्णः कदंबमधिरुह्य ततोऽतितुंगमास्फोटय गाढरशनो न्यपतद्वि
षोदे ॥ ६ ॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः ॥ पर्यक्प्लुतो विषकषायविभीषणोर्मिर्धावन्धनुःशतमनंतबलस्य किं
तत् ॥ ७॥ तस्य ह्रदे विहरतो भुजदंडघूर्णवार्घोषमंग वरवारणविक्रमस्य॥ आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः॥
॥ ८ ॥ तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यम् ॥ क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्मसु रुषा भुजया चछाद॥९॥

येन प्रकारेण स वै तत्रासीदिति कथ्यताम् ॥२॥ गोपालेन यदुदारं चारितमाचरितं तदेवामृतम् अतः कथ्यतामिति ॥३॥ श्रप्यमाणं पच्यमानं पयो यस्य सः।अत उपरि गच्छंतः खगा यस्मिन्पतंति ॥ ४ ॥ किं च । विप्रुष्मता अंबुकणयुक्तेन विषोदतरंगस्पर्शितमारुतेन स्पृष्टा यस्य तीरगा म्रियंते स ह्रद आसीदिति ॥ ५ ॥ तं कालियम् । चंडो वेगो यस्य तादृशं विषमेव वीर्यं सामर्थ्यं यस्य तम् । कदंबमिति भाविना श्रीकृष्णचरणस्पर्शभाग्येन स एकस्तत्तीरे न शुष्क इति ज्ञातव्यम् । अमृतमाहरता गरुत्मताऽऽक्रांतत्वादिति च पुराणान्तरम् । आस्फोटय बाहुं करतलेनाहत्य गाढा दृढं बद्धा रशना कटिबंधनवस्त्रं येन सः ॥६ ॥ तदा सर्पस्य ह्रदः पुरुषश्रेष्ठस्य पतनभारेण संक्षोभितानामुरगाणां विषैरुन्नतोंबुराशिर्यस्य सः । विषेण कषायीकृता भयंकरा ऊर्मयो यस्य सः। पर्यक् परितो धावन् धनुःशतं प्लुतः प्रसृतः । नैतच्चित्रमित्याह । अनंतबलस्येति ॥७॥ ह्रदे विहरतो भुजदंडाहतोदकघोषं श्रुत्वा ततः स्वसदनाभिभवं निरीक्ष्य तदसहमानः सर्पः समसरत् समाजगम॥८॥प्रेक्षणीयश्च सुकुमारश्च घनवदुज्ज्वलश्च तं श्रीवत्सपी

थेतीहार्थेन गृह्णाति–तेन प्रकारेणेति । तत्र कृष्णयाम् । आसीद्बभूव। इति कोर्थः स प्रकारः कथ्यताम् । हे विप्र परमविद्याप्रवीणत्वात्त्वं सर्वं जानासीति भावः। ''जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभिः श्रोत्रियलक्षणम्॥''इति याज्ञवल्क्यात् ॥२॥ हे ब्रह्मन्निति त्वं साक्षाद्ब्रह्मरूपत्वेनान्यप्रबोधनेऽपि समर्थोऽसीति भावः । एवं श्लेषेण सर्वभक्तश्रोत्रादीन्द्रियाणां च पालनेनोदारं सुखदातृ चरितमिति। स्वानां स्वस्य वा छंदेन वर्त्तितुं शीलमस्येति तथा तस्य । जुषन् सेवमानः ॥ ३ ॥ 'कालिंद्या ह्रदः' इति हरिवंशोक्तेर्योजनप्रमाणस्तस्या दक्षिणभागे वर्त्तमानस्तद्वर्त्तजस्तत्प्रवाहास्पृष्ट एव, अन्यथा तद्विषसंपृक्तजलवती सा मथुरादिदेशस्थजनैर व्यवहार्य्यैवाभाविष्यदिति ज्ञेयम् । ह्रदः अगाधजलवद्वृत्तविशेषः । 'तत्रागाधजलो ह्रदः' इत्यमरः ॥ ४ ॥ अत्रान्यदाह–किं चेति । यस्य ह्रदस्य । अभिमर्शिताः स्पृष्टाः ॥ ५ ॥ चंडस्तीक्ष्णो वेगः । तेन कालियेन । ततः कदंबात् । अतितुंगात् अत्युच्चात् । ह्रद इति शेषः ॥६॥ तदा पतनकाले । कषायीकृताः क्वाथताः । यद्वा–विषकषायेण विषरागेण विभीषणा ऊर्मयो यस्येति ''क्वाथे रागे कषायोऽस्त्री निर्यासे सौरभे रसे'' इति यादवः। किं तत्, न किमपीत्यर्थः । लक्षयोजनविस्तारायामपरिमितभूप्लावनमपि तत्र नाद्भुतावहमिति भावः । 'षण्णवत्यंगुलं धनुः' इत्यमरः । 'धनुर्हस्तचतुष्टयम्' इति च ॥ ७ ॥ अंग हे नृप । वरवारणो गजेंद्रस्तद्वद्विक्रमस्य । यद्वा–अंगैरवयवैर्वरः श्रेष्ठो यो वारणस्तत्समविक्रमस्य । ततः श्रीकृष्णात् । स्वसदनाभिभवम् स्वस्थानपराभवम् । समाजगाम बाधितुमाजगामेत्यर्थः।''वरः श्रेष्ठे विट्पतौ च देवादेरीप्सिते वृते'' इति यादवः॥८॥तम् कृष्णम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः ॥ कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥
गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः ॥ कृष्णे न्यस्तेक्षणा भीता रुदंत्य इव तस्थिरे ॥ ११ ॥ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः ॥
उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥ तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोगमाः ॥ विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम् ॥
॥ १३ ॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः ॥ तत्प्राणास्तन्मनस्कास्ते[१] दुःखशोकभयातुराः ॥ १४ ॥ आबालवृद्धवनिताः सर्वेंग पशुवृत्तयः ॥
निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः ॥ १५ ॥ तांस्तथा कातरान्वीक्ष्य भगवान्माधवो बलः ॥ प्रहस्य किंचिन्नोवाच प्रभावज्ञोऽनुजस्य सः ॥
॥ १६ ॥ तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः ॥ भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटम् ॥ १७ ॥ ते तत्रतत्राब्जयवांकुशाऽशनिध्वजोपपन्नानि
पदानि विश्पतेः ॥ मार्गे गवामन्यपदांतरांतरे निरीक्षमाणा ययुरंग सत्वराः ॥ १८ ॥

तद्वसनं ह्रदे विहरतः श्रीवत्सेन संयुक्तमुच्चलत्पीतं वस्त्रं यस्य तं भुजया भोगेन चच्छादावेष्टयत् ॥ ९ ॥ स प्रियो येषां ते तत्प्रियास्ते च ते सखायश्चेति तथा ॥ १० ॥ ११ ॥ भुवि भूकंपादयः दिवि उल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः । आसन्नं भयं शंसितुं शीलं येषां ते ॥ १२ ॥ तानालक्ष्य गोकुलान्निर्जग्मुरिति तृतीये नान्वयः । भयोद्विग्ना भयहेतुभ्यो भीताः भयेन कंपमाना इति वा ॥ १३ ॥ न तं हरिं विदंतीत्यतद्विदः ॥ १४ ॥ पशुवृत्तयोऽतिवत्सलाः ॥ १५ ॥ कातरान् भीतान् ॥ १६ ॥ भगवंतं लक्षयंति यानि पदानि तैः पदैः सूचितया पदव्या मार्गेण ॥ १७ ॥ पदैर्मार्गज्ञानप्रकारमाह । त इति । विश्पतेः श्रीकृष्ण

अवदातः श्यामः "अवदातोऽरुणे पीते श्वेते श्यामे निरामये" इति शाश्वतः । मर्मसु यत्र ताडनादिनाऽतीव पीडा मृत्युर्वा जायते तत्स्थानं मर्मेति । अप्रतिभयम् निर्भयम् । भुजयोर्भोगेन शरीरेण "भोगः सुखे धने चाहेः शरीरफणयोरपि" इति मेदिनी । भुजति कुटिलीभवतीति भुजा 'भुजो—कौटिल्ये' इगुपधत्वात्कः ॥ ९ ॥ सः श्रीकृष्णः । परिवीतं परिवेष्टितम् । न दृष्टा चेष्टा हस्तपादादिचालनरूपा यस्य तम् ॥ १० ॥ वत्सतर्यः गर्भाधानयोग्यवयसः ॥ ११ ॥ आसन्नम् निकटम् ॥ १२ ॥ तान् उत्पातान् । भयहेतुभ्यो महोत्पातेभ्यः । 'लक्षणातो वरा शक्तिः' इत्युक्तिमाश्रित्य समासांतरमाह—भयेनेति । उद्विग्ना इति 'ओविजी—भय चलनयोः' अतः क्तप्रत्ययः, तस्य नत्वं च ॥ १३ ॥ तैर्भूकंपादिभिः । अतद्विदः कृष्णमाहात्म्यमजानंतः । तस्मिन् कृष्णे इंद्रियाणि येषां ते तथा । नितरां धनं श्रीयमुनाह्रदरूपं स्वविहारास्पदमिति सरस्वतीसंवादः ॥ १४ ॥ बालानभिव्याप्याबालं तत्प्रभृति ये वृद्धा वनितास्ते आबालवृद्धवनिताः । पशुवद्दृष्टिमात्राद्व्यवहारो येषां ते तथा ॥ १५ ॥ तान् बालादीन् । तथा रोदनादिप्रकारेण । माधवो मधुवंशोद्भूतः । स बलः । अनुजस्य कृष्णस्य प्रभावज्ञः अयं तु साक्षात्सर्वसर्पेश्वरशेषशायी कथमेनमन्यः सर्पः पीडयितुं कल्प इति ज्ञानवानित्यर्थः । भगवान्सर्वशक्तियुक्तोऽपि माधवः सर्वविद्यापतिरपि असमर्थ इव न किञ्चिदुपदिष्टवान् किन्तु तद्दुःखेन दुःखेपि तेषा मेव किञ्चिद्धैर्यार्थम् प्रकटं बहिरेव हिंसित्वा तूष्णीमासीत् । अयं निजानुजस्य तत्त्वज्ञः स्निग्धश्च हसतीति नात्र चिंतेति बोधयितुमित्यर्थः । यद्वा—शेषरूपेण मया क्रीडां त्यक्त्वा प्राकृतक्षुद्रकालियसर्पाधमेन क्रीडास्य रोचत इति प्रहसने हेतुर्ज्ञेयः । नन्वीदृशे संकटेऽपि कथं स्वसामर्थ्यं न व्यंजितवान्, न च तत्प्रभावं स्पष्टमुपदिष्टवांस्तत्राह—प्रभावज्ञ इति । तदिच्छां विना तत्कर्तुं न शक्तवानित्यर्थः । माधवपदार्थस्तु श्रीहरिवंशे—"मा विद्या च यतः प्रोक्ता तस्या ईशो यतोऽभवत् । तस्मान्माधवनामापि धवः स्वामीति कीर्त्तितः ॥" इति विश्वनाथसंदर्भतोषिणीकाराः ॥ १६ ॥ लक्षयंति सूचयंति पद्मध्वजादिचिह्नैः ॥ १७ ॥ ते गोपाः । विशां प्रजानां नंदस्य

१ तदिन्द्रियास्तन्मनस्का इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्ह्रदे भुजगभोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते ॥ गोपांश्च मूढधिषणान्परितः पशूंश्च संक्रंदतः परमकश्मलमापुरार्ताः॥१९॥गोप्यो
ऽनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः ॥ ग्रस्तेऽहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकम् ॥
॥ २० ॥ ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः ॥ तास्ताः व्रजप्रियकथाः कथयंत्य आसन्कृष्णाननेऽर्पितदृशो मृत
कप्रतीताः ॥ २१ ॥ कृष्णप्राणान्निर्विंशतो नंदादीन्वीक्ष्य तं ह्रदम् ॥ प्रत्यषेधत्स भगवान्रामः कृष्णानुभाववित् ॥ २२ ॥ इत्थं स्वगोकुलमनन्यगतिं
निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः ॥ आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा मुहूर्तमुदतिष्ठदुरंगबंधात् ॥ २३ ॥

स्यान्येषां पदानामंतरांतरे मध्येमध्ये तत्तदपोहेन गवां श्रुतीनां मार्गे सत्वरा अप्रमत्ता योगिनस्तत्तदुपाध्यपवादेन यथा परं तत्त्वं मृगयंते तद्वदिति भावः ॥ १८ ॥
ततश्च सर्पशरीरवेष्टितं कृष्णं दूरान्निरीक्ष्य गोपांश्च पशूंश्च तथा तथा निरीक्ष्यार्त्ताः परमकश्मलं परं मोहं प्रापुः ॥ १९ ॥ प्रियेण श्रीकृष्णेन व्यतिहृतं विरहितं त्रैलोक्यं
शून्यं ददृशुः ॥ २० ॥ २१ ॥ २२ ॥ अनन्यगतिमात्मानमित्थं निरीक्ष्यात एवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञायोरगबंधादुदतिष्ठदित्यन्वयः ॥ २३ ॥

वैश्यजातीयत्वाद्वैश्यानां वा पतेः 'वयं गोवृत्तयोऽनिशम्' इत्युक्तेः । तत्रतत्र स्थानेस्थाने । अशनिर्वज्रम् । अन्येषाम् गवादीनाम् । अंतरश्चांतरश्चानयोः समाहारोंतरांतरम्, तस्मिंस्तथा मध्येमध्ये इत्यर्थः । तत्तदपोहेन
तेषांतेषां गोपदानां गोपपदानां चापोहेन त्यागेन । गोशब्दस्य श्रुतिवाचकत्वं वाग्वाचित्वाद्बोध्येयम् । श्रुतीनाम् वेदानाम् । मार्गे विचाररूपे । अप्रमत्ताः सावधानाः । तत्तदुपाध्यपवादेन अन्नमयाद्युपाधिनिराकरणेन । परं
तत्त्वं शुद्धं ब्रह्म ''ब्रह्म पुच्छं प्रतिष्ठा'' इत्येवं पुच्छरूपत्वेनान्वेषयंतीति । तद्वदित्यत्र गवां धेनूनां मार्गेऽध्वन्यपि तथैवान्वेषयामासुः।इति भाव इति । संकलितान्तर्गतं संकलितापाकरणं विना न लभ्यत इति तात्पर्यम् ॥१८॥
ततश्च अनंतरं च । तथातथा मूर्छया पतितान् संक्रंदतश्च । निरीहम् निश्चेष्टम् । अंतर्ह्रदे ह्रदमध्ये । जलाशयांते ह्रदसमीपे । भो बालका वृत्तांतं तावत्कथयत–किं कालियेनैव तीरादाकृष्य कृष्णो जले पातितः किं वा
कृष्ण एव तीरादवप्लुत्य जले पतितस्तत्रापि स्वबुद्ध्याऽन्यस्य कस्यचिदुपदेशेन वेत्यादिप्रश्ने मूढधिषणान् किमपि वक्तुमसमर्थान् गोपान्वीक्ष्य परमकश्मलं तन्मूर्च्छातोऽपि सकाशादधिकां मूर्च्छामापुरित्यर्थः ॥ १९ ॥ शून्यम्
असत्तुल्यम् ''शून्यमंकासने खे च श्वसमूहे वितथे तथा'' इति धरणिः ॥ २० ॥ ता गोप्यः । कृष्णमातरं यशोदाम् । शुचोऽश्रूणि । स्रवंत्योऽश्रुधारयानदीं कुर्वंत्यः । व्रजप्रियस्य कृष्णस्य कथाः तास्ताः पूतनावधादिरूपाः
वा व्रजस्य प्रियकथाः–पूतनाद्या महादुष्टा अनेन बहवो हता अयं सर्पस्तेष्वेकः को नाम वराक एनं हत्वाऽधुनैवायास्यतीति तन्मात्राश्वासनार्थमिति जीवगोस्वामिनः । 'प्रतीकोऽपघने तुल्ये' इति धरणिः । मृततुल्या इति॥२१॥
तद्ध्रदम् कालियह्रदम् । स प्रसिद्धः । प्रत्यषेधदिति–भो आर्यपादाः 'अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ' इति श्रीगर्गवचनादस्य त्वेतादृशदुर्गोत्तरणं किं चित्रमिति विचार्य विवेकं भजतयुष्मासु ह्रदं प्रविष्टे पश्चात्स्वस्यागतस्यास्य
मदनुजस्य लालनपालनादिकं कैः कर्त्तव्यम्, 'गोपायस्व समाहितः' इति गर्गमहर्षिनिदेशलंबने प्रवृत्ताः कथं स्थेत्यादिवाक्यैरित्यर्थः । ननु तेषां सर्वेषां प्रतिषेधं कर्तुं स कथं शक्तस्तत्राह–भगवान् सर्वशक्तियुतः । कांश्चिदुक्त
युक्त्या कांश्चिद्बलेन कांश्चिदंतःप्रेरणया च । अत एव सर्वरमणद्रामः । ननु सोऽपि कथं स्वस्थस्तत्राह–कृष्णस्य सर्वदुःखकर्षकस्य सदानंदमूर्तेरनुभाववैभवं दुष्टदलनादिरूपं वेत्तीति तोषिणी ॥ २२ ॥ इत्थम् सर्पवेष्टितम् ।
नान्यो गतिस्त्राता यस्यासौऽनन्यगतिस्तम् । सर्वरक्षकत्वे सति सर्वारक्ष्यं निरीक्ष्य विमृश्य । अत एव अनन्यगतित्वादेव । आत्महेतोः मदर्थम् । उरंगबंधादहिवेष्टनात् । उदतिष्ठत् पृथग्बभूव । गोकुलपक्षे त्वमो।लुगभाव आर्षः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्प्रथ्यमानवपुषा व्यथितात्मभोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान्भुजंगः ॥ तस्थौ श्वसञ्छ्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः ॥ २४॥ तं जिह्वया द्विशिखया परिलेलिहानं द्वे सृक्किणी ह्यतिकरालविषाग्निदृष्टिम् ॥ क्रीडन्नमुं परिससार यथा खगेंद्रो बभ्राम सोऽप्यवसरं प्रसमीक्षमाणः ॥ २५ ॥ एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरस्स्वधिरूढ आद्यः ॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादांबुजोऽखिलकलादिगुरुर्ननर्त ॥ २६ ॥ तं नर्तुमुद्यतमवेक्ष्य तदा तदीयगंधर्वसिद्धसुरचारणदेववध्वः ॥ प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥२७॥ यद्यच्छिरो न नमतेंगशतैकशीर्ष्णस्तत्तन्ममर्द खरदंडधरोंघ्रिपातैः ॥ क्षीणायुषो भ्रमत उल्बणमास्यतोऽसृङ् नस्तो वमन्परमकश्मलमाप नागः ॥ २८ ॥ तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसतो रुषोच्चैः ॥ नृत्यन्पदाऽनुनमयन्दमयांबभूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः ॥ २९ ॥

तस्य प्रथ्यमानेन वपुषा व्यथितात्मशरीरो भुजंगः सर्पः कुंडलीमुन्मुच्य तं त्यक्त्वा कुपितः स्वफणानुन्नमय्य श्वसन्केवलमीक्षमाणस्तस्थौ।कथंभूतः।श्वसनरंध्रेषु नासाविवरेषु विषं यस्य स तथा अंबरीषो मंडकपाकभाजनं तद्वत्संतप्तानि स्तब्धानीक्षणानि यस्य स तथा उल्मुकानि मुखेषु यस्य स च स च स च॥२४॥हरिश्च क्रीडंस्तममुं सर्पं परिससार परितो बभ्राम । अतिकरालविषाग्नियुक्ता दृष्टिर्यस्य तम् । जिह्वया द्विशिखयेति प्रतिमुखम् ॥२५॥ एवं परिभ्रमेणैव हतमोजो यस्य तम् । उन्नतावंसौ यस्य तम् ।तस्य मूर्धसु ये रत्ननिकरास्तेषां स्पर्शेनात्यरुणं पदांबुजं यस्य सः । ननु कथं चंचलेषु शिरस्सु ननर्त तत्राह । अखिलकलानामादिगुरुः ॥ २६ ॥ उपसेदुः प्राप्ताः ॥ २७ ॥ शतैकशीर्ष्णः शतमेकानि मुख्यानि शीर्षाणि यस्य तस्य क्षीणायुषोऽपि पुनर्भ्रमतो यद्यच्छिरो न नमते स्तब्धतां न त्यजति । नृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द तदा चास्यतो मुखेभ्यो नस्तो नासाविवरेभ्यश्चासृग्वमन् ॥ २८ ॥ पुनरपि रुषा उच्चैर्निःश्वसतो यद्यत्समुन्नमति, तत्तत्पदाघातेनानुनमयन्निहास्मिन्नवसरे हृष्टैर्गंधर्वादिभिः शेषासनः

सकलाः स्त्रियः कुमाराः सस्त्रीकुमारमिति साकल्येऽव्ययीभावः। मुहुर्त्तं स्तब्ध इव स्थित्वा किं रे कालिय त्वया विक्रमसर्वस्वं दर्शितोहं संप्रति गोपबालकोऽप्ययं विक्रमलवं दर्शयति पश्येत्युक्त्वोरंगबंधादुदतिष्ठत्पृथग्भवितुमुद्यतोऽभूत् ॥ २३ ॥ प्रथ्यमानेन वर्द्धमानेन। 'मंडकं सूक्ष्मरोटिके' इति शाश्वतः । तताय इति प्रसिद्धम् । यद्वा–अंबरीषो भ्राष्ट्रम् अन्नभर्जनार्थं रचितो गृहाकारयंत्रः 'क्लीबोंबरीषं भ्राष्ट्रो ना' इत्यमरः। ॥ २४ ॥ तं कालियम् । अमुम् अंगुलिनिर्दिष्टम् । सृक्किणी ओष्ठप्रांतौ । सोऽपि सर्पोपि बभ्राम ॥ २५ ॥ एवम् ग्रहणार्थम् । नर्त्तनासंभवं मत्वाशंकते–नन्विति । अखिलानां रज्ज्वाद्युपरि तननृत्यादीनां कलानां विद्यानां प्रथमाचार्यः ॥ २६ ॥ नर्तुम् नर्त्तितुम् । वर्णलोपः छांदसः । तदा नर्त्तनकाले । तदीया भगवदीया एव गंधर्वादयस्तस्य सर्वेश्वरत्वात् । "एष सर्वेश्वरः" इति श्रुतेः । पुष्पोपहारः पुष्पवृष्टिः । उपसेदुः सिषेविरे ॥ २७ ॥ शतमेकानि मुख्यानि शिरांसि यस्य तस्याग्रे फणासहस्रोक्तेः । क्षीणायुषोपि क्षीणबलस्यापि "आयुर्वै घृतम्" इत्यत्रायुःशब्दो बलपरोस्ति यथा तथात्रापि । स्तब्धताम् । उच्चताम् परमकश्मलम् अतीवक्लेशं 'कश्मलं क्लेशपापयोः' इति धरणिः ॥ २८ ॥ गरलम् विषम् । समुन्नमति उच्चैर्भवति । तत्तच्छिरः । गंधर्वाणां देवयोनित्वेन भ्रमोऽनुचित इति मत्वा प्रकारांतरेणाह–यद्वेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरु वमन्नृप भग्नगात्रः ॥ स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ॥३०॥ कृष्णस्य
गर्भजगतोऽतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रम् ॥ दृष्ट्वाऽहिमाद्यमुपसेदुरमुष्य पत्न्य आर्ताः श्लथद्वसनभूषणकेशबंधाः ॥ ३१ ॥ तास्तं सुवि
ग्नमनसोऽथ पुरस्कृतार्भाः कायं निधाय भुवि भूतपतिं प्रणमुः ॥ साध्व्यः कृतांजलिपुटाः शमलस्य भर्तुर्मोक्षेप्सवः शरणदं शरणं प्रपन्नाः ॥ ३२ ॥
नागपत्न्य ऊचुः ॥ न्याय्यो हि दंडः कृताकल्बिषेऽस्मिंस्तवावतारः खलनिग्रहाय ॥ रिपोः सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् ॥ ३३ ॥

पुराणः पुरुष इव यशोदानंदनः पुष्पैः प्रपूजितः यद्वा तदा गंधर्वादिभिः पुष्पैः प्रपूजितो गोपैः पुराणः पुमानिव दृष्ट इति । यद्वा पुष्पैः प्रपूजित इव प्रसन्नः सन्दमयांबभूव ।
हितं कृतवानित्यर्थः ॥ २९ ॥ अरणं शरणम् ॥ ३० ॥ गर्भे जगंति यस्य तस्यातिभारेणावसन्नमाक्रांतम् । पार्ष्णिः पादपृष्ठम् । आद्यं श्रीकृष्णम् । श्लथंतो विस्रंसमाना
वसनादयो यासां ताः ॥३१॥ ताः शरणं प्रपन्नाः सत्यस्तं प्रणेमुः । सुविग्नमनसोऽतिविह्वलचित्ताः । भुवीति । तस्मिन्स्थाने जलाधस्ताद्वा तीरे वा । शमलस्य पापात्मनोऽपि
भर्तुर्मोक्षेप्सवः भर्तुर्यच्छमलं तस्य वा भूतपतिं प्राणिमात्रस्य पतिम् शरणदमाश्रयप्रदम् ॥ ३२ ॥ प्रथमं तावत्कुपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तुवंति । न्याय्यो
हीति । तत्र "दंडानुमोदनं षड्भिर्दशभिश्च हरेर्नतिः ॥ प्रार्थनं पंचभिः श्लोकैस्ततः पन्नगयोषिताम् ॥ १ ॥" न च निग्रहानुग्रहलक्षणं वैषम्यं तवास्तीत्याहुः । धत्से

गोपानामपि वस्तुतो देवर्षित्वे तत्रापि स नोचित इति मत्वा पुनराह—यद्वेति । इत्यर्थ इति । "परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः" इति न्यायेन तद्धितमेव चकारेति भावः ॥ २९ ॥ तस्य कृष्णस्य चित्रतांडवेनाद्भुत
नृत्येन रुग्णं भुग्नं फणातपत्रं फणरूपच्छत्रं यस्य सः । उरु महत् । भग्नगात्रो मर्दितांगः । तम् श्रीकृष्णम् । परमभक्ताभिस्तत्पत्नीभिः कृपारूपं भक्तिबीजं पूर्वमुप्तमपि पूर्वपूर्वापराधजनितक्रौर्य्यदोषव्याप्ते कालियांतःकरणे दुष्टक्षेत्र इव
प्ररोढुमसमर्थमेवासीत्, तदा तु श्रीचरणस्पर्शेन तत्कृतदंडप्राप्त्या च तत्तद्दोषक्षये सति सहसैव तद्भक्तिबीजमंकुरितं बभूवेत्याह--स्मृत्वेति । मद्वैरिणो गरुडादप्यस्य सहस्रगुणाधिकं बलं मयोपलब्धं तस्मात्तत्पत्नीभिरूपादिष्टभक्ति
कोऽयमेव परमेश्वर इति स्वीयस्मृतिगोचरीकृत्वेत्यर्थः । चराचरगुरुमित्यसाधारणं बलं दर्शयन्नहमेव परमेश्वर उपास्य इति मूढमपि मां ज्ञापयन्कृपया मच्छिरोर्पितचरणो गुरुर्भवन्प्रसीदति, तमिममहमिदानीं शरणं यामीति ।
अरणं शरणमिति चक्रवर्ती ॥ ३० ॥ गर्भजगत इति । रोमविवरांतर्निविष्टानंतब्रह्मांडत्वादिति भावः । 'क्वेदृग्विधावगणितांडवराण्डचर्यावाताध्वरोमविवरस्य' इति परमेष्ठ्युक्तेः । बहिर्मुखोऽयं भगवत्कृतदंडेन म्रियते चेन्म्रि
यतां वयं विधवा भूत्वा भगवंतं भजामेति । यदा तु भक्त्या शरणं गतस्य तस्य पत्युर्दैन्यनिर्वेदविषादवितर्कमत्वादिसंचारिलक्षणं ददृशुर्मुखाद्यगेषु तदैवाहोऽयमस्मद्भाग्यवशाद्वैष्णवोऽभूत्तदस्य रक्षणे यतामह इति संहतास्तत्र जात
स्नेहत्वादार्त्ताः श्रीमच्चरणसंनिधिमाजग्मुः ॥ ३१ ॥ ता नागपत्न्यः । तम् श्रीकृष्णम् । पुरस्कृता अग्रे कृता अर्भा बाला याभिस्तास्तथा । जलाधस्थैर्जलगतो नंतु दर्शनमृतेऽशक्य इत्यरुच्याह--तीरे वेति । यद्वा--भुवीत्युक्ते
ह्रदस्य मध्ये द्वीपोस्ति यत्र स्थितः कृष्णः कालियवेष्टितो गोकुलजनैरदृश्यतेति ज्ञेयमत्र । साध्वीनां स्त्रीणां पापेऽपि भर्तरीश्वरदृष्टिरेवोचिता न त्वन्यथा । पापदृष्टिकरणे साध्वीत्वहतेरर्थांतरमाह—भर्तुरिति । कृतांजलिपुटा इत्युक्ते
स्तासां कामरूपत्वं प्रतीयते, अन्यथा स्तुतिकरणादिकमपि दुर्घटं स्यादिति भावः ॥ ३२ ॥ कुपितानुनयकोविदा नागांगना आहुः । दंडानुमोदनम् दंडप्रशंसा । षड्भिः श्लोकैरष्टत्रिंशदंतैः, ततो दशभिरष्टचत्वारिंशदंतैः, ततः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुग्रहोऽयं भवता कृतो हि नो दंडोऽसतां ते खलु कल्मषापहः ॥ यद्दंदशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव संमतः ॥ ३४ ॥ तपः सुततं किमनेन पूर्वं निरस्तमानेन च मानदेन ॥ धर्मोऽथ वा सर्वजनानुकंपया यतो भवांस्तुष्यति सर्वजीवः ॥ ३५ ॥ कस्यानुभावोऽस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वांछया श्रीर्ललनाचरत्तपो विहाय कामान्सुचिरं धृतव्रता ॥ ३६ ॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा वांछंति यत्पादरजःप्रपन्नाः ॥ ३७ ॥ तदेष नाथाऽऽप दुरापमन्यैस्तमोजनिः क्रोधवशोऽप्यहीशः ॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ॥ ३८ ॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥

दममिति । अनुशंसन्नालोचयन् ॥ ३३ ॥ निग्रहोऽप्यनुग्रहायेत्युक्तमिदानीमनुग्रह एवायं न निग्रह इत्याहुः । अनुग्रह इति । नोऽस्माकं यस्मादमुष्य सर्पत्वं दृश्यतेऽतस्तन्मूलपापनिवर्तको दंडोऽनुग्रह एव क्रोधत्वेन प्रतीयमानोऽपीत्यर्थः ॥ ३४ ॥ महांश्चायमनुग्रह इति । तस्य पूर्वपुण्यमभिनंदंति । तप इति । स्वयं मानरहितेनान्येभ्यो मानदेन च । सर्वं जीवयतीति सर्वजीवः ॥ ३५ ॥ न तपआदिनिमित्त एवैष भाग्योदयः किं त्वचिंत्यं तव कृपावैभवमित्याहुः कस्यानुभाव इति श्लोकत्रयेण । तप आदिना ब्रह्मादयोऽपि यस्याः श्रियः प्रसादमिच्छंति सा श्रीर्ललना उत्तमा स्त्री यस्य त्वदंघ्रिस्पर्शाधिकारस्य वांछया तप आचरत् । अस्य सर्पस्य । किं कृत इति कोवेत्तीत्यर्थः ॥ ३६ ॥ यत्तव पादरजः प्रपन्नाः प्राप्ताः पारमेष्ठ्याद्यपि तुच्छं मन्यंते ॥ ३७ ॥ अहो तदेषः अयत्नत एव प्राप । अन्यैः श्र्यादिभिरपि । कथंभूतं पादरजः । यदिच्छतः सेव्यं मे भवत्विति प्रार्थयमानस्यैव समक्षः प्रत्यक्ष एव विभवोऽपेक्षिता संपद्भवति ॥ ३८ ॥ नमस्तुभ्यं भगवतेऽचिंत्यैश्वर्यादिगुणाय ।

पंचभिस्त्रिपंचाशदंतैः । पन्नगयोषिताम् सर्पस्त्रीणाम् (१) न्यायादनपेतो न्याय्य उचितः । अस्मिन् सर्पे । निग्रहानुग्रहकर्तृत्वेन किमहं विषमस्तत्राहुः—न चेति । रिपोः सुतानामिति षष्ठ्यौ सप्तम्यर्थे । रिपौ सुतेषु चेत्यर्थः । दमम् दंडम्, खलोऽयं दंडार्ह इत्यालोचयन्निति भावः । 'फलम्' इति पाठे तु अपराधानुरूपं फलं विचारयन्नित्यर्थः । यद्वा—रिपोः सुतानां रिपुसुतेषु अपिना स्वसुतेषु, च तुल्यदृष्टेः रिपोरपि पुत्रस्य प्रह्लादस्य शिष्टस्य पालनदर्शनात्स्वस्यापि सुतस्य नरकासुरस्य वधदर्शनाच्चेति भावः । न च खलनिग्रहेऽपि नैर्घृण्यमित्याहुः—खल इति । खलत्वहेतुकनानानरकदुःखोपशमपूर्वकनित्यसुखमयमोक्षलक्षणं फलमेव दीयते मयेत्यनुशंसन्कथयन्नेव दमं दंडं धत्स इति ॥ ३३ ॥ पूर्वं निग्रहदृष्टिरस्माकं प्रमादोऽतः क्षम्यतामित्याहुः—निग्रहोऽपीति । असताम् असद्योनिप्राप्तानाम् । यस्मात् पापात् । अमुष्य अस्मत्पतेः । दंदशूकत्वम् सर्पत्वम् । तन्मूलपापनिवर्त्तकः सर्पयोनिकारणीभूतावानिवर्त्तको दंडोऽतः पापनिवर्त्तकत्वादनुग्रह एवेति संबंधः । इत्यर्थ इति । 'क्रोधोऽपि देवस्य वरेण तुल्यः' इत्युक्तिमाश्रित्य लोकदृष्टौ निग्रहोऽपि फलतोऽनुग्रह एवेति भावः ॥ ३४ ॥ अहो अस्य भाग्यमित्याहुः—महांश्चेति । अनेन सर्पेण । पूर्वम् पूर्वजन्मनि । यतस्तपआदेः । सर्वजीवः सर्वात्मा ॥ ३५ ॥ न हि तपआदिभिस्तत्र पादधूतिर्मस्तके जायतेऽत्यंतकृपाप्राप्य इत्याहुः—न तप इति । कस्य तपआदेः कर्मणः । अनुभावः प्रभावः । सोंघ्रिरेणुस्पर्शाधिकारः । किं कृतः केन कृतः । इत्यर्थ इति । न कोपीति भावः ॥ ३६ ॥ यस्य पादरजो यत्पादरजः । तुच्छं मन्यंते मृषात्वात्, अपुनर्भववांछा तु तेषाम् ''अनिच्छतो गतिमण्वीं प्रयुंक्ते'' इति तस्यानिच्छालभ्यत्वात् । यद्वा—न पुनर्भवो यस्मात्तद्रज इति ज्ञेयम् ॥ ३७ ॥ अहो अद्भुतम् । तत्पादरज एष सर्प आप प्राप । यत्पादरजोऽपेक्षिता संपद्भवतीत्यन्वयः । ऐहिकी पारत्रिकी च विभूतिः प्रेमसंपद्वा भवतीत्यर्थः । अन्यैर्दुरापमत्र श्रुतिः—''नान्यैर्देवैर्मनसा वाचा'' इति । मनोवाक्शब्दावत्र ज्ञानकर्मेंद्रियोपलक्षकौ । मनुष्यशरीरमेव कल्याणहेतुरिति नियमस्तु नास्तीत्याह—अहीश इति । यदा भवतः कृपाकटाक्षपातस्तदैव कल्याणमिति तात्पर्यम् ॥ ३८ ॥ तत् अचिंत्यैश्वर्यादि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानविज्ञाननिधये ब्रह्मणेऽनंतशक्तये ॥ अगुणायाविकाराय नमस्ते प्राकृताय च ॥ ४० ॥ कालाय कालनाभाय कालावयवसाक्षिणे ॥ विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥४१॥ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने ॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये॥४२॥नमोऽनंताय सूक्ष्माय कूटस्थाय विपश्चिते ॥ नानावादानुरोधाय वाच्यवाचकशक्तये ॥ ४३ ॥

तदुपपादनाय दशभिः श्लोकैर्विशेषणानि । पुरुषाय पूर्ष्वंतर्यामिरूपेण वर्तमानाय । महात्मने एवमपि नातिपरिच्छिन्नाय । कुतः । भूतावासाय आकाशायाश्रयाय । एतदपि कुतः । भूताय पूर्वमपि सते । कुतः । पराय कारणाय । किं च परमात्मने कारणातीताय ॥ ३९ ॥ कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः । ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिः उभयोर्निधये ताभ्यां पूर्णाय । कथं तथात्वमत उक्तं ब्रह्मणेऽनंतशक्तये । कथंभूताय ब्रह्मणे । अगुणायाविकाराय । पुनः कथंभूतायानंतशक्तये । प्राकृताय प्रकृतिप्रवर्तकाय । अप्राकृतायेति वा अप्राकृतानंतशक्तियुक्ताय । अयमर्थः । अगुणत्वादविकारं ब्रह्म ज्ञप्तिमात्रत्वात्कारणातीतं प्रकृतिप्रवर्तकोऽनंतशक्तिर्विज्ञाननिधित्वादीश्वरः कारणं तदुभयात्मने नम इति ॥ ४० ॥ अनंतशक्तित्वात्कालशक्त्या विश्वस्रष्टृत्वादिरूपेण नमस्यंति । कालाय कालस्वरूपाय । कालनाभाय कालशक्त्याश्रयाय । कालावयवानां सृष्ट्यादिसमयानां साक्षिणे । ततश्च विश्वाय विश्वरूपाय । तर्हि किं जडोऽहं नहि तदुपद्रष्ट्रे । न च द्रष्टृमात्राय । किं तु तत्कर्त्रे । न च कर्तृमात्राय। विश्वहेतवे सर्वकारकरूपाय ॥ ४१ ॥ तदेवाहुः । भूतमात्रेति । भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने आशयश्चित्तं भूतादिरूपाय । अतः सर्वकारकरूपायेति अहंकारात्मतया नमस्यंति । त्रिगुणेनेति । एवं सृष्टे कार्ये यस्त्रिगुणोऽभिमानस्तेन गूढा स्वांशभूतानामात्मनां जीवानामनुभूतिर्येन तस्मै॥ ४ २॥त्वं त्वहंकारानावृत इति स्तुवंति । नमोऽनंतायाहंकारापरिच्छेदात् । अतः सूक्ष्मायादृश्यत्वात् । अत एव कूटस्थायोपाधिकृतविकाराभावात् । अत एव विपश्चिते सर्वज्ञाय । एवं वस्तुतः स्तुत्वाऽचिंत्यमायात्वेन स्तुवंति । नानावादानुरोधाय अस्ति नास्ति सर्वज्ञः किंचिज्ज्ञो बद्धो मुक्त एकोऽनेक इत्यादिनानावादाननुरुणद्धि माययाऽनुवर्तते

एवमपि पूर्षु वर्त्तमानत्वेऽपि । नातिपरिच्छिन्नाय अतिशयेनापरिमितायेत्यर्थः । तत्र हेतुं शंकते—कुत इति । तदपि आकाशाद्याश्रयत्वमपि । कारणस्याप्याकाशादेस्तन्मात्राकार्यत्वश्रुतेस्तस्यापि कारणांतरेण भाव्यमित्याशंकानिवृत्त्यर्थमाह—किं चेति ॥ ३९ ॥ समर्थयितुं बोधयितुम् । तथात्वम् उभयपूर्णत्वम् । अत उभयपूर्णत्वप्रतिपादनाय । अत इति चतुर्थ्यर्थे तसिः । उक्तम् पदद्वयं—ब्रह्मणे अनंतशक्तये इति । प्रकृतिप्रवर्तकत्वे तस्य प्रयोजकत्वं मन्वानोऽर्थांतरमाह—अप्राकृतेति । प्रकृतिकार्यकर्तृत्वादिवर्जिताय । अयमर्थ इति । व्यावहारिकज्ञानस्य सकारणत्वेऽपि परमार्थज्ञानस्य कारणातीतत्वमेव, अल्पज्ञस्य सृष्टिकारणताभावेऽपि सर्वज्ञस्यानंतशक्तिमतः कारणता भवत्येवेति निर्गलितोऽर्थः ॥४०॥ सतश्च सर्वसाक्षित्वाच्च यद्यहं विश्वरूपस्तर्हि जडतापत्तिस्तत्राह—नहीति। ननु केवलमुपद्रष्टैवाहं तत्राहुः—न च किं त्विति संबंधः। एवमग्रेपि ॥४१॥ तदेव सर्वकारकरूपत्वमेव। यतो भूतादिरूपोऽसि अतो हेतोः।एवम् उक्तरीत्या।सृष्टिकार्ये देहादौ।त्रिगुणोऽभिमानः सात्त्विकोऽहं ब्राह्मणोऽस्मीत्याद्याकारकाभिमानः।गूढाऽऽच्छादिता स्वांशभूतानां जीवानाम् अनुभूतिर्ज्ञानम्॥४२॥ अहंकारापरिच्छेदात् अहंकारकृत

॥ ८२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः प्रमाणमूलाय कवये शास्त्रयोनये ॥ प्रवृत्ताय निवृत्ताय निगमाय नमोनमः ॥ ४४ ॥ नमः कृष्णाय रामाय वसुदेवसुताय च ॥ प्रद्युम्नाया निरुद्धाय सात्वतां पतये नमः ॥ ४५ ॥ नमो गुणप्रदीपाय गुणात्मच्छादनाय च ॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥ ४६ ॥

यस्तस्मै । किं च । वाच्यवाचकशक्तये । अभिधानाभिधेयशक्तिभेदादपि नानात्वेन प्रतीयमानायेत्यर्थः ॥ ४३ ॥ अनावृतत्वमेव हेत्वंतरेणापि सूचयंत्यः स्तुवंति । नमः प्रमाणमूलाय । चक्षुरादीनां चक्षुरादिरूपाय । अत एव कवये स्वयं तन्निरपेक्षज्ञानाय । कुतः । शास्त्रयोनये वेदात्मकनिःश्वासाय । किं च प्रवृत्ताय निवृत्ताय निगमाय नमो नमः इति ॥ ४४ ॥ किं च अनावृतैश्वर्यत्वादेव चतुर्मूर्तिरूपेण सर्वोपास्यत्वेन नमंति नमः कृष्णायेति श्लोकेन । रामाय संकर्षणाय । वसुदेवसुताय च वसुदेवशब्दितं शुद्धं सत्त्वं तत्र प्रकाशमानाय वासुदेवायेत्यर्थः । सात्वतामेतदुपासकानां पतये सालोक्यादिना पालकाय । एवं चतुर्मूर्तये कृष्णाय तुभ्यं नम इति ॥ ४५ ॥ कथं चतुर्मूर्तितेति तदाहुः । नमो गुणप्रदीपायेति । गुणा अंतःकरणानि तान् प्रदीपयति प्रकाशयतीति तथा तस्मै । चित्ताद्यधिष्ठातृत्वेन चतुर्मूर्तितेत्यर्थः । ननु तथाऽप्येकस्यैव कथं चतुष्ट्वमत आहुः । गुणात्मच्छादनाय तैरेव गुणैरुपासकानां फलवैचित्र्यायात्मानमाच्छाद्य नानात्वेन प्रकाशमानायेत्यर्थः । ननु तर्हि कथं प्रतीतिरत उक्तं गुणवृत्त्युपलक्ष्याय चित्तादीनां चेतनाध्यवसायादिवृत्तिभिरुपलक्ष्याय । उपलक्षणमेवाहुः । गुणद्रष्ट्रे तत्साक्षिणे । कथंचिदुपलक्ष्य एव न तु ज्ञेय यत्याहुः स्वसंविदे । आगोचरायेत्यर्थः ॥ ४६ ॥

परिच्छेदाभाववत्त्वात् । अतः परिच्छेदाभावात् । अत एव अदृश्यत्वादेव । अत एव उपाधिकृतविकाराभावादेव । अनुरुणद्धि अनुसरति । नानात्वेऽन्यदप्याह—किं चेति । इत्यर्थ इति । वाच्यवाचकभेदोऽपि नानात्वप्रतीतौ हेतुरिति भावः । ॥ ४३ ॥ अनावृतत्वम् आवरणहीनत्वम् । चक्षुरादिरूपाय "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्यादिश्रुतेः । यद्वा—प्रमाणानां प्रत्यक्षादीनां मूलाय प्रतिष्ठापकाय । "प्रमाणमिंद्रियग्रामे प्रत्यक्षादौ प्रमातरि । मर्यादा नित्यशास्त्रेयत्तासत्ये हेतुमानयोः ॥" इति विश्वः । अत एव चक्षुरादिप्रकाशकत्वादेव । तन्निरपेक्षज्ञानाय चक्षुरादिनिरपेक्षज्ञानाय । तत्र हेतुं शंकते—कुत इति । यद्वा—शास्त्रं योनिर्ज्ञप्तिकारणं यस्य तथा । "योनिः स्त्रीणां भगे स्थाने कारणे ताम्रके पणे" इति यादवः । यद्वा—निर्देशकारणाय इदं कुर्यादिदं नेत्यादिनिर्देशस्य कर्त्रे 'निर्देशग्रंथयोः शास्त्रम्' इत्यमरः । प्रमाणस्य वेदस्यापि मूलाय श्रीभागवतस्वरूपाय, चतुश्लोक्युपदेशानंतरमेव ब्रह्ममुखेभ्यो वेदानामाविर्भावात् । कवये तदाविर्भावकर्त्रे व्यासदेवाय नम इत्यर्थः । 'व्यासः प्राकट्यकृन्मतः' इति सिद्धांतदर्पणोक्तेः । शास्त्रं श्रीभागवतमेव प्रमाणं ज्ञप्तिसाधनं वा यत्रेत्यपि विश्वनाथः । न हि केवलं शास्त्रयोनिरेव किं तु तद्रूपमपि त्वमित्याह—किञ्चेति । प्रवृत्ताय प्रवृत्तिमार्गप्रवर्तकाय विधिरूपायेत्यर्थः । निवृत्ताय निवृत्तिमार्गप्रवर्तकाय निषेधरूपाय । यद्वा—सृष्टौ प्रवृत्ताय, प्रलये निवृत्ताय । निगमाय उभयेषां मार्गाय, विषयायेत्यर्थः । 'अयनं पदवी मार्गः पद्या च निगमः पथि' इति हलधरः । यद्वा—उभयरूपत्वे हेतुः—निगमाय वेदमूर्तये 'निगमो निश्चये वेदे परे पथि वणिक्पथे' इति यादवः ॥ ४४ ॥ वेदरूपत्वेऽपि भक्तवत्सलतया चतुर्व्यूहं दधर्थेत्याहुः—किं चेति । यद्वा—कृष्णाय सदानंदरूपाय प्रपन्नाघकर्षकाय, दैत्यादिषु वह्नये नीलवर्णाय वा "कृष्णः सीसाद्यलोहेषु कृष्णे नीलेऽनले कलौ । शूद्रे काके पिके व्यासे ध्वांते पक्षेऽर्जुने हरौ ॥" इति यादवः । रामाय अभिरामाय । प्रद्युम्नाय प्रकृष्टधनाय 'द्युम्नं द्रविणं धनम्' इति हलायुधः । ज्ञानं विना न निरुध्यते इत्यनिरुद्धस्तस्मै ॥ ४५ ॥ तदाहुः—चतुर्मूर्तिभवने प्रकारमाहुः । इत्यर्थ इति । चतुर्व्यूहं विनांतःकरणचतुष्टयाधिष्ठातृत्वं कथं घटेतेति भावः । तत्राप्याशंकते—नन्विति । तथापि चतुर्मूर्तित्वेपि । अतः अत्र । इत्यर्थ इति । शुद्धब्रह्मरूपत्वमाच्छाद्य भक्तानां यथायथा कामं तथातथा भवनशीलायेत्यभिप्रायः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अव्याकृतविहाराय सर्वव्याकृतसिद्धये ॥ हर्षीकेश नमस्तेऽस्तु मुनये मौनशीलिने ॥ ४७ ॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेऽस्य च हेतवे ॥ ४८ ॥ त्वं ह्यस्य जन्मस्थितिसंयमान्प्रभो गुणैरनीहोऽकृत कालशक्तिधृक् ॥ तत्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयाऽमोघविहार ईहसे ॥ ४९ ॥

अगोचरत्वमुपलक्ष्यत्वं च दर्शयंत्यो नमंति । अव्याकृतविहाराय अप्रतर्क्यमहिम्न इत्यर्थः । सर्वव्याकृतसिद्धये सर्वकार्योत्पत्तिप्रकाशहेतुत्वेनोपलक्षणयोग्यायेत्यर्थः । उपलक्षणांतरमाहुः हे हृषीकेश करणप्रवर्तक । किं विषयलिप्सया न मुनये आत्माराय । किं साधनवशेन वा नहि नहि मौनशीलिने मौनमात्मारामता तत्स्वभावाय ॥ ४७ ॥ कुतः । परावरगतिज्ञाय स्थूलसूक्ष्माणां गतिज्ञत्वेन न क्वापि सज्जमानायेत्यर्थः । अपि च सर्वाध्यक्षाय सर्वस्याधिष्ठात्रे । कुत एतत् । अविश्वाय न विश्वं यस्मिंस्तस्मै तन्निषेधावधये । विश्वाय च तद्विवर्ताधिष्ठानायेत्यर्थः । किं च तद्द्रष्ट्रे अध्यासापवादसाक्षिणे । अपि च अस्य विश्वाध्यासस्य तदपवादस्य च विद्याविद्याभ्यां हेतवे । यद्वा अविश्वाय विश्वतैजसाद्यवस्थारहिताय । विश्वाय च मायया स्वांशैस्तत्तदवस्थाय । तद्द्रष्ट्रे तासामवस्थानां भावाभावसाक्षिणे । अन्यत्समानम् । तस्मात्सर्वगतिज्ञत्वसर्वाधिष्ठातृत्वात्मारामत्वादिभिर्निरतिशयैश्वर्याय तुभ्यं नम इति ॥ विशेषणैरसंकीर्णैः पंचपंचाशता नुतः ॥ अहिस्त्रीभिः प्रसन्नो वस्तासामिव भवेद्धरिः ॥ १ ॥ ४८ ॥ एवं तावद्दंडानुमोदनेन नमस्कारैश्च भगवंतं प्रसाद्येदानीं त्वदधीनानां प्राणिनां कोऽपराध इत्याशयवत्यः प्रार्थयंते । त्वं हीति । अस्य लोकस्य गुणैर्जन्मादींस्त्वमेव अकृत अकरोः । ततश्च तांस्तान्संस्कारवरूपेण सतः युज्यमानान्स्वभावान्घोरत्वादीन्प्रतिबोधयन्नीहसे क्रीडसि । यद्वा अस्य जन्मादींस्त्वमीहस इत्यन्वयः ।

आत्मानमाच्छादयामि चेत्तर्हि कथमहं प्रतीय इत्याशंकते—नन्विति । इत्यर्थ इति । स्वप्रकाशस्यान्यगोचरत्वे स्वसंवित्ता भज्येतेति भावः । यद्वा—गुणाः सत्त्वाद्या भक्तिज्ञानाद्या वा तेषां ज्ञापकाय, गुणात्मा प्रकृतिरेव छादनमावरकं यस्य तस्मै, गुणैरिंद्रियादिभिरात्मनो जीवानाच्छादयतीति वा ॥ ४६ ॥ इत्यर्थ इति । व्याकृतविहारस्तर्कितुं शक्यो भवतीति त्वं तु न तथेत्यर्थः । इत्यर्थ इति । कारणं विना कार्योत्पत्तेरसंभवादित्यभिप्रायः । प्रवर्त्तकत्वं तु 'कारणं विना मंदोऽपि न प्रवर्त्तते' इति न्यायात्किञ्चिदपेक्ष्यैव भवतीति शंकते—किमिति । आत्मारामतापि साधनसंपत्त्यैवेति पुनराशंकते—किमिति । यद्वा—अव्याकृता व्याकर्त्तुमशक्याः सृष्ट्यादिविहारा यस्य तस्मै । सर्वेषु भक्तेषु व्याकृता प्रकटिता सिद्धिः स्वरूपं येन तस्मै । मुनये सर्वज्ञाय मौनशीलिनेऽसंभावितोक्तिरहिताय ॥ ४७ ॥ आत्मारामत्वे हेतुमाशंकते—कुत इति । इत्यर्थ इति । जीवेष्वपि ज्ञानिनो न कुत्राप्यासक्ता भवंति परमज्ञानिनस्तव तु कथमासक्तिर्भवेदिति तात्पर्यम् । अन्यदाह—अपि चेति । सर्वाधिष्ठातृत्वे हेतुमाशंकते—कुत एतत्, सर्वाधिष्ठातृत्वम् । इत्यर्थ इति । न हि साक्षाद्विश्वरूपत्वं किं तु विवर्त्ताधिष्ठानत्वेन तदस्तीति भावः । तत्समर्थयति—किं चेति । तत्रैवान्यदाह—अपि चेति । पूर्वव्याख्याने क्लिष्टकल्पनां मत्वाह । विश्वेत्युपलक्षणं तैजसप्राज्ञयोः । तत्तदवस्थाय विश्वादिरूपाय । यतः आत्मारामादिरूपोऽसि तस्माद्धेतोः ॥ असंकीर्णैः अमिलितैः पुनरुक्तिदोषवर्जितैः । वः युष्माकमध्येत्रध्यापकानां श्रोतृवक्तॄणाम् । तासामिव नागांगनानामिव (१)॥४८॥ एवम् उक्तविधया । श्रीकृष्ण एव दोषमादधंत्य आहुः—त्वं हीति । गुणैः सत्त्वादिभिः । आदिना शांतमू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः ॥ शांताः प्रियास्ते ह्यधुनाऽवितुं सतां स्थातुश्च तान्धर्मपरीप्सयेहतः ॥ ५० ॥ अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः ॥ क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजानतः ॥ ५१ ॥ अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः ॥ स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयताम् ॥५२॥ विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया ॥ यच्छ्रद्धयाऽनुतिष्ठन्वै मुच्यते सर्वतो भयात् ॥ ५३ ॥

कथंभूतः । अकृतानादिर्या कालशक्तिस्तां धारयतीति तथा । अन्यत्समानम् ॥ ४९ ॥ अतस्तस्य तवैवामूस्तनवस्तन्यंत इति क्रीडोपस्कराः तथापि तवाधुना शांताः प्रियाः । कुतः । सतां धर्मपरिपालनेच्छया ईहतः प्रवर्तमानस्यातस्तानवितुं स्थातुः स्थितस्य ॥ ५० ॥ एवं च तवाप्रियाचरणाद्यपराधस्त र्हि सोढव्य इति ॥ ५१ ॥ ५२ ॥ युष्मदनुग्रहेऽन्येषां मृत्युरेवेति चेत्तन्नेत्याहुः । विधेहीति । त्वदाज्ञया प्राणिनो नाद्यामेति भावः ॥ ५३ ॥

ढत्वे ग्राह्ये । त्वमकृत इह युष्मत्प्रयोगे प्रथमपुरुषः छांदसः । 'ऋजुमार्गेण' इति न्यायमाश्रित्याह—यद्वेति । ईहसे करोषि । धातूनामनेकार्थत्वादीहिरत्र करणे ॥ ४९ ॥ यतस्त्वमेवास्य कारणमतो हेतोः । तस्य कर्त्तुः । अमूः सर्पाद्याः । तथापि स्वीयतनुत्वेपि । शांताः सात्त्विका देवादयः । अशांताः राजसा मनुष्यादयः । मूढयोनयः तामसा अस्मदादयः ॥ ५० ॥ स्वामिधर्मं ज्ञापयंत्यः क्षमापयंतीत्याह—एवमिति, पूर्वोक्तरीत्या । सोढव्यः क्षंतुमर्हसीति द्विरुक्तिरादरार्था संभ्रमाद्वा । मूढस्य तामसस्य । अत्र हेतुः—त्वां सर्वेश्वरम् । शांतात्मनामेतद्देवोचितमिति संबुद्ध्यभिप्रायः । शांतलोकविप्रियकारित्वलक्षणोऽस्यापराधः सकृत्सोढव्य इति अधुना दंडयित्वा शिक्षितोऽप्ययं त्वदीयशांतजनेभ्यो यदि पुनरपरात्स्यति तदा न सोढव्य इति भावः । यद्वा—सकृदपि यो भर्ता तेनापि, त्वं तु स्रष्टृत्वादिना नित्येश्वरोऽस्यतस्त्वया तु किमुतेति भावः ॥ ५१ ॥ पद्भ्यां न गच्छत्यर्थादुरसा गच्छतीति पन्नग इत्यनेन तद्दैन्यं ध्वनितम् । साधुशोच्यानामित्युक्तेः त्वं साधुवर्योऽसि "पतिरेव हि साध्वीनां नारीणां जीवनं स्मृतम्"इत्याशयेनाह—प्राण इति । पतिजीवनपर्यंतमेव साध्वीनां जीवनम्, पत्यंते तदनुगमश्रवणादिति भावः । हे भगवन्परमदयालो । यद्वा—हे सर्वज्ञ निजकारुण्यमहिमानं स्वमायावैभवं जीवानामस्माकं दैन्यं च जानास्येवेति भावः । ननु चिकित्सास्य साध्वेव कृता रोगो गत एव किं तु रोगशेषदूरीकरणार्थं सप्ताष्टौ प्रहारा अवशिष्यंते तेषु सम्मतिर्दीयतामित्यत आहुः—अनुगृह्णीष्वेति । दोषशेषोऽस्यानुग्रहामृतप्रदानेनैव नाश्यो न तु दंडतीव्रौषधपायनेन यतोऽसौ प्राणांस्त्यजति । ननु त्यजतु किमनेन विगीतसर्पदेहेनातः परं दिव्यदेहो मद्भक्त एव भविष्यति तत्राहुः—स्त्रीणामिति । सुंदरीणामस्माकं वैधव्ये सति कश्चिदन्यः पापिष्ठः सर्पो बलात्कामयिता भविष्यतीत्यतः शोच्यानामस्माकमयमेव संप्रत्युत्पन्नवैष्णवताकत्वात्प्राणः । स्नेहास्पदीभवन्प्राणतुल्य इति विश्वनाथः । तोषिण्यां तु—हे भगवन्निति संबुद्धेरभिप्रायांतरमपि । तच्च—" अन्नं हि प्राणिनां प्राणा आर्त्तानां शरणं त्वहम् " इति प्रतिज्ञां स्मरस्येवेत्येवंरूपः । आर्त्तत्वमाहुः—प्राणानिति । यद्वा—अहो बत मा कुर्वस्मिन्ननुग्रहमस्माकं तु स उपयुक्त एवेत्याहुः—स्त्रीणां साधुभिः शोच्यानां जात्यैवास्वातंत्र्यात्, परमदैन्यं ध्वनितम् । यद्वा—साधु यथा स्यात्तथा पुनर्यथाऽपराधी न भवेदित्यर्थः । पतिरेव प्राणो जीवनं प्रकर्षेणाक्षतशरीरेणैव दीयतामिति ॥ ५२ ॥ भिन्नान्वयात् तेतवयोः पुनरुक्तिर्न शंक्येति । अनुष्ठेयम् कर्त्तव्यम् । विधेहि आज्ञापय ' विपूर्वाधा करोत्यर्थे ' इति व्याडयुक्तः । करोत्यर्थत्वेपि तमुल्लंघ्यान्यार्थोऽपि प्रकृतसंगत्या भवतीति बोधार्थमयमर्थः । यत् भवदाज्ञप्तम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः ॥ मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ॥ ५४ ॥ प्रतिलब्धेंद्रियप्राणः कालियः शनकैर्हरिम् ॥ कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ॥ ५५॥ कालिय उवाच ॥ वय खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ॥ स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ॥ ५६ ॥ त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्जनम् ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृतिः ॥ ५७ ॥ वयं च तत्र भगवन्सर्पा जात्युरुमन्यवः ॥ कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयम् ॥ ५८॥ भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ॥ ५९ ॥ श्रीशुक उवाच ॥ इत्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरम् ॥ ॥ ६० ॥ स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यते नदी ॥ य एतत्संस्मरेन्मर्त्यस्तुभ्य मदनुशासनम् ॥ ६१ ॥

॥५४॥५५॥ यदसद्ग्रह इति । यतः स्वभावोऽसद्ग्रहरूपः । यद्वा यतः स्वभावादसति देहादौ ग्रहोऽभिमानः स दुस्त्यज इति ॥५६॥ गुणैर्विविधतया सृज्यत इति गुणविसर्जनम् । तत्रापि नानास्वभावादयो यस्य तत्॥५७॥जात्या जन्मनैवोरुर्मन्युर्येषां ते वयं स्वयं कथं त्यजामः॥५८॥हि यस्मात्तत्र त्वन्मायात्यागे भवानेव कारणमित्यनुग्रहं विधेहि ममाज्ञया खादंतीति ईश्वरत्वान्निग्रहं वा विधेहीति ॥ ५९ ॥ यतो गोभिर्नृभिश्च नदी भुज्यत इति ॥ ६० ॥ न युष्मत्तो भयमाप्नुयात् तस्य युष्माभिर्भयं

सर्वतोभयात् संसारात् । इति भाव इति । प्राणिहिंसापरित्यागेन सद्गतिं लप्स्यामह इति तात्पर्य्यम् ॥५३॥ अंघ्रिकुट्टनैः पादमर्दनैः ॥ ५४ ॥ प्रतिलब्धेंद्रियप्राणः त्यक्तमूर्च्छः । कृतांजलिरिति सर्वांगव्यथावत्वाद्दंडवद्भूमौ निपत्य प्रणामासमर्थ इति ॥ ५५ ॥ असतां ग्रह इव बंधकारी मिथ्याहठरूप इति वा । स्वभावः स्वजातिधर्मः । स्वभावस्य दुराग्रहरूपत्वमसंभवं मत्वाऽर्थांतरमाह—यद्वेति । यो ग्रहो ब्राह्मणोऽहमित्याद्यभिनिवेशः । हे नाथ हे ईश्वर तमपि त्वं खंडयितुं समर्थ इति भावः ॥ ५६ ॥ तत्रापि गुणविसर्गत्वेपि । नानास्वभावा अग्नेरूर्द्ध्वज्वलनम्, वायोस्तिर्यग्गमनमित्येवमाकाराः । नानावीर्याणि मनुष्येऽन्यद्धस्तिन्यन्यदित्येवम् । ओजोऽवष्टंभः, बीजं शुक्रादि, आशयोऽभिप्रायः, आकृतिराकार एते नानाविधा यत्र संति तदित्यर्थः ॥ ५७ ॥ तत्र विश्वस्मिन् । त्वन्मायाम् क्रोधादिरूपेण परिणताम् ॥५८॥ यन्मन्यसे तद्विधेहीति संबधः । अनुग्रहम् प्रसादम् । निग्रहम् दंडम् । सर्वं निजमायावैभवादिकमस्माकं दैन्यादिकञ्च जानासीति सर्वज्ञ इत्यनुग्रहे हेतुः । जगदीश्वर इति, परमस्वतंत्र इति च निग्रहे । तथा च विष्णुपुराणे—'यथाहं भवता सृष्टम्' इत्यादि। यद्वा—सर्वज्ञ इति, निग्रहानुग्रहयोः कारणं वेत्सि, जगदीश्वर इति तयोरेकं विधेहीति। सत्यपि निग्रहकारणेऽनुग्रहमपि कर्त्तुं समर्थोसीति भावः ॥ ५९ ॥ कार्यमानुषो देवकार्यार्थं धृतनरदेहः । अत्र यमुनाह्रदे। सार्द्धेनान्वयः । कार्यं जगद्धितं तदर्थं स्वेन मानुषरूपेण प्रकटो यो भगवान् । यद्वा—कार्यं क्रीडा लीला तयैव मानुषो न तु तद्वद्भौतिकदेहविशेषत्वेनेत्यर्थः । यद्वा—कार्या निजप्रेमभक्तिविस्तारणादिना संपाद्या मानुषा येन, मानुषेष्ववतारेण तेषामेव प्राधान्यात् । अतस्तस्य मूलस्थाने श्रीवृंदावने सर्पाणां स्थितिरनुचितेति भावः । यद्वा—काद्ब्रह्मणोऽप्यार्य्याः पूज्यतमा मानुषाः श्रीनंदादयो यस्य सः । एवं तेषां सुखार्थमिति भावः । हे सर्पेति तत्र स्थित्ययोग्यत्वं याने समर्थत्वं चाह॥६०॥ स्वशब्देन तेषां तादृशदुर्विषमयत्वं तदधीनत्वं च सूचितम् यतो गवादिभिर्भुज्यते न तु सर्पैरतस्त्वं याहीति पूर्वेण संबंधः । मत्तोऽनुशासनं शिक्षा दंडोऽयत्राध्याये तं मदनुशासनम् । संध्योः संध्ययोः । सायं प्रात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥ योऽस्मिन्स्नात्वा मदाक्रीडे देवादींस्तर्पयेज्जलैः॥ उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥ ६२ ॥ द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितम् ॥ ६३ ॥ श्रीशुक उवाच ॥ एवमुक्तो भगवता कृष्णेनाद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरम् ॥ ६४ ॥ दिव्यांबरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्योत्पलमालया ॥ ६५ ॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजम् ॥ ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिवन्द्य तम् ॥ सकलत्रसुहृत्पुत्रो द्वीपमध्ये जगाम ह ॥ ६६ ॥ तदैव साऽमृतजला यमुना निर्विषाऽभवत् ॥ अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः ॥ ६७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे कालियनिर्यापणं नाम षोडशोऽध्यायः ॥ १६ ॥

नोत्पादनीयमित्याज्ञा ॥ इतोऽपि त्वया निर्गतव्यमित्याह । योऽस्मिन्निति । त्वयि स्थिते तन्न संभवतीति भावः ॥ ६१ ॥ ६२ ॥ न च तव गरुडभयं भवेदित्याह । द्वीपमिति ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ६७ ॥ इति श्री भा० म० दशमस्कंधे पूर्वार्धे टीकायां षोडशोऽध्यायः ॥ १६ ॥

रित्यर्थः । तव पादस्पर्शे मम च दंडे इत्यावयोः कीर्त्तिराचंद्रार्कं स्थास्यतीत्याह—य इति।न युष्मद्भयमाप्नुयादिति।तेन पद्यद्वयमिदं सर्पोच्चाटनमंत्र एव ज्ञेयः।तथा चर्ग्वेदस्य मंत्रांतरम् "यमुना ह्रदे।हि सो यातो यो नारायणवाहनः। यदि कालिकदंतस्य यदि काकालिकाद्भयम् ॥ जन्मभूमिपरिक्रांतो निर्विषो याति कालिकः ।" इति ॥ इतोऽप्यस्मादपि हेतोः । ममासमंतात् क्रीडा यत्र तस्मिन् ह्रदे । आदिना ऋषिपित्रादयो ज्ञेयाः । इति भाव इति । तवात्र स्थितौ पूर्ववत्कोऽपि नायास्यति स्नानादि तु दूरापास्तमित्यर्थः ॥ ६१ ॥ ६२ ॥ तस्य भयाभावं द्योतयति—न चेति । यस्य सुपर्णस्य भयात् । नाद्यान्मा भक्षिष्यति, अपि तु मत्पादचिंहं दृष्ट्वा नंस्यतीति भावः ॥ ६३॥ एवमुक्तो नाद्यादित्येवमुक्तः । तं श्रीकृष्णम् । अद्भुतकर्मणेति । कालियाद्व्रजस्थजीवस्य त्राणं कालियस्यापि गरुडात्त्राणमिति हिंस्यहिंसकयोरुभयोरपि कल्याणमित्यद्भुतं कर्म।कृष्णेनेति—स्वभक्तगरुडापराधस्य स्वप्रियव्रजस्थजीवा पराधस्य च कर्षणं परमभक्तकालियपत्नीप्रीत्यनुरोधात्कृतमिति भावः । सादरमिति । हे प्रभो दुष्टतायाः परमावधिरूपे मयि कृपायाः परमावधिरर्पितस्त्वया प्राकृताऽप्राकृतलोकेषु मदन्यः कोऽपि ध्वजवज्राङ्कुशादिचिह्नानि स्वमूर्ध्नि न धत्ते, तदहं साम्प्रतं श्रीमदङ्गानि मद्दत्तदंशोत्थविषतापतप्तानि सुगन्धशीतलचन्दनरसेन सस्त्रीक एव पाणिभिः स्पृशन् लिम्पानि, ततोऽत्र दिव्यासने क्षणमुपविशेत्युपवेश्य स्वाभीष्टं पूरयित्वा लब्धभगवत्प्रसादो निर्जगामेत्याह—दिव्येति सार्द्धद्वयेन—॥ ६४ ॥ परार्ध्यैः बहुमूल्यैः । नागपत्न्यश्च जगन्नाथं श्रीकृष्णं पूजयामासुरिति वचनव्यत्यासेन योज्यम् । मणिभिरिति । कृष्णप्रादुर्भावकाले तद्वक्षस्स्थ एवासीद् यः कौस्तुभः स एव तस्य नरलीलत्वशोभाव्याघाताऽभावार्थं तदलक्षितं कालियकोशागारे प्रविष्टोऽभूत् । अत एव बहुरत्नालङ्कारप्रदानसमये कालियपत्नीभिरपरिचित एव स्वीयरत्नविशेषज्ञानेन कौस्तुभो दत्तः । तदुक्तम्—"कौस्तुभाख्यो मणिर्येन प्रविश्य ह्रदमौरगम् । कालियप्रेयसीवृन्दहस्तैरात्मोपहारितम् ॥" इति गणोद्देशदीपिकायाम् ॥६५॥ ततः भगवत्पूजानंतरम् । अब्धेर्द्वीपं रमणकम् । प्रसाद्येति । भगवानपि कालियमूर्द्धस्वभयहस्ततलनिधानेन तदीयसर्वाङ्गार्त्तिमनाशयदिति भावः । गरुडध्वजं प्रसाद्येति । भो गरुडवाहन प्रभो सम्प्रत्यहं गरुडस्य ज्येष्ठभ्रातुर्दासोऽभूवमतः कदाचिद्दूरदेशगमनेऽहमपि वाहनत्वेन स्मर्त्तव्यः, निमेषमात्रेणैव शतकोटियोजनगामी दासाऽनुदास इति तद्भक्तिर्गम्यते । अतः कालियाऽऽरूढ एव कंसनिर्दिष्टः कृष्णो मथुरां जगामेति पुराणान्तरे कथा क्वचिच्छ्रूयत इति॥६६॥ तदैव कालियनिर्गमनावसरे सा यमुना अमृतमिव स्वादु जलं यस्याः सा।तत्र हेतुः—निर्विषेति। यद्वा—अमृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ नागालयं रमणकं कस्मात्तत्याज कालियः॥कृतं किं वा सुपर्णस्य तेनैकेनासमंजसम्॥१॥श्रीशुक उवाच॥उपहार्यैः सर्वजनैर्मासिमासीह यो बलिः॥वानस्पत्यो महाबाहो नागानां प्राङ्निरूपतः॥२॥स्वस्व भागं प्रयच्छंति नागाः पर्वणि पर्वणि॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ॥३॥ विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ॥ कदथाकृत्य गरुडं स्वय त बुभुजे बलिम् ॥४॥ तच्छ्त्वा कुपितो राजन्भगवान्भगवत्प्रियः ॥ विजिघांसुर्महावेगः कालियं समुपाद्रवत् ॥५॥ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादुच्छ्रतनकमस्तकः ॥ दाद्भिः सुपर्णं व्यदशद्ददायुधः करालजिह्वोच्छ्सितोग्रलोचनः ॥ ६ ॥

नागं सप्तदशे नागालयं तं निरयापयत् ॥ बंधून्स्वदुःखतः श्रांतान्सुतांस्तत्र दवादपात् ॥१॥ असमंजसमप्रियम् ॥ १ ॥ उपहार्यैर्भक्ष्यैः सपजनैः सर्पायत्तैर्जनैः । वानस्पत्यो वनस्पतेर्मूले देयो नागानां तद्बाधापरिहाराय यो बलिः प्राक् निरूपित उपकल्पितः ॥ २ ॥ ते च नागाः स्वंस्वं भागं जनैर्दत्तं सुपर्णाय प्रयच्छंति ततो भीतः गोपीथाय रक्षणाय ॥३॥ विषवीर्याभ्यां यो मदस्तेनाविष्टः काद्रवेयः कद्रूपुत्रः । गरुडं कदर्थीकृत्याविगणय्य । यद्वा उपहार्यैः सुपर्णभक्ष्यैः सर्पा एव जनास्तैर्नागानां संबंधी यस्मिन्नेकैको नागो दीयते तथाभूतो यो बलिः सुपर्णाय निरूपितस्तत्र स्वंस्वं भागं सव नागाः प्रयच्छंति कालियस्तु न प्रच्छयति किं त्वन्यैर्दत्तमपि तं बलिं स्वयमेव बुभुजे ॥ ४॥५ ॥ विषमेवायुधं यस्य सः प्रत्यभ्ययाबोढुं प्रतिजगाम । उच्छ्रितनैकमस्तकः उन्नमितानेकफणः ददायुधो दंतायुधः करालजिह्वश्वासावुच्छ्सितोग्रलोचनश्च उच्छसितान्युज्जृंभि

मोक्षकरं जलं यस्याः सा निर्गतं विषं विषवदुःखहेतुः संसारो यया सा। तथा अमृतस्य विषनाशकत्वप्रासिद्धेः ''न जलं यमुनावारि साक्षाद्ब्रह्मैव केवलम्'' इत्यादिपुराणाद्ब्रह्मज्ञानवन्मोक्षदायिनीति भावः।क्रीडामानुषरूपिण इति । क्रीडोपयोगिमनुष्यनाव्यवत इति विश्वनाथः ॥६ ७॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धेपूर्वार्द्धे षोडशोऽध्यायः॥१६॥ तम् नागं कालियम्। निरयापयत् निष्कासितवान्। तत्र कालिंदीतटे। दवात् वनाग्नेः (१)। समञ्जसम् प्रियम् 'प्रिये योग्ये समंजसम्' इति कोशात्। तद्भिन्नम् असमंजसम्॥ १ ॥ बलिरुपहारः 'बलिः पूजोपहारयोः' इति विश्वः । हे महाबाहो इति । यथा महाराजस्य पराक्रमेण वैरिणोऽपि राजानो बलिं हरंतीति भावः । सर्पायत्ता जनाः सर्पजनाः । शाकपार्थिवादिरयम्। तद्बाधा नागबाधा तान्निवृत्तये । यद्वा—वानस्पत्येऽमायां प्रतिमासं सर्पभीनिवृत्त्यर्थं सर्वे लोकास्तेभ्यो बलिं ददतीत्यथः । वनस्पतिं गतः सोमो यत्र स वानस्पत्यो दर्शः ''अमायामुडुराजो हि सदा॑याति वनस्पतिम् । वानस्यत्यं ततस्तस्या नाम वै प्रोच्यते बुधैः॥'' इति कोशात्। उपहार्यैः सर्पभक्ष्यभूतैस्तत्पूजकैर्वा॥२॥ पर्वणिपर्वणि दर्शेदर्शेऽवसरेऽवसरे वा ''पर्व क्लीबे महे ग्रंथौ प्रस्तावे लक्षणांतरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि॥'' इति मेदिनी । ततः सुपर्णात् । महात्मने बलवत्तराय ॥३॥ शास्त्रांतरसंमत्या क्लिष्टकल्पनया च पूर्वव्याख्यानमसंमतामिव मत्वाह—यद्वेति। पुराणांतरे—''एकैकं हि ददुर्नागं नागास्ताक्ष्यार्य रक्षया'' इत्युक्तेः । तत्र तेषु ॥ ४ ॥ तत् निजबलिभक्षणम् । भगवत्प्रियः गरुडः । विजिघांसुः हंतुकामः । हे राजन्निति । बलिप्रदराजविप्रतिपत्त्या भवदादिवदिति भावः ॥ ५ ॥ तम् गरुडम् ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं ताक्ष्यपुत्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः ॥ पक्षेण सव्येन हिरण्यरोचिषा जघान कद्रूसुतमुग्रविक्रमः ॥ ७ ॥ सुपर्णपक्षाभिहतः कालियोऽतीव विह्वलः ॥ ह्रदं विवेश कालिंद्यास्तदगम्यं दुरासदम् ॥ ८ ॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम् ॥ निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत् ॥ ९ ॥ मीनान्सुदुःखितान्दृष्ट्वा दीनान्मीनपतौ हते ॥ कृपया सौभरिः प्राह तत्रत्यक्षेममाचरन् ॥ १० ॥ अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति ॥ सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहम् ॥ ११ ॥ तं कालियः परं वेद नान्यः कश्चन लेलिहः ॥ अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः ॥ १२ ॥ कृष्णं ह्रदाद्विनिष्क्रांतं दिव्यस्रग्गंधवाससम् ॥ महामणिगणाकीर्णं जांबूनदपरिष्कृतम् ॥ १३ ॥ उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः ॥ प्रमोदनिभृतात्मानो गोपाः प्रीत्याऽभिरेभिरे ॥ १४ ॥

तान्युग्राणि लोचनानि यस्य सः ॥ ६ ॥ ताक्ष्यपुत्रो गरुडः मधुसूदनस्यासनं यस्मिन्सः ॥ ७ ॥ तस्य गरुडस्यागम्यमगाधतया च दुरासदम् ॥ ८ ॥ तदगम्यत्वे कारण माह । तत्रेति । निवारितोऽपि ॥ ९ ॥ १० ॥ ११ ॥ लेलिहः सर्पः अतस्तत्रावात्सीत् ॥ १२ ॥ जांबूनदं सुवर्णं तेनालंकृतम् ॥ १३ ॥ असव इंद्रियाणि ।

'तार्क्ष्यौ गरुडकश्यपौ' इत्यमरः । तम् कालियम् । सव्येन दक्षिणेन वामेन वा 'सव्यं दक्षिणवामयोः' इति वैजयंती॥७॥अगम्यम् गंतुमशक्यम् । दुरासदम् अन्येषां नरादीनामित्यर्थः॥८॥ तत्र ह्रदे । जलचरं मत्स्यमहरदिति संबंधः॥९॥ तत्रत्यानां क्षेमं कल्याणम् ॥१०॥ अत्र ह्रदे । ननु सौभरेः शापान्मत्स्याशनार्थं गरुडो मा गच्छतु तत्र कालियभक्षणार्थं गमने को बाध इति चेत्तर्हि मत्स्यशब्दार्थस्त्वित्थं विधेयः—सीयंते बध्यंते मांसाशिभिरिति स्या जीवाः 'षिञ्-बंधने' अतो घञर्थे कः, आर्षत्वादियङभावः।माद्यंतीति मदोऽसावधानाः 'मदी—हर्षे' अतः क्विप्। मदश्च ते स्याश्चेति मत्स्यास्तान् । तथा चासावधानजीवान्यदि खादतीत्यर्थः । यद्वा—माद्यंत्याहितुंडिकवाद्यैरिति मदः सर्पाः, स्यंति मारयंति स्वज्ञातिमिति स्याः यादोजीवाः 'यादोभ्यो ज्ञातिघातिभ्यो दीनां माम्' इत्युक्तेः। "जलौकसां जले यद्वन्महांतोऽदंत्यणीयसः" इत्युक्तेश्च । स्य इति 'षो—अन्तकर्मणि' धातोः आर्षः खश् । मदश्च स्याश्च मत्स्यास्तान्, तथा च सर्पान्मत्स्यांश्च यदा खादति तदेति संबंधः। यद्वा—मम कोऽर्थो मत्संबंधिनो ये स्या जीवास्ते मत्स्याः। इह समासावस्थायामस्मदो मदादेशो बोध्यः। तथा च—मत्तपःस्थलीभूतयमुनाह्रदे ये तिष्ठंति ते मत्संबंधिन एव 'संबंधमाभाषणपूर्वमाहुः' इति न्यायेनाभाषणे यदि संबंधस्स्यात्तर्हि किमु सहवासादौ, तथा च—तान्यदि स खादतीति योज्यम् । एतेन मदाश्रमवासिजीवभक्षणे तस्य प्राणवियोग इति सिद्धमिति भावः । यद्वा—हे मत्स्य अनंति चेष्टंते जीवा एभिरित्यानि जलानि 'अन—प्राणने' अतः क्विप् । "जलं जीवनहेतुर्हि जगतामथ तस्थुषाम् । अतो जीवनमित्युक्तं तेनेदं चेष्टते जगत् ॥" इति कौशिकसंहितोक्तेः । तानि सनति भजतीत्यन्सः 'षण—संभक्तौ' अत्रापि स एव प्रत्ययः । जलचरप्राणिमात्रं मत्स्यशब्देन ग्राह्यम्। क्लीबे नांतोऽयं शब्दो नांतत्वादेव नलोपोऽत्र तेनात्र यदि प्राणिमात्रं खादति तदा मृतो भावीति भावः। सर्पस्य जलचरता स्थलचरता च द्वये प्रसिद्धे न काप्यत्रानुपपत्तिरिति । यद्वा—मत्स्यपदं काकदधिरक्षणन्यायेनोपलक्षणं जीवमात्रस्येति । वस्तुतस्तु—सौभरेः शापस्तत्र गरुडाप्रवेशतात्पर्यकः 'तं कालियः परं वेद' इति वक्ष्यमाणत्वात् । तम् गरुडागम्यत्वरूपम्, शापमित्यर्थः । "ह्रदं विवेश कालिंद्यास्तदगम्यं दुरासदम्" इति पूर्वमुक्तत्वाच्च । गरुडस्तु सर्वज्ञत्वादेव तत्र नायातः, कालियस्तु तत्रत्यात्मीयसर्पमुखाच्छेषमुखाद्वा गरुडागम्यं ज्ञात्वा तत्राययौ । सौभरेस्तु गरुडाय कुप्यतो यस्मिन्मीने कृपाऽजनिष्ट तस्यैव मीनस्य संगादुत्थिता दुर्वासनैवापराधफलम्, यतश्च विप्लुतब्रह्मानंदः स चिरसंचिततपःसृष्टयौवनेनैव मूल्येन कामिनीवृंदं क्रीत्वा तत्रैव नरकतुल्ये विषयानंदे न्यमज्जत् । अपराधभोगांते श्रीवृंदावनयमुनाश्रयमाहात्म्येनैव पश्चान्निस्ततारेति नवमस्कंधकथात्रानुसंधेया ॥ ११ ॥ तम् गरुडागम्यं ह्रदम् । परम् केवलम् । ननु समर्थेन गरुडेन शापः कथं स्वीकृत इति शंका तु "विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यते । ब्राह्मणानामपीडायै बलिभिरपरैः सदा ॥" इति ब्रह्मांडोक्त्या नोदेति विज्ञानाम् । विवासितः प्रस्थापितः ॥ १२ ॥ विनिष्क्रान्तम् बहिरागतम् ॥ १३ ॥ अभिरेभिरे शिश्लिषुः ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव ॥ कृष्णं समेत्य लब्धेहा आसन्लब्धमनोरथाः ॥ १५ ॥ रामश्चाच्युतमालिंग्य जहासास्यानुभाववित् ॥ नगा गावो वृषा वत्सा लेभिरे परमां मुदम् ॥१६॥ नंदं विप्राः समागत्य गुरवः सकलत्रकाः ॥ ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥ ॥ १७ ॥ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे ॥ नंदः प्रीतमना राजन्गाः सुवर्णं तदाऽदिशत् ॥ १८ ॥ यशोदापि महाभागा नष्टलब्धप्रजा सती ॥ परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः ॥१९॥ तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः ॥ ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः ॥ ॥२०॥ तदा शुचिवनोद्भूतो दावाग्निः सर्वतो व्रजम् ॥ सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥ २१ ॥ तत उत्थाय संभ्रांता दह्यमाना व्रजौकसः ॥ कृष्णं ययुस्ते शरणं मायामनुजमीश्वरम् ॥ २२ ॥ कृष्णकृष्ण महाभाग हे रामामितविक्रम ॥ एष घोरतमो वह्निस्तावकान्ग्रसते हि नः ॥ २३ ॥

प्रमोदनिभृतात्मान आनंदपूर्णमनसः ॥ १४ ॥ लब्धेहा लब्धचेष्टाः ॥ १५ ॥ नगा वृक्षा अपि पूर्वं शुष्काः संतः सद्य एव विरूढा इत्यर्थः ॥ १६ ॥ ते विप्रा ऊचुः ॥ १७ ॥ १८ ॥ नष्टलब्धप्रजा नष्टप्राया पुनर्लब्धा प्रजा यया सा ॥ १९ ॥ श्रमेण च कर्षिताः । उपकुलतः कूलप्रांते ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

लब्धचेष्टाः पूर्वं तु मृतप्राया इत्यर्थः।कौरवेति।शुद्धवंशोद्भूतत्वात्तव श्रीकृष्णलीलामृतपाने रुचिरिति संबुद्ध्यभिप्रायः।यद्वा—कौ भूमौ रवः श्लाघ्यशब्दो यस्य तत्संबुद्धौ तथा,भगवद्भक्तानां यशःशब्दो भूमंडलं व्याप्नोतीति तात्पर्यम्। यद्वा—त्वयि ब्रह्मास्त्रतो रक्षणाज्जीविते कौरवा युधिष्ठिरादयो लब्धचेष्टा आसंस्तद्वदिति भावः ॥ १९ ॥ इत्यर्थ इति । भगवदमृतदृष्टिपातेन विषांबुपानमृतगोपानामिव वृक्षा अपि जीवनमापुः । तीरे वृक्षाभावाद्वृंदावनस्था दूरस्था अपि कृष्णमदृष्ट्वा शोकाच्छुष्यंतः पुनर्दृष्ट्वा लब्धेहा अंकुरपल्लवपुष्पाद्युद्गमवंतो बभूवुरिति भावः। रामश्चाच्युतं सर्वदा च्युतिवर्जितं जहास—धन्योस्येवं कर्तुं युज्यत इत्युपालंभपूर्वं जहासेति कालियनिग्रहेण कश्चित्क्षतश्च नाभूदिति नाभ्यलपदिति ॥ १६ ॥ गुरवः सर्वपूज्याः भागुर्यादिपुरोहिता वा "गुरुस्तु गीष्पतौ श्रेष्ठे पितरि दुर्भरे हरे । सर्वपूज्ये हितवदे ज्ञानदेऽपि गुरुः स्मृतः॥" इत्यनेकार्थवाग्विलासे ॥ १७ ॥ द्विजातीनामिति चतुर्थ्यर्थे षष्ठी, द्विजातिभ्यः । कृष्णस्य निर्मुक्तिः प्रीतिस्तस्या हेतवे 'निर्मुक्तिः प्रीतिमोक्षयोः' इति धरणिः ॥ १८ ॥ यशोदा च गाः सुवर्णं च ददावित्यपि ज्ञेयम् । नष्टा चासौ लब्धा नष्टलब्धा, सा प्रजा संततिर्यस्याः सेति वा ॥ १९ ॥ तत्र तस्मिन् । कूलप्रांते यस्या रात्र्या गमे कालियो निष्कासितस्तामित्यर्थः ॥ २० ॥ शुचौ ज्येष्ठे ग्रीष्मे वा आषाढे वनोद्भूतः । यद्वा—शुचिना पवनेन वनोद्भूतः शुचिपवनशब्दयोरेकार्थत्वात्पर्यायत्वम् 'पवनः पवतामस्मि' इत्युक्तेः । यद्वा—मरुत्सु कश्चिच्छुचिनामापि मरुदस्ति तेन । 'शुचिवलोद्भूतः' इति पाठो विजयध्वजसंमतः, स सुगमः । पुराणेतिहासादौ पुनरुक्तिर्दोषाय न इति, तस्याः काव्यदोषत्वादिति । दाव इत्युक्तेः पुनरग्निपदोपादानं शुचिवनोद्भूत इति विशेषणं च । "दावो वनानले चाथ दवश्च विपिनेऽपि च" इति धरणिः । "शुचिर्ग्रीष्माग्निश्रृंगारेष्वाषाढे शुद्धमंत्रिणि । ज्येष्ठे च पुंसि धवले शुद्धेऽनुपहते त्रिषु॥" इति मेदिनी । आवृत्य परिवार्य दावाग्निरयं कंसानुचरः कालियसखः कश्चिदसुर इति केचिदाहुः ॥ २१ ॥ ततः अग्निप्रवृत्तेः व्रजौकसः व्रजस्थकृषीवलाद्याः । मायया स्वरूपेणैव मनुजम् "स्वरूपभूतया निजशक्त्या मायाख्यया" इति श्रुतेः । यद्वा—मायया कापट्येनैव मनुजम् । वस्तुतस्तु—नराकृतिपरब्रह्मत्वेन तद्रूपेणैवेश्वरम् । यद्वा—माया कृपा तद्युक्तं मनुजं द्विभुजत्वादिसाम्येन । यद्वा—मायाः लक्ष्म्या ईश्वरं स्वामिनमपि मनुजं मनुष्यलीलं कृष्णं व्रजजनदुःखकर्षकं कालियदमनादिना दृष्टत्वात् । शरणं ययुः अस्माकं प्राणसंकटेऽस्मिन्नेव बालके स्वप्रसादादुद्भूते नारायण आविश्यास्मान्पालयति । 'अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ' इति गर्गोक्तेस्तमिमं संप्रति नारायणाविष्टं कृष्णमेव नारायणपरत्वेन विस्रम्भ्य विपत्तरणार्थं शरणं याम इति भावः ॥ २२ ॥ हे रामेति । अस्यापि तद्दिने सर्वज्ञत्वदर्शनेनायमपि कृष्णभ्राता देवाविष्ट इत्यनुमानात् । तावकानित्युक्तिर्दयोत्पादनार्था ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुदुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो ॥ न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयम् ॥ २४ ॥ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ॥ तमग्निमपिबत्तीव्रमनंतोऽनंतशक्तिधृक् ॥ २५ ॥ इति श्रीभागवते म० दशमस्कंधे पू० दावाग्निमोचनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुक उवाच ॥ अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः ॥ अनुगीयमानो न्यविशद्व्रजं गोकुलमंडितम् ॥ १ ॥ व्रजे विक्रीडतोरेवं गोपालच्छद्ममायया ॥ ग्रीष्मो नामर्तुरभवन्नातिप्रेयाञ्छरीरिणाम् ॥ २ ॥ स च वृंदावनगुणैर्वसंत इव लक्षितः ॥ यत्रास्ते भगवान्साक्षाद्रामेण सह केशवः ॥ ३ ॥ यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकम् ॥ शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितम् ॥ ४ ॥ सरित्सरःप्रस्रवणोर्मिवायुना कह्लारकंजोत्पलरेणुहारिणा ॥ न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोऽतिशाद्वले ॥ ५ ॥

कालाग्नेर्मृत्युरूपादग्नेः । न मृत्योर्बिभीमः किं तु त्वच्चरणवियोगादित्याहुः । न शक्नुम इति ॥ २४ ॥ २५ ॥ विमोहानहिदंडेन ततः स्वं शरणागतान् ॥ गोपानपादनंतोऽसावनंतवनवह्नितः ॥ १ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायां सप्तदशोऽध्यायः ॥ १७ ॥ अष्टादशे ततो ग्रीष्मे वसंतगुणलक्षिते ॥ अघातयद्बलेनालं प्रलंबं लीलया हरिः ॥ १ ॥ कृत्वा नृत्यं फणाग्रेषु कालियस्य सकौतुकम् ॥ बलं प्रलंबतुंगांसमारोहयदरातिहा ॥ २ ॥ १ ॥ गोपालच्छद्ममायया गोपालनमेव छद्म यस्यां तया मायया ॥ २ ॥ ३ ॥ वसंतसाम्यमाह चतुर्भिः । यत्र ग्रीष्मेऽपि निर्झराणां निर्ह्रादेन घोषेण निवृत्तस्वनाश्छन्नध्वनयो झिल्लिकाः कठोरध्वनिसूक्ष्मकीटा यस्मिंस्तथाभूतं वृंदावनं भवति । किं च शश्वत्तेषां निर्झराणां शीकरैरंबुकणैर्ऋजीषाः स्निग्धा ये द्रुमास्तेषां मंडलैर्मंडितम् ॥ ४ ॥ यत्र ग्रीष्मे वने वा । निदाघो ग्रीष्म

मृत्योर्नित्यत्वात्ततो न भयमित्याहुः—नेति । तर्हि कुतस्तत्राहुः—किं त्विति।प्रभो हे सर्वं कर्तुं समर्थ। न कुतोऽपि भयं यस्मात्तम्।अतो निजचरणपरित्यागभयमस्माकमाशु विनाशयेति भावः॥२४॥तम् वनोद्भूतम् । अनंतशक्तिधृगितिवह्निपानशक्तिरपि श्रीकृष्णेऽस्तीत्याह।ननु परमसुकुमारः कथं तीव्रमग्निमपिबत्तत्राह—अनंतेति।तस्य संहारिका शक्तिरेवापिबत्, तस्मिन् शक्तिमति तत्पानोपचारमात्रमिति भावः।'धृञ्—गतौ' भ्वादिः, ततः क्विपि धृगिति रूपम् ॥२५॥ विमोहान् ज्ञातभगवत्तत्त्वान् । अहो येन महाविषः कालियो निरस्तस्सोयं साक्षादीश एवेति । तत ईशत्वादेव । अनंतश्चासौ वनवह्निश्चेति(१)॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे सप्तदशोऽध्यायः ॥ १७ ॥ ततः सप्तदशानंतरम् (१) । सकौतुकम् साश्चर्यम् (२) । अथ दावाग्निपानोत्तरम् । ज्ञातिभिः गोपैः । केचिदिमं श्लोकं पूर्वाध्यायांते पठंति ॥ १ ॥ शरीरिणाम् देहिमात्रस्येत्यर्थः । नातिप्रेयान् अभितस्तापजनकत्वात् । गोपालनं छद्म वनगमनाय मिषं यस्यां तथाभूता या माया प्रच्छन्नकामनामयी जनवंचना तया विक्रीडतोर्व्रजबालाभिस्सह विहरतोरिति बलदेवस्यापि पृथक् कांता गोप्य आनंदवृंदावने दृष्टा मूलेप्युपरिष्टाद्व्यक्तीभविष्यति । अत्रातिशब्देन जलकेल्यादीनां किंचित्प्रियतापेक्षया ज्ञेय इति चक्रवर्त्तीतोषिण्यौ ॥ २ ॥ स च ग्रीष्मः । यत्र वृंदावने ॥ ३ ॥ पाठान्तरे मंडपैर्जनस्थितियोग्यस्थलैः 'मंडपोऽस्त्री जनाश्रयः' इत्यमरः ॥ ४ ॥ सरित्सरसां प्रस्रवणेषु ये ऊर्मयस्तरंगास्तत्संबंधिना वायुना 'भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचिः' इत्यमरः । बहुशाद्वले तु सर्वत्रैव तापाभावस्तत्र किं वृंदावनाधिक्यमित्यरुच्याह—यद्वेति । अतिक्रांतशाद्वले शाद्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः ॥ न यत्र चंडांशुकरा विषोल्बणा भुवो रसं शाद्वलितं च गृह्णते ॥ ६ ॥ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजम् ॥ गायन्मयूरभ्रमरं कूजत्कोकिलसारसम् ॥ ७ ॥ क्रीडिष्यमाणस्तत्कृष्णो भगवान्बलसंयुतः ॥ वेणुं विरणयन्गोपैर्गोधनैः संवृतोऽविशत् ॥ ८ ॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ॥ ९ ॥ कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे ॥ १० ॥ गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः ॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥ ॥ ११ ॥ भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः ॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् ॥ १२ ॥

स्तेन तत्कालीनवह्न्यर्काभ्यां च भवति यो दवस्तापः । अतिशाद्वलेऽतिहरिततृणाकीर्णे । यद्वा अतिक्रांतशाद्वलेऽपि स्थाने ॥ ५ ॥ ननु शाद्वलमेव कुतस्त्यं तत्राह । अगाधेति । अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिरूर्मिभिः पुलिनैः सह द्रवत्पुरीषं पंको यस्यास्तस्या भुवः रसं शाद्वलितं शाद्वलरूपतां च विषवदुल्बणा अपि सूर्यरश्मयो न गृह्णते न हरंति ॥ ६ ॥ तद्वनमविशदित्युत्तरेणान्वयः । नदंतश्चित्रा मृगा द्विजाश्च यस्मिन् । गायंतो मयूरा भ्रमराश्च यस्मिन् । कूजंतः कोकिलाः सारसाश्च यस्मिंस्तदविशत ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ काकपक्षाश्चूडाकरणात्प्राक्तनकेशाः । भ्रामणादिप्रकारैर्नियुद्धेन बाहुयुद्धेन एवं क्रीडाभेदैश्चिक्री

लशूल्ये ॥ ९ ॥ शाद्वलत्वे शंकते—नन्विति । कुतस्त्यम् कुतो जातम् । तत्र आक्षेपे । अगाधानि गंभीराणि ह्रदिनीनां नदीनाम् 'तटिनी ह्रादिनी नदी' इत्यमरः । ऊर्मिभिस्सहितैः पुलिनैस्तात्कालीनजलोत्थितस्थलैः । 'तोयोत्थितं तत्पुलिनम्' इत्यमरः । द्रवत्किञ्चिच्चलनवदार्द्रम् 'पुरीषं मलपंकयोः' इति शाश्वतः । उल्बणाश्चंडाः 'उल्बणं भयदे चंडे संवृते पुंनपुंसकम्' इति धरणिः । यत्र वृंदावने । शाद्वलितमित्याचारार्थक्विंताद्भावे निष्ठेति रूपगोस्वामिजीवगोस्वामिनौ । विश्वनाथस्तु—शाद्वलयुक्तीकृतम् " विन्मतोर्लुक् " इति मतुपो लुगित्याह ॥ ६ ॥ तद्वनमविशदिति द्वयोः संबंधः । कुसुमानि संजातानि यत्रेति तथा श्रीमत्त्वं स्वतः विशेषतश्चाह—कुसुमितं प्रफुल्लाशेषपुष्पव्याप्तमिति ग्रीष्मे वसंतगुण उक्तः । द्विजशब्देन गृहीतानामपि मयूरादीनां पृथगुक्तिरन्यत्तुश्रीणामपि संवलनं बोधयति ॥ ७ ॥ कृष्णो जगच्चित्ताकर्षकलीलः । अत एव भगवान् विरणयन् विविधस्वरैर्ध्वनयन् ॥ ८ ॥ धातवो गैरिकादयः स्वर्णादयो वा ॥ ९ ॥ प्रशशंसुः श्लाघयामासुः—अहो ते नृत्यकौशलमिति ॥ १० ॥ देवाः इंद्रवस्वाद्यंशैरवतीर्णत्वात्तेषाम् । यद्वा—गोपजातिकृष्णसखेषु प्रतिच्छन्ना एव नारदादयो भक्तास्तल्लीलास्वादार्थमिति । यद्वा—श्रीकृष्णोपासनपटलादौ तद्वदुपास्यत्वेन प्रसिद्धाः श्रीदामवसुदामसुदामादय इति समानमहित्वं व्यंजितम् । गोपालरूपिणमिति नित्ययोगे इनिः ॥ ११ ॥ त्रिवृत्कृतवेणीधारिणौ कर्णाग्रलंबिवक्रालकाधरौ वा "काकपक्षस्त्रिवृद्वेण्यां मध्यमुंडितकेशके" इति शब्दरत्नाकरे । भ्रामणैः मंडलाकारेण चलनैः । लंघनैः राशीकृतवालुकापुंजोपरि बहूनुलंघ्य पतनैः । एकं प्रसारितपादं बालं कराच्छादितनेत्रं कृत्वा तदुपरि लंघनं कृत्वा गच्छति स च को गत इति पृच्छ्यते यत्र तैर्वा । क्षेपैः आक्षेपवाक्यैः पाषाणगोलकादिप्रक्षेपणैर्वा । आस्फोटनैः एकं हस्तं द्विगुणीकृत्येतरेण पाणिना स्फालनरूपैः, करतलेन भुजमूलाघातैर्वा । नियुद्धेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ॥ शशंसतुर्महाराज साधुसाध्विति वादिनौ ॥ १३ ॥ क्वचिद्बिल्वैः क्वचित्कुंभैः क्व चामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया ॥ १४ ॥ क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया ॥ १५ ॥ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुंजेषु काननेषु सरस्सु च ॥ १६ ॥ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः ॥ गोपरूपी प्रलंबोऽगादसुरस्तज्जिहीर्षया ॥ १७ ॥ तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः ॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् ॥ १८ ॥ तत्रोपाहूय गोपालान्कृष्णः प्राह विहारवित् ॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथम् ॥ १९ ॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे ॥ २० ॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ यत्रारोहंति जेतारो वहंति च पराजिताः ॥ २१ ॥ वहंतो वाह्यमानाश्च चारयंतश्च गोधनम् ॥ भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः ॥ २२ ॥

ढतुः ॥ १२ ॥ १३ ॥ कुंभैः कुंभवृक्षफलैः । अस्पृश्यत्वं नेत्रबंधश्च तदाद्यैः । मृगाणां खगानां च चेष्टया ॥ १४ ॥ दर्दुरप्लावैर्मंडूकप्लुतिभिः । स्पंदोलिकया दोलालंबनेन नृपाणामिव लीलया ॥ १५ ॥ नद्योऽद्रिद्रोणयः कुंजानि च एतेषु ॥ १६ ॥ चारयतोः सताः । तद्वने तस्मिन्वने । तयोर्जिहीर्षया ॥ १७ ॥ १८ ॥ यथायथं वयोबलाद्यनुरूपं द्वंद्वीभूय ॥ १९ ॥ परिवृढौ नायकौ । तत्र केचन कृष्णसंघट्टिनः कृष्णपक्षीयाः ॥ २० ॥ २१ ॥ वाह्यमानाः पृष्ठेनोह्यमानाः ॥ २२ ॥

मल्लयुद्धेन च ॥ १२ ॥ स्वयम् रामकृष्णावित्यर्थः ॥ १३ ॥ ''कुंभोलूखलके क्लीबे कौशिको गुग्गुलुः पुमान्'' इत्यमरः । वर्तुलं कुंभफलम् । पृष्ठतो धावनात्स्प्रष्टुमप्यशक्यं त्वं मां स्पृशेत्युक्त्वा पुरतो लीलया धावति यत्र तदस्पृश्यक्रीडनम् । वस्त्रेण नेत्रमाच्छाद्य मां स्पृशेति निगद्य तं मुक्त्वा पुरतो भ्रमणं नेत्रबंधलीला । दूरांतरप्रदेशे स्थितं वृक्षं लक्ष्यीकृत्योभाभ्यां प्राग्वृक्षस्पर्शी विजयी स्यादिति क्रीडा धावनसंज्ञेत्याद्यपदाद्ग्राह्या । स्पर्शस्यादित्साचिकीर्षाभ्यां या क्रीडा, तत्र स्प्रष्टुर्जयोऽस्प्रष्टुः पराजयः, अलक्षितमेव पृष्ठदेशमासाद्य पाणिभ्यां नेत्रबंधकम्, परिचेतुर्जयोऽन्यथा पराजयः । सर्वत्र जयपराजययोर्मुरलीवेत्रादिरेव ग्लहः ॥ १४ ॥ कदाचित् श्रावणशुक्लतृतीयामारभ्येत्यर्थः । नृपचेष्टया दानवद्दे नृपस्येव चेष्टा घट्टकरजिघृक्षया व्रजबालानिरोधस्तया । उपहासकैः–शृणु भो अहं ते पितास्मि त्वं मे श्यालोऽसीत्येवमाकारकैर्हास्यजनकैर्वचनैः ॥ १५ ॥ एवम् उक्तविधया । तौ रामकृष्णौ । द्रोणी निम्नसानुस्थलम् । यद्वा–द्रोण्योऽद्रिसंधयः ''काष्ठागारेंबुवाहिन्यां शैलसंधौ च योषिति । द्रोणी न स्त्री मानभेदे द्रोणः काके कृपापतौ ॥'' इति त्रिकांडशेषात् । अंतर्लतानिबद्धो मंडपः कुंजः ''निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे'' इत्यमरः ॥ १६ ॥ गोपरूपी यः कश्चिद्गोपस्तद्दिने किंचित्कृत्यार्थं गृहे स्थितस्तद्रूपधारी । तयोः रामकृष्णयोः ॥ १७ ॥ तम् प्रलंबम् । तत्सख्यम् प्रलंबसख्यम् । अन्वमोदत स्वीचकार । तस्य प्रलंबस्य । दाशार्ह इति । 'प्रलंबबकचाणूर' इत्यादिना यदुकुलकदने मुख्यतया निर्दिष्टस्य प्रलंबस्य वधेन यदुकुलहितापेक्षया।तद्वदने हेतुः सर्वदर्शनः सर्वज्ञः । चिंतयन् अनेन प्रकारेण घातयिष्यामीति चिंतयन्॥१८॥ तत्र तदा ॥ १९ ॥ तत्र विहारे । 'प्रभुः परिवृढोऽधिपः' इत्यमरः ॥ २० ॥ यत्र यस्यां क्रीडायाम् । जेतारः पिहितफलादिज्ञानवंत आरोहंति निजप्रतिद्वंद्विगोपं वाहनत्वे कल्पयंति । पराजिताः पिहितफलाद्यज्ञानवंतो वहंति वाहनानि भवंतीत्यर्थः॥२१॥ वहंतः धारयंतः । भांडीरवटोऽवरोहणस्थानत्वेन कल्पित इत्यर्थः । तथाऽऽरोहणस्थानमपि तत्समीपवर्त्येव ज्ञेयम् । स च वटो हरिवंशे वर्णितः–''ददर्श विपुलोदग्रशाखिनं शाखिनां वरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामसंघट्टिनो यर्हि श्रीदामवृषभादयः ॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥ २३ ॥ उवाह कृष्णो भगवाञ्छ्रीदामानं पराजितः ॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतम् ॥ २४ ॥ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः ॥ वहन्द्रुततरं प्रागादवरोहणतः परम् ॥ २५ ॥ तमुद्वहन्धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः ॥ स आस्थितः पुरटपरिच्छदो बभौ तडिद्द्युमानुडुपतिवाडिवांबुदः ॥ २६ ॥ निरीक्ष्य तद्वपुरलमंबरे चरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकम् ॥ ज्वलच्छिखं कटककिरीटकुंडलत्विषाऽद्भुतं हलधर ईषदत्रसत् ॥ २७ ॥ अथाऽऽगतस्मृतिरभयो रिपुं बलो विहायसाऽर्थमिव हरंतमात्मनः ॥ रुषाऽहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥ २८ ॥ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन्रुधिरमपस्मृतोऽसुरः ॥ महारवं व्यसुरपतत्समीरयन्गिरिर्यथा मघवत आयुधाहतः ॥ २९ ॥ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना ॥ गोपाः सुविस्मिता आसन्साधुसाध्विति वादिनः ॥ ३० ॥

॥ २३ ॥ २४ ॥ कृष्णदृष्टिवंचनाय अवरुह्यतेऽस्मिन्नित्यवरोहणं मर्यादा ततः परं दूरमगात् ॥ २५ ॥ धरणिधरेंद्रवद्गौरवं यस्य तं निजमासुरं वपुरास्थितः । पुरटपरिच्छदः सुवर्णालंकारः । तडिद्द्युमान्विद्युद्दीप्तिमानित्यलंकारोपमा । उडुपतिवाडिति रामोपमा । उडुपतिं वहतीत्युडुपतिवाट् । यदि यथोचितस्थानेषु स्थिता विद्युतो भवेयुरुपरि चोडुपतिस्तदा सोंबुदो यथा भाति तद्वद्बभावित्यर्थः ॥ २६ ॥ अलमतिवेगेन । प्रदीप्ते दृशौ यस्मिन्वपुषि तत् । भ्रुकुटितटसंलग्ना उग्रा दंष्ट्रा यस्मिंस्तत् । प्रदीप्तदृक् प्रदीप्तनेत्रं भ्रुकुटितटं यस्मिन् उग्रा दंष्ट्रा यस्मिंस्तच्च तच्चेति वा । ज्वलंत्यः शिखाः केशा यस्मिंस्तत् ॥ २७ ॥ आगतस्मृतिरभय इवात्मनः सार्थं गोपसमूहं विहाय हरंतं रिपुमहनत् । यद्वा विहायसाऽऽकाशमार्गेणात्मनः प्राप्तमर्थमिव हरंतमिति । वज्ररंहसा वज्रवेगेन मुष्टिना ॥ २८ ॥ अपस्मृतो गतस्मृतिः । महारवं समीरयन् ॥ २९ ॥ ३० ॥

स्थितं धरण्यां मेघाभं निबिडं दलसंचयैः ॥ गगनार्द्धोत्थिताकारं पवनाभोगकारिणम् । नीलं चित्रांगवर्णैश्च सेवितं बहुभिः खगैः ॥ फलैः प्रवालैश्च घनैः सेंद्रचापघनोपमम् । भवनाकारविटपं लतापुष्पसुमंडितम् ॥ विशालमूलावनतं पवनांभोदधारिणम् । आधिपत्यमिवान्येषां तस्य देशस्य शाखिनाम् ॥ कुर्वाणं शुभकर्माणं तिरोवर्षमनातपम् । न्यग्रोधं पर्वताग्राभं भांडीरं नाम नामतः ॥" इति ॥ २२ ॥ तांस्तान् श्रीदामादीन् ॥ २३ ॥ उवाह कृष्ण इह व्यत्ययो ज्ञेयः 'उवाह कृष्णं श्रीदामा' इत्यादिहरिवंशादिविरोधात् । व्यत्ययाभावे का हानिरत आह—"बहुमानविरोधे तु व्यत्यासः शब्दतोर्थतः" इति शिष्टोक्तेः । शब्दस्यार्थस्य च विरोधे व्यत्यासो न दोषायेत्यर्थः ॥ २४ ॥ अविषह्यम् योद्धुमशक्यम् । यद्वा—कृष्णमविषह्यं वोढुमशक्यं मत्वा रामं वहन्नगादिति संबंधः ॥ २५ ॥ धरणिधरेंद्रः सुमेरुः । "पुरटो नगरोट स्याक्लीबं हेम्न्यग्रगे शुनि" इति धरणिः । द्युमता सूर्येण वाऽत्र पक्षेऽभूतोपमा ज्ञेया ॥ २६ ॥ पूर्वसमासे दंष्ट्राणां भ्रुकुटिसंलग्नत्वासंभवात्समासांतरमाह—प्रदीप्तेत्यादि । "भ्रुवोर्मध्ये तु भ्रकुटिर्भ्रूकुटिर्भ्रुकुटिः स्त्रियाम्" इति शब्दरत्ने । अत्रसत् उद्विविजे ॥ २७ ॥ अथ श्रीकृष्णकृतबोधानंतरम् । आगतस्मृतिः ज्ञातनिजवैभवः । बलं गृहीत्वा, प्रलंबधावने बलदेवेन कृष्णः प्रार्थितः स च तं न त्वं प्राकृतो बालः किं तु साक्षादनंतोऽसीति बोधितवानिति हरिवंशादवसेयम् । अभयशब्देनेवशब्दसंबंधे श्रीकृष्णबोधितस्याप्यनीशतैवाविर्भवेत्त्यतः प्रकारांतरेण योजयन्नाह—यद्वेति । "मुष्टिर्द्वयोः स्यात्सांगुष्ठे करे संकुचितांगुलौ" इति धरणिधरः ॥ २८ ॥ सः प्रलंबः । आयुधाहतो वज्राहतः ॥ २९ ॥ बलेन शालते दीव्यतीति बलशाली बलदेवः । एकार्थकौ ॥ ८८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशिषोऽभिगृणंतस्तं प्रशशंसुस्तदर्हणम् ॥ प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः ॥ ३१ ॥ पापे प्रलंबे निहते देवाः परमनिर्वृताः ॥ अभ्यवर्षन्बलं माल्यैः शशंसुः साधुसाध्विति ॥ ३२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे प्रलंबवधो नामाष्टादशोऽध्यायः ॥ १८ ॥ श्रीशुक उवाच ॥ क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः ॥ स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरम् ॥ १ ॥ अजा गावो महिष्यश्च निर्विशंत्यो वनाद्वनम् ॥ इषीकाटवीं निर्विविशुः क्रंदंत्यो दावतर्षिताः ॥ २ ॥ तेऽपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा ॥ जातानुतापा न विदुर्विचिन्वंतो गवां गतिम् ॥ ३ ॥ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवाम् ॥ मार्गमन्वगमन्सर्वे नष्टाऽऽजीव्या विचेतसः ॥ ४ ॥ मुंजाटव्यां भ्रष्टमार्गं क्रंदमानं स्वगोधनम् ॥ संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्तयन् ॥ ५ ॥

तदर्हणं प्रशंसार्हम् ॥ ३१ ॥ ३२ ॥ इति श्री० भा० म० दशमपूर्वार्धे टीकायामष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ऊनविंशे निविष्टं तु गोपगोकुलमच्युतः ॥ मुंजारण्यमरण्याग्ने ररक्ष तन्निपानतः ॥ १ ॥ दूरचारिणीर्दूरचारिण्यः ॥ १ ॥ वनाद्वनांतरं निर्विशंत्यो दावेन तर्षितास्तृषिताः क्रंदंत्य इषीकाटवीमत्युच्छ्रितघनतृणविशेषारण्यं निर्विविशुः ॥ २ ॥ कृष्णरामावादी येषां ते न तु तौ ॥ ३ ॥ तासां गवां खुरैर्दद्भिश्च छिन्नैस्तृणैर्गोष्पदैरंकितैश्च भूप्रदेशैस्तृणैर्वा गवां मार्गमन्वगमन् । नष्टाजीव्या गत

बलशालिबलदेवशब्दौ पर्यायौ । बलेनौजसा 'कालिंदीभेदनो बलः' इत्यमरोक्तेर्बलशब्दस्तु साक्षादेव तद्वाचकोस्ति, यदीत्थं तदा बलशालीति विशेषणम् ॥ ३० ॥ तम् बलम् ॥ ३१ ॥ माल्यैः पुष्पैः (३२) । अत्र श्रुतिः—"विष्टंभो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य । असत उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इंद्रियाय ॥" इति । अर्थः—हे सोम ते तव मध्वो ब्रह्मस्वरूपिणः अंशुरिवांशुः अंशः पृथिव्या धरुणः भूमेर्धर्त्ता रामरूपधारीति शेषः । ते त्वया असत अंतर्यामिणा प्रबोधितो दीप्यमानोऽत एव उत्सस्त्वदाज्ञाकरणे उत्कंठितः । नियुत्वान् जगतः प्राणरूपी सूत्रात्मा सन् गृणते आत्मनः स्वरूपं त्वद्वाक्यादवगतं भावयति । अहं परमेश्वरादनन्योऽस्मि देवकार्यार्थमवतीर्णोस्मीत्यालोचयतीत्यर्थः । ततो हेतोर्दिवः द्युलोकमंडपस्य विष्टंभः स्तंभा इव भवंति ते । विष्टंभः क्विबंतस्येदं द्वितीयाबहुवचनम् । अत्युच्छ्रितान् प्रलंबादीन्बहुत्वं विभूत्यर्थे । इंद्रियाय तद्वधेन स्वीयं वीर्यं प्रदर्शयितुं पवते गच्छति । किमस्यायुधं तदाह—विश्वा इति । सर्वाः क्षितयः नाशसाधनानि आयुधानि अस्य हस्ते एव संति अतो मुष्टिमात्रेण तं जघानेत्यर्थः । विष्णोः सर्वदेवतामयत्वादत्र सोमरूपेणैवास्य स्तुतिर्ज्ञेया एवमन्यत्रापीति ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टादशोऽध्यायः ॥ १८ ॥ तान्निपानतः अग्निपानतः (१) । दूरचारिणीः दूरचारिण्यः । गह्वरम् यमुनातीरकक्षम् "गुहागहनदंभेषु निकुंजेपि च गह्वरे" इति मेदिनी । तद्गावः तेषां गोपानां गावः ॥ १ ॥ इषीकाटवीम् मुंजारण्यम् "इषीका तु शलाकायां मुंजे लक्ष्मीस्त्रियोस्तथा" इति धरणिः । अजा वर्कर्यः, अजादिचारणे गोपालवदजापालादि तस्य नाम कथं नोच्यते, तासामल्पत्वेन गवां प्रचुरत्वाद्गोपालेति नाम । यद्वा—'यशः पुण्यैरवाप्यते' इति न्यायात्तन्नेति । "गोछागीमहिषीदुग्धादन्यद्दुग्धं तु चामिषम्" इति पाद्मादजामहिष्योः पेयदुग्धत्वात्तद्रक्षणादौ न दोषोऽस्ति । यत्तु, "आजं च माहिषं क्षीरं हंति श्राद्धं न संशयः" इति तत्तत्रैव दुष्टं न त्वत्रेति । किञ्चाज्यं वस्तुतोऽजोद्भवमेवान्यत्र तु सादृश्यात्तत्प्रयोग इति ज्ञेयम् । अथ वा "अजा स्यादप्रसूता गौः सकृत्सूता महिष्यपि । अन्या गाव इह प्रोक्ता इति शब्दार्थवेदिनः ॥" इति शब्दरत्नात् ॥ २ ॥ ते गोपाः । अतद्गुणसंविज्ञानो बहुव्रीहिः कृष्णरामादय इति ॥ ३ ॥ विचेतसः इतो गता वात्र गताइ त्येवं नानाबुद्धयः ॥ ४ ॥ ते गोपाः । ततः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता आहूता भगवता मेघगंभीरया गिरा ॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ॥ ६ ॥ ततः समंताद्वनधूमकेतुर्यदृच्छयाभूत्क्षयकृद्वनौकसाम् ॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंगमान्महान् ॥ ७ ॥ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः ॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ॥ ८ ॥ कृष्णकृष्ण महावीर्य हे रामामितविक्रम ॥ दवाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्हथः ॥ ९ ॥ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुम् ॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥ श्रीशुक उवाच ॥ वचो निशम्य कृपणं बंधूनां भगवान्हरिः ॥ निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥ तथेति मीलिताक्षेषु भगवानग्निमुल्बणम् ॥ पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत् ॥ १२ ॥ ततश्च तेऽक्षीण्युन्मील्य पुनर्भांडीरमापिताः ॥ निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥ कृष्णस्य योगवीर्यं तद्योगमायाऽनुभावितम् ॥ दावाग्नेरात्मनः क्षेम वीक्ष्य त मेनिरेऽमरम् ॥ १४ ॥

जीविकासाधनाः ॥ (४) ॥ मुंजाटव्यपि सैव या इषीकाटवी ॥ ४ ॥ ५ ॥ ६ ॥ वनौकसां गोगोपानां नाशहेतुर्वनवह्निः सर्वतः प्रादुरभूत् । सारथिना वायुना ॥ ७ ॥ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ कृच्छ्राद्गह्वरप्रवेशक्षुत्तृट्छ्रमादिजनितात् ॥ १२ ॥ क्षणेनैव भांडीरं प्रापिताः ततोऽक्षीण्युन्मील्य विस्मिताः ॥ १३ ॥ १४ ॥

मुंजाटवीतः । भ्रष्टमार्गम् इतस्ततो गतम् । संन्यवर्त्तयन् गतमार्गमेवागंतुकामा अभवन्नित्यर्थः ॥ ५ ॥ ग्गवः ! स्वनाम्नां गंगादिरूपाणां स्वनाम्नाम । प्रतिनेदुः प्रत्याक्रोशं चक्रुः ॥ ६ ॥ 'दुःखादनंतरं दुःखम्' इति संसारिणां बोधयन्नाह—तत इति । ततः गोदर्शनानंतरम् । धूमकेतुः अग्निः । उल्बणोल्मुकैः चंडालातैः । लेलिहानः अतिशयेनास्वादयन् ॥ ७ ॥ तम् आविर्भूतम् । प्रपन्नाः शरणं प्राप्ताः ॥ ८ ॥ संभ्रमे वीप्सा कृष्णकृष्णेति ॥ ९ ॥ नूनम् इदानीम् । अवसीदितुम् क्लेशमाप्तुम् । शरणागतरक्षणे महान्धर्मो भवतीति संबुद्ध्यभिप्रायः ॥ १० ॥ कृपणम् दीनम् । निमीलयतेति तेषामग्निपानदर्शनानौचित्यम् । ततः स्थानात्तेषामतिश्रांतानामलक्षितमेव शीतलसच्छायभांडीरतरुतलप्रापणौचित्यं च परामृश्येति भावः । नन्वहो कौतुकिन् लोचनमीलने कथमग्निपरिहारस्तत्राह—मा भैष्टेति । अतोऽन्यथा न त्राणहेतुरस्तीति भावः ॥ ११ ॥ भो वयस्याः वह्निविषाद्युपशमकं मणिमंत्रौषधादिकमयं कृष्णो बहु जानातीति तच्च विविक्तं विना न सिध्येदतोत्र जनसंघट्टे नेत्रनिमीलनमेव विविक्तमित्यभिप्रेत्यैवायं ब्रूते तद्वयं दूरतरं स्वनेत्रे मीलयाम इत्युक्त्वा ते न्यमीलयन्नित्याह—तथेति । भगवान्महदैश्वर्ययुतः । तीव्रमपि तं पीत्वेति तत्पिपासाया जातायास्तदिच्छाप्रातिकूल्यमाचरितुमसमर्थोऽग्निर्भयात्परमशीतलसुगंधमधुररसपानकीभूय तदीयकरतले सद्य एव गंडूषमात्री बभूव । तदैव योगाधीशो मुखेन पीत्वेत्यनेन तदीया योगमाया शक्तिरेव प्रकटीभूय तदप्येतत्स्मरतामनुरागार्द्रचित्तभक्तानां दुःसहदुःखप्रदमित्युक्त्वा तत्करतलादाछिद्य सैव मुखेन पपाविति लभ्यते । योगो योगमाया तस्या अधीशत्वात्तस्मिन्नेव तत्पानोपचारोऽभूदिति भावः । तान् गोगोपान् । यद्वा—मुखेनोपायेन पीत्वा । क उपायस्तत्राह—योगाधीश इति । योगैश्वर्यशक्तिरेवेति भावः । "मुखं प्रसरणे वक्रे प्रारंभोपाययोरपि" इति मेदिनी । कृच्छ्रात् गह्वरप्रवेशतृट्श्रमादिजनितादिति । योगाधीश इति । योगिनां परक्लेशशमने सामर्थ्यमस्ति, किमुत योगाधीशस्येति तात्पर्यम् ॥ १२ ॥ ततः भांडीरागमनानंतरम् । ते गोपाः । भो वयस्याः महाग्नेः प्रतीकारो मया कृतः सांप्रतमक्षीण्युन्मीलयतेति कृष्णेनोक्तास्ते पुनरक्षीण्युन्मील्यात्मानं मोचितं गाश्च मोचिता निशाम्य ज्ञात्वा विस्मिता आसन्नित्यन्वयः । किं भूताः—भांडीरमापिताः प्रापिताः, तेनैवेति सर्वत्र योज्यम् । तत्र श्रीयमुनादक्षिणकूले श्रीवृंदावनमध्ये । स्यारो इति प्रसिद्धशिवालयग्रामतो वायव्यादिशि भांडीर इति यः प्रसिद्धोऽस्माभिर्दृष्टचरो यदंशो यत्संबंधेनाद्यापि तन्नाम्ना ख्यातस्तत्प्रदेशो यमुनाघट्टश्च विस्पष्टः स एव भांडीरनामेति ॥ १३ ॥ योगमायानुभावितम् स्वसामर्थ्यकृतम् । तत् दावाग्न्याक्रांतमुंजारण्यतो भांडी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः ॥ वेणुं विरणयन्गोष्ठमगाद्गोपैरभिष्टुतः ॥ १५ ॥ गोपीनां परमानंद आसीद्गोविंददर्शने ॥ क्षणं युगशतमिव यासां येन विनाऽभवत् ॥ १६ ॥ तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च ॥ १७ ॥ गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ॥ मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ १८ ॥ इति श्रीभा०म०द०पू०दावाग्निपानं नामैकोनविंशोध्यायः ॥ १९ ॥ ॥ श्रीशुक उवाच ॥ ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥ १ ॥ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥ २ ॥ अष्टौ मासान्निपीतं यद्भूम्याश्चोदमयं वसु ॥ स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥ ३ ॥ तडित्वंतो महामेघाश्चंडश्वसनवेपिताः ॥ प्रीणनं जीवनं ह्यस्य मुमुचुः करुणा इव ॥ ४ ॥ तपःकृशा देवमीढा आसीद्वर्षीयसी मही ॥ यथैव काम्यतपसस्तनुः संप्राप्य तत्फलम् ॥ ५ ॥

॥१५॥१६॥१७॥ १८ ॥ श्रीदामादिस्वगोपानां स्वांगमारुह्य हृष्यताम ॥ स्वैश्वर्यमाविरकरोद्वनवह्निनिपानतः ॥ १ ॥ इति श्री० भा० म० दशमस्कंधे पूर्वार्धे टीकायां दावाग्निपानं नामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ विंशे प्रावृट्छरच्छोभावर्णनेन वनोचिताः ॥ प्रावृट्क्रीडा निरूप्यंते गोपरामयुजो हरेः ॥ १ ॥ हेयादेयोपमानेन प्रावृट्छरदृतुश्रियोः ॥ वर्णनं त्वद्भुतैश्वर्यकृष्णलीलाविवक्षया ॥ २ ॥ तत्र प्रावृड्वर्णनं तत इत्यादिद्वाविंशत्या । सर्वेषां प्राणिनां समुद्भव उत्पत्तितो जीवनतश्च यस्यां सा प्रावृट् । विद्योतमानाः परिधयः परिवेषा दिशो वा यस्यां सा । विस्फूर्जितं संक्षभितं नभस्तलं यस्यां सा ॥ १ ॥ सांद्रैर्निबिडैर्नीलांबुदैर्विद्युद्गर्जितसहितैराच्छन्नम् । सगुणं गुणैराच्छन्नं जीवाख्यम् । विद्युद्गर्जितांबुदानां सत्त्वरजस्तमोभिरुपमा ॥ २ ॥ पर्जन्यः सूर्यः । स्वगोभिर्निजरश्मिभिः । काले यथोचितसमये । अत्र राजोपमा समये करादानतः समये पुनर्दानतश्च सूचिता ॥ ३ ॥ अस्य विश्वस्य प्रीणनमाप्यायनकरं जीवनमुदकं मुमुचुः कृपालवो यथा तप्तं जनं निरीक्ष्यानुकंपमानास्तदाप्यायनाय स्वजीवनमपि त्यजंति तद्वन्महांतो मेघास्तडिन्नेत्रैर्विश्वं तप्तं निरीक्ष्य वायुभिर्वेपिता जीवनं मुमुचुरिति ॥ ४ ॥ तपसा ग्रीष्मेण कृशा । देवमीढा पर्जन्यसिक्ता । वर्षीयसी

रागमनरूपं तत्पानरूपं च । योगवीर्यमपूर्वसामर्थ्यम् 'योगोऽपूर्वार्थसंपत्तौ' इति मेदिनी । तम् श्रीकृष्णम् । अमरम् जरामरणहीनं परमेशम् ॥ १४ ॥ सायाह्ने सन्ध्याकाले ॥ १५ ॥ यासाम् गोपीनाम् । येन कृष्णेन ॥१६॥ तयोः रामकृष्णयोः । तत् श्लोके वक्ष्यमाणम् ॥ १७ ॥ तत् प्रलंबवधादि (१८)वयं कृष्णांगमारूढा इत्येव हृष्यताम् । स्वैश्वर्यम् निजवैभवम् (१)॥१८॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकोनविंशोऽध्यायः॥१९॥गोपरामैर्युज्यत इति गोपरामयुक् तस्य तथा (१)।हेयान्युपमानानि पाखंडादीनि, आदेयानि भक्ताचरितादीनि(२)।तत्र तयोर्द्वयोर्मध्ये।उत्पत्तितो दंशमशकचित्रितपृष्ठवहुपादादीनाम् , जीवनतो जीवनहेतुजलवृष्टेः। " सत्त्वं द्रव्ये प्राणिमात्रे सत्त्वं सत्तास्वभावयोः " इति यादवः । " परिधिः परिखाकाष्ठोपसूर्यशशिमंडले " इति धरणिः ॥१॥ न स्पष्टानि दृश्यानि ज्योतींषि सूर्यादीनि यत्र तत् । गुणैर्गुणकार्यैरिंद्रियादिभिः । प्रकाशकत्वात्सत्त्वसाम्यं विद्युतः, अभिमान्येव गर्जत्यतोऽभिमानस्य रजःकार्यत्वात्तत्कार्यस्य गर्जनस्यापि रजस्त्वमेवेति, अंबुदानामाच्छादकत्वेन तमःसाम्यमूह्यम् ॥ २ ॥ वर्षतीति पर्जन्यः 'पृषु—सेचने' पृषेः षस्य जोन्यप्रत्ययश्चौणादिकः । रविकरा एव मेघाकारेण परिणता वर्षंतीति निरूपितं हरिवंशे । 'आदित्याज्जायते वृष्टिः' इति मनूक्तेश्च । स्वगोभिः मेघाकारेण परिणतैः । अष्टौ मासानिति "कालाध्वनोरत्यंतसंयोगे" इति द्वितीया । वसु द्रव्यम् । उदमयम् जलरूपम् । अत्र स्वरूपे मयट् ॥ ३ ॥ आप्यायनकरम् तृप्तिकरम् " आप्यायनं पालने च समुद्रे वरुणे तथा । रवौ चंद्रे वारिजीवे धावने प्रियदर्शने ॥" इति ॥ ४ ॥ 'उष्ण उष्णागमस्तपः'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशामुखेषु खद्योतास्तमसा भांति न ग्रहाः ॥ यथा पापेन पाखंडा नहि वेदाः कलौ युगे ॥ ६ ॥ श्रुत्वा पर्जन्यनिनदं मंडूका व्यसृजन्गिरः ॥ तूष्णीं शयानाः प्राग्यद्वद्ब्राह्मणा नियमात्यये ॥ ७ ॥ आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनशुष्यतीः ॥ पुंसो यथाऽस्वतंत्रस्य देहद्रविणसंपदः ॥ ८ ॥ हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिताः ॥ उच्छिलींध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥ ९ ॥ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः ॥ धनिनामुपतापं च दैवाधीनमजानताम् ॥ १० ॥ जलस्थलौकसः सर्वे नववारिनिषेवया ॥ अबिभ्रद्रुचिरं रूपं यथा हरिनिषेवया ॥ ११ ॥

यसी उच्छूना पुष्टा । काम्यं तपो यस्य तस्य तनुः कामान्संप्राप्य । यथेति । सापि देवैः फलदानेन सिक्ता ॥ ५ ॥ ६ ॥ नित्यकर्मावसाने आचार्यनिनदं श्रुत्वा तच्छिष्या यथाऽधीयते तद्वदिति ॥ ७ ॥ अनुशुष्यतीरनुशुष्यंत्यः । अस्वतंत्रस्येंद्रियपरतंत्रस्य । स्वतंत्रस्य निरंकुशस्येति वा ॥ ८ ॥ हरिभिर्नीलैः शष्पैर्बालतृणैर्नीलवर्णा क्वचिदिंद्रगोपैः लोहितवर्णकीटविशेषैर्लोहिता तत्रतत्रोच्छिलींध्रैश्छत्राकारैरुद्भिदैः कृतच्छाया भूर्नृणां राज्ञां श्रीः सेनारूपा संपदिव ॥ ९ ॥ क्षेत्राणीति । तदा हि वृष्टे रविच्छेदे लसंतः प्रियंग्वादयो मुदं ददति विच्छेदे शुष्यंतोऽनुतापं चेति ॥ १० ॥ अबिभ्रदबिभरुः । यथा हरिनिषेवयेति । हरिसेवायां प्रवृत्ता हि सद्य एव सर्वे रुचिरा

इत्यमरः । काम्यं कामनाप्रधानम् तपो यस्य । तत्फलम् तपःफलं प्राप्य यथा पुष्टिमायाति तथेति योज्यम् ॥ ५ ॥ निशामुखेषु संध्यासु । 'खद्योतो ज्योतिरिङ्गणः' इत्यमरः । पाखंडा वेदविरुद्धमार्गाः । पापेन जनानां जन्मांतरीयकुत्सितादृष्टेन । एतेन दुर्जनवृद्ध्या सज्जनाभिभवोऽपि सूचितः ॥ ६ ॥ नित्यकर्मावसाने संध्याजपादिकर्मणोंते । मंडूका भेकाः "भेके मंडूकवर्षाभूशालूरप्लवदर्दुराः" इत्यमरः । एतेन भगवदनुग्रहमिच्छद्भिः कालो वंध्यो न कार्य इति ध्वनितम् ॥ ७ ॥ क्षुद्रनद्यः फल्गुजलाः । उत्पथवाहिन्यः तोयाधिक्यात्तटमुद्रिच्य यांत्यः । अनु वर्षानंतरं शुष्यंतः । इंद्रियवशवर्त्तिनो देहो हि व्यभिचारादिनोत्पथगामी, द्रविणमपि तदर्थव्ययेन तादृशमेव, संपदोऽत्र गवाश्वादिरूपाः ता अपि तदर्थमुपयोगात्तादृश एव, तथा नश्यंत्यपि शीघ्रमेव । पूर्वव्याख्याने इंद्रियपदमक्षरार्थालभ्यमतोऽकारमप्रश्लिष्यैवाह—स्वतंत्रस्येति । स्वतंत्रस्यापि निरंकुशगजवद्देहादय उत्पथगा नष्टाश्च भवंतीति भावः । अनेन रजोगुणस्वभावः सूचितः ॥ ८ ॥ कीटविशेषैः प्रथमवर्षणोद्भूतैर्जपापुष्पप्रभैः । लोहिता रक्ता । तत्रतत्र स्थले। यथा राज्ञां सेनायां केचिन्नीलवसनाः केचिद्रक्तांबराः केचिच्छ्वेतांबराः संत्ये वमत्रापीति बोध्यम् । एतेन भूमिवदेक एव चेतनो गुणसंगेन नानास्वभावः प्रतीयतेऽतो नानात्वरूपसंसारस्यासारत्वाद्धेयत्वेन हरिभक्तिरेव कार्येति ध्वनितम् ॥ ९ ॥ क्षेत्राणि केदाराः । संपद्भिः फलोद्रेकैः । दैवाधीनम् वर्षणावर्षणञ्चेत्यजानताम् । यद्वा—धनिनां क्रीतबहुन्नानां क्षेत्राणि बहुसस्यैरुपतापम्—अहो दैवेन किं कृतं किमर्थमस्माभिरेतावदन्नं गृहीतमधुना तु मूल्मपि नष्टं कुतो लाभ इत्यनुतापो भवतीति भावः । एतेन विषयादिं द्रियकर्षणशीलानां ज्ञानसमुद्रेकैः क्षेत्राणि शरीराणि मुदं ददति, धनिनां रजोमत्तानामनुतापमहो अस्माभिः कुतो न त्यक्त्वाविषयैर्हरिसेवा कृतेति भावः । 'मानिनाम्' इति पाठे कृषिर्निकृष्टं कर्म, वयं प्रतिष्ठिता न कुर्महे इति गर्ववतामनुतापम् । हंतहंत यदि कृषिं वयमकरिष्याम तदैतादृशीः सस्यसंपदः प्राप्स्यामेति पश्चात्तापं ददुर्मानिभ्य एवेत्यर्थः । यतस्ते मुदनुतापादिकं दैवाधीनं न जानंतीत्यर्थः । यथा निवृत्तिकर्मपरान्ब्रह्मलोकं गच्छतो दृष्ट्वा प्रवृत्तिपराः स्वर्गस्था अनुनयंतीति गम्योपमा भक्तैर्हेया ॥ १० ॥ यद्वा—जलौकसः पातालस्थाः, स्थलौकसो भूमिष्ठाः । सर्वे अंतरिक्षादिवासिनः । सर्वेषां दुःखं वारयतीति वारि ज्ञानम्, नवं निर्दोषं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरिद्भिः संगतः सिंधुश्चुक्षुभे श्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा ॥ १२ ॥ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ॥ अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ॥ १३ ॥ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः ॥ नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ॥ १४ ॥ लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः ॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥ १५ ॥ धनुर्वियति माहेंद्रं निर्गुणं च गुणिन्यभात् ॥ व्यक्ते गुणव्यतिकरेऽगुणवान्पुरुषो यथा ॥ १६ ॥ न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः ॥ अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १७ ॥ मेघागमोत्सवा हृष्टाः प्रत्यनंदञ्छिखंडिनः ॥ गृहेषु तप्ता निर्विण्णा यथाऽच्युतजनाऽऽगमे ॥ १८ ॥

भवंति तस्याः परमधर्मत्वात्परमसुखत्वाच्च तद्वदिति ॥ ११ ॥ कामाक्तं कामवासनायुक्तमिति श्वसनोर्मिसाम्यम् । गुणैर्विषयैर्युज्यत इति सरित्संगतिसाम्यम् ॥ १२ ॥ अधोक्षज एव चेतो येषां ते ॥ १३ ॥ असंस्कृता अक्षुण्णा नाभ्यस्यमाना इत्यसंस्कृतसाम्यम् । कालेन चाहता इति तृणाच्छादनसाम्यम् ॥ १४ ॥ यथा कामिन्यः पुंश्चल्यः ॥ १५ ॥ निर्गुणं ज्यारहितमपि गुणिनि गर्जितशब्दवति अभादशोभत । गुणव्यतिकरात्मके व्यक्ते प्रपंचेऽगुणवान्निर्गुणः पुरुषो यथेति ॥ १६ ॥ स्वभासा भासितयाऽहंमत्येति स्वचैतन्येनैव प्रकाशितेनाहंकारेण छन्नो जीवो यथा । यद्वा अहं विद्वान् दाता वेत्ता शूर इति स्वप्रतीत्यैवारोपितया इति ॥ १७ ॥ मेघागमेनोत्सवो येषा

तद्वारि नववारि तस्यातितरां सेवयाऽभ्यासलक्षणया । रुचिरं निर्दोषं ब्रह्मरूपमविभ्रद्बिभ्रति । किंभूतया—यथावद्धरिसेवया जातयेति शेषः । यथाश्रुतार्थस्तु स्वामिनैव स्फुटितः ॥ ११ ॥ श्वसनेन वायुना ' श्वसनः स्पर्शनो वायुः ' इत्यमरः । एतेन हरिभक्तैर्विषययोगो हेय इति सूचितम् ॥ १२ ॥ विव्यथुः विलीना बभूवुः । गिरणोद्गिरणसमर्थवत्त्वाद्गिरीणां व्यथाभावमात्रे दृष्टांतः, न तु बुद्धिमत्त्वाबुद्धिमत्त्वसत्त्वे इति । न विव्यथुर्न विव्यथिरे प्रत्युत रजआद्यपगमादशोभंतैवेत्यर्थः । व्यसनैराध्यात्मिकादितापैः । अधोक्षजचेतस्त्वादेव न व्यथंते "तपंति विविधास्तापा नैतान्मद्गतचेतसः" इति श्रीकपिलोक्तेः । प्रत्युत दैन्यवृद्ध्या गर्वासूयादिमालिन्यरहिता एव भवंतीति सद्भिरुपादेयमिति ॥ १३ ॥ संदिग्धाः इतो यांतीतो वेति संदेहास्पदाः । असंस्कृताः तृणाद्यपनयनहीनाः । कालेन चिरकालेन हता अपठिता इव । अनेन सच्छास्त्रं ज्ञानोत्पत्तये सदैवाभ्यसनीयमिति दर्शितम् ॥ १४ ॥ लोकबंधुषु जलप्रदानेनोपकारिषु गुणिषु विद्वत्तोपशमादिगुणयुक्तेषु, अनेन विवेकिना हरौ स्थिरा भक्तिर्विधेया न विद्युद्वच्चलेति भावः ॥ १५ ॥ निर्गुणः अनुगतसच्चिदात्मना यथा भाति तद्वदित्यर्थः । एतेन कालेनाभ्य सतां सगुण एव निर्गुणतामापद्यत इति ध्वनितम् ॥ १६ ॥ जीवो यथा वस्त्वात्मना न भाति तद्वदिति । न हि परिछिन्नेनाहंकारेणापरिच्छिन्न आत्माच्छादितुं शक्यते इत्यरुच्याह—यद्वेति । यथाऽहं विद्वानित्यादिरूपेणेति एतेनाहंमतित्यागेन यथार्थात्मज्ञानं भवतीति भावः ॥ १७ ॥ शिखंडिनो मयूराः । कुटुंबपालनादिक्लेशेन तप्ता अत एव निर्विण्णा अहो महाक्लेशदं गृहं हेयमिति निश्चिताः । अनेन स्वकल्याणार्थं हरिभक्ताऽऽगमने आनंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पीत्वाऽपः पादपाः पद्भिरासन्नानात्ममूर्तयः ॥ प्राक्क्षामास्तपसा श्रांता यथा कामानुसेवया ॥ १९ ॥ सरस्स्वशांतरोधस्सु न्यूषुरंगापि सारसाः ॥ गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशयाः ॥ २० ॥ जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे ॥ पाखंडिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥ २१ ॥ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः ॥ यथाऽऽशिषो विश्पतयः कालकाले द्विजेरिताः ॥ २२ ॥ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजंबुमत् ॥ गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः ॥ २३ ॥ धनवो मदगामिन्य ऊधोभारेण भूयसा ॥ ययुर्भगवताऽऽहूता द्रुत प्रीत्या स्नुतस्तनीः ॥ २४ ॥ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः ॥ जलधारा गिरेर्नादानासन्ना ददृश गुहाः ॥ २५ ॥

मतो हृष्टाः ॥ १८ ॥ नानात्ममूर्तयः अनेकरूपदेहाः ॥ १९ ॥ अशांतानि पंककंटकादियुक्तानि राधांास तटा।न यष' तेष्वपि न्यषुर्नितरामवसन् । सारसाश्चक्रवाकाः । अशांतानि घोराण्यनुपरतानि वा कृत्यानि येषु तेष्वपि गृहेषु ॥ २० ॥ ईश्वरे इंद्रे ॥ २१ ॥ नन्नाः प्रेरिताः । आशिषः कामान् । विश्पतयो राजानः वणिजां पतयो वा । द्विजेरिताः पुरोहितैरुक्ताः ॥ २२ ॥ प्रावृषि कृताः क्रीडा वर्णयति एवं वनमिति सप्तभिः । वर्षिष्ठं समृद्धम् ॥ २३ ॥ २४ ॥ वनौकसः पुलिंदीः प्रमुदिता भगवान् ददृशे । तथा वनराजीर्मधच्युतो मधस्रवा ददृशे । गिरेः सकाशज्जलधाराश्च तासां नादानासन्ना निकटवर्तिनीर्गुहाश्च । यद्वा वनौकसः प्रमुदिता आसन्

एव कार्य इति भावः ॥ १८ ॥ पद्भिर्मूलैः । शाखोपशाखापत्रपुष्पफलैरनेकदेहाः । प्राक् ग्रीष्मे । तपसा तापेन । क्षामाः कृशाः । यथा प्राक् कुटुंबावस्थायां कामानामनुसेवया जातेन तपसा श्रमेण श्रांता इन्द्रियदौर्बल्यमाप्ताः पादपाः संतः पादेन हरिपादोपासनेन पांति रक्षंत्यात्मानमिति पादपास्तपस्विनः सद्गतिसाधनत्वात्पद्भिश्शास्त्रैः पद्यंते सर्वपुरुषार्था एभिरिति पदस्तैः । अपः पुरुषार्थावाप्तिहेतून् ज्ञानरसान्पीत्वाऽऽस्वाद्य । नानात्मानो मूर्तयो विग्रहा येषां ते सर्वभूतात्मानो भवंतीति भावः । यद्वा—प्राग्वनिताद्यभावेन तपसा कामाग्निना श्रांताः कामानुसेवया पश्चात्स्त्र्याद्यवाप्त्या सततं कामभोगेन पुत्रतत्पुत्रादिरूपेण नानात्मानो भवंतीति भावः । एतेन विषयत्यागपूर्वकं शास्त्रविचारेण ज्ञानावाप्तिर्भवतीति सूचितम् ॥ १९ ॥ अंग हे नृप । ग्राम्याः प्राकृतजनाः । एतेन संसारिणां स्वभावो ध्वनितः । किं च, सर्वकृत्यावसाने हरिस्मरणादिकं करिष्याम इति न ध्येयम्, किं तु कृत्यानामवसानाभावाद्यदोपरतिस्तदैवेत्यपि सूचितम् ॥ २० ॥ नरकहेतुत्वादसद्वादैः । एतेन पाखंडिसंगाद्विहितधर्मत्यागन नरकावश्यंभावित्वमिति तात्पर्यम् ॥ २१ ॥ विशां प्रजानां पतयः । विट्पतय इति सम्यक्प्रतिभाति । छान्दसत्वाश्रयणे तु विश्पतय इत्यपि साध्वेव । अमृतम् जलम् “ अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरसे ॥” इति यादवः ॥ २२ ॥ प्रावृषि वर्षर्त्तौ । तद्वनं वृंदावनम् । अतिशयेन वृद्धं वर्षिष्ठं समृद्धम् । वर्षं वृष्टिस्तद्विद्यतेऽस्येति वर्षम् । मत्वर्थीयोऽच् । अतिशयेन वर्षं वर्षिष्ठं प्रभूतवर्षोपेतमिति वा ॥ २३ ॥ दुग्धाधारस्थलमूधस्तस्य भारेण । स्नुतस्तनीः क्षारितस्तन्यः ॥ २४ ॥ यद्वा—वनौकसो गावः मृगादयश्च । प्रमुदिताः प्रकृष्टानंदाः । आसन्निति क्रियापदं पृथक्कृत्वा सर्वेषां पदानां प्रथमांतता बोध्या । मधुच्युतश्श्चोतन्मकरंदाः । गोपक्षे मधु मधुरं क्षीरं च्योतंति स्रवंतीति मधु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति ॥ निर्विश्य भगवान्रेमे कंदमूलफलाशनः ॥ २६ ॥ दध्योदनं समानीतं शिलायां सलिलांतिके ॥ संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः ॥ २७ ॥ शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् ॥ तृप्तान्वृषान्वत्सतरान्गाश्च स्वोधोभरश्रमाः ॥२८॥ प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम् ॥ भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहिताम् ॥२९॥ एवं निवसतोस्तस्मिन्रामकेशवयोर्व्रजे ॥ शरत्समभवद्व्यभ्रा स्वच्छांब्वपरुषानिला ॥३०॥ शरदा नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः ॥ भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥३१॥ व्योम्नोऽब्दं भूतशाबल्यं भुवः पंकमपां मलम् ॥ शरज्जहाराऽऽश्रमिणां कृष्णे भक्तिर्यथाऽशुभम् ॥ ३२ ॥

तथा वनराजीर्वनराजयो वनपरंपरा मधुच्युत आसन् गिरेर्जलधारा आसन् त\ नेवंभतानादद्दशे सर्वतो ददर्श भगवान् । तथा धाराणां नादान्गुहाश्चेति ॥ २५॥२६॥२७ ॥ ॥ २८ ॥ २९ ॥ अथ शरदं वर्णयति एवं निवसतोरित्यष्टादशभिः । विगतान्यभ्राणि यस्यां सा । स्वच्छान्यंबूनि यस्यां सा अपरुषः शांतोऽनिलो यस्यां सा च सा च ॥ ३० ॥ नीरजानामुत्पत्तिर्यया तया शरदा कृत्वा । नीरजानामुत्पत्त्या वा ॥ ३१ ॥ व्योम्नोऽब्दमिति । व्योमादीनां चतुर्णां चतुरो मलान् शरदहरत् । आश्रमिणां चतुर्णां कृष्णे जाता भक्तिर्यथाऽशुभमसुखं हरति । तथाहि । ब्रह्मचारिणो गुर्वर्थोदकाहरणादिकष्टं यथा भक्तिर्हरति तया पूर्णस्य तेनानुपयोगात् गुरुभिरपि कृतार्थस्य तस्यानियोगात् एवं व्योम्नोऽब्दं जलदं शरज्जहार । यथा च गृहिणोपत्यादिसांकर्यं भक्तिर्हरति विविक्तवासरुच्युत्पत्तेः । तथा भूतानां शाबल्यं सांकर्यं शरत् । वर्षासु वृष्टिभिया संकुलानि वसंति यथा च वनस्थस्य मलधारणक्लेशं भक्तिर्हरति एवं भुवः पंकं शरत् । यथा च यतीनां कामादिवासनामलं श्रीकृष्णभक्तिर्हरति एवमपां मलं शरदिति ॥ ३२ ॥

च्युतः ॥ २५ ॥ वनस्पतिक्रोडे वृक्षमूले । यद्वा—वनस्पतीनां क्रोडं सुखं येन स वनस्पतिक्रोड इंद्रस्तस्मिन्नभिवर्षति सति "क्रोडः शनौ शूकरे ना रक्षोंकसुखसद्मसु" इति धरणिः । स्कंदानि शालूकादीनि, मूलानि मधुरमूलकादीनि, फलान्याम्रजंब्वादीनि ॥ २६ ॥ संभोजनीयैः श्रीदामादिभिर्गोपैः ॥ २७ ॥ वत्सतरान् अल्पवत्सान् ॥ २८ ॥ ताम् पूर्वोक्ताम् । आत्मशक्त्या माययोपबृंहिताम् ॥ २९ ॥ अपरुषोऽनिष्ठुरः ॥ ३०॥ प्रकृतिम् स्वरूपं स्वाच्छ्यम् 'संसिद्धिप्रकृती त्विमे । स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमरः ॥ ३१ ॥ शरत् ऋतुः 'अब्दर्त्तू शरदौ स्त्रियाम्' इति कोशात् । आश्रमिणाम् ब्रह्मचार्यादीनाम् । तया भक्त्या । तेन गुर्वर्थोदकाहरणेन । अनुपयोगात् उपयोगाभावात् । तस्य शिष्यस्य\ अनियोगात् अनाज्ञापनात् । "यावन्मां न विजानीयात्तावत्परिचरेद्गुरुम्" इत्याद्युक्तेः । "अकृतार्थं नियुंजीत कृतार्थे तु क्वचिन्मुनिः" इत्युक्तेश्च । अपो ददातीत्यब्दो मेघस्तम् । अपत्यादिभिः सांकर्यं संपर्कम् । "शबलश्चित्रवर्णे ना गवि स्त्री संकरे त्रिषु" इति धरणिः । संकुला मिलिताः । मद्भक्तस्तु 'चरेदविधिगोचरः' इत्युक्तेर्भक्तस्य मलधारणादेरनावश्यकत्वात् । एवं भक्तिवत् । यतीनाम् संन्यासिनाम् । एतेन हरिभक्तिशून्याः संन्यासिनोऽपि कामादिभिस्ताड्यन्त इति भावः । "तद्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवम्" इति पृथुं प्रति सनत्कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ॥ यथा त्यक्तैषणाः शांता मुनयो मुक्तकिल्बिषाः ॥ ३३ ॥ गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् ॥ यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥ ३४ ॥ नैवाविदन्क्षीयमाणं जलं गाधजलेचराः ॥ यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः ॥ ३५ ॥ गाधवारिचरास्तापमविंदञ्छरदर्कजम् ॥ यथा दरिद्रः कृपणः कुटुंब्यविजितेंद्रियः ॥३६॥ शनैःशनैर्जहुः पंकं स्थलान्यामं च वीरुधः ॥ यथाहंममतां धीराः शरीरादिष्वनात्मसु ॥ ३७ ॥ निश्चलांबुरभूत्तूष्णा समुद्रः शरदागमे ॥ आत्मन्युपरते सम्यङ्‌ मुनिर्व्युपरतागमः ॥ ३८ ॥ केदारेभ्यस्त्वपोऽगृह्णन्कर्षका दृढसेतुभिः ॥ यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥३९॥ शरदर्कांशुजांस्तापान्भूतानामुडुपोऽहरत् ॥ देहाभिमानजं बोधो मुकुंदो व्रजयोषिताम् ॥४०॥ खमशोभत निर्मेघं शरद्विमलतारकम् ॥ सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥ ४१ ॥

त्यक्तैषणाः त्यक्ताः पुत्रवित्तलोकैषणा यैस्ते ॥ ३३ ॥ गिरय इति । अयं भावः । न ह्युपाध्यायाः कर्मविद्यामिव ज्ञानिनो ज्ञानामृतं सर्वतो वितरंत्यपि तु कृपया क्वचिदेव । एवं गिरयः शिवं निर्मलं तोयं क्वचिन्मुमुचुः क्वचिन्न । न पुनः प्रावृषीव सर्वत इति ॥ ३४ ॥ गाधे क्षुद्रे जले चरंतीति तथा ते मीनादयः ॥ ३५ ॥ अविंदन् लेभिरे ॥ ३६ ॥ शनैःशनैरिति । तत्र ममतामिव पंकमहंतामिव आमतामपक्वतां जहुरिति ॥ ३७ ॥ आत्मन्युपरते त्यक्तक्रियो मुनिरिव निश्चलांबुः स एव व्युपरतागमो निवृत्तवेदघोष इव तूष्णीमभूदिति ॥ ३८ ॥ केदारेभ्यो बद्धसेतुशालिक्षेत्रेभ्यो दृढैः सेतुभिरपोऽगृह्णन् ततः परं वृष्ट्यभावात् । प्राणैरिंद्रियैः । तन्निरोधेनेंद्रियप्रत्याहारेण ॥ ३९ ॥ देहाभिमानजं बोध इव व्रजयोषितां तापं मुकुंद इव चेत्यर्थः ॥ ४० ॥ शरदा विमलास्तारका यस्मिंस्तत् । शब्दब्रह्मणो वेदस्यार्थान्पूर्वोत्तरमीमांसानिर्णी

मारोक्तेः ॥३२॥ सर्वस्वम् सर्वेषां स्वं धन धनोत्पादकं जलम्, जलादेव सर्वधनोत्पत्तेः प्रसिद्धत्वात् । शुभ्रवर्चसः शुक्लवर्णाः 'शुक्लशुभ्रशुचिश्वेत–' इत्याद्यमरोक्तेः । "वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि । पुंसि चंद्रस्य तनये" इति मेदिनी । पुत्रैषणा तु–पुत्रा मे भवेयुस्ते च श्रुतशीलाचारयुक्ताश्चिरजीविनो धनिनो यशस्विनश्च भवेयुरित्येवंरूपा, वित्तैषणा तु–वित्तं मे बहु भवेद्व्ययश्चाल्पो भवेद्यथाकथं धनसमृद्धिर्मे भवत्वित्येवंरूपा, लोकैषणातु–लोका मां सर्वे श्लाघयंतु कोऽपि मां न निंदेत्सुखं च मेऽत्र परत्र च स्यादित्येवंरूपा ज्ञेया । मुक्तकिल्बिषाः त्यक्तवासनाः ॥ ३३ ॥ ननु सर्वदा सर्वेभ्यः किमर्थं न ददतीत्याह–अयं भाव इति । उपाध्याया वेदांतारिक्तशास्त्राध्यापका यथा कर्मविद्यां सर्वेभ्यो ददति नैवं ज्ञानिनोपीत्याह–अपीति । प्रावृषीव वर्षर्ताविव सर्वत्र नेति भावः ॥ ३४ ॥ गाधजलेचराः अल्पांबुवासिनो मत्स्यादयः । क्षीयमाणम् शुष्यमाणम् । अविंदन् प्रापुः । क्षय्यम् क्षेतुं शक्यं क्षीयमाणमिति यावत् ॥ ३५ ॥ शरदर्कश्शरदृतुसूर्यः, तज्जम् । एतेन कुटुंबिनो गृहक्लेशं सहंते न तु तत्त्यजंतीति भावः ॥ ३६ ॥ तत्र तयोः । स्थलानि भूप्रदेशाः । वीरुधं तत्फलानि ॥ ॥ ३७ ॥ आत्मनि मनसि । यद्वा–उपे शर्वपाले हरौरते सति स इव मुनिरिव ॥ ३८ ॥ कर्षकाः कृषीवलाः ॥ ३९ ॥ देहोऽहमित्यभिमानेन जातं तापम् । बोध आत्मज्ञानम् । मुकुंदो व्रजयोषितां तापं यथेति दृष्टांतद्वयमत्र इवशब्दाभ्याहारेण ज्ञेयम् ॥ ४० ॥ सत्त्वेन व्यवसायेन गुणेन वा युक्तं यथा शोभते इति । पूर्वमीमांसानिर्णीतार्था विधिनिषेधार्थवादादिरूपाः, उत्तरमीमांसानिर्णीतार्थाः श्रवणादिसाधनैश्शास्त्रोपदिष्टपंचकोशादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अखंडमंडलो व्योम्नि रराजोडुगणैः शशी ॥ यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥ ४२ ॥ आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् ॥ जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ॥ ४३ ॥ गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाऽभवन् ॥ अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ॥ ॥ ४४ ॥ उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना ॥ राज्ञां तु निर्भया लोका यथा दस्यून्विना नृप ॥ ४५ ॥ पुरग्रामेष्वाग्रयणैरैंद्रियैश्च महोत्सवैः ॥ बभौ भूः पक्कसस्याढ्या कलाभ्यां नितरां हरेः ॥ ४६ ॥

तान्दर्शयतीति तथा तद्वत् ॥४१॥४२॥ समोऽन्यूनाधिकः शीतश्चोष्णश्च तम् । न तु गोप्यः । कृष्णापहृतचेतस्त्वेन तासां संतापो दुःसह इति । यद्वा नकार उपमार्थः । तदा कृष्णहृतचेतस इति चेतसा कृष्णमाश्लिष्य यथेत्यर्थः ॥ ४३ ॥ पुष्पिण्यो गर्भिण्यः । अन्वीयमानाः स्ववृषैः स्वपतिभिरनिच्छंत्योऽपि बलादनुगम्यमानाः । ईश्वराराधनार्थाः क्रिया बलात्फलैरनुगम्यमानाः समस्तभोगगर्भा यथेति ॥ ४४ ॥ कुमुत्कुमुदम् । कुत्सिता मुद्यस्येति दस्युसाम्यम् ॥ ४५ ॥ आग्रयणै

विवेकेन वस्तुतत्त्वावधारणोपयोगिनस्तान् । शुद्धचित्ते एव श्रवणादिना ज्ञानं जायते नान्यथेति तात्पर्यम् ॥ ४१ ॥ अखंडमंडलः परिपूर्णकलः ॥ ४२ ॥ प्रसूनवनम् पुष्पवनम् । दार्ष्टांतिकाद्वैषम्यं दृष्टांते मत्वा तस्यार्थांतरमाह—यद्वेति । तदा शरदि । इत्यर्थ इति । कृष्णे हृतं प्रापितं चेतो याभिस्तास्तथा । कृष्णध्यानेन संजातानंदा इति तात्पर्यम् ॥ ४३ ॥ यद्वा—ईशक्रियाः सभाम्यकर्माणि यथायत्नेनैव फलंति तद्वदिति भावः ॥ ॥ ४४ ॥ कुमुदिति । द्वितीयाबहुत्वे प्रथमैकवचनम् । कुत्सिते चौरजाराद्यवकाशयोग्ये रात्रिकाले मुदानंदो यस्येति । दस्युसाम्यम् चौरतौल्यम् ॥ ४५ ॥ यद्यपि नवान्नानि बहूनि तथापि "गृहमेधी व्रीहियवाभ्यां शरद्वसंतयोर्यजेच्छ्यामाकैर्वनीवर्षासु " इत्यादिश्रुतिवाक्यविहितैर्वैदिकैः पितृदेवार्चनरूपैः, लौकिकैः नानालोकैः संभूय संपादितै रावणादिवधलीलारूपैः । हरेः कलाभ्यामित्युक्तेः ' कृष्णस्तु भगवान्स्वयम् ' इत्युक्तिव्याकोपः स्यादिति चेत्, अत्र व्याख्यांतरेण समाधत्ते—किंभूता भूः—हरेः परमेश्वरस्य कला तदेकदेशजातत्वात् " पद्भ्यां भूमिः " इति श्रुतेः । ' भूः पादौ ' इति स्मृतेश्च । पुरेषु श्रीमथुरादिषु ग्रामेष्विव ग्रामेषु श्रीनंदावासादिषु । आग्रयणैरिति " नवान्नं नैव नंदायां न च सुप्ते जनार्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत् ॥" इति स्मृतेः। प्रबोधनांते वृश्चिक इति ज्ञेयम् । शरदंतत्वाच्छरद्यवहारः । इन्द्रियैरिंद्रदेवताकैः 'इन्द्रमिंद्रियकामस्तु' इत्युक्तेरिंद्रपूजामयैरित्यर्थः । कार्त्तिकमध्ये हि तत्पूजा व्रजादौ पूर्वमासीत्तां खंडयित्वैव श्रीभगवता गोवर्द्धनपूजा प्रवर्त्तितेति । इदं शरद्वर्णनमिंद्रमखभंगात्प्रागिति इंद्रपूजाया लोकपरंपरागतत्वं श्रीव्रजराजेन वर्णितमिति विश्वनाथादयः । आभ्याम् रामकृष्णाभ्याम्, नितरां बभाविति योज्यम् । त्यदादीनां बुद्धिस्थपरामर्शकत्वात् इदमा रामकृष्णौ परामृश्येते । यद्वा—बलभद्रस्य हरिकलात्वाल्लिंगसमवायेन कृष्णेऽपि तदुक्तिर्न विरुद्धा । बलस्य कलात्वं तु "वासुदेवकलानंतः सहस्रवदनः स्वराट्" इत्युक्तेः, 'अहं भवो यस्य कला कलायाः' इति तदुक्तेश्च, 'दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोपनीतः' इति द्वितीयाध्याये देवकृतस्तुतावुक्तत्वाच्च । यद्वा—हरेश्चंद्रमसः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वणिङ्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धा यथा सिद्धाः स्वपिंडान्काल आगते ॥ ४७ ॥ इति श्रीभा० म० दश० पू० प्रावृट्छरद्वर्णनं नाम विंशोध्यायः ॥ २० ॥ श्रीशुक उवाच ॥ इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना ॥ न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः ॥ १ ॥ कुसुमित वनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रम् ॥ मधुपतिरवगाह्य चारयन्गाः सहपशुपालबलश्चुकूज वेणुम् ॥ २ ॥ तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् ॥ काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥ ३ ॥ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितम् ॥ नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥ बर्हापीडं नटवरवपुः कर्णयोः काणकारं बिभ्रद्वासः कनककपिशं वैजयंतीं च मालाम् ॥ रंध्रान्वेणोरधरसुधया पूरयन्गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ॥ ५ ॥

नवान्नप्राशनार्थैर्वैदिकैरैंद्रियैरिंद्रियार्थैर्लौकिकैश्च महोत्सवैः । कलाभ्यां रामकृष्णाभ्यां दर्शनादिमहोत्सवाभ्याम् ॥ ४६ ॥ वणिजो यतयो नृपाः स्नातकाश्च दृष्टादृष्टाभ्यां वर्षरुद्धाः संतो निर्गम्यार्थान्वाणिज्यस्वाच्छंद्यदिग्विजयविद्यादीन्प्रपेदिरे प्रापयंत । यथा मंत्रयोगादिसिद्धाः आयुषा रुद्धाः काले आगते स्वपिंडान्योगादिप्राप्यान्देवा दिदेहानिति ॥ ४७ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां विंशतितमोऽध्यायः ॥ २० ॥ छ ॥ एकविंशे शरद्रम्यवृंदावनगते हरौ ॥ तद्वेणु स्वनमाकर्ण्य गोपीभिर्गीतमीर्यते ॥ १ ॥ इत्थमेवंभूतं वनम् । तदेवाह । शरदा स्वच्छानि जलानि यस्मिंस्तत् । वायुना वातमनुगतं वनं तदेकव्याप्तमित्यर्थः ॥ १ ॥ ततश्च कुसुमितवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाः खगाश्च तेषां कुलानि तैर्घुष्टाः सरांसि सरितो महीध्राश्च यस्मिंस्तद्वनं कृष्णोऽवगाह्य प्रविश्य वेणुमवादयत् ॥ २ ॥ तत्कृष्णवेणुगीतं स्मरस्योदयो यस्मात्तदाश्रुत्य श्रुत्वा परोक्षं यथा भवति तथा व्रजे स्थितत्वात् ॥ ३ ॥ विक्षिप्तमनसो व्याकुलचित्ताः ॥ ४ ॥ यादृशं कृष्णस्मरणं

कलाभ्यां शुक्लद्वितीयासायमुदिताभ्यामुत्सवै राजकीयपुरुषप्रभृतिकृतैरित्यर्थः । "हरिश्चन्द्रार्कवाताश्वे शुकभेकयमादिषु" इति मेदिनी ॥ ४६ ॥ स्वाच्छंद्यम् स्वेच्छया विचरणम् । काले देवादिदेहप्राप्तिसमये । वर्षेण वृष्ट्या "वर्षो स्त्री भारताद्यंबुवृष्ट्यब्दे प्रावृषि स्त्रियाम्" इति यादवः ॥ ४७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्धे विंशोऽध्यायः ॥ २० ॥ शरदा रम्यं शरद्रम्यम् । तद्वेणुस्वरम् कृष्णवेणुनादम् (१) । तदेव इत्थंभूतत्वमेव । इत्यथ इति । मंदसुगंधिशीतलमिति भावः । "न्यविशत्" इत्यात्मनेपदं तु नार्षत्वात् । अच्युत इति । विनापि वनादिक्रीडां सुखस्थितिं वक्ति ॥ १ ॥ घुष्टा घोषिणः । सरांसि कासाराः, सरितः स्यंदमाना यमुनाद्याः, महीध्रा गोवर्द्धनाद्याः । वेणुकूजनस्य कामोद्दीपकत्वेन गोप्याकर्षणार्थत्वमत्र ज्ञेयम् ॥ २ ॥ स्मरस्य कामस्य 'कामः पंचशरः स्मरः' इत्यमरः । यद्वा—कासांचिदहृष्टश्रुतम् ॥ ३ ॥ आरब्धतेत्यारब्धाः अकर्मकत्वात्कर्तरि क्तः कृतारंभाः । तद् वेणुगीतम् ॥ ४ ॥ यादृशम् यत्प्रकारकम् । तासाम् गोपीनाम् । क्षोभकम् संचालकम् । तत् स्मरणम् । वरम् शोभनम् । 'आपीडं मुकुटे स्रजि' इति शाश्वतः । संभवत्वाद्वपुर्विशेषणमपि बर्हेत्यादि । कर्णिकारं हयमारपुष्पं तदाकारं चतुर्दलं भूषणं वा "कर्णिकारः पुमानारग्वधद्रौ च द्रुमोत्पले" इति मेदिनी । "कर्णिकारो हयारातिपुष्पे कर्णविभूषणे । चंडातपुष्पसदृशे हैरण्ये च द्रुमोत्पले ॥ पारिव्याधतरौ बाणे लोहकारे कलादके" इति धरणिः । वैजयंतीमिति । "वैदूर्यमुक्ताफलनीलवज्रैः समाणिकैः संग्रथिता हि माला । वायोरपां भूमिखतेजसां हि तत्त्वैः प्रदिष्टा खलु वैजयंती ॥" केचित्तु श्वेतैः पीतैस्तथारक्तैर्हरितैर्नीलवर्णकैः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति वेणुरवं राजन्सर्वभूतमनोहरम् ॥ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयंत्योऽभिरेभिरे ॥ ६ ॥ गोप्य ऊचुः ॥ अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ॥ वक्त्रं व्रजेशसुतयोरनुवेणु जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ ७ ॥ चूतप्रवालबर्हस्तबकोत्पलाब्जमालाऽनुपृक्तपरिधान विचित्रवेषौ ॥ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा नटवरौ क्व च गायमानौ ॥ ८ ॥

तासां मनसः क्षोभकं जातं तदाह । बर्हापीडमिति । नटवद्वरं वपुर्बिभ्रद्वृंदावनं प्राविशत् । कथंभूतं वनम् । स्वपदैरंकितैः रमणं रतिजनकम् । गोपवृंदैर्गीतकीर्तिः तथा बर्हमयमापीडं शिरोभूषणं बिभ्रत् । बर्हमापीडो यस्मिन्निति वपुषो विशेषणं वा । वेणुवादनमुत्प्रेक्षते । रंध्रान्वेणोरिति । अतो नूनमधरसुधैव पूर्णाद्वेणोरुच्चलंती गीतवत्प्रसर्पितुमर्हतीति भावः ॥ ५ ॥ अभिरेभिरे वर्णयंत्यः पदेपदे परमानंदमूर्तिं कृष्णं परिरब्धवत्यः ॥ ६ ॥ अनुवर्णनमेवाह अक्षण्वतामिति त्रयोदशभिः । अक्षण्वतां चक्षुष्मतां तावदिदमेव फलं प्रियदर्शनं परमन्यन्न विदामो न विद्म इत्यर्थः । तच्च फल सखिभिः सह पशून्वनं प्रवेशयतो रामकृष्णयोर्वक्त्रं यैर्निपीतं सादरं दृष्टं तैरेव जुष्टं सेवितं नान्यैरित्यर्थः । कथंभूतं वक्त्रम् । अनुवेणु वेणुमनुवर्तमानं तं वादयत् । तथाऽनुरक्तकटाक्षमोक्षं स्निग्धकटाक्षविसर्गम् । अथ वा यैर्निपीतं तयोर्वक्त्रं तैर्यज्जुष्टमिदमेवाक्षण्वतामक्ष्णोः फलमिति ॥ ७ ॥ अन्या आहुः । चूतेति । चूतप्रवालादीनां चित्राभिर्मालाभिरनुपृक्ते ईषदंतरांतरतः संयुक्ते परिधाने नीलपीतांबरे

पुष्पैरेभिः सुगंधैश्च वैजयंत्यस्ति मालिका ॥'' इति भक्तिसुधार्णवे । क्वचित्तु–“ वैजयंती भवेन्मालाष्टधामौक्तिकनिर्मिता ” इति । “ जीमूतकरिमत्स्याहिवेणुशंखवराहकाः । शुक्तयश्चैव विज्ञेया अष्टौ मौक्तिकयोनयः ॥'' इति मल्लिनाथः । उत्प्रेक्षते तदलंकारेण वदति । अन्यनिमित्तिके वस्तुन्यन्यनिमित्तिकत्वारोप उत्प्रेक्षालंकारः । इति भाव इति । अधरनिमित्तिकसुधायां वेणुनिमित्तिकगीतत्वारोपोऽत्रोत्प्रेक्ष्यते इति तात्पर्यम् ॥ ५ ॥ इति बर्हापीडमित्यादिवर्णयंत्यः । वेणुरवं श्रुत्वा सर्वभूतानां मनोहरं प्रियं श्रीकृष्णं व्रजस्त्रियोऽभिरेभिर इति संबंधः ॥६ ॥ तावत् मुख्यम् । इत्यर्थ इति । वेत्तेरादादिकत्वादार्षः शब्रादिरित्यर्थः । वक्त्रम् मुखम् । यैः पुरुषैः । तैरेव जुष्टम् नेत्रफलं प्राप्तमिति । इत्यर्थ इति । अन्येषां निष्फलनेत्रत्वमिति भावः । “ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये ” इत्युक्तेः । ननु मनुष्यास्तु भगवद्गुणश्रवणादिद्वारा कर्णाद्यंगैरपि कृतार्था भवंति किमेकेन चक्षुषेति चेत्तदा प्रकारांतरमाह–अथ वेति। यैश्चक्षुर्भिर्निपीतं तैरेव चक्षुर्भिर्यद्दर्शनं जुष्टं प्राप्तम् । इदमेव कृष्णदर्शनमेव । नेत्रवतां नेत्रयोः साफल्यं न तु प्रियपुत्रादिदर्शनमपि नेत्रयोः साफल्यकरमिति भावः। व्रजेशसुतयोरिति । 'तातं भवंतं मन्वानः' इति वसुदेवोक्तेः 'रामोभिवाद्य पितरौ' इति श्रीशुकोक्तेश्च बलदेवस्यापि व्रजेशसुतत्वं व्रजे प्रसिद्धमेव। अभीप्सितोर्थस्त्वयम्–व्रजेशसुतयोर्मध्येऽनुपश्चाद्वर्त्तिनो यस्य वक्त्रं वेणुजुष्टं तत् यैर्वेति। वाशब्देन यैर्जुष्टं दृष्टं श्रुतमाघ्रातं यैर्वा नितरामतिशयेन पीतम् ।'वै'इति पाठे वै निश्चितमेव लज्जाधैर्य्ये अपि त्यक्त्वा निपीतं तेषामेवाक्षवतां जनानां चक्षुरादींद्रियाणां साफल्यं नान्येषाम्–तदद्य दीयतां कुलधर्मभयलज्जादिभ्यो जलांजलिरिति भावः। ननु दर्शनश्रवणमस्माकं कुलवतीनां संभवतु नाम वक्त्रकर्मकं निपानं तु ह्रीमतीनां कथं संभवेत्तत्राहुः–अनुरक्तेषु जनेषु कटाक्षस्य मोक्षो येन तत्तथा संधाय, कटाक्षशरो मुच्यते यथा तदाघातेन विह्वलीभूय लज्जाधैर्यादिकमपि विस्मृत्य तत्पास्यथेति भावः॥ ७॥ अन्याः भगवत्तत्त्वज्ञाः। चूतप्रवालम् आम्रपत्रम्, बर्हम् मयूरपिच्छम्, स्तबकः पुष्पगुच्छः, उत्पलाब्जा प्रसिद्धौ । रङ्गे नटादीनां नर्तनस्थले “रंगं स्थले नटादीनां नाट्यादियो ग्यभूमिके। सीसके चापि कार्पासे पुंभूम्नि नीवृदंतरे॥'' इति धरणिः। गाये गाने मानः सर्वैर्दत्त आदरो ययोस्तौ। यद्वा–गाये गाने मानो गर्वो ययोस्तौ, स चासमतुल्यस्त्रिलोक्यामपि गायको नास्ति के यूयं वराकाः गोपा इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् ॥ भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथाऽऽर्याः॥
॥९॥वृन्दावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि ॥ गोविंदवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्वऽपरतान्यसमस्तसत्त्वम्॥१०॥

ताभ्यां विचित्रो वेषो ययोस्तौ क्व च कदाचित्पशुपालगोष्ठ्यां गोपालसभायां मध्ये अलमत्यर्थं विरेजतुः । अहो गोपालानां पुण्यमिति भावः ॥ ८ ॥ अन्या ऊचुः । हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत्कृतवान् । कथम् । यद्यस्माद्गोपिकानामेव भोग्यां सतीमपि दामोदराधरसुधां स्वयं स्वातंत्र्येण यथेष्टं भुंक्ते । कथम् । अवशिष्टरसं केवलमव शिष्टं रसमात्रं यथा भवति तथा। यतो यासां ह्रदिनीनां पयसा पुष्टस्ता मातृतुल्या ह्रदिन्यो हृष्यत्त्वचो विकसितकमलवनमिषेण रोमांचिता लक्ष्यंते । येषां वंशे जातस्ते तरवो मधुधारामिषेणानंदाश्रु मुमुचुः । यथा आर्याः कुलवृद्धाः स्ववंशे भगवत्सेवकं दृष्ट्वा हृष्यत्त्वचोऽश्रु मुंचंति तद्वदिति ॥ ९ ॥ काश्चिदाहुः । हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषेण वितनोति । कथंभूतम् । यद्देवकीसुतस्य पदांबुजाभ्यां लब्धा लक्ष्मीः शोभा संपद्येन तत् । किं च गोविंदस्य वेणुमनु वेणुनिनादं श्रुत्वाऽनंतरं मंद

प्रकारः । इति भाव इति । यो योगिनां ध्यानपथेनाप्नोति स सर्वेश्वरः । गोपेषु तदानुकूल्येनास्त इत्यद्भुतं गोपादृष्टमिति तात्पर्यम् ॥८॥ अन्याः अनुरागिण्यः । किम् अनिर्वाच्यम् । कथं ज्ञातमिति शेषः।यतो हेतोः । ह्रदिन्यो नद्यः सरस्यो वा । वृक्षाद्या अपि तत्र भगवदनुरागिणस्तत्र किं चेतनानुरागवार्त्तेति भावः । हे गोप्यो वेणुर्मुरली किं स्वित्कुशलं मंगलमाचरत् अपि तु न किमपि, स्थावरजातित्वेनैव लक्ष्यते इति भावः । तदपि दामोदराधरसुधां भुंक्त इति कथं वयं सोढुं प्रभवाम इति भावः । तत्र हेतुः—गोपिकानामिति । अधरसुधायां हि गोपिकानामस्माकमेव स्वत्वं कृष्णस्य गोपजातित्वान्नित्यं रात्रावस्माभिः संभुज्यमानत्वात् । वेणुस्तु विजातीयः तत्रापि कृष्णरमितत्वमात्मनो मत्वा कृष्णप्रेयसीत्वाभिमानं धत्ते, तत्रापि धार्ष्ट्येन न पुनः पौरुषमाविष्कृत्य स भुंक्ते, तत्रापि परकीयं धनं, तत्रापि स्वयमेव न त्वन्यं जनं कमपि संगिनं करोति, तत्रापि चौर्येण किं तु धन स्वामिनीरस्मान् फूत्कारेण ज्ञापयित्वैव, किं चायं न फूत्कारः किं तु संभोगोत्थमणितमेव, तच्चास्मान् श्रावयित्वैव, तत्रापि न वशिष्टो नावशिष्टो रसः किञ्चिन्मात्रोपि यत्र तद्यथा स्यात्तथा भुंक्ते। 'वष्टिभागुरिः' इत्यलोपः । धन स्वामिनीनामस्माकं कृते स्वभुक्तावशिष्टमपि किञ्चिन्न रक्षतीत्यहो धार्ष्ट्यमिति भावः । किं च, अकुशलवर्त्तिनः सर्वे जनास्तादृशा एवेत्याहुः । यद्यतोऽधरसुधाभोगान्नद्योपि हृष्यत्त्वच उत्फुल्लकमलादिमिषेण पुलकवत्यो बभूवु स्तरवोपि मकरंदमिषेणाश्रु मुमुचुर्यथाऽऽर्या भगवद्गुणान् श्रुत्वाश्रुपुलकादिमंतो भवंति तथैव ते वेणोर्मणितं श्रुत्वेति। ह्रदिन्योऽस्य सख्यस्तरवश्च सखायो दूता एवेति सर्वेस्माकं वैरिण एवेति भावः । अतोऽयं गोप्यः निभृतं कुत्रापि रक्षणीयो यथा कृष्णाधरं न प्राप्नुयादित्यसूयाख्यः संचारी व्यंजितः ॥ ९ ॥ काश्चित् स्ववासभुवं श्लाघयंत्य आहुः—विपदेन स्वर्गलाभः । इह देवकीपदं यशोदावाचकम्, गोपीनां वसुदेवपत्नीजत्वस्याज्ञातत्वात् । न केवलं पादांकनसंपत्तिरेव किं त्वन्यदपि लोकांतरापेक्षया वैलक्षण्यमस्ति तदाह—किञ्चेति । गोविंदं नीलमेघं वेणुनादं च तद्ध्वनिं मत्वा तत्रतत्र मयूरा नृत्यंतीति । तत्रतत्र स्थले । समस्तानि गोवत्सपक्षिभुजंगादीनि । एतत् गोविंदपादांकनवेणुनादाकर्णनोत्तरमयूरनृत्यादि । अन्येषु स्वर्गादिषु । इत्यर्थ इति । पृथिव्यामपि वृंदावनमेव कुलकीर्त्तिकरपुत्रवद्वरमिति भावः । 'द्वे नाम्नी नंदभार्याया यशोदा देवकीति च'इति । लब्धा लक्ष्मीर्ध्वजवज्रादि चिह्नमयी शोभा येन तत् । लोके च पृथिवी धन्या तत्र जंबूद्वीपस्तत्र भारतं तत्रार्यावर्तं तत्र माथुरमंडलं तत्रापि श्रीवृंदावनमिति न्यायेन वृंदावनादधिकं न किमपीति । अत्रास्मान्नर्तयेति मयूरैः प्रार्थितस्य गोविंदस्य वेणु वादनं तदीयतालगत्यैव मंडलीभूय नृत्यतां तेषां मध्ये तस्यापि सनृत्यं वादनम्, ततस्तद्वाद्येन तुष्यतां पारितोषिकस्वीयदिव्यबर्हप्रदानं तस्मै, तेन च वादकलोकरीत्या साह्लादं तद्गृहीत्वा स्वशिरस्युष्णीषस्योपरिधारणमिति॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धन्याः स्म मूढमतयोऽपि हरिण्य एता या नंदनंदनमुपात्तविचित्रवेषम् ॥ आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥ ११ ॥ कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम ॥ देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ १२ ॥ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबत्यः ॥ शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्मनि दृशाऽश्रुकलाः स्पृशंत्यः ॥ १३ ॥ प्रायो बतांऽब विहगा मुनयो वनेऽस्मिन्कृष्णेक्षितं तदुदितं कलवेणगीतम् ॥ आरुह्य ये द्रुमभुजान्रुचिरप्रवालान्शृण्वंत्यमीलितदृशो विगतान्यवाचः ॥ १४ ॥

गर्जितं नीलमेघं तं मत्वा मत्ता ये मयूरास्तैराचरितं नृत्यं प्रेक्ष्य संघशस्तत्रतत्राद्रिसानुष्वपरतान्युपरतक्रियाण्यन्यानि समस्तानि सत्त्वानि यस्मिंस्तत् । नैतदन्येषु लोकेषु विद्यतेऽतो लोकांतरापेक्षया भुवः कीर्तिं वितनोतीत्यर्थः ॥ १० ॥ अपरा आहुः । हे सखि मूढमतयस्तिर्यग्जातयोऽप्येता हारिण्यो धन्याः कृतार्थाः या वेणुरणितं वेणुनादमाकर्ण्य नंदनंदनं प्रति प्रणयसहितैरवलोकनैर्विरचितां पूजां संमानं दधुः कृतवत्यः । कि च कृष्णसारैः स्वपतिभिः सहिता एव दधुः । अस्मत्पतयस्तु गोपाः क्षुद्राः समक्षं तन्न सहंत इति भावः ॥ ११ ॥ अन्या ऊचुः । हे गोप्यः आश्चर्यं शृणुत वनितानामुत्सवो यस्मात्तद्रूपं शीलं च यस्य तं कृष्णं निरीक्ष्य तेन वादितवेणोरसंकीर्णं गीतं च श्रुत्वा विमानैर्गच्छंत्यो देव्यो देवानामंकेषु स्थिता अपि स्मरेण नुन्नसाराः परिक्षितधैर्या मुमुहुः । मोहे लिंगमाहुः । भ्रश्यत्प्रसूनाः कबराश्चूडा यासां ताः । विगता नीव्यो यासां ताः । अत्र सर्वत्र वक्तृभेदान्नातीव संगतिर्वक्तव्या ॥ १२ ॥ क्षरणशंकयैवोत्तभितैरुन्नमितैः कर्णपुटैः पिबंत्यः सत्यः तथा शावाश्च वत्साश्च स्तनपाने प्रवृत्ताः समनंतरमेव गीतं श्रुत्वा तदेव पीयूषमुत्तंभितकर्णपुटैः पिबंतः स्नतस्तनपयःकवलाः केवलं स्तनेभ्यः क्षरितक्षीरग्रासा मुखेषु येषां ते तस्थुर्विस्मृतक्रिया बभूवुरित्यर्थः । तत्र हेतुः । गोविंदं दृशा मार्गेणात्मनि मनसि स्पृशंत्य आलिंगंत्यः अत एवाश्रूणां कला लेशा लोचनेषु यासां ता गावस्ते च शावाः ॥ १३ ॥ भो अंब मातरस्मिन्वने

अपराः प्रेमवत्यः । उपात्तः स्वीकृतः बर्हादिभिर्विचित्रो वेषो येन तम् । अस्मत्तस्ता धन्याः स्वानुकूलपतित्वेनेत्याहुः—किं चेति । इति भाव इति । गोपानां प्रायो बुद्धिहीनतास्तीति तात्पर्यम् । यद्वा—कृष्ण एव प्रीतिविषयत्वेन सारो येषां ते यथार्थनामानस्तासां पतयस्स्वपत्नीः कृष्णानुरागिणीरालक्ष्य स्वगार्हस्थ्यमेव धन्यं मन्यंते स्मेति ॥ ११ ॥ अन्याः कामिन्यः । असंकीर्णम् पृथक्पृथक्परिज्ञातश्रीभैरवादिस्वरम् । परिक्षितं च्युतं धैर्यं मनोधारणसामर्थ्यं यासां ताः । भ्रस्यंति च्यवंति प्रसूनानि कुसुमानि याभ्यस्तास्तथा । 'प्रसूनं कुसुमं सुमम्' इत्यमरः । 'प्रसूनं तु प्रसूते फलपुष्पयोः' इति हैमः । 'नीवी वस्त्रांशुकग्रंथ्योः' इति यादवः । नीव्यः कटिबंधग्रंथ्यः । मुमुहुः विचित्ता बभूवुः । मोट्टायितमिदं तदुक्तम्—"कांतस्मरणवार्त्तादौ हृदि तद्भावभावतः । प्राकट्यमभिलाषस्य मोट्टायितमिदं स्मृतम् ॥" इति । अत्र एषु । सर्वत्र सर्वेषु श्लोकेषु । नातीव संगतिः नातिशयेन संगतिः प्रसंगादिरूपा ॥ १२ ॥ तदेव गीतमेव । पीयूषम् अमृतम् । इत्यर्थ इति । बालवत्सानामपि महानंदो भवति किमुत विशेषविदामिति भावः । तत्र क्रियाविस्मृतौ । अत एव मनसाऽऽलिंगनादेव ॥ १३ ॥ काचित्किंचिद्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः ॥ आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंति पादयुगलं कमलोपहाराः ॥ १५ ॥ दृष्ट्वाऽऽतपे व्रजपशून्सह रामगोपैः संचारयंतमनुवेणुमुदीरयंतम् ॥ प्रेमप्रवृद्ध उदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषाऽम्बुद आतपत्रम् ॥१६॥ पूर्णाः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्य आननकुचेषु जहुस्तदाधिम् ॥ १७ ॥

ये विहगाः पक्षिणस्ते प्रायेण मुनयो भवितुमर्हन्ति । कुतः । कृष्णेक्षितं कृष्णदर्शनं पुष्पफलाद्यंतरं विना यथा भवति तथा रुचिराः प्रवाला येषां तान्द्रुमभुजान्वृक्षाणां शाखा आरुह्य तेन श्रीकृष्णेनोदितं प्रकटितं कलवेणुगीतं केनापि सुखेनामीलितदृशस्त्यक्तान्यवाचश्च संतो ये शृण्वंतीति । तथाहि । मुनयः श्रीकृष्णदर्शनं यथा भवति तथा वेदोक्तकर्मफलपरित्यागेन वेदद्रुमशाखारूढा रुचिरप्रवालस्थानीयानि कर्माण्येवोपाददानाः सुखिनः संतः श्रीकृष्णगीतमेव शृण्वंति।अतस्त एवैते भवितुमर्हंतीति भावः ॥ १४ ॥ आस्तां चेतनानां कथा नद्योऽप्यावर्तैः परिभ्रमैर्लक्षितेन सूचितेन मनोभवेन कामेन भग्नो वेगो यासां ता आलिंगनेन स्थगितमाच्छादितं यथा भवति तथा ऊर्मय एव भुजास्तैः कमलोपहाराः कमलान्युपहरंत्यो मुरारेः पादयुगलं गृह्णंति धारयंति ॥ १५ ॥ लोकार्तिहरणशीलत्वादिसाम्यात्सख्युः श्रीकृष्णस्यांबुदस्तदुपर्युदितः पुनः प्रेम्णा प्रवृद्धः सन्कुसुमावलीभिः पुष्पसमूहैस्तत्तुल्यैस्तुषारैर्वा सह स्ववपुषा छत्रं विहितवान् ॥ १६ ॥ साहंकारमाहुः । पूर्णाः कृतार्थाः पुलिंद्यः शबरांगनाः । कथमित्यत आहुः । प्रथमं दयितानां स्तनेषु मंडितेनानुलिप्तेन पुनश्च रतिसमये उरुगायस्य श्रीकृष्णस्य पदाब्जयो रागेणारुण्येन श्रीः कांतिर्यस्य तेन कुंकुमेन । पुनस्तस्य वनस्थलीषु चंक्रमणेन तृणेषु रूषितेन लग्नेन तद्दर्शनेन तथाभूतस्य कुंकुमस्य दर्शनेन स्मरकृता रुक तापो यासां तास्तेन कुंकुमेनाननेषु कुचेषु च कामतप्तेषु लिंपंत्यस्त

गङ्गा स्वमातरं वदति । यद्वा—अम्बेति सखीं प्रति संबुद्धिः, भावाविष्टप्रमदास्वभावत्वात् । हेतुं शंकते—कुत इति । केनापि वक्तुमशक्येनेत्यर्थः । उपाददानाः स्वीकुर्वाणाः । यतः श्रीकृष्णगीतं शृण्वंति अतो हेतोः । जन्मांतराभ्यासवशादित्यर्थः । त एव मुनय एव एते पक्षिणः । इति भाव इति । न हि जन्मांतराभ्यासं विना भगवद्गीतश्रवणे प्रवृत्तिर्भवति "पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" इति गीतासूक्तेः ॥ १४॥ तदा वेणुवादनकाले । तत् वेणुगीतम् । उपधार्य प्राप्य । यद्यप्यचेतनेषु कामवेगो वक्तुमशक्यस्तथापि तदधिष्ठातॄणां दवानां चेतनतैव गंगादिभ्यो भीष्माद्युत्पत्तिश्रुतेः । अत एवोक्तम्—मनोभवभग्नवेगा इति । 'स्थगे—आच्छादने' धातुः । यदंगमालिंग्यते तदालिंगकांगेनाच्छादितं भवतीति प्रसिद्धमेव । उपहरंत्यः समर्पयंत्यः । तदांबुकमलादर्शनादर्थांतरमाह—'सलिलं कमलं जलम्' इत्यमरोक्तेः कमलस्य जलस्योपहारः पादादिप्रक्षालनार्थं यासां ताः इति ॥ १५ ॥ कुसुमसमूहैः तदंतर्गतवाय्वानीतनंदनवनाद्युत्थपुष्पैः । मेघकर्तृकपुष्पवर्षणासंभवादर्थांतरमाह—तत्तुल्यैरिति । मेघच्युतजलकणेष्वपि 'मेघपुष्पं घनरसः' इति पुष्पशब्दप्रयोगान्मेघोऽपि चेतनाहीनस्तं सुखयति, वयं सचेतना अपि तं सुखयितुं न प्राप्ता अतो धिगस्मानिति भावः ॥ १६ ॥ साहंकारम् सेर्ष्यम् "परेश्वरे नाहंकार ईर्ष्याहंक्रिययोः स्त्रियाम्" इति शाश्वतः । कथमस्याग्रे ज्ञातमिति योज्यम् । इत्यत इत्यत्र । आहुरित्यस्य प्रकारमिति शेषः । तस्य श्रीकृष्णस्य । चंक्रमणेन पुनःपुनर्गमनेन । तद्दशनन तदाधिमित्यादिषु व्यवहितस्यापि स्मरपदस्य तच्छब्देन परामर्शः "दशैते राजमातंगास्तस्यैवामी तुरंगमाः" इतिवद्ध्येयः । अतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः ॥ मानं तनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः ॥ १८ ॥ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥ अस्पंदनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ १९ ॥

दार्धि कामव्यथां जहुः । अतस्ताः कृतार्थाः धिगन्या मादृश्यो या एवंभूतमप्याधिशमनं न लभंत इति भावः ॥ १७ ॥ हंतेति हर्षे । हे सख्यः अयमद्रिर्गोवर्धनो ध्रुवं हरिदासेषु श्रेष्ठः । कुत इत्यत आहुः । यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः । तृणाद्युद्गमनिभेन रोमहर्षदर्शनात् । किं च यद्यस्मान्मानं तनोति सह गोभिर्गणेन सखिसमूहेन च वर्तमानयोस्तयोः । कैः । पानीयैः सूयवसैः शोभनतृणैः कंदरैश्च कंदैर्मूलैश्च यथोचितम् । अतोऽयमतिधन्य इत्यर्थः ॥ १८ ॥ हे सख्यः इदं त्वतिचित्रम् । गोपैः सह वनेवने गाः संचारयतोस्तयो रामकृष्णयोर्मधुरपदैर्महावेणुनादैः । शरीरिषु ये गतिमंतस्तेषामस्पंदनं स्थावरधर्मस्तरूणां पुलको रोमांचश्च जंगमधर्म इति । निर्युज्यंते गाव आभिरिति निर्योगाः पादबंधनरज्जवोऽधृष्यगवां कर्षणाथाः पाशाश्च तैः कृतं लक्षणं चिह्नं ययोः । शिरसि निर्योगवेष्टनेन

कामव्यथात्यागात् । ताः पुलिंद्यः । कृतार्थाः कृतकृत्याः । एवम्भूतम् कामव्यथारूपम् आधिशमनं मनःपीडाशांतिम् । इति भाव इति । आधिनिवृत्त्यैव शांतिर्नान्यथेति तात्पर्यम् ॥ १७॥ हरिभक्तपरा ऊचुः । ''दासो भृत्ये च कैवर्ते भक्ते प्रक्षेपके परे'' इति धरणिः । श्रेष्ठत्वे हेतुं शंकते—यस्मादिति । निभेन छद्मना 'निभः स्यात्तुल्यछद्मनोः' इति वारतांतविः । अस्य सत्यपि प्रमोदे नानवधानतेत्याह—किं चेति । यद् यतः । वैकल्पिकत्वान्न सहस्य सादेशः । तयोः रामकृष्णयोः । 'यवसं तृणमर्जुनम्' इत्यमरः । 'यवसं घासहोमयोः' इति धरणिः।कं जलं दीर्यत एभिरिति कंदरास्तैस्तथा, पर्वतांतर्गतैरुभयत श्छिद्रैर्गृहैः।''कंदोऽस्त्री सूरणे सस्यमूले जलधरे पुमान्'' इति मेदिनी । ''मूलमाद्ये शिफायाञ्च समीपे मूलके च भे । तालमूल्यां गर्जरादौ बंधनच्छेदकारिणि॥'' इति धरणिः । यतो रामकृष्णयोर्मानदोऽतो हेतोरयं गिरिरतिधन्योतीव भागवतः । इत्यर्थ इति । दूरतोऽपि भगवन्नाम श्रवणादिना जना धन्या भवंति साक्षात्तन्मूर्तिसेविनां तु धन्यतमत्वमुचितमेवेति भावः । हंत सख्यो महदाश्रयणं विना नैव मनोरथः फलति, महत्त्वं च हरिभक्तानामेव, तेषां मध्ये श्रीगोवर्द्धनो गिरींद्र एव मुख्य इति गार्गी मुखाच्छ्रुतं तदस्य तत्रत्यमानसगंगायां स्नात्वा तदधिदैवतस्य श्रीहरिदेवनाम्नो नारायणस्य दर्शनार्थं याम इत्यत्र गुरुजनानामपि नैव विप्रतिपत्तिः, कृष्णोऽपि तत्रैव खेलतीति युक्तिं निश्चितवत्यः । स्वरमणं तमभिसीर्षवः श्रीगोवर्द्धनमेव सगणकृष्णवांछितसाधकं स्ववांछितसिद्ध्यर्थं स्तुवंति—।हंतेति विस्मये । हरिदासेषु नारदादिष्वपि मध्ये मुख्या ये त्रयो हरिदासा युधिष्ठिरोद्धवगोवर्द्धनास्तेष्वपि मध्येऽयमद्रिरेव हरिदासवर्य्यः, ''हरिदासस्य राजर्षे राजसूयमहोदयम्'' इति युधिष्ठिरे, 'कृष्णं संस्मारयन्रेमे हरिदासो व्रजाकसाम्' इत्युद्धवे, हंतायमद्रिरबला हरिदासवर्यः इत्यस्मिन्पर्वतेऽपि हरिदासपदप्रयोगात् । यद्रामकृष्णयोश्चरणस्पर्शेन शिलाद्रवादभिव्यंजितः प्रमोदो यस्य सः । चरणस्पर्शे सति शिलानां पंकसाधर्म्यप्राप्त्या ध्वजवज्रांकुशादिमच्चरणाचिह्नं निर्झरतृणोद्गमादयोऽश्रुपुलकादयोऽपि प्रमोदव्यंजका ज्ञेयाः । अत्र रामपदप्रयोगो भावगोपनार्थः । श्लेषेण रामः ''हये च पशुभेदे च त्रिषु चारौ सितेऽसिते' इति मेदिन्युक्ते रमणीयो यः कृष्णस्तस्य । हे अबला इति । पतिपारवश्यवतीनां युष्माकं तदाश्रयणमेव बलं बुध्यत इति भावः । यद्यतः प्रमोदादेव मानं तत्प्रसादनीं पूजां तनोति । सह गोभिर्गणेन सखिसमूहेन च वर्त्तमानयोस्तयोः पानीयानि पाद्याचमनीयपानार्थं सुगंधशीतलनिर्झरजलानि तथा नैवेद्यार्थं पानीयाः पेया मध्वाम्रपील्वादिरसाश्च सुयवसानि अर्घ्यार्थं दूर्वा गवां ग्रासार्थं सुगंधकोमलपुष्टिवर्द्धनदुग्धसंपादक तृणानि च । दीर्घस्त्वार्षः । यद्वा—पानीयं सुवत इति पानीयस्वो निर्झराश्च, कंदरा उपवेशशय्याविलासाद्यर्थं शीतोष्णसमयसुखदा गुहाश्च, भक्षणार्थं कंदमूलानि च, तत्रत्यरत्नपर्यंकपीठप्रदीपादर्शादयोऽप्युपलक्षकास्तैः ॥ १८ ॥ सकौतुका आहुः । अस्पंदनम् चलनाद्यभावः । पुलकः रोमोद्गमः ''रोमोद्गमस्तु पुलकः प्रेम्णि वृद्धेऽग्रगे तथा'' इति शब्दरत्ने । अधृष्या अनम्रा या गावस्तासां कर्षणमेवार्थः प्रयोजनं येषां ते पाशाः पाशवद्रचिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविधा भगवतो या वृंदावनचारिणः ॥ वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥२०॥ इति श्रीभा०म०दशमस्कंधे पू०वेणुगीतवर्णनं नामैक विंशतितमोऽध्यायः ॥२१॥ श्रीशुक उवाच ॥ हेमंते प्रथमे मासि नंदव्रजकुमारिकाः ॥ चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रतम् ॥१॥आप्लुत्यांभसि कालिंद्या जलांते चोदितेऽरुणे ॥ कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम्॥२॥गंधैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः ॥ उच्चावचैश्चोपहारैः प्रवालफ लतंडुलैः॥३॥कात्यायनि महामाये महायोगिन्यधीश्वरि॥नंदगोपसुतं देवि पतिं मे कुरु ते नमः ॥ इति मंत्रं जपंत्यस्ताः पूजां चक्रुः कुमारिकाः ॥४॥

स्कंधस्थपाशेन च गोपपरिवृढश्रिया विराजमानयोरित्यर्थः ॥ १९ ॥ २० ॥ गोपीनां कामतः कृष्णे निःसीमप्रेमसंगमः । कात्यायन्यर्चनोद्भूततत्प्रसादमहोदयः॥ १ ॥ इति श्रीभा० म० दशमस्कंधे पूर्वार्धे वेणुगीतवर्णनं नामैकविंशोऽध्यायः ॥ २१ ॥ छ ॥ द्वाविंशे गोपकन्यानां वस्त्राहरणलीलया ॥ वरं दत्त्वा गतः कृष्णो यज्ञशालामितीर्यते ॥ १ ॥ प्रथमे मासि मार्गशीर्षे ॥ १ ॥ २ ॥ ३ ॥ महामाये इत्यादिसंबोधनैस्तव न किंचिदशक्यमिति सूचयंत्यः प्रत्येकं प्रार्थयंते ॥४ ॥

रज्जवः । 'चिह्नं लक्ष्म च लक्षणम्' इत्यमरः । गोपेषु परिवृढा अधिपास्तेषां श्रिया शोभया । इत्यर्थ इति । अतीव शक्ता ये गोपास्त एवाविशस्तगवाकर्षणे योग्या नान्य इति तात्पर्यम् । निर्योगाख्यः पाशो निर्योगपाशः। स च चपलस्वभावानां वत्सानां दोहनसमये गोवामजंघासंगता गलबंधनरज्जुस्तेन कृतलक्षणयोः सौन्दर्यविशेषलाभेन ख्यातयोः "गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ" इत्यमरः । ततश्चायं मुक्तास्तबकजुष्टाग्रद्वयः पीतपट्टमय उष्णीषबंधभूषणविशेष इव गोपालकत्वव्यंजको द्रष्टॄणां मनोमोहन एव ज्ञेय इति चक्रवर्त्तितोषिणीकाराः ॥ १९ (२०) कामतः स्मरात् । निस्सीमप्रेम्णोऽमर्यादस्नेहस्य संगमः संप्राप्तिः । किंभूतः सः—कात्यायन्यर्चनेनो द्भूतो यस्तत्प्रसादः कृष्णप्रसादस्स एव महोदयो महाफलं यत्र स तथा। वर्ण्यते—अग्रे इति शेषः (१)॥२०॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकविंशोऽध्यायः॥२१॥ वस्त्राणामाहरणं स्वीकारस्स एव लीला तया (१) । मार्गशीर्षे " हेमंतः शिशिरश्चैव वसंतो ग्रीष्म एव च । वर्षा शरच्च ऋतवो मार्गाद्याः स्युर्द्विमासकाः " इति पंचांगदर्शने । "षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात्" इत्यमरोऽपि । कुमार्य एव कुमारिकाः । स्वार्थेकस्ततष्टाप् । "केऽणः" इति ह्रस्वः । 'कुमारी कन्यकानार्योः' इति धरणिः । अत्र कुमारिकाशब्देन प्राप्तयौवना नार्यो ज्ञेयाः, अन्यथा "याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः" इति वक्ष्यमाण विरोधः स्यात् । न हि कन्यानां रमणसंकल्पोऽस्ति, तासां संकल्पानुसारेणैव भगवता ताभ्यो वरदानं कृतम् 'संकल्पो विदितः साध्व्यो भवतीनाम्' इति वक्ष्यमाणत्वात् । स्वामिचरणा अपि 'श्याम सुंदर ते दास्यः' इत्यत्र तथैव व्याख्यास्यंतीति । हविष्यं यवाद्यन्नम् । हविष्यं तु सनत्कुमारसंहितायामुक्तम्—"हैमांतिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः । कलायकंगुनीवारवास्तूकहिलमोचिकाः ॥ षष्टिकाः कालशाकं च मूलकं केमुकेत रत् । कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी॥ पयोनुद्धृतसारं च पनसाम्रे हरीतकी । पिप्पली जीरकं चव नागरंगं च तिन्तिणी॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवम् । अतैलपक्कं मुनयो हविष्यान्नं प्रचक्षते ॥ " इति । सितमस्विन्नमनूष्मपक्वम् । धान्यम् तंडुलाः । प्राच्ये केमुआ इति केमुकस्य नाम।कलायः मटरीति । हेमाद्रौ तु—"हविष्येषु यवा मुख्यास्तदनुव्रीहयः स्मृताः।माषकोद्रवगौरादीन्सर्वाभावे विसर्जयेत्॥"।आग्नेये तु—"व्रीहिषाष्टिक मुद्गाश्च कलायः सलिलं पयः । श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥ कूष्मांडालाबूवार्त्ताकपालक्यज्योत्स्निकास्त्यजेत् " इत्युक्तम् । कात्यायन्यर्चनमेव व्रतं नियमम् । "व्रतं तु नियमे कृच्छ्रादौ संकल्पोपवासयोः" इति धरणिः ।चेरुः चक्रुः धातूनामनेकार्थत्वात्करणेऽपि चरिरस्तीति ॥ १ ॥ जलांते जलसमीपे।अरुण उदिते "उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयः" इति माधवः । सैकतीं मृण्मयीम् । प्रतिकृतिम् प्रतिमाम् " प्रतिकृतिरथार्चायां प्रतिनिधिप्रतिकारयोश्च स्त्री " इति मेदिनी ॥ २ ॥ बलिभिः परिवारदेवतापूजाभिः सह " बलिर्दैत्ये परीवारदेवतापूजने करे । जठरावयवे गेहदारुणि पूजने तथा ॥ उपहारे समर्थे च जरया श्लथचर्मणि । " इति मेदिनीशाश्वतौ ॥ ३ ॥ देव्याः सर्वसामर्थ्यं समर्थयंत्य आहुः—महामायेत्यादि । कं सुखं तन्वत इति कतानि मंगलानि तेषां समूहः कात्यं तस्यायनं स्थानं यस्यां सा तथा । महापूज्या माया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः ॥ भद्रकालीं समानर्चुर्भूयान्नंदसुतः पतिः ॥ ५ ॥ उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः ॥ कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्नातुमन्वहम् ॥ ६ ॥ नद्यां कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् ॥ वासांसि कृष्णं गायंत्यो विजह्रुः सलिले मुदा ॥ ७ ॥ भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः ॥ वयस्यैरावृतस्तत्र गतस्तत्कर्मसिद्धये ॥ ८ ॥ तासां वासांस्युपादाय नीपमारुह्य सत्वरः ॥ हसद्भिः प्रहसन्बालैः परिहासमुवाच ह ॥ ९ ॥

कृष्णचेतस्त्वमेवाह । भूयान्नंदसुतः पतिरित्यानर्चुरिति ॥ ५ ॥ व्रतस्य पूर्वांगमाह । उषसीति । गोत्रैर्नामभिः । अन्योन्याबद्धबाहवः परस्परं गृहीतपाणयः ॥ ६ ॥ ॥ ७ ॥ योगेश्वराणामीश्वर इति प्रत्येकं तादृङ्मनोरथपूरणसामर्थ्यं दर्शयति । तासां कमणः सिद्धये फलदानायेति ॥ ८ ॥ नीपं कदंबम् । बालैः सह ॥ ९ ॥

सामर्थ्यं यस्यास्सा तथा । महान् योग उपायः परकार्यसाधने यस्याः सा तथा । ईश्वरैः शंकराद्यैरधिष्ठितेत्यधीश्वरीति । देवि देवयति द्योतयति सर्वं जगदिति देवीति । अत्र विश्वनाथः—हे कात्यायनि नंदगोपसुतं मे पतिं कुरु । ननु कुर्विति मय्येव किमिति स्वातंत्र्यमर्प्यतेऽहं तु तदर्थं त्वत्पितरौ प्रेरयिष्याम्यतः कारयेति प्रयुज्यतामित्याशंक्य सर्वैकल्यमाह—हे महायोगिनीति । तेन संयोगस्त्वयैव शीघ्रं संपाद्यतां न तु पित्रादिव्यवधानोपद्रवेण, परमोत्कंठावतीनामस्माकं कालविलंबस्यासह्यत्वात्, कृष्णस्य संप्रत्यनुपनीतत्वेन विवाहायोग्यत्वात् । हे देवि मुख्यं विवाहं विनैव केवलगांधर्वविवाहेनैव मे पतिं कुर्वित्यर्थः । अधीश्वरीति । तत्र तव किमप्यशक्यं नास्तीति भावः । ननु तव कृष्णे पतिभावस्य त्वत्पितृभ्यामज्ञानत्वे त्वदभीष्टः कृष्णसंगमः कथं साधु सेत्स्यतीत्यत आह—महामाये । मायया मत्पितरौ तथा मोहय यथा कदाचिदपि गोपांतरेण मद्विवाहस्ताभ्यां न भाव्येत कृष्णांगसंगरहस्यं च न ज्ञातुं शक्येत । यद्वा—दीव्यति क्रीडति देवयति क्रीडयतीति देवी, स चासौ पतिश्चेति तं, तादृशं पतित्वं विवाहं विनैव सिध्यतीति मम गोपांतरव्यूढत्वेऽपि न कापि क्षतिरिति भावः । इत्येवं प्रत्येकं मंत्रार्थं पृथक्पृथग्विचिंत्येत्यर्थः । इयं ताभिरुपासिता चिच्छक्तिवृत्तिस्वरूपभूता योगमायैव न तु बहिरंगामाया । तदुक्तं नारदपंचरात्रे श्रुतिविद्यासंवादे—"जानात्येका परा कांतं सैव दुर्गा तदात्मिका । या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥ यस्या विज्ञानमात्रेण पराणां परमात्मनः । मुहूर्त्ताद्देवदेवस्य प्राप्तिर्भवति नान्यथा ॥ एकेयं प्रेमसर्वस्य स्वभावा श्रीकुलेश्वरी । अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥ अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी । यया मुग्धं जगत्सर्वं सर्वे देहाभिमानिनः ॥" इति । अतः "सर्वेषु कृष्णमंत्रेषु दुर्गाधिष्ठातृदेवता" इत्यागमे शुद्धसत्वस्वरूपा चिच्छक्तिवृत्तिः कृष्णभगिन्येकानंशाभिधाना योगमायैव मंत्राधिष्ठात्री सैव खल्वाभिरुपासिता । दुर्गामहामायेत्यादिनामसाम्येनैव लोकानां भ्रमो भवतीति ज्ञयम् । व्रजस्य लोकवल्लीलत्वान्मायोपासनेऽपि न दोषः । अत्र ये केचिदनन्यंमन्या यदन्यथा मन्यंते न ते तदीयप्रेमगंधसंबंधगंधवातमपि स्पृशंतीति वैष्णवतोषिणी । इति मंत्रम् पूर्वोक्तं कात्यायनीत्यादिसंबोधनात्मकं मंत्रम् ॥ ४ ॥ ५ ॥ उषसि घटिकाचतुष्कावशिष्टरात्रौ । क्वचित्तु 'उषः कालोऽष्टपञ्चाशत्' इत्युक्तम् । तदत्र 'उदितेऽरुणे' इति पूर्वोक्तिविरोधादुपेक्ष्यम् । 'गोत्रं कुलाख्ययोः' इति मेदिनी । गोत्रैर्नामभिर्धन्ये कुत्रासि किमिति विलंबस इत्येवमाहूता इत्यर्थः ॥ ६ ॥ पूर्ववत् नित्यवत् । वासांसि निक्षिप्य संस्थाप्येति सार्द्धेनान्वयः । कदाचिदिति व्रतपूर्णदिने पूर्णिमायामेव 'एवं मासव्रतं चेरुः' इत्युक्तत्वात्, अत एवोत्सवार्थं कुमारीभिस्ताभिः समानवासनत्वेन प्रणयास्पदीभूता वृषभानुनंदिन्याद्या अपि निमंत्र्यानीताः, पूजासमाप्त्यनंतरं कृष्णं मुदा गायंत्यस्तद्गानानंदेन हेमंतजलेपि शीताद्यस्फूर्त्तेः ॥ ७ ॥ तत् 'भूयान्नंदसुतः पतिः' इत्येवंरूपं मतम् । अभिप्रेत्य ज्ञात्वा । तत्र कालिंदीतटे ॥ ८ ॥ कृष्णः परिहासवाक्यं[1] वक्ष्यमाणमुवाच हेति । हसद्भिर्बालैरित्यतिबाल्यान्निष्कारणहासवद्भिः सह प्रकर्षेण हसन्निति परिहासमाह—भो व्रजबालिका अत्र कदंबशाखास्वेतावंति वस्त्राणि केन निबध्य स्थापितानि यूयं किं जानीथ न वा मया तु गाश्चारयता दूरादेव दृष्ट्वा किमयं मामकीनः कदंबोऽद्य विचित्रवासांस्येव पुष्पफलानि

१ परितो हासो यत्रेति परिहासम् ।

अत्रागत्याबलाः कामं स्वंस्वं वासः प्रगृह्यताम् ॥ सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्शिताः ॥ १० ॥ न मयोदितपूर्वं वा अनृतं तदिमे विदुः ॥ एकैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः ॥ ११ ॥ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ॥ व्रीडिताः प्रेक्ष्य चान्योऽन्यं जातहासा न निर्ययुः॥१२॥एवं ब्रुवति गोविंदे नर्मणाऽऽक्षिप्तचेतसः ॥ आकंठमग्नाः शीताद वेपमानास्तमब्रुवन् ॥१३॥ माऽनयं भोः कृथास्त्वां तु नंदगोपसुतं प्रियम् ॥ जानीमोंऽग व्रजश्लाघ्यं देहि वासांसि वेपिताः ॥ १४ ॥ श्यामसुंदर त दास्यः करवाम तवोदितम् ॥ देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे ॥ १५ ॥

हे अबलाः नो नर्म न परिहासः यस्माद्यूयं व्रतकर्शिताः व्रतश्रांताः ॥ १० ॥ एकैकशो वा आगत्य वासांसि स्वीकुरुत सहैव वा । न तत्रास्माकमाग्रह इत्यर्थः ॥ ११ ॥ क्ष्वेलितं परिहासम् । प्रेमपरिप्लुताः प्रेमरसनिमग्नाः ॥ १२ ॥ १३ ॥ तत्र मुग्धा ऊचुः । अंग भोः श्रीकृष्ण अनयमन्याय्यं मा कृथाः ॥ १४ ॥ प्रौढा ऊचुः । नो

दधारेत्यद्भुतदर्शनोत्सुकेन द्रुतमागत्यारुह्यतेति । ननु भो अस्मदीयान्येवैतानि वासांसि, मैवम्, तर्हि कथमेतावदुच्चकदंबशाखास्वारूढानि । ननु भो त्वयैव चोरयित्वारोहितानि, सत्यम् । सत्यमेतावंतमपि परिवादं दातुं बलं धत्से नंदस्य राज्ञः पुत्रोऽहं चौरस्तदद्य यूयं मथुरास्थकंसराजस्य पार्श्वे यियासथेत्यनुमीयते । ननु भो मा क्रुध्य वस्त्राण्येव निभाल्य विचारय किमेतानि स्त्रीवस्त्राणि पुंवस्त्राणि वा, सत्यम् । अयि धीमत्यो निभालितान्येतानि स्त्रीवस्त्राण्येव, तत्किं जगत्यस्मिन्यूयमेव स्त्रियः स्थ अन्या न संति । ननु भोः संत्येव किं त्वस्मिन्निर्जने वनेऽस्मान्व्रजबाला विना काः खल्वन्या आयांति, अयि रहःसंचारिण्यः किं भवत्य एव नान्याः । ननु भो अन्यथा विद्वन्वयमत्र खेलितुं नैवागच्छामः किं तु कदंबदेवतां दुर्गां पूजयितुम् । किं भो दुर्गापूजिका यूयमेव नान्याः, सत्यम्, नान्या एव । अयि मुग्धाः प्रतिनिशीथमत्रागत्य वैमानिकीभिर्देवीभिर्दुर्गा पूज्यते । ननु भो पूजयंतु नाम देवीम्, ता वस्त्राणि त्यक्त्वा कथं गताः, अयि बालास्तत्त्वं न जानीथ-अत्र रजन्यां पुनः पूजयिष्यंतीभिस्ताभिः स्नात्वा परिधातुं रक्षितानि । भोः कृष्ण त्वमेव तत्त्वं न जानासि अद्य दिन एव पूजयिष्यंतीभिरस्माभिरेव स्नात्वा परिधातुं वनदेवताद्वारोच्चशाखोपारे वस्त्राणि रक्षितानीति ॥ ९ ॥ अत्र कदंबाधोभागे । कामम् निश्चितम् ‘ कामो निश्चयवांछयोः ’ इति शाश्वतः ॥ १० ॥ पूर्वस्मिन्काले उदितमुदितपूर्वम् । आहिताग्न्यादिवत्समासः । तत् मत्कर्तृकसत्यभाषणरूपं वृत्तम् । इमे गोपाः । आग्रहो हठः । इत्यर्थ इति । मम तु भवतीनां शुद्धभावदर्शन एवाग्रह इति तात्पर्यम् । प्रतीच्छध्वमित्यत्रात्मनेपदमार्षम् । स्वीकारार्थश्चानेकार्थत्वात् ॥ ११ ॥ तस्य कृष्णस्य । तत् वचः । क्ष्वेलितम् “ क्ष्वेलितं सिंहनादे च परिहासे विषप्लुते ” इति पदरत्नाकरे । न निर्ययुः बहिर्नायाताः । जलादिति शेषः ॥ १२ ॥ एवम् उक्तरीत्या । वेपमानाः कंपमानाः । तम् श्रीकृष्णम् ॥ ॥ १३ ॥ तत्र तासां मध्ये । मुग्धाः,—अंकुरितयौवना मुग्धाः । अंकुरादेर्वृक्षधर्मत्वेन यावन बाधात्प्रत्यग्रत्वं लक्ष्यते, तेन शोभातिशयो व्यज्यते । एवं च पतिमात्रानुरागवत्त्वे सति प्रत्यग्रयौवनत्वमिति फलितं मुग्धालक्षणम्, तेन सामान्यवनिताप्रतिपालितास्वंकुरितयौवनासु नातिव्याप्तिः ॥ १४ ॥ प्रौढाः—पतिमात्रविषयकेलिकलापकोविदाः प्रौढाः । पत्यतिरिक्तकेलिकलाभाववत्त्वे सति केलिकलाप्रावीण्यमित्यर्थः । वेश्यायां कुलटायां च पतिमात्रविषयत्वाभावान्नातिव्याप्तिरिति । नंदस्य पितृत्वात्ततो न मे भयमित्यस्वारस्यादाह—कंसाय वेति । केचित्त्वत्र वर्णचतुष्टयजास्ता इत्यूचुः । दास्य इत्युक्तवंत्यः शूद्रजाः, करवामेत्यादिवचना वैश्यजाः, देहीत्यादिवचना विप्रजाः, नो चेदित्यादिवचनाः क्षत्रियजा इति । “ न जारजातस्य ललाटश्रृंगं कुलप्रसूतस्य न पाणिपद्मम् । यथायथा मुंचति वाक्यजालं तथातथा तस्य कुले प्रमाणम् ॥ ” इत्यभियुक्तोक्तेः परीक्षा सुलभैव । अत्र च जातिनिर्णयार्थं राजांतरप्रेषिततुल्यरूपविद्यादिगुणाः चतस्रः कन्यका यथा कालिदासेन तद्वचनानुसारेण भोजसभायां पृथक्पृथग्जात्या निर्णीताः सापि कथाऽनुसंधेया । लोकरंजनार्थं तद्वाक्यपद्यं च—“ अभूत्प्राची पिंगा रसपतिरिव प्राश्य कनकं गतच्छायश्चंद्रो बुधजन इव ग्राम्यसदसि । क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपरा न दीपा राजंते द्रविणरहितानामिव गुणाः ॥ ” इति । अत्र क्रमेण शूद्रविप्रक्षत्रवैश्यजास्ता इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ भवत्यो यदि मे दास्यो मयोक्तं वा करिष्यथ ॥ अत्रागत्य स्ववासांसि प्रतीच्छंतु शुचिस्मिताः ॥ १६ ॥ ततो जलाशयात्सर्वा दारिकाः शीतवेपिताः ॥ पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्शिताः ॥ १७ ॥ भगवानाहता वीक्ष्य शुद्धभावप्रसादितः ॥ स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितम् ॥ १८ ॥ यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनम् ॥ बद्ध्वांजलिं मूर्ध्न्यपनुत्तयेंहसः कृत्वा नमोऽधो वसनं प्रगृह्यताम् ॥१९॥ इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राऽऽप्लवनं व्रतच्युतिम् ॥ तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः ॥२०॥

चेद्राज्ञे नंदाय कंसाय वा ब्रुवाम ब्रवाम हे कृष्णेति ॥ १५ ॥ १६ ॥ प्रोत्तेरुर्निर्गताः ॥ १७ ॥ आहताः ईषदक्षतयोनीर्वीक्ष्य ॥ १८ ॥ धृतव्रताः सत्यो विवस्त्रा अपो व्यगाहताप्सु स्नाता इति यत्तदेतत् उ एव देवहेलनमपराध एवेत्यर्थः । व्रतवैगुण्यभीतानां प्रायश्चित्तमिवाह । अस्यांहसः पापस्य निवृत्तये मूर्ध्न्यंजलिं बद्ध्वाऽधो नमः प्रणामं कृत्वेति ॥ १९ ॥ इति दोषत्वेनाच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्य च्युतिहेतुं मत्वा तस्य पूर्तिकामास्तदशेषकर्मणां तस्य व्रतस्यान्येषामशेषकर्मणां च साक्षात्कृतं फलभूतं

न्येयम् । ब्रुवामेति भिन्नम् । हे इत्यनेन कृष्ण आक्षिप्यते 'यद्येन विनानुपपन्नं तत्तेनाक्षिप्यते' इति न्यायेन । कथनफलस्य दंडादेः कृष्णगामित्वात्परस्मैपदमेव युक्तमिति मत्वाह—ब्रुवामेति ॥ १९ ॥ हे शुचिस्मिताः शोभनेषद्धासवत्यः ॥ १६ ॥ ततः कृष्णोक्तिश्रवणोत्तरम् । दारिकाः दारा एव दारिकाः 'स्त्रियो दाराः पुंभूम्नि च स्त्रियाम्' इत्युक्तेर्दारशब्दात्स्वार्थिककांताट्टाप् । योनिम् स्मरमंदिरम् "योनिर्द्वयोः स्मरागारे जातावा करजन्मनोः" इति धरणिः ॥ १७ ॥ अक्षतयोनीः कृताल्पनिधुवनाः । शुद्धभावः परमप्रेमा तेन जातप्रसादः । आहता आगताः । यद्वा—आहताः शीतपीडिताः । तथा च विश्वः—"आहतं गुणितेऽपि स्यात्ताडितेऽप्यानकेपि च" इति संदर्भः । विश्वनाथस्तु—आ सम्यक् प्रकारेण हता मृता इव वीक्ष्य कुलजानां मरणादप्यधिक ईदृशो लज्जात्यागः सोपि मदनुरोधेनैवाभिः कृत इति मनसैवाधिगतो यः शुद्धो निरुपाधिर्भावः प्रेमा तेन प्रसादितः । स्कंधे निधायेति—भवतीनामधोवस्त्राण्यपि मया स्वस्कंधे धार्यंत इति तासु स्वप्रणयादरौ दर्शितौ । प्रकर्षेण परामर्शपूर्वमुवाच । परामर्शश्च—स्त्रीजातिमात्रेणापि दुष्करमाभिर्मत्प्रेमोपरोधेन कृतम् । किञ्च, इतोप्यन्यदात्यन्तिकदुष्करं कृत्यमस्ति तदेताभिः शक्यमशक्यं वेति मद्विषयकप्रेम्णः शक्तेरियत्तां परीक्षे इति । सस्मितमिति—भोः स्वमुखेनैवांगीकृतमद्दास्यः 'करवाम तवोदितम्' इति युष्मद्वचनस्याधुनाहं परीक्षां करिष्ये, ततो यद्युत्तीर्णा भवितुं शक्नुथ तदैव युष्मद्वसनानि मदीयात्ममनःप्राणशरीरैः सहितान्येव कृत्वा दास्यामीति भावः ॥ १८ ॥ देवहेलनम् देवस्य वरुणस्य हेलनमपराध एव । इत्यर्थ इति । उशब्दोत्रैवार्थक इति ध्येयमिति । यादवे तु 'उ तापेऽव्ययमीशे च' इत्युक्तम् । तथा च—उ कोर्थः तापकरं देवहेलनमिति योज्यम् । "प्रायः पापं समाख्यातं चित्तं तस्य विसर्जनम्" इति तत्त्वबोधिन्याम् । क्वचित्त्वेतच्छ्लोकद्वयं ग्रंथांतरीयमपि लिखितं दृश्यते तथाहि—"एकेन पाणिना नेमुरेकेनाच्छाद्य योनिकम् । ता वीक्ष्योवाच भगवान्भूयो धर्म्यमिदं वचः ॥ १ ॥ एकेन पाणिना यो वै प्रणमेद्देवमच्युतम् । तस्य दंडः करच्छेद इति धर्मविदो विदुः ॥" इति । शातातपस्तु—"जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत् । तत्सर्वं निष्फलं याति एकहस्ताभिवादनात् ॥" इति । एतच्चापयागत्वादत्रानुसधेयमव ॥ १९ ॥ विवस्त्राप्लवनम् नग्नीभूय स्नानम् । "स्नानं दानं तथा होमं शयनं गमनं भुजिम् । विवस्त्रो न प्रकुर्वीत कुर्वाणः पापकृद्भवेत् ॥" इति स्मृतेः । सर्वफलस्वरूपे तस्मिन्नेव तुष्टे किं फलमवशिष्टं स्यादिति भावेन नेमुः । न हि तत्प्रसादविषयीभूतानां प्रत्यवायादिलक्षणः कोपि दोष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तास्तथावनता दृष्ट्वा भगवान्देवकी सुतः ॥ वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः ॥ २१ ॥ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः ॥ वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन्प्रियसंगनिर्वृताः ॥ २२ ॥ परिधाय स्ववासांसि प्रेष्ठसंगमसज्जिताः ॥ गृहीतचित्ता नो चेलुस्तस्मिँल्लज्जायितेक्षणाः ॥ २३ ॥ तासां विज्ञाय भगवान्स्वपादस्पर्शकाम्यया ॥ धृतव्रतानां संकल्पमाह दामोदरोऽबलाः ॥ २४ ॥ संकल्पो विदितः साध्व्यो भवतीनां मदर्चनम् ॥ मयाऽनुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥ २५ ॥

तमेव नेमुः । स एवावद्यमृक् पापमार्जकः ॥ २० ॥ २१ ॥ दृढमत्यर्थं प्रलब्धा वंचिता ययं विवस्त्रा इत्यादिना । त्रपया लज्जया च हापितास्त्याजिता अत्रागत्य स्ववासांसीत्याग्रहेण । प्रस्तोभिता उपहसिताः सत्यं ब्रवाणि नो नर्मेत्यादिना । क्रीडनवत्कारिताश्च बद्ध्वांजलिमित्यादिशायश्चित्तच्छलेन । एवमपराधेऽपि ता नाभ्यसूयन् दोषदृष्ट्या नापश्यन् ॥ २२ ॥ प्रेष्ठसंगमेन सज्जिता वशीकृता अतो गृहीतचित्ताः सत्यो नो चेलुः । गृहीतचित्तत्वमाह । तस्मिन्कृष्णे लज्जायितेक्षणा लज्जाविलसितमीक्षणं यासां ता इत्यर्थः ॥ २३ ॥ दामोदर इति भक्तवात्सल्यं दर्शयति । अबलाः प्रति ॥ २४ ॥ भोः साध्व्यो भवतीनां मदर्चनमेव संकल्पो मनोरथः स च लज्जया युष्माभिरकथितोऽ

इत्याह–अवद्यमृगिति । अवद्यानि मार्ष्टीति तथा 'अवद्यं पापदोषयोः' इति शाश्वतः ॥ २० ॥ ता व्रतपूर्त्तिकामाः । तथावनताः हस्तद्वयसंपुटं मूर्ध्नि धृत्वा कृतप्रणामाः । करुणः दयालुः । तेन मूर्द्धकृतांजलिप्रणामेन ॥ २१ ॥ अथापि तथापि । अमुम् कृष्णम् । नाभ्यसूयन् प्रियत्वादेव, प्रियकृतं दुःखप्रदानमपि सुखत्वेनैवाऽनुभवंत्य इति भावः । क्रीडनवत् दारुयंत्रवत् । प्रियस्य श्रीकृष्णस्य संगेन संभाषणरूपेण निर्वृताः प्राप्तानंदाः ॥ २२ ॥ इत्यर्थ इति । लज्जितेक्षणानां चलनादिकमतिहठेनापि कर्तुमशक्यं भवतीति भावः । सज्जितास्तस्मिन्नेवात्यधिकमासक्तीकृताः । यथा कृष्णेन तासां वसनानि गृहीतानि तथा गृहीतं तस्यापि चित्तं याभिस्ता इति परस्परप्रेमाश्रयत्वमुक्तम् । अत्रमय्येताः परमासक्ता इति कृष्णेन यथा ज्ञातं तथैव कात्यायनीप्रसादादस्मास्वप्ययमासक्त इति ताभिरप्यवगम्य तस्मिन्कृष्णे लज्जायितं प्राप्तमीक्षणं यासां तथाभूताः सत्यो भावोत्थजाड्यादेव न चेलुः । या खलु कृष्णेन निष्कासिता ताभिरपि तिरस्कृता तदंगेभ्यो निस्सृत्य दूरंगताभूत्सा लज्जा पुनः परावृत्यायांती नयनेन कृततत्साहाय्येन कृष्णसमीपं नीयमाना कृष्णाल्लब्धातिप्रसादा पुनस्तासामंगेषु पूर्वतोप्यधिकमधिकारं प्रापेत्युत्प्रेक्षा ध्वनिता ॥ २३ ॥ तासाम् व्रजकुमारिकाणाम् । अबला इति । निर्बलानां कार्यं सबलेभ्यः श्रेष्ठं करोमीति संबुद्ध्यभिप्रायः । यद्वा–अः वासुदेवोऽहं मे बलं यासां तास्तथा भक्ता इत्यर्थः । बलमत्र सामर्थ्यमाच्छादनं वा । वासुदेववस्त्रवतां न हि प्राकृतवस्त्रे इच्छोदयतीति । अत एव यूयं मद्वाक्यात्त्यक्तवस्त्रा जाता इति भावः । दामोदर इति । भक्तोत्र नारदो नलकूबरावपि भविष्यभक्तौ यशोदादिर्गोपीजनोऽप्यत्र भक्तपदेन ग्राह्यः, तदनुग्रहार्थमुदरे दामबंधं स्वीचकारेति भावः । नारदे तु तद्वचःसत्यकरणमनुग्रहः, नलकूबरयोर्भक्तिदानमनुग्रहः, यशोदादीनामानंददानमनुग्रहः, 'प्रसादं लेभिरे गोप्यः' इत्याद्युक्तेः । विजयध्वजस्तु–पादस्पर्शः शरीरस्पर्श इत्याचष्ट "उत्तमानां शरीरं तु पादशब्देन भण्यते" इति शिष्टोक्तेः । अत एव भगवत्पूज्यपादविष्णुपाद इति व्यवहारो लोके शास्त्रे च दृश्यते । पादशब्देन पादपर्यायस्तेन स्वामिचरणतातचरण इत्यादयः प्रयोगाः श्रूयंते । 'अंगेनांगिग्रहणम्' इति न्यायो वाऽनुसंधेयः ॥ २४ ॥ भवतीनाम् युष्माकम् । मदर्चनं पतिरूपेण पूजनम् । अनुमोदितः अनुज्ञातः । यतोऽनुमोदितोऽतो हेतोः । "संभावनाकल्पनायामनात्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न मय्यावेशितधियां कामः कामाय कल्पते ॥ भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते ॥ २६ ॥ याताऽबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः ॥ यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः ॥ २७ ॥ श्रीशुक उवाच ॥ इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ॥ ध्यायंत्यस्तत्पदांभोजं कृच्छ्रान्निर्विविशुर्व्रजम् ॥ २८ ॥

पि मया विदितः स मयाऽनुमोदितश्चातः सत्यो भवितुमर्हति । अर्हतीति संभावनामात्रोक्त्या आत्यंतिको न भविष्यतीति सूचितम् ॥ २५ ॥ तत्कुत इत्यत आह । न मयीति । कामाय पुनः कामभोगाय । विषयमहिम्ना कामस्यापि शांतिहेतुत्वादिति भावः । कामाप्ररोहे दृष्टांतः । भर्जिता दग्धा क्वथिता पक्वा धाना यवादि । बीजायांकुरोद्गमाय । प्राय इति स्वेच्छया पुनः प्ररोहमपि सूचयति । ध्रुवादीनां तथा दर्शनात् ॥ २६ ॥ सिद्धाः पूर्णमनोरथाः । तदाह । इमा आगामिनी रात्रीर्मया रंस्यथेति ।

तिकसंभवे " इति निरुक्तिकारः । आत्यंतिकः सार्वकालिकः ॥ २५ ॥ तत् अनात्यंतिकम् । इत्यत इत्यत्र । विषयमहिम्ना आत्यंतिकविषयसंगेन । इति भाव इति । " विरज्येत तथा चित्तं कामनामतिसेवया " इत्युक्तेः । अप्ररोहः अनाविर्भावः । तथा दर्शनात् प्ररोहदर्शनात् । प्राय इति यथार्थे " प्रायश्चानशने मृत्यौ प्रायो बाहुल्यतुल्ययोः " इति । " धाना भृष्टयवे प्रोक्ता धान्याकेऽभिनवांकुरे " इति विश्वः । गवाः खलु पंकिलभुव्युप्ताः प्ररोहंति त एव सूर्यकांतरत्नभुव्युप्तास्तापेन भर्जिता भवंति ततो वृष्ट्यंबुसिक्ताः क्वथिता रंधिताः, बीजायांकुरोद्गमायेति विश्वनाथः । तोषिण्यां तु–धानाः स्वत एव भृष्टाः पुनः स्वादविशेषाय घृतादिना भर्जिता गुडादिना क्वथिता निष्पक्वाश्च बीजाय फलांतरोत्पादनाय न संपादनीया भवंति: किं तु स्वयमवास्वाद्या भवंति, तथा भवतीनामपि कामनांतररहितभावविशेषसंस्कृतमत्प्रेमसेवाकामोपीत्यर्थः । एतादृशी मम कापि माधुरीति भावः । तथा च ताभिरेवानुभूय वक्ष्यते च–'सुरतवर्द्धनं शोकनाशनम्' इति । 'वांछति यद्भवभियो मुनयो वयं च' इति न्यायेन परमशांतानां तेषां वांछाविषयस्यास्य कथं शांत्यंतरापेक्षा स्यात् । तस्मात्सत्यो भवितुमर्हतीत्येवेति निगमितम् । एषा स्वगुणविख्यापनमयी मोहिनी नागरचर्य्यापि भगवत्संबंधित्वेन पारमार्थिक्येव गम्या । क्वचिद्भर्जितेत्यादय एकवचनांता नेष्यते इति, स च पाठश्चित्सुखसंमतस्स्पष्टार्थश्च ॥२६॥ तत् पूर्णमनोरथत्वम् । आगामिनीः शरत्संबंधिनीः । तदानीं हेमंतत्वात्संवत्सरपूर्तेः प्रागित्यर्थः । " भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः " इति वक्ष्यमाणत्वात् । यत् मत्संगमम् । उद्दिश्य संकल्प्य 'भूयान्नंदसुतः पतिः' इत्युक्तेः । आर्यार्चनम् व्रतमिति योज्यम् । यातेति युष्मदभीष्टमंगीकृतमिति भावः । तच्च मयैव संपाद्यमित्याह–अबला इति । कुत्र यामेत्यत्राह–व्रजमिति । एवं चेत्कथमबलासु कारुण्यं, तत्स्फुटमेव संपादयति–सिद्धा इति । यथासंकल्पं मयांगीकृता एवेत्यर्थः । एवमंगीकारमयं विवाहमेव संपाद्य तदंगभूतं फलविशेषमपि संपादयति–मयेति । इमाः सन्निहिता एव तादृशप्राप्तावशक्यत्वप्रत्यायनार्थं साधनसाधुवादेनैवोपसंहरति–यन्मे तत्पत्नीत्वं चेरुर्भवत्य इति शेषः । सतीः हे सत्यः । अत एव ता अभ्याग्रहेण पत्यंतरं नांगीकृतवत्य एवेति । तथापि रहोव्यूढत्वेनान्यव्यूढावद्गूढमेवात्रमंतेति च बुध्यते । एतदन्या एव हि परकीयायमाना इति, तदेवमुक्तं युवतीर्गोपकन्याश्चेति। ननु 'नग्नां नेक्षेत्परस्त्रियम्' इति स्मृतेर्भगवताप्यन्याय्यं कुतः कृतमितिचेत्–शृणु, न हि ताः परस्त्रियस्ताभिर्भगवते समर्पितदेहत्वात्पूर्वावतारेषु तथैव भगवतापि प्रतिज्ञातत्वाच्च । ताः कात्यायन्यर्चिकाः । तद्विवर्जिताः भक्तिविवर्जिताः । ये यज्वानः विधिना यज्ञकर्त्तारः 'यज्वा तु विधिनेष्टवान्' इत्यमरः । तेषाम् विप्राणाम् । कर्मसु महामदः–नास्मत्सदृशाः कर्मठा लोक संतीत्येवंरूपस्तम् (१) ॥ २७ ॥ इत्यादिष्टाः पूर्वोक्तरीत्याज्ञप्ताः । तत्पदांभोजम् कृष्णचरणारविंदम् । इति–व्रजं यातेत्यादिष्टाः । लब्धः कामो निजवांछितं याभिस्ताः, अत एव देवीं तद्व्रतोद्यापनादिकमपि परमानंदाद्विस्मृत्येति भावः । लब्धकामत्वेऽपि कृच्छ्राद्दुःखेनैव व्रजमाविशन्, कुतः–तत्पदांभोजं ध्यायंत्य एव न तु साक्षात्पश्यंत्यस्तद्विच्छेदादित्यर्थः । पदांभोजमिति विशेषनिर्देशः पतिभावेन गौरवात् तदानीं लज्जया नम्रीभूय स्थितानां तन्मात्रदर्शनेन तदनुस्मृतेरेव प्रकृतत्वाद्वा । निःशब्दः पुनर्व्रतार्थे व्रजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ गोपैः परिवृतो भगवान्देवकीसुतः ॥ वृन्दावनाद्गतो दूरं चारयन्गाः सहाग्रजः ॥ २९ ॥ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः ॥ आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः ॥ ३० ॥ हे स्तोक कृष्ण हे अंशो श्रीदामन्सुबलार्जुन ॥ विशालर्षभ तेजस्विन्देवप्रस्थ वरूथप ॥३१॥ पश्यतैतान्महाभागान्परार्थैकांतजीवितान् ॥ वातवर्षातपहिमान्सहता वारयंति नः ॥ ३२ ॥ अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ॥ सुजनस्येव येषां वै विमुखा यांति नार्थिनः ॥ ३३ ॥ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥ गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ॥ ३४ ॥ एताव ज्जन्मसाफल्यं देहिनामिह देहिषु ॥ प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत्सदा ॥ ३५ ॥

आर्या कात्यायनी । सतीः सत्यः । भक्त्याऽनुकंप्य कन्यास्तास्तद्विवर्जितयज्वनाम् ॥ पत्न्यनुग्रहतस्तेषामहन्कर्ममहामदम् ॥१॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१॥ विप्रभार्यानुग्रहाय यज्ञवाटं गच्छन्विप्राणां काठिन्यमभिप्रेत्य तेभ्योऽपि द्रुमाः श्रेष्ठा इति तानभिनंदति चतुर्भिः । पश्यतेति । हे स्तोककृष्णादयो गोपाः एतान् द्रुमान्पश्यत । परार्थमेवैकांतेन जीवितं येषां तान् । तदाह । वातवर्षादीन्स्वयं सहंतः सहमाना अस्माकं वारयंति ॥ ३२ ॥ सुजनस्य कृपालोरर्थिन इव ॥ ३३ ॥ निर्यासो घनरसः ।

यमुनागमनाभिप्रायेणेति तोषिणी ॥ २८ ॥ अथ तासां गमनानंतरम् । श्रीतोषिण्यां तु इदानीं गोपकन्यासु प्रसादमुक्त्वा तत्प्रस्तावसादृश्याद्यज्ञपत्नीषु प्रसादं वक्तुमारभते । अथ लीलांतरारंभे । स च निदाघसमय एवेति ज्ञेयम् 'निदाघार्कातपः' इति वक्ष्यमाणत्वात् । अत एव सहाग्रजः श्रीबलदेवसहितः । वस्त्राहरणदिने तत्साहित्याभावात् । गोपैः परिवृत इति प्रागुक्तिर्वक्ष्यमाणलीलायां तेषामपेक्षाविशेषात् । देवकीसुत इति । पूर्वस्मादेव हेतोः 'वृंदावनाद्गतो दूरम्' इति प्रथमं तावद्गिरिव्रजमयं काम्यकवनं गतः तत एवास्य धातुरागमयवेशो वर्णयिष्यते, पश्चान्निदाघतृष्णागामितधेनुजलपायनार्थं व्रजं दक्षिणे विधाय यमुनामागतः । तच्च व्रजादागच्छन्मध्याह्ने भोज्यवंचनार्थम्, तच्च श्रीयज्ञपत्नीष्वन्नप्रार्थनारूपकृपार्थमिति ज्ञेयम् ॥ २९ ॥ 'निदाघः उष्णोपगमः' इत्यमरान्निदाघो ग्रीष्मर्तुः तत्स्वीकारे 'हेमंते प्रथमे मासि' इत्युपक्रमो विरुध्येतातोऽत्र निदाघपदेन स्वेदांबु ज्ञेयम् । "निदाघ ऋतुभेदे स्यादुष्णस्वेदांबुनोरपि" इति मेदिनी । निदाघ स्वेदांबु तत्करोऽर्को निदाघार्कः । मध्यपदलोपी समासः । तस्यातपो निदाघातपस्तास्मित् तीव्रे मध्याह्ने सति । द्रुमान्वीक्ष्येत्यन्वयस्ततो न विरोध इति।आत पत्रमिवाचरंतीत्यातपत्रायंते, आतपत्रायितास्तान् । आचारार्थक्यङंतात्कर्त्तरि क्तः । व्रजौकस इति द्रुमविशेषणम् । आत्मन इत्युपलक्षणं स्वस्य स्वेषां च ॥ ३० ॥ संबुद्ध्यात्मकपद्यम् हे स्तोकोऽल्पः कृष्णः कृष्णवर्णो यस्येति तथा सर्वेषां संबोधनानामग्रिमेण पश्यतेति क्रियापदेन संबंधः । गोपगणनाक्रमोयम् यथादृष्टिप्राप्तमेव ज्ञेयः । एते दश श्रीकृष्णस्य दशदिक्षु रक्षणार्थं प्रेम्णा वर्तंत इति केचित्संभावयंति दशसंख्याकत्वात्, तत्र स्तोककृष्णा दयोऽष्टावष्टदिक्षु देवप्रस्थवरूथौ छत्रधारणवर्त्मशोधनादिनोर्ध्वाधोदेशयोर्ज्ञेयौ एकादेशो भद्रसेनस्तु गोपसेनाध्यक्षः रामश्च सर्वापेक्षकस्तदानीं दूरे ।स्थित इति लभ्यते ॥ ३१ ॥ एकांतेन निश्चयेन "निश्चये च रहःस्थाने एकांतमेकनाशने" इति नैरुक्तः । वारयंति अपाकुर्वंति । महान् भागो भाग्यं येषां तान् । तल्लक्षणमाह—परेति । नोऽस्माकम् केचिद्वातादीन् स्वयं सहंते तपस्विनो न त्वन्येषां वारयंति स्निग्धाशया दयालवो वा केचित्परेषां वार यंति स्वयं तु न सहंते किं तु तत्प्रतीकारं कुर्वते, एते च स्वयं सहमानाः परेषां वारयंतीति महाभागत्वम् ॥ ३२ ॥ अर्थिनः कार्यार्थिनः ॥ ३३ ॥ "तोक्मं कर्णमले पुंसि हरिते च यवे हये । स्वर्ंकुरे" इति धरणिः ॥३४॥ यत्सदा देहिषु श्रेयआचरणमेतावदिति संबंधः । श्रेयः शुभं तस्याचरणम् "श्रेयो मुक्तौ शुभे धर्मेतिप्रशस्ते तु वाच्यवत्" इति मेदिनी । प्राणैरिति । प्राणानादरेण कर्मभिरित्यर्थः । धिया सदुपायचिंतनादिना, वाचा उप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति प्रवालस्तबकफलपुष्पदलोत्करैः ॥ तरूणां नम्रशाखानां मध्येन यमुनां गतः ॥ ३६ ॥ तत्र गाः पाययित्वाऽपः सुमृष्टाः शीतलाः शिवाः ॥ ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलम् ॥ ३७ ॥ तस्या उपवने कामं चारयंतः पशून्नृप ॥ कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन् ॥ ३८ ॥ इति श्रीभागवते म० दशमस्कंधे पू० कात्यायनीव्रतनिरूपणं नाम द्वाविंशोऽध्यायः ॥२२॥ ॥ गोपा ऊचुः ॥ रामराम महावीर्य कृष्ण दुष्टनिबर्हण ॥ एषा वै बाधते क्षुन्नस्तच्छांतिं कर्तुमर्हथः ॥ १ ॥ श्रीशुक उवाच ॥ इति विज्ञापितो गोपैर्भगवान्देवकीसुतः ॥ भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥ प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः ॥ सत्रमांगिरसं नाम ह्यासते स्वर्गकाम्यया ॥ ३ ॥ तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः ॥ कीर्तयंतो भगवत आर्यस्य मम चाभिधाम् ॥ ४ ॥ इत्यादिष्टा भगवता गत्वाऽयाचंत ते तथा ॥ कृतांजलिपुटा विप्रान्दंडवत्पतिता भुवि ॥ ५ ॥ हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः ॥ प्राप्ताञ्जानीत भद्रं वो गोपान्नो रामचोदितान् ॥ ६ ॥

तोक्माः पल्लवायंकुराः ॥ ३४ ॥ ३५ ॥ इत्यभिनंदन् प्रवालादीनां समूहैर्नतशाखानां तरूणां मध्येन यमुनां प्राप्तः ॥ ३६ ॥ ३७ ॥ कुमारिकाभ्यः पूर्वमेव तन्नर्माकुलतया अगृहीतभोज्यानामेव निर्गमात्क्षुधार्ता इत्युक्तम् ॥ ३८ ॥ इति श्रीमद्भागवते म०दशमस्कंधे पूर्वार्धे टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ त्रयोविंशे ततो गोपैरन्नयाच्ञापदेशतः ॥ तत्पत्न्यनुग्रहात्कृष्णो दीक्षितानन्वतापयत् ॥ १ ॥ १ ॥ भक्ताया इत्येकवचनं सद्यः सायुज्याभिप्रायेण ॥ २ ॥ ३ ॥ अस्मद्विसर्जिता आवाभ्यां

देशादिरूपया एषां समुच्चयशक्त्यभावे परपरोपादानं च ज्ञेयम् ॥ ३५ ॥ उत्करः समूहः "समूहे ऊर्द्धहस्ते च देशे करविवर्जिते । उत्करः शौर्यसंपन्न उदारे" इति धरणिः । स्तबकाः पुष्पगुच्छाः ॥३६ ॥ तत्र यमुनायाम् । ततः गोजलपानानंतरम् ॥ ३७ ॥ अत्र केचिदित्यादिश्लोकः क्वचिदाधिकः । तस्याः कालिंद्याः । नित्यं तु गृहीतभोज्या एव वनमायांति तद्दिने कुमारिकाहास्यकरणार्थं विस्मृतभोज्या एवागता इति क्षुधार्त्ता इत्यस्य तात्पर्यम् ॥ ३८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वाविंशोऽध्यायः ॥ २२ ॥ ततः जलपानोत्तरम् । तत्पत्नीनां दीक्षितभार्याणामनुग्रहात् । अपदेशः छद्म (१)। दुष्टान्निबर्हति हंतीति तथा 'बर्ह–हिंसायाम्' अतो ल्युप्रत्ययः । क्षुत् भोक्तुमिच्छा । तस्याः क्षुधः शांतिं प्रशमम् 'शांतिः प्रशममंगले' इति यादवः । "क्षुत्खलु वै मनुष्यस्य भ्रातृव्यः" इति श्रुतेरस्माकं महाशत्रुमधुना क्षुद्रूपं चेद्धंतुं शक्नुथ, तदैव युवयोर्महाबलदुष्टहंतृत्वे सार्थके ज्ञास्येते इति नर्म व्यंजितम् ॥ १ ॥ अन्यासां कालांतरे मोक्षादेकत्वम् ॥ २ ॥ आंगिरसम् अंगिरसा बृहस्पतिनोक्तं बृहस्पतिसवमिति वा । आसते कुर्वते, आसत इति प्रथमे व्याख्यातम् ॥ ॥३॥ तत्र यज्ञशालायाम् । युष्माकं गोपानाम् । तत्र याचने । आर्यस्य श्रीरामस्य । आर्यस्य बलदेवस्य प्रथमामभिधां कीर्त्तयंत इति मत्तो वैश्यजातेः सकाशादार्यं क्षत्रियजातिं किंचिदभ्यर्हितत्वेन दानपात्रं मत्वापि यदि ते वहिर्दर्शिनो वः किंचिद्दास्यंति तदपि भद्रमिति भावः । अभिधाम् नाम 'अभिधानं च नाम च' इत्यमरः ॥ ४ ॥ ते गोपाः । यथा भगवतोक्तं तथा तेन प्रकारेण ॥ ५ ॥ 'भूमिदेवो द्विजोत्तमः' इति हलायुधः । आदेश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गाश्चारयंतावविदूर ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ ॥ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ॥ ७ ॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ॥ अन्यत्र दीक्षितस्यापि नान्नमश्नन्हि दुष्यति ॥ ८ ॥ इति ते भगवद्याच्ञां शृण्वंतोऽपि न शुश्रुवुः ॥ क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ॥ ९ ॥ देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोऽग्नयः ॥ देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ १० ॥ तं ब्रह्म परमं साक्षाद्भगवंतमधोक्षजम् ॥ मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे ॥ ११ ॥ न ते यदोमिति प्रोचुर्न नेति च परंतप ॥ गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ १२ ॥ तदुपाकर्ण्य भगवान्प्रहस्य जगदीश्वरः ॥ व्याजहार पुनर्गोपान्दर्शयँल्लौकिकीं गतिम् ॥ १३ ॥

प्रहिताः संतो याचध्वम् । युष्माकं का तत्र लज्जा । ननु तथाऽप्यपात्रत्वादस्मभ्यं किमिति दास्यंतीति चेत्तत्राह । कीर्तयंत इति ॥ ४॥५॥६॥ अविदूरे वर्तमानौ संतौ वो यदन्नं तल्लषतोऽभिलषतः । वः ओदनं श्रद्धा च यद्यस्ति तर्हि यच्छतेति ॥७॥ दीक्षिता वयमभोज्यान्ना इति वदिष्यंतीति स्वयमेवाशंक्याहुः । दीक्षाया आरभ्याग्नीषोमीयपश्वालंभनात्पूर्वं दोषः न ततोऽन्यत्र । तथा सौत्रामण्याश्चान्यत्रान्यदा ॥ ८ ॥ क्षुद्रे स्वर्गादावाशामात्रं येषाम् । भरीणि क्लेशाधिकानि कर्माणि येषाम् अतोऽज्ञा वृथा ज्ञानाः वृद्धा इति मानवंतः ॥ ९ ॥ ननु कर्मक्रममुल्लंघ्यादेशकालेन्यार्थमन्नमन्यस्मै कथं देयं तत्राह । देश इति । पृथक् चरुपुरोडाशादि द्रव्यम् । तंत्रं प्रयोगः । धर्मोऽपूर्वम् ॥ १० ॥ मनुष्योऽयमिति दृष्ट्या मर्त्यात्मानो ब्राह्मणा वयं महांत इति मन्यमानाः ॥ ११ ॥ १२ ॥ लौकिकीं गतिं न हि कार्यार्थिनो निर्विद्यंते को वा याचको

आज्ञा ॥ ६ ॥ ननु तौ न ब्राह्मणौ कथं ब्राह्मणभोजनात्पूर्वं ताभ्यां दास्यामस्तत्राहुः–बुभुक्षितौ । 'अन्नस्य क्षुधितः पात्रम्' इति स्मृतिं जानीथैवेति भावः । किमप्यवदतस्तान्पुनराहुः–हे द्विजास्तयोरर्थिनोर्वो यदि श्रद्धा तर्हि यच्छत नो चेन्नेति ब्रूत, वयं परावृत्य याम इति भावः । धर्मवित्तमा अत्रान्वयव्यतिरेकयोर्धर्माधर्मौ वयं पुनः किं ब्रूम इति भावः । श्लेषेण ययोर्नाम्नैव सर्वजगदप्यतिद्रुतीभूयानुरज्यति तौ रामकृष्णावतिक्षुधार्त्तावर्थिनावपि श्रुत्वा यत्तूष्णीं भवथ अतो यूयं द्विजाः पितृद्वयजाता एवेत्याक्षेपश्च । धर्मवित्तमा इति विपरीतलक्षणया । यद्वा–'धर्मो धर्मविदुत्तमाः' इति सहस्रनामसु धर्मविद्भिरस्तस्य तमोऽज्ञानं येषां ते तथा।सान्तानामदन्तत्वादार्षत्वाद्वा रूपसिद्धेः हरिविमुखा इत्यर्थः । 'श्रद्धास्तिक्याभिलाषयोः' इति यादवः ॥ ७ ॥ 'दीक्षितान्नं न भोक्तव्यम्' इति शास्त्रादभोज्यान्नाः । आरभ्य प्रारभ्य । ततोन्यत्र पश्वालंभात्परत्र कर्मांतरे । ''आग्नीषोमीयं पशुमालभेत'' इति विहिता पशुसंस्था, ''सौत्रामण्यां सुराग्रहान् गृह्णाति'' इति विहिता सौत्रामणिस्ताभ्यामन्यत्रेत्यर्थः।दीक्षानंतरं पशुसंस्थायाः आग्नीषोमीयपश्वालंभनात्पूर्वमेव दोषः न ततोऽन्यत्र ''कर्मांतरे प्रवृत्तस्या अन्नमश्नन्न दुष्यति'' इति। पशुसंस्था चेदानीं जातैवेति भावः । सौत्रामण्यां तु सर्वदैव दुष्यतीत्यर्थः ॥ ८ ॥ ते विप्राः । इति गोपोक्तिप्रकारेण । बालिशाः मूर्खाः 'बालिशो बालमूर्खयोः' इति ॥ ९ ॥ देशः कृष्णसारसंचारविषयः । कालो वसंतादिः । मंत्रो देवताप्रसादजनकप्रणवादिः । ऋत्विजः षोडश । तथाहि–ब्रह्मा १, उद्गाता २, होता ३, अध्वर्युः ४, ब्राह्मणाच्छंसी ५, प्रस्तोता ६, मैत्रावरुणः ७, प्रतिप्रस्थाता ८, प्रतिहर्त्ता ९, पोता १०, अच्छावाकः ११, नेष्टा १२, आग्नीध्रः १३, सुब्रह्मण्यः १४, ग्रावस्तोता १५, उन्नेता १६ । एतेषां कर्माणि तु यज्ञविद्यातोऽवसेयानि । अग्नयः–आहवनीयगार्हपत्यदाक्षिणात्यसभ्यावसथ्यादयः । देवताः इंद्रादयः । यजमानः यज्ञकर्त्ता । क्रतुर्यज्ञोंगी ॥ १० ॥ तम् श्रीकृष्णम् ॥ ११ ॥ ते विप्राः । ॐमिति अंगीकृतमिति 'ॐमित्यंगीकारे ब्रह्मणि च' नेति न दास्याम इति च । प्रत्येत्य प्रत्यागत्य । तथोभयम् ॐमिति नेति च ते न ब्रुवंतीत्यूचुः । ॐमिति न प्रोचुरिति–संप्रति ब्राह्मणभोजनात्पूर्वमेव गोपालकेभ्यः कथं दास्याम इति भावः । नेति च न प्रोचुरिति–ब्राह्मणभोजनोत्तरं यद्यन्नान्युर्वरितानि भविष्यंति तर्हि दास्याम इति भावः । क्षुधाया अपि 'प्राणप्रहारी क्षुधा' इत्युक्तेः शत्रुकार्यप्राणहरणकर्त्रीत्वेन शत्रुत्वम् । त्वं तु परंतपोसीति क्षुध्याकुलो न भवसीति संबुद्ध्यभिप्रायः । यद्वा–राज्ञः क्रोधाविर्भावमालक्ष्य श्रीशुकः–हे परंतपेति । तदानीं यदि त्वं राजा भविष्यस्तदा ब्रह्मण्यचूडामणिरपि तान्ब्राह्मणान् शत्रूनिवावश्यमदंडयिष्य इति भावः ॥ १२ ॥ तत् गोपवचः । निर्विद्यंते विरज्यंते । पराभूयते तिरस्क्रियतेऽपि तु सर्व एवेति भावः । प्रहस्येति । अज्ञविप्रेषु कोपानौचित्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतम् ॥ दास्यंति काममन्नं वः स्निग्धा मय्युषिता धिया ॥ १४ ॥ गत्वाऽथ पत्नीशालायां दृष्ट्वाऽऽसीनाः स्वलंकृताः ॥ नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् ॥ १५ ॥ नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः ॥ इतोऽविदूरे चरता कृष्णेनेहेषिता वयम् ॥ १६ ॥ गाश्चारयन्स गोपालैः सरामो दूरमागतः ॥ बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयताम् ॥ १७ ॥ श्रुत्वाऽच्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः ॥ १८ ॥ चतुर्विधं बहुगुणमन्नमादाय भाजनैः ॥ अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः ॥ ॥ १९ ॥ निषिध्यमानाः पतिभिर्भ्रातृभिर्बंधुभिः सुतः ॥ भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः ॥ २० ॥ यमुनोपवनेऽशोकनवपल्लवमंडिते ॥ विचरंतं वृतं गोपैः साग्रजं ददृशुः स्त्रियः ॥ २१ ॥ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे ॥ विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासम् ॥ २२ ॥

न पराभूयत इत्यादिलोकस्थितिं दर्शयन् ॥ १३ ॥ केवलं देहेन गृहे वसंति धिया च मय्येवोषिता यतो मयि स्निग्धा अतो दास्यंतीति ॥ १४ ॥ १५ ॥ ईषिताः प्रेषिताः ॥ १६ ॥ स कृष्णो गोपालैः सह ॥ १७ ॥ तत्कथाक्षिप्तमनस्त्वात्तद्दर्शनोत्सुकाः अत एव तमुपागतं श्रुत्वा जातसंभ्रमा बभूवुरिति ॥ १८ ॥ भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधम् । बहुगुणं संस्कारविशेषैर्बहवो गुणा रससौरभ्यादयो यस्मिंस्तत् । भाजनैरमत्रैर्भांडैर्वा । पत्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृष्णमभिसस्रुरभिजग्मुः । अप्रतिबंधे दृष्टांतः । समुद्रं निम्नगाः नद्य इवेति ॥ १९ ॥ अत्र हेतुः । भगवतीति । दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः ॥ २० ॥ तथागताः सत्यो ददृशुः ॥ २१ ॥ हिरण्यवत्परिधिः परिधानं यस्य तं पीतांबरमित्यर्थः । वनमाल्यैर्बर्हैर्धातुभिः प्रवालैश्च नटवद्वेषो यस्य तम् । अनुव्रतस्य सख्युरंसे विन्यस्तो निहितो

दिति भावः । लौकिकीं गतिमिति । यत्र पुरुषेषु याचितं न सिध्येत्तत्र तत्पत्न्यो याच्या इति शिक्षयन्निति भावः ॥ १३ ॥ उषिताः कृतनिवासाः । मां चिंतयंत्यः सदेत्यर्थः । मामागतमेव ज्ञापयत न तु विवक्षितं, बुभुक्षालक्षणमदुःखश्रवणस्य सद्य एव तदतिसंतापकत्वात् । ननु त्वद्बुभुक्षाज्ञापनं विना कथमन्नं ता दास्यंति, तत्राह–वो युष्मभ्यं मत्संबंधेनैव युष्मद्बुभुक्षादर्शनेनैव दास्यंति । ननु तत्पतयो वारयिष्यंति, तत्राह–मयि स्निग्धाः स्नेहवत्यः पतिवारणं न मानयिष्यंति । यतो मय्येव धिया उषिताः केवलं देहेनैव पतिगृहे वसंतीत्यर्थ इति विश्वनाथः ॥ १४ ॥ अथ भगवत्प्रेषणोत्तरम् । द्विजसतीः ब्राह्मणपत्नीः । प्रश्रिताः नम्राः संतः । इदम् वक्ष्यमाणम् ॥ १५ ॥ ईष–प्रेरणेऽपि भौवादिक आत्मनेपदी ॥ १६ ॥ तस्य श्रीकृष्णस्य ॥ १७ ॥ तच्छब्दोऽत्र कृष्णपरामर्शी, तस्य कथया बुभुक्षावार्त्तया आक्षिप्तानि–अरे पामर मनः कथं प्रियतमस्य बुभुक्षाश्रवणेनापि न मूर्छितं जागर्षि धिक्त्वामित्येवं तिरस्कृतानि स्वस्वमनांसि याभिस्ताः । यतस्तद्दर्शनोत्सुका अत एव हेतोः । तम् कृष्णम् जातसंभ्रमाः । जातादराः "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी ॥ १८ ॥ अमत्रैः पात्रैः 'भाजनं योग्यपात्रयोः' इति मेदिनी । भांडैस्तूदादिशाखावंशत्वगादिनिर्मितैर्वा । भक्ष्यादयः पूर्वं व्याख्याताः । संस्कारो जीरकैलादिभिर्घृतादिना क्रियत इति १९ ॥ आशयः कदा श्रीकृष्णं द्रक्ष्याम इत्यभिप्रायः ॥ ॥ २० ॥ अशोको वृक्षविशेषः ॥ २१ ॥ हिरण्यपरिधिं नटवेशमिति वक्ष्यमाणत्वात् सुवर्णरसरंजितभक्तिच्छेदकुंचितकटिवेष्टनवस्त्रं नटोचितमेव । वनमाल्यं वन्यविविधपुष्पैरचितं दक्षिणवामस्कंधादारभ्य वैकक्षिकद्वयम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरन्ध्रैः ॥ अंतः प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र ॥ २३ ॥ तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया ॥ विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः ॥ २४ ॥ स्वागतं वो महाभागा आस्यतां करवाम किम् ॥ यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः ॥ २५ ॥ नन्वद्धा मयि कुर्वंति कुशलाः स्वार्थदर्शनाः ॥ अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ॥ ॥ २६ ॥ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥ यत्संपर्कात्प्रिया आसंस्ततः कोऽन्वपरः प्रियः ॥ २७ ॥

हस्तो येन तम् । इतरेण हस्तेन लीलयाऽब्जं धुनानं भ्रामयंतम् । कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य तं च तं च तं च॥२२ ॥ वृत्तेरपि लयेन सामरस्यमाह । प्राय इति । बहुशः श्रुता ये प्रियतमस्योदया उत्कर्षास्त एव कर्णपूराः कर्णौ पूरयंति कृतार्थौ कुर्वंतीति तथा तैः कर्णाभरणैरिति वा । यस्मिन्क्षणे निमग्न मनस आविष्टचेतसस्तं लोचनद्वारैरंतः प्रवेश्य सुचिरमुपगुह्य तापं जहुः । अभिमतयोऽहंवृत्तयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथेति ॥ २३ ॥ अखिल दृशां द्रष्टा सर्वबुद्धिसाक्षी । तास्तथा प्राप्ता विज्ञायापि । तथेत्येतद्विवृणोति । त्यक्तसर्वाशास्त्यक्ताः सर्वा आशा याभिस्ताः केवलमात्मनः स्वस्यैव दिदृक्षयेति ॥ २४ ॥ हे महाभागाः वः स्वागतं शुभमागमनम् । तदेवाह । यद्यस्मात्प्रतिबंधतिरस्कारेणास्माकं दिदृक्षया प्राप्ता इति । इदं व उपपन्नं संपन्नं युक्तमिति वा ॥ २५॥ युक्तत्वमेवाह । नन्विति । आत्मप्रिये आत्मा चासौ प्रियश्च तस्मिन्मयि कुशला विवेकिनोऽत एव स्वस्यात्मनोर्थं पुरुषार्थं पश्यंति ये ते यथा यथावद्भक्तिं कुर्वंति । यथावत्त्वमाह । अद्धा साक्षात् । अत्र हेतुः । अहैतुक्यव्यवहितां फलाभिसंधिरहितामत एवाव्यवहितां निरंतराम् ॥ २६ ॥ आत्मनः सर्वतः श्रेष्ठत्वमुपपादयति । प्राणेति । स्वा ज्ञातयः आत्मा

बर्हाणि प्रवालाश्च मौलिभूषणानि । धातवः सौगंधिकनाम्नः काम्यकवनपर्वतविशेषाल्लब्धाश्चित्रांगतया रचितास्तैर्नटवेशधरं कमलं धुनानं लीलाकमलघूर्णनमिषेण स्वहृदघूर्णीमेव दर्शयामीति निश्चिनुतेति भावः । "परिधिः परिधाने स्यात्कांचीपरिखयोस्तथा । मंडले द्रुमशाखायां भूषायां वाहनेऽपि च॥" इति धरणिः ॥ २२ ॥ वृत्तिश्चेतोवृत्तिस्तसत्त्वे समक्षदर्शने यथा तापहानिस्तथा तल्लयेऽपि ध्यानावस्थायामपि तापहानिरिति । समरसस्य भावः सामरस्यं सादृश्यम् । उत्कर्षा दुष्टदलनादिरूपयशःपुंजाः । यद्वा—प्रायः श्रुतप्रियतमोदयाश्च कर्णपूराः कर्णभूषाः ताश्च तैः । यद्वा—अभितो मतिर्येषां तेऽभिमतयो निपुणाः । प्राज्ञम् विद्वांसम् । "रिक्तमापूर्णतामेति मृत्युरप्यमृतायते । आपत्संपदिवाभाति विद्वज्जनसमागमात्॥" इत्युक्तेः ॥ २३ ॥ ताः विप्रपत्नीः । तथा कथमित्याकांक्षायां—तथेति । तथाभूताः पुरोन्नस्थालीः स्थापयित्वैव मूर्च्छिता दृष्ट्वा । आशा अभिलाषाः 'आशा दिगभिलाषयोः' इति यादवः ॥ २४ ॥ संपन्नम् शोभनम् । स्वरुच्यनुरोधादशोभनमपि कामुकस्य व्यभिचारवच्छोभनं प्रतीयतेऽत आह—युक्तं वेति । यद्यतः प्रतिबंधकोटीरपि तिरस्कृत्य मद्दर्शनार्थमागता अतो हे महा भागा एतद्व उपपन्नं, मम तु प्रत्युपकारासमर्थत्वान्न किमप्युपपन्नम् । किं करवाम ऋणी भवाम इति भावः ॥ २५ ॥ ननु निश्चये । अर्थम् परलोकहितम् । अत्र साक्षाद्भक्तौ । अत एव फलाभिसंधिराहितत्वादेव । फला भिसंधौ तु यावत्फलं क्रियते न निरंतरामिति भावः । 'अहमात्मा गुडाकेश' इति स्मृतेः, "आत्मा तदेतत्प्रेयः" इत्यादिश्रुतेः प्रियश्चाहमेवेति ॥ २६ ॥ यस्य आत्मनः । अनात्मन्यात्मत्वारोप आत्माध्यासः । विचारेणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्यात देवयजनं पतयो वो द्विजातयः ॥ स्वसत्रं पारयिष्यंति युष्माभिर्गृहमेधिनः ॥ २८ ॥ पत्न्य ऊचुः ॥ मैवं विभोऽर्हति भवान्गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलम् ॥ प्राप्ता वयं तुलसिदामपदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् ॥ २९ ॥ गृह्णंति नो न पतयः पितरौ सुता वा न भ्रातृबंधुसुहृदः कुत एव चान्ये ॥ तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिंदम तद्विधेहि ॥ ३० ॥ श्रीभगवानुवाच ॥ पतयो नाभ्यसूयेरन्पितृभ्रातृसुतादयः ॥ लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ॥ ३१ ॥

देहः एते सर्वे यत्संपर्कादस्याध्यासेनोपकरणत्वेन वा ॥ २७ ॥ तत्तस्मात्कृतार्था यूयं देवयजनं यज्ञवाटं यात गच्छत । ननु कृतार्थाः किमिति यास्याम इति चेत्तत्राह । पतय इति । पारयिष्यंति समापयिष्यंति । पतीनामनुग्रहायेत्यर्थः ॥ २८ ॥ नृशंसं परुषम् । निगमं प्रतिज्ञां ' न मे भक्तः प्रणश्यति ' इति वेदं वा 'न स पुनरावर्तते' इति । पदावसृष्टमवज्ञयाऽपि दत्तम् । बहुमानेन केशैर्निवोढुं दासीभवितुम् ॥२९॥ किं च । न गृह्णंति नोऽस्मान् । हे अरिंदम कामलोभपापादिदमन भवतः प्रपदयोः पादाग्रयोः पतितदेहानामन्या स्वर्गादिर्गतिरपि न भवेन्मा भवत्तस्माद्दास्यमेव विधेहीति॥ ३० ॥मयोपेता अनुज्ञाताः । प्रत्यक्षं देवान्प्रदर्श्याह । देवा अपीति॥ ३१ ॥

ध्यासनिवृत्तावप्युपकरणत्वनिवृत्तिर्न देहापत्यकलत्रादिष्वात्मसैन्योष्वित्युक्तेर्देहादेरुपकरणत्वम् । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतिरत्रानुसंधेया ॥ २७ ॥ यतो मद्भक्तास्तत्तस्माद्धेतोः । विप्रपत्न्यः शंकंते—नन्विति । इत्यर्थ इति । अग्निसाध्ये कर्मणि सपत्नीकस्यैवाधिकारादन्यथा कृतमप्यकृतं स्यादिति भावः । सत्रादिकर्मापि वेदरूपेण मयैवोक्तमतो मत्कार्यानुरोधादेव यात, तत्रैवस्फुरंतं मां द्रक्ष्यथेति भावः ॥ २८ ॥ "नृशंसः कठिने क्रूरे हिंसके नरशंसके" इति निरुक्तिकारः । 'निगमो वेदवैश्ययोः । प्रतिज्ञाने नागरे च' इति धरणिदेवः । न प्रणश्यति अदृश्यो न भवतीत्यर्थः । यः परमेशं प्राप्तः स पुनः संसारे नायातीत्यर्थः । दास्यो हि यथाकथंचिद्दत्तमप्यादरेण गृह्णंतीति भावः।ननु भवतीभिर्विप्रजात्यभिमानो दुस्त्यजस्तत्राहुः—तव गोपरूपस्यापि पादमूलं वयं प्राप्ताः, न हि विप्रजात्यभिमाने सत्येवं वक्तुं शक्यते।अस्मद्वाक्येनैव निश्चिनु, सत्यम्—तदपि गोपस्य मम गोप्य एव दास्यो योग्या यूयं ब्राह्मण्यो वंद्या एव, तत्राहुः—यदि ब्राह्मणीर्दासीकर्त्तुं जिहेषि कथं तर्हि त्वां ह्रेपयामस्त्वत्पुरो नैवयामः, वृंदावन एव वनदेवता इव वर्त्तिष्यामहे त्वत्संबंधगंधेनैव कृतार्थीभविष्याम इत्याहुः—वयं तु दूरे स्थितास्त्वत्पदावसृष्टं त्वत्प्रेयसीपदसंसर्गात् त्रुटितं शय्याधस्थितं त्वद्दासीदत्तं तुलसीदाम केशैर्धर्तुं प्राप्ताः, नास्माकं दुर्लभदास्येपच्छेति भावः । निवोढुम् धर्त्तुम् । अतिलंघ्य त्यक्त्वा ॥ २९ ॥ ताननादृत्येहागतास्ते पुनर्न स्वीकुर्वंतीत्याहुः—किंञ्चेति । अन्ये संबंधीतरे । संबंधित्यक्तमितरे स्वत एव त्यजंतीति तात्पर्यम् । यतोऽस्माकमन्या गतिर्नाकांक्षिता तस्मात् । तत् दास्यम् । किं च, त्वन्नगरस्थमालिकतांबूलिकादिवनिताजनास्याच्छ्रुतत्वद्रूपगुणमाधुर्य्या यदवधि वयं वयस्संधिमारभ्यैवाभूम, तद्दिनत एव त्वत्प्रेमवतीर्गृहकर्मस्वप्युदासीना अस्मान्व्यभिचारिणीरिव दृष्ट्वा संदिहानाः पत्यादयो नैव प्रायो व्यवहरंतीत्याहुः—गृह्णन्तीति । सुताः सपत्नीपुत्राः । अन्ये प्रतिवेश्यादयः । ततश्चातिवैयग्र्येण रुदत्यः पदाग्रे मूर्ध्ना प्रणमत्यस्सगद्गदमाहुः—तस्मादिति । अस्माकं यथान्यागतिर्न भवेत्तथा विधेहि । हे अरिंदम त्वत्प्राप्तिप्रतिबंधकभूता दुरितादय एवारयस्तान्दमय कृपया त्वमेवेति भावः ॥ ३० ॥ लोकाः संबंधिभिन्नाः । निजयोगेन प्रदर्श्य दर्शयित्वा । अनुमन्वते आदरं कुर्वंतीति मयि प्रेमवत्यो यूयं मत्सुखपरा एवातो मदनभिप्रेतं चेष्टितुं नार्हथ स्वहठं मा कृढ्वं गृहान् गच्छतेत्युक्ते भो अभिज्ञशिरोमणे असूर्यंपश्याः कुलवत्यो वयं वचनोल्लंघनात् यांस्तृणीकृत्य पुराद्बहिर्भूय एतावद्दूरे स्थितस्य लंपटत्वेन व्रजे ख्यातस्य तव समीपमागताः स्म पुनस्तत्रैव गच्छंतीरस्मांस्ते पत्यादयः पुरेषु प्रवेष्टुमप्यददानाः कोपादद्य वधिष्यंत्येवेति जानीम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न प्रीतयेनुरागाय ह्यंगसंगो नृणामिह ॥ तन्मनो मयि युंजाना अचिरान्मामवाप्स्यथ ॥ ३२ ॥ (श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥ न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ १ ॥) श्रीशुक उवाच ॥ इत्युक्ता मुनिपत्न्यस्ता यज्ञवाटं पुनर्गताः ॥ ते चानसूयवः स्वाभिः स्त्रीभिः सत्रमपारयन् ॥ ३३ ॥ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रुतम् ॥ हृदोपगुह्य विजहा देहं कर्मानुबंधनम् ॥ ३४ ॥ भगवानपि गोविंदस्तेनैवान्नेन गोपकान् ॥ चतुर्विधेनाऽऽशयित्वा स्वयं च बुभुजे प्रभुः ॥ ३५ ॥ एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगोपीनां रमयन्रूपवाक्कृतैः ॥ ॥ ३६ ॥ अथानुस्मृत्य विप्रास्ते अन्वतप्यन्कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृविडंबयोः ॥ ३७ ॥ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम् ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ ३८ ॥

तथापि त्वां त्यक्तुं न शक्नुम इति चेत्तत्राह । नेति । प्रीतये सुखाय । अनुरागाय स्नेहवृद्धये । अंगसंगोंऽगाभ्यां संगः ॥ ३२ ॥ अनसूयवः तासु अदोषदृष्टयः ॥ ३३ ॥ देहमिति । तदीयं देहं तत्र विहाय चैतन्येन भगवंतं प्रापेत्यर्थः ॥ ३४ ॥ ३५ ॥ अनुशीलयन्ननुकुर्वन् । गोगोपगोपीनामिति कर्मणि षष्ठी । रूपवाक्कृतैः रूपेण वाचा कृतैश्चरित्रैश्च रमयन् । तान् रमयितुं रेम इत्यर्थः ॥ ३६ ॥ अनुस्मृतिप्रकारमाह । नरानुकरणवतोर्विश्वेश्वरयोर्याच्ञां यदहन्म हतवंतस्तत्कृतागसो वयमित्यनुस्मृत्येति ॥ ३७ ॥ तदा च भार्या गुरूनिव मानयंतो भगवद्भक्तिरहितमात्मानं व्यनिंदन्नित्याह । दृष्ट्वेति । अलौकिकीं लोकातीताम् ॥ ३८ ॥

स्तत्राह–पतय इति । वो युष्मभ्यं नाभ्यसूयेरन् दोषदृष्टिमपि न कुर्युः, किमुतानिष्टं शंकध्वे इति भावः । किमुत पुत्रादयः, अन्ये च लोकाः । कीदृशीः मया सहोपेताः संगता अपि किमुत संप्रत्यसंगता एवेति भावः । अहमीश्वर इति तैरपि ज्ञातत्वादिति भावः । यतो देवा अपि यज्ञकर्मणि प्रत्यक्षीकृता अत्रार्थे पृष्टा भवतीरनुमन्वतेऽनुमंस्यंत एव, मां सर्वेश्वरं विदुषां देवानामप्यत्रार्थेऽनुमतिरेव न त्वननुमतिरित्यर्थ इति विश्वनाथः ॥ ३१ ॥ यद्यपि तेस्मानंगीकरिष्यंति तथापीति । अंगाभ्याम् शरीराभ्याम् । मे प्रीतये नेति मे इति शेषः । भक्त्यैवाहं तुष्यामि न त्वन्योपायेनेति भावः । नन्वंगसंगोऽप्यस्तु, तत्राह–अहो ब्राह्मणजन्मनि भवतीनां मयांगसंगो नृणां प्रीतये सुखाय न भवति । अनुरागादयस्तु सुतरां नेत्यर्थः । "धर्मसंस्थापनार्थाय संभवामि युगेयुगे" इति 'ब्राह्मण्यो लोकमातरः' इत्युक्तेर्भवतीनां मयि यशोदादिवदनुराग एवोचित इति ॥३२॥ याः समागतास्ताः । इतीत्थम् । ते विप्राः । अपारयन् समापयामासुः । 'पार–कर्मसमाप्तौ' चुरादिः ॥ ३३ ॥ तत्र तासु विधृता रज्ज्वादिनाऽऽबध्य स्थापिता । तदीयम् भर्त्रा ममत्वेन स्वीकृतम् । तत्र तत्पार्श्वे । इत्यर्थ इति । देहे एव तस्य स्वत्वं न त्वात्मनीति तस्यागोचरत्वेन स्वत्वाविषयत्वात् । अतस्तत्स्वत्वाधिकरणं तत्रैव त्यक्त्वा तीव्राभिलाषेण भगवंतं प्राप्तेति । भगवद्ध्यानादिना कर्मणां क्षीणत्वादिति भावः ॥ ३४ ॥ तेनैव विप्राभिरानीतेन । आशयित्वा भोजयित्वा ॥ ॥ ३५ ॥ एवमुक्तप्रकारेण । लीलावरवपुरिति ब्राह्मणीगमने तु लीलावैगुण्यं स्यादिति भावः । तान् गोपादीन् । रमयन्निति तुमर्थे शतृप्रत्ययः । इत्यर्थ इति । तदर्थमेव भगवतो रमणं न स्वार्थमाप्तकामत्वादिति ध्वनितम् ॥ ॥ ३६ ॥ नन्वेते विप्राः समीचीना न वा । अनुभवासत्त्वान्नाद्यः, हरिभक्तस्त्रीसंबंधान्न द्वितीय इति राज्ञो मानसाक्षेपं परिहरन्नाह–अथेति । ते विप्राः । अथ कोऽर्थो मंगलाः । कुतो–यतोऽन्वतप्यन्, तदपि कुतः–यतः कृतागसः, तत्र किं मानमिति चेदाह–अनुस्मृत्येति । अनुस्मरणं मानम् । किमपराद्धं तत्राह–अहन्मेति । तिरस्कृतवंत इत्यर्थः । स्वामिव्याख्याने अनुकरणशब्दार्थः तद्भिन्नत्वे सति तत्तुल्यत्वमिति ॥३७ ॥ तदा चानुस्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिग्जन्म नस्त्रिवृद्विद्यां धिग्व्रतं धिग्बहुज्ञताम् ॥ धिक्कुलं धिक क्रियादाक्ष्यं विमुखा ये त्वधोक्षज ॥ ३९ ॥ नूनं भगवतो माया योगिनामपि मोहिनी ॥ यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ॥ ४० ॥ अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ ॥ दुरंतभावं योऽविध्यन्मृत्युपाशान्गृहाभिधान् ॥ ४१ ॥ नाऽऽसां द्विजातिसंस्कारो न निवासो गुरावपि ॥ न तपो नात्ममामांसा न शौचं न क्रियाः शुभाः ॥ ४२ ॥ अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ॥ भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ॥ ४३ ॥ ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया ॥ अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ॥ ४४ ॥ अन्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः ॥ ईशितव्यैः किमस्माभिरीशस्यैतद्विडंबनम् ॥ ४५ ॥ हित्वाऽन्यान्भजते यं श्रीः पादस्पर्शाशयाऽसकृत् ॥ आत्मदोषापवर्गेण यद्याच्ञा जनमोहिनी ॥ ४६ ॥

त्रिवृत् शौक्रं सावित्रं दैक्षमिति त्रिगुणितं जन्म । व्रतं ब्रह्मचर्यम् । क्रियाः कर्माणि दाक्ष्यं च । क्रियादाक्ष्यमित्येकं वा पदम् । धिगित्यधिक्षेपे । ये वयं त्वधोक्षजे विमुखास्तेषां जन्मादि तत्सर्वं धिगिति व्यगर्हन्नित्यर्थः ॥३९॥४०॥ योऽविध्यदच्छिनत्तं दुरंतं भावं भक्तिं पश्यतेति ॥ ४१ ॥ द्विजातिसंस्कार उपनयनम् । क्रियाः संध्योपासनादयः ॥४२॥४३॥४४॥४५॥ आत्मनो दोषापवर्गेण चांचल्यगर्वादित्यागेन ॥ ४६ ॥

रणावसरे । अलौकिकीं लोकमर्यादामपाकृत्य कृताम् । तया भक्त्या ॥३८॥ शौक्रं शुद्धमातापितृतः, सावित्रम् उपनेतुः, दैक्ष्यम् देवदीक्षारूपम् । पृथक्कृत्य व्याख्याने हरिसेवारूपकर्मणां तत्रैव दाक्ष्यस्य च बोधादशोभनतां मत्वाह–एकपदमिति । क्रियादाक्ष्यं व्यावहारिककर्मकौशलं, यागादिक्रियाकौशलं वा । इत्यर्थ इति । "तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया । आयासायापरं कर्म विद्यान्या शिल्पनैपुणम् ॥" इत्युक्तेः ॥३९॥ शास्त्रज्ञानमपि फलावसरे फलाकरणादकिंचित्करमेव । भगवदनुग्रह एव ज्यायानित्याशयवंत आहुः–नूनमिति । योगिनाम् ज्ञानिनाम् । यद्यतः । द्विजा द्विजोत्तमाः । गुरुपदसान्निध्याद्द्विजपदेन ब्राह्मणग्रहः । गुरवः "वर्णानामाश्रमाणाञ्च मुख्योऽभूद्ब्राह्मणो गुरुः" इत्युक्तेः, "आचार्यत्वं गुरुत्वञ्च विप्रस्यैव वरानने" इति स्कांदोक्तेः । स्वाथ भगवत्प्राप्तिरूपे "स्वार्थः सर्वात्मना ज्ञेयो यद्धरेर्दर्शनादिकम्" इत्युक्तेः ॥ ४० ॥ अहो अद्भुतम् । कृष्णे दुरंतभावमव्यवहितभक्तिम् । यः दुरंतभावः । अविध्यत् 'व्यध–ताडने' छेदनमपि यथाकथंचित्ताडने पर्यवस्यति ॥ ४१ ॥ गुराविति । सामीपिकाधारे सप्तमी, वटे गाव इति वत् । विद्यावाप्तये गुरुकुलवासो न कृत इत्यर्थः । तपः ब्रह्मचर्यादि । आत्ममीमांसा ब्रह्मविचारः । शौचम् बाह्याभ्यंतरशुद्धिः । शुभाः क्रिया यागादिलक्षणाः ॥ ४२ ॥ यद्यप्यासां संस्कारादयो न संति तथापि कृष्णे भक्तिर्दृढा सत्यपि वारणकारणेऽवार्येत्यर्थः ॥ ४३ ॥ स्मारयामास अहो यूयं विद्वांसोऽपि किमिति मां न स्मरतेति विज्ञापयामास । तत्र हेतुः–सतां गतिः ॥ ४४ ॥ अन्यथा सतां गतित्वानंगीकारे । ईशितव्यैः अनीशैः, प्रेष्यैरिति यावत् । सहार्थे तृतीया । किम् स्मारणे । किं प्रयोजनम् न किमपीत्यर्थः । प्रयोजनाभावे किमर्थं स्मारणं कृतं तत्राह–ईशस्य एतत्स्मारणमस्मत्स्त्रीष्वनुकंपनं च विडंबनं कृपैव "विडंबनमतर्क्ये चानुकारकृपयोर्हसे" इति धरणिदेवः ॥ ४५ ॥ यम् श्रीकृष्णम् । श्रियाः भगवति त्यागकारणानां शौर्य्यौदार्यविद्वत्तानां सत्त्वे वासकारणस्य मौढ्यस्य चासत्त्वेपि न त्यजतीति भावः । "शूरं त्यजामि वैधव्यादुदारं मय्यनादरात् । विद्यावंतं च सापत्न्यान्मूढो मेऽतिप्रियस्ततः ॥" इति शिष्टोक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोऽग्नयः ॥ देवता यजमानश्च क्रतुधर्मश्च यन्मयः ॥ ४७ ॥ स एष भगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः ॥ जातो यदुष्वित्यशृण्म ह्यपि मूढा न विद्महे ॥ ४८ ॥ अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रियः ॥ भक्त्या यासां मतिर्जाता ह्यस्माकं निश्चला हरौ ॥ ॥ ४९ ॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे ॥ यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ॥५०॥ स वै न आद्यः पुरुषः स्वमायामोहितात्मनाम्॥ अविज्ञातानुभावानां क्षंतुमर्हत्यतिक्रमम् ॥५१॥ इति स्वाघमनुस्मृत्य कृष्णे त कृतहेलनाः ॥ दिदृक्षवोऽप्यच्युतयोः कंसाद्भीता न चाऽचलन् ॥५२॥ इति श्रीभागवते म० दशमस्कंधे पू० यज्ञपत्न्युद्धरणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीशुक उवाच ॥ ॥ भगवानपि तत्रैव बलदेवेन संयुतः ॥ अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् ॥ १ ॥

॥ ४७ ॥ इत्यशृण्म एवं सर्वत्र श्रुतवंतो वयं हि तथाऽपीति ॥ ४८ ॥ ४९ ॥ ५० ॥ ५१ ॥ न चाचलन् तयोर्दर्शनाय न जग्मुरित्यर्थः ॥ ५२ ॥ इति श्रीभा० म० दशमस्कंधे पूर्वार्धे टीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ चतुर्विंशे महेंद्रस्य मखं व्यावर्त्य हेतुभिः ॥ कृष्णः प्रवर्तयामास गोवर्धनमखोत्सवम् ॥ १ ॥ भूसुराणां क्रियागर्वं निरस्य स्वःसुरेषु च ॥ मघवन्मदभंगाय तन्मखं समवारयत् ॥ २ ॥ ब्राह्मणाः कंसाद्भीताः स्वाश्र

तस्य याच्ञा जनमोहिनी जनेषु निजैश्वर्याच्छादनकरीत्यर्थः ॥ ४६ ॥ पूर्वोक्तं स्मारयति—देशेति ॥ ४७ ॥ स एष कृष्णो यन्मयो देशादिरित्यर्थः ॥ ४८ ॥ स्त्रीभाग्यमहिम्नात्मानं श्लाघयंत ऊचुः—अहो इति । तादृशीस्तादृश्यः श्रीकृष्णानुरागिण्यः । यासां स्त्रीणाम् ॥ ४९ ॥ अनुतप्ता नमस्कुर्वन्तीत्याह—नम इति । कर्मवर्त्मसु यजनयाजनादिमार्गेषु ॥ ५० ॥ स्वापराधं क्षमापयंतः प्रोचुः—स इति । सः कृष्णः । अज्ञेषु महतां क्षमैवोचितेति भावः ॥ ५१ ॥ स्वाघम् गोपद्वारान्नार्थनापराकरणरूपम् । ते विप्राः । अच्युतयोः सर्वदैकरसयो रामकृष्णयोः । अस्माकं तत्र गमने कंसो ज्ञास्यत्ययमेव कृष्णो रामश्चेति, ततश्च तन्मारणे यत्नं करिष्यति । यद्वा—कुबुद्धित्वात्कंसस्य यूयं किमर्थं मच्छत्रुपार्श्वे गता अतो वध्या यूयमिति भीता वा । यद्वा—श्रुतास्मद्गमनवृत्तांतः कंसोऽस्माकं वृत्त्यादिकं हरिष्यतीति भीताः । यद्वा—ऐकमत्याभावेन न गता इति भावः ॥ ५२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ हेतुभिः हेतुवाक्यैः 'रजसा चोदिता मेघा वर्षंत्यंबूनि' इत्यादिलक्षणैः (१)। निरस्य अपाकृत्य । तन्मखम् इंद्रयज्ञम् (२) । इंद्रयागनिवृत्त्या गोवर्द्धनोत्सवं श्रुतिविहितं प्रवर्त्तयितुं श्रुतिमाह—"आग्रावभिरहन्येभिरक्तुभिर्वरिष्टं वज्रमाजिघार्त्ति असक्तुभिर्मायिनि शतं वा यस्य प्रचरन् स्वेदमेसंप्रवर्तयंतो विवर्त्तयन्नह"इति । अस्या अर्थः—यस्य वज्रिणः स्वेदमे वायुर्वेन्द्रो वांतरिक्षस्थान इत्युक्तेरंतरिक्षे शतं वा ततोऽधिकं वासं वर्त्तयंतः संवर्तं प्रलयं कुर्वंतः सांवर्तका नाम मेघाः प्रचरन्प्राचरन्संचारं कृतवंतः समायिनि मायामनुष्ये श्रीकृष्णे वरिष्ठं श्रेष्ठतमं वज्रमशनिं तद्वतीं महावृष्टिमाजिघर्त्ति क्षरति अक्तुभिः रात्रिभिः । सप्तभिरिति पुराणतः सप्तरात्रं वज्रधारेण पर्जन्येन ववर्षेत्यर्थः । तत्र हेतुमाह—आग्रावभिरहन्येभिरिति । ग्रावभिरिति समुदायिभिः ग्रावसमुदायः शिलोच्चयो लक्ष्यते तैः । अहन्येभिः अहः क्रतुमर्हंतीत्यहन्यास्तैः पर्वते क्रतुभाजि सतीत्यर्थः । मायी पुनः किं चकारेत्यत आह—विवर्तयन्नहेति च । अनंतरं मायी अहाकृतून् विवर्त्तयन् विपरीतं वर्त्तयन्नास्त इति शेषः । इंद्रयागार्थमाहृतैः संभारैर्गिरियागं प्रवर्त्तयति मायिनि इंद्रो महतीं वृष्टिं चकारेत्यर्थः । अत्र दृष्टांत उपरितो नेयः । यथास्माकं जाठराग्निः प्राणसहायो जलं शोषयति तच्चास्माभिर्बलसाध्ये कर्माणि क्रियमाणे रोमकूपद्वारा प्रस्वेदरूपेण वमति, एवं वायुसहायः सूर्यः भूम्यादिगतं तोयं शोष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदभिज्ञोऽपि भगवान्सर्वात्मा सर्वदर्शनः ॥ प्रश्रयावनतोऽपृच्छद्वृद्धान्नन्दपुरोगमान् ॥ २ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कथ्यतां मे पितः कोऽयं संभ्रमो व उपागतः ॥ किं फलं कस्य चोद्देशः केन वा साध्यते मखः ॥ ३ ॥ एतद्ब्रूहि महान्कामो मह्यं शुश्रूषवे पितः ॥ न हि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥ ४ ॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषाम् ॥ उदासीनोरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥ ५ ॥ ज्ञात्वाऽज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ॥ विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ॥ ६ ॥ तत्र तावत्क्रियायोगो भवतां किं विचारितः ॥ अथ वा लौकिकस्तन्मे पृच्छतः साधु भण्यताम् ॥ ७ ॥ नंद उवाच ॥ पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः ॥ तेऽभिवर्षंति भूतानां प्रीणनं जीवनं पयः ॥ ८ ॥

मस्था एव भगवंतमभजन् भगवानपि तत्रैव निवसन्निंद्रयागे कृत उद्यमो यैस्तान्गोपानपश्यदिति संबंधः ॥ १ ॥ २ ॥ वृथा संभ्रमो न भवति मखोऽयमित्येवं चेत् किमत्र फलं का देवता केनाधिकारिणा केन वा साधनेन साध्यते ॥ ३ ॥ एतद् ब्रूहि महान्कामो मम श्रवणे वर्तते । यद्वा तव महान्कामो दृश्यत इति । तूष्णीं स्थितं प्रत्याह । नेति । सर्वात्मनां सर्वत्रात्मदृष्टीनाम् ॥ ४ ॥ अत एव न विद्यते स्वः पर इति दृष्टिर्येषामिति स्वपरदृष्ट्यभावादेव तत्तद्भेदा अमित्रादयोऽपि तेषां न संतीत्याह । अमित्रेति । न मित्रमुदास्त उदासीनो विद्विड् येषां तेषां कृत्यं सर्वं कर्म नैव गोपनीयं किंचिदस्तीत्यर्थः । सत्यपि भेददर्शने उदासीनः शत्रुवद्वर्ज्य आत्मतुल्यत्वात्सुहृन्मंत्रेषु न वर्जनीय इत्याह । उदासीन इति ॥ ५ ॥ किं च सुहृद्भिः सह विचार्य ज्ञात्वैव कर्म कर्तव्यं न तु गतानुगतिकत्वमात्रेणेत्याह । ज्ञात्वेति । अज्ञात्वा च तत्र विदुषो यथा तत्कर्मफलं स्यात्तथा नाविदुषः ॥ ६ ॥ भवतामयं क्रियायोगः शास्त्रतोऽपि किं विचारितः प्रवृत्तो लौकिक आचारप्राप्तो वेति साधु सोपपत्तिकं भण्यतां कथ्यतामिति ॥ ७ ॥ आचार

यति तच्चेंद्रेण बलसाध्ये निरंतरभ्रमिरूपे कर्मणि प्रयुक्तः सन् किरणद्वारा चर्मकोशरूपेषु मेघेषु वमति ततस्तानिंद्रो भिंदन्वृष्टिं प्रवर्त्तयतीत्यर्थः ॥ स्वाश्रमस्थाः यज्ञशालास्थाः स्वगृहस्था वा । तत्रैव गोकुले ॥ १ ॥ तदभिज्ञः इंद्रयागार्थमयमुद्यम इति जानन्नपि । तत्र हेतुद्वयम्—सर्वात्मा सर्वांतर्यामी, सर्वदर्शनः सर्वज्ञः । दृशिरत्र ज्ञाने ॥ २ ॥ मे मह्यम् । संभ्रमः उद्यमः । कोयम् किंविषयः "संभ्रम उद्यमेऽपि स्यान्मंडलेन गतौ भये" इति शाश्वतः । किं फलम् दृष्टफलमदृष्टफलं वा । कस्य देवस्य चोद्देशः, कां देवतामत्रोद्दिश्य द्रव्यत्यागः । 'मखः स्याद्दानयागयोः' इति हलायुधः । श्लेषेण मंभ्रमः सम्यक् भ्रम एव वो युष्माकं मयि सर्वेश्वरे सति यदिन्द्रयागोद्योगः ॥ ३ ॥ एतत् यदर्थं संभ्रम इत्येतत् । ननु बालकस्य तव किमेतत्प्रश्नेन तत्राह—एतच्छ्रवणे मे महान्कामो महात्याकांक्षा । मदिच्छया न वदसि चेत्तर्हि स्वेच्छयैव वदेत्याह—यद्वेति । तवात्र महानभिलाषो निरीक्ष्यते । किमिदमिति उत्तरमददतं प्रत्याह—नेति । हिद्वयं साधुकृत्य सर्वथा प्राकट्यमाह ॥ ४ ॥ अत एव सर्वात्मत्वादेव । तद्भेदाः स्वपरदृष्टिभेदाः । स्वदृष्टिभेदः शत्रुः, परदृष्टिभेदो मित्रम्, उभयदृष्टि भेद उदासीनः । इत्यर्थ इति । गोप्यकरणे साधुत्वमेव भज्येतेत्यर्थः । उपकर्त्ता मित्रम्, अपकर्त्ता शत्रुः, उभयहीन उदासीनः । यद्यपि साधूनां वस्तुतो भेददर्शनं नास्ति तथापि यथाकथंचित्सत्यपि शत्रुर्यथापकारित्वेन वर्ज्यस्तथोदासीनोप्युपकारित्वाभावाद्वर्ज्य एव ॥ ५ ॥ विचार्यकरणे फलमाह—किंचेति । गतानुगतिकमात्रेण पारंपर्यागतत्वमात्रेण । विदुषः विचार्य कर्त्तुः । अविदुषः पूर्णफलं न स्यादंगादिवैगुण्याद्यज्ञानादित्यर्थः ॥६॥ तत्र देवकर्मणां मध्ये ज्ञात्वा करणे वा । किमिति प्रश्ने । सोपपत्तिकं हेतुसहितम् । तावत् प्रथमम् । क्रियायोगः अनुष्ठानप्रकारः ॥ ७ ॥ पर्जन्यः वर्षणशीलः । ननु वर्षणशीलास्तु मेघा नेंद्र इत्याह—मेघा इति । प्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं तात वयमन्ये च वार्मुचां पतिमीश्वरम् ॥ द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः ॥ ९ ॥ तच्छेषेणोपजीवंति त्रिवर्गफलहेतवे ॥ पुंसां पुरुषकाराणां
पर्जन्यः फलभावनः ॥ १० ॥ य एवं विसृजेद्धर्मं पारंपर्यागतं नरः ॥ कामाल्लोभाद्भयाद्द्वेषात्स वै नाप्नोति शोभनम् ॥ ११ ॥ श्रीशुक उवाच ॥
वचो निशम्य नंदस्य तथान्येषां व्रजौकसाम् ॥ इन्द्राय मन्युं जनयन्पितरं प्राह केशवः ॥ १२ ॥ श्रीभगवानुवाच ॥ कर्मणा जायते जन्तुः कर्मणैव
विलीयते ॥ सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते ॥ १३ ॥ अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणाम् ॥ कर्तारं भजते सोऽपि न ह्यकर्तुः
प्रभुर्हि सः ॥ १४ ॥

प्राप्त एवेति सहेतुकमाह । पर्जन्य इति । आत्ममूर्तयः प्रियमूर्तयः ॥ ८ ॥ ततः किमित्यत आह । तमिति । तमिंद्रं वार्मुचां मेघानां पतिं स्वामिनमीश्वरं नियंतारम् । तद्रे
तसा तद्वृष्टिपयसा ॥ ९ ॥ उपजीवंत्युपजीविकां कल्पयंति धर्मार्थकामसिद्धये । ननु कृष्यादिभिर्जीवंति किमिंद्रेण तत्राह । पुंसामिति । फलभावनः फलसाधकः । पर्जन्यं
विना कृष्यादिवैफल्यादित्यर्थः ॥ १० ॥ ११ ॥ इंद्राय मन्युं जनयन्निति कोपजननद्वारा गर्वपर्वतादिंद्रमवतारयितुं देवतानिराकरणं न त्वयमेवाभिप्राय इत्यर्थः ॥ १२ ॥
प्रथमं तावत्कर्मवादेन देवान्निराकरोति । कर्मणेति । ननु जडात्कर्मणः केवलात्कथं फलसिद्धिः स्यादिति चेत् अहो अशीलितमीमांसानां स्वमतिविलसिता श्रद्धा कर्मणां
फलकारणत्वे वचनतोऽवगते किं ततोऽनुपपन्नं नाम ॥ १३ ॥ केचित्पुनरतिसाहसभीताः कर्मपरतंत्रमीश्वरं मन्यंते तन्मतमनूद्य निराकरोति । अस्ति चेदिति । स्वयं कर्म

मूर्त्तयः आत्मा देहो यथा प्रेष्ठस्तथा तन्मूर्त्तयो मेघा अपीति भावः । ततस्तमघः कि प्रयाजनमतात्राह—ते मेघाः । प्राणनम् चेष्टाकरणम् । जीवनम् शरीराप्यायनम् । ‘ पयः स्यात्क्षीरनीरयोः ’ इति विश्वः । पयः
जलम् ॥ ८ ॥ रेतोवत्क्षरणशीलत्वाद्रेतो जलम् । तात प्रिय ‘ ततोऽनुकंप्ये जनके’ इति मेदिनी । तत एव तातस्तत्संबुद्धौ । तथा तादृशपूज्यदेवानुग्रहत एव त्वमेतादृशः पुत्रो लब्धोऽस्यतस्तत्पूजाप्रत्याख्यानं नोचितं
तवेत्याह—तातेति ॥ ९ ॥ तच्छेषेण यज्ञावशिष्टेन । आशंकते—नन्विति । तत्र आक्षेपे । पुरुषकाराणामपराक्रमासिद्धकर्मणाम् । इत्यर्थ इति । विना वृष्टिं तृणान्नाद्यसिद्धेः कोऽपि पुरुषार्थ आहारं विना न सिध्यतीत्यर्थः ॥
॥ १० ॥ विपक्षे बाधकमाह—कामात् दुर्विषयाभिलाषात् । लोभात् धनव्ययशंकया । भयात् राजादिभयतः । द्वेषात् देवेषु व्यर्थविरोधात् । स नरः ॥ ११ ॥ वचः इंद्रयागविषयम् । अयमेव देवतानिराकरणरूपः ।
इत्यर्थ इति । सात्त्विकत्वाद्देवानां गर्वरूपराजसधर्मे प्रवृत्तिं बाधयितुमिति भावः ॥ १२ ॥ भयक्षेमयोर्यद्यपि दुःखसुखांतर्गतत्वं तथापि भेदेन कथनम् । भयं संसारं क्षेमं मोक्षमपि कर्मणैवेति, आसक्त्यनासक्तिभ्यां कृतं क
र्मैवोभयहेतुरिति भावः । कर्मण्याशंकते—नन्विति । अशीलिताऽविचारिता मीमांसा जैमिनीयशास्त्रं यस्तेषाम् । स्वमतिविलसिता निजबुद्धिप्रकाशिता । श्रद्धा फलदातेश्वरः कर्मभिन्नोऽस्तीत्येवंरूपा । वचनतः ‘कर्मणा जायते’
इत्यादिशास्त्रतः । अवगते ज्ञाते सति । ततः कर्मणः । किं नाम कि कार्यम् । अनुपपन्नम् असिद्धम् । न किमपीत्यर्थः ॥१३॥ अतिसाहसम् अतिविचारासामर्थ्यम् । कर्मपरतंत्रम् कर्माधीनम् । फलं सुखदुःखादिलक्षणं
रूपयति ददातीति तथा, सहायकल्पः न स्वतंत्र इति यावत् । स ईश्वरोऽपि । कर्त्तारं कर्मण इति शेषः । अकर्त्तुः कर्मणः । स ईश्वरः न प्रभुः तत्र कारणासत्त्वादित्यर्थः । इमं श्लोकं विजयध्वजस्त्वित्थमवतारयति—
ननु प्रवृत्तेर्बुद्धिपूर्वकत्वेन कर्मणोऽचेतनत्वेन तदयोगान्न जगत्तदधीनमिति । किन्तु चेतनाधीनम् । चेतनोऽपि न देवदत्तादिसाधारणः किं तु विशिष्ट एव कश्चिदस्तीति कृष्णस्त्वहार्दानभिज्ञनंदगोपस्य मानसीं शंकां गूढा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ॥ अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम् ॥ १५ ॥ स्वभावतंत्रो हि जनः स्वभावमनुवर्तते ॥ स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ॥ १६ ॥ देहानुच्चावचाञ्जंतुः प्राप्योत्सृजति कर्मणा ॥ शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः ॥ १७ ॥ तस्मात्संपूजयेत्कर्म स्वभावस्थः स्वकर्मकृत् ॥ अंजसा येन वर्तेत तदेवास्य हि दैवतम् ॥ १८ ॥ आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति ॥ न तस्माद्विंदते क्षेमं जारं नार्यसती यथा ॥ १९ ॥ वर्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः ॥ वैश्यस्तु वार्तया जीवेच्छूद्रस्तु द्विजसेवया ॥ २० ॥ कृषिवाणिज्यगोरक्षा कुसीदं तुर्यमुच्यते ॥ वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम् ॥ २१ ॥

भिरलिप्तोऽन्येषां जीवानां कर्मणां फलरूपी फलदाता कर्तारं भजते तत्तत्कर्मफलदानेन ॥ १४ ॥ अतः कर्मण एव फलसिद्धेस्तत्पारतंत्र्ये चाजागलस्तनतुल्यत्वान्न देवतयाकृत्यमित्याह । किमिंद्रेणेति । ननु कर्मणोऽपि प्रवृत्तिरंतर्याम्यपेक्षैव कथ सर्वथा देवताया अनुपयोग इत्याशंक्याह । स्वभावविहितमिति । स्वभावेन प्राक्तनसंस्कारेणैव विहितं यत्कर्म तदन्यथा कर्तुमनीशेन ॥ १५ ॥ एतद्विवृणोति । स्वभावतंत्र इति । प्रवृत्तेः संस्काराधीनत्वात्किमंतर्यामिणेत्यर्थः ॥ १६ ॥ तस्मात्स्वभावतो निष्पन्नस्य कर्मण एव सर्वकारणत्वात् कर्मैव पूज्यमित्याह । देहानिति सार्धेन ॥ १७ ॥ संपूजयेत्संमानयेत् । ननु देवतोद्देशेन द्रव्यत्यागात्मकत्वात्कर्मणः कथं देवतां विना सिद्धिरित्याशंक्य कर्मांगमात्रं देवतेति पक्षमुपसंहरन्निव हेतुवादमाश्रित्यान्यामेव देवतां समर्थयते । अंजसेति ॥ १८ ॥ हेतुबलेनैव विपक्षे दोषमाह । आजीव्येति । उपजीवति सेवते ॥ १९ ॥ स्ववृत्तिं वक्तुं दृष्टांतत्वेन वर्णानां वृत्तिभेदमाह । वर्तेतेति । ब्रह्मणा वेदाध्यापनादिना ॥ २० ॥ वैश्यवृत्तेश्चातुर्विध्यमाह । कृषीति । कृषिवाणिज्यसहिता

भिसंधिः परिहरति–अस्ति चेदिति ॥ १४ ॥ यतः कर्मानुयायीश्वरोऽतो हेतोः । तत्पारतंत्र्ये कर्माधीनत्वे चेश्वरस्याजागलस्तनतुल्यत्वाद्व्यर्थत्वात् । पुनरत्राशंकते–नन्विति । अंतर्यामिणमपेक्षत इत्यंतर्याम्यपेक्षेति । अनुपयोगः प्रयोजनाभावः । आह श्रीकृष्णः । स्वभावेति–स्वेन भवनं स्वभावः । अन्यथा कर्तुम् परावर्त्तयितुम् । अनीशेन असमर्थेन ॥ १५ ॥ एतत् स्वभावाधीनत्वम् । इत्यर्थ इति । प्रवृत्तिः पयस्स्यंदनादिवत्संस्कारानुरोधिन्येवेति, न त्वंतर्याम्यधीनेति भावः ॥ १६ ॥ यतः स्वभावायत्तं सर्वं तस्माद्धेतोः । शुभं कर्म मित्रम्, अशुभं शत्रुः, उभयविलक्षणविपणाक्षक्रीडादि उदासीनः । अंतःकरणशुद्धिद्वारा ज्ञानहेतुत्वाद्गुरुः "कषायपक्तिः कर्माणि ततो ज्ञानं प्रवर्तते " इति श्रुतेः । यागादिरूपमैश्वर्यहेतुत्वादीश्वर इति विवेकः ॥ १७ ॥ यतः कर्मैव मुख्यं सर्वतः तस्मात् । स्वभावस्थः प्राक्तनसंस्कारानुविधेयः । स्वकर्मकृत् विहितकारी सन् । पुनः जडत्वात्केवलकर्मणः फलदातृत्वमघटमानं मत्वा शंकते–नन्विति । अंगं देवतांगि कर्मेति पक्षे ' तुष्यतु दुर्जनः ' इति न्यायमाश्रित्येवशब्दं प्रयुंक्ते–उपसंहरन्निवेति । वस्तुत उपसंहारस्तु यागांत एवेति हेतुवादं तर्कबलेन हेत्वंतरं संभाव्य, अन्यां शैलगवादिरूपाम् । अंजसा तत्त्वेन । ' अंजसा त्वरिते तत्त्वे ' इति यादवः । येन अनिरुक्तेन कर्मणा वर्तेत सदा तिष्ठेत् । अस्य पुरुषस्य तदेव सदा स्थितिहेतुः । दैवतम् कुलदैवम् । हि प्रसिद्धम् ॥ १८ ॥ विपक्षे एतत्पक्षानंगीकारे । आजीव्य आश्रित्य । एकतरं मुख्यं भावं देवादिरूपम् । अन्यम् गौणम् । तस्मात् गौणात् ॥ १९ ॥ स्ववृत्तिम् निजाजीवनम् । आदिना यागाध्ययनादिग्रहः । यद्वा–ब्रह्मणा तपसा कृच्छ्रचांद्रायणादिरूपेण ' वेदस्तत्त्वं तपो ब्रह्म ' इत्यमरः । वार्तया कृष्यादिरूपया ॥ २० ॥ कृषिः भुवो हलादिनोल्लेखनरूपा क्रिया, वाणिज्यं तु सत्यानृतरूपम् । निर्णयसुधाकरे तु–"समर्घे पण्यमादाय महर्घे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः ॥ रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् ॥ २२ ॥ रजसा चोदिता मेघा वर्षंत्यंबूनि सर्वतः ॥ प्रजास्तैरेव सिध्यंति महेंद्रः किं करिष्यति ॥ २३ ॥ न नः पुरो जनपदा न ग्रामा न गृहा वयम् ॥ नित्यं वनौकसस्तात वनशैलनिवासिनः ॥ २४ ॥ तस्माद्गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः ॥ य इन्द्रयागसंभारास्तैरयं साध्यतां मखः ॥ २५ ॥ पच्यंतां विविधाः पाकाः सूपांताः पायसादयः ॥ संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ॥ २६ ॥

गोरक्षा एवं त्रयम् । कुसीदं वृद्धिजीवनं चतुर्थम् ॥२१॥ ननु गवामपि वृत्तिर्महेंद्राधीनैवेत्याशंक्य निरीश्वरसांख्यमताश्रयेण निराकरोति । सत्त्वमिति श्लोकद्वयेन । अन्योन्यं स्त्रीपुरुषयोगेन ॥ २२ ॥ सर्वत इति । समुद्रशिलोषरादिष्वपि वृष्टिदर्शनान्न प्रेक्षावत्पूर्वकत्वं वृष्टेरिति भावः । तैरेव मेघैरेव सिध्यंति जीवंति ॥ २३ ॥ तथापि योगक्षेमार्थं देवतापेक्षेति चेदत आह । न नः पुर इति । पुरः पत्तनानि । जनपदा देशाः । अस्माकं योगक्षेमहेतुर्वनशैलादय एवेति भावः ॥ २४ ॥ ब्राह्मणानपि संगृह्णन्निगमयति । तस्मादिति । स्वयमुत्प्रेक्षितयागप्रयोगकल्पनामाह य इंद्रयागसंभारा इति सार्धपंचभिः । संभाराः साधनानि ॥ २५ ॥ सूपं मौद्गम् । पायसं केवले पयसि पक्वम् ।

यत्प्रदीयते । तद्वाणिज्यमिति प्रोक्तं क्रयविक्रयसंज्ञकम् ॥" इत्युक्तम् । गोरक्षा पशुपालनम् । तल्लब्धवस्त्विव्यर्थः । कुसीदम् वृद्ध्यर्थं धनप्रयोगः । तत्प्रकारं तु मनुराह–" अशीतिभागं गृह्णीयान्मासाद्वार्द्धुषिकः शते । द्विकं शतं वा गृह्णीयात्सतां धर्ममनुस्मरन् ॥ द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी । द्विकं त्रिकं चतुष्कं च पंचक च शतं समम् ॥ मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः । न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ॥" इति । व्याख्यैषाम्–शते प्रयुक्ते अशीतिभागं शताशीतिभागं प्रतिमासं गृह्णीयात् । पणशते प्रयुक्ते पणद्वयं वा प्रतिमासं गृह्णीयात् । साधुधर्मत्वादेकशते द्विकग्रहणस्य तेन किल्बिषी पापी न स्यात् । ब्राह्मणादिक्रमेण द्विकं त्रिकं चतुष्कं पंचकं च शतं सममेवेतोधिकां मासवृद्धिं न गृह्णीयात् । नन्वशीतिभागो लघुः द्विकं शते गुरु कथमिमौ ब्राह्मणस्य विकल्पौ, अत्राह याज्ञवल्क्यः–" अशीतिभागो वृद्धिः स्यान्मासिमासि संबंधके । वर्णक्रमाच्छते द्वित्रिचतुःपंचकमन्यथा ॥" इत्यलं प्रसक्तानुप्रसक्तेन । कौ भूमौ सीदति वर्द्धते ग्रहीता तपति दाताऽनेनेति कुसीदम् । कुत्सितान्मुखतः कृत्वाऽदातॄन्सीदति पीडयतीति वा कुसीदम् । औणादिकशप्रत्यये रूपम् । यद्वा–" कुसेरुंभोमेदेताः " इति ' कुस–संश्लेषणे ' अस्मादौणादिके दप्रत्यये वा रूपम् । ' कुसीदं वृद्धिजीवनम् ' इत्यमरः ॥ २१ ॥ पुनर्नंदः शंकते–नन्विति । निरीश्वरसांख्या हि गुणेभ्य एव सृष्ट्यादिमन्वते इत्येते । विविधम् स्थावरजंगमात्मकमंडजाद्यात्मकं वा ॥ २२ ॥ प्रेक्षावत्पूर्वकत्वम् बुद्धिमत्त्वपूर्वकत्वम् " प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः " इत्यमरः । इति भाव इति । बुद्धिपूर्वकत्वे तु समुद्रादिषु प्रयोजनाभावाद्वृष्टिः कदापि नो भवेदिति, विनैवेश्वरं जगदुत्पत्त्यादिसिद्धेरित्यर्थः ॥ २३ ॥ यद्यपि विनैव देवं जगदुत्पत्त्यादि भवति तथापि योगक्षेमार्थाम् अप्राप्तप्रायणप्राप्तरक्षणाय । नः अस्माकम् पुरः योगक्षेमावहा न संति । इति भाव इति । वनशैलस्थानां वनादिदेवादयः पूज्या न जानपदाद्या इति तात्पर्यम् ॥ २४ ॥ ब्राह्मणान् विना कर्ममात्रं न सेत्स्यतीत्यभिप्रेत्याह–ब्राह्मणेति । निगमयति बोधयति । यतो वयं वनौकसस्तस्माद्धेतोः । आरभ्यताम् अद्यारभ्य प्रवर्त्त्यताम् । संभारः सामग्री " संभारः साधनोपाये पालसंधार्यभूषणे " इति निरुक्तिकारः । स्वयमुत्प्रेक्षितः स्वकल्पितः ॥ २५ ॥ मौद्गम् मुद्गपाकः । संयावः गोधूमसार

१ फलवद्वृक्षदुग्धवद्वेन्वादिरूपे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हूयंतामग्नयः सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः ॥ अन्नं बहुविधं तेभ्यो देयं वो धेनुदक्षिणाः ॥ २७ ॥ अन्येभ्यश्चाऽऽश्वचांडालपतितेभ्यो यथार्हतः ॥ यवसं च गवां दत्त्वा गिरये दीयतां बलिः ॥ २८ ॥ स्वलंकृता भुक्तवंतः स्वनुलिप्ताः सुवाससः ॥ प्रदक्षिणं च कुरुत गोविप्राऽनलपर्वतान् ॥ २९॥ एतन्मम ममं तात क्रियतां यदि रोचते ॥ अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥ श्रीशुक उवाच ॥ कालात्मना भगवता शक्रदर्पं जिघांसता ॥ प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णत तद्वचः ॥ ३१ ॥ तथा च व्यदधुस्सर्वं यथाह मधुसूदनः ॥ वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिद्विजान् ॥ ३२ ॥ उपहृत्य बलीन्सर्वानादृता यवसं गवाम् ॥ गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ॥ ३३ ॥ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः ॥ गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजाशिषः ॥ ३४ ॥

संयावादयो गोधूमादिविक्रियाः । क्रमश्च सूपपायसयोः श्रुत्या दोहस्यार्थतोऽन्येषां पाठतः ॥ २६ ॥ यागशोभार्थं श्रद्धोत्पादनार्थं चाह । हूयंतामिति । धेनुदक्षिणाः धेनुसहिता दक्षिणाः ता एव वा दक्षिणाः वो युष्माभिः॥२७॥यवसं तृणम् ॥२८॥२९॥ सर्वाञ्छिरःकंपेनानुमोदयन्नाह । गोब्राह्मणाद्रीणामिति । मह्यं मम च ॥३०॥ ॥ ३१ ॥ तद्द्रव्येण तेन महेंद्रमखद्रव्येण । गिरिं द्विजान्प्रति यथायथम् ॥ ३२ ॥ बलीनुपहृत्य दत्त्वा । आदृताः सादराः ॥ ३३ ॥ अनडुद्युक्तानि उत्तमवृषभैः

घृतखंडनिर्मितः पाकः, दलितगोधूमादिपाको वा । अपूपः गोधूमपिष्टनिर्मितबहुछिद्रो मंडलाकृतिः सखंडः घृतपाकः । शष्कुली च मंडलाकृतिर्घृतपक्वा गोधूमविकृतिः । श्रुत्या श्रवणेन । आदौ पायसमंते सूपः । दोहस्य दुग्धस्य । अर्थतः प्रयोजनतः । यत्र यस्य दुग्धादेरपेक्षा तत्रैव तदादेयमिति । सर्वपदेन समग्रदुग्धस्य वा दधितक्रादेर्ग्रहः । अन्येषाम् संयावादीनाम् ॥ २६ ॥ होमं विना यागशोभा श्रद्धा च न भवतीत्याशयेनाह— हूयंताम् । अग्नयः गार्हपत्यादयः । बहुविधम् लेह्यादिरूपम् । यज्ञे केवलगवामपि दक्षिणात्वेन विधानम्, अत एव ता गावः ॥ २७ ॥ यथार्हतः श्वभ्यो बहिः, चांडालेभ्यश्श्वपचादिभ्यश्च ततोऽपि बहिः, पतितेभ्यः सुरापादिभ्यस्ततोपि बहिरित्यर्थः । यवसम् तृणादि । बलिः पायसादिभागः ॥ २८ ॥ गिरिपूजानंतरं ब्राह्मणान्संभोज्य पश्चात्स्वयं भुक्त्वालंकृताः संतः ॥ २९ ॥ अनुमोदयन् आनंदयन् । अयम् मत्प्रोक्तो मखः । दयितः प्रियः ॥ ३० ॥ कालस्य सर्वदर्पहरत्वाद्भगवतोऽपींद्रदर्पहरणात्तद्रूपत्वेन विशिनष्टि—कालात्मनेति । काल आत्मा चेष्टारूपो यस्य तेन । 'योयं कालस्तस्य ते व्यक्तबंधो चेष्टामाहुः ' इत्याद्युक्तेः । यद्वा—'कालश्यामलमेचकाः ' इत्यमरोक्तेः कालः श्यामल आत्मा देहो यस्य तेन । यद्वा—कलयत्याकर्षति सर्वचित्तमिति कालः स आत्मा स्वभावो यस्य तेन तथा । आत्मानस्तु मनोबुद्धिस्वभावधृतिजीवात्मपरमात्मान इति । तद्वचः कृष्णवाक्यम् ॥ ३१ ॥ मधुसूदन इति शक्रात्तेषां भयाभावं बोधयति । यद्वा— भ्रमरवत्सारग्राही मिष्टरसस्य विशेषेण भोक्तेति । तथा मधुसूदनोक्तिप्रकारेण । यथायथम् यथास्वमित्यर्थः ॥ ३२ ॥ बलीन् उपहारान् पुष्पधूपदीपादिरूपान् ॥ ३३ ॥ अनड्वाहो युक्ता वहनोचिता येषु तानि तथा । न त्वत्र युक्तशब्दो योजनार्थकोऽपि तु योग्यार्थकः 'युक्तं योजनयोग्ययोः' इति शब्दार्णवः । अत एव स्वामिचरणैरुक्तमुत्तमानडुद्युक्तानीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णस्त्वन्यतमं रूपं गोपविश्रंभणं गतः ॥ शैलोऽस्मीति ब्रुवन्भूरि बलिमादद्बृहद्वपुः ॥ ३५ ॥ तस्मै नमो व्रजजनैः सह चक्रेऽत्मनाऽऽत्मने ॥ अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ॥ ३६ ॥ एषोऽवजानतो मर्त्यान्कामरूपी वनौकसः ॥ हंति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवाम् ॥ ॥ ३७ ॥ इत्यद्रिगोद्विजमखं वासुदेवप्रणोदिताः ॥ यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ॥ ३८ ॥ इति श्रीभागवते महापु० दशमस्कंधे पू० गोवर्द्धनपूजानिरूपणं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

युक्तानि । सद्द्विजाशिषो द्विजाशीर्भिः सहिताः ॥ ३४ ॥ गोपविश्रंभणं गोपानां विश्वासजनकं रूपं गतः प्राप्तः सन्बलिमुपहारमाददभक्षयत ॥ ३५ ॥ तस्मै आत्मने आत्मना स्वयं व्रजजनैः सह नमश्चक्रे अहो इति सार्धं श्लोकं पठन् ॥ ३६ ॥ कामरूपी सर्पादिरूपः । अस्मै अद्रये शर्मणे क्षेमाय ॥ ३७ ॥ कर्मैवालं प्राक् स्वभावो गुणो वा कर्मांगं वा तद्वशो वा महेशः ॥ वार्त्ता कर्त्री देवतेतीयमुक्ता देवक्षोभे षण्मती न त्वभीष्टा ॥ १ ॥ ३८ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥

ते गोपाः । चात्पुरोहिताद्याः । कृष्णवीर्याणि पूतनादिवधरूपाणि बालचरितानि ॥ ३४ ॥ अन्यतममिति । तमप्प्रत्ययेनान्यान्यपि तत्तत्संधानार्थं रूपाणि कृतानीति लभ्यते । उक्तरूपापेक्षया नवीनम् । बृहद्वपुः गिरितुल्यशरीरः । गोपविस्रंभणम् पर्वत एवायमिति गोपविश्वासजनकं रूपं प्राप्तः । शैलोस्मीति । एतद्देशाधिपतिरहमेव युष्मद्भक्त्या प्रादुरासं स्वस्वाभिमतं वरं वृणुतेति वदन् बलिं नैवेद्यं दूरस्थैर्निकटस्थैर्नंदग्रामादिवर्तिभिरपरोक्षतः परोक्षतो वा ध्यानेन समर्प्यमाणं सहस्रकोटिहस्ततस्ततस्ततः स्थानादतिदीर्घानतिदीर्घीकृतपाणिभिरादाय तांस्तानानंदयन्नादत् बभुजे इति विश्वनाथः ॥ ३५ ॥ आत्मना कृष्णरूपेण । आत्मने गोवर्द्धनस्थहरिदर्पहारिणे । चक्रेऽत्मना इह पूर्वरूपमार्षम् । रूपी स्वीकृतप्रशस्तरूपः । अत्र प्रशंसायामिनिः । नः अस्मभ्यम् ॥ ३६ ॥ एषः गिरिराजः । अवजानतः स्वार्चापरित्यागिनः वनौकस इति । गृहद्वाराद्यावरणाभावात्तेषां हननं सुकरमेव । यद्वा—हे वनौकस इति । पित्रादीनां नमस्कृतिप्रेरणात्रावतारांतरवद्रूपांतरत्वेन न विरुद्धा तेषां नारायणादिषु तथा व्यवहारदर्शनात् ॥ ३७ ॥ इति इत्थम् । यथा यथावत् । ते नंदादिगोपाः । वासुदेवेन सर्वाधिष्ठात्रा प्रेरिताः कृष्णेन सहैव गोवर्द्धनैशानकोणस्थश्रीराधाकुंडात् क्रोशैकोपरिस्थितं व्रजं ययुरिति तोषिणी । कर्मैवालं सुखदुःखजन्मादिहेतुरिति 'कर्मणा जायते जंतुः' इत्यादिवाक्यैः प्रथममतम्, कर्मवादः । प्राक्स्वभावः प्राक्तसस्कार एव सर्वहेतुरिति द्वितीयं मतम् स्वभाववादः 'स्वभावतंत्रो हि जनः' इत्यादिनोक्तः । गुणो वा सत्त्वादिगुण एव सर्वहेतुरित तृतीयं मतम् "सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः" इत्यादिना गुणवाद उक्तः। कर्मांगं महेश ईश इति चतुर्थं मतम्, 'अंजसा येन वर्त्तेत' इत्यादिनोक्तः कर्मांगवादः तद्वशः कर्मवशो महेश इति पंचमं मतम्। 'अस्ति चेदीश्वरः कश्चित्' इत्यादिनोक्तः कर्मवशेशवादः वार्त्ता जीविका तत्कर्त्री देवता मुख्येति षष्ठं मतम् । 'वर्त्तेत ब्रह्मणा विप्रः' इत्यादिश्लोकद्वयेन वृत्तिहेतुदेववाद उक्तः । उक्ता कथिता इयं षण्णां मतानां समाहारः षण्मती षण्मतसमुदायः । देवस्य सर्वद्योतकस्य श्रीकृष्णस्य क्षोभे सर्वेशं मां त्यक्त्वैतेऽन्यानेव भजतं इत्येवं कुपिते । न त्वभीष्टा न त्वभीष्टफलदेत्यर्थः । हस्तिपादसर्वपादप्रवेशन्यायेन श्रीकृष्णार्चनेन सर्वार्चनं तदनर्चनेऽन्येषामर्चनेऽपि न किंचित्फलमिति "यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः" इत्याद्युक्तेः। इत्थं कर्मवादावतारणेन कर्मणां प्राधान्यं स्थापितं, तच्च संस्कारवशेनैव कर्मप्रवृत्तिरिति संस्कारस्य कर्ममूलत्वेन कर्मनिष्ठतैवाभिप्रेता । अतोंतर्यामिणा यथा प्रेर्य्यत इति न्यायेन घटमाना कर्मानासक्तिरपि परिहृता । तत्र च सत्त्वादिगुणस्वभावेन जीविकावश्यं सिध्येदिति तदर्थे प्रयासाभावेन कदाचित्कर्मणो लोपश्च निरस्तः । योगक्षेमकृन्निजोपजीव्यावश्यपूज्योक्तेः सवथा कर्मणां प्राधान्यमेव दृढीकृतम् । तच्च सर्वमशेषकर्मप्रध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप ॥ गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप सः ॥ १ ॥ गणं सांवर्तकं नाम मेघानां चांतकारिणाम् ॥ इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत ॥ २ ॥ अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम् ॥३॥ यथा दृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवम् ॥ ४॥ वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनम् ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियम् ॥ ५ ॥

पंचविंशे रुषा शक्रे व्रजनाशाय वर्षति ॥ उद्धृत्य गिरिमासारादरक्षद्गोकलं प्रभुः ॥ १ ॥ कृष्णो नाथो येषां तेभ्यः ॥ १ ॥ क्रुद्धः सन्निंद्रः सांवर्तकं नाम संवर्तः प्रलयस्तत्कर्तारं प्रसिद्धं मेघानां गणं प्राचोदयत्प्रेषयामास । ननु कृष्णनाथानां घाते कथं प्रवृत्त इत्याशंक्यात्मसंभावनया निरस्तविवेकत्वादित्याशयेनाह वाक्यं चाहेत्यादिपंचभिः । ईशमान्यहमेवेश्वर इति गर्ववान् ॥ २ ॥ देवहेलनं देवस्य ममावज्ञाम् ॥ ३ ॥ अदृढैरसमर्थैः कर्ममयैः क्रियानिर्वर्त्यैरत एव नामनौनिभैर्नाममात्रेण या नौरिति व्यवह्रियते तत्सदृशैः । आन्वीक्षिकीमात्मानुस्मृतिरूपाम् ॥ ४ ॥ तथा वाचाल बहुभाषिणं बालिशं शिशुं पंडितमानिनं पंडितंमन्यमतः स्तब्धमविनीतमिति निंदायां योजिताऽपींद्रस्य भारती श्रीकृष्णं स्तौति । तथाहि । वाचालं शास्त्रयोनिम् । बालिशमेवमपि शिशुवन्निरभिमानिनम् । स्तब्धमन्यस्य वंद्यस्याभावादनम्रम् । अज्ञं नास्ति ज्ञो यस्मात्तं सर्वज्ञमित्यर्थः । पंडितमानिनं ब्रह्मविदां बहुमाननीयम् । कृष्णं सदानंदरूपं परं ब्रह्म मर्त्यं तथापि भक्तवात्सल्येन मनुष्यतया प्रतीयमानमिति ॥ ५ ॥

ननिजभक्तिपरतार्थमेव, भक्तिपरतायाश्च मुख्यलक्षणं तद्भक्तार्चनमिति हरिदासगोवर्द्धनपूजनमिति सिद्धांतः । तत्र निगूढश्रीकृष्णाभिप्रायश्च–योऽहं पूर्णपरमेश्वरः स एव तेषां पुत्रादिरूपः ततः को नामैषामीश्वरः का वाऽन्या देवता प्रवर्त्तकस्तु तत्प्रेममयः स्वभाव एव स्यात् यदि च नरलीलया देवतास्वीकारस्तदा मन्निकटसंबंधिन्य एव युज्येरंस्तथापि नरलीलारक्षार्थं न तत्तद्व्यञ्जयितुमुत्सहे तस्मान्निरीश्वरमीमांसासांख्यवादापदेशेनैव तद्बोधयित्वा तथा प्रवर्त्तयामीति वैष्णवतोषिण्याम् ॥ ३८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ आसारात् धारासंपातात् 'धारासंपात आसारः' इत्यमरः । प्रभुः कृष्णः (१) । नाथः स्वामी । गोपेभ्य इति "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इति चतुर्थी । सः इंद्रः ॥ १ ॥ आत्मसंभावनया मत्तोऽन्यः कोधिक इति बुद्ध्या "आत्मसंभावनेति स्यान्मत्तोऽन्यः कोऽधिको भुवि" इत्युक्तेः ॥ २ ॥ मर्त्यम् मरणधर्माणम्, मनुष्यमित्यर्थः । उपाश्रित्य अयमेव सर्वेभ्यो बलीति कृत्वा । देवस्य अमरस्य मम । श्रीमदमाहात्म्यानां द्वंद्वैक्यम् । काननौकसाम् गोपानामिति तेषामज्ञत्वनिकृष्टत्वे बोधिते । मर्त्येभ्यो हितं मर्त्यम् । देवस्य ममेष्टस्य हेलनमिति वास्तवोर्थः ॥ ३ ॥ क्रियानिर्वर्त्यैः बहुव्यापारसाध्यैः । अत एव क्रियासाध्यत्वादेव । नाम्ना नावो नामनावस्ताभिर्निभास्तुल्यास्तैः "निभस्तु कथितो व्याजे पुँल्लिंगः सदृशे त्रिषु" इति मेदिनी । "प्लवा एते ह्यदृढा यज्ञरूपा अष्टादशोक्तं ह्यवरं येषु कर्म । एतच्छ्रेयो येऽभिनंदंति मूढा जरामृत्यू ते नराः प्राप्नुवंति॥" इति श्रुतेः । "शाब्दस्य हि ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः । परिभ्रमंस्तत्र न विंदतेऽर्थान्" इत्युक्तेः कर्ममयैः क्रतुभिस्सहान्वीक्षिकीं त्यक्त्वा कृष्णमाश्रित्यैव कृष्णाश्रयेणैव भवार्णवस्य गोवत्सपदत्वे जाते तत्तरणयत्नानौचित्यात्तेषां तितीर्षामात्रमिति वास्तवोर्थः ॥ ४ ॥ बहुभाषिणम् शास्त्रविरुद्धभाषिणमनधीतशास्त्रत्वात् । अज्ञम् नित्यगोचारित्वात् । स्तब्धं पितुरप्रेष्यतिधृष्टत्वात् । अतः पंडितंमन्यत्वात् । वाचा वाण्या अलं पूर्णं शास्त्रयोनिम् "ऋचः सामानि जज्ञिरे" इत्यादिश्रुतेः । एवमपि शास्त्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषां श्रियावलितानां कृष्णेनाध्मायितात्मनाम् ॥ धुनुत श्रीमदस्तंभं पशून्नयत संक्षयम् ॥ ६ ॥ अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् ॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ॥ ७ ॥ श्रीशुक उवाच ॥ इत्थं मघवताऽऽज्ञप्ता मेघा निर्मुक्तबंधनाः ॥ नंदगोकुलमासारैः पीडयामासुरोजसा ॥ ८ ॥ विद्योतमाना विद्युद्भिः स्तनंतः स्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥ ९ ॥ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः ॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतम् ॥ १० ॥ अत्यासारातिवातेन पशवो जातवेपनाः ॥ गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ॥ ११ ॥ शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः ॥ वेपमाना भगवतः पादमूल पाययुः ॥ १२ ॥ कृष्णकृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो ॥ त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल ॥ १३ ॥

अवलिप्तानां मत्तानाम् आध्मायितात्मनां बृंहितदेहानां धुनुतापनयत । श्रीमदेन यः स्तंभो गर्वस्तम् ॥ ६ ॥ बिभ्यतस्तान्प्रत्याह । अहं चेति । अनु व्रजे अन्वनंतरमेवागमिष्यामि । मरुद्गणैर्देवगणैः सह ॥ ७ ॥ मघवता इंद्रेण निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण बद्धा आसन् तदा निर्मुक्तबंधनाः संत आसारैर्धारासंपातैः पीडयामासुः ॥ ८ ॥ स्तनयित्नुभिरशनिध्वनिभिः । स्तनंतो गर्जंतः । मरुद्गणैरावहप्रवहादिवायुसमूहैर्नुन्नाः प्रेरिताः । जलशर्करा जलोपलान् ॥ ९ ॥ स्थूणावत्स्थूलाः अभ्रेषु मुंचत्सु सत्सु । नतोन्नतं नतं निम्नमुन्नतं तद्विपरीतं यथा भवति तथा भर्नादृश्यत ॥ १० ॥ जातवेपना जातकंपाः ॥ ११ ॥ तत्र पशूनां यानं विशिनष्टि । शिर इति ॥ १२ ॥ गोपगोपीनां

योनित्वेऽपि । ‘ मूर्खबालौ तु बालिशौ ’ इति कोशात् । अनम्रम् सर्वेश्वरम् । “ एष सर्वेश्वरः ” इति श्रुतेः । इत्यर्थ इति । “ स सर्ववेत्ता न हि तस्य वेत्ता ” इत्यादिश्रुतेः । पंडितैर्मन्यत इति पंडितमानी तम् । णिनिरत्र प्रत्ययः । कृष्णम् “ कृषिर्भूवाचकः शब्दः ” इत्यादिश्रुतेः । तथापि परब्रह्मत्वेऽपि ॥ ५ ॥ आधमतीत्याध्माः स इवाचरतीत्याध्मायते ततः कर्मणि क्तः आध्मायितः बृंहितो वर्द्धित आत्मा देहो मनो वा येषां ते तेषाम् । ‘ स्तंभः स्थूणाजडत्वयोः । अभिमाने रोधके च ’ इति शाश्वतः ॥ ६ ॥ बिभ्यतः भीतान् । तान् मेघान् । नागम् गजम् ‘ नागौ गजभुजंगमौ ’ इति हलायुधः ॥ ७ ॥ प्रलयाभिप्रायेण प्रलय एव तेषां निर्मुक्तिर्न त्वन्यदेत्यभिप्रायेण । निर्मुक्तबंधना विगलितजलस्तंभाः ॥ ८ ॥ “ स्तनयित्नुर्मेघशब्दे मेघे वज्रे तडिद्घ्नौ ” इति धरणिः । अशनिभिः वज्रैः ‘ दंभोलिरशनिर्द्वयोः ’ इत्यमरः । “ प्रवहो निवहश्चैव विवह उद्वहस्तथा । संवहावहपरावहा इत्येते मरुतां गणाः ॥ ” इति । जलोपलाः वायुना घनीभूतजलमयपाषाणाः, करका इत्यर्थः ॥ ९ ॥ ‘ स्थूणा स्तंभे गृहस्य च ’ इति मेदिनी । प्लाव्यमाना छाद्यमाना ॥ १० ॥ शरणम् रक्षकम् ॥ ११ ॥ तत्र तेषु गोगोपगोपीषु मध्ये । पशूनाम् गवाम् । यानम् धावित्वा भगवत्समीपे गमनम् । कायेन स्वदेहेन । शिरः तिरो विधायाग्रपादयोः कृत्वा, सुतान्वत्सांश्च निजाधोजठरभागे कृत्वेत्यर्थः । पादमूलम् चरणसमीपम्, तत्पार्श्वमिति यावत् ॥ १२ ॥ अस्माकं देवान्न तु तवेत्यर्थः । भक्तवत्सलेति दयोत्पादनार्था संबुद्धिः । तदानीं गोपाः ‘ अनेन सर्वदुर्गाणि ’ इत्यादिगर्गोक्तिं स्मृत्वा श्रीकृष्णमेवार्थयामासुरित्याह—कृष्णेति,—सर्वदुःखाकर्षणाभिप्रायेण । वीप्सा त्वरान्त्या । हे महाभाग अस्माकं परमभाग्यरूप । गोकुलं गवां समूहम् । प्राकृतोपि पुमानेकामपि गां यथाबलं रक्षितुं प्रयतते त्वं तु प्रभुरसि सर्वथा सर्वतः सर्वान्रक्षितुं समर्थः कालियमर्दनादौ तवालौकिकं प्रभुत्वमस्माभिरनुभूतत्वमित्याहुः—हे प्रभो इति । ननु देवेषु स्वशक्तिदर्शनं नोचितं तथापि मदाधिकारत्वात्तत्राहुः—हे भक्तवत्सल । भक्तजनरक्षणार्थं तव न किमप्यकृत्यमस्तीति । अर्जुन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिला वर्षनिपातेन हन्यमानमचेतनम् ॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः ॥ १४ ॥ अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयम् ॥ स्वयागे निहतेऽस्माभिरिंद्रो नाशाय वर्षति ॥ १५ ॥ तत्र प्रतिविधिं सम्यगात्मयोगेन साधये ॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः ॥ १६ ॥ न हि सद्भावयुक्तानां सुराणामीशविस्मयः ॥ मत्तोऽसतां मानभंगः प्रशमायोपकल्पते ॥ १७ ॥ तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ॥ गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥ १८ ॥ इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्द्धनाचलम् ॥ दधार लीलया कृष्णश्छत्राकमिव बालकः ॥ १९ ॥

प्रार्थनामाह । कृष्णकृष्णेति । त्वमेव नाथो यस्य तद्गोकुलं गवां कुलं वंशं नोऽस्मांश्च देवादिंद्रात्त्रातुं रक्षितुमर्हसि ॥ १३ ॥ विज्ञापनात्पूर्वमेव कुपितेनेंद्रेण कृतं तद्वर्षं मेने॥१४॥कथं मेने तदाह । अपर्त्विति । अपगत ऋतुर्यस्य तद्वर्षमतिशयितो वातो यस्मिंस्तदतिवातम् । शिलामयं शिलाप्रचुरम् ॥१५॥तत्र प्रतिज्ञापूर्वकं गोवर्धनोद्धरणमाह । तत्रेति । तत्र प्रतिविधिं प्रतीकारं स्वसामर्थ्येन साधयिष्यामि तेन च मौढ्याल्लोकेशमानिनां श्रीमदलक्षणं तमो हरिष्यामि । बहुवचनेन वरुणादीनभिप्रैति ॥ १६ ॥ ननु देवाः सात्त्विकास्त्वद्भक्ताश्च कतस्तेषां तमस्तत्राह । न हीति । सद्भावः सत्त्वं मद्भक्तिर्वा तद्युक्तानां सुराणामीशा वयमिति विस्मयो गर्वो हि यस्मान्न घटतेऽतोऽसंतस्ते । किं च तेषां मानभंगोऽनुग्रह एवेत्याह । मत्त इति ॥ १७ ॥ गोपाये रक्षिष्यामि । किं च सोऽयं मे मया व्रतो नियमः संकल्पो वा आहितो धृत इत्यर्थः ॥ १८ ॥ कृत्वा

रथसारथित्वस्य वक्ष्यमाणत्वादिति भावः॥१३॥ गोपविज्ञापनात्पूर्वमेव तद्वर्षमिंद्रकृतं मेने । नित्यभगवत्पार्षदानामप्येतादृशकष्टं लीलाशक्त्या प्रेमानंदरसस्योत्कर्षेणास्वादनार्थमुपस्थापितं लोभवतां बुभुक्षूणां क्षुत्कष्टमिव सुखोदर्कत्वात्सुखात्मकमेवेति ज्ञेयम्।अचेतनम् निःसंज्ञम्॥१४॥अत्युल्बणम् भयजनकम्॥१५॥तत्र वर्षणे। तेन प्रतीकारेण । लोकेशमानिनाम् लोकेशा वयमित्यभिमानवताम् । तमः अज्ञानम् । अभिप्रैति अभिप्रायविषयं करोति॥१६॥गोपा आशंकंते– नन्विति । असत्सु दण्डमाह–किंचेति । तेषाम् असताम् त्यक्तसत्त्वस्वभावानाम् । मत्तः मत्सकाशात् । प्रशमाय गर्वाभावाय ॥ १७ ॥ यस्माद्गोष्ठं मच्छरणं तस्मात् गोपाये इति । आत्मनेपदमार्षम् । अहं शरणं रक्षिता यस्य तत्तथा । मां नाथते 'कृष्णकृष्ण महाभाग' इत्येवं प्रार्थयते रक्षार्थमिति मन्नाथम् 'नाथृ–याच्ञादिषु' । अहं परिग्रहो मूलं यस्य तत्तथा । "पत्नीस्वीकारशपथमूलेष्वपि परिग्रहः" इति यादवः । यद्वा–"महिषी च सुतो भ्राता मातुलः श्यालकस्तथा । मंत्री दूतश्च सेना च सर्व एते परिग्रहाः॥" इति वररुचिकोशान्मम परिग्रहो मत्परिग्रह इति तत्पुरुषो वा । अत्र "प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने।प्रकृतेर्वाचकः संख्यां गृह्णाति विकृतेर्न तु॥", इति न्यायस्यानियतावमपि बोध्यते । रक्षणे निजदार्ढ्यमाह–किं चेति । सोऽयम् व्रजरक्षणरूपः । नियमः अपरित्याज्यधर्मः । नियमत्वे प्राग्वर्षपीडा कुतो न वारितेत्याशंकासंभवादाह–संकल्पो वेति । इदानीमेव संकल्पितः । इत्यर्थ इति । धारितो न तु स्थापित इति । आदधातेः स्थापनार्थत्वस्याधानादिपदे प्रसिद्धत्वादिति भावः । यद्वा–सः मद्बुद्धिस्थः । अयम् प्रत्यक्षभूतो गोवर्द्धन एव मे व्रतो जयस्तंभ आहितः स्थापित इत्यर्थः । "संकल्पे विजयस्तंभे नियमे च व्रतः स्मृतः"इति धरणिः॥१८॥उत्कृत्य उद्धृत्य 'कृती–छेदने' । "शिलींध्रं कंदलीपुष्पे करके ना झषांतरे । द्रुमेदे स्त्री तु विहगीभेदगंडूपदीमृदोः ॥" इति मेदिनी । इति इत्थम् ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाह भगवान्गोपान्हेंब तात व्रजौकसः ॥ यथोपजोषं विशत गिरिगर्तं सगोधनाः ॥ २० ॥ न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने ॥ वातवर्षभये नालं तत्त्राणं विहितं हि वः ॥ २१ ॥ तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः ॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः ॥ २२ ॥ क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः ॥ वीक्ष्यमाणो दधावद्रिं सप्ताहं नाचलत्पदात् ॥ २३ ॥ कृष्णयोगानुभावं तं निशाम्येंद्रोऽतिविस्मितः ॥ निस्स्तंभो भ्रष्टसंकल्पः स्वान्मेघान्स न्यवारयत् ॥२४॥ खं व्यभ्रमुदितादित्यं वातवष च दारुणम्॥निशाम्योपरतं गोपान्गोवर्धनधरोऽब्रवीत् ॥ २५ ॥ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः ॥ उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ॥ २६ ॥ ततस्ते निर्ययुर्गोपाः स्वंस्वमादाय गोधनम् ॥ शकटोढोपकरणं स्त्रीबालस्थविराः शनैः ॥ २७ ॥

उत्कृत्य । छत्राकमुच्छिलींध्रम् ॥ १९ ॥ यथोपजोषं यथासुखम् ॥ २० ॥ २१ ॥ सव्रजाः शकटमंडलीसहिताः । सोपजीविनो भत्यपुरोहितादिसहिताः ॥ २२ ॥ पदात्स्थानात् ॥ २३ ॥ २४ ॥ २५ ॥ व्युदप्राया विगतोदकप्रायाः स्वल्पजला इत्यर्थः ॥ २६ ॥ शकटोढोपकरणं शकटैरूढमुपकरणं यथा भवति तथा ॥ २७ ॥

अथ पर्वतधृतेरनु।हेऽम्बेति विकल्पेन प्रकृतिभावः। ननु क्रोशत्रयमात्रस्य गोवर्द्धनस्य तले सर्वव्रजस्थाः कथं मांतु । तत्रेदमवधेयम्—भगवत्पाणिस्पर्शानंदादेव लब्धाचिंत्यौजसा श्रीगोवर्द्धनेन क्रुद्धेंद्रक्षिप्तकुलिशशतघातमपि स्वपृष्ठे कुसुमहारप्रहारमिवानुभवता तथा सम्यगवबुध्यते यथा योजनचतुष्टयप्रमाणव्रजनगरस्थजनाःपशवश्च स्वतल यथावकाशमेव निवासयामासिरेऽत एवोक्तं हरिवंशे भगवता-''शैलोत्पाटेन भूरेषा महती निर्मिता मया।त्रैलोक्यमप्युत्सहेत रक्षितुं किं पुनर्व्रजम्॥'' इति।किञ्च,गोवर्द्धनोपरिष्टानां मृगवराहादीनां पशूनां पक्षिणाञ्च'स धृतः संगतो मेघैः'इति हरिवंशोक्तेस्तान्नितंबारूढान्वर्षतो मेघानालक्ष्य तदूर्द्ध्वशृंगाण्यारोहतां न तिलमात्रमपि कष्टमभूदिति ज्ञेयमिति विश्वनाथः ॥२०॥ इह गर्त्ते । अलम् तद्वारितम्। तदेवाह—वः युष्माकम् ।तस्माद्वातवर्षात्त्राणं रक्षणं विहितमस्ति विशेषेण हिनोति स्म वर्द्धते स्मेति विहितं शेषनागशरीरम् 'हि—गतिवृद्धिहिंसासु'इति कर्त्तरि क्तोऽकर्मकत्वात्। तस्य ब्रह्मांडाधारत्वेनातिविस्तृतत्वान्न हि तदावृतगर्त्ते जलं प्रवेष्टुं शक्नोतीत्यर्थः ।एतच्च संहितायां स्पष्टम् ॥ २१ ॥ स्वान्स्वान्व्रजान्समायुज्येत्यत्र व्रजशब्दः शकटव्यूहे व्याख्यात इति ध्येयम् । सव्रजा इत्यत्र श्रीहितंडुलाद्युपजीवन सहिता वा ॥ २२ ॥ सुखस्य शयनासनादिरूपसुखसाधनस्यापेक्षां श्रद्धाम् ॥ २३ ॥ कृष्णयोगस्यानुभावम् प्रभावम् ''अनुभावः प्रभावे स्यान्निश्चये भावसूचके'' इति यादवः । तम् पर्वतधारणगर्तजलाप्रवेशरूपम् । महापुरुषान्समीक्ष्यापि स्थाणुवत्प्रावण्यराहित्यं स्तंभस्तद्रहितो निस्तंभः । भ्रष्टोऽधोगतः व्रजनाशरूपः संकल्पो मनोरथो यस्य सः । न्यवारयदिति । न जानेऽद्य मह्यं कृष्णः कं दंडं दास्यतीति भयात् ॥ २४॥ २५॥ त्रासम उद्वेगम् ।वातेन सहितं वर्षमुपारतम् । उं शिवावतारं दुर्वाससं पाति रक्षत्यंबरीषप्रार्थनयेत्युपं सुदर्शनम्।स्पष्टमतन्नवमस्कध । तेनारतं दूरीभूतं सुदर्शनेन शोषितं वातवर्षमत एवाह—व्युदप्राया इति।एतदपि गर्गसंहितादौ स्पष्टम्। इत्यर्थ इति । नाममात्रजला इति भावः ॥२६ ॥ ततः भगवदुक्त्युत्तरम् ।ते गर्तस्थाः । ऊढम् धृतम् उपकरणं जीवनसाधनं यथा स्यात्तथा।'शकटाटोपकरणम्' इति विजयध्वजः। तत्र शकटेष्वटं गतमुपकरणम्। यद्वा—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्रभुः ॥ पश्यतां सवभूतानां स्थापयामास लीलया ॥ २८ ॥ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणादिभिः ॥ गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥ २९ ॥ यशोदा रोहिणी नंदो रामश्च बलिनां वरः ॥ कृष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ॥ ३० ॥ दिवि देवगणाः साध्याः ।सद्धगधर्वचारणाः ॥ तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पाथव ॥ ३१ ॥ शंखदुंदुभयो नेदुर्दिवि देवप्रणोदिताः ॥ जगुर्गंधर्वपतयस्तुंबुरुप्रमुखा नृप ॥ ३२ ॥ ततोनरक्तः पशुपैः परिश्रितो राजन्स्वगाष्ठं सबलोऽव्रजद्धरिः ॥ तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ॥ ३३ ॥ इात श्रीभागवते महापुराण दशमस्कंधे पू० गोकुलरक्षानिरूपणं नाम पंचविंशोऽध्यायः ॥ २५ ॥

॥ २८ ॥ निभृताः पूर्णाः।यथा यथोचितं परिरंभणादिभिः समीयुरुपजग्मुः । सदाशिषः श्रेष्ठानाशीर्वादान्॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ततो गोवर्धनस्थानात्। अस्य श्रीकृष्णस्य। तथाविधानि गोवर्धनोद्धरणादिरूपाणि तानि कृतानि कर्माणि गायंत्य ईयुययुः । कथंभूताः । एवं प्रेम्णा हृदि स्पृशन्तीति हृदिस्पृशस्ताः । यद्वा । कथंभूतस्य । प्रेष्ठत्वेन तासां हृदि स्पृशतीति हृदिस्पृक् तस्य ॥ ३३ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां पंचविंशोऽध्यायः ॥ २५ ॥

शकटेषु गमनसमये आटोपकरणं संभ्रमविधि यथा स्यात्तथेत्यर्थः ॥ २७ ॥ तम् उत्थापितम् । स्वस्थान यत उद्धतस्तत्रव ॥ २८ ॥ तम् श्रीकृष्णम्। प्रेमवेगात्प्रेमोद्रेकात् । तं यथा यथोचितं गुरुसमलघुवर्गभेदैः परिरंभणादिभिस्समीयुर्मिलिताः । आदिपदात् शुभाशीर्वादमस्तकाघ्राणचुंबनवामबाहुसंमर्दनतदंगुलिस्फोटस्तवनश्रमदुःखाभावप्रश्नादयो गुरुवर्गस्य,हास्यपरिहासादयः समवर्गस्य, पादपतनादयो लघुवर्गस्य ज्ञेयाः । गोप्यो वत्सलाश्चात्पुरोहितादयः दध्यादिभिर्मंगलद्रव्यैरपूजयन्। तदाशिषस्तु दुष्टान्नाशय शिष्टान्पालय पितरावानंदय धनैश्वर्यसंपन्नो भवेत्याद्याः।ननु परमवात्सल्यवता शेषांशेन पृथ्वीमपि दधता रामेण गोवर्द्धनधारणे स्वानुजस्य कथं साहाय्यं न कृतम्, उच्यते–इंद्रमखभंगगोवर्द्धनमखप्रवर्तनयोर्मयैव कृतत्वादहमेव गोवर्द्धनं धृत्वा व्रजं रक्षिष्यामि सोयं मे व्रत आहित इति तत्संकल्पस्य तदंशेन रामेणान्यथा कर्तुमनौचित्यात्। क्वचित्प्राचीनगोवर्द्धनधरप्रतिकृतौ मातृभ्यां नवनीतादिदानं पित्रा भ्रात्रा च गोवर्द्धनस्य शिरसावष्टंभादि, तच्च स्नेहकातरा इत्यनेनासूचीति तोषिणी ॥ २९ ॥ स्नेहेन कातरा आकुलांतःकरणाः ॥ ३० ॥ तुष्टाः गोरक्षणाद्धर्षिताः । सर्वेषामस्माकं हविर्दानसाधनीभूतगोरक्षणेन हितमाचारितं भगवतेति भावः ॥ ३१ ॥ गोरक्षणमहोत्सवमाह–शंखेति ॥ ३२ ॥ ततः देवकृतोत्सवोत्तरम् वा । एवं प्रेम्णा कृष्णकृतगायनस्नेहेन कृष्णस्य हृदिस्पृशः मनोहराः 'कामश्चाष्टगुणः स्त्रीणाम्' इत्युक्तेः कामाधिक्यात् । यथा स्त्रीणामुपपतौ प्रेमास्ति तत उपपतेः स्त्रीषु किञ्चिन्न्यूनोस्ति प्रायेणेत्यस्वारस्यादाह–यद्वेति।गोवर्द्धनधृतौ श्रुतिः–''तमस्य राजा वरुणः स्वमश्विना क्रतुं सचंत मारुतस्य वेधसः दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते तेन'' अस्या अर्थः–अस्य विष्णोस्तं पवताथ कृतं स्वं स्वन सपादत ऋतु वरुणोऽश्वना च सचंत अन्वमोदंत । मारुतरय वायाराप वेधसः स्त्रष्टुः ततश्च स्वमखभंगे कृते इंद्रे कुपिते विष्णुः कृष्णः उत्तमं श्रेष्टं दक्षं वृष्टिवारणक्षमम् अहर्विदं क्रतोर्लब्धारं पर्वतं दाधार दधार । यतः सखिवान् व्रजाख्यसखिसमुदायवान् । व्रजमपोर्णुते तेनाहर्विदा शैलेनाच्छादयतीत्यर्थः ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पञ्चविंशोऽध्यायः ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवंविधानि कर्माणि गोपाः कृष्णस्य वक्ष्य ते ॥ अतद्वीर्यविदः प्रोचुः समभ्येत्य सुविस्मिताः ॥ १ ॥ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ॥ कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितम् ॥ २ ॥ यः सप्तहायनो बालः करेणैकेन लीलया ॥ कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ॥ ३ ॥ तोकेनामीलिताक्षेण पूतनाया महौजसः ॥ पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥ ४ ॥ हिन्वतोऽधः शयानस्य मास्यस्य चरणावुदक् ॥ अनोऽपतद्विपर्यस्तं रुदतः प्रपदाहतम् ॥ ५ ॥ एकहायन आसीनो ह्रियमाणो विहायसा ॥ दैत्येन यस्तृणावर्तमहन्कंठग्रहातुरम् ॥ ६ ॥ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उलूखले ॥ गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ॥ ७ ॥

षड्विंशे विस्मितान्गोपान्कृष्णस्याद्भुतकर्मभिः ॥ नंदो गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत्॥ १ ॥समभ्येत्य नंदं समभिगम्य॥ १ ॥ यदूचुस्तदाह । बालकस्येति । यद्यस्मादद्भुतानि कर्माणि तस्माद् ग्राम्येषु गोपालेषु कथं जन्मार्हति।आत्मजुगुप्सितमात्मानर्हम्॥ २ ॥ अद्भुतानि कर्माण्याहुः।यः सप्तहायन इति।कथं बिभ्रत्स्थित इति। पुष्करं पद्मं गजराण्महागज इव ॥ ३ ॥ महौजसो महाबलायाः तनोर्वय आयुर्यौवनं वा कालेन यथा पीयते तद्वत् । कथमित्यनुवर्तते ॥ ४ ॥ अनसोऽधः शयानस्य मास्यस्य मासात्त्रयः परिच्छेदका यस्य उदगूर्ध्वं चरणौ हिन्वतश्चालयतः प्रपदेन पादाग्रेण हतं विपर्यस्तमनः कथमपतत्॥ ५ ॥यःकृष्णो दैत्येन ह्रियमाणःसंस्तं तृणावर्तं दैत्यं कथमहन्नित्यर्थः॥ ६ ॥हैयंगवस्तैन्ये

तदैश्वर्यम् कृष्णवैभवम् (१) । एवंविधानि गोवर्द्धनधारणादीनि । अतद्वीर्यविदः श्रीकृष्णमाहात्म्यमजानंतः । शुचिस्मिता नंदभाग्यं विमृश्य जातानंदाः । 'सुविस्मिताः' इति विजयध्वजः । इह किल गोवर्द्धनधारणसमये श्रीकृष्णलावण्यामृतरसास्वादनिमग्नानां गोपानां मनसि कोऽपि विचार उद्भवितुमवसरं न प्राप तदनु स्वस्वगृहगतानां सर्वेषां हृदि संदेह उत्पेदे—अहो संप्रति साक्षाद्दृष्टेन गिरिधारणेन पूतनावधादि दावानलोपशमनादिकं चास्यैव कर्म प्रतीमस्तदातदा ब्राह्मणाशीर्वादान्नं दभाग्यातिरेकाच्च नारायणप्रसादप्राप्तेऽस्मिन्बालके नारायणावेशाद्वा तेतेऽभूवन्निति वितर्का वृथैव कृता । वस्तुतस्तु सप्तवर्षिकस्य बालस्य सप्तदिनावधि शैलेंद्रधारणं नरत्वं निषिध्य परमेश्वरत्वमेव कथयति, किं च अस्माकं सांसारिकाणां ग्राम्यगोपानामेतत्पितपितृव्यमातुलादीनां लालनैः प्रफुल्लत्वमलालनैर्वैक्लव्यं तथा क्षुत्पिपासादधिपयश्चौर्य्यदंभानृतप्रलपनवत्सगोचारणादिकं परमेश्वरत्वे सति कथं संभवेदत ईश्वरत्वं निषिध्य नरत्वमेव प्रतिपादयत्यतोऽन्य तत्त्वं निश्चेतुमसमर्था महाबुद्धिमंतं व्रजराजमेव पृष्ट्वा निःसंशया भवाम इति मनसि कृत्वा तस्यैव महास्थानं प्रविश्य तं पप्रच्छुः—एवमिति विश्वनाथः ॥१॥ यत् वचः । तद्वचः शुक आह । अद्भुतानि वक्तुमशक्यानि । ग्राम्येषु विषयाविष्टजनेषु । आत्मनः स्वस्यानह निरूपणायोग्यम् । न ह्येताद्दृगैश्वर्यवतां गोपेष्वाविर्भावः शोभत इति भावः । तदा कृष्णे वनं गत इति ज्ञेयम् । परोक्ष एव रसापत्तेः परमनिकृष्टोऽपि स्वजुगुप्सायां न प्रवर्त्तते किमुत सर्वेश्वर इति चक्रवर्त्ती ॥२॥ सर्वे बालचरितमनुक्रमंते किंचिद्वैपरीत्येन । वैपरीत्यमाह—य इति । धारणानायासे दृष्टांतमाह—पुष्करमिति । 'पुष्करांभोरुहाणि च' इत्यमरः ॥३॥ तोकेन शिशुना "तोकमल्पशिशौ पुंसि कन्यायां स्त्री तथाल्पके इति धरणिः । तनोः शरीरस्य । बाल्यवार्द्धक्ययोरल्पपराक्रमत्वान्महौजस इत्यनेन दृष्टांतवैषम्यादाह—यौवनं वेति । "वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्" इति मेदिनी ॥ ४ ॥ अनसः शकटस्य । परिच्छेदका वयोज्ञापकाः "परिमाणे परिच्छेदः सर्वतश्छेदकेऽल्पके" इति नैरुक्तः । हिनोतेः शतृप्रत्यये हिन्वत इति ॥ ५ ॥ एकहायनो वर्षैकायुः । दैत्येन तृणावर्त्तेन । इत्यर्थ इति । न हि बालकर्तृककंठग्रहणेन महावपुषो हननं संभवतीत्यर्थः ॥ ६ ॥ इत्यर्थ इति । बाहुभ्यां केवलाभ्यां नटवन्न किं तु बालवत्स्खलन्निति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वने संचारयन्वत्सान्सरामो बालकैर्वृतः ॥ हंतुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ॥ ८ ॥ वत्सेषु वत्सरूपेण प्रविशंतं जिघांसया ॥ हत्वा न्यपातयत्तेन कपित्थानि च लीलया ॥ ९ ॥ हत्वा रासभदैतेयं तद्बंधूंश्च बलान्वितः ॥ चक्रे तालवनं क्षेमं परिपक्वफलान्वितम् ॥ ॥ १० ॥ प्रलंबं घातयित्वोग्रं बलेन बलशालिना ॥ अमोचयद्व्रजपशून्गोपांश्चाऽरण्यवह्नितः ॥ ११ ॥ आशीविषतमाहींद्रं दमित्वा विमदं ह्रदात् ॥ प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकाम् ॥ १२ ॥ दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् ॥ नंद ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥ १३ ॥ क्व सप्तहायनो बालः क्व महाद्रिविधारणम् ॥ ततो नो जायते शंका व्रजनाथ तवात्मजे ॥ १४ ॥ नंद उवाच ॥ श्रूयतां मे वचो गोपा व्येतु शंका च वोऽर्भके ॥ एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥ १५ ॥ वर्णास्त्रयः किलास्यासन्गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १६ ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥ १७ ॥ बहूनि संति नामानि रूपाणि च सुतस्य ते ॥ गुण्यकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १८ ॥ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः ॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ ॥ १९ ॥ पुराऽनेन व्रजपते साधवो दस्युपीडिताः ॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः ॥ २० ॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः ॥ नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ २१ ॥ तस्मान्नंदकुमारोऽयं नारायणसमो गुणैः ॥ श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः ॥ २२ ॥

नवनीतचौर्ये । बाहुभ्यां गच्छन् रिंगन्नित्यर्थः ॥ ७ ॥ मुखतो हंतुं कामो यस्य तं बकवेषमरिं बाहुभ्यां मुखतः कथमपाटयत् ॥ ८ ॥ ९ ॥ १० ॥ ॥ ११ ॥ आशीविषतमोऽतिक्रूरविषश्वासावहींद्रश्च तम् ॥ १२ ॥ औत्पत्तिकः स्वाभाविकः । कथमिति । किं सर्वेषामात्माऽयं स्यादिति शंका ॥ १३ ॥ उक्तमप्यतिविस्मयेनाभिनयेन वदंति । क्व सप्तहायन इति ॥ १४ ॥ प्राक्छ्रुतमेव गर्गाचार्यवाक्यं तच्चरितपरिशीलनेन निवृत्तासंभावनस्य नंदस्य कृष्णतत्त्वावबोधकं जातं स इदानीं तेनैव वाक्येन गोपानुपदिशति । श्रूयतामिति ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ तस्मात्तस्य कर्मसु विस्मयो नास्तीति नंदस्योक्तिः ॥ २२ ॥

भावः ॥ ७ ॥ मुखतः मुखभागतः । अपाटयत् व्यदारयत् ॥ ८ ॥ तेन दैत्येन ॥ ९ ॥ तद्बंधून् धेनुकज्ञातीन् । क्षेमं निरुपद्रवम् ॥ १० ॥ उग्रम् भयंकरम् ॥ ११ ॥ दमित्वा निगृह्य । उद्वास्य निष्कास्य । असौ कृष्णः । प्रसह्य हठात् । अश्नुते व्याप्नुतेऽतिवेगेन सर्वांगमित्याशि । अशेरिन् । तादृशं विषं यस्य स तथा । बाहुलकात्पूर्वपदस्य दीर्घः । ततस्तमप् ॥ १२ ॥ अनुरागः हृदयंगमः स्नेहः । अस्मिन् तवात्मजे । तस्य तव तनयस्यापि । किमिति वितर्के । आत्मवत्प्रियत्वादात्मायं सर्वेषामित्यर्थः ॥ १३ ॥ उक्तम् अर्थम् । अभिनयः प्रदर्शनम् । ततः महाद्रिधारणातः ॥ १४ ॥ तस्य कृष्णस्य चरितस्य परिशीलनेन विलोकनेन निवृत्ता संभावना अयमुक्तसदृशो भविष्यति न वेत्येवंरूपः संशयो यस्य तस्य । तत्त्वावबोधकम् याथार्थ्यप्रकाशकम् । स नंदः । तेनैव गर्गोक्तेनैव । व्येतु व्यपगता भवतु । वः युष्माकम् । अर्भके बाले । एनमित्यन्वादेशत्वादिदम एनादेशः । हेति प्रसक्तकथां प्रत्यंतरंगत्वेन कथांतरारंभसूचनाय "प्रत्यारंभे प्रसिद्धौ ह हा विषादशुगार्त्तिषु" इति यादवः ॥ १५ ॥ पूर्वोक्तमेव स्मारयति । वर्णाः शुक्लाद्याः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ यस्मान्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते ॥ मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणम् ॥ २३ ॥ इति नंदवचः श्रुत्वा गर्गगीतं व्रजौकसः ॥ दृष्टश्रुतानुभावास्ते कृष्णस्यामिततेजसः ॥ मुदिता नंदमानर्चुः कृष्णं च गतविस्मयाः ॥ २४ ॥ देवे वर्षति यज्ञविप्लवरुषा वज्राश्मपर्षानिलैः सीदत्पालपशुस्त्रि आत्मशरणं दृष्ट्वानुकंप्युत्स्मयन्॥उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं यथा बिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवाम्॥२५॥

इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे गर्गगीतनिरूपणं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥

इत्यद्धा साक्षान्मां प्रति समादिश्य गर्गे च स्वगृहं गते सति तदानीं तथा मन्यमानोऽपि इदनीं कृष्णं नारायणस्यांशं मन्ये । अत्र हेतुः । अक्लिष्टकारिणमिति ॥ २३ ॥ २४ ॥ गोवर्धनोद्धरणं सपरिकरमनुस्मरन्प्रकटितैश्वर्यस्य श्रीकृष्णस्य प्रीतिं प्रार्थयते । देव इति । यज्ञविप्लवेन या रुट् तया देवे इंद्रे वर्षति सति वज्राश्मपर्षानिलैः अशनिजलशर्करातीव्रवायुभिः सीदत्पालपशुस्त्रि आत्मशरणं सीदंतः पालाः पशवः स्त्रियश्च यस्मिंस्तत्तथा आत्मा स्वयमेव शरणं यस्य तद्गोष्ठं दृष्ट्वा अनुकंपी उत्स्मयन् हसन्प्रौढिमाविष्कुर्वन् शैलमुत्पाट्याबलो बालो लीलार्थमुच्छिलींध्रं यथा तथैकेन करेण बिभ्रद्धद्गोष्ठमपात्पालितवान् । एवं महेंद्रमदभित् गवामिंद्र इत्युत्तराध्यायार्थं च स्मरति । स एवंभूतः श्रीकृष्णो नः प्रीयात्प्रीयतामिति ॥ २५ ॥ षड्विंशे दशमे व्यक्तः षड्विंशो दशमो हरिः ॥ व्यनक्तु पंचविंशं मां चतुर्विंशतितः पृथक् ॥ १ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां षड्विंशोऽध्यायः ॥ २६ ॥

दुक्तसदृशस्तस्माद्धेतोः । तस्य बालस्य ॥ २२॥ तदानीम् गर्गोपदेशसमये । तथा मन्यमानोपि नारायणसमं मन्यमानोऽपि । इदानीम् तदुपदिष्टस्य शैथिल्यादंशमिति । अत्र नारायणांशत्वे । न क्लिष्टं कर्तुमशक्यं यस्माद्दावानलपानगोवर्द्धनोद्धरणादिरूपात्तदक्लिष्टमलौकिकं कर्म, तत्कर्त्तुं शीलमस्येति तथा । यद्वा—क्लिष्टाः क्लेशितास्तद्रहिता अक्लिष्टास्तान्करोति निजसेवकानिति वा तम् ॥ २३ ॥ गतविस्मया अपास्तसंदेहाः । आनर्चुः अर्चयांचक्रुः । यद्वा—आनर्च्चुः वस्त्ररत्नस्वर्णमुद्रोपहारैर्वनात्सायं कृष्णेप्यागते तं पीतांबरहारकटककुंडलैरलंकृत्य जयजय व्रजभूभूषण चिरं जीवेत्युपलालयामासुः ॥ २४ ॥ भो राजन् इंद्रकोपोत्थिताद्वज्राश्मपर्षादिकमहासंकटाद्गोवर्द्धनमुद्धृत्य तदाश्रितं गोष्ठं रक्षंस्तन्मखप्रवर्त्तनपंडितः कृष्णा यथा सुरलोकगर्वहंता प्रीणाति तथा ब्रह्मकोपोत्थिताद्वाग्वज्रादिदं श्रीभागवतं वेदोदधित उद्धृत्य त्वां रक्षंस्तत्परायणमखप्रवर्त्तनपंडितः कृष्णो भक्तिरहितदार्शनिकभूसुरलोकहंता प्रीणात्वित्याशयेन परीक्षितं स्वांतःपातं मानयन्कृष्णप्रीतिं प्राथयत—देव इति । सपरिकरम् सांगोपांगम् । यद्वा—श्रीशुकः स्वेष्टदेवं पूर्वार्द्धप्रथमभागांते स्मरन्स्वरक्षां प्रार्थयते । यज्ञस्य विप्लवेन भंगेन । जलशर्कराः करकाः । सीदंतः कंपमानाः । शरणं रक्षिता । अनुकंपी हृदयद्रवीभावयुक्तः । प्रौढिम् प्रागल्भ्यम् । "कंदल्यां च शिलींध्रः स्याच्छत्राकं तन्निगद्यते" इति शब्दार्णवः । प्रीयताम् प्रीतो भवतु गवामिन्द्रः गोस्वामी 'गोविंदोऽधिकृतो गवाम्' इत्यमरः । अस्य पद्यस्य लक्षजपात्प्रतिपक्षनाशः । देवे वर्षतीति मंत्रस्य श्रीवेदव्यासः ऋषिः, श्रीकृष्णः परमात्मा देवता, जगती छंदः, सर्वकार्यसिद्ध्यर्थे जपे विनियोगः । 'करधृतवरशैलं वेणुवाद्ये रसालम्' इत्युक्तरीत्या ध्यानं च कार्यम्, अंते पायसेन होमो ब्राह्मणभोजनञ्च तेनाभिलषितसिद्धिः (२५)॥ षड्विंशे इति । दशमे दशमस्कंधे षड्विंशेऽध्याये दशमो लक्ष्यभूत आश्रयशब्दोदितः परमात्मा नंदनंदनो व्यक्तः गोवर्द्धनोद्धृतिपूर्वकव्रजरक्षया यः प्रकटितोऽभूत्, स मां चतुर्विंशतितश्चतुर्विंशतितत्त्वघटितक्षेत्रसंज्ञशरीरात् पंचविंशं जीवात्मानं पृथक् व्यनक्तु प्रकटयतु । मे देहात्मबुद्धिमपाकृत्य निजो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ गोवर्धने धृते शैल आसाराद्रक्षिते व्रजे ॥ गोलोकादाव्रजत्कृष्णं सुरभिः शक्र एव च ॥ १ ॥ विविक्त उपसंगम्य व्रीडितः कृतहेलनः ॥ पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥ २ ॥ दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेशमद इंद्र आह कृतांजलिः ॥ ३ ॥

सप्तविंशे तदालक्ष्य कृष्णस्य प्राभवं परम् ॥ वर्ण्यते सुरभींद्राभ्यामभिषेकमहोत्सवः ॥ १ ॥ गोवर्धने धृते शैल इति शक्रस्य भयेनागमने हेतुः आसाराद्रक्षिते व्रज इति सुरभेर्हर्षेणागमने ॥ १ ॥ तत्रेंद्र आगत्य किं कृतवांस्तदाह विविक्त उपसंगम्येत्यादिना अथाह सुरभिरित्यतः प्राक्तनेन ग्रंथेन। विविक्ते एकांते । पादयोः पस्पर्श नमश्चकार ॥ २ ॥ अस्य श्रीकृष्णस्य श्रुतश्चासावनुभावश्च श्रतानुभावः दृष्टः श्रुतानुभावो येन स इंद्रः । नष्ट

पासने योजयत्वित्यर्थः । किंभूतः स षड्विंशः—पञ्चविंशतितत्त्वनियामकत्वेनेश्वर इत्यर्थः । एकादशस्कंधे तत्त्ववादाध्याये षडिंशतितत्त्ववादिमते " अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् । स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥" इत्यनेन पंचविंशो जीवः षड्विंश ईश उक्त इति(१) ॥ अत्र श्रुतयः—"जजान एव व्यबाधत स्पृधः प्रापश्यद्वीरोऽभिपौंस्यं रणम्। अवृश्चदद्रिमवसंपदः स्पृधस्तभ्नान्नाकं स्वरमाया पृथुम्"इति। अयमर्थः—वीरः श्रीकृष्णो जजानः जातमात्र एव स्पृधः स्पर्द्धमानान् व्यबाधत विशेषेणैव बबाधे । अभिपौंस्यं रणं प्रापश्यत् । पुंस इदं पौंस्यं स्वयोग्यं रणं प्रापश्यत् । दैत्यैर्नानाविधान्संग्रामांश्चकारेत्यर्थः । किं च, अवसंपदस्संपदः स्वयमेव गोवर्द्धनरूपेण अव अनायासेन संपदः गोपैर्दत्तमन्नादिकं भक्षितवान् । किं च, स्पृधत्स्पर्द्धमानं नाकं तत्पतिं नाकस्थं मेघचक्रं चास्तभ्नात्स्तंभयामास । यतः पृथुमद्रिमवृश्चत् उत्पाट्य धृतवान् । स्वरम्यया लीलयैवेत्यर्थः । ॥ २५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे षड्विंशोऽध्यायः ॥ २६ ॥ तत् गोवर्द्धनोद्धरणादिरूपम् । परम् अत्युत्कृष्टम् । प्राभवम् प्रभोर्भावः प्राभवं प्रभुताम् (१) । येन गोवर्द्धनेन गोव्रजरक्षा मद्दर्पहननपूर्वकं कृता स इंद्रमप्यन्यं करिष्यतीति भीतेरिंद्र आजगामेति । गोलोकात् गवामधिष्ठितस्थानात्। यद्वा—गोलोकात् प्राकृतात, परमवैकुंठरूपगोलोकसुरभ्या इंद्रसाहित्यानुपपत्तेः। यद्वा—गोलोकं व्रजमुद्दिश्य ' ल्यब्लोपे ' इति कर्मणि पंचमी । तथाह श्रुतिः—"ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिश्रृंगा अयासः अत्राहतदुरुगायस्य वृष्णः परमं पदमवभाति भूरि " इति । अर्थः—तानि वां युवयोः रामकृष्णयोर्वास्तूनि रम्यस्थानानि गमध्यै गंतुम् उश्मसि उश्मः कामयामहे न तु तत्र गंतुं प्रभवामः । यत्र येषु वास्तुषु भूरिश्रृंगा महाश्रृंगवत्यो गावः अयासः संचरंति । अत्र भूलोके अह निश्चितं तत् गोलोकाख्यं परमं पदं भूरि अत्यंतं मुख्यादपि विशिष्टमवभाति अत्यंतं शोभते । वृष्णः आनंदवर्षुकस्योरुगायस्य महाकीर्त्तेः श्रीकृष्णस्येत्यर्थः । यद्वा—गोलोकात् स्वर्गात् इंद्रसुरभ्या आव्रजतामित्यर्थः । 'दृग्दृष्टि—'इत्यादिना गोशब्दो हलायुधे स्वर्गवाचकोप्यस्तीति ॥ १ ॥ तत्र व्रजे । तदाह इंद्रकृत्यमाह । एकांते जनसंमर्दरहितस्थले, प्रकटस्थले मां दृष्ट्वा लोका हसिष्यंतीति भीतेरिति भावः। विविक्त इति । हंतहंत शक्रहतकस्य वज्रप्रहारैर्मम गोवर्द्धनपृष्ठं कीदृग्जर्जरमभूदिति दिदृक्षया कदाचित्प्रातरेकाकिनैव कृष्णेन तत्र गमनात्तदैवेंद्रेणाप्यागमनादिति बुध्यत । दर्शनस्थानं च हरिवंशे व्यक्तम् " स ददर्शोपविष्टं वै गोवर्द्धनशिलातले " इति । श्रृणु भो शक्र त्वं प्रथममेकक एव वाहनादिपरिच्छदं परित्यज्य दीनो भूत्वा स्वापराधं क्षमयितुं प्रभोश्चरणांबुजयोर्दंडवन्निपतेति सुरभ्या प्रेरणादुपसंगम्य । हंत भो देवेन्द्र किमिदं ते मय्यपारं वात्सल्यं दृश्यते, यद्बाल्यादज्ञत्वात्त्वन्मखहंतारं मामनुकंपितुमायासीति दृगिंगितेनोक्ते सति व्रीडितः । एनम् श्रीकृष्णम् ॥ २ ॥ गोवर्द्धनधारणे स्वाक्षिभ्यामादौ तत्प्रभावं दृष्ट्वा पश्चात्स्वस्यापराधित्वं निश्चित्य स्वात्मरक्षार्थं मेरुपृष्ठस्थब्रह्ममुखाच्छ्रुतोऽयमेवास्माकं परमगुरुरित्येवंलक्षणो यस्य स तथा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्र उवाच ॥ विशुद्धसत्त्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कम् ॥ मायामयोऽयं गुणसंप्रवाहो न विद्यते तेऽग्रहणानुबंधः ॥ ४ ॥ कुतो नु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिंगभावाः ॥ तथाऽपि दंडं भगवान्बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ॥ ५ ॥ पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः ॥ हिताय स्वेच्छातनुभिः समीहसे मानं विधुन्वञ्जगदीशमानिनाम् ॥ ६ ॥

स्त्रिलोकेशोऽहमिति मदो यस्य सः ॥ ३ ॥ तत्र ममापराधं क्षमस्वेति वक्तुं तव तावदपराधो नास्त्येव त्वयाऽनुग्रह एव कृत इत्याह चतुर्भिः । विशुद्धसत्त्वमिति । तव धाम स्वरूपं शांतमेकरूपमतश्च तपोमयं प्रचुरज्ञानं सर्वज्ञमित्यर्थः । कुतः । ध्वस्तरजस्तमस्कं ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन् । अत एवायमस्मदादिषु दृश्यमानो मायाकार्यरूपो गुणसंप्रवाहः गुणैः संप्रोह्यत इति तथा संसार इत्यर्थः । स ते तव न विद्यते यतः अग्रहणेनाज्ञानेनानुबध्यत इति तथा स सर्वज्ञस्य ते नास्तीत्यर्थः । अज्ञानसंबंधो वा ॥ ४ ॥ यदा अज्ञानतत्कृतदेहसंबंधौ न स्तस्तदा तत्कृतानां लोभादीनां का वार्तेत्याह । कुतो न्विति । तत्कृता देहसंबंधकृताः तद्धेतवः पुनरन्यस्य देहस्य हेतवः । ननु ज्ञानिनामपि ते दृश्यंतेऽत आह । अबुधलिंगभावा अज्ञानिनां गमकाः । यावद्रागादिमत्त्वं तावज्ज्ञानित्वमेव न सिद्धमित्यर्थः । लोभाद्यभावेऽपि मन्मानभंगो दंडार्थमित्याह । तथापीति॥५॥ननु त्वद्दंडे च मम गोपपुत्रस्य का शक्तिः किं वा कारणं को वा दंडो मया कृत इत्यत आह । पितेति त्वं पिता जगतां जनकः गुरुरुपदेष्टा अधीशो नियंता इति दंडधारणे हेतुत्रयम् । कालत्वात्समर्थः तस्मादुपात्तदंडो हिताय कल्याणाय स्वेच्छातनुभिर्लीलावतारैः समीहसे । तव समीहा लीलैव जगदीशमानिनामस्माकं मानविधून

अमिततेजसः दुर्ज्ञेयप्रभावस्य ॥ ३ ॥ तत्र तदा कृष्णपार्श्वे वा । हे इंद्र गर्वादेव त्वन्मखं विखंड्य त्वत्संप्रदानीयनैवेद्यं भोक्तुं गोवर्द्धनमखं मिषेणाकरवमिति त्वं वेत्स्येवेति वक्रोक्तिं ज्ञात्वा—भो नाथ त्वन्मायामोहितोऽप्यहमधुना त्वत्कृपालेशेन त्वत्तत्त्वं किंचिज्जानामीत्याह—विशुद्धेति । विशुद्धं रजस्तमोभ्यामनभिभूतं सत्त्वं यस्मिंस्तत्तथा । अतश्च शांतत्वाच्च । इत्यर्थ इति । प्राचुर्ये मयट् । सर्वप्रचुरशब्दौ पर्यायौ, प्रगतः चुरः स्तेयं यस्मादिति विग्रहादित्यर्थः । तत्र हेतुमाशंकते—कुत इति । यस्मिन् धाम्नि । अत एव गुणसंबंधराहित्यादेव । संप्रोह्यते संचाल्यते संबध्यते वा । इत्यर्थ इति । गुणसंबंधस्यैव संसारपदार्थत्वादिति तात्पर्यम् । स संसारः । यतो हेतोः । न गृह्यते वस्तुयाथात्म्यमनेनेत्यग्रहणं तेनानुबध्यते संबध्यते प्राप्यते इत्यर्थः । इत्यर्थ इति । सर्वज्ञस्येश्वरस्य संसारसत्त्व ईश्वरत्वैव लोलुप्येतेति भावः । कार्यापेक्षया कार्यिणो मुख्यत्वात् ‘ मुख्यामुख्ययोर्मुख्ये कार्यसंप्रत्ययः ’ इति न्यायेनाह— अज्ञानसंबंधो वेति ॥ ४ ॥ कारणाभावे कार्याभावमाह—यदेति । तत्कृतानाम् अज्ञानकृतानाम् । ज्ञानिष्वपि लोभादीनाशंकते—नन्विति । ते लोभादयः । अतः अत्र । अबुधानां लिंगं स्वरूपं भावयंति बोधयंतीत्यबुधलिंगभावाः । इत्यर्थ इति । रागादय एवाज्ञानित्वापादका इत्यर्थः । भगवतः स्वहितैषित्वमाह—लोभाद्येति । तथापि लोभाद्यभावेपि । दंडम् शासनम् । यद्वा—दंडं संन्यासचिह्नीभूतं वेणुलकुटम् । धर्मस्य प्रव्रज्याधर्मस्य । गुप्त्यै खलस्याज्ञानस्य निग्रहाय “ त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् ” इत्युक्तेः । इत्यभिप्रेत्यैव देवलेनोक्तम्—“सुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् ” इति । विष्णुलिंगम् दंडः “ दंडोऽस्त्री शासने राज्ञां हिंसने लकुटे गुणे । दमने वेणुलकुटे ” इति यादवः ॥ ५ ॥ भगवांस्तस्य महत्त्वं द्योतयन्दंडे कारणमाशंकते—नन्विति । जनको ब्रह्मादिद्वारा, उपदेष्टा मन्वादिरूपेण, नियंता यमराजादिरूपेण । मानधू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये मद्विधाज्ञा जगदीशमानिस्त्वां वीक्ष्य कालेऽभयमाशु तन्मदम् ॥ हित्वाऽऽर्यमार्गं प्रभजंत्यपस्मया ईहा खलानामपि तेऽनुशासनम् ॥ ७ ॥ स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्तेऽविदुषः प्रभावम् ॥ क्षंतुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती ॥ ८ ॥ तवावतारोऽयमधोक्षजेह स्वयंभराणामुरुभारजन्मनाम् ॥ चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनाम् ॥ ९ ॥ नमस्तुभ्यं भगवते पुरुषाय महात्मने ॥ वासुदेवाय कृष्णाय सात्वतांपतये नमः ॥१०॥ स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्तये ॥ सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ ११ ॥

नमित्यर्थः ॥ ६ ॥ कथमेतदित्यत आह । य इति । मद्विधाश्च ते अज्ञाश्च ते अतो जगदीशमानिनः काले भयकालेऽपि यथाऽधुनैवातिवृष्टौ त्वामभयं भयमगणयंतं वीक्ष्याशु तन्मदं जगदीशा इति मद्विधाश्च ते अतो जगदीशा इति मदं हित्वा विगतगर्वाः संतः आर्यमार्गं त्वद्भक्तिलक्षणं भजंति । अतस्तवेहैव खलानामनुशासनं दंड इत्यर्थः ॥ ७ ॥ एवं भगवत्स्वरूपमभिप्रायं चानुवर्ण्य क्षमापयति । स त्वमिति । एवंभूता असती मतिर्मे पुनर्मा भदिति प्रार्थनांतरम् ॥ ८ ॥ महानयमपराधः कथं क्षंतव्य इति चेदत आह । तवेति । स्वयंभराणां पुनश्चोरुभारजन्मनां बहूनां माराणां जन्म येभ्यस्तेषामभवाय नाशाय युष्मच्चरणसेविनां तु भवाय । अतो मम त्वत्सेवकत्वादत्यंतापराधिनोऽपि क्षंतव्यमिति भावः ॥ ९ ॥ क्षमापयन्नमस्करोति नम इति । तुभ्यं भगवते कृष्णाय नमः । पुरुषाय सर्वांतर्यामिणे । महात्मनेंतस्थत्वेऽप्यपरिच्छन्नाय । कुतः । वासुदेवाय सर्वनिवासाय । सात्वतां यादवानांपतये नमः ॥ १० ॥ तर्हि किमहं यादवः । न । स्वच्छंदोपात्तदेहाय स्वेषां भक्तानां छंदेनेच्छया यादवादिषु

ननं माननाशनम् । इत्यर्थ इति । माननिवृत्त्या साधुमार्गे प्रवृत्तिः स्यात्तदेव भगवल्लीलाप्रयोजनमिति भावः ॥ ६ ॥ एतत् जगदीशमानिनां दंडेन मानहननम् । मल्लीलेति यत् तत्कथमित्यर्थः । अतः अत्र । मद्विधाः मत्तुल्याः । अतः अज्ञत्वात् । तन्मदं येन मदेन त्वदपराधमकार्ष्मेत्यर्थः । स च जगदीशा वयमित्येवंरूपः अपगतः स्मयो गर्वो येषां ते तथा ‘ स्मयः स्यात्स्मितगर्वयोः ’ इति धरणिः । आर्याणां महतां मार्गम् । “ वेदोक्तिं योऽनतिक्रम्य कर्माणि कुरुतेऽनिशम् । स आर्यः प्रोच्यते सद्भिरनार्यस्तु ततोन्यथा॥” इति कौशिकोक्तेः । “चतुर्ष्वाश्रमवर्णेषु पूज्येषु वणिजां गणे। शिष्टाचाररते पुंसि स्यादार्यो गम्यपद्धतौ ॥” इति मार्कंडेयादौ । यतस्त्वं सर्वदाऽभयोऽतो हेतोः । ईहा लीलैव । इत्यर्थ इति । खलानुशासनार्थमेव लीलां बिभर्षीति भावः । “ईहा स्यादुद्यमे चेष्टावाञ्छालीलासु च स्त्रियाम्” इति नैरुक्तः ॥७॥ एवम् उक्तरीत्या । ‘विशुद्धसत्त्वम् ’ इत्यादिना भगवत्स्वरूपं गर्वपरित्यागेनार्यमार्गे प्रवृत्तिरस्त्वस्येत्यभिप्रायश्च । यस्सर्वेश्वरः सः त्वम् । “ प्लुतो व्याप्ते त्रिमात्रे च स्वरे कूर्दननृत्ययोः ” इति धरणिः । एवंभूता महदवज्ञानप्रवृत्ता ॥ ८ ॥ अयम् मदवज्ञालक्षणः । अतः अत्र । भाराणाम् भारभूतानामुत्पथगामिनामित्यर्थः । इह भूमौ यदुकुले वा । यतः सेविनां भवायातो हेतोः । इति भाव इति । ‘ अपराधः सकृद्भर्त्रा सोढव्यः ’ इति न्यायेनेति तात्पर्यम् । अहन्तूभयेषां मध्ये न कोपि मम तु न भवो नाभवो मयि तूदासीन एव वर्त्तसेऽतो धिङ् मामित्यर्थः ॥ ९ ॥ अपरिच्छिन्नत्वे शंकते—कुत इति ॥ १० ॥ भगवानाशंकते—तर्हीति । तर्हीति वाक्यालंकाराक्षेपयोः । परिहरति—नेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयेदं भगवन्गोष्ठनाशायासारवायुभिः ॥ चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना ॥ १२ ॥ त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तंभो वृथोद्यमः ॥ ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ॥ १३ ॥ श्रीशुक उवाच ॥ एवं संकीर्तितः कृष्णो मघोना भगवानमुम् ॥ मेघगंभीरया वाचा प्रहसन्निदमब्रवीत् ॥ ॥ १४ ॥ श्रीभगवानुवाच ॥ मया तेऽकारि मघवन्मखभंगोऽनुगृह्णता ॥ मदनुस्मृतये नित्यं मत्तस्येंद्रश्रिया भृशम् ॥ १५ ॥ मामैश्वर्यश्रीमदांधो दंडपाणिं न पश्यति ॥ तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहम् ॥ १६ ॥ गम्यतां शक्र भद्रं वः क्रियतां मेऽनुशासनम् ॥ स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तंभवर्जितैः ॥ १७ ॥

स्वीकृतदेहाय । तत्रापि विशुद्धं ज्ञानमेव मूर्तिर्यस्य तस्मै मायया सर्वस्मै सर्वरूपाय । कुतः । सर्वस्य बीजाय कारणाय अत एव सर्वभूतात्मने नम इति ॥११॥ कृतागस इत्यनेनोक्तमपराधं निवेदयति । मयेदमिति । आसारैर्वायुभिश्च गोष्ठनाशाय मयेदमकृत्यं चेष्टितं कृतम् ॥ १२ ॥ तथापि भो ईश त्वयाऽनुगृहीतोऽस्मि । अनुग्रहं दर्शयति । ध्वस्तस्तंभ इति वृथोद्यम इति च ॥ १३ ॥ १४ ॥ इंद्रेण स्वाभिप्राये निवेदिते भगवानपि तथैवाह । मयेति । इंद्रश्रिया देवराज्येन ॥१५॥ १६ ॥ वो युष्माभिः । बहुवचनं वरुणाद्यभिप्रायेण । क्व गंतव्यं स्वर्गेपि तवैवेश्वरत्वादिति चेत्तत्राह । क्रियतामिति । मदनुशासनेन यथापूर्वं तत्र स्थीयतामित्यर्थः । युक्तैरप्रमत्तैः । स्तंभवर्जितैर्निर

तत्रापि स्वच्छंददेहत्वेपि । विशुद्धम् केवलम् । मायया अघटनघटनापटीयस्या शक्त्या । सर्वरूपत्वे हेतुमाशंकते—कुत इति । अत एव सर्वकारणत्वादेव । सर्वेषां भूतानामात्मने स्वरूपाय ॥ ११ ॥ भो शक्र त्वं मद्भक्त इत्यनया स्तुत्यैव ज्ञायसे। किं तु, विनैव त्वदाज्ञां दुष्टा मेघा मद्व्रजं यत्कदर्थयंति स्म तदिमे त्वया दंडनीया इति पवित्रभर्त्सनमाशंक्य हन्तहंतास्मिन्नंतर्यामिणि कपटं न घटेतेति विमृश्य स्वचेष्टितं यथार्थमेवाह—मयेति । ननु मद्भक्ते त्वयि कथं संभवेत्तत्राह—विहते यज्ञ इति । ननु त्वत्प्रभुणा मयैव विहतेपि दासस्य तवैतावदकृत्यं न प्रत्येमि तत्राह—मानिना ऐश्वर्यगर्वस्य किमशक्यमिति भावः । ननु दैवादुत्थिता गर्वादयो मद्भक्तैर्विवेकेनैव तिरोधाप्यास्तत्राह—तीव्रमन्युना । तीव्रः क्रोधो हि विवेकमपि बलाद्ग्रसतीति भावः । आसारेण धारासंपातेन सहिता वायव आसारवायवस्तैः । मध्यमपदलोपी समासः॥१२॥ यद्यपि मयानुचितं कृतं तथापि ध्वस्तोऽपास्तः स्तंभो गर्वो यस्य स तथा। 'दृप्तो धर्मं न पश्यति'इत्युक्तेर्धर्माकरणेन गर्वितस्य नरकाप्राप्तिर्दर्पापहारेण धर्मप्रवृत्तौ स चानुग्रह एव।द्वितीयमनुग्रहं दर्शयति—वृथोद्यम इति। उद्यमसाफल्ये तु गवादिनाशान्नरकाप्राप्तिरतस्तद्वृथाकरणमप्यनुग्रह एवेति तिरस्कृते नापि भिषजा कृपालुना चिकित्सितो रोगीव त्वयाहमनुगृहीत एवातः ध्वस्तस्तंभरोगः । हता उद्यमा वज्रनिक्षेपादयो यस्य सः । नियंतृत्वादीश्वरं, हितकारित्वाद्गुरुं, प्रेमास्पदत्वादात्मानम् ॥ १३ ॥ एवम् त्वयेशानुगृहीतोस्मीत्येवंप्रकारेण । अमुम् मघवानम् । इदम् वक्ष्यमाणम्॥१४॥तथैव स्वाभिप्रायमाह—हे मघवन्निति । त्वत्पूज्यत्वाधिकारमिंद्रत्वमहं न नाशयामीति भावः।संपद्भ्यो धनादिभ्यः, तत्र तत्रासहिष्णुतां दृष्ट्वा यज्ञमेवाहरमिति भावः । अनुग्रहमाह—मदनुस्मृतय इति ॥ १५ ॥ ऐश्वर्यमीश्वरत्वम् श्रीः समृद्धिस्ताभ्यां मदेनांधो नष्टज्ञानचक्षुः । पणते व्यवहरते दानादानादिष्विति पाणिः । पणेरिञ्, हस्तः । दंडः पाणौ यस्य तं तथा । संपन्नाशे मदनुस्मृतिर्नान्यथाऽतस्तां दातुं श्रीभ्रंशं करोमीति भावः ॥ १६ ॥ गम्यस्थानाभावमाह—क्वेति । सर्वत्र मत्स्वाम्येपि स्थितौ प्रकारमाह—क्रियतामिति । अत्र क्रियतां मेऽनुशासनमित्युक्तेरनुशासनानंगीकारे पुनर्दंडो भविष्यति पारिजातहरणे तथात्वप्रसिद्धेः॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी ॥ स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरम् ॥ १८ ॥ सुरभिरुवाच ॥ कृष्णकृष्ण महायोगिन्विश्वात्मन्विश्वसंभव ॥ भवता लोकनाथेन सनाथा वयमच्युत ॥ १९ ॥ त्वं नः परमकं दैवं त्वं न इंद्रो जगत्पते ॥ भवाय भव गोविप्रदेवानां ये च साधवः ॥ २० ॥ इंद्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा नोदिता वयम् ॥ अवतीर्णोऽसि विश्वात्मन्भूमेर्भारापनुत्तये ॥ २१ ॥ श्रीशुक उवाच ॥ एवं कृष्णमुपामंत्र्य सुरभिः पयसाऽऽत्मनः ॥ जलैराकाशगंगाया ऐरावतकरोद्धृतैः ॥ २२ ॥

हंकारैः ॥१७॥ स्वसंतानैर्गोभिः सहोपामंत्र्य कृष्णकृष्णेत्यादि संबोध्य ॥ १८ ॥ इंद्रेण हता अपि भवता वयं सनाथाः कृताः रक्षिता इत्यर्थः ॥ १९ ॥ त्वं नः परमं दैवं देवताऽतो हे जगत्पते गोविप्रदेवानां येऽन्ये च साधवस्तेषां भवायाभ्युदयायाद्य त्वमेव नोऽस्माकमिंद्रो भव ॥२०॥ ननु भवतामिंद्रोऽस्तीति चेदत आह । इंद्रमिति । अलं पुरंदरस्येंद्रतयेत्यर्थः । ननु देव एवेंद्रो भवति कथमहं भवेयमिति चेदत आह । अवतीर्णोऽसीति ॥ २१ ॥ सुरभिरात्मनः पयसाऽभ्यषिंचदिंद्रश्चाकाशगंगाया मंदाकिन्या

अथ इंद्रानुज्ञानोत्तरम् । स्वसंतानैः व्रजगोभिः, प्राकृताया अपि तस्या अप्राकृतासु कृष्णपरिकरभूतासु स्वसंतानाभिमानस्तासां सुरभिवंशोद्भूतत्वात् । यथा प्राकृतस्य चंद्रस्य चंद्रवंशोद्भूतेऽप्राकृते श्रीकृष्णे स्वसन्तानाभिमान इति । गोपरूपिणम् नंदनंदनम् ॥ १८ ॥ इत्यर्थ इति । रक्षकस्यैव नाथपदार्थत्वादिति भावः । कृष्णकृष्णेति वीप्सा परमादरे । हे निजक्लेशकर्षक युक्तं गोकुलरक्षणमिति भावः । हे महायोगिन्निति । योगिनोऽपि सर्वं कर्तुं समर्थाः संति त्वं तु महायोग्यसि ततो गोवर्द्धनधारणादि ते नाद्भुतमिति भावः । किमहं व्रजत्रातैवास्मीति तत्राह—हे विश्वात्मन्निति । सर्वेषामात्मत्वादात्मानं सर्वस्त्रातुमीहते सर्वं त्रातुमीहस इति तदेवाह—विश्वसंभवेति । "जातो नारायणादिंद्रः" इत्यर्थवरहस्योक्तेरिंद्रोपि त्वया त्रात इति भावः । हे अच्युतेति । न हींद्रादयस्तव च्युतिं कर्तुमलमिति भावः ॥१९॥ नः अस्माकं गवादीनाम् । परमकम् अत्युत्कृष्टम् । दैवम् अभीष्टदेवता । यतो नः परमं दैवमतो हेतोः । साधवः सदाचाराः । इंद्रः ईश्वरो भव । हे जगत्पते जगदंतःपातित्वादस्माकं पतिरपि विशेषतोऽतो रक्षको भवेत्यभिप्रायः । गवेंद्रत्वेऽपि विप्रादीनामभ्युदयः "गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदाः समुद्गीर्णाः सषडंगपदक्रमाः ॥" इति श्रुतेः॥२०॥नन्वेकेंद्रसत्त्व इन्द्रान्तरकरणमनुचितमिति शंकते—नन्विति । अतः अत्र । इत्यर्थ इति।पुरमत्र गोकुलग्रामादि गोसमूहो वा, तद्दारकस्य नाशकस्येंद्रत्वं न शोभते परमैश्वर्ययुक्तस्यैवेंद्रत्वादिति भावः । इंद्रमखविमार्दित्वादिंद्रपराभवकर्तृत्वात्तवैवेंद्रत्वमुचितमिति भावांतरम् । ननु स्वातंत्र्येणैव कस्यचिदाज्ञया वेत्याह—ब्रह्मणेति । स्वापराधभीतेंद्रेण ब्रह्मा स्वरक्षार्थं निवेदितस्तेनाहं हे सुरभे त्वत्संतानपालकस्य त्वमतिप्रीतिपात्र्यस्यतस्त्वमिंद्रापराधं क्षमापयस्वेंद्रत्वे चाभिषिंचेत्युक्ता । किं च, ब्रह्मांडकोटींद्रस्य ब्रह्मरुद्रादिदुर्लभांघ्रिसेवस्य तव गवेंद्रत्वेनाभिषेके न कश्चिदुत्कर्षः किं त्वस्माकमभिषेक एव स भावीत्याह—अवतीर्णेति।यदि त्वं नावतरिष्यस्तर्ह्यस्माकमिदं भाग्यं कथमभविष्यदिति भावः।स्वस्य मानुष्यं संभावयन्नाशंकते—नन्विति । हे विश्वात्मन् सर्वनियंतः ॥२१॥ एवम् उक्तरीत्या । उपामंत्र्य संप्रार्थ्य । पयसा क्षीरेण । इंद्रश्चाभ्यषिंचतेति द्वयोरन्वयः । दाशार्हम् दशार्हकुलमुख्यम्॥यद्वा—दाशं सुखादिदानमर्हतीति तथा तम् । तथा च श्रुतिः—"ऋषभं मासमानानां सपत्नानां विषासहिम् । हंतारं शत्रूणां कृधि विराजं गोपतिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रः सुरर्षिभिः साकं नोदितो देवमातृभिः ॥ अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात् ॥ २३ ॥ (अहमिन्द्रो हि देवानां त्वं गवामिंद्रतां गतः ॥ गोविंद इति लोके त्वां गास्यंति भुवि मानवाः ॥ १ ॥) तत्रागतास्तुंबुरुनारदादयो गंधर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदान्विताः ॥ २४ ॥ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन्पयोद्रुताम् ॥ २५ ॥ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयो गिरयोऽबिभ्रदुन्मणीन् ॥ २६ ॥ कृष्णेभिषिक्त एतानि सत्त्वानि कुरुनंदन ॥ निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २७ ॥ इति गोगोकुलपतिं गोविंदमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवम् ॥ २८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पू० इन्द्रस्तुतिगोविंदाभिषेको नाम सप्तविंशोऽध्यायः ॥ २७ ॥

जलैरभ्यषिञ्चत् ॥ २२ ॥ देवमातृभिरित्यादिभिर्देवैर्मातृभिश्चेति वा । गाः पशून् गां स्वर्गं वा इंद्रत्वेन विंदतीति कृत्वा गोविंद इत्यभ्यधात् नाम कृतवानित्यर्थः ॥ २३ ॥ २४ ॥ देवनिकायेषु केतव इव दर्शनीया मुख्या इत्यर्थः । गावो गां पृथ्वीं पयोभिर्द्रुतामार्द्रामनयन् अकुर्वन्नित्यर्थः ॥ २५ ॥ नानारसौघाः क्षीरादिवाहिन्यः । अकृष्टपच्याः कर्षणं विनैव पक्वा औषधयो व्रीह्यादय आसन् । संधिरार्षः । यद्वा अकृष्टपच्या ओषधयो येषु ते गिरय उन्मणीन्गर्भगतान्मणीन् उत् उद्गतान्बहिः प्रकटानबिभ्रदबिभरुः ॥ २६ ॥ २७ ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे टीकायामिंद्रस्तुतिगोविंदाभिषेको नाम सप्तविंशोऽध्यायः ॥ २७ ॥

गवाम्॥'' इति । विषासहिं सहनसमर्थम् ॥ २२ ॥ ननु देवान् विहाय मातर एवागतास्ते कथं नागता इत्याशंकापनुत्तये आह–देवैर्मातृभिश्चेति। विंदति लभते । 'विद्लृ–लाभे' इतिशब्देनोक्तत्वात्। 'क्रमादमुं नारद इत्यबोधि' इतिवद्गोविंद इति । इत्यर्थ इति । 'अभिपूर्वस्तु भाषणे' इति व्याडयुक्तेः । अभ्यधात् कथितवान् । कथनं च नाम्न एवेति भावः ॥२३ ॥ तत्र अभिषेकस्थले गोवर्द्धनप्रदेशे तत्र शक्रकुंडमिति वाराहे गोविंदकुंडमिति प्रसिद्धेः । आगता न तु तैरिंद्राज्ञापेक्षितेति भावः । तुंबुरोरादिनिर्देशस्तु नारदादपि तस्य गाने ज्येष्ठत्वात,तार्ल्लिगपुराणे व्यक्तम् । नारदश्चायं नित्यपार्षदः गरुडादीनां वैनतेयादिरिव भगवदवतारतत्पार्षदप्रवरश्रीनारदस्यैवावतारो गीतादिकौतुकेन गंधर्वादिषु वर्त्तते । आदिपदाच्चित्ररथादयः । यद्वा–तुंबुरुनारदावादावग्रतो येषां ते इति ॥ २४ ॥ देवानां निकायेषु समूहेषु '' निकायस्तु पुमाँल्लँक्ष्ये सुधर्मिप्राणिसंहतौ । समुच्चये संहतानां निलये परमात्मनि ॥'' इति मेदिनी । इत्यर्थ इति । मुख्यानामेव मंगलकर्मसु प्राधान्यादिति तात्पर्यम् । इत्यर्थ इति । सर्वधातुषु कृञर्थस्य व्याप्तत्वादित्यर्थः ॥२५॥पूर्वव्याख्यान आर्षत्वाश्रयणेनाधिकरणानुक्त्या वारुच्याह–यद्वेति ॥ २६ ॥ एतानि गोव्याघ्राहिनकुलादीनि । सत्त्वानि जीवाः । निसर्गतः स्वभावत एव क्रूराणि क्रूरस्वभावानि । निर्वैराणीति कृतयुगतुल्यता ध्वनिता । हे कुरुनन्दनेति । अत्युत्तमकुरुराजवंशोद्भूतत्वात्त्वां मयेदं श्रावितमिति । हे तातेति । तस्य श्रवणे श्रद्धां वीक्ष्य प्रीत आहेति भावः ॥ २७ ॥ इति उक्तरीत्या । सः शक्रः ॥ २८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे सप्तविंशोऽध्यायः ॥ २७ ॥

१–यद्वा गाः सर्वेन्द्रियाणि आकर्षकत्वेन विन्दतीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ॥ स्नातुं नन्दस्तु कालिंद्यां द्वादश्यां जलमाविशत् ॥ १ ॥ तं गृहीत्वाऽनयद्भृत्यो वरुणस्यासुरोंतिकम् ॥ अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥ २ ॥ चुक्रुशुस्तमपश्यंतः कृष्णरामेति गोपकाः ॥ भगवांस्तदुपश्रुत्य पितरं वरुणाहृतम् ॥ तदंतिकं गतो राजन्स्वानामभयदो विभुः ॥३ ॥ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया ॥ महत्या पूजयित्वाह तद्दर्शनमहोत्सवः ॥ ४ ॥ वरुण उवाच ॥ अद्य मे निभृतो देहोऽद्यैवार्थोऽधिगतः प्रभो ॥ त्वत्पादभाजो भगवन्नवापुः पारमध्वनः ॥ ५॥ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ॥ न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥ ६ ॥

अष्टाविंशे ततो नंदानयनं वरुणालयात् ॥ वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते ॥ १ ॥ गोवर्धनं समुद्धृत्य वशे कृत्वाऽमरेश्वरम् ॥ नंदानयनतः कृष्णो वरुणं च वशेऽनयत ॥ २ ॥ ॥ १ ॥ कलामात्रायां द्वादश्यां पारणादराभिनिवेशेनासुरीं वेलामविज्ञायारुणोदयात्पूर्वमेव शास्त्रबलेन निश्युदकं प्रविष्टं तदनभिज्ञो वरुणस्य भृत्योऽनयदिति । तथा च शास्त्रम् । " कलार्धा द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि ॥ आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शंभुशासनात् ॥ " इत्यादि । वक्ष्यति च वरुणः ' अजानता मामकेन ' इति भगवद्धर्ममजानतेत्यर्थः ॥ २ ॥ स्वानां भगवद्धर्मपराणामभयदो मा भैष्टेत्यभयं ददत् ॥३॥ सपर्ययाऽर्हणेन ॥ ४ ॥ अद्येदानीं मे मया देहो निभृतो धृतः यदा त्वद्दर्शनं जातं तदैव देहसाफल्यं प्राप्तमित्यर्थः । यद्वा । निभृतः पूर्णमनोरथ इत्यर्थः । किं च अद्यैवार्थोऽधिगतः सर्वरत्नाकरपतिनापीतः पूर्वं नैवंविधोर्थः प्राप्त इत्यर्थः । किं च संसारोऽपि निवृत्त एवेत्याशयेनाह । त्वत्पादभाज इति । अध्वनः पारं मोक्षम् ॥ ५ ॥ भगवते निरतिशयैश्वर्याय । ब्रह्मणे पूर्णाय । परमात्मने सर्वजीवनि

ततः सप्तविंशाध्यायोत्तरम् (१) । अनयत् अकरोत् (२) । निराहारः व्रतघ्नाहाररहित उपोषितो वा । "अष्टैतान्यव्रतघ्नानि ह्यापो मूलं पयो दधि । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥" इति हेमाद्रिः ॥ १ ॥ तम् नन्दम् । तदनभिज्ञः भगवद्धर्मानभिज्ञः । निशीथात् अर्द्धरात्रात् । कलार्द्धाम् त्रिंशत्पलमिताम् । शंभुः शंकरः ऋषिर्वा । " यामौ द्वौ मध्यमौ रात्रेरासुरः समयो मतः" इत्युक्तेरर्द्धरात्रात्परयामावशेषनिशातः परं प्रविष्ट इत्यवधेयम् । इत्यर्थ इति । सर्वज्ञोऽपि भगवद्धर्मानभिज्ञोऽज्ञ एवेति भावः । असुर एवासुरवेलायां जलारक्षायां नियुक्त इत्युक्तमसुर इति । यद्वा—सुरभिन्नोऽसुरो यक्ष एवेत्यर्थः ॥ २ ॥ तं नंदम् । गोपका रात्रौ स्नानार्थं गतस्य रक्षकाः । तद्गोपाक्रोशं पितरमानेतुमिति । तदंतिकम् वरुणसमीपम् । विभुः सर्वतो दीप्तिमान् ॥ ३॥ लोकपालो वरुणः । तद्दर्शनेन कृष्णदर्शनेन महानुत्सवो यस्य स तथा ॥ ४ ॥ इत्यर्थ इति । "अद्य मे सफलो देहस्त्वत्पादांबुजदर्शनात्" इत्यादिना बल्यादिभिरुक्तत्वादिति भावः । जन्मसाफल्येऽपि मनोरथानाप्तौ किञ्चिद्वैकल्यमेवेत्यरुच्याह—यद्वेति । इत्यर्थ इति । 'निश्चले निभृतो मतः' इत्युक्तेरपूर्णमनोरथस्य नैश्चल्यं न संभवतीति भावः । मनोरथपूर्तेरप्यधिकलाभमाह—किञ्चेति । सर्वेषां रत्नानां वज्रमुक्तादीनामाकरः समुद्रस्तत्पतिनापि । इतः त्वद्दर्शनात् । एवंविधः त्वद्दर्शनसदृशः । इत्यर्थ इति । दुःखप्रदप्रायवज्राद्यपेक्षया परमानंदावाप्तिरूपनित्यसमृद्धिप्रदं त्वद्दर्शनमेव महद्रत्नमिति भावः । तदेवाह—किञ्चेति । अध्वनः भवाटव्याः ॥ ५ ॥ तत्र परमात्मत्वे । यत्र त्वयि । लोकसृष्टिम् विश्वरचनाम् । विकल्पयति विविधं करोति । माया बंधकशक्तिः । इत्यर्थ इति । स्वकार्याकरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजानता मामकेन मूढेनाकार्यवेदिना ॥ आनीतोऽयं तव पिता तद्भवान्क्षंतुमर्हति ॥ ७ ॥ (ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृक्) ॥ गोविंद नीयतामेष पिता ते पितृवत्सल ॥८॥ श्रीशुक उवाच ॥ एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः ॥ आदायागात्स्वपितरं बंधूनां चावहन्मुदम् ॥ ९ ॥

यंत्रे।तत्र हेतुः।न यत्रेति।लोकसृष्टिं विकल्पयति।या माया सा यत्र न श्रूयते।अविद्यमानेव ।तिष्ठतीत्यर्थः॥६॥अजानता मद्भृत्येन त्वत्पित्राहरणं यत्कृतं तदिति॥७॥नंदं विमुच्य

मेवाविद्यमानत्वम् । "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया" इत्याद्युक्तेः ॥ ६ ॥ अयम् नंदः । कार्यं कर्तुमुचितं न वेत्तीत्यकार्यवेदी तेन अजानतेति । त्वत्पितायमित्यजानता । द्वादश्या अल्पत्वेऽरुणोदयात्प्रागपि जले प्रवेष्टव्यमिति भक्तिशास्त्रमजानता वेति । भृत्यापराधेन ममैवापराधः "तन्नामानि च गृह्णाति लोको भृत्ये कृतागसि" इत्युक्तेः । अत एव मूढेन । मम भृत्योऽपि मत्कार्यं न जानातीत्याह—अकार्यवेदिना तव पितानीतः । अय मिति । रत्नचतुष्किकामध्य आसीनं स्वेनार्चितं स्वेष्टदेवस्मरणरतं श्रीनंदं स्वांजलिना दर्शयति । क्षंतुमर्हसीति । तव क्षमासिन्धुत्वान्मम त्वपराधासिंधुत्वाद्दंडयिष्यासि चेद्यथेष्टं दंड्यतामिति भाव इति विश्वनाथः । यच्च 'नंदं च मोक्ष्यति भयाद्वरुणस्य पाशात्' इति, तत्र च पाशाद्यद्भयं तस्माद्विमोक्ष्यति न तु पाशादिति पाशसंबंधो निरस्त इति तोषिणी ॥ ७ ॥ गोविंदेति । महापराधिनापींद्रेण कृतस्य गोविंदतयाभिषेकस्य स्वीकारेण परमकारुण्यं सूचितवान् । पितृशब्दोऽत्र पूज्यपरः । त्वद्दत्तपूज्यत्वाधिकारस्य ममोपर्यपि वत्सलतैवोचितेति संबुद्ध्यभिप्रायः । तदेवाह—ममापीति । अशेषदृगित्युक्त्या निजापराधाभावं ध्वनयतीति भावः ॥ ८ ॥ एवमुक्तविधया । ईश्वराणां हिरण्यगर्भादीनामपीश्वरो नंदनंदनः । बंधूनां गोपानाम् । अवहत्प्रापयामास । ईश्वरेश्वरत्वं दर्शयति—तथाहि—बीजांकुरतरूपमेष्वीशसूत्रविराट्स्वनंतबीजगर्भफलोपमः श्रीकृष्णोऽनंतकोटिब्रह्मांडनायक इति प्रसिद्धम्। अयमेवार्थः श्रीशंकरभगवत्पादैर्वेदांतसारे बनवृक्षदृष्टांतेन समाष्टिव्यष्टिरूपेण स्थूलसूक्ष्मकारणानि प्रतिपाद्य समष्टिवनदृष्टांतेन प्रतिपादितः । "शास्त्रेऽप्यंतस्तद्धर्मोपदेशात्" इत्यत्र "य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्य श्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवाक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद " इति नामरूपवंतमादित्यमंडलांतर्वर्त्तिनं नारायणमुदाहृत्य तस्य च ऋक्सामचगेष्णाविति नारायणस्य कृत्स्नप्रपंचात्मके ऋक्सामे अंगुलिपर्वणी इत्युक्तं ततोनंतकोटिब्रह्मांडाश्रयत्वं सूर्योक्तेर्ब्रह्मणो युज्यते । अयमेव नंदनंदनो महामायावी सुप्तिप्रलयकैवल्येषु कर्मोपरमे सति जगदिंद्रजालं स्वमूर्त्या सह तिरोधायापास्तसमस्तविशेषं ब्रह्मात्मानं प्रापयति कर्मशेषसत्त्वे पुनरुद्भावयति च ततश्चास्य स्वाविद्याभावादसंगत्वं पराविद्याकल्पितोपाधिसंबंधात्प्रतिमायाभोजकत्ववन्नियंतृत्वमविद्यायाश्चाद्यंतशून्यत्वात्तन्नित्यत्वं चेति सिद्धम् । नन्वसंगस्य "अस्थूलमनणु निष्क्रियं शांतम्" इत्यादिश्रुतेः सर्वविशेषशून्यस्य नामरूपनियंतृत्वादिकं च कथं घटेतेति चेत् । अत्र ब्रूमः । "कौलिके प्रतिमाद्वारा चैत्रे भोग इवेशता । असंगे भूम्नि जीवौघकल्पितोपाधियोगतः॥" । अनादौ संसारे जीवेश्वरविभागस्याप्यनादित्वाद्रज्ज्वां भुजङ्ग इव जीवौघस्याविद्यया शुद्धेपि चिदात्मनीशसूत्रादिकं कल्पितमिदमेव ब्रह्मणः शरीरम् । यथा कौलिकः प्रतिमां कृत्वेदमेव चैत्रशरीर मिति भावयति तद्वत् । यथा च प्रतिमाद्वारा चैत्रस्य सुखदुःखादिभोगो भवति तस्या हस्तवेधे चैत्रस्यापि हस्तवेधो जायते तस्यै पायसे समर्पिते चैत्रस्यापि पायसभोगो जायते एवं शुद्धायामपि चिति जीवौघकल्पितो पाधिद्वारा ईशनादिकं भवति । इयांस्तु विशेषः—जीवस्य स्वाविद्यया कल्पितं शरीरांतरमस्तीति प्रतिमानिमित्तकोऽपि भोगः स्वदेहावच्छेदेनैव जायते न प्रतिमावच्छेदेन । चितस्तु तदभावाद्विभुत्वाच्च परकल्पितोपाध्यवच्छेदे नैव नियंतृत्वादिकं भवति । तच्चाकर्मजत्वाच्चितौ न संसृज्यते यथा जीवे भोगः यथा वा कल्पितसर्पगतं भीषणत्वं रज्ज्वाम् । एवं च व्यवहारतः संसारस्याद्यंतशून्यत्वात्तत्कारणीभूतस्येशादेरपि तथात्वं वक्तव्यं किमुतेशादिकारणीभूतायाः श्रीकृष्णमूर्त्तेः । ईशः समष्टिकारणोपाधिः सूत्रात्मा समष्टिसूक्ष्मशरीरोपाधिः विराट् समष्टिस्थूलोपाधिः । ते च बीजोपमे ईशः अंकुरोपमः सूत्रात्मा वृक्षोपमो विराडित्येवं ज्ञेयाः । श्रीकृष्णस्तु परिपक्वानंतबीजगर्भफलोपमोस्त्यत एव सर्वकारणकारणेश्वरेश्वरसर्वेश्वरपुरुषोत्तमोत्तमादिशब्दैस्तन्नामोदाहियते । निरूपितं चैतद्विस्तरेण नीलकंठाचार्यैश्श्रीमहाभारतसभापर्वभावदीपे इत्यलं प्रपंचेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्दस्त्वतीं द्रियं दृष्ट्वा लोकपालमहोदयम् ॥ कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥ १० ॥ ते त्वौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरम् ॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः ॥ ११ ॥ इति स्वानां स भगवान्विज्ञायाखिलदृक्स्वयम् ॥ संकल्पसिद्धये तेषां कृपयैतदचिंतयत् ॥ १२ ॥ जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥ १३ ॥

समर्पयति । गोविंदेति ॥ ८ ॥ ९ ॥ अतींद्रियमदृष्टपूर्वं लोकपालस्य महोदयमैश्वर्यम् ॥ १० ॥ अत्यौत्सुक्ययुक्ता धीर्येषां ते । अपि किं स्वगतिं स्वस्थानं सूक्ष्मां ब्रह्माख्यां चोपाधास्यदुपाधास्यति । नोऽस्मान्प्रापयिष्यतीति संकल्पितवंत इत्यर्थः ॥ ११ ॥ इत्येवंभूतं स्वानां तेषां संकल्पमखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपयैतद्वक्ष्यमाणमचिंतयत् ॥ १२ ॥ अविद्या देहाद्यहंबुद्धिस्ततः कामस्ततः कर्म तैरुच्चावचासु देवतिर्यगादिषु योनिषु भ्रमन् स्वीयां गतिं न

॥ * ॥[1]आगात् सूर्योदयात्पूर्वमेवेति ज्ञेयम् ॥ ९ ॥ ० ॥ * ॥ अतिचमत्कारवन्ति इन्द्रियाणि यतस्तम् । महोदयं महैश्वर्यम् । तेषां लोकपालानाम् । अब्रवीदिति द्वादशीमध्य एव पारणं कृत्वा आस्थान्यामुपवेश्यैवेति ज्ञेयम् ॥ १० ॥ ० ॥ * ॥ स्वगतिं स्वोपासकानाम् । सूक्ष्मां ब्रह्मानन्दरूपां वैकुण्ठाप्तिरूपां वा । उपधास्यति नोऽस्मान् प्रापयिष्यते । भो व्रजराज त्वयैव पूर्वं गर्गोक्त्याऽस्य नारायणसाम्यमुक्तं न तु नारायणत्वम्, संप्रति तु वरुणस्तुत्या साक्षाद्दृष्ट्वा यदि नारायणत्वमेव निर्द्धारयसि तदा बन्धूनामस्माकं सांसारिकाणामप्यवश्यमेव मनोरथमयं पूरयिष्यत्येव । यतस्तव पुत्र एव मम भ्रातुः पुत्रोऽस्य भगिनीपुत्रोऽस्य दौहित्रः परमेश्वरोऽयमस्मिन्नेते वयं स्निह्याम एव, अयमप्यस्मास्वासज्जत्येव । तद्बो·गोपाः परमेश्वरत्वादस्मात्स्वस्ववांछनीयं यथेष्टं गृह्णीतेत्युक्ते केचिदाहुर्वयं मुक्ता एव बुभूषाम इति, अन्ये वयं वैकुण्ठवासिन एव बुभूषामेति पृथक्पृथग्विविधमतयो विविधसंकल्पवंतो बभूवुर्न तु "युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ" इति, 'तत्ते गतोऽस्म्यरणमद्य पदारविंदम्' इति, 'सखेति मत्वा प्रसभं यदुक्तम' इत्याद्युक्तिमंतो वसुदेवार्जुनादय इव ऐश्वर्यज्ञानोपरागात्स्वसंबंधशैथिल्यवन्तो बभूवुरित्यर्थः ॥ ११ ॥ स्वानां स्वेषां ज्ञातीनाम् 'स्वोऽर्थज्ञात्यन्यवाच्यपि' इत्युक्तेः । अज्ञातिधनाख्यायामित्युक्तेः सर्वनामकार्याभावः ॥ * ॥ इतो वस्तुतः स्वानां ज्ञातीनां संकल्पं विज्ञाय तु स्वयं अखिलं ब्रह्मानुभवं सुखं वैकुण्ठवाससुखं व्रजभूमिप्रेमसुखं च पश्यति जानातीत्यखिलदृक् । स्वपरिकरप्रेमतारतम्येन तत्सान्निध्य ऐश्वर्यावरणतारतम्यत्वेऽपि तदानीं लीलाशक्तिप्रेरणवशादेव सम्पूर्णसर्वज्ञत्वोदयात् गोपीनाम्, तेषां तु तत्प्रेममाधुर्यकणिकयाऽपि ब्रह्मसुखवैकुण्ठसुखयोर्नीचीनीकृतत्वेपि तेषां नरलीलत्वेन मुग्धानां संकल्पसिद्धये तत्संकल्पितं ब्रह्मसुखं वैकुण्ठसुखं चताननुभावयिष्यान्निदमाचिंतयत् ॥ १२ ॥ एतस्मिन् लोके सांसारिकसंचारस्थाने । स्वां स्वाबिंबभूतनारायणावाप्तिरूपाम् ॥ * ॥ जनः प्रस्तुतत्वान्मत्पित्रादिव्रजवासी । एतस्मिन् भूर्लोके । अविद्या आत्मस्वरूपाज्ञानम्, ततः कर्म तत उच्चावचासु गतिषु वरुणादिलोकगतसुखैश्वर्यमयीषु भूर्लोकगतमनुष्यातिर्यगादिदुःखानैश्वर्यमयीषु च दृष्टासु भ्रमन् नरलीलत्वादेव स्वेषां सांसारिकत्वबुद्ध्या भ्रमं प्राप्नुवन्, स्वां गतिं सर्वैरपि दुर्लभां वर्तमानां स्वपदवीं न वेद । यदयं मत्पिता वरुणलोकगतस्तत्रत्यां मायिकीमेव संपदं दृष्ट्वा निखिलवैकुण्ठसारमपि वृन्दावनं तस्मादपि न्यूनं मन्यते, यथा मुग्धः कश्चित्कृत्रिममुक्ताया आकारतेजःसौष्ठवं दृष्ट्वा लब्धचमत्कारो वास्तवानर्घ्यमुक्तां ततो न्यूनां वेत्ति, तथैव ब्रह्मादिदुर्लभचरणरेणूनप्यात्मनो वराकाद्वरुणादपि निकृष्टानेव मन्यते, तथैव नित्यमास्वाद्यमानमहामाधुर्यान्मद्विषयकपुत्रादिभावमयप्रेमवतोऽपि मुक्तिवैकुण्ठावधिकौ मन्यते, न तु तयोरहमधीनः केनचित्क्वचिद्दृष्टः प्रेम्णस्त्वहमधीन एव सर्वैर्दृश्यमान एवास्मीति विवेकं न भजते । किञ्च, मुक्तौ खलु ब्रह्मैवास्वाद्यते, तच्च ब्रह्म 'यस्य प्रभा प्रभवतः' इत्यत्र 'तद्ब्रह्म निष्कलमनंतम' इति ब्रह्मसंहितोक्तेः, 'ब्रह्मणो हि प्रतिष्ठाहम्' इति मदुक्तेः, "मदीयं महि

---

१ एतच्चिह्नितोऽग्रे विश्वनाथाद्यनुसारे व्याख्यानं प्रतिपद्यं बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति संचिंत्य भगवान्महाकारुणिको हरिः ॥ दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥ १४ ॥
सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनम् ॥ यद्धि पश्यंति मुनयो गुणापाये समाहिताः ॥ १५ ॥

वेद ॥ १३ ॥ स्वं ब्रह्मस्वरूपं लोकं वैकुंठाख्यं च । तमसः प्रकृतेः परम् ॥ १४ ॥ देहादिपिहितानां तद्दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामासे त्याह । सत्यमिति । सत्यमबाध्यं ज्ञानमजडमनंतमपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शश्वत्सिद्धं ब्रह्म गुणापाये गुणापोहे ज्ञानिनो यत्पश्यंति तत्कृपयैव दर्शयामास॥ १५॥

मानं च परं ब्रह्मेति शब्दितम् " इति मदंशमत्स्यदेवोक्तेश्च मदीयं निर्विशेषं व्यापकमतींद्रियं ज्योतिरेव । सोऽहमेव यस्य प्रेमकरणकास्वादविषयीभूतमाधुर्यः पुत्रादिरूपतया सदा वर्त्त एव । तथा–"अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी " इति पाद्मोक्तेर्मथुरामण्डलमध्यवर्तीदं वृंदावनं वैकुण्ठादपि श्रेष्ठं यस्य निवासतया सदा वर्त्तत एव । न च महाप्रलयेप्यस्य काचित् क्षतिः " भूगोलचक्रे सप्तपुर्यो भवंति तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हीति । यथा पयसि पद्मं तिष्ठति तथा भूम्याम् " इति गोपालतापिनीश्रुतेः । " प्राकृते प्रलये प्राप्ते व्यक्तेऽव्यक्तं गते पुरा । शिष्टे ब्रह्मणि चिन्मात्रे कालमायातिगेऽक्षरे ॥ ब्रह्मानंदमयो लोको व्यापी वैकुण्ठसंस्थितः । निर्गुणोनाद्यनंतश्च वर्तते केवलेऽक्षरे ॥ " इति बृहद्वामनवाक्याच्च मुक्तिवैकुण्ठलोकलोकादष्टचरत्वादेव यल्लब्धं स्पृहयति तदेनं तौ साक्षादुपलंभयामीति भावः । अत्र जनोयं व्रजवासी अविद्याकामकर्मभिरुच्चावचासु देवतिर्यगादिषु भ्रमन्पुनःपुनः पर्यटन् स्वां गतिं मया दास्यमानां मुक्तिं वैकुण्ठस्थितिञ्च न वेद इति कुव्याख्यानं न घटेत । व्रजवासिनो नंदादेः कृष्णे पुत्रादिभाववतो नित्यसिद्धत्वादेवाविद्याकामकर्मघटितः संसारो न संभवेत् । यदुक्तम् " तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम् । न पुनः कल्पते राजन् संसारोऽज्ञानसंभवः ॥ " इति । न च मुक्तिवैकुण्ठस्थित्योरपि दास्यमानत्वम् ' एषां घोषनिवासिनामुत भवान् किं देवरात–' इत्यादिब्रह्मोक्तेरेवेत्यखिलं पूतनावधान्ते सयुक्तिकं व्याख्यातं द्रष्टव्यम् ॥ १३ ॥ इति उक्तविधया । प्रकृतेः परम् अप्राकृतमित्यर्थः ॥ * ॥ इति संचिंत्य स नित्यास्पदस्य श्रीवृंदावनस्य सर्वोत्कर्षं ब्रह्मवैकुण्ठसुखानुभावनयैव सांप्रतं ज्ञापयामीति विचार्य स्वं ब्रह्मस्वरूपं लोकं वैकुंठ च दर्शयामास । वृन्दावनाद्वियोज्य पंचषान् क्षणान् ते एव प्रापयामासेति भावः । यतो महाकारुणिकः व्यतिरेकेणैव वृन्दावनस्य माधुर्य ताभ्यामप्युत्कृष्टं ज्ञापयितुमिति भावः । ननु ब्रह्मदर्शनैव ब्रह्मप्रापणा सैव सायुज्यमुक्तिस्तेषां ततो निष्क्रमणासंभवात् कथं तेषां पुनर्वृन्दावनमाधुर्येऽनुभावनेत्यत आह विभुः । सायुज्यमोक्षाद्वैकुण्ठाच्च निष्क्रमयितुमपि समर्थ इत्यर्थः ॥ १४ ॥ देहादिपिहितानाम् देहादिष्वात्मदृष्टीनाम् । यद्गुणापाये तदावरणसंक्षये मुनयः पश्यन्ति तदिति द्वयोरन्वयः । अबाध्यम् ज्ञानांतरेण विषयासत्त्वप्रतीतिर्बाधः तद्योग्यं बाध्यम्, तद्भिन्नमबाध्यमित्यर्थः । अंतइयत्ता, तद्रहितमनंतम् । " सत्यं ज्ञानमनंतं ब्रह्म " इत्यादिबहुश्रुतिप्रतिपादितं दर्शयामासेति पूर्वेणान्वयः ॥ * ॥ स्वं लोकं विशिनष्टि–तमसः प्रकृतेः परम् । सत्यमबाध्यं ज्ञानमजमनंतमपरिच्छिन्नं सनातनं शश्वत्सिद्धम् । यन्मुनयो ज्ञानिनः गुणापाये गुणातीतत्वे सति पश्यंति । वृंदावनस्यापि ब्रह्मानंदस्वरूपत्वेन तादृशत्वेऽपि मायाविभूतिमध्यवर्त्तित्वेनैव माधुर्याधिक्यं, यथा दीपज्योतिषस्तमोमध्यवर्त्तित्वेन । अत एव तमसः परं न तु तमोमध्यवर्त्तिसत्यज्ञानादिरूपं ज्योतिर्दर्शयामास । किञ्च, ब्रह्मस्वरूपतोऽपि विचित्रलीलामयं भगवत्स्वरूपमतिमधुरं शुकदेवादिभक्तात्मारामानुभवादवसीयते । तच्च भगवद्वपुः सर्वव्यापकमपि परिच्छिन्नम्, षड्विकाररहितमप्यप्राकृतजन्मास्तित्ववृद्ध्यादिसहितम्, तरंगादिदोषशून्यमपि क्षुत्पिपासाप्रस्वेदमयमोहसांग्रामिकशस्त्रघातादिसहितम् । अतर्क्यानन्तशक्तित्वादेव यथा तथैव । " पञ्चयोजनमेवास्ति वनं मे देहरूपकम् " इति भगवदुक्तेर्वृन्दावनमपि ब्रह्मदृष्टानन्तकोटिब्रह्माण्डव्यापकमपि परिच्छिन्नम् । " स्मरेत्पुनरतन्द्रितो विगतषट्तरङ्गम्बुधः " इत्यागमादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते तु ब्रह्महृदं नीता मग्नाः कृष्णन चोद्धृताः ॥ ददृशुर्ब्रह्मणो लोकं यत्राऽक्रूरोऽध्यगात्पुरा ॥ १६ ॥ नंदादयस्तु तं दृष्ट्वा परमानंदनिर्वृताः ॥ कृष्णं च
तत्रच्छंदोभिः स्तूयमानं सुविस्मिताः ॥ १७ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे वैकुंठप्रदर्शनं नामाऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥

एवं ब्रह्महृदं ब्रह्मैव हृदवद्ध्रदः तत्र निमग्नस्य विशेषविज्ञानाभावात्तं ब्रह्महृदं ते तु नीताः प्रापिता अथास्मिन्मग्नाश्च । तुशब्दोक्तं विशेषमाह । पुनः कृष्णेनोद्धृताः समाधेरिवोत्था
पिताः संतो ब्रह्मणस्तस्यैव लोकं वैकुंठाख्यं ददृशुरिति । ननु ब्रह्मनिमग्नानां पुनर्लौकदर्शनमघटितमेवेत्याशंक्याह । यत्रेति । यत्र यस्मिन्कृष्णे निमित्ते सति पूर्वमक्रूरोऽध्य
गात् दृष्टवान् । शुकपरीक्षित्संवादात्प्राक्तनत्वात्पुरेति भूतनिर्देशः । न ह्यतर्क्यैश्वर्ये भगवति किंचिदप्यसंभावितमिति भावः । अथ वा अक्रूरो यत्र दृष्टवांस्तस्य यमुनाहृदस्य
ब्रह्महृद इति नाम तं हृदं नीताः संतो ब्रह्मणो लोकं ददृशुः पुनश्च कृष्णेनोद्धृताः पूर्ववत्तं दृष्ट्वा विस्मिता बभूवुरिति व्यवहितान्वयोऽप्रसिद्धकल्पना च सोढव्येति ॥ १६ ॥
॥ १७ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पर्वार्धे टीकायामष्टाविंशतितमोऽध्यायः ॥ २८ ॥

वाक्यात्तरङ्गादिदोषरहितमपि क्षुत्पिपासाजन्मजराच्छेदभेदादिमन्मनुष्यपशुखगनगादिकमपि नित्यमेवेत्यनन्तचमत्काराश्रयमिति ॥ १९ ॥ लोकदर्शनमाक्षिपति—नन्विति । तत्रोत्तरम्—यत्रेति । शास्त्रस्यांनादित्वाद्व्यासादीनां प्राक
व्यकर्तृत्वेन भूतनिर्देशो नानुचित इति समाधेयम् । इति भाव इति । न ह्यचिन्त्याद्भुतवैभवस्य किमप्यघटितमिति तात्पर्यम् । ब्रह्मणि ह्रदत्वकल्पनातः कालिन्द्यां ह्रदत्वकल्पना घरीयसी प्रसिद्धा च, ब्रह्मणि चाप्रसिद्धाऽ
प्रसिद्धेः । प्रसिद्धिरेव वरेत्याशयेनाह—अथ वेति । अत्रेतिहासकल्पनापि विजयध्वजकृतास्ति, तथाहि—हे कृष्ण यदि त्वं परं ब्रह्म तर्हि नः स्वलोकं दर्शयेति गोपैः प्रार्थितेन श्रीकृष्णेनोक्तम्—यदि मल्लोकदिदृक्षा तर्हि शुद्धेन
चक्षुषा भाव्यम् । अतोऽस्याः कालिन्द्या ह्रदे मज्जनानन्तरं द्रक्ष्यथेत्युक्तास्तथा कृत्वा शुद्धचक्षुषा तत्र स्थितं ब्रह्माऽभिन्नं कृष्णमपश्यन्निति । उद्धृताश्च—ब्रह्मलोकात्पुनस्तदभिप्रायेण व्रजमेवापिता इत्यर्थश्चादनुक्तसमुच्चायका
ज्ज्ञेयः । तदभिप्रायश्च "कालिन्दी न तथैव नास्ति पुलिनं गोवर्द्धनो नो गिरिर्वेणुर्नास्ति न चास्ति गोपसुखदो वंशीवटाख्यो वटः । अस्मिन्नास्ति च कृष्णकेलिविपिनं नो वा गवां चारणं किं कुर्मो मधुसूदनस्य नगरे
सर्वेऽपि तूष्णीं स्थिताः ॥" इत्यभियुक्तोक्तिबोधितलक्षणो बोध्यः ॥ * ॥ एवं ब्रह्महृदं ब्रह्मैव ह्रद इव ह्रदस्तत्र निमग्नस्य विशेषज्ञानाभावात्, तं ब्रह्महृदं ते व्रजवासिनो नीताः प्रापितास्तदा ते तस्मिन्मग्नाः कृष्णेनोद्धृताः
स्वातर्क्यशक्त्या ब्रह्मसायुज्यादपि उद्धृतास्तस्मादुत्थापिताः सन्तस्तस्यैव ब्रह्मणो लोकं वैकुण्ठं ददृशुः । 'विकुण्ठमुपनेष्यति गोकुलं स्म' इति द्वितीयोक्तेः । उद्धृता इति । यथान्ये संसारह्रदादुद्धृताः सन्तो ब्रह्मानुभवंति तथै
वामी प्रेमवंतो गोपाः ब्रह्महृदादुद्धृता वैकुण्ठलोकं ददृशुरिति । सर्वस्वनाशवत्याः सायुज्यविपदः सकाशाद्वैकुंठो निवृतिकर इति भावः । प्रेमरहिताद्ब्रह्मसुखानुभवात्प्रेमसहितो वैकुंठसुखानुभवः श्रेष्ठस्ततोऽपि प्रेममयो गोकुल
सुखानुभवः श्रेष्ठ इति सिद्धांतो ज्ञापितः । यत्र वैकुंठे पुराऽक्रूरोऽध्यगात् गतवान् स्वाभीष्टदेवं दृष्टवान् इति वा । शुकपरीक्षित्संवादतः प्राक्तनत्वाद्भूतनिर्देशः ॥ १६ ॥ तम् कृष्णम् । तत्र ब्रह्मलोके । छंदोभिः मूर्तिमद्भि
र्वेदैः स्तूयमानं दृष्ट्वा परमानंदनिर्वृता अत्याह्लादमग्ना अपि पुनः पूर्ववत्तं यादृक्पूर्ववेषस्वभावं गोपरूपं दृष्ट्वा सुविस्मिताः अत्यद्भुताकुला बभूवुः—अहो अस्य वैभवं, क्षणे परमैश्वर्यं प्रदर्श्य क्षणेन पुनस्तत्तिरोदधाविति । व्यव
हितान्वयस्त्वाद्यपादांतस्थेन तं दृष्ट्वेत्यनेन सुविस्मिता इत्यंतपादांतस्थेन संबंधात् । स च काव्यदोषोस्ति । अप्रसिद्धकल्पना तु कालिंदीह्रदस्य ब्रह्महृदेति नामकल्पनेति ॥ * ॥ तं वैकुंठं दृष्ट्वा परमानंदपूरिताः वैकुंठीय
गोलोकस्थवृंदावनस्य वृंदावनसाधर्म्यदर्शनादिति भावः । यथा कोटीश्वराः कदाचिन्नष्टसर्वधनाः सन्तो दैवात् क्वचिद्दृष्टधनाचिह्नाः परमानंदनिर्वृता भवन्ति तथेत्यर्थः । ततश्चास्मत्प्राणकोटिनिर्मंछनीयमुखारविंदप्रस्वेदाबिन्दुः
कृष्णः क्वेति तदन्वेषणानुसंधानवत्त्वे सति तञ्च ददृशुरित्याह—कृष्णं तत्रत्यैः छंदोभिर्मूर्तिमद्भिर्गोपालतापिन्यादिभिः स्तूयमानं दृष्ट्वा सुविस्मिताः—हंहो क्वागच्छामस्तावदेते ज्योतिर्मयास्तावका अत्र वृंदावने खल्वपरिचीयमानाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच॥भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः ॥ १ ॥

ऊनत्रिंशे तु रासार्थमुक्तिप्रत्युक्तयो हरेः ॥ गोपीभी राससंरंभे तस्य चांतर्द्धिकौतुकम् ॥ १ ॥ ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा ॥ जयति श्रीपतिर्गोपीरासमंडलमंडनः ॥२॥
ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृत्वप्रतीतेः । मवम् । योगमायामुपाश्रितः आत्मारामोऽप्यरीरमत् साक्षान्मन्मथमन्मथः आत्मन्यवरुद्धसौरत इत्यादिषु स्वातं

प्रष्टुमस्माभिरशक्याः के, तन्मध्यवर्ती कृष्णश्चायमस्माननेकान्पित्रादीन् दृष्ट्वापि बाल्यविलासं प्रपञ्चयन्न सन्निधत्ते नापि भुजाभ्यां नः कण्ठं धत्ते, वयमपि सन्निधातुमेनमुत्सङ्गमारोहयितुं च संकुचामः, किमनेन क्षुत्पिपासा
वैक्लव्यं विस्मृतं मातास्य कथमेनमभोजयंती जीविष्यतीत्येवंविधान्विस्मयान् दधानास्ते लीलाशक्तिप्रेरितया योगमाययैव पुनर्वृन्दावनमानिन्यिरे इति शेषः । एतत्प्रकरणस्यायमेवार्थः श्रीमत्प्रभुवरै रूपगोस्वामिचरणैः स्तवमा
लायामुपश्लोकितः । स च श्लोको यथा—" लोको रम्यः कोऽपि वृंदाटवीतो नास्ति क्वापीत्यंजसा बंधुवर्गम् । वैकुंठं यः सुष्ठु संदर्श्य भूयो गोष्ठं निन्ये पातु स त्वां मुकुंदः ॥ १७ ॥ इति श्रीमद्भागवतभावार्थदीपिका
प्रकाशे दशमस्कन्धे पूर्वार्द्धेऽष्टाविंशोध्यायः ॥ २८ ॥ गोपीभिः सह हरेः उक्तिः पूर्वपक्षः, प्रत्युक्तिरुत्तरपक्षः । रासस्य नृत्यविशेषस्य संरंभे प्रारंभे । उत्सवे वा कर्तव्य इति शेषः । तस्य हरेः । अंतर्द्धेरंतर्द्धानस्य कौतुकं
कुतूहलं च (१)। ब्रह्मादीनां जयेन संरूढः प्राप्तो दर्पो यस्य एतादृशश्चासौ कंदर्पः कामस्तस्य दर्पं गर्वं हन्तीति तथा । मंडयति शोभयतीति मंडनः (२)। रासानौचित्यं शङ्कते—नन्विति । इदं रासक्रीडनम् । परिह
रति—मैवमिति । न हि प्राकृतवद्भगवतो विनोदः स्वातन्त्र्यादनन्याधीनत्वात् । विडम्बनम् अनुकरणम् । अपदेशः छद्म । निवृत्तिपरा निवृत्तितात्पर्यिका " आत्मा कामाद्विरज्येत कामानामतिसेवया " इत्याद्युक्तेः ।
ऐहिकामुष्मिकसर्वविषयत्यागपूर्वकव्रजाङ्गनाकृतभगवत्परप्रेम्णो निवृत्तेः परावस्थत्वं स्फुटीभविष्यति । ताः काः—या इत्येवं प्रतिश्रुताः प्रतिज्ञाताः । इत्यर्थ इति । न त्विह तच्छब्दः प्रसिद्धिपर इति ज्ञेयम् । यद्वा—ताः अज्ञाः
प्रजा वीक्ष्य, किंभूताः—रात्रीः रात्रिवत्तमोव्याप्ताः । तथा शर इव द्यन्ति खंडयन्तीति शरदा दुःखदाः पुत्राद्यास्तेषूत्फुल्लमल्लिकादिवत्सुखबुद्धयस्ताः, स्वरमणादि विना तदुद्धारमपश्यन् । अयोगेषु या माया कृपा तामशुभा
द्ययोगाय वा स्वस्मिन्योगाय या माया तामुपाश्रितः "माया कृपायां लीलायां मूलाज्ञाने छले तथा " इति शाश्वतः । यद्वा—ताः जिज्ञासुरूपाः प्रजाः, किंभूताः—' रा—दाने ' इत्यस्मात्त्रिः, रात्रीः उदारास्त्यागशीला आत्म
निवेदिका वा । तथा शर इव द्यन्ति उत्फुल्लमल्लिकोपलक्षितानि विषयसुखानि याः ता विरक्तास्तासामयोगाय उपाध्यध्यासबाधाय कृपामाश्रितः । यद्वा—योगाय ब्रह्माभेदाय या मा प्रमा तदर्थं ताभिरुपाश्रितो वा । यद्वा—
ता गोपीः रात्रीः स्वात्मसमर्पिकाः । स्ववियोगे शर इव द्यंति इति शरदाः ताः उत्फुलमल्लिका यासां ताः तासां कुललज्जादिभिरयोगाय स्वस्मिन् योगाय वा कृपामाश्रितः । यद्वा—अयोगा अन्यायोग्या स्वस्यैव योग्या
वा या मा तदंगशोभा तस्यां दत्ताचित्तः । यद्वा—यो भगवान् यामुपाश्रितः सा राधा, किंभूता—अगमा नित्या मा अंगशोभा यस्याः सा । योगे संयोग एव मा शोभा यस्यास्तस्यां दत्तचित्तः सोपि । समानमितरत् । यद्वा—
योगाय व्रजसुंदरीणां संयोगाय मायः शब्दो यस्याः सा योगमाया वंशी । ' माङ्—शब्देपि ' इत्यस्य घञि रूपम् । तामुपाश्रितः जठरपटयोरन्तरतो निष्कास्याधरे दधौ । यद्वा—योगस्य संभोगस्य मा शोभा तां याति प्राप्नोतीति
योगमाया श्रीराधा तां मनसोपाश्रितः, रासक्रीडायाश्च तद्धेतुत्वादिति । यद्वा—योगैर्योगिभिर्ब्रह्मादिभिर्मीयते ज्ञायते इति योगमा राधा ' यच्चिंत्यमखिलेश्वरैः ' इति ब्रह्मांडे नारदोक्तेः । यत्तेजः रन्तुं मनश्चक्रे । यामुपाश्रितो भगवानपि
रन्तुं मनश्चक्रे इत्यर्थः । किं कृत्वा—उत्फुल्लमल्लिका वीक्ष्य । किंभूताः—तारा नक्षत्राणि त्रपन्ते लज्जन्ते याभ्यस्तास्ता रात्रीः । तारोपपदात्त्रपतेरौणादिको डट् । केन साधनेन—शरेभ्यः कामबाणेभ्यो दयते रक्षतीति शरत्
स्त्रीसंघस्तेन शरदा । क्विप्यार्ष आलोपः । गोपीसमूहेनेत्यर्थः । यद्वा—यो भगवान् श्रीकृष्णः अपिता रक्षकांतररहितः, स्वतंत्र इति यावत् । सोप्यगमाय कामाय जेतुं रन्तुं मनश्चक्रे । अगे हिमाद्रौ मीयते हिंस्यते शिवेने
त्यगमस्तस्मै " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति चतुर्थी । एतद्वृत्तं शैवे स्फुटम् । किं कृत्वा—अरात् कामशस्त्रात्त्रायंत इत्यरात्र्यस्ताः । स्त्रीपंक्तीरित्यर्थः । ' यामाश्रित्येंद्रियारातीन्दुर्जयान् ' इत्याद्युक्तेः ।
किंभूताः—उत्फुल्लाः मल्लिकाः तत्पुष्पाणि यासु ताः । कृतशृंगारा इत्यर्थः । वीक्ष्य । यद्वा—शराच्छरवद्दारणस्वभावात्संसाराद्दयते पालयतीति शरदाः शुद्धबुद्धिस्तया, अमनम् आमु संसारे भ्रमणं ततः पातीत्यासुपं ज्ञानम्,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्याभिधानात्। तस्माद्रासक्रीडाविडंबनं कामविजयख्यापनायेत्येव तत्त्वम्। किं च। शृंगारकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः। ता रात्रीः 'याताबला

तदाश्रितः । अयं कामः स्त्रीभिर्लीलामिषेण मया जेय इति बुद्ध्या विचार्य रमणं चक्र इति भाव इत्यलं प्रपंचेन ॥ अत आरभ्यैत (*) चिह्नतः परं विश्वनाथचक्रवर्तिकृतां सवैष्णवतोषिणीं रासपंचाध्यायीव्याख्यां सर्वामेव प्रतिपद्यं निवेशयामः एतदल्पपर्यायैरपरितोषात् ॥ * ॥ श्रीरामकृष्णगंगाचरणान्नत्वा गुरूननुरुप्रेम्णः । श्रीलनरोत्तमनाथश्रीगौरांगप्रभं नौमि ॥ प्रणम्य श्रीशुकं भूयः श्रीकृष्णं करुणार्णवम् । लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥ गोपरामाजनप्राणप्रेयसेऽतिप्रभूष्णवे । तदीयप्रियदासाय मां मदीयमहं ददे ॥ अथ पंचभिरध्यायैः पंचप्राणसमैर्मुनिः । रासं प्राह हरेः सर्वलीलासंपच्छिरोमणिम् ॥ रासो जयति यद्वृत्तसौभाग्या गोपयोषितः । धरास्था अधरीचक्रुः सर्वोर्द्ध्वस्थां रमामपि ॥ ऊनत्रिंशे वेणुनादपारुष्यविषवर्णनम् । गोपिकाचातकीष्वाभिः क्रीडांतर्द्धिश्च वर्ण्यते ॥ इह खलु सप्तवर्षवयसि वर्तमानेन भगवता कार्तिकस्यामायां कर्मवादोत्थापनेनेंद्रमखभंगः कृतः । तच्छुक्लप्रतिपदि गोवर्धनमहोत्सवः । द्वितीयायां यमुनातीरे महोत्सवो भ्रातृद्वितीयायाञ्च भोजनोत्सवः श्रीमुनींद्रेणावर्णितोपि ज्ञेयः तत्रैव, वर्णिता इन्द्रकृतकोपोक्तयश्च । तृतीयामारभ्य नवमीपर्यन्तं गोवर्धनधारणम् । दशम्यां गोपानां विस्मयकथाबाहुल्यम् । एकादश्यां गोविंदाभिषेकः । द्वादश्यां वरुणलोकगमनम् । पौर्णमास्यां ब्रह्मलोकगमनम् । ततश्च शरदः समाप्तत्वात्तदुत्तरे वर्षेऽष्टवर्षवयस्त्वे सत्याश्विनपूर्णिमायां सर्वलीलोत्सवशिरोमणी रासोत्सवस्तं वक्तुमारभते—भगवानपि षडैश्वर्यपूर्णोपि रन्तुं मनश्चक्रे । रमणस्योद्दीपनालंबनानां कालदेशपात्राणां शरद्यामिनीवृंदावनव्रजवनितानां सर्वोत्कृष्टमाधुर्येणाकृष्टत्वादिति भावः । शतकोटिविलासिनीनामुज्ज्वलरसचिंतामणीनां सौस्वर्यसौन्दर्यसौकुमार्यसौरभ्यमाधुर्यवैदग्ध्यतौर्यत्रिकाणि बहुविधानि परमरुचिराणि स्वीयश्रोत्रेंद्रियैर्जिघृक्षुः स्वीयसौस्वर्यादीनि तदीयश्रोत्रादिभिस्ता जिघ्राहयिषुश्च बभूव । प्रेमवश्यत्वादेकस्यामेव रजन्यामव्यवधानेन यदा तदा सत्यसंकल्पताशक्त्या प्रेरितया योगमायया दुर्घटघटनपटीयस्या स्वशक्त्या प्रहरचतुष्टयवत्यास्तस्या एव रात्रेर्मध्ये तावद्विलाससमायत्यः परःशतकोटिरात्र्य आनीय दर्शिताः । अत एव ता रात्रीर्वीक्ष्येति बहुवचनम्, 'ब्रह्मरात्र उपावृत्ते' इत्यग्रेपि वक्ष्यते । प्रसिद्धार्थतत्पदोपन्यासान्नानागुणवतीरिति रात्रीणामुत्कर्षः । शरदा टाबंतः । शरदायामपि उत्फुल्ला मल्लिका यासु ताः । शरद्यपि मल्लिकाः, 'कुंदस्रजः कुलपतेरिह वाति गंधः' इति कुंदान्यपि । 'रेमे तत्तरलानंदिकुमुदोत्पलवायुना' इति रात्रावपि कमलानि पुष्यंतीति वृंदावनस्योत्कर्षः । 'शारदोत्फुल्लमल्लिकाः' इति पाठे—शारद्यश्च ता उत्फुल्लमल्लिकाश्चेति ताः । रन्तुमारेभे, रेमे इत्युक्ते आत्मारामस्य स्वत एव पूर्णकामस्य भगवतस्तस्य व्रजवनितासु रमणं बाह्यं नरविडंबनमेवेति कश्चिद्व्याचक्षीतेत्यतो रन्तुं मनश्चक्र इत्युक्त्या रमणमिदमांतरमेव न तु बाह्यमिति ज्ञापितम् । सत्यमांतरमेवेदं रमणं किन्तु व्रजसुंदरीणां भक्तत्वात्तदनुरोधेनैवेति कश्चिद्व्याचक्षीतेत्यतश्चक्र इत्यात्मनेपदं प्रयुक्तम् रमणस्य स्वसुखार्थकत्वं बोधयति । ततश्चेत्थम्भूतप्रेमाणो व्रजसुंदर्यो यत्तासु भगवान् स्वतः सुखपूर्णोपि रन्तुं मनश्चक्रे । 'आत्मारामाश्च मुनयः' इत्यत्र 'इत्थंभूतगुणो हरिः' इतिवत् । अतो व्रजसुंदरीणामपि परमोत्कर्षः । तथा "सोपि कैशोरकवया मानयन्मधुसूदनः । रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ॥" इति । "युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित् । कैशोरकं मानयानः सह ताभिर्मुमोद ह ॥" इति विष्णुपुराणहरिवंशयोः । मानयन् आदृतं कुर्वन्नित्यर्थः । ताभिः सह विहाराभावे स्वीयकैशोरवयोप्यमानितं स्यादत एवोक्तमभियुक्तमहानुभावैः "कैशोरं सफलीकरोति कलयन्कुंजे विहारं हरिः" इति सर्वथैव व्रजवनितानामप्युत्कर्षो ध्वनितः । तत्र चोक्तानुक्तसर्वेतिकृत्यसमाधानार्थमाह—योगमायां स्वीयाचिंत्यशक्तिवृत्तिम् । उप आधिक्येन आश्रित इति । स्वाश्रितामपि तामाश्रित इति प्रयोगात्तस्या अप्यत्र सौभाग्याधिक्यम् ॥ अत्र **तोषिणी**—अत्र टीकायां राससंरंभ इति । तस्मिन्निमित्ते रासारंभसम्बन्धिनं मानं वीक्ष्येत्यर्थः (१) । कंदर्पजेतृत्वप्रतीतोरीति । कंदर्पकर्तृकस्यैव जेतृत्वस्य प्रत्ययादित्यर्थः (२) । अथ मूले श्रीबादरायणिरुवाचेति । वक्ष्यमाणमहामहिम्नः प्रसंगस्यास्य बलात्तादिदं लंभयति बदरिकाश्रमे महातपश्चरणाद्भगवान् श्रीबादरायणः । तच्च तपः श्रीकृष्णोपासनलक्षणमेव, सर्वज्ञस्य तस्य परमोत्तमे तस्मिन्नेव व्यवसायौचित्यात् । तस्य च तादृशतपःफलरूपपुत्र इति सर्वज्ञत्वश्रीभगवत्प्रेममयत्वादिकं तत्राधिकं यद्यपि स्फुरति तथापि तन्नामनिरुक्तेर्माहात्म्यपर्यवसानमत्रैव जातं, ततस्तादृशभक्तैरेवैतच्छ्रोतव्यमिति व्यंजितम् । 'श्रीशुक उवाच' इति पाठे तु परमोज्ज्वलरसस्वाभाव्येन परमकोमलालापता दर्शिता । ततस्तादृशचित्ततयैव श्रोतव्यमिदमिति व्यंजितम् । तथाहि—सर्वातिशायिप्रेमवतीनां श्रीव्रजसुंदरीणां मनोरथपरिपूरणमेव प्रियमात्रसुखार्थं सर्वं कुर्वतो भगवतो मुख्यतरप्रयोजनं दर्शयंस्तदेव तस्य सर्वातिशायिमुख्यसुखमिति च प्रकटयंस्तत्र च 'साक्षान्मन्मथमन्मथः' इति, 'त्रैलोक्यलक्ष्म्यैकपदं वपुर्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः ॥ स चर्षणीनामुदगाच्छुचो मृजन्प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥

व्रजं सिद्धा मयेमा रंस्यथ क्षपाः' इति प्रतिश्रुता इत्यर्थः ॥ १ ॥ तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराजश्चंद्र उदगादुदितः । किं कुर्वन् । दीर्घकालेन दर्शनं यस्य स प्रियः स्वप्रियाया मुखमरुणेन कुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभो दिशो मुखं शंतमैः सुखतमैः करै रश्मिभिररुणेनोदयरागेण विलिंपन्नरुणीकुर्वन्नित्यर्थः । स प्रसिद्ध उडुराजः । तथा चर्षणीनां जनानां शुचस्तापग्लानीर्मृजन्नपनयन् ॥ २ ॥

धत्' इति, 'गोप्यस्तपः किमचरन्' इति दृष्ट्या सर्वात्मारामैरपि दुर्लभानां भगवद्रूपरसगंधस्पर्शशब्दानां वैशिष्ट्येनानुभवात् । तदीयरसस्याधरामृतस्य तु सर्वथैवान्यत्राऽसंभवात्प्रेमविशेषविस्तारसुसिद्ध्या तद्योग्याभिस्ताभिः सह रासक्रीडां पञ्चेन्द्रियतुल्यप्रियैः पञ्चभिरध्यायैर्वर्णयति । यत्र "पीत्वा मुकुंदमुखसारघमक्षिभृंगैः" इत्यादिना, "गोपीनां परमानंद आसीद्गोविंददर्शने" इत्यादिना, 'इत्थं शरत्स्वच्छजलम्' इत्यादिना, 'हेमन्ते प्रथमे मासि' इत्यादिना च तासां तस्य च नवरागं विशिष्य स्वेन वर्णितचरम् 'शरदुदाशये साधुजातसत्सरसिज—'इत्यादिना, 'प्रहसितं प्रिय प्रेम—'इत्यादिना, 'रहसि संविदं हृच्छयोदयम्'इत्यादिना च ताभिः स्वयं वर्णयिष्यमाणं च स्मृत्वातिविशिष्टतया वर्णयितव्यत्वेन नवसंगमं स्मरन्नाह—भगवानपीति । अपिशब्देन तासां पूर्वपूर्ववर्णितं नवरागं स्मारयति । पूर्वेण वाक्येन तु संगमस्यास्य नवत्वमेवावगमयति । एतावन्तं कालं ता अनुरागचपलचित्ततया रन्तुं मनः कुर्वन्त्य एवासन्, भगवांस्तु जातानुरागत्वेपि धैर्येण समयविशेषं प्रतीक्षप्राणो न चक्रे । संप्रति ताः कैशोरमध्यं प्राप्ताः सर्वसुखप्रदतया सर्वमंगलतया प्रकटितवेणुशिक्षादिविशेषतया च विलक्षणाः । कुमारीषु च 'मयेमा रंस्यथ क्षपाः' इति प्रतिश्रुता रात्रीर्वीक्ष्य तत्रापि राकारात्रेरागमनारंभे दीप्तानुरागत्वेन गलितधैर्यतया तच्चक्र एवेति प्रतिपत्तेः।श्लेषेण 'आत्मारामाश्च मुनयः' इत्यादिवद्भगवान्सर्वार्थपूर्णोपि ता रात्रीर्वीक्ष्योद्दीपनत्वेनानुभूयेति कैमुत्येनालंबनरूपाणां तासां प्रेममहिमा दर्शितः । तत एव व्यक्तसर्वार्थं तस्य कैशोरमपि मानितं जातमिति विष्णुपुराणे दर्शितम्—"सोऽपि कैशोरकवया मानयन्मधुसूदनः । रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ॥" इति । हरिवंशे च—"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित् । कैशोरकं मानयानः सह ताभिर्मुमोद ह॥" इति । अत्र कालविदित्यस्य व्याख्यानं ता रात्रीर्वीक्ष्येति । 'सह ताभिर्मुमोद ह' इत्यस्य सूचकम्—रन्तुं मनश्चक्र इति । आत्मनेपदनिर्देशः खल्वयं स्वार्थक्रियतां बोधयति "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति विशेषविध्याश्रयणात् । तदेवं ता इत्यनेन स्वस्यापि चमत्कारकरं कालवैशिष्ट्यं व्यंज्य तदुज्ज्वलितां श्रीवृन्दावनशोभामपि दर्शयति—शरदेति । शरदा हेतुना उच्चैः फुल्ला मल्लिका यासु ताः । परस्परयोगाप्रसिद्धेरनेनास्याः शरदो मल्लिकानां चापूर्वत्वं व्यंजितम् । तेन च सर्वाण्येव पुष्पाणि लक्ष्यन्त इत्यालंबनकालदेशानां श्रीकृष्णाय प्रेममयपरमसुखप्रदत्वं दर्शितम् । यस्माद् ह्लादिनीशक्तिविलासलक्षणतत्प्रेमविशेषमय्येवैषा रिरंसा न तु प्राकृतकाममयीति तेषां कंदर्पदर्पहेति व्याख्यातमपि तथा युक्तमेव । निवृत्तिपरेयं पंचाध्यायीत्यपि च स्वयमेव वक्ष्यते—"द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः । तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् ॥ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः । सदयं नंदयन् गोपीर्हृद्गतो नंदनंदनः ॥" इति । मुनीन्द्रेणापीदमेव वक्ष्यते—'विक्रीडितं व्रजवधूभिरिदं च' इत्यादौ । तत्र दुर्घटघटनां समादधदाह—योगमाया पराख्याचिंत्यशक्तिस्तामुप सामीप्येनाश्रितः । यत्रयत्र विहरति तत्रतत्रैव सूर्यः स्वदीधितिमिव सद्यः प्राप्त इति स्वाभाविकतादृशशक्तित्वं व्यंजितम् । तेन च दुर्घटतत्तल्लीला च सेत्स्यतीति भावः । श्लेषेण योगः संयोगस्तदर्थं माया कृपा 'माया दंभे कृपायां च' इति विश्वः । तामुपाधिक्येनाश्रितः । किञ्च, ता वीक्ष्य क्रमेण राकापर्याप्तमधिकमधिकं मनोरथं चक्रे इत्यर्थत्वे लब्धे विशेषोयमभिव्यक्तः—तस्यां राकायां सायं गृहमागतो भोजनादिकं विधाय मातुः स्थानाच्छय्यागृहचंद्रशालिकाद्वारमागतः सन् सद्यः संपाद्यत्वेन निश्चितवानित्यर्थः ॥ १ ॥ तदा भगवतो रिरंसासमये । तस्य हरेः प्रीतये । तमसि गोपांगनास्फुटदर्शनं न स्यादित्यभिप्रेत्येत्यर्थः । उडुभिस्ताराभिः राजत इति । यथाहमुडुभिराकाशे राजे तथा भगवानपि व्रजांगनाभी राजत्वित्यभिप्रायक उडुराज इति शब्दः । दीर्घं बृहत् दर्शनं स्वरूपं यस्य सः । पूर्णिमेंदोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा कुमुद्वन्तमखंडमंडलं रमाननाभं नवकुंकुमारुणम् ॥ वनं च तत्कोमलगोऽभिरंजितं जगौ कलं वामदृशां मनोहरम् ॥ ३ ॥

कुमुत्कुमुदं विकसनीयं विद्यते यस्य तं कुमुद्वंतं न खंडं मंडलं यस्य तं रमाया आननस्याभेव आभा यस्य तं नवकुंकुममिवारुणमेवंविधं चंद्रं दृष्ट्वा तथा वनं

पूर्णकलत्वादित्यर्थः । प्रियः भर्ता । स्वप्रियायाः निजभार्यायाः । ''अरुणं कुंकुमे रक्ते संध्यारागेऽर्कसारथौ'' इति धरणिः । प्राच्याः ककुभ इंद्रेशायाः । परपत्न्या इत्यर्थः । अनेन 'यद्यदाचरति श्रेष्ठः' इति न्यायेन यद्य स्मद्वंशप्रवर्तकश्चंद्र इन्द्रभार्यायाः प्राच्या मुखं विलिंपति, तदा कुलपरंपरागतत्वादस्माकमेतत्सदृशकर्मणि न दोष इति विमृश्य भगवान्प्रीतो भवत्वित्युक्तं स्वामिचरणैः—तत्प्रीतये इति । इत्यर्थ इति । अरुणतापादनमेवात्र विलिंपनपदार्थः । चर्षणीनां मनुष्याणां वा सस्यानाम् ''अर्यम्णो मातृकापत्नी तयोश्चर्षणयः सुताः । यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ॥'' इत्युक्तेश्चर्षणयो मनुष्याः । ''चर्षणिर्मानुषे सस्ये श्रांते चाध्वनि वाहने'' इति निरुक्तिकोशः । सस्यपक्षे खरकिरणसंतापम्लानरूपाः शुच इति ज्ञेयम् ॥ * ॥ तदैवोद्दीपनानन्तरं प्रादुर्बभूवेत्याह—तदेति । उडुराजश्चंद्र उदगात् । किञ्च, न केवलमयमुद्दीपन एव अपि तु गोपस्त्रीरमणस्य तस्य प्रमाणीभूत इत्याह—ककुभ इति । दीर्घकालेन दर्शनं यस्य सः । प्रियो रमणः । प्रियायाः स्वरमण्या मुखमरुणेन कुंकुमेन स्वकरधृतेन यथा विलिंपति तथा प्राच्याः ककुभो दिशो मुखं शंतमैः सुखतमैः करैः किरणैः धृतेनारुणेनो दयरागेण लिंपन्नरुणीकुर्वन्नित्यर्थः । स प्रसिद्ध एव । चर्षणीनाम् 'अर्यम्णा—' इति षष्ठोक्तेर्मनुष्यजातीनां शुचः संतापान् मृजन् अपनयन् । अयमर्थः—श्रीकृष्णस्य सः कुलादिपुरुषः पुरात नोऽपि द्विजराजोपि रमणार्हबहुतरस्त्रीमानपि प्राच्या दिश इन्द्रभार्यत्वात्परस्त्रिया मुखं स्वकरैः स्पृशति, स्वयं तस्यामनुरक्तस्तामप्यनुरागवतीं करोति यदि, तदा कृष्णस्य तद्वंश्यस्य नवीनवयसो गोपजाते रलब्धविवाहत्वात्स्वीयस्त्रीरहितस्याथ च स्वसौंदर्येण मानुषजातीरानंदयतो गोपस्त्रीरमणे कः खलु दोष इति ॥ अत्र **तोषिणी**—एवं निजरिरंसया चंद्रमपि प्राचीदिशा सह प्रियः प्रिययेव रन्तुमुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यंजयंस्तासां रात्रीणामुत्तमांगतारूपायामस्यामभिव्यक्तसर्वमंगलसूचकमन्यदप्याह—तदेति । उडूनां राजेति । ता अपि तत्परिवारत्वेनोदगुरिति ध्वनितम् । रश्मिभिररुणेनेति करणद्वयमुभयेषामपि साधकतमत्वात् । रश्मिधृतेन रागेणेत्यर्थः । विशेषेण लिंपन्निति पूर्णचंद्राभिप्रायेणैव, ततो राकैवेयं तिथिः । 'उत्फुल्लमल्लिका रात्रीर्वीक्ष्य' इतिवत्तस्याप्युद्दीपनत्वेन सहजोद्गमौचित्यात् । 'राकेशकररंजितम्' इति वक्ष्यमाणानुसारेण तत्तिथावेव तात्पर्यात् । स इति ता इतिवत् । न केवलमेवममुना प्राचीदिश एव तापोऽपहृतः किं तु सर्वेषां जनानामपीत्याह—चर्षणीनामिति । शुचः शरदर्कजसंतापदुःखानि । यद्वा—मनोदुःखानि । भगवतः सर्वशक्त्या श्रयपरमशक्तिरूपाणां तासामनुल्लासोल्लासाभ्यां स्वत एव सर्वेषां तत्तद्भावात्, श्रीकृष्णजन्मदिनादिवत् । प्रियः प्रियाया इवेति । सरागत्वसाधुत्वानन्यत्वादिनान्योन्यं रुचेरविशेषो दर्शितः । अत एव तत्परिजनानां शोका श्रूणि मार्जयन्यथाऽसौ परमसुखकरेण करेण लिंपति तथेति व्यंजितम् । दीर्घदर्शन इत्यनेन परमौत्कंठ्यं सूचितम् । एवं सर्वमिदं श्रीभगवतो रिरंसाविर्भावनमेवोक्तम् ॥ २ ॥ कुमुदम् रात्रिविकाशिकमलम् । विकसनीयम् प्रकाशनीयम् । यद्वा—कौ भूमौ मुद् यतः सा प्रभा तद्वन्तम् । तस्य चंद्रस्य । गोभिः किरणैः । ''नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु'' इति केशवोक्तेः । रंजितम् मंडितम् । कलम् ''कलं शुक्रे त्रिष्वजीर्णे नाव्योक्तमधुरध्वनौ'' इति मेदिनी । गूढार्थस्तु—वामदृक् ईकारस्तद्युक्तं कलं क्लीमिति बीजम् । अं वासुदेवं मानयति विज्ञापयतीत्यं मनः सांतोऽयं द्वितीया या अलुगार्षः । तच्छ्रुत्वा वासुदेवो वादयतीति ज्ञायते । पुनः औ अकारौ हरति त्यजतीत्यहरम् । कलमित्यत्र अकारयोस्त्यागपूर्वकमीकारसंगत्या क्लीमिति संपद्यते । तथा च—कामबीजं जगौ । वंशरवद्वारा विरहकर्षितप्रेमरसार्द्रतद्धृदयक्षेत्रे काममुद्भावयामास वपनेनेवेति तत्त्वम् ॥ * ॥ ततश्च तद्दर्शनेनोद्भूतकंदर्पविकारः ''यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः'' इति स्मृत्या स्वकुलादिपुरुषस्य तस्य धर्मं स्वस्मिन्नपि पश्यन्निःशंकमेव परस्त्रीरानेतुं कमप्यमोघं यत्नमकरोदित्याह—दृष्ट्वेति । कुमुत् कुमुदम् 'कुमुदेऽपि कुमुत्प्रोक्तम्' इति विश्वः । तत् विकाशनीयत्वेन वर्तते यस्य तम् । कोः पृथिव्या अपि मुत् कर्तव्यत्वेन वर्तते यस्य तमात्मानञ्च दृष्ट्वेत्यपि व्याख्येयम् । विशेष्यविशेषणानुक्तेः । न खंडं मंडलं बिम्बं स्वरूपं यस्य तम् पूर्णमित्यर्थः । रमा लक्ष्मीः तद्धातृत्वात्तदाननाभम् । यद्वा—''सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा'' इति स्मृतेः रमा श्रीराधा, रमन्ते रमयंतीति वा रमाः गोप्यश्च, तासामाननस्येवाभा यस्य तमिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः ॥ आजग्मुरन्योऽन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ॥ ४ ॥

च तस्य कोमलैर्गोभी रश्मिभिरभिरंजितं दृष्ट्वा कलं मधुरं जगौ अगायत । कथम् । वामदृशां वामा मनोहरा दृशो यासां तासां मनोहरं यथा ॥ ३ ॥ असापत्न्यायान्यो

तद्दर्शनेन ताः स्मृतिपथमारूढा इति भावः । पक्षे–रमाणां तासामानने आभा अन्तः कंदर्पविकारद्योतिनी सम्यक् कांतिर्यतस्तमात्मानमुदयरागव्याप्तत्वान्नवकुंकुमापिंडवदरुणम् । पक्षे–नवकुंकुमचर्चयाऽरुणं तथा वनं च तस्य कोमलैर्गोभिः किरणैरंजितं म्रक्षितम् अभिरंजितमिति समासो वा । पक्षे–तैः प्रसिद्धैर्गोभिः स्वांगकांतिभिः स्वपाल्यमानगवीभिर्वाऽभिरंजितम् । अभिरंजितरुचमित्यर्थः । टजभाव आर्षः । इत्युद्दीपनालंबनविभावौ दृष्ट्वा कलं मधुरमगायत । वेणुनेति शेषः । ' कामं गते कलपदामृतवेणुगीते ' इत्यग्रिमोक्तेः । कथम्–वामा मनोहरा दृशो यासां तासां युवतीनामत्र मनोहरं यथा स्यात्तथा गायन्तम् " स्त्रियः कामयन्ते " इति श्रुतेः । श्लेषेण ककारलकारम् । वामदृशामिति लुप्तविभक्तिकं पदं, वामदृक् चतुर्थः स्वरः तया सह पंचदशं कामबीजं जगाविति रहस्यम् । मनोहरम् मनस आकर्षकत्वात्स्वस्वरूपभूतमहामन्मथमंत्रमित्यर्थः ॥ अत्र **तोषिणी**–ततश्च तं दृष्ट्वा भावविशेषाविर्भावेण वनमागत्य तच्च तद्रश्मिभी रंजितं तत्र यमुनातीरभागमद्यापि ' रसौली ' इति प्रसिद्धव्रजस्थापितग्रामचत्वरमागत्य च कर्षणवेणुना किमपि गीतमगायदिति । पूर्ववत्तस्यां रात्रौ प्रकटितवेणुशिक्षा विशेषत्वमप्याह–दृष्ट्वेति । तच्च रमाननाभम् रमयंतीति रमास्तासां रमाणां परस्परमारूपाणामेव तासां तत्प्रेयसीनां मध्ये परमप्रेयसी या राधा तत्प्राहर्यमेव वेणुशिक्षाविशेषं प्रकटयितुम् । नूनमेतावन्तं कालं तासामपि संगमे शिथिलोऽभूत्, तस्या यदाननं तदाभं दृष्ट्वा तत्तया वितर्क्य तेन तत्स्मृत्वा कलं जगावित्यन्वयः । वितर्काद्युपपादनाय साम्येन विशेषणानि–कुमुत् कुमुदं, तथा च विश्वः 'कुमुदेऽपि कुमुत्प्रोक्तम् ' इति तद्वंतमिति वा । स्वप्रकाशनाय च कुमुदानि तदानीं विकासितानीति ध्वन्यर्थः । अत्र विशेषणैरेव विशेष्यश्चन्द्रो लभ्यते । " अयमुदयति मुद्राभंजनः पद्मिनीनाम् " इतिवत् । आननस्य पक्षे–कोः पृथिव्या मुत् कर्तव्यत्वेन विद्यते यस्य तदिति विशेष्यवशाल्लिंगपरिणामेन ज्ञेयम् । परस्परमारूपत्वात्तस्याः अखंडमंडलं षोडशकलम् । पक्षे–यथावत्परिमाणसंवलितं मंडलमवयववृंदं यत्र । नवकुंकुमपिंडवदरुणम् । पक्षे–नवकुंकुमरागेणारुणम् । एवं कालस्य रतियोग्यतां प्रदर्श्य स्थानस्यापि दर्शयति–वनञ्चेति । तस्य प्रथमोदयेनाल्पमात्रप्रकाशवद्भिर्गोभिः रंजितम् । दीर्घत्वाभावश्छांदसः । एवं भावोद्दीपनमेव दर्शितम् । कलं मधुराव्यक्तं ध्वनिं जगौ, वेणुनेति ज्ञेयम् । 'का स्त्र्यंग ते कलपदामृतवेणुगीत–' इत्यादिवक्ष्यमाणत्वात् । तत्र मधुरत्वं मनोहरणाय, अस्फुटत्वं सर्वासामपि तासां स्वस्वनाममयत्वादिभ्रमाय । वामदृशां मनोहरमिति–तादृशभाववतीनामेव मनोहरं यथा स्यात्तथेति । आदिरसमात्रोद्दीपनं रागविशेषं जगावित्यर्थः । वक्ष्यते च–' अनंगवर्द्धनम् ' इति । स च नूनं मध्यमादिनामा । यत उक्तं मोडररागभेदे–"मध्यमादिर्मग्रहान्तो मध्यमग्रामरागजः । अयं सायं तु गातव्यः शृंगारे ऋषवर्जितः ॥" इति । मेति मध्यमः । ऋषेति ऋषभधैवतौ स्वरौ । "ग्रहः स्वरस इत्युक्तो यो गीतादौ समर्पितः" इति । पूर्वं तु "इति वेणुरवं राजन्सर्वभूतमनोहरम्" इति सामान्यविषयकत्वात्स्वभावानुसारेण तासां मोहनमात्रं जातम्, अधुना तु रसविशेषोद्दीपनत्वादाकर्षणमिति । तत्रतत्र वंश्या अपि वैशिष्ट्य मस्ति । यथोक्तम्–"अर्द्धांगुलांतरोन्मानं तारादिविवराष्टकम् । ततोंगुलांतरे यत्र मुखरंध्रं तथांगुलम् ॥ शिरो वेदांगुलं पुच्छं त्र्यंगुलं सा तु वंशिका । नवरंध्रा स्मृता सप्तदशांगुलमिता बुधैः ॥ दशांगुलांतरा स्याच्चेत्सा तारमुखरंध्रयोः । महानंदेति विख्याता तथा संमोहिनीति च ॥ भवेत्सूर्यान्तरा सा चेत्तत आकर्षणी मता । आनंदिनी तदा वंशी भवेदिंद्रांतरा यदि ॥ गोपानां वल्लभा सेयं वंशुलीति च विश्रुता । क्रमान्मणिमयी हैमी वैणवीति त्रिधा च सा ॥" इति । अतो द्वादशांतरे तारमुखरंध्रा हैमीयं ज्ञेया । एवं गानवैशिष्ट्यमपि ज्ञेयम् । वामदृशामिति–श्लेषेण स्वस्मिन्कुटिलमेव पश्यंतीनां तासां मनोरूपमूलाकृष्ट्या दृष्ट्यादिसर्वेंद्रियवृन्दमेवाकृष्टु मित्येत्यर्थः । अत्र श्लेषेण कामबीजं जगाविति रहस्यम् । यतो वामदृक्सम्बन्धि यत् तत्सहितं कलमिति प्रथमाक्षरत्रयं व्यंजितम् । कीदृशम्–मनोहरम् । मनःशब्देन तदधिष्ठाता चंद्र उच्यते, स च तदाकारत्वेन लवकस्तं हरति आकर्षतीति । तत्संवलितमित्यर्थः । नादयुक्तत्वं तु वेणुनादस्वाभाव्यादेवेति भावः । तदुक्तम्–"कला तु माया लवका तु मूर्तिः कलक्वणद्वेणुनिनादरम्यः" इति ॥ ३ ॥ असापत्न्याय सापत्न्यनिवृत्तये । सहगमने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुहंत्योऽभिययुः काश्चिदोहं हित्वा समुत्सुकाः ॥ पयोऽधिश्रित्य संयावमनुद्वास्यापरा ययुः ॥ ९ ॥

न्यमलक्षितो न ज्ञापित उद्यमो याभिस्ताः स कांतो यत्र तत्र गीतध्वनिमार्गेण जग्मुः । जवेन वेगेन लोलानि चंचलानि कुंडलानि यासां ताः ॥ ॥ ४ ॥ श्रीकृष्णसूचकशब्दश्रवणेन तत्प्रवणचित्तानां तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयंत्य इवार्धावसितं कर्म विहाय ययुस्तदाह । दुहंत्य इति । पयः स्था

त्वीर्ष्या स्यादित्यर्थः । सः कृष्णः । यत्र स्थाने । कुंडलानां स्थत्वं पक्षत्वमंकुशत्वं च, किं वा भूमिः संकुचिता सैवाग्रे विवृता भविष्यतीति जवलोलकुंडला इत्यनेन ध्वनितम् ॥ * ॥ कलगीतसूत्रगुंफिताः पश्चालिका इव ताः कृष्णांतिकमायाता इत्याह—तद्गीतं मनोहरमपि मनोजवर्धनम् । किं च, कृष्णो हि वेणुगीताख्यं महाचोरं व्रजे प्रेषितवांस्तेन च व्रजस्त्रीणां निष्कपाटेन कर्णद्वारेणांतःकरणकोशागारं प्रविश्य मनसा सह धैर्यलज्जा विवेकादीनि महाधनान्यपहृत्य झटित्यानीय कृष्णाय दत्तानीत्याह—कृष्णेन गृहीतानि मानसानि मनांसि च, मानसानि मनःसंबंधीनि धृतिस्मृतिविवेकलज्जाभीतिमत्यादीनि, यासां ताः आजग्मुः । महाचौरचक्र वर्तिनः कृष्णात् तानि स्वस्वधनानि प्रार्थयितुमिवेति भावः । तदैव मन्ये तं महाचौरं धर्तुं व्यग्राणामन्योन्यं न लक्षित उद्यमो यासां ताः चौरस्य पश्चात्पश्चादवाजग्मुः । क्व—स कान्तो यत्र । जवेन वेगेन लोलानि कुंड लानि कुंडलोपलक्षितानि कंकणकिंकिण्यादीन्यपि यासां बहिष्करणगृहस्थितानि अल्पमूल्यत्वबुद्ध्या चौरेण तेन नापहृतानीति भावः ॥ अत्र **तोषिणी**—अन्ये तु तद्गीतं न श्रुतवन्तः किन्तु तेन ता एवाकृष्टा इति तस्य शक्तिविशेषं द्योतयन्नाह—निशम्येति । तत् पूर्वोक्तप्रकारं श्रीकृष्णवेणूद्गतम् । अनंगं श्रीभगवद्विषयं कामं प्राग्वर्तमानमेवाधुना वर्द्धयतीति तथा तत् । यद्यपि वामदृशां मनोहरमित्यनेनानंगवर्द्धनत्वमायातमेव तथापीयमुक्तिस्तद तिशयविवक्षया । अनंगशब्दप्रयोगश्च पूर्वं बीजांकुररूपेणैव स्थितः सम्प्रति पल्लवित इत्यर्थं बोधयति । एतेन तद्गानस्यामृतसेकत्वमप्युत्प्रेक्ष्यते सद्यस्तथाभावात् । व्रजस्य स्त्रियस्तद्विशेषाः प्रकरणबलात् । अत एव कृष्णेन परमाकर्षकेण पूर्वमेव गृहीतमाकृष्टं मानसं मनस्तदीयाशेषं वा यासां ताः, विशेषतश्चेदानीं गीतं श्रुत्वाऽऽजग्मुः । अन्योन्यालक्षितत्वे हेतुर्व्याख्यातः । यद्वा—स्वस्वयूथे मिथः सख्यवतीनामपि तासाम् । तत्र हेतुः—कृष्णेति । तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादिति भावः । अत एव जवेति । आजग्मुरिति—श्रीबादरायणेः श्रीकृष्णांतिके सदैव स्फूर्तेः, किं वा—तासां तद्गमनवार्तया भावविशेषोदयेन तासामिव स्वस्यापि तत्र गमनस्फूर्त्या साक्षादिव श्रीकृष्णांतिकतायाः स्फुरणात् । अग्रे तु ययुरिति चलनार्थकमेव । स इति तादृशतत्स्मरणोत्कंठावचनम्, परममोहनरूपगुणवेणुभावैः प्राचीनैस्तदानींतनैश्च तासामस्माकञ्च मुहुरत्यर्थमभी प्सित इत्यर्थः । कान्तो रमणो यत्रेति तत्रैव परमसुखमयस्थान इत्यर्थः । तस्य वेणुवाद्यस्य परमाकर्षकविद्यारूपत्वादन्यत्र भ्रमणादिकमपि नासीदिति भावः ॥ ४ ॥ श्रीकृष्णसूचकशब्दो वेणुनादः । तस्मिञ्श्रीकृष्णे प्रवणं संलग्नं चित्तं येषां ते तथा ‘ प्रवणं नतलग्नयोः ’ इति धरणिधरः । तत्क्षणम् भगवत्संबन्धिशब्दश्रवणक्षण इत्यर्थः । हरिसंलग्नमनसामपि लोकसंग्रहार्थं त्रैवर्गिककर्म कार्यमिति सूचयितुमिवशब्दमाह—द्योतयंत्य इवेति । अर्द्धावसितम् अर्द्धसमाप्तम् “ अवसितमृद्धे ज्ञातेऽप्यवसानगते च वाच्यलिंगं स्यात् ” इति मेदिनी । तत् अर्द्धावसितम् । चुल्याम् अग्निसंरोधयंत्रे उद्धाने ‘ चुल्ली चितायामुद्धाने ’ इति मेदिनी । अधिश्रित्य श्रपयितु मारोप्य । एतत्काथम् पयःक्वथनम् । प्रतीक्षमाणाः कालविलम्बमसहमानाः । अनवतार्य अनवरोप्य ॥ * ॥ तासां तत्पार्श्वगमनकाले परमोत्कंठया विलंबस्यासह्यत्वात् । ममताहंतास्पदकर्मापेक्षाभावं श्लोकत्रय्या वदन् कासांचित्स्वज्ञातिधर्मपरित्यागमाह—दुहन्त्यः गाः दोहयन्त्यः, तं दोहं दोहनकर्म हित्वाऽभिययुरभिसस्रुः । पयो दुग्धं पात्रस्थं चुल्ल्यामधिश्रित्याध्यारोह्य एतत्काथमप्रतीक्षमाणाः । काश्चित्संयावं गोधूमकणान्नं पक्वमप्यनुद्वास्या नवतार्य ॥ अत्र **तोषिणी**—एवं तत्प्राप्तिमुक्त्वापि परममोहनतद्गीतेनाऽऽवेगान्निजदेहदैहिकाद्युपेक्षयात्मकर्मलोकधर्मादिकं परित्यज्य चलितानां श्लोकत्रय्या विशेषप्रतिपत्तये पुनः प्रस्थानोद्यममेव वर्णयंस्तत्रादौ कासांचित्स्वजा तिकर्मपरित्यागमाह—दुहन्त्य इति । युग्मकमिदम् । दुहन्त्यो गाः, अंतर्भूतण्यर्थत्वाद्दोहयन्त्य इत्यर्थः । अभिययुः वेणुगीताभिमुखं ययुः । काश्चिदित्यादिकं बहुषु यूथेषु कासांचिदेकक्रियासंघटनात् ‘ वनिताशतयूथपः ’ इति वक्ष्यमाणत्वात् । दोहं दोहनं दुग्धं वा । तथाऽभियाने हेतुः—समुत्सुकाः कालविलंबसहनाद्यसमर्थाः । एष हेतुरग्रेपि सर्वत्रानुवर्त्यः । अपरा इत्यस्य पूर्वेण परेणाप्यन्वयः, एवमग्रेपि । अन्यत्तैः । यद्वा—पयश्चुल्ल्यामधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः ॥ शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योऽपास्य भोजनम्॥६॥लिंपंत्यः प्रमृजंत्योऽन्या अंजंत्यः काश्च लोचने॥
व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ॥७॥ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ॥ ८ ॥

लीस्थं चुल्ल्यामधिश्रित्यैतत्क्वाथमप्रतीक्षमाणाः काश्चिद्ययुः।संयावं गोधूमकणान्नं पक्वमनुद्वास्य अनुत्तार्य॥५॥६॥अन्याः प्रमृजंत्योंगोद्वर्तनादि कुर्वंत्यः।काश्च काश्चित्।कृष्णतुष्टयर्थं कर्म तदासक्तमनसामन्यथा कृतमपि फलत्येवेति द्योतयन्नाह।व्यत्यस्तेति।स्थानतः स्वरूपतश्चोर्ध्वाधोधारणेन विपर्ययं प्राप्तानि वस्त्राभरणानि यासां ताः॥७॥न च कृष्णा

श्रित्यानुद्वास्य पक्वमपि ततोऽनवतार्य संयावश्चाधिश्रित्यानुद्वास्येति ॥ ५ ॥ परिवेषयन्त्यः भुंजानानां पात्रेषु भोक्तव्यं विन्यस्यन्त्यः । सुतान् पयः क्षीरं पाययंत्यः । स्तनपानं कारयन्त्य इत्यर्थः । शुश्रूषंत्यः पादसंवाहनादिना । अश्नंत्यः भुंजानाः । अपास्य हित्वा ॥ * ॥ स्त्रीमात्रधर्मत्यागमाह—परिवेषयन्त्यः । तत् परिवेषणम् । पतीनुष्णोदकप्रदानादिना शुश्रूषन्त्यः ॥ अत्र **तोषिणी**—एवं कासांचित्सायंतनमुख्यकर्मत्रयत्यागमुक्त्वा तत्रैव कासांचिल्लोकधर्मत्यागं पादत्रय्या वदंस्तत्रादौ कासांचित्सामान्यबंधुभृत्यादिपरित्यागमाह—परीति पादेन । परिवेषयन्त्यः बंधुभृत्येभ्य इति शेषः । तत्परिवेषणं हित्वा ययुरिति पूर्वेणैवान्वयः । अतिस्नेहास्पदपरित्यागमपि कासांचिदाह—पाययन्त्य इति पादेन । हित्वेत्यनुवर्तते वक्ष्यमाणानुसारेण । भगिनीयातृपुत्रादीन् हित्वा अन्यथा रसाभासापत्तेः । एवं लोकपरित्यागमुक्त्वा धर्मपरित्यागमाह—शुश्रूषंत्यः शुश्रूषमाणाः । स्नानाद्यर्थोष्णोदकार्पणादिना सेवमानाः । कासांचिद्देहापेक्षात्यागमाह—अश्नन्त्य इति । अश्नन्त्यः भुंजानाः । अनेन तत्प्रेमाविष्टेषु दैहिकशुद्ध्यशुद्धिविचारो नास्तीति गम्यते । अत्रैवं संदर्भः—शिशून्भगिनीयातृपुत्रादीन् 'पयो गवां सुतान् स्तनम्' इत्युक्तेरालंबनवैरूप्यात्, 'सर्वाः शरत्काव्यकथारसाश्रयाः' इति वक्ष्यमाणरसाश्रयविरोधाच्चेत्याह—शुश्रूषंत्य इत्यंतर्गृहरीतिकाः काश्चिदेव ज्ञेयाः, अन्यासाम् 'यत्पत्यपत्यसुहृदाम्' इत्यादिना तदस्वीकारादिति ॥ ६ ॥ तदासक्तमनसां कृष्णासक्तचेतसाम् । स्थानतो विपर्ययः पादभूषणं बाह्वोर्बाहुभूषणं पादयोः । उपर्यंगावरकमधोंगेऽधोंगावरकमूर्ध्वांगे इति । स्वरूपतो विपर्ययः अधोवस्त्रस्योर्द्ध्वभागेन धृतिरूर्द्ध्ववस्त्रस्याधोभागेन । एवं भूषणेष्वपि ज्ञेयम् ॥ * ॥ कासांचिदावश्यकदैहिकवेषत्यागमाह—लिंपन्त्यः देहेऽनुलेपं चंदनादिना कुर्वत्यः । प्रमृजंत्यः उद्वर्तनादिकं कुर्वत्यः । कासांचिदावेगवशाद्देहावयवविशेषस्यापि परिचयो नाभूदित्याह—व्यत्यस्त्येति । विभ्रमाख्यानुभावोयम् । तदुक्तम्—"वल्लभप्राप्तिवेलायां मदनावेशसंभ्रमात् । विभ्रमो हारमालादिभूषास्थानविपर्ययः ॥" इति । अत्र **तोषिणी**—कासांचिच्चाहरहस्तत्प्रत्याशया 'विरहेऽप्यंगेष्वाभरणं करोति वल्लभ—' इति गीतगोविन्दरीत्या श्रीभगवत्प्रेमविलषितस्यापि निजांगवेषस्य परमोत्कंठया परित्यागमाह—लिंपन्त्य इत्यादिना । लिंपन्त्योंगरागं कुर्वत्यः । लेपनादिकमप्यपास्येति ज्ञेयम् । अन्या इत्यस्य लिंपन्त्य इत्यादिपदद्वयेनान्वयः । तत्रैव हेतुं दर्शयन् किं वक्तव्यं दैहिकदेहाद्यपेक्षापरित्यक्तेति कासांचिद्देहावयवविशेषाननुसंधानं जातमिति व्यनक्ति—व्यत्यस्त्येति । पूर्वोक्तसर्वत्यागानुभावकस्यौत्सुक्यस्य विभ्रमाख्योयमनुभावः । तल्लक्षणं पूर्वमुक्तमेव । अनेन तद्विधानां प्रेम यथा भगवतोऽपेक्षितं न तथा वेशादीति गम्यते । किं तु, पश्चात्तेनैव परिहितस्य स्वयं तथात्वपरिधापितामिति ज्ञेयम् । एवं दोहनादीनामन्येषामवश्यापेक्ष्यत्वेन यथोत्तरं श्रैष्ठ्यमूह्यम् । तदेवं सर्वा अपि कृष्णस्यांतिकमाभिययुः प्रस्थितवत्यः ॥ ७ ॥ हरिपरायणानां सर्वविघ्नहानिरित्याह—न चेति । प्रभवन्ति समर्था भवंति । पतिभिः पत्नीशुभाशुभभागित्वाद्वार्यमाणा धर्मोपदेशेन हस्तादिना वा, स्नेहात्पितृभिः, दुष्कीर्तिभयात्स्नेहाच्च भ्रातृभिः, कुलदोषशंकया बन्धुभिरिति । "रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके । अभावे ज्ञातयस्त्वेवम्" इति स्मृतेश्चत्वारो रक्षकाः । प्रायः पुत्रानुत्पत्तेस्तेऽत्र नोक्ता इति भावः । गोविन्देनापहृत आत्मा जीवाख्यो यासामिति । निवृत्तौ जीवनेन विच्छेदः स्यादिति जीवनार्थं गता इति भावः । मोहिता मोहावेशवशादपि निवृत्तिज्ञानशून्या बभूवुरिति भावः ॥ * ॥ ननु ताः प्रेमप्राबल्यात्सर्वापेक्षां तत्यजुरित्युचितमत्र तासामपेक्षां तत्पत्यादयः कथं तत्यजुस्तत्राह—ताः कुलवध्वः पतिभिः कुलकन्याश्च ताः पित्रादिभिर्वार्यमाणा न न्यवर्तंत। तत्र हेतुः—गोविन्देति । भयलज्जादीनां का वार्ता तासामात्मनामपि गोविन्देनापहृतत्वात । मोहिताः मूर्छिता इति, सूत्रसंचारितपञ्चालिका इवेत्यर्थः । पत्यादिभिर्गतप्राणानामपि भार्यादिदेहानामप्रतिष्ठाभयादेवान्यत्र सञ्चारो न सह्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ॥ कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ९ ॥

क्रुष्टमनसां विघ्नाः प्रभवंतीत्याह । ता वार्यमाणा इति ॥ ८ ॥ न लब्धो विनिर्गमो याभिस्ताः प्रागपि तद्भावनायुक्तास्तदा नितरां दध्युरि

इति चेत्—सत्यम् । विप्रतिपत्तिरियं योगमाययैव समाहिता ज्ञेया । तच्च समाधानं तयैव कल्पितानां तत्क्षण एव तादृशगोपीनां स्वस्वभार्यादिकत्वेन प्रत्यायितानां स्वस्वगृहान्प्रति पत्यादिभिः परावर्त्तनमेव ॥ अत्र **तोषिणी**—अपि ताः पत्यादिभिः क्व नु रात्रौ बहिर्गम्यत इत्यादिनिर्बन्धेन मुहुर्वार्यमाणा अपि न न्यवर्तंत, किन्तु ययुरेवेत्यर्थः । कुतः—मोहिताः हतविवेकाः । तत्कुतः—गोविन्देनापहृत आत्मा चित्तं यासां ताः । अयं पत्यादीनामपि शैथिल्ये हेतुर्ज्ञेयः, तद्भक्तिमात्रस्य सर्वविघ्नापहारिप्रभावत्वात् । तत्तदन्तिकवर्तिभिः पतिभिः काश्चित्पित्रादिभिश्च काश्चन, तत्र च पित्रादिभिरविवाहिताः स्वत्रासिन्यश्चेति "रक्षेत्कन्यां पिता प्रौढां पतिः पुत्रस्तु वार्द्धके । अभावे ज्ञातयस्त्वेवं न स्वातंत्र्यं क्वचित्स्त्रियः ॥" इति स्मृतेः ॥ ८ ॥ अंतर्गृहं गृहमध्यं तत्र गतास्तत्र निरुद्धाः काश्चिन्महालक्ष्म्यंशभूताः । विनिर्गमो बहिर्गमनम् । यद्वा—न लब्धोऽन्यगोपीवत् वीनां पक्षिणामिवातिशीघ्रं निःसरणं याभिः । यद्वा—वेः पक्षिणोऽपि निर्गमो यस्माच्छिद्रात्तदपि न लब्धं याभिस्तदाधिकं कृत्वा तस्करावेशवन्निस्सरणार्थमिति भावः । तस्य कृष्णस्य भावना:भक्तिसंस्कारस्तया युक्ताः । प्राक् वेणुनादश्रुतेः पूर्वमपि । तदा वेणुध्वनिश्रवणक्षणे । इत्यर्थ इति । तच्छ्रवणस्य तदाविर्भावबोधकत्वेन ध्यानहेतुतेत्यर्थः ॥ * ॥ अत्रो**ज्ज्वलनीलमण्युक्त**रीत्या विविच्यते—गोप्यस्तावद्द्विविधाः—नित्यसिद्धाः साधनसिद्धाश्च । साधनसिद्धाश्च द्विविधाः—यौथिक्योऽयौथिक्यश्च । यौथिक्यश्च द्विविधाः—श्रुतियूथभूतत्वाच्छ्रुतिचर्याः, ऋषियूथभूतत्वादृषिचर्याश्च । ततश्चासां चतुर्विधत्वमुक्तं पाद्मे—"गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः । देवकन्याश्च राजेंद्र न मानुष्यः कथंचन ॥" इति । गोपीत्वेनैव मानुषीत्वे लब्धेऽपि न मानुष्य इति निषेधस्तासां प्राकृतमानुषीत्वाभावं ज्ञापयति । अत्र गोपकन्यका एव नित्यसिद्धास्तासां साधनाऽश्रवणात् । गोपीत्वे सत्यपि कात्यायन्यर्चनस्य तु साधनत्वं नरलीलत्वमेव ज्ञापयति, गोपीत्वस्य सिद्धत्वादेवेति तत्प्रसंगे एव प्रपञ्चितम् । तासां नित्यसिध्यत्वे 'आनन्दचिन्मयरसप्रतिभाविताभिः' इति ब्रह्मसंहितोक्त्या तासां ह्लादिनीशक्तित्वप्रतिपादनात्, 'ह्लादिनी या महाशक्तिः' इति बृहद्गौतमीयाच्च, ताभिस्सह कृष्णस्य रमणस्यानादित्वाच्च, दशाष्टादशाक्षरादिमंत्रेषु तासां निर्देशात्, तन्मंत्रोपासनानां तद्विधायकश्रुतीनां चानाद्यन्तकालभावित्वाच्च । 'संस्तुवन्त्वमरास्त्रियः' इति प्रमाणावगतानां देवकन्यानां नित्यसिद्धगोपिकांशभूतत्वं व्याख्यातमुज्ज्वलनीलमणौ । श्रुतिचरीणां साधनसिद्धत्वम् "कंदर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः । कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयः ॥ यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजान्ति रमणं मत्वा चिकीर्षाऽजनि नस्तथा ॥" इत्यादिबृहद्वामनवचनेभ्योऽवगतम् । ऋषिचरीणाञ्च "गोपालोपासकाः पूर्वमप्राप्ताभीष्टसिद्धयः" इत्युज्ज्वलनीलमण्युक्तानां तथाभूतत्वम् । "पुरा महर्षयः सर्वे दंडकारण्यवासिनः।दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात् ॥" इति पाद्मोत्तरखंडात् । अत्र रामं दृष्ट्वा हरिं भोक्तुमैच्छन्निति रामसौंदर्यदर्शनेन स्वोपास्यस्य हरेर्गोपालस्य स्मरणात्तमेव भोक्तुमैच्छन्नित्यर्थः । लज्जया तु साक्षात्तं न वृतवंतः । ततश्च कल्पवृक्षस्येवावदतोऽपि रामस्य प्रसादात्तेषामभीष्टसिद्धिर्जातेत्याह—ते सर्वे इति । हरिं कामेन संप्राप्य इत्यनुसंहितं फलम्, ततः कामादेव हेतोर्भवार्णवात्संसारान्मुक्ता इत्यनुसंहितं फलम् । अत्र 'मातरः पितरः पुत्राः' इति 'यत्पत्यपत्यसुहृदामनुवृत्तिरंग' इति 'पतिसुतान्वयभ्रातृबांधवान्' इत्याद्यग्रिमग्रंथदृष्टेरपत्यवत्यो गोप्य एवांतर्गृहनिरुद्धा बभूवुरिति श्रीकविकर्णपूरगोस्वामि कृतदशमटीकायां दृष्टमतस्तदनुसारेण सार्वत्रिकं मूलार्थमव्याकोप्यैवं व्याख्यायते । गोपालोपासका ऋषयस्तु श्रीराममूर्तिमाधुरीदर्शनाद्रागमयभक्तेर्निष्ठारुच्यासक्तिरत्यंकुरभूमिका आरूढाः सम्यगपरिपक्वकषाया अपि श्रीयोगमाययादेव्या गोकुलमानीय गोपीगर्भे जनिताः कन्यका बभूवुः । तासामेव मध्ये काश्चिन्नित्यसिद्धगोपीसंगभूम्ना वयःसंधिदशामारभ्यैव लब्धपूर्वानुरागाः स्फूर्तिप्राप्तकृष्णांगसंगाः दग्धसम्यक्कषायाः प्रेमस्नेहादिभूमिका आरूढा गोपैर्व्यूढा अपि योगमाययैव तदंगस्पर्शदोषाद्रहिताश्चिन्मयदेहीभूताः कृष्णोपभुक्तास्तस्यां रात्रौ वेणुवादनसमये पतिभिर्वार्यमाणा अपि योगमायासाहाय्यप्रसादान्नित्यसिद्धगोपीभिः सहिता एव प्रेष्ठमभिसस्रुः । काश्चित्तु नित्यसिद्धादिगोपीसंगभाग्याभावादलब्धप्रेमत्वाददग्धकषाया गोपैर्व्यूढा गोपोपभुक्ता अपत्यवत्यो बभूवुः । ताः खलु तदनंतरमेव नित्यसिद्धादिगोपीसंगभूम्ना कृष्णांगसंगस्पृहोद्रेकात्पूर्वरागवत्यस्तासां कृपापात्रीभवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्योऽपि कृष्णांगसंगायोग्यदेहत्वेन योगमायासहाय्याकरणात्पतिभिर्वारिताः कृष्णमभिसर्तुमक्षमा महाविपद्ग्रस्ताः पतिभ्रातृपुत्रादीन्स्वप्राणवैरित्वेन पश्यन्त्यो मरणदशायामुपस्थितायां सत्यां यथान्या मात्रादिबंधुजनं स्मरन्ति तथैव स्वप्राणैकबन्धुं कृष्णं सस्मरुरित्याह–अन्तारिति । न लब्धो विनिर्गमो गतिर्याभिस्ता इति पतीनां द्वार्येव सतर्जनं सयष्टिकमुपविष्टत्वादिति भावः । सदैव तद्भावनया युक्ता अपि तदानीं दध्युः–हाहा प्राणैकबन्धो वृन्दावनकलानिधे जन्मान्तरेऽपि त्वत्प्रेयसीभूयासमस्मिन्नन्तकाले त्वन्मुखचन्द्रं नाऽपश्यं, भवतु मनसापि पश्यामीति प्रत्येकं स्वगतमनुलपन्त्यो मुद्रितलोचनाः सत्यो नितरां दध्युः ॥ अत्र **तोषिणी**–यदि च तास्तादृश विघ्नेन वारिता अभविष्यंस्तर्हि सद्य एव देशमीं दशामिव दशामगमिष्यन्निति तासां सर्वासामेव भावविशेषं दृष्टान्तेन प्रदर्शयंस्तासां प्रस्थितवतीनामेव मध्ये कासांचिदवस्थाविशेषमाह–अंतारिति त्रिभिः । अयमर्थः–श्रीकृष्णस्य व्रजप्रेयस्यस्तावद्द्विविधाः–नित्यसिद्धाः साधनासिद्धाश्च । तत्रैकासां नित्यसिद्धात्वमष्टादशाक्षरादावाभिर्विशिष्टत्वेनैव तदाराधनविधानाद्व्यक्तम्, तच्छ्रुतीनां तदाराधनानाद्यनाद्यनंतभावितत्वात् । अतो ब्रह्मसंहितायाम्–‘ चिन्तामणिप्रकरसद्मसुकल्पवृक्षलक्षावृतेषु ’ इति, ‘आनन्दाचिन्मयरसप्रतिभाविताभिः’ इति, “ श्रियः कान्ताः कान्तः परमपुरुषः ” इत्येता एव तदीयलक्ष्मीत्वेनोक्ताः । तत्र च श्रीराधिकाया वैशिष्ट्यं बृहद्गौतमीये–“ देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा ॥” इति । अत एव ऋक्परिशिष्टे च परस्परमव्यभिचारित्वं प्रोक्तम्–“राधया माधवो देवो माधवेनैव राधिका । विभ्राजन्ते जनेषु–” इति । अतो मात्स्यादौ–“रुक्मिणी द्वारवत्यास्तु राधा वृन्दावने वने ” इति शक्तित्वसाधारण्येनानयोर्गणनेऽपि वैशिष्ट्यं ज्ञेयम् । ब्रह्माण्डे तु श्रीकृष्णस्वरूपत्वं कृष्णस्याप्याराध्यत्वं चोक्तं ब्रह्मणा–“राधा कृष्णात्मिका नित्यं कृष्णो राधात्मको ध्रुवम् । वृंदावनेश्वरी राधा राधैवाराध्यते मया ॥ ” इति । अथावरासां साधनसिद्धत्वं यथा पाद्मोत्तरखंडे–“पुरा महर्षयः सर्वे दंडकारण्यवासिनः । दृष्ट्वा रामं हरिं तत्र भोक्तुमैच्छन्सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । हरिं संप्राप्य कामेन ततो मुक्ता भवार्णवात् ॥” इति । गोकुल इत्यस्य हरिं संप्राप्येत्यनेनाप्यन्वयात् ‘ ये यथा मां प्रपद्यन्ते ’ इति न्यायाच्च । महर्षयः पूर्वं तादृशभावेन श्रीकृष्णोपासका इत्यर्थः । अतो रामं दृष्ट्वेति सारूप्येण जातस्वोपासनसंस्कारा हरिं स्वोपास्यं श्रीकृष्णमेवोपभोक्तुमैच्छन्, लज्जया तु साक्षान्न वृतवन्त इति । ततश्च कल्पवृक्षस्येवावदतोपि श्रीरामस्य प्रसादात्तेषामिष्टसिद्धिर्जातेत्याह–ते सर्वे इति । गोकुले गर्भतः स्त्रीत्वमापन्ना गोकुल एव समुद्भूता गोकुल एव च हरिं श्रीकृष्णं कामेन स्ववासनानुसारेण संप्राप्य तस्मिन्नंतर्गृह एव स्वयमाविर्भूतं लब्ध्वा ततस्तदनंतरमेव भवार्णवान्मुक्ता इति । न च वक्तव्यं गोकुलजातानां प्रापञ्चिकदेहादित्वं न संभवतीति, अवतारलीलायाः प्रापञ्चिकमिश्रत्वात् । श्रीदेवकीदेव्यामपि षड्गर्भसंज्ञकानां जन्म श्रूयत इति, ‘कदाचिच्छ्रुतयो गोप्यो जाताः’ इति बृहद्वामनपुराणप्रसिद्धिः, आदिपुराणीयवृन्दावनमाहात्म्येप्येतद्वृत्तं स्फुटमस्ति । तत्रत्यवाक्यजातमिह विस्तरभिया नोक्तम् । अत एव यथा व्याख्यास्यते “स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः” इति । ‘गायत्री तासु जाता’ इति पाद्मे सृष्टिखण्डे । यथा ब्रह्मणा गोपकन्यारूपाया गायत्र्या उद्वाहे गोपेषु श्रीविष्णुवरः “मया जाता ततः कन्या दत्ता चैषा विरिञ्चये । युष्माकं च कुले चाहं देवकार्यार्थसिद्धये ॥ अवतारं करिष्यामि मत्कान्ता तु भविष्यति ।” इति । अतः ‘तत्प्रियार्थं संभवन्तु सुरस्त्रियः’ इत्यत्रापि तथा व्याख्यातम् । अत एव तासां चतुर्विधत्वमुक्तं पाद्मे–“गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः । देवकन्याश्च राजेन्द्र न मानुष्यः कथंचन ॥” इति । अत्र गोपकन्यका एव नित्याः ‘न मानुष्यः कथञ्चन’ इति प्राकृतमनुष्यतानिषेधात् । तासु च पाद्मोत्तरखंडे निर्दिष्टानामन्तर्गृहगता इत्युक्तानामप्येकत्वमुक्तत्वसादृश्येन लब्धानां लभ्यते । एता एव ‘शुश्रूषन्त्यः पतीन्काश्चित्’ इति प्रोक्ता ज्ञेयाः तासां दोहनादिपृथक्कर्मानुकेरंतर्गृहगतत्वस्य पतिशुश्रूषायां तात्पर्याच्च । तथा च सति याः काश्चन गोकुले समुद्भूताः साधनवशात्सिद्धपूर्णभावाः न तु सिद्धदेहाः नितरामन्या इव नित्यसिद्धाः पतिशुश्रूषणार्थमंतर्गृहगता गृहमध्यस्थिता एव पत्यादिभिः साग्रहद्वारादिनिरोधान्न लब्धो विशेषेण केनापि प्रकारेण निर्गमो याभिस्ताः । अत्र तासां साक्षाच्छ्रीगोविन्दसंगमे तादृशदेहस्थितेरेव विघ्नत्वात्पूर्ववत्तद्भक्तेरतिशैथिल्यविधानादावप्रवृत्तिरिति ज्ञेयम् । अलब्धनिर्गमत्वादेव तद्भावनायुक्तास्तस्मिञ्छ्रीकृष्णे समुत्कंठितचित्ताः सत्यः कृष्णं निजचित्ताकर्षकं तमेव दध्युर्ध्यातवत्यः ।

१ दशमीं मरणरूपाम् “दृष्टिप्रेम पुरा भ्रमोऽथ मदनः प्रोक्तोऽथ संकल्पको निद्रोच्छित्तिरतः शरीरतनुता लज्जाविनाशस्ततः । वैराग्यं विषयेष्वथो निगदिते उन्मादमूर्च्छे ततो मृत्युः स्यादिति पण्डितैः स्मरदशा उक्ता दशैताः क्रमात् ॥” इत्युक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः ॥ १० ॥

त्यर्थः ॥ ९ ॥ किं च तदानीमेव तं परमात्मानं श्रीकृष्णं ध्यानतः प्राप्ताः सत्यो गुणमयं देहं जहुरित्याह श्लोकद्वयेन । दुःसहेति । ननु कथं जहुः परमात्मेति ज्ञानाभावा

तत्रानुभावमाह—दुःखविशेषेण ध्यानविशेषेण च मुद्रितनेत्राः । यद्वा—मीलितमंतर्हितं लोचनमन्याशेषज्ञानं यासां ताः ॥ ९ ॥ न केवलं दध्युरेव किन्तु तमेवापुरित्याह—किं चेति । तदानीमेव ध्यानसमकालमेव । गुण
मयम् त्रिगुणकार्यम् । ननु देहत्यागोऽस्तु यथाकथञ्चिद्भेदेन रूपेण तत्संगस्त्वज्ञानामतिदुःशक इत्याशंकते—नन्विति । वस्तुनो वह्न्यादेः शक्तिः दाहिकादिरूपा । बुद्धिम् अयमग्निर्दाहक इत्येवंरूपज्ञानवंतमेव दहति,
ज्ञानं नापेक्षते नेच्छति । अन्यथा मत्वापि जलमिदमित्येवं ज्ञात्वापि यथा जलबुद्ध्या पीतामृतो जरामृत्युवर्जितो भवति तद्वदिति ज्ञेयम् । इति भाव इति तात्पर्यम् । अन्यथा पीताऽमृतोऽपि मृतो भवेदिति । "अवश्य
मेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इत्यादिस्मृतिमनुसृत्य पुनराशंकते—नन्विति । तथापि ज्ञाने सत्यपि वस्तुशक्त्या तत्प्राप्तिरस्तु देहं कथं जहुरिति ज्ञेयम् । तत्र प्रश्ने । सद्यः तत्क्षणमेव । किञ्च, बंधनध्वंसोऽपि प्रारब्ध
पुण्यपापप्रणाशेनैव दृष्टस्सचात्र कथमिति शंकते—नन्विति । अत्रोत्तरम्—दुःसहेति । दुःसहः सोढुमशक्यो यः प्रेष्ठस्य परमात्मनः श्रीकृष्णस्य विरहः सांसारिको वियोगस्तेन तीव्रोऽत्युत्कटस्तापो ज्वरानुभवस्तेन धुतानि निरस्ता
न्यशुभानि पापानि । तदप्राप्तिरूपं यत्परमदुःखं तद्भोगेनानुभवेन । इत्यर्थ इति—दुःखभोगेनैव पापं क्षीयत इति तात्पर्यम् । पुण्यक्षयः कथमित्याकांक्षायामाह—तथेति । यतः परमात्मप्राप्तिरेव गुणमयदेहत्यागे हेतुरतो हेतोः ।
यदि कश्चिदनारब्धफलानां कुतो नाश इत्याशंकेत तं प्रत्याह—जारेति । जारः उपपतिः पत्युरप्यधिकप्रियो भवति, तं कृष्णं परमात्मानं नारायणमेव संगताः सम्यग्ज्ञातवत्यः । गत्यर्थानां ज्ञानार्थताप्रसिद्धेः । अनेन बिंबभू
तहरिज्ञानेनारब्धकर्मणामपि नाश इति सूचितम् । तदधिगमः "उत्तरपूर्वाघयोरसंश्लेषविनाशौ" इति सूत्रात् । "तस्य सुहृदः साधुकृत्यां द्विषंतः पापकृत्याम्" इति श्रुतेः । तस्य ज्ञानिन इत्यर्थः । किं चाहिकंचुकवत्त्यक्त
देहानामप्यंतर्धापनं योगमायया कृतं यावदब्दमघासुरशरीरांतर्धापनवत्, तथा रोधकानां विस्मृतिश्च जनिता, अन्यथा रोधनादिकृतो लोकापवादो दुर्वारः स्यादिति ॥ * ॥ अत्र गोपीनां प्राप्यमतिरहस्यं वस्तु बहिरंग
लोकेभ्यो गोपयंस्तान्प्रति बाह्यमर्थमंतरंगान्भक्तिसिद्धान्तविज्ञान्प्रति स्वाभीप्सितमाभ्यंतरमेवार्थं ज्ञापयंस्तंत्रेणाह—दुःसहेति । तत्र बहिर्मुखान्प्रति ताभ्यः कृष्णो मोक्षं ददावित्याह—दुःसहो यः प्रेष्ठविरहस्तेन तीव्रतापस्तेन धूतानि गतानि
अशुभानि यासां ताः, ध्यानेन प्राप्तस्याच्युतस्याश्लेषेण या निर्वृतिरानंदस्तेन क्षीणं मंगलं पुण्यं यासां ताः । अतः प्रक्षीणप्रारब्धबंधना जारबुद्ध्याऽपि तमेव परमात्मानं प्राप्ता देहं जहुरिति । अन्तर्मुखान्प्रति तु तदानीं स्वप्रेष्ठविरहसंयोगो
त्थानि दुःखसुखान्यपरिमितानि प्राप्य लब्धमनोरथा एव ताः क्रमेण बभूवुरित्याह—दुःसहेन प्रेष्ठविरहेण यस्तीव्रतापस्तेन धुतानि कंपितीकृतानि अशुभानि याभिस्ताः । यासां प्रेष्ठविरहतापस्य तीव्रतां वीक्ष्य कोटिब्रह्मां
डस्थवाडवानलमहाकालकूटादिरूपाणि परःसहस्राण्यपि अशुभानि स्वतीव्रताहंकारं परित्यज्य स्वपराजयबुद्ध्या चकंपिरे इत्यर्थः । ध्यानेन प्राप्तः स्फूर्त्याऽऽगतो योऽच्युतस्तेन तदैवोद्भूतस्य प्रेमपूर्णचिन्मयस्य तादृशस्वभावा
भिमानादिमतो देहस्य य आश्लेषस्तेनाश्लेषेण या निर्वृतिस्तया क्षीणानि कृशीभूतानि मंगलानि प्राकृताऽप्राकृतानि यासां ताः । यासां स्फूर्तिप्राप्तं प्रेष्ठाश्लेषोत्थसुखं वीक्ष्य कोटिब्रह्मांडगतविषयसुखनिर्विषयब्रह्मानुभवसुखसह
स्राणि मंगलशब्दवाच्यानि क्षीणानि । यदपेक्षया निकृष्टान्येव बभूवुरित्यर्थः । भगवद्विरहसंयोगोत्थदुःखसुखाभ्यां प्रारब्धपापपुण्यानि नष्टानि तेषां स्वफलभोगैकनाश्यत्वादिति व्याख्यातुं वैष्णवानां मते न युज्यते, भगवद्वि
रहसंयोगयोः पापपुण्यफलत्वाभावात् । तादृशानां प्रारब्धनाशस्तु भजनदशायामेवानर्थनिवृत्तिभूमिकारूढानामित्याहुः । ततश्च तमेव परमात्मानं परमप्रेमास्पदं जारबुद्ध्यातिनिकृष्टयापि संगताः अत्युत्कृष्टपतिबुद्धिमतीभ्यो
रुक्मिण्यादिभ्योऽपि सकाशात्सम्यक् प्राप्ताः, पतिबुद्धेः सकाशादपि जारबुद्धौ 'या दुस्त्यजं स्वजनमार्यपथञ्च हित्वा' इत्युद्धववाक्यनिर्धारितान्निरंकुशप्रेमोत्कर्षात् । तथाऽस्मिन्नवतारे निकृष्टवस्तून्यप्युत्कृष्टीकुर्वती लीला दृश्यते ।
यथा महाराजराजेश्वरलीलातः सकाशादपि "विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये" इति भीष्मोक्तेः पार्थसारथित्वलीलाया उत्कर्षः, तथोत्कृष्टाच्छांतरसादपि निकृष्टस्य शृंगाररसस्य तत्रापि दास्यभावा
दप्यौपपत्यभावस्य तथोत्कृष्टाद्रत्नालंकारादपि गुंजागैरिकशिखिपुच्छादेरुत्कर्षो दृष्ट एवेति । संगताः काश्चिद्योगमायाकृतानुकूल्यान्निरोधमुक्ता अपि तस्यामेव रात्रौ रासविहारिणं तं प्राप्ताः, काश्चिदन्यस्यामपि । ननु पुरुषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दित्याशंक्याह । जारबुद्ध्याऽपीति । न हि वस्तुशक्तिर्बुद्धिमपेक्षते। अन्यथा मत्वापि पीतामृतवदिति भावः। ननु तदपि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह । सद्यः प्रक्षीण
तरोपभुक्तदेहाभिस्ताभिः सह भगवद्विलासो न युज्यत इति तत्राह—जहुरिति । देहमिति जात्यपेक्षयैकत्वम् । तस्य देहस्य योगमाययैवालक्षितमंतर्द्धापनमित्येके । अन्ये त्वेवमाहुः—अत्र हेयो देहो गुणमय एव भवत्यतो
गुणमयमिति । विशेषणस्याधिक्यात्तासां देहा वेणुवादनात्पूर्वं द्विधाभूता गुणमयाश्चिन्मयाश्चासन्निति बुध्यते । तत्र ये गुणमयाः स्वपत्युपभुक्ता देहास्तानेव जहुः । अयमत्र विवेकः—गुरूपदिष्टभक्त्यारंभदशात एव भक्तानां
श्रवणकीर्तनस्मरणदंडवत्प्रणतिपरिचर्यादिमय्यां शुद्धभक्तौ श्रोत्रादिषु प्रविष्टायां सत्याम् ‘ निर्गुणो मदपाश्रयः ’ इति भगवदुक्तेर्भक्तस्स्वश्रोत्रादिभिर्भगवद्गुणादिकं विषयीकुर्वन्निर्गुणो भवति, व्यावहारिकशब्दादिकमपि विषयीकुर्व
न्गुणमयोपि भवतीति भक्तदेहस्यांशेन निर्गुणत्वं गुणमयत्वं च स्यात् । ततश्च ‘ भक्तिः परेशानुभवो विरक्तिः ’ इति, ‘तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ’ इति न्यायेन भक्तिवृद्धितारतम्येन निर्गुणदेहांशानामाधिक्यतारतम्यं
स्यात्, तेन च गुणमयदेहांशानां क्षीणत्वतारतम्यं स्यात् । संपूर्णप्रेमण्युत्पन्ने तु गुणमयदेहांशेषु नष्टेषु सम्यङ् निर्गुण एव देहः स्यात्, तदपि स्थूलदेहपातस्तु बहिर्मुखमतोत्थताभावार्थं भक्तियोगस्य रहस्यत्वरक्षार्थञ्च भग
वतैव मायया प्रदर्श्यते यथा मौसललीलायां यादवानाम् । क्वचित्तु भक्तियोगोत्कर्षज्ञापनार्थं न प्रदर्श्यते च यथा ध्रुवादीनाम् । अत्र प्रमाणमेकादशे पञ्चविंशतितमाध्याये श्रद्धादयो निर्गुणा गुणमयाश्चेति प्रदर्शिताम्—“येनेमे
निर्जिताः सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ ” इति अनेन भक्त्यैव गुणमयवस्तूनां निर्जयो नाश एवोक्तो भगवता । अत एव धुतानि विधूतानि रांधितानि अशुभानि गुणमयशरी
राणि यासां ता इति । आश्लेषनिर्वृत्याऽक्षीणानि विवर्द्धितानि मंगलानि चिन्मयशरीराणि यासां ता इत्यप्यर्थश्चिकीर्षितो भवति । अतः प्रक्षीणबंधनाः अविद्याबंधात्पत्यादिवारणाच्च योगमायानुकूल्यं प्राप्य विच्युता इत्यर्थः ।
मरणवशाद्देहपात एव तासामिति तु न व्याख्येयम् “ या मया क्रीडता रात्र्यां वनेस्मिन्व्रज आस्थिताः । अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिंतया ॥ ” इति भगवद्वाक्येन कल्याण्य इति पदोपादानात् । पतिकृत
वारणान्मद्विरहसन्तापाच्च स्वदेहांस्तदा जिहासूनामपि तासां परममंगलरासोत्सवारंभे मरणस्यामंगलस्य सदनभिमतत्वात्ताः कल्याणवत्य एवाभवन्निति भगवदभिप्रायात्, तथा “ ता ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृतीः ”
इति शुकवाक्याच्च । ता ऊचुः याः पूर्वमलब्धरासा अन्तर्गृहनिरुद्धा आसन्निति । तेन मरणं विनैव ता गुणमयान्देहाञ्जहुरिति । विरहतीव्रतापरंधितास्तासां गुणमयदेहा गुणमयत्वं परित्यज्य चिन्मयत्वं ध्रुवादीनामिव
प्रापुरेव । एवं देहत्याग इत्यर्थोऽवगम्यते, तथाऽत्र ‘ अलब्धविनिर्गमाः ’ इति, तत्र व्रज आस्थिताः इति तथाऽत्र ‘ ध्यानप्राप्ताच्युताश्लेष० ’ इति, तत्र ‘ मापुर्मद्वीर्यचिन्तया ’ इति तुल्यार्थतैव । किन्त्वत्र संगता इति
तत्रालब्धरासा इत्यर्थभेददर्शनादेवांतर्गृहनिरुद्धगोपीनां द्वैविध्यं व्याख्यातम् । यथा सप्ताष्टानां फलानां सम्यक्पाकेऽवगते सत्याम्रवृक्षोऽयं पक्कफल इति ज्ञात्वा सर्वाण्येव फलानि वृक्षादवचित्य गृहमानीयन्ते, आनीय च
यानियानि च समुचितकालेन सौरकिरणादिना च सौरूप्यसौरभ्यसौरस्यसौकुमार्यवन्ति राज्ञो भोगार्हाणि रोचकानि जातानि फलानि विचक्षणपरिजनेन परिष्कृत्य समये राज्ञो भोगाय कल्प्यन्ते, यानि तु
अन्तःपक्कानि बहिरपक्कानि सौरूप्यादिगुणरहितत्वादरसनीयानि राज्ञोऽनर्हाणि ज्ञायंते तान्यूष्मविशेषयोगेन परिक्लृप्त्यैव द्वितीयतृतीयदिनादिषु राज्ञे समर्प्यन्ते । तथैव गोकुले जनितानां मुनिचरीणां गोपीनां मध्ये याः प्राकृत
गुणमयशरीरतां परित्यज्य प्रथममेव शुद्धाचिन्मयीभूतशरीरा अजनिषत, ताः पुरुषांतरास्पृष्टाः श्रीयोगमायया नित्यसिद्धादिगोपीभिः सहैवाभिसारिताः, यास्तु बहिर्गुणमयशरीरवत्यस्ता अपि श्रीकृष्णविरहोष्मप्रापणया गुण
मयशरीरभावत्याजनयैव विनष्टपुरुषांतरस्पर्शदोषाश्चिन्मयीभूतशरीराः काश्चित्तस्यां रात्रावेव सर्वासां पश्चादभिसारिताः, काश्चिदीषन्मात्रस्थितकषायाः प्रेक्ष्य विरहौष्म्येणैव तन्निवर्तनार्थं रात्र्यन्तरेष्वभिसारिताः, ततश्च ताः प्राप्त
रासादिविलासा रात्र्यंते नित्यसिद्धगोपीभिः सह पतिगृहमागत्य तदारभ्य पतिसंगतो योगमाययैव रक्ष्यमाणाः पत्यपत्यादिषु ममताशून्याः कृष्णप्रेमातिभरपरिप्लुताः शुद्धपयस्तन्यः स्वापत्यान्यपुष्णत्यो ग्रहग्रस्तत्वेनैव तद्बंधुभिः
प्रतीयन्ते स्मेति सर्वमनवद्यम् । अन्ये तु—अन्तर्गृहनिरुद्धा अपि नाऽपत्यवत्यः अग्रिमग्रंथेषु अपत्यादिशब्दैः सपत्नीपुत्रः प्रोष्यपुत्रो भ्रातृपुत्रो वा लक्षणीय इत्याहुः ॥ अत्र **तोषिणी**—एवं ततश्च सद्य एव श्रीकृष्णेन सह
संयोगं प्राप्ता इत्याह—दुःसहेति युग्मकेन । तत्रोत्कंठापरिणामं दुःसहेत्यर्धेन, ध्यानपरिणामं ध्यानेत्यर्द्धेन । उत्कंठया दुःसहप्रेष्ठविरहः विप्रलंभोत्थो भावस्तेन तीव्रतापस्तेन धुताऽशुभाः । ध्यानेन हेतुना प्राप्ता याऽच्युतस्य
निजभक्तेषु च्युतिराहितत्वेन प्रसिद्धस्याश्लेषनिर्वृतिस्तया क्षीणमंगलाः । अत्र दुःसहशब्देन तीव्रशब्देन च दुःखस्य परा काष्ठा दर्शिता, अच्युतशब्देन निर्वृतिशब्देन च सुखस्य च । अशुभ भगवन्नित्यसंयोगप्राप्तिः प्राचीन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेव परमात्मानं जारबुद्ध्याऽपि संगताः ॥ जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ॥ ११ ॥

बंधना इति । ननु कथं भोगमंतरेण प्रारब्धं कर्म क्षीणं भोगेनैव सद्यः क्षीणमित्याह । दुःसहेति । दुःसहो यः प्रेष्ठस्य विरहस्तेन तीव्रस्तापस्तेन धुतानि गतान्यशुभानि यासां तद प्राप्तिपरमदुःखभोगेन पापं क्षीणमित्यर्थः।तथा ध्यानेन प्राप्ता अच्युतस्य आश्लेषेण या निर्वृतिः परमसुखभोगस्तया क्षीणं मंगलं पुण्यबंधनं यासां ताः अतो ध्यानेन परमात्म

दशायां दुःखजनिका, तद्विरहस्फूर्तिः मंगलं च तद्दशायामेव सुखजनिका । प्राप्तव्यतत्संयोगस्फूर्तिः यावतीभ्यां ताभ्यां वृत्तिभ्यामेव प्रौढभावः साधकः सिध्यति तावत्योश्च तयोः शनैर्भोग्ययोरपि संप्रति युगपदेव भोगो जात इति धूतत्वं क्षीणत्वञ्चोक्तम् ॥ १० ॥ ० ॥ * ॥ ० ॥ अत्र **तोषिण्येव**–अतस्तत्रैव तं श्रीकृष्णमेव संगता मिलिताः । तथा च वासनाभाष्यधृतं मार्कण्डेयवचनम्–"तदानीमेव ताः प्राप्ताः श्रीमन्तं भक्तवत्स लम् । ध्यानतः परमानंदं कृष्णं गोकुलनायिकाः ॥" इति । तयोः शब्दयोः पापपुण्यपर्यायत्वाभावात्, तयोः स्वस्वप्रतिनियतफलदातृत्वात्, पापस्य तु सुतरां भगवद्विरहमयप्रेमस्फोरकत्वाभावात्, "न कर्मबंधनं जन्म वैष्णवानाञ्च विद्यते" इति पाद्मकार्तिकमाहात्म्यानुसारेण तासां सुतरां तत्प्रारब्धजन्मत्वाभावात् । किञ्च, 'गुरुपुत्रमिहानीतम्' इत्यादिन्यायेन प्रारब्धरक्षणारक्षणयोः स्वप्रेमवर्द्धनविदग्धश्रीभगवदिच्छैकमयत्वान्नान्यथा व्याख्या तम् । ननु किं जारत्वेन संगताः नेत्याह–तादृशरागौत्सुक्येन सोपानीकृतया जारबुद्ध्यापि परमात्मानं सर्वांशिपरमस्वरूपत्वेन सर्वेषामपि स्वभावत एव यदुपपत्यादिशब्दवत्पालकत्वेनापि पतित्वे सिद्धे भावविशेषधारिणीनां तासां रमणत्वेनापि पतिरसावितिं पतिरूपमेवेत्यर्थः । रमणत्वालाभेनैव जारबुद्ध्यापि तस्मिन्संगम्यमाने रमणालिप्सायाः प्रगल्भत्वाज्जारत्वस्य तस्मिन्सर्वांशिन्यसंभवात् । 'जिघांसयापि हरये' इत्यादिवज्जारबुद्ध्यापीति हेयतयैव निर्देशात् । प्राचीनस्य पत्युर्देहस्य च त्यागादिति भावः । तथाहि–"पटोलमूले रमणं स्यात्तथा रमणः प्रिये" इति विश्वप्रकाशकोशात्, "धवः प्रियः पतिर्भर्त्ता जारस्तूपपतिः समौ" इत्यमरकोशाच्च रमणपत्यादिशब्द वाच्यजारादिशब्दवाच्ययोर्नैकत्वं मंतव्यम् । किं तु, पूर्वस्य स्वामित्वादुत्तरस्य चोपपतित्वाद्विरुद्धवस्तुत्वमेव । तत्रापि सभ्यशब्दांतरमप्रयुज्य प्रयुक्तस्यासभ्यशब्दशब्दस्य जारशब्दस्य जिघांसाशब्दस्येव निंदातात्पर्यत्वमेव प्रती यते 'जारः पापपतिः' इति त्रिकांडशेषादिकोशाल्लोकाच्च । किन्तु, येन रागेण ता जारभावमयनिंद्यलोकधर्ममर्यादातिक्रममपि कृतवत्यस्तं सूचयित्वा तस्यैव प्रशस्तत्वं दर्श्यते, चेष्टाविशेषसाम्यात । कामतया व्यपदिष्ट त्वेऽपि प्रियानुकूल्यतात्पर्येण प्रेमैकरूपत्वं च । तथा च वक्ष्यते–'यत्ते सुजातचरणांबुरुहं स्तनेषु' इत्यादि । अत एवोक्तं तादृशैरपि–'आसामहो चरणरेणु–' इत्यादौ ' या दुस्त्यजं स्वजन–' इत्यादि । 'एताः परम्' इत्यादौ ' वाञ्छंति यद्भवभियो मुनयो वयञ्च ' इति । एवं हेयांशपरित्यागपूर्वकमहाप्रेमलभनीयश्रीकृष्णलक्षणपरमपुरुषार्थशिरोमणिप्राप्तिर्दर्शिता । तत्रानुषङ्गिकफलमाह–गुणमयञ्च देहं जहुरिति । यतः पूर्वोक्त प्रकारेण सद्यः प्रक्षीणबंधनाः एवं सच्चिदानंददेहप्राप्तिरपि सूचिता । एतदुक्तं भवति–अपिरत्र जारबुद्धेर्हेयत्वम् " जिघांसयापि हरये स्तनं दत्त्वाप सद्गतिम् " इत्यत्र जिघांसयेव व्यनक्ति, गर्हावचनेन तत्तच्छ ब्देनान्वयात । अत्र हेतुः–परमात्मानमिति । न हि परमात्मा तादृशनिंद्यशब्दवाच्यो भवितुमर्हति । तत्र च हेतुः–हरये इति । हरिशब्दोऽत्र कारुण्यादिमहागुणैः सर्वमनोहरतापरः । न ह्येवंभूतो जिघांस्यो भवितुमर्हति । तत्तदनर्हत्वेऽपि सासा च कथञ्चिज्जाता चेत्तर्हि परमात्मत्वाद्धरित्वाच्च सर्वहितकारित्वेनासौ परित्याजयेदेवायोग्यांशं तस्यामिवामूषु पुनश्च तस्या भक्त्याभासद्वेषं स्तनदानमात्रत्वेन भाक्तिं मत्वा तदुप लक्षितां धात्रीगतिं ददावेव । अमूषु ' दुःसहप्रेष्ठविरह–' इत्यादिपद्योक्तमहाभक्तिविशेषेणांतःसंगममनुभवंस्तदुचितनिजप्रेयसीं गतिं कथं न दद्यादिति । संगतिश्चेयं पूर्वोक्तगोलोकाख्ये गोकुलप्रकाशविशेषे एव ज्ञेया । अत एवोद्धवद्वारा श्रीभगवता संदिष्टम्–" या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः । अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिन्तया ॥ " इति । रासश्चायं तद्दिनगत एव तस्यैव विवक्षितत्वात् । तस्मिन्नपि प्रकाशे गोपलीलत्वेन दिनांतरेपि तत्संभवात् । किन्त्वत्र ' नासूयन्खलु कृष्णाय ' इति वक्ष्यमाणानुसारेण तत्पत्यादिषु दुःखाद्यनुत्पत्तये तन्माययैव त्यक्तानां देहानामंतर्द्धापनं, तत्सदृशीनामन्यासां स्फोरणं च गम्यते । एवं तावत्कालमेव तद्रहस्यं लब्धरासा भगवत्प्रेयस्योऽपि नाऽजानन्, यावदुद्धवद्वारा यथार्थानुभावकप्रभावम् ' या मया ' इत्यादिसंदेशं नाश्रृण्वन्निति च । अथ वा–तासां मुरलीवाद्यानुसरणेन तदन्तिकगतौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ राजोवाच ॥ कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने ॥ गुणप्रवाहोपरमस्तासां गुणधियां कथम् ॥ १२ ॥

प्राप्तेस्तत्कालसुखदुःखाभ्यां निःशेषकर्मक्षयाद्गुणमयं देहं जहुरिति ॥ १० ॥ ११ ॥ ननु यथा पतिपुत्रादीनां वस्तुतो ब्रह्मत्वेऽपि न तद्भजनान्मोक्षस्तथा बुद्ध्यभावा

किमाश्चर्यम्, यतः काश्चिन्निरुध्यमाना अप्यंतर्गृह एव तं प्राप्ता इत्याह—अन्तारिति । तादृशतीव्रतापेन धुतं श्रीकृष्णकृपया खण्डितमशुभं विरहरूपं यासां ताः । तेन जगतामपि धुतमशुभं याभिस्ता इति वा । 'मद्भक्तियुक्तो भुवनं पुनाति ' इतिवत् । तथा तादृशनिर्वृत्याऽक्षीणं क्षीणताविरुद्धं पुष्टं मंगलं निजतादृशतत्संयोगरूपं यासां ताः । तथा पुष्टं जगतामपि मंगलं याभ्यस्ता इति वा पूर्ववत् । गुणमयम् विरहभावमयम्, देहमावेशमित्यर्थः । तथा तृतीये सृष्टिप्रसंगे ब्रह्मणा दर्शितम् । अन्यत्समानम् । संगतिस्तस्मिन्नन्तर्गृह एव तस्य प्राकट्यात्, अन्तर्गृहगता इत्यन्वयात् । अत एव सद्यः प्रक्षीणं बंधनं सर्वतत्संगविरोधो यासां ताः, एवमलब्धरासास्तस्यामेव रात्राविति ज्ञेयं पूर्वहेतोरेव ॥ ११ ॥ यथावद्ब्रह्मज्ञानस्य मोक्षहेतुत्वात्तासां तदभावदर्शनात्कथं मोक्ष इत्यजाननिवाशङ्कते—नन्विति । तद्भजनात् पतिपुत्रसेवनात । तथा बुध्यभावात् ब्रह्मबुध्यभावात् । तस्य कृष्णस्य संगतिः । मुने तत्तल्लीलामननशील । परं कांतं जारं पतिम् । गुणेषु विषयेषु धीः बुद्धिर्यासां ताः । गुणप्रवाहस्य संसारप्रवाहस्य उपरमो निवृत्तिः । निवृत्तिमार्गलभ्या प्रवृत्तिमार्गेण कथं संसारनिवृत्तिः " उत्तिष्ठत जाग्रत " इति श्रुतेः । यद्वा—गुणेषु भगवत्सौंदर्यादिषु धीर्यासां भक्तानामिति यावत् । गुणस्य भगवत्सेवारूपस्य प्रवाहो यस्मिन्स देहस्तस्योपरमः कथं जातः " त्वयि भक्तस्तु कीटोऽपि भूयासं जन्मजन्मसु " इत्यादिवाक्यैर्भक्तौ तात्पर्यम्, भक्तिद्व्यर्थं न मोक्ष इति भावः ॥ * ॥ तत्रत्यानां बहिरङ्गाणां केषांचिन्मुखदर्शनेनैव हृद्गतं संदेहमालक्ष्य राजा स्वयं शुकवाक्यस्याभिप्रेतमर्थं तत्प्रसादाज्जानन्नपि तेषां संदेहनिवर्त्तनार्थमेव संदिहान इवाह—कृष्णमिति । हे मुने सर्वज्ञ कृष्णं परमात्मानमपि परं परपुरुषं कान्तं स्वरमणं विदुः, ब्रह्मतया तु न विदुः । अतो गुणधियां कृष्णेन सह विहरामेति गुणविषयकबुद्धीन तासां गुणप्रवाहस्योपरमः कथम् ' तमेव विदित्वाऽतिमृत्युमेति ' इति, " आत्मानमात्मात्मतया विचक्षते " इत्यादिश्रुतिस्मृतिवाक्यैः परमात्मज्ञानस्यैव मोक्षहेतुत्वोक्तेः ॥ अत्र **तोषिणी**—परि सवतोभावेनेक्षते सर्वेषां भावं जानातीति परीक्षिदित्यस्यायं भावः—यद्यपि स्वयं तन्माहात्म्यं जानात्येव तथाप्यंतर्मुखसंदिहानानां संदेहनिरासार्थमर्थविशेषेण संदेहविशेषः प्रपञ्चितः, बहिर्मुखसंदिहानानां च संदेहांतरनिरासार्थं ब्रह्मज्ञानवाद इव संदेहः प्रपञ्चितः । ' राजोवाच ' इति क्वचित्पाठः । अत्रापि सर्वभाववैचक्षण्य एव राजशब्दस्य तात्पर्यात्तथैवार्थः । श्रीमुनीन्द्रेणापि तथैव प्रतिवक्ष्यते । तत्र बहिर्मुखरीतितोऽर्थः प्रसिद्ध एव । अन्तर्मुखरीत्या त्वयमर्थः—ननु गुणमयं देहं जहुरित्युक्तम्, तत्र गुणशब्देन सत्त्वादिगुणत्रयमुच्यते, मयट्प्रत्ययेन विकारः, ततश्च हेयस्य देहस्य स्वतस्तन्मयत्वप्राप्तेः किं तन्निर्देशेन, तस्मात्पूर्वेण मानससाद्गुण्यपरंपरा, उत्तरेण तु प्राचुर्यं वाच्यम् । तत्रेदं पृच्छामः—कृष्णं विदुरिति । यदि च प्राप्तरासानां निस्त्रैगुण्यदेहतासूचनार्थमासामेव वा प्राप्तव्यदेहस्य तत्सूचनार्थमत्र गुणमयमिति विशिष्यते, तदपि तादृशस्य देहस्योपलक्षणत्वेन मासगुणप्रवाहस्यापि तादृशत्वेन लब्धिः स्यात् । तत्रापि पृच्छाम इत्याह—कृष्णं विदुरिति । अर्थश्चायम्—कृष्णं परं केवलं कांतं सर्वाश्चर्यगुणमनोहरतया परमं श्रेष्ठं विदुः, न तु ब्रह्मतया निर्गुणतदाविर्भावविशेषतया । तर्हि तासां गुणधियां ब्रह्मनिष्ठाया अपि त्याजकतया प्रसिद्धेषु तदीयतादृशगुणेषु धीरंतःकरणं यासां तादृशभूतानां तदेकनिष्ठत्वेन तद्गुणैक्यानुबंधतत्प्रेमवृत्तिगुणत्वादप्राकृतगुणानामित्यर्थः । ततो देहस्यं तु तासामसिद्धत्वाद्भवतु नामोपरमः, कथमविच्छिदुरतादृशगुणपरंपराया उपरमः स्यादित्यर्थः । ब्रह्मोपासकेष्विव न तत्स्वरूपमात्राविर्भावः । किं तु, गुणैरपि सह तदाविर्भावः । तता ब्रह्मोपासकेषु ये गुणास्ते प्राकृतसत्त्वमया एवेति तेषामेव गुणप्रवाहोपरमः संभवति नाविर्भूतभयवद्गुणानां तद्विधानामिति वाक्यार्थः । श्लेषेण चेदं पृच्छति—कृष्णं परं केवलं कांततया विदुर्न तु ब्रह्मतया व्यापकतया, तर्हि ' ये यथा मां प्रपद्यन्ते ' इति न्यायेन तासु व्यापकतागुणस्याप्रकाशादन्तर्गृहे प्राकट्यभावेन कथं विरह

॥१२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीशुक उवाच ॥ उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ १३ ॥

देवं कृष्णेऽपि ब्रह्मबुद्ध्यभावेन तत्संगतिः कथं मोक्षहेतुरिति शंकते । कृष्णं विदुरिति । परं केवलं कांतं कमनीयम् ॥ १२ ॥ परिहरति । उक्तमिति । अयं भावः ।

भावो गुणप्रवाहोपरमश्च । गुणधियां सुंदरोयं विदग्धोयमितिमात्रबुद्धीनाम् । मुने हे सर्वज्ञ ॥ १२ ॥ भक्त्या संततहरिमहिमसंस्मृतिसमुदितसंविदा निवृत्तियोग्या मुक्तिर्न तु कामादिना, तेन स्वर्गादिप्राप्तिरेवेति "कृष्ण कामास्तदा गोप्यस्त्यक्त्वा देहं दिवं गताः" इति विजयध्वजोक्तेर्नात्रेदं शोभनं प्रतिभाति । किन्तु, स्वामिचरणोक्त एव परिहारः सुष्ठु इति तदाह परिहरति—उत्तरं वक्ति । किंचिदमर्षादिनाऽव्यक्तवाक् । अहो भगवन्माहात्म्ये संदिहानोऽयमिति क्रुद्ध इवाह—उक्तमिति । न ह्यस्मदादिवद्भगवतः प्राकृतरूप इत्याह—अयं भाव इति । आवृतमिंद्रियादिरूपेण परिणतेनाज्ञानेन ब्रह्मत्वं ब्रह्मभाव आच्छादितं भस्मना वह्निरिव "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इत्याद्युक्तेः । हृषीकेशत्वादीश्वरत्वात्सर्वज्ञत्वेन वशीकृतमायत्वात्तत्कृतावरणं नास्ति, ततस्तस्मात्तत्र श्रीकृष्णे बुद्ध्यपेक्षा साक्षात्परब्रह्मैवायमिति ज्ञानापेक्षा नेति भाव इति । अनावृतोग्निर्यथा प्रकाशदाहादिकार्यं करोति न त्वावृतः, एवं जीवानामावृतब्रह्मरूपत्वात्तत्र तु ब्रह्मात्मरूपज्ञानं द्वारीकृत्यैव मोक्षो, भगवतोऽनावृतब्रह्मरूपत्वात्तादृशज्ञानं विनापि मोक्षप्रदत्वमिति तात्पर्यम् । किं च, प्रेष्ठविरहजक्षोभातिशयात्ताभिर्देहध्वंसोंगीकृत इत्याकूतम् । पुरस्तात् सप्तमस्कंधे । एतत् तव प्रश्नोत्तरम् । द्विषन्नपि द्वेषं कुर्वन्नपि यथा संततं वैरधिया चेतोनिवेशेन सिद्धिं सायुज्यं गतः । अधोक्षज इन्द्रियजज्ञानाविषयसाक्षात्परब्रह्मैव प्रियोऽनुरागविषयो यासां ताः । सोपाधिको निरुपाधिको वा चेतःप्रवाहस्तत्प्राप्तिहेतुरिति तत्त्वम् ॥ * ॥ श्रीमुनींद्रोपि नायं राज्ञः प्रश्न इति मनसा जानन्नेव त्वमेवं पृच्छन्नेवाशून्य एवासीति तद्व्याजेनानभिज्ञानेव तान्भर्त्सयन्नाह—उक्तमिति । पुरस्तात् सप्तमस्कंधे एव । द्विषन्नपीति द्वेषलक्षणप्रतिकूलभावेनापि यदि सायुज्यं लभ्यते तर्हि कामलक्षणस्यानुकूलभावस्य का वार्तेति भावः । हृषीकेशमिति । निरुपाधिकृपया स्वयमवतीर्य ब्रह्मादीनामपि हृषीकैरग्राह्योपि मर्त्यलोके परमनीचानामपि हृषीकेषु ईष्टे स्वाचिंत्यशक्त्या विषयभूतो भवति तानुद्धर्तुमितीदमप्येकं तस्य कृपैश्वर्यमिति भावः । इमास्तु अधोक्षजस्य अतींद्रियस्य तस्य प्रियाः प्रीतिविषयाश्रयभूता एव । अत्र 'अघः सिद्धिं यथा गतः' इति प्रत्यासन्नमघासुरं हित्वा विप्रकृष्टचैद्यो यद्दृष्टांतितस्तेन राजानं प्रत्येतत्सरहस्यं प्राह,—चैद्यस्यापि द्वेषाभिनिवेशोद्रेकान्मुनिशापनिबंधनगुणमयदेहस्यैवोपरमः, अन्तश्चिन्मयपार्षददेहस्तु तस्यानश्वरो नित्यो वर्त्तत एव । यदुक्तम्—'विष्णुचक्रहतांहसौ' इति । विष्णुचक्रेण हतमंह एव ययोर्न तु ताविति । सिद्धिं गतः अभीष्टां गतिं पार्षदतां प्राप्त इत्यर्थः । यदुक्तम्—"वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम् । नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥" इति ॥ अत्र **तोषिणी**—श्रीयुक्तः शुक इति परीक्षिद्वचनस्य बहिर्मुखप्रतारणबुभुत्सुसंदेहनिरसनार्थां प्रवृत्तिमवगम्यापि तद्व्याजेन बहिर्मुखान्भर्त्सयन्निव किंचित्सामर्षत्वेनाव्यक्तवचनात्तथैवाह—उक्तं पुरस्तादिति । सिद्धिम् अभीष्टां गतिम् पुनः पार्षदताम् । "वैरानुबंधतीव्रेण ध्यानेनाच्युतसात्मताम् । नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥" इति सप्तमात् । ततस्तस्य द्वेषेऽपि जाते लीनतया स्थितैरपि स्वगुणैरेव सह पुनस्तत्प्राप्तिरिति सुतरामेवाधोक्षजप्रीतिविषयाश्रयाणां तासां वार्द्धिष्णुप्रेमतया प्रकटैस्तैरेव सह तत्प्राप्तिरित्यर्थः । मया तु गुणमयं देहमिति स्वरूपशक्तिवृत्तिरूपांतर्बहिर्देहप्राप्त्या समूलप्रकृतिप्राकृतसद्गुणैः सौन्दर्यादिभिः संवलितमपीत्येव विवक्षितम्, देहस्यैव विशेषणत्वादित्यर्थः । प्रश्नस्य श्लेषत्वे द्वितीयार्थे त्वयमुत्तरस्यार्थः प्रश्नस्य । 'ये यथा माम्' इत्यत्र तान्प्रत्येवान्यान् गुणान्न प्रकाशयामि स्वतस्तु मम सर्वेपि संत्येवेति विवक्षितम् । अतस्तादृशभक्त्यावेशात्तस्यानुसंधानाभावोऽपि तत्तच्छक्तय एव स्वावसरे तान्प्रकाशयन्ति । अन्यथा दूरतो भजतां केवलतन्माधुर्यनिष्ठानां तदप्राप्तिरेव स्यात् । तत्र कैमुत्येन दृष्टान्तं शृण्वित्याह—द्विषन्नपीति । अन्यथा तत्राप्यंतेन मोक्षादिदायकमैश्वर्यं प्रकाशेतेति भावः । तत्तत्प्रकाशे नामद्वयेन हेतुमाह—हृषीकेशमिति, अधोक्षजेति च । उभयनामनिरुक्त्या तज्ज्ञानापेक्षयैव तेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥ अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १४ ॥
कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ॥ नित्यं हरौ विदधतो यांति तन्मयतां हि ते ॥ १५ ॥

जीवेष्वावृतं ब्रह्मत्वं कृष्णस्य तु हृषीकेशत्वादनावृतमतो न तत्र बुद्ध्यपेक्षेति ॥ १३ ॥ ननु देही कथमनावृतः स्यादत आह । नृणामिति । गुणात्मनो गुणनियंतुः । भगवत एवंरूपा अभिव्यक्तिरतो न देहिसादृश्यमत्र वक्तुं युज्यत इति भावः ॥ १४ ॥ अतो यथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह । काममिति । ऐक्यं संबंधम् ।

सिद्धये तद्गुणाविशेषः प्रकाशित इति दर्शितम् ॥ १३ ॥ देहसंबन्धेनावृतत्वं वदतो—व्याघातो देहावरणस्य मूढेनापि ज्ञातत्वादित्याशङ्कते—नन्विति । वस्तुतो भगवतो देह एव नास्ति 'देहीवाऽऽभाति मायया' इत्यत्रेव शब्दोपादानात् "अशरीरं वा वसंतम्" इति श्रुतेश्चेत्यभिप्रेत्याह—नृणामिति । एवंरूपा अप्राकृतरूपा दिव्या अभिव्यक्तिः अवतारः, प्राकट्यमिति यावत् । यतो लौकिकप्रभावचिद्घनमूर्तिरतो हेतोर्न देहिसादृश्यं प्राकृतजन सादृश्यम् । अत्र श्रीकृष्णे । युज्यते युक्तम् । इति भाव इति । भक्तजनार्तिप्रशमनार्थं प्रदर्शितलीलाविग्रहानेककोटिब्रह्मांडाधीशेन नंदनंदनेन कथमन्यस्य तुल्यता संभवेदिति तात्पर्यम् ॥ * ॥ यतः श्रेयस्साधनहीनानपि मयि यत्किञ्चित्संबंधमात्रवतो जनानहमुद्धरामीति मनसि कृत्वैव भगवतावतीर्णमित्याह—नृणामिति द्वाभ्याम् । निःश्रेयसं केषुचित्सायुज्यं केषुचित्सालोक्यादिकं केषुचित्प्रेम चार्थस्तस्मै । भ्रूविजृंभमात्रेण ब्रह्मांडकोटिसंहारसमर्थस्य भूभारभूतकंसादिवधार्थमेव व्यक्तिरन्यथा नोपपद्यत इति भावः । अव्ययस्य प्रतिभक्तजनं स्वात्मदानेनापि न व्येतीत्यव्ययस्तस्य । केन प्रकारेणेति चेदत आह—अप्रमेयस्य, प्रमातुमशक्यस्य । कस्तत्र तत्त्वं जानातीति भावः । यतो निर्गुणस्य प्राकृतगुणरहितस्य, अथ च गुणात्मनः स्वरूपभूतकल्याणगुणमयस्य । न हि अप्राकृतचिदानंदमयगुणसागरः प्रमातुं शक्यो भवेदिति भावः ॥ अत्र **तोषिणी**—तदेवं तद्ध्यानप्रभाव उक्तः । तत्र भगवद्व्यक्तिसमये तु भगवत्पार्षदस्यागंतुकदैत्यभावस्य चैद्यस्य तथा तादृशश्रीभगवत्प्रेमवतीनां तासां तत्तत्संपादनाय भगवतः साहाय्यमप्यस्ति कैमुत्येन कारणमित्याह—नृणामिति । नृणां जीवमात्राणां निःश्रेयसार्थाय सर्वसाधन फलाय तत्तद्योग्यतासम्पत्पूर्वकस्वलीलानन्दप्राप्तिरूपाय । तं साधयितुमेवेत्यर्थः । व्यक्तिः प्राकट्यं तदर्थावधारणत्वमाह—भगवत इति । अन्यथा भ्रूविजृंभमात्रेण ब्रह्मांडकोटिसंहारसमर्थस्य भूभारसंहरणमात्रार्थं व्यक्तेरनुपपत्तिरित्यर्थः । हे नृपेति । यथा नृणां क्षेमार्थमेवेतस्ततो भवादृशस्य राज्ञो गमनमिति भावः । भगवत्त्वमेवाह—अव्ययस्येत्यादिचतुर्भिर्विशेषणैः । नित्यं नानाप्रकारैर्नानाभक्तेभ्यः आत्मदानादिनापि न व्येतीत्यव्ययस्तस्य । कुतः—अप्रमेयस्यापारिच्छिन्नस्येत्यर्थः । तत्कुतः-निर्गुणस्य मायागुणातीतस्य । ततः कुतः-मायागुणानामात्मनः प्रवर्त्तकस्य । यद्वा-नृणां निःश्रेयसार्थायैव व्यक्तिमात्रं जन्म, अन्यथा कथञ्चिन्न संभवेदित्याह-अव्ययस्य जन्मादिविकाररहितस्य । किञ्च, प्रमेयस्य । तदर्थत्वे हेतुः—गुणात्मन इति । निजकारुण्याद्यशेषगुणानां सुप्तानामिव चेतयितुः प्रकटनपरस्येत्यर्थः । अन्यत्समानम् । श्लोकद्वयेऽस्मिन्नयं भाव इत्यादौ टीकायां बहिर्मुखसंदेहनिरासार्थस्तेषामयमभिप्रायः । ननु ब्रह्मणि कामादिकमपि चेदर्थकरं तर्हि जीवेष्वपि चित्सामान्येनैक्याद्ब्रह्मत्वमस्तीति पत्यादिष्वपि तादृशं स्यात्तत्राह—जीवेष्विति । आवृतत्वे हेतुर्वक्ष्यमाणवैपरीत्यरीत्या हृषीकाधीनज्ञानत्वमेव ज्ञेयम् । तत्र स्वास्मिन्नावृतत्वं बहिर्विक्षेपात्, परेषूपाधिमात्रग्रहणात् । हृषीकेशत्वादिति पूर्ववन्न हृषीकवशस्तदुदयः, अतः स्वप्रकाशतामयतामय एव, ततश्चानावृतमेव ब्रह्मत्वमिति स्थितम् । कामादिना केनापि तत्र प्रवृत्तिर्भवतु वस्त्वनुभवस्तु भवत्येवेत्यर्थः । ननु देहीति—पत्यादिवद्देहित्वेन प्रतीयमान इत्यर्थः । सिद्धान्तमाह—तत्तद्विशेषेण वैलक्षण्यादित्यर्थः । एवंरूपा अनावृतब्रह्मरूपा । न देहिसादृश्यं कुतो देहित्वमित्यर्थः । तद्विग्रहस्यैव स्वरूपशक्तिसिद्धवैचित्रिकपरमतत्त्वैकरूपत्वात्, तच्च विद्वदनुभवसेवितत्तच्छास्त्रप्रामाण्यात् । यथा च व्याख्यातम्—"नातः परं परम यद्भवतः स्वरूपम्" इत्यादिश्रुतिष्विति ॥ १४ ॥ यतोऽनावृतं ब्रह्मैव श्रीकृष्णोऽतो हेतोः । यथाकथंचित् येन केनप्रकारेण । तत्रासक्तिरतिशयेन व्यासंगः । कामम् कांतप्रेमाणम् । क्रोधम् ज्वलनात्मकं, द्वेषमित्यर्थः । भयम् अयं मे मृत्युरिति हेतोः सदा तन्निवृत्त्युपायचिंता । स्नेहः अनुरागः । ऐक्यसौहृदे व्याख्याते एव स्वामिचरणैः । ये विदधते कुर्वन्ति ते तन्मयतां तत्सायुज्यम्, स्फुटीकृतमेतत्सप्तमस्कंधे ॥ * ॥ तस्मात्त्वया सामान्यतस्तावदेष सिद्धान्तोऽवधार्यतामित्याह—कामं गोपीजनादयः, क्रोधं द्वेषं चैद्यादयः, भयं कंसादयः, स्नेहं वात्सल्यं नंदादयः, ऐक्यमात्मारामाः,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चैवं विस्मयः कार्यो भवता भगवत्यजे ॥ योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥ १६ ॥
ता दृष्ट्वांतिकमायाता भगवान्व्रजयोषितः ॥ अवदद्वदतां श्रेष्ठो वाचःपेशैर्विमोहयन् ॥ १७ ॥

सौहृदं भक्तिम् ॥ १५ ॥ न च भगवतोऽयमतिभार इत्याह । न चैवमिति । यतः श्रीकृष्णादेतत्स्थावरादिकमपि विमुच्यते ॥ १६ ॥ प्रस्तुतमाह ।

सौहृदं वृष्णिपांडवादयः नित्यं विदधते । अधुनापि तेते तंतं भावं कुर्वन्तस्तन्मयतां यांतीति । तासांतासां लीलानां नित्यत्वं ज्ञापयति । तन्मयताम् गोप्यादयस्तदासक्ततां,यथा—स्त्रीमयः कामुक इति।अन्ये सायुज्यम् ॥ अत्र **तोषिणी**—अस्तु तावद्भगवद्व्यक्तिसमयगतानां वार्ता किन्तु सर्वदातनानामपीयं रीतिरित्याह—काममिति । अत्र कामं द्विविधम्—श्रीगोप्यादीनामिव प्रेममयं, सैरंध्र्यादीनामिव रिरंसामयञ्च । क्रोधं द्वेषं चैद्यादीनामिव, भयं कंसादिकानामिव, स्नेहं वृष्णिपांडवानामिव, श्रीमद्व्रजवासिनामिव वा, ऐक्यम् आत्मारामाणामिव, सौहृदं क्रथकौशिक्यादीनामिव । तत्र भयद्वेषौ तु नानुमतौ, यः खलु कल्याणगुणमप्यात्मानं भीषणं मन्यते गूढं द्विषतोऽपि तस्य भीतस्य तथा मत्सरादिना साक्षादपि द्विषतो धृष्टस्य भद्राय कल्पते, तस्मिन् कः परमपामरस्तच्च तच्च कुर्यात् । किन्तु, स्नेहं सौहृदमेव वा सर्वेपि कुर्युरिति हि तात्पर्यम् । तदित्थमेवोक्तं श्रीनारदेन—" तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् " इति । केनापीति तत्र योग्येनेत्यर्थः । अतस्तत्रैव तदुक्तम्—" यथा वैरानुबंधेन मर्त्यस्तन्मयतामियात् । न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ " । तत्र च शास्त्रज्ञा गौरवमयभक्तियोगमतिक्रम्य भावमार्गे हेयस्यापि तस्य तन्मयताकारित्वाय प्राबल्यं दृश्यते इति व्यज्य स्नेहसौहृद्ये एवानुमते । तदित्थमेवोक्तम्—द्विषन्नपीति । तद्वदैक्यञ्च नानुमतम्, तत्र तादृशशतगुणास्फूर्तेरिति । एवशब्दः एकैकतः कृतार्थीभावाय । पाठांतरे ये विदधते । हि निश्चितम् । तन्मयताम् तत्तद्भावसमुचिताविर्भावं तदेकस्फूर्तिम् । किन्तु, श्रीभगवान्खलु " भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा परः सताम् " इति भगवद्वाक्यात्, " योगिभिर्दृश्यते भक्त्या नाऽभक्त्या दृश्यते क्वचित् । द्रष्टुं न शक्यो रोषाच्च मत्सराच्च जनार्दनः ॥ " इति पाद्मोत्तरखंडात्, " नाहं प्रकाशः सर्वस्य योगमायासमावृतः " इति श्रीगीतोक्तेश्च । यद्यपि द्रष्टृप्रभृतिभिस्तस्य याथार्थ्यं नाऽनुभूयते किं त्वन्यथैवेति तथापि तत्प्रभावात्परंपरयाऽप्युत्तरकाले याथार्थ्यं स्फुरतीति क्रोधभये अप्यत्र गणिते । ' किमुताधोक्षजप्रियाः ' इत्यनेन कामस्तु प्रियत्वातिशयादुत्कर्षित इति विवेचनीयम् । चेति वेति पाठौ समानार्थौ ॥१५ ॥ न तत्रेदमाश्चर्यमित्याह—न चेति । अतिभारः दुर्घटः । एवं विस्मयः गुणधियां गुणप्रवाहोपरमः कथमित्येवंरूपः संदेहः । भवतेति । गर्भादारभ्य श्रीकृष्णभक्तेन त्वया न कर्तव्योऽन्येन क्रियतां नामेत्याह—यतः श्रीकृष्णादेतज्जगद्विमुक्तं भवति, यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते " नाऽपरेण " इति श्रुतेः । स्थावरम् वृक्षादि । अत एवोक्तं ब्रह्मणा—' वृंदावने किमपि गुल्मलतौषधीनाम् ' इत्यादि । आदिना पाषाणादिग्रहः । तत्प्रसिद्धमहिल्योपाख्याने रामायणे अवतारभेदेप्यवतारिणोऽभेदात् " य एव रामश्च स एव कृष्णः " इति चिरंजीवभट्टोक्तेः ॥ * ॥ न चेति । अन्येन विस्मयं क्रियतां नामात्रार्थे भवता तु गर्भादारभ्य तन्महिमाऽभिज्ञेन न कार्यः । गोचारकत्वेऽपि भगवति, देवकीपुत्रत्वेऽप्यजे, गोपस्त्रीलंपट्येऽपि योगेश्वराणामपीश्वरे । कृष्णे सर्वावतारिणि । यत 'एतत्स्थावरादिकमपि विमुच्यते ' इति स्वामिचरणाः । यद्वा—तल्लीलापरिकराद्भिन्नमपि जगदधुनापि तत्तत्कामस्नेहादिभावमनुस्मृत्य विमुच्यते गुणप्रवाहान्मुक्तं भवति ॥ अत्र **तोषिणी**—न चेति । अन्येन क्रियतां भवता गर्भादारभ्य तन्महिमाभिज्ञेन न कार्य एवेत्यर्थः । अत एव भवतेति गौरवेणोक्तं न तु त्वयेति । विस्मयाऽकरणे हेतुविशेषः—भगवति अशेषैश्वर्ययुक्ते । ननु कथं तर्हि देवकीगर्भतो जन्म तत्राह—अजे नेन जीववन्न जायते किन्तु स्वेच्छयैव, भक्तवात्सल्यादिना स्वयमाविर्भवतीत्यर्थः । भगवत्त्वादेव योगेश्वरेश्वरे तत्रापि कृष्णे सर्वतः परिपूर्णाविर्भाव इत्यर्थः ॥ १६ ॥ प्रकृतमनुसरति—प्रस्तुतमिति । वदतां श्रेष्ठः चतुर्मुखशतमुखसहस्रमुखव्यासादिश्रेष्ठः । ताः गोप्यः । ' पेशोंगे दीप्तौ हेलायां चूर्णने पुंसि ' इति माधवः । उपेक्षाप्रार्थनाबोधकद्व्यर्थकवाक्यैर्विमोहयन्नवदत् । तत्रोपेक्षाद्योतकैर्विशेषेण मोहयन् आमुग्धा इव कुर्वन् । प्रार्थनागमकैस्तु विशेषेण स्नेहवतीः कुर्वन्निति विशेषः । अवाच इति छेदे लज्जया किमप्यवदन्तीरिति । पेशैः सौंदर्यैरित्यर्थः ॥ * ॥ प्रासंगिकं विरोधं समाधाय प्रस्तुतमाह—भो वेणुनादा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीभगवानुवाच ॥ स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥ व्रजस्यानामयं कच्चिद्ब्रूतागमनकारणम् ॥ १८ ॥

ता दृष्ट्वेति । वाचःपेशैर्वाग्विलासैः ॥ १७ ॥ सर्वाः ससंभ्रममागता विलोक्य सभयमिवाह । व्रजस्येति ॥ १८ ॥

कृष्टाः । वदतां कालदेशपात्रौचित्येन वचनचातुर्यवतां मध्ये श्रेष्ठः । पेशैः अवयवैः 'पिश—अवयवे' घञन्तः प्रयोगः । वाचोऽवयवाः वाच्यलक्ष्यव्यंगबोधका ये रूक्षाः स्निग्धाश्चांशास्तैर्विमोहयन् । वेणुनादेन मोहिता अपि ता विशेषेण मोहयितुमत्र ताः प्रति रूक्षोक्त्यैव भगवतस्त्रयो मनोरथाः सेत्स्यंति । प्रीतिविषयस्य कान्तस्य ममौदासीन्ये दृष्टेऽप्यासां प्रीतिलेशोऽपि न ह्रसतीति प्रीतेः शुद्धतां लोके दर्शयिष्यामीति, तथा—संप्रयोगे वैपरीत्यमिवाद्य नायिकाधर्ममवहित्थामयं वाम्यमहं ग्रहीष्यामि नायकधर्ममौत्सुक्यप्रकटनमयं दाक्षिण्यमेता ग्राहयिष्यामीति मननेऽपि वैपरीत्यं रचयिष्यामीति, तथा—परमलज्जावतीनां युवतीनां स्वाभाविक्यावहित्थया संगोपितान्यान्तरीणानि वचनानि प्रकृतिविपर्यासप्रापणया श्रोष्यामीति । यद्यपि कामिनीनां कुचाद्यवयववृन्दं वस्त्रावृतत्वेन गूढमेव चमत्कारकारकमिव तासामंतरीणमौत्सुक्यमपि बहिर्वाम्येनावृतमेव चमत्कारकारकं रसज्ञा मन्यंते न तूद्घाटितम्, तदपि कदाचित्कश्चिन्नायकः संभोग्याया नायिकाया अनावृतान्येवांगानि यथा दिदृक्षते, तथैव वाम्येनावृतमान्तरीणमौत्सुक्यवचनञ्च शुश्रूषते, किन्तु, पुरुषांतरस्य स्ववयस्यादेरपि सन्निधौ न दिदृक्षते नापि शुश्रूषते, तथैव कृष्णोऽदृष्टचरानावृतगोपीसर्वांगं संप्रति तासां वाम्यानावृतमान्तरीणं वचनवृन्दं शुश्रूषत इत्यत एव प्रियं नर्मसखमपि स्वसंगिनं तदानीं न चकारेति ज्ञेयम् ॥ अत्र **तोषिणी**—अतः परं परमरसमयरासलीलाप्रसंगोऽस्मिन्नंतरायानौचित्येऽपि सर्वेषामेकचित्ततापादनार्थमेवेदृशः प्रश्नो भवता कृतः, मयाऽपि भवदनुरोधेनैव सिद्धांतप्रक्रियेयं व्यञ्जितेति व्यंजयन् पुनरप्रार्थितोऽपि स्वयमुत्कंठया सहसा प्रस्तुतमेवाह—ताः वेणुगीताकृष्टाः परमविह्वलाः । तदेव दर्शयति—व्रजस्य योषितः व्रज एव स्थातुं योग्या न हि बहिर्वनमागन्तुमित्यर्थः । तत्रापि निजांतिकमेवायाताः प्राप्ता न तु लज्जादिना दूरतः स्थिता दृष्ट्वाऽवदत् । वाचःपेशैः वाग्विलासैः । ते च द्विविधाः—शाब्दिका आर्थिकाश्च । पूर्वे तु सुललितवर्णविन्याससुगमसुभगसमुच्चारणस्मितवलितश्रीमुखलोचनचिल्लीचालनविशेषादयः । उत्तरे रसा भावालंकारवस्तुरूपाः । एतेऽपि चतुर्विधाः—उपेक्षाभंगिमयाः, प्रार्थनाभंगिमयाः, तद्युगलार्थसंधापनमयाः, वास्तवार्थमयाश्च । तथा च सति विमोहयन्निति हृतचित्ता हृतविवेकाश्च कुर्वन्नित्यर्थो यथायथमूह्यः । तत्र पूर्वत्वं शाब्दिकप्रार्थनामयवास्तवार्थमयेषु, उत्तरोत्तरत्वं चान्ययोः । तत्र च शाब्दिकाः स्वभावेन विशेषतस्तु भावेन । आर्थिकेषूपेक्षामयाः स्वस्मिन्नुत्कंठावर्धनार्थमेव न तूपेक्षार्थं कृताः । 'रन्तुं मनश्चक्रे', 'जगौ कलं वामदृशाम्' इत्युक्तत्वात् । अत एवैतत्पक्षे वाक्ये शब्दमात्रता न तु तात्पर्यत इत्यर्थः । एवं मनस्यन्यद्वचस्यन्यदित्यवहित्थया तासामुत्कंठया विषण्णतासंपादनं, तेन च विवेकहरणमिति । तत्रापि प्रार्थनामया निजौत्सुक्यमात्रहेतुकाः, तद्युगुलार्थसंधापनं तु नर्मकौतुकार्थमिति । तथा वचने योग्यतां कैमुत्येनाह—वदतां श्रेष्ठः निखिलवाग्वैदग्ध्यविदां वरिष्ठः, यतो भगवान्स्वाभाविकतादृशज्ञानादिभिः सर्वातिशायी। यद्वा—सर्वत्रांतर्भूतोऽपि शब्दो द्रष्टव्यः । तथाहि—व्रजयोषितः सहजनिजप्रेमपरत्वेन प्रसिद्धा अपि, तत्रापि तास्तादृशं प्रेमविकारं प्राप्ता अपि, तत्रापि तदानीं निजांतिकमायाता अपि, साक्षाद्दृष्टा अपि, स्वयं च भगवान्सर्वज्ञत्वेन तासां भावाभिज्ञोऽपि वाचःपेशैः कपटवाक्यैर्विमोहयन् परमवैकल्यं प्रापयन्नवदत् । किमर्थम्—वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठः, नर्मविशेषणार्थमित्यर्थः ॥ १७ ॥ भो महाभागाः वो युष्माकं वने सुष्ठु आगमनं जातं किम् ? अपि तु न, अतो वः प्रियं किं करवाणि, न मया किमपि कर्तुं शक्यम् । सर्वा गोप्यः । ससम्भ्रमं ससाध्वसं यथा सभयं प्रत्युच्यते तथाह—व्रजस्येति । व्रजस्य किंस्वित् अनामयं क्लेशाऽभावोस्ति ? एवं सम्भ्रमेणाऽऽगमने कारणं ब्रूतेत्युपेक्षायाम् । प्रार्थनायां तु मम महद्भागरूपा मदीयभाग्यरूपा वा महत्याभा कांतिर्यस्याः सा महाभा राधा तां गच्छंति सखीभावेनेति तथा । यद्वा—मह्यते पूज्यते मयेति महा राधा तस्या भा दीप्तिरागता यासु ताः । वः सुंदरमागमनं जातम् । व्रजगतपत्यादिभीतिमालक्ष्याह—व्रजस्य व्रजसंबन्धिनीनां वः अनामयम् अभयम् । ते श्रांता मायामोहिताः सुताः स्वागमनकारणमशंकितं ब्रूत। यद्वा—आगमनस्य कं सुखं तदेवारणं यस्य तं मां किञ्चित्संभाषणं कुरुतेति गूढोऽर्थः। ॥ * ॥ अथ स्त्रीपुरुषाणां रसज्ञानां मेलने तावदियं रीतिः—यत्पुमांसो रतौत्सुक्यमाविष्कुर्वते, स्त्रियस्तु तत्राऽसहिष्णवः कुप्यंतीत्यतस्तामेव रसरीतिं प्रथममाश्रित्य कृष्ण आह—स्वागतं वो युष्माकं कच्चित्सुखमयमागमनं वृत्तम् । ॥१२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजन्येषा घोररूपा घोरसत्त्वनिषेविता ॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥ १९ ॥

लज्जया मंदहसितमालक्ष्याह । रजन्येषेति ॥ १९ ॥

ततो यूयं महाभागा जन्मारभ्य दुःखस्य मुखं भवतीभिः कदापि न दृष्टमिति भावः । यद्वा—नायं प्रश्नः किन्तु प्रत्युक्तिः, अतो युष्माकं शोभनमद्यागमनं वृत्तं यदत्रागतं तत्सम्यक् कृतम्, यतो महाभागा भाग्यवतीनां हि सर्वाः क्रिया एव सफलीभवंत्यः स्वस्य च परस्य च सुखदा भवंतीति भावः । अतो वः प्रियं किं करवाणि अधुना रात्रावत्र निर्जने वने एकाकिना यूना मया युवतीनां वो यत्प्रियमातिथ्यं कर्तुं शक्यं स्यात्तद् ब्रूत, युष्मत्प्रियचिकीर्षौ मयि सारल्येन स्वप्रियं कृपया स्पष्टं वक्तव्यं, यथा निःसंदेहं तत्राहं प्रवर्त्तेयेति भावः । ततश्च भो महासाहसिक लंपट अस्मानपि पतिव्रता यदेवं वक्तुमुत्सहसे तत्किं धर्मतो राजतश्च न बिभेषीति समुचितमुत्तरमप्राप्तवता प्रियं किं करवाणीत्यस्य व्यंजितेंगसंगरूपेर्थे सम्मतिलक्षणं लज्जाहेतुकं मौनमेव दृष्टवता भगवता विचारितम्—यद्येताभिः स्वयमुचितं वाम्यमद्य नांगीक्रियते तर्हि मयापि समुचितमौत्सुक्यं न बहिष्करणीयम्, किन्तु वाम्यमिश्रमेव । ततश्च संभोगभेदे संप्रयोगे यथा वैपरीत्यमपि चारु भवति तथैव संभोगभेदे मेलनेऽपि वैपरीत्यं चारु भवतु, किन्त्वासां महामोहनवेणुनादमाध्वीकपानोत्थातिवैवश्यादेव प्रकृतिविपर्ययस्तत एव दाक्षिण्यम्, मम तु वैवश्याभावात्तदनुरोधादेव कृत्रिमं वाम्यं बहिरेव कार्यमन्तस्तु स्वाभाविकमौत्सुक्यमस्त्येवेत्यादिकं विचार्य च वाम्यपदवीमारोढुं सभयमत्र संपृच्छते—व्रजस्येति । कच्चिद्व्रजस्यानामयं मंगलम्, न जाने सांप्रतं व्रजे काश्चिदिंद्राादिकृत उपद्रवो वर्तते, यतः सर्वा एव भवत्यो भीताः पलाय्य स्वत्राणार्थं मदंतिकमायाता इति भावः । ततश्च केयमद्यतन्यस्य धूर्तताल्हरीति मिथः सस्मितमविस्मयावलोकं वितर्कयंतीषु तास्वहो युष्माकं मौनेनैवावगम्यते नोपद्रवस्तर्हि कुतः किमर्थमायाताः । अहं तु नात्यूहितुं समर्थ इति भावः ॥ अत्र **तोषिणी**—प्रथममवहित्थयौदासीन्यमवलंबमानः सादरमाह—स्वागतमिति । वो युष्माकं शोभनमागमनं वृत्तमित्यर्थः । यद्वा—वो युष्माभिः सुष्ठु आगतं कच्चिदिति प्रश्नः । महान् भागो भाग्यं यासां तासां संबोधनम् । अतो वो युष्माकं किं प्रियं करवाणि, अपि तु न किंचित्कर्तुं शक्नोमीत्यर्थः । यद्वा—किं करवाणि तदाज्ञापयन्त्वित्यर्थः । महाभागानां प्रियाचरणेन ममापि धर्मविशेषो भावीति भावः । पूर्वं यज्ञपत्नीः प्रत्येवमेवोक्तं किन्तु तत्रास्यतामिति गौरवं विधाय किं कर्तुं शक्नोमि अपि तु न किमपीति केवलमौदास्यम् । अत्र तु प्रियं किमिति श्लेषेण साकांक्षत्वमपीति शेषः । वस्तुतस्त्वेतासां तादृशागमनं दृष्ट्वा परमप्रीत्यैवाह—स्वागतमित्यादि । महाभागा इति सर्वपारित्यागेन तदेकापेक्षया तासामागमनात् स्वस्य च नानाप्रियजनापेक्षया तादृशत्वाभावमननेन स्वस्मादपि प्रेममहत्त्वविवक्षयोक्तम् । भागोत्र भजनम् । अतस्तासां प्रेमवशः सन्नाह—प्रियमिति । तच्च प्रियजनवशीकरणचतुरस्य विदग्धशिरोमणेः स्वाभाविकमेवेति दिक् । तदित्थमेव परत्र च वस्तुत इत्यादिक इति शब्दपर्यन्तो वास्तवार्थो ज्ञेयः । तदनन्तरं तु नर्मादिमयो ज्ञेयः । तथाहि—स्वागतमित्यादिना नर्मणा सदाचारमिवाश्रित्य समागतजनेषु वक्तुं योग्यमुक्त्वा सर्वा एव युगपत्ससंभ्रममागता वीक्ष्य स्वयमपि कैतवेन सभयमसंभ्रममिव पृच्छति—व्रजस्येति । अनामयं मंगलं कच्चित् । ननु चतुरसिंह तथा सति गोपादयोप्यागताः स्युरितिचेत्—सत्यम्, तर्हि अंगनाविषयकः केषामप्युपद्रवो भवेदिति धूर्ततयाऽऽशंक्येव साटोपमाह—ब्रूतेति । निजागमनस्य कारणं हेतुं प्रयोजनं वा । अथ वा तदुक्त्यभिप्रायाऽनिर्धारणेन लज्जया चानुत्तरास्ता वीक्ष्य मन्ये शोकवेगेनामंगलस्याश्राव्यत्वेन वा किञ्चिन्न वदथेति व्यंजयन् किञ्चिदन्यदेव चोत्थापयन्सवैयग्र्यमिव पृच्छति—व्रजस्येति । एवं सर्वमग्रेप्याशंकादिकं कैतवनैवेति ज्ञेयम् । तथाप्यवदंतीः प्रसन्नमुखीश्चालोक्यास्वस्थतामाभिनयन्सलज्जामिवाह—ब्रूतेति । भवतु मद्दुर्वितर्क्यत्वं यूयमेव स्वयं ब्रूतेत्यर्थः । अत्रैकैकैव वाक् समुपेक्षामयी संप्रार्थनामयी चेत्युक्तम् । तत्र तस्याः समुपेक्षामयीत्वं प्रपञ्चितं संप्रार्थनामयीत्वं कथ्यते । इदमेव श्लेषार्थत्तयाऽग्रेऽपि प्रतिश्लोकं बोध्यम् । तथाहि—हे महाभागाः महान् भागो भाग्यं यासाम् । ईदृशी ज्यौत्स्नी, तत्रापीदृशं वनं, तत्रापीदृशं वो नवयौवनादि, तत्रापीदृशोऽनुवर्ती जनोऽयमनुकूल इति महदेव भाग्यमिति । अत्रेष्टप्रश्नरूपं प्रार्थनासोपानमाह—कच्चिद्वो युष्माकं स्वागतम् । प्रार्थनामाह—वो युष्माकं किं प्रियं करवाणि अतो यद्भवतीनां हृद्गतं किमपि प्रियमस्ति तदेव मम प्रार्थनीयमित्यर्थः । तत्र निरुत्तरा वीक्ष्य पुनः प्रार्थनार्थं सोपानांतरमाह—व्रजस्येति । प्रार्थनामाह—ब्रूतेति । मा लज्जतेति भावः ॥ १८ ॥ गोपांगनानां मंदहसितं स्मितम् । रजनी व्यभिचारिजनानुरंजन्यप्येषा घोराणां भयदानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपं प्रकाशो यस्यां सा । तदेवाह—घोरसत्त्वा व्याघ्राद्यास्तैर्निषेविता । यद्वा—रात्रिचरत्वाद्घोरसत्त्वा राक्षसा वा । स्त्रीभिः भीरुस्वभावाभिः । यद्वा—घोरसत्त्वैरस्माभिः यष्टिकंबलधारिभिः निसेविता।सुमध्यमाः क्षीणकटिप्रदेशाः। न गोपयोग्या इति संबुद्ध्यभिप्रायः, प्रार्थनापरमिदम् । तांस्त्यक्त्वा मां सेवध्वामित्याभिप्रायः ॥ द्वितीयोऽर्थः—उदितपूर्णचंद्रा जनानुरंजनी अघोररूपा । अघोरसत्त्वाः योगिनस्तैर्जनसंबाधाभावान्निषेविता । तस्माद्व्रजं प्रति न यात इह स्थेयम् । अन्यत्र तिष्ठंतु नाम मत्पार्श्वे स्त्रीभिर्न स्थेयं ममाबालब्रह्मचारित्वेन स्त्रीसंगपरिहारात् ॥ * ॥ हन्तहन्त कुलधर्मधैर्यलज्जादिकं ध्वंसयित्वा प्रतिदिनमस्मानुपभुंजानोऽयमद्य वेणुनादेनाकृष्यानीय कारणं पृच्छतीत्यपांगचालनैरेव परस्परमाचक्षाणासु तासु सत्यं देवपूजोपयोगिरात्रिविकाशिपुष्पाहरणार्थमागच्छाम इति किं लतास्वपाङ्गनिक्षेपेण ब्रूथ्वे, अयुक्तमिदं कालदेशपात्रानौचित्यादित्याह—रजनीति । एषा चंद्रिकाबहुलापि घोररूपा रात्रित्वादेवेति वल्लीमूलपल्लवादिषु सूक्ष्मसर्पवृश्चिकादेर्दुर्लक्ष्यत्वात्पुष्पाहरणस्य कालोऽयमनुचित इति भावः । घोरसत्त्वा व्याघ्रादयस्तैर्निषेवितेति कालसंबंधेन वृंदावनदेशोऽप्ययमनुचित इति भावः । तस्माद्व्रजं प्रति यात । ननु क्षणं विश्रम्य यास्यामस्तत्राह—नेह स्त्रीभिः स्थेयमिति । कालदेशसंबंधेन युष्मल्लक्षणानि पात्राण्यप्यनुचितानीति भावः । तत्रापि हे सुमध्यमा इति । यूयं युवतयः सुंदर्यः स्थ अहं च सुंदरो युवैवात्रास्मि, यद्यपि यूयं परमसाध्व्य एव अहं च " कृष्णो ब्रह्मचारी " इति गोपालतापिनीश्रुतिप्रामाण्येन ब्रह्मचार्येव, सहावस्थानेऽपि न कश्चिद्दोषस्तदपि मनः खल्वविश्वास्यं युष्माकं मम चेति भावः । एवं[1] व्यंजितौत्सुक्यं श्लिष्टार्थेनापि स्पष्टी भवति । तद्यथा—आगमनकारणं लज्जया न ब्रूथ्वे चेन्मा बूत तदहं जानाम्येव तस्मात्तत्त्वं शृणुतेत्याह—रंजयतीति रजन्येषा ज्योत्स्नामयत्वादघोररूपा, तस्मादघोरैः सत्त्वैर्मृगादिभिरेव वृंदावनस्वभावेनाहिंस्रत्वाद्व्याघ्रादिभिरपि वा निषेवितेति । तेनात्र न भेतव्यमिति भावः । यद्वा—नात्र स्वस्वपत्यादिभ्यो भेतव्यं यतो घोरसत्त्वनिषेवितेति । तेऽत्र नागमिष्यन्तीति भावः । अतो व्रजं प्रति न यात इह मदंतिके स्थेयम् । कुतः—स्त्रीभिः । किं स्त्रीमात्रमेव स्वांतिके स्थापयसीत्यत आह—हे सुमध्यमा इति । सौंदर्ये तारुण्ये च सति याः स्त्रियः शोभनमध्यदेशा भवान्ति ताभिर्भवतीभिरेव नान्याभिः स्थेयमिति भावः । एवमुपेक्षामयाः अपेक्षामयाश्चार्थाः कृष्णोक्तीनां ज्ञेयाः ॥ अत्र **तोषिणी**—एषा प्रत्यक्षेति तासां तर्कवाग्मितामाशंक्य द्रढयति । ततः कुलवधूनां बहिर्वनादावागमनं नोचितमिति भावः । ननु समुदित्य बह्वीनामागमनं न दोषभाक्, यदि च दोषभाक् तर्हि व्रजेऽपि किमेषा रजनी नास्ति तत्राह—घोरेति । इह वन एव घोरं रूपं तामसस्वभावाभिव्यक्तिर्यस्या न तु व्रजे इहाऽसहायत्वात् तत्र मम सहायत्वादिति भावः । तथा इह घोरैः प्राणिभिर्नितरां सेविता व्याप्ता तो व्रजं प्रति यात निर्भया गच्छत नात्र विलंबो युक्त इत्याशयेनाह—नेति । ननु तर्हि कथमत्र भवता स्थीयते तत्राह—स्त्रीभिरिति । न तु स्त्रिय इव पुरुषा अल्पसत्त्वा इति भावः । किञ्च हे सुमध्यमा इति । ' यत्राकृतिस्तत्र गुणा वसन्ति ' इति न्यायेन सुंदरीणां गुणवतीनां च भवतीनां नात्रागमनं युक्तमिति भावः । अन्यत्तैः । यद्वा—ननु रसिकशेखर भवानिव वयमप्यत्र विहर्तुं पुष्पाद्याहर्तुं वा समागतास्स्म इति छद्मना तासामवस्थितिमाशंक्याह—रजनीति । एषा रजन्येव न तु दिनम् । ननु रात्रिविलासिनस्ततः को नाम दोषस्तत्राह—घोरेति । हे कमललोचन ज्यौत्स्नीयं रात्रिस्तत्राह—घोरसत्त्वेति । श्लेषेण यूयं यूथशो बह्व्यो व्रजं तत्र स्थितान्स्वपतीन्प्रति यात भजत, एकाकिना मया बह्वीनां प्रियाचरणस्याशक्यत्वात् । ततोत्र न स्थेयमिति नर्मविशेषः । ननु भीरुप्रवर घोरसत्त्वेभ्योऽस्माकं न भयं तत्राह—सुमध्यमाः हे कृशमध्याः, तनुमध्यत्वात् कृशांगीनामबलानां बलिष्ठेभ्यो भयं स्यादेवेति भावः । वस्तुतश्चैतत्तासां स्वविषयकभावस्य व्यंजनार्थम् नर्मणोत्कंठावर्द्धनार्थञ्च । श्लेषार्थश्चायम्—भयसंभावनया च निजाभीष्टं मा निवर्त्तयतेत्याह—प्रथमार्द्धेन । एषा उदितपूर्णचन्द्रा जनान् रंजयतीति रजनी घोररूपेत्यादिकयोः, तस्मादत्र न कोऽप्यायास्यतीति भावः । तस्मादिह मम वीरस्यैव सन्निधौ स्थेयम् । यद्वा—अघोररूपा तमोपगमात् । अघोरैर्वृंदावनस्वभावेन मिथो मित्रत्वप्राप्त्या भयाऽजनकैरेव सत्त्वैः सर्वप्राणिभिः दिवसप्रायत्वात्तस्या ज्योत्स्नाऽघोरैः सत्त्वैर्भ्रमरकोकिलादिभिरेव वा निषेविता । यद्वा—घोरं दुष्टानां भयजनकम् । अकारविश्लेषेण केषांचिदपि भयाऽजनकं वा सत्त्वं बलं यस्य मम तेन निषेवितेति बालाश्वासनार्थम् । तच्छ्रुत्वा पृष्ठवर्तिनीः सस्मितं परावृत्य पश्यंतीः प्रत्याह—उत्तरार्धेन । अतः सर्वदा व्रजं प्रति यात न, इहैव स्थेयं

---

१ रजन्याः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः ॥ विचिन्वन्ति ह्यपश्यंतो मा कृध्वं बंधुसाध्वसम् ॥ २० ॥
दृष्टं वनं कुसुमितं राकेशकररंजितम् ॥ यमुनानिललीलैजत्तरुपल्लवशोभितम् ॥ २१ ॥

किं च मातर इति । विचिन्वंति मृगयंते । बंधूनां साध्वसं भयं मा कृध्वं मा कुरुतेत्यर्थः ॥ २० ॥ ईषत्प्रणयकोपेनान्यतो विलोकयंतीः प्रत्याह । दृष्टमिति ।

युष्माभिः । कुतः—स्त्रीभिः । स्त्रीजातीनामीदृशस्थान एव स्थातुं योग्यत्वादित्यर्थः । तत्रापि च हे सुमध्यमाः परमसुंदरत्वान्मदंतिक एवात्र स्थातुं युज्यत एवेत्यर्थ इति ॥ १९ ॥ अन्यदप्याह—इह स्थितौ भवद्बंधूनां क्लेशो भवेदित्याह—किंचेति । मातरः स्नेहवशात्, पितरो निंदाभयात्, पुत्रा बालाः स्तन्यादिहेतोः, भ्रातरोऽपि निंदाभयादेव, पतयो व्यभिचारशङ्कया । 'भीतिर्भीः साध्वसं भयम्' इत्यमरः । बंधूनां मध्ये साधोः साधुत्वस्य असं क्षेपं मा कुरुत, न हि साध्वीनां रात्रौ बहिर्गमनमुचितामिति भावः । इत्यर्थ इति । साध्वसपरिगामित्वात्परस्मैपदप्रयोगेणार्थः कार्य इति तात्पर्यम् । प्रार्थनायां तु तेऽपश्यन्तो विचिन्वंतीति बंधुभयप्रयुक्तं साध्वसं मा कृध्वम् मा कुरुध्वं, यतस्ते मोहिताः । किंचात्रागता युष्मान्मत्पार्श्वे पश्येयुस्तदा युष्माकं मम च लज्जाभयं स्यादेव । अपश्यन्तो मा विचिन्वंति अतो बंधुभ्यो भयं मा कुरुत । माङ् उभयत्रान्वेति ॥ * ॥ ननु रात्रावपि वनेऽपि युवतीनामपि संघशो गमने दोषो न जनैरुद्घोष्यते—सत्यम्, तदपि बंधवो भवतीरनिष्टशंकया सांप्रतमवश्यमन्विष्यंत्यतस्तान्मा व्याकुलयतेत्याह—मातर इति । वो युष्मान्विचिन्वंति मृगयंते । अत्र पुत्रा द्वित्रिमास्या एव नान्वेषणे चतुराः 'पाययन्तः शिशून्पयः' इति, 'क्रंदंति वत्सा बालाश्च' इति पूर्वापरोक्तेः, तदपि भगवता स्वस्मिंस्तत्तद्विशेषज्ञानाभावमभिनीतवतैवोक्तमित्यदोषः । अतो बंधूनां साध्वसं युष्मद्दर्शनोत्थं भयं मा कृढं मोत्पादयत । पक्षेऽपश्यन्तो विचिन्वंत्येव न त्वतिदूरे, निबिडे वनेऽस्मिन् वो न द्रक्ष्यन्त्यतो बंधुभ्यः सकाशाद्भयं मा कृढ्वं स्वच्छन्देन मया सह रात्रौ विलसतेति भावः ॥ अत्र **तोषिणी**—ननु पुरुषसिंह परमबलीयसस्त्वांतिके स्थितानां न कुतो भयमित्याशंक्य सशंकमाह—मातर इति । अत्र मातरः पितरो भ्रातर इति कुमारिका दृष्ट्वा भणितम् । व्यूढतया प्रतीता दृष्ट्वा पतयः पुत्रा इति यदुक्तं तत्खलु परिहासार्थं कल्पनामात्रमिति स्थापयिष्यते । च शब्दः उक्तसमुच्चये । हि निश्चये । अतो यदि कदाचित्तेष्वेकोऽप्यत्रागत्य मत्पार्श्वे युष्मान्पश्येत्तदोभयेषामपि लज्जाभये स्यातामिति भावः । अतोऽत्रावस्थित्या निजबंधुभ्यो मम आत्मनश्च साध्वसं भयं मा कृढ्वं नोत्पादयत । यद्वा—महामंत्राभिज्ञ ते सुदुर्गमवनमध्ये नागमिष्यंति आगता अपि न द्रक्ष्यन्त्येव तत्राह—युष्माकमप्राप्त्या बंधूनामनिष्टाऽऽशंकातो भयं नोत्पादयत, 'साध्व्यो हि बंधुवत्सलाः' इति न्यायात् । अतस्तेषु स्नेहेन च निवर्त्तध्वमिति भावः । अथ वा श्लोकद्वयेऽस्मिन्प्रत्यावृत्त्येदं व्याख्येयम्—हे सुव्रत त्वत्पार्श्वस्थिता न कुतश्चिदपि बिभीम इत्याशंक्य चक्षुर्मुद्रणपूर्वकं साभिनयमाह—नेहेति । मत्पार्श्वे स्त्रीभिर्न स्थेयमाबालब्रह्मचारित्वेन मम स्त्रीसंगपरिहारादित्यर्थः । अहो बत बालिकानां वृद्धानां वा सहवासे दोषोऽपि न किल घटेत; यूयं तु नवयौवनारूढा इत्याह—हे सुमध्यमा इति । ननु महाकपटपटो ! त्वजेऽस्माभिः संगो भवता बहुधा भवत्येव तत्राह—इहेति । इह निर्जनवने समये च प्रदोष इति दोषविशेषं श्रीमुखभंगिविशेषेण सूचयति । अत इहेदानीं युष्मत्संगान्मम दुष्कीर्तिरेव बाढं स्यादिति सर्वथा प्रयातैवेति । ननु सुप्रतिष्ठ ! न कोऽपि ज्ञास्यतीति दुष्कीर्तेर्मा भैषीस्तत्राह—मातर इति । अतोऽत्रागता नूनं द्रक्ष्यन्त्येवेति भावः । अतो मद्बंधूनां मद्दुष्कीर्तेर्भयं मा संपादयत । अन्यत्समानम् । वस्तुतस्तु तेभ्यो भयोत्पादनेन वंशीवादनस्थानात् दूरे सुगुप्तस्थाने नेतुं तथोक्तमिति । श्लेषार्थश्चायम्—न चात्र स्वस्वबंधुजनागमनमाशंक्यम्, यतः मातर इत्यादि । एवार्थे हिशब्दः । गहने वनेऽस्मिन्नंधा इवापश्यंत एव विचिन्वंति, अतो बहुमार्गणेनापि न द्रक्ष्यंतीत्यर्थः । ततश्च बंधुभ्यो भयं मा कुरुतेति ॥ २० ॥ अन्यतो वनम् । उपेक्षायाम्—भवतीभिर्वनं दृष्टम् । किंभूतम्—कुसुमानि संजातान्यस्येति हासो लक्ष्यते भवतीनामनुचिताचारं वीक्ष्य वनमपि हसतीति भावः । ततोऽपि परावृत्त्याऽऽकाशदत्तदृष्टीर्दैवमुपालंभंतीरिवालक्ष्याह—राकेति । राकेशोऽपि वनेनैकरसं योगं कृत्वा हसत्येव । पुनरतिकोपेन यमुनाभिमुखीरालक्ष्याह—यमुनेति । यमुनापि समीरकंपितनीरतरुपल्लवचालनच्छलेन नेह स्थेयमित्युपदिशतीति

१ मा कृढ्वमित्येव पाठ एतन्मते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः ॥ क्रंदंति वत्सा बालाश्च तान्पाययत दुह्यत ॥ २२ ॥

राकेशस्य पूर्णचंद्रस्य करै रंजितं यमुनास्पर्शिनोऽनिलस्य लीला मंदगतिस्तया एजंतः कंपमानास्तरूणां पल्लवास्तैः शोभितम् ॥ २१ ॥ सतीः हे सत्यः ॥ २२ ॥

भावः । पक्षेऽतीवशोभनरमणोपयोगि स्थलमिदं ततो रमणं कुरुतेति द्योतयाति ॥ * ॥ ततश्च ता लज्जया परितो विलोकयंतीराह—दुष्टमिति । आः ! ज्ञातं वनदर्शनार्थमागता इति । ततश्च तासामूर्द्ध्वावलोकने सत्याह—राकेशेति । यमुनादिगवलोकने सत्याह—यमुनास्पर्शिनोऽनिलस्य लीला मंदगतिस्तया एजन्तः कंपमानास्तरूणां पल्लवाः पुष्पितास्तैः शोभितमित्यभीप्सितं वनादिदर्शनमपि निर्व्यूढमतो मा विलंबध्वामिति भावः । पक्षे वृंदावनमिदं सर्वोत्कृष्टं, तत्रापि पूर्णचंद्रा रजनी, तत्रापि चतुर्दिक्षु यमुना, तत्रापि शैत्यमांद्यसौगन्ध्यवन्तोऽनिला इत्युद्दीपनविभावा एते, आलंबनविभावश्चाहं वर्त्त एवेत्यद्य युष्माकं रसिकता परीक्षिता भविष्यतीति भावः ॥ अत्र **तोषिणी**—ततस्तासां प्रणयकोपेन यदन्यतो दर्शनं तदन्यथोत्प्रेक्ष्यते—दृष्टमिति । तद्यातेति परेणान्वयः । कुसुमितमित्यादिविशेषणैर्दृश्यतोक्ता । तत्र चेषत्प्रणयकोपतो वनावलोकने दृष्टं वनमित्युक्तम् । तत उर्द्ध्वावलोकने च राकेशकररंजितमिति । ततः कालिंदीतीरावलोकने तु यमुनेति विवेचनीयम् । अन्यत्तैः । यद्वा—ननु महामोहनवाक्याद्यतिक्रमेण तेऽस्माभिरुपेक्षिता एवेति कुतो भयमिति चेत्तर्हि तादृशप्रयत्नेन रात्रावत्रागमनस्य किं नाम प्रयोजनमिति सकैतवं क्षणं ध्यात्वा—आः ! ज्ञातम्, दिष्ट्या पूर्णचंद्रायां रात्रौ मदीयश्रीवृंदावनशोभानिरीक्षणार्थमागतमिति । भवतु तच्च संपन्नमेवेत्यंगुल्यादिना दर्शयन्सलीलमाह—दृष्टमिति । अर्थः स एव । वस्तुतस्तु साक्षात्तथा तादृशवनादिप्रदर्शनेन भावमेवं विवर्द्धयतीति । श्लेषार्थश्चायम्—न केवलं तद्भयाभाव एव अपि तु परमसुखनिधानत्वमप्यत्रास्तीति भावोद्दीपनाय स्वयं दर्शयाति—दृष्टमिति । ईदृशसर्वगुणयुक्तं वनं दृष्टमेव तत्तस्माद्घोषं यातेत्यन्वय इति ॥ २१ ॥ यतो युष्मानपश्यंतो बंधवो भयमाप्नुवन्ति ततो हेतोर्यूयं मा चिरं शीघ्रं गोष्ठं यात, तान्वत्सान् पाययत गवां पार्श्वे त्यजत, बालांश्च दुह्यत स्वांगरसं तेषु पूरयत । दैवादिकत्वं दुहेरार्षम् । पक्षे माशब्दस्य सर्वत्रान्वयः । गोष्ठं मा यात किंभूतं चिरं चिरानुभूतमित्यर्थः । पतीन्मा शुश्रूषध्वं यतस्ते सुप्ताः । वत्सा मा क्रंदंत्यतस्तान्मा पाययत । बालाश्च मा क्रंदंति तानपि मा दुह्यतेत्यनेन ध्वनितमत्रैव रमध्वमिति ॥ * ॥ तत्तस्मान्मा चिरं यात, अपि तु शीघ्रमेव यातेत्यर्थः । सतीः पतिव्रता अपि शुश्रूषध्वम्, तद्धर्मग्रहणार्थं ता अपि भजनीया एवेति । इति परोढा उक्त्वा कुमारीः प्राह—वत्सा गवां क्रंदंति तान् दुह्यत दोहयत । मुनिचरीः प्राह—बालाः क्रन्दान्ति तान्पाययत । पक्षे—तत्तस्माच्चिरं समग्तामपि रात्रिं व्याप्य मा यात मया सह रमध्वमिति भावः । पतीन्साध्व्यश्चि मा शुश्रूषध्वं विधात्रा दत्तस्यैतादृशसौंदर्यस्य यौवनस्य च वैयर्थ्यप्रापणानौचित्यादिति भावः । एवं मा दोहयत मा पाययत मदनुरागिणीनां भवतीनां किं तैरिति भावः ॥ अत्र **तोषिणी**—तत्तस्माद्वनशोभादर्शनेन निजमनोरथपूरणान्मदोच्चैर्गीतदधिमंथनगवादिशब्दैर्घोषयति शब्दायते इति घोषः । श्लेषेण तु सर्वेषां सर्ववृत्तं घोषयतीति तं गोपाऽऽवासं संयात । 'गोष्टम्' इति क्वचित्पाठः । तत्रैव भवतीनां सर्वा सामग्रीति तदेव गन्तुं युज्यत इति भावः । मा चिरम् अचिरादेवेत्यर्थः । यद्वा—तत्र विलंबं मा कुरुतेत्यर्थः । किमर्थम् ?, पतिं शुश्रूषध्वं सेवध्वम् । कुतः—सतीः । हे सत्यः अन्यथा साध्वीत्वभंगः स्यात् । अतः परपुरुषस्य मम पार्श्वे युष्माकमवस्थानमयुक्तमिति भावः । ननु परमसेव्यत्वत्सेवामसहमानाः सदाऽसूयावंतो दुष्टतरास्तेऽस्माभिः परित्यक्ता एव, पतिव्रतात्वमपि त्वत्पादाब्जं निर्मंछनीकृत्य दूरतः क्षिप्तमित्याशंक्य सकरुणमिव पक्षान्तरमाश्रयन् वत्सादिषु स्नेहं जनयति—क्रंदंतीति । अतस्तान्वत्सान्पाययत बालार्थं च दुग्धं दुह्यत दोहयत, एतच्च तत्तत्संनिधानविश्रंभितत्तत्प्रियगवाद्यपेक्षया । अत्रेदं तत्त्वम्—ताः खलूद्दिश्य "स वो हि स्वामी भवति" इति गोपालतापन्याम् "श्रियः कान्ताः कान्तः परमपुरुषः" इति ब्रह्मसंहितायाम् । दशाक्षरादिमंत्राश्च तथा श्रुत्यागमादौ कृष्णवध्व इति चात्रैव तदेव श्रीकृष्णैककान्तानां परमलक्ष्मीणां तासामन्यत्र विवाहो न संभवति तत्प्रतीतिश्च तासामुत्कंठावर्द्धनार्थम् 'योगमायामुपाश्रितः' इत्यादौ तदर्थं निर्दिष्टया योगमाययैवेति गम्यते । यैव खलु तत्प्रतिरूपकल्पनया तत्पतिंमन्यांस्तान्वंचयति । वक्ष्यते हि—'नासूयन्खलु कृष्णाय' इत्यादि । ततस्तैः सहांगसंगाभावेनाऽजातापत्या एव केवलं स्नेहविशेषेण भ्रातृप्रभृतिपुत्रान् यान् पालयन्ति ते एव पुत्रा इति उच्यन्ते, तेषामपि लोके पुत्रतया व्यवहाराद्विशेषतस्तथा पाल्यमानत्वात् । श्रीबलदेवसांबावष्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ वा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः ॥ आगता ह्युपपन्नं वः प्रीयंते मयि जंतवः ॥ २३ ॥

संरंभक्षुभितदृष्टीः प्रत्याह । अथ वेति । यंत्रिताशया वशीकृतचित्ताः । उपपन्नं युक्तम् । प्रीयंते प्रीता भवंति ॥ २३ ॥

द्दिश्य "सस्नुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः" इति श्रीशुकवाक्येऽपि प्रयुक्तत्वात् । ततः स्तन्याभावेन गोदुग्धमेव तान्पाययंतीति तान्पाययत दुह्यतेत्युच्यते । अत एव मुनिनाप्युक्तम्—'पाययन्त्यः शिशून्पयः' इत्यत्र शिशूनित्येव पय इत्येव च न तु सुतान्स्तनमिति । यदि च तासामुदरजा एव ते स्युस्तदा रासनृत्यनायिकानामादिरसनायिकानां च तासां वैरूप्येण तस्य रासनृत्यस्य रसस्य च वैरूप्यं स्यात् । 'मातरः पितरः पुत्राः' इत्यत्र श्रीभगवद्वाक्ये केषांचिद्रात्रावपि वनेऽपि मात्रादिविचेतृत्वेन कासांचिदर्द्धजरतीत्वमप्यायाति तत्र पुनरतीव तत्स्यात् । तत्तु श्रीवैशंपायनस्यासंमतम्—"युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्"इत्येनेन । तथा तादिदं तासामालंबनरूपाणामुद्दीपनसौष्ठवमपि वर्णयता मुनीन्द्रेण न मतम्।'भगवानपि ता रात्रीः'इत्यादावुद्दीपनसौष्ठवेनालंबनरूपाणां तासां सौष्ठवमनुस्मृत्य रन्तुं मनश्चक्र इति च गमितम्।वक्ष्यते च तासां सौष्ठवं श्रीभगवंतमपेक्ष्य प्रौढत्वं च"मध्ये मणीनां हैमानां महामारकतो यथा"इत्यनेन, 'व्यरोचतैणांक इवोडुभिर्वृतः'इत्यनेन, 'तडित इव ता मेघचक्रे विरेजुः'इत्यनेन च। अत एव'मातरः पितरः पुत्राः' इत्यादिकं च कल्पनामयमेव जल्पितम्,परिहास वचनं वा'वाचःपेशैर्वि मोहयन्'इत्यत्र 'प्रहस्य सदयं गोपीः'इत्यत्र च परिहासस्य स्फुटतरत्वात्।तस्माच्छ्रीभगवतस्तासां सपुत्रतया निर्देशस्तु परिहासपर एव न तु दोषोद्धारपरः। दोषोद्धारे 'निंदामि च पिबामि च'इति न्यायेन च तासां स्वीकारे परमवैरस्यमेव च स्यात् । आस्तां तावत्तासां स्वयं दोषोद्धारः तादृशस्यालंबनदोषस्यास्तित्वमात्रेऽपि रसव्याघातः स्यात् । तच्चान्यत्रापि सन्नायके कविभिर्वर्जनीयत्वेन स्वीकृते न संभवति किमुत परमपुरुषोत्तमे महाकविवर्णनीये लीलारसविशेषवर्षणार्थमवतीर्णे तस्मिन् । वक्ष्यते च—"भजते तादृशीः क्रीडा यां श्रुत्वा तत्परो भवेत्" इति, 'सिषेव आत्मन्यवरुद्धसौरतः । सर्वाः शरत्काव्यकथारसाश्रयाः' इति च । तस्मात्पतयोप्यासां मायामात्रप्रतीताः, पुत्राश्च गौणार्था इति । श्लेषार्थश्चायम्—तत्तस्माद्बंधुभ्यः साध्वसाभावात् वनशोभारतिसामग्रीसद्भावाच्च अचिरं शीघ्रं मा यात । यदि यास्यथ तदा विलंबेन रात्र्यंत एव यास्यथेत्यर्थः । चकारान्माशब्दस्याग्रेऽपि सर्वत्र संबंधः—पतीन् मा शुश्रूषध्वम् । सतीः साध्वीर्मा शुश्रूषध्वं न सेवध्वम्, तत्पदवीमपि न यातेत्यर्थः । स्वातंत्र्यादिसुखभंगादिति च नर्मैव । वत्सा बालाश्च मा क्रंदंति तस्मान्मा पाययत मा दुह्यत चेति स्वातंत्र्यं सूचितम् ॥ २२ ॥ संरंभः कोपावेशस्तेन क्षुभितदृष्टीर्भ्रांतेक्षणाः । अथ वेति निपातद्वयं संभ्रमे मंगले वा । मयि विषये जंतवो जीवमात्राणि । अतो रमध्वमिति पक्षः ॥ * ॥ अथ वेति । हंत मया वृथैव तान्यागमनकारणानि कल्पितान्यधुनैव कारणमवगतमित्याह—मयि योऽभि सर्वतो भावेन स्नेहस्तस्मात् यंत्रिताशया वशीकृतचित्ता अत एवागतास्तदुपपन्नं मद्दर्शन लाभात् सिद्धम्, यतो मयि जंतवः प्राणिमात्राणि प्रीयन्ते इत्यात्पत्तिकं मे सौभाग्यं न त्वौपाधिकमिति भावः । तेन भवत्यो मयि प्रीतिसामान्यवत्य एव न तु कामोपाधिकप्रीतिविशेषवत्य इति ध्वनितम् । पक्षे—मदभिस्नेहः कांतभावमयः प्रेमा तस्माद्धेतोर्यंत्रीकृत आशयो याभिस्ताः । भवतीनां मनसा यंत्रेणैवाहमाकृष्टो वर्ते इत्यर्थः । तत् आगमनमुपपन्नमुचितमेव, न तूपपत्तिरहितमित्यर्थः । मयि जंतवोऽपि प्रीयंते किमुत भाववत्यो भवत्य इति भावः ॥ अत्र **तोषिणी**—अथ संरंभक्षुभितदृष्टीस्ता निवर्त्तयितुमिव जंतुमात्रसाधारणतानिर्देशेनातिक्षोभयन्नाह—अथ वेति । पक्षांतरमिदम् 'दृष्टं वनम्' इत्यादिनिरसनापेक्षया । मयि योऽभिस्नेहः प्रीतिसामान्यातिशयः तस्मादिति । रत्यर्थः पुंस्त्रीभावविशेषो न गृहीतः विशेषेणाभावात् । अत एव महौदास्यमाह—हि यतः सर्वेऽपि प्राणिनो मयि प्रीतिं कुर्वन्तीति । मदभिस्नेहादिति साक्षादुक्त्या तमपि शिथिलयति अत । एव गौरवेण भवत्य इति । अन्यत्तैः । यद्वा—अहो बत परित्यक्ता एव ते सर्वे तत्किं पुनस्तन्नामग्रहणेनेत्याशंक्य सश्लाघं पक्षांतरमाह—अथ वेति । अर्थस्तथैव । वस्तुतस्तु एवमौदासीन्यं चातुर्यभंग्या भावविवर्द्धनार्थमेवेति । श्लेषार्थश्चायम्—एवं यद्यप्यन्यप्रयोजनायागतास्तथापि मत्प्रार्थनया कियंतं क्षणमत्र विश्राम्यतेत्येवमुक्त्वा पक्षांतरमाह—अथ वेति । अभिशब्देन स्नेहस्य सम्यक्त्वोक्त्या रत्याख्य भाव एव सूच्यते । ततश्च यदि वा मदभिस्नेहादागतास्तर्हि तदेतदुपपन्नं युक्तमेवेत्यर्थः । तत्र हेतुः—जन्तवः प्राणिमात्राणि । मम मत्संबंधे । प्रीयंते मयि प्रीता भवंतीत्यर्थः । ततस्तादृशभाववतीनां वा का वार्तेति भावः । अत एव प्रेमादरेण भवत्य इति । अतोऽधुना मया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया ॥ तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणम् ॥ २४ ॥
दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा ॥ पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २५ ॥

दृष्टादृष्टभयप्रदर्शवेन विवर्तयति भर्त्तुरित्यादिश्लोकत्रयेण ॥ २४ ॥ २५ ॥

सह स्वच्छंदं रमध्वमिति भावः ॥ २३ ॥ शास्त्रसिद्धांतमाह—दृष्टं भयं राजनिंदादि, अदृष्टं नरकादि । अमायया अवंचनया । तद्बंधूनाम् भर्तृबंधूनां श्वशुरादीनाम् । प्रजानाम् संततीनां पालनं च परो धर्मः शास्त्रविहितत्वात् । अन्यथा कल्याणं नश्यतीति संबुद्ध्याह—हे कल्याण्य इति । भर्तुः सर्वपालकस्य मम अमायया नैष्कापट्येन सेवनं परोऽत्युत्तमो धर्मः, मम प्रसादहेतुत्वात् । "अमाययाऽनुवृत्त्या वै तुष्यत्यात्मप्रदो हरिः" इत्याद्युक्तेः । तद्बंधूनां देवानां ब्रह्मादीनां च यज्ञादिना सेवनं प्रजानां स्थावरजंगमानां यथोचितमनुपोषणं पानःपुन्येन पालनं स्थावराणां नित्यं जलादिप्रसेचनेन जंगमानामन्नवस्त्रादिप्रदानेनेत्यर्थः ॥ * ॥ ननु भवदभिस्नेहवत्यो वयं भवाम इति चेत्—जानामि । तर्हि तद्यात गोष्ठमिति मुहुः किं ब्रवीषि, न हि स्नेहाश्रयो जनः स्नेहविषयं जनं त्यक्तुं शक्नुयात्—सत्यम्, येन धर्मः सिध्येत्तदेव स्नेहवतापि व्रजजनेन कर्तव्यमिति शास्त्रम् । अत एतद्ब्रवीमीत्याह—भर्तुरिति । पर उत्कृष्टः । अमाययेति न तु पुंश्चलीत्वे सतीत्यर्थः । तद्बंधूनाम् श्वश्र्वादीनाम् । पक्षे स्त्रीणां प्रस्तुतत्वात् स्त्रीविशेषाणां व्रजसुंदरीणां भवतीनामित्यर्थः । भर्तुः शुश्रूषणं परो धर्मो न त्वात्मीयोऽतः स नानुष्ठेय इति भावः । यदुक्तम्—"विधर्मः परधर्मश्च आभास उपमाछलः । अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत् ॥" इति । मम विष्णुत्वाद्भवतीनां च वैष्णवीत्वान्मद्भजनमेव भवतीनां स्वधर्मोऽन्यस्तु परधर्म एव । "धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च सत्तमः" इति धर्मांतरत्यागपूर्वकस्य मद्भजनस्य विधिरिति भावः ॥ अत्र **तोषिणी**—ननु यद्यस्माकं भवदभिस्नेहो निश्चितस्तदा भवच्छुश्रूषाऽपि युक्तेत्त्याशंक्य धर्मशास्त्रेण भापयति—भर्तुरिति त्रिभिः । भर्त्रादीनामेव शुश्रूषणादिकं धर्मः न तु तादितरेषामस्माकम्, स चान्यधर्मापेक्षया परः । ननु तदप्यस्माभिर्यथायुक्तं क्रियत एव तत्राह—अमाययैवेति । परपुरुषस्य मम भजने सकपटमेव स्यात्ततः सोऽपि दुष्येदिति भावः । कल्याण्यो हे साध्व्यस्तदेव युष्माकमुचितमिति भावः । एतच्च कैतवेन प्रोत्साहनम् । वस्तुतस्तूपहास एव तस्य परमधर्मत्वाभावात् । "एतावानेव लोकेऽस्मिन्पुंसां धर्मः परः स्मृतः । भक्तियोगो भगवति तन्नामग्रहणादिभिः ॥" इति श्रीधर्मराजवाक्यादिति । श्लेषार्थश्चायम्—न केवलं मदभिस्नेहहेतोरेवोपपन्नमपि तु धर्महेतोरपीत्याह—भर्तुरिति । अमायया कल्याणीभिर्निजसद्भाववृत्तत्वेनैव न तु बलादापादितत्वेन । यो भर्ता तस्यैव शुश्रूषणं परो धर्मस्तथा तद्बंधूनां चेत्यादि । अन्यत्र परमधर्मविदा श्रीभीष्मेणांबायाः परित्यागाद्धर्मतो भर्तृत्वाऽसिद्धेः । तदेवं सद्भावावृतत्वेन ते मायया कपटेनैव भर्तारः सद्भाववृत्तत्वेन त्वहमेव सत्यभर्ता भवतीभिः शुश्रूषणीय इत्यर्थः । अत्र बाल्यमारभ्य भवतीनां हृदयमेव मम साक्षीति भावः । वस्तुतश्च स एष एवार्थः स्थापयिष्यते ॥२४॥ पत्युः दौश्शील्यादिसत्त्वेऽपि स्त्रीभिस्त्यागो नोचित इत्याह—दुःशील इति । दुःशीलः कलहादिज्ञानसंपन्नः । दुर्भगः निर्वीर्यः,कांतिहीनो वा । वृद्धः प्रवयाः । जडः कर्तव्याकर्तव्यज्ञानहीनः । रोगी भग्नांगोऽल्पांगो वा । यद्वा—कुष्ठादिव्याध्यार्तः । दौशील्यादिसत्त्वेऽपि ब्रह्महत्यादिपंचमहापातकरहितश्चेत्तर्हि शुचिरेवेति । "आ शुद्धेः संप्रतीक्ष्यो हि पतिः पातकदूषितः" इति याज्ञवल्योक्तेः। लोकेप्सुभिः स्वर्गादिफलेच्छुभिः । पक्षे—एतादृशोऽप्यहं चेत्तर्हि न त्याज्यः । पातीति पतिः तद्वत्त्वात् । किं वा पातिर्व्रजवासी युष्माभिर्न हातव्यो न गन्तव्यः । 'ओहाङ्—गतौ ' ॥ * ॥ ननु भवदभिस्नेहवतीनामस्माकमननुरूपाः प्रतिकूललीला अरोचकास्ते पतयः कथं सेव्या भवान्त्वित्यत आह—दुःशील इति । अपातकीति ' पतिं त्वपतितं भजेत् ' इति स्मृतेः । पतनहेतुपातकवानेव पतिस्त्याज्य इत्यर्थः । लोकेप्सुभिः पतिलोकसुखवांछावतीभिः । पक्षे—लोकेप्सुभिः इह लोके परलोके चातिक्षुद्रकीर्तिसुखाद्यपेक्षावतीभिरेव न हातव्यः, युष्माभिस्तु लोकद्वयाय जलांजलीन्दत्त्वा मन्माधुर्यसुखवारिधौ खेलंतीभिः प्रथमत एव पतिस्त्यक्त एव ॥ अत्र **तोषिणी**—ननु परोपदेशपंडित सर्वथा पतयः त्यक्ता एवाधुना किं तदीयशुश्रूषाद्युपदेशेन तत्राह—दुःशील इति । दुश्शीलः चौर्यादिरतः । दुर्भगः भाग्यादिहीनः, निष्फलोद्यम इत्यर्थः । वृद्धः जराभिभूतः । जडः कर्मादिषु सामर्थ्यहीनः । रोगी महारोगग्रस्तः । अधनोऽतिदरिद्रः, निजोदरभरणेप्यसमर्थ इत्यर्थः । अपिशब्दस्य प्रत्येकमन्वयः । दौश्शील्यादियुक्तोऽपि न हेयः, व्रजवासी तु सर्वसद्गुणयुक्त एवेति कथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहम् ॥ जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः ॥ २६ ॥

फल्गु तुच्छं कृच्छ्रं दुःसंपाद्यम् औपपत्यं जारसौख्यम् ॥ २६ ॥

त्याज्यः स्यादित्यपिशब्दार्थः । लोकेप्सुभिः लोकद्वयापेक्षावतीभिः । अन्यथेह लोके परत्र च दुःखमेवेत्यर्थः । तत्र च पातक्येव परित्याज्य इत्याह—अपातकीति । पातकं पतनहेतुः पापविशेषः । तथा च स्मृतिः ‘ पतिं त्वपतितं भजेत् ’ इति । अतोऽत्रत्यानां सर्वेषामपि पापमात्राभावान्न हातुं योग्य एवेति भावः । वस्तुतस्तु तासां निश्चितेऽपि दृढभावे उत्कंठावर्धनार्थमेव तथोक्तमिति । श्लेषार्थश्चायम्—तस्माद्वस्तुतोऽहमेव पतिरिति स्थिते दुःशीलेत्यादिवचनानुसारेण तत्तद्दोषयुक्तोऽपि पतिर्न हातव्य इति स्थिते निखिलकल्याणगुणयुक्तः पतिरहं कथं हातव्यस्ते पुनस्तत्तद्दोषयुक्ता न च पतय इति कथं न हातव्या इत्याह—दुःशील इत्यादि ॥ २९ ॥ कामस्य पुरुषार्थत्वेन पतिदोषेण तदप्राप्त्या जन्मनो नैष्फल्यापनुत्तये प्रकारांतरेण किं जन्मसाफल्यं न कार्यमिति चेत्—तत्र बाधकमाह । चोऽवधारणे । उपपतिः—पत्युः प्रतिनिधिरुपपतिर्जारः ‘ जार स्तूपपतिः समौ ’ इत्यमरः । तत्संबंधि कर्म ग्राम्यलक्षणं तत्कुलस्त्रियाः सर्वत्र पत्युरुत्तमाधममध्यमेषु पुरुषेषु जुगुप्सितं गर्हितमेवेत्यन्वयः । कथम्, तदुच्यते—अस्वर्ग्यम् स्वर्गविरोध्येव, प्रत्युत सप्तसूर्म्यादियातनाप्रदम् । किञ्च, अयशस्यम् इहामुत्र दुष्कीर्तिकरम् । तथापि न बहुलं फल्गु तुच्छफलम् । अल्पकालविषयत्वात्कादाचित्कत्वेनेत्यर्थः । कृच्छ्रमिति व्याख्यातं स्वामिपादैः । दुःसंपाद्यमिति कर्तुरतिश्रमसाध्यत्वात् । भयावहम् मरणादिभयकरम् । निधुवने तत्पत्यादिसमागमादिनेत्यर्थः । पक्षे—उप समीपे पतिर्यस्याः सोपपतिस्तस्या भावस्तत्त्वम्, अष्टयामं पतिसामीप्यम् । कु कुत्सितं लात्याददातीति कुला सा चासौ स्त्री च तस्या एव न तु मान्निष्ठानां युष्माकम् । ताराहल्यादीनां तु व्यभिचारादप्यौपपत्यं जुगुप्सितं न जातं पुनः पतिभिरंगीकरणादिति ॥ * ॥ मयि स्नेहसामान्यवत्यो भवत्यः स्वभावाद्भवन्त्येव किन्तु धर्मप्रतिकूलधर्मविशेषस्तु सर्वथैव त्याज्य इत्याह—अस्वर्ग्यमिति । मास्तु स्वर्ग इति चेत्—अयशस्यम् । यशोऽपि मा स्यादिति चेत्—फल्गु । मिथ्यैव ब्रूषे नेदं फल्गु सर्वोत्कृष्टत्वेनानुभूतत्वादिति चेत्—कृच्छ्रम्,—पत्यादिवारणकष्टमयम् । ननु “ वामता दुर्लभत्वं च स्त्रीणां या च निवारणा । तदेव पंचबाणस्य मन्ये परममायुधम् ॥ ” इति, “ दुःखमप्यधिकं चित्ते सुखत्वेनैव रज्यते ” इति च रसशास्त्रोक्तेः प्रत्युत तत्कृच्छ्रं रागवतीनामस्माकं सुखाशयहेतुरेवेति चेत्—भयावहम्, लोकशास्त्रनिषिद्धत्वादैहिकपारत्रिकभयप्रदम् । ननु “ यत्र निषेधविशेषः सुदुर्लभत्वं च यन्मृगाक्षीणाम् । तत्रैव नागराणां निर्भरमासज्जते हृदयम् ॥ ” इति रसशास्त्रोक्तेः प्रत्युत रसाधायकमेवैतदिति तत्राह—जुगुप्सितमिति । सर्वदेशे सर्वकाले औपपत्यमुपपतिकर्तृकं कर्म कुलस्त्रिया जुगुप्सितमिति । सर्वत्र तद्वती कुलस्त्री निंद्यत इत्यर्थः । तत्र यद्यपि स्वाभीष्टसिद्ध्या स्वनिंदापि सुसहैव तथापि मत्प्रणयास्पदानां युष्माकं निंदा मयापि कथमुत्पादनीयेति । अतो गोष्ठमेव यातेति भावः । पक्षे—सर्वत्रेति जुगुप्सितमिदं सार्वत्रिकमेव, प्रस्तुते तु मम नारायणसमत्वं गर्गमुखपरंपरया श्रुतमेव युष्माभिरित्यतो ममौपपत्येऽपि नैव निंदा । परमेश्वरत्वेन शुभाशुभकर्मातीतत्वादिति भावः ॥ अत्र **तोषिणी**—ननु श्रीव्रजयुवराज भवदाज्ञया नैव पतयस्त्याज्याः किं तु सदा नाम्नैव तेषां पतित्वं पतित्वव्यवहारस्तु त्वया सहैवास्तामित्याशंक्य तासां दीर्घाभीष्टनिंदनेन परमाप्रियमत्रहित्थया साभ्यसूयमिवाह—अस्वर्ग्यमिति । अस्वर्ग्यम् स्वर्गप्राप्तौ प्रतिकूलम् । अयि कामिन्यो दृष्टत्वाभावान्मास्तु स्वर्गापेक्षा इह लोके यशोऽपेक्षा त्वस्त्येव तद्बाधकं चेत्याह—अयशस्यमिति । पूर्वसंचितयशसोऽपि लोपकम् । ननु सुगुप्तमेवैतत् को नाम जानातु तत्राह—तथापि फल्गु तुच्छम् अस्थिरत्वात् । ननु भो अच्युत त्वया सहास्माकं तत्सुस्थिरमेव तत्राह—तथापि कृच्छ्रं दुःखसाध्यम् । ननु स्वैरसिंह व्रजे श्रीवृंदावने च स्वच्छंदविहरणात्सुखसाध्यमेव तत्राह—तथापि भयं परलोकात्कदाचित् स्वाम्यादिभ्यश्च तत् आ सम्यग्वहति प्रापयतीति तत् । ननु अमृतनिर्मंछनीयमधुराधरत्वदपेक्षयास्माभिः सर्वमुपेक्षितमेवेति कुतोपि न भयं तत्राह—तथापि सर्वत्र स्वदेशपरदेशयोर्व्यवहारपरमार्थयोश्च जुगुप्सितं निन्दितम् । हि निश्चितम् । ननु तत्त्वज्ञेन्द्र निजाभीष्टसिद्ध्या जुगुप्सापि सुसहैव तत्राह—कुलस्त्रिया इति । जातावेकत्वम् । कुलकलंकतोऽपि कुलस्त्रीणां परमानुचितमिति सर्वथा परिहार्यमेवेति भावः । वस्तुतस्तु पूर्ववदुत्कंठावर्द्धनार्थमेवेति । श्लेषार्थश्चायम्—पूर्ववदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवणादर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥ न तथा संनिकर्षेण प्रतियात ततो गृहान् ॥ २७ ॥
श्रीशुक उवाच ॥ इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितम् ॥ विषण्णा भग्नसंकल्पाश्चितामापुर्दुरत्ययाम् ॥ २८ ॥

किं च श्रवणादिति ॥ २७ ॥ २८ ॥

धर्मोपात्तः पतिस्तद्विपरीतस्तूपपतिरिति । अथ च लोकेऽप्यन्यथा प्रसिद्धिमालक्ष्य स्मृतिवाक्यमिदं छलार्थतया नर्म व्यंजयति । उप समीपे पतिर्यस्याः सा उपपतिस्तस्या भाव औपपत्यम् । पत्युः सामीप्यमित्यर्थः । तत्स वैयाऽस्वर्ग्यादिदोषयुक्तमिति । एवं भर्तुः शुश्रूषणमित्यत्र परः सर्वाधिक एवाऽधर्म इति व्याख्येयम् ॥ २६ ॥ स्वप्रीतिसाधनमाह—किंचेति । अन्यदाहुः—तव मुख्यभर्तृत्वात्त्वत्सेवनं जारसेवनवदस्वर्ग्यादि न किन्तु पतिसेवन तोऽपि मुख्यं स्वर्ग्यादिसाधनमेवेति चेत्—तथापि मच्छ्रवणादिना मयि भावो भक्तिस्स्यान्न तथा सन्निकर्षेणात्यंतसामीप्येन तेजस्विनामत्यंतसामीप्यं वह्निवद्भयंकरमिति तात्पर्यम् । अतो गृहानवाप्य मद्भक्तिर्विधेयेत्याह—प्रतियातेति । पक्षे—श्रवणादिना तथा न यथा संनिकर्षेण ततोऽगृहान् अकृतदारगमनान् प्रति यात भजत । किं वा गृहान्मदीयकुंजभवनानि विशतेत्यर्थः ॥ * ॥ ननु कथमन्यथा संभावयसि न वयं त्वदंगसंगार्थमागताः किन्तु गर्गोक्तिप्रामाण्यान्नारायणस्य समो नान्य इत्यतस्त्वामेव नारायणं ज्ञात्वा त्वद्भक्तिकामा वयमागतास्तदद्यतनीं रात्रिं स्वसमीप एवास्मान्स्थापयित्वा कृपया स्वचरणसरोजं परिचारयेति चेत्, तत्राह—श्रवणादिति । शुद्ध भक्ताः खलु सामीप्यसालोक्यादिकमपि न कामयन्ते यथा श्रवणकीर्त्तनादिकमिति प्रसिद्धिर्भवतीभिर्वैष्णवीभिः श्रुतैवेति भावः । पक्षे—श्रवणादिभ्यो भावः कंदर्पस्तथा न भवति यथा सन्निकर्षेणेत्यतो गृहान्प्रति न यातेति तत्र आवृत्त्यान्वयः । यद्वा—नञ्पर्यायस्याकारस्य प्रश्लेषेणाऽऽगृहान्, न गृहान्प्रति यातेत्यर्थः॥२७॥इति श्रुत्वा भगवन्पुनः किमुक्तं ताभिरिति पृच्छंतं परीक्षितं श्रीशुक उवाचेति । इतीत्थम् ‘ प्रतियात, नेह स्थेयं सुमध्यमाः’ इतिप्रकारम् । विप्रियं चित्तौत्सुक्यनिवर्तकम् । विषण्णाः स्थातुं गन्तुं वाऽशक्ताः । भग्नः संकल्पो नंदनंदनेन रंस्यामह इत्येवंरूपो मनोरथो यासां ताः । चिंतां दुखेन मनसोऽस्वास्थ्यम् । दुरत्ययाम् विना भगवत्प्रसादम निवार्याम् । पक्षे—विशेषेण प्रियम् । विगतं सन्नमवसादो यासां ता विषण्णास्ताश्च ता अभग्नसंकल्पाः संजातमनोरथास्तास्तथेत्येकं पदम् । दुरत्ययाम् मनोभवकृतदुःखहरां चिंतां चर्चां विचारं वा ‘ चिंता चर्चाविचारयोः’ इति यादवः ॥ * ॥ गाः नानाविधान् वाग्विलासान्प्रयोक्तुं विदंते लभत इति गोविंदस्तस्य भाषितम् ‘भाष्—व्यक्तायां वाचि ’ इत्यतो व्यक्तवाक्यं विप्रियमाकर्ण्य तदेव ध्वनिश्लेषयुक्तमव्यक्तवाक्यं तस्य प्रियत्वे बुद्ध्या सम्यगवगतेऽपीत्यर्थः । व्यक्तवाक्यस्य विप्रियत्वे कारणमपृष्ट्वाऽव्यक्तवाक्यस्यापि प्रियत्वे संदिहानास्ता अनुरागस्थायिभावोत्थदैन्योदयात्सत्यमयोग्या अस्मानयमुपेक्षते स्मैवेति निश्चित्य विषण्णाः,—यदर्थमहो पतिकुलपितृकुलधर्म धैर्यभयलज्जादिकमुपेक्ष्याऽऽयाताः स खल्वस्मानुपेक्षत इति भग्नसंकल्पाश्चिन्तामापुः । किं सकाकुपादग्रहणमिममनुनयेम, किं वा प्रयत्नतो धैर्यमवलंब्य कृत्रिमशाठ्येन व्रजं प्रति निवृत्य दुरवगाहगांभीर्यस्याप्यस्याशयं निर्धारयेम, किं वा प्राणान्परित्यजेम, तत्र चास्य साक्षादेव परोक्षं वा, यमुनाप्रवेशादिना वा हंत प्राणांस्त्यक्त्वास्य श्रीमुखं कथं पश्येम । अत्यक्त्वा वा कथमत्र स्थातुं प्राप्स्यामः, एतदादिष्टं पत्यादिभजनरूपं वान्त भक्षणं कर्तुं वा कथं प्रभवाम, क्व याम, किंकरवामेत्यादीतिकर्तव्यतामूढा बभूवुरित्यर्थः । “ आहूय गोपीततिचातकावलीः स्ववेणुनादेन ववर्ष यद्विषम् । कृष्णस्तदेवाशु पपुः सुविस्मिता विश्वस्य ताः का जहति व्रतं निजम् ॥ ” ॥ अत्र **तोषिणी**—एवं बहुधा प्रत्याख्यानेऽप्यनिवृत्तिमाशंक्य भावापलापेनाप्यौदास्यं विधत्ते—श्रवणादिति । श्रवणादिना यथा भावो भवति तथा संनिकर्षेणांगसंगेन न स्यात् । विरहे समुत्कंठया झटिति तद्वृद्धिः, संयोगे तूत्कंठाशैथिल्यादिति भावः । एवं परां काष्ठामापन्नोऽपि तासां भावोऽसिद्धतानिर्देशभंग्यापलपित एव । तत्र पूर्वरागे प्रायः पूर्वं श्रवणं, ततो दर्शनं, ततः संयोगप्राप्त्या निरंतरा तत्स्फूर्तिः, ततश्च तत्कथैवेति क्रमेणैव निर्दिष्टम् । वस्तुतस्तु परमकौतुकित्वान्निरंतरप्रेमभरसुकोमलितदक्षिणस्वभावानां तासां प्रेमवैयग्र्यदर्शनार्थमेवेति । श्लेषार्थश्चायम्—ननु येन सद्भावेन स्वस्य भर्तृत्वं तद्वैपरीत्येन तेषामभर्तृत्वं स्थापितं स एव न संभवति तव विप्रकृष्टत्वात्, तेषां तु सन्निकृष्टत्वादित्यत्राह—श्रवणादिति । यथा येन रसविशेषप्रकारेण मयि श्रवणादितोऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वा मुखान्यवशुचः श्वसनेनशुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः॥अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजत्य उरुदुःखभराः स्म तूष्णीम्॥२९॥

चिंतां प्राप्तानां स्थितिमाह। कृत्वेति।शुचः शोकादुद्गतेन श्वसनेन शुष्यंतो बिंबफलसदृशा अधरा येषु मुखेषु तानि अव अवांचि कृत्वा तथा चरणेन चरणांगुष्ठेन महीं लिखंत्यः।

भावो भवति तथा सन्निकर्षेणापि न। येऽन्ये संनिकृष्टाः पतिंमन्यास्तेष्वपि न स्यादित्यर्थः। मिथः प्रेमयोग्ययोर्यथा सन्निकर्षेण प्रणयबंधो भवति तथा न श्रवणादिनेति लोकप्रसिद्धत्वादन्यपदमर्थायत्तम्, प्रथमत एव तथोपक्रांतत्वात् प्रकरणप्राप्तश्च। तस्माद्गृहान्प्रति न यातेत्युभयत्रापि नञोऽन्वयः। यद्वा–प्रतिषेधप्रत्याख्यानप्रतिपक्षादिषु प्रकृतार्थविरोधेऽपि प्रतिशब्दो दृष्टः, ततश्च प्रतियात गमनविरोधविषयान्कुरुतेत्यर्थः। एवं तासां पूर्ववत्संलापो द्विधा–कासुचिद्यथार्थमेव, कासुचिच्चानुरागविवर्तेन नवीभावादिति ज्ञेयम्। इति एतद्गोविंदस्य गोकुलेंद्रत्वेन गोकुलमात्रहितस्यापि किमुत स्वेषु भाषितं स्फुटमेव वचनं विप्रियमिति। अर्थद्वयस्य स्पर्शित्वेनानिश्चिताशयत्वात्। उत्कंठास्वभावेन तासामुपेक्षैव स्फुरितेति। विषण्णाः अंतस्तप्ताः सत्यः। यतो भग्नः संकल्पस्तदंगसंगविषयश्चिरंतनमनोरथो यासां ताः। अतो दुरत्ययामनतिक्रम्यां चिंतामिष्टानवाप्तिजन्यं ध्यानमापुः। अयं प्रेमार्द्रकोमलस्वभावोऽपि परमकाठिन्यमस्मद्दौर्भाग्येन गतः, तदधुना किं सपादग्रहणकाकुभिरमुमनुनयेम उत प्रतिवचनेन वा प्रयत्नतः क्षणं धैर्यावलंबनेन वा शाठ्यतो व्रजं प्रति निवृत्त्या वा दुरवगाहगांभीर्यस्यास्याशयं निर्धारयेम, किं वा सद्य एव प्राणांस्त्यजेम। अत्र चास्य साक्षादेव परोक्षं वा, यमुनाप्रवेशादिनेत्यादि चिंतयामासुः॥ २८॥ चिंतायुताः कीदृश्यो बभूवुरिति चेदाह–कृत्वेति।उद्गतेन निःसृतेन श्वसनेन प्राणवायुना। बिंबफलम् अतिमृदुलरक्तम्। अधरा ओष्ठाः "अधरस्तु पुमानोष्ठे हीनेऽनूर्द्ध्वे च वाच्यवत्" इति मेदिनी। अंतर्गतशोकाग्नितापेन शुष्यदोष्ठा जाता इति भावः। अत्र "कामबाणप्रविद्धांगी स्विन्नयोनिर्वरांगना। पादांगुष्ठनखेनाधोवदना लिखती भुवम्॥" इति कामशास्त्रप्रसिद्धं भावं दर्शितवत्य इति ज्ञेयम्। अस्रैरिति नेत्रद्वारांतस्थां कामपीडां बहिराविर्भावयामासुरिति सूचितम्। कोमले मुखे कर्कशवचनस्यानौचित्याऽऽदर्शो ध्वनितः–मुखान्यधः कृत्वेति। तूष्णीं स्थिता वितर्कयंति–अयं प्रेमार्द्रकोमलस्वभावोऽपि परमकाठिन्यमस्मद्दौर्भाग्येन गतः सपादग्रहणचिबुकस्पर्शादिभिरनुनीयेत, किं वा प्रतिवचनेन प्रयत्नतः क्षणं धैर्यावलंबनेन वा, शाठ्यतो व्रजं प्रति निवृत्त्या दुरंतगाहगांभीर्यस्यास्याशयं निर्धारयेम, किं वा सद्यः प्राणान्परित्यजेम तत्र चास्य प्रत्यक्षं परोक्षं वा यमुनाप्रवेशादिना वेति तर्काः। किं च किं वास्मद्भ्रांत्याऽन्या एवागतास्तास्त्वेवायमेवं वदतीति मौग्ध्येनात्मनोऽवलोकनाय किं वेदानीं किं विधेयमिति निजस्य पृच्छायै, किं वाऽतिनिष्ठुरमीदृशं वाक्यजातं निशम्याधुनापि जीवाम इति स्वत्रीक्षायै, किं मुखदर्शनेन दुःखाग्निश्वासधूमेनाधरबिंबमुखपद्मानां शोषः मुकुलितप्रायत्वं तिरश्चीनत्वात्, किं वा निजानां चंद्रत्वानुभवात्तद्दर्शनेन नेत्रकमलसंकोचात्स्वादर्शनं भ्रमनिवारणायेत्येवं बहुधाऽन्येपि सन्तीत्यलं प्रपंचेन॥ *॥ चिंताया अनुभावानेवाह–कृत्वेति। मुखानि अव अधः कृत्वेति लज्जा ध्वनिता। प्रेम्णोऽनुरोधादस्माकं स्वाभाविकलज्जात्याग एव संप्रति लज्जां प्राप। यतः कुलवतीनां पुंजीभूतलज्जानामप्यस्माकं लज्जात्यागः खलु प्रेमहेतुक एव। स च प्रेमरसविदां मते संगीत एव न तु विगीतः। प्रेम्णस्तु लक्षणमेतदेव यत्स्वविषयं परमेश्वरमप्यतिशयेन वशीकरोति तत्प्रेमेति। ततश्च यदस्माकं प्रेमविषयोऽयं कृष्णो न वशोऽभूत्तदस्माकं प्रेमैव नास्तीत्यवगतम्, लज्जात्यागोयं किंहेतुकोऽभूदित्यनुतापो लज्जा चिंता च। तत्रानुतापं विवृण्वन् मुखानि विशिनष्टि–कीदृशानि शुचः शोकादुद्भूतेन श्वसनेनोष्णश्वासेन शुष्यंतो बिंबाधरा येषु तानि। सूर्यातपेन पक्वबिंबफलानां शोषे सति स्थौल्यस्यापगमः स्पष्टमलिनत्वं च यथा भवेत्तथाऽधराणामप्यभूदिति भावः। लज्जाचिंते विवृणोति–चरणेन वामपदांगुष्ठेन भुवं लिखंत्य इति। हे धरित्रि विदीर्णा भव त्वयि वयं प्रविशाम इति। शोकसंतापौ विवृणोति–उपात्तमषिभिः कज्जलकृष्णैः कुचयोः कुंकुमानि मृजंत्यस्तेन विच्छेदवर्द्धकेन महासंतापक्रकचेन द्विधा विदारयितुं श्यामसूत्ररेखे दत्ते इति संभावना ध्वनिता। अस्रैरिति बहुवचनेन मृजंत्य इति वर्तमानकालेन चास्राणां प्रवाहवती धारा सूचिता। तावद्भिरप्यस्रैरंतरीयवस्त्राण्यप्यार्द्रयंतीत्यमुयोक्त्या एवं संभाव्यंते–नयनोत्थयमुनाद्वयहृदयोत्थसंतापानलयोर्निर्वापणशोषणकामयोर्विवादेन कस्यापि जयः पराजयो वा दृष्ट इति। उरुदुःखस्य भरो भारो यासां ताः। तूष्णीमिति–भारासहिष्णुतयैव चेतनाया अपगमादिति भावः। ततश्च तस्थुरिति तासां गतचेतनानां पांचालिकानामिवोर्द्ध्वावस्थितिरेव गम्यते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः॥नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभगद्गदगिरोऽब्रुवतानुरक्ताः॥३०॥गोप्य ऊचुः॥
मैवं विभोऽर्हतिभवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलम्॥भक्ता भजस्व दुरवग्रह मा त्यजास्मान्देवो यथाऽऽदिपुरुषो भजते मुमुक्षून् ॥३१॥

तथा गृहीतकज्जलैरश्रुभिः कुचकुंकुमानि क्षालयंत्यस्तूष्णीं स्थिताः। यत उरुर्महान् दुःखस्य भरो भारो यासां ताः ॥ २९ ॥ किं च। प्रेष्ठमिति। किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ता अब्रुवत स्म। संरंभे कारणं प्रेष्ठमित्यादि। प्रियेतरमिव प्रतिभाषमाणं प्रत्याचक्षाणम् ॥ ३० ॥ एवं नृशंसं क्रूरम्। हे दुरवग्रह स्वच्छंद तव पादमूलं भक्ताः सेवितवतीरस्मान्भजस्व मा त्यजेति ॥ ३१ ॥

अत्र **तोषिणी**—अत एव तूष्णीं तस्थुः, क्षणं परमचिन्तावेशेन वागिंद्रियवृत्त्यस्फूर्तेः। शुच इत्यनेन शुष्यदित्यनेन च श्वासस्योष्णता दीर्घता च ध्वनिता। शतृप्रत्ययेन शोषाऽविच्छेदः। बिंबेत्यरुणता कोमलता च। अतोऽधराणामतिशोषो म्लानता च सूचितैव। चरणेन वामपादांगुष्ठेन भूलिखनं चिन्तानुभावः। हे भूमे विदीर्णा भव प्रविशामो वयमित्यस्य भावः, एवमूर्द्ध्वावस्थितिरेव गम्यते। उपात्तमसिभिरिति कुचकुंकुमानि मृजंत्य इति चास्राणां धारा सूच्यते। तस्या अपि बाहुल्यविवक्षया बहुत्वम्। तत्र सर्वत्र हेतुः—उरुदुःखस्य विषादस्य भरो भारो यासु ताः। अनेनानुक्तमपि संतापक्लेशादिकं गृह्यते। तेन वैवर्ण्यस्तंभादयोऽपि जाता इत्यर्थः। स्मेति प्रसिद्धौ। नर्मोक्त्यापि तासां तादृशशोके त्वया संभावना कार्या इति भावः। यद्वा—विस्मये तयापि तादृशदुःखमभूदहो प्रेममहिमेति। एते च चिंतानुभावा न तासां वक्ष्यमाणनिषेधरूपप्रतिवचनार्थ विशेषभंजकाः, कामिकृतप्रार्थनायां कुलवतीनां तत्संभवात् तासां रसाविरोधिभावोदयस्वभावाच्च ॥ २९ ॥ न केवलं तूष्णींभावमाश्रित्य स्थिता एव, अपि तु किंचिदब्रुवतेत्याह—किञ्चेति। दुःखकथनं त्वतिप्रियायोचितमित्याह—प्रेष्ठमिति। गद्गदाः स्खलिताक्षराः। संरंभपदेनाधरदशनं सूचितम्। प्रियेतरम् शत्रुम्। प्रत्याचक्षाणम् खण्डयन्तम्। चिंतां त्यजत, मा रुदत, स्वस्था भवत, गृहान्यातेत्यादि तदानीमपि वदंतमित्यर्थः। तदर्थं कृष्णकृते विनिवर्त्तितस्त्यक्तः,—सर्वे—कामा यस्मात्स सर्वकामः पतिः वांछितविषयो वा याभिस्तास्तथा। रुदितेन रोदनेनोपहते क्लिष्टे। अनुरक्ताः तत्परित्यागं कर्तुमशक्ताः ॥ * ॥ ततश्च किमरण्यरोदनं कुरुध्वे प्रसन्नमुख्यः सत्यः स्वस्वगृहं किं तूर्णं न गच्छतेत्युच्चैरुच्चारितेन भगवद्वाक्येन कर्णाध्वनांतःप्रविष्टवता मूर्छातस्ताः प्रबोधिताः किञ्चिद्विज्ञापयामासुरित्याह—प्रेष्ठम्, पूर्वं बहुशःकृतांगसंगात् प्रियतमम्। अथ च कारणं विनैव प्रियेतरमिव प्रतिकूलं स्वस्वपतिं भजध्वमित्यतिकठोरं भाषमाणम्। एतच्च नैव संभवेत्, यतस्तदर्थं विशेषेण पुनर्यथा संबंधगंधोपि तेषां न स्यात्तथा निवार्तिताः सर्वे कामा याभिस्ताः। अत्रान्यशब्दस्याप्रयोगाच्च भगवत्सुखार्थक कामः कामशब्देन नोच्यते इति श्रीशुकाभिप्रायः। रुदितेनोपहते अंधीभूते नेत्रे विमृज्येति। अयमंतकालोऽस्माकमागतस्तत्सकृदप्येतस्य मुखकमलं दृष्ट्वा म्रियामहे इत्याकांक्षयेति भावः। हंतहंत प्रेयसापि भूत्वा विनैवापराधं कथमेतावान्प्राणांतो दंडः क्रियते इति संरंभः, तथा वयमेतदनुरूपगुणाद्यभावादंगसंगाऽयोग्या एव भवामोऽतस्त्यज्यामह इति मननात्संरंभाभावश्चेत्यतः किञ्चित्संरंभेण गद्गदागिरो यासां ताः। ननूभयथाऽपि प्रेम शून्यात्तस्मान्निवृत्तिरेवोचितेत्यत आह—अनुरक्ता इति। अनुरागांधा हि विचारं न सहन्त इति भावः ॥ अत्र **तोषिणी**—प्रेष्ठं प्रियतममपि प्रियेतरमिव प्रियमात्रादितरमिव प्रत्याख्यानं कुर्वन्तम्। ननु तर्हि तस्मान्मनः कथं न न्यवर्तयंस्तत्राह—तदर्थं कृष्णाप्तये विशेषेण निवर्त्तिताः पुनर्यथा संबंधगंधोऽपि तेषां न स्यात्तथा निरस्तास्तद्व्यतिरिक्ता अशेषाभिलाषा याभिस्ताः। अतस्तन्निवर्त्तयितुं नाशक्नुवन्निति भावः। कुतः—कृष्णम् परमानंदघनतया सर्वचित्ताकर्षकतया च तन्नाम्ना प्रसिद्धं श्रीव्रजेंद्रनंदनम्। ननूरुदुःखाक्रान्ताः कथं वक्तुमपि शक्तास्तत्राह—संरंभेति। अमर्षेण विषादकार्येणैव विषादावरणादिति भावः। तत्र नेत्रमार्जनं भावद्वयसंधिजम्, तच्च प्रणयकोपस्वभावतः किञ्चिच्छ्रीमुखावलोकनपूर्वकवचनार्थमिति परमार्त्या लज्जाशैथिल्यमपि गम्यते। किञ्चिदिति विषादांशस्यांतर्भूतत्वात्। तद्द्वयकार्यं गद्गदत्वमनुरक्तत्वञ्च विषण्णतादौ सर्वत्रैव हेतुः ॥ ॥ ३० ॥ विभो प्राणनाथ। नृशंसम् वज्रसारवत्काठिन्येन हृदयविदारकम्। मेति प्रयोगो दुःखवैषम्येण स्त्रीस्वभावाद्वा। भक्ता अस्मान्मा भजस्व अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तिर्व्यर्था स्यात् । हे स्वेषु दुरवग्रह दुराग्रह । यद्वा–हे स्व हे बंधो दुरवग्रहं हठम् आ आसमंतात्त्यजेति । दृष्टान्तः–आदिपुरुषो महाविष्णुः यथा मुमुक्षून्मुक्तिकामनया भजतो न त्यजति 'ये यथा मां प्रपद्यन्ते' इत्याद्युक्तेः । वस्तुतस्तु अवग्रहो वृष्टिविघातस्तद्रहितो दुरवग्रह, भक्ताभीष्टवर्षणशीलेत्यर्थः । यद्वा–भानि नक्षत्राणि गभस्तयो वा विद्यंतेऽस्येति भवांश्चंद्रः, भा भयदा दूताः संत्यस्येति भवान्यमराजः । चंद्रेणापि रोहिणी प्रीत्याऽन्या भार्यास्त्यक्ताः । यमश्च लोकानां दुःखप्रदोऽस्त्येव स च स च नृशंसं गदितुमर्हति यतस्त्वं ताभ्यामन्योऽतो मैवम् । एवं मा वदेत्यर्थः ॥ * ॥ अस्मान्धर्ममुपादिशस्यथ च स्वयं पापराशिं चिकीर्षसीत्यनुचितमित्याहुः–मैवमिति । नृशंसं घातुकं साक्षान्मारकं यथा स्यात्तथा गदितुं भवान् प्रतिपुरुषं धार्मिकत्वख्यातिमतो नंदस्य पुत्रः सन्नार्हति । अन्यस्तु प्रतिपुरुषं मानुषमारणवृत्तिको वरमर्हतु नामेति भावः । 'नृशंसो घातुकः क्रूरः' इत्यमरः । त्वया कोटिसंख्या अपि वाक्शरास्तथैकदैवास्मान्प्रति निक्षिप्ता यथाधुनैव शरीराणि परित्यज्य यमपुरं सर्वा एव वयं यामो न तु त्वदुपदिष्टं गोष्ठपुरम्, त्वं तु शतकोटिस्त्रीवधपातकानि गृहीत्वा स्वयमेव गोष्ठं याहि । स्त्रीवधान्नो चेज्जिघृक्षासि, तर्हि सर्वविषयांस्त्यक्त्वा तव पादमूलं भक्ताः सेवितवतीरस्मान्भजस्व । अत्राऽन्यविषयानित्यनुक्त्वा सर्वविषयानित्युक्त्या च भगवदंगसंगो हि विषयो न भवतीति ध्वनितम् । ननु भोः कामिन्यः स्वस्वपतिभ्यो भवतीनां कामो नोपशाम्यति ? यतस्तान्परित्यज्य मामेव भजध्वे, तत्राहुः–हे दुरवग्रहेति । "अवे ग्रहो वर्षप्रतिबंधे" इति पाणिनिस्मरणात् दुष्टो दोषयुक्तोऽवग्रहो वृष्टिप्रतिबंधोऽनावृष्टिर्यस्येत्यत्रान्यपदार्थस्य मेघस्यैवोपयुक्तत्वाद्दुःशब्दप्रयोगाच्च । हे विषमात्रवर्षुक मेघेत्यर्थः । तेन चातकीनामस्माकं दूरस्थोपि त्वमेव कृष्णमेघो बंधुः, स च दैवदोषादद्य विषं वर्षसि, अवग्रहवत्वात्सलिलं न चेद्वर्षसि तर्हि मा वर्ष त्वद्वृष्टं विषमेव पीत्वा वयं म्रियामहे न तु निकटस्थानां ह्रदादीनामपि जलं पिबामेत्यस्माकं स्वभावं जानीहीति भावः । अतोस्मान्मा त्यज यद्यात्मनः कृतज्ञत्वं दधासीति भावः । ननु च चातक्यो मेघमपेक्षंतां नाम मेघस्तु चातकीर्नापेक्षते, चातक्यो म्रियन्तां जीवन्तु वा मेघस्य न कापि हानिरिति चेत्–सत्यम्, न त्वं जडात्मको मेघ एव किन्तु विदग्धचूडामणिर्नारायणसमो नारायणवदेव वर्त्तस्वेत्याह–देव इति । मुमुक्षून् त्वदुपासनाथ सर्वविषयांस्त्यक्तुमिच्छूनपि तदभीष्टोपपादनया भक्तवश्यत्वाद्भजते अस्मांस्तु त्वदर्थे संत्यक्तसर्वविषयश्रेणीका अपि त्वं कथं न भजसीत्यर्थः ॥ अत्र **तोषिणी**–श्रीगोप्य ऊचुरिति । तत्रैवं विवेचनीयम्–यद्यपि समानभावापन्नत्वेन युगपत्समानवचनस्फूर्तिरपि संभवति तथाप्येकदोक्तावतिकोलाहलतया नातिरसाधायकत्वात्कासांचिन्मुख्यानामेव वचनं ज्ञेयम् । तच्च युगपद्वा तत्तन्महावाक्योपसंहारे 'तन्नः प्रसीद वरद' इति, 'सिञ्चाङ्ग' इति, 'तन्नः प्रसीद वृजिन–' इति, 'तन्नो निधेहि' इति स्वस्वविवक्षितवचनचतुष्टयान्तं क्रमशो वा पूर्वपूर्वस्यां वाक्यस्थापनपूर्वकमेवोपन्यस्तमास्ति । चतुष्टयत्वं च–यूथशो दिक्चतुष्टयस्थितत्वात्तासाम् । तथापि सर्वासां तत्संमुखत्वञ्च 'कृष्णस्य विष्वक्पुरुराजिमंडलैरभ्याननाः' इतिवत् । "यासामेव प्रसादेन यासां श्रीनागरेश्वरे । जल्पितत्वं जायते ता वन्दे श्रीनागरेश्वरीः ॥ गोपीगणप्राणवल्लभाय भगवते नमः॥" । अथ पत्यादिपरित्यागेन त्वद्भजनेऽस्माकमधर्मो धर्मो वेति पश्चाद्विचारयिष्यते । अहो तवैव तावदस्मत्त्यागे धर्मदोषो दुष्परिहर इत्याह–मैवमिति । मेति निषेधस्यादौ प्रयोगः परमार्तिवैय्यग्र्येण । एवम् ईदृशम् । कथंचिदेतद्वचनसदृशमपि, किमुत वक्तव्यमेतादित्यर्थः । कुतः–नृशंसम्, वज्रसारवत्काठिन्येन हृदयविदारकमित्यर्थः । यद्वा–साक्षान्मारकम् 'नृशंसो घातुकः क्रूरः' इत्यमरः । गदितुं व्यक्तं वक्तुं किं वा गादितुमपि किमुत व्यवहर्तुमर्हति । तत्र च भवान्, प्रेमादिस्वभावतया प्रसिद्ध इत्यर्थः । तत्रापि विभो हे अस्मत्प्राणनाथ । अतोऽस्मान्प्रति मार्हत्येवेति भावः । अत्र 'संरंभगद्गद–'इत्युक्तत्वात् सर्वत्रशब्देन स्वरेण वा दैन्यादावपि प्रणयकोपो व्यंजनीयः । एवम् 'स्वागतं वो महाभागाः' इत्यादिकं भवता सादरं सन्यायं मृदूक्तमपि निवर्त्तनार्थमेवेति रसविघातकत्वादर्थतो विपरीतमेवेति भावः । अनेन स्वागतमित्याद्यपादस्योत्तरमूह्यम् । ननु भोः प्रियवादिन्यस्तर्हि किं कर्तुमर्हामीत्यपेक्षायामाहुः–अस्मान्भजस्व मनोरथपूरणेनानुवर्तस्व । कुतः–तव पादयोर्मूलतलं भक्ता इति । दैन्योक्तिः । अंगादिरूपकानुक्तिर्नृशंसेत्युक्त्या काठिन्याद्यभिप्रायेण । अनेन 'प्रियं किम्' इति पादस्योत्तरम् । ननु श्रीगोपगृहिण्यः सत्यमेव भजामि किन्तु भवत्पत्यादिहिताचरणमेव युक्तं नहीदृशमिति, तत्राहुः–संत्यज्येति । सर्वान् विषयानिंद्रियार्थान् पत्यादिरूपान्सम्यगपुनरंगीकारदार्ढ्येन त्यक्त्वा तेषां त्वद्भजनप्रातिकूल्यात् । अनेन 'व्रजस्यानामयम्' इत्यादिकस्य 'दुव्रत' इत्यंतस्य सर्वस्याप्युत्तरम् । तेषां सर्वेषां विषयांतःपातात् तत्त्यागेन देहेऽपि गलितप्रेमत्वात् तत्प्रेम विना 'रजन्येषा' इत्यादिवाक्यस्याप्यनुपादेयत्वात् । व्यतिरेकेणाहुः–हे दुरवग्रह । अस्माननन्यगतीर्मा त्यजेत्यर्थः । अन्यथैवं दोषः स्यादिति भावः । कथमित्याशंक्य धर्माधर्मातीतस्येश्वरस्यापीश्वरस्य तत्तद्धर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ॥ अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ॥ ३२ ॥

अपि च यदुक्तं पत्यपत्येत्यादि त्वया धर्मविदेति सोपहासमेवमेतदुपदेशानां पदे विषये त्वय्येवास्तु । उपदेशपदत्वे हेतुः ईश इति । विविदिषावाक्येन सर्वोपदेशानामीशपरत्वावगमादिति भावः । ईशत्वे हेतुः । आत्मा किल भवानिति । भोग्यस्य हि सर्वस्य भोक्ता आत्मैवेश इत्यतः प्रेष्ठो बंधुश्च भवानेवेति सर्वबंधुषु करणीयं त्वय्येवास्त्वित्यर्थः । अथ वा धर्मोपदेशानां पदे स्थाने धर्मोपदेष्टरि त्वयि सत्यस्मासु च धर्मं जिज्ञासमानासु सतीषु त्वया धर्मविदा यदुक्तमेवमेतदस्तु न तु त्वं धर्मोपदेष्टा किं तु भवानात्मेति । अथ वा । यदुक्तमेतदुपदेशपदे तद्गोचरे पुरुषेऽस्तु नाम त्वयि तु ईशे स्वामिनि सत्येवं काक्वा नैवमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूप इति । यद्वा यदुक्तं पत्यादिशुश्रूषणं धर्म इति एवमेतत्त्वय्येवास्तु । कुतः उपदेशपदे शुश्रूषणीयत्वेनोपदिश्यमानानां पत्यादीनां पदेऽधिष्ठाने । कुतः । ईशे न

पालनावश्यकतादर्शनादित्याहुः—देव इति । तत्रापि मुमुक्षूनपि किमुत तदेकेप्सून् मोक्षमप्यनिच्छून् । भक्त्यैकनिष्ठानित्यर्थः । यद्वा—मुमुक्षून् तस्मादन्यत्सर्वं त्यक्तुमिच्छून् । यथाऽसौ भजनमात्रापेक्षया सर्वानेव भजते स्वीकरोति तथा त्वमस्मान्भजस्वेति । 'भजतः' इति कचिद्द्वितीयान्तः पाठः । तत्र मुमुक्षूनित्यस्य विशेषणम् । तत्र साधनसाध्ययोर्द्वयोरप्यवस्थयोस्तेषामात्मसात्करणात्स कामान्व्यावर्तयति यथा तान्भजते न त्यजतीत्यर्थवशाद्भजस्वेत्यस्य विभक्तिं परिणमय्य व्याख्येयम् । तत्र श्रीगोपेंद्रनंदनत्वेनैव कृष्णे लब्धनिष्ठानामपि "यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः" इत्युक्तत्वात् । "हरिभक्त्या महादेव्याः सर्वा मुक्त्यादिसिद्धयः । भुक्तयश्चाद्भुतास्तस्याश्चेटिकावदनुद्रुताः ॥" इति नारदपंचरात्रोक्तानुसाराच्चानादृतमपि सर्वं ज्ञानादिकं ताः परिचरति । तस्मात्केवलप्रेममयेपि वचसि पारमैश्वर्यज्ञानमयोप्ययमर्थस्तासामेव महिमसूचनार्थम्, ज्ञानादिकं भक्तिप्रेरिततया भक्तविशेषाणां चमत्काराय स्फुरति । अथ वा दैन्येन महिमस्फूर्तेरीश्वरत्वं संभाव्येदृशं वचनम् । तथाहि—हे विभो बहिरंतर्व्यापक भवानस्माकं बहिरंतर्भावं सर्वं जानात्येवातस्तव पादमूलं भक्ता आश्रिता अस्मान्भजस्व, अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्यादि वचनानां वैयर्थ्यापत्तिः । ननु तत्त्वज्ञपूज्यपादाः कथं विषयसुखमिच्छथ ?, तत्राहुः—संत्यज्येति । अतो वयं परमार्थसुखमेवेच्छाम इति भावः । त्वया सह क्रीडाविशेषस्य तस्य प्रेमपरिपाकविलासरूपत्वेनाशेषपुरुषार्थसारसर्वात्मकत्वादिति 'ये यथा मां प्रपद्यन्ते' इत्येतन्निजवचनस्य सत्यतापेक्षया त्वमप्यस्मद्वदन्याऽशेषत्यागेनाऽस्मान्भोक्तुमर्हसीति गूढोऽभिप्रायः । हे दुरवग्रह स्वच्छन्द अस्मान्प्रपन्ना मा त्यज परमेश्वरत्वात्त्वामधर्मो न स्पृशत्येव, सत्यसंकल्पश्रुतिविरोधात्प्रतिज्ञाहानिस्तु परमाऽनुचितैवेति भावः । सर्वान्विषयान् साम्राज्यप्रभृति वैकुंठावधिपदानि संत्यज्यापि ते त्वाम् अमुमुक्षून्मोक्तुमनिच्छून् अशक्नुवतो जनानन्यानपि भज स्वीकुरु । द्वितीयायां षष्ठी, ते तुभ्यं त्वां प्राप्तुं मुमुक्षूनिति चतुर्थी वा । यतो देवो जगत्पूज्यस्त्वम्, अन्यथा देवत्वासिद्धिः । तत्रापि यथा यथावत्संपूर्णतयाऽऽदिपुरुषो भगवानिति । अत्र चाभिरपि यज्ञपत्न्युक्त्याद्यपद्यानुवादानुवादः आर्तिसाम्यांशेन ज्ञेयः । "आर्तावपि स्वभावेन वैदग्धीवलितात्मनाम् । प्रार्थेन गोपरामाणां निषेधार्थोऽपि वीक्ष्यते ॥" तथाहि—एवमीदृशं किंचित्प्रियं करवाणि मया सह किञ्चिद् ब्रूतेत्यादिकं नृशंसम् वक्तुं नार्हति । तत्र हेतुः—संत्यज्येति । याः सर्वविषयान्संत्यज्य तव पादमूलं भक्तास्ता एव दुरवग्रहं स्वच्छंदं यथा स्यात्तथा भजस्व, अस्मान् आ सर्वांशेनैव त्यज । प्रभवो भक्तजनानेव भजन्ते न त्वभक्तानित्यत्र दृष्टांतमाह—देव इति । अस्मिन्नर्थे वस्तुतस्तु सर्वमेतन्नैवेति भाव एव व्यंजित इति ॥ ३१ ॥ 'शुश्रूषध्वं पतीन्सतीः' इति यदुक्तं तत्राहुः—अपि चेति । धर्मविदा स्त्रीधर्मशास्त्रविदा इति । सोपहासमिति--'आर्तत्राणं परो धर्मः' इति स्मृतेरस्मानार्तास्त्यजतस्ते धर्मोपदेशो हासास्पदमेवेत्यर्थः । एवमेतत् यथोक्तमिदम् । उपदेशपदत्वे उपदेशविषये । इति भाव इति । "तमेतं वेदानुवचनेन यज्ञेन दानेन तपसा नाशकेन ब्राह्मणा विविदिषन्ति" इति श्रुत्या सर्वे वेदाभ्यासयज्ञदानाद्युपदेशाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमेशावास्य एवेति तात्पर्यम् । भोक्तैवेश इति । भोक्तारं विना भोग्यानां वैयर्थ्यात्, अनीशगृहवत् । यत आत्माऽत एव प्रेष्ठो बंधुः, निरतिशयप्रेमास्पदत्वात् । तथा च श्रुतिः--"तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽ
न्यस्मात्सर्वस्मादांतरं यदयमात्मा " इति । इत्यर्थ इति । सर्वात्मत्वादिति भावः । किञ्च, सत्युपदेष्टृपार्थक्ये उपदेशोऽन्याय्यो न त्वैक्यै इत्याहुः--अथ वेति । भंग्यंतरेणाहुः--अथ वेति । यदुक्तं धर्मशास्त्रेण एतद्वचस्तस्यो
पदेशस्य गोचरे पुरुषे प्राकृतजनेऽस्तु नाम भवतु, त्वयि स्वामिनि परमेशाने एवमुपदेशगोचरत्वमस्ति किम्, नास्तीत्यर्थः । पूर्वोक्तेरन्यथाकरणं काकुः " काकुः स्त्रियां विकारो हि शोकभीत्यादिभिर्ध्वनेः " इत्यमरः ।
ईशस्योपदेशाविषयत्वं कुतो न तत्राह--यत इति । साधकस्यैवोपदेशविषयत्वेन साध्यस्योपदेशाप्राप्यत्वमस्तीत्युक्तम्--फलरूप इति । यद्यपि त्वयाऽपत्यादिसेवा धर्मत्वेनोक्ता सापि 'यथा तरोर्मूलनिषेचनेन' इत्याद्युक्तरीत्याऽधिष्ठा
नेऽर्चितेऽधिष्ठेयाः स्वयमेवार्चिताः स्युरित्याहुः--यद्वेति । हेतुमाशंकते--कुत इति । अधिष्ठाने अधिकरणे । तत्रापि हेतुमाशंकते--कुत इति । अधिष्ठानाभावेऽधिष्ठेयानामभावात् । अन्यत् अवशिष्टम् । यद्वा—पत्यादीनाम
नुवृत्तौ रंगो रागो यासां स्त्रीणां तासामेव स्वधर्म इति । न त्वस्माकं त्वद्भक्तानामिति भावः।तेषामविधिगोचरत्वादिति भावः । ईशे वृंदावने ब्रह्मेंद्रादिभिरपि स्तूयमाने । यद्वा—बंधुराः प्रेमशृंखलाबन्धयुक्ता आत्मानो जीवा
यस्मिन्स तथा । यद्वा—तनुभृतामात्मा परमात्मैव बंधुर्न त्वन्येऽपत्यादयः ' बंधुर्गुरुरहं सखा ' इत्युद्धवं प्रति वक्ष्यमाणत्वात्, ' आत्मैव ह्यात्मनो बंधुः ' इत्याद्युक्तेश्च ॥*॥ अथ काश्चिन्मुखरास्तद्वचनेनैव तं पराजेतुकामा
आहुः—यदिति । पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्म इति यत्त्वयोक्तमेतदेवमस्तु अनेन प्रकारेण भवतु नात्र विवदामहे । एतदेवास्माभिः प्रतिक्षणं क्रियत इति भावः । ननु केन प्रकारेण, तत्राहुः—उपदेशस्य पदे आस्पदे
धर्मोपदेशकर्तरि त्वयि अनुवर्तिते सत्येव पत्यादीनामनुवृत्तिरुचितेत्यर्थः । 'प्रथमं धर्मोपदेष्टाऽऽचार्य उपसेव्यते पश्चात्तदुपदिष्ट आचरणीयो धर्मः' इति न्यायात् । आचार्यानुवृत्त्यैव निष्कपटया धर्मः सिध्येदिति च शास्त्रम्।
तत्रापि ईशे परमेश्वरे यद्याचार्य एव परमेश्वरः स्यात्तर्हि किमुतेति । किञ्चेश्वरत्वादेव तनुभृतां त्वमात्मा, आत्मत्वादेव प्रेष्ठः, प्रेष्ठत्वादेव बन्धुरिति । अयमर्थः—पत्यादीनां परमात्मसहितानामेवानुवृत्तिः शास्त्रोक्ता, आ
त्मराहित्ये तु सति सद्य एव गृहान्निःसारितानां तेषां नद्यादेस्तटे मुखानि दह्यंते इति धर्मशास्त्रम् । अतो मूर्तस्यात्मनस्तवैवानुवृत्त्या पत्याद्यनुवृत्तिसिद्धिः, किमन्यैस्तत्प्रतिकूलत्वादेव निरात्मकैर्दग्धमुखैः
पत्यादिभिरिति । ननु पूर्णप्रेम्ण ऐश्वर्यज्ञानावरकत्वादासाञ्च संपूर्णप्रेमवत्वात्कथमेतादृशमैश्वर्यज्ञानं संभवेत्, उच्यते—नारदपंचरात्राद्युक्तलक्षणो भक्तिरसामृतादिषु व्याख्यातः प्रेमा ह्यनिशनैसर्गिकौष्ण्यशैत्यवान्
विरहसंयोगे रसानुभावकोपि " ब्रह्मानंदो भवेदेष चेत्परार्धगुणीकृतः । नैति भक्तिसुखांभोधेः परमाणुतुलामपि ॥ " इति रसामृतोक्तेर्ब्रह्मानंदानुभवपरः परार्धाधिकोपि विरहे तीव्रांशुकोटेरप्यधिकं संतापयन्नैश्वर्यमाधुर्यसंबंधिनः
सर्वानेव भगवतो गुणान्प्रद्योतयत्येव, न तु कांश्चिदावृणोति विरहस्य सूर्यतुल्यत्वेन सर्वप्रद्योतकत्वात् । संयोगे तु सुधांशुकोटेरप्यधिकमाह्लादयन्माधुर्यमयानेव भगवतो गुणान्प्रद्योतयति, संयोगस्य शुद्धांशुतुल्यत्वेन सुधया
मादनोदैरैश्वर्यावरणात् । यत्र संयोगेप्यैश्वर्यं प्रद्योतते तत्र प्रेम्ण एवांपूर्णत्वमवगन्तव्यम् । अत्र त्वासां भाविविरहभावनावतीनां विरह एवायम् माहात्म्यस्फूर्तिरपि प्रेमकृतैव, प्रेमा ह्यसदपि माहात्म्यं स्फोरयति किमुत सत् । अत
स्तदतिशयस्तु तदतिशयमेव। यथादिभरतचरिते—' किं वा अरे आचरितं तपस्तपस्विन्या यदियमवनिः ' इत्यादीति**श्रीजीवगोस्वामि**चरणाः ॥ अत्र **तोषिणी**—ननूक्तः ' भर्तुः शुश्रूषणम् ' इत्यादिना स्वधर्मः कथमति
क्रम्यत इति तस्य कर्ममीमांसामतमाशंक्य तदुपमर्दि ब्रह्ममीमांसामतमालब्य प्रतिभावनेन तस्मिन्नात्मत्वमारोपयंत्यस्तन्मतदूषणेन नास्माकं स्वधर्म इति प्रतिपादयंति—यत्पतीति । धर्मविदेति सोपहासमेव । " सर्वशास्त्रोपदेशानां
पदे शास्त्रयोनित्वात्तु समन्वयात् " इति न्यायेन तत्तात्पर्यविषये तत एवेशे त्वय्येकस्मिन्नेव, एवं शुश्रूषणप्रकारेणैतदुपदेशवाक्यमस्तु । ननु तत्पदत्वमेव मयि कथं तत्र सच्छलमाहुः—किल वितर्के ।भवानात्मा परमात्मा ।
कथं तादृशत्वमपि तत्राहुः—तनुभृतां सर्वेषामेव प्रेष्ठः, निरुपाधिप्रेमास्पदत्वं ह्यात्मत्वं तत्तस्मादात्मा तत्रापि सर्वेषां प्रेष्ठत्वात्परमात्मेति । तथा बंधुः सर्वेषां निरुपाधिहितकारी, परमात्मा च सर्वावभासकत्वेन तादृशः,
ततश्च भवानेव स इति । अनेनेशत्वमपि सिद्धम् । तस्मात्त्वमेव शुश्रूषणीय इति भावः । अथ वा ननु सदाचारवर्गपूज्या युष्माभिस्त्यज्यंतां नाम विषयाः, स्वधर्मस्त्ववश्यमपेक्ष्यस्तत्र सासूयमाहुः—यत्पतीति । एवमुपदेश
कर्तरि त्वय्येवैतदुपदेशास्पदत्वमस्तु । त्वमेव तद्योग्यो भवसीत्यर्थः । ननु कथमेतत्तत्राहुः—प्रेष्ठ इत्यादि । तनुभृतां प्राणिमात्राणां प्रेष्ठश्चित्ताकर्षकः । बंधुः सर्वाभिलषितकारी । अत एवात्मा स एव हृदया
धिष्ठाता तत्प्रेरयिता वा तस्मादस्माकं वा को दोषः, किन्तु भवत एवेति प्रत्युत भवानेव तादृशदोषपरित्याजनायोपदेश्य इत्यर्थः । अथ पूर्ववदैश्वर्यपक्षोऽपि युज्यते, स च तैर्व्याख्यात एव । तत्र विवर्तवादमवलम्ब्यार्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्वंति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किम्॥तन्नः प्रसीद परमेश्वर मा स्म छिंद्या आशां भृतां त्वयि चिरादरविंदनेत्र ३३॥

हीश्वरमधिष्ठानं विना कोऽपि पतिपुत्रादिर्नामेति । अन्यत्समानम् । अलमतिविस्तरेण ॥ ३२ ॥ एतत्सदाचारेण द्रढयंत्यः प्रार्थयंते । कुर्वंतीति । कुशलाः शास्त्रनिपुणाः ।

द्वयम् अविशेषेणात्माद्युपगमात् । तथाऽप्यत्र भोक्तृत्वमीशितृत्वमेव ज्ञेयं राजनिर्देशभोक्तृत्ववत्, अन्यथा जीवत्वापाते विवक्षितत्वासिद्धेः । सामान्यतो निर्देशस्तु जीवस्य दृष्टांतत्वापेक्षया तस्य सर्वस्वरूपत्वस्थापनापेक्षया च । द्वितीये, न त्वित्यादिकं काकुगम्यं, तथा पर एवोपदेष्टा भवति न ह्यात्मन आत्मैवेत्यनुपदेष्टृत्वम् । तथा चास्माकमुपदेष्टृत्वाभावे साक्षात्कृतात्मत्वे च न पतिशुश्रूषणादिविधिगोचरमिति भावः । श्रीवैष्णवमते नान्य दर्थद्वयम् । अथ वा यदुक्तमिति । तत्र प्रथमार्थे स्वामिनि आश्रयत्वेन वृते इत्यर्थः । ' देवर्षिभूताप्तनृणां पितॄणाम् ' इत्यादेः । तदेवं तदुपासनमहिमद्वारा धर्मं प्रत्याख्याय वस्तुविचारद्वाराऽपि प्रत्याख्यायते—यद्वेति । अधिष्ठानत्वं तत्तत्स्फूर्त्याश्रयत्वम् " यस्य भासा सर्वमिदं विभाति " इति श्रुतेः । अत्रैश्वर्यार्थेषु किलेति निश्चितम् । उपदेशपद इति । शास्त्रगुरूपदेश्यचरणारविंदे इत्यर्थः, इत्यपि व्याकुर्वन्ति । अत्र नर्मेदम्--तत्त्वय्येवास्तु त्वमेव मोहिनीरूपेणाजितवत्स्त्री भूत्वा पत्यादिसेवाधर्ममाचरेत्यर्थः । कुतः उपदेशपदे गुराविव्यर्थः । अन्यथा गुर्वननुष्ठिते कर्माणि शिष्याणामप्रवृत्तिः स्यात् । तत्र च त्वमेव समर्थ इत्याहुः । ईशे सर्वकलासमर्थे न तु कृत्रिमस्त्रीत्वेन कोपि त्वयि प्रीतिं कुर्यादिति मन्तव्यम् । स्वभावत एव तव सर्वप्रेष्ठत्वादित्याहुः—प्रेष्ठ इति । बंधुरात्मा मनोहरस्वभावः । निषेधार्थश्चायम्—अंग हे कृष्ण पत्यादीनामनुवृत्तिः स्त्रीणां स्वधर्मः सुष्ठु अधर्म इति । यद्धर्मविदापि त्वयोक्तम् । अन्यादृशयोजनया छलेन प्रतिपादितमित्यर्थः । अमायया यो भर्त्ता इत्याद्यभिप्रायात् । एवमेतत् । ईश एव सत्युपदेष्टरि सर्वं वक्तुं व्यवहर्तुं च समर्थ इत्यर्थः । तस्मिंस्त्वय्येवास्तु तेन त्वमेवोपदेश्यो भवेत्यर्थः । कथम्, तत्राहुः—तनुभृतां श्रीवृन्दादिस्थितचतुर्विधप्राणिनामपि प्रेष्ठः प्रेमविषयः । बंधुः प्रेमकर्ता अत एवात्मा " साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् " इतिवत् परस्परहृदयाश्रय इत्यर्थः । तस्माद्यदि त्वमेव तेष्वनन्तेषु विरक्तः स्यास्तदा वयमपि स्वेषु स्वल्पप्रमाणेषु यथास्थितयोजनया धर्मप्राप्तेषु च स्यामेत्यर्थः । तत्र चास्मास्वेव विरक्तो भवेति नर्मतात्पर्यम् । यद्वा—यथा तथा वा योजना भवतु ' भर्तुः शुश्रूषणम्, इत्यादिना यत्पत्यादीनामनुवृत्तिः स्त्रीणां स्वीयो धर्म इत्युक्तम् एतदुपदेशकर्तरि त्वयीशे एवमस्तु । अनुज्ञायां लोट् । भवितुं योग्यमित्यर्थः । यतः प्रेष्ठ इत्यादिर्भर्तुर्विचारस्त्वस्माभिरेव ज्ञायत इति भावः ॥ ३२ ॥ एतत् पूर्वोक्तम्, तनुभृतामात्मैव बन्धुरित्येतत् । सदाचारेण सतां प्रवृत्त्या । शास्त्रनिपुणाः सारासारविवेकपटवः । आत्मन्निति सप्तम्यन्तम्, आर्षत्वान्ङिलोपः, परमेव्योमन्निवत् । स्वे आत्मनि अनिमित्तबंधौ, पत्यादयस्त्वनित्यप्रिया अत एवार्तिदा इति । अनित्यप्रियाणामार्तिदत्वम् " प्रियं त्वां रोत्स्यति " इति श्रुतिराह । प्रियम् अनित्याप्रियम् । वियोगि पुत्रधनादि । नित्यप्रियस्यात्मनो वियोगाभावाद्रतिविषयत्वमुचितमेव । अनेन ' क्रंदंति वत्सा बालाश्च ' इति प्रत्युक्तम् । प्रजादित्यागे श्रुतिमाह—किं प्रजयेति । येषामस्माकमात्मालोक आत्मदर्शनं संसृतिहरं, न पुत्रादिरिति तदर्थः । अरविंदवद्रात्रावप्रकाशमाने नेत्रे यस्यातः परमसुंदरीष्वस्मासूपेक्षा युक्तैवेति संबुद्ध्या सूचितम् । आशाम् तद्रूपां लतां प्रेमजलसेचनार्हां वचनकुठारेण मा छिंद्या इति भावः । परमेश्वरेति । ईश्वरोऽप्याशां पूरयति राजादिः, किमुत परमेश्वरस्त्वम् । ततो नायं परमेशधर्मो यदाशाच्छेद इति संबुद्ध्याऽऽहुः । ' वरदेश्वर ' इति पाठे ' मयेमा रंस्यथ क्षपाः ' इति वरं दत्त्वाधुना वरखंडको जात इति पूर्ववदभिप्रायः संबुद्धेः । " भुंक्ते परत्र दुःखानि कल्प आशाऽपहारतः" इत्यादिवाक्यात्समर्थानामाशापूरणमेव धर्म इति बोध्यम् ॥ * ॥ काश्चित्तदनुवादिन्यस्तमेवोक्तमर्थं सदाचारेणापि द्रढयन्ति—कुर्वंतीति । कुशलाः " य एतस्मिन्महाभागे प्रीतिं कुर्वंति मानवाः । नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥ " इति गर्गोक्तिविश्वासाच्चतुराः । न च रतिं कुर्वंतीत्यपि वस्तुतो वाच्यं, यतस्त्वयि रतिः स्वभावत एव कुशलानामित्यर्थः । स्वे स्वीये इति त्वमेव तेषां ममतास्पदम् । आत्मनीति । त्वमेवाहंतास्पदश्चात एव नित्यप्रिये इति । प्रीतिरपि त्वयि नित्यैव, पतिसुतादिषु त्वौपाधिकी, अत एवानित्या । अस्माकं तेषु सापि नास्तीत्याहुः—आर्तिदैस्त्वदभिसारवारकत्वाद्दुःखदैः । तत्तस्मान्नोऽस्मभ्यम् अस्मान्, जीवयितुं प्रसीद । यदि वा अस्मानन्योढाः मा जीवय एताः अनूढास्तु किं रोदयसीत्याहुः—हे वरद ' संकल्पो विदितः साध्व्यः ' इत्यादिना एताभ्यस्त्वं वरमदा एवेत्यर्थः । नन्वेतासु प्रसादे कात्यायन्यर्चनमेव कारणं, भवतीषु मत्प्रसादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ॥ पादा पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा ॥ ३४ ॥

तथा च शास्त्रम् । " किं प्रजया करिष्यामो येषां नोऽयमात्मा लोकः " इति ॥ ३३ ॥ किं च प्रतियातेति यदुक्तं तदशक्यं त्वयैव चित्तादीनामपहृतत्वादित्याहुः । चित्त

किं कारणम्, तत्र निष्कारणमेव प्रसीदेति सकाकु प्रार्थयामासुः—हे ईश्वर स्वाचिकीर्षिते स्वपरतंत्र ! चिरात् बाल्यमारभ्य त्वयि धृतामाशाम् आशाकल्पलतां संप्रति फलवतीं मा छिंद्याः । फलवती लता हि सत्पुरुषेण छेदं नार्हतीति चिरादिति छिंद्या इति पदाभ्यां द्योतितम् । एषा ह्याशालताप्यस्मन्मनःकेदारिकायां त्वयैवारोपितेत्याहुः—हे अरविंदनेत्र अस्मद्वयःसंस्कारस्ते प्रथमदर्शनसमयेऽरविंदतुल्याभ्यां नेत्राभ्यां त्वत्प्रेषिताभ्यामस्मन्नेत्ररंध्रेषु प्रविश्य हृदयक्षेत्रे भावाभिधानमाशालताबीजमाहितमिति ध्वनितम् । " चक्षूरागः प्रथमं चित्तासंगस्ततोऽथ संकल्पः " इति रसशास्त्रोक्तरीत्या । सैवाशालता गुणरूपश्रवणदर्शनादिना वर्द्धिता फलवती भुक्तभुज्यमानफलापि कठोरोक्तिकुठारिकया कथमद्य छिद्यते । " विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् " इति न्यायं जानास्येवेत्यनुध्वानितम् ॥ अत्र **तोषिणी**--एवं शास्त्रबलेन पत्यादौ शुश्रूषणं प्रत्याख्याय सदाचार बलेनापि प्रत्याचक्षाणाः ' मातरः पितरः पुत्राः ' इत्यादिना प्रपञ्चितं तत् स्नेहनिगडं विशेषतः परिहरंति—कुर्वंतीत्यर्द्धेन । हि प्रसिद्धौ । कुशलाः " य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः " इति गर्गवाक्यानुसारेण सारासारविवेकचतुरास्त्वयि नित्यप्रिये स्वाभाविकप्रेमास्पदरूपे रतिं प्रीतिं कुर्वंतीति । तस्य स्वस्मिन्परस्मिंश्च सुखमयस्फुरणमभिप्रेतम् । पत्यादीनां तद्वैपरीत्यमाहुः—स्वे आत्मीये आत्मन् आत्मनि चार्तिदैर्दुःखप्रदैः । तादृशभगवद्विमुखतापादकास्तन्निवारणतात्पर्यात् । अतस्तैः पत्यादिभिरस्माकं किं प्रयोजनम् । स्व इति सर्वनामत्वेपि पूर्वादित्वेन स्मिनो विकल्पात् । तदेवं प्रथमदिक्स्थिताः ' भक्ता भजस्व' इत्युपक्रमानुरूपं विवक्षितमुपसंहरति—तत्तस्मान्नोऽस्माकं संबंधेऽस्मान्प्रतीत्यर्थः । प्रसादमेवावश्यकार्यताभिप्रायेण व्यतिरेकमुखेनाभिव्यंजयन्ति—मा स्मेति । चिरात् अबोधोदयात् धृतां नैश्चल्येन कृतामिति पतिभिः सह तत्संबंधो निरस्तः । मा छिंद्याः किन्तु सफलयेत्यर्थः । अन्यथा तच्छब्देन तदेकालंबनजीवानामस्माकं सद्यो जीवनोच्छेदः स्यादिति भावः । आशामेव विशेषेण व्यंजयन्ति—हे वरद कुमारीषु 'संकल्पो विदितः' इत्यादिना दत्तवरविशेष । हे ईश्वर अन्येषां दुर्घटं मनआदिघटनाविशेषसमर्थेति । चिराद्धृतामित्यत्र हेतुः—हे अरविंदनेत्रेति । ' शरदुदाशय—' इत्यादिवक्ष्यमाणात् । अरं चक्रप्रांतं तदिवारं तत्पत्राग्रभागः हृदयच्छेदकत्वेन तद्विन्दतीति तु संरंभस्यान्तःस्थितेः । श्लेषश्च-अरविंदवद्रात्रावप्रकाशमाने नेत्रे यस्येत्यतः परमसुंदरीष्वप्यस्मासु संप्रति तवोपेक्षा युक्तैवेति नर्मद्योतना च । किञ्चारविंदरूपकेण दृष्ट्यापि सर्वेषां तापहारित्वं ध्वनितम् । अतोऽस्मासु तद्वैपरीत्यमयुक्तमिति भावः । ऐश्वर्यार्थस्तु, हि शास्त्रप्रसिद्धौ । कुशलाः श्रीनारदादयः । रतिं भावं न तु श्रद्धामात्रम् । तच्च योग्यमित्याहुः—नित्यप्रिये । कुतो नित्यत्वं प्रियत्वञ्च तत्राहुः—स्वे आत्मन्यपि विषये । आत्मनि परमात्मनीत्यर्थः । "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् " इत्युक्तेः । एतेन तस्य सुखरूपत्वं च ध्वनितम्, अन्यथा निरुपाधिप्रेमास्पदत्वं न स्यात् । अतोऽस्माकं पत्यादिभिः किम्, अपि तु न किञ्चित्प्रयोजनमित्यथः । ननु भवतीनां पत्यादयोऽपि मादृशा नित्यप्रिया एव, नेत्याहुः—आर्तिदैस्तादृशकुशलवृंदाभिलषितास्मदीयभगवद्भजनविरोधिभिः । वरदेश्वरेति पाठे वरस्याव्यभिचारित्वं दर्शितमिति । एवमुत्तरत्राप्यूह्यम् । निषेधार्थश्चायम्—नन्वहं तनुभृतां प्रेष्ठश्चेत्तर्हि स्वस्वोचितप्रेमकर्तारस्ते इव भवत्योपि स्वोचितं रत्याख्यं भावमेव मयि कुर्वतामित्याशंक्याहुः—कुशला मंगलरूपाः, साध्व्य इति यावत् । आर्तिदैर्दुःखाखंडकैः पत्यादिभिर्हेतुभिः । स्वे गृहादौ आत्मनि च नित्यप्रिये सति किं त्वयि रतिं कुर्वन्ति अपि तु न, तत्र स्वादिनाशापत्तेः । तत्तस्मात् हे वरद वांछितप्रद ईश्वर गोकुलस्वामिन् नः प्रसीद । प्रसादमेवाहुः—चिराद्वयमत्र मा स्म न तिष्ठाम । अस्तेर्लुङि लङ्प्रयोग आर्षः । शीघ्रं गृहगमनायानुज्ञां देहीत्यर्थः । तथा त्वयि धृतामवस्थितामाशाञ्चास्मदंगसंगेच्छारूपां छिंद्याः छिंधि ' धृङ्—अवस्थाने ' इति । अत्र वरदेश्वरे ।अत्र 'परमेश्वर ' इति पाठेपीश्वरवत्संगमनीयः । छिंद्या इत्यत्र छिंद्यादिति पाठेतु भवानित्यध्याहार्यम् ॥ ३३ ॥ निवृत्तौ प्रयोजनाभावपूर्वकं साधनाऽभावमाहुः—किञ्चेत्यादिना । गृहकृत्यनिष्पत्त्यर्थं सुखार्थं च गृहे वासो भवति तच्च सर्वं चेतसा भवति तत्तु त्वयाऽपहृतं तत्किं करिष्यामस्तत्र गत्वेति प्रयोजनाभावः । यद्वा—भवता येन संसारक्लेशेन हृतमपि याचित्तमिति योज्यम् । गृहे भवं गृह्यं तच्च तत्कृत्यमिति, तथा तस्मिन्मार्जनोपलेपनादिलक्षणे । कृत्यानां बहुत्वमपेक्ष्य चित्ते संतापो भवति न सुखमित्यरुच्या विशिनष्टि—सुखात्मना सुखरूपेण भवतेत्यस्य प्रतिपदं त्वयेति विशेष्यम् । पादयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निम् ॥ नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ॥ ३५ ॥

मिति । यदस्माकं चित्तमेतावंतं कालं सुखेन गृहेषु निर्विशति तत्त्वयाऽपहृतं करावपि यौ गृहकृत्ये निर्विशतस्तावपि । सुखात्मना त्वयेति वा ॥ ३४॥ अतः अंग हे कृष्ण नोऽस्माकं त्वदधरामृतपूरकेण तवैव हाससहितेनावलोकेन कलगीतेन च जातो यो हृच्छयाग्निः कामाग्निस्तं सिंच । नो चेदयं तावदेकोऽग्निस्तथा विरहाज्जनिष्यते योऽग्निस्तेन चोप

रपि स्तंभो जात इत्याहुः—पादाविति । गतिसाधनाभावाद्गमनं कथं स्यादिति भावः । अत्रायमाशयः—त्वत्काठिन्येनात्र स्थातुमपि न युज्यते गन्तुं च न शक्यते, हा कष्टमधुना किं कार्यमिति ॥ * ॥ अन्यास्तु स्वीयं प्रेमाणं परमं द्योतयंत्यो भोश्चोर चक्रवर्तिन् न वयमन्यार्थमागताः किन्तु त्वया चोरितं स्वं धनमेव प्रतिजिघृक्षव इत्याहुः—चित्तं भवतापहृतं न च तत्रान्यचोरस्येव तव कोप्याधिकः प्रयत्नोभूदित्याहुः—सुखेनेति । वेणुरन्ध्रेषु फूत्कारमात्रेणैवेत्यर्थः । न च तच्चित्तधनमस्माकमल्पतरमित्याहुः—यच्चित्तं गृहेषु सर्वेष्वेव निः निःशेषेण विशति अतस्तदपहारेण त्वयाऽस्माकं सर्वाण्येव गृहाणि लुंठितानीति ध्वनितम् । वस्तुतो गृहेष्वस्माकं चित्ताभावात्तानि ज्वलन्तु समृध्यंतु वा किमस्माकं तैरित्यनुध्वनितम् । अतिशयोक्त्या गृहेषु श्रोत्रादींद्रियार्थेषु तत्तत्साफल्यार्थं यन्निर्विशति यद्विना सर्वेंद्रियाण्यपि विफलीभवंतीति भावः । अतश्चित्तापहारादेव सर्वेन्द्रियाण्यपि त्वयाऽपहृतानीत्याहुः—करावपि यौ गृहकृत्येषु निर्विशतः उतेति नेत्रे श्रोत्रे अपि । एतानि सर्वाण्यपहृतानीत्यर्थः । ननु भो अद्य तावद्गच्छत श्वः परश्वो वा विविच्य वश्चित्तं दास्यामीति तत्राहुः—पादावस्माकं पदमेकमपि न चलतः । यद्विनेत्यर्थः । अतश्चित्तं देहि तत एव याम इति भावः ॥ अत्र **तोषिणी**—ननु गृहवाससुखरक्षार्थमपि न पत्यादित्यागो विधेय इत्याशंक्य तत्रापि तस्यव दोषोट्टंकनपूर्वकमाहुः—चित्तमिति । सुखेन सुखरूपतया स्वदर्शकेनेति तदानीं गृहादीनां दुःखरूपतास्फूर्तिर्ध्वनिता । सुखेन सहितामिति वा । पादौ यौ गृहकृत्ये गमने वा निर्विशतस्तावप्यपहृता अतस्तत्र पादमूलात्पदमेकमपि न चलतः । गन्तुं न शक्नुत इत्यर्थः । करयोः पादयोश्चापहारस्तत्तादिंद्रियशक्त्यपहारात् । अत आगमनञ्च त्वद्गीताकर्षणमात्रेणेति भावः । अतोस्माद्धेतोः कथं व्रजं यामः । ननु अबलाः एवं चेन्मयैवाग्रे गच्छता सह गम्यतां, तत्राहुः—तत्र गत्वा किं वा करवामेति । वा शब्दः समुच्चये । यद्यपि चित्तापहारेण सर्वेन्द्रियापहारोऽप्यायाति तथापि विशेषतः करपादापहारोक्तिः पतिशुश्रूषणादिगृहकृत्यस्यान्यत्र निजगमनस्य च परिहाराय । अन्यत्तैः । यद्वा—यच्चित्तं सुखे निमित्ते सुखे विषये वा पूर्वं स्थितं तद्भवताऽपहृतं सत उतापि न प्रविशत्यपि । कुतस्तस्मिन्कृत्ये करादिकं प्रवेशयेदित्यर्थः । ननु गृहेश्वर्यस्तथापि तद्विचारबलेन प्रवेश्यतां, तत्राहुः—करावप्यपहृतौ गृहसंबंधिकृत्ये न प्रविशतः । ननु तथाप्यत्र तु स्थातुमयुक्तमिति गच्छतैव, तत्राहुः—पादौ च भवतापहृतौ स्वाभिमुख्येनाकृष्टौ पदमपि न चलत इति । अन्यत्समानम् । अतस्त्वय्येव त्वदर्थकृत्ये एव करौ त्वत्स्थान एव पादौ प्रविशंति नान्यत्रेति सूचितम् । अत्र नर्मेदम्—वनेऽस्माकं प्रयोजनाभावात्त्वद्दर्शनार्थं नागताः स्मः चित्तवित्तस्य भवतापहरणात्तदुद्देशेनात्रागताश्चौरं भवन्तं प्राप्ता अपि ग्रहीतुं नेतुं च तथाऽऽक्रोशनार्थं कुत्रापि गन्तुमपि न शक्नुमो भवता करपादापहरणादतो हृतधनाः कथं व्रजं याम, किं वा करवाम, स्तंभनादिमहामंत्रज्ञचोरवरे कस्याप्युपायस्य प्रभुत्वासंचारादिति भावः । निषेधार्थश्चायम्—ननु वेणुगीतेन मया गृहादाकृष्टाः सुष्ठु श्रांताश्च कथं गन्तुं शक्नुथ तत्राहुः—गृहेषु भवता उद्भवता सुखेनापहृतं चित्तं यद्यस्माद्गृहकृत्ये निर्विशति । यद्वा—चित्तं सुखे एव न तु भवतापहृतम्, यद्यस्माद्गृहेषु निर्विशति एवं करावपि गृहकृत्ये निर्विशतः । परिश्रांतत्वमाशंक्याहुः—पादौ कथं पदमपि न चलतः अपि तु दूरमपि चलत एव । ततः कथं न याम अपि तु याम एव, अत्र च किं करवामेति ॥ ३४ ॥ स्वाभीष्टं निवेदयंत्य आहुः—सिंचेति । यतस्त्वया वयं सर्वव्यवहारसाधनापहारेणाऽसमर्थाः कृताः अतस्त्वमेव नः कामाग्निं निर्वापयेत्याहुः । कलगीतपदं पूर्वं व्याख्यातम् । यद्वा—कलगीतेन मधुरगानेन हृच्छय एव संतापजनकत्वसाम्यादग्निर्हृच्छयाग्निस्तम् । अधरनिष्ठामृतप्रवाहेण सिंच निर्वापय नो चेदन्यथा तावदधुना तेन द्वितीयेन च पदवीं सामीप्यम् "पदवी निकटे मार्गे विष्णौ च पादरक्षके" इति शाश्वतः । 'अंते या मतिः सा गतिः' इति न्यायेन वयं तु त्वां प्राप्स्याम एव । हस्तावेव मर्दयतस्तव शाठ्यमात्रं स्त्रीवधमात्रञ्चावशेक्ष्यतीति भावः । दृष्टान्तोऽत्र दीक्षितपत्नी ॥ * ॥ अहो संप्रयोगसमरान्यसमयेऽपि सुंदरीणां निर्वस्त्राः काया दिदृक्षिता ये आसंस्ते चीरहरणदिने दृष्टास्तथैव मधुपानान्यसमयेऽपि भाववतीनामासां निर्लज्जं वचनं शुश्रूषितमासीत्तदधुनापि श्रूयते । हंतहंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेणुनादेन काममयेन उन्मादिताः पुनश्च वाचःपेशैर्विह्वलीकृताः यच्चालंब्य विवेकलज्जाधर्मधैर्यादीनि तिष्ठंति तच्चित्तमप्यपहृतं तदप्येताः प्रायः सलज्जमेव भाषन्ते न त्वाभ्यन्तरभावमधुना वाचा मय्यरावुद्घाटयंतीति मनसि परामृशाति सति श्रीकृष्णे काश्चिन्मुख्यतमा उन्मादसंचारिप्राबल्येन विपर्यस्तीकृतप्रकृतय आहुः–सिञ्चेति । अत्र हासेत्यस्य संबंधिपदमर्थात्तवेत्येव लभ्यते । ततश्च अंग हे कृष्ण तव हाससहितेनावलोकेन कलगीतेन च जातः प्रोद्बुद्धः प्रोद्दीप्तो यो हृच्छयः काम एवाग्निस्तं तवैवाधरामृतपूरकेण सिंच निर्वापय । स्वार्थे कः । येनैवाग्निः प्रोद्दीप्यते तेनैव प्राप्तविवेकेन यदि निर्वाप्यते तदैव तदपराधोपशमः । अन्यथाऽग्निदाता गृहादिदाहोत्थं पापं प्राप्नोत्येवेति भावः । अत्र काममित्यप्रयुज्य हृच्छयपदप्रयोगेणैवं ध्वन्यते–अस्माकं कामो हि हृदि शेत एव तच्च त्वया विना कोऽपि प्रबोधयितुं न शक्नोति तं च वंशीनादेन सहास्मत्कर्णरन्ध्रद्वारा हृदयं प्रवेश्य तत्र शयानं कामाग्निं प्रबोध्य हासावलोकघृतमधुभ्यां कलगीतवातेन च प्रोद्दीप्य तत्रत्यानस्मत्प्राणान् दग्धुमुपक्रमसे, अतस्तद्दाहपापाच्चेद्बिभेषि, तं निर्वापय । न च तत्प्रोद्दीपनेन तन्निर्वापेन वा तवायासलेशोऽपि, यतस्ते हासावलोकस्तस्याग्नेरुद्दीपकः, अधरामृतं च तस्य निर्वापकामिति तद्वस्तुद्वयं तव मुखचंद्र एव वर्ततेऽतो दुर्लीलराजपुत्रस्य तवाग्निज्वालननिर्वापणात्मिकैव खेला भूयसी भूरिशो दृष्टा न त्वग्निज्वालनमय्येव।एषा त्वद्यैव दृश्यत इति । नन्वेतानि मे साहजिकान्येव हासावलोककलगीतानि एतैर्यदि युवतयो ज्वलेयुस्तदा कुत्रकुत्र कतिशो वा मया स्वाधरामृतैश्चिकित्सा कर्तव्येति चेत्–सत्यम्, परःसहस्रस्त्रीवधे प्राप्त एव तव तदुद्भूतादनुतापादयं हठोऽपास्यतीत्याहुः–नो चेदिति । विरहाग्निना उपयुक्तदेहा दग्धशरीरा योगिन्य इव ध्यानेन तव पदयोः पदवीं याम अधुनैव प्राप्नुयाम । अयमर्थः–वयं पूर्वजन्मन्यकृततपस्कानेवात्मनो जानीमो यदेतज्जन्मनि त्वं नांगीकुरुषे, तस्मादधुना तपश्चरणार्थं न बाह्यं लौकिकं वह्निं गृह्णीमः हृच्छयाग्नित्वद्विरहाग्न्योः स्वत एव सत्त्वात् । तत्रापि त्वद्विरहाग्निनाऽतिप्रबलीभविष्णुना हृच्छयाग्निरपि मंदीकरिष्यत एवातो विरहाग्नावेव प्राणेषु हूयमानेष्वस्माकं संकल्पश्चायम्–भो कृष्णविरहाग्ने कृष्णपादस्पर्शमाशास्यमाना वयं त्वयि स्वप्राणान् जुहुमस्तस्मात्कृष्णस्य पादयोः पदव्यामन्यजनैरलक्षिता अस्मांस्तथा स्थापय यथाऽस्मत्कुचयोरुपर्येव तत्पादौ पतेताम्, न तु भूमाविति । ततश्च त्वत्पादभारेणैवोपशांतहृच्छयाग्नयो वयं सिद्धमनोरथा एव भविष्यामः, त्वञ्चानिच्छन्नप्यस्मत्कुचस्पर्शसुखं प्राप्नुवन्नपि स्त्रीवधानुतापमेव भूयांसं प्राप्स्यसीति । सख इति–सख्यादेवैवं चिकीर्षामः । सखीरप्यस्मांस्त्वमेवं संतापयसि चेद्वयमपि त्वां सखायमेवं कथं नानुतापयाम इति ध्वनिः । किन्तु, प्रेम हतकं खलु तदपि त्वदनुतापदुःखं कोटिगुणीकृत्यास्मभ्यमेव दास्यत इति जानीमः । किं कुर्मोऽस्माकं दग्धललाटमेवंविधमेव विधात्रा सृष्टम् । तस्मादये परिणामदर्शिन् कृपासिंधो स्वानुतापवल्लीबीजं किमर्थं वपसि कथं वा तत्फलभागिनीरस्मांश्च करोषि, मुंच हठमस्मानंगीकुरु इति भूयांस एवानुध्वनयः ॥ अत्र **तोषिणी**–तदेवं द्वितीयदिक्स्थिता अपि पुनराशामेवोत्कंठस्फुटमेव वदंत्यस्तत्पूर्तेरप्यवश्यंभावितां प्रौढ्या निर्दिशंत्यस्तदापातप्रत्याख्यानेन त्वयि दोषमात्रं पर्यवस्यतीतिरीत्या विवक्षितमुपसंहरंति–सिंचेति । निर्वापयेत्यर्थः । आदौ क्रियानिर्देशः परमार्त्तिवैयग्र्येण । न इत्यस्य हृदयाग्निनैव संबंधः, तत्पुरुषस्योत्तरपदप्रधानत्वात् । हासस्य संबंधि पदं तवेत्येव लभ्यते प्रकरणबलात् । विनापि त्वच्छब्दमर्थबोधे सति तन्निर्देशस्त्वया जनिताग्नेस्त्वयैव निर्वापणं युक्तमिति विवक्षया । पूरशब्देनाग्नेर्महत्त्वमपि ध्वनितम् । स्वार्थे कः । हासावलोकगीतयोः क्रमेण घृतवातत्वं ध्वनितम् । हृदि शेते वसतीति हृच्छयः कामः । अतस्तन्निवर्त्तनौषधस्याप्यंतःप्रवेशनाऽपेक्षयाऽधरामृतपूरस्य पानं तथाऽनन्यप्रतिकार्यत्वं च सूचितम् । इदं च संभोगस्य साक्षात्प्रार्थनं तदीयवेणुतनुमाधुर्य्यमधुमत्तचित्तानां लोकोत्तरप्रौढानुरागार्तिनर्तितमहोत्कंठावगुंठितानां रसेनापि न विरुध्यते । निषेधाच्छन्नतयैवोक्तत्वात्तु नितरामिति । व्यतिरेकेण तदेव द्रढयति । नो चेद्यदि न सिंचासि तदापि ध्यानेनेति ‘मरणे या मतिः सा गतिः’ इत्यादिन्यायेन याम । संप्रत्येव प्राप्स्याम इत्यर्थः । प्राप्तकाले लोट् । तत्र च सखे इति संबोध्य स्वेषु स्नेहमुद्बोधयंति । तत्रान्वयक्रमेणाभिप्रायाश्चैते–ननु हासादिजहृच्छयाग्निसेके साधनं मम जलभाजनमत्र किमिव दृश्यते इति परिहासमाशंक्याहुः–अमृतेनैव तत्सिक्तं स्यान्न तु जलादिना, तत्रापि तस्य पूरेण न तु यत्किञ्चिन्मात्रेण । स्वार्थे कन् । ननु तदपि दुर्लभं कुत्र लप्स्ये, तत्रापि तस्य पूरस्यात्यंतासंभव इत्याशंक्य कथमिदं गोपयसीत्याहुः–त्वदधरेति । अहो नान्येनाऽमृतेन तच्छान्तिः स्यात् किं तु, त्वदधरसंबंधिनैव तत्रापि तस्याग्नेरत्यंतवृद्धेर्युवतीकोटिभिरप्यपरिसमाप्येन तत्पूरेणैवेति महातृष्णा सूचिता । एवमग्रे वक्ष्यमाणस्यामृतस्य च परमवैलक्षण्यम् । ननु ध्यानेन यामेति झटिति

१–पूरकशब्दे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ॥ अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग स्थातुं त्वयाभिरमिता बत पारयामः ॥३६॥
युक्तदेहा दग्धशरीरा योगिन इव ते पदवीमंतिकं ध्यानेन याम प्राप्नुयाम ॥ ३५ ॥ ननु स्वपतीनेवोपगच्छत त एनमग्निं सिंचेयुरिति चेत्तत्राहुः । यर्हीति । रमाया लक्ष्म्या
दत्तक्षणं दत्तः क्षण उत्सवो येन तत् दत्तोत्सवं दत्तावसरं वा । तदपि क्वचिदेव न सर्वदा । अरण्यजनाः प्रिया यस्य तस्य तव अरण्यजनप्रियत्वादरण्ये क्वचिद्यर्ह्यस्प्राक्ष्म स्पृष्ट
देहत्यागं सूचयंतीनां भवतीनां तत्साधनं न दृश्यते, तत्राहुः—अये अन्या इव किं वयमनुरागहीनाः, येन बाह्यमग्न्यादिकं तत्साधनं मृगयामः किं त्वंतरेव स्वत एव तदुदेष्यतीति भावः । अन्यत्तैः । यद्वा—
एवं विवक्षितमुपसंहरंत्यो ननु दुर्घटेऽस्मिन्नर्थे कथमतित्वरयथेत्याशंक्यातिदुःखाद्दुर्घटत्वमेव सत्यमित्याहुः—नो चेदिति । ध्यानेऽपि नैव याम, यतः विरहजाग्नेरेव उपयुक्ता उचिता देहा न तु संयोगामृतयोग्या यासां
ताः । अधुना एतदसिद्ध्या कालांतरे जन्मांतरेऽपि विरहस्यैव निश्चितत्वादिति भावः । सखे इति तस्यापि तत्र भाविदुःखं दर्शयंति । यद्वा—झटिति तत्प्राप्त्यभावेन देहत्यागं सूचयंत्य आहुः—जन्मांतरे ध्यानेनापि
ते पदयोरंतिकं मार्गमपि वा यामेति प्रार्थनम् । तत्र च सखीत्वेनैवेत्याशयेन संबोधयन्ति—सख इति । अनेन सुमध्यमा इत्यस्योत्तरम् । भवदाशयेद्दशसद्गुणदेहोऽपि त्याज्यः, त्यक्तेऽपि तस्मिन्भवान्न त्याज्य इति श्लोक
द्वयमिदमैश्वर्यमयार्थेऽपि प्रायः समानम् । निषेधार्थश्चायम्—तस्मात् अंग हे महालम्पट नोऽस्माकं हासावलोककलगीतेन सहजेन जातो यस्तव हृच्छयाग्निस्तं त्वदधरामृतपूरकेणैव सिंच । अस्माकं मध्ये सा काचिन्नास्त्येव
यस्या अधरामृतेन स्वकाग्निं सेक्ष्यसीत्यर्थः । इति स्ववर्गाणां सर्वथा नैरपेक्ष्यं सूचितम् । अथ च स्वाभीष्टपरममधुरवस्तुनि दुर्लभे सति लुब्धैः स्वस्याधरपुटौ लिह्यत इति नर्मभंगी व्यंग्या । नो चेद्यद्येवमश्रुत्वा पंथानम
स्माकं निरुंधन् दुराग्रहान्न विरमसि तदा वयं स्वपतिविरहजाग्न्युपयुक्तदेहा भवेम । वयं म्रियेमहीत्यर्थः । तथापि ध्याने चिंतनेऽपि तव पादयोः पदवीमपि न याम न यास्यामः । सख इति । बाल्यक्रीडायां प्राप्तसख्यत्वे
नास्मद्धर्मनिष्ठां जानास्यपीति भावः । यद्वा—चेदिति निश्चये । ‘ धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ’ इतिवत् । ततश्च नैव विरहजाग्न्युपयुक्तदेहा वयं यतो ध्यानेपि नैव यामेति ॥ ३९ ॥ कामाग्निशमने तु युष्माकं पतय
एव समर्था इत्याह—नन्विति । एनं कामजाग्निमित्युक्ते प्रत्युत्तरमाहुः—न केवलं रमाया एव दत्तोत्सवमस्माकं भक्तानामपि तथात्वादत आह—दत्तावसरम् दत्तावकाशं वेति । तदपि अवकाशदानमपि । अरण्यजनाः गोपाः
‘ वनशैलनिवासिनः ’ इत्युक्तेः । यर्हि यदा । तत्र च वने च । इत्यर्थ इति । न हि समुद्रतरणशीलस्य क्षुद्रखातकतरणेच्छा भवतीति भावः । यद्वा—अरण्यजनास्संन्यासिनः प्रिया यस्य स तथा । तथा च वयमपि सर्वांस्त्य
क्त्वा वनमेवागतास्त्वत्प्रियार्थमिति हेतोरस्मान् गृहाणेति । यद्वा—रमयत्यानंदयति त्वामिति रमा श्रीराधा तस्याः पादतलं तव दत्तक्षणम्, अतीव मृदुलसौभगवत्त्वेनेत्यर्थः । यर्हि अस्प्राक्ष्म तत्प्रभृति वयमप्यन्यसमक्षं
स्थातुं न पारयामः, किमुत सेति । अनेन तवांगस्पर्शनानंतरमन्यांगस्पर्शशंका निरस्तेति ध्वनितम् ॥ * ॥ ननु तर्हि स्वस्वपतीनेवोपगच्छत त एवैनमग्निं सिंचेयुस्तत्राहुः—यर्हीति । हे अंबुजाक्षेति—त्वन्नयनदर्शनक्षणमार
भ्यैव वयं भ्रमरीभूय स्थिताः स्म इति “ चक्षूरागः प्रथमं चित्ताऽऽसंगस्ततोऽथ संकल्पः ” इति रसशास्त्रोक्तं प्रथमं लोचनालोचननिदर्शनमेवास्माकं पूर्वरागप्रवर्तकमिति भावः । तत्रापि यर्हि यस्मिन्नेव क्षणे तव पादतलं क्वचि
द्गोवर्धनादिकुंजप्रदेशेऽस्प्राक्ष्म कुचाभ्यां स्पृष्टवत्यो वयम्, कीदृशम्—रमाया दत्तक्षणम्, वैकुंठवासिन्या लक्ष्म्या नारायणप्रियाया अपि रमणाभिलाषमयोत्सवदायकम् ‘यद्वांछया श्रीर्ललना चरत्तपः’ इति नागपत्नीवचनाद्गर्गादिमुखश्रुताच्च।
अतो वनवासिनीनां गोपस्त्रीणामस्माकं तत्राऽभिलाषे किमाश्चर्यमिति भावः । ननु लक्ष्म्या अप्यभिलषणीये वस्तुनि कुतो वः प्राप्तियोग्यतेत्यत आहुः—अरण्यजना गोपजातय एव प्रिया यस्य तस्य तव । तत्प्रभृति तं
क्षणमारभ्य अन्येषां स्वस्वपतीनां समक्षं गोपस्त्रियो वयं स्थातुमपि न पारयामः तान् दृष्ट्वा मनसि घृणोत्पद्यत इति भावः । किञ्च, न केवलं वयमस्प्राक्ष्म एव अपि तु त्वयाऽभि सर्वतो भावेन रमिताः । यथेष्टं संयुज्य
पुरुषवतीकृता अपीत्यर्थः । तेन संभुक्तपूर्वा अस्मानन्यत्र न प्रस्थापय पादयोस्ते पताम इति काकुर्ध्वनिता ॥ अत्र **तोषिणी**—ननु कथं निरपराधे मय्यपराधः कल्पते मदीयस्वाभाविकसौंदर्यादिदर्शनेन कामिनीनां वश्चि
तादिकं क्षुभ्यति तत्राहं किं करवाणि, किं च यदि गृहकृत्येषु न भक्तिस्तथापि कुलवधूनां युष्माकं तत्रैवावस्थानं युक्तम्, तत्राहुः—यर्हीति । हे अंबुजाक्ष यर्हि यदाऽस्मदनिर्वचनीयपुण्योदयसमये क्वचिदपि दुर्लभदेशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वाऽपि वक्षसि पदं किल भृत्यजुष्टम्॥यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजः प्रपन्नाः॥३७॥

वत्यो वयं तत्र च त्वयाऽभिरमिता आनंदिताः सत्यस्तदारभ्यान्यसमक्षं स्थातुमपि न पारयामः । तुच्छास्ते न रोचंत इत्यर्थः ॥ ३६ ॥ त्वत्पादसौभाग्यं त्वतिचित्रमि त्याहुः । श्रीरिति । वक्षस्यसापत्नं स्थानं लब्ध्वाऽपि तुलस्या सपत्न्या सह तव पदांबुजरजः कामयते स्म । भृत्यैः सर्वैर्जुष्टमिति सौभाग्यातिरेकोक्तिः । यस्याः स्ववीक्षण

त्वयाभिरमिता निजभावव्यंजनया नंदिताः सत्यस्तव पादतलमस्प्राक्ष्मेति सूचकेन वाक्येन " पुण्याः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन " इत्यत्र पूर्वकृतव्याख्यानुसारेण कयापि तया यथाकथंचिल्लब्धस्य पादतलस्पर्शस्य तद्गोष्ठीस्वेव प्रसिद्धेः । कृतकात्यायनीव्रतानां तु तत्स्पर्शस्यांगीकारमात्रतात्पर्याच्चाप्राप्तसंगा अपि प्राप्तसंगाभिरैक्यं प्रकल्प्य ताभिर्मिलित्वा प्रोचुरिति ज्ञेयम् । कीदृशं पादतलम्—रमाया दत्तक्षणम् । तस्यामपि नूनमर्पितमहोत्सवमित्यर्थः । ननु स्वप्न एवायं भवतीनाम्, अन्यथा नित्यमपि तथाद्यापि तत्स्यात्तत्राहुः—अरण्यजनेषु पुलिंदीहरिणादिष्वेव संततनिजदर्शनादिदानेन प्रीतिं कर्तुं, न व्रजजनेषु । ततोऽस्माकं तु सुतरामेव दुर्लभस्येत्यर्थः । इति रमाया अस्माकं च योग्यानां परित्यागात्तादृशानाञ्च स्वीकारादुपालंभश्च सूचितः । तदेवं यदास्प्राक्ष्म तत्प्रभृति नान्येषां समक्षं स्थातुमूर्द्ध्वावस्थानमपि कर्तुं पारयामः । अन्यदर्शनमस्मभ्यं न रोचत इत्यर्थः । अत एव कोप्युच्चाटनाविद्यामयः स्पर्शगुण इति भावः । ननु मिथ्यावादिन्यः सदा गोष्ठजनमध्ये वसथैव तत्राहुः—अंजः सुखेनानायासेन ततो बलादेव तत्र वसाम इति भावः । अथैश्वर्यपक्षे--क्वचित्स्पर्शने हेतुः—क्वचित्केषुचिदाविर्भावेषु रमाया दत्तक्षणं, स्वयं तु अरण्यजनप्रियस्य वृंदावनवासिनां श्रीगोपादीनां प्रेम्णा तदव्यभिचारिणः अहो अभाग्यं तथापि यर्हि कदाचिदेवास्प्राक्ष्म । अन्यत्समानम् । अत्र तेषां व्याख्यानेऽरण्येति तज्जनसंबंधेनैवेत्यपि दैन्यमेवेति । अनेनाथ वेत्यस्योत्तरम् । स्वाभाविकप्रेमविशेषेणैवागताः न त्वन्यजनवत्साधारणप्रेम्णेति । निषेधार्थश्चायम्—अये साधु स्मारितं सखे इत्यनेन, यतो बाल्यक्रीडासख्येन भवतीनां स्पर्शोऽपि जातोऽस्तीत्याशंक्याहुः—यर्हीति । यर्हि यदा तव बाल्ये वानरादिप्रियस्यैव सतः पादतलं रमाया रमण्या दत्तावसरं तदभिसारोन्मुखं बभूवेत्यर्थः । तत्प्रभृति तदपि नास्प्राक्ष्म किमुतान्यदंगम्, कथंभूता अपि त्वयाभिरमता बाल्ये कारितक्रीडा अपि अत एवान्येषां श्वश्र्वादीनामपि समक्षं स्थातुं पारयामः । अन्यथा तैरपि द्विष्येमहीति भावः ॥ ३६ ॥ सौभाग्यम् सौंदर्यम् । अतिचित्रम् निखिलदेवप्रसाद्यलक्ष्म्या कांक्षितधूलित्वादिति । श्रीयते सेव्यते निखिलैरिति श्रीर्लक्ष्मीः । असापत्न्यमेकाकिन्या लब्धत्वात् । भृत्यैः ऐकांतिकभक्तैर्नारदादिभिः । भगवतो विश्वंभरत्वेन सर्वपालकत्वात्तदपेक्षया निखिलानां भृत्यत्वमेवेत्याभिप्रेत्य स्वामिचरणैर्भृत्यपदं सर्वार्थपरतया व्याख्यातम्—भृत्यैः सर्वैरिति । अतिरेकः आधिक्यम् । यस्याः लक्ष्म्याः । स्वान् आत्मनः प्रति वीक्षणं स्ववीक्षणम् । आत्मनोऽस्मान् प्रपन्नास्तव पादरजस्सेवनाय प्राप्ता इत्यर्थः ॥ * ॥ तदेवं त्वयैव वयं स्वप्रेयसीकृताः । किन्तु त्वच्चरणसेवामेव वयमाशास्महे इति सदृष्टांतमाहुः—श्रीर्लक्ष्मीर्यस्य नारायणस्य पदांबुजरजश्चकमे तद्वत्तत्तुल्यस्य तवापि वयं पदांबुजरजः प्रपन्नाः । ततश्च गर्गोक्तिगम्येन तव नारायणतुल्यत्वेनास्माकमपि श्रीतुल्यत्वं स्वत एवायातमिति भावः । किञ्च, वक्षसि सर्वोत्तमे स्थले पदमास्पदं लब्ध्वापि तुलस्या सपत्न्या पदमपि भृत्यैर्जुष्टं सेवितमिति पुरुषजनसंघट्टवदपि तस्य पादरजश्चकमे स्वाभाविकीं प्रेयसीभावसमुचितां लज्जामपि परित्यज्य स्वन्यूनतामप्यंगीकृत्य कामयते स्मेति तस्याः प्रेयसीभावादपि दासीभावो यथाऽभीप्सितस्तथैवास्माकमपीत्यतस्तव रक्तकपत्रकादिदासैः सहापि लज्जां परित्यज्य पादौ संवाहयितुमिच्छामः । तथा वृंदावनीयपुलिंदीनां कर्म तृणलग्नत्वच्चरणतलकुंकुमेन स्वीयभालप्रलेपनमपि स्वन्यूनतामप्यंगीकृत्य चिकीर्षामः । किञ्च, श्रीमन्नारायणदेवेन प्रतुष्यता नित्यं निवासार्थं स्ववक्ष एव दत्तम् । त्वया तु रसिकशेखरेणास्मभ्यं स्वपदतलनिकटप्रदेशेपि क्षणमपि स्थातुमपि न दीयते इत्यस्माकमेव दग्धललाटमिति ध्वनिः । स्वयशःप्रेप्सुर्गर्गोक्तिप्रामाण्येन यदि नारायणतुल्यो बुभूषसि तदाऽस्मान्वक्षसावहेत्यपि भावगांभीर्यस्पर्शी ध्वनिः । ननु सा लक्ष्मीर्यथा चंचला तथैव यूयमपि पुण्यवतां जनानां गृहेगृहे चांचल्यधर्ममप्यंगीकुरुथेति नर्माशंका । केन मूर्खेणोच्यते श्रीश्चंचलेति, सा तु परमधीरैवेत्याहुः—यस्याः श्रियः स्वेषु वीक्षणकृते वात्सल्यरसभयकृपावलोकनप्रातिकृतेऽन्यसुराणां ब्रह्मादीनां तत्पुत्रतुल्यानां प्रयास एव, सा तु तदपि तानपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नः प्रसीद वृजिनार्दन तेंघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥३८॥

कृते श्रीरात्मानं विलोकयत्वित्येतदर्थमन्येषां ब्रह्मादीनां तपोभिः प्रयासः सा तद्रजस्तद्द्वयमपि प्रपन्ना इति ॥ ३७ ॥ हे वृजिनार्दन दुःखहंतस्त्वदुपासने त्वद्भजन एवाशा यासां ता वयं वसतीर्गृहान्विसृज्य हित्वा योगिन इव प्राप्ताः । तत्कर्तृकसुंदरस्मितविलसितनिरीक्षणेन यस्तीव्रः कामस्तेन तप्तचित्तानां हे पुरुषरत्न दास्यं देहि ॥ ३८ ॥

प्रायो नावलोकते किन्तु तच्छक्तिरेव काचित्तेभ्योऽभीप्सितां संपदं दत्ते इति ॥ अत्र **तोषिणी**—ननु मादृशतुल्यकुला एव यूयं ततो बत कथं पादतलमस्प्राक्ष्मेति वदथेत्याशंक्य निजाभीष्टोत्कंठावगुंठितयैवातिदैन्येनाहुः—श्रीरिति । यत् यस्य नारायणस्य वक्षसि पदं लब्ध्वापि पदांबुजरजः श्रीश्चकमे । प्रेयस्युचितं सेवाभिलाषविशेषं परित्यज्य दासोचितमेवेष्टवतीत्यर्थः । अत एव दासानां बहूनां तत्र संघट्टमप्यंगीचकारेति भावः । कीदृश्यपि सा, तत्राहुः—यस्या इति । तदेवं दृष्टांतमुक्त्वा दार्ष्टांतिकमाहुः—तद्वदिति । "तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैः" इत्युक्तत्वात्स नारायण इव यस्त्वं तस्य तव पादरजो वयं च सत्कुलादिसंपत्त्या प्रेयसीपदयोग्यतां लब्ध्वापि प्रपन्नाः । तस्य तव च गुणमहिमैवायं यत्तस्या अस्माकञ्च लब्धतादृशपदत्वेऽपि न्यूनताभिमानमेव कारयतीत्यर्थः । तत्र श्रीरंबुजसादृश्यसुधाधिमवलंबमाना तस्य पादांबुजरजश्चकमे । वयं तु तदुपाधिमनपेक्ष्यमाणास्तव पादरजः प्रपन्ना इति स्वेषां तत्पादस्य च वैशिष्ट्यमंबुजरूपकाभ्यां दर्शितम् । एवं क्षीरोदमथने यथान्यपरित्यागेन श्रियास्तदेकभजनं तथाऽस्माकमपि तदेकभजनमिति ज्ञापितम् । अथ वा--ननु नाहं स्वप्नेपि भवतीस्पर्शनं स्मरामि, भवतु वा तथाप्यविचारेण सकृत्स्खलनेऽपि न भूयः कर्तुमुचितम् । तच्चानौचित्यं भवतीनां साध्वीकुलाचारस्खलनेन मम च तादृशभवदाचारध्वंसनेनेत्यत्र साध्वीकुलशिरोमणिश्रियमेव दृष्टांतयंत्यः प्रत्युत्तरयंति—श्रीरिति । वक्षसि स्वभर्तुर्हृदये पदं स्थानं लब्ध्वापि श्रीः किल प्रसिद्धौ असमोर्द्ध्वमाधुरीभरमोहितत्वात्तथापि तवाङ्गसङ्गे निजायोग्यतामननाच्च । यदिति । यस्य वृंदावनसंबंधि पादरजो मात्रं यद्रजचकमे तद्वत्तस्य तव पादरजो वयमपि प्रपन्ना इत्यन्वयः । 'यद्वांछया श्रीर्ललनाऽचरत्तपः' इति तादृशप्रसिद्धिश्रवणात् । वक्ष्यते च स्वयम् 'जयति तेऽधिकम्' इति । पादरजःशब्दस्य पुनरुक्तिरत्युत्कंठया ज्ञेया । तदुक्तं पक्षद्वये । रूपकाप्रयोगश्च पूर्ववदेव ज्ञेयः । सा च न केवला किन्तु तुलस्या लीलारूपया वृन्दयापि । सहसा च तुलसी तत्प्रेयस्यपि चकमे, पाद्मे कार्तिकमाहात्म्ये जालंधरोपाख्याने तस्या अपि तत्प्रेयसीत्वश्रवणात् । तथा च स्कांदे मथुरामाहात्म्ये—"वृंदावनं द्वादशमं वृंदादेवीसमाश्रितम् । हरिणाऽधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम् ॥" इति । वाराहे तन्माहात्म्ये च—"वृंदावनं द्वादशमं वृंदया परिरक्षितम् । मम चैव प्रियं भूमे सर्वपातकनाशनम् ॥" इति तदाश्रितश्रवणाच्च । कथंभूतमपि भृत्यजुष्टं त्वद्भृत्यगणसेवितावशिष्टमपि पुना रज एव च विशेषयितुं तस्या वैशिष्ट्यांतरमाहुः—यस्या इति । स्ववीक्षणे स्वपतिप्रेमपर्यंतसंपत्तिप्रदेऽन्यसुराः श्रीविष्वक्सेनगरुडादयस्तेषामपि प्रयासः यदि तस्यास्तस्याश्चाप्येवं तदास्माकमेव को दोष इति भावः । ऐश्वर्यपक्षेऽपि पूर्ववदेवार्थः, किन्तु पूर्वत्र प्रेमकृतोत्कर्षदृष्टिप्राप्तत्वेनोत्तरत्र तत्त्वज्ञानप्राप्तत्वेनेति भेदः । तदेवम् 'भर्तुः शुश्रूषणं स्त्रीणाम्' इत्यादेरुत्तरं ज्ञेयम् । निषेधार्थश्चायम्—ननु श्रीवृन्दे अपि स्वपतित्यागेन मदाशया मद्वने तिष्ठतः, का यूयमित्यत्राहुः—श्रीरिति । यत् या श्रीः तुलस्या श्रीवृंदया सहात्र वने स्थितं तव पादांबुजरजश्चकमे । तत्कामनयाऽत्र वासं कृतवतीत्यर्थः । तद्वत्सहैव वयञ्च तव पादरजः प्रपन्नाः । काका, नैवेत्यर्थः । चपलात्वेन ख्याताया लक्ष्म्या यच्चापलं तथा जलंधरभार्यात्वमपि लब्धाया वृंदाया यद्व्यभिचारित्वं तत् तद्युक्तमेव । नास्माकमेतादृशीनामिति भावः । तत्रापि भर्तुरित्यस्यैवोत्तरं ज्ञेयमिति ॥ ३७ ॥ यतस्तव पादरजः प्रपन्नास्तत्तस्मात् । यद्वा—त्वदुपासनं त्वत्समीप उपवेशनं तत्राशा यासामिति ताः । यद्वा—वसतिविशेषणम्--त्वदुपासस्य नाशो यासु ता विसृज्येत्यन्वयः । योगिनः संन्यासिनः । यद्वा—दुःखिताः आमंत्रयन्ति—पुरुषस्य जीवस्य भूः स्थानं हृदयमोषते पीडयतीति पुरुषभूषणेति । यद्वा—पुरुषभुवि वसतीति तथा, बहिरंतर्ज्ञस्यैतदुचितमिति भावः । दास्यम् दासीभावम् । अनेन संगादि लक्ष्यते ॥ * ॥ तस्माद्गृहकुटुंबादिकं परित्यज्य नारायणस्य भक्ता इव वयं तव दास्यमेव कामयामहे इति । यतस्त्वं नारायणतुल्यस्तस्मादस्मान्प्रसीद । ननु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकम् ॥ दत्ताभयं च भुजदंडयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः॥३९॥

ननु गृहस्वाम्यं विहाय दास्यं किमिति प्रार्थ्यतेऽत आहुः । वीक्ष्येति । अलकावृतमुखं केशांतरैरावृतं मुखं तथा कुंडलयोः श्रीर्ययोस्ते गंडस्थले यस्मिन् अधरे सुधा यस्मिंस्त मत्प्रसादप्रतिकूलं दुःखादृष्टं भवतीनामस्तीत्यतः कथं प्रसादः, नारायणोऽपि किं सर्वत्रैव प्रसीदतीत्यत आहुः—हे वृजिनार्दन । तदपि दुःखं त्वमेवार्दय, नारायणो ह्यवश्यमेव प्रपद्यमानानां दुःखमर्दयति । वयं च तेंघ्रिमूलं प्राप्तास्तत्रापि कामनांतरराहित्येनैवेत्याहुः—विसृज्य वसतीरिति । ननु गार्हस्थ्यसुखं परित्यज्यापि मत्तः सुखं कञ्चनावश्यमर्थयध्वे इति जानीमस्तत्राहुः—त्वदुपासनायामेवाशा न तूपासनायाः फले, कस्मिंश्च न सुखे त्वया दास्यमाने आशा यासां ताः । अयमर्थः—उपासनया त्वां सुखयाम इत्येवाभिप्रायेऽपि त्वन्मुखदर्शनोत्थं यदि नः सुखमाकस्मिकं भवेत्तर्हि को दोष इति । ननु कथमुक्तमस्माकं हृच्छयाग्निं सिंचेति—सत्यम्, तदग्निज्वालाया अपि त्वमेव कारणमित्याहुः—तव सुंदरस्मितनिरीक्षणेन यस्तीव्रकामस्तेन तप्त आत्मा यासां तासामस्माकं दास्यं दासीत्वमेव देहि, न तु पत्नीत्वम् ॥ अत्र **श्रीमद्वल्लभाचार्य**चरणानामपि व्याख्या—अतो दास्यार्थिन्य एव वयं न तु विहारार्थिन्यः । अत उपनयनाद्यपेक्षापि न लोकव्यवहारेणेत्येषा तस्मादस्माकं कन्यात्वे परोढत्वे वा न कापि क्षतिः, उभयीभावेऽपि त्वद्दास्यसंभवादिति भावः । प्रकृतवैष्णवतोषिण्यां **श्रीसनातनगोस्वामि**चरणानामपि विवाहे सति पत्नीत्वेन भजनादप्यौपपत्येन भजनं परममहासुखं तच्च श्रीभागवताऽमृते काव्यादौ च प्रसिद्धमेव । अत एवात्र दास्यविशेष एव प्रार्थितः । अधुना च प्रार्थ्यते दास्यो भवाम इत्येव । अयं भावः—काममहोदधित्वादेव स्त्रीलंपटस्य तवास्माभिर्युवतीभिरुपासना स्वांगैरेव त्वत्सुखोत्पादनलक्षणा खल्वेषैवेत्यतो हृच्छयाग्निसेकप्रार्थनापि त्वदुपासनैव । कामाग्निरप्यस्माकं त्वदुपासनोपकरणमेव मुख्यमित्यत एव समुचितमेव संबोधनपदम्—हेपुरुषरूपभूषण गौरांगीनामस्माकमिंद्रनीलमणिमयसर्वांगालंकारेति ॥ अत्र **तोषिणी**—तदेवं तृतीयदिक्स्थिता अपि विवक्षितमुपसंहरंति—तन्न इति । तत्तस्मात्पूर्वोक्ताद्धेतोरेव प्रसादं कुरु, तमेवाहुः—दास्यमेव देहीति । ननु यौवनोन्मत्ताः ! दास्यमपि तादृशं दुर्लभमिति चेत्कथं देयमित्यत्र सदैन्यमाहुः—प्राप्ता इति । अतः सर्वपरित्यागेन प्रपन्नानामाशामवश्यं पूरयितुमर्हसीति भावः । अन्यथा चास्माकं दुःखं स्यात्तच्च तवानुचितमेवेत्याहुः—हे वृजिनार्दनेति । तत्र च निजभावोच्छालतीचत्ताः सत्यो हे रसिकशेखर रसविशेषमयमेव दास्यं देयमित्याशयेनाहुः—तदिति । यद्वा—तत्तादृशनिरीक्षणतप्तात्मनामपि दास्यमेव देहीत्यर्थः । तत्तापहरणेप्याशा परित्यक्तेत्यर्थः । दास्यस्योचितमेवेत्याहुः—हे पुरुषभूषणेति । सर्वत्रैवार्थे तवोपास उपास्तिस्तस्य नाशो यासु ता इति, श्लेषेण वसतिविशेषणं च । किं वा--हे सुंदरस्मितनिरीक्षण अतो धूर्ततयैवेदं वदसीत्यवहित्थया गृह्यमाणं भावं वाक्चातुर्यादिभिर्व्यंजयन्ति—त्वत्त्वत्तो यस्तीव्रः कामस्तेन तप्त आत्मा यासां तासां नः । अनेन दुःशीलः' इत्यस्योत्तरम् । त्वत्कामतप्तात्मनां तत्त्यागे कथं विचारो दोषो वा, न हि महाभुजंगग्रस्तानां तयोरेकतरोऽपि संभवतीति । निषेधार्थश्चायम्—तत्तस्मान्नोऽस्माकं संबंधे प्रसीद । आग्रहं त्यजेत्यर्थः । हे वृजिनार्देति छेदः । अतस्त्वदुपासनाशाः सत्यो वसतीर्विसृज्य तवांघ्रिमूलं न प्राप्ता वयं तस्मात् यास्त्वत्सुंदरेत्यादिलक्षणास्तासां ताः प्रति दास्यं देहि, अस्माकं तु न तेन प्रयोजनमित्यर्थः । तासामपि नात्यंततदंगीकारात्संप्रदानत्वाभाव इति षष्ठ्यभिप्रायः । पुरुषान्सखीनव तत्तदुत्कंठया तत्तद्गोकुलवधूवेशेन भूषयसि नाद्यापि ता इति तत्राप्यसंभावना दर्शिता । यद्वा—पुरुषभूस्तत्सत्ता पुरुषसामान्य इत्यर्थः । हे तस्य ऊषण पीडक तज्जातिमात्रकलंककारिन्निति सकोपसंबोधनम् । 'ऊष—रुजायाम्' इति ॥ ३८ ॥ अयोग्याहँ दास्यं यूयं योग्याः किमर्थमिच्छथेत्याशंकते—नन्विति । 'अलकाश्चूर्णकुंतलाः' इत्यमरः । अतिसुभगत्वात्तव सर्वेश्वरस्य दास्यमेवोचितमिति भावः । केचित्त्वत्रालकावृतमुखस्य जालत्वं, कुंडलयोर्वेसिकात्वं, गंडस्थलस्य विशालभूमित्वम्, अधरसुधाया लोभकत्वं, हसितावलोकस्य मोहिनीत्वं, वेणुगीतस्य भैरवरागत्वं, गोपीजनानां वनचरत्वं, नेत्राणां खंजनत्वं कल्पयंतीति ॥ * ॥ यूयं यन्मम दास्यो भवथ तत्किं मया मूल्येन क्रीताः स्थ दत्तभृतयो वा, तत्र भवताऽस्मत्समुचितमूल्यात्कोटिकोटिगुणितेनास्मदद्दष्टाश्रुतचरेण महानर्घ्येण हसितावलोकचिन्तारत्नेनास्मान् वयस्संध्यारंभ एव क्रीत्वा स्वीयकुंजमंदिरमानीय नीलनिधिपद्मनिधिजांबूनदसकरयुगलचिंतामाणिमयस्थलीविलासासदनीलमणिमंदिराण्यलकादिव्याजेन स्वसंपत्तीर्दर्शयित्वा दारैरपि दुर्लभम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का स्त्र्यंग ते कलपदायतमूर्छितेन संमोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम्॥त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन्॥४०॥

च तच्च तव मुखं वीक्ष्य दत्ताभयं भुजदंडयुग्मं वक्षश्च श्रिया एकमेव रमणं रतिजनकं वीक्ष्य दास्य एव भवामेति ॥ ३९ ॥ ननु जगुप्सितमौपपत्यमित्युक्तं तत्राहुः । का स्त्रीति ।

मूतं प्रतिदिनं भोजयसीत्याहुः—वीक्ष्येति । यदा शोणवक्रोष्णीषं शिरसि बध्नासि तदा दासीजनेन कंकतिकयोत्कृष्योत्कृष्योर्द्ध्वं नयनात् त्वया च स्वांगुल्यायत्तान्निरुध्योन्नीयोष्णीषांतःप्रवेशनाद् भालवामदक्षिण प्रांतयोरेव दृश्यमानमूलभागैरलकैरावृतमनाक् छन्नं मुखं वीक्ष्य यदा च चूडां बध्नासि तदा भालाग्रवामदक्षिणभागेष्वपि कुञ्चितैरनतिदीर्घैरलकैरा ईषदावृतं मुखं वीक्ष्याभ्यंगोद्वर्तनादिसमये संप्रयोगभरसमये चालकैरा सम्यक् प्रकारेणैवावृतमाच्छन्नं मुखं वीक्ष्य ईक्षणाभ्यामास्वाद्यमानमाधुर्य्यभरीकृत्य वयं दास्यो भवामः । मुखं कीदृशम्—कुंडलाभ्यां समयभेदेष्वलकैरनावृताभ्यामीषदावृताभ्यां संपूर्णाभ्यां चाचपलाभ्यामीषच्चपलाभ्या मतिचपलाभ्यां च श्रीः पृथक्पृथक् शोभा यत्र तत् । हसितप्रहसितसमये गंडयोरपि सृक्किण्योर्वितततत्वात् गंडस्थलेऽपि अधरसुधाऽधरमाधुर्योच्छलनं यस्य तत् गंडस्थलाद्गंडस्थलमारुह्य गोपीनयनचकोरैः पीयमानाऽधरसुधा यस्य तत् । रहस्यसमयभेदे तु गोपीनां गंडस्थलेऽधरसुधा यस्य तत् गंडस्थलयोर्गोपीनामधरसुधा यस्य तत् । यद्वा—कुंडलयोः श्रीः प्रतिबिंबरूपशोभा ययोस्ते गंडस्थले यस्मिन्, अधरे सुधा यस्मिन् तच्च तच्च तदित्ये कपदम् । हसितयुक्तोऽवलोको यत्र तत् । हसितं प्रफुल्लता गोपीनां कुमुदानां चावलोकाद्यस्मादिति वा । ननु युष्मत्पतयः एतदसहिष्णवः फूत्कारेण कंसराजतो मम भवतीनां च भयमुत्पादयिष्यन्ति, तत्राहुः—दत्त मभयं महेंद्रदर्पकादिभ्योऽपि पर्वतधारणादिना येन तथाभूतं भुजदंडयुगमिति । तथा चेत्त्वद्भुजदंड एव कंसपशोः प्राणहारको भविष्यतीति भावः । एवं च व्यंजितेन वीररसेन शृंगाररसः पुष्टो भवति स्म । ननु परना रीरहं धर्मात्मा स्वदासीर्न करोमीति तर्जन्या केयमिति पृच्छंत्यः—सत्यं भो धार्मिकचूडामणे गोपानां नारीर्न दासी करोषि किन्तु नारायणस्य नारीं लक्ष्मीमपि वैकुंठाद्बलादानीय स्ववक्षसा वहसीत्याहुः—वक्ष इति । श्रिया लक्ष्म्या कर्त्र्या लज्जावशात्सुवर्णरेखारूपया एकं मुख्यं रमणं यत्र तत् तस्मादधुना ते कियद्वयो बभूव त्रिचतुर्दशभवनेषु मध्ये तदूर्ध्वलोकेष्वपि ब्रह्मांडाद्बहिर्महावैकुंठलोकस्थेष्वपि मध्ये कस्यापि कामपि सुंदरीं नारीं त्वं न त्यक्ष्यसीति जानीम इति व्यंजितं भवति ॥ अत्र **तोषिणी**—ननु भवत्यो न धनादिना मूल्येन क्रीता न वा दत्तभृतयश्च कुतो दास्यो भवेयुः, उच्यते—अन्यत्रैव खल्वसावन्योन्येन स व्यवहारः । भवति तु स्व मुखादिदर्शनादिदानमेव मूल्यं भृतिश्चेत्याहुः—वीक्ष्येति । विशेषेण दृष्ट्वा विशेषमेवाहुः—अलकाऽऽवृतेत्यादिविशेषणैः । तत्र चालकैर्ललाटोपरिविलसद्भिरावृतमित्यूर्द्ध्वभागस्य कुंडलश्रीरिति द्वयोः पार्श्वयोर्हसितेनावलोको यस्मि न्निति तलमध्यभागयोरित्येवं सर्वत्र शोभोक्ता । स्थलरूपकेण कुंडलयोर्विस्तीर्णत्वं कुंडलश्रीत्यनेन स्वच्छत्वं च ध्वनितम् । अधरे च सुधानुमानं दर्शनमात्राल्लोभविशेषोत्पत्तेः सौरभ्यविशेषानुभवाच्च । तथा दत्तमभयं भक्तानां दैत्यवधादिना येनेत्यादिबलिष्ठत्वादिगुणस्तेन चातुर्येण पत्यादिभ्यो भयं परिहृतम् । वस्तुतस्तु गाढाऽऽश्लेषेण कामादिभयहरत्वमभिप्रेतम् । दंडरूपकेण सुवृत्तपृथुदीर्घत्वाद्याकारसौष्ठवम् । तत्राप्येवं वैशिष्ट्यमुक्तम् । तथा श्रिया वामभागस्थस्वर्णवर्णलक्ष्मीरेखारूपया लक्ष्म्या कर्त्र्या एकं श्रेष्ठं रमणं यस्मिन्निति परमसौंदर्यादिसंपत्तिनिधानमुक्तम् । चकारद्वयं विलोक्येति पुनरुक्तिश्च निजवामभुजवक्षसोर्विशेषाश्रयताविवक्षया । तथोत्तरयोर्द्वयोरेका क्रिया चैकसंप्रयोजनजनकत्वात् । तादृशगंडाधरमंडिते श्रीमुखे हि चुंबनपाने भुजवक्षसोश्चालिंगनमात्रमभिलषितमिति । अत्रालकादीनामुक्तिक्रमेणेदं गम्यते—प्रथमतो मुखस्य तत्तत्सौंदर्यदर्शने जातेऽपि लज्जया न चांतरक्ष्येण दर्शनं किन्त्वत्युत्कंठया पश्चादेव, तत इच्छाविशेषेण येन भुजौ दृष्टौ तस्य तु विश्रामो वक्षस्येवेति तथा क्रमो ज्ञेयः । एवं दासीत्वे हेतुः परममोहनतैवेति ध्वनितम् । किञ्च, भृतिर्मूल्यञ्च विषयदानमेव लोके दृश्यते तत्तु त्वयि तत्तद्रूपशोभावति मधुराधरसुधे लोभनीये भुजादिस्पर्शे पूर्णलक्ष्मीनिधानवक्षसि लब्धे स्वतः सिद्धमेवेति । तथा वीक्ष्येति स्वेषां नेत्रखंजनबंधो ध्वनितः । तत्रालकानां पाशत्वं, कुंडल योस्तदंतिमकुंडलिकारूपत्वम्, गंडयोस्तन्निधानस्थलत्वम्, अधरसुधाया लोभ्यत्वं, हसितावलोकस्य विश्वासजनकस्वपालितखंजनद्वयविलासत्वम् । तत्र भुजदंडयुगस्य च दत्ताभयत्वमेव करपल्लवयुक्तत्वादिति भावः । तादृशवक्षसश्च सुखचारप्रदेशत्वमित्यपि ज्ञापितम् । अन्यत्तैः । यद्वा—कुंडलयोः श्रीः शोभा येन तन्मुखम् । केषांचिन्मते श्रीति दीर्घः पाठः । तथा च कुंडलयोः श्रीहेतुगंडस्थले चाधरसुधा च तासां द्वंद्वैक्यं हसितश्चावलो कं च तत् तच्च वीक्ष्येति सर्वेषां प्राधान्यं द्योतितम्।विलोक्यं सादृश्यमिति।निषेधार्थस्तु—ननु यद्येवं तर्हि कथं ममांगान्येव मुहुर्वीक्ष्यमाणास्तिष्ठथ, तत्र साटोपमाहुः—वीक्ष्येति। तत्रापि काक्वैव निषेधो व्यंग्य इति॥३९॥पूर्वोक्तौपपत्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्तं भवान्व्रजभयार्तिहरोऽभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता॥तन्नो निधेहि करपंकजमार्तबंधो तप्तस्तनेषु च शिरस्सु च किंकरीणाम्॥४१॥

अंग हे कृष्ण कलानि पदानि यस्मिंस्तदायतं दीर्घं मूर्छितं स्वरालापभेदस्तेन।पाठांतरे कलपदामृतमयं यत् वेणुगीतं तेन संमोहिता का वा स्त्री आर्यचारितान्निजधर्मान्न चलेत्।यन्मोहिताःपुरुषा अपि चलिताःकिं चत्रैलोक्यसौभगमिति यद्यतःअबिभ्रन्नबिभरुः।त्वद्द्योतकशब्दश्रवणमात्रेणापि तावन्निजधर्मत्यागो युक्तः किं पुनस्त्वदनुभवेनेति भावः॥४०॥व्यक्तं

जुगुप्सितत्वं परिहरंत्य आहुः—कलानि व्यक्तमधुराणि । निजधर्मात् पातिव्रत्यलक्षणात् । कलपदगानश्रवणजानंदमग्नानां धर्माऽधर्मस्मृतिरेव नोदेतीति भावः । गवादयोंतश्चेतनाः । येन वेणुनादेन मोहिताः पुरुषा अपि ‘ शक्रशर्वपरमेष्ठिपुरोगाः ’ इत्युक्तेः शंकरप्रभृतयः स्त्रीवेशं कृत्वा गोपीवृंदे मिलिता अभूवन्निति । स्त्रीणां तु का वार्तेति भावः । न केवलं मनुष्याणामेव मोहोऽपि तु तदितरेषामपीत्याहुः—किं चेति । त्रैलोक्यस्य सौभगमलंकारमिदमस्मद्दृग्गोचरीभूतं रूपं सुंदरतरावयवोपक्लृप्तमाकारम् । इति भाव इति—त्वद्द्योतकशब्दस्य मधुसूदनमुरारिगोविन्देत्यादिशब्दस्य श्रवणमात्रेण विनष्टाखिलद्वंद्वानां विधिनिषेधकैंकर्याभावान्निजधर्मस्य वर्णक्रमादागतस्य त्यागो युक्त एव “ यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्मा विनष्टाः ” इत्युक्तेः । “ श्रवणवर्णनभावमथापि वा न हि भवामि यथा विधिकिंकरः” इति वक्ष्यंति स्वामिचरणाः । पुनस्त्वदनुभवेनाहं ब्रह्मास्मीति साक्षादात्मसाक्षात्कारेणेत्यपि तात्पर्यम् । यथाश्रुतन्तु त्वद्द्योतकशब्दे वेणुध्वनिरिमं कृष्णो वादयत्येवंरूप इति ॥ * ॥ ननु युष्माभिर्धर्माय जलांजलिर्दत्त एव तत्किमन्या अपि पतिव्रताः “विदूषयति निर्लज्जः स्वयं दुष्टः परानपि” इति न्यायेन दूषयथ । मद्वक्षस्यौत्पत्तिक्येवेयं लक्षणाविशेषरूपा सुवर्णरेखा भ्राजते, तां च दृष्ट्वा पतिव्रताशिरोमणिं लक्ष्मीमपि दूषयंत्यस्तस्यामप्यपराधिन्यः कथं भवथेति तत्र न कामपि दूषयामः किन्तु त्रिजगतामपि धर्मध्वंसनाय विधात्रा त्वं सृष्टोसीति सरोषचापलमाहुः—का स्त्री । अंग हे श्रीकृष्ण कलानि पदानि यत्र तदमृतरूपं यद्वेणुगीतं तेन ‘कलपदायतमूर्छितेन’ इति पाठे आयतं दीर्घं मूर्छितं स्वरालापभेदस्तेन संमोहितेति । न स्त्री दूष्यते किन्तु त्वत्कर्तृकं वेणुगीतमेवेति भावः । आर्य्यचरितात्पातिव्रत्यलक्षणनिजधर्मान्न चलेत् । अपि तु सर्वैव चलेदिति धर्मत्याजनलक्षणप्रत्यवायं त्वं प्राप्स्यस्येवेति भावः । न केवलं त्वद्गुणस्यैव धर्मध्वंसकताऽपि तु त्वद्रूपस्याऽपीत्याहुः—त्रैलोक्येति । ऊर्द्ध्वाधोमध्यदेशवर्तिषु प्राकृताप्राकृतलोकेष्वपि सौभगमेव यस्य तत् । न तु धर्मध्वंसकत्वहेतुकस्याप्यत्र द्वेष इति भावः । न च स्त्रीणां स्वाभाविकः कामोऽपि मोहे हेतुरस्तीति वाच्यम्, यतो जंगमस्थावराणां सर्वेषामपि वैवश्यप्रापकौ तवरूपगुणावित्याहुः—यद्यतो गीतरूपाभ्यामबिभ्रन् अबिभरुः तस्माद्धे राजन् किं बहुना ‘शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुः’ इति वेणुगीताध्यायात्परमतत्त्वविदामपि मोहः ‘विस्मापनं स्वस्य’ इति । तव:तस्यापि चमत्कारो दृष्ट इति श्रीशुकोक्तिरप्यासीदिति ज्ञेयम् ॥ अत्र **तोषिणी**—नन्वेवं पतिव्रताभिरुपहसनीया भविष्यथ तत्र स्फुटमेव सरोषदैन्यमाहुः—का स्त्रीति । त्रिलोक्यां वर्तमाना का स्त्री न चलेदपि तु सर्वैव चलेदित्यर्थः । तच्च ‘ देव्यो विमानगतयः’ इत्यादिना सूचितम् । कलेति पूर्वं व्याख्यातम् । पदेति प्रतिपदमपि तादृशं बोधयंति । आयतेति तत्र श्रीकृष्णस्य निर्बन्धं बोधयंति, स्वेषां च धैर्येणापि तत्कालेक्षणं वारयंति । पाठांतरे तस्यालौकिकस्वादुत्वं व्यंजयन्ति । तत्रादर्शने। एवं वार्तादर्शनेऽपि तथैवेत्येवं सर्वतो मार एवेति सभयमिवेत्याहुः—त्रैलोक्येति । त्रैलोक्यस्योर्द्ध्वाधोमध्यवर्तमानयावल्लोकस्य सौभगं सौभाग्यं जनप्रियत्वं सौंदर्यं वा यस्मिन् । यदन्तर्भूतमित्यर्थः । तदिदं प्रत्यक्षवर्तमानमित्यन्यथात्वं निरस्तम् । यद्वा—इदमेतादृशधर्ममसाधारणमित्यर्थः । निरीक्ष्येति । यस्य श्रवणादिनाऽपि मोहस्स्यादिति कैमुत्यं बोधयंति—का स्त्रीति । यत्र पुरुषा अपि स्वयं भगवानपि मुह्येयुरिति भावः । ‘ शक्रशर्वपरमेष्ठिपुरोगाः ’ इति वक्ष्यमाणात् । ‘विस्मापनं स्वस्य च ’ इति तृतीयोक्तेश्च । अहो अस्तु तावत्तादृशसारासारविदां तेषां वार्ता, यद्याभ्यां वेणुगीतरूपाभ्यां गवादयोऽपीति । अनेन ‘ लोकेप्सुभिः ’ इत्यस्योत्तरम् । निषेधार्थश्चायम्—ननु यदि ममांगदर्शने युष्माकं न क्षोभस्तर्हि कथमितश्चलितुमिच्छथ, तत्राहुः—का स्त्रीति । का स्त्री तज्जातिमात्रं कलेत्यादिलक्षणापि आर्यचरितात्सदाचाराद्धेतोः ते त्वत्तः सकाशान्न चलेत् नापयायात् । तथा यद्यस्माद्गवादयोऽपि पुलकान्यबिभ्रन् तदिदं निरीक्ष्य च समवलोक्यापि तस्मादेव हेतोः का नापयायात् अपि तु सर्वैवापयायादित्यर्थः । सुंदरीणां सुंदरपुरुषनिकटस्थितिर्हि बाढं लोकविगानहेतुरिति । तदेवं यदपि न तत्संमोहिता नापि सम्यक् तद्वीक्षणकारिकास्तथाप्यपयास्याम इति भावः ॥ ४० ॥ सर्वस्वामित्वेन तवास्मद्भर्तृत्वात्समानकुलजातत्वेन संबंधयोग्यत्वादस्माकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीशुक उवाच ॥ इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत् ॥ ४२ ॥

निश्चितम् ॥ ४१ ॥ विक्लवितं पारवश्यप्रलपितम् । गोपीररीरमद्रमयामास ॥ ४२ ॥

तव संगत्यौपपत्यदोषो नास्ति, कुतो निंद्यत्वमित्याभिप्रेत्याहुः—व्यक्तमिति । यथादिपुरुषः सुरलोकगोप्ता वामनो जातस्तथा स एवादिपुरुषो भवानधुना व्रजस्य सर्वभक्तसमुदायस्य । यद्वा—अस्माकं व्रजस्थानां भयं संसृतिजम्, आर्तिराध्यात्मिकादिरूपा त्रिविधा ते हरतीति तथा अभिजात इति । व्यक्तमसंदिग्धम् । “एष वः श्रेय आधास्यद्गोपगोकुलनंदनः । य एतस्मिन्महाभागाः प्रीतिं कुर्वन्तिमानवाः ॥ नारयोभिभवंत्येतान्” इत्यादिना श्रीगर्गाचार्योक्तेः । अरयः कामादयः । यत इत्थं तत्तस्मात्सहजशीतलत्वात्संतापहारित्वादानंदस्रावित्वात्कर एव पङ्कजस्तम् । यद्वा—पंकं क्लेशं जयतीति पंकजः कर एव पङ्कजस्तम् । तव करः पंकहरोऽस्ति अन्यथार्तबंधुत्वहानिः स्यादिति संबुद्ध्यभिप्रायः । किंकरीणामिति सर्वत्राभयार्थं दासीत्वदार्ढ्यार्थमेवोक्तम् । यद्वा—किंकरीतापः स्वामिनैवापह्रियत इति, त्वं चास्माकं स्वामीति । अन्यथा ‘ हितान्न यः संशृणुते स किंप्रभुः ’ इति न्यायेन तव किंप्रभुत्वं च स्यादिति भावः ॥ * ॥ तस्मादलं चातुरीप्रपंचेन मुंचावहित्थामित्याहुः—व्यक्तमिति । न तु कुत्राप्येतदाख्यानं गुप्तमित्यर्थः । किं तत्—भवान् व्रजस्य यद्भयं दावानलादिभ्यः, आर्तिः पीडा च वर्षवातादिभ्यस्ते हरतीति सः । ‘ व्रजजनार्तिहरः ’ इत्यपि पाठः । अभि सर्वतोभावेन नंदगृहे जातो यथा नारायण इति सर्वलोकैरुद्घुष्यते, अद्य यदि शतकोटिसंघा एता गोप्यो मरिष्यन्ति तदा व्रजजनानामेतत्पित्रादीनामार्तिः, कथमेकदैव ता वनमध्ये मृता इति भयञ्च भविष्यतीति भावः । तर्हि किमभीप्सितं वस्तत्राहुः—तत्तस्मात् हे आर्तबंधो अस्माकं ततेषु स्तनेषु करपंकजमर्पय । ननु तर्हि मृदुलमेतन्मे ज्वलिष्यतीति तत्राहुः—किंकरीणां त्वत्परिचारिकाणामस्माकं तप्तावप्येतौ त्वत्परिचर्यासाधनावेव । पंकजस्यापि सूर्योदयतापो न तापकः प्रत्युत सुखद एवेति भावः । शिरस्सु चेत्यतः परं मत्त्यागभयं मास्त्विति ज्ञापयितुम् ॥ अत्र **तोषिणी**—एवं चतुर्थदिक्स्थिता अप्यात्मनि धर्मादिदोषं परिहृत्योपक्रमवदेव प्रत्युत तस्मिन्नेव धर्मदोषापत्तिमुपसंहरंत्यः पुनर्विवक्षितमेवाहुः । किञ्च, ननु भवतु तत्तत्सर्वं मम तु नारायणसमगुणत्वेन पूर्णकामत्वान्नान्यत्र प्रवृत्तिः स्यात्, किमुतेदृशे कर्मणीत्याशंक्याह--व्यक्तमिति । व्रजस्य यद्भयं पूतनादिभ्यो दावादिभ्यश्च तदर्थस्त्रास आर्तिश्च वर्षवातादिभ्यश्च पीडा तथा भयं त्वद्विरहशंकयार्तिस्त्वद्विरहेण तदुभयहरः सन् ते खंडयितुमित्यर्थः । “तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् । गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥” इति स्वयमितीव विभाव्य पर्वतभारस्य ग्रहणात् । क्वाचित्के पाठान्तरे व्रजजनानामार्त्तिर्बाह्याभ्यंतराऽशेषबाधा । अभिजातः सत्कुलाज्जात इति । तत्रापि वैशिष्ट्यमतोऽस्माकं नाशे तत्रापि त्वदेकहेतुकनाशत्वे व्रतभंगापत्तितोप्यधिको धर्मदोषः स्यादिति भावः । ईश्वरस्य पूर्णकामस्यापि तादृशव्रतरक्षा तादृशकामना च दृश्यत एवेत्याहुः—देव इति । सर्वथा दीव्यति विराजत इति देवः आदिपुरुषः सर्वपुरुषेषु श्रेष्ठः सोपि यथा सुरलोकगोप्ता स्वेच्छया तज्जनमात्रस्य रक्षिता सन् अदित्यादावभिजातो भवति तत्तस्मात्करस्य पंकजत्वं तापहारितामात्रांशे निरूपितम् । वस्तुतस्तु पापस्य तदप्राप्तिमात्रनिदानत्वात्तदारंभ एवापगमः स्यादित्यभिप्रेत्यैव ततेष्वपि स्तनेषु परमस्निग्धाभिरपि ताभिस्तन्निधानप्रार्थनमिति ज्ञेयम् । पूर्ववत्सदैन्यमाहुः—शिरस्सु च किंकरीणामिति । अत ऊर्ध्वमस्मानात्मसात्कुर्विति विवक्षितम् । हे आर्तबन्धो इति--आर्तबन्धौ साक्षाद्विराजमाने त्वद्दासीनां तापोऽनुचित इति सूचितम् । तथा कामेन च मा निधेहि किं त्वार्तबन्धुत्वेनैव निधेहीति गूढोऽयमभिप्रायः । अवहित्थयाऽऽच्छाद्यमानो मनोभवोऽस्मदङ्गेषु हस्तार्पणेन स्वयमेवोद्भवितेति । निषेधार्थश्चायम्--तथापि तं बलादिव स्पृशन्तमाशङ्क्याहुः--व्यक्तमिति । तत्र पूर्वार्द्धेन ततो धर्मभयादितोऽपि रक्षा तवोचिता । न तु तन्नाश इति भावः । नो निधेहि मा निधेहि । आर्तबंधो इति स्वेषां धर्मभयादार्तिं व्यंजयंति । ततत्वे कामाग्निसंतापितहृदयकिंकरीणां स्वगृहदासीनामपि किमुत मादृशीनां तत्रापि शिरस्सु च मा निधेहि । किमुत स्तनेष्वित्यर्थः । तदेवं स्वागतामित्यादिप्रकरणं संलापाख्योऽनुभावो ज्ञेयः । “ उक्तिप्रत्युक्तिमद्वाक्यं संलाप इति कीर्त्यते ” इत्युक्तेरिति ॥ ४१ ॥ तासामार्तिश्रवणादुद्विग्नं राजानं प्रेक्ष्य तच्छांत्यै श्रीशुकः परसंतापापहारकारिण्या श्रिया सहितः परममुनिरुवाचेति । इति इत्थम् । तासाम् गोपीनाम् । योगिनः सनकाद्यास्तदीश्वराः शंकराद्यास्तेषामीश्वरः श्रीयशोदानंदनः । अनेन परमोत्कृष्टदयालुतोक्ता । दयालवो योगिनः, परमदयालवो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ॥ ४३ ॥

प्रियस्येक्षणेनोत्फुल्लानि मुखानि यासां ताभिः । उदारहासश्च द्विजाश्च तेषु कुंदकुसुमवद्दीधितिर्यस्य सः । एणांकश्चंद्रः ॥ ४३ ॥

योगेश्वराः, परमोत्कृष्टदयालुः श्रीकृष्ण इति । सदयं स्वहस्तेन तासामश्रुमार्जनादिपूर्वम् । गोपीनामपि 'ता मन्मनस्का मत्प्राणाः' इति भगवदुक्तेस्तद्रूपत्वान्नात्मारामत्वहानिरिति ध्येयं विद्वद्भिः । वक्ष्यत्यपि 'यथार्भकः स्वप्रातिबिंबविभ्रमः' इति । पारवश्येन कामायत्तत्वेन प्रलपितं प्रपूर्वलपेरनर्थकवचःपरत्वम् 'प्रलापोऽनर्थकं वचः' इत्यमरः । इत्युक्त्या स्वामिचरणैस्तासामपि वस्तुतोऽतथात्वं ध्वनितम् । अतथात्वं कामादि पीडाराहित्यम् ॥ * ॥ विक्लवितं वैक्लव्यव्यंजकं वाक्यं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यर्थः । प्रहस्य अहो भाववत्यो यूयं प्रतिदिनमेव मेलनसमये वाम्यमपारं कुरुध्वे, अहं त्वेकस्मिन्नेव दिनेऽद्यैवावहित्थया यत्किंचिद्वाम्यमकरवं तदपि दाक्षिण्यगर्भमेव, तेनाप्येतावद्वैक्लव्यवत्यो लज्जायाः श्राद्धं कृतवत्यो मां हासयध्वे, तस्माद्युष्मत्प्रात्यहिकावहित्थासिंधुचुलुकीकरणचंचुना मयैव जितास्थ, भो सुबुद्धिशेखरंमन्याः जितास्थ तत्स्वयमेवा गत्य प्रतिबंधकलज्जाधृत्याऽद्यभावान्मत्कंठकनकमणिमालायुता भूत्वा स्वाधरसुधाः पाययत, चिरादुद्भूतमहातृष्णोऽस्मीति परिहस्य । सन् अयः शुभावहो विधिर्यत्र तत् सस्नेहं वा यथा स्यात्तथा आत्मारामोऽपि ता गोपस्त्रीः रमयामास । इत्थंभूतप्रेमाणो गोपस्त्रिय इति 'आत्मारामाश्च मुनयः' इति पद्ये 'इत्थंभूतगुणो हरिः' इतिवद् गोपीनां तदीयस्वरूपभूतह्लादिनीशक्तिवृत्तित्वात् 'ता अथात्मानः' इत्यात्मभूताभिस्ताभी रमणं संभवत्येव । यद्यपि तदपि "न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्" इति, "नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना" इत्यादिभगवदुक्तेस्तस्य स्वात्मतोऽपि भक्तानामानंदप्रदत्वाधिक्यात्त्वगमादासां च गोपीनां सर्वभक्तशिरोमणित्वादात्मारामस्यापि तस्यानंदाधिक्यार्थमेवैताभी रमणमिति ज्ञेयम् । ननु 'प्रमदाशतकोटिभिराकुलितः' इति क्रमदीपिकाद्यागमदृष्ट्या शतकोटिसंख्याभिस्ताभिरेकत्रैवैकदैवैकस्य तस्य रमणं नोपपद्यते, तत्राह—योगिनः सौभर्यादयः, योगेश्वरा रुद्रादयस्तेषामपीश्वर इति । सौभर्यादयः कायव्यूहं कृत्वैव रमंते कृष्णस्त्वतर्क्याचरितस्तं विना । यद्वक्ष्यते--' चित्रं बतैतदेकेन वपुषा ' इत्यादीति ॥ अत्र **तोषिणी**-- इति निजोक्तिवदुभयार्थस्पर्शात्मकमेतद्विक्लवितं प्रेमवैक्लव्यमयरोषदैन्योक्तं श्रुत्वा तच्छ्रवणेन स्वाभिलाषं पूरयित्वेत्यर्थः । ततः प्रहस्य परिहासेऽपि तासां वैक्लव्यविशेषोदयात्ततो निजाभीष्टश्रवणसिद्धेस्तत्रापि स्ववचनसदृशप्रतिवचनसौष्ठवात्ततोऽवहित्थापगमेन रत्याख्यभावोदयाच्च प्रकर्षेण चेतोविकाशिरूपतया रसशास्त्रप्रसिद्धं सुखप्रसादानुभावं भावविशेषं लब्ध्वेत्यर्थः । तदेव च सप्रेमदैन्यवचनं श्रुत्वा सदयं चित्तार्द्रतासहितं यथा स्यात्तथा गोपीररीरमत् रन्तुं स्वयमेव प्रयोजयामास । अत्याग्रहं चकारेत्यर्थः । एवं तस्यैव च तत्रेच्छावैशिष्ट्यं लक्ष्यते । समानमपि क्रीडत्सु बालेषु प्रयोजकस्यैवेति भावः । अत एव परस्मैपदम् "अणावकर्मकाच्चित्तवत्कर्तृकात्" इति कर्त्रभिप्राये तद्विधानात् । ननु किमेतदाश्चर्यं नागरेषु ?, तत्राह--आत्मारामोऽपि । अहो आसां प्रेमगुणप्राबल्यं यतः 'आत्मारामाश्च मुनयः' इत्यादौ हरिगुणगणेनात्मारामगण इव तेन सोप्यात्मवशी चक्र इति भावः । अत एवापिशब्दः सार्थकः स्यादन्यथा तु प्रत्युत विरुद्ध एव । यद्यपि "नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना" इति सामान्यभक्तपरमव्याप्तिवचनं तथाप्यत्र वैशिष्ट्यविवक्षया तथोक्तमिति न पौनरुक्त्यं वैयर्थ्यम् । ननु कथमेकः सन्नसंख्या रमयामास, तत्राह--योगेश्वरेश्वर इति । योगेश्वरा अपि कायव्यूहादिकं विधाय युगपन्नानाकृत्यं विधातुं शक्नुवंति, स तु तेषामपी श्वरत्वेनाचिंत्यस्वाभाविकशक्तित्वात्तदादिकं विनापि शक्नोतीति वक्ष्यते च श्रीनारदेन--"चित्रं बतैतदेकेन वपुषा युगपत्पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥" इति भावः । गोपीशब्देन तत्तन्महामंत्रप्रसिद्धं तासां तदीयवल्लभात्वं स्मारयित्वा तत्रापि नात्याश्चर्यतां सूचयतीति ॥ ४२ ॥ मया शोभया सह वर्तमाना समा श्रीराधा तामिताभिः प्राप्ताभिः । उदाराण्यंगस्पर्शपुष्पाद्यर्पणकटाक्षपातरूपाणि चेष्टितानि यस्य सः । प्रियेक्षणेति मुखानां कमलवन्त्वमीक्षणस्य च भास्करत्वं सूचितम् । तेषूदारहासयुक्तद्विजेषु दंतेषु । यद्वा--द्विजा एव कुंदा माघ्यपुष्पाणि द्विजकुंदाः, उदारहासेनोत्कृष्टहास्येन विवृतानां द्विजकुंदानां दीधिति मरीचिर्यस्य सः । 'भानुः करो मरीचिः स्त्री' इत्यमरः । 'कुंदो माघ्येऽस्त्री मुकुंदभ्रमिनिध्यंतरेषु ना' इति मेदिनी । 'एणः कुरंगो हारिणः' इति हलायुधः । एणोंकश्चिह्नं यस्य स तथा "कलंकांकौ लाञ्छनञ्च चिह्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपगीयमान उद्गायन्वनिताशतयूथपः ॥ मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनम् ॥ ४४ ॥

॥ ४४ ॥

लक्ष्म च लक्षणम्" इत्यमरः । एतेन हरेः कांत्या तासामाच्छादितकांतित्वमुक्तम् ॥ * ॥ उदारं तासां रतिसुखप्रदं भाविभक्तानां तच्छ्रवणाद्यैः प्रेमप्रदं च चेष्टितं लीला यस्य सः । अच्युतः युगपदेव तत्प्रत्येकरमणानिष्ठच्युतिरहितः । उदारैस्तासां सुखप्रदैर्महद्भिर्वा हासैर्द्विजानां दंतानां कुंदानामिव प्रकाशिता दीधितिर्यस्य सः॥अत्र **तोषिणी**—रमणप्रकारमेव ताभिरित्यादिचतुभिवर्णयंस्तत्प्रयोजककर्तृताञ्च दर्शयन्नादौ ताभिः सह प्रेमसंगमेन तस्यापि शोभाविशेषं सदृष्टान्तमाह—ताभिरिति । समेताभिः स्वयमेव श्रीकृष्णेन कर्त्रा समागताभिः अरीरमदित्युक्तेस्ततस्ताभिस्तादृशीभिर्वृतः परितो वेष्टितः सन् व्यरोचत विशेषेणा शोभत । तत्राप्यच्युतः सर्वाभिः प्रत्येकमपि संगमेच्युतिरहितः सन् । अत एवोदारचेष्टितः उदाराणि रसविशेषोद्दीपनविचित्रवैदग्ध्यादिमयत्वेन सर्वोत्कृष्टानि परमसुखप्रदानि वा स्पर्शनपुष्पाद्यर्पणकटाक्षादिरूपाणि यस्य सः । अत एव प्रियस्य वीक्षणं स्वकर्तृकं तत्कर्तृकं वा ज्ञेयम् । उत्फुल्लशब्देन मुखस्य कमलत्वं व्यञ्जितम् । तदीक्षणे तदंतःकरणतमोपगमने । तदीयदिवसताप्राप्तेरिति भावः । एवं तासां रसविशेष उक्तः । तस्यापि तमाह—उदारो हासो यशसा द्विजकुंददीधितिर्यस्य सः । श्रीमद्दन्तानां प्रकाशेन हासस्याधिकशोभोक्ता । स्वतः परमकष्ठाप्राप्तनित्यशोभामयस्यापि ताभिः शाभाविशेषं दृष्टान्तेन साधयति—एणांक इति । चंद्रस्य पूर्णत्व एणांकस्यैणाकारत्वेनोपलंभादेणांकः पूर्णचंद्रस्ताराभिः सर्वतो विराजमानाभिः सतीभिर्वृतः सन् यथा विरोचते तद्वदिति । एवं ताभिः सह तस्यान्योन्यत्वं शोभनत्वं प्रेष्ठत्वं नित्यसाहित्यं तासां ततस्तन्वीत्वं च सूचितम् ॥ ४३ ॥ उपगीयमानो गोपीभिः । स्वयञ्च चंद्रमसमुद्गायन्नधिकं वर्णयन् कृष्णः शरच्चंद्रमसं कौमुदीकुमुदाकरम् जगौ । गोपीजनस्त्वेवं कृष्णनाम पुनःपुनरिति टीकांतरोक्तेः । शतशब्दोऽनेकवाची । यूथस्तु—" अर्बुदं दशकोटीनामेकं भवति शैलजे । दशार्बुदं भवेद्यूथमिति संख्याविदो विदुः ॥ " इति तंत्रोक्तेः । वैजयंतीलक्षणं पूर्वमुक्तम् ॥ * ॥ ताभिरुपाधिक्येन गीयमानं रागस्वरतालाद्यैः । तत्र तालत्रयेण गीतं यथा--" वदनं मधुरिममदनं चलनं दलनं कवीन्द्रकीर्तीनाम् । हसितं सुदृगभिलषितं तव सवयः पातु मामनिशम् ॥ " इति । स्वयं च वनितानां शतयूथानि पांति यास्ता मुख्यतमाः श्रीराधाचंद्रावल्याद्यास्तदनुगानरीत्या तेनैव गीतेन प्रत्येकमुद्गायन् । क्वचिदेकस्वरपरिवर्तेन परस्परगानम् । उद्गीतं यथा--" त्वद्वदनं मदनं मधुरिम्णा तत्र च हन्त दृगन्तविलासाः । तेष्वसमां सुषमामुपजग्मुः सुंदरि कामकलाः सकलास्ताः ॥ " इति, " कान्ते त्वदास्यादयदत्तमिंदुर्मृगच्छला दुर्यश एव धत्ते । जनोपहासासहनोऽथ वा किं द्विजोऽपि मूढो गरलं जघास ॥ " इति।अत्र सुंदरीत्यत्र सुंदरेति, कांत इत्यत्र कांत इति प्रयुंजानः प्रेयसीजनोऽनुगायति स्मेति रीतिः । वैजयंतीम् पञ्चवर्णपुष्पग्रथिताम् 'पञ्चवर्णा वैजयंती' इति वचनात्॥ अत्र **तोषिणी**—इत्थं शोभाविशेषोदयेन श्रीवृंदावनमपि शोभयन् गीतेन पुष्पादिप्रदर्शनेन च भावमुद्दीपयितुं रतियोग्यं यमुनापुलिनं गन्तुं च गमनक्रमेण बभ्रामेत्याह—उपगीयमान इति।उद्गायन् भावोद्दीपनं चंद्रादिकं हर्षेणोच्चैर्गायंस्ताभिश्चोपगीयमानः । उपगायनरीत्या तैरेव गीतैरनुक्रियमाणैर्वर्ण्यमानः,श्लेषेण तत्रैव संगमित्यर्थत्वात्। तच्चैवं ज्ञेयम्--यथा श्रीरसामृतसिंधौ "अखिलरसामृतमूर्तिः प्रसृमररुचिरुद्धतारकापालिः । कलितश्यामाललितो राधाप्रेयान् विधुर्जयति ॥" इति। क्वचिदेकद्व्यक्षरपरिवर्तनाच्च—"यामिनीकृतरुचिः शुचिकांतिश्चंद्रिकावलिविभाविकचश्रीः । षट्पदालिकालितैः कलगीतैः पश्य भाति कुमुदाकर एषः ॥ कामिनीकृतरुचिः शुचिकान्तिश्चन्द्रिकाबलिविभाविकचश्रीः।षट्पदालिकालितैः कलगीतैः पश्य भाति कुमुदाऽकर एषः ॥" इति । यथा तदीयस्वरतालादियुक्तेन तन्नाम्नैव तदुपगायन् तया गीयमानः मनसि तदेकाऽऽविष्टया वचसि तदेकस्फूर्तेः । यथोक्तं श्रीविष्णुपुराणे--"कृष्णः शरच्चंद्रमसः कौमुदीं कुमुदाऽऽकरम् । जगौ गोपीजनस्त्वेकं कृष्णनाम पुनःपुनः ॥" इति । तत्रार्थद्वयमपि रसनीयमिति । कृष्णश्च नाम च कृष्णनाम तदेवैकं केवलं जगाविति च व्याख्येयम् । "वनिता जनितात्यर्थानुरागाभ्याञ्च योषिति" इत्यमरः । तासां शतानि यूथानि पातीति तन्नायक इत्यर्थः । श्लेषेण तानि पिबति 'पिबंत इव चक्षुर्भ्याम्' इत्यादिवत् । आसक्त्या सेवतेऽधरामृतपानादिना साक्षात्पिबति वेति तथा सः । तासां निजनिजभावसाजात्यानुसारेण वर्गशो यूथत्वम् । वैजयंतीं पञ्चवर्णपुष्पग्रथिताम् 'पञ्चवर्णा वैजयंती' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकम् ॥ रेमे तत्तरलानंदकुमुदामोदवायुना ॥ ४५ ॥ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनाऽऽलभननर्म नखाग्रपातैः ॥ क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपातिं रमयांचकार ॥ ४६ ॥ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥ आत्मानं मनिरे स्त्रीणां मानिन्योऽभ्यधिकं भुवि ॥ ४७॥

॥ ४५ ॥ बाहुप्रसारश्च परिरंभश्च कराभ्यामलकादीनामालभनं स्पर्शश्च नर्म परिहासश्च नखाग्रप्रपातश्च तैः क्ष्वेल्या क्रीडया अवलोकैश्च हसितैश्च कामं तासामुद्दीपयंस्ता रमयामास ॥ ४६ ॥ महात्मनो विमुक्तचित्तात् ॥ ४७ ॥

वचनात् । यद्यपि वलयानां नूपुराणामिति वक्ष्यमाणादन्यान्यपि भूषणानि विद्यन्ते तथापि तां बिभ्रदिति वनविहारयोग्यांगत्वेनोक्तम् । सा च ताभिरेवाशु निर्माय समर्पिता, तद्वनदेव्या वृंदयैव वा तदर्थे तत्रतत्र कुंजादौ स्थापितेति ज्ञेयम् । व्यचरत् परिबभ्राम ॥४४॥ नद्याः कालिंद्याः । हिमाः शीतलाः वालुकाः सिकता यत्र तत्तथा । तस्या नद्याः तरलैर्मंदकल्लोलैरानंदयितुं शीलमस्यास्तीति तत्तरलानंदी, कुमुदानामामोदो यत्र स वायुः कुमुदाऽऽमोदवायुः, तत्तरलानंदी चासौ कुमुदामोदवायुश्चेति तथा तेन । यद्वा–तया नद्या तरलानि नृत्यंतीव स्थितान्यानंदीन्युत्फुल्लानि कुमुदानि तत्तरलानंदिकुमुदानि तेषामामोदेन सौरभेण संपृक्तेन वायुना । एतेन मंद सुगंधिशीतलत्ववैशिष्ट्यं वायोर्ध्वनितम् । ननु तावति पुलिने शतकोटिस्त्रीभिः कथं विजहार ? दुर्घटघटनापटीयस्या भगवन्मायया सर्वस्यापि सुकरत्वात्, वृंदावनैकदेशे ब्रह्मणा कोटिशो ब्रह्मांडानां दृष्टत्वाच्च । तदुक्तम्– "स तु माथुरभूरूपः परिच्छिन्नोऽप्यथाद्भुतः । स्फारः संकुचितश्च स्यात्कृष्णलीलानुसारतः ॥ अत्रैवाजांडमालापि पर्याप्तिमुपगच्छति । वृंदावनप्रतीकेऽपि याऽनुभूतैव वेधसा ॥ इत्यतो रासलीलायां पुलिने तत्र यामुने । प्रमदाशतकोट्योऽपि ममुर्यत्ते किमद्भुतम् ॥" इति भागवतामृतादौ स्फुटम् ॥ * ॥ तस्या नद्यास्तरलैस्तरंगैरानंदीति शैत्यमांद्याभ्यामानंददायकश्च रात्रावपि प्रफुल्लानां कमलानामामोदो यतः स च तेन वायुना रेमे । 'जुष्टम्' इति पाठे रमयांचकारेत्युत्तरेणाऽन्वयः । कुमुदामोदेति तरलानन्देति च क्वचित् ॥ अत्र **तोषिणी**–ततः श्रीयमुनापुलिने ताः प्रापय्य वैदग्धीविशेषेण रमयामासेत्याह–नद्य इति युग्मकेन । हिमवालुका कर्पूरस्तद्वालुका यत्र तत् । शाकपार्थिवादित्वात्साधुः।एवं पूर्वत्र वनमपि वृन्दावनमेव । तस्या नद्यास्तरलैस्तरंगैरानंदी सुखविहारी चासा कमलाऽऽमोदयुक्तवायुश्च तेन । निशायां कमलविकाशः श. दि मल्लिकाविकाश इव तदीयतादृशलीलारसमयप्रभावेण।आनंदीति जुष्टमिति च मांद्यम्। सौरभ्यशैत्ये स्पष्टे। कुमुदेति आनंदेति च पाठे एकेषां जुष्टमित्यत्र।रेमे इति क्वचित्। अत एव पृथगंकः कृतः ॥४५॥ परिरंभः आलिंगनम्। करादीनां स्पर्शः कामशास्त्रविहितमोचनलक्षणो ज्ञेयः। यद्वा–क्ष्वेल्यावलोकहसितैः बालसिंहनादनिरीक्षणमंदहासैः । तदुक्तं माघे–"बाहुपीडनकुचग्रहणाद्यैराहितेन नखदंतनिखातैः । बोधितस्तनुशयस्तरुणीनामुन्मिमील शनकैरपि मारः॥" इति ॥ * ॥ बाहुप्रसरस्तासां स्वस्य वक्षसि स्वस्तिकीभूतानां भुजानां प्रसारणम्। स च परिरंभश्च करादीनामालभनं स्पर्शश्च नर्मपरिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडोक्त्याऽवलोकैश्च हसितैश्च रतिपतिं कामं तासां स्वस्य चोत्तंभयन्नुद्दीपयन् । तावद्भिरेव स्वप्रकाशैः प्रत्येकं रमयांचकार । ननु च तावत्येव पुलिने बहुगोपीजनसंघट्टे निरावरणत्वात्सौरततल्पाद्यभावाच्च प्रत्येकं ताभिः शतकोटिप्रमदाभिः सह संप्रयोगलीला न संगच्छते, सत्यम्, भगवन्मूर्तेरिव श्रीवृंदावनभूमेरपि विभुत्वात्तिलमात्रप्रदेशस्याप्यतिस्फारत्वं, सावरणविविधकुंजवत्त्वं, गंधमाल्यतांबूलादिसहितविचित्रसौरतपुष्पतल्पवत्त्वं च दुर्घटघटनापटीयस्या योगमाययैव प्रकाशितं, लीलांते पुनरावृतं चेति सुसंगतिकमेवैतत् ॥ अत्र **तोषिणी**–सहजलज्जादिनाच्छाद्यमानमपि रेतः कांतोचितप्रीतिलक्षणायाः पातिं तदुचितमहाभावाह्वयपरमप्रेमाणं वा बाहुप्रसारादिभिरुत्तंभयन् इति तस्य रत्यासक्तिर्वैदग्धी च परमा दर्शिता । तत्र बाहुप्रसारः परिरंभारंभः । यद्वा–बाहुप्रसारेण परिरंभो गाढालिंगनमित्यर्थः । क्ष्वेलिः प्रस्तोभनादिरूपा । व्रजसुंदरीणामिति तद्योग्यं सौंदर्यमत्र विवक्षितम् । तेन च 'यत्राकृतिस्तत्र गुणा वसंति' इति न्यायात्तादृशं वैदग्ध्यमप्युपलक्ष्यते । रमणं च निजमोहनशक्तिविशेषेणाऽन्योन्यमलक्षितं ज्ञेयम् ॥ ४६ ॥ एवं बाहुप्रसारादिना । विमुक्तचित्तात् अनासक्तात्मनः । स्त्रीणाम् अभ्यधिकं भूलोकांतर्गतसुंदरीषु वयमभ्यधिकसुंदर्य इत्येवं मानिन्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवांतरधीयत ॥ ४८ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे रासक्रीडायां कृष्णांतर्धानं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

तत्सौभगमदं तादृशं सौभगेन मदमस्वाधीनताम् । मानं गर्वम् । केशवः कश्च ईशश्च केशौ तौ वशयतीति तथा सः ॥ ४८ ॥ इति श्री०म०दशमस्कंधे पूर्वार्धे टीकायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

रूपादिगर्वोत्सेकाः ॥ * ॥ अधुना "न विना विप्रलंभेन संभोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान्रागोऽभिवर्धते ॥" इति भरतन्यायाद्रसपुष्ट्यर्थं लीलाशक्त्यैवाऽऽविर्भावितं विप्रलंभबीजमाह—एवमिति । महात्मनः दिव्यातिदिव्यनायकेभ्यः श्रेष्ठाद्भगवतस्तत्रापि कृष्णात्स्वयंरूपात् । लब्धमानाः प्राप्तादराः । श्रीकृष्णरमणप्राप्त्या भुवि भूतलस्थानामेव स्त्रीणां मध्ये आत्मानं प्रत्येकमेव स्वमभ्यधिकं मेनिरे । मानिन्यः प्रत्येकमहं सुभगेति मननान्मानवत्यः गर्ववत्यः ॥ अत्र **तोषिणी**—अधुना "न विना विप्रलंभेन संभोगः पुष्टिमश्नुते । कषायिते हि वस्त्रादौ भूयान्रागोऽभिवर्द्धते ॥" इति भरतन्यायात्प्रेमविशेषोद्रेकादग्रे क्रीडाविशेषवर्णनार्थं विप्रलंभरूपरसविशेषं वक्तुमारभते—एवमिति । महात्मनो दिव्यातिदिव्यसर्वनायकवृंदेभ्यः परमात् । तत्र हेतुः—भगवतः । स्वयं भगवत इत्यर्थः । कृष्णात्तथैव प्रसिद्धादित्यर्थः । एवं पूर्वोक्ततत्प्रेमवशताप्रकारेण लब्धो मानः सम्मानः सौभाग्यं याभिस्तथाभूता भूत्वा मानिन्यः लब्धप्रणयमानाः सत्यो भुवि अन्यत्र चात्र च याः स्त्रियस्तासां सर्वासां मध्ये प्रत्येकमात्मानमेवाधिकं मेनिरे, तं प्रति मानिन्यो बभूवुः । स्त्रियः प्रति गर्विताचित्ता बभूवुरित्यर्थः । तत्र मानः "दंपत्योर्भाव एकत्र सतोऽरप्यनुरक्तयोः । स्वाऽभीष्टाऽऽश्लेषवीक्षादिनिरोधी मान उच्यते ॥ अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् । अतो हेतोरहेतोश्च यूनोर्मान उदंचति ॥" इति रसशास्त्रानुसारात् । गर्वश्चान्यत्रत्यानां तादृशनायकालाभात् । तत्रत्यानां तल्लाभेऽपि स्वसदृशसौभाग्यलाभाऽमननात् । यथोक्तम्—"सौभाग्यरूपतारुण्यगुणसर्वोत्तमाश्रयैः । इष्टलाभादिना चान्याहेलनं गर्व उच्यते ॥" इति । एवम् "संचारयंति ये भावं ते तु संचारिणो मताः । उन्मज्जंति निमज्जंति स्थायिन्यंबुनिधाविव ॥" इति रसतंत्रात् । गर्वोपि तादृक्प्रेमविशेषस्य स्थायिनः संचारिभावत्वात्तन्मय एव ज्ञेयः । अस्य हि रसस्यैवमेव स्थितिरुत्कर्षश्चेति ॥ ४७ ॥ तासाम् गोपसुंदरीणाम् । केशव इत्युक्ते ब्रह्मशिवयोः सर्वेश्वरयोरपि वशकर्तारं को वशयेदिति ध्वनितम् । वयं श्रीराधासमा यतोऽस्मानपि तत्सदृशमेव मनुत इत्यतस्तासां सौभगमदं, समानविहारेण च राधाया मानं च वीक्ष्यान्यासां मानप्रशमनाय श्रीराधायाः प्रसादाय तत्रैव व्रजसुंदरीसमूहे कृष्णातटे वान्तरधीयत । तासां दृष्ट्याऽदृश्यो बभूवेत्यर्थः । अंतर्द्धानमपि संभोगसमृद्ध्यर्थमेव, तदुक्तम्—"न विना विप्रलंभेन संभोगः पुष्टिमश्नुते । अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत् ॥" इति । अंतरधीयतेत्यत्रैकत्वेनाग्रिमाध्याये "कस्याः पदानि चैतानि याताया नंदसूनुना" इत्युक्तेर्द्वयोक्तिर्विरुद्धा नानुसंधेया प्रसादायेत्युक्तेः । प्रसादस्त्वेकांत एवोचितोऽतस्तया सहैवांतर्द्धानं बोध्यम् । यद्वा—द्वयोरैक्याभिप्रायेणैकत्वम् "राधा कृष्णात्मिका नित्यं कृष्णो राधात्मको ध्रुवम्" इति ब्रह्मांडोक्तेः । "तस्माज्ज्योतिरभूद्द्वेधा राधामाधवरूपकम्" इति संमोहनोक्तेश्च ॥ * ॥ ततश्च सर्वासु तासु भगवतः साधारण्येनैव रमणाद्या सर्वमुख्यतमा वृषभानुकुमारी सा सहसोद्भवदीर्ष्याकषायिताक्षी मानिनी बभूव, ततोऽन्यूना अन्याः सौभाग्यगर्ववत्यो बभूवुरित्युद्भूते वैमत्ये सति भगवतैव यत्तत्र समाहितं तदाह—तासामिति । ताश्च सा चेत्येकशेषेण तासां व्रजसुंदरीणां तस्या वृषभानुकुमार्याश्च क्रमेण तत् तं सौभगमदं मानञ्च वीक्ष्य, स चासौ सौभगमदश्चेति तमिति समासो वा । 'तं सौभगमदम्' इति वा पाठः । प्रशमाय तासां सौभगमदं प्रशमयितुं तां प्रसादयितुं च । केशवः कश्च ईशश्च तावपि वयते प्रशास्तीति । तस्य सौभगमदप्रशमने कः प्रयास इति भावः । केशान्वयते संस्करोतीति वा । केशप्रसाधनादिना तस्याः प्रसादनायां रसिकशेखरस्य चातुर्यमस्तीति भावः । अन्तरधीयतेत्यार्षम्, अंतरदधादित्यर्थः । 'धीङ्—अनादरे' इति दैवादिकस्य वा रूपम् । अत्राग्रिमग्रंथदृष्ट्या बलाद्गृहीत्वैवेति तत्रैव न त्वन्यत्र । गच्छंस्ताभिर्दृष्ट इत्यर्थः । तच्च तदिच्छायां जातायां योगमाययैव संपादितम् ॥ अत्र **तोषिणी**—तासाम् तादृशानाम् । तदिति तं सौभगमदं सौभाग्यहेतुकं गर्वं तथा च विश्वः—"मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः" इति । तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीशुक उवाच ॥ अंतर्हिते भगवति सहसैव व्रजांगनाः ॥ अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥ १ ॥
गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २॥

त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणम् ॥ उन्मत्तवच्च नियतं भ्रमंतीभिर्वनेवने ॥ १ ॥ अचक्षाणा अपश्यंत्यः ॥ १ ॥ गत्या चानुरागस्मिताभ्यां विभ्रमेक्षितानि सविलासनिरीक्षणानि तैश्च मनोरमा आलापाश्च विहाराः क्रीडाश्च विभ्रमा अन्ये च विलासभेदास्तैश्च रमापतेर्गत्यादिभिरेतैराक्षिप्तान्याकृष्टानि

मानश्च वीक्ष्य विशेषेण दृष्ट्वा । तत्र गर्वपक्षे युक्त्यंतराऽसाध्यं मत्वा, मानपक्षे कृतैरप्यनुनयादिभिरसाध्यं दृष्ट्वेत्यर्थः । गर्वं प्रति प्रशमाय मानं तु प्रति प्रसादाय तत्रैवांतरधीयत अंतरदधात्। 'धीञ्–अनादरे' दैवादिकः । न त्वन्यत्र गच्छन् दृष्ट इत्यर्थः । अत्र वक्ष्यमाणानुसारेण श्रीराधयैव सहांतर्धानं ज्ञेयम् । तच्च तस्य तदिच्छायां सत्यां योगमाययैव संपादितमिति । यद्यपि सहेतुकस्येर्ष्यामानस्यैव शांतये क्वचिन्नायकोपेक्षाऽपेक्षते "हेतुजोऽपि शमं याति यथायोगं प्रकल्पितैः । सामभेदक्रियादानानत्युपेक्षारसांतरैः ॥" इत्युक्तेः निर्हेतुकस्य प्रणयमानस्य विनैव प्रतिकारेण यत्किंचित्प्रतिकारेण वा, तथापि तच्छांत्यर्थमुपेक्षेयं परस्परगर्वसंबंधेन गाढतापत्तेः । तत उभयभावशांत्यर्थमेव सा प्रेमविपाकयोरपि तयोः शमनेच्छा च स्वेच्छामयलीलेच्छया युगपदेव सर्वा एव प्रति महारसदानमयरासेच्छया च । तया च विप्रलंभः परमप्रेमार्थमेव योक्ष्यत इति ॥ ४८ ॥ इति श्रीमद्भागवत भावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ कृष्णस्य मार्गणमन्वेषणम् । तच्च नियतं यथावच्च, कुतः–उन्मत्तवत् विरहाकुलतयोन्मत्ता इव संजाता इति (१) । हरेरेव योगैश्वर्यं स्वाभाविकं नान्यस्येति ज्ञापनाय गोपीनां भक्त्यतिशयमाह–श्रीशुक इति । तम् श्रीकृष्णम् । करिण्यः इभ्यः 'करेणुरिभ्यां नेभे स्त्री' इत्यमरः । यूथपम् गजेन्द्रम् ॥ * ॥ त्रिंशे तु विरहोन्मत्ताः कृष्णं पृष्ट्वा नगान् स्त्रियः । तल्लीलामनुचक्रुस्ताः संभुज्य स च तां जहौ ॥ अचक्षाणाः अपश्यंत्यः ॥ अत्र **तोषिणी**–तदंतर्द्धानकथनेन श्रीबादरायणेरप्यार्तिभरोदयात्कथाविच्छेदेनाऽध्यायापातः । तदेवं जातदुःखत्वेपि तासामेकां सर्वतः परमां यामादाय श्रीभगवानंतर्हितः तस्याः सौभाग्यं क्षणादनुसंधाय धैर्यमवलंबमान आह–अंतर्हित इति । सहसैवांतर्हित इत्यंतर्द्धानस्य प्रकाराद्यतर्कणात् 'अतर्किते तु सहसा' इत्यमरः । अयं तापाधिक्ये हेतुरूह्यः । व्रजस्यांगना इति–तासां तदेकप्रियत्वेन विरहतापस्यौचित्यमाधिक्यञ्चाभिप्रेतम् । यूथपम् मत्तगजेन्द्रम् । करिण्य इवेति तदेकालंबनत्वेन तासां तद्विच्छेदात्तापाधिक्ये दृष्टान्तः ॥ १ ॥ गत्या बालसिंहखेलनगमनेन । अनुरागस्मिताभ्याम् स्नेहमंदहासाभ्याम् । 'विभ्रमः–सेवायां संशये भावे' इति हैमः । "चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमो मतः" इति हरिदीक्षितः । रमतेऽनयेति रमा राधा तस्याः पतेः राधासहायस्य । तास्ता इति द्विरुक्तिः संभ्रमात् । पूर्वं याया लीलाः कृतास्तास्ता इत्यर्थः । तच्छब्दस्य पूर्वपरामर्शित्वात् । तदनुकरणेन तत्तुल्यवेशादिकरणेन अनु पश्चात् पूर्वं दृष्ट्वा यत्ताद्रूप्येण क्रियते तदनुकरणम् । तद्वृत्तन्नेत्यर्थः ॥ * ॥ ततस्तामितस्ततः कुंजे ष्वन्विष्यन्तीनां तमप्राप्तवतीनां प्रतिक्षणविवर्द्धमानविरहपीडया यः खलून्मादः संचारी प्राभूत्तस्य प्राकट्यप्रकारं वर्णयति–गत्येति द्वाभ्याम् । रमापतेः सर्वसौंदर्यसंपत्तिस्वामिनः कृष्णस्य गत्या स्वाभाविकेन पदविन्यासेन, प्रथमं स्वांतिकागमनम्, आगतानां यान्यनुरागयुक्तानि स्मितानि च, विशिष्टो भ्रमो भ्रमणं तारकायां यत्र तथाभूतानीक्षितानि च तैः । ततश्च मनोरम आलापः अयि स्थलकमलिनि अतितृष्णार्ताय मधुपाय स्वमकरंदं दास्यसि न वा, भो भ्रमर पद्मिन्याः पतिः सूर्य एव न तु भ्रमरस्तत्कथं त्वां स्वीयं मधु पाययिष्यति । भोः पद्मिनि पद्मिनीनां भवतीनां स्वभाव एवायं यत्ताः स्वपतिं सूर्यं स्वीयं मधु नैव पाययन्ति किंतूपपतिं भ्रमरमेवेति । ततस्तदालापेनैव पराजितया विहसन्त्या तया सहाधरमधुपानादिविहारः । एवं वा 'आं' जानामि मत्समीपस्थनीपतरुतलं गच्छंतीं त्वां महादर्पकः सर्पोऽदशत्, तद्विषं ते वक्षस्थलपर्यंतमुदसर्पत्, तदपि त्वं कुलवधूत्वादेव मां तदुपशमनं न पृच्छसि, तदहं दयालुत्वात्स्वयमेव त्वदंतिकमेत्य तद्विषोपशमकं मंत्रं पठन्करतलाभ्यां त्वदंगं संघट्टयामि । भोभो जांगलिक न मां सर्पोऽदशत्, यां सर्पो दशति स तद्गात्रमेव करतलाभ्यां संघट्टय । भो कुलांगने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ॥ असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥
गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनम् ॥ पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ॥ ४ ॥

चित्तानि यासां ता अतस्तस्मिन्नेवात्मा यासां तास्तस्य विविधाश्चेष्टा जगृहुस्तदनुकरणेनाक्रीडन् ॥ २ ॥ अपि च गतिस्मितेति । प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मर्तयो यासां ताः । अतः कृष्णविहारविभ्रमाः कृष्णस्येव विहारविभ्रमाः क्रीडाविलासा यासां ताः । अहमेव कृष्ण इति परस्परं निवेदितवत्यः ॥ ३ ॥ किं च गायंत्य

त्वदीयगद्गदस्वरादेव विषज्वालाकुलत्वं तव ज्ञायते इति ज्ञात्वापि यद्यप्यहं त्वामुपेक्षे तदा मां स्त्रीवधदोषो लगिष्यतीत्यतस्तद्विषमुपशमयिष्याम्येवेत्युक्त्वा तस्या वक्षःस्थले नखरार्पणादिकं चकार । ततो विहारः संप्रयोगः, ततो विभ्रमः कामोन्मत्तता । तदुक्तम्—"चित्तवृत्त्यनवस्थानं शृंगाराद्विभ्रमो मतः" इति । तैर्विरहावस्थायामतिशयेन स्मृत्यारूढैराक्षिप्तानि—अरे किमिह कुड्ये बहिर्भूय प्राणप्रेष्ठमन्वेष्टुं गच्छतेति तिरस्कृत्य देहतो निःसारितानीव स्वचित्तानि याभिस्ताः । यतः प्रमदाः प्रकर्षेण माद्यंति ताः । ततश्चोन्मादं प्राप्य तदात्मिकास्तस्यैवात्मानो मनोबुद्ध्यादयो यासां ताः । अतस्तास्तास्तदीया विविधाश्चेष्टा जगृहुः । बुद्धिपूर्वकग्रहणादनुचक्रुरित्यर्थः ॥ अत्र **तोषिणी**—तापमेवाभिव्यंजयति—गत्येत्यादिना पद्याधिकाऽध्यायद्वयेन । गतिः सामान्यानुरागः स्वविषयकः कांतयोग्याभावः, स्मितं विभ्रमेक्षितानि च तैः । विभ्रमोऽत्र भ्रूप्रभृतीनां तत्तन्मधुरचेष्टा । विहारः शृंगारचेष्टा । उत्तरो विभ्रमः शृंगारभावविशेषः । तथा चोक्तम्—"चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः" इति । तत्रानुरागचित्तवृत्त्यनवस्थाने मानसे, गतिस्मितविभ्रमयुक्तेक्षितविहाराः कायिकाः, आलापो वाचिक इति ज्ञेयम् । एतदुपलक्षणत्वेनान्येऽपि भावा ज्ञेयाः । अत्र गतेः सामान्यत्वेन पृथगुक्तिः । स्मितादिकयोरनुरागारंभमात्रज्ञायमानत्वेन तत्समुदितोक्तिः । आलापविहारयोर्विभ्रमजन्मनैव जायमानत्वेन तत्समुदितेति । तैर्गत्यादिभिः ताभिः समेताभिरित्यादिवर्णितैः पूर्वाचरितैराक्षिप्तचित्ताः । ततश्च तदात्मिकास्तन्मयास्सत्यः प्रमदास्तास्ता बाहुप्रसारेत्यादिभिः पूर्वोक्ताः सर्वा विविधाश्चेष्टा जगृहुः प्राप्ताः । तत्र प्रमदाः यौगिकार्थपुरस्कारेण जातित एव प्रकृष्टमदयुक्ताः । किं पुनस्तत्प्रेमवत्यस्ता इत्यर्थः । रमायाः सर्वरूपगुणमाधुर्यैश्वर्यसंपदधिष्ठातृशक्तेः पत्युरध्यक्षस्य इति सर्वातिशायिता सूचिता । यद्वा—रमा श्रीराधेति पूर्ववत् । इति वक्ष्यमाणं तत्साहित्यं सूचितम् ॥ २ ॥ न केवलमनुकरणेनैवाक्रीडन्, किन्तु ताद्रूप्येणापीत्याह—अपि चेति । प्रियस्य श्रीकृष्णस्य । आविष्टाः तदाकारतां नीताः । यतस्तदाविष्टा अतो हतोः । हे अबलाः असौ कृष्णोऽहमेव । यद्वा—तदात्मिकास्ताद्रूप्यं प्राप्ता अबला इति संबंधः ॥ * ॥ तस्यैवोन्मादस्य प्रौढत्वे सति तासामवस्थामाह—गतीति । प्रियस्य गत्यादिषु पूर्वोक्तेषु प्रतिरूढा मूर्तयो देहा यासां ताः । आदौ प्रियस्य गतिस्मितादय आसां प्रत्येकमूर्तौ चेंद्रियादिमय्यामारूढास्ततस्तेषु गतिस्मितादिषु आसां मूर्तिश्च प्रत्यारूढा इत्यर्थः । ततश्चोन्मादादेकीभावे सति असौ कृष्ण एवाहं किं वाहमेव कृष्ण इत्यादिसावधारणां भावनां विहाय असावहं कृष्णोऽहमिति रसास्वादप्रौढिमयीमवस्थां प्राप्य तदात्मिकाः प्राप्तकृष्णतादात्म्याः, न तु अहंग्रहोपासनावशादेवेति ज्ञेयम् 'प्रियाः प्रियस्य' इत्युक्तेः । न्यवेदिषुः परस्परं निवेदितवत्यः । न तु वयं व्रजस्त्रियो मनागपि का अपि जानन्ति स्मेत्यर्थः । तत्र हेतुः—कृष्णविहारैः स्मर्यमाणैर्विभ्रमो यासां ताः ॥ अत्र **तोषिणी**—तत्र तदात्मिकत्वमेवाभिव्यंजयति—गतीति । प्रियस्य गत्यादिषूक्तेषु, आदिपदाद्विहारविभ्रमौ । उक्तानुवादत्वेन पूर्वोक्ततत्तद्विशेषणानि नोक्तानि । तेषु प्रतिरूढाः सदृशीभूता मूर्तय इन्द्रियादिसंघातात्मकदेहा यासां ताः, इत्यंतर्बहिस्तद्भावापत्तिरुक्ता । अबलाः स्त्रिय इति स्त्रीचेष्टानुकरणमेव युक्तं ध्वनितम् । तथापि तु एवं यत्र युष्माकमुत्कण्ठाऽहमेवासौ तत्तद्विहारनागर इति प्रत्येकं सर्वा मिथो न्यवेदयन्त । कीदृश्यः सत्यः—कृष्णवद्विहारे विभ्रमो विलासो यासां, कृष्णविहारस्य विभ्रमो भ्रांतिर्याभ्यो वा तादृश्यः । तन्मयत्वञ्च प्रेमलीलाभरस्वभावेनैव न त्वहंग्रहोपासनावेशेनेत्याह—प्रियाः प्रियस्येति । प्रियास्तस्मिन्स्वाभाविकप्रेमवत्यः, प्रियस्य स्वस्मिन्स्मर्यमाणतादृशप्रेमकस्येत्यर्थः । लीलाख्यश्चानुभावोऽयम् "प्रियानुकरणं लीला रम्यैर्वेशक्रियादिभिः" इत्युक्तेः । यथा च प्रयोगः—"मुहुरवलोकितमंडनलीला मधुरिपुरहमितिभावनशीला:" इति ॥ ३ ॥ ताद्रूप्यं प्राप्ता अप्यन्यदपि किंचिच्चक्रुरित्याह—किञ्चेति । गायंत्य इति—तं प्रति दूरान्निजार्तिश्रावणार्थम् । यद्वा—गीतप्रियस्य तस्य तेनाकर्षणार्थम् । अमुं श्रीकृष्णमेव न त्वन्यत्किंचिदित्यर्थः । संहताः मिलिताः । सम्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥ नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥

इति । वनाद्वनांतरं गच्छंत्यो विचिक्युरमृगयन् । उन्मत्तस्य तुल्यत्वमाह । वनस्पतीनिति । वनस्पतीन् पप्रच्छुः । भूतेष्वंतरं मध्ये संतं पुरुषं बहिश्च संतमिति ॥ ४ ॥
तत्प्रपंचयति नवभिः । तत्र महत्त्वादेते पश्येयुरित्याशयाश्वत्थादीन्पृच्छंति । दृष्ट इति । प्रेमहासविलसितैरवलोकनैरस्माकं मनो हृत्वा चोर इव गतो वो युष्माभिः किं दृष्ट

म्मार्गणार्थमन्योन्यार्त्युपशमार्थं वा । वनस्पतीन् पुष्पं विना फलधारिणः । सर्वव्यापिनः स्थानप्रश्नोऽत्युन्मत्ततामेवाह "यच्च किंचिज्जगद्वस्तु दृश्यते श्रूयतेऽपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥" इति
श्रुतेः ॥ * ॥ यदा च स तासामुन्मादः स्वप्रौढिमानं विहाय मंदीबभूव तदा ता अर्धबाह्यानुसंधानवत्यो यथा चेष्टन्ते स्म तद्वर्णयति—गायन्त्य इति । कान्तविच्छेदेन दुःखिन्यो वयं व्रजस्त्रियस्तमन्वेषयाम इति बाह्या
नुसंधानम् । संहता मिलिता वनाद्वनं गच्छन्त्यः । उन्मत्तकवत् ईषदुन्मत्ता इव । अल्पार्थे कप्रत्ययः । पुरुषम् श्रीकृष्णम् । वनस्पतीन्पप्रच्छुरित्युन्मादलक्षणम् । ननु सर्वमुख्यया वृंदावनेश्वर्या सह कृष्णस्तदा सुखेन
रमते एवेति जानीमः । किन्तु, तद्विरहोन्मत्तानामासां गोपीनामुन्मादप्रश्नादिकं स जानाति न वेत्यतो विशिनष्टि—भूतेषु सर्वेष्वन्तरं बहिश्चाकाशवद्व्याप्य स्थितम् । तेन कृष्णस्वरूपस्यापारिच्छिन्नत्वेऽपि सर्वगतत्वात्तासां
प्रश्नादिकं तत्रतत्रैवाऽलक्ष्यमाणः शृणोत्येवेति द्योतितम् ॥ अत्र **तोषिणी**—ततश्चिरात्प्राप्तावधानानां तासां पुनरुन्मादाख्यामवस्थां वर्णयति—गायंत्य इति । गानमत्र गोकुले प्रसिद्धं पूतनावधादिमयम् । तच्च 'विषजला
प्ययात्' इत्यादिवक्ष्यमाणरीत्या स्वरक्षणाभिप्रायेण । उच्चैर्गानं तु तं प्रति निजार्तिश्रावणार्थं, किं वा गीतप्रियस्य तस्य तेनाकर्षणार्थं, किं वार्तिभरस्वभावादेव । अमुमेवेति—यद्यपि त्यागेन परमदुःखदोऽसौ तथापि
तमेवेत्यर्थः । 'गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते' इत्यादिवत् । संहताः अन्योन्यं मिलिताः सत्यः सर्वत्र सम्यग्मार्गणार्थं किं वा सख्येनान्योन्यमार्त्युपशमनार्थं किं वार्तिविशेषस्वभावादेव गानान्वेषणयोर्यौग
पद्यमिदम् । गायन्त्य एव भ्रमन्ति मध्येमध्ये तु पृच्छंतीत्यर्थः । वनस्पतीन् प्रति प्रश्ने हेतुः—उन्मत्तकवदिति । स्वार्थे कन् । तेन केशाद्यसंवरणं व्यज्यते । पुरुषम् सर्वांतर्यामिरूपमपि, अत एवाकाशवद्भूतेष्वन्तरं
बहिश्च व्याप्य सन्तमपि पप्रच्छुः । निजप्रेमावलम्बनकेवलनरलीलारूपेणैव तस्य तत्प्रश्नविषयत्वादिति भावः । यद्वा—अहो बत तासामिदं सर्वमरण्यरुदितमेव जातम् ?, नेत्याह—आकाशेति । वक्ष्यते च स्वयम्
'मया परोक्षं भजता' इति । यद्वा--पुरुषं स्वनायकं पप्रच्छुः । तं च भूतेषु स्थावरजंगमेष्वाकाशवदंतरं बहिश्च सन्तं साक्षादिव सत्तया स्फुरन्तं पप्रच्छुः । तादृशज्ञानस्फूर्तिश्च तासां प्रेमविवर्तविशेषादेव । वनलता
स्तरव आत्मनि 'व्यंजयंत इव पुष्पफलाढ्याः' इतिवत् । तत्र बहिः स्फुरंन्तं दूरतः, अन्तस्तु निकटात् । तत्र च सत्युन्मादे नैवातींद्रियेष्वपि वनस्पतिजातिषु प्रश्नो योग्य इति भावः ॥ ४ ॥
तत् प्रश्नवृत्तम् । तत्र वनस्पतिषु । एतेऽश्वत्थादयो महत्त्वादच्युतत्वाद्दूरदर्शिन इति । यद्वा--विष्णुब्रह्मरुद्राणां क्रमेणाधिष्ठानान्येतेऽतोऽपि महांत इति । अश्वत्थमुद्दिश्याहुः--न मया दृष्ट इति चलद्दलतया
तच्चेष्टिताध्यवसानात्, श्वोऽपि न स्थास्यतीति निर्वेदाच्च । युक्तमुक्तम्, अक्षिरहितेनानेन कथं दृश्य इति परस्परमक्षिमंतमुद्दिश्याहुः--प्लक्षेति । प्रकृष्टे अक्षिणी यस्येत्यकारस्य पूर्वरूपत्वं शकंध्वादित्वात् । रलयो
रैक्याच्च सिद्धम् । अथ पश्यन्नपि वागिंद्रियाऽभावाद्वक्तुं न शक्नोत्यतस्तद्वृतं वटमध्यवस्याहुः—नवपल्लवान्यस्य जिह्वातुल्यानीति ज्ञेयम् । मनसो रत्नत्वम् । हृत्वेति—न चोरं युष्मान्साधून् पृच्छामेति ॥ * ॥
प्रश्नं प्रपञ्चयति नवभिः । अत्रात्युच्चतरत्वादेते दूरवर्तिनमपि तमवश्यं पश्येयुरिति संभाव्य पृच्छांति—दृष्ट इति । प्लक्षः पीलुखल्विति ख्यातः । न्यग्रोधो वटः । किमर्थं पृच्छतेति तेषामपि प्रश्नमाशंक्याहुः—नंदस्य साधोस्सूनु
रपि नोऽस्माकं स्त्रीजनानां मनो हृत्वा गतः । प्रेम्णा सर्वलोकोन्मादकमहामोहनौषधविशेषेण सहितैर्हासावलोकनैः प्रेषितैश्चोरैरस्माकं नेत्रद्वारतोंतःकरणमंतःपुरं प्रवेशितैर्मनोरत्नं चोरयित्वा पलायित इत्यर्थः । क्षणं स्थित्वा
अहो किमेताभिः क्षुद्राभिरित्यस्मानवजानंतेऽमी, प्रत्युत्तरं न ददते तदलमेतैः क्षुद्रफलैः परोपकारधर्मानभिज्ञैरप्रफुल्लैरशुद्धान्तःकरणैरिति तान्विहायान्यत्र गताः ॥ अत्र **तोषिणी**—वः युष्माभिः । प्रत्येकं संबोधनं श्रीकृष्ण
प्रियत्वेनादरात् । ननु किमर्थमसौ युष्माभिः पृच्छ्यते, तत्राहुः--नो मनो हृत्वा गत इति । हृत्वेति मनसो रत्नत्वं व्यज्यत । अतो नष्टोद्देशित्वेनागतास्तं चौरं साधून् युष्मान्पृच्छाम इति भावः । नंदसूनुरिति स्वविश्वासहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कच्चित्कुरबकाशोकनागपुन्नागचंपकाः ॥ रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥
कच्चित्तुलसि कल्याणि गोविंदचरणप्रिये ॥ सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥

इति ॥ ५ ॥ महांतः स्वपुष्पैर्बहूपकारिणश्चेति करबकादीन्पृच्छंति । कच्चिदिति । हे करबकादयः दर्पहरं स्मितं यस्य सः इतो गतः कच्चिद्दृष्ट इति ॥ ६ ॥ अलिकुलैः

तूपन्यासस्तथापीत्यर्थः । नंदेति । यौगिकवृत्त्या तस्य प्रत्युत सर्वत्रजानंदहेतुत्वमेव युज्यत इति भावः । अत एव दुःखेन साक्षात्तन्नामोक्तिरपि । साक्षाच्छ्रीकृष्णनामाऽनुक्तिस्त्वीर्ष्यापि । अपिशब्दोच्चारस्य नाम्नोऽग्राह्यत्वेन ' सूचकस्यापि तद्भवेत् ' इत्युक्तेः । कच्चित् प्रश्ने । भवद्भिर्दृष्टे सति चास्यामेव दिशि विहरतीति समाश्वासमासाद्यान्वेषयाम इति भावः ॥ ९ ॥ कौ रवो यस्य स तथाऽनेनायं शब्दवान्वदिष्यतीत्याहुः--हे कुरबकेति । अन्या ऊचुः—अयं कु ईषद्रवो भ्रमराणां यत्रेति भ्रमरा अप्यत्र नो यान्ति । यद्वा—कुशब्दत्वाच्छोकवृद्धिकरोऽतोऽशोकं शोकनाशकं पृच्छत । नायं वक्तुं क्षमः, नाम त्वस्य जन्मशीलवर्करस्याज इव ज्ञेयम् । नागः नागकेसरः। केसरोपलक्षितपक्ष्मवत्त्वादयं सचक्षुरनेनावश्यं दृष्टः । अन्या ऊचुः—अयमस्मादपि तुंगः पुन्नागो दूरदर्शी वदिष्यत्ययम् । तदितरा ऊचुः—हसत्ययं पुष्पव्याजेन दृष्टोऽनेन युष्मच्चोर इति । रामो यथा मत्तस्तथा सोपी त्याह—रामानुज इति । मानिनीनां वयोरूपादिभिर्जातमानानामस्माकं तदैवाकस्मिकपवनेन चालिताग्रशाखांस्तानालक्ष्याहुः—अहो शिरोधूननेन वयं न जानीम इति ब्रुवत एते ॥ * ॥ पुष्पोद्यानं प्रविश्याहो सत्यमिमे एव शुद्धान्तःकरणाः प्रष्टव्याः । यदहो स्वमकरन्दैर्मधुव्रातानतिथीन्सेवन्त इति वृक्षनामान्याहुः—कच्चिदिति । कुरबकः शोणाम्लानः । नागो नागकेशरः । कच्चिद्गतः किं वा कच्चिदिहैव निह्नुत्य स्थितो वेति भावः । ननु किमर्थं पृच्छथेत्याशंक्याहुः—मानिनीनां मानधनानामस्माकं दर्पं मानं हरति स्मितं यस्येति । वयं निर्धनीकृता एवाभूमेति भावः । तदैवाकस्मिकेन पवनेन चालिताग्रशाखांस्तानालक्ष्याहो अहो शिरोधूननेन वयं न जानीम इति ब्रुवते, तदलममीभिः पुरुषजातिभिरित्यन्यतो जग्मुः ॥ अत्र **तोषिणी**—महत्तमत्वादतऽस्मान् क्षुद्राः प्रत्यवज्ञया नूनं न कथयेयुरिति मत्वान्यान्पृच्छंति—कच्चिदिति । कुरबकः शोणाम्लानः । नागो नागकेशरः । किमितो गतो यद्वात्रान्तर्हितो वर्तते पूर्वं दृष्ट इति पृष्टम् । [illegible]धुना [illegible]वित इति दूरताऽपि दर्शनं संभवेत् । तथापि न सुलभः स्यादिति निकटगतस्य सतोऽत्रैव तत्पदान्विष्य तैश्चैतमन्वेषयाम इति भावः । गत इति च पाठो बहुत्र तन्मते टीकायामित इत्यध्याहृत्य व्याख्यातम् । रामानुज इति नंदसूनुरितिवत् । ननु मानिनीनां युष्माकं कथं तेन मनो हृतं तत्राहुः—मानिनीनामिति । तासां दर्पहरं स्मितमपि यस्य तादृशोऽपीति तस्या विमृश्यकारित्वञ्च ध्वनितम् । दर्पो गर्वः । तदानीमेव तत्कृतेन कपटस्मितेन मानमयगर्वो हृतः । अत एवान्वेषयाम इति तथा तादृशमहामोहनस्य विच्छेदेन क्षणमपि जीवितुं न शक्नुम इत्यतः पृच्छाम इति भावः ॥ ॥ ६ ॥ हे सख्यः इयमस्यातिप्रिया तुलसी, तदेनां मिलित्वैवाग्रे गतोऽत इयं प्रष्टव्येति प्राहुः—तुलं तौल्यं स्यति दूरीकरोतीति तुलसी । यया तुल्याऽन्या नेति भावः । स्यतेरौणादिको डट् कल्यः । दर्शस्पर्शादि नैव सर्वकल्याणकरी त्वमसिं, तत्र हेतुः—गोविंदचरणप्रियेति । यथाऽन्योऽपि गोविंदप्रियो दर्शनादिना लोकं पुनाति " मद्भक्तदर्शनात्स्पर्शादर्चनाद्वंदनादपि । महापातकयुक्तोऽपि भवेत्कल्याणभाजनम् ॥ " इत्यादिपुराणात् । अच्युत इति । वस्तुतस्तस्य स्त्रीषु रागाभावमाहेति ॥ * ॥ एता अस्मत्पक्षग्राहिण्यः स्त्रीजातयः स्त्रीजनहृच्छयपीडाविदुष्यः कृपावत्यो भविष्यंति, तदिमाः पृच्छाम इत्यासाद्य तन्मध्ये परममुख्यतमां तुलसीं पप्रच्छुः—कच्चिदिति । हे कल्याणीति । वयमकल्याण्यः कृष्णविच्छेदात्, त्वमेव कुशलिनी, तत्र हेतुः—गोविन्देति । यद्वा—चरणशब्दोऽत्रादरमात्रव्यंजकः आर्यचरणा वदन्तीतिवत् । ननु यूयमपि तच्चरणप्रिया भवथैव, सत्यम्, तदपि साद्गुण्याधिक्यात्त्वमेव सौभाग्यवती विच्छेदाभावादित्याहुः—त्वा त्वां बिभ्रदेव गतः, तत्र तव सौरभ्याधिक्यमेव कारणमिति व्यंजयामासुः । अलिकुलैः सहेति—परःसहस्रभ्रमरकृतोद्वेगमप्यगणयित्वा । त्वां बिभ्रदिति—सुगंधप्रियेण तेनास्माकमग्रहणमेतादृशसौरभ्यभाववत्त्वाभावादेवेति निश्चिनुम इति भावः ॥ अत्र **तोषिणी**—एते पुरुषजातित्वेन प्रायः कृष्णपक्षग्राहिणोऽस्माकं मानं विज्ञायासूयया न किल कथयेयुरिति स्त्रीजातित्वेनात्मपक्षग्राहिणीं मन्यमानाः शश्वद्दृष्टतत्प्रीत्यनुमितसौभाग्यविशेषेण च तस्याः श्रीकृष्णदर्शनं संभाव्य श्रीतुलसीं पृच्छंति—कच्चिदिति । कल्याणि हे जगन्मंगलकारिणि परमसौभाग्यवतीति वा । अत्र हेतुः—गोवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मालत्यदर्शि वः कच्चिन्मल्लिके जाति यूथिके ॥ प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ॥ ८ ॥ चूतप्रियालपनसाऽसनकोविदारजंब्वर्कबिल्वबकुला म्रकदंबनीपाः ॥ येऽन्ये परार्थभवका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ॥ ९ ॥

सह त्वा त्वां विभ्रत्तवातिप्रियस्त्वया किं दृष्टः इति ॥ ७ ॥ गुणातिरेकेऽपि नम्रत्वादिमाः पश्येयुरिति पृच्छंति । मालतीति । हे मालति मल्लिके जातियूथिके वो युष्माभिः किमदर्शि दृष्टः । करस्पर्शेन वः प्रीतिं जनयन् किं यात इति । अत्र मालतीजात्योरवांतरविशेषो द्रष्टव्यः ॥ ८ ॥ फलादिभिः सर्वप्राणिनां संतर्पका एते पश्येयुरिति

न्देति । गोविन्दो गोकुलेंद्रस्तच्चरणप्रिया त्वम् ‘ श्रीर्यत्पदांबुजरजः ’ इत्यादिवत् । यद्वा—चरणपदमिहादरमात्रव्यंजकम् । आचार्यचरणा वदन्तीतिवत् । आदरश्चाधुना दैन्येन हे गोकुलेन्द्रप्रिये इत्यर्थः । इति तस्याऽऽगमनावश्यकत्वं विवक्षितम् । तत्प्रियत्वे हेतुः—सहेति । न च तत्र तवानवधानं संभवेत्, यतस्तेऽतिप्रिय इति । श्लेषेणातिक्रांतः प्रियानस्मद्विधानित्यपि ध्वनितम् । अलिकुलैः सहेति तस्याः साद्गुण्यं दर्शितम्, अलीनामप्यनिवार्यत्वसूचनात् । यद्वा—अतिप्रियत्वमेव विवृतं, तत्प्रियत्वेनैव ते शिलीमुखा अपि न निवार्यन्त इति सूचनात् । तथा मत्तानां तेषाम् झंकारेण निह्नवाऽसंभवत्वं च सूचितम् । अतोऽवश्यं त्वदंतिकमागतस्त्वया दृष्ट इति भावः । अच्युत इति श्लेषेण कदापि त्वत्तो न विच्युतो भविष्यतीति तदेव दृढीकृतम् ॥ ७ ॥ रूपधनविद्यावत्त्वे ये नम्रास्त एव भगवद्दर्शका नान्ये “ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः । यद्यस्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः ॥” इत्युक्तेरासु गुणातिरेकेऽपीति । माया राधाया रतिरस्यामिति मालती । रलयोरैक्यात् । बह्वादित्वान्ङीष् । अनेन तत्प्रियत्वात्तस्यापि प्रियैवेयम् । मल्लः सर्वपुष्पाधिको गंधोऽस्या अस्तीति मल्लिका “ मल्लः पात्रे कपाले च मत्स्यभेदे बलीयसि ” इति मेदिनी । सर्वोत्कृष्टगंधवतीयमपि तस्य प्रिया । जातिवत्सर्वप्रियत्वादियं जातीत्युच्यते । नायं क्तिन्नंतः किन्तु जातस्य जातमात्रस्येयं प्रिया जाती इदमर्थकाण्णतान्ङीप्, तत्संबुद्धौ । तथा ‘ जाती फले च मालत्याम् ’ इति मेदिनी । यूथं पुष्पसमूहरूपं गुच्छमस्या अस्तीति यूथिका शतपत्रिका इति विजयध्वजः । प्रियार्थमस्याः पुष्पगुच्छं ग्रहीतुं प्रवृत्तोऽनयाऽवश्यं दृष्ट इति । मा परमरमा तस्या धवः कांतः माधवो वसंत इव प्रकाशकः दासीषु पुष्पिणीषु करस्पर्शेन नखक्षतादिसूचनेन सेर्ष्यं नर्म चेति सूचितम् ॥ ॥ * ॥ अहो सौभाग्यगर्वेणोन्मत्तेयमस्मान्न पश्यति, तदेतादृशसौभाग्यरहिता एतत्सपत्नीर्मादृशीरिमाः पृच्छाम इत्यन्यतो गत्वाहुः—मालतीति । युष्मत्पुष्पावचयनार्थं यत्करेण स्पर्शस्तेन । वर्षाशरदतिप्रफुल्लत्वालिंगेन मालतीजात्योरेवाऽवांतरभेदो द्रष्टव्यः ॥ अत्र **तोषिणी**—तथापि तदाद्रियमाणत्वाभिमानादियं खलु न कथयेदिति नम्रीभूय पुष्पाऽर्पणेन नूनं श्रीकृष्णसेविका अपि निरभिमाना एता एव पृच्छन्ति—मालतीति । वैय्यग्र्येण प्रत्येकं संबोधनम् । अतः किमिति तैर्व्याख्यातम् । तत्र किमिति कच्चिदित्यस्यैवानुवर्तमानस्यार्थः । दर्शनं तावज्जातमेव तत्र स्पर्शोऽपि किं जात इति विशेषमेव पृच्छाम इति भावः । यद्वा—तासां तद्दर्शनं संभावयंति—प्रीतिमिति । करस्पर्शचिह्नदर्शनादिति भावः । तत्र हेतुश्च—पुष्पप्रियत्वान्माधवो वसंत इव माधव इति । करस्पर्शेनेति—युष्मत्पुष्पाणामुत्कृष्टानां श्रीहस्तद्वारावचयेनेत्यर्थः । यात इति—समानदुःखत्वेनास्मभ्यं तत्कथयितुं योग्यमेव चेति भावः । अतः दासीषु पुष्पिणीष्वपि नखक्षतादिसूचनेन सेर्ष्यं नर्म चाभिप्रेतम् ॥ ८ ॥ चूताम्रयोरम्लमधुरगुणभेदादवांतरजातिः, अम्लाम्रजातिर्मधुराम्रजातिश्च । नीपोऽल्पपुष्पः, कदंबो बहुपुष्पश्चेति । प्रियालो राजादनः । पनसः कंटकिफलः । असनः पीतसारः । कोविदारः काञ्चनारकः । जंबूः कृष्णफला स्निग्धपत्रा । अर्कः प्रसिद्धः, बिल्वोऽपि । बकुलो ‘ मौलसरी ’ इति प्रसिद्धः । इत्यर्थ इति—तीर्थसेवारूपतपोबलेन परतापनिवारणसमर्था इति भावः । रहितो विरहेण हत आत्मा ज्ञानं येषां गोपीजनानां तेषाम्, रहित आत्मा कृष्णो येषां श्रीकृष्णत्यक्तानामिति वाऽर्थः । एवंभूतमपुष्पफलरहितोऽप्यर्कः शिवप्रियत्वादुक्तः । यद्वा—श्रीवृंदावनीयत्वेन त्वमेव कथयसि चेत्तर्हि त्वामेव सर्वोपरितनत्वेन स्थापयाम इति । चूताम्रनीपकदंबानां पुनरुक्तिस्तु चेतोऽनवस्थानाद्वा बोध्या ॥ * ॥ अहो एताः स्वसपत्न्यास्तुलस्यास्तस्मात्कृष्णाच्च भीत्या जानत्योऽपि न ब्रुवते, तदलमेताभिः परतंत्राभिरित्यन्यतो गत्वा—सत्यमिमे एव यमुनातीर्थवर्तिनो निस्पन्दत्वेनैवानुमीयमानाविष्णुस्मरणमग्ना भवंत्यतो न मृषा वदिष्यन्तीति विश्वस्याहुः—चूतेति । चूताम्रयोर्लतावृक्षजातित्वेन भेदः । नीपो धूलिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि ॥ अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन ॥ १० ॥

पृच्छंति । चूतेति । चूताम्रयोरवांतरजातिभेदः कदंबनीपयोश्च । हे चूतादयः येऽन्ये च परार्थभवकाः परार्थमेव भवो जन्म येषां ते । यमुनोपकूलास्तस्याः कूलसमीपे वर्तमानाः । तीर्थवासिन इत्यर्थः । ते भवंतो रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णस्य मार्गं शंसंतु कथयंतु ॥ ९ ॥ हे क्षिति क्षिते त्वया किं तपः सुकृतं कृतं या त्वं केशवांघ्रिस्पर्शोत्सवा केशवस्यांघ्रिस्पर्शेनोत्सवो यस्याः सा । कुतः । अंगरुहैरुत्पुलकिता रोमांचिता विभासि शोभसे । तत्र विशेषं पृच्छंति । अपि किमयमुत्सवोंघ्रिसंभवोऽ

दम्बो बृहत्पुष्पः । कदंबः क्षुद्रपुष्पोऽतिसुगंधः । प्रियालः शालभेदः । असनः पीतशालः । कोविदारः काञ्चनारभेदः । अर्को निकृष्टोपि गोपीश्वरप्रियत्वात् तदा समीपे सदा वर्तमानः । अन्ये नारिकेलगुवाकादयः । ते भवन्तः आत्मशून्यानां नः कृष्णमार्गं कथयन्तु । ननु कस्मै प्रयोजनाय कथयामस्तत्राहुः—परार्थमेव भैविकमभ्युदयो येषां ते । यमुना उपकूले येषां ते इति गङ्वादिः ॥ अत्र **तोषिणी**—श्रीकृष्णदास्य एताः शंकया बत तं न कथयेयुरिति मुनिप्रायत्वेनाप्तानन्यापृच्छंति—चूतेति । चूतो लताजातिः, आम्रो वृक्षजातिः । पूर्वत्रैव, न त्वाम्रे कविभिर्लतात्वं प्रयुज्यते मध्यदेशादौ लताकाराश्च ते दृश्यंते इति । 'नीपो धूलिकदम्बे स्यात्' इति विश्वप्रकाशात्परागप्रधानो महापुष्पोऽसौ ज्ञेयः । प्रियालः अस्यैव बीजं चारुबीजतया 'चिरौंजी' इत्याख्यातं भुज्यते । पनसः कण्टकिफलः । असनः पीतसालः । कोविदारो युगपत्रकः । 'कोयिलाष' इति विंध्याद्रौ प्रसिद्धः, कांचनारतुल्यः कांचनारभेदोऽयम् । अर्कोपि निकृष्टोऽपि पृष्ट इति तासामुत्कंठातिशयः स्पष्टीकृतः । ननु युष्मान्प्रति तत्कथनेन किमस्मत्प्रयोजनं, तत्राहुः—परेति । अत्र श्रीस्वामिपादमते भवका इति इकाररहितः पाठः । भवो जन्मेति व्याख्यानात् । बहुव्रीहौ कः । इकारयुक्तपाठस्तु सर्वत्र दृश्यते । ततश्च भविकं मंगलमभ्युदय इत्यर्थः । तथाप्यर्थः स एव । तथापि यमुनोपकूला इति तीर्थवासित्वेन सत्यवादित्वात्कृपालुत्वाच्च सत्यमेव शंसनीयम् । न तु वञ्चनीयमिति भावः । उप समीपे कूलं येषां ते उपकूलाः, यमुनाया उपकूला यमुनोपकूला इति तु विग्रहः । ननु स्वयमेव युष्माभिरन्विष्य गृह्यतामित्याशंक्य निजार्तिज्ञापनेन कृपां जनयंत्यः सकातर्यमाहुः—रहितात्मनाम्, विरहहतज्ञानानामित्यर्थः । अतो मृतप्रायाः स्वयमन्वेष्टुं न शक्नुम इति भावः । पूर्वं सर्वेषु प्रायो दर्शनं पृष्टम्, एषु तु पूर्वपूर्वेषु प्रत्युत्तराऽलाभेन चातुर्यान्निश्चित्यैव केवलं तद्वर्त्मोद्देशप्रार्थनम् ॥ ९ ॥ निजार्तिविज्ञापनाय विवशतया भूमौ निपत्योचुः—हे क्षितीति । गुणाभाव आर्षः । उत्सवः कथं ज्ञात इत्याशंकते—कुत इति । अंगरुहैः रोमभिः । तत्र उत्सवे । एकदेशे श्रीकृष्णांघ्रिस्पर्शेणोद्भूतः । अथ वार्थको यद्वेति द्वितीयो विकल्पः । आहोस्विदित्यर्थे तृतीयो विकल्पः । यद्वा—वरमाहवं सुरतसंग्रामं पुष्णातीति तस्मान्नंदकिशोरादेवेति । इह केशवेति प्रशस्तकेशं श्रीकृष्णमेव वक्ति गोपीनामर्थांतरस्यानभीष्टत्वादिति विजयध्वजः ॥ * ॥ अहो किमेते विष्णुसमाविमत्त्वादस्मत्प्रश्नं न शृण्वन्ति, किं वा तीर्थवासिनोऽप्यमी कठोरा एव, यतः किमपि न प्रतिवदन्ति, हंहो के जानंति के वा तं न जानन्तीत्यनिश्चितत्वात्तीर्थवासिनोऽमी कथं वृथा निन्द्यन्ते यो जनस्तमपश्यज्ज्ञानाम्येवेति निश्चिततत्त्वो भवति स पृच्छ्यतामिति कयाचिदुक्ते, प्रियसखि स एव जनः खलु कस्तं किं त्वं जानासीति सर्वाभिः पृष्टा सा तर्जन्या भूमिं दर्शयामास । ततश्च सत्यमेव त्वं ब्रूषे यत्र तत्र स वर्तते सा पृथिव्येवेति पृथिव्या अस्यास्तद्विच्छेदो नास्तीति कृष्णस्य पितृवर्गसखिवर्गप्रेयसीवर्गदासवर्गेभ्यो विरहदुःखाऽनभिज्ञत्वात्पृथिव्येव धन्येत्यतोऽस्याः पूर्वपूर्वेष्विव प्रश्नो न घटते, किं त्वस्याः प्राचीनं तप एव जिज्ञास्यं, यत्कृत्वा कृष्णविरहात्यंताभाववत्यो वयमपि भवाम इति विमृश्य पृच्छंति—किमिति । हे क्षिति क्षिते त्वया किं तपः कृतम्, यतस्त्वं केशवस्यांघ्रिस्पर्शने उत्सवो यस्याः सा त्वं विभासि । यतोंगरुहैस्तृणांकुरैरुद्गच्छद्भिरुत्पुलकिता उत्कृष्टपुलकयुक्ता यत्र तत्र स वर्तते तत्रैव त्वामंघ्रिभ्यां स्पृष्ट्वैव तिष्ठतीति कृष्णांगसंगसुखं तव रात्रिंदिवं व्याप्यैव यतोभूत्तत्तपो

१ 'परार्थभविकाः' इति पाठाऽभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः ॥ कांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः कुलपतेरिह वाति गंधः॥११॥

धुना तवैकदेशांघ्रिस्पर्शसंभवः । यद्वा नैतावत्किं तु उरुक्रमविक्रमात्पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् । अहो अथ वा नैतावदेवापि तु ततोऽपि पूर्वं वराहस्य वपुषः परिरंभणेनेति अतस्त्वया नूनं दृष्टस्तं दर्शयेति ॥ १० ॥ हरिण्या दृष्टिप्रत्यासत्त्या कृष्णदर्शनं संभाव्याहुः । अपीति । हे सखि एणपत्नि अपि किमुपगतः समीपं प्राप्तः ।

वक्तुमर्हसि । वयं विरहिण्यो दुर्भगास्तच्छ्रुत्वापि कृतार्थीभवाम इति भावः । तदब्रुवाणां तामभिलक्ष्य पुरावृत्तस्मरणात्स्वयमेवाभ्यूहंति—अपीति । उरुक्रमस्य त्रिविक्रमदेवस्य विक्रमात् योंघ्रिसंभवोंघ्रिप्राप्तिः 'भू—प्राप्तौ' संपूर्वः । तत्र तदीयमहामहाभारसहनलक्षणं यत्तपस्तदेव किमित्यर्थः । वै इति निश्चये, पादपूरणे वा । आहोस्वित् महावपुषः परिरंभणेन तदीयदृढपरिरंभोत्थपीडाप्राप्तिलक्षणं यत्तपस्तदेव किमित्यर्थः । अन्याभिर्दुर्लभं तवैतदुत्सवप्राप्तिसाधनं यत्तपस्तदपि स्त्रियास्तव पुरुषसंगलक्षणत्वात्सुखमयमेवेति नास्ति त्वत्तोन्या धन्येति भावः ॥ अत्र **तोषिणी**—एवं पदवीप्रार्थनेन पदवीस्मरणाद्भूमौ दृष्टिं निधाय तस्याः सर्वव्यापकत्वेनावश्यं तद्दर्शनं संभाव्य तस्याः स्निग्धदूर्वांकुराद्युद्गमं पुलकजातं मत्वा तच्च श्रीकृष्णपादाब्जस्य स्पर्शोत्सवेनैव संभाव्य तस्य सर्वोत्कृष्टतां सूचयंत्यस्तस्याः सौभाग्यमधिकं वर्णयन्ति—किन्त इति । तपोऽत्र पुण्यजनकं कर्म । अपीति—अंघ्रिसंभवोऽयमुत्सवः । अपि किम् "त्रेधा विष्णुर्विचक्रमे" इति श्रुतिवर्णितस्य त्रिविक्रमस्य लोकत्रयोपक्रमणार्थं प्रकटितैश्वर्यस्य श्रीविष्णोश्चरणविक्षेपेण सर्वाक्रमणाद्बभूव ? अपि तु नैव, तदानीमीदृशोत्सवशोभाविशेषासम्पत्तेः । अहो न भवतु वा पादस्पर्शमात्रात्तदुद्धारार्थं प्रकटितमहावराहमूर्तेर्भगवतः साक्षात्संभोगेऽपि न सिद्ध इत्याहुः—आहो इति । यद्वा—तप एव विकल्पयंति—केशवांघ्रिस्पर्शसंभव उत्सवस्त्रिविक्रमपादस्पर्शात्कारणात्किं वा वराहमूर्तिपरिरंभणेन कारणेन बभूव । तत्कथ्यतामिति शेषः । श्रीकृष्णस्य तंतमतिक्रम्य माहात्म्यविशेषः सूचितः । अतस्त्वद्विरहं कथं सहेमहीति । किं वा—त्वं परमसुभगा वयञ्च तद्रहिता दुर्भगा एवेति कृपया तत्पदवीं सम्यग्दर्शयेति भावः ॥ १० ॥ एणपत्नि मृगजाये कांताया अंग उरोवयवे संगो ययोस्तौ कुचौ तयोः कुंकुमेन रंजिताया अरुणीभूतायाः । यद्वा—कांतस्य हरेरंगसंगो यस्यास्तस्याः कुचौ तयोः कुंकुमेति पूर्ववत् । कांतायाः कमनीयाया वेति । कुलपतिर्गोपीसमूहनाथस्तस्य । गंधोऽस्यास्तीति गंधो गंधवान्वायुः । मत्वर्थीयोऽच् । गंध इह वाति स्वयं च न दृश्यते तत्सद्भावो विज्ञायत इति व्यंग्यालंकारोक्तिः ॥ * ॥ ततश्चाहो हंत तेन स्वकान्तेन ध्वजवज्रांकुशादिभिश्चिह्नैर्विचित्रितांगी विहरंती स्वाधीनभर्तृका महागर्वान्धा कथमस्मांस्तमेवाचक्षीतेत्यग्रतो गत्वा कामपि हरिणीमालक्ष्याहुः—अपीति । हे सखि एणपत्नि प्रियया त्वया किमुपगतः स्वसमीपे स प्राप्तः, संबोधनपदसाहचर्यादेवात्र त्वयेति लभ्यते । एणस्य पत्नी भवंत्यपि त्वमस्मत्तुल्या तस्यैव प्रिया तमेव प्रियं मन्यसे इति भावः । यतो गात्रैर्मुखबाह्वादिभिर्वो दृशां सुनिर्वृतिमत्यानंदं तन्वन् सन् इति । दृशामित्यादरे बहुत्वम् । अच्युत इति । स्वदृगानंदलाभात्त्वया तदनुगमनादेव हेतोस्त्वत्तः स न विच्युत इति भावः । ततश्चाग्रतः स्वभावादेव गच्छन्तीं तामालक्ष्य हंहो स दृष्ट इति किं ब्रवीमि तं वो दर्शयाम्येव मदनुपदमागच्छतेति ब्रुवाणेवाग्रत इयं गच्छंती ग्रीवां परावृत्य मुहुरस्मान्पश्यति, तदियमेवात्र निर्दये वृंदावने दयावतीति तदनु गच्छंत्यो दैवात्क्वापि गतां तामदृष्ट्वा हंहो कृष्णं दर्शयिष्यन्ती हरिणी किं न दृश्यते इति पृष्टाः काश्चिदाहुः । तर्हि कृष्णोऽत्रैव क्वापि वर्तते हरिणी तु कृष्णाद्बिभ्यती स्वीयसूचकत्वदोषापलापार्थं क्वापि निह्नुताऽभूदिति वितर्कयन्त्यो दैवादायातं सौरभ्यमनुभूयाहो सत्यंसत्यमेतदेव तत्त्वमिति सहर्षं मुहुराहुः—कान्ताया अंगसंगतस्तत्कुचकुंकुमेन रंजितायाः कुंदस्रजो गंधो वाति आगच्छतेति । अत्र कांतयागात्रद्वयस्य च कुचयोश्च कुंकुमस्य कुन्दस्य च गंधस्तासां नासाभ्यामेव निश्चीयते स्मेति भावः । कुलपतेर्गोपीकुलरमणस्येति कुलपतित्वनिष्ठां परित्यज्य संप्रत्येकया कयाचित्कांतया रममाणस्य तस्यान्यायं पश्यतेति भावः ॥ अत्र **तोषिणी**—अथात्रेति विचार्यते—कामप्यादाय श्रीभगवानन्तर्हित इति व्यक्तीभविष्यदपि पूर्वं यन्मुनीन्द्रः स्वयं न स्फुटमुक्तवांस्तस्यायमभिप्रायः—सत्स्वपि नानाभगवदाविर्भावेषु मम स्वयं भगवति श्रीकृष्णाद्य एव तस्मिन्नाग्रहविशेष इति, तथा सत्स्वपि नानातत्तत्परिकरेषु श्रीव्रजवासिष्वेव स इति, तथा सत्स्वपि तेषु श्रीव्रजदेवीष्वेव ततोप्यधिकतरः स इति रहस्यं सर्वेपि ज्ञातवन्त एव किन्तु तास्वपि सतीषु श्रीराधिकायामेवाधिकतमः स इति न ज्ञातवंतः, तदेतन्मदाग्रहतारतम्यं च तत्तदुत्कर्षतारतम्यादेव, अस्याः परमरहस्यायास्तदेतत्तु साक्षाज्ज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधैः ॥ अन्वीयमान इह वस्तरवः प्रणामं किं वाऽभिनंदति चरन्प्रणयावलोकैः ॥१२॥

गात्रैः सुंदरैर्मुखबाह्वादिभिः । प्रियया सहेति यदुक्तं तत्र द्योतकम् । कांताया अंगसंगस्तेन तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः श्रीकृष्णस्य वात्यागच्छति ॥ ११ ॥ फलभारेण नतांस्तरूंन्कृष्णं दृष्ट्वा प्रणता इति मत्वा प्रियया सह तस्य गतिविलासं संभावयंत्यः पृच्छंति । बाहुमिति । तुलसिकाया अलिकुलैरतस्तदामोद

पयितुं संकुचति मच्चित्तं ज्ञानखलताभिया विज्ञापयितुमपीच्छति तस्मादस्याः सखीनां वचनात्तत्राप्रतीतौ च प्रतिपक्षाणामपि वचनाद्व्यंजनयैव वृत्त्या यथावसरं मध्येमध्ये प्रकटयिष्यामः । यदि च जातु स्वयमप्यावेशवशात्प्रकटयिष्यामस्तदा नाम तु तस्याः साक्षान्न वक्ष्यामः । एतस्यास्तत्पुनरास्तामन्यासामपि न, किञ्च व्यंजनावृत्तिरेव सैवत्र नानारसप्रकाशिनी, न तु मुख्या । सा च यदि प्रसंगेऽवधारिते विशेषव्यंजनार्थमभ्युदयते तदातीव चमत्कारिणी स्यादिति तदेतदाभिप्रेत्य प्रथमं सखीद्वारेदं ज्ञापयति । यदा तामादाय भगवानंतर्हितस्तदा तस्याः सख्यस्तु संशयाना एवासन् । किन्तु, केवलवल्लानुज्ञान्वेषणपराभिस्ताभिः सहचारित्वेऽपि किञ्चिदुन्मादधारित्वेऽपि तन्मिथुनान्वेषणव्यग्रतया पृथगवस्थितस्वयूथतया तदवधानदूरस्फुरदीहाः सख्यः पर्यटितवत्यो वक्ष्यमाणं तत्पादचिह्नदर्शनं विनाऽपि क्वचित्किञ्चिदुपलब्धवत्यश्च । तथाहि तासां वाक्यम्—अप्येणपत्नीति । अत्राऽखंडस्य वाक्यस्य निखिलपदानामप्यनुमोदनव्यंजक एवार्थः प्रतिपाद्यते । ततः सख्यमेवासां तन्मिथुनमनुलक्ष्यते, तद्दर्शनोत्कंठा च तत्र वाक्यार्थः । अपीति संभावनायाम् । तदिदं संभावयाम इत्यर्थः । अथ वाऽपीति प्रश्ने । तदेतत्पृच्छाम इत्यर्थः । किम् ? तत्राहुः—हे सखि अच्युतो वो युष्माकमुपगतः समीपं प्राप्तः ? । ननु वनविहारिणस्तस्य वन्यानामस्माकं समीपप्राप्तौ किमाश्चर्यम् ? तत्राहुः—प्रियया सहेति । ननु (तु) तत्खल्वाश्चर्यमेव किन्तु यत्र तस्य दर्शनं तत्र तस्याः सहयोगेन किमाश्चर्यमधिकं सुखं नाम तत्राहुः—तयैव गात्रैस्तादृशानंदव्यंजकनानानुभावविचित्रैरंगैर्वो युष्माकं भवत्या भवत्संबंधिनीनां च दृशां सुनिर्वृतिं केवलस्य तस्य दर्शनादपि तत्साहित्यदर्शनेन परमानंदं तन्वन् विस्तारयन्निति । तदिदञ्च नास्मासु गोपयितुमर्हसि, वयं हि तदंतरंगधर्मविदस्सहचर्यः तद्गंधवातमात्रेणापि तदीयं सर्वं ज्ञातुं शक्नुम इत्याहुः—कान्तांगेति । प्रथमं तावत्कुलपतेस्तस्य, तत्र कान्तायास्तस्याः, तत्र तदंगसङ्गस्य, तत्र तत्कुचसंगिकुंकुमस्य, तत्र च तल्लितकुंदस्रजः स एव गंधः स्फुटमत्रायाति । स चाभ्यस्तत्वादस्माभिरुपलभ्यत इत्यर्थः । अथ द्रष्टृदृष्टिदृश्यप्रशंसया तदनुमोदनव्यंजकपदानामर्थः—अत एव प्रथममपीति सकाकुसंभावनगिरा तत्रोत्कंठां व्यानंजुः—एणपत्नीति । जात्यैव दृष्टिप्रशंसा, एणपत्नीत्यनेन " पत्युर्नो यज्ञसंयोगे " इति पाणिनिस्मृतेरेणानां याज्ञिकत्वं तस्या यज्ञपत्नीत्वं व्यंजितमिति द्रष्टृप्रशंसा । उपगतः समीपप्राप्त इति तद्भाग्यप्रशंसा । तत्रापि प्रियेति द्रष्टृदृश्ययोर्द्वयोरपि प्रशंसातिशयः । गात्रैर्मिथः संगमेनासाधारणतां प्राप्तैरिति पूर्ववदेव । तन्वन् दृशां सखिषु सुनिर्वृतिमित्येभिर्दृष्टैश्च तदतिशयः । अच्युत इति प्रियया सह विचाराराहित्येन पुनर्दृश्यप्रशंसा । व इति यत्र भवती भवतीदृशी तत्र भवत्संगिनीनामपीदृशत्वं युक्तमिति द्रष्टृप्रशंसा । अथ कान्तेति दृश्यायास्तस्याः, तदंगसंगेति लब्धदुर्लभस्य दृश्यस्य कान्तस्य, कुचकुंकुमेति तत्संयोगलब्धभाग्यस्य दृश्यस्य कुंकुमस्य, तद्रंजिताया इति तत्संबंधेन लब्धशोभातिशयाया दृश्यायाः कुंदस्रजः शुभतया तदुदयशोभायोग्यतायाः, स्वरूपेण च तस्या एव, कुलपतेरिति दृश्यस्य कान्तस्य, इहेति लब्धतद्गंधसौभाग्यस्य दृश्यस्य तत्स्थानस्य, वातीति वातमप्यात्मसात्कृत्य स्वयमेव सर्वतश्चलतीति गंधविलसितस्य गंध इति तत्तद्विशेषे योगात्तस्य च प्रशंसावगतेति ॥ ११ ॥ विटवृत्तिं श्रितवतो मालत्यादिसमीपे पुष्पजिघृक्षया जिगमिषासंभवे प्रश्नस्तान्प्रति कथंचिदुपयुज्यतेऽपि, अश्वत्थादिप्रश्नः कथमुपयुज्यतेऽतस्तत्संभवं दर्शयितुमाहुः—बाहुमिति । प्रणामप्रदक्षिणादिना संसारात्तारयंतीति तरवोऽश्वत्थादयस्तान्प्रत्याहुः—हे तरवः रामानुजो मदांधसंगी एकं बाहुं प्रियांसे निधाय परेण प्रियामुखपद्मलोभिभ्रमरनिवारणाय गृहीतपद्मः । यद्वा—हस्तेन गृहीतपद्मः वः प्रणामं चरन्कुर्वन् । यद्वा—वः प्रणामं प्रणयावलोकैरभिनंदति स्वीकरोति किं वेत्यनेन स्थावराणां भक्त्यतिशयो ध्वनितः ॥ * ॥ तस्य तत्रैव वर्तमानत्वेऽन्यदपि लक्षणं मिथो ज्ञापयंत्यस्तरूंन्फलपुष्पावनम्रान्प्रगतान्मत्वा सवितर्कमाहुः—बाहुमिति । हे तरव इह चरन् कृष्णः फलपुष्पादिकरप्रदायिनां वः प्रजापरूणां प्रणामं किं प्रणयपूर्वकावलोकैरभिनंदति नवा ? हंतहंत युष्मद्विधेषु सात्त्विकसाधुलोकेषु कुतस्तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृच्छतेमा लता बाहूनप्याश्लिष्टा वनस्पतेः ॥ नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो ॥ १३ ॥

मदांधैरन्वीयमानोऽनुगम्यमान इह चरन्निति ॥१२॥ काश्चिदाहुः । हे सख्य इमा लताः कृष्णेन संगता नूनमत इमाः पृच्छत । ननु स्वपतिसंगतौ तत्संगतिर्दुर्घटा । न । वनस्पतेः पत्युर्बाहुनाऽऽश्लिष्टा अपि नूनं तत्करजस्पृष्टाः कृष्णकरनखस्पर्शं प्राप्ता अहो भाग्यं यत उत्पुलकानि बिभ्रति । न हि स्वपतिसंगतावीदृक्पुलकसंभव इति भावः ॥ १३ ॥

प्रीत्यवलोकनावकाश इति सासूयमाहुः—रामानुजो मत्तस्तत्रापि प्रियाया अंसे बाहुं वामभुजमुपधायेति संप्रयोगप्रेमवशाच्छ्लथदुर्बलः प्रियास्कंधार्पितं स्वबाहुमेव कोमलमुपधानं कृत्वा तस्या मुखगंधेनोत्पतिष्णूनां भ्रमराणां विद्रावणार्थमेव दक्षिणपाणिगृहीतकमलोऽतः सेवैकतानमानसस्य तस्य नान्यत्र दृष्टिपातसंभव इति भावः । तुलसिकानां कोमलतुलसीकाननस्यालिकुलैरन्वीयमानः । तुलसिकाः परित्यज्य इहात्रैव सोन्विष्यत इत्यतः स क्वचिदत्रैव निह्नुतो विहरतीति भावः । ननु तर्हि अलिकुलानामेवानुपदं गच्छामस्तत्राहुः--मदांधैरिति । न हि मदांधानामनुगतिर्भव्यजनैः कर्तुमुचितेति भावः ॥ अत्र **तोषिणी**—अथ तस्या मौनमयविलोकनाभिनिवेशेनाशंकितान्निजविरहार्तिदृष्टार्तिभरोदयात्स्तब्धतां मत्वा तां विहाय फलपुष्पादिभरनम्रान्वृक्षान्वीक्ष्य प्रणयभरविनतान्मत्वा सर्वानेव तान्पृच्छंति--बाहुमिति । इहापि तत्तत्प्रशंसयानुमोदनं व्यंग्यं तत्र वाक्यार्थेन । यथा हे तरवो रामानुजो वो युष्माकं प्रणामं किं वा प्रणयावलोकैरभिनंदति ? इति स्नेहस्य तत्कृपायाश्च योग्यतास्पदतां सूचयित्वा तेषां द्रष्टृणां गुणप्रशंसां कथं नाभिनंदेदित्याशंक्य तत्र तस्य तया सह मधुरविलासावेशकारणमाहुः । तज्ज्ञाने च कारणं गंधमात्रेण पूर्ववन्निजतदंतरंगधर्मविज्ञतामाहुः--बाहुमित्यादिना । तत्राभिनंदने सामान्यतः कारणं चरन्निति । तत्तत्क्रीडास्थानगमनव्यग्र इत्यर्थः । ननु सदा सर्वत्र भ्रमति पश्यति चास्मानद्य वा को विशेषस्तत्राहुः--बाहुं प्रियांस उपधायेति । प्रियायाः स्वस्मिन्परमस्निग्धाया अंसे स्कंधे उपधाय कोमलेयमिति यत्किंचिदाधायेति । ननु तामेवास्मान्दर्शयितुमागतः कथमस्मत्प्रणामं नाभिनंदेदित्याशंक्याहुः—तुलसिकालिकुलैरन्वीयमानः । गृहीतपद्मः प्रियायास्तान्निवारयितुं दक्षिणेन भुजेन लीलापद्मधूननासक्त इत्यर्थः । तर्हि कथमभिनंदेदिति भावः । अत्र तु तुलसिकालिकुलैरिति तत्क्रीडावनतुलसीनां सर्वसुगंधित उत्कर्ष एव द्योतितः, तथा वक्ष्यते च 'दिव्यगंधतुलसीमधुमत्तैः' इति । मदांधैः तद्रसपानमदेनांधैरप्यन्वीयमान इति प्रियांगसंघर्षेण परिमलविशेषो दर्शित इतीत्थमत्रापि पूर्ववत्तत्तत्प्रशंसा दर्शिता । अथ च 'मालां बिभ्रद्वैजयंतीम्' इति या वैजयंती प्रोक्ता मध्ये 'कच्चित्तुलसि' इत्यादौ त्वा बिभ्रदित्यनेन तत्प्राशस्त्यातिशयस्य प्रस्तुतत्वात् । या तु तुलसीमाला सूचिता पुनश्च 'कुंदस्रजः' इत्यनेन कुंदस्रक् च दर्शिता संप्रति तस्यास्तस्याः स्खलनहेतवो विहाराश्च व्यंजितास्तीदित्थं वाक्यार्थेन तत्तत्प्रशंसयानुमोदनमेव व्यंजितम् । अथ पदानामर्थैरपि पूर्ववदनुसंधेयम् । तदेवंवक्रीणां सख्यमेव लब्धम् 'तस्या अमूनि नः क्षोभम्' इत्यादौ विरोधमुखेन च तदेव हि निश्चेतव्यम् ॥ ॥१२॥ यतः कृष्णेन संगता अतो हेतोः । अत्राशंकते—नन्विति । तत्संगतिः कृष्णसंगतिः । दुर्घटा अशक्या नेत्याह—तन्नखैः कृष्णनखैः । स्पर्शः कथं ज्ञातस्तत्राहुः—यत इति । उत्फुल्लकान्यूर्ध्वरोमाणि । अन्यथा तदसंभवमाहुः—न हीति । इति भाव इति—यादृक्परपुरुषस्पर्शे स्त्रीणामानंदस्तादृक्स्वपतिसंगैर्नेति तात्पर्यम् ॥ * ॥ अन्यदपि लक्षणमन्या दर्शयंत्य आहुः—पृच्छतेति । हे सख्य इमा लता एव कृष्णसंगमलक्ष्मधारिणीः पृच्छत । न च स्वपतिसंगतौ तत्संगतिर्दुर्घटेति वाच्यम्, यतो वनस्पतेः पत्युर्बाहून्सम्यगाश्लिष्टा अपि अहो कामोद्रेकः नूनं तन्नखैः स्पृष्टा एवोत्पुलकानि बिभ्रति, न हि स्वपतिसंगतावीदृक्पुलकं स्यात् । अत एव तल्लक्षणस्यास्मद्दृश्यमानत्वात्पूर्वपूर्वा इव न वयं तदद्राक्ष्मेति मिथ्या वक्तुं प्रभविष्यंतीति भावः ॥ अत्र **तोषिणी**—तदेतत्सर्वम् 'कस्याः पदानि चैतानि' इति या वक्ष्यंति तासामवधानास्पदमेव न बभूवेति लभ्यते संशयासंभवात् । काश्चित्तु किंचित्कृतावधाना अपि रागद्वेषाऽभावात्तदश्रुत्वैव स्वाभीष्टमेव दर्शयन्ति।मुनींद्रश्चात्र पूर्वाभ्यस्तासां वासनाभेददर्शनाय तदुदासीनतां व्यंजयति—पृच्छतेमा लता इति । वनस्पतिरूपस्य पत्युर्बाहूनप्याश्लिष्टा एता एव लताः पृच्छत । नन्वेवं चेत्तर्हि कथमासां तत्संगतिस्तर्क्यते ? तत्राहुः—नूनं वितर्के, तस्य श्रीकृष्णस्य करजैस्स्पृष्टा इति । ननु तदिदमपि कथं ज्ञातं, तत्राहुः—उदुच्चैः पुलकान्यंकुररूपाणि बिभ्रति बिभ्रत्य एवासते । अहो इत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युन्मत्तवचोगोप्यः कृष्णान्वेषणकातराः ॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः ॥१४॥ कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनम् ॥ तोकायित्वा रुदंत्यन्या पदाऽहञ्छकटायतीम् ॥१५॥ दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनाम् ॥ रिंगयामास काऽप्यंघ्री कर्षंती घोषनिस्वनैः ॥१६॥

उन्मत्तवत्प्रच्छुरित्येतत्प्रपंचितमिदानीं ' रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ' इति यदुक्तं तत्प्रपंचयति । इतीति । उन्मत्तवचोगोप्यः उन्मत्तवचसश्च ता गोप्यश्च कृष्णस्यान्वेषणेन कातरा अतिविह्वलाः । अनुचक्रुरनुकृतवत्यः ॥ १४ ॥ कस्याश्चिदित्यादिभिश्चतुर्भिरनुकरणं प्रपंच्यते ततश्चतुर्भिस्तन्मयत्वं पुनरेकेनानुकरणमिति विवेकः । पूतनायंत्याः पूतनावदाचरंत्याः कृष्णवदाचरंती गोपी स्तनमपिबत् । तोकायित्वा तोकवदात्मानं कृत्वा ॥ १५ ॥ दैत्यायित्वा दैत्यवत्तृणावर्तवदात्मानं कृत्वा एका कृष्णार्भभावनां

पूर्वतायाम्, न त्वेवं पुरेत्यर्थः ॥ १३ ॥ एकं प्रतिश्रुतं प्रपंच्य द्वितीयं प्रक्रमते—इति उक्तरीत्या। अनुकरणघृताभिवृद्धवह्निज्वालानां कथमात्माऽतिष्ठत्तत्राह—तदात्मिका इति ॥ * ॥ इमा आनंदजाड्यान्न किमपि ब्रुवते इत्येवमचेतनेष्वपि प्रश्नकामादिदर्शनाभ्यामुन्मत्तानां वचांसीव वचांसि यासां ताः । ततश्च तस्यान्वेषणेपि कातरास्तन्मध्ये काश्चिदेवं प्रत्येकं परामममृशुः—संप्रत्यहमेव स्वरूपचेष्टाद्यनुकरणेनात्मानं कृष्णाकारं दर्शयित्वापि कातराणामासां स्वस्य च मौहूर्तिकीमपि निर्वृतिं निष्पादयामीति मनसि कृत्वा तस्य सर्वा एव लीलाः क्रमेण स्मृत्वा रूढीकृत्य पूतनावधादिलीलामनुचक्रुः । तस्मिन्नेवात्मानो यासां ताः । तत्र च प्रतिकूलानामनुकरणं योगमाययैव, तन्मध्य एव गोपीस्वरूपा भूत्वा तत्तल्लीलासिद्ध्यर्थं चकार । अनुकूलानुकरणं तु गोप्यश्चक्रुरिति ज्ञेयम् । "नो नः कथा वद सदास्विति तन्निषिद्धोऽप्यानंदनिघ्न इह ता यदवोचमेव । नामानि तु प्रथयितास्मि तदत्र नासामित्थं मुनिर्मनसि संप्रति निश्चिकाय ॥ " ॥ अत्र **तोषिणी**—इति पूर्वोक्तप्रकारेण उन्मत्तस्य वच इव वचो यासां तादृश्यो गोप्यः । कृष्णान्वेषणे कातराः, विरहदुःखेन तदपि कर्तुमसमर्था इत्यर्थः । तथा सत्यः 'गायंत्य उच्चैः' इत्याद्यनुसारेण गानानुवृत्तिप्राप्ता यायाः पूतनावधादिलीलास्तास्ता अपि मध्येमध्येऽनुचक्रुरित्यर्थः । तत्रहेतुः—तदात्मिकाः तस्मिन् कृष्ण एवात्मा चित्तं यासां ताः । गाढतदासक्ता इत्यर्थः । तत्र कृष्णानुकरणं स्फुटमेव तदात्मकतया तत्र च स्वभावापरित्यागेन नातितदभेदस्फूर्तिः ' यतंत्युन्निदधेंबरम् ' इत्यत्र यत्नकथनात् 'कृष्णोऽहं पश्यत गतिम्' इति स्वस्मिन्कृष्णत्वसाधनार्थं तच्छब्दप्रयोगाच्च । पूतनाद्यनुकरणं च कृष्णविषयकतद्धेतुकभयेनेति तदात्मकतयैव यथा स्वविषयकभयोन्मत्तस्य व्याघ्राद्यनुकरणम्, अतो न तदीयप्रेमविरुद्धभावयोगः । कस्याश्चिच्छ्रीयशोदानुकरणञ्च न स्वेन रत्याख्येन भावेन, तस्य बालभावतयावृतत्वात् । किन्तु, प्रीतिसामान्यातिशयाल्लब्धकृष्णभावत्वेन ततो भयादेव ततस्तस्याभावेन न मातृभावस्पर्शः किन्तु कृष्णभावनैवेति न मिथः स्पर्शानुचितयोर्भावयोर्युतिः । सर्वमेतत्तासु तदानीमुन्मादस्यानुगतत्वात्सहसैव समपद्यत नान्यदेवेति च ज्ञेयम् ॥ १४ ॥ पूतनेवाचरतीति पूतनायते, पूतनायत इति पूतनायंती " कर्तुः क्यङ् सलोपश्च " इति क्यङि पुनः तङन्ताच्छानचि प्राप्ते शतृप्रत्ययस्त्वार्षः, " श्यप्श्यनोर्नित्यम् " इति नुम् । तोक इवाचरतीति तोकायते तोकाय्यत, इति तोकायित्वा ' अव्ययकृतो भावे ' इति भावे क्त्वा । शकटायतीमिह नुमभावस्त्वार्षः ॥ * ॥ एवमनुकरणं चतुर्भिराह—पूतनायन्त्याः पूतनावदाचरंत्याः । कृष्णवदाचरन्ती स्तनमपिबत् पानमनुचक्रे । तोकायित्वा तोकवदात्मानं कृत्वा ॥ अत्र **तोषिणी**—तदात्मकत्वेनानुकरणस्य प्रपंचमाह—नवभिः । पूतनायंत्या इति—तथापि स्वभावस्थितत्वेन पूतनावदाचरंत्या एव न तु तत्तद्विरुद्धभावाया इत्यर्थः । कृष्णायंतीति तु 'कृष्णार्भभावनाम्' इति वक्ष्यमाणानुसारेण भावतोऽपि तदाचरंतीति लभ्यते । एवमुत्तरत्रापि स्तनमपिबदिति चानुकरणमात्रं तन्मात्रस्यापेक्षितत्वात् । शकटायतीम् शकटायमाणाम् । तादृशत्वं च हस्तपादाभ्यां भुवमवष्टभ्याधोमुखतयैवोच्चैरवस्थानम् ॥ १५ ॥ रिंगयामास हस्तजानुभ्यां चचाल । घोषनिस्वनैः मंजीरादिध्वनिभिः सह ॥ * ॥ दैत्यायित्वा तृणावर्तदैत्यवदाचरंती एका कृष्णस्य आर्भं बाल्यं भावयति या ताम् ॥ अत्र **तोषिणी**—कृष्णस्यार्भभावना बाल्यवासना सेव सा यस्यास्तां जहार । तद्वयावेशेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णरामायिते द्वे तु गोपायंत्यश्च काश्चन ॥ वत्सायंतीं घ्नती चान्या तत्रैका तु बकायतीम् ॥ १७ ॥ आहूय दूरगा यद्वत्कृष्णस्तमनुवर्ततीम् ॥ वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति ॥ १८ ॥ कस्यांचित्स्वभुजं न्यस्य चलंत्याऽऽहाऽपरा ननु ॥ कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥ १९ ॥ मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया ॥ इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंऽबरम् ॥ २० ॥ आरुह्यैका पदाक्रम्य शिरस्याऽऽहापरां नृप ॥ दुष्टाहे गच्छ जातोऽहं खलानां ननु दंडधृक् ॥ २१ ॥ तत्रैकोवाच हे गोपा दावाग्निं पश्यतोल्बणम् ॥ चक्षूंष्याऽऽश्वपिदध्वं वो विधास्ये क्षेममंजसा ॥ २२ ॥ बद्धाऽन्यया स्रजा काचित्तन्वी तत्र उलूखले ॥ भीता सुदृक्पिधायास्यं भेजे भीतिविडंबनम् ॥ २३ ॥

कृष्णस्यार्भे बाल्यं भावयति या तामन्यां जहार ॥ १६ ॥ १७ ॥ दूरगा दूरे वर्तमाना गाः यद्वद्यथा कृष्णस्तथाऽऽहूय तं कृष्णमनुवर्ततीमनुवर्तमानाम् । अनुकुर्वतीमिति वा पाठः ॥ १८ ॥ १९ ॥ यतंती प्रयत्नं कुर्वती अंबरमुत्तरीयं वस्त्रमुन्निदधे ऊर्ध्व धृतवती ॥ २० ॥ २१ ॥ अपिदध्वं निमीलयत ॥ २२ ॥ सुदृक् सुनयनमास्यं तद्वरणमनुकृत्य दर्शितवतीत्यर्थः । घोषाः किंकिण्यस्तेषां निस्वनैः कृत्वा सहिता सेविता वा, तच्च साक्षादेव तासामपि पादेषु नूपुरसद्भावात् । एतच्च 'घोषप्रघोषरुचिरम्' इत्याद्युक्तरिंगणलीलानुकरणम् ॥ १६ ॥ कृष्णरामाविवाचरत इति कृष्णरामायेते, ततो भावे क्ते इटि च कृष्णरामायिते । तत्र तासु । अनु पश्चात् । एका कृष्णायंती ॥ * ॥ ० ॥ अत्र **तोषिणी**—द्वे चिक्रीडतुः । काश्चित्तत्र गोपायंत्यो गोपबालायंत्याश्चिक्रीडुः । तदानीं बालकैरेव वत्सचारणात्तस्यामेव सभायां लीलांतरमाह—वत्सेति । अन्या कृष्णायमाना । तत्र तस्मिन्सति । एका च कृष्णायमाना हंति हननानुकरणमनुकरोति । अहन्नित्यर्थः ॥ १७ ॥ अनुवर्तनं त्वनुकरणं विनापि स्यादत आह—अनुकुर्वतीमिति वेति ॥ * ॥ दूरगा दूरवर्तिनीर्गाः यद्वत्कृष्ण आह्वयति तद्वदेवाहूय तं कृष्णमनुवर्त्तन्तीम् । 'अनुकुर्वतीम्' इति च पाठः ॥ अत्र **तोषिणी**—तदेवमनुकरणमात्रमुक्तमधुना प्रलंबवधप्राक्तनग्रीष्मकृतविचित्रलीलानुकरणे शृंगारालंबनरूपतदीयकैशोराविर्भावात्पुनरपि प्रियानुकरणरूपं लीलाख्यमनुभावमाह—आहूयेति द्वाभ्याम् । दूरगा इति समासान्तविधेरनित्यत्वात् । दूरगवीरित्यर्थः । अन्याः गोपमन्याः ॥ १८ ॥ ललिताम् अतीवरम्याम् । तन्मनाः कृष्णचेता आहेति ॥ * ॥ ततश्चान्या अपि लीला अनुचिकीर्षतीनामपि तासां तद्ध्यानाधिक्याऽऽवेशेनोन्मादसंचारिप्राबल्येन चाऽऽत्मानुसंधानापगमात्कृष्णतादात्म्यमाह—चतुर्भिः । कस्याश्चिदिति—अहं सुबलस्कंधार्पितभुजः कृष्णस्तस्मान्मम ललिताम् अतिरमणीयाम् । गतिम् नृत्यलीलाम् ॥ ० ॥ १९ ॥ ततो वातवर्षातस्त्राणं तत्त्राणमिति ॥ * ॥ यतंती प्रयत्नं कुर्वती । अंबरम् उत्तरीयवस्त्रम् । उन्निदधे ऊर्ध्वं धृतवती ॥ अत्र **तोषिणी**—वातवर्षाभ्यामिति । तत्तल्लीलावेशेन साक्षाद्वातादिस्फूर्तः । एवमग्रे 'दावाग्निं पश्यत' इत्यपि । अत्र त्रासातिरेकेण शृंगाररससंकोचान्न लीलोदाहरणम् ॥ ॥ २० ॥ खलानाम् उच्छृंखलानाम् ॥ * ॥ दुष्टाहे कालिय ॥ अत्र **तोषिणी**—पदाक्रमणपूर्वकमारुह्येत्यर्थः । ननु निश्चये, संबोधने वा । 'नृप' इति पाठे आश्चर्येण संबोधनम् । दुष्टाहे इति कालियस्य न्यक्कारेण संबोधनम् । गच्छ इतो निस्सर अन्यथा दंडं करिष्य इत्याह—जात इति । ननु निश्चितं तल्लीलायामेतद्वाक्याभावेप्यनुकरणम्, तत्र तस्य वाक्यस्य शेषेण तात्पर्येण वा ॥ २१ ॥ तत्र तासु । वः युष्माकम् ॥ * ॥ ० ॥ अत्र **तोषिणी**—तत्र चेति चकारेणान्वयः । कालियदमनलीलानुकरणे त्वित्यर्थः । 'तत्रैकोवाच हे गोपाः' इति च । बहुत्र रेशब्दस्त्वहृद्यत्वान्नाद्रियते । एवं कृष्णेनापि तत्र चक्षुःपिधानमादिष्टमिति गम्यते । दावाग्निं पश्यतोल्बणमिति तु तत्र हेतुवाक्यम् । उल्बणं चक्षुस्तेजोहरमित्यर्थः । तच्च निमीलनार्थव्याजादेव । एवं मुंजाटवीसंबंद्धत्र्यपि संबंधनीयमिति पृथङ्न वर्णितमिति ज्ञेयम् । अपिदध्वमिति " दधस्तथोश्च " इति स्मरणादभ्यासस्य भष्भावप्राप्तेरपिधध्वमिति वक्तव्ये दध्वमिति पाठ आर्षो लेखकप्रमादजो वा । अंजसा अनायासेनैव ॥ २२ ॥ तत्र तासां मध्ये । संभवत्वात्त्रिया अपि विशेषणमित्याह—वराक्षीति ॥ * ॥ अतश्चाकस्मादु

१ तत्र चोवाचेति पाठाभिप्रायेणैतत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं कृष्णं पृच्छमाना वृंदावनलतास्तरून् ॥ व्यचक्षत वनोद्देशे पदानि परमात्मनः ॥ २४ ॥
पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः ॥ लक्ष्यंत हि ध्वजांभोजवज्रांकुशयवादिभिः ॥ २५ ॥

पिधाय सुदृक् वराक्षीति वा । भीतिविडंबनं भयानुकरणम्॥ २३ ॥एवं पुनरपि वृंदावने लतास्तरूंश्च कृष्णं पच्छंत्यो वनोद्देशे वनप्रदेशे व्यचक्षतापश्यन् ॥ २४ ॥ २५ ॥

न्मादस्य प्राबल्ये शान्ते सति कृष्णतादात्म्यस्यापि शैथिल्यमभूत्, ततश्चाहं गोपीत्यात्मानमनुसंदधानां कांचिद्भांडस्फोटनहैयंगवमोषणलीलानुकरणोद्यतामालक्ष्य योगमायैव श्रीयशोदायमाना तदुचितं चकार–बद्धेति । हैयंगव मुष्णन्तं बध्नामीत्युक्त्वाऽन्यया काचित्स्रजा बद्धा सुदृक् आस्यमाच्छाद्य भीतिविडंबनं भयानुकरणं भेजे इत्यन्वयः ॥ अत्र **तोषिणी**–अन्यया पूर्वमुक्तवैव व्रजेश्वरीचेष्टामात्रं कुर्वत्या । तन्वी विरहार्त्या सद्य एव कार्श्यं प्राप्ता । तत्र अनुकरणे । उलूखल इति । उलूखलानुकारिण्यां कस्याश्चिदित्यर्थः । सुदृगिति–दृग्भ्यामपि चकितविलोकनादिना भयमनुचकारेत्यर्थः । मुखं पिधाय, हस्ताभ्यामिति शेषः । एष बालकभयस्वभावः । भीतिः कृष्णस्य भयकार्यं कंपादि, किंचिद्रोदनवाक्यादि च, तदनुकरणं भेजे । एवमन्यासामपि लीलानुकरणं यथार्हमूह्यम् ॥ २३ ॥ वनोद्देशे वनप्रदेशे ॥ * ॥ एवम् अनेन प्रकारेण । कृष्णं पृच्छमाना इति । अयमत्रप्रकारः– वैप्रलंभकस्योन्मादस्य प्रौढिमनि आत्मविस्मृतौ सत्यां स्वप्रेष्ठतादात्म्यमेव स्यात् । यदुक्तम्–'प्रियाः प्रियस्य प्रतिरूढमूर्तयः' इति, 'असावहं तु' इति, 'कृष्णोऽहं पश्यत गतिम्' इत्यादि तस्यैव मध्यत्वे यत्किञ्चिदात्मानुसंधानवत्त्वे सत्यनुकरणम् । यदुक्तं प्रह्लादचरिते–"क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह" इति । अत्राप्युक्तम्–'कृष्णायंत्यपिबत्स्तनम्' इत्यादि । तस्यैव मांद्ये आत्मानुसंधानस्य प्रायिकत्वेऽचेतनेष्वपि तरुगुल्मादिषु प्रश्नः ॥०॥२४॥ व्यक्तम् स्फुटम् । परमात्मनः श्रीकृष्णस्य वैतानीति कथं ज्ञातं, तत्राह–ध्वजे तावत्पर्यंतं श्रीकृष्णेनैवांके निधाय तस्या नयनात् ॥*॥ तदेवं त्रिविधमुन्मादं निर्वर्ण्य तदंतरैवाकस्मात्कृष्णस्य पदचिह्नान्यालक्ष्य सानंदवितर्कमाहुः–पदानीति । ध्वजादीनां धारणस्थानं प्रयोजनं चोक्तं स्कांदे–"दक्षिणस्य पदांगुष्ठमूले चक्रं बिभर्त्यजः ॥ तत्र भक्तजनस्यारिषड्वर्गच्छेदनाय सः ॥ (१) ॥ मध्यमांगुलिमूले च धत्ते कमलमच्युतः ॥ ध्यातृचित्तद्विरेफाणां लोभनायातिशोभनम् ॥ (२) ॥ पद्मस्याधो ध्वजं धत्ते सर्वानर्थजयध्वजम् ॥ कनिष्ठामूलतो वज्रं भक्तपापाद्रिभेदनम् ॥ (३) ॥ पार्ष्णिमध्येऽकुंशं भक्तचित्तेभवशकारिणम् ॥ भोगसंपन्मयं धत्ते यवमंगुष्ठपर्वणि ॥(४)॥ वज्रं वै दक्षिणे पार्श्वे अंकुशो वै तदग्रतः ॥" इति तत्रैव स्कांदे कृष्णमधिकृत्योक्तत्वात्कनिष्ठामूलेंकुशस्तत्तले वज्रमित्याहुः संप्रदायविदः । पार्ष्ण्यावंकुशस्तु नारायणादेर्ज्ञेयः । तदेवं चक्रध्वजकमलवज्रांकुशयवा इति षट् ६ चिह्नानि कृष्णस्य दक्षिणे चरणे । अन्यान्यपि चिह्नानि वैष्णवतोषिणीदृष्ट्या लिख्यन्ते–अंगुष्ठतर्जनीसंधिमारभ्य यावदर्द्धचरणमूर्द्ध्वरेखा ७, चक्रस्य तले छत्रम् ८, अर्धचरणतले चतुर्दिगवस्थितं स्वस्तिकचतुष्टयम् ९, स्वस्तिकचतुःसंधिषु जंबूफलचतुष्टयम् १०, स्वस्तिकमध्येऽष्टकोणमित्येकादश ११ चिह्नानि । "तथा वामपदांगुष्ठमूलतस्तन्मुखं दरम् । सर्वविद्याप्रकाशाय दधाति भगवानसौ ॥" इति १, मध्यमामूलेम्बरम् अंतर्बाह्यमंडलद्वयात्मकम् २, तदधः कार्मुकं विगतज्यम् ३, तदधो गोष्पदम् ४, तत्तले त्रिकोणं तदभितः कलशानां चतुष्टयम्, क्वचित्त्रितयं च दृष्टम् ५, त्रिकोणतलेर्द्धचंद्रः ६, अग्रद्वयस्पृष्टत्रिकोणकोणद्वयम् ७, तदधो मत्स्यः ८, इत्यष्टौ मिलित्वोनविंशतिः १९ ॥ अत्र **तोषिणी**–एवं तत्तल्लीलानां पुनःपुनर्गानानुकरणयोः प्रकारेण तत्प्रकारविशिष्टं प्रश्नं कुर्वाणा इत्यर्थः । परमात्मनः सर्वेषां मूलस्वरूपस्य पदानि वनोद्देशे व्यचक्षतेत्याश्चर्यम् । यस्य मुनयो वेदेऽपि यथाकथंचिदेव सूचकतया शब्दरूपाण्येव पदानि तर्कयन्तिमात्रं तस्यैव ताः स्वविहारवनोद्देशे पदानि व्यचक्षतेति अहो एतन्मात्रांशेऽपि वयं सर्वेपि मुनयो न तासां साम्यं प्राप्नुमः । किं पुनस्तादृशप्रेमविशेषासादितनित्यतदीयप्रेयसीत्वांशे इति भावः । 'अन्तर्हिते' इत्यादिप्रकरणे तेषां व्याख्यायां प्रथमं तापत्रयम्, द्वितीयं गानसहितान्वेषणम्, तृतीयं पूतनावधाद्यनुकरणम्, चतुर्थं पुनरप्यन्वेषणम्, पञ्चमं पददर्शनमिति क्रमः । स्वव्याख्यायां प्रथमं तापमात्रम्, द्वितीयं 'बाहुप्रसार–' इत्याद्यनुकरणम्, तृतीयं गानसहितान्वेषणं; तत्रैव मध्येमध्ये पूतनाद्यनुकरणम्, चतुर्थं पददर्शनमिति विवेचयनीयम् । ततश्चान्योन्यमाहुः–पदानीति । पदचिह्नानि, व्यक्तं स्फुटमेवैतानि, नंदसूनोः पदानि लक्ष्यन्ते ध्वजादिभिः । हि प्रसिद्धौ । ध्वजादीनि तत्र प्रसिद्धान्येवेत्यर्थः । ध्वजादियोगे हेतुः–महात्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योऽग्रतोऽबलाः ॥ वध्वाः पदः सुपृक्तान विलोक्यार्ताः समब्रुवन् ॥ २६ ॥

सुपृक्तानि संमिश्राणि ॥ २६ ॥

नः । परमपुरुषोत्तमस्येत्यर्थः । आदिपदादन्यान्यपि । तत्र पाद्मे ब्रह्मनारदसंवादे श्रीकृष्णमधिकृत्य "षोडशैव तु चिह्नानि मया दृष्टानि तत्पदे । दक्षिणे चाष्ट चिह्नानि इतरे सप्त एव च ॥ ध्वजा पद्मं तथा वज्रमंकुशो यव एवच । स्वस्तिकश्चोर्द्ध्वरेखा च अष्टकोणं तथैव च ॥ सप्तान्यानि प्रवक्ष्यामि सांप्रतं वैष्णवोत्तम । इन्द्रचापं त्रिकोणंञ्च कलशश्चार्द्धचन्द्रकम् ॥ अंबरं मत्स्यचिह्नञ्च गोष्पदं सप्तमं स्मृतम् । षोडशञ्च तथा चिह्नं शृणु देवर्षिसत्तम ॥ जम्बूफलसमाकारं दृश्यते यत्र कुत्रचित् ।" इति । क्रमदीपिकायाम्—"मत्स्यांकुशारिदरकेतुयवाब्जवज्रैः" इति । श्रीगोपालतापन्याम्—"शंखध्वजातपत्रैश्च चिह्नितं चरणद्वयम्" इति । आदिवाराहे मथुरामाहात्म्ये—"यत्र कृष्णेन संकीर्णं क्रीडितञ्च यथासुखम् । चक्रांकितपदा तेन स्थाने ब्रह्ममये शुभे ॥" इति । एवं चक्रशंखातपत्रैरधिकैरूनविंशतिचिह्नानि । स्कांदे तु यच्चक्रादिषट्कमात्रमुक्तं तत्तु श्रीविष्ण्वादावेव । यत उक्तं षोडशचिह्नप्रसंग एव पाद्मे—"अंकान्येतानि भो विद्वन्दृश्यंते तु यदा कदा । कृष्णाख्यं तु परं ब्रह्म भुवि जातं न संशयः ॥ द्वयं वाथ त्रयं वाथ चत्वारि पंच एव च । दृश्यंते वैष्णवश्रेष्ठ अवतारे कथंचन ॥" इति । तेषां स्थाननियमो यथा तत्रैव—"मध्ये ध्वजा तु विज्ञेया पद्मं त्र्यंगुलमानतः । वज्रं वै दक्षिणे पार्श्वे अंकुशो वै तदग्रतः । यवोऽप्यंगुष्ठमूले स्यात्स्वस्तिकं यत्र कुत्रचित् ॥ आदिं चरणमारभ्य यावद्वै मध्यमा स्थिता । तावद्वै चोर्द्ध्वरेखा च कथिता पाद्मसंज्ञके ॥ चतुरंगुलमानेन त्वंगुलीनां समीपतः । इन्द्रचापं ततो विद्यादन्यत्र न भवेत्क्वचित् ॥ त्रिकोणं मध्यनिर्दिष्टं कलशो यत्र कुत्रचित् । अष्टांगुलप्रमाणेन तद्भवेदर्धचंद्रकम् ॥ बिन्दुर्वै मत्स्यचिह्नञ्च आद्यंते वै निरूपितम् । गोष्पदं द्विखुरं ज्ञेयमाद्यायंगुलिमानतः॥" इति । एतल्लक्षणं तत्रैव—"पद्याऽऽकारा ध्वजा प्रोक्ता प्रान्ते त्रैकोणिकान्यथा" इत्यादि । व्याख्यायते च त्र्यंगुलमानतः मध्यमांगुल्यग्रात्तावन्मानं परित्यज्येत्यर्थः । वक्ष्यमाणयुक्तेः, 'पद्मस्याधो ध्वजं धत्ते' इति स्कांदसंवादाच्च । यत्र कुत्रचिदिति यथाशोभं बहुत्रेत्यर्थः । आदिं चरणमंगुष्ठतर्जन्यंतरालम् । यावन्मध्यं मध्यदेशं तावद्व्याप्य स्थिता । तत्तस्याष्टकोणस्य मानमष्टांगुलैर्ज्ञेयम् । अग्रतोऽष्टांगुलीः परित्यज्येत्यर्थः । स्वरूपमाने स्थानासमावेशः । स च चरणस्य दैर्घ्ये चतुर्दशांगुलप्रमाणत्वं, विस्तारे षडंगुलप्रमाणत्वमिति हयशीर्षमात्स्यादिप्रसिद्धत्वात् । एतदनुसारेण त्र्यंगुलमानत इत्यादि व्याख्यातं, व्याख्यास्यते चान्यत्र । इंद्रचापं निर्गुणत्वात्तादृशवर्णमयत्वाच्च । चतुरंगुलमानेनेति तावन्मानपरित्यागत उक्तम् । मध्यमांगुल्यधःस्थितबिंदोरधः स्थितत्वात् । तथा दैर्घ्यतोऽपि ज्ञेयम् । शोभोपयोग्यत्वाद्बिंदुमध्यनिर्दिष्टं चरणमध्ये स्थितम् । अष्टांगुलप्रमाणेन त्रिकोणस्याध इत्यर्थः, तत्कोटिद्वयस्य किंचित्त्रिकोणग्रासित्वात् । बिंदुरंबरपर्यायः । अयं च बाह्याभ्यंतरमंडलद्वयात्मकः । 'द्विरेखासु समन्वितम्' इति तत्रैव तल्लक्षणोक्तेः सर्वचिह्नानामुपरि बिंदुः, मत्स्यः सर्वचिह्नानामधः, द्विखुरं द्विशफमाद्याद्बिंदोर्द्व्यंगुलमानत इति इन्द्रचापादध इत्यर्थः । पद्याऽऽकारा वर्त्मतुल्या । प्रान्ते त्रैकोणिकं पताकास्थानीयं यस्यां सा । सप्तम्या अलुक् । एतच्च त्रैकोणिकं दक्षिणत एव ज्ञेयं वामत उर्द्ध्वरेखोपहतेः । षोडशं तु चिह्नं पादद्वय एव ज्ञेयम् अनियमेनोक्तत्वात् । जंबूफलतया निर्देशेन तद्वर्णतदाकारमयमेव तच्चिह्नं न तु रेखाऽऽकारम् । चक्रशंखौ तु "दक्षिणस्य पदांगुष्ठमूले चक्रं बिभर्त्यजः । तथा वामपदांगुष्ठमूलतस्तन्मुखं दरम् ॥" इति स्कांदाद्यनुसारेणैव ज्ञेयौ । छत्रं तु प्राधान्याद्दक्षिणचरण एव । तत्रापि चिह्नान्तरशून्यप्रदेशत्वाच्चक्राध एव ज्ञेयम् । तासां तद्दर्शनप्रकारश्चायं श्रीविष्णुपुराणे—"विलोक्यैका भुवं प्राह गोपी गोपवरांगना । पुलकाचितसर्वांगी विकाशिनयनोत्पला ॥ ध्वजवज्रांकुशाब्जांकरेखाकाराणि पश्यत । पदान्येतानि कृष्णस्य लीलाललितगामिनः ॥" इति ॥ २९ ॥ सर्वासां वाक्यम्—तैस्तैरिति । ध्वजाद्युपेतैरित्यर्थः । तस्य कृष्णस्य । पदवीं मार्गम् । अन्विच्छन्त्योऽन्वेषयंत्यः । वध्वा नार्याः । पदैः चरणनिक्षेपैः । ईर्ष्ययार्ताः ॥ * ॥ सुपृक्तानि मिश्रितानि ॥ अत्र **तोषिणी**—तैस्तैः ध्वजादिभिश्शोभितैः, वीप्सा मध्येमध्ये दूर्वादिमय्यादिभूमौ विच्छिन्नत्वात्स्थानबाहुल्यस्य विवक्षया । अग्रत इति—तावत्पर्यंतं कृष्णेनैवांके निधाय तस्या नयनात् । अबलाः विहारान्वेष

१ अराणि सन्त्यस्मिन्नितियरि चक्रम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्याः पदानि चैतानि याताया नन्दसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा ॥ २७ ॥ अनयाऽऽराधितो नूनं भगवान्हरिरीश्वरः ॥ यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः ॥ २८ ॥ धन्या अहो अमी आल्यो गोविंदांघ्र्यब्जरेणवः ॥ यान्ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ २९॥

तेनांसे न्यस्तः प्रकोष्ठो यस्याः । करेणोर्हस्तिन्याः ॥ २७ ॥ रह एकांतस्थानम् ॥ २८ ॥ हे आल्यः सख्यः अहो धन्या अतिपुण्या गोविंदांघ्र्यब्जरेणाभ्यां बलहीना अपि तस्य कृष्णस्य पदवीं वर्त्मान्विच्छन्त्यो मृगयमाणाः । वध्वाः श्रीराधायास्तस्या एव परमसौभाग्यवतीत्वेन स्थापयिष्यमाणत्वात् ॥ २६ ॥ कस्याः सुभाग्यायाः । प्रकोष्ठः करतलमूलभागः ॥ * ॥ अंसन्यस्तेति । यस्याः स्कंधे नंदसूनुना वामप्रकोष्ठो न्यस्त इत्यर्थः ॥ अत्र **तोषिणी**–तत्र सर्वा एवाहुः–कस्या इति । अत्र स्त्रीत्वज्ञानं तत्पदानां लघुत्वात्, निम्नत्वतदुचितांगलक्षितत्वादिना चेति ज्ञेयम् । नंदसूनुनेति पूर्ववत् । एतानि कस्याः पदानि, परिचीयन्तामिति शेषः । श्रीभगवता स्वांसे तत्प्रकोष्ठन्यसनं च यद्यपि रसविशेषेणैव तथापि रात्रौ स्खलन्त्यास्तस्याः सुखगमनार्थं बलाद्दूरे नयनार्थं च भवति । अनेन तस्यामधिकप्रीतिः सूचिता । तामेव दृष्टान्तेनाहुः–करेणोरिति । तयोरपि काममदेन प्रीत्या तथैव गमनात् ॥ २७॥ पदचिह्नैस्तां श्रीवृषभानुनंदिनीं ज्ञात्वा तस्याः सुहृदां वाक्यम् । यद्वा–अं वासुदेवं नयति चोरयतीत्यना । औणादिको डः । तया अस्माकं सर्वस्वं हरंत्या यत् यतः हरिरपि सर्वहरणोपीश्वरोऽपि राधितो वशीकृतः । गोविन्द इति भक्तिवात्सल्यमाह । भक्तघृणापकरणाय गोचारणमप्यंगीकृतवान्यस्तस्यान्यदपि नाऽकार्यं किंचिदिति भावः ॥ * ॥ पदचिह्नैरेव तां वृषभानुनंदिनीं परिचित्यांतराश्वस्ता बहुविधगोपीजनसंघट्टे तत्र बहिरपरिचयमिवाभिनयंत्यस्तस्याः सुहृदस्तन्नामनिरुक्तिद्वारा तस्याः सौभाग्यं सहर्षमाहुः–अनयैव नूनं निश्चयेन हरिर्भक्तजनदुःखहर्ता भगवान्नारायग ईश्वरो भक्ताभीष्टदानसमर्थ आराधितः, न त्वस्माभिर्यतो नो विहायेत्यादि । ततश्च राधयत्याराधयतीति राधा इति नामव्यक्तिर्बभूव । " मुनिः प्रयत्नेन तदीयनामाप्यधात्परं किन्तु तदास्यचंद्रात् । स्वयं निरेति स्म कृपानु तस्याः सौभाग्यमैर्ष्या इव वादनार्थम् ॥ " यद्वा–हे अनयाः अतिमहीयस्या तया सह वृथैव साम्याहंकारादनीतिमत्यः, नूनं हरिरयं राधितः राधामितः प्राप्तः शकंध्वादित्वात्पररूपम् । भगवान्सुंदरः कामातुरः स्वकीर्तिप्रख्यापको वा " भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु " इत्यमरः । ईश्वरः युष्मान्वंचयितुं समर्थः । यदि नोऽस्मान् सुंदरीर्विहाय गोविंदो गास्तस्या इंद्रियाणि रमणार्थं विन्दति वेदयति वा सः । तस्याश्च पदचिह्नान्युज्ज्वलनीलमणिटीकां दृष्ट्वा लिख्यंते–वामचरणेऽङ्गुष्ठमूले यवः १, तत्तले चक्रम् २, तत्तले छत्रम् ३, तत्तले वलयम् ४, अंगुष्ठतर्जनीसंधिमारभ्य यावदर्द्धचरणमूर्द्ध्वरेखा ५, मध्यमातले कमलम् ६, तत्तले ध्वजं सपताकम् ७, तत्तले वल्ली ८, पुष्पञ्च ९, कनिष्ठातलेंकुशः १०, पार्ष्णावर्द्धचंद्रः ११, इत्येकादश । दक्षिणचरणेंगुष्ठमूले शंखः १, तत्तले गदा २, कनिष्ठातले वेदिः ३, तत्तले कुंडलम् ४, तत्तले शक्तिः ५, तर्जन्याद्यंगुलितले पर्वतः ६, तत्तले रथः ७, पार्ष्णौ मत्स्यः ८, इत्यष्टौ मिलित्वैकोनविंशतिः ॥ अत्र **तोषिणी**–तत्र सखीनामंतरंगत्वेन गांभीर्यात्प्रतिपक्षाणामापाततो दुःखव्याप्तत्वात्तटस्थानाञ्च तदनभिनिवेशात्प्रथमं तस्याः सुहृद एवाहुः–अनयेति । नूनं वितर्के, निश्चये वा । हरिः सर्वदुःखहर्ता भगवाञ्छ्रीनारायण ईश्वरो भक्तेष्टप्रदानसमर्थः स्वतंत्रो वाऽनयैव आराधितः आराध्य वशीकृतो न त्वस्माभिः । अनेन राधयत्याराधयतीति राधेति नामकारणत्वं च दर्शितम् । तत्र हेतुः–गोविन्दः नोऽस्मान्विशेषेण हित्वा दूरतो निशि वनांतस्त्यक्त्वा तत्रापि रहः अस्मदगम्य एकान्तस्थाने यामनयत् । यद्वा–सवा अप्यस्मान् विहाय यन् गच्छन्नपि यामेव रहोऽनयदित्यर्थः ॥ २८ ॥ 'आलिः सेत्रे सखीपंक्त्योः' इति यादवः । धन्या निरपेक्षाः स्वसंगिपुरुषाणां साधनांतरं विनैव पावनसमर्थाः "निरपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैः" इति यादवः । तत्र धन्यत्वे । इति भाव इति–मूर्ध्नि धृतकृष्णपादरेणुना हतसर्वपापानां शुद्धांतःकरणानां कृष्णप्राप्तिर्न दुर्घटेति तात्पर्यम् । इदं तटस्थानां वाक्यम् ॥ * ॥ तटस्थपक्षास्तु तत्रानवधानाः कृष्णपदान्येवालक्ष्याहुः–धन्या इति । ब्रह्माद्या अघनुत्तये विच्छेददुःखापनयनाय यान्मूर्ध्नि दधुरित्यपराह्णे गोष्ठागमनसमये कृष्णसहचरबालकैः प्रत्यहं ते स्वर्गादवरुह्य कृष्णपादधूलिग्राहिणो दृश्यन्त एव, यद्वक्ष्यते–'वंद्यमानचरणः पथि वृद्धैः' इति, 'वंदिनस्तमुपदेवगणा ये' इति च । वयं तु लज्जयैव यद्वर्त्तुं न शक्नुमस्तेनैवैतावदवं प्राप्नुम इति भावः ॥ अत्र **तोषिणी**–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यत् ॥ यैकापहृत्य गोपीनां रहो भुंक्तेऽच्युताधरम् ॥ ३० ॥ न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः ॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥ (इमान्यधिकमग्नानि पदानि वहतो वधूम् ॥ गोप्यः पश्यत कृष्णस्य भाराक्रांतानि कामिनः ॥ १ ॥ अत्रावरोपिता कांता पुष्पहेतोर्महात्मना ॥)

णवः । तत्र हेतुः । यानिति । अस्माभिरप्येतद्रेणवभिषेकेण तथैव कृष्णः प्राप्तुं शक्य इति भावः ॥ २९ ॥ अन्या आहुः । तस्या इति । गोपीनां सर्वस्वम् । अयं भावः । भवेदेवं यदि तस्याः पदानि संपृक्तानि न भवेयुस्तानि तु नो दुःखं कर्वतीति ॥ ३० ॥ तदसंपृक्तान्केवलं कृष्णपादरेणूनेव विचिन्वत्यस्तान्दृष्ट्वा पुनरत्यंतं समतप्यंस्तदाह श्लोकत्रयेण । न लक्ष्यंत इति । खिद्यती सुजाते सुकुमारे अंघ्रितले यस्यास्तामुन्निन्ये स्कंधमारोपितवान् ॥ ३१ ॥

ततस्तटस्था आहुः—धन्या इति । अमी इमे । आल्य इति संबोधनं समदुःखत्वेन प्रायः सर्वासामेकभावात् । सर्वासामेव युगपत्संबोधनं चमत्कारातिशयात् । दधुरिति निर्देशो निश्चयज्ञापनार्थः । ब्रह्मादीनां यथोत्तरं श्रैष्ठ्यमूह्यम् । रमायास्तु विशेषणं तथापि श्रैष्ठ्यबोधनार्थम् । मूर्ध्नेति भक्तिभरं बोधयति । अघम् अपराधो विरहादिदुःखं वा । धन्यत्वे हेतुः—गोविंदांघ्र्यब्जेति । "सुपां सुलुक्—" इति षष्ठीलुक्छांदसः । तत्संबंधेन धन्या इत्यर्थः । अत एव यानिति । अतो रेणवोऽपि तत्संबंधलाभेन धन्याः । वयं तदभावात्ततोपि तुच्छा इति भावः । इयं च तत्पादरेणूनां माहात्म्यभावना प्रेमकृतैव, प्रेमा ह्यसदपि माहात्म्यं स्फोरयति किमुत सत् । ततस्तदतिशयस्तु तदतिशयमेव, यथादिभरतचरिते—"किं वा अरे आचरितं तपस्तपस्विन्या यदियमवनिः" इत्यादिगद्ये । तेन स्वमृगपदस्पर्शेन पृथिव्या भाग्यं वर्णितम् ॥ २९ ॥ अन्याः प्रतिपक्षाः । ननु कृष्णरेणुं धृतवतीनां कुतः शोकस्तत्राहुः—तस्या इति । अयं भाव इति—भवेदेवम् शोकाभावो नापि स्यात्, सपत्न्याः सुखं दुस्सहमित्यथः । अच्युतं सततस्यंदमानामृतमधरमिति तस्याः संदश्याधरपातं संस्मृत्य नः क्षोभ इति ॥ * ॥ प्रतिपक्षसख्य आहुः—तस्या इति । उच्चैः कुर्वन्ति जनयन्ति । गोपीनां सर्वासामेवास्माकं भोग्याच्युताधरमेकैव रहश्चोरयित्वा भुंक्ते, तयैव कामिन्या केनापि कर्मणैनं वशीकृत्यास्मान्प्रेमवतीस्त्याजयित्वा कृष्ण एतावद्दूरमानीत इति भावः ॥ अत्र **तोषिणी**—प्रतिपक्षसख्य आहुः—तस्या इति । उच्चैः अधिकम् । क्षोभम् अतिदुःखम् । अपहृत्येति एकाकित्वेन रहसि भोगात् । यद्वा—चौर्येण तया मायाविन्या नीतत्वादेव सोऽस्मान्विहायाऽत्रागतः । अन्यथा कथमागच्छेदिति भावः । गोपीनां सामान्यतः सर्वासामस्माकमेव । 'धनम्' इति पाठः क्वचित्, स च प्रायः सर्वस्वमिति तेषां व्याख्यामभीक्ष्य । 'रहः' इति पाठस्तु सर्वत्र । अच्युतस्य तां त्यक्त्वाऽन्यत्र काप्यगच्छतोऽधरमिति ॥ ३० ॥ तदसंपृक्तान् तस्याः पादैरमिश्रितान् । तत् तापमाह । उदूह्य नयनेन भूसंबंधाभावात्पदादर्शनमपि । शोकस्त्वेतादृशप्रेमा नास्मास्विति हेतोः ॥ * ॥ भो मत्सरमहारोगग्रस्ताः मा खिद्यत नात्र तस्याः पदानि संतीति तस्याः प्रियसख्य आहुः—नेति । ताः प्रत्येव सहर्षापांगमन्याः सख्यो नीचैः सवितर्कमाहुः—नूनमिति । उन्निन्ये भुजाभ्यामुदूह्य स्ववक्ष आरोहयामासेत्यर्थः । यतः प्रेयसीम् अतिप्रीतिविषयत्वात्तच्चरणखेदस्यासह्यत्वात् । इह खलु तत्सखीनामुभयविधं सुखं तस्यास्तादृक्सौभाग्यदर्शनोत्थम्, विपक्षाणां तादृशदुःखदर्शनोत्थं चेति ज्ञेयम् ॥ अत्र **तोषिणी**—न लक्ष्यंत इति । मत्सरोक्तित्वात् स्कंधमारोपितवानिति तैर्व्याख्यातम् । अत्र तान्दृष्ट्वेति तदसंपृक्तान् दृष्ट्वेत्यर्थः । यद्वा—सख्योऽप्याहुः—सखीवाक्यत्वादेव खिद्यदित्यादि । प्रेयसीम् अतिशयेन तत्प्रीतिविषयामित्यर्थः । अत उन्निन्ये हस्ताभ्यामंके निधाय निन्य इत्यर्थः ॥ ३१ ॥ × (॥ ० ॥ * ॥ भो असमीक्ष्य भाषिण्यः मा खिद्यतेति किं ब्रूथे तत्पदानां दर्शनादप्यदर्शनमस्मत्प्राणानामदर्शनं संभावयतीति द्योतयंत्यः प्रतिपक्षा आहुः—इमानीति । वधूमित्यनुपनी

× इमानीत्यादिसार्द्धपद्यस्य बहुपुस्तकेष्वनुपलम्भाच्छ्रीधरस्वामिनाप्यधृतत्वान्मूले प्रक्षिप्तरूपेण निवेशः । तस्य च सतोषिणीकाविश्वनाथव्याख्यानमत्रैव () चिह्नमध्ये बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः ॥ प्रपदाक्रमणे एते पश्यताऽसकले पदे ॥ ३२ ॥ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् ॥ तानि चूडयता कांतामुपविष्टमिह ध्रुवम् ॥ ३३ ॥ रेमे तया चात्मरत आत्मारामोप्यखंडितः ॥ कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मताम् ॥ ३४ ॥

प्रपदाभ्यामाक्रमणं क्षोणीमर्दनं ययोः। अत एवासकले पदे पश्यतेति॥ ३२॥ तस्याः कृष्णजान्वंतरुपविष्टायाश्चिह्नं दृष्ट्वाऽऽहुः। केशप्रसाधनमिति। कांतामधिकृत्य। तानि प्रसूनानि चूडयता चडानुकारणे बध्नता तेनेह ध्रुवमुपविष्टम्॥ ३३॥ रेमे इत्यादिः शुकोक्तिः। आत्मरतः स्वतस्तुष्टः। आत्मारामः स्वक्रीडः। अखंडितः स्त्रीविभ्रमैरनाकृष्टोऽपि तया रेमे। तथा चेत्कि

तेनापि कृष्णेन वनेऽत्र सा वधूरेव कृतेति भावः । तत्संकल्पेन तदैवागत्य ब्रह्मा तमुद्वाहं कारयित्वा तत्क्षणमेवांतर्दधाविति ग्रंथांतरतोऽवसेयम् । ईश्वरत्वादेव सर्वसंस्कारपूर्णत्वेनोपनयनातिक्रमोऽपि । "वधूर्भ्रातृदत्तलाजा जुहुयात्" इति कृतपाणिपीडनायामेव वधूशब्दस्य गृह्यसूत्रे प्रयुक्तत्वात्, अन्यथा स्त्रियमेवेति योगीन्द्रः प्रवदेदिति ध्येयं सुज्ञैः । ये वदन्ति श्रीराधा श्रीकृष्णेन नोढा तेप्यनेन परास्ता इति । अत एव भाराक्रांतस्य । गृहस्थाः खलु कलत्रभाराक्रांता इतस्ततो भ्रमंत्येवेति भावः । कामिनः न तु प्रेमिणः । प्रेमवतीनामप्यस्माकं त्यागादित्यत एव काम एव तं तां वाहयेदन्यथा व्रजेंद्रकुमारो ह्यतिसुकुमारो गोपालिकायाः कथं वाहको भवेदिति भावः ॥ अत्र **तोषिणी**–अथ प्रतिपक्षाः सासूयमाहुः–इमानीति । हे गोप्य इति विदग्धाभिर्युष्माभिरेतल्लक्ष्यत इति भावः । कामिनः केवलकामपरतंत्रस्य, न तु प्रेमरसाविदग्धस्येत्यर्थः ॥ (१) ॥ पुनः सख्य आहुः–। अत्रेति । महात्मना विदग्धशिरोमणिनेत्यर्थः । यद्वा–महे तत्प्रधानोत्सवे आत्मा मनो यस्य तेन । पुष्पहेतोः पुष्पार्थमवरोपितेति, अशोकवृक्षोऽयमस्याः पादस्पर्शं प्राप्य सद्यः पुष्प्यतु यथाहमेतत्पुष्पैरिमां प्रसाधयेयमिति बुद्ध्येत्यर्थः । अत एव महात्मना महाबुद्धिमता॥ अत्र **तोषिणी**–पुनः सख्य आहुः–अत्रेत्यर्द्धम् । महात्मना विदग्धशिरोमणिनेत्यर्थः । तदेतत्सार्द्धपद्यं क्वचिन्न दृश्यते च अतो नांकः कृतः) ॥ ॥ इदमतिचित्रमित्याहुः–अत्र स्थले । अत एव प्रसूनावचयहेतोरेव । प्रपदयोः पादाग्रयोराक्रमणं ययोस्ते प्रपदाक्रमणे । पदे पदचिह्ने । उन्नतशाखापुष्पावचयार्थं दुःस्थत्वाद्यावत्पादप्रमाणरहिते असकले ॥ * ॥ अत्राशोकशाखायां प्रसूनानामवचय इत्यत एवात्र प्रसूनानि लसंतीति भावः । किंचिद्दूरशाखाया हस्ताऽप्राप्यायाः पुष्पावचयार्थं प्रपदाभ्यामाक्रमणं क्षोणीसंमर्दनं यतस्ते पदे । अत एव असकले, संपूर्णयोस्तयोर्भुवि चिह्नाऽदर्शनात् ॥ अत्र **तोषिणी**–अथास्याः सख्य आहुः–अत्र प्रसूनेति । प्रेयसा अतिशयेन प्रीतिकर्त्रा । पूर्वत्र लिंगमाहुः–प्रपदेत्यर्द्धेन । पद इति । प्रतिपुष्पवृक्षमिति शेषः । अत एव बहुत्वं श्रीविष्णुपुराणे "पुष्पावचयमत्रोच्चैश्चक्रे दामोदरो ध्रुवम् । येनाग्र्याक्रांतिमात्राणि पदान्यत्र महात्मनः ॥" इति ॥ ३२ ॥ केशमार्जन्या केशसंस्कारः केशप्रसाधनम् । अत्र स्थले । कामिन्याः अतीवकमनीयायाः । कामिना पूर्णानंदवतापि । ध्रुवम निश्चितम् । तत्स्थलमधुना 'शृंगारवट' इति प्रसिद्धम् । सखीवाक्यमिदम् ॥ * ॥ कृष्णजान्वन्तरुपविष्टायास्तस्याश्चिह्नं दृष्ट्वा पुनर्विपक्षा आहुः–केशानां प्रसाधनम् । अत्रत्यवनदेवतादत्तकंकतिकयेति बुध्यते । कामिन्याः न तु प्रेमवत्याः, स्वसखीरपि वंचयित्वा कामुकं नीत्वा रहोगतत्वात् । कामिना न तु प्रेमवता, प्रेमवतीनामप्यस्माकं विरहपीडाननुसंधानात् । ततश्च तानि–तैः, प्रसूनैः केशैर्वा कान्तां कामिनीं चूडयता नर्मणा पौरुषं व्यंजयितुं चूडावतीं कुर्वता इह ध्रुवमुपविष्टमिति । रहःकेलिर्वार्ताप्यभूदिति भावः । "विन्मतोर्लुक्" इति मतुपो लुक् ॥ अत्र **तोषिणी**–गर्भकाख्यमालाखंडपतनं दृष्ट्वा पुनर्विपक्षाः प्राहुः--केशेत्यर्द्धेन । तु शब्दो भिन्नोपक्रमे । हीति पाठे निश्चये । प्रसाधनप्रयोजनं सूचयति--कामिन्याः कामिनेति । कामक्रीडासुखार्थमित्यर्थः । तादृशोपवेशं दृष्ट्वा सख्यस्त्वाहुः--तानीत्यर्द्धेन । चूडयतेति--ज्ञानं तु स्वदेशे तादृशवेशस्य प्रायशो दृष्टयेति ज्ञेयम् ॥ ॥ ३३ ॥ तथा चेत् अनाकृष्टश्चेत् । तत्राशंकायाम् आह उत्तरं कामिनामिति । रेमे सुरतलीलामनुबभूव । आत्मनि स्वरूपानंदे रतः । आत्मन्यारामः क्रीडा यस्य सः । "आत्मरत आत्मक्रीडः" इति श्रुतेः । अनेन

१ पदानीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषणद्वयेन विटवृत्तिनिषेधोऽसूचि मुनिना । भगवत्प्रीतिसाधनभक्तिज्ञानादितारतम्यात्प्रीतितारतम्यं सूच्यतेऽत्र । तथा चान्या गोप्य इंद्रियवृत्तयः, कृष्णनीता तु भक्तिर्बुद्धिर्वा ज्ञेया । बुद्धिमता तत्पदानि तत्तदर्थबोधकत्वेन योज्यानीति संतोष्टव्यम् । शोकादिकं च गुणनिमित्तमत एवाखंडित इत्युक्तम् ॥ * ॥ तदेवं गोपीनामुक्तिभिरेष तस्याः सौभाग्यातिशयं दर्शयित्वा स्वयमपि तमुपपादयति—रेम इति । आत्मारामोऽपि तया सह रेमे, तत्र हेतुः—कामिनामिति । 'स्वात्मरतः' इति पाठे आत्मारामशब्देन पौनरुक्त्यापातादेवं व्याख्येयम्—च एवार्थे । तयैव सहात्मना यत्नेन रतं रमणं यस्य सः 'आत्मा यत्नो धृतिर्बुद्धिः' इत्यमरः । आत्मारामतायां तादृशसुखलाभाभावादेव तावान्यत्न इति भावः । ननु तर्हि तस्याऽपूर्णत्वं प्रसक्तमतः अखंडितः, तदपि पूर्ण एव न तु खंडितः तस्याह्लादिनीशक्तित्वेन स्वरूपभूतत्वादिति भावः । ह्लादिनीशक्तित्वमपि सर्वाह्लादसारो यः प्रेमा तस्यापि परमावधिर्यो महाभावस्तद्रूपत्वादेव हेतोर्भगवत आत्मारामत्वेन ह्लादमात्ररमणादपि ह्लादमहासारभूतया तया सह रमणस्याधिक्यमस्त्येव । तदुक्तं तत्र—"ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी । तत्सारभूता राधेयम्" इति, "महाभावस्वरूपेयं गुणैरतिवरीयसी" इति च।ततश्चात्मारामोऽपि तया सह स्वात्मरतः स्वात्मरतोऽप्यखण्डितः पूर्ण एव रेमे इत्यन्वयः। तेन च भगवत्तत्त्वानभिज्ञानां प्राकृतविवेकिनां हितं च तेभ्यः स्वविलासतत्त्वस्य गोपनं च चकारेत्याह—कामिनामिति । कामवशैः स्त्रीवशैश्च न भाव्यमिति लोकाञ्शिक्षयामासेत्यर्थः । कामवशत्वे सति पुमांसो दीनाः स्युर्दैन्ये च सति स्त्रियो दुरात्मानः स्युरित्यर्थे भगवान्भगवत्प्रेयसी च प्रमाणयति । यतस्ते इतस्ततो जल्पंत उज्ज्वलप्रेमरसतत्त्वगोपनस्य हेतवो बभूवुरिति भावः । तथा दर्शयन्नेव प्रेमरसतत्त्वं च गोपयन्निति चैवशब्दाभ्यामेव व्याख्येयम् । यद्वा—कामिनां संबन्धे दैन्यं दर्शयन् 'आत्मवन्मन्यते सर्वम्' इति न्यायेन ये कामिनस्ते दीनमेवापश्यन्, याश्च स्त्रियः कामिन्यस्ता दुरात्मानमेवापश्यंस्तत्प्रयोजकीभवन्नित्यर्थः । यद्वा—कामिनां दैन्यं दर्शयन्निति—कामिभिः सुरतप्रार्थनादिना दीनैर्भवितव्यं स्त्रीभिस्तत्रासंमत्या दुरात्मभिर्भवितव्यमिति दर्शयन् रसिकजनाञ्ज्ञापयन् । एवमेव रसपोषो नान्यथेति भावः ॥ अत्र **तोषिणी**—तदेवं गोपीजनमुखेनैव तया सह तल्लीलां प्रशंस्य स्वयमपि प्रशंसति—रेमे इति । स्वैः स्वांशरूपैर्वैभवैर्वैकुंठीयलक्ष्म्यादिभिर्गोष्ठसंबंधिप्रेयस्यादिभिश्च हेतुभिरपरापेक्षारहितया तत्तदंशिन्यात्मनि स्वस्मिन्नेव रतः।स्वेनैव पूर्णकाम इत्यर्थः।तादृशोऽपि तथात्मारामः स्वरूपानंदावेशतत्पर इत्यर्थः।तादृशोपि तया हेतुना रेमे तत्तदनादृत्य नंदति स्म, तत्र हेतुस्तयेत्यर्थः। तच्छब्दस्य वक्तृबुद्धिस्थवैलक्षण्यव्यंजकत्वात्सर्वाधिकतत्प्रेमाश्रयविषयकरूपयेत्यर्थः। 'रेमे तया चात्मरतः' इति पाठे आत्मारामशब्देन पौनरुक्त्यापाता त्तत्पूर्णकामत्वादेवात्मरत इति लभ्यते । च शब्दश्च यथा तया तस्य रमणं ताभिर्वितर्कितं तथा रेमे चेति बोधयति । तदेवमपि पूर्वमेव विवक्षितम् । ननु ताभिर्लक्ष्म्यादिभिः प्रेयस्यादिभिरपि तस्य रमणं दृश्यते, तत्राह—अखंडितः। अनया हेतुना यथा ततस्ततः खंडितः स्यात्स्वपतेः सकाशात्खंडितानायिकावन्मनसा विच्युतः स्यान्न तथास्याः सकाशादयं लक्ष्म्यादिभिर्हेतुभिर्न कदाचिदपीत्यर्थः । अतः प्रेमनिर्जितत्वादनेन तस्याः स्वं सर्वं समर्पितमिति भावः । तच्च प्रियजनप्रेमवशत्वं तस्य महानेव गुण इति पूर्वं बहुशो लिखितं, श्रीभागवतामृते च विवृतम्। तदेवं तस्या एतादृशः प्रेमा येन तादृशोऽप्यसौ वशीचक्रे, तस्य चतादृशो येन तादृशात्मारामतापि तिरश्चक्रे।तदेवं तादृशालंबनत्वप्रेमवशत्वहीनाः कामिनः कामिन्यश्च स्वमहिम्ना परास्ततया दर्शिता इत्याह—कामिनां दर्शयन्निति। अत्र कामिनामिति मलमूत्रादितया परिणामिभिरन्नजलादिभिस्तर्प्यमाणो यो देहस्तर्पणेच्छारूपकामस्वभावानां न तु सच्चिदानंदविग्रहतया स्वतस्तृप्तानां न तु वा प्रियजनतर्पणमात्रस्वसुखलक्षणप्रेमस्वभावानामित्यर्थः । तेषां दैन्यं दुर्गतत्वं तथा स्त्रीणामपि मलमूत्रादिलक्षणानां न तु तस्यापि रमणहेतुभागवतसच्चिदानंदेत्यादिलक्षणानामित्यर्थः । तथा च तासां तद्विरोचनयोग्यता वक्ष्यते—'ताभिर्विधूतशोकाभिः' इत्यादिना । तदन्यस्त्रीणां दुरात्मताम् । तादृशदुर्गतनायकं वशीकृत्य हर्षगर्वादिदुष्टस्वभावतामित्यर्थः । तदुक्तं श्रीरुक्मिणीदेव्या—'त्वक्श्मश्रुरोमनख—' इत्यादिना । अत्र श्रीकृष्णस्य तावद्वैलक्षण्यमुक्तमेव । 'या ते पदाब्जम्' इत्यादौ तद्वैलक्षण्यानुभवयोग्याश्च काश्चिदेव तद्विलक्षणा एव भवंतीति ज्ञापितम् । तदेवं तेषां च दैन्यं तासां दुरात्मतां दर्शयन्निति "दर्शयद्विधुपराजयं रमावक्त्रमुल्लसति धृतलांछनम्" इतिवत्, 'सरसिजोदयश्रीमुखम्' इतिवच्च वाग्भंग्या स्वतस्तत्तन्निष्कर्षातिशय एव प्रतिपादितः, न तु बुद्धिपूर्विका । तेन तद्दर्शनेऽसति स्वात्मरतत्वादेक कामिदैन्यादिदर्शनार्थमुपहासकजनवत्तदनुकरणमपि न घटते इति।अन्यथा

१ श्रीशुकः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्येवं दर्शयंत्यस्ताश्चेरुर्गोप्यो विचेतसः ॥ यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने ॥ ३५ ॥ सा च मेने तदात्मानं वरिष्ठं सर्वयोषिताम् ॥
हित्वा गोपीः कामयाना मामसौ भजते प्रियः ॥ ३६ ॥ ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥ न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३७ ॥
एवमुक्तः प्रियामाह स्कंध अरुह्यतामिति ॥ ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ३८ ॥

मिति रेमेऽत आह । कामिनामिति ॥ ३४ ॥ ३५ ॥ स्त्रीणां दुरात्मतामाह सा चेति द्वाभ्याम् । कामो यानमागमनसाधनं यासां ता गोपीर्हित्वा मामेव भजत इति हेतोः सर्वयोषितां मध्ये आत्मानं वरिष्ठं मेने इति ॥ ३६ ॥ ३७ ॥ कामिनां दैन्यं दर्शयति । एवमुक्त इति । अखंडितत्वमाह । ततश्चेति । तस्यां स्कंधारोहोद्यतायामंतर्हित

तु न व्याख्यातम् । भक्तप्रेमवशता तु 'नाहमात्मानमाशासे' इत्यादिषु बहुषु संमतैव ॥ ३४ ॥ राक्षस्या बुद्धेः स्वभावमाह—। इत्येवम् पूर्वोक्तविधया ॥ * ॥ वृषभानुनंदिन्याः सर्वाधिकमुज्ज्वलरसस्य संभोगमंशं निर्वर्ण्य विप्रलंभमपि वर्णयितुं तद्बीजमुत्थापयति—यामिति ॥ अत्र **तोषिणी**—अत्र इत्येवमिति पद्यार्द्धद्वयं तेषामसंमतम् । पूर्वार्द्धे सति रेमे तयेत्यस्य शुकोक्तित्वासंगतेः, उत्तरार्द्धे सति सा चेति मात्रोत्थापनासंगतेः ॥ ॥ ३९ ॥ वरिष्ठम् सर्वोत्कृष्टम् ॥ * ॥ सा चेति । पूर्वं सर्वाः सौभाग्यमदयुक्ता आसन्नधुना सा च, तत्र हेतुः—हित्वेति । कामयानाः कामयमानाः । यद्वा—कामेन यानमागमनं यासां ताः । अत एवान्यगोपीसौभाग्यहेतुको यः पूर्वं मान उद्भूतः सोऽपि निश्शेषेणैव शांतः ॥ अत्र **तोषिणी**—तदेवं तयोस्तं प्रेमाणं प्रशंस्य प्रकृतं तादृशं तद्विलासमयं मानं तत्प्रसादनादिकमपि तत्पोषणार्थं वर्णयति—सा चेति सपादत्रयद्वाभ्याम् । सा च तदा मेने इत्यनेन पूर्वं तासु मध्ये वर्तमानाया अपि तादृशो मदो नासीदिदानीमेव जात इति लभ्यते । तच्चैवं तादृशभावे हि तासां द्विधा मानावस्था संभवति, कांतैकस्फुरणे हर्षादिप्रचुरस्थायिमयी कथंचिदन्यस्फुरणे गर्वादिप्रचुरस्थायिमयीति च । अतस्तस्या गाढानुरागप्राधान्येन तदेकस्फुरणमय्या बहुकालं व्याप्य हर्षादिमय्येव जाता, संप्रति कथंचिद्वाह्यज्ञाने तु परेति आत्मवरिष्ठत्वे हेतुः । गोपीः सर्वा एव तत्रापि कामयानाः कामयमाना अपि हित्वाऽसावनिर्वचनीयचरित्रमाहात्म्यः, परमस्वतंत्रोऽतिदुर्लभ इत्यर्थः । तत्रापि प्रियः यदेकप्रेमकर्ता सन्भजतेऽनुवर्तते । अत्रान्यस्फुरणेऽपि गोपीनामेव स्फूर्तिर्न तु पूर्वास्विव सामान्यस्त्रीणामित्येतदंशेऽपि वैशिष्ट्यं दर्शितम् ॥ ३६ ॥ भक्त्या लभ्यो नान्यथेति भावं दर्शयति—तत इति । ततो वरिष्ठत्वमननात् दृप्ता । केशवम् सर्वेश्वरम् । न पारये न शक्नोमि । सर्वथाहं तवाधीनेत्याह—नयेति ॥ * ॥ वनस्योत्कृष्टप्रदेशं गत्वा केशवं केशान्वयमानं प्राक्कृतनर्मद्योतकचूडामुन्मोचयंत्यास्तस्या विचित्रवेणीत्वेन ग्रथ्नंतम् । अत एव दृप्ता, स्वाधीनकांताया दर्प एव रसमावहतीति भावः । चलितुं न पारये इति । बहुवनभ्रमणोत्थो मे श्रमोऽभूदिति भावः । ननु मुग्धे ताभ्यो दूरमग्रे हृद्यं स्थानांतरं गंतव्यमिति चेत्तत्राह—नयेति । पूर्ववन्मां वहन्नित्यर्थः । ननु किमग्रिमप्रदेशे अन्यजनदुष्प्रवेशं कुंजांतर्गतं पुष्पतल्पं त्वां नयामि, किं वा पुष्पाभरणार्थं पुष्पोद्यानम्, तत्राह—यत्र ते मन इति ॥ अत्र **तोषिणी**—ततो वरिष्ठमननानंतरम् । वनप्रदेशविशेषं तेनैव सह गमनक्रमेणाग्रतो गत्वा दृप्ता गर्विता सती केशवं केशान् तदीयानेव वयते ग्रथ्नाति तमत एवाब्रवीत् । किम्, तदाहुः—न पारये इति । बहुविधभ्रमणेन परिश्रांतत्वादिति व्याजमयी हेतुव्यंजना । ननु ताभ्यो दूरमग्रे स्थानांतरं गंतव्यमिति चेत्, तत्राह—नयेति । पूर्ववदंके निधाय त्वमेव नयेत्यर्थः ॥ ३७ ॥ शुद्धबुद्धेः स्वभावं दर्शयितुमाह—सा वधूरिति । ततः स्कंधारोहानुज्ञानंतरम् । इत्यर्थ इति—निजस्वातंत्र्यं बोधितवांस्तस्या इति भावः ॥ * ॥ ततश्च कृष्णेन मनस्येवं विचारितम्—अहो अनया स्वाभाविकः स्वधर्मः परित्यक्त एव, न हि सन्नायिका पुष्पतल्पं प्रति स्वनयने वचसा नायकाय संमतिं दत्ते । यदि चानया वाम्यरूपस्स्वधर्मस्त्यक्तस्तदा मयापि नायकेन संभुक्तकांतानुवर्तित्वलक्षणो

१ गोपीभ्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ॥ दास्यास्ते कृपणाया मे सखे दर्शय सन्निधिम् ॥ ३९ ॥

इत्यर्थः ॥ ३८ ॥ अनुतापमाह । हा नाथेति ॥ ३९ ॥

दाक्षिण्यमयः स्वधर्मस्तत्कृत्य एव, न हि द्वयोरेव दाक्षिण्ये वाम्ये वा रसः सुरसः स्यात् । न चात्र रसिकलोकैरहं दूषयणीयः, रसो हि नायिकाप्रक्रांतपरिपाटीक एव साधुर्भवेत् । किञ्च, महाप्रेमवत्या अस्या मद्विप्रलंभ जनितदशाविशेषदिदृक्षा साक्षादेव वा चिरं मे वर्तते, साप्येतदवसरे पूर्णा भविष्यति । मत्संश्लेषजनितमस्याः सौभाग्याधिक्यं ताभिरनुभूतमेव मद्विश्लेषजनितामपि प्रेमोद्रेकपरमावधिव्यंजिकां दशामसाधारिणीं दृष्ट्वा ताः परमचमत्कारसिंधुनिमग्ना भवंतु । अस्या मद्विरहवाडवानलज्वालाया अग्रे तासां मद्विरहो दीपदहनायितो भवतु, ततश्चास्याः पूर्णतमाभ्यां संभोगविप्रलंभाभ्यां शृंगाररसोप्यद्य पूर्णतमत्वमापद्यताम् । अस्या अपि विरहे मत्संपादिते सर्वविरहोपशांत्यनंतरं सर्वासामैकमत्ये सति विधित्सितोऽद्य रासोऽपि सेत्स्यति । अन्यथात्वे तत्संगरंगिणा मया तासां मानोऽद्य सर्वथैव दुरुपशम इत्यादीनि बहूनि प्रयोजनानि पर्यालोचयन्सहसैवांतर्द्धेत्सु राह—स्कंध इति । अंतर्दधे तत्रैव स्थित्वा ताः पश्यन्नपि तन्नयनगोचरतां जहावित्यर्थः । तत्र 'नय मां यत्र ते मनः' इति वदंत्या वृषभानुनंदिन्या मनस्येवं विचारितम्—विलासश्रमवनविहारश्रमाखिन्नाया मम क्षणं सुषुप्सा वर्तते अस्यापि स्वापाभावेनैव सर्वरजनीयापनमकल्याणमसुखोदर्कमेव, अतः पुष्पतल्पं नयति चेन्नयतु आवां तत्र स्वप्स्याव इत्यतस्तत्रासंमतिर्न कृता । तत्र भगवतस्तदंतःकरणविज्ञता प्रेमरसमयलीलाशक्त्यैव तिरोधापिता तत्तल्लीलासिद्ध्यर्थमिति ज्ञेयम् । अन्वतप्यत मुहुर्विललाप ॥ अत्र **तोषिणी**—तदेवं तस्याः स्वाधीनभर्तृकत्वोचितं नर्मवचनं श्रुत्वा स्वयमपि सनर्मैवांतर्हित इत्याह—एवमिति पादत्रयेण । स्कंधे मदंसे आरुह्यतामित्याह । इदञ्च नर्मणैव प्रियामित्युक्तेः । तथाहि—" योन्यमुखे दुर्वादः प्रियतमवदने स एव परिहासः । इतरेन्धनजो धूमः सोयमगुरुसंभवो धूपः ॥ " इति । यद्वा—स्कन्धः " स्कंधः प्रकाण्डे काये च बाहुमूलसमूहयोः " इति विश्वप्रकाशात् कायः, स च युक्तत्वाद्वक्षोभागः, इदमपि नर्मैव । त्वर्थे चः, भिन्नोपक्रमे अंतर्दधे चेति समुच्चये वा । तस्याः सकाशादप्यंतर्द्धानेस्मिन्नीर्ष्यापगमात्सपत्नीनामैकमत्यमपि प्रयोजनं ज्ञेयम्, पूर्वान्तर्द्धानेऽपि तदेव चिकीर्षितमिति । एवमेकयैव क्रिययाऽनेकदुर्घटसंपादनेन परमचातुरी दर्शिता । अहो " उपर्य्युपरि बुद्धीनां चरंतीश्वरबुद्धयः" इति भावः । तदेवं संभोगोचितां स्वाधीनभर्तृकात्वमयीं प्रेमपराकाष्ठां दर्शयित्वा सा नर्मण्यपि विप्रलंभे परमदैन्यमोहात्मिकां तत्पराकाष्ठां दर्शयंस्तत्प्राशस्त्यमेव सूचयति—सेति सपादेन । सा तद्दर्शनैकजीवना अन्वतप्यत मुहुर्विललाप॥३८॥हा विषण्णास्मि वने 'हा विषादशुगार्तिषु' इत्यमरः । नाथ आशाप्रद। रमण रतिप्रद। प्रेष्ठ अतीव प्रिय। महाभुज त्रस्तभयवारक । ते दास्याः शिक्षार्हायाः । कृपणायाः कृपार्हायाः । सख इति । नायं सखिधर्मो यो भयस्थाने सखीत्याग इत्याह ॥ * ॥ विलापमेवाह—हा नाथेति । त्वद्वियोगमहाग्निना दह्यमानादस्मद्देहान्मे प्राणाः संप्रति निःसृतप्राया यत्नेनापि मया रक्षितुं न शक्यन्ते, एषां तु त्वमेव नाथेति इतो दर्शनं दत्त्वा शीघ्रमेतान्रक्षेति भावः । न चैषां रक्षामहं स्वार्थमेव प्रार्थये किन्तु त्वदर्थमेवेत्याह—हे रमणेति । सर्वा अप्यन्या गोपीस्त्यक्त्वा रमणसुखविशेषार्थं यामेतावद्दूरं रहः समानैषीस्तस्यां मयि मृतायामेवं रतिसुखमन्यत्रालभमानो मां स्मरंस्त्वमपि दुःखेन विलपिष्यसीति भावः । नन्वस्तु मद्दुःखं तेन तव किम्, तत्राह—हे प्रेष्ठेति । तव मत्प्रेष्ठत्वात्त्वदीयं तद्दुःखं कोटिगुणीभूय मय्येव फलिष्यति, मत्प्राणकोटिनिर्मंछनीयपादाब्जनखैरैकदेशस्य तव तद्दुःखमहं मृत्वापि सोढुं न पारयिष्यामि । अतः कृपया सन्निधाय तदेव दुःखं दूरी कुर्विति भावः । ननु यदि निःसृतप्राया एव प्राणास्तदा तानहमपि कथं विवर्तयितुं प्रभविष्यामि, तत्राह—हे महाभुजेति । त्वद्भुजस्य संजीवनौषधस्य स्पर्शनमात्रेणैव सुस्थसुशीतलीभूते देहेऽस्मिन्प्राणाः स्वयमेवागत्य स्थास्यंतीति भावः । ननु मां विना स्वस्य गतिमेवं जानासि चेन्महाराजकुमारमतिसुकुमारमादरणीयं माम् 'नय मां यत्र ते मनः' इत्यादिष्टवती किमकोपयस्तत्र सकाकुवैय्यग्र्यमाह—दास्यास्ते कृपणाया मे इति । तदानीं विलासश्रमनिद्रालस्याभिभूतयैव दीनया मया तथोक्तं क्षमस्व मा कुप्येति भावः । किञ्चायोग्ययापि मया सह त्वमेव दृढं यत्सख्यमकरोस्तेनैव तथाहमवोचमित्याह—हे सख इति । हे प्रिये तर्हि प्रसन्नोऽभूवं मत्समीपमेहीति चेत्संप्रत्यनुतापदुःखेनांधास्मि त्वं क्व वर्तस इति न पश्यामीत्याह—दर्शय सन्निधिमिति । एतावदेव विलप्य विरहाद् घूर्णनवशात्संमुह्य भुव्यपतदिति ज्ञेयम्, अग्रे मोहितामित्युक्तेः ॥ अत्र **तोषिणी**—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अन्विच्छंत्यो भगवतो मार्गं गोप्योऽविदूरतः ॥ ददृशुः प्रियविश्लेषमोहितां दुःखितां सखीम् ॥ ४० ॥
तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥ अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ॥ ४१ ॥

अन्विच्छंत्यो मृगयमाणाः । अविदूरतः समीपे ॥ ४० ॥ ४१ ॥

विलापमेवाह—हा नाथेति । हा खेदे, आर्तिसंबोधने वा । ततश्च सर्वत्रैव योज्यम् । नाथ स्वामितया पालक । रमण कान्तोचितप्रद । प्रेष्ठ मद्विषयकतदुचितप्रेमविस्तारक । क्वासि एवमेवं मयि स्निग्धोऽपि सं[illegible]स्विकाको क वर्तसे । हाहा तदज्ञानेन मम चित्तं क्षुभ्यतीति भावः । वीप्सातिवैयग्र्येण । पुनरालिंगनादिनिजसौभाग्यस्मारकेण निजरसोद्दीपकतदंगविशेषसौंदर्यस्मरणेन मुह्यंतीवाह—महाभुजेति । पुनरतिदैन्यमाह—दास्या इत्य. पदे । तत्रैव किं पुनरपि ममालिंगनादिलाभाय ममावासं मृगयसीत्याशंक्य नहिनहीत्याह । सखे दत्तनिजसाहचर्य सौभाग्यसन्निधिं निजसंनिधानमपि दर्शय प्रापय । गात्रसाहचर्यदानेन भवतैव जनितवासनानि, संप्रति तत्र मा गृह्णामि किं तु त्वमत्र विद्यस इति मनस्यपि निश्चयतः स्वस्था भवेयमिति भावः । तत्र हेतुः—दास्याः सख्यादावयोग्यायाः । किन्तु, तादृशतत्कृपयैव बलादुत्पादितत्वदेकसुखानुकूल्यतात्पर्याया इत्यर्थः । तत्रापि कृपणायाः तदिदं दुःखं सोढुमशक्तायाः, परिहर्तुं चाजानंत्या इत्यर्थः । अतो न मयि वंचना कार्या, नापि निजानुतापबीजं वक्तव्यमिति भावः । औदार्यनामा चानुभावोऽयम् । तदुक्तम्—"औदार्यं विनयं प्राहुः सर्वावस्थागतं बुधाः ॥" इति ज्ञेयम्, अग्रे मोहितामित्युक्तेः ॥३९॥ गां दृष्टिं पांति रक्षन्ति दुर्विषयगमनराहित्येनेति गोप्य इन्द्रियवृत्तयः शास्त्रविषयाः । मुक्तेः पूर्वमपरोक्षबुद्धेराविर्भावतिरोभावौ क्वचित्स्यातामिति दर्शनाय—प्रियविश्लेषेति । दुःखितामिति—भूतललुठनलग्नधूलिकंटकक्षतरक्तस्वेदबहलाश्रुधाराभिर्दुःखिनीत्येवं ज्ञापिताम् ॥ * ॥ अन्विच्छन्त्यः अन्वेषयन्त्यः । दूरतोऽपि ददृशुरिति तस्या विद्युत्तुल्यकांतिमत्त्वात् । सखीमिति तस्यास्तादृशदशादर्शनेन विपक्षाणामपि तत्र स्नेहोदयात् । किञ्च, उज्ज्वलरसस्य स्वभाव एवायं यत्कान्तस्य कान्तामात्रवियुक्तत्वे ज्ञाते सति कान्तानामीर्ष्याद्वेषाद्यभावः परस्परस्नेहवत्त्वं च । तदुक्तम्—"अत एव हि विश्लेषे स्नेहस्तासां प्रकाशते" इति ॥ अत्र **तोषिणी**—अविदूरतो नातिदूर इत्यर्थः, अतिदूरे व्यवधानसद्भावात्, राकेशशोभाविजयिशोभाविशेषेण दूरेऽपि दर्शनसंभवात् । दुःखितामत एव मोहितां मूर्छितां समदुःखभावनयां विशेषतस्तस्या एकाकिन्या अपि परित्यागदर्शनेन सुतरामीर्ष्यापगमादैकमत्याच्च सखीमित्युक्तम्, किन्तु निजसखीनामत्र प्रेमावेशविशेषो ज्ञेयः ॥ ४० ॥ तया सख्या । मानप्राप्तिम् स्कन्धारोहलक्षणाम् । पक्षे, अपरोक्षलक्षणाम् । दौरात्म्यात् अभिमानात् । अवमानम् त्यागलक्षणम् ॥ * ॥ ततश्च सखीभिरत्युच्चरोदनेन व्यजनादिपरिचर्यया यत्नतस्तत्प्रबोधे संपादिते सति अयि प्रियसखि स्ववृत्तान्तं कथ्यतामिति ताभिः पृष्टया तया कथितम्—अयि प्रियसख्यः कथं भवतीभ्यो विच्छिन्नाहमभूवमिति मुग्धाहं परतंत्रा नाज्ञासिषं, किन्तु मानप्राप्तिरवमानश्च दौरात्म्यादेवेति निश्चिनोमि । युष्मान्वरःसहस्राः प्रेमवतीरवमत्य स्वविरहानलेन ज्वालयित्वा मह्यमेकस्यै यत्सौभाग्यं दत्तम् इदं तस्य दौरात्म्यम् । तं दुर्लीलमहाराजपुत्रं प्रति वराक्यपि मुग्धा 'न पारयेऽहं चलितुं नय माम्' इति यदवोचमेतत्तु ममैव दौरात्म्यम्, यत एतावानवमानः प्राप्त इत्युभयथापि मे महन्मनोदुःखमेवेति स्वकान्ते तासु स्वस्मिंश्च क्रमेणासूयाविनयदैन्यानि व्यंजितानि । अत्र श्रीमुनींद्रेण दौरात्म्यशब्दप्रयोगस्तु तस्या वचनानुसारादेव । वस्तुतस्तु—श्रीकृष्णाद्दूर आत्मा यस्याः, दूर आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यं तस्मात् । विश्लेषादित्यर्थः । विस्मयं परमं ययुरिति—प्रियसखि भवत्याः सौभाग्यमुचितमेव नात्र तस्य दौरात्म्यं रतिश्रांतायाः स्वाधीनभर्तृकायास्तव कांतं प्रत्याज्ञापनमपि न दौरात्म्यं प्रत्युत रसावहमेव, किन्त्वनुकूलनायकेन संभुक्तकान्ताया यदाज्ञोल्लंघनमेतादृशदुरवस्थाप्रापणं च एतदेव रसप्रतिकूलं दौरात्म्यव्यंजकम् । हन्तहन्त महारसिकशेखरस्य महाप्रेमवतो दयानिधेस्तस्य कथमेवं चिकीर्षितमभूदिति परमं विस्मयं प्रापुः ॥ अत्र **तोषिणी**—अत एव च तया कथितमाकर्ण्येति । रोदनसंज्ञाप्रापणप्रश्नांतरमिति ज्ञेयम् । कथितम् कथं भवतीभ्यो विच्छिन्नाहमिति नाज्ञासिषं, किं तु दूरत एवात्मानुसंधानमकार्षमित्यादिप्रकारकं सर्ववृत्तमाकर्ण्य तत्रापि माधवात् नूनं लक्ष्म्यापि रमणतया स्पृहणीयात्, सर्वगुणादिसंपत्तेः पत्युर्वा तस्मात्स्वत एव परमसौभाग्यलाभलक्षणां संमानप्राप्तिं चाकर्ण्य तत्रैव गर्वलक्षणान्निजदौरात्म्यात्परित्यागलक्षणमवमानं चाकर्ण्य विस्मयमित्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोऽविशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते ॥ तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः ॥ ४२ ॥
तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥ तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः ॥ ४३ ॥

ततस्तयाऽपि सहिताः कृष्णान्वेषणाय वनमविशन् । ततो हरेरन्वेषणान्निवृत्ताः ॥ ४२ ॥ एवं तमप्राप्ता अपि स्वगृहान्नैव स्मृतवत्यः तदात्मिकाः स एवात्मा यासां ताः । तन्मय्य इत्यर्थः ॥ ४३ ॥

कोऽन्वयः । अत्र तु दौरात्म्यशब्दस्तद्दैन्यवचनानुवादात् । वस्तुतस्तु, श्रीकृष्णाद्दूरे आत्मा देहो यस्याः, दूरे आत्मा श्रीकृष्णो वा यस्याः सा दूरात्मा तस्या भावो दौरात्म्यम्, तस्माद्दूरविश्लेषादित्यर्थः । परमं विस्मयमित्यादि कस्य कथितमित्यादित्रयेणाप्यन्वयश्च । तत्सहितांतर्द्धानादिसर्वतच्चरितस्य सहिततच्चरितादपि दुर्वितर्क्यत्वात् । तत्रापि तादृशमानप्राप्तेः स्वेषु परःकोटिष्वप्यदृष्टचरत्वात् । तत्र च सति तस्यामप्यवमानस्य परमासंभवादिति ॥ ४१ ॥ तम इति । पुनर्विरहवेदनया नेत्रेषु तमः प्रविष्टमाज्ञाय । यद्वा–तमसि सांधकारगह्वरवने प्रविष्टं श्रीकृष्णं ज्ञात्वेत्यर्थः । पौर्णमास्यां शशिनः सार्वरात्रिकत्वात्प्रसिद्धतमसोऽसंभवादिति भावः । शास्त्रविषयास्ता दुःशास्त्रान्निवृत्य सच्छास्त्राभ्यासाय यत्नं चक्रुरिति ध्वन्यते । वस्तुतस्तु, तमःशब्दोपलक्षितहृदयगुहाप्रविष्टम् "यो वेद निहितं गुहायाम्" इति श्रुतेः । आलक्ष्य ज्ञात्वा । हरेस्तदुपासनान्निववृतुः तादूप्यमापुः "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति स्मृतेः, 'यस्य देवे परा भक्तिः' इत्यादिश्रुतेः, "भक्तिरेवैनं गमयति" इति श्रुतेश्च । स्त्रिय इति । स्त्रीणामन्धकारावृतवनप्रवेशासामर्थ्यादिति भावः । हरेरिति पाठः स्वामिसम्मतः । तत इत्यस्य पुनरुक्तिसमाधानाय तत इत्यस्यैव हरेरन्वेषणादिति व्याख्यानात् । अन्यथा तत इत्यस्य प्राग्विशेत्रगायोग्यता स्यात्, हरेस्तत इत्यन्वयाद्यसौष्ठवं च ॥ * ॥ ततश्च वैयग्र्येण सखीदत्तहस्तावलंबनया तया सहैव तास्तमन्वेषयामासुरित्याह–तत इति । चंद्रज्योत्स्ना यावद्विभाव्यते लक्ष्यते इति । पूर्णिमारजन्यामपि निबिडवृक्षच्छायावशादेव तम इति । तदुक्तं विष्णुपुराणे–"प्रविष्टो गहनं कृष्णः पदमत्र न दृश्यते । निवर्तध्वं शशांकस्य नैतद्दीधितिगोचरः ॥" इति । वस्तुतस्तु, हंहो खेदसिंधुनिमग्नाः सख्यः घनश्यामतमेऽस्मिंस्तमसि घनश्यामवपुषं तमस्मदवलोकनशंकयैव प्र (नि) लीनीभूय स्थितं मा संकोचयत, यत्रयत्र यूयं यास्यथ ततस्ततोऽन्यत्रैव स पलायिष्यत इत्यलमतिसुकुमारशरीरस्यं तस्य श्रमोत्पादने व्यवसायेनेति विमृश्यैव निववृतुरिति ॥ अत्र **तोषिणी**–यावद्वनं व्याप्य ज्योत्स्ना लक्ष्यते तावद्वनमविशन् । प्रविश्य तमन्वेषयामासुरित्यर्थः । तमसि महांगहनगते प्रविष्टं श्रीकृष्णं पदचिह्नादिना वितर्क्य ततस्तस्माद्वनान्निवृत्ताः ॥ ४२ ॥ इत्यर्थ इति । ध्यानेन तदात्मतां प्राप्ता इति तात्पर्यम् । सत्त्वबुद्धीनां स्वभावमाह–तन्मनस्का इति । तस्य आलापः कथनं यासां ताः । तद्गुणान्न तु दोषान् । गायंत्य इति–"मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद" इत्युक्तेर्भगवतो गीतप्रियत्वादिति । आत्मागाराणि देहगेहानि ॥*॥ तन्मनस्कत्वेनैव पूर्ववदुन्मादस्य मांद्ये तदालापाः 'दृष्टो वः कश्चिदश्वत्थ' इति तमालापन्त्यः।उन्मादस्य मध्यत्वे तद्विचेष्टाः 'कृष्णायंत्यपिबत्स्तनम्' इति वत्तच्चेष्टामनुकृतवत्यः । उन्मादस्य प्रौढत्वे तदात्मिकाः 'कृष्णोऽहं पश्यत गतिम्' इतिवदात्मविस्मृतौ तन्मयीभूताः। पूर्वसंस्कारवशादेव 'गायन्त्य उच्चैरमुमेव' इतिवत्तद्गुणानेवेति।।अत्र **तोषिणी**–ततश्च ततो निवृत्तास्तत्र प्रविष्टस्य तस्य 'व्यथते न किंस्वित्कूर्पादिभिः' इति वक्ष्माणरीत्या दुःखशंकया परमदुःखमग्ना बभूवुरित्याह–तदिति।तादृगवरोधस्थले प्रविष्टे तस्मिन्नेव मनो यसाम् ,ततस्तादृशे तस्मिन्नेव विषये आलापस्तद्दुःखस्मरणमयः संलापो यासाम्, ततस्तस्मिन्नेव निमित्ते विचेष्टा वर्त्मान्तरेण तन्निष्क्रमणसंभावनया परितः परिभ्रमणरूपा यासाम् ,ततस्तस्मिन्नेवात्मा यत्नो यासां तथाभावाः सत्यस्तस्य निलीनताकारणतादृशापन्नया दूरस्ववशीभावमयक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः पुलिनमागत्य कालिंद्याः कृष्णभावनाः ॥ समवेता जगुः कृष्णं तदागमनकांक्षिताः ॥ ४४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे रासक्रीडायां कृष्णान्वेषणं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ गोप्य ऊचुः ॥ जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि ॥ दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते ॥ १ ॥

किं तु पूर्वं यत्र श्रीकृष्णेन संगतिरासीत्तदेव कालिंद्याः पुलिनमागत्य कृष्णं भावयंति ध्यायंतीति तथा ताः कृष्णस्यागमनं कांक्षितं यासां ता मिलिताः सत्यः कृष्णमेव जगुरिति ॥४४॥ इति श्रीमद्भागवते म० दशमपूर्वार्धे टीकायां त्रिंशत्तमोऽध्यायः॥३०॥एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः ॥ कृष्णमेवानुगायंत्यः प्रार्थयंते तदागमम् ॥१॥ जयतीति । हे दयित ते जन्मना व्रजोऽधिकं यथा भवति तथा जयत्युत्कर्षेण वर्तते।यस्मात्त्वमत्र जातस्तस्मादिंदिरा लक्ष्मीरत्र हि श्रयते व्रजमलंकृत्य वर्तते । एवं व्रजे सर्व

पादिलक्षणान् गुणानेव केवलतया स्फुरितान्, न तु स्वपरित्यागादिदोषान्, गायन्त्यः गानेन तं श्रावयन्त्य आत्मानमपि न सस्मरुः । किमुतागाराणीत्यर्थः ॥ ४३ ॥ किमितस्ततो भ्रमंत्यो गानं चक्रुस्तत्राह—किं त्विति । यत्र पुलिने । यत्र त्यक्तास्तत्रैवास्मान् कृपया सांत्वयितुं नूनमागतः स्यादिति हेतोः पुनस्तत्रागत्येत्यर्थः । समवेताः 'दुःखं पंचभिः सह' इत्युक्तेरेकीभावं प्राप्ताः ॥ * ॥ हंतहंत यत्रयत्र तदन्वेषणार्थं यामस्ततस्ततः स पलायिष्यते तस्माद्वनपर्यटनकष्टं किं तस्योत्पादयिष्यामस्तदिच्छां विना स न लभ्यः, "यमेवैष वृणुते तेन लभ्यः" इति श्रुतिं प्रमाणीकुर्वत्य इव तद्दर्शने तत्कारुण्यमेव हेतुस्तत्कारुण्यस्य च तत्संकीर्तनमेव हेतुरिति सिद्धान्तं प्रकाशयंत्य इव पूर्वं यत्र तेन संगतिरासीत्तदेव स्थानमाजग्मुस्तमेव जगुरित्याह—पुनरिति ॥ अत्र **तोषिणी**—ततस्तत्रापि स्वैस्तस्यावरोधशंकया सर्वमपि तदन्वेषणमार्गं परित्यज्य सर्वासां समेतानामस्माकं निकट मिदं निर्व्यवधानतया दूरप्रसरवच्छब्दं तदेव लीलापुलिनं गतानां दैन्योपालंभादिमयमुच्चैर्गानमाकलय्य स्वयमेव करुणया श्रीकृष्णस्त्वरितमागमिष्यतीति तं भावयमानास्तथा चक्रुरित्याह—पुनरिति ॥ ४४ ॥ इति श्रीम द्भागवते भावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रिंशोध्यायः ॥ ३० ॥ निराशाः कृष्णोपलब्धौ । ताः गोप्यः । तदागमम् कृष्णागमनम् (१) । वेदांतानधिकारिणां साधनचतुष्टयसंपत्तिरहितानां हरिकीर्तनमेव तदुपासनं स्यात्तत्प्रसादजनकत्वेनेत्यतः स्त्रीभूतानां गोपीनामुपासनमाह । चित्ते सन्निहितत्वात्त इति । व्रजंति गोगोपा वासार्थमत्रेति व्रजो गोपावासस्थानम् । श्रयत आश्रयते । त्वयाऽविनाभूतत्वाच्छ्रिय इति भावः । अत्र व्रजे । यतस्त्वदर्थं धृतप्राणा अतो हेतोः । अन्यथा प्राणहानिः स्यादिति भावः । दयितविरहे दयिता न जीवेयुर्नाम, तत्राह—त्वयि धृतेति । युष्मान्विहायाहमन्येषां प्रत्यक्ष एवेति चेदत्राहुः—यद्वेति । कालांतरे दर्शनविषयी भवामि नाधुना, तत्राहुः—यद्वेति । एवमधुनैवैते गोपीजना मां विचिन्वते मृगयंत इति हेतोस्त्वया दृश्यतामिति संबंधः । कनकमंजरीवृत्तम् "कनकमंजरी नश्र रौ लगौ" इति सूत्रात् ॥ * ॥ पूर्वं जगु रित्युक्तं तदेव किमित्यत आह—गोप्य ऊचुरिति । हे दयित ते जन्मना व्रजो जयति । संबंधिविशेषानुक्त्या सर्वेभ्य एव लोकेभ्य उत्कर्षेण वर्तत इत्यर्थः । वैकुंठलोकोऽपीदृश इति तद्व्यावृत्त्यर्थमाह—अधिकं यथा स्यात्तथेति। वैकुंठः सर्वोत्कृष्ट एव व्रजस्तु सर्वोत्कृष्टतम इत्यर्थः । तल्लिंगान्तरमाहुः—इन्दिरा महालक्ष्मीः शश्वत् श्रयते सेवते 'श्रिञ्—सेवायाम्' । वैकुंठे तु सैव सेव्यते इत्यतो वैकुंठादपि व्रजः सर्वसमृद्धिपूर्ण इति भावः । एवं तद्धेतुक महासुखपरिपूर्णे व्रजे त्वत्प्रेयस्यो वयमेव सर्वलोकादृष्टश्रुतचरपरमासह्यदुःखं यदनुभवामस्तस्मात्त्राणं त्वां न प्रार्थयामहे, किं त्वेकवारं दृष्ट्वा स्वनयने सफलयेत्याहुः—अत्र वृंदावने हि निश्चितमेव दृश्यताम् । किं द्रष्टव्यम्—तावका जनास्त्वां विचिन्वत इति । कथमेतावत्संतापवत्योऽपि एता न विपद्यंत इति मा संशयिष्ठा इत्याहुः—त्वयि धृता अर्पिता असवो यैस्ते, त्वयैवोन्मादितैस्ते यद्यस्माकमसवोऽस्मास्वेवास्थास्यंस्तदा तेषु विरहानलदग्धेषु सत्सु वयमेतावत्क्षणे मृत्वा सुखिन्य एवाभविष्यामेति । त्वयि तु स्वनाथे महासुखिनि ते सुखेनैव वर्तंते इति कथमसूनां सुखे सति देहा विपद्यन्तामित्यतस्तवास्मद्दुःखदर्शना त्मकं सुखं शाश्वतिकमेवेति भावः । अत्र श्लोके प्रतिपादं द्वितीयाक्षरस्यैक्यं तथा प्रथमाक्षरसप्तमाक्षरयोश्च कुत्रचित् ॥ अत्र **तोषिणी**—कृष्णैकगम्यो वागर्थो यासां लेखितुमिष्यते ॥ गोप्यस्ताः करुणामय्यः स्वीकुर्वंतु मदाग्रहम्॥ (१) । पीतश्रीगोपिकागीतसुधासाररसश्रियाम् ॥ श्रीधरस्वामिनां किंचिदवशिष्टं विचार्यते ॥ (२) । अधिकं सर्वतः व्रजे न तत्रतत्र ह्यालक्ष्यते, हि यतः अत्र व्रजे शश्वन्निरंतरं, यद्वा—अधिकमित्यस्यात्राप्यन्वयः । प्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरदुदाशयेसाधुजातसत्सरसिजोदरश्रीमुषा दृशा ॥ सुरतनाथ तेऽशुल्कदासिका वरद निघ्नतो नेह किं वधः ॥ २ ॥

स्मिन्मोदमानेऽत्र तु तावकास्त्वदीया गोपीजनास्त्वयि त्वदर्थमेव कथंचिद्धृता असवो यैस्ते त्वां विचिन्वतेऽतस्त्वया दृश्यतां प्रत्यक्षीभूयतामिति । यद्वा अस्माभिर्भवान् दृश्यताम् यद्वा एवं त्वया दृश्यतामेते विचिन्वत इति ॥ १ ॥ अत्र स्वतंत्राणां बहूनां वक्तृत्वादपरा आहुरिति सर्वश्लोकेष्ववतारणास्ति । अथापि संगतिरुच्यते । तत्र विचिन्वंतु मम किमिति चेत्तत्राहुः शरदिति । शरदुदाशये शरत्कालीने सरसि साधु जातं सम्यग्जातं यत्सरसिजं सुविकसितं पद्मं तस्योदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तथा तया दृशा नेत्रेण हे सुरतनाथ संभोगपते वरदाभीष्टप्रद अशुल्कदासिका अमूल्यदासीर्नो निघ्नतो मारयतस्ते तव त्वया क्रियमाण इह लोकेऽयं वधो न भवति किम् । शस्त्रेणैव वधो वधः किं

मुहुराधिक्येनेत्यर्थः । इंदिरेति संपत्तदधिष्ठात्र्योरभेदेन निर्देशः तदधिष्ठानेनैव तद्वृद्धेः । एवं तत्प्रभावेणात्र्यानां सर्वेषामेव सर्वमंगलजातं, केवलं दैवहतानामस्माकमेव सद्यः दुःखं तत्राप्यधिकमिदं सर्वज्ञेन परमदयालुना स्वत्प्राणवल्लभेनापि न ज्ञायत इति तदधुनान्यत्तावदस्तु तद्दर्शनमात्रमपि जायतामिति व्यंजयितुं प्रार्थयन्ते—दयितेति।दृश्यताम् ज्ञायताम् । दुःखदर्शने सति परदुःखकातरोऽवश्यं साक्षाद्भवेदिति तु निगूढोऽभिप्रायः।किं तद्दुःखम्, तदाह—दिक्ष्विति । अनेन बहुलपरिश्रमादिकं परिभ्रमणं च सूचितम्।तावकास्त्वया स्वीकृतास्त्वदीयताभिमानवत्यो वा । अत एव विचिन्वते अन्वेषणेन बहुदुःखमनुभवंतीत्यर्थः।अतस्तावकत्वेनैव तद्दुःखमन्यथा तदनुपपत्तिरिति भावः।तत्र दयितेत्यनुकंपां जनयन्ति 'दयतेऽनुकम्पते' इति निरुक्त्या। दैन्यात् दयते चित्तमादत्त इति क्षीरस्वामिनिरुक्त्यनुसारेण किंचिदुपालंभतोपि तामेव । ननु कैतवरहितं प्रेम न तिष्ठति मानुषे लोके, यदि भवति ''कस्य विरहो विरहे भवति, को जीवति''इति न्यायेन दयितस्य विरहे दयिता न जीवेयुर्नाम, सत्यं, त्वत्त एव न म्रियन्ते इत्याहुः—त्वयि निमित्ते धृतासवः त्वत्प्राप्त्याशया जीवंतीत्यर्थः।यद्वा—त्वयि विषये प्राणा इंद्रियाणीति यावत् । त्वन्यस्त त्वेन पश्यन्तीत्यर्थः । एषु श्लोकेषु पदवर्णादिसाम्यापेक्षया प्रायः प्रतिपादं द्वितीयाक्षारस्यैक्यं तथा दलद्वये कुत्रचिदन्यत्रापि क्वचित्प्रथमाक्षरसप्तमाक्षरयोश्चेति कुत्रापि कथंचिद्विचार्यम् । तच्च मुक्ताफलटीकायां विवृतमस्ति । अत्र दृश्यतामित्यत्र स्वामिचरणानां प्रथमार्थः पचेर्विक्लित्तिविक्लेदनावद्दृशेरपि प्रकाशप्रकाशनार्थत्वात्समर्थनीय इति ॥ १ ॥ अवतारणा अवतरणिका । सङ्गतिः प्रसङ्गावसरादिरूपा । तत्र ताः । तत्र आक्षेपे । शरदुदाशय इत्यलुक्समासः । किं शस्त्रेण शतघ्न्यादिना । यतो दृशा भवत्येव वधोऽतः कारणात् त्वन्नेत्रहतास्मत्प्राणप्रत्यर्पणार्थम् । इति भाव इति—दर्शनाभावेऽस्माकं प्राणा अस्माकं देहेषु नायास्यन्ति किन्तु गमिष्यंत्येवे त्याशयः । यथासंभवम् यथायोग्यम् । सर्ववाक्यस्य सर्वश्लोकस्य शेषः, अंते योज्यमित्यर्थः । दृशः परमतरकरत्वम् उत्तमकाले जलदुर्गे साधूनामुत्तमद्रव्यांतर्न्यस्तलक्ष्मीतुल्यमहाधनस्य प्राणस्य हरणात् ॥ * ॥ ननु किमहं युष्मभ्यं दुःखं दित्सामि यदेवं सूचयथेति तत्र त्वमस्मान् हंस्येवेत्याहुः—शरदिति । दृशैव सुरतं नाथसि याचसेऽथ च दृशैव वरद अभीष्टसुखं ददासि अथ च तयैव दृशा प्रेमानलपुंजप्रक्षेपिणो निघ्नतोऽशुल्कदासिका अस्मान्मारयतस्तव इह किं न वधः, किं शस्त्रेणैव वधो वधः दृशा वधो वधो न भवति, अपि तु भवत्येव, तस्मात् हे वरद अभीष्टं ददद्देव अभीष्टमैहिकं पारत्रिकं सुखं द्यसि खंडयसीत्यर्थः । किं चास्मासु ते स्वत्वं चेद्भवति तर्हि स्वधनं पालय ज्वालय वा न दोषः । वयं तु त्वया न शुल्केन क्रीता नापि परिणयेन गृहीताः किं त्वशुल्कदासिका वयं स्वयमेव मौग्ध्यादभूमेत्यर्थः । तत्र तस्य मोहनोन्मादनचौरचक्रवर्तित्वमेव हेतुं वदन्त्यो दृशं विशिषंति—शरत्कालसंबंधी य उदाशयः गंभीरस्वच्छजलपूर्णस्तडाग इत्यर्थः । साधु जातं साधुसमयप्रदेशप्रकारतो जातं सत् जात्याप्युत्तमं यत्सरसिजं विकसितपद्मं तस्योदरस्थां श्रियं शोभां संपत्तिं मुष्णाति चोरयतीति तयेति दृशः सौंदर्यसौरभ्यशैत्यसौकुमार्याण्यसाधारणान्युक्तानि । या खलु तादृशं जनदुर्गमप्युल्लंघ्य तादृशाभिजातस्य जनस्यान्तःपुरं प्रविश्य संपत्तिं चोरयति, सा तव दृक् चोरिका केनापि मोहनो न्मादनधूलिप्रक्षेपणोन्मादिताभिरस्माभिः स्वयमेव दत्तं सुरतधनं प्राणांश्च नीत्वा तुभ्यं ददावतः पूर्वमुक्तं त्वयि धृतासव इत्यतो वयं त्वया निर्धनीकृता हता एवेति परःसहस्रस्त्रीवधपातकं त्वया गृहीतमेवेति ध्वनिः । अतः पापाद्भीत्यापि दर्शनं देहीत्यनुध्वनिः ॥ अत्र **तोषिणी**—शरदुदाशय इति जन्मकालयोस्साद्गुण्यं दर्शितम् । साधुजातेति जन्मनः । सदिति जातेर्व्यक्तेश्च । उदरेति तत्रापि तदंतः कोशस्येति कमलस्य शोभा परम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् ॥ वृषमयात्मजाद्विश्वतो भयादृषभ ते वयं रक्षिता मुहुः ॥ ३ ॥

दृशा वधो वधो न भवति किंतु भवत्येव । अतस्तव दृशाऽपहृतप्राणप्रत्यर्पणाय त्वया दृश्यतामिति भावः । त्वया दृश्यतामिति यथासंभवं सर्वत्र वाक्यशेषः ॥ २ ॥ किं च बहुभ्यो मृत्युभ्यः कृपया रक्षित्वा किमितीदानीं दृशा मन्मथं प्रेष्य घातयसीत्याहुः । विषेति । हे ऋषभ श्रेष्ठ विषमयाज्जलायोऽप्ययो नाशस्तस्मात्तथा व्यालराक्षसा दघासुराद्वर्षान्मारुताच्च वैद्युतानलादशनिपाताद्वृषोरिष्टस्तस्मान्मयात्मजाद्व्योमाद्विश्वतोऽन्यस्मादपि सर्वतो भयाच्च कालियदमनादिना रक्षिताः । किमिदानीमुपेक्षस इति

काष्ठा दर्शिता । तादृशतच्छ्रीमुषा स्वश्रिया तच्छ्रियं हरत्येवेत्यर्थः । यत्रयत्र सा स्फुरति तत्रतत्र तच्छ्रीर्न दृश्यते इति नवनवश्रीयुजाऽनया पुनः चोर्यत एव सेति भावः । दृशेत्येकवचनमेकयैव सूचनात् । एकयापि किमुत एताभ्यामिति श्लेषात् । दृशेति सुरतनाथेत्यत्राप्यन्वयः । हि दृशैव सुरतयाचकेति त्वयैवास्मासु तदिच्छा कारिता तत्र च वरदेति वरदानेन दृढीकृता चेति तत्रास्माकं न दोषः । अशुल्कदासिका इति–प्रत्युत गुण एव भवतस्तु सोपि दोषः, संप्रति तु महानेवेत्याहुः–निघ्नत इति । श्लेषेणापि तस्मिन्नेव दोषार्पणाय चौर्यक्रियाभिनिवेशो दर्शितः । स हि चौरेषु त्रिधा संभवति साधूनामपि संपत्त्यादाना दत्युत्कटदोषस्यागणनेन, अतिनिगूढपरवस्तुज्ञानेन, अतिदुर्लंघ्यलंघनेन च । तत्र प्रथमं सत्सरसिजेतिपर्यंतेनोक्तम् । शरदुदाशय इति स्वच्छतादिगुणयुक्तस्य जनयितुः, साधुजातेति जन्मनः, सदिति सद्रूपगुणस्य च प्रशंसनात् । द्वितीयं महाजलान्तः सरसिजोदरे विलीय स्थितत्वेन । तृतीयं च वर्षानंतरकालिकत्वादतिपूर्णस्योदाशयस्य दुरवगाहमध्यदेशत्वेन सहस्रपत्राख्यसत्सरसिजोदरस्य दृग्भिर्दुर्भेदत्वेन चेति । किं च, त्वद्दृयादिव तथा निगूढापि श्रीनायिका मुष्टा ततः सरलानां व्रजवृंदावनयोर्निर्भयं भ्रमंतीनामस्माकं वा का वार्ता, भवत्वस्माकमपि तद्द्वारा मोषणं किं तु सा कृततादृशकौटिल्यापि स्वचक्षुषोरन्तरे रक्षिता वयं तु तादृशसरला अपि बलान्मोषणे प्रत्युताशुल्कदासिकास्तत्रेर्ष्यां त्यक्त्वा निरुपाधितया सेवमाना अपि तद्द्वारा पुनर्निहन्तुमारब्धा इति परमान्याय्यमित्याहुः– निघ्नत इति । नेह किं वध इति । चौर्याल्लोकेन न ज्ञायतां नाम हत्यापि किं न स्यादित्यर्थः । संबोधनद्वयेन चेदं ज्ञाप्यते–अहो जातं तत्सर्वं त्वयैतदर्थमेव मृषा प्रपंचितमिति । अन्यत्तैः । यद्वा–तादृशादृशैव शुल्कदासिकाः । तद्रूपेणैव शुल्केन दासिका इत्यर्थः । तादृशीरपि निघ्नतस्त्यागेन मारयतः । हे सुष्ठुरतानां जनानामुपतापक । नाथतेरुपतापार्थत्वात् । तथा हे निजवरच्छेदक अतो निजदोषपरिहारार्थमप्यागम्यतामिति भावः ॥ २ ॥ इतोप्यधिकमुपालंभमाहुः–किञ्चेति । प्रेष्य प्रेर्य । यद्वा–ऋषभेत्यवतारांतरनाम्ना संबोधयंति, ऋषभदेववत्समाधिनिष्ठत्वात्किन्नास्मान्पश्यसि । यद्वा--यथर्षभावतारेणार्त्ता वृष्टिभयात्प्रजा रक्षिताः पूर्वं स एव त्वं दीनदयालुरित्यभिप्रायः । यथर्षभो गवेन्द्रः परपीडां न वेत्ति तद्वत्किमधुना जातोसीति वा । यद्वा--किमिति रक्षिताः कुतोऽविता मारिताः स्याम चेत्तदैव भद्रमभविष्यदधुना स्वह स्तमारणायावशेषिताः स्त्रीवधोऽतिनिंद्यो भविष्यत्येवेत्यन्ये । इति भाव इति--"अंते रण्डाविवाहश्चेदादावेव कुतो न सः" इति न्यायेन रक्षितोपेक्षा नोचितेत्यभिप्रायः ॥ * ॥ किञ्च जिघांसैव चेत्तव वर्तते तदा पूर्वपूर्ववि पद्भ्यः किमिति रक्षिताः, रक्षित्वा वधः खल्वनुचित एवेत्याहुः–विषमयाज्जलाद्योऽप्ययस्तस्मात् । व्यालराक्षसात् अघासुरात् । वर्षात् इन्द्रकृतवृष्टेः, मारुतात् तृणावर्तात् । वैद्युतानलात् इन्द्रकृतवज्रक्षेपात् । वृषात् आरि ष्टात्, मयात्मजात् व्योमासुरात् । विश्वतोऽन्यस्मादपि सर्वतोभयात्कालियदमनादिना । हे ऋषभ पुरुषश्रेष्ठ स्वरक्षणादेव त्वदेकप्राणा वयं रक्षिताः वर्षादिभ्यस्तु सर्वव्रजरक्षणादेव तदन्तःपातिन्यो वयमपि रक्षिताः । अत एव रक्षके त्वयि विश्वस्य पंचशरज्वालोपशमार्थं वयमागताः, त्वया तु ततोपि कोटिगुणितया स्वविरहानलज्वालया दंदह्यामह इति विश्वस्तघातादपि त्वं न बिभेषीति भावः । अरिष्टव्योमवधस्य भावित्वेपि गर्गभा गुर्यादिमुखतः कृष्णजन्मपत्र्यां श्रवणस्य भूतत्वेनैव भूतनिर्देशः ॥ अत्र **तोषिणी**–एवं परंपरया सर्वसाधारणतया त्वया वयं सदा रक्षिताः स्म एवं तर्हि "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" इति नीतिः कथं न स्मर्यतामित्यभिप्रेत्याह–विषजलाप्ययादिति । विषजलं कालियह्रदजलं तेन पीतेनाप्ययात् गवां गोपानाञ्च मरणात् । व्यालराक्षसात् अघात् 'रक्षो विदित्वाखिलभूतहृत्स्थितः' इत्यनेन तस्यैव व्यालरूपस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न खलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक् ॥ विखनसाऽर्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ॥ ४ ॥

भावः ॥ ३ ॥ अपि च विश्वपालनायावतीर्णस्य तव भक्तोपेक्षाऽत्यंतमनुचितेत्याशयेनाहुः । न खल्विति । हे सखे भवान्खलु निश्चितं यशोदासुतो न भवति किं तु सर्व

राक्षसत्वेन निर्देशः कृत इति । तस्माद्बालवत्सान् गिलितवतो वयं रक्षिता इति सर्वगोकुलजीवनरूपाणां तेषां रक्षणेन गोकुलस्य रक्षणाद्वयमपि रक्षिता इत्यर्थः, इति परंपरा दर्शिता । वर्षमारुताद्वर्ष मिश्रान्मारुतात् तत्रैव 'वज्राश्मपरुषानिलैः' इत्युक्त्या । वैद्युतानलाच्च श्रीगोवर्धनधारणेन त्वया रक्षिता इति सर्वसाधारणता दर्शिता । वृषमयात्मजात्समाहारः, वृषाद्वत्साकारत्वेनागतादपि परिणामे बृहत्त्वदर्शनात् । 'वराहतोको निरगात्' इतिवत् । सर्वं संगृह्याहुः—विश्वतो भयादिति । तत्रतत्र योग्यतामाहुः—हे ऋषभ सर्वश्रेष्ठेति ॥ ३ ॥ तत्तत्त्वमाहुः—अपि चेति । किन्तु अपि तु । बुद्धिसाक्षी चेत्कथं दृश्य इत्यभिप्रेत्याशंकते—नन्विति । तत्र दृश्यत्वे । विखन्यते मैथुनमृते उत्पद्यत इति विखनाः ब्रह्मा कमलजत्वात् । "यो जातः सर्वतः पूर्वं विना मैथुनमात्मनः । विखनाः स हि विज्ञेयः कुद्दालो विखनास्तथा ॥" इति निरुक्तात् । तेन तथा । यद्वा—श्रीयशोदानंदनो न भवान् तस्याः परमदयार्द्रायाः संबंधेनास्मासु दयोत्पत्तेः । अखिलदेहिनामंतरात्मदृगपि न तत्रास्मद्दुःखज्ञानसंभवात् । न च विश्वगुप्तये ब्रह्मणाऽर्थितः तत्रास्माकमपि रक्षायोग्यत्वाद्गोपीजनरक्षणे किं तेन शपथो दत्तः । भक्तानां कुले च नोदेयिवान् तत्र तत्संबंधेन निरुपाधिकृपालुतासंभवात् । किन्तु स भवान् खे आकाश एवोदेयिवान् इत्याकाशगुणत्वेनासंगौदासीनत्वोद्भवात् । यद्वा—नखान् लुनातीति नखलुः शस्त्रविशेषस्तद्वत्तीक्ष्णस्वभावो हि संसारस्तस्माद्गोपायति रक्षतीति नखलुः गोपिकाभक्तिस्तया नंदत्यानंदयाति वेति । संसृतिक्लेशरक्षकस्य तवानंगार्तिहरणं न दुर्घटमिति भावः । यद्वा—न खलु गोपिका वंशी तया नंदयतीति तथा । यद्वा—गोपिकानंदनो भवान्नेति न किं त्वस्त्येवेति काकुः । खलु प्रसिद्धम् । यद्वा—न खलु गोपिकानंदनोस्ति भवानिति दुःखितावाक्यम् ॥ * ॥ अयि शश्वदसमीक्ष्यभाषिण्यो गोप्यस्तिष्ठत सर्वानंदकंदो नंदनंदनोऽहं स्त्रीवधपातकी विश्वस्तघाती च निर्द्धारितस्तदितो निःसृत्य रहसि क्वचिदेवं स्थास्यामि यथा जन्ममध्ये सकृदपि मद्दर्शनं न प्राप्स्यंतीति तदीयभीषणोक्तिमाशंक्यानुतप्तास्तं प्रसादयितुं स्तुवन्ति—नेति । भवान् गोपिकानंदनः खलु न भवति किन्त्वखिलदेहिनामन्तरात्मा अंतःकरणप्रेरकः, दृक् द्रष्टा चेत्यंतर्यामी भवतीति भागुरिगार्गिपौर्णमास्यादिमुखाद्श्रौष्म इत्यतो यथास्मान्प्रेरयसि तथा ब्रूमहे इत्यतो मा कुप्य प्रसीद त्वदाविर्भावकारणं च श्रुतमित्याहुः—विखनसा ब्रह्मणा प्रार्थितः सन् सात्वतां यदूनां कुले उदेयिवान् श्रीयशोदागर्भोदय शैलादाविर्भूतः । नन्वेवं चेज्जानीथ तर्हि किमर्थं रूक्षं ब्रूध्वे, तत्राहुः—हे सख इति । त्वय्यैव रससिंधौ वयं निमज्जिता इति परामृश्य विश्वं पालयन् विश्वांतर्वर्तिनीरस्मानपि पालय कृपयैवेति भावः । यद्वा—स्वप्रेयसीनामेवं दुःखं द्रष्टुं नृदेवतिर्यगादिमध्ये कोऽपि न समर्थः । यथा त्वं दुःखं पश्यन्नपि सुखमास्से तस्मादेवं वितर्कयाम इत्याहुः—नेति । श्रीयशोदायाः परदुःखलवेऽपि द्रुतचित्तायाः कुक्षौ त्वं न जातोऽसि तत्कुक्षेरे कस्यापि लक्षणस्य त्वय्यनुपलंभादिति भावः । तर्हि कोऽहम् ! त्वं सर्वप्राणिनामंतर्यामीति वितर्क्यसे, स एव जीवानां दुःखं पश्यन्नपि तदंतः सुखं वसति । उदासीनशिरोमणेस्तवात्राविर्भावेऽपि किं कारणं न जानीम इत्याहुः—विखनसा ब्रह्मणा स्वसृष्टिवृद्धिमभीप्सुना विश्वगुप्तये विश्वस्मिन् जगत्यत्र गुप्तये त्वं प्रार्थितः त्वद्भक्त्या जीवा मुच्यंत इत्यतस्त्वमवतीर्य गुप्तस्तिष्ठ यथा केऽपि त्वामीश्वरं न मन्यंते तदा च तवेश्वरत्वममन्यमानानामी श्वरानुवर्तिनामपि जरासंधादिवदसुरत्वमेव भविष्यति, तत एव मे सृष्टिवृद्धिर्भवित्रीति ब्रह्मवांछितासिद्ध्यर्थं परदारपरद्रव्यचौर्यमात्सर्यहिंसादंभादिकं स्वप्रतिकूलं धर्मं स्वगोपनार्थमंगीकरिष्यन् दुस्त्यजं स्वधर्ममौदासीन्यञ्चाजहदेव सात्वतां कुले उदेयिवान् । सख इति—परदारग्रहणादस्माकं सखाप्यभूदिति भावः ॥ अत्र **तोषिणी**—तदेवम्प्रभावत्वादिदमनुमिमीमहे इति स्तुत्यर्थमाहुः—नेति । श्रीगोपैश्वर्या अपि स्वकुलश्रेष्ठत्वेन स्वांतर्गणयित्वा स्वदै न्येन न्यूनतोक्तिर्न दोषाय । अतोस्माकमिदं हृत्तापं त्वं जानास्येव किं बहूक्त्येति भावः । अवतारकारणमनुमीयते—विखनसेति । अतः स्वभक्तवरप्रार्थनया भक्तकुलेऽस्मिन्नुदितमात्रत्वेनापि भवता भक्ता अनवसरेऽपि परि पाल्या एवेति त्वत्प्रियाणामस्माकमप्यपरापेक्षा न युक्ता । सोऽयं तु परम एवावसर इति भावः । ननु यूयं न मद्भक्ता इति चेत्तथापि परिपाल्या इत्याशयेनाहुः—सख इति । यद्वा—ऐश्वर्यज्ञानमिदं मुन्यादिमुखतस्तन्माहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात् ॥ करसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहम् ॥ ५ ॥

प्राणिनां बुद्धिसाक्षी । ननु स किं दृश्यो भवति तत्राहुः । विखनसा ब्रह्मणा विश्वपालनाय प्रार्थितः सन्सात्वतां कुले उदेयिवानुदित इति ॥ ४ ॥ तस्मात्त्वद्भक्तानामस्मा कमेतत्प्रार्थनाचतुष्टयं संपादयेत्याहुः विरचिताभयमित्यादिचतुर्भिः । हे वृष्णिधुर्य संसृतेर्भयात्ते चरणमीयुषां शरणं प्राप्तानां प्राणिनां विरचितं दत्तमभयं येन तत्तथा हे कांत

त्यश्रवणेन ततो निजभावानुरूप्येण श्रीगोपिकानंदनतामयकेवलमाधुर्यानुभवेऽपि तदेतदैश्वर्यं याचकरीत्या निजाभीष्टसाधनमात्राय प्रयोजितमिति ज्ञेयम् । एवमुत्तरत्रापि । अन्यत्तैः । यद्वा—खल्विति प्रतिषेधे खलूक्त्वेति वत् । अंतरात्मदृगपि भवान् गोपिकानंदनो न भवति खलु, अपि तु भवत्येवेत्यर्थः, तदाह—विखनसेति । अहो वयं पाल्या एवेति भावः । यद्वा—सेर्ष्यमाहुः—गोपिकायाः परमदयालुतयाऽस्मत्पालिकायाः श्रीव्रजेश्वर्या नंदनो भवान्न भवति किन्तु परमात्मैव स्वतस्सर्वत्रौदासीन्यात् । एवं नूनमपि ब्रह्मभक्तिवशीकृतत्वादेव भवानेतन्नंदनंदनताव्याजेन विश्वगुप्तये प्रकटोऽस्ति । तत्र च बाल्यक्रीडामयाद्यनुवृत्त्याऽस्माकं सखितां च प्राप्तोऽस्तीति भवता प्रतिपाल्या एव वयमित्याहुः—विखनसेति । अथ वा नञः प्राङ् निर्देशात्सर्वपदैरेवान्वयः । तेन हे असखे प्रतिकूल खलु वितर्के भवान्यशोदानंदनो न भवति, तत्र तत्संबंधेनास्माकमुपेक्षानुपपत्तेः । तथाऽखिलदेहि नामंतरात्मदृगपि न भवति, तत्रास्मद्दुःखज्ञानसंभवात् । न च ब्रह्मणा विश्वगुप्तयेऽर्थितः, तत्रास्माकमपि रक्षाया योग्यत्वात् । सात्वतां भक्तानां कुले च नोदेयिवान्, तत्र तत्संबंधेन निरुपाधिकपालुतासंभवादिति ॥ ४ ॥ एतत् वक्ष्यमाणम् । वृष्णीनां चंद्रवंश्यानां धुर्योऽग्रणीः 'वृष्णिः पांडवचंद्रयोः' इति मेदिनी । यद्वा—वृष्णिषु रेतःसेक्तृषु मुख्य रतिनिपुण । उभयथाऽस्माकमभीप्सितापादनमुचितमिति संबुद्ध्यभिप्रायः । काम्यत इति कांतश्चतुर्वर्गः, स एव कामोऽभिलषितस्तं ददातीति तथा, करचरणयोरुभयोर्विशेषणम् । हे कांतेति वा । श्रीकरग्रहमिति—अतस्तव हस्तसंबंधाद्वयमपि श्रीतुल्या भवेमेत्यभिप्रायः । त्यागानर्हत्वमेव श्रीसमानतेत्यर्थः ॥ * ॥ ननु भो प्रियभाषिण्यः युष्माकं प्रणयकोपोक्तिपीयूषपानार्थमेवांतर्हितं तदधुना लब्धाभीष्टोऽस्मि यथेष्टं वरं वृणुतेति तत्प्रसादोक्तिं संभाव्य साश्वासं पृथक्पृथक् स्वाभीष्टं प्रार्थयन्ते—विरचितेत्यादिचतुर्भिः । हे वृष्णिधुर्य निजकुलकमलप्रभाकर नः शिरसि करसरोरुहं धेहि अर्पय । किमर्थम्, तत्राहुः—कामदम्—यस्य शरप्रहारभयात्त्वां प्रपन्नास्तं कामं द्यति खंडयतीति, तच्छ्लेषभंग्या कामं ददद्पि । न चात्र तस्याशक्तिरिति वाच्यम्, यतः संसृतेर्भयाच्चरणमीयुषां प्रपन्नानां जनानां विरचितमभयं येन तत् । येन संसारभयादपि रक्षितुं शक्यते तस्य कामभयाद्रक्षणे कः खल्वायास इति भावः । ननु तर्हि वो वक्षस्सु दधामि तत्रैव ममापि धित्सा वर्तते, तत्र नेत्याहुः—श्रीकरग्रहमिति । श्रिया लक्ष्म्या कराभ्यां ग्रहो ग्रहणं यद्वारणार्थं यस्य तद्वक्षसि करधित्सायां यथा लक्ष्म्या वार्यते तथैवास्माभिरपि तद्वारणीयमिति भावः ॥ अत्र **तोषिणी**--पूर्वानुसारेणैवैश्वर्यं संभा व्याहुः—विरचितेति मोक्षप्रदत्वमुक्तम् । कामदमिति धर्माद्यर्थिनां सर्वाभीष्टप्रदत्वं त्रिवर्गप्रदत्वं भक्तिप्रदत्वञ्च । श्रीकरग्रहमिति प्रेम्णा प्रियजनवश्यत्वं रसिकत्वं च । एषां यथोत्तरं श्रैष्ठ्यमुक्तम् । सरोरुहरूपकेण सहजशीतलमधुरत्वादिना स्वतः फलरूपकत्वं सूचितम् । तत्र मोक्षो नाम निर्विघ्नप्रेमसंपद्वृद्धये विविधदुःखपरंपरानिवृत्तिरेव ज्ञेयः । त्रिवर्गोऽयं प्रेमसाधनोपयोग्येव, अन्यच्च भक्तानामनपेक्ष्यमेव । एतच्च सर्वं तद्गुणवर्णनं प्रेमोल्लासेनैव ज्ञेयम् । ननु तद्योग्या न यूय मिति चेत्-सत्यम, निजमाहात्म्यापेक्षया धेहीत्याहुः--वृष्णिधुर्य हे निजाशेषमाधुरीप्रकटनाय यदुविशेषकुलेऽवतीर्णेत्यर्थः। तच्च भावाविशेषेणैव तथा ध्येयमित्याशयेनाहुः--कांत हे प्रियेति।अन्यत्तैः । यद्वा—हे विरचितेत्यादिना संसारसंबंधि यावद्भयापहारित्वेन शौर्यमुक्तम्, कांतं च तत्कामदश्चेति । स्वतः सुखदत्वेन सर्वाभीष्टप्रदत्वेन च दातृत्वम् । वृष्णिधुर्य वृष्णिविशेष व्रजराजकुलतिलकेति, वयं स्वाभाविकत्वत्पाल्या नैवोपेक्ष्या इत्युभयथापि शिरसि धेहीति । तेनास्मान्बाढमं गीकुरुष्वेति तात्पर्यम् । श्रियः संपदधिष्ठात्र्याः स्वगोकुले वशीकारात्करमिव गृह्णाति यत्तदित्यनेन सर्वसंपदाश्रयत्वं, ततोऽस्माकं विरहभयनाशस्तद्रूपाभीष्टप्राप्तिस्तत्प्राप्त्यानुषंगिकसर्वसंपत्प्राप्तिश्च तेनैव सिध्येदिति भाव इत्युक्तम् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रजजनार्तिहन्वीरयोषितां निजजनस्मयध्वंसनस्मित ॥ भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय ॥ ६ ॥

कामदं वरदं तथा श्रियः करं गृह्णातीति तथा तद्भवत्करसरोरुहं नः शिरसि धेहि ॥ ५ ॥ हे व्रजजनार्तिहन्हे वीर निजजनानां यः स्मयो गर्वस्तस्य ध्वंसनं नाशकं स्मितं यस्य तथाभूत हे सखे भवत्किंकरीर्नोऽस्मान् भज आश्रय । स्मेति निश्चितम् । प्रथमं तावज्जलरुहाननं चारु सुंदरं योषितां नोऽस्माकं दर्शय ॥ ६ ॥

हे व्रजजनार्तिहन् वयं किं व्रजजना न भवामेति संबुद्ध्याशयः । तथाभूत तादृश।अंतर्द्धानेनालं तव स्मितमेव स्त्रीमानदलनसमर्थमिति तात्पर्यम्। अभजनेऽस्माकं दुर्दशावत्पश्चात्त्वयापि दुःखमेव लब्धव्यं सख्येन तुल्यव्यथत्वात्। यद्वा—विश्वासघातदोषप्रसक्तेरित्याशयेनाहुः—हे सखे भजेति । कमलदर्शनेन भृंगवदस्मन्नेत्रभृंगाणां त्वन्मुखमेव कमलवत्प्रियमित्यभिप्रेत्याहुः—जलरुहेत्यादि । यद्वा—हे योषितां वीर स्त्रीवधे समर्थेति । स्त्रीवधेन शौर्यप्रकटनं सर्वथानुचितम् ‘ व्याधस्याप्यनुकंप्यानां स्त्रीणाम् ’ इत्युक्तेः । विशेषेणेरयाति प्रेरयति प्रतिपक्षान्निजानामिति वीरः शूरः ‘ रसे शूरे सुते वीरः ’ इति धरणिः ॥ * ॥ अपरा आहुः—योषितां मध्ये ये व्रजजनास्तेषामार्त्तिं कंदर्पशरप्रहारजनितां हंतीति तथा । तेन देव्यादीनामप्यन्ययोषितां तां न हरसि, यद्वक्ष्यते—‘व्योमयानवनिताः, कश्मलं युयरपस्मृतनीव्यः’ इति । हे वीर दुर्वारमारसंप्रहारमहाजिष्णो । किञ्चास्माकं सौभाग्योत्थं गर्वं तदुत्थं वाम्यलक्षणं मानमपि न सहस इत्याहुः—निजजनानां स्मयध्वंसनं माननाशकं स्मितमपि यस्य । ननु वरं शीघ्रं वृणुत तत्राहुः—भवत्किंकरीरस्मान्भज परिचर । ननु यदि मम किंकर्य एव यूयं तदा मां स्वपरिचरणे किमित्याज्ञापयध्वे, तत्राहुः—हे सखे इति । तर्हि ब्रूत किं वः परिचरणं, तत्राहुः—जलरुहेत्यादि । तोषिण्यान्तु—भज अस्मःद्दुःखं प्रतिकुर्वन्निकटे तिष्ठ । अहो आस्तां तादृशोऽपि मनोरथः प्रथमं तावन्मनोहरं जलरुहतुल्यमाननमपि दर्शय । तत्र व्रजजनार्तिहन्निति भजनयोग्यत्वमुक्तं व्रजान्तःपातित्वादस्माकमन्यथाऽस्मदंत्यदशापत्याऽऽर्तिहननासिद्धिः स्यात् । वीरेत्युक्तेरदेयस्यापि दानसामर्थ्यमुक्तम् । निजजनो निजप्रियाजनः । स्मयो मानः । तव स्मितमात्रेणापि मानो निरस्यते तदर्थमंतर्द्धानेनालमिति भावः । अनेनैव मनोहरत्वमप्यभिप्रेतमतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः । सख इति भजने प्रकारविशेषः सूचितः । यद्वा—अभजने चास्माकं दुर्दशाया पश्चात्त्वयापि किल दुःखं लब्धव्यं सख्येन तुल्यव्यथत्वात्, किं वा विश्वासघातदोषप्रसक्तेरिति भावः । अथ सख्ययोग्यस्यात्मनो विरहदैन्येनौद्धत्यमाशंक्याहुः—भवतः किंकरीरिति । योषितामिति—तत्र चास्माकं सामर्थ्याभावात्स्वयमेव दर्शयेति भावः । यद्वा—परमार्ताः प्रणयकोपेनाहुः—व्रजजनार्तिहन् । तथाभूतोऽपि योषितां वीर, योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्तास्तथा निजजनसुखग्लापनकपटास्मित तदधुनाऽभवत्किंकरीरन्या अदासीरेव भज, चारु जलरुहाननं च नो दर्शय मरणस्यैव निश्चितत्वात् । यद्वा—व्रजजनार्तिहन् । इह हन् गत्यर्थो ध्येयः, अन्यथा कथमस्माकमियं दशा स्यादिति ॥ अत्र **तोषिणी**—एवं वैयग्र्येणादावंगीकारमात्रं प्रार्थ्य अभीष्टविशेषान्प्रार्थयन्ते—त्रिभिः । तत्र प्रथमेन सामान्यसंगं प्रार्थयन्ते—व्रजेति । भज अस्मद्दुःखं प्रतिकुर्वन्निकटे तिष्ठ । अहो आस्तां तादृशोऽपि मनोरथः प्रथमं तावच्चात्र मनोहरं जलरुहतुल्यमाननमपि दर्शय । तत्र व्रजजनार्तिहन्निति भजनस्य योग्यत्वमुक्तमन्यथाऽस्मदंत्यदशापत्या आर्तिहननासिद्धिः स्यादिति । वीरेत्यदेयस्यापि दानसामर्थ्यमुक्तम् । निजजनो निजप्रियाजनः, स्मयो मानः, तव स्मितमात्रेणापि मानो निरस्यते तदर्थमंतर्द्धानेनालमिति भावः । अनेनैव परममनोहरत्वमप्याभिप्रेतमतस्तदवश्यं द्रष्टुमपेक्ष्यत इति भावः । सख इति भजने प्रकारविशेषः सूचितः । यद्वा—भजने चास्माकं दुर्दशाया पश्चात्त्वयापि किल दुःखं लब्धव्यं सख्येन तुल्यव्यथत्वात् । किं वा विश्वासघातदोषप्रसक्तेरिति भावः । अथ सख्ययोग्यस्याप्यात्मनो विरहदैन्येनौद्धत्यमाशंक्याहुः—भवतः किंकरीरिति । योषितामिति—तत्रास्माकं सामर्थ्याभावात्स्वयमेव कृपया दर्शयेति भावः । अन्यत्तैः । यद्वा—योषितां मध्ये ये निजजनास्तत्परिग्रहास्तेषां स्मयध्वंसनस्मित, अत एव निजदासीरस्मान्भज, तत्प्रकारमेवाहुः—‘जलेत्यादिना—आप्याययस्व नः’ इत्यंतेन । यद्वा—परमार्त्या प्रणयकोपेनाहुः—व्रजजनार्तिहन् हे तथाभूतोऽपि योषितां वीर योषिद्वधे समर्थेत्यर्थः । अतो वयं मृतप्राया एव वृत्तास्तथा निजजनसुखग्लापनकपटास्मित तदधुना असंभवत्किंकरीरन्या अदासीरेव भज, चारु जल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रणतदेहिनां पापकर्शनं तृणचरानुगं श्रीनिकेतनम् ॥ फणिफणार्पितं ते पदांबुजं कृणु कुचेषु नः कृंधि हृच्छयम् ॥ ७ ॥
मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ॥ विधिकरीरिमा वीर मुह्यतीरधरशीधुनाऽऽप्याययस्व नः ॥ ८ ॥

अविशेषेण प्रणताना देहिनां पापकर्शनं पापहंतृ तृणचरान्पशूनप्यनुगच्छति कृपयेति तथा सौभाग्येन श्रियो निकेतनं वीर्यातिरेकेण फणिनः फणास्वर्पितं ते पदांबुजं नः कुचेषु कृणु कुरु । किमर्थम् । हृच्छयं कामं कृंधि छिंधि ॥ ७ ॥ हे पुष्करेक्षण तवैव मधुरया गिरा वल्गूनि वाक्यानि यस्यां तया बुधानां मनोज्ञया हृद्यया गंभीरये

रुद्दाननं नो दर्शय मरणस्यैव निश्चितत्वात् । अन्यत्समानम् ॥ ६ ॥ न केवलं करनिधानेनैव कृतार्थाः किन्तु स्तनप्रदेशे चरणस्पर्शमपि इच्छाम इत्याहुः—प्रणतेति । वीर्यस्य अतिरेकेणाधिक्येन ॥ * ॥ अपरा आहुः—कुचेषु पदाम्बुजं कृणु अर्पय । किमर्थम्—हृच्छयं कामं कृन्धि छिंधि । अत्राभिस्समर्थरतिमत्त्वेन महाप्रेमवतीभिः स्वीयदुःखापायसुखप्राप्तिज्ञानरहिताभिः श्रीकृष्णसुखैकप्रयोजनककायिकवाचिकमानसव्यापाराभिस्त स्यैव सौरतसुखोद्दीपनार्थमेव स्वीयरूपयौवनकामपीडां विवृण्वतीभिः परमविदग्धाभिः प्रायः प्रेम्णो वाङ्निष्ठतालाघवं न क्रियते किन्तु कामस्यैव, यथा भोजनलंपटं कंचित्स्वमित्रं बुभुक्षुमभिलक्ष्य स्नेहेन तं भोजयितुकाम श्चतुर्विधमिष्टान्नसाधने प्रयतमानो जनस्तेन पृष्टोऽपि स्वार्थमेवाहं प्रयस्यामि न त्वदर्थमिति ब्रूते तदैव प्रेमा गुरुर्भवति यदि त्वेतावान्ममायासस्त्वत्सुखार्थमेव न तु स्वार्थे निष्कामत्वादिति ब्रूते तदा प्रेमा लघुर्भवति । तदुक्तं प्रेमसंपुटे—"प्रेमा द्वयो रसिकयोरयि दीप एव हृद्वेश्म भासयति निश्चलमेव भाति । द्वारादयं वदनतस्तु बहिष्कृतश्चेन्निर्याति शीघ्रमथ वा लघुतामुपैति ॥" इति । तत्रासां स्वसुखतात्पर्याभावः 'न पारयेऽहम्' इति भगवद्वाक्यादेव स्ववशीकारव्यंजकादवसीयते । तस्य प्रेमैकवश्यत्वमेव सर्वशास्त्रेषु दृष्टं न तु कामैकवश्यत्वमिति ज्ञेयम् । ननु पापाद्बिभेमि, तत्राहुः—प्रणतानां देहिनां पापनाशकम् । तव कुतः पापशंकेति भावः । ननु कठोरेषु युष्मत्कुचेषु सुकुमारं मत्पदाम्बुजं व्यथिष्यते, तत्राहुः—तृणचरानुगम्, तृणचरा गावस्तासामप्यनुगच्छति । गावो हि कठोरस्थलेऽपि घासं चरन्ति यदि तत्रापि तव चरणस्य सहिष्णुता तर्हि किमुतास्म त्कुचेषु, कुचकाठिन्यं प्रत्युत तस्य सुखदमिति भावः । ननु नानालंकारमंडितानां युष्मत्कुचानामुपरि पादार्पणमनुचितं, तत्राहुः—श्रियः शोभाया निकेतनमिति । कुचानामलंकारवर्यमेवैतद्भविष्यतीति भावः । ननु युष्मत्पतिभ्यो बिभेमि, तत्राहुः—फणिनः फणेषु अर्पितम् । त्वं कालियनागादपि न बिभेषि किमुत तेभ्य इति भावः ॥ अत्र तोषिणी—अथ [1]द्वितीयेन हृदयान्तरङ्गतद्विरहतापशान्तये प्रलेपौषधमिव प्रथमं हृदयबहिरेव तदङ्गसंगं प्रार्थयमाना दैन्येन तच्चरणमात्रस्यैव संगं तद्गुणानुवादपूर्वकं प्रार्थयन्ते—प्रणतेति । चरणपंकजं ते तावकमसाधारणं किं वा त्वदीयानामस्माकम् । कुचेषु कृणु निधेहि । ननु निर्भयाः ! पापादहं बिभेमि, तत्राहुः—प्रणतेति । सकृत्प्रणामकारिणामपि यथाकथंचिच्छरणागतानामपि नलकूबरकालियादीनां प्राणिनां पापहन्तुस्तव कुतः पापशंकेति । किं वा मदादिना सागस्सु युष्मासु तदाचरणमयुक्तमिति, तत्राहुः—प्रणतेति । कालियादिवत्त्वत्प्रणतानामस्माकमागो नश्यत्येव । ननु तथापि परमक्रूरेषु मृदुलतरं तत्कर्तुं न शक्यते, तत्राहुः—तृणेति । पशुसंगत्या वनेवने भ्रमणादितो नाधिकं दुःखमिति । यद्वा—अनभिज्ञाभिर्युष्माभिस्संगोऽनर्ह एव, तत्राहुः—तृणेति । तृणान्येव न त्वग्रतो न्यस्तानि शर्करादीनि चरंतीति परमाज्ञता सूचिता । पशव इव वयमनुकम्प्या इति भावः । ननु सुष्ठु शोभनेषु युष्माकं स्तनेषु कथं पदार्पणं कर्तुं युज्यते इत्यत आहुः—श्रीति । सर्वातिशयशोभास्पदत्वादलंकरणवर्यमेव भावीति भावः । भीरुस्वभावत्वाद्युष्मत्पातिभ्यो बिभेमि, तत्राहुः—फणीति । अनेन विषाद्यनर्थध्वंसहेतुत्वाद्विषोपमहृच्छयध्वंसनयोग्यताप्युक्ता । एवं चतुर्भिर्विशे षणैः पापहंतृत्वादिकमुक्तं तत्तदर्थमेवेष्यते, नेत्याहुः—हृच्छयं कृंधीति । अस्माकमेतदेव प्रयोजनमिति भावः ॥ ७ ॥ इत्यर्थ इति । मधुरा तु बालानामपि वागस्ति सा बुधमनोज्ञा न भवति, इयं तु बुधप्रिया

१ पूर्वं (६ पद्यतोषिण्याम्) मभिलाषविशेषान्प्रार्थयन्ते त्रिभिरित्युक्तं तत्र द्वितीयेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तव कथाऽमृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ॥ श्रवणमंगलं श्रीमदाततं भुवि गृणंति ते भूरिदा जनाः ॥ ९ ॥

त्यर्थः । मुह्यतीरिमा नो विधिकरीः किंकरीरधरशीधुना आप्याययस्व संजीवयेति ॥ ८ ॥ किं च अस्माकं त्वद्विरहे प्राप्तमेव मरणं किं तु त्वत्कथामृतं पाययद्भिः सुकृतिभिर्वंचितमित्याहुः । तवेति । कथैवामृतम् । अत्र हेतुः । तप्तजीवनम् । प्रसिद्धामृतादुत्कर्षमाहुः । कविभिर्ब्रह्मविद्भिरपीडितं स्तुतम् देवभोग्यं त्वमृतं तैस्तुच्छीकृतम् । किं च कल्मषापहं कामकर्मनिरसनं तत्त्वमृतं नैवंभूतम् । किं च श्रवणमंगलं श्रवणमात्रेण मंगलप्रदम् । तत्त्वनुष्ठानापेक्षम् । किं च श्रीमत्सुशांतं तत्तु मादकम् । एवंभूतं त्वत्कथामृतमाततं यथा भवति तथा ये भुवि गृणंति निरूपयंति ते जना भूरिदा बहुदातारः।जीवितं ददतीत्यर्थः । यद्वा एवंभूतं त्वत्कथामृतं ये भुवि गृणंति ते भूरिदाः पूर्वजन्मसु बहु

गंभीरार्थेति भावः । विधिं विधानं कुर्वंतीति विधिकर्यस्ताः " विधिर्ना नियतौ काले विधाने परमेष्ठिनि " इति मेदिनी । शेतेऽनेनेति शीधु मद्यममृतं वा ' शीधुपीयूषमद्ययोः ' इति धरणिः । अधरनिष्ठामृतेनेत्यर्थः । पुष्करेक्षणेत्याकाशवद्व्यापकदृष्टेस्तवास्माकं दर्शनं कथं नेत्यभिप्रायः ' पुष्करं सर्वतोमुखम् ' इत्यमरादयः ॥ * ॥ भोभो मत्प्राणैकवल्लभा रत्नवल्लर्यः जीवातुभूतासु भवतीषु नाहमुदासे, दासे मयि संततस्थे प्रेमहेमशृंखलानिबद्धे कथमविश्वस्ताः, विश्वस्ता भवत भावत्कं कंकणमिव हस्तांकगतमेव मां जानीतेति स्फूर्तिप्राप्तं तद्वाक्यमाकर्ण्यापरा आहुः—मधुरया माधुर्य्यव्यंजकवर्णघटितत्वात्सुश्रवया । वल्गूनि मंजुलपदार्थवैचित्रीकाणि वाक्यानि यस्यां तया । बुधानां विदग्धानां मनोज्ञया मनो जानत्या गिरा विधिकरीः किंकरीर्न इमाः मुह्यतीस्तन्माधुर्यस्वादभरादानान्मोहं प्राप्नुवतीः पुनरधरशीधुना आप्याययस्व । यद्वा—मोहं प्राप्नुवतीर्नः अधरशीधुनाऽपि आययस्व पुनर्मोहं प्रापयस्वेत्यर्थः ॥ अत्र **तोषिणी**—अत्र तन्मुखसौरभनिभतद्वापितविशेषजनिततत्पानेच्छात्मकस्य मोहपर्यंतदशागामिनस्तापस्य पुनरन्यद्दुश्चिकित्स्यतामाशंकमानास्तस्मिन्नेवांगसंगे पेयौषधमिवांतरं च संगमनीयम् । तन्मुखसुधाकरसुधारसमपि प्रार्थयन्ते—मधुरयेति । अधरशीधुनास्मानाप्याययस्व । अन्यथा सद्य एव म्रियेमहीति भावः। कुतः—तव गिरा स्मर्य्यमाणया 'स्वागतं वो महाभागाः' इत्यादिलक्षणया "कठोरा भव मृद्वी वा प्राणास्त्वमसि राधिके । अस्ति नान्या चकोरस्य चंद्रलेखां विना गतिः ॥ " इत्यादिलक्षणया वा, यया कयाचिद्वा । मुह्यतीः अंत्यदशानुगं मोहं प्राप्तवतीः । कीदृश्या गिरा—मधुरया स्वरविशेषेण वर्णविन्यासविशेषेण प्रेममृदुतया प्राणिमात्राणां रुचिरया । तथा वल्गूनि आकांक्षायोग्यतासत्तिसौष्ठववंति वाक्यानि सुप्तिङन्तवर्गा यत्र तादृश्या । तथा बुधानामर्थज्ञानां मनोज्ञया—अभिधालक्षणाव्यंजनादिवृत्तिप्रतिपादितवस्तुरसभावालंकारार्थगांभीर्येणानंदप्रदया । इमा इति प्रत्यक्षत्वादिनाऽसंदिग्धत्वं तत्कालीनत्वं च मोहस्योक्तम् । कथमदेयं दातव्यं, तत्राहुः—हे वीर दयावीर, दानवीरेति वा । पुष्करेक्षणेति—उक्तावसरे सस्मितविलाससुंदरदृष्ट्यादिना गिर एवाधिकं विमोहनत्वमभिप्रेतम् । यदुक्तं कर्णामृते—"पर्याचितामृतरसानि पदार्थभंगी वल्गूनि वल्गितविशालविलोचनानि" इति । यद्वा—गिरा मुह्यतीः अत एव विधिकरीर्दासीत्वं गताः, मोहेनविवेकापगमात् । यद्वा—गिरैव विधिकरीः अधुना विरहार्ता इमा मुह्यतीरित्याह ॥ ८ ॥ अन्यदाहुः—किञ्चेति । वंचितम्—विश्वमिति शेषः, वैपरीत्यादित्यर्थः । अत्र अमृतत्वे । तप्तानां संसारतापसंतप्तानां जीवनम् जलवत्संतापहरम् । उत्कर्षम् आधिक्यम् । न केवलं स्तुतमेवापि तु क्लेशहरमित्याह—किञ्चेति । तत्तु प्रसिद्धं तु । नैवंभूतम् कामकर्मनिरासकम् । विशेषांतरमाह—किं चेति । अनुष्ठानापेक्षम् सेवनापेक्षम् । अन्यद्विशेषमाह—किं चेति । इत्यर्थ इति—न हि जीवदानात्परं दानमस्ति । हरिकथाश्रवणे मोक्षो भवतीत्यर्थः । 'जीवेत्स वै यस्य पुनर्न मृत्युः' इत्याद्युक्तेः । पूर्वपुण्यं विना निरूपणमपि कर्तुं न शक्यत इत्यभिप्रेत्याह—यद्वेति । इत्यर्थ इति—"तेपुस्तपो जुहुवुः सस्नुरार्या यजिह्वाग्रे वर्तते नाम विष्णोः" इत्याद्युक्तेः । यतस्ते दर्शनमतिधन्यतमत्वापादकमतो हेतोः । केचित्तु अरे परमव्यग्राः यावदाप्याययेयं तावत्क्षणं मद्वार्तया कालो नीयतामिति चेत्, तत्रासमाहुः—श्रीकृष्णविरहिणीनां कथैव मृतं मरणं तप्ते मंडकपाकभाजने जवनामिव 'जीवनं भुवनं वनम्' इति कोशात् । कविभिरीडितम् 'कवयः किं न जल्पंति' इति वर्णनस्वभावेन तस्यापि वर्णनात् । कल्मषापहम् येषां पापमस्ति ते शृण्वंतु नास्माकं प्रयोजनम् । श्रवणेनैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमंगलम् ॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयंति हि ॥ १० ॥

दत्तवंतः।सुकृतिन इत्यर्थः । एतदुक्तं भवति।ये केवलं कथामृतं गृणंति तेऽपि तावदतिधन्याः किं पुनर्ये त्वां पश्यंत्यतः प्रार्थयामहे त्वया दृश्यतामिति ॥९॥ ननु तर्हि मत्कथा

मंगलं न तु प्रयोजनेन । श्रिया मदो येषां तेषु राजसु कविभिर्विस्तारितम् । ये भुवि गृणंति ते भूरिदा महाप्राणिघातकाः 'दो–अवखण्डने' अतोऽधुना त्वदाशया क्षणं जिजीविषूणां तेनालमिति वदंति तद्विगीत मिवाभात्यस्माकम् । यद्वा–भूरिदा हेमदाः–हेमदानस्याखिलाभीष्टप्रदत्वात्तत्र कथामृतवर्णनस्यापि तेनैव जातत्वात् । यथामृतं क्षुद्रोगादिहरं बलपुष्ट्यादिकरं मधुरमन्यविषयविस्मारकं तथा हरिकथापि संसाररोगहरा मधुरा सर्वविषयविस्मारिका, रोगादिनाशकत्वेन बलपुष्टिकर्यपीति ॥ * ॥ त्वत्कर्तृककथाया माधुर्यमहिमा कैश्चाच्यः, त्वत्संबंधिकथाऽन्यवक्तृकाप्यमृतद्वयात्स्वाद्वी श्रेष्ठा चेत्याहुः–तव कथैवामृतं केन साधर्म्येण तप्तान्महारोगादित प्तान्संसारतप्तांश्च जीवयतीति स्वर्गीयान्मोक्षरूपाच्चामृतादाधिक्यं च । कविभिः ध्रुवप्रह्लादादिभिर्वा 'या निर्वृतिस्तनुभृताम्' इत्यादिपद्यैरीडितम् । अन्यदमृतद्वयम् "सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं त्वंतका सिलुलितात्पततां विमानात्" इत्याद्युक्तिभिर्न रोचितम् । कल्मषाणि प्रारब्धपर्यंतानि पापानि अपहन्ति, स्वर्गीयामृतं तानि न हन्ति कामादिवर्द्धकत्वात्प्रत्युत तान्युत्पादयत्येव, मोक्षामृतमपि प्रारब्धपापं हंति । श्रवणे नैव स्वाद्यमानत्वादभीष्टसाधकत्वाच्च मंगलम्, तद्द्वयं तु नैवंभूतम् । श्रीमत् प्रेमपर्यंतसंपत्तिप्रदम् । आततम् प्रतिक्षणमेव वक्तृभिर्विस्तृतं, तदुभयं तु न तथा । ये गृणन्ति त एव भूरि बहुतरं ददति तेभ्यः सर्वस्वं ददाना अपि तत्परिशोधयितुं न क्षमन्त इति भावः । यद्वा–तव गीस्तु तदैव मधुरा यदि त्वद्दर्शनसहिता स्यादन्यथा तु महानर्थकरीत्याहुः–तव कथैव मृतं मरणकारणम् । कुतः–तप्तं जीवनं यतः । तप्ततैलादौ जलमिवेति श्लेषः । ननु तर्हि कथं पुराणादिषु श्लाघ्यते तत्राहुः–कविभिर्व्यासादिभिरीडितम् । कवीनां वर्णनमात्रस्वभावेन तस्यापि वर्णनादिति भावः । कल्मषापहमिति–दुःखभोगेन प्राचीनं कल्मषं नश्यत्येवेति भावः । लोककर्तृ कश्रवणेनैव मंगलं स्वस्त्ययनमविनाशो यस्य तत् । यदि जनाः सुधियस्तत्परिणामं दुःखं विचार्य न तत् श्रोष्यन्ति तदा तदपि नंक्ष्यत्येवेति भावः । श्रीमदैर्धनमदान्धैर्दुर्जनैरेव लोका म्रियन्तामित्यभिलब्धधनव्ययेनापि आततम् । देशेदेशे ग्रामेग्रामे पुराणवाचकान्संस्थाप्य विस्तारितम् । अत एव भूरि ये गृणन्ति ते भूरिदाः । भूरीन् श्रोतृलोकान् द्यन्ति खंडयन्ति मारयंति तस्मात्ते कथाजालं वितत्य सौम्या इवोपविष्टा मनुष्यमारकाद्व्याधादपि अधिका दूरत एव सुधीभिरुपेक्ष्या एवेति भावः । वक्ष्यति च 'यदनुचरितलीलाः' इत्यादि । वस्तुतः कथायाः कथकस्य च सर्वोत्कर्षव्यंजिकेयं व्याजस्तुतिः ॥ अत्र **तोषिणी**–अथ कथं तर्हि जीवथेत्याशंक्य प्रेममयस्वानुभवप्रमाणनिर्णीततत्तत्कथामहिम वर्णनेन, तत्र कारणमाहुः–तवेति । कथैवामृतममृतवत्स्वतःफलं फलांतरसाधनञ्च । तत्तद्रूपत्वं दर्शयति–तप्तान् त्वद्विरहतापखिन्नान् किमुत संसारतापखिन्नान् जीवयति मृत्युपर्यंतदुर्दशातोऽपि रक्षतीति, तत्पूर्वेषां जीवन रूपं चेति तथा । 'वंद्यमानचरणः पथि वृद्धैः' इत्यादेः, 'शक्रशर्वपरमेष्ठिपुरोगाः कश्मलं ययुः' इत्यादेश्च दर्शनात् । कविभिः ब्रह्मशिवचतुःसनादिभिरात्मारामैः किमुतान्यैः । ईडितम् वर्तमाने क्तः । अस्मद्व्रजवासि भिर्यद्वर्ण्यते तदेवानूद्य श्लाघ्यते । न तु स्वयं वर्णितुं शक्यत इत्यर्थः, रहस्याज्ञानात् । तथा कल्मषं सर्वरोचकत्वादिप्रभावमयत्वात्स्वांतरायमपि किमुत संसारहेतुपुण्यपापरूपं हंतीति तत् । एवमेवंभूतमपि श्रवणमात्रेणैव मंगलम् तत्तत्सर्वार्थसाधकम्, किमुतार्थविचारेण । अत एव श्रीमत् सर्वत उत्कर्षयुक्तम् । आततं सर्वव्यापकं च प्रसिद्धामृताद्वैलक्षण्यमप्युक्तम्, तदीदृशम् कथामृतं भुवि यत्र कुत्रापि ये गृणंति कथनरूपेण ददति ते भूरिदाः सर्वेभ्योऽपि सर्वार्थप्रदातारः, किमुत गोकुले तत्राप्यस्मासु तु त्वद्विरहतप्तासु जीवनमेव ददतीति भावः । ते चान्यत्र पूर्वोक्ता ब्रह्मादयः व्रजे सर्वे एवास्मासु तु विशेषतः सख्य इति ज्ञेयम् । यद्वा–अहो परमव्यग्रा यावदार्य्यीययेयं तावत् क्षणं मिथो मद्वार्तया कालो नीयतामिति चेत्, तत्र सत्रासमाहुः–कथैव मृतं मृतिः । कथैव मारयति इत्यर्थः । कुतः–तप्तं जीवनं यस्मात् । तप्ते तैलादौ जलमिवेति श्लेषः । कविभिः स्तावकैः । कल्मषापहं यथा स्यात्तथेडितम् । तन्नाशकतया श्लाघितमित्यर्थः । किञ्च, श्रवणेनैव मंगलम् । मंगलमिति श्रूयते, न त्वनुभूयत इत्यर्थः । श्रीमदाततम् श्रिया सौंदर्यादिना तत्कृतेन मदेन निज जनानादरादिलक्षणेन चाततं–सर्वतः प्रसृतम् । अतो ये तद्गृणन्ति ते भूरिदा महाप्राणघातका इत्यर्थः । एषा परमार्त्युक्तिरेव । 'दो–अवखण्डने' अतोऽधुना त्वदाशया क्षणं जिजीविषूणामलं तेनेति भावः ॥ ९ ॥ कथाश्राविणां किं दर्शनेनेत्याशंकते--नन्विति । निर्वृताः जातानंदाः । तत्रापि कथाश्रुतावपि । "संविद्युद्धे प्रतिज्ञायां संकेताचारनामसु । संभाषणे क्रियाकारे विज्ञाने तोषणेऽपि च ॥" इति कोशात् । रहसि संविदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलसि यद्व्रजाच्चारयन्पशून्नलिनसुंदरं नाथ ते पदम् ॥ शिलतृणांकुरैः सीदतीति नः कलिलतां मनः कांत गच्छति ॥ ११ ॥

श्रवणेनैव निर्वृता भवत किं मद्दर्शनेन । न । त्वद्विलासक्षुभितचित्ता वयं तत्रापि शांतिं न विंदाम इत्याहुः । प्रहसितमिति । हे प्रिय हे कुहक कपट । संविदः संकेतनर्माणि ॥ १० ॥ किं च त्वयि वयमतिप्रेमार्द्रचित्तास्त्वं पुनरस्मासु केन हेतुना कपटमाचरसीत्याहुः श्लोकद्वयेन । चलसीति । हे नाथ हे कांत यद्यदा व्रजाच्चलसि पशूंश्चारयंस्तदा

सर्वापेक्षया भवतीनामिष्टमवश्यं साधयिष्यामीत्येवंरूपाः । कुहकेति स्वोक्तस्यान्यथाकरणादस्मदुपेक्षया सर्वत्र कापट्यपर्यवसानाच्च ॥ * ॥ अस्माकं तु त्वद्दर्शनं विना त्वत्संबंधिवस्तुमात्रमतिदुःखदमित्याहुः--प्रहसितमिति ।
विहरणं संप्रयोगः । याश्च संविदः संलापनर्माणि । हृदिस्पृश इति--त्वं दुःखदत्वाद्विस्मर्तुमिष्टोऽपि विस्मर्तुं न शक्यस इति भावः । ध्यानेनापि मंगलं परमसुखदमिति चतुर्णामपि विशेषणम् । मनः क्षोभयन्ति व्याकुल
यन्ति, एतानि मनसि प्रविश्य सद्यः सुखं दत्त्वा तद्द्वितीयक्षण एव महादुःखं ददत्यत एव हे कुहक! कुहकदत्तवटकान्यपि सद्यः स्वादून्यप्यायत्यां परमदाहकानि। प्राणघातकानीत्यर्थः ॥ अत्र **तोषिणी**—तत्र प्रथमेर्थे, ननु हे
विचारलुब्धाः दुर्लभे मयि कथमेतावन्तमनुरागं कुरुथ, यदि कुरुत तदा मत्कथाश्रवणेनैव निर्वृता भवत इत्यादिकमाशंक्य तेनानिर्वृतौ तस्यैव पूर्वानुरागमयं चरितं सूचयंति—त्रिभिः । द्वितीयेर्थे, आशयापि चिरं जीवितुं न
शक्नुम इत्याहुः—प्रहसितमिति । भावे क्तः । वीक्षितमित्यत्र 'वीक्षण' इत्यपि क्वचित्पाठः । प्रथमतः प्रहसितं तासां दर्शनमात्रेण भावोल्लासात्, प्रकृष्टं सहजास्मितात्किंचिदुद्भटम् । हसितं कीदृशम्—प्रेम्णा वीक्षितं यत्र तादृ
शम् । ततो विहरणम् सखिभिः सह क्रीडाविशेषः । तच्च कीदृशम्—ध्याने मंगलं—तदनु चिंतने आशाबंधकारकं निजभावाभिव्यंजनामयत्वात् । ततश्च रहसि संविदः दूरतः स्वयं निर्जने गत्वा वेण्वादिना नर्मोक्तयः ।
ताश्च कीदृश्यः—याः हृदिस्पृशः हृदयंगमा इति सर्वतोंतरंगत्वं दर्शितम् । यच्छब्दोऽत्र प्रकारविशेषार्थः । ततो लिंगविभक्तिपरिणामेन पूर्वपूर्वत्रानुषंजनीयम्, तेषु यथोत्तरं श्रैष्ठ्यात् । कुहकेति उदर्के दुःखमयत्वात् । तदु
त्तरः कुहकानामयमेवेति भावः । न इति तत्र बहूनामनुभवं प्रमाणयन्ति । हि निश्चितम् । क्षोभणे हेतुः—प्रिय । हे लोभनेत्यर्थः । एवं तदेकप्रियत्वेन वयं सदा मनःक्षोभदुःखं लभामहे, त्वं पुनरस्मान्बत वंचयसे इत्या
शयेन संबोधयन्ति—हे कुहकेति ॥ १० ॥ उपालंभमाहुः—किं चेति । कः ककारोंते यस्य स कान्तः शुकः, स यथा फलादि गृहीत्वा क्षणेन नेत्रे परिवर्तयति त्वमपि तथाऽस्मान्वेणुध्वनिनाऽत्राहूय दर्शनरसमापीय गतः ।
यद्वा—कांतो बकः, स यथा स्वकार्यकरणे साधुरिवास्ते तथा त्वमपि । यद्वा—कांतोंतकः, स यथा साधूनसाधूंश्च सर्वानविशेषेण मारयति तथा त्वमस्मानिति । यद्वा—कांतः काकः, स यथा योऽस्मायन्नाद्यर्पयति तस्यैवो
परि मलमुत्सृजति तथा वयं त्वया सहातिप्रीतिकरास्त्वमस्मानेवं रोदयसीति भावः । यद्वा—कांतः कंकः, स यथा मृतान्मारयति तथा त्वमस्माननंगमारिता मारयसीति । यद्वा—कांतश्चातकः, स यथा स्वात्यंबु पीत्वा पुनर्मेघं
न सेवते तथा त्वं स्वकार्यं कृत्वास्मांस्त्यजसीति किं बहुना ॥ * ॥ किं च, त्वं केवलमधुनैव दुःखयस्यपि तु अन्यदापि स्वमपि दुःखयित्वाऽस्मभ्यं दुःखं दातुं यतस इत्याहुः—चलसीति । यद् यदा तदा नलिनादपि
सुंदरं सुकुमारम् । शिलैः कणिशैस्तृणैरंकुरैश्च सीदति क्लिश्येदिति संभाव्य मनः कलिलतामस्वास्थ्यं प्राप्नोति । यद्वा--कलिं कलहं लाति गृह्णतीति कलिलं तद्भावः कलिलता ताम्, कलेः कलहस्य लतां प्रतानमिति वा ।
अस्माभिरेव सहास्मन्मनः कलहं करोतीत्यर्थः । स च कलिर्यथा--अरे मनः स यदि वने भ्रमणात्खिद्यति तदा व्रजान्निस्सृत्य नित्यमेव तत्रैव किं यात्यतस्त्वं किमिति वृथा खिद्यसि । अयि निर्बुद्धयो गोपालिकास्तस्य
चरणद्वयं स्थलकमलादपि सुकुमारं भवत्येव वने च शिलतृणांकुरशर्कराः संत्येव कथं पीडा न स्यात् । अरे मुग्ध स सुकोमलवालुके पथिपथ्येव भ्रमति । अयि निर्विवेकाः गावः किं पथिपथ्येव घासं चरन्ति । अरे प्रेमांध
स चक्षुष्मान् शिलतृणाद्युपरि कथं पादावर्पयेत् । अयि प्रेमगंधेनापि रहिता व्यग्रावेगवशाद्भ्रमाद्वा तदुपरि पादः पतेत्तदा किं स्यात् । भो भ्रातश्चेतः सत्यं ब्रूषे, एतावद्दुःखमनुभवितुमेव जीवंत्यो विधात्रा वयं सृष्टाः । भो
दुःखिन्यः खलु जीवत यूयमहं तु युष्मत्प्राणैः सार्द्धं युष्मद्देहेभ्यो निःसृत्याधुनैव यामीति ॥ अत्र **तोषिणी**—तत्र भवता क्षोभदानं संयोगवियोगयोरविशेषमेव न तु कादाचित्कमित्याहुः--चलसीति द्वाभ्याम् । व्रजादिति--
ततश्चलनमारभ्यागमनपर्यंतमेव कलिलता सूचिता । पशूंश्चारयन्निति--विविधानामनंतानां तेषां चारणार्थं वर्त्मपरित्यागेनेतस्ततो भ्रमणाच्छिलादिभिरवसादः संभावितः, तथा पशुतया निर्बुद्धित्वेन ते त्वत्पादाब्जदुर्गमपथेऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतम् ॥ घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

तन्नलिनसुंदरं कोमलं ते पदं शिलैः कणिशैस्तृणैरंकुरैश्च सीदति क्लिश्येदिति नोऽस्माकं मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति । एवंभूतास्त्वद्दुःखशंकितचित्ताः वयम् ॥ ११ ॥ त्वं तु दिनपरिक्षये सायंकाले नीलकुंतलैरावृतं घनरजस्वलं गोरजश्छुरितं वनरुहाननमलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं बिभ्रत्सन् तच्च तादृशं मुहुर्मुहुर्दर्शयन्नो मनसि केवलं स्मरं यच्छस्यर्पयसि । न तु संगं ददासीति कपटस्त्वमसीति भावः ॥ १२ ॥

वत भ्रमंतीति श्लेषेण सूचितम् । शिलं पतितसस्यंगवन्यधान्यादिकम् 'आशिलिकंटकवनम्' इत्यादिहारिवंशोक्तेः । सर्वत्र कंटकाभावात्तु न तदुल्लेखः । नाथ हे व्रजेश्वरेति, तत्तत्रायुक्तमित्येति । यद्वा--कलिलतागमने हेतुः--नाथ हे प्राणेश्वर इति । कांतेति--अस्माकं एकतल्लउपयमेव तदिति प्रेमसंबोधनद्वयं कलिलताया हेतुविशेषः । यद्वा--नाथत्वेन सर्वेषां व्रजजनानां, कान्तत्वेन च विशेषतोऽस्माकमिति भावः । यद्वा--नाथ एवं प्रियजनो पतापक । ननु विवेकिन्यस्तर्हि अवसादहेतुमद्विषयकचिंता त्यज्यतां, तत्राहुः--कांतेति, प्रियजनचिंताया विवेकेप्यपरिहार्य्यत्वात् । ननु "यावतः कुरुते जन्तुः सम्बंधान्मनसः प्रियान् । तावंतोऽस्य निखन्यन्ते हृदये शोकशंकवः ॥" इत्याद्युक्तेः प्रीतेर्दोषत्वप्रतिपादनात्प्रीतिरेव निरस्यतां, तत्राहुः--मनो गच्छतीति । संकल्पमात्रात्मकं तन्नास्माकं बुद्धिवृत्तिविवेकमपेक्षत इति भावः । ननु मनोऽपि युष्माकमेवेत्याशंक्य तस्यापि न दोष इत्याहुः--कांत हे मनोहर । अहो वनभ्रमणं विहायात्र द्रुतमेहीति भावः ॥ ११ ॥ तच्च आननम् । इति भाव इति--कुहकानामौपरिकप्रेमा भवति न त्वांतर इत्यभिप्रायः । अत्रैव वीरत्वं नान्यत्रेत्यभिप्रायः ॥ * ॥ किं च त्वं संयोगेऽपि नैव सुखं दित्ससीत्याहुः--दिनपरिक्षये सायंकाले । नीलकुंतलैः कुटिलालकैर्मन्दमारुतलोलितैरावृतं, धेनरजस्वलम् 'धनं गोधनवित्तयोः' इति विश्वप्रकाशाद्गोरजश्छुरितं वनरुहाननं लोलालिमालाललितपरागभवच्छुरितसरोरुहसदृशमाननं बिभ्रत् । तच्च मुहुः संदर्शयन् गोसंभालनप्रियसखान्वेषणमिषेणेतस्ततः परिवृत्यास्मन्नयनगोचरीभवन् स्वदर्शनस्य सर्वजनानन्दकं स्वभावं ज्ञात्वा एताः कष्टसिंधावेव निमज्जयामीति विमृश्य नोऽस्मभ्यं स्मरं यच्छसि । य एव कुलधर्मपदवीं विषज्वालामिवानुभाव्यास्मानुन्माद्य वनेष्वानीयैवं रोदयतीति भावः । हे वीर व्रजस्त्रीणां धर्मध्वंसनार्थमेव प्रवर्तितस्मरशरप्रहार ॥

अत्र **तोषिणी**--दिनस्य परितः क्षयेऽत्यंतप्राप्ते सतीति दुःखाधिक्यं सूचितम् । नीलाः कुंतला अलकास्तेषां ललाटोपरि श्रीमुखस्यावरणेन शोभाभरापादनात् । तैरावृतमिति सहजसौंदर्यमभिप्रेतम् । अत एव घनरजस्वलमिति पूर्ववत् । रजसा तदुल्लासोऽभिप्रेतः 'पंकांगरागरुचिरम्' इतिवत् । विशेषतस्तु गोपोचितवेषस्य तस्य गोपीजातिषु स्वेषूद्दीपनादनुवादः, तत्तच्च सामान्यतः स्मरार्पणे हेतुः । विशेषतस्तु दिनपरिक्षये नीलकुंतलैरिति दर्शयन्निति च पूर्वस्य कामोदयवेलात्वात्, उत्तरस्य च भावातिशयसूचकत्वात् । यदि चादर्शयन्स्वगृहान्तः प्रविशति तथापि तादृशं कामार्पणं न स्यादिति भावः । तत्रापि मुहुरिति गोसंभालनादिच्छलेन पुनःपुनः परितो बहुधा निरीक्षणेन स्मरार्पणस्यापि पौनःपुन्यं दर्शितम् । तत्र कथंचिद्विचारभरेण संवरीतुमिष्यमाणस्यापि तस्य मुहुरुद्गाढीकरणं मनसीति स्मरस्यात्यंतमनोव्यापकत्वमप्रतिकार्यत्वं च । श्लेषेण स्मरमिति, यः कान्तजनस्मरणमात्रेण क्षोभकस्तं साक्षाद्यच्छसीति तस्य महत्त्वं सूचितम् । तत्र सामर्थ्यं सूचयंति--हे वीरेति । तत्रैव तव वीरत्वं न त्वन्यत्रेति सप्रणयरोषनर्म ध्वनितम् । वस्तुतस्तु तादृशत्वस्वीयभावोद्दीपनमिति भावस्य भावनैव मुहुरनूद्यते । अहो व्रजांतस्तादृशवेशदर्शनोपि स्मरोऽभूत्, अधुना च वनांतार्निशि रत्यर्थनागरवेषेण तत्रापि विरहे स्मरणविशेषेणासौ वर्द्धतैवेति विलंबं मा कुर्वीति भावः । एवं श्लोकद्वयेऽस्मिन्निदमपि व्यज्यते--नित्यमेवास्मदभीष्टमपूरयित्वापि गच्छति त्वय्यस्माकं मनः स्नेहमेव वहति न तु तदभावेनौदासीन्यम् । यं स्मरं वहति तत्तु त्वत्प्रेरिततयैव न तु स्वतः, तथा त्वत्स्नेहमयतयैव न तु रूक्षतया, स्नेहस्य स्वभावजत्वात् । त्वं पुनरस्मासु संगेच्छया संगच्छमानासु स्मरमेव ददासि न तु मिथः स्नेहोचितं संगं, तस्मादस्माकं सर्वं स्नेहमयमेव भवतान्तु कपटमयमेवेति॥१२॥

१ धनरजस्वलमित्येवमेव पाठमभिप्रैत्येदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि ॥ चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥
सुरतवर्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितम् ॥ इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥ १४ ॥

अतोऽधुना कपटं विहायैवं कुर्विति प्रार्थयंति श्लोकद्वयेन । प्रणतकामदमिति । हे आधिहन्हे रमण पद्मजेन ब्रह्मणाऽर्चितमापदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शंतमं च सेवासमयेऽपि सुखतमं ते चरणपंकजं कामतापशांतये नः स्तनेष्वर्पयेति ॥ १३ ॥ अपि च हे वीर तेऽधरामृतं नोऽस्मभ्यं वितर देहि । स्वरितेन नादितेन वेणुना सुष्ठु चुंबितं यथेष्टमास्वादितमिति नादामृतवासितमिति भावः । इतररागविस्मारणं नृणामितरेषु सार्वभौमादिसुखेषु रागमिच्छां विस्मारयति विलापयतीति तथा तत् ॥ १४ ॥

तमनुपलभ्यैव बोधयंत्य आहुः—अत इति । यतो नः स्मरं यच्छसीत्यतो हेतोः 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । आधिः कामपीडा तां हन्तीति तथा । अन्यथा नामवैयर्थ्यं स्यादिति भावः । एतत्समर्थकसंबोधनांतरमाहुः—रमणेति । रमते निःशंकमिति रमणः । इह रात्रौ न कोप्यायास्यतीति भावः । प्रणतानां नागांगनादीनां वांछितदम् । वत्साहरणरूपापराधित्वेन वृंदावने नित्यमागत्य पद्मजेनार्चितम् । धरण्या भूमेर्मंडनं भूषणम् । चरणपंकजमित्युक्त्या तापहारित्वं ध्वनितम् ॥ * ॥ ननु यद्यहं सदा दुःखयाम्येवेति निश्चिनुथ्वे तर्ह्यलं मया युष्माकमिति तत्कोपमाशंक्य हंतहंत स्वकर्मदुःखांधाभिस्त्वय्यपि दोष आरोपित इत्यनुतप्य तं प्रसादयितुं सर्वसुखदत्वेन स्तुवत्यस्त्वय्यैवास्माकं प्रयोजनमिति द्योतयंत्यः स्वदुःखोपशमनं प्रार्थयन्ते—प्रणतेति द्वाभ्याम् । प्रणतानामपराधीभूयापि नम्राणां कालियतत्पत्न्यादीनां कामदम् । पद्मजेन ब्रह्मणा स्वापराधोपशमनार्थमर्चितमतोऽस्माकमपराधः क्षम्यतामिति भावः । धरणिमण्डनमिति—अस्मत्कुचानपि तेषु चरणार्पणेन मण्डयेति भावः । ध्येयमापदीति—"अनेन सर्वदुर्गाणि यूयमंजस्तारिष्यथ" इति गर्गोक्तेः । आपदोऽस्मांस्त्रायस्वेति भावः । सर्वत्र हेतुः—शंतमम् सर्वकल्याणरूपं सर्वसुखरूपञ्च । आधिहन् आधिं हन्तुमित्यर्थः । न च स्तनेषु चरणार्पणे तव कोऽपि श्रमः प्रत्युत सुखमेवेत्याहुः—हे रमण । रिरंसोस्तव तेनैवाभीष्टसिद्धिर्भाविनीति भावः ॥ अत्र **तोषिणी**—तदेवम् 'प्रहसितम्—' इत्यादिभिस्तासामेव प्रेमोक्तिद्वारा पूर्वमपिवर्णितः श्रीकृष्णस्य पूर्वरागः श्रीमुनींद्रेण स्पष्टीकृतः, तासु तदीयरागस्य ताभिरनुभूयमानतया वर्णने नैव रसावहत्वादिति ज्ञेयम् । एवं तदंगसंगानुरागे तस्यैव दोषं विन्यस्य तथैव तत्प्रार्थनद्वयमुपसंहरंत्यः स्वयं गीतेन जातस्मरक्षोभाः पुनः प्रार्थयन्ते—प्रणतेति द्वाभ्याम् । प्रणतानां नलकूबरनागतत्पत्न्यादीनामभीष्टदमिति सर्वार्थप्रदत्वमुक्तम् । अत एव बालवत्सान् हृत्वा ज्ञातत्वेन 'वंद्यमानचरणः पथि वृद्धैः' इत्यनुसारान्नित्यमेवागच्छता वा, 'विखनसार्थितम्' इति व्याख्यानुसारेण वा पद्मजेनार्चितमिति पारमैश्वर्यमुक्तम् । धरणिं भुवं सुंदरासाधारणैर्लक्षणैर्ध्वजादिभिर्मंडयतीति तथा तदिति सौंदर्यम् । कृपालुत्वञ्च ध्येयमापदीति । इंद्रकृतवृष्ट्यादावनुभवात्सर्वापन्निवारकत्वम् । एवं सर्वार्थसाधनत्वमुक्तम् । परमफलत्वमाहुः—शंतमं चेति । एवं दुःखहानिसुखावाप्तिहेतुत्वं यदुक्तं तत्तदनुसार्येव संबोधनद्वयं विवेचनीयम् । अतोस्माकं विरहादिव्यथां नाशय विचित्रक्रीडादिना सुखं च संपादयेति भावः ॥ १३ ॥ अन्यदाहुः—अपि चेति । हे वीर कामजयवीर । इति भाव इति—शंखक्षीरन्याये नातीवानंदजनकमित्यभिप्रायः । स्तनतटचरणार्पणोद्बुद्धकामाग्निज्वालाशामकमधरामृतं देयमेव । अन्यथा कामोऽस्मान्धक्ष्यतीत्यर्थः । सुरतवर्द्धनम्—निधुवनेऽधरामृतपानेऽतीवानंदो भवतीति भावः । आनंदजनकत्वाच्छोकं मन्मथतापं नाशयतीति तथा । "विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यमरः ॥ * ॥ किं च, भो धन्वंतरिप्रतिमभिषक्छिरोमणे कामरागमूर्च्छिताभ्योऽस्मभ्यं किमप्यौषधं देहीत्याहुः । सुरतवर्द्धनमिति पुष्टिकरत्वम् । शोकनाशनमिति पीडाहरत्वं तस्योक्तम् । न च तदपि महार्घ्यं मूल्यं विनैव कथं देयमिति वाच्यम्, दानवीरेण त्वया तदतिनिकृष्टाय निष्प्राणाय सप्राणीकर्तुं विनैव मूल्यं दीयते एवेत्याहुः—स्वरितेन नादितेन वेणुना कीचकेनापि सुष्ठु सम्यक्तया चुंबितं स्वादितम् । ननु धनजनकुटुंबाद्यासक्तिरेवात्र कुपथ्यं तद्वते जनायैतन्न दीयते, तत्राहुः—इतररागविस्मारणम् । इतरवस्तुष्वेतदेव रागमासक्तिं विस्मारयतीत्यद्भुतमौषधमिदम् । यत्कुपथ्यान्निवर्तयतीत्यस्माभिरनुभूयैव दृष्टमिति भावः । नृणां मनुष्यजातिस्त्रीणां वितर देहि । हे वीर दानवीर दयावीर वा ॥ अत्र **तोषिणी**—अधर एवामृतमधरामृतम् । सुरतं प्रेमविशेषमयं संभोगेच्छां वर्धयतीति तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यताम् ॥ कुटिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशाम् ॥ १५ ॥

किं च क्षणमपि त्वददर्शने दुःखं दर्शने च सुखं दृष्ट्वा सर्वसंगपरित्यागेन यतय इव वयं त्वामुपागतास्त्वं तु कथमस्मांस्त्यक्तुमुत्सहसे इति सकरुणमूचुःअटती ति द्वयेन। यद्यदा भवान् काननं वृंदावनं प्रत्यटति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्धमपि युगवद्भवति एवमदर्शने दुःखमुक्तम् । पुनश्च कथंचिद्दिनांते सायंकाले ते तव श्रीमन्मुखं कुटिलाः कुंतलाः केशा यस्मिंस्तादृशमुदुच्चैरीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मंद एव निमेषमात्रमप्यंतरमसह्यमिति दर्शने सुखमुक्तम् ॥ १५ ॥

तदिति मध्वादिवन्मादकत्वमुक्तम्, मुहुर्लब्धेऽपि तस्मिन्नतृप्तिः सूचिता, निजधार्ष्ट्यादिकं च परिहृतम्। शोकं त्वदप्राप्तिदुःखस्यानुभवमपि नाशयति विस्मारयतीति तथा तदिति चोक्तम् । इतररागविस्मारणम्—तृणामपि किमुत नारीणां तास्वस्माकं तु तद्विस्मारणमिति किं वाच्यम्। शाश्वतस्वस्पृहया तदत्यन्ताभावस्यापि संपादकमित्यर्थः । तदेव प्रमाणयंति—स्वरितेति । वेणोः पुंभावेन ख्यातत्वात्तेषां तत्प्राप्तिस्तांबूलचर्वितादिसंबंधेन। तदीयरसे तदुपचारात्क्रमतस्त्रयेण स्वेच्छावर्धनदुःखांतरस्फूर्तिनाशनविषयांतरविस्मारणान्युक्त्वा तस्य परमपुरुषार्थत्वं दर्शितम्। एवमर्थत्रयमेव पूर्वपद्येऽपि दर्शितमित्यैकार्थ्यं च ज्ञेयम्। न च तवाऽदेयं किञ्चिदस्तीत्याशयेनाहुः—वीर हे दानशूरेति । अन्यत्तैः । तत्र नादामृतवासितमिति वेणुद्वारा सुष्ठुगायकमित्यर्थः । इदञ्च लोभविशेषोत्पादकतागमकं सुगायनस्य श्रोतृषु सुखादिना स्पर्शादीच्छाजनकत्वात् । तत्र चामृतस्याप्यमृतवासितत्वं गंधयुक्तिन्यायेन परस्परकिंचिद्वैलक्षण्यादिति ज्ञेयम्। यद्वा—स्वरितेन संजातषड्जादिस्वरेण वेणुना चुंबितमिति तस्य मादकत्वमेव दर्शितम्, वेणोस्तु चुम्बनं गानपौनःपुन्येन वैजात्याभिव्यक्तेस्तत्संपर्कजस्वरेणापि जगतोप्युन्मादकत्वाभिव्यक्तेश्च ॥ १४ ॥ अन्यच्छृणु इत्याहुः—किं चेति । "त्रसरेणुत्रिकं भुंक्ते यः कालः स त्रुटिः स्मृतः" इत्युक्तेः। ईह विभक्तिलोपस्त्वार्षः । दुःखसमयस्य दुरतिक्रमत्वेन विवृद्धमिवाततत्वात् । युगायते युगवदाचरति, युगशब्दश्चतुर्युगपरत्वेन प्रयुक्तः । तेन दैवद्वादशसहस्रवर्षतुल्यो भवति "दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम्" इत्युक्तेः। जडोऽनिमिषाकरणादिति शप्यते । यद्वा—चतुर्मुखेष्वष्टनेत्राणि स्वस्यानिमिषाणि कृत्वा स्थितोऽतः स एवाजडः परमविद्वान् उदीक्षतामुच्चैः पश्यत्विति ॥ * ॥ किं चास्माकं दुरदृष्टमेव दुःखप्रदं त्वं किं कुर्या इत्याहुः । यद् यदा भवान्काननं वृंदावनमटति गच्छति तदा त्वामपश्यतामस्माकं गोपीजनानां त्रुटिः क्षणस्य सप्तविंशतिशततमो भागः सोपि युगतुल्यो भवति। दिवसे त्रैयामिकमेव त्वद्विरहदुःखं सर्वेषां व्रजजनानाम् अस्माकं तु त एव त्रयो यामाः शतकोटियुगप्रमाणा भवन्ति। अत्र दुरदृष्टं विना किमन्यत्कारणं भवेदिति भावः । पुनश्च कथंचिद्दिनान्ते तव श्रीयुतं मुखमुत्कंठयेक्षमाणानां तेषामेव गोपीजनानां दृशां पक्ष्मस्रष्टा विधाता जडो निर्विवेकः। दुःखं करोतीति शेषः । एवं च त्वददर्शनेऽपार एव दुःखसिंधुः, दर्शने तु पक्ष्मोद्भवो निमेष एव यो दर्शनविरोधी सोऽपि नवशतत्रुटिप्रमाणो भवन्नवशतयुगायत इत्युभयथापि दुःखं दुरदृष्टवशादेवेति भावः। "त्रसरेणुत्रिकं भुंक्ते यः कालस्स त्रुटिः स्मृतः। शतभागस्तु वेधस्स्यात्तैस्त्रिभिस्तु लवः स्मृतः॥ निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः।" इति मैत्रेयः। यद्वा—'कृती—छेदने' दृशां स्वचक्षुषां पक्ष्मकृत् पक्ष्मछेत्ता। अजडश्चतुरो जनस्ते श्रीमुखमुदीक्षतामुत्कर्षेण पश्यतु न तु वयमचतुरा इति भावः॥ अत्र **तोषिणी**—युगायते दुःखसमयस्य दुरतिक्रमत्वेनेति परमदुःखमतश्चिरदर्शनदुःखमसह्यमिति सत्वरं दर्शनं देहीति भावः । अपश्यतां सर्वेषामपि व्रजजनानां किमुतास्माकम्। कुटिलाः कुंतलाश्चूर्णकुंतला उपरिभागे यस्मिंस्तत्। स्वत एव श्रीयुक्तं मुखमुदीक्षतां चेति चकारान्वयः। भवत्वन्येषां पक्ष्मकृत् उदीक्ष्यमाणानामपीत्याक्षेपार्थः। अन्यत्तैः। यद्वा—दुर्वितर्क्यप्रकृतेः कदापि त्वत्तोऽस्माकं न किंचित्सुखं जातं प्रत्युतादर्शनकालेऽपि दुःखमेवेत्याहुः—अटतीति। पूर्वार्द्धेनाऽदर्शनकाले दुःखमुक्तं, दर्शनकालेऽपि दुःखमाहुः—कुटिलेति। जडोऽनभिज्ञः अपक्ष्मत्वाकरणात्। शपनीय इति शेषः । यद्वा—उदीक्षमा

१ त्रुटि युगायत इति पाठाभिप्रायेण।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेऽन्त्यच्युतागताः ॥ गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥
रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम् ॥ बृहदुरःश्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥

तस्मात् हे अच्युत पतीन्सुतानन्वयांस्तत्संबंधिनो भ्रातॄन्बांधवांश्चातिविलंघ्य ते अंति तव समीपमागता वयम् । कथंभूतस्य । गतिविदोऽस्मदागमनं जानतः सर्वस्वं विहाय यदर्थमागमनं तत्तात्पर्यं जानत इति भावः । गीतगतीर्वा जानतः । याभिर्वयं मोहितास्तादृशीः गतिविदो वयं वा तवोद्गीतेनोच्चैर्गीतेन मोहिताः हे कितव शठ एवंभूता योषितो निशि स्वयमागतास्त्वामृते कस्त्यजेन्न कोऽपीत्यर्थः ॥ १६ ॥ अतस्त्वया त्यक्तानामस्माकं प्राक्तनत्वद्दर्शननिदानस्य हृद्रोगस्य त्वत्संगत्यैव चिकित्सां कुर्वित्याशये नाहुर्द्वयेन । रहसीति । श्रियो धाम ते बृहद्विशालमुरश्च वीक्ष्यातिस्पृहा भवति तथा च मुहुर्मुहुर्मनो मुह्यति ॥ १७ ॥

णानां सतां पक्ष्मकृत् 'कृती—छेदने' यः पक्ष्माणि कृन्तति स एवाऽजडः रसज्ञो विद्वान्वा । यद्वा—स्वदृशां पक्ष्मच्छिदेवाजडः स एव चोदीक्षतामुच्चैः पश्यतु, वयं तु पक्ष्मच्छन्नदृशो जडाः साक्षादपि किं पश्यामेति भावः ॥ ॥ १५ ॥ यतस्तव वियोगोऽस्माकमसह्यस्तस्माद्धेतोः । अच्युतेति—त्वं वीर्यच्युतिरहितत्वेन क्लीबोऽसि किमिति संबुद्ध्याशयः । अस्मदागमनं सुरतार्थमेवेति जानतो विज्ञस्य । गीतगतीः आकर्षणसंमोहनादिरूपाः । अस्मदागमनं यदि दर्शनार्थं तदापि तव गानं तून्मादकरमेवातो न वयं त्याज्याः, वयमपि गतिविदो गतानस्मान्न त्यक्ष्यतीति जानंत्य एवागताः । हे कितवेति--निजस्वभावान्यथाकरणात्तव धूर्तत्वं वयं विद्मः । तेनालम स्मासु धूर्ततयेति भावः । निशीत्युक्ते रात्रौ भीरूणां स्त्रीणां त्यागोऽनुचित इति । इत्यर्थ इति--स्वतः प्राप्तवस्तुनस्त्यागो मुक्तसंगस्याप्यन्याय्य एव "उद्यतस्य हि कामस्य प्रतिवादो न शस्यते । अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः ॥" इत्युक्तेः ॥ * ॥ याश्च वेणुवादनसमये पतिभिरंतर्गृहे निरुद्धा आसंस्ताः सेर्ष्यमाहुः--पतिसुतेति । गतिमंन्तिमां स्वस्य दशमीं दशां विदंतीति ताः वयम्, अंति त्वदंतिकमायाताः । हे अच्युत अत्रापि अच्युतोऽभूस्तत्किं विपरीतलक्षणयैव त्वमच्युतो नामेति भावः । तर्हि किमागता इति चेत्—उद्गीतेन मोहिता हतविवेकीकृताः । एवं चेत्तर्हि रे मूढाः सहध्वं वेदनामिति, तत्राहुः—हे कितव शठ एवंभूता योषितो निशि स्वयमागता भीरुं (रूः) त्वां निर्दयमृते कस्त्यजेन्न कोपीत्यर्थः । यद्वा—हे कितव हे मत्त निश्यायाताः युवतीः कः खलु युवा त्यजेत् । अतस्त्वं वंचकोऽपि वंचित एवाभूरिति भावः । "कितवस्तु पुमान्मत्ते वंचके कनकाह्वये" इति मेदिनी ॥ अत्र **तोषिणी**—एवं च सति तदेतदद्य कृतमत्यंतमयुक्तमित्याहुः—पतीति । बांधवा मातापित्रादयः । अति—तेषां वाक्यातिक्रमात्स्नेहादिपरित्यागाच्चातिशयेन विशेषेण च धर्माद्यनपेक्षया समूलत्वेन लंघयित्वातिक्रम्य । आगमने हेतुस्तवोद्गीतमोहिता हरिण्य इवेति भावः । न च यादृच्छिकमुद्गीतमपि तु ज्ञानपूर्वकमेवेत्याहुः—गतिविद इति । अस्मदागमनं जानत इति भावः । यद्वा--ननु भवत्यः परमधीरा गीतमात्रेण कथं मोहितास्तत्राहुः--गीतगतिविशेषान् जानत इति । यैः शक्रशर्वपरमेष्ठिपुरोगा अपि मोहिता इति भावः । यद्वा--भवत्यो विदग्धा ममेदृक्स्वभावमपि जानंतीति कथं न सावधाना जातास्तत्राहुः--त्वत्स्वभावविदोऽपि वयमिति । मोहनमंत्रप्रायत्वात्त्वद्गानस्येति भावः । अहो तदप्यास्ताम्, स्वयमेव तथा नीता योषितः पुनर्निशि कस्त्य जेत् । संभावनायां लिङ् । न कोपीत्यर्थः । अत एव हे कितव वंचनशील । अनेनान्योऽपि कितवः कस्त्यजेत्सर्वस्यापि तस्य कैतवलब्धेनैवार्थेन स्वव्यवहारसाधकत्वं भवतु तस्यापि तिरस्कारित्वमिति तत्रापि विशेषः । अत एव हे अच्युत । स्वगुणादव्यभिचारिन्निति सान्वयैव तवैषा संज्ञेति भावः ॥ १६ ॥ यतो रात्रौ भीरुत्यागोऽनुचितोऽतो हेतोः । प्राक्तनं यत्त्वद्दर्शनं तदेव निदानमादिकारणं यस्य तस्य । हृद्रोगः कामव्यथा तस्य । चिकित्साम् अपाकरणम् । अतिस्पृहा अत्यभिलाषः । तया अतिस्पृहया । मुह्यति वैवश्यमेतीत्यर्थः ॥ * ॥ किं कर्तव्यं तव मोहनपंचकं कामशरपंचक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलम् ॥ त्यज मनाक्च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

तव च व्यक्तिरभिव्यक्तिर्व्रजवनौकसां सर्वेषामविशेषेण वृजिनहंत्री दुःखनिरसनीति । विश्वमंगलं सर्वमंगलरूपा चातस्त्वत्स्पृहात्मनां त्वत्स्पृहारूढमनसां नो मनागीषत्किमपि त्यज मुंच । कार्पण्यमकुर्वन्देहीत्यर्थः । किं तत् । स्वजनहृद्रोगाणां यदतिगोप्यं निषूदनं निवर्तकमौषधं तत्त्वमेव वेत्सीति गूढाभिप्रायम् ॥ १८ ॥

मिवास्मन्नेत्ररंध्रेषु प्रविश्य हृदयं ज्वलयतीत्याहुः—रहसि संविदं रतिप्रार्थनव्यंजकसंभाषणं प्रथमम्, हृच्छयोदयमस्मदवलोकनहेतुकं कंदर्पभावोदयं द्वितीयम्, प्रकृष्टं हसितं यत्र तथाभूतमाननं तृतीयम्, प्रेमयुक्तमीक्षणं चतुर्थम्, श्रियो धाम शोभास्पदं बृहद्विस्तीर्णमुत्तुंगमुरो वक्षः पंचमं वीक्ष्य पुनःपुनर्विशेषतो दृष्ट्वा अतिस्पृहणमतिस्पृहा, भावक्किबन्तः । स्पृहितया मनो मुह्यते मुह्यति । औत्कंठ्यज्वालया मूर्च्छतीत्यर्थः ॥ अत्र **तोषिणी**—ते तव हृच्छयस्य कामस्योदयं वीक्ष्य । कीदृशम्—रहसि संवित् यत्र तम् । अलुक् समासः । तथा प्रकृष्टं हसितं यस्मिन्नानने तदाननं यत्र। तथा प्रेम्णा वीक्षणं यत्र तत्तादृशम् । तदनन्तरमुरश्च वीक्ष्य । तत्र बृहदिति गाढालिंगनेच्छाकारकः सौंदर्यविशेष उक्तः । श्रियः सर्वसंपन्निधेः स्वाभाविकपीतरेखारूपाया धामेति च वीक्ष्यास्माकमतिस्पृहेत्यस्मच्छब्दवाच्यकर्तृकवीक्षणस्पृहायाः क्रियाया वीक्षणस्य पूर्वकालत्वात्क्त्वा प्रत्ययः । स्वातंत्र्यापेक्षया स्पृहाया एव वा वीक्षणकर्तृकत्वोपचारः । अत्रोद्भवतीति शेषः । अतिस्पृहेति तृतीयान्तपदं वा । संपदादिवद्भावेऽपि क्किप् । अतिस्पृहया मनो मुह्यतीत्यर्थः । अतिस्पृहमिति चित्सुखः । अतिस्पृहा च तत्तदनुभवाय तत्संगममात्राय वा तया मनो मुह्यतीति स्पृहायाः परमौत्कंठ्यं द्योत्यते । यद्वा—वीक्ष्येति पूर्ववृत्तमिदं पूर्वमपि तथा तथैव भवेत्, अधुना तत्तदतिशयेन मरणमेवासन्नमिति भावः । एवं स्पृहाया दुर्निवारत्वादप्रतिकार्यत्वं तेन निजपरमदैन्यं चासूचि ॥ १७ ॥ व्रजवनौकसामित्युक्तेर्वयं किं तदंतर्गता नेत्युक्तम् । विश्वमंगलमित्युक्त्या वयं किं विश्वस्मिन्नेत्युक्तम्, यतो वयमपि तदंतस्था एवेति हेतोः, कार्पण्यं बद्धमुष्टित्वम् । इत्यर्थ इति—न ह्यशेषपालकस्य कार्पण्यं शोभत इति भावः । अज्ञात इव भगवान् पृच्छति—किं तदिति । अतिगोप्यम् प्रत्यक्षं वक्तुमशक्यम् । निजदर्शनोत्तरमंगसंगरूपमित्याशयः । स्वजनेति संबोधनं वा ॥ * ॥ किञ्च, कुलवधूनामस्माकं निरपराधानां त्वयैव संमोह्य रात्रौ वनमानीतानामौत्कंठ्याग्निना केवलं प्राणदाहनमेव न तत्राभिप्रेतं किं तु स्वांगसंगदानेन प्राणपालनमपीत्यत्र हेतुमाहुः—तव व्यक्तिरभिव्यक्तिर्व्रजजनौकसां सर्वेषामेवाविशेषेण विश्वमंगलम्—विश्वानि सर्वाणि मंगलानि यत्र तद्यथा स्यात्तथा । वृजिनहंत्री दुःखनिरासिनी । अतस्त्वत्स्पृहात्मनां त्वत्कर्तृका या स्पृहा अस्मद्दर्शनोत्था तस्यामेवात्मा तत्संपूरयितुकामं मनो यासां तासां नः । मनाक् ईषत् किमपि । त्यज मुंच । कार्पण्यमकुर्वन् देहीत्यर्थः । तदेव किम्, तत्राहुः—स्वजनहृद्रुजाम् युष्मज्जनकुचरोगाणाम् यन्निषूदनम् उपशमकमौषधम् । चरणकमलमित्यर्थः । तदेव यद्यस्माभिः कुचेष्वर्पयितुं प्राप्यते तदा तेनैव त्वत्स्पृहां पूरयित्वा स्वप्राणाः पालयंत इति भावः ॥ अत्र **तोषिणी**—तदेवं भवतैव निजहृच्छयोदयस्य व्यंजनयास्मासु तेते नाना भावा जन्यन्ते, हंतास्य हृच्छयतापः एवं शान्तः स्यादिति भावनया त्वद्भावभावितत्वेन तत्तद्वासनोदयात्, यतोऽस्माकं त्वयि स्नेहः स्वभावजत्वाद्बलवत्तर इति द्योतयंत्यस्तादृशस्नेहमयाभिलाषविस्फुटहृदयास्स्वदैन्यं निवेदयंति—व्रजेति द्वाभ्याम् । वजौकसां वनौकसां चेत्यर्थः । व्यक्तिः प्राकट्यम्, अतोंतर्द्धानमयुक्तमिति भावः । अंगेति प्रेमसंबोधनम् । न केवलं तेषां वृजिनहंत्री अशेषस्यापि मंगलरूपा वृजिनहंत्री । यद्वा—तेषामेव सर्वसुखदा च । अलमतिशयेनेत्यस्योभयतोऽप्यन्वयः । संबंधे दुःखशमकं किमपि देहि, ननु व्रजौकस्त्वेन भवतीनामपि तत्तदुत्पातजदुःखशांतिर्भविष्यत्येव किमन्यत्प्रार्थयध्वे, तत्राहुः—त्वयि त्वत्प्राप्त्यर्थमेव या स्पृहा तस्यामेवात्मा मनो यासां तासां नः । ननु व्रजवनौकसोऽपि मत्स्पृहास्ततः को विशेषः, तत्राहुः—स्वजनेति । तेष्वपि स्वजनाविशेषो योऽस्मद्विधस्तस्य हृद्रुजां यन्निषूदनमिति । मनागिति परमदौर्लभ्येन याचकरीत्या वा । वस्तुतस्तु हृद्रुजामिति बहुत्वे निशब्देन च तथा तद्विषयककामानाम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्ते सुजातचरणांबुरुहं स्तनेषु भीताः शनैः प्रिय दधीमहि कर्कशेषु ॥ तेनाटवीमटासि तद्व्यथते न किं स्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ ॥ १९ ॥ इति श्रीभा० महापुराणे दशमस्कंधे पू० रासक्रीडायां गोपीगीतं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

अतिप्रेमधर्षिता रुदत्य आहुः । यदिति । हे प्रिय यत्ते तव सुकुमारं पदाब्जं कठिनेषु कुचेषु संमर्दनशंकिताः शनैःशनैर्दधीमहि धारयेम वयम् । त्वं तु तेनाटवीमटसि संचरसि । नयसीति पाठे पशून्वा कांचिदन्यां वा आत्मानमेव वा नयसि प्रापयसि । तत्ततः तत्पदांबुजं वा कूर्पादिभिः सूक्ष्मपाषाणादिभिः किंस्विन्न व्यथते कथं नु नाम न व्यथेतेति भवानेवायुर्जीवनं यासां तासां नो धीर्भ्रमति मुह्यतीति ॥ १९ ॥ इति श्रीभा०म०दशम० पूर्वार्धे टीकायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

निवर्त्यत्वेन प्रत्युत सदा नवनवतया वर्धिष्णुत्वेनैव निरंतरतद्वैविध्यमभिप्रेतम् ॥ १८ ॥ धर्षिताः आकुलाः । संमर्दः संघर्षः । तेन पदाब्जेन । पशवस्तु पालमनुगच्छन्त्येवात आहुः—अन्याम् श्रीराधिकातोप्यलक्षिताम् । काञ्चिदिति गोपीभ्योऽप्यन्यां वा, राधिकातोऽपि प्रियाम् । कदाचिद्द्रवाद्यन्वेषणार्थमात्मानमपीति वा । ततः वनप्राप्तेर्हेतोः । यद्वा—हेतुवाचकयत्पदस्य पूर्वमनुक्तेराह—तत्पदांबुजमिति । ‘ कूर्पं स्यात्सूक्ष्मपाषाणे ’ इति धराणिः । भवदायुष्ट्वाद्वयं जीवेमेत्यर्थः ॥ * ॥ ननु भो रसिका यत्प्रार्थयध्वे तन्मे चरणकमलं संप्रति वनभ्रमणसुखे निमज्जत्यतो युष्मत्कुचेषु स्थातुं नावकाशं लभते, तत्र सरोदनमाहुः—यत्ते इति । तव सुजातमतिसुकुमारं यच्चरणांबुरुहं स्तनेषु दधीमहि तेनापि भीता एव वयं तेन चरणांबुरुहेणाटवीमटसीति काकूक्त्या हंतहंत कीदृशमनर्थमयसाहसं करोषीति भावः । ननु कथं भीताः स्थ, तत्र विशिंषन्ति—कर्कशेष्विति । स्तनानां कठोरत्वमेव भयहेतुरित्यर्थः । किमिति तर्हि धध्वे, तत्राहुः—हे प्रियेति । त्वं तेष्वेव चरणार्पणे प्रीणासीति त्वत्सुखमालक्ष्यैवेति भावः । किञ्च, तदानीं चरणेन स्तनपीडने त्वत्सुखे साक्षाद्दृष्टेऽपि चरणसौकुमार्यदृष्ट्यैव व्यथावश्यं संभवेदेवेति शंकयाऽस्माकं खेदो जायत एवेत्याहुः—शनैर्दधीमहीति । त्वत्सुखेऽप्यार्तिशंकया खिन्नत्वमिति महाभावलक्षणमिदम् । तेन त्वत्संयोगेऽप्यस्माकं दुःखं विधात्रा ललाटे लिखितमेवेति ध्वनिः । किं कर्तव्यम्, तपोभिर्विधिं प्रति स्तनानां कोमलत्वे प्रार्थ्यमाने तव सुखं न स्यात्, कर्कशत्वे च त्वच्चरणानां व्यथेत्युभयथैव संकटमस्माकमित्यनुध्वनिः । भवत्वस्माकमेवं संयोगवियोगयोः कष्टं, त्वं तु स्वैरित्वेपि किं कष्टं सहसे यत्ते नाटवीमटसि । किं चरणांबुरुहमेतदटव्यटनयोग्यमित्युपालम्भो व्यंजितः । ननु यदा यन्मे मनस्यायाति तदा तदहं करोम्येवात्र भवतीनां किमित्याहुः—त्वच्चरणं न व्यथते किंस्वित्, अपि तु व्यथत एव । किन्तु त्वमस्मास्विव स्वांगेष्वपि निर्दय एव, किं वा—एता मद्दुखेनातिदुःखिन्यो भवंति तस्मादेता दुःखयितुं प्रवृत्तेन मया स्वदुःखमपि कर्तव्यं सोढव्यं चेत्याशयेन तां व्यथामपि सहसे, किं वा—अस्मद्दुःखदर्शन एव तव महासुखमतस्तां व्यथामपि त्वं सुखमेव मन्यसे, किं वा—‘ संसर्गजा दोषगुणा भवंति ’ इति न्यायेन यत्पूर्वं ते हृदयं कुसुमसुकुमारमासीत्तदेवास्मत्कठोरस्तनसंगेन संप्रति कठोरमभूद्यथा तथैव तव चरणमपि स्तनसंगेनैव कठोरमभूदतः कूर्पादिभिरपि न व्यथते, किं वा—त्वच्चरणस्पर्शमाहात्म्यात्कूर्पादयोऽपि कोमला एव भवान्ति, किं वा—धरण्यैवातिकारुण्यात्त्वन्माधुर्यास्वादलोभाद्वा त्वच्चरणविन्यासस्थले स्वजिह्वोपस्थाप्यते, किं वा—त्वमस्मत्तोऽपि प्रेमसिंधुर्दैववशादस्मद्विरहसंतप्तो भ्रमन्नुन्माददशां प्राप्तः स्वचरणव्यथामपि नानुसंधत्से, इत्येवं नानाकारणानि परामृशंतीनामस्माकं धीर्भ्रमति । न तु क्वापि निश्चयं लभत इति भावः । नन्वेतात्कियत्स्वदुःखं व्यंजयथ, अहं तु तद्दुःखं दुःखं न मन्ये येन प्राणास्तिष्ठंतीति चेदत आहुः—भवदायुषामिति । भवति त्वय्येवायूंषि, भवानेव वाऽऽयूंषि यासां तासाम् । कल्याणवति त्वयि स्थिते त्वेतावद्भिरपि कष्टैरस्मदायुषां न नाश इत्यर्थः । अयं भावः—भवानिवास्मान्दुःखयितुं प्रवृत्तो विधिरेताद्विचारयति स्म—यद्यासामायूंषि संप्रत्यास्वेव स्थापयिष्यामि तदा मद्दत्तैरतिसंतापैर्दग्धायुष इमाः सद्यो मरिष्यंति, ततोहं पुनः काभ्यो दुःखं दास्यामि, तस्मादेतासामायूंषि मत्सधर्मिणि मद्बंधौ कृष्णे निधाय यथेष्टमिमा अम्रियमाणा अपारमेव दुःखं भोजयिष्यामीति, अत एव न म्रियामहे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीशुक उवाच ॥ ॥ इति गोप्यः प्रगायंत्यः प्रलपंत्यश्च चित्रधा ॥ रुरुदुः सुस्वरं राजन्कृष्णदर्शनलालसाः ॥ १ ॥
तासामाविरभूच्छौरिः स्मयमानमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥

द्वात्रिंशे विरहालापविक्लिन्नहृदयो हरिः ॥ तत्राविर्भूय गोपीस्ताः सांत्वयामास मानयन् ॥ १ ॥ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः ॥ सदयं नंदयन्गोपीरुद्गतो नंदनंदनः ॥ २ ॥ इति गोप्य इति । इत्येवंप्रभृति चित्रधा अनेकधा । सुस्वरमुच्चैः । कृष्णदर्शने लालसाऽतिस्पृहा यासां ताः ॥ १ ॥ साक्षान्मन्मथमन्मथो जगन्मोहनस्य कामस्यापि मनस्युद्भूतः कामः

यद्वा—एवं धीरेव तदनिश्चयाद्भ्रमति, प्राणास्त्वस्माकं निश्चयेन देहान्निर्गच्छंत्येवेति त्वं संप्रति पश्येति भावः । नन्वायुषि स्थिते कथं नाशस्तत्राहुः—भवदायुषां त्वत्समर्पितायुषां, स्वायूंषि तुभ्यमस्माभिः संप्रति दत्तानि तैश्चिरं त्वं व्रजे खेलेति भावः ॥ अत्र **तोषिणी**—ननु कास्ता हृद्रुजः किं वा तन्निषूदनमित्यपेक्षायां रुदत्य एवोद्दिशंति—यदिति । अंबुरुहरूपकेण सिद्धेऽपि सुकोमलत्वे सुजातेति विशेषणं ततोऽपि परमकोमलत्वविवक्षया । शनैरित्यत्र हेतुः—भीता इति । तत्र च हेतुः—कर्कशेष्विति । स्तनेषु दधीमहीत्यत्र हेतुः—हे प्रियेति । प्रियत्वेन हृद्येव तत्रापि स्तनेष्वेव धारणस्य योग्यत्वात् । तेनाटवीमटसि अधुना निशि वने भ्रमसीत्यर्थः । स एव चरणस्यैव धारणे पुनःपुनस्तदुल्लेखे च हेतुरुक्तः, अनिष्टाशंकया तत्रैव वर्द्धितस्नेहातिशायित्वात्, पूर्वं गोचारणाय परिभ्रमणात् प्रायिकत्वेन 'शिल—' इत्याद्युक्तेः । संप्रति कर्कशप्रायत्वेन दृश्यमाने पुलिनोपरितनयमुनातटे भ्रमणा त्कूर्पादिभिरिति । यद्यपि तदानीं श्रीवृंदादेव्यादिप्रियत्वेन श्रीवृंदावनस्य च स्वभावेन च तेषामपि तत्रतत्र शंका नास्ति तथापि "अनिष्टाशंकीनि बंधुहृदयानि भवन्ति" इत्यादिन्यायेन शंका तासां सा जायत एव । भ्रमति मुह्यति । अत्र हेतुः—भवदायुषामिति । इत्थमेवोपक्रान्तं त्वयि धृतासव इति । मध्ये चाभ्यस्तम् 'चलसि यद्व्रजात्' इति । अतस्तैर्या व्यथा साऽस्मज्जीवन एवोत्पद्यते, तदधुना प्राणान्धारयितुं कथंचिदपि न शक्नुम इति भावः । तदेवं तादृशशंका एव हृद्रुजस्तन्निषूदनं च स्वयमेव परमप्रियतमांगे सलालनसुखनिरासनमेवेति द्रुतमेव समागच्छेति भावः । 'नयसि' इति पाठे गच्छसीत्येवार्थः 'णय—गतौ' इति धातोः । तदेवं तासां सर्व स्यापि भावस्य प्रेमैकमयत्वे स्थिते श्रीभगवतोप्येवमेव ज्ञेयम् । हंतेमाः मयि प्रेमैकमय्य इत्याभ्यः परमसुखमयात्मदानमेवसमंजसम्, तच्च योग्यत्वादेवमेवमित्यालोच्य तादृशप्रेमविलासमयतत्तदिच्छा जायत इति । एवमन्यद प्यूह्यं सहृदयैस्तदेकरसिकैरिति ॥ १९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ यथा गोपीनामुपासनयात्मानं प्रकाशितवांस्तथा साधनसामग्र्या ज्ञानिनामपीत्यर्थं दर्शयितुमग्रिमाध्यायारंभ इति । विक्लिन्नहृदयः द्रवद्धृदयः । तत्र गोपीसमाजे । ताः विरहतप्ताः । सान्त्वयामास प्रेमवाक्यैः प्रीणयामास (१) । स्वप्रेमामृतकल्लोलैर्निजानुरागाम्बुमहदूर्मिभिर्विह्वलीकृतं विवशं चेतो यासां तास्तथा ताः । 'अथोर्मिषु महत्सूल्लोलकल्लोलौ' इत्यमरः । उद्गत आविर्बभूव (२) । पूर्वं त्वनवकाशतया दूरे स्थिताः पश्चादसावधानानां मूर्छितानां कंठेषु मूर्तिमंतः स्वराः सप्त प्रविष्टा इत्याह—सुस्वरमिति ॥ * ॥ चित्रधा आश्चर्यतालतानादिप्रकारेण गायंत्यः अतिवैवश्योद्रेकात्प्रलपन्त्यश्च सुस्वरं रुरुदुः ॥ अत्र **तोषिणी**—इति शब्दः प्रकारवचनस्तस्मादेवम्प्रभृतीत्येवार्थः । प्रकर्षेण प्रेमोद्रेकादुच्चैर्गायन्त्यः, कदाचित्प्रकर्षेण लपन्त्यश्च विरहव्याकुलतया किञ्चिदनर्थकं जल्पन्त्यः । चित्रधेत्यस्य पूर्वेण परेणाप्यन्वयः । सुस्वरम्—करुणदीर्घस्वरेणेत्यर्थः । हे राजन्निति—तद्दर्शने लालसया तद्युक्तमेवेत्यार्तिसंबोधनम् ॥ १ ॥ तासां गोपीनां मध्ये । शूरवंशे जातः कर्कशस्तासां बहुदुःखदर्शनादप्येतावंतं कालमनाविर्भूत इत्याह—शौरिरिति । कामजयित्वाद्वा शौरिराविरासीदिति, तदेवाह—साक्षान्मन्मथेति । मनो मथ्नाति क्षोभयतीति मन्मथः । पृषोदरादित्वात्साधुः । शरीरं विना केवलमनस एव मंथकत्वेन मन्मथत्वम् । तदुक्तम्—"अपूर्वेयं धनुर्विद्या मन्मथस्य महात्मनः । शरीरमक्षतं कृत्वा भिनत्त्यंतर्गतं मनः ॥" इति । इत्यर्थ इति—'मनोजये जितं सर्वम्' इत्युक्तेः कामस्य मनोवशीकरणशीलत्वेन तज्जेतृत्वमुपचर्यते, मनोजेता च सर्वजयी कामस्तस्यापि मनसो मोहकत्वेन भगवतो मन्मथमन्मथत्वम् । कोटिमन्मथलावण्यवद्भगवतो रूपदर्शनेन कामोऽपि मोहितोऽभूदित्याशयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥

साक्षात्तस्यापि मोहक इत्यथः ॥२॥ तन्वः करचरणादयः ॥ ३ ॥

किं च, तासां गलदश्रुधारामार्जनार्थम्, यद्वा–अपराधक्षमापणार्थं हस्तबंधनाय पीतांबरधर इति । यद्वा–अपराधक्षमापणार्थं तृणवद्दन्ते हस्तेन वस्त्रांचलं गृहीत्वा वस्त्रमिव गले मालां च बद्ध्वेत्यर्थः ॥ ॥ * ॥ शौरिरिति–श्रीगोपीजनपक्षस्य श्रीशुकदेवस्य कृष्णम्प्रत्यसूयोक्तिः । कुटिलांतःकरणक्षत्रजातिप्रादुर्भूतत्वादेव कृष्णः प्रेमवतीभ्य आभ्य एतावद्दुःखं दत्त्वा स्वशौर्यं प्रकटीचकार, यदि सरलान्तःकरणगोपीजातिजातोऽभविष्यत्तदा नैवमभविष्यदित्यर्थव्यंजिका । अत एव तासां दुःखेपि प्रफुल्लमुखः । वस्तुतस्तु, तासामानंदनार्थमेव प्रफुल्लीकृतं मुखांबुजमेव, हृदंबुजं तु संततप्तमेव यस्य सः । पीतांबरः स्कंधाभ्यां पुरो लम्बीकृत्य हस्ताभ्यां धरतीति सः । अपराधं क्षमापयितुमिति भावः । स्रग्वीति–प्रेयस्यैव परिधापितां स्रजं तां दर्शयितुमिति भावः । साक्षान्मन्मथो यः समष्टिकामस्तस्यापि मनो मथ्नातीति सः । जगन्मोहनमपि कंदर्पं मोहयितुमायांतं स्त्रीभावं प्रापय्य तथा मोहयामास, यथा सोऽपि कृष्णसौंदर्यं दृष्ट्वा कंदर्पशरपीडितो मुमोहेत्यर्थः । तेन कृष्णस्तत्प्रेयस्यश्च स्वरूपभूतकंदर्पस्यैव शरपीडिता रमन्ते न तु प्राकृतजगन्मोहककंदर्पस्य, तस्य तत्रानधिकारादेवेति ज्ञेयम् । न हि तुच्छभृत्यस्य प्रबलतरस्वामिनि प्राबल्यमिति भावः । तदानीं साक्षान्मन्मथमन्मथत्वेन महामोहनस्वीयमाधुर्याविष्करणं तासां तादृशस्यापि विरहदुःखस्य निवारणार्थमिति ज्ञेयम् ॥ अत्र **तोषिणी**–तासां तथा रुदतीनामधुना मद्दुःखसंभावनया दैन्यविशेषेणासां रोदनात्प्राणा गतप्राया इति तेन वितर्क्यमाणानामित्यर्थः । एवमात्मानपेक्षया तदेकापेक्षयैव दैन्यविशेषेण तत्प्राप्तिरिति दर्शितम् । शौरिः शूरवंशाविर्भूतत्वेन प्रसिद्धत्वेऽपि तासामेवाविरभूत्सर्वतोऽप्यपूर्वादाविर्भावादित्यर्थः । तथा च वक्ष्यते–'त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत्' इति, "तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः" इति, "गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्द्ध्वमनन्यसिद्धम् । दृग्भिः पिबन्त्यनुसवाभिनवं दुरापम्" इत्यादौ च । तथैव श्रीगोपीषु विशेषोक्तिः–'एताः परम्' इत्यादौ, 'वांछंति यद्भवभियो मुनयो वयं च' इति श्रीमदुद्धवसिद्धान्तानुसारेण सर्वाधिकप्रेमवतीषु तासु युक्तमेव च तादृशत्वम् 'प्रपद्यमानस्य यथाश्नतः स्युः' इत्यादिन्यायेन । तथैव दर्शयति–साक्षान्मन्मथमन्मथ इति । नाना वासुदेवादिचतुर्व्यूहेषु ये साक्षान्मन्मथाः स्वयं कामदेवा न तु तदीयशक्त्यंशावेशिप्रकृतमन्मथवदसाक्षाद्रूपास्तेषामपि मन्मथः मन्मथत्वप्रकाशकः "चक्षुषश्चक्षुः" इत्यादिवत् । येषां रूपगुणविशेषाणामंशेन तत्प्रकाशकोऽसौ तानखिलानेव प्रकाशयन्नित्यर्थः । अत एवास्य महामन्मथत्वेनैकाक्षरादिमंत्रा ध्यानानि च संति, किन्तु तस्मिन् ध्यानेऽन्याकारत्वं मन्मथत्वव्यंजनार्थमेव ज्ञेयम् । मन्मथपदस्य यौगिकवृत्त्या तेषामपि क्षोभकादिरूपः सन्निति ध्वनितम् । एवं तादृशरूपस्यादिरसे परमालंबनता भक्त्यन्तरागम्यता च दर्शिता । तदेवं स्वरूपाऽऽविर्भावस्यापूर्वतामुक्त्वा विलासवेशयोरप्याह–स्मयेत्यादिविशेषणत्रयेण । तत्र स्मयमानेति वर्तमानप्रयोगेण तात्कालिकत्वविवक्षया सहजस्मिताद्वैलक्षण्यप्रतीतेः । तथा पीतांबर इत्यनेनैव विवक्षिते सिद्धे धारणप्रयोगोऽतिरिक्त एवेति, तेन तदानीमन्यविशिष्टधारणबोधनात् । तथा स्रग्वीत्यत्रापि प्रशंसायां मत्वर्थीयविधानात् । किं च, स्मितेनात्मनः सुप्रसन्नत्वं त्यागस्य च परिहासमयत्वम्, पीतांबरधारणेन मूर्द्धपर्यंतावृततया स्वस्य तासां परित्यागतः संकुचितचित्तत्वम्, स्रग्वित्वेन केवलतत्संगितया तां विना स्वस्य संगांतरारोचकत्वं ज्ञापितम् । अथ च श्रोतृहृदयतत्प्रवेशाय तात्कालिकशोभावर्णनमिदम् ॥ २ ॥ तम् कृष्णम् । अवयवावयविनोरभेदोपचारात्तनूशब्दोत्रावयवपरः, शरीराणि वा । प्राणशब्द एकत्वं सामान्याभिप्रायम् ॥ * ॥ तन्वः करचरणादयः । आगतमिति पुनरुक्तिस्तासां मूर्च्छितानामुत्थानं तदागमनैकहेतुकमिति स्पष्टीकर्तुम् ॥ अत्र **तोषिणी**–आगतम्–आदौ समुत्कंठया सद्य एव दूरे प्रादुर्भूयागमनक्रमेण निजांतकं प्राप्तं सन्तम् । तथा च विष्णुपुराणे–"ततो ददृशुरायांतं विकाशिमुखपङ्कजम्" इति । अत एव विशेषेण लोकयित्वा दृष्ट्वेति रोदनवैवश्येनेषद्दर्शनेप्यानिश्चयात् । किं वा दृष्टेऽपि परमार्त्या विश्वासाभावात्सम्यङ् निरीक्ष्यैवेत्यर्थः । अबलाः विरहक्षामतयोत्थातुमप्यशक्ता अपि सर्वा युगपदुत्थिताः, तत्र हेतुः–प्रेष्ठेति । तदेकप्रेष्ठत्वेन मरणे जीवने च तदेकहेतुत्वात् । एतदेव दृष्टान्तेन साधयति–आगतामिति । पुनरुक्तिरुत्थाने आगमनैकहेतुतास्पष्टार्थं कृता । विलासाख्योऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काचित्करांबुजं शौरेर्जगृहेंजलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चंदनरूषितम् ॥ ४ ॥ काचिदंजलिनाऽगृह्णात्तन्वी तांबूलचर्वितम् ॥
एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥ एका भ्रुकुटिमाबध्य प्रेमसंरंभविह्वला ॥ घ्नंतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥

॥ ४ ॥ अंजलिना संहतहस्तद्वयेन ॥ ५ ॥ भ्रुकुटिं भ्रुवमाबध्य कुटिलीकृत्य प्रेमसंरंभेण प्रणयकोपावेशेन विह्वला विवशा दष्टाधरोष्ठा कटाः कटाक्षास्तैर्ये आक्षेपाः परिभवास्तै स्ताडयंतीवैक्ष्*** ॥ ६ ॥

नुभावोयम् । तदुक्तम्—“गतिस्थानागमादीनां मुखनेत्रादिकर्मणाम् । तात्कालिकं तु वैशिष्ट्यं विलासः प्रियसंगतः ॥” इति ॥ ३ ॥ काचित् अनिर्दिष्टाभिधा । करादिभिः करादिग्रहणं हरेर्भक्त्यैकलभ्यतामाह । चंदनेन रूषितम् भूषितम् ‘रुष—भूषायाम्’ धातुः सर्वगोपीषु मुख्यानां कासांचित्स्वस्वभावोचितप्रेमचेष्टितान्याह—काचिदिति पंचभिः । करांबुजं दक्षिणमेवेत्युत्तरार्द्धव्याख्यया व्यक्तीभावित्वात् । विनयमयमैत्र्यात् स्पर्शौत्सुक्याच्चेति भावः । इयमादरमयसंस्पर्शा त्तदीयतामयघृतस्नेहवती कांतपराधीना दक्षिणा च प्राथम्यात्सर्वज्येष्ठा । चंदनेन रूषितं भक्तिच्छेदेन लिप्तं बाहुं वाममेव, स्वकान्तवामभाग एव स्थित्यौचित्यात् । इयमादरगंधिना स्वकर्तृकालिंगनेन किंचिद्घृतस्नेहमिश्रमधुस्ने हवती व्यक्तसख्या किंचित्स्वाधीनकान्ता दक्षिणा च । अंजलिनागृह्णादितीयं दास्यप्रायमैत्र्या कान्ताधीना दक्षिणा च ॥ अत्र **तोषिणी**—पूर्वं विरहदैन्येन तुल्यवचनैः सर्वासामेव तुल्यप्राप्तिर्दर्शिता । अधुना प्राप्तनिजालंबत्वेन स्वस्वभावमनुसरन्तीनां मुख्यानां चेष्टितभेदैर्भावभेदानाह—करांबुजम् दक्षिणं जगृहे । वनभ्रमणश्रांततया मतस्य तस्य करावलंबनाय तथा व्यवहारस्यौचित्यात्स्पर्शौत्सुक्याच्च । करस्य दक्षिणत्वं च निजस्कन्धे तद्बाहुधारिण्या द्वितीयायाः कांतसमानस्थितत्वेन वामभागावस्थानौचित्यात्, दक्षिणस्यैव तथा ग्रहणौचित्याच्च । एवमुत्तरोत्तरं ज्ञेयम् । अंजलिनेति निर्देशादियं मृदुः सख्यप्रायदास्या कांतपराधीना दक्षिणा च । चंदनेन रूषितं भक्तिच्छे दलिप्तमिति । इयमाकृष्य धारणात्प्रखरा व्यक्तसख्या किंचित्पराधीनकांता दक्षिणा च ॥ ४ ॥ तांबूलस्य चर्वितं भक्षितोच्छिष्टं थूत्कृत्य त्यक्तं तज्जलं वा । संततप्तस्तनयोस्तापापनोदार्थमधाद्दधार ॥ * ॥ अंघ्रिकमलं दक्षिण मेव स्वहस्ताभ्यां गृहीत्वा भूमावुपविष्टा स्तनयोर्न्यधात् । ततश्च वामभुजेन कांतायाः स्कंधमालंब्य वामचरणेन भुवमवष्टभ्य कृष्णस्तस्थाविति ज्ञेयम् । इयं मैत्र्यप्रायदास्या कांताधीना दक्षिणा चेत्यत इमे तदयितामयघृत स्नेहवत्यौ प्रथमायाः सख्यौ ॥ अत्र **तोषिणी**—तांबूलमत्र प्रतिकुंजं मालादिसाहित्येन वृंदादेव्या स्थापितं, योगमाययैव वा सिद्धम् । शौरेरिति प्रकरणलब्धम् । अंजलिना अगृह्णादिति पूर्ववत् । अत्रौत्सुक्यं त्वधरामृता र्थम् । इयं मृदुर्दास्यप्रायसख्या कांतपराधीना दक्षिणा च । अंघ्रिकमलं दक्षिणमेव स्तनयोर्न्यधात् वामभुजेन प्रियावलंबनेन वामचरणन्यस्तांगभारताप्राप्तेः । संप्रति स्थित एव चायम् उपवेशस्याग्रतो वक्ष्यमाणत्वात् । अत उपविष्टयैव तया चरणधारणं, तस्य तयोर्निधाने हेतुः—संतप्तेति । विरहमयरत्योत्थेन भावेनेति शेषः । ‘हृदये’ इति पाठे स एवार्थः । इयं प्रखरा दास्यप्रायसख्या कांताधीना दक्षिणा च ॥ ५ ॥ नामैकदेशग्रह णेन भीमपदेन भीमसेनवत्कटपदेन कटाक्षग्रहो ज्ञेयः । घ्नंतीवेति—अरे शठ मामपि त्यक्तवानित्याशयः । राधिकेयमिति प्रतीयत इति ॥ * ॥ भ्रुकुटिमाबध्य भ्रुवं कुटिलीकृत्य । सज्यं धनुः शरसंसक्तं प्रतान्येवेत्यर्थः । प्रेमसंरंभेण प्रणयकोपावेशेन विह्वला विवशा । कटाः कटाक्षाः शरास्तेषां क्षेपणैः । कृष्णं लक्ष्यभूतं घ्नंतीव—भो कुहकशिरोमणे स्वप्रेमहालाहलं त्वया मयि प्रसृज्य सम्यक्तया सफलीकृतम्, देहान्निसृतप्रायान्प्राणा न्दग्धुं किं पुनरपि प्रत्यासीदसि, त्वं साध्वेव परिचितोऽभूरिति व्यंजयंती प्रैक्षत । निर्दष्टदशनच्छदेत्यंगुलिनाऽऽवृतस्य स्वाधरस्य दंशः कोपानुभावः । इयं मदीयतामयमधुस्नेहोत्थमानकौटिल्यवती ॥ अत्र **तोषिणी**—प्रेमसंरंभविह्वला सती भ्रुकुटिमाबध्य निर्दष्टदशनच्छदा भूत्वा कटाक्षैर्घ्नन्तीवैक्षतेत्यन्वयः । कटाक्षेपैः कटाक्षविक्षेपैः । ‘संदष्ट—’ इति क्वचित्पाठः । शौरिमिति प्रकरणात् । घ्नंतीवेति तस्यापि क्षोभं व्यज्य ताभिर्गृहीतत्वेनैव दाक्षिण्यमात्रेणैव च स तत्र स्थित इति व्यज्यते । तथा वाम्येन दूरस्थिताया अपि तस्याः प्रेमसंरंभेत्यनेन परमसुखं दर्शितम् । यथा श्रीविष्णुपुराणे—“काचिद् भ्रूभंगुरं कृत्वा ललाटफलकं हरिम् । विलोक्य नेत्रभृंगाभ्यां पपौ तन्मुखपंकजम् ॥” इति । अत्र विव्वोकोत्थानुभावो दर्शितः । यथोक्तम्—“दृष्टेऽपि गर्वमानाभ्यां विव्वोकः स्यादनादरः” इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपरानिमिषद्दग्भ्यां जुषाणा तन्मुखांबुजम् ॥ आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ॥ ७ ॥
तं काचिन्नेत्ररंध्रेण हृदिकृत्य निमील्य च ॥ पुलकांग्युपगूह्यास्ते योगीवानंदसंप्लुता ॥ ८ ॥

अनिमिषंतीभ्यामनिमीलंतीभ्यां दृग्भ्यामापीतमपि सम्यक्सादरं दृष्टमपि पुनःपुनर्जुषाणा नातृप्यत् ॥ ७ ॥ हृदिकृत्य हृदयं नीत्वेत्यर्थः ॥ ८ ॥

तथा ललितोत्थोपि । यथोक्तम्–“ विन्यासभंगिरंगाभ्यां भ्रूविलासमनोहरा । सुकुमारा भवेद्यत्र ललितं तदुदीरितम् ॥ ” इति । इयं प्रखरा सुसख्या अत्यंताधीनकांता वामा च ॥ ६ ॥ अपरा गोपी । संतः सर्वदा तत्पराः ॥ * ॥ अनिमिषंतीभ्यामानंदजाड्यवशादनिमीलंतीभ्यां दृग्भ्यां भ्रमरीभ्यामिव तस्य मुखाम्बुजम् । यद्वा–तत्प्रसिद्धं पूर्वस्याः कटाक्षशरजर्जरितत्वात्समयचाकितव्याकुलमनुतप्तम् । आपीतं सम्यगास्वादितमाधुर्यमपि पुनःपुनर्जुषमाणा आस्वादयंतीति । मुखांबुजस्य स्वभावेनैव माधुर्यमपरं तत्रापि स्वाभीष्टेन स्वयूथेश्वरीकटाक्षशरप्रहारेण संकोचत्रपाविषाददैन्यादिसंचारिविमिश्रणाबहुविधमतिवर्द्धमानं तदानीमभूदतस्तत्र तृष्णाधिक्यान्नातृप्यत् । संपूर्णांशेन दृष्टान्तादर्शनादेकांशेन दृष्टान्तमाह–सन्त इति । अत्र कटाक्षशरप्रहारिण्यामेव कृष्णस्य तदानीं संपूर्णा दृष्टिः संपूर्णं मनश्च न त्वन्यस्यां कस्यामप्येकांशेनापि, यत एव स्वस्मिंस्तस्यानवधानमालक्ष्य लज्जानुद्गमात् । दृग्भ्यामिति संपूर्णाभ्यामेव नेत्राभ्यां स्वच्छंदेनैव मुखमपश्यदतः सर्वतः सौभाग्यवती कटाक्षशरवर्षिण्येव ज्ञेया ॥ अत्र **तोषिणी**–जुषाणा स्वादयंती । आपीतं सम्यगास्वादितं माधुर्यमपि इति दृशो रसनात्वं मुखस्यांबुजतारूपकेण तत्सौंदर्यस्य मधुत्वं च रूपितम् । दृशो रसनात्वरूपकेण तु तन्माधुर्यासक्तिर्दर्शिता । शांत्यदास्यभक्तिनिष्ठा इति साक्षाद्दर्शनेऽपि तृप्त्यभावमात्रे दृष्टान्तः । वैशिष्ट्यं तु तत्तद्भावमाधुरीव्यंजकश्रीमुखालंबनतया विद्यत एव । इयं सम्मुखदत्तदृष्टित्वात्प्रखरा स्वयमेवासौ मां मिलिष्यतीति स्वस्थान एव स्थितत्वात्सुसख्या स्वाधीनकान्ता वामा च ॥ ७ ॥ तम् श्रीकृष्णम् । हृदिकृत्य कारागारेऽपराधिनमिव । इत्यर्थ इति–हृदयदेशे प्रापणमेव हृदिकरणपदार्थः । सर्वदा सतः करणासंभवादिति तात्पर्यम् । आनंदसंप्लुता परमानंदपूर्णा । पुंस्त्वपाठे तु योगिविशेषणम् । अत्र केचिदष्टसखीचेष्टितं कल्पयंति–‘काचित्करांबुजं शौरेः’ इत्यारभ्य ‘योगीवानंदसंप्लुता’ इत्यन्तम् । तत्र संख्यापूर्त्यर्थम् “काचिदायांतमालोक्य गोविंदमतिहर्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यदुवाच ह ॥” इत्यधिकं श्लोकं च पठंति । सख्यश्च–चंद्रावली १, श्यामला २, श्यामा ३, विशाखा ४, राधिका ५, ललिता ६, पद्मा ७, भद्रा ८ इत्याख्याः । ललिताविशाखाचंपकलताचित्रातुंगविद्येंदुलेखारंगदेवीसुदेव्य इत्थं केचित्सख्यष्टकं राधाभिन्नं वदन्ति ॥ * ॥ हृदिकृत्य हृदयं नीत्वेति । भाग्यान्मिलितोऽयं चंचलः कान्तः पुनर्मापसरत्विति च बुद्ध्येति भावः । निमील्य चेति–पुनर्नेत्ररंध्रेणैव न निःसरेदिति शंकयेवेति भावः । पुलकांगीति निर्विघ्नसंभोगप्राप्तिबुद्ध्या उपगूह्यास्त इति स्वकर्तृकोपगूहनं महाविरहोत्तरकालप्राप्त्या तृष्णाधिक्येन धैर्य्यापगमात्, तत्र द्रष्टृलोकाभावाल्लज्जानुत्पत्तेश्च । तिस्र एवैताः कांतपार्श्वे प्रत्यागमनाद्वामा अस्मानेवायमागम्य मिलतु न तु वयमिमं गत्वा कदाचिदपि मिलाम इति मदीयतामयमधुरस्नेहवत्त्वात्सुसख्याः स्ववशीकृतकांता ज्ञेयाः । तत्र तिसृषु मध्ये प्रथमा सर्वगोपीजनाधिका यूथेश्वरी, द्वितीयातृतीये तस्याः सख्यौ । एवं सप्तानामासां श्रीवैष्णवतोषिणीदृष्ट्यैव चंद्रावलीश्यामलाशैब्यापद्माश्रीराधाललिताविशाखा इति क्रमेण नामान्यवगतानि । अष्टमी तु “काचिदायांतमालोक्य गोविंदमतिहर्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यत्तदैव यत् ॥” इति विष्णुपुराणदृष्ट्या भद्रानाम्नी ज्ञेया । श्रीवैष्णवतोषिणीधृतस्कांदप्रह्लादसंहिताद्वारकामहात्म्यविख्याताभिख्या एता अष्टावेव त्रिशतकोटिगोपीषु मुख्या ज्ञेयाः । आसु तारतम्यजिज्ञासा चेदुज्ज्वलनीलमणिर्द्रष्टव्यः । सर्वमुख्या तु राधैव “यथा राधा प्रिया विष्णोस्तस्याः कृष्णः प्रियस्तथा । सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥” इति पाद्मोक्तेः । “देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा ॥” इति बृहद्गौतमीयोक्तेः । “राधया माधवो देवो माधवेनैव राधिका । विभ्राजते जनेष्वा–” इति ऋक्परिशिष्टोक्तेश्च ज्ञेया ॥ अत्र **तोषिणी**–तं नेत्ररंध्रेण हृदि कृत्येति । तस्या हृदये तस्य स्वच्छोपाधौ बिंबस्यैव परमासक्तिः सूचिता । ततः साक्षाद्भावाल्लुब्धलज्जया नेत्रे निमील्य भावपारवश्येन पुलकांगी सती उपगूह्यालिंगनमनुकृत्यास्ते । चिरं तथैवासीदित्यर्थः । योगीवेत्यन्तःस्फूर्तौ दृष्टान्तः । यद्वा–योगि क्रियाविशेषणम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संयोगि यथा स्यात्तदिवेत्यर्थः । इयं लज्जया मृद्वी पूर्वस्माद्धेतोः सुसख्या स्वाधीनकांता वामा च, एवं सतोक्ताः । अष्टमी तु श्रीविष्णुपुराणे—"काचिदायांतमालोक्य गोविंदमतिहर्षिता । कृष्णकृष्णेति कृष्णेति प्राह नान्यदुदैरयत् ॥" इति, प्रखरा सरला चेयम् । अत्रेदं विवेचनीयम्—सख्याख्यो भावस्तावदुभयविधः । एक आत्मनि तदीयताभावनामयत्वेन कांतपराधीनदाक्षिण्यादिमयः, अन्यः कांते मदीयताभावनामयत्वेन पराधीनकांतत्ववामत्वादिमयः । तदेवं भावद्वयमिश्रिततातारतम्येनान्येऽपि विविधा भावा विभाव्यन्ते । तदेतन्नानाभाववतीनां मध्ये सजातीयभावानां सख्यं, साक्षाद्रोचकत्वात् । विजातीयभावानां प्रतिपक्षता स्यात्, अरोचकत्वादेव । सजातीयभावानां सौहृद्यं स्यात्, यत्किंचिद्रोचकत्वेन हिताशंसनमात्रात् । अतिमिश्रत्वेनातिसूक्ष्मत्वेन वा नातिस्फुटसजातीयादिभेदभावानां ताटस्थ्यं स्यात्, व्यवधानहेतुत्वाभावात् । श्रीकृष्णविषयकनिजनिजभावमात्राभिरुचिमतीनां तासां सख्याद्युदयस्य तदेकमूल्यत्वमेवोचितमिति तत्र तदीयतामदीयतामययोर्मुख्ययोर्भावयोरुत्तरः श्रेयान् । ममताधिक्येन हि गंभीरप्रेमप्रवाहाधिक्यं भवति, तत एव तद्विवर्तरूपवाम्यापरपर्यायकौटिल्याभासो जायते "अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत्" इति भरतन्यायात् । अत एव कांतोऽपि तद्वशः स्यात् । तथा च रुद्रः—"वामता दुर्लभत्वं च स्त्रीणां या च निवारणा । तदेव पंचबाणस्य मन्ये परममायुधम् ॥" इति । यथा हरिवंशे सत्यभामायां दृश्यते—"रूपयौवनसंपन्ना सौभाग्येन च गर्विता । अभिमानवती देवी श्रुत्वैवेर्ष्यावशं गता ॥" इति, "कुटुंबस्येश्वरी साऽऽसीद्रुक्मिणी भीष्मकात्मजा । सत्यभामोत्तमा स्त्रीणां सौभाग्ये चाधिका भवेत् ॥" इति च । अत एवार्द्धेनार्द्धेन पूर्वचतसृणां वर्णनमुत्तरतिसृणां त्वेकैकेनेति कवेरादरोपि दृश्यते । आसु तिसृषु च 'एका भ्रुकुटिमाबध्य' इत्यनेन या वर्णिता सैव श्रेष्ठा, भाववैशिष्ट्येन प्रथमत्वेन चोपन्यासात् । तादृशसर्वविलक्षणभावश्च तस्या एव स्वपरित्यागे स्यात्, यस्याः सर्वपरित्यागेन स्वसंगनीतायाः सौभाग्यदानेन सर्ववैलक्षण्यं श्रीभगवान्स्वयमाविष्कृतवान्, तस्मात्सैव सा भवेत् । अथ प्रथमचतसृणां प्रथमैव ज्येष्ठा श्रेष्ठा च । अग्रे स्थितत्वात्सर्वा अतिक्रम्य प्रथमत एव कांतस्पर्शात्, दक्षिणासु सुमधुरचेष्टत्वात् । एषा चोत्तरवर्गप्रवराया विजातीयभावेति प्रतिपक्षिणी ज्ञेया । अथानयोर्वर्गविचारः । तत्रोत्तरप्रथमायाः सख्यौ तदनंतरे द्वे, प्रथमप्रथमायास्त्वेकव्यवहिततृतीयादिके द्वे, भावसाम्यात्तत्तदनुगततया वामदक्षिणयोः स्थितेश्च । या तु प्रथमद्वितीया सा खलु प्रथमगणांतः प्रविश्य स्थितापि किंचिद्व्यवहितत्वात्तदतिक्रमिचारितत्वाच्च न प्रथमायाः सखी पराधीनकांतंमन्यतया किंचित्तादृश्येनोत्तरायाश्च सुहृदिति ज्ञेयम् । अथ या विष्णुपुराणोक्ता सा तु नातिविस्पष्टभावत्वाद्वर्गद्वयाप्रवेशाच्छ्रीशुकेनावर्णनाच्च तटस्थैव ज्ञेया । अथ तासां नामविचारः । तत्र भविष्योत्तरे मल्लद्वादशीप्रसंगे श्रीकृष्णयुधिष्ठिरसंवादे तन्नामानि यथा—"गोपीनामानि राजेन्द्र प्राधान्येन निबोध मे । गोपाली पालिका धन्या विशाखा ध्याननिष्ठिका । राधानुराधा सोमाभा तारका दशमी तथा ॥" 'विशाखान्या धनिष्ठिका' इति क्वचित्पाठः । दशमीत्यपि नामैकं तच्चान्वर्थमिति सर्वैते पठितम् । यद्वा—तथेति दशम्यपि तारकानाम्न्येवेत्यर्थः । गोपाली चेयं नूनं पाद्मोक्तगायत्रीचरी भवेत् । तथा स्कांदप्रह्लादसंहितायां द्वारकामाहात्म्ये मायासरःप्रस्तावे पुनरुद्धवागमने प्रियप्राप्तिवत् प्रियदूतप्राप्तावपि स्वस्वभावाभिव्यक्तेस्तत्तद्भावोक्तिसहितान्येवाष्टौ नामान्युक्तानि । किं त्वत्यन्तदुःखमयोक्तित्वान्नैतादृशरसावसरे दृश्यानि । कदाचिद्विचारावसरे त्वपेक्ष्याणीत्यनन्यगतिकत्वेनैव लिख्यन्ते । यथा—

"तच्छ्रुत्वा वचनं तस्या ललिता क्रोधमूर्च्छिता । उद्धवं साश्रुनयना सोवाच रुदती तदा ॥ ललितोवाच ॥ असत्यो भिन्नमर्यादः शठः क्रूरजनप्रियः । मा कृथाः पुरतोऽस्माकं कथां तस्याकृतात्मनः ॥ श्रीश्यामलोवाच ॥ किं तस्य मंदभाग्यस्य ह्यल्पपुण्यस्य दुःखदाः । मा कथां कुरुत सख्यः कथाः कथयतापराः ॥ श्रीधन्योवाच ॥ केनायं हि समानीतो दूतो दुष्टजनस्य च । यातु तेन पथा पापो येन नायाति वै पुनः ॥ श्रीविशाखोवाच ॥ न शीलं न कुलं यस्य ज्ञायते कर्म जन्म च । हीनस्य पुरुषार्थेषु तेन संगो निरर्थकः ॥ श्रीराधोवाच ॥ पूतनाघातेन यस्य नास्ति पापकृतं भयम् । तस्य स्त्रीहनने साध्व्यः शंका क्वापि न विद्यते ॥ ॥ श्रीशैब्योवाच ॥ सत्यं ब्रूहि महाभाग किं करोति यदूत्तमः । संवृतो नागरस्त्रीभिः कथास्माकं करोति किम् ॥ श्रीपद्मोवाच ॥ कदोद्धवो महाबाहुर्नागरीजनवल्लभः । समेष्यतीह दाशार्हः पद्मपत्रायतेक्षणः ॥ श्रीभद्रोवाच ॥ हा कृष्ण गोपप्रवर हा गोपीजनवल्लभ । समुद्धर महाबाहो गोपीः संसारसागरात् ॥" इति । एके तु चंद्रावलीमेवाष्टानां मध्ये मन्यन्ते, न तु धन्यां तस्या लोकेऽतिप्रसिद्धेः । तत्र दशसंख्याकं मतं नात्रैकार्थ्यसमर्थयति संख्यावैषम्यात् । अष्टसंख्याकयोरपि मतयोर्धन्यापेक्षा न संघट्टयितुं शक्यते, तत्र तत्सहितत्वेन श्रीललितादीनां पंचानां वामप्रखरप्रायत्वात् । अत्र तु 'एका भ्रुकुटिमाबध्य' इति तिसृणामेवेति । चंद्रावलीपक्षस्तु संगम्यते तस्या दक्षिणवर्गाग्रिमत्वेन स्थापयिष्यमाणत्वाद्वामदक्षिणयोर्द्वयोरपि वर्गयोः त्रिसंख्याकत्वेन षट्त्वे द्वाभ्यां श्यामलाभद्राभ्यां चान्याभ्यामष्टतापर्याप्तौ सुघटता स्यादिति । तदेवं स्थिते या पुनरुत्तरवर्गप्रथमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥

प्राज्ञमीश्वरं प्राप्य यथा मुमुक्षवो जनाः । यद्वा प्राज्ञं ब्रह्मज्ञं प्राप्य यथा संसारिणः । यद्वा प्राज्ञं सौषुप्तं प्राप्य यथा विश्वतैजसावस्था जीवाः ॥ ९ ॥

'एका भ्रुकुटिम्' इत्यादिना वर्णिता सा परमभावसौभाग्योपरिकाष्ठापन्नत्वाच्छ्रीरावैव "यथा राधा प्रिया विष्णोस्तस्याः कृष्णस्तथा प्रियः । सर्वगोपीषु सैवैका विष्णोरत्यंतवल्लभा ॥" इति पाद्मोक्तेः, 'राधा वृंदावने वने' इति मात्स्यस्कांदादिभ्यः, "देवी कृष्णमयी प्रोक्ता राधिका परदेवता । सर्वलक्ष्मीमयी सर्वकांतिः संमोहिनी परा ॥" इति बृहद्गौतमीये च, "राधया माधवो देवो माधवेनैव राधिका । विभ्राजते जनेष्वा—" इति ऋक्परिशिष्टे वर्णिता च सा, तथैव श्रीजयदेवसहचरेण महाराजलक्ष्मणसेनमंत्रिणोमापतिधरेण—"भ्रूवल्लीवलनैः कयापि नयनोन्मेषैः कयापि स्मितज्योत्स्नाविच्छुरितैः कयापि निभृतं संभावितस्याध्वनि । गर्वोद्भेदकृतावहेलललितश्रीभाजि राधानने सातंकानुनयं जयंति पतिताः कंसद्विषो दृष्टयः ॥" इति । विवृतं चैतन्मदनुजवरैः श्रीरूपमहाभागवतैरुज्ज्वलनीलमणेः स्थायिभावविवरणे । अतो गांधर्वेति या गोपालतापिन्यां प्रसिद्धा सापि मुख्यत्वलिंगेनैयमेवेति मन्यन्ते । अस्यां प्रह्लादसंहितायां पूर्वपूर्वापेक्षया वचनकौशल्यान्मध्यात्वम् । अत्र च कोपावसरेऽपि लीलाविशेषमात्रव्यंजितप्रागल्भ्यतया बाहुधारिण्याद्यपेक्षया मध्यात्वमिति च समानम् । अथ या 'अपरानिमिषदृ—' इत्यादिना तत्सखी वर्णिता सा ललितेत्यवगम्यते वाम्यप्राखर्याभ्यां साम्यात्, संप्रति नातिवाम्यादिकं तु निजवरसखीनिशातदृक्पातघातजाततत्क्षोभदर्शनेनातिसंतोषात् । एषा च राधानुराधा इति या भविष्योत्तरे पठिता तदपरपर्यायैव वा । तत्र च पाठस्य नाम्नोश्च युग्मतामयतावगतेरत्रापि समवर्गप्राप्तसखीवृंदप्रथमोक्तेर्मुख्यताप्राप्तिसाम्यात् । अथ 'तं काचिन्नेत्ररंध्रेण' इत्यादिर्वर्णिता तत्सखी तु प्रायः श्रीविशाखैव वाम्यमार्दवाभ्यां साम्यात् । प्रह्लादसंहितायामपि—'न शीलम्' इत्यादिकं तद्वाक्यं तादृशमेव । अथ या प्रथमवर्गस्य प्रथमा सा श्रीचंद्रावल्येव, यतः श्रीराधया सह प्रतियोगितयैतद्धामस्था एव विराजते । तथा च श्रीबिल्वमंगलचरणाः—"राधामोहनमंदिरादुपगतश्चंद्रावलीमूचिवान्राधे क्षेममिहेति तस्य वचनं श्रुत्वाह चंद्रावली । कंसक्षेममये विमुग्धहृदये कंसः क्व दृष्टस्त्वया राधा क्वेति विलज्जितो नतमुखः स्मेरो हरिः पातु वः ॥" इति । अर्थसाम्यप्रायादियं भविष्योत्तरख्याता सोमाभैव वा स्यात् । अथ वा—तस्या द्वितीया 'काचिद्दधार' इत्यादिना श्रीराधासुहृद्वर्णिता सा श्यामला भवेत्, प्रह्लादसंहितायां ललितागणे प्रविश्य हितोपदेशदानेन तस्याः सौहृद्यलक्षणावगतेः । सखीनां समदुःखप्रलापिता भवति, किंचिद्यंतरितस्यैव तु हितोपदेशदातृता दृश्यत इति इयमेव श्रीमध्वाचारभारततात्पर्ये दर्शिता लीलाख्या भवेत् । अथ 'काचिदंजलिना' इति 'एका तदंघ्रिम्' इति वर्णिते ये चंद्रावलीसख्यौ तथा विष्णुपुराणे यास्तटस्था वर्णितास्ताः क्रमेण शैब्यापद्माभद्रास्स्युः, सेवकत्वदैन्येन, संजिगमिषया, नातिस्फुटभावविशेषत्वेन च साम्यादिति । "महानुभावसंमत्या युक्तिप्रायं व्यलेखि यत् । तत्र कृष्णस्तदीयाश्च ममानन्यगतेर्गतिः ॥ ताः सद्ग्रन्थरहोलीला नाम्ना संकोचमाप्नुयुः । मुनिनैवंकृताह्वानाः क्षमंतां मम चापलम् ॥" ॥ ८ ॥ ता यूथीभूताः । मुमुक्षूणामुपासनयेश्वरसाक्षात्कारेणैव संसारतापहानिः "मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ" इत्याद्युक्तेः । "ज्ञानादेव तु कैवल्यम्" इति श्रुतेर्ज्ञानस्यैव संसृतिनाशकत्वाद्वेदांतिमतेन पूर्वोक्तार्थेऽस्वारस्यादर्थांतरमाह—यद्वेति । ब्रह्मज्ञम् ज्ञानिनम् । ज्ञान्यनवरतसंगेन तदुपदिष्टात्मतत्त्वसाक्षात्कारेणाज्ञाननिवृत्त्या परमानंदस्वरूपावाप्तेः संसारतापहानिः स्फुटैवेति सर्वानुभूतार्थपरित्यागेनाननुभूतार्थकथनमन्याय्यमिव मत्वा पुनरर्थांतरमाह—यद्वेति । सौषुप्तम् सुषुप्त्यवस्थासाक्षिणम् । विश्वतैजसावस्था जीवा जाग्रत्स्वप्नसाक्षिणः सुषुप्तौ जाग्रत्स्वप्नोभयकालिकदुःखानामननुभवात् "अन्धोऽनंधो दुःख्यदुःखी" इत्यादिश्रुतेः । केवलसुखमेव तत्रानुभूयते सुखमहमस्वाप्समिति तदुत्थितस्मृतेः ॥ * ॥ प्राज्ञम् परमभागवतम् । जनाः संसारतप्ताः । "गृहेषु तप्ता निर्विण्णा यथाच्युतजना—" इति प्रावृड्वर्णनोक्तेः । **संदर्भस्तु**—प्राज्ञं सुषुप्तिसाक्षिणमिव सुषुप्तावविद्यावत् पुनः परित्यागशंकाया निगूढस्थितेरित्याह ॥ अत्र **तोषिणी**—नन्वन्यासां का वार्ता तत्राह—सर्वा इति । "तासां तत्सौभगमदं वीक्ष्य मानं च केशवः" इत्यत्रैवात्र च केशवशब्दः परमतेजोनिधानतापरः । ततश्च तदानीं यथा तस्यांतर्द्धानं तासां तेजोंतर्द्धापनं तथा संप्रत्याविर्भावेन तदाविर्भावो जात इति भावः । तस्यालोक एव परमानंदप्रदत्वात्परमोत्सवस्तेन निर्वृताः प्राप्तदुःखनिवर्तकपरमसुखाः । तत्रानुरूपो दृष्टान्तः—प्राज्ञमिति । सुषुप्तावविद्याया इव पुनः परित्यागशंकाया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥ व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ १० ॥ ताः समादाय कालिंद्या निर्विश्य पुलिनं विभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदम् ॥ ११ ॥ शरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवम् ॥ कृष्णाया हस्ततरलाऽऽचितकोमलवालुकम् ॥ १२ ॥

पुरुषः परमात्मा शक्तिभिः सत्त्वादिभिर्यथा । यद्वा उपासकः पुरुषो ज्ञानबलवीर्यादिभिः । यद्वा पुरुषोऽनुशायी प्रकृत्याद्युपाधिभिर्वृतो यथाऽधिकं विरोचते तद्वत् ॥ १० ॥ विकसत्कुंदमंदारैः सुरभिर्योऽनिलस्तस्मात्षट्पदा यस्मिंस्तत् पुलिनम् ॥ ११ ॥ शरच्चंद्रांशूनां संदोहैः समूहैर्ध्वस्तं दोषातमो रात्रि गतं तमो यस्मिंस्तत् अतः शिवं सुखकरम् ।

निगूढस्थितेरिति ॥ ९ ॥ ताभिः पूर्वमुद्दिष्टाभिः भगवद्दर्शनात्त्यक्तक्लेशाभिः । अच्युतोऽस्पृष्टशोकः । "पूर्वमेवाहमिहासम्" इति, "तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः । पुरुषः परमात्मा । सत्त्वादयो यद्यपि मायाकार्यत्वा न्मायाशक्तयस्तथापि मायायाः 'मम माया दुरत्यया' इत्याद्युक्तेस्सापि तच्छक्तिरतस्तस्या याश्शक्तयस्ता अपि तस्यैव ह्युपकरणानां स्त्रीस्वामित्वत् । एतदर्थस्य विज्ञेयत्वेन दुर्बोधत्वादर्थांतरमाह । "ज्ञेयो लोके स पुरुषो भजते यो हरिं सदा । तदन्यः खुरशृंगादिवर्जितो द्विपदः पशुः ॥ " इत्युक्तेः । पुरुष उपासकः भगवद्भक्तः । भक्तेर्ज्ञानाद्युत्पादकत्वं प्रथितमेव । यद्वा—हरेर्भक्ताधीनत्वेन स्वातंत्र्याभावा द्भक्ताधिक्यमत्रोक्तम् । "प्रसिद्धमेतल्लोकेऽस्मिन्स्वामिनः सेवकोऽधिकः । सेतुं कृत्वाऽतरद्रामो वायुजोब्धिं तु कूर्दनात् ॥" इत्यभियुक्तोक्तेः । ननु पुरुषपदं जीवपरम् 'क्षेत्रज्ञ आत्मा पुरुषः' इत्युक्ते स्तत्कथमन्यपरतया व्याख्यातमितिचेत्, 'तुष्यतु दुर्जनः' इति न्यायेनाह—यद्वा पुरुषोऽनुशायीति । "अनुशायी जीवः भगवन्निद्रामनुशेते प्रलयावस्थायाम्" इति निरुक्तेः । "अत्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु" इत्युक्तेः । प्रकृत्यादीत्यत्रादिना महदहंकारादिग्रहः । "यथा प्रकृतिभिर्गुप्तः पुमान्राजा च सप्तभिः" इत्याद्युक्तेः ॥ * ॥ शक्तिभिः सेंद्रियशक्तिभिः पुरुषो यथाधिकं विरोचते, तासां वैकल्ये सति तु नात्यन्तं रोचते, एवमेव कृष्णोप्यासां खिन्नत्वे खिन्नो नाधिकं रोचते, आसां विधूतशोकत्वेनाधिकरुचिसत्त्वे सोप्यधिकं रोचते । पुरुषस्य यथा स्वेंद्रियसुख एव सुखं स्वेंद्रियदुःखे दुःखमेवमेवं कृष्णस्यापि तासां सुखदुःखाभ्यामेव सुखदुःखे इति गोपीविषयकप्रेमवत्त्वं तासां स्वस्वरूपभूतत्वं ज्ञापितम् । स्कांदे प्रभासकांडे यथा—"षोडशैव सहस्राणि गोप्यस्तत्र समागताः । हंस एव मतः कृष्णः परमात्मा जनार्दनः ॥ तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः । चंद्ररूपी मतः कृष्णः कलारूपास्तु ताः स्मृताः ॥ संपूर्णमंडला तासां मालिनी षोडशी कला । षोडशैव कला यास्तु गोपीरूपा वराननाः ॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक्पृथक् । " इति । 'प्रमदाशतकोटिभिराकुलितः' इत्यागमोक्तेस्त्रिशतकोट्यो गोप्यस्तासां मध्ये द्वे राधाचंद्रावल्यौ मुख्यतमे, तयोरपि मध्ये श्रीराधा सर्वमुख्यतमेति भक्तिशास्त्रनिर्णयः ॥ अत्र **तोषिणी**—ततो मदमानौ परित्यज्य सर्वा मिलित्वैव तदनुगता बभूवुः, ताभिः श्रीभगवतोऽपि परमशोभाविर्भावो जात इत्याह—ताभिरिति त्रिकेण । भगवानिति—भगवान्सर्वसंपूर्णोपि अच्युतः । तत्र कथंचिच्च्युतिरहितोपि अधिकं पूर्वपूर्वतः प्रकृष्टं यथा स्यात्तथा ताभिर्विशेषेणारोचत । तादृशस्यापि ताभिस्तादृशत्वे तदाविर्भावविशेष एव दृष्टांत इत्याह—पुरुषः ईश्वरः । स यथा भगवद्रूपेण शक्तिभिरैश्वर्यादिमयस्वरूपशक्तिभिर्वृत एवाधिकं विरोचते न तु ब्रह्मरूपेण । ताभिरावृत इति तथा सोपि ताभिः प्रेमविशेषमयस्वरूपशक्तिभिर्वृत एवाधिकं व्यरोचतेत्यर्थः । तातेति संबोधनं परमानुकम्पायाम् 'तातोऽनुकम्पे पितरि' इति नानार्थात् । परमानुकम्प्यत्वादेव रहस्यमिदं त्वयि प्रकाशयामीति भावः ॥ १० ॥ समादाय सम्यग्वस्तधारणादिनाऽऽदाय । षट्पदा भ्रमराः ॥ किरणसंदोहस्य संमार्जनीत्वं ध्वनितम् । अतः तमोरहितत्वात् । यद्वा—कामजयस्फोरणार्थं शिवपदम् । कृष्णायाः कालिंद्याः । "अणुतरंगो लोलः स्यात्तरलः कुरुलस्तथा" इति गोपालः । 'आचितं छन्नसिक्तयोः' इति च । अतस्तरलैरणुतरंगैः निर्विश्य उपविश्य । तत्र पुलिने । आभिः गोपांगनाभिः ॥ * ॥ ततश्च ताः सम्यग्वास्यहस्तग्रहादिनाऽऽदाय निर्विश्य पुलिनं प्रविश्य च व्यरोचतेति पूर्वेणैवान्वयः । पुलिनं विशिनष्टि सार्धेन । विकसद्भिः कुंदैः मंदारैश्च सुरभिर्योऽनिलस्तस्मात्षट्पदा यस्मिंस्तत् । वायोः शैत्यं पुलिनसंबंधात्, मांद्यं षट्पदास्पदत्वात् । शरच्चंद्रांशूनां संदोहैर्ध्वस्तं दोषाया रात्रेस्तमो यत्र तत् । शिवमत एव सुखदम् । यमुनाया हस्तरूपैस्तरलैस्तरंगैराचिता आस्तृताः कोमला वालुका यस्मिंस्तत् ॥ अत्र **तोषिणी**—विशब्दोक्तस्य रोचने वैशिष्ट्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दर्शनाह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः ॥ स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे ॥ १३ ॥

हस्तरूपैस्तरलैस्तरंगैराचिता आस्तृताः कोमला वालुका यस्मिन् एवंभूतं पुलिनं ताः समादाय निविश्य तत्र ताभिर्वृतोऽधिकं व्यरोचतेति पूर्वेणान्वयः ॥ १२ ॥ ताश्च मनोरथानामंतं ययुः पूर्णकामा बभूवुरित्यर्थः । श्रुतयो यथेति । अयमर्थः । यथा कर्मकांडे श्रुतयः परमेश्वरमपश्यंत्यस्तत्तत्कामानुबंधैरपूर्णा इव भवंति ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णाः कामानुबंधं जहति तद्वदिति । आप्तकामा अपि प्रेम्णा तमभजन्नित्याह । स्वैरिति । अचीक्लृपन् रचयामासुः आत्मबंधवेंतर्यामिणे ॥ १३ ॥

स्योपकरणांतरमपि दर्शयति–ता इति द्वाभ्याम् । सम्यक् प्रत्येकं सर्वासामेव हस्तधारणादिनाऽऽदाय रासयोग्यपुलिनांतरं गन्तुं पूर्वपुलिनतो गृहीत्वा । निविश्य मध्यमधिष्ठायेत्यर्थः । विभुर्व्यापक इत्येकस्यापि सर्वासां युगपत्सामदानादिसमावेशार्थमित्यर्थः । पुलिनस्य भावोद्दीपनसामग्र्या रासक्रीडायोग्यतां दर्शयंस्तद्विशिनष्टि–विकसदिति सार्धेन । वायोः शैत्यसौरभ्ये स्पष्टे, मांद्यञ्च षट्पदास्पदत्वात् । शरदिति चंद्रांशूनां सुप्रसन्नता, संदोहेति चंद्रस्य पूर्णता, ध्वस्तदोषेति दिनवत्प्रकाशश्च सूचितः । कृष्णायाः श्रीकृष्णस्य सनामत्वेन सवर्णत्वेन च सख्यं प्राप्तायाः, अत एव–हस्तेति । किं वा–विचित्रशोभादिना तस्यापि चित्ताकर्षकत्वेन तन्नाम्न्याः । 'वृंदावनं गोवर्धनम्' इत्यादिः । हस्तेति हस्तैरिवावचयनेन स्थलीवैषम्यं कठिनांशराहित्यादिकं च ध्वनितम् । यद्वा–ताः समादायेति ताभिः सह तदेव पुलिनं निर्विश्य मध्यप्रदेशं प्रविश्येत्यर्थः । विशेषेण भवतीति विभुः । बभूवेति शेषः । तद्द दर्शनेति द्वाभ्यां वक्ष्यते । अन्यत्समानम् ॥ ११ ॥ १२ ॥ ताः यूथीभूताः । पूर्णकामाः प्राप्ताभिलषितार्थाः । दृष्टांतसिद्धमर्थं स्फुटयति–अयमर्थ इति । कर्मकांडे पूर्वमीमांसायाम् । श्रुतयः तदभिमानिन्यो देवताः । परमेश्वरम् परमात्मानम् । "वर्ष्मोस्मि समानाम्" इत्यादिभिः, "आयंतु नः पितरः" इत्यादिभिश्च केवलकामानुबन्धिकर्मप्रतिपादनेनापश्यन्त्यो वर्णयन्त्यः तत्तत्कामानुबन्धैः सर्वाच्छादकत्वपित्रादिप्रीणनादिभिरपूर्णा । इवेतीवशब्देन कर्मणोऽप्यन्तःकरणशुद्धिद्वारा तद्दर्शनोपयोगित्वमुक्तम् । ज्ञानकाण्डे उत्तरमीमांसारूपे । परमेश्वरम् "सर्वं खल्विदं ब्रह्म" इति, "ब्रह्माहमस्मि" इत्येवं चराचरात्मसहितमात्मतत्त्वं दृष्ट्वानुभूय तदाह्लादपूर्णाः स्वात्मज्ञानानन्दपूर्णाः कामानुबन्धं तत्तत्कर्मजसुखेहां जहति, ब्रह्मानन्दे सर्वानन्दानामंतर्भूतत्वात्, "तस्य मात्रामुपजीवंत्यन्ये" इत्यादिश्रुतेः । तद्वदिति प्राप्तात्मानंदवत्कामानुबन्धं हित्वा तद्दर्शनाह्लादेन श्रीकृष्णदर्शनानंदेन विधूता नष्टा हृद्रुजोऽविषयीकरणलक्षणा यासां तास्तथा । आप्तकामाः श्रीकृष्णदर्शनेन पूर्णमनोरथा अपि । प्रेम्णा अनुरागेण । तम् श्रीकृष्णम् । उत्तरीयैः प्रावरणवस्त्रैः। कुचकुंकुमांकितैरनेनैकैकवस्त्रा अप्यानंदविवशाः सत्यस्तैरेवासनं ददुरिति ध्वनितम् । आत्मबंधव इति–देहबंधुदर्शनेऽपीतिकर्तव्यताविस्मृतिर्भवति किमुतात्मबंधुदर्शन इत्याह ॥*॥ अत्र तासां सख्यसमुचितां प्रेमसेवामाह–तस्य श्रीकृष्णस्य दर्शनानंदेन खंडितसर्वमनोदुःखा व्रजसुंदर्यः स्वीयैरुत्तरीयैः कुचकंचुकोपरिस्थैरतिसूक्ष्मवस्त्रैरात्मबंधवे तस्मै आसनं तथाऽचीक्लृपन्नुपजह्रुर्यथा श्रुतयो महोपनिषदोऽपि मनोरथानामंतं परमकाष्ठां ययुः । यतोऽधिकोऽन्यो मनोरथो न संभवति तं प्रापुः । यद्दृष्ट्वा वयमपि व्रजे गोप्यो भूत्वा श्रीकृष्णेन सहैवं कुचकुंमस्तिमितवस्त्रार्पणादिना कदा विलसाम इत्युत्कण्ठिता बभूवुरित्यर्थः । अत एव श्रुतयो गोपीत्वप्राप्त्यर्थं तीव्रं तपश्चक्रुरिति बृहद्वामनीया कथा, "स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः" इति तासामुक्तिश्च । तत्र पूर्वकल्पगतकृष्णावतारदर्शिन्यः श्रुतयो लब्धचरमनोरथा एतस्मिन्कल्पे गोप्यो बभूवुरेव, एतस्मिन्कल्पे तु लब्धमनोरथा एताः श्रुतयोऽग्रिमकल्पे गोप्यो भविष्यन्ति श्रुतीनामानंत्यादिति ज्ञेयम् ॥ अत्र **तोषिणी**–ततोऽतिहृष्टानां प्रेमसेवामाह–तदिति । तस्य क्रीडाविशेषोत्सुकस्य विभोर्दर्शनेन च य आह्लादस्तेन विशेषतो धुता नाशिता हृद्रुजः सर्वा आधयो यासां, तथाविधेन तेन सह तत्रागमनेन रासक्रीडामयचिरस्थितिर्निर्धारिता, पूर्वशंकापगमात् । न केवलं परमदुःखशांतिरेव अपि तु परमसुखप्राप्तिरपि जातेत्याह–मनोरथस्य वांछितस्यान्तं परां काष्ठां ययुरिति । तत्र दृष्टान्तः–श्रुतयो यथेति । श्रुतयोऽपि तादृशलीलाविशिष्टं तं प्रकाश्य निजनिजनानातात्पर्यदौस्थ्यं परित्यजंति परमतात्पर्यावसानञ्च प्राप्नुवंतीति । तदुक्तमेकादशे स्वयं श्रीभगवता–'यस्यां न मे पावनमंग कर्म' इत्यादि, द्वादशे च श्रीसूतेन–'स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावः' इत्यादि च । तत्राप्येषा परमप्रेममयरासलीलेति श्रुतयोऽप्यत्रैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रोपविष्टो भगवान्स ईश्वरो योगेश्वरांतर्हृदि कल्पितासनः ॥ चकास गोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥
सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा ॥ संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १५ ॥

गोपीसभागतस्ताभिः संमानितः संश्चकास शुशुभे । त्रैलोक्ये या लक्ष्मीः शोभा तस्या एकमेव पदं स्थानं तद्वपुर्दधद्दर्शयन् ॥ १४ ॥ सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवोपलक्षिताः । संस्पर्शनेन शनैः संमर्दनेन ॥ १५ ॥

कृतार्था जाता इत्यस्या लीलाया महिमापि दर्शितः । अतः सहोक्तिनामालंकारोऽयं व्यंजितः । ततश्च सुस्थिरचित्ताः सत्य आसनमचीक्लृपन् विचित्रचारुक्रमेण रचयामासुः । कैः—स्वैः स्वयंपरिहितै रुत्तरीयैः । सर्वांगीणवस्त्रस्यांतर्गतैः ' कुचपट्टिकां वा ' इति वक्ष्यमाणानुसारेण हृदयावरणरूपैः । विरहरोदनधारापातात्कुचकुंकुमेनांकितै रंजितैरित्यर्थः । ननु लज्जाशैथिल्यमिव ताभिरंगीकृतं स्वोपयुक्तै र्वस्त्रैरासनं च दत्तं तत्राह—आत्मनो बंधवे । आत्मीयत्वेन मित्रत्वेन च भावादित्यर्थः । आसनञ्चेदं सर्वासां सूक्ष्मवस्त्रमयविस्तीर्णमेकमेव वर्गशः पृथक्पृथगेव ज्ञेयम् ॥ १३ ॥ तत्र गोप्युत्तरीयासने । यो योगेश्वराणां सनकादिप्रभृतीनामंतर्हृदि हृदयपद्मकर्णिकायां विमलोत्कर्षिण्यादिशक्तिभिः कल्पितासनः स एवेश्वरो नंदनंदनरूपेण गोपीसभागत इति संबंधः । चकाश 'काशृ—दीप्तौ ' । अर्चितः आसनतांबूलनर्मसस्मितापांगादिभिः संमानितः । धातूनामनेकार्थत्वाद्दर्शनेऽपि दधातिरस्ति ॥ * ॥ तत्र प्रतिस्वयूथमेव पृथक्पृथगुपर्युपरिनिहितबहुवस्त्रासनेषु ताभिः क्लृप्तेषूपविष्टः । ननु तावत्संख्याऽऽसनेषु कथमेक उपविष्टस्तत्राह—ईश्वरः तत्तदलक्षिततावत्प्रकाशवान् । तत्र हेतुः—भगवान् कामवान् ' भगं श्रीकामामाहात्म्य—' इत्यमरः । तस्य तावत्सु सर्वेष्वेवासनेषूपवेष्टुं कामनामालक्ष्यैश्वर्य्यैव शक्त्या योगमाया द्वारा तावन्तः प्रकाशास्तथा प्रकाशिता इत्यर्थः । किञ्च, स हि योगेश्वरैः शेषशंकरायैरन्तर्हृदि हृदयाभ्यन्तरे एव कल्पितं मनसैवानीतत्वात्त्रिजगद्दुर्लभमनुपहतमनर्घ्यमासनं यस्य सः । एताभिस्तु हृदयाद्बहिरेव स्वगात्रनिर्मा ल्यवस्त्रैः स्वोपभुक्तसुगंधैरासनं कल्पितं यत्तत्रैवोपविष्टश्चकाश दिदीपे । यः खलु स्वयं भगवान्ब्रह्मरुद्रादिपरिषदा क्षीरोदादितीरे स्तुत्यादिगम्य एव मनसि प्रादुर्भवन्परोक्ष एव क्षणमात्रमेव भवेत्, स एव गोपीपरिषदं स्वयं गतोऽच्युतश्चिरकालमभिव्याप्य च्युतिरहितः । ' अर्चितः' इति पाठे तांबूलनर्मस्मितापांगादिना संमानितः । किं कर्तुं गतः—प्राकृताऽप्राकृताधोमध्योर्द्ध्वलोके या लक्ष्मीस्तत्तदनंतस्वांशपर्यंतवस्तूनां नानाशोभादिसंप त्तिस्तस्या एकमनन्यत्पदमाश्रयभूतं यद्वपुस्तदपि दधत् । तासां गोपीनामंगकांतिस्मितकटाक्षादिमाधुर्यैः पुष्णन् । यद्वा—तत्रोपविष्ट एव तत्र तादृशोपवेशादिविशिष्ट एव योगेश्वरांतर्हृदि कल्पितासनः तत्क्षणमारभ्य महारुद्रादिभिर्योगेश्वरैर्गोपीपरिषन्मध्यगततादृशोपवेशतादृशशोभातत्तन्नर्मसंलापादिविशिष्ट एव कृष्णो ध्यानेन स्वहृदयमानिन्य इत्यर्थः ॥ अत्र **तोषिणी**—स प्रेमरसांबुधिवर्द्धनः श्रीकृष्णश्चंद्रः स्वयं भग वानैश्वर्यादिषड्गुणसंपन्नोऽपि तथा ईश्वरः नित्यमपूर्वापूर्वतत्प्रकाशनसमर्थोऽपि तत्र तास्मिन्नासन उपविष्टः संश्चकाश । तत्रासंभवशोभाविर्भाववान्बभूव । अन्यत्र पुनरसौ परमदुर्लभ एवेत्याह—योगेश्वरैः सिद्धसमाधिभिः श्रीरुद्रादिभिरपि अंतर्हृदि कल्पितं भावनामात्रेण स्थापितमासनं यस्य तादृशोऽपि । अलुक्समासः । अर्थात्तैरेव कल्पितमिति वा । तस्मा त्तासां संबन्धस्यैवैष महिमेति भावः । तत्र च वैशिष्ट्यमाह—गोपीति । यद्वा—तादृशेन गोपीपरिषद्गतत्वेनैव योगेश्वरांतर्हृदि कल्पितासन इति ज्ञेयम् । किञ्च, अर्चित आसनतांबूलनर्मस्मितापांगादिना संमानितः । किं कुर्वंश्चकाश—त्रैलोक्यस्य प्राकृताधोमध्योर्द्ध्वलोके परमव्योमाख्यमहावैकुंठपर्यन्ते या लक्ष्मीस्तत्तदनंतस्वाविर्भाववस्तूनां नानाशोभादिसंपत्तिस्तस्या एकमनन्यत्पदमाश्रयभूतं वपुःप्रकाशं बिभ्रत्, तासामग्रे धारयन्प्रकटयन्नित्यर्थः । तथा च वक्ष्यते—'गोप्यस्तपः किमचरन्यदमुष्य' इत्यादि ॥ १४ ॥ तम् कृष्णम् । सभाजयित्वा सत्कृत्य । अनङ्गदीपनम् कामोद्दीपकम् । अंके उत्संगे कृतयोरंघ्रिहस्तयोः संमर्दनेन । संस्तुत्य संश्लाघ्य । ईषत्कुपिताः प्रेम भरस्वभावत्वात्कोपालत्वम् ॥ * ॥ ततश्च रिरंसवे तस्मै रतमदित्सूनां तासां चेष्टितमाह—सभाजयित्वेति । सहासलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा अनंगदीपनम् स्वीयं कामं द्योतयन्तं, तासां वा कामोद्दीपकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्य ऊचुः ॥ भजतोऽनुभजंत्येक एक एतद्विपर्ययम् ॥ नोभयांश्च भजंत्यन्य एतन्नो ब्रूहि साधु भोः ॥ १६ ॥

तत्र भगवतोऽकृतज्ञतां तद्वचनेनैवापादयितुकामा गूढाभिप्राया लोकवृत्तांतमिव पच्छंति । भजत इति । भजतः प्राणनः अन अनंतरम् । केचित्तद्भजनानुसारेण भजंति । केचिदेतद्विपर्ययं यथा भवति तथा । तद्भजनानपेक्षमभजतोऽपि भजंति । अन्ये तु नोभयानिति ॥ १६ ॥

तं सभाजयित्वा तदुचितैरेव भावैः संमान्य पूर्वं नः संत्यज्य गतः संप्रत्येवं चेष्टत इति प्रणयकोपगोपनार्थमंककृतयोस्तेनैव तासामंके न्यस्तयोस्ताभिरेव वा स्वांके कृतयोः अंघ्रिहस्तयोः संस्पर्शनेन संस्तुत्य-अहो ते करचरणयोरद्भुतं शैत्यं यत्संस्पर्शनेनैवास्मत्संतापो निर्वाणस्तस्मात्त्वं सत्यं संतापदुःखानभिज्ञः सदा सुखी विधुरेवासीति व्याजस्तुत्या स्तुत्वा ईषत्कुपितास्तद्दर्शनानंदस्वभावत एव विनष्टीभूतकोपस्य शेषभागवत्य इत्यर्थः ॥ अत्र **तोषिणी**-तत्र च प्रणयस्वभावेन तासां निगूढां कोपोत्पत्तिमाह-सभाजयित्वा पूर्वोक्तप्रकारेण संमान्य तं बभाषिरे पृष्टवत्यः, ता इति शेषः । कीदृश्यः सत्यस्तत्राह-ईषत्कुपिताः । ननु तादृक्सभाजितवत्यश्चेत्तर्हि कथमीषत्कोपस्याप्यवसरमर्हति, तत्राह-अनंगदीपनमिति । तद्दीपनकृते नानाविलासमभिव्यंजंतमित्यर्थः । पूर्वं परित्यज्य गतः संप्रत्यसावेवं चेष्टत इति प्रणयस्वभावविमर्शनेनेति भावः । ननु कुचकुंकुमाक्तवक्षोपवेशतया स्वेषामेव तदनंगदीपनत्वे प्रागेव जाते सति तस्य तद्दीपनं दृष्ट्वा सन्तमपि कोपं व्यक्तीकर्तुं कथमर्हन्ति, तत्राह-अंककृतांघ्रिहस्तयोः संस्पर्शनेन संस्तुत्येति । तादृशतया तत्तत्स्पर्शपूर्वकं नानागुणप्रशंसया संतोष्येत्यर्थः । तेन कोपं तु गोपितवत्य एवेति भावः । तर्हि कोप आसीदिति कथं ज्ञायते, तत्राह-सहासेति । उपलक्षणे तृतीया । स्वगिरैवायं व्यक्तदोषः स्यादिति मतिकौटिल्यव्यंजकेन तादृशभ्रूविलासेन व्यक्ततत्कौटिल्य इत्यर्थः । व्यक्तीभविष्यति च तत्कौटिल्यं प्रश्नपरिपाट्येति भावः । तदेवमवहित्था नाम संचारी व्यक्तः।तदुक्तम्-"अनुभावपिधानार्थोऽवहित्थं भाव उच्यते" इति।अवहित्थेति स्त्रीलिंगता च।तथा "हेतुः काश्चिद्भवेत्काश्चिद्व्रीड्यः कश्चन गोपनः । इति भावत्रयस्यास्य विनियोगः समीक्ष्यते॥" इति च । यथाहेतुरत्र मतिकौटिल्यमेव गोप्योऽसूयामयोऽमर्षः गोपयन्त्यनेनेति गोपनः स चात्र तादृशतया तत्तत्स्पर्शसंभवाभ्यां प्रत्यायित,हर्षकौटिल्यं सहासादिकं च मतिकौटिल्यमयमपि तदेव प्रत्याययति । एवमत्रापि योगमायावैभवमेव दर्शितं, सर्वाभिर्युगपत्तथा व्यवहारात् । अंघ्रिहस्तयोरिति द्वित्वं प्रत्येकं जात्यपेक्षया ॥ १५ ॥ तत्र तदा । अकृतज्ञताम् कृतघ्नताम् । तद्वचनेन भगवद्वचनेन । गूढो गुप्तो भगवत्यकृतज्ञताद्योतनरूपोऽभिप्रायो यासां ताः । इवशब्देन भगवत्कर्मणामलौकिकत्वं सूचितम् । एके लौकिकाः । एके महात्मानः । अन्ये उभयविलक्षणाः । उभयान् भजतोऽभजतश्च । एतत्पक्षत्रयमस्ति यदत्र साधु निर्दोषपक्षस्तम् । भोः हे कृष्ण । नः अस्मभ्यम् ॥ * ॥ अत्र ताभिः प्रतिस्वं मनस्येवं विचारितम्-अद्य यदयं प्रेमिमुकुटमणिरप्यस्मानेवं दुरवस्थामलंभयत्तत्रायमेव प्रष्टव्यः-भोः कृष्ण तवास्मासु प्रीतिरौदासीन्यं द्रोहो वेति त्रयः पक्षाः संभाव्यमाना अपि विचारतो न घटंते । तत्र प्रीतिः सोपाधिर्निरुपाधिर्वा । नाद्या, सोपाधिप्रीतिमान् किल स्वकामसंपादकजनाननुरंजयत्येव न तु विरंजयति, त्वं त्वस्मानेव स्वविरहाग्नावधाक्षीरेव वधार्थम् । नापि परा, निशि घोरवनमध्य एवास्मत्त्यागादस्मत्कष्टद्रष्टुरपि तव क्रमानुत्पत्तेश्च । नाप्यौदासीन्यम्, अस्मत्सुखदुःखसाधकत्वदर्शनात् । नापि द्रोहः, स किं शाश्वतिकः प्रातिकूल्यनिबंधनो वा । नाद्यः, तथादर्शनाभावादेव । नापि द्वितीयः, अस्मासु तत्प्रातिकूल्याभावात् । किं त्वाश्वस्तपरिचारकजिघांसालक्षणविलक्षणो यः कश्चन द्रोहस्तस्यैवोदाहरणीभवता भवता भूयत इत्यादिकं स्वमुखेनास्माभिः स्फुटं न वाच्यं, किन्तु प्रहेलिकाभंग्या तथा किंचन प्रष्टव्यं यथायमेव यथार्थतया तत्प्रश्नोत्तरं ददान एतदादिकमर्थं व्याचक्षीतेति सहृदयत्वात्तुल्यमनोगतविमर्शास्ताः-भो महाप्राज्ञ कृष्ण एकामस्माकमर्थप्रहेलिकां व्याचक्ष्वेत्याहुः-भजतो जनाननुलक्षीकृत्यैव भजंति । एके जनाः सापेक्षं भजंतीत्यर्थः । अत्र सापेक्षवस्त्वलाभे सति नापि भजंतीति सोपाधिप्रीतिरायाता । एतद्विपर्ययं यथा स्यात्तथा भजन्ति । एकेऽभजतोऽपि भजन्ति निरपेक्षं भजन्तीत्यर्थः । अत्र स्वापेक्ष्यफलान्तरानुद्देशाद्भजनत्यागतो वा निरुपाधिप्रीतिरायाता । अन्ये तु नोभयान् भजंतीति नापि सापेक्षं नापि निरपेक्षं भजंतीत्यौदासीन्यमायातम् । द्वेषो द्रोहश्चाप्यभजनं भवेदिति तावप्यायातावित्यत एतद्विवरणे एवमेव किञ्चित्किञ्चिदधिकमपि व्यक्तीकरिष्यते भगवता । एतन्नो ब्रूहीति एते खलु के एतद्भजनमभजनं वा किं तद् ब्रूहीत्यर्थः । एते च एतच्च एतदिति "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इत्येकशेषैकत्वे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ मिथो भजंति ये सख्यः स्वार्थैकांतोद्यमा हि ते ॥ न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥
भजंत्यभजतो ये वै करुणाः पितरो यथा ॥ धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥

विदिताभिप्रायो भगवानुत्तरमाह । मिथ इति । हे सख्यः उपकारप्रत्युपकारतया ये मिथो भजंति तेऽन्यं न भजंति किं त्वात्मानमेव । कुतः । हि यस्मात्स्वार्थ एवैकांतत उद्यमो येषां ते । तत्र च न सौहृदमतो न सुखं न च धर्मः किं त्वर्थ एव दृष्टोद्देशाद्दोमहिष्यादिभजनवदित्यर्थः ॥ १७ ॥ ये त्वभजतो भजंति ते द्विविधाः करुणाः स्निग्धाश्च । तत्र तु यथाक्रमं धर्मकामौ भवत इत्याह । भजंत्यभजत इति ॥ १८ ॥

साधु यथार्थमेव ब्रूहि वैयधिकरण्यं मुंचन्नित्यर्थः ॥ अत्र **तोषिणी**–अथ सेयं परिपाटी स्वत्यागपरिहासार्थमेव ताभिः कृतेति बोधयन्नाह–गोप्य ऊचुरिति । तत्र चैतदिति उभयान् भजतश्चाभजतश्च न भजंतीत्यंतप्रश्नत्रयं साधु यथा स्यात्तथा ब्रूहीत्यर्थः । तेते के, किं वा तेषां फलं तत्सर्वं विविच्य कथयेत्यर्थः । भो इति संबोधनेनावधापयंति । स्वस्मिन्दोषपर्यवसानशंकया तस्य मनोनभिनिवेशानुकरणात् ॥ १६ ॥ विदितो ज्ञातोऽभिप्रायस्स्वस्मिन्दोषारोपलक्षणो येन स तथा । स्वार्थे स्वप्रयोजन एव । एकांतः निश्चितः । उद्यमः उद्योगः । तत्र परस्परभजने । अतः सुहृत्ताभावान्न सुखं, धर्मस्तु दानार्चनादिरूपोऽदृष्टार्थः प्रायो भवति । दृष्टोद्देशाद्दुग्धादिनिमित्तं, यद्यपि गोभजनमदृष्टार्थमपि तथापि प्राकृतैस्तदचिंत्य दृष्टार्थमेव तक्रियतेऽतो गोपदोपादानमत्रेति । इत्यर्थ इति–अन्योन्यपशुकंडूतिवद्दृष्टार्थस्य न धर्मत्वमिति भावः ॥ * ॥ विदिताभिप्राय उत्तरमाह–मिथ इति । उपकारप्रत्युपकारापेक्षया ये मिथो भजन्ति ते स्वार्थे दृष्टाऽदृष्टे स्वीयफलार्थ एव एकांत उद्यमो येषां ते । हि निश्चितं स्वात्मानमेव भजंति नान्यं, तन्मिथो भजनं नान्यथा अन्यथा न स्यात् अतस्ते स्वार्थपराः सोपाधिप्रीतिमन्तः । कामिन एवेत्यर्थः । तत्र तेषु सौहृदं प्रेम नास्ति । धर्म इति उत्तरश्लोकार्थदृष्ट्या निरपवादो धर्मश्च नास्ति । ‘ स्वात्मार्थम् ’ इति पाठे तदित्यस्य विशेषणमेतत् ॥ अत्र **तोषिणी**–स्वार्थोऽत्र स्वीयं दृष्टमदृष्टं च फलम् “ भजन्ति ये यथा देवान्देवा अपि तथैव तान् ” इति न्यायेन यज्ञादिसन्तोषितदेवतादिभिरपि गोमहिष्यादिभिर्दुग्धादिकमिव स्वर्गादिकं दीयत इति तस्मिन्नेकान्तस्तन्मात्रनिष्ठ उद्यमो येषां न तत्र सौहृदम् । धर्म इति प्रसिद्धमपि तद्वयं वक्ष्यमाणरीत्या सापवादमेव मन्यामहे इत्यर्थः । धर्मस्य स्वातंत्र्येण पुरुषार्थत्वेप्यर्थकामाभ्यां परिवर्तनाय विनियोगापातात्, सौहृदस्य चैकतरमयत्वादिति भावः । हि निश्चये । अन्यथा उक्तादन्यप्रकारेण । तत् मिथो भजनं न स्यात् । यद्वा–तत्र मिथ्यात्वं नास्तीत्यर्थः । तत्रात्मनोऽपि तासु तादृशभजनशंकां सहजसख्योल्लेखेन परिहरन्संबोधयति–हे सख्य इति । अन्यत्तैः । अत्रातो न सुखमित्यर्थबलाद्व्याख्यातम् । यद्यपि तत्रापि दृष्टसुखं घटते तथापि सौहृदराहित्येनोत्तमानां सुखबुद्धिर्न जायत इति भावः । किन्तु पाठोऽयं कल्पित इव लक्ष्यते । उत्तरत्रैतत्प्रतियोगिवाक्येऽपि नापेक्षितव्य इति । स्वार्थार्थमिति पाठोऽपि चित्सुखादीनां बहूनां संमतः । तत्र तद्भजनमन्यार्थं प्रतीयमानमपि स्वप्रयोजनार्थमेवेत्यर्थः । स्पष्टमन्यत् ॥ १७ ॥ तत्र तु तयोस्तु । करुणाः आर्तदर्शनश्रवणादिना द्रवद्हृदयाः । अत्र अभजद्भजने । निरपवादो निर्दोषः । सौहृदं साधुत्वं च । “ उपकारिषु यः साधुः साधुत्वे तस्य को गुणः । अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ ” इति जैमिनीयोक्तेः । हे सुमध्यमा इत्यनेन यूयं सुष्ठु मध्ये चेतसि भवं मध्यमं धर्मं यासां तास्तथा । अभजंतमपि मां भजंत्यो धर्मशीलाः स्थेति ध्वनितम् ॥ * ॥ द्वितीयप्रश्नस्योत्तरमाह–अभजतो ये भजन्ति निरपेक्षं भजंतीत्यर्थः । ते निःसंबंधसंबंधभेदाद्द्विविधाः । करुणा यथा–पितरो यथेति । तत्र करुणाः शुद्धभक्तास्तेष्वेव प्रह्लादादिषु निरुपाधिकरुणस्योदयदर्शनादिति दृष्टान्तद्वैविध्यादुभयेऽपि प्रत्युपकारानपेक्षिणस्तद्दुःखसुखाभ्यांदुःखसुखवन्तो भजनं प्राणात्ययेऽपि न त्यजन्ति । पूर्वे श्रेष्ठाः, उत्तरे अवराः । अत्रैवूभयेष्वेव धर्मो निरपवादः फलाकांक्षाराहित्यादनश्वरः । सौहृदं प्रेम च निरपवादम् । हे सुमध्यमा इति–श्लेषेण शोभनमध्यम एव प्रश्नो यासां ताः । विगीतोदाहरणत्वादाद्यन्तौ प्रश्नौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भजतोऽपि न वै केचिद्भजंत्यभजतः कुतः ॥ आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १९ ॥
नाहं तु सख्यो भजतोऽपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये ॥ यथाऽधनो लब्धधने विनष्टे तच्चिंतयाऽन्यन्निभृतो न वेद ॥ २० ॥

तृतीयप्रश्नोत्तरं भजतोऽपीति । अयमर्थः । ते त चतुर्विधाः । एके आत्मारामा अपराग्दृशः । केचिदाप्तकामा विषयदर्शिनोऽपि पूर्णकामत्वेन भोगेच्छारहिताः । अन्येऽकृतज्ञाः संमूढाः । अन्ये तु गुरुद्रुहोऽतिकठिनाः । 'स पिता यस्तु पोषकः' इति न्यायादुपकर्ता गुरुतल्यस्तस्मै द्रुह्यंतीति तथा ते ॥ १९ ॥ अत्र चरमकोटिगतमात्मानं मत्वाऽक्षिसंकोचैः परस्परं गूढस्मितमुखीस्ता दृष्ट्वाऽऽह । नाहं त्विति । हे सख्यः अहं तेषां मध्ये न कोपि किं तु परमकारुणिकः परमसुहृच्च । कथम् । अमीषां भजतामनुवृत्तिवृत्तये निरंतरध्यानप्रवृत्त्यर्थं तान्न भजामि । एतत्सदृष्टांतमाह । यथेति । तस्य धनस्यैव ।चतया निभृतः पूर्णो व्याप्त इति यावत् । अन्यत्क्षुत्पिपासाद्यपि न वेद ॥ २० ॥

विगीतावित्यर्थः । यद्वा—शोभनं मध्यममुत्तरं यास्वेवं मध्यमस्य प्रश्नोत्तरस्यास्य भवत्य एवोदाहरणानीत्यर्थः ॥ अत्र **तोषिणी**—वै प्रसिद्धौ । यथेत्युभयेषामुदाहरणार्थम् । पितरौ चेति चकारोऽध्याहार्यः । निरपवादो विप्रतिपत्तिरहित इत्यर्थः । सौहृदं च निरपवादम् । हे सुमध्यमा इति । सर्वसल्लक्षणोपलक्षणत्वेन तादृशगुणत्वं युष्मासु भात्येवेति भवत्य एव तत्र साक्षिण्य इति भावः । इदं च तासामात्मभजनार्थं चातुर्यम् । यद्वा—पूर्वं सोपाधि भजतामुद्दिष्टयोरपि सौहृदधर्मयोः सापवादत्वमुक्त्वा संप्रति निरुपाधि भजतामुद्दिष्टयोरपि तयोर्निरपवादत्वमाह । तत्राप्युदाहरणीकृतानां करुणानां पित्रोरप्यविशेषमाह—भजंत्यभजत इति । करुणेषु सौहृदस्यापि स्पष्टत्वात् । पित्रोः पुत्रादिपालनस्य गार्हस्थ्यधर्मसहायत्वाद्धर्मस्यापि सामान्यतः प्राप्तेः ॥१८॥ तृतीयप्रश्नस्य 'नोभयांश्च भजन्त्यन्ये' इत्येवंरूपस्य उत्तरं प्रस्फोटयति—अयमर्थ इति । ते उभयभजनहीनाः । एके मुख्याः । न पराक् बहिर्विषयान्पश्यन्ति किं त्वात्मानमेव केवलं ये पश्यन्ति तेऽपराग्दृशः ज्ञानिनः । केचित् तद्विशेषाः । आप्तः कामो येषां ते "आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् । तद्वत्कामा यं प्रविशन्ति सर्वे" इत्यादिस्मृतेर्ज्ञानिनां कामनोदयाभावात् । अन्ये प्राकृताः । संमूढाः अतिमूढाः । अन्ये तदितरे । अतिकाठिन्यं विना गुरूणां हिताशंसिनां द्रोहो न भवतीत्यभिप्रेत्याह—गुरुद्रुहः अतिकठिनाः ॥ * ॥ तृतीयप्रश्नस्योत्तरमाह—भजतोऽपीति । ते यथोत्तरन्यूनाश्चतुर्विधाः । आत्मारामा अबहिर्दृशः एके । अन्ये आप्तकामाः, बहिर्दर्शित्वेऽपि स्वत एव पूर्णकामत्वेन न परतो भोगेच्छवः । अपरे अकृतज्ञाः, परतो भोगेच्छुत्वेऽपि परैः कृतमुपकारादिकं न जानन्ति । अन्ये गुरुद्रुहः, परैः कृतमुपकारादिकं न मंन्यतां प्रत्युत तेभ्यो गुरु अधिकं द्रुह्यन्ति ते निर्हेतुकद्रोहिणः, सहेतुकद्रोहिणस्त्वल्पद्रुहः कैमुत्यप्राप्तत्वेन तदंतर्भूता एव, तथापालकत्वाद्गुरवश्च ते द्रुहश्चेति गुरुद्रुहो विश्वस्तघातिनश्चेति त्रिविधद्रोहोप्यभजनमेव । ततश्च प्रथमप्रश्नोत्तरस्योदाहरणमेकमेव, द्वितीयप्रश्नोत्तरस्य द्वे, तृतीयप्रश्नोत्तरस्य षडित्येवं नव ॥ अत्र **तोषिणी**—वै एव, नैव भजन्ति । हि प्रसिद्धौ । एवमकृतज्ञानामज्ञत्वेनाभजनमभिप्रेतं ज्ञात्वापि ये न भजन्ति ते त्वशेषदोषयुक्ता इत्याह—गुर्विति । गुरूपेक्षका इत्यर्थः । प्राणदंडोचितविप्रादेरिव तादृशस्योपेक्षा एव द्रोह इति । अत्र तु पदार्थे तात्पर्यं नास्ति किन्तु गौण्या वृत्त्या कृतोपकारोपेक्षका गम्यन्ते । तेन च तेषामर्थधर्मसौहृददयापेक्षाराहित्यं व्यज्यत इति ज्ञेयम् ॥ १९ ॥ अत्र चतुर्षु । चरमकोटिगतम् अंत्यकक्षाप्रविष्टम् । आत्मानम् श्रीकृष्णम् । मत्वा ज्ञात्वा । अक्षिसंकोचैः ईषन्नेत्रचालनैः । परस्परगूढस्मितमुखीः अन्योन्यगुप्तेषद्धासास्याः । ताः गोपीः दृष्ट्वा श्रीकृष्णो वक्ति—नाहं त्विति । तेषाम् चतुर्णाम् । न कोपि अन्यतमोऽपि न । किन्तु अपि तु । परमकारुणिकत्वादिकं शंकते—कथमिति । तान् भजतः । एतत् वृत्तम् । अधनो दरिद्रः । मम सकृत्संभूय पुनरंतर्द्धानं स्वस्मिन्प्रीत्यतिशयार्थम् "सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ । मत्कामः शनकैस्साधुः सर्वान्मुञ्चति हृच्छयान् ॥" इति नारदं प्रति मदुक्तेः । भक्तसंसृतिविनाशार्थमेव मम लीलेति भावः ॥ * ॥ तत्र प्रथमद्वितीयप्रश्नोत्तरोदाहरणेषु त्वं न वर्तसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥ मया परोक्षं भजता तिरोहितं माऽसूयितुं मार्हथ तत्प्रियं प्रियाः ॥ २१ ॥

एवं मदर्थोज्झितलोकवेदस्वानां मदर्थे उज्झितो लोको युक्तायुक्ताप्रतीक्षणात् वेदश्च धर्माधर्माप्रतीक्षणात् स्वा ज्ञातयश्च स्नेहत्यागात् याभिस्तासां वो युष्माकं परोक्षमदर्शनं यथा भवति तथा भजता युष्मत्प्रेमालापान् शृण्वतैव तिरोहितमंतर्धानेन स्थितम्। तत्तस्मात् हे अबला हे प्रिया मा मामसूयितुं दोषारोपेण द्रष्टुं यूयं माऽर्हथ न योग्याः स्थ॥ २१ ॥

तृतीयप्रश्नोत्तरोदाहरणेषु मध्ये कतम इति चेत्—श्रुणुत, भो मन्मुखेनैव मत्पराजयं शुश्रूषवो मिथः स्मितविलसितकटाक्षनटनचातुरीधुरीणाः सख्यः शृणुत—नारायणत्वेनात्मारामः पूर्णकामश्च भवन्नपि नंदपुत्रत्वेनानात्मारामोऽपूर्णकामश्च, गोपबालत्वेनानधीतनीतिशास्त्रत्वादकृतज्ञो भवन्नपि नारायणत्वेन सार्वज्ञ्यात्कृतज्ञश्च, सविलासादिभिर्मुहुः प्रणीतानामपि युष्माकं सकृन्मात्रत्यागेन द्रोहाद्गुरुध्रुगपि भवन्पुनः स्वदर्शनानंददानान्न गुरुध्रुक् च। तर्हि निश्चयेन को भवति भवानिति चेत्, तत्राह—नाहमिति। तुर्भिन्नोपक्रमे। जंतून् जीवमात्राणि भजतोऽप्यहं न भजामि। तर्हि पूर्वतः को भेदस्तत्राह—अमीषां भजतामनुवृत्तिर्मद्भजनं तस्या वृत्तये जीविकायै। हे अबला मदभिप्रायं ज्ञातुमसमर्थाः हंतहंत यमेवोपायं करोमि स एव विफलीभवति तस्मान्मय्यपराधिन्यनुग्रहलेशोऽपि कृष्णस्य नास्ति धिङ् मामिति प्रतिक्षणं निर्वेददैन्यादिवृद्ध्या कामक्रोधाद्यनुपगमैर्भक्तिः प्रदीप्तीभवत्यज्ञातप्रेम्णाम्, जातप्रेम्णां तु अनुवृत्तिर्मदासक्तिस्तस्या जीविकार्थं न भजामि दर्शनं दत्त्वाप्यंतर्भवामि तत एवानुवृत्तिरासक्तिः प्रवृद्धीभवति। तत्र जातप्रेमस्वेव दृष्टान्तः—यथेति। तस्य धनस्यैव चिन्तया निभृतः पूर्णः, व्याप्त इति यावत्। अन्यत् क्षुत्पिपासाद्यपि न वेद अतो मां भजतां मदनुवृत्तिरेव वांछितं तस्या आधिक्येन संपादनादहंता न प्रकटमभजन्नप्यप्रकटमधिकमेव भजामीत्यहमपि वस्तुतः करुण एव, द्वितीयप्रश्नस्योदाहरणीभूतो यथा भवत्य इत्यतो मम स्वदर्शनदानादाने एव भजनाभजनेन व्याख्येये। “ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्” इति वस्तुप्रतिज्ञाया अन्यथा भावानर्द्यादिति भावः ॥ अत्र **तोषिणी**—तदेवं तासां मते तदादिभिः सह विचित्रक्रीडया रममाणस्य तस्यात्मारामादिद्वयं न घटत एव विरहार्तिप्रदत्वेन। न च पूर्वोक्ते सापेक्षनिरपेक्षभजने तादृशोत्तरादिचातुर्येण विज्ञताभिव्यक्तेर्न चाकृतज्ञत्वं ततो गुरुध्रुक्त्वं निर्विशेषं काठिन्यमेव पर्य्यवसितामित्यभिप्रेत्य तैर्व्याख्यातम्—अत्र चरमेति। पूर्वं कृतज्ञतामात्रमापादयितुमपृच्छन्नधुना तु ततोऽपि दोषवैशिष्ट्यपर्यवसानेन संतुष्टा जाता इत्यभिप्रेत्य व्याख्यातमक्षिप्तं (नि) कोचैरिति। अथ वा काठिन्यापादनार्थमेवायं प्रश्नोद्यम इति व्याख्येयम्। अथाभजनेऽपि मम सर्वेभ्यो भजनकृद्भ्य उत्तमभजनत्वं, किमुत भजन इत्याह—नेति। तुशब्दो भिन्नोपक्रमे। आत्मारामादिचातुर्विध्यरहितोऽप्यहं भजतोऽपि जनान्न भजामि “नाहं वसामि वैकुंठे योगिनां हृदये न च। मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥” इत्यादिमदुक्तिभिस्तन्निकटस्थितमपि स्वं तेभ्यो न दर्शयामीत्यर्थः। नञः सर्वादौ प्रयोगः स्ववाक्येनैव स्वस्य यंत्रणापत्त्या परमवैयग्र्यात्। हे सख्य इति आत्मारामादिराहित्यमेव साधितम्। जंतूनित्यविशेषात्सर्वत्रैव ममेदृशो व्यवहारो न तु भवतीष्वेवेति नात्मनि ममौदासीन्यं शंकनीयमिति भावः। कथं न भजसि, तत्राह—अमीषामिति। अनुवृत्तीनां निरन्तरध्यानानां वृत्तिर्यस्मात्तस्मै। संततप्रेमप्रकर्षायेत्यर्थः। नन्वस्माकं त्वय्यनुवृत्तिवृत्तिः सदा वर्तत एवेति चेत्—सत्यम्, तथापि वैशिष्ट्यार्थमिति सदृष्टांतमाह—यथेति। विशेषतो नष्टे हारित इति वैयग्र्यविशेषो दर्शितः। अत एव तच्चिन्तया नितरां भृतो व्याप्तः। तदेवं रूपगुणादिना सर्ववरिष्ठत्वात्स्वार्थपूर्णत्वेन प्रेममात्रसापेक्षत्वेन च प्रत्युपकारानपेक्षतया साम्येऽपि करुणवितॄनप्यतिक्रम्य स्वस्य हितैषित्वं दर्शितम्, स्वादेयसर्ववशीकारसर्वपुरुषार्थशिरोमणिस्वप्रेमदानात्। तथा प्रियप्रेमरसास्वादाधिक्यं च बोधितं, संततद्वर्धनलालसात् तदर्थं तद्विरहदुःखसहनाच्चेति ज्ञेयम् ॥ २० ॥ युक्ताऽयुक्ताऽप्रतीक्षणम् सदाचरणलोकापवादभीतित्यागरूपम्। धर्माऽधर्माऽप्रतीक्षणम् निजपतित्यागौपपत्यसेवनरूपम्। शृण्वतेत्युपलक्षणम्—प्रेमालापं शृण्वता, गुणगाथां गायता, भावविशेषं स्मरता केवलमंतर्द्धानेनात्रैव स्थितं, विश्वासाभावश्चेत्प्रष्टव्यं यमुनादिभ्यः ॥ * ॥ ननु जंतूनस्वभक्तानजातप्रेम्णो जातप्रेम्णश्च यदेवं भजसि तत्सम्यक्करोषि, किन्त्वस्मास्वपि तथैव तद्व्यवहरणाद्वयमपि जंतुमध्यगण्या अभूमेति तासां सानुशयं वाक्यमाशंक्य भो मत्प्राणपरार्द्धप्रियपदपयोजपांशुपरमाणवः सख्यो युष्मासु यदन्यसाधारण्येनाद्य व्यवहृतं तदेतन्मे दौरात्म्यं क्षमध्वमित्याह—एवम् ‘व वा यथा तथैवैवम्’ इत्यमरोक्तेस्तद्वदित्यर्थः। ततश्च मदर्थे उज्झितो लोकः युक्ताऽयुक्ताऽप्रतीक्षणात्, वेदश्च धर्माऽधर्माऽप्रतीक्षणात्, स्वान्यात्मात्मीयधनज्ञातयश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः ॥ यामाभजन्दुर्जरगेहशृंखलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥ २२ ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्द्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

आस्तामिदं परमार्थं तु शृणुतेत्याह । नेति निरवद्यसंयुजां निरवद्या निर्दोषा निष्कपटा संयुक् संयोगो यासां तासां वो विबुधानामायुषाऽपि चिरकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्तुं न पारये न शक्नोमि । कथंभूतानाम् । या भवत्यो दुर्जरा अजरा या गेहशृंखलास्ताः संवृश्च्य निःशेषं छित्वा मा मामभजन्मदेकनिष्ठचित्ता अभूवंस्तासाम् । मच्चित्तं तु बहुषु प्रेमयुक्ततया नैकनिष्ठम् । तस्माद्वो युष्माकमेव साधुना साधुकृत्येन तद्युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु । युष्मत्सौशील्येनैव ममानृण्यं न तु मत्कृतप्रत्युपकारेणेत्यर्थः ॥ २२ ॥ इति श्रीभा० म० दशम० पूर्वार्धे टीकायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

स्नेहत्यागात् याभिस्तासामपि वस्तद्वदनुवृत्तये उक्तलक्षणानामन्येषां भक्तानामिवानुवृत्तिवृद्ध्यै परोक्षमदर्शनं यथा स्यात्तथा भजतां युष्मत्प्रेमालापान् शृण्वता तिरोहितामिति काकुः । तस्मादतीवानौचित्यं हृतमित्यर्थः । न हि प्राचीना अर्वाचीना भाविनो वा भक्ताः संभवेयुः, न ह्येतावत्या अप्यनुवृत्तेरपरवृद्धिरस्ति, न हि परमाणुपरममहतोर्ह्रासवृद्धी केनाप्याशास्येते तस्मादन्यप्रेमिभक्तान्प्रति युष्मत्प्रेमवैप्रलंभिकप्रतापमहोत्कर्षजिज्ञापयिषामयी ममेयम समीक्ष्यकारिता क्षम्यतामिति भावः । यस्मादेवं तस्मान्मा मां प्रयसूयितुं दोषारोपेण द्रष्टुं नार्हत । तत्र प्रियमिति प्रिया इति च हेतू । प्रियस्य दोषं प्रियाः खलु न मनस्यानयंतीत्यर्थः ॥ अत्र **तोषिणी**—अद्यैव च भवतीनां निकट एव स्थितवानस्मीत्याह—एवम् 'दुह्यंत्योऽभियुयुः काश्चित्' इत्यादिप्रकारेण मदर्थेत्यादि । हे अबला इति तत्तत्परित्यागे दुष्करत्वं सूचयति । मा सूयितुमित्यत्र हेतुविशेषमप्याह—प्रियं प्रिया इति । हि निर्धारणे । यद्वा—एवम् 'यथाऽधनः' इत्यादिप्रकारेण । वो युष्माकं मय्यनुवृत्तिवृत्तये एव मया तिरोहितम्, "पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः" इत्यादिभवद्वाक्यानुसारेणाग्रतः पार्श्वतः स्थित्वैव भवद्दृष्टिमात्रा गोचरीबभूवेत्यर्थः । किं कुर्वता—परोक्षं भजता प्रेमालापादिकमनुमोदमानेन । तथानुग्रहे हेतुः—मदर्थेति । अन्यत्तैः । यद्वा—माद्वयं निषेधे । तथापि प्रियं मल्लक्षणं मासूयितुं मार्हथ, अपि तु मद्दत्तदुःखा यूयमर्हथैवेत्यर्थः । कुतः—प्रियं प्रियाः प्रियस्य प्रियासु तथा कर्तुमयुक्तत्वादित्यर्थः । एतच्चानुनयचातुर्यम् ॥ २१ ॥ आस्ताम् स्थीयताम् । इदम् वृत्तम् । परमार्थम् सत्यभूतम् । नैकनिष्ठम् एकस्य बहुषु स्थानासंभवादित्यर्थः । इत्यर्थ इति—इत्थमतीव दुष्करप्रेमरूपद्रविणदातृत्वेनोत्तमर्णानां भवतीनां तत्प्रतीकारासमर्थस्य ममाधमर्ण्यमेव स्थास्यतीति तात्पर्यम् । विगतो बुधो गणनाभिज्ञो यस्मात्तेन स्वभावनित्येनाप्यायुषेति वा ॥ * ॥ मन्मनसि संततं यदुद्भवति तच्छृणुतेत्याह—नेति । निरवद्या कामकर्मलोकधर्मशास्त्रापेक्षाराहित्येन निरुपाधिसंयुक् संयोगो यासां तासां वः स्वेनैव यत्साधुकृत्यं न तु साधुत्वापादकेन केनचिद्वस्तुसंपर्केण साध्वित्यर्थः, तत् न पारये प्रतिकर्तुं न शक्नोमि । विबुधायुषापि देवानामायुः प्राप्यापीत्यर्थः । कृत्यमित्येकवचनेन युष्माकं क्षणिकमपि कृत्यमित्यर्थः । या मा माम् अभजन् । संवृश्च्य दुर्जरा अपि पतिश्वश्रूपिताभ्रात्रादिस्नेहशृंखलां निःशेषं छित्त्वैव, श्लेषेण अपक्वयोगिन इव संवृश्च्यापि ताः शृंखलामापुर्नैवाभजन्नित्यर्थः । अहं तु पित्रोर्भ्रातरि स्वेषु बंधुष्वपि स्निह्यामि च युष्मान्भजामि चेति 'ये यथा मां प्रपद्यन्ते' इति स्वप्रतिज्ञातोपि च्युत इति मम प्रतिक्रियाया असंभवः, व्यज्यमानोऽयमर्थः श्लेषेणापि लभ्यते स यथा—संवृश्च्य या युष्मान् अहं मा अभजम् । परसवर्णेन नकारदुकारयोः संयोगः। तत्तस्माद्वः साधुत्वेनैव तद्युष्मत्साधुकृत्यं प्रतियातु प्रतिकृतं भवतु, युष्मत्सौशील्येनैव ममानृण्यं, वस्तुतस्तु ऋण्येव भवामि युष्माकमिति भावः । ततश्च ताभिः प्रातस्स्वमनस्येव विचारितं परमेश्वरत्वादेव सर्वगुणपरिपूर्णत्वेऽपि दोषगंधमात्रराहित्येऽप्यस्मत्प्रेमरसविज्ञत्वेप्यस्मान् प्रेमवत्त्वेनोत्कर्षयितुं स्वं चापकर्षयितुमस्मदृणी भवितुमेवास्मत्कर्मकोऽयमस्य त्यागस्तदिमं पराबुभूषुं जिगीषवो वयमेवाधन्या एवं भवितुमपारयंत्योऽनेन फलतः प्रेम्णा जिता एवाभूमेति ॥ इति भावार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् । दशमे द्व्यधिकस्त्रिंशः संगतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ॥ जहुर्विरहजं तापं तदंगोपचिताशिषः ॥ १ ॥
तत्रारभत गोविंदो रासक्रीडामनुव्रतैः ॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥

त्रयस्त्रिंशे ततो गोपीमंडलीमध्यगो हरिः ॥ प्रियास्ता रमयामास ह्रदिनीवनकेलिभिः ॥ १ ॥ तत्तदा अंग हे राजन् । यद्वा तस्य भगवतोंगेन वपुषा करचरणाद्यवयवैर्वोपचिताः समृद्धा आशिषो यासां ताः ॥ १ ॥ रासक्रीडां रासो नाम बहुनर्तकीयुक्तो नृत्यविशेषस्तां क्रीडाम् । अन्योन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह ॥ २ ॥

संमतः सताम् ॥ अत्र **तोषिणी**—व इति संबंधमात्रे षष्ठी । युष्मान्प्रतीत्यर्थः । स्वसाधुकृत्यं स्वीयप्रत्युपकारकृत्यं न पारये प्रतिकर्तुं न शक्नोमि । यद्वा—वो युष्माकं यत्स्वीयमसाधारणं साधुकृत्यं तदहं न पारये तत्सदृशप्रत्युपकारे न समर्थोऽस्मीत्यर्थः । स्वसाधुकृत्यत्वमेव दर्शयति—निरवद्या काममयत्वेन प्रतीयमानत्वेऽपि वस्तुतो निर्मलप्रेमविशेषमयत्वेन निर्दोषा संयुक् सयोगः सम्यग्मद्विषयकचित्तैकाग्रता, स्वस्वपत्यादिस्पर्शाभावेन च निर्दोषा संयुक् संगमो यासाम् । किञ्च, या इति दुर्जराकुलवधूत्वेन छेत्तुमशक्या अपि गेहशृंखला गृहसंबंधिन्य ऐहिकपारलौकिकसुखकरलोकधर्ममर्यादाः संवृश्च्य मा माम् अभजन् परमानुरागेण मय्यात्मनिवेदनं कृतवत्य इत्यर्थः । अतो ममान्यत्रापि प्रेमयुक्तत्वान्न पारय इत्यर्थः । अत्रोत्तरं—व इति पदमनपेक्ष्यैव या इति प्रयुज्यते पश्चादेव च तेन योज्यतेऽतः प्रथमपुरुषत्वम् । अन्यत्तैः । विगतो बुधो गणताभिज्ञो यस्मात्तेनानन्तेनायुषापीत्यर्थः । शृंखलामिति क्वचिदेकवचनान्तः पाठः॥निज शेषरसाशेषप्रदानेन सदानुगम्।मां पुष्टं पाति यस्तुष्टः स्वामिनं यामि तं गतिम्॥२२॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे द्वात्रिंशोऽध्यायः ॥३२॥ ततो गोपीश्लाघानंतरम् । ताः कालिंदीतीरस्थाः । ह्रदिनीकेलिर्जलक्रीडा, वनकेलिरित्युपलक्षणं स्थलक्रीडादीनामिति (१) । तदा गोप्याश्वासनानंतरम् । क्लिष्टकल्पनापेक्ष्याऽक्लिष्टमार्ग एव साधुरिति मत्वाह—यद्वेति । "अंगं प्रतीकेऽवयवेपायदेशप्रियेषु च" इति धरणिः । यद्वा—भगवतो विशेषणम् । तत्र तासामंगेनेत्यादिसमासः ॥ * ॥ त्रयस्त्रिंशे रासलास्यविहारजलकेलयः ॥ प्रश्नोत्तराण्यप्युक्तानि परीक्षिच्छुकदेवयोः ॥ (१) ॥ सुपेशलाः अतिमनोहराः । तस्यांगस्पर्शादिना उपचिता आशिषः कामा यासां ताः । भगवत एव वा विशेषणम् । गोपीगात्रस्पर्शजनितसुखस्येत्यर्थः । तेन च प्रश्नोत्तरसमाप्तौ मानशांत्या तदाऽऽलिंगनचुंबनादिविलासा आसन्निति द्योतितम् ॥ अत्र **तोषिणी**—रासलीला जयत्येषा जगदेकमनोहरा ॥ यस्यां श्रीव्रजदेवीनां श्रीतोऽपि महिमा स्फुटः ॥ (१) ॥ इत्थम् ईदृशीः । सुपेशला परममनोहराः । विरहो भूतो भावी च, तज्जं तापं जहुः, विरहेप्यपरित्यागश्रवणात्तथा विशेषतोऽपि निजऋणित्वादिप्रतिपादनेन च दैवात्पुनर्विच्छेदेऽप्यत्यन्तपरित्यागशंकापगमनाच्च । अतः पूर्वमुक्तस्याप्यत्र पुनरुक्तिरधुनैव सम्यक्परित्यागस्य विवक्षया । किं च, तदंगेत्यालिंगनकरग्रहणादिना संपन्नमनोरथाः सत्यः । यद्वा—भगवत एव विशेषणं—सुपेशलवाग्घेतुत्वेन तासां गोपीनामंगैरुपचिताशिष इति ॥ १ ॥ तत्र कालिंदीतटे । गोविन्द इति—गोपीनां श्रुत्यवतारत्वाद्वा वेदलक्षणा वाणीरूपा गोपीर्विंदति लभत इति गोविंदः, गोभिः श्रुतिरूपाभिर्गोपीभिर्लभ्यत्वाद्वा । रासक्रीडेति—भक्तिप्रसन्नभगवत्प्रीतिरेवानंदानुभवे कारणं नान्यत्साधनमिति दर्शयितुं रासक्रीडामाह—"जक्षन् क्रीडन्रममाणः" इति श्रुतेः । साक्षाद्रासलीलामेवाह श्रुतिः—"पद्या वस्ते पुरुरूपा वपूंष्यूर्द्ध्वा तस्थौ त्र्यविं रेरिहाणा ऋतस्य सद्म विचरामि विद्वान्महद्देवानामसुरत्वमेकम्" इति । अस्या अर्थः—पद्या योग्या कृष्णमूर्तिर्बहुरूपा वपूंषि बहूनि वस्ते परिधत्ते । तस्याप्यन्योर्द्ध्वा गोपी संगरहिता तस्थौ । मध्य इति शेषः । किंभूता—त्र्यविं त्रेधाभूतां दृष्टिं रेरिहाणा गिलंती । रासे हि एकैकस्या गोप्या उभयतः कृष्णद्वयं पुरस्तादेकः, सा मूर्तिर्ऋतस्य धर्मस्य सद्मभूता तामनुचिंत्य विचरामि त्वद्वियुक्ता सती विद्वान् जानती काप्यवदत् देवानां कृष्णेन वियोजयतामसुरत्वं निर्दयत्वमेकं मुख्यं महदिति कृष्णतिरोधाने ज्ञेयमिति भावः । रासलक्षणं तु—"एकस्य पुंसो बह्वीभिः स्त्रीभिः क्रीडा तु मंडलैः । हल्लीसकक्रीडनकं रासक्रीडां विदुर्बुधाः ॥" इति । नारदपुराणे तु—"पृथुं सुवृत्तं मसृणं वितस्तिमात्रोन्नतं कौ विनिखन्य शंकुम् । आक्रम्य पद्भ्यामितरेतरं तु हस्तैर्भ्रमोयं खलु रासगोष्ठी ॥" इत्युक्तम् । आगमे त्वस्येयं प्रक्रिया—पृथ्वीकीलकोपरि मणिहाटकसंबद्धं विशालं चक्रं, तदुपर्यष्टदलं तत्समानं कमलं चतुरंगुलोन्नतं, तदु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रासोत्सवः संप्रवृत्तो गोपीमंडलमंडितः ॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः ॥ ३ ॥

तत्साहित्यमभिनयेन दर्शयति रासोत्सव इत्यादिनाक्षरचतुष्टयाधिकेन सार्धेन । तासां मंडलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन तेनैव कंठे गृहीतानामुभयत आलिंगितानाम् । कथंभूतेन । यं सर्वाः स्त्रियः स्वस्वनिकटं मामेवाश्लिष्टवानिति मन्येरंस्तेन । एतदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः । नन्वेकस्य कथं तथा प्रवेशः । सर्वसन्निहितत्वे वा कुतः स्वैकनिकटत्वाभिमानस्तासामित्यत उक्तम् । योगेश्वरेणेति । अचिंत्यशक्तिनेत्यर्थः ॥ ३ ॥

परि युगपदाक्रमणेन कर्णिकायां स्थितेन परितो बल्लवीमंडले च सता श्रीकृष्णेन तद्ग्रामगपूर्वकं समकालगानं विचित्रं नृत्यमनुष्ठितमिति । विजयध्वजस्तु—नृत्यादिषु भरतरीतिसंज्ञेषु गातुमुपक्रांतेषु योऽधिरसोल्लासो जायते स रसस्तत्संबंधी रसो रासस्तदुद्रेकेण क्रीडा नृत्यविशेष इत्याह ॥ * ॥ नृत्यगीतचुंबनाऽऽलिंगनादीनां रसानां समूहस्तन्मयी या क्रीडा तामनुवृत्तैस्तदानीं परस्परैकमत्येन स्वानुकूलैः अन्योऽन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह ॥ अत्र **तोषिणी**—तत्रेति । तदेवं ताभिः सहात्मन ऐकमत्ये सतीत्यर्थः । रासक्रीडामारभत परमाभिलषितानां तासां लाभेन पूर्वमेव कर्तुमीप्सितां महोत्सवरूपां तत्क्रीडां कर्तुं प्रवृत्तः । गोविंद इति—श्रीगोकुलेंद्रतायां निजाशेषैश्वर्यमाधुर्यविशेषप्रकटनेन परमपुरुषोत्तमता । स्त्रीरत्नैरिति—तासां च सर्वस्त्रीवर्गश्रेष्ठता प्रोक्ता 'रत्नं स्वजातिश्रेष्ठेऽपि' इति नानार्थवर्गात् । इति रासक्रीडायां परमसामग्री दर्शिता । अत एव प्रीतैस्तत्तत्प्रेमभरविशेषैः । अतोऽनुव्रतैस्तदेकाधीनैः । अत एवान्योन्यमाबद्धबाहुभिः, बाहवोऽत्र करा ज्ञेयाः । अन्योन्यत्वञ्च तासामेव न तु तेन सह, तद्बाहुभ्यां तासां प्रत्येकमुभयतः कंठग्रहणात् । एतद्धि रासक्रीडालक्षणम्—" नटैर्गृहीतकंठीनामन्योन्यात्तकरश्रियाम् । नर्तकीनां भवेद्रासो मंडलीभूय नर्तनम् ॥ " इति । अयमस्मन्मंडलीमध्येऽत्रैवास्तां न निस्सरत्वित्याबद्धेत्याशब्दव्यंजितस्तासां गूढोऽभिप्रायः ॥ २ ॥ तस्य तासां वा साहित्यम् । अभिनयेन रचनया । एतदर्थम् स्वस्वोपकंठमननार्थम् । इत्यर्थ इति—अंतराप्रदेशं विना स्वस्वनिकटमननं न संभवतीत्याशयः । तदसंभवं मत्वा शंकते—नन्विति । इत्यर्थ इति—" न तदिहास्ति लोकेषु यद्योगेन न जायते " इत्युक्तेः । सर्ववस्तुसंपादनं तु योगिनापि क्रियते किमुत योगेश्वरश्रीकृष्णवैभवमिति तात्पर्यम् । गोपीमंडलेति—प्रियामंके निधाय वेणुं वादयन्सतडिन्मेघोपम एकः प्रकाशो मेढीभूतो मध्ये विराजते यमवेक्ष्य मंडलं स्यादिति ॥ * ॥ तत्साहित्यप्रकारं दर्शयति—रासोत्सव इति षडक्षरन्यूनसार्द्धेन । रास एवोत्सवः भक्तहृन्मनश्चातकेभ्य आनंदामृतप्रदायकः । सम्यगेव प्रवृत्तः । केन—तासां मंडलरूपेण व्यवस्थितानां गोपीनां द्वयोर्द्वयोर्मध्ये प्रविष्टेन कृष्णेन । अत्र संप्रवर्तित इत्यनुक्तेः स्वतंत्रकर्तृत्वं तस्मै रासाय ददता स्वयं च करणत्वं भजता श्रीकृष्णेन स्वस्मात्सर्वशक्तिभ्यः सर्वलीलाभ्यश्च रासस्यैव महोत्कर्षः स्वदत्तो व्यंजयामासे । अत एव लक्ष्मीप्रभृतयोऽपि तं लब्धुमुत्कंठंत एव, न तु लभंत इति ज्ञेयम् । कथंभूतानाम्—तेनैव कंठे गृहीतानाम् उभयत आलिंगितानाम् । अत्राग्रिमश्लोके " मध्ये मणीनां हैमानां महामारकतो यथा " इति मध्य इति पदेन मारकत इत्येकवचनेन चात्र च श्लोके सता मिथो इत्यनुक्त्वा प्रविष्टेनेति पदेन च प्रयुक्तेन गोपीमंडलमध्यकर्णिकाभूत एव कृष्णो मध्ये स्थितः सन्नेव तथा गतिलाघवं प्रकटयामास, यथा मंडलस्थानां गोपीनामपि द्वयोर्द्वयोर्मध्ये प्रविष्टो नृत्यति स्मेत्येकपरमाणुमात्रकाले नैव मध्यप्रदेशादागत्य मंडलस्थास्त्रिशतकोटिगोपीः सनृत्यं परिरभ्य पुनर्मध्यप्रदेशगत एव बभूवेत्यलातचक्रादपि तस्य गतिलाघवमधिकमभूदिति ज्ञेयम् । यतो मंडलकर्णिकागतत्वं मंडलस्थप्रत्येकगोपीमध्यगतत्वं तस्य तदानीं सर्वैर्दृष्टम् । एवमेव " अंगनामंगनामंतरा माधवो माधवंमाधवं चांतरेणांगनाः । इत्थमाकल्पिते मंडले मध्यगः संजगौ वेणुना देवकीनंदनः ॥ " इति **श्रीबिल्वमङ्गलमहानुभाव**चरणैरुक्तम् । तत्र हेतुगर्भं विशिनष्टि—योगेश्वरेण निखिलकलानिधित्वात्तदुपायमहाविज्ञेन । "योगः सन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः । यद्वा—योगो योगमाया दुर्घटघटनापटीयसी महाशक्तिस्तस्या ईश्वरेण युगपत्सर्वगोपीनामाश्लेषौत्सुक्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं मन्येरन्नभस्तावद्विमानशतसंकुलम् ॥ दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥ ४ ॥
ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥ जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥

तावत्तत्क्षणमेवौत्सुक्यव्याप्तमनसां सस्त्रीकाणां देवानां विमानशतैः संकुलं संकीर्णं नभो बभव ॥ ४ ॥ तत्तस्य भगवतः श्रीकृष्णस्यामलं निर्मलं यशो जगुरिति ॥ ५ ॥

तस्याभिज्ञाय सैव तावतः प्रकाशांस्तस्य प्रकटय्य समादधौ । अत्र द्वयोर्द्वयोर्मध्ये प्रविष्टेनेति वीप्सया एकैकगोपीमध्ये द्विद्विगोपीमध्ये प्रवेशः संगच्छते इति व्याचक्षते । तत्रैकैकगोपीमध्यप्रवेशे व्याख्यायमाने योगमायापक्षे एकस्याः स्त्रियः स्कंधयोः कृष्णप्रकाशद्वयस्य भुजस्पर्शानौचित्यं नाशंकनीयम्, योगमाययैव तांतां प्रत्येकस्यैव प्रकाशस्य स्पर्शमानसमर्पणात् । द्विद्विगोपीव्याख्याने तु नैवासमंजसम् । यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् असौ मयाश्लिष्यन्नेवात्रास्ति तदपि यत्सर्वत्रायं दृश्यते तदियं काचिदस्य नाव्यविद्येत्यमंसतेत्यर्थः । अत्र मध्यगो देवकीनंदनः श्रीवृंजेश्वर्या[1] सहित एवेत्याहुः, तस्या एव सर्वश्रैष्ठ्यात्, 'रासक्रीडादिकारणम्' इति तदीयशतनामस्तोत्रदृष्टेः । तावत् तत्क्षण एव विमानशतैर्व्याप्तं नभो बभूव । केषाम्—दिवौकसाम् ब्रह्मादीनाम् । अत्रौत्सुक्यादिति कृष्णनृत्यांश एव न तु रसस्य विलासे दासत्वेनानौचित्यात्, तद्दाराणां तु अनौचित्याभावात्सर्वत्रैव । अत एव रासे दिवि पुंसां कृष्णदर्शनमेव, न गोपीदर्शनं, योगमाययावरणादिति ज्ञेयम् ॥ अत्र **तोषिणी**—रासः परमरसकदंबमय इति यौगिकार्थः, स एवोत्सवः क्रीडाविशेषरूपं सुखमयं पर्व । कृष्णेन परमानंदमूर्तिना निमित्तेन सम्यक् प्रवृत्तः । सम्यक्त्वमेव दर्शयति—गोपीनां मंडलेन मंडितः । इत्येवं तासां शोभाहेतुत्वमधिकं दर्शितम् । तत्प्रवर्तने तद्विशेषश्चोक्तः श्रीपराशरेण—"रासमंडलिबंधोऽपि कृष्णपार्श्वमनुज्झता । गोपीजनेन नैवाभूदेकस्थानस्थिरात्मना ॥ हस्ते प्रगृह्य चैकैकां गोपिकां रासमंडलीम् । चकार तत्करस्पर्शनिमीलितदृशं हरिः ॥ ततः प्रवर्तते रासश्चलद्वलयनिःस्वनः । अनुजातशरत्काव्यगेयगीतिरनुक्रमात् ॥" इति । किञ्च, तासामिति, द्वयोरित्युक्तेरेकत्रैव मध्ये स्थितिर्बोध्यते तन्निवारणार्थं वीप्सा । अत एव 'मध्ये मणीनाम्' इत्यत्र मध्य इति सामान्यतो वक्ष्यते । कृष्णस्याप्युभयतः स्थितत्वेन दोर्भ्यां गृहीतकंठ्य इति च । तथा चोक्तं बिल्वमंगलेन—'अंगनामंगनाम्' इत्यादि । व्यक्तीभविष्यति च क्रमदीपिकावचनेन—'सुदृशामुभयोः पृथगंतरम्' इत्यनेन । अत एव तत्तद्युग्मभुजैव तत्र विहिता न तु तत्तत्त्रिकभुजेति । स्त्रिय इति—स्त्रीषु परमानुरागेण युगपदात्मसंगममीप्सुषु सत्पुरुषस्य तथैव कृत्यं व्यक्तमिति बोधयति । अन्यथा वैषम्येण दोषापत्तिः सुखभंगश्चेत्यर्थः । यं स्वनिकटमेव मन्येरन्नमंस्यतेति । अत्रेदं विवेचनीयम्—रासमहोत्सवोऽयं परस्परसुखार्थमेव श्रीकृष्णेन प्रारब्धस्तस्माद्रासस्य सर्वशोभादर्शनं श्रीगोपीनां सर्वासामेवावश्यापेक्ष्यमिति तासामिदमेव मानयोग्यं कयाचिन्नाव्यविद्ययैवासौ बहुत्र भाति, मयानुगृहीत एवान्यथा स्वनिकटमेवापश्यन्नित्युच्यते । किञ्च, ताभिः प्रियस्य स्वस्वनिकट एव स्थितिं मन्यमानाभिस्तस्य स्वपार्श्वद्वयेऽपि वर्तमानता तुल्यानंदग्रस्तबुद्धित्वेन न विवेक्तुं शक्तेति गम्यते । तस्मात्पूर्वत्र चात्र चानंदमोह एव मूलं कारणं ज्ञेयम् । अत्र चैकस्य तथा प्रवेशादिकं समादधदाह—योगो योगमायाऽचिंत्याद्भुतशक्तिविशेषस्तस्येश्वरेणेति । स्वाभाविकतच्छक्तित्वेनैव प्रेरणां विनापीच्छामात्रेण तत्तदुदय इति व्यंजितम् ॥ ३ ॥ नन्वेतादृशरासक्रीडा केन दृष्टेति चेदाह—नभः अंतरिक्षम् । द्यौः स्वर्ग ओको वासस्थानं येषां तेषाम् । औत्सुक्यम् उत्कंठा ॥ * ॥ द्यौराकाश ओको निवासो येषामिति स्वभावत एव व्योम्नि भ्रमतामकस्माद्रासक्रीडादर्शनात्संहतानामित्यर्थः । अत एव विमानशतसंकुलं नभो बभूव । चंद्रदिशं परित्यज्य चन्द्रोपर्येव वा ज्ञेयम् । दिवौकसां ब्रह्मरुद्रादीनामिति स्वर्गादावपि तादृशोत्सवाऽसद्भावः सूचितः । तत्रैवाप्यौत्सुक्येति । औत्सुक्यमत्र नृत्यांश एव न तु रहस्यविलासांशेपि, दासत्वेनायोग्यत्वात्, तत एवाधुनैवागतत्वात् । अत एव योगमायया तेषां रहस्यं प्रति दृष्ट्याच्छादनमपि ज्ञेयम् ॥ ० ॥ ॥ ४ ॥ ततः रासोत्सवोपक्रमानंतरम् । तद्यशः कृष्णस्य गोपीनां च यशः—अहो श्रीकृष्णवैभवमहो गोपीभाग्यमित्येवंरूपम् । पुष्पवृष्टिस्तु रंगस्थलीमार्दवार्थेति ॥ * ॥ ० ॥ अत्र **तोषिणी**—ततस्तेभ्यो दिवौकोभ्यः,

[1] वृंदावनेश्वर्या ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वलयानां नूपुराणां किंकिणीनां च योषिताम् ॥ सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले ॥ ६ ॥
तत्रातिशुशुभे ताभिर्भगवान्देवकीसुतः ॥ मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥

सप्रियाणा कृष्णसहितानाम् । तुमुलः संकीर्णः ॥ ६ ॥ महामरकतो नीलमणिरिव हैमानां मणीनां मध्येमध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे। गोपीदृष्ट्यभिप्रायेण वा विनैव मध्यपदावृत्तिमेकवचनम् ॥ ७ ॥

किं वा तदनंतरं स्वयमेव नेदुर्दिव्यत्वान्महामंगलोत्सवस्वभावाच्च । एवमग्रेपि । आदौ दुंदुभीनां नादो मंगलार्थः । स्वस्ववर्गसंमेलनार्थश्च नितरां पेतुः । निशब्देन वृष्ट्य इति बहुत्वेन च रंगस्थल्यां पुष्पास्तरणं किल जातमिति बोध्यते । स्त्रीभिरप्सरोभिः स्वपत्नीभिश्च सहिता इति सर्वेषामेव तदेकानिष्ठतोक्ता । न तिष्ठति मलो यस्मादित्यमलमिति तेषामपि तदानीं दुर्वासना निरस्ता ॥ ५ ॥ “वलयः कंठरोगे ना कंकणे पुंनपुंसकम्” इति मेदिनी । “नूपुरः पादभूषणे, किंकिणी क्षुद्रघंटिका” इति कोशः । ‘तुमुलो रणसंकीर्णे’ इति मेदिनी ॥ * ॥ सप्रियाणाम् सकृष्णानाम् । अत्र चकारेण तत्रानद्धसुषिरतुमुलान्यपि संगृहीतानि । एषां चकारेणोक्तत्वादप्राधान्याद्वलयादिवाद्यानाच्छादकत्वं ध्वनितम् ॥ अत्र **तोषिणी**—एवं देवकृतोत्सवमुक्त्वा रासयोग्यवाद्यगीतादि वक्तुमादौ वाद्यमाह—वलयानामिति । किंकिणीनाम् कांच्यादिवर्तिनीनाम् । योषितामिति योषित्त्वेन स्वभावत एव वलयादिसद्भावः सूचितः । सप्रियाणामिति तासां प्रीत्यर्थः तावत्तया प्रकाशमानस्य श्रीभगवतोऽपि तावद्वलयादिशब्दोऽभिप्रेतः । रासेन यन्मंडलं मंडलीबंधस्तस्मिन् ॥ ६ ॥ तत्र रासक्रीडायाम् । ताभिः गोपीभिः । देवकीसुतो यशोदानंदनः । हैमानाम् हेम्न इमे हैमाः । इदमणि टिलोपेन साधु । हेमकारेण रचिताः । यद्वा—हैमा हिमगिरिसंभूताः पीतमणयः । गोपीनां दृष्ट्यभिप्रायेण मध्ये इति पदमावर्तनीयं, गोपीभिर्बहुरूपदर्शनात् । सर्वमध्यकर्णिकास्थस्यैकत्वान्मध्यपदावृत्तिर्न कार्येत्याह—वा विनैवेति ॥ * ॥ देवकीसुतः क्षत्रियजातिरपि भगवान् षडैश्वर्यपूर्णोऽपि तत्र गोपजातिस्त्रीणां मध्येऽतिशुशुभे । इंद्रनीलमणिवर्णोऽपि कृष्णस्तासां गौरकांतिमिश्रणान्मरकतवर्णस्तत्रापि शोभावैलक्षण्यमालक्ष्य महच्छदः प्रयुक्त इत्येके । मरकतशब्दोऽयमिंद्रनीलमणिवाचीत्यपरे । ‘महामारकतः’ इत्यपि पाठः ॥ अत्र **तोषिणी**—देवकीसुतस्तत्तया भवत्तु विख्यातो भगवान्सर्वैश्वर्यशोभाभरसंपन्नोपि तत्र तु रासमंडले ताभिरत्यंतं शुशुभे । यद्वा—तत्र यशोदासुतत्वेऽत्यन्तं शुशुभे । तत्रापि ताभिरत्यन्तं शुशुभ इत्यर्थः । तादृशस्यापि ताभिः शोभातिशयं दृष्टांतेन साधयति—मध्ये इति । सामान्यविवक्षयैकत्वम्, सर्वेषु मध्येष्वित्यर्थः । अतो मंडलमध्यस्थोऽप्येकः प्रकाशो ज्ञेयः । स एव हि श्रीराधिकां संगे निधाय वेणुवादनपूर्वकं भ्रमन्सर्वं रासमंडलमत्यर्थं मंडयति । तच्च क्रमदीपिकाद्युक्तरासांतरानुसारेण ज्ञेयम्—“इतरेतरबद्धकरप्रमदागणकल्पितरासविहारविधौ । मणिशंकुगमप्यमुना वपुषा बहुधा विहितस्वकदिव्यतनुम् ॥ सदृशामुभयोः पृथगंतरगं तरुणीद्वितयम्” इति मणिशंकुगतत्वमुक्त्वा तदेव पुनर्विशेष्य वर्ण्यते—“मणिनिर्मितमध्यगशंकुलसद्विपुलारुणपङ्कजमध्यगतम्” इत्याद्यनंतरम् “तरुणीकुचयुगपरिरंभमिलद्घुसृणारुणवक्षसमुल्यगातिम्” इति । तथैवोक्तम्—‘मंडले मध्यगः संजगौ वेणुना’ इति । हैमानां हेमविकाराणां मणीनाम्, गोलोकतया मणिवन्निर्मितानाम् । महामारकत इत्यपि सामान्यतयैकवचनम् । ‘मेघचक्रे’ इति वक्ष्यमाणात् । यथा महामरकतमणेरपि हेममणिमध्यवर्तितयैव शोभाधिक्यं स्यात्तथा तस्यापि प्रियाजनाश्लेषेणैवाधिका शोभा स्यादित्यर्थः । अन्यत्तैः । तत्र महच्छब्दपूर्वः मरकतशब्द इंद्रनीलमणिवाची स्यादिति ज्ञेयम् । यद्वा—तासां सुहेमगौरीणां कांतिच्छटासंपर्कादनातिश्यामलमरकतमणिवर्णतां प्राप्त्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुंडलैर्गंडलोलैः ॥ स्विद्यन्मुख्यः कबररशनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥

स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह। पादन्यासैरिति । भुजविधुतिभिः करचालनैर्भज्यन्मध्यैर्भज्यमानैर्मध्यैश्चलद्भिः कुचैश्च पटैश्च गंडलोलैर्गंडेषु चंचलैः । स्विद्यन्मुख्यःस्विद्यंति स्वेदमुद्गिरंति मुखानि यासां ताः कबरेषु रशनासु च ग्रन्थयो दृढा यासां ताः कबरान्रशनाश्च शैथिल्यभिया दृढं बद्ध्वा नृत्यंत्य इत्यर्थः । यद्वा तेषु तासु चाग्रंथयः नृत्यवशाच्छिथिलग्रंथय इत्यर्थः। तत्र नानामूर्तिः कृष्णो मेघचक्रमिव तास्तुं बहुविधास्तडित इव स्वेदस्तुषार इव गीतं गर्जितमिव चेति यथासंभवमूह्यम् ॥ ८ ॥

महामारकत इत्युक्तमिति । ततश्च नृत्यशक्तिविशेष एव न तु कोऽपि भगवत्ताविशेष इति ॥ ७ ॥ अन्योन्यशोभातिशयमाह–स यथेति । स कृष्णः । ताभिः गोपीभिः । ताः गोप्यः । तेन कृष्णेन । पादानां न्यासैर्वक्रस्थानादिविक्षेपविशेषैः । अतिपरिश्रमसाध्ये कर्मणि दृढग्रंथीनामपि विमोको भवतीत्यत आह–बद्धेति । इत्यर्थ इति–इह नञ्समासे नञप्राशस्त्ये बोध्यः । शिथिलग्रंथयोऽप्रशस्तग्रंथयोऽल्पग्रंथयो वा "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥" इति हरिभर्त्र्युक्तेः । 'कबरी केशविन्यासः' इत्यमरः । 'रशना कांचिजिह्वयोः' इति विश्वः । क्वचित् 'कबरं केशजूटायाम्' इत्यपि । तत्र दृष्टान्ते । मेघचक्रं मेघमंडलम् । ताः गोप्यः । यथासंभवं यथायथम् । कृष्णवध्व इत्यनेन कात्यायनीव्रतकर्त्र्यो गांधर्वविधिना विवाहिता एव । "परस्परानुरोधेन कन्यायाश्च वरस्य च । गांधर्व इति संप्रोक्तो विवाहः संगमे सति ॥" इति स्मृतेर्भगवति व्यभिचारदोषो नायाति, परकीयासंगतेरेव व्यभिचारत्वात् । कुत्रचितासां परकीयात्वेन कथनं तु शृंगारातिशयार्थम् । किञ्च, कांतिविशेषद्योतनायैव तडित इति दृष्टान्तो न तु पादन्यासादिविशेषद्योतनाय, तडितामचेतनत्वात् । यद्वा–तडितामिव पादन्यासादौ शैघ्र्यावर्तनादिप्रकाशाय । 'तड–आघाते' चौरादिकात् 'ताडेर्णिलुक्च' इत्यौणादिक इतिः । धातूनामनेकार्थत्वात् तटंति क्षिप्रं तिरोधानं गच्छन्तीति तडितः ॥ * ॥ यथा ताभिः स शुशुभे तथा तेन ता अपि शुशुभिर इत्याह–पादन्यासैरिति । पादानां न्यासा गीतरसतालानुसारिणः पुनःपुनर्व्यक्तीकृतविचित्रनृत्यगीतयस्तैः । भुजविधुतिभिः अन्योन्यबद्धानामपि भुजानां विचित्रैः कंपनैः । क्वचिदन्योन्यावबद्धभुजतां त्यक्त्वा कदाचिदतिलाघवतो हस्तकभेदेन करचालनैर्गीतपदार्थाभिनयैः । स्मितसहितैर्भ्रुवां विविधैर्भेदैर्भंगिभिः रसाभिनयार्थं स्वस्वकौशलावधापनार्थं च । तस्मान्मध्यैर्भज्यमानैः स्वभावतः कात्स्र्न्येन नृत्यविवर्तनादिना च भंगमिव गच्छद्भिर्मध्यभागैः । चलैः कुचपटैः कंचुकोपरितनवस्त्रैः, भगवदुत्थानानंतरं न पुनः संगृहीतैः । कृष्णस्य वध्वो भोग्याः स्त्रियः 'वधूर्जाया स्नुषा स्त्री च' इति नानार्थवर्गः । अत्र वधूशब्दस्य भार्यावाचकत्वे व्याख्यायमाने 'प्रकृतिमगन् किल यस्य गोपवध्वः' इति भीष्मोक्त्या विरुध्येत तेन न तथा व्याख्येयम् ॥ कृष्णस्य श्यामसुंदरस्य तदेकाश्लिष्टा गौरांग्यस्तदेकाश्रयतया तदेकभोग्यतया च वध्व इव वध्व इति प्रकृत**वैष्णवतोषिणी** ॥ अत्र **तोषिणी**–न केवलं ताभिः सोऽधिकं शुशुभे किन्तु तेन ताश्च तथा शुशुभिर इत्याह–पादेति । पादानां न्यासा नृत्यगतिभिर्भूस्याक्रमणभंग्यस्तैः । भुजानां हस्तानां विशेषेण धुतिभिर्हस्तकभेदेन चालनैः, यद्यप्यन्योन्यबद्धबाहुत्वेन भुजविधुतयो न संभवेयुस्तथापि कदाचित्तदर्थमाबद्धत्वपरित्यागेनैव । स्मितसहितैर्भ्रुवां विलासैः तत्तद्रसाभिव्यंजनचातुर्यैः । भज्यमानैः स्वभावतः कात्स्र्न्येन विशेषतश्च नृत्यार्थपरिवर्तनादिना भङ्गमिव गच्छद्भिर्मध्यभागैः । किं वा–भज्यमानता भंगः कौटिल्यमिति यावत् । कुटिलीभवन्मध्यभागैरित्यर्थः । सर्वत्र मुहुरिति मन्तव्यम् । कुचपटा भगवदुत्थाने सति पुनःपुनर्गृहीतानि निजनिजोत्तरीयाण्येव । अन्यत्तैः । तत्र ग्रंथय इत्येव पदच्छेदो योग्यो न त्वग्रंथय इति । कृष्णवध्व इत्यादिकं त्वेवं व्याख्येयम् । तं कृष्णं गायन्त्यस्ता दृष्टांतयितव्यवशात्कृष्णस्य तत्तत्प्रकाशचक्रे विरेजुः । कुत्र का इव–मेघचक्रे तडित इव । ननु 'मध्ये मणीनाम्' इत्यादिप्रोक्तदृष्टान्तो घटते अदांपत्येन तत्तदागन्तुकसंबंधात् न त्वयं स्वाभाविकसंबंधाभावात्तदेतदाशंक्यानंदवैचित्र्येण रहस्यमेव व्यनक्ति–कृष्णवध्व इति । तद्वदत्रापि स्वाभाविकादेव संबंधाद्दांपत्यमेवेति भावः । अत एव तासामभ्यासविशेषं विनापि तेषुतेषु गुणेषु परम एवोत्कर्षो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः ॥ कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥ काचित्समं मुकुंदेन स्वरजातीरमिश्रिताः ॥
उन्निन्ये पूजिता तेन प्रीयता साधुसाध्विति ॥ तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥ १० ॥

नृत्यमाना नृत्यंत्यः । रक्तकंठ्यो नानारागैरनुरंजितकंठ्यः । कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः । इदं विश्वम् ॥ ९ ॥ मुकुंदेन सह स्वरजातीः षड्जादिस्वरालापगतीः । अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः । प्रीयमाणेन संमानिता तज्जात्युन्नयनमेव पुनर्ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये उन्नीतवती ॥ १० ॥

वर्तते ॥ ८ ॥ कामकलोद्बोधककरस्पर्शविशेषोऽभिमर्षः । यद्वा—नृत्ये मानं कृष्णकृतं संमानं यासां ताः । आवृतम् व्याप्तम्, देवसाक्षिकत्वात् । यद्गीतेन यासां गानेन । रतिप्रिया रमणानुरागाः ॥ * ॥ नृत्यमाना नृत्यंत्यः । यद्वा—नृत्येन मानः कृष्णकर्तृक आदरो यासां ताः । रक्तकंठ्यः नानारागैरनुरंजितकंठ्यः । रागाश्चोक्ताः संगीतसारे—“तावंत एव रागाः स्युर्यावत्यो जीवजातयः । तेषु षोडशसाहस्त्री पुरा गोपीकृता वरा ॥” इति । रतिः कृष्णकर्तृका प्रीतिरेव प्रिया यासां ताः । कृष्णस्याभिमर्शेन स्पर्शादिना मुदिताः, इति नृत्यादिश्रमानुद्गमः । यद्गीतेन यत्कर्त्रीकेण गीतेन तदानीमिदं जगद्ब्रह्मांडमावृतम्, व्याप्तमासीदित्यर्थः । यद्वा—यद्गीतेन यत्कर्मकेण गीतेनेति । अद्यापि जगद्वर्तिभिर्लोकैर्या गीयंत एवेत्यर्थः ॥ अत्र **तोषिणी**—ततश्च प्रहर्षोद्रेकेण तासां नृत्यस्य प्राधान्यं वर्णयित्वा गानस्याप्याह—उच्चैरिति । नृत्यमाना इति नर्तनेऽपि तादृश गानात्तत्कौशलविशेषो दर्शितः । गानादिप्रयोजनमाह—रतिः श्रीकृष्णकर्तृका प्रीतिः सैव प्रिया यासां ताः । न चोच्चैर्गानादिना तासां श्रमः शंकनीय इत्याह—कृष्णस्याभिमर्षेण मुदिता इति, अयमप्येको हेतुर्ज्ञेयः । गीतस्योच्चैस्त्वं दर्शयति—यासां गीतेनावृतं व्याप्तम् । यद्वा—यासां गीतेन स्वयमुत्प्रेक्षितेन रागसमूहेनेदं जगदावृतम् । तदनुसारिगानपरं जातमित्यर्थः । ताभिः कृताः षोडशसहस्रसंख्या रागा एव जगति विभक्ता इति संगीतशास्त्रप्रसिद्धेः । यथोक्तं संगीतसारे—“तावंत एव रागाः स्युर्यावत्यो जीवयोनयः । तेषु षोडशसाहस्त्री पुरा गोपीकृता वरा ॥” इति । अन्यत्तैः । यद्वा—नृत्येन मानः श्रीकृष्णकृतसंमानो यासां ताः । रक्तकंठ्यः प्रेमस्निग्धकंठ्यः, इति परममधुरत्वमुक्तम् । उच्चैर्गाने हेतुः—रतीति, कृष्णेति च । यद्वा—उच्चैः श्रीकृष्णगानादप्युच्चतया । तथा चोक्तं पराशरेण—“रासगेयं जगौ कृष्णो यावता व्यायतध्वनिः । साधु कृष्णेति कृष्णेति तावत्तं द्विगुणं जगुः ॥” इति । तत्र हेतुमाह—रक्तेत्यादिविशेषणैस्त्रिभिः । एषां यथेष्टं हेतुहेतुमत्त्वं ज्ञेयम् । एवम् ‘ तत्रापि शुशुभे ताभिः ’ इत्यत्र तासां शोभावद्गानादिगुणस्यापि परमोत्कर्षः सूचितः । उत्तरत्र तु स्पष्टमेव ॥ ९ ॥ अत्र समगानं तत्प्रशंसार्थम् । मुकुंदेन तद्गानानुसारेण गीतमिति ज्ञेयम् । अन्यथा मुकुंदगानसमगानज्ञस्त्रिलोक्यां कोऽपि नास्ति तद्विभूतिमंतरेणेति भावः । ध्रुवम् व्यक्तवर्णगानेन प्लावनं वा । सार्धे नान्वयोत्र ॥ * ॥ स्वरजातीरिति—स्वराः खलु—“षड्जर्षभौ च गांधारो मध्यमः पंचमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसंभवाः ॥ मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः । मातंगश्च क्रमेणाह स्वरानेतान्सु दुर्गमान् ॥” तेषां जातीरष्टादश । यदुक्तम्—“रागश्च जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता ॥ शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः । ता एव विकृताः सत्यो जाता विकृतसंज्ञया ॥ षाड्ज्यार्षभी च गांधारी मध्यमा पंचमी तथा । धैवती चाथ नैषादी शुद्धा एतास्तु जातयः ॥” इति । अमिश्रिताः कृष्णोन्नीताभिरसंकीर्णाः । यद्वा—शुद्धा अपि जात्यंतरास्पृष्टाः परमप्रावीण्येन केवलतरतद्गानात् । तत्रापि उत्कृष्टं निन्ये, अतः परमदुर्गेयाणामपि तासां तथा गानमालक्ष्य तेन कृष्णेन सा पूजिता स्वीयपीतोत्तरीयादिभिः संमानितेति । विशाखेयमिति प्राञ्चः । तज्जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वा उन्निन्ये उन्नीतवती । तस्यै कृष्णो मानमादरं बहुरत्नमालापदकोर्मिकाद्यलंकारमदात् । इयं पूर्वतोप्यधिकसाद्गुण्याविष्कारवती ललिता । ततश्च यथोत्तरोत्कृष्टतादृशगाने गोपीनामप्रवृत्तिमालक्ष्य श्रीराधा स्वयमगायन्ती स्वसख्यास्तस्या एव सर्वसाद्गुण्योत्कर्षं ज्ञापयामासेति ज्ञेयम् ॥ अत्र **तोषिणी**—अधुना पूर्ववत्तासु मुख्यानां प्रेमचेष्टितानि पृथक्त्वेनाह—काचिदिति सार्धपंचाभिः । मुकुन्देन सममिति तस्यापि तदनुगत्वं विवक्षितम् “ सह युक्तेऽप्रधाने ” इति स्मरणात् । उन्निन्ये उत्कृष्टं कल्पयामास । अमिश्रिताः संहत्य गानेऽपि विलक्षणत्वेन पृथगवगताः । ततश्च तेन मुकुंदेन पूजिता । कथं पूजिता तत्राह—साध्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काचिद्रासपरिश्रांता पार्श्वस्थस्य गदाभृतः ॥ जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका ॥ ११ ॥
तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् ॥ चंदनालिप्तमाघ्राय हृष्टरोमा चुचुंब ह ॥ १२ ॥

एवं नृत्यगीतादिना श्रीकृष्णसंमानितानां तासामतिप्रीतिविलसितं वृत्तमाह । काचिदिति । श्लथंति वलयानि मल्लिकाश्च यस्याः सा ॥ ११ ॥ उत्पलस्य सौरभमिवति । वीप्सा हर्षेण, साधुत्वदार्ढ्याय वा । वदतेति शेषः ॥ तदेवेत्यर्द्धकम् । तदेव तालानिबद्धं केवलरागमयमेव वा प्राथमिकत्वेन प्राप्तत्वादादितालमयमेव वा गीतं तत्क्षणादेव ध्रुवं यतिनिःसारसंज्ञतालद्वयैकतरात्मकध्रुवाभोगाख्यावयवद्वयमात्रयुतगीतविशेषं रचयित्वा जगावित्यर्थः । तस्यै च मानमदात् । मुकुन्द इति शेषः । किन्तु पूर्वतो बहु यथा स्यात्तथेति । अन्यत्तैः । यद्वा–स्वरा मत्तमयूरादिकध्वनयः षड्जादयः सप्त । तदुक्तम्–"रंजकाः श्रोतृचित्तानां स्वराः सप्तविधा मताः । षड्जर्षभौ च गांधारो मध्यमः पंचमस्तथा । धैवतश्च निषादश्च सर्वे स्युः श्रुतिसंभवाः ॥ मयूरचातकच्छागक्रौंचकोकिलदर्दुराः । मातंगश्च क्रमेणाह स्वरानेतान्सुदुर्गमान् ॥" इति । अथ जातयस्तत्र रागोत्पत्तिहेतवः । तदुक्तम्–"रागश्च जायते यस्याः सा जातिरभिधीयते । शुद्धा च विकृता चेति सा द्विधा परिकीर्तिता ॥ शुद्धा सप्तविधा ज्ञेया तज्ज्ञैः षड्जादिभेदतः । षड्जकैशिक्यादिभेदादेकादशविधा परा ॥" इति । आदिग्रहणादार्षभील्यादयः षट्, षड्जो दिव्यो वेत्यादयश्च दश ज्ञेयाः । ता अमिश्रिताः स्वरजात्यंतरास्पृष्टाः पक्ष्मप्रावीण्येन केवलतत्तज्ज्ञानापि उत् उत्कृष्टं निन्ये गृहीतवती, जगावित्यर्थः ॥ १० ॥ गदाभृत इति । ननु वनिताभिर्विलासावसरे गदाधारणस्य शृंगारापहारकत्वाद्वीररसत्वापत्तिर्जातेतीत्थं भ्रांतानां भ्रांत्यपनुत्त्यर्थमाह गदार्थं पार्वतीशिवसंवादेन । तथा हि–रासलीलां विलोक्यागत्य शिवेन सा लीला पार्वत्यै वर्णिता । तत्र प्रसंगेनोक्तम्–'पार्श्वस्थस्य गदाभृतः' इति । तत्र पार्वत्योक्तम्–गदाभृत इति कथम् ? तत्र शिवेनोक्तं गदाभृतो वेणुभृतः । तदा पार्वत्युवाच–"रणे संप्रेषिता शूरैः शत्रूंश्चूर्णयती भुवि । शास्त्रेण सा गदा प्रोक्ता कथं वेणुर्गदा प्रभो ॥ शिव उवाच ॥ कीचकेषु समुत्पन्ना बहुरंध्रविभूषिता । येन केन प्रकारेण माधवेनाधरे धृता ॥ वेणुः सपत्निभावेन गदत्येवमहर्निशम् । अतो व्रजस्त्रियः सर्वाः संवदंति च तां गदाम् ॥" इति शिवकृतपंचाध्यायीव्याख्याने, तदैव गोपीश्वरो जात इति प्रसिद्धेः । केचित्तु नटवृंदाधिपोचिता गदाकृतिर्यष्टिस्ताम्, तदपि न शोभनं प्रतिभाति । मम तु गदति वर्णात्मकं शब्दं निगदतीति गदा वंशी तां बिभर्तीति तथा तस्य । 'गद–व्यक्तायां वाचि' इतीत्थं प्रतिभातीति । स्कंधम् भुजशिरः ॥ * ॥ साद्गुण्यप्राधान्येन सख्यौ वर्णयित्वा सौभाग्यप्राधान्येन सर्वमुख्यतमां वर्णयति–काचिदिति । गदाभृतः कृष्णस्य । पक्षे, गदनं गदा गीतवत्योः सख्योर्गुणतारतम्यज्ञानकथा, तां बिभर्ति धत्ते पुष्यति वा तस्य स्कन्धं बाहुना दक्षिणेन जग्राह आललंबे । श्लथन्तो वलयाः मल्लिकाश्च कबरस्था यस्याः सा । स्वाधीनकान्तत्वादियं वृषभानुकुमारी ॥ अत्र **तोषिणी**–एवं कासांचिद्गुणोत्कर्षप्राधान्येन तत्रापि तारतम्येन गानाद्यनुभावकं प्रेम वर्णयित्वा कासांचित्संभोगप्राधान्येन वर्णयति–काचिद्रासेत्यादिना । तत्रापि कस्याश्चित्सौभाग्यप्राधान्येनाह–काचिद्रासेति । पार्श्वस्थस्येति शीघ्रसुखग्रहणं दर्शितम् । अन्यथा रासावेशेन स्खलनं संभवेत् । गदां नटवृंदाधिपत्युचितां गदाकृतिं यष्टिं बिभर्ति इति । यद्वा–गदति वर्णात्मकं शब्दं निगदतीति गदा वंशी तदुचितत्वेनापि बिभर्तीति गदाभृत्तस्य । अत एव मध्यस्थापि नटवृंदाधिपतिस्थानीयोऽयं प्रकाशः । परिश्रान्तिलक्षणम्–श्लथदिति । श्रमेण नवमालिकावद्विलुलिताङ्गरागं श्लथन्तः परस्परं विच्छिद्य संघट्टं कुर्वन्तो वलयास्तथा श्लथन्त्यो गलंत्यो मल्लिकाश्च कबरस्था यस्यां सा तथा । श्रीपराशरेणाप्युक्तम्–"परिवर्तश्रमेणैका चलद्वलयलापिनीम् । ददौ बाहुलतां स्कंधे गोपी मधुनिघातिनः ॥" इति । अत्र मल्लिकानां शिथिलता च ज्ञेया । शोभादिदशानां मध्ये सोऽयं माधुर्यनामाऽनुभावो ज्ञेयः । यथोक्तम्–"माधुर्यं नाम चेष्टानां सर्वावस्थासु चारुता" इति । एवमस्याः स्वाधीनभर्तृकात्वं च दर्शितम् । तस्माच्छ्रीराधिकैवेयम् । अतो निकटपठिते गानाविद्यया तद्द्वयसुखकारिण्यौ तत्सख्यौ श्रीललिताविशाखे भवेताम् । पूर्वस्यास्तादृशचेष्टत्वेन वर्णनं स्वतंत्रनायिकात्वव्यंजकमुत्तरयोर्गीतादिगुणत्वेन वर्णनं साहाय्यकत्वव्यंजकमिति ॥ ११ ॥ तत्र रासे । उत्पलेन तन्मालया सुगंधितमिति वा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्याश्चिन्नाट्यविक्षितकुंडलत्विषमंडितम् ॥ गंडं गंडे संदधत्या आदात्तांबूलचर्वितम् ॥ १३ ॥ नृत्यंती गायती काऽपि कूजन्नुपुरमेखला ॥ पार्श्वस्थाच्युतहस्ताब्जं श्रांताऽधात्स्तनयोः शिवम् ॥ १४ ॥ गोप्यो लब्ध्वाऽच्युतं कांतं श्रिय एकांतवल्लभम् ॥ गृहीतकंठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ १५ ॥

सौरभं यस्य तं बाहुम् ॥ १२ ॥ नाट्येन नृत्येन विक्षिप्तयोश्चंचलयोः कुंडलयोस्त्विषेण त्विषा मंडितं गंडं कपोलं तथाभूते स्वगंडे संदधत्याः संयोजयंत्याः ॥ १३ ॥ कुजती नूपुरे मेखला च यस्याः सा ॥ १४ ॥ एवमन्या अपि गोप्यो यथायथं नानाविभ्रमैर्विजह्रुरित्याह । गोप्य इति ॥ १५ ॥

हृष्टरोमा जातसात्त्विकभावा । 'स्तंभः स्वेदोऽथ रोमाञ्चः' इत्याद्युक्तेः । चुचुंब हेति कामाकुलितत्वं सूचितम् ॥ * ॥ अंसगतम् स्वस्कंधे स्थितम् । चंदनालिप्तमपि उत्पलस्येव सौरभं यस्येति स्वाभाविकेन गात्रस्योत्पलगंधेनात्यधिकेन चंदनगंधस्यावरणात् । पूर्वाध्यायोक्तक्रियातुल्यत्वादियं नूनं श्यामला ॥ अत्र **तोषिणी**–अथ प्राक्तनक्रियासादृश्येन श्रीश्यामलाविलासमाह–तत्रेति । एका गोपी । अंसगतम् स्वस्कंधगम् । स्वभावत एवोत्पलपुष्पतोऽप्यधिकं तज्जातीयं सौरभं यस्येत्यर्थः । विशेषतश्चंदनेन आ सम्यक् भक्तिच्छेदादिसाधुप्रकारेण लिप्तम् । ह स्पष्टम् । चुंबने हेतुः–हृष्टरोमेति । प्रेमवैवश्यादित्यर्थः । श्लेषेण रोमाण्यपि हृष्टानि, तस्याश्च हर्षः किं वक्तव्य इत्यर्थः । अयं प्रागल्भ्योत्थानुभावः । यथोक्तम्–" निःशंकत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता " इति ॥ १२ ॥ स्वगंडे निजकपोले " गंडः स्यात्पुंसि खड्गिनि । ग्रहयोगप्रभेदे च वीर्थ्यंगे पिटकेऽपि च । चिह्नवीरकपोलेषु हयभूषणबुद्बुदे ॥ " इति मेदिनी । आदादित्यनेन स्वस्मात्स्वानामभेदो दर्शितोऽस्ति, भेदे तन्न संगच्छत इति ॥ * ॥ नाट्येन विक्षिप्तयोश्चंचलयोः कुंडलयोस्त्विषा कांतिर्यत्र स चासावत एव मंडितश्च तस्मिन् गंडे कृष्णकपोले श्रमव्याजेन गंडं संदधत्यै कस्यैचित् तांबूलचर्वितं प्राऽदात् । तस्या मुखं स्वमुखं संमुखं कुर्वन्प्रकर्षेणाऽदादित्यर्थः । इयं पूर्वोक्तसाम्याच्छैब्या ॥ अत्र **तोषिणी**–श्रीशैब्याविलासमाह–कस्याश्चिदिति । स्वगंडं श्रीकृष्णगण्डे नाट्येतिश्रमव्याजेन संदधत्या इति भावः । प्रादात्तस्या मुखं स्वमुखसंमुखं कुर्वन् प्रकर्षेणादादित्यर्थः । अत्र दाने षष्ठी निगूढार्था, आर्षी वा । तांबूलचर्विताऽऽदानमास्येन पूर्ववत् ॥ १३ ॥ शिवम् सुखकरम् । अच्युतेति च्युतिराहित्यमाह ॥ * ॥ नृत्यन्ती गायंती । हस्ताब्जमधादित्येका चंद्रावली, हस्तग्रहणसाम्यात् । द्वितीया पद्मा तदानीं चरणाब्जं स्तनयोरधात्, इदानीं हस्ताब्जं स्तनयोर्धत्ते स्मेति स्तनतापनिवृत्तेरुभयथापि सिद्धेः । अष्टमी भद्रा तु तत्रानुक्तापि पूर्ववदेव ज्ञेया ॥ अत्र **तोषिणी**–श्रीहस्तग्रहानुसारेण नूनं पूर्ववच्चंद्रावलीविलासमाह–नृत्यती नृत्यंती, गायती गायंती च । कूजदित्यत्र गानानुरूपतालयुक्तं कूजितं ज्ञेयम् । पार्श्वस्थस्याच्युतस्य निश्चयेन तत्पार्श्व एव स्थितस्य भगवतो हस्त एवाब्जं तापहारित्वादिना तत् श्रांता सती श्रमनिवृत्त्यर्थमिवेत्यर्थः । शिवम् स्वतः सुखरूपम् । एवं मुख्याः षडुक्तास्तथैव सप्तमी पद्मापि ज्ञेया । सारल्येन लक्षिता पूर्ववद्विष्णुपुराणोक्ता भद्रा त्वियं स्फुटमष्टमी स्यात् । यथा–" काचित्परिलसद्बाहुः परिरभ्य चुचुंब तम् । गोपीगीतस्तुतिव्याजनिपुणा मधुसूदनम् ॥ " इति । श्रीजयदेवचरणास्त्विमामेव वर्णनाविशेषेण सरसचरितां साधयित्वा व्यंजयामासुः–" रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवाम् " इत्यादिना ॥ १४ ॥ विभ्रमैः विलासैः । एकांतवल्लभम् निर्णीतनियतभर्तारम् । तद्दोर्भ्याम् कृष्णभुजाभ्याम् । तम् कृष्णम् । विजह्रिरे क्रीडां चक्रुः ॥ * ॥ एवमन्या अपि गोप्यः स्वस्वभावानुसारिण्यो विजह्रुरित्याह–गोप्य इति । अत्र 'यद्वाञ्छया श्रीर्ललनाऽचरत्तपः' इति नागपत्नीस्तुत्या, 'नायं श्रियोऽङ्ग उ नितांतरतेः प्रसादः' इत्युद्धवोक्त्या, " श्रीः प्रेक्ष्य कृष्णसौंदर्यं तत्र लुब्धाचरत्तपः " इति भागवतामृतोत्थापितपौराणिककथया च नारायणकांतायाः श्रियः कृष्णसंगासंभवादेवं व्याख्येयम् । कान्तम् कमनीयमच्युतं कृष्णमेकान्तवल्लभं लब्ध्वा विजह्रिरे । तद्दोर्भ्यां कृष्णभुजाभ्यां गृहीताः कंठा यासां ताः । श्रियः श्रिय इवेत्यर्थः । सा यथा नारायणवक्षोगृहीतगात्री, एता गोप्योऽपि तथा कृष्णभुजगृहीतकंठ्य इत्यर्थः । यद्वा–नारायणेनैक्यात्कृष्णस्यापि श्रीवल्लभता ॥ अत्र **तोषिणी**–अच्युतम् कस्माच्चिदपि रूपगुणादिमाहात्म्याच्च्युतिरहितम् । तस्य दुर्लभतामाह–श्रियोऽपि एकान्तं वैकुंठनाथादितोऽप्यतिशयान्नितान्तं वल्लभम् ' यद्वाञ्छया श्रीर्ललनाऽचरत्तपः ' इत्यनुसारेण

१ आदादिति पाठेनाऽऽदानार्था।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियो बलयनूपुरघोषवाद्यैः ॥ गोप्यः समं भगवता ननृतुः स्वकेशस्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥

तत्र वादकेषु गायकेषु गंधर्वकिन्नरादिषु रसावेशेन मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसंपत्तिं दर्शयन्रासरसंभ्रममाह। कर्णोत्पलेति। कर्णोत्पलैश्चालकविटंकैरलकालंकृतैः कपोलैश्च घर्मैश्च वक्त्रेषु श्रीः शोभा यासां ताः । घोषाः किंकिण्यः । बलयनूपुरघोषैर्वाद्यैर्वादित्रैः । स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तालगतिसंतुष्टाः केशाः सशिरःकंपं पादेषु पुष्पवृष्टिमिवाकुर्वन्नित्युत्प्रेक्षितम् । भगवता सह ननृतुः । क्व । भ्रमरा एव गायका यस्यां राससभायाम् ॥ १६ ॥

प्रेमविषयं न तु लब्धम् । तं कान्तं रमणं लब्ध्वा । यद्वा–श्रियः कान्तं कामनास्पदम् । एकांतवल्लभं स्वैकनिष्ठप्रियतमं लब्ध्वा न केवलं लाभः किन्तु स्वल्पमपि विश्लेषमसहमानेन तेन स्वदोर्भ्यां गृहीतः कंठो यासां तादृश्य इत्यर्थः । अत एवातिप्रेमानंदेन तमेव गायन्त्यो विजह्रिर इति । एवं श्रियोऽपि सकाशात्तासामतिमाहात्म्यमभिव्यक्तम् । तथैव गम्यते श्रीमदुद्धवेन–"नायं श्रियोंग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोन्याः । रासोत्सवेऽस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजवल्लवीनाम् ॥" इति ॥ १९ ॥ तत्र रासे । रासरसंभ्रमः रासावेशः । स्रजः पुष्पाणि तन्माला वा । 'स्रग्मालापुष्परज्जुषु' इति धरणिः। एतेन स्वकेशेत्याद्युक्तेन । उत्प्रेक्षितम् उत्प्रेक्षाविषयतां नीतम् । उत्प्रेक्षालक्षणं तु कुवलयानंदे–"संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना । उक्तानुक्तास्पदाद्या स्यात्सिद्धासिद्धास्पदे परे ॥" इति । अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यात्मतासंभावनमुत्प्रेक्षा । सा त्रिधा–कस्यचिद्वस्तुनो वस्त्वंतरात्मना संभावनं वस्तूत्प्रेक्षा, सैव स्वरूपोत्प्रेक्षा, अहेतोर्हेतुतया सम्भावनं हेतूत्प्रेक्षा, अफलस्य फलतया संभावनं फलोत्प्रेक्षा । तत्राद्या वस्तूत्प्रेक्षा द्विधा–उक्तविषयाऽनुक्तविषया चेति । परे हेतुफलोत्प्रेक्षे अपि प्रत्येकं द्विविधे–सिद्धविषये असिद्धविषये च । तत्रोदाहरणं क्रमात्–"धूमस्तोमं तमः शंके कोकीविरहशुष्मणाम् । लिंपतीव तमोंगानि वर्षतीवांजनं नभः ॥" (१) । अथ प्रदोषे विसृत्वरतमसो नैल्यदृष्टिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन सद्यः प्रियविघटितसर्वदेशस्थकोकांगनाहृद्द्रुतप्रज्वलिष्यद्विरहानलधूमस्तोमत्वसंभावनं स्वरूपोत्प्रेक्षा, तमसो विषयस्योपादानादुक्तविषया । तमो व्यापनस्य रोदोगताखिलवस्तुसांद्रमालिनीकरणेन निमित्तेन तमःकर्तृकलेपनतादात्म्योत्प्रेक्षा । नभःकर्तृकाञ्जनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविषया वस्तूत्प्रेक्षा । "रक्तं तवांघ्रियुगलं भुवि विक्षेपणाद् ध्रुवम् । त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ॥" (२) । चरणयोस्सहजे रागे विक्षेपणमहेतुर्हेतुत्वेन संभावितं हेतूत्प्रेक्षा, विक्षेपणस्य च विषयस्य सत्त्वात्सिद्धविषया । चंद्रपद्मविरोधे सहजे कान्तामुखकान्तिकामनाहेतुरसती च हेतुत्वेन संभाविते त्यसिद्धविषया हेतूत्प्रेक्षा । "मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः । प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ॥" (३) । अत्र स्वाभाविक्या मध्यकर्तृककुचधृतेः कनकदामबद्धत्वेनाध्यवसितवलित्रयशालिता फलत्वोत्प्रेक्षणं सिद्धविषया फलोत्प्रेक्षा । जलजस्य जले निजावस्थितेरुदकवासतपस्त्वेनाध्यवसितायाः कान्तापदसायुज्यप्राप्तिर्न फलमिति खपुष्पायमाणायास्तस्याः फलत्वेनोत्प्रेक्षणमसिद्धविषया फलोत्प्रेक्षेति । तथा चेह वस्तूत्प्रेक्षोक्तविषया ज्ञेया, विषयाणां कर्णोत्पलादीनामुक्तत्वादिति । कर्णोत्पलानि सौवर्णानि गोपिकास्थानीयानि वर्णसाम्यात्, अलकाः श्यामाश्चूर्णकुंतलाः कृष्णस्थानीयाः, उभयोर्विटंकः परस्पराबद्धकरानुकारः, कपोलेषु रंगस्थानीयेषु, घर्मश्च कालिंदीप्रवाहस्थानीयः, तेनतेन वक्त्राणां श्रीर्विलक्षणा रासमंडलशोभा यासां ता इति द्विविधा रासलीला संजातेति । भ्रमराणां गायकत्वं तु स्वयमेव लिखितम् । "विटंकः पक्षिवासार्थकल्पितेऽलंकृतौ तथा" इति कोशात् । 'गोष्ठी सभासंलापयोः स्त्रियाम्' इति मेदिनी ॥ * ॥ पृथक्पृथग्गाननृत्यादिसाद्गुण्यशोभामुक्त्वा समुदितनृत्यजनितवक्त्रादिशोभां विवृणोति–कर्णोत्पलेषु कर्णधृतोत्पलोपलक्षितचक्रिकाकुंडलेषु । अलकानामिति लौल्याद्विविधाष्टंका वेष्टनानि च कपोलेषु घर्मबिंदवश्च तैर्वक्त्रेषु श्रीः शोभा यासां ताः । 'टकि–बन्धे' । वलयनूपुराद्यलंकाराणां घोषस्तुल्यस्वरतया नादो येषु तैर्वाद्यैः । तत्रानद्धशुषिरैस्तत्तदधिष्ठातृदेवताभिरेव स्वसफलीकरणार्थमागत्य वादितैः । स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः । एतेन तालगतिसंतुष्टाः केशाः सशिरःकम्पाः पुष्पवृष्टिमिवाकुर्वन्निति स्वामिचरणाः। भ्रमरा अपि गायका यस्यां तस्यां रासगोष्ठ्यां राससभायाम् ॥ अत्र **तोषिणी**–तथैव तासां माहात्म्यं दर्शयति-कर्णेति द्वाभ्याम् । कर्णेति तासां रासेन श्रमेऽपि परमशोभा दर्शिता। तथापि नृत्ये हेतुमाह–भगवता निजाशेषमाधुर्यसारसर्वस्वं प्रकटयता। सममिति तत्साहित्यस्य परमोल्लासकत्वात् । यतो गोप्यस्तदेकप्रेमवश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमे रमेशो व्रजसुंदरीभिर्यथाऽर्भकः स्वप्रतिबिंबविभ्रमः ॥ १७ ॥

यथा गोप्यो नानाविभ्रमैर्भगवता सह विजह्रुरेवं भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह । एवमिति । तद्विलासानभिभूतस्यैव रतौ दृष्टांतः । यथाऽर्भक इति । स्वप्रतिबिंबैर्विभ्रमः क्रीडा यस्य स इव । अनेनैतद्दर्शितम् । स्वीयमेव सर्वकलाकौशलं सौगंध्यलावण्यमाधुर्यादि च तासु संचार्य ताभिः सह रेमे यथाऽर्भकः स्वप्रतिबिंबैरिति ॥ १७ ॥

त्वेन प्रसिद्धा इत्यर्थः । तेन सममित्यनेन तासां तत्सदृशवैदग्ध्यादिकमपि सूचितम् । तथा तासामिव तस्यापि कर्णोत्पलेत्यादिकं सर्वं बोध्यते । उत्पलधारणञ्च संप्रति श्रीकृष्णेनैव कारितमिति ज्ञेयम् । भ्रमरगायकेति तत्त दुचितगानसमर्थत्वात्तेषामसाधारणत्वं व्यंजितम् । अन्यत्तैः । तत्र वादकेष्विति दुंदुभिनादाभिप्रायेण । तद्धि नादादिकं तेषां तन्नृत्यानुकूलमेवासीदिति तत्संमतम् । किन्नरादिष्विति च दिवौकसामित्युक्तेस्तदन्तर्गतत्वसंभावनयेति । एवं तत्र तासां न काचिदन्यतो गीतादेरप्यपेक्षा, किन्तु स्वानंदेनैव तेषां मध्येमध्ये वादनादिचेष्टितेति ॥ १६ ॥ ताभिः गोपीभिः । तासां विलासास्तद्विलासास्तैरनभिभूतोऽतिरस्कृतः । विलासस्तु—“ यानस्थानासनादीनां नेत्रवक्त्रादिकर्मणा । उत्पाद्यते विलासो यः स विलासः प्रकीर्तितः ॥ ” इति भरतेनोक्तः । अनेन दृष्टान्तेन एतद्वृत्तं दर्शितम् । लावण्यं तु—“ मुक्ताफलेषुच्छायायास्तरलत्वमिवांतरे । प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यते ॥ ” इति दर्शितम् । माधुर्यन्तु—“ यतश्चेतो नापयाति तन्माधुर्यमितीरितम् ” इति । आदिना सौस्वर्यग्रहः । तासु गोपीषु । संचार्य संप्रवेश्य । ताभिः गोपीभिः । अर्भको बालः । एतेनापि व्यभिचारदोषः परास्तः । प्रतिबिंबानां बिंबाधीनसत्ताकत्वेन वस्तुतस्तदविनाभावित्वात्तदभिन्नत्वमेव । तथा च गोपीनां भगवत्प्रतिबिंबत्वेनाभिन्नत्वाद्बाललीलावत्तल्लीलाप्यतर्क्यैवेति ॥ * ॥ एवं रासनृत्यांगैरेव कृष्णस्य संभोगाङ्गान्यपि निर्वृतानीत्याह । परिष्वङ्ग आलिंगनम्, एकैकया सह युग्मनृत्ये करेणाभिमर्शः स्पर्शः, स च नृत्यगतिसमाप्तौ स्वदक्षिणकरेण प्रियावामवक्षोजे तालन्यासरूपः, स्निग्धेक्षणम् रहस्यांगेषु सप्रेमावलोकनम्, उद्दामविलासः पारितोषिकप्रदानमिषाच्चुंबनादिः, हासस्तु तत्तत्प्राप्त्यनंतरं मुखोल्लासः परिहासो वा तैः । रमेशः रमायां लक्ष्म्यामैश्वर्यं प्रकटयन् व्रजसुंदरीभिः सह रेमे न तु रमयेत्यर्थः । यथार्भको मुग्धस्तथैव तासु प्रेमाधीनत्वान्मौग्ध्यमेव दधन्न तु रमायामिवैश्वर्यमित्यर्थः । ननु परःसहस्राभिस्ताभिः कथमेकः संरेमे, तत्राह—स्वस्य प्रतिबिम्बं प्रतिस्वरूपमेव विभ्रमो विलासो यस्य सः । “प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायांतरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥” इत्यत्र बिम्बशब्देन यथा स्वरूपमुच्यते तथैवात्रापि । एकैकया प्रियया सह एकैकस्वरूपो रेमे इत्यर्थः । तासां ह्लादिनीशक्तित्वेन स्वरूपभूतत्वात् । स्वप्रतिच्छवित्वानौचित्याद्व्याख्यांतरं नेष्टम् ॥ अत्र **तोषिणी**—एवमिति तैर्व्याख्यातम्[1] । तत्रावतारिका दृष्टान्तबलादेव प्रतिपन्ना । यथार्भक इत्यादिका स इवेत्यंतव्याख्या चास्या एवानुगता, उभयत्रापि प्रतिबिम्बस्थानीयानां श्रीगोपीनामर्भकस्थानीयस्य श्रीभगवतश्च मुहुः परस्परमनुकरणात् । तत्र च श्रीभगवत एवार्भकस्येव विलासाय स्वयं प्रवृत्तिस्तत्प्रवर्तनं तदीयविलासविशेषश्च लभ्यते । ततस्तद्विलासानभिभूतस्यैव रतौ दृष्टान्त इतीदं त्वागन्तुकमिव लक्ष्यते । यत्त्वनेनैतद्दर्शितमित्यादिकं व्याख्यातम्, तत्र च ता एव तद्गुणप्रकाशिका इति प्रतिपद्यते । यथार्भकः प्रतिबिम्बद्वारत एव स्वीयमुखमाधुर्याद्यनुभवति न तु स्वतस्तथा श्रीभगवानपि तादृशनिजप्रेयसीद्वारत एवेति हि गम्यते, तासां प्रेममयमुदयं विना तदनुदयात् । यद्वा—रमाया ईशः प्रभुरपि व्रजसुंदरीभिरेव रेमे न तु तयेति ततोपि तासां प्रेमगुणसौंदर्यमाधिक्यमभिप्रेतम् । यद्वा—रमाया ईशः प्रभुरेव न तु रमणः व्रजसुंदरीभिस्तु रेमे तथापि तथैवाभिप्रेतम् । तदपि रमणमसाधारणमेवेति सचमत्कारमाह—एवमिति । तत्र परिष्वंगस्तासामाश्लेषः, कराभिमर्शस्तासां करालभनम्, स्निग्धेक्षणम् तन्मुखादीनां सरसावलोकनम्, उद्दामविलासः स्तनस्पर्शनादिः, हासश्च भावोद्रेकविलसितास्मितम्, तैः । एवं तस्य तासामपि सर्वोपरिचरगुणत्वेन परस्परं साम्यमासक्तिञ्च दृष्टान्तेन व्यंजयति—यथेति । कश्चिदर्भकस्तद्वयःस्वभावेनात्यंतक्रीडासक्तः स्वप्रतिबिम्बे विभ्रमो विलासो यस्य तादृशश्च तथा स्वतुल्याभिस्ताभिस्स्वप्रतिमूर्तिभी रमते, तस्यासौ प्रेमवशता । स्वभावेन

१ श्रीधरस्वामिभिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूल कुचपट्टिकां वा ॥ नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह ॥ १८ ॥
कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥ कामार्दिताः शशांकश्च सगणो विस्मितोऽभवत् ॥ १९ ॥

तास्तु भगवद्विलासैराकुला बभूवुरित्याह । तदंगेति । तस्यांगसंगेन प्रकृष्टा मुत्प्रीतिस्तया आकुलान्यवशानींद्रियाणि यासां ताः । विश्लथबंधान्केशादीनंजसा प्रतिव्योढुं यथापूर्वं धर्तुं नालं न समर्था बभूवुः । विस्रस्ता माला आभरणानि च यासां ताः ॥ १८ ॥ न केवलं ता एवाकुलेंद्रियाः किं तु देव्योऽपीत्याह । कृष्णविक्रीडितमिति । किं च शशांकश्चेति । अनेनैतत्सूचितम् । शशांकेन विस्मितेन गतौ विस्मृतायां ततः प्राक्तनाः सर्वेऽपि ग्रहास्तत्रतत्रैव तस्थुस्ततश्चातिदीर्घासु रात्रिषु यथासुखं विजह्रुरिति ॥ १९ ॥

तन्मयक्रीडासक्तः सन् स्वरूपशक्तित्वेन स्वप्रतिमूर्तित्वात् प्रतिबिम्बस्थानीयाभिस्ताभी रेमे । अत एव तत्सदृशत्वाभिप्रायेण पूर्वमपि गोपवध्व इत्यनुक्त्वा कृष्णवध्व इत्येवोक्तम् । तथा च ब्रह्मसंहितायाम्—" आनंदचिन्मयरसप्रतिभाविताभिः स्वाभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामि ॥ " इति । अत्र च यथार्भको यादृशं मुखचालनादिकं कुरुते तादृशं तत्प्रतिबिम्बमूर्तयोऽपि, यादृशं तास्तादृशमेत्र क्रीडाकौतुकित्वात्सोपि । एवं श्रीकृष्णश्च श्रीगोप्यश्च परस्परमासक्तत्वादनुचक्रुरिति ज्ञेयम् । अनेन तासामिव तस्याप्यत्र स्निग्धशब्दव्यंजितस्नेहविकारो दर्शितः । स च सात्त्विकोप्युक्तः श्रीपराशरेण—" गोपीकपोलसंश्लेषमभिपत्य हरेर्भुजौ । पुलकोद्गमसस्याय स्वेदांबुघनतां गतौ ॥ " इति ॥ १७ ॥ ताः गोप्यः । तस्य कृष्णस्य । अंगसंगेन शरीरसंपर्केण । तया मुदा । विस्रस्ताः विश्लथाः । कुरूद्वहेति संबुद्ध्या भक्त्या कृष्णो वशीभवतीति पश्य त्वमपि शुद्धकुरुवंशोद्भूतत्वाद्भक्तिं कृष्णमायत्तीकर्तुं कुर्वित्यभिमुखीकरोति । यद्वा—शुद्धवंशोद्भूतत्वात्तुभ्यमिमां रहस्यलीलां ब्रवीमीत्याशयः ॥ * ॥ ततश्च ता भगवद्विलासैरानंदविह्वला बभूवुरित्याह—तदङ्गेति । प्रकृष्टा मुत् आनंदस्तयाऽऽकुलेंद्रियाः । कुचपट्टिकाम् कंचुलिकाम् । प्रतिव्योढुम् व्योढुम् । नालम् न समर्थाः ॥ अत्र **तोषिणी**—ततश्च तासामत्यंतानंदवैवश्येन रासविरामोऽजनीत्याह—तदंगेति । तदंगसंगैः क्रमेण प्रकर्षं प्राप्ता या मुत् हर्षस्तयाऽऽकुलेंद्रियाः । व्याकुलेंद्रियतालक्षणमाह—केशानित्यादिना । दुकूलम् परिधानीयक्षौमवस्त्रम् । कुचपट्टिकाम् कंचुकस्थानीयमुत्तरीयम् ॥ १८ ॥ अथान्यदद्भुतमाह—न केवलमिति । ता एव गोप्य एव । किन्तु अपि तु । देव्यो देवांगना अपि । न केवलं देव्य एव किन्तु देवा अपीत्याह—किञ्चेति । शशोंकश्चिह्नं यस्य, वाहनत्वात् । सगणो रोहिण्यादिभगणसहितः । अनेन शशांकविस्मयकथनेन । एतत् वृत्तम् । गतौ नक्षत्रसंचाररूपायाम् । ततः शशांकात् । प्राक्तनाः प्राक्तनर्क्षराश्यादिषु वर्तमानाः । सर्वेऽपि ग्रहाः भौमादयः, तत्रतत्रैव यत्रयत्र राश्यादौ स्थिता इति । ततश्च ग्रहगतिविस्मृतेर्ग्रहाणां चलनाभावाद्रात्रीणां दीर्घत्वं, ग्रहगत्यैव रात्र्यादेः समाप्तिदर्शनात् ॥ * ॥ कामार्दिताः कृष्णविषयकेण कामेन पीडिताः । ' कामार्दितः ' इति पाठे शशाङ्कोऽपि श्रीकृष्णमालोक्य स्त्रीभावं प्राप्तः कृष्णविषयकेण कामेन पीडितश्च । व्रजसुंदरीगात्राणां तद्विलासानाञ्च योगमाययैव पुरुषदृष्टेः प्रत्यावरणं पूर्वं व्याख्यातमेव ॥ अत्र **तोषिणी**—कृष्णस्य स्वयं भगवत्त्वेन माधुर्यादिभिः परमपरिपूर्णस्य विक्रीडितं पूर्वपूर्वतोऽपि वैशिष्ट्येन क्रीडां वीक्ष्य साक्षात्सेवादिमयप्रीतिवैशिष्ट्येन दृष्ट्वा खेचरा देवादयस्तेषां स्त्रियः सर्वा अपि कामेन श्रीभगवद्विषयकेण पीडिताः सद्यो व्यमुह्यन् । पूर्वं श्रीकृष्णप्राप्तौ निजायोग्यत्वादिविचारराहित्येन पश्चाद्देहादेरपि विस्मरणेन मोहवैशिष्ट्यं प्रापुः । अन्यत्तैः । तत्रातिदीर्घास्विति—अन्यथा स्वच्छंदबहुलसुखक्रीडानामप्रसिद्धिः स्यात् । अत एवाग्रे वक्ष्यमाणस्य ' ब्रह्मरात्रे ' इत्यस्यार्थं ब्रह्मणश्चतुर्युगसहस्रपरिमितायां रात्रौ गता यामिति केचिद्व्याचक्षते । तदपि संभवेदेव, भगवच्छक्त्याऽशेषविरुद्धस्य समावेयत्वात् । विस्मयादिना गतिस्थगितत्वन्तूत्प्रेक्षामात्रं, तेषां ज्योतिश्चक्राधीनगतित्वात्स्वगतेरत्यल्पत्वात्प्रतिलोमत्वाच्च । वस्तुतस्तु, तल्लीलामाधुर्येण नदीप्रवाहस्येव ज्योतिश्चक्रस्य स्तब्धत्वं ज्ञेयम् । रात्रिष्विति बहुत्वं च 'ता रात्रीः' इत्युक्तस्य 'निशाः' इति वक्ष्यमाणस्य चानुसारेणेति । एवं रासक्रीडायाः श्रीकृष्णविषयकभावविशेषवर्द्धनेन परममोहनत्वं दर्शितम् । तत्र युक्तमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ॥ रेमे स भगवांस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥
तासां रतिविहारेण श्रांतानां वदनानि सः ॥ प्रामृजत्करुणः प्रेम्णा शंतमेनांग पाणिना ॥ २१ ॥

किं च कृत्वेति । अयं भावः । "कात्यायनि महामाये महायोगिन्यधीश्वरि ॥ नंदगोपसुतं देवि पतिं मे कुरु ते नमः ॥ " इति प्रत्येकं ताभिः प्रार्थनाद्भगवताऽपि 'याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः' इति तथैव प्रतिश्रुतत्वात्तावंतमात्मानं कृत्वा रेमे इति । यावतीर्यावत्यः ॥ २० ॥ कृपातिशयमाह । तासामिति ॥ २१ ॥

तत्प्रकृत्यैव तत्संबंधिनृत्यगीतादेस्तत्तद्भाववर्द्धनतातिशयात्, तत्रापि तस्य साक्षात्कर्तृकत्वात्, तत्रापि लक्ष्म्यादिदुर्लभतादृशसौभाग्याभिस्ताभिः सहितत्वात्, तत्रापि तादृशपरिपाटीसंवलितत्वादिति । तत्र कामार्दित इत्येक वचनांतपाठस्तेषामसंमतः, किन्तु, देवादयोपीत्यनेन तासामेव कामार्दितत्वस्वीकारात् । किञ्च, शशांकश्चेति तदादेर्भिन्नवाक्यत्वांगीकाराच्च ॥ १९ ॥ अन्यदुपयोगमाह—किञ्चेति । लीलया योगमायया । अत्र लीला तात्पर्यमाह—अयं भाव इति । प्रत्येकम् पृथक्पृथक् । ताभिः गोपकन्याभिः । तथैव यथा ताभिर्वृतम् । प्रतिश्रुतत्वात् प्रतिज्ञातत्वात् ॥ * ॥ ततश्च ताभिः सह प्रत्येकं कुंजेषु रहस्यक्रीडाप्यभूदित्याह—कृत्वेति । यावती र्यावत्संख्याका गोपयोषितो गोपवध्वो गोपकन्याश्च तावंतमात्मानं तावत्संख्यमात्मप्रकाशं कृत्वा । आत्मारामोऽपीति व्याख्यातार्थः ॥ अत्र **तोषिणी**—अथ रासानंतरं विश्रम्य कृतं लीलाविशेषमाह—कृत्वेति द्वाभ्याम् । आत्मा नम् आत्मनः प्रकाशमित्यर्थः । 'न चांतर्न बहिर्यस्य' इति न्यायेन मध्यमत्वेऽपि तच्छ्रीविग्रहस्य विभुत्वात्, "चित्रं बतैकदैकेन वपुषा युगपत्पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥" इत्यैच्छिकप्रकाशाच्च । पौनरुक्त्यमिदं विश्रमसमय एकीभूतत्वात् । गोपयोषितो गोपजातीययोषितः । ततश्च काश्चिद्विवाहिताः काश्चित्कन्याश्चेति ज्ञेयम् । एकविंशद्द्वाविंशयोर्व्यूढकन्यानां पृथक्पूर्वानुरागवर्णनात्, "युवतीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्" इति हरिवंशोक्तेश्च । एतच्च स्वरूपेण लिखिते उज्ज्वलनीलमण्यादौ व्यक्तम् । लीलया शृंगाररसलेखया । रेराम[1] रेमे । भगवानिति तदेव भगवत्तासारमाधुर्यसर्वस्वप्रकटनमिति भावः । तस्यैव प्रेमरस परिपाकविलासविशेषात्मकत्वात्, तथा जगच्चित्ताकर्षकेण तेनैव स्वतः प्रेमविशेषविस्तारणात् । तच्चाग्रे व्यक्तं भावि, श्रीभागवतामृते च विवृतम् आत्मारामोपीत्युक्तार्थम् । तद्रमणञ्च पृथक्पृथक् तत्रैव निकटनिकुंजादि ष्विति ॥ २० ॥ तासाम् गोपीनाम् । वदनानि मुखानि । प्रामृजत् संमार्जितवान् । अंगेति संबुद्धिः । शंतमेन स्पर्शनादानंदजनकेन ॥ * ॥ तासां रतिविहारेण 'तासामतिविहारेण' इति च पाठः । श्रांतानामिति—तासां रतिश्रांतिमालक्ष्य करुणः रमणाद्विरतोऽभूदित्यर्थः । शंतमेन सुखमयेन । प्रामृजदित्युपलक्षणम् वीजनानुलेपनप्रत्यंगप्रसाधनवीटिकाप्रदानान्यपि चक्रे ॥ अत्र **तोषिणी**—रतिर्दंपत्योर्मिथोऽनुरागस्त न्मयो विहारो विविधविदग्धचेष्टा । अतिविहारेणेति पाठेऽपि स एवार्थः । तेन श्रान्तानां शंतमेन परमसुखात्मकेन पाणिना प्रकर्षेणामृजत् स्वेदबिंदूपसारेणालकसंवरणादिनोज्ज्वलयामास । यतः करुणः परमदुःखास हिष्णुस्वभावः । सत्यपि कारुण्येन साधारण्ये तासां तु तानि प्रेम्णा प्रामृजदिति परमवैशिष्ट्यं दर्शितम् । प्रेमा हि साद्गुण्यानुसंधानेनाहन्ताममतैकतरविषयत्वे च जाता चेतसि स्निग्धता, तत्रापीदृशभावमयीति परम एव विशिष्टः । स्वयं कारुण्यादिकमंतर्भावयति—शंतमेनेति । स्पर्शमात्रेणापि स्वभावतः परमसुखकरत्वं, तत्र च प्रमार्जनं, तत्रापि प्रेम्णा, तत्र च शंतमेनेति परमसंतोषणमुक्तम् । अंगेति प्रेमसंबोधनम् ॥ २१ ॥

१ रराम भगवानिति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्यः स्फुरत्पुरटकुंडलकुंतलत्विड्गंडश्रिया सुधितहासनिरीक्षणेन ॥ मानं दधत्य ऋषभस्य जगुः कृतानि पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥ २२ ॥
ताभिर्युतः श्रममपोहितुमंगसंगघृष्टस्रजः स कुचकुंकुमरंजितायाः ॥ गंधर्वपालिभिरनुद्रुत आविशद्वाः श्रांतो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥

ततोऽतिहृष्टानां गोपीनां चरितमाह । गोप्य इति । स्फुरतां पुरटकुंडलानां स्वर्णकुंडलानां कुंतलानां च त्विषा गंडेषु या श्रीस्तया सुधितेनामृतायितेन हाससहितेन निरीक्षणेन च ऋषभस्य पत्युः कृष्णस्य मानं दधत्यः पूजां कुर्वत्यस्तस्य कृतानि कर्माणि जगुः । तस्य कररुहैर्नखैः स्पर्शेन प्रमोदो यासां ताः ॥ २२ ॥ अथ जलकेलिमाह । ताभिरिति । तासामंगसंगेन घृष्टा संमर्दिता या स्रक् तस्या अत एव तासां कुचकुंकुमेन रंजितायाः संबंधिभिर्गंधर्वपालिभिर्गंधर्वपा गन्धर्वपतय इव गायंतो येऽलयस्तैरनुद्रुतोऽनुगतः स कृष्णो वाः उदकमाविशत् । भिन्नसेतुर्विदारितवप्रः । स्वयं चातिक्रांतलोकवेदमर्यादः ॥ २३ ॥

ततः भगवत्कृतस्वेदमार्जनाद्यनन्तरम् । स्फुरताम् देदीप्यमानानां चलतां वा । त्विषा दीप्त्या । तया श्रिया । अमृतायितेन अमृतवदाह्लादजनकेन । मानम् सत्कारम्–अहो भगवता कृतार्थीकृता स्मः इत्यादिकम् । दधत्यः कुर्वत्यः । तस्य कृष्णस्य । प्रमोदः प्रकृष्टाऽऽनंदः । नखक्षतस्यापि शृंगारांगतात्रोक्तेति ॥ * ॥ ततश्च ताः स्वाधीनकांताः कांतपरिधापितरत्नालंकाराः कुंजेभ्यो निष्क्रम्य मिलिता रासोत्सवसमाप्तिसूचकं मंगलं जगुरित्याह–गोप्य इति । स्फुरंत्या स्वर्णकुंडलानां कुंतलानां च त्विषा गंडेषु या श्रीस्तया सूचितेन अमृतायितेन हाससहितानिरीक्षणेन ऋषभस्य पुरुषश्रेष्ठस्य कृष्णस्य मानमादरं दधत्यः कृतानि तत्कर्माणि जगुः । पुण्यानि चारूणि । तस्य कररुहाणां नखानां स्पर्शेन प्रकृष्टो मोदो यासां ताः ॥ अत्र **तोषिणी**–ततः प्रहृष्टा निजदेहादिना त्रिधा तस्य प्रहर्षं संजनयामासुरित्याह–गोप्य इति । तत्र स्फुरदिति सौंदर्येण, सुधितेति भावेन, जगुरिति संकीर्तनेन । ऋषभस्येति तैर्व्याख्यातम् । अत्र ऋषभस्य पत्युः श्रीकृष्णस्येत्यत्रायमभिप्रायः–कृष्णवध्व इत्यस्मिन्स्वयमेव श्रीमुनींद्रेण व्यक्तीकृते वयं कथं गोपयामः, तस्मादस्माभिरव्याख्याता अपि दयितरमणादिशब्दाः केन वाऽन्यथा मंतव्या इति । तदा च परस्परमनन्यभावेनाव्यक्तेर्दांपत्यस्फूर्त्या तस्य मानं दधत्य उक्तप्रकारैः पूजां कुर्वत्यः । यद्वा–अहो मम धन्यता यस्येदृश्यो वध्व इत्येतादृशं तस्य गर्वमर्पयंत्यः । पुण्यानि पुण्यकराणि चारूणि च जगुः । ‘ पुण्यं तु चार्वपि ’ इत्यमरः । तस्यैकशेषत्वाद्गाने हेतुः । तस्य कररुहैः स्पर्शानुगाने गुणवत्योप्येताः कृतमौना इति प्रणयकोपेन तत्प्रवर्तनाय किंचिन्मोदनात् । प्रकृष्टो मोदः कासांचिद्यासां ता इति । इत्यादिश्रांतानामपि गाने रसोल्लासो बोधितः । तासामित्यादिद्वये हेलानामायमनुभावः । यथा–“ चित्तस्याविकृतिः सत्त्वं विकृतेः कारणे सति । तत्राद्यविक्रियाभावो बीजस्यादिविकारवत् ॥ ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत् । भावादीषत्प्रकाशो यः स हाव इति कथ्यते ॥ हाव एव भवेद्धेला व्यक्तः शृंगारसूचकः ॥ ” इति ॥ २२ ॥ अथ स्थलक्रीडानंतरम् । जलकेलिः जलक्रीडा । ताभिः गोपीभिः । तासाम् गोपीनाम् । अत एव संमर्दनादेव । गंधर्वपेत्युपमेयोत्तरसमासः । गंधर्वपास्तुंबुर्वादय एव भगवल्लीलामन्वेष्टुमलिरूपेणागता इति ज्ञेयम् । श्रांत इति जलात्यंतावगाहात् । वप्रः तटः । यद्वा–शृ हिंसा तस्या अंतो यस्य स श्रंतस्स एव श्रान्तः नित्यनिरस्तमृत्युः । भिन्नसेतुर्विशेषितलोकमर्यादः ‘भिन्नो विशेषे दलने’ इति कोशात् । पृथक्पृथक्स्थापिततत्तत्सेतुरिति । एः कामस्य भं दीप्तिं राजति क्षिपतीतीभराट् । क्षेपेऽपि राज् धातुः । गोपीविषये गजीशब्दस्तु ‘गज्–शब्दे’ धातुः । गजीभिः शब्दं कुर्वतीभिः । भिन्नसेतुरिति गजस्य मदातिरेकसूचनेन कृष्णस्यापि तात्कालिकहर्षातिरेकमाह । भिन्नलोकवेदधर्ममर्याद इत्यर्थः । एतदर्थाऽऽश्रयणे तु “कृष्णे स्वधामोपगते धर्मः कं शरणं गतः” इत्युक्तिविरोधः स्यादिति ॥ * ॥ ततश्च रासोत्सवस्यावभृथस्नानमिव जलविहारमाह । ताभिर्युतः अपोहितुं दूरीकर्तुम् । ताभिः काभिः याः स्वकुचकुंकुमैरेव रमणव्यापारवशेन रंजिताः । अंगसंगेनैव घृष्टाः संमर्दिताः स्रजो यासां ताः । ‘स कुच–’ इति पाठे सः कृष्णः । “गंधर्वो मृगभेदे स्याद्गायने खेचरेऽपि च” इति विश्वप्रकाशाद्गंधर्वपा गायनश्रेष्ठा येऽलयस्तैरनुद्रुतः सन् । वाः जलमविशत् । भिन्नसेतुर्विदीर्णावरणः । कृष्णपक्षे, अतिक्रांतलोकमर्यादः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोंऽभस्यलं युवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंग ॥ वैमानिकः कुसुमवर्षिभिरीड्यमानो रेमे स्वयं स्वरतिरत्र गजेंद्रलीलः॥२४॥
स्वरतिरात्मारामोऽपि रेमे । अत्र गोपीमंडलेऽत्रांभसीति वा ॥ २४ ॥

अत्र **तोषिणी**—ततः परमहृष्टस्य भगवतोऽपि प्रेमचेष्टितमाह—ताभिरिति त्रिभिः । श्रमं तासामपोहितुमपनेतुं तादृश प्रेममयमधुरनरलीलाविष्टत्वादात्मनश्चेत्यर्थः । अंगसंगेत्यनेन पद्मिनीस्त्रीपूज्यपादानां तासामंगतः स्वाभाविक
परमामोदसंचारोऽभिप्रेतः । किञ्च, स्वकुचेति स्वशब्दोत्रासाधारणार्थः । अत एवानुद्रुतः । स्रक् कौन्दी ज्ञेया, परमशुभ्रत्वेन कुंकुमरंजितत्वसंपत्तेः । एवं जलक्रीडायां कामोद्दीपनसामग्री च दर्शिता । वाः यामुनमावि
शत् आसक्त्या प्राविशत् । दृष्टान्तो गजेंद्रस्य बह्वीभिर्गजीभिः सह जलविहारासक्त्याद्यनुसारेण । अन्यत्तैः । यद्वा—गंधर्वपा गायनश्रेष्ठाः "गंधर्वो मृगभेदे च गायने खेचरेऽपि च" इति विश्वः । त इव येऽलयश्च
तैरिति जलक्रीडायोग्यमुत्तमगीतमुक्तम् । यद्वा—काभिः—भगवदंगसंगेन घृष्टस्रजो याः, याश्च निजकुचकुंकुमेन रंजिता रत्यावेशेन सर्वांगेषु संपृक्तास्ताभिः । अत एव तासां श्रममपनेतुम् । न केवलं तासामेव स्वस्यापी
त्याह—श्रांत इति । भिन्नेत्युपमानेऽपि श्रांतत्वे हेतुः । भिन्नसेतुरिव कृतलीलौद्धत्य इत्यर्थः । 'स कुच' इति स्वामिसंमतः पाठः 'सः श्रीकृष्णः' इति व्याख्यानात्स्वेत्यस्याव्याख्यानाच्च ॥ २३ ॥ परिषिच्यमान इति । नानाजलक्रीडाभेदै
रार्द्रीक्रियमाणः । जलक्रीडाभेदास्तु कृष्णकर्णानंदे उक्ताः । तथाहि—करयोर्वामांगुष्ठमूलमापीड्य तर्जन्याद्यंगुलीभिर्मिथः संयोगरूपसंपुटेन क्षिप्तं जलं यदि लक्ष्यीकृतं न स्पृशेत्तर्हि पराजितः, स्पृशेच्चेज्जित इत्येको भेदः १ । गंडूषो यस्य
लक्ष्यादर्वाक्पतेत्स पराजितः, लक्ष्यं स्पृशेच्चेज्जित इति द्वितीयो भेदः २ । यस्य स्तनोरोभ्यां जलताडनेऽल्पास्तरंगाः प्रादुर्भवेयुः स पराजितः, बहवश्चेज्जित इति तृतीयो भेदः ३ । इतरेतरमंगुलीभिर्गृहीतमणिबंधेन बाहुद्वये
नालोडितजलोत्थफेनं यस्याचिरं लीयते स पराजितः, यस्य तु चिरेण स च जित इति चतुर्थो भेदः ४ । श्रोणिबिंबताडितपश्चाज्जलैर्यः पंक्तित्रुटितो भवेत्स पराजितः, अन्यस्तु जित इति पञ्चमो भेदः ५ । इत्येवमपरेऽ
पि नाना संतीति । इतस्ततः सर्वांगेषु । कुसुमवर्षिभिरिति—कृष्णभंग क्रीडायां वितर्क्य बलवृद्ध्यर्थमिव जयजयेत्येवं स्तूयमानः । वैमानिकैरिति पुंस्त्वेन पुरुषैरेव स्त्रीणां तासां व्रजसुंदरीपक्षपातित्वेन कुसुमवर्षादावप्रवृत्तेः ।
व्रजसुंदरीविजये तु देवीभिरेव पुष्पवृष्टिर्जयजयेति शब्दश्च क्रियेत, न तु देवैरिति । गोपीमंडलस्य भेदाशंकयाह—अंभसि वेति । स्वरतिस्स्वस्मिन्स्वेन वा रतिर्न परत्र परेण वा यस्य स तथेति । अनेन तत्तत्काले
रमणकथनं विशेषस्मरणाय वा सुरजनमोहनायेति बोध्यम्, अन्यथा "आत्मक्रीड आत्मरतिः" इति श्रुतिर्व्याकुप्येतेति । गजेंद्र इव लीला यस्येति तथा । "गजो माने हस्तिनि च मुख्ये शब्दयुते तथा" इति निरुक्तेः ।
गजेन्द्राणां वेदशब्दयुतानां शिष्टानां लीला यस्य स तथेति । "यदायदा हि धर्मस्य ग्लानिर्भवति भारत" इत्यादिस्मृतेर्धर्मप्रवर्तक इत्यर्थः सम्यक् ॥ * ॥ प्रेम्णेक्षितः । 'प्रेम्णोक्षितः' इति च पाठः । स्वं धनं
रतिः क्रीडैव यस्य सः ॥ अत्र **तोषिणी**—जलक्रीडामाह—स इति । स परमकौतुकी युवतिभिस्तादृशक्रीडारसमत्ताभिस्तादृशप्रवीणाभिस्ताभिरित्यर्थः । इतस्ततः सर्वासु दिक्षु स्थित्वांभसि जलेऽर्थादंभसैव सिच्यमानः ।
प्रेम्णे स्थितश्च प्रेम्णोक्षणेनांतरेपि सिच्यमान इवेत्यर्थः । अत एव प्रेम्णोक्षित इत्यपि पाठः । न केवलं तेन बहिरेव सिक्तोऽपि तु प्रेम्णांतरप्युक्षितः सिक्त इत्यर्थः । इत्यंतर्बहिरपि तत्क्रीडासक्तं दर्शितम् ।
किं कुर्वतीभिः—परिहासरसात् प्रकर्षेण हसंतीभिः तादृशः सन् स्वयमपि रेमे । तथैवांतर्बहिरपि तेन ताः सिच्यन्ते स्मेत्यर्थः । कथंभूतोऽपि—स्वरतिरपि । तादृशोऽपि कथं भूतः सन्—गजेन्द्रस्य लीलेव
परमासक्तिमयी लीला यस्य तादृशः सन् । पुनः कीदृशोऽपि सन्—वैमानिकैः कुसुमवर्षिभिरीड्यमानः । सदा सर्वत्र स्तूयमानतया प्रकटपरममहिमापि सन्नित्यर्थः । तेषां तादृशलीलापरिकरतायामयोग्यत्वान्नान्यथा तु
व्याख्येयम् । अंगेति हर्षसंबोधने । अन्यत्तैः । यद्वा—स्वेषु निजजनेषु स्वासु तास्वेव वा रती रागो यस्य सः । अतः स्वस्य जयादपि तासां जयेन संतोष इति भावः । यद्वा—कृपया तज्जलक्रीडां विस्तार्य वर्णयेति

---

१ हसन् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचार भृंगप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः ॥ २५ ॥ एवं शशांकांशुविराजिता निशाः स सत्यकामोनुरताबलागणः ॥ सिषेव आत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥

स्थलजलक्रीडे दर्शिते वनक्रीडां दर्शयति।ततश्चेति।कृष्णायाः यमुनाया उपवने जलस्थलप्रसूनानां गंधो यस्मिंस्तेनानिलेन जुष्टानि दिशां तटान्यंता यस्मिन्।यद्वा दिशश्च तटं स्थलं च यस्मिन्नुपवने। भृंगाणां प्रमदानां च गणैरावृतः करेणुभिर्गजीभिरावृतो मदस्रावी गजो यथा॥२५॥रासक्रीडां निगमयति। एवमिति। स कृष्णः सत्यसंकल्पोऽनुरताबलागणः अनुरागिस्त्रीकदंबस्थ एवं सवा निशाः सेवितवान्। शरत्काव्यकथारसाश्रयाः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः। यद्वा निशा इति द्वितीयाऽत्यंतसंयोगे।शृंगाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेव इति।एवमप्यात्मन्येवावरुद्धः सौरतश्चरमधातुर्न तु स्खलितो यस्येति कामजयोक्तिः॥२६॥

चेत्, तत्राह–स्वा असाधारणी रतिर्जलादिक्रीडा यस्य सः। अहो दृष्टान्ताद्यभावेन सा विस्तरेण वर्णयितुं न शक्यत इत्यर्थः ॥ २४ ॥ ततः स्थलजलक्रीडानंतरम्। जलप्रसूनानि कुमुदादीनि, स्थलप्रसूनानि सौगंधिककुंदादीनि। जुष्टानि परिमलितानि। तटशब्दस्यान्ते लक्षणातो मुख्यार्थश्रयणं न्याय्यमित्याह–यद्वेति। ''तटं नपुंसकं क्षेत्रे प्रतीरे तु तटी त्रिषु'' इति मेदिनी। भगवत्पक्षे मदच्युद् दुष्टगर्वहरः। द्वयोः पुण्य पापयो रदो लेखनं येन स द्विरदः, चित्रगुप्तेन पुण्यपापलेखनकर्त्रेत्यर्थः। कैः–करे हस्तविषयेऽणुभिः सूक्ष्माग्रलेखनीभिः। भृंगवद्गायमानप्रमदावृत इति वा ॥ * ॥ ततः जलविहारानंतरम्। चकारेणांगमार्जनवनदेवतानीत तादात्विकवस्त्रालंकारपरिधानानंतरं च। कृष्णाया यमुनाया उपवने परःसहस्रकुंजयुक्ते तत्र स्वापलीलार्थं चचार जगाम। कीदृशे–जलस्थलवर्तिप्रसूनानां गंधो यत्र तथाभूतैरनिलैर्जुष्टानि दिक्तटानि यस्य तस्मिन्। भृंगाणां प्रमदानां च गणैरावृतः। मदानां च्युत् च्योतनं क्षरणं यस्य सः ॥ अत्र **तोषिणी**–ततः जलक्रीडानंतरम्। पूर्वनेपथ्यापगमे तदानीं वन्यनेपथ्यस्य रोचकत्वात्तत्प्रचुरक्रीडाविशेषेच्छयेत्यर्थः। त्वर्थे चकारो भिन्नोपक्रमे। चचार पुष्पावचयनिकुंजांतर्निलीनतादिविचित्रप्रकारेण क्रीडन्नितस्ततो बभ्राम। भृंगगणावृतत्वं पुष्पावचये तत्साहित्येनैवागमनात्, जलक्रीडायामंगेषु धौतेषु सहजमधुरसौरभ्यस्यातिप्रकाशाच्च। अत एव तेषां मुहुरुक्तिः। मदच्युदिति भृंगगणावृतत्वे हेतुता तथा द्विरदश्रेष्ठता स्वकान्तासक्तता च ॥ २५ ॥ उपसंहरति–एवमित्यनेन। रासक्रीडाया निगमनं बोधनम्। निशा नितरां शं सुखं यासु ताः। क्षणमपि रतिविरामो नासीदित्यन्वर्थता। अनुरतस्त्रीगणस्तदिच्छानुकूलरमितस्त्रीजनो वा। एतेन श्रीकृष्णस्य स्त्रीष्वनासक्तिर्द्योतिता। रसाः शृंगारहास्यादिरूपाः। निशानामचेतनत्वाद्रसाश्रयता न संपनीपद्यतेऽत आह–यद्वेति। चरमधातुरत्र रेतः। '' रसाऽसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः '' इत्यत्र धातुगणनायां शार्ङ्गधरेण शुक्रस्य चरमत्वमुक्तम्। किञ्चोत्पत्तिक्रमेणापि शुक्रस्य चरमत्वमेव। तदुक्तं संहितायाम्–'' रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते। मेदसोऽस्थि ततो मज्जा तस्माच्छुक्रस्य संभवः ॥ '' इति। रसादन्नादिरसादित्यर्थः। वीर्यं निरुध्य सुरतं करोतीति अयमेव कामजयः '' स्त्रीसंगेऽपि न पतितं रेतो यस्य परेच्छया। स धन्यः पुरुषो लोके कामजेता स कथ्यते ॥ '' इति संहितोक्तेः ॥ * ॥ शरत्पौर्णमासीनक्तंतनीं रासक्रीडामुपसंहरन्नन्यास्वपि रात्रिषु विविधविचित्रापरिगण्यतादृशक्रीडा ताभिः सह बभूवेत्याह– एवं सर्वा एव योगमायायाः प्रभावाच्छशांकांशुविराजिता निशाः सिषेवे। स्वविलासैर्वृंदावनीयनिशासुखमास्वादयामासेत्यर्थः। षिवु धातोः कर्तृत्वेन क्रीडोपयोगिन्यस्ता निशाः परमादरणीयत्वेन भोग्याः किमुत तत्रत्याः कामविलासा इति द्योतितं, महाप्रसादान्नं सेवते भक्त इतिवत्। यतस्ते कामा विलासा न प्राकृता ज्ञेया इत्याह–सत्याः वास्तववस्तुरूपाः कामा विलासा यस्य सः। किञ्च, रमणस्य कर्तृत्वं स्वं गोपीश्च प्रापयामासेत्याह–अनु तद्रमणानंतरं रता रमणकर्तारोऽबलागणा अपि यस्य सः। अबलापदेन तत्र तासां प्रभविष्णुत्वाभावो व्यंजितः। तदा च भगवतो रात्रिंदिवं तत्केलिविलासैकतानमनस्त्वमभूदित्याह–आत्मनि मनसि। अवरुद्धा अवरुध्य स्थापिताः सौरताः सुरतसंबं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥

॥ २७ ॥
धिनो हावभावविंब्बोककिलकिंचितादयः, वाम्यौत्सुक्यहर्षादयः, स्तंभस्वेदवैवर्ण्यादयः, दर्शनस्पर्शनश्लेषादयश्च येन सः । " एवं सौरतसंलापैर्भगवान्देवकीसुतः । स्वरतो रमयामास नरलोकं विडंबयन् ॥ " इत्यत्र विशेष
विवक्षयैव संलापपदोपन्यासः । अत्रत्वविशेषेण सर्वे एव ते संगच्छन्त इति ज्ञेयम् । सर्वा द्वादशमासिकीरेव निशाः सिषेवे । कीदृशीः—शरत्काव्यकथाश्रयाः 'हायनोऽस्त्री शरत्समाः' इत्यभिधानात् शरदि संवत्सरमध्य
एव ऋत्वादिकमधिकृत्य ये काव्यकथारसाः संभवन्ति तेषामाश्रयाः या सांवत्सरिकनिशाः श्रीवृंदावनीयकृष्णक्रीडाधिकरणीभूतास्ता आश्रित्य सत्कवयः प्राचीनार्वाचीना व्यासपराशरजयदेवलीलाशुकगोवर्द्धनाचार्यश्रीरूपप्रभृतयः
स्वस्वकृतेषु काव्येषु कथाः रसांश्च शृंगारप्रधानान्वर्णयित्वाऽपि न पारं प्रापुरित्यर्थः । अत एव मयापि सामस्त्येन वर्णयितुमशक्यत्वाद्दिगेवैषा दर्शितेति भावः ॥ अत्र **तोषिणी**—अथास्यां शरदि पूर्णिमायां कृतां रासक्रीडा
मुपसंहरंस्तत्प्रकारतामन्यत्राप्युपदिशन्नन्यामन्यामपि क्रीडामुपलक्षयति—एवमिति । एवं पूर्वोक्तरासप्रकारेण शरत्काव्येति वक्ष्यमाणात् । प्रतिशरदशशांकांशुविराजिता निशाः सर्वा एव सिषेवे । परमादरेण परिचरितवा
नित्यर्थः । अन्यथा ऋत्वंतरसंभवा ज्यौत्स्नीस्तामसीश्च रहस्तत्तद्गृहप्रवेशतस्तदभिसारेण कुंजशयनादिना कदाचिद्रासेन चेति भावः । उत्तरासां विशेषज्ञापिकाः पूर्वा एव विशिनष्टि—शरदि ये काव्यकथारसाः संभवन्ति
तेषामाश्रयो यासु श्रीभगवत्कृतानंतलीलासु तादृशीर्निशा व्याप्येति । पक्षे, सर्वाः शरत्काव्यकथाः सर्वदेशकालकविभिर्यावत्यो वर्णयितुं शक्यन्ते तावतीस्ताः सिषेवे । किन्तु रसाश्रयाः रसेष्वाश्रयो यासां
ता एव न तु कैश्चिद्विरसतया या ग्रथितास्ता अपीत्यर्थः । उपलक्षणं चैतदन्यासाम् । यद्वा—शशांकांशुविराजिताः वसंतादिसंबंधिन्योऽपि या निशास्ता एव रासप्रकारेण सिषेवे । तथा ऋतुषट्कात्म
कस्य शरदाख्यस्य याः काव्यकथाः पूर्ववदनन्तास्ताश्च सर्वास्सिषेवे, किन्तु रसाश्रया एवेति । कीदृशः सन् सिषेवे, तत्राह—आत्मन्यंतर्मनसि अवरुद्धाः समंततः स्थापिताः सौरतास्तासां सुरतसंबंधिनो भावहावोदयो येन
तादृशः सन्निति । ततस्ताः परित्यक्तुं न शक्तवानिति भावः । अत्र विशेषानिर्देशादखिला एव भावादयो गृहीताः । "एवं सौरतसंलापैर्भगवान्देवकीसुतः । स्वरतो रमया रेमे नरलोकं विडम्बयन् ॥" इत्यत्र तु विशेषार्थ
मेव हि संलापशब्दो दत्त इति । आत्मन्यवरुद्धसौरतत्वे हेतुः—अनुरताबलागणः निरंतरमनुरक्तोऽबलागणो यस्मिंस्तद्विधः । तेषां सौरतानामनुरागप्रभवत्वादनुराग एव तत्र कारणं, न तु कामिजनवत्काम इत्यर्थः । यतः
सत्यकामः व्यभिचाररहिततादृशाभिलाष इति । एवमेवोक्तं श्रीपराशरवैशंपायनाभ्याम्—"एवं स कृष्णो गोपीनां चक्रे बालैरलंकृतः । शारदीषु सचंद्रासु निशासु मुमुदे सुखी ॥" इति । टीकायां त्वेवमपीत्यादिना
स्मरपारवश्याभावमात्रप्रतिपादनाय सौरतशब्दस्य व्याख्यांतरमप्रसिद्धमपि कृतमिति ज्ञेयम् ॥ २६ ॥ ज्ञातशास्त्रतात्पर्योऽपि परीक्षित्स्वनाम्नोऽन्वर्थतां द्योतयंस्तथानभिज्ञश्रोतृसंदेहप्रहाणाय पृच्छति—राजेति । इतरस्य अध
र्मस्य । प्रशमाय निवृत्तये । अंशेन बलदेवेन सह । "यदायदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" इति श्रीमुखोक्तेः । यद्वा—यस्यांशेन जगत् स ईश्वरोऽवतीर्ण इत्यन्वयः ।
अंशेनश्चासौ जगदीश्वर इति वा ॥ * ॥ अथ परीक्षित्सभोपविष्टानां विविधवासनावतां कर्मिज्ञानिप्रभृतीनां हृदये संदेहं समुद्भूतमालक्ष्य तदुच्छेदार्थं पृच्छति—संस्थापनायेति । इतरस्य अधर्मस्य । यः खल्वंशेन
जगदीश्वरो विष्णुर्भवति स स्वयं भगवानपीत्यर्थः । अंशेन बलदेवेन सह ॥ अत्र **तोषिणी**—"वंशीसंजल्पितमनुरतं राधयांतर्द्धिकेलिः प्रादुर्भूयासनमधिपरं प्रश्नकूटोत्तरं च । नृत्योल्लासः पुनरपि रहःक्रीडनं वारि
खेला कृष्णारण्ये विहरणमिति श्रीमती रासलीला ॥"एवं सुखविशेषेणैव मुनींद्रेण प्रश्नस्य विस्तार्य च वर्णिताया रासक्रीडायाः श्रवणाद्राज्ञोऽपि तत्रतत्र सुखोद्बोध एव जात इति लभ्यते, न तु रोषदर्शनं वैरस्यापातात् ।
तस्मात्तत्रत्यानां केषांचित्संदेहं वितर्क्य तेषामेव हितार्थं तमुत्थाप्य स्वसंदेहव्याजेन पृच्छति—संस्थापनायेति त्रिभिः । तत्राद्यद्वयं युग्मकम् । संस्थापनाय लुप्तस्य प्रवर्तनाय, प्रवृत्तस्य च रक्षणायेत्यर्थः । न केवलं तदर्थमेव
किं त्वितरस्याधर्मस्य प्रशमाय । सर्ववासनोन्मूलनायेत्यर्थः । अन्यथा धर्मसंस्थापनस्याप्यसिद्धिः स्यात् । हि प्रतिद्धम् । "धर्मसंस्थापनार्थाय संभवामि युगेयुगे" इत्यादिवचनेभ्यः । भगवानिति—तत एव भगवद्भावप्रकटन
मपि स्यादिति भावः । अंशेन श्रीबलदेवेन सहेति तत्रतत्राग्रहो दर्शितः । यतो जगतामीश्वरः प्रतिपालकः । अन्यथा जगन्नाशापत्तिरित्यर्थः । यद्वा—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति न्यायेन यो जग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स कथं धर्मसेतूनां वक्ता कर्त्ताऽभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनम् ॥ २८ ॥
आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितम् ॥ किमभिप्राय एतं नः संशयं छिंधि सुव्रत ॥ २९ ॥

प्रतीपं प्रतिकूलमधर्ममित्यर्थः । आचरत्कृतवान् । न चेदमधर्ममात्रं कलंजभक्षणादिवत्किं तु महासाहसमित्याह । परदाराभिमर्शनमिति ॥ २८ ॥ आप्तकामस्य नायमधर्म इति चेत्तर्हि यद्येवं कामाभावान्निंदितं केनाभिप्रायेण कृतवानिति पृच्छति । आप्तकाम इति ॥ २९ ॥

दीश्वरः स्वयं तु पूर्णैश्वर्ययुक्त इत्यर्थः । तस्यान्यकामना न संभवतीति भावः ॥ २७ ॥ इत्यर्थ इति । धर्मापेक्षयाऽधर्म एव प्रतीप इति भावः । अत्राक्षिपति—न चेति । विषदिग्धबाणहतमृगमांसं कलंजम्[1] । किन्तु अपि तु । हेतुशून्यो धर्मव्यतिक्रमः साहसः । अभिमर्शनम् अविचार्यग्रहणम् । ब्रह्मन्निति वेदमूर्ते इत्यनेन संदेहहरणे सामर्थ्यं सचितम् ॥ * ॥ प्रतीपम् प्रतिकूलमधर्मम् । यदि च स्वैरलीलयैवाचरदित्युच्यते तदा ब्रह्मशाप मंगीकृत्य तत्फलं च कदाचिदीश्वरत्वेऽप्यंगीकरोति यथा तथा पापमंगीकृत्य तत्फलमप्यवश्यमंगीकुर्यादित्याक्षेप इत्येकः प्रश्नः ॥ अत्र तोषिणी—स इति । पूर्वत्र यच्छब्दस्याध्याहारादन्वयः । धर्मा एव सेतवः लोकरक्षामर्यादाः । धर्मे वैदिकनिबंधा वा तेषां वक्तृत्वादेव कर्ता । अन्यथा वाक्यव्यवहारयोर्विसंवादेन लोकैरग्राह्यः स्यात् । किञ्च, अभितो रक्षिता तत्प्रतिपक्षत्ववादिना बहुधा संवर्द्धनेन च पालकः । परदाराभिमर्शनरूपं प्रतीपं धर्मसेतूनामेव धर्मसंस्थापनादेर्वा प्रतिकूलम् । ब्रह्मन् हे साक्षाद्वेदमूर्ते प्रतीपाचरणेन वेदातिक्रमात् भवादृशविप्रकुलातिक्रमोऽपि स्यात् । तच्च ब्रह्मण्यदेवस्य तस्यायुक्ततममेवेति भावः । यद्वा—ननु तत्कारणं मया कथं ज्ञातुं शक्यमीश्वरचेष्टितत्वादित्याशंक्याह—हे सर्ववेदात्मक, सर्वज्ञत्वादित्यर्थः । अन्यत्तैः । यद्वा—प्रतीपमाचरदिति अधर्ममुक्तवान् कृतवान् अभिरक्षितवांश्चेत्यर्थः । तत्रोक्तिः—‘मया परोक्षं भजता तिरोहितम्’ इत्यादिना रहोऽपि परदारान् भजे इत्यनुवादात्, कृतिः—साक्षादेव रमणात्, अभिरक्षा—पुनःपुनराचरणात्, तेन लोके प्रवृत्तिसंभवाच्चेति । स्वयमधर्मकर्तृभ्योऽपि तस्य महानेव दोषबंध आयातः । यद्वा—धर्मं प्रकर्षेण नाशितवान्, अधर्मं च सम्यक् स्थापितवानिति श्लेषेण स्वयं सिद्धांतमप्याह—संस्थापनायेति । धर्मसंस्थापनं नाम सामान्यतः, संस्थापनं तु तत्रैव शुद्धभ क्तियोगस्य सर्वातिक्रमितया स्थापनात् “स्मर्तव्यः संततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधास्स्युरेतयोरेव किंकराः ॥” इति पाद्मादिशास्त्रेभ्यः । तदवतारस्य तन्मुख्यप्रयोजनत्वञ्चोक्तं कुंती देव्या—“भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः” इति, ‘भक्तियोगविधानार्थम् त्वाम्’ इति टीका च । तद्धि तत्र विनाप्यपदेशं तत्प्रतापेनैव भवति । तथेतरस्य तद्विरुद्धस्य च स्वत एव नाशो भवतीति स तथा भूतोऽसौ परदाराभिमर्षणरूपं कथमाचरत्, अपि तु नैवाचरदिति । कुतः—धर्मसेतूनां सर्वधर्माश्रयभूतानां भक्तियोगभेदानां वक्तृत्वादिहेतोरित्यर्थः । अतो द्विजावतारमुख्यप्रयोजनभक्तिविशेषफलप्रेमविशेषविस्तारणार्थं तासां पतिसेवादिधर्मत्याजने नान्यधर्माद्यनादरो युक्त एवेति भावः । स च ‘तावत्कर्मादि कुर्वीत’ इत्यादिवचनात्साधनदशायामपि युक्तः, किमुत तासामिति । यद्वा—स भगवान् जगदीश्वरश्चेत्येव वा प्रतीपत्वे हेतुः । सर्वो शितत्वादंतर्यामित्वाच्चेत्यर्थः । यद्वा—परे परमशक्तिरूपा ये दाराः स्वीयरमणात्तदभिमर्षणमपि कथं प्रतीपमाचरत्, अपि तु नैवेत्यर्थः । यतो भवद्भिरेवोक्तम्—‘कृष्णवध्वः’ इति ॥ २८ ॥ परिहरति—आप्तकामस्येति । यद्येवमाप्तकामत्वं तस्य तर्हि आप्तकामत्वे निंदिताचरणमनुचितमिति कोऽभिप्रायो यस्य स किमभिप्रायः । किमाशयवानित्यर्थः । एतम् आप्तकामत्वे निंदिताचरणरूपम् । न इति तत्रत्यसमाजापेक्षया बहुत्वम् । सुव्रतेति । ब्रह्मचर्यनिष्ठोऽपि मत्कृपया ब्रूहीति संबुद्ध्यभिप्रायः ॥ * ॥ परमेश्वरस्य नायमधर्म इति चेत्, निंदितमिदं केनाभिप्रायेण चकारेति पृच्छति—आप्तकाम इति । तेन स्वकामपूरणार्थमिदं कृतवानिति प्रत्युत्तरं न दातव्यमिति भावः । अवतारेस्मिन्नेतादृशं जुगुप्सितमेव कर्तव्यमिति चेदत आह—यदुपतिरिति । परमधार्मिकाणां यदूनां पतिस्तर्हि कथमभूदिति भावः । न इति—न तु केवलस्य ममात्र संशयोऽस्तीत्यर्थः । तस्याप्तकामत्वेऽप्या

१ एतत्कलंजभक्षणे विषदिग्धबाणहतत्वेनाऽधर्मैतद्विकारस्यापि सम्भवोऽतो ‘न कलंजं भक्षयेत्’ इत्यत्रैवात्रापि तत्कन्दग्रहणमिति श्रीधराभिप्रायः प्रतिभाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ ३० ॥
नैतत्समाचरेज्जातु मनसाऽपि ह्यनीश्वरः ॥ विनश्यत्याचरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषम् ॥ ३१ ॥

परमेश्वरे कैमुतिकन्यायेन परिहर्तुं सामान्यतो महतां वृत्तमाह। धर्मव्यतिक्रम इति। साहसं च दृष्टं प्रजापतींद्रसोमविश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषाय न भवतीति ॥ ३० ॥ तर्हि ‘यद्यदाचरति श्रेष्ठः’ इति न्यायेनान्योऽपि तत्कुर्यादित्याशंक्याह। नैतदिति। अनीश्वरो देहादिपरतंत्रः। यथा रुद्रव्यतिरिक्तो विषमाचरन् भक्षयन् ॥ ३१ ॥

त्वारामत्वेऽपि प्रेमाऽऽनन्दस्वरूपाभिस्ताभिः सोत्कण्ठं रमणं युज्यत एवेति ज्ञातप्रायरहस्यसिद्धान्तत्वादिति भावः। सुव्रतेति। सदाचारपरायणस्य तवाप्यस्यामेव लीलायामत्यावेशदर्शनादेते संशेरत इति भावः॥अत्र **तोषिणी**—यदुपतिरिति। कृततादृशाकर्तव्यश्चेत्परमधार्मिकाणां यदूनां पतिरपि न स्यात्। एतमिति। कुत्राप्यन्यः संशयो नास्तीत्यर्थः। न इति बहुत्वं संदेहे वर्गाभिप्रायेण। संशयम् प्रा (अ) प्तशिरोमुकुटाचरितत्वशास्त्रविरुद्धत्वाभ्यां चित्तदोलनम्। सुव्रत हे ब्रह्मचर्यादिनिष्ठ इति भवादृशामाचरितविरुद्धं तत्तु जुगुप्सितमेवेति। यद्वा—हे सदाचारनिविष्टेति। अन्यथा भवदादिसंमतसदाचारलोप इति भावः। श्लेषपक्षे, यदूनां भक्तानां पतिरिति भक्तकृपया कदाचिद्धर्मातिक्रमार्होऽपीत्यर्थः। जुगुप्सितं किं कृतवान् अपि तु नैव, किन्तु भक्तवर्गसंमतमेवाकरोदित्यर्थः। कुतः—आप्तः लब्धः कामो रासक्रीडादिना निजप्रेमभक्तिविस्तारणमनोरथो येन सः। सर्वसाध्यतमप्रेमभक्तिप्रवर्तनेन निंदितानाचरणात्, प्रत्युत तेन साधुवर्गसंतोषणादेरित्यर्थः। तथापि नः संशयमिति सांजलिकरचालनेन तत्रत्यसंदिहानवर्गाभिप्रायेण, तच्च विनयेन। प्राय इति तत्र केषांचिच्छास्त्रतत्त्वविदां भक्तिपराणां सद्रसाभिषिक्तानां प्रेमभक्तिरसमयतदीयरासक्रीडादौ संशयांतराभावात्। अतोऽनवहितानामेवात्रत्यानां केषांचिद्धितार्थमेव मया पृच्छयते, । न च निजसंदेहादिति भावः। तस्मादभि अभयं यथा स्यात्तेभ्यो भयमकृत्वा तेषां संशयशृंखलां छिन्द्धीत्यर्थः। सुव्रत हे भक्त्यैकनिष्ठ ॥ २९ ॥ साहसं परिहर्तुम् अपाकर्तुम्। सामान्यतः साधारण्येन। ईश्वराणाम् योगैश्वर्यवताम्। साहसम् शास्त्रविरुद्धाचारः। प्रजापतेर्ब्रह्मणो दुहित्रनुगमनम्, इन्द्रस्याहल्यागमनम्, सोमस्य गुरुस्त्रीतारागमनम्, विश्वामित्रस्याभक्ष्यमांसाशनप्रवृत्तिः। आदिना सप्तर्षीणां शवभक्षणोद्योगः, अजीगर्तस्य पुत्रविक्रयः, पराशरस्य दासकन्यासंगश्च ग्राह्यः। तच्च साहसम्। तेषाम् प्रजापत्यादीनाम्। तेजीयसामिति हेतुगर्भितविशेषणम्—तपआदिप्रभावोद्भूततेजसा साहसस्य दग्धत्वाद्दोषाय पापाय नेति। “तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि। नवनीते नले दुर्गे” इति यादवः। तत्रोपयोगिदृष्टान्तमाह—वह्नेरिति। न हि गोब्राह्मणादिशरीरामेध्यदाहेनाग्नेर्ब्रह्महत्यादिदोषो भवति तेजस्वित्वादिति भावः ॥ * ॥ कृतस्याप्यधर्मस्य फलमीश्वराणामपि न भवेत्किमुत परमेश्वरस्य तस्येति प्रथमप्रश्नोत्तरमाह—धर्मेति षड्भिः। ईश्वराणां रुद्रादीनामपि धर्मव्यतिक्रमोऽधर्मो दृष्टः। साहसं साहसहेतुक इत्यर्थः। न दोषाय न प्रत्यवायाय, वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः ॥ अत्र **तोषिणी**—सहजकृपालुतया शिष्यस्नेहापेक्षया वा तदीयाक्षेपाभासपरिहारपूर्वकं श्लेषदर्शिततदीयसिद्धांतांतरमेव परिहरति—धर्मेति सप्तभिः। ईश्वराणाम् कर्मादिपारतंत्र्यरहितानाम्। तेषां धर्मव्यतिक्रमो यद्दृष्टः यथा ब्रह्मादीनां दुहितृकामनादौ, तथा साहसं निर्भयता च यद्दृष्टं तथा बृहस्पतेरुतथ्यपत्नीगमनादौ तत्तच्च तेजीयसां तेषां न दोषाय प्रत्यवायाय। तत्र दृष्टान्तः सर्वभुजो वह्नेर्यथा सर्वभुक्त्वं न दोषाय नापावित्र्याय तद्वदित्यर्थः ॥ ३० ॥ तत्राक्षिपति—तर्हीति। अन्यः अतेजीयान्। एतत् साहसम्। जातु मनसापि किमुत कायेन। विनश्यति समूलं छिन्नो भवति। मौढ्यात् अज्ञानात्क्रोधाद्युद्रेकतो वा। ‘नश्यत्याश्वाचरन्’ इति पाठस्तु विजयध्वजोक्तः। तत्राशु पानोत्तरक्षणमेव, न तु विलंबेनेत्यर्थः ॥ * ॥ तर्हि ‘यद्यदाचरति श्रेष्ठः’ इति न्यायेनान्योऽपि कुर्यादित्याशंक्याह—अनीश्वरः निकृष्टो यथा रुद्रव्यतिरिक्तः विषमाचरन् भुंजानः सद्यो विनश्यति। रुद्रस्तु—भुक्त्वा प्रत्युत नीलकंठत्वेन शोभते स्मेति भावः ॥ अत्र **तोषिणी**—तर्ह्यन्येषां का वार्ता तत्राह—नैतादिति। एतत् धर्मव्यतिक्रमादिमयमीश्वराचरितम् न सम्यगाचरेत् सम्यगित्यस्य निषेधे तात्पर्यात्। एकांशेनापि नाचरेदित्यर्थः। जातु कदाचिदपि। तत्र च न मनसापि किमुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित ॥ तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ॥ ३२ ॥
कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वाऽनर्थो निरहंकारिणां प्रभो ॥ ३३ ॥

कथं तर्हि सदाचारस्य प्रामाण्यमत आह । ईश्वराणामिति । तेषां वचः सत्यमतस्तदुक्तमाचरेदेव आचरितं तु क्वचित्सत्यमतः स्ववचोयुक्तं तेषां वचसा यद्युक्तमविरुद्धं तत्तदेवाचरेत् ॥ ३२ ॥ ननु तर्हि तेऽपि किमेवं साहसमाचरंति तत्राह । कुशलेति । प्रारब्धकर्मक्षपणमात्रमेव तेषां कृत्यं नान्यदित्यर्थः ॥ ३३ ॥

वाचा कर्मणा वा । हि निश्चये । विशेषेण समूलतया लोकद्वयदुःखित्वादिप्रकारेण नश्यति । मौढ्यादीश्वराणामैश्वर्यमात्मनश्चासामर्थ्यं ज्ञात्वेत्यर्थः । इति भक्षणे मौढ्यमेव हेतुरुक्तः, अन्यथा भक्षणाप्रवृत्तिः स्यात् । अब्धिजम् कालकूटम्, अतिपरमतीक्ष्णतया सद्य एव विनाशोऽभिप्रेतः । ईश्वरस्तु न नश्येदेव, प्रत्युत ऐश्वर्यविशेषप्रकाशादिना शोभते, यथा नीलकंठत्वादिना शिव इति भावः ॥ ३१ ॥ पुनराक्षिपति—कथमिति । सदाचारस्य सद्भिराचरितस्य । अतोऽत्राक्षेपे । समाधानमाह—ईश्वराणामिति । सत्यम् परमार्थत्वेनाभीष्टदम् । अतः सत्यत्वात् । तदुक्तम् ईश्वरोक्तम् । वचस एव सत्यत्वे "कुर्याद्विद्वांस्तथा सक्तश्चिकीर्षुर्लोकसंग्रहम्" इति विधानस्य का गतिस्तत्राह—आचरितं तु क्वचिदिति । हास्यादिनिवृत्त्यर्थं क्वचिदिति । वैदिकमार्गप्रदर्शनार्थं यदाचरणं तत्सत्यमेव, अतः क्वचित्सत्यत्वादेव स्ववचो युक्तं स्वशब्देनेश्वरग्रहस्तथैव विगृह्णाति—तेषामीश्वराणां वचसा वचनेन वेदरूपेण यद्यदाचरणं युक्तमविरुद्धं तत्तदाचरणमीश्वराणामपि कुर्यादित्यर्थः । यद्वा—तेषामीश्वराणां यत्स्ववचः स्ववचनं युक्तं वेदाविरुद्धं, विद्वांस्तदाचरेत्तत्स्वीकुर्याद्वेदविरुद्धं तु भक्तपरतंत्रतयेश्वरस्यान्यथाचरणमपि कदाचिद्भवति तन्न ग्राह्यमिति भावः । अत एवोक्तं देवलबौधायनकौशिकैः—"कृतानि यानि कर्माणि दैवतैर्मुनिभिस्तथा । नाचरेत्तानि कर्माणि श्रुत्वा वापि न कुत्सयेत् ॥ तदुक्तं तु सदा कार्यमाम्नायानुगतं यदि । स्मृतेर्वेदविरोधित्वे परित्यागो यथा भवेत् ॥ तथैव लौकिकं वाक्यं स्मृतेर्बाधात्परित्यजेत् । वैदिकस्य परित्यागात्प्रायश्चित्ती भवेन्नरः ॥ लौकिकं तु परित्याज्यमीश्वरोक्तं भवेद्यदि । यद्वेदेन विरुद्धं स्यान्न ततः किल्बिषी पुमान् ॥" इति निर्णयसुधाकरादौ बहुधा वर्णितमित्युपरम्यते । किञ्च—"अतर्क्याः खलु ये भावा न तांस्तर्केण योजयेत्" इति श्रुतेरपीश्वराणामचिन्त्यभावत्वात्तत्र तर्कोऽकिंचित्कर एवात ईश्वरे श्रुत्या तर्को निषिद्ध इति ॥ * ॥ कथं तर्हि सदाचारस्य प्रामाण्यमत आह—ईश्वराणामिति । सत्यम् सद्भ्यो हितम् । क्वचित् दशरथपुत्रत्वे सतीत्यर्थः । तस्मादियं व्यवस्थेत्याह—स्ववचोयुक्तम् अविरुद्धम् तदेवाचरेत् । बुद्धिमानिति—तत्रापि विचार्यैव "तदसौ वध्यतां पाप आततायात्मबंधुहा" इति भगवतो वचोप्यर्जुनेनाश्वत्थामवधविधायकं न पालितमिति ॥ अत्र **तोषिणी**—वच आज्ञा । सत्यम् प्रमाणत्वेन ग्राह्यं स्ववचनेनाविरुद्धमिति । तेषामेव तथा विचारादाज्ञाया बलवत्तरत्वं व्यंजितम् । बुद्धिमानिति—तत्तद्विचार्येत्यर्थः । अन्यथा निर्बुद्धिरेवेति भावः ॥ ३२ ॥ पुनरीश्वरेष्वाक्षिपति—नन्विति । तेऽपि ईश्वरा अपि । तत्र ईश्वरसाहसे । तेषाम् ईश्वराणाम् । ईश्वरशब्दार्थस्तूक्त एव । इत्यर्थ इति—प्रारब्धप्रतीक्षका एव विद्वांसो न तु कर्मासक्ताः किंचित्कुर्वंतीत्याशयः । श्लोकार्थस्तु—कुशलानां तपोदानयज्ञादीनामाचरितेन करणेनार्थः प्रयोजनं स्वर्गादिसुखं नास्ति । विपर्ययेण परस्त्रीसंगसुरापानादिनाऽनर्थो नरकादिलक्षणो न । निरहंकारिणामिति हेतुगर्भं विशेषणम्, निरहंकारित्वादित्यर्थः । अहंकारः कर्मस्वासक्तिः स एव बंधकारणम्, तेषामनासक्तत्वाद्बंधो नास्तीत्याशयः ॥ * ॥ ० ॥ अत्र **तोषिणी**—[1]चेकारादमुत्रापि । वाशब्दः समुच्चये । अनर्थोऽपि नास्ति । कुतः—निरहंकारिणाम् अहंकारिभ्यो व्यतिरिक्ता

---

१ इह चार्थो नेति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥३४॥ यत्पादपंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबंधाः ॥ स्वैरं चरंति मुनयोऽपि न नह्यमानास्तस्येच्छयाऽऽत्तवपुषः कुत एव बंधः ॥३५॥ गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ॥ योंतश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥ ३६ ॥

प्रस्तुतमाह । किमुतेति । कुशलाकुशलान्वयो न विद्यत इति किं पुनर्वक्तव्यमित्यर्थः॥ ३४ ॥एतदेव स्फुटीकरोति । यस्य पादपंकजपरागस्य निषेवो निषेवणं तेन तृप्ताः।यद्वा। यस्य पादपंकजपरागे निषेवा नितरां सेवा येषां ते तथा ते च ते तृप्ताश्चेति भक्ता इत्यर्थः । तथा ज्ञानिनश्च न नह्यमाना बंधनमप्राप्तवंतः ॥ ३५ ॥ परदारत्वं गोपीनामंगी

नाम् । अहंकाराभावेन कर्मभिरलेपादित्यर्थः । प्रभो हे बोद्धुं समर्थ । यद्वा—तस्यापीश्वरत्वाभिप्रायेण संबोधयति—हे ईश्वरेति ॥ ३३ ॥ प्रस्तुतम् प्रकृतम् । तिर्यङ्मर्त्यदिवौकसाम् पशुपक्ष्यादिनरदेवानां सर्वेषामीशितव्यानां नियम्यानाम् । ईशितुः नियामकस्य । कुशलाकुशलान्वयः पुण्यपापफललेपः । इत्यर्थ इति—यदि तत्कृपाकटाक्षावाप्तज्ञाननिर्गताहंकाराणां कुशलाकुशलफलसंबंधो न तर्हि सर्वनियन्तुर्भगवतः कथं स भवेदित्यर्थः ॥ * ॥ प्रस्तुतमाह—किमुतेति ॥ अत्र **तोषिणी**—यद्येवमहो तेषां निरहंकारतामात्रेणैवानर्थाभावस्तर्हि तेषामपि हितार्थमवतीर्णस्य परमेश्वरस्य कुतोऽनर्थशंकापीति कैमुत्येनाह—किमुतेति । तिर्यगादयः क्रमेण तामसराजससात्त्विकाः । ईशितव्यानाम् स्वभावत एव नियम्यानाम्, इति मुक्तानामपि तदधीनता सूचिता । त्वर्थे चकारः । ईशितव्यानां कुशलाकुशलाभ्यां पुण्यपापाभ्यां योऽन्वयः संपर्कः स किमुत सुतरामेव न विद्यत इति पूर्वेणान्वयः । सर्वनियंतृत्वेन नियामकाभावात् । एतदेव हि परमेश्वरत्वं नामेति भावः । " बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे " इत्यमरः ॥ ३४ ॥ एतदेव कैमुत्यमेव । स्फुटीकरोति प्रकटयति । " तस्य ते पादसंस्पर्शों मम भूयादहर्निशम् " इत्याद्युक्तेर्भगवत्सेवायां पशुमृते तृप्तेरश्रवणादस्वारस्यादर्थांतरमाह—यद्वेति । ते च तृप्ता हरिसेवामृतेऽन्यविषयेषु प्राप्तालंबुद्धयः । इत्यर्थ इति—" अतृप्नुमः क्षुल्लसुखावहानामृते वयं कृष्णकथामृतौघात् " इत्याद्युक्तेरित्यर्थः । मुनयो मननशीला ज्ञानिनश्च । तथा भक्तवत् । बंधनम् पुत्रादिषु स्नेहादिरूपं कर्मजन्यं वा । स्वैरं निर्बंधाः । इच्छया निजया भक्तानां वा । स्वीकृतमूर्तेस्तस्य श्रीकृष्णस्य बंधहेत्वासक्त्यादेरभावाद्बंधशंकैव नोदेतीत्यर्थः ॥ * ॥ तद्भक्ता अपि धर्माधर्माभ्यां न बध्यन्तेऽतः—यदिति । निसेवो नितरां सेवनं, योगो भक्तियोगस्तत्प्रभावेण विधुतोऽखिलानां स्वद्रष्टॄणामपि कर्मबंधः किमुत स्वस्य, यैस्ते मुनयो मननशीला भक्ता अपि न नह्यमाना बंधनमप्राप्नुवंतः, तस्य तु निरंकुशया स्वेच्छयाऽऽत्तानि स्वीकृतानि वपूंषि परस्त्रीशरीराणि येन तस्य ॥ अत्र **तोषिणी**—तदेव कैमुत्यान्तरेण स्फुटं दर्शयति—यदिति । यत्तदोरन्वयाद्योगप्रभावेत्यादेरपि तदंतःप्रवेशाद्यदिति यस्येत्यर्थः । सुब्लुक्छांदसः । यद्यस्य पादपंकजयोः परागाणां कांतिपरमाणूनां नितरां सेवनेन ध्यानरूपेणानुशीलनेन तृप्ता अन्यत्रालंबुद्धयः । तत्प्रेमपूर्णा इत्यर्थः । यस्यैव योगप्रभावेण भक्तियोगाख्यसाधनतेजसा विधुताखिलकर्मबंधा ये ते चापि मुनयः स्वैरं स्वच्छंदं यथा स्यात्तथा चरंति विहितमविहितमपि कुर्वन्ति, तत्र नह्यमानाश्च न भवन्ति तस्मात्तस्य कुत एव बन्धः । अपि तु नास्त्येव बंध इत्यर्थः । तदेवं कैमुत्येन दर्शयित्वा विशेषणविशेष्यादपि तस्य बंधाभावं दर्शयति—इच्छयेति । इच्छया इच्छामात्रेण न तु जीववत्कर्मपारवश्येनात्तं तद्भक्तिसंबंधात् प्रपञ्चेप्यानीतं वपुर्येन तस्येति । अतो भक्तविशेषानुग्रहाय दुर्वाससः पराभावनावत्क्वचिन्मर्यादामप्यसौ लंघयतीति भावः ॥ ३५ ॥ वस्तुतो गोपीनां परदारत्वं नास्ति गांधर्वविधानेन परिणीतत्वात्, तथापि निर्बंधेन तद्दूह्यमाणं प्रति 'तुष्यतु दुर्जनः' इति न्यायेन तदंगीकृत्य स्वीकृत्य परिहृतम्—'यत्पादपंकज' इत्यादिनोत्तरितम् । परमार्थविचारे भगवतः पारदार्यं नायातीत्याह—इदानीमिति । न काचित् न किंचिदिति । योंतर्यामी स कृष्ण एव । क्रीडनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्य परिहृतमिदानीं भगवतः सर्वांतर्यामिणः परदारसेवा नाम न काचिदित्याह । गोपीनामिति । योंतश्चरत्यध्यक्षो बुद्ध्यादिसाक्षी स एव क्रीडने न देहभाङ्न त्वस्मदादि तुल्यो येन दोषः स्यादिति सर्वात्मनि स्वपरभेदो न संभवतीति भावः ॥ ३६ ॥

लीलया हेतुना । इह जगति । देहभाक् आविष्कृतदेहः ॥ * ॥ तत्तद्दृष्ट्या तु सर्वांतर्यामिणो भगवतो न केऽपि परे इत्याह—गोपीनामिति । योन्तश्चरति तस्य बहिरालिंगने को दोष इति भावः । अध्यक्षो बुद्ध्यादि द्रष्टा । तस्य रहस्यबहिर्मात्रदर्शने को दोष इति भावः । इह व्रजमंडले । क्रीडनेन हेतुना । देहान् गोपीशरीराणि । भजते रतिश्रमप्रस्वेदाम्बुमार्जनादिना सेवते ॥ अत्र **तोषिणी**—तदेवं गोपीनां परदारत्वमंगीकृत्यापि दोषः परिहृतः । तत्र च सति कुलटात्वं जारत्वं नापयाति । तन्नाम खलु धिक्काराय परपर्य्यवस्यतीति तदसहमानस्तासां तत्परदारत्वमेव खंडयति—गोपीनामिति । तैर्व्याख्यातम् । तत्र बुद्ध्यादिसाक्षी परमात्मेत्यर्थः । अतो न तस्य परो नाम कश्चिदिति, के वा परदारा इति भावः । ननु स तु निराकार इति श्रूयते, तस्मादाकारवत्त्वादस्मदादितुल्य एवासौ न तत्राह—स एवेति । एव शब्दोयं चैवेत्यस्मादाकृष्टः । अत्र च शब्दः क्वचि न्नास्ति । क्रीडनेन स्वैरं तदिच्छयैव न तु कर्मवशत्वेन देहभाक् । तदुचिते देशे तदुचिते निजदेहे प्रवर्तक इत्यर्थः । अंतर्यामितायामकारापेक्षाया अभावादेव निराकारत्वं तत्रोच्यते, न वस्तुतः "केचित्स्वदेहान्तर्हृदयाव काशे प्रादेशमात्रं पुरुषं वसन्तम्" इति द्वितीयस्कंधोक्तेरिति भावः । न त्विति—न त्वस्मदादिजीववत्परस्परमनात्मकर्मवशश्चेत्यर्थः । 'एष क्रीडनदेहभाक्' इति, 'क्रीडनेनेह देहभाक्' इति च पाठः । अथ वा—यो गोप्यादीनां सर्वेषामपि तत्तद्योग्यताप्रदेशेन परमात्मरूपेणांतश्चरति स एवाध्यक्षस्तदधिष्ठाता । 'गोप्यः किमाचरत्' इत्यादिना, 'कात्यायनि महामाये' इत्यादिना, 'अपि बत मधुपुर्याम्' इत्यादिना च व्यंजिततादृशममतामयभावविशे षाणां तासां तु पतिरूप एवाध्यक्ष इत्यर्थः । ननु कथं परमात्मरूपेण क्रीडति, कथं चानेन रूपेण क्रीडति, तत्राह— एष बहिः प्रकटरूप एव स श्रीकृष्णस्तादृशक्रीडासाधनं देहं भजते, नित्यमेवाश्रयति न त्वन्तस्थः परमात्मरूप इति । पाठांतरे इह बहिः प्रकटरूपत्व एवेत्यादि योज्यम् । एवमुत्तरत्रापि । तदेवमंतर्यामित्वपक्षे स्वदारत्वस्यातिव्याप्तिपरिहाराय किंचिदन्यदाहार्य्य व्याख्यातं, तथापि विण्मूत्रपरि पूरितदेहासु 'त्वक्श्मश्रुरोमकेश—' इत्यादिरुक्मिणीवाक्यानुसारेण विशुद्धसत्त्वव्यक्तविशेषमयपरमज्योतिर्देहस्य तस्य प्रवृत्तिस्तज्जुगुप्सिततामेवावगमयति, न तु "भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत्" इत्यनुसारेण रोचमानताम् । अत एवांतर्गृहगतानां कासांचिदसिद्धदेहानां तद्देहपरित्याजनञ्च निर्दिश्यते । न च सैरन्ध्यादावपि तत्प्रवृत्तिदर्शनादन्यथा मन्तव्यम् । "मुकुन्द दर्शनात्सद्यो बभूव प्रमदोत्तमा" इति । तत्स्पर्शादिना स्पर्शमणिलोहवृत्तांतवद् ध्रुवदेहवच्च तद्योग्यदेहलक्षणप्रमदोत्तमात्वं प्राप्य तत्क्रीडनयोग्यता तत्र जातेति गम्यते । न चासामपि तादृशत्वं मंतव्यम् 'ताभिर्विधूत—' इत्यादौ 'ताभिरेव प्रत्युतासावधिकं व्यरोचत' इत्युक्तत्वात् । किञ्च, 'नायं श्रियोंग—' इत्यादौ श्रीतोपि स्वर्योषिद्भ्योऽपि पराभ्योऽपि सर्वांगनाभ्योऽर्हत्तमत्त्वं परत्वं चासां लभ्यते । यतः साधिक्षेपमुक्तम्—'कुतोन्याः' इति । तस्मादासां विलक्षणत्वावगमाद्विलक्षणत्वेनैव व्याख्यांतरं कर्तव्यम् । तथाहि—गोपीनां तद्विशेषाणामासां तथा तत्पतीनां संप्रति तासां पतित्वेन प्रतीतानां तथा सर्वेषामपि गोपगवादीनां देहिनाञ्च योंतर्मध्ये चरति 'जयति जननिवासः' इति दृष्ट्या, 'अहोभाग्यमहोभाग्यम्' इति रीत्या, "योऽसौ गोषु तिष्ठति योऽसौ गाःपालयति" इति तापनीश्रुत्या च तन्मध्ययोग्यक्रीडाभिर्नित्यमेव क्रीडति, स कृष्णोऽध्यक्षः प्रत्यक्षः प्रापञ्चिकानां प्रकटस्सन्नपि चरति तत्तद्योग्यमेव क्रीडति । उभयथापि क्रीडायां हेतुः—एष श्रीकृष्णः क्रीडाशीलः श्रीगोपालवपुः प्रकाशनशील इति । यद्वा—स एव प्रापञ्चिकप्रत्यक्षः सन्नपि क्रीडनदेहान्स्वक्रीडाहेतुविग्रहान् गोप्यादीनांस्तानेव भजन् क्रीडति । पाठांतरेपि क्रीडनेनोपलक्षितांस्तद्रूपान् देहानिति । तदेवं तथैव नित्यविहारात्तासां तन्नित्यप्रेयसीत्वम् । ततस्तत्पतिसदेहत्वं च दर्शितम् । तत्र परसंबंधवर्णनेन संदेहं प्रकटयंत्यां प्रकटलीलायामपि सुस्वावेशात्स्पष्टमेवोक्तं तासु तद्रूपत्वं स्वयं श्रीशुकदेवेन—'अधोक्षजप्रियाः' इति, 'भगवत्प्रियाः' इति 'कृष्णवध्वः' इति च । तापिन्यां दुर्वाससा ताः प्रत्येव च—"योऽसौ गोषु तिष्ठति" इत्यादौ 'स वो हि स्वामी भवति' इति परमसंबंधवर्णनेन संदेहराहितायामप्रकटलीलायां कैमुत्ये तदेव निर्णीतं श्रीमदष्टादशाक्षरपटले श्रीब्रह्मणा स्वसंहितायाम्—"आनंदचिन्मयरसप्रतिभाविताभिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्याखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामि ॥" इत्यत्र कलात्वेन निजरूपत्वे प्रातेऽपि प्रकटलीलागतपरकीयत्वे संदेहनिरासार्थं निजरूपतयेति । एतदेव चोपक्रमोपसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुग्रहाय भूतानां मानुषं देहमास्थितः ॥ भजते तादृशीः क्रीडा याः स्मृत्वा तत्परो भवेत् ॥ ३७ ॥

नन्वेवं चेदाप्तकामस्य निंदिते कतः प्रवृत्तिरित्यत आह । अनुग्रहायेति । तत्परो भवेत् भगवति तत्परचित्तो भवेत् । शृंगाररसाकृष्टचेतसोऽतिबहिर्मुखानपि स्वपरान्कर्तुं तादृशीः क्रीडा बभाजेति भावः ॥ ३७ ॥

हारयोस्तासु लक्ष्मीत्वस्य तास्मिन्परमपुरुषत्वस्य निर्देशेन तथैव निर्धारितम् । तत्र 'चिन्तामणिप्रकरसद्मसु' इत्यादौ ' लक्ष्मीसहस्रशतसंभ्रमसेवमानम् ' इत्युपक्रमः । 'श्रियः कान्ताः कान्तः परमपुरुषः' इत्युपसंहारः । तत्र चान्यत्र च साक्षाद्गोपीशब्दप्रधानाः श्रीमदष्टादशाक्षरप्रमुखमंत्राश्च तथैव वदंत आसते । तथा च तत्तन्मंत्रव्याख्यायां गौतमीयतंत्रे तत्तन्मंत्रद्रष्टारः श्रीदेवर्षिचरणास्तत्प्रधानाः श्रीभगवतो नामधेयं बहिरंगदृष्टीनां प्रवृत्त्यर्थं रूढिमपि परित्यजन्तः सर्वेश्वरत्वं मायास्वरूपशक्त्योर्वैभवभेदेन द्विधा निरुच्य तद्ध्यानगततदंतरंगप्रेयसीभक्तानां प्रवृत्त्यर्थं श्रीगोपालमूर्तेस्तस्य श्रीगोपालीपतित्वमेवाश्रितरूढितया तत्राप्युत्तरपक्षतया पर्यवसायितवंतः । तत्र चैवकारेण प्रकटलीलाप्रसिद्धमौपपत्यं निराकृतवन्तः । यथा—"गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः । अनयोराश्रयत्वेन कारणत्वेन चेश्वरः ॥ सांद्रानंदपरं ज्योतिर्वल्लभेन च कथ्यते । अथ वा गोपीप्रकृतिर्जनस्तदंश मंडलम् ॥ अनयोर्वल्लभः स्वामी भवेत्कृष्णाख्य ईश्वरः । अनेकजन्मसिद्धानां गोपीनां पतिरेव वा । नंदनंदन इत्युक्तस्त्रैलोक्यानंदवर्धनः ॥ " इति । अत्रानेकजन्मसिद्धानामिति "बहूनि मे व्यतीतानि जन्मानि तव चार्जुन" इतिवत्तासामनादिकल्पपरंपराप्राप्तश्रुतिपुराणतंत्रादिप्रसिद्धावतारित्वमेव व्यनक्ति । तस्माद्वस्तुतः परदारत्वमेव नास्ति किमुतायोग्यत्वमिति भावः॥३६॥अत्राशंकते—नन्विति । एवं चेत् निःस्पृहस्यापि स्वेच्छाविग्रहांगीकारेपि । निंदिते लीलातात्पर्यानभिज्ञपुरुषगर्हिते परदारविनोदे। इत्यत इत्यत्र ।तादृशीः शृंगारिजनानंददा रासादिरूपाः या लीलाः । स भगवानेव परः परायणं यस्य स तथा ।इति भाव इति—भगवदवतारस्य सर्वलोकहितार्थत्वेन शृंगारिणोऽपि सर्वांतर्गता एव तदुद्धर्तुमेव भगवतः परिपूर्णकामस्य रासलीलादौ प्रवृत्तिः "भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः। श्रवणस्मरणार्हाणि करिष्यन् " इति प्रथमस्कंधोक्तेः ॥*॥ जुगुप्सितं किमभिप्रायं कृतवानिति प्रश्नस्योत्तरमाह—अन्विति।भक्तानामनुग्रहाय तादृशीः क्रीडा भजते, याः श्रुत्वा मानुषं देहमाश्रित्य जीवस्तत्परस्तद्विषयकश्रद्धावान्भवेदिति क्रीडांतरतो वैलक्षण्येन मधुररसमय्या अस्याः क्रीडायास्तादृशी मणिमंत्रमहौषधीनामिव का चिदतर्क्या शक्तिरस्तीत्यवगम्यते।तथैव मानुषदेहवत एव तद्भक्तावधिकारित्वं मुख्यमभिप्रेतम्॥अत्र **तोषिणी**—नन्वाप्तकामस्य कुतः क्रीडायां प्रवृत्तिः कुतस्तरां वा बहिर्दृष्ट्या लोकावगीते तस्मिन्नित्यत आह—अन्विति।भक्तानामनुग्रहाय " सद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः " इति पद्मपुराणीयभगवद्वचनात् । मानुषं नराकारमाश्रितः ब्रह्मरूपेण सर्वाश्रयोपि स्वयमाश्रयं कृतवानिति तस्य परब्रह्मस्वरूपस्य परमाश्रयत्वं च दर्शितम् । एतदुक्तम्— " दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् " इति । तथा च श्रीभगवदुपनिषदः—" ब्रह्मणो हि प्रतिष्ठाहम् " इति । आस्थित इति पाठेऽप्यादरविषयः कृत इति स एवार्थः । स्वेच्छया मानुषं देहमधुनैव विरचय्याश्रित इति व्याख्यातुं न घटते, परत्र तत्र लोकेऽधिष्ठातृत्वेन कृष्णाख्यनराकारपरब्रह्मणः श्रीगोपैरनुभूतत्वात् । एवं भक्तानुग्रहार्थं तत्क्रीडेत्यभिप्रेतम् । आप्तकामत्वेपि भक्तानुग्रहो युज्यते विशुद्धसत्वस्य तथा स्वभावात् । यद्वा वभाविते चान्यत्र दृश्यतेऽसौ तथा रहूगणानुग्राहके श्रीजडभरतचरिते यथा वा भवदनुग्राहके मयीति च, तत्र भक्तशब्देन व्रजदेव्यो व्रजजनाश्च सर्वे कालत्रयसंबंधिनोऽन्ये च वैष्णवा गृहीताः । व्रजदेवीनां पूर्वरागादिभिर्व्रजजनानां जन्मादिभिरन्येषां च तत्तद्दर्शनश्रवणादिभिरपूर्वत्वस्फुरणात् । अत एव तादृशभक्तप्रेमसंगेन तादृशीः सर्वचित्ताकर्षणीः क्रीडा भजते, याः साधारणीरपि श्रुत्वा भक्तेभ्योऽन्योपि जनस्तत्परो भवेत्, किमुत रासलीलारूपामिमां श्रुत्वेत्यर्थः । वक्ष्यते च—'विक्रीडितं व्रजवधूभिरिदं च विष्णोः' इत्यादि । यद्वा—मानुषं देहमाश्रितस्सर्वोपि जीवस्तत्परो भवेदिति मर्त्यलोके भगवदवतारात्तथा भजने मुख्यत्वाच्च मनुष्याणामेव सुखेन तच्छ्रवणादिसिद्धेः । 'भूतानाम्' इति पाठे निजावतारकारणभक्तसंबंधेन सर्वेषामेव जनानां विषयिणां मुमुक्षूणां मुक्तानां चेत्यर्थः । इति परमकारुण्यमेव कारणमुक्तं तथापि भजनसम्बन्धेनैव सर्वानुग्रहो ज्ञेयः । अन्यत्तैः । तत्र बहिर्मुखानपीति तत्पर्यंतत्वं विवक्षितम् । परमप्रेमपराकाष्ठामयतया श्रीशुकस्यापि तद्वर्णनातिशयप्रवृत्तेः । गोपीनामित्यस्यार्थांतरे त्वेवं व्याख्येयम्—नन्वेवमपि नित्यवद्भुतमेव तथा क्रीडतु किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नासूयन्खलु कृष्णाय मोहितास्तस्य मायया ॥ मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ॥ ३८ ॥

नन्वन्येऽपि भिन्नाचाराः स्वचेष्टितमेवमेवेति वदंति तत्राह । नासूयन्निति । एवंभूतैश्वर्याभावे तथा कुर्वतः पापा ज्ञेया इति भावः ॥ ३८ ॥

प्रापञ्चिकेभ्यस्तत्प्रकटनेन, तत्राह—भक्तानाम् प्रपञ्चगतानामनुग्रहाय मानुषं देहं मर्त्यलोकरूपं विराड्देहांशमाश्रितः तत्र प्रकटोऽभूदित्यर्थः । "यस्य पृथिवी शरीरम्" इत्यादिश्रुतौ तत्रापि तच्छरीरप्रयोगान्मानुषशब्देन तल्लोकस्य लक्षितत्वाच्च । अन्यत्समानम् । अथ वा—'तत्परो भवेत्' इत्यत्र भक्तानां भूतानां बहुत्वान्न ते कर्तृत्वेन विपरिणामाद्यनुवर्तेरन् । व्याख्यांतरे चाध्याहारादिकष्टता पतेत् । भगवानिति तु तत्रतत्र व्याख्यानेऽपि प्रकरणादेव लभ्यते । तस्मात्तादृशीः क्रीडाः, असौ याः श्रुत्वापि स्वयमपि तत्परो भवेत् । यदायदा शृणोति तदातदा सक्तो भवतीति भावार्थः ॥ ३७ ॥ पुनराक्षिपति—भिन्नाचाराः दुराचाराः । स्वचेष्टितम् पारदार्यादि । एवमेव लोकानुग्रहार्थमेव । तत्र कथने । मायया मोहिता नासूयन्—इमाः स्वैरिण्यो गृहे न प्रवेश्याः, कृष्णोऽपि व्यभिचारित्वात्कुकर्मैवेत्येवं मनसि नाकुर्वन्नित्यर्थः । वस्तुतस्तु भगवदात्मकानां व्रजौकसां मायामोहाऽसम्भवात्तस्य मायया करुणया मा यथार्थमतिरूहिता विचारविषयं प्रापिता येषां ते तथा । कृष्णं स्वात्मानं पश्यंतस्तत्पार्श्वस्थान्स्वपार्श्वस्थानेव मन्यमाना नासूयान्निति । एवंभूतैश्वर्याभावे श्रीकृष्णसमसामर्थ्याऽसत्त्वे । तथा कुर्वतः तदनुकुर्वतः । इति भाव इति—तेजीयसां साम्यं कर्तुं प्रवृत्तोऽतेजीयान्नश्यत्येवेत्याशयः ॥ * ॥ नन्वेवं सर्वास्वेव निशासु गोपस्त्रीभिः सह विहरति भगवति तासां पतिश्वश्र्वादयः स्वस्वगृहेषु ताः स्ववधूरदृष्ट्वा भगवते तस्मै कथं नाकुप्यंस्तत्राह—नेति । मायया योगमाययैव न तु बहिरंगमायया । भगवत्परिवारेषु तस्या अधिकाराभावात् । तन्मोहि तानां च भगवद्वैमुख्यस्यावश्यं संभवात् । तेषां गोपानान्तु भगवद्वैमुख्यमात्राऽदर्शनात् । तथा मोहनं च गोपीषु कृष्णमभिसृतवतीषु तादृशीस्तावतीरेव गोपीस्सृष्ट्वा तान्दर्शयित्वैव । अतः स्वान्स्वान्दारान्स्वपार्श्वस्थानेव मन्यमानाः। यदुक्तमुज्ज्वलनीलमणौ—"मायाकल्पिततादृक्स्त्रीशीलनेनानसूयुभिः । न जातु व्रजदेवीनां पतिभिः सह संगमः॥" इति । ततश्च योगमायायाश्चिच्छक्तिवृत्तित्वात्तत्कार्याणामपि नित्यमत्यौचित्यात्सर्वमायिकप्रपंचना शेपि तेषु स्वस्वभार्याभिमानस्य च नित्यंमन्यत्वमेव । मन्यमाना इत्यभिमानमात्रं न तु योगमायाकल्पितानामपि तासां पतिभिः सह संयोग इति तासां तदाकारतुल्याकाराणामन्यसंभुक्तस्यानौचित्यात्। अत एव स्वपार्श्वस्थानिति तु स्वतल्पस्थानित्युक्तम् । तच्च समाधानं योगमाययैव तत्पतीनां तासु कामभावानुत्पादनात्कृतमिति ज्ञेयम् । श्रीभगवत्पार्श्वात्स्वस्वगृहं प्रति गोपीनामागमनसमये मायिकगोपीनां माययैवांतर्द्धानमपि ज्ञेयम् ॥ अत्र **तोषिणी**—ननु भवतु परमात्मत्वेन वा नित्यमेव ताभिः प्रेयसीभिः सह विहारित्वेन वा तासु तत्परदारत्वस्य प्रत्याख्यानम्, तत्र प्रथमः पक्षस्त्वध्याहारादिना कथंचित्स्थापित एव, अथ नित्यप्रेयसीत्वेनोत्तरपक्षश्चेत्तर्हि हन्त कथं तासां परदारत्वं श्रूयते येन तासामन्यत्र विवाहोऽपि संप्रति लभ्यते । ततश्च तं प्रति जन्मांतरे विवाहप्राप्तत्वेन तासां तत्पत्नीत्वमेव स्यात् । ततश्च तत्परताकारणाय भक्तानामनुग्रहाय तादृशीः क्रीडा भजत इति चेत्तर्हि, तेषां दाराकर्षणेन तं प्रत्यसूयासंभवात्तेषु व्रजवासित्वात्परमभक्तेषु कथं वानुग्रहः सिध्येत्, कथं वा तासुतन्नित्यप्रेयसीषु तादृशदुरवस्थायास्तेषु परमभक्तेषु च तादृशतद्वर्णनस्य श्रवणेन परेषामपि भक्तानां तत्परता स्यात् । तत्र 'पाठक्रमादन्वयक्रमो बलीयान्' इति तत्क्रमेण सिद्धान्तयति—नासूयन्खलु कृष्णायेति । खलु निश्चये यस्माद्व्रजौकसस्तस्मात्कदाचिदपि नासूयन्नित्यर्थः । "यद्धामार्थसुहृत्प्रियात्मत नय—" इति तं प्रति ब्रह्मवचनात्, 'कृष्णेर्पितात्मसुहृदर्थकलत्रकामा' इति राजानं प्रति श्रीशुकवचनाच्च । ननु तथाप्यनुग्राह्यानां जानतामजानताञ्च स्वयं तथानिष्टकरणमसमंजसं, तत्रोच्यते—यदि तेषां विवाहतोऽपि ता दारास्युस्तर्हि तथात्वमेव, यदि तेषां भ्रममात्रेण व्यूढतया प्रतीता वस्तुविचारेण तु तस्यैव दारास्तेन तदाकर्षणं च तैर्न ज्ञायते च तर्हि को दोष इत्याह—मोहितास्तस्य मायया । मन्यमानाः स्वपार्श्वस्थान्स्वान्स्वान्दारान् । अत्र तन्नित्यप्रेयसीत्वं तासां श्रुतमिति श्रुतार्थान्यथानुपपत्त्या 'दशापवित्रेण गृहं संमार्ष्टि' इत्यादिवदावृत्त्यान्वयः क्रियते । तत्र चायमर्थः—अस्य मायया प्रेमवैचित्रीरचनाय विचित्रलीलासमुल्लासिकया योगमायया मोहिताः संतस्ते तस्य दारान्स्वान्स्वान्मन्यमानाः स्वस्य पार्श्वस्थाँश्च मन्यमाना इति तदेवं तस्येत्यस्य द्विधान्वय भेदो दार्शितः । तत्र पूर्वस्यान्वयाविभेदस्यायमभिप्रायः—योगमायाकल्पितानामन्यासामेव तैर्विवहनसंप्रवृत्तं न तु भगवन्नित्यप्रेयसीना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिति तथा तासां तदानीं मायया गोपितानां मोहितानां च न तद्वृत्तं जातमासीदन्यतः श्रुतमपि तदनभीष्टमेवासीदिति तासु तेषां दारत्वस्य मननमात्रं न तु वास्तवत्वं, तथा तेषु तासां पतित्वं च मनसा त्यक्तमेव इत्येवं तासां तैर्विवाहसंबंधो न जात इति यतो नासूयन्नित्यनेन गुणेऽपि दोषारोपं नाकुर्वन्नित्येव मयोक्तं न तु नैर्ष्यन्निति । अथोत्तरस्यान्वयविभेदस्यायमभिप्रायः—रासाद्यर्थं तेन तासां कर्षणे योगमायाकल्पितानां संज्ञाकल्पित च्छायावत्तत्तत्प्रतिरूपाणामन्यासामनुभावेन तान्येव ते स्वपार्श्वस्थान्मेनिरे, ततोऽपि न दोषप्रसंग इति । ननु श्रीभगवत्प्रेयसीनां तासां कदाचिदपि यदि बलात्तच्छय्यानिवेशः स्यात्तर्हि महानेव दोष इत्याशंक्य द्वितीयेनैवा न्वयविभागार्थेन सिद्धांतं कृतवान् । स्वपार्श्वस्थांश्च मन्यमाना इति । विवाहवदेव तत्र मायया वंचितास्त इति भावः । एतदेवाह—ताः प्रति स्वयमेव श्रीभगवान् 'निरवद्यसंयुजम्'इति एतदेव च गर्गवाक्येन कैमुत्या ल्लभ्यते—“य एतस्मिन्महाभागे प्रीतिं कुर्वन्ति मानवाः । नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः ॥” इति, तदेवमेव ब्रह्मणा—'श्रियः कांताः कान्तः परमपुरुषः' इति प्रोच्यान्यथात्वं मायिकमेवेति दृढीकृतमिति । अत्रेदमपि विचार्यते—'ता वार्यमाणा' इत्यादौ यत्तासां पतिम्मन्यादिभिर्निवारणं श्रूयते तत् किमुत कृष्णाकर्षणमज्ञात्वा ताभ्यो नासूयेयुर्नाम तदाकर्षणकर्तृकश्रीकृष्णायासूयेरन्नेवेति पूर्वपक्षः संगच्छते । तासां तत्तत्पार्श्वता तु सिद्धान्ताय न कल्पते, तस्मात्तदिदं वक्तव्यं—तदा श्रीकृष्णेन तासामाकर्षणं बुद्धिपूर्वकमिति तैर्नावगतम् । तथाहि—विद्याविशेषमयत्वात्खल्वसौ वंशीनादस्तासामेव कर्णे प्रविष्टो न पुनरन्यासाम्, सर्वकर्णप्रवेशश्चेत्तर्हि शयनावसरप्राप्तं निजशयनगृहं हित्वा कथमसौ विदूरनिर्जनवनं गत इति वितर्क्य मातरः पित्रादयः सर्व एव महत्या शंकया तत्र गच्छेयुः । तस्मादौत्पत्तिकादेव माधुर्यान्मुहुः सर्वमेव कर्षत्यसा वित्यनुभूय तासामपि तद्दर्शनार्थं गमनमाशंक्येत । किं त्वसमयत्वात्तैर्निवारितं तथापि यद्यखंडामपि रात्रिं तत्रामूः स्थिता इति ज्ञायेत तदा व्रजवासित्वात्तेषामसूयायास्तत्रासंभवेपि तदाभासः स्यादेव यथा सोयमस्माकं जीवनादिमूलं स चायमखंडनिशि परवधूनां निजनिकटस्थितिमनुमोदमान आसीदिति तस्य लोकवर्ममर्यादामंगलातिक्रममनुमाय विस्मितानां तेषां तन्मंगलचिंतामय एवायं भावः कोपमय इवेति तदाभासत्वमेव तत्र लभ्यते, येन ते वधूभ्यः कन्याभ्यश्चासूयेयुः तासां स्वपार्श्वस्थतया दर्शनात्तु सोऽपि नासीदिति कुतस्तरामसूयावकाश इति । एतदभिप्रेत्यैव युगांतरगतांस्तत्प्रेयसीनां तासां गोत्रप्रवर्तकान्गोपान्प्रति श्रीविष्णुना सोऽयं वरो दत्तः । यथा पाद्मे सृष्टिखंडे—“यदा नंदप्रभृतयो ह्यवतारं धरातले । करिष्यंति तदा चाहं वसिष्ये तेषु मध्यतः ॥ युष्माकं कन्यकाः सर्वा रमिष्यंते मया सह । तत्र दोषो न भविता न रोषो न च मत्सरः॥ ” इति । किञ्च, स्वरूपेणैव यस्य पर्याप्तिर्न भवति तत्रोपाधिस्वीकारानर्थक्यमिति व्रजौकस्त्वेनैव श्रीकृष्णं प्रति तेषामसूयानुत्पत्तिर्व्याख्याता । मायामोहितत्वं तत्र हेतुर्विरुद्ध एव तन्मोहिता एव तं प्रत्यसूयां कुर्वन्ति न तु तदमोहिता इति तस्मान्मोहिता इत्यादेरन्यभागेनैव संगतिः । तत्र प्रयोजनं च श्रीकृष्णस्य यदसमंजसत्वं कैश्चित्तर्क्यते तथा यस्तयोः श्रीकृष्णमंगलचिंतामयभाव एवासूयत्वेन प्रतीयते तयोर्निरसनमेव तत्र माययेति करणं चेत्तर्हि कर्त्रपेक्षया तस्येत्यत्र तेनेत्येव प्रयुज्यते, यदि च हेतुत्वं तर्हि मोहिता इति न प्रयुज्येत ततः कर्तृरूपैव सेति लभ्यते, तस्यास्तद्रूपत्वेन निर्देशश्च प्रियजनप्रेममयलीलाविष्टस्य तस्य प्रेरणं विना सार्वभौमस्य परमदक्षप्रतिनिधिरिव ताम न्तरान्तरलब्ध्वां तल्लीलां पूर्वपूर्वतादृशतल्लीलाक्रममनुक्रम्य समुत्कर्षविलसद्रसतां नयतीति विवक्षया तदेवमेवच दर्शितम्—' योगमायामुपाश्रितः' इति, तदेवं तस्यास्तदीयत्वे प्रकरणेन लब्धे सति तस्येति पदस्य नातिप्रयोजक त्वात्, श्रुतार्थान्यथानुपपन्नत्वाच्च तस्य दारान्स्वान्स्वान्स्वपार्श्वस्थांश्च मन्यमाना इति परेणापि योजयित्वा सार्थकतां समर्थयद्भिस्तासु श्रीकृष्णस्यौपपत्यं तासामन्यशय्यानिवेशश्रीकृष्णाय व्रजवासिनामसूयाभासस्तस्या समंजसत्वञ्च परिहृतमिति । तत्र तस्य मायया ये स्वेस्वे दारास्तान्स्वपार्श्वस्थान्मन्यमाना भगवत्प्रेयस्यवस्थानानर्हसमये तदभेदेनानुभवंतः यतो मोहितास्तयैवेति च योजयंति । यतः पतिव्रता नामपि न परात्परिभवः संभवति किमुत ' य एतास्मिन्महाभागे ' इति गर्गवचनानुसारेण श्रीभगवत्पराणां किमुत तत्प्रेयसीनामिति गम्यम् । अत्र कूर्मपुराणोत्तरविभागे द्वात्रिंशाध्या यस्यांते तदिदमुपोद्बलकमस्ति यथा—“ पतिव्रता धर्मपरा रुद्राण्येव न संशयः । तासां पराभवं कर्तुं शक्नोतीह जनः क्वचित् ॥ यथा रामस्य सुभगा सीता त्रैलोक्यविश्रुता । पत्नी दाशरथेर्देवी विजिग्ये राक्षसेश्वरम् ॥ रामस्य भार्यां विमलां रावणो राक्षसेश्वरः । सीतां विशालनयनां चकमे कालचोदितः ॥ गृहीत्वा मायया वेषं चरन्तीं विजने वने । समाहर्तुं मतिञ्चक्रे तापसः किल भाविनीम् ॥ विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिम् । जगाम शरणं वह्निमावसथ्यं शुचिस्मिता ॥ उपतस्थे महायोगं सर्वदोषविनाशनम् । कृताञ्जली रामपत्नी साक्षात्पतिमिवाच्युतम् ॥ नमस्यामि महायोगं कृतांतं गहनं परम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः ॥ अनिच्छंत्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ॥ ३९ ॥

ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ॥ ३९ ॥

दाहकं सर्वभूतानामीशानं कामरूपिणम् ॥'' इत्यादि । ''इति वह्निं पूज्य जप्त्वा रामपत्नी यशस्विनी । ध्यायन्ती मनसा तस्थौ राममुन्मीलितेक्षणा ॥ अथावसथ्याद्भगवान्हव्यवाहो महेश्वरः । आविरासीत्सुदीप्तात्मा तेजसैव दहन्निव ॥ सृष्ट्वा मायामयीं सीतां स रावणवधेप्सया । सीतामादाय धर्मिष्ठो पावकोंतरधीयत ॥ तां दृष्ट्वा तादृशीं सीतां रावणो राक्षसेश्वरः । समादाय ययौ लंकां सागरान्तरसंस्थिताम् ॥ कृत्वा च रावणवधं रामो लक्ष्मणसंयुतः । समादायाभवत्सीतां शंकाकुलितमानसः ॥ सा प्रत्ययाय भूतानां सीता मायामयी पुनः । विवेश पावकं दीप्तं ददाह ज्वलनोऽपि ताम् ॥ दग्ध्वा मायामयीं सीतां भगवानुग्रदीधितिः । रामायाऽदर्शयत्सीतां पावकोभूत्सुरप्रियः ॥ प्रगृह्य भर्तुश्चरणौ कराभ्यां सा सुमध्यमा । चकार प्रणतिं भूमौ रामाय जनकात्मजाम् ॥ दृष्ट्वा हृष्टमना रामो विस्मयाकुललोचनः । ननाम वह्निं शिरसा तोषयामास राघवः ॥ उवाच वह्ने भगवन् किमेषा वरवर्णिनी । दग्धा भगवता पूर्वं दृष्टा मत्पार्श्वमागता ॥ तमाह देवो लोकानां दाहको हव्यवाहनः । यथावृत्तं दाशरथिं भूतानामेव सन्निधौ ॥ भर्तृशुश्रूषणोपेता सुशीलेयं पतिव्रता । भवानी पार्श्वमानीता माया रावणकामिता ॥ या नीता राक्षसेशेन सीता भगवता हृता । मया मायामयी सृष्टा रावणस्य वधाय सा ॥ यदर्थं भवता दुष्टो रावणो राक्षसेश्वरः । मयापसंहृतश्चैव हतो लोकविनाशनः ॥ गृहाण विमलामेतां जानकीं वचनान्मम । पश्यन्नारायणं देवं स्वात्मानं प्रभवाप्ययम् ॥ इत्युक्त्वा भगवांश्चण्डो विश्वार्चिर्विश्वतोमुखः । मानितो राघवेन्द्रेण भूतैश्चान्तरधीयत ॥'' इति । तस्मात्तदावसथ्याग्निवत्तल्लीलायामुपाश्रिता योगमायापि तत्र साहाय्यं कुर्यादेवेति गम्यते । ततः प्रस्तुतमेवानुसंधीयताम् ॥ ३८ ॥ केचित्तु ब्रह्मरात्रसमकाले समाप्ते सतीत्याहुः । तदपि भगवन्मायाया अघटितघटनापटीयस्यास्संगच्छत एव, मार्कंडेयस्य क्षण एव सप्तकल्पप्रदर्शनात् । वासुदेवेन सर्वत्र प्रकाशमानेनानुमोदिताः स्वगृहादावपि दत्तानंदा अनिच्छंत्यो भगवद्विरहमसहमानाः । एतदेवाह—भगवानेव प्रियो यासां न गृहादि, तास्तथा ॥ * ॥ ब्रह्मरात्र इति समासान्त आर्षः । ब्रह्मणो रात्रौ युगसहस्रप्रमाणायामुपावृत्ते उपाधिक्येनावृत्ते एकामावृत्तिं गते सति गोप्यः स्वगृहान्ययुः, एकस्यामेव रजन्यामेतावत्यो लीलाः कर्तव्या इति भगवतः सत्यसंकल्पत्वात् । नृत्यगीतादयो यावंतो विलासा मनस्यभीप्सितास्तावतां संपूर्त्यौ यावंतः समयास्संभवन्ति तावद्भिः समयैर्युगसहस्रं पूर्णं बभूव । तच्च युगसहस्रं प्रहरचतुष्टयात्मकरजनीमध्य एव रासस्थल्यां प्रविवेश । यथा पंचयोजनात्मकवृंदावनप्रदेशैकदेश एव पंचाशत्कोटियोजनप्रमाणानि ब्रह्माण्डानि प्रविष्टानि ब्रह्मणा दृष्टानि, यथा चातिस्तोकस्यैव भगवत उदरस्योपर्यपरिमितानि दामानि अंतरेव च ब्रह्माण्डमेव दृढमभूदित्यत्र नासंभावना कार्या । तदुक्तं भागवतामृते—''एवं प्रभोः प्रियाणाञ्च धाम्नश्च समयस्य च । अविचिन्त्यप्रभावत्वादत्र किंचिन्न दुर्घटम् ॥'' इति । कालप्रचलनलीला लोकेपि दुर्लक्ष्यैव, यतोष्टादशशतघट्यात्मकत्रिंशद्दंशाः सार्द्धत्रयादिघट्यात्मकमेषादिराशिषु व्यतीयन्ते । एतच्च ज्योतिःशास्त्रतो निश्चेयं भवतीति । वासुदेवानुमोदिताः—मम च भवतीनां च प्रतितादृशक्रीडासिद्ध्यर्थं प्रच्छन्नकामतैवाभीष्टेति कृष्णेन कृतानुमोदना इत्यर्थः । यद्वा—चित्ताधिष्ठात्रा वासुदेवेनैव गुरुलज्जाभयादिकमुद्भाव्य प्रेरिताः । अत एव प्रियविरहस्य दुःसहत्वादनिच्छन्त्यो ययुः ॥ अत्र **तोषिणी—**तदेवं प्रासंगिकं समाप्योपसंहरन्परमसुखामृतसिंधुमवगाढानामपि तासामतृप्तिमाह—अनिच्छन्त्योऽपि गोप्यः स्वगृहान्ययुः । तेन समं विहारेणैव व्रजं निकटप्रायमागत्य स्वस्वगृहवर्त्मानि जगृहुरित्यर्थः । तत्र हेतुः—ब्रह्मेति । तत्कालस्य गृहगमनायैव योग्यत्वादित्यर्थः । ननु तदर्थत्यक्तसर्वाणां तासां कथं तदपेक्षा तत्राह—वासुदेवोऽत्र प्राग्जन्मनि वसुषु विराजितत्वाद्व्रजेश्वर एव, गोकुललीलायां तदर्थस्तस्यैव सांनिध्यात् । ततश्चापत्यार्थेणि तेन तस्यापत्यतयापेक्षिततदनुस्मरणार्हप्रातःकालेनानुमोदिताः पुनरासु स्वसंगदानाद्यंगीकारस्तुत्यादिभिः कारितानुमोदना इत्यर्थः । श्लेषविशेषेण तत्तन्निकटे सर्व एव सत्यक्रीडता चानुमोदिता इति प्रत्येकमप्यनुनयो दर्शितः । ऐश्वर्यार्थत्वे तु तेनाप्यनुनयात्तासां माहात्म्यं

१ उत्तरान्वयि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोनुशृणुयादथ वर्णयेद्यः ॥ भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वऽपहिनोत्यचिरेण धीरः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे रासक्रीडावर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

भगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामविजयमेव फलमाह । विक्रीडितमिति । व्रजवधूभिः सह विष्णोर्विक्रीडितम् । अचिरेण धीरः सन्हृद्रोगं काममाशु अपहिनोति परित्यजतीति ॥ ४० ॥ सेयं श्रीपरमानंदसेविश्रीधरनिर्मिता ॥ श्रीभागवतभावार्थदीपिका दशमाश्रया ॥ १ ॥ इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धे टीकायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

दार्शितम् । यद्वा—वसुदेवस्तासां शुद्धमंतःकरणम् 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इति श्रीशिवोक्तेः । प्रेम्णा तदधिष्ठात्रेति तत्र सत्त्वमुक्तम् । ननु ताभिर्लब्धदुर्लभसंगानंदस्य तस्य त्यागे तद्यत्नेनाप्यनुमोदनं कथमिव घटेत, प्रेमवश्यत्वपक्षेऽपि तत्संग एव प्रेमफलमिति । तद्ध्यानादावपि कथं तद्वशत्वं, तत्राह—भगवानेव प्रियो यासां ताः, भगवत्प्रेयस्यो वा । अतः स्वदुःखमपि ताः सहन्ते न तु तत्संकोचलेशमपीति भावः । सत्पुरुषाणां प्रेयसीवशत्वेऽपि लज्जामर्यादादाक्षिण्यादिभिस्तदेकसंगत्यागस्य दर्शनादिति च भावः ॥ ३९ ॥ भगवल्लीलायाः संसारनिवृत्तिहेतुत्वाच्छ्रवणं सदा कार्यम्, सा च कामजयपूर्विका कामिनां दौर्गत्यावगते रत्र लीलायां भगवतापि काम एव जितोऽत एतच्छ्रवणपरायणस्यापि स च जितो भवतीत्याशयेनाह—विक्रीडितमिति । विविधं जलस्थलवनादिभेदेन क्रीडितं विहरणम् । चेति पदं श्रद्धातिशयजननार्थकम् । यथान्यानि विक्रीडितानि तथैवेदं च लीलातात्पर्यावगत्यावाप्तधैर्यः सन् । कामत्यागस्य भगवद्रूपतापादकत्वेन संसारनाशकत्वं स्फुटम् । "यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति श्रुतेः । कामा वासनाः, मदनस्यापि वासनाजन्यत्वात्कामत्वम् (४०)॥ श्रीपरमानंदसेविना श्रीधरेण स्वामिना निर्मिता दशमाश्रया दशमस्कन्धांतर्गता श्रीभागवतभावार्थानां दीपिका या सा त्वियमेव, पदवाक्याद्यर्थानां प्रकाशिकास्त्वन्या बह्वयः संतीत्यनेन निजानुत्कर्षः परोत्कर्षश्च सूचितः । वस्तुतस्तु श्रीपरमानंदं निजस्वरूपानंदं सेवितुं शीलमस्येति निजानंदसेवी स चासौ श्रीधरो राधिकेशस्तेन निर्मिता रचिता या श्रीरासलीला सा इयमेव पंचाध्यायनिरूपितैव । किंभूता—श्रियो राधाया भागवतानामन्यासां गोपीनां यो भावो भक्तिरनुराग इति यावत्, स एवार्थः प्रयोजनं तस्य दीपिका भक्तिपारवश्यात्सर्वेश्वरेण हरिणा निषिद्धमपि स्त्रीभिर्नृत्यमंगीकृतमिति भावः । पुनर्दशमो लक्ष्मीभूतः श्रीकृष्ण एवाश्रयो यस्यास्सा तथा । कृष्णमाश्रित्य गोपीभिर्निजाभिमतं साधितमिति भावः (१) ॥ * ॥ सर्वलीलाचूडामणे रासस्य श्रवणकीर्तनफलमपि सर्वफलचूडामणिभूतमेवेत्याह—विक्रीडितमिति । चकारादीदशमन्यदप्यन्यकविवर्णितम् । ताभिः सह विक्रीडितं विष्णोरिति 'तासां मध्ये द्वयोर्द्वयोः' इत्युक्तव्यापकत्वाभिप्रायेण । नु निश्चितमनुदिनं वा शृणुयात् । अथ वर्णयेत् कीर्तयेत् । स्वकवितया काव्यरूपत्वेन निबध्नीतेति वा । परां प्रेमलक्षणां प्राप्येत्युक्त्वा प्रत्ययेन हृद्रोगवत्यप्यधिकारिणि प्रथमत एव प्रेम्णः प्रवेशः, तत्तत्प्रभावेणैवाचिरतो हृद्रोगनाश इति प्रेमायं ज्ञानयोग इव न दुर्बलः परतंत्रश्चेति भावः । हृद्रोगरूपं काममिति भगवद्विषयकः कामविशेषो व्यवच्छिन्नस्तस्य प्रेमामृतरूपेण तद्वैपरीत्यात् । धीरः पंडित इति । हृद्रोगे सत्यपि कथं प्रेमा भवेदिति नास्तिक्यलक्षणेन मूर्खत्वेन रहित इत्यर्थः । अत एव श्रद्धान्वित इति । शास्त्रविश्वासिनं नामापराधिनं प्रेमापि नांगीकरोतीति भावः ॥ श्रीकृष्णातिवशीकारचंचोर्जिष्णुशिरोमणेः । प्रेम्णा हास इवायं श्रीरासः श्रीरपि नापयम् ॥ शास्त्रबुद्धिविवेकाद्यैरपि दुर्गममीक्ष्यते । गोपीनां रसवर्त्मेदं तासामनुगतीर्विना ॥ पदवाक्यप्रकरणध्वनयोऽत्र सहस्रशः । सम्यागम्याश्च गम्याश्च नोक्ता विस्तरभीतितः ॥ ॥ अत्र**तोषिणी**—

अथ तादृशलीलाश्रवणादेरपि प्राकृतकामविरोधित्वेन श्रीभगवत्प्रेमावहत्वेन च कैमुत्यात्तल्लीलायाः परमभक्तिफलरूपत्वं दर्शयित्वा पूर्वसिद्धांतमेवोत्कर्षयँस्तल्लीलावर्णनसमाप्तौ सुखावेशेनोत्तरकालभावितच्छ्रोतृवक्तृजनानाशि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एकदा देवयात्रायां गोपाला जातकौतुकाः ॥ अनोभिरनडुद्युक्तैः प्रययुस्तेम्बिकावनम् ॥ १ ॥ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुम् ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकाम् ॥ २ ॥ गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः ॥ रजनीं तां महाभागा नंदसनंदकादयः ॥४॥ कश्चिन्महानहिस्तस्मिन्विपिनेऽतिबुभुक्षितः ॥ यदृच्छयाऽऽगतो नंदं शयानमुरगोऽग्रसीत् ॥ ५ ॥ स चुक्रोशाहिना ग्रस्तः कृष्णकृष्ण महानयम् ॥ सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥

चतुस्त्रिंशेऽहिना ग्रस्तं नंदं हरिरमूमुचत् ॥ विद्याध्रं चांगिरःशापाच्छंखचूडं तथावधीत् ॥ १ ॥ रासापदेशतः कामं किंकरीकृत्य कामतः ॥ अनुगृह्णन्वशं निन्ये तथा विद्याधराधिपम् ॥ २ ॥ तदेवं कामानुग्रहमुखेन कामजयं प्रतिपाद्य तथैव विद्याधरजयं प्रतिपादयितुं तत्प्रसंगं दर्शयति । एकदेति ॥ १ ॥ २ ॥ गावो गाः । मधु मधुरम् । मध्वन्नं मधुना सहितमन्नम् ॥ ३ ॥ जलमात्रं प्राश्योपोषितास्तां निशां तत्र ऊषुर्न्यवसन् ॥ ४ ॥ महानहिरजगरः । उरगः उरसा गच्छन्नित्य

षयन्निव च स्वाभाविकतत्फलं कथयति–विक्रीडितमिति। विशिष्टाम् क्रीडाम्, चकारादीदृशमन्यदपि । विष्णोरिति 'तासांमध्ये द्वयोर्द्वयोः' इत्याद्युक्तव्यापकत्वाभिप्रायेण। श्रद्धया विश्वासेनान्वित इति तद्विपरीतावज्ञारूपापराध निवृत्त्यर्थञ्च नैरन्तर्यार्थञ्च। तच्च फलवैशिष्ट्यार्थम्। अत एव योऽनु निरंतरं शृणुयात्, अथानंतरं स्वयं वर्णयेच्च । उपलक्षणञ्चैतत्स्मरेच्च । भक्तिं प्रेमलक्षणां परां श्रीगोपिकाप्रेमानुसारित्वात्सर्वोत्तमजातीयां प्रतिक्षणं नूतनत्वेन लब्ध्वा हृद्रोगरूपं काममिति भगवद्विषयकः कामविशेषो व्यवच्छिन्नः, तस्य परमप्रेमरूपत्वेन तद्वैपरीत्यात् । काममित्युपलक्षणमन्येषामपि हृद्रोगाणाम् । अन्यत्र श्रूयते–"ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥" इति । अत्र तु हृद्रोगापहानात्पूर्वमेव परमभक्तिप्राप्तिः । तस्मात्परमबलवदेवेदं साधनमिति भावः । धीरः सन्निति–धैर्यञ्च लभत इति । यद्वा–कामं यथेष्टम् आशु भक्तिं प्रतिलभ्य हृद्रोगमाधिं श्रीकृष्णा प्राप्त्यादिकृतमचिरेणापहिनोति तत्प्राप्तिरिति भावः । अन्यत्समानम् ॥ क्रीडता बहिरंतश्च जडोऽयं येन लभ्यते । तस्य चैतन्यरूपस्य प्रीत्यै भगवतोऽस्त्विदम् ॥ इति भावार्थदार्शिन्यां हार्षिण्यां भक्तचेतसाम् । दशमस्य त्रयस्त्रिंशः संगतः सम्मतस्सताम् ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अहिना सर्पेण । अमूमुचत् मोचयामास । विद्यामन्तर्द्धानाविर्भावादिलक्षणां धरतीति तथा तम् । मूलविभुजादित्वाद्धरतेः कः । शंखचूडम् यक्षम् (१) । रासापदेशतः रासलीलाछलेन । कामतः स्वेच्छया । विद्याधराधिपं कामं चानुगृह्णन्नित्यन्वयः (२) । तदेवमिह तच्छब्दो वाक्यालंकारे एव । कामस्यानुग्रहाय मुखं प्रारंभो यस्य वृत्तस्य तत्कामानुग्रहमुखं तेन "येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । तेते गता विष्णुपुरीं नरेंद्राः क्रोधोऽपि देवस्य वरेण तुल्यः॥" इत्युक्तदिशा 'मोघा याच्ञा वरमधिगुणे' इत्युक्तदिशा च भगवत्कृतकामजयोऽपि कामानुग्रह एव। तथैव विद्याधरानुग्रहमुखेन तत्प्रसंगं विद्याधरमेलनम्। एकदा रासानंतरं फाल्गुनशिवरात्रौ । अनोभिः शकटैः । गोवर्द्धनमखवत्कृष्णकौतुकमूलत्वेन तीर्थे दानार्थं बहुलद्रव्यस्य नयनार्थम् अंबिकावनम् । मथुरादिग्विभागे वायव्ये सरस्वतीतीरस्थं शिवोमामूर्त्तिभूषितम् ॥ १ ॥ तत्र वने । पशूनां जीवानां पतिम् "ब्रह्माद्याः स्थावरांताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्त्यंते संसारवशवर्त्तिनः। तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः ॥ मलमायादिभिः पाशैः स बध्नाति पशून्पतिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः ॥ ब्रह्मादिस्तंबपर्यंतान्पशून्बद्ध्वा महेश्वरः । पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् ॥" इति शैवोक्तेः । देवीम् अंबिकाम् ॥ २ ॥ देवः पार्वतीनाथः ॥ ३ ॥ तत्र सरस्वतीतीरे। ताम् यात्रा गतानामागतेत्यर्थः। सनंदः श्रीनंदानुजः, संज्ञायां कन् । अतस्तदग्रजस्योपनंदस्य गोष्ठ एव स्थितिरवधार्य्यते, योग्यता च तस्य ज्ञानवयोधिक्यात् ॥ ४ ॥ कश्चित् अनिर्दिष्टनामा । यदृच्छया केनापि भाग्योदयेन । उरग इत्यलक्षितागमनः । यात्रिकलोकशून्यत्वाद्विपिन इति । किमर्थमागत्य जग्रास, तत्राह–बुभुक्षितं शयानम् स्वीकृतनिद्रम्। पूर्वस्यां रात्रौ जागरणोपवासादिना श्रांतेर्निर्भरनिद्राणमिति भावः ॥ ५ ॥ स नंदः । वीप्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसोत्थिताः ॥ ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥ अलातैर्दह्यमानोऽपि नामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाऽभ्येत्य भगवान्सात्वतां पतिः ॥ ८ ॥ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितम ॥ ९ ॥ तमपृच्छद्धृषीकेशः प्रणतं समुपस्थितम् ॥ दीप्यमानेन वपुषा पुरुषं हेममालिनम् ॥ १० ॥ को भवान्परया लक्ष्म्या रोचतेऽद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ॥ ११ ॥ सर्प उवाच ॥ अहं विद्याधरः कश्चित्सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेनाचरं दिशः ॥ ॥१२॥ ऋषीन्विरूपानंगिरसः प्राहसं रूपदर्पितः ॥ तैरिमां प्रापितो योनिं प्रलब्धः स्वेन पाप्मना ॥ १३ ॥ शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः ॥ यदहं लोकगुरुणा पदा स्पृष्टो हताशुभः ॥१४॥ तं त्वाऽहं भवभीतानां प्रपन्नानां भयापहम् ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन्॥१५॥ प्रपन्नोऽस्मि महायोगिन्महापुरुष सत्पते ॥ अनुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥१६॥ ब्रह्मदंडाद्विमुक्तोऽहं सद्यस्तेऽच्युतदर्शनात् ॥ यन्नाम गृह्णन्नखिलाञ्छ्रोतृनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ १७ ॥

लक्षितत्वमुक्तम् । अग्रसीज्जग्रास ॥ ५ ॥ ६ ॥ विव्यधुस्ताडयामासुः । उल्मुकैर्ज्वलत्काष्ठैः ॥ ७ ॥ अलातैस्तैरेवोल्मुकैः । उरंगमोऽजगरः ॥ ८ ॥ विद्याधरैरर्चितं पूजितम् ॥ ९ ॥ गोपेष्वात्मन ऐश्वर्यं प्रकाशयितुमविद्वानिव तमपृच्छत् । दीप्यमानेन वपुषा समवस्थितम् ॥ १० ॥ यः परया शोभया रोचते प्रकाशते स भवान्क इति ॥ ११ ॥ १२ ॥ प्राह समुपहसितवानस्मि प्रलब्धैरुपहसितैः । मदीयेनैव पापेन निमित्तेन ॥ १३ ॥ यद्यतः शापात् ॥ १४ ॥ त्वा त्वाम् आपृच्छे स्वं लोकं गंतुमनुज्ञां

त्रासात् । कृष्ण क्लेशकर्षक । तातेति स्नेहात् । तथा मे मृतित्रासो नास्ति किं तु त्वद्वियोगादेव यथेति भावः । महानित्यप्रतिकार्यताबोधकः । प्रकर्षेणापन्नं विपद्ग्रस्तम्, वृद्धत्वेन पाल्यत्वात्, शरणागतम्वा॥६॥ तस्य नंदस्य । आक्रंदितम् अर्त्तिशब्दम् । सहसा शीघ्रम् ॥ ७॥ अलातैः उल्मुकैः, तेषामेव तिर्यग्योनिभीषणत्वात् । तम् नंदम् । तम् सर्पम् । अभ्येत्य आगत्य संकोचेन वृद्धसंगाद्दूरे वयस्यवर्गात्संभ्रमेण पितृसंन्निधौ प्राप्य पादस्पर्शमात्रेणैव नंदं सर्पाकारं चामुञ्चत् । भगवानचिंत्यशक्तिस्तयैव सर्वं कर्तुं समर्थः सैरंध्रीवायकादिषु दृष्टत्वात्, पादस्पर्शस्तु संभ्रमादेवेति ॥ ८ ॥ सः सर्पः ॥ ९ ॥ तम् त्यक्तसर्पवपुषं देवविशेषम् ॥ १० ॥ एताम् सर्परूपाम् । जुगुप्सिताम् गर्हिताम् । गतिम् दशाम् "गतिः स्त्री मार्गदशयोर्ज्ञाने यात्राभ्युपाययोः । नाडीव्रणसरण्योश्च" इति मेदिनी । वेति पक्षांतरे । अवशः कर्मवशतः ॥ ११ ॥ श्रुतः प्रसिद्धः । श्रिया दीप्त्या । स्वरूपसंपत्त्या स्वपूर्वदेहावाप्तिलक्षणया । अग्रिमेण प्राहसमितिक्रियापदेनान्वयः ॥ १२ ॥ तैः ऋषिभिः । विरूपान् सौन्दर्यरहितान् । अंगिरसः अंगिरसो वंश्यान् । "सौन्दर्ये च स्वभावे च रूपशब्दं प्रचक्षते" इति ॥ १३ ॥ तैः अंगिरोभिः ॥ १४ ॥ तम् त्रैलोक्यग्रहम् । 'अमीवं पापदुःखयोः' इति कोशात् ॥ १५ ॥ अनुजानीहि अनुज्ञां देहि ॥ १६ ॥ ब्रह्मदंडात् ब्रह्मशापात् । गृह्णन्नुच्चरन् । तस्य अखिलपावनकर्त्तुः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवंद्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥ १८ ॥ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौकसो विस्मितचेतसस्ततः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाऽऽययुस्तत्कथयंत आदृताः ॥ १९ ॥ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने राञ्यां मध्यगौ व्रजयोषिताम् ॥ २० ॥ उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलितांगौ स्रग्विणौ विरजोंबरौ ॥ २१ ॥ निशामुखं मानयंतावुदितोडुपतारकम् ॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना ॥ २२ ॥ जगतुः सर्वभूतानां मनःश्रवणमंगलम् ॥ तौ कल्पयंतौ युगपत्स्वरमंडलमूर्च्छितम् ॥ २३ ॥ गोप्यस्तद्गीतमाकर्ण्य मूर्च्छिता नाविदन्नृप ॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २४ ॥ एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् ॥ शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २५ ॥ तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनम् ॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः ॥ २६ ॥

याचे । हे अमीवहन्दुःखनाशन ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ अहिदेहं निहत्यैवं प्रागुन्मत्तं सुदर्शनम् ॥ तद्वदुन्मादिनं कृष्णः शंखचूडमताडयत ॥ १ ॥ तत्प्रसंगमाह । कदाचिदिति ॥ २० ॥ विरजोंबराविति । विरजसी निर्मले अंबरे ययोस्तौ ॥ २१ ॥ किं च । निशाप्रवेशं सत्कुर्वंतौ उदित उडुपस्तारकाश्च यस्मिंस्तत मल्लिकागंधेन मत्ता अलयो यस्मिंस्तत् ॥ २२ ॥ अनिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपि तौ स्वरमंडलस्य मूर्छितं युगपत्कल्पयंतौ । मनःश्रवणयोर्मंगलं यथा भवति तथा जगतुरगायतामिति ॥ २३ ॥ मूर्च्छितास्तद्गीतलीनचित्ताः श्लथद्भ्रश्यद्दुकूलं यस्मात्तमात्मानं देहम् । स्रस्ता केशेभ्यः स्रजो यस्य तं च ततो नाविदन् ॥ २४ ॥ २५ ॥ निरीक्षतोर्निरी

यदि पदा स्पृष्टः पूतो भवेत्तर्हि भूयः पुनः किं वक्तव्यमिति कैमुत्यं सूचितम् । सार्द्धेनान्वयः ॥ १७ ॥ इति इत्थं संश्लाघ्य । दाशार्हम् श्रीकृष्णम् ॥ १८ ॥ तत् विद्याधरवर्णितम् । आत्मनस्स्वस्य वैभवं स्वाभाविकै श्वर्यम् । तास्मिन् श्रीकृष्ण एव । नियमम् व्रतादि "नियमो मंत्रणायां च प्रतिज्ञानिश्चये व्रते" इति मेदिनी । समाप्य समर्प्य । एतस्मिन्नर्चिते सर्वेऽर्चिताः स्युस्सर्वमूलत्वात् । मूले सिक्ते शाखादिसेकवत् । विस्मितचेतस इति—अहो अयमेव साक्षात्परमेश्वरः, यथा गर्गमुखात्प्रथमं श्रुतं तथैव वरुणादपि तदेवाधुना विद्याधरेणाप्युक्तमतो वयमप्येतत्संबंधेन धन्या एवेति चिंतितवंतः । ततः अंबिकावनात् । तत् कृष्णवैभवम् ॥ १९ ॥ कथां तरमाह—कदाचिदिति । अथ नंदमोचनोत्तरम् । कदाचित्कालांतरे॥ २० ॥ उपगीयमानौ होलिकोचितगीतिभिर्वर्ण्यमानौ । तत्र हेतुः—बद्धं सौहृदं यैरिति । एतेन रामस्यापि पृथक्प्रेयसीगणो लक्ष्यते तद्व्यञ्जितम् "गोप्योन्तरेण भुजयोरपि यत्स्पृहा श्रीः" इति । सर्वमेलस्तु होलिकावसरसङ्कर्षादेवेति ज्ञेयम् । ललितम् चेतोहरम् ॥ २१ ॥ कुमुदवायुना जुष्टमित्यन्वयस्तु " विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च" इतिवदवसेयः ॥ २२ ॥ अनिबद्धत्वात् अन्योन्यं भिन्नत्वात् "क्रमयुक्ताः स्वरा यत्र मूर्च्छना साभिधीयते" इति संगीतरत्नाकरोक्तेः । अन्यैः रामकृष्णेतरैः । स्वराणां निषादादीनां सप्तानां मंडलस्यैकीभावस्य वा वृत्तिलक्षणस्य मूर्च्छितं मूर्च्छनामेकविंशतिधम् । कदा एकस्मिन् क्षणे । तथा च भरतः—"सप्तस्वरास्त्रयो ग्रामा मूर्च्छना एकविंशतिः" इति, "क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् । मूर्च्छनेत्युच्यते ग्रामत्रये ता एकविंशतिः ॥" इति संगीतसारोक्तेश्च ॥ २३ ॥ तद्गीतम् ताभ्यां रामकृष्णाभ्यां गीतम् युगपन्मूर्च्छितम् । ततो गानश्रवणात् ॥ २४ ॥ एवम् उक्तविधया हे राम कृष्ण अस्मांस्त्रायस्वेति वदन्तं नित्यात्मीयत्वेन स्वीकृतत्वात् । धनदानुचरः कुबेरभृत्यः ॥ २५ ॥ तयोः रामकृष्णयोः ।

१ होलिकापूर्णिमायाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहम् ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावताम् ॥ २७ ॥ मा भैष्टेत्यभयाऽऽरावौ शालहस्तौ तरस्विनौ ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमम् ॥ २८ ॥ स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ॥ विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ २९ ॥ तमन्वधावद्गोविंदो यत्रयत्र स धावति ॥ जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन्स्त्रियो बलः ॥ ३० ॥ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥ जहार मुष्टिनैवांग सहचूडामणिं विभुः ॥ ३१ ॥ शंखचूडं निहत्यैवं मणिमादाय भास्वरम् ॥ अग्रजायाददत्प्रीत्या पश्यंतीनां च योषिताम् ॥ ३२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे शंखचूडवधो नाम चतुस्त्रिंशोऽध्यायः ॥३४॥ श्रीशुक उवाच ॥ गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ॥ कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान् ॥ १ ॥

क्षमाणयोः । तौ नाथौ यस्य तं प्रमदाजनं कालयामास हठात्प्रेरयामास ॥ २६ ॥ दस्युना व्याघ्रेण ॥ :२७ ॥ मा भैष्ट भयं मा प्राप्नुतेत्यभयवाचौ ॥ २८ ॥ २९ ॥ ३० ॥ अविदूरे समीपत इवाभ्येत्य शिरसा सह चूडामणिं जहारेत्यर्थः ॥ ३१ ॥ ३२ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः ॥ युग्मश्लोकानुगीतेन निन्युर्दुःखेन वासरान् ॥ १ ॥ एवं रात्रिषु कृष्णेन स्वैरम

क्रोशंतम् त्राहित्राहीत्युक्त्वा रुदंतम्। उदीच्याम् निजेशदिशि। कालयामास निजयष्टिघूर्णनेन माययित्वोदीचीं दिशं प्रति विद्रावयामासेत्यर्थः। तेन स्पर्शस्तासां नाभूदिति ज्ञेयम् 'यथा गाः' इत्यग्रिमोक्तेः। अशंकितो निर्भयः ॥ २६ ॥ यथा दस्युना ग्रस्ता गास्तथा क्रोशतमाह्वयंतम्। स्वपरिग्रहम् निजस्त्रीजनम् 'दस्यू तस्करशार्दूलौ' इति यादवः ॥ २७ ॥ माप्नुत भीता मा भवंत्वित्यर्थः । शालो वृक्षविशेषः । 'तालहस्तौ' इति पाठे तु तालो गीतांगवाद्यविशेषस्तृणराजो वा हस्तयोर्ययोस्तौ तथा । मनस्विनौ अभीतौ "मनस्वी निर्भयोदारस्थिरधीयोगिराजसु" इति निरुक्तिः । तरसा शीघ्रं बलेन बलेन वा 'तरसी बलरंहसी' इति विश्वः । त्वरितम् धावंतम्। गुह्यकेषु यक्षेष्वधमं परदारग्राहित्वात् ॥ २८ ॥ सः शंखचूडः । तौ रामकृष्णौ । कालो मृतिसमयाभिमानी देवस्तन्नामातिबलोऽसुरो वा । मृत्युर्यमः । उद्विजन् बिभ्यत् ॥ २९ ॥ तम् गुह्यकम्। तस्य शंखचूडस्य। शिरोरत्नं चूडामणिम्। चूडामणिहरणान्तमेव तज्जीवनमिति जानन्नेव तं जहारेति तत्त्वम् ॥३०॥ अविदूरे समीपे। इवशब्देन किञ्चिद्दूरम्। तस्य यक्षस्य मुष्टिना 'मुष्टिर्द्वयोः पले बद्धपाणौ त्सरौ च' इति मेदिनी। (इत्यर्थ इति । सहादियोगे तृतीयया भाव्यमतः शिर इति तृतीयार्थे द्वितीया बोध्यार्षत्वात्) ॥ ३१ ॥ एवम् उक्तप्रकारेण। भास्वरम् देदीप्यमानम्। पश्यन्तीनामिति—मह्यमेषोतिसुभगायै दास्यतीत्येवं प्रत्येकं चिंतयंतीनां तासां मत्सराभावार्थं कस्यैचिदप्यदत्त्वा श्रीरामे स्वरक्षणात्प्रेमाणञ्च ज्ञात्वा श्रीरामायैवादात् । स च सर्वज्ञत्वाच्छ्रीकृष्णाभीप्सितदेश एव तं न्यधादिति ज्ञेयम् ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ दुःखेन कृच्छ्रेण । निन्युः व्यतीयुः (१) । एवम् रासादिना । दिवा दिने । तद्विरहितानाम् कृष्णविरहयुतानाम् । अनुगीतेन मुहुर्मुहुर्गानेन । गोप्य इति—तम् श्रीकृष्णम् । अनु पश्चात् । द्रुतं गतं चेतो यासां ताः । प्रगायंत्यः प्रकृष्टं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्य ऊचुः ॥ वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ॥ कोमलांगुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुंदः ॥ २ ॥
व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ॥ काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥

भिरमितानां दिवा तद्विरहितानामनुगीतेन दिननिस्तारप्रकारमाह । गोप्य इति । दुःखेन कृच्छ्रेण ॥ १ ॥ वामबाहुकृतवामकपोल इत्यादीनि द्वादशयुगलानि । हे गोप्यो वामे बाहौ तन्मूले कृतोऽर्पितो वामकपोलो येन सः वल्गिते नर्तिते भ्रुवौ येन स वल्गितभ्रूर्मुकुंदः । अधरे आर्पितं वेणुं कोमलाभिरंगुलिभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तं यत्र यदा ईरयति वादयति ॥ २ ॥ तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सह वर्तमाना अपि तद्वेण्वीरणमुपधार्याकर्ण्य प्रथमं विस्मितास्ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्तास्तत्परवशा इत्यर्थः । सलज्जाः सत्यः कश्मलं मोहं ययुः । अत्र लिंगम् । अपस्मृता विस्मृता नीव्यो याभिरिति । अत एवंभूतस्य कृष्णस्य विरहं कथं सहामहे इति सर्वत्र वाक्यशेषः ॥ ३ ॥

गानं भक्तिलक्षणमिति ध्येयम् ॥ × * ॥ अथ वेणुगीताध्यायः ॥ पंचत्रिंशे वेणुगीतं द्वादशश्लोकयुग्मतः ॥ वर्ण्यते यत्प्रियाः पीत्वा विरहिण्योऽनयन्दिनम ॥ (१) ॥ संभोगशैत्यं ज्यौत्स्नीषु विच्छेदौष्ण्यं दिनेष्वदात् ॥ प्रेमा ताभ्यः स्वपुष्ट्यर्थं स्वयं तद्वितयात्मकः ॥ (२) ॥ एवं रात्रिषु गोप्यः स्वकान्तेन सह लब्धांगसंगाः सनृत्यगीतनर्माधरामृतादिकं पिबंत्यः संभोगरसनिमग्ना बभूवुरित्युक्तम् । इदानीं दिनेषु तेन सह लब्धमनोमात्रसंगास्तद्वेणुगानामृतमात्रं पिबंत्यो विप्रलंभरसनिमग्ना बभूवुरित्याह—तं वनं गच्छंतमनुलक्ष्यीकृत्य द्रुतानि वेगेन सह चलितानि चेतांसि यासां ताः ॥ १ ॥ एकैकया द्वौद्वौ श्लोकावन्याः प्रति गीताविति द्वादश युगलानि चतुर्विंशतिश्लोकाः । हे गोप्य इति—श्रृणुतेति शेषः । मुकुंद इति भक्तेर्मोक्षदत्वं सूचयंत्य आहुः ॥ (२) ॥ पूर्वश्लोके यदेत्युक्तेस्तदेति लभ्यते । व्योमयानं विमानं तत्रस्था वनिता व्योमयान वनिताः । व्योम्नि नभसि यानं गतिर्येषां ते व्योमयाना देवास्तेषां वा । सिद्धो देवयोनिविशेषः । ' गुह्यकः सिद्धो भूतोऽमी देवयोनयः ' इत्यमरः । ततः विस्मयानंतरम् । काममार्गणेभ्यः स्मरबाणेभ्यः । ' मार्गणो याचके शरे ' इति मेदिनी । इत्यर्थ इति—कामपारवश्यात्तेन स्वाधीनवस्तुग्रहणवत्तासां चित्तानि गृहीतानीति भावः । अत्र मोहे । लिंगम् ज्ञापकम् । नीवी कटिवस्त्रग्रंथिः । मुच्यमानवस्त्रग्रंथिस्मरणरहिता इत्यर्थः । यत एतादृशः कृष्णोऽतो हेतोः । एवंभूतस्य वेणुवादनमोहितदेवांगनस्य । सर्वत्र युगलेषु ॥ * ॥ वृंदावने गाः संचार्य तत्रत्यतरुवल्लीमृगखगादीन्नक्तंतनस्वविरहखिन्नानाश्वासयन्स्वागमनमावेदयितुं यदा वेणुना कृष्णः संजगौ तदा तदाकर्णनेनोद्दीप्तभावा गोप्यः स्वस्वयूथस्थाः सखीः प्रत्याहुः—वामेत्यादिद्वादशयुगलानि । हे गोप्यः वामबाहुमूले कृतोऽर्पितो वामकपोलो येन सः । गीतस्यारोहावरोहयोर्गमकमयीकरणं तेनैव प्रकारेण संभवेत् । तथैव वामजंघोपरि दक्षिणजंघाधस्तटन्यासोऽपि ज्ञेयः । तेन त्रिभंगललितस्तिर्यग्ग्रीवस्त्रैलोक्यमोहन इति नामत्रयं प्रकटीबभूवेति भावः । वल्गिते नर्तिते भ्रुवौ येनेति सुबलादीन्पुरस्थितान् गानसौष्ठवेऽवधापयितुमिति भावः । ह्रस्वत्वमार्षम् । अधरेऽर्पितो न्यस्तो दत्तो वा यो वेणुस्तम् । यत्र यदेरयति । कीदृशम्—कोमलाभिरन्यजनांगापेक्षया सुकुमाराभिः ' अकर्मकठिनौ हस्तौ ' इति सामुद्रिकात्स्वांगापेक्षया त्वीषत्कठिनाभिरंगुलीभिराश्रिता मार्गाः सप्तस्वरच्छिद्राणि यस्य तम् ॥ तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः

× एतस्मिन्नध्याये (*) एतच्चिह्नतोऽग्रे सतोषिणी विश्वनाथव्याख्या प्रतिपद्यमवधेया ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहिता अपि प्रथमं तद्वेण्वीरणमवधार्याकर्ण्य विस्मिताः—अहो वेणुनादस्यैतावन्मोहनत्वमननुभूतचरं, यतोऽस्मान्साध्वीरपि मोहयति, अस्मान्पुरुषानपि स्त्रीभावयुक्तीकृत्य मोहयतीति प्रथमं विस्मययुक्तास्ततश्च सिद्धैः सहैव सलज्जाः—अस्मद्व्यभिचारमस्मत्पतयो वितर्कयेयुरिति तथैवास्मत्पुंस्त्वविपर्ययमस्मत्पत्न्यो वितर्कयेयुरिति स्वस्वपतिभ्यः सकाशात्स्वस्वपत्नीभ्यश्च सकाशाल्लज्जायुक्ता अभूवन् । ततश्च सिद्धैः सहैव कामस्य मार्गणेभ्यः समर्पितानि दत्तानि चित्तानि याभिस्ताः । आयातान् श्रीकृष्णविषयककामशरानालक्ष्य—भोः श्रीकृष्णकामशराः युष्मभ्यमेतान्यस्माच्चित्तानि दत्तानि, एतानि शीघ्रं विद्धीकुरुत अस्माभिः पातिव्रत्याय जलांजलिर्दत्तः, कृष्णोऽस्माभिः सह कृपया रमतामिति । तथास्माभिरपि स्वपुंस्त्वं देवत्वं च त्यक्तं कृष्णोऽस्मान्सद्य एव स्वयोगबलेन गोपस्त्रीकृत्यास्माभिस्सह रमतामिति समर्पितपदव्यंग्यं ज्ञेयम् । ततश्च सिद्धैः सहैव कश्मलं कामशरपीडया मोहं मूर्छां ययुः प्रापुः । कश्मलस्यानुभावमाह—अपस्मृता न स्मृताः स्खलिता अपि नीव्यो याभिस्ताः । सिद्धैस्तु सहैव शिथिलवस्त्रबंधकेशबंधादिका बभूवुरित्यर्थः । समासांताभाव आर्षः । अकस्माद्देवीनां देवानां च यद्येतादृशावस्थास्तर्हि वयं मानुष्यस्तत्रापि गोप्यस्तत्राप्येकनगरस्थास्तत्रापि लब्धांगसंगाः कथं तं विना स्थास्यामस्तदुत्तिष्ठत सख्य एतान्दग्धमुखान्पश्यतोऽपि पतिश्वशुरादींस्तिरस्कृत्य केनचिन्मिषेण वृन्दावनं प्रविश्य प्राणप्रेष्ठेन सार्द्धं विलसाम इति ध्वनिः प्रतियुगलांतमेवानुवर्तनीयः ॥ अत्र **तोषिणी**—जयति व्रजदेवीनामपूर्वा महिमावली ॥ पदालंबलवादेव तद्गीतं व्याचिकीर्षति ॥ (१) ॥ अथ परःकोटीनां यूथश एकैकशश्च भिन्नानुभवभावानामेकस्यां सभायां दुर्घटयुगपत्सर्वसमावेशानामत एव व्रजदेव्य इति तव सुतः सतीति नानासंबोधनीयजनानां प्रतिदिनलीलासामान्यवर्णनपराणां संक्षेपेण वाक्यसंग्रहोऽयमध्याय इति । यद्यपि न मिथो वाक्यसंगतेरपेक्षा तथापि श्रीमता कवींद्रेण प्रातरादितत्तल्लीलाक्रमत एव तत्तत्संग्रहः कृत इति क्वचिद्द्वित्रादिकमपि युगलमेकसमागतमिति च संगतिः कर्तव्या । तत्र प्रतिनियतयुगलतया वर्णनं प्रतियुगलं लीलातत्प्रयोजनयोः पूर्वापरीभावेनेत्यत्रैवमभिप्रयंति । यद्यपि श्रीकृष्णलीलैव केवलपुरुषार्थस्तत्पोष्यजनस्तु तदनुगततयैव तथापि तद्युगलतां विना न सुखलाभ इत्यहो कष्टमस्माकमेव तादृश्यां लीलायां प्रवेशो नास्तीति तदेवं गृहान्निस्सरणमारभ्य तत्रागमनावधि श्रीभगवतो वन्यक्रीडाः कदाचित्काश्चन काश्चिदनुभूय यथास्वं यथानुभवं गायंत्यस्तत्र चादौ प्रातर्बहिर्भूय वनवर्त्मनि तेन वेणावीरिते सति सिद्धवनितानां सायं गृहं प्रविष्टं तमपश्यंतीनां तद्दिदृक्षया नक्तं व्योम्नि स्थितानां तद्वाद्यस्य तद्वादनमुद्रया तदीयसौंदर्यलीलाविशेषस्य च तासां व्योमयानत्वादनावृतत्वेन प्रागेवानुभवात्, श्रीभगवतश्च वामबाहुकृतवामकपोलत्वेन प्रायो वक्रोर्द्ध्वदृष्टिभंगितया स्वविषयकदृष्टिमननाच्च प्राधान्यतस्तासामेव प्रेममोहमाहुः—वामेति युगलेन । वामशब्दस्यार्थांतरेण मनोहरताव्यंजनात्स एव प्रयुक्तो न सव्यादिशब्दः । वामबाहुकृतवामकपोलत्वेन श्रीग्रीवाया ईषत्परिवर्तनं तिर्यक्त्वं च तया वक्रोर्द्ध्वावलोकनं तथा वेणुवादनेऽभिनिवेशस्तथा सुप्रसिद्धत्रिभंगानुसारेण श्रीवामजंघोपरि श्रीदक्षिणजंघा तस्य न्यासश्च ज्ञेयः । वलितभ्रुरिति ह्रस्वत्वमार्षम् । दीर्घांतोऽपि पाठः क्वचित् । अधरेऽर्पितो यो वेणुस्तम् । यद्वाअधरेऽर्पितो न्यस्तो यस्मिन्दत्तो वा यस्मै स चासौ वेणुश्चेति विग्रहस्तम् । सदा तस्य संयोगाभिप्रायेण । इदञ्च निष्ठायाः पूर्वनिपाताभावार्थमाहिताग्न्यादौ पठनीयम् । बिम्बादिरूपकाप्रयोग आरुण्यमाधुर्यगुणस्फूर्तावपि तत्संबंधमात्रेणैव वेणुवाद्यस्य मोहनत्वबोधनाय, किं वा—सदा वेणुसंसर्गेण तस्मिन्नीर्ष्योदयात् । “ अकर्मकठिनौ हस्तौ पादौ चाध्वनि कोमलौ ” इति महापुरुषलक्षणत्वेऽपि कोमलेति प्रयोगः स्नेहेन, अन्यांगापेक्षिककाठिन्यांशमपेक्ष्य वस्त्वंतरापेक्षिककोमलांशस्फूर्तेः । तथा मात्सर्येण तस्यातिकठिनमुरलीस्पर्शानौचित्याभिप्रायात् । अतोऽस्मासु कोमलांगीष्वेव तत्स्पर्शोऽपि युक्त इति गूढोऽभिप्रायः । एवं सहजमहासौंदर्यमयस्यापि तस्य वेणुवादनमुद्राविशेषेण सौंदर्यविशेषो दर्शितः । तेन च वेणुवाद्यस्य महामोहनत्वमेवाभिप्रेतम् । हे गोप्य इति—परमविदग्धाभिरतत्तत्त्वं युष्माभिरेव बोद्धुं शक्यते न त्वन्यैर्जनैरिति भावः । यत्र यदेति वक्ष्यमाणमोहप्राप्तौ तत्कालजातत्वं तस्यां वेण्वीरणैकहेतुत्वञ्चावश्यकत्वादिकमप्यभिप्रेतम् । एवमग्रेऽपि ॥ व्योमयानं विमानं तद्वनिता देव्यः । सिद्धैस्तद्यानैर्देवैरित्यर्थः । अपूर्वत्वात्तैरपि सह विस्मिता बभूवुः । अतस्तैः स्वपतिभिर्भमहद्भिश्च सह वर्तमाना अपि काममार्गणैः कर्तृभिः समर्पितं चित्तमर्थात्कृष्णाय यासां तथा भूता बभूवुः, ततः सलज्जा बभूवुः । एवं लज्जावत्योऽपि तन्मार्गणेन मोहपर्यंतां दशां प्रापुः । यद्वा—अपस्मृताः स्खलिता अतिविस्मृता नीव्यो याभिस्तादृश्यो बभूवुः । अन्यत्तैः । यद्वा--विस्मयानंतरं स्त्रीस्वभावेन कामोदयात्सलज्जा बभूवुः । ततश्च काममार्गणैः समर्पितं बलादाच्छिद्य श्रीकृष्णायार्पितं चित्तं यासां तथाभूताः सत्यो मोहं ययुः । तत्रास्तां ताव

१ अपस्मृतनीव्य इत्यत्र ‘नद्यृतश्च’ इति कबभाव इत्याशयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंतचित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ॥ नंदसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥ ४ ॥
वृंदशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥ दंतदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥

हंत हे अबला इदं चित्रं शृणुत । हारहासो हारवद्विशदो हासो यस्य सः । यद्वा वेणुवादनेनाधोवदनेन हसतो हारेषु स्फुरन्हासो यस्य सः । यद्वा हारवद्वक्षसि शोभमानो हासो यस्य सः । यद्वा हाराणां हास इव विशदा स्फूर्तिर्यस्मिन्नुरसीति । तस्मिन् उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः । यर्हि यदा कूजितवेणुर्नादितवेणुर्भवति ॥ ४ ॥ तदा व्रजे वृषा मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ते । आराद्दूरादेव दंतैर्दष्टाः कवला ग्रासा यैस्ते धृता उत्तंभिताः कर्णा यैस्ते निद्रिता इव लिखितचित्रमिव चासन् । अविदुषां तिरश्चामिदमतिचित्रमित्यर्थः ॥ ५ ॥

न्मानसविकारमात्रे लज्जा यतस्तेषामग्रतोऽपस्मृतनीवीकाश्च बभूवुरित्यर्थः । अतो यत्र देव्योऽपि मुह्यंति तत्र का वयमिति भावः ॥ २ ॥ ३ ॥ (यु० १) ॥ हंतेति हर्षे । हारवन्मुक्तावलिवद्विशदः श्वेतो हासो यस्य स तथा ‘ हारो मुक्तावलौ युधि ’ इति मेदिनी । ‘ विशदश्वेतपांडुराः’ इत्यमरः । हासस्य वस्तुतोऽमूर्तत्वात्तत्र विशदत्वारोपणमनुचितमिव मत्वाह--यद्वेति । कदाचिन्मुक्तावल्यसत्त्वे विशेषणवैयर्थ्यं मत्वाह–वक्षसि । हास्यावसरे दंतदीधितिपुञ्ज एव हारवद्भातीत्यर्थः । संभवत्वादुरोविशेषणं शोभनमिदमिति मत्वाऽऽह--यद्वेति । हाराणां हास इवेत्युत्प्रेक्षैव हारदीप्तेर्हासत्वेनोत्प्रेक्षणात् । एवमेव विद्युतो लक्ष्मीत्वेनोत्प्रेक्षणमेव । अयमित्युक्तिर्बुद्धिसन्निहितत्वात् । आत्मविरहार्तानां नर्मदः परिहासदः । आनंदजनक इत्यर्थः । “ द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च ” इत्यमरः ॥ (४) ॥ वृंदंवृंदमिति वृंदशः । इह “ संख्यैकवचनाच्च वीप्सायाम् ”इति शस् । एकैकवृंदेन पृथक्पृथक् स्थिता इत्यर्थः । अविदुषामल्पज्ञानवतामित्यर्थः । इहाल्पार्थेन नञा समासो न त्वभावार्थकेन तेषामप्याहारमैथुनादिज्ञानदर्शनात् । इदम् ग्रासस्थितिपूर्वकं वेणुनादश्रवणम् । इत्यर्थ इति–किंचिज्ज्ञानवतां यदीयं दशा तर्हि किमस्माकं विशेषज्ञानवतीनामनवधाने वक्तव्यमिति भावः ॥ * ॥ देववनितानां विदग्धप्रवराणां का वार्ता मूढजनानामपि मोहं शृणुतेत्यन्या आहुः–हंत चित्रमित्यद्भुतादप्यद्भुतमित्यर्थः । हे अबला इति–स्त्रीणां युष्माकं पातिव्रत्यबलं कृष्णेन प्रथमत एवापहृतमिति भावः । हाराणां बलाकानामिव हासः प्रकाशो यत्र तथाभूत । उरसि मेघोपमा स्थिरा विद्युत्तत्रत्यलक्ष्मीरेखैव यस्य सः । तेन बलाकाविद्युद्भूषितकृष्णवक्षोमेघेनैव भवतीनां पातिव्रत्यनिदाघो ध्वंसित इति भावः । अत एवायमार्तजनानां युष्माकं नर्म सर्वलोककर्तृकमुपहासं ददातीति सः । कदा यर्हि कूजितवेणुर्भवति तदेत्यर्थः । वेणुनादमात्रेण शिथिलनीवीकबरीकाः प्राप्तोन्मादाः सर्वलोकहासास्पदीभूता भवत्यो भवंतीति भावः ॥ युष्माकं मानुषीणां का वार्ता तिर्यग्जातयोऽपि वेणुनादेन मूर्छिताः क्रियंत इत्याहुः–वृंदशः । प्रतियूथमित्यर्थः । व्रजस्था वृषा व्रजस्था मृगा गावश्च दंतैर्दष्टाः कवलास्तृणग्रासा यैस्त इति तृणेषु दंतैर्दष्टेषु सत्सु तन्निगलनात्पूर्वमेवारब्धेन वेणुनादेनैव बलात्कर्णमार्गैरेव देहांतः प्रविष्टं न तु मुखमार्गेण तृणग्रासा देहांतःप्रविष्टाः । अत एव धृता उत्तंभिताः कर्णा यैस्ते । ततश्च तेन हृतानि चित्तानि येषां त इत्यत एव सर्वेंद्रियव्यापाराभावान्निद्रिता इव, तत एव तृणग्रासास्ते दन्तदष्टत्वस्यानपगमाद्भुव्यपि नो पतिता इति भावः । ततश्च प्रबलीभूतेन जाड्यसंचारिणा जनिते तस्यातिशये सति मूर्छायां च सत्यां श्वासस्यापि प्रायस्तब्धीभावाल्लिखितचित्रमिवेत्युपमान्तरं दत्तम् । तत्रापि लिखितेत्युत्कीर्णचित्रादपि लिखितचित्रस्य चमत्कारित्वातिशयविवक्षयोक्तम् । केनाप्यद्भुतचित्रकारेणाकाशपट्टे लिखितानि चित्राणीति विस्मयरसो ध्वनितः ॥ अत्र **तोषिणी–**ततो वनांतिकं गच्छन्सर्वगोगोपालसंकलनाय वन्यमृगादिहर्षणाय स्वानुव्रज्याकरश्रीगोपादीनां ससांत्वनगृहनिवर्तनाय च वेणुमेवावादयत् तत्रास्तामन्येषां वार्ता तस्योभयतो वनव्रजयोःस्थिताःपशवोऽपि मुमुहुरित्याहुः–हंतेति । हृदयस्थविस्मयचमत्कारद्योतकं तथैव साक्षाद्वदंति–चित्रमद्भुतम् । हे अबला इति–तच्छ्रवणेन प्रेमविह्वल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः ॥ कर्हिचित्सबल आलि स गोपैर्गाः समाह्वयति यत्र मुकुंदः ॥ ६ ॥
तर्हि भग्नगतयः सरितो वै तत्पदांबुजरजोऽनिलनीतम् ॥ स्पृहयतीर्वयमिवाऽबहुपुण्याः प्रेमवेपितभुजाः स्तिमितापः ॥ ७ ॥

किं च अचेतनासु सरित्सु तदतीव चित्रमित्याहुः । हे आलि सखि बर्हिणस्य मयूरस्य स्तबका मयूरपिच्छा धातवो गैरिकादयश्च पलाशानि पल्लवाश्च तैर्बद्धश्चासौ मल्लानां परिबर्हः परिकरस्तं विडंबयत्यनुकरोतीति तथा स मुकुंदो गोपैः सह । वेणुनेत्युपरितनमत्रापि ज्ञातव्यम् । यत्र यदा गाः सम्यगाह्वयति ॥ ६ ॥ तर्हि तदा । तद्ध्वनिश्रवणात् अनिलेनानीतं तस्य पदांबुजरजः स्पृहयंत्य इव भग्नगतयः सरितो वै निश्चितं वयमिव ता अप्यबहुपुण्या यतो न प्राप्नुवंति।केवलं प्रेम्णा वेपिताः कंपिता भुजास्तरंगा यासां ताः । स्तिमिता निश्चला आपो यासां ताः।गोप्योऽपि लोचनयोः स्तिमितजला भवंतीति ॥ ७ ॥

तयेन्द्रियादिशाक्तिराहित्याभिप्रायेण । अत एव श्रृणुतेत्यवधापयंति । स्थिरविद्युदिति—वक्षस्थां रेखारूपां लक्ष्मीमेवोत्प्रेक्षंते प्रसिद्धत्वात्तु नानुवदंति । तत्र स्थिरेति चित्रत्वे कारणं, विद्युत्त्वेनोरसश्च घनत्वं व्यंजयंति । तस्याश्च नायिकात्व माशंक्य तत्रापि स्थिरत्वं विभाव्य मात्सर्यं, तथापि विद्युद्धनसहयोगेन हारहासयोर्बलाकात्वं तादृशघनत्वेन तापहारित्वं च । अत एव नंदयति जगदिति नंदस्तस्य सूनुरिति स्वभावेनानंदकत्वमुक्तम् । अत एवार्तजनानां गवादीनां मृगादीनां चानंददाता । अयमित्यधुनैव यो गृहान्निर्गतः स इत्यर्थः । साक्षात्सर्वैरनुभूयमान इति वा । कूजितेत्यादि कर्मणि क्तः । अन्यत्तैः । यद्वा—हारो मनोहरो हासो यस्य सः । यद्वा—यस्मिन्नुरसि । अन्यत्समानम् ॥ व्रजे ये निरुद्धा पाल्यमानाः शकटवाहो वृषास्ते, मृगाः कृष्णसाराः तत्संबंधेन गावो वनगामिन्यस्तदुपलक्षणत्वेनान्येऽपि तत्तज्जातयो दंतैर्दष्टा एव हृतचेतस्त्वेन न गीर्णा न चर्विता नापि त्यक्ताः कवला स्तृणग्रासा यैः । अत एव हृतचेतस्त्वेनेत्यत्र तस्या मुरल्याः शब्दांतरोत्थानभयं नेत्युत्प्रेक्ष्य दंतैस्तृणधारणे मोहभयान्मा गायेति तन्निवेदनव्यंजना च । निद्रितानामपि किंचिच्चलनादिकमप्यस्तीति तत्परिहारार्थं दृष्टांतं तस्माहुः—लिखितेति । पद्यादौ लिखितं वृषादीनां चित्रमिव लिखितग्रहणं लिखितंचित्रस्योत्कीर्णचित्राच्चमत्कारकरत्वापेक्षया । एकत्वं संघट्टेनैकतामिव गता इत्यपेक्षया ॥ ४ ॥ ५ ॥ (२) ॥ इतोऽप्यधिकमाहुः—किञ्चेति । तत् वेणुनादाकर्णनम् । उपरितनं श्लोकेऽत्रापठितमप्यष्टमश्लोके पठितम् । अत्रापि षष्ठश्लोकेऽपि । सबलो बलदेवसहितः ॥ (६) ॥ यतः अबहुपुण्यत्वात् । सरंति चलंतीति सरित इति सारिच्छब्दार्थहानिः स्तिमिताप इत्यनेनोक्ताऽत्र ॥ * ॥ वृषमृगादीनां चेतनानां का वार्ता अचेतनानामपि वेणुश्रवणहेतुकं स्तंभं श्रृणुतेत्यन्या आहुः—बार्हिणस्य मयूरस्य स्तबकाः पिच्छानि । यद्वा—बर्हिणशब्देनैव बर्हिणापिच्छानि लक्षितानि च, स्तबकाः पुष्पगुच्छाश्च । धातवो गैरिकादयश्च, पलाशानि पल्लवाश्च, तैर्बद्धो यो मल्लानां परिबर्हः परिकरस्तं विडंबयत्यनुकरोति स्वभावत उपहसति वा सः । बलदेवसहितः स मुकुंदो गोपैर्युक्तः गाः हिहीं कालिंदि गंगे सरस्वतीति तासां नामभिर्यत्र यदाह्वयति ॥ तर्हि सरितो यमुनामानसगंगासरस्वत्याद्याः सरितोऽन्याश्च व्रजस्था अचेतना अपि चेतनां प्राप्य हन्तहन्ताहो अस्माकं भाग्यं यतस्स्नानावगाहनाद्यर्थमस्मानाह्वयति तदिदं स्वतीक्ष्णप्रवाहेण तटं भित्त्वा याम इति कृष्णपार्श्वं यियासवोऽपि भग्नगतयोऽत्यानंदजाड्येन स्वाभाविकगतेरपि स्तंभाद्विगतप्रवाहा एव भवंतीति शेषः । श्लेषेण कृष्णांगसंगसुखप्राप्त्यभावादन्यनदीकृतोपहासाच्च ऐहिकी गतिर्भग्ना, पातिव्रत्यलोपात्पारलौकिकी च गतिर्नष्टा । अहो तासामभाग्यमिति भावः । किंचिद्भाग्यं चाहुः—तस्य पदांबुजरजः अनिलनीतमनुकूलवातानीतं स्पृहयंत्यः प्राप्यापि तृप्त्यभावादेव पुनःपुनरिच्छन्तीत्यर्थः । अतो वयमिव कृष्णसंगाद्यप्राप्तिप्राप्तिभ्यामबहुपुण्या नाप्यपुण्या, अल्पपुण्या इत्यर्थः । प्रेम्णा वेपिता भुजास्तरंगा यासां ताः । अस्माकमपि भुजाः प्रेम्णा कंपंते स्तिमिता जाड्येन कठिनीभूयापि पुनरार्द्रीभूता आपो यासां ताः । वयमपि नेत्रयोस्तिमितजला जलैस्तिमिता भवामः । आहिताग्न्यादिः । समासांताभाव आर्षः । एवं वयमपि पतिभ्रात्रादिभिः कृष्णाभिसारवारणाद्भग्नगतयः लोकोपहासात्पातिव्रत्यलोपाच्चैहिकपारलौकिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरंतीर्वेणुनाऽऽह्वयति गाः स यदा हि ॥ ८ ॥
वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः ॥ प्रणतभारविटपा मधुधाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ ९ ॥

स्थावरेष्वप्यतिचित्रं दृश्यत इत्याहुः । अनुचरैर्गोपैर्देवादिभिर्वा । मुग्धानां वाक्यमादिपुरुष इवेति । अचलभूतिर्निश्चलश्रीः । वेणुना तत्तन्नाम्ना गानेन ॥ ८ ॥ तदा प्रणता भारेण विटपाः शाखा यासां ता वनगता लताः स्वस्मिन्विष्णुं प्रकाशमानं सूचयंत्य इव मधुधारा ववृषुः । स्मेति विस्मये । तरवश्च तथा तत्पतीनामपि तथैवानंद इति विस्मय इति भावः । एतानि विष्णुव्यक्तिलक्षणानि ॥ ९ ॥

गतिरहिताश्च तदंगसौरम्यस्पृहावत्यश्च ॥ अत्र **तोषिणी**–ततो वनांतः प्रविष्टस्य मल्लवेशोचितवन्यभूषणैर्भूषितस्य गवादिजलपानाद्यपेक्षया विदूरनदीकसरोवरमयदेशगतस्य गोसमाश्वासनार्थवेणुवाद्यविशेषान्नदीनामपि भावविशेषोदयेन मोहं संभावयंति–बर्हिण इति । स वेणुवाद्यविशारदो मुकुंदः कर्हिचिद्द्वयं प्रथमं पानसमये यत्र यदा सम्यक्प्रीतिपूर्वकतत्तद्विचित्रनामभिराह्वयति । अप्रधान एव सहार्थे तृतीयाविधानात् । श्रीकृष्णनादपोषणार्थ एव श्रीबलादीनां नादो बोध्यते, तेन च सरितां श्रीकृष्णनिष्ठ एव भावोद्बोधो व्यज्यते । संहतो नादश्च तासां सर्वासामेव दूरगत्वात् । अत एव गा इति बहुत्वम् । ततो दूरश्रवणात्सरित इति च वक्ष्यते । आलि हे सखींति सरितां तादृशभावो विश्वासार्थम् । यद्वा–सख्येनैव स्वसादृश्यं तत्कथ्यत इति भावः । अन्यत्तैः । अथ वा–बर्हिणशब्देन कथंचिद्बर्हमेवोच्यते। स्तवकाः पुष्पगुच्छाः, पलाशाः कोमलपत्राणि । यदा हे गंगे हे यमुने हे सरस्वतीति गंगादिनाम्नीर्गाः समाह्वयतीति । मधुरतमस्वकंठेनैवाह्वयतीति विशेषो ज्ञेयः ॥ तदा सरितो माथुर्यो मानसगंगायमुनासरस्वत्याद्याः प्रकारांतरप्राप्तायोग्यतामनेनानिलमात्रप्रापितं रज एकमपि स्पृहयंत्यो लक्ष्यंते "स्पृहेरीप्सितः" इति संप्रदानत्वेऽपि रजसः कर्मत्वम् "कर्तुरीप्सिततमं कर्म" इति स्मरणादीप्सिततमत्वविवक्षया । यतस्तत्स्पृहाहेतोः स्तब्धप्रवाहतया भग्नगतयो लक्ष्यंते । सरित इत्यन्वर्थतया सततप्रवाहवत्योऽपीत्यर्थः । भग्नगतय इति श्लेषेण निजपतिसमुद्रानुसरणभंगेन लोकद्वयोपेक्षोक्ता । अतस्तादृश्योऽपि तदप्राप्त्या वयमिवा बहुपुण्या अप्रचुरशुभा दृष्टा एव लक्ष्यंते । अस्माकमिवासामपि श्रीकृष्णक्रीडाश्रयसजातीयविजातीयगणभेदासंख्यत्वेन विरलावसरत्वादिति भावः । किन्तु प्रथमतः केवलं तद्रजःप्राप्तीच्छया वेपितभुजाः प्रसारितकरा इव तरंगा यासां तादृश्यो लक्ष्यंते, पश्चात्स्तिमितापो निस्तरंगतया स्तब्धसर्वचेष्टाश्च लक्ष्यंते इत्यर्थः । अन्यत्तैः । तत्र गोपीनां लोचनयोः स्तिमितजलत्वं सदा सार्द्रत्वात् । यद्वा–सरित्स्वपांगत्वात्स्वपक्षे स्तिमितांगा इत्यर्थः । तदेतावानुत्प्रेक्षाक्रमः, वस्तुक्रमस्तु–प्रथमं तादृशशब्दस्पर्शस्ततः प्रवाहस्तंभस्ततस्तरंगमात्रावशेषचलनत्वं ततस्तद्राहित्यमपीति । किं चोत्प्रेक्षाक्रम एवं ज्ञेयः–प्रथमं तच्छ्रवणं ततो गतिभंगस्ततस्तद्वादकालिंगनेच्छया भुजकंपस्ततस्तदप्रातिदुःखेन स्तंभस्ततस्तादृशरजोमात्रस्पृहेति । तदेवं तथातथा भूता अपि तन्मात्रं स्पृहयंत्य एव लक्ष्यंते न तु प्राप्तवत्यः, अनिलानुकूल्यात्सुलभत्वात् । यतो वयमिवाबहुपुण्या इत्यन्वयो ज्ञेयः । तदेवमचेतनानामप्येवं वार्ता को वा नामास्माकं दोष इति भावः ॥ ६ ॥ ७ ॥ (३) ॥ मुग्धानां मूढानां साक्षादादिपुरुषत्वात्तस्यात्रेवशब्दप्रयोगोऽयुक्त एवेति भावः । केचित्तु अनुचरैः सनकाद्यैः । अचलभूतिः स्थिरश्रीः 'भूतिः श्रीजन्मभस्मसु' इति यादवः । वनचरो जलशायी । गिरिर्वायुस्तस्य तटवद्विशदे मुखे वर्तमाना गा वेदवाणीराह्वयति । तथा च–सनकादिस्तुतजलशायी आदिपुरुषो यथा श्रुतीराह्वयति वायुमुखेन तथा कृष्णोऽपीति पक्षः सुबोध एव । तत्र चरंतीस्तृणं भक्षंतीः ॥ (८) ॥ तथा मधुधारा ववृषुः स्म । तत्पतीनाम् लतापतीनाम् वृक्षाणामपि । तथैव लतावत् । इति भाव इति–पत्नीनामानंदं दृष्ट्वा स्वयमप्यानंदिता बभूवुरित्याशयः । एतानि प्रणति रोमांचानंदाश्रुपातादीनि । "कथं विना रोमहर्षं द्रवता चेतसा विना । विनानंदाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥" इत्याद्युक्तेः । पक्षे, तरवः संसारतरणशीलास्तीर्णसंसारा मुमुक्षवो मुक्ता वा । आत्मनि हृदये स्थितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्णुं व्यंजयंतो अपरोक्षीकुर्वंत इव ज्ञानपुष्पेण जीवन्मुक्त्यवस्थाफलेनाढ्याः । प्रणतस्य भारो भरणं येषां ते विटपा भुजा येषां ते, मूर्ध्नि धृतांजलिपुटा इत्यर्थः । अत एव भक्त्युद्रेकेण रोमांचितगात्राः वनेऽरण्ये रता निवृत्तिधर्ममनुतिष्ठंतः । यद्वा—वने भासि—ग्रीष्मे पंचाग्निज्वालासेवायां, वर्षर्तौ वने कानने, हिमर्तौ वने कंठदघ्नजले वसंतः । 'वनं भास्यप्सु कानने' इति यादवः । मधुधारा आनंदांबुसंततीः ससृजुः, तत्स्वभावा बभूवुरित्यर्थः । "धारास्त्यागेंबुसंतत्यां सैन्याग्रेऽश्वगतिष्वपि" इति यादवः । 'सर्गः स्वभावनिर्मोक्ष—' इत्यमरः । इह वनचरशब्दसामर्थ्यान्मत्स्यकूर्मवराहादिविषयेऽप्येतौ श्लोकौ शब्दशक्तिविशारदैर्ज्ञेयौ । ग्रंथविस्तरभियोपरम्यत इति ॥ * ॥ नदीनामनादिसिद्धानामचेतनत्वेऽपि देवतारूपाणां का वार्ता, श्वःपरश्वोदृष्टजन्मनामतिनिकृष्टानामपि जडानां रसिकतां वेणुश्रवणहेतुकां पश्यतेत्यन्या आहुः—अनुचरैर्गोपैः । आदिपुरुषो नारायण इव निश्चलश्रीः तदपि वनचरः वन्यजीवेष्वनुरागादिति भावः ॥ तदा गृहस्थवैष्णवाः सस्त्रीकाः संकीर्तनश्रवणेन यथा भाववंतो भूत्वा प्रणमंति तथैव वनलताः स्त्रियस्तरवस्तत्पतय आत्मनि मनसि स्फुरंतं विष्णुं व्यंजयंत्यो ज्ञापयंत्य इवाश्रुतुल्या मधुनो मकरंदस्य धाराः ससृजुर्मुमुचुः । 'ववृषुः' इति पाठेऽश्रूणामाधिक्यम् । पुष्पेण हर्षसंचारिणा फलेन रतिस्थायिना च विराजमानाः, प्रणता भारेण विटपाः शाखा यासामित्यनुभावः प्रणामः । प्रेम्णा हृष्टा रोमहर्षयुक्तास्तनवो येषां ते इति रोमांचः ॥ अत्र **तोषिणी**—ततो गाः पाययित्वा स्वयमपि पीत्वा ताभिः सह तरुच्छायां पर्वतभूमिमवगाह्य दूरस्वाच्छंद्यास्ताश्चारयंस्तत्रतत्र निजचरितमयं सखिगीतं शृण्वन्न वधानेन दूरगतास्ताः स्वयमेव वेणुनाजुहाव । यत्र च तत्रास्तां स्वस्वाधिष्ठातृरूपेण परमदेवीनां नदीनां वार्ता, तथान्येषां तत्रत्यानां जंगमजातीनाम् । अहो स्थावरजातीनामप्येतादृशत्वमित्याहुः—अन्विति । अनुचरैः सदा संगिभिर्गोपैरिति प्रणयविशेषो दर्शितः । तत एव समिति सम्यक्तया सर्वांशतः प्रेमविशेषतश्चोत्तमप्रकारेणेत्यर्थः । अन्विति—अनुक्रमेण व्यंजितमातापित्रादिस्नेहानुबंधेन जन्मादिलीलाप्रबंधेनेत्यर्थः । यद्वा—सह भावेन सर्वैर्मिलित्वेत्यर्थः । यद्वा—तत्समीपवर्तित्वेन प्रत्येकस्वस्ववैदग्धीज्ञापनपूर्वकत्वेनेत्यर्थः । तादृशतया वर्णितं सकौतुकं रसभावालंकारगानतालाभिनयादिप्राचुर्येण प्रस्तुतं वीर्यं तत्तत्प्रभावमयं चरितं यस्य सः । असाधारण एव चासावित्याहुः—आदीति । यद्वा—आदिपुरुष आदिनारायणो यथा तथैवाचलश्रीरपि वनचर इत्यादिनान्वयः । तेन च परमविनोदित्वादिकमुक्तं, दृष्टांतश्च तादृशत्वनिश्चयार्थः । सर्वोत्तमायामपि तस्यैवादिपुरुषतायामिवशब्दप्रयोगश्चासां तादृशकेवलतन्माधुर्य्यमयभावविशेषस्वभावेनाननुसंधानात् । अचलश्रीत्वनिर्देशस्तु तस्य च्युतिरहितोदित्वरासमोर्द्ध्वतत्तत्संपदनुभवात् । एतदचलभूतित्वमेवोत्तरं दर्शयिष्यते । वनचरः वनेषु चरन्नित्यर्थः । इति गवामदृश्यता सूचिता । वस्तुतस्तु नित्यवृंदावनविहार्येव सन्नचलविभूतिरित्यर्थः । गिरितटेषु विषमप्रदेशेषु चरंतीरिति परिश्रांतिः सूचिता । अत एव वेणुनादेनैव समाह्वयति । स गोपचूडामणिर्विचित्रतदाह्वानचतुर इत्यर्थः । हि एव यदैव । वनेति सप्तम्या लुक्छांदसः ॥ तदा वने यावत्यो लतास्ताः सर्वा अपीत्यर्थः । श्लेषेण वन्यत्वात्तत्रापि लतात्वाद्वैदग्ध्यादिरहिता अपीत्युक्तं, तथा वने यावंतस्तरवस्तावंतश्च तत्र लिंगव्यत्ययेन व्यंजयंत इति बोद्धव्यम् । लतानामादौ निर्देशः स्त्रीत्वेन स्वतुल्यभावप्राधान्यविवक्षया । विष्णुमिति—सर्वत्र स्फुरद्रूपत्वाद्व्यापकत्वेन प्रवेशशीलत्वेन वा वर्तमानतया श्रीकृष्णमित्यर्थः । तमात्मनि स्फुरंतं व्यंजयंत्य इवेति भावपरवशचेष्टयैव व्यंजनेन स्वयमेव दृष्टांतगर्भश्लेषेण विष्णुं श्रीनारायणमिव तमित्यर्थः । दृष्टांतव्यंजना च आदिपुरुष इत्युक्तेः स्पष्टीकरणाय । तत्र दृष्टांतपक्षे लतातरवः स्त्रीपुरुषजातयः पुष्पफलाढ्याः ' यस्यास्ति भक्तिर्भगवत्यकिंचने ' इति, " सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा " इति प्रमाणेन सर्वसाध्यसाधनसंपन्नास्तथापि प्रगतभारविटपाः ' नेमुर्निरीक्ष्य परितृप्तदृशो मुदा कैः ' इति चतुःसनादिवन्नम्राः । मधुधारा अश्रूणि । दार्ष्टांतिकपक्षे लतातरुत्वादिमिषेण तत्तद्रूपा इत्यर्थः । तत्रांकुरोद्भेदमिषेण हृष्टतनवः । तत्तच्च " अस्पंदनं गतिमतां पुलकस्तरूणाम् " इत्यादिभिः श्रीगोकुले प्रसिद्धमेव । प्रेमबाष्पेति पक्षद्वयेऽपि सर्वत्र संबंधनीयम्, समासप्रविष्टस्यापि वा प्रेमशब्दस्यार्थवशादन्यत्र संबंधः । ववृषुर्निरंतरं बहुशोऽमुंचन् । ससृजुरिति सार्वत्रिकमूलपाठेऽपूर्वत्वेन प्रवर्तयामासुः । यद्वा—मधुनो धारा यासु तथाभूताः सत्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्शनीयतिलको वनमालादिव्यगंधतुलसीमधुमत्तैः ॥ अलिकुलैरलघु गीतमभीष्टमाद्रियन्यर्हि संधितवेणुः ॥ १० ॥
सरसि सारसहंसविहंगाश्चारुगीतहृतचेतस एत्य ॥ हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥ ११ ॥

किं च सरसि कमलवनेषु विहरतां पक्षिणामपि मनआकर्षणं तद्गीतं किं पुनरन्येषामित्याहुः । दर्शनीयतिलक इति । दर्शनीयस्तिलको यस्य । दर्शनीयानां सुंदराणां मध्ये मुख्य इति वा । वनमालासु या दिव्यगंधा तुलसी तस्या मधुना मत्तैरलिकुलैरलघु उच्चैरभीष्टमनुकूलं गीतमाद्रियन्नादरेण गृह्णन् यर्ह्यधरे संधितवेणुर्भवति ॥ १० ॥ तर्हि ये सरसि सारसा हंसा अन्ये च विहंगास्ते चारुणा गीतेन हृतचेतस एत्य तत आगत्य हरिमुपासताभजन् । तत्समीपे उपविविशुर्वा । हंतेति विषादे ॥ ११ ॥

प्रेम ससृजुः । सार्वदिकेषु च लोकेषु स्ववृत्तांतेन श्रीकृष्णप्रेम विस्तारयामासुरित्यर्थः । तदेवमुभयत्र विष्णुत्वं तद्व्यक्तिचिह्नानि च व्याख्यातानि ॥ ८ ॥ ९ ॥ (४) ॥ अन्यदद्भुतमाहुः—किं चेति । तद्गीतम् कृष्णवेणुगीतम् । तिलको भल्लाकृतिपुंड्रविशेषः । तदुक्तम्—“ नासाग्रात्केशपर्यंतमूर्द्ध्वपुण्ड्रमुदाहृतम् । अधो भल्लाकृतियुतं कृष्णधार्यमतिस्फुटम् ॥ ” इति वैष्णवशास्त्रे । दर्शनीयतिलकास्त्वन्येऽपि सन्तीत्यरुच्याह—दर्शनीयानामिति । “ तिलको द्रुमभेदाश्वरोगेषु तिलकालके । सौवर्चले प्रधाने च विवरणे च विशेषके ॥ ” इति हलधरः ॥ (१०) ॥ अन्ये च चक्रवाकप्लवकारंडवादयः । हृतचेतस आकृष्टबुद्धयः । यतचित्ता एकाग्रमनसः । मीलितदृशोऽर्द्धोन्मीलितनेत्राः । धृतमौनास्त्यक्तनिजनिजारावाः । ततः सरसः । उपासनपदस्योभयार्थत्वादाह—तत्समीप इति ॥ * ॥ गृहारामाणामिव तरुलतानां वैष्णवतामुक्त्वा आत्मारामाणामिव हंससारसादीनां वेणुश्रवणहेतुकां विष्णूपासनामाहुः—दर्शनीयं द्रष्टुमर्हं तिलकं गैरिकादिमयं यस्य सः । दर्शनीयेष्वतिसुंदरेषु मध्ये तिलकतुल्य इति वा । वनमालासु: पंचवर्णपुष्पपत्रमयीषु दिव्यगंधा या तुलसी तस्या मधुना मत्तैरलिकुलैः, मत्तत्वादेवासंकुचद्भिः । अलघु गीतम् उच्चैर्गीतम । ननु च कमलमालतीनागकेशरादिपुष्पाण्येव लोकाः सुसौरभत्वेन ख्यापयंति, न तु सर्वतो माहात्म्येनाधिकामपि तुलसीम्, उच्यते—तुलस्या गंधः कश्चित्प्राकृतलोकैर्ग्राह्योऽत्यल्पतर एव, अप्राकृतलोकैस्तु ततोऽधिकः, भगवन्मालाधिकारिभृंगैस्तु ततोऽप्यधिकोऽत्यसाधारणः, सर्वाधिकतमस्तु भगवन्नासिकैकमात्रवेद्य एव अन्यत्र योगमाययावरणात् । तदुक्तं वैकुंठवर्णने—“ गंधेऽर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमनसो बहु मानयंति ” इति । अभीष्टमिति—वेणुगानारंभे केन स्वरेण गेयमिति सति तदैव मिलितानां भ्रमराणां हुंकारे वृत्ते साधुसाधु भ्रमर एष एव स्वरो गृह्यते इत्याद्रियन्सम्मानयन्यर्हि अधरे संधितवेणुः सम्यग्धृतवेणुर्भवति, संधानं संधा सा जाता अस्येति संधित इतच्प्रत्ययांतः ॥ तदा हरिमेत्य सरसः सकाशात् हरिसमीपमागत्य तमुपासत दर्शनश्रवणमननैरभजन् । मीलितदृश इति दृङ्मीलनं रसास्वादानुभावः ॥ अत्र **तोषिणी**—तदेवं मल्लवेषं प्राप्तत्वेन पूर्वं मल्ललीला सूचिता । ततश्च गानश्रवणेन भ्रमणं, संप्रति तु वेषांतरादिवर्णनेनेदं लभ्यते । ततः परिश्रांत आसन्ने मध्याह्ने कचिन्महासरसि स्नात्वा द्रुतरचिततिलकवनमालामात्रस्वल्पवन्यवेषपूर्वकं तैः सह तत्कालोपयुक्तवन्यभोजनपूर्वकं च प्रथितोच्चदेशे महातरुतलशिलायामुपविश्य गोसंभालनाय प्रस्थापितेषु सखिषु नूतनवनमालाकृष्टभ्रमरमात्रपरिवारतया कृततदवधानः सन्नेवं वेणुवाद्यविनोदेनारमत इति वर्णयंत्यः—तत्र चास्तां सर्वत्र विश्वस्तानां स्थावराणां वार्ता, तद्विपरीतानां पक्षिणामपि श्रूयतामित्याहुः—दर्शनीयः सर्वदैव द्रष्टुं योग्यः सततमनोहरो गैरिकादिमयस्तिलको यस्य सः। दिव्यातिदिव्यपुष्पगणवनमालायामपि दिव्यः सर्वोत्तमो गंधो यस्याः सा तुलसीत्यलिकुलानामाकर्षणे हेतुः । अत एव तन्मधुनोऽपि तादृशत्वं दर्शितं, मदस्य चालिकुलैरित्यत्यंतसंकीर्णताशंकापरिहाराय पर्यायेणैव तत्सान्निध्यं बोद्धव्यं बलिभिर्दुर्बलानामपसारणात् । मत्तत्वादेवालघु तस्मादेव वैशिष्ट्यं च ज्ञेयम्—अभीष्टमिति । स्वजात्यनुसारेण ते यद्यद्गायंति तदेव तस्य परमकौतुकत्वादनुकूलमित्यर्थः । यद्वा—तेषां श्रीवृंदावनसंबंधिनामलौकिकत्वात्तस्य यदायदा यद्यदभीष्टं तदातदा तत्तदेव विचित्ररागेण गायंतीति तथोक्तम् । अत्र चाभीष्टमिति सप्रणयेर्ष्यम्—संत्येव विचित्राणि तदभीष्टानि किं त्वस्मत्संबंधं विनेति भावः । अभीष्टत्वादेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहबलः स्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ॥ हर्षयन्यर्हि वेणुरवेण जातहर्ष उपरंभति विश्वम् ॥ १२ ॥
महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिश्छायया च विदधत्प्रतपत्रम् ॥ १३ ॥

मेघोऽपि हरिं सेवत इत्याहुः । सहबल इति । भो व्रजदेव्यो गोप्यः सहबलः सरामः कृष्णः स्रग्भिर्निर्मिताभ्यामवतंसाभ्यां कर्णभूषणाभ्यां विलासो यस्य । यद्वा मुक्ताफलस्र गापीडेन विलासो यस्येति । क्षितिभृतः सानुषु गिरेस्तटेषु वर्तमानः स्वयं जातहर्षो विश्वं हर्षयन्यदावेणुर वेणोपरंभति निनादयति । नादेन पूरयतीत्यर्थः ॥१२॥ तदा मेघो महतः कृष्णस्यातिक्रमणे शंकितं चेतो यस्य स न पुरतो याति न पुनरुपरि अतियाति न चोच्चैर्गर्जति ।किं तु तत्रैव स्थितः सन्वेणुरवमनु मंदमंदं गर्ज्जति । किं च सुहृदं विश्वार्तिहरणादिसाम्यात्सुहृत्सखा कृष्णस्तं सुमनोभिरभ्यवर्षत् । अदृश्यैर्देवैः क्रियमाणं कुसुमवर्षं मेघे कल्पयित्वोक्तम् । तुषारो वा कुसुमतया कल्पितः स एव वा देवतारूपो ऽभ्यवर्षदिति । प्रतपादातपात्त्रायत इति प्रतपत्रं छत्रं तच्छायया कुर्वन्निति ॥ १३ ॥

द्रियन् यर्हि संधितवेणुरिति यदा तदीयस्वरोचिततद्गानारंभमात्रमित्यर्थः ॥ तदैव सरसि तस्मिन् स्थिता ये ते सर्वेऽपीत्यर्थः । विहंगाश्चक्रवाकादयः । एत्य तद्गीताभिमुखमागत्य । हरिं मनोहरस्वभावतया तथा प्रसिद्धं श्रीकृष्णमुपलक्ष्यीकृत्याऽऽसत, तेऽनंताः सुखविहारपरा अपि । यद्वा—परमभागधेयाः । तत्र तेषामानंदमूर्च्छामाहुः—यताचित्ता इत्यादिना । हंत खेदे । तथा निजाभीष्टलाभाद्विस्मये वा । हरिमिति पूर्ववद्दृष्टां तगर्भः श्लेषः । ततः पक्षे हरिं विष्णुमुपासताभजंत । उपासनालक्षणं—यतेत्यादि ॥ १० ॥ ११ ॥ (९) ॥ अन्यदाहुः—मेघ इति । स्रग्भिः पुष्पैः । अप्राप्तरत्नैर्विशेषतः पुष्पालंकारा ध्रियंते कृष्णस्तु न तादृश इत्याह—यद्वेति । मुक्ताफलानां स्रग्भिः पंक्तिभिः कृतेनापीडेन मुकुटेन विलासो लीला यस्येति “ स्रक्पुष्पे पुष्पमालायां रच्नालिरचनासु च ” इति निरुक्तेः । “अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे ” इति मेदिनी । “ विलासो हारभेदे स्याल्लीलायामपि पुंस्ययम् ” इति मेदिनी । स्वयं जातहर्षः स्वाभाविकानंदवान्, न तु भूषणवस्त्रादिधारणजानंद इत्यर्थः । उपाद्रम्भतेः परस्मैपदमार्षम् । इत्यर्थ इति—धातूनामनेकार्थत्वान्निनादेऽपीति भावः ॥ (१२) ॥ पुरतोऽग्रे । किं तु अपि तु । तत्रैव यत्र कृष्ण इत्यर्थः । न केवलं स्थित इत्याह—किञ्चेति । मेघो हि वर्षणेन तापदुर्भिक्षादिनाशकरत्वाज्जगदार्तिहरः, श्रीकृष्णस्तु दुष्टनाशकत्वेन तथेति साम्यम् । कुसुमतया स्पर्शसाम्येन कल्पितः । स एव मेघ एव, कामरूपत्वान्मेघानाम् “ जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ” इति कालिदासोक्तेः । ‘ विपूर्वो धा करोत्यर्थे ’ इति व्याडयुक्तेर्विदधत्कुर्वन्नित्यर्थः ॥ * ॥ भूमिष्ठानामानंदमनुवर्ण्याकाशस्थानां जडानामपि वेणुनादहेतुकं तं वर्णयति—सहबलः सहचरसैन्यसहितः । स्रग्भिश्चूडावक्षःस्थलव र्तिनीभिः, अवतंसाभ्यां कर्णवर्तिनीभ्यां च विलासः शोभा यस्य सः । सानुषु गिरेर्नितंबेषु स्थितः स्वयं वेणुरवेण जातहर्षो विश्वं यर्हेषन् हर्षयितुं यदा उपरंभति । रलयोरैक्यादंतर्भावितण्यर्थत्वाच्च वेणुरवमुपलंभयत्यास्वाद यतीत्यर्थः । अत्र कृष्णस्य गिरिनितंबवर्तिमेघत्वे स्रगवतंसानां बलाकात्वं, पीतांबरस्य विद्युत्त्वं, वेणुरवस्य वृष्यमाणसुधारसासारत्वं गम्यम् ॥ तदा मेघ आकाशस्थो महदतिक्रमेण महतः सतः सकाशादतिश्रेष्ठस्य कृष्णमेघ स्यातिक्रमणशंकितचित्तः मंदमंदमनुगर्जति, वेणुरवस्यानुकूल्येनैव प्रतिकूलो नेत्यर्थः । सुहृदम् विश्वार्तिहरणकर्मवर्णसाम्यात्सखायम् । सुमनोभिः सूक्ष्मपुष्पतुल्यैर्हिमकणैः, अभि परितः सूर्यातपनिवृत्त्यर्थमवर्षत् ॥ अत्र **तोषिणी**—ततश्च मध्याह्ने सखिभिरानीतैः स्रगवतंसादिविचित्रवेशैर्विलसन्, गवामनुरोधेन निश्छायेष्वपि गिरेः समभूभागे भ्रमन्, मेघच्छायेच्छया मल्लाररागं गायन्, श्रीबलादिसखिभिः प्रतिध्वनिभृद्भिरिसानुभिस्तत्तत्प्रतिध्वनि भृद्भिश्च कृतानुगानस्तादृशतादिच्छया स्वल्पाकर्षणप्रयोगात्तावन्मात्रमेघागमनेन मंदमात्रगर्जनजनितवाद्यस्तत्तुमुलशब्देन स्वयमपि हृष्टो विश्वमपि हर्षयन्, अतएव मेघाऽऽच्छन्नदेवादिभिः कृतपुष्पवृष्टिस्तच्छायायां विक्रीडति स्म । तदेत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षः ॥ तव सुतः सति यदाऽधरबिंबे दत्तवेणुरनयत्स्वरजातीः ॥ १४ ॥
सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥ कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः ॥ १५ ॥

अपि च महदेतदाश्चर्यमित्याहुः । विविधेति । हे सति यशोदे तव सुतो नानागोपक्रीडासु विदग्धो निपुणो वेणुवाद्ये विषये निजैव शिक्षा यासु ताः । स्वोत्प्रेक्षिता न त्वन्यतः श्रुता इत्यर्थः । स्वरजातीर्निषादऋषभादिस्वरालापभेदाननयदुन्नीतवान् ॥ १४ ॥ तत्ताः स्वरजातीः सवनशो मंद्रमध्यमतारभेदेन यतो गीतध्वनिरागतस्ततश्चानता कंधरा चित्तं च येषां ते उपधार्य समाकर्ण्य कवयः कोविदा अपि न निश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुरिति ॥ १५ ॥

ह्लीलास्फूर्तियुक्तानां तासामभिप्रायेणावतारिकेयम्—अहो आस्तां पृथक्पृथक्तदुल्लेखः विश्वस्याप्यानंदो दृश्यतां तत्र चान्येषां का वार्ता दूरस्था चेतनाचलस्वभावस्यापीति वर्णयंत्यस्तद्रूपगुणचेष्टाभिः श्रीकृष्णेन सौहृद्यमेव संभावयंति—सहबल इति । श्रीबलभद्रेण सहित इत्युपलक्षणं सख्यंतराणाम् । सखिसैन्येन सहित इति वा । विलासो विनोदः । क्षितिभृतः प्राधान्येन श्रीगोवर्धनस्य कदाचिदन्यस्यापि सानुषु समभूभागेषु, तत्र यौगिकार्थस्तु तत्तत्प्रशंसासूचकः । अस्यैव क्षितिभृत्त्वं युक्तमिति भावः । हे व्रजदेव्यः परमदिव्यगणस्पृहणीयसौभाग्यस्य व्रजजनस्यापि मध्ये देव्यो दिव्यत्वेनाभिमता इत्यर्थः । अतः परमवैदग्धी च सूचिता । अतस्तद्वेणुगानतत्त्वं युष्माभिरेवावधार्यत इति भावः ॥ तदेवं सपरिकरस्य तस्य विश्वस्यापि परमहर्षे सति नूनं मेघोऽपि प्रहर्षेणोच्चैर्गर्जितुमिच्छन्नपि महतः श्रीकृष्णस्यातिक्रमेण निजोच्चशब्देन तद्वेणुरवाच्छादनापराधस्तस्मिञ्शंकितचेताः सन्ननुकूलतया तद्गानपोषणायेत्यर्थः । मंदंमंदं गर्जति परिश्रांतं च मत्वा तमप्याप्याययतीत्याहुः—सुहृदं तद्वर्गाद्यनुकारात्सखायं श्रीकृष्णम् अभिलक्ष्यीकृत्य सुमनोभिः करणभूतैरभ्यवर्षत् । अभ्यषिञ्चदित्यर्थो वा । गर्जनस्य वर्तमानप्रयोगेण पौनःपुन्यं, वृष्टेरतीतप्रयोगेण सुहृत्त्वं बोध्यते । किं कुर्वन्—छायया तदुपरि छत्रं विदधत् । छायां कुर्वता स्ववपुषेत्यर्थः । अन्यत्तैः । तत्र स्रग्भिरिति प्रथमार्थे, खंडितनानावर्णपुष्पदलरचितांतरंतःसूक्ष्मसूक्ष्मतरसूक्ष्मतममंडलमयीभिः श्रेणिभिरित्यर्थः । निनादयतीति शब्दार्थाय रभेरंतर्भूतण्यर्थतांगीकारः । परस्मैपदं नुम् चार्षम् । यद्वा—स्रग्भिरवतंसाभ्यां च विलासो यस्य । यद्वा—स्रग्भिरवतंसो मौलिर्विलासश्च विविधा क्रीडा यस्य सः । उपरंभति ‘रभ—राभस्ये’ इत्यस्मात् । कौतुकीभवतीत्यर्थः । मंदमंदमित्यस्यावर्षदित्यनेनाप्यन्वयः । श्लेषेण सुमनोभिरिति शोभनमनोवृत्तिभिः छायया च निजदेहेन मंदमंदगर्जनाद्वाचापीत्येव त्रिधा सेवाप्युत्प्रेक्ष्या ॥ १२ ॥ १३ ॥ (६) ॥ अपि च अन्यच्च । स्वेनैवोत्प्रेक्षिताः कल्पिताः । इत्यर्थ इति—एतस्यैव सर्वशास्त्रयोनित्वम् । “ शास्त्रयोनित्वात् ” इति न्यायात् । यद्वा—विविधानां गवां गीतशब्दानां पतयो गंधर्वास्तेषां चरणेषु गीतगतिषु विदग्धः समर्थः । यद्वा—विविधानां स्वस्वजातिस्वभावचेष्टासु नानाविधानां गोपानां चरणेषु कर्मसु विदग्धः कुशलः । यद्वा—विविधो गोपो रक्षणं तस्य चरणेषु तत्तदापद्रक्षणविधिषु विदग्ध इत्यर्थः ॥ (१४) ॥ मंद्रो गंभीरः । “ मंद्रस्तु गंभीरे तारोऽत्युच्चैस्त्रयस्त्रिषु ” इत्यमरः । यतो यत्र । ततस्तत्र । कोविदा अपि गानपारज्ञा अपि । तद्भेदो गानभेदः । कस्मिन्स्वरे को रागो भैरवश्रीरागहिंदोळमालकौशिकमेघमल्लारदीपकादिष्वन्यतमः । का वा शावरीगुर्जरीललितटोडीगन्धाविलावलसिंधुजयवंतीगौरीकल्याणकर्णाटपर्जदेशसोरठशोणीविहागादिष्वन्यतमा गायित इति । तत्तत्त्वं न विदुः अपूर्वगानश्रवणात्तन्निश्चयं कर्तुं न शेकुरिति भावः ॥ * ॥ अथापराह्णे काश्चन गोप्य आगमिष्यतः स्वप्रेयसश्चिरदर्शनासिद्धयर्थं विचारितयुक्तयः केनचिन्मिषेण व्रजेश्वरीसदनं गतास्तत्र च विविधवृद्धायुवतिबालिकाभिः संभूय विस्तार्यमाणाः स्वसुतगुणकर्मप्रभावकथाः शृण्वतीं स्वयञ्च कथयंतीं सुतविरहविह्वलां तां स्वस्वमनश्च समाश्वासयितुं तां संबोध्य वेणुगानगुणप्रभावं वर्णयंति—विविधेति । हे सति श्रीयशोदे विविधं गोपानां चरणान्याचरणानि गवां कालतो दोहनवशीकरणादीनि तेषु विदग्धस्तव सुतः अधरबिंबे दत्तवेणुः सन् यदा स्वराणां षड्जादीनां जातीरष्टादशमुख्याः अन्याः सहस्रशो वा नयत् उन्नीतवान् । कीदृशीः—वेणुवाद्यविषये उरुधा बहुप्रकारा निजात्स्वस्मादेव न तु परस्मात्कस्माच्चिदपि शिक्षा यासु ताः ॥ सवनशः समयेसमये तत्स्वरजात्युन्नयनमुपधार्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवः शमयन्खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ १६ ॥
व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ १७ ॥

अस्माकं तु मोहं किं ब्रूम इत्याहुः । निजपदाब्जदलैरिति । ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन्वर्ष्मणा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो वादितवेणुः सन्यद्व्रजति ॥ १६ ॥ तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववेगो यासु ता वयम् । कुजा वृक्षास्तेषां गतिं गमिताः सत्यो मोहेन न विदामः कबरं वा वसनं वेति ॥ १७ ॥

शक्रशर्वपरमेष्ठिनः पुरोगा मुख्या येषां ते शक्रोपेंद्राग्नियमादयः शर्वकात्यायनीस्कंदगणेशादयः ब्रह्मचतुःसननारदादयश्च कवयो गानतालादिसृष्टिकर्तारोऽपि आनता कंधराश्चित्तानि च येषामिति गानमाधुर्यस्वादानुभावः । न निश्चितं रागस्य तालस्य तानस्वरादीनां च तत्त्वं स्वरूपं यैस्ते । ततश्चाज्ञानाद्वेणुमाधुर्याच्च मोहं प्रापुः । अहो जगदीश्वरा यत्र मुमुहुस्तत्र जगदीशितव्यानामन्येषां मोहे को विचार इति । आर्ये जगन्मोहनोऽयं तव सुतोऽभूदिति भावः ॥ अत्र **तोषिणी**–एवमेकांतगोष्ठीः संगृह्य श्रीगोष्ठेश्वरीगोष्ठीगतापि गोष्ठी तल्लीलाक्रमप्राप्ततया संगृह्यते । तत्रापि विविधप्रकारविशेषेग तत्कथामेव तां कुर्वंतीति विवक्षया तत्रोत्क्रांते मध्याह्ने स्वपुत्रागमनाविलंबाशंकया तां खिद्यमानां तद्विलंबहेतून्न्यासपूर्वकमगोपनीयरसनिबंधेन निखिलपरमाश्चर्यवैदग्धीमयतत्क्रीडाभिनिवेशवर्णनेन प्रोत्साहयंत्यः सांत्वयंति, निगूढं तु स्वेषामपि झटिति तदागमनेच्छया तद्द्वारा तदभिनिवेशं वारयितुमभिप्रयंति, साधारणजनवत्स्पष्टतद्वार्ताकथनेन निजभावगूहनमपि कुर्वंति–विविधेति । विविधगोपाचरणेषु विदग्ध इति सामान्यतस्तैरेव सर्वमनोहर इत्यर्थः । तत्र चाधरबिंबे दत्तवेणुस्तेनातिविराजमानः सन्नित्यर्थः । यदा विश्वहर्षणादिसमये स्वरजातीरुत्थापितवाँस्तत्रापि वेण्वित्यादिलक्षणा उरुधा निजैव शिक्षा यासु ताः तादृशीश्च ताः । वेणुवाद्य इति पाक्षिकोऽन्वयः । अन्योन्यस्वरादावपि निजशिक्षामयत्वे वेणुवाद्यत्वाधिक्यमिति दर्शितम् । यद्वा–स्वरजातीः कथंभूताः--निजशिक्षाः, पुनः कथं० वेणुवाद्ये उरुधा, तत्र तु नानाप्रकाराः, तत्रापि पूर्ववत् । हे सति जगत्पूज्ये, अतस्त्वत्सुतस्यापि तादृशत्वं युक्तमेवेति भावः ॥ उपधार्य श्रुत्वेति स्वस्वस्थानादेव श्रवणं लभ्यते, ततश्च तस्य फलरूपत्वेऽपि सर्वव्यापकत्वं बोधितम्, तथैव निजशिक्षाविशेषात्सुरेशा गंधर्वादिद्वारा गीतादिश्रवणसंप्रत्तिमंतोऽपि स्वयं कवयोऽपि शक्रपुरोगास्तत्सहितलोकपालादयो देवजातयः, शर्वपुरोगास्तत्सहितदेवीस्कंदगणेशास्तद्गणाः, परमेष्ठिपुरोगास्तत्सहितचतुःसननारदसप्तर्षिप्रजापतिगणादयः । क्रमस्तु शक्रादीनां बहिरिंद्रियेग प्रथमत एव तच्छ्रवणात्, शर्वस्य कैलासस्थत्वेऽप्यंतर्निष्ठत्वेन तदंतरमेव, परमेष्ठिनस्तु दविष्ठत्वेन तदनंतरमेवेति । चित्तस्यानतत्वं तच्छ्रवणत्वमेव । कस्य स्वरस्य प्रभेदो गीयते इति निश्चयाभावात्, वेणुनादमाधुर्याच्च कश्मलं ययुः । अन्यत्तैः । अथवा–स्वराञ्जातीश्च सवनशोऽनुकालं वारंवारमपि श्रुत्वेत्यर्थः । यद्वा--न निश्चितं तत्त्वं किमद्भुतमाधुरीमयमिदं सुषिरगीतम्, किं वान्यः परमचमत्कारकारी तावदपूर्वः कर्णग्राह्यः कोऽपि विषयः, किं वा महामोहनः कोऽप्येष मंत्र उल्लसतीति वेणुगीतस्य याथार्थ्यं यैस्तथाभूताः संतः पश्चात्कश्मलं प्रापुस्तदेकलीनचित्तत्वात्सर्वं विसस्मरुरित्यर्थः । अन्यत्समानम् ॥ १४ ॥ १५ ॥ (७) ॥ पुनराह–अस्माकमिति । “ ललामोऽस्त्री ध्वजे श्रेष्ठे भूषायां पुंड्रचिह्नयोः ” इति यादवः । यद्वा–निजानि नित्यानि पदानि पादांका एवाब्जानि तेषां दलैरितस्ततस्थापनैः ॥ (१६) ॥ तेन निमित्तेन वर्ष्मधुर्यवद्गमनरूपेण हेतुना सविलासवीक्षणेन विभ्रमोपेतदृष्ट्या वेग उद्रेकलक्षणसंस्कारः कौ भूमौ जायते इति कुजो वृक्षः । ‘ व्रजगतिम् ’ इति पाठे तु ब्राह्मे मुहूर्ते रासांते कृष्णेन प्रापिता इत्यर्थः । मोहेन मनोऽनवस्थालक्षणेन कबरं स्रस्तं केशपाशं वसनं कञ्चुक्यादिधृतम् ॥ * ॥ अथान्ययूथस्थाः स्वसखीः प्रति वेणुहेतुकं स्वमोहमेवाहुः–निजपदान्येवाब्जदलानि तैः । कीदृशैः–ध्वजादीनि विचित्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मणिधरः क्वचिदागणयन्गा मालया दयितगंधतुलस्याः ॥ प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र ॥ १८ ॥
क्वणितवेणुरववंचिताचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १९ ॥

किं च । मणिधरो मणीन् ग्रथितान्गोगणनार्थं धरतीति मणिधरः क्वचिद्देशे एतैर्मणिभिर्गा आसमंताद्गणयन् । तथा दयितगंधा या तुलसी तस्या मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत ॥ १८ ॥ तदा क्वणितवेणुरवेण वंचितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्या गुणगणार्णं गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य ताः कृष्णमेवान्वसतान्वासत न न्यवर्ततेत्यर्थः । कुतः । यतो विमुक्ता गृहाशा

ललामानि चिह्नानि येषां तैः । गोष्ठगमनसमयेऽग्रतो गतानां गवां खुरतोदं खुराक्रमणव्यथां व्रजभुवः शमयँस्तदुपारि स्वचरणाब्जन्यासेन शमयितुं यदा वर्ष्मगा देहेन धुर्यो गजस्तद्वद्गतिर्यस्य स कृष्णो व्रजति ॥ तदा तेन कृष्णेन सविलासवीक्षणेनैवार्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषामिव गतिं गमिताः प्रापिताः सत्यो मोहेन कबरं वसनं वा न विदामस्तयोः स्खलनं न जानीम इत्यर्थः । तेन व्रजभुवः चरणांबुजन्यासेन शमयामास, व्रजसुभ्रुवां तु मनसिजतोदं नयनांबुजन्यासेनोत्पादयामासेत्येवमेवास्माकं ललाटमिति द्योतितम् ॥ अत्र **तोषिणी**—अथ तदनंतरजातलीलामयीगोपनीयरसानिबद्धा पुनरेका काचिदेकांतगोष्ठी संगृह्यते । तत्र तादृशनानाकथाश्रयेण लंघितेऽपि तृतीये यामे नागते श्रीभगवति काश्चिदुत्कंठितचित्ता गोपिकाः गोपावृत्तिसमये तदन्वेषणार्थं पुष्पावचयादिमिषेण कदाचिद्गच्छंति च वनमध्यम्, तत्र दृष्टं दिनांतरे प्रस्तुवंति च । तदेवमवतारिका—अहो प्राणसख्यस्तत्रतत्र चान्येषामस्तु मोहकथा स्फुटमस्माकमेव श्रूयतामिति भाववैवश्येनाहुः—निजेति । निजशब्देनासाधारणत्वं व्यज्यते। बहुत्वं गौरवेण, प्रतिन्यासपूर्वरूपत्वविवक्षया वा । निजत्वादेव ध्वजादीनि विचित्राण्यद्भुतानि ललामानि येषु तैः । यद्वा--ध्वजादिभिर्विचित्रैर्ललामैश्च सुंदरैः । उपलक्षणानि चैतानि प्रसिद्धानां चक्रादीनामप्रसिद्धानामष्टकोणादीनाम् । व्रजभुवः व्रजसंबंधीगोप्रचारभूमेः । लक्षणया तद्गततृणादीनामित्यर्थः । गवादिखुराक्रमणव्यथां शमयन्निति—गवां पश्चात्पश्चाद्गच्छतो भगवतः पादाब्जस्पर्शस्वभावत एव सद्यस्तृणांकुरोत्पत्तेः । अत एवासंख्यधेनुवृंदनित्यचारणसमावेशः स्यात् । तत्र विलासमाहुः—वर्ष्मधुर्यगतिः गजेंद्रवच्छनैःशनैश्चलन्नित्यर्थः । यत ईरितवेणुः शीघ्रगमने सम्यग्वेणुवादनमस्पष्टमिति । यद्यपि स्वाभाविकमेव तत्तस्य तथापि विलासविशेषेण विस्पष्टमपि स्यादिति तथोक्तम् । ततोऽस्मद्दृष्टिविषये त्वधिकमेव तथाचारितमिति व्यञ्जितम् ॥ व्रजति इतस्ततो भ्रमतीत्यर्थः । तेन कारणभूतेन यत्सविलासं सलीलं वीक्षणम् अस्मासु तत्रतत्र च तेनार्पितोऽन्तर्निहितो मनोभवस्य वेगो यासु ता इति स्वतोऽप्रतिकार्यत्वमुक्तम् । कुजगतिम् स्थावरत्वम्, जाड्यमित्यर्थः । गमिताः प्रापिताः । यद्वा—तेनेति कुजगतिगमितत्वे सविलासे सति न विदाम इत्यत्र हेतुर्विवेचनीयः । तस्य व्रजजनेनास्माकमगत्वं वैदग्ध्या च मुग्धत्वमिति कारणवैपरीत्येनाद्भुतत्वं ततस्तस्य परममोहनत्वं स्वेषां दैन्यं च दार्शितम् । कबरं वसनं वा न विद्मः, स्खलितमिति शेषः । तदनुक्तिर्लज्जया । कबरमिति कियत् वसनमपीत्यर्थः । वा समु च्चये टीकायामपि तथैव ॥ १६ ॥ १७ ॥ (८) ॥ अन्यदाहुः—क्विचेति । तथा विशेषगांतरमाह—अंसे भुजशिरसि । प्रक्षिपन्निदधानः । यद्वा—मणिधरः कौस्तुभधरः “ मणिः स्त्रीपुंसयो रत्नजातौ मुक्तादिकेषु च । कंठदेशस्तनेऽजाया लिंगाग्रेऽलिंजरेऽपि च॥”इति मेदिनी ॥ (१८)॥ अन्वसतेह दीर्घाभावस्त्वार्षः । इत्यर्थ इति—किंचिद्गुणवानपि लोके न त्यज्यते किमुत गुणगणाब्धिरित्याशयः । तत्र हेतुमाशंक्य समादधिरे—कुत इति। यतो हेतोर्गृहाशा त्यक्ताऽतो हेतोः कृष्णमुपासत, त्यक्तसर्वपरिग्रहैरेव कृष्ण उपास्यत इति भावः ॥ * ॥ गोष्ठस्थानां स्वेषां मोहनमिव वनस्थानां मृगीणां वेणुहेतुकं मोहनमाहुः—मणिधरः गोगणसंख्यानमाणिमालाधरः । शुक्लरक्तश्यामपीतानां चतुर्णां वर्णानां प्रत्येकं पंचविंशतिप्रभेदैः शतं वर्णा भवंति । तथैव चित्रितत्वचंदनतिलकत्वादिवर्णैर्मृदंगमुखत्वाद्याकारैश्चान्येऽप्यष्ट प्रभेदा भवंति । ततश्च तत्तद्वर्णाकारैरष्टोत्तरशतमणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार ॥ २० ॥
मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन ॥ बंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः ॥ २१ ॥

याभिस्ता गोपिका इव ता अपि ह्येवमेवान्वासतेति ॥ १९ ॥ तदेवं वृंदावनप्रदेशेषु क्रीडित्वा सयाह्ने गोधनानि परावर्त्य यमुनाया क्रीडतस्तस्य सौभाग्यमनुवर्णयंति । कुंद दामकृतकौतुकवेष इति । गोपीनामुत्सवाय कुंददामभिः कृतः कौतुकेनोत्सवेन वेषोऽलंकारो येन सः । हे अनघे यशोदे तव वत्सः पुत्रो नंदसूनुः कृष्णः । यद्वा सहैव बह्वयः कथयंत्यः काश्चित्तव वत्स इति काश्चिन्नंदसूनुरिति चाहुः । नर्मदो हर्षदः सन्यदा विजहार क्रीडति स्म ॥ २० ॥ तदा मलयजस्पर्शेन मलयजस्य चंदनस्येव सुरभिः शीतश्च यः स्पर्शस्तेन तं कृष्णं मानयन्ननुकूलं यथा तथोपवाति वीजयति । यद्वा मलयजो दक्षिणो वायुः । यद्वा मलयजस्य कृष्णेन स्वांगेऽनुलिप्तस्य चंदनस्य स्पर्शेन मानयन्निति । किं च बंदिन इव स्तावकाः संतो गंधर्वादिगणा वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः परित उपासत ॥ २१ ॥

गोलकैर्गोगणनार्थं श्रीकृष्णेन गोजपमालैका कृतास्ति, तां मालां गृहीत्वैवासंख्यानामपि गवामष्टोत्तरशतं यूथान् पृथक्पृथग्वर्णान् गणयति । तथाहि–हिहीं धवरीत्याह्वानेन धवलीयूथो यथा तथैव हंसी चंदनी गंगे मुक्ते इत्याह्वानेन तत्प्रभेदाश्चतुर्विंशतिरन्येऽपि यूथा आयान्ति।एवमरुणी कुंकुमी सरस्वतीत्यादिसंज्ञा,श्यामला धूमला यमुनेत्यादिसंज्ञा, पीता पिंगला हारिता लिकेत्यादिसंज्ञा,चित्रिता चित्रतिलका दीर्घतिलका तिर्यक्तिलकेत्यादिसंज्ञा, मृदंगमुखी सिंहमुखीत्यादिसंज्ञाश्च स्वस्वनामभिराहूता आयांत्यतो वनाद्गोष्ठगमनसमये काश्चनापि गावो विस्मृता भवेयुरित्येकैकमगिगोलकावर्तनेन गा गणयन् दयितगंधा तुलसी तस्या मालया सह वर्तमानः प्रणयिनः प्रियस्यानुचरस्य स्कंधे भुजं प्रक्षिपन् यदाऽगायत ॥ तदा वेणो रवेण वंचितान्यपहृतानि चित्तानि यासां ताः, कृष्णस्य गृहिण्यो हारिण्यः कृष्णमन्वसत अन्वासत । अन्ववर्ततेत्यर्थः । यतो गुणगणार्णं गुणसमुद्रं कृष्णमनुगत्य प्राप्य तद्गुणानास्वाद्येत्यर्थः । विमुक्ता गृहाशा याभिस्ताः गोपिका इव वयमप्येवंवृत्ता भवामः ॥ अत्र **तोषिणी–**अथापराह्ने स्वीकृतवेषांतरो गृहागमनाय मुहुर्वेणुगानेन गाः समाहरति गणयति च । अहो बत तत्र मृग्योऽप्याक्रियंते किमुत वयं गोप्य इत्याहुः–मणीति । मणिमालाधारी गा आगणयन् जगौ क्रमशस्तत्तद्यूथमुख्यमुख्याया नाम वेणुना गायति स्म । तास्तथैव स्वस्वयूथेनागतास्तत्तद्वर्णादिसंकेतीकृततत्तन्मणिमालया गणयति स्म चेत्यर्थः । यद्यपि कृष्णवत्सैरसंख्यातैरिति पूर्वोक्तं तथापि यूथेशादिगणनाभिप्रायेणैवेदमुक्तं, तद्बुद्धिप्रावीण्याभिप्रायेण वा । " उपर्युपरि बुद्धीनां भवंतीश्वरबुद्धयः " इति न्यायेन दयितगंधत्वेन तुलस्या मालया पत्रादिमालया सदा विशिष्ट इत्यर्थः। यद्वा–भ्रमरगानं मालायां प्रकल्प्य सापत्न्येन सेर्ष्यमाहुः । तया सहागायतेति तस्या धाष्टर्यं व्यंजितम् । किं कुर्वन्नगायत--किंचिन्नीचभूमिकास्थितस्यानुचरस्यांसे भुजं वामे दक्षिणमेव वा कूर्परोर्द्ध्वभागं प्रक्षिपन् लीलया विन्यसन् । अतः स एव प्रेमयुक्तसौभाग्यवान्न तु वयमिति भावः। क्वणितवेणुरवेति वक्ष्यमाणत्वाद्वेणुनैवागायदिति सिद्धम्॥ क्वणितेति विशेषणेन वादितो यो वेणुस्तस्य रवेण वंचितानि प्रलंभितानि तत्पूर्वकमपहृतानि चित्तानि यासां ताः। कृष्णगृहिण्यः कृष्णेति देशपावनपतिका अपीत्यर्थः । गृहिण्य इति मानुषजातित्वत्पत्युः परमप्रेयस्योऽपीत्यर्थः । कृष्णमन्वसत तत्परित्यागेन कृष्णमेव श्रिता इत्यर्थः । तत्र हेतुः–गुणगणार्णमिति। कृष्णगृहिण्य इति श्लेषेणापि कृष्णभार्यात्वं प्राप्ता इति नर्म। विमुक्तेति तैर्व्याख्यातम्। यद्वा–विमुक्ता गृहा आशाश्चाशनं च याभिस्ताः, गृहं पत्यादिपरिकरः। वयमित्यनुक्त्वा गोपिका इत्युक्तं गोपिकाजातित्वेनैव तदके स्वभावासिद्धेस्तदभावेऽपि तासामित्यभिप्रायेण। यद्वा–वयमित्युक्तेरपि गोपिका इति रसविशेषपोषकत्वं परोक्षवचनात् ॥ १८ ॥ १९ ॥ (९) ॥ तदेवम् तदेत्थम् । केचित्तु विवाहे यद्रक्षकरे पूगपीतसर्षपादियुतं सूत्रं बध्यते तत्कौतुकं, तत्संबंधी वेषो वैवाह्यवेषो यस्य स तथा । " कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः। तथा परंपरायातमंगले च कुतूहल ॥ विवाहसूत्रगीतादिभोगयोरपि न द्वयोः " इति मेदिनी । तव वत्स इत्यनेनैव सुतत्वसिद्धौ नंदसूनुरिति महामुनेः कथनं वसुदेवात्मजत्वभ्रांतिवारणायैव, नंदाद्यशोदायां साक्षाज्जात इति तत्त्वावबोधाय चेति। नेयमेकोक्तिः पुनरुक्तिदोषाद्वदंत्या भ्रांतिसंभावनाकल्पनाच्चात आह--यद्वेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हर्षदः लीलावचनेनानंददः ॥ (२०) ॥ उपमानगर्भसमासापेक्षया तद्रहित एव स साधुः । " अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत् " इति न्यायेनात आह--यद्वेति । मलयसंबंधी वायुः स्वभावत एव सुगंधिशीतो भवतीति पुनरुक्तिदोषवायुद्वयसंबंधकल्पनाचास्वारस्यप्रतीतेरर्थांतरमाह--यद्वेति । न केवलं वायुरेवोपास्त किं त्वन्येऽपीत्याह--किन्नेति । स्तावका मंगलपाठकाः । गंधर्वादीहादिना चारणविद्याधरादयो ग्राह्याः । पुष्पादीत्यत्रोक्तादिनाभिनयादिग्रहः । तम् कृष्णम् । परिरत्रोपार्थे उपसर्गाणामप्यनेकार्थत्वात् ॥ * ॥ अथ व्रजेश्वरीसदनं गता गोप्यस्तमपराह्णे स्वपुत्रागमनविलंबेन विक्षुभ्यन्तीं तद्विलंबकारणोक्त्या सांत्वयंति- कुंददामेति युगलत्रयेण । वैष्णवतोषणी--यमुनायां पर्यटन् श्रमोपशांत्यर्थं तत्र स्नात्वा तत्तट उपविश्य कौतुकव्यंजकं वेशं परमोत्कंठया मेलिष्यतः स्वबंधून्सुखायितुं कृत्वा यदा विजहार पादविहरणं चकार तदा मंदवायुरुपवातीत्यन्वयः । प्रणयिनां वयस्यानां नर्मदः परस्परं हासोपहासं द्यति खंडयति ददाति चेत्यर्थः । अनघ इति--तव प्राक्तनमर्वाचीनं वा किमप्यघं नास्ति यतः पुत्रानिष्टं स्यात्तत् किमिति किंचिद्विलंबमात्रेणैवासुरादिहेतुकं । तदनिष्टं शंकस इति भावः । यतो नंदस्य पुण्यवच्छिरोमणित्वेन प्रसिद्धस्य सूनुः, तव च महापुण्ययशस्विन्वेनैव यशोदाया वत्सो महावात्सल्यपात्रीभूतः पुत्रः, लोके हि मातापित्रोरभाग्येनैव बालस्यानिष्टं भवेदतो न कृष्णस्य किमप्यनिष्टमिति भावः ॥ तद्विलंबस्य कारणं वयं बालकानां मुखेभ्य एव श्रुत्वा जानीमस्तच्छृण्वित्याह--मंदेति । मलयजस्य मलयपर्वतोत्पन्नचंदनवृक्षस्य स्पर्शेन सौगंध्यं शैत्यं च गृहीत्वा तयोर्भारेण द्रुतं चलितुमसमर्थो वायुः कृष्णं मानयन्ननुकूलं यथा स्यात्तथोपवाति । बंदिनस्तावका ये उपदेवगणा गंधर्वादयस्तेऽपि स्वस्वगुणान् दर्शयंतो वाद्यादिभिः परिवव्रुः । अत एव तत्तदनुमोदनहेतुको विलंबो जायते एव ' गुणिनि गुणज्ञो रमते ' इति न्यायात् । न चात्र खेदः समुचितः । त्वत्पुत्रं ते यदेवं संमानयंति तत्तवैव भाग्यमिति भावः ॥ अत्र **तोषिणी**--अथ पुनर्व्रजेश्वरीसभागतं पूर्वोक्तगोसमाहरणादिसामयिकलीलानंतरलीलावर्णनं संगृह्यते । तच्च समाहरणं द्वितीयजलपानसमय एव स्यादिति व्यज्यते । तत्र तादृशीं च लीलां स्वयमनुभूय कालातिक्रमेणार्तां तन्मातरं तदागमनवार्तया सुखयितुमभिगम्य पूर्ववदेवाहुः--कुंदेति युग्मत्रयेण । कुंदेति मंदेति च कार्तिकमासोऽयमिति लभ्यते वसंते कुंदानर्हत्वात्, हेमंतशिशिरयोर्वायोर्द्वैषाच्च । तत्र च तदीयेनं सर्वसुखदलीलत्वेन सर्वसुखसेवापात्रत्वेन च तां स्वस्थयंति, विलंबे कारणमपि निवेदयंति । यमुनायां विजहार--तस्या जले स्नानकेलिं विधाय तीरे सविलासं चिक्रीडेत्यर्थः । कीदृशः सन् विजहार, तत्राहुः--कुंददामेति । समस्तदिनभ्रमणश्रांत्या स्नानस्यापेक्षत्वात्कुंददाम्नां जलक्लिन्नतायामरुचिप्रदत्वेन तत्पश्चाद्भावयोग्यत्वाच्च । तत्र सर्वसुखदलीलत्वादिकं वदंत्यो विलंबे कारणमपि सूचयंति--गोपेत्यादिभिः । तस्य च तादृशत्वं युवयोः पुत्रत्वादनुरूपमेवेत्यर्थः । सर्वानंदकतया तन्नाम्ना प्रसिद्धस्य सूनुः । न विद्यतेऽवं दुःखं सर्वेषां यतः हे तथाभूत इति । तथैव सर्वानांदिन्यास्तव च वत्स इत्यर्थः । तत्र वत्स इति धेनूनां वत्स इव परमस्नेहविषय इत्यर्थः । अतस्तव त्वत्यर्थं वैयग्र्यं युक्तमेवेति भावः । गोपेति--जलादितृप्ततया स्थगितगमनैर्गोपैर्गोधनैश्चावृत इत्यर्थः । तत्रापि प्रणयः सख्यमयस्नेहस्तद्वतां नर्मदः सपरिहासकेलिभिः सुखद इत्यर्थः । कौतुकं क्रीडोत्सवो हर्षो वा । वेशोऽवतंसाद्यलङ्कारः । एवं पूर्ववेशपरित्यागेन वेशांतरं ज्ञेयम् ॥ अनुकूलम् प्रियम् । यद्वा--पृष्ठवायुत्वेन गमनानुकूलं यथा स्यादिति सोऽपि तत्स्वैरचारितायां सहाय इति भावः । अतो मंदपदं श्लिष्टमपि ज्ञेयं तामिति कर्मसंबंधात् । उपवाति वीजयतीत्यर्थः । यद्वा--उप समीपे वाति यत्रासौ तत्रैव तादृशो नान्यत्रेत्यर्थः । मानयन् पूजयन् । मलयजेति तैर्व्याख्यातम् । अत्र मलयजो दक्षिणो वायुरिति पक्षे वैकल्पिको विसर्गलोपः । शरदि तस्य च सद्भावात् तादृशानुकूल्याय तु सुतराम् । पृष्ठवायुत्वपक्षे सोऽप्यनुकूलं यथा स्यात्तथैवोपवातीत्यर्थः । उपदेवा गंधर्वादयो ये ते सर्वेऽपीत्यर्थः, बंदिन इति । गीतेति च गीतद्वारा स्तुतिर्बोध्यते । बलिवाद्ययोस्तु तदनुगतत्वम् । बलिरत्र दिव्यवस्त्रालंकारभोगादिसामग्रीमयो ज्ञेयः । अतो गीतप्राधान्याद्गन्धर्वादिगणा इति तैरप्युक्तम् । परिवव्रुरिति--तेऽपि तदागमनविलंबं चक्रुरित्यर्थः । किन्तु वायोरेषां च प्रस्थानमांगलिकत्वाच्छीघ्रसुखागमनं भवेदेवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः ॥ कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः ॥ २२ ॥
उत्सवं श्रमरुचाऽपि दृशीनामुन्नयन्खुररजश्छुरितस्रक् ॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २३ ॥

आयांतमालोक्य हृष्यंत्यः परस्परमूचुः ।वत्सल इति। व्रजस्य गवां च। यद्वा व्रजे निबद्धानां गवामनुकंप्यानामस्माकमित्यर्थः।वत्सलो हितकृत् ।कुतः। यद्यस्मादगध्रः अगं धरतीति गोवर्धनोद्धरणः।बहुशो रक्षण स्योपलक्षणमेतत् । वृद्धैर्ब्रह्मादिभिः पथि वंद्यमानचरण इति। ते सेर्ष्यं सायं शीघ्रमागंतु न ददति हि ।सर्वैर्वन्द्यमानचरण इत्यर्थः। उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सः ॥ २२॥श्रमयुक्तयाऽपि कांत्या नेत्राणां हर्षमुन्नयन्नुच्चैः प्रापयन् । खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य । सुहृदामस्माकमाशिषो मनोरथस्य दित्सया

भावः ॥ २० ॥ २१ ॥ (१०) ॥ व्रजशब्देन गोपा ग्राह्याः 'तास्थ्यात्ताच्छब्द्यम्' इति न्यायेन । ते च तत्पार्श्वे एव संति तथा गावोऽपि तद्वात्सल्यार्थन्नायान्तीति शोभनं न प्रतिभातीत्यत आह--यद्वेति । व्रजे गोकुले निबद्धानां बद्धवद्गृहे स्थितानाम् । गोशब्दोऽत्रानुकंप्ये । यथा गावोऽनुकंपार्हास्तथा वयमपीत्यभिप्रेत्योक्तमस्माकमित्यर्थ इत्याशयोऽत्र ध्येयः । वत्सलत्वे हेतुमाशंक्य समादधते—कुत इत्यादिना । बहुश इति--बहु वारमित्यर्थः । तेन दावाग्निपूतनादिभ्योऽपि रक्षणमुपलक्ष्यत इति । ते च ब्रह्मादयः । इत्यर्थ इति--तत्कृतपूजनेन विलंबत्वादित्यभिप्रायः ॥ (२२) ॥ सुहृदाम् अनिमित्तबंधूनाम् । सः चंद्रः । एषः कृष्णः । उडुराज इहोडुराज इवेति लुप्तोपमा बोध्या । उडुराजोऽपि व्रजगवामध्वपशूनां पथिकानां च वत्सलः--वत्सं वर्षं सामर्थ्यात्कामोद्रेकं लाति ददातीति तथा । "वत्सः पुत्रादिवर्षयोः । तर्णके नोरसि क्लीबम्" इति मेदिनी । 'गोष्ठाध्वनिवहा व्रजाः' इत्यमरः । अगेनोदयाचलेन ध्रियते इत्यगध्रः, अगान्वृक्षान्धरति पुष्णातीति वाऽगध्रः । वृद्धैः सप्तर्षिभिः । पथि व्योममार्गे । दिनांते रात्रौ । कृत्स्नगोधनं समस्तकलासमेधितचंद्रिकाख्यमुपोह्य परिपूर्य गतिवेणुः कविभिर्वर्णितवंशः वेणुशब्दः त्वक्सारपरोऽपि लक्षितलक्षणयाऽन्वयमाह । अनुगै रोहिण्यादिनक्षत्रैरीडितकीर्तिः परिकृतगणनः । श्रमं रविकिरणजं लुंचति छिनत्तीति श्रमलुक् तेन रलयोरैक्यमत्र । तृतीया हेतौ । 'लुञ्च—अपनयने' इत्थं सुधीभिर्ज्ञेयम् ॥ * ॥ ननु तर्हि कौतुकलोलुपो मत्पुत्रो विलंबमानः संध्यासमाप्तावपि नैष्यति ततश्चाहं मरिष्याम्येवेति तत्र तदीयशीघ्रगमने हेतुमुपन्यस्य तामाश्वासयंत्य आहुः--वत्सल इति । व्रजगवां व्रजे निबद्धानां वृषाणां वत्सलस्तेषां स्वविरहदुःखमनुस्मृत्य गंधर्वादीनप्यवमत्य शीघ्रमायास्यत्येवेत्यर्थः । टजभाव आर्षः । न च गोचारकस्य तस्य गवां दर्शनस्पर्शनगात्रकंडूयनघासप्रदानादिकौतुकात्स्वतोऽतिनिकृष्टगायकगंधर्वादिगानकौतुकं चित्ताकर्षकं वाच्यमित्याहुः—यद्यस्मादगध्रः येषां गवां रक्षणार्थमगं गोवर्धनमपि धृतवान् । अतस्तेषु महान्स्वाभाविक एव स्नेहः, गंधर्वादिषु तु गुणोपाधिकोऽपि प्रीतिलेशो न तस्यास्तीति भावः । ननु यद्येवमभविष्यत्तदैतावत्क्षणपर्यंतं गृहमागमिष्यदेवेति तत्र विलंबे पुनरपि हेतुमुपन्यस्यंति—वृद्धैर्ब्रह्मरुद्रादिभिः पथिपथि वंद्यमानौ चरणौ यस्य सः । वेणुगानाकृष्टैः स्वस्वभवनादागत्य निकटे नभसि स्थितैः सर्वमेव दिनं कृष्णं दृष्ट्वा लब्धानंदैः संप्रति गोष्ठागमनसमये स्वस्वभवनगमनोन्मुखैर्नभसो भुवमवतीर्य ब्रह्मरुद्रेंद्रादिभिः प्रत्येकमेव त्वत्पुत्रानुग्रहमर्थयितुं चरणौ वंद्येते तेनात्र किं कर्तव्यमिति तेषामनुरोध एव विलंबाधिक्ये हेतुरिति ध्वनिः । त्वत्पुत्रस्य चरणौ ब्रह्मादयोऽपि वंदंत इति स्वभाग्यं किं न पश्यसि, किमिति खिद्यसीत्यनुध्वनिः । तर्हि भो व्रजबालिकाः शीघ्रमट्टालिकापृष्ठमारुह्य पश्यत कियद्दूरे वत्स आयातीति तया साश्रुगद्गदमुक्ताः सर्वोर्द्ध्ववलभीं शीघ्रमारुह्योच्चैराहुः—कृत्स्नेति । एष कृष्णः सुहृदां स्वबंधूनामाशिषो मनोरथस्य दित्सया एतीत्यन्वयः । उपोह्यैकीकृत्य । गीतयुक्तो वेणुर्यस्य सः ॥ श्रमेण या रुक् शोभा तयापि दृशीनामुत्सवमानंदमुन्नयन्नुच्चैः प्रापयन् । खुररजश्छुरिता व्याप्ता स्रग्यस्येति स्वसंगिनीः सखीः प्रत्यपांगभङ्ग्या श्रीयशोदाद्यलक्षितं किमप्युक्तम् । अत्र स्रज्येव खुररजोनिर्देशादन्यत्र रजो नास्तीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ॥ बदरपांडुवदनो मृदुगंडं मंडयन्कनककुण्डललक्ष्म्या ॥ २४ ॥
यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनांते ॥ मुदितवक्र उपयाति दुरंतं मोचयन्व्रजगवां दिनतापम् ॥ २५ ॥

दातुमिच्छया देवक्या जठरे भवतीति तथा स एवोडराजश्चंद्रो निर्वृतिहेतुत्वेन स एष एतीति॥ २३ ॥अतिसंभ्रमेण काश्चित्समीपमायांतं कथयंति। मदेति। ईषन्मदेन विघूर्णिते विह्वलिते लोचने यस्य सः। बदरपांडुवदनः ईषत्पक्वबदरवत्पांडुरं वदनं यस्य सः। अत्र हेतुः । कनककुंडलयोर्लक्ष्म्या कांत्या मृदू कोमलौ गंडौ यस्मिंस्तद्वदनं मंडयन्निति कोमलगंडस्थलं वा शोभयन्निति ॥ २४ ॥ यदुपतिरिति देवकीजठरभूरिति च ‘ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ’ इत्यादिगर्गवाक्यप्रसिद्धयोक्तम् । यद्वा ‘ सख उदेयिवान्सात्वतां कुले ’ इतिवज्ज्ञात्वा काश्चिद्वदंतीति । गजेंद्रस्येव गतिर्यस्य चंद्र इव प्रसन्नवक्त्रो व्रजगवामस्माकमनंतं दिनतापं च शमयन्नुपयातीति एष समीपमाया

लभ्यते । तच्च सखिभिर्मुहुर्निजोत्तरीयेण रजसोऽपसारितत्वात्स्रजि तु रजस्तस्य प्रविश्य स्थितत्वादपसारणयत्ने दलभंगः स्यात् । मणिनापीयं माला यत्न दूरीक्रियते दामधृतवस्त्रसंपुटस्था नवीनाप्यन्या यत्न परिधीयते तस्मादियं माला यया प्रियया स्वहस्तेन संग्रथ्य सखीद्वारा दत्ता तां प्रियामेव स्वकंठधृतामेनां दर्शयितुं कृष्णस्य यत्न इति । देवकी यशोदा तस्या जठरमेव क्षीराब्धिस्तस्मिन् भवतीति सः । “द्वे नाम्नी नंदभार्याया यशोदा देवकीति च” इति पणोद्देशदीपिकाधृतादिपुराणवाक्यात् । उडुराजश्चंद्रः ॥ अत्र **तोषिणी**–ततश्चोत्कंठाभिरट्टालिकादिकमारुह्य तदेव दर्शयंति–वत्सल इति । तत्र च आगमनं वर्णयितुं प्रथमं परमोल्लासेनासाधारणीं तत्कृपामेव तत्र हेतुं व्यंजयंति--वत्सलो व्रजगवामिति । तत्रोदाहरणमाहुः–यदिति । यद्यस्मात्परमकोमलोऽप्यसौ तदर्थं पर्वतमपि धरतीत्यर्थः । अत्र वर्तमानप्रयोगश्चात्यंतक्तज्ञतया कृतः तदातनत्वेनैव तत्स्फूर्तेः । यदेवं तद्विरहेऽपि तद्वदेव निजामार्तिं रक्षाञ्च व्यंजयंति । अथागमनं वर्णयंति–वन्द्यमानचरण इति । व्रजांतःप्रवेशे तेषां तदप्राप्यत्वात् । अत एव वंद्यमानेति वर्तमाननिर्देशेन वंदनादनिवृत्तिर्बोध्यते । अतः संकोचेन तद निच्छायामपि तैस्तत् क्रियते इति व्यक्तम् । अहो एतादृशगुणज्यायस्त्वमिति भावः । गोधनोपवहनार्थं व्रजवर्तिषु निजागमनमंगलविज्ञापनार्थञ्च गीतवेणुः । तदीयरागतालानुसारेण तद्गानसंबंधिषु तदीयानुगानभंग्यैवानु गैर्गोपैरीरिता कीर्तिः पूतनामोक्षादिरूपा एतद्दिनक्रीडात्मिका वा यस्य सः ॥ श्रमः तज्जनितप्रस्वेदादिस्तदाश्रययापि सहजशोभयेत्यर्थः । यद्वा–श्रमेण या रुक् शोभा तयापि । दर्शीनां दृङ्मात्राणां किमुतास्मदीयाना मित्यर्थः । तत्र तादृशशोभानिदर्शनं गवां खुररजोभिः परागैरिव छुरिता कर्बुरिता स्रक् माला यस्य सः । स्रज्येव रजोनिर्देशादन्यत्र रजो नास्तीति लभ्यते । तच्च सखिभिर्मुहुर्मुहुरंगतो निजोत्तरीयेण रजस्यपसारितेऽपि तस्यां तस्य प्रविश्य स्थितत्वात् । परमांतरंगप्रियजनदत्तायास्तस्या दलादिभंगशंकया तेनैव तन्निवारितत्वाद्वा, दूरतोऽपि रजआदीनां निर्देशस्त्वनुमानेन प्रेमबलतो निकटवत्स्फुरणेन वा । पूर्वव्यंजितमागमने कृपाया एव कारणत्वं साक्षादप्याहुः–दित्सयेति । अन्यथा श्रीवृंदावने पूर्वपूर्ववर्णितानुसारेण किं वा सुखं तस्य नास्तीति भावः । सुहृदामिति सामान्योक्तिर्दर्शीनामितिवत् । एष इत्यंगुल्या निर्दिशंति । देवकीशब्देनात्र श्रीयशोदैव सादरं प्रस्तूयते । व्रजराजत्वादेव एव देवकः श्रीनंदस्तस्य पत्नी देवकीति । ‘देवो राज्ञि सुरे हरौ’ इति कोशात् । तस्या एव सांत्वनायां प्रवृत्तेर्मातृतया मतत्वात् ‘तव सुतः सति’ इति, ‘नंदसूनुरयमार्तजनानाम्’ इति पूर्वसंवादाच्च । मात्रंतरसूचने तु प्रत्युत तद्विरोधापत्तेः, मतांतरवाक्येऽप्यौदासीन्यापत्तेश्च । अतस्तस्य तदप्येकं नामेति लभ्यते । ‘नाभेरसावृषभ आस सुदेविसूनुः’ इत्यत्र मेरुदेव्या एव सुदेवीतिसंज्ञावत् । उक्तं च–“ द्वे नाम्नी नंदभार्याया यशोदा देवकीति च ” इति । उडुराजः दिनतापहरणादिसाम्यात् । उडुस्थानीयाश्चात्र सखायो ज्ञेयाः । श्रीकृष्णजन्मस्थानत्वेन देवकीजठरस्य शुद्धसत्त्वमयत्वेन परमशुद्धत्वात्क्षीरसमुद्रत्वं ध्वनितम् ॥ २२ ॥ २३ ॥ (११) अतिसंभ्रमेण सहसा । अत्र पांडुरत्वे । गंडौ कपोलौ । इंद्रनीलमणिदर्पणसदृशयोः कनककुंडलप्रभान्वयेन बदर इव वदनं

॥ १८६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः ॥ रेमिरेऽहस्सु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥

इति श्रीभागवते म० द० पू० वृंदावनक्रीडायां गोपिकायुगलगीतं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥

तीति ॥ २५ ॥ एवं विरहदुःखेनापि नु अहो कृष्णलीला एव गायंत्यस्तास्मिंश्चित्तं चेतना जीवितं यासां तास्तस्मिन्नेव मनः संकल्परूपं यासां ता अतो महानुदय उत्सवो यासां ता अहःस्वपि रेमिरे ॥ २६ ॥ इति श्रीमद्भागवते० म० दशमस्कंधे पूर्वार्धे टीकायां पंचत्रिंशोऽध्यायः ॥ ३५ ॥

यस्य भातीति भावः । समासापेक्षया भिन्नंभिन्नं पदं शोभनं, झटित्यर्थावबोधकत्वादत आह—कोमलेति ॥ (२४) ॥ यद्वा अथ वा । वस्तुतस्तु पूर्वोक्तरीत्या गोपानां यदुत्वं यशोदाया देवकीत्वं च साधितमेव । विजयध्वजेन पाठांतरं कल्पयित्वा बलदेवपक्षे योजना कृता, सा च 'कृष्णलीलानुगायतीः' इत्यनेन विरोत्स्यतीति । चंद्रपक्षे मदे आनंदकरे विघूर्णित इतस्ततः प्रसृतः लोचनः प्रकाशो यस्य स तथा । 'लुच—प्रकाशेऽपि' स्वसुहृदां स्त्रीणां मानदो अभिमानखंडनः । वनानां भासां दीप्तीनां माला अस्यास्तीति वनमाली । बदरो बृहस्पतिः, पांडुः शुक्रस्तयोरिव वदनं वचनं यस्य स तथा । व्रजगवामिति व्याख्या तम् ॥ * ॥ इदानीं नगरप्रांतपर्यंतमागतस्तत्रापि किंचिद्विलंबस्य कारणं शुश्रुवित्याहुः—मदेति । मदेन पित्रादिदर्शनोत्थेनानंदेन प्रेयसीजनदर्शनोत्थकाममत्ततया च विघूर्णिते विह्वले लोचने यस्य सः । प्रथमार्थो वात्सल्यरसपरिकरैर्द्वितीयार्थो मधुररसपरिकरैस्तत्रत्यैर्बुध्यत इत्येवमग्रेऽपि ज्ञेयम् । स्वसुहृदां पुरोहितादिमातुलादिभ्रात्रादिदासादितांबूलिकादीनां यथोचितमाशीर्वादादिकृतामीषन्मानदः राजपुत्रत्वादल्पवयस्त्वेनानधिगतनीतिशास्त्रत्वाच्च ईषन्मात्रं यथोचितं शिरोनमनादिकं मानं ददातीति सः । इत्ययमपि विलंबहेतुरिति भावः । पक्षे, स्वसुहृदां प्रेयसीनां चंद्रशालिकाद्यारुह्य हसितापांगनीलोत्पलैः पूजयंतीनामीषदन्यजनाऽलक्षितं मानमभीष्टदानव्यञ्जकैः कटाक्षैर्ददातीति सः । वनपर्यटनश्रमेण क्षुत्पिपासाभ्यां च ईषत्पक्वबदरवत्पांडु वदनं यस्य सः । पक्षे, स्वाभीष्टप्रेयसीविरहानुभावोऽयं वदने पांडिमा । मृदुगंडं मृदू गंडौ कनककुंडलयोश्चलयोर्लक्ष्म्या कांत्या मंडयन् ॥ यदुपतिरिति—गोपानां यादवत्वस्य पूर्वं प्रतिपादितत्वात् । द्विरदराजविहारो गजेंद्रतुल्यमंदगमनः । मुदितवक्त्रः प्रफुल्लितमुखः । उपयाति निकटमायाति । व्रजगवां व्रजस्थजननेत्राणाम् ॥ अत्र **तोषिणी**—ईषदित्यस्य विशुद्धसत्त्वमयत्वेन विघूर्णितेत्यनेन संबंधः । मदो हर्षकृतचित्तविकारः । स च स्वभावत एव, विशेषतश्च नवयौवनात्, ततोऽपि विशेषतः प्रेयसीजनदर्शनाद्विज्ञेयः । एवं बहुष्वपि व्यंगेषु तत्सभायां तत्तदुपलब्धिस्तु स्वस्ववासनानुसारेणैवेति न रससांकर्यदोषः । तेन मदेन मनाक् विविधतया घूर्णिते लोचने यस्येति श्रीनेत्रयोर्विलासविशेष उक्तः । व्रजप्रवेशसमयेऽभिगच्छतां स्वसुहृदां तेभ्यो मानं प्रणामालिंगनसस्मितसंभाषणप्रणयावलोकनर्मविलोकक्रपावलोकादिलक्षणं यथोचितं ददातीति सः । वनमालीति पूर्वोक्तकुंददामानुसारेण कुंदैरेवापादलंबिकात्वेन रचितया मालया युक्त इति ज्ञेयम् । मृद्विति कैशोरस्वभावेन सुकोमलकांतित्वात् । मंडयन्निति स्वभावत एव कुंडलयोर्गंडाभ्यां संयोगात् । विशेषतश्च गजेंद्रगत्या मंदमंदचलनेन मुहुरुपसर्पणापसर्पणाभ्यां शोभाविशेषात् ॥ यदुपतिरिति—पूर्वदर्शितस्कांदोक्तानुसाराद्यादेवष्वपि सर्वेषु भवंतो मम वल्लभा इति यदुपुराद्व्रजमागतस्य रामस्य गोपान्प्रति श्रीहरिवंशप्रसिद्धवचने निर्धारणसप्तमीनिर्देशाच्च यदूनां गोपानां पतिरिति सर्वस्यापि गोकुलस्य परमाश्रयत्वेन परमप्रेमास्पदत्वं दर्शितं मुदितवक्त्र इति । उपयातीति दुरंतमपरिच्छिन्नमपि तदनिष्टाशंकाहेतुकं तद्विच्छेदहेतुकं च व्रजगवां तापं विमोचयँस्तत एव परमानंदं च ददातीति ज्ञेयम् । अन्यत्तैः । तत्र व्रजगवामस्माकमिति व्रजस्यास्माद्विशिष्टस्य मज्जनस्य गवां च शकटादीनां व्रजस्थानामित्यस्मत्संवलितत्वादस्माकमेवेत्यर्थः । यद्वा—व्रजस्य गवां नेत्राणाम् । "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्योः स्त्रियां पुंसि गौः" इति नानार्थवर्गात् । बदरवत्पांडुवदन इति निजभावानुसारेण तस्यापि स्वविरहदुःखनिश्चयात्तथा दृष्टेः, भावांतरवर्जने तु श्रमवैवर्ण्यव्यंजनात् । यामिनीपतिश्चंद्रो यथा दिनांते उदेति तथेति । युग्मकानि पूर्णानि ॥ २४ ॥ ॥ २९ ॥ (१२) ॥ चिंत्यते संज्ञायते इंद्रियप्रवर्तकत्वेनेति चित्तम् 'चिती—संज्ञाने' अतः क्तप्रत्यये इडभावः ईदित्त्वात् । तस्मिन् श्रीकृष्णे । अतो भगवन्मनस्त्वादेव । महान् वक्तुमशक्यः । अहस्स्वपीहापिना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः ॥ महीं महाककुत्कायः कंपयन्खुरविक्षताम् ॥ १ ॥ रंभमाणः खरतरं पदा च विलिखन्महीम् ॥ उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥ २ ॥ किंचित्किंचिच्छकृन्मुञ्चन्मूत्रयन्स्तब्धलोचनः ॥ यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणाम् ॥ ३ ॥ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै ॥ निर्विशंति घना यस्य ककुद्यचलशंकया ॥ ४ ॥

षट्त्रिंशे तु हतेऽरिष्टे नारदोक्त्या बलाच्युतौ॥ वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरं समादिशत्॥ १ ॥गोपीरासांतरायातं शंखचूडं निहत्य सः॥अहन् गोपीमहानंदासहं दुष्टमरिष्टकम् ॥ २ ॥एवं देवगंधर्वादिगीतनृत्यवाद्यकुसुमवर्षादिभिः कृष्णं प्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने तद्विरुद्धार्थांतराधिकारार्थमथशब्दः। तर्हि तदा।वृषभाकृतिरसुरः। तं वर्णयति सार्धत्रयेण। महांतौ ककुत्कायौ यस्य सः। खुरैर्विदारितां महीं कंपयन्॥ १ ॥रंभमाणो वृषभजातिशब्दं कुर्वन्। विलिखन् विदारयन्।उद्यम्योर्ध्वं कृत्वा।वप्राणि तटान्युत्क्षिपन् ॥ २ ॥ किंचित्किंचिच्छकृन्मध्येमध्ये ईषदीषत्पुरीषं मुंचन्। तथा मूत्रयन्मूत्रमुत्सृजन्। स्तब्धलोचनोऽनिमिषलोचनः। यस्य ध्वनिना गवां नारीणां च ॥ ३ ॥ तत्र "आ चतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः। अत ऊर्ध्वं तु नारीणां प्रसवः परिकीर्तितः ॥" इति विभागः। ककुदि गलपृष्ठमांसपिण्डेऽचलोऽयमिति भ्रांत्या वर्षं

रात्रिक्रीडापि बोधितेति ॥ * ॥ नु भो राजन्। गायतीर्गायंत्यः। तस्मिन् श्रीकृष्ण एव चित्तं यासां ताः। तस्य श्रीकृष्णस्यापि मनो यासु ता इत्यतः श्रीकृष्णतत्प्रियाणां परस्परविषयाश्रयत्वात्परस्परमनोग्रहणम् अतः प्रतिक्षणमानेशस्मरणात्। रेमिर इति विप्रलंभप्रेम्णो दुःखमयत्वेन तदाविष्टजनप्रतीतत्वेऽपि परमसुखमयत्वं प्रेक्षावत्प्रतीतमस्त्यतः प्रेम्णः पुरुषार्थचूडामणित्वं व्यंजितम् ॥ अत्र **तोषिणी**—उपसंहरति—एवमिति। व्रजस्थिता अपि स्त्रियः। हे राजन्निति तासां विरहगीतप्रेम्णा मुहुस्तं राजानं स्वस्थयति। अहस्सु तद्विरहमयेष्वपि रेमिरे जातनिर्वृतिप्राया बभूवुः। अत्र हेतवस्तच्चित्ताद्याः। तस्य परमानंदस्वभावत्वादिति भावः। अन्यत्तैः। यद्वा—एवमुक्तप्रकारेणेति। तत्रेदशलीलांतरे गानमपि बोध्यते। तच्चित्ततन्मनस्कत्वतज्ज्ञानैस्तदेकगतज्ञानेच्छाप्रयत्नत्वमुक्तम्। महान् तदाविर्भावरूपत्वात्, महान्सर्वतोऽप्युत्कृष्ट उदयः सत्कर्मसिद्धिर्यासां ताः। तदेवमुत्तरोत्तरमाविर्भावविशिष्टयेन रमणस्यापि वैशिष्ट्यं ज्ञेयम्। तत्र वत्सल इत्यादिषु साक्षादाविर्भावात्साक्षादेव रमण तत्राप्युत्तरोत्तरतारतम्यं, पूर्वत्र तु विरहेऽपि रमणं निजालंबनस्य मनःस्फुरितत्वादंशेन भवत्येवेति सर्वत्र रेमिर इति विश्लिष्टमेव ॥ २६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे पंचत्रिंशोऽध्यायः ॥ ३५॥ अरिष्टे वृषाकृतिदैत्ये (१)। रासस्यांतरे मध्य आयातम्। स कृष्णः। गोपीनां महांतमानंदं न सहत इति तथाभूतम् (२)। एवम् उक्तरीत्या। तद्विरुद्ध उत्सवविरुद्धोऽर्थांतराधिकारो गोगोपगोपीनां भयजनकारिष्टागमनरूपस्तदर्थम्। तम् दैत्यम्। ककुत्कायौ स्कंधोऽर्द्धभागदेहौ ॥ *[1] ॥ तर्हीत्यस्य यत्पदसापेक्षत्वात्प्रदोषे यदा कृष्णो रासार्थमुद्यतोऽभूदिति विष्णुपुराणदृष्ट्या शेषो देयः। तद्वाक्यम्—"प्रदोषाऽर्द्धे कदाचित्तु रासासक्ते जनार्दने। त्रासयन्भयदो गोष्ठमरिष्टः समुपागतः ॥" इति। महदुच्चं ककुत् पृष्ठाग्रशिखा यत्र तथाभूतः कायो यस्य सः ॥ १ ॥ खरतरम् अतितीक्ष्णम् ॥ * ॥ ० ॥ २ ॥ यस्य अरिष्टस्य। निर्ह्रादितेन गर्जितेन। निष्ठुरेण कठोरेण ॥ * ॥ भीतमिव राजानमालक्ष्याश्वासयति—हे अंगेति। श्रीकृष्णस्तं मारयिष्यतीति मा त्रस्तो भवेति भावः ॥ ३ ॥ तत्र पातस्रावयोः। आ चतुर्थाच्चतुर्थमासपर्यंतं गर्भपातस्य स्रावसंज्ञा। अतः षष्ठमासादूर्ध्वम्। यस्य अरिष्टस्य। अचलो नगः ॥ * ॥ निर्वि

१ इतोऽग्रे षष्ठितमाध्यायपर्यन्तमेतच्चिह्नतोऽग्रे तोषिणीविश्वनाथाद्यनुसारिव्याख्यानं प्रतिपद्यमधेयम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः ॥ पशवो दुद्रुवुर्भीता राजन्संत्यज्य गोकुलम् ॥५॥ कृष्णकृष्णेति ते सर्वे गोविंदं शरणं ययुः ॥ भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतम् ॥ ६ ॥ मा भैष्टति गिराऽऽश्वास्य वृषासुरमुपाह्वयत् ॥ गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम ॥ ७ ॥ बलदर्पहाऽहं दुष्टानां त्वद्विधानां दुरात्मनाम् ॥ इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् ॥८॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः ॥ सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ९ ॥ अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् ॥ कटाक्षिप्याऽद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा ॥ १० ॥

तीत्यर्थः । घनो हि प्रायेण गिरौ वर्षति ॥ ४ ॥ तीक्ष्णे शृंगाग्रे यस्य तं वीक्ष्य ॥ ५ ॥ कृष्णकृष्ण रक्षेति ॥ ६ ॥ ७ ॥ इत्येवं वदन् । आस्फोटय करतलेन बाहुमाहत्य तेन तलशब्देन कोपयन् ॥ ८ ॥ भुजाभोगं भुजा भुजः स एव भोगः सर्पदेहस्तं सर्पदेहाकारं भुजमित्यर्थः । स्वयमच्युतः अन्यान्दुष्टान्हरतीति हरिः । उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमंतो मेघा यस्मात्सः ॥९॥ अग्रे न्यस्ते विषाणाग्रे येन सः । स्तब्धे असृक्तुल्ये लोचने यस्य सः । कटाक्षिप्य कटाक्षेण तिर्यङ् निरीक्ष्येत्यर्थः॥ १०॥

शंति घना इति कूलं पिपतीषतीतिवदचेतनेऽपि निर्देशसंभवात् । यद्वा—मेघाश्चेतना एव देवतारूपेण "इंद्रः प्राचोदयत्क्रुद्धो मेघानां चांतकारिणां गणम्" इत्युक्तेः । "मेघा नद्योऽथ गिरयोऽचेतनाश्चेतना अपि । द्विरूपा एव वर्तंते सत्यमेतद्द्विजोत्तमाः ॥ श्रूयंते सर्वशास्त्रेषु वर्ण्यमाना महर्षिभिः" इति संहितोक्तेश्च ॥ ४ ॥ तम् आरिष्टम् । तत्रसुर्भीता आसन् ॥ * ॥ पुनरपि तथैव हे राजन्निति । भगवत्प्रभावज्ञानेन राजमानस्त्वं कुतो गोकुलवासिजनभयं शंकस इति भावः ॥ ५ ॥ ते गोकुलवासिनः । कृष्णकृष्णेति संबोध्य संभ्रमत्वाद्रक्षेति क्रियाविस्मृतिः, तत्तस्माद्गोकुलमित्यन्वयः ॥ * ॥ हे कृष्णेति भक्तक्लेशकर्षकत्वान्नः क्लेशमपाकुर्विति भावः । वीप्सा तु संभ्रमे । गोविंदं गोकुलेंद्रतयाभिषिक्तम् । सर्वे इत्युक्तेः पशवोऽपि कृष्णकृष्णेति प्रोचुः । उक्तञ्च सुरभिगमने—'स्वसंतानैरुपामंत्र्य' इति । गोवर्धनरासस्थलात्कोलाहलश्रवणेनाभिमुखमायांतं शरणं ययुरित्यर्थः ॥ ६ ॥ आश्वास्य सांत्वय्य । हे मंद किं प्रयोजनम् ॥ * ॥ मंद अल्पमते । पशूनां त्रासनात् त्रासितैः किं फलं न किमपीति भावः । यतोऽहमेव दुष्टानां दुष्कर्मणां शास्ताऽतो मयि सति तैः किं प्रयोजनमिति भावः । ननु वृषभोऽहं कथं शासनीयस्तत्राह—हे असत्तमेति । कृत्रिममेव तव वृषत्वं तत्त्वतो दुष्टदैत्य एवेति भावः ॥ ७ ॥ त्वद्विधानाम् त्वत्समानाम् ॥ * ॥ त्वद्विधानां त्वत्सदृशानां, किमुत तवेति भावः । अच्युतस्तत्स्थानादचलितः । 'न चचाल ततः स्थानात्' इति पराशरोक्तेः ॥ ८ ॥ इत्यर्थ इति--सर्पदेहवत्स्निग्धं पुष्टं वक्रीभवनशीलमित्याभिप्रायः । अच्युतः सर्वदैकस्वभावः । एवं तलशब्दास्फोटनादिना ॥ * ॥ सख्युः सुबलस्य । श्रीदाम्न इति **तोषिणी** । सख्युरंसे भुजस्थापनेन सावज्ञत्वं दर्शितम् ॥ ९ ॥ न्यस्ते कृते । विषाणाग्रे शृंगाग्रभागे । स्तब्धे स्तिमिते । कटशब्दोऽत्रैकदेशन्यायेन कटाक्षपरः । कटेन कटाक्षेणाक्षिप्य ।

१ अयमेवमेव पाठमुरीकरोतीति भाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहीत्वा शृंगयोस्तं वा अष्टादश पदानि सः ॥ प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ॥ ११ ॥ सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः ॥ आपतत्स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः ॥ १२ ॥ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भूतले ॥ निष्पीडयामास यथाऽर्द्रमंबरं कृत्त्वा विषाणेन जघान सोऽपतत् ॥ १३ ॥ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च पादाननवस्थितेक्षणः ॥ जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः ॥ १४ ॥ एवं ककुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ॥ विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥ १५ ॥

प्रत्यपोवाह प्रतिलोमं व्यनुदत् ॥ ११ ॥ अपविद्धोऽपक्षिप्तः । आपतदाद्रवत् । स्विन्नानि स्वेदयुक्तानि सर्वांगानि यस्य सः । क्रोधमूर्छितः क्रोधेन व्याप्तः ॥ १२ ॥ कृत्त्वा उत्कृत्य विषाणमुत्पाट्य तेनैव जघान स चापतत् ॥ १३ ॥ मूत्रं च शकृच्च मूत्रशकृत् । एकवद्भावः । तदुभयं समुत्सृजन्नित्यर्थः । पादांश्च क्षिपन्नितस्ततश्चालयन् अनवस्थितेक्षणः प्रचलितनेत्रः । कृच्छ्रं कष्टं जगाम । अथ निर्ऋतेर्मृत्योः क्षयं निवासं जगाम । कृच्छ्रं यथा भवति तथा मृत इति वा ॥ १४ ॥ नयनोत्सवो नयनानांमूर्तिमानुत्सवः ॥ १५ ॥

इह समासस्त्वार्षः । आक्षिप्येत्यनेन तिर्यङ्निरीक्षणं लक्ष्यते. । अशनिर्वज्रम् ॥ * ॥ कटाशब्देन कटाक्ष एव बोध्य एकदेशन्यायेन ॥ १० ॥ स कृष्णः । तम् अरिष्टम् । प्रतिलोमम् पृष्ठतः । व्यनुदत् पातयामास ॥ ॥ * ॥ ० ॥ ११ ॥ सः असुरः ॥ * ॥ ० ॥ १२ ॥ तम् असुरम् । सः कृष्णः । अम्बरम् वस्त्रम् । कृत्त्वा 'कृती—छेदने' । विषाणमिति शेषः । सः आसुरः ॥ * ॥ ० ॥ १३ ॥ इत्यर्थ इति—अतिपीडितस्य मलमूत्रे निःसृते इति तात्पर्यम् । निर्गता ऋतिः कल्याणं निंदा वा यस्मात्स निर्ऋतिः "ऋतिः कल्याणवर्त्मनोः । जुगुप्सास्पर्धयोः स्त्री स्यात्" इति मेदिनी । "निर्ऋतिः स्यादलक्ष्म्यां स्त्री दिगीशाऽदय मृत्युषु" इति धरणिः । "क्षयो रोगांतरे वेश्मकल्पान्तापचयेषु च" इति मेदिनी । कर्मद्वयापेक्षया क्रियाविशेषणे लाघवं मत्वाह—कृच्छ्रं यथेति ॥ * ॥ निर्ऋतेः क्षयं जगामेति मुनींद्रस्य कोपोक्तिरेव । वस्तुतस्तु—'ये च प्रलंबखरदर्दुरकेश्यरिष्ट—' इत्यादावस्यापि मोक्षश्रवणान्निर्ऋतेर्मृत्योर्हेतोः क्षयं भगवन्निवासं गत इत्येवार्थः । **विश्वनाथस्तु**—निर्ऋतेर्मृत्योः सकाशात् क्षयं वधं जगाम । निर्ऋतिरेवागत्य तं जघान न तु कृष्ण इत्युत्प्रेक्षते । स तु सद्यो मुक्तिमापेत्याह ॥ १४ ॥ एवम् शृंगताडनादिना । ककुद्मिनम् वृषासुरम् । निपातनात्ककुदो ग्मिनिप्रत्ययः । स्वजातिभिर्देवैर्गोपैर्वा ॥ * ॥ जातिभिर्गोपैस्तेषामेवांतरंगत्वात् । सबल इत्यरिष्टवधेऽनुजस्नेहेन स्वक्रीडातस्तस्याप्यागमनात् । अत्र यद्धरिवंशे—"स चोपेंद्रो वृषं हत्वा कांतचंद्रे निशामुखे । अरविंदाभनयनः पुनरेव रराम ह ॥" इति । तत्र गोष्ठप्रवेशानंतरं पुनर्निर्गम्येति ज्ञेयमिति भगवतस्तत्र रागविशेषो दर्शितः । यच्चोक्तमादिवाराहे श्रीगोवर्द्धनपरिक्रमे—"गंगायाश्चोत्तरं गत्वा देवदेवस्य चाक्रिणः । अरिष्टेन समं यत्र महद्युद्धं प्रवर्तितम् ॥ घातयित्वा ततस्तस्मिन्नरिष्टं वृषरूपिणम् । कोपेन पाणिघातेन मद्यास्तीर्थं प्रकल्पितम् ॥ वृषभस्य वधो ज्ञेय आत्मनः शुद्धिमिच्छता । स्नातस्तत्र तदा कृष्णो वृषं हत्वा सगोपकः ॥ राधां विशाप्मा प्रोवाच कथं भद्रे भविष्यसि । वृषो हतो मया चायमरिष्टः पापसूचकः ॥ तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारिणम् । स्वनाम्ना विदितं कुंडं कृतं तीर्थमदूरतः ॥ राधाकुंडमिति ख्यातं सर्वपापहरं शुभम् । अरिष्टराधाकुंडाभ्यां स्नानात्फलमवाप्नुते ॥ राजसूयाश्वमेधाभ्यां नात्र कार्या विचारणा । गोहत्या ब्रह्महत्या च पापं क्षिप्रं प्रणश्यति ॥" तत्र—गंगायाः मानसगंगायाः, चक्रिणः करचरणादिगतचक्रादिमहाभगवल्लक्षणस्य देवदेवस्य दिव्यातिदिव्यमहैश्वर्यमाधुर्यस्य श्रीकृष्णस्येत्यर्थः । यत्र महद्युद्धं प्रवर्तितं प्रवृत्तम् । घातयित्वा कोपेन गोष्ठोपद्रवहेतुककोपविशेषेण यः पार्ष्णिघातस्तेन । पृथिव्याः तद्युद्धप्रपंचशुश्रूषामाशंक्याह—वृषभस्येति । मम तल्लीलाकथनावेशे सति तीर्थमाहात्म्यकथनं न स्यादिति भावः । वृषानुकर्तृवधात् शुद्धिं तदनुकरणमिच्छता इच्छन्नित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महातीर्थमिदं पातालात्समुत्थितामिति व्याजेन स्वतीर्थमहिमदर्शनाय तत्र स्नातस्य । तदेवं स्नानानंतरं मूलानुसारेण गोष्ठं प्रविश्य द्वित्रिदंडान्स्थित्वा श्रीहरिवंशानुसारेण पुनरपि रासाय वेणुवाद्यादिसंकेतेन राधादिभिः सह हतारिष्टे रासवर्त्मनि तत्र सर्वाभ्यः पृथग्गतस्य तां प्रति स नर्मवचनमाह—विपाप्मेति । तत्परिहासाशंकया विपाप्मत्वं व्यंजयन्नित्यर्थः । मम तावत्पापं नोत्पन्नमेव प्रत्युत तीर्थनिर्माणपुण्येन कृतकृत्यः सिद्धसर्वार्थोऽभूवमेतादृशतीर्थनिर्माणा भावात्त्वं कथं भद्रे पुण्यविषये भविष्यसीत्यर्थः । विपाप्मत्वमेव व्यंजयति—वृषो वृषाकारमात्रोऽरिष्टनामा पापसूचकः सुदुश्चारित्रेण निजपापत्वेनासुरत्वेमव यो व्यंजयतीत्यर्थः । लब्धचिंतायाः श्रीराधायास्तु तन्मेलने स्नेह एवोदितवा नित्याह—तत्रेति । तत्प्रसंगे समाश्लिष्य स्वाभाविकीं लज्जामपि त्यजंती सम्यगालिंग्य ततस्तत्सौहार्देन स्वयमपि तत्र कुण्डं कृतवतीत्याह—स्वनाम्नेति।राधेति राधयेत्यर्थः । स्वयमिति ज्ञेयम्।स्वयं कर्त्रीकत्वेनैव तत्कुंडतुल्यताप्राप्तेः सखीलक्षसहायत्वात्कुंडस्य स्वल्पप्रमाणत्वाच्च । अत एव समाश्लिष्य कृतमिति तदैव करणं बोध्यते। तच्चारिष्टखुरचूर्णितबहलमृद्दपसारणया प्रथममीषदेव पश्चात्तु विशालतेति ज्ञेयम् । अदूरतस्तत्कुण्डयुग्मतयेत्यर्थः । अधुनापि तथा श्रीगोवर्धनेशानकोणांते दृश्यत इति । अत्र **विश्वनाथः**—आरिष्टवधांते राधाकृष्णयोर्नर्मसंलापमयी तत्कुण्डद्वयोत्पत्तिकथा पौराणिकी श्लोकविंशत्या निबध्यते । तथा—मास्मान्स्पृशाद्य (घ-)वृषभार्दन हंत मुग्धा घोरोऽसुरो यमपि कृष्ण तदप्यं गौः ॥ वृत्रो यथा द्विज इहास्त्ययि (पि) निष्कृतिः किं शुद्धो भवांस्त्रिभुवनस्थिततीर्थकृवेत् ॥ (१) ॥ किं पर्यटामि भुवनान्यधुनैव सर्वा आनीय तीर्थविततीः करवाणि तासु ॥ स्नानं विलोकयत तावदिदं मुकुंदः प्रोवाच तत्र कृतवान्बत पार्ष्णिवातम् ॥ (२) ॥ पातालतो जलमिदं किल भोगवत्या आयातमत्र निखिला अपि तीर्थसंघाः॥आगच्छतेति भगवद्वचसा त एत्य तत्रैव रेजुरथ कृष्ण उवाच गोपीः॥(३) ॥ तीर्थानि पश्यत हरेर्वचसा तदेवं नैव प्रतीम इति ता अथ तीर्थवर्याः ॥ प्रोचुः कृताञ्जलिपुटा लवणाब्धिरस्मि क्षीराब्धिरस्मि श्रृणुताऽमरदीर्घिकास्मि ॥ (४) ॥ शोणोऽस्मि सिन्धुरहमस्मि भवामि ताम्रपर्णी च पुष्करमहं च सरस्वती च ॥ गोदावरी रविसुता सरयूः प्रयागो रेवास्मि पश्यत जलं कुरुत प्रतीतिम् ॥ (५) ॥ स्नात्वा ततो हारिरतिप्रजगल्भ एव शुद्धः सरोऽप्यकरवं स्थितमर्कतीर्थम् ॥ युष्माभिरात्मजनुषीह कृतो न धर्मः कोऽपि क्षितावथ सखीर्निजगाद राधा ॥ (६) ॥ कार्यं मयाप्यतिमनोहरकुण्डमेकं तस्माद्यतध्वमिति तद्वचनेन ताभिः ॥ श्रीकृष्णकुण्डतटपश्चिमदिश्यमंदो गर्तः कृतो वृषभदैत्यखुरैर्व्यलोकि ॥ (७) ॥ तत्रार्द्रमृन्मृदुलगोलततीः प्रतिस्वहस्तोद्धृता अनतिदूरगता विधाय ॥ दिव्यं सरः प्रकटितं घटिकाद्वयेन ताभिर्विलोक्य सरसं स्मरते स्म कृष्णः ॥ (८) ॥ प्रोचे च तीर्थसलिलैः परिपूरयैतन्मत्कुण्डतः सरसिजाक्षि सहालिभिस्त्वम् ॥ राधा तदा नननेति जगाद यस्मात्त्वत्कुण्डतीरमुरुगोवधपातकाक्तम् ॥ (९) ॥ प्राहृत्य पुण्यसलिलं शतकोटिकुंभैः सख्यर्बुदेन सहमानसजाह्नवीतः ॥ एतत्सरः स्वमधुना परिपूरयामि तेनैव कीर्तिमतुलां तनवानि लोके ॥ (१०) ॥ कृष्णेंगितेन सहसेत्य समस्ततीर्थसंघस्तदीयसरसो धृतदिव्यमूर्तिः ॥ तुष्टाव तत्र वृषभानुसुतां प्रगम्य भक्त्या कृताञ्जलिपुटः स्रवदस्रधारः ॥ (११) ॥ देवि त्वदीयमहिमानमवैति सर्वशास्त्रार्थविन्न च विधिर्न हरो न लक्ष्मीः ॥ किं त्वेक एव पुरुषार्थशिरोमणिस्त्वत्प्रस्वेदमार्जनपरः स्वयमेव कृष्णः ॥ (१२) ॥ यश्चारुयावकरसेन भवत्पदाब्जमारज्य नूपुरमहो निदधाति नित्यम् ॥ प्राप्य त्वदीयनयनाब्जतटप्रसादं स्वं मन्यते परमधन्यतमं प्रहृष्यन् ॥ (१३) ॥ तस्याज्ञयैव सहसा वयमाजगाम तत्पार्ष्णिवातकृतकुण्डवरे वसामः ॥ त्वं चेत्प्रसीदसि करोषि कृपाकटाक्षं तर्ह्येव तर्षविटपी फलितो भवेन्नः ॥ (१४) ॥ श्रुत्वा स्तुतिं निखिलतीर्थगणस्य तुष्टा प्राह स्म तर्ष मपि वेदयतेति राधा ॥याम त्वदीयसरसीं सफला भवाम इत्येव नो वर इति प्रकटं तदोचुः ॥ (१५) ॥ आगच्छतेति वृषभानुसुता स्मितास्या प्रोवाच कांतवदनाब्जधृताक्षिकोणा ॥ सख्योऽपि तत्र कृतसम्मतयः सुखाब्धौ मग्ना विरेजुरखिलाः स्थिरजंगमाश्च ॥ (१६) ॥ प्राप्य प्रसादमथ ते वृषभानुजायाः श्रीकृष्णकुंडगततीर्थवराः प्रसह्य ॥भित्त्वत्र भित्तिमतिवेगत एव राधाकुण्डं व्यधुः स्वसलिलैः परिपूर्णमेव ॥ (१७) ॥ प्रोचे हरिः प्रियतमे तव कुण्डमेतन्मत्कुण्डतोऽपि महिमाधिकमत्र लोके ॥ अत्रैव मे सलिलकेलिरिहैव नित्यं स्नानं यथा त्वमसि तद्वदिदं सरो मे ॥ (१८) ॥ राधाऽब्रवीदहमपि स्वसखीभिरेत्य स्नास्याम्यरिष्टशतमर्दनमस्तु तस्य ॥ योऽरिष्टमर्दनसरस्युरुभक्तिरत्र स्नायाद्वसेन्मम स एव महाप्रियोस्तु ॥ १९) ॥ रासोत्सवं प्रकुरुते स्म च तत्र रात्रौ कृष्णांबुदः कृतमहारसहर्षवर्षः ॥ श्रीराधिकाप्रवरविद्युदलंकृतश्रीस्त्रैलोक्यमध्यविततीकृतादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अरिष्टे निहते दैत्ये कृष्णेनाद्भुतकर्मणा ॥ कंसायाथाह भगवान्नारदो देवदर्शनः ॥ १६ ॥ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च ॥ रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥ १७ ॥ न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः ॥ निशम्य तद्भोजपतिः कोपात्प्रचलितेंद्रियः ॥ १८ ॥ निशातमसिमादत्त वसुदेवजिघांसया ॥ निवारितो नारदेन तत्सुतौ मृत्युमात्मनः ॥ ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया ॥ १९ ॥

कामं व्रजे वसंतं तं कृष्णं तेन तु विस्मृतम् । नारदः स्मारयामास कंसं दूतगिरेव तु ॥ १ ॥ तदाह । अरिष्ट इति । देवदर्शनो देवर्षिः । यद्वा एवं कथिते एवं भविष्यतीति साक्षाद्देववद्दर्शनं ज्ञानं यस्य सः ॥ १६ ॥ आप्तेनैव नारदेनोक्तमाह । यशोदाया इति । देवक्याः अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह । यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह । रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाह । यद्वा नंदसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्याया रोहिण्याः पुत्रमाह । तौ वसुदेवसुतौ चेत्कथं व्रजं गतौ तत्राह । वसुदेवेनेति । ते तव पुरुषाः सेवकाः ॥ १७ ॥ १८ ॥ निवारित इति । हते वसुदेवे तौ पलायेतामतो व्यक्तीर्तिः ॥ (२०) ॥ १९ ॥ कामम् स्वेच्छया । यद्वा–कस्य कंसस्यामं रोगवत्तन्नाशकम् । तेन कंसेन । दूतस्य गिरेव न तु स दूत इतीवेन ज्ञायते । 'कृतांतोऽनंतमस्मृतिम्' इति पाठे कृतांतः कालोऽप्यूनो हीनो यस्मात्तम् । पाठा० अनंतानियत्ताशून्यम् । किं भूतं कंसम्–न स्मृतिर्व्यवहाराकुलत्वाद्यस्य स तथा तमित्यर्थः (१) । कथांतरद्योतनायायं श्लोकः । तत् नारदवृत्तम् । अथ अरिष्टहननोत्तरम् । पश्यति सर्वमिति दर्शनः, देवश्चासौ दर्शनश्चेति देवदर्शन इत्यभिप्रेत्यैव स्वामिचरणैरुक्तम्–देवर्षिरिति । देवर्षित्वे तु कर्दमादिवत्तपोज्ञानादिनिष्ठत्वमेवायाति न तु देवकार्यसाधकत्वमत आह–यद्वेति । देवानामिंद्रादीनामिव दर्शनमतींद्रियं ज्ञानं यस्येति । यद्वा–देवस्य हरेर्दर्शनं यस्य । देवं हरिं दर्शयतीति वा । देवानां दर्शनं मतं यस्येति वा । एतेन नारदस्य देवकार्यसाधकत्वं ज्ञायते, न त्वसुरकार्यकर्तृत्वमिति ॥ * ॥ अरिष्ट इति । निहत इत्यतीतनिर्देशादत्र चिरादिति ज्ञेयम् । गोवर्धनगतरासस्य वसंतमध्योद्भवत्वेन कंसवधस्य तु शिवरात्रिचतुर्दशीगतत्वेन प्रसिद्धेः । गोष्ठे विषयेऽद्भुतकर्मणेति पूतनावधाद्यरिष्टवधांताद्भुतकर्मणा कंसं प्रति श्रीनारदेन कथनस्याभिप्रायेण देवदर्शन इति तैर्व्याख्यातम् । अत्र प्रथमेऽर्थे पश्यतीति दर्शनो मंत्रदर्शीति ऋषित्वाचिता, द्वितीये प्रतिकल्पमेव गोकुले प्रकटलीलेयं यादवपांडवादिभक्तगणरक्षानुरोधेनैव तावदेव नरलीलेन भगवता क्रियते नाधिकेति सा समाप्तैव । संप्रति यादवाः परमदुःखिनो देवाश्चोद्विग्ना अतः श्रीभगवता कंसवधस्याविलंबकार्यत्वं ज्ञातं, तस्मादवसरोऽयमिति तथा कथयामि यथा कंसस्तमत्रानयेत् । अत्र **विश्वनाथः**–देवः परमेश्वर इव पश्यति कृष्णलीलातत्त्वं जानातीति सः । व्रजलीलासमाप्तिमवधार्य माथुरीं लीलामाविर्भावयितुं कंसद्वारैव कृष्णं मथुरामानेतुं युक्त्युत्थापनविचक्षण इत्याह ॥ १६ ॥ आप्तेन यथार्थ वक्त्रा । अप्रसिद्धेः क्लिष्टकल्पनां मत्वाह–यद्वा । वसुदेवसुतत्वे आक्षिपति–वसुदेवेति । तत्राक्षेप उत्तरमाह । त्वत्त इति शेषः ॥ * ॥ ततश्चैनं स्वयमेवासौ हनिष्यतीति श्रीकृष्णलीलाशैलीं देववद्ब्रह्मादिवज्जानान्निति रामं रोहिण्याः पुत्रमपि देवक्या एवेति गर्भसंकर्षणमपि कथयामासेति ज्ञेयम् । बिभ्यता त्वत्त इति । भीरुत्वान्न तव वध्य इति भावः ॥ १७ ॥ स्वस्य मित्रे विश्वसनीये सुहृदि । याभ्याम् रामकृष्णाभ्याम् । ते तव । पुरुषा नियोगकारिणस्तृणावर्तादयः । तत् नारदोक्तम् । निशम्य श्रुत्वा । निशातम् तेजितम् ॥ * ॥ स्वो ज्ञातिश्चासौ मित्रं चेति । वै प्रसिद्धमेतत् । केवलं त्वमेव मूढो न जानासीति भावः । पुरुषा आप्तजनाः ॥ ॥ १८ ॥ तौ रामकृष्णौ । अतो हेतोः । पलायनाभावार्थमित्यर्थः । तत्सुतौ वसुदेवसुदेवसुतौ । भार्यया देवक्या वसुदेवमिति शेषः ॥ * ॥ निवारित इति । हते पितरि तन्निर्वेशायावसरप्रतीक्षामपि कुर्वीयातां बद्धयोस्तु पित्रोर्मोचनार्थमद्यश्वो वाऽऽगच्छेतां, किञ्चाधुनातनीं जिघांसां तयोर्वसुदेवो न ज्ञापनीयस्तथा सति स्वमित्रं नंदं प्रति तेनोक्तेः स सपुत्र एव पलायिष्यत इत्यतो वसुदेवदेवक्योर्बंधनमेवाधुना कृत्वा केनापि मिषेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतियाते तु देवर्षौ कंस आभाष्य केशिनम् ॥ प्रेषयामास हन्येतां भवता रामकेशवौ ॥ २० ॥ ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥ अमात्यान्हस्तिपांश्चैव समाहूयाह भोजराट् ॥ २१ ॥ भोभो निशम्यतामेतद्वीर चाणूरमुष्टिकौ ॥ नंदव्रजे किलासाते सुतावानकदुंदुभेः ॥ २२ ॥ रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः ॥ भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया ॥ २३ ॥ मंचाः क्रियंतां विविधा मल्लरंगपरिश्रुताः ॥ पौरा जानपदाः सर्वे पश्यंतु स्वैरसंयुगम् ॥ २४ ॥ महामात्र त्वया भद्र रंगद्वार्युपनीयताम् ॥ द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥ २५ ॥ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि ॥ विशसंतु पशून्मेध्यान्भूतराजाय मीढुषे ॥ २६ ॥ इत्याज्ञाप्यार्थतंत्रज्ञ आहूय यदुपुंगवम् ॥ गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच ह ॥ २७ ॥

बध्यतामिति मंत्रं वदता नारदेन निवारित इति ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ मह्यं मम निदर्शितौ विधात्रा नारदेन वा । व्रजं गंतुमुद्यतौ । तावाह । भवद्भ्यामिति ॥ २३ ॥ मंचा उत्तुंगस्तंभादिरचितस्थानानि ॥ २४ ॥ अहितौ शत्रू ॥ २५ ॥ मीढुषे वरदाय ॥ २६ ॥ अर्थतंत्रज्ञोऽर्थसिद्धांतमेव जानातीत्यर्थः ॥ २७ ॥

रामकृष्णौ मथुरामानीयेतामिति मंत्रं ददतेति ज्ञेयम् । न च वसुदेवदेवक्यौ बंधयता नारदेन तयोर्विप्रियं कृतमिति वाच्यम्, प्रत्युत प्रियमेव कृतं परमोत्कंठाभ्यां ताभ्यामायत्यां स्वपुत्रमुखदर्शनलाभेन स मुनिराशीःशतसंप्रदानपात्रीकरिष्यत एवेति मुनेस्तद्विषयकापराधो नाभूदिति ॥ १९ ॥ आभाष्य बहुधोक्त्वा । भवता मद्भृत्येषु पूज्येन यद्यप्यत्रभवत्तत्रभवच्छब्दावेव पूज्येऽर्थे स्तस्तथापि क्वचित्केवलोऽपि प्रयुज्यते ‘सर्वे सर्वार्थवाचका’ इति न्यायमाश्रित्येति ध्येयम् ॥ * ॥ ० ॥ २० ॥ ततः केशिप्रेषणोत्तरम् । मुष्टिकादिनाम्नो मल्लान् । हस्तिपानाधोरणिकान् ॥ * ॥ ० ॥ २१ ॥ एतत् वक्ष्यमाणम् । आसाते तिष्ठतः ॥ ॥ * ॥ आनकदुन्दुभेरिति--तज्जन्मवृत्तान्तेन नारदोक्तिरेव प्रमाणितेति भावः । नारदोक्तिस्तु--‘इमौ त्वां वधिष्यतः’[1] इतिलक्षणा ॥ २२ ॥ ततस्ताभ्याम् । विधातृदर्शितमृत्युज्ञानं तु योगिनामेवात आह--नारदेनेति । यद्यपि कंसेन वीरपदेनान्येऽप्यामन्त्रितास्तथापि द्वयोर्नामग्रहणात्तौ चाणूरमुष्टिकौ गोकुलं गन्तुं सज्जौ दृष्ट्वा कंसो वक्ति--इह मथुरायाम् ॥ * ॥ निदर्शितः कथितः । संप्राप्ताविति तत्र तस्य “स्थानं प्रधानं न बलं प्रधानं स्थाने स्थितः कापुरुषोऽपि शूरः । जानामि नागेन्द्र तव प्रभावं कण्ठे स्थितो गर्जसि शङ्करस्य ॥” इत्युक्तेः स्वस्थानस्थितत्वेन नाशासम्भवोऽपीतीह प्राप्तौ हन्येताम् । गमिते, प्राप्येतामिति तत्र नीयतामित्यर्थः ॥ २३ ॥ मल्लरङ्गस्य मल्लायोधनस्थानस्य परितः सर्वासु दिक्षु श्रिताः स्थिताः । स्वैरसंयुगं योद्धाकांक्षापूरकं युद्धम् ॥ * ॥ मल्लरङ्गो मल्लक्रीडास्थानं तस्य परितः श्रिताश्चतुर्दिक्षु वेष्टनरूपेण स्थिता इत्यर्थः । वस्तुतस्तु तयोः पलायननिरोधार्थमेव मञ्चवृतिः कृता तेनेति ॥ २४ ॥ महामात्र हस्तिप “महामात्रोऽतिविस्तारे हस्तिपे चावनौ स्त्रियाम्” इति निरुक्तिकोशे । “रङ्गोक्तीरागनृत्यायोधनभूमित्रपुष्वथ” इति कोशात् । कुवलयं भूमण्डलमापीडयतीति । यद्वा--कुवलयं कैरववनं, वा कुवलयं कैरवमापीडे शेखरे यस्य स तथा ॥ * ॥ हे भद्रेति । त्वं चतुरशिरोमाणिरसीति प्रोत्साहनाय सम्बुद्धिरियम् । ममाहिताविति--ननु तौ तु त्वद्भागिनेयावेवेति चेत्तत्र तं हरिवंशीयवृत्तान्तेन नारदाच्छ्रुतेन हस्तिपं कंसो बोधयामास । तद्य सौभपतिद्रुमिलदानवादुग्रसेनरूपधरात्तत्पत्न्यां मज्जन्मेति नारदेन मह्यमुक्तमिति । अतस्तौ शत्रू मे, नाहं यादवः किन्तु दानव एव, तौ च दानवारी एवेति तत्त्वम् ॥ २५ ॥ धनुर्यागो धनुषोऽर्चाबलिदानादिरूपः । भूतराजाय भैरवविग्रहधारिणे रुद्राय । मीढुषे समर्थायाभीष्टदात्रे वा ॥ * ॥ न केवलं लौकिक एवोपायः कार्यः किन्तु दैवोऽपीत्याह--आरभ्यतामिति । भूतराजाय भूतेश्वराय मथुरापालाय तस्य धनुषोऽपि दैवताय श्रीरुद्राय । मेहति सिंचति वरदानेन तर्पयति निजार्चकमिति तस्मै ॥ २६ ॥ अर्थसिद्धांतमेवेत्यत्रै

१ तदाकाराऽलङ्कारः ।

भोभो दानपते मह्यं क्रियतां मैत्रमादृतः ॥ नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ॥ २८॥ अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनम् ॥ यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ॥ २९ ॥ गच्छ नंदव्रजं तत्र सुतावानकदुंदुभेः ॥ आसाते ताविहानेन रथेनानय मा चिरम् ॥ ३० ॥ निसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः ॥ तावानय समं गोपैर्नंदाद्यैः साभ्युपायनैः ॥ ३१ ॥

हे दानपते अक्रूर मैत्रं मित्रकृत्यं त्वया क्रियताम् । त्वत्तोऽन्य आदृतः सादरो हिततमश्च न वियत इति ॥ २८ ॥ २९ ॥ ३० ॥ तौ मे मृत्युर्नितरां सृष्टः । वैकुंठसं

वकारेण धर्मादिज्ञानराहित्यमुक्तम् । "तंत्रं कुटुंबकृत्ये स्यात्सिद्धांते चौषधोत्तमे । प्रधाने तंतुवाये च शास्त्रभेदे परिच्छदे ॥ श्रुतिशाखांतरे हेतावुभयार्थप्रयोजके । इतिकर्तव्यतायां च" इति मेदिनी । ततः पाणिग्रहणानंतरम् ॥ * ॥ अर्थो द्वितीयपुरुषार्थस्तस्यैव तंत्रं सिद्धांतं जानाति न तु धर्ममोक्षयोरित्यसूच्यनेन । यदुपुंगवमिति—सर्वेषां यदूनामास्थास्पदमतोऽस्यैव योग्यता न तु केवलं मदीयानामिति । वस्तुतस्तु यदूनामेव हितकरः न तु तस्य, स्वस्य दानवमननादिति भावः । पाणिग्रहणं तु केवलस्नेहप्रदर्शनार्थं निजोक्तिपालनार्थमेवेति ॥ २७ ॥ दानपते अक्रूरहस्ते काचिद्दानपतित्वसंपादिका रेखास्ति, तेन भाविदानपतित्वमालक्ष्याऽऽमंत्रित इति प्रतीयते । यद्वा—कंसस्य दानाध्यक्ष एव स इति ज्ञेयम् । यद्वा—दानमस्ति येषां ते दाना उदाराः । मत्वर्थीयोऽच् । तेषां पते ॥ * ॥ भोभो इत्यादरे वीप्सा । दानपते हे वदान्यवरेत्यर्थः । अतो मदर्थितमपि त्वयाऽवश्यं संपाद्यमिति भावः । ननु भोजराज कुतो मामेव प्रेरयसि सर्वे यादवास्त्वदाज्ञाकारिणस्तत्राह—आदृत इत्यादि । त्वत्तोऽन्यो नैपुण्येन कार्यसाधको न कोऽप्यस्तीत्यर्थः ॥ २८ ॥ यतस्त्वादृशो मद्धितकरो नास्ति अतो हेतोः । हे सौम्य प्रियदर्शन । मित्रत्वद्योतनायेयं संबुद्धिः । "सौम्यो विप्रे सोमजीवसुन्दरे सोमदैवते" इति यादवः । कार्येषु यद्गौरवं महत्तत्साधयतीति तथाभूतं त्वामिति सम्बन्धः । विष्णुम् वामनम् । स्वार्थम् स्वर्गावाप्तिरूपम् । विभुः समर्थः । एतेन समर्थेनापि कंचिद्द्वारीकृत्यैव कार्यं साध्यते इति सूचितम् ॥ * ॥ हे सौम्येति प्रोत्साहयति । निजामित्रत्वेन सहजशान्तत्वेन वाश्रितः शरणं गतः । किमर्थम्—कार्यस्य गौरवं गुरुत्वं तत्साधनं गुरुप्रयोजनं साधयितुमित्यर्थः । ननु त्वमेव स्वयं सर्वार्थे शक्तः किं मयेति चेत् सत्यम्, समर्थस्यापि साहाय्येनैव कार्यं किल संसिद्ध्येदित्यत्र दृष्टान्तः—यथेति । विभुः समर्थोऽपि । द्वेषादिंद्रादपि विष्णोर्न्यूनत्वं सूचितम् ॥ २९ ॥ तत्र नन्दगोकुले । तौ वसुदेवसुतौ । इह मथुरायाम् ॥ * ॥ तत्रैवासाते न तु पलायिताविति वक्तव्यमिति भावः । अनेनेति तर्जन्याह—अधुनैवालंकृत्य स्थापितेनेत्यर्थः । निजयानदानेनानुग्रहविशेषो दर्शितः । सुन्दराभिनवपरिष्कृतं सुरथं दृष्ट्वा बालकौ तौ सुखं स्वयमेवारोक्ष्येते इति भावः । कंसोपभुक्तो रथो भगवदारोहणानर्ह इत्यन्यो रथः श्रीभगवदिच्छयैव तेनाज्ञप्त इति ॥ ३० ॥ तौ वासुदेवौ । वैकुंठसंश्रयैर्विष्ण्वाश्रितैः । समं सार्धम् । अभ्युपायनमुपाहारः "स्यादभ्युपायनं सैन्य उपहारे स्फुटाध्वनि" इति निरुक्तिः ॥ * ॥ वैकुण्ठसंश्रयैरिति । तैर्निसृष्टेन तेन मम किं स्यादिति भावः । ताविति—एकप्रयत्नत्वात्तयोरिति भावः । नंदाद्यैरिति—अन्यथा शंकया तौ नागमिष्यत इति भावः । तेषामप्यानिष्टमत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घातयिष्य इहानीतौ कालकल्पेन हस्तिना ॥ यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ॥ ३२ ॥ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् ॥ तद्बंधूनिह निष्यामि वृष्णिभोजदशार्हकान् ॥ ३३ ॥ उग्रसेनं च पितरं स्थावरं राज्यकामुकम् ॥ तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ॥ ३४ ॥ ततश्चैषा मही मित्र भवित्री नष्टकंटका ॥ जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ ३५ ॥ शंबरो नरको बाणो मय्येव कृतसौहृदाः ॥ तैरहं सुरपक्षीयान्हत्वा भोक्ष्ये महीं नृपान् ॥ ३६ ॥ एतज्ज्ञात्वाऽऽनय क्षिप्रं रामकृष्णाविहार्भकौ ॥ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियम् ॥ ३७॥ अक्रूर उवाच ॥ राजन्मनीषितं सध्र्यक्तव स्वावद्यमार्जनम् ॥ सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनम् ॥ ३८ ॥

श्रयैर्विष्णुसंश्रयैर्देवैः ॥ ३१ ॥ किं ततस्तत्राह । घातयिष्य इति । कालकल्पेन । मृत्युतुल्येन । वैद्युतोपमैरशनितुल्यैः ॥ ३२ ॥ ३३ ॥ ३४ ॥ नष्टकंटका नष्टशत्रुः । ननु कतिपयसुहृद्वधेन नष्टकंटका कथं स्यादिति तत्राह । जरासंध इति ॥ ३५ ॥ ३६ ॥ यदुपुरश्रियं द्रष्टुं चेति ॥ ३७ ॥ तत्र स्वमनीषितं विचारितम् । सध्र्यक्

कारिष्यामीति गूढोऽभिप्रायः । साम्युपायनैरिति–घृतदध्यादिसहितैः । एतच्च धनुर्यागसत्यताबोधनार्थम् ॥ ३१ ॥ आक्षिपति–किमिति । ततस्तदानयनात्। किं स्यादिति । तत्र आक्षेपे । इह पुरे । ततो हस्तितः ॥ * ॥ वाग्देवींमते तु–यदीह मधुपुर्यामानीतौ भवतस्तदा स्वपराजयेन तयोर्द्वारांतःप्रवेशोत्साहवर्द्धनाद्धस्तिनैव द्वारभूतेन घातयिष्ये रंगांतः प्रापयिष्यामि अतः कालकल्पेन मल्लानां मम चेत्यर्थात् । ततस्तदनतरं मुक्तौ स्वमुक्तिनिमित्तं पूर्ववन्मल्लैरेव द्वारभूतैर्घातये स्वसमीपमपि प्रापयिष्यामि । अतो मम मुक्तिहेतुत्वाद्वैद्युतोपमैः क्रममुक्तिमार्गनेतृभगवत्संबंधिदिव्यपुरुषोपमैरिति ॥ ३२ ॥ तयो रामकृष्णयोः । तद्बंधूंस्तयोर्ज्ञातीन् ॥ * ॥ ननु तद्बंधुभ्यस्स्वानिष्टाच्छङ्के, तत्राह--तद्बंधूनिति द्वाभ्याम् । ननु तयोः पूर्वमेव कथं न हनिष्यसि, तत्राह–तयोर्निहतयोः सतोरनुतापतप्तानेव सत इति कोपातिशयो दर्शितः । वाङ्मते तु--मुक्तौ तयोः प्राप्तयोः सतोस्तद्बंधूनपि प्राप्स्यामि । अव्यभिचारादिति भावः ॥ ३३ ॥ तद्भ्रातरम् पितुः सहोदरम् । अन्ये यादवाः ॥ * ॥ ० ॥ ३४ ॥ ततः ससुहृद्रामकृष्णादिमरणोत्तरम् । मित्र अक्रूर । एषा या बहुराजास्तीत्यर्थः । अत्राशंकते–नन्विति । जरासंधादिसत्त्वे एषां वधेनापि नष्टकंटका भूर्न भविष्यतीत्याशंकाशयः । तत्र आशंकायाम् । गुरुः असुर एव, तस्याहं पुत्रतोऽपि प्रिय इति भावः । दयितोऽतिप्रियः ॥ * ॥ नन्वहमपि भोजेषु किं तद्बंधुर्नेत्याह–हे मित्रेति । त्वं तु मम हितकारी अतस्त्वां प्रति पृथ्वीमपि विभजेऽहमिति भावः ॥ ३५ ॥ तैः जरासन्धादिभिः । सुरपक्षीयान् कौरवादिवंश्यान् ॥ * ॥ सुरपक्षीयान्नृपान् कौरवादीन् । वाङ्मते तु–महीं भोक्ष्ये मुक्तौ सर्वानंदान्तर्भावात् ॥ ३६ ॥ एतत् मम वृत्तम् । तौ कथमानयिष्य इति चेत्तत्राह–धनुरिति । यदुपुरस्य मधुपुरस्य श्रियं छविं वा द्रष्टुमिति वेति शेषः । तत्पार्श्वे धनुरुत्सवमथुरासौंदर्यवर्णने स्वयमेवागमिष्यत इति भावः ॥ * ॥ अर्भकाविति–त्वया प्रतार्य तावानेतुं शक्याविति भावः । तत्प्रकारं शिक्षयति–धनुरिति । अन्येभ्यस्तत्राप्यर्भकेभ्यो यज्ञोत्सवपुरीशोभादर्शनं नितरां रोचेतेति भावः । तथा च श्रीहरिवंशे–"वाच्यश्च नंदगोपो वै करमादाय वार्षिकम् । शीघ्रमागच्छ नगरं गोपैः सर्वैः समन्वितः॥कृष्णसंकर्षणौ चैव वसुदेवसुतावुभौ । द्रष्टुमिच्छति कंसो वै सभृत्यः सपुरोहितः ॥ एतौ युद्धविदौ रंगे कालनिर्वाणयोधिनौ । दृढौ च कृतिनौ चैव श्रृणोम्यव्याहतोद्यमौ॥पितृष्वसुः सुतौ मुख्यौ व्रजवासौ वनेचरौ । अस्माकमपि मल्लौ द्वौ सज्जौ युद्धकृतोद्यमौ॥ताभ्यां सह नियोक्ष्येऽहं तौ युद्धकुशलावुभौ । द्रष्टव्यौ च मयावश्यं बालौ तावमरोपमौ ॥ वक्तव्यं च व्रजे तस्मिन्समीपे व्रजवासिनाम् । राज्ञा धनुर्मखं नाम कारयिष्यति वै सुखी ॥" इति॥३७॥तव मनीषितमित्यन्वयः । स्वस्यावद्यं स्वावद्यं न वदति यत्र तदवद्यम् । 'अवद्यं मृत्युपापेयाः' इति व्यक्तिकारः । यद्यपि मृत्युर्वारणी

१ अन्तर्भावितण्यर्थोऽयम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोरथान्करोत्युच्चैर्जनो दैवहतानपि ॥ युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ॥ ३९ ॥ एवमादिश्य चाक्रूर मंत्रिणश्च विसृज्य सः ॥ प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयम् ॥ ४० ॥ इति श्रीभा० म० द० पू० अक्रूरसंप्रेषणं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ श्रीशुक उवाच ॥ केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन्मनोजवः ॥ सटावधूताऽऽभ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः ॥ १ ॥

सम्यक् स्वावद्यं मरणं तन्मार्जनम् । तथाप्येतावानभिनिवेशो न कार्य इति भविष्यत्सूचयन्नाह । सिद्ध्यसिद्ध्योरिति ॥ ३८ ॥ पुरुषकारस्य व्यभिचारमाह । मनोरथानिति ॥ ३९ ॥ ४० ॥ इति श्रीभा० म० दशमस्कंधे पूर्वार्धे टीकायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ सप्तत्रिंशे हते केशिन्यच्युतो भाविकर्मभिः ॥ नारदेन स्तुतः क्रीडन्व्योमासुरमथावधीत् ॥ १ ॥ वृषवेषासुरं यद्वत्केशिनं हयवेषिणम् ॥ कंसप्राणसखं हत्वा कंसं व्यसुमिवाकरोत् ॥ २ ॥ केशी त्विति । प्रथमश्लोकेन य एव

यस्तथाप्यहमवश्यमेतेन विधिना वारयिष्याम्यत्र कालमेतावानियान्हठो न कार्य इति भविष्यत्तन्मरणम् । समं चेतः कुर्यादिति चेत इति शेषः । फलं साधयतीति तथा । दैवं पूर्वादृष्टमेव । यथादृष्टं फलं स्यादित्यर्थः ॥ * ॥ तच्छ्रुत्वा स्वीयभगवद्दर्शनतद्वारा तन्मारणलक्षणदीर्घस्वाभीष्टयुगलसिद्ध्याशया तत्तदर्थमेव स्वीयतदात्मीयतां प्रख्यापयितुमिच्छया च तद्वाक्यं श्लाघते—राजन्निति द्वयेन । सम्यगिह हेतुः।हे राजन्निति—राज्ञस्तव दंडनीतिशास्त्रानुगामित्वादिति भावः । ननु धार्मिकोऽयं कथं केवलं दंडनीतिमनुमोदते, तस्येदं वाक्यं कूटमेवेत्याशंक्य स्वाशयं गोपयँस्तदनुवादेनापि श्लाघते—कुर्यादिति । विधिलिङा धर्मशास्त्रमतेऽप्येतादृशसंकटप्रतीकारादौ प्रयतेतैवेत्यर्थः । तदुपेक्षायामात्महत्यादिपापोपपत्तेः । किन्तु मनीषितस्य सिद्ध्यासिद्ध्योः समो हर्षदुःखरहित एव सन् कुर्यादिति विशेषः । 'समम्' इति पाठे क्रियाविशेषणत्वं भावमिति शेषं वा । हि यतो दैवमदृष्टमेव फलं भद्रमभद्रं वा भावयति करोतीति तत् ॥ ३८ ॥ पुरुषकारस्य पुरुषार्थस्य । व्यभिचारमनियतफलत्वम् । मनोरथसिद्धौ हर्षस्तदभावे शोको विषादः । यद्यपि सिद्धिरसिद्धिर्वा दैवाधीना तथापीति ॥ * ॥ निवृत्तिधर्मपराणामस्माकं तु तदपि न कर्तव्यं किं तु सर्वदेवमयस्य राज्ञस्तवाज्ञयैव क्रियत इति प्रकारांतरेणापि स्वाशयं गोपयितुं तस्मिन्स्वभक्तिं दर्शयितुं चाह—मनोरथेति । अपिशब्दात् किमुत दैवोपकृतात्, तस्मात्कृतेऽपि साम्यभावेन यथावसरं हर्षशोकाभ्यां युज्यत एव, न तु निवृत्तिवदधिकृतं सुखमित्यर्थः । यद्यप्येवं तथापि ते तवाज्ञां करोमि करवाणीत्यर्थः । भाविसूचना चेयम् । स्वावद्यमार्जनमसुरत्वखंडनं मुक्तिप्राप्तेः । कुर्याद्भवानिति शेषः । हि यस्माद्दैवं श्रीकृष्णलक्षण ईश्वर एवात्र फलदातृ, न तत्र भवत्स्वाधीनत्वमिति भावः । जनो भवादृशः । यद्यप्येवमीश्वर एवात्र स्वयं कर्ता न मादृशस्यात्र किञ्चित्करत्वं तथापि त्वदानुकूल्यरूपेण तदुक्तजनव्यवहारेणैव करोमीति । अत्रारिष्टवधानन्तरम् । कंसस्य यादवान्प्रति सकपटप्रोत्साहनवाक्यं, वसुदेवं प्रति च निंदनं, तथा कंसं प्रति धिक्कारः । अन्धकस्य वाक्यजातमिति हरिवंशमतम् । अत्र **विश्वनाथः**—जंतुर्निकृष्टलोको न तु भवानिति प्रकटोऽर्थः । वस्तुतस्तु त्वं जंतुरेव पशुनिर्विशेष इत्यर्थः । दैवहतानपिकाराद्दैवपालितान्मनोरथान्करोति । तत्र दैवपालितेषु मनोरथेषु हर्षः दैवहतेषु शोकः ताभ्यां जंतुर्युज्यते युक्तो भवति तथापि एवमपि तवाज्ञां करोमि यतो भवांस्तु भाग्यवान्हर्षमेव प्राप्स्यतीति प्रकटो भावः । वस्तुतस्तु अथापि यद्यपि जंतोर्मुमूर्षोस्तवाज्ञा कर्तुं न युज्यते तदपि करोमि, तव राजत्वान्मम तु त्वत्प्रजात्वादिति भावः । यद्वा—अथापि तव मनोरथसिद्धावपि मम तु मनोरथं सेत्स्यत्येवेत्याज्ञां करोमीति ॥ ३९ ॥ एवम् उक्तप्रकारेण । सः कंसः । श्रुतावपि वृषासुरवधस्तथाहि— "प्रनेमास्मिन्ददृशे सोमो अंतर्गोपा नेममाविरस्था कृणोति स तिग्मशृंगं वृषभं युयुत्सन्द्रुहस्तस्थौ बहुले बद्धो अंतः" इति । एतदर्थस्तु—अंतर्गोपाः अंतः स्थित्वा गोपायन्नंतर्यामि नेमस्मिन्नर्धप्रपंचे स्थावरे सोमः सोमादिरूपः ददृशे प्रकर्षेण दृष्टः । नेममर्द्धप्रपंचम् । अस्थाः अस्थिरं जंगममाविः कृणोति प्रकटी करोति । स तिग्मशृंगं वृषभं युयुत्सन् योद्धुमिच्छन् । दृङ्मात्रेण भस्मीकर्तुं शक्तोऽपि लीलया तेन सह युयुत्सन् द्रुहः द्रोहं कृतवांस्तं ततवानित्यर्थः । ततश्च बहुले व्रजे । अंतः रासमंडलमध्ये बद्धः भक्तजनेन प्रेमपाशेन बद्धः संस्तस्थौ । क्रीडितुमिति शेषः ॥ * ॥ ० ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे षट्त्रिंशोऽध्यायः ॥ ३६ ॥ भाविकर्मभिरग्रे करिष्यमाणकर्मभिः । अथ केशिवधानंतरम् (१) । यद्वद्यथा वृषासुरं तद्वद्धयवेषिणमित्यन्वयः । व्यसुमिव मृतकसमम् (२) । अनूद्य वर्णयित्वा । इत्यर्थ इति—यद्यपि निरुपपदो जृधातुः समृद्ध्यर्थेऽस्ति 'निर्जरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः ॥ दुराशयः कंसहितं चिकीर्षुर्व्रजं स नंदस्य जगाम कंपयन् ॥ १ ॥) तं त्रासयंतंभगवान्स्वगोकुलं तद्धेषितैर्बालविघूर्णितांबुदम् ॥ आत्मानमाजौ मृगयंतमग्रणीरुपाह्वयत्स व्यनदन्मृगेंद्रवत् ॥ २ ॥ स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः ॥ जघान पद्भ्यामरविंदलोचनं दुरासदश्चंडजवो दुरत्ययः ॥ ३ ॥ तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः ॥ सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ॥ ४ ॥

म्भूतः केशीत्यनूद्य तं भगवानुपाह्वयदिति द्वितीयेनान्वयः । महाहयः सन्महीं निर्जरयन् श्लथयन्विदारयन्नित्यर्थः । सटाभिः केसरैरवधूतानीतस्ततः क्षिप्तान्यभ्राणि विमानानि च तैः संकीर्णं नभः कुर्वन् । हेषितैरश्वजातिशब्दैर्भीषितमखिलं विश्वं येन तम् ॥ १ ॥ तद्धेषितैस्तैरतिनिष्ठुरैर्हेषितैः बालैः पुच्छलोमभिर्विघूर्णिताः परिभ्रामिता अंबुदा येन तम् । आजौ संग्रामार्थम् । आत्मानं कृष्णम् । अग्रणीः पुरतो निर्गतः सन्नुपाह्वयत्स्वसमीपमाजुहाव । स च केशी तन्निशम्य मृगेंद्रवद्व्यनदत्सिंहनादमकरोदित्यर्थः ॥ २ ॥ ततः केशी तं कृष्णं निशाम्य दृष्ट्वा मुखेन खं पिबन्निव मुखं विवृत्याभिमुखः सन्नभिजगाम । किं च । अत्यमर्षणोऽतिकुपितोऽत्यंतमसहमानो वा प्रत्यक्पद्भ्यां जघान । दुरासदोऽन्यैरभिभवितुमशक्यः । दुरत्यय उद्यतः सन् दुरतिक्रमः । अत्र हेतुः । चंडजवश्चंडस्तीव्रो जवो वेगो धावनं यस्य ॥ ३ ॥ तद्धननं वंचयित्वा तं च हननाय प्रसा

देवाः' इत्यादिवत्तथाप्यनेकार्थत्वाद्विदारणेऽपीत्याशयः । 'हेषा ह्रेषाऽश्वशब्दे द्वे' इति नामरत्नाकरे ॥ * ॥ केशिसंज्ञान्वर्थतामाह—सटेत्यादि ॥ १ ॥ तम् केशिनम् । अग्रणीः कृष्णो ज्ञेयः ॥ * ॥ स्वगोकुलं निजव्रजम् । तच्च श्रीवैशंपायनेनोक्तम्—"नृशब्दानुसरः क्रुद्धः स कदाचिद्दिनागमे । जगाम घोषसंवासं नोदितः कालधर्मणा ॥ तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सह ।" इत्यादि । किंभूतं स्वगोकुलम्—तत् अनिर्वचनीयप्रेमास्पदमित्यर्थः । यद्वा—तस्य केशिन इव हेषितैरिति समस्तमेव । तत्राग्रणीरिति भीतान् गोष्ठजनान् पृष्ठीकृत्य यमुनामार्गे निर्गतः सन्स्वसमीपं प्रत्याजुहावेत्यर्थः । श्रीगोविंदस्थानमुत्तरेण यमुनावट्टविशेषस्य केशिघट्टतीर्थत्वेन प्रसिद्धेः । तथा च वाराहे—"गंगाशतगुणं पुण्या यत्र केशी निपातितः" इति । अत्र विवरणं श्रीविष्णुपुराणे—"त्राहित्राहीति गोविंदस्तेषां श्रुत्वा तदा वचः । सतोयजलदध्वानगंभीरमिदमुक्तवान् ॥ अलं त्रासेन गोपालाः केशिनः किं भयातुरैः । भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते ॥ किमनेनाल्पसारेण हेषिताटोपकारिणा । दैतेयबलवाह्येन बलिना दुष्टवाजिना ॥" इति । श्रीहरिवंशे च—"तमापतंतं संप्रेक्ष्य केशिनं हयदानवम् । प्रत्युज्जगाम गोविंदस्तोयदः शशिनं यथा ॥ केशिनस्तु तमभ्यासे दृष्ट्वा कृष्णमवस्थितम् । मनुष्यबुद्ध्यो गोपाः कृष्णमूचुर्हितैषिणः ॥ कृष्ण तात न खल्वेष सहसा ते हयाधमः । उपसर्प्यो भवान्बालः पापश्चैष दुरासदः ॥ एष कंसस्य सहजः प्राणस्तात बहिश्चरः । उत्तमश्च हयेंद्राणां दानवोऽप्रतिमो युधि ॥ त्रासनः सर्वदेवानां तुरंगाणां महाबलः । अवध्यः सर्वभूतानां प्रथमः पापकर्मणाम् ॥" इति । तत्र शशिनमित्युक्तेः केशिनः शुक्लपक्ष एव वधो ज्ञेयः ॥ २ ॥ ततो नादानंतरम् । न केवलमभ्याजगामेवेत्याह—किञ्चेति । निर्बलस्यातिकोपेन किमित्याह—अत्यंतेपि । प्रत्यक्पद्भ्यां पश्चिमपद्भ्याम् । अत्र दुरत्ययत्वे ॥ * ॥ अरविंदलोचनमिति । प्रफुल्लपद्माभस्मेरनेत्रोन्मीलनेन वीक्षणादिति सावज्ञत्वमुक्तम् । यद्वा—श्रीबादरायणेस्तात्रिंदोक्तिरियम् । तादृशसुन्दरसुकुमारांगे दृष्टेऽपि तद्दुष्टभावानपगमात् ॥ ३ ॥ तम् असुरम् । सावज्ञं सावमानं क्रियाविशेषणम् वा । तथैव यथापूर्वम् ॥ * ॥ अधोक्षज इंद्रियज्ञानाविषयो यः स कथं तत्पादघाताविषयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स लब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसाऽपतद्धरिम् ॥ सोऽप्यस्य वक्रे भुजमुत्तरं स्मयन्प्रवेशयामास यथोरगं बिले ॥ ५ ॥ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयःस्पृशो यथा ॥ बाहुश्च तद्देहगतो महात्मनो यथाऽऽमयः संववृधे उपेक्षितः ॥ ६ ॥ समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् ॥ प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं व्यसृजत्क्षितौ व्यसुः ॥ ७ ॥ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः ॥ अविस्मितोऽयत्नहतारिरुत्स्मयैः प्रसूनवर्षैर्दिविषद्भिरीडितः ॥ ८ ॥

रितयोः प्रत्यक्पादयोर्हस्ताभ्यां गृहीत्वा । परिविध्य भ्रामयित्वा । व्यवस्थितस्तथैव स्थितो बभूव ॥ ४ ॥ व्यादाय मुखं प्रसार्य वेगेन हरिं पुनरापतत् प्रत्याद्रवत् । सोऽपि हरिर्हसन्नुत्तरं सव्यं भुजम् । निर्भयत्वे दृष्टांतः । यथोरगं बिल इति ॥ ५ ॥ ततः किं तदाह । दंता इति । चर्वणाय भगवद्भुजं स्पृशंतीति तथा ते व्यादानेन ये विवृताः । अयो लोहं स्पृशंतीति स्पृशः । यद्वा तप्तमयमतितप्तं लोहादि स्पृशंतो यथेति । आमयो जलोदराख्यो रोगः ॥ ६ ॥ लेंडं पुरीषमुत्सृजन् ॥ ७ ॥ कर्कटिकाफलं हि पक्वं

स्यादित्यहो तस्य मूढतेति भावः । रुषा स्वगोकुलत्रासनजक्रुधा । यद्वा—अरुषा लीलयैव ॥ ४ ॥ सोऽसुरः । सव्यं वामम् । बिले छिद्रे ॥ * ॥ संज्ञा चेतना । स हारिरपि । स्मयमान इति--किमरे ग्रसितुमायासि ग्रसेति वामांगुष्ठं दर्शयित्वा । उत्तरं वामं भुजम् । यथेति--मूषिकं घातयितुं मूषिकाबिले यथा कश्चिदुरगं प्रवेशयति तथैव केशिप्राणघातार्थं तस्य वक्रे इति । उरगश्च सस्पृहमकष्टमेव तत्र प्रविशति तथैव भुजोऽपि प्रविवेश ॥ ५ ॥ ततो भुजप्रवेशात् । किं किं जातम् । तदाह—यज्जातं तद्वक्ति—व्यादानेन प्रसारणेन ये दंता विवृत्ताः प्रकटितास्ते । तप्तमयस्स्पृश इति त्रिपदं भिन्नं क्लिष्टान्वयं विसृज्यार्थांतरमाह—यद्वेति । अत्र मयडंतः पाठो न तु सान्तः । तद्देहगतोऽसुरदेहप्रविष्टः । जलोदरग्रहणमुदरवृद्धिद्योतनाय ॥ * ॥ हंतहंत दंष्ट्राकराले तस्य वक्त्रविवरे नीलोत्पलमृणालसुकुमारस्तस्य भुजः कथं प्रविवेशेति शंकाकुलं राजानं तत्त्वमाह—दंता इति । चर्वणाय भगवद्भुजं स्पृशतीति तथा ते दंता निपेतुः निर्मूलतया पेतुः । 'दशनैर्मूलनिर्मुक्तैः' इति हारिवंशोक्तेः । तप्तम् अयः लोहं स्पृशंतीति स्पृशः पदार्था यथा । अय इति कर्माणि षष्ठ्यभावः 'अधायि रामोदमुत्तमम्' ? इतिवत् "तदर्हम्" इति निर्देशात् । नीलोत्पलसुकुमारशीतलमपि तद्भुजमतिसन्तप्तवज्रनिर्मितमिव केशी स्वदंतैः स्पृष्ट्वाऽमन्यतेति भावः । 'पित्तेन दूने रसने सितापि तिक्तायते' इति न्यायात् । ववृधेऽघासुरवद्वृद्धिर्ज्ञेया ॥ ६ ॥ स दैत्यः । विक्षिपन्नितस्ततश्चालयन् । परिवृत्ते बहिर्निर्गते लोचने यस्य स तथा । 'लेंडं बद्धपुरीषे स्यात्' इति धरणिः । क्वचित् 'लम्बम्' इति पाठः । "तुरगस्य शकृल्लेंडं लंबा प्राकारकोशयोः" इति हलायुधोक्तेः । सोऽपि सम्यक् ॥ * ॥ यावता तद्देहो विदारितः स्यात्तावद्ववृध इत्युक्तं—समेधमानेनेति । तद्देहविदारणेनैव तन्मृत्योर्विहितत्वात् । "यत्त्वया पाटितं देहं भुजेनानतपर्वणा । एषोऽस्य मृत्युरह्नाय विहितो विश्वयोनिना ॥" इति हरिवंशे नारदोक्तेः ॥ ७ ॥ कर्कट्येव कर्कटिका कर्कधूलता कर्कटी, भाषायाम् 'ककडी' इति प्रसिद्धा तत्फलसदृशात् । यद्वा—कर्कटी मत्स्यजातिभेदस्त्री तस्याः फलं गर्भस्तत्सदृशात् । सा प्रसवे यथा स्वयं म्रियते जठरस्फुटनात्तथा भुजापकर्षणात्सोऽसुरो मृत इत्यर्थः । "कर्कटो विहगे राशौ कुलीरे शाल्मलीफले" इति कोशाच्छाल्मलीफलोपमाद्वा । शाल्मलीफलमपि पक्वं सत् विदीर्यत इति । तद्देहतोऽसुरशरीरात् । उत्स्मयैर्विस्मितैः । दिविषदो देवाः । 'आदितेया दिविषदः' इत्यमरः । केशिवधमाह श्रुतिः—"न ता अर्वा रेणुककाटो अश्नुते । न संस्कृतत्रमुपयंति ता अभि । उरुगायमुभयं तस्य ता अनु । गावो मर्त्यस्य विचरंति यज्वनः" इति । अर्थस्तु—ता गा अर्वा अश्वरूप्यसुरः । रेणुककटति अतिशयेन वर्षति तेन वाऽऽवृणोति विश्वमिति रेणुककाटः 'कटे—वर्षावरणयोः' इत्यस्माद्यङ्लुकि घञ् । नाश्नुते न व्याप्नोति । संस्कृतः संस्कारो दाहच्छेदनौषधपानादिस्तेन त्रायते इति संस्कृतत्रो वैद्यस्तं प्रत्यपि ताः गावः नाभ्युपयंति निर्बाधितत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवर्षिरुपसंगम्य भागवतप्रवरो नृप ॥ कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत ॥ ९ ॥
कृष्णकृष्णाप्रमेयात्मन्योगेश जगदीश्वर ॥ वासुदेवाखिलावास सात्वतां प्रवर प्रभो ॥ १० ॥

सत्सार्यंतं विदीर्णे भवति तद्वद्विदीर्णात्तस्य देहात् । व्यसोर्विगतप्राणात् । अविस्मितो गर्वरहितः । अयत्नेन हतोऽरिर्येन सः ॥ ८ ॥ कंसाय कृष्णमादिश्य तद्रहस्यादिपैशुनैः ॥ कंसघातादि कृष्णस्य कार्यमावेदयन्मुनिः ॥ १ ॥ तदाह देवर्षिरित्यादिना । न चायं सूचकः किं तु सर्वसुहृदित्याह । भागवतप्रवर इति ॥ ९ ॥ अस्मद्रहस्यं

यतस्ता गावः मर्त्यस्य यज्वनः नंदादेः संबंधिन्योऽभयं उरुगायं महाकीर्तिमनुलक्ष्यीकृत्य चरंतीति मंत्रार्थः ॥ * ॥ कर्कटिकाफलोपमादित्यत्र विशेषः श्रीविष्णुपुराणे—"द्विपादपृष्ठपृष्ठार्धश्रवणैकाक्षिनासिके । केशिनस्ते द्विधाभूते शकले च विरेजतुः ॥" इति । अयत्नहतारिकोऽप्यविस्मितः अहमेवं कर्तेति विस्मयात्मकगर्वरहितः । यद्वा—तादृशदुष्टमहाभीषणवधेऽप्यविगतस्मितः अश्रमेणैव लीलयैव मारणात् । तदुक्तं श्रीपराशरेण—"अनायस्ततनुः स्वस्थो हसंस्तत्रैव संस्थितः" इति । 'हतारिरुत्स्मयैः' इति पाठे सुरैरित्यध्याहार्यम् । एतदनंतरं श्रीपराशरः—"ततो गोपाश्च गोप्यश्च हते केशिनि विस्मिताः । तुष्टुवुः पुंडरीकाक्षमनुरागमनोरमम् ॥" इति । वैशंपायनश्च—"तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा । बभूवुर्मुदिताः सर्वे हतविघ्ना हतक्लमाः ॥ दामोदरं तु श्रीमंतं यथास्थानं यथावयः । अभ्यनंदन्प्रियैर्वाक्यैः पूजयन्तः पुनःपुनः ॥" इति ॥ ८ ॥ वृत्तांतांतरसूचनाय श्लोकमाह—तस्य कृष्णस्य रहस्यादीनां गोपनादीनां पैशुनैः सूचनैः 'यशोदायाः सुतां कन्याम्' इत्याद्युक्तलक्षणैः । कृष्णं तन्मृत्युमादिश्य पुनः कृष्णस्य कृष्णाय (१) । तद् वृत्तम् । सूचकः पिशुनः । किन्तु अपि तु । भागवतेषु प्रवरो मुख्यः ॥ * ॥ व्रजलीलां समाप्य स्वां लीलां दर्शय माथुरीम् ॥ इत्यावेदयितुं तत्र देवर्षिस्तुष्टुवे प्रभुम् ॥ (१) ॥ भागवतानां प्रकृष्टो वरो मनोरथसिद्धिर्यस्मात्सः । अक्लिष्टेनाक्लेशेन कर्म केशिवधादिकं यस्य तम् ॥ **तोषिणी**—सर्वसुहृदिति व्रजेऽपि ससैन्यकंसजरासंधाद्यागमनभयनिवर्त्तनाय । तथा च रणात्कंसादेरपि मुक्तिपर्यवसायकत्वात् । यद्वा—दिव्यज्ञानत्वादेवश्वासावृषिश्चेति श्रीगोपालमंत्रगणद्रष्टा च इति परमांतरत्वं सूचितम् । भागवतप्रवर इति—भगवतो लीलाधिकारनियुक्तभक्तेषु श्रेष्ठः । ततस्तत्संपादनार्थं तस्य तथा चेष्टा रहस्यागत्य निवेदनं च युज्यत एवेति भावः ॥ ९ ॥ कृष्णकृष्णेत्यादिना कथं शंकावारणं स्यादत आह—अयं भाव इति,—अयमत्राभिप्रायः । यतो दैत्यसंहारायावतीर्णोऽतो हेतोः । तदनुरूपाचरणेन यथा भूभारापहारस्तदनुकूलव्यापारेण । तत्र भूभारसंहारे । भयं तु परिच्छिन्नदेहादेरेव न त्वात्मन इत्यर्थः । सर्वभूतेष्वखिलजीवेषु । सात्वतानां यदूनाम् । केचित्तु—अप्रमेयात्मन्नित्युक्तेः "अंगुष्ठमात्रः पुरुषः" इति श्रुतेः का गतिस्तत्राह—योगेशेति । योगिनां योगविषयत्वेन स्वेच्छाविग्रहग्रहणेन तदुपपत्तेः । योगस्य वायुविषयत्वमिति मंदाशंकां निरस्यन्नाह—जगदीश्वरेति । "आत्मन एष प्राणः श्रद्धा खं वायुः" इत्यादिश्रुतेर्वायोर्जगदन्तःपातित्वेन तदीशत्वं न पृथक्वक्तव्यमित्यर्थः । कृष्णशब्दस्यापि बह्वर्थत्वात्को ग्राह्यस्तत्राह—वासुदेवेति । वासुदेवोऽपि बहुवाची तत्राह—अखिलावासेति । तथाप्यखिलावासत्वमाकाशादीनामपि तत्राह—सात्वतामिति । सात्वतप्रवरा अप्यनेकेऽक्रूरादयः संतीति चेत्तत्राह—प्रभो सर्वाधिप सर्वसमर्थेति च 'समर्थोऽधिपतौ प्रभुः' इति यादवः ॥ * ॥ मया यत्कंसं प्रति सूचितं तद्भवदीयतादृशलीलावसरं ज्ञात्वैव । यतो भवत्प्रसादेन भवतस्तत्त्वं लीलानुक्रमं च जानामीति ज्ञापयन्नाह—कृष्णकृष्णेत्येकादशभिः । कृष्णकृष्णेत्यानंदेन । भगवंस्तव नामसंकीर्तनकृद्भक्ताभासो नारदोऽस्मीत्यात्मानं स्मारयति । निजक्लेशाकर्षकत्वात्त्वमेव सर्वसुखं दातुं समर्थ इति भावः । वीप्सा परमादरे । अप्रमेयः प्रमातुमशक्यः आत्मा मनो यस्येत्यतः परं व्रज एव विराजमानो व्रजस्थान्पित्रादीनानंदयिष्यसि मथुरां यास्यंस्तत्रत्यानेवेत्यतः कस्त्वन्मनो वेदयितुं क्षमत इति भावः । किञ्च—योगेश योगमायाधीश्वरत्वादुभयत्रापि विराजस्वेति भावः । जगदीश्वरेति—जगत्कार्यं भारावतारणमपि कर्तव्यमिति भावः । वासुदेवेति--नंदस्य पुत्रत्वेन प्रसिद्धिमकार्षीरेव, इदानीं वसुदेवस्यापि तद्भाग्यं प्रकटयेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसाम् ॥ गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ॥ ११ ॥ आत्मनाऽऽत्माश्रयः पूर्वं मायया ससृजे गुणान् ॥
तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥ १२ ॥ स त्वं भूधरभूतानां दैत्यप्रमथरक्षसाम् ॥ अवतीर्णो विनाशायसे तूनां रक्षणाय च ॥ १३ ॥

वैरिणि कंसे सूचितवानिति मा शंकीरित्याह कृष्णकृष्णेत्यादिना । अयं भावः । त्वमीश्वरो भूभारदैत्यसंहारायावतीर्णोऽस्यतस्तदनुरूपाचरणेन विश्वं परिपालयेति । तत्र त्वयि तावद्भयशंकैव नास्तीत्याह । अप्रमेयात्मन्नपरिच्छिन्नस्वरूप । योगेशाचिंत्यप्रभाव । जगदीश्वर विश्वनियंतः । वासुदेव सर्वभूतेषु वर्तमान । अखिलावास सर्वस्याश्रय । संप्रति सात्वतां प्रवर श्रेष्ठ । प्रभो सर्वशक्ते ॥ १० ॥ कथमेवंरूपोऽहमिति चेदत आह । त्वमात्मेति । न हि त्वं जीववत्परिच्छिन्नः किं तु सर्वभूतानामांतर एकोऽनुस्यूत आत्मा । अंतरनुस्यूतत्वे दृष्टांतः । एधसां काष्ठानामंतर्ज्योतिरिवेति । भूतेषु स्थितोऽपि तैर्न दृश्यस इत्याह । गूढ इति । अत्र हेतवः । गुहाशयो बुद्धेरप्यांतरः । किं च साक्षी न हि साक्षी दृश्यत इत्यर्थः । अपि च महापुरुषः अतः परिच्छिन्नमतिभिर्न ज्ञायस इत्यर्थः।तर्हि सर्वांतरत्वे किं प्रमाणमत आह । ईश्वर इति । न हीश्वरं विना पर तंत्राणां जीवानां प्रवृत्तिर्घटत इत्यर्थः ॥ ११ ॥ अहमीश्वरोऽन्यत्सर्वमीशितव्यमित्येतदेव कत इत्यत आह । आत्मनेति । साधनांतरनिरपेक्ष एवात्माश्रयः स्वतंत्रः मायया शक्त्या भवान् गुणान्ससृजे सृष्टवान् । तैः सृष्टैर्गुणैरिदं विश्वं सृजसि अत्सि संहरस्यवसि पालयसि । ननु सृष्ट्यादिक्रिया षट्कारकसाध्यैव दृष्टेत्याह । सत्यसंकल्प इति । न हि संकल्पैकसाध्ये बहिःसाधनापेक्षेति भावः । अतस्त्वमीश्वर इत्युपसंहारः॥ १२॥प्रस्तुतमाह । स त्वमिति। भूधरभूतानां भुवं धरंतीति भूधरा राजानस्तद्रूपाणाम्॥ १३॥

भावः । अत एवाखिलावासेति,–अखिलांस्त्वद्भक्तान्कंसभयविच्युतानानीय मथुरायां वासयेति भावः । यस्त्वं सात्वतां यादवानां प्रवरः । यद्वा–प्रकृष्टो वरो मनोरथो यस्य, सिद्धिस्वरूपोऽसि । प्रभो त्वं सकलं कर्तुं शक्नोषि ॥ १० ॥ भगवत आक्षेपमाशंक्य समाधत्ते–कथमित्यादिना । परिच्छिन्नो मितदेशवर्ती । अपि तु आंतरोंतस्थः । तैर्भूतैः । अत्र गूढत्वे । अन्यदाह–किञ्चेति । इत्यर्थ इति–साक्षिणोऽदृश्यत्वे साक्षित्वमेव व्यापयेत ‘साक्षाद्द्रष्टेति साक्षी’ इति निरुक्तेः, “साक्षाद्द्रष्टरि संज्ञायाम्” इति पाणिन्युक्तेश्च । न केवलं साक्षित्वादेव गूढ इत्याह–अपि चेति । अतो महापुरुषः सर्वाधिष्ठानम् । अतो महापुरुषत्वादेव । परिच्छिन्नमतिभिरल्पबुद्धिभिः । इत्यर्थ इति–पुरुषस्यैव दुर्ज्ञेयत्वान्महापुरुषज्ञानं तु दूरापास्तमित्यर्थः । तर्हि ज्ञानाविषयत्वे । ईश्वरं नियंतारम् । इत्यर्थ इति–“ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि” इत्यादिस्मृतेः, “केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि” इति स्मृतेश्च ॥ * ॥ ननु मे यथेच्छा तथा करोमि करिष्यामि च तत्र त्वं किमेवं विशेषं निवेदयसि, तत्राह–त्वमात्मा ममांतर्यामी, त्वमेव मां निवेदयितुं प्रेरयसि । तत्राहं किं करोमीति भावः । न केवलं ममैव अपि तु सर्वभूतानामंताश्चित्ते तिष्ठसि । एधसां काष्ठानामंतर्ज्योतिरिव गूढः । किञ्च, गुहाशयः यथा नंदपुत्ररूपेण गोवर्धन गुहायां शेषे तथैवांतर्यामिरूपेणांतःकरणगुहायां शेषे । साक्षी–तत्र शयानोऽपि सर्वं साक्षात्पश्यसि । तत्र हेतुः–महापुरुषोऽप्रतिहतयोगबल इत्यर्थः । किन्तु महापुरुषा ईशितव्या अपि भवंति त्वन्त्वीश्वरः सर्वनियन्ता ॥ ११ ॥ पुनर्भगवदाक्षेपं समाधत्ते–अहमित्यादिना । पुनराशंकते–नन्विति । षट्कारकसाध्या कर्तृकर्मकरणसंप्रदानापादानाधिकरणरूपषट्कारकनिष्पाद्यैव । इति भाव इति–साधनापेक्षत्वे जीवत्वं स्यादित्याशयः । अतः सत्यसंकल्पत्वादेव । इत्युपसंहार इति पर्यवसानम् ॥ * ॥ यदि त्वमस्मानस्मद्बुद्ध्यादिकं च नास्रक्ष्यस्तदाहमप्येवं नावेदयिष्यमित्याह–आत्मनेति । गुणान्महदादीन् यदि त्वं सृष्टवानेव तदान्ये जना स्वत्प्रेरिता एव स्वस्वकृत्यं कर्तुं चेष्टंते तथैवाहमप्यद्य त्वामेतन्निवेदयितुं चेष्ट इति भावः ॥ १२ ॥ प्रस्तुतं प्रकृतम् । प्रमथा रुद्रगणास्तेषामपि बाणासुरयुद्धे नाशनात् । ‘प्रमथाः स्युः पारिषदाः’ इत्यमरः ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्ट्या ते निहतो दैत्यो लीलयायं हयाकृतिः ॥ यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवम् ॥ १४ ॥ चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनम्॥ कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥ १५ ॥ तस्यानु शंखयवनमुराणां नरकस्य च ॥ पारिजातापहरणमिंद्रस्य च पराजयम् ॥ १६ ॥ उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणम् ॥ नृगस्य मोक्षणं पापाद्द्वारकायां जगत्पते ॥ १७ ॥ स्यमंतकस्य च मणेरादानं सह भार्यया ॥ मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः ॥ १८ ॥ पौंड्रकस्य वधं पश्चात्काशिपुर्याश्च दीपनम् ॥ दंतवक्रस्य निधनं चैद्यस्य च महाक्रतौ ॥ १९ ॥

॥ १४ ॥ परश्वोऽहनीति । अद्यैवाक्रूर एष्यति श्वो मथुरां गंताऽसि परश्वश्चाणूरादींश्च ते त्वया निहतान् द्रक्ष्यामीति सिद्धवन्निर्देशो विज्ञापनप्रकारविशेषः ॥ १५ ॥ तस्यानु तदनंतरम् । शंखादीनाम् । शंखः पंचजनः । वधं द्रक्ष्यामीति शेषः । भाविनिर्देशमात्रमेतन्न त्वानंतर्यं विवक्षितम् ॥ १६ ॥ १७ ॥ भार्यया

अधुना लीलामनुक्रामन्नवतारे कारणमाह—स त्वमिति । दैत्यानां स्वभाक्तिविरुद्धानाम् । साधूनां स्वभक्तिप्रवर्तकानाम् । पाठांतरे सेतूनां स्वभक्तिमर्यादानाम् । प्रमथा राजरूपाः काशिराजादय एव । यद्वा—बाणासुरसहाय्यार्थमागतरुद्रेण युद्धे साक्षादेव प्रमथा रुद्रपार्षदा ग्राह्याः ॥ १३ ॥ अयं केशी । लीलयाश्रमेणैव । यस्य केशिनः । अनिमिषा देवाः 'सुरमत्स्यावनिमिषौ' इति यादवः ॥ * ॥ तत्र पूतनादयो ये हतास्तेऽपि दुष्टा एव किं त्वयं परमदुर्मार इत्याह—दिष्ट्येति । अयमधुना साक्षादेवेत्यर्थः । अतस्त्वं केशवनामा भविष्यसीति शेषः । " यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन । तस्मात्केशवनामा त्वं लोके गेयो भविष्यसि ॥ " इति विष्णुपुराणोक्तेः ॥ १४ ॥ योगबलेन भाविनोऽर्थान्वक्ति—चाणूरमित्यादि । ते त्वया निहतान् । सिद्धवत्संजातवत् । निर्देशः कथनम् । कर्तुरुत्साहवर्धकत्वने बोधननैपुण्यमित्यर्थः ॥ * ॥ स्वस्य तल्लीलाभिज्ञतां विवृण्वन्भाविष्यं विवृणोति—चाणूरमित्यादि । अप्यर्थे चकाराः सर्वैः सह योज्याः, तैश्च चाणूरादीनामवश्यवध्यत्वं सूचितम् । मल्लानन्यान्कंकन्यग्रोधादींश्च । हे विभो प्रभो त्वं सर्वं कर्तुं समर्थोऽसीति भावः । विभुप्रभू च पर्यायौ ॥ १५ ॥ आनंतर्यं क्रमो नात्र हनने ज्ञेयमिति ॥ * ॥ ० ॥ १६ ॥ वीर्यशुल्कादीत्यत्रादिना लक्ष्यवेधादिग्रहः । लक्षणं चिह्नम् 'लक्षणं नाम्नि चिह्ने च' इति मेदिनी । पापादज्ञातविप्रधनापहारलक्षणात् ॥ * ॥ वीराः क्षत्रियास्तेषां कन्यानाम् । यद्वा—हे वीरेति । त्वं वीरत्वात्सर्वं करिष्यसीति भावः । वीर्यं पराक्रमः तदेव शुल्कं मूल्यम्, आदिपदात्कन्यानां भक्त्यादिकं च लक्षणं प्रकारो यस्योद्वाहस्य तम् । तत्र क्वचित्समुदितं क्वचित्तु केवलभक्तिरेव यथा कालिंद्यादेरिति ज्ञेयम् । पापात् विप्रगोहरणजात् । द्वारकायामित्युक्तेर्द्वारकानिर्माणप्रयाणमपि सूचितम् । तत्र कर्तव्यं च यथार्हं पूर्वत्र परत्र च योज्यम् । जगत्पते इति—तत्रेंद्राद्यागमनेन गरुडारोहणादिना तादृशैश्वर्यप्रकाशनादिति भावः ॥ १७ ॥ ब्राह्मणस्य द्वारकावासिनः । यद्वा—अवंतीवासिनो गुरोः सांदीपनेः । तत्र स्वशब्दः स्वीयपरः, स्वीयस्य यमस्य धामतः । ब्राह्मणस्येति चतुर्थ्यर्थे षष्ठी ॥ * ॥ ब्राह्मणस्येह संप्रदानाभावस्तु तस्यैव स्वत्वात् । स्वधामत इति—अनावृत्तिस्थानादपीति परमस्वातंत्र्यं दर्शितम् ॥ १८ ॥ पौंड्रकस्य मिथ्यावासुदेवस्य । महाक्रतौ युधिष्ठिरराजसूये ॥ * ॥ पश्चात् पौण्ड्रकवधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानि चान्यानि वीर्याणि द्वारकामावसन्भवान् ॥ कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि॥२०॥अथ ते कालरूपस्य क्षपयिष्णोरमुष्य वै ॥ अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः ॥ २१ ॥ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवांछितम् ॥ स्वतेजसा नित्यनिवृत्तमायया गुणप्रवाहं भगवंतमीमहि ॥ २२ ॥ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनम् ॥ क्रीडार्थमद्याऽऽत्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वताम्॥२३॥श्रीशुक उवाच ॥ एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः ॥ प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः॥२४॥भगवानपि गोविंदो हत्वा केशिनमाहवे ॥ पशूनपालयत्पालैः प्रीतैर्व्रजसुखावहः ॥२५॥ एकदा ते पशून्पालाश्चारयंतोऽद्रिसानुषु ॥ चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः ॥२६॥

जांबवत्या सह । स्वधामतो महाकालपुरात् ॥ १८ ॥ १९ ॥ द्वारकामावसन् द्वारकायां वसन् । कर्ता करिष्यति ॥ २० ॥ अमुष्य विश्वस्य भूभारस्य वा ॥ २१ ॥ एवं विज्ञाप्य कृताभिनंदनं भगवंतं नमस्यति द्वयेन । विशुद्धविज्ञानघनमिति । केवलं ज्ञानैकमूर्तिमित्यर्थः । अत एव स्वसंस्थया स्वरूपसम्यक्स्थित्यैव परमानंदरूपया सम्यगाप्ताः सर्वेऽर्था येन तम् । आप्तकामतोक्त्वा सत्यसंकल्पतामाह । अमोघवांछितमिति । ननु वांछा चेदस्ति तर्हि दुर्निवारा संसृतिरत आह । स्वतेजसेति । चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहो यस्मात्तम् । अतो भगवंतं निरतिशयैश्वर्यमीमहि शरणं व्रजेमेति ॥ २२ ॥ ननु त्रिकालज्ञस्त्वं कथं मत्प्रपंचं न जानासि जानासि चेत्कथमगुणप्रवाहं ब्रवीषि तत्राह । त्वामिति । ईश्वरमन्यस्य वशयितारं स्वाश्रयमन्यस्यावशमत आत्ममायया आत्माधीनया मायया विनिर्मिता अशेषविशेषा महदाद्या यादवादिरूपा वा कल्पना येन तं धुर्यं श्रेष्ठं नतोऽस्मीति ॥ २३ ॥ २४ ॥२५॥ ननु नारदेन व्योमवधो न दृष्टस्तत्कथं व्योमवधप्रसक्तिरिति तत्रोच्यते । प्रातरेव केशिवधानंतरं नारदेनोक्तमंगीकृत्य पुनस्तथैव पशूंश्चारयता व्योमो हतः । यद्वा व्योमवधः पूर्वमेव वृत्तोऽपि वेषधारिवधप्रसंगादत्रोच्यत इति द्रष्टव्यम् । केचित्तु पुनः शंखचूडवधात्पूनंतरम् ॥ १९ ॥ भुवि गेयानीत्युक्त्या वीर्याणां संसारनिवृत्त्यर्थमेव कृतत्वं सूचयति ॥ * ॥ यानि एकेनैव युगपद्बह्वीनां बहुधा विवाहादीनि श्रीदामानुग्रहादीनि तानि चाहं द्रक्ष्यामि । अत एवैकादशे—" गोविंदभुजगुप्तायां द्वारकायां कुरूद्वह । अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥" इति । अहो भाग्यमाहात्म्यं मम, अहो कारुण्यमाहात्म्यं तवेति भावः ॥ २० ॥ प्रकृतत्वाद्भूभारस्य चेति । अक्षौहिणीनामष्टादशानाम् । अर्जुनसारथेरित्यनेन भारतयुद्ध इति ध्वनितम् ॥ * ॥ अमुष्येति षष्ठी आर्षी । निधनं निधनरूपं चरितमिति शेषः ॥ २१ ॥ एवमुक्तरीत्या । अत एव ज्ञानमूर्तित्वादेव । अर्थाः प्राप्तव्याः । आप्तकामता श्रुत्युक्ता । योगिजीवसाम्यतामादायाशंकते—नन्विति । अतोऽत्र । अतो निवृत्तगुणप्रवाहत्वात् । यद्वा—स्वतेजसा स्वप्रभावेण, योगिजीवादीनां तु भगवत्प्रसादावाप्तयोगादिभिः संसृत्यभावो न तु स्वप्रभावेणेति विशेषः । चिच्छक्त्या सदा ब्रह्माहमस्मीति निष्ठयेति बोध्यम् । स्वामिव्याख्याने 'तेजो बले प्रभावे च' इति यादवः ॥ * ॥ ० ॥ २२ ॥ ईमहि न तु जानीम इत्यत्राशंकते—नन्विति । मत्प्रपञ्चं भगवन्मायाप्रभावम् । अगुणप्रवाहं गुणप्रवाहस्य दृष्टत्वात् । तत्र ज्ञानाज्ञाने । अतोऽनन्याधीनत्वात् । अशेषाः सर्वे । विशेषा भेदाः । 'धुर्यौ मुख्ये बलीवर्दे समर्थे ' इति धरणिः ॥ * ॥ ० ॥ २३ ॥ एवमित्थम् । यदुपतिं गोपेशम् । तस्य कृष्णस्य दर्शनेनोत्सवो यस्य सः ॥ * ॥ ० ॥ २४ ॥ भगवानपीत्यत्रापिना तद्दर्शनोत्सवो नारददर्शनोत्सव एव तस्याद्भुतश्रावकत्वादिति भावः । पालैर्गोपैः ॥ * ॥ ० ॥ २५ ॥ पुनस्तद्दिन एव । तथैव पूर्ववत् । ननु व्योम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप ॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः ॥ २७ ॥ मयपुत्रो महामायो व्योमो गोपालवेषधृक् ॥
मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥ २८ ॥ गिरिदर्यां विनिक्षिप्य नीतंनीतं महासुरः ॥ शिलया पिदधे द्वारं चतुःपंचावशेषिताः ॥
॥ २९ ॥ तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सताम् ॥ गोपान्नयंतं जग्राह वृकं हरिरिवौजसा ॥ ३० ॥ स निजं रूपमास्थाय गिरींद्रसदृशं बली ॥
इच्छन्विमोक्तुमात्मानं नाशक्नोद् ग्रहणातुरः ॥ ३१ ॥ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले ॥ पश्यतां दिवि देवानां पशुमारममारयत् ॥ ३२॥
गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः ॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ॥ ३३ ॥ इति श्रीभागवते म० द० पू० केशिव्योमासुरवधो
नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ श्रीशुक उवाच ॥ अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः ॥ उषित्वा रथमास्थाय प्रययौ नंदगोकुलम् ॥ १ ॥

वैमेव पठंति च । तमाह । एकदेति ॥ २६ ॥ २७ ॥ मेषायितान्मेषवदाचरितान्स्वयं चोरवदाचरितः सन्नपोवाहापकृष्य निनाय ॥ २८ ॥ पिदधे छादितवान् ॥ २९ ॥ शरणदः आश्रयप्रदः । हरिः सिंह इव ॥ ३० ॥ ३१ ॥ पशुमारं पशुमारो यथा भवति तथा । अनिःश्वासमित्यर्थः ॥ ३२ ॥ भुवि गोपैः स्तूयमान उपरि वैमानिकैर्देवैरिति ॥ ३३ ॥ इति श्री०म०दशमे पू० सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ अष्टत्रिंशे यथा ध्यायन्नक्रूरो गोकुलं गतः ॥ तथैव रामकृष्णाभ्यां गृहं नीत्वा सुसत्कृतः ॥ १ ॥ प्रातः केशिवधे वृत्ते द्वादश्यां निर्गते मुनौ ॥ ततो व्योमे हतेऽक्रूरः सायं गोकुलमागमत् ॥ २ ॥ तदेवं नारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णो मथुरां गंतुमुद्यतो

प्रेषगाद्यश्रुतेरत्र तद्वधः प्रकृतासंगत इव भातीत्यत आह–यद्वेति । द्रष्टव्यं ज्ञेयम् । केचितु पूर्वं रासलीलोत्तरमित्यर्थः । तं व्योमवधम् । ते गोपाः । अद्रिसानुषु गोवर्धनप्रस्थेषु । चोरपालापदेशतः वयं पशूंश्चोरयिष्यामो वयं पालयिष्याम इत्यपदेशेन छन्नमनसा । व्याजेनेति यावत् । "अपदेशः पुमाल्लँक्ष्ये निमित्तव्याजयोरपि" इति मेदिनी । निलायनं निलीनकर्म ॥ * ॥ व्योमवधस्य श्रीनारदानुक्तत्वात्तद्दिने तद्वधे एकदेत्युक्तेरसंगतत्वात्तादृशलीलायाः कौमारान्त एव योग्यत्वाच्च । अतः 'वृषमयात्मजात्' इति गोपिकावाक्यञ्च संगच्छते । वृषात्मजो वत्सो मयात्मजो व्योमासुर इति पूर्वव्याख्यानात् । निलायनं नाम चोरितस्य तिरोधापनं, तद्रूपां क्रीडाम् ॥ २६ ॥ तत्र क्रीडायाम् । मेषायिता मेषवद्वर्तमानाः ॥ * ॥ अकुतोभया इति–चोरयितव्याश्चोरयितारः पालकाश्चैतत्त्रयं वयं सखाय एवेति विश्वासात् ॥ ॥ २७ ॥ अपकृष्य बलात्कारेण गृहीत्वा ॥ * ॥ अपोवाह चोरयामास ॥ २८ ॥ गिरिदर्यां पर्वतगुहायाम् ॥ * ॥ विनिक्षिप्य विशेषेण दूरतोंतःप्रदेशप्रवेशनेन नितरां क्षिप्त्वा ॥ २९ ॥ तस्य व्योमस्य । तत्कर्म बालनयनतत्पिधानरूपं कर्म । वृकम् ईहामृगम् 'कोकस्त्वीहामृगो वृकः' इत्यमरात् ॥ * ॥ सतां भक्तमात्राणाम् । शरणदः शरणरूपमात्मानं दाता किमुत तत्तत्सत्तमगणदुर्लभभागधेयानां तेषामित्यर्थः ॥ ॥ ३० ॥ सः व्योमः । ग्रहणेन कृष्णकरपीडनेनातुरः ॥ * ॥ बल्यपि आत्मानं मोक्तुमिच्छन्नपि निजं रूपमास्थायापि नाशक्नोत् ॥ ३१ ॥ तं व्योमम् । इत्यर्थ इति--यज्ञे हि पशुः 'अथ हृदयमवद्यति' इत्यादि मंत्रैर्हृदयादिषु निष्पीड्य निःश्वासरहित एव मार्यत इति भावः ॥ * । पश्यतां हर्षेण पश्यत्सु दिवीति तदानीमप्याशंकया स्थित्वेत्यर्थः । पशुमारममारयत् यज्ञियं पशुमिव श्वासरोधेनामारयत् । "उपमाने कर्मणि च" इति णमुल् । ण्यन्तस्य म्रियतेरनुप्रयोगश्च । इदमप्यनुरूपमेव तस्यां क्रीडायां चोरदंडस्यापि क्षणिकतदनुकरणरूपत्वात्तेनापि गोपानां श्वासरोधनाच्च । अच्युत इति तादृशसमुचितलीलातोऽचलनाभिप्रायेण ॥ ३२ ॥ स्वगोकुलमित्यनेन स्वीयत्वेन गृहीतं गोकुलं, गोकुलोपलक्षितं वृंदावनम् । प्रविवेश बहिर्लीलामाच्छाद्य नित्यलीलां स्वीचकारेति । अतः परं नंदनंदनलीला वृंदावननिकुंजादिषु रहस्या भविष्यति प्रत्यक्षांतर्द्धास्यतीति ध्वनितामिति ज्ञेयं श्रीहरिप्रियैः ॥ * ॥ कृच्छ्रतो गुहारूपात्कृच्छ्रस्थानान्निःसार्य, अत एव गोपैर्देवैश्च स्तूयमानः, अत एव प्रकर्षेण । 'विवेश स्वस्य गोकुलम्' इत्यागामिलीलास्मरणशंकया स्वचित्तं समादधाति--नात्यंतीनस्तत्परित्यागो भविष्यतीत्यभिप्रायात ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ सुसत्कृतो मानितः (१) । वृत्ते जाते । मुनौ नारदे । ततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गच्छन्पथि महाभागो भगवत्यंबुजेक्षणे ॥ भक्तिं परामुपगत एवमेतदचिंतयत् ॥ २ ॥ किं मयाचरितं भद्रं किं तप्तं परमं तपः ॥ किं वाऽथाऽप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवम् ॥ ३ ॥ ममैतद्दुर्लभं मन्य उत्तमश्लोकदर्शनम् ॥ विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ॥ ४ ॥ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनम् ॥ ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ॥ ५ ॥

वर्तते तदाऽक्रूरोऽपि गोकुलमागमदित्याह । अक्रूरोऽपीति ॥ १ ॥ २ ॥ अपिः संभावनायाम् । वा अथ वा अर्हते योग्याय ॥ ३ ॥ स्वस्य कृष्णस्य दर्शनेऽसंभवमाशंक्य पुनस्तत्संभावयति ममैतदिति द्वयेन । विषयात्मनो विषयाविष्टचित्तस्य मम । शूद्राज्जन्म यस्य तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति ॥ ४ ॥ यद्वा मैवं किं त्वधमस्य नीचस्यापि मम स्यादेव । कुत इत्यत आह । ह्रियमाणः कालनद्येति । अयं भावः । यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किंचित्कदाचित्तरति कूलं प्राप्नोति तथा कर्मवशेन

नारदगमनोत्तरम् (२) । तदेवं वाक्यालंकारेऽव्ययद्वयम्, निदर्शने वा । तदा कृष्णोद्युतिसमये । उद्यत उत्कंठितः । तां यस्यां रात्रौ न्ययुंक्त तामित्यर्थः ॥ * ॥ अक्रूरोऽपीति अपिशब्दः समुच्चये । समुच्चयश्च श्रीकृष्णस्य मथुरागमनोद्यमेनेति । यद्वा–अपिचशब्दः केशिगमनसमुच्चये उभयोः कंसादिष्टत्वात् । यस्यां रात्र्यां कंसेनादिष्टस्ताम् । तथा श्रीहरिवंशे--"निशि स्तिमितमूकायां मथुरायां जनाधिपः" इति । अत एवात्रापि पूर्वमुक्तम्–'प्रविवेश गृहं कंसः' इत्यादि । यच्च तत्रैवोक्तम्–"तस्मिन्नेव मुहूर्ते तु मथुरायास्स निर्ययौ । प्रीतिमान्पुंडरीकाक्षं द्रष्टुं दानपतिः स्वयम् ॥" इति तत्कल्पभेदाद्भिन्नम् । यद्वा–यादवैः सह कंसस्य बहुलसंकथया प्रायो रात्रिशेष एवोपसन्नेऽक्रूरं प्रति तस्य प्रेरणया तथैव पर्यवस्यतीति । महती भक्तिरूपा मतिर्यस्य सः । तथा चैकादशीं रात्रीं भगवदर्चनकथाकीर्तनादिभिर्जागरणेनैवोषित्वा पारणमकृत्वैव ययाविति विश्वनाथः । श्रीगोकुलजनवैक्लव्यहेतुकं तद्गमनवर्णनमनिच्छुरपि केवलं तद्भक्तिभागास्वादनमवलंब्यैव मुनींद्रोऽवर्णयत् । ज्ञातत्वेऽपि पुनर्नंदेति विशेषणं स्वस्य तद्विशिष्टतयैव स्फूर्तेः ॥ १ ॥ महामतित्वमाह--गच्छन्निति । महाभाग इति--बहुषु सत्सु कृष्णानयनार्थं तस्यैवाज्ञप्तत्वात् । परां प्रेमरूपाम् । एतद्वक्ष्यमाणम् । एवम् इत्थम् ॥ * ॥ ० ॥ २॥ स्वभाग्यमभिनंदन्नाह--किमिति । भद्रमिति सामान्योक्तं विशिनष्टि--किं तप्तमित्यादिना । योग्याय विष्णुभक्त्यादिगुणसंपन्नाय । यत् यतः ॥ * ॥ भद्रकर्मणां मध्ये किं मया भद्रं कृतं यद्यतः केशवं ब्रह्मरुद्राभ्यामपि दुर्दर्शम् ॥ ३ ॥ एतत् किं यदुत्तमश्लोकदर्शनमिति । शूद्रजन्मन इति– अश्रौतजन्मत्वाच्छूद्रस्य । "गायत्र्या ब्राह्मणमसृजत्त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम्" इति श्रुतेः श्रुतिजन्मनामेव श्रुत्युच्चारणेऽधिकार इति । शूद्रस्तु–"वेदाक्षरोच्चारणाच्च शूद्रश्चांडालतां व्रजेत्" इति स्मृतेः शूद्रत्वादपि पपतीत्याशयः ॥ * ॥ एतत् ईदृशं तत्तद्भद्राचरणादिसाध्यम् । यद्वा--आधुनिकमुत्तमश्लोकदर्शनम् । यद्वा--स्वानुभवमात्रवेद्यमाहात्म्यतातिविवक्षयादावेतदित्युक्तम् । उत्तमः संसाराख्यतमोनिरसनः श्लोकः यशो यस्य तस्य दर्शनं मम मत्संबंधे दुर्लभम् । साधनबाहुल्यं यदि स्यात्तदापि जन्मांतर एव लभ्यं मन्ये । कुतः–विषयात्मनः प्रारब्धवशेन विषयतादात्म्यं प्राप्तस्य । अनुरूपो दृष्टांतो यथेति । शूद्रजन्मन इति--साधनबाहुल्ये सति विप्रजन्मन्येव तत्स्यात् । कर्मशूद्रस्य तु प्रायश्चित्तविशेषेणेह जन्मन्यपि स्यादिति ॥ ४ ॥ पक्षांतरमाह--यद्वेति । मैवं, कृष्णदर्शनं मम भविष्यत्येवेत्याह--किंत्विति । हेतुमाशंकते--कुत इति । इत्यत इत्यत्र । अत्राशयमाह--अयं भाव इति । किंचित्तृणादि तरति तटे लगति । कदाचिद्वाय्वादिविवर्त्तनादिनेत्यर्थः । कश्चिद्भगवदनुगृहीतः ॥ * ॥ मतिधृतिभ्यामाह--मैवमिति । अधमस्येति तत्संदर्शनाऽखिलसाधनराहित्यं तद्वैपरीत्यं चोक्तम् । तथाप्यच्युतस्य सद्भजनाभावेऽपि कृपालुतादिमाहात्म्याच्च्युतिरहितस्य श्रीकृष्णस्य दर्शनं तन्माहात्म्यबलात्स्यादेवेत्यर्थः । संभावनायां लिङ् । अत्र निदर्शनम्--तत्तत्कर्मभोगकालप्रवाहेण संसार्यमाणेऽपि क्वचित्सांकेत्यनामादिनिमित्ते सति कश्चनाजामिलादिसदृशस्तरति तत्कूलायमानं भगवंतं प्राप्नोति । यथाकथंचित्तदभिगमनादौ सति पूतनादिसदृशो वा नदीरूपकेण यथा ताद्ध्रियमाणस्तृणादिरनुकूलवातादिनिमित्ते सति तरति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममाद्यामंगलं नष्टं फलवांश्चैव मे [भवः॥ यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजम् ॥ ६ ॥ कंसो बताद्याऽकृत मेऽत्यनुग्रहं द्रक्ष्येंघ्रिपद्मं प्रहितोऽमुना हरेः ॥ कृतावतारस्य दुरत्ययं तमः पूर्वेऽतरन्यन्नखमंडलत्विषा ॥ ७ ॥ यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः ॥ गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुचकुंकुमांकितम् ॥ ८ ॥

कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति संभवतीति ।। ५ ।। अतोऽनया प्रवृत्त्यैव ममामंगलं ध्रुवं नष्टमेवेति ज्ञायते । भवो जन्म च सफलं जातमिति । यद्यतो नमस्करिष्यामि ॥ ६ ॥ अमंगलनाशे शूचकांतरमाह । कंस इति । बतेत्याश्चर्ये । अतिखलः कंसोऽपि ममात्यंतमनुग्रहं कृतवान् । यतोऽमुना कंसेन प्रहितो हरेरंघ्रिपद्मं द्रक्ष्ये द्रक्ष्यामीति । पूर्वेंबरीषादयस्तमः संसारमतरंस्तीर्णास्तत् ।। ७ ॥ अंघ्रिपद्मं विभावयति । यदिति । ब्रह्मादिभिरर्चितमिति परमैश्वर्यमाह । श्रिया चेति सौभाग्यातिशयम् ।

तद्वदिति व्यंजितम् ॥ ९ ॥ अतः कालवशेन तरणसंभवात् । अमंगलं पापम् ॥ * ॥ अमंगलं सर्वोऽप्यंतरायः । योगिभिरपि यद्ध्येयमेव तन्नमस्ये साक्षात्कृत्य नमस्यामीत्यर्थः ॥ ६ ॥ अमंगलनाशे संदेहाभावमाह--यतोऽनुग्रहात् । प्रहितः प्रेषितः । द्रक्ष्य इत्यात्मनेपदमार्षम् । संसारं संसारहेतुमविद्याम् । यस्यांघ्रिपद्मस्य नखमंडलत्विषा नखसमूहतेजसा । तेजसा तमस्तरणस्य नियतत्वादिति भावः ॥ * ॥ संभावितश्रीभगवत्कारुण्यस्यैव लक्षणं सविस्मयमाह—कंस इति । अनुग्रहं ममाभीष्टसाचिव्यम् । यन्नखमंडलत्विषा तत्कांत्या तत्स्फूर्तिमात्रेणैवातरन्, आस्तां तद्भक्तिवार्तेति भावः । एतेन नराकृतिविग्रहस्य सनातनत्वं विग्रहांतराणां तदंतर्भावश्च लभ्यते ॥ ७ ॥ विभावयति चिंतयति । यदंघ्रिपद्मं सर्वजगत्स्कर्तुः पूज्यगत्वेन परमैश्वर्यम् । अतिसुन्दरता लक्ष्मीतोऽधिका न कुत्राप्यस्ति तत्पूज्यत्वेन सौभाग्यस्याधिक्यं स्फुटमेव । मुनिभिमर्ननिष्ठैर्जीवन्मुक्तैर्मुमुक्षुसहितैः तैः स्वर्गादिवदनुपेक्ष्यत्वात्परमपुरुषार्थता । कृपावशेन गवां तृणाद्यशनार्थं तदनुचरत् जातिवर्णाश्रमधर्माद्यरोहेनापि गोपिकाभिः केवलं प्रेम्णैव तत्स्पर्शानंदोऽनुभूयत इत्यर्थः ॥ * ॥ यदिति--अत्र यच्छब्दस्य वाक्यांतिमत्वात्तच्छब्दानपेक्षयैव योजना स्यादिति पूर्वेण युग्मकं न कृतम् । तदुक्तं काव्यप्रकाशे—" यच्छब्दस्तूत्तरवाक्यपदार्थगतत्वेनोपपत्तेः सामर्थ्यात्पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षते " इति । ततश्च प्रपंचाधिकारिभिर्यदंघ्रिपद्ममार्चितम् । " मतिबुद्धिपूजार्थेभ्यश्च " इति वर्तमाने क्तः । " क्तस्य च वर्तमाने " इति षष्ठ्यभावस्त्वार्षः । तैरागमोक्तमार्गेण सदोपास्यमानमिति । एतदेव द्रढयितुं क्रमेण तच्छिरस्पदैस्तदधस्पदैरप्युपास्यत्वमाह । श्रियेति वैकुंठपरिकराणामुपलक्षणम् । मुनिभिरिति प्रपंचस्थसर्वभक्तग्राहकम् । तत्र मुनिभिः श्रुतिपुराणाद्यनुसारिभिः । सिद्धैः साधकैश्च ससात्वतैः पाञ्चरात्रिकसहितैः । तत्साहित्यमत्र तस्यावश्यकत्वाभिप्रायेण । तदेवं यस्योत्कर्षप्रतिपादनाय तदिदं त्रयमुक्तं तस्य गोकुलस्य परमोत्कर्षं दर्शयति—गोचारणायेत्यर्धेन । यत्तेषामागममार्गेण ध्यात्वार्चितं तदेव स्वयं गोचारणायानुचरैश्चरद्भवति । तदप्यास्तां गोपिकानां कुचनिर्माल्यरूपैः कुंकुमैरंकितं भवतीत्यहो परमाश्चर्यमिति भावः । 'आचितम्' इति पाठे व्याप्तमित्यर्थः । तदेवं प्रायो देवर्षिमुखाद्रासश्रवणेन केवलं तत्प्रेम सुलभमेव चिंतितं न तु रतिकेलिमयविशेषमिति तद्दास्यभावेऽस्मिन्न रसाभासत्वं, किं वा गोपिकानां तमतिबालं वात्सल्याद्वक्षसि लालयंतीनां ज्यायसीनां कासांचिदित्यर्थः । गोपिका अप्यत्रोपलक्षणमेव गोपालादीनामिति ज्ञेयम् । सेयमस्य गोकुलमहिमस्फूर्तिस्तदाभिमुख्यप्रभावेणैवेति ध्येयम् । **विश्वनाथस्तु**--यस्यानुचरा ब्रह्मादयस्तदंघ्रिपद्मं गवामनुचरम्, यस्यार्चका ब्रह्मभवादयस्तद्गोपिकानां तु कुचोच्छिष्टकुंकुमास्वादकमित्युत्कर्षपरमावधिः । न चाक्रूरेण दासेन स्वप्रभोरुज्ज्वलरसास्वादनं रसाभासत्वादनुचितमिति वाच्यम्, वाक्यस्यास्य स्वगतत्वात् । स्वगतोक्त्या हि पित्रादयोऽपि हर्षात्पुत्रादीनां शृंगाररसमनुमोदयंतो दृष्टाः । यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनम् ॥ मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ॥९॥ अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया ॥ लावण्यधाम्नो भवितोपलंभनं मह्यं न न स्यात्फलमंजसा दृशः ॥ १० ॥ य ईक्षिताऽहं रहितोऽप्यसत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः ॥ स्वमाययाऽऽत्मन्रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥

मुनिभिर्भक्तसहितैरिति परमपुरुषार्थत्वम् । गोचारणायेति कृपालुत्वम् । यद्गोपिकानामिति प्रेममात्रसुलभत्वम् ॥ ८ ॥ मनोरथांतरं करोति । द्रक्ष्यामीति । शोभमानौ कपोलौ नासिका च यस्मिंस्तत् । स्मितसहितोऽवलोको यस्मिन् अरुणकंजवल्लोचने यस्मिन् तच्च तच्च मुखम् । गुडालकावृतं वक्रकेशावृतम् । तदानीमेव शुभसूचकं दृष्ट्वातिहृष्यन्नाह । प्रदक्षिणमिति ॥ ९ ॥ पुनरप्यन्यच्चिंतयति । अप्ययेति । ईयुषः प्राप्तवतः लावण्यस्य धामाऽऽश्रयस्तस्य विष्णोः । यद्वा विष्णोर्लावण्ययुक्तं यद्धाम वपुस्तस्य उपलंभनं दर्शनं भविता भविष्यति अपि यद्येवं स्यात्तर्हि मह्यं मम दृशो लोचनस्य फलं न स्यादिति न अपि तु स्यादेवेत्यर्थः ॥ १० ॥ य ईक्षितेत्यादि चतुर्भिः कालापकम् । तत्रैवं शंका । नन्वस्मदादिवदेव भोक्तृत्वकर्तृत्वादिधर्मैस्तत्रतत्र प्रतीयमानस्य कथं विष्णुत्वमितीमां शंकां श्लोकत्रयेणापाकुर्वंश्चतुर्थेन तमहं द्रक्ष्यामीति मनोरथं करोति । तथाहि य ईक्षितेति । असत्सतोः कार्यकारणयोरीक्षितापि ईक्षणमात्रेण कर्ताऽप्यहंरहितोऽहंकारहीनः । तथाऽपास्ततमोभिदाभ्रमः तमः स्वाज्ञानं

मनुना--"अन्विच्छति पतिं युक्तं वयःशीलगुणादिभिः । यदा तु भवतः शीलश्रुतरूपवयोगुणान् ॥ अशृणोन्नारदादेषा त्वय्यासीत्कृतनिश्चया ।" इति कर्दमोपाख्याने पुत्र्या अपि शृंगाररसानुमोदनात् ॥ ८ ॥ इतोऽप्यधिकं मनोरथं करोतीत्याह--मनोरथांतरमिति । गुडा निबिडा अलकाः कुंतलास्तैरावृतम् । यद्वा--गुडा अंगुलिकास्तद्वद्वक्राः । यद्वा--गुड इक्षुविकारस्तद्वत्स्निग्धाः । "गुडः पिंडेक्षुविकृतौ स्नुह्यंगुलिकयोर्गुडा" इति यादवः । वै-शब्दादन्येऽपि शुभसूचका भारद्वाजादयो ग्राह्याः । तदुक्तम्--"भारद्वाजो मयूरश्च शुकश्च गरुडस्तथा । एतेषां दर्शनं पुण्यं गतौ वामे विशेषतः ॥" इति ज्योतिषे ॥ * ॥ इत्थं सहजदास्येनादौ पादाब्जदर्शनं विभाव्य तत एव प्रेमोद्रेकेण लोभाच्छ्रीमुखदर्शनेऽपि मनोरथं करोति–द्रक्ष्यामीति । अत्र मृगा इति अयुग्मवैशिष्ट्यार्थम् । कृष्णमृगसहिताश्चेति ज्ञेयम् । तदुक्तं शकुनतंत्रे–"पुण्येन गत्या गवया अयुग्माः प्रदक्षिणं गौरमृगाश्चरन्ति । समा न शस्ता न च वामयाताः कृष्णैर्विमिश्रा न भवन्ति दुष्टाः ॥" इति ॥ ९ ॥ इदानीमन्यत्ततोऽप्यधिकं स्मरतीत्याह–पुनरिति । लावण्याधिकरणत्वोक्तिः शरीरे संगच्छते न त्वात्मनीत्यस्वारस्यादाह–यद्वेति । यद्येवं स्याद् यदि दर्शनं स्यात् । इत्यर्थ इति–'द्वौ नञौ प्रकृतार्थं गमयतः' इति वामनोक्तेः । लुनाति छिनत्ति द्रष्टॄणां चेतो हरतीति लवणं सौंदर्यं तदेवाधिकं लावण्यमिति "लावण्यं त्वतिसौंदर्ये छेदे मधुवने तथा" इति निरुक्तेः ॥ * ॥ ननु तद्दर्शनमसुरा अपि लभंत एव तत्र तवैव का भाग्यश्लाघेत्यत आह–अप्यद्येति । अद्य निजेच्छयैव मनुजत्वमस्मद्वैवस्वतवंशप्रादुर्भूतत्वं गतवतो विष्णोर्लावण्यधाम्नः किमुपलंभनं यथार्थानुभवितेत्यसुराणां दर्शनमात्रं न तु लावण्योपलंभ इति भावः । फलं सार्थकत्वम् "अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेश यतो वयस्यैः । वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥" इत्युक्तेः । अंजसा साक्षादेव न तु छायादिव्यवधानेनेति भावः । यद्वा–उपलंभनं समीपप्राप्तिः । दृशः फलं दर्शनमंजसाऽनानायासेन चक्षुरुन्मीलनमात्रेणैव न तु योगादिसाधनबाहुल्येनेति भावः ॥१०॥ कालापकमिति–" श्लोक एकेन युग्मं हि द्वाभ्यां वैशेषिकं त्रिभिः । कालापकं चतुर्भिः स्यात्कुलकं तु ततः परैः ॥ " इति साहित्यसंदर्भोक्तेः । तत्र भगवति । एवं वक्ष्यमाणरीत्या । शंकाक्षेपोऽस्तीत्याह–नन्विति । तत्रतत्र युद्धादौ स्त्र्यादिग्रहणे च । अपाकुर्वन्निरस्यन् । तथाहि दर्शयति । तमआद्यपास्तौ हेतुमाशंक्य समाधत्ते–कुत इति ।] एतत् तमआदिनिरसनम् । तत्र आक्षेपे । यद्यपि स्वरूपसाक्षात्कारवान्सदैवास्ते तथापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्याखिलाऽमीवहभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मभिः ॥ प्राणंति शुंभंति पुनंति वै जगद्यास्तद्विरक्ताः शवशोभना मताः ॥ १२ ॥

ततो भिदा भेदस्ततो भ्रमोऽभिनिवेशादिः अपास्ता अपाकृतास्तमआदयो यस्मिन्सः । कुत एतत्तत्राह । स्वतेजसा चिच्छक्त्या नित्यस्वरूपसाक्षात्कारेण । तथापि स्वमायया स्वाधीनया मायया तदीक्षया तस्यैवेक्षया प्राणाक्षधीभिः सहितैरात्मन्नात्मनि स्वस्मिन्नेव रीचतैर्जीवैः सदनेषु वृंदावनतरुषु गोपीगृहेषु च लीलया कर्माणि कुर्वन्सक्तवद्भीयते आभिमुख्येन प्रतीयते ॥ ११ ॥ ननु सर्वथाऽहंकारादिरहितस्यात्मारामस्य लीलाऽपि कुत इत्याशंक्य परानुग्रहार्थेत्याशयेनाह । यस्येति । अखिलान्यखिलस्य वा अमीवानि पापानि घ्नंतीत्यखिलामीवहानि तैः । तथा सुमंगलैः शोभनानि मंगलानि येभ्यस्तैः गुणाः करुणादयः कर्माणि जन्मानि च तैर्विमिश्रा युक्ता वाचो जगत्प्राणन्ति जीवयंति शुंभंति शोभयंति पुनंति पवित्रयंति । व्यतिरेकमाह । या इति । तैर्विरक्ता रहितास्तास्तु वाचः स्वलंकृता अपि वस्त्राद्यलंकृतशववच्छोभमाना मताः सतां संमताः ॥ १२ ॥

तस्यैव भगवत ईक्षया ईक्षणेन स ऐक्षत " एकोऽहं बहु स्याम् " इति श्रुतेः । स्वस्मिन्नेव :प्रकाशिते रज्जूरगवत्प्रदर्शितैर्जीवैः । एतेनाध्यस्तानामधिष्ठानातिरेकेण सत्ताया अभावाद्वस्तुतः प्रतीतिकर्तृत्वमेव न तेषां स्वयमेवात्मनात्मानमपश्यादिति । अयमेवार्थो वतिना सक्तवदित्युक्तेनाभिधीयते " लोकवत्तु लीलाकैवल्यम् " इति न्यायोऽप्यत्रानुकूल एवेति ॥ * ॥ मनुष्यकृतेस्तस्य लावण्योपलंभो नयनाभ्यामेव, स च सांप्रतं नंदग्राम एव अन्तर्यामिणः परमेश्वरस्य तस्य त्वनुमानेनैवोपलंभोऽस्मदादीनां सदा सर्वत्र वर्तत एवेत्याह—य इति । असत्सतोर्जीवस्याशुभशुभकर्मणोरीक्षिताऽहंरहितोऽप्यहं पश्यामीत्यहंकारहीनोऽपीत्यपिकारेण जीवो देहाहंकारसहित एवेक्षिता, परमात्मा तु तद्देहाहंकाररहित एव द्रष्टा उदासीनः सन्साक्षीत्यर्थः । नन्वहंकारराहित्यसाहित्याभ्यां को विचारः ? देहस्थितश्चेत्तद्वर्तिशोकमोहादिभिर्युज्यत एव, न हि गृहे स्थित आसक्तोऽनासक्तो वा गृहवार्ती ध्वान्तमौष्ण्यं शैत्यं वा नानुभवेत्तत्राह—स्वतेजसा चिच्छक्त्यापास्तं तमोऽज्ञानं तत्कृता भिदा भ्रमश्च येन सः । यो ह्यंतर्यामी स्वीयया माययात्मनि जीवेऽधिकारेण रचिताः सृष्टा याः प्राणेंद्रियधियस्ताभिस्तासां स्रष्टा स ईयतेऽनुमीयते, तथा तदीक्षया तासां प्राणादीनामीक्षया प्रकाशेन च तासां प्रकाशकः स सदनेषु समष्टिव्यष्टिदेहेष्वनुमीयते । तदुक्तम्—' गुणप्रकाशैरनुमीयते भवान् ' इति । तद्रूपलावण्यानुभवो हि परमभाग्यफलमेव ॥ ११ ॥ लीलायामाक्षिपति—नन्विति । अखिलानीति कर्मधारये कस्येत्याकांक्षोदयात्तत्पुरुषमाह—अखिलस्य वेति । वाचो भक्तानुकंपिन्मुरारे यशोदासूनो इत्येवंलक्षणाः । व्यतिरेकं गुणकर्मजन्ममिश्राभावमाह । तैर्गुणकर्मजन्मभिः । ता वाचः । स्वलंकृताः उपमारूपकोत्प्रेक्षाद्यलंकारयुक्ता अपि । यथास्या मुखं सुंदरमित्यर्थे वर्णनीये अस्या मुखं कमलमिवेत्युपमा । एतन्मुखमेतन्मुखमिवेत्यनन्वयः । मुखकमलं रम्यमिति रूपकम् । अस्या मुखे भ्रमरा अब्जमत्या पतंतीति भ्रांतिमदलंकारः । " अस्या मुखे कृते धात्रा किं पद्मेन किमिंदुना " इति आक्षेपः । एतन्मुखं कमलं वेति संशयः । नैतन्मुखं किं तु कमलमित्यपह्नुतिः । मन्य एतन्मुखं कमलमित्युत्प्रेक्षा, एवमन्यदप्यूह्यम् । यथा सुवस्त्राद्यलंकृतोऽपि शवो न शोभते तद्वत् । अत एवोक्तम्—" न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमन्त्युशिक्षयाः ॥ " इति प्रथमे ॥ * ॥ यस्य संकीर्तनान्यपि यदुद्धारकाणीत्याह—यस्येति । अखिलानि अखिलस्य वाऽमीवानि पापानि घ्नंतीत्यखिलामीवहानि तैः, शोभनानि मंगलानि येभ्यस्तैर्यस्य गुणकर्मविमिश्रा वाचो वाक्यानि जगत् तद्वक्तृश्रोत्रात्मकं प्राणंति जीवयंति, जीवयित्वा :शुंभंति कृपालुत्वनिर्मत्सरत्वादिभिरलंकारैः शोभयंति, शोभयित्वा च पुनंति आविद्यकदोषात्पवित्रयंति । तद्रहिता वाचो गुणालंकारादिमत्योऽपि शवाञ्शोभयंति ताः । प्रथमं जीवतोऽपि तद्वक्तृश्रोत्रात्मकाञ्जनाञ्शवान्कुर्वंति, तत उपमाद्यैरलंकारैरलंकारैरिव शोभयंतीति । तदुक्तम्—" जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः । बिले बतोरुक्रमविक्रमान्ये न शृण्वतः

स चावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् ॥ यशो वितन्वन्व्रज आस्त ईश्वरो गायंति देवा यदशेषमंगलम् ॥ १३॥ तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवम् ॥ रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममाऽऽसन्नुषसः सुदर्शनाः ॥ १४ ॥ अथावरूढः सपदीशयो रथात्प्रधानपुंसोश्चरणं स्वलब्धये ॥ धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन्वनौकसः ॥ १५ ॥ अप्यंघ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपंकजम् ॥ दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणैषिणां नृणाम् ॥ १६ ॥

स्वयंरचितान्सेतून्वर्णाश्रमधर्मान्पालयताममरवर्याणां सुखकर्ता सन्नवतीर्णः । यद्यशः ॥ १३ ॥ त्रैलोक्ये एकमेव कांतम् । दृशिर्दृष्टिस्तद्वतां महानुत्सवो यस्मात् । यद्वा महानुत्सव एव । अत एव श्रिय ईप्सितमास्पदमेवंभूतं रूपं श्रीमूर्तिं दधानं तमीश्वरं द्रक्ष्यामीति । अत्र लिंगम् । उषसः प्रभातसमयाः । सुदर्शनाः सुप्रसन्नं दर्शनं येषां ते शुभदर्शना इत्यर्थः । सुखं प्रभाता रजन्यः शुभसूचिका बभूवुरित्यर्थः ॥ १४ ॥ किं च । अथ दर्शनानंतरं सपदि तत्क्षणमेव रथादवतीर्णः सन्प्रधानयोः पुरुषयो रामकृष्णयोश्चरणं योगिभिरप्यात्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि । आभ्यां सहानयोः सखीन् गोपांश्च नमस्यामीति ॥ १५ ॥ किं च । अपीति । अधास्यत्

कर्णपुटे नरस्य ॥ " इत्याद्युक्तेः ॥ १२ ॥ अस्त्वेवं प्रकृते किमागतं तत्राह–स चेति । स च भगवान् । किलेति प्रसिद्धम् । सोऽवतीर्ण इह किं मानामिति चेदाह–गायंति । देवा व्यासदेवप्रभृतयः । गेयसंभवे गानं युक्तम् ' सति कुड्ये चित्रम् ' इति न्यायेन । अशेषाणां सर्वेषां श्रोतृवक्तृप्रभृतीनां मंगलं श्रेयस्करम् ॥ * ॥ तदेवं य ईक्षिता यस्य च नानागुणकर्मणां तादृङ् माहात्म्यं स तु सोऽपि स्वयं सात्वतान्वयेऽवतीर्णः सन्व्रज आस्त इति संबंधः । किलेति महत्सु शांतेषु च प्रसिद्धिं प्रमाणयति । स्वसेतवो भगवद्धर्मादिमर्यादाः । अमरवर्या ब्रह्मरुद्राद्याः । न केवलं तदवतारादिदर्शिनां तेषामेव शर्मकृदपि त्वन्येषामपीत्याह–यश इति । तदेव प्रशंसति–यद्यशो देवाः सर्वाराध्या अपि गायंति । यच्च परमनिकृष्टपर्यंताशेषजीवानां मंगलमिति । तत्तत्कर्तृत्वञ्च नास्मदादिवत्कर्मपारवश्येन किं तु स्वातन्त्र्येणेत्याह–ईश्वरः ॥ १३ ॥ स्वमानसं प्रति वक्ति–तं कृष्णम् । महतां गतिं महद्भिर्गम्यम् । एकमेवेत्येव कारेणान्यत्र तादृशसौंदर्यव्यवच्छेदो बोध्यते ' ' स्वमूर्त्या लोकलावण्यनिर्मुक्त्या ' इति वक्ष्यमाणत्वात्, ' परं पदं भूषणभूषणांगम् ' इत्याद्युक्तेश्च । पंचमीबहुव्रीहिणोत्सवहेतुत्वं प्रतीयते । पुत्रजन्मादिवन्न तूत्सवरूपत्वमित्यस्वारस्यादाह–यद्वेति । 'उत्सवो मह उत्सेकः ' इति कोशादुत्सवो भद्रहेतुरित्यर्थः । "भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः" इति श्रुतेः । एवंभूतं श्रीकांक्षितम् । अत्र दर्शने । लिंगं हेतुः । इत्यर्थ इति–प्रातः शुभशकुनादिभिर्ज्ञायतेऽवश्यं मे भगवद्दर्शनं भविष्यतीति भावः ॥ * ॥ नन्वेवं साधारण्यञ्चेत्तस्मात्तव किं वैशिष्ट्यं तत्राह–तं त्विति । नूनं निश्चये । तुशब्दः सर्वयादवादितोऽपि निजभाग्यवैशिष्ट्यविवक्षया । अहं त्वद्यैव तं द्रक्ष्ये, महतां महाभागवतानां गतिं गम्यं गुरुञ्चोपदेष्टारामिति साध्यसाधनत्वमुक्तम् । रूपं सौंदर्यम् । एवं सामान्यत उक्त्वा श्रीकृष्णरूपे तस्मिन्विशेषमाह–त्रैलोक्य–(–मध्ये मध्योऽर्ध्वलोकः स च महावैकुंठपर्यंतः सोऽपि महानारायणपर्यंतस्तस्मादपि-)–कांतम् । अत एव स्वसहितानां तादृशामपि दृशिमतां महोत्सवम् । वक्ष्यते च महाकालपुरनाथेन श्रीभगवता–"द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीताः" इति । उक्तञ्च उद्धवेन–' विस्मापनं स्वस्य च ' इति । न केवलं स्वरूपरीयसामेव तादृशं तत्, अपि तु स्वशक्तिवरीयस्या अपीति वदँस्तादृशसुभगतायां हेतुमाह–सर्वसौभाग्याश्रयरूपायाः श्रियोऽपि ईप्सितमीप्सां तस्या आस्पदं न तु महानारायणादिवद्भोग्यमपीत्यर्थः । तदुक्तम्–' यद्वाञ्छया श्रीललनाचरत्तपः ' इति । उषस इत्यनेन बह्व्यो रात्रयश्चिरं सुप्रभाताः सन्ति, अन्यथेदृशं फलं न स्यादित्यर्थः ॥ १४ ॥ धृतं ध्यातं न तु दृष्टम् । आभ्यां रामकृष्णाभ्यां सह ॥ * ॥ वनौकसः वृंदावनसकलप्राणिनः ॥ १५ ॥ अन्यदाह–किञ्चेति । अपीति सम्भावनायाम् । कालसर्पवेगेन प्रोद्वेजितानां त्रस्तानाम् । तद्धस्तपंक

॥ १९७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेंद्रताम् ॥ यद्वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगंधिकगंध्यपानुदत् ॥ १७ ॥ न मय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्य दूतः प्रहितोऽपि विश्वदृक् ॥ योंतर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा ॥ १८ ॥ अप्यंघ्रिमूलेऽवहितं कृतांजलिं मामीक्षिता सस्मितमार्द्रया दृशा ॥ सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशंक ऊर्जिताम् ॥ १९ ॥ सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ माम् ॥ आत्मा हि तीर्थीक्रियते तदैव मे बंधश्च कर्मात्मक उच्छ्वसित्यतः ॥ २० ॥

धास्यति । तद्विभावयति दत्ताभयमिति सार्धेन ॥ १६ ॥ बलिना तावत्पदत्रयपरिमितभूदानसमये तस्य हस्ते उदकं निहितम् । कौशिकः कौशिकगोत्रोत्पन्न इंद्रस्ते नापि कदाचित्किंचिन्निहितमिति ज्ञातव्यम् । मुमुक्षूणां संसारभयनिवर्तकं सकामानामभ्युदयप्रदं चेत्युक्तमथानुरक्तानां परमसुखदं चेत्याह । यद्वेति । वाशब्दो वितर्के । यत्करपंकजं विहारे रासक्रीडायाम् । सौगंधिकस्य गंध इव गंधो यस्य तत्सौगंधिकगंधि ॥ १७ ॥ एवं परमानुग्रहं संभाव्य पुनरप्यसंभवमाशंक्य परिहरति । न मयीति । यद्यप्यहं कंसेन प्रहितोऽतस्तस्य दूतस्तथापि मय्यरेरयमिति बुद्धिं नोपैष्यति न करिष्यतीत्यर्थः । यतो विश्वदृक् सर्वज्ञोऽतो मम चेतसोंतश्च बहिश्च यदीहितं चेष्टितमेतद्यः क्षेत्रज्ञोंतर्यामी नित्यज्ञानेनेक्षते । अयं भावः । चेतसो बहिरेव कंसमनुवर्तेतस्तु कृष्णमेव तदेतदसौ हृदि स्थितो जानातीति । यद्वा एतस्य जगत ईहितमिति ॥ १८ ॥ अपि यदंघ्रिमूले चरणोपांतेऽवहितं संयतं कृपामृतेनार्द्रया दृशा मामीक्षिता द्रक्ष्यति तर्हि सपद्येव विनष्टाखिलकल्मषः परां मुदं वोढा प्राप्स्यामीति ॥ १९ ॥ अथ मां परि

जम् । विभावयति विवृणोति । विभुरिति सर्वव्यापित्वान्मन्मनोरथं करिष्यत्येवेत्याह ॥ * ॥ नृणामिति षष्ठी चतुर्थ्यर्थे ॥ १६ ॥ यत्र हस्तपंकजे । कौशिकत्वमिंद्रस्य यथा जातं तद्धरिवंशतोऽवसेयम् । निहितं स्थापितम् । 'दत्ताभयम्' इत्यादिना मुमुक्षूणां, 'समर्हणम्' इत्यादिना सकामानाम् । अनुरक्तानां परमप्रेमवताम् । 'सौगंधिकं तु कह्लारम्' इत्यमरः । यद्धस्तपंकजम् । अपानुदन्निराकरोत् ॥ * ॥ सम्यगर्ह्यते पूज्यते येन तत्समर्हणं संकल्पोदकम्, तच्च सार्वभौमावतारे पुरंदरेण तस्य हस्ते जलं दत्तमिति पुराणांतरे । बलिना च वामनावतार इत्यष्टमे वर्णितमेव । यच्च विहारे रासक्रीडानंतरसंप्रयोगे श्रमं विहारश्रमोत्थस्वेदांबु मार्जयामास । तदुक्तम्—"तासां रतिविहारेण श्रांतानां वदनानि सः । प्रामृजत्करुणः प्रेम्णा शंतमेनांग पाणिना ॥" इति । तेन तासां परममाधुरी ध्वनिता । तत्किंभूतं—स्पर्शेन तासां मुखस्पर्शेन सौगंधिकगंधि मानससरोवरकमलं सौगंधिकमिति पुराणांतरे प्रसिद्धम् । इहापि पूर्ववत्स्वस्वगतोक्तत्वान्न रसाभासः ॥ १७ ॥ संभाव्य विचार्य । असंभवं दर्शनादेर्मनस्येवाह । अथ वा—किं प्रलापेन तव कंसभृत्यत्वात्तत्प्रहितत्वाच्च त्वय्यच्युतोऽरिबुद्धिं करिष्यत्येवेति मंदाशंकां परिहरन्नाह—न मयीति । अतः कंसप्रहितत्वात् । इत्यर्थ इति—धातूनामनेकार्थत्वादेतिरत्र करणेर्थे बोध्य इत्याशयः । यतो यस्माद्धेतोः । अतो हेतोः । एतत् संकल्पलक्षणम् । क्षेत्रं श्रीगीतोक्तलक्षणम् "महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च । इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः । एतत्क्षेत्रम्" इत्येवंरूपं जानाति साक्षात्पश्यतीति क्षेत्रज्ञः । निजाभिप्रायमाह—अयं भाव इति । पूर्वव्याख्याने ममेहितमित्युक्तेर्भगवतः परिच्छिन्नदर्शित्वप्रतीतेरस्वारस्यादाह--यद्वेति ॥ * ॥ ० ॥ १८ ॥ 'अतो नु अपि यद्यर्थे' इत्याह—अपि यदि । ईक्षिता लुटः प्रथमपुरुषैकवचनम् । वीता गता विविधा शंका 'शत्रुप्रेषितोऽयं नांगसंगार्हः' इत्येवमादिका यस्य स तथा । ऊर्जितामुद्रिक्ताम् । वोढेति वहतेः पूर्ववत् ॥ * ॥ सपदि तत्क्षणमेव ॥ १९ ॥ अथ दृष्ट्यनंतरम् । तीर्थीक्रियते ज्ञानयोग्यपात्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लब्धांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः ॥ तदा वय जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २१ ॥ न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा ॥ तथाऽपि भक्तान्भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ ॥ किं चाऽग्रजो माऽवनतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमंजलौ ॥ गृहं प्रवेश्यातसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु ॥ २३ ॥

रप्स्यते आलिंगिष्यति यदा तदैव तेन मे आत्मा देहस्तीर्थीक्रियतेऽतिपवित्रीकरिष्यते । बंधश्च अतो देहात् उच्छ्वसिति श्लथो भविष्यति ॥ २० ॥ ततः भोस्तातेति । तदा जन्मभृतः सफलजन्मानः । अन्यथा तज्जन्मैव न भवतीत्याह । महीयसेति । महीयसा श्रीकृष्णेन योऽनादृतोऽमुष्य तस्य जंतोस्तज्जन्म धिक् ॥ २१ ॥ ननु सुहृदादिषु परिष्वंगसंप्रश्नादयो जीवधर्माः कथमीश्वरे संगच्छंतेऽत आह । न तस्येति । दयितः प्रियस्तद्विपरीतोऽप्रियः सुहृत्तमो हिततमस्तद्विपरीतो द्वेष्य एतत्सर्वव्यतिरिक्त उपेक्ष्य इति । दयिताद्यो न संतीति सत्यं तथापि भक्तान्भजते । तत्र यथा ये भक्तास्तांस्तथा भजते । " ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् " इति भगवद्वचनात् । अविषमत्वेपि भक्तेभ्य एव फलं ददातीत्यत्र दृष्टांतः । यद्वत्सुरद्रुम इति ॥ २२ ॥ यो मयांजलिः करिष्यते तस्मिन्नेवांजलौ गृहीतं स्वकरेण धृतं माम् । आत्तानि समस्तान्यर्घादिसत्कृतानि ...

क्रियते इति वा । भगवदालिंगनेन विनैवोपास्ति ज्ञानयोग्यो जात इति भावः । कर्मात्मकः संसृतिलक्षणः । अतो देहाद्बंधः, अतोंगसंगाद्वा ॥ * ॥ सुहृत्तमं श्रीवसुदेवादिहितकारित्वात् । न केवलं सुहृत्तमतैव किन्तु ज्ञातिम् । ज्ञातित्वेऽपि सत्यनन्यदैवतम् ऐकांतिकदास्यवंतम् । ततश्च तेन मे देहस्तीर्थी क्रियते तीर्थं करिष्यते, देहः पूतो भूत्वाऽन्येषामपि पावनो भविष्यति । अतः परिरंभाद्धेतोः । उच्छ्वसिति उद्गतो भविष्यति ॥ ॥ २० ॥ तन्यते विस्तार्यते वंशोऽनेनेति ततः, तनोतेः क्तप्रत्ययेऽनुनासिकलोपेन रूपसिद्धिः । 'ततोऽनुकंप्ये जनके' इति मेदिन्युक्तेर्जनकभ्रातृत्वान्मयि ततशब्द उपचर्यते । भगवद्दृष्ट्याऽनुकंप्यत्वाद्वा मां ततेति वक्ष्यते । तत एव तात इत्यभिप्रेत्यैवोक्तम्--भो तातेति । महीयसाऽतिपूज्यतमेन । यः पुमान् । अमुष्य पुंसः । तज्जन्म यस्मिञ्जन्मनि नादृत इत्यर्थः ॥ * ॥ उरु महत् श्रवः कीर्तिर्निरुपाधिकृपाकरत्वादिलक्षणा यस्य सः । महीयसा सर्वपूज्यतमेन भगवता प्रेमसंभाषणादिना न संमानितः । अमुष्य तादृशस्य । तन्महत्तमानादृतम् । यद्वा--परमापकृष्टत्वेनाऽनिर्वचनीयम् । यद्वा--संजात्यादिनोत्कृष्टमपि । यद्वा--महीयसा कृपादिगुणमहत्तमेन तत्सेवकेन केनचिदपि । किं पुनस्तेन सर्वकृपालुगुणमूर्द्धन्यमणिनेत्यर्थः ॥ २१ ॥ तत्रानीश्वरतामाशंकते--नन्विति । अतोऽत्र । तस्मात्प्रियाद्विपरीतः । एतस्माद्दयितादिचतुष्काद्व्यतिरिक्तो भिन्नः । इति सत्यम्--दयितत्वाद्यभावस्तत्र सत्यं विद्यतेऽपि । तत्र दयितत्वादिमत्सु । यथा दयितत्वादिरूपेण । तान् दयितत्वादिमतः । तथा--दयितत्ववंतं दयितत्वेन, द्वेष्यं द्वेष्यत्वरूपेण । तथा च श्रीगीतासु । इत्यत्रैतस्मिन्विषये । यद्वद्यथा । सुरद्रुमः कल्पतरुः । न हि कल्पद्रुमस्य केनापि साकं रागद्वेषादि तथापि फलं तु सेवकायैव ददातीतिवद्भगवानपीति भावः ॥ * ॥ ननु तस्य परमेश्वरत्वात्सर्वत्र साम्यमेव संभवेत्, एवं च त्वं स्वस्मिंस्तत्सुहृत्तमत्वादिकं किं संभावयसीति तत्राह--न तस्येति । तथापि भक्तान्भजत इति--" समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ " इति तदुक्तेः । तत्रापि यथा तथेति ये यथा भक्तास्तांस्तथा भजते । " ये यथा मां प्रपद्यंते तांस्तथैव भज्याम्यहम् " इति तद्वचनात् । यद्वत्सुरद्रुम इति--आश्रयणतारतम्येन फलतारतम्यम् । अनाश्रितेभ्यः फलाऽप्रदानं च तदपि सुरद्रुमस्य यथा न वैषम्यं तथा तस्य भगवतोऽपि । किञ्च--सुरद्रुमस्याश्रिताधीनत्वं तथा नास्ति यथा भगवतो भक्ताधीनत्वम् । अतो भक्तिसंबंधेन तस्य सौहार्दद्वेषोपेक्षा अपि दृष्टा एव । यथांबरीषादौ सौहार्दं, तद्द्वेष्टृदुर्वासःप्रभृतौ द्वेषोपेक्षे च दृष्टे एवेति ॥ २२ ॥ इदानीं बलदेवविषयिणीं चिंतां कुरुते--किञ्चेति । स्मयन्नहो मां पितृव्यः सन्नमतीति मंदस्मितं कुर्वन् स्वबंधुषु वसुदेवादिषु संप्रक्ष्यतेऽनुयोक्ष्यते ॥ * ॥ स्वबंधुषु वसुदेवादिषु ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति संचिंतयन्कृष्णं श्वफल्कतनयोऽध्वनि ॥ रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप ॥ २४ ॥ पदानि तस्याखिललोकपाल किरीटजुष्टामलपादरेणोः ॥ ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः ॥ २५ ॥ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाऽश्रुकला कुलेक्षणः ॥ रथादवस्कंद्य स तेष्वचेष्टत प्रभोरमून्यंघ्रिरजांस्यहो इति ॥२६॥ देहंभृतामियानर्थो हित्वा दंभं भियं शुचम् ॥ संदेशाद्यो हरेर्लिंगदर्शन श्रवणादिभिः ॥ २७॥ ददर्श कृष्णं रामं च व्रजे गोदोहनं गतौ ॥ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ ॥ २८ ॥

त्कृतानि येन तं मां गृहं प्रवेश्य ॥ २३ ॥ एवंप्रकारेणाध्वनि संचिंतयन् स तु मार्गमपि न वेद तथापि सूर्यास्तगमने रथेन गोकुलं प्राप्त इति ॥ २४ ॥ अखिलैर्लोक पालैः किरीटेषु जुष्टाः अमलाः पादरेणवो यस्य तस्य। क्षितिकौतुकानि क्षितेरलंकाररूपाणि ॥ २५ ॥ तद्दर्शनेन तेषां पदानां दर्शनेन य आह्लादस्तेन विवृद्धः संभ्रमो यस्य सः प्रेम्णा ऊर्ध्वानि रोमाणि यस्य सः। अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः। अवस्कंद्यावप्लुत्य तेषु पदेषु सोऽक्रूरः अचेष्टत व्यलुठत्। अहो इति दुर्भलतां भावयन् ॥२६॥ ननु किमर्थमेवं व्यलुठत् नास्ति प्रेमसंभ्रमे फलोद्देश इत्यत आह। देहंभृतामिति। देहभाजामेतावानेव पुरुषार्थः। कः। कंसस्य संदेशात्संदेशमारभ्य हरेर्लिंगदर्शन श्रवणादिभिर्दंभादि हित्वा योऽयमक्रूरस्य वर्णित इति। संदेश आद्यो यस्यार्थस्य स संदेशाद्यो यावानक्रूरस्य जात इति वा॥२७॥ततः कृष्णं रामं च ददर्श। गावो दुह्यंतेऽस्मि

इति इत्थम्। सूर्यश्चास्तगिरिमिति—प्रातश्चलितो मथुरातोऽल्पेऽपि मार्गे भगवद्ध्यानावेशितचेतस्त्वादश्वरश्मिसंचालनादिकं न सस्मारेति भावः। नृपालनादिव्यग्राणामेतद्दौर्लभ्यमाह—नृपेति संबोधयन्निति भावः ॥ * ॥ सूर्यश्चास्तगिरिमिति सहोपमा। सा चास्तगिरिणा सूर्यस्येव गोकुलमहसा तस्यावृतत्वं ध्वनयति ॥ २४ ॥ तस्य श्रीकृष्णस्य। पदानि पादतलचिह्नानि। विलक्षितानि विलक्षणत्वेन ज्ञापितानि। 'अलंकारेऽपि कौतुकम्' इति कोशांतरात् ॥ * ॥ ननु रथोपर्यासीनेन सायं गोधूलिकृतांधकारे बहुलगोपगणपदावृतानि तस्य पदानि कथं दृष्टानि तत्राह—क्षितीति। क्षितेः कौतुकमुत्सवो येभ्यस्तानीति। निजालंकारत्वेन तयैव सुव्यक्ततया रक्षणात्। तत्र च भक्तजनदृष्टौ स्वतः स्फुरणादिति भावः। ननु तस्यैव तानीति कथं विज्ञातं तत्राह—अब्जाद्यैर्विलक्षितानि असाधारणानि ॥ २५ ॥ तेषां पदानां दर्शनेन। संभ्रमोऽत्र भक्त्युद्रेकनिमि त्तव्यापारविशेषः ॥ * ॥ संभ्रमः कर्तव्यतानुसंधानाभावः। अश्रूणां कला कलनमतिक्षरणं तेनाकुले ईक्षणे यस्य सः। अहो भाग्यं दुर्लभलाभो ममायमिति सगद्गदं ब्रुवन् ॥ २६ ॥ रजोलोठने किं प्रयोजन मित्याक्षिपति—नन्विति। प्रेमसंभ्रमे प्रेमावेशे फलोद्देशः फलमुद्दिश्य प्रवृत्तिर्भवतीति। पदविभागमुपेक्ष्यैकपदस्य लघुत्वादाह—बहुव्रीहिणा। मतुबंतेन मतुबंतस्यान्वयो वा, तुल्यालिनिवेशन्यायेन वा। संदेशः परमुद्दिश्य निजवृत्तकथनम् ॥ * ॥ मथुरातो यात्रामारभ्य नंदव्रजे प्रवेशपर्यंतमक्रूरस्य मनोवाक्कायचेष्टितं वर्णयित्वा तदेव दृष्टांतीकृत्य सिद्धांतसारमाह—देहमिति। देहमिति द्वितीयार्षी। अलुक्समासे प्रथमाद्वितीययोरग्रहणात्। तच्च प्रयोगादर्शनात्तत्रोदाहरणाभावाच्चेति ध्येयम्। देहधारिणामियानेतावानेव पुरुषार्थः। कंसस्य संदेशादारभ्य हरेर्लिंगदर्शनश्रवणा दिभिर्योऽयमक्रूरस्य वर्णितः। यथा हरेर्लिंगं पदाचिह्नं दृष्ट्वा अक्रूरस्तत्रैव धूलौ लुलोठ। तत्राक्रूरो राजमंत्री राज्ञोऽप्यादरणीयः कथं गोचारकस्य पदधूलौ लोठामीति दंभं हित्वैव, मद्दूतोऽपि भूत्वा मच्छत्रोः कृष्णस्य पदधूलौ लोठतीत्युपजापकंपितात्कंसाद्भयं हित्वा, कुपितकंसविनाश्येषु गृहकलत्रादिषु च शुचं शोकं हित्वैव लुलोठ। यथा तथैव वयं पंडितत्वादभिजातत्वादैश्वर्यवत्त्वाच्च श्रेष्ठाः कथं सर्वलोकानादृत कुचैलाकिंचनानिकृष्टवैष्णवचरणधूलौ पताम इति दंभं स्वजनानिंदनाद्भयं तत्तत्त्यागाच्छोकञ्च हित्वा हरेर्लिंगं वैष्णवं दृष्ट्वा तच्चरणधूलौ पतेयुः। यद्वा—हित्वेत्यादिकं देहभृत्स्वेव योग्यं न त्वक्रूरे प्रेमविह्वल इति। यथा हरेर्नारदादिमुखाद्यशःश्रवणेन स्मरणेन चाक्रूरो यथा दास्यरसानुकूलान्मनोरथांश्चकार तथैव कदा हरिं परिचरिष्यामः अपि किं तं द्रक्ष्याम इत्यादिमनोरथान् कुर्युरिति ॥ २७ ॥ ततोंघ्रिरजोलोठनोत्तरम्। गोदोहनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ॥ सुमुखौ सुंदरवरौ बालद्विरदविक्रमौ ॥ २९ ॥ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजम् ॥ शोभयंतौ महात्मानौ सानुक्रोशस्मितेक्षणौ ॥३०॥ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ ॥ पुण्यगंधानुलिप्तांगौ स्नातौ विरजवाससौ॥३१॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती ॥ अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ॥ ३२ ॥ दिशो वितिमिरा राजन्कुर्वाणौ प्रभया स्वया ॥ यथा मारकतः शैलो रौप्यश्च कनकाचितौ ॥ ३३ ॥

न्निति गोदोहनं तत्स्थानं गतौ प्राप्तौ ॥ २८ ॥ २९ ॥ अनुक्रोशोऽनुकंपा तद्विलसितस्मितयुक्तमीक्षणं ययोस्तौ ॥ ३० ॥ उदारा रुचिरा क्रीडा ययोस्तौ । स्रग्विणौ रत्नस्रग्भिरलंकृतौ विरजे निर्मले वाससी उत्तरीये ययोः ॥ ३१ ॥ प्रधानभूतौ पुरुषौ प्रकृतिपुरुषात्मकौ वा । कुतः । आद्यौ । तदपि कुतः । जगद्धेतू । अत एव जगत्पती । विपरीतो वा चतुर्णां पदानां हेतुहेतुमद्भावः । जगत्यर्थे पृथिव्या भारापनयनाय स्वांशेन मूर्त्तिभेदेन बलकेशवौ संतावक्तीर्णौ ॥ ३२ ॥ स्वप्रभया विगततिमिरा

क्रियां वा ॥ * ॥ प्रथमं दूरतो वस्त्रदर्शनात्तदेवादौ वर्णयति–पीतनीलेति । ततस्तडिदादिभ्योऽपि प्रकाशबहुलत्वेन नेत्रदर्शनात्तयोरेव वर्णनम् ॥ २८ ॥ किशोरावनाप्तयौवनौ । " किशोरोऽश्वशिशौ सूर्ये वयसि यौवनाग्रिमे " इति धरणिः ॥ * ॥ ततः किञ्चिच्चलने सति व्यक्तीभूतकैशोरस्य ततो वर्णस्य तत्र शोभोपलंभात्तद्वर्णनम् । ततो गवां सम्भालनार्थमुत्थापितभुजावलोकनं, ततः श्रीमुखनिभालनं, ततः किञ्चिन्निकटीभूय पश्यता तेन सर्वांगसौंदर्यावलोकनं, ततो बालौ किशोरावपि महाबलत्वेन द्विरदविक्रमौ मत्तगजवच्चलन्तौ ददर्श ॥ २९ ॥ महात्मानौ परपुरुषौ ॥ * ॥ ० ॥ ३० ॥ उदारा महती ख्याता चातुर्य विशिष्टा वा रुचिरा द्रष्टृचेतोहरा । " उदारो महति ख्याते दक्षिणे दानशौंडके " इति शाश्वतः । वनमालायाः पृथगुपादानाद्रत्नस्रग्भिरित्युक्तम् । पुण्यः सुरभिर्गंधो यस्य तुलसीदारुपटीरादेः स पुण्यगंधस्तेन " नास्ति प्रियोऽनुलेपोऽन्यो हरेस्तुलसिजो यथा " इति हरिभक्तिचंद्रोदये ॥ * ॥ उदाररुचिरा महामनोहरा क्रीडा गवाह्वानरोधनादिषु विलासहासादिरूपा ययोस्तौ । कृपया निजमाधुरीं दर्शयितुं तमदृष्ट्वैव स्थितयोरनयोः क्रीडायां कौतुकावेशः । तत्र च वेशविशेषाणां प्रत्येकनिशामनमिति क्रमेण वर्णनम । स्रग्विणौ ह्रस्वमध्यममालाधारिणौ । वनमालिनौ दीर्घमालाधारिणौ । विरजं वासो ययोस्तौ । विरज इत्यकारांतो रजशब्दः ' अर्थाः पादरजोपमाः ' इति प्रयोगात् । स्रग्वीत्यादिकं तु स्नानानंतरमेव गृहात्तत्रागमादिति ज्ञेयम् ॥ ३१ ॥ ' अप्रसिद्धेः प्रसिद्धिर्बलीयसी ' इति न्यायेनाह–प्रकृतिपुरुषात्मकौ वा । बलदेवस्य शेषावतारत्वेन प्रकृतित्वं ज्ञेयम् । तच्च ' यस्याद्य आसीद्गुणविग्रहो महान् ' इत्यादिना " महानहंवैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदम् " इत्यंतेन पञ्चमस्कंधेऽवसेयम् । तत्राशंकते–कुत इति । तदपि आद्यत्वमपि । अत एव जगद्धेतुत्वादेव, उत्पादकस्य प्रायो रक्षकत्वदर्शनात् । वैपरीत्ये विनिगमनाविरहात्तदप्यस्त्वित्याह–विपरीतो वेति । जगत्पतित्वं कुतो–यतो जगद्धेतू, तदपि कुतो–यत आद्यौ, तदपि कुतो यतः प्रधानपुरुषाविति । स्वांशेन निजैश्वर्येण मायया वा ॥ * ॥ कृष्णस्य सर्वापेक्षया प्रधानत्वं, रामस्य त्वन्यापेक्षया स्वांशेन स्वाविर्भावभेदेन हेतुना । यथाऽघबकादीन् कृष्णो धेनुकप्रलंबादींश्च रामो जघानेति । यथा चाणूरकंसादीन्कृष्णो मुष्टिकद्विविदादीन्राम इत्युभावेव जगतीक्ष्मायावतीर्णाविति ॥ ३२ ॥ मारकतः श्याममणिस्तच्छैलोपमः कृष्णः । रूप्यं रजतं तत्समो रामः । ननु कृष्णप्रभाया अंधकारनिरासकता न संभवति तत्तुल्यत्वदर्शनादिति चेत्कश्चिन्मंदो वदेत्तं प्रत्याह–" यदेतदादित्यस्य परं कृष्णं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रथात्तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः ॥ पपात चरणोपांते दंडवद्रामकृष्णयोः ॥ ३४ ॥ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ॥ पुलकाचितांग औत्कंठ्यात्स्वाख्याने नाशकन्नृप ॥ ३५ ॥ भगवांस्तमभिप्रेत्य रथांगांकितपाणिना ॥ परिरेभेऽभ्युपाकृष्य प्रीतः प्रणतवत्सलः ॥ ३६ ॥ संकर्षणश्च प्रणतमुपगुह्य महामनाः ॥ गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहम् ॥ ३७॥ पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनम् ॥ प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत् ॥ ३८॥ निवेद्य गां चातिथये संवाह्य श्रांतमादृतः ॥ अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ॥ ३९ ॥

दिशः कुर्वाणौ । कनकाचितौ सुवर्णव्याप्ताविति सालंकारयोः शैलसादृश्यार्थमुक्तम् ॥ ३३ ॥ ३४ ॥ भगवद्दर्शनाह्लादेन यद्बाष्पं तेन पर्याकुले ईक्षणे यस्य सः । पुलकैराचितं व्याप्तमंगं यस्य सः । स्वाख्यानेऽक्रूरोऽहं नमस्करोमीति कथने नाशकन्नाशक्नोत् ॥ ३५॥ अभिप्रेत्याक्रूरोऽयमेतदर्थमागत इति ज्ञात्वा कंसहननसामर्थ्यं द्योतयन्निव रथांगेन चक्रेणांकितो यः पाणिस्तेनाभ्युपाकृष्य तमालिंगितवान् ॥ ३६ ॥ पाणी अंजलिरूपेण संहतावेव स्वपाणिना गृहीत्वा ॥ ३७ ॥ मधुपर्क एवार्हणं तस्मिन्वा

रूपम् '' इह श्रुतौ, '' आकृष्णेन रजसा वर्तमानः '' इति श्रुतौ च रवितेजः कृष्णमेव यथा तमोऽपहं तथैवात्राप्यनुसंधेयम् । नेत्रेऽपि कृष्णवर्णैव कनीनिका प्रकाशिकास्तीत्याबालगोपालप्रसिद्धेः ॥ * ॥ ननु दूरतस्तद्विशेषः कथं दृष्टः, उच्यते—महातेजस्त्वित्वादिति । यतः क्रमशः रात्र्यंशे जातेऽपि विशेषतो विद्योतेतामित्याह--दिश इति । शैलदृष्टांतोऽन्यसवयस्कापेक्षया । तथा च विष्णुपुराणे--'प्रांशुमुत्तुंगबाहुंसम्' इत्यादि । योजना चेयं यथा मारकतश्शैलो रौप्यश्च कनकाचितौ भवतस्तथा तौ ददर्शेति ॥ ३३ ॥ तूर्णं दर्शनसमकालमेव । अवप्लुत्यावरुह्य ॥ * ॥ अयं भावः--दूरतः प्रथमदर्शने यद्रथान्नावप्लुतस्तत्र स्नेहवैकल्यमेव हेतुः । भूमौ रथे वा स्थितोऽहमित्यनुसंधानाभावात्, तदभिमुखगामितुरगेण रथेन तदीयरूपाकृष्टदृष्टिमनसः स्वस्यानुकूल्यालाभाच्च । अथ निकटागतो यदवप्लुतस्तत्रापि तदेव हेतुः । दूरस्वभावतस्तदात्मन ईषदूर्ध्वस्थितेर्न स्फुटमवेगतासीत्, निकटात्तु स्फुटमवगताऽतस्तदनुसंधानादादराकर्षणे जाते इति । तथा पितृव्यताव्यवहारेण योग्यतायामपि प्रणामे यथाविधि तदविधाने हेतुर्दुर्गम्य इति ॥ ३४ ॥ आह्लादोऽत्यानंदः । पुलकैः रोमांचैः ''पुलको मणिदोषेऽस्रभेदे कृमिविशेषके । रोमांचे हरिताले गंधर्वे हस्त्यन्नपिंडके ॥'' इति धरणिः ॥ * ॥ स्नेहविह्वलत्वं सहेतुकमभिव्यञ्जयति--भगवदिति । पर्याकुले॰ सम्यक् द्रष्टुमपि नाशकदिति सूचितम् । उत् उच्चैर्गतः कंठस्तद्भवः स्वरो यस्य स उत्कंठस्तस्य भाव औत्कंठ्यं तस्मात्सन्नकंठत्वादित्यर्थः । स्वाख्यानेऽपि नाशकत् किं पुनः प्रसंगापादन इति भावः ॥ ३९ ॥ तम् अक्रूरम् । रथांगपदेन निशातनद्योतकेन बलाधिक्यं द्योतितम् । अभ्युपाकृष्य समीपमानीय । प्रीतस्तद्भक्त्यवबोधनेन ॥ * ॥ भगवानिति सार्वज्ञ्यं परमकारुण्यादिकञ्चाह । अभिप्रेत्य ज्ञात्वा । रथांगेत्युपलक्षणं, तदुक्तं पराशरेण—''सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना । संस्पृश्याकृष्य च प्रीत्या सुगाढं परिषस्वजे ॥ '' इति । प्रीतः सन्परिरेभे न तु पितृव्यव्यवहारेण । तदमनने हेतुः—प्रणतवत्सल इति । तदीयदास्यमयभक्तिविशेषवशः ' ये यथा मां प्रपद्यंते' इत्यादेः ॥ ३६ ॥ पाणी अनयदिह प्रकृति भावः ॥ * ॥ सानुज इति अग्रजत्वव्यवहारेणातिथ्यकरणे तस्यैव मुख्यत्वात् । गृहं श्रीनंदगृहम् । श्रीरामस्यापि स्वगृहत्वेनैवाभिमानात् । पाणिना स्वदक्षिणेन । पाणी अंजलिभूतौ । गृहीत्वेति 'गृहीतमंजलौ' इति तन्मनोरथात् ॥ ३७ ॥ ''मधुपर्कं घृतक्षौद्रदधिभिः संभवेन्मुने'' इत्यादिपुराणात् । तत्तद्द्रव्यमानीय मधुपर्कं कृत्वार्चयदिति भावः । पूर्वव्याख्यानेऽर्हपदं व्यर्थं ज्ञात्वा व्याख्यांतरं कृतवानिति ध्येयम् ॥ * ॥ वरं श्रेष्ठं रत्नादिमयम् । प्रक्षाल्य पादावित्यत्र तदप्रत्याख्याने हेतुः--आदृतः सादरः । तथादरपरिपाटीभिः स्वमाधुरी व्यंजिता यथाऽक्रूरोऽपि तदैश्वर्यादिकं विस्मृत्य तदिच्छानुसारी बभूवेति भावः ॥ ३८ ॥ गां गोशब्दोपलक्षितां वासार्थभूमिम् । पानीयादि दुग्धार्थं धेनुं वा । संवाह्य पादसेवां कृत्वा । बहुगुणं षड्रसयुक्तं पायसं वा । विभुः स्वयं भगवान् । किञ्च,—

१ रामकृष्णयोर्व्यक्तिरिति शेषः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् ॥ मुखवासैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुनः ॥४०॥ पप्रच्छ सत्कृतं नंदः कथं स्थ निरनुग्रहे ॥ कंसे जीवति दाशार्ह सौनपाला इवावयः ॥ ४१ ॥ योऽवधीत्स्वस्वसुस्तोकान्क्रोशंत्या असुतृप्खलः ॥ किं नु स्वित्तत्प्रजानां वः कुशलं विमृशामहे ॥ ४२ ॥

यदुचितमर्हणं तदाहरत् आनीय समर्पितवानित्यर्थः ॥ ३८ ॥ ३९ ॥ ४० ॥ सत्कृतं संमानितम् । निरनुग्रहे निर्दये कथं केन प्रकारेण स्थ जीवथेत्यर्थः । सौनः पशुघाती स एव पालको येषामवीनां मेषाणां त इव तत्तुल्या इत्यर्थः ॥ ४१ ॥ निरनुग्रहतामाह । योऽवधीदिति । तोकान् तोकानि । असुतृप् असूनेव तर्पयति यः अतः

गोनिवेदनं किमर्थमिति प्रश्ने " न त्वेवामांस्सोऽर्वः स्यात् " इति श्रुतेः तुशब्दः पक्षव्यावृत्तौ । अर्वोऽर्चनममांसः पश्वालंभनवार्जितो नैव भवेत् । अत्र " यद्यालभेद्यद्युत्सिसृक्षेत् " इत्यनेन सूत्रेण गवालंभस्य विकल्पं विधाय " न त्वेवामांस्सोऽर्वः " इत्यनेनार्घमात्रे गवालंभनं नियमेन विधत्ते । तथा तद्वयोः स्मृत्यंतरविरोधेनाप्रामाण्ये प्राप्ते व्यवस्थामाह–' अधियज्ञमधिविवाहं कुरुते ' इत्येवं ब्रूयात् । अधियज्ञं यज्ञे । अधिविवाहं विवाहे । कुरुते विदधाति । 'गवालंभनपाप्मानं हिनोमि' इत्यस्यांते इत्येवं ब्रूयात् । अन्यत्र पाप्मा हतः पाप्मानं हन्मीति वा विकल्पः । यद्यप्येवं मधुपर्के " तद्यथैवादो मनुष्यराज आगतेऽस्मिन्वार्हत्युक्षाणं वेहतं वा क्षदंते " इति श्रुतेर्वेहतं वंध्यां गां क्षदंते हिंसंति इति गवालंभो विहितस्तथाप्यस्वर्ग्यत्वाल्लोकविद्विष्टत्वाच्च " मा गामनागामदितिं वधिष्ट " इति श्रुतेः, " अश्वालंभं गवालंभं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेत् ॥ " इति स्मृतेश्च, कलौ न विधेयः । " अत्रोपविष्टं कार्ष्णिं तं शास्त्रतः प्रत्यपूजयत् । पाद्यं निवेद्य प्रथममर्घ्यं गां च न्यवेदयत् ॥ स च तां मंत्रवत्पूजां प्रत्यगृह्णाद्यथाविधि । प्रतिगृह्य तु तां पूजां जनकाद्द्विजसत्तमः ॥ गां चैव समनुज्ञाय " इति मोक्षधर्मेषु भारतोक्तेर्गां धेनुं समनुज्ञाय तृणादनार्थं सम्यगाज्ञां दत्त्वान्यां पूजां प्रत्यगृह्णादिति टीकोक्तेश्च कलौ न विधेयः । " अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नहि " इति याज्ञवल्क्यस्मृतिषु निषेधदर्शनात् । अर्घ्याश्च " षडर्घ्या भवंति " इति श्रुतेः षडेव अर्घ्या अर्घार्हाः । के ते–"आचार्य ऋत्विग्विवाह्यो राजा प्रियः स्नातकः " इति श्रुतेः । आचार्य उपनयपूर्वकं वेदाध्यापकः । ऋत्विक् श्रौतस्मार्तादिकर्मार्थं वृतो ब्रह्मादिः । विवाह्यो वरः । राजा अभिषेकादिगुणवान्प्रजापालनेऽधिकृतः क्षत्रियः । प्रिय उत्कृष्टजातिः समानजातिर्वा सखा । स्नातको ब्रह्मचर्यात्समावृत्तः । आचार्यस्यार्घ्यो नान्यस्य । तथा च मनुः–" तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः । स्रग्विणं तल्प आसीनमर्हयेत्प्रथमं गवा ॥ " इति । ब्रह्म वेदः स एव दायस्तं हरतीति तथा । प्रतीति–प्रतिसंवत्सरमागतानाचार्यादीनर्घेण पूजयेयुर्नार्वागित्यलं प्रपंचेन । तथा चाक्रूरस्य प्रियत्वादर्घ्यत्वम् । तत्र गोप्रदर्शनमेव योग्यं न त्वालंभो याज्ञवल्क्येन यज्ञोद्वाहयोरपि कलौ निषिद्धत्वाद्यज्ञविवाहाभ्यामन्यत्राविहितत्वाच्च ॥ * ॥ एवं संवाह्य पादसंवाहनं कृत्वा उभयत्र ण्यंतत्वं वा । **विश्वनाथः**–पाद्याद्युपचारेषु गौरियं दृश्यतां तेष्वतिनयनेंद्रियसुखदानार्थं सुंदरगवोपस्थानमप्येको मंगलोपचारः । मेध्यं द्वादशीपारणाविहितं हविष्यमित्यर्थः । अस्य दिनस्य द्वादशीत्वं परश्वश्चतुर्दश्यां भूतराजपूजायां कंसमारणात् । ' न रात्रौ पारणं कुर्यात् ' इति निषेधातिक्रमस्तु कृष्णगृहान्नप्रातिलाभात् ॥ ३९ ॥ तस्मै अक्रूराय । मुखवासैः कर्पूरतांबूलैः । पुनरित्यर्थ इति–मुखवासादिदानांते ॥ * ॥ ० ॥ ४० ॥ इत्यर्थ इति–जीवनस्यैव सत्तापदार्थत्वात्प्राणधारणानुकूलो व्यापारः सत्तेति तल्लक्षणादिति तात्पर्यम् । सूनाऽयुताधिकपशुहननस्थानं, तत्र तिष्ठतीति सौनः । सौनपाले जीवति यथा मेषजीवनं दुर्घटं तथा भवतामपीत्यर्थः । " अविर्नाथे रवौ मेषे शैले मूषिककम्बले " इति मेदिनी ॥ * ॥ हे दाशार्हेति कंसस्य यदुकुलद्वेष्टृत्वेन तस्यापि ततो भयं सूचयति । सूनावृत्त्या चरतीति सौनः, सूना पशुमारणं जीवघातस्थानमिति यावत् । एतेन न जाने कस्मिंश्चिद्दिने युष्मानेव हनिष्यतीति भयं सूचितम् ॥ ४१ ॥ यः कंसः । स्वस्वसुर्देवक्याः । ' तोकं पुत्रे सुतायां च ' इति मेदिनी । अतोऽसुतृबिति । तदपि तेषु मिथ्यादोषारोपकत्वात् । नु स्विदिति निपातद्वयं वितर्के ॥ * ॥ तोकान् बालापत्यानि, तत्रापि स्वसुः, तत्रापि क्रोशंत्या इति निर्दयत्वं महादुष्टत्वं चोक्तम् । तच्च केवलमात्मदेहरक्षार्थमेवेत्याह–असुतृबिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं सूनृतया वाचा नंदेन सुसभाजितः ॥ अक्रूरः परिपृष्टेन जहावध्वपरिश्रमम् ॥४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे पू॰अक्रूरागमनं नामा
ऽष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ॥ श्रीशुक उवाच ॥ सुखोपविष्टः पर्यंके रामकृष्णोरुमानितः ॥ लेभे मनोरथान्सर्वान्पथि यान्स चकार ह॥१॥ किमलभ्यं
भगवति प्रसन्ने श्रीनिकेतने ॥ तथाऽपि तत्परा राजन्नहि वांछंति किंचन॥२॥सायंतनाशनं कृत्वा भगवान्देवकीसुतः ॥ सुहृत्सु वृत्तं कंसस्य पप्रच्छान्य
च्चिकीर्षितम् ॥ ३॥ श्रीभगवानुवाच ॥ तात सौम्यागतः कच्चित्स्वागतं भद्रमस्तु वः ॥ अपि स्वज्ञातिबंधूनामनमीवमनामयम् ॥ ४ ॥

खलः । तस्य कंसस्य प्रजानाम् । हे अक्रूर येषां जीवनमात्रमपि दुर्लभं तेषां वः किं तु कुशलं विमृशामहे विचारयाम इति ॥ ४२ ॥ मधुरया वाचा इत्थं सत्कृतः । तथैव वाचा परिपृष्टेन प्रश्नेन । भावे क्तः । अध्वपरिश्रमं संसारश्रमम् ॥ ४३ ॥ इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धे टीकायामष्टात्रिंशत्तमोऽध्यायः ॥ ३८ ॥ ॥ नवत्रिंशे पुरीं गच्छत्यच्युते गोपिकोक्तयः ॥ अक्रूरेणाथ कालिंद्यां विष्णुलोकस्य दर्शनम् ॥ १ ॥ भक्तानां मनोरथाः सत्या भवंतीति द्योतयन्नाह । सुखोपविष्ट इति । रामकृष्णाभ्यामुरु अधिकं मानितः ॥ १ ॥ २ ॥ ३ ॥ हे तात हे सौम्य स्वागतं यथा तथा आगतः । स्वज्ञातिबंधूनां स्वे सुहृदः ज्ञातयः सपिंडाः बंधवोऽसपिंडा:

दित्याह—खल इति । तस्य प्रजानामधीनानां किं कतमत्कुशलम् । कुशलाभावे निश्चितेऽपि कथं कुशलं पृच्छाम इति भावः ॥ ४२ ॥ ‘ अध्वा संसारमार्गयोः ’ इति धरणिः । भगवद्दर्शनमेव संसारपरिश्रमहानौ हेतुर्न तु नंदप्रश्नादिः । इममेवाध्यायार्थं श्रुतिरप्याह—“ देवानां दूतः पुरुधः प्रसूतो नागान्नो वोचतु सर्वतात ” इत्यादिः । “सदासुगः पितु मां अस्तु पंथाः” इति । “उद्रायो अस्था सदनं पुरुक्षोः” इत्यक्रूरमनोरथो वर्णितः । अक्रूरागमनमाह—देवानां कंसं हंतुकामानां वागाद्यभिमानिनामग्न्यादीनामहं दूतोऽस्मि कृष्णं प्रति गंतुं प्रस्थितोऽस्मि । पुरुधः बहुप्रकारैः प्रसूतो निसृष्टः कंसेन नोऽस्मान्प्रति अनागान् निष्पापान् सर्वताता सर्वस्य विस्तार कर्ता हारिः वोचतु वदतु । अस्माभिः सह संभाषणं करोतु । तथा पंथा अपि सदा सुगः सुगमः पितुमानन्नवानस्तु मार्गेऽप्यंतरायो मा भूदित्यर्थः । पुरुक्षोर्बहूनां क्षयकर्तुः सदनं गृहमेश्यां प्राश्नुयाम् । उद्राय उत्कटसंपद इति श्रुतिपदानामर्थः ॥ * ॥ अध्वनि मार्गे परितः श्रमः ‘ न मय्युपैष्यत्यरिबुद्धिमच्युतः ’ इति पूर्वोक्तरीत्या श्रीव्रजेश्वरादिमनःप्रसादे संदेहात्मको यो मनःखेदस्तमपि जहावित्यर्थः ॥ ४३ ॥ इति श्रीमद्भागवतभावार्थदीपिका प्रकाशे दशमस्कंधे पूर्वार्धेऽष्टात्रिंशोऽध्यायः ॥ ३८ ॥ अथ गोपिकोक्तेरनंतरम् । दर्शनं कृतमिति शेषः (१) । ‘ सत्यं मे भक्तचिंतितम् ’ इत्याह—भक्तानामिति । मनोरथान् ‘ गोचारणायानुचरद्वने ’ इत्यारभ्य ‘ किं चाग्रजो मावनतम् ’ इत्यंतान् यान् । सोऽक्रूरः । चकार दध्यौ, कृञत्र ध्याने करणार्थत्वात् । तदुक्तं यादवेन—“ करणं कारणे काले साधनेऽनुव्रतादिषु । स्पष्टाद्युच्चारणाभेदे ध्यानपद्मासनादिषु ॥ ” इति ॥ * ॥ लेभे मनोरथान्सर्वान् इति केषांचित्प्राप्तत्वेन वर्णितत्वात् । केषांचिदुपलक्षितत्वेन सूचितत्वात् । केषाञ्चित्प्राप्तव्यत्वेन निश्चितत्वादिति ॥ १ ॥ ननु मुख्यमनोरथो मोक्षः स त्वनेन नो लब्धः संसाराऽनिवृत्तेरित्यत्राह—किमिति : तत्परा मुख्यभागवतास्तत्प्रसादमंतरेणान्यन्नाकांक्षंतीति भावः ॥ * ॥ नन्वन्यान्साष्टर्यादीनपि कथं न प्रार्थितवाँस्तत्राह—किमलभ्यमिति । तत्परास्तद्भक्त्येकनिष्ठाः किञ्चन भक्तिव्यतिरिक्तम् । राजन्निति—श्रीकृष्णभक्त्यां देदीप्यमानत्वात्तुभ्यमिदं श्रावयामीति भावः ॥ २ ॥ सायंतनाशनं रात्रिभोजनम् । “सायं प्रातर्द्विजातीनां भोजनं श्रुतिचोदितम् ” इति याज्ञवल्क्योक्तेः । सुहृत्सु वसुदेवादिषु । वृत्तं वर्तनम् ‘ वृत्तं वर्तनच्छंदसोः ’ इति धरणिः ॥ * ॥ सायंतनाशनं कृत्वेति द्वादश्यामपि द्विर्भोजनमुपनयनात्प्राग्न विरुद्धमिति धर्मशास्त्रात् । देवकीसुत इति—तद्भावमात्मनो व्यंजयन्नित्यर्थः । अत एव सुहृत्सु यादवेषु वृत्तिं वर्तमानां चेष्टां तथान्यच्चिकीर्षितमध्यवसीयमाना भाविनी चेष्टा तामपि पप्रच्छ—‘ वृत्तम् ’ इति पाठेऽतीतां चेष्टां, यद्वान्यत्तन्मारणलक्षणं चिकीर्षितं स्वयं कर्तुमिष्टमित्यर्थः ॥ ३ ॥ स्वागतं शुभागमनम् । सपिंडा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं नु नः कुशलं पृच्छे एधमाने कुलामये ॥ कंसे मातुलनाम्न्यंग स्वानां नस्तत्प्रजासु च ॥ ५ ॥ अहो अस्मदभूद्भूरि पित्रोर्वृजिनमार्ययोः ॥ यद्धे
तोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ॥ ६ ॥ दिष्ट्याऽद्य दर्शनं स्वानां मह्यं वः सौम्य कांक्षितम् ॥ सञ्जातं वर्ण्यतां तात तवागमनकारणम् ॥ ७ ॥
श्रीशुक उवाच ॥ पृष्टो भगवता सर्वं वर्णयामास माधवः ॥ वैरानुबंधं यदुषु वसुदेववधोद्यमम् ॥ ८ ॥

संबंधिनः तेषामपि कच्चित् किमनमीवमपापमदुःखं सुखमिति यावत् । अनामयमारोग्यम् ॥ ४ ॥ एवं प्रश्नोऽपि मम नातीव संगत इत्याह । किं न्विति । अंग हे अक्रूर पृच्छे पृच्छामि । नोऽस्माकं कुलस्यामये रोगे नो मातुल इति नाम यस्य तस्मिन् । नः स्वानां ज्ञातीनां तस्य प्रजासु च ॥ ५ ॥ अस्मदस्मन्निमित्तम् । वृजिनं दुःखम् । आर्ययोर्निरपराधयोः । यद्धेतोर्योऽहमेव हेतुस्तस्मात् ॥ ६ ॥ हे सौम्य स्वानां वो दर्शनमद्य मम संजातं तद्दिष्ट्या भद्रम् ॥ ७ ॥ माधवो मधोर्वंशजः ॥ ८ ॥

सप्तपुरुषावधयः । अनमीवमस्तीति शेषः ॥ * ॥ हे तातेति पितृव्यतया पितृतुल्यत्वम् । हे सौम्येति साधुतया तत्रापि गौरवातिशयो व्यञ्जितः । अत एवागता इति व इति च । क्वचिदे कवचनांतपाठोऽपि । भद्रं क्षेममस्तु युष्माकमित्याशीः प्रश्ने सदाचारानुरोधात् । यद्वा—दैन्यमागतस्य तस्य समाश्वासनार्थम् । अनमीवमनामयमिति द्वाभ्यां क्रमेण सामान्यविशेषदुःखाभावप्रश्नः । स्वागतमिति—किं सुखेनागतमन्यथा वेति संदेहव्याप्तप्रश्नस्तु अतर्किततदागमनादेव ॥ ४ ॥ एवं प्रश्नोऽनमीवादिप्रश्नः । तस्य कंसस्य ॥ * ॥ अनामयस्य विशेषतः प्रश्ने स्वतात्पर्यं दर्शयंति—तदनुपहतिरेवानामयतया पृष्टेति भावः । नाम मात्रेणैव मातुले वस्तुतस्त्वामये यतोऽसौ नागंतुकः, न त्वेकस्य किन्तु सर्वस्यैव कुलस्येत्यतस्तन्नाशनमेवोचितम् । तथाप्येतावंतं कालं मातुलनाम्नैवोपेक्षितामिति भावः ॥ ५ ॥ प्रश्नोत्तरमनुतप्तः सन्नाह—अस्मदिति । हेतौ पंचमी । 'वृजिनं दुःखपापयोः' इति विश्वः । "आर्यश्शिष्टे निरागसि । वर्णाश्रमोक्तधर्माग्र्ये श्रेष्ठे वणिक्संहतौ" इति धरणिः । तयोः पित्रोः ॥ * ॥ ० ॥ ६ ॥ मह्यं मम ॥ * ॥ तदेवं सति यदद्य वो दर्शनं सम्यगैकांतिकं जातं तद्दिष्ट्या । कीदृशानां वः—स्वानां कंसस्य परजातत्वादास्निग्धत्वाच्च भोजराजत्वेऽपि ममैव ज्ञातीनां मदीयधनरूपाणां वेत्यर्थः । [1]सर्वनामत्वाभावस्तु 'स्वोऽर्थज्ञात्यन्यवाच्यपि' इत्युक्तेः[2] । कीदृशं दर्शनं—कांक्षितम् । ततस्तावत्प्रियत्वेनैव यद्येकस्याप्यात्मीयस्य तत्रत्यस्य दर्शनं भवेत्तदा तन्मारणयुक्तिः सिद्ध्येदित्यभिप्रायेणेति भावः । अत्रैतावती विवक्षा—अत्रत्या मातापित्रादयस्तत्रत्येभ्योऽपि परमस्निग्धा इति तदनुमतिं विना तत्र गंतुं न शक्नोमि । तथाऽप्रकटेष्वपि तेषु महापराधेषूपेक्षितस्य मातुलनाम्नस्तस्य सहसा जिघांसयाभिगमने तमेव कारणीकर्तुमिच्छामि । तस्मादपि तादृशोऽपेक्षितः कश्चिदायाति ततस्तदनुरोधेन तेषामनुमतिं लेभे, तेन सह युक्त्वा च तस्यैव तत्कारणमुद्भावयामि, तदैव तन्मारणं नीतिपदवीमारोहतीति । अतो हे तात तवागमनकारणं तावद्वर्ण्यताम् । तस्मिञ्ज्ञाते सत्यायतिचिंतां करिष्याम इति भावः ॥ ७ ॥ माधवोऽक्रूरः । वैरस्य प्रकृतस्यानुबन्धमनुवर्तनं, वैरेणानुबंधं सततदोषभावं वा "अनुबंधो दोषभावे प्रकृत्यादिविनश्वरे । मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्तने ॥" इति यादवः ॥ * ॥ [3]भगवते भगवंतं ज्ञापयितुमित्यर्थः ॥ ८ ॥

१ स्वशब्दस्येत्यादिः । २ ज्ञातिवाचित्वेनाऽज्ञातिधनाख्यायामिति पर्युदासात् । ३ 'भगवते सर्वम्' इति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्संदेशो यदर्थं वा दूतः संप्रेषितः स्वयम् ॥ यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः॥९॥श्रुत्वाऽक्रूरवचः कृष्णो बलश्च परवीरहा ॥ प्रहस्य नंदं पितरं राज्ञाऽऽदिष्टं विजज्ञतुः ॥ १० ॥ गोपान्समादिशत्सोऽपि गृह्यतां सर्वगोरसः ॥ उपायनानि गृह्णीध्वं युज्यंतां शकटानि च ॥ ११ ॥

यो धनुर्मखच्छद्मा संदेशो यस्य । यदर्थं चाणूरादिभिर्घातनार्थं स्वयं संप्रेषितः । अस्य कृष्णस्य पुरतो वर्णयामास । स्वजन्म कृष्णजन्म । आनकदुंदुभेः सकाशात् ॥ ॥ ९ ॥ विजज्ञतुर्विशेषेण ज्ञापयामासतुः ॥ १० ॥ सोऽपि नंदोऽपि गोपान्समादिशत् । तदेव दर्शयति गृह्यतामित्यादिना । गोरसः क्षीरादिः उपायनानि राज्ञे निवेदनी

स्वयम् अक्रूरः । प्रेषितः कंसेनेति शेषः । किं तदुक्तं तत्राह—स्वजन्मेति ॥ * ॥ यत्संदेशः स्वयमात्मनाऽक्रूरो दूतस्तेन प्रेषितः यदर्थं वा तत्संदेशं तमर्थञ्च वर्णयामासेति योजना । संप्रति वैरसातत्यादौ हेतुः—यदुक्तमिति ॥ ९ ॥ परेषु शत्रुषु वीरः कंसस्तद्धंता, परश्चासौ वीरश्चेति वा ॥ * ॥ वैशंपायनोक्तमपि वाक्यजातमत्रानुसंधेयम्—“मथुरां स्वपुरीं तात यास्यामः स्वसुखाय वै । गमिष्यंति व्रजाः सर्वे गोपालाः सपरिग्रहाः ॥ कंसाज्ञया समुचितं करमादाय वार्षिकम् । समृद्धस्तस्य कंसस्य भविष्यति धनुर्महः ॥ तद्द्रक्ष्यथः समृद्धं च स्वजनैश्च समेष्यथः । पितरं वसुदेवञ्च सततं दुःखभाजनम् ॥ दीनं पुत्रवधश्रांतं युवामथ समेष्यथः । सततं पीड्यमानञ्च कंसेनाश्रुतबुद्धिना ॥ देशांते शोषितं वृद्धं दुःखैः शिथिलतां गतम् । कंसस्य भयसंत्रस्तं भवद्भ्यां च विना कृतम् ॥ दह्यमानं दिवारात्रौ सोत्कंठेनांतरात्मना । तां च द्रक्ष्यसि गोविंद पुत्रैरमृदितस्तनीम् ॥ देवकीं देवसंकाशां सीदंतीं विगतप्रभाम् । पुत्रशोकेन शुष्यंतीं त्वद्दर्शनपरायणाम् ॥ वियोगशोकसंतप्तां विवत्सामिव सौरभीम् । उपप्लुतेक्षणां दीनां नित्यं मलिनवाससम् ॥ स्वर्भानुवदनग्रस्तां शशांकस्य प्रभामिव । त्वद्दर्शनपरां नित्यं तवागमनकांक्षिणीम् ॥ त्वत्प्रवृत्तेन शोकेन सीदंतीं वै तपस्विनीम् । त्वत्प्रभावेष्वकुशलां त्वया बाल्ये वियोजिताम् । अरूपज्ञां तव विभो वक्त्रस्यास्येंदुवर्चसः ॥ यदि त्वां जनयित्वा सा देवकी परितप्यते । अपत्यार्थो नु कस्तस्या वरमेवानपत्यता ॥ त्वं तु शक्रसमो यस्याः पुत्रः स्वसदृशो गुणैः । परेषामप्यभयदो न सा शोचितुमर्हति ॥ वृद्धौ तवाद्य पितरौ परभृत्यत्वमागतौ । भर्त्स्येते त्वत्कृते तेन कंसेनाशुभबुद्धिना ॥ यदि ते देवकी मान्या पृथिवी वात्मधारिणी । तां शोकसलिले मग्नामुत्तारयितुमर्हसि ॥ तं च वृद्धं प्रियसुतं वसुदेवं सुखोचितम् । पुत्रयोगेन संयोज्य कृष्ण धर्ममवाप्स्यसि ॥ यथा नागः सुदुर्वृत्तो दमितो यमुनाह्रदे । विमूलश्च कृतः शैलो यथा वै भूधरस्त्वया ॥ दर्पोत्सिक्तश्च बलवानरिष्टोऽपि निपातितः । परप्राणहरः केशी दुष्टात्मा च हयो हतः ॥ एतेनैव प्रयत्नेन वृद्धावुद्धृत्य दुःखितौ । यथा धर्ममवाप्नोषि तत्कृष्ण परिचिंत्यताम् ॥ निर्भर्त्स्यमानो यैर्दृष्टः पिता ते कंससंसदि । ते सर्वे चक्षुरश्रुभिर्नेत्रैरभ्युत्थिता भृशम् ॥ गर्भावकृंतनादीनि दुःखानि च बहूनि च । माता ते देवकी कृष्ण कंसस्य सहते वशे ॥ ” इत्यादि । प्रहस्येति—स्वमृत्युमपि निमंत्र्य स्वान्तिकमानेतुमुपक्रमते युष्माकं राजेत्यर्थद्योतकोऽयं प्रहासः । राजादिष्टं धनुर्मखनिमंत्रणं विज्ञापयामासतुर्न तु रहस्यम् । विज्ञापने हेतुः—परवीरहेति । पर उत्कृष्टो वीरः कंसस्तद्धननार्थमेवेति भावः ॥ १० ॥ सर्वे गोरसाः क्षीराज्यदध्यादिरूपा यत्र समूहे स तथा यद्वा—सर्वगः सर्वत्रगः रसः सुवर्णादिः “ रसो रागे विषे वीर्ये तिक्तादौ पारदे द्रवे । रेतस्यास्वादने हेम्नि शृंगारादौ ध्वनावपि ॥ ” इति यादवः । यद्वा—सर्वगः सर्वव्यापी रसः कृष्णः “ रसो वै सः ” “ स ह्येवायं लब्ध्वाऽऽनन्दीभवति ” इति श्रुतेः कंसेन गृह्यतामस्मद्देशाऽधीशत्वादुष्कर्मत्वेऽपि तस्य मोक्षो भवत्वित्यभिप्रायः । उत्तमवस्तूनि रत्नादिरूपाणि नवनीतादीनि वा ॥ * ॥ सोऽपि स्वपुत्रपालनव्यग्रत्वेन प्रसिद्धः श्रीनंदोऽपी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ॥ द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः किल ॥ एवमाघोषयत्क्षत्ता नंदगोपः स्वगोकुले ॥ १२ ॥ गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम् ॥ रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ॥ १३ ॥ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च काश्चन ॥ १४ ॥ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः ॥ नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥ १५ ॥

यान्युत्तमवस्तूनि ॥ ११ ॥ रसान्घृतादीन् । शब्दच्छलेनेदं सूचयति । अचिकित्स्यस्य रोगस्य चिकित्सार्थं रसान्दास्याम इति । क्षत्त्रा व्रजरक्षाधिकृतेन । आघोषयत्सर्वतो घोषितवान् ॥ १२ ॥ ताः कृष्णैकजीवना गोप्यस्तत्तदाऽक्रूरमागतमुपश्रुत्येति ॥ १३ ॥ व्यथालिंगान्याह पंचभिः । काश्चिदिति । तेन श्रवणेन कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां ता बभूवुरिति । दुकूलानि च वलयानि च केशग्रंथयश्च स्रंसंतो दुकूलादयो यासां तथाभूताः काश्चन बभूवुरित्यर्थः ॥ १४ ॥ तस्य

त्यर्थः । इंद्रमखभंगवत्तस्यैव विज्ञापनमोहनतया परवशीभूयेति भावः । एवं न कस्यापि तत्र विप्रतिपत्तिर्जातेति ज्ञेयम् ॥ ११ ॥ शब्दच्छलेन श्लेषेण । एकशब्दस्यानेकार्थताविशिष्टस्य प्रकृतभिन्नाभिन्नार्थसूचनं श्लेषः । अचिकित्स्यस्यानिवर्त्यस्य रोगस्य कंसस्य । तत्रैव भगवताप्यामयशब्दः प्रयुक्तः 'एधमाने कुलामये' इति । चिकित्सार्थं निवृत्त्यर्थम् । रसान् विषवन्मारकस्वभावाञ्श्रीकृष्णबलदेवरूपान् । बहुत्वं पूजायाम् । पर्वोत्सवम् "पक्षसंधावुत्सवे च ग्रंथौ पर्व विदुर्बुधाः" इति दत्तः । जानपदा लोकाः "भवेज्जनपदो जानपदोऽपि जनदेशयोः" इति मेदिनी । "क्षत्ता शूद्राक्षत्रियजे प्रतीहारे च सारथौ । भुजिष्यातनयेऽपि स्यान्नियुक्ते वेधसि पुमान् ॥" इति च ॥ * ॥ जानपदा इति—सर्वजनपदवासिनो यांतीत्यतोऽस्माकमेव तत्र का विप्रतिपत्तिरिति भावः ॥ १२ ॥ व्यथिता जातपीडाः ॥ * ॥ उपश्रुत्य कस्यापि कुतश्चिन्मुखाच्छ्रुत्वा साक्षात्तासु कस्यापि कथनाशक्तेः । ताः स्वभावसिद्धप्रेयसीभावाः । तत् आघोषणमात्रं श्रुत्वा भृशं व्यथिताः । अन्यास्तु साधनसिद्धप्रेयसीभावास्तौ नेतुमागतमक्रूरमुपश्रुत्य भृशं व्यथिता इति योज्यम् । किन्तु--तासामपीयं व्यथा तद्विरहभीत्यैव जाता तत्र गतस्य तस्यानिष्टाशंकया तु न जाता 'तासां मुकुंद--' इत्यादिवक्ष्यमाणात् । तद्गमने परमधीरश्रीमन्नंदोपनंदादिसर्ववृद्धवृंदसंमतिरेव तत्र कारणमन्यथा सद्य एव तासामंतर्द्धानं स्यादिति लीलाशक्तिरेव तादृशस्फूर्तिमरौत्सीदिति ज्ञेयम् । विरहभीतिरपि न सार्वकालिकी तत्रासार्वकालिकंस्थितिनिश्चयेन । नंदसूनुरिति—श्रीमन्नंदसूनुत्वेनैव निश्चेष्यमाणत्वात् । 'तासां मुकुंद--' इत्यादिकस्याशंकामयमात्रत्वात् । अन्यथा तथापि प्रागुक्तमेव स्यात् । आशामात्राजीवातुत्वात्प्रोषितप्रेयसीनामेवमपि तादृश्यवस्था परमानुरागस्वभावेनैव ज्ञेया ॥ १३ ॥ 'दुकूलं श्लक्ष्णवस्त्रे स्यात्क्षौमे च' इति मेदिनी ॥ * ॥ तत्र रासदर्शितप्रेमतारतम्येनासामुत्तरोत्तरमवस्थावैशिष्ट्यमाह—काश्चिदिति त्रिभिः । यद्यप्यत्र पूर्वोक्ताया व्यथाया लिंगवर्णनमिति तदुपश्रुतिकृतत्वं स्वत एव लभ्यते तथापि तत्कृतेत्यधिकप्रयोगस्तदवस्थायाः तदुपश्रवणस्य स्वरूपमात्रेणैव न तु 'अन्याश्च तदनुध्याने' इत्याद्यर्थानुसंधानार्थकाललवविलंबजाततदनुध्यानादिकार्यद्वारेति बोधयति । स्रंसदित्यर्वे तु कार्यादिनिर्देशात्तासहयोगाच्च तत्कृतेत्येवान्वितं गम्यम् । श्रवणमात्रजन्यत्वादत्र च तत्र चार्थसंधानानंतराण्यपि कैमुत्येन गम्यानीति । एवं सति प्रथमद्वयमुत्तमं प्रायो नित्यसिद्धं च, स्वाभाविकहार्दात् । उत्तरं कनिष्ठं प्रायः साधनसिद्धं च, तादृशत्वाभावात् । अत्र च प्रथमे द्वये उत्तरोत्तरं श्रैष्ठ्यमुत्तरे तु न्यूनत्वमिति ज्ञेयम् । अथ क्रमेण व्याख्यायते--तत्रैकासां भद्रादीनां सहसा श्वासवैवर्ण्ये प्राह--काश्चिदित्यर्धेन । श्वासेन म्लानाः सद्यो विवर्णीभूता मुखश्रियस्तिलकादयोऽपि किं पुनर्वर्णा यासां ताः । तत्कृतहृत्तापादिपरपरत्रापि गम्यं पूर्वपूर्वावस्थाश्च । अथ कासांचिच्छ्यामलादीनां सहसा कार्श्यमप्याह स्रंसदिति ॥ १४ ॥ आत्मलोकं मोक्षम् ॥ * ॥ चंद्रावल्यादीनां प्रणयमप्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः ॥ हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ॥ १६ ॥ गतिं सुललितां चेष्टां स्निग्धहासावलोकनम् ॥ शोकापहानि नर्माणि प्रोद्दामचरितानि च ॥ १७ ॥ चिंतयंत्यो मुकुंदस्य लीलाविरहकातराः ॥ समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः ॥ १८ ॥ गोप्य ऊचुः ॥ अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः ॥ तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा ॥ १९ ॥

श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ता इमं लोकं देहमपि न जानंति स्म मुक्ता इवेति ॥ १५ ॥ अपराः स्त्रियः शौरेर्गिरः स्मरंत्यः संमुमुहुः । कथंभूताः । अनुरागेण यत्स्मितं तेनेरिताः । हृदि स्पृशंतीति हृदिस्पृशो मनोज्ञाः । चित्राणि पदानि यासु ताः ॥ १६ ॥ १७ ॥ विरहेण कातरा विह्वलाः । अच्युते आशयश्चित्तं यासां ताः ॥ १८ ॥ कृष्णसंगतिं विधाय विघट्टयतीति विधातारं प्रत्येकमाक्रोशंत्य आहुः । अहो इति । मैत्र्या हिताचरणेन प्रणयेन स्नेहेन च

तस्यानुसंधानेन ध्यानधारया निवृत्ता अशेषाश्चक्षुरादिवृत्तयो यासां ताः । यद्वा—श्रीकृष्णस्य गमनेऽनुसंधानम्—कथमसौ यास्यति, कथं वा तत्र स्थास्यति, कथं च वयं जीवेम इत्यादिलक्षणा निरंतराचिन्ता, तेन निवृत्ताशेषवृत्तयः । इमं लोकं देहदैहिकपदार्थं सर्वमेव आत्मलोकं परमात्मस्वरूपं प्राप्ता इवेति देहाद्यज्ञानमात्रे दृष्टान्तः, न त्वास्वादांशेऽपि, काचकाञ्चनयोरिव ब्रह्मास्वादप्रेमास्वादयोस्तुल्यत्वानौचित्यात् ॥ १५ ॥ ईरिताः वर्णिताः ॥ * ॥ श्रीराधादीनां प्रणयातिशयमाह--स्मरन्त्य इति । शौरेरिति—संप्रति शूरापत्यताभिमता यो गंतुकामस्तस्येति तासां पक्षपातिनः श्रीशुकस्य प्रणयेर्ष्योक्तिः । अनुरागव्यञ्जकं यत्स्मितं तेनेरिताः । चित्राणि विस्मयजनकानि पदानि यासु ता गिरः 'न पारयेऽहं निरवद्यसंयुजाम्' इत्यादिवाक्यानि स्मरन्त्यः सम्यगेव मुमुहुः । पूर्वास्तद्रूपस्यैव ध्यानधारयैव मुमुहुः, एतास्तु तद्वाचोऽपि स्मरणेनापि सम्यगेव मुमुहुरिति पूर्वतः प्रेमवैशिष्ट्यवत्यो ज्ञेयाः ॥ १६ ॥ गतिं यात्राम् । चेष्टामंगादिचालनरूपाम् । नर्माणि हास्यवचांसि ॥ * ॥ एवं मूर्छादिसंचारिग्रस्ता एव रात्रिं गमयित्वा पुनः किं संजातमिति शंकासंचारिसंस्कारप्राबल्येन लब्धबाह्यानुसंधानाः परमोत्कण्ठया प्रातर्व्रजराजपुरद्वार एवागता भाविविरहवत्त्वेन साम्यात्सर्वाः संहता विलेपुरित्याह—गतिमिति ॥ १७ ॥ संघशः संघीभूय । समेता युताः ॥ * ॥ निमेषविरहतोऽपि भीताः संप्रति भाविना महाविरहेण विह्वलाः संघशः समेता यूथैर्यूथैः संगता मिलिताः ॥ १८ ॥ विघट्टयति वियोजयति । बालिशोऽज्ञो बालो वा 'बालिशश्च शिशौ मूर्खे' इति मेदिनी । अपार्थकं निष्फलम् । कथम्—यथेति । अर्भकचेष्टितं बालाङ्गचालनादि ॥ * ॥ श्रीकृष्णस्य संगताविव विच्छेदेऽपि कमप्यन्यं हेतुमनालोचयन्त्यो विधातारमेव तत्र हेतुं मन्वानास्तमेवाक्रोशयन्त्य आहुः—अहो इति त्रिभिः । अहो खेदे । हे विधातरिति—त्वमेव सर्वं विदधासीति भावः । अतः सर्वेष्वपि जीवेषु दयां कर्तुमर्हस्यपि तव कस्मिंश्चिद्दया नास्ति, विधातृत्वमेव दर्शयन्त्यो निर्दयत्वं च दर्शयन्ति—संयोज्येत्यादिना । देहिनो देहाभिमानवशेनेतस्ततो वर्तमानानपि जीवान् अकस्मादन्योऽन्यं मैत्र्यापि केवलं तथा प्रणयेन च संयोज्येति विधातृत्वं दर्शितम् । एवं श्रीकृष्णसंगतौ निजगुणादिराहित्यं सूचितम् । अप्यर्थे चकारः । संयोज्यापि अकृतार्थानेव वियोजयसि । विविधचेष्टितमपार्थकम् अपगतावर्थौ हेतुप्रयोजने यस्येति । केन हेतुना किमर्थं वा संयोजयसि, अकृतार्थानपि पश्चात्केन हेतुना किमर्थं वा वियोजयसीति नावगच्छाम इत्यर्थः । हेतौ प्रयोजने च सति संयोजितानामकस्माद्वियोजनमयुक्तमेवेति भावः । अपार्थकत्वे दृष्टान्तः—अर्भकेति । तच्चेष्टितं यथा हेतुं प्रयोजनं च विना केवलं मौढ्यादेव तद्वदित्यर्थः । अन्यत्तैः । तत्र हिताचर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसम् ॥ शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतम् ॥ २० ॥ क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् ॥ येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः ॥ २१ ॥

अकृतार्थानप्राप्तभोगानपि तान्वियुनंक्षि वियोजयसि तस्मान्न तव दया । बालिशोऽपि त्वमित्याहुः । अपार्थकमिति ॥ १९ ॥ विगर्हितं तवेदं कर्मेत्याहुः । यस्त्वमिति । शोकमपनुदतीति शोकापनोदः स चासौ स्मितलेशश्च गूढहासस्तेन सुंदरं मुकुंदस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यमदृश्यतां करोष्यतस्तव कृतं कर्मासाधु निंद्यमित्यर्थः । ॥ २० ॥ किं च दत्तापहारित्वेनातिक्रूरत्वमित्याहुः । क्रूरस्त्वमिति । नन्वक्रूरो हरति नाहमिति चेदत आहुः । अक्रूरसमाख्ययेति । न ह्येवं कर्तुमन्यः प्रभवत्यतो नामांतरेण स्म ध्रुवं त्वमेवागतोऽसि । कृष्णं हरामि न युष्मच्चक्षुरिति चेन्न । येन त्वद्दत्तेन चक्षुषा मधुद्विष एकदेशे नेत्रवक्त्रादौ त्वदीयं समग्रं सृष्टिनैपुणमद्राक्ष्म दृष्टवत्यो

णेन तत्कृतप्रीत्या स्नेहेन संबंधाविकृतप्रीत्येत्यर्थः । यद्वा—स्वयं मैत्र्यापि लक्षितः सन्प्रणयेन मिथो विस्रब्धप्रेम्णा सह संयोज्येति योज्यम् ॥ १९ ॥ निंद्यत्वमाह—विगर्हितमिति । अदृश्यतां चक्षुरविषयताम् । इत्यर्थ इति—न ह्येतत्साध्वाचार इति भावः ॥ * ॥ भवतु वा सामान्यतस्तव तादृशं चरितम्, विशेषतस्त्विदं गर्हितमित्याहुः—यस्त्वमिति । प्रकर्षेण रसानुभवपूर्वकं दर्शयित्वाऽसितैः कुंतलैः कुटिलालकैरावृतं श्रीललाटोपरिभागे भ्रमरवन्निपातेन व्याप्तमित्यूर्ध्वभागस्य शोभा, सुकपोलमिति पार्श्वद्वयस्य, उन्नसमिति मध्यस्य, शोकेति मधुरस्मितेन विकसदधरबिम्बं तदारुण्यच्छुरितश्रीमद्दन्तपंक्तिमाधुर्याभ्यामंतर्भागस्यापि सूचिता । शोकश्चार्तानां सर्वेषाम् । तत ईदृशस्य तद्वक्त्रस्य परोक्षताचरणात्तव कर्मासाध्वेव । अत एव श्रीविष्णुपुराणे—“सारं समस्तगोष्ठस्य विधिना हरता हरिम् । प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना ॥” इति । अन्यत्तैः । यद्वा—मुकुंदस्य सर्वदुःखमोचकत्वेन तन्नामधेयस्य वक्त्रं प्रकर्षेण दर्शयित्वा पारोक्ष्यमदृश्यत्वं करोषि नयसि, तस्य ते तव कृतमसाध्वेव । चातुर्वर्ण्यादित्वात् ष्यञ् । आस्तां तावन्मैत्रीपूर्वकतदीयसंयोगस्य वियोजनं नाम तद्दर्शनमात्रस्यापि गर्हितं किमुत तत्प्रकृष्टदर्शनस्येत्यर्थः । प्रकर्षमेव दर्शयन्ति—असितेत्यादिविशेषणैः ॥ २० ॥ अन्यत्ततोऽप्यधिकमाह--किञ्चेति । स्वस्य क्रूरतामपानुदन्नाशंकते—नन्विति । यतोऽन्योऽप्रभुरतो हेतोः । नामांतरेणाक्रूरनाम्ना । भंग्यन्तरेणाह—कृष्णमिति । तत्राहुर्नेति । अत्र ब्रह्मण आशयं प्रकटयन्त्य आहुः—अयं भावः । रहस्यं गुह्यं गोपीभिरभिज्ञातमित्यमर्षेण कोपेन । इवशब्देन वस्तुतः कोपाभावं बोधयति निजकल्पितत्वात् । “क्रूरो भयंकरे सौरे नृशंसे कठिनोष्णयोः” इति हलायुधः ॥ * ॥ हि एव, त्वमेव करोषि । बत, खेदे । तथा श्रीविष्णुपुराणेऽपि—“अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम् । उत्कृत्तान्यद्य नेत्राणि विधात्राऽकरुणात्मना ॥” इति । यथाऽज्ञः पापापापमजानन्नो दत्तमपि हरति तद्वदित्यर्थः । किन्तु त्वं सर्वज्ञोऽप्यज्ञायस[1] इति परमदुःखदानमात्रतात्पर्यत्वेन ततोऽपि पापवैशिष्ट्यमिति भावः । कथं चक्षुर्हृतं, तत्राह—येनेति । त्वदीयमखिलसर्गसौष्ठवं मधुद्विष एकदेशेऽद्राक्ष्मेति, तदीयनेत्रवक्त्रादिसौन्दर्यामृतार्णवकलांशांशांश एव पद्मचंद्रादिसौंदर्ये पर्याप्तमपश्यामेत्यर्थः । अतोऽनभिरुचेरन्यत्राप्रवर्तमानस्य तन्मात्रविषयस्य चक्षुषस्तद्धरणेन चक्षुष एव हरणम् । तत्र मधुद्विष इति योग्यपदोपादानम् । ‘नारायणसमो गुणैः’ इति वाक्यात्सर्वातिशयगुणशालित्वेनैव तत्पर्यायस्येत्यर्थः । यद्वा—मध्विव मधु तादितरसर्वप्राकृताऽप्राकृतव्यञ्जनीयं तस्मै द्वेष्टि तदीयानां तद्धरतीति तस्येति । यद्वा—मधुपुरीपतित्वात्तत्समशीलत्वाच्च कंस एव मधु तद्द्विष इति तं हत्वा तद्राज्ये लब्धे पुनरत्रागमनं दुर्लभमिति

---

१ अज्ञ इवाचरसीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा बत ॥ विहाय गेहान्स्वजनान्सुतान्पतींस्तद्दास्यमद्धोपगता नवप्रियः ॥ २२ ॥ सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम् ॥ याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवम् ॥ २३ ॥ तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि ॥ कथं पुनर्नः प्रतियास्यतेऽबला ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् ॥ २४ ॥

वयं तच्चक्षुः । अयं भावः । मम सर्वं रहस्यमाभिर्ज्ञातमित्यमर्षेणैव कृष्णं वियोजयन्नस्मानंधीकरोषीति ॥ २१ ॥ विधातारं विहाय परस्परमूचुः । न नंदसूनुरिति । बतेति खेदे । क्षणभंगमस्थिरं सौहृदं यस्य सः । गृहादीन्विहायाद्धा साक्षात्तस्यैव दास्यमुपगताः स्वकृतातुरास्तत्कृतेनैव स्मितादिना परवशा अपि नोऽस्मान्न समीक्षते । नवंनवं प्रियं यस्य सः । अत एनं निवारयाम इति भावः ॥ २२ ॥ सेर्ष्यमूचुः । सुखं प्रभातेति । व्रजस्पतेः श्रीकृष्णस्य मुखं पास्यंत्यादरेण द्रक्ष्यंति । कथंभूतम् । अपांगेन नेत्रप्रांतेनोत्कलितमुज्जृंभितं स्मितमेवासवो रसो यस्मिंस्तत् । यद्वा अपांगोत्कलितस्मितेनासवरूपं यन्मुखम् । ततश्च पानं मुख्यमेव संभावयंति ॥ ॥ २३ ॥ ननु द्वित्राणि दिनानि तथा भवतु नाम तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तित आगमिष्यतीत्याशंक्याहुः । हे अबलास्तासां मधुवन्मंजुभिर्भाषितैर्व

भावः ॥ २१ ॥ कृष्णं कटाक्षीकृत्यान्योऽन्यमाहुः—नेति । नंदसूनुरिति साभिप्रायोक्तिः । अतो नवप्रियत्वात् । इति भाव इति—नूतनस्त्रीसंगरसिकः पुनरस्मान्प्रागनुभूताः प्रति नागमिष्यतीत्याशयः ॥ * ॥ उदासीनं विधातारं किं निंदामः, परम् आत्मीयोऽस्मज्जीवनैकहेतुः श्रीनंदसूनुरेव तथाविध इत्याहुः—नेति । नंदसूनुर्बल्लवेंद्रकुमारत्वेनास्मत्समीक्षणयोग्यः किं पुनरस्मामिस्तादृशप्रेमबंधेन सोऽपीत्यर्थः । न समीक्षते नापेक्षते अपृष्ट्वैव दूरप्रस्थानोद्यमात् । समीक्षिष्यते इति च व्याख्यानेऽपि संप्रत्यपेक्षाया दर्शनादिति भावः । अतो दृढसौहृदत्वेन ज्ञातत्वेऽपि क्षणभंगसौहृद एवासौ नः समीक्षायाम् । हेतुगर्भविशेषमाहुः—विहायेति । गेहादीनां यथोत्तरं श्रैष्ठ्यमूह्यम् । अद्धा साक्षात्स्वदेहार्पणादिना दासीत्वमुप सामीप्येन प्राप्ता इति दास्यविशेषः सूचितः । तदुपगतावेव हेतुः—स्वकृतातुरा इति । तैर्व्याख्यातम् । यद्वा—संप्रति समीक्षायां विशेषतो हेत्वन्तरमाहुः—स्वकृतेन त्यागेनातुरा रोगेणेव पीडिताः नः केवलं न समीक्षते, किञ्च नवप्रियोऽसौ सर्वान्व्रजजनान्विहायाक्रूरेण सममात्मीयतां व्यज्य गमनदर्शनान्नवप्रियोऽसौ संप्रति माथुरीभिरेव प्रीतिं विधास्यतीत्यर्थः ॥ २२ ॥ सेर्ष्यं क्षान्तिरहितम् । व्रजस्पतेरिह पतिशब्दस्य छांदसः सुट् । मुखस्य पानासंभवादर्थान्तरमाह—यद्वेति । रूपकेण मुखमासवीक्रियते, ततश्च मुखस्यासवरूपत्वादासवस्य पानं संभवत्येव । “ आसवोऽमृतमद्ययोः ” इति धरणिः ॥ * ॥ हंतहंत किमद्भुतमस्माकं दुरदृष्टं, मथुरांगनानां शुभादृष्टं युगपदेव फलति स्मेत्याहुः—सुखमिति । इयं रजनी पुरयोषितां सुप्रभाता, व्रजयोषितां तु दुष्प्रभाता, तासामाशिषः विप्रादिदत्ता दीर्घमनोरथा वा सत्याः सफलाः, अस्माकं तु नष्टा बभूवुः । व्रजस्पतेः कृष्णस्य । सुडार्षः । व्रजजनानामेव दृश्यमिति भावः । अपांगे नेत्रान्ते उत्कलितस्मितम् उत्कृष्टा--रसव्यञ्जिका: कला: संजाता यस्य तदुत्कलितं स्मितमेव रहस्येंगितम् आसवो मादको रसो यत्र तन्मुखं पास्यन्ति स्वापाङ्गरसनाभिरास्वादयिष्यन्ति । कुलधर्मलज्जाभयादिकं सहसैव त्यक्त्वाऽस्येंगितमंगीकरिष्यन्तीत्यर्थः । ततश्च समुचितसमये सम्यक्प्रकारेणान्यजनालक्षिततया मुखमपि साक्षात्पास्यन्ति । तदुक्तं विष्णुपुराणे—“ सुप्रभाताऽद्य रजनी मथुरावासियोषिताम् । पास्यन्त्यच्युतवक्त्राब्जं यासां वै नेत्रपंक्तयः ॥ ” इति ॥ २३ ॥ अन्योऽन्यमाशंक्य समादधत इत्याहुः—नन्विति । तथा भवतु पुरांगनानां सुप्रभाता रजनी भवतु । नामेति वाक्यालंकारे । पित्रादिभिर्नन्दाद्यैः । तासां मथुरांगनानाम् । मधुवत्पुष्परसवत् । मंजुभिः श्रुतिमनोहरैर्वाक्यैः । विभ्रमैर्विलासैः । ‘ मनोज्ञं मंजुमंजुलम् ’ इत्यमरः । न हि नंदादय एव तत्संबंधिनः किं त्वन्येऽपीत्याहुः—यद्वेति । अन्ये वसुदेवप्रभृतयः । ग्राम्या ग्रामभवाः । अविदग्धाश्चातुर्यहीनाः । “ ग्राम्यं स्त्रीकरणे क्लीबेऽश्लीलप्राकृतयोस्त्रिषु ” इति मेदिनी । इत्यर्थ इति—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजांधकवृष्णिसात्वताम् ॥ महोत्सवः श्रीरमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतम् ॥ २९ ॥
मैतादृविधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीवदारुणः ॥ योसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ २६ ॥

शीकृतचित्तस्तथा तासां सलज्जस्मितैर्विभ्रमैर्भ्रमन्परवान्पित्रादिपरतंत्रोऽपि । यद्वा व्रजे परेऽन्ये बंधवः संति यस्य तथा मनस्वी धीरोऽपि ग्राम्या अविदग्धा नः कथं प्रतियास्यते प्रत्येष्यति न कथंचिदित्यर्थः ॥ २४ ॥ किञ्च । अस्मदुत्सवभाजोऽन्य एवाद्य भविष्यंतीत्याहुः । अद्येति । तत्र पुरे दाशार्हादीनां दृशो दृष्टेर्महानुत्सवो भविष्यते भविष्यति । ये देवकीसुतं द्रक्ष्यंति तथा ये चाध्वनि गच्छंतं द्रक्ष्यंति तेषामपि दृशो भविष्यतीति । यद्वा दृश इति द्वितीया । तेषां दृशो नेत्राणि महोत्सवो भविष्यते प्राप्स्यति प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २५ ॥ अक्रूरं शपंत्य आहुः । मैतद्विधस्येति । एषा विधा विधानं कर्म यस्य अत एव निष्कृपस्याक्रूर इति शोभनं

चतुरस्त्रीप्राप्तौ को मूढामाद्रियत इति भावः । " परवांस्तु पराधीनो निघ्नः परवशः स्मृतः " इति हलायुधः । यद्वा—अबलाः सुरतधार्ष्ट्यहीनाः । ग्राम्या अश्लीललीलाः । मथुराङ्गनास्त्वग्राम्या नित्यसुरतकर्मोपेताः । " समुद्रोर्मिवदुन्नम्यभ्रूविलासेन सुंदरी । निद्रितं मदनं या तु बोधयेत्सा वराङ्गना ॥ " इति कामन्दकोक्तेः ॥ * ॥ भ्रमन् सर्वं विस्मरन् । लोकधर्मयोर्वर्त्मादिसकलं विस्मरिष्यतीति भावः । परवान् गृहीतचित्तत्वादेव तत्पराधीनः सन्नित्यर्थः । तदुक्तं विष्णुपुराणे—" मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति । नागरस्त्रीकलालापमधु श्रोत्रेण पास्यति ॥ विलासिवाक्यपानेषु नागरीणां कृतास्पदम् । चित्तमस्य कथं भूयो ग्राम्यगोपीषु यास्यति ॥ भावगर्भस्मितं वाक्यं विलासललिता गतिः । नागरीणामतीवैतत्कटाक्षेक्षितमेव तु ॥ ग्राम्यो हरिरयं तासां विलासनिगडैर्यतः । भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति ॥ " इति । अबलाः तादृशकलालावण्यबलहीनाः ॥ २४ ॥ स्वग्राह्यस्यान्यत्रगत्या शोचन्त्य आहुः—किञ्चेति । आर्षत्वाश्रयणेनात्मनेपदस्वीकारस्यागतिकगतिकत्वादाह—यद्वेति ॥ * ॥ गुणानां गुणजातीनां सर्वासामास्पदमाश्रयः । यदाश्रयेणैव ते सिद्ध्यन्ति तामित्यर्थः । किं बहुना सर्वगुणसंपत्तिहेतुं विष्णुप्रियां श्रियं लक्ष्मीमपि रमयितुं जातरतिं कर्तुं शीलं यस्य तदिति प्रौढिवाक्यम् । देवकीसुतमिति—' प्रागयं वसुदेवस्य 'इत्यादितत्पुरोहितवाक्येन । स च सा च तत्पुत्रत्वमेवाभिमंस्येते इति । ये चाध्वनि वर्तमानाः पथिकास्तद्वासिनोऽपि लोकाः । तदुक्तं वैष्णवे—" धन्यास्ते पथि ये कृष्णमितो यान्तमवारिताः । उद्वहिष्यंति पश्यन्तः स्वदेहं पुलकाचितम् ॥ मथुरानागरीपौरनयनानां महोत्सवः । गोविन्दावयवैर्दृष्टैरतीवाद्य भविष्यति ॥ को नु स्वप्नः सुभाग्याभिर्दृष्टस्ताभिरधोक्षजम् । विस्तारितांतनयना या द्रक्ष्यन्त्यनिवारिताः ॥ " ॥ २९ ॥ इदानीमक्रूरनामानर्थकमित्यभिप्रेत्याहुः—मेति । एषा प्रत्यक्षा । अत एव एतादृशकर्मकर्तृत्वादेव । तत्र एतन्नामानंगीकारे । लोलिंबराजेनापि हरिविलासे एतदभिप्रेत्यैवोक्तम्—" अक्रूर ते नामनि निश्चयेन बली बहुव्रीहिसमास एव । अस्माकमात्मानममुं यतस्त्वं कृतान्तवन्नेतुमुपागतोऽसि ॥ " इति ॥ * ॥ इति शब्देनैव एतादित्यस्यार्थस्योक्तत्वात् ' इत्येतत् ' इति तैर्न लिखितम् । यद्वा—इत्येतत्, इत्येवम्, इत्यादिप्रयोगदर्शनाद्गोबलीवर्दन्यायेन पौनरुक्त्याऽदोषो ज्ञेयः । अतीवदारुणः परमक्रूरः । कुतः—तदाहुः—य इति । असाविति—दारुणत्वेनानिर्वचनीयत्वं सूचितम् । यद्वा—असावयमित्यर्थः । प्रत्यक्षस्थितोऽपि अनाश्वास्य पुनरेष मया समानीय युष्मासु समर्पणीय इति वचसापि । जनमिति सामान्येनोक्तेस्तन्मात्रस्याप्याश्वास उचितः, किमुताबलारूपस्येत्यर्थः । अतोऽचिरादस्मिन्स्त्रीवधो भावीति सुशब्दाभिप्रायः । अतोऽतीवक्रूर एव । तदुक्तं विष्णुपुराणे—" किं न वेत्ति नृशंसोऽयमनुरागपरं जनम् । येनायमक्ष्णोराह्लादं नयत्यन्यत्र नो हरिम् ॥ " इति । अतः परमस्य क्रूरस्य क्रूर इत्येव नाम युक्तमिति भावः । यद्वा—अक्रूर इत्येव नाम मा भूदेव, इत्येवमेतत्प्रकारमन्यन्नामापि मा भूदिति । अतः परमस्य क्रूर एव नाम भाव्यम् । तन्नाम्नैवाभिधेय इति

१ न क्रूरो यस्मादित्यभिप्रायः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः ॥ गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते ॥ २७ ॥ निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन्कुलवृद्धबांधवाः ॥ मुकुंदसंगान्निमिषार्धदुस्त्यजाद्दैवेन विध्वंसितदीनचेतसाम् ॥ २८ ॥

नाम मा भूत् । तत्र हेतुः । अतीवदारुण इत्यादि । प्रियात्प्राणादपि प्रियतरं कृष्णमध्वनः पारमस्मद्दृग्गोचरत्वादतिदूरं देशं नेष्यति ॥ २६ ॥ अहो धिगस्मज्जीवितमित्याहुः । अनार्द्रधीरिति । अनार्द्रा कठिना धीर्यस्य स तावदेष कृष्णो रथमधिरूढः । अस्याविनयमालक्ष्य स्थविरैश्चोपेक्षितम् । ते न निवारितवंत इत्यर्थः । किं च दैवं चेति । अयं भावः । यदि दैवमस्माकमनुकूलं भवेत्तर्हि विघ्नैः कश्चिदेषां मध्ये प्रतिहन्येत अकस्माद्वज्रपातो वा भवेत् । अन्यद्वा किंचिदनिष्टं स्यान्न तु तत्किंचिदस्तीति ॥ २७ ॥ परस्परं संमंत्र्य साहसमधिरुह्याहुः । निवारयाम इति । अकरिष्यन्करिष्यंति । निमिषार्धदुस्त्यजान्मुकुंदसंगाद्विध्वंसितानि वियोजितान्यत एव दीनानि चेतांसि

भावः । एतद्विधस्यैतादृशस्य ॥ २६ ॥ आत्मानं निन्दन्त्य आहुः—अहो इति । अस्य कृष्णस्य । अविनयं धार्ष्ट्यम् । स्थविरैः वृद्धैः । इत्यर्थ इति—वृद्धा अपि धृष्टसंबंधेन धृष्टा एव जाता इति भावः । न हि वृद्धानां दोष इत्याहुः—किञ्चेति, अयं भाव इति । एतेषां गोपानाम् । अन्यत् आमयादिरूपम् । तत् अनिष्टम् । किञ्चित्किमपि । सर्वमेतद्दैवप्रातिकूल्याज्जातम् "प्रतिकूले नृणां दैवे सरले वक्रता भवेत्" इत्युक्तेरिति भावः ॥ * ॥ अहो अत्रागत्याऽक्रूरेण स्वक्रूरता सर्वत्रैव संचारिता, यतः परमकोमलचित्तः श्रीनंदनंदनोऽप्यस्मान्प्रति परमकठिनोऽभूदित्याहुः—एष कृष्णोऽप्यनार्द्रधीरस्मान्रुदतीर्दृष्ट्वापि यतो रथं सम्यगवास्थित उपरिनीडमारूढः । तं रथम् । अनु पश्चात् । अनोभिः शकटैः सहिता गोपाः । दुर्मदा इति—एषामहो दुष्टमत्ततैवाजनिष्ट अत्रानागमिष्यतः कृष्णस्य विरहेण स्वयं यन्मारिष्यन्ति तदपि नानुसंदधत इति भावः । स्थविरैर्वृद्धैरपि निषेधमकुर्वाद्भिरुपेक्षितम् । स्वजीवितमिति शेषः । किञ्च, दैवञ्चेति, अयं भाव इति स्वामिचरणैरुक्तमेव । तस्मादायुरेव व्रजस्थानामतः परं नास्तीति निश्चिनुम इति सिद्धम् ॥ २७ ॥ साहसमुत्तरकालमनालोच्य कर्मकरणम् । अत एव विमुक्तत्वादेव । एवंभूतानां कृष्णवियुक्तानाम् । इत्यर्थ इति—मृत्युभयं हि जीवतां भवति तत्त्वस्माकमात्मभूतेन कृष्णेन रहितानां मृतप्रायाणां नास्तीति । अपिशब्दात्कुलसंबंधिनां तु तद्दूरापास्तमिति भावः ॥ * ॥ सोऽयमस्माभिर्बाल्यमारभ्यानन्यवृत्तिना मनसा वृत इति, स चाप्यस्मांस्तथैवांगीकृतवानिति पतिरेव स्यात् । ततः संप्रत्यस्मान्परित्यज्य व्रजन्नसौ कथं निवारणीयः, कस्य वा तु संकोच इत्याशयेनाहुः—निवारयाम इति । सम्यग्लज्जादिकमपहाय साहसमवलम्ब्योप समीपे गत्वा श्रीहस्तधारणादिना माधवं निवारयामः शीघ्रमेव निवारयिष्यामः । ननु पित्राद्यनुमतिं विना कथं स्वातंत्र्येण वृतोऽसौ तत्राप्याहुः—माधवमिति । नूनं लक्ष्म्यापि निगूढमयं वृतोऽस्तीति सदाचारप्रश्ने नायं दोष इति भावः । स्थापयिष्यते चेदम् 'एवं ब्रुवाणा' इत्यादौ । ननु कुलवृद्धादयास्त्विदमौद्धत्यं दृष्ट्वा शान्तिं करिष्यन्ति तत्राहुः—किन्न इति । कुलस्य वृद्धा धर्मप्रवर्तका बांधवाः स्नेहादिबद्धाः पत्यादयश्च धार्ष्ट्यदर्शनेन निश्चितरहस्यवृत्तान्ता अपि नोऽस्माकं किं करिष्यन्ति । यतो दैवेनापरिहार्येण निजाऽदृष्टेन हेतुना यो मुकुन्दसंगस्तत्प्रथमदर्शनादिस्तेनैव विध्वंसितानि देहगेहाद्यासक्तितो विच्यावितानि तथा यथामनोरथं तदप्राप्त्या दीनानि चेतांसि यासां तासाम् । नन्वतो दैवेन तद्वियोजनमधुना भद्रमेव कृतं तर्ह्यधुनापि तत्संगाग्रहस्त्यज्यतां तत्र सभयमाहुः—निमिषेति । यद्वा—युष्माकं ते किञ्चिदपि न करिष्यन्ति तत्राहुः—मुकुंदेति । मुकुन्दस्य सानुरागेण कुलवृद्धा देव्यो मोचकत्वात्तन्नाम्नस्तस्य माधवस्य संगाद्दैवेन विध्वंसिता अत एव दीनचेतसो यास्तासामस्माकम् । कीदृशान्मुकुंदसंगात् निमिषार्द्धोऽपि दुस्त्यजत्वेन पूर्वमस्माभिरनुभूतादित्यर्थः । अयं भावः—यद्यसौ निवृत्तः स्यात्, यदि तैस्त्यज्येमहि तदा वनदेव्य इव वृंदावनैकशरणा भूत्वा तं सुखमेव निषेवेमहि, यदि दंड्येमहि निरुद्ध्येमहि च तदापि तन्निवृत्तिं दृष्ट्वैव म्रियेमहि इति सुखमेव । यदि न निवृत्तः स्यात्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्याम् ॥ नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरन्तम् ॥ २९ ॥ योऽह्नः क्षये व्रजमनंतसखः परीतो गोपैर्विशन्खुररजश्छुरितालकस्रक् ॥ वेणुं क्वणन्स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम ॥ ३० ॥ श्रीशुक उवाच ॥ एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णविषक्तमानसाः ॥ विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर माधवेति ॥ ३१ ॥

यासाम् । एवंभूतानामस्माकं न मृत्योरपि भयमित्यर्थः ॥ २८ ॥ इतोऽपि कारणादवश्यं साहसमेवावलंबनीयमित्याहुः । हे गोप्यो यस्य ललितं स्मितं च वल्गु मंत्रश्च लीलावलोकश्च परिरंभणं चानुरागेणैतानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नोऽस्माभिः क्षणदा रात्रयः क्षणमिव नीतास्तममुं कृष्णं विना दुरंतं तमो विरह दुःखं कथं नु अतितरेम । न कथंचिदित्यर्थः॥२९॥ किं च आस्तां तावत्तमोऽतितरणं जीवनमेव कथं स्यादित्याहुः । य इति । अह्नः क्षये दिनावसाने खुररजोभिश्छुरीता धूसरा अलकाः स्रजश्च यस्य स व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणं तेन नश्चित्तं क्षिणोति हरति । अमुं कृष्णं विना तावत्कथं भवेम जीवेम ॥३०॥ कृष्णे विषक्तानि

दोत्सर्गसिद्धमेव मरणमिति च न किमपि ते कुर्युस्ततो निवारयामैवेति ॥ २८ ॥ इतोऽपि वक्ष्यमाणादपि । क्षणं निद्रावसरं सुरतोत्सवं वा ददतीति क्षणदाः "क्षणः कालांशव्यापारपर्वोत्सवहानिषु" इति धरणिः । इत्यर्थ इति—प्रियविरहे क्षणमपि युगशतमिव तर्तुमशक्यं भवतीति भावः ॥ * ॥ अथ निवारणार्थमुद्यता अपि बहुविरुद्धसंघट्टे तस्मिन्स्वेषां प्रवेशमदृष्ट्वा सभयमाहुः—यस्येति । यस्यानुरागेणैव ललितस्मितादीनि, यस्यां सैव वल्गुमंत्रः रहस्यसंकेतवार्ता, रासगोष्ठ्यां रासोपलक्षितक्रीडामात्रसभायाम् । नोऽस्माभिः । तममुं विना दुरन्तमदृष्टपारं तमो विरहांधकारदुःखसमुद्रं कथं तरेमेति । यथास्य संगसुखेन बह्व्योऽपि रात्रयः क्षण इवाभूवं स्तथैव विरहःदुखेन क्षणोऽप्यस्माकं युगसहस्रं सदा भवत्येव, किन्तु बह्वी रात्रीरागामिनीर्गमयितुं कथं प्रभविष्याम इत्यर्थः ॥ २९ ॥ जीवनेऽपि ससंदेहा आहुः—किंचेत्यादि । आस्तां तिष्ठतु । छुरिता व्याप्ताः "छुरितं व्यापने छेदे" इति निरुक्तेः । न कथमपीत्यर्थः ॥ * ॥ अनन्तः संकर्षणतया तदेकनामत्वाच्छुभ्रवर्णत्वेन सारूप्यादनंतबलत्वाच्च । व्रजे कृष्णनामांतरवत्तथा गर्गोक्त्या प्रसिद्धो बलदेवस्तस्य सखा तत्सहित इत्यर्थः । गोपैर्वयस्यैः । परीतो वेष्टितः । स्मितं मंदहासः । कटाक्षोपांगदर्शनम् । निरीक्षणं वक्षोजादिनिभालनं तेन चित्तं संमोहयति । अद्य सायं तत्तद्यदि न भविष्यति तदा का खलु जीवितं धारयितुं पारयिष्यतीति भावः ॥ ३० ॥ एवमुक्तरीत्या । गोविन्देत्यनेन दीनदयालुता । दामोदरेत्यनेन भक्तायत्तता । माधवेत्यनेन मधोः क्षत्रियत्वेन तद्वंश्यत्वात्क्रौर्यं वा स्त्रीषु कृपालुता च ध्वनितेति भावः ॥ * ॥ एवं विलप्य कृष्णं रथादवतारयितुं संहता एव यदा गंतुं प्रवृत्तास्तदोरुस्तंभादिविघ्नवशादसामर्थ्ये सति केवलं रुरुदुरेवेत्याह—एवमिति । विरहपीडयाऽऽतुरा एकमपि पदं गंतुं स्पष्टाक्षरतया वक्तुं चासमर्थाः । हे गोविन्द इत्यनेनास्माकं गा मनश्चक्षुरादींद्रियवृत्तीर्गव्यः परःसहस्रा विन्द लभस्व, त्वत्संगे एव गच्छंतीरेताः कृपया गृहाण, स्वीयमनोवृषभेन्द्रेण सह संगमय्य रक्षस्व, न तूपेक्षस्व । देहास्त्वस्माकं त्वत्संगायोग्यत्वाद्भगा अत्रैव पंचत्वं प्राप्स्यंति, यदि त्वं नागमिष्यसीति । किंच स्त्रीवधाञ्जिवृक्षसि चेद्गृहाण, यस्याः प्रेम्णा दामबंधनमपि स्वीकृतवानभूस्तां मातरं श्रीव्रजेश्वरीं मा जहि, यदि परश्वस्त्वं नायास्यसि तदा सा सर्वथा मरिष्यतीति मातृहत्यान्तु मा गृहाणेति हे दामोदरेति पदेन विज्ञापना । हे माधवेति—त्वमस्माकं मा खलु धवः किन्तु सखा भवसि, यदि धवोऽभविष्यस्तदास्मासु तव स्वत्वसंभवात्स्ववस्तूनां पालने ज्वालने वा नैवाति दोषः प्राप्स्यत् । किन्तु वयं परद्रव्याणि भवामोऽतोऽस्मन्नाशानिबंधनं दोषं नांगीकुर्या इति विज्ञापना द्योतितेति **विश्वनाथः** । अत्र **तोषिणी**—अथ भृशं विरहातुरत्वेन विशेषविलापाऽशक्त्या शोकोद्दीपकतन्नामविशेषैरेव विलेपुरित्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीणामेवं रुदंतीनामुदिते सवितर्यथ ॥ अक्रूरश्चोदयामास कृतमैत्रादिको रथम् ॥ ३२ ॥ गोपास्तमन्वसज्जंत नंदाद्याः शकटैस्ततः ॥ आदायोपायनं भूरि कुंभान्गोरससंभृतान् ॥ ३३ ॥ गोप्यश्च दयितं कृष्णमनुव्रज्यानुरंजिताः ॥ प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ॥ ३४ ॥

मानसानि यासाम् । सुस्वरमुच्चैः ॥ ३१ ॥ क्रूरमक्रूरतः श्रुत्वा कंसं कंसनिषूदनः ॥ गोपीमनोरथारामः सरामः स्वपुरं ययौ ॥ १ ॥ स्त्रीणामिति । ता अनादृत्य कृतमैत्रादिको मैत्रं मित्रदैवतं प्रातःसंध्योपासनं तदादि कर्म कृतं येन सः ॥ ३२ ॥ अन्वसज्जंतान्वगच्छन् ॥ ३३ ॥ अनुरंजिताः परावृत्य निरीक्षणा

एवमीदृशं भृशं ब्रुवाणा इत्यन्यदपि तादृशमूचुरिति ज्ञेयम् । तत्र हेतुर्विरहातुरा विवशास्तत्रापि हेतुर्व्रजस्त्रियः सहजप्रेमरसमयत्वेन प्रसिद्धा इत्यर्थः । अत एव कृष्णे विषक्तानि प्रेम्णा लग्नानि मानसानि यासां ताः । अत एव लज्जां त्यक्त्वा सुस्वरमुच्चस्वरेण रुरुदुः । स्म पादपूरणे । तच्च प्रेमार्तेरशक्त्या । कथं रुरुदुः—हे गोविंद दामोदर माधवेत्येवम् । अत्र गोविन्देति गोकुलेन्द्रस्मरणात्त्वां विना गोकुलमिदं सर्वं क्षणादेव विलेष्यते इति सूचयति । दामोदरेति नाम श्रीव्रजेश्वर्याः स्वकृतानुतापस्मारकम्[1] । ततस्त्वां विना तस्यास्तस्यै स्मरणेन संप्रति कीदृगवस्था भविष्यतीति व्यञ्जयति । माधवेति 'जयति तेऽधिकं जन्मना व्रजः' इत्यनेन, 'सततमुरसि सौम्य श्रीर्वधूः साकमास्ते' इत्यनेन च निजसंभावनानुसारेण तया श्रीनारायणप्रिययापि गूढं वृत इति परमसन्तापकस्त्वं योग्यमेवास्मन्महानुरागविषयो जात इति स्मरणेन हंत कथमस्मा कमधुना कालक्षेपणं भविष्यतीति ज्ञापयन्ति । मानाम्नीं नारायणप्रियामपि धुनोति भावविशेषेण कंपयतीति निरुक्तिश्चात्र प्रस्तुतोपयोगिनी ज्ञेया । ईशस्यापि तव विच्छेदे वयं वा कथं जीवेम मरणे च हा पुनर्द्रष्टव्यो नासीदिति ध्वनयन्ति । चकारोऽनुक्तानामन्येषामपि रागमयकरुणपरिदेवितानां समुच्चये ॥ ३१ ॥ गोपीमनोरथानामेवारामो निवासः सन् स्वपुरं मथुरां मथुरायाः स्वीयावासत्वात् "मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः" इत्युक्तेः स्वपुरत्वमिति (१) ॥ अनाश्वासितास्ता रुरुदुरित्याह—स्त्रीणामिति । ताः साक्षाच्छ्रुतिरूपाः । मित्रदैवतं सूर्यरूपतयोपदिष्टं ब्रह्म यत्र गायत्रीमंत्रे तज्जपाग्र्यं कर्म । यद्वा—कृतसूर्यमंडलाधिष्ठितनारायणोपासनः "ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥" इति स्मृतेः, "यश्चासावादित्ये" इत्यादिश्रुतेश्च । आदिपदात्स्तवपाठादिग्रहः ॥ * ॥ एवमुक्तप्रकारेण रुदतीरपि स्त्रियोऽनादृत्येत्यक्रूरस्यापराधः सूचितः । स्वतः सर्वैरनुकंप्यानां तत्रापि तादृशप्रेम्णा यथा रुदतीनां व्रजस्त्रीणां कथमपि सान्त्वनमपेक्ष्य प्रस्थानात् । भो मातरः क्षमध्वं पराधीनस्य राजसेवकस्य ममापराधमेषोऽहमेत्र कृष्णमानीय समर्पयिष्यामीत्यनाश्वासनमेव तदनादरः । अत एव तदनादरफलमक्रूरस्य स्यमंतकप्रसंगे कृष्णविच्छेददुःखं, द्वारकात्यागं, दुर्यशो, वाराणसीवासं च भावुकभक्तविशेषाः श्रीगोकुलमहिम्ना मन्यंते । अतस्ताभिरपि तदपराधं मत्वा प्रागुक्तम्—'योऽसावनाश्वास्य सुदुःखितम्' इत्यादिना । वैष्णवेऽपि—"अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान् । एवमार्तासु गोपीषु घृणा कस्य न जायते ॥" इति । सूर्य उदिते एव सल्लग्नाद्यपेक्षयेति ज्ञेयम् । अत्र गोपीविलापाब्धिनिमग्नचेतस्त्वादेव मुनिना तात्कालिकव्रजेश्वरीविलापावर्णनमिति केचित् । धनुर्मखोत्सवदर्शनोत्कण्ठमना बालकोऽयं स्वपित्रा सहैव याति, यथासमयं पित्रैव भोजयिष्यमाणः पितुरंक एव सुखं शयिष्यमाण एकदिनं तत्र स्थित्वा परश्वः पुनः स्वपित्रा सहैवायास्यति, कात्र चिंतेति पुरंध्रीभिर्गोपैश्च नंदादिभिश्च मुहुराश्वासितायास्तस्यास्तदा नातिशोक इत्यन्ये प्राहुः ॥ ३२ ॥ तं श्रीकृष्णम् । ततो व्रजात् ॥ * ॥ तं रथम् । अन्वषज्जन्त पश्चादगच्छन्, नानाशंकाकुलचित्तत्वात् । आद्यपदेन सनंदादयः । तत इत्यनेन सूचिते विलम्बे हेतुः—उपायनं रत्नाद्युत्तमद्रव्यम् । कुंभांश्चेति यात्रामंगलमपि सूचितम् ॥ ३३ ॥ प्रत्याख्यानं—तिष्ठन्तु नायान्त्विति गमननिषेधरूपम् ॥ * ॥ अनुरञ्जिताः कृष्णेन रथस्थेनैव पश्चिमाभिमुखीभूय स्वप्रेयसीनां निर्गच्छतः प्राणानालक्ष्य—भोः प्राणैकवल्लभा मा खिद्यत एष्येऽहमेतान्वञ्चयित्वा युष्मत्सन्निधिमेष्यामीत्यर्थद्योतकेन निरीक्षणेन किञ्चिदानंदिताः । ततश्चोर्वादिजाड्ये निवृत्ते सति । गोप्यश्चेति यथा गोपा आनंदेन रथमनुव्रजन्ति स्म तथा गोप्यश्च दयितमनुव्रज्य प्रत्यादेशं दूतादिद्वाराऽत्राधिकरणार्थनिजविज्ञप्तिवाक्यस्य प्रतिवचनं काङ्क्षन्त्यः नयनकृतमाश्वासं यथा प्रापुस्तथा वचनकृतमपि तमभिलषं

१ उदूखलबन्धनकर्मणः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः ॥ सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः॥३५॥यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च॥अनुप्रस्थापितात्मानो लेख्यानीवोपतस्थिरे॥३६॥ता निराशा निववृतुर्गोविंदविनिवर्तने ॥ विशोका अहनी निन्युर्गायंत्यः प्रियचेष्टितम्॥३७॥भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ॥ रथेन वायुवेगेन कालिंदीमघनाशिनीम्॥३८॥तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभम् ॥ वृक्षषंडमुपव्रज्य सरामो रथमाविशत्॥३९॥

दिभिः किंचिदानंदिताः । प्रत्यादेशं प्रत्याख्यानम् ॥ ३४ ॥ तप्यतीः संतप्यमानाः । ताः आयास्ये शीघ्रमागमिष्यामीति दौत्यकैः दूतवाक्यैः ॥ ३५ ॥ कृष्णमनुप्रस्थापिता आत्मानश्चित्तानि याभिस्ताः लेख्यमयपुत्रिका इव निश्चलाः ॥ ३६ ॥ ३७ ॥ ३८ ॥ वृक्षाणां षंडं समूहमुपव्रज्य ॥ ३९ ॥

त्योऽवतस्थिरे । दूरतस्तद्दृष्टिविषये परमोच्चे देशे सावधानतया स्थिता इत्यर्थः ॥३४॥ ता गोपीः । स्तथोक्तप्रकारेण । पाठा० संप्रेष्यैः प्रेषितुं योग्यैः—भवतीर्ध्यायन्नेव कश्चित्कालं तत्र स्थास्य इत्येवंरूपैः ॥*॥ केचित्तु यदेवं व्याचक्षते दूतद्वारकसंदेशे स्वरूपैरायास्यामि न तु स्वयं—तदसत्, इतिशब्दस्य सर्वान्ते निदेशाभावात्तदप्रतिपत्तेः । संदेशमात्रागमने प्रत्युत तासां परमक्षोभापत्तेः । " आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः " इत्यनेन परमाप्तदूतस्य श्रीमदुद्धवस्य वाक्येन तदुच्छित्तेः । दौत्यकैर्गोप्यतया वारंवारं बहुभिर्दूतवचनैः सप्रेमैर्विविधशपथपूर्वकं स्नेहमयैर्न तु सच्छलैरित्यर्थः । यदूत्तमः संप्रति तन्नामाभिमत्यैव तद्रक्षानिश्चयात् । गमने हेतुरायास्यत इति । " वर्तमानसमीपे वर्तमानवद्वा " इति लट्प्रयोगोऽपि । तच्च दंतवक्रवधानंतरं सिद्धमिति पाद्मोत्तरखंडमूलस्वारस्यं च तत्रैवोदाहरिष्यते । अत्र **तोषिणी**—दौत्यकैरिह कर्मणि ष्यञ् । बहुवचनेन यथा तासां प्रबोधो भवति तथा बहुप्रकारैस्तद्विश्वासोत्पादकैः शपथशतसहितैरित्यर्थः । कप्रत्ययेनानुकंपाव्यञ्जकैः सप्रेमैः सप्रेमाभिरिति । यथा यूयं मां विना विभिन्नधैर्यास्तथाहमपि विदीर्णहृदय एव पराधीन एव, भवतीनां स्मितमधुरकटाक्षमाध्वीकं त्रिजगदतिदुर्लभं स्वधीरसनया लिहन्नेव जीवन्पुरीं यामि, यद्यहं परश्वो नागमिष्यामि तदा यूयमहं च न युगपदेव प्राणान्धर्तुं शक्नुमः । यदि वा परमायुःप्राबल्यादाशाबंधाच्च जीविष्यामस्तदपि तज्जीवनं मरणकोटितोऽप्यधिककष्टमित्यादिप्रेमामृतम्रक्षितैरित्यर्थः । परश्वआगमनप्रकारस्तु उपरिष्टाद्व्याख्यास्यते ॥ ३५ ॥ केतुर्ध्वजः ' केतुर्ग्रहपताकयोः ' इति विश्वः ॥ * ॥ अथापि तासां संघः प्राणरक्षैवाभून्न तु शान्तिरित्याह—यावदिति । आलक्ष्यते किञ्चिल्लक्षणेनेषद्दृश्यते तावत्तं रथं रेणुञ्चानु पश्चात्प्रस्थापितात्मान उपलक्षिता लोकैः समीपे दृष्टाः ॥ ३६ ॥ प्रियचेष्टितं कृष्णलीलां प्रगायन्त्यो विशोकाः सत्यः । यद्वा—विशिष्टशोकाः ॥ * ॥ अतो गोविन्दस्य विशेषेण मथुरागमनौन्मुख्यं विनैव निवर्तने निराशाः । किन्तु तत आगमन एव साशाः सत्यो निवृत्ता इत्यर्थः । आयास्य इति तेनोक्तत्वात्तथैवाह—प्रियस्य कृष्णस्य चेष्टितं 'तस्मान्मच्छरणं गोष्ठम्' इत्यादिलक्षणं तत्तत्प्रतिपालकं चरितमायास्य इत्यस्य प्रमाणरूपं गायन्त्यो विशोका आशाच्छेदज्ञानेन मर्मपर्यन्तभेदकेन प्रियविच्छेदं जानंत्यस्त दुःखाशंकालक्षणेन शोकेन रहिताः सत्योऽहनी निन्युरदर्शनदुःखातिशयं विषह्य गमयामासुरन्यथा क्षणमपि नागमिष्यन्नित्यर्थः । तथैव श्रीभगवता वक्ष्यते—" धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन । प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मिकाः ॥ " इति । श्रीमदुद्धवेन च—" गायन्ति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च । गोप्यश्च " इत्यादि । अहनी रात्र्यहनी । तद्विशेषस्तु लीलास्तोत्रादौ वर्णितः ॥ ३७ ॥ अपिशब्देन गोपगणोऽपि । कालिन्दीं कलिन्दगिरिसंभूताम् ॥ * ॥ अथ तासामिव प्रियजनप्रेमार्द्रतास्वभावेन सकलश्रुतिस्मृतिगीतस्य श्रीकृष्णस्याप्यार्तिर्जातैव, किन्तु गांभीर्येणैव गोपिता दौत्यकैरिति बहुवचनेन तदावेशसूचनात् । गमनं त्वावश्यककार्यविशेषार्थमेवेत्याह—भगवानपीति । सोऽपि तद्दुःखदर्शनाक्षमतया वायुवेगेन तद्वच्छीघ्रतया चालितेन रथेन कालिन्दीमनन्ततीर्थप्रदेशावच्छिन्नां सम्यक्प्राप्तः । अघानि दुःखव्यसनानि नाशयतीति ताम् । निजविरहतापनाशिनी सा भवेदिति बुद्ध्यैवेत्यर्थः । ननु तद्दुःखं न तत्र स्पष्टं दृष्टं तत्राह—रामेति । तत्संकोचान्निगूहितामिति भावः । ननु तर्हि व्याजेनापि कथं न निवृत्तस्तत्राप्याह—रामेति । कालिन्दीप्राप्तिश्चेयं मध्याह्ने । तथा च श्रीविष्णुपुराणे—" गच्छन्तो जविनाश्वेन रथेन यमुनातटम् । प्राप्ता मध्याह्नसमये रामाक्रूरजनार्दनाः ॥ " इति । अत एवान्ये तत्संगे गंतुं न शक्ताः । तत्र तदानीं नंदीश्वरगिरिसन्निहितः श्रीनंदनिलय इति प्रसिद्धावपि यद्यपि तादृशवेगस्य रथस्य तावान्विलम्बो न संभवति तथाप्यसौ मुहुर्दूत्यादिद्वारा श्रीगोपिकासान्त्वनबाहुल्येन वृक्षावृततया रथगमने कौटिल्येन च ज्ञेयः ॥ ३८ ॥ तत्र कालिन्द्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अक्रूरस्तावुपामंत्र्य निवेश्य च रथोपरि ॥ कालिंद्या ह्रदमागत्य स्नानं विधिवदाचरत् ॥ ४० ॥ निमज्ज्य तस्मिन्सलिले जपन्ब्रह्म सनातनम् ॥ तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥ ४१॥ तौ रथस्थौ कथमिह सुतावानकदुंदुभेः ॥ तर्हि स्वित्स्यंदने न स्त इत्युन्मज्ज्य व्यचष्ट सः॥४२॥ तत्रापि च यथापूर्वमासीनौ पुनरेव सः॥न्यमज्जद्दर्शनं यन्मे मृषा किं सलिले तयोः ॥४३॥ भूयस्तत्रापि सोऽद्राक्षीत्स्तूयमानमहीश्वरम् ॥ सिद्धचारणगंधर्वैरसुरैर्नतकंधरैः ॥ ४४ ॥ सहस्रशिरसं देवं सहस्रफणमौलिनम् ॥ नीलांबरं बिसश्वेतं शृंगैः श्वेतमिव स्थितम् ॥ ४५ ॥ तस्योत्संगे घनश्यामं पीतकौशेयवाससम् ॥ पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणम् ॥ ४६ ॥

शत्रुभ्यः शंकितः सन् रथोपरि निवेश्य ॥ ४० ॥ ब्रह्म वेदं सावित्रीं जपन् । एवशब्दः प्रतिबिंबव्यावृत्त्यर्थः ॥ क्वेमौ बालौ क्व तौ मल्लाविति शंकितचेतसे । अक्रूराय जले रूपमत्याश्चर्यं व्यदर्शयत् ॥ १ ॥ ४१ ॥ ४२ ॥ ४३ ॥ सिद्धादिभिः स्तूयमानम् ॥ ४४ ॥ सहस्रं शिरांसि यस्य तम् । सहस्रफणेषु मौलयः किरीटानि यस्य संतीति तथा तम् । नीले अंबरे यस्य तम् । बिसवत्कमलनालवच्छ्वेतं शुभ्रम् । शृंगैः शिखरैः श्वेतं कैलासमिव स्थितम् ॥ ४५ ॥ तस्योत्संगे कुंडलीकृतदेहार्धे विलोकयेत्येकादशेन श्लोके

मृष्टमतिपूतम् । मणेर्दिनमणेः । प्रभवत्युद्भवतीति तथा । एकदेशन्यायोऽत्र बोध्यः, एकदेशस्त्वादिमोंऽतिमो वातोऽत्रांत्यैकदेशो गृहीतः । 'निशम्य भानुनंदिनी' इतिवत् । यथा वृषभानुनंदिन्यां राधायां शिवेन भानुनंदिनीत्युक्तं तद्वदिहापि, श्याममणिसदृशं वा ॥ * ॥ ० ॥ ३९ ॥ तौ रामकृष्णौ । शत्रुभ्यः कंसानुयायिभ्यः । अधोगतौ मा गृह्णीयुरिति शंकितः ॥ * ॥ अहो श्रीव्रजदेवीमनःक्षोभात्किल तदाप्यक्रूरस्य तन्निजपरममधुरवैभवावगाहिता यथा ब्रह्मादेर्जाता तथा न जातेत्याह–अक्रूर इति त्रिभिः । तावुपामंत्र्य अनुज्ञाप्य । रथोपरीति सुखोपवेशार्थम् । कालिन्द्या ह्रदमनन्ततीर्थम् ॥ ४० ॥ तस्मिन्कालिन्दीह्रदे । ब्रह्म अघमर्षणसूक्तम्, तस्यैव निमज्ज्यजपविधेः वेदं वा । तौ रामकृष्णावेव ॥ पद्यम्–इमौ रामकृष्णौ । तौ चाणूरमुष्टिकौ । यद्यप्यन्येऽपि तत्र मल्लाः संति तथापि तयोः प्रधानत्वात्तच्छब्देन तौ गृहीतौ, ताभ्यामेवादौ तयोर्युद्धस्य प्रवृत्तत्वाद्वा । अत्याश्चर्यमदृष्टपूर्वम् (१) ॥ * ॥ "स्वमंत्रध्येयरूपादप्यद्भुतं रूपमीक्षितम् । व्रजेऽक्रूरेण तत्रैव निष्ठामप्याप चेतसः ॥ तां च्यावयन्व्रजवधूमंत्रहेतोः पुरातनीम् ॥ निष्ठामेवापयन्कृष्णो वैकुण्ठं तमदर्शयत् ॥"॥४१॥ सोऽक्रूरः । व्यचष्टाद्राक्षीत् । स्यंदने रथे । इह जले ॥ *॥४२॥ तत्रापि रथेऽपि । व्यचष्टेति क्रियापदमपि आकृष्यतेऽत्र । सोऽक्रूरः । पुनर्न्यमज्जत् । तयोः रामकृष्णयोः ॥ *॥०॥४३॥ तत्रापि कालिन्दीजलेऽपि । भूयः पुनः । असुरैः असुषु प्राणेषु रतैर्यत्नपरैः । '-प्राणेष्विन्द्रियेषु च । असवः परिकीर्त्यन्ते–' इति । "रतं गुह्ये प्रयत्ने च मैथुने क्रीडनेऽपि च" इति धरणिः । जितेन्द्रियैः प्राणायामपरैर्वा । बल्यादिभिर्वा ॥ * ॥ द्वितीये निमज्जने तु तं स्वांशं श्रीविष्णुं तन्मंत्रोपास्यदैवतं दर्शयंस्तत्रैव तन्मनोनिष्ठां धारयितुं तत्परिकरानन्तरूपमपि साक्षादनुभावयामास मदभीष्टदेवः श्रीवैकुण्ठनाथो वसुदेवगृहेऽवतीर्ण इति ज्ञापयामास च–भूय इति त्रयोदशभिः । तत्रैव ह्रदेऽहीश्वरमद्राक्षीन्न तु पूर्ववद्रामकृष्णौ । सिद्धैः स्वाशिष्यैः सनकादिभिः । भुजंगपतयो विवृता वैष्णवे–"वृतं वासुकिरंभाद्यैर्महद्भिः पवनाशिभिः" इति । असुरैः प्रह्लादाद्यैः । [2]नतमस्तकैरिति सर्वेषां विशेषणम् ॥ ४४ ॥ देवं शेषम् ॥ * ॥ मौलिनामिति व्रीह्यादित्वादिनिः । "ददृशुर्ब्रह्मणो लोकं यत्राऽक्रूरोऽध्यगात्पुरा" इत्यत्र ब्रह्मणो लोकं वैकुंठमिति स्वामिव्याख्यानात् । 'वैकुंठेऽपि यथा शेषः' इति भागवतामृतवाक्याच्च जलेऽक्रूरो वैकुण्ठमेवापश्यदिति प्राहुः ॥ ४५ ॥ तस्य शेषस्य ॥ * ॥ कृष्णस्यांशं नारायणं वर्णयति–तस्येति । पुरुषं ब्रह्माण्डान्तर्यामिणो रूपविशेषम् । स्पष्टयिष्यते च 'नतोऽस्म्यहं त्वाम्'

१ असुषु रता असुराः "अन्येष्वपि दृश्यते" इत्यपि शब्दाङ्गः । २ अयमेवमेव पाठमुरीकरोति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसन्नचारुवदनं चारुहासनिरीक्षणम् ॥ सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरम् ॥ ४७ ॥ प्रलंबपीवरभुजं तुंगांसोरःस्थलश्रियम् ॥ कंबुकंठं निम्ननाभिं वलिमत्पल्लवोदरम् ॥ ४८ ॥ बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम् ॥ चारुजानुयुगं चारुजंघायुगलसंयुतम् ॥ ४९ ॥ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतम् ॥ नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजम् ॥ ५० ॥ सुमहार्हमणिव्रातकिरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ॥ ५१ ॥ भ्राजमानं पद्मकरं शंखचक्रगदाधरम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥ ५२ ॥ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ ५३ ॥

नान्वयः ॥ ४६ ॥ शोभने भ्रुवौ यस्य उन्नता नासिका यस्य तं च तं च । शोभनौ कपोलौ यस्य अरुणावधरौ यस्य तं च तं च ॥ ४७ ॥ तुंगावंसौ यस्य उरःस्थले श्रीर्यस्य तं च तं च । वलिमत्पल्लवोदरं वलयस्तिर्यङ्निम्नरेखा यस्य संति तद्वलिमत्तच्च तत्पल्लववदश्वत्थदलसदृशमुदरं यस्य तम् ॥ ४८ ॥ कटितटं च श्रोणिश्च करभसदृशमूरुद्वयं च बृहच्च तत्कटितटश्रोणिकरभोरुद्वयं च तेनान्वितम् । यद्वा बृहद्भ्यां कटितटश्रोणिभ्यां करभोरुद्वयेन चान्वितम् ॥ ४९ ॥ तुंगावीषदुन्नतौ गुल्फावरुणनखव्राताश्च तेषां दीधितिभिः । तथा नवाः कोमला अंगुल्योंगुष्ठौ च तान्येव दलानि तैश्च विलसच्छोभमानं पादपंकजं यस्य तम् ॥ ५० ॥ सुमहार्हा मणिव्राता येषु तैः किरीटादिभिः भ्राजमानम् ॥ ५१ ॥ ५२ ॥ पृथक्पृथक् भावोऽभिप्रायो येषां तैः । तत्र पार्षदैः स्वामीति स्तूयमानम् । सनकादिभिर्ब्रह्मेति । ब्रह्माद्यैः सुरे

इत्यादिना । शान्तं घोरत्वाद्यभावेन मनोनयनानन्दकम् ॥ ४६ ॥ चारु रम्यं प्रसन्नं विशदं वदनं मुखं यस्य तम् । चारुहासेन युतं निरीक्षणं यस्य तम् । मध्यमपदलोपी समासः । चारुहासः स्मितम् । यद्वा—चारुणी हासनिरीक्षिते यस्येति ॥ * ॥ चारुसुशब्दयोर्मुहुरुक्तिस्तु तत्तदतिशयबोधनायैव ॥ ४७ ॥ पल्लव आकाशस्तद्वदुदरं यस्येति । “ पल्लवोऽस्त्री किशलये विस्तृताकाशयोरपि ” इति वैजयन्ती । अनंताण्डकोटिनिवेशनक्षममुदरं यस्येति भावः ॥ * ॥ श्रीरत्र रेखारूपा । प्रेयसीतत्सखीरूपे त्वग्रे वक्ष्येते च ॥ ४८ ॥ करभवन्निम्नोन्नतमरोमकं चोरुद्वयम् । कटितटं काञ्चीपदम् । पूर्वसमासे श्रोणिकटपदयोः स्थितेऽपि द्वित्वे सामान्याभिप्रायेणैकत्वमाश्रित्य कृतविग्रहत्वात्किञ्चिदस्वारस्यं मत्वा द्विवचनान्ताभ्यां विगृह्णाति—यद्वेति ॥ * ॥ कटिरेव तटं विस्तीर्णत्वात्, श्रोणिरत्र तदग्रभागस्तयोर्बृहत्त्वं स्थौल्यम् । “ मणिबंधादाकनिष्ठं करस्य करभो बहिः ” इत्यमरः । **विश्वनाथस्तु**—कटितटं नितम्बः । श्रोणिः कटिः ‘ कटिः श्रोणिः ककुद्मती ’ इत्यमरः । ऊरुद्वयस्य करभसादृश्यं यथायथं स्थूलत्वेन क्रमनिम्नत्वेन च । अन्वितसंयुतादिपदं तत्सौन्दर्यातिशयव्यञ्जनायापूर्वमित्यर्थः ॥ ४९ ॥ व्रातः समूहः । दीधितिभिः किरणैः ॥ * ॥ नवशब्देन सौकुमार्यं, तेन च नवदलवदारुण्यं लक्ष्यते । नवानि यान्यंगुल्यादिरूपाणि दलानि तैरिति वैपरीत्येन रूपकश्चातिशयितार्थम् । अत्र कचिद्व्युत्क्रमेण वर्णनेन तद्दृष्टेस्तत्रैव भ्रमणं बोधयित्वा लोभाकुलता बोध्यते ॥ ५० ॥ सुमहार्हाः अमूल्याः । कटिसूत्रं काञ्ची । ब्रह्मसूत्रमुपवीतम् ॥ * ॥ अधुना भूषणादिकमाह—सुमहार्हेति । सुमहार्हं परमश्रेष्ठत्वं कटिसूत्रादीनां ज्ञेयम् ॥ ५१ ॥ पद्मः करे यस्य तम् ॥ * ॥ पद्मस्य पृथगुक्तिरनायुधत्वात् । करसंबंधेनोक्तिरन्यत्रांगेऽपि तद्धारणसंभवात् ॥ ५२ ॥ पार्षदैरनुचरैः । नवभिर्नवसंख्याकैः । तत्र पार्षदैः सुनंदाद्यैः । संभवत्वाद्वचसामपि विशेषणम् । अत आह—वचोभिरिति, वेति ॥ * ॥ परिवारानाह—सुनंदेति । तत्र पार्षदाः सेवकत्वात्सर्वान्तरंगाः । सनकाद्या भक्तत्वेऽपि सेवांशराहित्येन ततो बहिरंगाः । निष्कामत्वेन भगवत्स्वरूपानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भावैर्वचोभिरमलात्मभिः ॥ ९४ ॥ श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया ॥ विद्ययाऽविद्यया शक्त्या मायया च निषेवितम् ॥९५॥ विलोक्य सुभृशं प्रीतो भक्त्या परमया युतः ॥ हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ॥९६॥

श्वर इति । 'मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः । भृगुर्वसिष्ठो दक्षश्च' इति नवभिर्द्विजोत्तमैः परः प्रजापतिरिति । वसुरुपरिचरः । प्रह्लादनारदवसवः प्रमुखा मुख्या येषां तैः परं दैवतमिति च । श्रेष्ठैर्वचोभिः पृथग्भावैर्वचोभिरिति वा ॥५३॥५४॥ इला भूः ऊर्जा बलं विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू माया तु तयोः कारणम् । शक्ति र्ह्लादिनी संवित् (ज्ञानम्) आभिरन्याभिश्च निषेवितम् ॥ ५५ ॥ विलोक्य सुभृशं प्रीतोऽस्मत्कृष्णोऽसावेवंभूतः परमेश्वर इति ज्ञात्वेति ॥ ५६ ॥

भवित्वेन चान्येऽभ्योऽन्तरंगाः । ब्रह्माद्येषु ब्रह्मरुद्रयोर्वस्तुतस्तु तद्गुणत्वेऽपि जगदधिकारांशाभिमानाभाससद्भावेन ततो बहिरंगतादर्शकत्वम् । अन्ये तु बहिरंगा एव । " मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः । भृगुर्वसिष्ठो दक्षश्च " इति नवप्रजापतयो ब्रह्माद्यपेक्षया न्यूनज्ञानादित्वेन बहिरंगा एव । प्रह्लादादयस्तु तत्तन्महागुणत्वेऽपि सर्वतत्तत्परिवारसहितस्य तस्य दैनोपासिकाभिमानितया बहिरेव प्रायस्तिष्ठन्तीति सर्वबहिर्गणिताः । एषां दिङ्नियमश्चागमानुसारात् । यथा पार्षदाः पूर्वाद्यष्टस्वपि दिक्षु, सनकाद्याः पश्चात्, ब्रह्माद्याः ऊर्ध्वादिदिग्यथास्वदिक्षु, देवस्य दक्षिणे भागे वा । मरीच्याद्या वामे, प्रह्लादादयः संमुखे, नारदस्तु संमुखोऽर्द्ध्वे इति । एते च नित्यावरणरूपत्वात्प्रापञ्चिकानामपीशा ज्ञेयाः । यथोक्तं पाद्मोत्तरखंडे–" नित्याः सर्वे परं धाम्नि ये चान्ये च दिवौकसः । ते वै प्राकृतनाकेऽस्मिन्ननित्यास्त्रिदशेश्वराः ॥ " । " तेह नाकं महिमानः सचंते " इति श्रुतिरिति । तत्र श्रेष्ठैरित्यमलात्मभिरित्यस्यार्थः । अविद्यमानं मलं दोषो यत्रेति । पृथग्भावैरिति वचोविशेषणमेव कृतं तथापि वक्तृष्वेव तात्पर्यम् । अमलात्मभिरिति परिवारस्य विशेषणम् । तेन च सर्वेषामभिप्रायाणां युक्ततमत्वं व्यक्तम् ॥ ९३ ॥ ९४ ॥ तयोर्विद्याविद्ययोः । आभिः श्र्यादिभिः । अन्याभिर्विमलोत्कार्षिणीज्ञानक्रियायोगाप्रह्वीसत्यानुग्रहेशानाभिश्च ॥ * ॥ आवरणरूपेण वर्तमानाः शक्तीराह–श्रियेति । तत्र श्रीरैश्वर्यम् । पुष्टिर्बलम् । गीर्ज्ञानम् । कान्तिः श्रीः । कीर्तिर्यशः । तुष्टिर्वैराग्यमिति षट् भगशब्दवाच्याः शक्तयः । इला भूशक्तिः संधिन्याख्या अंतरंगा, यस्या विभूतिः पृथ्वी । ऊर्जा लीलाशक्तिरंतरंगा, यस्या विभूतिस्तु लोकस्था तुलसी । विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू बहिरंगे, शक्तिर्महालक्ष्मीर्ह्लादिन्यंतरंगा । माया विद्याविद्ययोर्मूलभूता बहिरंगा, चकारात्तदधीना जीवशक्तिस्तटस्था, एताभिर्नितरां सेवितम् । अत्र **तोषिणी–**ह्लादिनी स्वरूपानंदानुभाविनी संवित् चिद्रूपा स्वरूपभूतमहाशक्तिः, सैव हि शक्तिशब्दस्य प्रथमप्रवृत्तिहेतुर्मायातिरिक्ता च । तया महालक्ष्म्याख्यया तदंतरंगया निषेवितं तया तत्स्पर्शात । तदुक्तम्–" ह्लादिन्या संविदाश्लिष्टः सच्चिदानंद ईश्वरः " इति । संविदित्यस्यान्ते ज्ञानमित्यधिका टीका केनचिदबुद्ध्यैव कल्पितेति लक्ष्यते । मायया च बहिरंगया निषेवितं चाद्गौणताव्यक्तेस्तया तदस्पर्शात् । तदुक्तं श्रीवैष्णवे–" ह्लादिनी संधिनी संवित्त्वय्येका सर्वसंस्थितौ । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥" इति । तथा द्वितीये च–" विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया " इत्यादि । अनयोरेव मूर्तिभेदाः श्र्यादयः प्रापञ्चिकाप्रापञ्चिकभेदेन द्विविधत्वात्तासां जात्या त्वेकत्वं विवक्षितम् । तत्र श्रीः संपदः संपादयित्री, पुष्टिः शरीरस्य, गीर्वाचः, कांतिः शोभायाः, कीर्तिर्यशसः, तुष्टिरंतःकरणस्य, इला भुवः, ऊर्जा लीलायाः, विद्या यथार्थज्ञानस्य, अविद्या तदज्ञानस्य । तच्च क्वचित्तत्तत्प्रेम्णापि भवतीति ह्लादिनीवृत्तिरपि,--एतदुपलक्षणत्वेनान्या अपि ज्ञेयाः । तदुक्तं पाद्मोत्तरखंडे–" एवं परपदे नित्यैर्मुक्तैर्हरिपरायणैः । दिव्याभिर्महिषीभिश्च राजते हरिरीश्वरः ॥ " इति ॥ ९९ ॥ हृष्यन्ति प्रादुर्भूतानि तनूरुहाणि रोमाणि यस्य स तथा । भावेन परप्रेम्णा परिक्लिन्ने आनंदाश्रुजलस्नाते लोचने यस्य सः । परिक्लिन्नं द्रवीभूतं आत्मा चित्तं लोचने च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिरा गद्गदयाऽस्तौषीत्सत्त्वमालंब्य सात्वतः ॥ प्रणम्य मूर्ध्नावहितः कृतांजलिपुटः शनैः ॥ ५७ ॥ इति श्रीभा० म० द० पूर्वार्धेऽक्रूरप्रतियाने भगवत्प्रयाणनिरूपणं नाम एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ अक्रूर उवाच ॥ नतोऽस्म्यहं त्वाखिलहेतुहेतुं नारायणं पूरुषमाद्यमव्ययम् ॥ यन्नाभिजातादरविंदकोशाद्ब्रह्माऽऽविरासीद्यत एष लोकः ॥ १ ॥ भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि ॥ सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोंगभूताः ॥२॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया गृहीताः ॥ अजोऽनुबद्धः स गुणैरजाया गुणात्परं वेद न ते स्वरूपम् ॥३॥

॥५७॥ इति श्री० भा० म० दशमे पूर्वार्धे टीकायामेकोनचत्वारिंशोऽध्यायः ॥३९॥ चत्वारिंशे ततोऽक्रूरः कृष्णं मत्वेश्वरेश्वरम् ॥ प्रणम्य भक्त्या तुष्टाव सगुणागुणभेदतः ॥ १ ॥ श्रीकृष्णं प्रणमति । नतोऽस्मीति । हे कृष्ण त्वा त्वां नतोऽस्मि । त्वमस्मत्पितृव्यः कुतो मां बालं नतोऽसि तत्राह । आद्यं पुरुषमव्ययं चानादिनिधनमित्यर्थः । कुत एतत् । अखिलहेतूनां हेतुम् । स तु नारायणो नाहमिति चेत्तत्राह । नारायणं त्वाम् । किं नारायण इति मां स्तौषि काऽत्र स्तुतिः सत्यमेवेत्याह । यन्नाभिजातादिति । यतो ब्रह्मणः एष लोक आविरासीत् । अनेन नारं जीवसमूहं तस्य अयनत्वात् नारायण इति सूचितम् ॥ १ ॥ अखिलहेतुत्वं प्रपंचयति । भूरिति । खस्यादिरहंकारः । अजा माया तस्या आदिः पुरुषः । एते ये जगतो हेतवस्ते सर्वे तवांगभूता अंगाच्छ्रीमूर्तेर्भूताः जाताः । उपसर्जनभूता वा ॥ २ ॥ नन्वतिस्तुतिः कथं क्रियतेऽहमेवान्यत उत्पन्नस्तत्परतंत्रश्चेत्याशंक्य तवैषा माया त्वत्पारमार्थ्यं तु न कोऽपि वेदेत्याह । नैत इति । एते अज आदिर्येषां ते आत्मनस्ते स्वरूपं न विदुः । अना

यस्येति वा ॥ * ॥ विलोक्येति तैर्व्याख्यातम् । तत्राध्याहारेण व्याचष्टेऽस्मत्कृष्णोऽसावित्यादि । तथोक्तं वैष्णवे–“ बलकृष्णौ तदाऽक्रूरः प्रत्यभिज्ञाय विस्मितः ” इति ॥ ५६ ॥ सात्वतोऽक्रूरः । सत्त्वं धैर्यं व्यवसायमिति यावत्, आत्मभावं वा । “ सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जन्तुषु ॥ ” इति मेदिनी ॥ * ॥ सत्त्वं धैर्यम् । रुद्धकंठत्वेन शनैरेव अहो अक्रूरभाग्यमिति विमृशंस्तं नृपं प्रत्याह मुनीन्द्रः–हे भारतेति । भरतवंश्यैर्भवाद्भिरपि बहुशोऽसावनुभूत एवेति भावः ॥ ५७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ईश्वरेश्वरं सर्वेश्वरम् । सगुणागुणभेदाभ्यामिति तृतीयार्थे तसिः (१) । तत्राक्षेपे । इत्यर्थ इति–उभयपदसंगृहीतोऽयमर्थ इत्याशयः । अत्र हेतुमाक्षिपति–कुत इति । एतत् अनादिनिधनत्वम् । ‘ सोऽखिलहेतुहेतुः ’ इत्युक्तेः । इति चेत् इत्युक्ते । तत्राक्षेपे उत्तरमाह–मां किं स्तौषीति, नारायणस्त्वम् । अत्र मन्नारायणत्वे । सत्यं यथार्थमेव । यस्य नारायणस्य नाभिजातात् । केचित्तु नारपदेन नराद्यखिलवस्त्ववकाशप्रदत्वेनायनत्वान्नारायण आकाश एव किं न स्यात्तद्वारणाय–पूरुषमिति । पुरुषाणामपि पितृपितामहादिवद्बीजपरंपरा स्यात्तद्वारणाय आदिमिति वदंति, तदत्राचारुत्वद्धातीति ॥ * ॥ ० ॥ १ ॥ सर्वकारणत्वं विशदयति–‘ अनंतरस्य विधिर्वा प्रतिषेधे वा ’ इति न्यायेन खस्यादिरित्युक्तम् । एवमजादिरिहापि । इंद्रियार्थाः शब्दादयः । विबुधा इन्द्रियाधिष्ठातारः । श्रीमूर्तेर्नारायणात् । “ नाभ्या आसीदंतरिक्षꣳ शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन् ॥ ”, “ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ” इत्यादिश्रुतेः । यद्येत एव जगद्धेतवस्तर्हि किं मयेति चेदाह– उपसर्जनभूता गौणीभूता न ह्यङ्गिनं प्रधानं विना गुणीभूतैरंगैः किञ्चित्कर्तुं शक्यत इति ॥ * ॥ श्रीमूर्तेर्जाता “ वाचां वह्नेर्मुखं क्षेत्रम् ” इत्याद्युक्तेः ॥ २ ॥ अत्राक्षिपति–नन्विति । तत्परतंत्रोऽन्याधीनः । इति भाव इति–चेतनस्येन्द्रियाविषयत्वात् “ न हि ज्ञातारं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वां योगिनो यजंत्यद्धा महापुरुषमीश्वरम् ॥ साध्यात्मं साधिभूतं च साधिदैवं च साधवः ॥ ४ ॥
त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः ॥ यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया ॥ ५ ॥

त्मतया जडत्वेन कारणेन । जडत्वे हेतुः । गृहीताः प्रत्यक्षादिभिर्दृष्टाः । न ह्यजडो दृग्गोचर इति भावः । ननु जडा मां मा जानंतु जीवस्तु ज्ञास्यतीत्यत आह । अज इति । सोऽजो ब्रह्माऽप्यजाया गुणैरनुबद्ध आवृतो गुणातीतं ते तव स्वरूपं न वेदान्यः कुतो ज्ञास्यतीति । यद्वा प्रकृत्यादय आत्मनः स्वरूपं तव स्वरूपं च न विदुः । जडत्वादेव जीवस्तु तानात्मानं च वेत्ति न पुनस्त्वत्स्वरूपमिति । यथोक्तं हंसगुह्ये—"देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनंतमीडे ॥ " इति ॥ ३ ॥ ननु यदि केऽपि न जानंति कथं तर्हि संसारनिवृत्तिर्जीवानामित्याशंक्य साक्षादगोचरत्वेऽपि येन केनापि मार्गेण भजतां त्वं गम्योऽसीत्याह । त्वां योगिन इति । हैरण्यगर्भादयोऽध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तदंतर्यामिस्वरूपमीश्वरं नियंतारं च यजंति ॥ ४ ॥ तदेवं सांख्ययोगावेकीकृत्योक्तौ । अथ त्रयीमार्गं कर्मज्ञानभेदेन दर्शयति त्रय्या चेति श्लोकद्वयेन । वैतानिकाः कर्मयोगिनस्त्वां वै त्वामेव यजंते । ननु ते इंद्रवरुणवाय्वादीन्यजंते न तु मामित्यत आह । नाना वज्रहस्तादीनि रूपाणि येषां ते येऽमरास्तेषामाख्यया नाम्ना त्वामेव यजंत इति । अयं भावः । ऐंद्रवारुणादिसूक्तैरिंद्रादयः सर्वैश्वर्येण प्रकाश्यंते न च सर्वेश्वरा बहवः संभवंत्यतो नामभेदेन त्वामेव यजंत इति । तथा च श्रुतिः " सप्रथमः सप्रकृतिर्विश्वकर्मा सप्रथमो मित्रावरुणोऽग्निः सप्रथमो

वेद " इति श्रुतेः । ननु " वेदाहमेतं पुरुषं महान्तम् " इति श्रुतेर्ब्रह्मणस्तु ज्ञानमस्तीति प्रतीयतेऽतोऽर्थांतरमाह—यद्वेति । यथोक्तमिति षष्ठे स्कंधे हंसगुह्ये एतन्नामकस्तोत्रे दक्षेणोक्तम् ॥ * ॥ ० ॥ ३ ॥ सर्वाज्ञत्वमाक्षिप्य समादधते—नन्विति । हैरण्यगर्भा हिरण्यमर्भोपासका योगिपदग्राह्याः । साधवो यथोचितानुष्ठाननिष्ठाः । केचिदत्राध्यात्मादिपदमन्यथा व्याख्यान्ति । तथाहि—आत्मानो जीवास्तैः सहाधिकत्वेन वर्तमानं साध्यात्मम् । भूतैराकाशादिभिः सह तद्विलक्षणत्वेन वर्तमानं साधिभूतम् । देवैर्ब्रह्मादिभिः । विशिष्टगुणत्वेन वर्तमानं साधिदैवं तत्तदुपासनार्थं तत्तदधिष्ठानेषु तत्तद्गुणप्रवर्तकत्वेन तत्तदुत्तमत्वेन वर्तमानं यजन्तीत्यर्थः ॥ ॥ * ॥ ० ॥ ४ ॥ तदेवम् इत्थम् । सांख्ययोगाविति—सांख्यास्तु साध्यात्मादिरूपं, योगिनस्तु महापुरुषरूपमीश्वरं मन्यन्ते, तदुभावेकीकृत्य तत्तच्छास्त्रविषयावुक्तौ । त्रयी वेदत्रयी । वैतानिका याज्ञिकाः । " अस्त्री वितानमुल्लोचे विस्ताराध्वरयोः क्षणे " इति हलायुधः । द्विजा जैमिन्यादयो ब्राह्मणाः । पुनराक्षिप्य समाधत्ते—नन्वित्यादिना । अत्राशयमाह—अयं भाव इति । सर्वैश्वर्येण परमैश्वर्येण यतो बहवः सर्वेश्वरा न संत्यतो हेतोः । अत्र प्रमाणमाह—तथा चेति । प्रथमेन कारणेन सह वर्तते सप्रथमः । प्रकृत्या मूलकारणेन सहेति सप्रकृतिः, विश्वकर्मादिरूपः सर्वो देवसमूहः कारणसहितः । यद्वा—प्रथमशब्देनोपादानकारणं ग्राह्यं, प्रकृतिशब्देन निमित्तकारणं च, वैपरीत्येन वा ज्ञेयम् । यद्वा—प्रथमः आदिर्विश्वकर्माऽऽदिर्मित्रावरुणादिः स एव । यद्वा—प्रकृत्या प्रधानेन सह विश्वकर्मापि स एवादिः । चिकित्सतीति चिकित्वान् । छान्दसः सलोपः । अश्विनीकुमाररूपः तस्मै सर्वदेवरूपायेन्द्राय भगवते । " इंद्रो मायाभिः पुरुरूप ईयते " इत्यत्रेंद्रशब्दो ब्रह्मवाचको दृष्ट इति । शुक्लयजुर्वेदे वाजसनेयिनस्तु—" सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इंद्राय सुतमाजुहोत स्वा हा" इति पठंति । अस्यार्थः—सा संस्कृतिः सोमसंस्कारः । किंभूता संस्कृतिः—विश्ववारा । सर्वर्त्विगादिभिर्वरणीयेत्यर्थः । प्रथमा मुख्या । स प्रथमः परमेश्वरः वरुणः " आपो ज्योति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एके त्वाऽखिलकर्माणि संन्यस्योपशमं गताः ॥ ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहम् ॥ ६ ॥ अन्ये च संस्कृतात्मानो विधिनाऽभिहितेन ते ॥ यजंति त्वन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकम् ॥ ७ ॥ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ॥ बह्वाचार्यविभेदेन भगवन्समुपासते ॥ ८ ॥ सर्व एव यजंति त्वां सर्वदेवमयेश्वरम् ॥ येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥ ९ ॥ यथाऽद्रिप्रभवा नद्यः पर्जन्याऽऽपूरिताः प्रभो ॥ विशंति सर्वतः सिंधुं तद्वत्त्वां गतयोंततः ॥ १० ॥

बृहस्पतिश्चिकित्वांस्तस्मा इंद्राय हविराजुहोति" इति ॥ ५ ॥ ज्ञानयज्ञेन समाधिना ॥ ६ ॥ सांख्ययोगत्रयीमार्गा उक्ता वैष्णवशैवमार्गावाह द्वयेन । अन्ये चेति । संस्कृतात्मानो वैष्णवशैवदीक्षया दीक्षिताः संतस्ते त्वयाऽभिहितेन पंचरात्रादिविधिना त्वन्मयास्त्वन्मयत्वेनात्मानं चिंतयंतस्त्वदेकप्रधाना इति वा । वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेन बहुमूर्तिं नारायणरूपेणैकमूर्तिकं च त्वामेव यजंति ॥ ७ ॥ बह्वाचार्यविभेदेनेति । नानाभेदशैवपाशुपतादिमार्गेण ॥ ८ ॥ येऽपि क्षुद्रदेवताभक्तास्तेऽपि त्वामेव यजंतीत्याह । सर्व एवेति । हे सर्वदेवमय । नन्वेते परस्परदेवताधिक्षेपकलहव्याकुलचित्ताः कथमेकमेव यजंतीत्युच्यते तत्राह । यद्यप्यन्यधिय इति । बुद्धिमात्रभेदो न वस्तुभेद इत्यर्थः ॥ ९ ॥ तस्मात्सर्वे मार्गास्त्वय्येव पर्यवस्यंतीति सदृष्टांतमाह । यथेति । अद्रेः सकाशात्सर्वतः प्रभवंति या नद्यस्ताः पुनः पर्जन्येनापूरिता बहुस्रोतसः सत्यः सर्वतः नानापथैः सिंधुमेव विशंति यथा तद्वदेता गतयो मार्गा ऋजुकुटिलाः अंततस्त्वामेव विशंतीति ॥ १० ॥

रसोऽमृतम् " इति श्रुतिप्रतिपादितजलरूपः, मित्रः सूर्यरूपः, अग्निरग्निरूपः, स चिकित्वान् ज्ञानस्वरूपः, बृहस्पतिर्वेदस्य पतिः, प्रथमः सर्वेषामाद्यः । तस्मा इंद्राय परमेश्वराय सुतं सोमं स्वाहाकारेणाजुहोत होमं कुरुते त्यर्थः ॥ * ॥ ० ॥ ५ ॥ प्रवृत्तिमार्गोपास्तिप्रकारमुक्त्वा निवृत्तिमार्गोपास्तिप्रकारमाह—संन्यस्य कर्मफलाऽऽसंगं त्यक्त्वा । उपशमं शान्तिम् । ज्ञानविग्रहं ज्ञानैकस्वरूपम् ॥ * ॥ ० ॥ ६ ॥ तथात्मचिंतनं दुर्लभं मत्वाह—त्वदेकप्रधानाविति । यद्वा—त्वं मयः सर्वोत्तमो येषामिति त्वन्मयाः " मयः सर्वोत्तमे दैत्यशिल्पिन्युष्ट्रेऽपि कथ्यते " इति । अभिहितेन पञ्चधा कथितेन । विधिना कालेन ' विधी तु दैवकालौ च ' इति यादवः । ' पञ्चकालपरायणैः ' इत्युक्तेः ॥ * ॥ ' पंचरात्रस्य वक्ता तु भगवान्स्वयम् ' इति स्मृतेस्तस्य परमप्रामाण्यमुक्तम् । त्वन्मयाः अन्तर्बहिस्त्वदीयस्फूर्तिमत्त्वात् । बहुमूर्त्येकमूर्तिकमिति—त्वन्मूर्तानां चिन्मयीनां नानात्वेऽप्येकत्वमेवाभिप्रेतम् । " एको वशी सर्वगः कृष्ण ईड्यः । एकोऽपि सन्बहुधा योऽवभाति " इति श्रुतेः ॥ ७ ॥ बह्वाचार्यविभेदेन दधीच्यादिबह्वाचार्यभेदेन शैवपाशुपतादिमार्गेण ॥ * ॥ शैवमार्गमाह । त्वामेवेत्येवकारः पूर्वतो न्यूनतामाह । राजैव युवराज इतिवत् ॥ ८ ॥ क्षुद्रदेवताः पञ्चदेवभिन्नाः । सर्वदेवमय ! " शैवाः सौराश्च गाणेशा वैष्णवाः शक्तिपूजकाः । मामेव प्राप्नुवंतीह वर्षापः सागरं यथा ॥" इति पाद्मोक्तेः । किञ्च—' एकोऽहं पञ्चधा जातः क्रीडया नामभिः किल " इति पञ्चधेत्युपलक्षणं सर्वदेवानाम् । किञ्च—" योयो यांयां तनुं भक्तः श्रद्धयार्चितु मिच्छति । तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हितान् ॥ " इति गीतासूक्तेः परमेश्वर एव तत्तद्रूपेणोपास्यते, स एव तत्तद्देवतान्तर्यामिरूपेण फलं ददातीत्यर्थः ॥ * ॥ एवमुक्तलक्षणा योगिकार्मिप्रभृतय उपासकाः सर्वे । ननु केचित्पृष्टा वयं शिवमर्चयामः, वयं सूर्यं, वयं गणेशमित्याद्याचक्षते, तत्राह—येऽपीति । ननु ते कादाचित्कीमपि स्मृतिं मयि न कुर्वन्ति तत्राह—यद्यपीति ॥ ९ ॥ अद्रेर्गिरेः । पर्जन्येन गर्जन्मेघेनापूरिताः । गतयो मार्गाः,—पूजामार्गाः, पुरुषार्थसाधनानि शास्त्राणि वा प्रस्थानभेदेन भिन्नानि । अंततस्तात्पर्यवृत्त्या, अंततः पूजावसाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मार्पणबुद्ध्यावसिता वेत्यर्थः । अथ प्रस्थानभेदेन यथा सर्वशास्त्राणि सर्वे मार्गाश्च त्वयि पर्यवस्यन्ति तथा दर्शयति 'त्वां योगिनः' (४) इत्यारभ्य 'तद्वत्त्वां गतयोंततः' इत्यन्तसप्तश्लोकोक्तप्रकारेण । प्रथमं त्रयीशब्देन वेदत्रयवाचिना तदुपलक्षिता अष्टादश विद्या अप्यत्र विवक्षिताः । तत्रर्ग्यजुःसामाथर्वभेदेन वेदाश्चत्वारः । "शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः । छंदसां लक्षणञ्चैव षडंगो वेद उच्यते ॥" इति षडङ्गानि, पुराणन्यायमीमांसाधर्मशास्त्राणि चेति चत्वार्युपाङ्गानि । तत्रोपपुराणानामंतर्भावः, वैशेषिकस्य न्यायनये, वेदान्तस्य मीमांसायां, महाभारतरामायणयोः सांख्यपातञ्जलपाशुपतवैष्णवादीनां च धर्मशास्त्रे, मिलित्वा चतुर्दश विद्याः । तथोक्तम्—"पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥" इति । एता एव चतुर्भिरुपवेदैः सहिता अष्टादश विद्या भवन्ति । ते च—आयुर्वेदो धनुर्वेदो गांधर्ववेदोऽर्थ शास्त्रञ्च । ता एता अष्टादश विद्यास्त्रयीसंज्ञादिनोपन्यस्ता अन्यथा न्यूनताप्रसंगात् । सर्वेषां चास्तिकानामेतावन्त्येव धर्मप्रस्थानानि, अन्येषामप्येकदेशिनामेष्वेवांतर्भावात् । ननु नास्तिकानामपि प्रस्थानानि संति तान्येतेष्व नतर्भावात्पृथग्गणितुमुचितानि । तथाहि—शून्यवादेनैकं प्रस्थानं माध्यमिकानाम् १, क्षणिकविज्ञानवादेनापरं योगाचाराणाम् २, ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरं सौत्रांतिकानाम् ३, प्रत्यक्षक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणाम् ४, इति सौगतानां प्रस्थानचतुष्टयम् । तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणाम् १, एवं देहातिरिक्तदेहपरिमाणात्मवादेन द्वितीयं प्रस्थानं दिगंबराणाम् २, एवं मिलित्वा षट् प्रस्थानानि कस्मान्नोच्यन्ते । सत्यम् । वेदबाह्यत्वात्तेषां म्लेच्छादिप्रस्थानवत्परंपरयापि पुरुषार्थानुपयोगादुपेक्षणीयत्वमेव । इह च साक्षात्परंपरया वा परमार्थयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दर्शितः, ततो न न्यूनत्वशंकावकाशः । अथ संक्षेपेणैषां प्रस्थानानां स्वरूपभेदहेतुः प्रयोजनभेद उच्यते बालानां व्युत्पत्तये । तत्र धर्मप्रतिपादकमपौरुषेयं वाक्यं वेदः । स च मंत्रब्राह्मणात्मकः । तत्र मंत्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः।तेऽपि त्रिविधा ऋग्यजुः सामभेदेन । तत्र पादबद्धगायत्र्यादिच्छंदोविशिष्टा ऋचः "अग्निमीळे पुरोहितम" इत्यादिकाः। ता एव गीतिविशिष्टाः सामानि । तदुभयविलक्षणानि यजूंषि । "अग्निदग्नीन्विहरन्तु" इत्यादिसंबोधनरूपा निगदमंत्रा अपि यजुरंतर्गता एव । तदेवं निरूपिता मंत्राः । ब्राह्मणमपि त्रिविधं—विधिरूपमर्थवादरूपं तदुभयविलक्षणञ्च । तत्र 'शाब्दीभावना विधिः' इति भाट्टाः । 'नियोगो विधिः' इति प्राभाकराः । 'इष्टसाधनता विधिः' इति सर्वे तार्किकाः । विधिरपि चतुर्विधः, उत्पत्त्यधिकारविनियोगप्रयोगभेदात् । तत्र कर्मस्वरूपमात्रप्रतिपादको विधिरुत्पत्तिविधिः—"आग्नेयोऽष्टाकपालो भवति" इत्यादिः । सेतिकर्तव्यताकस्य करणस्य यागादेः फल संबंधबोधको विधिरधिकारविधिः—"दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिः । अंगसंबंधबोधको विधिर्विनियोगविधिः—"व्रीहिभिर्यजेत, समिधो यजति" इत्यादिः । सांगप्रधानकर्मप्रयोगैक्यबोधकः पूर्वोक्तविधित्रय मेलनरूपः प्रयोगविधिः । स च श्रौत इत्येके । कल्प्य इत्यपरे । कर्मस्वरूपञ्च द्विविधं गुणकर्मार्थकर्मभेदात् । तत्र क्रतुकारकाण्याश्रित्य विहितं गुणकर्म । तदपि चतुर्विधम्, उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् । तत्र "वसंते ब्राह्मणोऽग्नीनादधीत", "यूपं तक्षति" इत्यादावाधानतक्षणादिना संस्कारविशेषविशिष्टाग्नियूपादेरुत्पत्तिः । "स्वाध्यायोऽध्येतव्यः","गां पयो दोग्धि" इत्यादावध्ययनदोहादिना विद्यमानस्यैव स्वाध्यायपयः प्रभृतेः प्राप्तिः । "सोममभिषुणोति", "व्रीहीनवहन्ति", "आज्यं विलापयति" इत्यादावभिषवाभिघातविलापनैः सोमादीनां विकारः । "व्रीहीन्प्रोक्षति, प्रत्यवेक्षते" इत्यादौ प्रोक्षणावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कार एव । एतच्चतुष्टयं चांगमेव । तथा क्रतुकारकाण्यनाश्रित्य विहितमर्थकर्म । तच्च द्विविधम्--अंगं प्रधानञ्च । तत्रान्यार्थमंगम्, अनन्यार्थं प्रधानम् । अंगमपि द्विविधं--सन्निपत्योपकारकमारादुपकारकं च । तत्र प्रधानस्वरूपनिर्वाहकं प्रथमं, फलोपकारकं द्वितीयमेव । संपूर्णांगसंपादको विधिः प्रकृतिः, विकलांगसंपादको विधिर्विकृतिः, तदुभयविलक्षणो विधिर्दर्विहोमः । एवमन्यदप्यूह्यम् । तदेवं निरूपितो विधि भागः । प्राशस्त्यनिंदान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः । स च त्रिविधः--गुणवादोऽनुवादो भूतार्थवादश्च । तत्र प्रमाणांतरविरुद्धार्थबोधको गुणवादः—"आदित्यो यूपः" इत्यादिः । प्रमाणांतरप्राप्ता र्थबोधकोऽनुवादः—"अग्निर्हिमस्य भेषजम" इत्यादिः । प्रमाणांतरबाधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः—"इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादिः । तदुक्तम्—"विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥" इति । तत्र त्रिविधानामर्थवादानां विधिस्तुतिपरत्वे समानेऽपि भूतार्थवादानां स्वार्थेऽपि प्रामाण्यं देवताधिकरणन्यायात् । अबाधिताज्ञातज्ञापकत्वं हि प्रामाण्यम्, तच्च बाधितविषयत्वाज्ज्ञातज्ञापकत्वाच्च न गुणवादानुवादयोः । भूतार्थवादस्य तु स्वार्थतात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं न विहन्यते । तदेवं निरूपितोऽर्थवादभागः । विध्यर्थवादोभयाविलक्षणं तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदान्तवाक्यम्, तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठानाप्रतिपादकत्वान्न विधिः । स्वतः पुरुषार्थपरमानंदज्ञानात्मके ब्रह्मणि स्वार्थे चोपक्रमोपसंहारादिषड्विधतात्पर्यलिंगवत्तया स्वतः प्रमाणभूतं सर्वानपि विधीनंतःकरणशुद्धिद्वारा स्वशेषतामापादयन्परशेषत्वाभावाच्च नार्थवादः । तस्मादुभयविलक्षणमेव वेदान्तवाक्यम्, तच्च क्वचिदज्ञातज्ञापकत्वेन विधिरिति व्यपदिश्यते । विधिपदरहितप्रमाणवाक्यत्वेन क्वचिद्भूतार्थवाद इति व्यवह्रियत इति न दोषः । तदेवं निरूपितं त्रिविधं ब्राह्मणम् । एवं च कर्मकाण्डगणकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च प्रयोगत्रयेण निर्वाहार्थमृग्यजुःसामभेदेन भिन्नः । तत्र हौत्रप्रयोग ऋग्वेदेन, आध्वर्यवप्रयोगो यजुर्वेदेन, औद्गात्रप्रयोगः सामवेदेन । ब्रह्मयजमानप्रयोगौ तत्रान्तर्भूतौ । अथर्ववेदस्तु—यज्ञानुपयुक्तः शांतिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेनात्यंतविलक्षण एव । एवं प्रवचनभेदात्प्रतिवेदं भिन्ना भूयस्यः शाखाः । एवं च कर्मकाण्डे व्यापारभेदेऽपि सर्वासां वेदशाखानामेकरूपत्वमेव । ‘ब्रह्मकाण्ड’ इत्यादिः चतुर्णां वेदानां प्रयोगभेदेन प्रयोजनभेद उक्तः । अथाङ्गानामुच्यते । तत्र शिक्षाया उदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यञ्जनात्मकवर्णोच्चारणविशेषज्ञानं प्रयोजनम्, तदभावे मंत्राणामनर्थफलत्वात् । तथा चोक्तम्—“मंत्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥” इति । तत्र सर्ववेदसाधारणी शिक्षा ‘अथ शिक्षां प्रवक्ष्यामि’ इति पंचखंडात्मिका प्रकाशिता । प्रतिवेदशाखं च भिन्नाः प्रातिशाख्यसंज्ञिता अन्यैरेव मुनिभिः प्रदर्शिताः । एवं वैदिकपदसाधुत्वज्ञानेनोहादिकं व्याकरणप्रयोजनम् । तच्च “वृद्धिरादैच्” इत्याद्यष्टाध्यायात्मकं महेश्वरप्रसादेन पाणिनिनैव प्रकाशितम्, तत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्तिकं विरचितम्, तद्वार्तिकोपरि च भगवता पतञ्जलिना महाभाष्यमारचितम् । तदेतत्त्रिमुनिव्याकरणं वेदांगं माहेश्वरमित्याख्यायते । कौमारादिव्याकरणानि तु न वेदांगानि, किन्तु लौकिकप्रयोगमात्रज्ञानार्थानीत्यवगंतव्यम् । एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणे पदसाधुत्वे च ज्ञाते वैदिकमंत्रपदार्थज्ञानापेक्षायां तदर्थं भगवता यास्केन समाम्नायः समाम्नातो व्याख्यातव्य इत्यादित्रयोदशाऽध्यायात्मकं निरुक्तमाचरितम् । तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निरूप्य वैदिकपदानामर्थः प्रदर्शितः । मंत्राणां चानुष्ठेयार्थप्रकाशनद्वारेणैव करणत्वात्पदार्थज्ञानाधीनत्वाच्च वाक्यार्थज्ञानस्य मंत्रस्थपदार्थज्ञानाय निरुक्तमप्यपेक्षणीयम्, अन्यथाऽनुष्ठानासंभवात् । ‘सृण्येव जर्जरी तुर्फरी तू दूना’ इत्यादीनामतिदुरूहत्वात्प्रकारांतरेणार्थज्ञानस्यासंभावनीयत्वाच्च । एवं निघंटुकोशा वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तांतर्भूता एव । तत्रापि निघंटुसंज्ञकः पञ्चाध्यायात्मको ग्रंथो भगवता यास्केनैव कृतः । अन्येऽप्यमरहेमचंद्रादिप्रणीताः कोशाः सर्वे निघंटुरूपत्वेन निरुक्तान्तर्भूता एव द्रष्टव्याः । एवमृग्मंत्राणां पादबद्धानुष्टुप्छंदोविशेषविशिष्टत्वात् तदज्ञाने च निंदाश्रवणे छंदोविशिष्टनिमित्तानुष्ठानविशेषविधानाच्च छंदोज्ञानाकांक्षायां तत्प्रकाशनाय ‘धी श्री स्त्री म्[1]’ इत्यध्यायाष्टात्मिका छंदोविचितिर्भगवता पिंगलेनैव रचिता । तत्रापि ‘अलौकिकम्’ इत्यंतेनाध्यायत्रयेण गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीछंदांसि सप्तावांतरभेदानि निरूपितानि । ‘अथ लौकिकम्’ इत्यारभ्याध्यायपंचकेन पुराणेतिहासादावुपयोगीनि लौकिकानि छंदांसि प्रसंगान्निरूपितानि । व्याकरणे लौकिकपदनिरूपणवत् । एवं वैदिककर्मदर्शादिकालज्ञानाय ज्योतिषं भगवतादित्येन गर्गादिभिश्च प्रणीतं बहुविधं गणितहोरासंहितादिरूपस्कंधत्रयात्मकमिति । एवं शाखांतरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञापनाय कल्पसूत्राणि । तानि च प्रयोगत्रयभेदात्त्रिविधानि । तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायनसांख्यायनादिप्रणीतानि, आध्वर्यवप्रयोगप्रतिपादकानि बौधायनापस्तंबकात्यायनादिप्रणीतानि, औद्गात्रप्रयोगप्रतिपादकानि तु शांड्यायनत्र्याख्यादिभिः प्रणीतानि । एवं निरूपितः षण्णामंगानां प्रयोजनभेदः । चतुर्णामुपांगानामधुनोच्यते । तत्र सर्गप्रतिसर्ग मन्वंतरवंशवंशानुचरितप्रतिपादकानि भगवता बादरायणेन प्रणीतानि पुराणानि । तानि च—“ब्राह्मं १, पाद्मं २, वैष्णवं ३, शैवं ४, भागवतं ५, नारदीयं ६, मार्कंडेयम् ७, आग्नेयं ८, भविष्यं ९, ब्रह्मवैवर्तं १०, लैंगं ११, वाराहं १२, स्कांदं १३, वामनं १४, कौर्मं १५, मात्स्यं १६, गारुडं १७, ब्रह्मांडं १८ चेत्यष्टादश । एवमुपपुराणान्यनेकप्रकाराणि द्रष्टव्यानि । न्याय आन्वीक्षिकी पञ्चाध्यायी गौतमेन प्रणीता, प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां षोडशपदार्थानामुद्देशलक्षणपरीक्षादिभिस्तत्त्वज्ञानं तस्याः प्रयोजनम् । एवं दशाध्यायं वैशेषिकं शास्त्रं कणादेन प्रणीतम्, द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां भावपदार्थानाम

१ मगणः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भॅावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनं, तदपि न्यायपदेनोक्तम् । एवं मीमांसापि द्विविधा—धर्ममीमांसा, शारीरकमीमांसा च । तत्र द्वादशाध्यायी धर्ममीमांसा "अथातो धर्मजिज्ञासा " इत्यारभ्य " अन्वाहार्ये च दर्शनात् " इत्यंता जैमिनिना प्रोक्ता । तत्र धर्मप्रमाणं[१] धर्मभेदः[२] शेषशेषिभावश्च[३] क्रत्वर्थपुरुषार्थभेदेन प्रयुक्तिविशेषैः[४] श्रुत्यर्थपठनादिभेदैः[५] क्रमभेदोऽधिकारविशेषः[६] सामान्यातिदेशो[७] विशेषातिदेशः[८] ऊहो[९] बाधस्[१०]तन्त्रं[११] प्रसंगश्चेति[१२] क्रमेण द्वादशानामध्यायानामर्थः । तथा संकर्षणकांडमध्यायचतुष्टयात्मकं जैमिनिना प्रणीतम् । तच्च देवताकाण्डसंज्ञया प्रसिद्धमप्युपासनादिकर्मप्रतिपादकत्वात्कर्मकांडांतर्गतमेव । तथा चतुरध्यायी शारीरकमीमांसा—" अथातो ब्रह्मजिज्ञासा " इत्यादि " अनावृत्तिः शब्दात् " इत्यतां जीवब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्यविचारप्रतिपादकान्न्यायानुपदर्शयंती भगवता बादरायणेन कृता । तत्र सर्वेषामेव वेदान्तवाक्यानां साक्षात्परंपरया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाऽध्यायेन दर्शितः । तत्र प्रथमपादे, स्पष्टब्रह्मलिंगयुक्तानि वाक्यानि विचारितानि । द्वितीयपादे, अस्पष्टब्रह्मलिंगयुक्तान्युपास्यब्रह्मविषयाणि । तृतीयपादे, स्पष्टब्रह्मलिंगानि ज्ञेयब्रह्मविषयाणि । एवं पादत्रयेण वाक्यविचारः समापितः । चतुथपादे तु, प्रधानविषयत्वेन संदिह्यमानान्यव्यक्तादिपदानि चिंतितानि १ । एवं वेदांतानामद्वये ब्रह्मणि सिद्धे समन्वये तत्र संभावितस्मृतितर्कादिविरोधमाशंक्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः । तत्राद्यपादे, सांख्ययोगकणादस्मृतिभिः सांख्यादिप्रयुक्तैश्च तर्कैर्विरोधो वेदांतसमन्वयस्य परिहृतः । द्वितीयपादे, सांख्यादिमतानां दुष्टत्वं प्रतिपादितं, स्वपक्षस्थापनपरपक्षनिराकरणरूपपर्वद्वयात्मकत्वाद्विचारस्य । तृतीयपादे, महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः पूर्वभागेन परिहृतः, उत्तरभागेन तु जीवविषयाणाम् । चतुर्थपादे, इन्द्रियविषयश्रुतीनां विरोधपरिहारः २ । तृतीयाध्याये साधननिरूपणम् । तत्र प्रथमपादे, जीवस्य परलोकगमनागमनेन वैराग्यं निरूपितम् । द्वितीयपादे, पूर्वभागेन त्वंपदार्थो निरूपितः, उत्तरभागेन तत्पदार्थः । तृतीयपादे, निर्गुणे ब्रह्मणि नानाशाखापठितगुणोपसंहारः कृतः, प्रसंगात्सगुणविद्यासु शाखांतरीयगुणोपसंहारो निरूपितः । चतुर्थपादे, निर्गुणब्रह्मविद्याया बहिरंगसाधनान्याश्रमयज्ञादीन्यंतरंगसाधनानि शमदमानिदिध्यासनादीनि निरूपितानि ३ । चतुर्थाध्याये सगुणनिर्गुणविद्ययोः फलनिर्णयः कृतः । तत्र प्रथमपादे, श्रवणाद्यावृत्त्या निर्गुणं ब्रह्म उपासनावृत्त्या सगुणं वा ब्रह्म साक्षात्कृत्य जीवतः पापपुण्यालेपलक्षणा जीवन्मुक्तिरभिहिता । द्वितीयपादे, म्रियमाणस्योत्क्रांतिप्रकारश्चिंतितः । तृतीयपादे, सगुणब्रह्मविदो मृतस्योत्तरमार्गोऽभिहितः । चतुर्थपादे, पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता, उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकगमनस्थितिरुक्ता ४ । इदमेव शास्त्राणां मूर्धन्यं, शास्त्रांतरं सर्वमस्यैव शेषीभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशंकरभगवत्पादोदितप्रकारेणेति रहस्यम् । एवं धर्मशास्त्राणि—मनुयाज्ञवल्क्यविष्णुयमांगिरोवसिष्ठदक्षशातातपपराशरगोतमशंखलिखितहारीतापस्तंबोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि । एवं व्यासकृतं महाभारतं, वाल्मीकिकृतं रामायणं धर्मशास्त्र एवांतर्भूतमितिहासत्वेन प्रसिद्धम् । एवं सर्वदेवसाधारणं मंत्रशास्त्रमपि धर्मशास्त्र एवांतर्भूतम् । सांख्यादीनां धर्मशास्त्रांतर्भावेऽपीह स्वशब्देनैवोपादानात्पृथगेव संगतिर्वाच्या । अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः । तत्रायुर्वेदस्याष्टौ स्थानानि भवन्ति--सूत्रं १, शारीरम् २, ऐन्द्रियं ३, चिकित्सा ४, निदानं ५, विमानं ६, कल्पः ७, प्रसिद्धि ८ श्चेति ब्रह्मप्रजापत्यश्विधन्वन्तरींद्रभरद्वाजात्रेयाग्निवेशादिभिरुपदिष्टश्चरकेण संक्षिप्तस्तत्रैव सुश्रुतेन पञ्चप्रस्थानात्मकं प्रस्थानांतरं कृतम् । एवं वाग्भटादिभिरपि बहुधेति न शास्त्रभेदः । कामशास्त्रमप्यायुर्वेदांतर्गतमेव सुश्रुतेन वाजीकरणाख्यकामशास्त्राभिधानात् । तत्र वात्स्यायनेन पञ्चाध्यायात्मकं कामशास्त्रं प्रणीतं, तस्य विषयवैराग्यमेव प्रयोजनम् । शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुःखमात्रपर्यवसानात् । चिकित्साशास्त्रस्य च रोगतत्साधनरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम् । एवं धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः १, द्वितीयः संग्रहपादः २, तृतीयः सिद्धपादः ३, चतुर्थः प्रयोगपादः ४ । तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणं च कृतम् । तत्र धनुःशब्दश्चापे निरूढोऽपि चतुर्विधेष्वायुधेषु वर्तते । तच्चतुर्विधं—मुक्तममुक्तं मुक्तामुक्तं मन्त्रमुक्तं च । तत्र मुक्तं चक्रादि, अमुक्तं खड्गादि, मुक्तामुक्तं शल्यावांतरभेदादि, मंत्रमुक्तं शरादि । तत्र मुक्तमस्त्रमुच्यते, तदमुक्तं शस्त्रमित्युच्यते, तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधम् । एवं साधिदैवतेषु समंत्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च ते सर्वे चतुर्विधाः पदातिरथतुरगगजारूढाः, दीक्षाभिषेकसन्नहनमंगलकरणादिकं च सर्वमपि प्रथमे पादे निश्चितम् १ । सर्वेषां शस्त्रविशेषाणामाचार्यस्य च लक्षणपूर्वकसंग्रहप्रकारो दर्शितो द्वितीयपादे २ । गुरुसंप्रदायसिद्धानां शस्त्रविशेषाणां पुनःपुनरभ्यासो मंत्रदेवतासिद्धिकरणमपि निरूपितं तृतीयपादे ३ । एवं देवतार्चनाभ्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सादिभिः सिद्धानामस्त्रविशेषाणां प्रयोगश्चतुर्थपादे निरूपितः ४ । क्षत्रियाणां स्वधर्माचरणं युद्धं, दुष्टदस्युचौरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम् । एवं गांधर्वशास्त्रं भरतेन प्रणीतम् । तत्र नृत्यगीतवाद्यभेदेन बहुविधोऽर्थः प्रपंचितः । देवताराधननिर्विकल्पकसमाध्यादिसिद्धिश्च गांधर्ववेदस्य प्रयोजनम् । एवमेव रसशास्त्रञ्च बहुविधं भरतेनैव प्रणीतं रसरीतिशब्दालंकारार्थालंकारनायकनायिकादिवर्णनरूपम् । नीतिशास्त्रमश्वशास्त्रं गजशास्त्रं शिल्पिशास्त्रं सूपकरणशास्त्रं चतुःषष्टिकलाशास्त्रञ्चेति नानामुनिभिः प्रणीतानि । तस्य च सर्वस्य लौकिकतत्तत्प्रयोजनभेदो द्रष्टव्यः । एवमष्टादशविद्यास्त्रयीशब्देनोक्ताः । तथा सांख्यशास्त्रं भगवता कपिलेन प्रणीतम् । तत्र त्रिविधदुःखात्यंतनिवृत्तिरत्यंतपुरुषार्थ इति षडध्यायम् । तत्र प्रथमेऽध्याये विषया निरूपिताः १ । द्वितीयेऽध्याये प्रधानकार्याणि २ । तृतीयेऽध्याये विषयेभ्यो वैराग्यम् ३ । चतुर्थेऽध्याये विरक्तानां पिंगलाकुररादीनामाख्यायिका ४ । पंचमेऽध्याये परपक्षनिर्जयः ५ । षष्ठे सर्वार्थसंक्षेपः ६ । प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रप्रयोजनम् । तथा योगशास्त्रं भगवता पतञ्जलिना प्रपञ्चितम्–“ अथ योगाऽनुशासनम् ” इत्यादिपादचतुष्टयात्मकम् । तत्र प्रथमपादे, चित्तवृत्तिनिरोधात्मकः समाधिः, अभ्यासवैराग्यरूपं च तत्साधनं निरूपितम् १ । द्वितीयपादे, विक्षिप्तचित्तस्य समाधिसिद्ध्यर्थं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टांगानि निरूपितानि २ । तृतीयपादे, योगविभूतयः ३ । चतुर्थपादे कैवल्यम् ४ इति तस्य विजातीयप्रत्ययस्यैव निरोधद्वारेण निदिध्यासनासिद्धिः प्रयोजनम् । तथा पाशुपतं शास्त्रं भगवता पशुपतिना पशुपाशविमोक्षणाय–“ अथातः पाशुपतं योगविधिं व्याख्यास्यामः ” इत्यादिपंचाध्यायैर्विवेचितम् । तत्राध्यायपंचकेनापि कार्यरूपो जीवः पशुः, कारणं पशुपतिरीश्वरो, योगः पशुपतौ चित्तसमाधानं, विधिर्भस्मना त्रिषवणस्नानादिः निरूपितो, दुःखांतसंज्ञको मोक्षश्च प्रयोजनम् । एत एव कार्यकारणयोगविधिदुःखांता इत्याख्यायन्ते । एवं वैष्णवं नारदादिभिः कृतं पंचरात्रम् । तत्र वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरूपिताः । भगवान्वासुदेवः परमेश्वरः सर्वकारणं तस्मादुत्पद्यते, संकर्षणाख्यो जीवस्तस्मान्मनः प्रद्युम्नस्तस्मादनिरुद्धोऽहंकारः । सर्वे चैते भगवतो वासुदेवस्यांशभूतास्तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिराभिध्यानं कृत्वा कृतकृत्यो भवतीति निरूपितम् । एवं वैष्णवं मंत्रशास्त्रमखिलमपि पंचरात्रांतर्गतमेव । वामागमस्तु शास्त्रबाह्य एव । तदेवं दर्शितः प्रस्थानभेदः । सर्वेषां संक्षेपेण त्रिविध एव प्रस्थानभेदः । तत्रारंभवाद एकः १, परिणामवादो द्वितीयः २, विवर्तवादस्तृतीयः ३। पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्व्यणुकादिक्रमेण ब्रह्मांडपर्यन्तं जगदारभंतेऽसदेव कार्यं कारणव्यापारादुत्पद्यत इति तार्किकाणां प्रथमः । मीमांसकानां च सत्त्वरजस्तमोगुणात्मकं प्रधानमेव महदहंकारादिक्रमेण जगदाकारेण परिणमते, पूर्वमपि सूक्ष्मरूपेण सदेव कार्यं कारणव्यापारेणाभिव्यज्यते इति द्वितियपक्षः सांख्ययोगपाशुपतानाम् । ब्रह्मणः परिणामो जगदिति वैष्णवाः । स्वप्रकाशपरमानंदाद्वितीयं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारेण कल्प्यत इति तृतियपक्षो ब्रह्मवादिनां, सर्वेषां प्रस्थानकर्तॄणां च । विवर्तवादे पर्यवसानेनाद्वितीये परमेश्वर एव वेदान्तप्रतिपाद्ये तात्पर्यं न हि ते मुनयो भ्रान्ताः सर्वज्ञत्वात्तेषाम्। किन्तु बहिर्विषय एव प्रवणानामापाततः परमपुरुषार्थे प्रवेशो न संभवतीति नास्तिक्यनिवारणाय तैः प्रस्थानभेदा दर्शिताः। तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तेषां तात्पर्यमुत्प्रेक्षमाणास्तत्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना ऋजुकुटिलनानापथजुषो भवन्तीति न सर्वेषामृजुमार्ग एव प्रवेशो न वा पर्यवसानेऽपि परमेश्वरप्रातिरंतःकरणशुद्धिवशेन पश्चादृजुमार्गाश्रयणादेव तत्प्राप्तिः । ऋजुमार्गस्तु भागवतधर्माश्रयणमेव “ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥ ” इत्युक्तेः । तथा च सर्वेषां मार्गाणां साक्षात्परंपरया वा त्वमेव प्राप्यः । सरितामृजुकुटिलनानापथजुषां यथा सागर एव गम्यस्तद्वदिति भावः । ऋजुपथजुषां गंगानर्मदादीनां साक्षादेव समुद्रो गम्यः । कुटिलपथजुषां यमुनासरय्वादीनां गंगाद्वारा समुद्र एव गम्यः । एवं वेदान्तवाक्यश्रवणादिनिष्ठानां साक्षात्त्वं गम्योऽन्येषां तु सांख्यानुयायिनां तार्किकाणां च चतुर्विंशतितत्त्वद्रव्यादिसप्तपदार्थविविक्तात्मज्ञानेन । मीमांसाधर्मशास्त्रेतिहासपुराणानुयायिनां तु तत्तच्छास्त्रोदितकर्मानुष्ठायिनामंतःकरणशुद्धिद्वारा । कामशास्त्रानुयायिनां तु विषयानुभवविरक्तानां वैराग्यद्वारा । आयुर्वेदस्य तु तपोयज्ञार्चनादिष्वारोग्यस्यैव योग्यत्वेन तत्संपादनद्वारा । धनुर्वेदस्य निजधर्मत्वात्क्षत्रियाणामंतःकरणशोधनद्वारा । शिल्पनीत्यादिविद्यानुयायिनामपि यथाकथंचिदंतःकरणशुद्धिद्वारैव । शैवशाक्तसौरगाणपत्यादीनां तु गीतोक्तद्वारा परंपरया वैष्णवत्वद्वारेण । वैष्णवानां तु नंदनंदनरूपे त्वयि परानुरागरूपाद्वैतनिष्ठानां साक्षादेव त्वं गम्योऽसि “ तेऽपि मामेव कौंतेय भजन्त्यविधिपूर्वकम् ” इत्याद्युक्तेः । गांधर्ववेदाऽनुयायिनां तु स्वरब्रह्मनिष्ठानां त्वयि चेतएकीभावसंपादनद्वारा । साहित्यनिष्ठानामप्युज्ज्वलनीलमण्युक्तप्रकारेण त्वमेव गम्योऽसि । किं बहुना एतदभिप्रेत्यैव शिवरहस्ये महिम्नाख्यस्तवे पुष्पदंतेनोक्तम्–“ त्रयी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वं रजस्तम इति भवतः प्रकृतेर्गुणाः ॥ तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ॥ ११ ॥

अत्र हेतुमाह । सत्त्वमिति । भवतः शक्तिर्या प्रकृतिस्तस्याः सत्त्वादयो गुणा अतः प्राकृताः प्रकृतिकार्योपाधयो ब्रह्मपर्यंताः स्थावरादयो जीवाः स्वोपाधिद्वारा तेषु गुणेषु प्रोताः प्रविष्टास्ते च प्रकृतौ सा च त्वयीति । अतः क्रमेणोपाधिलयात्सर्वेऽपि त्वामेव विशंतीति । यद्वा भवतः प्रकृतेर्गुणेषु प्रोता ब्रह्मादयो भवद्व्यतिरिक्ता न संत्यतस्त्वमेव सर्वदेवमय इति ॥ ११ ॥

सांख्यं योगः पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च । रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥ " इति ॥ * ॥ अत्राद्रिस्थानीयो वेदः, पर्जन्यस्थानीया मुनयः । अंतत इति दृष्टान्ते गमनस्य पर्यवसाने सति दार्ष्टान्तिके विचारस्येति व्याख्येयम् । तथा च मोक्षधर्मे नारायणीयोपाख्याने—" सांख्ययोगं पंचरात्रं वेदाः पाशुपतं तथा । ज्ञानान्येतानि राजर्षे विद्धि नाना मतानि वै ॥ सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते । हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः ॥ अपांतरतमाश्चैव वेदाचार्यः स उच्यते । प्राचीनगर्भं तमृषिं प्रवदन्तीति केचन ॥ उमापतिर्भूतपतिः श्रीकंठो ब्रह्मणः सुतः । उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः ॥ पंचरात्रस्य कृत्स्नस्य वक्ता तु भगवान्स्वयम् । सर्वेष्वेव नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ॥ यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः । न चैनमेवं जानन्ति तेऽमी भूता विशां पते ॥ तमेव शास्त्रकर्तारं प्रवदन्ति मनीषिणः । निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम ॥ निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः । ससंशयाद्धेतुबलान्न ह्यावसति माधवः ॥ पंचरात्रविदो ये तु यथाक्रमपरा नृप । एकांतभावोपगतास्ते हरिं प्रविशंति वै ॥ सांख्यं च योगश्च सनातनोऽत्र वेदाश्च सर्वे निखिलोऽपि राजन् । सर्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणम् ॥ " इति । अपांतरतमा इति श्रीकृष्णद्वैपायनस्यैव पूर्वजन्मनामेति तत्रैवोक्तम् । सर्वेष्वेवेति तत्रतत्र नारायणवत्परमोपादेयगुणत्वेनानुक्तेस्तेषां तदाकांक्षासंभवादिति भावः । **विश्वनाथस्तु**—ननु यदि ते मामेवार्चयन्ति तर्हि ते मामेव प्राप्नुयुः—मैवम्, तेषामर्चना एव त्वां प्राप्नुवन्ति न तु तेऽर्चकाः । तदुक्तं स्वेनैव—" येऽप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥ यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥ " इत्यतोऽहमपि दृष्टान्तेन तथैव वच्मीत्याह—यथेति । अद्रिभ्यः सकाशात्प्रकर्षेण भवन्तीति ताः । अद्रिभिर्जनिता इत्यर्थः । पर्जन्येन मेघेनापूरिता इति-अद्रिषु पर्जन्यवृष्टानि जलान्येवेतस्ततः एकीभूता नद्यो भवन्ति । ताश्च नद्यः सर्वतः प्रसृता अन्ततः सिंधुं विशन्तीति । यथाऽद्रिजनिता नद्य एव सिंधुं प्राप्नुवन्ति न तु नदीजनका अद्रयस्तथैव गतयः गम्यन्त आभिरिति मार्गभूता अर्चना एव त्वां प्राप्नुवन्ति न त्वर्चकास्ते तवैव सर्वदेवाधिष्ठातृत्वात् । "अधिष्ठानपूजा अधिष्ठातर्येव पर्यवस्यन्ति" इति न्यायात्सर्वदेवपूजापि त्वत्पूजैवेति भावः । अत्र पर्जन्यस्थानीयो वेदः । पर्जन्यो हि सिंधुजलमयत्वात्सिंधोरुद्भूतः, वेदोऽपि त्वत्त उद्भूतस्तदुक्ता नानापूजनविधय एव जलानि, तत्राधिकारिण एवाद्रयस्तत्कृता नानादेवपूजा एव नानादेशनद्यस्ता यथा नानादेशेभ्यो निस्सृत्य सिंधुमेव गच्छन्ति तथैव पूजा अपि देवताभ्यो निस्सृत्य विष्णुम् ॥ १० ॥ सर्वमार्गप्राप्यत्वे हेतुमाह—भवतस्तव । अतः प्रकृतिकार्यत्वात् । प्रकृतिकार्यं सत्त्वादि । स्वोपाधिद्वारा सत्त्वादिनिजनिजोपाधिद्वारा । तेषु सत्त्वादिषु । सा प्रकृतिः । यत इत्थं क्रमोऽतो हेतोः । क्रमेण सांख्योक्तक्रमेणोत्पत्तितो विलोमक्रमेण । सांख्यप्रक्रियाश्रयणे श्रमं वीक्ष्यर्जुं पंथानमाह—यद्वेति । शक्तिशक्तिमतोरभेदोपचारादिति । यतस्त्वद्व्यतिरिक्ता न सन्त्यतो हेतोः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये सर्वात्मने सर्वधियां च साक्षिणे ॥ गुणप्रवाहोऽयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु ॥ १२ ॥
अग्निर्मुखं तेऽवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ॥ द्यौः कं सुरेंद्रास्तव बाहवोऽर्णवाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितम् ॥ १३ ॥

ननु भवतः प्रकृतेरिति वदन्ममापि प्रकृतिसंबंधं ब्रवीषि ततश्च तेषां मम च को विशेषः स्यादित्याशंक्य विशेषमाह।तुभ्यमिति । अविषक्तदृष्टयेऽलिप्तबुद्धये।कुतः।सर्वात्मने। स्वव्यतिरिक्ताभावादविषक्तदृष्टित्वमित्यर्थः । किं च सर्वधियां साक्षिणे सर्वबुद्धिसाक्षित्वान्न क्वापि बुद्धिलेप इत्यर्थः । इतरे तु संसरंतीत्याह । गुणप्रवाह इति । देवनृतिर्यंच आत्मानो देहा येषां तेषु देवादिशरीराभिमानिष्वित्यर्थः । त्वदविद्यया कृतोऽयं गुणप्रवाहः प्रवर्ततेऽतो महान्विशेष इत्यर्थः ॥ १२ ॥ सर्वात्मन इत्यनेनोक्तं सगुणं स्तौति

॥ * ॥ ननु तर्ह्येवं विविच्य सर्वे मामेव किन्नोपासते तत्राह—सत्त्वमिति । तेषु गुणेषु हि निश्चितं ब्रह्मपर्यन्ता जीवाः सर्वेऽपि यदि मायया मोह्यन्ते तर्हि ते कथं त्वां भजन्तामिति भावः ॥ ११ ॥ प्राकृतपदार्थेष्वव स्थितस्य हरेस्ततो विशिष्टमहिमासंभवमालोच्याशंकते—नन्विति । ततः प्रकृतिसंबंधात् । तेषां प्राकृतानाम् । अलिप्तबुद्धित्वे हेतुमाशंकते—कुत इति । इत्यर्थ इति—दृष्टेरासंगो हि निजाभिन्ने भवति न त्वभिन्ने इति भावः । न हि केवलमलिप्तबुद्धित्वमेव, किं त्वतोऽप्याधिक्यमित्याह—किञ्चेति । इत्यर्थ इति--न हि साक्षी साक्ष्यधर्मेण युज्यते पूर्ववदिति तात्पर्यम् । इतरे त्वद्विमुखाः । इत्यर्थ इति--अभिमान एव शरीरादिषु संसृति हेतुरित्यर्थः । त्वदविद्यया स्वात्मभूतस्य तवाज्ञानेन गुणानां रजआदीनां प्रवाह उत्पत्तिस्थित्यंतरूपः । यतस्त्वमविषक्तबुद्ध्यादिरत इतरेभ्यस्तव महान्भेद इत्यर्थः । इतरे त्वविद्यया संसृतिभाजिनः सदा निजज्ञानानंदवतस्तव कुतः संसृतिसंबंध इति भावः ॥ * ॥ त्वन्तु तेषु पूर्ववदुदासीनस्तिष्ठसीति विचार्य स्वयं भीतः सन्प्रपद्यमान आह—तुभ्यमित्यर्धेन । त इत्यस्याविद्ययेत्यनेनान्वयः । अत एव तैर्व्याख्यातम्--त्वदविद्यया कृतोऽयमिति । यद्वा--यत्तुभ्यं नमो नमस्कारः तत्ते तुभ्यमिति त्वामेव प्रसादयितुमित्यर्थः "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति विधानात् । तुशब्दो भिन्नोपक्रमे प्राकृतेभ्योऽत्यंतभेदात् । 'अस्तु' इति पाठे स्पष्ट एव द्वितीयोऽर्थः । अविषक्तदृष्टये दृष्ट्वापि तेष्वनासक्तायेत्यर्थः । तत्र हेतुः--सर्वात्मने सर्वभूत (मूल) स्वरूपत्वात्सर्वेषां सर्वप्रवर्तकस्य कथमन्यत्रादरः स्याद्येन विरक्तिः स्यादिति भावः । नन्वादराभावेऽपि द्रष्टरि दृश्य गुणस्य संक्रमः स्यादेव तत्राह--सर्वधियां सर्वसाक्षिणे साक्षिमात्रत्वान्न तव तेष्वासक्तिरिति भावः । ननु तेषां त्वय्येव पर्यवसानतो विचारे सति त्वदौदासीन्ये कथं सिद्धिः स्यात्तत्राप्याह--सर्वधियां चेति । तेषां तदा त्वदाभिमुख्ये जाते भक्तत्वं जातमिति तदभिज्ञस्त्वं न तेषूदासीनो भवसीति भावः । "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥" इति श्रीभगवद्गीतात एवेति भावः । तादृशविचारात्पूर्वावस्थायां तेषां का वार्ता तत्राहार्द्धेन—गुणेति । अत्र **विश्वनाथः**—ते त्वां प्राप्तुं तुभ्यं मम नमोऽस्तु । तव तु स्वभक्तेभ्योऽन्येषूपासकेषु दृष्टिर्न रज्यतीत्याह—तुभ्यमिति, अविषक्तदृष्टय इति । कथं तर्हि सर्वदेवपूजां त्वं प्राप्नोषीति ब्रूषे, यो हि येभ्यः पूजां प्राप्नोति स तेष्वनुरज्यत्येव तत्राह—सर्वात्मने सर्वाधिष्ठातृत्वादेव तत्तत्पूजां प्राप्नोषि न तु तस्यां तव काचिदपेक्षास्ति, तेऽपि त्वां न पूजयन्ति कुतस्तव तेष्वा सक्तिरिति भावः । अतः साक्षिण इति । साक्षित्वं सर्वत्रोदासीन एवेति भावः । ननु तर्हि ते देवा एव स्वस्वोपासकांस्तानुद्धरन्तु तत्राह—गुणेति । असकृन्निरन्तरम् । देवनृतिर्यञ्च आत्मानो येषां तेषु देवादिशरीरा भिमानिष्वित्यर्थः । तत्तदुपास्या देवा अपि स्वयं गुणप्रवाहपतिताः कथं स्वोपासकांस्तानुद्धरेयुरिति भावः ॥ १२ ॥ नानादेवतानामभिः कृतं यजनादि मद्विषयं कथं स्यादित्याक्षेपे सर्वेषां त्वदुद्भवत्वेन त्वदंशत्वादं गार्चनेऽङ्ग्यर्चनवत्स्यादिति हेतोर्हरेः सर्वात्मत्वं सगुणस्य स्फुटयति--अनूद्योच्चार्य । त्वन्मुखाज्जातोऽग्निस्तव मुखम् । "मुखादग्निरजायत" इत्यादिश्रुतेः ॥ * ॥ किञ्च वैराजरूपस्य तव तेते देवा अंगान्येवेत्यतोऽपि तत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ॥ निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते ॥ १४ ॥ त्वय्यव्य यात्मन्पुरुषे प्रकल्पिता लोकाः सपाला बहुजीवसंकुलाः ॥ यथा जले संजिहते जलौकसोऽप्युदुंबरे वा मशका मनोमये ॥ १५ ॥

अग्निर्मुखमिति द्वाभ्याम् । अग्न्यादीननूद्येश्वरावयवता विधीयते योऽयमग्निः स तु तव मुखमित्यादिवचनव्यत्त्यया । ईक्षणं चक्षुः । श्रुतिः श्रवणेंद्रियम् । कं मूर्द्धा । प्राणश्च बलं च तत् ॥ १३ ॥ अद्रयः स्थूलसूक्ष्मगिरयः परस्य तेऽस्थिनखानि निमेषणं निमेषोन्मेषावित्यर्थः ॥ १४ ॥ न केवलमेतावत्किन्तु सर्वोऽप्ययं प्रपंचस्त्व दवयवभूत एवेति वदन्नेवं सत्यपि प्रपंचस्य षड् जन्मादयो विकारास्त्वयि न प्रसज्जंते तस्य त्वयि कल्पितत्वादित्याह । त्वयीति । अव्ययात्मनि पुरुषे पूर्णे लोकादयः संजि हते प्रचरंति । हे अव्ययात्मन्निति वा । कथंभूते त्वयि । मनोमये मनःप्रधाने मनोवृत्तिव्यंग्ये "दृश्यते त्वग्र्यया बुद्ध्या । मनसैवानुद्रष्टव्य" इत्यादिश्रुतेः । जले

देवपूजा तत्रैव पूजेत्याह–अग्निरिति त्रिभिः । तत्राद्यं द्वयं युग्मम् । मुखं मुखशक्त्यंशाधिष्ठानमित्यर्थः । एवमन्यदपि ॥ १३ ॥ परस्य तवेति योज्यम् । निमेषणं मुकुलीभावो रात्रिः, 'एकसंबंधिज्ञानमपरसंबंधिस्मारकम्' इति न्यायेन निमेषणपदेनोन्मेषोऽपि स्मार्यते घटघटत्वयोरेकतरोच्चारणेऽपरस्य स्मरणं जायत एवेतिवत् । उन्मेष उत्फुल्लता, अहरित्यर्थः । प्रजापतिर्दक्षः । वीर्यं रेतः ॥ * ॥ अत एवाभेदेनाप्युपासनं विधीयते । परस्य तेभ्योऽन्यस्य निजरूपेण पृथग्वर्तमानस्येत्यभेदेनोक्तेभ्योऽपि भेदो दर्शितः ॥ १४ ॥ सर्वात्मत्वमुपसंहरति–न केवलमिति । एवं सत्यपि प्रपंचावयवत्त्वेऽपि । तस्य प्रपंचस्य । न हि रज्जुकल्पिताहेर्विषं रज्जावायातीति भावः । अव्ययात्मन्निति 'परमे व्योमन्' इतिवल्लुप्तसप्तमीकम् । निर्व्यपाये इत्यर्थः । लोकादय इहादिना पालग्रहः । बहुभिरंडजोद्भिज्जस्वेदजजरायुजैर्जीवैः संकुलाः व्याप्ताः । "ऋजुमार्गेण सिद्ध्यतोऽर्थस्य" इति न्यायमाश्रित्याह--हे अव्ययात्मन्निति वेति । अग्र्यया तपोयागादिकरणेन शुद्धया । मनसाप्युपासमया संस्कृतेन । जलौकसो वारिवासिनः । उदुंबरे जंतुफले "उदुम्बरो जंतुफलो यज्ञांगो हेमदुग्धकः" इत्यमरः । मशकाः पिपीलिकाविशेषाः । एवम् उदुम्बरस्थमशकवत् । इत्यर्थ इति–अनंतांतर्गतानि ब्रह्माण्डान्यप्यनंतान्येवेत्यर्थः ॥ * ॥ तदेवं विराजरूपत्वेन स्तुत्वाऽनंतब्रह्मांडकारणमहाहिरण्यगर्भत्वेन स्तौति--त्वयीति । हे अव्ययात्मन् सर्वकारणत्वेऽप्यचिन्त्यशक्तित्वेन निर्विकारपुरुषे महाहिरण्यगर्भरूपे मनोमये मनआद्यन्तःकरणमयषोडशकले त्वयि लोकाः सपाला बहुजीवसंकुलाः चरन्तीति । तत्र लोका ब्रह्मांडानि, सञ्चरन्ति यथाक्रमं सृष्टिप्रलययो र्बहिरन्तर्भवन्ति, पाला ब्रह्मादयोऽधिकारानाधिकारयोरारोहन्ति पतन्ति च, अन्ये जीवा अत्रामुत्र गतागतं कुर्वन्तीत्यर्थः । तत्र ब्रह्मांडानां सञ्चरणे दृष्टान्तः–यथा जल इति, पालादीनामुदुम्बरे वेति । उदुम्बरमत्र ब्रह्माण्डस्थानीयम् । अत्र **विश्वनाथः**–नन्वेवं चेत्तर्हि देवयाजिनोऽपि मद्याजिन एव 'यान्ति मद्याजिनोऽपि माम्' इति मदुक्तेः कथं ते मां न प्राप्नुवन्ति तत्राह–त्वयि पुरुषे वैराजरूपे । लोका भूरादयः प्रकल्पिताः । पाला इन्द्रादिदेवतास्तत्सहिताः । संजिहते प्रचलन्ति । वा इवार्थे । यथा चौदुम्बरे फले मशकाः सूक्ष्मकीटा असंख्याः । त्वयि कीदृशे-मनोमये, मनआद्यखिलतत्त्वमये, मायिकत्वान्नश्वर इत्यर्थः । हे अव्ययात्मन् न व्येति न नश्यति आत्मा देहो यस्य । हे सच्चिदानंदविग्रह इत्यर्थः । तेनानश्वराणि सच्चिदानंदमयानि रूपाण्येव तव स्वरूपाणि, तानि यजन्त एव त्वद्याजिन उच्यन्ते । वैराजरूपन्तु तव मायिकं रूपं नश्वरं, न तु त्वत्स्वरूपमतस्तदंगभूत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानियानीह रूपाणि क्रीडनार्थं बिभर्षि हि ॥ तैरामृष्टशुचो लोका मुदा गायंति ते यशः ॥ १६॥ नमः कारणमत्स्याय प्रलयाब्धिचराय च ॥ हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥१७॥ अकूपाराय बृहते नमो मंदरधारिणे ॥ क्षित्युद्धारविहाराय नमः सूकरमूर्तये ॥ १८ ॥ नमस्तेऽद्भुतसिंहाय साधुलोकभयापह ॥ वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च ॥१९॥ नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे ॥ नमस्ते रघुवर्याय रावणांतकराय च॥२०॥

यथा जलौकसः सूक्ष्मप्राण्यंडराशयो यथा चोदुंबरांतःकेसरेषु मशकाः परस्परवार्तानभिज्ञा एवमनंतानि ब्रह्मांडानि त्वयि संचरंतीत्यर्थः ॥ १५ ॥ तस्मादेवंभूतं तव स्वरूपं दुरवगाहमिति त्वदवतारकथामृतमेव संतः सेवंत इत्याह । यानियानीति । आमृष्टा परिमार्जिता शुक् येषां ते ॥ १६ ॥ अतः स्वयमप्यवतारान्नमस्यति । नम इति । हयशीर्ष्णे हयग्रीवाय । मधुकैटभयोर्मृत्यवे निहंत्रे ॥ १७ ॥ अकपाराय कर्माय । क्षित्युद्धारो विहारो यस्य तस्मै ॥ १८ ॥ १९ ॥ भृगूणां पतये परशु

देवतायाजिनो न त्वद्याजिनः । अतः साधूक्तम् ‘ यान्ति देवव्रता देवान् ’ इत्यादीति द्योतितम् ॥ १९ ॥ यस्मात्त्वमनन्तस्तस्माद्धेतोः । एवंभूतं सर्वप्रपंचाधारम् । दुरवगाहं दुर्ज्ञेयम् । इति हेतोः । ते परिहृतदुःखा लोकाः । हीति प्राग्विद्यमानान्येव रूपाणि बिभर्षि नाविद्यमानानीत्याह,–“ भूतामेव बिभर्तींशो ह्यवतारतनुं सदा ” इति पुराणांतरात् ॥ * ॥ ननु तर्हि कानि मम स्वरूपभूतानि रूपाणि तत्राह–यानीति । क्रीडनानि अब्धिसंतरणमधुकैटभहननादीनि तदर्थं बिभर्षि नित्यसिद्धान्येव गृह्णासि । गृहीत्वा लोकान्कृपया दर्शयसीत्यर्थः । अतस्तैरेवाराधितैरामृष्टाः परिमार्जिताः शुचः अविद्यकशोकमोहादयो मला यैस्ते । रूपाणि बिभर्षीत्यवताराणां तदीयत्वाभिप्रायेण लोकाः सर्वे इत्यधिकारापेक्षा निरस्ता । मुदा गायन्तीति तद्गानस्य स्वतः पुरुषार्थताभिप्रेता । यद्वा–पूर्वं यदन्यसाधारण्येन वैष्णवानामुपासनत्वमुक्तं तत्र च ‘ बहुमूर्त्येकमूर्तिकम् ’ (श्लो. ७) इति यद्विशिष्य ता मूर्तयो नोक्तास्तत्र संतोषाभावात्प्रपंचयति–यानीति ॥ १६ ॥ यतः सर्वलोकगीतमवतारकथामृतमतो हेतोः । स्वयमक्रूरः । नमस्यति नमस्कारं करोतीत्यर्थः । कारणमत्स्याय मन्वाद्यवनं निमित्तीकृत्य मत्स्यवपुर्धृतवत इत्यर्थः । मदं दैत्यदर्पं स्यति नाशयतीति मत्स्य इत्यन्वर्थतामाह । मत्स्यानां जलजीवनत्वादाह–प्रलयेत्यादि । किञ्च–प्रलयाब्धिविदारणमप्यन्यस्याशक्यमितीश्वरतामप्याह–च । चेति वक्ष्यमाणसमुच्चये ॥ * ॥ कारणमत्स्याय सर्वकारणरूपमत्स्याय, तद्रूपस्य नित्यत्वादिकमभिप्रेतम् । यद्वा–कारणेन सत्यव्रतोपदेशादिना मत्स्यायेति कारणत्वमग्रेऽपि ज्ञेयम् ॥ १७ ॥ कुं भूमिं तदवयवभूतं गिरिं वा पिपर्ति बिभर्तीति कूपारः । पृषोदरादित्वात्पूर्वपदस्य दीर्घः । धातूनामनेकार्थत्वाद्धरणेऽपि पृधातुरस्तीति । न कूपारो यस्मात्सोऽकूपारस्तस्मै ‘ अकूपारोऽब्धिकच्छपे ’ इति हलायुधः । अब्धिश्च कच्छपश्चेति समाहारद्वंद्वः । बृहते नित्यवृद्धाय । शुभं सुखं वा करोति पृथ्व्युद्धृत्यसुरनाशाभ्यामिति शू (सू) करः पृषोदरादित्वात् । “ तालव्या अपि दंत्याश्च शंबशंबरशूकराः ” इति द्विरूपकोशात् ॥ * ॥ “अकूपारः समुद्रे स्यात्कूर्मराजेऽपि कीर्तितः ” इति विश्वः ॥ १८ ॥ अद्भुतोऽदृष्टपूर्वः, सिंहो नरत्वविशिष्टमृगेन्द्रस्तद्रूपाय । साधुलोकस्य देवादिजनस्य भयमसुरनिमित्तकमपहन्तीति तथा । क्रान्तं पादैर्मितं भुवनत्रयं येन तस्मै ॥ * ॥०॥१९॥रघुषु तदपत्येषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्ते वासुदेवाय नमः संकर्षणाय च ॥ प्रद्युम्नायाऽनिरुद्धाय सात्वतां पतये नमः ॥ २१ ॥ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे ॥ २२ ॥ भगवञ्जीवलोकोऽयं मोहितस्तव मायया ॥ अहं ममेत्यसद्ग्राहो भ्रम्यते कर्मवर्त्मसु ॥ २३ ॥ अहं चात्मात्मजागारदारार्थस्वजनादिषु ॥ भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो ॥ २४ ॥ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहम् ॥ द्वंद्वारामस्तमोविष्टो न जाने त्वाऽऽत्मनः प्रियम् ॥ २५ ॥ यथाऽबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ॥ अभ्येति मृगतृष्णां वै तद्वत्त्वाऽहं पराङ्मुखः ॥ २६ ॥

रामाय ॥ २० ॥ चतुर्व्यूहरूपेण प्रणमति । नमस्ते वासुदेवायेति ॥ २१ ॥ २२ ॥ एवं स्तुत्वा बंधमोक्षं प्रार्थयितुमाह । भगवन्निति । असति देहादौ ग्राह आग्रहो यस्य सः । असन् ग्राहो यस्येति वा ॥ २३ ॥ न केवलमयं लोकोऽहमपि तथैवेत्याह । अहं चेति ॥ २४ ॥ मूढत्वमेव प्रकटयति । विपर्ययमतिरिति । अनित्ये कर्मफले नित्यमित्यनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः । द्वंद्वेषु सुखदुःखादिष्वारमति क्रीडतीति तथा सः । ननु दुःखे कुतो रतिस्तत्राह । तमोविष्टस्तमसा व्याप्तोऽत आत्मनः प्रियं प्रेमास्पदं त्वा त्वां न जान इत्यर्थः ॥ २५ ॥ तदेव सदृष्टांतमाह । यथेति । तस्माज्जलादुद्भवंतीति तदुद्भवानि तृणा

वर्याय वरीतुमर्हाय ॥ * ॥ कुठारायुधत्वाद्धनरूपकम्, तेन तेषां तत्र किञ्चिदपि कर्तुमक्षमत्वं व्यञ्जितम् ॥ २० ॥ प्रकृष्टं द्युम्नं बलं यस्य तस्मै । न निरुद्ध्यते भक्ति विनेत्यनिरुद्धः ॥ * ॥ प्रद्युम्नानिरुद्धयोस्तदानामनीविर्भूतयोरपि तापन्यादावेषां चतुर्व्यूहानां नित्यताश्रवणात्तयोश्चतुर्व्यूहान्तःपातित्वेन युक्तमेव प्रगमनमिति ॥ २१ ॥ शुद्धाय दैत्यच्छलनार्थं वेदविरुद्धवादित्वेऽप्यतदभिप्रायाय । कलिं कृन्तति छिनत्ति, कालयति वा कल्किः । पृषोदरादित्वात्कलेः कलादेशो डिप्रत्ययः ॥ * ॥ शुद्धाय वेदविरुद्धशास्त्रप्रवर्तकत्वेऽपि निर्दोषाय । तत्र हेतुः—म्लेच्छेति । म्लेच्छा एव प्रायेण सादृश्येन क्षत्राणि क्षत्रिया राज्यकारित्वेन तत्तुल्या इत्यर्थः । तेषां हंत्रे । कल्को दंभः सोऽस्यास्ति म्लेच्छवशित्वेन कल्कि तादृशं रूपमस्येति तस्मै । यद्वा—कलिं करितुं हिंसितुं शीलमस्येति कल्किः । औणादिको डिः कलेरिकारलोपश्च । स एव रूपं स्वरूपं यस्यास्ति तस्मै ॥२२॥ एवमुक्तरीत्या । बंधाद विद्यालक्षणान्मोक्षं तन्निवृत्तिलक्षणम् । ग्राह आग्रहो हठः । व्यधिकरणसमासापेक्षया समानाधिकरणसमासस्य सुग्रहत्वादाह—असन्नित्यादि । असन्नहंताममतालक्षणो ग्राहो ग्रहः "ग्रहोनुग्रहनिर्बंधग्रहणेषु रणोद्यमे । सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः ॥ ग्राहो ग्रहेऽवहारे च" इति मेदिनी । ग्राहशब्दो ग्रहपदवाच्योऽस्तीत्यर्थः ॥ * ॥ हे भगवन्निति सर्वं कर्तुं समर्थत्वान्मदभीष्टमपि संपादयेति द्योतनमेव संबुद्ध्यभिप्रायः । त्वया लोकोद्धारार्थमवतारेषु कृतेष्वपि ये महापराधसंस्कारवन्तस्ते त्वन्मायामोहितास्त्वद्भक्तिं विहायान्यत्र प्रवर्तंत इति शोचयन्नाह—भगवन्निति ॥ २३ ॥ लोकवृत्तं स्वस्मिन्नप्यारोप्याह—न केवलमित्यादिना । आत्मा देहः । अर्थो हिरण्यादिः । आदिना पश्वादिग्रहः । स्वप्नकल्पेषु स्वप्नतुल्येषु । प्रभो इति भ्रान्तिवारणे सामर्थ्यं सूचयन्नाह ॥ * ॥ ० ॥ २४ ॥ इत्यर्थ इति--विपरीतबुद्धौनृते नेत्थं भातीत्याशयः । द्वंद्वेष्वेकैकस्य ग्राह्यत्वेन रतिस्संभवंत्यपि न द्वितीयेष्वित्याशयेनाशंकते—नन्विति । तमसाऽज्ञानेन 'तमोऽज्ञानमिहोच्यते' इत्युक्तेः । अतस्तमोव्याप्तत्वात् । इत्यर्थ इति—तमोव्याप्तानां विना प्रकाशं वस्त्वलाभस्य प्रथितत्वादिति भावः ॥ * ॥ आत्मन एव साक्षात्प्रियं परमात्मत्वात्, न तु पुत्रादिवद्देहादिसंबंधेनेत्यर्थः । अतो देहादिभ्योऽपि प्रियतमत्वेन ज्ञानयोग्यतोक्ता तथापि न जाने नानुभवामि ॥२५॥ अज्ञानाविष्टस्य वस्त्वज्ञानं तदेवपदार्थः । आदिना शैवालादिग्रहः । तथा जलवत् । मृग्यंते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात्सहऽहं कृपणधीः कामकर्महतं मनः ॥ रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥ २७ ॥ सोऽहं तवांघ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् ॥ २८ ॥ नमो विज्ञानमात्राय सर्वप्रत्यय हेतवे ॥ पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये ॥ २९ ॥

दीनि तैः । तथा मायाच्छन्नं त्वा त्वामहं हित्वा पराङ्मुखो देहाभिमुखो वर्त इति ॥ २६ ॥ नन्वेवं जानतः कुतो विषयाभिमुखता तत्राह । नोत्सह इति । कृपणा विषयवासनायुक्ता धीर्यस्य सः । अत एव कामकर्मभ्यां हतं क्षुभितमिंद्रियैश्च बलिभिर्विषयसंयुक्तैरितस्तत आकृष्यमाणं मनो रोद्धुं नियंतुं न शक्नोमीति ॥ २७ ॥ तदेव मस्वतंत्रो यः सोऽहं तवांघ्रिमुपगतः शरणं प्राप्तः । नन्विन्द्रियपरतंत्रस्यैतदपि कुतस्तत्राह । तच्चापीति । हे ईश अंतर्यामिंस्त्वदंघ्र्युपगमनं चासतां दुरापमतो भवतोऽनुग्रह एवेत्यहं मन्ये । अनुग्रहे सतीति वा । ननु सतां सेवयेदं भवतीति किं मदनुग्रहेणेत्यत आह । पुंस इति । जीवस्य संसरणापवर्गः संसरणस्य संसारस्यापवर्गः समाप्तिर्यदा त्वत्कृपया भवेत्संभावनास्पदं भवति हे अब्जनाभ तदा सदुपासना संपद्यते तयैव त्वयि मतिर्भवेत् । त्वत्कृपां विना न सत्सेवा नतरां त्वन्मतिर्नितमां मुक्तिरित्यर्थः ॥ २८ ॥ पादयोः

इति मृगा विषयास्तेषु तृष्णामभ्येमीत्यर्थः । देहादावभिमुखोऽभिनिविष्टः ॥ * ॥ तदुद्भवैः सारसशैवालादिभिरिति सुज्ञेयत्वमपि सूचितम् । दार्ष्टान्तिकेऽपि तत्तत्प्रभावमाधुर्ययुक्तत्वेन स्वाज्ञानेन मायाच्छन्नत्वेन प्रतीतं त्वा मिति ॥ २६ ॥ अज्ञानामेतदस्तु ज्ञस्य तवैतन्न संगच्छत इत्याशंकते—नन्विति । एवं जानतो विज्ञस्य । तत्राक्षेपे । अत एव कृपणबुद्धित्वादेव । कामो विषयाभिलाषः । कर्मादृष्टम् ॥ * ॥ कामः पूर्ववासना तत्प्रेरितेन कर्मणा हतम् । प्रकर्षेण मंथद्भिरैहिकविषयसंयुक्तत्वादतिबलिष्ठैः रोद्धुं नोत्सहे तथा मे धियः कार्पण्यं यथा तादृशं मनो रोद्धुमुत्साहोपि न जायते इत्यर्थः ॥ २७ ॥ तदेवम् इत्थम् । अस्वतंत्र इंद्रियादिपरतंत्रः । अत्राशं कते—नन्विति । एतदपि मदंघ्र्युपगमनमपि । तत्राक्षेपे । असतामशास्त्राचाराणाम् । यतोऽसतां तवांघ्र्युपगमनं दुरापमतो हेतोः । संभवत्वात्सतम्यपीत्याह—अनुग्रहे सतीति । पुनरत्राशंकते—नन्विति । तया सदुपासनया । इत्यर्थ इति—परंपरया त्वत्कृपैव मोक्षहेतुरिति भावः । नतरां नतमामिह “ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ” इति तरतमबंतादामुः ॥ * ॥ अस्मीति शरणागतस्य दार्ढ्यं नित्यत्वं चाभिप्रैति । हे ईश अंतर्यामितयाऽधुना त्वयैव तत्र प्रेरणादित्यर्थः । असतामिंद्रियपरतंत्राणाम् । अनुग्रहे हेतुः—अब्जनाभेति । लोकानुग्रहायैव लोकपद्मं निजनाभौ बहसीति भावः । अन्यत्तैः । तत्र तदुपासना तद्भक्तानां सेवा । संपद्यते साध्वी भवति । त्वन्मति स्त्वज्ज्ञानम् । मुक्तिर्भक्तेरानुषंगिकी, सापि न तु सा किमुत स्वयं भक्तिरित्यर्थ इति ज्ञेयम् । यद्वा—तज्ज्ञानं तु मम दूरतममित्याह—पुंस इति । अंघ्रीत्यत्र “सुपां सुलुक्—” इत्यादिनाऽमो लुक् । तथाविधानां मादृशां दुरापं तवांघ्रिं यदुपगतोऽस्मि समीपं प्राप्तवानस्मि । तच्चाप्यहमित्यादि पुनःपुनरहंशब्दः केचिन्निजभजनादिकं कारणं वदंतु तदनुग्रहमेवेति व्यनक्ति । अहो अस्तु तावत्त्वदंघ्रिसमीपप्राप्तिरन्यथा त्वयि मतिरपि दुरापेत्याह—पुंस इति । यर्हि विचारणे सति उत्तमयोपासनया त्वदाराधनेन सतां चोपासनया संसारापवर्गस्तद्वासनाक्षयः स्यादेव तया त्वयि मतिर्भक्तिः स्यान्नान्यदेति । अत्र **विश्वनाथः**—सोऽहं तथाभूतोऽप्यहं तवांघ्रिं शरणं गतोऽस्मि । तदप्यसद्भिर्दुरापं भवदनुग्रहे सत्येव संभवेदित्यहं जानामि । मदनुग्रह एव कदा स्यात्तत्राह—हे अब्जनाभ सदुपासनया हेतुना यर्हि त्वयि मतिः स्यात् । सदुपासनैव कदा स्यात्तत्राह—पुंसो यर्हि संसारान्तकालः स्यात्संसारांतकाल एव कदा स्यादिति चेद्यदा यादृच्छिकी सत्कृपा स्यादिति ज्ञेयम् । तेनादौ यादृच्छिकी सत्कृपा ततः संसारनाशारंभस्ततः सदुपासना ततः कृष्णे मतिरिति क्रमः । शास्त्रारंभ एव सत्यमित्यादिना प्राक्प्रदर्शित उक्तो भवति ॥२८॥ द्वयेन युग्मश्लोकेन । “मात्रा परिच्छदे देशे प्रवृत्तौ कर्णभूषणे । अक्षरावयवे माने मूर्तौ कालविशेषके ॥” इति हलायुधः । अत एव विज्ञानमूर्तित्वादेव । अन्यदप्याह—किञ्चेति । तत्र हेतुमाशंकते—कुत इति । परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्ते वासुदेवाय सर्वभूतक्षयाय च ॥ हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥३०॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धेऽक्रूरस्तुतिर्नाम चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ ॥ श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः ॥ भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः॥१॥

पतन्प्रार्थयते नम इति द्वयेन । विज्ञानमेव मात्रा मूर्तिर्यस्य तस्मै। अत एव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय । किं च पुरुषस्य ये ईशाः सुखदुःखादिप्रापकाः कालकर्म स्वभावादयस्तेषां प्रधानाय नियंत्रे । कुतः । ब्रह्मणे परिपूर्णाय । कि श्च अनंतशक्तये अनंताः शक्तयो यस्य । यद्वा अनंता मायाख्या शक्तिर्यस्य तस्मै । अथ वा प्रधानं प्रकृतिः पुरुषस्तत्प्रवर्तक ईशः काल एतात्रितयात्मने ब्रह्मणे। वक्ष्यति च भगवान् "प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यंजकः कालो ब्रह्म तत्रितयं त्वहम् ॥ " इति ॥ २९ ॥ सर्वप्रत्ययहेतुत्वमभिव्यंजयन्स्तौति । नमस्त इति । वासुदेवाय चित्ताधिष्ठात्रे । सर्वभूतक्षयाय क्षय आश्रयः । अहंकारश्च प्राणिनामाश्रयः । ततश्चाहंकाराधिष्ठात्रे संकर्षणायेत्यर्थः । हृषीकेशेति । बुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य ग्रहणम् । शरणागतं मां पाहीति प्रार्थना ॥ ३० ॥ इति श्रीभा० म० दशमे पूर्वार्धे टीकायां चत्वारिंशोऽध्यायः ॥ ४० ॥ छ ॥ एकचत्वारिंशकेऽह्नत्रजकं प्रविशन्पुरीम् ॥ ततो वरानदात्तुष्टः सुदाम्नो वायकस्य च ॥ १ ॥ सशंकमक्रूरमनः

पूर्णस्य सर्वनियंतृत्वं स्फुटमेवेति न केवलं परिपूर्णरूप एवेत्याह—किञ्चेति । अनंता अमिताः । शक्तयः सामर्थ्यानि । बहुशक्तिकल्पनापेक्षया सर्वव्यवहारसाधिकैकशक्तिकल्पना वरीयसी बहुवनचरसिंहाश्रयणन्यायेनेत्याह—यद्वेति । अनंता ज्ञानमृते नान्तो यस्याः सानंता । पुरुषेशेत्यादिपदस्य पूर्वव्याख्याने क्लिष्टकल्पनामपेक्ष्य प्रसिद्धार्थमाह—अथ वेति । वक्ष्यति एकादशे भगवानुद्धवाय 'प्रकृतिः' इतीममर्थम् ॥ * ॥ पादयोः पतन्नात्मानं निवेदयति--नम इति । विज्ञानस्य मदनुभवस्य मात्रा परिमाणं यतस्तस्मै । यावन्तं स्वविषयकमनुभवं ददासि तावदेव त्वामनुभवामीत्यर्थः । अन्यविषयकज्ञानानामपि त्वमेव हेतुरित्याह--सर्वेति । यतः पुरुषेति पुरुषोन्तर्यामी तद्रूपेण कर्मादिषु प्रेरयसि, ईश ईश्वरस्तद्रूपेण कर्मादिफलं ददासि, प्रधानं माया तद्रूपेण विषयेषु त्वमेव बध्नासि, ब्रह्मज्ञानैकस्वरूपं तद्रूपेण स्फुरितं सत्तस्माद्बंधान्मोचयसि च, अनंतशक्तिर्भगवाँस्तद्रूपेण स्वस्मिन्भक्तिं प्रदाय कृतार्थयसि च ॥ २९ ॥ अभिव्यञ्जयन्प्रकटयन् । अहंकारमाश्रित्यैव सर्वे व्यवहरन्तीति प्रसिद्धम् । ततश्चाहंकारस्याश्रयत्वादेव । इत्यर्थ इति—अहमित्यभिमानलक्षणं संकर्ष इत्याचक्षत इत्युक्तेरयमर्थः । इयमक्रूरस्तुतिर्मरुद्रूपेण कृष्णस्य श्रुतौ प्रसिद्धा । तथा च श्रुतिः—"सप्तसप्त शाकिन एकमेका शता ददुः यमुनायामधि श्रुतमुद्राधो गव्यं मृजेति राधो अश्व्यं मृजे" इति । एतदर्थस्तु—अघमर्षणकाले भगवंतं दृष्ट्वाऽक्रूरस्तद्देवतां मरुतं स्तौति—सप्तसप्तैकोनपञ्चाशत् शाकिनः शक्नुवन्ति य इति, वा शक्नुवंत्येतैरिति शाकिनः शक्तिमन्तः, शक्तिप्रदा वा मरुतः । एकमेका प्रत्येकम् । शता 'शतमैश्वर्यं भवति ' इति यास्कः । ऐश्वर्याणि ददुः । यतो मया श्रुतम् 'एषास्य परमा संपत्' इति वेदशिरोभ्य आकर्णितम् । राधो धनं सूत्रान्तर्यामिरूपं यमुनायामधि मध्ये, मृजे मृगयामि पश्यामीत्यर्थः । तदेव राध उत् ऊर्ध्वं गव्यं गोषु सूर्यरश्मिषु स्थितं मृजे तथाश्वमश्ववति रथे स्थितं तदेवातिमृजे अधो भूलोकेऽपि पश्यामीत्यर्थः ॥ * ॥ वासुदेवायेति । हे वसुदेवनंदन भवानेव मम सेव्योऽस्तु न तु दुष्टभूपतिरिति भावः । सर्वभूतानां क्षयाय निवासाय । स्वस्मिन्मां वासय न तु गृहांधकूप इति भावः । हृषीकेशेति—मम मनआदींद्रियाणि भवानेव गृह्णातु न तु कलत्रपुत्रादिरिति भावः ॥३०॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्धे चत्वारिंशोऽध्यायः ॥४०॥ ॥ रजकं वस्त्रनिर्णेजकम् । ततो रजकहननोत्तरम् । सुदाम्नो मालाकारस्य । वायकस्य सौचिकस्य च (१) । सशंकं मारणार्थमेतावहं नेष्याम्यतोऽहं पापीयानस्मीति शंकाकुलम् । स्वधाम निजस्वरूपम् । तस्य संदर्शनमेव सती कृपा ततः । प्रमोद्य प्रतोष्य । अलंकृता चासावनंतैर्महोत्सवैर्हस्तिमल्लादिश्रृंगारैर्यद्वा—अनंतेन बलेन महेनातिपूज्यतमेन श्रीकृष्णेन चोत्सवो ययोर्देवकीवसुदेवयोस्ताभ्यामाढ्या युता ताम् (२)।तस्याक्रूरस्यात्मनो वपुर्दर्शयित्वा। नाट्यं नटनविषयम्, गणेशाम्बिकादिरूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोपि चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः ॥ कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् ॥ २ ॥ तमपृच्छद्धृषीकेशः किं ते दृष्ट मिवाद्भुतम् ॥ भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥ अक्रूर उवाच ॥ अद्भुतानीह यावंति भूमौ वियति वा जले ॥ त्वयि विश्वात्मके तानि किं मेऽदृष्टं विपश्यतः ॥ ४ ॥ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ॥ तं त्वाऽनुपश्यतो ब्रह्मन्किं मे दृष्टमिवाद्भुतम् ॥ ५ ॥

प्रमोद स्वधाम संदर्शनसत्कृपातः ॥ स्वराजधानीं मथुरामपश्यदलंकृतानंतमहोत्सवाढ्याम् ॥ २ ॥ १ ॥ २ ॥ ३ ॥ भूमौ वियति जले वा यावंत्यद्भुतानि तानि त्वय्येव संति तं च त्वां पश्यतो मे किमद्भुतमदृष्टम् । अपि तु सर्वं दृष्टमित्यर्थः ॥ ४ ॥ ननु मत्प्राप्तेः पूर्वमेव त्वं विस्मितमुखो लक्षितोऽस्यतो भूमौ वियति जले वा किमप्यद्भुतं दृष्टमेवेति चेदत आह । यत्राद्भुतानीति । यत्र त्वयि सर्वाण्यद्भुतानि संति तं सर्वाद्भुताधिष्ठानं त्वामिह पश्यतो मे त्वत्तोऽन्यत्र भूम्यादौ किमद्भुतं दृष्टम् । त्वां विना न तत्र

मिव । नटो रूपाभिनयकर्ता ॥*॥ तस्येत्यनादरे षष्ठी । तमपृष्ट्वैवेत्यर्थः । समाहरदन्तर्धापयामास । नाट्यमिवेत्युपसंहारे दृष्टान्तः । नटो नाट्यं यथोपसंहरति तथैव कृष्णो वैकुंठं वैकुंठीयञ्च सनातनं वस्तु तत्सर्वमुपसंजहारेत्यर्थः ॥१॥ सोऽपि अक्रूरोऽपि । आवश्यकं नित्यं संध्यावंदनादि ॥ * ॥ ० ॥ २॥ तमक्रूरम् । ते त्वया । इवशब्देन सर्वाश्चर्यमये मय्येतन्नाद्भुतमित्युक्तम् । तथेति—यथा कश्चिदद्भुतदर्शी व्यापृतचित्तो भवति ॥ * ॥ तथा त्वां लक्षयामह इति—तव नेत्रे सास्रे प्रोत्फुल्ले एवात्र प्रमाणमिति भावः ॥ ३ ॥ इत्यर्थ इति—सर्वाद्भुताधिष्ठानदर्शने सर्वं दृष्टं हस्तिपदन्यायेनेति भावः ॥ * ॥ पूर्वं तद्रूपं तदभेदेन ज्ञातवान्, इदानीं तु सद्यतत्प्रश्नप्रभावेण लब्धविशेषज्ञानस्तमेव सत्सर्वदर्शकं मत्वा तद्रूपमपि तद्वैभवमेव विमृश्याह—अद्भुतानीति । भूम्यादिषु यावंत्यद्भुतानि सन्ति तानि तावन्ति त्वय्येवेह संति, तत्र हेतुः—विश्वात्मके विश्वस्य मूलरूपत्वात् । विश्वेन कार्येणा श्रित आत्मा यस्य तादृशे । मध्यपदलोपी बहुव्रीहिः । “ यस्मिन्विज्ञाते सर्वं विज्ञातं स्यात् ” इति श्रुतेः । तस्माद्विपश्यत इति विपश्यता मे मया भूम्यादिषु किमद्भुतं दृष्टं न किमपि, किन्तु यत्किमपि दृष्टं तत्त्वय्येव दृष्टमित्यर्थः । त्वद्रूपे दृष्ट एव तद्दर्शनादिति भावः ॥ ४ ॥ पुनराशंकते—नन्विति । यतो मत्संगात्पूर्वमेव विस्मितोऽतो हेतोः । अतोऽत्र । इह रथे । इत्यर्थ इति—“यस्मिन्दृष्टे सर्वं दृष्टं स्यात् ” इति श्रुत्यर्थोऽप्यत्र सूचित इति भावः । संबुद्धिस्तु स्वयमेवोपस्थिता भवत्यतो ब्रह्मेति द्वितीयान्तं पदं, तथा च त्वां ब्रह्म परिपूर्णं पश्यत इति योज्यम् । नलोपे संबुद्धौ विशेषाभावात् ॥ * ॥ त्वद्रूपेऽस्मिन्दृश्यमाने तु तानि सर्वाण्यप्य द्भुतत्वाय न कल्पन्ते किं तु त्वद्रूपमेवेदमित्याह—यत्रेति । भूम्यादिषु यान्यद्भुतान्यपि सर्वाणि यत्र त्वयि संति तं त्वामनुपश्यत इति भाग्यतः, संप्रति निरंतरं पश्यता मया किमन्यदद्भुतमिह दृष्टं किन्विदमेव त्वद्रूपं पूर्वतोऽप्य द्भुतं दृश्यत इत्यर्थः । तत्र हेतुगर्भं विशिनष्टि—ब्रह्मेति । अथ कस्मादुच्यते ब्रह्म “ बृंहति बृंहयति च ” इत्यादिश्रुतौ “ बृहत्त्वाद् बृंहणत्वाच्च यद्ब्रह्म परमं विदुः ” इति श्रीविष्णुपुराणे च त्वय्येव सर्वबृहत्तमत्त्वस्य दृष्टत्वात् । तत्रापि ‘ यन्मर्त्यलीलौपयिकम् ’ इत्यादौ ‘ विस्मापनं स्वस्य च सौभगर्द्धेः परं पदम् ’ इति प्रसिद्ध्या त्वद्रूपस्य परमतत्त्वादिति भावः । ‘ ब्रह्मन् ’ इति पाठेऽपि स एवार्थः । ‘ दृष्टमिव ’ इति पाठे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः ॥ मथुरामनयद्रामं कृष्णं चैव दिनात्यये ॥ ६ ॥ मार्गे ग्रामजना राजंस्तत्रतत्रोपसंगताः ॥ वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाऽऽददुः ॥ ७ ॥ तावद् व्रजौकसस्तत्र नंदगोपादयोऽग्रतः ॥ पुरोपवनमासाद्य प्रतीक्षंतोऽवतस्थिरे ॥ ८ ॥ तान्समेत्याह भगवानक्रूरं जगदीश्वरः ॥ गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥ भवान्प्रविशतामग्रे सह यानः पुरीं गृहम् ॥ वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीम् ॥ १० ॥ अक्रूर उवाच ॥ नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो ॥ त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥ ११ ॥ आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज ॥ सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ॥ १२ ॥

किंचिदद्भुतमित्यर्थः । ब्रह्मन् हे परमेश्वरेत्यर्थः । ब्रह्मेति वा पाठः ॥ ५ ॥ गांदिनीसुतोऽक्रूरः ॥ ६ ॥ दृष्टिं नाददुः पश्यंत एव स्थिता इत्यर्थः ॥ ७ ॥ रामकृष्णागमनं प्रतीक्षमाणाः स्थिताः ॥ ८ ॥ प्रश्रितं विनीतम् ॥ ९ ॥ स्वगृहं च प्रविशताम् । अवमुच्योत्तार्य विश्राम्येत्यर्थः ॥ १० ॥ ११ ॥ साग्रजः सह गोपालैरित्यर्थः ॥ १२ ॥

त्विवशब्दस्तस्य दर्शनस्य न्यूनत्वमेव बोधयतीति दिक् ॥ ५ ॥ इति एवम् । दिनात्ययेऽपराह्णे ॥ * ॥ अनयदित्यनेन श्रीमुनींद्रस्य गोकुलजनत्वाभिमानो बोध्यते । दिनात्ययेंत्ययामे 'तथापराह्णे' इति वक्ष्यमाणात्, वक्ष्यमाणबहललीलाकालसमावेशाच्च, "तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान्" इति च वक्ष्यते । तथोक्तं श्रीपराशरेण--"संप्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरां पुरीम्" इति । अत्रांतिमदशदंडात्मकापराह्णस्यान्तिमषड्दंडात्मकसायाह्नस्य च प्रायिकत्वात्तन्मध्यवर्तिचतुर्थप्रहरत्वमेवोभयसमंजसमिति । तदुक्तं वैशंपायनेन--"विविशुस्ते पुरीं रम्यां काले रक्तदिवाकरे" इति सायाह्नस्यैकदेशचिह्नं मंतव्यम् । अक्रूरतीर्थादतिनिकटवर्तिपुरोपवनस्य दिनात्यये प्राप्तिरक्रूरस्य तदाश्चर्यदर्शनाच्चिरं विलंबात् ॥ ६ ॥ तत्रतत्र मार्गसव्यदक्षिणपार्श्वयोरित्यर्थः । यद्वा—वसुदेवसुतौ वीक्ष्य तत्रतत्र श्रीकृष्णे बलदेव च लग्नां दृष्टिम् । इत्यर्थ इति--दृष्टिप्रत्यादाने विवशा बभूवुरित्यर्थः ॥ * ॥ किञ्च पथि लोकानां प्रीत्यर्थं शनैरागमनादपीत्याशयेनाह—मार्ग इति । ग्रामाणां जना इति मूढत्वं सूचितं, तथापि प्रीता इति वस्तुस्वभावो दर्शितः । हे राजन्निति—तत्त्वया बुध्यत एवेति भावः । यद्वा—ग्रामे जनानामपि तादृशप्रीतिस्मरणात्प्रेमार्त्युदयेन शोचन्संबोधयति—अहो राज्ञां स्वभावं त्वं जनास्येवेति भावः ॥ ७ ॥ तावत्तदा । अग्रतोऽग्रे । तत्र मथुरोपकण्ठे ॥ * ॥ यावत्ते आयान्ति तावत्प्रतीक्षमाणाः अवतस्थिरे । 'अनिष्टाशङ्कीनि बंधुहृदयानि' इति न्यायेन वर्त्म निरीक्षमाणा ऊर्द्ध्वावस्थित्याऽवर्तन्त, न तूपविष्टा इत्यर्थः । पूर्वं रथशैघ्र्येण गंतुमशक्तास्ते स्ववर्त्माग्रे रथचिह्नमदृष्ट्वापि वक्रवर्त्मांतरे तच्चिह्नात्तेनासौ गत इत्याशंकमाना शीघ्रं तन्मेलनायर्जुवर्त्मना चलन्त एवासन्, संप्रति त्वेकीभूतवर्त्मनि पुरसमीपे तमदृष्ट्वा परमोत्कंठया पश्चादेव निरीक्षमाणास्तस्थुरितिज्ञेयम् । विलम्बस्त्वक्रूरनिमज्जनादेवेति तत्त्वम् ॥ ८ ॥ तान् नंदादीन् । इवेन पितृव्येण हास्यानौचित्यमुक्तम् । यद्वा—तेषु कंसकृतदौर्जन्यमालक्ष्य हसन्निवेत्युक्तम् ॥ * ॥ जगदीश्वरोऽपि निजपाणिना तत्पाणिं गृहीत्वा, यतो भगवान् भक्तवात्सल्याद्यशेषगुणप्रकटनपर इत्यर्थः । प्रहसन्निवेति—तदानंदनार्थमेव न तु वस्तुतः प्रहसन्मथुरादर्शनेन व्रजनगरत्यागस्मृत्यान्तर्विषादोदयात् ॥ ९ ॥ इहोपवने । इत्यर्थ इति—धातूनामनेकार्थत्वाभिप्रायेण विश्रामेऽपि मुचिः । यद्वा—अवोपसर्गवशादप्यर्थांतरम् ॥ * ॥ त्वत्प्रवेशानंतरमेव पुरीं द्रक्ष्यामहे । तातेति[1] तत्संतोषार्थमादरोक्तिः । एवमवमोचनं पुरीदर्शनञ्च कार्यमस्माकमस्तीति त्विलम्बात्सहैव गमने न स्यादिति व्यञ्जितम् । तच्चाऽसंकोचेन तद्दर्शनार्थम् ॥ १० ॥ संबुद्धित्रयेण स्वत्यागानौचित्यं द्योतयति । न हि प्रपन्नत्यागः प्रभ्वादीनामुचित इति भावः ॥ * ॥ परमार्त्या बहुधा संबोधयन्प्रार्थयते—प्रभो इत्यादिना । नाहमित्यादौ हेतुः—हे प्रभो सर्वोपकारिप्रभवनशीलत्वेन सर्वाश्रय । ननु तदाऽपि मदाज्ञया प्रविशत तत्राह—त्यक्तुमिति । तत्र हेतुः—हे नाथेति । नाथयति याचयति ददाति सर्वेभ्यः सर्वान्कामानिति हे तथाभूत । ननूदासीनस्त्यज्यत एव तत्राह—भक्तं ते तव । अनन्यगतिमित्यर्थः । ननु सत्यं कदापि न त्याज्य एव किन्तु स्वच्छन्देन पुरीविहाराद्यर्थमिममेल्पकालं स्वगृहं प्रस्थाप्यसे तत्राह—हे भक्तवत्सलेति । क्षणमपि भक्तत्यागो न युक्तस्तवेति भावः ॥ ११ ॥ नो गेहान्

---

१ तत इत्यत्र तातेति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनीहि पादरजसा गृहान्नो गृहमेधिनाम् ॥ यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः ॥ १३ ॥ अवनिज्यांघ्रियुगलमासीच्छ्लोक्यो बलिर्महान् ॥ ऐश्वर्यमतुलं लेभे गतिं चैकांतिनां तु या ॥ १४ ॥ आपस्तेंऽघ्र्यवनेजन्यस्त्रींल्लोकाञ्छुचयोऽपुनन् ॥ शिरसाऽधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥ ॥ १५ ॥ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन ॥ यदूत्तमोत्तमश्लोक नारायण नमोऽस्तु ते ॥ १६ ॥

यच्छौचेन यस्य पादरजसः क्षालनोदकेन गृहांगणस्थितेन देवाः पितरश्च तुष्टा भवंति ॥ १३ ॥ श्लोक्यः पुण्यकीर्त्यर्हः । एकांतभक्तानां या गतिस्तां गतिं च लेभे ॥ १४ ॥ अपुनन्पवित्रितवत्यः । याभिरद्भिः स्वः स्वर्गं प्राप्ताः ॥ १५ ॥ प्रार्थयमानो नमस्करोति । देवदेवेति । अतः परमन्यच्छ्रेयो नास्तीति मत्वा बहुधा नोऽस्मान्वा । इत्यर्थ इति–"बहुलं छन्दसि" इति व्यवहितयोरपि ससहशब्दयोः पूर्वोत्तरभावेनान्वय इति तात्पर्यम् । अधोक्षजेतीन्द्रियजन्यज्ञानाऽविषयत्वेऽपि सुहृत्तमत्वात्ताद्विषयो जात इति संबुद्धिद्वयाभिप्रायः। 'गृहं गेहं च पुंभूम्नि' इति त्रिकाण्डकोशात् ॥ * ॥ तर्हि किं कार्यं तत्राह–आगच्छेति । नन्वस्मदागमनविज्ञापनाय त्वं कंसं यास्यसि इत्याशंक्य तदैश्वर्यानुभवेन कंसान्निर्भयतया नेत्याह–याम इति । अहं यूयञ्च सर्व एव प्रथमतो गृहाण्येत्र गमिष्यामः। तथापि संमतिमालक्ष्य सदैन्यं प्रार्थयते–नोऽस्मान्सनाथान्कुरु । बहुत्वं निजबंधुवर्गापेक्षया । हे अधोक्षज इंद्रियज्ञानागोचर इत्येवंभूतस्य तव साक्षाद्गमनेनैव सनाथत्वं सिद्ध्यतीति भावः । यद्वा–नोऽस्मत्संबंधिनो गेहान्याम तानेव सनाथान्कुरु दासस्य तेषु स्वामित्वाभावात् । त्वद्गमनेनैव सनाथत्वसिद्धेरिति भावः । अत एव नैकाकी चागच्छेरित्याह–सहेति । तैर्व्याख्यातम् । तत्र छांदसत्वाद्विपर्ययेण पाठ इति भावः । यद्वा–सुहृद्भिः पित्रादिभिः । तैश्च कीदृशैः–सगोपालैः शाकटबलीवर्दरक्षकैरपि सह । साकल्येऽव्ययीभावः । "तृतीयासप्तम्योर्बहुलम्" इत्यादेशविकल्पः । ननु सत्र एव कथं घटतां तत्राह–सुहृन्निरुपाधि कृपाकरः साधुः, सुहृत्तरस्त्वद्भक्तः साधुः, सुहृत्तमस्त्वं भगवानिति तथाभूतत्वन्माहात्म्येन घटते न तु मद्योग्यतयेत्यर्थः । **विश्वनाथोऽपि**–याम इति–एते त्वमहञ्चास्माकं गेहान्याम इति कंसमावेदयितुं प्रथमं तत्समीपमहं न यास्यामि श्वो मारिष्यन्स तु किं कर्तुं शक्नुयात् नाहं तस्मात्किञ्चिदपि बिभेमि त्वदैश्वर्यस्य दृष्टत्वादिति भावः । न च मद्गृहे कस्यापि वस्तुनः संकोचस्तस्मात्सर्वेऽपि यूय मागच्छतेत्याह–सहाग्रज इति ॥१२॥ गृहमेधिनां पञ्चसूनाजातहिंसावताम् । पितरो दिव्या अग्निष्वात्तादयो वंशप्रवर्तका वा । अग्नयो गार्हपत्यादयः । सुरा इन्द्रादयः ॥ * ॥ ननु पित्राग्निसुरादीनां पूजादिना सदा त्वद्गृहाणां सनाथता भात्येव तत्राह–पुनीहि । गृहमेधिनां नित्यं गृहेषु पञ्चसूनातत्पराणाम् । अनुशब्देन सकृल्लब्धेनापि निरंतरं तृप्यंतीति ध्वन्यते । पितर इति–पित्रादीनामनुतृप्त्या गार्हस्थ्यकृत्यसमाप्त्या गृहस्थानां स्वत एव सुखं कृतार्थता च स्यादिति भावः ॥ १३ ॥ अवनिज्य प्रक्षाल्य । गतिः सालोक्यादिरूपा ॥ * ॥ न चेयं स्तुतिर्दृष्टफलत्वात् । यद्वा–ननु तर्हि रजस्तच्छौचजलं वा तत्र नीयतामित्याशङ्क्य श्रीबलिवत्तत्र साक्षात्प्रक्षालयितुमिच्छामीत्याशयेनाह–अवनिज्येति । महाञ्छ्लोक्यः पुण्यकीर्तिमत्सु श्रेष्ठ इत्यर्थः, श्रीव्यासादिभिरपि प्रशस्तत्वात् । अतुलमिन्द्रादीनामपि दुर्लभत्वात् । गतिं प्राप्यं ताञ्च लेभे इहैव द्वारपालत्वेन साक्षाच्छ्रीभगवतः प्राप्तत्वात् ॥ ॥ १४ ॥ अंघ्र्योरवनेजनं शौचोऽस्ति यासां तास्तथा, चरणप्रक्षालनच्युताः । शर्वः शिवः ॥ * ॥ अहो आस्तां तावत्त्वदवनेजनजलानां माहात्म्यं परंपरयाऽपि तत्स्पृष्टानां माहात्म्यं परमाश्चर्यमित्याह–आप इति । शुचय इति–महापातकिपावनेनान्यतीर्थानामिवाशुचित्वं निरस्तम् । न केवलं त्रींल्लोकानेवापुनन्, लोकपालमुख्यं सर्ववंद्यं श्रीशिवमपीत्याह–शिरसेति । तदुक्तं प्रथमस्कंधे–'सेशं पुनाति' इति । बहिःश्मशानादिसंबंधं तिरस्करोतीत्यर्थः । इति तासां परमपुरुषार्थरूपत्वमुक्तम् । अहो साक्षात्तत्स्पर्शेन पावनत्वं किं वक्तव्यं, महापराधिनां चिरं स्वकृतपापेनैव दग्धानामपि दाहस्थानस्पर्शमात्रेणैव परमशोधनं ब्रह्मलोकप्रापणञ्चाह–स्वर्याता इति । स्वरिति–त्रिलोकीपक्षे ब्रह्मलोकपर्यंतस्य स्वर्गत्वाद्ब्रह्मलोकमित्यर्थः । तत्तु नवमे व्यक्तम् । एवमादौ पावनत्वं, ततः परमवंद्यत्वं, ततश्च सुदुस्तरमहदपराधादपि निस्तारकत्वं, परमपदप्रापकत्वञ्च क्रमेणोक्तम् ॥ १५ ॥ अतः श्रीहरिकीर्तनात् । देवदेवेत्युक्तेरिन्द्रवारणायाह–जगद्भिर्नाथ्यते प्रार्थ्यत इति जगन्नाथ दुष्टदमन । तादृशा राजानोऽपि संति तद्वारणायाह–पुण्यं श्रवणं नाम येषां रुद्रादीनां ते पुण्यश्रवणास्तैः कीर्त्यत इति तथा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ आयास्ये भवतो गेहमहमार्यसमन्वितः ॥ यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियम् ॥ १७ ॥ श्रीशुक उवाच ॥ एवमुक्तो भगवता सोऽक्रूरो विमना इव ॥ पुरीं प्रविष्टः कंसाय कर्माऽऽवेद्य गृहं ययौ ॥ १८ ॥ अथापराह्ने भगवान्कृष्णः संकर्षणाऽन्वितः ॥ मथुरां प्राविशद्गोपै र्दिदृक्षुः परिवारितः ॥ १९ ॥ ददर्श तां स्फाटिकतुंगगोपुरद्वारां बृहद्धेमकपाटतोरणाम् ॥ ताम्राऽऽरकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभिताम् ॥ २० ॥

संबोधयति ॥ १६ ॥ आदौ तावद्यदुचक्राय द्रुह्यतीति यदुचक्रध्रुक् तं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि ॥ १७ ॥ रामकृष्णावानीताविति स्वकृतं कर्मावेद्य समर्प्येति ॥ १८ ॥ गोपैः परिवारितः प्राविशत् ॥ १९ ॥ श्रीकृष्णदृष्टां पुरीमनुवर्णयति चतुर्भिः । ददर्श तामिति । स्फाटिकानि तुंगानि गोपुराणि पुरद्वाराणि गृहद्वाराणि च यस्यां ताम् । बृहंति हेममयानि कपाटानि तोरणानि च यस्यां ताम् । ताम्रं चारः आरकूटश्च तन्मयाः कोष्ठा धान्यागाराश्वशालादयो यस्यां ताम् । परिखाः

यदूत्तमेत्युक्ते यादवांतरवारणायाह—उत्तमश्लोकेति । तादृशा अनेके युधिष्ठिरादयः सन्ति तद्वारणायाह—नारायणेति ॥ * ॥ हे देवदेवेति । तत्र त्वद्गमनेन ध्रुवं महापुण्यं स्यादेवेति भावः । यद्वा—देवानां ब्रह्मादीनां पूज्येति । यद्यपि स्व एव सेवकास्त्वदनुग्राह्यास्तथापि जगन्नाथत्वेन मामप्यनुग्रहीतुमर्हसीति भावः । ननु पुण्यवत एवानुगृह्णामि तत्राह—पुण्येति । तव श्रवणादिनाहमपि पुण्यवानेव । यद्वा—यस्य श्रवणकीर्तनाभ्यामपि पुण्यं स्यात्तस्य दर्शनादिना ममापि महापुण्यं जातमेवेति भावः । किञ्च—यदूत्तमेति—यदुकुलावतीर्णेन तच्छ्रेष्ठेन त्वया तत्कुलजातोऽहमनुग्रहीतुं योग्य एवेति भावः । ननु तथापि कंससंगी त्वं श्रीगोकुले जाता पराधश्च कथमनुग्राह्य इत्याशंक्याह—उत्तमश्लोकेति । पूतनादीनामपि तादृशगतिदानेन सर्वोत्कृष्टनिजकीर्त्यपेक्षयेत्यर्थः । नन्वीश्वरस्य मम तादृशीच्छा कचिद्भवेत्काचिन्न भवेदित्याशंक्याह—नारं जीवसमूहस्तस्यायनमाश्रयेति । भवतु मा वा तथापि जीवमात्रस्य त्वमेव गतिरिति भावः । परमवैयग्र्येण सपादग्रहं प्रणमति—नम इति । एवं श्रीकृष्णमेकं प्रत्येव प्रार्थनादिकम् । अन्योऽन्यं महास्निग्धतया श्रीबलदेवेन सह तस्याभेदात्तस्मात्प्राधान्याच्चेति । **विश्वनाथस्तु**—हे देवदेव त्वं देवेषु दीव्यसि, अद्य मद्गृहे दीव्य । त्वं जगतां नाथः, अद्य मद्गृहस्य नाथो भव । हे पुण्यश्रवणकीर्तन अद्य मद्गृहमपि पुण्यं कुरु । हे यदूत्तम यदोर्मम गृहमागच्छ । हे उत्तमश्लोक पतितपावनत्वयशः प्रकाशयन्पतितस्य मम गृहं पुनीहि ॥ १६ ॥ आर्यो बलदेवः । वितरिष्ये 'विपूर्वस्तरतिर्दाने' इति व्याडिः ॥ * ॥ आर्येण श्रीरामेण सम्यगन्वित इति गोपैः साहित्यं निरस्तम्, तेषां चिरं तत्रानवस्थानात् । कदेत्यपेक्षायामाह—यदुचक्रेति । यदेति शेषः । संकेतेनैव तदुक्तिः, मंत्रभंगभयाद्दुष्टत्वाद्वा । सुहृदां यादवादीनां श्रीवसुदेवमोचनादिना प्रियं प्रीतिं—पितरौ बद्धौ सर्वे यादवाश्च दुःखिता अतोऽत्रागतस्य मम त्वद्गृहगमनादिनातिथ्यसुखं न योग्यमिति भावः । **विश्वनाथस्तु**—सत्यं भो मां यदूत्तमं ब्रूषे तर्हि यदुचक्रद्रुहं हत्वैव त्वद्गृहमायास्ये ॥ १७ ॥ एवमुक्तरीत्या । भगवता सहागमनाभावाद्विमना इवेति कंसदौर्जन्याद्वा ॥ * ॥ स परमोत्सुकः । श्रीभगवदानयने परमहृष्टोऽपि । इवेति वाक्यालंकारे । यद्वा—आयास्य इति तदंगीकारेण कंसहननप्रतिज्ञादिना चात्यन्तवैमनस्याभावात् । प्रायः श्वः कंसं मारयित्वा श्रीभगवानागमिष्यतीति विभाव्य बहुधा निजगेहमुपस्कर्तुमिति ज्ञेयम् । अत एव तदासक्त्या तत्र तस्य श्रीभगवदागमनपर्यंतमन्यत्कर्मादिकं किमप्यग्रे कुत्रापि न श्रूयते ॥ १८ ॥ अथाक्रूरप्रेषणोत्तरम् ॥ * ॥ ० ॥ १९ ॥ अथ मथुरावर्णनम् ॥ तां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौवर्णशृंगाटकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृताम् ॥ वैदूर्यवज्राऽमलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु ॥ २१ ॥ जुष्टेषु जालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ॥ संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंडुलाम् ॥ २२ ॥ आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः ॥ सवृंतरंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां सपाट्टिकैः ॥ २३ ॥

परितःखातगर्तास्ताभिर्दुरासदां दुर्गमाम् । उद्यानानि इह दूरस्थानानि कृत्रिमवनानि रम्याण्युपवनानि च निकटानि तैरुपशोभिताम् ॥ २० ॥ सौवर्णाः शृंगाटकाश्चतुष्पथा हर्म्याणि धनिनां गृहाणि च निष्कुटा गृहोचिता आरामाश्च तैः । श्रेणीनामेकरूपशिल्पोपजीविनां सभाभिरुपवेशस्थानैरन्यैश्च भवनैर्गृहैरुपस्कृतामलंकृताम् । अमलाः स्फटिकाः । हारितो मरकताः । वैदूर्यादिरत्नैर्जुष्टेषु वलभ्यादिष्वाविष्टैरुपविष्टैः पारावतैर्बर्हिभिश्च नादिताम् । तत्र वलभ्यो गृहपुरोभागेषु वक्रदारुच्छादनानि । वेदयो वलभीनामधोदेशे विरचिता अवष्टंभवेदिकाः जालामुखरंध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धा भमयस्तेष्विति । रथ्या राजमार्गाः । आपणाः पण्यवीथयः । मार्गा अन्ये च । चत्वराण्यंगणानि । संसिक्तानि रथ्यादीनि यस्यां ताम् । प्रकीर्णा माल्यादयो यस्यां ताम् ॥ २१ ॥ २२ ॥ तथा स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां ताम् । कैः । आपूर्णैः कुंभैर्दध्ना चंदनेन चोक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः । वृंतैः फलगुच्छैरुपलक्षिता रंभाः क्रमुकाश्च तत्सहितैः । सकेतुभिः केतवो ध्वजास्तत्सहितैः । पट्टिका वितास्तिविस्तारपट्टवस्त्राणि तत्सहितैः । तत्रेयं रीतिः । द्वारेषूभयतस्तंडुलानामुपरि पूर्णकुंभास्तत्परितः प्रसूनावलयः कंठे पट्टिका

मथुराद्य । तोरणानि द्वारबहिर्भागाः । "तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः । 'आरकूटश्च पित्तलम्' इत्यभिधानचिंतामणिः । आरपदेनारकूटग्रहस्त्वेकदेशन्यायेन बोध्यः । उपवनानि प्रमदवनानि वा ॥ * ॥ कोष्ठानि दुर्गप्राकारा इत्यपि केचित् ॥ २० ॥ "शृंगाटकं भवेद्वारिकंटके च चतुष्पथे" इति मेदिनी । 'हर्म्यं तु धनिनां गृहम्' इति शाश्वतः । "निष्कुटस्तु गृहोद्याने स्यात्केदारकपाटयोः" इति मेदिनी । "श्रेणिः स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ" इति च । "सभा समाजके गोष्ठ्यां द्यूतमंदिरयोरपि" इति च । 'भवनं स्याद्गृहे भावे' इति च । उपस्कृतामलंकृताम् । वलभीष्वाच्छादनवक्रदारुषु । वेदिषु परिष्कृतभूमिषु ॥*॥ वलभी । पटलाधारो वंशपञ्जरस्तस्य चूडा वेति **क्षीरस्वामी** । "आच्छादनं स्याद्वलभी गृहाणाम्" इति हलायुधः । 'छाजा' इति भाषायामपि मध्यदेशीयानाम् । सा चेष्टकादिनिर्मितगृहप्रान्तैः पाषाणादिनिर्मितच्छादनश्रेणी 'वलभी चंद्रशालिका' इति त्रिकांडशेषः । सा च गृहोपरि गृहम् । तथा च माघकाव्ये—"यस्यामसेवंत नमद्वलीकाः समं वधूभिर्वलभीर्युवानः" इति । वेदिर्गृहाग्र इष्टकादिबद्धा विश्रान्तिभूः ॥ (२१) ॥ नादितां कारितनादाम् । तत्प्रतिध्वनियुक्तान्तर्गृहामित्यर्थः ॥ २१ ॥ २२ ॥ तत्र कुंभाद्यलंकारे । क्रमुकः पूगः "क्रमुकस्तु पुमान्भद्रमुस्तके ब्रह्मदारुणि । फले कार्पासिकायाश्च पट्टिकालोध्रपूगयोः॥" इति मेदिनी । रंभाः कदली

१ नामैकदेशे नाममात्रस्य ग्रहणं सत्या सत्यभामा, भीमो भीमसेन इत्यादिवत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां संप्रविष्टौ वसुदेवनंदनौ वृतौ वयस्यैर्नरदेववर्त्मना ॥ द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः ॥ २४ ॥ काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ॥ कृतैकपत्रश्रवणैकनूपुरा नांक्त्वा द्वितीयं त्वपराश्च लोचनम् ॥ २५ ॥ अश्नंत्य एकास्तदपास्य सोत्सवा अभ्यज्यमाना अकृतोपमज्जनाः ॥ स्वपंत्य उत्थाय निशम्य निस्वनं प्रपाययंत्योऽर्भमपोह्य मातरः ॥ २६ ॥ मनांसि तासामरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः ॥ जहार मत्तद्विरदेंद्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवम् ॥ २७ ॥ दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ॥ आनंदमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिम् ॥ २८ ॥

मुखे चूतादिपल्लवास्तदुपरि पात्रांतरे दीपावलयस्तत्सन्निधौ सर्वृतरंभाः क्रमुकस्तंभाः केतवस्तोरणानि चेति ॥ २३ ॥ नरदेववर्त्मना राजमार्गेण तां पुरीं संप्रविष्टाविति द्वितीयान्तम् ॥ २४ ॥ औत्सुक्यमेवाह द्वयेन । काश्चिदिति । विपर्यक् विपरीतं धृतानि वस्त्राणि भूषणानि च याभिस्ताः युगलेषु धार्येषु कुंडलकंकणादिष्वेकं विस्मृत्य एकमेव धृत्वा अपराः समीयुः । तदेवोदाहरति । कृतमेकमेव पत्रं ययोस्ते श्रवणे यासामेकमेव नूपुरं चरणाभरणं यासां ताश्च ताश्च नांक्त्वा अनंक्त्वा एकस्मिन्नेव लोचने अंजनं विधायैव ॥ २५ ॥ तद्भोजनं अपास्य त्यक्त्वा । अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यंगाः । अकृतोपमज्जना अकृतस्नानाः । अर्भं बालकं अपोह्य निरस्य ॥ २६ ॥ प्रगल्भा या लीलास्ताभिर्हसितानि अवलोकनानीक्षणानि च तैः श्रियं रमयतीति श्रीरमणस्तेनात्मना वपुषा तासां दृशामुत्सवं ददत् मनांसि जहार ॥ ॥ २७ ॥ मुहुः श्रुतत्वात्तद्गतचेतसः सयस्तं दृष्ट्वा तस्य प्रेक्षणं चोत्स्मितं च तदेव सुधा तयोक्षणं सेचनं तेन लब्धो मानो याभिस्ताः । दृशोद्घाटितेन नेत्रद्वारेणात्मनि मनसि लब्धं प्राप्तं परिष्वज्य तदप्राप्तिजनितमनंतमाधिं मानसीं व्यथां जहुः । हे अरिंदम निर्जितकामेति संबोधनम् । शृंगाररसे निमग्नो मा भूरिति ॥ २८ ॥

वृक्षाः "रंभा कदल्यप्सरसोर्ना घेणौ वारणांतरे" इति च ॥ * ॥ ० ॥ २३ ॥ वसुदेवनंदनावित्युक्तेर्मथुरागमनसमये नंदनंदनवपुषो निःसृत्य वसुदेवनंदनो बलदेवेन साकं गोपैश्च मथुरां ययौ । नंदनंदनस्तु प्रकटलीलामंतर्धाप्य वृंदावन एव तस्थावंतर्धाय निजवपुरिति । अत एव "वृंदावनं परित्यज्य न याति नंदनंदनः । सदैव तत्र रमते प्रकटोऽप्रकटः क्वचित् ॥" इति पाद्मादिषु स्फुटम् । उत्सुका जातोत्कंठाः ॥ * ॥ ० ॥ ॥ २४ ॥ काश्चित्पुरस्त्रियः । "पत्रं तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः" इति मेदिनी ॥ * ॥ ० ॥ २५ ॥ अर्भं बालकम् ॥ * ॥ ० ॥ २६ ॥ तासां पुराङ्गनानाम् । ईक्षणानि कटाक्षपातान् । उत्सवमानंदम् । "उत्सवो मह उत्सेके इच्छाप्रसवकोपयोः" इति मेदिनी ॥ * ॥ श्रिया स्वांगलक्ष्म्यैव मथुरांगना रमयति क्रीडयति तेन दृशामुत्सवं ददत्तासां मनांसि जहार । चाक्षुषसंभोगदानेन ता विह्वलीकृत्यालक्षितमेव मनोरत्नानि चोरयामासेत्यर्थः ॥ २७ ॥ तद्गतचेतसः कृष्णगतचेतसः । तं श्रीकृष्णम् । तस्य कृष्णस्य । उत्स्मितमुत्कृष्टस्मितम् । तदेवोत्स्मितमेव । तया सुधया । तेन सेचनेन । ता गोप्यः । तस्य कृष्णस्याप्राप्त्या जनितम् । एकदापि कृष्णो न दृष्टोऽस्माभिरित्येवमाधिं मनःपीडाम् । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । हृष्यन्ती त्वग्यासां ताः, रोमाञ्चितांगा इत्यर्थः ॥ * ॥ हे अरिंदमेति—एतादृशभगवच्चरितश्रवणमननादिनैव त्वया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः ॥ अभ्यवर्षन्सौमनस्यैः प्रमदा बलकेशवौ ॥ २९ ॥ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः ॥ तावानर्चुः प्रमुदितास्तत्रतत्र द्विजातयः ॥ ३० ॥ ऊचुः पौरा अहो गोप्यस्तपः किमचरन्महत् ॥ या ह्येतावनुपश्यंति नरलोकमहोत्सवौ ॥ ३१ ॥ रजकं कंचिदायातं रंगकारं गदाग्रजः ॥ दृष्ट्वाऽयाचत वासांसि धौतान्यत्युत्तमानि च ॥ ३२ ॥ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः ॥ भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥ ३३ ॥

सौमनस्यैः कुसुमसमूहैः शोभनमनोभावैर्वा ॥ २९ ॥ ३० ॥ पौराः पुरस्त्रियः ॥ ३१ ॥ रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रंगमपि कुर्वन् रंगकारस्तम् ॥ ३२ ॥ ३३ ॥

कामादयोऽरयो विजिता इति भावः ॥ २८ ॥ कुसुमवृष्टेरपि सुमनस्त्वं हेरानंदजनकमिति मत्वाह—शोभनमनोभावैरिति ॥ * ॥ ० ॥ २९ ॥ तौ बलकृष्णौ । तत्रतत्र स्थलेस्थले । उदपात्रं पाद्याद्यर्थम् । उपायनैरुपवीतफलाद्यैः ॥ * ॥ ० ॥ ३० ॥ या गोप्यः । एतौ बलकृष्णौ । प्रेक्षणेनैवातीवानंदजनकत्वान्नरो लोक्यते निजानंदप्रदत्वेन येन स नरलोकः । यद्वा—नरैर्लोक्यते निजानन्दप्रदत्वेन यः स नरलोकः स्त्रीजनस्तस्य महान् कथनस्याप्यगोचर उत्सवो याभ्यां तौ तथा ॥ * ॥ पौराः पौर्यः, केवलगोपीनां श्लाघनात् । क्लीबभावस्त्वार्षः । यद्वा—एवं स्त्रीपुंसानां सर्वेषामेव प्रमोदमुक्त्वा तत्र च प्रायो रूपदर्शनमेव कारणमिति बोधयंस्तन्माहात्म्यं तात्पर्येणाह—ऊचुरिति । पुरौकसः सर्वेऽपि किमूचुस्तदाह—अहो इति । तत्र गोप्य इत्युपलक्षणं नरलोको भूर्लोकस्तत्रावतीर्णत्वेन तत्प्राधान्यात् । यद्वा—नराणामित्युक्त्वा संतोषाभावादाहुः—लोकानां चतुर्दशभुवनानामपि । यद्वा—नरलोको जीवलोकस्तेषां सर्वेषामपि महानुत्सवो याभ्यां तौ महोत्सवरूपाविति वा । अनु निरंतरं पश्यन्तीति वर्तमाननिर्देशः पुनस्तत्र गमनसंभावनात् ॥ ३१ ॥ अथ श्रुतिविहितरजकवधमालाकारकुब्जाद्यनुग्रहमाह—रजकमिति । तथाह श्रुतिः—"युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रामंतवो ह सर्गाः" इति । अर्थस्तु—युवं युवाम् । पीवसा बलेन रजकं हत्वेत्यर्थः । वस्त्राणि वसाथे । युवोर्युवयोः । मंतवो मानयितारः—मालाकारकुब्जाप्रभृतयः । सर्गाः सृजन्ति माल्यानुलेपनादिकं ये ते सर्गाः । अच्छिद्रा नीचत्वकुब्जत्वदोषहीना भवन्तीति ॥ * ॥ एवं शिष्टानां परमानंदेन तत्संमाननमुक्त्वा दुष्टानां तद्वैपरीत्यं दर्शयन्नादौ रजकवधमाह—षड्भिः । किंचिद्दैत्यस्वभावं कंसानुगमित्यर्थः । अत उक्तं वैष्णवे—'कृष्णस्तस्य दुरात्मनः' इति । रंगकारमित्यनेन तस्य विक्रेतव्यान्यपि कतिचिद्वस्त्राण्यासन् । वंचनार्थमेव तु राजवस्त्राणीति वक्ष्यतीति भावः । वस्त्रधावनस्थानात्पुर्यन्तरागच्छन्तमिति, तदपि मंगलमेकमिति सूचितम् । 'धौताम्बरश्च रजकोऽपि शुभाय दृष्टः' इत्युक्तेः । गदाग्रज इत्यनुप्रासरक्षार्थं, रजरंगेति वारद्वयश्रवणात् । यद्वा—गदोऽपि तादृशत्वेन प्रसिद्धः किमुत तदग्रजः स्वयं भगवानिति ज्ञापनार्थम् । एवं यदुकुललीलारंभे गुणतः श्रीरामकृष्णेतरसर्वभ्रातृगणमुख्यस्य गदस्यापि जन्म सूचितम् । गदौ च द्वौ । 'बलं गदं सारणञ्च' इति रौहिणेयः । "देवरक्षितया लब्धा नव चात्र गदादयः" इति । दैवरक्षितेयश्चेति । तत्र रौहिणेयस्य जन्माभावादन्यतर एव गृह्यतेऽत्र । स चानंतरकनिष्ठः, श्रीकृष्णश्चानंतरज्येष्ठः । श्रीरामवदेव सहविहारी भविष्यतीति सूचितम् । अत एव 'कच्चिद्गदाग्रजः सौम्य' इति श्रीगोपीभिः, 'मम गदाग्रज एत्य पाणिम्' इति श्रीरुक्मिण्या च वक्ष्यत इति ॥ ३२ ॥ अर्हतोरित्युक्त्या भगवता स्वस्य नरेशकंसभागिनेयत्वेन सर्वपूजापूज्यत्वं द्योतितम् । समुचितानि अस्मद्वृतियोग्यानि, प्रमाणतो वर्णतो वा । परं श्रेयस्तु तेऽदातुरपि भविष्यति किं पुनर्दातुरित्यसंशयमेवेति ॥ * ॥ कथमयाचत तदाह—देहीति । समुचितानि परिधानयोग्यानि । अंग हे रंजक । न वक्तव्यमेतद्वस्त्रयोग्यौ युवां न भवथ इत्याह—अर्हतोरिति । ननु मूल्यं विना कथं देयानीति चेत्तत्राह—भविष्यतीति । परमुत्तमं श्रेयो मंगलमैहिकामुष्मिकञ्च, किंचिद्विलंबेन मूल्यमधिकं देयं पुण्यञ्च परमं भावीत्यर्थः । दुष्टं प्रत्यपीदृशं मधुरवाक्यं निजसौशील्येनायत्यां भक्तजनासह्यनिजकीर्तिपरिहारेच्छया, श्लेषादकारप्रश्लेषेणाऽदातुश्च परलोके भक्तिसुखमयं वैकुंठप्राप्तिलक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स याचितो भगवता परिपूर्णेन सर्वतः ॥ साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥ ३४ ॥ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः ॥ परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥ ३५ ॥ याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा ॥ बध्नंति घ्नन्ति लुंपंति दृप्तं राजकुलानि वै ॥ ३६ ॥

रुषितः कुपितः ॥ ३४ ॥ हे उद्वृत्ताः गिरौ वने चरथ ये नित्यं ते यूयं पूर्वं किं परिधत्तेति संभावनायां लोट्। अभीप्सथ प्रार्थयध्वम् ॥ ३५ ॥ राजकुलानि राजकीयाः

परं श्रेयो न भावि किन्तु तद्बाह्यं केवलं कैवल्यमेव । अत्र च संशयो जीवने संदेहः, मरणमेवेत्यर्थः ॥ ३३ ॥ स रजकः । सर्वतः परिपूर्णस्य याचनमपि तदनुग्रहार्थमेवेति भावः । साक्षेपं भर्त्सनां कुर्वन् " आक्षेपो भर्त्सनाकृष्टिकाव्यालंकृतिषु स्मृतः " इति मेदिनी । सुदुर्मदः प्राप्तात्पभृतित्वात् । नृपाप्तविशेषभृतिको राजपुरुषः क्षमी, तदितरो विपरीत इति प्रत्यक्षं लोके इति ॥ * ॥ सर्वतः परिपूर्णेन कौतुका देवेति भावः । सुदुर्मदत्वं तूक्तं वैष्णवे–" कंसस्य रजकः सोऽथ प्रसादारूढविस्मयः " इति । ' सुदुर्मुखः ' इति पाठे परमदुर्वचनः " प्राप्ताविष्टाय मूर्खाय सृजते वाङ्मयं विषम् " इति हरिवंशोक्तेः ॥ ३४ ॥ साक्षेपवाक्यं विवृणोति–ईदृशानीति । " उद्वृत्तमुत्तमाचारे तथैवोच्छृङ्खलेऽनृजौ " इति धरणिः । गिरिवनेचरोक्तेर्नेदृग्वस्त्रार्हा यूयं वनौकसः पक्ष्यादिवदिति भावः । किमत्र निषेधे वा वितर्के " कुत्सायां किं वितर्के च निषेधप्रश्नयोरपि " इति मेदिनी ॥ * ॥ हे उद्वृत्ता राजतो निःशंकचेष्टा यतो गिरिवनेचराः तादृशा यूयमीदृशान्येव वासांसि परिधत्त तर्हि किं कथं राजद्रव्याण्यभीप्सथ, अत्र नाधिकलाभः प्रत्युतेदानीं राजपुरागतानां वो राजापराधतो भयं च भविष्यतीति भावः । अत्र यद्यपि परिधत्तेति सोपहासमेव तत्र च हेतुर्गिरिवनेचरा इति, तथापि वंचनार्थं सत्यमुद्रया वाऽवददिति किमभीप्सथेत्युक्तम् । यद्वा–ईदृशान्येव वासांसि किं परिधत्त, येनोद्वृत्ताः सन्तो राजद्रव्याण्यभीप्सथ, वस्तुतो न परिधत्त न तदभीप्सा च योग्या किन्तूद्वृत्तत्वमेव युष्माकमवशिष्यत इति भावः । अत्र यद्यपि 'परिपूर्णेन सर्वतः' इति, 'श्यामं हिरण्यपरिधिम् ' इत्याद्युक्तानुसारेण तद्वस्त्रं तु सर्वोत्कृष्टमेव । तदुक्तं वृंदावनविहारे पराशरेणापि–" सुवर्णाञ्जनचूर्णाभ्यां तौ तदा भूषिताम्बरौ " इति, तथाप्यासुरदृष्ट्या तत्सौंदर्यं न च दृश्यत इति तथोक्तम् । सैरस्वती[1] तु यथार्थमाह–हे उत्कृष्टवृत्ता नित्यमेव श्रीगोवर्धनवनविहारिणो यूयं किमीदृशान्येव वासांसि परिधत्त, अपि तु परमदिव्यान्येव राजद्रव्याणि अपवित्राणि लीलयापि किमभीप्सथ अपि तु नैवेत्यर्थः । तस्माद्व्याजमात्रमेवेदं याचनमिति भावः । अत्र **चक्रवर्ती**–वृत्तात्सौशील्यादुद्गताः हे दुःशीला इत्यर्थः । परिधत्तेति संभावनायां लोट् । ' वृत्तं पद्ये चरित्रे च त्रिषु ' इत्यमरः ॥ ३५ ॥ जिजीविषा जीवितुमिच्छा । " कुलं जनपदे गोत्रे सजातीयगणेष्वपि । भवने च तनौ भृत्ये " इति शाश्वतः । निःस्वं रंकम् ॥ * ॥ हे बालिशा आशु यात, पलायध्वमित्यर्थः । मैवं प्रार्थ्यं पुनः कदापि प्रार्थनमीदृशं न कार्यम् । घ्नन्ति प्रहरन्ति । लुम्पन्ति छिन्दन्ति । हि यतः संप्रति त्वस्माभिर्बालिशत्वादेव क्षान्तमिति भावः । सरस्वती त्वाह–हे याताशुबालिशाः यातः प्राप्तः आशुश्चपलो बालिशो मूर्खश्चायं रजकलक्षणो यैस्तथाभूताः । यदि जिजीविषा जीवनधारणेच्छा तत्प्रकटनेच्छा तदा मैवं प्रार्थ्यम् । ननु शूरे रजकेऽपि कथं बलं वर्णनीयं तत्राह–हि यतः राजकुलानि राजवंश्या भवद्विधा दृप्तं जनं बध्नन्तीत्यादि । ' जीव–बलप्राणधारणयोः ' । **विश्वनाथस्तु**–बलिं श्यन्ति त्रिपादभूमिं प्रार्थ्य तनुं कुर्वन्तीति बालिशाः । स्वार्थेऽण् । बालिशाः हे परमेश्वराः यदि जिजीविषास्ति मे तर्हि मैवं प्रार्थ्यं बलिरिव तुभ्यं यदि वासांसि ददामि तर्हि मे जीवनं न स्थास्यतीत्यर्थः । कुत इत्यत्र आह–बध्नन्तीति । राजकुलानि अत्रत्या राज

१ वक्तुरन्याऽभिप्रायेऽपि वाग्देवी यथार्थमेवाहेति बोध्यम्, एवमग्रेऽपि यथास्थलं ' वाग्देवी तु सरस्वती तु, गीस्तु ' इत्यादिभिर्बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विकत्थमानस्य कुपितो देवकीसुतः ॥ रजकस्य कराग्रेण शिरः कायादपातयत् ॥ ३७ ॥ तस्यानुजीविनः सर्वे वासःकोशान्विसृज्य वै ॥ दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ॥ ३८ ॥ वसित्वात्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा ॥ शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३९ ॥ ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् ॥ विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥ ४० ॥

लुंपंति निःस्वं कुर्वंति ॥ ३६ ॥ ३७ ॥ वासःकोशान्वस्त्रपुटकान् ॥३८॥३९॥ वायकस्तंतुवायविशेषः । वेषमलंकारम् । चैलेयैर्वस्त्रमयैरनुरूपैराकल्पैर्भूषणैः ॥ ४० ॥

कीयाः पुरुषाः । दृप्तं कंसराजान्निशंकं जनं प्रथमं बध्नन्ति, ततो राजानं विज्ञाप्य घ्नन्ति, ततो लुम्पन्ति तद्गृहं लुण्ठन्ति ॥ ३६ ॥ एवमित्थम् । विकत्थमानस्याविमृश्य भाषिणः । कराग्रेण चपेटप्रदानेन । करस्याग्र्यं सामग्र्यं तेन "अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलंबने समूहे च प्रान्ते सामस्त्यमुख्ययोः ॥ अधिके प्रथमे ज्ञाने गमने प्रापणेऽपि च।" इति निरुक्तिः। कायाद्देहात् । अपाहरत् पृथक्चकार ॥*॥ विकत्थमानस्य विरुद्ध मात्मश्लाघापूर्वकमुच्चैर्जल्पतः । अत्रात्मश्लाघा च—एवंभूतमहाशिल्पिराजात्मीयसेवकोऽहमिति व्यंजनया । सा च स्पष्टं दर्शिता वैशंपायनेन—" अहं कंसस्य वासांसि नानादेशोद्भवानि वै । कामरागाणि शतशो रञ्जयामि विशेषतः ॥ " इत्यादौ । कुपितः कंसपक्षपातात्, विशेषतश्च [1]बहुवचनेन तत्साक्षादग्रजादीन् प्रति दुरुक्तिस्पर्शात् । अत एव खड्गानुकारिणा कराग्रेणैकेनैव, तिष्ठत एव तस्य शिरः कायादपाहरत्, छित्त्वा दूरे चिक्षेपेत्यर्थः । देवकीसुत इत्यत्र कंसेन क्रियमाणया देवक्या यातनया कदर्थितः सोऽयं तदीयानां जनानामौद्धत्यं कथं सहतामिति भावः । यद्वा—दुष्टसंवारार्थं तस्यां जात इत्यर्थः॥ ३७ ॥ तस्य रजकस्यानुजीविनः पुत्रादयः। " कोशोऽस्त्री कुड्मले दिव्ये पात्रे खड्गपिधानके । जातिकोषेऽर्थसंघाते पेश्यां शब्दादिसंग्रहे ॥ गृहे तनौ च पुटके पिटकायामपि " इति हलायुधः ॥ * ॥ वै इति—' च ' इति पाठोऽनुक्तसमुच्चायकः—ते गर्दभादयोऽपि सर्वत इतस्ततो मार्गं दुद्रुवुः । यद्वा—मार्गस्य सर्वा दिशो दुद्रुवुः । अकारप्रश्लेषेऽमार्गमिति वा । मार्गं हित्वा तदितरस्थानं प्रति दुद्रुवुरित्यर्थः । अच्युत इति—तत्स्थानस्थितिमपि व्यञ्जयति। ॥ ३८ ॥ वसित्वा परिधाय । वस्त्रे इति द्वित्वेन दुकूलोत्तरीये उक्ते । यद्वा—कंचुकप्रावाररूपे । कानिचिद्धारणाऽयोग्यानीत्यर्थः ॥ * ॥ आत्मप्रिये पीतनीलवर्णे । वस्त्रे परिधानीयोत्तरीये । आदत्त आ सम्यक् तत्तदिच्छाद्यनुसारेण वस्त्रं दत्तवान्, तदर्थं गृहीतवानिति वा । कानिचिद्योग्यानि अधिकानि च । अत्रायमपि श्रीभगवतोऽभिप्रायः—नूनं कंसेन महोत्सवे स्वपरिकरशोभार्थमेतान्यपूर्वाणि वस्त्राणि धारयितुं दत्तानि,तस्मात्तच्छोभां नाशयंस्तैरहमेव स्वपरिकरशोभां कुर्वन्प्रथमतस्तदुत्साहं नाशयामीति । वस्तुतस्त्वेतानि वस्त्राणि [2]नरकहृतकुमारीवत्तदीयान्येव लीलासौष्ठवाय लीलाशक्त्या तद्वारैव मिलितानीति ज्ञेयम् ॥ ३९ ॥ ततो वस्त्रस्वीकारोत्तरम् । 'आकल्पो वेषभूषणे' इति हैमः ॥ * ॥ इत्थं शिष्टहर्षार्थं दुष्टनिग्रहं कृत्वा शिष्टाननुजग्राहेति वदन्नादौ वायकानुग्रहमाह—ततस्त्विति । ततस्तद्वधाद्वस्त्रपरिधानाच्च । वायकः प्रीतो विष्णुभक्तत्वात् । चैलेयैरेवाकल्पैः कटककुंडलादिभिस्तयोर्वेषं रचितवान् । आकल्पत्वमेव स्थापयति—विचित्रवर्णैर्मणिजटितसुवर्णाकल्पवद्विरच्य स्वगृहादानीतैरित्यर्थः । ननु कुतस्तौ मणिमयनिजालंकारौ त्यक्तवंतौ कुतो वा सोऽपि चैलेयमेवालंकारं दत्त

१ गिरिवनेचराः (३५), बालिशाः (३६) इत्यादिना। २ यथा नरका-(भौमा)-सुरैकत्रिताः कुमार्यस्तथेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः ॥ स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ॥ ४१ ॥ तस्य प्रसन्नो भगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियं च परमां लोके बलैश्वर्यस्मृतींद्रियम् ॥ ४२ ॥ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः ॥ तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ॥ ४३ ॥ तयोरासनमानीय पाद्यं चार्थार्हणादिभिः ॥ पूजां सानुगयोश्चक्रे स्रक्तांबूलानुलेपनैः ॥ ४४ ॥ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो ॥ पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वाम् ॥ ४५ ॥

पर्वण्युत्सवे सितेतरौ श्वेतकृष्णौ गजशावाविव ॥ ४१ ॥ इह लोके परमां श्रियं च बलं चैश्वर्यं च स्मृतिं चेंद्रियं तत्पाटवं च प्रादात् ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥

वांस्तत्राह–अनुरूपतः, मल्ललीलायां गात्रतोदकत्वेन तस्यैवानुरूप्यादित्यर्थः । अनेन तयोः स्वस्वानुरूप्यमपि ज्ञेयम् ॥ ४० ॥ लक्षणं मुद्रा । 'पर्व स्यादुत्सवे ग्रंथौ ' इति कोशात् । सितेतरौ श्वेतश्यामौ ॥ * ॥ नाना बहुविधं लक्षणं प्रकारो ययोस्ताभ्यां वेषाभ्यां छन्दाभ्याम् । द्वित्वं तदनुरूपत्वेन द्विधाभेदात् । विरेजतुरित्यत्र भक्तसेवास्वीकारादिति तत्त्वम् । सितेतरौ श्वेतकृष्णौ । दार्ष्टान्तिकवर्णव्यतिक्रमेण दृष्टान्तवर्णोक्तिः । केवलमलंकारकृतशोभायां तात्पर्येण पूर्वापरतानपेक्षणात् ॥ ४१ ॥ तस्य वायकस्य । बलं शारीरं रूपसौंदर्यं वा । ऐश्वर्यमणिमादि । स्मृतिर्निजस्मरणम् । " बलं गंधरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान्हलायुधे दैत्यप्रभेदे वायसेऽपि च ॥ बलयुक्तेऽन्यलिंगः स्याद्वाब्यालके तु योषिति । " इति मेदिनी ॥ * ॥ तस्य तस्मै । प्रकर्षेणादात् । पूर्वत एव तस्य तद्भक्त्या सारूप्यादीनां तत्स्वामित्वबोधनार्थम् । लोके इति–अत्रैव लोके, किमुत परत्रेत्यर्थः । यद्वा–लोके पश्यत्येवेत्यर्थः । प्रशब्दार्थं व्यञ्जयति–आत्मनः श्रीगोपालरूपस्येति । परमां ब्रह्मादिदुर्लभाम् । श्रियं द्रव्यादिसंपदम् । परमामिति लिंगादिव्यत्ययेनाग्रेऽपि योज्यम् । चकारादैश्वर्यं प्रभुत्वं दानं च त्रिवक्रावत्तत्कालमेव ज्ञेयम् । तत्संभावनार्थमाह–भगवानिति ॥ ४२ ॥ ततो वायकवरदानोत्तरम् । तौ रामकृष्णौ । सुदाम्न इत्यन्वर्थनामवतः । आराद्दूरात् ॥ * ॥ ततस्तदनंतरमिति, चैलेयाकल्पानंतरं पुष्पमालानामपेक्ष्यत्वादित्यर्थः । यद्वा–वायकानुग्रहानंतरं वायकादपि मालाकारं प्रत्याधिकानुग्रहार्थमित्यर्थः । सर्वलोकवत्तस्य पूर्वं स्वयं श्रीकृष्णनिकटप्रयाणं तु तदुपायनार्थापूर्वमालारचनाभिनिवेशेनेति ज्ञेयम् । अग्रे च व्यक्तं भावि । सम्यक् ससंभ्रममासनत्यागादिप्रकारेणोत्थाय भुवि ननाम शिरसा । तदुक्तं वैष्णवे–" भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीम् " इति । श्रीभगवद्दर्शनार्थं निष्क्रान्तपारिकरस्य तन्मालानिविष्टदृष्टेस्तस्य कृपया सहसांतिकसमागमनेन प्रणामस्थानसंकोचापत्तेः, संभ्रमेण तद्विस्मरणाद्वा ॥ ४३ ॥ तयोः रामकृष्णयोः । अर्घार्थमुदकमर्घ्यं, तदितरमर्हणमनुधूपादीनि तैः । सानुगयोः सगोपयोः ॥ * ॥ अर्घ्यं गंधादिद्रव्याष्टकम्, अर्हणं चान्यत्पूजोपकरणं धूपदीपनैवेद्यादि । आदिशब्दाच्चामरवीजननीराजनादीनि । अर्हणशब्दादिशब्दाभ्यां गृहीतानामपि स्रगादीनां पृथगुक्तिस्तत्प्राचुर्यस्य पुनः पूजनस्य चाभिप्रायेण ॥ ४४ ॥ सार्थकं सफलम् । मह्यं मम । वां युवयोः ॥ * ॥ अथ भक्त्या स्तुतिश्च कृतेत्याह—आहेति । प्रेमगद्गदाद्युत्तमप्रकारेणावदत् । न इति बहुत्वं तद्गमनेनात्मनो बहुमानात्, निजपारिकराद्यपेक्षया वा । आगमनेनेति–कृपया वास्तुस्पर्शमात्रेण किमुत साक्षाद्दर्शनदानेनेति भावः। अहो किं वक्तव्यं युष्मदागमनसौभाग्यवतां युवामेव साक्षात्पश्यतामस्माकं जन्म सार्थकमिति । अनेनैव पूर्वपुरुषाः संबंधिनश्च सर्वे भूतभविष्या निस्तीर्णा इत्याह—पावितञ्चेति । नित्यपूज्यानां पित्रादीनां प्रीत्युत्पत्त्या समास

१ ' दृष्ट्वाऽऽरात्समुत्थाय ' इति पाठाभिप्रायेण । २ ' चार्घ्यार्हणादिभिः ' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवंतौ किल विश्वस्य जगतः कारणं परम् ॥ अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ ४६ ॥ न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः ॥
समयोः सर्वभूतेषु भजंतं भजतोरपि ॥ ४७ ॥ तावाज्ञापयतं भृत्यं किमहं करवाणि वाम् ॥ पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥ ४८ ॥
इत्यभिप्रेत्य राजेंद्र सुदामा प्रीतमानसः ॥ शस्तैः सुगंधैः कुसुमैर्माला विरचिता ददौ ॥ ४९ ॥

क्षेमायाभयाय भवायोद्भवाय ॥ ४६ ॥ रजकवधेन वायकानुग्रहेण च युवयोर्विषमदृष्टितयाऽनीश्वरता नाशंकनीयेत्याह । न हि वामिति । अत्र हेतुः समयोरिति । अत्रापि हेतुद्वयम् । सुहृदोरिति जगदात्मनोरिति च । कथं तर्हि वैषम्यं दृश्यते तत्राह । भजंतमिति । कल्पतरोरिवेत्यर्थः ॥ ४७ ॥ ४८ ॥ इत्यभिप्रेत्य

कृत्यता च वृत्तेत्याशयेनाह–पितृदेवेति । हीति प्रमाणं दर्शयति ॥ ४९ ॥ विश्वस्य सर्वस्य । अंशेन प्रकृतिपुरुषादिरूपेण । परं केवलं कारणम् । इह मथुरायाम् । एकोऽत्र चशब्दः समुच्चये, तेन जगतः क्षेमायेति योज्यम् ॥ * ॥ तथा चाक्रूरेण वक्ष्यते–' अद्येश नो वसतये ' इत्यादि । तत्र सर्वत्रैव हेतुः–हे विभो परमेश्वरेति । ननु नंदगोपसुतावावां, कथमीदृशी स्तुतिः क्रियते तत्राह–भवन्ताविति । किल शास्त्रादिप्रसिद्धौ । विश्वस्य सर्वस्य जगतोऽस्थिरस्य महदादेः कारणं पुरुषरूपेण कारणावस्थातः परश्च स्वयं भगवद्रूपेण इह मथुरायामंशेनेति जातावेकत्वम् । अंशैर्गोपयादवादिभिः सहेत्यर्थः । यद्वा–अंशेन जगतः कारणमित्यन्वयः । तथा च वक्ष्यते–" यस्यांशांशांशभागेन विश्वस्थित्यप्ययोद्भवाः " इति । चकाराभ्यां द्वयोरपि प्राधान्यं बोध्यते । तत्र क्षेममिहामुत्र चाभयम् । भव उद्भवो वृद्धिर्वा ॥४६॥ ईश्वरतां तयोराह—रजकेत्यादिना । अत्राविषमदृष्टित्वे । अत्रापि समत्वेऽपि ॥ * ॥ ज्ञानक्रियाशक्तिदातृत्वेनोपकारात् सुहृदोः, अर्थात्सर्वेषां चेतनानां मूलकारणत्वेन जगतः कृत्स्नस्य चेतनाचेतनस्य चात्मनोः । यद्वा–जगत्कृत्स्नं व्याप्य सुहृदोरात्मनोश्च । अपिरुक्तसमुच्चये । भजन्तं ब्राह्मणचांडालादीनामेकतरमाश्रयमाणमात्रम् । भजतोः स्वयमाश्रयतोश्च । अतः समयोर्युवयोर्न विषमा दृष्टिः, किं वा सुहृदोर्जगदात्मनोश्च तावन्न विषमा दृष्टिः । तथा भजन्तमेव भजतोः कृपयतोरपि न सा, यतः समयोः प्राकृते दुःखे सुखे च तुल्ययोः । सूर्ये तमस इव पेचकचक्षुर्ज्योतिष इव च तच्चेतसि तस्यतस्य स्पर्शासंभवात् । स्वरूपभूताह्लादिनिशक्तिविलासविशेषरूपाया भक्तेरेव स्पर्शादिति भावः । तदुक्तं गीतासु–"समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥ " इति । नवमे च–" साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि ॥ " इति । उभयत्र भक्त्यैव न त्वन्येन तच्चित्तं लिप्तं भवतीत्यर्थः । अन्यत्तैः । यद्वा–ईश्वरयोर्युवयोर्भक्तिहीनाधमगृह आगमनं सर्वत्र समतयैवेति दैन्यमात्रादाह–न हीति । अयमनुग्राह्योऽयं नेति विषमा दृष्टिर्नास्ति, यतः सुहृदोर्निरुपाधिकृपाकरयोः । किञ्च–जगदेवात्मा प्रियः ययोः, कुतः भजन्तं भजतोरपि सर्वभूतेषूत्तमाधमेष्वपि समयोर्जगन्नाथत्वाद्दीनवात्सल्याच्चेत्यर्थः । न तव जात्यादिवैषम्यं यतोऽत्रत्येष्वपि मध्ये भजन्तं वायकं मालाकारं माञ्च कृतार्थयसीति भावः ॥ ४७ ॥ तावत्र भवंतौ । भृत्यं माम् एतत्कुर्विति यन्नियुज्यते प्रेर्यत एष इत्यर्थः ॥ * ॥ तौ विषमदृष्टिरहितावपि । ननु मदाज्ञा वेदरूपास्त्येव तत्राह–किमिति । साक्षादागतयोर्युवयोरधुना किं कार्यं तादित्यर्थः । नन्वाज्ञां विनापि पूर्वमातिथ्येन स्वयं तत्कृतमेव तत्राह–पुंस इति । हि यस्माद्भवद्भिर्यन्नियुज्यते हि एव एष एव पुंसो जीवस्य निजजनस्य वाऽनुग्रहः परमानुग्राह्यत्वमिति । भवद्भिरिति बहुत्वं तदीयापेक्षया । अहो अधुना भवदाज्ञया किं चिकीर्षामीति भावः ॥ ४८ ॥ इतोऽनंतरं तावानर्चेत्याह–इत्यभिप्रेत्येति । तन्मतं भगवन्मतम्–एता माला अस्मभ्यं ददात्वयमित्येवंरूपम् ॥ * ॥ अभिप्रेत्येति–लज्जादिना ताभ्यां साक्षादनुक्तमपि मालाकारस्य स्वस्य गृहागमनेन मालाविशेषविषयदृष्ट्या च संभाव्येत्यर्थः । हे राजेंद्रेति महाराजस्यापि ता दुर्लभा इति सूचयति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ ॥ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ ५० ॥ सोऽपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषु च सौहार्दं भूतेषु च दयां पराम् ॥ ५१ ॥ इति तस्मै वरं दत्त्वा श्रियं चान्वयवर्धिनीम् ॥ बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ॥ ५२ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे पुरप्रवेशो नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

इत्येवं विज्ञापयन्नभिप्रेत्य मन्मतं ज्ञात्वा मालाः कृष्णरामादिभ्यो ददौ ॥ ४९ ॥ ५० ॥ ५१ ॥ अन्वयवर्धिनीं अन्वये वंशे वृद्धिमतीमित्यर्थः । अप्रार्थितं श्रीप्रभृतिकं च दत्त्वा ततो निर्जगामेति ॥५२॥ स्वैरं चरन्मधुपुरे रजकं निकृत्य कृष्णः प्रदाय च वरानथ वायकाय ॥ मालाकृतं समनुकंप्य चकार कुब्जामृज्वीं धनुश्च सह सोन्नमयन्बभंज ॥ १ ॥ इति श्रीमद्भागवते दशमस्कंधे पूर्वार्धे टीकायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

यद्वा—तद्भाग्यविशेषं बोधयति, न संबोधयति । शस्तैः सद्वर्णसौकुमार्यादिगुणैर्मंगलकरत्वान्मंगलैरिति वा । विरचिता इति—यासु निजकुटुंबैः सह स्वयं विशेषेण रच्यमानासु तौ सहसैवानुगतौ, ता विरचिताः सतीर्ददावित्यर्थः । पूजायां तु शैघ्र्येण पूर्वसिद्धा राजादियोग्या एव ददाविति भावः । अन्यथा विरचिता इति व्यर्थम् । प्रीतमानसत्वेन दानप्रकारस्तु श्रीपराशरेणोक्तः—"ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः । चारूण्येतानि चैतानि प्रददौ स विलोभयन् ॥" इति । 'मालाम्' इत्येकवचनान्तपाठे भ्रातृभ्यां तुल्यतयैव दीयमानास्वपि मालासु मध्य एवालक्षितं श्रीकृष्णाय सर्वश्रेष्ठामेकां मालां ददावित्यर्थः ॥४९॥ ताभिर्मालाभिः ॥ * ॥ प्रणताय मालादानानंतरं कृताष्टांगप्रणामाय । प्रपन्नाय रक्षरक्षेत्यादिप्रकारेण शरणागताय । यद्वा—प्रथमत एव भक्ताय ॥ ५० ॥ सोऽपि सुदामापि । तस्मिञ्छ्रीकृष्ण एव । तद्भक्तेषु हरिभक्तेषु । भूतेषु स्थावरजंगमेषु ॥ * ॥ ननु के ते वराः, तांश्च परमैकान्ती सुदामा स्वयं वृतवान्न वा तत्राह—सोऽपीति । तस्मिन् कृष्ण एव । ननु कथं पूर्वभक्तिरीत्या संकर्षणेऽपि न वृतवांस्तत्राह—अखिलानां श्रीसंकर्षणादीनां स्वांशानामात्मनि मूलस्वरूपेंऽशिनीत्यर्थः । तेन सा च सिद्ध्येदिति विविक्तपुरुषार्थतयेति भावः । पूर्वं तु समयुग्मतावर्णनं, तदग्रजतया तस्यापि गौरवलीलासारादेकमेव द्विधा प्रकाशमानं तत्त्वमेकपरमैश्वर्यस्याश्रययोग्यं भवत्येवेति प्रशंसातात्पर्येणेति भावः । परां श्रेष्ठां निरुपाधिदयाम् । आद्यश्चकारस्त्वर्थे, द्वितीय उक्तसमुच्चये ॥ ५१ ॥ इतीत्थं प्रार्थितः । तस्मै सुदाम्ने । इत्यर्थ इति—यावद्वंशस्तावद्वृद्धिमतीं न तु वंशं वर्द्धयतीत्येवंरूपां सदावंशसत्त्वापत्तेरित्याशयः । भक्तवात्सल्यमाह—अप्रार्थितमिति । ततो मालाकारगृहात् ॥ (५२) ॥ अध्यायार्थं वर्णयन्नग्रिमाध्यायार्थं सूचयति—स्वैरमिति । निकृत्य छित्त्वा 'कृती—छेदने' । ऋज्वीं सरलाम् । बभञ्ज तुत्रोट ॥ * ॥ इति—एतदप्रार्थितान् । ननु कथं वदान्यशिरोमणिरसौ स्वयमन्यान्वरान्न ददौ तत्राह—श्रियञ्चेत्यादि,—द्वितीयचकारोक्तं समुच्चिनोति । अन्यत्तैः । अन्वयवर्धिनीमितीनन्तपाठ एव तेषां संमतः । मतुपा व्याख्यातत्वात् । वर्धनं वर्धः अन्वयवर्धोऽस्यामस्तीति । तत्र वंश इति सप्तम्यन्तासमस्तपाठे तद्वंशेऽनवच्छिन्नां श्रियमित्यर्थः । समस्तपाठे वंशवृद्धिश्चेत्यर्थः । तदुक्तं श्रीपराशरेण—"बलहानिर्न ते सौम्य धनहानिरथापि वा । यावद्दिनानि तावच्च न विनङ्क्ष्यति संततिः ॥ भुक्त्वा च विपुलान्भोगांस्त्वमन्ते मत्प्रसादतः । ममानुस्मरणं प्राप्य दिव्यलोकमवाप्स्यसि ॥ धर्मे मनश्च ते भद्र सर्वकालं भविष्यति । युष्मत्संततिजातानामायुर्दीर्घं भविष्यति ॥ नोपसर्गादिकं दोषं युष्मत्संततिसंभवः । अवाप्स्यति महाभाग यावत्सूर्यो भविष्यति ॥" इति । 'बलमायुः' इति पाठे च तत्तत्सर्वं श्र्याद्यन्तर्भूतमेव ज्ञेयम् । अग्रजेन सह वरान्दत्त्वा तेनैव सह निर्जगामेत्यर्थः । **विश्वनाथस्तु**—श्रीबलादीनां तस्य ग्रहीतुमनपेक्षत्वेऽपि स्वस्य दातुमपेक्षत्वाद्भक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ ॥ अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनाम् ॥ विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्रसप्रदः ॥ १ ॥ का त्वं वरोर्वेतदु हानुलेपनं कस्यांगने वा कथयस्व साधु नः ॥ देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते न चिराद्भविष्यति ॥ २ ॥ सैरंध्र्युवाच ॥ दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि ॥ मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति ॥ ३ ॥

द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा ॥ वधस्तद्रक्षिणां कंसारिष्टं रंगोत्सवादि च ॥ १ ॥ अंगविलेपाश्चंदनादयः गृहीतान्यङ्गविलेपानां भाजनानि यया ताम् । रसप्रदः सुखप्रदः ॥ १ ॥ हे अंगने हे वरोरु इति सोपहासं संबोध्यापृच्छति त्वं का एतदनुलेपनं कस्य वा उ ह इति निपातौ भ्रूविक्षेपयुक्ते वितर्के । अस्मत्सेवा सद्यः फलत्येवेत्याह । न चिरादिति ॥ २ ॥ तिस्रो ग्रीवारःकट्यो वक्रा इति त्रिवक्रेति नाम यस्याः सा अनुलेपनकर्मणि कंससंमता तेनाङ्गीकृता। मद्भावितं मया अनुष्ठितं...

वात्सल्येन ददाविति ज्ञेयम् ॥ ५२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्द्धे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ कुब्जाया उन्नमनमृज्वीकरणम् । भिदा भेदनम् । तद्रक्षिणां धनूरक्षकाणाम् । कंसस्य अरिष्टं मरणाचिह्नावलोकनम् "अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणाचिह्ने च" इति मेदिनी । स्वामिचरणैरिरष्टपदं लक्षणया तद्दर्शनपरं प्रयुक्तम् । आदिना श्रीकृष्णस्य पुरान्निर्गमो ग्राह्यः (१) । अथ मालाकारगृहान्निर्गमोत्तरम् । माधव इत्युक्त्या तस्या मांशत्वं सूचितम् । युवतीं तरुणीम् । वराननामिति पृच्छायोग्यतामाह ॥ * ॥ रसं कुब्जायाः शृंगारं, सहचरेषु हास्यं सर्वत्राद्भुतं प्रददातीति सः । इयं स्वरूपभूतायाः साक्षाद्भूशक्तेः सत्यभामायाः अंशभूता अस्या एव विभूतिः पृथिवी प्रसिद्धा । अतस्तया सहैक्येनेयं परःसहस्रदुष्टासुरभारभुग्नत्वं स्वकुब्जत्वेन दर्शयन्ती स्वीयं गंधगुणं चंदनादिमिषेणोपहरन्ती पृथिव्येव परमभक्त्या प्रीत्या पथि संगताऽभूत् । भगवांश्च सानंदमेव गंधं गृहीत्वा स्वीयं माधुर्यमेव रसं ददानो–भो मद्भक्ते पृथिवि संप्रत्येव कंसादिस्वभावान्मयापहृतानेव विद्धि, तदधुनैव त्वं स्वस्था भवेति तामाश्वासयन्नानंदमग्नामृज्वीं चक्रे इत्येवैतत्प्रकरणतत्त्वमिति **केचिदाहुः । तोषिणी** तु–राजपथेनेति तास्मिँल्लोकसुखदातृत्वं दर्शयति । युवतीमिति, वैराननामिति पदद्वयेनान्यत्सौष्ठवं त्वस्तीति बोधितम् । यान्तीं कंसगृहं गच्छन्तीम् । तथा च तस्या एवोक्तिः श्रीहरिवंशे–'राज्ञः स्नानगृहं यामि' इति । प्रकर्षेण साकूततया हसन् । स्वभावत एव रसप्रद इति ॥ १ ॥ साधु निष्कपटम् । ततोंगविलेपदानात् ॥ * ॥ साधु सभ्यं, वा लज्जया यदुक्तिवैकल्यं तद्भिनैव, वा यदि स्यादङ्गविलेपनमस्मद्गात्रयोग्यम् । तथा च तत्रैव–"तामुवाच हसन्तीं तु कृष्णः कुब्जामवस्थिताम् । उभयोर्गात्रसदृशं दीयतामनुलेपनम् ॥" इति । किञ्च–"वयं विदेशातिथयो मल्लाः प्राप्ता वरानने । द्रष्टुं दिव्यं धनुर्गेहं राष्ट्रं चैव महार्द्धिमत् ॥" इति । संबोधनमुपहासेन–वरावूरू यस्या इति । न तावेव केवलं तादृशावपि त्वंगं मूर्तिरेव प्रशस्तं यस्या अस्तीति सर्वे गुणाः संत्येव, तच्चैकमेवात्र, बहुत्वं दोष इत्यभिप्रायात् ॥ २ ॥ "चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी । प्रसाधनोपचारज्ञा सैरंध्रीत्यभिधीयते ॥" इति कात्यः । अमरस्तु–"सैरंध्री परवेश्मस्था स्ववशा शिल्पकारिका" इत्याह । दासी परिचारिका । मद्भावितं मन्निष्पादितं–चंदनादि । भोजपतेः कंसस्य । अन्यतमोऽन्येष्वपि कः श्रेष्ठः, न कोऽपीत्यर्थः ॥ * ॥ त्रिवक्रनामेति पुंवद्भाव आर्षः । हि प्रसिद्धौ । तथा च तत्रैव–"कुतश्चागम्यते सौम्य यन्मां त्वं नावबुद्ध्यसे । महाराजस्य दयितां नियुक्तामनुलेपने ॥" इति । मया भावितं साधितम् । तत् अनुलेपनम् । युवामिति सामान्योक्त्या श्रीरामेऽपि तदर्हताप्राप्तिस्तत्संबंधेनैवाभिप्रेयते । हे सुंदरेति–तस्यैव संबोधनेन तदेकतात्पर्यात् । युवां विनान्येषु बहुषु श्रेष्ठो यः सोऽपि कोऽर्हति । यद्वा–अन्यतमः युवाभ्यामत्यन्तभिन्नः, इति युष्मदीयाः सखायोऽप्यर्हन्तीति । अन्यत्तैः । यद्वा–तवाहं दास्यस्मीति भावविशेषेणादावुक्त्वा पश्चात्तत्प्रेम्णोत्तरमाह । **विश्वनाथस्तु–**दास्यस्मीत्यन्यस्य संबंधिपदस्याऽनुपादाना

१ कामिनीमिति पा० । २ हरिवंशे, एवमग्रेऽपि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनम् ॥ ४ ॥ ततस्तावंगरागेण स्ववर्णेतरशोभिना ॥ संप्राप्तपरभागेन शुशुभातेऽनुरंजितौ ॥५॥ प्रसन्नो भगवान्कुब्जां त्रिवक्रां रुचिराननाम् ॥ ऋज्वीं कर्तुं मनश्चक्रे दर्शयन्दर्शने फलम् ॥६॥ पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्तानपाणिना ॥ प्रगृह्य चिबुकेऽध्यात्ममुदनीनमदच्युतः ॥ ७ ॥ सा तदर्जुसमानांगी बृहच्छ्रोणिपयोधरा ॥ मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ॥ ८ ॥

पनसाधनक्रियायां कंसस्य बहुमता दास्यस्मि ॥ ३ ॥ रूपं चांगसौष्ठवं पेशलं च सौकुमार्यं माधुर्यं च रसिकता हसितं चालापाश्च वीक्षितं च तैर्धर्षितात्मा मोहितचित्ता सा ददौ । सांद्रं घनम् ॥ ४ ॥ स्ववर्णेतरशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णस्तेन शोभितं शीलं यस्य तेन । संप्राप्तपरभागेन संप्राप्तः परो नाभेरुपरितनो भागो येन सः । संप्राप्तः परभागः शोभातिशयो येनेति वा । तेनानुरंजितौ ॥ ५ ॥ स्वदर्शने सद्यः फलं दर्शयन् ॥ ६ ॥ तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीड्य द्वे अंगुल्यावुत्ताने उन्नते यस्मिन्पाणौ तेन चिबुके मुखस्याधोभागे धृत्वाऽध्यात्मं देहमुन्नमयामास ॥ ७ ॥ तदैव ऋजु समानमंगं यस्याः ।

त्प्रत्यासत्त्या तवेति द्योतनम् । तवेत्युक्तेऽनृतं भावव्यक्तिश्च स्यादिति तन्न प्रयुक्तम् । सुंदरेत्येकवचनेनैकस्मिन्कृष्ण एव स्पृहा । युवामिति द्विवचनेन स्वीयभावस्यावहित्था च द्योतिता । हि एवार्थे । अनुलेपनकर्मण्येवाहं कंससंमता न त्वन्यत्र कुब्जत्वदोषादिति स्वबुद्धिर्ज्ञापिता ॥ ३ ॥ उभयोः रामकृष्णयोः । 'सांद्रं वने घने मृदौ' इति मेदिनी ॥ * ॥ माधुर्यं स्वभावतो मनोहरत्वम् "किमेतदद्भुतमिव वासुदेवेऽखिलात्मनि" इत्यादि । तच्च रूपं पेशलं सौंदर्यसौष्ठवयुक्तम् 'वाचः पेशैः' इतिवत् । तथा तत्रैव हसितेनालापेन वीक्षणेन च विशेषत इत्यर्थः । रूपादिभिरिति—श्रीकृष्णस्यैवेति ज्ञेयम् । तत्रैव भावस्य स्वयमभिव्यज्ययिष्यमाणत्वात् । उभयोरपि योग्यं तदिच्छया ददौ समर्पितवती । तथा श्रीविष्णुपुराणे—"श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम् । अनुलेपञ्च प्रददौ गात्रयोग्यमथोभयोः ॥" इति । अत्र दानं हस्ते समर्पणं, गात्रे लेपनं वा । पूर्वत्र सांद्रमिति तत्संज्ञकम् । ततः स्ववहनयोग्येन स्वल्पेनापि सहचरवृंदसहितयोः पर्याप्तिरभूदिति बोध्यते । उत्तरत्र सर्वांगव्याप्तमित्यर्थः । उभयत्र मालाकल्पानुपघातपूर्वकानुलेपनं ज्ञेयम् । **विश्वनाथस्तु**—रूपेण सौंदर्येण पेशलैः संमोहनकर्मणि दक्षैर्माधुर्यादैर्धर्षितचित्ता । 'दक्षे तु चतुरपेशलपटवः' इत्यमरः ॥ ४ ॥ ततोऽनुलेपेन । तृतीयार्थे तसिः । तौ रामकृष्णौ । प्रसिद्धार्थत्यागे कारणाभावमालक्ष्याह—परभागः शोभातिशयः "परभागोऽतिसौंदर्येऽन्यांशे भक्ते महेश्वरे" इति धरणिनिरुक्तौ । अनुरञ्जितौ स्वकांत्यनुकूलशोभां प्राप्तौ ॥ * ॥ अनुरञ्जितौ पत्त्रभंगरचनाविधिना श्रीगंडवक्षोभुजादिष्वनुलिप्तौ सखिभिस्तथैव स्वयम् ॥ ५ ॥ दर्शयन् भाविकंसहनने निजशक्तिप्रकटनेन लोकान्प्रत्याययन्निति भावः ॥ * ॥ कुब्जामत एव त्रिवक्रां तत्संज्ञकाम् । ऋज्वीं कर्तुमिति—अनृज्वीम् ऋज्वीं कर्तुमित्यर्थः । ऋज्वीकरणे हेत्वंतरम्—रुचिराननामिति । सद्यः फलमापातफलं विशेषफलस्य तयैव 'एहि' इत्यादिना प्रार्थयिष्यमाणत्वात् ॥ ६ ॥ तस्याः कुब्जायाः । उन्नमयामास ऊर्ध्वमाकृष्टवानित्यर्थः । 'पादाग्रं प्रपदम्' इत्यमरः । 'अधस्ताच्चिबुकम्' इत्यपि । अधरोष्ठयोरधस्तादित्यर्थः ॥ * ॥ सद्यः फलं तु मल्ललीलोचितग्रहणप्रावीण्यपूर्वकमेवेत्याह—द्वे अंगुल्यौ मध्यमातर्जन्यौ उत्ताने उपरिकृताग्रभागे यत्र तेन पाणिना दक्षिणेन, वामेन पृष्ठावस्तंभनं ज्ञेयम् । आत्मानं जीवमधिकृत्य वर्तमानमध्यात्मं देहम् । इति जीवभागपर्यंतं तद्देहस्य प्रारब्धवशेनापरिहार्यं कुब्जत्वमिति सूचितम् । अच्युतो निजलीलाविशेषादच्युत इति । अत एव तथा ग्रहणमन्यथेच्छामात्रेणैव तत्तत्संभवात् ॥ ७ ॥ सा कुब्जा । तदैवोन्नमनक्षण एव । श्रोणिशब्दो यद्यपि 'कटिः श्रोणिः ककुद्मती' इत्यमरोक्तेः कटिवाचकस्तथापि नितंबं लक्षयतीह । 'स्तनमेघौ पयोधरौ' इति हैमः । मुकुंदस्पर्शने नैतदसंभावितमित्याह—मुकुंदेति ॥ * ॥

---

१ कुब्जा— ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो रूपगुणौदार्यसंपन्ना प्राह केशवम् ॥ उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया ॥ ९ ॥ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे ॥ त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ॥ १० ॥ एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः ॥ मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ॥ ११ ॥ एष्यामि ते गृहं सुभ्रूः पुंसामाधिविकर्शनम् ॥ साधितार्थोऽगृहाणां नः पांथानां त्वं परायणम् ॥ १२ ॥

बृहत्यौ श्रोणी पयोधरौ च यस्याः सा । मुकुंदस्पर्शनादिति मुख्यं कारणम् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ आधिविकर्शनं मनःपीडाशमनम् । कंसवधेन स्वयं

ऋजूनि वक्रतापगमात् । अत एव कुब्जतया वक्षोभागादेः स्वल्पत्वादिना पूर्वमसमानानि अधुना तु समानं योग्यं मानं परिमाणं येषां तथाभूतान्यंगानि यस्याः । तदेव दर्शयति—बृहदिति । न केवलमेतावदेव, प्रमदानां मध्ये उत्तमा च बभूव । भगवदंगसंगानुरूपोत्कर्षमपि लेभ इत्यर्थः । अतोऽत्र मुकुंदस्पर्शनमेव मुख्यं कारणं, ग्रहणादिपरिपाटी तु विनोदमात्रत्वाद्गौणमिति भावः । मुकुंदेति कैमुत्यमेव हेतुगर्भम्—यो निजांशेनापि, तेन च चिंत्यमानमात्रेणाप्यशेषसंसारदोषदूरीकरणपूर्वकं सारूप्यादिमुक्तिमपि ददाति, तस्य साक्षाद्भूतस्य कियदिदमिति भावः ॥ ८ ॥ ततः प्रमदोत्तमाभावानंतरम् । उत्तरीयांतं दुकूलप्रान्तम् । स्मयंती ईषद्धसंती । जातहृच्छयोद्दीप्तकामा ॥ * ॥ ततस्तत्संस्पर्शनादेव रूपगुणयोरौदार्यं महत्त्वं, तेन संपन्ना सतीति प्रमदोत्तमात्वमेव दर्शितमतो योग्यताप्राप्त्या जातहृच्छयाविर्भूतकामा । स्मयो मदः स्मितं वा, तत्सहितं यथा स्यात्तथा । 'स्मयंती' इति पाठे स्मयस्माना [1] प्रकर्षेण कटाक्षवीक्षणादिना आह । तदुक्तं श्रीपराशरेण—"विलासललितं प्राह प्रेमगर्भभरालसम् " इति ॥ ९ ॥ वीरेति रतियुद्धशूर । इहाधुना । त्वया कारणेन उन्मथितं विलोडितं चित्तं यस्याः । पुरुषेषु श्रेष्ठत्वात्त्वां विनाऽन्यो न मे रोचत इति संबुद्ध्यभिप्रायः ॥ * ॥ वीरेति—निजाभावोद्दीपनगुणविशेषविशिष्टतया संबोधयति श्लेषेण, हे अभीष्टपूरणसमर्थ मम गृहं त्वमेहि । ननु निजसंगिन इमान्विहाय कथमेकाकी आयायामिति चेत्तत्राह—त्वमेतेऽहं च सर्वे यामः । ननु दिनांतरे आगमिष्यामस्तत्राह—नेति । इह राजमार्गे त्यक्तुं न शक्नोमि वासस्थानानिश्चयेन पुनर्दुष्प्रापत्वात् । अतो गृहमेव नेष्यामीत्यर्थः । यद्वा—तर्हि ज्येष्ठोऽयं सखीनामेको वा नीयतां तत्राह—नेति । त्वय्येव मदपेक्षा न त्वस्मिन्निति भावः । नन्वीदृशमत्र ते धार्ष्ट्यं न योग्यं तत्राह—त्वयेति । अतो मम न कोऽपि दोष इति भावः । अत एव प्रसीद स्वयमेवानुग्रहं कुरु । त्वत्प्रसादे सति धार्ष्ट्यादपि न बिभेमीति भावः । तत्र हेतुमाह—पुरुषर्षभ हे पुरुषोत्तमेति । किञ्च—निजपुरुषर्षभत्वापेक्षया त्वयापि नाहं त्यक्तुं योग्येति भावः । **विश्वनाथस्तु**—हे वीरेति—अन्ये धर्मवीराद्या भवंति त्वं तु स्त्रीजनधर्मध्वंसवीरो भवसीति भावः । ननु त्वमेहीत्यादिना भोजनार्थं मां निमंत्रयसि किं तत्राह—न त्वां त्यक्तुमित्यादि,—त्वदुक्त्या तु लोका इह राजमार्गे हसंतोऽन्यथा संभावयंति तस्मादेवं मा वादीस्तत्राह—त्वयोन्मथितेति । तर्हि त्वया मच्चित्तं कथमुत्कर्षेण मथितमिति तवैवायं स्पर्शदोषो न ममेति भावः । सतम्यर्थे षष्ठी ॥ १० ॥ एवमित्थम् । अनुगानां गोपानाम् । ह स्फुटम् । तां कुब्जाम् ॥ * ॥ रामस्य पश्यतः, अनुगानां च पश्यतां तत्तत्साक्षात्स्त्रिया कामिन्या याच्यमानः रहस्यं किमपि प्रार्थ्यमानः, अत एव च तस्य तेषाञ्च मुखं वीक्ष्य प्रहसन्कौतुकेनोच्चैर्हसन् । तथा चोक्तं श्रीवैशंपायनेन—" तौ जातहर्षावन्योऽन्यं सतामाक्षेपमव्ययौ । वीक्ष्यमाणौ प्रहसितौ कुब्जायाः श्रुतविस्तरौ ॥" इति । ह स्फुटमेवोवाच । तथा तच्च श्रीरामादीन्प्रति एतां वञ्चयामीति व्यंजनाय, तां प्रति तु प्रतिजानाम्येवैतादिति बोधनायेति भावः । अत्र **विश्वनाथः**—मुखं वीक्ष्येति—भो आर्य भोः सखायश्च किमधुना युष्माकं मुखानि हास्यार्णवेन विप्लुतानि, पश्यत नेयं स्त्रीमूर्तिः किन्तु हास्यरस एव युष्मान्कौतुकिनो ज्ञात्वा मेलितुमुपक्रमते, मथुरापुर्या हास्यवैदग्धीयं वा स्वं परिचाययतीति भावः ॥ ११ ॥ पुंसां तरुणानाम् । किञ्चिदत्यावश्यकं झटिति करणीयं मेऽस्तीत्याह—कंसवधेनेति । त्वं तु सर्वथाऽत्याज्य

१ 'सस्मयं जातहृच्छया' इति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः ॥ नानोपायनतांबूलस्रग्गंधैः साग्रजोऽर्चितः ॥ १३ ॥ तद्दर्शनस्मरक्षोभादात्मानं नाविदन्स्त्रियः ॥
विस्रस्तवासःकबरवलया लेख्यमूर्तयः ॥ १४ ॥ ततः पौरान्पृच्छमानो धनुषः स्थानमच्युतः ॥ तस्मिन्प्रविष्टो ददृशे धनुरैंद्रमिवाद्भुतम् ॥ १५ ॥
पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ॥ वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥ १६ ॥

साधितोऽर्थः सुहृदा प्रयोजनं येन सः । अगृहाणामकृतदाराणां पांथानां प्रवासिनां परमयनमाश्रयस्त्वम् ॥ १२ ॥ मधुरया गिरा तां प्रस्थाप्य व्रजन्वणिक्पथैर्वणिग्भिरने
कोपायनादिभिः पथि अर्चितः ॥ १३ ॥ लेख्याश्चित्रन्यस्ता इव मूर्तयो यासां ताः ॥ १४ ॥ धनुषः स्थानं धनुर्मखशालां पृच्छमानः पृच्छन् ॥ १५ ॥ प्रसह्य

त्याह—अगृहाणां वनवासिनाम् । पांथानां मार्गेत आगतानाम् । नोऽस्माकम् । अनेनासंगानामीश्वराणामस्माकं भक्ता एव पूजादिनाऽऽश्रयीभूता इति दर्शितम् ॥ * ॥ कुब्जां प्रति प्रियोऽयं मां स्वीकरोतीति, राम
दीन्प्रति तु ग्राम्यां स्त्रियमिवायं कृष्णो वञ्चयतीति द्योतयन्नाह—एष्यामीति । पुंसामिति बहुवचनेन तां प्रति परिहासः । साधितार्थ इति कंसवधाद्यावश्यककृत्यं कृत्वा निश्चितो भूत्वेति समयसंकेतश्च व्यञ्जितः । अगृहाणाम्
“ न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ” इति न्यायेनाकृतदाराणाम् । नोऽस्माकमिति राजपुत्रत्वादात्मन आदरेण खल्वेकत्वेऽपि सा बहुवचनं मन्यते स्म । पांथानामिति—गोकुले स्वनगरे मम गोप्योऽनुरागिण्यो वतते
तथाऽत्र पुर्यामपरिचितायां न काश्चन, केवलं त्वमेकैवानुरागिणी प्राप्तेति तां प्रत्यनुरागश्च व्यंञ्जितः । रामादींस्तु बहुवचनेनाधिपदेन च प्रयुक्तेन कृष्ण एनामस्वीकुर्वन्सामान्यवनितालक्षणगालिप्रदानेनैनामनभिज्ञां तिरस्करो
तीति प्रत्याययामास ॥ १२ ॥ तां कुब्जाम् । वणिक् वणिज्या पंथाः परंपरागतमार्गो येषां ते तथा । “ वणिक् स्त्रियां वणिज्यायां वैश्ये च कारणांतरे ” इति धरणिः ॥ * ॥ नानाविधैरुपायनरूपैस्तांबूलादिभिश्च
उपायनगृहीतानामपि तांबूलादीनां पृथङ्निर्देशस्तदानीमुपादेयानां तेषां प्राचुर्यविवक्षया, स्रजो रत्नमुक्तादिमालाः गंधः सुगंधिचंदनादिपंकोऽगुर्वादिसाधितद्रवविशेषः, विचित्रवर्णचूर्णादयश्च । साग्रज इत्युपलक्षणं सानुगोऽपि ।
श्रीयमुनांतिके पुर्यंते वर्तमानत्वादादौ विप्रैः कृतमधुना चांतर्वर्तमानैर्वैश्यैरर्चनमुक्तं, क्षत्रियाश्च प्रायो मध्ये वसंतीति तत्कृतं नोक्तमिति ज्ञेयम् । **विश्वनाथः**—वणिक्पथैर्वैष्णवैर्वणिजां वर्त्मवर्तिभिर्नानाजातीयैरित्याह ॥ १३ ॥
तस्य तयोर्वा दर्शनेन यः स्मरक्षोभः कामोत्थानं तस्माद्विस्रस्तानि स्खलितानि वस्त्रकेशपाशकटकानि यासां ताः ॥ * ॥ वणिक्पथेष्वपि स्त्रीणां तु कोमलस्वभावत्वादाधिको भावो जात इत्याह—तादिति । स्त्रियो वणिग्यो
षितः । तस्य दर्शनेन यः स्मरः स्मरणमात्रेणापि जायमानः प्रेमविलासरूपः कामस्तेन क्षोभो धैर्यक्षयो मोहो वा तस्माद्धेतोरात्मानं देहं देहिनं वा नाविदन् । का वयं क्व वर्तामह इत्यनुसंधातुं न शक्ता इत्यर्थः । अत एव
विशेषेण स्रस्तानि वासआदीनि यासां ताः । तत्र वासोवलयविस्रंसः स्मरवेगेन सद्य एव कार्श्याद्यापत्तेः, केशविस्रंसस्तु गात्रमोटनकंपाद्यामर्दात् । किञ्च—लेख्यवन्मूर्तयो, बभूवुरिति शेषः ।
विश्वनाथस्तु—तेषां स्त्रियस्तु परमभक्ताः “ चक्षूरागः प्रथमं चित्तासंगस्ततोऽथ संकल्पः । निद्राछेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥ उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः ।” इति
कालक्रमोद्भविष्णूरपि स्मरदशाः सद्य एव प्रापुरित्याह—तद्दर्शनेति । आत्मानं नाविदन्निति का वयं क्व तिष्ठामः किं कुर्म इति ज्ञातुमसमर्था इति त्रपानाशांता दशा उक्ताः । विस्रस्तेति—उन्मादोऽ
ष्टमः । लेख्याश्चित्रन्यस्तमूर्तयो यासां ता इति मूर्च्छा नवमी । दशमीत्वमंगलत्वात्प्रेमवतीनां प्रायो न भवतीति प्राञ्चः ॥ १४ ॥ ततः स्त्रीभ्यो दर्शनदानोत्तरम् । तस्मिन् धनुःस्थाने । ऐन्द्रमिवानेकवर्णम् ॥ * ॥
तत इति सार्धकम् । भक्तजनानुग्रहानंतरं ज्ञानाद्यैश्वर्यात्सर्वथा च्युतिरहितोऽपि लीलाकौतुकावेशेन धनुःस्थानं पृच्छन्निति योज्यम् । ऐन्द्रं धनुरिवेति रत्नादिजटितत्वेन विचित्रवर्णत्वाद् बृहत्तरत्वाच्च, अत एवाद्भुतम् । तथा च
हरिवंशे—“स तयोर्दर्शयामास तद्धनुः स्तंभसन्निभम् । अनारोप्यमसंभेद्यं देवैरपि सवासवैः ॥” इति । पुरुषैः कंसभृत्यैः । अर्चितत्वादेव परमर्द्धिर्भूषणादिमहाधनसंपत्तिस्तद्वत् ॥ १५ ॥ परमर्द्धिमद्बहुभारम् “समृद्धौषाधिभारेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करेण वामेन सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यताम् ॥ नृणां विकृष्य प्रबभंज मध्यतो यथेक्षुदंडं मदकर्युरुक्रमः ॥ १७ ॥ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ॥ पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् ॥ १८ ॥ तद्रक्षिणः सानुचराः कुपिता आततायिनः ॥ ग्रहीतुकामा आववुर्गृह्यतां वध्यतामिति ॥ १९ ॥ अथ तान्दुरभिप्रायान्विलोक्य बलकेशवौ ॥ क्रुद्धौ धन्वन आदाय शकलैस्तांश्च जघ्नतुः ॥ २० ॥ बलं च कंसप्रहितं हत्वा शालामुखात्ततः ॥ निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः ॥ २१ ॥ तयोस्तदद्भुतं वीर्यं निशाम्य पुरवासिनः ॥ तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ ॥ २२ ॥ तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान् ॥ कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः ॥ २३ ॥

बलात् ॥ १६ ॥ निमिषेणातिशीघ्रम् । मदकरी मत्तहस्ती ॥ १७ ॥ १८ ॥ गृह्यतां वध्यतामिति वदंतो जिघृक्षव आवृतवंतः ॥ १९ ॥ न केवलं क्रुद्धौ किं तु भग्नस्य धनुषः शकले गृहीत्वा जघ्नतुश्चेति ॥२०॥ परतः प्रातरेव गंतव्यमिति शालामुखादेव पुनर्निष्क्रम्य ॥ २१ ॥ तेजः प्रभावम् । प्रागल्भ्यं धृष्टताम् ॥२२ ॥ शकटं

वृद्धावृद्धिः प्रकीर्तिता'' इति निरुक्तिः ॥ * ॥ वार्येत्यर्द्धकम् । नृभिस्तद्रक्षिभिः क्रोधात्, तथा सर्वैरपि कंसभीत्या स्नेहाद्वार्यमाणोऽपि ॥ १६ ॥ ज्यया मौर्व्या सहितं सज्यम् । अनिमिषेण निश्चलपक्ष्मणेत्यर्थः । 'ज्या मातरि वसुधायां मौर्व्याम्' इति मेदिनी ॥ * ॥ सलीलं सावहेलं, चकारादस्य सर्वैरप्यन्वयः । तथा निमिषेणेत्यस्यापि । उद्धृतमुत्थापितम् । पश्यतां नृणां तत्र रक्षिणां क्रुद्धानामन्येषां च यथासंभवं मल्लानामिति ज्ञेयम् । अनादरे षष्ठी । अकारप्रश्लेषेणानिमिषेण निर्निमेषतया पश्यतामिति वा । अत्र **विश्वनाथः**—नृणां पश्यतां प्रबभंजेति, हंहो लोकाः श्रुतचरमहिमद्रढिमकमेतदेव धनुः पूज्यते राज्ञा, इदं तु मत्पाणिस्पर्शमात्रेणैव विदीर्णं घुणजीर्णमेवोपलब्धमिति प्रोवाचेति ज्ञेयम् ॥ १७ ॥ यं शब्दम् ॥ * ॥ न च तन्मृदुलं मंतव्यं किन्तु वज्रसारतोऽपि परमतिकठिनमित्याशयेनाह—धनुष इति । प्राक् खमंतरिक्षं पूरयामास शब्दस्याकाशगतत्वात् । ततो रोदसी द्यावाभूमी महत्तरत्वेनोर्द्ध्वाऽधोगामित्वात् । ततश्च दिशः सर्वाः, एवं सर्वानपि लोकानपूरयदित्यर्थः । कंसो जगद्भीषणोऽपि उपाधिक्येन त्रासं प्राप्तः, निर्घातकोटिनिष्ठुरतच्छब्दादेव, विचारतश्च तस्मात्सद्यो मृत्युप्राप्तिमननात् ॥ १८ ॥ तद्रक्षिणो धनूरक्षिणः । आततायिनः आयुधान्यातत्याऽऽगच्छंतः ॥ * ॥ सानुचरं श्रीरामादिसहितम् । आततायिनो गृहीतायुधाः । गृह्यतां राज्ञे समर्पणाय जीवन्नेव ध्रियतां, पश्चाद्वध्यतां पाशैर्यंत्र्यतामिति, एषा महामदेन बहलोक्तिः । वाग्देवीमते तु—अस्मद्विधो जनो गृह्यतां बध्यतामिति ज्ञेयम् ॥ १९ ॥ अथ निजाऽऽवरणोत्तरम् । तान् धनूरक्षकान् ॥ * ॥ दुरभिप्रायान् दुष्टभावान् । धन्वनो धनुषः । शकले खंडे द्वे । तान्विलोक्य क्रुद्धौ, जघ्नतुश्चेति वाक्यभेदात्तानित्यस्यापुनरुक्तता ॥ २० ॥ परतोऽग्रे । इति हेतोः । शालामुखाद्धनुर्गृहद्वारात् । बलं चेति पूर्वान्वयि । पुरसंपदो हर्म्यादिशोभाः ॥ * ॥ कंसेन प्रहितं प्रेषितं बलं सैन्यम्, श्लेषेण कंसस्य सामर्थ्यमिवेति । ततस्तस्मादेवेति शालामुखविशेषणम् । पुरसंपदो निरीक्ष्य हृष्टौ सन्तौ पुनरपि चेरतुः लीलया पुर्य्यन्तर्वव्रेमतुः ॥ २१ ॥ तयोः रामकृष्णयोः । तत् धनुर्भंगबलहननरूपम् । रूपं सौंदर्यम् 'रूपं स्वभावे सौंदर्ये' इति मेदिनी ॥ * ॥ एवं दुष्टदमनादिना शिष्टानामानंदो नितरां जात इत्याह—तयोरिति । तत् तत्रत्यम् । वीर्यं धनुर्ग्रहणादौ पराक्रमम् । तेजः सर्वाभिभवनस्वभावम्, प्रागल्भ्यमकुंठत्वम्, रूपं सौंदर्यं च । तेजआदीनां द्वंद्वैक्यम् । विबुधोत्तमौ शिवविष्णू, ततोऽप्युत्तमौ संकर्षणवासुदेवौ वा ॥ २२ ॥ तयोः रामकृष्णयोः । अस्तमस्ताचलम् । शकटाः सन्ति अत्रेति

१ 'तद्रक्षिणः सानुचरम्' इति पाठाभ्युपगमादेतत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्यो मुकुंदविगमे विरहातुरा या आशासताशिष ऋता मधुपुर्यभूवन् ॥ संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान्भजतश्चकमेऽयनं श्रीः ॥ २४ ॥ अवनिक्तांघ्रियुगलौ भुक्त्वा क्षीरोपसेचनम् ॥ ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितम् ॥ २५ ॥

शकटावमोचनस्थानम् ॥ २३ ॥ मुकुंदस्य विगमे व्रजान्निर्गमनसमये या आशिष आशासत 'सुखं प्रभाता रजनीयम्'। 'अद्य ध्रुवं तत्र दृशो भविष्यते' इत्यादि यदुक्तवत्यस्ता ऋताः सत्या बभूवुः। केषाम्। मधुपरि मथुरायां पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्य देहस्य लक्ष्मीं शोभां संपश्यताम्। कथंभूतस्य गात्रस्य। नु अहो इतरान्ब्रह्मादीन् हित्वा यदयनमाश्रयं श्रीः कामयामास। यां गात्रलक्ष्मीमिति वा ॥ २४ ॥ अवनिक्तं क्षालितमंघ्रियुगलं ययोस्तौ क्षीरमिश्रमन्नं भुक्त्वा तां रात्रिं

शकटम्। अर्शआदित्वादच्। एतदभिप्रेत्यैव स्वामिभिर्व्याख्यातं शकटावमोचनस्थानमिति ॥ * ॥ विशेषतो बहुव्रता तया चरतोः। आदित्योऽस्तमिति तदानीमाविष्कृततत्प्रतापासहनादेवेति भावः ॥ २३ ॥ पुरुषभूषणं पुरुषश्रेष्ठम्। "श्रेष्ठे चालंकृतौ प्रोक्तं भूषणं भूनिवासके" इति निरुक्तिः। किंभूताः—यदित्यध्याहारापेक्षया सरलपंथानमाह—यां पुरुषभूषणगात्रलक्ष्मीमिति वेति। अयनमित्यनेन व्यधिकरणेनाप्यजहल्लिंगत्वात्संबंधः ॥ * ॥ अथ श्रीगोपीनां पुरजनानां च प्रेमवर्णनमुपसंहरति—गोप्य इति। अयमर्थः—मुकुंदस्य विगमे व्रजं परित्यज्य मथुराप्रस्थाने गोप्यो विरहातुराः सत्यो या आशिषः "सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवम्" इति रीत्या पुरयोषितां कामिनीनां यानर्थानाशासताऽवश्यप्राप्यत्वेनेष्टवत्यः स्वयमभिप्रेतवत्य इत्यर्थः। 'आङः—शासु—इच्छायाम्'। ता आशिषो मधुपुरि मधुपुरे पुरुषभूषणस्य मुकुंदस्य सम्यक्पश्यतामन्येषामपि जनानामव्यभिचारिण्यो बभूवुः। तदुत्कर्षार्थं तद्गात्रलक्ष्मीमेव विशिनष्टि—हित्वेति। 'श्रीर्यत्पदांबुजरजश्चकमे तुलस्याः' इत्यादिरीत्या, 'यद्वांच्छया श्रीः' इत्यादिरीत्या च। भजतः स्वसंपत्तिकामनया समुपासीनानपीतरान् हित्वा तन्मयनिजांतरवैभवमनादृत्य यामेवायनमाश्रयं कामयामास, तदेवं परमयोग्यानां तासां विरहमनभिनंदन्परमयोग्यत्वादेव पर्यवसानेन तु न स्थास्यत्येव विरह इति ध्वनयति। वक्ष्यते च स्वयं भगवता—"मय्यावेश्य मनः कृष्णे विमुक्ताशेषवृत्तयः। अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ॥" इति। **विश्वनाथस्तु**—व्रजसुंदरीभावभावितत्वादकस्मात्तद्विरहस्मृतिजनितविषादो मुनींद्रः परीक्षितं पूर्वकथां स्मारयति—गोप्य इति। मुकुंदस्य विगमे व्रजान्निर्गमनसमये या आशिषः भविष्यन्तीः सुखसंपत्तीः आशासत अस्माकमाशिषोऽद्य पुरस्थाः प्राप्स्यंतीत्यभाषंत 'सुखं प्रभाता रजनीयम्' इति, 'अद्य ध्रुवं तत्र दृशो भविष्यतः' इत्यादिकास्ताः मधुपुर्यां कृष्णगात्रशोभाः पश्यतामृताः सत्या यथार्था एवाभूवन्। कथं तादृशीनां विलापोक्तिरप्यन्यथा भवेदिति भावः। श्रीस्त्रैलोक्यवर्तिन्यपि शोभा सर्वशोभाधिष्ठात्री देवता इतरान्भजतः स्वां कामयमानानपि पुंसस्त्यक्त्वा यां गात्रशोभां चकमे। 'भूषणभूषणांगम्' इतिवत्स्वं शोभयितुमिति भावः। गात्रलक्ष्मीं विशिनष्टि—अयनं प्राकृताऽप्राकृतसर्वशोभानामाश्रयणीयमित्यर्थः ॥ २४ ॥ क्षीरस्योपसेचनमुपसेको यस्मिन्नन्ने तत्तथा। यस्यां मथुरां गतास्ताम्। कंसचिकीर्षितं हस्तिमल्लादिद्वारा निजमारणलक्षणम् ॥ * ॥ अवनिक्तं दासैः क्षालितमंघ्रियुग्मं ययोस्तौ। क्षीरेण व्रजस्थकृष्णप्रियवयस्किनीदुग्धेन शकटोपरिष्टाग्निधान्यां व्रजेश्वर्यैवार्पितभांडस्थेनोपसिच्यमानमोदनं भुक्त्वा कंसस्य चिकीर्षितं परेद्यवि स्वहिंसनव्यवसायं ज्ञात्वापि निर्भयत्वात्सुखं स्वापाधिक्येनोषतुः। भोः पुत्रौ अद्य किं कृतं मुग्धाभ्यां युवाभ्यां, हंतहंत कथमार्चितं धनुर्भग्नं, कथं वा तद्रक्षिणो हताः, न जाने क्रुध्यन्कंसः श्वः किं कर्त्तेति हाहा कथं मया गोष्ठाद्युवामानीतावित्यादिभीतस्य सर्वां रात्रिमनिद्राणस्य पितुर्नंदस्य वाक्यं स्वापाधिक्यादेव तौ न श्रुतवंताविति ज्ञेयम्। अत्र **तोषिणी**—अवनिक्त इति तैर्व्याख्यातम्। तत्र ययोरिति षष्ठ्या तत्तदंगसेवककर्तृकत्वं बोध्यते। क्षीरमिश्रमिति पूर्ववत्। क्षीरेणोपसिच्यत इति कर्माणि ल्युड्विधानात्। कंसस्य चिकीर्षितं प्रातर्मंचारूढमहाजनसमागममध्ये रंगभूमौ मल्लयुद्धादिविधापनेच्छां ज्ञात्वा लोकमुखाच्छ्रुत्वा, सुखं तद्वधार्थमायासं विना स्वस्थं यथा स्यात्तथा। यत्खल्वत्र रजकादिकं हत्वा पादावनेजनमात्रं कृत्वा न तु स्नात्वा भुक्तं तत्रेदं मन्यामहे—पापिनां वधः खलु परमधर्म एव तथा "प्रत्यंगुलं तु तीर्थानि प्रतिहस्तं सुरालयाः" इति मथुरामाहात्म्यवचनादरः कर्तव्य एव, तत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च ॥ वधं निशम्य गोविंदरामविक्रीडितं परम् ॥ २६ ॥ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः ॥ बहून्यचष्टोभयथा मृत्योर्दौत्यकराणि च ॥ २७ ॥ अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि ॥ असत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा ॥ २८ ॥ छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः ॥ स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनम् ॥ २९ ॥ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनम् ॥ यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगंबरः ॥ ३० ॥ अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च ॥ पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिंतया ॥ ३१ ॥ व्युष्टायां निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते ॥ कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ॥ ३२ ॥

सुखं न्यवसताम् ॥ २५ ॥ परं केवलं गोविंदरामयोर्विक्रीडितं तत्र तु पराक्रमः कश्चित् ॥ २६ ॥ उभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दौत्यकराणि च । तथा च मंत्रः । “ इत्थादुलूकश्चापप्तन् हिरण्याक्षो अयोमुखः । रक्षसां दूत आगतः ॥ ” इत्यादिः । तथा “ यदेतद्भूतान्यन्वाविश्य दैवीं वाचं वदसि ” इत्यादिश्च ॥ २७ ॥ तानि दर्शयति श्लोकत्रयेण । जलादौ प्रतिरूपे दृश्यमानेऽपि स्वशिरसस्तत्रादर्शनम् । असत्यपि द्वितीये चक्षुर्षोंतर्धानेंगुल्यादौ ज्योतिषां चंद्रादीनां द्वित्वम् ॥ २८ ॥ छायायां प्रतिबिंबे छिद्रप्रतीतिः । पिहितकर्णपुटस्य योंतःश्रूयमाणो ध्वनिः स प्राणघोषस्तस्यानुपश्रुतिरश्रवणम् । वृक्षेषु स्वर्णवर्णप्रतीतिः । रजःकर्दमादिषु स्वपदानामदर्शनम् । एतानि जागरितानि दुर्निमित्तानि ॥ २९ ॥ स्वप्नान्याह । स्वप्न इति । प्रेतैर्मृतैः परिष्वंगः । खरमारुह्य यानम् । विषभक्षणम् । नलदमाली जपाकुसुममाली यायादिति यत्तदप्येकं दुर्निमित्तमिति ॥ ३० ॥ ३१ ॥ कष्टेन कथंचित्प्रभातायां पुनः सूर्ये चाद्भ्यः समुत्थित इति । तथा च श्रुतिः । “ अद्भ्यो वा एष

स्तदनंतरं स्नानं युक्तमिति ॥ २५ ॥ धनुष इति देहलीदीपकन्यायेन भंगपदेन रक्षिणामित्यनेन च संबध्यते । परं केवलम् ॥ * ॥ कंसस्त्विति युग्मकम् । कंसस्तु धनुर्भंगादिकं निशम्य तंतं परं केवलं रामकृष्णयोः विचित्रक्रीडारूपं न तु युद्धरूपं निशम्य भीतो दुर्निमित्तान्याचष्टे ॥ २६ ॥ उभयथा दैह्यानि बाह्यानि वा । तथा च मृत्युदौत्ये मंत्रः श्रुतिः । इत्था इत्थम् । उलूकः पक्षिविशेषः । आपप्तन् शुभमिति शेषः । हिरण्याक्षः पीतनेत्रः । अयोमुखः लोहचञ्चुः । रक्षसां रक्षोवन्निर्दयानाम् । बहुत्वं पूजापेक्षम् । यमराजस्य मृत्योरित्यर्थः । तथाऽन्यो मंत्रः—भूतानि पक्ष्यादीनि।यत् यां वाचम्।दैवीं देवद्योतिकां वदसीति। तदेषा वाक् मृत्योर्दूतरूपेति भावः ॥ * ॥ दुर्मतिः तदानीमपि भगवद्भागवतद्रोहानिवृत्तेः । अयं सर्वत्रैव हेतुः । बहूनि राज्यभंगादिहेतूनि तावद्ददर्श । मृत्योर्दौत्यमिव कुर्वन्तीति तत्कराणि तत्सूचकानि च ददर्शेत्यर्थः ॥ २७ ॥ तानि दुर्निमित्तानि । प्रतिरूपे प्रतिबिंबे । तत्र प्रतिबिंबे । द्वितीये रूपे । द्वित्वं द्विरूपत्वम् ॥ * ॥ द्वैरूप्यं द्वित्वभानम् । चकारद्वयं दर्शनादर्शनयोर्द्वयोरपि प्राधान्यबोधनार्थम् । एवं तथेत्यस्य परेणान्वयः ॥ २८ ॥ जागरितानि जागरे जातानि । स्वपदाना स्वपादलाञ्छनानाम् ॥ * ॥ छिद्रप्रतीतिः सच्छिद्रतादर्शनम् ॥ २९ ॥ स्वाप्नानि स्वप्नभवानि । परिष्वङ्ग आलिंगनम् । ‘ बिसादनम् ’ इति पाठे पद्मकंदभक्षणमित्यर्थः । “ नलदमाली दक्षिणामुखो व्राजयति ” इति श्रुतेः । “ पद्ममालां शिरः कृत्वा यो गच्छेद्दक्षिणामुखः । एवं पश्यन्निशि स्वप्ने तत्क्षणे मृत्युमृच्छति ॥ ” इति स्वप्ननिदर्शने । यद्वा—नलदं वक्ररक्तपुष्पं मृणालशून्यं वर्षासु जायमानं तन्मालाधारी । ‘ अभयं नलदं सेव्यममृणालं जलाशयम् ” इत्यमरः । तैलाभ्यक्तः कृततैलाभ्यंगः । दिगंबरो नग्नः ॥ * ॥ ० ॥ ३० ॥ इत्थंभूतानि अन्यानि कर्दममज्जनादीनि त्वक्स्फुरणादीनि च स्वप्नजागरजानि । मरणसंत्रस्तो मृत्युभीतः ॥ * ॥ सञ्जातो जागरो येषु तानि जागरितानि, जागरसंबंधीनीत्यर्थः ॥ ३१ ॥ व्युष्टायामित्यस्य कष्टेनेत्यादिरर्थः । “ अद्भ्यो वा ” इति श्रुतिर्व्याख्यातचरा । अथापरा श्रुतिः—यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आनर्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे ॥ मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३३ ॥ तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषं विविशू राजानश्च कृतासनाः ॥ ३४ ॥ कंसः परिवृतोऽमात्यै राजमंच उपाविशत् ॥ मंडलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३५ ॥ वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च ॥ मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः समासत ॥ ३६ ॥

प्रातरुदेति अपः सायं प्रविशति " इति । " य उदगान्महतोर्णवाद् विभ्राजमानः सलिलस्य मध्यात् । स मा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु ॥ " इति च ॥ ३२ ॥ ३३ ॥ यथोपजोषं यथासुखम् ॥ ३४ ॥ ३५ ॥ मल्लताल उत्तर उपरि उच्चैः श्रूयते येषु तेषु तूर्येषु । उपाध्याया मल्लाचार्याः ॥ ३६ ॥

सूर्यः । उदगादुदयं प्राप । अर्णवादर्णवस्य संबंधिनः सलिलस्य जलस्य मध्याद्विभ्राजमानो देदीप्यमानः । स ऋषभश्रेष्ठः । विपश्चित्सर्वज्ञो मां पुनात्वित्यर्थः ॥ * ॥ ० ॥ ३२ ॥ जघ्निरे वादयाञ्चक्रिरे, वादकैः । कर्मणि लिट् । चैलमत्रानेकवर्णवस्त्रम् ॥ * ॥ सहोत्सवमाह–रंगं मल्लक्रीडास्थानम् । पुरुषाः कंसभृत्याः । आनर्चुर्मंगलकलशस्थापनाऽऽदिनाऽलंचक्रुः । तथा च हरिवंशे कंसादेशः–" श्वः सचित्राः समालाश्च सपताकास्तथैव च । सुवासिता वपुष्मंत उपनीतोत्तरच्छदाः ॥ क्रियंतां मञ्चवाट्यश्च वलभ्यो वीथयस्तथा ॥ " इत्यादि ॥ ३३ ॥ तेषु मञ्चेषु । जानपदा देशांतरीया जनाः ॥ * ॥ यथोपजोषमित्यत्र विशेषः । श्रीविष्णुपुराणे–"राजमञ्चेषु चारूढाः सह भृत्यैर्महीभृतः । अन्तःपुराणां मञ्चाश्च तथाऽन्ये परिकल्पिताः ॥ अन्ये च वारमुख्यानामन्ये नगरयोषिताम् । अक्रूरवसुदेवौ च मञ्चमध्ये व्यवस्थितौ ॥ नगरीयोषितां मध्ये देवकी पुत्रगार्धिनी । " इति । हरिवंशे च–" मंचागारैः सुनिर्मुक्तैर्युद्धाय सुविभूषितैः । समाजवाटः शुशुभे समेघौघ इवार्णवः ॥ श्रेणीनाञ्च गणानाञ्च मंचा भान्त्यचलोपमाः । अंतःपुरगणानां च प्रेक्षागाराण्यदूरतः । रेजुः काञ्चनचित्राणि रत्नमालाकुलानि च ॥ गणिकानां पृथग्मञ्चाः शुभैरास्तरणाम्बरैः । शोभिता वारमुख्याभिर्विमानप्रतिमौजसः ॥ अन्ये च मञ्चा बहवः काष्ठसंचयबंधनाः । रेजुः सास्तरणास्तत्र शतशोऽथ सहस्रशः ॥ " इति । देवक्या नागरीमध्यप्रवेशे हेतुः–पुत्रगार्धिनीति । कंसेनानादृतत्वादंतःपुरमञ्चाऽप्रवेशादिति भावः । विविशुरुपाविशन् । कृतं निर्माय न्यस्तमासनं तत्तद्योग्यपीठादिकं येषां ते ॥ ३४ ॥ राजमञ्चेऽत्युच्चमञ्चे । विदूयता परितप्यमानेन ॥ * ॥ राजमञ्चश्चोक्तस्तत्रैव–" प्राङ्मुखश्चात्र निर्मुक्तो मेरुशृंगसमप्रभः । रुक्मयंत्रनिभस्तंभश्चित्रनिर्योगशोभनः ॥ प्रेक्षागारः स कंसस्य चकाशेऽप्यधिकं श्रिया । शोभितो माल्यदामाद्यैर्नित्रासक्तलक्षणः ॥ " इति । " स दृष्ट्वा सर्वनिर्मुक्तिप्रेक्षागारं नृपोत्तमः । श्रेणीनां दृढसंयुक्तैर्मञ्चवाटैर्निरंतरम् ॥ सोत्तारणाय युक्ताभिर्वलभीभिर्विभूषितम् । काञ्चनीभिः प्रवृद्धाभिरेकस्तंभैश्च शोभितम् ॥ सर्वतः सारनिर्यूहं स्वायतं सुप्रतिष्ठितम् । उदकप्लवेन सुश्लिष्टं मंचारोहणमुत्तमम् ॥ छन्नं तद्वोदकाभिश्च मानवौघभवक्षयम् । " इति । तत्र मंचप्रेक्षागारयोः स्वल्पबहुलपरिच्छदादीनां भेदो ज्ञेयः । मंडलेश्वराः खंडमंडलपतयस्तेषां मध्यस्थः कंससेवकत्वेन तेषां तन्मञ्च एव स्थितेः । राजानश्चान्ये तन्मित्रनृपा इति भेदः । यद्वा–पृथग्मञ्चोपविष्टानां तेषामेव मञ्चवर्गमध्ये कंसमंचस्य वृत्तेः । विशेषेण दूयता दूयमानेन हृदयेनोपलक्षित इति स्वभावतो नित्यभीतत्वाद्विशेषतश्च दुर्निमित्तदर्शनात् ॥ ३५ ॥ तालस्ताडः, स च भुजयोस्ताडनरूपः । डलयोरैक्यम् । " ताडस्तु ताडने घोषे मुष्टिमेयतृणादिषु । ताडी पत्रद्रुमे " इति मेदिनी ॥ * ॥ न केवलं स्वयमेव वाद्यमानेषु अपि तु मल्लानां तालश्च स्वबाहुमूलघातः स उत्तरस्तदधिकतया श्रूयमाणो येषु तादृशेषु चेति । तद्वाद्यादप्यधिकशब्दोऽयमिति मल्लानां महाबलिष्ठतोक्ता । यद्वा–बहिः साधारणेषु तूर्येषु वाद्यमानेषु, अन्तस्तु मल्लोचिततालप्रधानेषु वाद्यमानेष्विति । यतो दृप्ताः सगर्वाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चाणूरो मुष्टिकः कूटः शलस्तोशल एव च ॥ त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३७ ॥ नंदगोपादयो गोपा भोजराजसमाहुताः ॥ निवेदितो
पायनास्ते एकस्मिन्मंच आविशन् ॥ ३८ ॥ इति श्रीभा० म० द० पू० कुब्जास्वरूपदानमल्लरंगोपवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
श्रीशुक उवाच ॥ अथ कृष्णश्च रामश्च कृतशौचौ परंतप ॥ मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥ १ ॥ रंगद्वारं समासाद्य तस्मिन्नागमवस्थितम् ॥
अपश्यत्कुवलयापीडं कृष्णोंबष्ठप्रचोदितम् ॥ २ ॥

उपस्थानं मल्लरंगमासेदुरागताः ॥ ३७ ॥ भोजराजेन कंसेन समाहुताः समाहूताः । निवेदितान्युपायनानि यैस्ते ॥ ३८ ॥ इति श्री० म० दशमे पूर्वार्धे टीकायां द्विचत्वा
रिंशोऽध्यायः ॥ ४२ ॥ त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः ॥ रंगप्रवेशसौभाग्यं चाणूरेण च भाषणम् ॥ १ ॥ पूर्वैर्गुरेव कृतं शौचं शुद्धत्वं निरपराधत्वं याभ्यां
तौ । एतदुक्तं भवति । धनुर्भंगादिनाऽऽवाभ्यां निजैश्वर्यं सूचितेऽपि पितरौ न मुंचत्यावां च पुनर्जिवांसत्यतोऽस्य मातुलस्यापि वधे नावयोर्दोष इत्येवं कृतापराधप
रिहाराविति । मल्लानां दुंदुभीनां च निर्घोषं मल्लतालदुंदुभिनिर्घोषं वा ॥ १ ॥ कुवलयापीडसंज्ञकं नागं हस्तिनम् अंबष्ठो हस्तिपकस्तेन चोदितम् ॥ २ ॥

अत एव सम्यगसंकोचेन सर्वतोऽविशन्प्रविविशुः ॥ ३६ ॥ कांश्चिन्मल्लान्नामतो निर्दिशति—चाणूर इति । ते चाणूराद्याः ॥ * ॥ उपातिष्ठन्त्याराधयन्ति कंसं यत्र तदुपस्थानं मल्लरंगोचितस्थलमासेदुः प्राप्तवन्तः । एव
कारेण चाणूरादय एवासेदुः, किमुतान्ये तच्छिष्या इत्यर्थः । चकाराद्प्राश्निकवर्गाश्च । तथा च श्रीविष्णुपुराणे—“ मल्लाः प्राश्निकवर्गश्च रंगमध्ये समीपगः । कृतकंसेन ” इति । अस्यार्थः—मल्ला बाहुयोधिनः । प्राश्निका
श्चानुमोदनादिना तदुत्साहनादिपरास्तेषां वर्ग इति ॥ ३७ ॥ समाहुताः ह्रस्वत्वमार्षम् । ये समाहूतास्त इति योज्यम् । निवेदितोपायना दत्तप्रभूताः “ प्रभूतमुद्गते प्राज्ये उपढौकनकेऽपि च ” इति कोशात् ॥ * ॥
भोजराजेन कंसेन सम्यक्सादरं साश्वासं चाहूता इत्यर्थः । अत्राश्वासश्च—भो व्रजराज त्वं मे मंडलेश्वरमुख्योऽसि, गोष्ठादागतोऽपि किं भीत्यैव मां न संगतोऽभूः, धनुर्भंगं खलु पुत्रयोर्दौरात्म्यं मा मंस्थास्ताभ्यां ह्यः स्वबलपरी
क्षैव मह्यं दत्ता, तौ बलिष्ठौ श्रुत्वैव द्रष्टुमाहूतौ, तद्यूयं शीघ्रमागच्छत, मा भैष्टेत्यादिकः । अत एव राजाज्ञागौरवादेव । क्वापि प्रातरेव गतौ स्वपुत्रौ तत्रापश्यन्नपि तदागमनमनपेक्ष्यैव परमाप्तबुद्धितो गोपानेव तयोरर्थे शील
शिक्षणार्थञ्च नियुज्य हितोपदेशवाक्यं संदिश्य च द्रुतं नंद आजगाम । उपनंदादयश्च द्रुतमायाताः कंसाय निवेदितदधिघृतवस्त्रस्वर्णमुद्राद्युपायना राजमञ्चे उपवेशस्थानाऽदर्शनाद्राज्ञ आज्ञयैवान्यस्मिन्नेकस्मिन्मंचे उप
विविशुः । अत्राश्वासनं श्रीरामकृष्णयोर्मल्लयुद्धे प्रवर्तनाद्यर्थमेवेति ज्ञेयम् । श्रीकृष्णप्रियाणामपि तेषामादौ गमनं हि कुवलयापीडवधपूर्वकस्वच्छंदेन रंगांतः प्रवेष्टुं श्रीकृष्णेच्छयैवेति ध्येयमिति **तोषिणीकाराः** ॥ ३८ ॥ इति
श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥ सौभाग्यमत्र रसकदंबमूर्तिप्रदर्शनरूपम् (१) । शौचमभिनीय प्रदर्शयति—एतदुक्तमित्यादिना । द्वितीयोऽर्थ उत्तान एव । दुंदुभिध्वनिना
मल्लघोषस्याभिभवमाशंक्यार्थान्तरमाह—मल्लताल एव दुंदुभिनिर्घोषस्तम् । तत्र तस्यैव प्राधान्यादित्यर्थः ॥ * ॥ अथेति पित्रादीन्दृष्ट्वैव सर्वलक्षितौ सवयस्यौ यमुनातीरं रामकृष्णौ गतौ, तत्रैव कृतदंतधावनादिकौ भोभो वयस्या
मल्लतालमयो दुंदुभिघोषोऽयं श्रूयते तदित एव प्रविशाम इति द्रष्टुं द्रुतमीयतुः ॥ अत्र **तोषिणी**—द्रष्टुमिति—दिदृक्षाव्याजेनेत्यर्थः । अंबष्ठादिवचनार्थं परिधानीयोत्तरीयपरिधानेन मल्लवेशाऽस्वीकारात् । अन्यथा वक्ष्यमाण
परिकरबंधवैयर्थ्यं स्यात् । उपेयतू रंगस्थलांतिकं ययतुः । परंतप हे शत्रुनाशनेति । तादृशदुष्टद्वेषे भवादृशां शील एवेति भावः । यद्वा—कृतशौचाविति नरचेष्टानुकरणमात्रम्, एतन्मिषेणैव वृद्धगोपेभ्यः पूर्वमेव विच्छिन्नाविति
ज्ञेयम् ॥ १ ॥ तस्मिन् रंगद्वारे । नागं गजम् “नागः पन्नगमातंगक्रूराचारिषु तोयदे । नागकेसरपुन्नागनागदंतकमुस्तके ॥” इति मेदिनी । “अंबष्ठस्तु महामात्रे रागद्रव्ये विलोमजे” इति धरणिः ॥ * ॥ हिंसार्थमेवांबष्ठप्रेरितमैक्षत ॥ २ ॥

१ ‘ समाविशन् ’ इति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बद्ध्वा परिकरं शौरिः समुद्ध्य कुटिलालकान्॥उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥ अंबष्ठांबष्ठ मार्गं नौ देह्यपक्रम मा चिरम् ॥ नो चेत्सकुंजरं त्वाद्य नयामि यमसादनम् ॥ ४ ॥ एवं निर्भर्त्सितोंबष्ठः कुपितः कोपितं गजम् ॥ चोदयामास कृष्णाय कालांतकयमोपमम् ॥ ५ ॥ करीं द्रस्तमभिद्रुत्य करेण तरसाऽग्रहीत् ॥ कराद्विगलितः सोऽमुं निहत्यांघ्रिष्वलीयत ॥ ६ ॥ संक्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवम् ॥ परामृशत्पुष्करेण स प्रसह्य विनिर्गतः ॥ ७ ॥

परिकरं बद्ध्वा युद्धोचितपरिधानं कृत्वा । समुद्ध्य निबध्य ॥ ३ ॥ ४ ॥ अंतको मृत्युः कालस्तन्निमित्तं यमस्तन्नियंता तैरुपमा यस्य तम् ॥ ५ ॥ विगलितो विच्युतः मुष्टिना निहत्य चरणेष्वलीयतादृश्यो बभूव ॥ ६ ॥ अचक्षाणोऽपश्यन् । घ्राणमवघ्राणं तेन दृष्टिर्दर्शनं यस्य सः । लोचनागोचरमपि हि पशवो घ्राणेन जानंतीति

"भवेत्परिकरः संघे पर्यंकपरिवारयोः । प्रगाढगात्रिकाबंधे समाचारविवेकयोः ॥" इति मेदिन्युक्तेर्युद्धोचितपरिधानं गाढगात्रबंधं, कटिबंधमिति यावत् ॥ * ॥ शौरिरिति तद्वंश्यानामानंदार्थमिति भावः । परिकरं बद्ध्वा कंचुकं विसृज्य परिधानीयवस्त्रं मध्यबन्धनघटीपटेन वेष्टयित्वा प्रालम्बमालादिकं वैकक्षादित्वे निधायेत्यर्थः । 'विचित्रवेषाभरणस्रगम्बरौ' (१९) इति वक्ष्यमाणत्वात् । कुटिलान् स्वभावत एव वक्रान्, अत एव पूर्वं कंकतिकया लसदुष्णीषेषु दीर्घकेशेषु प्रवेशितानपि, यद्वोष्णीषबंधकालेंगुल्या केशान्तःप्रवेशितानपि युद्धकाले विक्षेपशंकयाऽलकांश्चूर्णकुंतलान्समुद्ध्योत्तरीयेणापि गाढं बद्ध्वेत्यर्थः । समूह्येह दीर्घत्वमार्षम् । श्लेषेण दुष्टवधे मुखावरणादिना विघ्नापादनात्कुटिलानां स्वीयानामपि सम्यग्बंधनं युक्तमेवेति ध्वनितम् ॥ ३ ॥ अपक्रम दूरीभव । नो चेन्मार्गदानाभावे । यमसादनं यमगृहम् ॥ * ॥ वीप्सा दृढावधानार्थं क्रोधादेव वा । मार्गरोधनं किल महापातकमित्याशयेनाह— मा चिरं द्रुतमपक्रम मार्गादपसर । सदनमेव सादनम् । स्वार्थेऽण् । वस्तुतस्तु यमेन मनोनिरोधेनासाद्यते प्राप्यत इति यमसादनं मोक्षम् । नयामि प्रेरयामि । सामीप्ये वर्तमानत्वम् । अद्येति एतावंतं कालमुद्वृत्तो वर्तसे तस्मादद्य त्वां यमस्य सादनम्— । अग्रे पूर्ववत् ॥ ४ ॥ एवमित्थम् । निर्भर्त्सितो वाचा ताडितः । कृष्णाय कृष्णमुद्दिश्य । तन्निमित्तं मृत्युकारणम् । तन्नियन्ता मृत्युप्रेरकः । यद्वा—बलादाकर्षणो कालो मृत्युर्वा "कालो मृत्यौ यमे कृष्णे समये चालकेऽपि च" इति धरणिः । संहारेंतको रुद्र इव "रुद्रोन्तकः" इति श्रुतेः । क्लेशजनने यम इव तम् ॥ * ॥ कृष्णाय कृष्णं ग्रहीतुम् । कालेनांतः आयुःशेषो येषां तेषां मनुष्यादीनाम् । यो यमः प्रसिद्धस्तेनोपमा यस्य तम् । तेन कृष्णस्यासौ किमपि कर्तुं न प्रभविष्यतीति भीतं राजानं प्रत्याश्वासो ध्वनितः ॥ ५ ॥ अभिद्रुत्य झटिति प्राप्य । तं कृष्णम् । करेण शुंडादंडेन । "करो वर्षोपले रश्मौ पाणौ च बलिशुंडयोः" इति मेदिनी । अमुं गजम् । स कृष्णः ॥ * ॥ तं निर्भयत्वेनैव स्थितं कृष्णं करेण शुण्डेन मध्यदेशेऽग्रहीत् । ततश्च स कृष्णोऽमुं कुंजरं निहत्य वाममुष्ट्या शुंडे प्रहृत्य तत्प्रहारविवशाच्छुंडाद्विगलितः सन्नंघ्रिषु तस्य महास्थूलपदेष्वलीयतादृश्यो बभूव । अंघ्रिष्विति बहुवचनेनैवं व्याख्येयम्—प्रथममेकस्मिन्पादपृष्ठेऽलीयत तदा घ्राणदृष्टौ कुंजरे तत्रैव धर्तुमुद्यते सति अन्यस्मिन्पादेऽलीयत तत्रापि धर्तुमुद्यतेऽन्यस्मिन्नित्येवं सहासमुखांबुजो महाकौतुकी स कुंजरं बहुशो वंचयन्स्वखेलामत्र महाद्भुतां लोकान्दर्शयामासेति भावः ॥ ६ ॥ स गजः । तं कृष्णम् । "पुष्करं खेंबुपद्मयोः । तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रकांडयोः । कुष्ठौषधे द्वीपतीर्थभेदयोर्दुर्लभेऽपि च ॥" इति बहवः । द्वितीयः स शब्दः कृष्णपरामर्शी ॥ * ॥ अचक्षाणोऽपश्यन् । पशुत्वात् घ्राणदृष्टिः गंधेनैव जानन् । पुष्करेण शुंडाग्रेण । परामृशत् तं जग्राहेति । स्त्रीयखेलांतरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुच्छे प्रगृह्यातिबलं धनुषः पंचविंशतिम् ॥ विचकर्ष यथा नागं सुपर्ण इव लीलया ॥ ८ ॥ स पर्यावर्तमानेन सव्यदक्षिणतोऽच्युतः ॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ॥ ९ ॥ ततोऽभिमुखमभ्येत्य पाणिनाऽऽहत्य वारणम् ॥ प्राद्रवन्पातयामास स्पृश्यमानः पदेपदे ॥ १० ॥ स धावन्क्रीडया भूमौ पतित्वा सहसोत्थितः ॥ तं मत्वा पतितं क्रुद्धो दंताभ्यां सोऽहनत्क्षितिम् ॥ ११ ॥

प्रसिद्धम् । परामृशद्धृतवान् । पुष्करेण शुंडाग्रेण । स कृष्णः । प्रसह्य बलेन ॥ ७ ॥ धनुषो धनुषां पञ्चविंशतिं हस्तशतं यावत्तावंतं देशं विचकर्ष आकृष्य नीतवान् । कं क इव विचकर्ष । यथा नागं सर्पवद्वर्तमानं गजं सुपर्ण इव स्वयमित्यर्थः । 'आविरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः' इतिवत् प्राचीदिगिव वर्तमानायां देवक्यां इंदुरिव वर्तमानः कृष्णः ॥ ८ ॥ स पर्यावर्तमानेनेति । पुच्छग्राहिणं श्रीकृष्णं ग्रहीतुं यदि दक्षिणतः परिवर्तते गजस्तर्हि सव्यतो भ्रामयति तं कृष्णः । यदा सव्यतः परिवर्तते गजः तदा दक्षिणतो भ्रामयन् भ्राम्यमाणेन तेन सह स बभ्राम । गोवत्सेन भ्राम्यमाणेन बालकः स एव कृष्णो यथान्यो वा बालक इवेति ॥ ९ ॥ वारणं गजं प्राद्रवन्प्रकर्षेणासमंततो धावन्पातयामास । यथा पतति तथा तं वंचयन्प्राद्रवदित्यर्थः ॥ १० ॥ किं च स धावन्निति । अहनदहन् ॥ ११ ॥

लोकान्दर्शयिष्यन् कृष्णः स्वमेकवारं तदुत्साहवर्धनार्थं ग्राहयामासेति भावः । ततश्च कुंजरे तस्मिन्कृतार्थंमन्ये सति स कृष्णः प्रसह्य बलात्कारेणैव—किमरे बलं दर्शयसीत्युक्त्वा स्वं मोचयित्वा बहिर्निर्गतोऽभूत् । **तोषिण्यां** तु—पुष्करेण श्लेषाच्छ्रीमदंगे कमलवत्कोमलतां गतेनेति ध्वन्यते ॥ ७ ॥ पंचविंशतिधनुर्मितदेशं शतहस्तमित्यर्थः । 'धनुर्हस्तचतुष्टयम्' इति नाममाला । इतिवदिति—यथाविरासीद्यथेत्यत्र यथाशब्द इव शब्दश्चान्वितौ, प्राच्यां यथा प्राचीवद्वर्तमानायां देवक्यामिंदुरिव वर्त्तमानः स्वयं हरिराविरासीदिति तद्वदत्रापीति भावः ॥ * ॥ 'धनुर्हस्तचतुष्टयम्' इति कोशाच्छतहस्तप्रमाणं देशं व्याप्य । यथेति यथावदेव विचकर्ष । स कुंजरस्तदा किमपि धैर्यं कर्तुं न शशाकेति भावः ॥ ८ ॥ सोऽच्युतः । तेन गजेन । अन्यः प्राकृतः ॥ * ॥ ततश्च कुंजरस्य किञ्चिदुत्साहप्रापणार्थमाकर्षणवेगं भगवान् किञ्चिच्छिथिलीचक्रे इत्याह—स अच्युतः कदाचिदपि तदा तत्पुच्छग्रहणाच्च्युतिराहित्याभिप्रायेण । यद्वा—द्रुतगतिविशेषेग सव्ये दक्षिणे चालातचक्रवद्वर्तमानत्वात् ॥ ९ ॥ ततो भ्रामणोत्तरम् । "वारणं प्रतिषेधे स्याद्वारणस्तु मतंगजे" इति मेदिनी । तं गजम् । इत्यर्थ इति—अतिस्थूलशरीरवत इतस्ततो भ्रमणे स्वयमेव पतनं भवेदिति भावः ॥ * ॥ अथान्यां खेलां दर्शयन्पुच्छं तत्याजेत्याह—तत इति । पाणिनाऽऽहत्येषदेव प्रहृत्य, यथावत्प्रहारे सद्य एव मरणात्प्रारम्यमाणखेला न निष्पद्यत इति भावः । प्राद्रवन्सन्निति प्रकर्षेण द्रवन् आ ईषदेव भ्रमँस्तदुत्साहवर्धनार्थं स्वस्य प्रद्रवणं दर्शयामास तम् । वस्तुतस्तु स्वस्य तदीषदेव द्रवणमित्यर्थः । अत एव पदेपदे तेन स्पृश्यमानः सँस्तं पातयामास इति तं पातयितुमेव स्वयं मुहुर्मुहुर्द्रवणासमर्थ इव स्खलति स्मेत्यर्थः ॥ १० ॥ अन्यं वंचनाविधिं चकारेत्याह—किञ्चेति । स कृष्णः । क्रीडया लीलया । सहसा झटित्येव । तं कृष्णम् । स गजः ॥ * ॥ ततश्च कठोरशिलामय्यां भूमौ तमत्याघातं पातयितुं स्वस्य पतनमेव तं दर्शयामास, न तु लाघवोत्थानमित्याह—स इति । तं पतितं मत्वा तमेव हंतुमुद्यतोऽपि क्षितिमेवाहन् । जानुभ्यां पतित्वा चखानेत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वविक्रमे प्रतिहते कुंजरेंद्रोऽत्यमर्षितः ॥ चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा ॥ १२ ॥ तमापतंतमासाद्य भगवान्मधुसूदनः ॥ निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥ पतितस्य पदाक्रम्य मृगेंद्र इव लीलया ॥ दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दंत पाणिः समाविशत् ॥ अंसन्यस्तविषाणोऽसृङ्मदबिंदुभिरंकितः ॥ विरूढस्वेदकणिकावदनांबुरुहो बभौ ॥ १५ ॥ वृतौ गोपैः कतिपयैर्बलदेव जनार्दनौ ॥ रंगं विविशतू राजन्गजदंतवरायुधौ ॥ १६ ॥ मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥ मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः ॥ १७ ॥

॥१२॥१३॥ १४ ॥ रंगं समाविशत्तदा वीरश्रिया बभौ । कथंभूतः । अंसे न्यस्तं विषाणं गजदंतो येन सः । असृजो रक्तस्य मदस्य च बिंदुभिः परितोऽंकितः।विरूढा उद्गताः स्वेदकणिकास्ताभिरुपलक्षितं वदनांबुरुहं यस्य सः ॥ १५ ॥ न केवलं स एकः समाविशत्किं तु वृतौ गोपैरिति ॥ १६ ॥ तत्र च शृंगारादिसर्वरसकदंबकमूर्तिर्भ गवांस्तत्तदभिप्रायानुसारेण तत्तद्रूपो बभौ न तु साकल्येन सर्वेषामित्याह । मल्लानामिति । मल्लादीनामज्ञानां द्रष्टॄणामशन्यादिरूपेण दशधा विदितः सन्साग्रजो रंगं गत इत्यन्वयः । मल्लादिष्वभिव्यक्ता रसाः क्रमेण श्लोकेन निबध्यंते । "रौद्रोऽद्भुतश्च शृंगारो हास्यं वीरो दया तथा । भयानकश्च बीभत्सः शांतः सप्रेमभक्तिकः ॥" अविदुषां विराट् विकलः अपर्याप्तो राजत इति तथा । अनेन बीभत्सरस उक्तः । विकलत्वं च 'क्व वज्रसारसर्वांगौ' इत्यादिना वक्ष्यते ॥ १७ ॥

तस्य दंतक्षेपकाल एवातिसूक्ष्मेण रूपेण कृष्णस्योत्थायान्यत्र गमनात्, अत एव 'अतर्कितेतिसहसा' इत्यभिधानात्सहसोत्थित इति प्रयुक्तम् ॥ ११ ॥ महामात्रैर्हस्तिपाधिपैः "महामात्रः समृद्धे चामाने हस्तिपकाधिपे" इति मेदिनी । अभ्यद्रवत्संमुखमाजगाम ॥ * ॥ स्वत एवात्यमर्षितः संजातपरमामर्षः, पुनश्च महामात्रैः प्रेर्यमाणो रुषा तद्वैशिष्ट्येनाभ्यद्रवत् ॥ १२ ॥ तं गजम् । हस्तं शुंडादण्डम् "हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च" इति मेदिनी ॥ * ॥ ततश्च कालाधिक्यमालक्ष्य तेन सह खेलां समापयामासेत्याह—तमिति । स्वयं भगवानप्यंशेन च तादृशमधोः सूदनोऽपि श्रीमन्नराकारोचितमल्ललीलारसानुसारेणैव पाणिना एकेनैवावहेलया वामेनैवेत्यर्थः । हस्तं शुंडां प्रगृह्येत्यर्थः॥ १३॥ पतितस्य दंतमुद्धृत्य । तेन दंतेन । इभं गजम्॥ * ॥ [१]पतितं सन्तं तं श्रीचरणेन शिर आक्रम्य । पाठान्तरे पतितस्य स्वतस्तस्य दंतमुत्पाट्य । हरिरिति सिंहवत्तत्प्राणहरणाद्धस्तिहननेन सिंहरूपत्वाच्च ॥ १४ ॥ तदा रंगप्रवेशावसरे । अंसे स्कंधे । 'अंसो भुजशिरोव्याध्योः' इति धरणिः । "विषाणी क्षीरकाकोल्यामजशृंग्यां च योषिति । कुष्ठनामौषधे क्लीबं त्रिषु शृंगेभदंतयोः ॥" इति मेदिनी । "असृक् स्याद्योगभेदे ना रक्तेऽपि स्यान्नपुंसकम्" इति च ॥ * ॥ मृतकमित्यर्धकम् । दंतयुक्तवामपाणिः । द्वितीयदन्तोऽस्य श्रीबलदेवेनोत्पाट्य गृहीत इति ज्ञेयम् । 'गजदन्तवरायुधौ' (१६) इति वक्ष्यमाणत्वात् । सम्यक् मत्तगजेन्द्रगत्या शोभा विशेषेण च, आ ईषद्द्वारान्तः प्राविशत् प्रविवेश । शोभाविशेषमाह— । अंसो वामस्कंधः । आङ्कितः विचित्रैरिव भूषितः । विशेषेण विचित्रतया वा रूढाः प्रादुर्भूताः, रुहेः प्रादुर्भावार्थकत्वात्, सच्चिदानंदविग्रहे विकारासं भवात् । अंतर्भूतानंततादृशविलासधर्माणां लीलानुरूप्येण केवलाविर्भावतिरोभावसंप्रतिपत्तेश्च । अंबुरुहरूपेण तस्यापि जलबिन्दुभिर्यथा शोभा स्यात्तथेति ध्वन्यते । मूर्तया वीररसश्रियैव बभौ ॥ १५ ॥ कतिपयैरल्पसंख्यैः ॥ ॥ * ॥ प्रवेशे पूर्वतो विशेषविवक्षयोक्तशेषन्यायेनाह—वृताविति । कतिपयैरिति—वृद्धानां श्रीव्रजेन्द्रेण सह गमनात् । सवयसामप्यत्यासन्नानामेव श्रीगोकुलतः संगमनात् । बलदेव इति अनुजस्नेहेन दुष्टवधार्थं बलविशेषप्रकटनात् । जनार्दन इति—जनैर्निजभक्तैः श्रीनारदादिभिरर्द्यते कंसवधार्थं याच्यते यः स तथा । राजन्निति हर्षेण संबोधयति । गजस्य दंतावेव तन्मारणसाधनतया कंसादौ भयदत्वेनांसे गृहीततया च वरे आयुधे ययोः । यद्वा—गजदंत श्रेष्ठावायुधे ययोस्तौ ॥ १६ ॥ तत्र च प्रवेशसमये । कदंबकं समुदायः "कदंबं निकुरंबे स्यान्नीपसिद्धार्थयोः पुमान्" इति मेदिनी । निकुरंबं समूहः । तत्तदभिप्रायानुसारेण मल्लाद्यभिप्रायानुरोधेन । साकल्येन

१ 'पतितं तं समाक्रम्य' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रससमूहमूर्तित्वेन । प्रेमभक्त्या तन्नामकरसेन सह वर्तत इति सप्रेमभक्तिकः । अनेन विकलत्वकथनेन । उक्तो द्योतितो न तु भगवति बीभत्सत्वं संगच्छतेऽतीव रम्यत्वादिति भावः ॥ ॥ * ॥ मल्लानामिति तैर्व्याख्यातम् । तत्र सर्वरसकदंबमूर्तिरिति कार्यकारणभेदात् "रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनंदी भवति" इति श्रुतेः । विशेषश्चैवं—मल्लानां परमशूरंमन्यतया गवतानामवज्ञातचरस्याप्य शनितुल्यांगत्वेन हरेः स्फुरणादशनिवद्विरोधिनमवगणय्य प्रवेशाच्च मल्लानां क्रोधस्थायिभावमयो रौद्रः १ । नृणां तद्द्वेषितदीयंमन्यव्यतिरिक्तानां पौरादीनां लोकोत्तरविलासादिदर्शनेन विस्मयस्थाय्यद्भुतः २ । स्त्रीणां मात्रादिव्यतिरिक्तानां स्मरत्वेन प्रियभावमयी रतिर्व्यक्ता, ततः स्थायी श्रृंगारः ३ । गोपानां श्रीदामादीनां स्वजनो वयस्यस्ततोऽसंकुचितचित्ततया गजरक्तमदबिंदुदंतादिजातविलक्षणवेशदर्शनेन तेषां हासस्थायिभावो हास्यः ४ । असतां राज्ञां शास्तेति तद्वीर्यातिशयदर्शनेन युद्धोत्साहस्थायी वीररसः ५ । पित्रोः श्रीदेवकीवसुदेवयोः श्रीनंदवसुदेवयोर्वा, तदुपलक्षणत्वेन तत्समवासनानामन्येषामपि शिशुत्वस्फूर्तेस्तदीयमार्दवज्ञानेन मल्लादिदौरात्म्यशंकया शोकस्थायी करुणः ६, (एष एव दयाशब्देन लक्षितः)। कंसस्य मृत्युस्तद्धेतुस्तेन भयस्थायी भयानकः ७ । अविदुषां सच्चिदानंदविग्रहत्वेन विद्वद्गुणसंमतेऽपि तस्मिन्विकलत्वमननेन भौतिक निर्णयाज्जुगुप्सास्थायी बभित्सः ८ । योगिनां ज्ञानिभक्तानां परं तत्त्वं परब्रह्मविग्रहः, तेन शांतिस्थायी शान्तः ९ । 'शमो मन्निष्ठता बुद्धेः' इति शान्तिशब्दस्य तन्निष्ठावाचित्वेन तन्निष्ठायाश्च तत्प्रीतिमात्रजन्यत्वेन दास्यसख्यादिभावविशेषानिर्देशेन चाखिलान्यवासनाशान्तिपूर्वकस्तत्स्वरूपैकालम्बनः प्रीतिविशेष एव शान्तिरित्युच्यते सोऽस्याऽस्तीति अर्शआदित्वादच् । वृष्णीनां परमाराध्य इति सप्रेमभक्तिकः भक्तिराराध्यतया ज्ञानं प्रेमात्मिका भक्तिः प्रेमभक्तिस्तया स्थायिरूपया सह वर्तत इति । अतोऽयं रससंग्रहश्लोकः । "रौद्रोऽद्भुतः शुचिरथो धृतसख्यहास्ये वीरोऽथ वत्सलयुतः करुणो भयांधः । बीभत्ससंज्ञ उदितोऽथ तथैव शान्तः सप्रेमभक्तिरिति ते ह्यधिका दश स्युः ॥" इति । अत्र क्रमं विना निर्देशस्तत्रोच्चावचजनानां दृष्टिपातस्तथैव जात इति विवक्षया । अथ वा—ये तत्र प्रतिकूलज्ञाना अज्ञानाः सज्ञाना अनुकूलज्ञानाश्चेति सामान्यतश्चतुर्विधास्तदवांतरभेदेन विशेषतो दशविधा द्रष्टारः सन्ति तेषामसौ यथायोग्यं पृथक्पृथक्तत्तद्धर्मप्रकटनेनाविर्बभाविति तादृङ्मधुरविलासे परमैश्वर्यमपि दर्शयति—मल्लानामिति । तत्र मल्लाः कंसपक्षीयाः । सक्षितिभुजश्च कंसश्च प्रतिकूलज्ञानाः परमसुखविग्रहे तस्मिँस्तथातथा दुःखदत्वायोग्यत्वात् । किन्तु तमोदूषितदृष्टयस्तस्मिन्विपरीतमेव धर्मं प्रतियन्ति खंडे पित्तदूषितजिह्वायास्तिक्तत्वमिव, तत्र मल्लानां स्वांगस्पर्शातिकर्कशत्वादिना सर्वयादवादिसाधुगणस्य तथा तस्यापि पराभवं भावयतां ततोऽप्यतिकर्कशत्वादित्वं प्रकटितमित्यशनिः । असतां साधूनामेव शान्तिं कुर्वतां तत एवानधिकारिणामपि बलादेव क्षितिभुजां तदुपभोगकर्तॄणां क्षेपेण तानभ्यवहरतामिव शास्ता दंडकर्ता, भोजपतेश्च राक्षसदैत्यादिनिजगणद्वारा स्वयं चानेकसाधूनां मृत्युहेतुत्वेन स्वमात्रादौ स्वस्मिँश्च तथोद्यमकारित्वेन प्रसिद्धस्य, अतः सर्वगिलानां श्रेष्ठस्येत्यर्थः । तस्य मृत्युर्यम इव । अथ न द्वेषिणो न च सज्ञाना न चानुकूलज्ञाना याज्ञिकब्राह्मणा इव केचिदविद्वांसस्तादृशतत्स्वरूपानुभूते सुखोदयाभावायोगान्न जानन्त्येव किन्तु तादृशत्वावभावकतच्छक्तिविशेषप्रसादालाभेन यत्किञ्चिन्नृबालकत्वेनैवानुभवन्ति तेषां विराट् विराडंशनृबालकविग्रहः । अथ सज्ञाना आकाशस्थितयोगिनः सनकादयस्ते तु सर्वाश्रयभूततया जानन्तीत्यनुकूल्यांशस्य नातिसंभवात्केवलतज्ज्ञानमात्रास्तेषां परं तत्त्वम् । अखंडस्वरूप तल्लक्षणं गुणानां पिण्डरूपश्रीभगवदाकारत्वेन केवलस्वरूपमात्राविर्भावब्रह्मोद्धारतोऽपि श्रेष्ठं वास्तववस्त्वित्यर्थः । अथ नरः स्त्रियो वृष्णयः पितरौ गोपाश्चानुकूलज्ञानाः तथातथा ज्ञानस्यानुकूल्यमयत्वात्तेषां तत्तद्रूप इति स्वाभाविकानंतमाधुरीप्रभाववृंदस्य तस्य ताँस्तान्प्रति तत्तदुल्लासायद्यदंशांशाभासलाभेन जीवा अपि तथातथा रोचन्ते, तत्र नृणामितरानुकूलचतुष्टयव्यतिरिक्तानां साधारणानाम् " निरीक्ष्य तावुत्तमपूरुषौ जनाः" (२०) इत्यादिवक्ष्यमाणानां मध्ये केषाञ्चित्पूरुषाणाम् 'महानयं बताधर्मः' (अ० ४४, श्लो० ७) इत्यादिवक्ष्यमाणवचनानां मध्ये कासाञ्चित्स्त्रीणाञ्चेत्यर्थः । तेषां नरवरो नरश्रेष्ठः । एषां ज्ञानित्वं प्रभावमाधुर्याशज्ञानेनैव तच्छ्रेष्ठत्वावगमात्, आनुकूल्यं च तथातथा वचनात् । एवमुत्तरोत्तरत्रापि तारतम्येन तत्त्वं ज्ञेयम् । स्त्रीणां तादृशवाक्यानां मध्ये 'गोप्यस्तपः किमचरन्' (अ०४४, श्लो०१४) इत्यादिवचनानां कासाञ्चित्स्मरस्तद्धेतुमाधुरीविशेषप्रकाशनेन श्रीकृष्णावतारिते चेतसि प्राकृतस्मरदेवताया अधिकारसामर्थ्येन च स्वयमेतद्रूपोऽत एवाह—मूर्तिमानिति । मृत्युत्वेन त्विदं न विशेक्ष्यतेऽयथावत्त्वात् । परतत्त्वेऽपि न तेन सह मूर्तेरभेदात् । वृष्णीनां तत्प्रधानानां यादवानां परदेवता पारमैश्वर्यस्फुरणेन संबंधस्फुरणस्यावृतप्रायत्वात् । परा सर्वतः श्रेष्ठा या देवता स्वयं भगवत्त्वेन निजाराध्या सैव स्वयम् । अतः पित्रोर्यदुकुललीलायां पितृत्वेन प्रसिद्धयोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीवसुदेवदेवक्योर्वृष्णिश्रेष्ठत्वेन तज्जन्मलक्षणमारभ्य तादृशस्तुत्यादिश्रवणेनैश्वर्यज्ञानाच्चावृतवात्सल्ययोरपि शिशुरिति तदानीं तादृशसंकटसमये श्रीनंदादिसंगेनैव शुद्धवात्सल्यस्योल्लासादिति ज्ञेयम् । स्वशब्दोऽत्र वृष्णिभ्योंतरंग
त्वव्यञ्जनाय । ‘स्वपित्रोः’ इति क्वचित्पाठः, तत्र विशेष्यपदं नाध्याहार्यम् । गोपानां श्रीनंदादीनां श्रीदामादीनां च स्वजनः पुत्रादिरूपो मित्रादिरूपश्चेति तेषां स्वभाव उक्तः । तथातथैव श्रीगोकुल
लीलायां श्रीमुनींद्रादिभिस्तेषामसकृत्प्रशस्तत्वात्तदपेक्षयाऽन्येषां कनिष्ठीकृतत्वाच्च । अत्र चैवं ज्ञेयम्–भक्तयभावास्तावत्त्रिविधाः–प्रतिकूलज्ञानानां प्रीतिविरोधिनः, अज्ञानानां प्रीत्युदासीनाः, अन्योभयेषां प्रीत्यात्मका
इति । तत्राद्यानामशनित्वशास्तृत्वमृत्युत्वभानाद्भयप्राया एव लक्ष्यन्ते । तच्च तेषां भयं रसतां न प्राप्नोति । प्राकृतरसशास्त्रविदः श्रव्यकाव्यदर्शनीयेषु दृश्यकाव्यानुकार्येषु च नलदमयन्त्यादिषु रसोत्पत्तिं न रसं प्रतिपद्यन्ते,किन्तु
तत्तत्काव्यानुभवितृष्वेव तेष्वपि तत्सवासनेष्वेव संप्रतिपद्यन्ते, मल्लादिसवासनास्तु न भगवत्काव्याधिकारेण इति । श्रीभागवतरसविदस्तु तादृशं भावं द्वेष्यत्वेनैव मन्यन्ते । वस्तुतश्च दुःखरूप एवासाविति न सुखस्वरूपर
सतामर्हति । तथाज्ञानामवज्ञैव सापि रसतां न प्राप्नोति । अथान्योभयेषां प्रीत्यात्मकत्वेनैक्येऽपि तत्तद्विशेषात्पञ्च भेदाः । योगिनां ज्ञानिभक्तस्य परपर्याया शान्तिः, वृष्णीनां तदुपलक्षितभक्तिमतां प्रेमपर्याया भक्तिः,
मित्राणां सख्यं, पित्रादीनां शिशुत्वपुत्रत्वभावनामयप्रीतिमतां वात्सल्यं, स्त्रीविशेषाणां प्रियताभावनामयीरतिरिति । यत्र तु वैशिष्ट्यं न जातं तत्र शुद्धैव प्रीतिः, तथा नृणामिति षट् । एष च प्रीत्यात्मकः सर्वोऽपि
भावो रसतां प्राप्नोत्येव, ब्रह्मानंदतोऽपि स्वत एव परमानंदरूपत्वात्, प्राकृतरसशास्त्राणामपि यत्किञ्चिदानंदरूपत्वेनैव प्रीत्यादीनां रसतासंप्रतिपत्तेः । विभावादिसद्भावश्चात्र स्वत एव परमालौकिकः, अतः प्राकृतरसवत्क
विकृत्रिमालौकिकत्वमपि नापेक्षते । अतोऽत्र वर्णनीयानुकार्ययोरेव मुख्यरसोत्पत्तिः । एष एव भागवतरसो नाम कौमुदीकारादिभिर्दर्शितः । मूलेऽपि–‘ पिबत भागवतं रसमालयम् ’ इत्यादौ । तत्रोदाहरणञ्च–
‘‘स्मरन्तः स्मायरन्तश्च मिथोऽघौघहरिं हरिम् । भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥’’, ‘‘क्वचिद्रुदन्त्यच्युतचिंतया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः । नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य
निर्वृताः ॥’’ इति च । अत्र हरिरालम्बनो विभावः, स्मरणमुद्दीपनो विभावः । विशेषेण भावयति रसमिति विभावशब्दस्यार्थः । स्मरणादिक उद्भास्वरोत्थोऽनुभावः, पुलकः सात्त्विकाख्यः । अनुभावयति ज्ञापयति रसमिति
तच्छब्दार्थः । चिन्तादयः सञ्चारिभावाः । रसे सम्यक् चरन्तीति । संजातया भक्त्येति स्थायी भावः, सर्वाश्रयत्वात्स्थातुं शीलमस्येति । ‘भवन्ति तूष्णीं परमेत्य निर्वृताः’ इति तत्संवलनम् । परं परमरसात्मकं वास्त्वित्यर्थः ।
एवम्–‘‘ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः । पुलकाञ्चितांग औत्कंठ्यात्स्वाख्यानेऽपि हि नाशकत् ॥ ’’ इत्यादि । एवं प्रीतेरैक्येन तन्मयरसस्याप्यैक्यम् । तद्भावानां षोढा भेदेन रसा अपि षोढा । यथा–शान्तिस्थायी
शान्तः १, प्रेमभक्तिस्थायी सप्रेमभक्तिकः २, सख्यस्थायी सख्यमयः ३, वात्सल्यस्थायी वत्सलः ४, रतिस्थायी शृंगारः ५, अवशिष्टप्रीतिस्थायी तु प्रीतिमय ६ एव । अथ येऽन्येऽद्भुतादयो भागवताः सप्त रसास्तेऽपि
तेषु भगवत्प्रियजनेषु भगवत्प्रीतेरेवाविर्भवन्ति, तत्रैव च तिरो भवन्तीति तत्तद्रससंचारिभावप्राया गौणत्वान्नात्र गण्यन्ते, तद्विरोधितदुदासीनभावौ तु तज्ज्ञानायैव दर्शिताविति । एते च भावरसाः प्रायः संज्ञान्तरेण परि
भाष्य रसामृतसिंधौ श्रीमद्भ्रातृशुभाशयैर्विस्तरतः करतल इव दर्शिताः । संक्षेपतस्तदर्थसंग्रहश्लोकाश्चैते–‘‘ स्थायीभावो विभावानुभावैः संचारिभिस्तथा । स्वादुत्वं नीयमानोऽसौ रस इत्यभिधीयते ॥ कारणान्यथ कार्याणि
सहकारीणि यानि च । तान्येव व्यपदिश्यन्ते विभावाद्याख्यया रसे ॥ आलंबनोद्दीपनाख्ये विभावस्य भिदे उभे । आलम्बनौ च द्विविधौ विषयाश्रयभेदतः ॥ रसस्य विषयः कृष्णस्तस्यानुभविताश्रयः । स चानुभविता प्रेम्णो
यः श्रेष्ठोऽन्यस्पृहाकरः ॥ उद्दीपनास्तु सम्बंधिपदार्थाः कंसवैरिणः । अनुभावाः सात्त्विकाः स्युरांगिकाश्चेति ते द्विधा ॥ स्तंभः स्वेदोऽथ रोमांचः स्वरभंगोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ नृत्यं
विलुंठितं गानं श्वासहासादयोऽपि च । आंगिका अनुभावास्ते यथायथमुदीरिताः ॥ निर्वेदश्च विषादश्च दैन्यं ग्लानिस्तमो मदः । गर्वः शंकात्रासवेगा उन्मादापस्मृती तथा ॥ व्याधिर्मोहो मृतिश्चैव आलस्यं जाड्यमित्यपि ।
व्रीडाऽवहित्था स्मरणं वितर्कश्चिन्तनं मतिः ॥ हिंसौत्सुक्यत्वौग्र्यमर्षासूयाश्च धृतिचापले । निद्रा च सुप्तिरालस्यमितीमे व्यभिचारिणः ॥ निर्वेदाद्यास्त्रयस्त्रिंशद्भावाः स्युर्व्यभिचारिणः । स्थायिनं वर्धयन्त्येते प्रादुष्षन्ति तिरोऽ
पि च ॥ आनुकूल्यात्मिकायां चेल्लिप्सोल्लाससधर्मिका । स स्थायी तारतम्येन रतिप्रेमादिनामभाक् ॥ रतिः प्रेमा तथा स्नेहः प्रणयो मानरागकौ । अनुरागमहाभावावेते भावक्रमा मताः ॥ शान्तिः प्रीतिस्तथा सख्यं वात्सल्यं
प्रियता तथा । ज्ञानादरस्वतुल्यत्वकृपावल्लभतारतः ॥ शान्तः प्रीतस्तथा प्रेयान् वत्सलो मधुरो रसाः । सामान्याद्भक्तिशब्दोक्तः स्थायी भक्तिरसो मतः ॥ विस्मयो हास्य उत्साहक्रोधभीतघृणाशुचः । ये चैते स्थायिनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतं कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ ॥ कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥ १८ ॥ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगंबरौ ॥ यथा नटावुत्तमवेषधारिणौ मनः क्षिपंतौ प्रभया निरीक्षताम् ॥ १९ ॥

उद्विविजे भीतो बभूव ॥ १८ ॥ यथा नटाविति निर्भयत्वं दर्शितम् ॥ १९ ॥

भक्तेर्जातास्ते तत्र गौणकाः ॥ अद्भुते हास्यवीरौ च रौद्रस्तद्वद्भयानकः । बीभत्सः करुणश्चैव तेषु गौणरसाः क्रमात् ॥ श्रीकृष्णविषयत्वं तु भक्तिद्वाराऽत्र संमतम् । क्वचित्स्वतोऽपि येन स्यात्स्थायिनो न हि दूषणम् ॥" इति । अत्र **विश्वनाथस्तु**—अथ तत्र रंगभूमौ स्थितेषु नानाविधजनसमुदायेषु श्रुतिप्रथितमहारसस्वरूपः स्वयं भगवांस्तत्तदन्तःकरणानुरूपमेव स्फुरति स्मेति वदन्स्वयमेव सर्वोपनिषत्साराऽर्थो मूर्त इति साक्षादिव दर्शयति—मल्लानां पर्वतोपमशरीराणां चाणूरादीनामशनिरिव विदितोऽभूदित्येवमेव सर्वत्रान्वयः । क्वचित्तृतीयार्थे क्वचित्संबंधे च षष्ठ्यः । अतिसुकुमारसुशीतलमधुरांगोऽपि सः पर्वतैर्महाकठोरसुसंतापककटुतरांगो वज्र इव मल्लैर्द्वेषाद्विष्टांतःकरणैरनुभूतः, पित्तदूषितरसनैर्मत्स्यंडिकापित्त इवातितिक्त इति तैस्तत्सवासनैस्तत्रत्यैः सभ्यैरपि दृष्टापि भगवतः स्वरूपं नास्वादितमिति तेषु रसाभास एव न तु रसः । नृणां माथुराणां द्वेषादिराहित्यादुत्पत्त्यैव प्रेमसामान्यवतां नरवरः, नरेष्वसाधारणैरतिचमत्कारकगुणरूपशीलादिभिः श्रेष्ठ इति तैः शुद्धसत्त्वमयान्तःकरणैस्तस्य नरवरत्वं स्वरूपमेवास्वादितामिति तेषु विस्मयरसः । स्त्रीणां जनन्यादिव्यतिरिक्तानां युवतीनां स्मर इति, कृष्णविषयककामस्य प्राकृतत्वाभावात्तासां माथुरत्वेन प्रेमवत्त्वात्ताभिस्तस्य साक्षान्मन्मथमन्मथत्वं स्वरूपमेवास्वादितमिति तासूज्ज्वलो रसः, अत्रैव मूर्तिमानिति विशेषणोपन्यासे नास्यैव स्वरूपस्यांगित्वं ध्वनितम् । गोपानां स्वजन इति तैरपि स्वरूपमास्वादितं यतो गोपमित्रत्वं तस्य खलु स्वरूपमेवेति तेषु सख्यरसो हास्यरसश्च । असतामसाधूनां क्षितिभुजां, श्लेषेण सज्जनवतीं पृथिवीं ग्रसतामिव भक्तापराधिनां तेषां शास्तान्तक इत्यन्तकत्वम् । सर्वसुहृदः सर्वानंदकस्य कृष्णस्य न स्वरूपमिति तैर्मल्लैरिव तन्नास्वादितमिति तेषु रौद्ररसाभास एव । स्वपित्रोः नंदवसुदेवयोर्वसुदेवदेवक्योर्वा शिशुरिति—ताभ्यां च स्वरूपमास्वादितं यतो नंदात्मजत्वं तस्य स्वरूपमेवेति तत्र वात्सल्यरसो विजिघांसुलोकदर्शनात्करुणरसश्च । भोजपतेः कंसस्य मृत्युरिति मृत्युत्वम् । माधुर्यसुधावर्षकस्य कृष्णस्य न स्वरूपमतस्तेन तस्य तमिति तस्मिन्भयानकरसाभासः । अविदुषां कंसपुरोहितादीनामपराधिनां विराट् व्यष्टिः । प्राकृतो मनुष्यः—हंहो अयमेव किं परमेश्वर इत्युच्यते भ्रान्तैरयं तु पारदारिकत्वेन गवादिघातित्वेन च श्रुतचरः, संप्रति प्राण्यस्थिरक्तकलिलगात्रो मनुष्येष्वप्यनाचारो घृणास्पदीभवत्यस्मिन्नेत्राणामिति व्याहरत्सु महापापिष्ठेष्वावेशाभावात्कंसादिभ्योऽप्यधमेषु मंदभाग्येषु तेषु बीभत्सरसाभासः । योगिनां सनकादीनां परं तत्त्वं मूर्तं परं ब्रह्मेति तस्य स्वरूपं तैरास्वादितमिति तेषु शान्तरसः । वृष्णीनां परदेवता उपास्यपरमेश्वर इति तत्स्वरूपं तैरास्वादितामिति तेषु दास्यरस इत्येवं तत्र दशविधेषु जनसमुदायेषु चतुर्णां विमुखत्वेन तद्रसास्वादनासामर्थ्यात् षड्भिरष्टौ रसा आस्वादिता इत्यतः "रसो वै सः, रसं ह्येवायं लब्ध्वानंदी भवति" इति । वै निश्चितमेव । स श्रीभागवतीयदशमस्कंधदर्शितायां माथुररंगभूमौ प्रसिद्धः कृष्ण एव रसः, तं रसम् "कृष्ण एवायमानंदमयोऽपि लब्ध्वा आनंदी भवत्यानंदभूमवान् भवति" इति श्रुतिरेवं व्याख्येया ॥ १७ ॥ तौ रामकृष्णौ । मनस्वी शूरः "मनस्वी स्थिरचित्ते स्याच्छूर योगविदि" इति धरणिः ॥ * ॥ हतं दृष्ट्वेति महोच्चमञ्चोपर्युपवेशात् । अतिदुर्जयत्वदर्शनं कुवलयापीडहननात्, तेजोविशेषाभिव्यंजनाद्वा । मनस्वी महाशूरोऽपि । तदेति ततः प्राक्तादृग्भयाभावात् । कंसस्य तादृशोद्वेगात्प्रहर्षेणाह—हे नृपेति । त्वं तु नृपालकत्वादासन्नमृत्युरपि न बिभेषीति भावः । तस्य त्वादृशत्वं नास्ति परद्रोहित्वात् 'द्रोग्धुर्हि परतो भयम्' इत्युक्तेः । स एव भूतो न तु त्वमिति भावान्तरम् ॥ १८ ॥ तौ रामकृष्णौ । महाभुजौ शूरौ । प्रभया देहकान्त्या । क्षिपंतावाकर्षन्तौ ॥ * ॥ विचित्राणि विविधानि अद्भुतानि वा वेषादीनि ययोस्तौ । तत्र वेषस्तिलकादिः, आभरणं तिलकमेव, कटककुंडलादिकृ (धृ) तोऽपि महायुद्धे तेषामम्लानत्वादिव्यंजनया कौशलविशेषो व्यञ्जितः । निरीक्षमाणानां मल्लादिदशविधजनानां प्रभयाऽशनित्वादिरूपया स्वतेजसा मनः क्षिपन्तौ यथायथं विक्षिपंतौ । उत्तमवेषधारिणाविति नटविशेषणम् । उत्तमास्तथातथा प्रत्यायनसमर्था ये वेषा नानानेपथ्यानि तद्धारिणावित्येकस्य नानात्वं, प्रकाशमात्रेण तु कालभेदेन दृष्टान्तः । यद्वा—इन्द्रजालिकनट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरीक्ष्य तावुत्तमपूरुषौ जना मंचास्थिता नागरराष्ट्रका नृप ॥ प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननम् ॥ २० ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥ जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुभिः ॥ २१ ॥ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतम् ॥ तद्रूपगुणमाधुर्य प्रागल्भ्यस्मारिता इव ॥ २२ ॥

प्रहर्षवेगेनोत्कलितान्युज्जृंभितानीक्षणान्याननानि च येषां ते । तयोराननं पपुः परं न तृप्ताः । निराकांक्षा न बभूवुरित्यर्थः ॥ २० ॥ तदेवाह । पिबंत इवेति । श्लिष्यंत इव परिष्वंगं कुर्वंत इव लक्षिता इत्यर्थः ॥ २१ ॥ यथादृष्टं धनुर्भंगादि यथाश्रुतं गोवर्धनोद्धरणादि तत्तदनतिक्रम्य तदनुरूपमित्यर्थः । प्रत्यक्षं च तयो रूपं गजदंतादियुक्तं गुणाः शौर्यादयो माधुर्यं हसितालापादि प्रागभ्यं धाष्टर्यं तैः स्मारिता इव स्मरणं प्रापिता इवेत्यर्थः ॥ २२ ॥

एवात्र दृष्टान्तः । स च स्वांगेन्द्रजालाभ्यां सत्यासत्यधर्मान्युगपद्दर्शयतीति ॥ १९ ॥ तावुक्तार्थौ । इत्यर्थ इति–रम्यत्वस्त्वालोकतः कस्यचिदपि चेतो न निवर्तत इति भावः ॥ * ॥ ये तु प्रतिकूलज्ञानव्यतिरिक्तास्तेषु तु साधारणानामपि परमप्रेमैव जातः किमुतासाधारणानामित्याह–निरीक्ष्येति । उत्तमपूरुषावित्याखिलसौंदर्यवैदग्ध्यादिकं सूचितम् । मंचास्थिता इति निरीक्षणं सम्यगुक्तम् । नागराः पौराः । राष्ट्रिका जानपदा लोकाः सर्वेऽपीत्यर्थः । उत्कलितत्वं विकाशितत्वम् । पपुरित्यनेन नयनानां चमत्कृतत्वम्, आननस्य सौन्दर्याऽमृतनिधानपात्रत्वम् । आननं पपुरिति सौन्दर्यप्राचुर्यात्तेनाभेदोत्प्रेक्षया । केवलाननिर्देशो दर्शनैतत्प्राधान्यात् ॥ २० ॥ तदेवाऽनैराकांक्ष्यमेव । पिबन्तः सादरमवलोकयन्तः । लिहन्त आस्वादयन्तः । इत्यर्थ इति–तत्रत्यजनैरिति शेषः । लक्षिता दृष्टाः । सर्वेन्द्रियैस्तमभजन्निति भावः ॥ * ॥ पिबन्त इति युग्मकम् । ताविति शेषः । इवेत्युत्प्रेक्षायाम् । नेत्रविस्तारणालिंगेन ताभ्यां तयोः पानमिव कुर्वन्त इत्यर्थः । प्रत्येकापेक्षया द्वित्वाऽद्वित्वादि । एवं जिह्वाद्वारा तन्माधुरीवर्णनलिंगेन तया तयोर्लेहनमिव कुर्वन्त इत्यर्थः । तथा हर्षवशात्तदतिसांमुख्यपूर्वकनासाफुल्लत्वससंभ्रमश्वासोत्तोलनादिलिंगेनाविच्छिदुरतत्सौरभ्यलाभलालसया तावेव नासयोः प्रवेशयितुमिव प्रवृत्ता इत्यर्थः । तद्वदेव च परस्पररूपदर्शनार्थं करचालनलिंगेन बाहुभिस्तदालिंगनमिव कुर्वन्तः । अत एव चालनलाघवेन बहव इव दृश्यन्त इत्यभिप्रायेण । अत्र तु बहुत्वं केषांचित्तत्तद्योग्यानां तत्तदिच्छाप्यास्ति, ततः किञ्चिदनुकरणमपि संभवतीत्यपि पिबन्त इवेत्यादिकमुक्तम् । अत्र **विश्वनाथः**–पिबन्त इवेत्यादीनि नयनविस्ताररसनाचालनप्रफुल्लनासाश्वासग्रहणबाहुप्रसारणलिंगज्ञापितानीत्यर्थः ॥ २१ ॥ इत्यर्थ इति । न त्वदृष्टाश्रुतचरं जगदुरिति भावः । 'प्रगल्भो निपुणे धृष्टे' इति धरणिः । प्रागल्भ्यं नैपुण्यं च ॥ * ॥ ऊचुरिति तैर्व्याख्यातम् । तत्र यथादृष्टमित्यादावेवं विवेचनीयम्–समासोऽयमव्ययीभावः । स च " अव्ययं विभक्ति–"इत्यादिना सूत्रेण, "यथासादृश्ये" इत्यादि च वर्ण्यते । तत्र प्रथमेन यथार्थत्वे प्रवर्तमानस्यैवं विवेकः–यथार्थाश्चत्वारः,–योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यञ्चेति । अत्र पदार्थानतिवृतिस्तदनातिक्रमः । तत्रोदाहरणम्–यथाबलमधीते, बलमनातिक्रम्येत्यर्थः । योग्यतायामुदाहरणम्–अनुरूपस्य दानं यथादानमिति, योग्यमित्यर्थः । अत्र यथाशब्देन प्रयुज्यते न त्वन्यशब्दैः । एवं सवीणं ध्वनतीत्यत्र सादृश्यार्थे सहशब्दवत् । तस्माद्यथादृष्टमित्यादौ दृष्टं यद्धनुर्भंगादि तदनतिक्रम्य । श्रुतं यद्गोवर्धनोद्धारणादि तत्तदनतिक्रम्येति विभज्यैव योज्यम् । तदनुरूपमित्यर्थ इति–अत्र योग्यतायामेवाव्ययीभावो गम्यते, अनुरूपमस्य दानामितिवत् । तत्तश्च तत्तद्योग्यमित्यर्थः । पदार्थानतिवृत्तियोग्यतयोरव्ययीभावयोर्भिन्नार्थत्वेऽपि योग्यतार्थे यत्पर्यवसानं कृतं, तत्खलु तत्रैव तात्पर्यमित्यपेक्षया गम्यते । "यथाऽसादृश्ये" इत्यसादृश्ये प्रवर्तमानस्य द्वितीयसूत्रस्योदाहरणम्–यथावृद्धं प्रविशंतु, येये वृद्धास्त इत्यर्थः । प्रत्यक्षमित्यनेन तच्छब्दो व्याख्यात इति । यद्वा--यथेति योग्यतार्थे एव, दृष्टं यद्धनुर्भंगादि तदनुरूपमेव । श्रुतं यन्नारायणांशवत्त्वादि तदनुरूपमेव, नाधिकामित्यर्थः । अत एव वक्ष्यते–'अंशेन' (२३) इति, तत्तदपि तेषां संदिग्धमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि ॥ अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥ एष वै किल देवक्यां जातो नीतश्च गोकुलम् ॥ कालमेतं वसन्गूढो ववृधे नंदवेश्मनि ॥ २४ ॥ पूतनानेन नीतांतं चक्रवातश्च दानवः ॥ अर्जुनौ गुह्यकः केशी धेनुकोन्ये च तद्विधाः ॥ २५ ॥ गावः सपाला एतेन दावाग्नेः परिमोचिताः ॥ कालियो दमितः सर्प इंद्रश्च विमदः कृतः ॥ २६ ॥ सप्ताहमेकहस्तेन धृतोद्रिप्रवरोमुना ॥ वर्षवाताशनिभ्यश्च परित्रातं च गोकुलम् ॥ २७ ॥ गोप्योस्य नित्यमुदितहसितप्रेक्षणं मुखम् ॥ पश्यंत्यो विविधांस्तापांस्तरंति स्माश्रमं मुदा ॥ २८ ॥

विस्मितानां वाक्यान्याह अष्टभिरेतावित्यादिभिः ॥ २३ ॥ किलेति सर्वत्रान्वेति ॥ २४ ॥ गुह्यकः शंखचूडः अन्ये चाघासुरादयः ॥ २५ ॥ २६ ॥ २७ ॥ आश्रममीषच्छ्रमयुक्तं मुखम्। अश्रमं श्रमरहितं मुखमिति वा। यद्वा अश्रमं यथा भवति तथा तापांस्तरंति स्मेति ॥ २८ ॥

वार्सात्संप्रति तद्दर्शनेनैव निश्चितं जातमित्याह–तद्रूपेति । तस्य रूपं भगवल्लक्षणाकारम्, गुणा असमोर्द्ध्वसौन्दर्यादयः, माधुर्यं कदाचिदाच्छादितेष्वपि रूपगुणेषु तत्स्वभावत एव मनोहरत्वम्, प्रागल्भ्यं सर्वत्राकुंठितत्वं, तैः स्मारिता इव । इवेत्युत्प्रेक्षायाम् । वस्तुतस्त्वसंभावनाविपरीतभावनाभ्यां संदिग्धत्वमेव न तु श्रुत्वापि दृष्ट्वापि विस्मृतत्वामिति तैः प्रतीतिं प्रापिता इत्यर्थः । यद्वा–तत्तत्तु तेषां सदा स्मर्यमाणमपि तदानीं तद्रूपादिदर्शनेनातीव चमत्कृतत्वमासीदिति । नूतनस्मरणविषयतामिव प्राप्तमित्याह--तद्रूपेति । अत एवोत्तरत्र 'विस्मितानां वाक्यमाह' इति तैर्व्याख्यास्यते । अत्र **विश्वनाथः**–दृष्टं धनुर्भंगादि, श्रुतं गोवर्धनोद्धरणादि, तत्तदनतिक्रम्योचुः । रूपाणि श्यामत्वदन्तपाणित्वादीनि, गुणाः शौर्यादयः, प्रागल्भ्यानि धनुर्भंगादिष्वकुंठत्वादीनि, तैस्तत्प्रभावादींश्श्रुतान्स्मारिता इवेत्यनधिकारार्थः ॥ २२ ॥ एतौ रामकृष्णौ । नारायणस्य साक्षादंशेनैश्वर्येण । यद्वा–अंशानां समूह आंशं स्वाभाविकस्वरूपं, नारायण एवावतीर्णावित्यर्थः । षष्ठी त्वत्राभेद एव राहोः शिर इतिवत् । यद्वा–इं कामं हन्तीतीहः शिवः, सोंशोऽवयवोद्भवो यस्य स इहांशो नारायणः । "नारायणाद्रुद्रोऽजायत" इति श्रुतेः । स इनः स्वामी यस्य स इहांशेनः परीक्षित्तत्संबुद्धौ तथा । एतेन 'कृष्णस्तु भगवान्स्वयम्' इत्युक्तिसामंजस्यमुक्तम् ॥ * ॥ यद्वूचुस्तदेवाऽऽहाष्टभिः–। भगवतः स्वाभाविकसमोर्द्ध्वनिखिलैश्वर्ययुक्तस्य हरेः सर्वदुःखहर्तुरभीष्टदानादिना मनोहरस्य च यतो नारायणस्य सर्वजीवाश्रयस्य तस्य साक्षादंशेन न तु शक्त्यावेशादिना । इत्येतौ सर्वाभीष्टप्रदौ भविष्यत इति दर्शितम् । इह मथुरायाम्, तत्रापि श्रीवसुदेवस्य वेश्मनीति स्वेषु चातिशयेन पक्षपातो दर्शितः । वेश्मनीति साक्षाद्भगवदंशत्वेन विकारासंभवात् । गीर्देवी त्वित्याह–अंशेन तच्छक्तिमयत्वात्तदंशोपलक्षितो यो वसुदेवस्तस्य वेश्मनीत्यर्थः ॥ २३ ॥ एष कृष्णः । किल प्रसिद्धम् । किल नीतः, किल ववृध इत्येवं किलाव्ययं सर्वत्रान्वेतीत्यर्थः । एतम् एतावंतम् । एतच्छब्दो मत्वर्थे लाक्षणिकोऽर्थानुपपत्तेः ॥ * ॥ एवं सामान्येन द्वावप्युक्त्वा भगवदवतारत्वमेव स्पष्टयितुं तच्चरितानि वक्ष्यन्तः प्राधान्येन श्रीकृष्णस्यादावाहुः–एष इति षड्भिः । वै प्रसिद्धौ । यो जातः प्रादुर्भूतः स एवैषः, अंगुल्या निर्देशादेष इति । किल निश्चये । एतमेतावंतम् । आर्षत्वात्तद्धितलुक् ॥ २४ ॥ अनेन कृष्णेन । अन्तं नाशम् । चक्रवातस्तृणावर्तः । अर्जुनौ ककुब्वृक्षौ । तद्विधास्तैस्तुल्याः, छलिन इत्यर्थः ॥ * ॥ अन्तं विनाशम् ॥ २५ ॥ एतेन श्रीकृष्णेन ॥ * ॥ सर्पतीतस्ततः प्रसरतीति सर्पः । शिरस्सु नृत्येन तद्गमनमशक्यमिति । कालिय इति तन्नामप्रसिद्धचैव महाविषत्वादिकं सूचितम् ॥ २६ ॥ अमुना कृष्णेन । अद्रिप्रवरो गोवर्धनः । अशनिर्वज्रपातः ॥ * ॥ विमदकरणप्रकारमाह–सप्ताहमिति । प्रथमः च उक्तसमुच्चये, द्वितीयोऽनुक्तस्य । तेन श्रीगोविंदाभिषेकोऽपि गृहीतः ॥ २७ ॥ अस्य कृष्णस्य । नित्यं सदा । मुदिते हर्षयुते हसितप्रेक्षणे यस्मिँस्तत्तथा । भगवति श्रमारोपेणानीशत्वमाशंक्याह–अश्रमं श्रमरहितमिति वा । मुखे तु श्रमचिह्नं भवति न तु श्रमस्तस्यान्यांगविषयत्वात्प्राय इत्यरुच्याह–यद्वेति । विविधानाध्यात्मिकादीन् ॥ * ॥ तत्रैव भावविशेषवतीनां कासाञ्चित्स्त्रीणां वाक्यमाह–गोप्य इति । नित्यं मुदितं हर्षेण प्रसन्नञ्च,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदंत्यनेन वंशोऽयं यदोः सुबहुविश्रुतः ॥ श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः ॥ २९ ॥ अयं चास्याग्रजः श्रीमान्रामः कमललोचनः ॥ प्रलंबो निहतो येन वत्सको ये बकादयः ॥ ३० ॥ जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च ॥ कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ॥३१॥ हे नंदसूनो हे राम भवंतौ वीरसंमतौ ॥ नियुद्धकुशलौ श्रुत्वा राज्ञाऽऽहूतौ दिदृक्षुणा ॥ ३२ ॥ प्रियं राज्ञः प्रकुर्वत्यः श्रेयो विंदंति वै प्रजाः ॥ मनसा कर्मणा वाचा विपरीतमतोऽन्यथा ॥ ३३ ॥ नित्यं प्रमुदिता गोपा वत्सपाला यथा स्फुटम् ॥ वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ॥ ३४ ॥

अनेन परिरक्षितः यदोर्वंशः सुबहुविश्रुतः सञ्छ्र्यादि लप्स्यत इति वदंतीति ॥ २९ ॥ धेनुकबकवत्सासुरेषु विपर्ययोक्तिर्जनवादेष्वनिश्चयात् ॥ ३० ॥ जनेष्वेवं ब्रुवाणेषु सत्सु तदसहमानश्चाणरोऽब्रवीदिति ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

तत् हसिते प्रेक्षणमवलोकनं ५ मिँस्तच्च । यद्वा—नित्यं मुदितं तत्, अत एव हसितं हास्ययुक्तं च प्रकृष्टं कटाक्षादिना सुंदरमीक्षणं यस्मिँस्तत्र । यद्वा—उदितं हसितयुक्तं प्रेक्षणं यस्मिँस्तन्नित्यं मुदा पश्यन्त्यः, अत एवाश्रममनायासेन तरन्ति स्माऽतरन् । ता एव तेरुर्नास्मद्विधमंदभाग्या इति दैन्येनातीतत्वम् । यद्वा—स्म प्रसिद्धावेव्र नातीते । अतो वर्तमानप्रयोगस्तस्य व्रजगमने संभावनानपगमात् । विविधान् गुरुपत्यादिकृतनिन्दा तर्जनादिना विरहादिभेदेन वा । एवं रासादिलीलापि सूचिता ॥ २८ ॥ अनेन कृष्णेन ॥ * ॥ अथ श्रीमथुरादौ करिष्यमाणां लीलामुद्दिशति—वदन्तीति, शास्त्रज्ञाः कथयन्ति । महत्त्वं सर्वत उत्कर्षम् ॥ २९ ॥ अयं रामः । अस्य कृष्णस्य । येन रामेण ॥ * ॥ एवं श्रीबलदेवस्याप्याहुः—अयमिति । अप्यर्थे चकारः । अग्रजत्वेन श्रीमान् तदनुरूपं सर्वशोभायुक्तः । तत्रापि नेत्रशोभया लोभयन्ति—कमलेति । वत्सको वत्सप्रतिरूप एव न तु वत्सः । "इवे प्रतिकृतौ" इति कन् । इति तद्वधे दोषः प्रत्याख्यातः । आदिशब्दाद्धेनुकजातयः । विपर्ययोक्तिस्तैर्योजिता । अत्र 'यथादृष्टं यथाश्रुतम्' (२२) इत्युक्तेस्तत्त्वज्ञानाभाव एवोपजीव्यः ॥ ३० ॥ तत् जनवादरूपं तन्महत्त्वम् ॥ * ॥ एवमेतत्प्रकारम् । ब्रुवाणेष्विति प्रहर्षेण तेषामुक्त्यसमाप्तिरुक्ता । जनेष्विति बाहुल्यात्तेषाम निवार्यत्वं ज्ञापितं, तदुक्तेरप्रमाणं च खंडितम् । एवं तेषां मात्सर्यादयः । तूर्येषु नितरां नदत्स्वित्यनेन युद्धोत्साहश्च दर्शितः । अत एवाब्रवीत्समाभाष्याहूय संबोध्य वा, वाक्यमिति पौनरुक्त्यं विशेषणाविशेष्येऽत्र देय इत्यभिप्रायेण । स च निष्ठुर इति गम्यः । यद्वाऽकारप्रश्लेषेण वक्तुमयोग्यमित्यर्थः ॥ ३१ ॥ लोकप्रसिद्धत्वादाह—हे नंदसूनो इति । वीर्येण पराक्रमेण । संमतौ सम्यक्ख्यातौ । नियुद्धं बाहुयुद्धम् ॥ * ॥ समाभाषणप्रकार मेवाह—हे इति । नंदसूनुत्वेन संबोधनं तदीयसत्पुत्रत्वस्य व्यञ्जनाय, रामेति सकललोकरतिहेतुत्वस्य । तत्तच्च युद्धाय प्रोत्साहनम् । श्लेषेण तु गोपपुत्रत्वेनामहत्त्वं, तद्वत्पितृसंबंधानुल्लेखेनाज्ञातापितृकत्वं सूचयति । तत्तूपहासेन तेजोग्लापनार्थमिति ज्ञेयम् । वीर्येण बलेन । सम्मतौ लोकानामादृतौ । तत्रापि नियुद्धे बाहुयुद्धे । कुशलौ दक्षौ श्रुत्वाऽत एव दिदृक्षया भवन्तौ नियुद्धं वा द्रष्टुमिच्छया । राज्ञेति तद्योग्यतोक्ता । अहो अत्र मल्लयुद्धेन क्रीडतामिति भावः । अत्रापि विरोधिलक्षणयोपहास एव तात्पर्यम् ॥ ३२ ॥ अतोऽन्यथा राज्ञः प्रियानाचरणेन । विपरीतमश्रेयः ॥ * ॥ तत्र वैमुख्यं न युक्तं, तथा च स्मृतिरित्याह—प्रियमिति । प्रकुर्वन्त्य इत्यार्षो नुम् । एतच्च भगवतोः श्रेयोऽर्थमेवेति भावः ॥ ३३ ॥ राज्ञा कथमवगतमेतौ नियुद्धकुशलाविति चेत्तत्राह—नित्यमिति । नियुद्धक्रीडया गोपा गोवत्सांश्चारयन्तीति किंवदन्त्यावगतमित्यर्थः ॥ * ॥ न च वक्तव्यं गोपैरस्माभिस्तन्न सम्यग्ज्ञायते इति यतो नित्यमिति । गोपाः गवां रक्षकाः । समुच्चयेऽप्यर्थे वा तथा शब्दः । वत्सपाला अपि, गाः गोजातीः स्फुटं व्यक्तं प्रसिद्धमेवेत्यर्थः । इदमपि निगूढावहासयुक्तम् । एवमुत्तरत्रापि ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्राज्ञः प्रियं यूयं वयं च करवाम हे ॥ भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ॥ ३९ ॥ तन्निशम्याब्रवीत्कृष्णो देशकालोचितं वचः ॥ नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनंद्य च ॥ ३६ ॥ प्रजा भोजपतेरस्य वयं चापि वनेचराः ॥ करवाम प्रियं नित्यं तन्नः परमनुग्रहः ॥ ३७ ॥ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितम् ॥ भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः ॥ ३८ ॥

हे कृष्ण प्रियं करवामेति । राज्ञि प्रीते भूतानि च प्रसीदेयुः ॥ ३५ ॥ ३६ ॥ ३७ ॥ यथोचितं नियुद्धं बाहुयुद्धं भवेत् । मल्लसभासदो यतो नित्यं भवतामेषा क्रीडा तस्माद्धेतोः । यूयं वयं च करवाम इत्यत्र 'युगपत्प्राप्तौ परः' इत्युत्तमपुरुषप्रयोगः । नियुद्धस्य कलहरूपत्वात्तत्र किं फलं तत्राह—भूतानीति ।:कथं सर्वभूतप्रसादस्तत्राह—सर्वभूतेति ॥ * ॥ तर्हि गोपैः सह तत्क्रीडा कार्येति चेत्तत्राह—तस्मादिति । राज्ञः प्रियार्थमेवाऽस्माभिः सह कार्येति भावः । भूतानि जीवाः । नृपस्य सर्वभूतमयत्वं सर्वभूतस्य तदुपजीवनत्वात् । तस्मान्निजप्रजारूपयोर्भवतोरनेन रक्षैव कार्येति मा च भैषीस्त्वमिति भावः । अन्यत्तैः । तत्रेतिशब्दस्य प्रकारार्थस्य राज्ञीत्यादिनान्वयः ॥ ३९ ॥ तत् चाणूरवाक्यम् । अभिनंद्य कारवमेत्युक्त्वा च ॥ * ॥ तन्निशम्याभिनंद्य च देशकालोचितं तदानीं तादृशमेव वक्तुं योग्यं वचोमात्रमब्रवीत् । वस्तुतोऽभिप्रायस्त्वन्य एवेति भावः । तादृशवचने हेतुः—नियुद्धमित्यादि । तत्र हेतुः—कृष्णः, तादृशलीलाकौतुकितया प्रसिद्ध इत्यर्थः ॥३६॥ अस्य कंसस्य । प्रजा यूयम् । तथात्वेऽपि वयं वनेचरा एतेन वनेचराणां मुख्यप्रजात्वं नास्तीत्युक्तं, तथापि यद्वयं प्रियं नृपप्रियं नियुद्धं नित्यं करवाम तत्परं केवलमनुग्रह एवेशस्येति शेषः । वस्तुतस्तु वयं नित्यं प्रियं मोक्षं यदस्य करवाम करिष्याम, तन्नोऽस्माकमनुग्रह एव । न हि मदनुग्रहं विना मोक्षो भवतीति सूचितम् ॥ * ॥ अभिनंदनमेवाह—प्रजा इति । भोजपतेरिति गौरवात् । तत्राप्यस्य न तूग्रसेनस्यापीत्यर्थः । वयञ्च प्रजाः क्रीदृशा अपि वनेचरा अपि । चकाराद्भवन्तस्तावत्पुरवासिनः सुतरामेवेत्यर्थः । तस्माद्वयमपि राज्ञः प्रियमाज्ञापालनादिकं करवामैव, नोऽस्मभ्यं भोजपतेरनुग्रह एव वयमत्र प्रवृत्ता भवामेति भावः । वस्तुतस्त्वस्येत्यनादरे षष्ठी । वयं चापि वयमपि प्रजाः, अपि तु नैवेत्यर्थः । तत्र हेतुर्वनगोचराः, ।नित्यवृंदावनविहारिण इत्यर्थः । अयमाधुनिक इति भावः । तस्माद्वयं राज्ञः स्वस्य श्रीगोपराजस्यैव प्रियं करवाम कर्तुमिच्छामः, न तु भोजपतेः । नन्वीश्वरस्य तवान्यत्र राजत्वादिमननमाज्ञापालनादिकञ्चासंभवमित्याशंक्याह—नोऽस्माकमनुग्रहः—प्रेमविशेषकर्तृजनविषयश्चेतोद्रवविशेष एव, येन तादृशीमपि वश्यतां प्रतिपद्येमहीति भावः ॥ ३७ ॥ इत्यर्थ इति—माऽत्र निषेध एवेति ध्येयम् । न हि मल्लानां सभा सा तु राज्ञ एवेत्यस्वारस्यादाह—हे मल्लेति वा । वस्तुतस्तु वयं बाला बलानां शक्तीनां समूहो बालं तद्विद्यते येषु ते बालाः । मत्वर्थीयोऽच् । सर्वशक्तिमंत ईश्वराः । तुल्यबलैः स्वसदृशसर्वशक्तिमद्भिः । अन्यथा निर्बलसबलयोर्युद्धेक्षणात्सभ्याः पापिनो भवन्तीति तात्पर्यम् । एतेन यूयं नास्मत्तुल्यबला इति बलैकदेशवतां सर्वबलवद्भिर्नियुद्धमनुचितमेवेति ध्वनितम् ॥ * ॥ बाला बाल्यत्वेनाल्पबला इत्यर्थः । बहुत्वमन्येषामपि बालानां स्वकोटौ प्रवेशश्च दृष्टान्तव्यञ्जनाय, संसर्गिगोपवर्गापेक्षया वा । तुल्यबलैरिति—बालेष्वपि ये न्यूनबला अधिकबलाश्च तैर्नेत्यर्थः । क्रीडिष्याम इति—तत्रापि क्रीडायामेव ममेच्छेति भावः । अन्यत्तैः । वस्तुतस्तु हे बाला अज्ञास्तुल्यबलैर्गोपैः सखिभिरेव सह क्रीडिष्यामो न त्वल्पबलैर्युष्माभिरित्यर्थः । गोपैर्ममानंतबलशीलवयोविलासवेशैश्च 'मूर्छितकलं वरवेणुत्राणवीणैः' इति प्रसिद्धेः । 'मल्लानामशनिः' इति च । तत्रापि भवादृशामाग्रहात्तत्र प्रवर्तामहे, ततोऽशनिस्वभावमदंगस्य स्पर्शने भवतां वधे तु नास्माकं दोष इति भावः । श्रीहरिवंशे विष्णुपर्वणि कंसवधेऽष्टाशीतितमेऽध्याये नियुद्धे निपातनानंतरमवध्यस्यापि मल्लस्य तस्य वधे कार्ये स्वदोषपरिहारार्थं स्पष्टमेव भगवद्वचनम्—"अहं बालो महानंध्रो वपुषा पर्वतोपमः । युद्धं ममानेन सह रोचते बाहुशालिना ॥ युद्धव्यतिक्रमः कश्चिन्न भविष्यीत मत्कृतः । न ह्यहं बाहुयोधानां दूषयिष्यामि यन्मतम् ॥ योऽयं करीषधर्मश्च तोयधर्मश्च रंगजः । कषायस्य च संसर्गः समयो ह्येष कल्पितः ॥ संयमः स्थिरता शौर्यं व्यायामः सत्क्रिया बलम् । रंगे च नियता सिद्धिरेतद्युद्धविदां मतम् ॥ यदयं बाहुयुद्धं वै स्वैरं कर्तुमुद्यतः । अत्र वै निग्रहः कार्यस्तोषयिष्याम्यहं जगत् ॥ करूषेषु प्रसूतोऽयं चाणूरो नाम नामतः । बाहुयोधी शरीरेण कर्मभिश्चात्र चिन्त्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चाणूर उवाच ॥ न बालो न किशोरस्त्वं बलश्च बलिनां वरः ॥ लीलयेभो हतो येन सहस्रद्विपसत्त्वभृत् ॥ ३९ ॥ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नाऽनयोऽत्र वै ॥ मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्धे कुवलयापीडवधो रंगभूमिप्रवेश निरूपणं नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥ श्रीशुक उवाच ॥ एवं चर्चितसंकल्पो भगवान्मधुसूदनः ॥ आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः ॥१॥ हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः ॥ विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया ॥ २ ॥

मल्लसभाधिकृताज्ञानानधर्मो मा स्पृशेन्न स्पृशेदित्यर्थः । हे मल्लेति वा ॥ ३८ ॥ सहस्रद्विपानां सत्त्वं बलं बिभर्तीति तथा ॥३९॥ बलिभिर्मादृशैः सह भवद्भ्यां बलिभ्याम्। अत्र युद्धे नानयो नाधर्मः। विक्रम पराक्रमं कुरु । मुष्टिको विक्रमतादित्यनुषंगः ॥ ४० ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां त्रिचत्वारिंशोऽध्यायः॥४३॥ चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनम् ॥ कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनम् ॥१॥ चर्चितो निश्चित एव संकल्पो यस्य सः । आससाद जग्राहेत्यर्थः ॥१॥२ ॥

ताम् ॥ एतेन बहवो मल्ला निपातानन्तरं हताः । रंगप्रतापकामेन मल्लमार्गश्च दूषितः । शास्त्रसिद्धिस्तु योधानां संग्रामे शास्त्रयोधिनाम् ॥ रंगे सिद्धिश्च मल्लानां प्रतिमल्लनिपातजा । रणे विजयमानस्य कीर्तिर्भवति शाश्वती ॥ हतस्यापि रणे शास्त्रैर्नाकपृष्ठं विधीयते । रणे ह्युभयतः सिद्धिर्हतस्येह घ्नतोऽपि वा ॥ सा हि प्राणान्तिकी यात्रा महद्भिः साधुपूजिता । अयं तु मार्गो बलतः क्रियातश्च विनिस्सृतः ॥ मृतस्य रंगे कः स्वर्गो जयतां वा कुतो रतिः । ये तु केचित्स्वदोषेण राज्ञः पंडितमानिनः । प्रतापार्थे हता मल्ला मल्लहंतुर्वधो हि सः ॥'' इति ॥ ३८ ॥ तथैवाह सः—न बाल इति । बलिनामेकैकशक्तिमतां ब्रह्मादीनां वरः । तदेवाह—येन त्वया सहस्रेति ॥ * ॥ किशोरश्च न भवसि तस्यापि बालसादृश्येनाल्पबलत्वात् । किन्तु बलिनां मध्ये वरः श्रेष्ठः । वरत्वमेव दर्शयति—लीलयेति । येनेति येनयेनेत्यर्थः । द्वयोरपि स्कंधे गजदंतस्य दृष्टत्वादनुमाय तदिदं प्रोक्तमिति ज्ञेयम् ॥ ३९ ॥ यस्माद्युवां बलिनां वरौ लोकदृष्ट्या । बलिभिरस्माभिः सह । अत्र नियुद्धे ॥ * ॥ बलिभिरिति बहुत्वं सर्वेषामेव मल्लानां क्रमेण नियुद्धेच्छया । यद्वा—बलिभिर्बहुभिरप्येकदा योद्धव्यं तथापि नानयः। कथं तर्हि भवता योद्धव्यमित्याशंक्य पुनः स्वाभिमानमाह—मयि तु विक्रम, यावन्तं स्वविक्रमं दर्शयेत्यर्थः । अहं तु न दर्शयामीति भावः । ननु गोपा वयं राजसभायां न क्रीडायोग्या इत्यत्राह—हे वार्ष्णेय । तदिदमपि वयं जानीम इति भावः । न त्वं गोपः किन्तु वृष्णिवंशोद्भूतत्वाद्राजवंशीय एवेति तत्त्वम् । **विश्वनाथस्तु**—बलिभिर्मादृशैः सह, न चात्र तैर्बालैस्तेषां त्वत्तुल्यबलत्वाभावादिति भावः ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशदस्कंधे पूर्वार्धे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ आदिपदेन मातापित्रोः शोकमर्दनग्रहः । ताभ्यां रामकृष्णाभ्याम् (१) । श्रुत्युक्तमल्लादिमर्दनमाह—एवमिति । तथा च श्रुतिः—"अवातिरतमनृतानि विश्वऋतेन मित्रावरुणा सचेथे" इति । अर्थस्तु—तत्रायादवोऽपि कंसो यदूनामाधिपत्यमिच्छन्ननृतः,तेन प्रयुक्तानि मल्लादीनि बहुत्वमाद्यर्थम्, आदिना हस्त्यनुक्ताद्यादीनां ग्रहः । अनृतानि विश्वसर्वाणि तानि अवातिरतं तिरस्कृतवन्तौ । ऋतेन सत्येनैव यादत्ववेन गोपत्वाच्छादितया प्रागप्रसिद्धेन मित्रावरुणौ सूत्रान्तर्यामिणौ रामकृष्णौ सचेथे संगच्छेथे युवाम् । तत्र कंसस्यानृतत्वमत्र हरिवंशस्थमहामात्रकथया बोध्यम् ॥'चर्चितौ निश्चितार्चितौ' इति निरुक्तिकारः ! एवं चाणूरोक्तप्रकारेण ॥ * ॥ भगवानशेषैश्वर्यसंपन्न इति सद्य एवेच्छामात्रेण तद्वधसामर्थ्यं सूचितम् । तथापि चाणूरमाससाद क्षणंक्षणं मल्लयुद्धकौतुकार्थमंतिके गतः । यतो मधुसूदनः । यथा सद्यो हंतुं शक्तोऽपि चिरं बाहुयुद्धक्रीडां कृत्वा मधुं हतवाँस्तद्वदित्यर्थः । लोकवत्तु लीलाकैवल्याम्, इति न्यायेनेति भावः । अथ तदनंतरं मुष्टिकमित्यादि॥१॥ मल्लयुद्धरीतिमाह—हस्ताभ्यामिति । बद्ध्वा गृहीत्वा ॥ * ॥ क्रीडामेवाह—हस्ताभ्यामित्यादिचतुर्भिः । चकार उक्तसमुच्चये । एवशब्दस्य हस्ताभ्यामित्यनेनाप्यन्वयः, अन्येनान्यस्य मिश्रणे वैषम्यापत्त्या मल्लक्रीडापाटवहानेः । एवमग्रेऽपि । अन्योऽन्यं विजिगीषयेति । श्रीभगवतोऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अरत्नी द्वे अरत्निभ्यां जानुभ्यां चैव जानुनी ॥ शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ॥ ३ ॥ परिभ्रमणविक्षेपपरिरंभावपातनैः ॥ उत्सर्पणापसर्पणैश्चान्योन्यं प्रत्यरुंधताम् ॥४॥ उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि ॥ परस्परं जिगीषंतावपचक्रतुरात्मनः ॥५ ॥ तद्बलाबलवद्युद्धं समेताः सर्वयोषितः॥ऊचुः परस्परं राजन्सानु कंपा वरूथशः॥६॥महानयं बताऽधर्म एषां राजसभासदाम् ॥ये बलाबलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ॥ ७॥

बाहुमध्यात्कनिष्ठांगुलिव्यतिरेकेण कृतमुष्टिर्हस्तोऽरत्निः ॥ ३ ॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरंभो बाहुभ्यां निष्पीडनम् अवपातनमधःक्षेपः उत्सर्पणमुत्सृज्य पुरतो गमनम् अपसर्पणं पृष्ठतो गमनम् एतैः अन्योऽन्यं प्रत्यरुंधतां प्रत्यावृतवंतौ ॥ ४ ॥ उत्थापनं जानुनी पादौ च पिंडीकृत्य पतितस्योच्चाटनम् । उन्नयनं हस्ताभ्यामुद्धृत्य नयनम् । चालनं कंठादिलग्नस्य निःसारणम् । स्थापनं पाणिपादादिपिंडीकरणम् । एवं परस्परमात्मनो देहस्यापचक्रतुरपकारं कृतवंतौ ॥ ५ ॥ तद्युद्धं बलाबलवदेकतो बलमन्यतोऽबलम् तद्युक्तं बलाबलवत् विषममित्यूचुरित्यर्थः । वरूथशः समेताः संघशो मिलिताः । यद्वा तद्बलाबलवतोर्युद्धं दृष्ट्वा महानयमधर्म इत्यूचुरित्यन्वयः । अत्र दृष्ट्वेत्यध्याहार्यम् ॥ ६ ॥ तदेव दर्शयति । महानिति । बालयोर्बलवतोश्च युद्धं राजा चेत्पश्येत्स्वयं वारणीयः । एते तु राज्ञः पश्यतः स्वयम्

नरलीलाव्यवसायत्वेन विजयेच्छासंभवात् । चार्चितश्चाणूरमहं हन्यामिति विचारितः संकल्पोऽभिप्रायो येनेति सः ॥२॥ तौ कृष्णचाणूरौ । अभिजघ्नतुः संयोजितवन्तौ ॥*॥ द्वे प्रत्येकं पृथगित्यर्थः । तौ श्रीभगवच्चाणूरौ । तावित्यस्य पूर्वेण परेणाप्यन्वयः।अभितो जघ्नतुः प्रहृतवन्तौ । अरत्निशब्दस्तैर्व्याख्यातः। अत्र प्रमाणवाचकः खल्वयं, ततस्तेन युद्धं न संभवति,:कथंचित्तद्वयञ्जकाकारांगवाचकत्वेऽपि निस्सृतकनिष्ठांगुलितया प्रहारसौकर्यं न संभवति, नापि मल्लेषु तादृशं युद्धं प्रसिद्धं, तस्मान्मुष्ट्योपलक्षितत्वेन कथंचिन्मुष्टिरेव वाच्या । व्याख्यास्यते च भगवद्वात्राणामरत्निजान्वादीनामिति । यद्वा—"अरत्निः कफणौ हस्ते सप्रकोष्ठे तदंगुलौ" इति विश्वप्रकाशात्कफोणिरेवोच्यते । 'कफोणिः कफणिस्तथा' इति द्विरूपकोशात् । अत्र **विश्वनाथस्तु**—यद्यप्यरत्निभ्यां मल्लयुद्धं दुष्करत्वादप्रसिद्धं, प्रसिद्धन्तु समुष्टिहस्ताभ्यामेव तदपि 'वेणुत्राद्य उरुधा निजशिक्षा' इतिवद्भगवता निष्कनिष्ठमुष्टिहस्तेनैवारब्धे नियुद्धे चाणूरेणापि कष्टं प्राप्तेनापि वीराभिमानिना तथा कृतमिति ज्ञेयम् ॥ ३ ॥ एतैर्नियुद्धप्रकारैः ॥ * ॥ प्रत्यरुद्वतामिति—लुङि श्नम्प्रत्यय आर्षः ॥ ४ ॥ उच्चाटनमुच्चैःकरणम् । एवमुक्तरीत्या । "मल्लयुद्धं नियुद्धज्ञा विंशभेदं प्रचक्षते । द्वात्रिंशद्भेदमपरे चत्वारिंशद्विधं परे ॥" इति संग्रामविजयवचनात् । सर्वनियुद्धविधिदर्शनार्थं भगवतैवं क्रीडितम् । तत्तद्विधायासाभावादयमेवार्थ उपर्यपि । "तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ । युयुधाते" इत्यादिना सूच्यते ॥ * ॥ आत्मनोपचक्रतुरिति भगवतस्तदभावेऽपि द्रष्टृलोकाभिप्रायानृत्यात्तथोक्तम् ॥ ५ ॥ इत्यर्थ इति—कृष्णचाणूरयोः साम्याभावाद्बलाबलवतोर्विषममेव युद्धमिति भावः । वरूथशः संघशः "वरूथो रथगुप्तौ संघे क्लीबं चर्मवेश्मनोः" इति कोशात् । विषमपदाध्याहारस्यागातिकगतिकत्वादाह—यद्वेति । अग्रिमश्लोकपादेनान्वयोऽत्रेति ॥ * ॥ सानुकंपा इति—स्नेहस्य स्वभाव एवायं यत्स्वविषयस्य बलाधिक्यं न प्रत्याययेदिति । वरूथशः स्वस्ववर्गभेदेन ॥ ६ ॥ तदेव अधर्मत्वम् । स्वयं युद्धकर्तृभिरिति । एते युद्धकर्तारः । अनुमन्यन्ते अनुकूलं मन्वते । राजसभायां सीदंत्युपविशंतीति राजसभासदस्तेषां तथा । इत्यर्थ इति—सत्यप्यधर्मवारके पुनरतद्वारणे महानेवाधर्म उभयोरिति भावः ॥ * ॥ तासामुक्तिं दशभिराह—बालाभ्यां सह बलवतोर्युद्धं

१ तिलोप आर्षः । २ 'उपचक्रतुरात्मना' इति पा० । ३ अधर्मकर्त्रवारकयोः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ ॥ क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ॥ ८ ॥ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥ वल्गतः शत्रुमभितः कृष्णस्य वदनांबुजम् ॥ वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ॥ ११ ॥ किं न पश्यत रामस्य मुखमाताम्रलोचनम् ॥ मुष्टिकं प्रति सामर्षं हाससंरंभशोभितम् ॥ १२ ॥

न्विच्छंत्यनुमन्यंत इति बतायं महानधर्म इत्यर्थः ॥७॥ बलाबलवयुद्धतां प्रपंचयति पंचभिः । क्वेति । वज्रसाराणि वज्रवत्कठिनानि सर्वाण्यंगानि ययोस्तौ ॥८॥ समाजस्य सभायाः ॥ ९ ॥ अपरा ऊचुः । न सभामिति । अब्रुवन् ज्ञात्वाऽपि तूष्णीं तिष्ठन् । विब्रुवन्विपरीतं ब्रुवन् । अज्ञो न जानामीति ब्रुवन् । अतः प्राज्ञो न सभां प्रविशेदिति ॥ १० ॥ वल्गतः शत्रुमभित इति शत्रोः सर्वतो धावतः कृष्णस्य श्रमवारिणा उप्तं व्याप्तं मुखांबुजं दृश्यताम् ॥ ११ ॥ अन्या ऊचुः । किं न पश्यतेति । सामर्षं सक्रोधम् ।

राजा चेत्पश्येत्सोऽपि वारणीयः । एते तु राज्ञः पश्यतोऽनु पश्चात्स्वयमपि पश्यन्ति, इच्छतस्तस्यानु स्वयमपीच्छन्तीति शत्रंतस्य दृशेराक्षेपात्तिङन्तोऽपि दृशिर्लभ्यते । तथैव तिङन्तस्येच्छतेराक्षेपात्सोऽपि शत्रन्तो लभ्यते ॥ ॥ ७ ॥ " सारो बले स्थिरांशे च पुमान्न्याय्ये वरेऽन्यवत् " इति यादवः । शैलेन्द्रो मेरुस्तद्वद्दृढांगौ । नाप्तयौवनावप्राप्तयुवधर्मौ ॥ * ॥ बलवत्त्वाबलवत्त्वे तर्जनीभिर्दर्शयन्ति—क्वेति । क्व अत्यन्तबाधके धर्मे, तथा क्वात्यन्त बाध्यधर्मे वर्तत इत्यर्थः ॥ ८ ॥ व्यतिक्रमो हानिः । अस्य कंसकृतस्य । यत्र स्थाने । विदुषा न स्थेयमित्यर्थः । कर्हिचिदिति लाभेऽपीत्यर्थः ॥ * ॥ समुत्तिष्ठेत्सम्यगुद्भवेत् । तस्मादत्र वयं स्थातुं न योग्या इति भावः ॥ ९॥ अतः किल्बिषावाप्तेः " आत्मसर्वांगसंबद्धमलं किल्बिषमुच्यते " इति । अनपायिमलं किल्बिषमित्यर्थः ॥ * ॥ तथाप्यत्र यत्प्रविष्टास्तन्महापराधा जाता एवेत्याशयेनाहुः—नेति । प्राज्ञः युक्तवचनायुक्तवचनयोर्दोषज्ञः । तर्हि तव तस्य सावधानत्वे को दोषस्तत्राहुः—सभ्यानां कथंचित्कस्यचिद्दोषः स्यात् । एवं स्वस्यापि भ्रमादिना सभ्यानां संसर्गजं स्वस्यापि श्रमारिष्टं विचारयन्नित्यर्थः । दोषानेवाह—अब्रुवन्निति । विज्ञोऽपि मौनमपलापं वा कुर्व स्तथा स्वयमज्ञोऽपि विरुद्धं ब्रुवन्, किमुत विज्ञोऽपीत्यर्थः । **विश्वनाथस्तु**—अस्माभिरत्रागत्यैवापराद्धमित्यपराः शास्त्रशासनमाहुः—नेति । सभायामधर्मे उत्पद्यमाने सति धर्मं ज्ञात्वापि तमब्रुवंस्तूष्णीं तिष्ठन्नित्यर्थः । विब्रुवन् विधर्ममेव ब्रुवन् । वा ज्ञः ज्ञात्वापि न जानामीति ब्रुवन् किल्बिषं प्राप्नोत्यतः सभां न प्रविशेदिति सभाप्रवेशनिषेधो व्यवहारसापेक्षस्यैव प्राज्ञस्य न तु व्यवहारनिरपेक्षस्य प्राज्ञस्य । यथा सभापर्वणि द्यूते द्रौपदीविपदि व्यव हारसापेक्षाः प्राज्ञा भीष्मादयोऽब्रुवाणा एव तस्थुः । व्यवहारनिरपेक्षः प्राज्ञो विदुरस्तु धर्मं ब्रूते स्मैवेति । रंगभूमौ तु सर्व एव प्राज्ञाः कंसाद्भीता व्यवहारसापेक्षा एवेति ॥१०॥ पद्मकोशं पद्ममुकुलम् । अंबुभिर्जलबिंदुभिः । वल्ग—प्लुतगतौ ' ॥ * ॥ नन्वेतयोः श्रमाऽदृष्ट्या बलवत्त्वानुमानान्न कोऽपि दोषप्रसंग इत्याशंक्य श्रीकृष्णस्य तावच्छ्रमं दर्शयंति—वल्गत इति । श्रमश्चायं तादृशस्निग्धानेव प्रतिभासते न तु सर्वानिति ज्ञेयम् ' मल्लानाम, शनिः ' इत्याद्युक्तेः । रूपकेण तत्तद्धर्मं साधयित्वापि पद्मेति पुनरुपमानादिदं बोधयति—आकृष्टांबुजगणसौन्दर्यात्तन्मुखमेवांबुजम्, तथा श्रमवार्यत्र तच्छोभाहेतुत्वेन तदुपयुक्तं वारीति स्वानुभवव्यञ्जनाय रूपकं कृतम्, यथाकथंचित्साधारणजनानुभवायैव तु पुनरुपमा कृतेति। श्रमवारीत्यत्र भिसो लुक्छांदसः । तदेवांबुभिरित्युपमानेन योगः स्यादिति कोशपदोपादानेन मुखस्यापि स्मितेनेषद्विकाशित्वं ज्ञापितमत एव विशेषेणेक्षताम् । **वक्रवर्ती** तु—वदनांबुजं मुखचन्द्रो दृश्यताम् । ' अब्जौ शङ्खशशांकौ च ' इत्यमरः । अत्र लक्षितलक्षणयांबुजपदेन चन्द्रो लक्षितः । क्लीबत्वं चार्षम् ॥ ११ ॥ किं वितर्के । आताम्रे ईषद्रक्ते लोचने यस्य तम् ॥ * ॥ अथ तद्वत्सुकुमारस्यापि श्रीरामस्य तच्छ्रमदर्शनेन स्वश्रममभिभूय जातं क्रोधं तेजः पश्येतेति तदेव स्थापयन्ति—किं पश्यतेति । हासेनावज्ञा च दर्शिता । हासकर्तृको य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुण्या बत व्रजभुवो यदयं नृलिंगगूढः पुराणपुरुषो वनचित्रमाल्यः॥गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयांऽचति गिरित्ररमार्चितांघ्रिः॥१३॥
गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धम् ॥ दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकांतधाम यशसः श्रिय ऐश्वरस्य॥१४॥

हासेन संरंभ आवेशस्तेन शोभितम् ॥१२॥ अन्या ऊचुः । पुण्या बतेति। नृलिंगेन मनुष्यदेहेन गूढः । वनस्थानि चित्राणि माल्यानि यस्य सः । गिरित्रः शिवो रमा च ताभ्यामर्चितावंघ्री यस्य सः । अयं भावः । धिगिमां सभां यस्यामयं पराभूयते तास्तु व्रजभुवोऽपि पुण्याः यद्यास्वयं कृष्णो विविधक्रीडया नानाविधविहारेणांचति गच्छतीति ॥ १३ ॥ अहो कष्टमल्पपुण्या वयं यतोऽस्माभिरनवसरे दृष्टोऽयम् । गोप्यस्तु बहुपुण्या इत्याहुस्त्रिभिः । गोप्य इति । अमुष्य श्रीकृष्णस्य रूपमंगं लावण्येन सारं

आवेशोऽविच्छिन्नोदयस्तेन शोभितम् । **विश्वनाथस्तु**—क्रोधस्य कारणं मुष्टिकप्रहारजनितश्रम एव बुद्ध्यतामिति भावः ॥ १२ ॥ बत हर्षे । वने यानि चित्राणीति सप्तम्या अधिकरणार्थकत्वाद्वनस्थानीत्युक्तं स्वामिचरणैः । गिरिं कैलासं, गिरीन् पूज्यानर्थाद्विप्राँस्त्रातीति वा गिरित्रः 'तद्ब्राह्मणान्परमसर्वविपत्सु पाति' इति दक्षोपाख्यानोक्तेः । "गिरिर्ना नेत्ररुग्भिदि । अद्रौ गैरेयके योषिद्वीर्णे पूज्ये पुनस्त्रिषु" इति मेदिनी । अत्र तात्पर्यमाहुः—अयं भाव इति । अयं श्रीकृष्णः । ताः प्रासिद्धाः ॥ * ॥ पुण्या इति तैर्व्याख्यातम् । तत्रायं भावः—इत्यस्योदंतं विवक्षितमित्यर्थः । यद्वा—अथ काश्चिद्विदग्धा यज्ञपत्नीप्राया ऐश्वर्यज्ञानमिश्रपरप्रेमवत्यस्तत्समा वैगुण्येन मधुपुरीमप्यबहुमन्वानास्तत्रत्यानां साद्गुण्ये श्रीव्रजभुवमेव प्रशंसन्ति—पुण्या इति चतुर्भिः । बत विस्मये । व्रजभुवः व्रजसंबंधिन्यो भूमय एव पुण्याः परमधन्या न त्वियं महापुर्यपि । बहुत्वनिर्देशेन तासां बहूनामपि यादृशपुण्यत्वं न त्वेकस्या अपि तादृशत्वमित्यर्थः । यत् यासु अयं श्रीकृष्णाख्यः पुराणपुरुषोऽपि नवः नित्यनूतनो यः, य एव पुरुषस्तन्मुख्यत्वेन तच्छब्दः प्रथमोऽभिधेयः सोऽहं चेति । भ्रमति वर्तमानप्रयोगस्तत्सामीप्यात्, पुनस्तत्र गमनाभिप्रायाच्च । वस्तुतस्तु यथार्थभारतीनिःसृतिरियम् । तत्र तदीयनित्यलीलायाः स्थापयिष्यमाणत्वात् । अन्यत्र परममहतामप्यसौ दुर्लभ इत्याह—गिरित्रेण रमयापि हृदयेऽर्चितावागमोक्तमार्गेणोद्दिश्यैवाराधितौ न तु व्रजवासिजनवत्साक्षात्सेवितावंघ्री यस्य तादृश इत्यर्थः । ननु संप्रत्यत्राप्ययमञ्चति तत्राह—विक्रीडयेति । अत्र प्रतिकूलैः पराभवितुमिष्यते विविधोदासीनलोकैः संकीर्य्यते चेति नानाभीष्टचिक्रीडिषोदयाभावात्र विशिष्टा क्रीडा । तत्र तु सर्वस्याप्यनुकूलत्वेन कान्तत्वेन च परमाभीष्टचिक्रीडिषोदयाद्विशिष्टैवेति कुतः साम्यमेवेति भावः । सर्वानुकूल्यं वैशिष्ट्यञ्च दर्शयन्ति—वनेत्यादिना । वने सर्वाभीष्टपुष्पादिनिधाने परमैकान्ते श्रीवृन्दावने चित्राणि विशिष्टक्रीडाकौतुकितया सखिभिर्मिलित्वा विविधाश्चर्यत्वेन यावदभीष्टं रचितानि माल्यानि यस्य तादृशः । उपलक्षणं चैतद्देशान्तराणाम् । तथा गाः पालयन् स्वयं निजपरमस्नेहपात्राणां गवां तत्तन्निजाभीष्टक्रीडास्वैरतासहायं पालनं विश्वमोहनं मधुराह्वानादिना कुर्वन् । किञ्च—सहबलः तत्रतत्र बलसहाय इति स्वयमभीष्टतत्तत्क्रीडने श्रीबलेन पुष्टत्क्रीड इत्यर्थः । अहो किमपरं वक्तव्यं शक्रशर्वपरमेष्ठिमोहनं तरूणामपि पुलककारकं वेणुञ्च क्वणयंस्तद्वाद्यमाधुरीं मुहुरुल्लासयन्निति । अत्र **विश्वनाथो**ऽपीत्थमेव व्याचख्यौ ॥ १३ ॥ निजभाग्यं निदन्त्यो गोपीभाग्यं च श्लाघयंत्य आहुः—अहो कष्टमित्यादिना । रूपं द्रव्याश्रयलक्षणं गुणम् । तच्च—"अंगान्यभूषितान्येव प्रेक्षणीयैर्विभूषणैः । येन भूषितवद्भान्ति तद्रूपं प्रोच्यते बुधैः ॥" इत्युक्तं भरतेन । न केवलं लावण्यसारमेव किं त्वन्यत्राविद्यमानमित्याहुः—किञ्चेति । तदपि असमोर्ध्वमपि । पाठान्तरे 'ईश्वरस्य' इति पाठे । अनुसवं प्रतिक्षणम् । अभिनवं नूतनम् । तथा चोक्तं स्वामिभिः—नित्यनवीनमिति। दुरापं विना ज्ञानमित्यर्थः ॥ * ॥ गोप्य इत्यत्र तेषामवतारिकायां दृष्टोऽयामेतिपर्य्यन्तः पूर्वपद्याभिप्रायः । गोप्य इ.युत्तरत्रयस्य ज्ञेयम् । असमोर्द्धम् अनंततदाविर्भावेष्वपि न विद्यते समं किमुतोर्द्ध्वं यस्य तादित्यर्थः । पिबन्तीति तृषार्ता इवामृतमिति भावः । अनुसवाभिनवं प्रतिक्षणमधिकाविर्भावप्रेमतत्स्फूर्त्योः परस्परं वर्धमानत्वादिति भावः । दुरापं लक्ष्म्यादिभिर्दुर्लभमपि । श्रियः सर्वशोभायाः । 'ईश्वरस्य' इति पाठे परमेश्वरस्यापि परमालंबनरूपमित्यर्थः । अन्यत्तैः । तत्र

१ श्रीधरस्वामिनाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ ॥ गायंति चैनमनुरक्तधियोऽश्रुकंठ्यो धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः ॥ १९ ॥

श्रेष्ठम् । किं च असमोर्ध्वं न विद्यते सममूर्ध्वमधिकं च यस्य तत् तदपि नान्येनाभरणादिना सिद्धं किं तु स्वत एव ऐश्वरस्यैश्वर्यस्य चैकांतधामाव्यभिचारिस्थानम् । पाठांतरे अमुष्य ईश्वरस्येत्यन्वयः । एवंभूतं नित्यं नवीनं रूपं या नेत्रैः पश्यंतीति ॥ १४ ॥ किं च या दोहनादिष्वेनं गायंति ता व्रजस्त्रियो धन्याः । प्रेंखेंखनं दोलां दोलनम् । उक्षणं सेचनम् । कथंभूताः । उरुक्रमे चित्तमुरुक्रमचित्तं तेनैव यानं सर्वविषयप्राप्तिर्यासां ताः । पाठांतरे उरुक्रमं चिंतयंत्य इत्यर्थः । कुतः । अनुरक्तधियः ।

सौन्दर्यमिति लेख्येऽप्यसंगतमिति, नूनं प्रथमलेखकभ्रमात् । अन्यथा किञ्चेत्यस्य तदपीत्यादेश्चासंगतिरिति । यद्वा–व्रजभुवां धन्यत्वेन तद्वासिमात्रधन्यत्वं व्याञ्जितम् । तत्रापि श्रीगोपीनां किं वक्तव्यमिति परमविदग्धाः काश्चिच्छ्रीशुकेनाप्यनुमोद्यमानेष्वमीषु बाढमनुमोद्यमानवाक्यमाहुः–गोप्य इति । तपो भगवदाराधनलक्षणम् । किं कतमदाचरितवत्यः, ईदृशफलस्य वाङ्मनसातीतत्वात् । तदपि तादृशमित्यर्थः । यदि जानीथ तदा वयमपि तत्रोद्यमं करवामेति भावः । यद्वा–किं तपोऽचरन्नपि तु नैवाचरन्निति तपोमात्रस्येच्छाफलदानाशक्तेस्तदीयनित्यप्रेयसीसमुचित एवायमुदय इति भावः । तथात्वे हेतुं परमाह–यद्यस्मादमुष्य साक्षाद्भावेऽपि निर्देष्टुमशक्यस्येत्यर्थः । रूपं परमं शोभनप्रमाणांगप्रत्यंगवत्त्वम् । दृग्भिः पिबन्तीति नैरंतर्येऽपि तस्याऽक्षयिष्णुत्वं तासामतृप्तिञ्च सूचयित्वा रूपस्य सुधासमुद्रत्वमुत्प्रेक्षते । किञ्च–दर्शनमात्रस्य तादृशत्वं दर्शयित्वालिंगनादेः कैमुत्यमानयन्ते । कीदृशं तत्–लावण्यस्य कान्तिकंदलीचाकचिक्यस्य सारः श्रेष्ठांशो यत्र तादृशं तत्, प्राचुर्यात्तद्रूपमेव वा । नन्वनन्ता एव तत्प्रादुर्भावा इति तत्रतत्रापि तादृशत्वं संभवति तत्राहुः–असमोर्द्ध्वम् । नन्वन्यत्र नास्ति चेत्कुतो लब्धं तत्राहुः–अनन्यासिद्धं, स्वाभाविकमेवेति नित्यत्वञ्च दर्शितम् । अत एव यशआद्युपलक्षितानां षण्णां भगानामतिशयितं धाम नित्याश्रयम् । पाठान्तरेऽपि ईश्वरस्येत्येवार्थः । नन्वेवं सदैकरूपत्वेन पश्यन्ति चेत्तदा नास क्वचमत्कारः स्यात्तत्राहुः—अनुसरेति । नन्वीदृशं रूपं तत्रास्ति चेत्तदाऽन्येऽपि पश्येयुस्तत्राहुः–दुरापमिति । स्वतस्तादृशप्रेम्णोऽसंभवादन्येषां तादृशत्वं तासामेव दृढावधानेन स्फुरति, अन्यथा तु न स्फुरतीत्यर्थः । **विश्वनाथस्तु**–हंतहंत महासुकृतिन एव व्रजभूमिषूत्पद्यन्ते तेष्वपि गोपीजना अतिश्रेष्ठा इत्याहुः–गोप्य इति । किमचरन्निति–भोः सख्यस्तत्तपः यदि यूयं सर्वज्ञस्य कस्याचिन्मुखाज्जानीथ तदा ब्रूत, तदेवास्मिञ्जन्मनि कृत्वा व्रजभूमौ गोप्यो भवेम, यद्यतस्ता अमुष्य रूपं सौन्दर्यामृतं पिबन्ति, वयं तु मथुरास्था अस्य पराभवविषं पीत्वाऽऽनखशिखं ज्वलाम इति भावः । तासां दृग्भिः पानस्यैव तादृशतपःफलमुक्त्वा स्वांगैरालिंगनादेस्त्वनिर्वाच्यहेतुकत्वं ज्ञापितम् । किं चास्य रूपे लावण्यमधिकं वर्तत इत्यत उपादीयत इति न वाच्यं, किन्तु लावण्यसारं लावण्यापि यः सारस्तत्स्वयमेवैतत् । ननु स्वर्लोकादिभ्योऽपि न्यूने भूर्लोकेऽस्मिंश्चेदेवं रूपं दृश्यते तर्हि सर्वतः श्रेष्ठे महावैकुंठलोके इयतोऽप्यधिकमधुरं श्रीनारायणस्य रूपं भवेदिति तत्राहुः–असमोर्द्ध्वम् । एतद्रूपस्य समरूपमपि क्वापि नास्ति किमुताधिकामिति भावः । ननु तर्हि कृष्णेनैतद्रूपं कुतः सकाशाल्लब्धं तत्राहुः–अनन्यसिद्धम् । अस्मिन्नेवैतत्स्वाभाविकमिति । नन्वेतद्रूपं ताः सदैकरूपत्वेन पश्यन्ति चेत्तदा न तासामसकृच्चमत्कृतिहेतु तत्स्यात्तत्राहुः–अनुसवं प्रतिक्षणम्, अभिनवं नूतनम् । एवं चेत्तत्रैव गत्वा देशान्तरीयस्त्रीभिरपि सुखेनायं दृश्यतां तत्राहुः–दुरापं, लक्ष्म्या अपि दुर्लभम् । ननु भवतु नामास्य सौंदर्योपाधिक एव सर्वोत्कर्षः, श्रीनारायणादौ तु भगवच्छब्दवाच्यं षडैश्वर्यमधिकमस्ति तत्राहुः–एकान्तेति । यशआद्युपलक्षितानां षण्णामेव भगानामेकान्तधाम अतिशयितास्पदम् । ऐश्वरस्यैश्वर्यस्य ॥ १४ ॥ पुनर्व्रजांगनाभाग्यमभिनंदंत्य आहुः–किञ्चेति । अवहनने व्रीहिताडनावसरे । मथने दधिमंथने, उपलेपे गोमयादिना स्थललेपनसमये, अर्भरुदिते बालरोदने, मार्जने धूलिशोधनकाले, आदिपदात्स्नानादिग्रहः । पाठान्तरे ‘ चिन्तयाना ’ इति पाठे । इत्यर्थ इति–‘ चिति–स्मृत्याम् ’ स्मरन्त्य इति भावः । अत्र हेतुमाशंकन्ते–कुत इति । अनुरक्तधिय इति हेतुगर्भविशेषणम् । अनुरक्तधीत्वादित्यर्थः । तत्रानुरक्तबुद्धौ । लिंगं हेतुः । अश्रिवति–न ह्यनुरागं विनाऽश्रूद्गमो भवतीत्यर्थः ॥ * ॥ किञ्च–तासां गृहकर्माण्यपि नैतन्माधुर्यपानप्रातिबंधकानीत्याहुः–या दोहनादिष्वेनं गायन्ति । दोहनेऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ॥ निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यंति सस्मितमुखं सदयावलोकम् ॥ १६ ॥ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः ॥ शत्रुं हंतुं मनश्चक्रे भगवान्भरतर्षभ ॥ १७ ॥ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतां पुत्रयोरबुधा बलम् ॥ १८ ॥

तत्र लिंगमश्रुकंक्यः ॥१५॥ प्रातरिति । या अबलाः क्वणयतो वादयतो वेणुं निशम्य गृहात्तूर्णं निर्गम्य पथि सस्मितमुखं पश्यंति ता भूरिपुण्या इति ॥१६॥ एवं सभयं ब्रुवाणासु स्त्रीषु तासां भयनिवृत्तये कृष्णः शत्रुं हंतुं मनश्चक्रे ॥ १७ ॥ सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आतुरौ विह्वलौ पुत्रयोर्बलमजानंतौ

वहनने इति पदे अन्तर्भूतण्यर्थे । अवहननं तुषापकरणम् । चकारात्क्वापि पश्यन्ति चेत्येतन्माधुर्यं रसनाभिरपि दृग्भिरपि पिबन्तीति पानाविच्छेद उक्तः । उरुक्रमचित्तमेव यानं वाहनं यासां ताः । यत्रयत्र तच्चित्तं याति तत्रतत्रैव तास्मिंस्ता एव स्फुरन्तीति भावः । यद्वा—उरुक्रमस्य चित्तं वाहनं यासां ताः । अयमुरुक्रमोऽपि ब्रह्माद्यैः स्वचित्तेषूह्यमानोऽपि याः स्वयं स्वचित्ते वहतीति तास्वपि कृष्णोऽयमनुरक्तधीरिति तासां सौभाग्यभरो दर्शितः ॥ १५ ॥ पुनराहुः—प्रातरिति । अस्य श्रीकृष्णस्य ॥ * ॥ प्रातर्व्रजाद्वनं व्रजतः, सायं वनाद्व्रजं प्रविशतोऽस्य कृष्णस्य वेणुं निशम्य गृहेभ्यो निर्गत्य पथि गवानयनमार्गसमीपोपवनादौ पश्यन्ति।सदयः स्वविरहखिन्नाङ्गीस्ता दृष्ट्वा तदभीष्टवितरणव्यञ्जकानुकंपासहितोऽवलोको यस्य तम् ॥ १६ ॥ योगेश्वर इति पराभिप्रायज्ञत्वादित्याह—शत्रुं हंतुमिति ॥ * ॥ यद्यप्यन्यदापि तद्दर्शनं संपद्यते तथापि तन्निर्गमनावेशयोरनुव्रज्याभिगमनच्छलाल्लोकानामग्रेऽप्यसंकोचेन तत्सिद्ध्यतीति । तथा चेद्दशमात्रस्य दर्शनमस्माकं न संभवेदित्यत एवापुण्या एव वयमिति भावः । एवमीदृशं प्रकर्षेण प्रेमार्त्या सभयं भाषमाणासु सतीष्विति तादृशभाषणात्तासामनिवृत्तिरुक्ता । "अर्हानर्हयोश्च" इत्यर्हार्थे सप्तमी । तदा तद्विधानं योग्यमेवेत्यर्थः । योगेश्वर इति स्वेच्छया स्वशक्तिप्रकाशनाप्रकाशनयोर्हेतुः । हरति भूभारमिति हरिः, तद्वधप्रवृत्तावौत्सर्गिकश्चास्ति हेतुरिति भावः । शत्रुमिति मत्सरिद्वेषित्वात् । भगवानिति स्वरूपनिर्देशः सर्वत्रैव हेतुगर्भः । हे भरतर्षभेति—चिरं युद्धक्रीडया तद्वधविलंबादप्रसन्नचित्तं राजानमुल्लासयति, भरतवंश्यत्वात्त्वमपि भारतयुद्धादावीदृशीं लीलां जानासीत्यभिप्रायेण । **विश्वनाथस्तु**—शत्रुं हंतुं मनश्चक्र इत्यलमनुरागिणीर्दुःखयित्वेति भावः ॥ १७ ॥ पितरौ संमुखस्थौ देवकीवसुदेवौ ॥ * ॥ उपाधिक्येन सामीप्येन वा श्रुत्वा पितरौ देवकीवसुदेवौ वसुदेवनंदौ वाऽन्वतप्येताम्—हंतहंत व्रजे गमिष्यन्नक्रूर एव कथं तथा न शिक्षितो यथैतौ नानयिष्यत्स इति, हंतहंत "कथमनायि पुरे मयकासुतः कथमसौ न निगृह्य गृहे धृतः"इत्यादिकं पश्चात्तापं प्रकुर्वन्तौ।बलमबुधावजानंतौ।इह षष्ठ्यभावस्तु तस्याः षष्ठ्या अनित्यत्वात्। तदुक्तम्—"कर्तृकर्मणोः कृति"इत्यत्र भाष्यवृत्तौ विहित"तदर्हम्[2]" इतिनिर्देशेनानित्यज्ञापनात्,

१ 'सभयं तदुपश्रुत्य' इति पाठो भाति । २ "तस्यार्हम्" इत्यकरणादिति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ॥ युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ ॥ १९ ॥ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरो भज्यमानांगो मुहुर्ग्लानिमवाप ह ॥ २० ॥ स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ ॥ भगवंतं वासुदेवं क्रुद्धो वक्षस्यबाधत ॥ २१ ॥ नाचलत्तत्प्रहारेण मालाहत इव द्विपः ॥ बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन्हरिः ॥ २२ ॥ भूपृष्ठे पोथयामास तरसा क्षीणजीवितम् ॥ विस्रस्ताऽऽकल्पकेशस्रगिंद्रध्वज इवापतत् ॥ २३ ॥

पितरावनुतापं प्राप्ताविति ॥ १८ ॥ १९ ॥ तदा भगवतो गात्राणामरत्निजान्वादीनां निष्पातैः प्रहारैर्वज्रस्य निष्पेषस्तीव्रप्रपातस्तद्वन्निष्ठुरैः । भज्यमानांगः श्लथद्गात्रः ॥ ॥ २० ॥ श्येनस्येव वेगो यस्य स चाणूरः अबाधताताडयत् ॥ २१ ॥ २२ ॥ भूपृष्ठे भुव उपरि । पोथयामासास्फालयत् । इंद्रध्वजो वज्रम् । यद्वा इंद्रध्वजो नाम गौडेषु

'धार्यैरामोदमुत्तमम्'इति भट्टेश्च। तद्धितप्रत्ययः खलु सूत्रे प्रथमनिर्दिष्टविभक्त्यंतादेव नियमितः।यथा''तस्यापत्यम्''इत्यत्र उपगोरपत्यमौपगवः,धनमर्हति धन्य इति॥ १८॥तैस्तैरुक्तैरनुक्तैर्वा।इतरश्चाणूरः।तथैव कृष्णचाणूरवत् ॥*॥ पुनर्युद्धवर्णनमवतारयति–तैरिति, पूर्वदर्शितदिङ्मात्रैः । वीप्सा तेषां वैचित्र्याद्यपेक्षया । ते च मल्लशास्त्र उक्ताः विधयः–कृतप्रतिकृतसुसंकटबाहुसन्निपातावधूतप्रमाथोन्मथनक्षेपणमुष्टिवराहोद्धूतनिस्वनतलप्रसृष्टशलाकानखपातपादोद्धूतजानुशिरोऽवघट्टनप्रकर्षणाकर्षणाभ्याकर्षविकर्षणादिभेदान्नियुद्धं बहुभेदमस्ति । कृतादिस्वरूपमाह–''क्वचिद्देशे निपीडं तु कृतं तस्य तु मोचनम् । मल्लशास्त्रविशेषज्ञैः प्रतिकृतमुदाहृतम् ॥ मुष्टिग्रहणवश्यौ तु बाहू सुसंकटौ मतौ । सन्निपातोंगसंघट्टोऽवधूतं तन्निराकृतिः ॥ निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते । यत्तूत्थायांगमथनं तदुन्मथनमुच्यते ॥ क्षेपणं कथ्यते यत्तु स्थानात्प्रच्यावनं हठात् । उभयोर्भुजयोर्मुष्टिरुरोमध्ये निपात्यते । मुष्टिरित्युच्यते सुज्ञैर्मल्लविद्याविशारदैः ॥ अवाङ्मुखस्कंधगतं भ्रामयित्वा तथैव यः । क्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिःस्वनः ॥ चेपटो वज्रपातेन तुल्यस्तल उदीरितः । अंगुल्यः प्रसृता यास्तु प्रसृष्टास्ता उदीरिताः ॥ ऋज्वी दृढा रुषा क्षिप्ता शलाका सांगुली स्मृता । तस्या यस्तु नखोत्पातः शलाकानखपातकः ॥ जानुभिश्च शिरोभिश्चावघट्टनबहुध्वनि । तदुक्तं जानुशिरसोरवघट्टनमत्र वै ॥ आकृष्य क्रोडीकरणं प्रकर्षणमुदाहृतम् । आकर्षणं लीलयैव संमुखीकरणं स्मृतम् ॥ पुरः पश्चात्पार्श्वयोश्चाभ्याकर्षो भ्रमणं मतम् । पश्चात्प्रपातनं वेगाद्विकर्षणमुदाहृतम् ॥'' । एवमन्येऽपि नियुद्धभेदा बहवः सन्ति ग्रंथविस्तरभिया न लिखिता इति ज्ञेयम् । उभाविति–चाणूरस्यापि तत्र नैपुण्यं बोधयति। अन्यथाऽनर्हतया लीलासौष्ठवं न स्यात्तच्च लीलाशक्तिसंपादितामिति भावः । 'विविधैरच्युतेतरौ' इति पाठे इतरश्चाणूरः ॥ १९ ॥ तदा युद्धावसरे । ग्लानिं प्राणसंदेहक्लेशम् ॥ * ॥ अचिन्त्यशक्तिवाचको भगवच्छब्दोऽत्र, मल्लेषु तादृशस्फूर्तौ हेतुः । वज्रनिष्पेषस्तत्करणकसंचूर्णनं, तद्वन्निष्ठुरैः ॥ २० ॥ श्येनः कपोताराति: पक्षिविशेषः । उत्पत्य उत्प्लुत्य ॥ * ॥ श्येनवेग इति पूर्वं ग्लानिं प्राप्य दूरगमनं बोधितम् । उभावित्येकदैव मुष्टिकृताभ्यां द्वाभ्यामेव प्रहारात् । महाबलिष्ठत्वान्नियुद्धकौशलत्वं च दर्शितम् । भगवन्तं वासुदेवमिति तन्मूढत्वदौरात्म्यव्यञ्जकं तत्तन्निरुक्तेः ॥ २१ ॥ तत्प्रहारेण चाणूरोभयमुष्टिप्रहारेण । मालाहतः पुष्पैस्ताडितः ॥ * ॥ श्रीभगवानपि तादृशनिजजनहर्षणाय तस्य तत्तदेव व्यञ्जितवान्न तु स्वविनोदाय, स्वस्य क्षोभलेशमप्यकृतवानित्याह–नेत्यर्द्धेन । स्रग्भिरित्यनेन सुखमपि तस्य तस्य सूचितम् । बहुत्वस्य यदि बह्वीभिरपि ताभिर्हतः स्यात्तदपि तस्य न किञ्चिदपि यथा स्यात्तथास्य बलबाहुल्येनापीति भावः । अथ श्रीहरिवंशवचनानि–''यदयं बाहुयुद्धं वै सवैरं कर्तुमुद्यतः । तत्र वै निग्रहः कार्यस्तोषयिष्याम्यहं जगत् ॥ करूषेषु प्रसूतोऽयं चाणूरो नाम नामतः । बाहुयोधी शरीरेण कर्मभिश्चानुचिन्त्यताम् ॥ एतेन बहवो मल्ला निपातानंतरं हताः । रंगप्रतापकामेन मल्लमार्गाश्च दूषिताः ॥ ये तु केचित्त्वदोषेण राज्ञः पंडितमानिनः । प्रतापार्थे हता मल्ला मल्लहंतुर्वधो हि सः ॥'' बहुशो बहुवारान्बहुधा चेत्यर्थः ॥ २२ ॥ आस्फालयच्चिक्षेप । वज्रेन्द्रध्वजपदाऽप्रसिद्धिं मत्वाह–यद्वेति । विस्रस्ता विश्लथा

१ 'स्रग्भिर्हतः' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहतेन वै ॥ बलभद्रेण बलिना तलेनाभिहतो भृशम् ॥ २४ ॥ प्रवेपितः स रुधिरमुद्वमन्मुखतोऽर्दितः ॥ व्यसुः पपातोर्व्युपस्थे वाताहत इवांघ्रिपः ॥ २५ ॥ ततः कूटमनुप्राप्तो रामः प्रहरतां वरः ॥ अवधीह्लीलया राजन्सावज्ञं वाममुष्टिना ॥ २६ ॥ तर्ह्येव हि शलः कृष्णपदापहतशीर्षकः ॥ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥ २७ ॥ चाणूरे मुष्टिके कूटे शले तोशलके हते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे[१] प्राणपरीप्सवः ॥ २८ ॥ गोपान्वयस्यानाकृष्य तौ संसृज्य विजह्रतुः ॥ वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ ॥ २९ ॥

प्रसिद्धः कस्मिंश्चिदुत्सवे महान्स्तंभो ध्वजपताकाद्यलंकृतः पुरुषाकृतिरुच्छ्रीयते स यथा पतति तद्वदपतदिति ॥ २३ ॥ २४ ॥ अर्दितः पीडितः । उर्व्युपस्थे भूतले ॥ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ वल्गंतौ नृत्यादि कुर्वंतौ ॥ २९ ॥

आकल्पकेशस्रजो यस्य स । उच्छ्रीयते ऊर्ध्वं स्थाप्यते । स इन्द्रध्वजः ॥ * ॥ तरसा भ्रामणवेगेनैव । क्षीणजीवितमाकाश एव मृतम् । तथा च विष्णुपुराणे—"भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् । भूमावास्फोटयामास गगने गतजीवितम् ॥" इति । अत एवाहो मृत एवायमित्युक्त्वा परित्यागमिषेणैव पोथयामासेति ज्ञेयम् । अपतत्—स चेति शेषः । इन्द्रध्वजोपमया तद्देहस्य बृहत्तरत्वमप्युक्तम् । तदुक्तं श्रीहरिवंशे—"देहेन तस्य मल्लस्य चाणूरस्य गतायुषः । सन्निरुद्धो महारंगः स शैलेनैव लक्ष्यते ॥" इति ॥ २३ ॥ तथैव चाणूरवदपतदित्यन्वयः । तलेन चपेटेन "तलश्चपेटे तालद्रौ तलं ज्याघातवारणे" इति मेदिनी ॥ * ॥ अभिमुखं हतेन प्रहृतेन 'बलभद्रं बलेोच्छ्रयात्' इति स्वभावत एव महाबलिष्ठेन । तत्रापि बलिना प्रकटितवलेनेत्यर्थः । तलेन चपेटेन ॥ २४ ॥ स मुष्टिकः । प्रवेपितोऽतिकंपयुतः ॥ * ॥ पूर्वमिन्द्रध्वजदृष्टान्त ऊर्ध्वात्पतनेऽत्र तु वृक्षदृष्टांतो भूमेरेवेति ॥ २५ ॥ ततो मुष्टिकवधोत्तरम् । सावज्ञमनायासं भर्त्सनपूर्वकं वा । 'अवज्ञा भर्त्सने श्रमे' इति तीर्थः ॥ * ॥ लीलयाऽप्रयासचेष्टया, यतो वाममुष्ट्या, तत्रापि सावज्ञं हेलयैवेत्यर्थः ॥ २६ ॥ तर्ह्येव हि मुष्टिकपातसमकालमेव । द्विधा द्वाभ्यामेकेन वोभयोर्विदीर्णो विदारितः ॥ * ॥ शलस्तोशलकश्च मल्लन्यायमतिक्रम्य भयान्मिलित्वैवालक्षितयुगपत्पादद्वयाकर्षणाय नीचितमस्तकः सन्निति ज्ञेयम् ॥ २७ ॥ शेषा उक्तेभ्योऽन्ये ॥ * ॥ युद्धे श्रीकृष्णतो युद्धे । कंसतः प्राणरक्षां कर्तुमिच्छन्त इत्यर्थः ॥ २८ ॥ तौ रामकृष्णौ । संसृज्य संगम्य । रुतौ शब्दायमानौ नूपुरौ तुलाकोटी ययोस्तौ 'तुलाकोटिस्तु नूपुरे' इति यादवः ॥ * ॥गोपानित्यतः प्राक् ततश्च विहस्येति ज्ञेयम् । आकृष्य आपातप्रवृत्तौ लज्जया स्वयमनागच्छतोऽपि बलाद्गृहीत्वा संनह्य मल्लरीत्या मिथो गृहीत्वा वल्गन्तौ मल्लगतिं कुर्वन्तौ । तदानीं चैलेयालंकारत्वेऽपि रत्ननूपुराविति चरणे प्रतिमल्लविमर्दाभावाद्गात्रनोदकत्वेन वल्गनपोषकशब्दत्वेन च तदपरित्यागात् । एतद्वयस्योत्कर्षणादिकं कौतुकार्थम् । तच्च कंसक्रोधविवर्धन

१ सर्वे इत्यत्र 'युद्धे' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ॥ ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति ॥ ३० ॥ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवारयत्स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ः ३१ ॥ निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गोपानां नंदं बध्नीत दुर्मतिम् ॥ ३२ ॥ वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ॥ उग्रसेनः पिता चापि सानुगः परपक्षगः ॥ ३३ ॥ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ॥ लघिम्नो त्पत्य तरसा मंचमुत्तुंगमारुहत् ॥ ३४ ॥

साधुसाधु इति वदंतः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ अव्ययोऽश्रमः । लघिम्ना लाघवेन ॥ ३४ ॥

मपि ज्ञेयम् ॥ २९ ॥ जना रंगस्थाः । प्रजहृषुस्तुतुषुः । ऋते विना ॥*॥ विप्रेषु मुख्याः साधवश्च ये ते तु तन्महिमज्ञानबलेनाकुतोभयत्वात्साधुसाध्विति स्पष्टमेव वदन्तः प्रजहृषुः ॥३०॥ विद्रुतेषु पलायितेषु । इदं वक्ष्यमाणम् ॥*॥ स्वस्यैव तूर्याणि न्यवारयन्न तु देवानां निवारयितुं शक्तस्तदानीं हततेजस्कत्वात् । न च यानि स्वयमवाद्यन्त तानि वाऽशक्यत्वादिति भावः । 'सैः'[१] इति पाठेऽपि स एवार्थः । श्रीविष्णुपुराणे तु पूर्वमेव न्यवारयदिति प्रोक्तम्—"बलक्षयं विवृद्धिं च दृष्ट्वा चाणूरकृष्णयोः । वारयामास तूर्याणि कंसः कोपपरायणः ॥ मृदंगादिषु वाद्येषु प्रतिषिद्धेषु तत्क्षणात् । खे संगतान्यवाद्यन्त देवतूर्याण्यनेकशः ॥ जय गोविंद चाणूरं जहि केशव दानवम् । इत्यंतार्द्धिगता देवास्तमूचुरतिहर्षिताः ॥" इति । श्रीहरिवंशे च—"ततः प्रस्विन्नवदनः कृष्णप्रणिहितेक्षणः । न्यवारयत तूर्याणि कंसः सव्येन पाणिना ॥ प्रतिषिद्धेषु तूर्येषु मृदंगादिषु तेषु वै । खे संगतानि" इत्यादि । किञ्च—"स्वयमेव प्रावाद्यन्त तूर्यघोषाश्च सर्वशः" इति । अत्रैकवाक्यता वादकैः पुनः प्रवर्तितत्वाज्ज्ञेया । निवारणच्छलं दर्शयति—वाक्यञ्चेति । ह स्फुटम् । निजादेशश्रवणार्थमिवेति भावः । भोजैर्यादवभेदैः कतिपयैरेव राजत इति तथा स इति सर्वेषामपि तदनादरः सूचितः ॥ ३१ ॥ निःसारयत निष्कासयत । बध्नीत निगडयुतं कुरुत ॥ * ॥ नियुद्धक्रीडायां मल्लहननाद्दुर्वृत्तौ, युद्धं चानयोस्तदित्याह—यतो वसुदेवात्मजौ । पुरान्निःसारयतेत्यपकर्तुमशक्यत्वात् । निःसारणशक्यत्वञ्चानयोः प्रायो वनवासिनोर्वनाभिरुचेः स्यादिति गूढोऽभिप्रायः । प्रकटस्तु भागिनेयावेताविति । दुर्मतिं वसुदेवेन सह सौहृद्यात्, तथाप्यज्ञानादेव मच्छत्रुपालनं कुरुत इति बध्नीतैव न तु हन्यादिति । सरस्वती तु—दुर्गमं वृत्तं चरितं ययोस्तौ । पुरात् पुरमध्यास्य । निश्शेषेण सारं श्रेष्ठं कुरुत । गोपानां धनं श्रीकृष्णं हरत अत्रैव रक्षत । नंदं बध्नीत प्रेमरसनयेति शेषः । तेन सहातिप्रीतिं कुरुतेत्यर्थः । दुर्गमा मतिर्यस्य तम् ॥३२॥ असत्तमोऽतीव कपटः । उग्रसेनोऽपि हन्यताम् । परपक्षगो वसुदेवपक्षपाती ॥ * ॥ सुदुर्मेधाः पुत्रपरिवर्तनादिकौटिल्येन । अतोऽसत्तमः स्वपुत्रार्पणप्रतिज्ञाखंडनात् । 'वसुदेवस्तु' इति पाठः क्वाचित्कः । चकार एव समुच्चयेऽत्र । अपिशब्दात्पितापि । तथापि परपक्षगो वसुदेवानुगः । सरस्वती तु—दुर्गमबुद्धिर्वसुदेवो हन्यतां गम्यतां, सर्वैराश्रियतामित्यर्थः । न विद्यते सत्तमो यस्मात्सः । तथोग्रसेनोऽप्याश्रियतां, यतः परः परमेश्वरस्तस्य पक्षं गच्छतीति तथा ॥ ३३ ॥ एवमित्थम् । विकत्थमानेऽयुक्तं भाषमाणे । अव्ययो न केनापि हंतुमर्हः । तरसा शीघ्रम् । उत्तुंगमत्युच्चम् ॥ * ॥ विकत्थमान इति तथा तर्जनस्याप्यात्मश्लाघायां तात्पर्यात् ।

१ स्वेत्यत्र ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमाविशंतमालोक्य मृत्युमात्मन आसनात् ॥ मनस्वी सहसोत्थाय जगृहे सोऽसिचर्मणी॥३५॥तं खड्गपाणिं विचरन्तमाशु श्येनं यथा दक्षिणसव्यमंबरे॥
समग्रहीद्दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ॥ ३६ ॥ प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुंगमंचात् ॥ तस्योपरिष्टात्स्वयमब्जनाभः
पपात विश्वाश्रय आत्मतंत्रः ॥३७॥ (कंसोपि कृष्णेन जगत्त्रयैकनिवासभूतेन निपात्य सोऽधः ॥ तेनात्मतंत्रेण च पीडितोऽसूंस्तत्याज राजन्निमिषां
तरेण ॥१॥) तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः ॥ हाहेति शब्दः स महांस्तदाऽभूदुदीरितः सर्वजनैर्नरेंद्र ॥ ३८ ॥ स नित्यदोद्वि
ग्नधिया तमीश्वरं पिबन्वदन्वा विचरन्स्वपञ्छ्वसन् ॥ ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवापमाप ॥ ३९ ॥

॥ ३५ ॥ दुर्विषहमविषह्यमुग्रं तेजो यस्य स श्रीकृष्णः ॥ ३६ ॥ गरिष्ठत्वाय विश्वाश्रयत्वमुक्तम् । तत्र हेतुः । अब्जनाभः । कुतस्तस्योपर्येवं पपात । यत आत्मतंत्रः स्वतंत्रः ॥ ३७ ॥ ३८ ॥ ३९ ॥

अव्ययः श्रीकृष्णः । तन्नामत्वेन प्रसिद्धत्वादश्रम एव सन्नित्यर्थः । स्वभक्तद्रोहश्रवणात्प्रकुपितः । लघिम्ना शैध्र्यातिशयेनालक्षिततयेत्यर्थः । तरसा वेगेन । आरुहत् आरोहदित्यर्थः ॥ ३४ ॥ तं श्रीकृष्णम् । मनस्वी धीरः ॥ * ॥ आविशन्तं वेगेन मञ्चान्तः प्रविशन्तम् । आत्मनो मृत्युं मृत्युमिव । साक्षाद्भीत्या मृत्युत्वेन प्रतीयमानमित्यर्थः । मनस्वीति निन्दार्थे विन् 'भूमनिन्दाप्रशंसासु' इत्यादिस्मरणात् । निंदितमना भीत इत्यर्थः । अत एव कंसोऽशस्त्रेऽपि तस्मिन्नसिचर्मणी जग्राह ॥ ३५ ॥ तं कंसम् । दुर्विषहे उग्रे च बलार्चिषी यस्य स तथा । "तेजो दीप्तौ प्रभावे च स्यात्पराक्रमरेतसोः" इति मेदिनी ॥ * ॥ दक्षिणं वामं च भागं व्याप्य गति कौशलेनाशुवेगेन विविधं चरन्तं भ्रमन्तम् । अत्रानुरूपो दृष्टान्तः—यथाकाशे श्येनमिति । अनेन दुर्ग्रहत्वमुक्तम् । तथापि प्रसह्य बलात्समग्रहीत् । कुतः—दुर्विषहमुग्रं न तु साधारणोग्रं तेजः पराक्रमो यस्य स इति । तार्क्ष्य सुतोऽपि दुर्विषान्सर्पान्हन्तीति दुर्विषहा, अत एवोग्रतेजाश्च । तद्दृष्टान्तेन त्वसाधारणोग्रः, लीलया ग्रहणमपि सूचितम् ॥३६॥ तस्य कंसस्य । गरिष्ठत्वाय दुर्भरत्वाय तत्र विश्वाश्रयत्वे । उपरिपतनमाक्षिपति—कुत इति । आत्म तंत्रः अपराधीनत्वाद्यथेच्छं पपातेति भावः ॥ * ॥ सम्यग्ग्रहणमेव व्यञ्जयति—केशेषु प्रकर्षेण दृढं गृहीत्वेति । ननु मुकुटबद्धकेशेषु द्रुतं ग्रहणं कथं स्यात्तत्राह—चलत् ग्रहणोद्यम एव सवैयग्र्यमस्तकचालनेन । विगलत्किरीटं यस्य तम् । तथा च श्रीविष्णुपुराणे—'केशेष्वाकृष्य विगलत्किरीटम्—' इति । हरिवंशे च—"मुकुटश्चापतत्तस्य कांचनो वज्रभूषितः । शिरसस्तस्य कृष्णस्य परामृष्टेन पाणिना ॥" इति । अन्यत्तैः । यद्वा—आत्मतंत्रे हेतुः—विश्वाश्रयः । तत्र कैमुत्येन हेतुः—अब्जनाभः, गर्भोदशायिरूपेणांशेनापि भुवनकोषपद्मनाभ इत्यर्थः ॥ ३७ ॥ परेतं मृतम् । हरिः सिंहः । तदा कंसपतनाऽवसरे । कृष्णलीलाश्रवणरता एव नरेंद्रा अन्ये तु नरा अपि न सन्ति "कृष्णभक्ता नरेंद्राः स्युरन्ये तु पशवो नराः" इति पुराणांतरात् । "परेतो वाच्यलिंगः स्यान्मृते भूतान्तरे पुमान्" इति मेदिनी ॥ * ॥ उपरि श्रीभगवत्पातादेव सम्यक्परेतं मृतम् । जगतो विश्वस्येति न केनापि निवारितं सर्वेषां च सुखमिति च सूचितम् । हाहेति शब्दोऽत्र विस्मये । महापुरुषस्याप्यवज्ञया वधात् । तथा च विष्णुपुराणे—" ततो हाहाकृतं सर्वमासीत्तद्रंगमण्डलम् । अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम् ॥" इति । नरेंद्रेति—तं हृष्टं दृष्ट्वा स्वयमतिहृष्टः संबोधयति । नरेंद्रा अपि त्वादृशा दुष्टान्मारयंति किमुतेंद्रेंद्रः श्रीकृष्ण इति नाश्चर्यमिति भावः ॥३८॥ स कंसः । उद्विग्नधिया भीतबुद्ध्या तं कृष्णरूपम् । नित्यदा सदा । यतो हेतोश्चक्रायुधं सुदर्शनधरं ददर्शातो हेतोस्तदेवरूपं चक्रायुधरूपं दुरवापं ज्ञानमृते साधनांतरानवाप्यम् "तमेव विदित्वातिमृत्युमेति, नान्यः पंथा विद्यतेऽयनाय" इति श्रुतेः । सर्वदा ज्ञानरूपभक्तेर्देहान्ते जात ज्ञानत्वात्तदेवापेति भावः । ज्ञानस्य मुक्तौ पाके वह्नेर्ज्वालावद्धत्त्यवांतरव्यापारवत्त्वादित्यन्यत्र बहुधा निरूपितमिति ॥ * ॥ प्रसंगात्कंसस्य मोक्षमाह—स इति । नित्यदा नित्यमेवोच्चैर्भीतया भयेनाकृष्टया धिया ददर्श । तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याऽनुजा भ्रातरोऽष्टौ कंकन्यग्रोधकादयः ॥ अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्वेशकारिणः ॥ ४० ॥ तथाऽतिरभसांस्तांस्तु संयत्तात्रोहिणीसुतः ॥ अहन्प रिघमुद्यम्य पशूनिव मृगाधिपः॥४१॥नेदुर्दुंदुभयो व्योम्नि ब्रह्मेशाद्या विभूतयः॥पुष्पैः किरंतस्तं प्रीत्या शशंसुर्ननृतुः स्त्रियः॥४२॥तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः ॥ तत्राभीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ॥ ४३ ॥ शयानान्वीरशय्यायां पतीनालिंग्य शोचतीः ॥ विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ॥४४॥ हा नाथ प्रिय धर्मज्ञ करुणानाथ वत्सल ॥ त्वया हतेन निहता वयं ते सगृहप्रजाः ॥४५॥ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ ॥ न शोभते वयमिव निवृत्तोत्सवमंगला॥४६॥अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणम्॥ तेनेमां भो दशां नीतो भूतध्रुक्को लभेत शम् ॥४७॥

निर्वेशो निष्कृतिरानृण्यमित्यर्थः । तत्कारिणः संतस्तेऽभ्यधावन् ॥ ४० ॥ तथा तादृगतिरभसो वेगो येषां तान् । संयत्तानुद्युक्तान् ४१ ॥ ४२ ॥ ४३ ॥ शोचंत्यो विलापांश्चक्रुः । शुचः अश्रूणि ॥ ४४ ॥ हेधर्मज्ञ हेकरुण हेदीनवत्सलेति विलापे प्रेमसंबोधनानि । ते त्वदीया वयम् ॥ ४५ ॥ त्वया पत्या विरहिता पुरीयं न शोभत इति स्वदृष्ट्याभिधानम् ॥ ४६ ॥ अनागसामिति तु परमार्थाभिधानम् ॥ ४७ ॥

यद्रूपं नित्यं दृष्टं तदेवाऽधुनापि स्फुरितं सत्प्राप्तेत्यर्थः । "यंयं चापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तंतमेवैति कौंतेय सदा तद्भावभावितः ॥ " इति भगवद्गीतातः पेशस्कारिकीटवदिति भावः । दुरवापमाप—ननु कालनेमिजन्मनि श्रीमदजितेन हतस्याप्यप्राप्तमोक्षस्य तादृशदुष्टस्य तत्कथं घटेत तत्राह—तं निजाशेषैश्वर्यप्रकटनपरमीश्वरमिति । **विश्वनाथस्तु**—स्वस्य भूतलाघाताभावार्थं तस्योपरिष्टादेव पपात । विश्वाश्रय इति स्वभावे नैव तं मारयितुमिति भावः । किञ्च—कंसो मृत इति कोऽपि यदा न प्रतीयाय किन्तु मूर्छितोऽयमिति मन्यते स्म तदा तं विचकर्ष । तन्मृत्युं सर्वान्प्रत्याययितुमिति भावः । कंसस्य भयहेतुको भगवदावेश एव सर्वापराध हानिपूर्वकमोक्षहेतुरासीदित्याह—स इति ॥ ३९ ॥ तस्य कंसस्य । इत्यर्थ इति—"निर्वेशस्तु पुमान्भागे वेतने मूर्छनेऽपि च" इति मेदिनी । 'वेतनं भृतिरानृण्यम्' इति कोशांतरात् । तत् आनृण्यम् । ते कंसानुजाः ॥*॥ निर्वेशो निष्कृतिरानृण्यमिति यावत् ॥ ४० ॥ "परिघो योगभेदेऽस्त्रविशेषेऽर्गलघातयोः" इति मेदिनी । पशून्मृगादीन् "पशुर्मृगादिदेवाजे नाऽव्ययं पशुदर्शने" इति । 'सिंहव्याघ्रौ मृगाधिपौ' इति हलायुधः ॥ * ॥ परिघं तत्रैव दैवतः प्राप्तम् । यद्वा—परिघाकारं गजदंतमेव ॥ ४१ ॥ तं कृष्णम् । विभूतयः अंशाः " विभूतिर्भस्ममांसेषु संपत्तौ भवनेऽपि च" इति धरणिः ॥ * ॥ विभूतयस्तदैश्वर्यास्तत्सेवका इत्यर्थः । स्त्रियोऽप्सरसः ॥ ४२ ॥ तेषां कंसादीनाम् । तत्र रंगभूमौ ॥ * ॥ ० ॥ ४३ ॥ वीरशय्यायां रणभूमौ । वीराणां शय्या शयनं यस्यां सा तस्याम् । विसृजन्त्यस्त्यजन्त्यः ॥ * ॥ वीराणां शय्या रणभूः ॥ ४४ ॥ अनाथा प्रिया वत्सला यस्य स तथा । करुणया नाथंते प्रार्थयन्त इति करुणानाथा दीनस्तेषु वत्सल स्निग्ध 'वत्सलः स्निग्धपुत्रयोः' इति कोशात् ॥ * ॥ हा नाथेत्या द्येकत्वं प्रत्येकं पृथग्विलापात् । मुख्यत्वेन कंसस्त्रीणामेव तद्वर्णनाद्वा । करुणादयालो आ ईषत्प्रहतेऽपि निहताः किं पुनर्मारिते । 'त्वया हतेन' इति पाठः क्वचित् । त्वया हतेनैव कर्त्रेति दुःखोक्तिः । गृहैः प्रजा भिश्चापत्यादिभिः सहिता । गीर्देवी तु निंदति—अनाथेत्यकारप्रश्लेषेणैकपद्यात् ॥ ४५ ॥ निवृत्ते उत्सवमंगले यस्यां सा । उत्सवो होलिकादिरूपो, मंगलं विवाहादि ॥ * ॥ विशेषेणाऽपुनर्योगतया रहिताः । निवृत्त उत्सवो गीतवाद्यादि मंगलानि च शुभसूचकानि यस्याः सा । न चान्यतस्तत्संभवेदित्याहुः—पुरुषर्षभेति । गीर्देवी तु—पुरुषर्षभ बलीवर्द । काका न शोभते किमिति " ऋषभः स्वरभेदे स्यादष्टवर्गौषधे वृषे । श्रेष्ठार्थे च" इति विश्व प्रकाशात् ॥ ४६ ॥ तेन भूतद्रोहेण । इमां मृत्युरूपाम् । भूतध्रुक् प्राणिद्रोही " एतस्य महतो भूतस्य " इत्यादिश्रुतौ भूतशब्द ईशपरस्तथा चेशद्रोही कः शं लभेत, न कोऽपीत्यर्थः । दैहिकव्यवहारमात्रेण ताभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वेषामिह भूतानामेष हि प्रभवाप्ययः ॥ गोप्ता च तदवध्यायी न क्वचित्सुखमेधते ॥ ४८ ॥ श्रीशुक उवाच ॥ राजयोषित आश्वास्य भगवाँल्लोकभावनः ॥ यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ॥ ४९ ॥ मातरं पितरं चैव मोचयित्वाऽथ बंधनात् ॥ कृष्णरामौ ववंदाते शिर साऽऽस्पृश्य पादयोः ॥ ५० ॥ देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ ॥ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ ॥ ५१ ॥ इति श्रीभागवते महापुराणे द० पूर्वार्धे कंसादिवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

एष कृष्णः प्रभवंत्यस्मादिति प्रभवः अपियंति प्रलीयंतेस्मिन्नित्यप्ययः स च स च। तदवध्यानं कृष्णस्य अवज्ञा तत्कर्तुं शीलं यस्य सः ॥४८ ॥४९॥ आस्पृश्य ईषत्स्पृष्ट्वा ॥ ५० ॥ पुत्रभ्रांतिं विहाय जगदीश्वराविति ज्ञात्वा शंकितौ न सस्वजाते नालिंगितवंतौ । किंतु बद्धांजली तस्थतुरित्यर्थः ॥ ५१ ॥ प्रसह्य हत्वा हस्तींद्रं मल्लेंद्रान्मलल्लीलया ॥ बीभत्सचरितं कंसं स बीभत्समवारयत ॥ १ ॥ इति श्रीमद्भागवते म० दशमस्कंधे पूर्वार्धे टीकायां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

सह शोचन्त्यः काश्चित्परमार्थदर्शिन्य आहुः—अनागसामिति द्वाभ्याम् । उल्वणमुत्कटं बहुधा दुर्मारणात् ॥ ४७ ॥ एष प्रत्यक्षस्थितः । "प्रभवाप्ययौ हि भूतानाम्" इति श्रुतेः । सुखं यथा स्यात्तथा न वर्धते ॥ * ॥ किञ्च—सर्वेषामिति तदवध्यायी तदवज्ञातापि, किं पुनर्द्रोहीत्यर्थः । सुखं यथा स्यात्तथा नैधते स सदा दुःखेन क्षीयत इत्यर्थः । क्वचिदिह परत्र चेत्यर्थः । इदं तत्स्वभावनिन्दापेक्षयैवोक्तं न तु तादृशानामपि सुखपर्यवसायकभगवत्स्वभावदृष्ट्येति ज्ञेयम् । एष श्रीकृष्णः । प्रभवत्यस्मादिति प्रभवः, अपियंत्यस्मिन्नित्यप्ययः, स च स चेति **विश्वनाथः** ॥ ४८ ॥ आश्वास्य सर्वतदीयवृत्तश्रावणेन सांत्वय्य । संस्थां मृतसंस्कारम् ॥ * ॥ आश्वास्येत्यत्र हेतुः—लोकभावनः, स्वाभाविक्या दयया सर्वलोकपालक इति । अत एव श्रीविष्णुपुराणे—"बहुप्रकारमाश्वस्तः पश्चात्तापातुरो हरिः । ताः समाश्वासयामास स्वयमस्राविलेक्षणः ॥" इति । श्रीहरिवंशे च—"कंसनारीविलापांश्च श्रुत्वा स—करुणान्बहून् । गर्हमाणस्तथात्मानं तस्मिन्यादवसंसदि ॥ अहो मयातिबाल्येन नवरोषातिवर्तिना । वैधव्यं स्त्रीसहस्राणां कंसस्यास्य कृते कृतम् ॥" इत्यादि । संस्थामंत्यकृत्यम् । सा च 'स नीतो यमुनातीरमुत्तरम्—' इत्यादिश्रीहरिवंशानुसारेण परिज्ञेया । तच्च तासां महाशोकदर्शनपरिहारार्थं तीर्थानामनाविलतार्थं चेति गम्यते । आश्वास्य मयि पालयितारि का युष्माकं चिन्तेति बोधयित्वेति **विश्वनाथः** ॥ ४९ ॥ अथ कंससंस्थोत्तरम् ॥ * ॥ अथ तदनंतरमिति परदुःखासहिष्णुतयादौ कंसस्त्रीणां पतिदेहेन सह प्रेषणाय व्यग्रत्वात्सर्वेषु स्वस्वस्थानं गतेषु कोलाहलशान्तिश्च । आस्पृश्य सम्यक् स्पृष्ट्वा ॥ ५० ॥ सस्वजात इति "द्वयोर्नाम्नोर्बहूनां वा यत्र वाक्ये समुच्चयः। नामत्रयाश्रिता संख्या कृत्तिबायोर्विशेषणम् ॥" इति हरिभक्तेरनुशासनाद्देवकीवसुदेवयोर्द्वित्वमादाय सस्वजात इत्युक्तम् । अन्यथा सस्वज इत्यस्य द्विरुपादानं स्यात् । इत्यर्थ इति—शंकाकुलत्वान्नालिंगितवन्तौ । शंका च—कथमावामीश्वरे पुत्रत्वबुद्धिं कुर्व इत्येवंरूपा ज्ञेया ॥ (५१) ॥ 'यादृशो यक्षस्तादृशो बलिः' इति न्यायेन सबीभत्सं केशग्रहपूर्वकभूमिविलोडनसहितम् । अयमर्थः श्रुत्याप्यनूद्यते—"अहश्च कृष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि" इति श्रुतिः । अस्या अर्थः--अहः युद्धयज्ञः कृष्णम् अनु एकः विवर्तते विशेषेण जायते । तथार्जुनम् अनु अहर्विवर्तते । एकश्चकारोऽन्वाचयेऽपरः समुच्चये । तेन कृष्णार्जुनाभ्यां विभज्य समुच्चित्य वा क्रियमाणौ द्वौ युद्धयज्ञौ वर्तेते इत्यर्थः । उभे अप्यहनी रजसी रजोगुणकार्ये वेद्याभिर्लब्धुं योग्याभिः, श्रीभिर्हेतुभूताभिः । लक्ष्म्यर्थं युद्धानि जायन्त इत्यर्थः । ताभ्याञ्च सहायाभ्यां वैश्वानरो विश्वेषां नृणाम् इष्टफलप्रापको धर्मः स्वयमदृष्टरूपोऽपि जायमान आविर्भवन् । वाशब्द इवार्थे । राजा जायमानः सन् तमांसि अधर्मरूपाणि अवातिरत् तिरस्कृतवान् । केन—अग्निज्योतिषेत्यर्थः । खांडवदाहेऽग्निना दत्ते चक्रगांडीवे तद्रूपेण ज्योतिषेति भावः । अनेन मंत्रेण सर्वे कृष्णकृतयुद्धाऽर्जुनयुद्धाश्च लक्ष्यन्त इत्यवधेयम् ॥*॥ विज्ञाय विशेषतो ज्ञात्वा सांप्रता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः ॥ मा भूदिति निजां मायां ततान जनमोहिनीम् ॥ १ ॥ उवाच पितरावेत्य साग्रजः सात्वतर्षभः ॥ प्रश्रयावनतः प्रीणन्नंब तातेति सादरम् ॥ २ ॥

पंचचत्वारिंशकेऽथ पितृनंदादिसांत्वनम् ॥ उग्रसेनाभिषेकश्च गुरौ वासात्पुरागमः ॥ १ ॥ उपलब्धार्थौ विदित्वेति। अयमर्थः। उप समीपे आवयोः पुत्रबुद्ध्या यः सांसारिकपरमसुखभोगात्पूर्वमेव लब्धार्थावावामीश्वराविति लब्धः प्राप्तः परमज्ञानरूपोऽर्थो याभ्यां तथाभूतौ तौ ज्ञात्वा मयि प्रसन्ने सत्यनयोर्ज्ञानं नाम किं दुर्लभं स्यात् दुर्लभं तु मयि पुत्रतया प्रेम तत्प्रेम यथा पुत्रतया न तथा ईश्वरत्वेन अत इदानीमेव तज्ज्ञानम् नाभूदिति । निजां स्वाधीनां मायां तयोः प्रसारितवानिति ॥ १ ॥ तदेव दर्शयति उवाचेत्यादिभिरष्टभिः ।

द्भुतकर्मदर्शनादिना स्मृततज्जन्मवृत्तांतत्वेन पुनरैश्वर्यज्ञानोद्बोधात्कृतसभक्तिवंदनावपि पुत्रावपि जगदीशबुद्ध्या भीतो संतौ । यद्वा—न सस्वजाते किन्तु प्रणतौ भवन्तौ च स्थितावित्यर्थः । तथा श्रीविष्णुपुराणे—“ उत्थाप्य वसुदेवस्तु देवकी च जनार्दनम् । स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थितौ ॥ ” इति स्तुतिस्तु दीर्घा तत्रास्ति ॥ ५१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधे पूर्वार्धे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ अथ कंसमृतेरनंतरम् । गुरौ गुरुसमीपे उज्जयिन्याम् (१) । उपलब्धार्थावित्यस्याशयमाह—अयमर्थ इति । अतः पुत्रप्रेम्णो दुर्लभत्वात् । तज्ज्ञानमेतावीश्वरावित्येवंरूपम् । तयोर्देवकीवसुदेवयोः ॥ * ॥ अहो भगवतो नौमि बलात्सर्वप्रवर्तनम् । प्राहिणोद्यः स्वशून्येऽपि श्रीनंदादीनपि व्रजे ॥ १ ॥ अत्र ‘ तं संपरेतं विचकर्ष भूमौ ’ (अ० ४४, श्लो० ३८) इत्यारभ्य ‘ उवाच पितरावेत्य ’ (२) इत्येतत्पर्यन्तस्य प्रकरणस्य लीलाक्रमघटनार्थमित्याद्यर्थिक एव क्रमो गृह्यते । तथाहि—प्रथमं तावत्कंसस्य मृत्युप्रत्यायनार्थं रंगभूमावेव यत्किञ्चिद्विकर्षणम् , ततः कंसभ्रातॄणां हननम्, ततः श्रीवसुदेवदेवकीमोचनम् ,तत्रैव ताभ्यां वंद्यमानयोस्तयोः संकोचवचनम्, ततः पर्वतकायस्य कंसस्य यमुनातीरं प्रति नयनासंभवाच्छ्रीकृष्णेन पुनः कर्षणम्, तेन च परिखा जातेति श्रीविष्णुपुराणे प्रसिद्धम् । यथा—“ गौरवेणातिमहता परिखा तेन कृष्यता । कृता कंसस्य देहेन वेगेनेव महांभसः ॥ ” इति । सा चाद्यापि विश्रान्तितीर्थपर्यन्तसंगता कंसस्य खातं, कंसनदीति च प्रसिद्धा दृश्यते । एवं कंसदेहस्य काठिन्यस्थौल्येऽपि व्यक्ते, ततः कंसादिस्त्रीणां तत्रैव गमनं विलापाद्यञ्च, ततश्च ‘ पितरावुपलब्धार्थौ ’ इत्यादि । अथ तदिदं प्रकरणं व्याख्यायते—उपलब्धार्थाविति । उपोत्र हीने, पुत्रभावमयप्रेमतो हीनतया लब्धोऽर्थः पारमैश्वर्यज्ञानं याभ्यां तादृशौ । तन्मोचनानंतरवंदनसमये ज्ञात्वा तत्तु मा भूदिति विचार्य जनमोहिनी या माया पुत्राद्यासक्तिरूपा, निजां तां स्वविषयकां ततान “ या प्रीतिरविवेकानां विषयेष्वनपायिनी । त्वामनुस्मरतः सा मे हृदयान्नापसर्पतु ॥ ” इतिवत् । यद्वा—स्वीयामसाधारणीं कृपां, किं वा स्वविषयकां पितृभावमयीं कृपां वात्सल्यम् । तामभिव्यञ्जयति—जनानां स्वभक्तानां मोहिनीं, यद्दर्शनेन तदानींतना यच्छ्रवणेनेदानींतनाश्च भक्ताः प्रेममोहं प्राप्नुवन्तीत्यर्थः । एतेन तादृशभावस्य परमपुरुषार्थत्वं ध्वनितम् । श्रीशुकादीनामपि तादृशभक्तगणान्तःपातात् । यद्वा—तां मायां पुनः कीदृशीम्—अंशेन जनमोहिनीञ्च, किञ्चिदन्यथावचनत्वेन पुरतः प्रतीयमानत्वात् । तच्च तां प्रति युक्तमेव “ स्त्रीषु नर्मविवाहेषु वृत्त्यर्थे प्राणसंकटे ” इत्यादिन्यायात् ’ पुत्रभाव एवानयोः पितृत्वेन स्वीकृतयोर्वृत्तिरिति । वक्ष्यते च—‘ इति माया ’ इत्यादौ ‘ परिरभ्यापतुर्मुदम्, (१०) इति । **विश्वनाथस्तु**—उपलब्धोऽर्थोऽस्मदैश्वर्यज्ञानरूपं धनं याभ्यां तथाभूतौ पितरौ ज्ञात्वा मा भूदिति स चार्थोऽनयोर्माऽस्तु किन्तु तदावरको वात्सल्यप्रेमैव, संप्रत्यस्तु मम चानयोश्च तेनैव परमानंदलाभादिति मनसि विमृश्य निजामंतरंगां मायां स्वैश्वर्यज्ञानमावरीतुं योगमायां ततान । जनमोहिनीम् “ दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ” इत्यत्र जनशब्देन भक्ता एवोक्तास्तान्मोहयितुं शीलं यस्यास्ताम् । यद्वा—जनयत इति जनौ जननीजनकौ, तयोर्मोहिनीम् । स्वामिचरणास्तु—मयि प्रसन्ने सत्यनयोर्ज्ञानं नाम किं दुर्लभं, दुर्लभं तु मयि पुत्रतया प्रेमेति भगवदभिप्रायमाहुः । अत एव पितरौ वात्सल्यरसं ग्राहयितुमाग्रिमश्लोकेषु तयोः कपटोक्तिरपि न दोषायेति ज्ञेयम् ॥ १ ॥ तदेव मायाप्रसारणमेव । प्रश्रयाय प्रकृष्टं सेवां कर्तुमवनतः । प्रीणान्निति णिजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि ॥ बाल्यपौगंडकैशोराः पुत्राभ्यामभवन्क्वचित् ॥ ३ ॥

प्रीणन्प्रीणयन्सादरमुवाच ॥ २ ॥ अस्मत्तोऽस्मन्निमित्तं नित्य मुत्कंठितयोरपि युवयोः पुत्राभ्यामावाभ्यां कृत्वा बाल्यपौगंडकैशोरास्तत्तदवस्थानुभवसुखानीत्यर्थः । तानि नाभवन्निति अस्मत्तः पुत्राभ्यामिति सामानाधिकरण्यं वा ॥ ३ ॥

द्यभाव आर्षः ॥ * ॥ तदेव विवृणोति—उवाचेति । ‘ उवाच पितरावेत्य ’ इति पूर्वं मोचयित्वा गृहमेव प्रस्थापितौ तावेत्येत्यर्थः । कंसादिसंस्कारार्थमन्यान्नियोज्येति भावः । सात्वतर्षभ इति—स्ववंश्यत्वेनानुगृहीतेषु यादवेषु च कृपां विस्तारयितुमुचितोऽयमिति तद्दर्शनया तेष्वपि तां विस्तारयितुमिति भावः । तथा च विष्णुपुराणे—“मोहाय यदुचक्रस्य विततान स वैष्णवीम् ” इति । साग्रजत्वं तत्साहित्येन तयोरधिकविश्वासार्थम् । यद्वा—हे अंब, हे तातेत्येवं संबोधनेन प्रीणन् तौ प्रीणयन् । किं वा स्वयमेव हृष्यन्सादरमुवाच ॥ २ ॥ इत्यर्थ इति—लक्षणयाऽवस्थाशब्दास्तत्तदवस्थासुखपरा बोध्याः । ते बाल्यादयः । नैमित्तिकाधारसप्तमीकल्पनापेक्षया तृतीया कल्पना प्रथमातिक्रमे कारणाभावाद्वरेति मत्वाह—अस्मत्त इति । आवाभ्यामित्यर्थः । तासिरत्र सप्तमीतृतीययोः पूर्वापरव्याख्यानयोर्ज्ञेयः ॥ * ॥ हे तातेति प्राधान्यात् । किं वा ज्ञानपरस्य तस्य स्नेहौत्कट्यमसंभाव्य मातृवत्स्नेहोदयाय । क्वचिदेकांशेऽपि तदिदं कैशोरस्य पूर्वपूर्वावस्थैवोच्यते । तथात्र वर्षक्रमो विचार्यते—“क्व सप्तहायनो बालः क्व महाद्रिविधारणम्” इति श्रीव्रजवासिवचनेन तद्धारणसमये सप्तहायनत्वं श्रूयते । तद्धारणञ्च तत्पूजासमयकार्तिकशुक्लप्रतिपदानंतरं तृतीयायामेव गम्यते । वर्षपूरणसमयस्तु गौणभाद्रकृष्णाष्टम्यामेव मासद्वयादिनदशकाधिकेऽपि वात्सल्यात्सप्तवर्षमात्रतां प्रोक्तवन्तस्तस्मात्तन्मर्यादया पूर्वपूर्वपर्यालोचनया च तदभ्यन्तर लीलावर्षाणि गण्यन्ते । तत्र ‘कालेनाल्पेन राजर्षे’ इत्यादिदृष्ट्या राजकुमारादिषु दृष्टत्वेन कैमुत्यप्राप्त्या च नासंभावना कार्या । तत्र सति वर्षे पूर्णे तृणावर्तवधः, तृतीयवर्षारंभकार्तिके दामोदरलीला, ततः कतिचिद्दिनान्ते वृंदावनप्रवेशः, प्रविष्टे च वृन्दावने द्वित्रिमासानंतरं वत्सचारणारंभः, तत्र वत्सबकव्योमवधस्तदेवं तृतीये चतुर्थारंभे शरदि बालवत्सहरणम्, तत्र पौगंडस्य प्रवेशेऽपि “यत्कौमारे हरिकृतं जगुः पौगंडकेऽर्भकाः ” इति वचनात्तद्धारणहेतोरनुल्लासे स्तंभः, पंचमारंभे पौगंडप्रकाशः, तत्र कार्तिकशुक्लाष्टम्यां गोचारणारंभः, पंचमस्य निदाघे कालियमर्दनं, षष्ठे गोचारणकौतुकमात्रं, सप्तमारंभे कैशोरप्रवेशः, तत्रैव पक्वतालावसरे धेनुकवधः, तत्संध्यायां ‘पीत्वा मुकुंदमुखसारघम्’ इत्यादिरीत्या प्रथमतादृशभावाभिव्यक्तिः, कालियदमनधेनुकवधयोर्विपर्ययः प्रतिपन्न एव, सप्तमस्य निदाघे प्रलंबवधः, अष्टमस्याश्विने वेणुगीतं, कार्तिके गोवर्धनोद्धारणमिति ‘क्व सप्तहायनो बालः’ इति वचनमनुस्मृत्य स्थापितम् ॥ तथा “एकादश समास्तत्र गूढार्चिः सबलोऽवसत्” इत्यनुसृत्य निरूप्यते—अष्टमारंभ एव कार्तिकशुक्लैकादश्यां गोविंदाभिषेकः, द्वादश्याञ्च वरुणलोकगमनम्, तत्पूर्णिमायां ब्रह्मह्रदावगाहनं श्रीवराहदेवेन तस्यां तन्महिमकथनात् , हेमन्ते वस्त्रहरणं, निदाघे यज्ञपत्नीप्रसादः, नवमस्य शरदि रासलीला, शिवरात्रिचतुर्दश्यामंबिकावनयात्रा, फाल्गुन्यां शंखचूडवधः, दशमे स्वैरलीला, एकादशे चैत्रपौर्णमास्यामरिष्टवधः, द्वादशस्य गौणफाल्गुनद्वादश्यां केशिवधः, तच्चतुर्दश्यां कंसवध इति द्वादशस्तत्र न पूर्ण इत्येकादश समा इत्युक्तम् । किन्तु नवमान्त एव पूर्णकिशोरता, सा च न व्यवच्छिद्यते “कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्रतत्र हि” इति प्रद्युम्नस्यागमनेऽपि तत्साम्यावगमादिति प्रस्तुतमनुसरामः । अत्र **विश्वनाथोऽपि** ‘ बाल्यपौगंडकैशोराः ’ इह पुंस्त्वमार्षम् । ननु “ क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ” इति पुरस्त्रीणामुक्तेः कथं कैशोरस्यातीतत्वमुच्यते “ कौमारं पञ्चमाब्दान्तं पौगंडं दशमावधि । कैशोरमापञ्चदशाद्यौवनञ्च ततः परम् ॥ ” इति वचनात्पञ्चदशवर्षपर्यन्तमेव कैशोरं, कृष्णस्त्वेकादशवर्षवयाः कंसं जघान ‘एकादश समास्तत्र’ इत्याद्युद्धवोक्तेर्व्रजभूमावुपनयनाभावाच्चेत्यतस्तदानीं तयोः कैशोरस्यारंभ एव न तु शेषोऽपीति,—सत्यं, यद्यपि सामान्यतो वयोगणना ईदृश्येव तदपि “कालेनाल्पेन राजर्षे रामः कृष्णश्च गोव्रजे । अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा ॥” इत्युक्तेः राजकुमारादावपि क्वचित्सुखिनि पौगंडवयस्यपि शरीरवृद्धिमति कैशोरचेष्टादर्शनात् । कृष्णे तु

॥२३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न लब्धो दैवहतयोर्वासो नौ भवदंतिके ॥ यां बालाः पितृगेहस्था विंदंते लालिता मुदम् ॥ ४ ॥ सर्वार्थसंभवो देहो जनितः पोषितो यतः ॥ न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ॥ ५ ॥ यस्तयोरात्मजः कल्प आत्मना च धनेन च ॥ वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयंति हि ॥ ६ ॥ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुम् ॥ गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः ॥ ७ ॥

किं च आवामेव दैवहीनावित्याह । न लब्ध इति । पितृगेहस्था बाला यां मुदं विंदंते लभंते सा च न लब्धेति ॥ ४ ॥ एवं तावच्छ्लोकद्वयेन युवयोरावयोश्च कामहानिर्जातेत्युक्तमावयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह । सर्वार्थसंभव इति । सर्वेषां धर्मार्थार्थानां संभवो यस्मिन्स देहो यतो याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशं निष्कृतिमानृण्यं मर्त्यः शतसंवत्सरमात्रेणायुषा न प्राप्नोति ॥ ५ ॥ तन्मध्ये पितुरपेक्षया यः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रोर्वृत्तिं जीविकां न संपादयेत्तं प्रेत्य लोकांतरे यमदूताः स्वस्यैव मांसं खादयंति हि ॥ ६॥ किं च मात्रादिशुश्रूषामकुर्वन्विफलजीवितश्च भवतीत्याह । मातरमिति । प्रपन्नमापन्नमित्यर्थः ।

कैमुत्यप्राप्तेर्वैष्णवतोषिणीभक्तिरसामृतानंदवृंदावनचंप्वादिमतमनुसृत्यैवं व्यवस्थेयम्—मासचतुष्टयाधिकवर्षत्रयस्यैव कृष्णे पंचवर्षीयमाणत्वात्तत्प्रमाणं प्रथमं वय एव कौमारं तत्र कृष्णस्य महावने स्थितिः । ततः परमष्टमासाधिकषड्वर्षपर्यन्तं वयः पौगंडं, तत्र वृंदावने थितिः । ततः परं दशवर्षपर्यन्तं कैशोरं, तत्र नंदीश्वरे स्थितिः । ततः सप्तमे मासि चैत्रकृष्णत्रयोदश्यां मथुरागमनं, चतुर्दश्यां कंसवध इति । तत्र दशवर्षे तु कैशोरभावं तत्रैव नित्यस्थितिरतस्तदनंतरं सर्वकालमेव तस्य कैशोरमेव ज्ञेयम् । ‘ कृष्णं मत्वा स्त्रियः ’ इत्यादिना प्रच्छन्नागमे तत्साम्यावगतेः , ‘ संतं वयसि कैशोरे ’ इति सामान्यतः श्रीकपिलदेवोक्तेश्च, आगमादिष्वपि विंशाक्षरादिमंत्राणां द्वारकालीलामयध्यानेष्वपि तथा दृष्टेश्च । तस्मात्कंसवधदिने तस्य कैशोरापगमः कैशोरानपगमश्चेति कृष्णस्य पुरस्त्रीणाञ्चैकवाक्यं संगच्छते स्म ॥ ३ ॥ इह चावयोरेव महती हानिर्नात्रभवतोर्युवयोरित्याह—किञ्चेति । दैवहीनौ मंदभाग्यौ । नौ आवयोः । तृतीयार्थे षष्ठी । आवाभ्यामित्यर्थः । यां लालनरूपाम् । सा मुद् ॥ * ॥ नेति तैरवतारितम् । तत्र किञ्चेत्यस्य न केवलं युवयोरेव हानिः किं त्वावयोरपीत्यर्थः । अत एव कारणेन नौ व्यावर्तेतां किन्त्वस्य पुत्रजातीया एवेति ज्ञेयम् । यद्वा—मादृशयोरप्रयोजनकयोः पुत्रयोस्तेनापि युष्मत्सुखदत्वं न स्यादेव किं तु आवयोरेव सर्वसुखहानिर्जातेत्याह—नेति । कर्तरि संबंधविवक्षया षष्ठी । अकारप्रश्लेषेणादैवहतयोः कर्माधीनतारहितयोरिति तत्त्वार्थः । पितृगेहस्थत्वादेव पितृभ्यां लालिताः संतः । यद्वा—पितृगेहस्था एव स्वभावतो यां मुदं विंदन्ति विशेषतस्ताभ्यां लालिता इति ॥ ४ ॥ यद्वा—शतशब्दोऽनंतार्थकस्तेन सहस्रादिवर्षायुषापि न, किं वक्तव्यमल्पायुषाम् । तयोर्मातापित्रोः ॥ * ॥ ० ॥ ५ ॥ तन्मध्ये तयोर्मातापित्रोर्मध्ये । पितुः सकाशाद्यः कल्पः स्त्रीणामस्वातंत्र्यात्सामर्थ्याभावाच्च पितुरित्युक्तं स्वामिभिः । देहेन निजदेहेनैव न तु भृत्यादिना । धनेनालंबुद्ध्युत्पादकवसुना । तयोरित्युभयत्रान्वेति काकाक्षिगोलकन्यायेन । तयोर्मातापित्रोः, तं मातृपिताजीविकामददतम् । हीति ‘ वृद्धौ च मातापितरौ ’ इत्यादिकां स्मृतिं सूचयति ॥ * ॥ यस्तयोरित्यत्र टीकायां तन्मध्येऽपि त्वित्येव पाठो न तु पितुरिति । स्वस्य तस्यैवेत्यर्थः । कल्पः शास्त्रविधिनादातुं योग्यः । कर्मणि स्थित इति यावत् ॥ ६ ॥ न केवलं पारत्रिकक्लेश इहापि तेऽयोग्या एवेत्याह—किञ्चेति । स्मृतिमर्थतः पठति—मातरमिति । मातरं सर्वावस्थासु मानार्हाम् । साध्वीमक्षताचाराम् । शिशुं स्वजीविकाकृत्यायोग्यम् । गुरुं ज्ञानोपदेष्टारम् । तञ्च विप्रमेव तस्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः ॥ मोघमेते व्यतिक्रांता दिवसा वामनर्चतोः ॥ ८ ॥ तत्क्षंतुमर्हथस्तात मातर्नौ परतंत्रयोः ॥ अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशम् ॥ ९ ॥ श्रीशुक उवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ॥ मोहितावंकमा रोप्यपरिष्वज्यापतुर्मुदम् ॥१०॥ सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किंचिदूचतू राजन्बाष्पकंठौ विमोहितौ ॥ ११ ॥ एवमाश्वास्य पितरौ भगवान्देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृपम् ॥ १२ ॥

अबिभ्रदपुष्णन् श्वसन्नपि मृततुल्य एवेति ॥ ७ ॥ तत्तस्मान्नौ आवयोः मोघं व्यर्थम् । अनर्चतोरपूजयतोः ॥ ८ ॥ दुर्हृदा शत्रुना कंसेन कृत्वा ॥ ९ ॥ १० ॥ ॥ ११॥ आश्वास्य सांत्वयित्वा ॥ १२ ॥

ज्ञानोपदेशाधिकारात् " मुखजा उपदेष्टारो बाहुजा रक्षकाः स्मृताः । वर्णानामाश्रमाणाञ्च मुख्योऽभूद्ब्राह्मणो गुरुः ॥ " इत्युक्तेः, " विप्रस्यैवाधिकारोऽस्ति धर्मज्ञानोपदेशने " इति संहितोक्तेश्च । यद्वा—गुरुं ज्ञानवृद्धं विप्रञ्चेति पृथगेव । तत्र विप्रं जातिमात्रम् । ' ब्राह्मणो जन्मना श्रेयान् ' इत्युक्तेश्च । प्रपन्नं शरणमागतं यं कं वापि ॥ * ॥ वृद्धं कुलवृद्धम् ॥ ७ ॥ नन्वस्त्वेतत् प्रकृते किमायातं तत्राह—तन्नाविति । यत एवं शास्त्रार्थस्तत्तस्माद्धेतोः । कंसात् ' कसि— गतिशासनयोः ' इति धातोः सर्वहिंसाधिकारणत्वेन तन्नाम्नो राज्ञः । नित्यमहोरात्रम् । उद्विग्नचेतसोः त्रस्तमनसोः । अकल्पयोः शक्तिसामग्रीहीनयोः । एते इतः पूर्वे दिवसा मोघम् " मोघा स्त्री पाटलायां स्याद्धीननिष्फलयोस्त्रिषु " इति मेदिन्युक्तेः निष्फलं यथा स्यात्तथा क्रियाव्ययविशेषणानां क्लीबत्वमेकवचनञ्चेति ॥ * ॥ अत्राकल्पशब्दः केवलासमर्थस्यैव वाचकः । अकल्पत्वे हेतुः—कंसादिति । मोघमिति दोषोक्तिः । न विद्यते कल्पो याभ्यां तयोः, कंसात्कंससामान्ययुद्धोत्साहवशात्, नित्यमुदोरत एव विग्नचेतसोः पुरीं प्रति चलितचेतसोः 'ओविजी—भयचलनयोः " मोघमित्यादिकाकूक्तिरिति वास्तवोऽर्थः ॥ ८ ॥ एतदेव स्फुटयति—तदिति । यत आवामकल्पौ तत्तस्माद्धेतोः । दुर्हृदाऽशोभनमनसा ' दुरशोभनदुःखयोः ' इति यादवः । परतंत्रयोरिति मनुष्यनाट्यानुकरणम् । नौ आवयोः ॥ * ॥ तदर्चनम् । हे तात, मातरिति पुनः संबोधनं स्नेहभरजननार्थम् । तातमातृत्वादेव सुश्रूषामकुर्वतोरपि नौ क्षंतुमर्हथ । किञ्च—परतंत्रयोर्निहतवासेनास्वाधीनयोरतो दुर्हृदा कंसेन क्लिष्टयोरावयोरसामर्थ्याच्चेति भावः । तत्र श्रीकृष्ण उवाचेति क्वचिदस्ति ॥ ९ ॥ इत्युक्तरीत्या । मायया कृपया गृहीतनरवपुषः । विश्वात्मनः सर्वान्तर्यामिणः ॥ * ॥ मोहितौ विस्मारितवात्सल्यव्यतिरिक्तसर्वौ । तत्र हेतवः—मायामनुष्यस्य कृपाप्रधानेन नराकृतिपरब्रह्मणः, हरेरसमोर्द्ध्वमाधुर्येण सर्वमनोहरस्य, विश्वात्मनः परमात्मत्वेन विश्वस्यापि निरुपाधिपरमप्रेमास्पदस्येति । अंकमारोप्य ताविति शेषः । **विश्वनाथस्तु**—इति एवं माया कपटं मनुष्येषु यस्येत्याह ॥ १० ॥ वाष्पकंठौ गद्गदवाचौ ॥ * ॥ चकार उक्तसमुच्चये । स्नेहपाशेनावृतौ सन्तौ पाशास्त्रवदपारिहार्येण दीर्वेण च प्रेम्णा बहिरन्तर्व्याप्यमानौ अत एव विमोहितौ न किंचिदप्यनुसंधातुं समर्थौ बाष्परुद्धकंठौ च सन्तौ न किमप्यूचतुश्च, किन्तु केवलमश्रुधाराभिः सिंचन्तौ तयोरभिषेकमिव कुर्वन्तौ स्थिताविव्यर्थः । हे राजन्निति स्नेहभरस्वभावो भवतागम्य इवेति भावः । तादिदं वृत्तं श्रीनन्दादीनामगोचर एव ज्ञेयम्, उभयत्रैव भगवता पितृत्वव्यञ्जनात् ॥ ११॥ यदूनां नृपं रायदुजत्वे स्थापयामास ॥ * ॥ मातामहमित्यवश्यमान्यत्वेन पितृभ्यां सह संबंधविशेषेण तत्संमतत्वेन च यदुराजयोग्यतोक्ता । अत एव तु शब्दः । तद्विधाने मुख्यं प्रयोजनं स्वस्य गोकुलगमनेच्छयैव ज्ञेयम् । तथा च श्रीहरिवंशे तं प्रति श्रीभगवद्वाक्यम्— " अहं स एव गोमध्ये गोपैः सह वनेचरः । प्रीतिमान्विचारिष्यामि कामचारी यथा गजः ॥ एतावच्छतशोऽप्येवं सत्येनैव ब्रवीमि ते । न मे कार्यं नृपत्वेन विज्ञाप्यं क्रियतामिदम् । भवान्राजा तु मान्यो मे यदूनामग्रणीः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आह चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यं नृपासने ॥ १३ ॥ मयि भृत्य उपासीने भवतो विबुधादयः ॥ बलिं हरंत्यवनताः किमुतान्ये नराधिपाः ॥ १४ ॥ सर्वान्स्वज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् ॥ १५ ॥ सभाजितान्समाश्वास्य विदेशावासकर्शितान् ॥ न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् ॥ १६ ॥

त्वमेवाज्ञापयेति मा वदेत्याह । ययातिशापादिति । तव तु यादवत्वेऽपि मदाज्ञया न दोष इति भावः ॥ १३ ॥ मम तादृशी शक्तिर्नास्तीति चेत्तत्राह । मयीति । मत्प्रसादेन सर्वं सिद्धं भविष्यतीत्यर्थः ॥ १४ ॥ स्वान्ज्ञातीन्संबंधांश्च दिग्भ्य आनाय्येति शेषः ॥ १५ ॥ १६ ॥

प्रभुः । विजयायाभिषिञ्चस्व स्वराज्ये राजसत्तम ॥ " इति । नृपं राजानमकरोन्न तु पूर्ववदधिपं, यतो भगवान् कर्तुमकर्तुमन्यथा कर्तुं समर्थत्वाद्भक्तवात्सल्येन ययातिशापमपि नापेक्षितवानिति भावः । अतः पूर्वेषां राजत्वं तु स्वकपोलकल्पितमित्यायातम् । अस्य राजत्वविधानं बंधनान्मोचयित्वेति ज्ञेयम् , प्रथमाध्यायान्ते निगृह्येत्युक्तेः । अत एव श्रीविष्णुपुराणेऽपि–" उग्रसेनं ततो बंधान्मुमोच मधुसूदनः । अभ्यषिञ्चत्तथैवैनं निजराज्ये हतात्मजम् ॥ " इति । श्रीहरिवंशे तु–यदुग्रसेनस्य कंसशोकादिकं तत्तु लोकव्यवहारमात्रेणानुक्तमिति श्रीशुकेन नादृतम् । यच्च तस्य वसुदेवादेरपि कंसेनानिग्रहणं तादृशमन्यच्च कल्पभेदेन व्यवस्थेयम् । **विश्वनाथस्तु**–' एवमाश्वास्य ' इत्यादिकं श्रीनंदस्य परोक्षमेव, मत्पुत्रं युद्धश्रान्तमेते परमानंदमत्ताः स्नेहेन भोजयितुमंतःपुरं नयान्ति, नयन्तु, अहन्तु संप्रति पुत्रार्थे गतभीः स्वावास एवाह्निकं कृत्यं करवै इत्युक्त्वा तेन तत्रैव गतत्वात् ॥ १२ ॥ तदाज्ञामाक्षिपति–त्वमेवेति । इति भाव इति–' प्रभोराज्ञा गरीयसी ' इत्युक्तेर्मदाज्ञयाऽकर्तव्यमपि कर्तव्यं स्यादित्यर्थः ॥ * ॥ अस्मान्यादवान् । ननु भवद्विधाज्ञापने मम का योग्यता तत्राह–प्रजा इति । त्वदधीनानित्यर्थः । तुशब्दो निर्धारणे । हे महाराजेति यदुराजत्वेन साम्राज्यमप्यभिप्रेतम् । किन्तु यद्यपि भवतामपि यदुत्वमेव तथापि भवतां भोजानां प्रायः परस्पराराज्यप्राप्तेरस्माकं वृष्णीनां तु प्रायस्तदप्राप्तेर्भवतामेव राज्यं योग्यमिति विशेषतो भावः ॥ १३ ॥ तदाशंकामपनुदतीत्याह–ममेत्यादिना । भवतस्तव । आदिपदाद्दैत्यगंधर्वादीनां ग्रहः । इत्यर्थ इति–मय्यनुकूले सर्वमनुकूलं स्यात् , " सुप्रसन्ने जगन्नाथे प्रतीपं सरलं भवेत् " इत्युक्तेः ॥ * ॥ तदेव दर्शयति–अवनता भक्त्या नम्राः सन्तो बलिं हरन्त्वित्याज्ञा । तथा च श्रीविष्णुपुराणे–"ययातिशापाद्वंशोऽयमराज्यार्होऽपि सांप्रतम । मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः ॥ " इति । ' हरन्ति ' इति पाठे हरिष्यन्तीत्यर्थः । अन्ये इतरेभ्यो न्यूना इत्यर्थः । नराधिपा अप्यन्य इति वा ॥ १४ ॥ कंसभयेनोद्वतान्निःसृतान् । विश्वकृत्सर्वकृतिकुशलः ॥ * ॥ सर्वानिति युग्मकम् । स्वे आत्मीयाः, संबंधाश्च कृतवैवाहिकादिसंबंधाः । दिग्भ्य आनाय्येति शेषः । दिग्भ्य इति कर्मणि चतुर्थी वा, गतानित्यनेनान्वयात् । यद्विति–यदुभेदा भोजादय इत्यर्थः । आदिशब्देन सात्वतादयः । भोजाश्चाक्रूरेण सह तत्रैवासन् । इत्येते यादवानामष्टौ भेदा मुख्यतमा ज्ञेयाः । सभाजितान्सतः शीघ्रयानप्रस्थापनादिमानेनेत्यर्थः । अतः सम्यक्सुखं शीघ्रञ्चानाय्य विदेशावासेन कृशतां प्राप्तानतो बहुलधनेन संतर्प्य नितरां गृहाद्युपस्करपरिच्छदवृत्तिप्रदानादिना समहोत्सवमवासयत् । नन्वसंख्यानां कथं तथानिवासनं द्रुतमेव संभवेत्तत्राह–विश्वकृदिति । अतस्तद्वैभवस्येंद्रादिदुर्लभत्वमपि सूचितम् । तत्र श्रीरोहिणीमपि व्रजादानेष्यतीति ज्ञेयम् ॥ १५ ॥ १६ ॥

---

१ त्वस्मानिति पा० । २ कंसभयोद्गतानिति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ १७ ॥ वीक्षंतोऽहरहः प्रीता मुकुंदवदनांबुजम् ॥ नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणम् ॥ १८ ॥ तत्र प्रवयसोऽप्यासन्युवानोऽतिबलौजसः ॥ पिबंतोऽक्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः ॥ १९ ॥ अथ नंदं समासाद्य भगवान्देवकीसुतः ॥ संकर्षणश्च राजेंद्र परिष्वज्येदमूचतुः ॥ २० ॥

सिद्धा पूर्णाः । कृष्णरामाभ्यां गतो निवृत्तो ज्वरस्तापो येषां ते ॥ १७ ॥ सदयस्मितं वीक्षणं यस्मिंस्तत् ॥ १८ ॥ प्रवयसो वृद्धाः अप्यतिशयितं बलमोजश्च येषां ते ॥ १९ ॥ २० ॥

यद्वा–सिद्धा इवेति लुप्तोपमा । जीवन्मुक्ता यथा कृष्णे परब्रह्मणि रामेण रमणेन रत्या वा गताध्यात्मिकादितापत्रया भवन्ति तथा रेमिरे ''सिद्धिः स्त्री योगानिष्पत्तिपादुकान्तार्द्धिवृद्धिषु । मुक्तौ योगविशेषे च तद्वान्सिद्धः प्रकीर्तितः ॥'' इति निरुक्तिकारः ॥ * ॥ अथ तेषां सर्वोत्तमां स्थितिमाह–त्रिभिः । तत्र कृष्णेति युग्मकम् । प्रथमं तावत्कंसादिवधेन गतज्वराः, ततश्च पुनर्त्रासादिना लब्धमनोरथाः, तदनंतरं श्रीकृष्णसंकर्षणभुजैर्गुप्ताः कंसभयादितो रक्षिताः, ततस्तैरेव लब्धमनोरथास्तदीपतस्वाविर्भावसहिततादृशमथुरावासादिना पूर्णकामाः सन्तो रेमिरे ताभ्यां क्रीडां चक्रुः । तेनैव सिद्धाः कृतकृत्या बभूवुः । तत्र च कृष्णरामाभ्यामन्यनिरपेक्षया तत्स्वरूपमात्राभ्यां गतज्वरा बभूवुः । ताभ्यां व्यतिरिक्ते तापः सुखं तु तयोरेव येषां तथा बभूवुरित्यर्थः । तत्तदर्थयोग्यतत्तन्नामनिरुक्तिस्तूह्नेया ॥ १७ ॥ अहरहः प्रतिदिनम् । पूर्वेणैव संबंधः ॥ ॥ * ॥ सुखमेव विवृणोति–वीक्षन्त इति । विशेषेण सन्निकृष्टत्वादिना तन्मुखमीक्षमाणाः । तत्राप्यहरहर्वीक्षमाणाः प्रीता बभूवुरिति दर्शनसौख्यं नित्यमेवाधिकं दर्शितम्, तेनातृप्तिरपि दर्शिता । तत्र हेतवः–नित्यप्रमुदितं क्षणक्षणमेव प्रकर्षेण हृष्यत्, अतो नित्येति सर्वत्रैव व्यंग्यम् । क्षणक्षणमेव श्रीमत्प्रशस्तशोभं तथा सदयेत्यादिना च ॥ १८ ॥ तत्र मथुरायां तदा वा । युवत्वे किमौषधमिति चेत्तत्राह–पिबन्त इति । अक्षैर्नेत्रैः ''अक्षो नेत्रे च शकटे चक्रे रावणजेंद्रिये'' इति धरणिः ॥ * ॥ तत्र भगवत्पार्षदत्वमेव तदावरणपूजादेवतानां श्रीमदुद्धवादीनां, प्रवयस्त्वं न स्यादेव ये केचिदंधकादयो प्राचीनवृद्धास्तेऽपीत्यपिशब्दार्थः । अतः ''स कथं सेवया तस्य कालेन जरसं गतः'' इति श्रीमदुद्धवमुद्दिश्य विदुरवाक्यन्तु प्राकट्यावसरप्रमाणचरमकक्षां गत इत्येवाभिदधाति–अलौकिकगुणस्वादशालित्वात्सुधेव सुधासौन्दर्यं मुखांबुजस्य सुधामिति तथाप्यलौकिकत्वं तामक्षैराक्षिभिः पिबंत इति तेनैव तादृशं कमलमिति च पुनस्तयोः परमालौकिकत्वं व्यञ्जितम् । मुहुः प्रतिक्षणं पिबन्तः प्रतिक्षणमतिशयेन युवानः शरीरेंद्रियबलयुक्ताश्चासन् । उपलक्षणं चैतत्सहआदीनामिति ॥ १९ ॥ अथ यादवाश्वासनानन्तरम् । देवकीसुत इति–देवकीत्युपलक्षणं मातापित्रोः, जातस्नेहः स एव नंदात्मजस्य तु तत्रानगतत्वात् । मथुरागमनावसरे ततः पृथग्भूय तत्रैवांतर्हितो नित्यलालारतोऽभूदिति तत्त्वम् ॥ * ॥ अथ श्रीव्रजराजस्य प्रस्थापनं प्रक्रममाणः श्रीकृष्णस्य भगवत्तायां देवकीसुततायाः प्रस्तावे च परीक्षितः समुल्लसन्मुखतामवेक्ष्य राजेंद्रेति संबोधनम् । तन्मुखमवलोक्य तदीप्सिततानुरूपं वदन्नपि श्रीकृष्णस्यैव वचनपारिपाटीभिर्निजाभीप्सितं स्थापयिष्यन्नाह–अथेति । अथ यादवानां तथाभावादनंतरमिति । अद्य सायमस्माभिः प्रस्थापितव्यं सायञ्च सति प्रातरित्येवं यदुकुलाश्वासनपौरसंमाननाद्यवश्यकृत्याद्यपेक्षया कतिपयादिनविलंबविधानात् । यद्यहं सहसैव गोकुले गच्छामि तदा जरासंधादिसंमर्दस्तत्र स्यादत्रत्यानामरक्षा चेत्यंगीकृतनरलीलाघटितया शंकया तदसमाप्तौ तु कदाचिदेकान्ते सम्यगासाद्य पुत्रोचितनमस्कारादिमद्व्यवहारेणोपेत्य केवलबालोचितभावाविष्कारेण परिष्वज्य चेदं श्लोकत्रयेण वक्ष्यमाणं केवलतत्पुत्रोचितमब्रवीत् । कोऽसौ–भगवान् पूर्णसर्वैश्वर्येण निरपेक्षः । यश्च देवकीसुतः देवक्यां प्रकटितजन्मा स एव, तथा संकर्षणश्च तत्तन्निरुक्त्या यो वसुदेवात्मजत्वं प्राप्तस्तदनुसंगेन स चैव ऊचतुरिति भवद्भिर्यथार्थमेव मंतव्यम्, न च श्रीवसुदेवदेवक्योरिव यत्किञ्चिदन्यथा कर्तुम्, तत्र सिद्धान्तस्य प्रायो विरुद्धत्वात्, अत्र तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशम् ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोऽपि हि ॥ २१ ॥
स पिता सा च जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २२ ॥

भृशमात्मनोऽप्याधिक्येन पोषितौ । न चाश्चर्यमेतदित्याह । पित्रोरिति । आत्मनो देहादप्यात्मजेषु पित्रोरभ्यधिका हि प्रीतिरिति ॥ २१ ॥ देवकीवसुदेवयोः

'नंदस्त्वात्मज—'इत्यादौ सिद्धांतस्य दर्शितत्वात् । तथा तत्र 'मायां ततान जनमोहिनीम्' इतिवदत्र श्लेषेणाप्यनुक्तत्वाच्छ्रीनंदप्रभृतीनां भावस्य श्रीब्रह्मशुकोद्धवादिभिः स्वाभाविकत्वेन सर्वदुर्लभत्वेन स्तुतत्वाच्च । 'अहोभाग्यम्' इत्यादिभिः, 'नेमं विरिञ्च—' इत्यादिभिः, 'युवां श्लाघ्यतमौ' इत्यादिभिश्च । तत्र राजेंद्रेति राजेंद्राणां भवतां महाराजकन्यायाः प्रपितामह्याः संबंधेन तत्रैव निष्ठा युक्ता, भिक्षुकाणामस्माकं तु यथारुच्येवेति भावः । अत्र **विश्वनाथः**—बहुदिवसीयकथां कथयित्वा कंसवधदिवसस्य परेद्यवि कस्यचिदतिमुख्यायाः दुरधिगमार्थायाः कथायाः कथनारंभबोधनायाथशब्दः । 'नक्तं सम्यक् समासाद्य' इति तत्पुत्रत्वाभिमानवत्त्वेनैवेत्यर्थः । देवकीसुत इति देवकीसुतत्वाभिमानमपि गृह्णन्नित्यर्थः । भगवानित्युभयोः समाधात्रीं स्वीयामैश्वर्यशक्तिमेवाश्रित्येति भावः । संकर्षणश्चेति "यदूनामपृथग्भावात्संकर्षणमुशंत्यपि" इति स्वनाम्नो व्युत्पत्तिं दर्शयन्निति भावः । परिष्वज्येति प्रणामेऽवसराप्राप्तेरिति भावः । तदवसरप्राप्त्यभावश्च तयोर्दर्शनमात्रेणैवार्गलोपमाभ्यां भुजाभ्यां श्रीनंदेनानंदसमुद्रनिमग्नेन युगपदेवोद्धृत्यातिविस्तीर्णे स्ववक्षसि तयोर्द्वयोरेव धारणात् । अतस्तयोरत्र परिष्वंगकर्मत्वेनैव परिष्वंगकर्तृत्वमभूदिति बुध्यते । ऊचतुरिति तदनंतरमुपविष्टे श्रीव्रजराजे तदासनमध्यास्य तद्भुजाश्लिष्टावेव तौ सप्रश्नोत्तरवृत्तबहुवृत्तान्तकथनानंतरमिदं सविनयं सान्तःसंकोचं यादवजनतोपरोधज्ञापनपूर्वकं साश्वासं ससान्त्वनमूचतुः ॥ २० ॥ युवाभ्यां नंदयशोदाभ्याम् । एतत् आत्माधिक्येन पोषणम् ॥ * ॥ प्रथमं ज्येष्ठत्वाद्बलदेव आह—द्वाभ्याम् । हे पितुर्युवाभ्यां मातापितृभ्यां यशोदानंदसंज्ञाभ्यामित्यर्थः । एतच्च युक्तमेवेत्याह—पित्रोरिति । आत्मनो देहादप्यात्मजेष्वौरसेष्वभ्यधिका स्यादेव । पोषितौ लालितावित्यत्र द्विवचनेन मित्रपुत्रे मयि स्वपुत्रे कृष्णे च युवयोस्तुल्यवात्सल्यस्य दृष्टत्वात् । युवामेव यथा कृष्णस्य तथा ममापीत्यावयोर्द्वयोरपि पितराविति द्योतयित्वा युवां लालकौ विना कोटिप्राणप्रियतमं भ्रातरं कृष्णञ्च विनाऽत्र पुर्यामपरिचितयोर्देवकीवसुदेवयोः पित्रोर्गृहे मया स्थातुं न शक्यत इत्यनुद्योतितम् ॥ २१ ॥ नंदं बोधयति भगवान्—देवकीत्यादिना । उत्सृष्टाँस्त्यक्तान् । पोषरक्षणे इति समाहारद्वंद्वः ॥ * ॥ ननु भो बलभद्र सत्यमेव त्वं मम मित्रस्य वसुदेवस्यैव पुत्रोऽसि, स च विपन्मुक्तश्चिरात्प्राप्तं त्वां पुत्रं कथं त्यक्तुं प्रभविष्यत्यतस्त्वं संप्रति स्वपितुस्तस्यैव गृहे तिष्ठ आवां तु त्वद्विच्छेदविदीर्णं स्वहृदयं विवेकशिलया पिधाय कथंचिज्जीविष्यावो न तु वसुदेवस्य सख्युर्दुःखं द्रष्टुं प्रभविष्यावो यत आवां तव पोषकावेव पितराविति चेत्तत्राह—स इति । तेषां शिशूनां स एव पिता सैव जननी न त्वाधानकर्तापि पिता स्वकुक्षौ धृतवत्यपि जननी, ताभ्यामुत्सृष्टानां शिशूनां यदि प्राणा एवाऽयास्यँस्तदा केषां तौ पितरावभविष्यतामतः शिशुभिरपि विवेकिभिः पोषकावेव पितरौ, ताभ्यामपि सकाशाद्बहुमाननीयावतो मया नात्र स्थातव्यं, यदि स्वयं ब्रह्माप्यागत्य वदेत्तेनापि ममायं हठो न शिथिलयितुं शक्यः, हंतहंत पितुस्तव संगे कृष्णो व्रजं गत्वा सुखेन खेलयिष्यति, अहं तु कृष्णविच्छेददावदग्धो मथुरायां स्थास्यामीति सर्वथैव न भवेत्तस्माद्धोः पितरहं सशपथमेवेदं ब्रुवे—यदि कृष्णो मां हित्वा त्वत्संगेन व्रजं यास्यति तदा मे प्राणाः सद्य एव यास्यन्तीति स्वाभिप्रायो द्योतितः । अत्र **तोषिणी**—अत्र संकर्षणोऽपि नान्यथा मंतव्य इति स्वयं श्रीकृष्ण आह—स पितेति । चकारोऽप्यर्थे । सोऽपि तस्मात्संकर्षणोऽपि नान्यथा मंतव्य इति । मम तु जन्मादित्रयहेतू एव भवन्ताविति भावः । यद्वा—स एव पिता सैव जननी न तु त्यक्तवन्तः पूर्वपित्रादयस्तस्माद्यद्यन्यतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ २३ ॥ एवं सांत्वय्य भगवान्नंदं सव्रजमच्युतः ॥ वासोऽलंकारकुप्याद्यैरर्हयामास सादरम् ॥ २४ ॥

पुत्रौ युवां नास्मत्पुत्रावित्यपि न वाच्यमित्याह । स पितेति ॥ २२ ॥ २३ ॥ सव्रजं व्रजवासिभिः सहितम् । कुप्यानि स्वर्णरजतव्यतिरिक्तकांस्यपात्रादीनि

जन्म स्यात्तथापि किमुत जन्मादित्रयमित्यादि ॥ २२ ॥ वो युष्मान् ज्ञातीन् । पूर्वोक्तरीत्या नंदादयोऽपि ज्ञातय एव । अत्रत्यं किंचित्कृत्यं कृत्वेत्याह—विधायेति । एष्याम इत्युक्तेश्च बहवो मिलित्वा गमिष्यामः । एतेन कुरुक्षेत्रयात्रा सूचिता, तत्रैव तथा संभवादिति तात्पर्यम् ॥ * ॥ तथैव सान्त्वयति—यातेति । वयमिति द्वित्वे "अस्मदो द्वयोश्च" इति वचनात् । चकारेणोद्धवं संगृह्णाति । पूर्वमेतावागमिष्यतः पश्चात्स्वयमित्यर्थः । सुहृदां भवत्सख्यादिसंबंधेनैव पित्रादितया मतानां श्रीवसुदेवादीनां सुखं विधायेति तदिच्छया तत्तत्कार्यसाधनाय यद्यस्मिन्यादवपांडवादिमेलनेच्छया च तदौरसत्वख्यापनपूर्वकं तद्विद्वेषिदंतवक्रपर्यंतदुष्टवधावधिकमभीष्टं संपाद्येत्यर्थः । एतदर्थं भवतां यदुवंशोत्पन्नत्वमवलंब्य मातृपक्षेऽपि "ब्राह्मणादुग्रकन्यायामावृतो नाम जायते । आभीरोंबष्ठकन्यायामायोगव्यात्तु धिग्वणः ॥ " इति मनुस्मृतेस्तदुत्तमत्वमालंब्य क्षत्रियकन्या अपि परिणेष्यामीत्यनुक्त्वा प्रार्थनव्यञ्जना च । आपातगमनेनैषां प्रीतिभंगः स्याद्भवतां तु न कोटिकल्पान्तरेऽपीति भावः । तदेव ज्ञातीन्साक्षात्पित्रादीन् स्नेहदुःखितान्द्रष्टुमेष्यामः । पश्यन्त एव स्थातुमागमिष्याम इत्यर्थः । तदर्थतायां विहितेन तुमुन्प्रत्ययेन तस्यैव पुरुषार्थत्वव्यञ्जनात् । यद्वा—'तथापि भूमन्महिमा गुणस्य ते' इत्यत्र बोधगोचरीभवितुमितिवदत्रापि द्रष्टुं गोचरीभवितुमिति व्याख्येयम् । न च यत्किञ्चिदेव दर्शनमात्रार्थं किन्त्वविच्छिन्नमेवेत्यभिप्रेत्याह—स्नेहदुःखितानिति । स्नेहस्य निरवधिकत्वे तद्धेतुकादर्शनदुःखस्य तादृशत्वमिति विचार्य यस्मात्करुणाकुलतया गमिष्यामस्तस्मान्नित्यानिजाविर्भावदानेन युष्माकं तद्दुःखमवश्यमेव दूरीकरिष्याम इत्यर्थः । अत्र सुखं विधायेति तस्य तु पुनरपेक्षणीयत्वं दर्शितम् । तदेवं ज्ञातिषु भवत्सु नित्यावस्थानमेव युक्तं तेषु सुहृत्सु पुनरैच्छिकमेव तदिति भावः । किञ्च—सुहृदां सुखं विधायेति मध्येमध्ये समागमने कदर्थनैव स्यात्, आपातसमाधानार्थं साक्षात्कारतुल्यं ममाप्रकटलीलास्फोरणं तदुद्धव एव करिष्यतीति व्यञ्जितम् । तदेतदुद्धवसंदेशे व्याख्यास्यते व्रजमागत्य श्रीकृष्णस्य नित्यावस्थितिश्च दंतवक्रवधान्ते स्थापयिष्यते । श्रीनंदस्तु तदेतत्सर्वं तदाभिप्रेतं न तदानीं सदावगतवान्, क्रमेणैव तु बोद्धेति गम्यम् । अत्र **विश्वनाथः**—ततश्च हंतहंत किमहं करोमि यदि बलदेवं नीत्वैव व्रजं यामि तदा व्रजे महासुखं भविष्यति किन्त्वत्र यादवानां विशेषतो वसुदेवस्य महादुःखं भविष्यति, ममापि महाकलंको भावी—हाहा कंसेन मे सर्वे पुत्रा हताः, यस्त्वेकस्तद्धस्तादपि रक्षितोऽवशिष्टोऽभूदयं बलभद्रस्तमपि नीत्वा नंदो व्रजं जगाम तन्मे नायं सखा किन्तु दैवहतस्य द्वितीयः कंस एवेति संभावयन्नातिसंततो वसुदेवः परःसहस्रानभिशापान्मे दास्यति, ततश्च मे कृष्णस्यापि कुतः कुशलमिति भावनासंकटग्रस्तं नंदं कतिशः क्षणांस्तूष्णीमेव स्थितमालक्ष्य तं युक्त्या प्रबोधयन्कृष्णः ससांत्वनमाह—यातेति । हे तात यूयं संप्रति व्रजं यात । वयमित्यहं बलदेवोमधुमंगलादयश्च वो ज्ञातीन्द्रष्टुमेष्यामः, संप्रति कतिशो दिनान्यत्रैव पुर्यां वसेमेति भावः । कदायास्यथेत्यत आह—वः सुहृदां वसुदेवादीनां सुखं विधायेति । यथा त्वां कलंको न स्पृशेद्यथैतेषां च स्वपुत्रं बलदेवं प्राप्याभिमत्य संलाल्यात्मगृहे स्थास्यतीति विश्वस्य सुखं भवेत्तथा कृत्वेत्यर्थः ॥ २३ ॥ एवं निजागमनोक्त्या सान्त्वय्याश्वास्य । "अकुप्यं रूप्यहेमादि कुप्यमन्यद्धनादिकम्" इति हलायुधः । प्रभृतिपदेन ताम्रलोहकाष्ठपीठशकटादीनां ग्रहः ॥ * ॥ सान्त्वय्येत्यत्र हेतुः—भगवान्, सर्वं कर्तुं समर्थ इत्यर्थः । मत्पुत्रोऽयं सत्यवाक्यात्कदापि च्युतो न स्यादिति श्रीनंदसंभावनोत्पादनायेति भावः । सव्रजं सर्वव्रजजनैः सहितम् । ये तत्र संगे गतास्तान्साक्षादेव तादृशवाक्येन तत्तत्प्रदानेन च, ये व्रजस्थाः श्रीयशोदादयस्तानपि तत्तत्संदेशेन तत्तत्प्रेषणेन चेत्यर्थः । कुप्यानि गोदोहनार्थं कांस्यादिपात्राणि । आदिशब्दादुत्तमयानादीनि । व्रजस्य तत्तदधिकसंपत्सद्भावेऽपि तत्तत्प्रदानं प्रीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रे सह गोपैर्व्रजं ययौ ॥ २६ ॥

तत्प्रभृतिभिः ॥ २४ ॥ २५ ॥

मयंत्वांद्वांछिततमं गंधपुष्पादिवत् । तदेवाह—सादरं यथा स्यात्तथा । यद्वा—सादरं श्रीनंदं पुत्रेण यदुच्यते क्रियते वा तत्रतत्रैव स्नेहभरेण प्रीयमाणमित्यर्थः । अर्हयामासेति—श्रीवसुदेवोग्रसेनादीनानाय्य तद्वारा पूजयास । स्वयं तु सन्निधानेनैव हेतुरासीदित्यर्थः । 'कारीषाग्निरध्यापयति' इतिवत्तदायुक्तत्वात् । अत्र **विश्वनाथः**—एवं सान्त्वय्येति—यद्यत्र मम कतिचिद्दिनविलंबो भवेत्तदापि न व्याकुलीभवितव्यं, मम तत्रैव मनोऽत्र त्वेतदनुरोधेनैव स्थितिरिति । सव्रजं कुप्यानीति व्याख्यातचरं पूर्वव्याख्याने ॥ २४ ॥ तौ रामकृष्णौ ॥ * ॥ इत्युक्त इत्यस्य 'यात यूयम्' इत्याद्यन्तपूर्वपद्यत्रयेण व्यवहितेनाप्यन्वयः । प्रणयविह्वल इति स्तंभमोहादि कञ्च सूचयति । गोपैः सहेति तेषामपि प्रत्येकमालिंगनं तथा प्रेमविह्वलत्वादिकञ्चोक्तम् । "अहो भगवतो नौमि बलात्सर्वप्रवर्तनम् । प्राहिणोद्यः स्वशून्येऽपि श्रीनंदादीनपि व्रजे ॥ त्वां व्रजेश्वरि शोचामि त्वां च वृंदावनेश्वरि । कृष्णं विना गतेष्वेषु हाहा जीयिष्यथः कथम् ॥" । अत्र **विश्वनाथः**—प्रणयविह्वलः पुत्रविच्छेदोत्थमूर्छाविवशः व्रजं ययौ । रामकृष्णौ तौ तु वसुदेवगृहमागत्य सुखं वर्तेते स्मेति । अत्र केचिद्रसज्ञाः प्रेम्णोऽणुमात्रमप्यपचयमसहमाना आक्षिपन्तो विवदन्ते इति तांश्च समाधित्सामो व्याख्यान्तरेण । तच्च—ये उपादित्सन्ते त एवोपाददतां, तत्रायमाक्षेपः—'पितर्युवाभ्याम्' इत्यादिश्लोकपञ्चकस्य यथाश्रुतार्थः खलु प्रेमप्रातिकूल एव स्पष्ट एतावता व्याख्यानेनापि न प्रेमा स्थिरीभवति नंदकृष्णयोर्मिथस्त्यागात्, तत्रापि कृष्णः खल्वीश्वरो दुर्गमलीलो नंदं पितरमपि त्यक्त्वा तिष्ठतु, नंदस्तु कृष्णं त्यक्त्वा कथं व्रजं गन्तुमशकत्, प्राणकोटयधिकप्रेष्ठं तमप्युपेक्ष्य व्रजे गोधनाद्यपेक्षैव किं तस्य दुस्त्यजाऽभूत्, मथुराप्रांत एव तावत्कालं किन्नावसत् । तद्व्याख्यानञ्चैवं श्रीनंदप्रबोधनमात्रोपक्षीणं, न तु रामकृष्णयोस्तादृश्येव निष्ठा मनसि वास्तवी यतो रामोऽपि व्रजमायास्यन्दशमे वर्णितो न तु कृष्णः, निखिलान्स्ववध्याञ्शत्रून्दंतवक्रपर्यन्तान् हत्वा निश्चितीभूय, यद्व्रजागमनं पाद्मोत्तरखंडदृष्टम् 'यर्ह्यंबुजाक्षापससार भो भवान्कुरून्मधून्वा' इति प्रथमस्कंदवाक्यज्ञापितं च वर्तते तदपि न प्रेमलक्षणं संगमयति । तथाहि—"तास्तथा तप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः । सांत्वयामास सप्रेमैरायास्ये इति दौत्यकैः ॥" इति श्रीशुकोक्तौ दौत्यकैर्दूतवाक्यैरिति टीकाकाराणां व्याख्यानम् । तत्र बहुवचनेन बहूनां दूतानां वाक्यैरेकस्यैव वा दूतस्यायास्ये आयास्ये आयास्येऽवश्यमायास्याम्येवेति पुनःपुनरुक्तेरिति बुद्ध्यते । कीदृशैः—सप्रेमैः प्रेमसहितैरिति दुर्लंघ्याज्ञस्य राज्ञोऽज्ञस्य धनुर्मखदर्शनार्थकानिमंत्रणानुरोधेनैवाद्य मथुरां युष्माँस्त्यक्त्वा यामि न तु स्वेच्छया, अतः श्वो धनुर्मखं दृष्ट्वा परश्व आयास्यामि, तत्र यदि कार्यान्तरमापतेत्तदपि श्व एव कृत्वा परश्वस्तु शीघ्रमायास्याम्येवेत्येषोऽर्थ एव कृष्णस्य यदि वाङ्मनसयोः स्यात्तदैव तद्वाक्यानां प्रेमसहितत्वं स्यादन्यथा तु कपटसहितत्वमेव । यथा—"न लब्धो दैवहतयोर्वासो नौ भवदंतिके । यां बालाः पितृगेहस्था विन्दन्ते लालिता मुदम् ॥" इत्यादिवसुदेवदेवकीमोहनार्थकानां तद्वाक्यानामिति, संतु वा तद्वाक्यानि तादृशान्येव श्रीशुकदेवः कथं सप्रेमैरित्यनेन तानि विशिनष्टि स्म, तस्माद्यदि जरासंधादिदुष्टदमनादिनानाकृत्यान्यनपेक्ष्यैव कंसवधपरादिने एव शीघ्रं कृष्णो व्रजमागच्छेत्तदैव तस्य गोपीनां प्रेम्णोऽपेक्षा स्यादन्यथा तूपेक्षैव, सप्रेमैरिति पदार्थश्चालीक एव स्यात्तस्मादत्रोपपत्तिश्चिंतनीया । तत्रेयं चिन्ता—वसुदेवादयोऽपि प्रेमवन्तो भवन्त्येवेत्येषामप्युपेक्षाऽनुचिता, नंदादयस्तु असमोर्द्ध्वप्रेमवन्तस्तेषामुपेक्षा सर्वथैवानुचिता, जरासंधादिदुष्टवधशिष्टपालनमप्यवतारप्रयोजनमवश्यसंपाद्यं, रुक्मिण्यादिपारिजाताद्याहरणधर्मपुत्रादिसाहित्यविचित्रचरित्रात्मिका द्वारकादिलीलाप्यवश्यप्रकाश्या, धनुर्मखं दृष्ट्वैवायास्यामीति गोपीष्वागमनं प्रतिश्रुतं च सत्यं कार्यं, वह्निदाहेन कनकस्वरूपमिव महाप्रवासविप्रलंभप्रकाशितं तासामसमोर्द्ध्वं प्रेमस्वरूपं च मथुराद्वारकाप्रेमपरिकरमुख्यमभिज्ञचूडामणिमुद्धवं दर्शयित्वा तस्यैव प्रेम्णः सर्वोत्कर्षश्च स्थापनीय इत्याद्यावश्यकनिखिलकृत्यसमाधात्रीमतर्क्यैश्वर्यस्वीययोगमायाशक्तिमाश्रित्य बलदेवसहित एव कृष्णः श्रीनंदं पितरमासाद्य तदैव तेषां नंदादीनां स्वस्य च द्वौद्वौ प्रकाशावाविर्भाव्य प्रथमेन प्रकाशेन श्रीनंदं प्रति 'पितर्युवाभ्याम्' इत्यादिश्लोकत्रयं यदुवाच तस्य 'एवं सांत्वय्य' इति तदुत्तरस्य श्लोकद्वयस्य च व्याख्याकृतैव तत्रैव प्रकारान्तरेण कृष्णरामावाहतुः—पितरिति । युवाभ्यां स्निग्धाभ्यामावां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णरामौ द्वावपि पोषितौ पालितौ चेति युवयोरावां पोष्यपुत्रावेव न त्वात्मजौ किमित्यावाभ्यां त्वं पृच्छयसे तत्र तत्त्वं ब्रूहि, अत्रत्यास्तु नंदस्य पोष्यपुत्रावेवेत्युग्रसेनादयो ब्रुवन्ति, अत एव देवकीवसुदेवावावामात्मजौ मत्वा लालनादिकं बहुतरं कृत्वा मथुरायामत्रैव निरुद्ध्य रक्षितुमीहेते त्वत्समीपमायातुमपि न ददाते, त्वं तत्प्रियसखोऽपि लौकिकरीत्या श्वोभोजनार्थमपि न निमंत्रितः, अद्यापि त्वां मेलितुमपि केऽपि यादवा नायान्ति आवान्त्वतितरामुद्विग्नौ तैरलक्षितं बलात्पलाय्यैव त्वत्समीपमायाताविति भावः।ननु भोः कृष्ण त्वं पूर्वजन्मनि वसुदेवस्य पुत्र आसीरेव"प्रागयं वसुदेवस्य कचिज्जातस्तवात्मजः"इति त्वन्नामकरणसमये गर्गेणोक्तं तेनैव वसुदेवं प्रत्यपि तथैवोक्तमित्यनुमिमेऽतो वसुदेवस्त्वां गुणगणार्णवमेतज्जन्मन्यपि पुत्रत्वेनाभिमत्य जिघृक्षति,बलदेवं स्वपुत्रं तु स्वगृहं नेष्यत्येवेत्यहं जाने एव,तत्त्वामप्यहं पृच्छामि—एतेषां वाचैव त्वं किमावां पोषकौ पितरावेव संप्रति मन्यसे, आवयोः किं त्वं पोष्य एव पुत्रोऽभूस्तत्र कृष्णः सास्रमाह—पित्रोः खल्वात्मजेष्वेव पुत्रेषु आत्मनो देहाज्जीवात्मनश्चापि सकाशादधिकप्रीतिर्भवेत्, यद्यहं युवयोः पोष्य एव पुत्रो नात्मजस्तदा कथमहं युवयोरात्मप्राणकोटेरपि प्रियोऽभूवमतस्त्वद्वैरिणां वसुदेवादीनां मुखमप्यतः परं न द्रक्ष्यामीति भावः। ननु वत्स भो बलदेव तव कोऽभिप्रायस्तं ब्रूहीत्यत आह—'सपिता' इत्यादि। तस्मादहं वसुदेवगृहे त्वां कृष्णञ्च हित्वा नैव स्थास्यामि यदि स्वयं ब्रह्माप्यागत्य वेददिति पूर्वव्याख्यात एव भावः। ततश्च यदि बलदेवमपि नीत्वा व्रजं यामि तर्ह्येते महादुःखिनो भविष्यन्ति, एतैः स्वार्थपरैर्मयि वैरभावः कृत एव, अहं तु वैरं कथं करवाणीति क्षणं चिंतयन्तं व्रजराजं तौ सत्वरमाहतुः—यातेति। हे तात यूयं यात वयञ्च व्रजं यामो न चात्र क्षणमपि विलम्ब्यतामिति भावः। "जातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम्" इति नीतिशास्त्रं जानास्येव तथापि स्वसाधुत्वेन यद्येषां दुःखगंधमपि सोढुं न शक्नोषि तर्हि शृणु यद्ब्रूमहे इत्याहतुः—ज्ञातीनिति। वो युष्माकं यादवत्वेन ज्ञातीन्वसुदेवादीन् द्रष्टुमेष्यामः, सुहृदां तत्रत्यानां सौहार्दवतां जनानां स्वदर्शनदानादिना सुखं विधाय—। इति ताभ्यामुक्तस्तौ रामकृष्णौ वामदक्षिणाभ्यां भुजाभ्यां परिष्वज्यैव कृपणः स्वधनमिव न तु स्वांगविच्युतीकृत्येत्यर्थः। प्रणयानंदविवशः अश्रुभिरानंदधाराभिर्नेत्रे पूरयन्नेव कनकशकटमारुह्य व्रजं ययौ। अतो योगमायाप्रभावात्परस्परालक्षित एको नंदः कृष्णवियुक्त एव व्रजं ययावन्यस्तु कृष्णसंयुक्त इति। एवं च व्रजस्थानामपि सर्वेषां गोपगोपीपश्वादीनां प्रकाशद्वयीकारणादेके कृष्णवियुक्तेन नंदेन सह दुःखसमुद्रे निमग्ना अन्ये कृष्णसंयुक्तेन नंदेन सहानंदसमुद्रे निमग्ना व्रज एव तत्र परस्परमलक्षिता असंपृक्ता एव वर्तते स्म। यथा द्वारकायां नारददृष्टप्रकाशेषु एकत्र कृष्णं लालयन्ती भोजयन्ती देवकी परमानंदनिमग्ना, तैदवान्यत्र कृष्णवियुक्ता हंतहंत मृगयां कृत्वाऽधुनापि नायातो मत्पुत्रः क्षुधातृष्णाव्याकुल इति वदन्ती परमदुःखनिमग्नैवेति। यदुक्तं भागवतामृते—"आश्चर्यमेकदैकत्र वर्तमानान्यपि ध्रुवम्। परस्परमसंपृक्तस्वरूपाण्येव सर्वथा॥" इति। यद्यपि "प्रकाशस्तु न भेदेषु गण्यते स हि नो पृथक्" इत्युक्तेर्वस्तुतो न प्रकाशानां भेदस्तदाप्यभिमानचेष्टितादीनां लीलाशक्तिप्रभावाद्भेदस्तिष्ठत्येवेति योगमायाविभूत्यध्याये बहुलाश्वश्रुतदेवोपाख्याने च व्यक्तीभवित्यतीति प्रकाशद्वयस्य क्रमेण प्रयोजनद्वयम्। यथा स्वीयकनकस्यानर्घ्यस्य स्वरूपज्ञानार्थमेव यथा वह्निना तत्संदह्यते तथैव स्वीयसर्वप्रेमपरिकरमुख्यमप्युद्धवं दिव्योन्मादचित्रजल्पादिभिर्महाचमत्कारमयं व्रजप्रेम्ण उत्कर्षं ज्ञापयितुमेव प्रथमो वियोगमयः प्रकाशः प्रकाशितः। अत एव व्रजं प्रत्युद्धव एव प्रस्थापयिष्यते। स च प्रायस्तमेव वियोगमयं प्रकाशं दृष्ट्वा महाप्रेमचमत्कारमाप्नुवन्। 'एताः परं तनुभृतो भुवि' इति, 'नायं श्रियोंग—' इति, 'आ सामहोचरणरेणुजुषाम्' इत्यादिपद्यैस्तत्प्रेम्ण एव सर्वोत्कर्षं प्रतिपादयिष्यति। स एव प्रकाशः कुरुक्षेत्रं गत्वा देवकीवसुदेवार्द्रारुक्मिण्यादींश्च स्वं दर्शयित्वा प्रेमचमत्कारं प्रापयिष्यति। बलभद्रोऽपि व्रजं गतस्तमेव प्रकाशं प्रेमोन्मादमयं दृष्ट्वा चमत्कारमाप्स्यतीति व्रजविषयकं स्वाश्रयकं प्रेमाणं निश्चलमेव ज्ञापयितुं द्वितीयः स योगमयः प्रकाशः। अत एव "विशोका अहनी निन्युर्गायन्त्यः प्रियचेष्टितम्" इत्यत्राहनी इति द्विवचनेन द्वे अहनी व्याप्यैव विच्छेदो न तत इति ज्ञापितः। उद्धवेनापि—"हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वताम्। यदाह वः समागत्य कृष्णः सत्यं करोति तत्॥" इति तदा वर्तमानकाल एव प्रयुक्तः। तथा तेन व्रजप्रवेशे प्रथमं संयोगमय एव प्रकाशः सामान्यतो द्रक्ष्यते। यद्वक्ष्यते—"वासितार्थे नियुद्ध्यद्भिर्नादितं शुष्मिभिर्वृषैः" इति, "गोदोहशब्दाभिरवैर्वेणूनां निःस्वनेन च" इति, "स्वलंकृताभिर्गोपीभिर्गोभिश्च सुविराजितम्" इति, "तादीपदीप्तैर्मणिभिर्विरेजुः रज्ज्वाविकर्षद्भुजकंकणस्रजः। चलन्नितंबस्तनहारकुंडलत्विष्यत्कपोलारुणकुंकुमाननाः॥" इति, 'उद्गायतीनामरविन्दलोचनम्' इत्यादिकृष्णसंयोगानंदलक्षणमित्येवं प्रकाशद्वयप्रयोजनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ शूरसुतो राजन्पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिम् ॥ २६ ॥ तेभ्योऽदाद्दक्षिणा गावो रुक्ममालाः स्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः ॥२७॥ याः कृष्णरामजन्मर्क्षे मनोदत्ता महामतिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २८ ॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद्गायत्रं व्रतमास्थितौ ॥ २९ ॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्य सिद्धामलज्ञानं गूहमानौ नरेहितैः ॥ ३० ॥ अथो गुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यं सांदीपनिं नाम ह्यवंतिपुरवासिनम् ॥ ३१ ॥ यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदिताम् ॥ ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ॥ ३२ ॥

पुरोधसा गर्गाचार्येण अन्यैश्च ब्राह्मणैः द्विजसंस्कृतिमुपनयनम् ॥ २६ ॥ गावो गाः रुक्मस्य माला विद्यंते यासां ताः क्षौमवस्त्रमालावतीः ॥ २७ ॥ याः पूर्वं मनोदत्ता आसंस्ताः स्वा एवाददात् । ननु ताः कंसेनापहृताः सत्यं राजगोष्ठादाच्छिद्य दत्ता इत्याह । कंसेनाधर्मत इति ॥ २८ ॥ गायत्रं व्रतं ब्रह्मचर्यम् ॥ २९ ॥ प्रकर्षेण भवंत्याभ्यामिति प्रभवौ अत एव सर्वज्ञौ स्वतः सिद्धममलं ज्ञानं नरचेष्टितैः प्रच्छादयंतौ ॥ ३० ॥ ३१ ॥ यथा यथावत् । उपसाद्य प्राप्य गुरौ

प्रमाणं चोक्तम् ॥ २९ ॥ अथ नंदागमनोत्तरम् । ब्राह्मणैरन्यैः सभ्यादिरूपकर्मार्थमागतैः सह । यथावत् । क्षत्रियोचितदंडचर्मादिभिः " पालाशं ब्राह्मणस्योक्तं बैल्वं क्षत्रस्य वै विशः । औदुंबरं मार्गसैंहबास्तचर्माणि वै क्रमात् ॥ " इत्याद्युक्तेः ॥ * ॥ ० ॥ २६ ॥ तेभ्यो ब्राह्मणेभ्यः । क्षौमं वस्त्रं मालाः पुष्पमालाश्च विद्यंते यासां तास्तथा ॥ * ॥ ० ॥ २७ ॥ गोदान आशंकते–नन्विति ॥ * ॥ रामकृष्णयोर्जन्मर्क्षे तदुपलक्षितसमय इत्यर्थः । अतः ' कृष्णावतारोत्सव–' इत्यादिवद्रामजन्म श्रुत्वापि तथैवादादिति बोद्धव्यम् । तथा दाने हेतुः–महामतिरिति । तज्जन्मसमये भाविवृत्तज्ञानादधुना च तदनुस्मरणादिति भावः ॥ २८ ॥ तत उपनयनोत्तरम् । द्विजत्वं क्षत्रियत्वसंपादकधर्मम् । व्रतं तज्जपरूपनियमं वा ॥ * ॥ गर्गादिति तच्छिक्षयेत्यर्थः । गायत्रमिति प्राजापत्यब्राह्मयोरुपलक्षणम् । तत्र गायत्रं गायत्रीमधीयानस्य त्रिरात्रव्यापि, प्राजापत्यं वेदारंभपर्यंतम्, ब्राह्मं तत्समाप्तिपर्यंतम् । अत एव सामान्यतो ब्रह्मचर्यमेव तैर्व्याख्यातम् । सुव्रतौ सन्तौ ॥ २९ ॥ प्रभवौ मूलकारणे । अत एव सर्वज्ञानकारणत्वादेव । नान्येन तपआदिना सिद्धं किं तु स्वाभाविकं यदमलं वेदरहस्यरूपं ज्ञानम् ॥ * ॥ प्रभवाविति युग्मकम् ॥ ३० ॥ अथो अतः । काश्यां पठितवान् काश्यस्तम् । केचिदिह काश्यामिति पठंति तन्नादर्तव्यम् " तदोपनीतो भगवानवंतीनगरं ययौ । चकार विद्याग्रहणं मुनेः सांदीपनेर्गुरोः ॥" इति ब्रह्मवैवर्तोक्तेः । शिष्टास्तु काश्यमित्येकदेशन्यायेन कश्यपगोत्रोद्भूतमित्यर्थमाहुः ॥ * ॥ उपजग्मतुः रथमारुह्येति ज्ञेयं, रथस्य वक्ष्यमाणत्वात् । काश्यं काश्यां जातम् ॥ ३१ ॥ तौ रामकृष्णौ । शिक्षयन्तौ 'यद्यदाचरति श्रेष्ठः ' इत्याद्युक्तसंपादनार्थमित्यर्थः । देवमिवेत्यनेन "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादिकां श्रुतिं सूचयति । अनिन्दितामिति विद्याभ्यासं कुर्वता छात्रेणाध्यापकेतरसेवा न कार्या तन्निंदाश्रुतेः,–"विप्रः शास्त्रमधीयानो ह्यन्नपानादिलिप्सया । विना विद्याप्रदातारं सेवमानः पतत्यधः ॥ भिक्षादिना प्रभुञ्जीत न तु वृत्तिं समाश्रयेत् । निंदाभिरेव संशय्य तादृशत्वे तु नारकी ॥" इति संहितोक्तेः । "वृत्तिर्बुद्ध्यादिविकृतौ सेवाजीवनयोरपि" इति धरणिः । यद्वा–अनिन्दिता सेवा गुरोः कार्या न तु तस्मिन्प्रवसिते तद्भार्यारजःसमाप्तौ तत्संगादिरूपाऽपीत्यर्थः । अत्र महाभारतीया गाथैतद्विषयिण्यनुसंधेया–"विद्यां श्रुत्वा ये गुरुं नाद्रियन्ते प्रत्यासन्ना मनसा कर्मणा च । तेषां पापं भ्रूणहत्याविशिष्टं तेभ्यो नान्यः पापकृच्चास्ति लोके ॥ " इति । प्रत्यासन्नच्छात्रादिनाऽवश्यमाचार्यसेवा शक्त्यनुसारेण कार्येति बोधितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ॥ प्रोवाच वेदानखिलान्सांगोपनिषदो गुरुः ॥ ३३ ॥ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा ॥ तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ॥ ३४ ॥ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ॥ ३५ ॥

वृत्तिमन्यान् ग्राहयंतौ शिक्षयंतौ । गुरुमुपेतावुपगतौ । सेवितवंतावित्यर्थः ॥ ३२ ॥ शुद्धो भावो यासु ताभिरनुवृत्तिभिः । सांगोपनिषदः अंगानि षडंगानि शिक्षादीनि तैरुपनिषद्भिश्चैतरेयादिभिः सहितान् ॥ ३३ ॥ सरहस्यं मंत्रदेवताज्ञानसहितम् । धर्मान्मन्वादिधर्मशास्त्राणि । न्यायपथान्मीमांसादीन् । आन्वीक्षिकीं तर्कविद्याम् । षड्विधाम् —" संधिश्च विग्रहो यानमासनं द्वैधमाश्रयः " इत्येवं षड्विधां राजनीतिम् ॥ ३४ ॥ सकृन्निगदमात्रेणैकवारं गुरोरुच्चारणमात्रेण ॥ ३५ ॥

"योऽन्नाद्यात्तये त्यक्त्वा गुरुसेवां करोति च । अन्यस्य स च संज्ञेयो नामधारकछात्रकः । स तु विप्रो न पूजार्हः कुक्षिंभरगणाग्रणीः ॥" इति बहुधा संहिताभागे वर्णितमस्ति वरतंतुनेति ॥ * ॥ यथावत् समित्पाणित्वादिश्रुत्युक्तप्रकारेण । दान्तौ संयतौ सन्तौ । तथा च श्रीहरिवंशे—"निवेद्य गोत्रं स्वाध्यायमाचारेणाभ्यलंकृते । शुश्रूषू निरहंकारावुभौ रामजनार्दनौ ॥" इति । वृत्तिमनुवृत्तिम् । अनिंदितामीश्वरत्वेऽपि कर्तुं योग्यत्वेन श्लाघ्याम् । स्मेति तद्वृत्तं प्रसिद्धमेवेत्यर्थः ॥ ३२ ॥ तयोः रामकृष्णयोः । निखिलान् पदक्रमांगजटावल्ल्यादिसहितान् । आदिना कल्पव्याकरणनिरुक्तज्योतिर्गणच्छंदोविचितीनां ग्रहः । उपनिषदः केनमांडूकाद्याः । शिक्षादीनां लक्षणान्यक्रूरस्तुतौ विवेचितानि ॥ * ॥ शुद्धेन भावेन भक्त्या या अनुवृत्तयस्ताभिः । तद्विशेषश्चाग्रे श्रीदामविप्रोपाख्याने श्रीभगवन्मुखादेव व्यक्तीभाव्यत एवात्र स्वयं बादरायणिना न प्रपञ्चित इति ज्ञेयम् । अखिलान् चतुरोऽपीत्यर्थः । एतदुपदेशश्च शब्दमात्रतः, अर्थज्ञानं मीमांसोपदेशेनैव भविष्यतीति तदनंतरं तत्पाठशुद्ध्यर्थमावश्यकत्वादर्थसहितान्येव च तान्यंगान्युक्तानि । "शिक्षा व्याकरणं कल्पो ज्योतिषं छंद एव च । निरुक्तं च निरुक्तानि षडंगानि मनीषिभिः ॥" इति ज्योतिषोंगत्वं तदर्थकालादिशुद्ध्यपेक्षणात् । अंगानंतरं रहस्यत्वेनानुपदिष्टचरीरुपनिषदः । एताश्च पूर्ववत्प्रथमतः शब्दत एव ॥ ३३ ॥ तर्कविद्यां वेदेतिहासाद्यर्थनिर्णायकामित्यर्थः । संधिः साम, बलवताऽरिणा मेल इति यावत् । विग्रहो दंडः, दुर्बलेऽरौ निग्रह इत्यर्थः । यानं विजिगीषोररिं प्रति यात्रा । आसनं कदाचिच्छक्तिप्रतिबंधे च तत्रैव शत्रोर्दुर्गमावेष्ट्य तत्र धान्यादिप्रवेशं प्रतिबध्नताऽवस्थानम् । बलवता विग्रहे बलवत्तरेण तच्छत्रुणा संधिं कृत्वोभयत्र दासोऽस्मीति वाचैवात्मसमर्पणं कर्तव्यं न कर्मणेति स द्वैधीभावस्तदुक्तं कामन्दके—"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः ॥" इति । अरिणा पीड्यमानस्य बलवद्भूपदुर्गाद्याश्रयणमाश्रयः इति । एषामवान्तरभेदा विस्तरभिया न लिखिताः ॥ * ॥ सरहस्यमिति सार्द्धद्वयकम् । ततश्च क्षत्रियजातावावश्यकत्वाद्धनुर्वेदः, एतदादीन्यर्थतोऽपि ज्ञेयानि । ततश्च तत्तत्सर्वविद्योपकारकत्वेनापेक्ष्याणि धर्मशास्त्राणि । ततश्च वैशिष्ट्याधानार्थं न्यायपथान्, तत्तद्वेदार्थनिर्णायकाञ्जैमिनिकपिलपतञ्जलिबादरायणरचितपूर्वमीमांसादीञ्शब्दानुगतयुक्तिग्रंथान् । ततश्च बाह्यवादनिरासार्थं स्वतंत्रयुक्तिमयीमान्विक्षिकीमपि । एवं जातायां राजत्वयोग्यतायां राजनीतिमित्येवं क्रम एव सिद्ध्यति ॥ ३४ ॥ सर्वं विद्यासमूहम् । सर्वा विद्या यत्र सा सर्वविद्या वेदचतुष्टयी तस्याः सर्वासां विद्यानां वा प्रवर्तकौ "अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः " इत्यादिबृहदारण्यकश्रुतेर्विद्यापदवाच्या वैशेषिकपातंजलादिरूपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः ॥ गुरुदक्षिणयाऽऽचार्यं छंदयामासतुर्नृप ॥ ३६ ॥

चतुःषष्ट्या अहोरात्रैस्तावतीश्चतुःषष्टिकलाः संजगृहतुः । ताश्च शैवतंत्रप्रोक्ता लिख्यंते यथा । गीतम् १ । वाद्यम् २ । नृत्यम् ३ । नाट्यम् ४ । आलेख्यम् ५ । विशेषकच्छेद्यम् ६ । तंडुलकुसुमबलिविकाराः ७ । पुष्पास्तरणम् ८ । दशनवसनांगरागाः ९ । मणिभूमिकाकर्म १० । शयनरचनम् ११ । उदकवाद्यमुदकघातः (उदकयानम्) १२ । चित्रयोगाः १३ । माल्यग्रथनविकल्पाः १४ । शेखरापीडयोजनम् १५ । नेपथ्ययोगाः १६ । कर्णपत्रभंगाः १७ । सुगंधयुक्तिः १८ । भूषणयोजनम् १९ । ऐंद्रजालम् २० । कौचुमारयोगाः २१ । हस्तलाघवम् २२ । चित्रशाकापूपभक्ष्यविकारक्रियाः २३ । पानकरसरागासवयोजनम् २४ । सूचीवायकर्म २५ । सूत्रक्रीडा २६ । वीणाडमरुकवाद्यानि २७ । प्रहेलिका २८ । प्रतिमाला २९ । दुर्वचकयोगाः ३० । पुस्तकवाचनम् ३१ । नाटकाख्यायिकादर्शनम् ३२ । काव्यसमस्यापूरणम् ३३ । पट्टिकावेत्रबाण (न) विकल्पाः ३४ । तर्ककर्माणि ३५ । तक्षणम् ३६ । वास्तुविद्या ३७ । (सुवर्ण) रूप्यरत्नपरीक्षा ३८ । धातुवादः ३९ । मणिरागज्ञानम् ४० । आकरज्ञानम् ४१ । वृक्षायुर्वेदयोगाः ४२ । मेषकुक्कुटलावकयुद्धविधिः ४३ । शुकसारिकाप्रलापनम् ४४ । उत्सादनम् ४५ । केशमार्जनकौशलम् ४६ । अक्षरमुष्टिकाकथनम् ४७ । म्लेच्छितकुतर्कविकल्पाः ४८ । देशभाषाज्ञानम् ४९ । पुष्पशकटिकानिमित्त (र्मिति) ज्ञानम् ५० । यंत्रमातृकाधारणम् ५१ । मातृकासंवाच्यम् ५२ । मानसीकाव्यक्रिया ५३ । अभिधानकोशः ५४ । छंदोज्ञानम् ५५ । क्रियाविकल्पाः ५६ । छलितकयोगाः ५७ । वस्त्रगोपनानि ५८ । द्यूतविशेषः ५९ । आकर्षक्रीडा ६० । बालक्रीडनकानि ६१ । वैनायिकीनाम् ६२ । वैजयिकीनाम् ६३ । वैतालिकीनां च विद्यानां ज्ञानम् ६४ । इति चतुःषष्टिकलाः । छंदयामासतुरुपलोभितवंतौ ॥ ३६ ॥

ज्ञेया । इह “ शास्त्रयोनित्वात् ” इति न्यायाच्च ॥ * ॥ ० ॥ ३९ ॥ चतुःषष्ट्या संख्यया संख्यातैरहोरात्रैर्दिननिशाभिः । तावतीस्तावत्संख्याकाः । ताश्च कलाश्च । कं सुखं लान्ति स्वविदामिति कला इति । ता गणयति—यथेति । गीतम्—गानशिक्षा, गीतनिर्माणं, स्वरजातिरागभेदास्तालमांत्रादिरचनाप्रकाराः, साधकबाधकस्वरादिमेलनपरिज्ञानञ्च । “ स्वरगं पदगं चैव तथा लयगमेव च । चेतोऽवधानगं चैव गेयं ब्रूयुश्चतुर्विधम् ॥ ” । स्वरादिभेदा अनंताः । रागाश्च भैरवश्रीरागादिभेदेन षोढाऽप्यवांतरभेदैरनंता एव । तालश्च कालक्रियामानम, कालस्य क्रिययाऽऽवापनिष्क्रमादिकया मानं परिच्छेदः । लयश्च गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यम् । गीतविशेषमाह—“ गा (धा) तुमातुसमायुक्तं गीतमित्युच्यते बुधैः । तत्र नादात्मको गातुर्मातुरक्षरसञ्चयः ॥ ” इति । तद्द्विविधम् । यथा—“ गीतं च द्विविधं प्रोक्तं यंत्रगात्रविभागतः । यंत्रं स्याद्वेणुवीणादि गात्रं तु मुखजं मतम् ॥ ” । किञ्च—“ निबद्धमननिबद्धञ्च गीतं द्विविधमुच्यते । अनिबद्धं भवेद्गीतं वर्णादिनियमं विना ॥ यद्वा गमकधातुज्ञैरनिबद्धं विना कृतम् । निबद्धञ्च भवेद्गीतं तालमानरसान्वितम् । छन्दोगमकधातुज्ञैर्वर्णादिनियमैः कृतम् ॥ ऋग्भिः पाठ्यमभूद्गीतं सामभ्यः समपद्यत । यजुर्भ्योऽभिनया जाता रसाश्चाथर्वणः स्मृताः ॥ अंगैरालम्बयेद्गीतं हस्तेनार्थं प्रदर्शयेत् । दृष्टिभ्यां भावयेद्भावं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादाभ्यां तालनिर्णयः ॥ गीतं पीनपयोधरा समदना नारी विचित्रा कथा रम्यं हर्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी । चित्तज्ञाः सुहृदः सुताः सुमनसो भक्ताः पुनः सेवकाः शुद्धं गीतफलं कवित्वमतुलं संसारसारा मताः ॥ संगीतकेन रम्येण सुखं यस्य न चेतसि । मनुष्यवृषभो लोके विधिनैव स वञ्चितः ॥ संसारदुःखदग्धानामुत्तमानामनुग्रहात् । प्रभुणा शंकरेणात्र गीतं वाद्यं प्रकाशितम् ॥ गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् । रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि पक्षिणः । वनादायान्ति फणिनः शिशवो न रुदन्ति च ॥ कृतिचमत्कृतये किमतः परं फणिवरोऽश्वतरो बत पञ्चमः । अपि मृतां यदवाप मदालसां मधुरगीतवशीकृतशंकरः ॥ परमानन्दविवर्धनमभिमतफलं वशीकरणम् । सकलजनचित्तहरणं विमुक्तिबीजं परं गीतम् ॥ " अत एव–" नाहं वसामि वैकुंठे योगिनां हृदये न वै । मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ॥ " इति भगवताऽप्युक्तमित्यलम् १ ॥ अथ वाद्यानि–" तालेन राजते गीतं तालो वादित्रसंभवः । गरीयस्तेन वादित्रं तच्चतुर्विधमुच्यते ॥ ततं सुषिरमानद्धं घनमित्थं चतुर्विधम् । ततं तंत्रीगतं वाद्यं वंशाद्यं सुषिरं तथा ॥ चर्मावनद्धमानद्धं घनं तालादिकं मतम् । " इति । तत्र ततं यथा–" अलावती ब्रह्मवीणा किन्नरी लघुकिन्नरी । विपञ्ची वल्लकी ज्येष्ठा चित्रा जोषवती जया ॥ हस्तिका कुब्जिका कूर्मा शारंगी परिवादिनी । त्रिशवी शतचन्द्री च नकुलौष्ठी चटंसवी ॥ औडंबरी पिनाकी च निबंधः शुष्कलस्तथा । गदावारणहस्तश्च रुद्रोऽथ शरमण्डलः ॥ कपिलासो मधुस्यंदी घोणेत्यादि ततं वदेत् । " । अलावणी यथा–"कनिष्ठिकापरिध्यर्धमध्यच्छिद्रेण संयुतः । दशयष्टिमितो दंडः खादिरो वैणवोऽथ वा । अधः करभवानूर्ध्वे छत्रावल्याभिशोभितः ॥ नवांगुलादधः छिद्रोपरि चंद्रार्धसन्निभाम् । निवेश्य तुंबिकां भद्रालाबुखंडं निवेशयेत् ॥ द्वादशांगुलविस्तारं दृढपक्कं मनोहरम् । तुंबिकावेधमध्येन दंडच्छिद्रे तु निर्मिताम् ॥ अलाबूमध्यगां डौर्वी कृत्वा स्वल्पां तु काष्ठिकाम् । तथा संवेष्ट्य तन्मध्ये काष्ठिकां भ्रामयेत्ततः ॥ यथा स्यान्निश्चलालाबूबन्धश्च करभोपरि । पञ्चांगुलिवु संत्यज्यालाबूं स्वल्पाञ्च बन्धयेत् ॥ केशान्तर्निर्मिता पट्टमयी सूत्रकृताथ वा । समा सूक्ष्मा दृढा तत्रतत्र देया विचक्षणैः । एतल्लक्षणसंयोग्यात्रा (न्या) लावणी प्रकीर्तिता ॥ बिन्दुना न समुपेतं तुंबं निक्षिप्य वक्षसि । मध्यमानामिकाभ्यां च वाद्या दक्षिणपाणिना ॥ तारे मन्द्रे च घोषे च त्रिस्थाने बिन्दुरिष्यते । तुम्बीमूलं समुत्पत्य वामांगुष्ठेन धारयेत् । ततस्ताभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते ॥ त्रिस्वरो दक्षिणः पाणिर्वामस्तत्र चतुःस्वरः । अलावण्यां स्थिता ज्ञेयाः सप्त षड्जादयः स्वराः ॥ रागव्यक्तिर्यथा रागे भवेत्षड्जादिभेदतः । अंशन्यासविभेदाच्च तथात्राऽपि विधीयते ॥ इयमलावणी प्रोक्ता मनःश्रवणरञ्जनी । प्रत्यक्षा शारदा देवी वीणारूपेण संस्थिता ॥ " इत्यलावणीलक्षणानि । अन्येषां विस्तरभयान्नोदाहृतानि । तानि च संगीतदर्पणसंगीतदामोदरादिग्रंथेभ्योऽवसेयानि । सुषिरं यथा–" वंशोऽथ पारो मधुरी तित्तिरीशंखकाहलाः । तोरडीमुरलीबुक्काश्रृंगिकास्वरनाभयः ॥ श्रृंगं कापालिकं वंशश्चर्मवंशस्तथापरः । एते सुषिरभेदास्तु कथिताः पूर्वसूरिभिः ॥ वर्तुलः सरलश्चैव पर्वदोषविवर्जितः । वैणवः खादिरो वाऽपि रक्तचंदनजोऽथ वा ॥ श्रीखंडजोऽथ सौवर्णो दंतिदंतमयोऽपि वा । राजतस्ताम्रजो वाऽपि लौहजः स्फाटिकोऽथ वा ॥ कनिष्ठांगुलितुल्येन गर्भरंध्रेण शोधितः । शिल्पविद्याप्रवीणेन वंशः कार्यो मनोहरः ॥ वंशेनैव मतोऽशीति मतंगमुनिनोदितम् । ततोऽन्येऽपि तदाकारा वंशा एव प्रकीर्तिताः ॥ तत्र [1]चैवं शिरोदेशादधोऽद्रिमितमंगुलम् । फूत्काररंध्रं कुर्वीत मितमंगुलिपर्वणा ॥ पञ्चांगुलानि संत्यज्य तावद्रंध्राणि कारयेत् । कुर्यात्तथाऽन्यरंध्राणि सप्तसंख्यानि कौशलात् ॥ बदरीबीजतुल्यानि संत्यज्यार्धार्धमंगुलम् । प्रांतयोर्वेधनं कार्यं स्वराद्यैर्नादहेतवे ॥ सिक्थकेन कला देया तेन सुस्वरता भवेत् । पञ्चांगुलोऽयं वंशः स्यादेकैकांगुलवृद्धितः ॥ षडंगुलादिदाम्ना स्याद्यावदष्टादशांगुलम् । फूत्कारताररंध्रस्य यावदंगुलमंतरम् । तदेव नाम वंशस्य वांशिकैः परिकीर्त्यते ॥ एकांगुलो द्व्यंगुलश्च त्र्यंगुलश्चतुरंगुलः । अतितारतरत्वेन वांशिकैः समुपेक्षितः ॥ [2]त्रयोदशांगुलो वीणा विधौ च समुपेक्षितः । निंदितो वंशतत्त्वज्ञैस्तथा सप्तदशांगुलः ॥ महानंदस्तथा नंदो विजयोऽथ जयस्तथा । चत्वार उत्तमा वंशा मतंगमुनिसंमताः ॥ दशांगुलो महानंदो नन्द एकादशांगुलः । द्वादशांगुलमानस्तु विजयः परिकीर्तितः ॥ चतुर्दशांगुलमितो जय इत्यभिधीयते । ब्रह्मा रुद्रो रविर्विष्णुः क्रमादत्र व्यवस्थिताः ॥ नैर्वेद्यं प्रौढता चापि सुस्वरत्वञ्च शीघ्रता । माधुर्यमिति पञ्चामी फूत्कृतेषु गुणाः स्मृताः ॥ शीत्कारबहुलः स्तब्धो विस्वरः स्फुटतो लघुः । अमाधुर्यश्च विज्ञेयाः षड् दोषाः फूत्कृतेः क्रमात् ॥ वृथा प्रयोगबाहुल्यमल्पता गीतवादने । एभिर्दोषैर्युतोऽतीव निंदितो वांशिको मतः ॥ स्थानकादिलयाभिज्ञो गम

१ ' त्यंधा ' इति प्राचीनपु० पाठः । २ ' त्रयोदशांगुलो वीणापरः । ' एवमपि पाठः, स चोह्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काद्यः स्फुटाक्षरः । शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते । प्रमुक्तिर्बद्धमुक्तिश्च युक्तिश्चेत्यंगुलेर्गुणाः । सुस्थानत्वं सुस्वरत्वमंगुलौ सावनक्रियाम् । समस्तगमकज्ञानं रागरागांगवेदिता ॥ क्रियाभाषाविभाषासु दक्षता गीतवादने । सुस्थाने चापि दुःस्थाने नादनिर्माणकौशलम् ॥ गातॄणां स्थानदातृत्वं तद्दोषाच्छादनं तथा । वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ॥ " इति वंशः । काहलाख्येति निषंगः तोडही मुरली बुक्का इत्येतेऽत्र स्त्रियां सप्तस्वराणां नाभिरिव स्वरनाभिः स्त्रियां वर्तते, इतरेषां विस्तरभिया स्वरूपं नोक्तम्। तच्च संगीतदर्पणसंगीतदामोदरादिग्रंथेभ्योऽवसेयम्। आनद्धं यथा—"आनद्धे मर्दलः श्रेयानित्युक्तं भरतादिभिः"। अपि च—मुरजपटहढक्का बिंबको दापवाद्यं पणववनसरुञ्झालावजाहू त्रिवल्यः । करठकमठभेरी स्यात्कुडुक्का हुडुक्का मनसमुरालेझल्ली ढुक्कली दौंडिशाना ॥ डमसटमुकिमड्डुः कुण्डली तण्डनामा रणमभि घटवाद्यं दुंदुभी चारजश्च । क्वचिदपि टुठुकी स्याद्दर्दुरं चाप्युपांगं प्रकटितमनवद्यं वाद्यमित्थं जगत्याम् । त्रिपुरमथनकर्तुस्ताण्डवे तत्प्रयाणे ततमुखसुषिरञ्चानद्धमित्थं घनञ्च ॥ मर्दलः खादिरः श्रेष्ठो हीनः स्यादन्यदारुजः । रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्चकैः ॥ सार्धहस्तप्रमाणञ्च दैर्घ्यमस्य विधीयते । त्रयोदशांगुलं वाममथ वा द्वादशांगुलम् ॥ दक्षिणञ्च भवेद्धीनमेकेनार्द्धांगुलेन वा । करणानद्धवदनो मध्ये चैत्र पृथुर्भवेत् ॥ षण्मासीयो भवेद्वस्तस्तच्चर्मकरणं मतम् । मृत्तिकानिर्मितश्चैव मृदंगः परिकीर्तितः । पातयेत्खरालें वाद्यमादनार्थञ्च मर्दले ॥ विभूतिर्गैरिकं भक्तं केन्दुकेन समन्वितम् । यद्वा चिपि (पी) टकं देयं जीवनीसत्त्वमिश्रितम् ॥ सर्वमेकत्र पिष्टं तल्लेरः खरलिरुच्यते । वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे ॥ एवं मर्दलकः प्रोक्तः सर्ववाद्योत्तमो मतः । अस्य संयोगमासाद्य सर्वं वाद्यञ्च शोभते ॥ एतदंगे बीजकाष्ठे दलमर्द्धांगुलं विदुः । तदिर्धामिति विज्ञेयाः पाठवर्णा मृदंगजाः ॥" । थोंदंढं धिक्कट स्तद्धीताकंदंदंथोंगंधिधिखझंझिनंगटंदंथाः कूटपाठा मता अमी । तधिंथोंडेंतक्कत्रींदोंदंदंधिगणांततं तधितक्कतंधंधिदोंताधिपाटखंडे त्वयं क्रमः । तथा च—यतिमाने पाठखंडः—द्रगतथेजां द्रगतथेजां धोधोधिकताधिका थोजांथोजांतकतताधिकाथोताद्रगतताधिधिधिधिकतताकडनाथोधिकथोजांथोताद्रगतताद्रतताधि इति । "यतिरोढाप्यवच्छेदो गजरो रूपकं ध्रुवम् । गलपः सारिगोणी च नादं च कथितं तथा । प्रहरणं वृंदनञ्च प्रबंधा द्वादश स्मृताः ॥" । यथा—दंथात इत्येकताल्यां यतिः । ओडवाद्यं यथा—"दांतथोतधिकतधिकदंथादंथाथोधियोधित ततत्तथाविथविदिश्यांदिश्यांटटनाकिटटनाकितदटङ्गनंटतगथत्रटङ्गथत्रटङ्गतागिनगितागिनागिदां दांदंदंदींदींदंताततथा" इति । अवच्छेद्यवाद्यं यथा—"दंथातः दथातः धिक्किधिक्किदिगणंदंताथः" इति । गजरवाद्यं यथा—थोकटेन्ननेजढेंडेंगयोगथोङ्गटेङ्कथोगताकिधिकटेङ्ननाधिधिकटतकथोकत्तधिकट तक्ककतथोगतद्धीम्" इत्येकताल्यां गजरः । रूपकवाद्यं यथा—"तकधिकतकधिककथविताकिथाविताकिधिकदंथातः" इति । ध्रुवकवाद्यं यथा—'तक्कतक्काटधिक्कधिक्काट' इति निसारताले ध्रुवकः । गलपो यथा—"तधिदधिधिकतकताधिगलगंथा थादेंतथाढेनत्र" इत्येकताल्यां गलपः । सारिगोणी यथा—"थोङ्गटेङ्तक्कधिक्कतकधिकतकथोहटङ्गनहटङ्गंनथोगकथोः" इति प्रथमखण्डः । "टेत्रथोःथिथोहःटेत्रटेत्रदक्कतगदक्कधिक्कतादिददक्कदंगदंगथोगथोकतकतक धिकतधिकतधोटेत्रधोटेत्रथटेगलखोगगलखोगखोहटगेंठगेंखोहटम् इत्यस्य छंदनम्" इति । नादो यथा—"दांकारात्रितयं पूर्वं दांधिगिति ततत्त्रयम् । दांदांधिकत्रयं यत्र इति नादः शचीप्रियः ॥" इति । "द्रुतं मानसमार ब्धशुद्धं कूटविनिर्मितम् । सप्तखण्डमयं वाद्यं कथितं तदिहोच्यते ॥" द्रुतमानत्वात्प्रतिताले यथा—"तत्ततततत्ततक्कितक्किदंदंधिगनथोधिगनथोधिक्कधिक्कधिक्कधिक्कधिक्नगिनगमिथोथोधिधिधिःदांदांधिक्कथोथोथोहथोहनात्रि थोनत्रिथोथोहथोहडेटिडेडिथोहथोहतटितटितटुकगींगींधगिधगितततधेततधेतततगिडीत्रडीथोगथोगथोंथोगगथोगथोतत्ताचाः" "इति सप्तपदान्याहुः कथितं वाद्यपंडितैः । प्रतितालेन तालेन पादवर्णसमासतः ॥ गंधर्वपतिना पूर्वमु र्वशीलास्यनर्तने । सुधर्मारञ्जनार्थञ्च कथितं प्रकटीकृतम् ॥" इति प्रहरणं यथा—"थोगक्का तदधिकाथागकटगगोंदंथोगादिदधिकृधिक्कादिकटेत्र" इत्येकताल्या प्रहरणम् । "वाद्यं विमुच्यते येनच्छदनं तन्निगद्यते " यथा—'तझधिथोदि त्रटेत्रतत्र' इति छदनम् । "कलासो विकलासश्च टाकलं चार्धटाकली । जोलाटाकलिका चैव गोमुद्री मुरजस्तथा ॥" अलाबुवाद्यं म्लेच्छवाद्यम् । मर्दलस्त्रयोदशांगुलवाममुखो, द्वादशांगुलदक्षिणमुखः। मुरजस्त्वष्टादशांगुलवाममुखः, सप्त दशांगुलदक्षिणमुखः, मर्दलमुरजयोरयं भेदः । घनं यथा—"अनुरक्तं विरक्तञ्च द्विविधं घनवाद्यकम् । गीतानुगञ्चानुरक्तं विरक्तं तालसंश्रयम् ॥ करतालः कांस्यताले जयघंटोऽथ शुक्तिका । कंबिकापटवाद्यं च पट्टातोयञ्च घर्घ रम् ॥ झंझातालश्च मंजीरं कर्तर्थुकुर इत्यपि । द्वादशैते मुनीन्द्रेण कथिता गवसंज्ञिकाः ॥ त्रयोदशांगुलव्यासौ शुद्धकांस्यविनिर्मितौ । मध्यमुखौ स्तनाकारौ तन्मध्ये रज्जुगुम्फितौ ॥ पद्मिनीपत्रसदृशौ कराभ्यां रज्जु

१ (" तेनेति शब्दस्तेनः स्यान्मङ्गलानां प्रदर्शकः । तेशब्देनोच्यते गौरी नशब्देनोच्यते हरः ॥ तेन माङ्गलिकश्चायं शब्दस्तेन इति स्मृतः ॥ " इति संगीतदामोदरे) । २ मथ इते वा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंत्रितौ । करतालावुभौ वाद्यौ पोटर्द्धनटकैरिति ॥ यद्वा त्रयोदशयवव्यानं वक्त्रयवोन्मितम् । यवपञ्चकगम्भीरं मध्ये च यवसप्तकम् ॥ विसृतं वर्तुलं निम्नं यवत्रयमितं ततः । पृष्ठतो मध्यदेशे च शिवालिंग समाकृतिम् ॥ अत्यम्लपैष्टिनिर्दिग्धशुद्धकांस्यविमिर्षितम् । संरक्तांगुलिसुस्निग्धसुदीर्घमधुरध्वनिम् ॥ घनानिसाविसंरक्तं दृढं शुष्कं मनोहरम् । काश्मर्यादिसमुद्भूतं तालमाहुर्मनीषिणः ॥ सुनादं दक्षिणं तालं ततो हीनञ्च वामकम् । कुर्वीत तद्वयं कार्यं तर्जन्यंगुष्ठयोगतः ॥ वामहस्तस्य तालस्य मध्यमं सन्निनादितम् । तिर्यग्दक्षिणतालस्य परिव्यंसेन तालयेत् ॥ तालादौ वादयेच्चैव प्लुतदीर्घलघुद्रुतैः । " इति करतालविशेषः । कर्तरी घनविशेषः । उंकरश्च घनविशेषोऽदन्तरेफान्तपुँल्लिंगः । अन्येषां लक्षणं विस्तरभयान्नोक्तम् । " रुक्मिण्याः सत्यभामायाः कालिन्दीमित्रविन्दयोः । जांबवत्या नाग्नजित्या लक्ष्मणाभद्रयोरपि । कृष्णस्याष्ट महिषीणां पुरोद्वाहमहोत्सवे ॥ ततं शुषिरमानद्धं घनञ्च युगपज्जनाः । अवादयन्नसंख्यातमिति पौराणिकी श्रुतिः ॥ ततं वाद्यं तु देवानां गंधर्वाणां च शौषिरम् । आनद्धं राक्षसानां तु किन्नराणां घनं विदुः । निजावतारे गोविन्दः सर्वमेवानयत्क्षितौ ॥ यावन्ति वाद्यभांडानि रामरावणयोर्युधि । तावन्त्यो नाभवन्सेनाः कुरुपांडवसंगरे ॥ " किञ्च—" निर्लिपह्वत्कंपनतोमरेण रणे सुरोरर्मथनात्सुरेण । अभूत्ततायैरपि सिंहनादैः सा पञ्चशब्दीति कणादवादः ॥" युधि सैन्यानां योऽहंकाररवः स सिंहनादः । तताादिभिरेभिश्चतुर्भिर्वाद्यैश्च पञ्चशब्दीवाद्यमभूत् । सिंहनादेन सह वाद्यं पंचविधमस्तीति संगीतदामोदरः । " शिवागारे झल्लकञ्च सूर्यागारे तु शंखकम् । दुर्गागारे वंश (शी) वाद्यं माधुरीञ्च न वादयेत् ॥ " । झल्लकं कांस्यनिर्मितकरतालमिति योगिनीतंत्रम् । मत्स्यपुराणेऽपि—" गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत् । विरिञ्चेश्च गृहे ढक्कां घंटां लक्ष्मीगृहे त्यजेत् ॥ घंटा भवेदशक्तस्य सर्ववाद्यमयी यतः । " । किञ्च—" देवस्याग्रे प्रतिदिनं कारयेत्सञ्चकारकः । तत्तद्देवस्य चरितं पौराणं व्यासकीर्तितम् ॥ तेनैव सर्ववाद्यानां फलं पूर्णं प्रजायते । न्यूनता चोपचाराणां सापि पूर्णा भवेत्ततः ॥ वेदिता सर्वशास्त्राणां वेदानामंगसंयुजाम् । विशुद्धोभयवंशश्च वक्ता कार्यो द्विजोत्तमः ॥ कुटुम्बी शान्तचित्तश्च छात्राध्यापनतत्परः । अनन्यजीविको विप्रो जयोच्चारे शुभावहः ॥" इति भविष्योक्तेः । जयशब्दार्थस्तु—" अष्टादश पुराणानि रामस्य चरितं तथा । विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥ कार्ष्ण्यं च पञ्चमो वेदो यन्महाभारतं स्मृतम् । सौराश्च धर्मा राजेन्द्र मानवोक्ता महीपते । जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥" इति ब्रह्मचारिकाण्डे भविष्योक्तेः । वाद्यम्—" विततञ्च घनं वाद्यं ततं सुषिरमेव च । कांस्यं पुष्करतंत्रीभिर्वेणुना च यथाक्रमम् ॥" । एतद्देवामरेणापि—" ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥ चतुर्विधमिदं वाद्यम् " इति । तत्र शिक्षादयः पूर्ववत् २ ॥ नृत्यनाट्यम्—" नृत्यं कृतानुकरणं नाट्यं तु नर्तकाश्रयम् । करणान्यङ्गहाराश्च विभावो भाव एव च । अनुभावो रसाश्चेति संक्षेपान्नृत्यसंग्रहः ॥ " इति । करणानि साधनानि । अंगहारो अंगविक्षेपः । विशेषेण भावयन्त्युत्पादयन्ति रसमिति विभावाः, स्त्रीवसन्तोद्यानादयः रसकारणानि । अनुभूयते रस एभिरित्यनुभावाः, कंपस्वेदादीनि रसकार्याणि । भावाः सात्त्विकाः स्तंभादयो, व्यभिचारिणश्च धृतिस्मृत्यादयः । एतैरुत्कर्षमारोप्यमाणोऽत्र व्यञ्जितः स्थायीभावो रत्यादिः शृंगारादिरसरूपो भवतीति । तंत्रान्तरे तु नृत्यभेदज्ञानार्थमेव पृथङ्नाट्यकलोक्ता ३ ॥ आलेख्यम्—चित्रकर्म । "रूपभेदाः प्रमाणानि भावलावण्ययोजनम् । सादृश्यं वर्णिकाभंगमिति चित्रं षडंगकम् ॥" एषां स्वरूपं स्थापत्यशास्त्रादवसेयम् ४ ॥ विशेषकच्छेद्यम्—विशेषकं तिलकं यद्ललाटे दीयते तस्य भूर्जादिपत्रमयस्य छेदनं, विशेषकग्रहणमादरार्थं विलासिनीनामतिप्रियत्वात् ५ ॥ तंडुलकुसुमावलिविकाराः—तण्डुलैर्नानावर्णैः कुसुमैर्वा शिवादिपूजार्थं नानाप्रकाररचना । अत्र ग्रथनं माल्यग्रथन एवान्तर्भूतं भक्तिविशेषेणावस्थापनं कलान्तरम् ६ ॥ पुष्पास्तरणम्—पुष्पादिभिः शय्यादिरचनम् । पुष्पशयनमित्यपरा संज्ञा ७ ॥ दशनवसनांगरागाः—रागशब्दः प्रत्येकं संबध्यते । दशनरागो मस्यादिना । वसनरागः कौसुंभादिना । अंगरागोंगमार्ष्टिः ८ ॥ मणिभूमिकाकर्म—मणिभूमिकावत्कुट्टिमभूमिस्तस्या मरकतादिभेदेन करणम् ९ ॥ शयनरचनम्—शयनीयस्य कालापेक्षया रक्तविरक्तमध्यस्थाभिप्रायादाहारपरिणत्यादिदशाक्कद्रचनम् १० ॥ उदकवाद्यम्—उदकपूरितपात्रे मुरजादिवन्मधुरनानातालसमुत्थापनम् ११ ॥ उदकघातः—हस्तयंत्रयुक्तिभिरुदकस्य ताडनं तदुभयं जलक्रीडांगम् । जलस्तंभविद्येति केचित् १२ ॥ चित्रयोगाः—दौर्भाग्यकेशपलितीकरणादयोऽद्भुतदर्शनोपायाः १३ ॥ माल्यग्रथनविकल्पाः—माल्यानां देव

१ आनद्धम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूजार्थं नेपथ्यानां ग्रथनविकल्पाः १४॥ शेखरापीडयोजनम्—ग्रथनविकल्प एवायं किन्तु योजनं कलांतरम्।तत्र शेखरस्य शिखास्थानेऽवलम्बनन्यासेन परिधापनादापीडस्य च मण्डलाकारग्रथितस्य काष्ठिकायोगेन परिधापनान्नानावर्णैः पुष्पैर्विरचनं योजनम् । तदुभयं नेपथ्यांगम् १५॥ नेपथ्ययोगाः—देशकालापेक्षया वस्त्रमाल्याभरणादिभिः शोभार्थं शरीरस्य मंडनाकाराः १६॥ कर्णपत्रभंगाः-दंतशंखादिभिः कर्णपत्रविशेषा नेपथ्यार्थाः १७॥ सुगंधयुक्तिः—स्वशास्त्रविहितप्रपंचातीतप्रयोजना १८॥भूषणयोजनम्—तद्योगो द्विविधः—संयोज्योऽसंयोज्यश्च।तत्र संयोज्यस्य हारादेर्मणिमुक्ताप्रवालादिभिर्योजनम्।असंयोज्यस्य कटकादे रचनम्।तदुभयं नेपथ्यांगं न तु शरीरे भूषणयोजनं, तस्य 'नेपथ्ययोगाः' इत्यनेन गतार्थत्वात्१९॥ ऐंद्रजालम्—इन्द्रजालादिशास्त्रप्रभवयोगाः सैन्यादिदर्शनाद्विस्मयार्थाः२०॥ कौचुमारयोगाः—कौचुमाराश्च योगाः कुचुमारर्षिणा प्रोक्ताः सुभगंकरणादयः, सुरूपत्वाद्यापादका इत्यर्थः। कौचमार इति पाठे कुचानां स्तनानामिमे कौचाः काठिन्यादयः, मारस्य कामस्येमे मारा रागकरणादयः, कौचाश्च ते माराश्चेति कौचमाराः। यद्वा—कुचुशब्दः पक्षिशब्दानुकरणे, तेन पक्षिणो लक्ष्यन्ते, कुचून् पक्षिणो मारयन्तीति कुचुमारास्त एव कौचुमारा जालनिर्माणादयः २१ ॥ हस्तलाघवम्—चमत्कारार्थं लघुहस्ततया तत्तद्वस्तुपरिवर्तनम्, शस्त्रास्त्राद्युत्सर्गशैघ्र्यं वा २२ ॥ चित्रशाकापू (कसू) पभक्ष्यविकाराक्रियाः—पानकरसरागासवयोजनं दशविधशाकमुद्गादिसूपभक्ष्यविकाराणां क्रिया पाकविधिना निष्पादनम्। द्रावितमद्रावितं रसं पानकम्। रागो लेह्यम्। आसवः संधानमेका कला द्विविधोक्ता,पानकेषु रसादियोजनमिति केचित्।"मूलपत्रकरीराग्रफलकाण्डादिरूढकम्। त्वक्पुष्पं कवकं चैव शाकं दशविधं स्मृतम्॥" अधिरूढं नालबीजांकुरास्थिमज्जादि। 'सूपं व्यञ्जनसूदयोः' इति मेदिनी २३ ॥ सूचीवायकर्म—सूच्या पुष्पमूर्त्यादिरूपेण सीवनम् २४ ॥ सूत्रक्रीडा—सूत्राणामन्यथा दर्शनं, सूत्रचारेण पुत्रिकादिचालनं वा २५ ॥ वीणाडमरुकवाद्यानि—एतच्च विशेषवित्रक्षयेहोक्तमपि केचिन्न लिखन्ति, वाद्यशब्देनोक्तार्थत्वात् २६ ॥ प्रहेलिका—अपह्नुतवागर्थज्ञानम्। " व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र बाह्यार्थसंबद्धं कथ्यते सा प्रहेलिका ॥ " इति हारिः। तथाहि—" वने जाता वनं त्यक्त्वा वने वसति नित्यशः। पण्यस्त्री न तु सा वेश्या यो जानाति स पण्डितः ॥ (१)। अर्धं वसति वैकुण्ठे तदर्धं गणिकागृहे। सर्वं तु वणिजो हट्टे वद वैद्य किमौषधम् ॥ (२)। पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः। चलति (ते) वायुवेगेन तस्याहं कुलबालिका ॥ (३)। श्यामास्या न च मार्जारी द्विजिह्वा नैव सार्पिणी। पञ्चभर्त्री न पाञ्चाली यो वेद स च पंडितः ॥ (४)। अपदो दूरगामी च साक्षरो न तु पण्डितः। अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ॥ (५)। क्रमादेता नौ-हारताल-कुलालजा-लेखनी-पत्राणां बोधकाः। एवमन्या बह्वयः सन्ति २७ ॥ प्रतिमाला—" प्रतिश्लोकं क्रमाद्यत्र संधायाक्षरमंतिमम्। पठेत्तं श्लोकमन्योऽन्यं प्रतिमालेति सोच्यते ॥ " । तथाहि—" कृष्णेति मंगलं नाम यस्य वाचि प्रवर्तते। भस्मीभवन्ति तस्याशु महापातककोटयः ॥ " । इह 'यः' अन्ते पठित एतच्छ्रुत्वाऽपरो यकारादिमं श्लोकं पठेत्। स च—" य इच्छेन्निजकल्याणं स सदा संगमाचरेत्। हरिभक्तिपराणां हि ते हि कल्याणभाजनम् ॥ " इत्येतच्छ्रुत्वा परस्तु—" नंदनंदन मे देहि दधिपात्रं नमोऽस्तु ते। पात्रं विना गताया मे श्वश्रूस्ताडयिता भृशम् ॥ " इतोऽन्यस्तु—" शंखचक्रगदापद्मास्ते करेषु जनार्दन। द्योतन्तेऽर्कं त्वतिक्रम्य रणे मुरनिषूदन ॥ " इति श्रुत्वाऽपरो नकारादिमं पठेदित्थं प्रतिमाला भवति। सर्ववस्तुप्रकृतिनिर्माणं वा प्रतिमाला २८ ॥ दुर्वचकयोगाः—शब्दतोऽर्थतश्च यद्दुःखेनोच्यते तद्वक्तुमुपायाः। यथा—"वाश्चारेड्ध्वजधग्धृतोड्वधिपतिः कुध्रेड्जजानिर्गणेड्गोराडारुडुरस्सरेडुरुतरग्रैवेयकभ्राडरम्। उडुवीड्धृङ्नरकास्थिभृत्त्रिदग्भृदार्द्राजिनाच्छच्छविः स स्तादंबुमदंबुदालिगलरुग्देवो मुदे वो मृडः ॥ " इत्येवंरूपं वृत्तं पाठार्थतो दुरुच्चार्यम्। (पदच्छेदः—वाश्चारेड्ध्वजधक्। धृतोड्वधिपतिः। कुध्रेड्जजानिः। गणेट्। गोराडारुडुरस्सरेडुरुतरग्रैवेयकभ्राट्। अरम्। उडुवीड्धृक्। नरकास्थिभृत्। त्रिदग्भृत्। आर्द्राजिनाच्छच्छविः। सः। स्तात्। अम्बुमदम्बुदालिगलरुक्। देवः। मुदे। वः। मृडः)। वार्षु चरन्तीति वाश्चारा मत्स्याः, तेषाम् ईट्—ईष्टे इतीट् स्वामी महामत्स्यो ध्वजे यस्य स कामः, तं दहतीति तथा। धृत उडूनामृक्षाणामधिपतिश्चन्द्रो येन स तथा। कुं भूमिं धरन्तीति कुध्राः पर्वतास्तेषामीड् हिमालयस्तज्जा पार्वती जाया यस्य स तथा। गणानां प्रमथानामीड् स्वामी। गवां राजा नंदी गोराट्, तमारोहतीति गोराडारुट्। उरसा सरन्ति गच्छन्तीत्युरःसराः सर्पास्तेषामीडेव उरुतरं ग्रैवेयकं कंठाभरणं तेन भ्राजते द्योतते इति तथा। " उ संबुद्धौ रुषोक्तौ च शिववाचि त्वनव्ययम्। उ प्रश्ने च " इति हैमः। उना शंभुना डीयते उपरि ध्रियत इत्युडुर्गंगाप्रवाहः। विशेषेणेड्ढत इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीट्,उडुश्चासावीट् चेत्युडुवीट्, तं धृजतीति तथा। नराणां कं मस्तकं च तदस्थि चेति तथा, तद्बिभर्तीति तथा । तिस्रः दशास्त्रिदशास्ता बिभर्तीति तथा । आर्द्राजिनेनाच्छा छविर्यस्य स तथा । अंबुमंतश्च तेंबुदा स्तेषामालिस्तद्वद्गलरुक्कण्ठकान्तिर्यस्य स तथा । स देवो मृडः वो मुदे अरं शीघ्रं स्तादित्यर्थः २९ ॥ पुस्तकवाचनम्–पुस्तकस्थानां काव्यानां शृंगारादिरसानुकूलगीतस्वरेण वाचनम् ३० ॥ नाटिकाख्यायिकादर्शनम्–नाटकस्य दशरूपकस्याख्यायिकायाश्च परिज्ञानं निर्माणञ्च । तच्च नाटकम्–"पूर्वरंगं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥ प्रथमं पूर्वरंगः स्यात्ततः प्रस्थापनेति च। आरंभे सर्वनाट्याना मेतत्सामान्यमिष्यते ॥ " इत्यादिनारभ्यते । पूर्वरंगो नांदी । सूत्रधारो नाट्याचार्यः । आख्यायिकाऽज्ञातसत्यार्थभूता कथा । यथा–" उत्पातकं तदिह देव विचारणीयं नारायणः पतति चेदथ वा सुभद्रा । कादंबरी मदविघूर्णितलोचनस्य युक्तं हि लांगलपतेः पतनं पृथिव्याम् ॥१ " । अयं श्लोकः साख्यायिकः । सा च–कदाचित्कश्चिद्ब्राह्मणोऽतीतशास्त्रो वृत्त्यर्थं देशांतरे भ्रमन् कस्यचिन्नृपस्य नगरसमीपस्थसरसि स्नात्वा हरिमर्चयँस्त त्रागतेनैकाकिनैव तन्नगरनृपेण नमस्कारपूर्वकं पृष्टः–किमर्थं कुतश्चागत इति, तेनोक्तं–वृत्त्यर्थमत्र नृपपार्श्वे आगतोऽस्मि, तेनोक्तं–यदि न किञ्चिद्दास्यति तदा किं करिष्यसि, विप्रेणोक्तं–यदि मे दैवं प्रबलं तदा पादत्राण प्रहारेण ग्रहीष्याम इत्युक्तो नृपः स्वद्वारपालादींस्तं दर्शयित्वोवाच–अयं न मत्पार्श्वमानेयो नास्य वार्तापि कार्येति । ब्राह्मणश्च मध्याह्नोत्तरं भ्रमन्राजमार्गे केनचिन्नृपाधिकारिणा दृष्टः स्वगृहमानीय सत्कृत्येह तिष्ठ तव वृत्त्यर्थं यत्नं करिष्यामीत्युक्तस्तत्स्थान उवास । तत्र वसतस्तस्याल्पेनैव कालेन तद्गृहस्थजगन्नाथमन्दिरमूर्तित्रयमध्यतो बलभद्रमूर्तिरकस्मात्पपात । ततो नृपो ब्राह्मणानाहूयोत्पातोऽयं जातः किमर्थं का चास्य शांतिरित्युवाच । तच्छ्रुत्वा ते स्वस्वमत्यनुरोधेनोत्पातं मत्वा शांत्यायूचुः । यद्गृहे राजदृष्टचरविप्र आसीत्तेनोक्तं–मद्गृहेऽप्येकः पण्डितोऽस्ति तमहं पृष्ट्वा वदिष्यामि, राज्ञोक्तमवश्यं पृष्ट्वागच्छ । स तदैव गत्वा तं तद्वृत्तं पप्रच्छ, तेनोक्तं–नृप पार्श्व एव वदिष्यामि नान्यत्र । स चागत्य नृपाय तथैवाकथयत् । नृपश्च तमानाय्य नत्वा च दृष्टचरं तमेव मत्वा पप्रच्छ, तेन हि पूर्वमुक्तश्लोकः पठितस्तदाकर्ण्य नृपो नानावस्त्रालंकाराद्यानाय्य तदुपरि पादत्राणं संस्थाप्य विप्राय ददौ । कथं राजन्सर्वोपकरणोपरि पादत्राणं स्थापितमित्युक्तो विप्रेण नृपस्तमाहानेन मां ताडयित्वा गृहाणैतदिति, भवदुक्तिरियं सत्या जातेति कथामेतां विना श्लोकतात्पर्यं न लभ्यते । इत्थं साख्या यिका अन्येऽपि सन्ति ३१ ॥ काव्यसमस्यापूरणम्–पूरणसाकांक्षा कविशक्तिपरीक्षार्थमपूर्णतयैव पठ्यमाना समस्या । तस्याः पूरणं यथा–' शतचंद्रं नभस्तलम् ' इति । तत्र " दामोदरकराघातविह्वलीकृतचे तसा । दृष्टं चाणूरमल्लेन " इत्यनेन पूर्यते । एवम्–' पिपीलिका चुम्बति चन्द्रबिम्बम् ' इति । तत्र " लवुर्जनः सज्जनसंगमेन करोति दुःसाध्यमपीह साध्यम् । पुष्पाश्रया शंभुशिरोऽधिरूढा " इत्यादिना पूर्यते । एवमन्या अप्यनन्ताः संतीति ३२ ॥ पट्टिकावेत्रवानविकल्पाः–पट्टिकायाः खट्वादेश्च वेत्रैर्वाने वितनने विविधकल्पनाऽनेकपुष्पलतादिरूपा कल्पना । ' पट्टिका छुरिकासंज्ञो:' इति धरणिः । केचित्तु–छुरिका वेत्र बाणानां प्रहरणे विविधकल्पना ऊर्ध्वाधस्तिर्यगादिप्रकारेण प्रहरणमित्याहुः३३॥ तर्ककर्माणि–तर्काणां शास्त्रीयानां लौकिकानां वा नानाविधोहापोहेन क्रियाः । तथाहि–'भट्टस्य कटयां शरटः प्रविष्टः । तत्र छिद्रा भावे प्रवेशो न संभवतीत्याद्यूहनम् । यदि माता स्यात्तर्हि पिताऽपि स्यादित्येवंरूपा अनन्ताः सन्तीति । तार्किकास्तु–व्याप्यारोपेण व्यापकारोपस्तर्क इत्यूचुः । तदुदाहरणञ्च–'यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यात् ' इति । "व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम् " । यथा–वह्न्यभावो व्याप्यस्तदारोपप्रयुक्तो व्यापकधूमाभाव इति । केचित्तु–'तर्कोऽनिष्टप्रसञ्जनम् ' इत्याहुः । तच्च शंखोऽस्थि कथं पवित्रं मृग चर्मापि कथं तत्, तयोरस्थिचर्म विशेषत्वात्पावित्र्ये हेतुर्वाच्य इत्येवमनेकधानिष्टप्रसंगारोपोऽस्ति वैधेयानाम् ३४ ॥ तक्षणम्–शयनाद्यर्थं वार्धकिकर्म ३५ ॥ वास्तुविद्या–गृहनिर्माणादिरूपा ३६ ॥ सुवर्णरत्नरूप्यपरीक्षा–तेषां गुणदोषमूल्यादिभिः परी क्षणम् । स्वर्णमेकादशवर्णतो हीनं न ग्राह्यमधिकवर्णं ग्राह्यं षोडशवर्णं यावत् । एवं रूप्यमपि मृदु कांस्यादिसंगहीनं ग्राह्यम् । तत्र वज्रमौक्तिकमाणिक्यनीलमरकतभेदात्पञ्च रत्नानि, गोमेदपुष्परागवैदूर्यप्रवालभेदाच्चतुर्धो परत्नानि । वज्रमौक्तिके श्वेते, माणिक्यं लोहितम्, नीलं नीलमेव, मरकतं हरितं श्वेतं पीतञ्च । गोमेदं पुष्परागं पिंगलम्, प्रवालं लोहितम् । वैदूर्यं हरिपांडुरञ्च इति । वज्रे सप्त दोषाः पञ्च गुणाश्च सन्ति । षट्कोणलघुभा स्वरतीक्ष्णधारसर्वतोरश्मिस्निग्धञ्चाकालमृत्युसर्पादिशत्रुव्याधिभयहरं वज्रं भवति । मलबिन्दुरूक्षरेखावैषम्यकाचवत्तदनिष्टकरम् । तन्मौल्यं द्वादशधा परीक्षानुसारेण । एवमेव रत्नशास्त्रे सर्वेषां गुणदोषमूल्यान्युक्तानीत्यलमतिप्रसङ्गेन ३७ ॥ धातुवादः–स हि मृत्प्रस्तररसधातूनां गैरिकाभ्रकपारदादिरूपाणां पातनसाधनमेलनादिज्ञानहेतुरर्थार्थः । यद्वा–धातूनां क्रियाणां वादः । धातुरित्युपलक्षणम् । स च गुप्तक्रियादिरूपः । तथाहि–"रामनाम सुधाधाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पवित्रं रस ना रसम् । कः कर्ता कर्म किंचात्र क्रियासंबोधने च के ॥'' इति । इह हे न इति संबुद्धिः, रसेति क्रियापदम् 'रस—आस्वादने', रामनामेति कर्म, त्वमिति कर्तेति । एवम्—''सार स्व तेन कौ मुद्याथ वा भवति देहिनाम् । अत्र क्रियापदं गुप्तं कर्तृसंबोधने तथा ॥'' इति केचिदाहुः । हे स्व देहिनां या मुद् हर्षः कौ भूमौ भवति सा ते न आरेति योजनया सर्वं ज्ञायते ३८ ॥ मणिरागाकरस्थानम्—स्फटिकादि रञ्जनज्ञानम् । तदुत्पत्तिस्थानमेतादृशभूमावमुकमण्याकर इति ज्ञानम् ३९ ॥ वृक्षायुर्वेदयोगाः—वृक्षाणां रोपणमुष्टिचिकित्साः । वृक्षाश्चाम्रादयस्तेषां रोपणम् ''सम्यक्कृष्टे समे क्षेत्रे माषानुप्त्वा तिलांस्तथा । सुनिष्पन्नान्समुद्धृत्य तत्र बीजोतिरिष्यते ॥'' इति । ''क्षीरनिषिक्तं बीजं बृहतीतिलभस्मसर्पिषा लिप्तम् । गोमयमृदितमथोप्तं सद्यो जायेत धूपितं वसया ॥ (१) ॥ खर्जूरबिल्वलकुचाः सितसर्षपेण पिण्याकतश्च तुषवारिवशेन चाम्राः । ऐरावता निचुलपत्रजलोक्षितेन सार्द्रा हिमाभसलिलेन च यान्ति वृद्धिम् ॥ (२) ॥ नराणामिव वृक्षाणां वातपित्तकफाद्रुदाः । संभवन्ति न संदेहस्तल्लक्षणमथो ब्रुवे ॥ (३) ॥ कृशो दीर्घो लघू रूक्षो निद्राहीनोऽल्पचेतनः । न धत्ते फलपुष्पाणि वातप्रकृतिकस्तरुः ॥ (४) ॥ आतपाऽसहनः पांडुः शाखाहीनो मुहुर्यदि । अकालफलपाकी च शाखी पित्तात्मकः कृशः ॥ (५) ॥ स्निग्धशाखादलः शाखी सम्यक्पुष्पफलोज्ज्वलः । लतापरीतगात्रस्तु कफवान्परिमंडलः ॥ (६) ॥ सस्निग्धैः पिशितरसैः प्रयाति वातः सस्निग्धैस्सुहिमजलैश्च याति पित्तम् । कट्वम्लैरहिमजलैः कषायरूक्षैः श्लेष्मापि क्रमविहितैः प्रयाति नाशम् ॥ (७) ॥'' इत्थं बहुधा वृक्षायुर्वेदे वर्णितमियलं प्रपंचेन ४० ॥ मेषकुक्कुटलावकयुद्धविधिः—मेषादीनामुपस्थानादिचतुरंगैर्योधनम् । लावकः पक्षिविशेषः । उपस्थानानुस्थानप्रस्थानपुरस्थानानि चतुरंगानि ४१ ॥ शुकसारिकाप्रलापनम्—तयोर्मानुषभाषापाठनम् ४२ ॥ उत्सादनम्—उत्सादने संवाहने केशमर्दने च कौशलम् । पादयोर्मर्दनमुत्सादनं, शेषांगेषु मर्दनं संवाहनं, शिरोऽभ्यंगकर्म केशमर्दनम् ४३ ॥ अक्षरमुष्टिकाकथनम्—अक्षराणां मुष्टिरिव गुप्तिः साभासा निराभासा च । आद्याक्षरमुद्रा यथा—'मे-वृ-मि-क-सिं-'इत्यादिना मेषवृषादिकथनम् । दिवोदासीयेऽपि—''आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती-।-संगमे न हि भोक्तव्यं द्वादश्यां द्वादशाऽऽहरेत् ॥'' इति । ''आ-का-पौ-चै-द्वितीयायां शिष्यं नाध्यापयेद्गुरुः'' इति स्मृत्यंतरे । '' जन्मर्क्षसंख्यासहिता गताब्दा दृगूनिता नंदहृतावशेषाः । आ-चं-कु-रा-जी-श-बु-के-शु-जाताः क्रमेण मौदीयदशाः प्रदिष्टाः ॥ '' इति । हिल्लाजेपि-''धनिष्ठार्धश-पू-उ-रे तृणकाष्ठादिसंग्रहम् । शय्यावितर्तिगेहांतर्द्धिप्रेतदहनं त्यजेत् ॥ '' इति मुहूर्तशास्त्रेऽपि । यद्वा—एकाक्षरोक्त्याक्षरमुष्टिकाया वर्णसमुदायरूपपादादेर्ज्ञानम् । तथाहि—कदाचिदेकनगरवास्तव्यौ स्वस्वविद्याप्रवीणौ सवयसौ कौचिदवनिदेवरुक्मकारतनयौ मिथःसख्येनार्थार्जनाय नगरान्तरमीयतुः । तत्र च पश्यतोहरतया बहुसचातुरीचुंचुनापि नाडिन्धमेन न तथा धनमार्जितं यथाधिमारुतिमन्दिरमिन्दिराजानिकथां कथयतैकदैव,—सन्तोष सेविना वाडवजनिना परेण । ततश्च हायनाऽनेहसि गते पितृदर्शनाभिलाषुकयोर्भवनमभिपरावर्तमानयोर्द्रव्यापहारभिया कृतजागरणयोररण्ये क्रमेण शयने कृतसमययोः पुरश्शयितेन स्वर्णकारसुतेन शयानस्य साधुद्विजदारकस्य शिखां पादेनाक्रम्य शिरश्छेदाय पापेन वसुलिप्सयासिरुदयोजि । ततश्च बहुबोधितस्यापि दुर्मतिशान्तिमनालोच्यासिच्छिन्नांगुल्यसृजा पत्रे ' अ-प्र-शि-ख ' इति वर्णचतुष्टयं विलिख्य मत्पित्रे देयमिति तस्मै प्रायच्छत् । स च स्वमनोरथं सम्पाद्यागत्य तत्पित्रे तददात् । स च तदर्थमबुध्यमानो भोजराजसभामगात् । तत्रत्येष्वपि तदर्थमकथयत्सु बुधेषु राज्ञि ' सप्तदिनाभ्यन्तरेऽब्रुवाणा यथार्हं दण्ड्या इमे ' इति कृतनियमे पलायमानेषु तेषु वनवटाधः स्थितेन वररुचिना रात्रौ तत्रस्थगृध्र—गार्भिणीमांसाभिलाषितत्पत्नीसंवादेन तदक्षरार्थोऽवगतः । यतश्च श्रूयते—'' दिवा निरीक्ष्य वक्तव्यं रात्रौ नैव च नैव च । धूर्ताः सर्वत्र तिष्ठन्ति वटे वररुचिर्यथा ॥ '' इति । ततश्च प्रसन्नमनाः स प्राता राजसभामागत्येमं श्लोकमेकैकाक्षरज्ञातैकैकपादं पपाठ—'' अ-नेन तव पुत्रस्य प्र-सुप्तस्य वनान्तरे । शि-खामाक्रम्य पादेन ख-ड्गेन निहतं शिरः ॥ '' इति । अपरा चेष्टामुद्रा । सा च किसलयादिरूपेणाक्षरकथनम् । तथाहि—'' अहिफणकजचक्राणि टंकारासिप्रभञ्जनान् । मुखोर्द्ध्वरोमसंस्पर्शकेशस्पर्शौ क्रमेण च ॥ अकचटतपयशा इति वर्गाष्टकस्य च । एतानि कुर्यान्मतिमान्सामितौ बोधनाय वै ॥ अंगुल्या निर्दिशेद्वर्णे मात्राः स्फोटिकया तथा । एतद्रामेण निर्दिष्टं लक्ष्मणाय वने सता । नासाकर्णौ शूर्पणख्याश्छेत्तुं बोधाय चेष्टया ॥ '' । अस्यार्थः—कजं कमलम् । टंकारो दुंदुभिवादनानुकरणम् । असिपदेन खड्गप्रहारानुकरणम् । प्रभञ्जनो वातकरणानुकरणम् । स्पष्टमन्यत् । यदा ' रामं नौमि ' इति कथनेच्छा स्यात्तदा मुखोर्द्ध्वरोमाणि स्पृष्ट्वांगुलिद्वयमुत्थाप्य स्फोटिकाद्वयं कुर्यादेतेन ' रा ' इति सिद्धम् । ततो ' मं ' सिद्ध्यर्थं हस्तेन पवनं कृत्वांगुलिपञ्चकमुत्थाप्यैकादश स्फोटिकाः कुर्यात् । ततो ' नौ ' सिद्ध्ये खड्गप्रहारं हस्तेनानुकार्यांगुलिपञ्चकमुत्थाप्य स्फोटिकात्रयं कुर्यादित्येषा रीतिः सर्वत्र बोध्या । एवम् ' कृष्णोऽस्ति ' इति बोधनार्थमादौ कमलं कृत्वा तत एकांगुलिमुत्थाप्य तां वक्रां कुर्यादकारसिद्ध्ये स्फोटिका न कार्या, तेन ' कृ ' इति सिद्धम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः केशं स्पृष्ट्वांगुलिद्वयमुत्थाप्य दुंदुभिवादनानुकरणं कृत्वांगुलिपञ्चकमुत्थाप्य पुनरंगुलिद्वयं संयोज्य नव स्फोटिकाः कुर्यात्तेन ‘ ष्णो ’ इति जातम् । ततः केशान्स्पृष्ट्वांगुलित्रयमुत्थाप्य पुनरंगुलिद्वयं संयोज्य स्फोटिकात्रयं कुर्यात्तेन ‘स्ति’ इति । सर्वसंयोजनात्कृष्णोऽस्तीति जायते । किञ्च–‘क्रू’ कथनार्थमादौ कमलं कृत्वैकांगुलिमुत्थाप्य ततो मुखोर्द्ध्वरोमाणि स्पृष्ट्वांगुलिद्वयमुत्थाप्यांगुलिद्वयसंयोगं कृत्वा षट्स्फोटिकाः कुर्यात् । ‘ क्ष ’ कथनेऽपि कमलं कृत्वा केशान्स्पृष्ट्वांगुलिद्वयं संयोज्यैकां स्फोटिकां कुर्यात् । ‘ ष्नि ’ कथनार्थं मुखरोमाणि स्पृष्ट्वांगुलिद्वयमुत्थाप्यासिचेष्टां कृत्वांगुलित्रयमुत्थाप्य पुनरासिचेष्टां कृत्वांगुलिचतुष्कमुत्थाप्य पुनरसिचेष्टां कृत्वांगुलिपञ्चकमुत्थाप्यांगुलिचतुष्टययोगं विधाय स्फोटिकात्रयं कुर्यादित्येवं संयुक्ताक्षरेऽक्षरपौर्वापर्यापेक्षयाक्षरसंयोगसमांगुलियोगेनांते मात्रासमाः स्फोटिकाः कार्या इति ४४ ॥ म्लेच्छितविकल्पाः–यत्साधुशब्दोपनिबद्धमप्यक्षरविन्यासादस्पष्टार्थं, तस्य भेदा ज्वलनागंतुकश्रृंगादयः । यथा–‘ साहेऽव शलाम् ’ इति । इहाहिना शेषेण सह वर्तते इति साहिर्विष्णू रुद्रो वा, तत्संबुद्धौ हे साहे । शं मोक्षलक्षणं कल्याणं लाति ददातीति शला ब्रह्मविद्या ताम् । अव रक्ष देहि वा । भारतेपि विदुरेणोपदिष्टा लाक्षामंदिरप्रवेशसमये । भेदाश्चास्य ग्रन्थांतरगम्याः ४५ ॥ देशभाषाज्ञानम्–अप्रकाशवस्तुज्ञापनार्थं तत्तद्देशीयैर्व्यवहारार्थं च ४६ ॥ पुष्पशकटिकानिमित्तज्ञानम्–पुष्पाणि निमित्तीकृत्य शुभाशुभादेशपरिज्ञानम् । पुष्पसंख्यावर्णाभ्यां शुभाशुभकथनम् । तच्च शकुनशास्त्रादवसेयम् । निमित्तज्ञानम्–आगतस्य भाषणादिना तदागमनकार्यज्ञानम् । भवदीयं तत्क्रमतिमिष्टामित्युक्ते तत्कार्थमागतोऽयमित्येवंरूप तया ज्ञानमिति सामान्येनोक्तम् ४७ ॥ यन्त्रमातृका–सजीवानां निर्जीवानां च यन्त्राणां संग्रामार्थं वटनाशास्त्रं विश्वकर्मप्रोक्तम् । सजीवयन्त्राणि तु जीववदुत्प्लुत्योत्प्लुत्य नाशहेतूनि । तानि च धनुर्वेदे प्रसिद्धानि ४८ ॥ धारणमातृका–श्रुतग्रन्थस्य धारणार्थं शास्त्रम् । यथोक्तम्–“ वस्तु कोशस्तथा द्रव्यं लक्षणं केतुरेव च । इत्येते धारणादेशाः पञ्चांगरुचिरं वपुः ॥ ” इति । वस्तुपदेन वस्तूनां स्वरूपबोधकं शास्त्रम् । निघंट्वादिकोशः प्रसिद्धः । द्रव्यस्य तल्लक्षणस्य च बोधकं शास्त्रं तर्कादि । केतुपदं तत्तच्चिह्नपरम्, व्याकरणं पुंह्यादिबोधकम् ४९ ॥ संपाद्य (वाच्य) म्–तत्रैकः पूर्वधारितं ग्रंथं पठति, अपरोऽश्रुतपूर्वं तेन सह तथैव पठति । केचित्तु संपाटयमिति पठित्वाऽभेदस्यापि वज्रादेर्द्वैधाकरणामित्याचक्षते ५० ॥ मानसी–मनःसंभवा चिन्ता । तत्र कश्चिद्व्यञ्जनाकारैः पद्माद्याकृतिभिर्यथास्थितानुस्वारविसर्गयुक्तैरनुक्तार्थं श्लोकं लिखत्यन्यस्तथैव पठतीति दृश्यविषया। यदा तु तथैव यथाक्रममाख्यातानि श्रुत्वाऽपूर्ववदुन्नीय पठति तदादृष्टविषया, सा चाकाशमानसी । तदुभयं क्रीडार्थं वादार्थञ्च । तदुक्तं विदग्धमुखमंडने–“मानसी नाभसीत्याद्या बुद्ध्यादौ न्यासितापि या । बाहुल्येन प्रयोगात्तु नेह तासां प्रदर्शनम् ॥” इति । आदिपदान्मूर्ता-त्रिचित्रा-वाचिकी-प्रातिलोमिकी-मौलदेवी-धारा-पल्लवी-साभिनयालंकारादयः संवेद्याः । “ह्ि◌ ◌ ◌ ◌ ू व ◌ ◌ ं ि ◌ ं ि वे: ु ु ु ◌ वी ◌ ि ◌ ि ◌ः । । ◌ ु ◌ ◌ ◌ ि ु ुॢ व ु ◌ ◌ ◌ ◌ वी ◌ ◌ वे ◌ ◌ ◌ ं ुः ॥” इयमेव बिन्दुमतीत्युच्यते–“स्वरेषु बिन्दुयुक्तेषु हलां यदत्रबोधनम् । तद्बिन्दुमदिति प्राहुः केचिद्बिन्दुमतीमिति ॥” । “त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वतीदयितः । अयमुदयति घुसृणारुणरमणीवदनोपमश्चन्द्रः ॥” । इत्यस्योदाहरणं स्वरबिन्द्वादि पूर्वोक्तम् । यद्वा–पत्रादिचित्ररूपा सा “वर्णद्वयेन चैकैकदलभूतदलाष्टकम् । सर्वोत्तराद्यवर्णेन पद्मं स्यात्कृतकर्णिकम् ॥” । उदाहरणम्–“अलयोऽपश्यदरयोऽररेऽवंद्योऽहस्तोऽगजोऽहीनः” एवमन्येऽपि बहवो भेदाः सन्तीति ५१ ॥ काव्यक्रिया–संस्कृतप्राकृताऽपभ्रंशकाव्यकरणम्, चित्रकाव्यकरणम् । तदुक्तम्–“भाषाभिश्चित्रितं यत्स्यात्संस्कृतप्राकृतादिभिः । संतश्चित्रं तदिच्छन्ति संशुद्धं त्वेकभाषया ॥” इति । उदाहरणं संस्कृतप्राकृतयोः–“किं न स्यात्कीदृक्षं महतोऽपि हि तादृशस्य जलराशेः । दिनमणिकिरणासिफंसणपडिबद्धं लोहि किं गोसे (१) ”। कमलवणं महतोऽपि समुद्रस्य किं कीदृशं न स्यात् । कं जलमलवणमक्षारं न स्यात् । दिनमणेः किरणानां स्पर्शेन प्रतिबुद्धं भवति किं प्रभाते कमलानां वनम् । एवमन्यदपि साहित्यशास्त्रतोऽवसेयम् । संस्कृतापभ्रंशमुदाहरति–“किं सुखमाहुः प्रायः केशविकारं च का हरेर्दयिता । भा कस्मिन्निशि किं भृशवाक्कोलुच्च इवीलपुलसाणम् (१) ” । को रोचते वीरपुरुषाणामिति चतुर्थः प्रश्नः । ‘शमलकम्मालं भे’ शं सुखम्, अलकं चूर्णकुंतलम्, मा लक्ष्मीः, अलमत्यर्थम्, भे नक्षत्रे, समरकर्मारंभे इत्यलमतिप्रसंगेन ५२ ॥ अभिधानकोशः–उत्पलमालादि । आदिना विश्व-हैम-शब्दार्णवो-ज्ज्वला-जय-धनंजय-संसारावर्त-नाममाला-यादव-शाश्वत-धरणि-हलायुध-वररुचि-व्याडय-मर-भागुरि-बोपालित-रांतिदेव-हर-केशव-शुभांक-गोवर्धन-रभश-रुद्रदत्त-गंगाधर-हारावली-त्रिकांड-रत्नमाला सौभरि-वाग्भट-माधव-वाचस्पति-धर्म-तारपाल-विक्रम-वामन-कात्यायन-चंद्र-गोमि-पाणिन्यनेकार्थध्वनिमञ्जर्यनेकार्थादीनां ग्रहः ५३ ॥ छंदोज्ञानम्–पिंगलादिप्रणीतच्छंदसो ज्ञानम् ।



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छंदश्च मात्रावर्णभेदेन द्विधा । मात्राछंदांस्यार्यादीनि । वर्णच्छंदांसि तु श्यादीनि । तेषां प्रस्तारोद्दिष्टनष्टैकद्व्यादिलगाक्रियापथिमार्गयोगमेरुमर्कटीसूचीपताक्यादिभिः प्रत्ययैर्यथार्थज्ञानं भवतीति ९४ ॥ क्रियाकल्पः—काव्यकरण विधिः । स च—"साधुशब्दार्थसंदर्भं गुणालंकारभूषितम् । स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥" इति वाग्भट उक्तः । साधू निर्दोषौ सालंकारौ यौ शब्दार्थौ तयोः संदर्भो गुंफनं यत्र तत् । गुणैरौदार्यादिभिरलंकारैश्चित्रोप पमादिभिर्भूषितम् । स्फुटा रीतयः पाञ्चालीगौड्यार्भटयादयः,रसाश्च शृंगारादयस्तैरुपेतम् । कीर्तय इत्युपलक्षणम् "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥" इति काव्य प्रकाशोक्तार्थानाम् । तत्कारणञ्च प्रतिभाव्युत्पत्त्यभ्यासाः । नवनवार्थोन्मेषशालिनी बुद्धिः प्रतिभा, व्युत्पत्तिर्गुरूपदेशपूर्वकसर्वशास्त्रज्ञानम्, अभ्यासोऽनारतं काव्यरचनादरः।एवमन्येपि मनःप्रसत्त्यादयः काव्यहेतवस्तच्छास्त्रतोऽवसेयाः। यद्वा—क्रियाणां यज्ञादीनां कल्पो बौधायनादिपद्धतिग्रंथज्ञानम् । वा—क्रियाणां स्वर्णकारादिकर्मणां कल्पो ज्ञानम् । तेन भूषणभाजनहर्म्यादिसर्वक्रियाकरणं बोध्यम्९५॥ छलितकयोगाः—"तद्रूपमन्यरूपेण संप्रकाश्य हि वञ्चनम् । देवेतरप्रयोगाभ्यां ज्ञेयं तच्छलितं तथा ॥" । वञ्चनार्थं देवादिबहुरूपधारणोपाया इत्यर्थः ९६ ॥ वस्त्रगोपनानि—वस्त्रेणाप्रकाश्यदेशसंवरणम् । यथा तद्रूपं मानमपि तस्मान्नापैति, त्रुटितस्यात्रुटितस्येव परिधानं महतो वस्त्रस्य संवरणादिनाऽल्पीकरणं च गोपनानि । सूत्रादिमयानां कौशेयादिरूपतया प्रदर्शनं वा ९७ ॥ द्यूतविशेषाः—निर्जीवसजीवादिभेदेन बहवो द्यूतभेदाः । सपणं सजीवं, तद्धीनं निर्जीवम् । चतुरंकादिरूपमेत न्निर्जीवविधानम् ९८॥ आकर्षक्रीडा—दूरस्थक्रीडकान्याकृष्य यत्र क्रीडा काष्ठपुत्तलिकाचालनरूपा । यद्वाऽऽकाशे दीर्घडोरकया प्रेषितस्य शणपत्रादिनिर्मितयंत्रस्याकर्षणादिना क्रीडा, पाशकक्रीडा वा । दुर्विज्ञेयतया पुनर्वचनं सजीवद्यूतविधानं वा ।पाशके चतुरंके सति द्रव्यं दशधा विभज्य लापयेत् । एकांकपाते एकं जेता गृह्णीयात्, द्व्यंके त्र्यंशान्, त्र्यंके षडंशान्, चतुरंके पतिते दश भागानेव पूर्वांकयोजनया गृह्णीयादिति द्यूतविदां स्थितिः ९९ ॥ बालक्रीडनकानि—बालानां कंदुकवीटापुत्रिकादिभिः क्रीडनानि । तानि च देशकालभेदादनंतानि ६० ॥ वैनायिकी—हस्त्यादिशिक्षा । आदिना वाजिग्रहः ६१ ॥ वैजयिकी—विजयप्रयो जना दैव्यपराजितादिः, मानुषी सांग्रामिकी शस्त्रविद्या ६२ ॥ व्यायामिकी—व्यायामप्रयोजना मृगयादिः । एतास्तिस्र आत्मोत्कर्षरक्षणाजीव्यार्थाः ६३ ॥ इत्येताश्चतुःषष्टिकला व्याख्याताः । उत्सादनात्केशमार्ज नस्य पृथग्गणने संख्यापूर्तिः ६४॥ "कला स्यान्मूल्यवृद्धौ शैल्यादावंशमात्रके । षोडशांशे च चंद्रस्य कलना कालमानयोः ॥ भूमौ भक्त्यां कृपायां च कादंबिन्यामथो कला ॥" इति मेदिनीनिरुक्तिः । गुरु दक्षिणाया आवश्यकत्वमाह—" याजने हि ददतं वै ते तमयाजयंस्तस्माद्ददद्याज्यः, प्रतिगृह्णंतो वै ते तमयाजयंस्तस्मात्प्रतिगृह्णता याज्यमुभये राध्नुवंति " इति श्रूयते । तद्वदध्यापनेऽपि—"याजने प्रतिग्रहवज्जीविकारूपे दद देवाऽध्याप्यः । प्रतिगृह्णतैवाध्याप्यम् " इति धर्मः । अत्र भारतस्मृतिमप्याह—"यश्चाधर्मेण वै ब्रूयाद्यश्चाधर्मेण पृच्छति । तयोरन्यतरः प्रैति विद्वेषं चाधिगच्छति ॥ " इति । अस्यार्थः—यो दक्षिणाया अग्रहणेना धर्मेण ब्रूयादध्यापयेत् । यश्चाधर्मेण तस्या असमर्पणेन पृच्छत्यधीते अन्यतरोऽदाताऽप्रतिग्रहीता वा प्रैति म्रियते । विद्वेषं चान्यतरोऽदानादप्रतिग्रहाद्वाऽधिगच्छति । मद्दत्तदक्षिणाया अग्रहे तवाधर्मः स्यान्मम च त्वयि द्वेषः स्यादहमनेन कृतार्थो न कृत इति भावः ॥ * ॥ ततश्च कौतुकविशेषार्थं कला अप्युपदिदेशेत्याह—अहोरात्रैरिति । यावतीः कलाः सञ्जगृहतुरिति—चतुःषष्टिकलासंग्रहे एतावंत्यहोरात्राणि । एवमखिलवेदादिसंग्रहणे ऽप्यहोरात्राणि ज्ञेयानि । कलानां नामानि तु तैरेवं लिखितानि । केचित्तु कलाः कल्पसंहितोक्ताः सुधियामेव प्रत्येकमहोरात्रशिक्षणार्हाः क्षुद्रसिद्धिरूपाः परचित्ताद्यभिज्ञतादूरश्रवणदर्शनचिंतारत्नामृतविशेषनिर्माणाद्या अन्या एवाहुः । यद्वा—तत्सर्वं कलाश्चाहोरात्रचतुःषष्ट्या संजगृहतुरित्यन्वयः । तथा च विष्णुपुराणे—" सरहस्यं धनुर्वेदं ससंग्रहमधीयताम् । अहोरात्रचतुःषष्ट्या तदद्भुतमभूद्द्विज ॥ " इति । श्रीहरिवंशे च—" तौ च श्रुतिधरौ वीरौ यथावत्प्रतिपद्यताम् । अहोरात्रैश्चतुःषष्ट्या सांगवेदमधीयताम् ॥ " इति । छंदयामासतुः काममप्यभीप्सितां दक्षिणां गृह्णात्वित्युक्त्वा तत्प्रातीच्छां कारयामासतुरित्यर्थः । ' अभिप्रायवशौ छंदौ ' इत्यमरः ॥ ३६ ॥

१ श्रीधरस्वामिभिरेवेति तात्पर्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजस्तयोस्तं महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिम् ॥ संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ह ॥ ३७ ॥ तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरंतविक्रमौ ॥ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वाऽर्हणमाहरत्तयोः ॥ ३८ ॥ तमाह भगवानाशु गुरुपुत्रः प्रदीयताम् ॥ योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा ॥ ३९ ॥ समुद्र उवाच ॥ नैवाहार्षमहं देव दैत्यः पंचजनो महान् ॥ अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः ॥ ४० ॥ आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः ॥ जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकम् ॥ ४१ ॥ तदंगप्रभवं शंखमादाय रथमागमत् ॥ ततः संयमनीं नाम यमस्य दयितां पुरीम् ॥ ४२ ॥ गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ॥ शंखनिर्ह्रादमकर्ण्य प्रजासंयमनो यमः ॥ ४३ ॥

प्रभासे क्षेत्रे महार्णवे मृतं बालं वरयामास ॥ ३७ ॥ ईश्वराविति विदित्वा समुद्रस्तयोरर्हणमाजहार ॥ ३८ ॥ ३९ ॥ पंचजनस्त्वसुरोऽहार्षीत् स च महान्ममासाध्य इत्यर्थः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

तयोः रामकृष्णयोः । अतिमानुषीं मनुष्यदेहे असंभवाम् । स सांदीपनिः ॥ * ॥ प्रभासे मृतं, तीर्थयात्रायां पितृभ्यां सह तत्र महाशिवक्षेत्रे गतस्य तत्र बालतया जले क्रीडतः शंखासुरेण ग्रसनादिति ज्ञेयम् ॥ ३७ ॥ गुरूक्तिं तथेत्यंगीकृत्य । अथांगीकारोत्तरम् । महान्तौ लोकापेक्षयाऽलौकिकौ पूज्यौ रथौ ययोस्तौ, न तु योधमहारथावनंतबलत्वेन तत्त्वासंभवात् । वेलां सिंधुतीरम् "वेला काले च सीमायामब्धेः कूलविकारयोः । अक्लिष्टमरणे रागे ईश्वरस्य च भोजने ॥" इति मेदिनी । तयोः रामकृष्णयोः । विदित्वा पूर्वावतारीयपुरुषार्थस्मरणेन तावेताविति ज्ञात्वा ॥ * ॥ महारथौ वीरप्रवरौ, अनेन सर्वायुधसाहित्यादिकमुक्तम् । दुरन्तविक्रमावनन्तपराक्रमौ । वेलां समुद्रतीरम् । निषेदतुरुपविष्टौ । 'निषीदतुः' इति पाठस्त्वार्षः । अर्हणममूल्यरत्नादिकम् ॥ ३८ ॥ तमब्धिम् । यो गुरुपुत्रः, असौ प्रदीयतामिति ॥ * ॥ भगवानित्यैश्वर्यं प्रदर्शयन्नित्यर्थः । असौ प्रकर्षेणाऽविकृतशरीरत्वादिना दीयतां देहवत्त्वात्तथाशक्तेरिति भावः । इह प्रभासे ॥ ३९ ॥ शङ्खाकारमत्स्यरूपधरः ॥ * ॥ समुद्र उवाचेति क्वचिदस्ति क्वचित्तु न, टीकाकृद्भिस्तद्वाक्यत्वेन न स्पष्टीकृतः । न चेत्यर्धकं क्वचिन्नास्ति । देव हे क्रीडापरेति, तत्सर्वं जानन्नपि यदेवमाज्ञापयति सेयमेका तत्र क्रीडेति भावः । अत्र दैत्य इत्यस्यैवासुर इति टीका । अंतारित्यर्धकम्, आस्त इति शेषः । "आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः" इत्यर्धकं क्वचिदस्ति । एतदभावे तूत्तरत्र 'प्रभुः' इत्यध्याहार्यम् । कृष्णेति—सर्वाकर्षकशक्तेस्तव तस्य निग्रहो न दुष्कर इति भावः ॥ ४० ॥ तं पञ्चजनम् ॥ * ॥ जलमिति श्रीशुकोक्तिः । सक्षोभमन्तः प्रविश्य अर्भकं तदस्थीन्यपीत्यर्थः । तदन्वेषणं च यद्यप्यस्थीन्यपि प्राप्स्यामि तदपि गुरुप्रसादेन जीवयिष्यामीति समुद्रं प्रति लौकिकलीलाव्यञ्जनार्थम् । एकवचनादेकाक्येव श्रीकृष्णः प्रविष्ट इति ज्ञेयम् । तथा च विष्णुपुराणे—"इत्युक्तेन्तर्जलं गत्वा हत्वा पञ्चजनं तु तम् । कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥" इति । तच्च रथरक्षार्थं बलदेवस्य तीरे स्थापनात् ॥ ४१ ॥ तस्य पञ्चजनस्य । अंगप्रभवं शरीरसम्भूतम् । ततो दैत्यहननोत्तरम् ॥ * ॥ तदंगप्रभवमिति—तत्त्वतो विप्रशापापेक्षया नित्यपार्षदेन शङ्खेन दैत्यस्यानुकरणात्, जयविजयवत् । अत एवेच्छया श्रीकृष्णहस्ते तु वाद्ययोग्यसूक्ष्माकारोऽप्यभवदिति ज्ञेयम् । अवन्तीखंडमते तु—" ततः पञ्चजनं हत्वा ग्राहरूपं महासुरम् । तन्मध्यस्थं स जग्राह शंखं ग्रस्तं हि यत्पुरा ॥ तस्योदरे यदा बालं नाप्तवाँस्तं जनार्दनः । यमालयगतं मत्वा तदा वरुणमब्रवीत् ॥ भगवन्यादसामीश रथो मे दीयतां महान् । येनाहं विहितात्मा हि पश्येयं संगरे यमम् ॥ पुराजिरे हता दैत्या दानवा बलगर्विताः । त्वया येन रथेनाद्य मह्यं स दीयतां रथः ॥ " इत्यादि । दीयतामिति तत्र निवासनिश्चयात् ॥ ४२ ॥ प्रजाः संयच्छति नियच्छतीति प्रजासंयमनः ॥ * ॥ जना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहिताम् ॥ उवाचावनतः कृष्णं सर्वभूताशयालयम् ॥ लीलामनुष्य हे विष्णो युवयोः करवाम किम् ॥ ४४ ॥ श्रीभगवानुवाच ॥ गुरुपुत्रमिहानीतं निजकर्मनिबंधनम् ॥ आनयस्व महाराज मच्छासनपुरस्कृतः ॥ ४५ ॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ ॥ दत्त्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ॥ ४६ ॥

सपर्यां पूजाम् । सर्वेषां भूतानामाशया अंतःकरणानि तान्यालयो निवासो यस्य तम् ॥ ४४ ॥ निजं कर्मैव निबंधनं नितरां बंधनं यस्य तथाभूतमपि मदाज्ञापुरस्कारेणानयतस्ते न दोष इत्यर्थः ॥ ४५ ॥ ४६ ॥

र्दनः सर्वनिजजनाभीष्टपूरकः । अत एव हलायुधेनापि सह, एतन्नाम्ना तस्य हलप्रकटनमपि तदा ज्ञेयम् । शंखप्रध्मानानंतरम् अवंतीखण्डे त्वेवम्—"तेन शब्देन वित्रस्ताः कृतान्तालयवासिनः । नरकान्तर्गता मर्त्याः पापाचारपरायणाः ॥ सुखमापुः प्रशान्ताश्च बहवः कृष्णदर्शनात् । शस्त्राणि कुण्ठतां प्रापुर्यंत्राणि विविधानि च ॥ विदीर्णानि तदा व्यास वासुदेवस्य दर्शनात् । असिपत्रवनं नाम शीर्णपत्रमजायत ॥ रौरवं नाम नरकमरौरवमभूत्तदा । अभैरवं भैरवाख्यं कुम्भीपाकमपाचकम् ॥ शृंगाटकमशृंगाटं लोहसूच्यप्यसूचिताम् । जगाम जगतामीशे प्राप्ते तत्र जनार्दने ॥ हस्तमात्रतरा जाता तदा वैतरणी नृणाम् । नारकास्ते तदा याते तत्र विश्वेश्वरे विभौ ॥ पापक्षयात्तदा सर्वे विमुक्ता नारका नराः । पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोऽपहम् ॥ विमानायुतसाहस्रैरारूढास्ते समंततः । समीक्ष्य पुंडरीकाक्षं मुक्तास्ते सर्वपातकात् ॥ ततः शून्यं मुने यातं सर्वं निरयमंडलम् । दर्शनात्तस्य देवस्य विष्णोर्विश्वस्वरूपिणः ॥" इति । प्रजासंयमन इति भयङ्करत्वमुक्तम् । तथाऽत्र युद्धं च सूचितं, श्रीविष्णुपुराणे—'जित्वा वैवस्वतं यमम्' इत्युक्तेः । अवन्तीखण्डे बहुशो वर्णितमेतत् ॥ ४३ ॥ तयोः रामकृष्णयोः । अवनतोऽतिनम्रः ॥ * ॥ सर्वेति—तस्य तत्र निष्कपटतामपि जानंतमित्यर्थः । विष्णोर्व्यापकत्वेन विश्वप्रभो इत्यात्मनस्तत्सेवकत्वं सूचितम् । लीलाप्रधानमनुष्याकारयोः 'लीलामनुष्य हे' इति क्वचित्पाठः । किन्तु 'लीलामनुष्ययोर्विष्ण्वोः' इति पाठः स्वामिसंमतो लक्ष्यते एकसंबोधनस्याग्रह एव वक्सेत्यत्र करिष्यमाणसमाधानत्वात् । किं करवाम आज्ञापयेति शेषः ॥ ॥ ४४ ॥ इत्यर्थ इति । अपराधिनो विनापराधसमयातनाभोगत्यागे यद्यप्यधिकारिणस्तव दोषस्तथापि परनियंतुर्ममाज्ञयाऽकर्तव्यमपि कर्तव्यमेवेति भावः ॥ * ॥ निजकर्म प्रारब्धाख्यं निबंधनमवश्यभोग्यं यस्य तथाभूतमपि । हे महाराजेति तदत्यंताभिक्रममभिप्रेत्य कृपया तत्प्रोत्साहनाय सादरं संबोधनम् । तदाज्ञानुवर्ती सन् । अयं भावः—प्रारब्धस्यावश्यकत्वमपि मदाज्ञयैव, अधुना च गुरुपुत्रानयनं मदाज्ञयैव किन्तु विशिष्य साक्षान्मया क्रियमाणत्वादियमेव बलवती,यथा यावदायुः कारावासायाज्ञप्तः कश्चिन्नृपेण, स यदि तं पक्षसमाप्तौ मोक्तुमिच्छेत्तदा पूर्वाज्ञां बाधित्वा तं मुञ्चत्येवेति तद्वदत्रापि ज्ञेयम्।मच्छासनपुरस्कृत इत्यत्र मदाज्ञया तमानयतस्तव को दोष इति **विश्वनाथः** ॥४५॥ तेन यमराजेन । तं गुरुम् । भूयो वृणीष्व पुनराज्ञापय ॥ * ॥ तथेत्युक्त्वा यमेन तेनोप समीप आनीतम् । गुरुपुत्रमिति यादृशो मृतस्तादृशतच्छरीरकमेवेत्यर्थः । अवन्ती खण्डे तु—"तच्छ्रुत्वा धर्मराजस्तु पुत्रं सांदीपिनेस्तदा । ससर्ज बालरूपं च तद्वन्मानं तदुद्भवम् । पश्यतां सर्वदेवानां तदद्भुतमिवाभवत् ॥" इत्युक्तम्।तच्च कृष्णप्रभावैरेव ज्ञेयम्।मच्छासनपुरस्कृत इत्यनेनैव क्रोडीकृतत्वात् ।यतो वक्ष्यते एकादशे—"मर्त्येन यो गुरुसुतं यमलोकनीतं त्वाञ्चानयच्छरणदः परमास्त्रदग्धम्" इति।तत्र तेनैव शरीरेणेति तट्टीका च।अतस्तत्प्रभाव एव विवक्षित इति । तथा च श्रीविष्णुपुराणे—" तं पाञ्चजन्यमापूर्य गत्वा यमपुरीं हरिः।बलदेवश्च बलवाञ्जित्वा वैवस्वतं यमम्॥ तं बालं यातनासंस्थं यथापूर्वं शरीरिणम् । पित्रे प्रदत्तवान्कृष्णो बलश्च बलिनां वरः॥" इति। अत्र यातनासंस्थमिति प्राचीनावस्थोक्ता,—सर्वेषां यातनाशान्तेः।अस्य वैकुंठगमनं तु भगवदिच्छया। अथ समुद्राहृतं रत्नादिकं तस्मै दत्तमिति च ज्ञेयम् । तथा च श्रीहरिवंशे—"तदा सांदीपिनेः पुत्रं तद्रूपवयसं तदा । प्रादात्कृष्णः प्रतीतात्मा सह रत्नैरुदारधीः ॥" इति । स्वशब्देन गुरौ महाभक्तिर्बोध्यते । अतः परामपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरुरुवाच ॥ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः ॥ को नु युष्मद्विधगुरोः कामानामवशिष्यते ॥ ४७ ॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ॥ छंदांस्ययातयामानि भवंत्विह परत्र च॥४८॥गुरुणैवमनुज्ञातौ रथेनानिलरंहसा॥आयातौ स्वपुरं तात पर्जन्यनिनदेन वै॥४९॥समनंदन्प्रजाः सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यंत्यो बह्वहानि नष्टलब्धधना इव ॥५०॥ इति श्रीभा० म० द० पू० गुरुपुत्रानयनं नाम पंचचत्वारिंशोऽध्यायः॥४५॥

वत्सेति प्राधान्येनैकस्य संबोधनम् । गुरोर्निष्क्रयो गुरुदक्षिणा । युष्मद्विधयोः शिष्ययोर्गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोऽपीति । पत्न्यभीप्सितया दत्तया पुत्रदानलक्षणया दक्षिणयैवालमित्यर्थः ॥ ४७ ॥ हे वीरौ ॥ ४८ ॥ अनिलवद्रंहो वेगो यस्य तेन । पर्जन्यो मेघस्तद्वन्निनदो यस्य तेन ॥ ४९ ॥ नष्टमदृष्टं तत्पुनर्लब्धं धनं याभिस्ता इवेति ॥५०॥ इति श्रीभा० म० दशमस्कंधे पूर्वार्धे टीकायां पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥

दक्षिणां वृणीष्वेति भूयः पुनरूचतुस्तच्च युक्तमेवेत्याशयेनाह–यदूत्तमाविति।तादृशधर्मप्रचारार्थं यदुकुलेऽवतीर्णत्वादिति भावः॥४६॥ ''निष्क्रिया प्रतिकारे स्यात्क्रियाऽभावे स्त्रियाम्'' इति धरणिः । ईश्वरानुचराणां सर्वकामाप्तिर्भवति कथं न तद्गुरोरिति भावः ॥ * ॥ वत्सेति स्नेहविशेषात्कृष्णं प्रति संबोधनम् । युष्मद्विधानामपि किमुत युवयोरित्यर्थः ॥ ४७ ॥ वीरौ सुभटौ । वां युवयोः । ''अयातयामः सफले प्रहारादर्वाक्कर्मणि'' इति धरणिः । इह साफल्यमध्यापनादिना परत्र तदुक्ताचरणेनोत्तमफलदत्वादित्यर्थः । अत्रार्थे मानम्–''यो वा अविदितार्षे यच्छंदोदैवतविनियोगेन ब्राह्मणो न मंत्रेण वा यजते याजयति अध्यापयति वा स्थाणुं गच्छति श्वभ्रं वा वार्च्छेत्प्रमीयते पापीयान्भवति यातयामान्यस्य छंदांसि भवन्ति । अथ मंत्रेमंत्रे वेद सर्वमायुरेति अयातयामान्यस्य छंदांसि भवन्ति । तस्मान्मंत्रेमंत्रे विद्यात्'' इति श्रुतेरेवार्थो यजुर्वेददीपे कात्यायनेन धृतः । तथाह–''द्रष्टार ऋषयः स्मर्तारः परमेष्ठ्यादयो देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वा छंदांसि गायत्र्यादीनि एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजयति वा तस्य ब्रह्म निर्वीर्यं यातयामं भवत्यन्तराशु गर्तं वा पद्यते स्थाणुं वार्च्छति प्रमीयते वा पापीयान्भवति'' इति ॥ * ॥ स्वगृह इति–यद्यप्येतन्मद्गृहमपि युवयोरेव गृहं तथापि तत्र केवलनिजाभिमानात् स्वीये माथुरे गृहे इत्यर्थः । 'स्वगृहम्' इति पाठः क्वचित् । हे वीराविति–तादृशदानशौर्यदयासु वीरत्वात्त्रिविधवीरतायुक्तौ युवामिति भावः । तत्र तदादीन्प्रणम्य गच्छन्तावाशिषाभिनंदयति–कीर्तीरिति ॥ ४८ ॥ एवमाशीःप्रदानपूर्वकम् । तातेति कृष्णलीलाकर्णनाविष्टत्वेन प्रियत्वद्योतनाय राज्ञ आमंत्रणम् 'नित्यं विष्णुजनप्रियः' इत्युक्तत्वात् । ''तातस्तु प्रियपित्रोः स्याद्विस्तृते चात्मजे गुरौ'' इति धरणिः ॥ * ॥ 'स्वगुरुणा' इति पाठोऽपि क्वचित् । स्वपुरमिति तत्र ममतास्नेहो दर्शितः । अत एवानिलरंहसेति शीघ्रगमनम् । अनिलरंहस्त्वादेव पर्जन्यो गर्जन्मेघस्तद्वन्निनदो यस्य तेन । अतो विदूरादेव । तच्छब्दश्रवणेन सर्वे तदभिमुखं जग्मुरिति ज्ञेयम् । हे तातेति प्रहर्षात् ॥ ४९ ॥ बह्वहानि बहूनि दिनानि ॥ * ॥ सर्वाः पौर्य्यः जानपदाश्च । तत्र जानपदाः काश्चित्पथि दृष्ट्वा काश्चिच्च पुर्यामागताः सत्य इति ज्ञेयम् । तद्विशेषश्च श्रीहरिवंशे–''ततः प्रत्युत्थिताः सर्वे यादवा यदुनंदनौ । सबलौ हृष्टमनस उग्रसेनपुरोगमाः ॥ श्रेण्यः प्रकृतयश्चैव मंत्रिणः सपुरोहिताः । सबालवृद्धा सा चैव पुरी समभिवर्तत ॥ नंदितूर्याण्यवाद्यंत तुष्टुवुश्च जनार्दनम् । रथाः पताका नालिन्यो राजन्ते स्म समंततः ॥ प्रहृष्टमुदितं सर्वमन्तःपुरमशोभत । गोविंदागमनेऽत्यर्थं यथैवेन्द्रमखे तथा ॥ मुदिताश्चाप्यगायन्त राजमार्गेषु गायनाः । जयाशीःप्रथिता गाथा यादवानां प्रियंकराः ॥ गोविन्दरामौ संप्राप्तौ भ्रातरौ लोकविश्रुतौ । स्वे पुरे निर्भयाः सर्वे क्रीडन्ति सह बांधवैः ॥ न यत्र कश्चिद्दीनो वा मलिनो वा विचेतनः । मथुरायामभूद्राजन्गोविन्दे समुपस्थिते । वयांसि साधुवाक्यानि प्रहृष्टा गोहयद्विपाः । नरनारीगणाः सर्वे भेजिरे मनसः सुखम् ॥

१ 'निष्क्रियः' इति पाठाभिप्रायेण । २ अडभाव आर्षः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥

षट्चत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा ॥ यशोदानन्दयोश्चक्रे कृष्णः शोकापनोदनम् ॥ १ ॥ कामचारं द्विजातिः सन्परित्यज्यातिसंयतः ॥ गुरोर्ज्ञानमनुप्राप्य सख्या गोपीरुपादिशत् ॥ २ ॥ गोपीनां सांत्वनमपि रहस्यं सन्मंत्रिसाध्यमिति तदर्थमुद्धवं विशिनष्टि ।वृष्णीनामिति । बुद्धिसत्तमो बुद्ध्याऽतिश्रेष्ठः ॥ १ ॥

शिवाश्च वाताः प्रववुर्विरजस्का दिशो दश । दैतैयानि[1] प्रहृष्टानि सर्वेष्वायतनेषु च ॥ यानि लिंगानि लोकस्य बभुः कृतयुगे पुरा ॥ तानि सर्वाण्यदृश्यन्त पुरीं प्राप्ते जनार्दने ॥" इति ॥ ९० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ तद्गिरा उद्धववाचा (१) । कामचारं यथेच्छाचरणम् । द्विजातिः कृतोपनयनः । अतिसंयतः जितेंद्रियः । सख्या उद्धवेन (२) । भगवद्वशीकरणे भक्तिरेव मुख्येति वक्तुं हरेर्गोपीष्वनुकंपित्वमाह–तदर्थं सान्त्वनार्थम् । बुद्ध्या सत्तमः पंडितशिरोमणिः ॥ * ॥ आर्तैकशरणं कृष्णमार्तान्व्रजजनांश्च तान् । तच्चार्ता श्वासकं भक्तमार्त्या वंदे दुराशया ॥ (१) ॥ एवमात्मनः प्राथमिकावश्यकसमाप्त्या तथा 'आयास्य' इति, 'द्रष्टुमेष्यामः' इति स्ववाक्यव्यभिचारतर्कतस्तेषामार्तिविशेषशंकया च व्रजं गन्तुमर्होऽपि यच्छ्रीभगवान्व्रजं नाजगाम, तत्र श्रीनंदयशोदादिप्रेमबद्धतया पुनस्तदागमनाभावमाशंकमानानां श्रीवसुदेवदेवक्यादीनां गुरुत्वेनालंध्यवाक्यानामनुज्ञैव कारणं लक्ष्यते, "ज्ञातीन्वो द्रष्टुमेष्याम विधाय सुहृदां सुखम्" इत्युक्तत्वात् । श्रीव्रज राजादिभिश्च तद्विधगुरुजनानामिच्छां रक्षामप्युलंध्य तदागमनस्य लिंगातिक्रमशंकया स्फुटमप्रार्थितत्वात् । जरासंधादिमहाशत्रुभ्यो रक्षा चास्मद्व्रजे न स्यात्किन्तु दुर्गादिसंपत्तिमत्यां पुर्यामेव स्यादिति स्वयमपि विचारितत्वाच्च । अतः श्रीवसुदेवादिभ्यो गोपनानुसारेणोद्धवं प्रति 'भक्तमेकान्तिनं क्वचित्' इति वक्ष्यते । "अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया । गतांश्चिरायिताञ्शत्रुपक्षक्षपणचेतसः ॥" इति वक्ष्यमाणानुसारेण जरासंधादिदुर्जननिर्जयादिकृत्यशेषोऽपि कारणांतरम् । अन्यथा तैर्जनानां व्रजजनानामपि महानुपद्रवः स्यात् । अत औदासीन्यव्यञ्जनाय नंदादीन्स्वनिकटेऽपि नाजुहाव । किञ्च–युगपदुभयत्र पितृत्वादिव्यवहारस्याभिरुचितलीलावेशादीनां समञ्जसतायां दुर्घटता स्यात् । निजप्रेयसीनां चानयनेऽनानयने चासमञ्जसत्वमिति । अत एव पूर्वमपि वयं च स्नेहदुःखिताञ्ज्ञातीन्वो द्रष्टुमेष्याम इत्येवोवाच न त्वाह्वयिष्याम इति । अतस्तादृशानपि वो वयमेव द्रष्टुमेष्यामो न तु यूयमत्रागच्छतेति व्यञ्जनामभिप्रेत्यैव तयोर्दिदृक्षया स्वयं नंदादयोऽतिनिकटा अपि व्रजान्नागता स्तत्तदुपद्रवापातात् । पुरे व्रजे च युगपत्प्रकटा स्थितिश्च न स्यात्, तज्ज्ञाने श्रीनंदादीनामस्मदीयत्वे ज्ञानहान्या बंधुभावहानिश्च स्यात् । यथैव वक्ष्यते–' यथा दूरचरे प्रेष्ठे ' इत्यादि । तस्मात्तथा स्थितिमपि न चकार । अप्रकटा स्थितिस्तु तस्य सर्वदाऽस्त्येव । तथैव प्रतिपादयिष्यते–" मा शोचतं महाभागौ ' इत्यादौ, " भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् " इत्यादौ च । किन्त्वसौ प्रकट लीलाविर्भाविनां तेषामनुभवगोचरो न भवति । प्रकटलीलायामपि मध्येमध्ये यत्तस्य व्रजस्थं कश्चित्कंचित्प्रति गुप्तमागमनं तदप्युत्कंठाप्रधानानां स्फुरणभ्रमकरत्वाद्विश्वासाय न भवति । तस्मादन्तवक्रवधान्ते प्रश्नोत्तरखंडे वर्णयिष्यमाणं श्रीभागवतमते च व्यञ्जयिष्यमाणं यावत्तत्र निजगमनं संपद्यते तावत्तेषां यथा केनापि व्याजापदेशेन तत्तद्विश्वासास्पदं स्यान्महाराजत्ववैभवश्रवणं स्यात्तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलश्रीरामगमनं च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवाख्येन प्रियसखेन तादृशं संदिश्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्रोक्तां लीलां वक्तुमारभतेऽध्यायद्वयेन–वृष्णीनामिति । वृष्णीनामसंख्यानामूर्द्ध्वोर्द्ध्वमहानुभावानां विविधभावानामपि सर्वेषां यादवानां सम्मत आदृतवचनाचरणः । ' प्रवरः ' इति पाठेऽपि तथैवाभिप्रायः । इति परममाहात्म्यं परमसामञ्जस्यं चाभिप्रेतम् । तेन च व्रजजनानामपि तादृशां सान्त्वने सामर्थ्यम् । किञ्च–'मंत्री गुप्तयुक्ति प्रदोऽमात्यविशेषः ' इति विश्वास्यत्वेन बुद्धिनैपुण्येन च तत्सामर्थ्यम् । तेन च पूर्वलिखितयुक्तिरपि श्रीभगवता तस्मिन्स्वयमेव कदाचिद्व्यञ्जिताऽस्तीति गम्यते । न केवलमेतावदेव किन्तु कृष्णस्य दयितो दयावि

१ 'दैवतानि' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमाह भगवान्प्रेष्ठं भक्तमेकांतिनं क्वचित् ॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ॥ ३ ॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ॥ ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहम् ॥ ४ ॥

॥ २ ॥ ३ ॥ गोपीनां विशेषतः संदेशे कारणमाह । ता इति । मय्येव संकल्पात्मकं मनो यासां ताः । अहमेव प्राणो यासां ताः । मदर्थे त्यक्ता दैहिकाः पति शेषविषयः, इत्यनिर्वचनीयगुणत्वम् । तेनात्मीयतया स्वीकृतत्वं चोक्त्वात्मगम्यस्थानप्रस्थापने श्रीगोपिकास्वपि संदेशे योग्यत्वञ्च । एवमंतरंगलोकदृष्ट्या यथोत्तरश्रेष्ठत्वेन तन्महिमानं चोक्त्वा तद्योग्यतावैशिष्ट्यम् । तथा सखा असंकोचप्रेम्णा दत्तसख्यपदवीकोऽपि । इति श्रीकृष्णेन गुगरूरवयआदौ साम्यं सर्वयादवेभ्यस्तस्य परमासंकोचविस्रंभास्पदत्वं चोक्त्वा बहिरंगलोकदृष्ट्याप्याह—बृहस्पतेः साक्षादेव शिष्यः, न तु शिष्यादिद्वाराऽध्यापनादित्यर्थः । तच्च नीतिशास्त्रमारभ्य श्रीभागवतपर्यन्तस्येति ज्ञेयम्, बृहस्पतेरपि तत्र संकर्षणसंप्रदायान्तःपातात् । इति परमवाग्मित्वमुक्त्वा तेषां श्रीकृष्णाजित्वरशुद्धप्रेमवाक्यानां प्रत्युत्तरे तस्य तु यत्किञ्चित्सामर्थ्यं व्यञ्जितम् । सर्वत्र हेतुः—बुद्धिसत्तम इति । एवं श्रीभगवत इव षड्गुणा दर्शिताः । एतदेव च मनसि विचारितं श्रीभगवता नोद्धवोऽण्वपि मन्न्यूनः, इत्युद्धवनामा श्रीवसुदेवस्य भ्रातुर्देवभागस्य पुत्रस्त्वत्रास्तीति शेषः । यद्यपि हरिवंशे—“ उद्धवो देवभागस्य महाभागः सुतोऽभवत् । पंडितानां परं प्राहुर्देवश्रवसमुद्भवम् ॥ ” इति । द्वयोरपि भ्रात्रोरुद्धवनामानौ पुत्रौ कथ्येते, तथाप्ययं देवभागसुत एव ज्ञेयः । महाभागत्वं खलु तादृशकृष्णकृपायोग्यत्वं न तु पंडितमात्रत्वम् । तदेवमेव—“ कच्चिदंग महाभाग सखा नः शूरनदनः ” इति । स एव व्रजेश्वरेण तथा संबोधयिष्यते । श्लेषेण साक्षादुद्धवो मूर्तिमानुत्सव इति ॥ १ ॥ तस्य श्रीकृष्णदयितत्वादौ हेतुं तत्परतां च विशेषणैर्दर्शयँस्तादृशतद्दर्शनोद्देश्यमाह—तमिति । प्रेष्ठं बाल्यमारभ्यैवातिशयेन प्रीतिकर्तारम् । भक्तं परमादरेण सेवातत्परं च “ यः पञ्चहायनो मात्रा प्रातराशाय याचितः । तन्नैच्छद्रचयन्यस्य सपर्यां बाललीलया ॥ ” इत्यादितृतीयोक्तेः । अत एवैकांतिनं तदेकापेक्षकम् । यथोक्तं श्रीव्रजेन्द्रेण—“ एकान्तिनो यस्य न कञ्चनार्थं वांछन्ति ये वै भगवत्प्रपन्नाः ॥ ” इति । श्रीवैष्णवेऽपि—“ विहाय पितृदेवादीन्परिनिष्ठां गतो हरौ । तद्गाढप्रेमभिः पूर्ण एकान्तीति निगद्यते ॥ ” इति । अत्र सर्वयादवापेक्षामतीत्य तस्यैकान्तित्वं ज्ञेयम् । तथाभूतं तमाह । किमर्थम्—प्रपन्नानां तवास्मीति सकृद्याचमानानामपि, किमुत तदेकजीवनानां य आर्तिं हरति सः । तेषामार्तिं हर्तुमित्यर्थः । तस्य तत्तज्ज्ञानतादृशानुग्रहादौ योग्यं पदं—भगवानिति । सर्वज्ञदयादिगुणानां मर्यादावारांनिधिरित्यर्थः । नन्वपरिहार्यनानास्निग्धजनवेष्टितेन श्रीभगवता तादृशसंदेशो दुष्करस्तत्राह—क्वचित् । कथंचिल्लब्धे । तदेवं द्वितीयस्थाने हंत तादृशं संदेशं कया मुद्रयोवाच तत्राह—गृहीत्वेति । तच्च निजेष्टप्रयोजने तस्य रागोत्पादनेच्छातः परमगोप्यत्वेन शनैर्निकटे विवक्षातः, तदुक्तिप्रवृत्त्या प्रेमभरोदयस्वभावत्वाच्च ॥ २ ॥ मत्संदेशैर्मदाज्ञावचनैः ॥ * ॥ न इति बहुत्वं तत्पितृकत्वेनात्मनो बहुमननात् । किं वा—मत्पितृत्वेन भवादृशामपि तौ पितरावित्यभिप्रायेण । इति तयोस्तस्य स्नेहं वर्धयति । ‘ नौ ’ इति क्वचित्पाठः । कृष्णरामयोरित्यर्थः । पित्रोर्मद्विच्छेददुःखितयोः प्रीतिं सुखमा सम्यक् बहुस्वचातुर्येण बलादिव वह प्रापय, मद्विना तयोस्तयोः प्रीतेर्दुःसाध्यत्वात् । यद्वा—प्रवाहन्यायेन कुरु यथा तत्पश्चादपि तयोः प्रीतिस्तिष्ठेदेवेत्यर्थः । ननु तत्र मम वराकस्य का शक्तिरित्याशंक्य संबोधयति—हे उद्धवेति । उद्धव एव त्वमसीति पूर्वोक्तसद्गुणानिधित्वं सूचयति । उद्धवशब्दस्य श्लेषार्थश्चोक्त एव । किञ्च—हे सौम्य हे शान्तमूर्ते, मनोज्ञेति वा । अस्तु तावत्तच्चातुर्यं त्वद्दर्शनमात्रेण च तयोः प्रीतिर्भवितेति भावः । इदं प्रोत्साहनार्थम् । गोपीनां तु मद्वियोगेनाधिस्तं विशेषेण मोचय । दृढबंधनवद्धृदि संलग्नमपुनःस्पर्शतया त्याजय । एवमाविमोचनमात्रमेव तासां न तु प्रीतिं कर्तुं शक्ष्यसीत्यर्थः । तच्च संदेशैर्बहुभिरेव न तु तत्तद्वाक्चातुर्यादिना नापि द्वित्रैर्वा ॥ ३ ॥ ततः पतिपुत्रादित्यागेन । किं किं जातम् । अतोऽत्राक्षेपे । यद्वा—लोको देहस्तद्धर्मा अशनवसनानुलेपादयः । यद्वा—लोकाः स्वर्गादयस्तदर्थं धर्मा यागादयः । यद्वा—लोकानां जनानां धर्मः प्रवृत्तिलक्षणः । निवृत्तिमार्गे वर्तमाना इत्यर्थः । यद्वा—त्यक्ता दत्ता लोकेभ्यो धर्मा मदर्चनादिरूपा यैस्ते, मद्धर्मोपदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ॥ स्मरंत्योंग विमुह्यंति विरहौत्कंठ्यविह्वलाः ॥ ६ ॥

पुत्रादयो याभिस्ताः । ततः किमत आह । ये त्यक्तलोकधर्मा इति । मन्निमित्तं त्यक्तौ लोकधर्माविहामुत्रसुखे तत्साधनानि च यैस्तानहं बिभर्मि पोषयामि संवर्धयामि सुखयामीत्यर्थः ॥ ४ ॥ तासां वियोगाधिं दर्शयति द्वयेन । मयि ता इति । विरहेणौत्कंठ्यं तेन विह्वलाः परवशाः ॥ ५ ॥

द्धारः । यद्वा—अत्यक्तो लोकधर्मः स्वविहितधर्मो वर्णाश्रमाचारलक्षणो यैस्ते, मत्प्रीतये ये स्वधर्मनिष्ठा इत्यर्थः । बिभर्मि स्वसायुज्यमावहामीत्यर्थः ॥ * ॥ गोपीनां विशेषतः संदेशे द्वाभ्यां विशेषावस्थावर्णनेन कारणं वक्तुं प्रथमतः साधारणावस्थां वर्णयति—ता इति । विशेषणत्रयेण क्रमेण तासां स्वं विना धर्माद्यशेषार्थेषु देहेषु लोकेष्वपि नैरपेक्ष्यमुक्तम् । अन्यत्तैः । तत्रादिग्रहणाद्भोजनपानादयश्च दैहिकाः । यद्वा—मन्मनस्का इति बाह्यसर्वप्रियार्थानादरः । मत्प्राणा इति ततोऽपि प्रियाणामन्तरीणसर्वार्थानामनादरः । मदर्थ इत्यादिना “ भोक्तृत्वे सर्वदुःखानां पुरुषः प्रकृतेः परम् ” इत्यात्मपर्यवसायिसर्वभोगानादरात्मानादरश्च विवक्षितः । तत्रतत्र हेतुमाह—मामेव दयितं प्रियं मनसा गता निश्चितवत्यः, न तु बाह्यान्विषयान् । तथा प्रेष्ठं ततोऽपि प्रियतमम् मामेव न तु ततोंतरीणप्राणादीन्, मद्वियोगे तत्तदनादरात् । तथा निरुपाधिप्रेष्ठमात्मानमपि मामेव न तु देहिनम्, मद्वियोगे तस्यापि शून्यायमानत्वात् । मद्विनाभूतानां तासामात्मान्यत्र प्रीतिमात्रं न स्पृशतीत्यर्थः । तदेवं त्रिभिर्योगैः पदैर्मामेव पतिं निश्चितवत्य इत्यर्थः । न तु किंवदन्तीप्राप्तमन्यदित्यर्थः । तथैव ता एव वक्ष्यन्ते—‘ अपि बत मधुपुर्यामार्यपुत्रोऽधुनास्ते ’ इतीदं पद्यार्धं बहुत्र तत्त्ववादिनां टीकायामपि ध्रियते । किन्तु स्वामिपादैरनभिमतमिव लक्ष्यते मध्ये प्रविष्टस्य सुदुर्गमस्याप्यव्याख्यानात् । य इति सामान्येन निर्देशः, अधिकाराद्यनपेक्षया भरणस्यावश्यकताबोधनार्थम् । चकारात्तानपि किं पुनः प्राणाद्युपेक्षिकास्ता इत्यर्थः । यद्वा—मम मनो यासु ताः । किञ्च—मम ता एव प्राणा यतो मदर्थ—इत्यादि । तत्र हेतुः—मामेव इत्यादि । कैमुत्येन हेतुः—य इत्यादि । अहं ब्रह्मादिध्येयोऽपि बिभर्मि अंतर्धारयामि, चिंतयामीत्यर्थः । तथा चादिपुराणे—“ भक्ता ममानुरक्ताश्च कति सन्ति न भूतले । किन्तु गोपीजनः प्राणाधिकप्रियतमो मम ॥ ” इति । अतस्तासामाधेर्मदन्तःप्रवेशेन सदाहमप्याधिमानित्यर्थः । यद्वा—ये ताभिस्त्यक्ताः पत्यादिलोकाः, भोजनादिदेहधर्माः, लज्जादिसाध्वीधर्माश्च तानप्यहं बिभर्मि रक्षामि, किमुत ताः ॥ **विश्वनाथस्तु**—मामेम न तु स्वस्वपतिमन्यं दयितं प्रियं मनसा ज्ञातवत्यः, न केवलदयितमेव अपि तु प्रेष्ठम् । न च प्रेष्ठमेव किन्त्वात्मानम् । ताभिरहमेव स्वस्वजीवात्मा च निश्चित इत्यर्थः । स चाहमत्र मथुरायामतस्ताभिः स्वस्य देहा निर्गतात्मान एव मन्यन्ते, केवलं मदीययोगमाययैव दुस्तर्क्यया शक्त्या जीव्यन्त इति भावः । येऽन्येऽपि साधकभक्ता अपि मन्निमित्तं लोकधर्मांस्त्यजन्ति तानपि बिभर्मि किं पुनस्ताः ॥ ४ ॥ तासां गोपीनाम् । ता गोप्यः । औत्कंठ्यं रागित्वम् । प्रेयसां गेहादीनां मध्ये प्रेष्ठे तेभ्योऽपि प्रियतमे । विगतं ह्वलं चलनं यासां ताः ॥ * ॥ ननु वा भवन्मनस्कादिरूपास्ता एवं लब्धभवत्का एव कथमनु शोचन्तीति चेत्—सत्यम्, अन्तरनुसंधाने तादृश्य एव ताः, किं तु बहिरवधाने जाते परमव्यग्रा भवन्तीत्याह—मयीति । गोकुलस्त्रीत्वेन तावन्मदीयदर्शनमात्रजीविनाः, तत्रापि ताः अनिर्वचनीयस्वभावाः । द्वयोः प्रकर्षे तरबीयसुनौ बहूनां तु तमबिष्ठनाविति प्रियं तावत्सर्वं ममतास्पदं, ततोऽपि प्रियः प्रेयान् अहंतास्पदमात्मा ते च यद्येकस्य बहवः संभवन्ति तदा तेषां कोटिसंख्यानामपि प्रेष्ठे तानप्यतिक्रम्य ये मत्संबंधिनः प्रियास्तेभ्योऽप्यधिकप्रियमित्यर्थः । एवंभूते मयि ‘कुटिलकुंतलं श्रीमुखं च ते’ इति तद्व्याख्यानुसारेण निकटस्थेऽप्यार्तिप्रदे, संप्रति तु दूरस्थे इत्यर्थः । स्मरन्त्यो मम दूरस्थत्वं भावयन्त्यः, तद्भावनारंभवत्य

१ त्यक्तदैहिका इत्यस्याग्रे “ मामेव दयितं प्रेष्ठमात्मानं मनसा गताः ” इत्याधिकः पाठोऽस्येष्ट इति भाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन ॥ प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मिकाः ॥ ६ ॥

गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशास्तैः । मे मदीया बल्लव्यो गोप्यः । मदात्मिका इति । तासामात्मा यदि स्वदेहे स्यात्तर्हि विरहतापेन दह्येतैव तस्य मयि वर्तमानत्वात्कथंचिज्जीवंतीति भावः ॥ ६ ॥

एव मुह्यन्ति मूर्च्छां प्राप्नुवन्ति । एवं तथाभावनायाः स्वल्पकालत्वं मूर्च्छायास्तु चिरस्थायित्वं व्यञ्जितम् । ततश्च हा कष्टं मद्भावनमपि कर्तुं न शक्नुवन्तीति भावः । वर्तमानप्रयोगेण स्मरणस्य मोहस्य च पौनःपुन्यं दर्शितम् । मोहे हेतुः—विरहेति । अतो लालास्रवादेरयमपस्माराख्यः सञ्चारी भावः । अतः " कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं च " इति पूर्वमपि तथावस्थास्पृष्टानामेव मया त्यक्तानां, संप्रति तु लब्धतदतिशयानां मयि भावस्य सर्वतः प्रचाराद्दपि सांप्रतं तत्र गमने मम लज्जापि जायत इति भावः । अंगेत्यार्त्या संबोधनम् । श्लेषेण हे मदंगतुल्येति, तासां सान्त्वनाय प्रोत्साहनाय च । अत्र **विश्वनाथः**—ननु तासां यदि त्वमेव मनःप्राणादयः, प्रेष्ठ आत्मा च तर्हि ताः कथमत्र नायातास्तत्र स्थातुमेव कथं शक्नुवन्ति तत्राह—मयीति । ताः खलु गोकुलस्त्रियः गुञ्जा-गैरिक-मुरली-मयूरपिच्छालंकृतेन गोपवेशेनैव मया सह तत्र गोकुल एव विलासे प्राप्तनिष्ठा मयाप्यत्र नेतुमनभिप्रेताः कथमत्र वृष्णिपुर्यामागच्छेयुरिति भावः । ततश्च प्रेयस्यः मयि प्रेष्ठे दूरस्थे सतीति प्रियं तावत्सर्वं ममतास्पदं, ततोऽप्यधिको ममतास्पदमात्मा प्रेयान्, ते च यद्येकस्य बहवः संभवन्ति तेषामपि कोटिसंख्यानां प्रेष्ठ इति । यद्यात्मकोटिभ्योऽपि केचित्पदार्थाः प्रियाः संभवेयुस्तेषामपि मध्ये योतिप्रियस्तद्दूरे मयीत्यर्थः । अत एव विमुह्यन्ति विशिष्टां मूर्च्छां प्राप्नुवन्तीत्यर्थः । मदीयया दुस्तर्क्यया शक्त्या जीवमाना अपि न जीवयितुमेव शक्यंत इति भावः ॥५॥ तासां बल्लवीनाम् । विरहतापेन मद्वियोगाग्निना । तस्यात्मनः । इति भाव इति—अन्यत्र वर्तमानस्यान्यत्रत्यवह्निना दाहो न भवतीत्याशयः॥* ॥ अतिकृच्छ्रेणेति—तासां मत्प्राप्त्याशया प्राणधारणमित्यतिकष्टं, प्राणत्यागस्तु सुगम एवेति । ननु केन प्रकारेण प्राणान्धारयन्तीत्यत आह—प्रतीति । गोकुलान्निर्गमनसमये शीघ्रमागमिष्यामीति ये प्रत्यागमनसंदेशास्तैः । अतो मत्प्राप्त्याशैव बलवती निर्गच्छतोऽपि प्राणान्बध्नातीति भावः । तत्र का भवन्ति तास्तत्राह—बल्लव्यः, यद्यपि ता बल्लवानामेव स्त्रियस्तथापि मे मदीया एव । तासां महामाधुर्यमयरूप-रस-गंध-शब्द-स्पर्शादिगंधमपि तत्पतयः स्वप्नेऽपि न लभंते, किं त्वस्मद्भार्या इमा इत्यभिमानमात्रमेवेत्यतो रसशक्त्यैव स्वपुष्ट्यर्थमननादित एव ता नित्यपरकीयाः कृता अपि मद्भोग्या मदीया एव, यतो मदात्मिकाः मत्स्वरूपशक्तेर्ह्लादिन्या अपि महासारप्रेमवृत्तित्वान्मत्स्वरूपभूता अपि सर्वोत्कृष्टह्लादरूपत्वान्मदाकर्षणसमर्थाः, अत एवात्मारामस्यापि मम ताभी रमणसुखमत्यधिकम्, अत एव मयात्मनः सकाशादप्यधिकं ता अनुकंपनीया इत्यनुकंपार्थकः कप्रत्ययः प्रयुक्तः । श्लेषेण—ममात्मा मनोरमणार्थी यासु ताः, मय्येवात्मा तथाभूतो यासां ता इति वा । मत्संभोगान्मदीया एवेत्यर्थः ॥ अत्र **तोषिणी**—अथ तासां दशमीं दशामपि शंकते—अल्पायासेन प्राणान्धारयन्ति निर्गच्छन्तोऽप्यवस्थापयन्ति । अतोऽग्रे कति दिनानि धारयितुं शक्यन्तीति भावः । ननु कोऽसावायासो येन धारयंति तत्राह—कथञ्चन केनापि प्रकारेण यत्नेन । तदेवं स्ववाक्चलनलज्जया कारणं व्यक्तमनुक्त्वा पश्चाद्गत्यंतराभावात्स्पष्टमेव निर्दिशति—। प्रतीतिसंदेशस्य बहुत्वं मध्येमध्ये संदेशान्तराणामपि प्रेरितत्वात् । इत्थं प्रथमोक्तमत्प्रत्यागमनादिनसंभावनप्रपञ्चः, ततो विलंबतर्कतो मूर्च्छा, ततस्तस्यामेवोद्भूतस्वाभाविकतत्स्मरणाच्चेतना, पुनस्तत्संभावनादिपौनःपुन्यादायासेनैव धारयन्तीत्यर्थः । मे बल्लव्य इति—ब्राह्मणस्यास्य ब्राह्मणीयमितिवन्मम गोपरूपस्य गोपीरूपा भार्या इत्यर्थः । एवं हि ' पित्रोर्नः प्रीतिमावह ' इत्यनेन गोपाभिमानित्वं स्वयमेव व्यंजितम् । न केवलं साधारणलोकरीत्या तादात्म्यव्यवहारस्ताभिर्मम, किन्तु मदात्मिका मत्स्वरूपभूतशक्तय इत्यर्थः । 'मन्मनस्काः' इत्यादिकं तूक्तमेव । ब्रह्मसंहितायाम्—" आनंदचिन्मयरसप्रतिभावितामिस्ताभिर्य एव निजरूपतया कलाभिः । गोलोक एव निवसत्यखिलात्मभूतो गोविंदमादिपुरुषं तमहं भजामि ॥ " इति । तस्मात्परदारतया कल्पनं तासां वाङ्निर्गलताप्रकटनाय । लीलाशक्त्या कृतमिति प्रातीतिकमात्रम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्युक्त उद्धवो राजन्संदेशं भर्तुरादृतः ॥ आदाय रथमारुह्य प्रययौ नंदगोकुलम् ॥ ७ ॥

प्राप्तो नंदव्रजं श्रीमान्निम्लोचति विभावसौ ॥ छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ८ ॥

संदेशं ' भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् ' इत्यादिकम् ॥ ७ ॥ निम्लोचत्यस्तं गच्छति सति । छन्नं यानं रथो यस्येति तदा गोपीभिरज्ञातत्वेन नंदसंगं सपरशय्यासंबंधश्च ' नासूयन्खलु कृष्णाय ' इत्यादौ प्रख्यात एवेति भावः । यद्यपि मदीयत्वभावमयेन प्रेम्णा मद्वाक्ये विश्वासानपगमान्मत्प्रत्याशां कदाचिदपि त्यक्तुं न शक्नुवन्ति तथापि प्राय इति काश्चिन्न धारयंत्यपीति संभाव्यते । अतः प्रत्यागमनपर्यवसानैरेव संदेशैरधुनापि ताः सान्त्वनीया इति भावः । यद्यप्यत्र सर्वेऽपि व्रजवासिनस्तदेकजीवनत्वात्सान्त्वनार्हाः ' एषां घोषनिवासिनाम् ' इत्यादिषु ' यद्धामार्थसुहृत्प्रियात्मतनयाः ' इत्यादिभ्यः, 'अहो भाग्यमहो भाग्यम्' इत्यादिभ्यः, " दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् " इत्यादिभ्यः, कालियह्रदप्रवेशोत्थानयोः पशूनां स्थावराणामपि दुःखसुखवर्णनाच्च । अतो मनसि चिन्तितं स्वयं भगवता ' तस्मान्मच्छरणं गोष्ठम् ' इत्यादि, तत्रापि श्रीमदुपनंदादयस्तत्रापि श्रीदामादयस्तदर्हास्तत्रतत्र तथातथा प्रशस्तत्वात् । अतः श्रीव्रजराजेन वक्ष्यते—" अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् । गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिम् ॥ " इति । तथापि यस्तेषामनुल्लेखस्तस्मादिदं गम्यते—केषुचिच्छ्रीपित्राद्यंतःपातित्वेन सान्त्वनं, केषुचिदभिप्रायविशेषेण सान्त्वनाभाव एव सान्त्वनमभिप्रेतमिति । तथाहि—श्रीमति गोकुले प्रेमा खलु त्रिविधो दृश्यते—उत्कण्ठाप्रधानो विस्रंभप्रधानो विवेकशून्यश्चेति, स चान्यत्रापि गरिष्ठः सन् प्रेष्ठस्फूर्तिसाक्षात्कारमेव जनयति । यथा **श्रीलीलाशुकचरणै**रुक्तम्—" अग्रे समग्रयति कामपि केलिलक्ष्मीमन्यासु दिक्ष्वपि विलोचनमेव साक्षि " इति । तत्र च **श्रीजयदेवचरणै**रपि वर्णितम्—" श्लिष्यति चुम्बति जलधरकल्पं हरिरुपगत इति तिमिरमनल्पम् " इति । अत्रैव च वक्ष्यते श्रीव्रजराजेन—'मनो याति तदात्मताम्' इति । अत्रोत्तरोभयभावानां साक्षात्कारबुद्धिजनिकैव सा भवेत्, विस्रंभाविवेकयोरन्यत्वप्रतीतिजननायोग्यत्वात् । प्रथमभावानां तु साक्षात्कारेऽप्यप्रतीतिः स्यात्किमुत स्फूर्तौ, उत्तरकाले तु सर्वथोत्कण्ठाया विकल्पस्वभावत्वात् । यथा द्वारकाजलविहारे पट्टमहिषीणां वर्णयिष्यते । अत उक्तमुत्कण्ठाप्रधानप्रेमाणः पितरौ, प्रेयस्यश्च वियोगमानिन्य एवासन्, 'यथैवोक्तम्' इत्यादिना वक्ष्यते च । 'इति संस्मृत्य' इत्यादिना, 'इति गोप्यो हि' इत्यादिना च । अथ ये विवेकशून्यप्रेमाणो गवादयः, ये च विस्रंभप्रधानप्रेमाणः श्रीदामादयस्ते संयोगमानिन एवासन्, गवादीनां स्वानुभवेनैव निश्चयात् । श्रीदामादीनान्तु मां तु मथुरात इहागत्यैकान्ते मिलतीति रहो मिथः संवादेन तद्दार्ढ्यात् । यथैवैषां हर्षोऽपि वर्णयिष्यते—'वासितार्थेऽभियुद्ध्यद्भिः' इत्यादिना । तस्मात्पित्रोः प्रेयसीनां च सान्त्वनमेव सान्त्वनमन्यथा समाधानाभावात् । श्रीदामादिषु सान्त्वनाभाव एव सान्त्वनं सान्त्वनेन प्रत्युत संदेहापत्तेरिति । तदेवं द्विविधानामुत्कण्ठादिप्रधानानां सान्त्वनाऽसान्त्वनव्यवस्थायां सिद्धायामन्येषां तत्तदनुगतभावानां तयैव तद्व्यवस्था । यथा—"अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः" इति वचनोपलक्षितानां दुःखं, वृक्षाणां पक्षिणां च तथातथा वर्णयिष्यमाणानां प्राचीनतत्स्पर्शनादिना संसारविमुक्तानां सुखमिति कालियह्रदप्रवेशनिर्गमयोः स्थावराणामपि किमुत मृगपर्यन्तप्राणिनाम् । दुःखसुखयोर्व्यक्तिस्तु तत्तदनिष्टेष्टतापरमातिशयभयलीलाविशेषश्लिष्टकालस्य तादृशस्वभावत्वादेव जातेति मंतव्यम् । यत्र भुवि दिवि च मंगलामंगलनिमित्तानि जातानि इति । **केचित्तु**—सखीनां गमनागमनाभिप्रायेण सान्त्वनमिति व्याचक्षते तन्न, श्रीगोपेन्द्रस्य प्रश्ने सखीनित्यस्य स्वारस्यात् । तदेवमग्रिमग्रन्थोऽपि व्याख्येयः ॥ ६ ॥ नंदगोकुलं नंदग्रामम् ॥ * ॥ भर्तुरिति तस्य तद्भावेन भक्तिभरो द्योत्यते । रथमारुह्येति शीघ्रगमनं बोधयति । प्रकर्षेण प्रकृष्टमनोरथाचरणादिना ययौ । नंदयतीति नंदस्तस्य गोकुलमिति तद्गोकुलस्यापि श्रीकृष्णप्रेम्णा नंदकत्वमभिप्रेतम् ॥ ७ ॥ विभावसौ सूर्ये 'सूर्यवह्नी विभावसू' इत्यमरः । यानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासिताऽर्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ॥ धावंतीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ॥ ९ ॥ इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सितैः ॥ गोदोहशब्दाभिरवैर्वेणूनां निस्वनेन च ॥ १० ॥ गायंतीभिश्च कर्माणि शुभानि बलकृष्णयोः ॥ स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितम् ॥ ११ ॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमम् ॥ १२ ॥ सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥ हंसकारंडवाकीर्णैः पद्मषंडैश्च मंडितम् ॥ १३ ॥ तमागतं समागम्य कृष्णस्यानुचरं प्रियम् ॥ नंदः प्रीतः परिष्वज्य वासुदेवधियाऽऽर्चयत् ॥ १४ ॥

लब्धवानिति सूचयति ॥ ८ ॥ व्रजं वर्णयति पंचभिर्वासितार्थ इत्यादिना । वासिताः पुष्पवत्यो गावस्तन्निमित्तमभितो युध्यद्भिः शुष्मिभिर्मत्तैर्वृषैर्नादितम् । वास्राभिर्धेनुभिः । स्ववत्सकान्प्रति ॥ ९ ॥ विलंघद्भिरुत्पतद्भिः गोदोहशब्दैः सहाभितो रवाः मुंच मा मुंच नय आनय देहि गृहाणेत्यादयो यस्मिंस्तम् । वेणूनां निस्वनेन च मंडितम् ॥ ॥ १० ॥ गायंतीभिर्गोपीभिर्गोपैश्च गायद्भिः सुविराजितम् ॥ ११ ॥ अग्न्याद्यर्चनान्वितैर्गोपगृहैर्धूपादिभिश्च मनोरमम् ॥ १२ ॥ षंडैः समूहैः ॥ १३ ॥ आर्चयत्पूजयामास ॥ १४ ॥

रथः । तदा प्रवेशसमये । 'यानं स्याद्वाहने गतौ' इति मेदिनी ॥ * ॥ श्रीमान् स्वशोभया रथशोभया च विराजमानः । 'श्रीमन्' इति पाठे तु संबोधनम् ॥ ८ ॥ 'वासिता वृषकामिनी' इति यादवः । 'शुष्मं तेजसि सूर्ये च' इति मेदिनी । शुष्मं तेजोबलवीर्यरूपं विद्यते येषां ते शुष्मिणस्तैः । वासयति दुग्धं स्वस्यामिति वास्रा 'धेनुर्वास्रा रोहिणी च' इति कोशांतरात् ॥ * ॥ पञ्चभिर्व्रजं वर्णयति—मदीयव्रजस्य शोभामुद्धवः पश्यत्विति भगवदिच्छाशक्तिप्रेरिता योगमाया निर्वेद-विषाद-दैन्यादिसंचारिभिर्विधुरं कृष्णवियुक्तप्रकाशं संवृत्य हर्षौत्सुक्यचापलोत्साहादिभिरतिमनोहरं कृष्णसंयुक्तप्रकाशं प्रथमं समये सामान्यत एवोद्धवं दर्शयामासेति ज्ञेयम् ॥ ९ ॥ मुञ्चादिक्रियाणां वत्सं क्षीरञ्चेति यथायथं शेषः ॥ * ॥ आंदिना उपेहि, अपसर, तरस्व, मा त्वरस्वेत्यादीनां ग्रहः ॥ १० ॥ शुभानि मंगलकराणि ॥ * ॥ गोपीभिः प्रेयसीभ्य इतराभिः 'मदर्थे त्यक्तदैहिकाः' (४) इत्युक्तेः । गोपैश्च श्रीदामादिभिरन्यैश्चालंकृतैरिति ध्येयम् ॥ ११ ॥ माल्यैः पुष्पैः ॥ * ॥ एवं लौकिकशोभां वर्णयित्वा वैदिकशोभामपि वर्णयति—अग्नीति । नित्यहोमोपस्थानादिनाग्न्यर्कयोः, ग्रासदानादिना गवाम्, अतिथ्यादीनां चतुर्णां सत्कारादिना । यद्वा—अग्न्यादयः पञ्च भगवत्पूजाधिष्ठानान्येव, पित्रादयश्च स्वगृहस्थानामवश्यार्च्या एवेति, वैष्णवानां ते च तदीयत्वेनैवेति तेषामर्चनान्वितैः । यद्यपि महाभागवतैरप्युपास्यानां व्रजवासिनां विधिकैंकर्यं नास्ति तथापि श्रीभगवत इव तेषां च कर्मकरणमिदं लीलयैवेति ज्ञेयम् । किन्तूभयथा वैश्याभीरतया द्विजत्वमेवैषां दर्शितम् । तदुक्तं श्रीकृष्णरामनामकरणे—'कुरु द्विजातिसंस्कारम्' इति । 'वैश्यस्तु वार्तया जीवेत्' इत्यादौ वार्ता चतुर्विधा । तत्र 'वयं गोवृत्तयोऽनिशम्' इति च । अंतर्गृहशोभां वर्णयति—धूपेति ॥ १२ ॥ "षं (खं) डोऽर्धे मणिदोषे च समूहेक्षुविकारयोः" इति धरणिः ॥ ॥ * ॥ बहिःप्रदेशशोभां वर्णयति—सर्वत इति । पद्मषण्डैः सरोवरादिगतैः ॥ १३ ॥ तमुद्धवम् ॥ * ॥ आगतं स्वगृहद्वारि प्राप्तं सन्तम् । समागम्य श्रुत्वाभ्यंतरतः सन्निकृष्टमागम्य । अनुचरं भक्तमतः प्रियं कृष्णस्यात्मनो वा । वासुदेवधिया वैष्णवस्य तदधिष्ठानतदभेदेन ॥ अत्र **विश्वनाथः**—अथोद्धवः कृष्णवियुक्तप्रकाशस्थं नंदालयं प्रविवेशेत्याह—तामिति । समागम्याभ्यंतरतः समीपमागत्य, स्वपुत्रसारूप्यावलोकनेनोद्धवस्य

१ शब्दादिरवैरिति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोजितं परमान्नेन संविष्टं कशिपौ सुखम् ॥ गतश्रमं पर्यपृच्छत्पादसंवाहनादिभिः ॥ १५ ॥ कच्चिदंग महाभाग सखा नः शूरनंदनः ॥ आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः ॥ १६ ॥ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना ॥ साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा ॥ १७ ॥ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् ॥ गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिम् ॥ १८ ॥

कशिपौ शय्यायां संविष्टम् ॥ १५ ॥ १६ ॥ साधूनामिति । कर्मणि षष्ठ्यः ॥१७॥ गावो गाः । गिरिं गोवर्धनम् ॥ १८ ॥

च स्वद्रष्टृजनमात्रोत्सवदायित्वशक्त्या च श्रीनंदस्य बाह्यव्यवहारानुसंधानसंभाषणादिसामर्थ्योदयो ज्ञेयः । वासुदेवधियाऽतिथिरूपेण मदिष्टदेवो नारायण एवागत इत्याचर्यत्पाद्यादिना ॥ १४ ॥ संविष्टं शयितम् । 'स्वप्नः संवेश इत्यपि' इत्यमरः ॥ * ॥ पूर्वं परमान्नेन पायसेनोत्कृष्टान्नेन वा भोजितम्, ततः कशिपौ शय्यायां कायं प्रसार्य विश्रान्तवंतम्, ततश्च सेवकद्वारा पादसंवाहनादिना गतश्रमम्, सुतं सुखोपविष्टं पर्यपृच्छ दित्यर्थः ॥ अत्र **विश्वनाथः**—भोजितं परमान्नेनेति—यद्यपि मथुराप्रस्थानावधि व्रजस्थजनानां सर्वमेव महानसममार्जितमलिप्तं तृणपत्रधूलिभिः परिपूर्णं लूतातंतुवितानमयमेवाभूत्, परस्परप्रतिवेशिजनदत्तैर्दधिदुग्धतक्रादिभिरेव प्राणान्धारयन्तो हे हताः स्म इति वादिनः सर्वे विषीदन्त्येव, तदपि तद्दिने हंतहंत मद्गृहमायातोऽयमुद्धवोऽद्य मा क्षुध्यत्विति व्रजराजस्याशयमभिज्ञाय कश्चित्परिजनो ब्राह्मणः खण्डतण्डुलपयोभिरेकपुरुषमात्रभोज्यं परमान्नं पपाचेति ज्ञेयम् । पादसंवाहनं सेवकद्वारैव उद्धवस्य तद्भ्रातृपुत्रत्वात् ॥ १५ ॥ मुक्तो बंधनक्लेशात् ॥ * ॥ तत्र श्रीकृष्णस्य विश्लेषदुःखवृद्धिमाशंक्य सहसा स्पष्टं प्रष्टुमशक्यत्वादादौ तत्प्रश्नभूमिकारूपं वसुदेवकुशलं पृच्छति—कच्चिदिति । श्रीकृष्णस्य सान्निहितत्वाद्भवान्महाभागतायां योग्य एव, वयं तादृशतायामयोग्यास्तेन परित्यक्तु योग्या ऐवति भावः । शूरनंदन इति—तेन तत्पितुर्भाग्योदयोऽपि विवक्षितः । तच्च श्रीकृष्णस्य तत्त्रायमाणत्वाभिप्रायेण । मुक्तः आपद्भ्यः । अपत्याद्यैर्युक्त इत्यनेनेन च सामान्यतः सर्वेषां तथा श्रीकृष्णस्यापि कुशलं पृष्टम्॥ १६ ॥ सानुगः केश्यादिसहितः । स्वेन स्वकीयेन 'स्व आत्माऽऽत्मीययोरपि' इति हलायुधः । यदूनामिति द्वितीयार्थे षष्ठी । यद्वा—कर्मेति पदमध्याहार्यम् । यदूनां कर्म कृत्यं यो द्वेष्टीति ज्ञेयम् ॥ * ॥ क्षणं निजधैर्यार्थं मुक्तत्वस्य मुख्यकारणमेव साक्षात्कृष्णप्रस्तावव्यवधानतया प्रस्तौति—दिष्ट्येति । स्वेनेति तद्धनने दोषः परिहृतः । पाप्मानमेवाह—साधूनां सदाचाराणामत एव धर्मपराणाम् । तत्र श्रीकृष्णगमनमस्माभिरप्यनुज्ञातमिति भावः ॥ १७ ॥ न इति सामान्येनोक्तं, पुनर्विशेषत आह—मातरमिति ॥ * ॥ ततश्च धैर्ये चिरमक्षमः साक्षादेव प्रष्टव्यमेव पृच्छति—अपीति । कृष्णः सर्वचित्ताकर्षको मत्पुत्रः किं स्मरति किं नः विस्मृतवानस्तीत्यत्र न इति बहुत्वमुपनंदाद्यपेक्षया । सा च समानास्निग्धत्वविवक्षया । मातरमिति तन्मात्रनिर्देशस्तु तस्या अत्यन्तदुःखदर्शनव्यग्रतया तदेकस्फुरणात् । सुहृदः संबंधिगोपालतन्मातुलादीन् । सखीन् श्रीदामादीन् । गोपीनिति साधारणान्, एकशेषत्वेन गोपीरपि, ताश्च तादृशीः । आत्मा कृष्ण एव नाथो यस्य तम् । व्रजस्य तन्नाथत्वेन सर्वेषां तन्नाथत्वं सिद्ध्यतीत्यस्यैव विशेषणं दत्तम् । गावो गाः गौरवानुसारेण यथाक्रमवन्न्यूनोक्तिः । वृन्दावनाद्गिरेरगुरुत्वं तदन्तर्भूतत्वात् । अथ वा—प्रथमत आत्मस्फूर्तेरेव लभ्यत्वात्पूर्वं न इत्युक्तम् । ततश्चोत्तरोत्तरस्यासंकोचस्थानत्वातिशयेन सान्निध्यातिशयात्स्मरणातिशयसंभावनया सखिपर्यंतानुक्रमोक्तिः । अथ विशेषस्मरणासंभावनया सामान्यत्वेनापि द्वयोस्तद्विषयत्वं पृच्छति पदद्वयेन । तत्रापि सामान्योक्तिः—व्रजञ्चेति । तत्रतत्राऽसंभावनया पुनर्विशेषोक्तिः—गाव इति । अहो अहरहस्तमपि त्यक्त्वा यत्संगे यत्र चारमत, ता गास्तद्वृंदावनञ्च किं स्मरति । तत्र च विचित्रक्रीडासुखसंपत्कल्पद्रुमं स्वयं प्रवर्तितपूजनं सप्ताहं स्वकरे धृतं गिरिं वा स्मरति । मारितेऽप्येकस्मिन्कंसे तत्पत्नीद्वयानुवर्तिनामन्यत्र च तद्वयपित्रादीनां परःकोटीनां दुरुद्यमभाजां प्रतिघातार्थं, स्वजनानामपि यदूनां ततस्तत आनीय सुखवासार्थं व्यग्रचित्तत्वादात्मनः स्मरणमपि तस्य तत्रतत्र प्रतिरुद्धस्य न सुघटते, किमुतान्येषामिति भावः ॥ अत्र **विश्वनाथः**—ततः साश्रुगद्गदं पृच्छति—अपीति । मातरमिति—तन्मातुर्दुरवस्था त्वयैव दृश्यतामिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्यायास्यति गोविंदः स्वजनान्सकृदीक्षितुम् ॥ तर्हि द्रक्ष्याम तद्वक्रं सुनसं सुस्मितेक्षणम् ॥ १९ ॥

अप्यायास्यत्यागमिष्यति किम् सकृदपि ॥ १९ ॥

तर्जन्या तां दर्शयति । आत्मनाथमिति–संप्रति निःशोभं व्रजं पश्येति भावः ॥ अत्र **क्रमसंदर्भः**–" अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया । गतांश्चिरायिताञ्शत्रुपक्षक्षपणचेतसः ॥ " इति वक्ष्यमाणानुसारेण जरासंधादिदुर्जयनिर्जयादिकृत्यशेषेऽपि कारणांतरमन्यथा तैस्तेषां व्रजजनानामपि महानुपद्रवः स्यात् । अत्रौदासीन्यव्यञ्जनाय स्वनिकटेऽपि तान्नाजुहाव । किञ्च–युगपदुभयत्रापि पित्रादिव्यवहारस्याभिरुचितलीलावेशादीनां समञ्जसताया दुर्घटत्वं स्यात् । निजप्रेयसीनाञ्चानयनेनाप्यसमञ्जसत्वमिति । अत एव पूर्वमपि 'वयञ्च स्नेहदुःखितान् । ज्ञातींन्वो द्रष्टुमेष्यामः ' इत्येवोवाच न त्वाहरिष्याम इति । अतस्तादृशानपि वो वयमेव द्रष्टुमेष्यामो न तु यूयमत्रागच्छतेति व्यञ्जनामभिप्रेत्यैव तयोर्दिदृक्षया स्वयं नंदादयोऽपि निकटादपि व्रजान्नागतास्तत्तदुपद्रवापातात् । पुरे व्रजे च युगपत्प्रकटा स्थितिर्न युक्ता तज्ज्ञाने श्रीनंदादीनामस्मदीयत्वज्ञानहान्या बंधुभावहानिश्च स्यात् । पुत्रादिरूपस्य स्वस्य महाराजताश्रवणेन तूत्कण्ठातिशयप्रेमानंदबुद्धिः स्यात् । यथा वक्ष्यते–' यथा दूरचरे प्रेष्ठे ' इत्यादि । तस्मात्तथा स्थितिमपि न चकार । अप्रकटा स्थितिस्तु तस्य तत्र सदैवास्त्येव तथैव प्रतिपादयिष्यते ॥ १८ ॥ तर्हि गोविंदागमनावसरे । तद्वक्रं गोविंदमुखम् । गोविंद इति गोप्रियत्वमाह । तदर्थमायास्यति चेत्–तर्हीति ॥ * ॥ अप्यायास्यतीति–किंस्विदुद्धव तन्मनोऽभिप्रायं जानासीति भावः । ननु जानाम्येव स आयास्यति, युष्मान्सान्त्वयिष्यति, निश्चलमत्र स्थास्यतीति, तत्रास्मत्सान्त्वनं दूरे वर्ततां, निश्चलवासोऽपि मा भवतु किन्तु तद्दर्शनमात्रमहं याचे इत्याह–गोविन्द इति । स्वजनानस्मान्विरहमहाज्वरपीडितानद्य श्वो वा मरिष्यतो द्रष्टुमपि सकृदपि किमायास्यति गोविन्द इति । परःपरार्धान्गास्तदुपलक्षितानि कोटिशः स्वर्णमुद्रा मुक्ताहीरकादिरत्नबहुराजतकानकपात्रविविधवस्त्रालंकारचन्दनागुरुकुङ्कुमाद्यनेकगृहद्रव्याणि विन्दतां लभताम् । आवयोर्मृतयोरेतेषु वस्तुषु कोऽन्यः स्वत्वं कल्पयेदत एतानि गृहीत्वा यत्र तस्य वस्तुमिच्छा तत्र वसत्विति भावः । ननु किमेवं द्योतयसि तमागतप्रायं विद्धीति, तत्र विलम्बमसहमान आह–कर्हीति । ' तर्हि ' इति च पाठः । द्रक्ष्याम इति–सलोप आर्षः । तच्चंद्रकोटितिरस्कारि वक्रं, तां निरुपमां नासाम्, तदमृतमधुरं स्मितम्, ते कमलदलाकारे सुदीर्घनयने तस्मिन्नन्तकाले उपसन्ने दृष्ट्वैव म्रियेमहीत्याकांक्षा महती वर्तत इति भावः ॥ अत्र **तोषिणी**–ननु धीमान्कृतज्ञोऽसौ सदा स्मरत्येव किन्तु ' विधाय सुहृदां सुखम् ' इत्युक्तेः कार्यवशात्किञ्चिन्मात्र एव विलम्बः स्यादित्याशंक्य तत्स्मरणस्य फलं द्वयमन्यत्पृच्छति–अपीति । गोविंदः गोकुलपालक इत्यागमनस्यावश्यकतोक्ता । स्वशब्देन स्नेहपात्रतयेक्षणावश्यकता च । आस्तां पौनःपुन्याशा सकृदपि तथैवास्तां सान्त्वनाद्याशा, ईक्षितुमपि किमायास्यतीति । तत्रेक्षितुमिति स्वेषां महाव्याधितानामिव तापः सूचितः । सकृदिति–तत्राप्यसंभावितजीवनानामिव यन्मात्रेणास्मासु मरिष्यमाणानां पुनर्दर्शनाभावदुःखं यथाकथञ्चिज्जीविष्यतां च पुनर्दर्शनासंभावनदुःखमुभयेषाञ्चापाततस्तृष्णाया असह्यतादुःखं नंक्ष्यतीति भावः।तस्मिन्नपि तदा गमने द्वयं फलान्तरं सवैयग्र्यमभिव्यनक्ति–कर्हीति । कदाऽऽगमनं स्यात्कदा द्रक्ष्याम इत्यर्थः । अन्यत्पूर्ववत् ॥ **संदर्भस्तु**–'मा शोचतं महाभागौ' इत्यादौ " भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् " इत्यादौ च किन्त्वसौ प्रकटलीलाविर्भाविणां तेषामनुभवगोचरो न भवति तस्माद्दन्तवक्रवधान्ते पाद्मोत्तरखण्डे वर्णयिष्यमाणं भागवतमते च व्यञ्जयिष्यमाणं यावत्तत्र निजगमनं संपद्यते तावत्तेषां यथा केनाप्यपदेशेनासावनुभवगोचरः स्यान्महाराजत्वे च वैभवश्रवणं स्यात्तथा समाधातुं स्वयमगत्वा स्वस्यागमने केवलं श्रीरामगमनं च दुःखकरं मत्वा स्वतुल्येन श्रीमदुद्धवेन प्रेयस्त्वेन तादृश्यं संदिश्य श्रीव्रजवासिनः सान्त्वयामासेति क्रमप्राप्तां लीलां वक्तुमारभतेऽध्यायद्वयेन–' वृष्णीनाम् ' (१) इति । ' ये त्यक्त–' (४) इति । यच्छब्दसामान्यनिर्देशस्तान्निर्देशश्च विप्रत्वाद्यनपेक्षार्थः । चकारात्तानपि किमुत तन्मनस्का इति । धारयन्तीति (६)–अतः प्रत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दावाग्नेर्वातवर्षाच्च वृषसर्पाच्च रक्षिताः ॥ दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना ॥ २० ॥ स्मरतां कृष्णवीर्याणि लीलापांगनिरीक्षितम् ॥ हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः ॥ २१ ॥ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्षमाणानां मनो याति तदात्मताम् ॥ २२ ॥ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा ॥ २३ ॥

श्रीकृष्णोपकारस्मरणादिभिरनुपमानंदेनाभिभूयमान आह दावाग्नेरित्यादिना । वाताद्वर्षाच्चेति । वृषात्सर्पाच्चाघासुरात् अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्म ॥ २० ॥ किं च । स्मरतामिति । लीलयाऽपांगेन निरीक्षितम् । अंग हे उद्धव ॥ २१ ॥ न केवलं शिथिला एव किं तु शनैःशनैरुपरमंतीत्याह । सरिच्छैलेति । सरितश्च शैलाश्च वनोद्देशाश्च तान् । आक्रीडान् क्रीडास्थानानि तदात्मतां मुकुंदरूपताम् ॥ २२ ॥ सुराणामर्थायेह प्राप्तौ महद्गंभीरं गर्गस्य वचनं यथा ॥ २३ ॥

गमनपर्यन्तैरेव संदेशैरधुनापि ताः सान्त्वनीयाः । एतत्पश्चाद्वर्णितमेव ॥ १९ ॥ वातवर्षादिन्द्रकृतात्, वृषसर्पाच्चेति समाहारद्वंद्वः । अन्येभ्यः केश्यादिभ्यः । मृत्युभ्यो मृत्युहेतुभ्यः ॥ * ॥ ततः सधैर्यमिव स्वेषु तत्कृतकात्मदुःखाद्यनपेक्षिस्नेहशतं निजसान्त्वनार्थमिव स्मरन्, प्रत्युत तेन हृदि विदीर्यमाण इव विलपति—दावाग्नेरिति । अहो परमबाल्यादेव तेनास्माकं रक्षा मुहुरेव कृताऽस्ति, कति वा वर्णयामः । यत्र दावाग्नेरपि स्वयमनुकंपावेशेन पातुमारम्भः ॥ विश्वनाथस्तु—ननु नैव मरिष्यथ बहुकालमेव तं स्वसूनुं लालयन्तो जीविष्यथेति, अधुना तु मृत्युहस्तान्न मुच्यामहे इति वक्तुमतीतान्मृत्यून्स्मरति—दावाग्नेरिति । सुमहात्मना सुष्ठु महानात्मा कारुण्यप्रभावादिनिरुपाधिप्रेमास्पदादिस्वभाव औत्पत्तिको गुणो यस्य तेन । किन्त्वधुना सुमहोग्रदावानलात्कथं तेन रक्ष्यामह इति न जानीम इति भावः ॥२०॥ अन्यदाह—किञ्चेति । क्रिया गृहादिविषयाः ॥ * ॥ एवं पद्यद्वयेन माधुर्यप्रभावौ स्मृतौ, तत्रोभयथापि वैयग्र्यं लब्ध्वा एतदेव प्रात्यहिकमात्मदुःखं निवेदयति—स्मरतामिति । कृष्णेति—कृष्णस्येत्यर्थः। "सुपां सुलुक्—"इत्यादिना सुपो लुक् । अत एव लीलेत्यादावप्यन्वयः । वीर्याणि दावाग्निमोक्षणादिरूपस्वभावमयचरितानि । न केवलं तान्येवापि तु माधुर्यमयचरितानि चेत्याह—लीलेति । लीला नेत्रयोः स्वाभाविकविलासः, तत्पूर्वकमपांगेन लज्जास्वभावान्नेत्रैकदेशेनैव निरीक्षितम्, सर्वत्रैव स्निग्धस्वभावतया सावधानमीक्षणम्, तथा तत्रैव हसितं तत्रैव भाषितञ्च स्मरतां तद्व्यसनमापन्नानां सर्वा भोजनादिक्रियाः शिथिलाः अंतर्व्यग्रतया बहिः प्रयत्नशून्याः, ईश्वरेणैव प्रवार्तिता इत्यर्थः । क्रियाभिरन्यचित्ततया वाऽस्वस्थास्तिष्ठेम तदपि न सिद्ध्येदिति भावः ॥ विश्वनाथः—ननु तदीयमुखचन्द्रस्मरणसुधयैव सर्वे संतापाः शाम्यन्तीति—सत्यम्, तत्स्मरणं सर्वसन्तापहरणमपि संप्रति दुरदृष्टवशादस्माकं सर्वसन्तापकरमेवाभूदित्याह—स्मरतामिति । क्रियाः शिथिलाः स्नानभोजनाद्या अभ्यासवशाज्जायमाना अपि शिथिलीभवंति । अत एव जीवाम इति भावः ॥२१॥ तदात्मतां तस्मिन्नेव व्याप्तताम् ॥ * ॥ ननु गृहावस्थाने पुत्रस्मरणमधिकं स्यात्तत्त्यागाय गाः पालयतां यमुनातीरे भ्रमतामित्याशंक्य तेनाप्यप्रतिकारं निवेदयति—सरिदिति । उद्देशाः प्रदेशाः, तान् मुकुंदस्याजगररक्षणादिभ्योऽस्मदादिमुक्तिदातृत्वेन तन्नाम्ना व्रजे विख्यातस्य पदैश्चरणचिह्नैः श्रीपृथ्वीदेव्यापि स्नेहादद्यापि निजांके तथैव रक्ष्यमाणैर्विभूषितान् । तथाऽऽक्रीडान् तत्तत्क्रीडाचिह्नमनोहरान् । ईक्षमाणानां प्राणिमात्राणां किमुतास्माकं मनस्तदात्मतां तत्स्फूर्तिमयतां याति । अस्माभिः किं कर्तव्यमिति भावः ॥२२॥ गंभीरं दुर्ज्ञेयार्थम् 'प्रागयं वसुदेवस्य' इत्याद्युक्तरूपम् । यद्वा—महते भूभारसंहारलक्षणायार्थाय प्रयोजनाय । इह च सामानाधिकरण्ये महतष्टेराकाराभावश्छांदसः ॥ * ॥ एवं हठात्पुनरागतेन माधुर्यस्मरणेन लब्धचित्ताः स्वस्थाः पुत्रबुद्ध्या स्नेह एवात्यन्तार्तिहेतुरित्याशंक्य तदाच्छादनाशया विश्लेषविशेषमयप्रीतिजातिस्वभावात्तन्माहात्म्यकीर्तनेच्छया वा पुनः प्रभावान्स्मरति—मन्य इति चतुर्भिः । इह मद्गृहे,प्राप्तौ स्वाच्छन्द्येनैव जन्मानुकृतवन्तौ, सुरोत्तमौ नारायणसमौ कावपि मन्ये संभावयामि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंसं नागायुतप्राणं मल्लौ गजपतिं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥ २४ ॥ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् ॥ बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिम् ॥२५॥ प्रलंबो धेनुकोऽरिष्टस्तृणावर्तो बकादयः ॥ दैत्याः सुरासुरजितो हता येनेह लीलया ॥२६॥ श्रीशुक उवाच ॥ इति संस्मृत्यसंस्मृत्य नंदः कृष्णानुरक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥२७॥ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च ॥ शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा ॥ २८ ॥ तयोरित्थं भगवति कृष्णे नंदयशोदयोः ॥ वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ॥ २९ ॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥ ३० ॥

न केवलं तद्वचनानुसारेणैव किं तु व्यवहारसंवादादपीत्याह । कंसमिति ॥ २४ ॥ इभराड्यष्टिमिव तालत्रयप्रमाणं धनुर्बभंज ॥ २५ ॥२६॥२७॥२८॥ २९॥३०॥

इति पुत्रभावस्यैव सहजत्वमंतर्गतत्वं च बोधयति ॥ २३ ॥ तस्य गर्गस्य वचनानुरोधेन न सुरोत्तमावपि तु व्यवहरणं व्यवहारः कृतिरूपः, संवदतीति संवादः सम्यग्वक्ता व्यवहार एव संवादो व्यवहारसंवादस्तस्मात् । अवधिष्टां नाशयामासतुः ॥ * ॥ मल्लौ चाणूरमुष्टिकौ । तथाशब्देन मल्लयोर्गजपतेश्च नागायुतप्राणत्वमुक्तम् । अवधिष्टां हतवन्तौ । यौ यश्च यथास्वमिति शेषः । मृगाधिप इत्येकत्वं प्रत्येकदृष्टान्तत्वात् ॥ २४ ॥ तालोंगुष्ठमध्यमे विस्तृते यत्परिमाणं जायते सः, तादृशतालत्रयपरिमाणम् "प्रादेशतालगोकर्णाः सांगुष्ठे वितते करे । तर्जन्यादियुते" इति कोशात् । केचित्तु 'तालो हस्तचतुष्टयम्' इत्याहुः । महासारं बहुपुरुषधार्यत्वाद्गुरुतरम् । यष्टिमिक्षुदंडम् 'यष्टिर्वोष्विक्षुदंडयोः' इति शाश्वतः ॥ * ॥ तालः षष्टिहस्तप्रमाणपरिमि (श) तकस्तालवृक्षः । एकेन वामेनैव ॥ २५ ॥ येनेत्येकत्वं प्राधान्यात् ॥ * ॥ ० ॥ २६ ॥ इतीत्थम् । प्रेमप्रसरेण स्नेहाधिक्येन । विह्वलो विवशः । अत्युत्कण्ठानुरागो यस्य स तथा ॥ * ॥ कृष्णानुरक्तधीरिति—स्मृत्यारूढेण महैश्वर्येणापि हंतहंत एतादृशैश्वर्यवता पुत्रेण गुणरत्नाकरेण दुरदृष्टवशाद्विश्लिष्टोऽभूवमिति कृष्णेऽनुरक्तेव धीर्न तु वसुदेवस्येवैश्वर्यगंधेनापि संकुचितानुरागा शिथिलितसंबंधा धीर्यस्य सः । प्रेमप्रसरविह्वल इति—जातिप्रमाणाधिक्यवतः प्रेम्णोऽगस्त्यस्याग्रे खल्वैश्वर्यस्य समुद्रोऽपि कियानिति भावः । एवं कृष्णस्य पिता नंदो गांभीर्यस्य बलाद्धृतिं धृत्वा लौकिक्या रीत्योद्धवं संमानयितुं सम्यगीक्षितुं परिचेतुं कुशलं प्रष्टुं कृष्णस्य प्रभावमयचरितं वक्तुं शशाक ॥२७॥ अवास्राक्षीन्निरंतरममुचत् ॥ * ॥ माता श्रीयशोदा स्वधैर्यसिंधुभ्रमिनिमज्जनोन्मज्जनवती तत्तत्किमपि कर्तुं न शशाकेत्याह—यशोदेति । मथुराप्रस्थानदिनमारभ्यैव शतशः स्त्रीपुंसस्वजनैः प्रबोध्यमानापि पुत्रमुखं विनाऽन्यत्किमप्यहं न द्रक्ष्यामीति प्रतिक्षणमेव प्रतिजनानां पुरो मुद्रितनेत्रैवाश्रूणि अव समंतात् निजवस्त्रादिकमाप्लाव्यास्राक्षीत्—विससर्जैव न तूद्धवं परिचेतुं वात्सल्यविषयीकर्तुं स्वयं किंचित्प्रष्टुं पुत्रं प्रति किंचित्संदेष्टुं च शक्तेत्यर्थः। स्नेहेन पुत्रविषयकेण स्नुतपयसौ पयोधरौ यस्याः सा । श्लेषेण स्नुतानां पयसां धरा॥२८॥ परमं परां काष्ठां प्राप्तम्॥*॥ तयोः कीदृशभावौ तौ[2] भवेतामिति सविस्मयं परिचिन्त्यमानयोः श्रीनंदयशोदयोरित्थं पूर्वोक्तप्रकारेणानुरागं तृष्णातिशयमयस्नेहं भगवति सर्वेश्वरे वीक्ष्य विशेषेण साक्षात्कृत्य,तत्रापि कृष्णे परमपूर्णाविर्भावे तस्मिन्वीक्ष्य, तत्रापि परमं सर्वोत्कृष्टं वीक्ष्य उद्धवो नंदं तस्यैव प्राधान्यात्संवादे प्रवृत्तत्वाच्च । श्रीयशोदायास्तु परमवैयग्र्येण तत्प्रवृत्त्यशक्त्या तमेवाह । उच्चैः सांत्वयितुमिति शेषः ॥ २९ ॥ यद्धेतोर्नारायणे मतिः कृताऽतो युवां श्लाघ्यतमावित्यन्वयः ॥ * ॥ तत्र मुदाऽहो मम भाग्यं ममैतज्जन्मैव सार्थकं जातं यदीदृशाऽनुरागो दृष्ट इति तयोर्दुःखदर्शनेऽप्युद्धवस्यानंदः । हर्षेण तदंशाविष्कारेणैवोपलक्षितो न तु तद्दुःखदर्शनमयदुःखांशाविष्कारेणेति भावः । तस्य हि तदैश्वर्यस्फूर्तेरेव प्राधान्यात् । तदनुरागस्यापि महिमांशस्फूर्तिरेव प्रथमतो जाता न तु वैयग्र्यांशस्फूर्तिः । केवलवैयग्र्यांशस्फूर्तेर्योग्यत्वे तु सान्त्वनानधिकारिणं मन्यमानो भगवानपि

१ रामकृष्णयोः । २ तौ देवकीवसुदेवौ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतौ हि विश्वस्य च बीजयोनी रामो मुकुंदः पुरुषः प्रधानम् ॥ अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ ॥ ३१ ॥

अखिलगुरुत्वमेव जनकत्वेन नियंतृत्वेन चाह । एताविति । रामो मुकुंदश्चेत्येतौ विश्वस्य बीजयोनी निमित्तोपादाने । ननु पुरुषप्रधानयोर्बीजयोनित्वं प्रसिद्धमत आह । पुरुषः प्रधानमिति । पुरुषोंशः प्रधानं शक्तिः । अतः प्रधानपुरुषावप्येतावेवेत्यर्थः । एवं जनकत्वमुक्तम् । किं च । अन्वीय भूतेषुभूतेष्वनुप्र

न तं प्रास्थापयिष्यदिति भावः । अतः प्रथमतस्तन्महिमवर्णनद्वारैव प्रोत्साह्य तौ सान्त्वयितुमिच्छँस्तज्जातीयश्रीनंदवाक्यावसरं प्राप्य तथैवाह—युवामिति द्वाभ्याम् । इह श्रीकृष्णावतारावतीर्णतदीयमहाभक्तगणपूर्णे जगति देहिनां तत्पर्यन्तानां सर्वेषां मध्ये ये श्लाघ्याः श्रीनारदादयः श्रीगोकुलवास्यन्तास्तेषामपि मध्ये श्रेष्ठौ । हे मानदेति—एवं युवाभ्यामेव तदीयानामस्माकं मानो दत्तः । यतः श्रीकृष्णसंबंधिन एवंविधा जाता इति लोकैः कीर्तयिष्यत इति भावः । यद्यस्मान्नारायणे नरस्य महत्स्रष्टृप्रभृतिपुरुषावतारसमूहस्याऽप्याश्रयेऽखिलगुरौ परमव्योमनाथादितोऽपि महत्तमप्रकाशे उभयथा परमोपादेयपरमदुर्लभपरमभाग्यदुष्प्रापाश्रयमात्र इत्यर्थः । तास्मिन्नीदृशी पुत्रभावतया तद्वश्यतातिशयकारिणी मतिः कृता विद्यते । युवाभ्यामेवेति शेषः ॥ ३० ॥ निमित्तोपादानत्वे आक्षिपति—नन्विति । अतोऽत्र । अतः पुरुषप्रधानयोरप्यनयोरंशशाक्तित्वात् । इत्यर्थ इति—अंशांशिनोः शक्तिशक्तिमतोश्चाभेदोपचारादेतावेवेत्याशयः । यद्वा—पाठक्रमादर्थक्रमो बलीयान्—“ अग्निहोत्रं जुहोति”, “ यवागूः पचति ” इति वत् । ‘ रामो मुकुन्दः पुरुषः प्रधानम् ’ इह रामः प्रधानम् । ‘ यस्याद्य आसीद्गुणविग्रहो महान्यत्संभवोऽहम् ’ इति पञ्चमस्कन्धे रुद्रोक्तेः संकर्षणस्य प्रधानत्वमुक्तम् । प्रधानादेव महत्तत्त्वोत्पत्तिस्ततोऽहंकारोत्पत्तिश्च सांख्यैर्मन्यत इति मुकुंदस्य पुरुषत्वम् । ‘ स एव पुरुषः साक्षात् ’ इत्यादि बहुश उक्तेः स्फुटमेवेति । एवमित्थम् । नियंतृत्वमाह—किञ्चेति । तदुपहितस्य भूतोपाधिकस्य । जानातीति ज्ञानं जीवस्तस्य नियंतृत्वे हेतुमाशंकते—कुत इति । इत्यर्थ इति—अनादिभावस्य कारणता कारणस्य नियंतृता च प्रसिद्धेति भावः । यद्वा—एतौ रामो मुकुंदश्च प्रधानं सर्वोत्तमः । कुतः—यतः पुरुषः, अन्येषामर्वाचीनत्वात्पुराणः पुरातनः । किञ्चानयोरवतारप्रयोजनं दैत्यहननमेव न किन्तु स्वोपदिष्टज्ञानरक्षणमपीत्याह—अन्वीयेति । इमौ पुराणौ पूर्णानंदौ रामकृष्णौ विलक्षणेषु विविधलक्षणेषु नानाविधव्यावर्तकधर्मेषु भूतेषु अन्वीयावतीर्य विज्ञस्य व्यासाद्यात्मनोपदिष्टविशिष्टज्ञानस्यासुरजनकृतनाशं विज्ञायेशाते समर्थयेते, रक्षत इत्यर्थः ॥ * ॥ हि एव, एतावेव । मुकुन्दश्चेति चकारान्वयः । ए (भू) तेषु प्राणिषु अन्वीय तद्विलक्षणस्य ज्ञानस्य शुद्धचिन्मात्रस्वरूपस्य जीवस्येशाते । चकाराद्भूतानाञ्च । संधिरार्षः । इमाविति पुनरुक्तिस्तयोरेव तादृशतां निर्धारयति । अन्यत्तैः । तत्रानादित्वात्कारणत्वमिव स्वातंत्र्येणेति वैशिष्ट्यं ज्ञेयं जीवादेरप्यनादित्वात् । यद्वा—नारायणत्वमखिलगुरुत्वमप्याह—एताविति । अंशांशिनोरभिन्नत्वाद्येन रामेण सहैकरूपो यो मुकुन्दस्तावेतौ रामकृष्णाभिधतया पृथक्तया दृश्यमानावेव च विश्वस्य, चकारादवतारादीनामपि बीजयोनी द्वावपि निमित्तोपादानरूपौ विश्वस्य तत्तद्रूपतया नाम्नापि पुरुषः प्रधानमिति विख्यातौ इमावेव तदेतद्द्वयरामकृष्णरूपेण पुराणावनादिसिद्धौ सन्तौ भूतेषु जीवेष्वन्वीय तत्तदुपाधावन्तर्यामिरूपेणानुप्रविश्य विलक्षणस्य ज्ञानस्य चाद्वयज्ञानस्वरूपस्य ब्रह्मणोऽपीशाते, प्रकाशनाप्रकाशनयोः समर्थौ भवतः । “ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥ ” इति, “ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ” इति, ‘ ब्रह्मणो हि प्रतिष्ठाहम् ’ इत्यादिश्रीभागवतगीतोक्तेः । “ मदीयं महिमानं च परं ब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ ” इति च । अत्र **विश्वनाथः**—नारायणत्वमखिलगुरुत्वञ्चाह—एताविति । अंशांशिनोरभिन्नत्वात् ‘ बहुमूर्त्येकमूर्तिकम ’ इत्यक्रूरोक्तेश्च । एतौ द्वावप्येक एव नारायण इत्यर्थः । विश्वस्य बीजयोनी द्वावपि निमित्तोपादानरूपौ द्वावेव पुरुषः द्वावेव प्रधानं शक्तिशक्तिमतोरैक्यादिति भावः, ‘ प्रकृतिर्ह्यस्योपादानम् ’ इत्याद्येकादशस्कन्धोक्तेः । भूतेष्वन्वीयान्तर्यामितया प्रविश्य विलक्षणज्ञानस्येशाते प्रदानसमर्थौ, भक्तेभ्यो भक्तिज्ञानस्य, ज्ञानिभ्यो ब्रह्मज्ञानस्य च कृपया दातारौ स्याताम् । “ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिञ्जनः प्राणवियोगकाले क्षणं समावेश्य मनो विशुद्धम् ॥ निर्हृत्य कर्माशयमाशु याति परां गतिं ब्रह्ममयोऽर्कवर्णः ॥ ३२ ॥ तस्मिन्भवंताव खिलात्महेतौ नारायणे कारणमर्त्यमूर्तौ ॥ भावं विधत्तां नितरां महात्मन्किं वाऽवशिष्टं युवयोः सुकृत्यम् ॥ ३३ ॥ आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः ॥ प्रियं विधास्यते पित्रोर्भगवान्सात्वतां पतिः ॥ ३४ ॥

विश्य भूतानां तदुपहितस्य विलक्षणस्य च नानाभेदस्य ज्ञानस्य जीवस्य चेशाते ईश्वरौ नियंतारौ भवतः । कुतः । पुराणावनादी । अनादित्वात्कारणत्वं ततश्च नियंतृत्व मित्यर्थः ॥ ३१ ॥ ननु सृष्ट्यादिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्च तस्यान्येभ्यः को विशेष इत्याशंक्याह यस्मिन्निति द्वाभ्याम् । यस्मिन्क्षणमपि मनः समावेश्य कर्मा शयं कर्मवासनां निर्हृत्य त्यक्त्वा ब्रह्ममयः स्वरूपज्ञानवानर्कवर्णः शुद्धसत्त्वमूर्तिः सन्परां गतिं तत्पदं याति ॥३२॥ अखिलस्यात्मा च हेतुश्च तस्मिन् कारणमर्त्यमूर्तौ केनापि कारणेन मनुष्याकृतौ तथापि महात्मन्महात्मनि परिपूर्णे भवंतौ भक्तिं कुरुतः । अतः कृतकृत्यावित्यर्थः ॥ ३३ ॥ प्रस्तुतमाह । आगमिष्यतीति । पित्रोर्युवयोः ॥ ३४ ॥

यान्ति ते ॥" इति, 'मदीयं महिमानञ्च' इत्यादितदुक्तेः । चकारादाविलक्षणज्ञानस्य प्राकृतस्य स्वर्गादिसाधनस्यापि कार्मिभ्यो दातारौ ॥ ३१ ॥ पुनरीशतामाक्षिपति—नन्विति । तस्य श्रीकृष्णस्य । विशुद्धं तद्भक्त्यादिना पूतम् । तत्पदं श्रीकृष्णसायुज्यम् ॥ * ॥ तत्र तयोश्चेतःप्रसक्तिमदृष्ट्वा तदेव पुनः कैमुत्येन विवृणोति—यस्मिन्निति द्वयेन । यस्मिन् कृष्णे । एकस्य निर्देशो द्वयोरभेदाभिप्रायेण । जनः यः कश्चिदपि जीवः मरणसमये क्षणमपि विशुद्धं केवलं न त्वन्येंद्रिययुक्तम् । यद्वाऽविशुद्धमपि मनः समावेश्य यथाकथञ्चिल्लब्धपदं कृत्वाऽऽशु सद्य एव ब्रह्ममयः श्रीभगवत्पार्षदतया चिच्छक्तिवृत्तिः शुद्धसत्त्वस्यैव तादृशमूर्तित्वेन स्वरूपप्रकाशचतुरः प्राधानिकवत्तिरोहिततदंशोऽतोऽर्कवर्णः स्वयमेव प्रकाशमानोऽन्यांश्च प्रकाशयन्नित्यर्थः । 'आदित्यवर्णं तमसः परस्तात्' इतिवत् । **विश्वनाथस्तु**—परां गतिं वैकुण्ठलोकम् । ब्रह्ममय श्चिन्मयशरीरः सन्नर्कवर्णः सूर्यतुल्यतेजा इत्याह ॥ ३२ ॥ तस्मिञ्छ्रीकृष्णे । कारणेन भूभरहरणादिना हेतुना । महात्मन्निति सप्तमी । भावमतिप्रेमाणम् । यतः श्रीकृष्णभक्तावतो हेतोः । इत्यर्थ इति—'समुद्रान्ता इवापगाः' इति न्यायेन हरिभक्त्यंताः सर्वविधय इति । तद्वत्त्वाद्युवां कृतार्थावेवेति भावः ॥ * ॥ अखिलेति—अथात्मा स्वांशानामीश्वररूपाणां विभिन्नांशानाञ्च जीवानां :मूलरूपः हेतुश्च सर्वप्रकाशक इति ज्ञेयः । तत्र हेतुः—नारायण इति । ननु स चतुर्भुजस्तत्राह—सर्वकारणं यत्तत्त्वं तदेव मर्त्याकारा मूर्तिर्यस्य तस्मिन्नराकृतिपरब्रह्मणीत्यर्थः । भावमर्दिशानुरागम् । नितरामित्यनेन श्रीवसुदेवदेवकीभ्यामपि तदुत्कर्षं बोधयति । हे महात्मन् तादृशानुरागशीलत्वात्परमोत्कृष्टस्वभाव श्रीव्रजेश्वर । वाशब्दो भ्रूक्षेपे । तयोर्युवयोः । किं कतरत् अवशिष्टं किन्तु सर्वं परिपूर्णमेव, केवलं युष्मत्संतोषकं तस्यैव कृत्यमवशिष्यत इति स्वशब्दार्थः । 'युवयोः' इति पाठेऽपि स एवार्थः ॥ अत्र **विश्वनाथः**—अखिलानामात्मा च हेतुश्च कारणञ्च मनुष्यमूर्तिश्च तस्मिन्युवयोः कृत्यं किमवशिष्टमिति । तुकारेण तस्य कृष्णस्यैव युष्मत्सान्त्वन-प्रीणन-वशीभवनादिकृत्यमवशिष्यत इति ज्ञाप्यते । 'स्वकृत्यम्' इति पाठेऽपि स एवार्थः ॥ ३३ ॥ प्रस्तुतं प्रकृतम् । अदीर्घेण शीघ्रम् । अच्युत इति वाक्यच्युतिवर्जितत्वमाह ॥ * ॥ तथाप्यजातशान्ती प्रत्युत हन्त त एव हितेऽपि तदुत्कर्षमेवं कथयन्तीति तद्गुणाचिंतने नात्यन्तार्तौ तौ वीक्ष्याधुना तु तद्वैयग्र्यस्पृष्ट आह—आगमिष्यतीति । अच्युतः सत्यसंकल्पादिना तन्नामासौ । प्रियमव्यभिचारिसंगमरूपम् । अवश्यप्रियविधाने हेतुः—पित्रोः, यथा युवाभ्यां पितृभावमयेन महाप्रेम्णा वशी

१ 'तु तयोः स्वकृत्यम्' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वताम् ॥ यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ ३९ ॥
मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमंतिके ॥ अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३६ ॥

'यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम् ॥ ' इति यदाह कृष्णस्तत्सत्यं करिष्यतीति ॥ ३५ ॥ कालविलं बनमसहमानौ प्रत्याह । मा खिद्यतमिति । हे महाभागौ खेदं मा कुरुतम् । अंतिके इदानीमेव समीपे वा । कुत इत्यत आह । अंतर्हृदीति । तर्हि सर्वैः किमिति न

कृत्य पुत्रत्वेन संपादितोऽसौ तथा तेनापि पितृत्वेनैवाभिमतयोर्युवयोरित्यर्थः । 'ये यथा मां प्रपद्यन्ते' इत्यादेः । यतो भगवानपि सात्वतानां भक्तानां पतिः पालकस्तदभीष्टसुखसंपादकः । यद्वा—भगवानपि यादवानां पतिरपि तादृशप्रेमवशत्वादिति भावः । अत्र **विश्वनाथः**—भो वत्स उद्धव त्वमतिबुद्धिमाञ्श्रुतः किन्तु मुग्ध एवासि यदावामपि स्तौषि । हंतहंत तादृशो गुणार्णवः पुत्रो यद्गृहादन्यत्र गतस्ततोऽधिको मंदभाग्योऽधमो दुःखी त्रिभुवनमध्ये कोप्यस्ति ? इत्यावां सर्वैर्निंदनीयावेवेति तदुक्तिमाशंक्य साश्वासमाह—आगमिष्यतीति । अच्युतः 'वो द्रष्टुमेष्याम' इति महावाक्यच्युतिरहितः । सात्वतानां यदूनां पतिः पालक एव केवलमत्रैव स्थित्वा भविष्यति, युवयोस्तु प्रियं मनोभीष्टं करिष्यति ॥ ३४ ॥ प्रतीपं प्रतिकूलम् ''प्रतीपो नृपतौ पुंसि प्रतिकूले तु वाच्यवत्'' इति धरणिः । किञ्च—करोतीति वर्तमानार्थकलटा श्रीमदुद्धवः स्वात्मानम् ''नोद्धवोऽण्वपि मन्यूनो यद्गुणैर्नार्दितः प्रभुः'' इति तृतीयस्कंधोक्ति स्वविमर्शरूपां श्रीकृष्णस्य स्फुटयितुं साक्षादेव कृष्णरूपत्वेनाह ॥ * ॥ ननु तस्यागमनमत्र न प्रतीमस्तत्राह—हत्वेति । यद्वा—पितृत्वं विलंबकारणञ्च तद्वाक्येनैव प्रतिपादयति—हत्वेति । करोतीति—''वर्तमानसामीप्ये वर्तमानवद्वा'' करिष्यते इत्यर्थः । किं वा—तत्तस्माद्धेतोरस्माभिस्सह सत्यं शपथं करोति कुत्रैवास्ते इत्यर्थः । 'सत्यं शपथतथ्ययोः' इत्यमरः । वस्तुतस्तूद्धवेनादृष्टस्तत्रैव ताभ्यां तदैव लालितः स प्रकाशांतरेण वर्तत एवेत्युद्धवमुखात्सत्यैव वाग्निरगात् ॥ ३९ ॥ इदानीमेव कालक्षयं विनैव 'अंतिकं शीघ्रसामीप्ये' इति यादवः । प्रकटमप्याह—मा खिद्यतमिति । द्रक्ष्यथः पश्यथः । इह वर्तमाने लृट्[1] । अत एव श्रीमदनुभूतिस्वरूपचरणैः कारकप्रक्रियायाम् ''छन्दसि स्यादिः सर्वत्र'' इत्यत्र स्यादिपदं त्याद्युपलक्षकमुक्तम् 'एकसंबंधिज्ञानमपरसंबंधिस्मारकम्' इति न्यायेन । स्यादित्याद्युभयावयववत्त्वाद्विभक्तेरिति । अत्र हेतुमाशंकते—कुत इति । तत्राक्षेपे । तद्यथा ज्योतिर्यथा । इति भाव इति—'भक्त्याहमेकया लभ्यः' इति श्रीमुखोक्तेरित्यर्थः । 'काष्ठं दार्विंधनं त्वेधः' इत्यमरः ॥ * ॥ हंतहंत धिगावां ययोरभाग्यस्य प्राबल्यमेव सत्यवचसोऽपि पुत्रस्यात्रागमने प्रतिबंधकीभवतीति खिद्यन्तौ प्रत्याह—मेति । नन्वन्तिके यद्द्रक्ष्यावस्तत्कस्मिन्दिने श्वः परश्वो वा पञ्चमे दिने दशमे दिने वा संप्रति निर्जिगमिषून्प्राणान्केनाश्वासेन स्थापयिष्यावस्तावत्, न चेदागमिष्यति तदेव निश्चित्य ब्रूहि, निर्यान्तु प्राणा मास्तु तन्निरोधनकष्टमावयोरित्युक्तवति श्रीनंदे उद्धवः स्वहृदि परामम्रर्श—हंतात्र कमुपायमनुतिष्ठामि प्राकृतपुत्रवियोगातुराः खल्वेवं प्रबोध्यन्ते—भोभो किमिति सांसारिकमोहमग्ना भवथ, मिथ्याभूतपुत्रकलत्रादिष्वासक्तिमनर्थहेतुं परित्यज्य भगवत्यासक्तिः क्रियतामिति । यस्य तु भगवत्येव पुत्रीभूते आसक्तिः सोऽयं नंदः कथं प्रबोधयितव्यः । न च वसुदेवस्यैवास्य पुत्रभाव ऐश्वर्यप्रदर्शनया शिथिलयितुं शक्यः, प्रत्युतानयोर्गाढत्वमेवापद्यते । हंत प्राकृतमपि पुत्रं गृहे खेलन्तमदृष्ट्वा तत्पितरौ दुःखेन म्रियेते । आवयोस्त्वतिभाग्यवशात्परमेश्वरोऽपि पुत्रीभूतो गृहे खेलति स्म, आवयोः क्षणमपि लालनमप्राप्य खिद्यते स्म, स्वगृहे तं पुत्रमदृष्ट्वा कथं जीविष्यावः, धिगावां यत्तादृशोऽपि पुत्राद्वियुक्तावित्येवंविधाऽनयोर्मनोनिष्ठा । देवकीवसुदेवौ त्वेतत्पारमैश्वर्यानुभवे सति हंतावयोरयमाराध्य एव न तु पुत्र इत्येतत्परिष्वंगलालनादावपि शंकेते । तेन केवलमेपामेक एव कृष्णे ममताग्रंथिर्दृढः । किन्तु परमेश्वरस्यापि तस्यैतेषु दृढैव ममता ''गृहीत्वा पाणिना पाणिं पित्रोर्नौ प्रीतिमावह'' इत्येतदर्थे तस्यापि व्याकुलता मया दृष्टैव । ''दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषां नो व्रजौकसाम् । नंद ते तनयेऽस्मासु तस्या

१ ''छन्दसि बहुलम्'' इति पाणिनीयाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वाऽस्त्यमानिनः ॥ नोत्तमो नाधमो वाऽपि समानस्यासमोऽपि वा ॥ ३७ ॥
न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥ ३८ ॥

दृश्यते तत्राह । ज्योतिरिवैधसीति । तद्यथा मथनं विना न दृश्यते तथा भक्तिं विना कृष्णोऽपीति भावः ॥ ३६ ॥ अहो आस्तामेतत्तस्य त्विहागमनं स्वस्यातिप्रियान्पित्रादीन्विहाय न संगच्छत इति मन्येहं तत्राह । नह्यस्येति । अस्य प्रियादयो नहि संति । तत्रेमौ हेतू । अमानिनः समानस्येति च निरभिमानित्वाद्रागादिरहितत्वाच्चेत्यर्थः ॥ ३७ ॥ ३८ ॥

प्यौत्पत्तिकः कथम् ॥'' इति गोपवागपि स्मृत्वा स्मर्यत एव । यदि पुनर्मथुरां गत्वा श्वस्तमानयेयं तदा कंसभार्याद्वयोपजापकुपिते जरासंधे मथुरां हंतुमागमिष्यति सति तत्र वसुदेवादीन्यादवान्को रक्षेत्, यदि तद्रक्षार्थं कृष्ण एव पुनर्मथुरां गच्छेत्तदैते म्रियेरन्, यदि चातश्चतुःपञ्चवर्षान्ते आयास्यतीति ब्रवीमि तदा तावत्कालपर्यन्तं धैर्यदिधीर्षाप्येतैर्दुष्करा, चतुःपंचदिनान्ते आयास्यतीत्यलीकोक्त्याश्वासने तस्मिन्नेवावधिसमाप्तिदिने मद्वैकलीकत्वे व्यक्ते म्रियेरन्, तस्मादुपायांतराभावादधुना श्रीकृष्णस्य परमात्मत्वेन सर्वत्रौदासीन्यं तथा निर्विशेषब्रह्मस्वरूपत्वेन जन्म-कर्म-शरीर-पित्रादिसंबंधराहित्यं तदनुकूलाध्यात्मयोगश्च प्रपञ्च्यानयोः प्रेमा संकोचनीयः । तेनतेनाप्यप्रमेयो दुष्पारो दुर्निवारः प्रेमा यदि प्रत्युत वर्धेतैव तदा मथुरां गत्वा कृष्णवसुदेवोग्रसेनादिमहासदस्यनयोः प्रेम्णो निरुपमां कीर्तिं कीर्तयित्वा सर्वान्विस्माप्य मया कृष्ण एवोपालंभनीय इति मनसि कृत्वा प्रथमं कृष्णस्य परमात्मत्वं द्योतयन्नाह—अंतरिति । तर्हि सर्वैः किमिति न दृश्यते तत्राह—ज्योतिरिति । तद्यथा मंथनं विना न दृश्यते तथैव कृष्णोऽपि । तस्माद्युवाभ्यां तस्मिन्पुत्रे कृष्णे वैष्णवैरिव भक्तिः कर्तुं न शक्यते कथं स साक्षात्स्वगृहे द्रष्टव्य इति द्योतिते सति येन तेन प्रकारेण पुत्रः स्वगृहमायातु पुत्रेऽपि[1] तस्मिन्भक्तिः कर्तव्येति नंदयशोदाभ्यां मनसि विचारितमत एव '' मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्रयाः '' इत्युद्धवं प्रत्युपरिष्टाद्वक्ष्यते ॥ ३६ ॥ एतत् भक्तिं विना स नाप्यते इत्येतत् । आस्तां तिष्ठतु । तस्य कृष्णस्य । तत्राक्षेपे । तत्र प्रियाद्यभावे । अमानिनः अहंममाभिमानहीनस्य प्रियादयो न, समानस्य सर्वत्रैकरूपस्य चोत्तमादयो न भवन्तीति भावः ॥ * ॥ अथापि प्रेमाणमसंकुचंतमालक्ष्य भो व्रजराज कृष्णः साक्षात्परं ब्रह्मैव संभवतीत्याह—त्रिभिः । अस्य प्रियादयो न सन्ति, तत्र हेतुः—अमायिनः, समस्य चेति । नै मातेत्यादिः प्रकटार्थः । नंदं ज्ञापयितुमभीप्सितः अप्रकटोऽर्थस्त्वन्य एव । तत्रतत्र सदसन्मिश्राः सात्त्विकतामसराजस्यो योनयस्तास्वस्य जन्म नास्ति, जन्माभावादेव तदुत्तरकालभवं कर्मापि नास्ति, तादृशजन्मा देहोऽपि नास्ति, तेन देहेन क्रीडापि नैव, अर्थः प्रयोजनञ्च नैव । या गुणातीताः शुद्धसत्त्वरूपा यशोदादेवकीकौसल्याद्यास्तासु जन्म तदनंतरं कर्म च तज्जन्मा देहश्च क्रीडा च अर्थश्चास्ति, तद्रूपा मात्राद्याः संतीति भावः । किन्त्वयं नंदं ज्ञापयितुमनभीप्सितः । सोऽपि एवं ब्रह्मस्वरूपोऽपि साधूनां स्वभक्तानां दुःखत्राणाय कल्पते योग्यो भवत्येव, भक्तवात्सल्यादिति भावः ॥ अत्र **तोषिणी**—अत्रास्तामेतत्, न वयं अंतर्हृदीत्यादिकं बुद्ध्यामहे इत्यर्थः । यथा जीवानां तेनतेन लौकिकप्रकारेण प्रियादयः कर्मान्ताश्चतुर्दश भावाः स्युस्तथास्यामी न सन्तीत्याह—नहीति त्रिकेण । अस्तीती सर्वत्र निषेधे योज्यम् । अस्य श्रीकृष्णस्योपकारादिना प्रियोऽतिशयेन नह्यस्ति प्रकाशेनापि नास्तीत्यर्थः । अपकारेणाप्रियोऽपि नास्ति कश्चिदिति यथासंभवमग्रेऽपि योज्यम् । तथा सौंदर्यपांडित्यादिगुणदृष्टिहेतोरुत्तमः स्तुत्यो न, कौरूप्य—कौबुद्ध्यादिदोषहेतोरधमो निंद्यो न, तादृशगुणदोषाभावदृष्टिहेतोः आ सर्वतः सम उपेक्षाबुद्धिविषयो न—॥ ३७ ॥ तदेवाह—न मातेति ॥ * ॥

१ अत्राग्रिमपद्यत्रयस्यापि सारांशतो व्याख्यानं प्रसङ्गाद्बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थं सोऽपि साधूनां परित्राणाय कल्पते ॥ ३९ ॥
सत्त्वं रजस्तम इति भजते निर्गुणो गुणान् ॥ क्रीडन्नतीतोऽत्र गुणैः सृजत्यवति हंत्यजः ॥ ४० ॥

सोऽपि जन्मकर्मादिरहितोऽपि क्रीडाप्रयोजनः सन्स साधूनां परिपालनाय सदसन्मिश्रयोनिषु सात्त्विकराजसतामसयोनिषु । यद्वा देवादिमत्स्यादिनृसिंहादियोनिषु कल्पते आविर्भवतीत्यर्थः ॥ ३९ ॥ ननु जन्मकर्मादिरहितस्य कुत एतदित्यत आह । सत्त्वमिति । क्रीडामतीतोऽपि क्रीडन् । तथापि मायागुणैः सर्वं घटत इत्यर्थः ॥ ४० ॥

धातुद्वारोत्पादनहेतोर्न माता न पिता च, अतः सुतादयोऽपि न विवाहसंबंधहेतोर्भार्यापि न, सर्वकारणादिहेतोरात्मीयो न, तदभावहेतोः परोऽपि न, अभिन्नदेहदेहिस्वरूपादन्यत्रास्मत्त्वाभिमानहेतोर्देहो न, अन्यादृशदेहस्वीकाराज्जन्मैव च न, कुतो देह इत्यर्थः—॥ ३८ ॥ सात्त्विका ऋषयस्तामसाः सर्पादयो राजसा मनुष्याः, एतदर्थे देवादिग्रहणार्थमाह—यद्वेति । इत्यर्थ इति—समर्थार्थकक्लृपधातोराविर्भावोऽप्यर्थः । समर्थस्यैव प्राय आविर्भावो नासमर्थस्येति भावः ॥ * ॥ अपूर्वोत्पत्तियोग्यत्वाभावात्कर्म शुभाशुभमदृष्टश्चेति न सर्वत्र यथायथं हेतुः । पूर्वत्र अमानिनस्तदभिमानशून्यस्य समस्य च विकाररहितस्येति प्रायः सर्वत्रैव नञः प्रयोगस्तान्निषेधनिर्धारणार्थः । आद्यो वा शब्दः समुच्चये । अन्ये च तत्संभावनायामपि तन्निरासार्थाः । जन्म एव चेति चशब्दः क्वाचित्कः । किन्तु तस्यैवंभूतस्य साधुत्वेन प्रियादयः साधुद्रोहित्वेनाप्रियादयश्च सन्तीत्यभिप्रेत्याह—सदिति । सज्जातिरियमसज्जातिरियमित्यूह्यादरानादरावननुसंधाय तासु तदनुकारिस्वरूपविग्रहेण प्रकटीभूय, साधूनां साधुत्वेनैव प्रियादितया स्वीकृतानां सर्वतो रक्षणाय योग्यो भवतीत्यर्थः । ननु संकल्पेनैव तत्स्यात्किं तत्तत्प्रादुर्भावेण तत्राह—क्रीडार्थः ' लोकवत्तु लीलाकैवल्यम् ' इति न्यायेन क्रीडाप्रयोजनः सन्नित्यर्थः । अयमभिप्रायः—अन्यलेपस्तास्मिन्न भवत्येव किन्तु परमसद्गुणशिरोमणये तस्मै साधुत्वञ्च रोचते । साधुत्वस्य च तदेकनिष्ठायामेव मुख्या वृत्तिः, ' धर्मः प्रोज्झितकैतवोऽत्र 'इत्यत्र मोक्षेच्छापर्यन्तस्य कैतवतास्वीकारात्, " न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम । वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् । मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि ॥ " इति स्पष्टत्वात् । तदेकनिष्ठता च तत्प्रेमतारतम्यैकतारतम्या, तद्वैविध्येन त्रिविधा च, प्रेमैकहेतुत्वात्तस्याः । यथा चोक्तम्—' यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ' इति, " येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् " इत्यादि । तच्च तत्प्रेम निर्गुणम् " सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् । तामसं मोहदैन्योत्थं मन्निष्ठं निर्गुणम् स्मृतम् ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥" इति भगवता निर्णीतत्वात् । अतस्तादृशसाधुमात्रापेक्षी भगवान् "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पाद्मोक्ततदुक्तानुसारेण तत्सुखमयस्वसुखाय क्रीडति यत्तत्तस्य स्वभाव एवेति स्थिते 'ये यथा मां प्रपद्यन्ते' इति न्यायाद्यथावसरं प्रियादिरूपतामपि प्राप्नोति । संप्रति च वसुदेवदेवक्यादिभ्योऽपि युवयोः शुद्धवात्सल्यप्रेमातिशयवत्त्वात्तानुपेक्ष्य युवयो रक्षामिच्छन् युवयोः प्रेमभिराकृष्यमाणो युवयोरेव पुत्रत्वमात्मनि बहुमन्यमानो युवयोरग्रे तदुचितमनोहरलीलाप्रकाशनलालसो व्रजमागमिष्यत्येवेति । तदुक्तं स्वयमेव—" गच्छोद्धव व्रजं सौम्य पित्रोर्नः प्रीतिमावह " इति ॥ ३९ ॥ अत्राशंकते—नन्विति । एतत् आविर्भावकल्पनम्, वस्तुतो निर्गुणोऽपि मायया सत्त्वादिगुणान् लीलार्थमादत्ते । यद्यपि क्रीडातीतस्य क्रीडनं न संगच्छते तथापीति । इत्यर्थ इति—स्फटिकरागवदुपाधिसंबंधेन क्रीडा संपनीपद्यत एवेति भावः ॥ * ॥ ननु यदि तस्य सर्वत्र साम्यात्प्रियाप्रियादयो न सन्ति तर्हि कथं तेन केचित्सुखिनः केचिद्दुःखिनश्च जगत्यत्र सृष्टास्तत्र गुणकृतमेव सुखदुःखादिकं न तत्कृतमित्याह—सत्त्वमिति । निर्गुणोऽपि स्वमायाशक्त्या वीक्षणादिना गुणाँस्तदीयान्स्वीकुरुते । किमर्थम्—क्रीडन् क्रीडितुम् । अतीतः क्रीडातीत इति । क्रीडापि तस्य नास्तीति नंदं बोधयितुमभीप्सितोऽर्थः । वस्तुतस्तु गुणानतीतः सन्नत्र मायिकलोकमध्ये कृष्णरामाद्यवतारेण स्वभक्तैः सह क्रीडितुमित्यर्थः । अतो गुणैर्जगत्सृजति । यत एव प्राक्कल्पगतजीवाः स्वस्वशुभाशुभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा भ्रमरिकादृष्ट्या भ्राम्यतीव महीयते ॥ चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ॥ ४१ ॥ युवयोरेव नैवायमात्मजो भगवान्हरिः ॥ सर्वेषामात्मजो ह्यात्मा पिता माता स ईश्वरः ॥ ४२ ॥ दृष्टं श्रुतं भूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकं च ॥ विनाऽच्युताद्वस्तु तरां न वाच्यं स एव सर्वं परमार्थभूतः ॥ ४३ ॥

अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टांतीकुर्वंस्तस्यात्रियैव कर्तृत्वमिति सदृष्टांतमाह । यथेति । भ्रमरिका परिभ्रमणं तयोपलक्षितया दृष्ट्या मही भूरपि भ्राम्यतीति तथा प्रतीयते एवं चित्ते कर्तरि सति तत्र चित्ते विक्षिप्तेऽहंधिया आत्माध्यासेनात्मा कर्ता स्मृतो यथा तद्वदिति ॥ ४१ ॥ किं च युवयोरेव नायमात्मजः किं तु सर्वेषामपि तत्रापि नात्मज एव किन्तु शत्रुमित्रादिरूपोऽपीति सर्वात्मत्वनिरूपणेन तयोर्मोहनिवृत्तये संबंधमनैकांतिकीकरोति । युवयोरेवेति द्वाभ्याम् ॥४२॥ अच्युताद्विना तरां नितरां तत्त्वतो

कर्मसाधनफलसिद्ध्यर्थं बुद्धीन्द्रियादीनि प्राप्य सुखिनो दुःखिनश्च भवन्तीति तत्र तस्य को दोषः, न हि तस्य प्रिया अप्रियाश्चेति भावः । **तोषिणी** तु—तैर्व्याख्यातं, तत्र तथापि तत्सान्निध्यबलेन तन्मायागुणास्तत्र कुर्वन्ति, तत्तस्मिन्नारोप्यत इत्यर्थः । यद्वा—इतः क्रीडा च तस्य स्वभाव एव यत्र प्राकृतसत्त्वादीनप्यनुरक्तीकरोतीति दर्शयति । गुणेभ्यः सत्त्वादिभ्यो निष्क्रान्तस्तत्संसर्गरहितोऽपि क्रीडन् निजभक्तसुखमयनिजसुखक्रीडाहेतोः सत्त्वं रजस्तम इति गुणानपि भजते, तर्हि तैराविष्टो भवति नहिनहीत्याह—गुणैः स्वरूपभूतैर्ज्ञानादिभिस्तानतिक्रान्तस्तदनाविष्ट इत्यर्थः । अत एव अजः, जन्मादिविकाररहितत्वेन तन्नामेत्यर्थः । प्राकृतसत्त्वादिभ्यां क्रीडामप्याह—सृजतीति ॥ ४० ॥ अत्र प्रकृते । तस्य जीवस्य । तया भ्रमरिकया । तत्र कर्तृत्वाभिनिवेशवति । आत्मा जीवः । तद्वदीशेऽपि स्रष्टृत्वादिकं मायाकृतमेव न स्वाभाविकमसंगत्वात्तस्येत्याशयः ॥ * ॥ जगत्स्रष्टृत्वमपि परमेश्वरे तत्र वस्तुतो नास्ति तस्यापि गुणकृतत्वादित्याह—यथेति । भ्रमरिका परिभ्रमणं वातादिधातुवैगुण्यात्तद्युक्तया दृष्ट्या जनेन मही कुंभकारचक्रवद्भ्राम्यतीव ईयते प्रतीयते । यथा च जीवेन चित्तेऽपि कर्तरि सति तत्रैवाहंधिया चित्तमेवाहमिति बुद्ध्या आत्मा कर्ता स्मृतः स्मर्यते, तथैव गुणकृतैव जगत्सृष्टिरीश्वरे प्रतीयत इति शेषः । एवञ्च स्वरूपेणैव तस्य जगत्स्रष्टृत्वं नास्ति, किन्त्वस्वरूपभूताया अपि मायायास्तच्छक्तित्वेन तदभेदाज्जगत्स्रष्टृत्वमस्यापीति ज्ञेयम् ॥ ४१ ॥ पुत्राभिनिवेशं नैजत्वेनाविष्टमालक्ष्य तन्निवृत्तये सर्वरूपतां निरूपयितुमाह—किञ्चेति । अयं कृष्णः । तत्रापि सर्वात्मजत्वेऽपि न केवलमात्मज एवेति । आदिना सुहृदादयो ग्राह्याः । अनैकान्तिकीकरोति व्यभिचारयति ॥ * ॥ अतः प्रेमविशेषवशत्वेनैव युवयोः पुत्रोऽसौ ततः कथंचिदन्यत्र गतोऽप्यागमिष्यत्येव, यदि च प्रातीतिकेन जन्यजनकभावेन तस्मिन्पुत्रत्वं मन्यसे तदा सर्वात्मकत्वेन न केवलं युवयोरेव अपि तु सर्वेषां, न केवलं पुत्र एवापि तु पित्रादिरपि । तत्रतत्र च साक्षात्तदालंबनकप्रेमविशेषाभावान्न कदाचिदनुगच्छेदिति बोधयति—युवयोरेवेति द्वाभ्याम् । अयं मद्विधस्येश्वरः । भगवान्सर्वैश्वर्ययुक्तः । हरिर्दुःखहर्ता । यद्वा—तस्मात्प्रेमविशेषसद्भावमात्रस्य तस्मिन्पुत्रत्वापादकत्वाद्युवयोरेवायमात्मजः, नैव न तु सर्वेषामात्मजः, हि यस्मात्सर्वेषामात्मा परमात्मा, पिता जनयिता, स्थाता धाता, ईश्वरः कर्मदाता चेति ॥ अत्र **विश्वनाथः**—अतो जगत्स्रष्टरि तस्मिन्परमेश्वरे पुत्रादिभावना सुखदुःखदत्वादिभावना च कर्तुं नोचिता, तदपि परमेश्वरोऽपि स कृष्णो ममैव पुत्र इति यदि मन्यसे, तदा शृणु तत्त्वमित्याह—युवयोरेव नात्मजः किन्तु येये तस्मिन्नात्मजभावं कुर्युस्तेषां सर्वेषामेवात्मजः । आत्मा आत्मवत्प्रेष्ठः येये तस्मिन्नात्मैवायमिति भावं कुर्युस्तेषामात्मा । एवं पित्रादिभाववतां स पित्रादिः । ईश्वर इतीश्वरत्वात्तस्मिन्किमपि नायुक्तमिति भावः ॥ ४२ ॥ तरामिह निलोप आर्षः । अत एव स्वामिचरणैर्व्याख्यातं—नितरामिति । परमार्थरूपो नित्याप्रतिहतरूपः ।:स एव श्रीकृष्ण एव ॥ * ॥ भो व्रजराज, वस्तुतस्तु युष्मदादिकं सर्वमिदं जगदिच्छाशक्तिसृष्टत्वात्तदात्मकमेव जानीहि ब्रूहि च तदनुरूपमित्याह—दृष्टमिति । अच्युताद्विना वस्तु नतरां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं निशा सा ब्रुवतोर्व्यतीता नंदस्य कृष्णानुचरस्य राजन् ॥ गोप्यः समुत्थाय निरूप्य दीपान्वास्तून्समभ्यर्च्य दधीन्यमंथन् ॥ ४४ ॥

वाच्यं निर्वचनार्हं वस्तु नास्तीति ॥ ४३ ॥दीपान्निरूप्य प्रज्वाल्य । वास्तून्देहल्यादीन् ॥ ४४ ॥

नैव वाच्यम् । प्रकृतिप्रत्ययपौर्वापर्यभाव आर्षः ॥ ४३ ॥ एवमुक्तरीत्या । कृष्णानुचरस्योद्धवस्य । समभ्यर्च्य वास्तुदेवताः मार्जनालेपनाक्षतादिभिः ॥ * ॥ एवं पूर्वोक्तप्रकारेण । तत्र श्रीनंदस्य तत्प्रकारो यथाकथञ्चित्स्वपुत्रागमनमात्रतात्पर्यकः, श्रीमदुद्धवस्य तत्प्रकारस्तु सान्त्वनमात्रतात्पर्यकः "वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा" इत्याद्युक्तेः । यथायमनयोर्भावः सर्वेषां श्लाघनीयः, एतादृशभावमूलकं चेदं विरहदुःखम्, तच्च संप्रति परमदुःसहं जातम्, श्रीकृष्णागमनञ्च न संप्रति घटते तस्माद्भावश्लाघासहितेनैव तत्त्वोपदेशेन भावमेवैतं यत्किञ्चिद्विश्लथ्यमानं विधाय तद्दुःखञ्च तादृशं विधेयमिति सान्त्वनमात्रतात्पर्यकः । ब्रुवतोस्सतोरिति शतृप्रत्ययेन तु द्वयोरपि पुनःपुनस्तादृगुक्तिं बोधयति । सा तयोः सल्लाँपसंबंधिनी दीर्घापि निशैव विशेषेण निरवशेषाऽतीता, न च श्रीगोपेन्द्रस्य शोको नाप्युद्धवस्य तदर्थवाक्प्रयोगो विररामेत्यर्थः । कृष्णानुचरस्येति—तदादेशानुसारेणाशेषवाक्चातुर्यवतोऽपीत्यर्थः । ततश्च प्रातःकृत्यार्थं त्वरया श्रीमदुद्धवो बहिर्निर्गत इति ज्ञेयम् । तदागमनज्ञानेन च गोप्यः प्रातर्गृहकृत्यं कर्तुं प्रवृत्ता इत्याह—गोप्य इति । गोप्योऽत्र विस्रंभप्रधानांतःपातिन्यः साधारण्यो वा । दधिमंथनमिदं प्रायः कृष्णाय नवनीतप्रेषणापेक्षया । अत्र **विश्वनाथः**—एवं तयोर्ब्रुवतोरेव सा निशा व्यतीता, न तु नंदयशोदयोः सान्त्वनं कर्तुमुद्धवः शशाक, नाप्युद्धवस्य प्रबोधनं तौ जगृहतुरिति भावः । अत्र व्रजराजो मनस्येवं विचारयामास—अयं कृष्णः परमेश्वर एवेति यन्मां प्राबोधयदुद्धवस्तत्किमप्यहं न जानामि, अस्य नामकरणसमय एव नारायणसमोऽयमिति गर्गमुखादश्रौषमेव, नारायणस्य समः स्तं विना कोऽन्यस्तस्मात्तथा पूतनाघबकादिमारणाद्गोवर्धनधारणाद्दावानलोपशमनाद्वरुणलोकपालप्रणमनान्नारायणत्वमस्यान्वभूवमेव । नारायण एव परमात्मा स एव परं ब्रह्मेत्येतदपि जानाम्येव, न तदप्ययमावयोरेव पुत्र इत्यत्राराधितोऽस्मदनुभव एव प्रमाणम् । 'तस्मान्नन्दात्मजोऽयं ते' इति श्रीगर्गमुनिवाक्यमपि परमेश्वरेऽपि तस्मिन्नाराध्यबुद्धिमकृतवतोरपि स्वभुक्तशेषतांबूलचार्वितादिकं समर्पितवतोरप्यावयोर्मनःप्रसादान्यथानुपपत्तिरपि कृष्णजन्मनः प्रागावयोरिष्टदेवो नारायणो ध्यातुं शक्य एवासीदधुना तु ध्यानमात्र एव स्फुरत्याविर्भवति चेत्यावयोर्मनःप्रसादालिंगम् । अत आवयोः पुत्रे तस्मिँस्तत्तद्व्यवहृतिर्न दोषः । तथा कृष्णस्यावां पितरावेवेत्यत्र कृष्णस्यानुभवः प्रमाणम्, आवयोस्तांबूलचर्वितप्रदानांकारोहणपरिष्वंगचुंबनादिलक्षणलालनस्याप्राप्तौ सत्यां तस्य मुखम्लानेर्बहुशो दृष्टत्वात् । आवयोः पितृत्वे सत्येव परमेश्वरोऽपि स विविधानुशासनभर्त्सनबंधनादिकमंगीकुरुते स्म । अन्यथा परब्रह्मणः सर्वव्यापकस्य परमेश्वरस्य कथं बंधनमिति । किन्तु सांप्रतं मथुरायाञ्च कंसादिवधानंतरं हे कृष्ण त्वं परमेश्वर एवेति सर्व एव ब्रुवते स्म । तत्र देवकी तु अहं ते मातेति, वसुदेवोऽहं ते पितेति, केचिदन्ये वयं ते पितृव्या इति, केचिच्च वयं ते भ्रातर इति, आत्मीया इति, बंधव इत्याद्युक्त्वा बहव एव तं यदा स्वस्वगेहं प्रति नेतुं निमंत्रयन्तो मथुरायामेव रोद्धुं प्रावर्तन्त तदा मत्पुत्रो महाभव्यशिरोमणिः स महासंकटे तत्तन्मुखापेक्षया जले पतितः[1] स्वीयं व्रजमपि गंतुमपारयन्सर्वत्रैव दाक्षिण्यादेवमब्रवीदित्यहमनुमिमे[2] । अहं खलु परमेश्वर एव सर्वस्रष्टा, मम का माता, कः खलु पिता, क आत्मीयः, को वाऽपरः, किन्तु यूयं सर्वशास्त्रं पश्यत यो मे भक्तिं करिष्यति तस्यैवाहं नान्यस्य गृहं यास्यामि, स एव मे पित्रादिरिति । अयं तूद्धवो बालक एव बुद्धिमानपि मत्पुत्रस्य तस्य महागंभीरहृदयहृदमवगाढुमसमर्थस्तद्वाचं तां श्रुत्वा कृष्णस्यायमेवाशय इति मत्वा तत आगत्यात्र मां तथैव बोधयति । किञ्च—मत्पुत्रेण चातुर्यात्सम्यगेवैतदुक्तम्—यो मे भक्तिं करिष्यति स एव मे पित्रादिस्तस्यैव गृहे वसामीत्यतोऽहमप्युद्धवद्वारा संदेशमिमं संप्रेषयिष्यामि—हे कृष्ण त्वच्चरणे मे भक्तिर्भवेत्तथा कृपया प्रसीद, यथा त्वदीयश्रवणकीर्तनस्मरणप्रणमनादिभक्त्या त्वामहं प्राप्नुयामिति, ततश्च सर्वयादवसभासु मत्संदेशमिमं प्रथयित्वा—भोभो यदुवंश्याः भवन्तोऽत्र मद्भक्तिं कर्तुं न शक्नुवन्ति नन्दस्तु करोत्यतः स एव पिता बंधुः प्रियश्च

---

१ प्रणयोल्लंघनसंकोचरूपजले निमग्न इत्याशयः । २ वक्ष्यमाणाहं खल्वित्यादिरीत्या ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकंकणस्रजः ॥ चलन्नितंबस्तनहारकुंडलत्विषत्कपोलारुणकुंकुमाननाः ॥४५॥ उद्गायतीनामरविंदलोचनं व्रजां गनानां दिवमस्पृशद्ध्वनिः ॥ दध्नश्च निर्मंथनशब्दमिश्रितो निरस्यते येन दिशाममंगलम् ॥ ४६ ॥ भगवत्युदिते सूर्ये नंदद्वारि व्रजौकसः ॥ दृष्ट्वा रथं शातकौंभं कस्यायमिति चाब्रुवन् ॥ ४७ ॥ अक्रूर आगतः किं वा यः कंसस्यार्थसाधकः ॥ येन नीतो मधुपुरीं कृष्णः कमललोचनः ॥ ४८ ॥

दीपप्रकाशेन दीप्तैः मणिभिः कांच्यादिषु स्थितै रत्नैस्ता गोप्यस्तदा विरेजुः । कथंभूताः । रज्जूर्विकर्षत्सु भुजेषु कंकणानां स्रजो यासां ताः । चलंतो नितंबाः स्तना हाराश्च यासां ताः । कुण्डलैस्त्विषंतः स्फुरन्तः कपोला यासां ताः अरुणानि कुंकुमानि येषु तान्याननानि यासां ता एव ताश्च ताश्च ॥ ४५ ॥ ४६ ॥ तदा व्रजौकसो गोप्यः ॥ ४७ ॥ सक्रोधमाहुः । अक्रूर इति । अर्थं साधितवानित्यर्थसाधकः । तदाहुः । येन नीत इति ॥ ४८ ॥

तद्गृहमेव यामीत्युक्त्वा स शीघ्रमिहागच्छेदिति तदन्ते व्रजराजस्तमपि परामर्मर्श, दैन्यसञ्चारिप्राबल्येन विसस्मारैव । अथ प्रकृतमनुसरामः–ब्राह्मे मुहूर्ते समुत्थाय दीपान्प्रज्वाल्य देहल्यादीनादिना क्षेत्रपालादीन् ॥ ॥ ४४ ॥ ता गोप्यः ॥ * ॥ दीपैर्हेतुभिर्दीप्तैस्तत्प्रतिबिंबेन विशेषितैः विरेजुः स्वत एव रेजुः, पुनश्च तादृशमणिदीप्तिभिर्विशेषतो रेजुरित्यर्थः । यद्वा–दीपादपि दीप्तैरतो विशेषतो रेजुः, अतो दीपज्वालनं तु मंगलतयैव । विराजमाने हेत्वन्तरं–रज्जुरित्यादि । स्रक्श्रोणिकुंडलस्यापि चलनं प्रकरणवशाज्ज्ञेयम् । अरुणेति बाह्लीकदेशोद्भवानि कुंकुमानि व्यज्यन्ते ॥ ४५ ॥ दिवं स्वर्गम् । येन ध्वनिना । दिशां दिक्षु स्थितानामशुभं नश्यतीत्यर्थः । एतेन तासां ध्वनिस्तदा सर्वदिक्षु दिवि च प्रसृत्य तत्रत्यकर्णदेशमागत्य तेषामशुभं नाशयतीत्यर्थः ॥ * ॥ संततश्रीकृष्णावेशयुक्तानामपि तासां व्रजव्यवहाररक्षणाय श्रीकृष्णैक रक्षिततत्तत्संस्कारवशाद्दधिमंथनेऽपि तदावेशं सूचयँस्तत्र च योग्याऽवसरतया गानेनातिशयं दर्शयँस्तेन जगतोऽपि मंगलं जातमित्याह–उदिति, उच्चैरित्यावेशो दर्शितः । अरविन्दलोचनमिति सौन्दर्यप्रधानं गानं व्रजांगनानामिति तादृशप्रसिद्धेर्गाननैपुण्यञ्च । एवं प्रेम्णोच्चैर्गानात्तासां बाहुल्याच्च गीतध्वनेर्व्यापकता ज्ञापिता । अत एव दिवमस्पृशत् । तत्र हेत्वन्तरञ्च–दध्न इति । निर्मथनं निरंतरविलोडनम् । चकारा त्कंकणादेश्च शब्दः मिश्रितः । दिशां दशदिग्वर्तिनां सर्वेषामेव लोकानाममंगलमैहिकामुष्मिकाऽशेषदुःखं तन्मूलञ्च कर्म निरस्यते सवासनं दूरतः क्षिप्यते ॥ ४६ ॥ तदा सूर्योदये । शातकौंभं सुवर्णबहुलम् । 'शात कौंभं सुवर्णे च घटपुंजेऽश्वमारके' इति मेदिनी ॥ * ॥ भगवतीति तमोनाशनादिशक्त्यभिप्रायेण भगवत्पूजाधिष्ठानादिना वा । तादृशी स्तुतिश्च तदुदयस्य सर्वेषां व्रजवासिनां श्रीकृष्णवार्ताप्राप्तिसुखमयहेतुतया संतोषेण । व्रजौकसः पुरुषाः, स्त्रीणां वक्ष्यमाणत्वात् । तदेति तच्छब्दप्रयोगश्च सदा व्रज एव निवासात्तद्रथाऽपरिचये हेतुः । किञ्च–शातकौंभं स्वर्णपरिवृतमिति वैलक्ष्यण्यमुक्तमतोऽयं कस्येत्यब्रुवन् । चकारादनुक्त ञ्चान्यत्किंचित्समुच्चिनोति ॥ ४७ ॥ स्वयमाक्षिप्य समादधिरे–कंसेत्यादिना । येनाक्रूरेण ॥ * ॥ अथोत्कण्ठाप्रधानान्तःपातिनीनां कासाञ्चिद्वाक्यमाह–अक्रूर इति द्वाभ्याम् । मधुपुर्यधिकारित्वदैत्यत्वाभ्यां कंसोऽपि मधुस्तस्य पुरीमिति, तस्यां तन्नयनाऽयोग्यता । कृष्ण इति नास्मत्पुत्रादिरन्योऽपि किन्तु स्वयमेव कृष्ण इति, तत्रापि कमललोचन इति विशेष्यसौन्दर्यविशेषसर्वतापहारितागुणविशेषस्मरणेन निजहृदयार्तिविशेषं निवेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं साधयिष्यत्यस्माभिर्भर्तुः प्रेतस्य निष्कृतिम् ॥ इति स्त्रीणां वदंतीनामुद्धवोऽगात्कृताह्निकः ॥ ४९ ॥ इति श्रीभा० महा० दशम० पू० नंदशोकापनयनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ छ ॥ श्रीशुक उवाच ॥ तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनम् ॥ पीतांबरं पुष्करमालिनं लसन्मुखारविंदं परिमृष्टकुंडलम् ॥ १ ॥ शुचिस्मिताः कोऽयमपीच्यदर्शनः कुतश्च कस्याच्युतवेषभूषणः ॥ इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयम् ॥ २ ॥

कंसं घातयित्वा पुनः किमर्थमागत इत्याशंक्य स्वयमेव कारणं संभावयंति । किमिति । तदा तथा साधितेन कार्येण प्रीतस्य तुष्टस्य भर्तुः । पाठांतरे प्रेतस्य मृतस्य कंसस्य निष्कृतिमौर्ध्वदेहिकमस्माभिः कृत्वा साधयिष्यते किम् । अस्मद्दत्तमांसैः तिलोदकं पिंडांश्च कृत्वा दत्त्वा तस्यौर्ध्वदैहिकं संपादयिष्यति किमिति भावः । इत्येवं वदंतीनां स्त्रीणां ततस्तस्मिन्नवसरे कृताह्निकः कृतस्नानादिनियम उद्धव आगत इति ॥ ४९ ॥ इति दशमस्कंधे पूर्वार्धे टीकायां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ छ ॥ सप्तचत्वारिंशकेऽथ कृष्णादेशेन गोपिकाः ॥ बोधयित्वोद्धवस्तत्त्वमनुज्ञाप्यागमत्पुरीम् ॥ १ ॥ १ ॥ अपीच्यं सुंदरं दर्शनं यस्य सः । अच्युतस्येव वेषो भूषणानि च यस्य

यन्ति । अत एव तादृशस्य व्रजाद्बहिरपि नयनमयुक्तं किमुत मधुपुर्यामिति भावः । यद्वा—क्रुद्धा आहुः—यः कंसस्यार्थे साधितवानिति सः ॥ ४८ ॥ निष्कृतिं प्रीतिम् "स्यान्निष्कृतिरौर्ध्वदैहप्रीत्यानृण्येषु कृत्रिमे" इति धरणिः । प्रेतस्य परलोकं गतस्य । किमिति वितर्के । इत्यर्थ इति—मृतोद्देशेन मांसेन श्राद्धं बहुतृप्तिकरं भवतीत्यर्थः । ततस्तासां कथनोत्तरम् । तस्मिन्नवसरे कथनोत्तरक्षणे ॥ * ॥ यद्यपि स्वभर्तुः कंसस्यैवार्थसाधनाय श्रीकृष्णं नीतवाँस्तथापि दैवात्तस्मिन्घातिते स्वार्थसाधनाय तत्रैव श्रीकृष्णं रक्षित्वा यत्पुनरत्रागतस्तन्नूनमेवमभिप्रायेणैवेत्याभिप्रेत्याहुः—किमित्यर्धेन । पूर्वं प्रीतस्य पश्चाद्दैवादन्यथात्वं प्राप्तस्येत्यर्थः । पाठान्तरे प्रेतस्यापि निष्कृतिमानृण्यमिति । ततस्तादृशोक्तिश्रवणात् । **विश्वनाथस्तु**—कंसं घातयित्वा किमर्थमागतः पुनरित्याशंक्य कार्यं संभावयन्ति—तदा साधितेन कार्येण प्रीतस्य । 'प्रेतस्य' इति पाठे मृतस्य निष्कृतिमस्माभिः कृत्वा साधयिष्यति, अस्मन्मांसैः पिंडान्कृत्वा दास्यतीत्यर्थः । इति वदन्तीनां समीपमगात् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ अथ तत्त्वबोधानंतरम् । ता अनुज्ञाप्य पृष्ट्वा (१) । व्रजांगनाव्यामोहोक्तिभंग्या श्रीकृष्णभक्तिमत्राध्याये वक्ति— । तमुद्धवम् । परिमृष्टे देदीप्यमाने कुंडले यस्य स तम् ॥ * ॥ व्रजस्त्रिय इति—व्रजेऽपि श्रेष्ठत्वेन याः प्रसिद्धा भगवत्प्रेयसीरूपास्त्रियस्ता इत्यर्थः । 'व्रजस्त्रियः कृष्णगृहीतमानसाः' इत्यादिष्वपि तथैव, तत्प्रसंगे तच्छब्दप्रयोगात् । उद्धवं वीक्ष्य तं च कृष्णानुचरं वीक्ष्य तदाकारतया निभाल्य । तत्र हेतुः—प्रलंबबाहुमित्यादि । तत्र पुष्करमाला तु प्रस्थापनसमये श्रीभगवतैव स्वकंठात्प्रसादीकृतेति गम्यते । व्रजेऽप्येतादृशतत्समनिवेशरूपा एव तदनुचरा इत्यनुमानात्तदनुचरत्वेन वितर्क्येत्यर्थः ॥ १ ॥ 'पीच—वैरूप्ये' पीचनार्हः पीच्यो न पीच्योऽपीच्यः 'अपीच्यः सुंदरेऽनिंद्ये' इति धरणिदेवः । तम् उद्धवम् । परिवव्रुः परिवेष्टितवत्यः ॥ * ॥ अतः सुविस्मिताः—अन्यत्रापि कथमेतादृशोऽस्तीति तदेतदाहुः कोयमिति । 'शुचिस्मिताः' इति पाठे तस्य प्रसादायारोपितस्मिता इत्यर्थः । दृश्यते इति दर्शनं रूपम् । वेषो वस्त्रतिलककेशबंधादिः, भूषणं कटककुंडलादि । यद्वा—अच्युतवेषभूषणे एव वेशभूषणे यस्य तम् "त्वयोपभुक्तस्रग्गंध

---

१ प्रीतस्य' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः ॥ ३ ॥ जानीमस्त्वां यदुपतेः पार्षदं समुपागतम् ॥ भर्त्रेह प्रेषितः पित्रोर्भवान्प्रियचिकीर्षया॥४॥अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे॥स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः॥५॥

सः । कोऽयं कुतो वा कस्य चेति वदंत्यस्तं परिवव्रुः ॥ २ ॥ ३ ॥ पार्षदं सेवकम् ॥ ४ ॥ पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः । स्नेहानुबंध इति ॥ ५ ॥

वासोलंकारचर्चिताः '' इत्येतद्वाक्यानुसारात् । तत्राप्यापाततोऽसंकोचे हेतुः—उत्सुकाः , कालाक्षमत्वेन विचारशून्याः । पश्चादपि तत्र हेतुः—उत्तमश्लोकः श्रीकृष्णस्तत्पादाम्बुजमेवाश्रयो यस्य तम् । यद्वा—उत्तमश्लोक पदांबुजयोः संवाहनाद्यर्थमुपधानवदाश्रयस्तस्य तथा तदात्मीयतां निर्धार्येत्यर्थः । **विश्वनाथस्तु—**शुचि शुद्धं स्मितं यासामिति कृष्णस्मारकवेश (ष) दर्शनात्थेन हर्षेण स्मितम् । 'सुचिस्मिताः' इति पाठे कृष्णस्यैव पीतांबरमिदं तदंगोत्तीर्णमेव कमलमाला च कथमनेन प्राप्ते इति विस्मयः । अपीच्यं सुंदरं दर्शनं यस्य सः । कोऽयं, कुतः, कस्य वा मनुष्य इति वदंत्यः कृष्णवृत्तांतप्राप्तिसंभावनयोत्सुकाः ॥२॥ ताः किं चक्रुरित्यत आह—तमिति । तम् उद्धवम् । रमापते राधापतेरित्यनेन तस्यां तस्याऽऽसक्तिर्नान्यत्रेति सूचितम् ॥ * ॥ ततश्च तमिति तमुद्धवं रहसि रमापतेः संदेशहरं विज्ञाय स्वयमेव पूजांगत्वेन दत्त आसन उपविष्टं सन्तं प्रश्रयेणावनताः सद्यः पुनः सव्रीडहासेक्षणसूनृतादिभिः सुसत्कृतं संतमपृच्छन्निति क्रमः कर्तव्यः।अत्रासन इति सामीपिकार्थमेवाधिकरणं ज्ञेयम् । तद्विधासु तस्य महाभक्तेरेव निर्णीयमानत्वात्,यतः सैरन्ध्यादिषु तस्य तादृशता वर्णयिष्यते इति कैमुत्यलाभाच्च । प्रश्रयेणावनता विनयनम्रशिरसः । व्रीडो व्रीडा, हासः प्रसादस्ताभ्यां युक्तमीक्षणमवलोकनं सूनृतं च स्वागतं कुशलञ्चेत्यादिप्रियवाक्यं तदादिभिस्तत्पुरःसरासनपाद्यादिभिः सुसत्कृतमादृतम्, ततश्च रहसि विजातीयभावाऽगोचरे तत्रासने उपविष्टं सन्तं तादृशरहःस्थलगमनोपवेशादिहेतो रमापतेः संदेशहरं विज्ञाय अस्मास्वपि कमपि संदेशमानीतवानयमिति निश्चित्यापृच्छन् । रमापतेः ' जयति तेऽधिकं जन्मना— ' इत्याद्यनुसारेण तादृशतत्संपत्तिदर्शनेन ज्ञातस्य तासामेवाभिप्रायस्य प्रकटनमिति विशेष्य व्याख्येयम् ॥ **विश्वनाथस्तु—**प्रश्रयेति व्याख्यातचरम् । व्रीडा स्त्रीस्वभावोत्था मूर्द्धादेरीषदावरणलक्षणा लज्जा, सा ह्यादरणीय जनसामान्यदर्शने सहसैव भवेत्, हासः स्वप्रियदास एवायमिति निश्चयेन मुखप्रसादस्ताभ्यामीक्षणं संपूर्णावलोकनम् । आदिना यथासमयं यथोपस्थितञ्च पाद्याद्यातिथ्यं रहसि विजातीयजनागोचरस्थले, तादृशस्थले सहसैवागमनेन तं संदेशहरं विज्ञाय । रमापतेरिति गोपीपक्षपातिनः शुकस्यासूयाद्योतनम्—संप्रति मथुरायां स्पष्टमेव परमेश्वरः, तं सुखयितुं रमैवागमिष्यति किमेतासु संदेशप्रेषणदंभेने त्याकारकम् ॥ ३ ॥ यदुपतेरित्यनेनापि गोपीपतित्वाभावं सूचयंति । भर्त्रेहेति राधोक्तिः, न हि भर्तॄणां वनितात्यागो योग्य इति भावः । पित्रोर्नंदयशोदयोः ॥ * ॥ जानीम इत्यत एवालं प्रश्नेनेति । यदुपतेरिति स गोपजातिरपि संप्रति यदूनां पतिरभूदिति बृहत्पदप्राप्तस्य स्वयं कथमत्राजिगमिषा संभवेदिति भावः । अत एव भवान्प्रेषितः, पित्रोः प्रियचिकीर्षया न तु स्वस्य, तेन यशोदानंदाभ्यां पितृभ्यां गोपजातिव्यञ्जकाभ्यामस्य किं प्रयोजनमिति भावः । नंदयशोदे रुदित्वा म्रियेते कृष्णो मथुरायां राज्यं करोतीति लोकनिंदाभयादेव त्वं प्रेषित इति मन्यामहे, किन्तु भोश्वशुरवर्य तेन सुबुद्धिशेख रेण प्रेषितः पित्रोः प्रियचिकीर्षया त्वं चात्रायातोऽतः प्रयाहि नंदयशोदयोः समीपम् , तौ हि त्वां प्राप्यानंदेन कृष्णं तं विस्मरिष्यत इति धन्यैव तस्य विवेकतीक्ष्णतेत्याद्या बहव एव व्याजस्तुतिमयात्यंततिरस्कृतवाच्यध्वनेः पल्लवाः ॥ ४ ॥ अन्यथा नंदयशोदाप्रियचिकीर्षामंतरा । तस्य कृष्णस्य । चक्ष्महे पश्यामः । मुनेरपि शमनिष्ठावतः संन्यासिनोपि, वसिष्ठादिषु तथा श्रवणात् । सुदुस्त्यजोऽतिशयेन त्यक्तुमशक्यः । सुरत्रातिशयेऽनेकार्थ त्वात् । न हि कृष्णः संन्यासीति भावः ॥ * ॥ तौ विना तु तस्य यदुपत्तेः गोव्रजे तन्मात्रवनगोपावासे स्मरणयोग्यमपि न पश्यामः, किमुत तत्स्मरणपथगतमित्यर्थः । यत्तु तयोरपि स्मरणं तदपि तयोरेव स्नेहस्य गुणो न तु तस्येत्याहुः—स्नेहेति । बंधूनामिति—बंधुषु पित्रादिषु स्नेहानुबंधः स मुनेस्संन्यासिनोपि दुस्त्यजः कृच्छ्रेणैव विस्मर्तुं शक्यते न तु सहसा त्यक्तव्य इति ततोपि काठिन्यमित्यर्थः । **विश्वनाथस्तु—**स्मरणीयं स्मरणयोग्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्येष्वर्थकृता मैत्री यावदर्थविडंबनम् ॥ पुंभिः स्त्रीषु कृता यद्वत्सुमनस्स्विव षट्पदैः ॥ ६ ॥ निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः ॥
अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणम् ॥७॥ खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम्॥दग्धं मृगास्तथाऽरण्यं जारो भुक्त्वा रतां स्त्रियम्॥८॥

अन्यथा गोव्रजे तस्येत्यत्र हेतुः । अन्येष्विति । अर्थकृता कार्यनिमित्ता । विडंबनं मैत्र्यनुकरणमात्रं न तु तात्त्विकी मैत्री । पुंभिरिति दृष्टांतौ ॥ ६ ॥ अस्यैवान्यार्थनिदर्शनैः प्रपंचः निःस्वमित्यादिना । निःस्वं निर्धनम् । दत्ता दक्षिणा येन तं याज्यम् ॥ ७ ॥ पक्षिणो विगतफलं वृक्षम् । रतामनुरक्तामतृप्तामित्यर्थः ॥ ८ ॥

जनं कमपि न चक्ष्महे पश्यामः, स्मृतयोर्यशोदानंदयोः पित्रोरपि तेन यद्येवमनादरः कृतस्तदास्मदादीनां तदीयस्मृत्येकभूमिकायामप्यारोहणयोग्यता कुत एव स्यादिति भावः । मुनेः कृतसंन्यासस्यापि दुस्त्यजः । षष्ठ्यार्षी । कृष्णेन तु परस्त्रीपुंजेषु रममाणेनापि दुस्त्यज एव इत्यहो कृष्णस्य वैराग्यतीव्रतेति भावः ॥ ९ ॥ अन्येषु पितृव्यतिरिक्तेषु गोपीजनेषु यावदर्थं प्रयोजनावसानपर्यंतमनुकरणमात्रं यस्याः सेति तीर्थः । मैत्र्या इति श्लेषेण यावदर्थविडम्बनामिति स्वामिनः । तात्त्विकी यथार्था । यद्वत् यथा स्त्रीषु यावदर्था नृणां मैत्री भवतीति तात्पर्यम् । सुमनस्सु पुष्पेषु ॥ * ॥ ननु कृष्णस्य पितृभ्यां भ्रात्रादिभिश्च निष्प्रयोजनत्वान्मैत्री मास्तु, युष्माभिः स्त्रीभिस्तु लंपटत्वात्तस्य प्रयोजनमस्त्येवेति यूयमेव स्मरणीया भवथेति तत्राहुः—अन्येष्विति । अर्थकृता प्रयोजनवती निंद्यैव मैत्री, यावदर्थविडम्बनम् ' यावत्तावच्च साकल्ये ' इत्यभिधानात्सर्वार्थविडंबनरूपाया मैत्र्याः कर्ता, यश्च मैत्र्याः प्रतियोगी यश्च प्रयोजकः यश्चोपकरणं तेषां सर्वेषामप्यर्थानां विडंबनं तिरस्कारस्तद्रूपेत्यर्थः । स्वस्य प्रयोजनसद्भावे मैत्र्याः सत्त्वं, प्रयोजनाभावे मैत्र्या अभाव इत्यर्थः । पुंभिः सुमनःस्विव पुष्पसदृशीषु सौंदर्यसौरभ्यसौकुमार्यमाधुर्यवतीष्वपि स्त्रीषु, श्लेषेण शोभनमनस्कासु अचंचलचित्तास्वपि मैत्री तद्वत्कृता यद्वत् षट्पदैः कृतेत्यन्वयः । षट्पदा हि सौरभ्यादिगुणवंत्यपि पुष्पाणि सकृत्पीत्वैव स्वचापल्यदोषाद्यथा त्यजंति तथैव पुमांसः स्वसंभोगार्हमाधुर्यादिमतीरपि एकनिष्ठा अपि स्त्रीः संभुज्य त्यजंतीति प्रयोजनसद्भावेपि मैत्र्या अभाव इत्यतिनिंदा । **तोषिण्यां** तु—अन्येषु मैत्री अर्थकृता प्रार्थनीयपदार्थोपाधिका न तु बंधुष्विव स्वाभाविकीत्यर्थः । सा च यावदर्थविडंबनम्—यावत्तेर्थास्तावदेव तस्या मैत्र्या अनुकरणमात्रम्, अस्मासु तु न काचिद्बंधुता मिथुनता संबंधश्च न स्थिरः स्यादिति शालीनतया दृष्टान्तोपदेशेनैवाहुः—पुंभिरिति । दृष्टान्तस्यैव दृष्टान्तः सुमनःस्विति । श्लेषेण शोभनचित्तेष्विति न तेषां तत्र दोषः किन्तु चापल्यात् षट्पदानामिति भावः ॥ ६ ॥ अस्यैव यावदर्थविडम्बनस्यैव । निस्स्वं निर्धनम् । गणिका वेश्याः ' पण्यस्त्री गणिका वेश्या ' इत्यमरः । अकल्पं रक्षणाद्यसमर्थम् । अधीता विद्याः शास्त्राणि यैस्ते छात्राः । आचार्यमध्यापकम् । याज्यं यजमानम् ॥ * ॥ मिथुनतासंबंधश्च यदि धर्मप्रधानतः स्यात्तदा स्थिरोपि स्यात्केवलग्राम्यधर्ममयश्चेदास्थिर एव स्यादित्यर्थांतरन्यासव्याजेन तदेव पर्यवसाययंति—निःस्वमिति युग्मकेन । निःस्वं निर्द्धनीभूतम् । अकल्पं पालनासमर्थीभूतम् । ऋत्विजो याजकाः । **विश्वनाथस्तु**—तत्र स्वप्रयोजनाभाव एव मैत्र्या अभाव इत्यत्र दृष्टान्तान्दीपकन्यायेनाह—निःस्वं गणिकास्त्यजंति, तेन यावद्धनप्राप्तिस्तावन्न त्यजंतीत्येवमग्रेपि व्याख्येयम् ॥ ७ ॥ खे गच्छंतीति तथा । गृहं गृहस्थसद्मप्रणयकोपातिरेकं बोधयितुं दृष्टान्तबाहुल्यम् । जीर्य्यति यशः परलोकश्चानेनेति जारः । इत्यर्थ इति—रतिरनुरागो विद्यतेऽस्या इति रता ताम्, मत्वर्थीयाऽचायमर्थो लभ्य इति स्वाम्यभिप्रायः । "रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः" इति मेदिन्याम् । रागेऽनुराग इत्यर्थः ॥ * ॥ रतां रमणवर्तामपि स्त्रियं त्यजन्ति, तेन यावत्तस्या यौवनं तावन्न त्यजंतीति पूर्ववदर्थाभावाद्य त्किंचित्प्रयोजनाभावेऽपि मैत्र्या अभावः प्रतिपादितः । तेन तस्य स्वप्रयोजनसिद्धिः पुरस्त्रीभिरेव भवतीति कथं वयं स्मरणीया भवामेति कृष्णस्य स्वेषु प्रेमाभावो दर्शितः । तत्रापि जारा इति बहुवचनेन स्त्रियमित्येकवचनेन च बहुजारपरायाः कामोपाधिकप्रीतिमत्यास्तैस्त्यागः संभवत्वस्माकं तु बह्वीनामपि तदेकनिष्ठत्वमेव केवलं, प्रेमापि न च कैशोर एव कामोपाधिकः किन्त्वाबाल्यादेवेत्यतो निरुपाधिक एव, तदपि कृष्णेन वयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति गोप्यो हि गोविंदे गतवाक्कायमानसाः ॥ कृष्णदूते व्रजं याते उद्धवेत्यक्तलौकिकाः ॥ ९ ॥ गायंत्यः प्रियकर्माणि रुदत्यश्च गतह्रियः ॥ तस्य संस्मृत्यसंस्मृत्य यानि कैशोरबाल्ययोः ॥ १० ॥ काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमम् ॥ प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ११ ॥

त्यक्तलौकिकास्त्यक्तलोकव्यवहाराः ॥९॥ प्रियस्य कर्माणि गायंत्यस्तथा तस्य बाल्यकैशोरयोर्बाल्ये कैशोरे च वयसि यानि कर्माणि तानि संस्मृत्यसंस्मृत्य गतह्रियो निर्लज्जाः सत्यो रुदत्यश्च तमपृच्छन्निति पूर्वक्रिययैव संबंधः ॥ १०॥ प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितोऽयं दूत इति कल्पयित्वाऽब्रवीत्। यद्वा तस्मिन्नप्युद्धवे प्रियप्रस्थापितं

त्यक्तास्तस्मात्तद्दृष्टान्तोपि तत्र न संभवेदित्यभिव्यज्य निरुपमं नृशंसत्वमेव द्योतितम् ॥ ८ ॥ इतीत्थम् । लोकव्यवहाराः पुरुषसमक्षं नग्नांगाच्छनादिरूपाः । गोविंद इत्याद्यलुक्समासः ॥ * ॥ इति पूर्वोक्तवचन प्रकारेण । त्यक्तलौकिकाः स्वमुखेनैवौपपत्यस्पष्टीकरणादनादृतलोकसंकोचा बभूवुः । क्व सति—कृष्णस्य सर्वेषामप्याकर्षकतया तन्नाम्नस्तस्य निजप्रेष्ठस्यान्यत्र गतस्य सतो दूते तत्राप्युद्धवे समायाते सति, तत्र हेतुः—हि यस्माद्गोविन्दे पूर्वमेव गोकुलेंद्रे, श्लेषेण सर्वेन्द्रियव्यापके गतानि वागादीनि यासां ताः । तत्र कायेन गतिर्निजांगानां समर्पणात्तदर्थकमात्रकर्माचरणात्तदाविष्टतया कायस्य विस्मरणाच्च । तस्मात्तासामिदानीमीदृशभवनं युक्तमेवेति भावः । इत्थमेव च पूर्वमनन्यतया स्वयं वृतवत्य इति व्याख्यातम् ॥ ९ ॥ तस्य कृष्णस्य । तम् उद्धवम् । ल्यबंतद्विरुक्तिश्छांदसी ॥ * ॥ ततश्च गतह्रियः सत्यः यानि कैशोरबाल्ययोः प्रियकर्माणि तानि मुहुः स्मृत्वा गायन्त्योऽपि बभूवुः, रुदत्यश्च बभूवुरित्यर्थः । कैशोरस्य प्रथमोक्तिस्तासां स्वरसोद्दीपनत्वेन, बाल्यं कौमारपौगंडात्मकं तदीयस्मरणमाबाल्यस्नेहेन ॥ १० ॥ काचिन्मुग्धा । मधुकरे दूतत्वारोपणम संभवं मन्वानो वक्ति—यद्वेति । मधुकरापदेशेन भ्रमरव्याजेन । इत्यर्थ इति—अन्योक्त्योद्धवमेव भ्रमरीकृत्यावददिति भावः ॥ * ॥ अथ "महाभावविशेषस्य गतिं कामप्युपेयुषः । भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते ॥ तद्घूर्णाश्चित्रजल्पाद्यास्तद्भेदा बहवो मताः । प्रेष्ठस्य तु (सु) हृदालोके प्रणयक्रोधजृंभितः । भुवि रागमयो जल्पश्चित्रजल्पस्तदुद्भवः ॥" इति रसग्रंथानुसारेण तास्वेव कस्या अपि दिव्योन्मादमयश्चित्रजल्पं वक्तुमाह—काचिदिति । कापि परमप्रेष्ठा, सा च श्रीराधेत्यर्थः । श्लेषेण के प्रेमसुखे आसमंताच्चिज्ज्ञानं यस्याः, कं सर्वेषां प्रेमसुखमाचिनोति क्षणेक्षणे वर्द्धयति या सेति च मुख्यत्वात्सैव, तथैव सैषा तन्नाम्नैव प्रतिपादिता । वासनाभाष्येपि तादृशी सा पीतपरागपिंजरश्मश्रुं कञ्चिद्भ्रमरमकस्माद्दृष्ट्वा तं दूतं कल्पयित्वा वक्ष्यमाणभंगीमयमिदमब्रवीत् । ननु महाविरहदुःखेऽस्मिन्कुतो मानस्तत्राह—प्रियसंगमं ध्यायन्ती, स्फूर्तिस्वप्नयोर्यः प्रियसंगमस्तमेव गुप्तं मुहुरागतस्यैव तस्य साक्षात्तथा स्मरंती । ननु तथापि यद्यन्यनायिकया प्रियस्य तत्र प्रसंगस्स्यात्तदा संभवत्यपि मानस्त त्राप्याह—कल्पयित्वेति, या भ्रमरमपि दूतं कल्पयति सा तदपि कल्पयेदिति भावः । वक्ष्यति च 'सपत्न्याः कुचलुलित—' इति । प्रियेण स्वविषयकपरमप्रेमवता तेन प्रस्थापितं दूतं वितर्क्येदं चित्रजल्पाख्यं श्लोकमब्रवीदतो यत्तत्र वासनाभाष्यस्थापितमाग्नेयवचनम् "गोप्यः पप्रच्छुरुषसि कृष्णानुचरमुद्धवम् । हरिलीलाविहारांश्च तत्रैकां राधिकां विना ॥ राधा तद्भावसँल्लीना वासनाया विरामिता । सखीभिः साभ्यधाच्छुद्धविज्ञानगुणजृंभितम् । इज्यान्तेवासिनं वेदचरमांशविभावनैः ॥" इति, तदेतत्पूर्वं तस्याः निर्वेदाख्यं जातमासीदित्यपि ज्ञेयम् । तन्मूलतया प्रणयरोषमयोऽयमपि भावविशेषो जज्ञे, विचित्रसंचारिमयत्वात्तादृशावस्थायाः । अतस्तद्भावमयदशमीदशानन्तर्यपर्यालोचनया वासनाया विरामिता, पुनस्तत्संगमसंभावनरहिता बभूव, ततश्च तज्जातीयवार्तामसहमाना तदाच्छादनाय देहान्तरेष्वपि तद्दुःखपारावारमपश्यंती मुक्तिरेव वरमिति प्रतिपादनाय वा वेदचरमांशस्य ज्ञानकांडस्य विभावनैरुदाहरणैः शुद्धेत्यादि यथा स्यात्तथैवाभ्यधात् संवादमाचचार । न केवलं सा किन्तु सख्योऽपीत्याह—सखीभिरिति योज्यम् । अथ वा वेदचरमांशस्तादृशभावप्रकाशको वेदः, वासना तादृशभावेतरः सर्व एव भावः शुद्धविज्ञानं च तादृशभावमयानुभव उच्यते, "यं सर्वे वेदा आमनंति मुमुक्षवो ब्रह्मवादिनश्च" इति मुक्तावस्थोपरि सामान्यभक्तेरपि प्राशस्त्याम्नायात्, 'वाञ्छन्ति यद्भवभियो मुनयो वयञ्च' इति श्रीगोपिकामात्राणामपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्य ऊचुः ॥ मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः ॥
वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् ॥ १२ ॥

दूतमिति दूतदृष्टिं कृत्वा मधुकरापदेशेनोद्धवमेवाप्रस्तुतप्रशंसयाब्रवीदित्यर्थः ॥ ११ ॥ हे मधुप कितवस्य धूर्तस्य बंधो नोऽस्माकमंघ्रिं मा स्पृश । मा मां नमस्कारेण प्रार्थयस्वेत्यर्थः । तत्किमित्यपेक्षायां कृष्णवर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणाह । सपत्न्याः कुचविलुलिता कुचाभ्यां विलुलिता संमर्दिता या कृष्णस्य वनमाला अत एव तस्याः कुंकुमं येषु तैः श्मश्रुभिरुपलक्षितः । किन्तु तन्मानिनीनां तासामेव मानिनीनां प्रसादं मधुपतिर्वहतु किमस्मत्प्रसादनेन तस्य । यदुसदसि विडंब्यमुपहासास्पदम् । कुतः ।

सर्वस्पृहणीयभावत्वाच्च, 'इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या' इत्याद्येकादशानुसारेण यथा भक्त्यैवानुभावोदयाच्च ॥ **विश्वनाथस्तु**—ह्लादिनीशक्तिसारवृत्तिरूपस्य प्रेम्णोपि या सप्तमी भूमिका महानुभावस्तन्मयी काचित्, सा च वृषभानुनंदिन्येव मथुरांगनासु कृष्णकर्तृकसंगमं ध्यायन्ती ध्यानेन कल्पयन्ती, अत उद्भूतमाना प्रियेण श्रीकृष्णेन मां प्रसादयितुं प्रस्थापितो यं दूत इति कल्पयित्वा कमपि मधुकरमब्रवीत् । यद्वा—मधुकरापदेशेनोद्धवमेवाब्रवीत् ॥ ११ ॥ अत्र गोप्यश्चित्रजल्पेन भ्रमरमुद्दिश्योद्धवमाहुः । चित्रजल्पश्च रसरत्नाकरे—" चित्रजल्पो दशांगोयं प्रजल्पः परिजल्पितः । विजल्पोज्जल्पसंजल्पा अवजल्पोभिजल्पितः ॥ आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः । " इति । तत्र प्रजल्पमाहैका—मधुपेति । 'उन्मत्तः कितवो धूर्तः' इत्यमरः । इत्यर्थ इति—त्यक्तासु को नमस्कारः, किं तत्प्रार्थनेन वेति भावः । तद्वारणम् । किं कुत इति । तस्य भ्रमरस्य । श्मश्रूणां मुखरोम्णाम् । लोहितत्वे रक्तत्वे । अत एव संमर्दनादेव । तस्याः सपत्न्याः । कुपिताह—किन्त्विति । तासामेव मथुरास्थानामेव । मधुपतिर्यदुपतिः, एकदेशन्यायेन मधुरापतिर्वा 'मधुरा मथुरा प्रोक्ता' इति कोशात् । तस्य कृष्णस्य । उपहासास्पदत्वे हेतुमाशंकते—कुत इति । ईदृशो भ्रमरोऽर्थात्तद्वत् । अत्र प्रजल्पलक्षणमाह—" असूयेर्ष्यामदयुजा योवधीरणमुद्रया । प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्तितः ॥ " इति । इह सपत्नीर्ष्यामदाभ्यां भ्रमरावधीरणं, भ्रमरदूतत्वेन कृष्णाकौशलमपि ध्वनितम् ॥ * ॥ " स्वतः प्रेमजवार्ताया गोविन्दे लीनचेतसः । राधायाः केन वागर्थौ वेद्यः स्यात्तत्कृपां विना ॥ " । स्वचरणकमलसौरभलोभेन भ्रमन्तं भ्रमरं वीक्ष्य दिव्योन्मादवती श्रीवृषभानुनंदिनी प्रजल्पति—हे मधुप भ्रमर कितवस्य धूर्तस्य 'एवं मदर्थोज्झित—' इत्यादिना, 'न पारयेहम्' इत्यादिना, 'आयास्ये' इति दौत्यकेन च मिथ्यावचनवृंदेन वञ्चकस्य कृष्णस्य बंधो बंधुतारूपदौत्यकारिन् अंघ्रिं मा स्पृश । ननु किमिति नमस्कर्तुं न ददासि, तत्राह—हे मधुप मद्यप 'मधु मद्ये पुष्परसे' इत्यनेकार्थवर्गः । मद्यपस्पर्शेन चरणस्यापावित्र्यं स्यादतो नमश्चिकीर्षा चेद्दूरमपसृत्य नमस्कुर्वीति भावः । नन्वदुष्टे मयि किमिति मिथ्या मद्यपत्वपरिवादमर्पयसीति, तत्र नायं परिवादः किन्तु यथार्थमेव वच्मीत्याह—मम सपत्न्याः कुचयोः कृष्णवक्षःसंघर्षेणाविलुलिता विमर्दिता या माला किं वा कुचाभ्यामेव विलुलिता या कृष्णवनमाला तत्संबन्धिकुंकुमयुक्तैः श्मश्रुभिर्मा स्पृशेति भ्रमरस्य स्वाभाविकश्मश्रुपीतिम्नि एव तथारोपः । तेन च मानिनीं मामनुनेतुमिहायातस्त्वमथ च तथाभूतकुंकुमश्मश्रुप्रक्षालनं विनैवेति विवेकाभाव एव मद्यपलक्षणम् । एतद्दर्शनया मानो वर्द्धयत एव न तु निवर्त्यत इति बुध्यस्वेति भावः । ननु यथा तथास्तु त्वं तावत्प्रसीदेति तत्राह—हे मधुप मद्यपालक तत्र गत्वा निजप्रभोः पेयं मद्यमेव पालय पिब च, तत्कर्मैव त्वं कर्तुं शक्नोषि न तु दौत्यं निर्बुद्धित्वादिति भावः । नन्वेवं चेदलं मया, संप्रत्यहं पुनर्मथुरामेव यामि स एव गोपेन्द्रनंदनः स्वयमेत्य त्वां प्रसादयत्वित्यत आह—वहत्वित्यादि । मधूनां यादवविशेषाणां पतिः संप्रति सोऽभूत्—व्रजेश्वरीगर्भजातत्वेन गोपजातिरपि भाग्यवशात्क्षत्रियजातिरभूदतस्तन्मानिनीनां क्षत्रियस्त्रीणां प्रसादं वहतु प्राप्नोतु, ता एव सद्यः प्रसादयतु किमस्माभिर्निकृष्टाभिर्गोपस्त्रीभिरिति भावः । तत्र बहुवचनेन वहधातुप्रयोगेण च मधुस्त्रीणामानंत्यात्सर्वासामेव तद्भुक्तत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान्भवादृक् ॥
परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ १३ ॥

यस्य दूतस्त्वमीदृगीदृशोऽविवेकीति ॥ १२ ॥ ननु किमित्येवं तमवजानीथ किं वस्तेनापकृतमत आह । सकृदिति । भवादृक् त्वादृशः कृष्णवर्णो दुर्मनाः सुमनस इव कुसुमानि यथा त्यजति तद्वत् (शोभनमनसोऽस्मान्सद्यस्तत्यजे) अहो बताकृतज्ञस्य तस्य पादपद्मं श्रीः कथं सेवते। विदितं मयेत्याह । अपीति । बतेति खेदे । उत्तम

देकस्यां प्रसादितायामन्यस्यां मानोत्पत्तेस्तस्यामपि प्रसादितायामन्यस्यामित्येवं तासां प्रवाहरूपेण प्रसादं प्राप्नोत्वित्यस्मत्सान्निधावागमने तस्यावसर एव नास्तीति भावः । ननु तदीयसर्वसौभाग्यनिधे देवि मैवं वादीर्यदि त्वयि तस्य मनो नास्ति तर्हि कथमहं तेन दूतः प्रस्थापितस्तत्राह—यस्य दूतस्त्वमीदृक् क्षत्रियजनसुरतचिह्नधारी, तस्य यदुसदसि विडंब्यं विडम्बनमेव यदुस्त्रीणां तत्कृतधर्मलोपस्य व्यक्तीभावेन कुपितैस्तत्पतिभिस्तस्य विडम्बनमेव करिष्यत इति भावः। यद्वा—यस्य त्वमीदृग्दूतस्तस्य यत् यदुसदस्तत्राधिकरणे एव विडंबनं भाविगोपेन तन्नारीणां भुक्तत्वाद्यदूनां निन्दैव सर्वदेशे भविष्यतीत्यर्थः। श्लेषेण यस्य दूतस्त्वमीदृक् स च मधुपतिर्मधूनां मद्यानां पतिर्मद्यप एव, यतो मद्यस्य विक्षेपेणैव त्वादृशो भ्रमरो दूतः कृत इति। अत्र कितवेत्यसूया, सपत्न्या इत्यादिनेर्ष्या, अंघ्रिं मा स्पृशेति मदः, वहत्वित्यादिनाऽवधीरणम्, यदुसदसीत्यादिनाकौशलोद्गार इत्ययं प्रजल्पः। तदुक्तमुज्ज्वलनीलमणौ—“असूयेर्ष्यामदयुजा योवधीरणमुद्रया प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते ॥” ॥१२॥ न हि कृष्णेन किंचिद्वोऽपराद्धमित्याक्षिपति—नन्विति। अवजानीथावज्ञां कुरुत। वो युष्माकम् ।अपकृतमपराधः कृत इति। अतोत्राह पारिजल्पेन—सकृदिति । दुर्मनाः सकपटः । तद्वत् सोस्मांस्तत्यजे। अहो बतेति अत्यद्भुते निपातद्वयम्। तस्य कृष्णस्य । इति भाव इति—लक्ष्मीस्तु क्षीरसागरस्य जडत्वेन तदुद्भूताऽकुशला वयं नराणामतिनिपुणत्वेन तत्रापि गोपानां गोपरिचर्यात्राप्तातिपुण्यानां कुले जातत्वान्न तादृश्य इत्याशयः। परिजल्पितलक्षणन्तु—“ प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात् । स्वविचक्षणताव्यक्तिर्भंग्या स्यात्परिजल्पितम् ॥” इति। इह तथैवोपपादितम् । सुमनसां त्यागो यथा तद्गंधमादाय भवतोपि नोचितस्तथा वयमपि सुमनोभिस्तुल्याः शरीरदौर्गंध्यादिरहिताः सुकुमाराश्च, यथा घ्राणेंद्रियतर्पकत्वेन पुष्पाणि सेव्यानि तथा तरुण्योपि तरुणैः सेव्या एव। सुमनःपदेन मालती वा ग्राह्या “सुमनाः पुष्पमाल्त्योः स्त्री देवबुधयोः पुमान्” इति यादवः। यद्वा—भवं संसारमापश्यतीति भवादृक्, अतीव गृहासक्तः सुमनसो देवान् ज्ञानिनश्च यथा त्यजति तत्सेवां नाद्रियत इति भावः। भवं न पश्यतीति भवादृक् विरक्तो ज्ञानी सुमनस इव हृद्यान्स्त्रीपुत्रादींस्त्यजति तद्वद्वेति ॥ * ॥ ननु भ्रमरजातेर्ममायं स्वाभाविक एव श्मश्रुपीतिमा न तु सुरतकुंकुममिदम्, तस्य च त्वदेकतानमानसस्य मधुपुर्यां कामपि स्त्रियं स्वप्नेप्यपश्यतः कोऽपराधो यतस्त्वमीदृशं मानमाविष्करोषीति तत्राह—सकृदिति । पायनस्याऽसकृत्त्वेपि सकृदित्युक्तिरनुरागेण । तत्र तृष्णाधिक्यं व्यंजयति—अधर एव सुधा तामित्यत एव एतावद्भिरपि संतापैर्न म्रियामहे इति भावः । एता मद्दत्तैः कष्टैर्यदि मरिष्यन्ति तदाहं काभ्यः कष्टं दास्यामि तस्मान्मरणाभावाय स्वाधरसुधां पाययामीति स पुरैव विचारयामासेति भावः । अतः सकृदेव पाययित्वा सद्यस्तत्क्षण एवास्मांस्तत्याज । अतोस्मत्सुखदानतात्पर्ये सति सुधापायनस्यासकृत्त्वं स्यादिति त्वमेव विचारयेति भावः। तत्रापि पाययित्वेति णिचा तस्य बलात्कारो दर्शितः । नन्वेवं चेत्साध्व्यो भवत्यः कथं तस्मै स्पृहयन्ति तत्राह—मोहिनीं बुद्धिभ्रंशिनीम् । अतस्तेनास्मदादयो लोकद्वयत एव भ्रंशिता इति “ विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ” इति न्यायोपि कृष्णेन न गणित इति भावः। किञ्च—तस्य प्रीत्यप्रीती द्वे एवातिचित्रे इत्याह—सुमनसो देवश्रेणीरिव विष्णुः कृष्णोऽस्मान्सुधां पाययित्वा सुमनसो मालतीर्भवादृक् भ्रमर इवास्मांस्तत्याज, पायनत्यागयोः कर्मणि कर्तारि च पृथक्पृथग्दृष्टान्तः । देवपक्षे—हे अधर निकृष्टेति संबोधनम्। ‘ सुपर्वाणः सुमनसः ’ इत्यमरः । ननु तस्य युष्मत्कर्मकत्यागेषु युष्माकमेव कोऽपि दोषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ॥
विजयसखसखीनां गीयतां तत्प्रसंगक्षपितकुचरुजस्ते कल्पयंतीष्टमिष्टाः ॥ १४ ॥

श्लोकस्य जल्पैर्मिथ्याकथाभिः प्रलापैः प्रायो हृतचेताः । वयं तु न लक्ष्मीवदविचक्षणा इति भावः ॥ १३ ॥ झंकारान्बहुधा कुर्वंतमस्मत्प्रसादलाभाय कृष्णं गायतीति मत्वाऽऽह । किमिहेति । पुराणं पुरातनं बहुशोऽनुभूतम् । विजयसखस्य श्रीकृष्णस्य सांप्रतं याः सख्यस्तासामग्रतस्तत्प्रसंगो गीयताम्, संदेशः कथ्यतामित्यर्थः । इष्टाः कृष्णस्य प्रियाः तेन गीतेन पूजिता इति वा । तेनालिंगितेन क्षपिता कुचरुक्स्तनगतविकारो यासां तास्तवेष्टमपेक्षितं दास्यंतीति ॥ १४ ॥

कारणमस्ति तस्य वेति तत्राह—सुमनस इवास्मान्स भवादृक् तत्याज, भ्रमरो यन्मालतीस्त्यजति तत्र दोषः कस्येति त्वयैव विचार्यतामिति भावः । 'सुमनो मालती जातिः' इत्यमरः । सौरभ्यसौकुमार्यपावित्र्य सर्वोत्कर्षादिभिः सुमनःसाधर्म्याच्छोभनमनस्कत्वाच्च वयं सुमनस इति व्रजे प्रसिद्धा एव । स च भ्रमरसाधर्म्याच्चपलः स्वसुखमात्रार्थी प्रसिद्ध एवेति नेदं कवितामात्रमिति ध्वनिः । ततश्च चाञ्चल्यदोषादेव मालती र्वह्वीरपि त्यक्त्वा निकृष्टेष्वपि पुष्पेषु विषज्जति अविषज्जति वा भ्रमर इव कृष्णे कथं वयं मानिन्यो न भवाम इत्यनुध्वनिः । ननु कृष्णस्य निर्दोषत्वं शास्त्रप्रसिद्धमेव, शास्त्रज्ञेन गर्गेण 'नारायणसमः' इत्युक्तत्वात्, तत्र भवतु स नारायणः, परवंचनादिदोषाणां प्रत्यक्षत एव दृष्टत्वात्ते कथमपलपनीया भवंत्विति विमृश्य सविचिकित्समाह—परिचरतीति । पद्मा लक्ष्मीः । लक्ष्मीपरिचर्यायामपि हेतुं स्वयमेवोद्भावयन्त्याह—अपि बतेति । उत्तम श्लोक इति ये जल्पाः स्तावकलोकानां स्तुतिमात्राणि तैर्हृतं चेतो यस्याः सा । तेन लक्ष्मीरतिऋज्वी वयं तु वैचक्षण्यवैदग्धबुद्धिवैचित्र्यादिगुणानां विधात्रा दत्तत्वात्कथं तादृशीभवितुं प्रभवाम इति भावः । अत्र पाययित्वेति मोहिनीमिति च तस्य शाठ्यं, सद्यस्त्यागान्निर्दयत्वं, भवादृगिति चापल्यं, लक्ष्म्या आर्जवव्यञ्जनया स्वविचक्षणत्वम्, आदिनाऽकृतज्ञत्वप्रेमशून्यत्वादिकं सर्वत्रैवानुस्यूतमित्ययं परिजल्पः । तदुक्तम्—"प्रभो र्निर्दयताशाठ्यचापल्याद्युपपादनात् । स्वविचक्षणताव्यक्तिर्भंग्या स्यात्परिजल्पितम् ॥" ॥ अत्र **तोषिणी**—तस्य कैतवमेव दर्शयन्ती माने कारणमाह—। अत्रेर्ष्याधिक्येनागृहीतमपि कर्तुर्नाम वाक्यस्य पूरयितव्यतया मधु पतिरिति पूर्वस्मादेवाकृष्यते, तत्संगतत्वाद्भवादृगिति मधुप एव लभ्यते । अत्रेयं योजना—मधुपतिरसौ स्वामसाधारणीमधरसुधामस्मान्सकृत्पाययित्वा बलाच्छलात्साध्वीरस्मान् पानायापाद्य सद्यस्त त्याज । कीदृशीम्—मोहिनीं, बुद्धिं भ्रंशयित्वा निजदुरंतलालसासंपादिनीम् । तत्र तस्य तथा पायने नास्त्येव दृष्टान्त इति । त्यागे तु सोऽयं दृष्टान्तः क्रियते—भवादृगिति । भवद्विधमधुप जातीयः सुमनस इवेति । अयमर्थः—भवद्विधमधुपजातिस्तदनन्यजीविकत्वात्तासु बह्वषु तत्रतत्र रसमल्पमल्पं प्राप्य बुभुक्षाशांत्यभावात्तांतां सुमनसं स्वसुखार्थं यत्त्यजति तद्युक्तमेव । मधुपतिस्तु सुधामयाधरत्वादन्यरसा पेक्षामतीतः, किन्तु दुःशीलत्वाच्छोभनमनसां दुःखदानमेव स्वसुखतया मन्यते, तस्माद्भवतापि तास्मिन्कितवे बंधुता कार्येति । अथ वा—भवादृगित्युभयत्र संबंधनीयः । तत्र दृष्टान्तपक्षे मधुपजातीयः, दार्ष्टांतिकपक्षे विदूरसौरभग्रहणसमागमनपरितोभ्रमणमधुरास्फोटरटनसहचुंबनादिभिर्भवद्वद्दुश्चे (दुचे) ष्टमानोपीति योज्यम् । ननु 'जयति तेऽधिकम्' इत्यादिभवद्वाक्यरीत्या पद्माया अपि तदासक्तायाः संप्रति तत्रापि तदुपासनं दृश्यते, भवत्या कथमसौ निंद्यते तत्राह—परिचरतीति । सकलपद्माधिकारिण्यपि पद्मा तत्पादपद्मं कथं परिचरतीति न बुध्यते । तदेतदुक्त्वा क्षणं विभाव्याह—अपि बतेति । अपीति संभावनायाम् । बतेति खेदे । हीति प्रसिद्धौ । उत्तमश्लोकस्येव ये तस्य जल्पाः प्रलोभनमयानि भाषितानि तैर्हृतचेताः सती तत्परिचरतीति ज्ञातमित्यर्थः । तदेवं तस्या अविचक्षणत्वं व्यज्य स्वस्य तु विचक्षणत्वं व्यंजितम् । तस्मात्कितवे तास्मि न्नस्माकमपि मान एव युक्त इति भावः । तत्राऽसकृत्पायनमप्युत्कंठतया विस्मृत्य सकृदेव पाययित्वेति तस्याऽनाया एव वंचनाकरीं सामग्रीं दर्शयित्वा स्वस्य त्रासातिशयः प्रकटितस्तास्मिन्नीर्ष्याद्यतिशयश्च सूचि तस्तथापि मोहिनीमित्युक्त्वा स्वलालसाव्यवच्छेदं प्रत्याख्याय मोहाद्यतिशयश्च व्यंजित इत्याद्यूह्यम् ॥ १३ ॥ विजल्पेनाह—किमिति । विजयः सर्वाष्वेव यस्य, स्वसखीनामेव विरहादिना घातकस्येति तत्तानामुक्तिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्रतोग्रे, यदुपतिर्गीयताम् । सैविसर्गपाठे तत्प्रसंगो वा । ''इष्टमाशंसितेऽपि स्यात्पूजिते प्रेयसि त्रिषु । सप्ततंतौ पुमान् क्लीवे संस्कारे कृतकर्मणि ॥'' इति मेदिनी । यथा पूजिताः पूजकस्य तदीयस्य चेष्टं कुर्वंति तथा प्रिया नेत्यरुच्याऽऽह पूजिता वेति । निर्विसर्गपाठे तेन कृष्णेन, प्रसंगेनालिंगितेन, क्षपिताऽपास्ता, रुक् कामक्लेशः । विजल्पलक्षणम्—''व्यक्तयाऽसूयया गूढमानमुद्रांतरालया । अंघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ॥'' इति । कटाक्षोक्तिर्यदुपतिपुराणविजयसखादिशब्दैः सूचितात्रेति । किञ्च, यद्वा—स्वपुरतो वर्ण्यमानप्रियकथया प्रबुद्धमदनकलिका पुनरपि श्रोतुमना असहमानेवाधिक्षेपं कोपनार्थमधिकं वक्तीति कृत्वो द्धवमुद्दिश्याह—षट्सु संधिविग्रहादिषु कपिलादिदर्शनेषु वांघ्रिरवक्रगतिर्यस्य स तथा । यद्वा—षट्सु विषयेषु भगवद्भक्तिपरिपंथिषु कामादिषु अंघ्रिः पादो यस्य तत्संबुद्धौ हे उद्धव 'अंघ्रिः स्याद्गतिपादयोः' इति निरुक्तिकारः । 'अघि—गतौ' रिप्रत्ययः । त्वमगृहाणां गृहाश्रमरहितानाम्, वनचारिणामित्यर्थः । नोस्माकामिहाग्रतः—पुरमणति प्राप्नोतीति पुराणस्तम् 'अण—गतौ' मथुरागतं यदूनां पतिं किं बहु कर्णबिलपूरं गायसि, न शब्दायस्वेत्यर्थः । तस्य गृहांतर्वर्तित्वेन वनमध्यवासिपुरतो गायनमनुचितमित्यर्थः । तर्हीदं कस्याग्रे युक्तमिति तत्राह—विजयेति । कृष्णसखीनां मथुरांगनानामग्रतस्तस्य प्रसंगो गीयताम् । तत्र गातुस्तव फलसिद्धिरप्यस्तीत्याह—क्षपितेति । तत्प्रसंगेन क्षपिता निरस्ता कुचानां रुक् संतापरूपा यासां ताः, इष्टाः कृष्णप्रिया मथुरांगना उद्गात्रे ते तुभ्यमभीष्टं धनादिकं कल्पयंतीत्यन्वयः । 'तत्प्रसंगम्' इति पाठे तु गायतामित्यात्मनेपदमार्षम् । भवान् गायताम् । यद्वा—यदुपतिविषया या गीतिस्तां गायेति परस्मैपदमेव । तस्य प्रसंगेन प्रकृष्टाऽऽलिंगनेन विजयसखसखीनामग्रतो यदुपतिं गायताम् । पुंसां ते कृष्णेष्टाः स्त्रीजना अभीष्टं कल्पयन्तीति वा ॥ * ॥ तदेवं तदीयसरोषवचनसरोजविक्षेपेणापसृत्य पुरतो रुवन्तं मधुपमस्मत्प्रसादनायैव श्रीकृष्णं बहुधा गायत्यसाविति वितर्क्य तमवज्ञातुमन्यथोत्प्रेक्षते—हे षडंघ्रे । तज्जातिस्वभावादेव गानस्वभावः, तस्माद्यद्गायसि तदिह व्रजे परमदुःखिते किं किमिति गायसि, तत्रापि बहु किं गायसि, तत्रापि यदूनामधिपतिं किं गायसि । यदूनां महाराजवंश्यानामसंख्यानामधिपतिः, अत्रत्यास्तु गोपास्तत्रापि संप्रति तेनानादृताः, अतस्तत्परिपाल्यमाना यदव एव गानजीविनस्तवेष्टं विधातुमर्हन्ति न त्वेते इति स्वल्पं वा बहु वा तत्रैव गातव्यमिति भावः । षडंघ्रे इत्यनेन पशुश्चतुष्पात् त्वं तु षट्पदः, तेन सार्धपशुत्वेन बुद्ध्यभावातिशयादेव गायसि न तु विचारादित्यसूया । ननु व्रज एव सर्वाधिकप्रेमवानसौ ततो व्रज एव श्रेष्ठ इत्याशंक्य पुराणं बहुशोऽनुभूतं, तत्तत्सर्वं कापट्येनैवानुष्ठितवानिति निश्चितम् । यद्वा—चिरमतिक्रान्तं संबंधं पूर्वमेव व्रजस्य तत्तदासीन्नाधुनेति भावः । यद्वा—'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः' इति द्व्यात्मकत्वे पुराणं पुरव णम् तदैव व्रजस्य सुखरूपमासीदधुना तु केवलं कर्षति धात्वर्थसत्तारूपेणैवावशिष्टमित्यर्थः । किञ्च—हंत कुरु च नाम व्रजेऽपि गानमस्माकमग्रतः किं गायसि, तत्रापि बह्वित्यादि । कथंभूतानाम्—अगृहाणाम् । तेन स्वोच्छिष्टमोहनरसविशेषसकृत्पायनमात्रपूर्वकत्यागाद्विदूष्य त्याजितगृहाणाम् । अतो यदुपुरेऽपि तत्प्रेयस्य एव विशिष्टं तव गानस्थानमित्याह—विजयते सर्वं वशीकरोतीति विजयः श्रीकृष्णः सखा त्वद्बंधुस्तस्य सखीनां सह खेलतीनामग्रतः । तत्प्रसंगस्तस्य विजयस्य सांप्रतमस्मत्परित्यागपूर्वकयादवकुलाधिपत्यफलतत्पुरवनिताशतवशीकरणलक्षणस्य प्रसंगस्तत्सुखदः प्रस्तावो गीयताम् । तेन ता इ (ह) ष्टास्तेन त्वयैव वा संमानितास्तवेष्टं द्रुतमेव कल्पयिष्यंति । यद्वा—कल्पयन्ति सदा कुर्वत्य एवासते । अधुना त्वस्मद्दुःखस्थां दृष्ट्वा तद्वर्णनपूर्वकेण तासां सौभाग्यज्ञापनेन त्वया मानिताः सत्यो विशेषेण कल्पयिष्यन्तीत्यर्थः । यद्वा—क्षयितकुचरुजः संप्रति श्रीकृष्णेनैव खण्डितकामपीडाः, दुखान्ते लोकाः समुल्लासाद्वंदिभ्यो बहु ददतीति समात्सर्यकौटिल्यम्, धाष्टर्यप्रदर्शनेन सकटाक्षोपहासश्च ॥ **विश्वनाथस्तु**—भ्रमरजातिस्वभावेन झंकारान्कुर्वन्तं तं—मत्कृतेन तिरस्कारेणाप्तसंरंभोऽयं स्वीयं गानगुणं प्रकाशयतीति मत्वाह—इह गोपीसभासु किं गायसि अज्ञस्य तव गाने नैताः प्रसीदंतीति भावः । तदपि पुनःपुनर्गायसि, तत्रापि यदुपतिं यदूनां पतित्वेन ख्याप्यमानं, तत्रापि नोस्माकमग्रतः । कीदृशीनाम्—अगृहाणां तेनैव त्याजितगृहाणामिह वनप्रदेश उपविष्टानां तुभ्यं चैकमुष्टिभिक्षादातृप्यसमर्थानाम् । ननु स्वांगोत्तीर्णपुरातनवस्त्रमाल्यादिकं किञ्चिद्देहीति चेत्तुभ्यं सर्वथैवानभिज्ञाय न ददामीत्याह—पुराणं गायसि तस्य यदुपतित्वे पुराणं प्रमाणयसीत्यर्थः । हे षडंघ्रे इति पूर्ववत्सार्द्धपशो कुत्र किं वा गातुमुचितमिति बुद्ध्यभावान्न जानासि, पशुत्वात्पुराणं वा कथं जानास्यतः कथं भिक्षां प्राप्स्यसीति भावः । किन्तु तव पशुत्वात्तुभ्यं वयं न कुप्यामः, किन्तु मानोपजीविनस्तत्र गानस्थानमुपदिशामः शृण्वित्याह—विजयेति । कामयुद्धे विशिष्टो जयो यस्य, विगतो जयो वा यस्य, स

१ 'तत्प्रसङ्गः क्षपित—' इति पाठे । २ 'या प्रेयसि' इति पाठो ज्यायान्प्रतिभाति व्यक्त्यन्तरस्याप्येतद्विषयत्वेऽबाधात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृंभस्य याः स्युः ॥
चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ १६ ॥

भो मातर्मैवं वोचस्त्वामनुस्मृत्यानंगविक्लवस्त्वां प्रसादयितुं मामादिष्टवानित्यत आह । दिवीति।दिवि भुवि रसातले च याः स्त्रियः स्युस्ताः का नाम तस्य दुरापा न काश्चन। तदित्यव्ययं तस्येत्यर्थः।कपटेन रुचिरेण हासेन भ्रविजृंभो यस्य तस्य।हे कपट इति वा।किं च।यस्य चरणरजः श्रीः सेवते तत्र वयं काः।अपि च यद्यप्येवं तथापि कृपणपक्षे

चासौ सखा चेति विजयसखस्तस्य सखीनां—तव सखा कामयुद्धे या जयति याभिर्वा विजीयते तासामेवाग्रतस्तत्प्रसंगः सुरतजयपराजयबिरुदावली गीयताम् । श्लेषेण पूर्वं सुबलसख आसीत्संप्रति विजयोऽर्जुनस्तस्य सखाऽभव दिति भाविवार्तापि तस्या मुखात्स्वयं निःसृतेति ज्ञेयम् । ततश्च ताः क्षपितकुचरुजः खंडितकुचज्वालास्तवेष्टं वांछितं कलयिष्यंति, त्वया च त्वद्गानश्रावणया इष्टाः पूजिताः सत्यः । अत्रोत्तरार्द्धेऽसूयामानगर्भः सर्वत्रैवोपहासात्मकः कटाक्षः कृष्णे पर्याप्नोतीत्ययं विजल्पः । तदुक्तम्—“ व्यक्तयाऽसूयया गूढमानमुद्रांतरालया । अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ” इति ॥ १४ ॥ स्वयमाक्षिप्य समादधे—आदिष्टवाना ज्ञतवान्। उज्जल्पेनाह—दिवीति । तस्य कृष्णस्य । स्वन्यूनतां द्योतयंत्याह—किञ्चेति । तत्र तस्य।अत्रापि विमृश्याह—अपि चेति । यद्यप्येवं लक्ष्मीसेव्यस्य दृष्टौ वयं—सितोपलाशिनस्तत्किट्टाशनमिव वन्या न योग्यास्तथापि । इति भाव इति—कृष्णपार्श्वे गत्वेत्थं त्वया वाच्यमित्याशयः । उज्जल्पलक्षणम्—“हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया । सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईरितः ॥” इति ॥ तीर्थस्तु—ननु त्वामित्थं वदंती प्रगल्भा मत्तकाशिन्यसि त्वदर्थं कृष्ण आयास्यतीति चेदत्राह—याः स्त्रियः कपटरुचिरहास्ययुक्तो यो भ्रूविजृम्भस्तस्य विषयास्ता दिव्यादिषु कास्तस्य दुरापा न का अपि, कपटरुचिरहासभ्रूभंगरूपाकर्षणमंत्रावित्त्वात्तस्येति भावः । कमानन्दं पटयति गमयतीति कपटः, रुचिं राति ददातीति रुचिरस्तत्संबुद्धौ वा । तथा कपटेति पृथक्संबुद्धिर्वा । कपटे हेतुः—चरणेति । भूतिर्लक्ष्मीर्यस्य हरेश्चरणरज उपास्ते । तदनुग्रहार्थमिति शेषः । ननु भवंत्योपि तथा कुर्वंत्वित्यत्राह—वय मिति । तत्र वयं वनचारिण्यः काः स्याम न का अपि । पुनरपि शृणु—कृपणस्य किंपचानस्यास्माद्विधस्य[2] जनस्य पक्षेंतिके उत्तमश्लोकशब्द एव कर्णविषयो न तु वाच्योर्थश्चक्षुर्विषय इत्यर्थः । यद्वा—उत्तमश्लोकशब्दो दीनपक्षपाती श्रुतः सोप्यस्मद्विषयो नाभूदित्यर्थः ॥ * ॥ ननु भोः कृष्णप्रेयसीशिरोमणे तत्र स्थितः स रात्रिन्दिवमेत्र त्वां ध्यायन्कामशरार्दितः खिद्यति त्वं चेत्प्रसीदसि तदैव तस्य निस्तार इति तत्र सासूयमाह— दिवीत्यादि । कृष्णस्य स्त्रीभिर्विना कालो न यातीत्यहं सुष्ठु जानामि, तत्र यदि मथुरायाः स्त्रियो न मिलंति तदा सोऽस्मान्ध्यायतु प्रसादयतु तत्र नेतुं त्वादृशं दूतं प्रस्थापयतु । न च गोपजातिं तं पुरस्त्रियः क्षत्रियजातयः कथमंगीकरिष्यन्तीति वाच्यम्, यतो दिवि भुवीति । तदित्यव्ययम् । तस्य कादुरापाः, यदि स स्वर्गे गच्छेत्तदा देव्योपि, रसायां रसातलादिषु नागपत्न्योऽपि स्वस्वपतीं स्त्यक्त्वा तमागच्छेयुर्मथुरांगनानां का वार्तेति भावः । न च तत्तदंगनाप्राप्तौ तस्य किञ्चित्पणादिकमपेक्षितव्यमित्याह—कपटेनापि रुचिरौ सर्वासां मनोहरौ भ्रूविजृंभहासौ यस्य तथाभूतस्यैव तस्य या देव्यादयः स्युर्न तु स्वस्वपतीनामित्यर्थः । तत्कपटहासमूल्येनैव ताः स्वयमेव क्रीता भूत्वा स्वस्वपतिं त्यजंति, कपटपदेन कृष्णस्तु सकृदेव भुक्त्वा त्यजति, नत्वप्रियत्वादिति भावः । देव्यादयो दूरे वर्तन्ताम्, भूतिर्लक्ष्मीर्नारायणस्यापि स्त्री चरणरज उपास्ते तदंगसंगार्थमिति नागपत्नीवाक्यं वयं पौर्णमासीमुखादश्रौष्म, अतो वयं काः कस्यां गणनायां तिष्ठामो यतो मानुष्यस्तत्रापि गोप्यस्तत्रापि वृंदावनीया इति भावः । इदं दैन्यमयवाक्यमपि समस्तकोद्भूननस्वरविशेषेण गर्वगर्भितामीर्ष्यामेव व्यनक्ति,सा चेर्ष्या स्वेषां लक्ष्म्यादितोपि प्रेमाधिक्यं रूपलावण्याधिक्यञ्चानुव्यनक्ति । अपि च किञ्च । उत्तमश्लोकशब्दो हि कृपणपक्षे एव संततहीनदीनजनान्यो दयते स उत्तमश्लोक इत्युच्यते।

१ पत्युः । २ ‘कदर्ये कृपणक्षुद्रकिम्पचानामितम्पचाः’ इति कोषात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुंदात् ॥
स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन् ॥ १६ ॥

कृपणानुकंपिनि पुंस्युत्तमश्लोकशब्दो भवतीति तथा कथनीयं त्वयेति भावः ॥ १५ ॥ पादमूले प्रविशंतं क्षमापयिष्यंतमिव मत्वाऽऽह । विसृजेति । शिरसि न्यस्तं पादं विसृज । तथाऽप्यमुंचंतमाह । वेद्मीति । मुकुंदादभ्येत्य ततः शिक्षित्वेत्यर्थः । दौत्यैर्दूतकर्मभिश्चाटुकारैः प्रियोक्तिरचनाभिरनुनयः सांत्वनं तत्र विदुषः प्रार्थनाचतुरस्य ते तव सर्वमहं वेद्मि।मुकुंदवत्त्वमप्यविश्वसनीय इति भावः । ननु तेन किमपराद्धं तत्राह।स्वकृत इति।स्वकृते तदर्थमेव विसृष्टा अपत्यपत्यन्यलोकाः अपत्यानि पतयश्चेहलोकोऽन्यलोको धर्मसाध्यश्च स्वर्गादिः याभिस्ता नोऽस्मान् अकृतचेता असंयतचित्तश्चंचलो यो व्यसृजत्तत्याज अस्मिन्किं नु संधेयं किमनुसंधातव्यं किं तथ्यं ज्ञातव्यमित्यर्थः ॥ १६ ॥

कृष्णे.तत्तल्लक्षणाभावान्मिथ्यैवोत्तमश्लोकशब्द इत्यर्थः । यद्यस्मद्विधान्कृपणजनानात्मनाऽदुःखयिष्यत्तदा स्वस्मिन्कथमुत्तमश्लोकशब्दवाच्यत्वमधास्यदिति वाऽऽक्षेपध्वनिः । अत्र पूर्वार्द्धे दिवि भुवीत्यादिना कुहकताख्यानम्, चरणरज इति तृतीयचरणे गर्वगर्भितेर्ष्या, अपि चेति चतुर्थे चरणे सासूय आक्षेप इत्ययमुज्जल्पः । तदुक्तम्—"हरेः कुहकताख्यानं गर्वगर्भितयेर्ष्यया । सासूयश्च तदाक्षेपो धीरैरुज्जल्प" ईर्यते इति ॥ १५ ॥ संजल्पेनाह—विसृजेति । न्यस्तं स्थापितम् । विसृज अपाकुरु । तथापि तथोक्तेऽपि । ततस्तस्मात् । इत्यर्थ इति—अभ्याङ्संबंधादिणः शिक्षार्थत्वम् 'धात्वर्थं बाधते कश्चित्' इत्युक्तेरिति तात्पर्यम् । सर्वं कृत्यम् इति भाव इति—भृत्येऽपि स्वामिनो धर्मः प्रायः स्यादिति न्यायेनेति भावः । स चाक्षिपति—नन्विति । तेन कृष्णेन । तत्राक्षेपे । असंयतचित्तोऽवशीकृतचित्तः । यः कृष्णः । अस्मिन्कृष्णे । अनुसंधातव्यं योक्तव्यम्, न किमपीति । संजल्पमाह—"सोल्लुंठया गहनया कयाप्याक्षेपमुद्रया । तस्याकृतज्ञताद्युक्तिः संजल्पः स तु कीर्तितः ॥" इति । अर्थांतरम्—प्रणतकृष्णशिरस्थितस्वपादस्मरणातिरेकविवशा स्वपादमुद्भ्रवशिरसि स्थितं मत्वाह—विसृजेति । तव शिरसि स्थितं मम पादं विसृज मुंच, अहं त्वां वेद्मि । अनुनयः सांत्वनम् । किं ते दौत्येनेतो मुकुंदं याहि, किमित्येवं कोपगर्भं वचनं वदसीति तत्राह—स्वकृत इति । कृष्णार्थं त्यक्तपुत्रभर्तृबंधुजना अस्मानिह वने व्यसृजदिति । य इतोऽकृचेता अकृतज्ञः, कृतघ्न इत्यर्थः । दूतोऽहं त्वां संदधामीत्यत्राह—किन्विति । "उमाप्रणामसंक्रांतचरणालक्तकः शशी । संध्यानुग इवाभाति यस्य पायात्स वः शिवः ॥" इत्याद्युक्तेरीश्वरेपीयं लीला जनमोहनार्थेति ॥ * ॥ सौरभलोभेन चरणतले प्रविशन्तमपि भ्रमरं—ननु लक्ष्मीकोटिनिर्मंछनीयनखद्युते देवि सत्यं त्वय्यपराद्ध एव कृष्णस्तस्मात्त्वं कृपयैव क्षमस्वेति प्रणमन्तं तं मत्वाह—शिरसि धृतं मम पादं विसृज त्यज, इतो दूरीभवेत्यर्थः । वेद्म्यहमिति—लक्ष्म्यादिकेव नाहं प्रतार्येति भावः । मुकुंदात्सकाशादभ्येत्य चाटुकारैः प्रियोक्तिरचनारूपैर्दौत्यैर्दूतकर्मभिरनुनयविदुषस्तस्मादनुनयप्रकारं शिक्षितवतस्तव सर्वं शीलादिकं वेद्मि । कर्मणि वा षष्ठी, त्वां वेद्मीत्यर्थः । ननु स्वामिनि ! त्वत्प्राणकोट्यधिकेन तेन सह विग्रहेणालं प्रत्युत मया तीर्थेन संधिरेव कर्तुं युज्यत इति तत्राह—स्वकृत इति । तैर्व्याख्यातम् । तत्र रासमुरलीवादनसमयेंतर्गृहानिरुद्धगोपीभिरपत्यानि त्यक्तानि तदानीं तानि त्यक्त्वैव निस्सृतत्वात्, अस्माभिः पतयः, धन्यादिकन्याभिः पित्रादय इति यथासंभवं ज्ञेयम् । ता गोपीर्यो व्यसृजत् । कीदृशः—अकृतचेताः, न विद्यते कृते उपकृते चेतो यस्य सः, अकृतज्ञ इत्यर्थः । नु अहो ईदृशे तस्मिन्कठोरे किलु संधेयं संधातुमर्हमपि तु नैवेत्यर्थः । अत्र पूर्वार्द्धे सोल्लुंठाक्षेपमुद्रा, उत्तरार्द्धेऽकृतज्ञता । आदिना निर्दयत्वपरद्रोहित्वप्रेमशून्यत्वानीत्ययं संजल्पः । तदुक्तम्—"सोल्लुंठया गहनया कयाप्याक्षेपमुद्रया । तस्याकृतज्ञताद्युक्तिः संजल्पः कथितो बुधैः ॥" ॥ अत्र **तोषिणी**—अहमित्यन्या न जानंतु नाम अहं तु विचक्षणा जानाम्येवेत्यर्थः । 'दूत्यैः' इति क्वाचित्कः, अर्थस्तु स एव । मुकुंदादित्यस्माकं सर्वासां स्पृहादित्यागं ददातीति तथानाम्न इत्यनेन धूर्तत्वं क्रूरत्वञ्चाभिप्रेतम् । तदीयत्वेन दूतस्य च धूर्तस्वभावत्वेन तस्य तु परमाविश्वसनीयत्वमुक्तम् । यद्वा—कमलबुद्ध्या पुन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृगयुरिव कपींद्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ॥
बलिमपि बलिमत्त्वाऽवेष्टयद्ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १७ ॥

किं च कृष्णस्य पूर्वाणि कर्माण्यनुसंदधाना बिभेम्यहमस्मादित्याह । मृगयुरिवेति । मृगयुर्लुब्धक इव यः कपींद्रं वालिनं विव्यधे अविध्यत् । लुब्धधर्मा क्रौर्यवान् । अलुब्धधर्मेति वा । लुब्धको हि तन्मांसमत्तुकामो विध्यत्ययं तु न तथाऽतो वृथा कठिन इत्यर्थः । तथा स्त्रियं च शूर्पणखां स्त्रीजितः सीतापरतंत्रः काम एव यानं प्राप्तिसाधनं यस्यास्तां विरूपां छिन्नकर्णनासिकामकरोद्दाशरथिरूपेण । तथा बलिमपि वैरोचनिं तद्दत्तं बलिमत्त्वा भक्षयित्वा गृहीत्वेत्यर्थः । ध्वांक्षवत्काकवदवेष्टयद्बबंध वामनरूपेण । बलिमत्त्वाऽधोऽक्षिपत् । विष्टपाय इति पाठे बालिं पूजां गृहीत्वा विष्टपात्स्वर्गादधोऽक्षिपदित्यर्थः । तत्तस्मादसितस्य कृष्णस्य सख्यैरलम् । न किंचित्कार्यमित्यर्थः । एवं चेत्किमिति तं नित्यं गायथ तत्राह । दुस्त्यजस्तु तस्य कथारूपोऽर्थ इति ॥ १७ ॥

रुपसृत्य पादोपरि तं मुहू रुवन्तं भ्रमरमवेक्ष्य—भो देवि मा दोषं कार्षीः सकृदपि मे विज्ञप्तिं कृपया शृण्विति याचमानमिव च तं मत्वाह—विसृजेति । तत्र सोल्लुंठमाह—त्वां मुकुंदं च युवयोः शीलं च सर्वमहं वेद्मि तस्मान्मे पादं ते त्वदीयैश्चाटुकारैः सह विसृज, मत्पादं चाटुकारांश्च युगपत्त्यजेत्यर्थः । कथंभूतैः—अनुनयविदुषो मुकुंदादभ्येत्य कृतैर्दूतकृत्यैः । ननु स्वामिनि तेन प्रेष्ठेन सह विग्रेहणालं सकृदपराधं क्षांत्वा मया तीर्थेन संधिरेव कर्तुं युज्यत इति तत्राह—स्वेति । पतयश्चापत्यानि चान्ये च गृहादयो, लोकाश्च सर्वे ऐहिकामुष्मिकभोगसहायाः । न कृतं चेतोऽस्मासु—एता अनन्यगता इति मनो येन सः । यद्वा—स्वकृते स्वार्थम् अस्मान् विसृष्टापत्यपत्यन्यलोका अकृत अकार्षीत्, इताश्च प्राप्ताश्च व्यसृजत् । नु अहो ईदृशेऽस्मिन्कठोरे शठवरे किं संधेयमपि तु नैवेत्यर्थ इत्याक्षेपः ॥ १६ ॥ संधेयत्वे दोषमाह—किञ्चेति । अनुसंदधाना विमृशति—अस्मात्कृष्णात् । लुब्धको व्याधः । "मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि" इति मेदिनी । लुब्धकानां त्विदमुचितमपि स तु न तथेत्याह—अलुब्धधर्मेति । तन्मांसं वानरपशुमांसम् । विध्यति हिनस्ति । अयन्तु कृष्णस्तु । न तथा न वानरमांसाशी । अतो वानरमांसाशित्वाभावात् । इत्यर्थ इति—वानरमांसस्याभक्ष्यत्वात्तदर्थमपि तद्धननं नोचितं कुतोऽन्योऽन्यथेति भावः । तथा तद्वत् । तथा ततोपि पूर्वतरावतारचरितमस्य शृणु—बलिमिति । तद्दत्तबलिं तत्समर्पितत्रिलोकीरूपपूजाम् । अत्त्वा गृहीत्वा । ध्वांक्षपक्षे तद्दत्तबलिं पुरुषार्पितबलिमत्त्वा तच्छिरस्येव स्वमलं त्यजतीतीत्यर्थः कार्यः । "ध्वांक्षो मत्स्यात्खगे काके तर्कोटे भिक्षुकेऽपि च" इति मेदिनी । तस्मात् सदातनकौटिल्यस्वभावत्वात् । एवंचेत् सख्यानिच्छा चेत् । तस्य कृष्णस्य । कथार्थः चरितव्यवहारः । दुस्त्यजस्त्यक्तुमशक्यः, पारवश्यापादकत्वादिति भावः । एतच्चावजल्पेनोक्तम् । स च—"हरौ काठिन्यकामित्वधौर्त्यादासक्त्ययोग्यता । यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः ॥" इति । वस्तुतस्तु कपेः सुग्रीवस्य ईं लक्ष्मीं द्रावयतीति कपींद्रस्तमपराधिनमित्यर्थः । बलिमिति—'बल—परिवर्तने' धातुः । बलति परिवर्तयतींद्रश्रियमिति बलिस्तेन परकीयं त्रैलोक्यं स्वीयं कृतमिति चौर्याख्यापराधं दृष्ट्वा दुष्टशिक्षणं कृतवानिति ॥ * ॥ किञ्च—न केवलं तस्य तादृशचेष्टितादेव बिभेम्यपि तु श्यामतास्वभावादपीति तद्गुणयोगेन तदभेदबुद्ध्या धीरोदात्तत्वादिगुणतया प्रसिद्धेष्वपि श्रीरामवामनादिरूपेषु दोषं दर्शयन्ती तद्रूपं कैमुत्यं दर्शयति—मृगयुरिवेति । मृगयुर्व्याध इव निर्दयो गुप्तश्च सन् एको योऽसितः सोऽपि कपीनामवध्यानामीशमपि वालिनं विव्यधे । प्रसिद्धस्य मांसादिलुब्धस्य धर्माः क्रौर्यादयो यत्र तादृशः । अलुब्धधर्मा तद्धर्मरहितोऽपि वा । तदप्यास्ताम् । य एव स्त्रियं तत्रापि कामयानां कामयमानामपि साक्षाद्विश्रवःप्रभवां विरूपां छिन्नकर्णनासामकृत ।

१ 'प्रिये' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्मा विनष्टाः ॥ सपदि गृहकुटुंबं दीनमुत्सृज्य दीना बहव इह विहंगा भिक्षुचर्यां चरंति ॥ १८ ॥

अपि च जानीम एव तत्कथाऽपि त्रिवर्गलतामूलोन्मूलनीति तथापि न त्यक्तुशक्नुमः । किं कुर्म इत्याह।यदनुचरितेति । यस्यानुचरितमेव लीला तदेव कर्णपीयूषं तस्य विप्रुट् कणिका तस्याः सकृददनं सेवनं तेन विधूता निरस्ता द्वंद्वधर्मा रागादयो येषां तेऽत एव विनष्टा असत्तुल्या दीनं दुःखितं गृहं कुटुंबं विहाय दीना भोगहीना विहंगा अपि भिक्षुचर्यां प्राणवृत्तिमात्रं चरंत्यतस्त्याज्यस्तथापि त्यक्तुं न शक्नुम इति निंदापरत्वेऽर्थ्यं तावच्छ्रौतोर्थः । दुस्त्यजत्वेऽपि पारमार्थिकोऽयमर्थः । विधूतद्वंद्वधर्मा इत्यंतः समासः पूर्ववत् । ततस्ते च ते अविनष्टाश्चेति समासः । इतरे पुनर्द्वंद्वधर्माणो विनष्टा एव । सपदि तत्क्षणमेव दीनं तुच्छं गृहसहितं कुटुंबं विहाय दीना इवाकिंचनाः । धीरा इति वा पाठः । बहवो विहंगा हंसा इव सारासारविवेकचतुरा भिक्षुचर्यां पारमहंस्यं चरंति तस्मादेवं परमपुरुषार्थरूपत्वाद्दुस्त्यज एव तत्कथार्थ इति ॥ १८ ॥

तस्य च क्षत्रियजातितया तत्तत्संभवेन्नाम योऽन्योऽसितो ब्राह्मणजातितया तत्रापि ब्रह्मचारितया शांत्यादिशुभयोग्योऽपि, बलिं परमधर्मात्मानमपि, तत्रापि बलिं तस्य पूजामुपहारमत्त्वा भुक्त्वा गोप्यवदात्मसात्कृत्यापि छलेन दानपूर्तिममत्वा विष्टपात् त्रैलोक्यराज्यादक्षिपत् भ्रंशयामास, तत्राप्यधोऽक्षिपत् भूविवरे विचिक्षेप । पाठान्तरे त्ववेष्टयत् बबंध, पराजयतेति । काको यथा बलिं जग्ध्वापि लोकं वेष्टयति स्वजातीयानन्यानाहूय तद्गृहमावृणोति तद्वत् । अत्र विव्यध इत्यादिभिः काठिन्यम्, स्त्रीजित इति कामित्वम्, बलिमपीति धौर्त्यमभिप्रेतम् । तत् तस्मात् । असितमात्रस्य सख्यैर्बहुषु सख्यप्रकारेष्वेकेनाप्यलं न तु प्रयोजनमित्यर्थः । ननु तस्य कथं कथा रूपोऽर्थो मुनिभिरपि न त्यज्यते तत्राह–दुस्त्यज इति । सोऽयं तस्य कोपि दुरन्तो मोहनः स्वभाव इति भावः । इति भियेव सेर्ष्योक्तिः । ननु ‘ नाख्येयं परदूषणम् ’ इति निषेधः, सत्यम्, निषिद्धत्वाद्वक्तुमयुक्तमपि तद्दैगुण्यं तस्य परमन्याय्यकारित्वादुत्पद्यमानेन रोषावेशेन त्यक्तुं न शक्यते इत्याह–तद्दैगुण्यरूपकथाप्रयोगो दुस्त्यज इति ॥ **विश्वनाथस्तु**–नन्वति कोमलमनाः स त्वामेव ध्यायंस्तत्रास्माभिर्दृश्यते इति, तत्र त्वमर्वाचीनो दासस्तस्य तत्त्वं न जानासि, न केवलं स ह्यस्मिन्नेव जन्मनि कठोरः किन्तु पूर्वपूर्वजन्मस्वपीति पौर्णमासीमुखादस्माभिः श्रुतत्वादित्याह–यदा स क्षत्रियजातौ रामचन्द्रोऽभूत्तदा क्षत्रियधर्मं परित्यज्य व्याध इव वालिनं विव्याध, निर्दयो गुप्तः सन्नित्यर्थः । तत्रापि लुब्धस्य व्याधस्यापि धर्मरहितः, न हि व्याधो वानरान्हिनस्ति तन्मांसस्याभक्ष्यत्वेन केनाप्यक्रेयत्वादिति भावः । अन्यमधर्मं शृण्वित्याह–स्त्रियं शूर्पणखां तमेव कामयमानां छिन्न कर्णनासामकृत, अन्यः कोप्येनां मा भुंक्तामिति क्रौर्येणेति भावः । न च जटाबहुलधारित्वाद्वैराग्येणेत्यत आह–स्त्रिया सीतया जितः । ततोपि पूर्वजन्मनि स ब्राह्मणोभूत्तदापि ब्राह्मणधर्मं शांत्यकैतवादिकं परित्यज्य बलि मित्यादि पूर्ववत् । तस्मात्कृष्णवर्णस्य सख्यैरस्माकं गौरीणामलम्, तत्संबन्धिनः सख्यस्य यावन्तो भेदास्तेषामेकोपि न भद्र इति बहुवचनेन द्योतितम् । असिताः खल्वशुद्धचित्ता भवन्ति तेभ्यो भयस्यावश्यंभावित्वादिति भावः । नन्वभीक्ष्णं परानिन्दां कुर्वती किं शुद्धचित्तासीति तत्राह–तस्य कथायाः प्रतिजन्मचरित्रस्यार्थो व्याख्या दुस्त्यजः । सोस्मानेव दुःखयति अस्माभिस्तत्कथाया अप्यर्थो न वक्तव्य एव किम् । अत्र निन्दा भवतु यथार्थभाषणत्वेनानिंदा वा भवतु असौ त्यक्तुमशक्य एवेति भावः । यद्वा–सोऽस्माभिस्त्यक्त एव किन्तु तत्कथारूपोऽर्थो वस्तुविशेषस्तु दुस्त्यज एव । कर्तृपदानुक्त्या सर्वैरेव मुन्यादिभिरपीत्यर्थः । अत्र विव्यध इति काठिन्यम्, स्त्रीजित इति कामित्वम्, बलिमपीति धौर्त्यम् । असितसख्यैरित्यासक्तयोग्यता भयमीर्ष्या चेत्ययमवजल्पः । तदुक्तम्–“हरौ काठिन्यकामित्वधौर्त्यादासक्त्ययोग्यता । यत्र सेर्ष्याभियेवोक्ता सोऽवजल्पः सतां मतः॥” इति ॥ १७ ॥ अन्यदाह–अपि चेति । तत्कथा कृष्णकथा । त्रिवर्गलता धर्मार्थकामरूपा वल्ली तस्या मूलनिकृंतनी । तथापि जानंत्योपि वयं त्रिवर्गस्थाः । अभिजल्पेनाह–यदिति । यस्य कृष्णस्य । अनुचरितमवतारच रितमेव । लीला विलासः । तदेव लीलैव । कर्णपीयूषं श्रवणामृतम् । अत एव विनष्टरागादित्वादेव । “ लीला प्रियस्यानुकृतिः श्लिष्टा वाग्वेषचेष्टितैः । लीला विलासः केलिश्च क्रिया शृंगारभावजा ॥ ” इति कोशः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

“ पृषंति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः ” इत्यमरः । प्राणवृत्तिमात्रमित्यनेन ज्ञानार्थमेव तेषां देहधृतिर्न तु भोगार्थेत्युक्तम् । अतः अस्य लीलाकर्णनस्य दीनतापादकत्वात् । तावदधुना । श्रौतः श्रुतिविहितः । पारमार्थिको वास्तवः । अयं वक्ष्यमाणः । ततश्च पूर्ववत् समासोत्तरम् । ते चेत्यादि कर्मधारयः । इतरे गृहस्थाः । इवेन न तु दीना इत्युक्तम्, किन्त्वत्युदारास्त्यक्तुमशक्यस्य त्यागित्वात् । इवाऽध्याहाराऽपेक्षया ‘धीराः’ इति पाठः सम्यक् । विहंगपदं लक्षणया हंसपरम् । पारमहंस्यं संन्यासम् । तथा च श्रुतिः–“ प्रव्रजंत्येतद्ध स्म वै पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मा लोकः ” इति । “ ते ह स्म पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंति ” इति च । ‘ दीनो दुःखितदुर्गततुच्छमूषिकवाचकः ’ इति स्वामी । अभिजल्पलक्षणम्–“ भंग्या त्यागौचिती तस्य खगानामपि खेदता । यत्र सानुनयं प्रोक्ता तद्विद्यादभिजल्पितम् ॥ ” इति ॥ * ॥ वयं साक्षात्तेन सह सख्यं कृतवत्यो तद्दुःखिन्योऽभूम तत्र किं चित्रं, तल्लीलाकथापि सर्वजगत्संतापिनी त्याह–यस्यानुचरितं प्रतिक्षणचेष्टितमेव लीला सैव कर्णपीयूषं शब्दमात्रेणैव सुखदं, किं पुनरर्थत इति भावः । तस्या अपि विप्रुट् तस्या अपि सकृदप्यदनं किञ्चिदास्वादनं तेनापि विधुता विशेषेण खंडिता द्वंद्वधर्माः स्त्रीपुंसादिपरस्परसख्यरूपधर्मा येषां ते । तत्कथां स्त्री चेच्छृणोति सद्य एव पतिस्नेहं त्यजति, पतिश्चेत्स्त्रीस्नेहमेवं पुत्रश्चेत्पितरं मातरञ्च, माता चेत्पुत्रमित्येवं परस्परत्यागाद्विशेषेण नष्टा इति तेषां नाशे तथा न दुःखं यथा वैराग्य इति संसारिकलोकानुभव एव प्रमाणमिति भावः । किञ्च–ते जनाः स्निग्धमनसोऽपि कठोरस्य कृष्णस्य लीलाश्रवणादतिकठोरा निर्दया कृतघ्नाश्च भवंतीत्याह–सपदि कथाश्रवण क्षणमात्र एव । गृहकुटुम्बं पितृश्वश्र्वादिपर्यंतम् । दीनमन्यस्योपार्जकस्याऽभावात्, श्वो यद्भोक्तव्यं तद्धनरहितमपि । यद्वा–तद्विच्छेदकातरम् उत्सृज्य, मृत्यवे कुशवारिसंयोगेन संप्रदायैवेत्यर्थः । हंतहंत ते स्त्रीपुत्रादयो म्रियन्तां नाम स्वयमपि सुखिनो न भवंतीत्याह–दीना गृहं त्यक्त्वा गच्छंतश्चित्तविक्षेपाद्वराटकमात्रमपि ग्रंथौ न गृह्णंतीति भावः । ‘ धीराः ’ इति पाठे भार्यादिरोदनदर्शनेप्यक्षुभ्यन्तो महाकठोरा इत्यर्थः । न च ते एकद्वा द्वित्रा वा चतुःपंचा वा किन्तु बहवः परःशताः परःसहस्राश्च । ननु ततस्ते कया जीविकया जीवंति तत्राह–विहंगाः पक्षिण इव गोधूमादिकणभिक्षापरिपाट्यैव जीवंति, न तु केनापि दत्तया स्थूलभिक्षयापीति भावः । इहेति–अत्रैवाऽस्मद्दुःखस्थाने वृंदावने एत्यागत्यास्मत्संगादपि महादुःखिनो भवंतीति भावः । तेन तत्कथाया बहुमत्स्यंडिकामयधत्तूरबीजचूर्णत्वम्, कथावाचकस्य साधुवेशच्छलमहावातुकत्वम्, पुराणपुस्तकस्य जालत्वम् । अत एव ते वनाद्वनं भ्रमन्तोऽपि स्वकक्षगृहीतपुस्तका एव दृश्यन्ते । व्यासादीनां जालनिर्मातृत्वं, कृष्णस्य परमेश्वरत्वेन तत्तदादेष्टृत्वमेतदर्थमेव कृष्णेन परमेश्वरता गृहीता गोप्य इव सर्वे लोका दुःखाब्धौ पतंत्विति तस्य विचारः, ईदृशपरदुःखदर्शनमेव तस्य सुखमत ईदृशपरदुःखदानजन्यफलभागी यथा स न तथा व्यासादय इति परःशता एव ध्वनयोऽस्य पद्यस्य सर्वे एव सिद्धांततो व्याजस्तुत्या भक्तेः सर्वोत्कर्षव्यंजका ज्ञेयाः । अत्र खगसदृशीकृत्य सज्जनानां खेदनात्तस्य त्याग एव समुचित इत्यनुतापमयं वाक्यमित्ययमभिजल्पः । तदुक्तम्–“भंग्या त्यागौचिती तस्य खगानामपि खेदनात् । यत्र सानुशयं प्रोक्ता तद्भवेदाभिजल्पितम् ॥” इति ॥ **तोषिणी** तु–यस्यानुचरितं स्वस्यानुकूलं कर्मैव लीला बालचेष्टितवत्स्वच्छन्दखेलामात्रमिति निन्दैव, लोकहितार्थकर्मणा सह लीलायाः प्रतियोगित्वात् । तदेव कर्णपीयूषं शब्दतः कर्णसुखदं न त्वर्थतो मनः प्रीतिकरमित्यर्थः । तस्यापि विप्रुट् न तु बाहुल्यम्, तस्या अपि सकृदप्यदनं दूरदेशात्कथंचित्किञ्चिदास्वादनं तेन विशेषेण धुता द्वंद्वधर्मा मिथुनाचाराः शीतौष्ण्यादिभोगा वा यैस्तथाभूतास्सन्तः विहंगा आकाश गामित्वाद्दूरादागत्य हंसादयः पक्षिणोऽपि तत्रापि बहवः एव न तु द्वित्राः सपदि ललिश्रवणोत्तरमेव दीनमपि गृहस्य कुटुम्बं तातजननीभार्यादिकं त्यक्त्वा स्वयमपि दीना विनष्टाश्च सन्त इह तल्लीलास्थाने वृन्दावने समागत्य भिक्षुचर्यामेव चरन्ति । ‘धीराः’ इति पाठे तेषां दुःखेनाक्षुभिताः कठोरचित्ताः सन्त इत्यर्थः । ‘बहव इव’ इति पाठस्तु सर्वटीकाकारासंमतः, श्रीस्वामिभिरपि स्तुतिपक्ष एव हंसा इवेति गौणवृत्तिद्योतनायैव इव शब्दो दत्त इति । अयं भावः–येऽमी पक्षिणो दृश्यन्ते नूने न प्राचीनास्तेषां तद्वियोगे जीवनासंभवात्, ततोऽमी आगंतुका एव । अत्र तादृशमागमनमादिशी भिक्षुचर्या च तेनैव संभवति यथा भवदागमनं दौत्येनैवेति । यद्वा–तस्य निष्ठुरता किं वाच्या, तच्चरितलवमपि ये केचिच्छृणुयुस्तेपि निष्ठुराः स्युरित्याह–यदिति । अर्थः पूर्ववत् । यद्वा–तर्हि कथं मां गातुं निषेधसि तत्राह–यदिति । अर्थः पूर्ववत् । विशेषतश्च इह बहव एव विहंगास्तदावेशात्तद्गानशीला भिक्षुचर्यां चरन्ति तत्र को वा वराको भवान्, तत्र च ते प्रायो व्राजपत्यर्लीलामेव गायंति तथापि न रोचन्ते, भवांस्तु यादुपत्यलीलामिति कथंतरां रोचन्तां नामेति ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः॥ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमंत्रिन्भण्यतामन्यवार्ता॥१९॥

ननु किमेवं ब्रूषे पूर्वं त्वयैव साकं रहसि किमेवं नावोचयथायेत्यत आह । वयमिति ।उपमंत्रिन् दूत । आस्तामियं वार्ता । यतः कुलिकस्य मृगयो रुतं गीतमज्ञा यथा ऋतं सत्यमिति श्रद्दधानाः कृष्णस्य हरिणस्य वध्वो भार्या हरिण्यः शरैः क्षताः सत्यो रुजो ददृशुः । एवं जिह्मस्य कुटिलस्य तस्य व्याहृतमृतमिव श्रद्दधानाः स्पृहयंत्यो वयमसकृदेतद्ददृशिम । किं तत् । तस्य नखैः स्पर्शस्तेन तीव्रः स्मरस्तेन रुजः पीडाः । तस्मादन्या वार्ता भण्यतां कथ्यतामिति ॥ १९ ॥

पुनराशंकन्ते–नन्विति । एवमयोग्यम्, द्वितीयैवंपदस्याप्ययमेवार्थः । किंशब्दद्वयं कुत इत्यर्थे । इयं वार्ता एकान्तवार्ता । यतो यस्मात् । ''कुलिकं मृगयौ योगभेदे वल्मीककाकयोः । पटोलेन्दुकुलश्रेष्ठसमूहेषु च वाच्यवत् ॥'' इति धरणिः । एतत्पदार्थं पृच्छति–किं तदिति । तस्य कृष्णस्य। 'रुक् पीडारोगकान्तिषु' इति धरणिः। तस्मात् तस्य संयोगस्य पीडाहेतुत्वात् । वस्तुतस्तु तच्छ्रवणस्यानंदजनकत्वादन्यस्य सर्वस्माद्विलक्षणस्य कृष्णस्य वार्ता भण्यतामिति ध्येयम् । तस्य कुलिकस्य नखस्पर्शात्तीव्रो दुःसहः स्मरस्पर्शो यस्य शरस्य तेन रुजः पीडा इति वा । ''स्मरः कामस्पर्शनयोः स्मरणेऽवगतौ हरौ'' इति निरुक्तिकारः । ''जिह्मं तु कुटिले मंदे क्लीबं तु गरपादपे'' इति मेदिनी । इहाऽऽजल्पेनोक्तिः । लक्षणन्तु–''जैह्म्यं तस्यार्तिदत्वं च निर्वेदाद्यत्र कीर्तितम् । भंग्यान्यसुखदत्वं च स आजल्प उदाहृतः ॥ '' इति । तस्य प्रियस्य ॥ * ॥ वयमिति तैरवतारितं, तत्रैवमिति जानीम एवेत्यादि पूर्वपद्यावतारिकात्मकं पूर्वपद्यार्थमित्यर्थः, उत्तरैवंशब्दोपि तदर्थः । पूर्वः किं शब्द आक्षेपे, उत्तरस्तु प्रश्ने । आस्तामिति–तद्वाक्यं यदि प्रमाणं स्यात्तदैव त्वया प्रष्टव्यं न त्वन्यथा, यतस्तद्वाक्यप्रामाण्यबुद्ध्यैव वयं दुःखसागरे मग्ना इत्यर्थ इति । यद्वा–अहो तल्लीलाश्रवणमात्रेण बहवो व्यसनं प्राप्ताश्चेत्कथं तत्कपटोक्त्या महादुःखं वयमन्त्रभूमेति किमाश्चर्यमित्याह–वयमिति । यद्वा–ननु देवि प्रथमतः प्रियसंदेशं शृणु ततो विचारय ततस्तुष्य कुप्य वा तत्राह–वयमिति । जिह्मस्य पूर्वोक्तस्य कितवस्य तद्बंधोरसकृद्व्याहृतम् 'न पारयेहम्' इत्यादिकम् 'आयास्ये' इत्यन्तं वचनसहस्रम् ऋतं सत्यमिवासकृच्छ्रद्दधानाः यथा महतां वाक्यं सत्यं तदिव निश्चिन्वाना मुहुर्व्यभिचारेपि मुहुः श्रद्धाना इत्यर्थः । ततो मोहेन कृष्णस्य तस्यैव वध्वोऽपि सत्यस्ततोऽसकृन्नखस्पर्शेन मुहुः स्वस्मिंस्तच्चिह्नदर्शनात्तीव्रस्मररुजः' तीव्रा स्मररुक् यासां तथा भूताश्च सत्यः एतदेतादृशं दुरवस्थानमेव न तु कदापि स्मरसुखं ददृशुर्ददृशिम, प्राप्तवत्य इत्यर्थः । 'तिङां तिङो भवंति' इति छांदसवार्तिकात् । स्वतस्तून्मोदनास्मत्प्रयोगाननुसंधानादतः परोक्षप्रयोगोऽपि तदानीं बोधावरणं सूचयति । यत एवं तस्मात् । वयमज्ञा एवेति तत्र दृष्टान्ता हरिण्यः । कुलिकरुतमिवेति–यथा हरिण्यः कुलिकरुतं सत्यमिवास्मदनुकूलमेवेदं न पुनरन्यथारूपमिति मन्यमानाः भवद्बंधुनखसदृशकुलिकबाणस्पर्शेनास्मत्स्मररुक्सदृशरुजः सत्य एतदस्मदीयदुरवस्थासदृशं दुरवस्थानं ददृशुः, प्राप्नुवंतीत्यर्थः । उभयत्र तद्योग्यतार्थं विशेषणमज्ञा इति । ननु भवत्यस्तावत्कुलवध्वस्तास्तु पशुजातीया मनुष्यभक्ष्यास्तां दुरवस्थां प्राप्तुमर्हन्त्येवेति तासु कथं स्वसाम्यं निर्दिशसीत्याशंक्य स्वपक्षान्तःपात्यमानानां तासां पक्षपातमाचरंती श्लाघामाह–कृष्णवध्व इति । तद्भर्तारोऽप्यात्मानं परमोत्कृष्टकृष्णनामतयाख्यापयन्ति ततस्तद्बंधुतस्तेषां को निष्कर्षो येन तासामपि निष्कर्षः स्यात्, ततो यथा तादृशीषु तासु कुलिक एव दुःखदायी स्यात्तथास्मासु भवद्बंधुरेवेति भावः । ततो हे उपमंत्रिन् दांभिकतया तूष्णीं स्थितस्यास्य तन्मांत्रिणः प्रतिनिधे । यद्वा–''तत्रोपमंत्रिणोऽराजन्नानाहास्यरसैर्विभुम्'' इत्यत्र तथा व्याख्येयानुसारेण हे भंडविद्यापण्डित अन्या वार्ता भण्यतामुपहासस्त्यज्यतामित्युन्मादवचने तासां या कृच्छ्रादर्थसंगतिस्तदुत्कर्षाय सा भातीत्युनुक्तं मुनिभिस्तथेति ॥ **विश्वनाथस्तु**–ननु एवं चेत्परमविज्ञाभिर्भवतीभिः कृष्णे कथं सख्यं तत्राह–वयं तस्य 'न पारयेऽहं निरवद्यसंयुजाम्' इत्यादिकं जिह्मव्याहृतमपि ऋतमिव सत्यमिव श्रद्दधाना

१ 'सुप्तिङुपग्रह–' इत्यादिबाहुलकात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रियसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुंधे माननीयोऽसि मेंग ॥
नयसि कथमिहास्मान्दुस्त्यजद्वंद्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥ २० ॥

परावृत्य गत्वा पुनरागतं प्रत्याह । प्रियसखेति । हे प्रियस्य कृष्णस्य सखे प्रेयसा कृष्णेन पुनः प्रेषितः किं त्वमागतोऽसि । अंग हे दूत मे माननीयः पूज्योऽसि । अतो भवान् किमनुरुंधे प्राप्तुमिच्छतीत्यर्थः । तद्वरय वृणीष्व । एवं संमानितं प्रत्याह । नयसीति । इहात्र सतीः अस्मान् दुस्त्यजं द्वंद्वं मिथुनीभावो यस्य तस्य प्रेयसः पार्श्वे समीपं कथं नयसि नेष्यसि।तथाहि।हे सौम्य श्रीर्नाम वधूः साकं सहैव सततमास्ते।तत्राप्युरसि वक्षस्येव ॥ २० ॥

अज्ञा अभूम, कुलिकस्य व्याधस्य रुतं श्रद्दधाना हरिण्यः कृष्णवध्वः कृष्णसारस्त्रिय इव । ततः किमत आह—एतत्कुलिकरुतं ददृशुः, रुतस्य दर्शनाऽसंभवात्तत्फलं शराघातं ददृशुरित्यर्थः । तथा वयमपि तन्नखस्पर्शेन तीव्राः स्मररुजः कंदर्पपीडा ददृशिमेत्यर्थः । असकृदिति—एकवारं तत्फलदर्शनेऽपि पुनरपि विश्वासात्पुनरपि तत्फलदर्शनादज्ञताधिक्यं हरिणीनां तथैवास्माकमपि लब्धपुनःपुनर्मानोत्थदुःखदशानाम्। तस्मात् हे उपमंत्रिन् विदूषक अन्यवार्ता भण्यताम्, तस्य तद्वार्तायाश्च दुःखदत्वादन्यकथैव संप्रत्यस्माकं सुखदेत्यर्थः । अत्र तस्य कौटिल्यं तद्वार्तायाश्च दुःखदत्वमन्यवार्तायाश्च सुखदत्वमित्ययमाजल्पः । तदुक्तम्—“जैह्मयं तस्यार्तिदत्वञ्च निर्वेदाद्यत्र कीर्तितम् । भंग्याऽन्यसुखदत्वञ्च स आजल्प उदीरितः ॥” इति ॥ १९ ॥ परावृत्य ततोऽन्यत्र पर्यावृत्य । प्रियेति—यद्वा—ग्रहाविष्टेवात्मनः कृष्णैकचित्ततां दर्शयंत्याह प्रतिजल्पेन । “ पुनरप्रथमे प्रश्ने व्यावृत्तावववधारणे ” इति हलायुधः । पूज्यः प्रेष्टबंधुत्वात् । अतः पूज्यत्वात् । इत्यर्थ इति—किमर्थमस्मत्तः स्वीकर्तुमिच्छसीति भावः । तदवांछितम् । आत्मनो नेतुमागत इति भ्रांतधीराह—इह सतीः अत्र स्थिता अस्मान् । तस्य कृष्णस्य । सततशब्द आपेक्षिक इति तदाह—साकमिति, अर्धांगीकृत्यास्ते । सपत्न्या लक्ष्म्याः कदापि वियोगाभावात्त्वन्नीतानां दर्शनमपि दुर्लभं किं पुनः संभाषणं किन्तरां ताच्चित्ताऽऽदानं किन्तमां सुरतलीलानुभव इत्यास्तामयं प्रसंगः । प्रतिजल्पलक्षणम्—“दुस्त्यजद्वंद्वभावेऽस्मिन्प्राप्तिर्नार्हेत्युदाहृतम् । दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः॥”इति ॥*॥ अथोन्मादेन तत्रैव भ्रमन्तं भ्रमरमनुसंधाय क्षणमंतर्हिता वा तमपश्यन्ती सखेदं परामर्श—हंत हंत मम तीक्ष्णया गिरा संतप्तेनानेन दूतेन मथुरां गतेनावेदितसर्ववृत्तान्तः कृष्णो मामुपेक्षांचक्रे इति कलहांतारितां दशां प्राप्ता प्रेमांबुधिना सद्गुणमौलिना मत्कान्तेन पुनरपि स एव प्रेषितो दूतोऽत्रायातीति तद्वर्त्म निरीक्षमाणाऽकस्मात्तं विलोक्य सादरमाह—हे प्रियसख मत्प्रियस्य सखे पुनरागाः मद्वाक्यशरताडितोपि साद्गुण्येन मदपराधमगणयित्वैवागाः, आः जानामि प्रेयसामप्यतिप्रेमवता मदपराधकोटीरप्यगणयता तेनैव किं प्रेषितः, तर्हि वरय वृणु किमनुरुंधे अनुरुत्से, कामयस इत्यर्थः । यद्वा—कमनुरोधं ते संपादयामीत्यर्थः । तव मथुरा गमनमेव वृणोमीति चेद्यामि मथुरामित्युक्त्वापि पुनः पुरस्त्रीवेष्टितं तं तत्र पश्यंत्या मेऽवश्यं मानो भावीति परामृश्याह—नयसीति । दुस्त्यजं द्वंद्वं मिथुनीभावो यस्य तस्य पार्श्वम् । नन्वेकाकी स तत्र वर्तत इति सशपथं ब्रवीमीति तत्राह—हे सौम्य आर्यबुद्धिरसीति भावः । श्रीरेव वधूः साकं सहैव तत्रापि सततं तत्राप्युरसि, पुरुषायितत्वेनैवेति भावः । अथमर्थः—श्रियो देवीत्वेन नानारूपधारित्वशक्तेः कृष्णो यदाऽन्यां स्त्रियं भुंक्ते तदा रेखारूपतां हित्वा प्रकटमेव युवतिर्भूत्वा तं रमयतीति । अत्र दूतं संमान्यापि तदुक्तिमंगीकृत्याप्यनौचित्यं ज्ञापयन्ती नांगीकुरुत इत्ययं परिजल्पः । तदुक्तम्—“ दुस्त्यजद्वंद्वभावेऽस्मिन्प्राप्तिर्नार्हेत्यनुव्रतम् । दूतसंमाननेनोक्तं यत्र स परिजल्पकः ॥ ” इति ॥ **तोषिणी** तु—ततो भ्रमरस्वभावतो व्यवधानमपि प्राप्तं वा प्रदेशान्तरगतं वा निजोन्मादमूर्च्छयोरेकतरतस्तत्रैव स्थितमप्यननुसंहितं वा क्षणं तमदृष्ट्वा सहजप्रेमोत्कण्ठास्वभावतस्तदुपेक्षा माशंक्य मंक्षु कलहांतारितावस्थामिव प्राप्नुवन्ती दैवात्तं पुनरागतं चान्यमेव वा तमेवानुसंहितं वा दृष्ट्वा हृष्यन्त्याह—द्वयेन । तत्र सस्तुतिकमाहार्द्वेन । ईदृशोपकारपरत्वात् प्रियसख अभिरुचितमित्रेति । प्रेयसेति च परमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि बत मधुपुर्यामार्यपुत्रोऽधुनाऽऽस्ते स्मरति स पितृगेहान्सौम्य बंधूंश्च गोपान् ॥
क्वचिदपि स कथा नः किंकरीणां गृणीते भुजमगुरुसुगंधं मूर्ध्न्यधास्यत्कदा नु ॥ २१ ॥

तेन संमंत्रिता सती ब्रूते । अपि बतेति । बत हर्षे । हे सौम्य गुरुकुलादागत्यार्यपुत्रः कृष्णोऽधुना किं मधुपुर्यां वर्तते । पितृगृहं बंधूंश्च किं स्मरति कदाचिदपि प्रसंगवशान्नोऽस्माकं वार्ताः किं ब्रूते । अगुरुवत्सुगंधं भुजं नो मूर्ध्नि कदा नु धास्यतीति ॥ २१ ॥

ल्लासात् । किमनुरुन्धे कामयसे । पूर्ववत्तिङ्प्रत्ययः । यद्वा—कामये एतमेव कामयिष्ये, कर्तुमिच्छामीत्यर्थः । हन्त युष्माकं मधुपुरीगमनमेव वृणोमि तत्र ससांत्वं सयुक्तिकं सम्यक् प्रत्याख्यानमाहार्द्रेन । दुस्त्यजं द्वंद्वमस्म द्विजातीयतत्रत्यनागरीभिर्मिथुनीभावो येन तस्य त्वद्बंधोः पार्श्वे कथं कया युक्त्या नयसि । ननु भगवद्गमने सर्वास्ताः स्वयं न्यक्करिष्यन्ते, सत्यम्, तद्वराक्यः काः किं त्वस्मद्व्रजतस्तेन सहैव गता सा लक्ष्मीरेव तत्र स्वैर रमणाय तं रक्षतीति तां प्रत्यपि सेर्ष्यमाह—श्रीरिति । सा तस्य वधूः श्रीरादरबाहुल्येन कं सुखं यथा स्यात्तथा उरस्यास्ते वसति, तदेतच्च लक्ष्मीरेखामेव तन्मूर्तितयोत्प्रेक्ष्योक्तम् ‘ गोप्यः किमाचरदयं कुशलं स्म वेणुः ’ इति वत् । श्लेषेण तस्या विपरीतस्थितिव्यञ्जनया धाष्टर्यातिशयश्च दर्शित इति मत्सरासूये । अयं भावः—यद्प्यत्रापि सा तदविच्युतैवासीत्तथापि श्रीमन्नन्दव्रजस्वाभाव्येन तस्य तदा प्रेममात्रादरान्न तत्र तादृशस्तदादरो वृत्तः, तत्र तु सम्पत्तिमात्रपुरुषार्थत्वान्महानेव तदादर इत्यतो वयं कथं तत्र यास्याम इति, तस्मादत्रैव तमानयेति निगूढोऽभिप्रायः । एवमीर्ष्यासूया स्पृहा च ॥ २० ॥ तेनोद्धवेन । संमंत्रिता संबोधिता । अपि बतेत्यव्ययद्वयं संप्रश्ने । गुरुकुलादुदुज्ज यिनीतः । आर्यस्य पूज्यस्य बसुदेवस्य पुत्रः । “आर्यो वेदानुगे पूज्ये श्वशुरे वैश्यजे गुरौ । ब्राह्मणादिषु वर्णेषु चाश्रमेषु चतुर्षु च ॥” इति धरणिः । स कृष्णः । पितुर्नंदस्य गेहान् भार्याम्, बहुत्वं पूजायाम, यशोदामित्यर्थः । बध्नंति स्नेहेनेति बंधवः स्त्रीजनाः, गोप्य इत्यर्थः । चकाराद्गोगृहगिरीणां ग्रहः । यद्यागमिष्यत्तदाधास्यन्न संदेहोऽत्रातस्तदागमनं पृच्छामीति वा । अत्र च सुजल्पेनोक्तम्—“यत्रार्जवात्सगांभीर्यं सदैन्यं सहचापलम् । सोत्कंठं च हरिः[1] पृष्टः स सुजल्पो निगद्यते ॥” इति ॥ * ॥ हंतहंत मयोन्मत्तया किं प्रजल्प्यते प्रष्टव्यन्तु न पृच्छ्यत इत्यनुसंतप्य ससंभ्रममाह—अपि बतेति । मधुपुर्यामास्ते—व्रजमिव तामपि त्यक्त्वाऽन्यत्र किं न यियासतीति भावः । इतः समीपवर्तिन्यां तत्र पुर्यां तस्य स्थितिरत्रागमनसंभवनामप्युत्पादयतीत्यभिप्रायेण । यद्वा—सुखमास्ते इत्यनुक्तेरस्मत्प्रणयस्मरणव्याकुलोऽनुरोधवशादेव तत्रास्ते, यत आर्यस्य यदुभिर्दुर्विनीतैः प्रतार्यमाणत्वा त्सारल्यसमुद्रस्य श्रीव्रजराजस्य तदेकप्राणस्य पुत्रः, हंतहंत मत्पितापि मां व्रजं नेतुं नाऽशकदहं तत्र गन्तुं कमुपायं करोमीति स्वविलंबमसहमानस्त्वां प्रस्थापयति स्मेति भावः । तेन मधुपुर्यामास्त इति तस्य को दोषः, यत आर्यस्यातिसरलस्य स्वपरिणामदर्शित्वेनापि शून्यस्य नंदस्य पुत्रः, तादृशं पुत्रं तादृशः पिता यत्त्यक्त्वा व्रजमायास्यतीति को जानाति, यद्यज्ञास्यद्व्रजराज्ञी सा तावदक्रूररथारूढैव स्वपुत्रं कंठे कुर्वत्येव यथुरामयास्यत्तामनुगोपिकाश्रेण्यश्चेति व्रजराजस्यायत्तत्वमेवास्माकं सर्वनाशे कारणमभूदिति भावः । अतस्तादृशस्यापि पितुरपि सरलस्य वसुदेवेन महाप्रतारकेणाच्छिद्य गृहीतपुत्रस्य व्रजमागत्य मूर्छया पतित्वा स्थितस्य गृहान् कोशागारबंधनागारशयनागारादीन् संप्रत्यमार्जितालितेन तृणधूलिलतापत्रलूलातंतुवृताञ्शून्यायितान्स्मरति कच्चित्, गेहान्तरेषु बंधून्संप्रति मूर्छितान्काश्चिदितीति । यदा तस्य मनोभिरुचितं कैंकर्यं कर्तुं पुरस्त्रियो न जानंति तदैव तत्सुखमनुपलब्धवतीभिस्ताभिः सुखानुपलंभकारणं पृष्टो नोऽस्माकं कथां गृणीते । वनमालागुम्फने स्थासक[2]संपादने वीटिकानिर्माणे वीणावादने रागतालादिसृष्टौ गीतनृत्यरासादौ सौंदर्यलावण्यवैद

१ प्रियः इति पा० । २ ‘चर्चा तु चार्चिक्यं स्थासकः’ इति कोशाच्चन्दनादिना देहविलेपनसम्पादने इत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्र्यादिषु प्रश्नोत्तरविलासे संयोगलीलायां प्रेमस्नेहमानप्रणयादिषु यथास्मद्व्रजस्था गोप्यो मां सुखयंति न तथा यूयमिति गच्छत भो यदुस्त्रियः स्वपतीनेवालमलं युष्माभिः, अहन्तु प्रातर्व्रजमेव गच्छन्नस्मीत्युक्त्वाऽत्रा गत्याऽगुरुसुगंधभुजमस्माकं मूर्ध्नि कदाऽधास्यत् धास्यति। तेन च समाश्वासितम्—भोः प्राणप्रेयस्यः सशपथमिदमहं ब्रवीमि भवतीस्त्यक्त्वा न क्वापि यास्यामि त्रिभुवनमध्ये क्वापि युष्मत्सादृश्यगंधलेशमपि नोपलब्धवानस्मीति व्यंजयिष्यति। अत्र प्रथमे पादे आर्जवं, द्वितीये स्वप्रसंगानुख्यापनेन गांभीर्यं, तृतीयचतुर्थयोर्दैन्यचापलोत्कंठा इत्ययं सुजल्पः। तदुक्तम्—"यत्रार्जवात्सगांभीर्यं सदैन्यं सहचापलम्। सोत्कंठं च हरिः पृष्टः स सुजल्पो निगद्यते॥" इत्येवं दशविधो दिव्योन्मादप्रभेदश्चित्रजल्पो ज्ञेयः। स च दिव्योन्मादो महाभावोत्कंठभागस्य मोहनस्य विलासविशेषो वृंदावनेश्वर्या वर्णितः। "प्रायो वृंदावनेश्वर्यां मोहनोऽयमुदञ्चति। एतस्य मोहनाख्यस्य गतिं काम्प्युपेयुषः॥ भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्यते। उद्घूर्णाश्चित्रजल्पाद्यास्तद्भेदा बहवो मताः॥ प्रेष्ठस्य सुहृदालोके गूढरोषाभिजृंभितः। भूरिभावमयो जल्पो यस्तीव्रोत्कंठितांतिमः। चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितः॥ विजल्पोज्जल्पसंजल्पा अवजल्पोऽभिजल्पितः। आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्तितः॥" इति। प्रेयस्या चित्रजल्पस्य माधुरीपिपासया कृष्ण एव भ्रमररूपमधादिति केचित्। एवमेवात्र **तोषिणी**—अहो किंकिं मया प्रजल्पितं प्रष्टव्यन्न पृष्टमिति। पर्यवसाने सार्जवं सगांभीर्यं सदैन्यं सचापल्यं सोत्कंठं सगद्गदबाष्पधारं पृच्छति—अपीति। अपिः प्रश्ने। अस्य चरणत्रयमयवाक्यत्रयेणाप्यन्वयः। बत भो दूत आर्यपुत्र इति रूढ्या वृत्त्या आर्यस्य श्रीगोपेंद्रस्य पुत्र इति। तच्छब्देन स एवास्माकं वास्तवः पतिरन्यस्तु लोकप्रतीतिमात्रः बाल्यमारभ्यान्यत्रास्मदीयभावाभावादिति व्यंजितम्। तदुक्तम्—'इति गोप्यो हि गोविंद—' इत्यादिनेत्यार्जवम्। तत्र मधुपुर्यामास्त इति प्रागयं प्रश्नश्चिरात्संदेशस्याप्यनागमनान्न तु केवलतयातिदूरगुरुकुलगमनश्रवणात्, तच्छ्रवणे सति व्यग्रतया प्रथमं तदेव पृच्छ्येत न तु मानभंगीप्रसंगं लभेत, यस्मादेव व्रजनरवेदनापि तन्न पृष्टम्, तदश्रवणञ्च प्रथमलब्धगायत्रीपुरश्चरणार्थगुप्तवासव्याजेन तत्प्रत्याख्यानात्। स च व्याजः शत्रुभिरतिक्रान्तभयाद्व्रजस्थानामेषां महादुःखस्य च शंकितत्वादिति ज्ञेयम्। तदेवमन्यत्रागमनाज्ञानेपि सोऽयं प्रश्नस्तूपालंभात्मकं गांभीर्यं व्यनक्तीति गांभीर्यम्। ननु देवि तत्रासौ सुखमास्त एवेति चेत्तर्हि तत्रत्यान्पित्रादीन्किं स्मरतीत्यन्यत्पृच्छति—स्मरतीति। एवमग्रेऽपि व्याख्येयम्। पूर्वपूर्वस्मिन्नतृप्त्योत्तरोत्तरः प्रश्नो ज्ञेयः। तत्र पित्रादिस्मरणगर्भिततद्गृहस्मरणं पृच्छति—स मधुपुरनिवासी व्रजजनैकजीवातुर्वा आर्यपुत्रः। पितुर्व्रजेंद्रस्य। गेहानिति जन्मभूमित्वादिना स्मरणयोग्यतोक्ता। बहुत्वं व्रजस्येतस्ततो गमनेन पुत्रसुखार्थं स्थानेस्थाने विचित्रगृहनिर्माणाच्छ्रीनंदीश्वराख्ये शैल एव दिव्यप्रासादबाहुल्याद्वा। गेहशब्देन तस्य पितृमातृतल्लालनं तत्र स्वकीयबाल्यलीलादिकमुपलक्ष्यते। बंधून् ज्ञातीनुपनंदादीन् क्वचित्कस्मिंश्चित्स्थानेऽवसरे वा स श्रीदामप्रियसखः अस्मत्प्रियनाथो वा गृणीते स्वमुखेनोच्चारयेदपि। तत्र योग्यतामाह—किंकरीणां बहुधा कृतसेवानामिति दैन्यम्। कथा इति बहुत्वं किंकरीणां बहुत्वात्प्रत्येकं कथावैचित्र्यात्स्वत एव बाहुल्याच्च। 'कथाम्' इति पाठे एकामपि। अगुरुसकाशादपि सुष्ठु गंधो यस्य तादृशं भुजमिति ध्यानविशेषेण साक्षात्प्रयुक्तोऽपि लोकरीत्या शोकशमक इव च भवतीति स्वयं भगवता विचार्य प्रचुर्यते स्म। तत्र "न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इति, 'नात्यंतिकं विगणयंत्यपि ते प्रसादम्' इति। साधारणभक्तेरपि ज्ञानस्य तत्फलस्य च हेयतां शुद्धमत्प्रेममाधुर्यस्य सर्वातिशयितां स्वानुभवेनैव निश्चिन्वतीनां तासां स्फुरिष्यतीति विचार्य प्रेमानुभवप्रमाणकसिद्धान्तमयस्तासां प्रतीयते (न्यस्तः), तथापि तासां तच्च स्फूर्तिमात्रप्रतीत्या समुत्कंठाक्लेशपरकाष्ठामाशंक्य ताभिरस्यामवस्थायामनुभूयमानो नित्यलीलारूपस्तृतीयस्त्वर्थः सत्यं शांतये स्यात्, तदनुसंधानञ्च मदुपदेशप्रभावेण भविष्यतीति विचार्यैव निर्दिष्ट इति ज्ञेयम्। तत्र 'भवतीनाम्' इत्यर्द्धकं मुख्यवाक्यम्। अस्य प्रथमार्थस्त्वेवम्—मे मया भवतीनां वियोगः क्वचिदपि नहि स्यात्, तत्र हेतुः—सर्वात्मना सर्वेषामात्मना उपादानरूपेणांतर्यामिरूपेण चेति। अथ द्वितीयः—सर्वत्रैव बहिरंतश्च सदा मत्स्फूर्तेः सर्वात्मना सर्वत्र प्रयत्नेन सर्वथैव मया सह वियोगो नास्तीति, तदेव सदृष्टांतमाह—यथेति। तत्राहमपि भवतीनां मनआदीनि, गुणाः सौशील्यादयः मनआदीनां गुणाः सौशील्यादयः मनआदीनां गुणवृत्तय एव वाऽऽश्रयो यस्य सः तेषामेवाश्रयरूपो वा तथाभूतोऽहं तत्रतत्र सदा वसन् परिस्फुरामीत्यर्थः। अथ तृतीयः—सर्वात्मना सर्वेण प्रकाशेन वियोगो नास्ति किं त्वेकेनानेन प्रापञ्चिकप्रकटप्रकाशेनैव सांप्रतोऽयं वियोगोऽन्येन तदप्रकटप्र

---

१ प्रियः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काशेन न तु संयोग एवेत्यर्थः । कथं तत्राह–यथा खादीनि भूतानि स्वस्वकार्येषु वाय्वादिषु अप्रकटप्रकाशेन वर्तंत एव तथाहञ्च तत्र वर्त इत्यर्थः । किमाकारस्तत्राह–भवतीनां बुद्ध्याद्याश्रयाकारः श्यामसुंदरवेणुविलासि रूप एव सन्नित्यर्थः । एतदुक्तं भवति–वृंदावने मथुरायां द्वारकायामपि नित्यैव तस्य स्थितिः श्रूयते। तत्र वृंदावने यथा स्कान्दे–"ततो वृंदावनं रम्यं वृंदादेवीसमाश्रितम् । हरिणाधिष्ठितं तच्च ब्रह्मरुद्रादिसेवितम् ॥" इति । "वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधवः । वृंदावनांतरगतः सरामो बालकैर्वृतः॥" इति । पाद्मपातालखण्डे–"अहो अभाग्यं लोकस्य न पीतं यमुनाजलम् । गोगोपगोपिकासंगे यत्र क्रीडति कंसहा ॥" इति, "यमुना जलकल्लोले सदा क्रीडति माधवः " इति च । बृहद्गौतमीये–"इदं वृन्दावनं रम्यं मम धामैव केवलम् " इत्यारभ्य, "सर्वदेवमयश्चाहं न त्यजामि वनं क्वचित् । आविर्भावस्तिरोभावो भवेन्मेत्र युगेयुगे ॥ तेजोमयमिदं रम्यम दृश्यं चर्मचक्षुषा ।" इति । श्रीगोपालतापनीश्रुतौ–"गोविन्दं सच्चिदानंद वंदावनभूरुहतलासीनं सततं समरुद्गणोहं परया स्तुत्या परितोषयामीति जन्मजराभ्यां भिन्नः स्थाणुरयामच्छेद्योयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गाः पालयति योऽसौ गोपेषु तिष्ठति" इत्यादि । मथुरायां यथाऽऽदिवाराहे–"अहोऽतिधन्या मथुरा यत्र सन्निहितो हरिः" इति । पाद्मपातालखंडे–"अहो मधुपुरी धन्या यत्र तिष्ठति कंसहा" इति । वायुपुराणे–"चत्वारिंशद्योजनानां ततस्तु मथुरा स्मृता । यत्र देवो हरिः साक्षात्स्वयं तिष्ठति सर्वदा ॥" इति । गोपालतापनीश्रुतौ–"संप्राप्य मथुरां रम्यां सदा ब्रह्मादिसेविताम् । शंखचक्रगदाशार्ङ्गै रक्षितां मुशलादिभिः ॥ यत्रासौ संस्थितः कृष्णस्त्रिभिः शक्त्या समाहितः । रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो हरिः ॥ " इति । अत एवोक्तम्–"मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः" इति । द्वारकायां यथैकादशस्कंधांते–"द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् । वर्जयित्वा महाराजश्रीमद्भगवदालयम् ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः । स्मृत्याशेषाशुभहरं सर्वमंगलमंगलम् ॥" इति । अत्र श्रीविष्णुपुराणे त्वयं विशेषः–'यदु देवगृहं त्वेकं नाप्लावयत्' इति, 'कृष्णक्रीडाकरं स्थानम्' इति च, सर्वत्र 'जयति जननिवासः' इत्यादिकमुदाहरणीयमत एव तस्य नित्यैव तत्र स्थितिर्वर्तते । अथ च जन्मादिलीलायां गमनत्यागौ श्रूयेते इति प्रकाशभेदेनैवोभयविधत्वं व्यवतिष्ठते । तथाहि–'न चांतर्न बहिर्यस्य' इत्यादिदामोदरलीलादृष्ट्या मृद्भक्षणलीलादौ । श्रीव्रजेश्वर्यादीनां तथानुभूत्या च श्रीकृष्णविग्रहस्य मध्यमत्व एव विभुत्वं दृश्यते । तच्च विरोधिधर्मद्वयमेक एतस्मिन्नासंभवमचिंत्यशक्तित्वात्, तस्य च 'श्रुतेश्च शब्दमूलत्वात्' इत्येतन्न्यायसंमतत्वात् । तदेवं विभुत्वे सति युगपदनेकस्थानाद्यधिष्ठानार्थं रूपांतरसृष्टिः पिष्टपेषिता, किन्तु युगपन्मध्य मत्वविभुत्वप्रकाशिकया तयैवाचिंत्यशक्त्या तदिच्छानुसारेणैक एव श्रीविग्रहोऽनेकधा प्रकाशते बिंब इव स्वच्छोपाधिभिः, किन्तु तत्रोपाधिमात्रजीवनत्वेन साक्षात्स्पर्शाद्यभावेन वैपरीत्यनियमेन विश्वस्य परिच्छिन्नत्वेन च प्रतिबिम्बत्वम्, अत्र तु स्वाभाविकशक्तिस्फुरितत्वेन साक्षात्स्पर्शादिभावेन यथेच्छमुदयेन तद्विग्रहस्य विभुत्वेन च बिंबत्वमेवेति विशेषः । तत्र तेषां प्रकाशानां तयैवाचिंत्यशक्त्या पृथक्पृथगेव क्रियादीनि भवन्ति, अत एव युगपदाविर्भूतानां प्रकाशभेदालंबिनीनां निमेषोन्मेषादिक्रियाणामविरोधः, अत एव विभोरपि परस्परविरोधिक्रियागुणाश्रयस्यापि तत्तत्क्रियाकर्तृत्वं यथार्थमेव, तद्यथार्थत्वे बहुशः श्रीभागवतादिवर्णितं विदुषां तदुद्भवं सुखं नोत्पद्यत इति तदन्यथानुपपत्तिश्चात्र प्रमाणम् । इदमेवाभिप्रेत्य भगवता नारदेन "चित्रं बतैकतदेकेन वपुषा युगपत्पृथक्" इत्यादौ वपुष एकत्वेऽपि पृथक्प्रकाशत्वमुक्तम् । तेषु प्रकाशेषु पृथक्पृथक्क्रियाधिष्ठाना दित्वं तादृशमुन्यादावपि न संभवतीति चित्रत्वं च । वक्ष्यते च एष एव प्रकाशः क्वचिदात्मशब्देन क्वचिद्रूपादिशब्देन च । यथात्रैव 'न हि सर्वात्मना क्वचित्' इति, अन्यत्र 'कृत्वा तावंतमात्मानम्' इति, 'तावद्रू पोहमव्ययः' इति, 'कृष्णेनेच्छाशरीरेण' इति च । तत्र नानाक्रियाद्यधिष्ठातृत्वादेव लीलारसपोषाय तेषु प्रकाशेष्वप्यभिमानभेदं परस्परमननुसंधानञ्च प्रायः स्वेच्छयांगीकरोति भगवानित्यपि गम्यते । एवं तच्छक्तिमयत्वा त्तत्परिकरेष्वपि ज्ञेयम् । तत्र तेष्वपि प्रकाशभेदो यथा कन्याषोडशसहस्रविवाहे श्रीवसुदेवदेवक्यादिषु, वक्ष्यते च टीकाकृद्भिः । अनेन देवक्यादिबंधुजनसमाजोऽपि प्रतिगृहं यौगपद्येन सूचित इति तेषु श्रीकृष्णे च प्रकाशभेदादभिमानभेदो यथा नारददृष्टयोगमायावैभवे ॥ तत्र सौरभमनुभजंतीवोत्कंठावेशं द्योतयति–मूर्च्छ्यधास्यदिति दैन्यात् किंकरीत्वमेवं सर्वविघ्ननिवारणपूर्वकं धास्यतीत्यर्थ इति चापलम् । कदेति–तत्रानिश्चयेन परम वैकल्यं सूचयति । अत्रापि वितर्के । नु शब्दो विचारतोप्यनिश्चयं सूचयतीति परमोत्कंठा दर्शिता । पूर्वमार्यपुत्र इत्युक्त्या च स्वस्य तद्वधूत्वं स्थापयित्वा संप्रति किंकरीत्वस्थापनप्रार्थना दैन्यादेव, तात्पर्यन्तु तद्वधूत्व एव यथा 'नंदगोपसुतं देवि' इति संकल्प्यापि 'श्यामसुंदर ते दास्यः' इति कुमारीभिरुक्तन्तद्वत्, 'तस्याहं गृहमार्जनी' इत्यादिकालिंद्यादिवचनवच्च । अन्यत्तैः । यद्वा–बत खेदे, अधुनापि मधुपुर्यामास्ते किम्, एतावन्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ॥ सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत ॥ २२ ॥ उद्धव उवाच ॥ अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ॥ वासुदेवे भगवति यासामित्यर्पितं मनः ॥ २३ ॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ २४ ॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ॥ भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा ॥ २५ ॥ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च ॥ हित्वाऽवृणीत यूयं यत्कृष्णाख्यं पुरुषं परम् ॥ २६ ॥

श्रीकृष्णदर्शनोत्सुका गोपीः प्रियस्य संदेशैः सांत्वयन् प्रथमं तावदिदमभाषत ॥ २२ ॥ तदाह षड्भिः । अहो इति । स्म नूनं यूयं पूर्णार्थाः कृतार्थाः ॥ २३ ॥ श्रेयोभिः श्रेयःसाधनैः ॥ २४ ॥ अनुत्तमा अतिश्रेष्ठा सर्वोत्कृष्टेत्यर्थः । सा भवतीभिः प्रवर्तितेति ॥ २५ ॥ अवृणीत वृतवत्यः ॥ २६ ॥

कालं तत्र स्थातुं नार्हति किन्तु शीघ्रमागन्तुमर्हतीति भावः । सौम्याश्च ते बंधवश्च तान् । अतिसुप्रकृतित्वादिना स्मरणयोग्यतोक्ता॥२१॥ अथ भ्रमरगीताकर्णनोत्तरम् । एवं भ्रमरमुद्दिश्य गीतम् । इदं वक्ष्यमाणम् ॥ * ॥ एवं पूर्वोक्तप्रकारं साक्षात्परंपरयाप्यश्रुतचरप्रेमवचनं निशम्य,अथ प्रेमविकारशान्तेरनंतरं सांत्वयन्सांत्वयितुमिदं श्रीकृष्णैश्वर्ये तत्प्रेममाहिमज्ञापनमयतया तादृशप्रेमविकारस्तंभनाय तासां श्लाघामयतया दैन्यशमनाय च तथा वक्ष्यमाणं प्रयुक्तमन्यथा श्रवणाशक्तेः गोपीसंभ्रमेण श्रीराधां साक्षादसंभाष्यमाणां श्रावयन्नन्याः॥२२॥तद्वक्ष्यमाणम् । इतिशब्दो हेतौ, यतो वासुदेवे मनोर्पितमिति हेतोः ॥ * ॥ ० ॥२३॥ शास्त्रतो नियमकरणं व्रतम्,स्वाध्यायो वेदाभ्यासः, संयम इन्द्रियनिग्रहः । अन्यैस्तीर्थाटनसत्संगादिरूपैः । विशेषेण विधिर्येषां संध्याग्निहोत्रादीनां ते विविधाः ''अच् प्रत्यन्वव–'' इत्यत्राजिति योगविभागादच् । ''अहरहः संध्यामुपासीत'' ''यावज्जीवमग्निहोत्रं जुहुयात्'' इत्यादिश्रुतिभिः । अन्यैरित्युक्तेर्विविधपदवैयर्थ्यशंकावारणायायमर्थः॥*॥तदेव कैमुत्येन प्रतिपादयति–दानेति। दानाद्यात्मकानि यानि श्रेयांसि।अन्यैश्च योगसांख्यज्ञानादिभिः कृष्णेर्पितैस्सद्भिः 'नैष्कर्म्यमप्यच्युतभाववर्जितम्' इत्याद्युक्तेः । कृष्णे स्वयं भगवति भक्तिः श्रवणादिरुचिमात्रं साध्यते '' स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे '' इति, ' धर्मः स्वनुष्ठितः पुंसां विष्वक्सेन–' इत्यन्वयव्यतिरेकाभ्याम् । तत्र दानं विष्णुवैष्णवसम्प्रदानकम्, व्रतमेकादश्यादि, तपः कृष्णार्थे भोगत्यागादि, होमो विष्णुमंत्रैः, जपोऽष्टादशाक्षरादीनाम्, स्वाध्यायो गोपालतापन्यादिपाठः, संयमः कृष्णेतरेभ्यो मनोनिवृत्तिरिति । श्रेयांसि भक्त्यंगानि ज्ञेयानि, अन्येषां दानादीनां भक्तिहेतुत्वाभावस्य प्रतिपादितत्वात् ॥ २४ ॥ दुर्लभेति भक्तेरवश्यकर्तव्यतामाह ॥ * ॥ भवतीनां तु महाभावात्मिका भक्तिर्नित्यसिद्धैव, ततः सा किं श्लाघ्या, किन्तु तच्छिक्षया लोकानां भाग्यमेव श्लाघ्यमित्याह–भवतीभिर्भगवति सर्वनिजैश्वर्यप्रकटके अत उत्तमश्लोके तास्मिन्ननुत्तमा सर्वतोपि श्रेष्ठा महाप्रेमलक्षणा प्रवर्तिता स्वदर्शनश्रवणप्रभावेण लोकेषु प्रचारितेतिवत् । यथा वक्ष्यते–' सर्वात्मभावोऽधिकृतः ' इत्यादि, यथा च प्रोचे–' विक्रीडितं व्रजवधूभिः ' इत्यादि, एतद्दिष्ट्या भद्रं जातमित्यर्थः ॥ **विश्वनाथस्तु**–प्रागियं नासीदतः परं तु भवतीनां रागात्मिकां भक्तिमनुसृत्यैव रागात्मिका भक्तिः क्रियमाणा लोके प्रचरिष्यतीत्यर्थः । प्रवर्तितेति '' आशंसायां भूतवच्च '' इति भविष्यति निष्ठा । दिष्ट्या लोकानामतिभाग्येन ॥ २५ ॥ यत्कृष्णाख्यं पुरुषमवृणीत तद्दिष्ट्येति योज्यम् ॥ * ॥ भक्तिप्रवर्तनरीतिमेव स्पष्टयति–यद्यस्मात्पुत्रादींस्त त्तन्मन्यान्निजकृष्णैकालंबनस्वाभाविकभावबलेन हित्वाऽवस्तुबुद्ध्या परित्यज्य कृष्ण इत्याख्या ख्यातिर्यस्य तं परं पुरुषं नराकृतिपरब्रह्मरूपं यूयमवृणीत वास्तवकांततया स्वीकृतवत्यस्तद्दिष्ट्या भद्रं, लोकानां महद्भाग्यमित्यर्थः । भवतीनां तादृशाचारितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वात्मभावोऽधिकृतो भवतीनामधोक्षजे ॥ विरहेण महाभागा महान्मेऽनुग्रहः कृतः ॥ २७ ॥ श्रूयतां प्रियसंदेशो भवतीनां सुखावहः ॥ यमादायागतो भद्रा अहं भर्तू रहस्करः ॥ २८ ॥ श्रीभगवानुवाच ॥ भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् ॥ यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही ॥ तथाहं च मनःप्राणभूतेंद्रियगुणाश्रयः ॥ २९ ॥

सर्वात्मभाव एकांतभक्तिः । अधिकृतः प्राप्तः । भगवत्प्रेमसुखप्रदर्शनेन ममैव महाननुग्रहः कृत इति ॥ २७ ॥ भर्तुः कृष्णस्य रहस्करो रहस्यकार्यकर्ता ॥२८॥ भवतीनां मे मया सह वियोगो नास्ति । कुतः । सर्वात्मना सर्वस्योपादानकारणेन । अत एव सर्वेषु मनआदिकार्येष्वहमनुगतत्वेन स्थित इति सदृष्टांतमाह । यथेति । भूतेषु चराचरेषु महाभूतानि । वाय्वग्निर्वायुसहितोऽग्निः वायुश्चाग्निश्चेत्यर्थः । यथा तथाऽहं चेति । मनआदीनि कार्याणि गुणाः कारणं तेषामाश्रयत्वेनानुगत इत्यर्थः ॥ २९ ॥

दृष्ट्वा श्रुत्वा चान्ये तथा प्रवर्तेरन्निति ॥ **विश्वनाथस्तु**–पुत्रादीन्ममताहंतास्पदान् यदवृणीत स्वभोक्तृत्वेन तन्ममातिभाग्यम्, ईदृक्प्रेमवतीदर्शनादिति भावः ॥ २६ ॥ विरहेणेत्यस्यैवायं प्रपञ्चः भगवत्प्रेमसुखदर्शनेनेति ॥ * ॥ ननु वयं यद्धर्मं त्यक्त्वा परपुरुषं वृतवत्यस्तत्र भवतः किं भाग्यमभूदत आह–सर्वात्मेति । अधोक्षजेऽन्यैः प्रत्यक्षीकर्तुमप्यशक्ये श्रीकृष्णे प्रेमैव तावद्दुर्लभः, भवतीनां सर्वात्मभावः सर्वात्मना सर्वेणैव स्वरूपेण सहितः परिपूर्णो यो भावः स महाभाव इत्यर्थः । सूर्यो यथा सर्वांस्तापसंक्रमणेन व्याप्नोति, चन्द्रो यथा सर्वाञ्शैत्यसंक्रमणेन व्याप्नोति तथा यः सर्वान्स्वधर्मसंक्रमणेनातति व्याप्नोतीति सर्वात्मा स चासौ भावश्चेति स इति श्लेषेण । तल्लक्षणमपि प्रकटीकृतम् । यदुक्तम्–"अनुरागः स्वसंवेद्यदशां प्राप्य प्रकाशितः । यावदाश्रयवृत्तिः स्याद्भाव इत्यभिधीयते ॥" इति । स च महाभावः प्रेम्णः सप्तमो विलासः । भवतीनां न त्वन्यासां लक्ष्म्यादीनामपीत्यर्थः । कीदृशः–अधिकृतः अधिकारविषयीकृतः । तत्राधिकारो भवतीभ्य एव परमेश्वरेण दत्तो नान्याभ्य इति भावः । अत एव विरहेण कर्त्रा मे मम महाननुग्रहः कृतः दिव्योन्माद्रचित्रजल्पादिमहाभावभेदान्दर्शयित्वेत्यर्थः । यदि भवतीनां विरहो नाऽभविष्यत्तदा कृष्णो मां न प्रास्थापयिष्यत्, अहं चैतदाश्चर्यं नाद्राक्ष्यामिति स्वभाग्यपरावधिरुक्त इति **विश्वनाथः** ॥ भवतीनां तु सर्वात्मना परिपूर्णत्वेन यो भावो महाभावपर्यन्तदशां प्राप्तः प्रेमा यस्त्वधोक्षजेऽपि कृतः अधिकारितया प्रवर्तितस्तद्दशाकारीत्यर्थः । अतः सोऽपि भवतीनां न दूर इति भावः । किन्तु मह्यमेतादृशप्रेममहिमदर्शनार्थमेवैतद्भवतीष्वभ्युदितमिति मन्यतामित्याह–विरहेण कर्त्रेति पूर्ववदिति **क्रमसंदर्भः** ॥ **तोषिण्यपि**–तस्मिन्सर्वात्मभावः "आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" इति न्यायेन सर्वत्र स्फुरति, स भवतीष्वेकदर्शनाद्भवतीभिरेव क्रियत इत्यर्थः । अतः सोऽपि भवतीनां न दूर इति भावः । अत एव हे महाभागास्ततो विरहो नामायं बहिरंग एवेति न तत्रांतःकरणवेशो युज्यत इति, किन्तु मह्यमेतादृशप्रेममाहिमेति पूर्ववत् ॥ २७ ॥ इदानीं कृष्णसंदेशं वक्तुमुपक्रमते–श्रूयतामिति । यं संदेशम् ॥ * ॥ एवमाश्वास्य किंचित्स्वास्थ्यमुपलभ्य वक्तव्यमाह । यद्वा–तथापि कैवल्यहासमदृष्ट्वा व्यग्रः संस्तत्संदेशेनैव स्वास्थ्यं भवतीति संभाव्य तमेव वक्तुमारभते–श्रूयतामिति । प्रियस्य संदेशः । ननु तेन संदेशेनालं येनाशु तत्प्राप्तिर्न स्यात्तत्राह–भवतीनां परमोत्कंठितानां सुखावह आश्वेव तत्प्राप्तिनिर्धारणात् । तदर्थमेवात्रागतोस्मि न त्वन्यार्थमिति तस्मिन्नादरं जनयति–यमिति । 'अन्यथा गोव्रजे तस्य' इत्यादिकमनेन प्रत्युत्तरितम् । भर्तुरित्यात्मनस्तद्दूतत्वं बोधितम् । तत्र च रहस्कर इत्यात्मनः परमाप्तत्वेन तत्संदेशदानयोग्यत्वम्, तथा संदेशस्य गोप्यत्वम् । किञ्च–भद्रा हे साध्व्य इति तासामेव तत्संदेशैकपात्रत्वं, तथा संदेशस्यापि भद्रत्वमादरार्थं सूचितम् ॥ **विश्वनाथस्तु**–ननु किमस्मच्छ्लाघयैतया चास्मान्सांत्वयितुं त्वमिहायतः किंचिदस्ति वा कृष्ण संदेशादिकमस्मद्दुःखोपशमकं तद् ब्रूहीत्यत आह–श्रूयतामिति । भर्तुः कृष्णस्य । रहस्करो रहस्यकार्यकर्ता ॥ २८ ॥ अवियोगे हेतुमाशंकते–कुत इति । अत एव सर्वोपादानत्वादेव । उपादानकारणत्वं सदृष्टा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तमाह—यथेति । अनुगतानि कानि—भूतानीत्यत आह—खमित्यादि । इत्यर्थ इति—कारणस्य मृदादेः कार्येषु घटादिष्वनुगतत्वप्रसिद्धेरिति भावः ॥ * ॥ अत्र प्रथमो ज्ञानोपदेशरूपः परमविज्ञान्प्रति तत्प्रेम्णोऽन्या
धर्षणीयमहाबलवत्त्वज्ञापनार्थकः, मंदधियः प्रति तत्प्रेममाहात्म्याच्छादनार्थकश्च । तथाहि—मया गोपीभ्यो दातुमुद्धवद्वारा ज्ञानामृतं प्रेषितं तदपि तासां प्रेमाग्निं निर्वापयितुमसमर्थं प्रत्युत तत्तापेनैवालीढं बभूवेत्यहो तासां
प्रेमप्राबल्यं यन्महायोगेश्वरेण मयाप्युपदिष्टो ज्ञानयोगो वैय्यर्थ्यमगात्तथा रासारंभे कर्मयोग इत्यंतरंगाविज्ञभक्तान् प्रेम्णः प्राबल्यं प्रकाशयामास, तथा महाप्रेमवतीष्वपि गोपीषु सर्वहितकारिणा परमेश्वरेण
मोक्षसिद्ध्यर्थं ज्ञानोपदेशः कृत इत्यन्यान्पंडितंमन्यान्मंदधियः प्रति प्रेम्णो माहात्म्यमाच्छादयामास परमरहस्यत्वादिति । एवं भक्तविबुधान्प्रेमामृतस्य प्रदानेन पुष्णात्यभक्तासुरांस्त्वप्रदानेन वंचयतीत्युभयमेव मोहिनी
सधर्मणः शास्त्रस्याऽस्य प्रयोजनं ज्ञेयम् । अथ प्रकृतमनुसरामः—भगवानुवाचेत्युद्धववाक्यम् । तत्रोवाचेति लिटो महाप्रेमवतोऽपि मत्प्रभोरेतादृशवचनस्य प्रयोजनं मम दुर्गमत्वात्परोक्षमेवेति ज्ञापितम् । भवतीनां मे मया
सह वियोगो नास्त्येव, कथं रुदित्वारुदित्वा मर्तुमीहध्व इति भावः । कुतः—सर्वेषामात्मना परमात्मना, अहं हि परमात्मा भवाम्यत्र सर्वशास्त्राणि सर्वे गर्गादयो मुनयश्च वरुणादयो देवाश्च प्रमाणम्, तस्मात्परमात्मरूपेण
भवतीनां देहेष्वहं वर्त एवेत्यतो मया सह सदा संयोग एव भवतीति भावः । अत्र च यथा रासारंभे धर्मोपदेशवाक्येष्वप्याभ्यंतरी श्रृंगारकथा स्वोपालंभेन दोषनिवृत्त्यर्था स्थापिता । तथाहि—दिनांतरे भोः कृष्ण
कामुकशिरोमणे त्वया रासकेलिदिने कथमस्मासु धर्मोपदेशः कृत इति प्रेयसीभिः सोपालंभमुक्ते सति भो अविदुष्यः मया तु तद्दिने संभोगमकृत्वोपदेश एव कृतः कथं मुग्धाभिर्भवतीभिर्धर्मोपदेश एवावधारित
इत्युक्त्वा 'रजन्येषा घोररूपा' इत्यादिवाक्यानां संभोगकथारूपं द्वितीयमर्थं कृष्णो व्याचष्ट स्म । तथैव सुदूरप्रवासान्ते भाविनि संयोगे—भोः प्राणनाथ कथमस्मासु महाविरहिणीषूद्धवद्वारा त्वया ज्ञानोपदेशः कृत
इत्युक्त्वा 'भवतीनां वियोगो मे' इत्यादिवाक्यानां द्वितीयं प्रेमरीतिमयमर्थं व्याख्यास्यतीत्यत एतेषु वाक्येषु वर्तमान एवेति द्वितीयः प्रेमरीतिमयोऽर्थो व्याख्येयः । स यथा भवतीनां मया सह विरहो न सर्वे
णात्मना किं त्वेकेन देहेनैव, आत्मशब्दस्य देहजीवमनोबुद्धिवाचित्वात्, . प्रेमा ह्यात्मधर्म एव ममात्मबुद्धींद्रियादयो भवतीष्वेव स्थिता देह एव मया मथुरामानीतः, भवतीनामप्यात्ममनोबुद्धींद्रियादयो मय्येव वर्तंते केवलं
देहा एव तत्र व्रजे स्थिताः, किन्त्वहं सर्वशास्त्रेषु सर्वैः प्रेमाधीन एव निरूपितोऽत एव प्रेम्णि मम नास्ति स्वातंत्र्यम्, प्रेमवतामस्माकं परस्परं देहविच्छेद एव विप्रलंभस्तमारुह्य प्रेमा संप्रत्यतिवार्धितुमिच्छत्यतो मया सोत्कंठेनापि
स्वदेहः सांप्रतं कथं व्रजमानेतुं शक्यः,किन्तु स एव प्रेमा स्वाभीप्सितां वृद्धिं प्राप्य विप्रलंभं दवयित्वा यदा संभोगभूमिकामारोक्ष्यति तदैव तदधीनेन स्वदेहो व्रजमानेतव्य इति देहेनापि वियोगोऽयास्यतीति भावः ।
किन्त्वह मुपादानकारणत्वादपि सर्वभूतेषु वर्त एवेत्याह—यथेति । भूतेषु चराचरेषु, भूतानि महाभूतानि, तान्येव कानीत्यत आह—खमिति । वाय्वग्निर्वायुसहितोऽग्निः यथा वर्तते तथाह—मनआदीनि कार्याणि गुणास्तेषां
कारणम् सर्वेषामपि परमकारुण्येनाश्रयः, तत्रतत्रानुगतो वर्त एवेत्यर्थः । पक्षे मां सदा प्रेम्णा ध्यायन्तीनां भवतीनां मनःप्राणबुद्धींद्रियगुणाञ्शब्दादींश्चाश्रयामीति सः । आश्रित्य तत्रतत्र स्फुरन्नेवाहं सदा वर्त इत्यर्थः ॥
तोषिण्यां तु—तत्र च श्रीभगवानुवाचेति—तत्तदक्षरैर्णैवाहं तद्वक्ष्यामीति भावः । तत्र च सुप्तोहं किलविललापेतिवाह्लिटा परोक्षनिर्देशः । तदर्थन्तु नाहं विवेक्तुं शक्नोमि किन्तु भवत्य एव विचारयंत्विति व्यनक्ति । तथैव
भवतीनामहमित्यादि, तत्रापातप्रतीतो ज्ञानरूपः प्रथमार्थो रहस्यार्थांतरगोपनाय, तत्र ह्येकत्र " दीव्यंतमक्षैस्तत्रापि प्रियया चोद्धवेन च । पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥ " इति । तत्रान्यत्र "मन्त्रयन्तञ्च
कस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः " इति । तत्र भावभेदादभिमानभेदो लक्ष्यते—अयमेतदवस्थोस्मीति । एवं षोडशसहस्रकन्याविवाहे कुत्रचिच्छ्रीकृष्णसमक्षं कर्म कुर्वत्यास्तद्दर्शनसुखं भवति, तत्परोक्षं तद्दर्शनोत्कंठेति । यथा
योगमायावैभव एव क्वचिदुद्धवेन संयोगः क्वचिद्वियोग एव इति विचित्रता । तदेवं तत्र प्रकाशभेदे सति तदभेदेनाभिमानक्रियाभेदे चावस्थिते सति । स च प्रकाशो द्विविधो ज्ञेयः । प्रकटोऽप्रकटश्च । तत्र प्रकटः प्राप
ञ्चिकेष्वभिव्यक्तिः, अप्रकटस्तेष्वनभिव्यक्तिः । तत्र पूर्वमष्टादशेऽध्याये यो गोलोकतया दर्शितः श्रीवृंदावनस्यैव प्रापञ्चिकेष्वप्रकटप्रकाशविशेषस्तत्र तदानीमपि स्थितेन श्रीकृष्णस्याप्रकटोत्थेन प्रकाशविशेषेण तासामप्यप्रकट
प्रकाशैः संयोगः श्रीवृन्दावनप्रकटप्रकाशे प्राक्स्थितेन संप्रति मथुराप्रकटप्रकाशं गतेन श्रीकृष्णस्य प्रकटप्रकाशेन तु तासां प्रकटप्रकाशैर्वियोग इति तदेव सदृष्टान्तमाह—यथेति । तत्र प्रथमार्थे खं वाय्वग्निर्जलं महीति
खादीनि भूतानि, यथा भूतेषु वाय्वादिपार्थिववस्त्वंतरेषूपादानतयानुगतानि तथाहं सर्वेष्वित्यर्थः । अथ द्वितीयः—यथा भूतानि भूतेषु कार्यरूपेषु भूतानि कारणरूपाण्याश्रयत्वेन वर्तंते तथाहमपि भवतीनां ये मनआदयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये ॥ आत्ममायानुभावेन भूतेंद्रियगुणात्मना ॥ ३० ॥

नन्नु कारणत्वे सर्वानुगतत्वे च कार्यकारणभेदः स्यादत आह । आत्मन्येवेति । ननु नित्यसिद्धस्य कुतः सृष्ट्यादिरूपता अत आह । भूतेंद्रियगुणात्मना । बुद्धींद्रियेति वा पाठः । तद्रूपेणेति । ननु निर्विकारस्य कुतस्तद्रूपतेति तत्राह । आत्ममायानुभावेनेति ॥ ३० ॥

गुणाश्च धैर्यादयस्तेषां मत्स्फूर्त्येकजीवनानामाश्रय इत्यर्थः । अथ तृतीयः—तत्कथं तत्राह—यथा खादीनि भूतानि स्वस्वकार्येष्वप्रकटप्रकाशेन वर्तंत एव तथाहं तत्र वर्त इत्यर्थः । किमाकारस्तत्राह—भवतीनां मनआद्याश्रयाकारः श्यामसुंदरवेणुविलासरूप एव सन्नित्यर्थः ॥ २९ ॥ भगवतः " एको देवः सर्वभूतेषु गूढः " इत्यादिश्रुतिसिद्धमेकत्वमाक्षिप्य समाधत्ते—नन्वित्यादिना । अतोऽत्राक्षेपे । पुनराशंकते—नन्विति । भूतादिरूपेण आत्मनीति । एतेन कार्यकारणसाधनाधारत्वं स्वस्यैवोक्तम् । पाठान्तरे गुणशब्देन भूतग्रहणमपि । किञ्चेन्द्रियपदेनैव बुद्धेर्ग्रहात्पूर्वपाठो मम सम्यग्भातीति । तद्रूपेणेति—बुद्ध्यादिरूपेण । भूतादिरूपत्वे शंकते—नन्विति । आत्मनो मायानुभावेनाचिंत्यशक्तिप्रभावेण ॥ * ॥ आत्मन्येवेति । तत्र प्रथमार्थः—नन्वेकस्योपादानत्वमंतर्यामित्वञ्च दुर्घटं घटादौ मृत्तिकादेरंतर्यामित्वसंभवान्मतान्तरेप्युपादानरूपाणां परमाणूनामचेतनानामन्य एवेश्वरश्चेतनो नियामकस्तत्राह—आत्मन्येवेति । आत्मन्येवाधिष्ठाने । आत्मना निमित्तरूपेणात्मानमुपादानरूपं भूतेन्द्रियगुणात्मना भूतरूपेणेंद्रियरूपेण गुणरूपेण जीवरूपेण च सृजामि प्रकटयामि । ' बुद्धींद्रिय—' इति पाठे भूतान्युपलक्षणीयानि । न त्वात्मा खल्वेक एव तस्याधिष्ठानादित्वं युगपत्कथं सिद्ध्यतीत्याशंक्य सर्वाशंकानिरासार्थमाह—आत्ममायानुभावेनाचिंत्यशक्तिप्रभावेण । 'श्रुतेस्तु शब्दमूलत्वात्' इति न्यायेन चिन्तामण्यादिष्वपि तादृशत्वदर्शनेन चेति भावः । द्वितीयो यथा—ननु सत्यमस्मासु तथैव त्वं स्फुरसि त्वयि तु न वयं, संयोगो नाम च स्वप्नादिव्यातिरिक्तो मिथो मेलनमेव तत्राह—आत्मनि चित्ते निर्विकारेप्यात्मना मनसा संकल्पविकल्पात्मकेनात्मानं प्रयत्नं भवत्संयोगविलासात्मकमेकं सृजे करोमि "आत्मा देहमनोबुद्धिस्वभावधृतिब्रह्मसु । प्रयत्ने च" इति विश्वप्रकाशः । न केवलं सृजेऽनुपालयामि चिरकालं व्याप्य संवर्धयामि च तथा हन्मि विलासांतरार्थं तं दूरीकरोमि च, एवमन्यमपि जानीतेत्यर्थः । कीदृशेनात्मना—आत्मनः स्वस्य मायाया यदा भवतीषु, यद्वा—आत्मनि स्वस्मिन्भवतीनां वा माया (दया) तस्या अनुभावः प्रभावो यत्र तादृशेन । पुनः कीदृशेन—भूतानि सिद्धानि साक्षात्स्थितान्येव इन्द्रियाणि चक्षुरादीनि गुणा रूपादयः आत्मनोऽहंकारास्पदानि यत्र तादृशेन । 'बुद्धी—' इति पाठे ननु मनोरथमात्रमिदं भवतः कथं सत्यं स्यात्तत्राह—बुद्धिगुणा विकारादय इंद्रियगुणा दर्शनादयश्चात्मनस्तदात्मतां प्राप्ता यत्र तादृशेन विचारसिद्धप्रत्यक्षसंवलितेनेत्यर्थः । तस्मादुभयानुभवाद्बहिः प्रातीतिकोयं वियोगो नादरणीय इति भावः । तृतीयो यथा—प्रकाशः कथं संभवति तत्राह—आत्मनि विग्रह स्वरूपेधिष्ठाने आत्मना तेनैव करणभूतेनात्मानं तत्प्रकाशविशेषं सृजे 'तदाऽऽत्मानं सृजाम्यहम्' इतिवदाविर्भावयामि । अनुपालयेऽभीष्टलीलापर्यंतं रक्षामि । हन्मि तदवसानेंतर्द्धापयामि । ननु कथं तेनैव सृजसि तत्राह—आत्ममायाऽचिंत्यशक्तिस्तस्या अप्यनुभावो यत्र तादृशेन तेन । पुनः कीदृशेन—भूतानि नित्यसिद्धानि, इंद्रियाणि गुणा रूपादयश्चात्मा स्वरूपं च यस्य तादृशेन । 'बुद्धी—' इति पाठे बुद्ध्योंतःकरणानि इंद्रियाणि च गुणाश्चात्मनः स्वरूपभूतान्येव यत्र तादृशेन । अतस्तत्रतत्र प्रकाशमात्रमेव स्यान्न तु विकार इति भावः ॥ **विश्वनाथस्तु**—किञ्चाहमेव कर्ताऽधिकरणं कर्म चेत्याह—आत्मन्यधिष्ठाने आत्मनैव करणेनात्मानमेव जगद्रूपं सृजे सृजामि । ननु त्वं सच्चिदानंदरूपः जगदिदं ततो भिन्नं प्रतीयते तत्राह—आत्मनो मम या शक्तिस्तस्या अनुभावः कार्यं तेन भूताद्यात्मना सृजामि, तस्या मद्बहिरंगशक्तित्वाज्जगतोऽस्य मद्रूपत्वं न तु मत्स्वरूपत्वमिति भावः । पक्षे भवतीनामात्मनि मनसि आत्मना प्रयत्नेनात्मानं स्वं सृजाम्याविर्भावयामि, संभोगादिलीलार्थं मुहूर्तमनुपालयामि, ततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ॥ सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ ३१ ॥

नन्वात्मनो भूतादिरूपत्वे तद्दोषप्रसंगः स्यात्तत्राह । आत्मेति । आत्मा तु शुद्धः । कुतः। अगुणान्वयः न गुणेष्वन्वेतीति तथा।तत्कुतः।व्यतिरिक्तः।तदपि कुतः।ज्ञानमयो ज्ञान स्वरूपः । नन्वहंप्रत्यये स्वसंवेद्यमेवात्मनो नानावस्थावत्त्वमिति कुतस्तस्य शुद्धतेति तत्राह । सुषुप्तीति । मायाकार्यमनोवृत्तिभिर्विश्वतैजसप्राज्ञरूपेण प्रतीयते । न

हन्म्यंतर्द्धापयामि । केन प्रयत्नेन–आत्ममायाप्रभावेण, मम योगमायाप्रभाव एव मम प्रयत्न इति भावः । आत्मानं कथंभूतम्–भूतान्यंगानि इंद्रियाणि गुणाः सौंदर्यादय आत्मनो बुद्ध्यादयस्तेषां द्वंद्वैक्यं, तेन सहितम् ॥ ३० ॥ आत्मनो जडत्वं शंकते–नन्विति । तेषां भूतादीनां दोषो जडत्वादिरूपस्तस्य प्रसङ्गः प्रसक्तिः । तत्राक्षेपे । शुद्धत्वे हेतुमाशंकते–कुत इति । अन्वेति संगं प्राप्नोतीति । व्यत्तिरिक्तः सर्वस्माद्भिन्नः । अत्र हेतुमाशंकते–तदपीति, व्यतिरिक्तत्वमपि । शुद्धरूपतामाक्षिपति–नन्विति । अहं करोम्यहं शृणोम्यहं वदामीत्यनेकावस्थता । तत्राक्षेपे । इत्यर्थ इति–मायाकृतं नानात्वमेकस्यौपाधिकमेव न स्वाभाविकमित्यर्थः ॥ * ॥ ननु तर्हि तव स्वरूपं किं लोकैः कथं वा ज्ञेयमिति चेन्मत्स्वरूपन्तु गुणातीतमंतर्यामिसंज्ञं सर्वत्र प्रतीयत एवेत्याह–आत्मा परमात्मा ज्ञानं मायातीतं चित्तन्मयः, गुणैः सृष्ट्यादिकर्त्र्यप्यचिंत्यशक्त्या तत्संबंधाभावाच्छुद्धः, शरीरमध्यवर्तित्वेपि तद्व्यतिरिक्तो गुणाधिष्ठातृत्वेऽपि न गुणानन्वेतीति सः । स तु सर्वैरप्यनुमानगम्य इत्याह–सुषुप्तेति । ईयतेऽनुमीयते । तदुक्तं पक्षे–'गुणप्रकाशैरनुमीयते भवान्' इति, “ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥” इति च । आत्माऽहं ज्ञानमयोऽत्र स्थितोपि युष्मद्विषयकातिशयज्ञानवान्न तु कदाचिदपि युष्मान्विस्मरामीत्यर्थः । शुद्धो मथुरास्थोऽपि मथुराजनाऽऽसंगदोषरहितः, यतो व्यतिरिक्तो युष्मद्वियोगखिन्नः, कथमन्या रोचयामीति भावः । यतो गुणान्वयः, युष्मद्गुणसौंदर्यमधुरकटाक्षावलोकादीनन्वेमि ध्यानेन निरंतरं प्राप्नोऽमीत्यर्थः । एवंभूतो युष्माभिरपि सदैवाहमनुभूय इत्याह–सुषुप्तेति । तत्र सुषुप्तेन ममात्मनोनुभूतचरस्य रूपगुणादिसामान्यं, स्वप्नेन तद्विशेषं, जागरणेन तु हास्यलास्यादिसंभोगमाधुर्यमयः साक्षादात्मैवेयतेऽनुभूयत एव॥**तोषिणी** तु–आत्मा ज्ञानमय इति प्रथमार्थः । नन्वेतावन्तं कालं तवात्मानं घनश्यामवर्णं परिमितसर्वांगं परमाश्चर्यकररूपवन्तमेव मन्यामहे स्म, संप्रति भवता त्वचिंत्यशक्तिमयस्तत एव सर्वेषामुपादानतयांतर्यामितया च व्यापक एव स इत्यस्माकं भवता सह न वियोग इत्युपदिश्यते, स च न केनापि दृश्य इत्यरूपश्चेत्यवगम्यते । तत्तद्रूपता च तत्र भवदेकगम्येति भवतु नामायं सन्देशः, वयं तु स्वंस्वमात्मानं परिच्छिन्नदेहरूपमेवानुभवामः, ततः कथंचिज्जातीयेनानेन तादृशस्य भवदात्मनः संगमनुभविताः स्मस्तत्राह–आत्मा ज्ञानमय इति । सर्वैरप्यात्मा सुषुप्त्यादिभिर्मनोवृत्तिभिस्तत्तद्रूपासु तत्तद्वृत्तिषु प्रतीयत एव, सुषुप्तावपि ' सुखमहमस्वाप्सम् ' इति प्रत्यभिज्ञानात्, किमुतान्ययोरिति भावः । यतो ज्ञानमयः प्रकृतिज्ञानस्वरूपत्वात्स्वयंप्रकाशः, यतोऽसौ तत्तद्गुणानुगतोपि व्यभिचारिणीभ्यस्तत्तद्वृत्तिभ्यो व्यतिरिक्तत्वाच्छुद्ध इत्यर्थः । तस्माज्ज्ञानरूपेण सर्वेषामुपादानेन व्यापकेन मदात्मना ज्ञानरूपस्य निजात्मनस्तादात्म्यभावनया सुखिन्यो भवत, किमनया बहिर्योगदुःखमयभावनयेति भावः । 'मायावृत्तिभिः ' इति पाठेपि स एवार्थः । द्वितीये त्वर्थे यो मम तादृशविग्रहरूपात्मा भवतीभिर्निर्धारितः स तु सुषुप्त्यादिवृत्तिषु भवतीभिरीयतेऽनुभूयत एव, मत्समाधेरेव भवतीषु सुषुप्तवद्भासमानत्वात् । यथोक्तम्–“जाग्रत्स्वप्नसुषुप्तेषु योगस्थस्य च योगिनः । या काचिन्मनसो वृत्तिः सा भवेदच्युताश्रया ॥” इति । तमेवात्मानं विशिनष्टि–ज्ञानमयो नानाविद्याविदग्धः, शुद्धो दोषरहितः, व्यतिरिक्तो विशेषेण सर्वोत्तमः, गुणान्वयः सर्वगुणशालीति । तृतीयेप्यर्थे भवतीभिर्यत्सुषुप्त्यादिषु स्वीयमनआद्याश्रयस्तादृशो यो ममात्मानुभूयते स च गौतमीयतंत्राधिस्थस्य “ नवीननीरदश्यामं नीलेंदीवरलोचनम् । बल्लवीनंदनं वंदे कृष्णं गोपालरूपिणम् ॥” इति वर्तमानवन्दनात्मकस्य सार्वदिकानुशीलनीयस्य श्रीगोपालस्तवराजादेर्दृष्ट्या नित्यतद्विध एव ज्ञेय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येनेंद्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ॥ तन्निरुंध्यादिंद्रियाणि विनिद्रः प्रत्यपद्यत ॥ ३२ ॥
एतदंतः समाम्नायो योगः सांख्यं मनीषिणाम् ॥ त्यागस्तपो दमः सत्यं समुद्रांता इवापगाः ॥ ३३ ॥

स्वत इत्यर्थः ॥ ३१ ॥ एतत्कुतः । मनोनिरोधे तदभावादिति व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते । येनेति । उत्थितः पुमान्यथा मिथ्याभूतमेव स्वप्नं ध्यायत्येवं बाधितानपींद्रियार्थान् शब्दादीन्येन मनसा ध्यायेत ध्यायेच्चिंतयेत् । ध्यायंश्च येनेंद्रियाणि प्रत्यपद्यत प्राप तन्मनोविनिद्रोऽनलसः सन्निरुंध्यान्नियच्छेदिति ॥ ॥ ३२ ॥ तावता च कृतार्थो भवतीत्याह । एतदंत इति । एष मनोनिरोधः अंतः समाप्तिः फलं यस्य सः । समाम्नायो वेदः । स तत्र पर्यवस्यतीत्यर्थः । योगोऽष्टांगः । सांख्यमात्मानात्मविवेकः । त्यागः संन्यासः । तपः स्वधर्मः । दम इंद्रियदमनम् । मार्गभेदेऽप्येकत्र पर्यवसाने दृष्टांतः । समुद्रांता आपगा नद्य इवेति ॥ ३३ ॥

इति भावः ॥ ३१ ॥ कुतो मायिकं नानात्वमित्याशंक्य सहेतुकं तदाह—मनइत्यादिना । व्यतिरेकमभावः । एवं स्वप्नवत् । येन मनसा ॥ * ॥ येनेति तैर्व्याख्यातम् । तत्र चिंतयेत् चिंतयति । प्राप प्राप्नोतीत्यर्थः । द्वितीयोर्थो यथा—ननु सत्यं साक्षात्कारनिभा सा स्फूर्तिः, किन्तु न सदेति बहिर्दृष्ट्या वियोगस्फूर्तेरपाये क उपायः—बहिर्वृत्तितो मनोनिरोध एवेति योगशास्त्रप्रक्रियामुपदिशति—येनेति । तृतीयेपि—हंत यद्यस्मिन्प्रकाशे वियोग एव च तद्दृष्टिश्चास्माकं हातुमशक्या भवतश्च नागमनं तर्हि कथमिव कालं क्षिपाम इत्याशंक्य ममागमनं यावन्मनोनिरोधः क्रियतामित्यभिप्रेत्याह—येनेति ॥ अत्र **विश्वनाथः**—उपदिष्टोयं ज्ञानयोगो मनोनिरोधे सति फलतीति मनोनिरोधं विधत्ते—येन मनसेंद्रियार्थान्विषयान्ध्यायेत, उत्थितः प्रबुद्धो जनः स्वप्नवत्स्वप्ने यथा मृषाभूतानप्यर्थान्ध्यायेत्, तन्मनइंद्रियाणि च निरुंध्यात्, यतो विनिद्रः सावधान एव जनः प्रत्यपद्यत प्रतिपन्नो ज्ञानवानभूदिति पूर्वाचारः प्रमाणितः । पक्षे—उत्थितो मूर्च्छांतः प्रबुद्धो भवद्विधो जन इन्द्रियार्थान्मद्दर्शनस्पर्शनाधरपानाऽऽलिंगनादीन्विषयान् मदाविर्भावजनितत्वात्सत्यानेव येन मनसा स्वप्नवन्मृषाभूतानेव ध्यायेत तन्मनो निरुंध्यात्तिरस्कुर्वीत, तदप्रामाण्यादिति भावः । यतो विनिद्रो निद्रारहित एव भवदादिः इंद्रियाणि स्वनेत्रादीनि प्रत्यपद्यत प्रत्यक्षत एव निरंजननीरागानिश्चंदनादीनि अपद्यत ज्ञातवानेव, युष्माभिरनुरागांधाभिर्महाविरहोत्कंठाविगतविचाराभिर्मत्कर्तृकयुष्मत्कर्मकनानाविधसंभोगोऽपि यन्मृषाभूत एव मन्यते एतदेव मे महद्दुःखमत एव तत्तत्सत्यापनार्थकमेतत्संदेशप्रेषणं ममेति भावः ॥ ३२ ॥ तावता मनोनिरोधमात्रेण । इत्यर्थ इति—अन्यथा वेदाभ्यासादि निष्फलमेव । तथा च वक्ष्यत्येकादशे श्रीकृष्णः—"दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि । सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः ॥" इति । अष्टांगो यमादिसमाध्यन्तः । अपां समूह आपः प्रवाहस्तेन गच्छन्तीत्यापगाः ॥ * ॥ मनोनिरोधार्थका एव सर्वशास्त्रोक्ताः सर्वेऽप्युपाया इत्याह—एतदंत इति । एष मनोनिरोध एवांतः समाप्तिफलं यस्य स इति तैर्व्याख्यातम् । पक्षे—मनोनिरोधे सत्येव संसारतरणं तथैव भवतीनामपि मद्विरहतरणं मनोनिरोधादेव यत्स्वलु मनः सत्यमपि मत्संगं भवतीरलीकत्वेन प्रत्याययतीति भावः । अर्थस्तूभयत्र तुल्य एव ॥ **तोषिणी** तु—समाम्नायः शास्त्रं ज्ञापकम्, योगादीनि साधनानि, तत्र सत्यं विविधकर्मस्वपि सदा शाठ्यवर्जनम्, यागः सांख्यञ्च सर्वेषामेव सामान्यधर्मः, त्यागादयः क्रमेण यतिवनस्थब्रह्मचारिगृहस्थधर्माः । यद्वा—त्यागो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशाम् ॥ मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥ ३४ ॥

ननु किमन्यानिवास्मानात्मविषया प्रलोभयसि वयं तु सर्वसुंदरसकलगुणगणालंकृतेन त्वया विरहं नैव सहामहे इति चेदत आह।यत्त्वहमिति।दृशां दूरे यद्वर्ते तन्मदनुध्यानार्थम् ।

दानं गृहिधर्मः, सत्यं समदर्शनं यतिधर्मः । यद्वा–सर्व एवैते मुख्याः सामान्यधर्मा इत्यर्थत्रयेपीदं समानम् ॥ ३३ ॥ न हि वयं संन्यासिन्यो यतो ब्रह्मज्ञानेन संतोषं करिष्याम इति कृत्वा शंकन्ते–नन्वित्यादिना । अतोऽत्र । यदहं वर्ते । मदनुध्यानकाम्यया निरन्तरमदुपासनेच्छया । संनिकर्षः सामीप्यम् ॥ * ॥ तदेवमप्रकटप्रकाशे वियोग एव नास्ति प्रकटप्रकाशेऽपि बहिः प्रातीतिकप्रायिक एव च कदाचित्फूर्तेरपि साक्षात्कारपदवीप्राप्तत्वात् , स च केनापि मम स्वाभाविकेन दुराग्रेहणास्तीति ज्ञायतामित्यभिप्रेत्य तमेवाग्रहं दर्शयति–द्वाभ्याम् । तुशब्दो भिन्नोपक्रमे । कंसवधलक्षणमहाकार्यानुरोधेनैव तावदत्रागतं संप्रति कार्यावशेष परित्यागपूर्वकागमनयोग्यत्वेऽपि यदहं भवतीनां या दृशो नेत्राणि तासामेव दूरे वर्ते न तु भवतीनामपि, अप्रकटप्रकाशे तत्र विद्यमानत्वात्, तत्रापि केवलं वर्ते न तु सुखेनास्मीत्यर्थः । तत्खलु मत्कर्तृकं यदनुध्यानं तत्काम्यया तद्धेतोरेव, ध्यानं भवत्कर्तृकम् "क्षणं युगशतमिव यासां येन विनाभवत्" इति प्रसिद्धया पूर्वत एव सिद्धम् । मद्विषयमनुध्यानं तदनुगतं तत्सदृशतां प्राप्तं मत्कर्तृकं भवद्विषयं प्रेयसीकर्तृकस्याग्रे वक्ष्यमाणत्वात्, तन्मम मनस्युदियादिति वांछेयेत्यर्थः । तच्च किमर्थं तत्राह–मनसो यः सन्निकर्षः भवतीनां सान्निध्ययोग्यता तदर्थमित्यर्थः । यतस्तां विना मम चेतसि सदैव लज्जा जायत इति भावः । उक्तश्च स्वयमेव–'न पारयेहं निरवद्यसंयुजाम्' इत्यादि । एवमीदृशभवदुपासनयैव तद्योग्यता स्यादितीदृशमपि दुःखं सहे इति वाक्यार्थः । उक्तं हि मुनिभिः–"न विना विप्रलंभेन संभोगः पुष्टिमश्नुत । कषायिते हि वस्त्रादौ भूयान्रागोऽभिवर्द्धते ॥" इति ॥ अत्र **विश्वनाथः**–भो उद्धव एतेन संदेशेनास्मांस्त्वं द्विगुणं ज्वालयसि स्म तस्मात्तं संदेशप्रेषकं कालदेशपात्रानभिज्ञं किं ब्रूमस्त्वां वा परामर्शशून्यं किमाक्षिपामः, एतद्ब्रह्मज्ञानं खल्वस्यां व्रजभूमौ कः क्रेष्यति यस्य भावस्त्वयैतावद्दूरमानीतः, किमेते गोपीजना जन्मावधि श्रीकृष्णसौंदर्यामृतपायिनः संप्रति ब्रह्मज्ञानं निंबरसं पास्यन्ति, महादुर्भिक्षे हि वरमिह स्त्रियः प्राणाञ्जहति तदपि घासं नाश्नन्ति, शृणु रे महामूर्ख शृणु–इदं ब्रह्मज्ञानं खलु संसाररोगस्यौषधं महामुनिचिकित्सकानां हृदयपर्णशालायां तिष्ठति, किमिदं कृष्णप्रेममहारोगस्य भेषजं भवति, ते[1] चिकित्सका अपि किमिमं रोगं तावत्कदापि परिचिन्वन्तोऽपि सांदीपिनिमुनेः सकाशाच्चिकित्साशास्त्रमधीत्य त्वामुद्धवमध्याप्यास्मभ्यं प्रेमज्वालोपशमकमौषधं प्रेषयामासुः, गच्छाधुनैवास्मत्प्रेषित इदमौषधं नीत्वा, स एवैतत्पीत्वास्मद्विषयकस्य प्रेमरोगस्य ज्वालां न्यवर्तयत् पुनरपि रोगशेषं निवर्तयतु, अस्माकं प्रेमानलमहाज्वालैव शतजन्मपर्यन्तं वर्ततां न चैतदौषधस्पर्शोऽपि, किमरे दावानलोपशमकोप्यंबुराशिर्व्रजानलमुपशमयितुं शक्नोति, किञ्चास्य संदेशस्यान्तरस्मात्किञ्चिदनुकूलोऽप्यर्थो यो यथाकथंचिद्भासते स किं तदभिप्रेतो घुणाक्षरन्यायेनायातो वेति न तत्र विश्वासिम इति ससंरंभं ब्रुवाणासु तासु–भोः स्वामिन्यः क्षणमवधत्त ब्रह्मज्ञानादन्यमपि संदेशमानीतवानस्मीत्युक्त्वा तत्र श्रोतुं श्रद्धधानास्ताः प्रति कृष्णवाक्यमाह–यत्त्वहमिति । यद्भवतीनां दृशां प्रियोऽप्यहमधुना दृशां दूरे वर्ते तन्मदनुध्यानकाम्ययैव, तच्चानुध्यानं मनसः सन्निकार्षार्थमतोऽधुना भवतीनां मनसः समीप एव वर्ते । एकत्रोपलक्षणमेतत्–मम दृशां प्रिया अपि भवत्यो यदधुना दृशां दूरे स्थितास्तन्मनसः समीप एव वर्तध्व इत्यप्यर्थः । तेन च दृक्समीपवर्तित्वे मनोदूरवर्तित्वं, मनः समीपवर्तित्वे दृग्दूरवर्तित्वमासक्तिविषयीभूतस्य बंधनं भवति, अत्रापि मनोदृशोर्मध्ये मनस एवाभ्यर्हितत्वान्मनःसमीपवर्तित्वमेव मदभीप्सित तदेव भवतीनामप्यभीप्सितं भवत्विति भावः । अत एवोक्तम्–" दूरस्थोऽपि समीपस्थो यो यस्य हृदि वर्तते । यो यस्य हृदये नास्ति समीपस्थोऽपि

१ बहुत्वं व्यङ्ग्योक्त्योत्तरत्र 'सः' इति दर्शनात्। अनुरागपारवश्याद्वा विरोधः परिहरणीयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा दूरचरे प्रेष्ठे मन आविश्य वर्तते ॥ स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षगोचरे ॥३५॥मय्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् ॥ अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ॥३६॥ या मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ॥ अलब्धरासाः कल्याण्यो माऽऽपुर्मद्वीर्यचिंतया ॥३७॥

तच्च ध्यानं मनसः सन्निकर्षार्थमिति ॥३४॥ एतदुपपादयति त्रयेण । यथा दूरचर इति ॥ ३५ ॥३६॥ उपैष्यथेति माधुर्यमात्रमिति चेदत आह । या इति । हे कल्याण्यः

दूरतः ॥ '' इति । दूरत इति सप्तम्यर्थे तसिः ॥ ३४ ॥ एतत् मनःसामीप्यम् । दूरे चरति गच्छतीति तथा तस्मिन् । चात्पुरुषाणामिति । सन्निकृष्टे निकटस्थे । अक्षगोचरे इन्द्रियविषये ॥ फलसंदेहात्प्रियतमस्मरणं मत्स्मरणसदृशं न, फलनिश्चयादित्याशयेनाह—मय्येति । विमुक्ता त्यक्ता अशेषाः वृत्तयः संकल्पादयो येन तत्तथा । कृत्स्नम्—सर्वभावेन कृंतत्यज्ञानमिति कृत् ज्ञानम्, तेन स्नस्यत आदीयत इति कृदुपपदात् 'स्नसु—आदाने' इति धातोरौणादिको डः । ज्ञानज्ञेयमित्यर्थः ॥ * ॥ एतदेव स्त्रीपुंसानामनुभवदर्शनायोपपादयति—यथेति । स्त्रीणां चेति चकारात्पुंसां च, दूरवर्तिन्यां प्रेष्ठायां यथा मन आविश्य वर्तते न तथा सन्निकृष्टायामक्षिगोचरीभूतायाश्चेत्यर्थः । हंहो उद्धव एषोऽपि संदेशः संप्रति त्वया स्वहृदयसमूढ एव स्थाप्यताम्—संप्रति कृष्णेन याः स्त्रियः संभुज्यन्ते कदाचित्तासां दशां दूरवर्तिनि कृष्णे भविष्यति सति ताभ्य एव तदानीं त्वया दातव्यः, संप्रति व्रजस्थास्तु नास्य ग्राहिकाः, यासां पूर्वं व्रजवर्तिन्यपि दृग्गोचरीभूतेऽपि तस्मिन्कृष्णे एकैकनिमेषेणैकैकयुगकालं व्याप्य स दृग्दूरवर्तिकृत एवाभूत्तदा तदैव सहस्रशोविवाहेषु सहस्रकृत्व एव मनःसन्निकर्षः खल्वभूदेवास्माकमिति सावहेलमाचक्षाणासु तासु—भोः स्वामिन्यः यद्येषोऽपि न रोचते तर्ह्यस्मादप्यन्यं संदेशं श्रुणुत मया तु बहव एव संदेशा आनीता इति प्रोच्य पुनः कृष्णवाक्यमाह—मय्येति । विशेषेण मुक्तास्त्यक्ता गृहपत्यादिविषया अशेषाश्च स्ववृत्तयो येन तथाभूतं मनः मयि कृष्णे आविश्य मां नित्यमनुस्मरन्त्यो यद्वर्तध्वे तदचिरादेव मामुप स्वसमीप एव वर्तमानमेष्यथ प्राप्स्यथ । ननु भवतु नाम भवतो भावसिद्धिस्तत्रास्माकं किमित्याशंक्याह—भवतीनामपि तदाधिक्यं स्यादिति कामनयापीत्याह—यथेति । स्त्रीणामन्यासामपि किमुत भवतीनां चेत्युक्तार्थसमुच्चये । अतो मिथःप्रेमवर्धनाभिलाषेच्छोर्दुर्निग्रहोऽयं मम दुराग्रहो भवतीभिः क्षन्तव्य इति भावः । तदेतावत्संदिश्य पुनर्विचारयति स्म मया यत्त्रिधा समाधानं कृतं तद्यद्यप्रकटलीलामयं ते संभावनया तान् मंस्यन्ते मनोनिरोधे च नोत्सहिष्यन्ते तर्हि प्रकटलीलायामेव साक्षान्मत्प्राप्तिः समाधानाय कल्पेतेति तदेतद्विचार्य सोऽपि मम दुराग्रहो भवतीनामाग्रहेण चिरादेव नंक्ष्यतीत्याह—मय्यावेश्येति । पद्येऽस्मिन्नुत्तरत्र च मयीत्याद्यस्मच्छब्दप्रयोगस्य द्वित्रिरावृत्त्या तत्राप्यादित एव कृष्ण इति विशिष्टसर्वत्राप्युन्नेयमिदमित्यधिकारनिर्मित्या कृष्णपदं यथायथं योज्यं,तच्चावश्यकत्वायान्याकारप्राप्तिपरिहाराय च गम्यमिति स्थिते सोऽयमत्रार्थः—यद्यस्माद्विमुक्तं तदाशेषवृत्तिकं मनो मयि कृष्णे यथाकथंचिदाश्रयितव्ये स्वदायकतया प्रसिद्धेऽस्मिन्कृष्णतया प्रसिद्धाकारे आवेश्य निरंतरं मां कृष्णतया प्रसिद्धाकारमेव स्मरन्त्यः स्थ तस्मादचिरादेव मां कृष्णतया प्रसिद्धाकारमुप समीप एष्यथ प्राप्स्यथैव, न तु ममात्र स्वातंत्र्यमिति भावः । नन्वेवं चेत्पुनरपि तथा दुराग्रहो भवतः स्यात्तत्र सचाटु प्राह—नित्यमिति । सहासेनैव तथाकरवम्, किन्त्वित ऊर्ध्वं न कारिष्यामीति भावः ॥ ३५ ॥ ३६ ॥ माधुर्यमात्रं प्रियोक्तिमात्रम् । अत्र स्वानुभूतमर्थमाह—या इति । मद्वीर्यं मत्स्वरूपम् "वीर्यं तेजोबलप्रल्यस्वरूपेषु च रेतसि" इति धरणिः ॥ * ॥ तत्रतत्र प्रमाणं दर्शयति—या इहास्मिन्प्रकटप्रकाशात्मके वृंदावने रात्र्यां तस्यां क्रीडता मया कृष्णतया प्रसिद्धाकारेण सहालब्धरासाः । तत्र हेतुः—व्रज आस्थिता रुद्धा इत्यर्थः । ता अपि मद्वीर्यचिंतया मम कृष्णतया प्रसिद्धाकारस्य

1 प्रियतमस्मरणे फलसन्देहो मत्स्मरणे च फलनिश्चय इति तयोरसाम्यमित्याशयाऽऽशयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः ॥ ता ऊचुरुद्धवं प्रीतास्तत्संदेशाऽऽगतस्मृतीः ॥३८॥ गोप्य ऊचुः॥दिष्ट्याऽहितो हतः कंसो यदूनां सानुगोऽघकृत ॥ दिष्ट्याऽऽप्तैर्लब्धसर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना॥३९॥ कच्चिद्गदाग्रजः सौम्य करोति पुरयोषिताम् ॥ प्रीतिं नः स्निग्धसव्रीडहासोदारेक्षणार्चितः ॥ ४० ॥

याः स्वभर्तृभिः प्रतिबद्धा वने क्रीडता मया सहालब्धक्रीडास्तास्तदैव मत्कृतलीलानुस्मृत्या मामापुः प्रापुः ॥ ३७ ॥ तस्य संदेशेनागता स्मृतिर्यासां ताः । प्रथमार्थे द्वितीया ॥ ३८ ॥ यदूनामहितः शत्रुः अघकृद्दुःखदः । दिष्ट्येत्यानंदे । आप्तैः प्राप्तैर्हितैर्वा सह ॥ ३९ ॥ अन्या ऊचुः । कच्चिदिति । नोऽस्माकम् उचिताम् अस्मासु करणीया

सर्वातिक्रमिमद्गुणप्रभावेण मा मां कृष्णतया प्रसिद्धाकारमापुरेव, अप्रकटप्रकाशात्मके वृंदावन इति भावः । कल्याण्य इति संबोध्य भवत्यस्तु साक्षादेव प्राप्स्यन्ति न तु 'जहुर्गुणमयं देहम्' इति रीत्येति व्यंजितम् ॥ अत्र **विश्वनाथः**—अत्रार्थे भवतीनां मध्येंतर्गृहनिरुद्धा यां गोर्प्यस्ता एव प्रमाणमित्याह—या इति । ताः स्वमनोरथाऽसिद्ध्या मद्विच्छेदमहापीडया च मर्तुकामा अपि कल्याण्यः कल्याणवत्यो जीवत्य एव मद्वीर्यचिंतया तदैव मामापुः, तत्रैवाविर्भूय रममाणेन मया सार्द्धमेव तस्यां रात्रौ व्रजे स्थितास्तत्परात्रिषु रासमपि प्राप्ता इत्यर्थः ॥ ३७ ॥ तस्य कृष्णस्य । ता गोप्यः ॥ * ॥ ता अंतर्गृहनिरुद्धचर्या एवोचुः । तेन संदेशेनागता स्मृतिर्यासां ताः । द्वितीयाऽऽर्षी । आं ! सत्यमेव तस्यां रात्रौ तेन रममाणेनैव सह वयमास्मेति स्मरन्त्यः स्वानुभवं प्रमाणीकृत्योद्धवं प्रीतास्ता एव लौकिकरीत्योद्धवं पप्रच्छुः ॥ अत्र **तोषिणी**—एवमिति—यदायदा यच्छ्रुतं तदातदा तत्रार्थत्रयस्यापि ताभिस्तारतम्येनानुसंहितत्वात्, प्रथमार्थे—प्रेयसि तस्मिन् पूर्वम् 'यत्पत्यपत्यसुहृदाम्' इत्यादिषु याः सर्वतनुभृतां निरुपाधिप्रेमास्पदत्वादिना परमात्मता स्थापिता संप्रति तेन ज्ञानमयेन संदेशेन तदात्मिका स्मृतिर्यासां ताः । तंत्रेण तु तेन ज्ञानमयेनापि संदेशेन न गता स्मृतिर्निजभावोचितानुसंधानरूपा यासां ताः । तत्र हेतुः—प्रीताः, तस्मिन्स्वाभाविकताद्दशप्रेमवत्य इत्यर्थः । प्रियतमादिष्टमिति—सोऽप्येवमस्मासु नोपदिशेदिति विभाव्येति भावः । द्वितीयार्थे, तेन प्रेमसाक्षात्कारसूचकेन संदेशेनागता स्मृतिः साक्षात्कारस्य स्मरणं यासां ताः । तृतीयार्थे, तेनाप्रकटप्रकाशे संयोगं सूचयता संदेशेन गता स्मृतिर्जातिस्मरवत्तत्त्संस्काररूपा यासां ताः । अंत्यार्थद्वये, अत एव प्रीताः प्राप्तपरमानंदाः । अत एव विश्वासे हेतुः—प्रियतमेति । अथ 'मय्यावेश्य मनः कृत्स्नम्' इति चतुर्थपक्षे, सा स्मृतिस्तु पूर्वं स्ववर्गवज्जातपूर्वानुरागतया दृष्टानां तासां रासे तु तत्रादृष्टानामप्येतावन्तं कालं स्वीयश्रीकृष्णानुरागावेशेनाऽननुसंहितानामनेन तु संदेशप्रभावेणानुसंधानरूपेति ज्ञेयम् । अत्रैवं श्रीभगवतोऽभिप्रायः—मम संप्रति गमनादिकं नसंभवत्येवेति सांत्वनसंदेशे प्राप्ते प्रथमत आगमनप्रतिज्ञैव समंजसा, भाविनि कालविलंबे तु न केवलं सा समंजसेति विविधसमाधानसंधायकविविधार्थसंबंधे संदेशोऽपि योग्यः यस्य, पर्यवसानार्थेन मुहुस्तत्रत्यनित्यविहारानुसंधानमपि भवेत्, कदाचिद्बहिरनुसंधाने तु मद्दर्शनतृष्णा च मुहुस्तत्स्फुरणरसास्वादचमत्कारहेतुः स्यात्, आयत्यां मत्साक्षात्कारे परमचमत्कारः स्यादिति ॥ ३८ ॥ आप्ता जगति बहवः सन्ति तद्व्यावृत्त्यर्थमाह—हितैरिति ॥ * ॥ अथागतस्मृतितया किंचिदाश्वासयुक्तानां पुनरननुसंहितप्रकटप्रकाशतया जातविरहस्फूर्तीनां वाक्यानि दर्शयितुमाह—गोप्य ऊचुरिति ॥ अहो अस्माकं निजसुखेन सिद्धेनासिद्धेन वा किं, तस्य सुखमेवास्माकं परममंगलमित्यभिप्रेत्यादौ तदभिनन्दान्ति—दिष्ट्येति । लब्धसर्वार्थैरिति तेषामप्यशेषसुखसिद्ध्या तदर्थचिंता निरस्ता । अतः कुशली सुखी । अच्युत इति कथमपि सुखच्युतिराहित्याभिप्रायेण । अधुनेति पूर्वमसौ कंससंबंधेन बहुधा दुःखं प्राप्तोऽस्तीति भावः । दिष्ट्या एतदेव भद्रमिति वा । अहितस्तद्द्वेष्टा, यदूनामघकृच्च । आप्तैस्तत्र प्राप्तैर्युदुभिः ॥ ३९ ॥ अन्याः सापत्न्यमसह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं रतिविशेषज्ञः प्रियश्च वरयोषिताम् ॥ नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानुभाजितः ॥ ४१ ॥ अपि स्मरति नः साधो गोविंदः प्रस्तुते क्वचित् ॥ गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथांतरे ॥ ४२ ॥ ताः किं निशाः स्मरति यासु सदा प्रियाभिर्वृंदावने कुमुदकुंदशशांकरम्ये ॥ रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ४३ ॥

मित्यर्थः । प्रीतिं कच्चित्पुरयोषितां करोति । स्निग्धं च तत्सव्रीडहासेनोदारं सुंदरमीक्षणं तेनार्चितस्ताभिरस्माभिर्वा ॥ ४० ॥ अन्या ऊचुः । कथमिति । तासां वाक्यैर्विभ्रमैश्चानुभाजितः पूजितः ॥ ४१ ॥ पुनरन्या ऊचुः । अपीति । किमनया चिंतयाऽस्मान् क्वचित्प्रस्तुते प्रसंगे ग्राम्या अविदग्धाः स्मरति किम् ॥ ४२ ॥ अन्या ऊचुः । ताः किमिति । कुमुदैः कुंदैः शशांकेन च रम्ये वृंदावने क्वणंति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यामस्माभिः प्रियाभिरीडिता मनोज्ञाः कथा यस्य स तदा यासु निशासु

मानाः । गदोऽग्रजो यस्य स तथा, गदस्यातिशययोद्धृत्वेन क्रूरस्वभावत्वात्तदनुजोऽपि तादृश एवेति । सौम्येति निजार्तिश्रावणाथ तमाह्लादयंत्य आहुः । अस्माभिर्वेति पूर्वकालापेक्षयोक्तम् ॥ * ॥ अत्र **विश्वनाथः**— अन्याः सेर्ष्यमाहुः । गदाग्रज इति—गदो देवरक्षितायाः प्रथमात्मजो देवकीपुत्रमात्मानं मत्वा तदनुजताभिमननेन संप्रति तदग्रजोभूदिति गोकुलसंबंधस्तस्य शिथिलीभूत इति द्योतयांचक्रुः । नोऽस्माकं स्निग्धं च तत्सव्रीडहासेनोदारं यदीक्षणं तेनार्चितोस्माभिः स संप्रति पुरयोषितां प्रीतिमुत्पादयति सहासावलोकादिभिस्ता अर्चयति किम् ? शिवशिव अस्मदर्चनीयः स तासामर्चकोऽभूदित्यस्माकमेव दौर्भाग्यमिति भावः ॥ **तोषिणी** तु— अत्र वक्तृभेदेऽपि संगतिरुत्तरोत्तरमैकमत्येनोक्तकार्यैव । तथाहि—अथ सुखस्थितिप्रकारं प्रेमलालसौत्कंठ्येनैव पृच्छन्त्यस्तदीयविलासस्फूर्तेः पुरस्त्रीणां स्मरणात्सापत्न्यस्वभावेनेर्ष्यामंकुरयन्ति—कच्चिदिति । सप्तम्यर्थे षष्ठी पुरस्त्रीणामिति । स्वेषु स्नेहशैथिल्यं पुरस्त्रीषु तदाधिक्यञ्च सूचितमिह ॥ ४० ॥ अन्यास्तदागमने ससंदेहाः । विभ्रमैः शृंगारचेष्टाभिः, नायास्यतीति भावः ॥ * ॥ अयि मुग्धाः किमिदमपि जिज्ञासध्वेऽत्र सन्देह एव नास्तीत्यन्याः सोल्लुंठसान्तःकोपमाहुः—कथमिति । रतिविशेषज्ञः स सांप्रतं पुरयोषितां प्रियोऽभूत्कथं नानुबध्येत नासक्तो भवेत्, तासां वाक्यैस्तादृशैर्विभ्रमैश्चानुभाजितः निरंतरं ता भजन्नसौ तैर्भाजितः भजनं कारितइत्यर्थः । तेन वयं ग्रामयोषितः रतिविशेषं च महामत्ताय तस्मै न दित्सामहे, तादृशीमनुकूलां वाचं विभ्रमांश्च न जानीम इत्यतो वयं तेन ताः प्राप्य त्यक्ता एवेति निश्चिनुध्वमिति पृच्छ्यत इति भावः ॥ ४१ ॥ स्वस्मरणेन तदागमनं संभावयंत्योऽन्याः । अनया पुरस्त्रीकृततदादरादिरूपया । स्वैरकथांतरे स्वच्छन्दविषयव्यवहारविशेषे । प्रस्तुते प्रसक्ते सति ॥ * ॥ अपीति—सख्यः सत्यमेव वयं त्यक्तुमर्हत्वात्तेन त्यक्ता एव । किञ्च—लोके हि अतिनिकृष्टा अपि संभुक्तत्यक्ता अपि केनचिद्गुणांशेन दोषांशेन वा स्मृत्यारूढाः कदाचिद्भवंतीति पृच्छ्यत इत्याहुः—। ग्राम्या अविदग्धाः । स्वैरकथांतरे गाननर्मप्रहेलीकवित्वादिरचनाकथामध्ये । भोः पुरस्त्रियः यूयं यथा गानादि जानीध्वे तथाऽस्मद्गोष्ठे गोप्योपि प्रायः किञ्चिज्जानंति । यद्वा—ता ग्राम्या एवं नैव जानन्तीति किमस्मानुल्लिखतीत्यर्थः । गोविन्दो गोकुलेन्द्र इति स्मरणार्हतोक्ता । साधो इति—अत्र कदापि किञ्चिन्मिथ्या न वाच्यमिति संबुद्ध्यभिप्रायः ॥ ४२ ॥ अन्याः सौंदर्याभिनिविष्टाः । तदा रासावसरे । ता निशाः ॥ * ॥ भोभो गोप्यः वक्रोक्त्याऽलं, तासां तस्य च निन्दया, स्पष्टमेव किं न ब्रूध्वे, अन्यद्वैदग्ध्यादिकमस्मद्दौर्भाग्यवशात्कृष्णेन विस्मर्यतां नाम स्ववासः कथं विस्मृत इत्यन्याः सरोदनमाहुः—ता इति । कुमुदकुन्दशशांकैर्वृंदावनीयपुलिनस्य सर्वशुक्लीकृतत्वाद्रम्ये प्रियाभिरस्माभिः सह रेमे । ईडिता विमानचारिणीभिस्स्वर्गांगनाभिरपि स्तुता कथा यस्य स इति तेन पुरांगना वराक्यः का वा कथा जानान्ति,मथुरायां क्व वैतादृशपुलिनं तदभिमतानि नृत्यगीतवादित्राणि चूडामुकुटस्थासकवनमालावीटिकादिरचना वा तत्र काः कर्तुं जानंतीति मथुरायां स्थित्या कृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अय्येष्यतीह दाशार्हस्तप्ताः स्वकृतया शुचा ॥ संजीवयन्नु नो गात्रैर्यथेंद्रो वनमंबुदैः ॥ ४४ ॥ कस्मात्कृष्ण इहायाति प्राप्तराज्यो हताऽहितः ॥ नरेंद्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥ ४५ ॥ किमस्माभिर्वनौकोभिरन्याभिर्वा महात्मनः ॥ श्रीपतेराप्तकामस्य क्रियेताऽर्थः कृतात्मनः ॥ ४६ ॥

रेमे ताः कदाचित्किं नु स्मरति वा न वेति ॥ ४३ ॥ स्वनिमित्तेन शोकेन तप्ता नोऽस्मान्गात्रैः करस्पर्शादिभिः संजीवयन्किं नु इहैष्यतीति ॥ ४४ ॥ अन्या ऊचुः । कस्मादिति । अनन्यगतित्वेन पूर्वमत्रावसत्संप्रति महदैश्वर्यं प्राप्तः कस्मादिहागमिष्यतीति ॥ ४५ ॥ अन्यास्तु परमार्थमूचुः किमस्माभिरिति । व्रजमेव ओको गृहं यासां ताभिर्वनचरीभिरन्याभिर्वा राजकन्याभिर्महात्मनो धीरस्य किं च श्रीपतेः । तदपि आस्ताम् । स्वत एवाप्तकामस्यात एव कृतात्मनः पूर्णस्य किं कोऽप्यर्थः क्रियेत न कश्चि

स्य सर्वमेव सुखमस्तीभूतमिति तदीयानंदाभावमेव स्मृत्वा वयं दुःखेन म्रियामहे, वयमिव तत्र काश्चित्तदभिमता विलासिन्यस्स्युश्चेत्ताभिः सह रासलास्यवेणुवाद्यादिविनोदं च शृणुयाम चेत्तदात्र तद्विरहेऽपि वयं सुखेनैव वर्तेमहीति ध्वनितम् ॥ अत्र तोषिणी—अहो नागरीगणप्राप्त्याऽस्मान्वा न स्मरतु तद्रासक्रीडारात्रीरपि कचित्स्मरतीति पृच्छन्तीत्ययमर्थः । यः खल्वस्माभिर्दुर्भिक्षभिक्षुकीभिरिव सांप्रतमीडिता मनोज्ञा तस्य युष्माकं च मनोरमा कथा ‘ दिष्ट्याहितो हतः कंसः’ इत्यादिरूपा यस्य स तवेश्वरः साक्षान्नामनिर्देशेन लघूकर्तुं शंकनीयस्ताः सांप्रतिकीभ्यः पराभ्यश्च विलक्षणास्तत्र च बहुत्वाद्विस्मर्तुमपारणीया निशाः किं कदाचिदपि स्मरति । यासु कुमुदादिभी रम्यत्वाद्विलक्षण एव वृंदावने तदा तदानीं याः काश्चन तस्य प्रिया आसन् । एवा भवतास्तासु दृश्यमाना दुःखावस्था तासु न संभवतीत्यस्मादृशीभ्यः सर्वाभ्योप्यन्याभिरेव ताभिः सह तस्य तासाञ्च क्वणच्चरणनूपुरतयाऽतिमनोहरायां रासगोष्ठ्यां रेमे स्वयं चिक्रीडेति ॥ ४३ ॥ स्वशब्दोऽत्र कृष्णार्थकः । संजीवन्संतोषयन् । अयीति कोमलामंत्रणे ॥ * ॥ ननु स्मरत्येवेति चेत्तर्हि तस्यात्रागमनं नैव प्रतीम इत्याशयेन रासस्मरणजनितोत्कंठाभरेण तदागमनसंदेशं विस्मृत्यैव पृच्छन्ति—अयीति । दाशार्हः दाशार्हाणां राजा, तत्पालनार्थं व्यग्रोपीति भावः । स्वकृतया शुचेति तत्स्पर्शैकप्रतीकारत्वमन्यथाऽस्निग्धहृदयाविज्ञत्वं स्त्रीवधादभीरुत्वञ्च ज्ञापितम् । गात्रैः सम्यग्जीवयन्निति तत्स्पर्शानाममृतमयत्वम् । तत्र तु वर्तमानप्रयोगेण समागमकाल एव करस्पर्शादिकं विलंबासहत्वं च । यथेति तात्कालिकं तदेकसाध्यत्वञ्च दृढीकृतम्, गर्जनादिनेव संदेशादिना च तापापनोदनं निराकृतम् ॥ विश्वनाथस्तु—भोः सख्यः अत एव तस्मात्पुरादुद्विग्नः कृष्णः शीघ्रमत्रागमिष्यतीति तदागमनमाशास्यमाना अन्यास्तत्समभावा आहुः—अयीति । स्वनिमित्तेन शोकेन तप्ता अस्मान्स्वगात्रैर्दर्शितैः संजीवयन् किं नु इहैष्यतीति ॥ ४४ ॥ अन्या व्यवहारनिपुणाः । अनन्यगतित्वेनान्याश्रयाऽभावेन । अत्र गोकुले । “राज्यं राज्ञां समूहे च प्राकाश्ये नृपकर्मणि । पंक्तिकृत्ये महैश्वर्ये मुख्यामात्ये नृपस्य च ॥” इति निरुक्तिकारः । प्राप्तं राज्यं महैश्वर्यं मुख्यामात्यत्वं वा येन स तथा ॥ * ॥ तच्छ्रुत्वाऽन्या वाम्यमयस्वभावाः—भोः सख्यः कृष्णस्य रासादिभिः किं सुखं तावन्मुग्धा यूयं किमपि न जानीध्वे तदभिमतसुखं मन्मुखाच्छृणुतेति वक्रोक्त्याऽऽहुः—कस्मादिति । अत्र गोचारणक्लिष्टस्तत्र प्राप्तराज्योऽभूत्, अत्र गोपजातिभिस्तत्रापि परकीयाभिः किं सुखं, तत्र तु नरेन्द्रेत्याद्युद्वाह्येति । क्वचित्पुराणे मथुरास्थस्य कृष्णस्य रुक्मिण्युद्वाहः कल्पभेदेन ज्ञेयः । प्राप्य मथुरामित्यधिकृत्य “रामानिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ” इति गोपालतापिन्यां च श्रूयते ॥ अत्र तोषिणी—नन्वेष्यत्येवेति चेन्न घटेतेत्याहुः—कस्मादिति । तदेव दर्शयन्ति—प्राप्तेत्यादिना । ननु तथापि भवतीनां विरहार्त एष्यत्येव तत्रान्यथा संभावयन्ति—नरेंद्रेति । प्रीत इति—अस्मद्द्वेषजातेस्तस्य तेनैवाभीष्टक्षत्रियजातित्वसिद्धेः कांताविशेषलाभाच्च । ननु तथा सत्यपि मातापित्रादीनामत्रत्यानां परमसुहृदां प्रीत्यर्थमेष्यत्येव, तत्राहुः—सर्वेति । सर्वे ते लब्धाः परेष्वधुना कापेक्षेत्यर्थः । यद्वा—तत्रत्यैः सुहृद्भिरत्रागच्छन्नसौ निवारयितव्य इति भावः ॥ ४९ ॥ अन्या आप्ताः । न केवलं धीर एव किन्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिंगला ॥ तज्जानतीनां नः कृष्णे तथाऽप्याशा दुरत्यया ॥ ४७ ॥ क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदम् ॥
अनिच्छतोऽपि यस्य श्रीरंगान्न च्यवते क्वचित् ॥ ४८ ॥ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे ॥ संकर्षणसहायेन कृष्णेनाऽऽचरिताः प्रभो ॥ ४९॥

दिति ॥ ४६ ॥ यतोऽघटमानापि या कृष्णस्य संगतिः सैवास्मान्व्याकुलयत्यतो नैराश्यमेव परमं सुखं तच्चातिदुष्करमित्याहुः परं सौख्यमिति । स्वैरिणी कामचारिणी ॥
॥ ४७ ॥ संविदमेकांतवार्ताम् ॥ ४८ ॥ किं च तद्विस्मृतौ न तावद्दुःखमस्ति साऽपि नास्माकं संभवतीत्याहुः सरिच्छैलेति त्रिभिः । आचरिताः सेविताः ॥ ४९ ॥

सर्वसौंदर्याधिष्ठानभूतलक्ष्मीपतिरपीत्याहुः—किं चेति । तदपि श्रीपतित्वमपि । आस्तां तिष्ठतु, न तयापि तस्य किञ्चित्कृत्यमस्तीत्याहुः—स्वतः स्वभावत एवाप्तकामस्य प्राप्ताखिलाभीष्टस्य । अत एवाप्तकामत्वादेव । अर्थः प्रयोजनम् ॥ * ॥ नरेंद्रकन्योद्वाहस्य हेतुत्वमाक्षिप्य तास्वपि कारुण्यं व्यंजयन्त्य इव तस्य नैरपेक्ष्यमेव हेतुं सेर्ष्यमाहुः—किमिति । तत्र हेतुः—महात्मनः, महांस्तदुपर्यपि वर्तमान आत्मा चित्तं यस्य । यतः श्रीपतेः श्रियः सर्वैराश्रयितुमभीष्टाया अपि तत्रतत्र तदनुगामिन्या लक्ष्म्याः पत्युः । अत एवाप्तकामस्य यथेष्टविषयपूर्णस्य । अत एव कृतात्मनः लब्धधृतेरिति । ततः काचिदपि कन्यका तस्य विवाहाय नाहर्तव्येत्युद्धवं प्रति च निगूढः प्रयत्नः सूचितः ॥ अत्र **विश्वनाथः**—भोः सहचर्यः प्रेमशून्ये कृष्णे ईर्ष्यासूयादिकं त्यज्यतामिति वदंत्यस्तस्य सर्वत्रौदासीन्यमन्या आहुः—किमिति । ननु श्रीपतित्वात्तस्यां तस्य प्रेमास्ति चेन्न, आत्मकामस्य कृतात्मनः पूर्णस्वरूपस्य तयापि किं कोर्थः क्रियेत क्रियते। 'युगपर्याप्तयोः कृतम्' इत्यमरः । पर्याप्तिः परिपूर्णता । अन्यत्पूर्ववत् ॥ ४६ ॥ यतो यस्मात् । अघटमाना भवितुमशक्या या । तच्च नैराश्यम् । पिंगला तन्नाम्नी वेश्या । तथापि नैराश्यं परं सुखमिति ज्ञाने सत्यपि । आशा तृष्णा । दुरत्यया त्यक्तुमशक्या ॥ * ॥ तर्हि तत्प्राप्त्याशा त्यज्यतामिति चेन्न, सा सर्वथैव त्यक्तुमशक्येत्याहुः—परमिति । तदपि कृष्णे आशा कृष्णविषया ह्याशा दुरत्यया सर्वैरेव दुस्त्यजा । पिंगलायाः खलु पुरुषान्तर एवाशाऽऽसीदतः सा तया त्यक्तेति भावः ॥ अत्र **तोषिणी**—परं परमम् । हि एव नैराश्यमेव । स्वैरिणीत्वेन तथा वक्तुमनर्हापीत्यपिशब्दार्थः । न च मंतव्यं तद्वयं न विद्म इत्याहुः—तन्नैराश्यमेव सुखमिति जानतीनामपीत्यन्वयः । तथापि तादृश्याशा दुरत्यया कथमपि त्यक्तुं न शक्येत्यर्थः । कुतः—कृष्णे चित्ताकर्षके श्रीव्रजेन्द्रनंदन इत्यर्थः । तत्राप्यघटमानायाः श्रीकृष्णसंगतेराशैवास्मानाकुलयतीत्युन्नेयम् । स्वैरिण्यपीत्यनेन " तास्तन्मनस्कास्तत्प्राणास्तदर्थे त्यक्तदैहिकाः । तमेव दयितं प्रेष्ठमात्मानं मनसा गताः ॥" इति वयं स्वैरिण्यस्तु न मन्तव्या इति व्यज्य श्रीभगवता 'बल्व्यो मे मदात्मिकाः' इतिवत्तथा स्वयमपि 'जारो भुक्त्वा रतां स्त्रियम्' इत्यर्थान्तरन्यासीकृत्य तस्मिंस्तत्परिहारवत् '—मधुपुर्यामार्यपुत्रोऽधुनास्ते' इति साक्षादुक्तिवच्च परमसाधुशिरोमणावुद्धवे संकोचः परिहृत इति च ज्ञेयम् ॥ ४७ ॥ न केवलमस्माकमेव कृष्णाशा दुस्त्यजा किं त्वन्यस्यापीत्याहुः—क इति । यस्य कृष्णस्य ॥ * ॥ तदेवाभिव्यंजयंति—क इति । को जनो लोकमात्रं किं पुनः स्त्रीत्यर्थः । उत्सहेत अध्यवसायमपि कुर्यात् किं पुनस्त्यजेदिति, संत्यक्तुम् अदार्ढ्यज्ञानैरप्यवज्ञातुं किं पुनर्विस्मर्तुम् । उत्तमाः श्लोका गुणरूपादिवर्णा अपि यस्य तस्य संविदम् 'न पारयेहम्' इत्यादिरूपाम् । संत्यक्तुमिति संशब्देन मानादावप्यंतस्त्यागो निषिद्धः । कुतः—तदाह—अनिच्छत इति । 'नाहमात्मानमाशासे' इत्यादिवन्नवनवप्रियानुरागेण प्रियामनपेक्षमाणस्यापि श्रीर्लक्ष्मी रेखारूपेण वर्तमाना अंगाद्वक्षसः क्वचित्कदाचिदपि न च्यवते नापयाति॥**विश्वनाथस्तु**—लोभी खलु लोभ्यं वस्तु प्राप्नोतु न प्राप्नोतु वा किन्तु तत्रौत्सुक्यं त्यक्तुं नोत्सहत इत्याहुः—क इति । उत्तमश्लोकस्य कृष्णस्य संविदं सौंदर्यमाधुर्याद्युपलब्धिं त्यक्तुं क उत्सहेत,न कोपि । अन्यत्समम् ॥ ४८ ॥ अतिदुःखिता आहुः—किञ्चेति । तद्विस्मृतौ कृष्णविस्मरणे । सापि तद्विस्मृतिरपि । इम इति—तदाविष्टमनस्त्वात्प्रत्यक्षीभूता इवेति प्रतीयते तासामिति भावः । प्रभो इति—तद्दूतत्वात्त्वमप्यस्माकं प्रभुरेवेत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनःपुनः स्मारयंति नंदगोपसुतं बत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥ ५० ॥ गत्या ललितयोदारहासलीलावलोकनैः ॥ माध्व्या गिरा हृतधियः कथं तद्विस्मरामहे ॥ ५१ ॥ हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ॥ मग्नमुद्धर गोविंद गोकुलं वृजिनार्णवात् ॥ ५२ ॥

॥ ५० ॥ हे उद्धव तं कथं विस्मरामेति ॥ ५१ ॥ ५२ ॥

भिप्रायः । यद्वा—त्वं प्रभुरसीत्यतो गोपीवच्छ्रीकृष्णावेशं कुर्वीति शुकोक्तिः ॥ * ॥ किञ्च—तद्विस्मृतौ सत्यामाशापि हीयते सा त्वस्माकं नैव घटत इत्याहुः—सरिदिति त्रिभिः । आचरिता अनुशीलिताः, श्रीनिकेतैर्ध्वजवज्रादिचिह्नशोभायुक्तैः, शिलादिष्वद्यापि वर्तमानैः । तोषिण्यवतरणिका पूर्ववत् । वनोद्देशेन व्रजोपि गृह्यते तदंतर्वर्तित्वात्तस्येति सर्वाण्यवस्थानानीत्यर्थः । वेणुरवा इदानीमपि कैश्चित्क्रियमाणाः, इमे तु स्फूर्त्या प्रत्यक्षा इव क्रियन्ते । तत्र गाव इत्यत्र लिंगं विपरिणमनीयम् । आचरिता इति व्याख्यातमेव । अन्यकृतवेणुरवस्यापि तदनुशीलित्वं जात्यैक्यात् । संकर्षणसहायेनेति—तत्रतत्र शोभादिपारिपोषात्तेनापि सहागमनमीहितम् । पुनःपुनरिति स्मरणाऽविच्छेदेऽपि स्मरणविशेषाणां पुनःपुनरतिशायिता ध्वनिता । प्रभो इति परमदैन्येन । यद्वा—हे प्रभो सर्वदा समर्थेति त्वमेवात्र न्यायकर्ता भवेति भावः ॥ ४९ ॥ नंदगोपसुतमिति तस्य तत्रत्यत्वेऽप्यन्तार्हितलीलत्वात्तथोक्तिर्लोकदृष्ट्येति ज्ञेयम् । बताश्चर्ये । सार्धेनान्वयः । ननु सरिदाद्यवलोकनं श्रीकृष्णं स्मारयत्यन्यदा तन्नास्तीत्यागतमिति तत्राह—तत्पदकैः, तस्य कृष्णस्य प्रशस्तपदैः । प्रशस्तता तत्र कथमितिचेदाह—श्रीनिकेतैर्ध्वजवज्रादिश्रीविशिष्टैः ॥ * ॥ श्रीनंदाभिधस्य गोपस्य राज्ञः सुतमिति भवद्विधोपदेशात्प्रयत्नशतैरीश्वरत्वेन स्मर्ययिष्यमाणमपि तद्रूपं तथैव स्मारयन्तीति ज्ञानाद्यवसरो व्यंजितः । ननु तत्रतत्रानुसंधानमात्रं बलात्त्यक्त्वा तं विस्मरत, तत्राहुः—श्रीनिकेतैर्ध्वजाद्यसाधारणलक्षणैः । श्रियः सर्वस्याः संपदः शोभाया वा निकेतैस्तस्य पदकैः, सर्वत्रोदितैस्तल्लीलाभेदेन पदचिह्नानां प्रकारैः । स्थूलादित्वात्प्रकारे कन् । तदानीमपि तेषामनुवृत्तिः प्राग्व्युत्पादितैव ॥ ५० ॥ माध्व्या मनोहरया । तत्तम् ॥ * ॥ ननु वस्त्रेण नेत्रमावृत्य बुद्ध्या मनोऽन्यत्र नीत्वा सर्वं तदीयं विस्मृत्य स विस्मर्यतां तत्राहुः—गत्येति, अनया देहचेष्टामात्रमुपलक्षितम् । उदारहासश्च लीलावलोकनानि च तैरिति तदयिभाव विशेषः । बहुत्वं तेषां प्रत्येकपरंपरया । माध्व्या शब्दतोऽर्थतश्च मधुरया । एवं विविधचेष्टया हृतबुद्धयस्तद्गत्यादिकं तदीयसौहृदं वा कथं केनोपायेन विस्मरामोऽपि तु न कथमपीत्यर्थः । यद्वा—पुनरन्यो वा तदुपाय उपदिश्यतामित्यर्थः ॥ अत्र **विश्वनाथः**—ननु शरदादिषु कुत्राप्यगत्वा चैलेनाक्ष्यावृत्य धिया मनोऽन्यत्र प्राप्य स विस्मर्तव्यस्तत्राहुः—धीर्नास्त्येव तेनैव हृतत्वादित्याह—माध्व्या मधुमय्या । हे उद्धव ॥ ५१ ॥ स्वजपनीयमंत्रं प्रकाशयंत्य आहुः—हे नाथ सर्वैश्वर्ययुक्त । रमयापि स्वाभीष्टावाप्तये नाथ्यते प्रार्थ्यत इति तथा । व्रजनाथानां गोपीनां गोपानां वार्तिनाशन । यद्वा—व्रजं नाथयंत्युपतापयंतीति व्रजनाथाः कंसादयस्तानार्त्या पीडनेन नाशयतीति तथा । भिन्नपदे वा । गोकुलं तद्वासिनः । त्वद्वियोग एव वृजिनं दुःखं तदर्णवात्, न हि गोविन्दस्य गोकुलोपेक्षोचितान्यथा नाम्नोऽन्वर्थता न स्यादित्यभिप्रायः ॥ * ॥ ततश्चाऽस्माकं दुःखमस्योपदेशान्नापगच्छेदिति तमुद्धवमनादृत्य समुत्थिततया मथुराभिमुखीभवंत्यः समुन्नतनादेन स्वकान्तमेव संबोधयंत्यः सदैन्यरोदनमाहुः । तत्र च तस्य गोकुलप्रियतास्मरणेन गोकुलदुःखासहनतया स्वदुःखमप्यनादृत्य गोकुलरक्षामेव प्रार्थयन्ते—हे कृष्णेति । सर्वतदीयाद्भुतरूपगुणक्रीडाक्रोडीकारितया संततं निजांतःस्फुरता विशेषनाम्ना प्रथमतः संबोधनम् । हे रमानाथेत्यादिना विशेषेण नामभिरिति ज्ञेयम् । हे कृष्णेत्यत्र हे नाथेति क्वचित्पाठे

१ हे कृष्ण हे रमानाथेति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वराः ॥ उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजम् ॥ ५३ ॥

श्रीकृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं ज्ञात्वा ॥ ५३ ॥

प्रथमतः स्वीयभावस्फूर्तिः, हे सर्वासामस्माकमासां स्वामिन्नित्यर्थः । हे रमानाथेति रमापर्यंतनाथ्यमानकृपादृष्टितया परमदुर्लभ । तत्र च 'तस्मान्मच्छरणं गोष्ठं मन्नाथम्' इत्याद्यनुसारेण व्रजस्य नाथ । आर्तिनाशनश्च सन् निर्वाहिततादृशसंकल्प । अतोऽधुना तु दुःखसमुद्रे मग्नं गोकुलं सर्वांस्तत्रत्यान्प्राणिन उद्धर । 'वृजिनार्णवात्' इति क्वचित्पाठः । सकृन्निजदर्शनेन सर्वं दुःखमपास्य पुनर्जीवयन्सुखी कुर्वित्यर्थः । तत्र च हे गोविंदेति संबोध्य गोकुलेंद्रतयाभिषिक्तस्य तव गोविन्दतापालनार्थमप्यवश्यमेवेदं कृत्यमिति सूचितवत्यः । "स्वेषामात्मवियोगार्तिमप्यवज्ञाय वल्लभाः । व्रजस्य हर्तुं वृष्वाना निरस्येत्कथमच्युतः ॥" इति ॥ अत्र **विश्वनाथः**—तत उद्धवमप्यनादृत्य परमार्त्या मथुराभिमुखीभवन्त्यः कृष्णोद्देशेनैव संबोधयन्त्यः सगद्गदमाहुः—हे कृष्ण अयोग्यानामप्यस्माकं चित्ताकर्षक । हे रमानाथ रमयापि नाथ्यमानाद्भुतमाधुर्यरसविलासादिमहासंपत्ते । हे व्रजनाथ व्रजस्थानां नाथेति । हे आर्तिनाशन पूर्वं गोवर्द्धनं धृत्वेंद्रकृतार्तिमनाशयद्भवानित्यर्थः । संप्रति तु त्वद्विरहादेव सर्वतोऽप्यधिके वृजिनस्यार्णवे एवायश्वो वा नश्यदेव गोकुलमिति स्वयमेवागत्योद्धर । हे गोविंद स्वपालितचरीः स्वीयगवीर्विन्दस्व, अलं दूतप्रस्थापनयेति भावः ॥५२॥ ततः प्रार्थनोत्तरम् । ता गोप्यः । अधोक्षजं ब्रह्म । तमधोक्षजमेवोद्धवोपदेशात आत्मानं ज्ञात्वा निरस्तवियोगतापाः ॥*॥ अत्र **तोषिणी**—अतः पुनरपि तासां वैयग्र्यं दृष्ट्वा कथितैः 'भवतीनां वियोगो मे' इत्यादिकैः 'मय्यावेश्य मनः कृष्णे' इत्याद्यंतैर्महामंत्रैरिव कृष्णसंदेशैर्व्यपेतो विरहोत्थज्वरो महासंतापो न तु तत्प्राप्त्यैकनाश्यो विरहो यासां तादृश्यः सत्यः संप्रत्येवोद्धवं यथा स्वास्वस्थमातिथ्योचितं पूजयांचक्रुरिति पूर्वमारब्धापि पूजा दुःखेन वितथा जातेत्यधुना तु विशेषेणैवेत्यर्थः । ननु संदेशमात्रेण कथं व्यपेतविरहज्वरत्वन्तत्राह—ज्ञात्वेति । तत्र प्रथमार्थे यस्यात्मनो ज्ञानं संदिष्टं तमात्मानमधोक्षजं श्रीकृष्णमेव मत्वा न त्वन्यम्, तत्रायमभिप्रायः—" अनुवादमनूक्त्वा तु न विधेयमुदीरयेत् " इति न्यायादत्र तदुपदेशाज्ज्ञातत्वेन तस्यात्मत्वमनूद्य पुनरधोक्षजापरपर्यायश्रीकृष्णत्वमेवाभिधीयते । तत्रात्मशब्देन सर्वात्मोच्यते, अधोक्षजशब्देन रूढिवृत्त्या प्रसंगसंगत्या च श्रीकृष्ण एव प्रतिपाद्यते, तत्रैव योगवृत्त्या सर्वेन्द्रियाधिकारित्वम्, तत्र च सति मया सर्वात्मनेति यत्पूर्वमुपदिष्टं तत्खलु लक्षणया निर्विशेषस्वरूपत्वेनैवेत्यविद्यावादिनः । परमविशेषवत्परमस्वरूपत्वेनैवेत्याचिन्त्यशक्तिवादिनः । तादृशविशेषवत्त्वेपि मे मयेत्युक्तेः कृष्णतया विलक्षणेनेति प्रकरणदार्शिनः । तथैव " कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् " इत्यादौ स्वाभाविकपरमप्रेमास्पदत्वोचितं सर्वात्मत्वं स्थापयित्वा ' देहीवाभाति मायया ' इत्यत्र देहिशब्दोक्तजीवत्वं निषिद्धमिति तत्र व्याख्यातमेव । तत्र यद्यपि गोवर्द्धनमखप्रवर्तनाय कर्मवादादिवदभीष्टमप्यत्र प्रथमार्थे परमरहस्यांतरार्थद्वयाच्छादनाय स्वस्मादुपरततया विरहसंतापमयकालक्षपणाय च श्रीभगवता निर्विशेषत्वमेव प्रतिपादितं, प्रथमतस्ताभिरप्यपेक्षितं तथापि पुनस्ताभिस्तच्छ्रवणाद्विलक्षणस्वरतिस्वाभाव्येन श्रीकृष्णस्यैव सदा सर्वत्र स्फुरणान्निजसर्वेन्द्रियप्रवर्तकत्वेनाभिगमाच्च । तत्र श्रीकृष्णत्वमेव पर्यवसाय्यते स्म तदेवास्माभिरप्यनूद्य विधेययोरात्माधोक्षजशब्दयोः क्रमबलाद्दृश्यते, अन्यथाऽद्वैतावेशे सति पूज्यपूजकत्वाननुसंधानात्ताभिरुद्धवस्य पूजनं न प्रसज्येत च । द्वितीयेऽर्थे—यथाऽसावस्माननुभवति सदा तथा वयमपि तमित्यविनाभावस्फूर्तेरात्मानमधोक्षजतादात्म्यापन्नं मत्वेति व्याख्येयम् । तृतीयेऽर्थे—यथा तेन संदिष्टं तथैवात्मानं मत्वेत्यर्थः । ' मय्यावेश्य मनः कृष्णे ' इति । चतुर्थपक्षे तु—यथा कृष्णेनादिष्टं तथात्मानमचिरात्कृष्णं प्राप्स्यंत तथैवाधोक्षजं च कृष्णमचिरात्स्वं प्रापयिष्यन्तं ज्ञात्वा निश्चिन्त्येत्यर्थः । चशब्दं विनापि तदर्थः स्वयं गम्यते ' ब्रह्मेति परमात्मेति भगवान् ' इतिवत् । किन्तु "ततस्ताः कृष्णसंदेशैर्ज्ञात्वात्मानमधोक्षजम् " 'व्यपेतविरहज्वराः' 'उद्धवं पूजयांचक्रुः ' इति क्रममकृत्वा यदुद्धवमित्याद्यनन्तरम् ' ज्ञात्वात्मानमधोक्षजम् ' इति पठितं तत्खलु यथा श्रीनंदस्य गर्गदर्शने ' तं दृष्ट्वा ' इत्यादि ' आनर्चाधोक्षजधिया ' इति तदाश्वासने च 'वासुदेवधियार्चयत् ' इत्यातिथ्यौचित्यं तथैव संगच्छते, यदत्रापि विशेषणद्वयेन तासां तत्र परमात्मदृष्टिरेव निर्दिष्टेति ॥ **विश्वनाथस्तु**—ततश्च तासु दुःखेनाशामपि शिथिलयित्वा मर्तुमुद्यतासु अन्यानप्यतिरहस्यान्संदेशानुक्त्वो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उवास कतिचिन्मासान्गोपीनां विनुदञ्छुचः ॥ कृष्णलीलाकथा गायन्रमयामास गोकुलम् ॥ ५४ ॥
यावंत्यहानि नंदस्य व्रजेऽवात्सीत्स उद्धवः ॥ व्रजौकसां क्षणप्रायाण्यासन्कृष्णस्य वार्तया ॥ ५५ ॥

विनुदन्नपनयन् ॥ ५४ ॥ ५५ ॥

द्धवस्ता आनन्दयामासेत्याह—ततस्ता इति । ततस्तदनन्तरं ये कृष्णसंदेशाः पूर्वसंदेशेभ्यो भिन्नास्तैरित्यन्वयः । ते च संदेशाः श्रीशुकेनाविवृता अपि फलतो ज्ञेयाः । यथा—भोः प्राणप्रेयस्यः संप्रेषितस्योद्धवस्याग्रे युष्माभिश्च क्षूंषि मुद्रयितव्यानि ततश्च पूर्वं यथा गोपालबालकाश्चक्षुर्मुद्रणेन मुंजाटवीदावानलादुद्धृतास्तथैव विरहानलाद्भवतीरुद्धरिष्यामि, पश्यत मे योगबलमिति संदेशश्रवणेन ता यदैव चक्षूंषि मुद्रयामासुस्तत्क्षणमध्य एव शतकोटिवर्ष समयं योगमायया प्रवेश्य तत्र ताभिः सह रासवृन्दावनविहारद्यूतमधुपानजलविहारहिन्दोलनादिविलासानन्यालक्षितान्कृष्णस्तावच्चक्रे यावद्भिः सा विरहपीडा सम्यगेव विस्मृता भवेत् । ततश्च तासामंगान्यानन्दसमुदितान्यालक्ष्य मुहूर्तानन्तरं—भोः स्वामिन्यः सांप्रतं चक्षूंष्युन्मीलयतेत्युद्धवेनोक्ते सति ताश्चक्षूंष्युन्मील्याधोक्षजम्—अधः कृतेभ्योऽक्षिभ्यो निमीलितेभ्यो नेत्रेभ्यः परःसहस्रानन्दप्राप्त्या पुनर्जातमिवात्मानं स्वं ज्ञात्वा पूजयांचक्रुः । प्रतिक्षणं यतमानोऽप्यहं यन्न शक्नोमि तत्रायं काल एव कर्मैव व्याख्यातलक्षणं प्रेमैव वा प्रतिबन्धक इत्यहं शंके । इत्येवं प्रकारकैः संदेशैर्व्यपेतो विरहज्वरः स्वेषु तत्प्रेमाभावनिश्चयलक्षणः संतापो यासां ताः । अधोक्षजं कृष्णमात्मानम् आ अतुल्यं विरहसंतापजर्जरं ज्ञात्वा । किं वा—आत्मानम् आत्मनः स्वानेव आप्राणा यस्य तथाभूतमधोक्षजं कृष्णं ज्ञात्वोद्धवं पूजयांचक्रुरिति—भो उद्धव साधूक्तमतः परं कष्टेनापि स्वप्राणा आत्मानं स्वस्वजीवात्मानमधोक्षजं परमात्मानं ज्ञात्वेति । प्रकटोऽर्थोऽसुरमोहनार्थ एव न तु वास्तवः शास्त्रस्यास्य मोहिनीसाधर्म्यात् । न हि केनापि प्रेमरसास्वादिना भक्तेनैकात्म्यज्ञानं कदापि रोचितम्, आभ्यः प्रेमिभक्तमुकुट शिखामणिभ्यस्तत्कथं रोचताम्, "तत्कथामृतपाथोधौ विहरंतो महामुदः । कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥" इत्यार्षशास्त्रतात्पर्याभिज्ञैः स्वामिचरणैरप्युक्तम् । नापि बलवताप्यात्मज्ञानेन संपूर्णः प्रेम क्वाप्यावरीतुं शक्यो दृष्टः, वसुदेवार्जुनयोरपि महैश्वर्यदर्शनोद्दीपितदास्यभक्त्यैव वात्सल्यसख्यभावावृतौ न तु ब्रह्मज्ञानेन । यत्तु 'ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः' इति व्रजौकसां ब्रह्मरसनिमग्नत्वं श्रूयते तदपि ब्रह्मज्ञानस्य तदरोचकत्वज्ञापनार्थमेव, त एव तत्रोद्धृता इति पदं प्रयुक्तं यथा संसारकूपाज्जीवा उद्ध्रियंते तथैव व्रजौकसस्ते ब्रह्मरसादुद्धृता इति, किञ्चासामुत्पन्नात्माभेदज्ञानवत्त्वे "गोप्यो हसंत्यः पप्रच्छू रामसंदर्शनादृताः । कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥" इति । "कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः" इत्याद्यग्रिमवचनानि साभिमानान्यज्ञानद्योतकानि संभवेयुरिति विवेचनीयम् ॥ ५३ ॥ अपनयन् दूरीकुर्वन् । कृष्णस्य लीला यासु ताः ॥ * ॥ ततश्च श्रीगोपीप्रमुखानां श्रीकृष्णस्फूर्तौ साक्षात्कारत्वप्रतीत्या तन्नित्यलीलायां मानसप्रत्यक्षमयप्रवेशेन 'मय्यावेश्य मनः कृष्णे' इति तदाश्वासने च प्रायो विच्छिन्न एव शोक इत्याह—उवासेति त्रिभिः । विनुदन् बहिर्विरहानुसंधानेन विस्मृतौ सत्यां पुनःपुनस्तैः संदेशैरपनुदन् । एतदुपलक्षणत्वेन श्रीनंदयशोदयोरपि तथा तदपनयनं ज्ञेयम् । यत्त्वन्यद्गोकुलं तज्जनवृंदं तत्स्फूर्त्यैव तत्साक्षात्कारप्रतीतिमयं तदपि माथुरीर्गोकुलसंबंधिनीश्च श्रीकृष्णस्य लीला कथा गायन् रमयामास तल्लीलानां साक्षादेव स्फोरणेन प्रीणितवान् ॥ ५४ ॥ क्षणप्रायाणि क्षणकल्पानि, क्षणो (द्वा) दशपलात्मकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् ॥ कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसाम् ॥ ५६ ॥ दृष्ट्वैवमादि गोपीनां कृष्णाऽऽवेशात्मविक्लवम् ॥ उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५७ ॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव निखिलात्मनि रूढभावाः ॥ वांछंति यद्भवभियो मुनयो वयं च किं ब्रह्मजन्मभिरनंतकथारसस्य ॥ ५८ ॥

सरिद्वनगरिदर्यादिषु प्रत्येकं श्रीकृष्णलीलासंप्रश्नादिभिर्व्रजौकसां तं संस्मारयन्रेमे॥५६॥कृष्णावेशेनात्मनो मनसो विक्लवं वैक्लव्यं दृष्ट्वा। ता गोपीर्नमस्यन्नमस्करिष्यन्नुत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्या भवतीति दर्शयितुं तासां महत्त्वं पंचभिर्जगौ उवाच ॥ ५७॥ एता इति । एताः परं केवलं तनुभृतः सफलजन्मानः रूढभावाः परमप्रेमवत्यः। यदिति । यं रूढं भावं भवभियो मुमुक्षवो मुनयो मुक्ता अपि वांछंति वयं च भक्ता अपि । अतोऽनंतस्य कथासु रसो रागो यस्य तस्य ब्रह्मजन्मभिर्विप्रसंबंधिभिः शौक्लसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिः किं कोऽतिशयः । यत्र तत्र जातः स एव सर्वोत्तम इत्यर्थः । यद्वा अनंतकथासु रसो यस्य तस्य ब्रह्मजन्मभिश्चतुर्मुखजन्मभिरपि किं न किम

कालः ॥ * ॥ तदेव विवृणोति—यावंतीति।क्षणप्रायाणीति—उद्धवस्यान्वर्थनामत्वाद्भगवताप्यानंददातृत्वस्वशक्त्यर्पणाचेति गम्यते ॥५९॥ संप्रश्नैरत्र किं कृतं—भगवतात्र किं कृतमित्येवंरूपैः ! पार्श्वद्वयोन्नतनिम्नानिम्नपत्रकुसुमितवृक्षनिविष्टा स्थली द्रोणी, सानुविशेषो वा । हरिदासो हरिसेवको ज्ञातात्मतत्त्वो वा "दासो भृत्ये तया शूद्रे ज्ञातात्मनि च धीवरे" इति मेदिनी ॥ * ॥ सम्यक्स्मारयन् साक्षात्कृतनिर्विशेषं कुर्वन्नित्यर्थः । तादृशानामपि तेषां स्मरणे यत्सम्यक्त्वं तत्तथैव पर्यवस्यतीत्यत एव स्वयमपि रेमे । गत्रादिवत्स्फूर्तिविशेषाद्द्रुमाणामपि कुसुमितत्वमुक्तम् ॥ ५६ ॥ एवमादि पूर्वोक्तभ्रमरोद्देश्यकगानादिप्रार्थनांतरूपम् । अन्याय्याऽयोग्या । तासां गोपीनाम् । उत्कृष्टो धवः स्वामी श्रीकृष्णो यस्य स उद्धवः 'धवः पतिर्धवो भीरुः' इत्यनेकार्थध्वनिमंजर्याम् । उद्धुनोति द्रावयति निजसंगिनामज्ञानमिति वा ॥ * ॥ एवं यद्यपि सर्वेषामेव व्रजवासिनां श्रीकृष्णे सर्वविलक्षणः प्रेमा तथापि श्रीगोपीषु तस्य परमचमत्कारमयी भक्तिर्जातेति । दृष्ट्वेत्यादि—एवमुक्तप्रकार आदिर्यस्य तच्चरितमिति शेषः । कृष्णावेशेनात्मनो विक्लवो दिव्योन्मादादिर्यत्र तदननुभूतं दृष्ट्वा परमप्रीतः तद्दर्शनात्स्वभाग्यस्फुरेण चासां गुणानुमोदनेनैव वात्यंतहृष्टो नमस्यन्नमस्कर्तुं स्तोत्रतया जगौ, आवेशेन सुस्वरं तुष्टाव । किं वा—झटिति प्रणमन्नेव जगौ, प्रत्यहं गमनागमनसमये किंचिद्व्यवहितदूरे स्थित्वेति ज्ञेयम् ॥ ५७ ॥ एता गोप्यः अपि वांछाम इत्यर्थः । यतो भगवत्प्रेमैवोत्कर्षहेतुरतो हेतोः । अनन्तस्य हरेः । अतिशय आधिक्यम । यत्र तत्र यस्मिन्कस्मिन्वंशे । स एव भगवद्भक्त एव । इत्यर्थ इति—'विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम्' इत्याद्युक्तेः । ननु 'ब्राह्मणो जन्मना श्रेयान्' इत्याद्युक्तेः "ब्रह्म ब्राह्मण आत्मना" इति श्रुतेश्च तान्निन्दात्र प्रतीयतेऽतोर्थांतरमाह—यद्वेति । इत्यर्थ इति—" स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिंचितामेति ततः परं हि माम् । अव्याकृतं भागवतोऽथ वैष्णवं पदं यथाहं विबुधाः कलात्यये ॥" इति शंकरोक्तेः ॥ * ॥ गोपीमाहात्म्यविद्वर्यं सर्वभागवतोत्तमम् । तमुद्धवं प्रपद्येऽहं तद्गीतार्थविलुब्धधीः ॥ ननु भवद्भिः क्षत्रियैर्ब्राह्मणा एव नमस्या इति स्थिते 'केमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः' इति कस्यचिद्दुर्मतमाशंक्य तासामेव सर्वोत्तमतनुत्वं स्थापयंस्त्रिभिः प्रथमं तावद्भगवन्महाप्रेमप्रकाशाकरत्वेन स्थापयति, तत्राह—एता इति द्वाभ्याम् । एताः श्रीनन्दव्रजवासिन्यः श्रीभगवत्प्रेयस्यः परं केवलं संप्रति भगवदवतारसहभावसम्पन्नतद्युक्तिसाधकासिद्धनित्यसिद्धालंकृतायां भुवि तनुभृतः परमोत्तमतनुधारिण्य इति स्त्रीत्वादिदृष्ट्या नावमन्तव्याः । कथम्—तत्राह—अखिलात्मनि सर्वांशिनि स्वरूपत्वादेव सर्वेषां तावन्निरुपाधितादृशपरमप्रेयसीयोग्ये, तत्रापि गोविन्दे परमरूपगुणसीमताविख्यातगोकुलेन्द्रतया प्रकाशमाने रूढभावा उद्भूतमहाभावाः, तत्राप्येवमित्यनुभवैकवेद्येनानिर्वाचनीयप्रकारेणेत्यर्थः । तस्मात्तादृशभावतेजोमय्यस्तनवो यासां सर्वोत्तमा इति भावः । तत्र प्रमाणानि तु समनंतरमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः ॥
नन्वीश्वरोऽनुभजतोऽविदुषोऽपि साक्षाच्छ्रेयस्तनोत्यगदराज इवोपयुक्तः ॥ ५९ ॥

पीत्यर्थः ॥५८॥ किं च इश्वरप्रसादो महत्त्वे कारणं तस्य च न जातिराचारो ज्ञानं वा कारणं किं तु केवलं भजनमेवेत्याह । क्वेमा इति । साक्षाद्भजतः पुंसः । ननु अहो

दर्शयिष्यन्तो।तदर्थं तादृशभावमहिमानमाह—यद्भावमात्रमास्तां तावद्दूरतस्तद्विशेषवार्ता मुमुक्षवो मुक्ताश्च वाञ्छन्ति, वयमपिनित्यतत्संगिनो भक्ता महिमदृष्ट्या केवलं वाञ्छामो न तु प्राप्नुमः, दूरतस्त्वन्ये भावस्यास्य यन्निदानं तन्मा धुर्यविशेषानुभवस्तदलाभादिति भावः । टीकायामत इत्यस्याप्येतदेव तात्पर्यम् । अन्यत्तैः । यद्वा—ईदृशभावाभावेन ब्रह्मजन्मभिरप्यलमित्याह—अकारप्रश्लेषेण अनन्तस्य परममाधुरीभिरप्यपारस्य तस्य कथास्वपि अरसो रुचिमात्रस्या भावो यस्य तस्येति तेषाम् । द्वितीयपक्षेऽपि 'अरसः' इत्येव पाठो युज्यते, अन्यथा पूर्वं चतुर्मुखजन्माभिर्वेतिमात्रमवक्ष्यतेति ॥ अत्र **विश्वनाथः**—सर्वोत्कृष्टमाहात्म्यमाह—पञ्चभिः । अनंतकथासु रसो रागो यस्य तस्य ब्रह्मजन्मभि र्विप्रसंबंधिभिः शौक्रसावित्रयाज्ञिकैस्त्रिभिर्जन्मभिश्चतुर्मुखजन्मभिर्वा किं कोतिशयो न कोपि, यतोऽनंतकथासु राग एव सर्वोत्कर्षप्रतिपादको नान्य इति भावः । यद्वा—अनंतकथासु रागाभाव एव तत्तत्सर्ववैफल्यप्रतिपादक इति भावः ॥५८॥ अन्यदाह—क्वेमेति । इमा गोप्यः । द्वौ क्वावन्वयानुपपत्तिं वक्तः । कथम्—तत्राह—वनचरीरिति । तदात्वये वनगमनमप्युचितमेव तत्राह—व्यभिचारेति । अनियतभर्तृभिरप्यतृप्तास्तर्हि कृष्णोऽपि कश्चिद्रोपः स्यात्तत्राह—परमात्मनीति । रूढभावः परप्रेमा । अनुभजतः स्वयोग्यतानुरोधेन भक्तिं कुर्वतः । अविदुषः शास्त्रानभिज्ञस्य पुंसः । साक्षाच्छ्रेयः तदीप्सितम् । नन्वित्यनेन "भक्त्या त्वनन्यया शक्यो ह्यहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन" इत्यैतिह्यं प्रमाणयति । "प्रश्नावधारणैतिह्यसमीहानुमते ननु" इति यादवः ॥ * ॥ तस्माज्जनानां महोत्कर्षे भक्तिरेव कारणं न तु तपोज्ञानादिकम् । या च भक्तिः स्वयं सर्वोत्कृष्टापि सर्वलोकप्रतिष्ठितत्वेन सर्वो त्कृष्टेऽपि स्थले न तिष्ठति, सर्वलोकविगीतत्वेनातिनिकृष्टेऽपि स्थले तिष्ठति, स्थित्वा च तदेव स्वास्पदं सर्वोत्कृष्टं सर्वपूज्यं सर्वदुर्लभपदवीकं च करोतीति सविस्मयं सरोमाञ्चमाह—क्वेति द्वाभ्याम् । इमाः स्त्रिय इति स्त्रीत्वेन गोपसंततित्वेन च जात्या विगीताः । वनचरीर्वनचर्य इति वनभ्रमणशीलत्वात् । स्वभावेनाऽपि व्यभिचारदुष्टा इत्याचरणेनापि विगीता इमाः क्व, कृष्णे परमात्मनि वैकुंठनाथादिभ्य आत्मभ्योपि परमे सर्वांशिनि पूर्णस्वरूपे रूढभावो भक्तेरपि परममहान् विलासो महाभावः क्वेत्यत्यंतासंभवे क्वद्वयप्रयोगः । अहो अत्याश्चर्यमिति विमृश्य क्षणं विभाव्य ज्ञाततत्त्वो नैतदित्याश्चर्यमित्याह—ननु निश्चये । नु भो इति स्वमन एव संबोध्योक्तिः । ईश्वरो भगवान् भजतो जनस्य नापि भजनसिद्धस्याविदुषोपि त्वंतत्पदार्थज्ञानरहितस्यापि साक्षाच्छ्रेयः संसारमुक्तिपूर्वकस्वप्रेमरसास्वादरूपं मंगलं सर्वमुक्तैरपि दुर्लभं वस्तु तनोति, यथाऽगदराजोऽमृतमुपयुक्तः पीतः सन् तत्स्वरूपमजानतोऽपि जनस्य श्रेयः सर्वव्याधिप्रशमनपूर्वकमपूर्वास्वादविशेषं तनोति, किं पुनरासां भक्तिसिद्धनित्यसिद्धशिरोमणीनां तत्स्वरूपरूपगुणैश्वर्यमाधुर्यमहाविदुषीणां तत्परिचर्योपकरणीकृतस्वीयबुद्धीन्द्रियसर्वगात्र यौवनालंकारपरिच्छदानां नारदादिसर्वभक्तदुर्लभं रूढभावं न तनुयादिति भावः । रूढभावलक्षणमुज्ज्वलनीलमणौ दृश्यमिह विस्तरभिया नोक्तम् । व्यभिचारदुष्टा इति स्त्रीणां त्रैविध्याद्व्यभिचारस्त्रिविधः । पतिमुपपतिं च रमयंत्या एकः, स हि लोकशास्त्रयोर्विगीतः । पतिं त्यक्त्वोपपतिमेकमेव रमयंत्या अन्यः, स हि लोकशास्त्रविगीतत्वेप्येकपुरुषमात्रप्रीतिमत्त्वेन रसशास्त्रसंगीतः । स्वपतिं त्यक्त्वोपपतिबुद्ध्या भगवंतमेव रमयंत्या अपरः, स ह्यनभिज्ञलोकविगीतत्वेप्यभिज्ञलोकसंगीतत्वाल्लोकशास्त्रयोः परमार्हणीयत्वाच्च यद्यपि न व्यभिचारस्तदपि व्यभिचारसाधर्म्यादेव व्यभिचार उच्यते व्रजसुंदरीणाम् । अहोऽत्र व्यभिचारेण दुष्टा इवेति व्याख्येयम् । मम तु व्यभिचारो दुष्टो द्वेषविषयो यासां ताः, साक्षात्परमपतिश्रीपरमेश्वररतत्वात्परमसाध्व्य इत्यर्थः शोभनः प्रतिभाति । प्रसंगसंगातिस्तु यथा कथंचिदुन्नेया ॥ **तोषिण्यान्तु**—तदेवं प्रथमपद्येन बहिर्मुखान्विगृह्य तदेवात्र क्वेमा इत्यादिपद्ये प्रथमचरणेन साम्यसूयमनुयुज्यते । यत्र च "निगृह्यानुयोगे च" इति वाक्यस्य टेः प्लुतो विभाषितोस्ति । यथाह काशिकायाम्—'स्वमता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायं श्रियोंग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोऽन्याः ॥
रासोत्सवेऽस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजबल्लवीनाम् ॥ ६० ॥

उपयुक्तः सेवितः अगदराजोऽमृतं यथेति ॥५९॥ अत्यंतापूर्वश्चायं गोपीषु भगवतः प्रसाद इत्याह । नायमिति । अंगे वक्षसि उ अहो नितांतरतेरेकांतरतिमत्याः श्रियोऽपि नायं तत्प्रच्यौवनं निग्रहः अनुयोगस्तस्य मतस्याविष्करणं तत्र निगृह्यानुयोगे यद्वाक्यं वर्तते तस्य टेः प्लुतो विभाषा अनित्यः शब्द इति केनचित्प्रतिज्ञातम् । तदुपपत्तिभिर्निगृह्य साभ्यसूयमनुयुंक्ते—अनित्यः शब्द इत्यात्थ' इत्यादि । इह च तद्वदेव परोक्षप्यनुयोगगर्हितं सिद्धान्तमाह—क्वेति । कृष्णे क चेत्याद्यर्थस्य सद्भावे सति केमाः स्त्रिय इत्याद्यर्थस्य संभावना नैव घटत इत्यर्थः । अत्र च तदेव पूर्वपद्यवद्वितीयेन चरणेन दार्ढ्यार्थं स्वसिद्धान्तं समुद्य परार्द्धेनाज्ञानेनाप्युपयुक्तस्यामृतादेर्दिव्यतनुताकारित्वमीश्वरशक्तेः कैमुत्यातिशयं साधयतीति व्याख्येयम् । प्रथमचरणे स्थितस्य निकृष्टभूमिकया चँ कस्य केत्यस्य प्रतियोगितया द्वितियचरणे क चेति निर्दिष्टम् । यदि कृष्णविषयकरूढभावात्मिका परमोत्कृष्टभूमिका ताभिर्लब्धा तदा तासां निकृष्टभूमिकास्थितिः कुत्र स्थिता 'एताः परं तनुभृतः' इति तदीयतनुव्यवसायभावानां श्लाघित्वात् । 'यन्नामधेयश्रवणानुकीर्तनात्' इत्यादेः 'विप्राद्द्विषड्गुणयुताद्' इत्यादेः "भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात्" इत्यादेश्चात्र कैमुत्यलाभात्, ध्रुवस्यापि पार्थिवदेहस्य सद्यो हिरण्मयत्वश्रवणात् । किञ्च—स्वतंत्रश्रीमदुद्धवेन तासु तादृशनिकृष्टवचनं न प्रयोक्तव्यमुपक्रमोपसंहारादिषु तस्य परमानादरात् । वस्तुतस्तु व्यभिचारस्तासां नास्त्येव 'गोपीनां तत्पतीनाञ्च' इति श्रीशुकसिद्धान्तात्, अत्र श्रीमदुद्धवेनैव पूर्वमखिलात्मनि तत्र च परमात्मनीति तस्य सूचनात् । न च तासां स्वाभाविकोऽनाचार आशंक्यः 'आर्यपथञ्च हित्वा' इति वक्ष्यमाणानुसारेण स्वतः सदाचारताप्राप्तेः । न तु स्त्रीत्वं दूषणीयं लक्ष्म्यादेरपि स्त्रीत्वात् । न चेमा इति निन्दावचनम् 'आसामहो' इत्यादावासामित्यनेनेदन्तानिर्देशेन स्तुतेरेव व्यंजयिष्यमाणत्वात् । न च वनचरीत्वं निंद्यं वनस्यास्य 'तद्भूरिभाग्यम्' इत्यादिना ब्रह्मणापि प्रार्थ्यमानत्वात् । 'आसामहो' इत्यादिना स्वयमपि । उत्तरार्द्धे तु अगदराजस्तावद्देहमेव दिव्यं करोतीत्येकेनैवांशेन दृष्टान्तः, तादृशागदराजादिस्वभावमूलकारणमीश्वरस्वभावस्तु सर्वमपि श्रेयः स्वमविदुषोपि जगतः कुर्यादेव किमुत तासां तदीयगुणग्रामविद्वद्वराणामिति । तस्मात्परकीयाभ्यसूयाख्यसंचार्यनुवादस्य तदुत्तरस्थया 'कृष्णे क च' इत्यादिवाक्यमय्या संचारिलक्षणया मत्याराध्यत्वेनोक्तत्वाद्गुणत्वमेव । तदुक्तं काव्यप्रकाशे—"संचार्यादेर्विरुद्धस्य वाक्यस्योक्तिर्गुणावहा" इति । अत्र च यथा—'तिष्ठेत्कोपवशात्स्वभावपिहिता दीर्घं न सा कुप्यति' इत्यत्र पिहितेत्यनंतरं नैव घटत इति निर्देशं विनापि 'उत्तरा प्रतिपत्तिः पूर्वां बाधते' इति न्यायेनान्वयो लभ्यते तद्वदप्यत्र तं विनापीति न किंचिदसमंजसम् । अथ वा—ननु भवतीप्रभृतयो यूयमप्युत्तरोत्तरं महांत (हत्य) एव कथं तद्व्यंजयथ तत्राह—केमा इति । स्त्रिय इति जात्यैव सुकोमलत्वं दर्शितम् । तत्र चेमा इति विशेषतश्चमत्कारनिर्देशः । अत्रेमाः स्त्रियः इति सर्वोत्तमत्वं दर्शितम् । वनञ्च प्रस्तुतत्वाच्छ्रीवृंदावनं, तच्च श्रीकृष्णस्यैकांतविहारास्पदं तच्चारिण्य इति सामान्यतस्तन्माहिमा सूचितः । ता इमाः कृष्णविषये क तमाश्रित्य कस्यामूर्द्ध्वभूमिकायां वर्तंते तथेदृशगाढतदासक्त्या भाव एव व्यभिचारः । अत्र परमविस्मितमानसः सरोमाञ्चं साभिनयं हेतुमाह—परमात्मनि सर्वेषामेव निरुपाधिपरमप्रेमयोग्येऽपि तादृशतयानुभवितुं परमदुर्लभे तस्मिन्नेष ईदृशतयाऽऽशु दृश्यमानो रूढभावः परां कोटिमारूढो महाभावो न त्वस्मासु तल्लेशोपीत्यर्थः । न चासामेव तस्मिन्नेतादृशसौहृद्यं न तु तस्यास्विति वाच्यं, तस्य परमेश्वरस्य परमहृदयतया साधारणेष्वपि दृश्यते किमुतैतास्वित्याह—नन्वीश्वर इति । ननु निश्चये । अनु सादृश्ये । भजनानुकरणमपि कुर्वतोऽविदुषस्तन्माहात्म्यमजानतोऽपि दैन्यान्मादृशस्यापीत्यर्थः । साक्षादव्यवधानेन श्रेयः एतासां दर्शनादिप्रसादमयं परमहितं तनोति किमुतासां तन्माधुरीपरमोत्कर्षानुभवित्वेन तन्माहात्म्य परमकाष्ठाभिनिविष्टानामिति भावः ॥ ५९ ॥ अत्यंतापूर्वोऽनन्यलभ्यः । अयं तदनुरागलक्षणः । कुतोऽन्या इति—"बहुलं छन्दसि" इति विभक्तिव्यत्यासः । कुतोऽन्यासामित्यर्थः ।

१ प्रस्त्यावनमिति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि गुल्मलतौषधीनाम् ॥
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्यम् ॥ ६१ ॥

प्रसादोऽनुग्रहोऽस्ति । नलिनस्येव गंधो रुक्कांतिश्च यासां तासां स्वर्गांगनानामप्सरसामपि नास्ति । अन्याः पुनर्दूरतो निरस्ताः । रासोत्सवे कृष्णस्य भुजदंडाभ्यां गृहीत आलिंगितः कंठस्तेन लब्धा आशिषो याभिस्तासां गोपीनां यः प्रसाद उदगादाविर्बभूव ॥ ६० ॥ किं च आस्तां तावद्गोपीनां भाग्यं मम त्वेतावत्प्रार्थ्यमित्याह । आसा

अन्यपदेन यक्षादिस्त्रीग्रहः । यः प्रसादः ॥ * ॥ ननु परमव्योमनाथकृष्णयोरभेद एव निरूप्यते—तत्र पूर्वस्य च सदा वक्षःसंगिनी लक्ष्मीः सर्वभक्तशिरोमणिस्तस्या भावः कथं नाभिनंद्यते । किञ्च—‘ यथा दूरचरे प्रेष्ठे ’ इत्यादिरीत्या वियोगमयभावस्योत्कर्षः सर्वत्र लभ्यते ततो यदि संयोगेऽप्यासां तेनाधिक्यं स्तात्तथा वर्ण्यतां संयोगे तु लक्ष्म्या एव तदाधिक्यं गम्यते । किञ्च—लक्ष्मीर्हि स्वरूपशक्तिस्तदपेक्षया स्वरूपेणामू न्यूनाः स्युः कथमेता एव स्तुतेर्विषयीक्रियन्ते तत्र सप्रौढयाह—नायमिति । अंगे मदीशस्य श्रीकृष्णस्य मूर्तीविशेषे तस्मिन्सक्ता या श्रीस्तस्या अप्ययमेतावान्प्रसादस्तदंगसुखोल्लास उ निश्चित्तं न विद्यते । कीदृश्या अपि तस्याः—नलिनस्य दिवा स्वर्णकमलस्येव गंधो रुक्कांतिश्च यासां तासां स्वर्योषिताम् । ‘स्वश्चूडामणिं सुभगयंतमिवात्मधिष्ण्यम्’ इत्युक्तदिशा दिव्यसुखभोगास्पदलोकगणशिरोमणिवैकुंठस्थितानां योषितां भूलीलाप्रभृतीनां मध्ये नितांतरतेः परमप्रेमयुक्तायाः । तदेवं सति कुतोऽन्याः सर्वा एव स्त्रीजातयो दूरत एव परास्ता इत्यर्थः । तं प्रसादमेव दर्शयति—रासेति । व्रजसुंदरीणां नित्यास्थित एव यो यावान् रासोत्सवे उदगात् प्राकट्यं प्राप । कीदृशीनाम्—अस्येत्यासां समीपे ‘यन्मर्त्यलीलौपयिकम्’ इत्यनुसारेण परमव्योमनाथादप्युत्कृष्टस्य मया सांप्रतं साक्षादिवानुभूयमानस्यापि श्रीकृष्णस्य यौ भुजदंडौ ताभ्यां गृहीतः स्वल्पस्यापि विश्लेषस्य भयादिव कंठः कंठालिंगनं यत्कृतमित्यर्थः । तेन लब्धा आशिषो मनोरथा याभिस्तासाम् । तस्माल्लक्ष्मीतोऽपि सर्वथा वैलक्षण्यादासां स्वरूपेण चास्मिन्प्रेयसीभावेन च वैलक्षण्यं दर्शितम् । अत एव लक्ष्मीविजयवाक्येस्मिन् ‘ व्रजसुंदरीणाम् ’ इत्युक्त्वा सौंदर्यादीनामप्याधिक्यं दर्शितम् । ‘ यस्यास्ति भाक्तिः ’ इत्यादिरीत्या भक्तितारतम्येन तारतम्याद्युक्तमेव चेदम् । ‘ व्रजबल्लवीनाम् ’ इति पाठे तु व्रजस्य तासाञ्च तादृशी प्रसिद्धिः सूचिता ॥ अत्र **विश्वनाथः**—यथा सर्वावतारश्रेष्ठे एव कृष्णे गोचारणवानरबालकसहभोजित्वदधिचौर्यपरस्त्रीचौर्यादिलोकविगानं गृहीत्वैव सर्वसंगीतः सर्वोत्कर्षसीमानं प्राप, तथैव सर्वह्लादिनीशक्तिशिरोमणिभूता अपीमाः स्त्रियो गोपस्त्रीत्ववनचारित्वव्रजलोकविख्यातव्यभिचारादिविगानं गृहीत्वैव लक्ष्म्यादिभ्योऽपि परमसौभाग्यसीमानमापुरित्याह—नायमिति । अयं प्रसादः उ अहो अंगे नारायणस्य वक्षसि वर्तमानायाः श्रियोऽपि नितांतरतेः प्राप्तात्यंतरमणाया अपि कदापि नोदगात्कुतः पुनः स्वर्योषितामुपेन्द्राद्यवतारपत्नीनाम् । नलिनस्येवेति पूर्ववत्समासः । तेन भक्तिमज्जनानां मध्ये सर्वोत्कर्षकोटयां गोप्य एव स्थिताः साक्षाच्छ्रेयसोऽपि मध्ये सर्वोत्कर्षकोटयां रास इति सूचितम् ॥ ६० ॥ किंचित्प्रार्थयितुमाह—किञ्चेति । आशंसा इच्छा । स्वजनं भर्त्रादिकम् । धर्मं श्रुतिस्मृतिविहितं नियतस्वभर्तृसंगरूपम् “ नैका द्वौ पती विंदेत ” इति श्रुतेः । श्रुतिभिर्वेदशिरोभिः । विमृग्यामन्वेषणीयाम् ॥ * ॥ तस्मादासां भावे परमदुर्लभे मनोरथस्याप्यनौचित्यात् ‘ वाञ्छन्ति यद्भवभियो मुनयो वयञ्च ’ इति यन्मयोक्तं तदविचारादेव । सांप्रतं तु सविचारमाशासे एतदेव मे भूयादित्याह—आसामिति । इमा यासामुपरि चरणौ विन्यस्यंति तासामतिक्षुद्रजातीनां गुल्मलतौषधीनां मध्ये किमप्यहं स्याम् । ननु भजनस्य सर्वोत्कृष्टा काष्ठा का खल्वेतासु वर्तते यामेवालक्ष्य त्वमासामेव चरणरेणून्वांछन्न तु लक्ष्म्यादीनामपीत्यत आह—या इत्यादि । लोकधर्मधैर्यलज्जामर्यादादित्रोटनपूर्वकं महारागेण भजनमेव मया न क्वापि दृष्टमत एव प्रतिरजानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या वै श्रियाऽर्चितमजादिभिराप्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्याम् ॥
कृष्णस्य तद्भगवतश्चरणारविंदं न्यस्तं स्तनेषु विजहुः परिरभ्य तापम् ॥ ॥ ६२ ॥

मिति । गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमप्यहं स्यामित्याशंसायां लिङ् । कथंभूतानां गोपीनाम् । या इत्यादि । आर्याणां मार्ग धर्मं च हित्वा मुकुंदस्य पदवीं मार्गम् ॥६१॥ पुनस्ता एव विशिनष्टि । या वा इति । योगेश्वरैर्ब्रह्मादिभिरप्यात्मन्येवार्चितं तद्रासमंडले स्तनेषु न्यस्तं परिरभ्य यास्तापं विजहुस्तत्यजुरिति ॥६२॥

यदायदा स्वकुलधर्मादिमर्यादा व्रजशलाका अपि महारागबलेन त्रोटयित्वा कृष्णमभिसरन्ति तदा कृष्णपार्श्वे प्रति गमने वर्त्मावर्त्मविचारो नासामिति तृणादिरूपस्य मम मूर्ध्नि चरणानर्पयिष्यंति, अधुना तु कोटिशः सकाकु प्रार्थिता अपि नैता मन्मूर्ध्नि चरणानाधित्संतीत्यतस्तदैव मम धन्यजन्मता भविष्यतीति भावः ॥ अत्र तोषिणी—अथ पूर्वोक्तरीत्या तस्य नित्यप्रेयसीनामपि तासां जन्मादिलीलाविस्मृततादृशानां तादृशीनामपि तस्मिन्नुद्बुद्धलोकधर्मातिक्रमिरागाणां तादृशीनामपि श्रुतिदुर्लभतत्पदवीभाजामनुमतिं वाञ्छंस्तच्चरणरज एव तत्र साधनं निश्चिन्वन्प्रचुरतत्स्पर्शयोग्यं तत्र स्थावरजन्माप्याशास्ते—आसामिति । अहो इत्यत्यन्तदुर्लभलालसाखेदे । वृन्दावन इति सदा तत्रैव तासां सान्निध्यात् । गुल्मः स्तम्बः ' अप्रकाण्डे स्तम्बगुल्मौ ' इत्यमरः । वृक्षादीनामनुक्तिरप्युच्चत्वेन सम्यक् तज्जोषणाऽसिद्धेः । गुल्मादीनामनुक्रमेणोक्तिर्नीचनीचतया रजसां सम्यक्प्राप्तेरुत्तरोत्तराभिलाषाधिक्याद्दैन्याच्च । गुल्मादीनां यथोत्तरं न्यूनत्वमूह्यम् । परमदीनतयात्मनोऽतिनीचत्वमननेन तृणत्वमात्रप्रार्थने पर्यवसानात् । गीतमपि तासां माहात्म्यं पुनरत्यौत्सुक्येन गायति—या इति । मुकुन्दस्य पदवी तत्प्राप्त्येकोपायः पूर्वमुक्तो रूढभाव एव । मुकुन्देति मुक्तिं ददातीति निरुक्त्या तादृशभावस्य दुर्लभतां सूचयति । ' मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ' इति प्रेममात्रदानकार्पण्यसूचनात् । कीदृशीम्—श्रुतिभिः कर्त्रीभिर्विमृग्यां परमपुरुषार्थतयान्वेषणीयाम् । किं कृत्वा भेजुः—स्वजनमार्यपथञ्च हित्वा, लोकमर्यादां वेदमर्यादाञ्च त्यक्त्वेत्यर्थः । तत्तु दुस्त्यजं पूर्वोक्तैः श्रीप्रभृतिभिः सर्वैरत्याज्यम् । ते खलु सर्वलोकसर्वमहावेदपुरुषार्थसारबुद्ध्यैव भजंतीत्यतो न तेषु रागौत्कण्ठ्यमेव कारणमित्येता एव समोर्द्ध्वरागा इति भावः । तदेवमिति मुकुन्दपदवीमिति तत्रापि श्रुतिभिर्विमृग्यामिति तस्यानित्यत्वं सर्वोत्तमत्वं च गम्यते । तत्रापि तास्ता भेजुरिति तं शीघ्रं ग्रहीष्यंत्येव, गृहीतश्चासौ नात्मानं मोचयितुं शक्ष्यतीति नित्यसंगित्वं बोध्यते, परमान्तरंगेणाप्युद्धवेन तासां चरणसम्बन्धेन यथाकथंचिज्जन्मप्रार्थनात्, तत्रापि वृन्दावन एव तत्सम्भवमननात्तासां तस्य च तत्तद्विधत्वं बोध्यते ॥ ६१ ॥ ता गोप्यः । या गोप्यः । आप्तकामैः सत्यसंकल्पैः । योगेश्वरैः सनकादिभिः । आत्मनि हृदये । यच्चरणारविन्दम् । तापं कामसन्तापम् ॥ * ॥ न केवलं तादृशतल्लाभसाधनस्य तादृशरासस्यैवोत्कर्षेण तासां माहात्म्यमपि तु भगवल्लाभस्यापीत्याह—या इति । वै प्रसिद्धम् । सर्वलोकचमत्कारकरं यथा स्यात्तथा कृष्णस्य भगवतः 'कृष्णस्तु भगवान्स्वयम्' इत्यादावसमोर्द्ध्वरूपत्वेन प्रसिद्धस्य तस्य तत्तादृशभावैकभाव्यं प्रपदारविन्दम् 'गोप्यस्तपः किमचरन्' इत्यादिरीत्या प्रकृष्टाविर्भावं पदारविन्दं परिरभ्य 'यत्ते सुजातचरणाम्बुरुहं स्तनेषु' इत्यादिरीत्या परमस्नेहमयरागेणालिंग्य तापं विजहुः, तादृशतत्प्राप्तितः पूर्वं यः कश्चिद्भावः स सर्वोऽपि तादृशभावानां खल्वनुभवेन तापमेव तत्सर्वं तत्यजुरित्यर्थः । पदमात्रोपादानेन भक्तिव्यञ्जनया तादृशश्रीकृष्णस्य परमदुर्लभता सूचिता । तत्रापि लिट्प्रयोगेण तत्त्यागस्य स्वपरोक्षतां सूचयित्वा स्वपर्यन्तमहाभगवतागम्यत्वं सूचितम् । श्रीभगवतोऽपि ताभिः परिरंभे रागं दर्शयति—न्यस्तं तेन बलादिवार्पितम् । तत्र समयवैशिष्ट्यमप्याह—रासगोष्ठ्यां रासोपक्रमसभायां तस्यां परमापूर्वलीलायां प्रवर्तमानायामित्यर्थः, 'संस्पर्शनेनांककृतांघ्रिहस्तयोः' इति तदानींतनप्रसिद्धेः । ततश्च ' तासामाविरभूत् ' इति 'त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधत् ' इत्याद्यनुसारेणात्रत्यसमयांतरादपि परमापूर्वाविर्भावत्वमिति भावः । कथंभूतम्—श्रिया वैकुण्ठलक्ष्म्यापि मनस्येव सदार्चितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वंदे नंदव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ॥ यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ॥ ६३ ॥ श्रीशुक उवाच ॥ अथ गोपीरनुज्ञाप्य यशोदां नंदमेव च ॥ गोपानामंत्र्य दाशार्हो यास्यन्नारुरुहे रथम् ॥ ६४ ॥ तं निर्गतं समासाद्य नानोपायनपाणयः ॥ नंदादयोऽनुरागेण प्रावोचन्नश्रुलोचनाः ॥ ६५ ॥ मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्रयाः ॥ वाचोऽभिधायिनीर्नाम्नां कायस्तत्प्रह्वणादिषु ॥ ६६ ॥

एवं महत्त्वं प्रतिपाद्य नमस्करोति । वंद इति ॥ ६३ ॥ अनुज्ञाप्यानुज्ञां याचित्वा आमंत्र्य पृष्ट्वा ॥ ६४ ॥ ६५ ॥ नोऽस्माकं मनसो वृत्तयः कृष्णपादांबु

भावविशेषेण बोध्यमानमेव वर्तते न तु तथा प्राप्तम् ' यद्वांछया श्रीर्ललनाचरत्तपः ' इत्युक्तेः । अत एव सुतरामजादिभिर्ब्रह्मरुद्रादिभिराधिकारिकैरातकामैरात्तकामभक्तैर्योगेश्वरैः सर्वयोगानामीश्वरैः शुद्धयोगभक्तिभिरपीति । मनस्येवार्चितं न तु साक्षात्स्प्रष्टुं शक्यम् । पूजार्थत्वाद्वर्तमाने क्तः । तस्मात्सर्वदुर्लभचरणारविंदस्य तस्याभिरेव तादृशतया लब्धत्वादचिरादेवाकृष्य वशयितव्य इति भावः । यदात्मनीति चरणारविंदमिति क्वचित्पाठः ॥ ॥ ६२ ॥ एवमुक्तरीत्या । यासां नंदव्रजस्त्रीणाम् । हरिकथैवोद्गीतमुच्चैर्गानं भुवनत्रयं पुनाति स्मरणादिना देवाश्शेषो मनुष्याश्च यल्लीलां गायन्तीति भावः ॥ * ॥ तस्मादास्तां ममातिक्षुद्रस्य साक्षान्नमस्कारसाहसमेतत्स जातीयत्वादन्यासामपि पादरेणुमेव नमस्करोमि । न च साक्षादेव ता इति सकंपसगद्गदं चाटुमाह—वंद इति । यासामिति—याभिः कर्त्रीभिरित्यर्थः । हरिकथाया उद्गानम् 'उद्गायतीनामरविंदलोचनम्' इत्येतत्प्रकारम् । यद्वा—यत्संबंधिहरिकथाया उद्गानं तत्तन्महानुभावैरनुगानं संबंधपरम्परया भुवनत्रयमूर्द्ध्वाधोमध्यलोकं सर्वमपि पुनाति एतद्विपरीतोदासीनसर्वभावापहारतः शोधयति 'मद्भक्तियुक्तो भुवनं पुनाति' इतिवदविद्यामालिन्यादिति **विश्वनाथः** ॥ प्रकरणेऽस्मिन्व्यासादिमहावक्तॄणां तात्पर्यमिदम्—सर्वभागवतानां श्रीकृष्णसंबंधिनः खलु परमश्रेष्ठास्तस्यैव स्वयं भगवत्त्वात्, तत्रापि तल्लीलापरिकरा एवांतरंगा अन्येषां तदनुगतत्वात्, तेष्वपि श्रीमानुद्धवः 'त्वं तु भागवतेष्वहम्', 'भक्तमेकांतिनं क्वचित्', 'नोद्धवोऽण्वपि मन्न्यूनः', 'अहं भर्तू रहस्करः', 'कृष्णस्य दयितः सखा' इत्यादिदर्शनात्तस्यापीदृशी तद्भावस्पृहा, तास्वादराधिको न पट्टमहिषीष्वपि, केन वा तासां चरणारविंदं नानुगमनीयम् । तत्रापि राधेति । अभीक्ष्णश इति शस्प्रत्ययेन प्रतिक्षणमेव न तु त्रिकालं पञ्चकालं वेत्यर्थः । यावदनायासेन तत्तत्प्राप्त्यनुकूलतृणादिजन्मभाग्यं तेनाभूत्तावदिति भावः । तं श्रीमदुद्धवं वन्दे । कृष्णप्रेष्ठवरोऽपि यः गोपीपादाब्जधूलिस्पृक्तृणजन्माप्ययाचत ॥ ६३ ॥ अथ प्रार्थनोत्तरम् । यास्यन्, मथुरामिति शेषः ॥ * ॥ अथ कालान्तर एव । चः समुच्चये । आज्ञाप्य तेषां चित्तसमाधानपूर्वकमाज्ञां प्रार्थ्य । गोप्यादिनिर्देशक्रमोऽयं तदादीनां प्रेम्णो यथापूर्वं प्रकर्षमनुभूय तत्क्रमादेवानुज्ञा प्रार्थितेति व्यनक्ति, पूर्वोक्तयुक्त्या सांत्वनायां मुख्यत्वात् । गोपांस्त्वामंत्र्य यथायथं व्रजेश्वराद्यनुज्ञाश्रावणसहितं संबोध्य—हे अमुक तेषां मनुज्ञा जाता संप्रति गच्छाम इति जनं संतोष्येत्यर्थः । दाशार्ह इति—तत्कुलोद्भवत्वेनैव नीतिज्ञः । किं पुनः सः, वैशिष्ट्येनेति भावः ॥ ६४ ॥ तम् उद्धवम् ॥ * ॥ रथारोहणपरिपाटीमाह—रथारोहणार्थं निर्गतं निर्गत्य व्रजद्वारि स्थितं सन्तम् । नानेति—निजमुद्रालक्षितं पुत्रार्थं श्रीव्रजेश्वर्या दत्तं नवनीतक्षीरलड्डुकादिकं तथा श्रीबलदेवरोहिण्यर्थं देवक्यर्थं च श्रीव्रजदेवीभिश्च प्राणेश्वरार्थं निजलिंगचिह्नितं गुंजाहारादिकं च श्रीदामादिभिश्च प्रियसुखार्थं तत्परिचितवन्यपुष्पमूलफलादिकं श्रीव्रजेश्वरेणापि कस्तूरीगतमौक्तिकं श्रीवसुदेवार्थं घृतपक्वान्नादिकमुग्रसेनार्थं च गोरसादिकं सर्वैश्च श्रीमदुद्धवार्थं वस्त्रालंकरणादिकमित्येवं पृथक्पृथङ्नानाविधैरुपायनैर्युक्तपाणयः सन्तः प्रकर्षेण गद्गदत्वादिगुणयुक्ततयाऽवोचन् ॥ **विश्वनाथस्तु**—नानेति—कृष्णस्य पौगंडकैशोरविलाससमय एव यानि संचितानि बहुरत्ननानास्वर्णमुद्रामुक्तालंकारादीनि यौवने सति कृष्णस्य परिधास्यमानानि तदा तु तद्वियोगात्तेषु ममतात्यागात्तान्येवोपायनत्वेन कल्पितानि ज्ञेयानि ॥ ६५ ॥ वृत्तयो व्यापाराः 'वृत्तिर्व्यापारजीवने' इति कोशात् । तत्प्रह्वणादिषु कृष्णनमस्कारादिषु स्यादित्यन्वयः ॥ * ॥ भो आयुष्मन्नुद्धव आवयोर्माता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया ॥ मंगलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ॥ ६७ ॥

जाश्रयाः स्युः । अभिधायिनीरभिधायिन्यः ॥ ६६ ॥ कृष्णे रतिः स्यादिति ॥ ६७ ॥

पित्रोस्तादृशोऽपि महारूपगुणशीलसमुद्रबालके महाकठोरत्वमासीदधुनापि वर्तत एव तदानीं यद्बहुतरस्नेहलालनादिकं कृतं तत्सर्वं कृत्रिममेवेत्यधुनाऽवगतं यत्तद्विरहेप्यावाभ्यां जीव्यते, पिता खलु जगत्येको दशरथः स एव, यः खलु पुत्रं रामं विदूरविगतं श्रुत्वैव प्राणांस्तत्याज, आवयोस्तस्मिन्पुत्रे कृष्णे प्रेमगंधोपि नास्तीत्यत एवाभिज्ञचूडामणिरस्मत्पुत्रः स्वस्यानरूपौ पितरौ परित्यज्य परमेश्वरत्वेनातर्क्यचरित्रत्वादन्यावेव देवकीवसुदेवौ पितरौ चकार, तद्विगावां त्रिजगत्यतिदुर्भगौ यशोदानंदौ, तदपि कस्मिंश्चिदपि भाविजन्मनि तस्मिन्नतिः स्यादिति प्रार्थयते द्वाभ्याम् । मनस इति—महानुरागमहावर्त एवायमत एव मनआदींद्रियाणां प्रतिक्षणमेव कृष्णरूपादिनिमग्नत्वेऽपि मनसो वृत्तयः कृष्णपादांबुजाश्रयाः स्युरिति । रतिः स्यादिति प्रार्थनायां लिङ् । दैन्यसंचारिणो महाप्राबल्यं दर्शयति । किञ्च, सख्यवात्सल्योज्ज्वलप्रेमवतां स्वभाव एवायं यद्विरहवैवश्येन विषयालंबनस्य स्वस्मिन्नौदासीन्यज्ञानेन च जनिते महादैन्ये स्वस्वभावविच्युतिर्दास्यभावग्रहणं च, यथा मयि कृष्णे नाद्यावधि न नः विश्वस्तमौदासीन्यादेवेति मत्वा बलदेवेन 'प्रायो मायास्तु मे भर्त्तुः' इत्युक्तेः, 'दास्यास्ते कृपणाया मे' इति वृंदावनेश्वर्या, 'क्वचिदपि स कथां नः किंकरीणां गृणीते' इति श्रीगोपीभिः । 'मनसो वृत्तयो नः स्युः' इति श्रीनंदाद्यैः, न तु सुखसमयेऽपि देवकीवसुदेवाभ्यामिव 'युवां न नः सुतौ' इत्यादिकमैश्वर्यज्ञानजनितस्वसंबन्धत्यागपूर्वकं कदाऽप्युक्तम् ॥६६॥ यत्र क्वापि योनिषु । कर्मभिरित्यचेतनस्य कर्मणः कथं प्रवर्तकत्वन्तत्राह—ईश्वरेच्छयेति । ननु देवः फलं ददातीति मीमांसको न सहते, तथाहि—नवमाध्याये विचारितं किं यागेनाराधिताया देवतायाः फलमपूर्वमुतापूर्वद्वारकं यागस्य फलसाधनत्वमिति संशयः । तत्र भंगुरस्य यागस्य कालांतरभाविफलं प्रति साधनत्वायोगादवश्यं द्वारं किञ्चित्कल्पनीयं, देवताप्रसादश्च श्रुतियुक्तिभ्यां तद्वारं स्यात् । "तृप्त एवैनमिंद्रः प्रजया पशुभिस्तर्पयति" इति श्रुतिः । युक्तिरप्युच्यते—क्रियया व्याप्तुमिष्टतमत्वात्कर्मकारकं प्रधानं तेन च कर्मणा व्याप्यत्वात्संप्रदानं ततोपि प्रधानम्, इंद्रादिदेवता च संप्रदानत्वात्पूजामर्हति, यागश्च पूजारूपत्वादतिथेर्भोजनमिव देवताया अंगं स्यात्तस्माद्राजादिवद्देवः फलं ददातीति पूर्वपक्षः । अत्रोच्यते—यागदेवतयोर्योयमंगांगिभाव उपन्यस्तः स तु शब्दाकांक्षानुसारेण विपर्येति । तथाहि—यजेतेत्याख्यातेन भावनाभिधीयते, सा च किं केन कथमिति भाव्यकरणेति कर्तव्यतालक्षणमंशत्रयं क्रमेणाकांक्षति, तत्र यागस्य समानपदोपनीतत्वेप्ययोग्यत्यत्वान्न भाव्यता, स्वर्गस्य तु वाक्यतात्पर्याद्युपनीतस्यापि पुरुषार्थत्वेन योग्यत्वात्स्वर्गे सा स्यात्तस्य च स्वर्गस्य साधनाकांक्षायां यागः करणत्वेनान्वेति, तच्च करणं साध्यरूपत्वात्स्वनिष्पादकं सिद्धम्, द्रव्यदैवतमिति कर्तव्यत्वेन गृह्णाति, ततो यागोंगी देवता तदंगमेवं च सति नातिथिवद्देवता यागेनाराध्यते या तु श्रुतिः—"स्तृप्त एवैनम्" इति नासौ स्वार्थे तात्पर्यवती प्रत्यक्षादिविरोधात्, न हि काचिद्देवता विग्रहवती हविर्भुक्त्वा तृप्ता सती फलं प्रयच्छतीति प्रत्यक्षेणोपलभ्यते, प्रत्युत तदभावः प्रत्यक्षेणायोग्यानुपलब्ध्या वा प्रमीयते, किञ्चाश्वमेधे "स्ते गां दंष्ट्राभ्यां मंडूकाः कांक्षान्" इत्यादावश्वावयवानां दंष्ट्रादिद्रव्याणां हविषां भोक्तृत्वेन मंडूकादयस्तिर्यंचो देवताविशेषाः श्रूयन्ते, न च तेषां फलदातृत्वं संभाव्यते । "ओषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा" इत्यचेतनानामोषधीवनस्पतितदवयवानां देवतात्वं श्रूयते तत्कुतो हविर्भोक्तृत्वं कुतस्तरां तृप्तिः कुतस्तमां फलदातृत्वम्, तस्माद्विग्रहादिमतां देवतानामभावान्न देवताप्रसादो यागस्य फलद्वारं किन्तु श्रूयमाणफलसाधनत्वान्यथाऽनुपपत्तिकल्प्यमपूर्वं तद्वारम् । अभ्युपगतेष्वपि देवेष्वपूर्वस्यैव फलद्वारत्वमवश्यं वक्तव्यं मंत्रार्थवादेतिहासपुराणेषु देवतानामपि तपश्चरणानुष्ठानब्रह्मास्त्रादिमंत्रप्रयोगेभ्यः समाहितविध्यनुकीर्तनात्तस्माद्देवो न फलप्रद इति सिद्धम् । औपनिषदास्तु ईश्वरस्य फलदातृत्वं मन्यन्ते । तथाहि—तदीये शास्त्रे तृतीयेऽध्याये विचारितम्—किं धर्मः फलं ददात्याहोस्विदीश्वर

---

१ ज्ञापयति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप ॥ उद्धवः पुनरागच्छन्मथुरां कृष्णपालिताम् ॥ ६८ ॥ कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसाम् ॥
वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥६९॥ इति श्रीभागवते महापुराणे दशमस्कंधे पूर्वार्द्धे भ्रमरगीतोद्धवप्रतियाने सप्तचत्वारिंशोऽध्यायः ॥४७॥

॥ ६८ ॥ व्रजवासिनां भक्त्युद्रेकं कृष्णादिभ्य आह । उपायनानि चाददादिति ॥ ६९ ॥ इति श्रीभा० म० दशमस्कन्धे पूर्वार्धे टीकायां सप्तचत्वारिंशोऽध्यायः ॥४७॥

इति संशयः । तत्र मीमांसकोक्तन्यायेन धर्मः फलप्रद इति पूर्वपक्षः । सिद्धान्तस्तु—किं धर्मोऽन्यानधिष्ठित एव फलप्रदः, किं वा केनचिच्चेतनेनाधिष्ठितः । नाद्यः, अचेतनस्य तारतम्यानभिज्ञस्य यथोचितफलदातृत्वायोगात्, द्वितीये तु येनाधिष्ठितः स एव फलदातास्तु, न चैवं धर्मवैयर्थ्यमिति शंकनीयं वैषम्यनैर्घृण्यपरिहाराय धर्मापेक्षणात्, असति तु धर्मे कांश्चिदुत्तमं सुखं कांश्चिन्मध्यमं कांश्चिदधमं च प्रापयतीश्वरः कथं विषमो न भवेत्कथं वा विचित्रं दुःखं प्रापयन्निर्घृणो न भवेत् । धर्माधर्मानुसारेण तत्प्रापणे गुरुपितृराजादीनामिव न वैषम्यनैर्घृण्ये प्राप्नुतः । न हि दुष्टशिक्षां शिष्टपरिपालनञ्च कुर्वतां गुर्वादीनां वैषम्यनैर्घृण्ये विद्येते । यदुक्तम् "स्ते गाम्" इति मंडूकादीनाम् "तिरश्चामोषधिवनस्पत्यादी च" इति स्थावराणां फलप्रदत्वमयुक्तमिति तत्तथैवास्तु, ईश्वरस्य फलदातृत्वे कः प्रत्यूहः । यदपि "तृप्त एवैनमिंद्रः प्रजया पशुभिस्तर्पयति" इति तत्रापींद्रे देवतायामवस्थितोऽन्तर्यामी फलप्रदत्वेन विवक्षितः "अंतः प्रविष्टः शास्ता जानानाम्" इति श्रुतेः, "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति स्मृतेः । तस्मादीश्वरप्रसाद एव फलद्वारम् । न च जैमिनीयौपनिषदयोर्मतयोर्विरोधोस्ति, परस्परं विवक्षाविशेषेण तत्समाधानात् । यथा देवदत्तस्यैव पक्तृत्वेऽपि सम्यगभिज्वलनविवक्षितत्वात्काष्ठानि पचंतीति व्यवहारः । तथा परमेश्वरस्यैव फलप्रदातृत्वेऽपि तारतम्यापादननिमित्ततया प्राधान्यविवक्षितत्वाद्धर्मः फलप्रद इति व्यवहारः किं न स्यात्तस्मादविरोधात्फलप्रद ईश्वर एवेत्यलमतिप्रसंगेन । अतः कर्मफलप्रदः श्रीकृष्ण एव । रतिरत्यंतासंगः ॥ * ॥ कृष्णभक्त्या महानुरागमय्या कृष्णपालितामित्यत एवोद्धवेन व्रजभूमावत्यनुरक्तेनापि तत्र गतं संप्रति मथुरा कृष्णेन पाल्यते व्रजः कथं न पाल्यत इत्युपालब्धुमेवेति मुनेराशयः ॥ अत्र **तोषिणी**—कृष्ण ईश्वररूपेऽपि, कृष्ण एव तदिच्छयेत्यनुक्त्वा ईश्वरेच्छया पृथगीश्वरपदोक्तिः स्वभावानुसारेण । कर्मभिरिति नरलीलापन्नत्वादात्मनि साधारण्यमननेन । मंगलाचरितैः पुण्यकर्मभिः । दानस्य पृथगुक्तिस्तेषां स्वेषु प्राचुर्यात् । अथ च वाक्यद्वयमिदं वियोगमयपितृवात्सल्येनापि संभवतीति ॥ ॥ ६७ ॥ एवमित्थम् । कृष्णभक्त्या कृष्णदूतत्वात्तत्रापि कृष्णभक्तिरेव तेषामित्यर्थः । लोकदृष्ट्योग्रसेनपालितायामपि परमार्थत आह—कृष्णपालितामिति । तस्य सर्वदा तत्पालकत्वादिति भावः ॥ * ॥ एवमध्यायद्वयोक्तक्रमेण । सभाजितः पूजितः । कृष्णभक्त्या कृष्णासक्त्यैवेति पूर्ववत् । ननु'आसामहो' इत्यादिरीत्या तादृशवृंदावनासक्तश्चेत्कथं मथुरां पुनरागच्छत्तत्राह—कृष्णपालिताम्, संप्रति कृष्णेन सा पाल्यते तत्प्रियतमभृत्यैस्तत्रानागमनं कर्तुं कथं शक्ष्यत इति भावः ॥ ६८ ॥ भक्त्युद्रेकं प्रीत्याधिक्यम् । नन्दादिभिः पृथक्पृथग्दत्तानि उपायनान्युपहारान् ॥ * ॥ प्रथमं निजान्तःपुरस्थिताय कृष्णाय प्रणिपत्य प्रणिपातपूर्वकं तत्कृतालिंगन कुशलप्रश्नादिकं पूर्वं वृत्तं निर्वाह्य क्रमतस्तत्कृतप्रश्नविशेषमुपलभ्य व्रजौकसां तत्पित्रादीनां भक्त्युद्रेकं प्रेमातिशयं तत्तद्वचनचेष्टात्मकं यथावसरं यथायोग्यं सर्वमेवाह, तत्र साक्षात्तद्दर्शनादेवं तेषां प्रीतिर्दुःखशोकनिवृत्तिश्च सम्यग्भवति न तु तच्चातुर्येण तत्संदेशैर्वेत्यभिप्रायात्मकमिति ज्ञेयम् । तदनन्तरं यथावसरं वसुदेवादिभ्यः पूर्ववद्यथाक्रमं तेषां भक्त्युद्रेकं यथायुक्तमाह, तदनन्तरं यथावसरं तस्मै तेभ्यश्चोपायनान्यदादिति विवेचनीयम् ॥ **विश्वनाथस्तु**—व्रजौकसां भक्त्युद्रेकं मथुरौकोभ्यः सकाशादित्यर्थस्तेन—भोः प्रभो कृष्ण त्वं भक्तिवश्यो भक्तिप्राप्यो भक्तिदश्य इति सर्वशास्त्रार्थस्तेषां च मया त्वदीयसर्वभक्तेभ्योऽपि सकाशाद्भक्त्युद्रेक एव दृष्टः, यतः—"श्वेतीकृताखिलजनं विरहेण तवाधुना । गोकुलं कृष्ण देवर्षेः श्वेतदीपभ्रमं दधे ॥" । त्वत्पितुर्नन्दस्य तु महानुरागभ्रमिरियं त्वयैव बोद्धुं शक्या । तदुक्तम्—'मनसो वृत्तयो नः स्युः' इति पद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अथ विज्ञाय भगवान्सर्वात्मा सर्वदर्शनः ॥ सैरंध्र्याः कामतप्तायाः प्रियमिच्छन्गृहं ययौ ॥ १ ॥ महार्होपस्करैराढ्यं कामो पायोपबृंहितम् ॥ मुक्तादामपताकाभिर्वितानशयनासनैः ॥ धूपैः सुरभिभिर्दीपैः स्रग्गंधैरपि मंडितम् ॥ २ ॥ गृहं तमायांतमवेक्ष्य साऽऽसनात्सद्यः समुत्थाय हि जातसंभ्रमा ॥ यथोपसंगम्य सखीभिरच्युतं सभाज यामास सदासनादिभिः ॥ ३ ॥

अष्टचत्वारिंशकेऽथ कृष्णः कुब्जामरीरमत् ॥ अक्रूरस्य गृहं गत्वा तं गजाह्वयमादिशत् ॥ १ ॥ सैरंध्रीकाममापूर्य पूरयित्वा मनोरथान् ॥ अक्रूरस्य ततः कृष्णस्तेन पार्थानसांत्वयत् ॥ २ ॥ १ ॥ महार्हैरनर्घ्यैरुपस्करैर्गृहोपकरणैरन्वितम् । कामोपायैस्तदुद्दीपकैः सुरतबंधादिलेख्यैरादर्शादिभिरुपबृंहितम् ॥ २ ॥ यथा यथोचितम् ।

द्वयम्, त्वन्माता तु गद्गदरुद्धकण्ठा नैव किमपि वक्तुं शशाकेति श्रुत्वा कृष्णो विगलितधैर्यो मध्येसभमप्युच्चै रुरोद । त्वत्प्रेयसीनां वाडवानलस्तु रजन्यां कुत्रचिद्रहस्येवोद्घाटय दर्शयितव्यः । त्वत्प्रेयसीशिरोमणेस्तु दिव्योन्माद चित्रजल्पादिदिङ्मात्रमेवाविष्कृतं यदवधाय कृष्णस्तां रात्रिं सर्वां जज्वालैवेति ॥ ६९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ अथोद्धवागमनोत्तरम् । तमक्रूरम् (१)। ततः सैरन्ध्रीकामपूर्त्युत्तरम् । अक्रूरस्य मनोरथान्पूरयित्वा । तेनाक्रूरेण (२) । अथेत्युक्तार्थम् । सर्वे दर्शनं ज्ञानं यस्य स तथा ॥ * ॥ सैरन्ध्रीमपि संत्यक्तुमहं शक्नोमि नोद्धव । किमुत व्रजलोकांस्तानिति व्यञ्जन्निमाम गात् ॥ श्रीसैरन्ध्र्यै नमस्तस्यै यत्कृपाकृष्टमानसः । स्वयं गृहं गतो वस्तुमसंकोचं रमापतिः ॥ अथेति सार्धद्वयकम् । भगवाञ्श्रीकृष्णः अथेत्युद्धवस्यागमनहेतोर्विज्ञाय बहूनि दिनानि व्याप्य तन्मुखाद्व्रजौकसां पित्रादीनां प्रत्येकं सान्त्वनप्रायं विशेषेणानुभूय कदाचित्सैरन्ध्र्या गृहं ययौ । कीदृश्याः—कामतप्तायाः स्वार्थाभिलाषविशेषेण दह्यमानायाः । तर्हि किमेषोऽपि कामी ? नेत्याह—प्रियमिच्छन् मत्प्रीत्यर्थमसावंगरागं मह्यमर्पितवती तस्मादह ममुष्याः प्रीतिविशेषमेव कृत्वाऽनृणः स्यामिति विचारयन्नित्यर्थः ॥ अत्र **विश्वनाथः**—विज्ञाय उद्धवोक्तं विशेषतो ज्ञात्वा तत्र समाधानं पूर्वमेव कृतवानित्याह—भगवान् महातर्क्यैश्वर्ययुतत्वान्मथुरायां स्थितोऽपि प्रकाशान्तरेण व्रजमगादेवेत्यर्थः । सर्वात्मत्वादेव सर्वमनोरथं पूरयितुमित्यर्थः । किन्तूद्धवसमाधानार्थं सर्वदर्शनः तदोद्धवं प्रति स्वीयप्रकाशद्वैतविरहप्रकाशेऽप्याविर्भावादिकमतिरहस्यमपि ज्ञापयामासैवेत्यर्थः । ततश्च पूर्वं यत्प्रतिश्रुतं तद्दातुं तेन सह कुब्जाया गृहं जगामेत्याह—सैरन्ध्र्या इति । ननु कुतस्तस्यास्तादृशमपि वांछितं विधित्सितवाञ्ज्ञातवांश्च तत्राह—सर्वेति । सर्वात्मत्वेन सर्वहितकारित्वात्तदपि कर्तुमुचितम् । सर्वदर्शनत्वेन तदपि ज्ञातमित्यर्थः ॥१॥ उपबृंहितमुपचितम् । सुरतसम्बंधिलेख्यानि वृषभवंधविपरीतरत्यादिचित्राणि । सुरभिभिर्घ्राणेंद्रियतृप्त्युत्पादकैः 'सुरभिर्घ्राणतर्पणः' इत्यमरः । सार्द्धेनान्वयः ॥*॥ महार्हेति—संभोगोत्सवोपयोगिबहूपकरणान्वितमित्यर्थः । कामो पाया मधुतांबूलादयः । उपस्कारानेव प्रपञ्चयति—मुक्तादामानि गृहस्य पताकोपरीति ज्ञेयम् ॥ २ ॥ तं कृष्णम् । जातः संभ्रमो वेगो यस्याः सा तथा । सदासनं सिंहासनं, बहुमूल्यनेपालकंबलादिमयं वा । आदिना पुष्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथोद्धवः साधु तयाऽभिपूजितो न्यषीददुर्व्यामभिमृश्य चासनम् ॥ कृष्णोऽपि तूर्णं शयनं महाधनं विवेश लोकाचरितान्यनुव्रतः ॥ ४ ॥ सा मज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादिभिः ॥ प्रसाधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ॥ ५ ॥ आहूय कांतां नवसंगम ह्रिया विशंकितां कंकणभूषिते करे ॥ प्रगृह्य शय्यामधिवेश्य रामया रेमेऽनुलेपार्पणपुण्यलेशया ॥ ६ ॥

सद्भिरासनादिभिः ॥ ३ ॥ ४ ॥ प्रसाधितो योग्यतामापादित आत्मा देहो यया सा । सव्रीडं यल्लीलयोद्गतं स्मितं तद्येषु विभ्रमेषु भ्रूविक्षेपादिविलासेषु तद्युक्तैरीक्षितैरुपलक्षिता ॥ ५ ॥ अनुलेपार्पणादन्यत्तस्याः पुण्यं नास्तीति दर्शयितुं पुण्यलेशयेत्युक्तं न तु पुण्यस्याल्पत्वविवक्षया ॥ ६ ॥

मालादिग्रहः ॥ * ॥ अवेक्ष्य दूरे दृष्ट्वा । सम्यगुल्लासेनोत्थाय । हि पादपूरणे । उल्लासकार्यमाह—जातसंभ्रमा, सम्भ्रमः चित्तत्वरा । अच्युतमिति प्रतिज्ञातच्युतिरहितम् ॥ ३ ॥ यथा कृष्णस्तथैव । तया सैरन्ध्र्या । अभिमृश्य स्पृष्ट्वा । सर्वेश्वरसमक्षं समासनोपवेशनानौचित्याद्भूमावेवोर्णाद्यासने न तु सिंहासन इति भावः । महाधनमनर्घ्यम् । लोका अत्र रसिकास्तदाचरितानि दासीसंगादीनि । वस्तुतस्तु लोकाचरितानि स्वोक्तिपालननिजजनाभिप्रेतार्थपूरणादीनि ॥ * ॥ तथेत्युक्तसमुच्चये । उद्धवश्च साधु यथा स्यात्तथाऽभितः पूजितः उर्व्यां न्यषीददिति भक्त्यासनमभिमृश्य स्पृष्ट्वेति तस्याः प्रीत्यर्थं वंदित्वेत्यर्थो वा । महाधनममूल्यरत्नादिमयमित्यर्थः । तूर्णं विवेशेति पूजायाः पूर्वमासने निविष्टस्ततः उत्थाय सद्यो गृहान्तःशय्यायां स्वयमुपविवेशेत्यर्थः । तत्र हेतुः—लोकानामाचरितानि स्वैरस्त्रीगृहमध्ये रत्यर्थं स्वेच्छयैवासु तच्छय्यानिवेशादीनि सर्वाण्येवानुसृतः । स्वीकृतलौकिकलीलत्वादेवात इदमपि रात्रावेव बोद्धव्यम् ॥ **विश्वनाथस्तु**—उर्व्यां न्यषीदत् कृष्णप्रियादत्तासने दासस्योपवेशनानौचित्यात्तदाज्ञापालनार्थं केवलं हस्तेनैव पस्पर्शेत्यर्थमाह ॥ ‘ शयनमन्तर्गृहे शय्यासुप्तिसद्मसु वर्तते ’ इति ॥ ॥ ४ ॥ सा कुब्जचरा । सुधेव स्वादुरासव ओषध्यर्कस्सुधासवस्तदादिभिरुत्तमांजनादिभिः ॥ * ॥ आलेपश्चंदनपंकः । गंधो वह्निसंपर्कजश्चंदनादिनिर्यासः । सुधावदासवो मधु । उपससार समीपे शनैर्गता । माधवं लक्ष्मीकान्तमिति, अहो दीनविषयकृपापारवश्यं कियद्वर्णनीयमिति भावः । प्रसाधितो रतियोग्यतां प्रापितः ॥ ५ ॥ नवस्य “ यद्यप्यसौ पार्श्वगतो रहो गतस्तथापि तस्यांघ्रियुगं नवंनवम् ” इत्याद्युक्तेर्नित्यनूतनस्य श्रीकृष्णस्य संगमेऽहो अयं ब्रह्माद्याशास्यमानलोकश्रीरमापतिः क्वाहं क्वेति या लज्जा तया विशंकितां संकुचिताम् । शय्यामिति कर्मप्रवचनीययोगे सप्तम्यर्थे द्वितीया । भगवतेऽनुलेपार्पणस्यातीव पुण्यत्वात् । “ काश्मीरद्रवपाटीरकर्पूरादिभिरन्वितम् । अनुलेपं हरेर्दत्त्वा ह्यश्वमेधफलं लभेत् ॥ ” इत्यादिपुराणात् ॥ * ॥ नवसंगमह्रिया विशंकितामित्यनेन तस्याः प्राचीनतत्स्पर्शप्रभावेण तदेव शरीरं परमदिव्यकुमारीभावाय संपन्नमित्येतद्व्यंजितम् । कंकणभूषित इति सुकोमलांगित्वात्कंकणोपर्य्येव प्रगृह्येत्यर्थः । तादृशानुग्रहे भक्तिरेव हेतुरित्याह—अनुपलेपेति, तैर्व्याख्यातम् । यद्वा—अनुलेपार्पणलक्षणं पुण्यं लान्ति आत्मसात्कुर्वंतीत्यनुलेपनलास्ते त्वामीशियाऽनुलेपार्पकभक्तवर्गश्रेष्ठयेत्यर्थः । स्वयं भगवति श्रीकृष्णे तत्रापि साक्षात्तत्रापि समयविशेषेऽनुलेपार्पणात् ॥ **विश्वनाथस्तु**—नवसंगमेति विशंकितेति पदाभ्यां मन्दधियः प्रति तस्या अनन्यभोग्यत्वं ज्ञापितम् । तत्र तस्या महासुंदर्य्याः कुब्जत्वमेव रक्षकमासीदिति भावः । अनुलेपार्पणलक्षणस्तत्प्रापकः पुण्यलेशो यस्या इति, न तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साऽनंगतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेन रुजो मृजंती ॥ दोर्भ्यां स्तनांतरगतं परिरभ्य कांतमानंदमूर्तिमजहादतिदीर्घतापम् ॥ ७ ॥ सैवं कैवल्यनाथं तं प्राप्य दुष्प्रापमीश्वरम् ॥ अंगरागार्पणेनाहो दुर्भगेदमयाचत ॥ ८ ॥ आहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया ॥ रमस्व नोत्सहे त्यक्तुं संगं तेंबुरुहेक्षण ॥ ९ ॥ तस्यै कामवरं दत्त्वा मानयित्वा च मानदः ॥ सहोद्धवेन सर्वेशः स्वधामागमदर्चितः ॥ १० ॥

कुचादीनां रुजो मृजंती । जिघ्रंती च चरणमित्यर्थः ॥ ७ ॥ काममेव प्राकृतदृष्ट्या अयाचत । न च गोप्य इव सा तन्निष्ठेति दुर्भगेत्युक्तम् । कृतार्थत्वे तु तस्या न संदेहः ॥ ८ ॥ ९ ॥ काम एव वरस्तं दत्त्वा । मानयित्वा चालंकारादिदानैः ॥ १० ॥

साधनसिद्धानां व्रजांगनानां माथुरीणामिव पुण्यपुंज इति भावः ॥ ६ ॥ सा सैरंध्री । दोर्भ्यां बाहुभ्याम् । स्तनावंतरे मध्ये यस्य तत्स्तनांतरं वक्षस्थलं तद्गतं प्राप्तं कांतं कमनीयं, कशब्दोपलक्षितवेदस्याप्तं तात्पर्यविषयं वा । काम्यते सर्वैरिति कमनी रमा तया यायते प्राप्यते कमनीया सा मूर्तिर्यस्य, अनेन लक्ष्मीयोग्यमतीव दुर्लभं वस्तु तदिति ध्वनितम् । अतिदीर्घतापं संसारम्, लोकदृष्ट्या कामार्तिं वा ॥ * ॥ अनंगतप्तेत्यस्योरसाऽक्षिभ्यामप्यनुषंगः । अनंगतप्तेत्यसमस्तत्वेपि संश्रुतत्वात् । अनंतस्यापरिच्छिन्नमाधुर्यतया च तस्य तथा नाम्नश्चरणेन स्वयं तेन वा तत्रतत्र निहितेन रुजः कामपीडा मृजंती अपसारयन्ती, एतच्च रतान्ते ज्ञेयम् । स्तनांतरगतं स्तनरूपावकाशं प्राप्तम् ‘अंतरमवकाशावधि’ इत्यमरनानार्थात् । अत एवानंदमूर्तिं तत्रापि कान्तं मधुरभावविशेषमयमत एवात्यंतदीर्घमपि तदप्राप्तितापं सद्यो जहौ ॥ ७ ॥ सोक्तार्था । प्राकृतदृष्ट्या संसारिकदृष्ट्या । कामं निधुवनलीलाम् । तन्निष्ठा कृष्णनिष्ठा । यत्स्मरणं कृतार्थताऽऽपादकं तत्संगस्य तत्र का कथेत्यर्थः । यद्वा—दुर्गतं भं भयं यस्मात्स दुर्भः कृष्णस्तं गच्छतीति दुर्भगा, दुःखेभ्यो बिभ्यतीति दुर्भा विरक्तास्तैर्गम्यते इति दुर्भगो हरिः सोस्ति प्रियत्वेनास्या इति दुर्भगा । मत्वर्थीयाजंताट्टाप् । इदं वक्ष्यमाणम् ॥ * ॥ ईश्वरं परमस्वतंत्रमत एव परमदुष्प्रापम् । एवमुक्तप्रकारेण । तत्रापि केवलः शुद्धभक्तस्तस्य भावः कैवल्यमेकान्तरतिः ‘कैवल्यसंमतपथस्त्वथ भक्तियोगः’ इत्यत्र कैवल्यमित्येव संमतः पंथा भक्तियोग इति स्वामिव्याख्यानात्, यथा वर्णविधानमपवर्गश्च भवतीति पंचमस्कन्धपद्यानुसाराच्च तस्य नाथं तत्प्रदानप्रभुं तत्तया प्राप्य प्रकर्षेण लब्ध्वा दुर्भगा पूर्वं कुब्जात्वदासीत्वलक्षणदौर्भाग्ययुक्तापि न तु श्रीगोपीव स्वतः श्रीविजयितत्तद्गुणयुक्ता । अहो आश्चर्यम् । इदं वक्ष्यमाणं सुदुर्लभं पदमयाचत । अस्या दुर्भगावस्थत्वस्य प्राचीनत्वेन निर्देशः । “किमनेन कृतं पूर्वमवधूतेन भिक्षुणा” इत्यादिवत् ॥ ८ ॥ ० ॥ * ॥ तदेवाह—सहेति । आहोष्यतामिति पाठः सर्वत्र स तु पुनरुक्तः अयाचतेत्युक्तत्वात् । याचनमेव विवृणोति—सहेति । इह मद्गृहे मया सहोष्यतां त्वया । तत्र प्रयोजनमाह—रमस्वेति । तत्रापि मया सहेति योज्यम् । ननु ममान्यत्र कृत्यानि बहुतराणि संतीति चेत्तत्राह—नोत्सह इति । अतस्त्वं यत्र यास्यसि तत्रैवाहं यायामन्यथा प्राणांस्त्यक्ष्यामीति भावः ॥ **विश्वनाथस्तु**—कैवल्येनैव नाथमयाचत केवलया मयैव सह रमस्व न त्वन्यया कयाचिदपीति प्रार्थयामासेत्यर्थः । तथाभूतवरस्य कृष्णेनाप्रदास्यमानत्वाद्दुर्भगा । तत्रापि कतिचित्तु दिनानि इहांतर्गृह एवोष्यतां न तु बहिर्निष्क्रम्यतां भोजनपानादिसिद्धिरेतद्गृहमध्य एव सर्वा वर्तत इति भावः ॥ ९ ॥ तस्यै सैरंध्र्यै । सर्वेश इति तद्गृहगमने तत्संगे च दोषाभावमाह ॥ [illegible] ॥ [illegible]मवरं [illegible]त्त्वेति मत्कर्तृकसंपूर्णसंभोग

१ सहोष्यतामिति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुराराध्यं समाराध्य विष्णुं सर्वेश्वरेश्वरम् ॥ यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसौ ॥ ११ ॥
अक्रूरभवनं कृष्णः सहरामोद्धवः प्रभुः ॥ किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया ॥ १२ ॥

मनोग्राह्यं विषयसुखम् । तस्यासत्त्वात्तुच्छत्वात् ॥ ११ ॥ किंचिच्चिकीर्षयन् हस्तिनापुरप्रस्थापनं कारयितुमिच्छन्नित्यर्थः । अक्रूरप्रियकाम्यया च ॥ १२ ॥

एव तवाभिप्रेतः स च सामान्यस्त्रीसत्त्वेऽपि ते सेत्स्यतीति प्रतिश्रुत्येत्यर्थः । मानयित्वा तत्र तां संमतां कृत्वा, निरंतरं रमणं तु त्वदिष्टं न संभवेत्किंवदन्तीभयादिति चोक्त्वाऽ
गमत् । गमनागमनयोरुद्धवसाहित्यं लोकवितर्काऽभावाय, तस्य महाशिष्टशिरोमणित्वेन सर्वत्र ख्यातत्वात् । कुब्जेयं भूशक्तेर्विभूतिर्ज्ञेया पूर्वव्याख्यानात् ॥ **तोषिणीकारास्तु**—कामः 'सहोष्यताम्' इत्यादिना तया
प्रार्थितः स्मरोपभोगः स एवाभीष्टोऽर्थ आगत्यागत्य रंस्य इति तत्संकल्पात्मकस्तामिति श्रीगोपीवच्छुद्धप्रेमाविशेषो भावो दर्शितः । 'यत्ते सुजातचरणाम्बुरुहम्' इत्यादिरीत्या तासां तदीयसुखैकस्वसुखदत्वादस्यास्तु स्वसु
खमात्रोद्देशात् । किन्तु "लक्ष्मीसहस्रकोटीनामप्याविर्भावने प्रभोः । सैरंध्र्याः स्वीकृतिः सेयं व्यनक्ति स्म परां कृपाम् ॥" । तत्र च तस्य स्वाभाविककरुणैव कारणमित्याह—मानद इति । उद्धवेन सहित इति यथा तेन सह
गतस्तथैवागतः, तच्च लोकाचारितमनुसृत्य तस्य परमधर्मनिष्ठस्य संगेनापलापार्थमिव । वस्तुतस्तु परमप्रणयेनेति भावः । स्वधाम श्रीवसुदेवांतर्गृहम् । तत्रतत्र च तस्य लीलेच्छैव कारणमित्याह—सर्वेश इति । ऋद्धिमत्[1] सर्व
विधप्रियजनसेवोपकरणसंपन्नामिति तद्गमनयोग्यतोक्ता । अत्रेयं माथुरहरिवंशकथा श्रूयते—पूर्वजन्मनीयं राजकन्यासीत्तत्र नारदाद्भगवद्गुणगानश्रवणेन तस्मिञ्जातानुरागा बभूव, पश्चाच्च नारदात्तस्या योग्यवरे राज्ञा पृष्टे स
उवाच तामेव कन्यां पृच्छामस्तस्याः कोऽभिप्रायस्ततश्च पृष्टा सोवाच—यं भवान्सर्वोत्तमत्वेन गायति स मे वर इति, ततश्च नारदेन तत्प्राप्त्यवसंभावनायां दर्शितायामपि जन्मकोटिभिरपि वरयिष्यामीति तद्वचनं श्रुत्वा विवाहस्य
तत्प्राप्तिसाधनमुपदिष्टा सा चिरं तपस्तप्तवती, तदाऽऽकाशवाणी जाता—जन्मांतरे कुब्जा सती यत्स्पर्शेण सौंदर्यं लप्स्यते सोऽहं ते पतिः स्यामिति, ततश्च कंसमंत्रिवरवैश्यगृहे सा तथैव जाता, कंसेन सा प्रार्थ्य निजगंध
युक्तौ निर्दिष्टेति । एवमंगरागार्पणेनाहो इति यथाधुनिकदृष्टमेव कल्पभेदकथामयं वेति ॥ १० ॥ मनसाप्यग्राह्यम् । कुत्सिते शब्दादिविषये मनीषा बुद्धिर्यस्य स तथा ॥ * ॥ तदेवं तत्कथां समाप्य तस्या लौकिक
कामिनीवत्प्रतीयमानत्वेऽपि निंदां निराकुर्वन्प्रशंसामेव व्यनक्ति—दुराराध्यमिति । विष्णुं सर्वव्यापकं परिपूर्णं स्वयं भगवन्तमित्यर्थः । अतः सर्वेषामीश्वराणां महत्स्रष्ट्रादिपुरुषाणामपीश्वरमाविर्भावादिहेतुम् । 'सर्ववरेश्वरम्'
इति पाठे तु सर्वेषां वराणां वरणीयार्थानां मुक्तिभक्तिपर्यन्तानामीश्वरं प्रदानसमर्थमत एव दुराराध्यं तादृशमपि सम्यगाराध्य यो मनोग्राह्यं वस्तु स्वप्रीतिजनकत्वेन प्रार्थयते असावेव जनः कुमनीषी कुमतिः, तत्र हेतुरस
त्त्वात् । अतितुच्छानित्यानर्थकार्यर्थवरणात् । एषा तु वाङ्मनसागोचरमानंदमूर्तिंश्रीभगवन्तमेव तादृशत्वेन प्रार्थितवती परमसुबुद्धिरेवेत्यर्थः । तथैव प्रार्थितं श्रीप्रह्लादेन—"या प्रीतिरविवेकानां विषये ह्यनपायिनी । त्वामनु
स्मरतः सा मे हृदयान्मापसर्पतु ॥" इति विष्णुपुराणे ॥ **विश्वनाथस्तु**—मनोग्राह्यं स्वेंद्रियसुखं तेन कृष्णेंद्रियसुख एव सर्वथा दृष्ट्या यद्यानुषंगिकं स्वेंद्रियसुखं स्यात्तदा न दोषः । भक्तिमात्रैककामित्वेऽपि संसारध्वंस
त्वदिति ज्ञेयम् ॥ ११ ॥ इत्यर्थ इति—किञ्चित्पदं सर्वसाधारणवाचि तेनेष्टार्थावबोधः, इष्टं च हस्तिनापुरप्रेषणमेवेति भावः । अक्रूरप्रियं च "आगच्छ याम गेहान्नः सनाथान्कुर्वधोक्षज" इत्याद्युक्तलक्षणम् ॥ * ॥ श्रीसै
रंध्र्या इवाक्रूरायापि दत्तं वरं संपादयंस्तद्गृहं गत इत्येतदंशेन प्रसंगसाजात्याल्लीलाक्रमाच्चाह—अक्रूरेति । रामोद्धवाभ्यां सहित इति । 'आर्यसमन्वितः' इति भगवता पूर्वं तथैवांगीकारात्तथाग्रजं विना स्वातंत्र्येण तादृशकार्यविधा

[1] 'स्वधामाऽगमदृद्धिमत्' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तान्नरवरश्रेष्ठानाराद्वीक्ष्य स्वबांधवान् ॥ प्रत्युत्थाय प्रमुदितः परिष्वज्याभिनंद्य च ॥ १३ ॥ ननाम कृष्णं रामं च स तैरप्यभिवादितः ॥ पूजयामास विधिवत्कृतासनपरिग्रहान् ॥ १४ ॥ पादावनेजनीरापो धारयञ्छिरसा नृप ॥ अर्हणेनांबरैर्दिव्यैर्गंधस्रग्भूषणोत्तमैः ॥ १५ ॥ अर्चित्वा शिरसाऽऽनम्य पादावंकगतौ मृजन् ॥ प्रश्रयावनतोऽक्रूरः कृष्णरामावभाषत ॥ १६ ॥ दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलम् ॥ भवद्भ्यामुद्धृतं कृच्छ्राद्दुरंताच्च समेधितम् ॥ ॥ १७ ॥ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ ॥ भवद्भ्यां न विना किंचित्परमस्ति न चापरम् ॥ १८ ॥

आराद्दूरत एव ॥ १३ ॥ १४ ॥ आ अप इति छेदः । अप आ सर्वतो धारयन्नित्यन्वयः ॥ १५ ॥ १६ ॥ वां युवयोरिदं कुलं गृहं वा भवद्भ्यामुद्धृतं समेधितं च ॥ १७ ॥ वामिदं कुलमित्यादिव्यवहारदृष्ट्योक्त्वा परमार्थमाह । युवामिति । जगन्मयौ युवाम् । कुतः । जगद्धेतू । तदपि कुतः । प्रधानपुरुषौ तदात्मकौ । अतो भवद्भ्यां विना परं कारणमपरं कार्यं च नास्ति ॥ १८ ॥

नानौचित्याच्च । रामोद्धवसाहित्यं सर्वत्रैव तस्य तदनुगतत्वात्कार्यवरस्य विधानार्थं मंत्रिवरस्यापेक्ष्यत्वाच्च ॥ **विश्वनाथस्तु**—अक्रूरप्रियकाम्ययैव किंचिच्चिकीर्षयन् दासस्य स्वविषयकप्रभुनिदेशस्यैव प्रियत्वमननात् ॥ १२ ॥ सोऽक्रूरः । तान्कृष्णादीन् । ननामेत्यग्रिमेणाप्यन्वयः ॥ * ॥ श्रीकृष्णस्य तदीयं पांडवीयश्च सौहृदांशं प्रकाश्यैव तत्र गतत्वात्प्रथमतोऽक्रूरस्यापि तादृशो भावो जात इत्याह—स इति । नरवरेषु श्रेष्ठान् आरात्तदर्थं चन्द्रशालिकाद्युपवेश्य स्थापयित्वा दूरादेव स्वयं विलोक्य प्रमुदितः सन् प्रत्युत्थाय प्रत्युद्गम्य चेति ज्ञेयम् । ततः परिष्वज्य शुभाशंसनादिनाभ्यनन्दत् । ‘ अभिनंद्य च ’ इति पाठे युग्मकम् ॥ १३ ॥ सोऽक्रूरः । तैः कृष्णादिभिः ॥ * ॥ पश्चादातिथ्यकरणे भक्त्यंशमवलंब्य स्वभावादरेणैवैश्वर्यस्फूर्तिस्तदनुक्रमेणैव कृष्णं रामञ्च ननामेत्यन्वयः । उद्धवं तु “ वैष्णवे बन्धुसत्कृत्या ’ इति रीत्या बन्धूचित्तमेव सच्चकारेति ज्ञेयम् । तत्रापि पूर्वयुक्त्या तैः श्रीकृष्णादिभिरभिनंदित एव ‘ अभिवादितः ’ इति पाठांतरम् ॥ १४ ॥ अर्हणेन योग्यपूजोपकरणेन । तदेवाह—अंबरैरित्यादि ॥ मृजन्मृदु पीडयन् ॥ * ॥ पादेति युग्मकम् । पादाववनिज्येते याभिस्ताः । धारयन्निति “ वर्तमानसामीप्ये वर्तमानवद्वा ” । अर्हणेन चतुर्विधान्नतांबूलपर्यंताहेणद्रव्येण ॥ तदनंतरं पूर्वतोऽपूर्वाऽम्बरादिभिरर्चयित्वा शिरसाऽऽनम्य पादसंवाहनारंभे भक्त्या तौ शिरसा स्पृष्ट्वा । पादाविति—कृष्णरामयोः सह विश्रांतयोरेकमेकमित्यर्थः । तथाभिप्रेत्यैव श्रीकृष्णेन तथा विश्रांतत्वात् । मृजन्संवाहयन्नित्यर्थः । श्रीकृष्णरामावुत्तानशायिनौ ॥ १५ ॥ १६ ॥ उद्धृतं दुःखात् । समेधितं यथेप्सितप्रदानेन ॥ * ॥ सम्यगेधितं विचित्रवैभवैः ॥ १७ ॥ जगन्मयौ जगद्व्यापिनौ । तत्र हेतुमाशंकते—कुत इति । तदपि जगद्धेतुत्वमपि । तदात्मकौ प्रधानपुरुषरूपौ । संकर्षणस्य प्रधानकार्याहंकाराधिष्ठातृत्वेन प्रधानरूपत्वं, पञ्चमस्कन्धे तु श्रीरुद्रेण स्फुटमेव प्रधानत्वमुक्तं संकर्षणस्य प्रधानकार्यकारित्वात् । तथाहि—“ यस्याद्य आसीद्गुणविग्रहो महान्यत्संभवोऽहं त्रिवृता स्वतेजसा ” इति । सांख्यैरपि प्रधानादेव महत्तत्त्वोत्पत्तिस्ततोऽहंकारोत्पत्तिश्च मन्यते, श्रीकृष्णस्य पुरुषत्वम् “ स एष आद्यः पुरुषः पुराणो न यत्र कालो विशते न वेदः ” इत्यादिवाक्यैर्बहुत्रोक्तमिति । यतः प्रकृतिपुरुषरूपावतो हेतोः । नास्तीति निखिलप्रपञ्चस्य प्रकृतिपुरुषात्मकत्वात् । “ अणुर्बृहत्कृशः स्थूलो योयो भावः प्रसिध्यति । सर्वो ह्युभयसंयुक्तः प्रकृत्या पुरुषेण च ॥ ” इति वक्ष्यमाणत्वात् ॥ * ॥ इदं कुलं वामिति किमुच्यते जगदपि युष्मदीयमित्याह—युवामिति । एकस्यापीश्वरस्य द्विधाविर्भावादित्वेन बहिरंगांतरंगशक्तिभ्यां प्रधानपुरुषौ सन्तौ जगद्धेतू जगदुपादाननिमित्तकारणे, अत एव ताभ्यामेवांशाभ्यां जगन्मयौ, तत्तादात्म्येनापि स्थितावित्यर्थः । तदुक्तमेकादशे—“ आसीज्ज्ञानमथो अर्थ एकमेवाऽविकल्पितम् । तन्मायाफलरूपेण द्विधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ॥ ईयते बहुधा ब्रह्मन्छ्रुतप्रत्यक्षगोचरम् ॥१९॥ यथा हि भूतेषु चराचरेषु मह्यादयो योनिषु भांति नाना ॥ एवं भवान्केवल आत्मयोनिष्वात्मात्मतंत्रो बहुधा विभाति ॥ २० ॥ सृजस्यथो लुंपसि पासि विश्वं रजस्तमःसत्त्वगुणैः स्वशक्तिभिः ॥ न बध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बंधहेतुः ॥ २१ ॥

ननु प्रत्यक्षादिसिद्धं कथं नास्तीत्युच्यतेऽत आह । आत्मसृष्टमिति । हे ब्रह्मन्परमेश्वर । ब्रह्मेति वा पाठः । रजआदिस्वशक्तिभिरात्मनैव सृष्टमिदं विश्वमन्वाविश्य कारणत्वादननुप्रविष्टोऽप्यनुप्रविश्येव स्थितः श्रुतप्रत्यक्षगोचरं यथा भवति तथा बहुधा भवानेव प्रतीयते॥ १९॥एकस्यैव बहुधा प्रतीतिं सदृष्टांतमाह। यथा हीति । योनिषु स्वस्यैव रूपांतरेणाभिव्यक्तिस्थानेषु चराचरेषु भूतेषु यथा महीप्रमुखानि कारणान्येव नाना भांति तथात्मयोनिषु स्वकारणेषु भूतभौतिकेषु भवान्केवलोऽपि बहुधा विभाति । ननु जीवोऽपि नरमृगादिशरीरेषु बाल्युवाद्यवस्थासु च तथातथा प्रतीयत इत्याशंक्य तद्व्यवच्छेदार्थमात्मतंत्रग्रहणम् ॥ २० ॥ ननु सृष्ट्यादिकर्तृत्वेन सगुणत्वेन च मम किं जीववद्बंध उक्तो नहिनहीत्याह । सृजसीति । तद्गुणकर्मभिर्वा तैर्गुणैः कर्मभिर्वेत्यर्थः । यतः क्व च ते बंधहेतुः कदाचिदपि बंधहेतुरविद्या तव नैवास्ति । कुत इत्यत आह । ज्ञाना

समभवद्बृहत् ॥ '' इति । अतो भवद्द्वयां विना भूतं कारणं कार्यं च किञ्चिन्नास्तीति जगदेव युवाभ्यामुद्धार्यं समेध्यञ्चेति भावः ॥ १८ ॥ प्रत्यक्षासिद्धस्यापलापो न युक्त इत्याशंकते–नन्विति । नपुंसकानां संबोधने न लोपविकल्पत्वाद्द्वितीयपाठोपि साधीयान् । अन्वाविश्याणुत्वमहत्त्वानुरूप्यतया प्रविश्य “ तत्सृष्ट्वा तदेवानुप्राविशत् ” इति श्रुतेः । श्रुतप्रत्यक्षयोर्गोचरम्–श्रुतं श्रुतिः “ वाचारंभणं विकारः–”इत्यादिरूपा, प्रत्यक्षत्वयं घटोऽयं पट इत्यादिनिर्दोषार्थेन्द्रियसन्निकर्षलक्षणम् । यद्वा–श्रुतस्य प्रत्यक्षं साक्षात्कारो येषां ते श्रुतप्रत्यक्षा ज्ञानिनस्तेषां गोचरं वा ॥ * ॥ तादृशतत्कार्यस्य विश्वस्य तदव्यतिरेकेण तदभिन्नत्वं साधयन्पुनरंतर्यामितया तद्व्याप्तत्वेन च साधयति । आत्मकार्यं स्वसृष्टं बहुधा देवगंधर्वमनुष्यगवादिरूपेण चेयतेऽवगम्यते, यतो विश्वमिदं श्रुतप्रत्यक्षगोचरं श्रवणदर्शनविषयीभूतम् । अजहल्लिंगस्यापि गोचरशब्दस्य क्लीबत्वमार्षम् ॥ १९ ॥ “ योनिः प्राकट्यनिलये भगणे त्वाकरेषु च ” इति धरणिः । भांति प्रतीयन्ते । तथातथा नरमृगादिरूपो बाल्युवादिरूपो वा । तद्व्यवच्छेदार्थं जीवत्वापाकरणार्थम् ॥ * ॥ एवं केवलः शुद्धोऽचिंत्यशक्त्या विकाररहित एव आत्मयोनिष्वात्माभिव्यक्तिस्थानेषु आत्मा भवान्बहुधा विभाति । आत्मतंत्रः स्वतंत्रः ॥ २० ॥ स्वतंत्रत्वेपि पुनराशंकते–नन्विति । नहिनहीति संभ्रमे वीप्सा । इत्यर्थ इति--तत्पुरुषभ्रमवारणार्थमयमर्थः कार्य इति । यतो हेतोर्बंधहेतुर्नास्ति अतो न बध्यसे इत्यन्वयः । इति भाव इति–“नेश्वरस्याऽशुभं धत्ते स्वे महिम्नि स्थितस्य च” इत्युक्तेः, लौकिकींद्रजालादिमायायामपि तथा दर्शनात् ॥ * ॥ ननु भवत्वचिंत्यशक्तित्वाच्चिंतामण्ययस्कांतादिवदुपादाननिमित्तत्वेप्यविकारित्वं, कथं नाम वीक्षणादिचेष्टामयस्रष्टृत्वादि ० कथं वा तेन न बद्धस्तत्राह–सृजसीति । सिद्धान्तमाह–ज्ञानात्मनः चिच्छक्तिमात्रविलासप्रयत्नस्य मायाविलासोऽपि यस्तव प्रयत्नः प्रतीयते सोऽपि तत्संबंधेनैवेत्यर्थः । एतदुक्तं भवति–मायिकप्रपंचेऽपि चिच्छक्तिविलासास्त्वदुक्त्यादिरूपा अनुगता दृश्यन्ते, तथा चैकादशे “सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी । तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥” इत्यादि । अतो मायिकवैभवांतर्गतसाधकभक्तजनार्थमेव कुर्वंति त्वय्यानुषंगिकमेवान्यसृष्ट्यादिकं भवतीति पासीति पश्चान्निर्देशस्य तात्कालिकत्वेन दृष्टान्ततया विन्यासात् । यथोक्तं प्रथमे श्रीकुन्त्या–“तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येमहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदाऽऽत्मनः स्यात् ॥ अतो न बंधस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ॥ २२ ॥

त्मन इति । मायाया आश्रयानावरकत्वादिति भावः ॥ २१ ॥ किञ्च आस्तां तावद्बंधशंका यतोऽविद्योपाधेर्जीवात्मनोऽपि न वस्तुतो बंधोऽस्तीत्याह । देहाद्युपाधेरिति । अनिरूपितत्वान्मिथ्यात्वादित्यर्थः । आत्मनो भवो जन्म तन्मूला भिदा च साक्षात्स्वरूपतो न स्यादिति । ननु मम बंधाभावं वदता त्वया किं मोक्षोंगीकृतः ओमिति चे त्तर्हि बंधाभावे मोक्षासंभवादापन्नो बंधोऽपीत्याशंक्याह । अत इति । यतो नाविद्या अतो न बंधो मोक्षश्च । एवमुभौ न स्यातामित्यर्थः । ननु उलूखले मां बद्धं श्रुतवान्यमु नाह्रदे मुक्तं दृष्टवानस्यतः कथमुभयं नास्तीत्यत आह । निकाम इति । स्वाभिप्रायानुरूपस्त्वयि नोऽस्माकमविवेक एव परमेवंभूत इति । यद्वा नोऽविवेक एव तवोभौ स्याता

त्रियः ॥'' इति । तदेवं मायाविलास एव विकारित्वं न तु चिच्छक्तिविलासे, तत्र तन्निषेधात् । यथोक्तं द्वितीये वैकुंठवर्णने–'न यत्र माया' इति, 'न च कालविक्रमः' इति च । तथा मायाविलासानासक्तेः तेन न बंधोऽतो न दोष इति भावः ॥ अत्र **विश्वनाथः**–अतस्त्वमेक एव सर्वे (जगदी) श्वर इत्याह–सृजसीति । तत्तदभिधैस्तैस्तैर्गुणैः कर्मभिश्च जीव इव त्वं न बध्यसे । ननु कुतोऽहं न बध्ये तत्राह–ज्ञानात्मनः ज्ञानस्वरूपस्य, परब्रह्मणस्तव बंधहेतुरविद्या क्व, जीवस्येव तव सा नास्तीत्यर्थः ॥ अत्र **तोषिणी**–तैर्व्याख्यातं, तत्रोलूखलबद्धश्रवणान्नराकृतिमूर्तौ संसारबंधोपि संभाव्यते, यमुनाह्रदे दृष्टदेवाकृतिमूर्तौ तत्तदैश्वर्यसामग्री दर्शनान्मुक्तत्वं च प्रतीयत इत्यभिप्रायः ॥ २१ ॥ तव तु बंधो दूरापास्त इत्याह–किञ्चेति । तन्मूला जन्मकारणम् । भिदा भेदः । अनिरूपितत्वाद्विचारे क्रियमाणे निरूपयितुमशक्यत्वात् । विचारश्च–देहः कुतो जातः शुक्रशोणिताभ्यां, ते चान्नादन्नञ्चादृष्टसहकृतजलादित्येवमादिरूपस्तेन परमकारण एव पर्यवसानं लभ्यते नान्यत्रेति । बंधाभावेऽपि शंकते–नन्विति । ओमित्यंगीकारेऽव्ययम् । तत्राप्याक्षिपति–बंधाभावे इति । 'बद्ध एव मुक्तो भवति नाबद्धः' इति न्यायात् । तथा च मोक्षाऽभावे बंध एवापन्न आयात इति । एवमुक्तरीत्या । उभौ बंधमोक्षौ । इत्यर्थ इति–सर्वदा विमुक्तस्य कथं बंधाशंका तदुत्तरा मोक्षशंका चेत्यर्थः । बंधमोक्षाव भिनीय दर्शयति–नन्वित्यादिना । मुक्तं कालियादिति शेषः । यत उभौ प्रत्यक्षसिद्धावतो हेतोः । अतोऽत्र । ''निकामस्त्वनुकूले निश्चयातिशययोरपि '' इति धरणिः । परं केवलमेवंभूतो बंधमोक्षादिप्रदर्शक इति । न हि वनस्थाग्निना गृहदाहो युज्यत इत्यतो भवदधिकरणकाविवेको भवतामेव बंधादिप्रदो न मम । त्वयीत्युक्त्या ममैव प्रतीयत इत्यरुच्याह–यद्वेति । वस्तुतस्तव न स्तस्तावस्माकमेवाविवेकः स यो विद्यमानधर्मारोपः खपुष्पसौर भ्यादिवदिति भावः॥*॥ अनिरूपितत्वादनिर्वचनीयत्वादित्यर्थः । यद्वा–यदि वा स्यातां तादृशौ तदा नोऽस्माकं प्रियवर्गाणां नितरां काम एव तौ द्वौ स्याताम् । प्रेमविजातिविशेषोचितमनोरथविशेषं प्राप्यैव तादृश्यो लीलास्तवोदयंते, यथा श्रीयशोदाया वात्सल्यमनोरथविशेषेणार्भकभावमयलीलाविशेषोदयाद्बंधनादिप्राप्तिलीलोदय इति भावः । ननु कथं प्रकटैश्वर्येऽपि मयि तेषां तादृशभावः संभवति तत्राह–न तिष्ठति विवेक ऐश्वर्यदर्शनेऽपि तदनुसंधानं यस्मात्तादृशोऽपि निष्काम इति । यतः '' अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ '' इत्युक्तेस्तवापि तादृशो भावः स्यादिति भावः ॥ अत्र **विश्वनाथः**–ननु मे यद्यविद्या नास्ति तदात्मदेहोऽयमविद्यात्मकः कुत आयातस्तत्राह–देहादीति । तव देहाद्युपाधेरनिरूपितत्वादिति तव देहादिरुपाधि राविद्यक इति कैरपि शास्त्रज्ञैर्न निरूपित इति । अत एव तव न भवो जीववत्संसारो जन्म वा नैव स्यात्, तवापि देहादिराविद्यको यदि भवेत्तदा त्वमपि स्वतंत्रोऽपि जीवतुल्य एव जन्मादिमान्स्या इत्यर्थः । अतस्तव देहादेरुपाधित्वाभावाज्जीववत्साक्षात्पैतृकधातुसंबंधं जन्म न स्यात्किं त्वाविर्भावात्मकमेव जन्म भवेत्तथात्मनो देहाद्भिदा भिन्नत्वं जीवस्येव तव नास्ति, त्वद्देहोऽपि त्वमेवेत्यर्थः । '' देहिदेहविभागोऽत्र नेश्वरे विद्यते क्वचित् '' इति पाद्मायुक्तेः । अतस्तव ब्रह्मत्वादेवाविद्याविद्याभ्यामतीतस्य नैव बंधो नैव मोक्षः । उलूखले मात्रा निबद्धस्य कालियह्रदान्मुक्तस्य मम बंधमोक्षौ स्त इति चेत् स्याताम ,तौ तु तेन निषिध्येते इति भावः । कुतस्त्वयि स बंधः स मोक्षश्च, नोऽस्माकं भक्तानां निकामो ध्येयत्वादभीष्टा एव, यतो विवेकः स बंधो मोक्षश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वयोदितोऽयं जगतो हिताय यदायदा वेदपथः पुराणः ॥ बाध्येत पाखंडपथैरसद्भिस्तदा भवान्सत्त्वगुणं बिभर्ति ॥२३॥ स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः ॥ अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २४ ॥ अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः ॥ २५ ॥ कः पंडितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् ॥ सर्वान्ददाति सुहृदो भजतोऽभिकामानात्मानमप्युपचयापचयौ न यस्य ॥ २६ ॥

मिति ॥ २२ ॥ ननु तर्हि ममावतारास्तच्चरित्राणि च शुक्तिरजतवदविद्याकल्पितान्येव किं नहिनहि इयं तु तव लीलेत्याह द्वयेन । त्वयोदित इति ॥ २३ ॥ सुरेतरांशाये राजनस्तेषामक्षौहिणीशतानां वधेन भूमेर्भारमपनेतुम् इह वसुदेवगृहे स्वांशेन रामेण सहावतीर्णोऽसि ॥ २४ ॥ अत एवंभूतस्य तवागमनेन कृतार्थोऽस्मीत्याह त्रयेण । अद्येति । हे ईशाद्य नो वसतयो गृहास्तपोवनादपि बहुपुण्याः । कुतः । या वसतीस्त्वं साक्षात्प्रविष्टः । कथंभूतः । यस्य तव पादसलिलमेव गंगा त्रिजगत्पुनाति यश्च त्वं सर्वदेवादिपंचयज्ञदेवतामूर्तिः स त्वं जद्गुरुरिति ॥ २५ ॥ स्वमनोरथः परिपूरित इति तुष्यन्नाह । कः पंडित इति । ऋतगिरः सत्यवाचः । त्वत्तोऽपरं शरणं कः समीयाद्गच्छेत ।

विवेक एव मायिकत्वाभावाज्ज्ञानस्वरूपो न तु तावदज्ञानसंज्ञौ भवबंधमोक्षावित्यर्थः ॥ २२ ॥ मत्संबंधि निखिलं कल्पितमेवेत्याशंकते–नन्विति । तच्चरित्राणि अवतारचरितानि । भीत इवाह–नहिनहीति । इयमवतारादिरूपा । लीला विलासः । उदितः प्रकाशितः । अयं धर्माधर्मादिबोधकः । हिताय स्वर्गापवर्गाय ॥ * ॥ अतः स्वभक्तितात्पर्यपर्यवसानं वेदमार्गं पुष्णंस्तदभिव्यक्तिस्थानं सत्त्वगुणमपि पुष्णातीत्याह–त्वयेति । त्वयेश्वरेणोदित उक्त इति भ्रमादिदोषचतुष्टयराहित्यात्प्रामाण्यमवश्यपाल्यत्वञ्च । न चेत्थं कृत्रिम इत्याह–पुराणोऽनादिः, तवानादित्वेन त्वत्त एवानादितो मुहुराविर्भावित्वेन चेति भावः । स यदायदा तादृशत्वदपेक्षार्हभक्तवृंदाभावात्त्वदौदासीन्येनासद्भिर्बाध्येताऽतिशयेन पीडितः स्यात्तदा दैवाच्छ्रीप्रह्लादस्येव कस्यचिद्भक्तजनस्यैकस्य बहूनां वा प्राकट्ये सति तत्पोषणार्थं स्वयमवतीर्य सात्त्विकगणवर्द्धनेन वेदपथं पुष्णन्स्वयमेव सत्त्वगुणं भवान्बिभर्ति पुष्णातीत्यर्थः ॥ २३ ॥ यः पाखंडनिवृत्त्यर्थं सत्त्वं बिभर्ति स इत्यर्थः । स्वांशेन निजैश्वर्येण । अमुष्य यदूपपदस्य ॥ * ॥ तदेवमुपोद्घातानंतरम् 'दिष्ट्या पापो हतः कंसः' इत्येवानुदिष्टं प्रकृतमेवानुवर्तयति–स इति, एवमुक्तमाहात्म्यो मुहुरवतीर्य सन्मार्गप्रवर्तकः । विभो हे सर्वैश्वर्यपरिपूर्ण वसुदेवस्य यादवश्रेष्ठस्य, श्लेषेण वसुर्भक्तिलक्षणो धर्मस्तेन दीव्यति द्योतत इति तथा तस्य ॥ २४ ॥ एवंभूतस्य पृथ्वीभारनाशकस्य । अतः कुलयशोविस्तारकत्वादहं कृतार्थोऽत्यंतकीर्तिमानस्मीति । बहुपुण्यत्वे हेतुमाशंकते–कुत इति । पंचयज्ञाश्चोक्ताः । सर्वे देवा ब्रह्माद्याः, पितरोऽर्यमाद्याः,भूताः कीटपतंगाद्याः, नरोऽतिथयः, वेदा ऋगाद्यास्तेषां मूर्तिरेकत्र घनीभावः । वेदमूर्तित्वादेव जगतां गुरुर्हितोपदेष्टा ॥*॥ यादवेषु चाहं त्वया नितरामनुगृहीत इत्याह–अद्येति । हे ईश सर्वेश्वर भूरिभागा बलिप्रभृतिभ्योपि बहुमाहात्म्याः, यतो वेदादयो मूर्तय इव मूर्तयोऽधिष्ठानानि यस्य यज्ञरूपांशावतारे, यस्य च तव वामनांशावतारे पादशौचसलिलमपि त्रिजगत्पुनाति स त्वं जगद्गुरुः सर्वेभ्यः स्वाविर्भावेभ्योऽपि गुरुर्महान्, या मद्वसतीरेव प्रविष्टः न त्वद्याप्यन्ययादवगृहानित्यर्थः । जगद्गुरुत्वादेव हे अधोक्षज सर्वज्ञानातीत ॥ २५ ॥ शरणं रक्षितारम् । 'शरणं गृहरक्षित्रोः' इत्यमरः । यतो हेतोर्ददात्यतः क इति संबंधः, बल्यादिभ्यः स्वात्मार्पणदृष्टेः । उपचयाऽपचयौ वृद्धिह्रासौ, महत्त्वाल्पत्वे इति यावत् । सारथ्यवीरासनादिष्वपि निजजनेच्छया प्रवृत्तिदर्शनादिति भावः ॥ * ॥ भक्तस्तद्द्वेषादिनापि पूतनादिभ्योऽपि तादृशपददानात्प्रीतिविषयत्वेन प्रसिद्धो यस्य तस्मात् । तथोक्तं श्रीमदुद्धवेनापि–' अहो बकीयम् '

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरैरपि दुरापगतिः सुरेशैः ॥ छिंध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायाम् ॥ २७ ॥ इत्यर्चितः संस्तुतश्च भक्तेन भगवान्हरिः ॥ अक्रूरं सस्मितं प्राह गीर्भिः संमोहयन्निव॥२८॥श्रीभगवानुवाच ॥ त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बन्धुश्च नित्यदा ॥ वयं तु रक्ष्याः पोष्याश्च अनुकंप्याः प्रजा हि वः ॥ २९ ॥ भवद्विधा महाभागा निषेव्या अर्हसत्तमाः ॥ श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥३०॥

यतो भवान् भजतः पुंसो भक्तस्य सर्वानभितः कामांश्च ददात्यात्मानमपि ॥२६॥ नोऽविवेकिनाम् । तत्रापीह गृह एव ॥ २७ ॥ २८ ॥ वो युष्माकं प्रजाः पुत्रा हि वयमिति ॥ २९ ॥ ननु नृभिर्देवाः सेव्या इति प्रसिद्धं तत्राह ! देवा इति । स्वार्थाः स्वकार्यसाधनपराः । साधवस्तु केवलं परानुग्रहपराः । परमार्थतस्तु साधव एव देवा इति इत्यादि । तत्प्रियत्वेऽपि कथमप्यनवधानादिना तत्पालनप्रतिज्ञाव्यभिचारः स्यादित्याह—ऋतगिरः सत्यसंकल्पात्, कदाचित्तस्य परमभक्तांतरे वेशेऽपि संकल्पस्यैव तत्कार्यसाधकत्वादिति भावः । न चोपकारात्मकस्य भजनस्याप्यपेक्षा किन्तु कथंचिदाश्रयणमात्रस्येत्याह—सुहृद इति । न चोपकारानभिज्ञतेत्याह—कृतमुपकारं जानाति बहु मन्यत इति कृतज्ञस्तस्मात् । तच्चोपकाराभासस्यापि बहुमन्यमानत्वे पर्यवस्यतीत्याह—सर्वानिति । यस्य विषयलाभालाभादिनोपचयापचयौ न स्तः स भजतो भजनमात्रं कुर्वतः पुष्पपत्रादिनापि सेवमानाय सर्वान्कामान्ददाति, तत्र सुहृदः सौहृद्ययुक्ताय यत्ते आत्मानमपि ददाति तदधीनं करोति तस्मान्मदीयगृहागमनमपि तव नाश्चर्यमिति भावः ॥ **विश्वनाथस्तु**—त्वदपरं त्वत्तोऽन्यम् । ऋतगिरः सत्यवाक्यात्, कंसं हत्वा त्वद्गृहं यास्यामीति स्ववाक्यं सत्यं कृतमिति भावः । सुहृदः हितकारिणः, येन दासस्य हितं स्यात्तत्त्वमेव ज्ञात्वा करोषीत्यर्थः । कृतज्ञात्कदाचित्कमपि किञ्चिदपि भक्तेन विस्मृतमपि त्वं जानास्येवेत्यर्थः । यो भवान्सुहृदे शोभनांतःकरणाय भजते जनाय निष्कामायेत्यर्थः । सर्वानवांछितानपि कामान्ददाति, न च तावतोऽपि दत्त्वा निवर्तस इत्याह—आत्मानं स्वमपि ददाति, अत्र भवानित्यध्याहार्यम् । ननु स्वपर्यंतदानं नाम महानुपचयस्तत्राह—यस्य तवोपचयापचयौ न स्तः । कोटिब्रह्मांडवर्तिद्रव्येषु कोटिसंख्यब्रह्माद्यैस्तुभ्यमुपहृतेष्वपि तव न कोप्युपचयः, त्वया भक्ताय स्वपर्यंतवस्तुजातप्रदानेऽपि न कोप्यपचयः, अतर्क्यानंतशक्तित्वादिति भावः ॥ २६ ॥ सुतादिदेहांतेषु मोहरशनामज्ञानकृतां बंधहेतुभूतामहंताममतामित्यर्थः । सा केति भवदीयमायां त्वदाज्ञाकरीं वंचकशक्तिम् ॥ * ॥ तादृशतत्कृपां श्लाघमानः सलज्जः सन्निजतदेकनिष्ठतांतरायराहित्यं प्रार्थयते—दिष्ट्येति । जनार्दनेति—हे ब्रह्मादियाच्यमानदर्शन । तदेव दर्शयति—योगेति । योगेश्वरैः सनकाद्यैः, सुरेशैर्ब्रह्माद्यैः, गतिर्ज्ञानं, प्रतीतः प्रत्यक्षं प्राप्तः, एतद्दिष्ट्या अहो अस्माकं भाग्यमहिमेत्यर्थः । आप्ताः सुहृदः ॥२७ ॥ इतीत्थम् । भक्तेनाक्रूरेण । गीर्भिर्लोकविषयाभिः । संमोहयन्नुत्पन्नं तत्त्वज्ञानमन्यथा कुर्वन्निव ॥ * ॥ सम्यग्निजाज्ञाप्यार्थानुकूलतया स्तुतः 'स त्वं प्रभो' (४८–२४) इत्यादिभिः श्रुतत्वात् । गीर्भिरिति तद्वैशिष्ट्यं बोधयति, शुद्धप्रेममयलौकिकलीलाभिरुचेः 'त्वन्नो गुरुः' (२९) इत्यादिलक्षणाभिर्गीर्भिः संमोहयन्मूर्छयन्निव चेतनायामपि विवेकलोपात् ॥ **विश्वनाथस्तु**—मोहयन् स्वैश्वर्यज्ञानं लुम्पन्नित्याह । तत्र शक्तिद्योतकं भगवान्सर्वैश्वर्यादिसंपन्नो हरिर्मनोहारिलीलश्चेति ॥ २८ ॥ पितृव्यः पितृभ्राताऽत एव गुरुः 'पितृव्यः पितृवन्मान्यः' इत्युक्तेः । वयं नित्यदा नित्यं रक्ष्या इत्यादि । एतेनास्य सेव्यत्वमुक्तम् ॥ * ॥ नोऽस्माकमिति विनयेनात्मनः साधारण्यापादनार्थम् । श्रीबलदेवाद्यपेक्षया गुरुरुपदेष्टा, बंधुश्च हिताचरणेन, तत्र श्लाघ्यः परमोत्तमत्वात्, किं वास्य पदस्य सर्वैरेवान्वयः, नित्यमित्यर्थः । आपद्भ्यो रक्ष्या भोजनादिना पोष्याः सदुपदेशादिनाऽनुकम्प्याश्च, हि यतो वः प्रजा वयम् ॥ अत्र **विश्वनाथः**—प्रजाः पुत्रतुल्याः । व्यवहारदृष्ट्या त्वमस्माकमादरणीय एव, परमार्थदृष्ट्या तु त्वं परमवैष्णवत्वात्पूज्य एवेत्याह ॥ २९ ॥ पुनराशंकते—नन्विति । तत्राक्षेपे । अर्हेषु पूज्येषु

१ चतुर्थ्यन्तम्पाठमभ्युपगम्य ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥ ३१ ॥ स भवान्सुहृदां वै नः श्रेयाञ्छ्रेयश्चिकीर्षया ॥ जिज्ञासार्थं पांडवानां गच्छस्व त्वं गजाह्वयम् ॥ ३२ ॥ पितर्युपरते बालाः सह मात्रा सुदुःखिताः ॥ आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुम ॥ ३३ ॥

त एव सेव्या इत्यर्थः ॥ ३० ॥ तर्हि मृच्छिलादिमयाः किं देवादयो नैव स्युरित्यत आह । न हीति । अम्मयानि जलरूपाणि तीर्थानि मृन्मयाः शिलामयाश्च देवा न भवंतीति न अपि तु भवंत्येव । तथाऽपि साधूनां तेषां च महदंतरमित्याह । ते पुनंतीति ॥ ३१ ॥ किंचिच्चिकीर्षयन्प्रागादिति यदुक्तं तत्कार्यमादिशति । स इति । नः सुहृदां मध्ये भवाञ्छ्रेयाञ्छ्रेष्ठोऽतः पांडवानां श्रेयश्चिकीर्षया गजाह्वयं गच्छस्व गच्छेति । यद्वा स्वेति पृथक् पदम् । हे स्व आत्मीयेत्यर्थः ॥ ३२ ॥ राज्ञा धृतराष्ट्रेण । वसंते

सत्तमा आतिश्रेष्ठाः । भवद्विधास्त्वत्तुल्यभक्तिमंतः । इत्यर्थ इति—स्वपूजां प्राप्य फलदातृत्वाद्देवानां वणिक्साम्यम्, स्वार्थमनपेक्ष्य फलदातृत्वात्सेव्यत्वमिति भावः ॥ * ॥ भवद्विधा इति—। अर्हन्त इत्यर्हास्तेषु सत्तमाः । ननु नृभिर्देवाः सेव्या इति प्रसिद्धिस्तत्राह—देवाः खलु स्वार्थसाधनपरा न तु तथा साधवस्ते तु परानुग्रहकातरा एवेति भावः ॥ अत्र **विश्वनाथः**—अतो महत्तमत्वाच्च विशेषतोऽस्माकं त्वमेव सेव्य इत्याशयेनाह—भवद्विधा इति, किं पुनः साक्षाद्भवंत इत्यर्थः । अतो देवेभ्योपि भवद्विधा महत्तमा इति भावः । नृभिर्नित्यं नितरां सम्यक्सेव्याः, अतो महाभागाः महान्भागः परमभागवतत्वादिप्राप्तिहेतुर्भाग्यं येषां ते, महत्तमा इत्यर्थः, अतोऽर्हत्तमाः । नृभिरिति प्रायो मनुष्याणामेव श्रेयःसाधकत्वात् । अत्र च स्वस्याऽपितृव्यतयोक्तो यादवतया मनुष्यतामननात् । श्रेयस्कामैरिति बहुत्वेन मुक्तिभगवद्भक्तिपर्यंतानि श्रेयांसि गृह्यन्तेऽतो भगवद्भागवतव्यतिरिक्तानां देवादीनां न तावती शक्तिः । स्वल्पफलदायकत्वेऽप्यस्ति दोषांतरमित्याह—देवा इति । अतो देवेभ्योऽपि भवद्विधा देवादिजातिनिरपेक्षतया महत्तमा इति भावः । साधवः 'तितिक्षवः' इत्यारभ्य 'त एते साधवः' इतिपर्यंतेन तृतीयस्कन्धे वर्णिता बोध्याः ॥ ३० ॥ तर्हीहाक्षेपेऽव्ययानामनेकार्थत्वात् । आक्षिप्य समाधत्ते 'द्वौ नञौ प्रकृतार्थं गमयतः' इति वामनोक्तेः । आपः स्वरूपं येषां तानि । तथा मृच्छिलयोर्विकारास्तथा । ते तीर्थादयः । उरुकालेन बहुकालसेवया । सर्वदा परनिष्ठचेतस्त्वात्साधूनां महत्त्वमाह—दर्शनादेवेति । देवानां मृच्छिलामयत्वे श्रुतिः—"संस्रवभागास्थेषाबृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः इमां वाचमभिविश्वे गृणंत आसद्यास्मिन्बर्हिषि मादयध्वं स्वाहा वाट्" इति । हे विश्वे सर्वे देवा यूयं संस्रवतीति संस्रवो घृतम्, उपलक्षणमेतत् तद्भागवंतः, इषा भागेन इच्छया वा बृहन्तो वर्द्धयन्तः, प्रस्तरे पाषाणे तिष्ठंति प्रस्तरेष्ठाः उपलक्षणमेतत्पार्थिवतैजसानाम्, केन—स्वाहा वेदमंत्रेण । परि सर्वदा धेया धारणयोग्या ध्येया इत्यर्थः । इमां वाचमभिगृणंतः । इमां काम्—वहति प्रापयति भागं देवेभ्य इति वाट् पूजकः, त्वं वाट् भवेत्याध्याहृत्य योज्यम् । अस्मिन्बर्हिषि यज्ञेऽर्चने यूयमासाद्य प्राप्य मादयध्वं तृप्यध्वमित्यर्थो वाचा कृतः ॥ * ॥ अतो यदि देवाः साधारणाः सेवितुं साक्षाल्लभ्यन्ते तदापि न साम्यं साक्षात्तु दुर्लभा एव, ततः प्रतिमारूपेणैव सेव्यन्ते । तत्र तु तदपेक्षयातिनिकर्ष इति वक्तुं प्रसंगतस्तीर्थानामपि साधारणानां तमाह—न हीति, शिरश्चालने नञ् । ते तत्तद्रूपतीर्थदेवाः । एकशेषत्वेऽपि क्लीबत्वाभाव आर्षः । पुनंति चित्तमलतः शोधयन्ति ताच्चिरकालसेवयैव न तु साधुवत्प्रथमक्षणदर्शनादेवेति । अतः साधूनां देवादिभ्यो महदंतरमिति भावः । प्रतिमापूजनाद्ब्रह्मत्वं च गत्वाऽमृतत्वं च गच्छतीति सामवेदीयप्रतिमोपनिषदि प्रतिमार्चनमपि मोक्षहेतुरुक्तस्तच्च क्त्वाप्रत्ययेन पूर्वकालविहितेन पूजनानंतरं चिरकालेनैव हरिं नत्वा ग्रामं गच्छतीतिविज्ञेयम् । एवकारेण साधूनां दर्शनसमकालमेव पावकत्वमुक्तम् ॥ ३१ ॥ सोर्हत्तमः । यतः श्रेष्ठोऽतो हेतोः । गमेः परस्मैपदित्वादार्षत्वाश्रयणस्यापि वक्रत्वेनर्जुपंथा एव श्रेयानित्यादाह—यद्वेति । इत्यर्थ इति—'स्वः स्वकीये धनेऽपि च' इति कोशात् ॥*॥ एतावता यद्विवक्षितं तदाह—स साधुत्वेनोक्तमाहात्म्यः पितृव्यत्वेनास्मात्प्रियतरः साधुत्वेन परोपकारकश्च नः सुहृदां यादवानां मध्येऽतिप्रशस्यश्च भवान् । वै प्रसिद्धम् । पाडवानां या जिज्ञासा धृतराष्ट्राश्रये ते कथमवतिष्ठंत इति पर्यालोचनं तदर्थम् ॥ ३२ ॥ राज्ञा सह ऋषिभिरानीताः वसंतः सान्ति । निजैश्वर्यमाच्छाद्य वदति—शुश्रुम इति ॥*॥ जिज्ञासामेव स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषु राजांबिकापुत्रो भ्रातृपुत्रेषु दीनधीः ॥ समो न वर्तते नूनं दुष्पुत्रवशगोंधदृक् ॥ ३४ ॥ गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३५ ॥ इत्यक्रूरं समादिश्य भगवान्हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३६ ॥ इति श्रीभागवते महापुराणे दशमस्कन्धे पूर्वार्धे कुब्जारमणादिनिरूपणं नामाऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ श्रीशुक उवाच ॥ स गत्वा हास्तिनपुरं पौरवेंद्रयशोंकितम् ॥ ददर्श तत्रांबिकेयं सभीष्मं विदुरं पृथाम् ॥ १ ॥ सहपुत्रं च बाह्लीकं भारद्वाजं सगौतमम् ॥ कर्णं सुयोधनं द्रौणिं पांडवान्सुहृदोऽपरान् ॥ २ ॥ यथावदुपसंगम्य बन्धुभिर्गांदिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्तां स्वयं चापृच्छदव्ययम् ॥ ३ ॥

निवसंतीति । शुश्रुम श्रुतवंतो वयम् ॥ ३३ ॥ दुष्टा ये स्वपुत्रा दुर्योधनादयस्तद्वशेन गच्छतीति तथा । यतोंधदृगंधनेत्रः ॥ ३४ ॥ ३५ ॥ ३६ ॥ इति श्रीमद्भागवते म० दशमस्कन्धे पूर्वार्धे टीकायामष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ छ ॥ ॥ ऊनपंचाशत्तमे तु गत्वाऽक्रूरो गजाह्वयम् ॥ राज्ञः स्वभ्रातृपुत्रेषु बुद्ध्वा वैषम्यमागमत ॥ १ ॥ पौरवेंद्राणां यशोभिस्तत्कृतदेवब्राह्मणायतनादिभिरंकितम् ॥ १ ॥ बाह्लीकपुत्रः सोमदत्तः । भारद्वाजो द्रोणः । गौतमः कृपः ॥ २ ॥ स्वयम् अव्ययं कुशलम्

कारणं स प्रयोजनञ्चाह—त्रिभिः। उपरते शांते तादृशाऽऽदरणीयजनेष्वश्लीलवचनानर्हताख्यापनाय, बाला इत्यानयनसमयापेक्षया, राज्ञेत्यन्धस्यापि तस्याधुना दैवाद्राज्यप्राप्तिर्जातेति सूचितम् । शुश्रुम इति लौकिकलीलामाधुर्यमग्रे नूनमिति च ॥ ३३ ॥ तेषु पाण्डवेषु । अम्बिकापुत्रः धृतराष्ट्रः । दीनधीः मंदबुद्धिः । अन्धदृगिहान्धपदमेव दृष्ट्युपघातं वक्ति, पुनर्दृग्ग्रहणम् 'परिणतगजप्रेक्षणीयम्' इतिवद्विशेष्यमात्रपरतयैवेति ज्ञापनायेति ध्येयम् ॥ * ॥ नूनं वितर्के । समो न वर्तते, तत्कुतः—अम्बिकापुत्रः, पांडोर्वैमात्रेयत्वादित्यर्थः । हेत्वन्तरम्—दुष्पुत्रवशगः, तत्कुतः—दीनधीः क्षुद्रबुद्धिः । तदपि कुतः—अंधदृक् तदादीनां सामुद्रिके बहुदोषश्रवणात् ॥ ३४ ॥ तद्वृत्तं धृतराष्ट्रवर्तनम् । तत् तद्वृत्तं तथा विधास्याम इति । शं सुखम् । सुहृदां पार्थानाम् ॥ * ॥ अधुनैव गच्छ तस्य राज्ञो वृत्त वर्तनं साध्वसाधु वेति जानीहीत्यर्थः । तत्तथा ॥३५॥ इतीत्थम् । ततोऽक्रूरगृहात् ॥ * ॥ भगवान्समग्रैश्वर्यादिपूर्णोपि हरिर्मनसैव दुष्टसंहारसमर्थोपि ईश्वरः सर्वनियंतापि इति पूर्वोक्तानुनयप्रकारेणैव सम्यक्पुरस्कारपूर्वकमादिश्य ततोऽक्रूरगृहात्संकर्षणोद्धवाभ्यां सह, न त्वनुव्रजनार्थमक्रूरेणापीति तत्प्रस्थापनत्वरा दर्शिता । स्वेति तस्मिन्भवने तदनंतरं स्वेच्छाविलासः सूचितः । वै संबोधने। तच्च लीलामाधुर्यानुभववैशिष्ट्याय ॥३६॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्धेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ऊनपंचाशत्तमे एकोनपञ्चाशत्तमे । राज्ञो धृतराष्ट्रस्य । वैषम्यं दौर्जन्यम् (१) । सोऽक्रूरः । तत्र हास्तिनपुरे ॥ * ॥ स इति युग्मकम् । प्रथमं राज्ञो दर्शनं योग्यं, ततः कुलश्रेष्ठत्वाद्भीष्मस्य । तद्दिने तयोरेकत्र स्थितिरासीदित्युक्तम्—सभीष्ममिति । तत आत्मीयत्वाद्विदुरस्य, ततः तत्संगेन स्वभगिन्याः पृथायाः—॥ १ ॥ अपरान् कुरून् । सहपुत्रमिति "वोपसर्जनस्य" इति वैकल्पिकत्वान्न सादेशः ॥ * ॥—ततः कुलवृद्धत्वाद्बाह्लीकस्य, ततः पांडवान्वेषणे तदुपाध्यायस्य भारद्वाजस्य, ततस्तत्सहचारित्वेन गौतमस्य, ततः सहाध्यायित्वेन कर्णादीनां सर्वेषामेव बालकानामिति पाठक्रमः । तत्र पाण्डवानां पश्चाद्भावः स्वस्य मध्यस्थत्वख्यापनेन धर्मोपदेशाय । प्रथमश्चशब्दोऽनुक्तसमुच्चये सर्वत्र योज्यः, द्वितीयस्सूक्तार्थो ब्राह्मणस्यापि भारद्वाजस्य क्षत्रियमध्यपातात् । क्वचित् 'भारद्वाजं सगौतमम्' इति पाठः । अपरान् शकुन्यादीन् ॥ २ ॥ गांदिनीसुतोऽक्रूरः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उवास कतिचिन्मासान्राज्ञो वृत्तविवित्सया ॥ दुष्प्रजस्याल्पसारस्य खलच्छन्दानुवर्तिनः ॥ ४ ॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गुणान् ॥
प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितम् ॥ ५ ॥ कृतं च धार्तराष्ट्रैर्यद्गरदानाद्यपेशलम् ॥ आचख्यौ सर्वमेवास्मै पृथा विदुर एव च ॥ ६ ॥ पृथा तु
भ्रातरं प्राप्तमक्रूरमुपसृत्य तम् ॥ उवाच जन्मनिलयं स्मरंत्यश्रुकलेक्षणा ॥ ७॥ अपि स्मरन्ति नः सौम्य पितरौ भ्रातरश्च मे ॥ भगिन्यो भ्रातृपुत्राश्च
जामयः सख्य एव च ॥ ८ ॥ भ्रात्रेयो भगवान्कृष्णः शरण्यो भक्तवत्सलः ॥ पैतृष्वसेयान्स्मरति रामश्चांबुरुहेक्षणः ॥ ९ ॥

पृच्छत् ॥३॥ दुष्प्रजस्यासत्पुत्रस्याल्पसारस्य मंदधृतेः खलानां कर्णादीनां छंदमिच्छामनुवर्तितुं शीलं यस्येति तथा तस्य ॥ ४ ॥ तेजः प्रभावम् । ओजः शस्त्रादिनैपुणम् । वीर्यं शौर्यम् । न सहद्भिरसहमानैर्धार्तराष्ट्रैश्चिकीर्षितमित उपरि कर्तुमिष्टम् ॥५॥ कृतं च गरस्य विषस्य दानादि । अपेशलमन्याय्यम् । तेज ओज इत्यादि सर्वमस्मै कथयामास ॥६॥ तत्कथनात्पूर्वतरं पृथाया वृत्तमाह । पृथा त्विति । अश्रूणां कला लेशा ययोस्ते ईक्षणे यस्याः सा ॥ ७ ॥ अपि किम् । जामयः कुलस्त्रियः ॥ ८ ॥ पैतृष्वसेयान्मत्पुत्रान् ॥ ९ ॥

तैर्धृतराष्ट्रादिभिः ॥ * ॥ यथांवद्वृद्धादीन्प्रणामादिनोपसंगम्य स्नेहाधिक्येन मिलित्वा सुहृदां यादवानां वार्तां कुशलवृत्तं सम्यग्यथाविध्यातिथ्यादिपूर्वकं सस्नेहं पृष्टः ॥ ३ ॥ राज्ञो धृतराष्ट्रस्य । “छन्दो वशेऽप्यभिप्राये’ इति मेदिनी । “खलं भूस्थानकल्केषु नीचक्रूराधमे त्रिषु । खलो वस्त्रप्रभेदे स्याद्वृत्ते चर्मणि घातके ॥” इति च ॥ * ॥ कतिचिन्मासानिति बहुदिनवासात्तस्य कौटिल्यातिशयो व्याञ्जितः । वृत्तमेव कारणद्वारा सूचयति–दुष्प्रजस्येति ॥ ४ ॥ तेजो ज्योतिर्लक्षणा दीप्तिः । ओजः पराभिभवसामर्थ्यम् । बलं शारीरं, रूपं वा । इत उपरि तत्प्रभावाद्यसहनादूर्ध्वं कर्तुमिष्टं तन्निष्कासनमारणोपायादि । धार्तराष्ट्रैर्यत्कृतं तत्पृथाविदुरावाचख्यतुरित्यर्थः । द्वयोरन्वयः । अस्मै अक्रूराय ॥ * ॥ तेज इति युग्मकम् । आदिना लज्जाधैर्यादिग्रहः । गरदानं श्रीभीमाय, आदिना जलनिक्षेपादिकृतम्, चिकीर्षितं तु लाक्षागृहादि । किमुत पृथा यतः पितृव्यत्वेनोभयत्र समो विदुरः सोपीत्यर्थः ॥ ५ ॥ ६ ॥ तत्कथनाद्धार्तराष्ट्रकृतान्यायोक्तेः । तम् अक्रूरम् । जन्मनिलयं पितृगृहम् ॥ * ॥ अश्रूणि कलयतः निरंतरं मुंचत इत्यश्रुकले ईक्षणे नेत्रे यस्याः सेति वा ॥ ७ ॥ नोऽस्मान् । ‘जामिः स्वसृकुलस्त्रियोः’ इत्यमरः ॥ * ॥ न इति पुत्राद्यपेक्षया बहुत्वम् । सौम्य हे शांतप्रकृते भवादृशां बंधुवात्सल्यसाधुत्वादिति भावः । पितरौ शूरतत्पत्न्यौ । जामयः श्रीदेवक्यादयः । सख्यः समशीला अन्याः ॥ ८ ॥ कृष्णस्य चत्वारि विशेषणानि संबंधसामर्थ्यदयालुतास्त्रीयरक्षकताबोधकानि ॥ * ॥ तत्रैव विशेषतः पुनः पृच्छति–भ्रात्रेय इति, तादृशप्रश्ने निजयोग्यतोक्ता । न चासौ मम भ्रात्रेयोऽन्यसाधारणः , किन्तु भगवान्, तत्र शरण्यः रक्षितृवाचकेन शरण्यपदेन तद्धर्मो लक्ष्यते, ततश्च तत्र साधुरित्यर्थः । ‘सर्वात्मना यः शरणं शरण्यं गतो मुकुंदम्’ इतिवत् । तत्र प्रवृत्तौ हेतुः–भक्तवत्सलः, अत एव संभावयामीत्याह–स्मरति, किमिति शेषः । पैतृष्वसेयानिति स्नेहविशेषमात्रत्वेन स्मरणीयविशेषतां बोधयति । अंबुरुहेक्षण इति परमसौंदर्यम्, एवं दिदृक्षया तस्मिन्सहजवात्सल्यम् । ततः करिष्यमाणा निजरक्षाप्रार्थनापि तद्विलास एव ज्ञेयो न तु कामनामात्रेण । ‘विपदः सन्तु नः शश्वत्’

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव ॥ सांत्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ॥ १० ॥ कृष्णकृष्ण महायोगिन्विश्वात्मन्विश्वभावन ॥ प्रपन्नां पाहि गोविंद शिशुभिश्चावसीदतीम् ॥ ११ ॥ नान्यत्तव पदांभोजात्पश्यामि शरणं नृणाम् ॥ बिभ्यतां मृत्युसंसारादीश्वरस्याऽऽपवर्गिकात् ॥ १२ ॥ नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ॥ योगेश्वराय योगाय त्वामहं शरणं गता ॥ १३ ॥

शोचंतीं मां वाक्यैः सांत्वयिष्यति किम् ॥ १० ॥ हे महायोगिन्महान्योग उपायो मायाख्योऽस्यास्तीति । हे विश्वात्मन् सर्वान्तर्यामिन् । हे विश्वभावन विश्वपालक । प्रपन्नां शरणागताम् । अवसीदतीं क्लिश्यंतीम् ॥ ११ ॥ आपवर्गिकान्मोक्षप्रदात् ॥ १२ ॥ शुद्धाय धर्मात्मने । ब्रह्मणेऽपरिच्छिन्नाय । परमात्मने जीवसखाय ।

इत्याद्युक्तेः । एतानि विशेषणानि द्वयोरेव योग्यानि, रामस्य पश्चान्निर्देशस्तदनुगत्यैव तद्भावात् ॥ ९ ॥ वृकाणां व्याघ्राणाम् । सपत्नमध्ये शत्रुमध्ये "सपत्नोऽरौ च पतिते पत्नीसहचरे त्रिषु" इति निरुक्तिः ॥ * ॥ ननु स्मरन्नेव मामत्र प्राहिणोदित्याशंक्याह—सपत्नेति । अनेनात्मनः परमार्तत्वं व्यंजितम् । वृकाणामित्यनंतरं मध्य इत्यध्याहार्यम् । वाक्यैः प्रियवचनैः, पूर्ववत्तत्तद्वचनशुश्रूषया ॥ १० ॥ वीप्सेहादरे । संबुद्धित्रयं सर्वसामर्थ्यमाह । गोविन्देति सर्वथा दीनदयालुतामाह ॥ * ॥ ननु तत्रत्येषु स्वेषु निजकृत्यं विधायात्रागत्य सांत्वयिष्यत्येवेति चेदनन्तरं तद्दर्शनामृतं लभेमहि तावत्तत्र स्थितोऽप्यसावस्माकं प्राणरक्षां कुर्यादिति परमसामर्थ्यं निरूपयंती परमार्त्या साक्षादिव तं संबोध्य त्रिभिः सकरुणं वदंती प्रागुपसन्नापद्रक्षां प्रार्थयते—कृष्णेति । पूर्वं मुख्यनाम्ना सम्बोधनं, तत्र वीप्सा झटित्याभिमुख्याय, तत्र तादृशसामर्थ्यव्यंजकं संबोधनं—महायोगिन् हे परमोपाययुक्तेति । न च त्वयि विज्ञापनापेक्षास्ति सर्वज्ञानादिप्रवर्तकत्वादित्याह—हे विश्वात्मन् । न च ज्ञात्वापि कथंचिदुदास्से जगत्पालकत्वादित्याह—विश्वभावनेति । तत्र च प्रपन्नवात्सल्यं दर्शयति—हे गोविन्द गोवर्धनोद्धारण प्रकाशिततन्नामन्निति । न च तत्र विलम्बः कार्य इत्याह—शिशुभिः सह शत्रुसंकटे निरंतरं दुःखं प्राप्नुवतीञ्च ॥ अत्र **विश्वनाथः**—महायोगिन्निति मथुरायां स्थितोऽपि ममैतां खेदोक्तिं शृण्विति भावः । किञ्च—विश्वात्मन्निति मम हृद्यपि स्थितस्त्वं शृणोष्येवेति भावः । विश्वभावनेति विश्वमपि त्वं पालयसि मत्पालने कोऽत्र तेऽतिभार इति भावः । हे गोविंद मन्नेत्रगोचरी भव, त्वामहं पश्येयमिति भावः ॥ ११ ॥ आपवार्गिकात् मोक्षहेतुभूतात्, सर्वकर्मफलप्रापकाद्वा "अपवर्गः क्रियासाध्यफलाप्तौ त्यागमोक्षयोः" इति वैजयंती । मृत्युग्रस्तः संसारो मृत्युसंसारः । मध्यपदलोपी समासः । तस्मात्तथा ॥ * ॥ न चैतदर्थमन्यः प्रार्थनीयो यतः सर्वदुःखमूलात्संसारादपि सर्वेषामपि त्वच्चरणमेव निस्तारकमिति मम निश्चय इत्याह—नेति । अन्यद्ब्रह्मज्ञानादपि 'येन्येऽरविंदाक्ष' इत्याद्युक्तेः । नृणां जीवानाम् । मृत्युसंसारादनादिमृत्युपरंपराप्राप्तेः । नान्यत्पश्यामीत्यत्र हेतुमाह—ईश्वरस्येति । "मदीयं महिमानं च परं ब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥" इति श्रीमत्स्यदेवोक्त्यनुसारेण, "यो मामव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥", 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादिश्रीभगवद्गीतानुसारेण च प्रसिद्धमहैश्वर्यस्येत्यर्थः । अत एवापवार्गिकात् । अपवर्गदानार्हादिति **चक्रवर्ती** ॥ यद्वा—ईश्वरस्य महादेवस्यापि वृकासुरादिभवमहाभयतो मोक्षप्रदात् ॥ १२ ॥ "शुद्धो द्वितीये धर्मे च निर्दोषे पावने सिते" इति धरणिः ॥ * ॥ निजाभीष्टयोग्यमेव तं प्रणमंती शरणं याति—नम इति । शुद्धायेति धर्मात्मतयाऽवश्यं शरणागतरक्षाभिप्रेता । ब्रह्मणे इत्यादिपदद्वयेन तत्र च सदा सर्वत्र रक्षायोग्यता । योगेश्वरायेति तदर्थं स्वतः सर्वार्थपूर्णता । योगायेति चान्यतो ज्ञानाऽनपेक्षा । यद्वा—कृष्णाय स्वयं भगवते, परिपूर्णैश्वर्यादियुक्तायेत्यर्थः । निर्विशेषज्ञानिनामपि परिच्छिन्नतत्त्वज्ञानमात्ररूपाय । परमात्मनेंतर्यामित्वमात्रैश्वर्यज्ञानिनामपि तद्रूपाय त्रिष्वपि विशेषणम् । शुद्धाय मायास्पर्शरहिताय । योगेस्वराय निजतथातथानुभावानुभवोपायदात्रे, शक्तिशक्तिम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरम् ॥ प्रारुदद्दुःखिता राजन्भवतां प्रपितामही ॥ १४ ॥ समदुःखसुखोऽक्रूरो विदुरश्च महायशाः ॥ सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः ॥ १५ ॥ यास्यन्राजानमभ्येत्य विषमं पुत्रलालसम् ॥ अवदत्सुहृदां मध्ये बन्धुभिः सौहृदोदितम् ॥ १६ ॥ अक्रूर उवाच ॥ भोभो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्धन ॥ भ्रातर्युपरते पांडावधुनाऽऽसनमास्थितः ॥ १७ ॥ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंजयन् ॥ वर्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि ॥ १८॥ अन्यथा त्वाचरँल्लोके गर्हितो यास्यसे तमः ॥ तस्मात्समत्वे वर्तस्व पांडवेष्वात्मजेषु च ॥ १९ ॥

योगेश्वरायाणिमादियुक्ताय । योगाय ज्ञानात्मने ॥१३॥ प्रपितामही प्रपितामहः पांडुस्तस्य भार्या अरुदद्रुरोद ॥ १४ ॥ पृथया सह समं दुःखं सुखं च यस्य सः । तस्याः पुत्राणामुत्पत्तिहेतुभिर्जनकैर्धर्मानिलेंद्रादिभिस्तत्कथनैरित्यर्थः ॥ १५ ॥ बंधुभिः रामकृष्णादिभिः । सौहृदेनोदितमुक्तं यत्तदवददिति ॥ १६ ॥ भ्रातर्युपरत इति । पांडोः पुत्रेषु सत्सु राजासनं त्वमास्थित इति कटाक्षः ॥१७॥ भवतु तथाप्येवं वर्तमानः श्रेयोऽवाप्स्यसीत्याह । धर्मेणेति ॥१८॥ तमो नरकमिहैव महद्दुःखमिति भावः॥१९॥

तोरभेदांशेन स्वयं तत्तद्रूपाय च तुभ्यमिति शेषः । अतो नासाध्यं तव किंचिदिति भावः ॥ १३ ॥ इत्येवमादिगुणपूर्णम् । प्रपितामही कुंती । स्वेषु जन आविर्भावो यस्य तम्, भक्तार्तिहरमित्यर्थः ॥ * ॥ इत्येवम् । स्वजनं पित्रादिकम्, जगदीश्वरं जगदीशतया कृष्णं चानुस्मृत्य मुहुः स्मृत्वा । यद्वा—च अपि बंधुतां स्वजनं प्राप्तमपि कृष्णं जगदीश्वरतयानुस्मृत्य । किं वा—जगदीश्वरमपि स्वजनं निजबंधुतयानुस्मृत्य तदप्राप्त्या दुःखिता सती प्रकर्षेण सगद्गदमरुदत् । भवतां प्रपितामहीति तस्यास्तादृशप्रणयवत्याः साक्षात्कृष्णपितृष्वसुः प्रपौत्रत्वेन तस्य भाग्यं सूचयन्हर्षं वर्द्धयति । अतः परमादरेण भवच्छब्दप्रयोगस्तत्र बहुत्वञ्च । अतः प्रहर्षेण संबोधयति—राजन्निति । श्रीकृष्णसंबंधित्वेन देदीप्यमानोऽसीति भावः ॥ १४ ॥ तस्याः कुन्त्याः । तत्कथनैस्तेषां कथनैः । इत्यर्थ इति—कुंतिराजगृहदुर्वासःपरिचर्यावाप्तदेवतोषिणीविद्याप्रभावागतधर्मादिदेवांशोद्भूततदात्मजप्रभाववर्णनैरित्याशयः ॥ * ॥ चस्त्वर्थे । विदुरस्तु महद्यशः स्वभावतः पांडवपक्षपातादिसत्ख्यातिर्यस्य सः । तत्पुत्रेति तैर्व्याख्यातम् । तत्र देववरेभ्य उत्पन्नत्वात्तेषां कदाचिदप्यशुभं नास्तीत्यादिकथनैरित्यर्थः । अथ वा—तत्पुत्रोत्पत्तेर्हेतवो भूभारावतारार्थमवतीर्णस्य कृष्णस्य लीलासहाय्यानि तैः ॥ १५ ॥ यास्यन् गन्तुमिच्छन्, अक्रूरः । यद् वचः 'साम्यं हि कार्यं सर्वत्र' "विदुषां महतां चायं धर्मो यद्दीनपालनम्" इत्यादिरूपं तादित्यर्थः । सौहृदेन सुहृद्भावेनोदितम् ॥ * ॥ पुत्रेषु तेषां राज्यादिसिद्धये लालसा महामनोरथो यस्य तम् । सुहृदां भीष्मादीनां मध्ये तस्य लज्जोत्पादनेन निजोक्तिग्रहणार्थम् ॥ १६ ॥ कीर्तिवर्धनेत्यत्रापि विपरीतलक्षणया छेदकेत्यर्थो लभ्यते । यद्वा—" वर्धनं वृद्धिवर्धिष्णुच्छेदे घर्घ्यां तु वर्द्धनी " इति मेदिनी । कटाक्ष इति—न हि पांडुपुत्रेषु सत्सु तव राज्याधिकारोस्तीति । वैचित्रवीर्येत्यपि तथा ज्ञेयं, पाणिग्रहीतृपुत्राभावत्वेन व्यासात्मजत्वादिति । अधुनेत्यनेन पूर्वमपि तव ज्येष्ठत्वेऽप्यंधत्वान्न राज्यमासीदिति ध्वनितम् ॥ * ॥ प्राक् सोल्लुंठं सामप्रायमाह—भोभो इति । वीप्साऽत्यंताभिमुख्यार्थे वाच्यार्थाप्रियत्वेन तस्य वैमुख्यसंभवात् ॥ १७ ॥ भवतु राज्यम् । तथापि प्राप्तराज्यत्वेपि । एवं मदुक्तप्रकारेण । उर्वीं भूमिम् । स्वेषु निजात्मजपांड्वात्मजेषु । श्रेयः पारत्रिकं सुखम् ॥ * ॥ शीलेन सद्वृत्तेन । स्वेषु स्वपुत्रपांडवादिषु । श्रेयः कुशलं कीर्तिञ्च ॥ १८ ॥ अन्यथा वैषम्यमाचरन् । नरकं तत्समम् । इति भाव इति—प्रबलविरोधात्पुत्रनाशेनेहैव महन्नरकस्थवद्दुःखमनुभविष्यसीति भावः । तस्मादैहिकामुष्मिकदुःखभयात् । " तमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेह चात्यंतसंवासः कर्हिचित्केनचित्सह ॥ राजन्स्वेनापि देहेन किमु जायात्मजादिभिः॥२०॥ एकः प्रसूयते जंतुरेक एव प्रलीयते ॥ एकोनु भुंक्ते सुकृतमेक एव च दुष्कृतम् ॥ २१ ॥ अधर्मोपचितं वित्तं हरंत्यन्येऽल्पमेधसः ॥ संभोजनीयापदेशैर्जलानीव जलौकसः ॥ २२ ॥ पुष्णाति यानधर्मेण स्वबुद्ध्या तमपंडितम् ॥ तेऽकृतार्थं प्रहिण्वंति प्राणा रायः सुतादयः ॥ २३ ॥ स्वयं किल्बिषमादाय तैस्त्यक्तो नार्थकोविदः ॥ असिद्धार्थो विशत्यंधं स्वधर्मविमुखस्तमः॥ २४ ॥

नन्वात्मजानात्मजादिषु कथं समत्वं स्यात्तत्राह नेह चेति षड्भिः । अत्यंतं नित्यं संवासः सम्यक्स्थितिः ॥ २० ॥ तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च केनापि साहित्यं नास्तीत्याह । एक इति ॥ २१ ॥ किं च यदा च सह संवसंति तदाऽपि क्लेशोपार्जितवित्तापहारितया पुत्रा नाम शत्रव एव ज्ञेया इत्याह । अधर्मेति । संभोजनीयाः पोष्याः पुत्रादय इति व्यपदेशैरन्ये शत्रवोऽल्पमेधसो मूढस्य वित्तं हरंति । जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रादयो हरंति स्वत्वेनाश्रयन्ते तद्व दिति ॥ २२ ॥ किं च यानेवं पुष्णाति ते धनमादाय मृता जीवंतोऽपि वा तं जीवंतं मृतं वा परित्यजंतीत्याह । पुष्णातीति । स्वबुद्ध्या स्वीया इत्यभिमानेन । रायोऽर्थाः । अकृतार्थमप्राप्तभोगम् ॥ २३ ॥ स पुनः पापैकपाथेयो नरकं विशतीत्याह । स्वयमिति । पुरुषार्थकुशलो न भवतीति नार्थकोविदः । असिद्धार्थोऽपूर्णमनोरथः ॥ २४ ॥

राहुस्तमोऽधं च दुःखैनोव्यसनेष्वपि " इति यादवः ॥ * ॥ अथ सस्मितं सपरिहासमाह–अन्यथेति । तमः महादुःखम्, अत्र पुत्रवियोगादिजममुत्र नरकादिजमित्यर्थः ॥ १९ ॥ साम्यस्य दौर्बल्यमाह–नन्विति । सर्वस्यानित्यत्वात्स्नेहः कुत्रापि योग्यतामंतरेण न कार्य इत्याह–नेहेति । इह लोके । किं बहुना, स्वदेहोऽपि नात्यंतसंगीत्याह–स्वेनापीति,–कैमुत्यं दर्शितम् ॥ * ॥ इह लोके । चकारादमुष्मिंश्च लोके । कर्हिचित्कदाचिदपि । ' कस्यचित् ' इति क्वचित्पाठः । हे राजन्निति राजत्वेऽपि तदपरिहार्यमिति भावः । स्वेनात्मतया प्रतीतेनापि । अतः पुत्रादिव्यवहारस्यानित्यत्वात्तत्राऽनासक्तिं विधाय धर्मरक्षार्थं स्वेषु साम्येन वर्तनमेव युक्तमिति भावः ॥ २०॥ तत्र प्रसिद्धे संसारे । तावदिति वाक्यालंकारे । एकोऽसहायः । अनु देहपातोत्तरम् । सुकृतं शुभकर्मफलं स्वर्गादि । दुष्कृतमशुभकर्मफलं नरकादि ॥ * ॥ प्रसूयते प्रसूतो भवति । प्रमीयते मृत्युना हिंस्यते, प्रम्रियत इत्यर्थः । 'प्रलीयते' इति पाठेऽपि स एवार्थः । युग्मद्वयेऽप्युत्तरत्रैवैवकारः संपदि न करोतु नाम कोऽपि बंधुः साहाय्यं विपदि कुर्यात्सर्वथा तत्र च न करो तीत्यभिप्रायेण । च उक्तसमुच्चयार्थः उभयत्र युग्मेपि योज्यः । अनु तत्तत्पुत्रादिसहभावात्पश्चादेव मरणं जन्मांतरं च लब्ध्वा पूर्वपूर्वकर्म भुंक्ते ॥ २१ ॥ सहवासेऽपि संबंधिनो न सुखदा इत्याह–किंचेति । संभोजयितुं योग्याः संभोजनीया एते मया रक्ष्या इति व्यपदेशैर्मिथ्याहेतुभिः । यद्वा–संभोजनीयाः पुत्रादयो वयमिति व्याजोक्तिभिः संभोजनीयेति पृथक्पदम् । संन्विरापः । तत्पुत्रा मत्स्यानां पुत्राः । अन्यपदमुभयत्र पुत्रादिपरम् । तद्वन्मूढस्या प्यन्य इति "अपदेशः पुमाँल्लक्ष्ये निमित्तव्याजयोरपि" इति मेदिनी ॥ * ॥ जलान्यत्र क्षयिष्णूनि ज्ञेनानि, महासंवर्त्तेन तेषां क्षयदौर्गंध्यापातान्महामत्स्यस्य पूर्वमेव मरणापत्तेः ॥ २२ ॥ इतोऽप्यन्यत्स्नेहाविषयत्वादाह– किंच । यान् पुत्रादीन् । एवमकार्येण, स्वत्वभ्रांत्या । ते पुत्रादयः । तम् अज्ञं नरम् । 'राः पुंसि स्वर्गवित्तयोः' इति मेदिनी ॥ * ॥ अधर्मेण स्वधर्मातिक्रमेण निषिद्धाचरणेन च उपचितं स्वयं यत्नत उपार्जितमपि अन्ये पुत्रादयोऽल्पमेधसो जनस्येति तत्तद्विचाराभावात् । तत्र वै पोषणं तस्यैव वर्द्धनं न तु तेन प्राणादिपोषणमिति लक्षणं प्रहिण्वंति त्यजंति ॥ २३ ॥ सोऽज्ञः ' पथि भोज्यं पाथेयं, पापमेवैकं केवलं पाथेयं यस्य स तया 'पाथेयं शंबले पांथे' इति धरणिः । तैः पुत्रादिभिः । नार्थकोविदः स्वप्रयोजनाऽकुशलः । नञर्थेन नशब्देन 'सुप्सुपा' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माल्लोकमिमं राजन्स्वप्नमायामनोरथम् ॥ वीक्ष्यायम्यात्मनात्मानं समः शांतो भव प्रभो ॥ २९ ॥ धृतराष्ट्र उवाच ॥ यथा वदति कल्याणीं वाचं दानपते भवान् ॥ तथाऽनया न तृप्यामि मर्त्यः प्राप्य यथाऽमृतम् ॥ २६ ॥ तथाऽपि सूनृता सौम्य हृदि न स्थीयते चले ॥ पुत्रानुरागविषमे विद्युत्सौदामनी यथा ॥ २७ ॥ ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान् ॥ भूमेर्भारावताराय योऽवतीर्णो यदोः कुले ॥ २८ ॥

स्वप्नश्च माया च मनोरथश्च तत्तेन तुल्यमात्मना बुद्ध्या विवेकयुक्तया आत्मानं मनः आयम्य नियम्य शांतः सन्समो भवेति ॥२५॥ हे दानपते अक्रूर । न तृप्याम्यलमिति न मन्ये॥२६॥सूनृता प्रिया वाक्चलेऽस्थिरे हृदि न स्थीयते न तिष्ठतीत्यर्थः। सुदामा पर्वतस्तत्र भवा विद्युदिव । तस्मिन्स्फटिकशिलामये सहसैवातिस्फुरिता विद्युद्यथा लीयते तद्वदित्यर्थः । यद्वा सुदामा माला तस्या इयं सौदामनी मालाकारेत्यर्थः ॥ २७ ॥ नन्वेवं जानतोऽपि कथमयं मोह इति चेदत आह । ईश्वरस्येति । विधिं विधानं

समासः । अंधमंधकारयुतम् । तमो नरकम् ॥ * ॥ अंधं तमो महानरकम् । नार्थकोविदः धर्माद्यर्थानभिज्ञः ॥ २४ ॥ अनेन प्रकृते किमायातं, तत्राह—तस्मादिति । यतोऽधर्मेण पुत्रादिपालनं नरकहेतुस्तस्माद्धेतोः । लोकं शरीरं, जगद्वा । स्वप्नेति लुप्तोपमा, स्वप्नवत् । मायापदेनेंद्रजालं तद्वत् मनोरथः मनोराज्यवत् । प्रभो इति तस्य निजोक्तिस्वीकारार्थं श्लाघामात्रम् । सम इति स्वपरबुद्धिं विहाय निजभ्रातृपुत्रेषु तुल्यतया वर्तस्वेत्यर्थः ॥ * ॥ वीक्ष्य दृढं ज्ञात्वा । आत्मना बुद्ध्या आत्मानं मनः । शांतः लोभाद्युपरतः । समः स्वपुत्रेषु पांडवेषु च तुल्यभावो भव । यद्वा—समः सन् शांतः सुखी भव, अन्यथा दुःखमेवेति भावः । यद्वा—भगवन्निष्ठो भवेत्यर्थः । परेष्विव पांडवेषु स्नेहेनैव तादृशत्वसिद्धेरित्युपदेशसारः । तत्र च तव शक्तिरस्त्येवेति संबोधयति—प्रभो इति । स्वोक्तग्रहणार्थमियं चातुरी । तदैव राजत्वसिद्धिः, अयमेव राज्ञो मुख्यधर्मश्चेति भावेनाह—हे राजन्निति ॥ २९ ॥ कल्याणीं कल्याणकरीम् । अनया वाचा । अमृतं देवान्नम् "अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले ह्यग्नौ मोक्षणे हेम्नि गोरसे ॥ क्लीबे ना त्वमरे स्त्री तु गुडूच्याम्" इति यादवः ॥ * ॥ कदापि समो न भवितास्मीति मनसि द्रढयित्वा शाठ्येन तद्दोषपरिहारार्थं प्रभो इत्यस्य प्रत्युत्तरतया निजस्वातंत्र्यं निषेद्धुं तत्र श्रीकृष्णस्यैव दोषं वक्तुं प्राक् तत्संतोषार्थं तदुक्तमभिनंदति—यथेति । यथा यदभिप्रायेण, तथा तदभिप्रायेणैव, न त्वभिप्रायांतरं बुद्ध्वेत्यर्थः । दानपते इति सदुपदेशदानाभिप्रायेण ॥ **विश्वनाथस्तु**—अभिज्ञंमन्योऽक्रूरो मामपि तत्त्वमुपदेष्टुं प्रगल्भते, किमिदमहं न जानामीत्यंतर्मदपूर्णोऽपि महागांभीर्यं प्रकाश्य बहिर्महासाधुरित्याह—यथेति । दानपत इति मथुरायामन्नदानेन बुभुक्षून्यथा तर्पयसि तथैवात्र हस्तिनापुरेऽनभिज्ञं मां ज्ञानदानेन तर्पयसीति भावः ॥ २६ ॥ यद्यपि यथा वदसि तथैव कर्तुं योग्यं तथापीति । 'विषमं तु नतोन्नतम्' इति धरणिः । "सूनृतं मंगलेऽपि स्यात्प्रियसत्ये वचस्यपि" इति मेदिनी । इत्यर्थ इति—कर्मकर्तरि प्रयोगस्त्वत्राकर्मकत्वान्नास्त्यत आर्षत्वाश्रयेण यगादीति बोध्यम् । तद्वत् यथा सुदाम्नि गिरौ विद्युदुद्यंत्येव लीयते तथा मद्धृदि त्वद्वाचोऽप्युक्तिसमकालमेव लीयंत इत्यर्थः । तडिद्दृष्टांतस्य व्यधिकरणत्वात्सामानाधिकरण्येनाह—यद्वेति । तस्या मालाया इयं दीप्तिः विद्योतत इति विद्युत् संज्ञायां कर्तरि क्विब्वा । 'स्याद्विद्युत्तडिद्दीप्त्योः' इति धरणिः ॥ * ॥ सुदामा मेघः 'सुदामा भूधरे मेघे' इति विश्वः । चपले मेघे चपलाविद्युदिवेत्यर्थः ॥ २७ ॥ अत्राक्षिपत्यक्रूरो—नन्विति । अयं त्वदुक्तः पुत्रानुरागरूपः । ईश्वररचनाया एव मायात्वप्रसिद्धेरिति यावदर्थः । विधुनोति उपसर्गवशादत्र धुनोतेः करणार्थता, करोतीत्यर्थः । "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । विहाराहारसंहार[1]प्रतिहारप्रहारवत् ॥" इत्युक्तेः । य ईश्वरः ॥ * ॥ विधिं विधानेच्छाम्, सा च मायाख्येति तैर्व्याख्यातम् । अन्यथा प्रकारांतरेणापि कर्तुं कोऽपि न शक्नोत्यतस्तां को

१ परिहारेत्यपि पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो दुर्विमर्शपथया निजमाययेदं सृष्ट्वा गुणान्विभजते तदनुप्रविष्टः ॥ तस्मै नमो दुरवबोधविहारतंत्रसंसारचक्रगतये परमेश्वराय ॥ २९ ॥ श्रीशुक उवाच ॥ इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ॥ सुहृद्भिः समनुज्ञातः पुनर्यदुपुरीमगात् ॥ ३० ॥ शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितम् ॥ पांडवान्प्रति कौरव्य यदर्थं प्रेषितः स्वयम् ॥ ३१ ॥ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां पारमहंस्यां दशमस्कन्धे पूर्वार्धे पांडववृत्तनिरूपणं नामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ समाप्तमिदं दशमस्कंधपूर्वार्द्धम् ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

मायामिति यावत् ॥ २८ ॥ अतस्तमेव नमस्यति । य इति । दुर्विमर्शपथया अवितर्क्यमार्गया गुणान्कर्माणि तत्फलानि च विभजते विविच्य ददाति । दुरवबोधो यो विहारस्तस्य क्रीडा स एव तंत्रं प्रधानं मुख्यं कारणं यस्य संसारचक्रस्यात एव तस्य गतिर्यस्मात्तस्मै नम इति ॥ २९ ॥ अभिप्रेत्य ज्ञात्वा ॥ ३० ॥ ३१ इति श्रीमद्भागवते महापुराणे दशमस्कंधपूर्वार्धे भावार्थदीपिकायां टीकायामेकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ समाप्तमिदं दशमस्कंधपूर्वार्द्धम् ॥

विधुनोत्यतिक्रमेत, न कोपीत्यर्थः । अत्र त्वमेव प्रमाणम्, एतावता शिक्षणेन मां विवेकं ग्राहयितुं नाऽशक इति भावः । स चेश्वरः संप्रति युष्मद्गृहे वर्तत इत्याह—भूमेरिति । तेन तत्र गत्वा स एव निवेद्यतां यन्मम विधेयम्, स मैवं प्रेरयेदिति भावः ॥ २८ ॥ यतस्तन्मायाऽपाकर्तुमशक्याऽतो हेतोः । तमीश्वरम् । दुरवबोधो ज्ञातुमशक्यः । अत एव दुर्ज्ञेयविहारैककारणत्वादेव । तस्य संचारचक्रस्य । "तंत्रं कुटुंबकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे । प्रधाने तंतुवाये च शास्त्रभेदे परिच्छदे ॥ श्रुतिशाखांतरे हेतावुभयार्थप्रयोजके । इतिकर्तव्यतायाञ्च" इति मेदिनी ॥ * ॥ अस्माभिर्बहिरंगैः परमस्वतंत्रोऽसौ दूरत एव नमस्कार्य एवेत्याह—य इति । तैर्व्याख्यातम् । तत्रावतारिकायां निजवैषम्यहानेच्छाहेतोरिति शेषः । अवितर्क्यमार्गया ज्ञानातीतप्रवृत्तिकत्वात्पारिहर्तुमशक्यया । न चोच्चनीचसुखदुःखविसर्गे तस्य वैषम्यमित्याह—कर्माणीति । कर्माणि पूर्वकर्मानुसारेण विधिनिषेधलक्षणानि । शास्त्रमुखेन व्यवस्थापयति—फलानि सुखदुःखलक्षणानि चोत्पादयतीत्यर्थः । न चैवं तस्यैश्वर्यं कर्माधीनमित्याह—दुरवबोधेति । अनादित्वादनंतानि जीवानां नानाकर्माणि तद्विहारेच्छानुसारेणैवोदयंत इति भावः । अतः परमेश्वराय वशीकृतसर्वत्वेन तन्नाम्ने ॥ **विश्वनाथस्तु**—गुणान्विभजते शांतघोरविमूढरूपत्वेन विभक्तान्करोति । दुरवबोधो दुर्गमः विहारतंत्रः लीलासिद्धांतो यस्य, संसारचक्राद्स्माद्गतिरुद्धारो यस्मात्स च स च तस्मै । धृतराष्ट्रं प्रबोधयेति त्वां मत्प्रबोधार्थं प्रेरयति, मा प्रबुद्धस्वेत्यबोधार्थं मां च प्रेरयतीत्येवं विषमा लीलास्य, ततश्चास्यास्सिद्धान्तं को जानीयादिति भावः । न च त्वं तु संसारचक्रे पतित एवेत्यपि वाच्यम्, ममापि तस्मादेव गतिर्भाविनीति भावः ॥ २९ ॥ इतीत्थम् । नृपतेर्धृतराष्ट्रस्य । सोऽक्रूरः । सुहृद्भिर्विदुरादिभिः ॥ * ॥ इतीदृशं वैषम्यापरित्यागलक्षणम् । नृपतेरिति समत्वेन युधिष्ठिरराज्ये स्वराजत्वहानिशंकयेति भावः । सुहृद्भिः पांडवादिभिः ॥ ३० ॥ यदर्थं धृतराष्ट्रविचेष्टितज्ञानार्थम् । कौरव्येति—त्वमपि तद्वंश्यत्वात्तत्परायणो भवेत्यभिप्रायः ॥ * ॥ पांडवान्प्रति विचेष्टितम् अंतःक्रौर्यबहिर्मार्दवाभ्यां विविधं चेष्टितम् । यदर्थं यद्विचेष्टितज्ञानार्थं प्रेषितः, ताभ्यामेव । हे कौरव्येति—त्वत्पूर्वजानां कुरूणां क्षयकारणं तदेव, तच्च त्वया ज्ञायत एवेति भावः ॥ ३१ ॥ इति श्रीखरडपत्तनवास्तव्यपण्डितवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे पूर्वार्द्धे एकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ ॥ समाप्तं चेदं दशमस्कन्धपूर्वार्द्धम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया
चोपेते श्रीमद्भागवते दशमस्कन्धोत्तरार्द्धप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दशमस्कंध उत्तरार्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अस्तिः प्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ ॥ मृते भर्तरि दुःखार्ते ईयतुः स्म पितुर्गृहान् ॥ १ ॥ पित्रे मगधराजाय जरासंधाय दुःखिते ॥ वेदयांचक्रतुः सर्वमात्मवैधव्यकारणम् ॥ २ ॥ स तदप्रियमाकर्ण्य शोकामर्षयुतो नृप ॥ अयादवां महीं कर्तुं चक्रे परममुद्यमम् ॥ ३ ॥ अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः ॥ यदुराजधानीं मथुरां न्यरुणत्सर्वतोदिशम् ॥ ४ ॥

ॐ नमो भगवते वासुदेवाय ॥ ततः पंचाशत्तमे तु जरासंधभयादिव ॥ कारयित्वांबुधौ दुर्गं तन्निनाय निजं जनम् ॥ १ ॥ कपटान्कपटैरेव हत्वा दैत्यानयत्नतः अजयच्च जरासंधं धर्मेणैव तु धार्मिकम् ॥ २ ॥ अस्तिप्राप्तिसंज्ञिके ईयतुर्जग्मतुः ॥ १ ॥ २ ॥ कंसे शोकः कृष्णे चामर्षस्ताभ्यां युतः ॥ ३ ॥ न्यरुणद्रुरोध ॥ ४ ॥

ॐ स्वस्ति श्रीगणेशाय नमः ॥ श्रीकृष्णं राधिकानाथं वृंदावननिकुंजगम् ॥ गोपगोपीगवां सेव्यं वन्दे सर्वार्थसिद्धये ॥ १ ॥ ततोऽक्रूरागमनोत्तरम् । इवपदं भयाभावमाह । दुर्गं शत्रुभिः दुःखेन गम्यं राज्ञामावासयोग्यं स्थलविशेषे प्रासादविशेषम् "दुर्गो ना नीलि (ली) कठिनदुर्गमेषु च वाच्यवत्" इति धरणिः । "राज्ञां स्थानं भवेद्दुर्गं बह्वम्बुतृणधान्यकम् । सर्वसांग्रामिकोपेतं सर्वतो वीर्यसंयुतम् ॥ वर्तुलं चतुरस्रं वा भूमिष्ठं वातितुंगकम् । वार्क्षपार्वततौयादिभेदेन बहुधा मतम् ॥ वीर्यं वर्तुलमत्युच्चं गोलोत्क्षेपणरंध्रयुक् । निरंतरिक्षं दुर्गांगं कथितं युधि कोविदैः ॥" इति संहितायां दुर्गलक्षणम् । तत् तत्र । निनाय प्रापयामास (१) । कपटांस्तृणावर्तबकादीन् । धर्मेण युद्धधर्मेण । धार्मिकं युद्धधर्मविदं, शैवधर्मविदं वा (२) । सच्छास्त्रस्याऽसच्छास्त्रेणेव श्रीकृष्णस्य जरासंधेन सह संग्रामं वर्णयति । सदसतां तत्त्वनिर्णयेन भक्तिद्वेषाभ्यामुद्भूताभ्यां विहितमोक्षावाप्तिर्भवति, तत्र कथां प्रसञ्जयितुमाह—अस्तिप्राप्तिशब्दाभ्यामविद्याया द्वे रूपे संशयाविपरीतनामनी कथ्येते । कंसस्य 'कसि—हिंसायाम्' हिंसात्मनोऽधर्मस्य महिष्यौ महि महिमानं धर्मस्य सिनुत इति महिष्यौ 'षिञ्—बंधने' अस्मादौणादिको डट्, संबंधिन्यौ । भर्तरि स्वनिर्वाहके कंसनाम्न्यधर्मे कृष्णनाम्ना धर्मेण मृते मारिते । निपातनाण्णि चो लोपः । स्वपितुः स्वपोषकस्य जरासंधस्य जरा व्यर्थवयोहानिहेतुभूता कौलिकमार्गेण शैवत्वावेशरूपा, तस्यां संधा मरणापत्तावपि न मुंचामीति प्रतिज्ञा यस्य तस्य । गृहान् प्रमितिविषयानीयतुः प्राप्य स्थिते । शब्दशक्तिनिपुणैरयमर्थोऽध्यात्मविषयतया ज्ञातव्यः । एवमन्यत्रापि ध्येयम्, ग्रंथविस्तरभिया न प्रदर्श्यत इति । भरतर्षभेति भरतवंश्यत्वात्त्वैतद्भ्रवामीत्यभिप्रायः ॥ * ॥ ० ॥ १ ॥ मगधराजाय द्विजातिनिषिद्धकुलधर्मेण राजमानाय 'मगधस्त्यक्तनीवृतोः' इति कोशात् । आत्मनो वैधव्यस्य वैरूप्यस्य प्रतिपादनासामर्थ्यलक्षणं कारणम् ॥ * ॥०॥ २ ॥ स जरासंधः । तदप्रियं जामातृमृतिरूपममंगलम् । नॄन् कौलिकान् नयान् पिबति, नरान्पातीति नृपः । अयः शुभावहः सताम् अदो नाशकोऽसतामित्ययादः श्रीकृष्णस्तं वांति शरणं गच्छन्तीत्ययादवा वैष्णवास्तद्रहिताम् ॥ * ॥ नृपः सर्वनरपतिः, सम्राडित्यर्थः । नृपेति क्वचित्पाठः । न विद्यंते यादवा यस्यां तामयादवाम् । क्वचित् ' अयादवीम् ' इति पाठः ॥ ॥ ३ ॥ अक्षौहिणीलक्षणार्थमवांतरसंज्ञाप्यमरेणोक्ता—" एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका । पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः । अनीकिनी दशानीकिन्योऽक्षौहिणी ॥ " इत्यमरः । एको गज एको रथस्त्रयोऽश्वाः पञ्च पदातय इति दशसंख्या पत्तिः, त्रिगुणिता पत्तिः सेनामुखम्, तत्त्रिगुणितं गुल्मः, गुल्मं त्रिगुणितं गणः, त्रिगुणो गणो वाहिनी, त्रिगुणिता वाहिनी पृतना, त्रिगुणिता पृतना चमूः, त्रिगुणा चमूरनीकिनी, दशानीकिन्योऽक्षौहिणीति विवेकः । सर्वसंकलने २१८७० गजाः, २१८७० रथाः, ६५६१० हयाः, १०९३५० पदातय इति । ' विंशत्याद्याः सदैकत्वे ' इत्यमराद्विंशत्येत्येकत्वम् ॥ * ॥ अक्षौहिणीसंख्येयम्—" खबाणाग्निनवव्योमचंद्रसंख्याः १०९३५० पदातयः । खेन्दुषट्शरषट्संख्या ६५६१० अश्वा नागा रथा अपि ॥ खाद्रिनागेंदुदक्संख्या २१८७० इत्येषाऽक्षौ

१ वीर्यं (बुड) संज्ञम् । २ 'बुडम्' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरम् ॥ स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलम् ॥ ५ ॥ चिंतयामास भगवान्हरिः कारणमानुषः ॥ तद्देशकालानुगुणं स्वावतारप्रयोजनम् ॥ ६ ॥ हनिष्यामि बलं ह्येतद्भुवि भारं समाहितम् ॥ मागधेन समानीतं वश्यानां सर्वभूभुजाम् ॥ ७ ॥

तस्य बलं सैन्यमुद्वेलं लंघितमर्यादं सागरमिव । तेन तस्य बलेन संरुद्धम् ॥ ५ ॥ किं बलमेव हन्मि न मागधम् । मागधं वा हत्वा बलं गृह्णामि । यद्वा समागधं सर्वं हन्मीति चिंतयामास । ननु प्रथमं कथं जेष्यामीत्येवं चिंतयितुं युक्तं तत्राह । कारणमानुष इति । भूभारावतारकारणेन मानुषो न तु तत्त्वत इति ॥ ६ ॥ एवं त्रिधा विचिंत्य

हिणी स्मृता ॥ " इति । यदुराजधानीमिति तस्या निरोधस्य च महत्त्वे हेतुः । सर्वादिङ्निरोधविशेषो हरिवंशे जरासंधोक्तौ–" सर्वतो नगरी चेयं जनौघैः परिवार्यताम् । अयोयंत्राणि युंज्यंतां क्षेपणीयाश्च मुद्गराः ॥ ऊर्द्ध्वं चापि निवार्यतां प्राप्ता वै तोमरास्तथा । " इति । किञ्च " मल्लः कलिंगाधिपतिश्चेकितानः सबाह्लिकः । काश्मीरराजो गोनर्दः केकयाधिपतिस्तथा ॥ द्रुमः किंपुरुषश्चैव पार्वतीयो ह्यनामयः । नगर्य्याः पश्चिमद्वारं शीघ्रमारोधयन्तु वै ॥ पौरवो वेणुदारश्च वैदर्भः सोमकस्तथा । रुक्मी च भोजाधिपतिस्सूर्याक्षश्चैव गालवः ॥ विन्दानुविन्दावावन्त्यौ दंतवक्रश्च वीर्यवान् । छागलिः पुरुमित्रश्च विराटश्च महीपतिः ॥ कौशल्यो मालवश्चैव शतधन्वा विदूरथः । भूरिश्रवास्त्रिगर्तश्च बाणः पञ्चनदस्तथा ॥ उत्तरं नगरद्वारमेते दुर्गसहा नृपाः । आरुह्य चापि मर्दन्तां वज्रप्रतिमगौरवाः ॥ उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः । एकलव्यो बृहत्क्षत्रः क्षत्रधर्मा जयद्रथः ॥ उत्तमौजाश्च शल्यश्च कौरवाः केकयास्तथा । वैदेहो वामदेवश्च शाकल्यश्च सिनीपतिः । पूर्वं नगरनिर्व्यूहमेतेष्वायत्तमस्तु नः ॥ अहं च वरदश्चैव चेदिराजेन संगताः । दक्षिणं नगरद्वारं वारयिष्यामि दंशिताः ॥ " इति ॥ ४ ॥ तस्य जरासंधस्य । उत्त्यक्ता वेला येन स तथा " वेला काले च सीमायामब्धेः कूलविकारयोः " इति मेदिनी ॥ * ॥ निरीक्ष्येति युग्मकम् ॥ ५ ॥ असंभाव्यमाशंकते–नन्विति । तत्राक्षेपे । तद्देशेति–तस्मिन्देशे काले च यदनुगुणमुचितम्, इहाधुना किं कार्यमिति विचारितवान्, स्वावतारप्रयोजनं भूभारहरणरूपं च चिंतयामासेति चानुकर्षोऽत्र ॥ * ॥ कारणं सर्वकारणं यत्तत्त्वं तद्रूप एव मानुषस्तदाकारो न तु प्राकृतरूप इति तल्लीलत्वेऽपि सर्वज्ञानादिशक्तिमत्त्वम् । तस्य देशस्य कालस्य चानुरूपं महासैन्येन श्रीमधुपुर्या निरोधादवश्यमत्रैव तद्धन्तुं योग्यम् । तत्राप्यधुना, विलंबं विनैवेत्यर्थः । किञ्चात्र केचिदाशंकन्ते–अष्टादशाक्षौहिणीकमहाभारतीययुद्धस्य श्रीव्यासदेवेन बहुमहत्त्वं वर्णितमिह चतुर्दशोत्तरचतुःशताक्षौहिणीकाहवस्य न किमपि तद्वर्णितमत्र को हेतुरिति । अत्रेदमवधेयम्–तत्र श्रीकृष्णभक्तानां श्रीभीष्मयुधिष्ठिरादीनां महद्युद्धनीत्यादिकौशलवर्णनं श्रोतृजनोद्धारायैव न तु पौत्रसंबंधेनेति, जरासंधादीनां कृष्णभक्तिहीनत्वात्तदीयसंग्रामस्य प्रचुरसैन्यत्वेऽपि न तन्महत्त्ववर्णनामिति । अत एवोक्तम्–" श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोर्थः । तत्तद्गुणानुश्रवणं मुकुंदपादारविंदं हृदयेषु येषाम् ॥ " इति । यद्वा–अक्षाणां रथचक्राधाराणामूहः समूहो यस्यां सेनायां साक्षौहिणीति सेनाबाहुल्यमेवावयवशक्त्या ज्ञेयं, न तु वाचनिकम् । अत एवोक्तम्–"आजगाम जरासंधस्त्रयोविंशत्यनीकपः " इति । अनीकश्चाक्षौहिण्यवयव एव । तदुक्तममरसिंहेन–' दशानीकिन्योऽक्षौहिणी ' इति ॥ ६ ॥ एवमुक्तविधया । प्रथमं पक्षं बलहननरूपम् । तत् बलहननम् । एतद् उपस्थितम् । वश्यानां निजायत्तानाम् ॥ * ॥ समाहितं सम्यक्सर्वतः समाहृत्य

१ सलोप आर्षः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अक्षौहिणीभिः संख्यातं भटाश्वरथकुंजरैः ॥ मागधस्तु न हंतव्यो भूयः कर्ता बलोद्यमम् ॥ ८ ॥ एतदर्थोऽवतारोऽयं भूभारहरणाय मे ॥ संरक्षणाय साधूनां कृतोऽन्येषां वधाय च ॥ ९ ॥ अन्योऽपि धर्मरक्षार्थै देहः संभ्रियते मया ॥ विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् ॥१०॥ एवं ध्यायति गोविंद आकाशात्सूर्यवर्चसौ ॥ रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ ॥ ११ ॥ आयुधानि च दिव्यानि पुराणानि यदृच्छया ॥ दृष्ट्वा तानि हृषीकेशः संकर्षणमथाब्रवीत् ॥ १२ ॥

प्रथमं पक्षं निर्धारितवांस्तदाह चतुर्भिः । हनिष्यामीति ॥ ७ ॥ बलोद्यमं कर्ता करिष्यतीति ॥ ८ ॥ नन्वत एव हंतव्यस्तत्राह । एतदर्थ इति । एतच्छब्दार्थं स्पष्टयति । भूभारहरणायेति ॥ ९ ॥अयमेतदर्थोऽवतार इत्युपलक्षणमित्याह । अन्योऽपीति । प्रभवतः उद्भवतः ॥ १० ॥ ससूतौ सारथिसहितौ । परिच्छदः परिकरो ध्वजकवचा

प्रोत्साह्य चानीतम् । वश्यानां वशे स्थितानाम्, अत एव श्रीभीष्मः पांडवाश्च नायाता इति ज्ञेयम् ॥ ७ ॥ भटाश्वरथकुंजरैरुपलक्षिताभिरक्षौरिणीभिः संख्यातं कृतसंख्यमिति पूर्वान्वयि । “ भटः परमजातौ स्यात्पदातौ वीरविज्ञयोः ” इति निरुक्तिः । बलाय सेनानयनाय । यद्वा—‘ त्रयोविंशत्यनीकाख्यम् ’ इति वक्ष्यमाणत्वात्त्रयोविंशतिधाविभक्तसेनापटलैरिति । सेनापटलेऽपि यौगिकोऽक्षाणां रथचक्रावयवानामूहः समूहो यस्यां सेनायां साऽक्षौहिणीति प्रयोगो नाऽसंगत इति ध्येयम्, अष्टादशकृत्वो लाक्षणिकसैन्याऽऽनयनस्य दौर्घव्यप्रतीतेः ॥ * ॥ भटादिभिरुपलक्षिताऽक्षौहिणीभिस्संख्यातं कथितम्, न तत्र प्रत्येकं तासां संख्या कर्तुं शक्यते बहुलत्वादाधिक्यमेव विवक्षितम्, चतुरंगिणीत्वादक्षौहिणीशब्दप्रयोगश्चेति प्रतीयते । अघटनघटनापटीयस्त्वान्मायया यथाश्रुतमपि संभाव्यत एवेति तत्त्वम् ॥ ८ ॥ ननु निश्चयेन यतः पुनरानयिष्यतीत्यत एव हेतोर्हंतव्यो भूभार इति । यद्वा—‘ न त्वतः ’ इति पाठः स्वामिनां, लेखकप्रमादान्नन्विति जातः, तत्पक्षे, अत एव यतः पुनर्बलमानयिष्यति जरासंधोऽतोऽयं न हंतव्य इति व्याख्येयम् । एषोऽर्थः प्रयोजनं यस्य स एतदर्थः ॥ * ॥ एतदर्थम् एतस्मा इत्यर्थः । कस्मै ? तत्राह—भूभारहरणायेत्यादि । अवतारः प्रपंचे प्राकटयम् । ‘ अयम् ’ इति पाठः स्वामिसंमतः । ‘ हि ’ इति क्वचित्पाठः । भूभारहरणं स्पष्टयति—संरक्षणायेति । संशब्देन स्वभक्तिप्रवर्तनादिना लोकद्वयेऽपि रक्षा सूचिता ॥ ९ ॥ अन्योपि रामादिरपि । विरामाय विनाशाय ॥ * ॥ अन्योऽपि किमुत सर्वैश्वर्यादिपूर्णोऽयमित्यर्थः । संभ्रियते प्रकाश्यते इत्यर्थः । तथा च श्रीगीतासु—“ यदायदा हि धर्मस्य ग्लानिर्भवति भारत ” इत्यादि ॥ १० ॥ एवमुक्तप्रकारेण । आकाशाद्वैकुंठात् “ आकाशो ब्रह्मवैकुंठस्वर्लोकगगनेषु च ” इति धरणिः । सद्यश्चितनावसरे । उपस्थितौ प्राप्तौ ॥ * ॥ एवमिति सार्द्धकम् । गां पृथ्वीं विन्दतीति गोविन्द इति, भूभारहरणार्थं साक्षादवतीर्णो भगवानित्यर्थः, तस्मिन् । आकाशादूर्ध्वलोकात्तदीयमहावैकुंठादित्यर्थः ॥ ११ ॥ पुराणानि शंखचक्रगदादीनि । यदृच्छयाऽकस्मादेव । “ यदृच्छा निर्निमित्ते स्याद्द्भुताकस्मिकेऽथवा ” इति धरणिः । तानि रथायुधादीनि । अ५ रथावुपस्थित्युत्तरम् ॥ * ॥ दिव्यानि लोकातीतानि । यतः पुराणानि पुरापि नवानि नित्यानीत्यर्थः । यदृच्छया स्वैरितया, आनयनादिप्रयत्नं विनैवोपस्थितानि, तेषां भगवदभिप्रायज्ञत्वेन चेतनताभिप्रेता । यद्यपि “ हलं संवर्तकं नाम सौनन्दं मुशलं तथा । धनुषां प्रवरं शार्ङ्गं गदां कौमोदकीं तथा ॥ ” इति श्रीहरिवंशात्, तथा श्रीविष्णुपुराणे च चत्वार्येवायुधान्युक्तानि तथाप्यत्र श्रीभगवच्चक्रं श्रीबलदेवस्य धनुरादिकमपि ज्ञेयं

१ उत्तरपद्यावतरणे अयमेतदर्थोऽवतार इत्युपलक्षणमित्युक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ. पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो ॥ एष ते रथ आयातो दयितान्यायुधानि च ॥ १३ ॥ यानमास्थाय जह्येतद्व्यसनात्स्वान्समुद्धर ॥ भा. दी. प्र.
श्री. टी. एतदर्थं हि नौ जन्म साधूनामीश शर्मकृत् ॥ १४ ॥ त्रयोविंशत्यनीकाख्यं भूमेर्भारमपाकुरु ॥ एवं संमंत्र्य दाशार्हौ दंशितौ रथिनौ पुरात् ॥१५॥ टीका.
निर्जग्मतुः स्वायुधाढ्यौ बलेनाल्पीयसाऽऽवृतौ ॥ शंखं दध्मौ विनिर्गत्य हरिर्दारुकसारथिः ॥१६॥ ततोऽभूत्परसैन्यानां हृदि वित्रासवेपथुः ॥ तावाह
॥२८९॥ मागधो वीक्ष्य हे कृष्ण पुरुषाधम ॥ १७ ॥ न त्वया योद्धुमिच्छामि बालेनैकेन लज्जया ॥ गुप्तेन हि त्वया मंद न योत्स्ये याहि बंधुहन् ॥१८॥ अ० ५०

दिस्तत्सहितौ ॥ ११ ॥ १२ ॥ त्वमेवावन् रक्षको नाथो विद्यते येषां ते त्वावंतस्तेषाम् ॥ १३ ॥ १४ ॥ दंशितौ बद्धकवचौ ॥ १५ ॥ स्वायुधाढ्यौ शोभनायुधसंपन्नौ ॥ १६ ॥ पुरुषा अधमा यस्मादिति वास्तवोऽर्थः । हे पुरुषोत्तमेति ॥ १७ ॥ गुप्तेन सर्वांतरत्वाद्दर्शनानर्हेण । हे अमंद । बध्नातीति बंधुरविद्या तां हंतीति तथा हे

योग्यत्वादन्यत्राऽऽगमनश्रवणाच्च । अत एवाग्रे " एष ते रथ आयातो दयितान्यायुधानि च " इति बहुत्वम् ॥ दृष्ट्वेत्यर्द्धकम् । हृषीकेशः विनैव वचनेन सर्वं प्रवर्तयितुं समर्थोऽपि संकर्षणं सर्वं दृष्टिमात्रेण नाशयितुं समर्थमपि । अथ कार्त्स्न्येनाब्रवीत् । लीलाकौतुकावेशेन युक्तिपूर्वकमेव बभाष इत्यर्थः ॥ १२ ॥ त्वावतामत्र समासे त्वदादेशस्य टेराकारश्छांदसः ॥ * ॥ पश्य अवधेहि । तत्किम्—व्यसनमिति ' व्यसनं विपदि भ्रंशेऽत्याशक्तौ ' इति कोशात् । त्वम् नाथः विद्यसे येषां ते त्वावंतः । मतुप्यात्वमार्षम् । यद्वा—त्वमवन् रक्षको येषामिति शतर्यपि तथा । " रक्षकोऽवस्त्राणकरो नाथः स्वाम्यधिपो गुरुः " इति कोशात् ॥ १३ ॥ एतद्बलम् । ईशेति संबुद्धिः ॥ * ॥ निर्णयमाह—यानमिति । एतत्सैन्यं जहि । तन्मुख्यप्रयोजनमादिशति—व्यसनादिति । स्वान् सकलसाधुजनालंबनरूपान्परिकरान्सम्यगक्षतत्वादिनोद्धर । एतच्चावश्यकार्यमित्याशयेनाह—एतदर्थमिति । हि यस्मात् । यत एवान्येषां च साधूनां शर्मकृद्भवेदित्यर्थः । हे ईशेति प्रोत्साहनम् ॥१४ ॥ अनीकपदमक्षौहिणीपरम् । एवमित्थम् । 'दंशितः कवचाचितः, इति मेदिनी ॥ * ॥ आवश्यकतार्थमेव सैन्यस्य हननस्य च वैशिष्ट्यमाह—त्रयोविंशतिरनीकान्यक्षौहिण्योऽनीकिन्यो वा, तदाख्यं तावत्संख्यम् । यद्वा—त्रयोविंशतिश्च ता अक्षौहिण्यस्त्रयोविंशत्यक्षौहिण्यस्ता एवानीकं सैन्यं त्रयोविंशत्यनीकम् । मध्यमपदलोपी समासः। त्रयोविंशत्यनीकमाख्या यस्य तथेति । भारं भारभूतम् । दाशार्हाविति मनुष्यलीलापरत्वमभिप्रेतम् । अत एव दंशितौ ॥१५॥ अल्पीयसाऽल्पप्रमाणेन । दारुकस्तन्नामा सारथिर्यस्य स तथा 'दारुकः कृष्णसारथिः' इति कोशात् ॥ * ॥ अल्पीयसेति जरासंधबलापेक्षया, तत्रापि हरिवंशोक्तविकद्रुदुर्मंत्रणया सर्वेषामागमनेन च । अत एवावृतौ आवरणशक्त्या चतुर्दिक्षु वेष्टितौ । स्वैर्निजायुधैराढ्यौ युद्धे संपन्नौ । तत्तदायुधदर्शनेनैव परसैन्यं क्षोभयंतावित्यर्थः । विशेषेण सर्वतो वैलक्षण्येन निर्गत्य, यतो दारुकसारथिः तत्सारथित्वोपलक्षणया दिव्यातिदिव्यतत्तद्द्रव्यादिशक्तिमान् । हरिरिति शंखध्वनिनैव परेषां वीर्यादिहरणाभिप्रायेण ॥ १६ ॥ ततः शंखध्वनेः । वित्रासेन वेपथुः कंपः । तौ रामकृष्णौ ॥ * ॥ अत एव विशिष्टत्रासेन वेपथुः । श्रीकृष्णं साक्षात्कालरूपं मत्वा तेन साकं युद्धं परिहर्तुमाह—ताविति सार्धेन ॥ १७ ॥ गुप्तेन निंद्येन 'गुप—गोपनकुत्सनयोः' गोपीजारेणेत्यर्थः । यद्वा—गुप्तेन नंदगोपपालितेन वैश्येनेत्यर्थः ॥ * ॥ बालेनैकेनेति— 'बालकेनैव' इति च पाठः । ननु युद्धे शक्तिरेवापेक्ष्यते न तु वय इत्याह—गुप्तेनेत्यर्द्धकेन, कंसभयेन गोकुले निवासात् । ननु वैरिवञ्चनार्थं काले गुप्तिरेव योग्येत्यत आह—मंद हे अभद्र । कुतः—बंधुहन् । अतो याहि धर्मयुद्धादितोऽपसर । तत्त्वार्थस्तु व्याख्यातस्तैः । यद्वा—याहि स्वगृहम्, युद्धश्रमेण ते प्रयोजनाभावादिति भावः ॥ **विश्वनाथस्तु**—गुप्तेन कंसभयाद्गोकुलं ॥२८९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तव राम यदि श्रद्धा युध्यस्व धैर्यमुद्वह ॥ हित्वा वा मच्छरैश्छिन्नं देहं स्वर्याहि मां जहि ॥ १९ ॥ श्रीभगवानुवाच ॥ न वै शूरा विकत्थंते दर्शयंत्ये
व पौरुषम् ॥ न गृह्णीमो वचो राजन्नातुरस्य मुमूर्षतः ॥ २० ॥ श्रीशुक उवाच ॥ जरासुतस्तावभिसृत्य माधवौ महाबलौघेन बलीयसावृणोत् ॥
ससैन्ययानध्वजवाजिसारथी सूर्यानलौ वायुरिवाभ्ररेणुभिः ॥२१॥ सुपर्णतालध्वजचिह्नितौ रथावलक्षयंत्यो हरिरामयोर्मृधे ॥ स्त्रियः पुराट्टालकहर्म्य
गोपुरं समाश्रिताः संमुमुहुः शुचार्दिताः ॥ २२ ॥ हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितम् ॥ स्वसैन्यमालोक्य सुरासुरार्चितं
व्यस्फूर्जयच्छार्ङ्गशरासनोत्तमम् ॥ २३ ॥

अविद्यानिरसनेति । याहि प्राप्नुहि ॥१८॥ अच्छेद्यदेहोऽसाविति स्वयमेव मत्वा परितोषात्पक्षांतरमाह । यद्वा मां जहीति ॥ १९ ॥ यथाश्रुतार्थग्रहणेन भगवत उत्तरम् । न वै शूरा इति । विकत्थंते श्लाघंते ॥ २० ॥ माधवौ मधुवंशभवौ । महता सैन्यसमूहेनावृतवान् । वायुरभ्रैः सूर्यं रेणुभिश्चाग्निं यथेत्यदर्शनमात्रमेवावरणमिति सूचितम् ॥ २१ ॥ २२ ॥ परस्यानीकानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषामत्युल्बणं वर्षं तेन पीडितम् । व्यस्फूर्जयदुज्जृंभितवान् ॥ २३ ॥

गतस्य तव वैश्यपालितत्वेन वैश्यधर्मप्राप्तेः ॥ १८ ॥ श्रद्धा युद्धश्रद्धा ॥ * ॥ 'त्वं च' इति वा पाठः । चशब्दस्त्वर्थे । श्रद्धा युद्धेच्छा । यदीति मद्भयानुभवितैव यदि कथंचित्स्यादित्यर्थः । स्थैर्यमुच्चैर्बहुबलादात्मानमुद्वह प्रापय, न जातूद्विग्नो भव, न पलायस्वेत्यर्थः । 'धैर्यम्' इत्यपि पाठे स एवार्थः । यद्वा—मत् मत्तः पापात्मनः सकाशात्स्ववैकुंठं याहि । किं कृत्वा—शरैश्छिन्नं मम देहं हित्वा त्यक्त्वा, अत्रैव प्रक्षिप्येत्यर्थः ॥ १९ ॥ आतुरस्य जामातृमरणेन दुःखितस्य । मुमूर्षतः मर्तुमिच्छतः । "गीर्बुद्धी विपरीते स्त आसन्नमरणस्य नुः" इति शिष्टोक्तेः ॥*॥ आत्मना सह युद्धकौतुके तं प्रवर्तयितुं व्यक्तार्थमाश्रित्य सोल्लुंठमुत्तरमाह—नेति । वै प्रसिद्धम् । न च तव गालिप्रदानेन वयं क्षुभ्याम इत्याह—नेति । आतुरस्य वातादिदोषव्याकुलस्य, तत्रापि मुमूर्षतः संप्रत्येव मरिष्यतः वाचो न गृह्णीमो वस्तुबुद्ध्या न भावयामः, कुतः कोपं कुर्म इत्यर्थः । राजान्निति—यद्यपि राज्ञस्ते तदतीवानुचितमिति भावः ॥२०॥ तौ रामकृष्णौ । सैन्येन, यानध्वजै रथध्वजैः वाजिभिरश्वैः, सारथिभिश्च सहितौ । 'वाजी त्वश्वे शरे खगे' इति हलायुधः ॥*॥ श्रीशुक उवाचेति क्वाचित्कः । जरासुत इति जराराक्षस्या संहितदेहत्वात्तद्दत्तशक्तित्वेन मनुष्यातीतशक्तिरुक्ता । माधवाविति दाशार्हाविति वत् । वस्तुतस्तु, साक्षान्मायानाशकत्वेन, तत्कार्यप्रपञ्चनाशने तु किंचिदपि प्रयासादिनेत्यर्थः ॥२१॥ तालो वृक्षविशेषः । पुरं गृहम्, अट्टालकं गृहोपरीष्टकादिविरचितचतुरस्रस्थलम्, हर्म्यं धनिनां वासः, गोपुरं पुरद्वारम् । "पुरं नपुंसकं गेहे देहपाटलिपुत्रयोः । पुष्पादीनां दलावृत्तौ ना गुग्गुलौ न ना पुरि ॥" इति मेदिनी । "गोपुरं द्वारि पूर्द्वारि कैवर्ते मुस्तकेऽपि च" इत्यपि । 'हर्म्यादि धनिनां वासः' इत्यमरः । "इष्टिकादिविराचितं चतुरस्रं गृहोपरि । स्थलमट्टालिकं प्रोक्तमट्टः क्षौमं तदेव हि ॥" इति कोशात् ॥*॥ सुपर्णेति तत्तद्ध्वजादर्शनमपि सूचितम् । पुरस्याट्टालिकं दुर्गोपरिरचितमुच्चगृहम्, हर्म्यं चोच्चप्रासादः, गोपुरं पुरद्वारम्, द्वंद्वैक्यम् । उच्चारूढा अप्यलक्षयंत्यो लक्षणैरप्यतर्कयंत्यः शुचा शोकेनापिता व्याप्ताः । 'अर्दिताः' इति पाठे पीडिताः सत्यः संमुमुहुः । स्त्रीणां स्वभावत एव स्नेहार्द्रचित्तत्वादिति भावः ॥ २२ ॥ 'अलिबाणौ शिलीमुखौ' इत्यमरः । उज्जृंभितवान् उच्चैश्चकार ॥ * ॥ हरिरिति युग्मकम् । हरिरिति परसैन्यहरणात् । पडिनमत्र संपातेन वित्रासनमेव न तु छेदनम् 'मुकुंदोऽथाऽक्षतबलः' इति वक्ष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृह्णन्निषंगादथ संदधच्छरान्विकृष्य मुंचञ्छितबाणपूगान् ॥ निघ्नन्रथान्कुञ्जरवाजिपत्तीन्निरंतरं यद्वदलातचक्रम् ॥ २४ ॥ निर्भिन्नकुंभाः करिणो निपेतुरनीकशोऽश्वाः शरवृक्णकन्धराः ॥ रथा हताश्वध्वजसूतनायकाः पदातयश्छिन्नभुजोरुकंधराः ॥२५॥ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताः शतशोऽसृगापगाः ॥भुजाऽहयः पूरुषशीर्षकच्छपा हतद्विपद्वीपहयग्रहाकुलाः ॥२६॥ करोरुमीना नरकेशशैवला धनुस्तरंगायुधगुल्मसंकुलाः ॥ अच्छूरिकावर्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः ॥ २७ ॥ प्रवर्तिता भीरुभयावहा मृधे मनस्विनां हर्षकरीः परस्परम् ॥ विनिघ्नताऽरीन्मुसलेन दुर्मदान्संकर्षणेनापरिमेयतेजसा ॥२८॥ बलं तदंगार्णवदुर्गभैरवं दुरंतपारं मगधेंद्रपालितम् ॥ क्षयं प्रणीतं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परम् ॥ २९ ॥

तदाह । गृह्णन्निति । निषंगादिषुधेः शरान् गृह्णन् अथ तान्गुणे संदधत् गुणमाकृष्य निशितबाणसमूहान्मुंचन् । निघ्नन्प्रहरन् । पत्तिः पदातिः । निरंतरमिति ग्रहणादिक्रियाविशेषणम् । ज्वलत्काष्ठं भ्रमणे यथा चक्रवद्भवति तद्वद्यथास्फूर्जयदिति ॥ २४ ॥ हता अश्वा ध्वजाः सूता नायका रथिनश्च येषु ते ॥ २५ ॥ संछिद्यमाना द्विपदा इभा वाजिनश्च तेषामंगेभ्यः प्रसूता असृगापगा रुधिरनद्यः परस्परं प्रवर्तिता इति तृतीयेनान्वयः । प्रसिद्धनदीरूपकमाह । भुजा एवाहयो यासु ताः । पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः । हता द्विपा एव द्वीपा अंतर्वर्तितटानि हया एव ग्रहा ग्राहास्तैश्चाकुला व्याप्ताः ॥२६॥ करा ऊरवश्च मीना यासु ताः नराणां केशा एव शैवालं यासु ताः । धनूंष्येव तरंगा आयुधान्येव गुल्मास्तैश्च तैश्च संकुलाः । अच्छूरिकाश्चर्माणि चक्राणि वा तान्येवावर्तास्तैर्भयानकाः । महामणीनां प्रवेका उत्तमा आभरणानि च यथायथमश्मानः शर्कराश्च यासु ताः ॥२७॥भीरूणां भयावहाः । मनस्विनां धीराणां हर्षकर्यः किं च संकर्षणेनापि तद्बलं क्षयं प्रणीतम् ॥ २८ ॥ अंग हे राजन् । अर्णववद्दुर्गं दुर्गमं भैरवं भयंकरं च

माणत्वात् ॥ २३ ॥ तत् शरासनोऽज्जृंभणम् । ' निषंगः संगते तूणे ' इति मेदिनी । अथ ग्रहणोत्तरम् । ताञ्शरान् । गुणे मौर्व्याम् । “अलातं दीप्तकाष्ठे स्यादगृहीते तु वाच्यवत् ” इति धरणिः ॥ * ॥ तद्विद्याविशेषाभिव्यञ्जनं शृण्वित्याह—गृह्णन्निति । निषंगादिषुधेः सकाशादेकैकशरान् गृह्णन् अथानुगुणे तान्संदधत् । गुणमाकृष्य तान्मुंचँस्तैश्च रथादीन्निघ्नन् । निरंतरामिति ग्रहणादिसर्वक्रियाविशेषणम्, तेन ग्रहणयोजनकर्षणनिक्षेपणप्रहरणक्रियाः क्रमेणोद्भूता अपि सदैवोद्भवंत्य एव द्रष्टृन्प्रति ताः क्षणार्धमध्ये शतकोटिकृत्व उद्भवंतीत्यर्थः । अत एव अलातचक्रदृष्टान्तः ॥ २४ ॥ निर्भिन्नकुम्भा विदलितमूर्धानः “ कुंभो राश्यंतरे हस्तिमूर्द्धांसे राक्षसांतरे ” इति मेदिनी । अनीकशः राशिशः “अनीकोऽस्त्री रणे सैन्ये समूहे दुर्गतेपि च ” इति धरणिः ॥ * ॥ ० ॥ २५ ॥ 'इभः स्तंबेरमः पद्मी ' इत्यमरः । “द्वीपोऽस्त्रियामंतरीपं यदंतर्वारिणस्तटम्” इति च । 'ग्रहो ग्राहे च रव्यादौ ' इति धरणिः ॥ * ॥ ० ॥ २६ ॥ “ जलनीली तु शेवालं शैवऽलोऽथ ” इत्यमरः । गुल्मा लवल्यः “ गुल्मः सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः । स्तंबे स्त्रियामामलक्यां लवलीवस्त्रवेशयोः ॥” इति मेदिनी । “अच्छूरिका स्यात्पुलके वृत्तचक्रध्वनिष्वपि ” इति तीर्थः । “ प्रवेकस्तूत्तमे पुंसि वाच्यवत्स्याद्विवेक्तरि ” इति निरुक्तिः । ' आवर्तस्त्वंभसां भ्रमः ' इति । यथायथं । मणय अश्मानः पाषाणानि ' अश्मनी मणिपाषाणे' इति कोशात् । अलंकाराश्च शस्त्रभेदनाच्छर्करावज्जाताः, शर्कराः सिकता वालुका इति यावत् “शर्करा खण्डविकृतावुपलाकर्परांशयोः ।: शर्करान्वितदेशेपि रुग्भेदे शकलेपि च ॥” इति मेदिनी ॥ * ॥ अच्छूरिका चर्माणि चक्राणि वा । पञ्चमस्कन्धे ' अच्छूर्यमृतमणी ' इत्यादौ प्रयुक्तश्चक्र एव ॥ २७ ॥ परस्परमन्योन्यम् । न केवलं श्रीकृष्णेनैव नद्यः प्रवर्तिता इत्याह—किञ्चेति । यद्यपीह कृष्णेनेति नोक्तं तथापि ' क्षयं प्रणीतं वसुदेवपुत्रयोः ' इत्यग्रिमपद्योक्तिविरोधात्तेनापीति बोध्यम् ॥ * ॥ दुर्मदान् दुष्टाहंकारान् । साक्षाच्छ्रीभगवता सह युद्धात् । यद्वा—निजबलादिना महामत्तानित्यर्थः । तेजः पराक्रमः ॥ २८ ॥ यतो दुरंतपारमतोऽर्णववदिति

१ यद्यपि 'हरिः परानीक–' (२३) इत्यतः प्रकरणात्कृष्णेनासृङ्नद्यः प्रवर्तिता इति वक्तुं शक्यते तथापि स्पष्टतया नोक्तमित्याशयः । उत्तरवाक्यप्रामाण्यदानेऽप्यसौष्ठवाऽनुपलब्धेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थित्युद्भवांतं भुवनत्रयस्य यः समीहतेऽनंतगुणः स्वलीलया ॥ न तस्य चित्रं परपक्षनिग्रहस्तथापि मर्त्यानुविधस्य वर्ण्यते ॥ ३० ॥ जग्राह विरथं रामो जरासंधं महाबलम् ॥ हतानीकावशिष्टासुं सिंहः सिंहमिवौजसा ॥ ३१ ॥ बध्यमानं हतारातिं पाशैर्वारुणमानुषैः ॥ वारयामास गोविंदस्तेन कार्यचिकीर्षया ॥ ३२ ॥ स मुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः ॥ तपसे कृतसंकल्पो वारितः पथि राजभिः ॥ ३३ ॥

यतो दुरंतपारम् । अंतोऽत्र तलम् । पारमवधिः । दुःशब्दो निषेधे । विक्रमेणागाधं देशतश्च निरवधिकमित्यर्थः । किं च मगधेंद्रेण च पालितं बलम् । यदेवंभूतं रामकृष्णयोः कर्मोक्तं तत्परं केवलं तयोर्विक्रीडितं न तु पराक्रमः ॥ २९ ॥ न चैतदाश्चर्यमित्याह । स्थित्युद्भवांतमिति । तर्हि किमित्याश्चर्यमिव वर्णितं तत्राह । तथापीति । मर्त्याननुविधत्तेऽनुकरोतीति मर्त्यानुविधस्तस्य ॥ ३० ॥ किं च जग्राहेति । हतान्यनीकानि यस्य अवशिष्टा असव एव यस्य तं च तं च ॥ ३१ ॥ हता बहुशोऽरातयो येन तथाभूतमपि

योज्यम् । तलमिति 'तलं स्वरूपेऽनूर्द्ध्वे स्त्री' इति मेदिनी । इत्यर्थ इति व्याख्येयमिति । रक्षकप्रबलत्वेपि नाशेऽनायासमाह—किञ्चेति । तयो रामकृष्णयोः ॥ * ॥ विक्रीडितं लीलाविशेष एव परं केवलं न त्वावेशिकं युद्धमित्यर्थः ॥ २९ ॥ एतद्बलनाशनम् । यः कृष्णः । समीहते कुरुते । चित्राभावे तद्वत्कुतो वर्णितमित्याह—तर्हीति । यद्यपि हरेः परपक्षनिग्रहश्चित्रं न तथापीति । तस्य मनुष्यधर्ममनुकुर्वतो हरेस्तद्युद्धं वर्ण्यते, बुद्ध्यवतारार्थं प्रशस्यत इत्यर्थः ॥ * ॥ ननु जगदीशता चेत्तर्हि कथं क्षुद्रातिक्षुद्रैः स्वाननुरूपैर्जीवैः सह युद्धे रसः सिध्यति, न चेत्तर्हि तद्वर्णनेन किं तत्राह—स्थितीति । तर्हि किमित्याश्चर्यमिव वर्णितं तत्राह—तथापीति । मर्त्यः सन्ननुरूपमेव विधत्त इति मर्त्यानुविधस्तस्य । अयमर्थः—येन स्वाकारेण जगत्सृष्ट्यादिकं करोति तेनैव यदि जरासन्धं जयति तदा खल्वननुरूपत्वान्न रसः, यदि च मर्त्यः सन् जयति तदा मर्त्यस्य प्रतियोद्धा मर्त्य एवानुरूपस्तत्रातिप्रौढस्य जरासंधस्य जयाच्चमत्कार इति रस एव भवति । न च मर्त्यदेहस्यास्वरूपत्वमिति वाच्यम् 'परमात्मा नराकृतिः' "नराकृति परं ब्रह्म हरिः कारणमानुषः", 'यन्मित्रं परमानंदं पूर्णं ब्रह्म' इत्यादिश्रवणात्, 'अहं ब्रह्म परं धाम' इति गीतोक्तेश्च ॥ ३० ॥ अन्यदद्भुतमाह—किंचेति । ओजसा बलेन ॥ * ॥ सिंहस्सिंहमिति मर्त्यानुविधतया साम्याभिप्रायात् । 'महाबलम्' इति क्वचित्पाठः । तत्र महाबलत्वमपि मर्त्यानुविधाऽपेक्षयैव न तु ऐश्वर्यापेक्षया ॥ ३१ ॥ वारुणैर्नागादिरूपैः, मानुषै रज्ज्वादिभिः । वारयामास मोचयामास । तेन जरासंधेन । कार्यस्य पुनस्तदानींतनसेनावधस्य चिकीर्षया ॥ * ॥ मानुषीयैस्त्वत्यंतापमानार्थम् । गोविंद इति पूर्ववत् । अत एव तेन जरासंधेन यत्कार्यं हननार्थं भूभारसैन्यसंमेलनं तस्य कर्तुमिच्छया । महाराजोऽयं संबंधी च ततोऽधुना कृतापराधोऽपि त्यज्येतेति रामस्तमत्रायतेत्यर्थः । अत्र प्रकरणप्राप्तस्य बन्धनस्य " भीत्रार्थानां भयहेतुः " इत्यनेनापादानत्वम्, गोभ्यो यवान्वारयतीतिवत् ॥ ३२ ॥ मुक्तो विसृष्टः । वारितो निवारितः ॥ * ॥ स मुक्त इति युग्मकम् । लोकनाथाभ्यामिति पूर्वोक्तरीत्या लोकहितार्थमेवेति भावः । अथ च महाशयत्वाज्झटिति तद्धनने त्वनाग्रहश्च दर्शितः । यतो वीरसंमतोऽतो बंधे ततोऽपि मोचने व्रीडितः । अत एव तपस उद्यतः, कथं यादवबलादपि पराजयो मम जातस्तत इतः क्षात्रधर्मं न करिष्यामि किन्तु तपसैव शरीरं त्यक्ष्यामीति बहिरभिमानज्ञापनायाऽन्तस्तु वीर्यातिशयलाभायेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि ॥ स्वकर्मबंधप्राप्तोऽयं यदुभिस्ते पराभवः ॥ ३४ ॥ हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा ॥ उपेक्षितो भगवता मगधान्दुर्मना ययौ ॥ ३५ ॥ मुकुंदोप्यक्षतबलो निस्तीर्णारिबलार्णवः ॥ विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ ३६ ॥ माथुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमागधबंदिभिः ॥ ३७ ॥ शंखदुंदुभयो नेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानि पुरं प्रविशति प्रभौ ॥ ३८ ॥ सिक्तमार्गां हृष्टजनां पताकाभिरलंकृताम् ॥ निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणाम् ॥ ३९ ॥ निचीयमानो नारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ॥ ४० ॥ आयोधनगतं वित्तमनंतं वीरभूषणम् ॥ यदुराजाय तत्सर्वमाहृतं प्रादिशत्प्रभुः ॥ ४१ ॥

जरासंधं बध्यमानं वारयामासेति ॥ ३२ ॥ ३३ ॥ पवित्रार्थानि धर्मोपदेशपराणि पदानि येषु तैर्वाक्यैः । नयनैर्नीतिभिः । प्राकृतैर्लौकिकैः । तत्र लौकिकन्यायमाहुः । स्वकर्मेति । यदुभिरल्पकैः कृत्वा ते महतः पराभवः केवलं कर्मबंधेन प्राप्तोऽतस्त्वया न लज्जितव्यमिति ॥ ३४ ॥ बार्हद्रथो जरासंधः ॥ ३५ ॥ मुकुंदोऽपि यथावित्यनुषंगः । न क्षतं बलं यस्य सः । तस्यैवामृतदृष्ट्या क्षतप्रतिसंधानादिति भावः । निस्तीर्णोऽनायासेनैव तीर्णोखिलार्णवो येन । साधुसाधु इत्यनुमोदितश्च ॥ ३६ ॥ प्रत्युद्यातैर्मथुरावासिभिर्जनैः उपसंगम्य मिलित्वा ॥ ३७ ॥ तदा प्रभौ पुरं प्रविशति सति शंखादयो नेदुः ॥ ३८ ॥ कथंभूतां पुरं तदाह । सिक्तमार्गामिति । ब्रह्मघोषेण वेदघोषेण निर्घुष्टां निनादिताम् । कौतुकेनोत्सवेन आ सर्वतो बद्धानि तोरणानि यस्यां ताम् ॥ ३९ ॥ निचीयमानो विकीर्यमाणः । प्रविवेशेति विपरिणताऽनुषंगः ॥ ४० ॥ आयोधनं ज्ञेयम् ।

पथि वनवर्त्मनि तपोर्थमाश्रिते ॥ ३३ ॥ तत्र नयेषु ॥ * ॥ पवित्रार्थपदैः क्षत्रियस्य वार्द्धक्य एव सति वैराग्ये तपः, युद्धादिको मुख्यो धर्मः लज्जया तत्त्यागोऽनुचित इत्यादिलक्षणैः । तवैतत्पराभवदुःखं ललाटे लिखितमेव तत्कथमन्यथा भवति ' अवश्यमेव भोक्तव्यम् ' इति स्मृतेः । अतः स्वकर्मभिरेवैतत्पराभवस्तथा च प्रारब्धाधीनत्वात्तत्र का लज्जा, कः खलु बुद्धिमानतिक्षुद्राद्यादवादपि दुर्बलं मंस्यते । यादवेन युद्धे तत्र जये सति न किमपि यशः, पराजयेपि न काचिल्लज्जा, जरासंधसिंहो हि कृष्णसारं जित्वापि न कमप्युत्कर्षमजित्वापि न कामपि निंदां प्राप्नोतीति वयं जानीमः । समपक्षेणापि सह युद्धे जयपराजयाभ्यां क्षत्रियैर्न गर्वदैन्ये धार्ये, किमुत स्वतोऽतिन्यूनेनेति शास्त्रम् ॥ ३४ ॥ ' नृपो बार्हद्रथस्तदा ' इत्येवपाठः सम्यक् । तीर्थस्तु–' नृपतिर्बार्हद्रथः ' इति पपाठ, तत्रार्षत्वाश्रयणमृते निर्वाहो नास्ति ॥ * ॥ हतेष्विति त्रिकम् । बृहद्रथः राजचक्रवर्त्ययं तदपत्यमिति तन्नामविख्यापक इत्यर्थः । अत एव साभिमानत्वादुपेक्षितोऽपि दुर्मना दुःखितचित्तः ॥ ३५ ॥ अपिना पूर्वक्रिया गृह्यते । तस्यैव मुकुंदस्यैव । क्षतप्रतिसंधानं विक्षतीभवनम् । इति भावः–दृष्ट्या मृतिनाशकस्य विक्षतीकरणं नाद्भुतमित्याशयः । अरिबलार्णवः शत्रुसेनासमुद्रः ॥ * ॥ मुकुंद इति जरासंधमोचनाभिप्रायेण । निस्तीर्णेति मर्त्यानुविधत्वात् । मुकुन्दोपि मथुरां ययाविति । अनुमोदितः जयजयेत्यादिशब्दैर्वार्द्धितः ॥ ३६ ॥ प्रत्युद्यातैरानयनार्थं संमुखमागतैः ॥ * ॥०॥ ३७ ॥ प्रभौ सर्वेश्वरे श्रीकृष्णे ॥ * ॥ शंखेति युग्मकम् । अनेकश इत्यस्य सर्वैरेवान्वयः ॥३८॥ तोरणानि वंदनमालाः ॥ * ॥ हृष्टेत दिव्यवस्त्रादिधारणं सूचयति । कौतुकेनेति तृतीयालुक्छांदसः । अतः सर्वत्रान्वेति ॥ ३९ ॥ अंकुरैर्दूर्वांकुरैः । विपरिणतस्य शत्रन्तविशेषलिंडन्तत्वेन विपरिणतस्य । अनुषंगः पृष्टपाठत आनयनम् । उत्कलितानि प्रफुल्लानि ॥ * ॥ कीदृशस्सन् प्रविवेश तत्राह–निचीयेति । प्रीत्या हर्षेणोत्कलितैर्विकासितैर्लोचनैः कृत्वा । अत्र विपरिणतानुषंग इति ' पुरं प्रविशति प्रभौ ' इति पूर्वोक्तशतृप्रत्ययस्य सप्तम्याश्च लिङ्गत्वप्रथमत्वेन विपरिणामात् । यद्वा–निचीयमान इति परेण युग्मकम् ॥ ४० ॥ यदुराजायोग्रसेनाय ॥ * ॥ वीराणां भूषणं गात्रालंकरणम्, तेषामतिबहुलतयानंतं मूल्येनाप्यनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं सप्तदशकृत्वस्तावत्यक्षौहिणीबलः ॥ युयुधे मागधो राजा यदुभिः कृष्णपालितैः ॥ ४२ ॥ अक्षिण्वंस्तद्बलं सर्वं वृष्णयः कृष्णतेजसा ॥ हतेषु स्वेष्वनीकेषु त्यक्तोऽयादरिभिर्नृपः ॥ ४३ ॥ अष्टादशमसंग्रामे आगामिनि तदंतरा ॥ नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ॥ ४४ ॥ रुरोध मथुरामेत्य तिसृभिर्म्लेंच्छकोटिभिः ॥ नृलोके चाप्रतिद्वंद्वो वृष्णीञ्छ्रुत्वात्मसंमितान् ॥ ४५ ॥ तं दृष्ट्वाऽचिंतयत्कृष्णः संकर्षणसहायवान् ॥ अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ॥ ४६ ॥

रणभूमिस्तत्रस्थं वित्तम् । वीराणां भूषणम् ॥ ४१ ॥ तावतीति च्छेदः । तावति पराजये वर्तमानेऽप्यक्षौहिण्यो बलं यस्य सः । सप्तदशकृत्वः सप्तदशवारान्युयुधे ॥ ४२॥ अक्षिण्वन् क्षयं निन्युः ॥ ४३ ॥ अष्टादशमेऽष्टादशे संग्रामे भाव्ये तन्मध्येऽकस्मात्कालयवनः प्राप्तः ॥ ४४ ॥ आत्मसंमितान्स्वतुल्यान् ॥ ४५ ॥ वृजिनं दुःखम् ।

रूप्यमित्यर्थः । आहृतं जनैरानायितम् । यदुराजाय स्वयमेव तथात्वेन स्थापितायोग्रसेनाय । प्रकर्षेण राजयोग्यादरपूर्वकमदिशदुपहृतवान् । यतः प्रभुः स्वयं तद्वैभवानपेक्षः, स्वमर्यादापालनपरश्चेत्यर्थः ॥ ४१ ॥ एवं प्रथमयुद्धवत् । तावति तत्प्रमाणकेऽर्थात्पराजये सति ॥ * ॥ एवमिति प्रतिवारं त्रयोविंशत्यक्षौहिण्यः, तादृशं युद्धम्, वनगमनागमश्च ज्ञेयः । यद्वा—तावतीत्यत्र पुंवद्भावाभाव आर्षः । तावत्यस्त्रयोविंशतिसंख्या अक्षौहिण्यो बलं सैन्यं ताभिर्वा युद्धसामर्थ्यं यस्य सः । कृष्णपालितैरिति पूर्ववदक्षतत्वादि बोध्यते ॥ ४२ ॥ तद्बलं जरासंधबलम् । अनीकेषु सैन्येषु । अरिभिः कृष्णादिभिः ॥ * ॥ वृष्णय एव न तु पूर्ववत् कृष्णरामौ, तत्र सात्यक्यादीनां प्राधान्यं क्रमशो ज्ञेयम् । कृष्णतेजसा वह्निना ज्वालानामिव श्रीकृष्णेन समवाय एव तेषां तेजो व्यवर्द्धतेत्यभिप्रायेण, न तु तदभावापेक्षया "नृलोके चाप्रतिद्वंद्वो वृष्णीञ्छ्रुत्वात्मसंमितान्" इति वक्ष्यमाणात् । अत एवारिभिर्वृष्णिभिरेव त्यक्तः श्रीकृष्णाभिप्रायेणेति भावः । यद्वारिभिर्हतेषु पूर्ववच्छ्रीभगवता त्यक्तः सन् ॥ ४३ ॥ मडत्रार्षः ॥ * ॥ प्रत्यदृश्यत सहसैव माथुराणां दृष्टिविषयो बभूवातिशीघ्रं प्राप्त इत्यर्थः । नारदेन प्रेरितोऽत्र विशेषो विष्णुपुराणे—"गार्ग्यं गोष्ठे द्विजं श्यालः षंढ इत्युक्तवान्द्विज । यदूनां सन्निधौ सर्वे जहसुर्यादवास्ततः ॥ ततः कोपसमाविष्टो दक्षिणापथमेत्य सः । सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् ॥ आराधयन्महादेवं सोयश्चूर्णमभक्षयत् । ददौ वरं च तुष्टोऽसौ वर्षे द्वादशमे हरः ॥ सभाजयामास च तं यवनेशोप्यनात्मजः । तद्योषित्संगमाच्चास्य पुत्रोऽभूदालिसंप्रभः ॥ तं कालयवनं नाम राष्ट्रे स्वे यवनेश्वरः । अभिषिच्य वनं यातो वज्रांगकठिनोरसम् ॥ स च वीर्यबलोन्मत्तः पृथिव्यां बलिनो नृपान् । पप्रच्छ नारदश्चास्मै कथयामास यादवान् ॥" इति । 'प्रेषितः' इति पाठेऽपि स एवार्थः ॥ ४४ ॥ न प्रतिद्वन्द्वः प्रतियोद्धा यस्य स तथा ॥ * ॥ अप्रतिद्वन्द्वः प्रतियोधरहितः । श्रुत्वा श्रीनारदादेव ॥ ४५ ॥ तं यवनम् ॥ * ॥ 'संकर्षणसहायवान्' इति मथुरातो दूरगमने तस्य संप्रति ग्रहणार्थं तेन सहेत्यर्थः । मर्त्यानुविधित्वादेवेति भावः । अत एवाह—अहो इत्यादि । अहो खेदे । हि निश्चितम् ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यवनोऽयं निरुंधेऽस्मानद्य तावन्महाबलः ॥ मागधोऽप्यद्य वा श्वो वा परश्वो वाऽऽगमिष्यति ॥ ४७ ॥ आवयोर्युध्यतोरस्य यद्यागंता जरासुतः ॥ बंधून्वधिष्यत्यथवा नेष्यते स्वपुरं बली ॥ ४८ ॥ तस्मादद्य विधास्यामो दुर्गं द्विपददुर्गमम् ॥ तत्र ज्ञातीन्समाधाय यवनं घातयामहे ॥४९॥ इति संमंत्र्य भगवान्दुर्गं द्वादशयोजनम् ॥ अंतःसमुद्रे नगरं कृत्स्नाद्भुतमचीकरत् ॥ ५० ॥ दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शिल्पनैपुणम् ॥ रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितम् ॥ ५१ ॥

उभयतो यवनाज्जरासंधाच्च ॥ ४६ ॥ तदाह द्वयेन । निरुंधे निरुणद्धि ॥ ४७ ॥ अस्य अनेन ॥ ४८ ॥ ४९ ॥ समुद्रमध्ये दुर्गं तन्मध्ये नगरम् । कृत्स्नाद्भुतं सर्वाश्चर्यमयम् । अचीकरत्कारयामास ॥ ५० ॥ त्वष्टा विश्वकर्मा तदीयं शिल्पनैपुणं च क्रियाकौशलम् । तदाह सार्द्धैस्त्रिभिः । रथ्येति । रथ्या राजमार्गाः पुरतः वीथ्य उपमार्गाः पश्चिमतः उभयतोऽपि चत्वराण्यंगणानि तन्मध्ये कोष्ठास्ततोऽप्यंतः सुवर्णभवनानि तदुपरि स्फाटिकाट्टालिकास्तदुपरि हेमकुंभा इति बहुभूमिकम् । यथावास्तु वास्तु गृहादि

तद् वृजिनम् । तावदधुना । श्व आगामिदिने । परश्वस्ततः परदिने ॥ * ॥ नितरां रुंधे आवृणोति । यतो महाबलोऽतोऽपसर्तुमपि न शक्यत इति भावः ॥ ४७ ॥ "छंदसि बहुलम्" इति तृतीयार्थे षष्ठी । तदेवाह—अनेनेति ॥ * ॥ आवयोः सगणयोरिति शेषः । बंधून् अयोद्धॄंस्तत्रत्यवृद्धबालादीनिति भावः । व्रजस्थगोपांश्च तेषामवध्यत्वमनुसंधाय नेष्यत इति ॥ ४८ ॥ यतो जरासन्ध आयास्यति तस्माद्धेतोः । दुर्गमं मनुष्यागम्यम् । तत्र दुर्गे । समाधाय स्थापयित्वा ॥ * ॥ अद्यैव विधास्यामः, बहुत्वं श्रीरामस्य महत्त्वापेक्षम् । सम्यक् स्थिरतयाधाय स्थापयित्वा । घातयामह इति अन्यकर्त्रपेक्षया, रुद्रवचनपालनार्थम् । अत्र हरिवंशे त्वियमपि भगवतो हेतूक्तिः—"इयं च माथुरी भूमिरत्यगम्या परस्य तु । वृद्धिश्चैव पराऽस्माकं बलतो मित्रतस्तथा ॥ कुमारकोट्यो याश्चेमाः पदातीनां गणाश्च ये । एषामपीह वसतां संमर्दमुपलक्षये ॥" इत्यादि । अत्रेदं विमृशामः—यादवावासांतःपुरयोग्यसमुद्रांतःस्थद्वादशयोजनात्मकपरागम्यद्वारकातो मथुराभूमेर्विस्तीर्णत्वान्नायं केवलयादवानधिकृत्य श्रीभगवतः परामर्शः, किन्तु निगूढोऽयमभिप्रायः—संप्रति यादवजातिकतया तदादिसाहाय्येन लीलांतरमारब्धाः स्मः । अतः श्रीगोपानां स्वस्मिन्नेव निश्चितमज्जातिभावानां नित्यमेव वर्द्धमानैर्यादवैर्भाविनी संकीर्णता न युक्ता । दुष्टोपद्रवाऽऽशंका च तेषामप्युपस्थिता स्यात् । श्रीमदुद्धवद्वारा मदीयतत्रत्यलीलास्फोरणेन विरहदुःखसमाधानप्रायं च कृतवानस्मि तेषाम् । अतो दुष्टान्प्रति तेष्वौदासीन्यव्यंजनाय यादवानां गोपालकैरनैक्यप्रदर्शनाय च मर्त्यानुविधस्य मम विदूरगमनमेव युक्तमिति ॥ ४९ ॥ इतीत्थम् ॥ * ॥ समुद्रस्यांतर्द्वादशयोजनं, बहिश्चाष्टादशयोजनमन्यत्र ज्ञेयम् । एवं त्रिंशद्योजनं श्रीद्वारकापुरं ख्यातम् । योजनश्चोक्तम्—"अष्टभिर्यवमध्यैस्स्यादंगुलं द्वादशांगुलम् । तालं त्रितालको हस्तो हस्तौ द्वौ किष्कुरुच्यते ॥ किष्कुद्वयं धनुर्ज्ञेयं धनुषो हि सहस्रकम् । क्रोशः क्रोशौ तु गव्यूतिर्गव्यूती द्वे तु योजनम् ॥" इति । अचीकरत् विश्वकर्मणा कारितवान् आविर्भावयामास ॥ ५० ॥ यत्र नगरे । त्वष्टरि विश्वकर्मणि स्थितं त्वाष्ट्रम् । शिल्पनैपुणं शिल्पविद्यापटुत्वम् । रथ्या राजमार्गः, चत्वरमंगणम् 'चत्वरं स्थंडिलेंगणे' इति मेदिनी । वीथी "आपणः पण्यवीथी च द्वयं वीथीति शब्दितम्" इति शाश्वतः । आपणो हट्टशून्यविक्रयमार्गः, पण्यवीथी हट्टयुतविक्रयमार्ग इति भेदः । स्वामिचरणास्तु—पुरतः पूर्वभागे राजमार्गाः, पश्चिमतः पश्चाद्भागे उपमार्गाः, उभयतोपि पार्श्वद्वयेऽपि अंगणानि, तन्मध्येंगणयोर्मध्ये, ततोप्यंतः कोष्ठेषु मध्ये, सुवर्णरसलितानि गृहाणि, तदुपरि स्वर्णगृहोपरि, तदुपरि स्फाटिकाट्टालिकोपरि स्वर्णकलशा इति बह्व्यो भूमिकारचनाविशेषा यत्र तत्तथेति । यथावास्त्विति वास्तुशास्त्रानुसारेण गृहरचनायुतम् । तथाहि—"द्वात्रिंशदष्टाधिकाविंशतिश्च सिद्धौ नखौ भूमिपतेर्द्विजातेः । दशांशयुक्तान्यपि क्षत्रियस्य वैश्यस्य वेदांगुल उज्झितानि ॥ शूद्रस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ॥ हेमशृंगैर्दिविस्पृग्भिः स्फटिकाट्टालगोपुरैः ॥ ९२ ॥ रजताऽऽरकुटैः कोष्ठैर्हेमकुंभैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥ ९३ ॥ वास्तोष्पतीनां च गृहैर्वलभीभिश्च निमितम् ॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥ ९४ ॥

निर्माणस्थानं तदनतिक्रम्य विनिर्मितम् ॥ ९१ ॥ सुराणां द्रुमा लताश्च येषु तान्युद्यानानि विचित्रोपवनानि च तैरन्वितम् । हेममयानि शृंगाणि येषु तैः । दिविस्पृग्भिरत्युच्चैः स्फाटिका अट्टाला उपरिभूमिका गोपुराणि द्वाराणि च तैर्निर्मितमित्युत्तरेणान्वयः ॥ ९२ ॥ रजतारकुटैः रजतं च आरकुटं च पीतलोहं ताभ्यां निर्मितैः कोष्ठैरश्वशालान्नशालादिभिः । कथंभूतैः । हेमकुंभैरलंकृतैः तथा रत्नकूटैः पद्मरागादिशिखरैः । हैमैः सौवर्णैः । महामरकतमयानि स्थलानि येषु तैर्गृहैश्च ॥ ९३ ॥ किं च नगरगृहादौ वास्तोष्पतीनां

च स्वस्वचतुर्विभागयुक्तानि चेत्थं प्रभवन्ति भेदाः । कश्चिज्जनो भूपसमानधर्मो गृहं विदध्याद्विधिनाप्यनेन ॥ अष्टाधिकं हस्तशतं शतं वा यन्नेत्रनंदप्रमितं पृथुत्वे । वेदाष्टहस्तं रससप्तकं च दैर्घ्ये सपादानि भवन्ति भेदाः ॥'' इत्येवं गृहशुद्धिपूर्वं गृहाणि कुर्यात् । ''प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम् । शयनं याम्यदिग्भागे नैर्ऋत्यां शस्त्रमंदिरम् ॥ प्रतीच्यां भोजनगृहं वायुभागेन्नसंग्रहम् । भांडारसदनं सौम्ये त्वैशान्यां देवतालयम् ॥ पूर्वस्यां श्रीगृहं कुर्याद्वायव्यां पशुमंदिरम् । इंद्राग्न्योर्मथनं मध्ये याम्याग्न्योर्घृतमंदिरम् ॥ यमराक्षसयोर्मध्ये पुरीषत्यागमंदिरम् । राक्षसांबुपयोर्मध्ये विद्याभ्यासस्य मंदिरम् ॥ तोयेशानिलयोर्मध्ये रौदनं मंदिरं स्मृतम् ॥ वायव्योत्तरयोर्मध्ये संभोगस्यैव मंदिरम् ॥ उत्तरैशानयोर्मध्ये त्वौषधागारमुच्यते । पुरंदरेशयोर्मध्ये सर्ववस्तुसुसंग्रहम् ॥ सदनं कारयेदेवं क्रमादुक्तानि षोडश ।'' इत्येवमुक्तप्रकारेण गृहादिरचनाढ्यमित्यर्थः ॥ * ॥ कृत्स्नाद्भुतत्वमेव दर्शयति—दृश्यत इति चतुष्केण । हि एव । विज्ञानं शिल्पधीः, शिल्पाभिज्ञतेत्यर्थः । तन्नैपुण्यं हस्तक्रियासौष्ठवं दृश्यते पराकाष्ठापन्नतया विभाव्यते, इदानीं भगवत्प्रसादेन परमशक्तिलाभादिति भावः ॥ ॥ ९१ ॥ सुरद्रुमाः—संतानकल्पवृक्षहारिचंदनमंदारपारिजाताख्याः ''संतानः कल्पवृक्षश्च पुंसि वा हरिचंदनम् । पंचैते देवतरवो मंदारः पारिजातकः ॥'' इत्यमरः । यद्वा—आम्रजंबूकदंबादयो देवतरवः ''आम्रो जंबूः कदंबश्च बोधिः पालाशबिल्वकौ । प्लक्षोदुंबरमाधूकौ बद्धपाप्पिचुमंदकौ । एते चान्ये च बहवो देववृक्षाः स्मृता बुधैः ॥'' इति । तथा सुरलताः—स्वर्णवल्लीमुक्तावल्लीविद्रुमवल्ल्यादयो विष्णुक्रांतादयो वा । ''मुक्तावल्ली स्वर्णवल्ली तथा कल्पलतादयः । देववल्ल्यो बुधैः प्रोक्ता विष्णुक्रांतादयस्तथा ॥'' इति संहितोक्तेश्च ॥ * ॥ उद्यानोपवनयोः पुष्पफलप्रधानत्वेन भेदः । यदुदेवा यदुश्रेष्ठाः श्रीकृष्णबलदेववसुदेवोग्रसेनादयः । अत्रैवं वासस्थानं ज्ञेयम्—परितस्तावत्समुद्रः, पुरतः संक्रमार्थमालिः, समुद्राभ्यंतरे तीरे सुखविहारार्थं परितश्चत्वराणि, तदन्तर्दुर्गप्राचीरालिः, तत्कोणेषु तन्मध्येषु च रत्नकूटा यदुपरि हेमकूटाः, तदुपरि हेमकुंताः पताकाश्च ज्ञेयाः । दुर्गचतुर्दिक्षु गोपुराद्बहिरवलोकाय तदुपरि स्वच्छस्फाटिकाट्टालिकाः, दुर्गान्तःपुरश्चत्वराणि, तदंतरुद्यानोपवनानि, तदुपलक्षितकूपादीनि च, तदन्तर्वास्तोष्पतिगृहाः । तदन्तर्यथाभ्यंतरमश्वान्नगृहादयः, कोष्ठाः, तदन्तः पुरोभागे ब्राह्मणगृहाः, पश्चाच्छूद्रगृहाः, वामे च वैश्याः, दक्षिणे क्षत्रियगृहाः, मध्ये सुधर्मामग्रे विधाय श्रीकृष्णबलदेववसुदेवोग्रसेनगृहाः, गृहाणां मरकतस्थली, उपरि वलभ्यो हेमकुन्तादयश्च यथाशोभं सुधर्मामारभ्य यथा वथिय उपमार्गाश्च तत इति । पारिजातप्रस्थापनं तु तत्त्याग एव । यद्वा—अग्रे स्वयं भगवदानीतपारिजातादस्य न्यूनत्वेन भेदः कल्प्यः, सुरद्रुमलतोद्यानेति वर्णितत्वात् । सुधर्मायास्त्वेकत्वेन नान्या गतिरितींद्रस्तथा नाकरोदिति ज्ञेयम् । हरेर्हरये, अन्यथा प्रसह्य स्वयमेव हरेदिति विभाव्यैवेति भावः । (इति सार्द्धत्रयाऽन्वयः) ॥ ९२ ॥ '' कोष्ठः कुसूले चात्मीये मध्ये कुक्षौ गृहस्य च । संग्रहस्थापनस्थाने तृणागारादिकेऽपि च ॥ '' इति धरणिः ॥ * ॥ ० ॥ ९३ ॥ न केवलं मनुष्यावासशोभितं तदित्याह—किञ्चेति । ''वास्तोष्पतिर्बलारातौ देवमात्रे धराधरे । मुख्ये गेहे'' इति निरुक्तिः । '' शुद्धान्ते वलभीचंद्रशाले सौधोर्द्ध्ववेश्मनि '' इति रभसः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुधर्मां पारिजातं च महेन्द्रः प्राहिणोद्धरेः ॥ यत्र चावस्थिता मर्त्या मर्त्यधर्मैर्न युंजते ॥ ५५ ॥ श्यामैककर्णान्वरुणो हयाञ्छुक्लान्मनोजवान् ॥
अष्टौ निधिपतिः कोशाँल्लोकपालो निजोदयान् ॥ ५६ ॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ५७ ॥
तत्र योगप्रभावेण नीत्वा सर्वजनं हरिः ॥ प्रजापालेन रामेण कृष्णः समनुमंत्रितः ॥ निर्जगाम पुरद्वारात्पद्ममाली निरायुधः ॥ ५८॥ इति श्रीमद्भा०
म० द० उ० दुर्गनिवेशनं नाम पंचाशत्तमोध्यायः ॥ ५० ॥

देवानां च गृहैर्वलभीभिश्चंद्रशालिकाभिश्च निर्मितम् । यदुदेवगृहैराजगृहैरुल्लसच्छोभमानम् ॥ ५४ ॥ पारिजातं च प्राहिणोत्प्रस्थापयामासेति शुकपरीक्षित्संवादात्पूर्वभावित्वा द्भूतनिर्देशः । मर्त्यधर्मैः क्षुत्पिपासादिषडूर्मिभिः ॥५५॥ निधिपतिः कुबेरः अष्टौ कोशान्निधीन् । "पद्मश्चैव महापद्मो कुंदकूर्मौ तथौदकः ॥ नीलो मुकुंदः शंखश्च निधयोऽष्टौ प्रकीर्तिताः" इति प्रसिद्धान् । निजोदयान्निजविभूतीः ॥ ५६ ॥ अन्ये च सिद्धादयो भगवता स्वाधिकारसिद्धये यद्यदाधिपत्यं दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुरिति ॥५७॥ यथा कालयवनो न वेत्ति न चासौ जनस्तथा योगप्रभावेण नीत्वा त्वमत्र स्थित्वा प्रजाः पालयाहं पलायिष्य इति समनुमंत्रितः कृतानुमंत्र इत्यर्थः ॥५८॥ इति श्रीमद्भा० म० दशमस्कंधोत्तरार्धे भावार्थदीपिकायां श्री० टीकायां पंचाशत्तमोऽध्यायः ॥ ५० ॥

यदुदेवः श्रीकृष्ण उग्रसेनो वा ॥*॥०॥५४॥ 'स्यात्सुधर्मा देवसभा' इत्यमरः । पारिजातं वांछितदं वृक्षम् । यत्र सुधर्मायाम् । सुधर्मां पारिजातं च पराजितः सन्देवराजः श्रीकृष्णाय ददौ न तु प्रत्येति । "अधिक्र मंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमोचिताम् । निर्जित्य संख्ये त्रिदशांस्तदाशिषो हरन्ति" इत्युक्तेः, "पारिजातं तदुत्पाट्य आरोप्य च गरुत्मति । सेंद्रान्देवान्विनिर्जित्य" इति वक्ष्यमाणत्वाच्च । अत एव प्राहिणोदित्युक्तं न तु समर्पयामासेति ॥ * ॥ ० ॥ ५५ ॥ हयान् सहस्रसंख्यान् "ददौ सहस्रसंख्यातानश्वान्देवाय तोयराट्" इति पुराणांतरात् । औदकः कुंदः खर्वः, यद्वा—तन्नामैव । क्वचित्तु नव निधयोपि— "महापद्मश्च पद्मश्च शंखो मकरकच्छपौ । मुकुंदकुंदनीलाश्च खर्वश्च निधयो नव ॥" इति शब्दार्णवात् ॥ * ॥ ० ॥ ५६ ॥ सिद्धा देवविशेषाः, आदिना गंधर्वकिंपुरुषादयश्च । आधिपत्यमधिपतित्वापादकं गायना द्यैश्वर्यम् । प्रत्यर्पयामासुर्निवेदयामासुः, गायनाद्यैस्तोषयामासुरिति भावः ॥ * ॥ हरौ क्रीडार्थं निजाशेषविभूतिसमाहरणकौतुकिनि भगवति, यतः भूमिगते तादृशविनोदार्थमेव पृथिव्यामवतीर्णे । एवं परमकौतुकेन संबोधनम्—नृपेति । यथा भवादृशां नृपाणामपि विभूतयो विनोदार्था एव तथा तस्यापि परमनृपतेः परमविभूतयो विनोदायैवेति संबुद्ध्यभिप्रायः । विशेषस्तु हरिवंशे दृश्यः ॥ ५७ ॥ तत्र नगरे । नीत्वा प्रापय्य । यद्वा— योगस्य प्रभावः सामर्थ्यं मथुरास्थिताखिलनिजनिजपदार्थराशेर्द्वारकायां भवनं तेनेत्यर्थः । अत्र मथुरायाम् । इत्यर्थ इति—उभयोः पलायने प्रजास्त्रस्ता भविष्यंतीति भावः । पुरद्वारान्मथुराद्वारतः ॥ * ॥ योगोऽचिंत्यैश्वर्यम्, तस्य प्रभावेण माहात्म्येन । तथा च पाद्मोत्तरखण्डे—"सुषुप्तान्मथुरायां तु पौरांस्तत्र जनार्दनः । उद्धृत्य सहसा रात्रौ द्वारकायां न्यवेशयत् ॥ प्रबुद्धास्ते जनाः सर्वे पुत्रदारसमन्विताः । हैमहर्म्यतलावि ष्टा विस्मयं परमं ययुः ॥" इति । हरिरिति तथा नयनात् । त्वमत्र स्थित्वा प्रजाः पालयेति तैर्यद्व्याख्यातं तत्तु द्वारकानीतप्रजाभ्योऽवशिष्टबहिरंगप्रजागतमेव ज्ञेयम्, निजपार्श्वरक्षितसैन्यगतमेव वा । यद्वा—अस्य यादवाऽवध्यत्वान्मा शंकां कृथाः, त्वमत्र स्थित्वा पुरं पालय मुचकुंदेनैनमहं घातयिष्यामीत्येव मंत्रो ज्ञेयः । सम्यगनुरूपश्च मन्त्रः समनुमन्त्रः स जातोऽस्येति तारकादित्वादितच् । पद्ममालीति नारदोक्तलक्षणापेक्षया । निरायुध इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ तं विलोक्य विनिष्क्रांतमुज्जिहानमिवोडुपम् ॥ दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥ १ ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरम् ॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणम् ॥ २ ॥ नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितम् ॥ मुखारविंदं बिभ्राणं स्फुरन्मकरकुण्डलम् ॥ ॥ ३ ॥ वासुदेवो ह्ययमिति पुमाञ्श्रीवत्सलाञ्छनः ॥ चतुर्भुजोऽरविंदाक्षो वनमाल्यतिसुंदरः ॥ ४ ॥ लक्षणैर्नारदप्रोक्तैर्नान्यो भवितुमर्हति ॥ निरायुधश्चलन्पद्भ्यां योत्स्येऽनेन निरायुधः ॥ ५ ॥ इति निश्चित्य यवनः प्राद्रवंतं पराङ्मुखम् ॥ अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनाम् ॥ ६ ॥

एकपंचाशत्तमेऽह्नमुचुकुंदद्दशा हरिः ॥ यवनं मुचुकुंदेन स्तुतः सन्नन्वकंपत ॥ १ ॥ यवनेंद्रसुतात्कालयवनाद्यदुभीषणात् ॥ हरिर्हरगिरः स्वैरं पालनायापलायत ॥२॥ यदा गार्ग्यः श्यालेन षंढ इत्युक्तस्तदा यादवैरुपहसिते क्रुद्धोऽसौ श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रं वरं लब्धवान् । ततश्च यवनेंद्रेणापुत्रेण स्वक्षेत्रे पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनमजीजनदिति पुराणप्रसिद्धम् । पुरद्वारा न्निष्कांतम् । उज्जिहानमुद्गच्छंतम् ॥ १ ॥ २ ॥ नित्यप्रमुदितमित्यादि मुखारविंदविशेषणम् ॥ ३ ॥ ४ ॥ नारदोक्तैरेतैर्लक्षणैरयं पुमान्वासुदेव एव नान्यो भवितुमर्हति । अयं च निरायुधोऽतोऽनेन पद्भ्यामेव चलन्निरायुधोऽहं योत्स्यामीति निश्चित्य तं पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ॥ ५ ॥ ६ ॥

पलायनमननार्थम् ॥ ९८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धे उत्तरार्द्धे पञ्चाशत्तमोऽध्यायः ॥९०॥ मुचकुंदो राजा, तद्दृशा दृष्ट्या (१) । यदून्भीषयते भययुक्तान्करोतीति तथा तस्मात् । हरगिरः शिववाचः (२) । पुराणे विष्णुपुराणे प्रसिद्धम् । तथाहि-" गार्ग्यं गोष्ठ्यां द्विजं श्यालः षंढ इत्युक्तवान्यदा । यदूनां सन्निधौ सर्वे जहसुर्यादवास्तदा ॥ सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम् । आराधयन्महादेवं सोऽयश्चूर्णमभक्षयत् ॥ ददौ वरं तु संतुष्टो वर्षे हि द्वादशे शिवः । संयोजयामास च तं यवनेशो ह्यनात्मजः ॥ तद्योषित्संगमाचास्य पुत्रोऽभूदलिसन्निभः । तं कालयवनं नाम राजानं प्राहुरुत्तमाः ॥" इति । गार्ग्यः शैशिरायणः । श्यालोऽपि यादवपुरोहितः, स च हस्तेन गार्ग्यलिंगं चालयन्यदोत्थानं न ददर्श तदा ' गार्ग्यः षंढः ' इति प्रोवाचेत्यर्थः । तं कृष्णम् । उज्जिहीत इत्युज्जिहानस्तम् ' ओ-हाङ्-गतौ ' शानच् ॥ * ॥ तमिति षट्कम् । विनिष्क्रांतमित्यादि-विशब्देन सम्यङ्निष्क्रम एव तस्य निश्चयोऽभूदिति ध्वनितम् । उज्जिहानमित्यादिना श्रीकृष्णमाधुर्यवर्णनं स्वप्रेमतस्तत्स्वभाववर्णनापेक्षयैव न तु यवनस्यानुभवापेक्षया, तत्र सति वैराऽसंभवात् " नाहं प्रकाशः सर्वस्य योगमायासमावृतः " इति श्रीगीतोक्तेश्च । यथा तिक्तादिरुचिस्वभावाः खंडादिमाधुर्यं नानुमोदन्ते इति तद्ग्रहणाभास एव तेषां, तद्वत्तदेवमहो पश्यंतोपि न पश्यंतीति भावः ॥ १ ॥ " आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् " इत्यमरः । कौस्तुभेनामुक्ता पिनद्धा कंधरा यस्य तम् ॥ * ॥ पृथुदीर्घचतुर्बाहुमिति श्रीनारदोपदेशानुसारेणोदयात्, तेन तथोपदेशश्च विलक्षणलिङ्गेन शीघ्रमसौ निश्चिनोत्विति । नवकंज इवारुणे ईक्षणे नेत्रे यस्य तम् ' अव्यक्तरागस्त्वरुणः ' इत्यमरः ॥ २ ॥ सच्चिदानंदस्वरूपत्वान्नित्यप्रमुदितमिति ॥ * ॥ श्रीमत्कांतियुक्तम् । प्रशंसायां मतुप् । सुकपोलमित्यवयवसौष्ठवोपलक्षणम् । शुचिस्मितमिति विलासस्य स्फुरदित्यादिवेषस्य ॥ ३ ॥ अयं प्रत्यक्षदृश्यः । द्वयोरन्वयः ॥ * ॥ षट्केऽपि वासुदेव इति सार्धमवांतरमन्वितम् । इत्येतैर्लक्षणैर्वासुदेव एवायमिति भवितुमर्हति नान्य इति संबन्धः । इति शब्दो वासुदेवपरामर्शकः ॥ ४ ॥ लक्षणैश्चिह्नैः ' चिह्नं लक्ष्म च लक्षणम् ' इत्यमरः । यतोऽयं निरायुधोऽतो हेतोः ॥ * ॥ ० ॥ ५ ॥ इतीत्थम् । पराङ्मुखं पृष्ठं दर्शयन्तम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्तप्राप्तमिवात्मानं हारिणा स पदेपदे ॥ नीतो दर्शयता दूरं यवनेशोऽद्रिकंदरम् ॥ ७ ॥ पलायनं यदुकुले जातस्य तव नोचितम् ॥ इति क्षिपन्ननुगतो नैनं प्रापाऽहताशुभः ॥ ८ ॥ एवं क्षिप्तोऽपि भगवान्प्राविशद्गिरिकंदरम् ॥ सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरम् ॥ ९ ॥ नन्वसौ दूरमानीय शेते मामिह साधुवत् ॥ इति मत्वाऽच्युतं मूढस्तं पदा समताडयत् ॥ १० ॥ स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ॥ दिशो विलोकयन्पार्श्वे तमद्राक्षीदवस्थितम् ॥ ११ ॥

आत्मानं हस्तप्राप्तमिव दर्शयता दूरं नीत इत्यन्वयः ॥ ७ ॥ अहताशुभोऽक्षीणकर्मा ॥ ८ ॥ ९ ॥ तं शयानमच्युतं मत्वाऽताडयदिति ॥ १० ॥ ११ ॥

तं श्रीकृष्णम् । जिघृक्षुर्ग्रहीतुमिच्छुः ॥ * ॥ प्रकर्षेण लीलाविशेषेण आ ईषत् द्रुतगत्या चलन्तं जिघृक्षुरिति तस्य गार्वितत्वम् । दुरापमित्युपहासास्पदत्वं व्यंजितम् ॥ ६ ॥ स कालयवनः ॥ * ॥ तत्रापि भगवतश्चातुर्यं दर्शयति—हस्तेत्यादि ॥ ७ ॥ अशुभमत्र भगवद्ग्रहणाऽयोग्यतापादकमात्रमेव ग्राह्यं न सर्वम्, अथाऽनेकजन्मसंचितसुकृतपुंजेनाऽप्राप्यं श्रीकृष्णदर्शनं तस्य न भवेत् "बहुजन्मविपाकेन सम्यग्योगसमाधिना । द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदम् ॥ " इति कर्दमोक्तेः, " यत्पादपांशुर्बहुजन्मकृच्छ्रधृतात्मभिर्योगिभिरप्यगम्यः " इत्युक्तेश्च । इतीत्थम् । क्षिपन्निंदन् । प्राप पस्पर्श ॥ * ॥ तथाप्यप्राप्यं स्थिरीकर्तुं परुषमाह—पलायनमिति । यदुकुल इति यादवानां सुप्रसिद्धमहावीर्यवत्त्वादिति भावः । हताऽशुभ इति—अस्यापातप्रतीत्यर्थता चेत्तर्हि तदप्राप्तौ हताशुभ इत्यस्य हेतुत्वं वक्तुं महदेवानुचितम् । यवनस्यास्य यदि भाग्यमप्रतिहतमभविष्यत्तर्हि सोऽयं तच्छत्रुर्हस्तगतश्चाभविष्यदिति शोचन्प्रतिपत्त्याविरुद्धमतिक्रान्त्वप्रतिपत्तेः । न च यवनस्य मुक्तिक्रियातिपत्त्या शोचनमिदमिति वक्तव्यम्, तन्मुक्तेरनंतरं भावित्वात् । तत्र 'ये च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः' इत्यादौ द्वितीयस्कंधाभिधानात् । न च प्रसिद्धाऽऽशुभहानिमात्रेण तत्प्राप्तियोग्यता वक्तव्या, 'यत्पादपांशुर्बहुकृच्छ्रधृतात्मभिर्योगिभिरप्यगम्यः' इत्यत्राऽसंमतत्वात्, 'भक्त्याहमेकया ग्राह्यः' इति लक्षणसाधनांतरस्वप्रतिपन्नत्वाच्च । तस्मात् 'अपरे हतपाप्मानो व्यजनैः' इत्यत्र हतपाप्मतया समस्तेन तटस्थेन प्रतिपक्षेण भावेन रहितायां परमभक्तावेव तात्पर्यावसानम् । तत्राप्यहतशुभतायास्तद्विरुद्धभाव एव पर्यवसितिरितीत्थमेव साक्षात्तत्प्राप्त्यभावे हेतुता गम्यते, यथा व्रजेश्वरी पश्चाद्धावंती तं पराद्रवंतमपि प्राप्तवत्येव तथा सोऽप्ययं कथं प्राप्नुयादित्यभिप्रायात् ॥ ८ ॥ एवम् 'पलायनं यदुकुले' इत्युक्तरीत्या । सोऽपि यवनोऽपि । तत्राद्रिकंदरे ॥ * ॥ भगवान् सर्वज्ञः गिरिगुहान्तःशायिमुचुकुंदस्य प्रभावं भक्तिं च जानन्नित्यर्थः । प्राविशदिति प्रविश्य मुंचुकुंदस्य शिरःप्रदेशेऽतिष्ठदिति ज्ञेयम् । तथा च हरिवंशे—"शिरस्थाने तु राजर्षेर्मुचुकुंदस्य केशवः । संदर्शनपथं मुक्त्वा तस्थौ बुद्धिमतां वरः ॥" इति । कालयवनस्य तत्रावकाशाय प्रथमतः स्वगोपनाय चेति भावः । अन्यमेव ददृशे न तु तत्रैव स्थितं भगवन्तम् ॥ ९ ॥ असौ कृष्णः । इह कन्दरे ॥ * ॥ ननु वितर्के । अच्युतमिति ततोऽन्यत्र भगवत्प्रयाणस्य तेनाऽमननाभिप्रायेण । नन्वनुगम्यमानः सद्यः कथं सुप्यादिति विचारयोग्योऽप्यसौ दृष्टचतुर्भुजत्वादिरूपादत्यन्तविलक्षणं नरं दृष्ट्वाऽप्यच्युतं कथममन्यत तत्राह—मूढः गुहातमसो व्याप्त्या क्रोधादिना च हततत्तद्विचार इत्यर्थः ॥ १० ॥ स शयानो मुचुकुन्दः । उन्मील्योद्घाट्य । तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥ देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥ १२ ॥ राजोवाच ॥ को नाम स पुमान्ब्रह्मन्कस्य किंवीर्य एव च ॥ कस्माद्गुहां गतः शिश्ये किंतेजो यवनार्दनः ॥ १३ ॥ ॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मांधातृतनयो महान् ॥ मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्यसंगरः ॥ १४ ॥ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरम् ॥ १५ ॥ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाब्रुवन् ॥ राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥ १६ ॥ नरलोकं परित्यज्य राज्यं निहतकंटकम् ॥ अस्मान्पालयतो वीर कामास्ते सर्वे उज्झिताः ॥ १७ ॥ सुता महिष्यो भवतो ज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्च तुल्यकालीया नाऽधुना संति कालिताः ॥ १८ ॥

तस्य क्रुद्धस्य दृष्टिपातेन संदीप्तो यः स्वदेहजोऽग्निस्तेन ॥ १२ ॥ यवनमर्दयति हिनस्तीति तथा स कस्य वंश्यः किंवीर्यः कीदृक्प्रभाववान् । किंतेजः कस्य वीर्यम् पुत्र इत्यर्थः । शिश्ये अशयिष्ट ॥॥ १३ ॥ सत्यः संगरो युद्धं प्रतिज्ञा वा यस्य सः ॥ १४ ॥ १५ ॥ गुहं कार्तिकेयम् । स्वःपालं स्वर्गपालकं सेनान्यम् ॥ १६ ॥ उज्झितास्त्यक्ता गता इत्यर्थः ॥ १७ ॥ किं च सुता इति । तुल्यकालीयास्त्वत्समानकालीनाः । कालिता विचालिताः ॥ १८ ॥

यवनम् ॥ * ॥ चिरमिति वैवस्वतमन्वंतरादाद्यचतुर्युगे त्रेतायां जातस्य तस्य सम्राजो देवसाहाय्यात् । शनैरिति बलान्निद्राभंगेन घूर्णाव्याप्तत्वात् ॥ ११ ॥ स यवनः । तस्य मुचुकुंदस्य । स्वदेहजो यवनदेहजः ॥ * ॥ यावदद्राक्षीत्तावदेव दर्शनसमकालता दाहस्योक्ता, क्षणादिति च भस्मसाद्भवने शीघ्रता । भारतेति महावंशजातत्वेन महावंश्यानां तादृशप्रभावे न किमप्यद्भुतं मन्तव्यम्, यथा भरतवंशजशन्तन्वादिभिः स्वपुत्रभीष्मादिभ्यः स्वेच्छामरणादिकमपि दत्तं तथा मुचुकुन्देनापि स्वनेत्राग्निना भस्मसात्कृतो यवनदेहो दग्धो देवादिवरस्तूपलक्षणमिति बादरायणेर्मतम् । अत एव स नात्र प्रस्तूयते । 'स्वपन्तं यो गुहामध्ये' इत्येतदग्रे पद्यं तु विगीतम संलग्नश्च । श्रीपराशरवैशंपायनमते तु वरादेव तत् । तथा च विष्णुपुराणे—"प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति । देहजेनाग्निना सद्यः स तु भस्मीभविष्यति ॥ " इति । हरिवंशे च देवेषु तत्प्रार्थने—"स्वपन्तं बोधयेद्यो मां तं दहेयमहं सुराः । चक्षुषा क्रोधदीप्तेन एवमाह पुनःपुनः ॥ एवमस्त्विति तं शक्र उवाच त्रिदशैः सह । " इति । अनेन निद्राप्रार्थनमिदं यावद्भगवद्दर्शनं भविष्यति तावन्मम निद्रैव समीचीना न तु जागरणमित्यभिप्रायेण । जागरणहेतुदाहप्रार्थना च पूर्ववदमुष्य भक्तोऽपि मां न जागरयेदित्यभिप्रायेण ॥ **विश्वनाथस्तु**—वृद्धगर्गोक्तकृष्णदर्शनं यावद्भविष्यति तावन्निद्रैव न तु जागरः, तद्दर्शनसमुत्कंठस्य मम बहुतरचतुर्युगावच्छिन्नः कालो जागरेण यापयितुमशक्यः, निद्रया च तावानपि कालः क्षणप्राय एव भविष्यति, क्रोधकरणकदाहप्रार्थनं तु शक्रं भीषयितुमन्यथा स्ववैरिघातनार्थं पुनरपि शक्रस्तं जागरयेदित्यभिप्रायेण ॥ १२ ॥ सोऽद्रिकंदरशायी । नामेति प्रसिद्धम् । वंश्यो वंशोद्भवः । किं वीर्यं यस्य स तथा । कस्य तेजः किंतेजः । इत्यर्थ इति—तेजःशब्दोदितवीर्यपदेन पुत्रो लक्ष्यते, सूत्रशाटिकान्यायेनेति भावः । "तेजो वीर्येऽनले सूर्ये चंद्रशंपोडुषु ग्रहे । प्रतापदीप्तिपुत्रेषु" इति नाममालोक्तेः पुत्रवाचको वा तेजःशब्द इति ॥ * ॥ को नाम किन्नामेत्यर्थः । यद्वा—नाम प्राकाश्ये कः केन जात्यादिना प्रसिद्धः किंनाम किंजातिरित्यर्थः ॥ १३ ॥ सोऽद्रिकन्दरशायी । " संगरो युधि चापत्तौ प्रतिज्ञायां विषे ध्वनौ । शमीफले क्रियाकारे तथा मित्रकलत्रयोः ॥ " इति निरुक्तिः ॥ * ॥ महान् महाभागवतः ॥ १४ ॥ स मुचुकुंदः । तद्रक्षां सुरगणरक्षाम् ॥ * ॥ आत्मरक्षणे निमित्ते । चिरं कतिचिच्चतुर्युगानि ॥ १५ ॥ ते सुरगणाः । अथ सेनानीप्राप्त्युत्तरम् । कृच्छ्रात्कष्टसाध्यात् ॥ * ॥ अथ कार्त्स्न्येन । कृच्छ्राद्दुःखैकरूपात् ॥ १६ ॥ इत्यर्थ इति—त्यक्तगतवस्तुनोर्वियुक्तत्वेन समानार्थकत्वात्त्यक्तगतपदे पर्यायै ॥ * ॥ ० ॥ १७ ॥ अन्यदाह—किञ्चेति । अमात्याः समीपवर्तिनः । कालेनेति शेषः । विचालिता लोकान्तरं नीताः । यद्वा—कालो मृत्युर्जातो येषां ते तारकादित्वादितच् ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालो बलीयान्बालिनां भगवानीश्वरोऽव्ययः ॥ प्रजाः कालयते क्रीडन्पशुपालो यथा पशून् ॥१९॥वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ॥ एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥२०॥ एवमुक्तः स वै देवानभिवंद्य महायशाः ॥ (निद्रामेव ततो वव्रे स राजा श्रमकर्शितः॥२१॥यः कश्चिन्मम निद्राया भंगं कुर्यात्सुरोत्तमाः ॥ स हि भस्मीभवेदाशु तथोक्तश्च सुरैस्तदा ॥) अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥ २२ ॥ स्वपन्तं यस्तु वै मध्ये बोधयेत्त्वामचेतनः ॥ स त्वया दृष्टमात्रस्तु भस्मीभवतु तत्क्षणात् ॥ २३ ॥ यवने भस्मसान्नीते भगवान्सात्त्वतर्षभः ॥ आत्मानं दर्शयामास मुचुकुंदाय धीमते ॥ २४ ॥ तमालोक्य घनश्यामं पीतकौशेयवाससम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितम् ॥ २५ ॥

मत्प्रजाः कोऽन्यः कालयेदिति चेदत आहुः।काल इति।कालयते इतस्ततश्चालयति॥ १९॥तस्य कैवल्यस्य॥ २०॥ २१॥ गुहायां प्रविष्टः शेते स्म ॥ २२॥ २३॥ २४॥ २५॥

अमात्याः पार्षदा मंत्रिणश्च ॥ १८ ॥ बलगर्वितः प्राह–मत्प्रजा इति । कः कालः–भगवानिति । तमपि युद्धेन जेष्यामीति चेदाह–ईश्वर इति । अहमपि तादृश इति चेदाह–अव्यय इति । स्वरूपतोऽव्ययतो गुणतश्च नाशरहित इत्यर्थः ॥ * ॥ भगवानिति श्रीनारायणशक्तित्वेन तदभेदात् । अत एवेश्वरो नियंता । न व्येतीत्यव्ययः अनाद्यंतप्रवाहः । कालयतेऽन्यत्र नयति । ननु किमर्थं तत्राह–क्रीडन् , तस्य तादृश्येव क्रीडेत्यर्थः । इति तस्य बलीयस्त्वातिशयो दर्शितः । पशुपाल इति तेषु तस्य स्वाच्छंद्ये दृष्टान्तः ॥ १९ ॥ कैवल्यं मोक्षम् । ऋते विना । ‘ मुक्तिः कैवल्यनिर्वाण- ’ इत्यमरः । एको विष्णुरेवेति विशेष्यसंबद्धान्ययोगव्यवच्छेदार्थकैवकारेण पार्थ एव धनुर्धर इतिवत्पार्थादन्यत्र धनुर्धरत्वस्येव विष्णोरन्यत्र कैवल्यप्रदत्वस्य योगो व्यवच्छिद्यत इति । “ आरोग्यं भास्करादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ” इति, भवपाशाच्च मोक्षकः । ‘ विष्णुरेव परं ब्रह्म ’ इति च स्मृतेः, ‘ कृष्णं विना नैव सृतिं तरंति ’ इति श्रीधरोक्तेश्च । यानि च–“ या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेंद्रियतत्वसारैः । मोक्षार्थिभिः ” इत्यादीन्यन्यदेवताभजनस्य मोक्षबोधकवाक्यानि तान्यपि विष्णुभक्तिं द्वारीकृत्यैवेति ज्ञेयं हरिवंशीय घंटाकर्णाख्यानतः, अन्यथा स कथं शिवेन विष्णुपार्श्वे प्रेषितः, प्रासिद्धं चैतद्धरिवंशे । नन्वत्रैवकारस्यैकशब्देन संबंधो न तु विष्णुशब्देनेति चेदत्राह–‘ पाठक्रमादर्थक्रमो बलीयान् ’ इति “ अग्निहोत्रं जुहोति, यवागूः पचति ” इतिवत्, “ आत्मा वा अरे द्रष्टव्यः श्रोतव्यः ” इत्यादिवद्वेत्यलं प्रपंचेन ॥ * ॥ भद्रं ते इति सामान्यतस्तावत्तव मंगलं भूयात् । विशेषस्तु वरं वृणीष्वेत्यर्थः । कैवल्यं संसारनिवृत्तिपूर्वकं परमपदप्राप्तिम् । विष्णुरेवैक ईश्वरः प्रदानसमर्थः । तत्र हेतुः–भगवान् सर्वशक्तिसम्पन्नः । असंख्येभ्यस्तदादिदानेप्यव्ययो न त्वस्मदादिवदल्पशक्तियुक्तः । तपआदिव्ययेन सव्ययो वा ॥ २० ॥ एवमुक्तरीत्या । स मुचुकुन्दः । (तदा देववरदानकाले । शुभाम् अन्ते हरिदर्शनाच्छुभकरीम् । यथा ते तव ईप्सितमेवं तथास्त्वित्यर्थः । इह पाठानां बहुत्वादयं पाठः श्रेयान् । तथाहि–“अयाचत तदा निद्रामनन्योपद्रवां शुभाम् । अस्त्वेवं राजराजंस्ते कुरु निद्रां यथेप्सितम् ॥ ” इति ॥ * ॥ महायशा इत्यस्यायं भावः–विष्णुरेवैकः कैवल्यदाता चेत्तर्हि तैरन्यैर्वा किम्, प्रत्युतान्यदर्शनमप्ययोग्यमतस्तद्दर्शनं यावत्तत्प्रियतममथुरांतिके विविक्ते सुप्तमेवार्हमिति निद्राया एव वरणात् सर्वतो महायशो वितताने‍ति । निद्रया तदनुमोदनाद्वरत्वेन दत्तया । तच्छयनगुहा तु मथुरामंडलस्य दक्षिणसीमायां धवलपुरमध्ये लोकप्रसिद्धा । या तु मथुरापरिक्रमप्रसंगे श्रीवाराहदेवेन पुर्यन्तरेवोक्ता सा तदनुकारिदेवालय एव ज्ञेया । ‘ यशोदालयवद्गिरिगह्वरे ’ इति वक्ष्यमाणात् ॥ २१॥ स बोधयिता) ॥*॥०॥२२॥०॥*॥०॥२३॥ भस्मसान्नीते भूते । ‘ भस्मतां नीते ’ इति पाठः प्राक्तनो मे प्रतिभाति, लेखकप्रमादात्तत्स्थाने सेति जातम् ॥ * ॥ धीमते तद्भक्त्येकनिष्ठत्वात्प्रशस्तबुद्धये ॥ २४ ॥ तं कृष्णम् ॥ * ॥ तत्सौंदर्यविशेषाकृष्टचित्तः पुनर्मुचुकुंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्भुजं रोचमानं वैजयंत्या च मालया ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलम् ॥ २६ ॥ प्रेक्षणीयं नृलोकस्य सानुरागस्मितेक्षणम् ॥ अपीच्यवयसं मत्तमृगेंद्रोदारविक्रमम् ॥ २७ ॥ पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः ॥ शंकितः शनकै राजा दुर्धर्षमिव तेजसा ॥ २८ ॥ मुचुकुंद उवाच ॥ को भवानिहसंप्राप्तो विपिने गिरिगह्वरे ॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकंटके ॥ २९ ॥ किं स्वित्तेजस्विनां तेजो भगवान्वा विभावसुः ॥ सूर्यः सोमो महेंद्रो वा लोकपालोऽपरोऽपि वा ॥३०॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभम् ॥ यद्बाधसे गुहाध्वांतं प्रदीपः प्रभया यथा ॥३१॥ शुश्रूषतामव्यलीकमस्माकं नरपुंगव ॥ स्वजन्म कर्म गोत्रं वा कथ्यतां यदि रोचते ॥ ३२ ॥

॥२६॥२७॥धर्षितोऽभिभूतः । दुर्धर्षमप्रधृष्यम् ॥ २८ ॥ विपिनेऽरण्ये तत्रापि गिरेर्गह्वरे दुष्प्रवेशस्थाने तत्राप्युरुकंटके पद्मपलाशसदृशाभ्यां पद्भ्यां विचरसीति ॥२९॥ तेजोमूर्तिः प्रभावो दीप्तिर्वा ॥ ३० ॥ सर्वत्रापरितोषादाह । मन्य इति । पुरुषर्षभं श्रीविष्णुम् । गुहाध्वांतमंतस्तमः ॥ ३१ ॥ ३२ ॥

भाग्यं प्रशंसागर्भं वर्णयति—तमिति चतुष्केण । भ्राजता तद्वक्षोलब्धकांतिविशेषेण कौस्तुभेन विराजितम्, विशब्दो भूषणांतरापेक्षया ॥ २५ ॥ वैजयंती पंचरत्नमाला ॥ * ॥ पद्ममालैव पूर्वोक्ता वनमालेति पूर्वं निर्दिष्टा संप्रत्यस्मिन् गर्गोपदेशानुसारेण वैजयंती तया स्फुरदिति ज्ञेयम् । इयं तु पञ्चवर्णपुष्पेति सर्वतस्तद्भूषणानां भगवदनंतरूपत्वं व्यञ्जितम् ॥ २६ ॥ अपीच्यवयसं शोभमानयौवनम् ॥ * ॥ अपीच्यं सुदरतरं वयो नवयौवनं यस्य तम् ॥ २७ ॥ तस्य कृष्णस्य । अधृष्यमनभिभाव्यम् ॥ * ॥ महाबुद्धिरिति—श्रीभगवद्द्वेषेण नायमन्यो मां भ्रमयति मद्विधधर्षकप्रभावत्वाभावादन्यस्येति विचारसमर्थप्रज्ञ इत्यर्थः । बुद्धेर्महत्त्वहेतुरपि प्रह्लादस्येव भक्ति बलमेव वेति वाक्यालंकारः ॥ २८ ॥ तत्राप्यरण्येपि । तत्रापि दुःप्रवेशस्थानेपि । ‘ अरण्यं विपिनं, गहनं काननं वनम् ’ इत्यमरः । “ गुहा गहनदंभेषु निकुंजे गह्वरः स्मृतः ” इति कोशान्तरम् ॥ * ॥ विपिने निर्जने ॥ २९ ॥ तेजस्विनां ज्योतिष्मतां सूर्यादीनां पुंजीभूतमेकं तेजः । किं स्विदिति वितर्के । स्वामी तु तेजो मूर्तिः मूर्तिमत् प्रभावः प्रतापः, दीप्तिः प्रकाशः । विकल्पत्रयं तु तेजस्यवयवासंभवात्तथा प्रभावस्यापि चरम पक्षः साधीयान् । अपरः कुबेरादिः ॥ * ॥ स्विद्वितर्के । किं तेजस्विनामखिलानां सूर्यादीनां पुंजीभूतं तेजः, अपितु नेत्यर्थः । तदपेक्षया तावतोप्यल्पप्रमाणत्वादिति भावः । एवमुत्तरत्रापि । टीकायां तेजोमूर्तिः तेजः शब्दो हि न मूर्तिवाची “ तेजो बले च दीप्तौ च तेजो धाम्नि पराक्रमे । प्रभावरेतसोश्च ” इत्येतावंत एवार्था विश्वप्रकाशादौ दर्शिताः । ‘ मूर्तः ’ इति निष्ठान्तो वा पाठः । तस्य प्रभावदीप्ताभ्यां प्रत्येकमन्वय इति महा भूततेजोंशरूपम् । तत्तेजोऽपि कियदित्याह—भगवान् भगवद्विभूतिरूपो महाभूततेजोऽधिष्ठातृरूपो देवो विभावसुरपि नेत्यर्थः । त्रयीतनुत्वेन तेजोऽपि महिष्ठम् । अन्यत्ताद्वितर्क्य तमप्यल्पप्रमाणत्वेन खण्डयति—सूर्य इति । तेषामतापहारकत्वमनाह्लादकत्वञ्चाशंक्य चन्द्रं वितर्क्य तमपि खण्डयति—महेन्द्रः, तत्तत्सर्वदेवानामधिपोऽपि । ततोऽन्यत्रात्यंतमनस्व्याह—लोकेति । वा शब्दः कटाक्षे ॥ ३० ॥ सर्वत्र सर्वपक्षेषु । अन्तस्तमः अन्तःकरणाऽज्ञानम् “ यो वेद निहितं गुहायाम् ” इत्यत्र गुहापदमंतःकरणपरम् । प्रदीपो गृहांतर्वर्त्ति ध्वान्तं यथेति ॥ * ॥ तेभ्य ऊर्ध्वमपि विविच्याह—मन्य इति । त्रयाणां मध्ये पुरुषर्षभं विष्णुत्वमारभ्य महाभगवत्तापर्यंतवैभवत्वात् । सर्वपुरुषश्रेष्ठो यस्त्वं गुहयोर्बाह्याभ्यंतरयोर्गिरिकंदरहृद्रूपयोस्तमः यथा स्वं ध्वान्तं दुःखं च प्रभया तेजसा प्रदीप इवेति शश्वत्सर्वानुभूतत्वेन दृष्टांतितं न तु योग्यत्वेन ॥ ३१ ॥ अव्यलीकं सत्यम् । शुश्रूषतां श्रोतुमिच्छताम् । गोत्रं नाम वंशप्रवर्तकश्च “ गोत्रं संभाव्यबोधे च काननक्षेत्रवर्त्मसु । कुलाख्ययोर्गिरौ पुंसि भूगोरक्षकयोस्त्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबंधवः ॥ मुचुकुंद इति प्रोक्तो यौवनाश्वात्मजः प्रभो ॥ ३३ ॥ चिरप्रजागरश्रांतो निद्रयापहतेंद्रियः ॥ शयेऽस्मिन्विजने कामं केनाप्युत्थापितोऽधुना ॥ ३४ ॥ सोपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ॥ अनंतरं भवाञ्श्रीमाल्लँक्षितोऽमित्रशातनः ॥ ३५ ॥ तेजसा तेऽविषह्येण भूरि द्रष्टुं न शक्नुमः ॥ हतौजसो महाभाग माननीयोऽसि देहिनाम् ॥३६॥ एवं संभावितो राज्ञा भगवान्भूतभावनः ॥ प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ॥३७॥ श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि संति मेंग सहस्रशः॥न शक्यंतेऽनुसंख्यातुमनंतत्वान्मयापि हि॥३८॥

वयं त्विति वंश्याभिप्रायेण बहुवचनम् । तेष्वहं मुचुकुंद इति प्रोक्त इति । युवनाश्वो मांधातुः पिताऽतो मांधाता यौवनाश्वः ॥ ३३ ॥३४॥३५॥३६॥३७॥३८॥

याम् ॥" इति निरुक्तिः ॥ * ॥ नरपुंगवेति भूमिस्पर्शादिमनुष्यलीलाभिप्रायेण । अत एवाव्यलीकं निजप्रियं त्वज्जन्मादिशुश्रूषतामस्माकं सकाशे कथ्यतां भवतेति शेषः । तदनुक्तिः कर्मणि प्रयोगश्च गौरवेण "व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि" इति विश्वः । गोत्रं नाम । यद्वा—अव्यलीकं निष्कपटं कथ्यतामित्यन्वयः । वा समुच्चये, विकल्पे वा । गुह्यत्वेप्येकतरमपि कथ्यतामित्यर्थः । यदि रोचत इति विनयोक्तिः ॥३२॥ पुरुषव्याघ्र पुरुषश्रेष्ठ "व्याघ्रः स्यात्पुंसि शार्दूले रक्तैरंडकरंडयोः । श्रेष्ठे नरादुत्तरस्थः कंटकार्यां तु योषिति ॥" इति मेदिनी । ऐक्ष्वाका इक्ष्वाकुकुलजाः ॥ * ॥ अहो महत्तमस्य जन्मादिप्रश्ने नीचकस्य का शक्तिः, कथं वा तेन नीचे तत्कथ्यतामत आत्मनः समर्पणार्थमात्मन एव जन्मादिकं कथयेयं तत्प्रसंगादसौ स्वयमपि तत्कथयेच्च, यतो नरलील इति गूढाभिप्रायेणाह—वयमिति । तुशब्दो निजाल्पतामननाद्भिन्नोपक्रमे । ऐक्ष्वाका इक्ष्वाकव इत्यर्थः । क्षत्रबंधवो नीचक्षत्रिया इत्यपि विनयभावात् ॥ ३३ ॥ शये अशयिषि, वर्तमानसमीपे भूते लट् ॥ * ॥ एवं जन्म नाम च कथयित्वा विनयादिना स्वस्यान्तरं भावं गोपयन्बाह्यं शयनकारणं कथयन्निजकर्माह—चिरेति । प्रजागरकारणाऽकथनञ्च विनयादेव ॥ ३४ ॥ आत्मीयेन तदीयेनैव । अमित्रशातनेति पादप्रहर्तृयवननाशनाभिप्रायेण ॥ * ॥ नूनं वितर्के । आत्मीयेनैवेति स्वापराधः परिहृतो विनयश्च व्यंजितः । स्वस्यापराधाऽभावं परमभाग्यदशां च व्यंजयति—अनंतरमिति । 'श्रीमन्' इति—वा पाठः । भगवतैव निजशत्रुरसौ बुद्ध्या घातित इत्यपि बुद्धमित्याशयेनाह—अमित्रं शास्ति दंडयतीति तथा । 'अमित्रशातनः' इति पाठेऽपि स एवार्थः ॥ अत्र **विश्वनाथः—**अमित्रशातन इति । मन्ये मद्द्वारेण त्वयैव स्वशत्रुर्घातित इति भावः ॥ ३५ ॥ हतौजसो नष्टतेजसः । महैस्तेजोभिरासमंताद्भज्यते सेव्यत इति महाभाग, अतितेजस्विन्नित्यर्थः । अत एव माननीयोसीति ॥ * ॥ तव तेजसा हतमोजो येषां तथाभूता वयं, भुवि किमर्थमत्रागतोऽसि किं वाधुना करिष्यसीत्यादिकं बहु प्रष्टुं न शक्नुमः । वक्तुमिति वक्तव्ये हतौजस्त्वादेव भावावरणाशक्तेः प्रष्टुमित्युक्तम् । 'द्रष्टुम्' इति पाठे द्रष्टुमिति कुतो वक्तुं प्रष्टुं वेत्यर्थः । एतावत्तु निर्णीतमित्याह—देहिनां ब्रह्मादीनां माननीयोसि । तत्र युक्तमेवेति संबोधयति—महल्लोकोत्तरं भागं माहात्म्यसमूहो यस्य हे तथाविधेति । भगशब्दात्समूहेऽण् प्रत्ययः ॥ ३६ ॥ एवमुक्तविधया । संभावितः पूजितः 'संभाविताऽर्चितौ समौ' इति धरणिः । मेघनादा चासौ गभीरा निम्नार्था तया 'निम्नं गभीरं गंभीरम्' इत्यमरः ॥ * ॥ अनुकंपया भूतमात्रं भावयति पालयितुं प्रवृत्तः किमुत तादृशमिति तत्राह । अतएव प्रहसन्निति, स्वभावानुवादः ॥ ३७ ॥ मयापीति मत्कर्तृकसंख्याकत्वेप्यनंतत्वहानिः स्यादिति भावः । नैतावता मत्सार्वज्ञ्यमपि त्रपते, सतोऽज्ञानस्यैव सार्वज्ञ्यनाशकत्वादिति ॥ * ॥ तानि च सहस्राणि अनुसंख्यातुं संख्यानसदृशामपि कर्तुम् "अनु हीने सहार्थे च पश्चात्सादृश्ययोरनु" इति विश्वः । हि निश्चितम् ॥ अत्र **विश्वनाथः—**परमनिरहंकारित्वेऽपि मद्वचनश्रवणार्थमेव स्वोत्कर्षमसौ द्योतयत्यतोऽहमपि परमनिरहंकारोऽपि निजमुखेनैवास्मै स्वोत्कर्षमभिधास्यामि 'ये यथा मां प्रपद्यन्ते' इति मदुक्तेरित्याह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि कर्हिचित् ॥ ३९ ॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमंतो नैवांतं गच्छंति परमर्षयः ॥ ४० ॥ तथाप्यद्यतनान्यंग शृणुष्व गदतो मम ॥ विज्ञापितो विरिंचेन पुराऽहं धर्मगुप्तये ॥ भूमेर्भारायमाणानामसुराणां क्षयाय च ॥ ४१ ॥ अवतीर्णो यदुकुले गृह आनकदुंदुभेः ॥ वदंति वासुदेवेति वसुदेवसुतं हि माम् ॥ ४२ ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः ॥ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ ४३ ॥ सोऽहं तवानुग्रहार्थं गुहामेतामुपागतः ॥ प्रार्थितः प्रचुरं पूर्वं त्वयाऽहं भक्तवत्सलः ॥ ४४ ॥ वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते ॥ मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुम् ॥ ४५ ॥

क्वचित्कदाचित्कश्चिद्यद्यपि रजांस्यपि विममे गणितवांस्तथापि जन्मानि कर्माणि न विमिमीते ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ते तिग्मचक्षुषानिमित्तेन मयैव दग्धः ॥ ४३ ॥ ४४ ॥ अपूर्णोऽहमिति शोचितुम्। यद्वा अन्यैर्दत्तेषु वरेषु क्षीयमाणेषु यथा शोचति नैवं मा प्रपन्नाः मद्दत्तवराणामक्षय्यत्वादिति भावः ॥ ४५ ॥

जन्मेति ॥ ३८ ॥ अनंतत्वमाह—कश्चिदिति । चिदव्ययमत्रावधारणे ज्ञेयम्, तथा च को ब्रह्मैव सर्वस्रष्टृत्वात् । तथापि पार्थिवरजोगणकत्वेपि । स एवोरुजन्मभिरपि, स्वामिना जायंत इति जन्मानि कर्माणीत्यर्थः कृतः । किंभूतानि—गुणाः कर्माणि जन्मान्यभिधानानि नामानि च विद्यंते येषु तानीत्यर्थः । इह मत्वर्थीयोच् । "जन्म स्याज्जनने देहे वंशे स्थाने च कर्मणि" इति निरुक्तिः । "कर्म व्याप्ये क्रियायां च जनने मरणेऽपि च" इति च । विपूर्वात् 'माङ्—माने' अस्माल्लुडर्थे लिट् ॥ * ॥ विममे विमिमीते । तथापि मे जन्मानि न विमिमीत इत्यर्थः । कीदृशानि—गुणैः कर्मभिश्चाभिधानानि नामानि यत्र तादृशानि । टीकायां तु जन्मानीति कर्माण्युपलक्षयत्युत्तरानुरोधात् । न मे जन्मानीत्यन्वय इति चित्सुखः ॥ ३९ ॥ अनुक्रमन्तो नितरां गणयन्तः । परमर्षयो वशिष्ठादयः ॥ * ॥ कालेति सार्द्धकम् । कालत्रय उपपन्नानि सिद्धानि, भूते वा भविष्यति वा वर्तमाने वा कानिचिदपीत्यर्थः । कर्माणीति गुणनाम्नामुपलक्षणम् । अनुक्रमन्तः क्रमेण गणयन्तो न गच्छन्ति " यतो वाचो निवर्तंते " इत्यादेः । एव निर्धारणे । परमर्षयो वेदांता अपि ॥ तथापि भगवदनुरोधेनाद्यतनानि सांप्रतानि परमदुरूहाण्यपि गदतो मम कथयतो मत्तः सकाशाच्छृणुष्वमात्रं न तत्त्वतो वा परिणामतो ज्ञातुमिच्छेत्यर्थः ॥ ४० ॥ यद्यपि नान्तं गच्छन्ति तथापि । अद्यतनान्याधुनिकानि । भारायमाणानां भारवदाचरताम् "कर्तुः क्यङ्—" इति क्यङ् ॥ * ॥ विज्ञापित इति सार्द्धकम् । धर्मगुप्तये साधूनां रक्षणायेत्यर्थः ॥ ४१ ॥ गृहे भार्यायाम् । प्रवृत्तिनिमित्तमाह—वसुदेवेति ॥ * ॥ आदौ जन्माह—अवतीर्ण इति । नामाह—वदन्तीत्यर्द्धकेन । वासुदेवेति " सह सुपा " इति सामान्यतः समासः । ननु ' वसंति तत्र भूतानि ' इत्यादिना तव नामेदं पूर्वमपि प्रसिद्धमेत्र—सत्यम्, किन्तु मध्येमध्ये तिरोभूतेन प्रवृत्तिविशेषेणाधुनिकमिव प्रतीयत इत्याह—वसुदेवसुतमिति । हि प्रसिद्धौ । श्रीरामादिष्वनेकेष्वपि तत्पुत्रेषु सत्सु प्राधान्यान्मय्येव तत्प्रसिद्धिरित्यर्थः ॥ ४२ ॥ कालनेमिरिति प्राग्जन्माभिप्रायेण । सद्द्विषः सतां द्वेष्टारः । मया हताः, प्रलम्ब आदिर्येषामघधेनुकादीनां ते तथा । अतद्गुणसंविज्ञानबहुव्रीहिणा प्रलम्बरहिता इत्यर्थः । तिग्मचक्षुषा कोपाग्निना ॥ * ॥ कर्माह—कालनेमिरिति । मयेति शेषः ॥ ४३ ॥ पूर्वं पुरा जन्मनि ॥ * ॥ न च तद्भननार्थमेवागतोस्म्यन्यथापि तस्य शक्यत्वात्, किन्तु त्वत्कृपार्थमेवेत्याशयेनाह—स इति । तादृशमाहात्म्योऽप्यहमुप दाक्षिण्येनागतः । " उप सामीप्यदाक्षिण्यदोषाख्यानात्ययेष्वपि " इति विश्वः । प्रचुरं यथा स्यात्तथा प्रकर्षेण शुद्धभावादिनार्थितः द्रष्टुं याचितो वांछित इत्यर्थः ॥ ४४ ॥ " अपूर्णोऽहमधन्योऽहमसुखी जन्मवानिति " इत्यर्द्धश्लोकः पुस्तकांतरे लभ्यते, इह स्वामिचरणैस्तत्प्रतीकोच्चारणेन स्वीकृतः प्रतीयते । सर्वेश्वरदत्तापहारित्वाभावमाह—यद्वेति । अन्यैर्मद्भिन्नैर्देवतांतरैः । इति भाव इति—" विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वाम् । तेषामाशिष ईश तदनु विनश्यन्ति यथा राजकुलम् " इति चित्रकेतूक्तेर्भगवद्दत्तवराणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्युक्तस्तं प्रणम्याह मुचुकुन्दो मुदान्वितः ॥ ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ ४६ ॥ मुचुकुन्द उवाच ॥ विमोहितो ऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक् ॥ सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः ॥ ४७ ॥ लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोऽनघ ॥ पादारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः ॥ ४८ ॥ ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य भूपतेः ॥ मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरंतचिंतया ॥ ४९ ॥

अष्टाविंशतितमे युगे भगवानवतरिष्यतीति वृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः ॥ ४६ ॥ त्वद्भक्तिरेव केवलं दुर्लभा । कामास्तु तुच्छा न वरणयोग्या इत्याशयेना भक्तानां संसारमष्टभिः प्रपंचयंस्तौति । विमोहित इति । हे ईश योषित्पुरुषश्चेति द्विविधोऽप्ययं जनस्त्वदीयया मायया विमोहितोऽतोऽनर्थदृक् । अनर्थे संसारे दृक् दृष्टिर्य स्यासौ । यद्वा । अर्थं परमार्थस्वरूपं त्वां न पश्यतीति तथा । अतस्त्वां न भजति । किं तु परस्परं वंचितः सन्सुखेच्छया दुःखानामेव प्रभवो येषु तेषु गृहेष्वेव सज्जत इति॥ ॥ ४७ ॥ किं च कामसुखं सूकरादिष्वपि संभवति । भगवद्भजनं तु न मानुषजन्मव्यतिरेकेणेति मानुषत्वं प्राप्य त्वामभजन्नतिमूढ इत्याह । लब्ध्वेति । अत्र कर्मभूमौ । अव्यंगमविकलांगम् । किं च । असति विषयसुखे मतिर्यस्य सः । गृहमेवांधकूपस्तस्मिन्निपतितः । यथा पशुस्तृणलुब्धोंधकूपे पततीति ॥ ४८ ॥ न केवलमस्य जनस्येयं

मेवाक्षयित्वमन्यदत्तानां क्षयित्वश्रवणादित्याशयः ॥ * ॥ हे राजर्षे इति—राज्ञ ऋषेश्च योग्यान्सर्वानपीति भावः । प्रपन्नः शरणागतोऽपि, किं पुनर्भक्तिमांस्त्वादृश इत्यर्थः । न भूय इति तस्मात्तुच्छो वरो न मृग्य इति गूढोऽभिप्रायः ॥ **विश्वनाथस्तु**—शोचितुं नार्हतीत्यन्यैर्दत्तेषु वरेषु क्षीयमाणेषु सत्सु यथा शोचति नैव मां प्रपन्नः मद्दत्तवराणामक्षयत्वादिति भावः ॥ ४१ ॥ इतीत्थम् । तं कृष्णम् । अष्टाविंशतितमे वैवस्वतमन्वन्तरगताष्टाविंशतितमावृत्त्या गते द्वापरे युग इत्यर्थः । वृद्धगर्गवाक्यं गर्गेण तस्मै प्रोक्तं वाक्यमिति पुराणांतरात् । इत्यर्थ इति—गर्गपदेन वृद्धगर्गो ग्राह्य इति ज्ञेयम् ॥*॥०॥४६॥ भगवद्भक्तेर्दौर्लभ्यं द्योतयन्कामानामनर्थहेतुतामाह—त्वद्भक्तिरित्यादिना । यतो विमोहितोऽतो हेतोः । अनर्थमनर्थहेतुं सांसारिकविषयसुखं पश्यतीति तथा । अतोऽनर्थदृक्त्वात् । परस्परं पुरुषेण स्त्रीवंचिता, स्त्रिया च पुरुषः, निजनिजकपटेनेति ज्ञेयम् । सज्जते आसक्तो भवति ॥ * ॥ त्वदीययेति दुर्लंघ्यत्वमाभिप्रेतम् । अयमिति—एतच्च प्रत्यक्षमेवेत्यर्थः । गृहेषु तत्संबंधिपुत्रधनादिषु चासक्तो भवति । न च साक्षाद्दुःखेऽपि कदाचिन्निर्विण्णः स्यात्, रत्यादिना प्रतारितत्वादित्याह—वञ्चित इति ॥ ४७ ॥ विषयसुखसौलभ्येऽपि हरिभजनं दुर्लभमित्याह—किञ्चेति । अत्यनर्थमाह—किञ्चेति । तथायमपि विषयलुब्ध इत्यर्थः ॥ * ॥ अहो द्वित्रिवराटकमूल्येनाऽज्ञश्चिन्तामणिं विक्रीणातीत्याह—लब्ध्वेति । अनघ हे यत्किंचिद्भजनेन सर्वदुःखनिवर्तक । कथंचित् पूर्वादृष्टेन । पादारविंदं त्वदीयमिति प्रकरणबलात्साक्षादनुक्तिः । संभ्रमेणाऽयत्नतो न भजति अप्रयासेन तस्य यद्भजनं तदपि न कुरुते । अभजने हेतुः—यथा पशुस्तथैवासंमतः विवेकरहितः, अतो गृहांधकूपे पतितश्च भवति ॥ ४८ ॥ स्वस्यापि तथात्वमाह—नेति । एष एतच्छरीरसंबंधी । अजित सर्वेश्वर । उन्नद्धमुच्छृंखलम् । अत एव अनात्मबुद्धित्वादेव । दुष्टोंतः परिणामो येषां ते दुरन्ता विषयास्तेषां चिंतया संपादनेच्छया ॥ * ॥ यमहं निन्दामि स चाहमेवेत्याह—ममेति **विश्वनाथः** ॥ मम तु तत्राऽविशेष इत्याह—ममेति । एष बहुयुगलक्षणः । निष्फलत्वे हेतुः—अजित हे मद्विधबहिर्मुखावशीकृत । भक्तिविघ्ने हेतुः—भूपतेः सर्वपृथ्वीशाभिमानिनः । अतो राज्यश्रियोन्नद्धः संवृद्धो मदो यस्य तस्य । यत एव मर्त्यात्मबुद्धेः यत एव च सुतादिष्वत्यासज्यमानस्य तत्रापितत्रापि ‘ इदमद्य मया लब्धम्’ इत्याद्युक्तदुरंताचिन्तया ऽपार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलेवरेऽस्मिन्घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहम् ॥ वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वाऽगणयन्सुदुर्मदः ॥५०॥ प्रमत्तमुच्चैरितिकृत्य चिंतया प्रवृद्धलोभं विषयेषु लालसम् ॥ त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः ॥ ५१ ॥ पुरा रथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वा नर देवसंज्ञितः ॥ स एव कालेन दुरत्ययेन ते कलेवरो विट्कृमिभस्मसंज्ञितः ॥ ५२ ॥ निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवंदितः ॥ गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पूरुष ईश नीयते ॥ ५३ ॥

गतिः । किं तु ममापि तथैवेत्याह । ममैष इति । मर्त्ये शरीरे आत्मबुद्धिर्यस्य तस्य ममात एव सुतादिष्वासज्जमानस्य ॥ ४९ ॥ उन्नद्धमदत्वं प्रपंचयति । कलेवर इति । घटकुड्यादिसदृशे दृश्येऽनात्मनि यत एवं सुदुर्मदोऽभवम् । अतो ममैष कालो निष्फलो गत इति ॥ ५० ॥ त्वामगणयंतं त्वमाक्रमसीत्याह । प्रमत्तमिति । प्रमत्तमनवहितम् । त्वामंतकमविगणय्य देहादिष्वासक्तमिति यावत् । कुतः प्रमत्तम् । इतिकृत्यचिंतया एवमेवं करणीयमिति मनोरथपरंपरया मनोरथे भग्नेऽपि विषयेषु लालसमुत्सुकम् । प्राप्तेऽपि पुनः प्रवृद्धो लोभस्तृष्णा यस्य तमंतकस्त्वमभिपद्यसेऽभिभवसीत्यर्थः । क्षुधा सृक्किणी लेलिहानोऽहिराखुं मूषकमिवेति ॥५१॥ किं च कालात्मना त्वयाऽभिपन्नो देह एवं भवतीत्याह । पुरेति । श्वसृगालादिभिर्भक्षितो विट्संज्ञितस्तैरभक्षितः कृमिसंज्ञितो दग्धो भस्मसंज्ञितो भवति इति बुद्ध्या विचार्यैवंभूतशरीरे ममतां कुर्वंतो जना हरिं नाराधयंति ते आत्मनि शत्रुभूता ज्ञेयाः सततम् । यतः "योनेः सहस्राणि बहूनि गत्वा दुःखेन लब्ध्वाऽपि च मानुषत्वम् ॥ सुखावहं ये न भजंति विष्णुं ते वै मनुष्यात्मनि शत्रुभूताः " इति ॥ ५२ ॥ किं च अंतकप्राप्तेः प्रागपि दिग्विजयिनो राज्ञोऽपि पारतंत्र्यदुःखं तदवस्थमेवेत्याह । निर्जित्येति । अभूतविग्रहोऽविद्यमानसंग्रामः । पूर्वं ये

चिंतनेन, यद्वा–दुःखमंते यस्यास्तया तादृशचिन्तया । अतो न केवलं निष्फलत्वं किन्तु दुःखदत्वमपीति भावः ॥ ४९ ॥ कले शुक्रे वरा स्थितिर्यस्य तत्कलेवरम् । अलुक्समासः । "वरा प्रोक्ता शतावर्यां सुभगास्थिति भक्तिषु" इति धरणिधरोक्तेः । घटकुड्यसन्निभे निपाभित्त्यादितुल्ये। आदिपदमुपलक्षणलब्धमिति स्वामिचरणाभिप्रायः ॥*॥ अस्मिन्सर्वदोषास्पदे । अगणयन् विस्मरणादिभिरनाद्रियमाणः ॥५०॥ उत्सुकमुत्कंठावन्तम् । प्राप्तेऽपि– विषये इत्यर्थः । लेलिहान आसास्वादानः । 'उंदुरुर्मूषिकोऽप्याखुः' इत्यमरः॥*॥त्वामभजन्तं जनं त्वत्स्वरूपः काल एवं ग्रसेदित्याह–प्रमत्तं विषयासक्तत्वेन त्वत्स्मरणादाववधानरहितम् । प्रवृद्धलोभं तेषां भोगादनुपरतम् । कालरूपेणांतयतीत्यंतकस्त्वमित्यभेदोक्तिः । कालशक्तेस्तव भजनं भयेनापि युक्तमिति विवक्षया सहसा तर्कमतिक्रम्याभिपद्यसे आभिमुख्येन सर्वतो वा प्राप्नोषि । दृष्टान्ते विशेषणानि समानानि ॥५१॥ अन्यदाह–किञ्चेति । अभिपन्नो ग्रस्तः । तैः श्वसृगालाद्यैः । यतः उक्तं ग्रंथान्तरे–योनेरिति । सुखावहं स्वर्गापवर्गदम् । दुरत्ययेनातिक्रांतुमशक्येन । ते तवांशभूतेनेत्यर्थः । 'प्रभावं पौरुषं प्राहुः कालम्' इत्याद्युक्तेः॥*॥कलेवर इति पुंस्त्वमार्षम् ॥५२॥ अन्यदाह–किञ्चेति । अंतकप्राप्तेर्मरणात् । तस्मिन्नवतिष्ठत इति तदवस्थम् । दिशां चक्रं मंडलं दिक्चक्रम् । समा विद्यावयःकुलदानैर्ये तुल्याः । नीयते प्राप्यते ॥ * ॥ कामिमात्रस्य जीवने मरणेऽपि सुखं नास्तीति वदन्नादावैहिककामिनः साम्राज्येऽपि पराधीनतादुःखमाह–निर्जित्येति द्वाभ्याम् । वरासनस्थो महासिंहासनस्थः । योषिद्भिस्तद्दास्यादिभिश्च । गृहेषु विविधान्तःपुरेषु । क्रीडामृगो भवन्नीयते । हे ईश सर्वेषां त्वन्मायाधी

१ ' घटः कुटनिपौ ' इति कोषाद्घटनिपौ पर्यायौ ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करोति कर्माणि तपस्सु निष्ठितो निवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥ ५४ ॥
भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युतसत्समागमः ॥ सत्संगमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥ ५५ ॥

समाना राजानस्तै राजभिर्वंदितोऽपि मिथुनीभावः सुरतमेव परं सुखं येषु तेषु योषितां गृहेषु क्रीडामृग इव इतस्ततो नीयते ॥ ५३ ॥ किं च तत्रातितृष्णाकुलस्य न भोगक्षणः कश्चिदस्तीत्याह । करोतीति । तपस्यधःशयनब्रह्मचर्यादौ सुनिष्ठितः पुनश्च स्वराडिंद्रः स्यामिति । यद्वा जन्मांतरेष्वेवमेव चक्रवर्ती स्यामिति ॥५४॥ तदेवमष्टभिः श्लोकैरीशबहिर्मुखानां संसारं प्रपंच्य भक्त्या तन्निवृत्तिक्रममाह । भवापवर्ग इति । भो अच्युत भ्रमतः संसरतो जनस्य यदा त्वदनुग्रहेण भवस्य बंधस्यापवर्गोतो भवेत्रा

नत्वादिति भावः ॥ ९३ ॥ अभक्तस्य कर्मादि कुंजरशौचवदित्याह–किञ्चेति । तत्र वर्तित्वे । कर्माणि स्वाराज्यदानि । निवृत्ता गता भोगा यस्मात्स तथा । तेषां भोगानां सजातीयभोगेच्छयाददत्, धनानीति शेषः । स्वर्गस्य कर्मभूमित्वाऽभावात्कर्मांतराऽसंभवेन सुखांतरोत्पादकत्वं नास्तीत्यत आह–यद्वेति । "यस्य मूर्धनि दृश्येत विना छत्रेण भूपतेः । पद्मानुकारिणी छाया तमाहुश्चक्रवर्तिनम् ॥" इति नीलकंठः । प्रवृद्धतर्ष उद्रिक्ततृष्णः । सुखाय मुक्तिसुखाय ॥ * ॥ धर्ममाचरतोऽपि पारलौकिककामिनोऽपि सदा दुःखमेवेत्याह–करोतीति ॥ अत्र **विश्वनाथस्तु**–स्वामभजतो विषयभोगो यथा निंद्यस्तथा विषयभोगाभावोऽपि निंद्य इत्याह–करोतीति । कर्माणि व्रतयज्ञादीनि । तपस्तु निष्ठितत्वान्निवृत्तविषयभोगोपि । तस्य भोगस्यैवापेक्षया ददद्विविधदानं कुर्वन् । यद्वा–कर्मसांगतार्थं दक्षिणां ददत् । एवमैहिकमर्थक्षयादिदुःखं सूचितम् । सुखाय न कल्पते योग्योऽपि न भवति । एवं स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिरित्यादिन्यायेनेंद्रत्वेऽपि सुखाभावात्पारलौकिकमपि दर्शितम् । श्रीविष्णुपुराणे चास्यैव स्तुतौ "देवलोकगतिं प्राप्तो नाथदेवगणोपि हि । मत्तः साहाय्य कामोऽभूच्छाश्वती कुत्र निर्वृतिः ॥" इति ॥ ९४ ॥ तदिति वाक्यालंकारे । तन्निवृत्तिक्रमं संसारनिवृत्तिक्रमम् । "स्यादपवर्गस्त्यागे मोक्षे कार्यावसानसाफल्ये" इति मेदिनी । तदा भवापवर्गपूर्वकाले । इत्यर्थ इति–भक्त्यवांतरव्यापारीभूतज्ञानावाप्त्या मुक्तो भवतीत्यर्थः ॥ * ॥ तर्हि कदा भद्रं स्यात्तत्राह–भवेति । यदा भवेत् सर्वज्ञैः संभावितो भवति तर्हि सत्संगमोऽपि विवेकिभिः संभाव्यत इत्यर्थः । यद्वा–अतिशयोक्तिनाम्नोऽलंकारस्य चतुर्थोऽयं भेदः । यथोक्तं तद्विवृतौ–"चतुर्थी सा कारणस्य गदितुं शीघ्रकामिताम् । या हि कार्यस्य पूर्वोक्तिः" इति । तस्माद्यर्हि भवापवर्गः शीघ्रमेव भवेदित्यर्थः । यतः सत्संगम इत्यादि । यतस्त्वयि मतौ च जातायां भवापवर्गस्याप्यव्यभिचारः स्यादित्याह । एवकारान्नान्यदा कदापीत्यर्थः । अच्युतेति संबोध्य तत्र त्वमच्युतो भवसीति भावः । ननु मत्कृपां विना सत्संगोऽपि न स्यादिति सैवास्त्वादिकारणं तत्राह--संत एव गतिराश्रयो यस्य तस्मिन् । 'स्वेच्छामयस्य' इति 'अहं भक्तपराधीनः' इति सदिच्छयैव तत्र सर्वं प्रवर्तते । न तु स्वतः, अतः सापि तदनुगतैवेति भावः । सतां गतावित्यस्मिन्नर्थेऽपि असतां गतिः 'प्रार्थितः प्रचुरं पूर्वं त्वयाहम्' इति भवदुक्तरीत्या ययाऽसौ भवापवर्गदाता त्वं लब्ध इति भावः । मतिरिति । 'रतिः' इति च पाठः । समर्थ एव सत्संगमेन रत्यंकुररूपैव मतिर्जायत इति ॥ अत्र **विश्वनाथः**–तर्हि सर्वदुःखोपशमनी परमसुखमयी भक्तिरेव कदा भवेदित्यत आह--भवेति । हे अच्युत भ्रमतो जीवस्य यदा भवापवर्गो भवबंधस्य नाशः स्यात्तदा सत्संगमोऽनुग्राहकसाधुसंगो भवेत् । यर्हि सत्संगमस्तदैवेत्येवकारान्नान्यदा कदापीत्यर्थः । अत्र यर्हि तर्हीति स्थूलकालमालंब्यैवोक्तिः, सूक्ष्मकालमालम्ब्य तु सत्समागमभवापवर्गयोः कारणकार्ययोः पौर्वापर्यमवश्यमेव वक्तुमुचितं तदपि तद्विपर्ययेणोक्तिः कार्यस्यातिशैघ्र्यबोधिन्यतिशयोक्तिश्च तुर्थी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्ये ममानुग्रह ईश ते कृतो राज्यानुबंधापगमो यदृच्छया ॥ यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखंडभूमिपैः ॥ ५६ ॥ न कामयेऽन्यं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो ॥ आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबंधनम् ॥ ५७ ॥ तस्माद्विसृज्याशिष ईश सर्वतो रजस्तमःसत्त्वगुणानुबंधनाः ॥ निरंजनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥ ५८ ॥

नकालः स्यात्तदा सतां संगमो भवेत् । यदा च सत्संगमो भवेत्तदा सर्वसंगानिवृत्त्या कार्यकारणनियंतरि त्वयि भक्तिर्भवति । ततो मुच्यत इत्यर्थः ॥ ५५ ॥ मम तु सत्संगमात्पूर्वमेव यो राज्यादिसंगविच्छेदो जातः सोऽयं त्वया महाननुग्रहः कृत इत्याह । मन्य इति । ते त्वया साधुभिर्विवेकिभिस्तपसे वनं विविक्षद्भिः प्रवेष्टुमिच्छद्भिः स्वयं त्यक्तुमलभमानैः प्रार्थ्यत इति ॥ ५६ ॥ तदेवं विषयसेवामार्गं भगवत्सेवामार्गं च विविच्य वरान् वृणीष्वेति यदुक्तं तत्रोत्तरमाह । न कामय इति । अकिंचना निवृत्ताभिमानाः । आर्यो विवेकी ॥ ५७ ॥ रजस्तमःसत्त्वगुणैरनुबध्यंत इति यथा ता आशिष ऐश्वर्यादिशत्रुमारणादिधर्मादिरूपा विसृज्य परं पुरुषमीश्वरं ज्ञप्तिमात्रं ज्ञानघनम् ।

ज्ञेया । अन्यत्सर्वं पूर्ववत् ॥ ९९ ॥ निजभाग्यं श्लाघते—मम त्वित्यादिना । राज्यस्य तदनुबंधकस्य संपादकस्य कोशादेश्चापगमस्त्यागः । 'एक एव चरेद्भिक्षुः' इत्युक्तेरेकाकिचरणेच्छया । अखंडभूमिपैः सार्वभौमैः ॥ * ॥ ततस्तदारभ्यैव मयि त्वदनुग्रहो लक्षित इत्याह—मन्य इति । हे ईश 'मूकं करोति वाचालम्' इति न्यायेन हे दुर्घटघटनापटो । राज्यानुबन्धस्य राजत्वासक्तेरपगमो यस्मात्तादृशोऽनुग्रहस्ते त्वयैव यदृच्छया स्वैरितया कृत इति तर्कयामि "त्रैवर्गिकाऽयासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र । ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोन्यैः ॥" इति वृत्रोक्तेः, "यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः" इति स्वयं भगवदुक्तेश्च । योऽनुग्रहोऽखंडभूमिपैरपि मृग्यते किं पुनर्भारतवर्षैकदेशपतिभिरित्यर्थः । एकचर्यया एकांतनिष्ठया । तेषां कथं वनविवक्षा स्यात्तत्राह—साधुभिः विवेकेनासन्निष्ठात्यागिभिरित्यर्थः ॥ ९६ ॥ तत्र तयोर्द्वयोः । आत्मबंधनमात्मनः संसारकारणम् ॥ * ॥ अतः पादसेवनात्साक्षाद्विविधपारिचर्याया अन्यं वरं वरणीयार्थं न कामये, तदेव कामय इत्यर्थः । कुतः—अकिञ्चना मुक्तिपर्यंतमर्थं तुच्छीकृत्य भक्तास्तैरपि प्रार्थ्यतमात् । प्रार्थ्या भक्तिः, प्रार्थ्यतरं दर्शनं, प्रार्थ्यतमं पादसेवनं, तस्मात्सर्वपुरुषार्थत आधिक्यमुक्तं तदेव हि योग्यमित्याशयेन संबोधयति—विभो हे सर्वपुरुषार्थाधिकसुखदानसमर्थ । आराध्य प्रार्थ्य सेवित्वा वा । अपवर्गो भक्तिः । तथा च पञ्चमस्कन्धे—" यथा वर्णविधानमपवर्गश्च भवति योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणे " इति । यद्वा—मुक्तिं कथं न वृणुषे, तत्राह—आराध्येति । वरमीषत्प्रियेऽव्ययम् । आराध्य कस्त्वां मुक्तिप्रदं सन्तं वृणीत वरमात्मबंधनमेव वृणीतेत्यर्थः । अहं तु मोक्षेऽपि निरपेक्षः कथं तं वृणुयामिति भावः ॥ ९७ ॥ तर्हि किं करोषीत्यत आह—तस्मादिति । यतो वराणां बंधकत्वं तस्माद्धेतोः । तथाभूता मानुषराक्षसदैवीर्वाऽऽशिषो मनोरथास्संपदो वा 'स्यात्संपदिच्छयोराशीः' इति निरुक्तिः । ज्ञानघनत्वे हेतुमाशंकते—कुत इति । निरंजनं निरुपाधिम् । अत्रापि हेतुमाशंकते—कुत इति । तदपि निर्गुणमपि कुतो द्वैतवर्जितम् । अत एव द्वैतवर्जितत्वादेव ॥ * ॥ आशिषः फलानि । सर्वश इति पादसेवनविरुद्धो मोक्षोऽपि निरस्तः 'सर्वतः' इति पाठेऽपि स एवार्थः । तस्यापि ज्ञानहेतुसत्त्वगुणानुबंधनत्वात्, सेवायास्तु नैर्गुण्यहेतुकत्वात् । 'सात्त्विक्याध्यात्मिकी श्रद्धा' इत्यादौ 'मत्सेवायां तु निर्गुणा' इति श्रीभगवदुक्तेः । अन्यत्तैः । तत्र त्वामित्येतदाकारेणाऽविर्भवंतमित्यर्थः । तं च 'परं सत्यं परं धीमहि' इति, 'आद्योवतारः पुरुषः परस्य' इति, 'कृष्णस्तु भगवान्स्वयम्' इत्यादिदृष्ट्या स्वयं भगवन्तमित्यर्थः । पुरुषमीश्वरमिति—" विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " इति गीतादृष्ट्यांतर्याम्याकारेण परमात्माख्यमित्यर्थः । ज्ञप्तिमात्रमिति—'ज्ञानमात्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिरमिह वृजिनार्तस्तप्यमानोऽनुतापैरवितृषषडमित्रोऽलब्धशांतिः कथंचित् ॥ शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि माऽऽपन्नमीश ॥ ५९ ॥ श्रीभगवानुवाच ॥ सार्वभौम महाराज मतिस्ते विमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहिता यतः ॥ ६० ॥

कुतः । निरंजनम् । तत्कुतः । निर्गुणम् । तदपि कुतः । अद्वयम् । अत एव अक्षरं त्वां शरणं व्रजामीति ॥ ५८ ॥ भुंक्ष्व तावद्भोगान्कैवल्यं तु करस्थमेवेति पुनर्वरैः प्रलोभयंतं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते । चिरमिति । वृजिनैः कर्मफलैरार्तः पुनस्तद्वासनाभिस्तप्यमानस्तथाऽप्यवितृषषडमित्रः । तृडेव तृषा तृष्णा । न विगततृषाः षडमित्राः शत्रव इंद्रियलक्षणा यस्य सः । अत एवालब्धशांतिः कथंचिद्दैववशेन लब्धशांतिरिति वा । शरणं स्वज्ञानं तद्ददातीति तथा । हे शरणद समुपेतः प्राप्तोहम् ।

परं ब्रह्म ' इति दृष्टया चिन्मात्राकारेण सर्वत्र ब्रह्माख्यमित्यर्थः । तदुक्तम्–' ब्रह्मेति परमात्मेति भगवानिति शब्द्यते '' इति । तदेवमाविर्भावत्रयात्मके मयातीतत्वमाह–कुत इत्यादिना । तत्र त्रिधापि निरंजनमुपाधिं विना स्वरूपेणैव तथातथा स्थितं, भगवत्त्वे परमात्मत्त्वेऽपि निर्गुणं निर्गता प्राकृतेभ्यो गुणेभ्यः गुणाः स्वरूपशक्तिवृत्तिरूपा ऐश्वर्यादयो यस्य तम् । मध्यपदलोपी समासः । ' मां भजंति गुणाः सर्वे ' इत्यादौ ' साम्यासंगादयो गुणाः ' इति श्रीभगवदुक्तेः । अद्वयं सजातीयविजातीयभेदरहितम् । ज्ञप्तिमात्रत्वेऽपि स्वरूपशक्तिर्यत्किंचिदुपलभ्यते, ईक्षितृत्वस्य स्वाभाविकतयाऽवश्यं मंतव्यत्वात् । तदुक्तम्–" ईक्षतेर्ना शब्दम् '' इत्यत्र भाष्यकृद्भिर्ज्ञानस्वरूपस्य तस्य ज्ञानसाधनापेक्षा नास्ति प्रकाशस्वरूपवस्तुनः प्रकाशसाधनापेक्षाभावादिति भगवत्त्वे परमात्मत्वे च स्पष्टमेव सा श्रूयते–" न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥ '' इति, ' अपाणिपादो जवनो ग्रहीता ' इति च । विग्रहश्च " यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम् '' इति । यद्वा–निरंजनं नितरां रंजकम्, निर्गुणं निःशेषेण गुणयत्युत्तरोत्तरं भक्तिविस्तारेण वर्धयतीति तम्, अद्वयं प्रतिद्वन्द्विशून्यम्, ज्ञप्तिश्चिदेकलक्षणं ब्रह्माख्यं वस्त्वपि मात्रांशो यस्य तम्, सच्चिदानंदरूममनंतशक्ति पुरुषाकारं त्वामेतमित्यर्थः । व्रजामि सेव्यत्वेनाऽऽसादयामि । शेषं पूर्ववत् ॥ **विश्वनाथस्तु**–ननु पुरुषाकारं मां मायाशरणं ब्रह्मेति केचिदाचक्षते तत्राह–निरंजनं नितरामुपाधिशून्यं, यतो निर्गुणम्, ननु सत्यं निर्गुण एवास्मि इदं मदीयं वपुस्तु गुणमयमेवेति वदंति तत्राह–अद्वयं, त्वं त्वद्वपुश्च न भिन्नं, त्वमेव त्वद्वपुरित्यर्थः । तर्हि वपुरिदं किंस्वरूपं तत्राह–ज्ञप्तिमात्रं चित्स्वरूपं ब्रह्मैवेत्यर्थः । यद्वा–गुणमयजगतोऽपि तच्छक्तिमयत्वेन त्वद्भिन्नत्वाभावाद्वयं, स्वरूपशक्त्या तु ज्ञप्तिमात्रं पुरुषम् ॥ ५८ ॥ तद्वासनाभिः कर्मफलवासनाभिः । तथापि कर्मवासनातप्यमानत्वेपि । अत एवाऽतृप्तेंद्रियारातित्वादेव । अरुच्या न पक्षांतरमत्र तत्राप्यभयत्वे सत्यस्य भयाभावप्रसिद्धेः ॥ * ॥

अतोऽधुना कथमपि मामुपेक्षितुं नार्हसि किन्तु सर्वतो रक्षेति सदैन्यमर्थयते–चिरमिति । इह संसारे । वृजिनैः पापभोगैरार्तः अनुतापैः पुण्यभोगक्षये शोकैस्तप्यमानः कथंचिदपि न लब्धा शांतिश्चित्तस्थैर्यं सुखं वा येन सः । यद्वा–कथंचित्प्रयत्नाभावादनिरूप्येण केनचित्कारणेन सम्यक्प्रत्यक्षतया तथापि उप समीपे इतः प्राप्तः, तच्च तव योग्यमित्याह–हे शरणद । ' आर्तानां शरणं त्वहम् ' इत्यादिस्वप्रतिज्ञापेक्षया स्वाश्रयदायक । न च वक्तव्यं तद्भक्तिवशादिति भक्तेरपि प्रवर्तकस्त्वमेवेत्याशयेन संबोधयति–परमात्मन्निति । अतोऽधुना निजपादाब्जमाहात्म्यानुरूपमेव दातुमर्हसि न त्वन्यदित्याशयेन पादाब्जं विशिनष्टि–पदैस्त्रिभिः । अतः पाहि निजसेवकत्वेन पालय । तच्च केवलं दीनवात्सल्यादेवेत्याशयेन पुनराह–आपन्नमिति । तत्र च त्वमेवैकः समर्थ इत्याह–ईशेति ॥ **विश्वनाथस्तु**–भुंक्ष्व भोगांस्तदन्ते साक्षात्पादसेवनं तु ते दास्याम्येवेति वरैः प्रलोभयन्तं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते–चिरमिति । वृजिनैः संग्रामे शक्रवैरिजिगीषालक्षणैरुपद्रवैरार्तः हरिहरि ! एतावद्दिनानि भगवन्तं नाभजमित्यनुतापैस्तप्यमानः, विषयभोगे प्रस्तुते सत्यवितृषषडमित्रः विगततृष्णानि मे षडिन्द्रियाणि न भवंति, कथंचित्स्वकृतेनान्यदत्तेन विवेकेनाप्यलब्धशांतिः तेन त्वद्दत्तेष्वपि भोगेष्वेवमेव पुनरप्यहं भविष्यामि । विषयभोगस्य स्वभाव एवायं तस्मान्मा देहि भोगानिति द्योतितम् । हे परमात्मन्नन्तर्यामिन्सर्वं त्वं जानास्येवेति भावः । ' अभयमृतमशोकम् ' इति पदाब्जस्य विशेषत्रयेण अन्यत्र मानुष्यसंपत्तौ रोगविपक्षादिभयं दिव्यसंपत्तावचिरस्थायित्वलक्षणमनृतत्वं ब्राह्मसंपत्तौ त्वत्पादसेवनवंचितत्वलक्षणः शोक इत्यलं ताभिरिति द्योतितम् । तस्मान्मामापन्नमापद्ग्रस्तं पाहि, स्वपादाब्ज एव रक्षेत्यर्थः ॥ ५९ ॥ ऊर्जिताऽत्युच्चा । तत्र हेतुः–वरैरित्यादि ॥ * ॥ हे सार्वभौमेष्वपि महाराज इत्यत्यन्तादरात्पौनरुक्त्यं वा हे सार्वभौम महाराजेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रलोभितो वरैर्यस्त्वमप्रमादाय विद्धि तत् ॥ न धीर्मय्येकभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ६१ ॥ युंजानानामभक्तानां प्राणायामादिभिर्मनः ॥ अक्षीणवासनं राजन्दृश्यते पुनरुत्थितम् ॥ ६२ ॥ विचरस्व महीं कामं मय्यावेशितमानसः ॥ अस्त्वेव नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ॥ ६३ ॥ क्षात्रधर्मस्थितो जंतून्न्यवधीर्मृगयादिभिः ॥ समाहितस्तत्तपसा जह्यघं मदुपाश्रितः ॥ ६४ ॥ जन्मन्यनन्तरे राजन्सर्वभूतसुहृत्तमः ॥ भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलम् ॥ ६५ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कन्धे उत्तरार्धे मचुकुंदस्तुतिर्नामैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

अशोकत्वे हेतुः । अभयम् । तत्रापि हेतुः । ऋतं सत्यम् । आपन्नमापदाव्याप्तं पाहीति ॥ ५९ ॥ ६० ॥ अप्रमादाय प्रमादाय न भवत्येव । कुत इत्यत आह । न धीरिति । एकांतभक्तानां धीराशीर्भिः प्राप्ताभिरपि न भियते नासज्जत इत्यर्थः ॥ ६१ ॥ व्यतिरेकमाह । युंजानानामिति । उत्थितं विषयाभिमुखम् ॥ ६२ ॥ तुभ्यं तव ॥ ६३ ॥ युक्त्याभासेन भीषयंस्तपसि लोकसंग्रहे प्रवर्तयति । क्षात्रधर्मेति ॥ ६४ ॥ ६५ ॥ इति श्रीमद्भागवते म० द० उत्तरार्धे श्री० भावार्थदीपिकायामेकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

ततः परमेश्वरस्यापीदृशं वचनमित्यहो सौशील्यमिति भावः । विमला संसारवासनाशून्या, ऊर्जिता प्रखररसविदग्धेत्यर्थः । तत्र हेतुः—प्रकर्षेण मां प्रपन्नो जन इत्याद्युक्तयुक्त्या लोभितस्यापि कामैः साम्राज्याद्यैर्मोक्षपर्यंतैर्मद्भक्त्या काम्यमानैरर्थैर्न विहता किन्तु तस्यामेव बद्धस्पृहा जातेत्यर्थः । ऊर्जिता चालयितुमशक्यत्वाद्बलवती ॥ ६० ॥ तत्प्रलोभनम् । एवं कुतः प्रमादाभावाय कुतो ज्ञायते । इत्यत इत्यत्र । इत्यर्थ इति—विषयसंग एव बुद्धिभेद इति भावः ॥ * ॥ अप्रमादाय अप्रमादं दर्शयितुमन्योपासकानिति "क्रियार्थोपपदस्य—"इत्यादिना चतुर्थी । एतद्दर्शनायैव प्रलोभितोऽसीति भावः ॥ ६१ ॥ व्यतिरेकं बुद्धिरेकं युञ्जानानामपि न क्षीणा दुष्कर्मवासना यस्मिंस्तत्तथा ॥ * ॥ अन्योपासकानां तु प्रमादो भवत्येवेत्याह—युंजानानामिति । अभक्तानां मद्भक्तभिन्नानां योगिनां ज्ञानिनां चेत्यर्थः ॥ ६२ ॥ अनपायिनी जन्मांतरेऽप्यपायहीना । अस्त्वेव भविष्यत्येव (यादादीनां तुबादीनाञ्च कालविशेषाकथनेऽपि भविष्यत्कालो बोध्य इत्युक्तमाकरे) ॥ * ॥ इतः परं कृतकृत्य एव त्वमित्याह—विचरस्वेति ॥ ६३ ॥ युक्तिस्तूचितार्था तद्भिन्नो युक्त्याभासः, न हि भगवद्दर्शिनः पापानि कदापि तिष्ठंतीत्यतो नेयं युक्तिः किन्तु तदाभास एवेत्याशयः । लोकसंग्रहे तन्निमित्तम् । निमित्ते सप्तमी । क्षात्रधर्मे राजधर्मे । आदिना प्रमादोपि राज्ञां भवतीति तद्ग्रहः । तज्जन्तुवधोत्थम् । अघं पापम् ॥ * ॥ हाहा अतः परमपि मां स्वसंगाद्वियोजयितुमिच्छसि, मैवंमैवमिति तस्य महोत्कंठामालक्ष्य भगवता विचारितम्—अयमस्मिन्नवतारे स्वसंगे नेतुमनर्हः, मदीयलीलापरिकरा हि द्वापरांतर्भवा उद्धवाक्रूरादयो युधिष्ठिरार्जुनादयश्च इममेतन्मन्वन्तरप्रथमसमयभवमतिप्राचीनं दृष्ट्वा—अहो कोयमतिस्थूलतमोऽतिदीर्घतमोऽस्मदननुरूपो मानुष इत्युक्त्वा हसिष्यान्ति, तथा संप्रत्येव जरासंधात्पलायनलीलायां तथाग्रिमासु रुक्मिणीहरणादिलीलासु जरासंधादिभिः शाल्वादिभिश्च संग्रामे नायं मत्संगानुरूपो भवितुमर्हति, अयं तान्मद्विपक्षान्मशकानिव करतलाभ्यामेव घृष्ट्वा वधिष्यतीत्यत इमं संगाद्विमोचयितुं कां युक्तिं करोमीति विचिन्त्य केवलमलीकोक्तिमयं तत्प्रत्यायकं किमप्याह—क्षात्रेति ॥ ६४ ॥ तत्त्वमाह—जन्मनीति । अनंतरे एतद्देहपातानन्तरभाविनि । सर्वभूतसुहृत्तम इत्यनेन सर्वाऽभयप्रदानलक्षणः संन्यासो लक्ष्यते । आत्यन्तिकमुक्तिहेत्वौपनिषदात्मसाक्षात्कारोपयोगिपारिव्राज्ययोग्यत्वात्सर्वतनुषु प्रायो ब्राह्मणतनुरेव चरमदेहत्वान्मत्प्राप्तियोग्या नान्येति सूचयन्नाह—भूत्वेत्यादि । द्विजवरो ब्राह्मणः 'प्रव्रज्या ब्राह्मणस्यैव' इत्येव

---

१ टीकायाम् 'एव । कुतः' इत्यस्य स्थाने एवं कुत इत्येव पाठोऽस्येष्ट इति भाति ।   २ प्रमादाऽभावदर्शनायैव ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्थं सोनुगृहीतोंग कृष्णेनेक्ष्वाकुनंदनः ॥ तं परिक्रम्य सन्नम्य निश्चक्राम गुहामुखात् ॥ १ ॥ स वीक्ष्य क्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् ॥ मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तराम् ॥२॥ तपःश्रद्धायुतो धीरो निःसंगो मुक्तसंशयः ॥ समाधाय मनः कृष्णे प्राविशद्गंधमादनम् ॥३॥ बदर्याश्रममासाद्य नरनारायणालयम् ॥ सर्वद्वंद्वसहः शांतस्तपसाऽऽराधयद्धरिम् ॥ ४ ॥ भगवान्पुनराव्रज्य पुरीं यवनवेष्टिताम् ॥ हत्वा म्लेच्छबलं निन्ये तदीयं द्वारकां धनम् ॥ ५ ॥ नीयमाने धने गोभिर्नृभिश्चाच्युतचोदितैः ॥ आजगाम जरासंधस्त्रयोविंशत्यनीकपः ॥ ६ ॥

द्विपंचाशत्तमे धावन्भयादिव गतः पुरीम् ॥ अन्वमोदत संदेशं रुक्मिण्या द्विजवर्णितम् ॥ १ ॥ १ ॥ क्षुल्लकानल्पप्रमाणान् ॥ २ ॥ तपसि श्रद्धायुतः ॥ ३ ॥ तत्र च बदर्याश्रमम् ॥ ४ ॥ निन्ये नयन्मार्गे चलति स्म ॥ ५ ॥ ६ ॥

कारेणान्यवर्णस्य तद्व्यवच्छेद इत्युक्तं हारीतस्मृतौ । उपैष्यसीति " ब्रह्मैव सन्ब्रह्माप्येति " इति श्रुतेर्ब्रह्म भूत्वा ब्रह्म प्राप्नोतीति प्रतीयते । तथा च–"ब्रह्म ब्राह्मण आत्मना" इति श्रुतेः, "अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि " इति स्मृतेश्च ब्राह्मणो ब्रह्मैवाऽतो ब्रह्मैव सन् अपरोक्षात्मज्ञानवान्ब्राह्मणजातिर्भूत्वा ब्रह्म परमात्मानं प्राप्नोतीत्यर्थ इति श्रुत्यर्थो भगवता ध्वनितः । यत्तु ' स एष साधो चरमो भवानाम् ' इत्युद्धवं प्रत्युक्तं श्रीकृष्णेन, तदपि निजभक्तानां देहत्यागसमक्षणमेव ब्राह्मण्यं संपाद्य निजशक्त्या मोक्षदानपरमिति ध्येयम्, अन्यथा भूत्वा द्विजवर इत्युक्तिर्व्याकुप्येतेति ॥ * ॥ ननु तर्हि त्वत्संगी कदा भविष्यामीत्यत आह–जन्मनीति । अतः परं त्वं मद्धाम वैकुंठं यास्यस्येव स्ववैरिभ्योऽप्यस्मिन्नवतारे मोक्षं वैकुण्ठवासञ्च ददामि किं पुनस्तुभ्यं परमभक्ताय, किंचावतारान्तरे च त्वां संगिनं लीलापरिकरं करिष्यामि, यदा त्वां स्वञ्च समकालमेवाऽविर्भावयिष्यामी त्यनंतरे जन्मनि मम च तव चेत्यर्थः । सर्वभूतानामुपकारकत्वात्, यथायोगं विद्याप्रदानाच्च । सुहृत्तमो द्विजवरः परमादरणीयो विप्रो भूत्वा मां केवलं वैराग्यत्वान्निष्परिग्रहं समेष्यसि, मत्संग एव स्थास्यसीत्यर्थः ॥ ६९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्ध उत्तरार्द्धे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ इवेनात्रापि भयाभाव एवोक्तः । पुरीं द्वारवतीम् । अन्वमोदत स्वीचकार (१) । इत्थं सार्वभौमेत्याद्युक्त्या । स मुचुकुन्दः । इक्ष्वाकून्नन्दयतीति तथा । तं कृष्णम् ॥ * ॥ ० ॥ १ ॥ स मुचुकुन्दः । ' क्षुल्लकस्त्रिषु नीचेल्पे ' इति मेदिनी । गुणतः प्रमाणतश्चाल्पप्रमाणानित्यर्थः ॥ * ॥ उत्तरामिति नरनारायणाश्रमाभिप्रायेण, तत्र हि कलिर्न प्रभवतीति । यद्यपि " यावत्सपादपद्माभ्यां स्पृशन्नास्ते रमापतिः । तावत्कलिस्तु पृथिवीं पराक्रान्तुं न चाशकत् ॥ " इति द्वादशोक्तानुसारेण श्रीकृष्णप्राकट्ये तत्रापि तत्प्रभावो नासीत्तथापि चिरं तत्प्राकट्यं न स्यादित्यभिप्रायेण तथा कृतमिति ज्ञेयम् ॥ २ ॥ मुक्तसंशयः कृष्णबोधितत्वात्सर्वसंशयहीनः ॥ * ॥ धीरो विवेकनिपुणः । अतो मुक्तसंशयः शास्त्रादिभिः कृतपरमनिश्चयः । अतो निःसंगः अन्योपासनाफलाऽऽकांक्षारहितः । यद्वा–मुक्तसंशयत्वादेव तपसि भगवदेकाग्रचित्तत्वे श्रद्धायुक्तः । अत एव निस्संगः । अतः कृष्णे मनः समाधिनिष्ठं कृत्वा प्रकर्षेण सर्वोत्कृष्टप्रकारेणाविशत् ॥ ३ ॥ तत्र च गंधमादनेऽपि । बदरीभिर्घोंटाभिरुपलक्षित आश्रमो बदर्याश्रमस्तम् ॥*॥ नरनारायणयोरालय आश्रयो यस्मिंस्तम् ॥४॥ प्रकृतमनुसरति–भगवानिति । तदीयं यवनाहृतम् ॥ * ॥ निन्ये नेतुमुपचक्रमे ॥५॥ गोभिस्तद्युक्ताऽ

१ "बदरी कोली कोलं कुवलफेनिले । सौवीरं बदरं घोण्टा' इति कोषाद्बदरघोण्टयोः पर्यायता ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलोक्य वेगरभसं रिपुसैन्यस्य माधवौ ॥ मनुष्यचेष्टामापन्नौ राजन्दुद्रुवतुर्द्रुतम् ॥ ७॥ विहाय वित्तं प्रचुरमभीतौ भीरुभीतवत् ॥ पद्भ्यां पद्मप
लाशाभ्यां चेलतुर्बहुयोजनम् ॥ ८ ॥ पलायमानौ तौ दृष्ट्वा मागधः प्रहसन्बली ॥ अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ॥९॥ प्रद्रुत्य दूरं संश्रांतौ
तुंगमारुरुहतां गिरिम् ॥ प्रवर्षणाख्यं भगवान्नित्यदा यत्र वर्षति ॥ १० ॥ गिरौ निलीनावाज्ञाय नाधिगम्य पदं नृप[1] ॥ ददाह गिरिमेधोभिः समंतादग्नि
मुत्सृजन् ॥ ११ ॥ तत उत्पत्य तरसा दह्यमानतटादुभौ ॥ दशैकयोजनोत्तुंगान्निपेततुरधो भुवि ॥ १२ ॥

वेगरभसं वेगोद्रेकम् ॥ ७ ॥ भीरुभीतवद्धीरोरपि भीतवत् अतिभीतवदित्यर्थः । चेलतुः पलायेताम् । बहुयोजनं देशम् ॥ ८ ॥ अप्रमाणवित् प्रमाणमियत्ता तन्न वेत्तीति तथा ॥ ९ ॥ तुंगमेकादशयोजनोन्नतम् । प्रकर्षेण वर्षत्यस्मिन्निति प्रवर्षण इत्याख्या यस्य तम् । तदाह । भगवानिति । भगवानिंद्रः ॥ १० ॥ तत्र विचिन्वन्नपि तयोः पदं निलयस्थानमनधिगम्य ॥ ११ ॥ ततो गिरेः दश चैकं च योजनानि तावदुत्तुंगान्मागधसंरोधदेशमतिक्रम्य परतोऽधो निपेततुः ॥ १२ ॥

नोभिः ॥ *. ॥ चादुष्ट्रादिभिश्च ॥ ६ ॥ वेगाधिक्यं, वेगरभसम् । यद्वा—नामैकदेशन्यायेन वे शब्देन वेदो ग्राह्यस्तं वयं गायंतीति वेगा ब्राह्मणास्तेषां रभसं युद्धसंरंभं रिपुसैन्यस्य जरासंधसैन्यस्य मध्ये विलोक्येत्यन्वयः । यद्वा—रपंत्यनिष्टं शापादि दुष्टेषु, शुश्रूषुषु वरांश्चेति रिपवो विप्राः । ''रपेरस्येत्'' । ' रप—परिभाषणे ' । तेषां सैन्यस्येति सप्तदशकृत्वः पराभूतेन जरासंधेन कथांचिन्मम जयो मदग्रतो युद्धं त्यक्त्वा रामकृष्णपलायनं वा यथा भवेत्तथा यूयं कुरुतेति पृष्टा ब्राह्मणास्तमूचुः—जयस्तु तव नो भावी परन्तु वयं तव सैनिका भूत्वा गच्छामः, स श्रीकृष्णोऽस्मानप्रहार्यान्मत्वा पलायिष्यते, एवं तयोः पलायनं भावि न केवलं त्वत्तस्तदपीति स्पष्टं संहितायाम् । यच्चोक्तम्—'' आततायिनमायांतमपि वेदांतपारगम् । जिघासंतं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥ '' इति तदत्र न संगच्छते, तेषां भगवत्पलायनेच्छावत्त्वेन क्षिघांसाऽभावात् ॥ * ॥ माधवौ क्रीडाविशेषार्थं मधुकुले जातौ रामकृष्णौ । मथुरायां पुरा रक्षितेन रामेण संगतेः । आपन्नौ स्वीकृतवन्तौ । तथोक्तं वैष्णवे—'' मनुष्यधर्मशीलस्य लीला सा जगतः पतेः । अस्त्राण्यनेकरूपाणि यदरातिषु मुंचति ॥ मनसैव जगत्सृष्टिसंहारं च करोति यः । तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः ॥ तथापि ये मनुष्याणां धर्मास्तदनुवर्तनम् । कुर्वन्बलवता संधिं हीनैर्युद्धं करोत्यसौ ॥ साम चोपप्रदानं च तथा भेदं प्रदर्शयन् । करोति दंडपातञ्च क्वचिदेव पलायनम् ॥ मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते । लीला जगत्पतेस्तस्य छन्दतस्संप्रवर्तते ॥ '' इति । हे राजन्निति—राजनीतिवित्त्वं सर्वं जानास्येवेति भावः ॥ ७ ॥ इत्यर्थ इति—वतिर्भीरुभीतत्वाभावमाह ॥ * ॥ विहाय विशेषेण पुनर्लिप्साराहित्येन हित्वा । कुतः—प्रचुरं वित्तस्य प्राचुर्याच्छत्रोर्लोभनेन विलंबनायेत्यर्थः । पद्मपलाशाभ्यामिति भये सत्यतिकोमलांगोऽपि पादत्राणादिरहितोऽपि पलायत इति द्योतनाय, तस्य तु भयराहित्यं वतिनैवोक्तमिति ॥ ८ ॥ इयत्ताऽन्तः ॥ * ॥ अत्र प्रमाणं विभुत्वम्, बलादिभिरपरिच्छेद्यत्वामिति यावत् । अन्वधावदित्यादिना तस्य तद्धनग्रहणं निरस्तमतस्तद्धनं श्रीद्वारकायामेवायातामिति ज्ञेयम् । तदुक्तं हरिवंशे—'' निवेदयामास ततो नराधिपे तदुग्रसेने प्रतिपूर्णमानसः । जनार्दनो द्वारवतीं च तां पुरीमशोभयत्तेन धनेन भूरिणा ॥'' इति ॥ ९ ॥ गिरिं गोमंतम् '' तावारुरुहतुर्वीरौ गोमंतमुदिते रवौ '' इति हरिवंशोक्तेः ॥ * ॥ प्रवर्षणाख्यामिति गिरेरग्निदाहशंका निरस्ता ॥१०॥ निलीनौ गुप्तौ । पदं पादचिह्नम् । ततोग्रेऽनधिगम्य । एधोभिः काष्ठैः ' काष्ठं दार्विन्धनं त्वेधः ' इत्यमरः ॥ * ॥ निलीनौ तृणगुल्मादिषु तिरोहितौ । तयोः पदं पादचिह्नमन्यत्राऽप्राप्येति हेतुः । ददाह दग्धुमारेभे । नृपे इति बहुजनाधीशत्वेन सामर्थ्यं तत्र दर्शितम् ॥ ११ ॥ उभौ रामकृष्णौ ॥ * ॥ दह्यमानः तटः प्रान्तभागो यस्य तस्मात् । अधो गिरेस्तत्रापि भुवि न तु कण्टकजलादौ । अनेन निः

१ नृपः इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलक्ष्यमाणौ रिपुणा सानुगेन यदूत्तमौ ॥ स्वपुरं पुनरायातौ समुद्रपरिखां नृप ॥ १३ ॥ सोऽपि दग्धाविति मृषा मन्वानौ बलकेशवौ ॥ बलमाकृष्य सुमहन्मगधान्मागधो ययौ ॥ १४ ॥ आनर्ताधिपतिः श्रीमान्रैवतो रेवतीं सुताम् ॥ ब्रह्मणा चोदितः प्रादाद्बलायेति पुरोदितम् ॥ १५ ॥ भगवानपि गोविंद उपयेमे कुरूद्वह ॥ वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥ १६ ॥

॥ १३ ॥ १४ ॥ श्रीकृष्णस्य विवाहान्निरूपयितुं बलदेवविवाहं नवमस्कंधोक्तमनुस्मारयति । आनर्तेति ॥ १५ ॥ मात्रां कलाम् ॥ १६ ॥

शब्दत्वेन च सुदूरे तयोः सुखपतनं पक्षिवदभिप्रेतम् ॥ १२ ॥ रिपुणा जरासंधेन । स्वपुरं द्वारकाम् । समुद्रः परिखा खातनदी यस्यास्ताम् । "खेयं तु परिखाधारस्त्वंभसां यत्र धारणम्" इत्यमरः ॥ * ॥ अलक्ष्यमाणाविति धूमावृतसर्वदिक्त्वात् । रिपुणेति रिपुत्वात्सावधानेनापीत्यर्थः । सानुगेन महासैन्येनापि सह । यदूत्तमाविति यादवानन्दयन्ताविति भावः । नृपेति नृपाणां क्रूरस्वभावादिति भावः ॥ १३ ॥ सोऽपि जरासंधोऽपि ॥ ॥ * ॥ बलकेशवाविति सामर्थ्यमुक्तम् । सुमहदिति तदा सर्वस्यापि भगवदुपेक्षितत्वात् । उपेक्षा च रुक्मिणीहरणपराक्रमकौतुकपोषणार्थं तत्साक्षादरिवर्गनिर्जयेन तस्याः प्रहर्षार्थश्च ज्ञेयम् । ननु कथं महापावनान्माथुरानेव स्वराज्यत्वेन गृहीत्वा नोवास तत्राह—मागधः नीचदेश्यानां तत्रैवाभिरुचेरिति भावः । तदेवं पलायनेऽपि जयो दर्शितः, अनेकमहारथादिभिरनुगन्तुमशक्यत्वात्सर्वानतिक्रम्योत्प्लुतत्वाच्च ॥ १४ ॥ कथांतरमाह । यद्यपि "सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहम्" इति गार्ग्योक्तेः परिवेत्त्रादिशंका रौहिणेयत्वाद्बलस्य दैविकेयत्वाच्च कृष्णस्य सोदर्यत्वाभावान्नास्ति तथापि योगमायाकृष्टदेवकीगर्भत एव बलस्य रोहिणीगर्भावेशात्सोदर्यत्वमप्यायातीत्यतस्तद्वारणाय पूर्वोक्तं स्मारयति—आनर्ते इति । पुरा नवमस्कन्धे ॥ * ॥ श्रीमान् ब्रह्मलोकगमनेन सप्तविंशतिचतुर्युगेष्वतीतेष्वपि सर्वसंपत्तिमानिति योगादिबलं सूचयति । अतः प्रकर्षेणाऽदात् । रैवतो रेवतसुतः ककुद्मी ॥ १५ ॥ अपिना यथा बल उपयेमे तथा भगवानित्युपमा द्योत्यते । 'मात्रांशे वित्तमानयोः' इति कोशात् ॥ * ॥ भगवानिति युग्मकम् । भगवान् स्वयंभगवान् । तथातथा नित्यविहारी श्रीकृष्णः । तदानीञ्च गोविंदः गां पृथ्वीं विन्दतीति क्रीडाविशेषार्थं तस्यामवतीर्ण इत्यर्थः । अतः श्रियो मात्रां माति प्रविशत्यस्यां सर्वमिति परिपूर्णां मूर्तिं भगवद्देवाऽवतरितुमर्हत्वात् । तथा च श्रीविष्णुपुराणे—"एवं यथा जगत्स्वामी देवदेवो जनार्दनः । अवतारं करोत्येषा तथा श्रीस्तु सहायिनी ॥" इति । अत एव वक्ष्यते—सदृशीमिति । उपयेमे विवाहलीलया निकटं निनाय । अपिः पूर्वोक्तसमुच्चये । यद्वा—गोविंदो गोकुलेन्द्रो गोकुलवर्तिगोपीविरहेणांतःखिन्न इत्यर्थः । यथैवोद्धवं प्रति निजकरुणाबाष्पमुद्गिरति—'गच्छोद्धव व्रजम्' इत्यादिभिः, यथैवोद्गिरिष्यति सर्वप्रकटलीलान्तेऽपि—'तास्ताः क्षपाः प्रेष्ठतमेन नीताः' इत्यादिभिः, तादृशः सन्नुपयेमे । कुतः—श्रियो मात्रामंशं मूर्तिभेदमिति यावत् । ततश्च 'श्रियः कान्ताः कांतः' इत्याद्यनुसारेण गोपीनामपि श्रीत्वात् । 'नायं श्रियोंग उ नितान्तरतेः प्रसादः' इत्याद्यनुसारेण प्रसिद्धश्रीतोप्युत्कृष्टतमत्वेनैव कुरुषु पांडुशब्दवच्छ्रीषु गोपीति नामांतरप्राप्तत्वात्तदैकतत्त्वादित्यर्थः । तास्वपि मुख्यायाः श्रीराधाया एव मात्रमिति वा । "ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखम्" इति भगवदुक्त्यनुसारेण यादवादिनिजगणविशेषसुखार्थमपि तादृशीमेव स्वीचकारेति भावः । एवमेवोक्तं पाद्मकार्तिकमाहात्म्ये—"कैशोरे गोपकन्यास्ता यौवने राजकन्यकाः" इति । स्कान्दादौ च—"रुक्मिणी द्वारवत्यां तु राधा वृंदावने वने" इति । तथा शक्तिवैचित्र्यबोधनार्थमाह—भगवानिति । यद्वा—यो गोविंदः "मां केशवो गदया प्रातरव्याद्गोविन्द आसंगवमात्तवेणुः" इति नारायणवर्माद्यनुसारेण तथा नित्यविहारी सोऽपि वैदर्भीमुपयेमे, तत्कथं तत्राह—भगवान्, अचिंत्यशक्त्या तत्र चात्र च प्रकाशवान् । यथैव सांत्विता उद्धवद्वारा व्रजदेव्य इति भावः । स्वयंवर इति हरिवंशोक्तं तद्वृत्तं स्मारयति । ततश्च स्वयंवरे निवृत्ते भगवदुक्त्या शिशुपालाय दातुं निश्चितायास्तस्या महार्तिवैयग्र्येण संदेशादिना हरणादिकं वृत्तमिति । यद्वा—स्वयमेव वैदर्भ्या पुरोहितपुत्रप्रेषणेन वरः पतित्वेन श्रीकृष्णवरणं तस्मिन् ॥ **विश्वनाथस्तु**—मात्रां मूलभूतं सूक्ष्मस्वरूपम् 'तस्य मात्रा गुणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ॥ पश्यतां सर्वलोकानां ताक्ष्यर्पुत्रः सुधामिव ॥ १७ ॥ राजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननाम् ॥ राक्षसेन विधानेन उपयेम इति श्रुतम् ॥ १८ ॥ भगवञ्छ्रोतुमिच्छामि कृष्णस्यामिततेजसः ॥ यथा मागधशाल्वादीञ्जित्वा कन्यामुपाहरत् ॥ १९ ॥ ब्रह्मन्कृष्णकथाः पुण्या माध्वीर्लोकमलापहाः ॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥ २० ॥ श्रीशुक उवाच ॥ राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ॥ तस्य पंचाभवन्पुत्राः कन्यैका च वरानना ॥ २१ ॥ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः ॥ रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्वसा सती ॥ २२ ॥ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणाश्रियः ॥ गृहागतैर्गीयमानास्तं मेने सदृशं पतिम् ॥ २३ ॥ तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयाम् ॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥ २४ ॥

गरुडो यथा देवान्प्रमथ्य सुधामहरत्तथेति ॥ १७ ॥ 'राक्षसो युद्धहरणाद्' इति स्मृतेः राज्ञः प्रमथ्येति च त्वदुक्त्या राक्षसेन विधानेनोपयेमे परिणीतवानिति श्रुतं पूर्वमेव वा ॥१८॥ सामान्यत एव श्रुतम् । विशेषं तु श्रोतुमिच्छामि ॥१९॥ श्रवणौत्सुक्यमाविष्करोति । ब्रह्मन्निति । पुण्या महाफला माध्वीः श्रुतिसुखाः लोकस्य मलापहाश्च शृण्वानः शृण्वन्नित्यर्थः । श्रुतज्ञः श्रुतसारवित् । नित्यनूतनाः प्रतिक्षणमाश्चर्यवत्प्रतीयमानाः ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

शब्दः ' इतिवत्, श्रीकृष्णस्य स्वयं भगवत्त्वेन तस्या अपि स्वयं लक्ष्मीत्वौचित्यात् ॥ १६ ॥ तरसा बलेन ' तरो बले च रोगे च ' इति मेदिनी ॥ * ॥ तरसा सद्यः । प्रमथ्य निर्जित्य । जरासंधस्य मुख्यत्वेऽपि शाल्वादित्वं शाल्वस्यैव प्रथमं युद्धप्रवृत्त्येति ज्ञेयम् । तच्च हरिवंशे व्यक्तम् । पक्षगान् सहायान् । ' ताक्ष्यौं कश्यपसौपर्णौ ' इति कोशात् ॥ १७ ॥ पूर्वमेव तृतीयस्कन्धे । वा अथवा ॥ * ॥ राक्षसेनेति वीरप्रशस्यत्वेन योग्यतैव विवक्षिता । रुचिराननां श्रीकृष्णस्यापि मनोहरमुखीमिति महासौंदर्यमुक्तम् ॥ १८ ॥ सामान्यत आपाततः । विशेषं विस्तारम् ॥ * ॥ प्रकारांतरेण प्राप्तुं शक्याया अपि हरणलीला कौतुकार्थैवेति तत्त्वम् ॥ १९ ॥ माध्वीर्मधुराः ' माध्वी मधुरमद्ययोः ' इति निरुक्तिः । शृण्वानः आर्षत्वाच्छानच् ॥ * ॥ कथारूपेण सुखसाध्या अपि पुण्याः सर्वधर्ममूलरूपाः । को धर्मार्थी तावच्छृण्वंस्तृप्येत । तथा माध्वीः परममधुररसरूपाः कोऽर्थार्थी शृण्वंस्तृप्येत । तथा लोकमात्रस्य मलस्य पापाद्यविद्यातद्दोषस्य हंत्रीः को मोक्षार्थी शृण्वंस्तृप्येत । तथा नित्यनूतनाः ' सतामयं सारभृताम् ' इत्यादिन्यायेन प्रतिपदं प्रोन्मीलत्प्रेमानन्ददाः को वा भक्त्यर्थी शृण्वंस्तृप्येत । शृणुवान् श्रवणमात्रं लभमानः श्रुतज्ञः यदि तत्तत्तात्पर्यवेत्तेत्यर्थः । अबधिरमात्रो वा ॥ २० ॥ तस्य भीष्मकस्य ॥ * ॥ ' कन्यका तु वरानना ' इति पाठेऽपि तदेव तात्पर्यम् ॥ २१ ॥ तन्नामतो निर्दिशति—रुक्मीति । अग्रजो ज्येष्ठः । एषां रुक्म्यादीनाम् ॥ * ॥ अनंतर इति सर्वत्रान्वेति क्रमजातत्वविवक्षया । सती रूपादिगुणैरुत्तमा ॥ २२ ॥ सा रुक्मिणी । रूपं स्वरूपम्, वीर्यं प्रभावः, गुणा भक्तवात्सल्यादयः, श्रियोऽलौकिकसंपदः । तं श्रीकृष्णम् । गृहागतैर्नारदादिभिः ॥*॥ श्रीः संपत् । वीर्यस्य गुणांतर्गतत्वेऽपि पृथगुक्तिः क्षत्रियत्वेन परमानंदप्रदत्वात् । रूपादीनां पूर्वपूर्वाधिक्यमूह्यम् । उप समीप एव श्रुत्वा । कथम्—पितुर्गृहमागतैः सर्वैरेव गीयमानाः कविभिर्गीततया निबद्धत्वात्प्रीत्या मधुरस्वरेणोच्चैः कीर्त्यमानत्वात् । सदृशं योग्यम्, आत्मनस्तादृशत्वात् ॥ २३ ॥ तां रुक्मिणीम् । लक्षणानि सौभाग्यचिह्नानि । तदुक्तमनंगरंगे—" नीलांभोरुहपत्रकांतिरथ वा स्वर्णप्रभा

१ पाठान्तरमेतत् । २ 'तपोवीर्य—'इति पाठे तप ऐश्वर्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बंधूनामिच्छतां दातुं कृष्णाय भगिनीं नृप ॥ ततो निवार्य कृष्णद्विड्रुक्मी चैद्यममन्यत ॥२५॥ तदवेत्यासितापांगी वैदर्भी दुर्मना भृशम् ॥ विचिंत्याऽऽप्तं द्विजं कंचित्कृष्णाय प्राहिणोद् द्रुतम् ॥ २६ ॥ द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः ॥ अपश्यदाद्यं पुरुषमासीनं कांचनासने ॥ २७ ॥

चैद्यममन्यत—तस्या वरमित्यर्थः ॥ २५ ॥ अवेत्य ज्ञात्वा । असितापांगी सुनीलकटाक्षा । कृष्णाय कृष्णमानेतुं प्रेषयामास ॥ २६ ॥ प्रतीहारैर्द्वारपालैः ॥ २७ ॥

भास्वरा भृंगीनीलशिरोरुहा शशिमुखी सारंगशावेक्षणा । स्याद्यस्यास्तिलजप्रसूनसदृशी नासा सुदन्तावली सुश्रोत्रा पिकभाषिणी च जलजग्रीवाथ बिम्बाधरा ॥ चक्राद्यंकितशोणपाणिचरणा क्षामोदरी स्वल्पभुग्रंभास्तम्भमनोरमोरुयुगला श्रोण्या बृहत्यान्विता । नाम्या चातिगभीरया गजगतिः शांताल्पनिद्रालसा शीलाढ्या सुकुमारिका नरवरैः कन्या विवाह्या शुभा ॥ " इति ॥ * ॥ बुद्धिः परमार्थविचारः, लक्षणं स्वीयभगवल्लक्ष्म वल्लक्ष्म औदार्यं वदान्यत्वं कुलीनत्वादिमहत्त्वं वा, शीलं सुस्वभावः, गुणाः सौकुमार्यसौरम्यादयो लज्जादयश्च, तैराश्रियत इत्याश्रयः आश्रयणं यस्यामिति वा । च अपि । कृष्णः सर्वचित्ताकर्षकगुणो भगवानपि । बुद्ध्यादेर्गुणांतर्गतत्वेऽपि पृथगुक्तिस्तत्तद्विशेषाभिप्रायेण । अत एव सदृशीम् । अत्र च चरणचिह्नादिलक्षणानां सादृश्यं दक्षिणवामविपर्ययेणेति गम्यते, स्त्रीपुरुषाणां सामुद्रिकादौ तथा प्रशस्तत्वात् । बुद्ध्यादीनां पूर्वोत्तरानुक्रमाभावः सादृश्ये सर्वेषामेव प्राधान्यापेक्षया सम्यग्युद्धहरणादिनोद्वोढुं मनो दधे निश्चिकाय, सदाऽचिंतयद्वा । अथ वा—सदृशीं तादृशबुद्ध्यादिभिर्लक्षणैः राधायैकात्मत्वादिति भावः । अत एव मनोदधे एतावन्तं कालं मनोऽपिदध इति भावः ॥ ॥ २४ ॥ बंधूनां पित्रादीनाम् । ततः कृष्णात् । कृष्णद्विट् जन्मांतरीयसंस्कारवशेन कृष्णविरोधी । इत्यर्थ इति—किममन्यतेति साकांक्षत्वाद्वरमिति शेषः कार्य इत्याशयः ॥ * ॥ बन्धूनां पित्रादीनाम्, अनादरे षष्ठी । एवं मुनींद्रेण भीष्मकस्य साधुत्वमेव दर्शितम् । ततस्तस्मात्कृष्णात्, भगिनीदानं बंधूना निवार्य । हे नृपेति—नृपत्वाभिमानेन तमनृपं मत्वेति भावः ॥ २५ ॥ तत् रुक्मिहार्दम् । आप्तं विश्वस्तम् " आप्तः प्राप्ते सत्यवाचि विश्वस्ते चान्यलिंगकः " इति निरुक्तिः । कृष्णायेति चतुर्थी " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति सूत्रात् ॥ * ॥ असितापांगीति कातर्येण तन्मालिन्यातिशयस्मरणात्[1] । यद्वा—असिते श्रीकृष्णे तद्वर्त्मनि अपांगं यस्याः सा । अत एव विचिंत्य लज्जादिपरित्यागेन स्वयमेव कर्तव्यं तत्सहायं च निश्चित्य । यद्वा—झटित्येव भ्रात्रादिभिर्मम दुर्विवाहे निश्चयः कृतस्तत्राद्यपर्यंतं तेन तु योगिनाऽपि सर्वं ज्ञात्वापि यदनुसंधानं न कृतं तत्कुत्राप्यन्यत्र तस्य परमासक्तिर्भवेत्, श्रूयते च गोकुले तस्य परमप्रेयस्यः, अतो निजजनन्यादिषु तदेकवरणं विना निजमरणादिकं श्रावितमप्यकिंचित्करम्, किन्तु तस्मिन्नेव तच्छ्रावितं कथं चित्सिद्धिकरम्, यतस्तेन गुणिशेखरेण प्रपन्नजनमात्रदुःखाऽसहिष्णुतया स्वदुःखमपि संव्रियत इति च श्रूयते यथा सैरंध्रीप्रसंगे । तस्मान्मया लज्जादिकं परित्यज्य दूतः संदेशश्च विधेय एव, यदि च तथापि तेन नांगीक्रियेय तदा प्रथममेव प्राणाञ्जह्यामिति विचार्य ॥ २६ ॥ स रुक्मिणीप्रेषितविप्रः ॥ * ॥ स दूतः । अभि आभिमुख्येनैव न तु भ्रांतिवक्रगत्या, एत्य प्राप्येति दैवानुकूल्यं दर्शितम् । प्रतीहारैरिति बहुत्वमेकैकशः । क्रमेण प्रवेशनेन द्वाराणां बाहुल्येन तेषामपि बाहुल्यात् । प्रकर्षेण स्तुत्यादिना । मार्गदर्शनेनांतः प्रवेशितः सन् । आद्यं सर्वांशिनम् । पुरुषं श्रीकृष्णमित्यर्थः । काञ्चनासन इति श्यामसुंदरस्याधिकशोभा सूचिता ॥ २७ ॥

१ दुर्मनस्त्वेन स्वाभाविकनीलिमकज्जलाविलत्वादिहेतौ रसपोषाभावाद्वेत्वन्तरानुधावनमेतदित्यावूह्यं सुधीभिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् ॥ उपवेश्यार्हयांचक्रे यथात्मानं दिवौकसः ॥ २८ ॥ तं भुक्तवंतं विश्रांतमुपगम्य सतां गतिः ॥ पाणिनाऽभिमृशन्पादावव्यग्रस्तमपृच्छत ॥ २९ ॥ कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः ॥ वर्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥३०॥ संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित् ॥ अहीयमानः स्वाद्धर्मात्स ह्यस्याखिलकामधुक् ॥ ३१ ॥ असंतुष्टोऽसकृल्लोकानाप्नोत्यपि सुरेश्वरः ॥ अकिंचनोऽपि संतुष्टः शेते सर्वांगविज्वरः ॥ ३२ ॥

आत्मानं श्रीकृष्णम् ॥ २८ ॥ अभिमृशन् शनैः संमर्दयन् ॥ २९ ॥ ३० ॥ स धर्मोऽस्य ब्राह्मणस्याखिलकामदोग्धा भवति । यद्वा स ब्राह्मणोस्य विश्वस्याखिलकामधुगिति ॥ ३१ ॥ लोकानाप्नोति लोकाल्लोकांतरं पर्यटति । नैकत्र निर्वृतस्तिष्ठतीत्यर्थः । नाप्नोतीति पाठे सुरेश्वरोऽपि भूत्वा लोकान्नाप्नोत्युत्तमलोकान्प्राप्तोऽप्यप्राप्त इव क्लिश्यतीत्यर्थः । शेते सुखमास्ते इत्यर्थः । तदेवाह—सर्वेष्वंगेषु वाक्पाण्यादिषु विज्वरस्तापरहितः ॥ ३२ ॥

तं विप्रम् । अवरुह्योत्तीर्य । देवा यथा श्रीकृष्णं पूजयन्ति तथा तं कृष्ण इत्यर्थः ॥ * ॥ दृष्ट्वा दूरादेवावलोक्य । अर्हणे हेतुः—ब्रह्मण्यदेवः सर्वाराध्योऽपि ब्रह्मण्यो ब्राह्मणभक्तः, सौशील्यात्तादृश इत्यर्थः । यथेति दृष्टान्तेन परमभक्तिं बोधयति ॥ २८ ॥ तं विप्रम् । अव्यग्र एकाचित्तः " व्यग्रोऽनेकमनोवृत्तौ सक्तेग्ररहितेऽन्यवत् " इति धरणिः ॥ * ॥ अव्यग्रः स्वस्थचित्तः सन्नपृच्छत् । यतः सतां सद्धर्माणां गतिः प्रथमाश्रयः ॥ २९ ॥ नातिकृच्छ्रेण सुखेन ॥ * ॥ द्विजवरेषु तच्छ्रेष्ठेष्वपि श्रेष्ठः । तादृशत्वे कारणान्येव पादोनचतुर्भिर्दर्शयंस्तेषां मूलमादौ सदयप्रश्नपूर्वकं स्थापयति—धर्म इति, यज्ञादिः । वृद्धानां प्राचीनद्वादशस्वयंभ्वादिभक्तानामाधुनिकानां स्वगुरुप्रभृतीनां संमत इति धर्मस्य तावच्छुद्धता वर्तत एव, किन्तु कृच्छ्रेण नातिकृच्छ्रेणानतिदुःसंपादत्वेन वर्तत इत्येव पृच्छयत इत्यर्थः । दुःखं विना धर्माऽसिद्ध्या सुखेनेत्यनुक्तिः, अतिदुःखस्य चानभीष्टत्वादति शब्दः, स च वृत्त्यादेः संतताऽप्राप्यत्वादिकं बोधयति । ननूद्यमे कृते कथं तत्स्यात्तत्राह—सदा प्राप्त्यभावेऽपि संतुष्टमनस इति ॥ ३० ॥ न हि धर्मो ब्राह्मणस्यैव कामधुग्भवत्यपि तु स्वानुष्ठातृमात्रस्येत्यरुच्याह—यद्वेति । " यदृच्छालाभसंतुष्टविप्रार्चाऽखिलकामधुक् " इत्यादिपुराणात् ॥ * ॥ तत्स्तुत्यर्थं संतोषमेव स्तौति—संतुष्ट इति । यर्हि तर्ह्येवाहीयमानोऽभ्रश्यत् । हि एव । स एव । न त्वन्यः ॥ ३१ ॥ निर्वृतो सुखी । इत्यर्थ इति—लोकान्मनुष्याल्लोकांतरं मनुष्यांतरम्, इतः किञ्चित्प्राप्स्यामीतः किंचिदितीच्छयेति भावः । ' लोको जनेऽपि भुवने ' इति मेदिनी । सुरेश्वर इन्द्रः । इत्यर्थ इति—" इच्छति शती सहस्रं सहस्राप्तो लक्ष्मीहते कर्तुम् । लक्षाधिपश्च राज्यं राज्येशश्चक्रवर्तित्वम् ॥ चक्रधरोऽपि सुरत्वं सुरत्वलाभे तु सुरपतित्वं हि । सुरपतिरूर्द्ध्वगतित्वं तथापि न निवर्तते तृष्णा ॥" इति गारुडोक्तेरिति भावः । इत्यर्थ इति—दुःखितस्य निद्रानुपलब्धेरिति भावः । तदेव सुखम् ॥ * ॥ अन्वयव्यतिरेकाभ्यां तदेव दर्शयति—असंतुष्ट इति । असकृदिति पुनःपुनरभी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः शांतान्नमस्ये शिरसाऽसकृत् ॥ ३३ ॥ कच्चिद्वः कुशलं ब्रह्मन्राजतो यस्य हि प्रजाः ॥
सुखं वसंति विषये पाल्यमानाः स मे प्रियः ॥ ३४ ॥ यतस्त्वमागतो दुर्गं निस्तीर्येह यदिच्छया ॥ सर्वं नो ब्रूह्यगुह्यं चेत्किं कार्यं करवाम ते ॥ ३५॥
एवं संपृष्टसंप्रश्नो ब्राह्मणः परमेष्ठिना ॥ लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ॥ ३६ ॥ रुक्मिण्युवाच ॥ श्रुत्वा गुणान्भुवनसुंदर शृण्वतां ते निर्विश्य
कर्णविवरैर्हरतोंगतापम् ॥ रूपं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताऽविशति चित्तमपत्रपं मे ॥ ३७ ॥

स्वलाभः स्वत एव प्राप्तो लाभ आत्मलाभो वा तेन संतुष्टान्पूर्णान्साधून् स्वधर्मनिष्ठान् ॥ ३३ ॥ यस्य राज्ञो विषये देशे ॥ ३४ ॥ यतः स्थानात्। यदिच्छया यत्कार्येच्छया। दुर्गं समुद्रम् ॥ ३५ ॥ संपृष्टः संप्रश्नः प्रष्टव्योऽर्थो यं सः । परमेष्ठिना परमेश्वरेण । बंधूनामनभिप्रेतं रुक्मिणश्चेष्टितमित्यादि सर्वम् ॥ ३६ ॥ रुक्मिण्या स्वयमेकांते लिखित्वा दत्तपत्रिकाम् । मुद्रामुन्मुच्य कृष्णाय प्रेमचिह्नामदर्शयत् ॥ ब्राह्मणः श्रीकृष्णानुज्ञया वाचयति । श्रुत्वेति । अयमर्थः। हे अच्युत । हेभुवनसुंदरेत्यौत्सुक्यं द्योतयति । क्व तव महिमा । क्व चाहं रूपकुलशीलादियुक्तापि । तथाऽप्यपगता त्रपा यस्मात्तन्मे चित्तं त्वय्याविशत्यासज्जते । तत्कुतस्तत्राह । शृण्वतां कर्णविवरैरंतः प्रविश्यांगतापम् । अंगेति पृथक् संबोधनं वा । हरतस्तव गुणान् श्रुत्वा तथा दृशिमतां चक्षुष्मतां दृशामखिलार्थ

ष्टसिद्धावपि संतोषानुदयात् ॥ ३२ ॥ स्वत इति तस्यार्थाश्रयणगौरवादर्थांतरमाह—आत्मेति । तेनात्मलाभेन । पूर्णास्तृप्तान् ॥ * ॥ एवं संतुष्टिमात्रेण स्वयं सुखी स्यात्तदनुगतैश्चान्यैर्गुणैः सर्वान्सुखयन्परमपूज्यः स्यादित्याह—विप्रानिति । बहुत्वं प्रत्येकनमस्कारविवक्षया । शांतान् रागद्वेषादिरहिताँस्तत्त्वनिष्ठान्वा । एषामुत्तरोत्तरस्मिन्कैमुत्यं श्रैष्ठ्यं चोह्यम् । शिरसा न तु वाङ्मात्रेण, तत्रासकृत् । यद्वा—स्वस्य मम लाभेन संतुष्टान् । तथा चैकादशे—'मया संतुष्टमनसः' इत्यादि । यतः साधून् मद्भक्तान् 'साधवो हृदयं मह्यम' इत्यादि नवमे । इत्येवं विशेषणानां व्यतिक्रमेण हेतुत्वादिकं ज्ञेयम् । अयं भावः—भवानीदृश एव काप्यपेक्षा नास्त्येव तथाप्यागमनेन यन्मामनुजग्राह तेनाहं वशीकृतस्त्वदाज्ञां यत्नतः संपादयिष्यामीति ॥ ३३ ॥ "नीवृज्जनपदो देशो विषयस्तूपवर्तनम्" इत्यमरः । स राजा ॥ * ॥ एवमतिकृच्छ्रसाध्यत्वेऽपि संतोषात्तस्य धर्मसिद्धिं मत्वापि तद्विधेष्वतिकृच्छ्रस्यानभीष्टतया तदुपगमहेतुं राजानुग्रहं पृच्छति—कच्चिदिति । कुशलम् उपद्रवो न स्यात्साहाय्यञ्च भवेदित्यर्थः । ब्रह्मन्निति वेदवित्त्वेन राज्ञां सर्वथा पूज्यस्त्वमिति भावः ॥ ३४ ॥ दुर्गं दुःखेन गम्यम् "दुर्गं दुःखाब्धिराज्यांगकठिनेषु गिरौ तथा" इति निरुक्तिः ॥ * ॥ अगुह्यं चेत्सर्वं ब्रूहीति विनयात् । किं करवाम, तदाज्ञापयेति शेषः ॥ ३५ ॥ तस्मै परमेष्ठिने । "परमेष्ठी ब्रह्मविष्णुशिवस्वामिध्रुवेषु च । द्विजोत्तमे स्वयम्भूश्च तथैव परिकीर्तितः ॥" इति कोशसारे ॥ * ॥ परमेष्ठिनेति सर्वज्ञत्वमुक्तम् । तथापि प्रश्ने हेतुः—लीलेति । क्रीडार्थं प्रकटितमनुष्यदेहेन तादृश्या एव मनुष्यक्रीडाया योग्यत्वादित्यर्थः । यद्वा—लीलाभिर्गृहीतः सेवितो देहो यस्य, स्वेच्छया लीलावेशादिति भावः । सर्वमागमनकारणं धर्मनिष्पत्त्यादिकं चावर्णयत् ॥ ३६ ॥ मुद्रां लाक्षादिना योगम् । उन्मुच्यापाकृत्य । स्वाशयं प्रकाशयति—अयमर्थ इति । यस्माच्चेतसः । तत् चित्तावेशनम् । न केवलमंगतापहरमेव किन्त्वन्तस्तापहरमपि हरिगुणाऽनुश्रवणमित्यस्वारस्यादाह—अंगेति ॥ * ॥ रुक्मिण्युवाचेत्याह पत्रद्वारेति स्वामिचरणाः, परन्तु तस्य 'इत्येते गुह्यसंदेशाः' इत्युक्तेः केवलं संदेशहरत्वमेव प्रतीयते ॥ अत्र **तोषिणी**—"नौमि श्रीरुक्मिणीवाणीं स्वत्राणीबुद्धिसिद्धये । सर्वाकर्षकनामापि चकृषे स द्रुतं यया ॥" तत्राच्युतेत्यस्य भुवनसुंदरेत्यस्य च भावः—क्वेत्यादि । एवं तु पदद्वयमिदं यद्यपि दैन्यप्रतिपादकं तथापि दैन्यस्याप्यौत्सुक्यगर्भत्वादौत्सुक्यमित्युक्तम् । अंगतापमिति मनःप्रवेशेऽप्यंगोद्भवमपि तापं हरति, किमुत मनउद्भवमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का त्वा मुकुंद महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यम्॥ धीरा पतिं कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोऽभिरामम् ३८॥

लाभात्मकं रूपं च श्रुत्वेति ॥ ३७ ॥ अहो कुलकन्यानामिदमतिधाष्टर्यमिति मा शंकीरित्याह । का त्वेति । हे मुकुंद हे नृसिंह नरश्रेष्ठ का नाम कन्या कुलवती तथा

भावः । लाभात्मकं लभ्यालभ्ययोरभेदाभिप्रायेण । च च लाभस्यावश्यकताविवक्षयेति । यद्वा—परमकुलीनकन्यादित्वात्प्रथमतः स्वभुवनेषु परमवैकुंठपर्यंतेषु प्राकृताऽप्राकृतलोकेषु प्रकृत्या चाकृत्या च शोभमान सर्वाऽऽकर्षकमाधुर्येत्यर्थः । तत्रापि हे अच्युत नित्यमेव तादृश, तव प्रकृतिशोभाभूतानां गुणानामाकृतिशोभाभूतानां रूपाणां च स्वरूपाऽभिन्नत्वादिति भावः । एतद्विरोधिविषयैव श्रुत्वा गुणानिति, रूपमिति च, गुणरूपे एवोक्ते न तु स्वरूपमपि तद्वत्पृथगिति तदेवं भुवनसुंदरादित्वं स्वभावत एव तस्याः स्फुरतीत्युन्नेयम्, लक्ष्मीत्वेन प्राचीनसंस्कारसंभवात्, श्रवणादिविशिष्टत्वेनानुक्तत्वात्, श्रुत्वा गुणानित्यादिना श्रवणविशिष्टत्वेन तूक्त्यन्तरात्, पौनरुक्त्यात्, आविशतीत्याशब्दस्वारस्याच्च । ततः प्राचीनसंस्कारतोऽश्रुतेऽपि त्वयि मम चित्तं विशत्येव, श्रुते तु विशेषत एवेत्याह—ते तव गुणान् सर्वसुखदत्वादींस्तेष्वेकमेकमपीत्यर्थः । रूपं कांत्यवयवसौष्ठवं च श्रुत्वा श्रवणपथप्राप्तिमात्रेण विशेषतोन्तर्भूय मम चित्तं त्रपारहितं सत् आ विशेषतः संधानांतरराहित्येन त्वयि विशति मग्नं भवति । कुलीनकन्यायास्तावदसंगतं पुरुषं मनसाऽपि प्रवेष्टुं त्रपा जायते तत्र तु सा त्यक्तैव, संप्रति साक्षादपि प्रार्थनं क्रियते । अहो तव सोऽयं सर्वाकर्षणस्वभाव एवेति । मम वा को दोष इति भावः । ननु स्वमनः संयम्यतां तत्राप्याह—अच्युतेति , त्वमपि तस्माच्च्युतो न भवसि कथमपि त्यक्तुमशक्यत्वादिति भावः । तदेवं त्वय्येव निवेदयितुं युक्तमिति च सर्वाकर्षकताव्यंजकसर्वसुखदत्वपुरस्कृतान्गुणानेव विशिंषंती तदेकरतेः स्वस्याकर्षणादौ कैमुत्यमापादयति—शृण्वतामिति । श्रवणेंद्रियुक्तमात्राणां तत्रापि श्रोतुं प्रवृत्तमात्राणामित्यर्थः । कर्णविवरैर्निर्विश्य तेषां विषयात्मकत्वाद्गुणानां च शब्दवाहनत्वात्पुरुषप्रयत्नाऽभावेऽपि तद्द्वारा स्वत एव निःशेषेण प्रविश्यांतरमवगाह्य तापमात्रं हरतस्तच्छीलानित्यर्थः । तान्छ्रुत्वा मम चित्तं त्वय्याविशति—अहो योऽसावेक एव तादृशानां गुणानामाश्रयः स एव साक्षादेवाश्रयितुं योग्य इत्यौत्सुक्येन सदा चिंतयति, तथा तादृशे त्वनन्यरतावत्यंतायुक्तत्वात्कथञ्चिज्जातमपि तापं शीघ्रमेव ते हरिष्यंतीत्याशां वर्द्धयतीति सविशेषार्थः । एवं गुणानिति प्रकृत्या शोभनता व्यंजिता । आकृत्या रूपमिति पूर्ववत्तदपि विशिनष्टि । दृशामिति दृगिंद्रियमात्रयुक्तानां यादृशस्तासामाखिलार्थस्य लाभः । सर्वमाधुर्यस्यानुभवो यस्मिन्, यदंतर्भूत इत्यर्थः । अतस्तद्विनाभूतानामांध्यनिर्विशेषतैवेति भावः । तच्च श्रुत्वा मम चित्तं त्वय्याविशति, सदैव साक्षादनुभवितुं वांछतीति सविशेषार्थः। रूपस्य पश्चादुक्तिस्तदहो चक्षुर्मात्रगम्यमपि साक्षादिवानुभवामीति क्रमेण निजभावोत्कर्षज्ञापनाय, तथा रूपस्य चक्षुषाप्यनुभवः स्यादित्याधिक्यज्ञापनाय च । अत एव गुणानां तापहरणत्वमेवोक्तम्, रूपस्य तु अखिलार्थलाभत्वमिति ॥ अत्र **विश्वनाथः**—नन्वदृष्टश्रुतचरीं नृपकन्यां त्वां मह्यं वराय पत्रिकां स्वविवाहाय लिखंतीं निर्लज्जां कथमहमंगीकरोमीति चेत्—सत्यम्, अहमपि स्वदुर्वशस्य स्वचित्तस्य स्वभावमेवावेदयामि तच्छ्रुत्वाऽपेक्षस्वोपेक्षस्व वानुगृहाण निगृहाण वा, तत्र खलदुर्लभस्य तव लाभालाभाभ्यां सदा सुखं जीविष्यंत्या अद्य श्वो वा मरिष्यन्त्या मम न भयलज्जे इत्याह—श्रुत्वेति सप्तभिः । हे अच्युत तव गुणान्रूपं च श्रुत्वा मम चित्तमपत्रपं विगतलज्जं सत्त्वय्याविशतीति मम चित्तस्य निस्त्रपकरणे तव गुणरूपे एव हेतू । मम च कर्णावित्युभयोरेव दोष इति न त्वयाहमुपालंभनीया नापि मया त्वमुपालंभनीय इति भावः । हे अच्युतेति—मच्चित्तं निस्त्रपीकृत्यापि त्वं तस्माच्च्युतो न भवसि न जाने किमपरं चिकीर्षसीति भावः । मच्चित्तं च निस्त्रपीभूयापि त्वय्येवाविशति, न जाने किमपरं बुभूषतीति भावः । नन्वन्यस्यापि पुरुषस्य गुणरूपे प्रकृष्टे भवत एवेति स किं न दूष्यते तत्र मैवं वाच्यमिति वदंती प्रथमं गुणान्विशिनष्टि—शृण्वतां श्रवणवतां कन्याजनानां कर्णविवरैर्निर्विश्याङ्गतापम् अंगयोः स्थूलसूक्ष्मयोरुभयोरेव तापं समस्तमेव हरतो नाशयत इत्येवंभूता गुणाः कस्यान्यस्य पुंसो वर्तन्ते तं वदेति भावः । रूपं विशिनष्टि—दृशिमतां चक्षुष्मतां जनानां दृशां दृगिन्द्रियाणामखिला अन्यूनाः श्रेष्ठा येऽर्था विषया नीलमणिनीलोत्पलादीनां कनककुंकुमादीनां चंद्रकांतचंद्रादीनां च ये वर्णा नीलपीतरक्तशुक्लास्तेभ्यः सकाशादपि महामाधुर्यसंबंधी लाभो यत्र तद्रूपं त्वदीयगात्ररसनाधरनखादिसौंदर्यं तस्मादेवंभूतं रूपं कस्यान्यस्य वर्तत इति भावः । अत एवानुरूपं संबोधयति—हे भुवनसुंदर भुवनेषूर्ध्वाधोमध्यवर्तिषु प्राकृताप्राकृतेषु लोकेषु सुंदर प्रकृत्या चाकृत्या च शोभमान ॥ ३७ ॥ स्वयमाशंक्य समाधत्ते—अहो इत्यादिना । इदं स्वयमेव वरान्वेषणादिकम् । अतिधाष्टर्यमत्यकार्यम् । कुलवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्मे भवान्खलु वृतः पतिरंग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि ॥ मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ॥३९॥

**महती पुरुगुणोदारा तथा धीरा धृतिमती त्वां पतिं न वृणीत । मय्येव केयं दोषशंकेति भावः । कथंभूतम् । कुलशीलादिभिरात्मनेव तुल्यं निरुपममित्यर्थः । द्रविणं द्रव्यसं
पत् । धाम प्रभावः । तथा नरलोकस्य मनसामभिरामोऽभिरमणं यस्मात्तम् । किं च काले विवाहावसरे ॥ ३८ ॥ हे विभो तत्तस्मान्मे मया भवान्खलु पतिर्वृतः आत्मा
च भवतोऽर्पितः अतस्त्वमत्रागत्य मां भवतो जायां विधेहि । विपक्षे बाधकं द्योतयंत्याह । वीरभागमिति । वीरस्य तव भागं मामाराच्छीघ्रमेत्यागत्य चैद्यो**

सुकुलोत्पन्ना । पुरुगुणैर्बहुगुणैः 'नीलांभोरुहपत्रकांति—' इत्याद्युक्तैरुदाराऽधिका । धीरा " धीरो धैर्यान्विते स्वैरे धीरः स्यात्रिषु पंडिते " इति मेदिन्युक्तेर्धीमती धृतिमती च । इति भाव इत—संसृति
मुक्तिदातारं निखिलगुणैर्नरश्रेष्ठं निजजनोक्तिपालनायातिक्लिष्टकारिणं वा का त्रिलोक्यन्तर्गता स्त्री या न वृणुत इति तात्पर्यम् । इत्यर्थ इति—ईश्वरांतरासंभवादिति भावः । अन्यदाह—तथेति । अभिरामो बह्वानंदः ।
" अत्यानंदे स्त्रीवृते चाभिरामस्त्वतिसुंदरे " इति निरुक्तिः । समये सुभगप्राप्तिर्दुर्लभेत्याह—किंचेति ॥ * ॥ नन्वस्तु मल्लक्षणः पुरुष एव त्रिजगत्यस्मिन्निरुपमः किं कन्यापि श्रोत्रनेत्रवती जगत्यस्मिंस्त्वमेवैकासि
यत एवमन्या निर्लज्जा नेति तत्राह—केति । हे मुकुंद मुखे कुंदवद्धासो यस्येति मामेव हसितुं प्राप्तावसरेत्यर्थः । का महती गुगरूपवती धीरा बुद्धिमती कुलवती त्वां पतिं न वृणीत । तेन कुरूपा दुःशीला दुर्बु
द्धिरनभिजातैव, अशृण्वती वा त्वां न वृणीतेति भावः । कीदृशम्—कुलादिभिरात्मनैव तुल्यम् । काले स्वसमय इत्यन्या अपि बह्वय एव कन्याः स्वसमय एव त्वां वरिष्यन्ति, न त्वधुनैव मत्समय इति भावः । हे नृसिंह
नरश्रेष्ठ, हे सिंहवद्दुर्वशेति न मे त्वद्वशीकारे कापीच्छास्तीति भावः । तदपि नरलोकमात्रस्यैव मनोऽभिरमयसीति मन्मनसः कोऽपराध इति भावः ॥ अत्र **तोषणी**—नन्वेतच्छ्रवणेनान्या हसिष्यंतीत्याशंक्यैताः प्रति सेर्ष्यं
तं प्रति सदैन्यमाह—का त्वेति । हे मुकुन्द सर्वेषां सर्वदुःखविमुक्तिपूर्वकपरमसुखद । हे नृसिंह सर्वोर्द्ध्वानंतगुणरूपत्वात्प्राकृताप्राकृतसर्वपुरुषश्रेष्ठ, हे स्वभावेनैव तत्तद्रूपेत्यर्थः । तादृशत्वं च दुर्ज्ञेयमिति चेत्प्रकटप्रलीलया च
कुलादिभिरात्मतुल्यमसमोर्द्ध्वं तथा मनोभिरामं सर्वलोकमनःसुखदं त्वां का स्त्रीजातिः पुरुषमात्रे लुब्धस्वभावा पतित्वेन न वृणीत, तत्र कन्या कुलवती महतीत्युत्तरोत्तरत्वाभावे सति क्रमान्नितरां न वृणीतां नाम स्वायोग्यत्व
मननात्तत्तद्भावेऽपि धीरा का न वृणीतापि तु वैदग्ध्यबुद्धिरेव वृणीतेत्यर्थः । तत्र विवाहावसरेपीति धीरत्वाभावस्यातिशायिता लज्जायाश्चात्ययोग्यता व्यंजिता सर्वनाशोपपत्तेः । अथ वा—महती धीरा कुलवती वा या न
वृणीत तत्तदभिमानेन न वृणीत महत्यादिरेव न भवतीत्यर्थः । विवाहावसरेऽपीति तादृशगौणकलमालंब्यापीत्यर्थः । तत्र कुलं सद्वंशावतीर्णत्वं, शीलं दयालुत्ववदान्यत्वादि, वयो नित्यनवयौवनशोभोद्भेदः, कुलस्य सर्वा
धिक्यमत्र तव तत्रोदयादवगतमेव ' अहो अलं श्लाघ्यतमं यदोः कुलम् ' इतिवदिति भावः । सतानां कुलादिमात्राणामुक्तिः प्रेयसीभावयोग्यत्वात् । एवमन्येप्येऽषामंतर्भावेण ज्ञेयाः । ते च यथा शृंगारतिलके—"त्यागी
कुलीनः कुशलो रतेषु कल्पः कलावित्तरुणो धनाढ्यः । भव्यः क्षमी स्थिररुचिः सुभगोऽभिमानी स्त्रीणां मतः सुभगवानिह नायकः स्यात् ॥" इति । भव्यः सुवेषः, सुभगः सुंदरः, स्थिररुचिः स्थिरप्रेमा । अत्र
शीलेनैव त्यागित्वं क्षमित्वं स्थिररुचित्वञ्च । विद्यया रतिकुशलत्वं कलावित्त्वं च । रूपेण भव्यत्वं सुभगत्वञ्च । धाम्ना कल्पत्वमभिमानित्वञ्चांतर्भाव्यते । स्पष्टमन्यत् ॥ ३८ ॥ स्वाभिमतज्ञापने सामर्थ्यं द्योतय
न्त्याह—हे विभो अतर्यामिन्नित्यर्थः । यतोऽखिलगुणैर्वरीतुमर्होऽसि तस्माद्धेतोः । भवतोऽत्रेति व्यवहितानंतरयोरपि छंदसि संबंधाभ्युपगतत्वेनेहात्र भवत इति वैपरीत्येन योज्यम् । अत्र भवतस्सर्वपूज्यस्येत्यर्थः । अत्र
भवत इत्यपि विपरिणमय्य तुभ्यमित्यर्थः । अर्पितो दत्त इति । " अयोग्यं दातुमुद्युक्ते पित्रादौ कन्यका स्वयम् । योग्यं पतिं प्रवृण्वीत न च सा दोषभागिनी ॥ " इति वारतांतविः । यतस्तुभ्यमर्पितोऽतो हेतोः ।
अत्र भवतः पूज्यस्यात्मनः । इत्थमकरणेऽयोग्यतामाह—विपक्ष इति । वीरस्य प्रसिद्धशौर्यस्य । भागमर्द्धांगम् "अर्द्धो वा एष यत्पत्नी" इति श्रुतेः । मृग्यन्ते व्याधैरिति मृगाः शशशृगालादयस्तान्मृगान्पातयति भक्षणार्थं मारयतीति
मृगपतिः सिंहः । गां विकृतां वाचं मिनोति क्षिपतीति गोमायुः ' भूरिमायगोमायुमृगधूर्तकाः ' इत्यमरः ॥ *॥ एवमन्यगतेरपि स्त्रियाश्चेन्मम त्वनन्यगतेर्महानेवोभयलोकनाश आपतितः,कदाचिदीश्वरोऽसौ नाप्यवधानं कुर्यादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान्परेशः ॥ आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोऽन्ये ॥ ४० ॥ श्वोभाविनि त्वमजितोद्वहने विदर्भान्गुप्तः समेत्य पृतनापतिभिः परीतः ॥ निर्मथ्य चैद्यमगधेंद्रबलं प्रसह्य मां राक्षसेन विधिनोद्वह वीर्यशुल्काम् ॥ ४१ ॥

माभिमर्शतु मा स्पृशतु । मृगपतेर्बलिं गोमायुवत् । गोमायुः सृगाल इवेति ॥ ३९ ॥ अनेकजन्मकृतैः सुकृतैरिदमेव भूयादिति प्रार्थयते पूर्तेति । पूर्तं कूपादि । इष्टमग्निहोत्रादि । दत्तं हिरण्यादिदानम् । नियमस्तीर्थाटनादिः । व्रतं कृच्छ्रादि ॥ ४० ॥ ननु चैद्याय बंधुभिरर्पितायां त्वयि किमधुना करणीयमित्यपेक्षायामाह । श्वोभाविनीति । हे अजित श्वोभाविनि उद्वहने विवाहे प्रथमं गुप्तोऽलक्षित एवागत्य पश्चात्पृतनापतिभिः परिवृतः संश्चैद्यादिबलं निर्मथ्य प्रसह्य बलाद्वीर्यं प्रभावदर्शनमेव शुल्कं वैवा

किं वा—लज्जयेति व्याकुला सत्युत्तरोत्तरं क्रियात्रयेण स्पष्टमेवाह—तदिति । हे अंग, हे विभो इति मुहुः संबोधनं दैन्येन । आत्मा देहस्वाम्येव किमुत देह इत्यर्थः । भवत इति सम्प्रदानताप्राप्तावपि शेषे षष्ठी । नित्यतदीयत्वाभिमानेनात्यंतदानाऽसंभवात् । अत्र सति भवतो जायां मां विधेहि यथेच्छसि तथा कुर्विति । न च किञ्चिदशक्यमित्याह—हे विभो सर्वसामर्थ्ययुक्तेति । वीरेति—अन्यथा तव वीर्यहानिप्रसक्तिरिति भावः । अत्र टीकायाम् ‘ एत्यागत्य ’ इत्युत्तरश्लोकगतस्य टीका प्रथमलेखकभ्रमाल्लिखितेति लक्ष्यते मूलाभावात् । अत आरात् समीपे वर्तमानश्चैद्य इत्यागमनशैघ्र्याय । अन्यथा ते लज्जापि स्यादिति दृष्टान्तेनाह—गोमायुवदिति । हे अम्बुजाक्षेति सतततत्सौन्दर्यस्फुरणस्वाभाव्यात्त्वद्दृष्ट्या मम तापं शमयेति विवक्षातश्च ॥ **विश्वनाथस्तु**—यस्मादेवं तत्तस्मान्मया भवान्पतिर्वृतः प्रथममेव न त्वधुना व्रियसे । आत्मा जीवो देहश्चार्पितः । पत्रीप्रेषणं तु भवन्मनोनिर्द्धारज्ञापनार्थमेव । भवतोंगीकारे सतीमं पालयामि, अनंगीकारे तु ज्वालयामि न तु कस्मैचिदपि ददामि, यदि ब्रह्मापि स्वयमागत्य वदेदिति भावः । किञ्च—आत्मनिवेदनमिदं बलिराजवन्निर्भावमेव न, किन्तु सभावमेवेत्याह—हे विभो भवतो जायां विधेहि, यथा कश्चित्कस्मैचित्किमपि भोज्यं दत्त्वा—इदं त्वया स्वयं भोक्तव्यमेवेति ब्रूते इत्यतो निर्भावात्सभावमात्मनिवेदनं प्रेमस्पर्शित्वाच्छ्रेष्ठमिति ज्ञेयम् । किञ्च—स्वस्यांगीकारमनंगीकारं वा ब्राह्मणं शीघ्रं प्रेष्याहं ज्ञापनीयेत्याह—मेति । वीरस्य तव भागमिमं चैद्यो माभिमर्शतु । मयि त्वदाशया देहमिममदहन्त्यामकस्माच्चैद्य आगत्य यदि स्पृशेत्तत्क्षणमेव त्वदाशायां निवृत्तायां त्वद्विरहाग्निरेवातिप्रज्वलित एनं भस्मीभूतं कुर्यादेव । किन्तु तवाप्रतिष्ठा भाविनीति मे भयमिति भावः । अप्रतिष्ठामेवाह—मृगपतेर्बलिं गोमायुः शृगाल इवेति । अम्बुजाक्षेति—तदानीं त्वन्नयनकमलं ध्यायन्त्या मम तु देहे दह्यमानेपि तापो न भावीति भावः ॥ ३९ ॥ स्वाभिमतमाह—अनेकेत्यादिना । आदिना सत्संगग्रहः । अग्रे जयतीत्यग्रजा, गदा अग्रजा यस्य स तथेत्यनेन सायुधागमनमुक्तम् । आदिना जरासंधादिग्रहः ॥ * ॥ अये महादुर्लभपुरुष त्वं नैकजन्मसुकृतलभ्यस्तस्मात्सामान्यतस्त्वत्प्राप्तिकामनया निष्कामया वा पूर्वपूर्वजन्मसु यदि मया बहूनि सुकृतानि कृतानि तदा तेषामेव फलविशेष एव भूयादिति प्रार्थयते—पूर्तेति । पूर्तेष्टदत्तैर्भगवत्संप्रदानकैः, नियमैस्तीर्थस्नानादिभिः, व्रतैरेकादश्यादिभिः, देवविप्रगुर्वर्चनैर्भगवदर्चनांगैर्यदा मया भगवानलमतिशयेनाराधितस्तदा मानुष्या मे मानुष एव भगवान्गदाग्रज आगत्य पाणिं गृह्णातु, न त्वन्ये नारायणादयोपि देवा मानुषा वेत्यर्थः । दमघोषस्य तत्रादित्वेनोल्लेखस्तु तद्विवाहस्य प्रस्तुतत्वादेव ॥ **तोषिणी** तु—नन्वेतन्महापुण्येनैव लभ्यते इत्याशंक्यानादिजन्मपरंपरापुण्यानि च तदर्थमेव संकल्पयंती संदेशमध्ये तदपि वैयग्र्येण निक्षिपति—पूर्तेति । पूर्तादिभिरर्पितैः । आदिना साक्षाच्छ्रवणादिभिश्च । पूर्तादीनां यथोत्तरमाराधने श्रैष्ठ्यम् । भगवाञ्छ्रीनारायणः । अलमत्यर्थं यद्याराधितस्तर्हि । ननु परमदुर्घटमिदं कथं सिध्यतु, तत्राह—परेशः । कर्तुमकर्तुमन्यथा कर्तुं च समर्थ इत्यर्थः । भगवद्गदाग्रजयोर्भेदोक्तिर्निजाभिरुचितपरममाधुर्यमयनरलीलत्वेन भेदभावनया ॥ ४० ॥ विवाहार्थमागतबहुराजसु पाणिग्रहाऽसंभवसंदेहापनोदार्थमाह—चैद्येत्यादिना । श्वोभाविनीति—श्वः प्रभाते विवाहो भविष्यतीति विचार्य ततोग्र एवागत्येत्यर्थः । विवाहार्थं देयं वैवाहिकदेयम् । अनेन मदुक्तेन ॥ * ॥ निजाऽतिवैयग्र्येण स्वयमेवोपायमप्युपदिशति द्वाभ्याम्—श्व इति । गुप्तः ख्यापितैर्नामदेशभाषांतरैः केनाप्यनुपलक्षितः । सम्यगेत्यांतः प्रविश्येत्यर्थः । पृतनानां पतिभिरिति सैन्यस्य तत्पतीनां च बाहुल्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतःपुरांतरचरीमनिहत्य बंधूंस्त्वामुद्वहे कथमिति प्रवदाम्युपायम् ॥ पूर्वेद्युरस्ति महती कुलदेवियात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ॥४२॥ यस्यांघ्रिपंकजरजःस्नपनं महांतो वांछंत्युमापतिरिवात्मतमोऽपहत्यै ॥ यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून्व्रतकृशाञ्छतजन्मभिः स्यात् ॥ ४३ ॥

हिकं देयं यस्यास्तां माम् । अनेन राक्षसविधिनोद्वहेत्युपदेशरहस्यम् ॥ ४१ ॥ ननु भवतु शिशुपालादिबलप्रमथनमंतःपुरमध्यगतायास्तव हरणे त्वद्बंधुवधोऽपि प्रसज्येतेत्यत आह । अंतःपुरेति । पुराद्बहिर्वर्तमानां गिरिजामंबिकाम् । अंबिकागृहादेव मम हरणं सुकरमिति भावः ॥ ४२ ॥ ननु किमनेनानर्थकारिणा निर्बंधेन चैद्योऽपि तावत्प्रख्यातगुणकर्मा योग्य एव वर इति तत्राह । यस्येति । हे अंबुजाक्ष यस्य भवतोंघ्रिपंकजरजःस्नपनमात्मनस्तमसोऽपहत्यै उमापतिरिव महांतो वांछंति । तस्य भवतः प्रसादं यर्ह्यहं न लभेय न प्राप्नुयां तर्हि व्रतैरुपवासादिभिः कृशानसून्प्राणान् जह्यां त्यजेयम् । ततः किमित्यत आह । शतजन्मभिरिति । एवमेव वारंवारं जह्यां यावच्छत

मभिप्रेतं, तच्च स्नेहस्वाभाव्येन । तत्र तु हे अजितेति एतादृशप्रेरणसाहसे हेतुरुक्तः । तत्र मगधेशबलस्यापि निर्मथनं चैद्यसहायत्वात् । निर्मथ्येति बलस्य समुद्रत्वं ध्वन्यते । तेन च यथा पूर्वं समुद्रमुन्मथ्य मामुद्धृतवानसि तथाऽद्यापि चैद्यादिबलार्णवमुन्मथ्य मामुद्धरेति । वीर्यशुल्कामिति राक्षसविवाहस्यैव योग्यता, प्रार्थनादिनिरपेक्षता चोक्ता । कार्यसिद्धिस्त्वजितत्वादेव भविष्यतीति ॥ ४१ ॥ पुनराशंक्य समाधत्ते—नन्विति । पूर्वेद्युर्विवाहात्पूर्वस्मिन्दिने । कुलदेवानां कुलपूज्यानां पितॄणां देवानां च यात्रा । नववधूरुपस्थितविवाहा कन्या । "वधूः स्त्री सारिवौषधौ । स्नुषाशटीनवोढासु भार्यापृक्कांगनासु च ॥" इति मेदिनी ॥ * ॥ अतोऽप्यतिव्यग्रा श्वोभाविनीत्यत्र कारणं विवृण्वती पुनर्विशेषतोप्युपदिशति—अंतःपुरस्यापि मध्यप्रकोष्ठान्तश्चरीम् । पूर्वेद्युर्विवाहदिनात्पूर्वस्मिन्दिने । कुलदेवयात्रेति[1] तस्या आवश्यकत्वमुक्तम् । ननु पूर्वेद्युरपि कस्मिन्क्षणे भवेदिति कथं ज्ञेयं तत्राह—महती महावाद्याद्युत्सवेन सा सुव्यक्तैवेत्यर्थः । उपेयात् पूजार्थमंतिके गच्छतीति विधिरस्तीत्यर्थः ॥ ४२ ॥ पुनराशंक्य समाधत्ते—नन्वित्यादिना । निर्बंधेन हठेन 'निर्बंधो हठमुक्तयोः' इति धरणिः । तत्राक्षेपे । महान्तो ब्रह्मेंद्रादयः । अहो अयं महादेवोऽपि भगवत्पदरजो यस्मिँस्तत्र प्रवाहे गंगारूपे स्नपनं सदा करोति, वयं देवाः कथं न तत्कुर्म इतीच्छंति । तस्योमापत्याद्याराध्यस्य आत्मनस्तमसोऽज्ञानस्यापहत्यै नाशाय महान्त एव न तूमापतिरपि, तस्य तु 'ज्ञानं महेश्वरादिच्छेत्' इति स्मृतेरन्येषां ज्ञानदातृत्वेन परमज्ञानित्वम् । तत्पक्षे तु किंभूत उमापतिः—आत्मतमः साक्षाच्छ्रीकृष्णरूपः—प्रकर्षेणात्मा श्रीकृष्णरूप आत्मतमः 'आत्मा सर्वेश्वरः साक्षी' इति कृष्णसहस्रनामस्वात्मशब्दस्य पठितत्वात् । तर्हि स किमर्थं सेवते तत्राह—अपगता हतिर्नाशो यस्याः साऽपहतिर्मर्यादा तस्यै । सा च द्विधा—लौकिकी वैदिकी च । उभयविधैवाऽत्याज्या "श्रुतिस्मृतिपुराणोक्तं लंघयेन्न कदाचन । लंघनात्प्रत्यवायी स्यात्ततोंते नरकं व्रजेत् ॥" इत्युक्तेः । किंच—"यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याऽऽकर्षणक्षमः । तथापि लौकिकाचारं मनसापि न लंघयेत् ॥" इति स्मृतिसारोक्तेः । सा चेत्थं बोध्या—यद्यहं श्रीहरिं न सेविष्ये तर्हि मद्भक्ता अपि तं न सेविष्यन्ते, तेन तेऽधोगामिनः स्युः "हरिभक्तिपरित्यागादन्ते नरकमाप्नुयात्" इत्युक्तेः । यद्वा—तमःप्रवर्तकमपि मामल्पज्ञास्तामसं वदंति तन्निरासायाहमपि हरिभक्तिं सेवे, तेन सर्वे मां शुद्धसत्त्वमेव ज्ञास्यंति । न हि तामसः कदापि हरिं सेवते, हरो न तामस इति ज्ञापनायेत्यर्थः । ततः प्राणत्यागेन । यावत्तव प्रसादः स्यात्तावदेवमेव कुर्यां, यदा कदाचित्तवैव भार्या स्यां, नान्यस्य देवस्यापि । किमु शिशुपालस्येति भावः ॥ * ॥ स्नपनशब्देन रजसां गंगाप्रभवत्वादिना सर्वतीर्थमयत्वं ध्वन्यते । यद्वा—रजसः स्नपनं क्षालनोदकमित्यर्थः । महान्तः श्रीब्रह्माद्याः । आत्मनस्तमस्तमो गुणाधिष्ठातृत्वं तस्या

[1] कुलदेवयात्रेति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मण उवाच ॥ इत्येते गुह्यसंदेशा यदुदेव मयाऽऽहृताः ॥ विमृश्य कर्तुं यच्चात्र क्रियतां तदनंतरम् ॥ ४४ ॥ इति श्रीमद्भागवते० महा० दश० उ० रुक्मिण्युद्वाहे द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ श्रीशुक उवाच ॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः ॥ प्रगृह्य पाणिना पाणिं प्रहसन्निदमब्रवीत् ॥ १ ॥ श्रीभगवानुवाच ॥ तथाहमपि तच्चित्तो निद्रां च न लभे निशि ॥ वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः ॥ २ ॥

जन्मभिरपि तव प्रसादः स्यादिति ॥ ४३ ॥ अत्र यत्कर्तुं करणीयं तद्विमृश्य क्रियतामिति ॥ ४४ ॥ इति श्रीमद्भागवते महा० दशमस्कंध उत्तरार्धे श्री० टीकायां द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ त्रिपंचाशत्तमे गत्वा विदर्भानद्भुतेहितः ॥ रुक्मिणीमहरत्कृष्णो मिषतां द्विषतां बलात् ॥ १ ॥ १ ॥ निद्राया अलाभे कारणांतरम् । वेदेति ।

पहत्यै । उमायाः पतिरिति—यथात्मारामेणापि श्रीशिवेन तद्भक्तिवशतया यत्नेनोद्वोढा सा तथा त्वयाप्यहमुद्वोढव्योति भावः । अतः परममहत्त्वेन त्वमेव योग्यः पतिर्न त्वन्यः कश्चिदिति भावः । तथा परमसौंदर्येणापी त्याह—हे अम्बुजाक्षेति । तस्येति यच्छब्दापेक्षत्वात् । भवदिति छांदस एव षष्ठ्या लुक् । यदि भवतः प्रसादं पत्नीत्वेनाङ्गीकारलक्षणं न लभेय तदा जह्यामिति "हेतुहेतुमतोर्लिङ्" । तत्र जह्यामिति कामप्रवेदने, प्रौढया संभावने च स्यात् । त्यागप्रकारमाह—व्रतकृशान् । शतेति—एवं कृपार्थं दुःखमरणं बोध्यते । यद्वा—स्वत एव त्वदर्थं व्रतैः कृशान्, अधुना त्वत्प्रसादाऽलब्ध्या निर्गच्छतोऽनायासेनैव जह्यामित्यर्थः । इति मरणस्य सुकरत्वमुक्तम् । ततश्चैवं शतजन्मभिरपि स्यात् । व्रतकृशेति पाठे स एवार्थः । शतशब्दोऽयमनिर्णयसंख्यात्वे । अन्यत्तैः । किन्तु स्वस्या नरकन्यालीलामाविश्योक्तिरियम् । यथा—ननु त्वं मे न पत्नी योग्यासीति कथमुद्वहेयमिति चेत्सत्यमेव, यतः श्रीब्रह्मादीनामपि सुदुर्लभ्योऽसि, क्काहं क्षत्रियकन्या, तथापि बहुजन्मसु प्राणपरित्यागेनापि त्वदर्थं यतिष्य इत्याह—यस्येति । वांछत्येव न त्वद्यापि लभते । अतः स्यादिति संभावनायामेव लिङ् । शतजन्मभिरसूञ्जह्याम्, शतजन्मभिर्वा प्रसादः स्यादित्येतदर्थः । कुतः—तत्राह—हे अंबुजाक्षेति । परम माधुर्येण मनोव्याकुलताविधानादेवेति भावः । यद्वा—नन्वहमंतर्गोपिकाविरहदूनो न करिष्याम्येव विवाहं तस्मादन्यमेव गुणरूपाभ्यां महान्तं कंचिद्वृण्वित्याशंक्योपायान्तरमपश्यन्ती दुरंतां मरणपर्यन्तां निजकृच्छ्रपरंपरामुद्दिश्य करुणयाऽधर्मभयेन च तं प्रत्यावर्तयति—यस्येति ॥ **विश्वनाथस्तु**—यदि चैवं ब्रूषे भो राजपुत्रि मत्प्रापकप्राचीनसुकृतानि ते न संति कथं मत्प्रसादं लिप्स्यस इति, तर्हि भाविनि जन्मनि त्वत्प्राप्त्यर्थमेतज्जन्मनि ब्रह्मचारिणी सती तपः करिष्ये । यदि चैकजन्मतपसा न पर्याप्तिस्तर्हि कोटिजन्मपर्यंतमपि तपः करिष्ये । मम त्वत्प्राप्त्याग्रहस्तु मया दुर्वार एव । यदि च वक्ष्यसे मत्प्राप्तिप्रतिबंधकानि बहूनि ते दुरितानि संति, तर्हि तपसैव लभ्याभिस्त्वच्चरणधूलिभिस्तान्यपि ध्वंसयिष्याम्येवेत्याह—यस्येति । हे अंबुजाक्षेति—तव सुंदरनयनावलोकलिप्सैव ममेदृक्कृच्छ्रकरणे हेतुरिति भावः ॥ ४३ ॥ ० ॥ * ॥ गुह्यत्वेन संदेशानां गौरवं, बहुवचनेन नानाप्रकारत्वाद्युक्तिमत्त्वं च, स्वस्य च परमविश्वसनीयत्वं निःशेषवक्तृत्वं च व्यंजितम् । तथा त्वयापि गोपनीया एवेति । अन्यथा तस्या बंधुषु लज्जाद्युत्पत्तेः । मया आहृता आनीता इति, मम तु कृत्यमेतदेवेति भावः । विमृश्येति विनयभरेण, स च सम्यक्प्रवर्तनार्थम् । वयं ब्राह्मणा ऋजव एव, सर्वोपरि बुद्धिस्त्वैवेति भावः । तत्र गुह्यत्वे सति यदुभिर्मंत्रणं विना न स्वयं कर्तुमुत्सह इति न वाच्यं, यतः हे यदुवर तव बुद्धिबलाधीना एव तेपीति भावः । तस्माद्यत्कर्तव्यं तत्त्वनंतरमेव क्रियतां, प्राप्तावसरत्वान्मंत्रणादिविलंबं न सहत इति भावः ॥ **विश्वनाथस्तु**—गुह्यसंदेशा इति—भगवन् मम शपथो, न काप्येते प्रकाश्यास्तर्हि तस्या लज्जा भविष्यतीति भावः । यदुदेवेति—अत्रार्थे यदुभिरपि मंत्रणा न कार्येति सर्वमन्यत्पूर्ववत् ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्द्धे द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥ अद्भुतेहित आश्चर्यलीलः । मिषतां पश्यताम् (१) । स कृष्णः । वैदर्भ्या विदर्भराजपुत्र्याः ॥*॥ तुशब्दः क्रमप्राप्तश्रीकृष्णभाववर्णनरूपे प्रकरणभेदे । तथैवाभिव्यंजयति—प्रगृह्येति । प्रकर्षेण पुलकादिप्रेमविकारेण गृहीत्वा, पाणिना चेदं पाणिग्रहणं सत्यसंपादनाय । तच्च हार्दमपि व्यंजयितुमीषत्क्रीडासहितेन प्रहर्षेण भावविशेषेण च प्रकृष्टं हसन् । यदुनंदन इति रुक्मिणीपरिग्रहाद्यदुकुलस्यानंदनाभिप्रायेण ॥ **विश्वनाथस्तु**—रुक्मिणी कृष्णैकचित्ता बहिरंतर्व्याकुलैवास्ति, कृष्णस्तु रुक्मिण्येकचित्तत्वादंतर्व्याकुलोपि प्रहसन्प्रहासेन स्वहर्षमाविष्कुर्वन् ॥ १ ॥ यथा रुक्मिणी मच्चित्ता तथाहमपि तस्यां चित्तं मनो यस्य स तथा । प्रथमं कारणं तच्चित्तत्वं द्वितीयं ममेत्यादि ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे ॥ मत्परामनवद्यांगीमेधसोऽग्निशिखामिव ॥ ३ ॥ ॥ श्रीशुक उवाच ॥ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः ॥ रथः संयुज्यतामाशु दारुकेत्याह सारथिम् ॥ ४ ॥ स चाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः ॥ युक्तं रथमुपानीय तस्थौ प्रांजलिरग्रतः॥५॥ आरुह्य स्यंदनं शौरिर्द्विजमारोप्य तूर्णगैः ॥ आनर्तादेकरात्रेण विदर्भानगमद्धयैः ॥ ६ ॥ राजा स कुंडिनपतिः पुत्रस्नेहवशं गतः ॥ शिशुपालाय स्वां कन्यां दास्यन्कर्माण्यकारयत् ॥ ७ ॥

तया अकथितमप्यहं जानामीति ॥ २ ॥ आनयिष्ये आनेष्यामि । राजन्यापसदान्राजसु हीनान् । उन्मथ्यानयने दृष्टांतः । एधस इति ॥ ३ ॥ उद्वाहर्क्षमिति । परश्वो रात्रौ विवाहनक्षत्रमिति विज्ञाय तस्यां रात्र्यां प्रस्थाय प्रातर्विदर्भदेशानगमत । " श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य " इति रुक्मिणीसंदेशात् ॥ ४ ॥ शैब्येत्यादीनि चत्वार्यश्वनामानि ॥ ५ ॥ ६ ॥ पुत्रस्य रुक्मिणः स्नेहेन तद्वशमनुगच्छतीति तथा । अनेन शिशुपालेऽनभिरुचिं द्योतयति । कर्माणि पुरालंकारपितृदेवा

सा यथा मच्चिता तथाहमपि । तल्लक्षणमाह–निद्राश्चेति । निद्रामपि कुतोऽन्यदुपभोगादिसुखमित्यर्थः । अत्र विघटननिदानस्यापि मम ज्ञातत्वान्मया स्वत एव तत्समाधानं कार्यमित्याह–वेदेति सार्धेन ॥ २ ॥ तां रुक्मिणीम् । " स्यादपसदः प्रोषितेपि नीचे पीडाकरे तथा " इति निरुक्तिः । एधसः काष्ठात् ॥ * ॥ तामानयिष्य इति–एतावन्तं कालं तस्या एवाभिप्रायं प्रतीक्ष इति भावः । तर्हि ममानागमने भवांस्तामुपेक्षेतैव–न, तदीयमहागुणाकृष्टत्वान्ममेत्यभिप्रायेण तां विशिनष्टि–मत्परामिति पदद्वयेन । तत्परत्वे सर्वसद्गुणवत्ता सिद्धैव ' यस्यास्ति भक्तिर्भगवत्यकिंचना ' इत्यादेः । ' एवं श्रुत्वा गुणान् ' इत्यादिना तदुक्तनिजगुणरूपवत्तस्या अपि गुणरूपे बोधिते । उच्चैर्मथित्वेति–'निर्मथ्य,–इति तदुक्तानुसारेण, तदुक्तप्रतिपालनपरता बोधिता । राजन्यापसदानिति–मुहुर्निर्जयादिनापमानेनापि लज्जाद्यभावाद्दुर्बुद्धितानपगमाच्च । मृधे इति–युद्धमध्ये साक्षादेव न तु मायांतर्द्धानादिनेत्यर्थ इति निजपराक्रमः सूचितः । एधस इति दृष्टान्तेन यज्ञियाग्निशिखावद्दारुणाच्छन्नत्वेपि परिश्रमेणावश्योद्धार्यत्वं ध्वनितम् । यथैधसि वर्तमानाग्निशिखा प्रकटीभूता एध एव ज्वालयति तथैव रुक्मिप्रभृतिदुष्टराजन्यकुलेनावृता सैव तत्सर्वं ज्वालयिष्यति । अहं तु निमित्तमात्रं भविष्यामीति भावः । एवं तदशेषसंदेशोत्तरमप्यूह्यम् ॥ ३ ॥ परश्व आगामिदिनात्परदिने ॥ * ॥ यद्यपि पृतनापतिभिः परीत इति तया स्नेहस्वभावेन संदिष्टं, तथापि प्रतिवीरेष्ववज्ञया ' गुप्तः समेत्य ' इति तस्या युक्तमुक्तं रक्षितुमिच्छया तस्याः स्वस्य च लोकतो लज्जया च स पुनरेकाक्येव प्रस्थित इति वक्तुमाह–उद्वाहर्क्षमित्यादित्रयस्यैकत्रैव वाक्यार्थस्तैर्दर्शितः । किञ्च–विशेषेण ज्ञात्वा बहिस्तस्माद्विप्राज्ज्योतिःशास्त्राच्च, अन्तस्तु सर्वज्ञत्वान्निश्चित्य । मधुसूदनः मूर्तिभेदैस्तत्तदुपलक्षणसर्वदैत्यकुलहर्तेत्युत्साहसाम्राज्यं दर्शितम्, भाविजयश्च सूचितः । श्लेषेण–भ्रमरो यथा पद्मिन्याः परिमले लब्धे धैर्यं कर्तुं नेष्टे, तद्वदिति द्योतितम् । सम्यगस्त्रादिपूर्णतया युज्यताम् ॥ ४ ॥ स च दारुकः ॥ * ॥ स चेति चेन तात्कालिकत्वं बोध्यते । सैव्येत्यत्र शैब्येति पाठः सत्संमतः । एषां वर्णो यथा पाद्मे–" शैब्यश्च शुकपत्राभः सुग्रीवो हेमपिंगलः । मेघपुष्पस्तु मेघाभः पांडुरो हि बलाहकः ॥ " इति । युक्तं संतं सुग्रीवपुष्पकं नाम रथमुप समीपे आनीय भक्त्या शिरसि बद्धत्वात्प्रकृष्टोञ्जलिर्यस्य सः ॥५॥ स्यंदनं रथम् ॥ * ॥ द्विजं रुक्मिणीप्रहितमारोप्य तस्य सुखगमनाय, तस्याः प्राणरक्षणार्थं तदंतिके प्रेषणाय च । शौरिरिति साक्षाद्भगवत्त्वेपि मनुष्यलीलत्वात्तथैव यानमुचितमिति भावः । एका चासौ रात्रिश्चेत्येकरात्रस्तेन । सन्ध्यायां रुक्मिणीसंदेशाञ्छ्रुत्वा तदानीमेव रथमारुह्य गच्छन्प्रातः कुंडिनं प्रापेत्यर्थः ॥ ६ ॥ स भीष्मकः । अनेन पुत्रस्नेहेत्यादिवचनेन । अनभिरुचिं रुच्यभावम् ॥ * ॥ स परमसाधुत्वेन प्रसिद्धोऽपि स्वां स्वाधीनामपि । अकारयत् स्वभृत्यपुरोहितादिभिः । तत्र वश इच्छा ' वशः कांतौ ' इत्यमरः । तच्च मूलत एव स्पष्टम् ' बंधूनामिच्छताम् ' इत्यादेः, ' वेदाहम् ' इत्यादेश्च । स्नेहशब्दात् तेन मरणवनवासाद्युद्यमः कृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरं संमृष्टसंसिक्तमार्गरथ्याचतुष्पथम् ॥ चित्रध्वजपताकाभिस्तोरणैः समलंकृतम् ॥ ८ ॥ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः ॥ जुष्टं स्त्रीपुरुषैः श्रीमद्भिर्गृहैरगुरुधूपितैः ॥९॥ पितॄन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृप ॥ भोजयित्वा यथान्यायं वाचयामास मंगलम् ॥ १० ॥ सुस्नातां सुदतीं कन्यां कृतकौतुकमंगलाम् ॥ अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ॥ ११ ॥ चक्रुः सामर्ग्यजुर्मंत्रैर्बद्ध्वा रक्षां द्विजोत्तमाः ॥ पुरोहितोऽथर्ववित्रै जुहाव ग्रहशांतये ॥ १२ ॥

चंनादीनि ॥ ७ ॥ तान्येवाह । पुरमित्यादिचतुर्भिः । संमृष्टाः संसिक्ताश्च मार्गादयो यस्मिंस्तत् । चित्रा ध्वजेषु पताकास्ताभिः समलंकृतमकारयत् ॥ ८ ॥ स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थो द्रष्टव्यः । यद्वा स्रग्गंधमाल्यान्याबिभ्रतीति तथा तैः । तथा विरजोंबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टम् । तथा श्रीमद्भिर्गृहैश्च जुष्टम् ॥ ९ ॥ यथान्यायमन्यांश्च कन्यां प्रति मंगलं वाचयामास ॥ १० ॥ कृतं कौतुकेन विवाहसूत्रेण मंगलं यस्यास्ताम् । अहतं नवीनम् । भूषणोत्तमैश्च भूषिताम् ॥ ११ ॥ वध्वास्तस्याः कन्यायाः ।

इति गम्यते ॥ ७ ॥ तानि पुरालंकारादीनि । संमृष्टास्त्यक्तावस्कराः प्राक्, तदनु संसिक्ता गोमयोदकादिप्रोक्षिताः॥ * ॥ पुरमिति युग्मकम् । मार्गः साधारणं वर्त्म । रथ्या पण्यवीथिका ॥ ८ ॥ मत्वर्थो द्रष्टव्य इति—स्रग्गंधमाल्याभरणवद्भिरित्यर्थो विधेय इत्यर्थः । 'ऋजुमार्गेण सिध्यतः—' इति न्यायमाश्रित्याह—यद्वेति ॥ * ॥ विरजोंबरेति—रजःशब्दोदंतोपि द्विरूपकोशे—" रजश्च रजसा सार्द्धं मनश्च मनसा सह । सर्वे सांताः स्युरदंता राद्धांतितमिदं बुधैः ॥ " इति । स्त्रीपुरुषैः प्राचीनैर्विवाहोत्सवार्थमागन्तुकैश्च, श्रीमद्भिर्वितानादिशोभावद्भिर्गृहैश्च जुष्टम्, अकारयदिति शेषः ॥ ९ ॥ अन्यानातिथ्यादीन् । यथान्यायं यथोचितम् ॥ * ॥ विवाहे कन्यां प्रति यन्मंगलं वाचयितुं युज्यते तदित्यर्थः । कन्यां प्रतीत्युत्तरेणान्वयः । अत्रानन्यगत्या द्वितीया । बलात्प्रतीत्यध्याह्रियते, तृतीयाबलात्सहशब्दवत् ॥ १० ॥ सुदतीं कृतदंतधावनाम् । " कौतुकं विषयाभोगे हस्तसूत्रे कुतूहले । कामे ख्याते मंगले च " इति यादवः । " आबध्नाति करे सूत्रं मंगलार्थं द्वयोर्गुरुः " इति ग्रंथान्तराच्च । ' अहतं नवशुद्धयोः ' इति । " अंशुकं केवले वस्त्रे सूक्ष्मवस्त्रोत्तरीययोः " इति यादवः । " पूर्वं मर्दनचीरहारतिलकं नेत्राञ्जनं कुण्डलं नासामौक्तिपुष्पमाल्यकरणं झंकारकन्नुपुरम् । अंके चंदनलेपनं कुचमणिक्षुद्रावलीघंटिकास्तांबूलं करकंकणं चतुरता शृंगारकाः षोडश ॥ " इति कन्याया विवाहोत्सवे कार्याः । प्रसंगाद्वरस्याप्याह—" क्षौरं मर्दनशीर्षवस्त्रातिलकं गात्रेषु चित्रार्चनं कर्णे कुंडलमुद्रिका च मुकुटं पादौ च चर्मावृतौ । हस्ते शस्त्रपटाम्बरं कटिछुरीविद्याविनीतं मुखं तांबूलं सुरशीलवत्त्वगुणिताः पुंसस्त्वमी षोडश ॥" इति कौतुकरत्नाकरोक्तेः । कृतकौतुकशब्देनैतेप्युपलक्षणीया इति ॥ * ॥ सुदतीं तांबूलरागापसारणेन सहजप्रकाशाच्छोभमानरदाम् । "आहतं गुणितेपि स्यात्ताडिते च मृषार्थके । स्यात्पुरातनवस्त्रेऽपि नववस्त्रे वितानके ॥" इति विश्वोक्तेराहतं सद्यो यंत्रमुक्तमंशुकं ज्ञेयम् । 'अहतां—' इति पाठेपि स एवार्थः, तस्यैव मांगलिकत्वात् ।"अहतं यन्त्रानिर्मुक्तमुक्तं वासः स्वयंभुवा । शस्तं तन्मांगालिक्येषु तावन्मात्रे न सर्वदा ॥" इति । यद्वा—सुस्नातामित्यादिपद्यस्य चक्रुरित्यनेनोत्तरेणैवान्वयः काकाक्षिन्यायेन ॥ ११ ॥ रक्षां चक्रुरित्यन्वयः ॥ * ॥ वै प्रसिद्धौ, अथर्ववित्त्वेन प्रसिद्धः । अथर्वमंत्राणां ग्रहशान्तौ प्राचुर्यात् ॥ १२ ॥

---

१ 'विरजांबरभूषितैः' इति पाठमभिप्रेत्ययम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् ॥ प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदां वरः ॥ १३ ॥ एवं चेदिपती राजा दमघोषः सुताय वै ॥ कारयामास मंत्रज्ञैः सर्वमभ्युदयोचितम् ॥ १४ ॥ मदच्युद्भिर्गजानीकैः स्यंदनैर्हेममालिभिः ॥ पत्त्यश्वसंकुलैः सैन्यैः परीतः कुंडिनं ययौ ॥ १५ ॥ तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य च ॥ निवेशयामास मुदा कल्पितान्यनिवेशने ॥ १६ ॥ तत्र शाल्वो जरासंधो दंतवक्रो विदूरथः ॥ आजग्मुश्चैद्यपक्षीयाः पौंड्रकाद्याः सहस्रशः ॥ ॥ १७ ॥ कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुम् ॥ यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः ॥ १८ ॥ योत्स्यामः संहतास्तेन इति निश्चितमानसाः ॥ आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः ॥ १९ ॥ श्रुत्वैतद्भगवान्रामो विपक्षीयनृपोद्यमम् ॥ कृष्णं चैकं गतं हर्तुं कन्यां कलहशंकितः ॥ २० ॥ बलेन महता सार्धं भ्रातृस्नेहपरिप्लुतः ॥ त्वरितः कुंडिनं प्रागाद्गजाश्वरथपत्तिभिः ॥ २१ ॥ भीष्मकन्या वरारोहा कांक्षंत्यागमनं हरेः ॥ प्रत्यापत्तिमपश्यंती द्विजस्याचिंतयत्तदा ॥ २२ ॥

अथर्वविदथर्वणमंत्रवित् ॥ १२ ॥ १३ ॥ अभ्युदये उचितम् ॥ १४ ॥ ततश्चतुरंगसैन्यैः परीतः परिवृतः कुंडिनं भीष्मकस्य पुरं ययौ । मदं च्यवंते इति मदच्युतस्तैः स्यंदनैः रथैः हेमरचिता माला विद्यंते येषु तैः ॥ १५ ॥ कल्पितं निर्मितं यदन्यनिवेशनं तस्मिन् ॥ १६ ॥ १७ ॥ यदि श्रीकृष्णो हरेदिति शंकिताः । कन्यां साधयितुमित्यर्थः ॥ १८ ॥ १९ ॥ ॥ २० ॥ २१ ॥ सूर्योदयात्पूर्वमेवौत्सुक्येन रुक्मिण्यचिंतयदित्याह । भीष्मकन्येति । प्रत्यापत्तिं प्रत्यागमनम् ॥ २२ ॥

रूप्यं रजतम् । चात्ताम्रपात्रस्थान् "पात्रे ताम्र मये स्थाप्य तिलान्हेमगुडान्वितान् । यो ददाति वेदविदे ग्रहार्तिस्तस्य नो भवेत् ॥" इति दानग्रंथोक्तेः ॥ * ॥ प्रकर्षेणाऽऽदरादिनाऽदात् । राजव्यवहारतो नात्यादृतयोरपि गुडतिलयोर्दानं विधिबलादेव, सुवर्णरत्ना द्युपकरणसहितं तिलपर्वतादिकं वा । तद्दानविधिर्दानग्रंथेभ्योवसेयः ॥ १३ ॥ एवं भीष्मकवत् । मंत्रज्ञैर्विप्रैः । अभ्युदये कर्माणि उचितं नांदीश्राद्धादि "विवाहादिषु सर्वेषु संस्कारेषु च वास्तुषु । मोक्षे चाऽभ्युदय स्तीर्थयाने संपदि मंगले ॥" इति शाश्वतः ॥ * ॥ सोपहासमाह–एवमिति । भीष्मकवदेवेत्यर्थः । अस्येदं कर्म कुंडिनपुरादनतिदूरे ।स्थित्वेति ज्ञेयम्, पूर्वदिनकृत्यत्वात् । तथापि तस्य स्वतो भगवत्समर्पणोत्सुकत्वात्सार्थकं बभूव । तस्य तु तत्प्रातिकूल्यात्प्रतिकूलमेवेति भावः । सुताय सुतमुद्वाहयितुम् ॥ १४ ॥ ततोऽभ्युदयकर्मकरणोत्तरम् ॥ * ॥ ० ॥१५॥ तं दमघोषम् । समभ्येत्य संमुखं गत्वा । निवेशनं गृहं वस्त्रादिराचितम् ॥*॥ मुदा सह यथा मुदितो भवति तथेति लौकिकता दर्शिता ॥ १६ ॥ तत्र कुंडिनपुरे ॥ * ॥ ० ॥ १७ ॥ यदि कदाचित् । इत्यर्थ इति–अंतर्भाविताणिजर्थोत्र ज्ञेयः । साधयितुं दापयितुमिति भावः ॥ * ॥ यत्ता उद्युक्ताः ॥ १८ ॥ संहता मिलिताः । तेन कृष्णेन ॥ * ॥ समग्रेति पाठे समग्रं सर्वांगपूर्णम् ॥ १९ ॥ एतत् वयं संहताः कृष्णेन योत्स्याम इत्येतत् ॥ * ॥ श्रुत्वेति युग्मकम् । जनपरंपरयैतत्पूर्वोक्तं श्रुत्वा । एतत्किं, तत्राह–विपक्षीयेति । तत्र पूर्वं तद्देशादागतया जनपरंपरया, उत्तरत्र तदनुमिमेऽनयातः पुरगामिन्येति ज्ञेयम् । ततः कलहे शंकितः सन् । कर्तरि क्तः, तारकादित्वादितज्वा ॥ २० ॥ परिप्लुतो व्याप्तः " मंडूकव्याप्तयोः प्रोक्तः परिप्लुतध्वनिर्नटे " इति निरुक्तिः ॥ * ॥ शंकाहेतुमाह–भ्रातृस्नेहेत्यादि । तदीयताद्दशसंबंधमाधुर्यमयप्रेमसिन्धौ मग्नोऽन्यानुसंधानासमर्थ इत्यर्थः । कथंभूतः–भगवान् सर्वज्ञानक्रियाशक्तियुक्तोपि, अत एव गजादिभिश्चतुर्भिरंगैरुपलक्षितं यत्तेन महता बलेन सैन्येन सार्द्धं त्वरितः प्रायः प्रहरार्धानंतरं चलितोपि श्रीकृष्णेन सहैव विदर्भनगरे ससैन्यप्रवेशादतिशीघ्रः सन्प्रागादिति । तेन स्नेहेनेतरशक्तेरावरणेऽपि स्वानुकूलशक्तेः प्रकाशनं दर्शितम् । ऐश्वर्यज्ञानतोऽपि बन्धुभावस्याधिक्यं च । अत एव भ्रातृपदप्रयोगः ॥ २१ ॥ रुक्मिण्युत्कंठामाह–सूर्योदयेत्यादिना । वरो वरणीय आरोहो जघनप्रदेशो यस्याः सा तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो त्रियामांतरित उद्वाहो मेऽल्पराधसः ॥ नागच्छत्यरविंदाक्षो नाहं वेद्म्यत्र कारणम् ॥ २३ ॥ सोपि नावर्ततेऽद्यापि मत्संदेशहरो द्विजः ॥ अपि मय्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सितम् ॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः ॥ २४ ॥ दुर्भगाया न मे धाता नानुकूलो महेश्वरः ॥ देवी वा विमुखा गौरी रुद्राणी गिरिजा सती ॥ २५ ॥

त्रियाम रात्रिस्तावन्मात्रेणांतरितः । अल्पराधसो मंदभाग्यायाः॥ २३ ॥ जुगुप्सितं धाष्टर्यादि । अपीति शंकायाम् । नायाति हि कृतोद्यम इति । अयमर्थः । आदौ कृतोद्यमत्वात्तं न प्रस्थापितवान् । प्रस्थानावसरे च किंचिन्मयि जुगुप्सितं मत्वा प्रत्याचष्ट । अतः सोऽपि द्विजो नूनं नायातीति ॥ २४ ॥ यद्वा । ततो निर्गतोऽपि श्रीकृष्णो मद्दैववै

"आरोहो जघने दीर्घे उच्चारोहणयोरपि" इति धरणिः ॥ * ॥ नवसंगमरसोल्लासं दर्शयितुं पुनः श्रीरुक्मिण्याः पूर्वरागविशेषोदयं वर्णयति—भीष्मेति सार्धपंचभिः । तस्यापि भाग्यं सूचयित्वा तदुचितान्तःसंस्कारोऽप्यस्तीति दर्शयति । वरः श्रेष्ठ आरोहः कांतत्वेन श्रीकृष्णस्य यो लाभस्तल्लक्षणा सर्वोर्द्धभूमिकाप्राप्तिर्यस्याः सेत्येवं श्रीमन्मुनेर्विवक्षितम् । यद्वा—वरः श्रेष्ठ आरोहो नितंबो यस्याः इति वयःप्रकाशव्यंजनया भावस्यातिशयैर्योग्यतां व्यंजयति । अत एव हरेः निजमनोहरता आत्मानमपि हरिष्यतो भगवत आगमनमाकांक्षन्ती नित्यमेव वांछंती, संप्रति च द्विजस्य प्रत्यापत्ति तद्वृत्तिज्ञापिकामपश्यन्त्याचिन्तयाचिन्तां प्राप॥२२॥ "राधः स्यात्कार्यसंसिद्धौ भाग्येऽदंतोऽपि हिंसने" इति निरुक्तिः । तावन्मात्रेण रात्रिमात्रेणांतरितो व्यवहितः । अत्राऽनागमने ॥ * ॥ अहो खेदे । त्रियामाशब्दप्रयोगोल्पकालत्वविवक्षया । अल्पराधस्त्वे हेतुः—नागच्छतीति । अधुनापि न प्राप्त इत्यर्थः । "राधो राधाभाग्यसिद्धिहिंसाराधनकर्मसु" इति निरुक्तेः । तत्राल्पराधस्त्वं विना कारणान्तरं न पश्यामि तस्य सर्वशक्तिमत्त्वात्प्रपन्नपालकत्वाच्च । विप्रस्य च प्रत्यागमनाभावे तदेव कारणम् ॥ **विश्वनाथस्तु**—त्रियामाऽद्यतनी रात्रिस्तयैवान्तारितः श्वस्तन्यान्तूद्वाहलग्नमेवेति भावः ॥ २३ ॥ धाष्टर्यमविनयः । आदिना कौटिल्यादिग्रहः । स्वाशयमाह—अयमर्थ इति । तं विप्रम् । अतो भगवतोऽनागमनात् । सोऽपि विप्रोपि लज्जया नायातीत्यर्थः ॥ * ॥ तदेवाह—सोपीति—मय्यतिकृपालुरपि । यदि द्विजस्याप्यागमनमभविष्यत्तदा प्राणत्यागाऽत्यागयोरेकतरं निरोद्धव्यमिति भावः । जुगुप्सितं शरीरबुद्ध्यादिगतं दृष्ट्या प्रत्याचष्ट आगमनोद्यमं त्यक्तवान् । यतोऽनवद्यो निर्दोष आत्मा देहान्तःकरणादिर्यस्य सः । मम सदोषायास्तद्भार्यानर्हत्वमिति । अतो द्विजोप्यकृतार्थो मत्प्राणत्यागभयान्नायातीति भावः ॥ २४ ॥ पक्षान्तरमाह—यद्वेति । क्वचित् स्थानांतरे । प्रतिबद्धः किंचित्कार्यप्रतिबन्धरुद्धः । दुर्भगाया मन्दभाग्यायाः । धाता ब्रह्मा कृष्णो वा "धाता हिरण्यगर्भे ना पालके धारकेऽपि च" इति धरणिः । महेश्वरो रुद्रः, कृष्णो वा । पुनः कथनं विषादवशात् । देवीति—देव्यस्त्वनंतास्तासां केत्यनिर्णयादाह—गौरीति । 'गौरोरुणे सिते पीते' इत्यनेकार्थात्तत्राप्यनिश्चय एवेति चेदाह—रुद्राणीति । सामान्यविवक्षायां गंगाया अपि तत्पत्नीत्वेन संशयाऽनिस्तार एवात आह—गिरिजेति । पुनरपि नद्या अपि गिरिजात्वेन तथात्वमेवाह—सतीति । पुनरपि 'सती साध्वी पतिव्रता' इति कोशात्संशयतादवस्थ्यं ग्रंथान्तरमानेनापनेयम् । तथाहि—"सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे" इति । शैलवधूर्मेनका 'गिरिजा मेनकात्मजा' इति, कोशात् । एतादृशविशेषणविशिष्टांबिकेत्यर्थः । विमुखा पराङ्मुखा जातेत्यर्थः ॥ * ॥ पुनस्तस्यानवद्यात्मत्वेन दोषदर्शनमप्राप्य निजाल्पराधस्त्वमेव कारणं स्थापयति—दुर्भगाया इति । धाता मे नानुकूल इति—मत्प्रतिकूलत्वेन विधात्रैव क्वचिद्वर्त्मनि प्रतिबंधितः । तत्प्रातिकूल्ये हेतुर्न दृश्यते इत्यत आह—महेश्वरो वेति । कदाचिन्मत्पूजामप्राप्य कुपितः स्यादित्यर्थः । महेश्वर्यत्वात्तस्य मयि बालिकायामज्ञायां कोपो न युज्यत इति अनेन ब्रह्मरुद्रावपि तदर्थमनयोपास्यामानौ स्त इति गम्यते । अहो प्रत्यहमाराध्यमानाऽस्मत्कुलदेव्यपि गौरी विमुखा, हंतहंत कमपराधं मे सा प्राप्ता यन्मयि वैमुख्यं गता, तस्याः सांसार्गिकोयं वा दोष इत्याह—रुद्राणीति । तत्पतिः सर्वजनान्रोदयति, सा तु मां रोदयतु नाम । हन्त ममैतावद्वैक्लव्यं प्राणाजिहासापर्यंतमपि दृष्ट्वा कथं न द्रवति, तत्र पैतृकं दोषं संभावयंत्याह—गिरिजा पाषाणपुत्री कथं द्रवेदतः सा मद्देहं त्याजयिष्यत्येवेति निश्चिनोमि । यतः सती पूर्वजन्मनि स्वमपि देहं या त्यक्तवती तस्या अन्यदेहत्याजनं नाश्चर्यमिति भावः । 'गिरिशा' इति पाठे पर्वते शयाना मत्प्रार्थनां निद्राकुलत्वाद्वा न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं चिंतयती बाला गोविंदहृतमानसा ॥ न्यमीलयत कालज्ञा नेत्रे चाश्रुकलाकुले ॥ २६ ॥ एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप ॥ वाम ऊरु र्भुजोनेत्रमस्फुरन्प्रियभाषिणः ॥ २७ ॥ अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः ॥ अंतःपुरचरीं देवीं राजपुत्रीं ददर्श ह ॥ २८ ॥ सा तं प्रहृष्टवदनमव्यग्रात्मगतिं सती ॥ आलक्ष्य लक्षणाभिज्ञा समपृच्छच्छुचिस्मिता ॥ २९ ॥ तस्या आवेदयत्प्राप्तं शशंस यदुनंदनम् ॥ उक्तं च सत्यवचनमात्मोपनयनं प्रति ॥ ३० ॥

मुख्यात्कचित्प्रतिबद्धो भवेदित्याह । दुर्भगाया इति ॥ २५ ॥ कालज्ञा नाऽधुनापि गोविंदागमनकाल इति मन्वाना किंचिदाश्वस्तचित्ता सती चिंतास्तब्धे लोचने निमीलितवतीत्यर्थः ॥ २६ ॥ प्रियभाषिणः प्रियसूचकाः ॥ २७ ॥ पुरोपवनं प्राप्तेन श्रीकृष्णेन विनिर्दिष्टः प्राप्तं मां कथयेत्यादिष्टः ॥ २८ ॥ न व्यग्रा आत्मनो देहस्य गतिर्यस्य तम् । लक्षणाभिज्ञा दूतस्य लक्षणं तत्तत्कार्यसूचकमभिजानातीति तथा ॥ २९ ॥ तस्यै प्राप्तं यदुनंदनमावेदितवान् । तं च शशंस । आत्मोपनयनं प्रति आत्मना स्वयं श्रीकृष्णस्यानयनं प्रति तेन द्विजेन सत्यवचनं प्रोक्तमिति । आत्मनः प्राणेश्वरस्येति वा । यद्वा आत्मनस्तस्या उपनयनं प्रति श्रीकृष्णेन यदुक्तं सत्यवचनं तामानयिष्य शृणोतीत्यर्थः ॥ २९ ॥ एवमुक्तरीत्या । बालाऽस्वतंत्रा । आस्वस्थचित्ता स्थिरमानसा । स्तब्धे निष्ठुरे ॥ * गोविंदो गवामिन्द्रः श्रीमति गोकुले तादृशमाधुर्यतया वर्णितो यस्तेन हृतं मानसं यस्याः सा । अत एव बाला प्येतावितयंती अश्रूणां कला बिंदवस्तैराकुले व्याप्ते विवशे वाऽक्षिणी न्यमीलयत ॥ **विश्वनाथस्तु**–भोश्चञ्चल चित्त संप्रति तनुत्यागोपायं मा कुरु, यतो नाधुनापि तस्यागमनकालो व्यतीतस्तस्मात्तनुत्यागात्पूर्वमधुना ध्यानेनैवैकवारं तन्मुखमवलोकयामि, नात्र त्वं मे प्रतिबध्नानेति नेत्रे न्यमीलयत मुद्रितवती ॥ २६ ॥ "वामांगस्फुरणं स्त्रीणामन्यथातो नृणां शुभम्" इति शाकुनिकाः ॥ * ॥ सूत्रशाटिकान्यायेन वध्वाः सन्निहितविवाहायाः कन्यायास्तस्याः प्रतीक्षंत्याः प्रतीक्षमाणाया ऊर्वादीनां यथोत्तरमूर्ध्वतापेक्षया प्रियभाषित्वे श्रैष्ठ्यम् । अस्फुरन्निति बहुत्वमेकदैव सर्वस्फुरणाभिप्रायेण । प्रियभाषिण इहैकशेषत्वेन क्लीबत्वे प्राप्तेऽपि पुंस्त्वमार्षम् ॥ २७ ॥ अथांगस्फूर्त्युत्तरक्षणे । यो रुक्मिण्या प्रेषितः स एवेत्यर्थः ॥ * ॥ स एव योग्यत्वेन श्रीकृष्णेन निर्दिष्टो न त्वन्यः । संदेशस्तु–मां प्राप्तं कथय तामद्यैवान्वेष्यामीति प्रकारको ज्ञेयः । प्रथमं स एव द्विजसत्तमस्तां रुक्मिणीं ददर्श, न तु तं सेत्यर्थः । तत्र हेतुः–अंतःपुरचरीं विप्रवर्त्मनिरीक्षणाय तस्मिन्नितस्ततो भ्रमंतीम्, व्यग्रचित्तामित्यर्थः । कीदृशीम्–देवीं वैवाहिकालंकारमंगलकर्मादिना द्योतमानाम् । ह हर्षे । विप्रकर्तृकदर्शनस्य यत्प्रथमत्वं तदुल्लेखोसौ रुक्मिकौटिल्येन संप्रति स्वस्य तद्दर्शनं भवेन्न वेति पथि तांस्तान्सूचयति तदुल्लाससूचकत्वात् ॥ २८ ॥ सा रुक्मिणी । तं स्वादिष्टं विप्रम् । व्यग्रा विगलिता । सती सदाचारा ॥ * ॥ सुनंदविप्रोहं त्वत्प्रियपार्श्वादायातो मां पश्येत्युच्चैरुक्तवन्तं प्राप्तध्यानभंगा सापि तं ददर्शेत्याह–सेति । न व्यग्रा आत्मनो मनसो गतिर्यस्मात्तम् । विप्रस्य वदनहर्षदर्शनेन तस्या मनसो वैयाग्र्यं शांतमभूदित्यर्थः । यतो लक्षणं कार्यसिद्धिसूचकं दूतहर्षं स्ववामनेत्रादिस्फुरणं चाभिजानातीति सा । शुचि शुद्धं हर्षद्योतकं स्मितं यस्याः सा । पूर्वं तु दुःखेपि भावगोपनार्थं कपटस्मितैवासीदिति भावः । सती सर्वगुणैरुत्कृष्टा । सम्यक्सर्वतः क्षेममित्यादरादिनापृच्छत् । यद्वा–आत्मनां जीवानां गतिं प्राप्यं श्रीकृष्णमपृच्छत्–स कुत्रास्ते किं वाऽवददित्येवं बहुशोवदत् । 'मैत्रेयादात्मनो गतिम्' इत्यादौ श्रीकृष्णस्यैवात्मगतिपदवाच्यत्वश्रवणात् । गतिमाश्रयं वा "गतिः प्राप्ये दशायाश्चाधारे गमनवेदने" इति कोशात् ॥ २९ ॥ तस्यै रुक्मिण्यै । आवेदितवान्कथयामास । तत् श्रीकृष्णानयनम् । शशंस कथितवान् । परात्मवाचकत्वमेवात्मपदस्य मुख्योर्थ इत्याश्रित्याह–प्राणेश्वरस्येति । कृष्णागमनं श्रुत्वाप्युद्विग्नां वक्ष्याह–यद्वेति । इत्यर्थ इति–तद्वृद्भूतं निखिलं संशयं नुनोदेति भावः ॥ * ॥ शशंस–यदुनंदनं विप्रस्तुष्टाव, तस्य ब्रह्मण्यत्वसौशील्यभक्तजनपालकत्वादिदर्श

१ तं चेत्यत्र तच्चेति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमागतं समाज्ञाय वैदर्भी हृष्टमानसा ॥ अपश्यंती ब्राह्मणाय प्रियमन्यन्ननाम सा ॥ ३१ ॥ प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ ॥ अभ्ययात्तू र्यघोषेण रामकृष्णौ समर्हणः ॥ ३२ ॥ मधुपर्कमुपानीय वासांसि विरजांसि सः ॥ उपायनान्यभीष्टानि विधिवत्समपूजयत् ॥ ३३ ॥ तयोर्निवे शनं श्रीमदुपकल्प्य महामतिः ॥ ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ॥ ३४ ॥ एवं राज्ञां समेतानां यथावीर्यं यथावयः ॥ यथाबलं यथावित्तं सर्वैः कामैः समर्हयंत् ॥ ३९ ॥ कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः ॥ आगत्य नेत्रांजलिभिः पपुस्तन्मुखपंकजम् ॥३६॥ अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा ॥ असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ॥ ३७ ॥

इत्यादि तच्च शशंसावर्णयदित्यर्थः ॥ ३० ॥ तं श्रीकृष्णम् । अस्मिन्कार्ये सर्वस्वार्पणमप्यपर्याप्तमिति तदुचितं प्रियमपश्यंती तदा केवलं ननाम । पश्चाद्दद्यु ददावित्यर्थः । यद्वा मां श्रियं ये नमंति ते तावत्सर्वसंपदामास्पदं भवंति किं पुनर्मयि प्रणतायामिति ततोऽधिकमन्यत्प्रियमपश्यंती ननामेति ॥ ३१ ॥ ३२ ॥ ३३ ॥ महामतिरित्यनेन श्रीकृष्णो बाढं कन्यामुद्वोढुमेवागतः स्यादिति वरोचितेन विधिना समपूजयदिति सूचितम् । यथा यथावत ॥ ३४ ॥ समेतानां राज्ञां मध्ये वीर्याद्यनतिक्रम्य तंतं समर्हितवा नित्यर्थः ॥ ३५ ॥ श्रीकृष्णे भाविकर्मसूचकं जनानुरागं दर्शयति । कृष्णमागतमिति त्रिभिः ॥ ३६ ॥ अस्यैव रुक्मिण्येवार्हत्येव असावेव भैष्म्या एव समुचित एवेति षडव नादित्यर्थः ॥ ३० ॥ अपर्याप्तमप्रतिक्रियम् । तदुचितं ब्राह्मणयोग्यम् । इत्यर्थ इति—पितृगृहस्थकन्यायाः स्वातंत्र्याभावेनाधुना मम पार्श्वे किंचित्तव योग्य देयं नास्ति, स्वतंत्रा दास्यामीति क्षमापनार्थं ननामेति भावः । ननु तस्याः साक्षाल्लक्ष्म्यवतारत्वात्कथं स्वातंत्र्याभाव इति चेदाह—यद्वेति । ततो मत्प्रणमतेः । सा रुक्मिणी ॥ * ॥ किमस्मै पारितोषिकं ददामीति विमृशन्ती केवलं ननाम, प्रणामादन्यत्समुचितमपश्यंती, प्रणत्या तु स्वस्य ऋणित्वमेव व्यंजयामास । ततश्च तदैव विप्रगृहं सार्वकालिकसर्वसंपत्तिपूर्णं बभूव, महालक्ष्म्या अपि ऋणित्वादीति ज्ञेयम् ॥ ३१ ॥ अभ्ययादग्रे जगाम, आनयनायेत्यर्थः ॥ * ॥ स्वदुहितुरिह स्वशब्दे न तस्य परमहर्षं द्योतयति । अयोग्यस्यापि स्वस्य कन्याविवाहप्रेक्षणे तयोरुत्सुकतयात्मनः परमधन्यत्वमननात्, एतां श्रीकृष्णोऽवश्यं हरिष्यतीत्येवंनिगूढभावाद्वासमर्हणैरुत्तमोद्वाहीयद्रव्यैः सहाभ्ययात् । भीष्मक इति शेषः॥३२॥ वैवाह्यवरे करणीयमाह—मधुपर्कमिति । स भीष्मकः। वासोदानमपि वरायैव "परिधास्यै यशोधास्यै" इत्यादिमंत्रैर्वेदे प्रतिपादितम् । विधिवद्विष्टरपाद्यार्घ्याचमनीयदानादिविधिमनतिक्रम्येत्यर्थः ॥ * ॥ तान्यभिव्यञ्जयाति—मध्विति ॥ ३३ ॥ तयोः रामकृष्णयोः ॥ * ॥ निवेशनं निवेशस्थानम् । श्रीमत्त्वं तस्य गृहोचितभोगसाधनादिना ज्ञेयम् ॥ ३४ ॥ एवमित्थम् । इत्यर्थ इति—महतो महन्मध्यस्थस्य मध्यममल्पस्याल्पं चार्चनादि चकारेत्यर्थः ॥ * ॥ वीर्यं प्रभावः । बलं सैन्यम् । कामैरुपभोगैः ॥ ३९ ॥ भाविकर्म विवाहः । तन्मुखपंकजं कृष्णमुखारविन्दम् ॥ * ॥ तन्मुखपंकजं पपुरिति—तस्मादुच्छलितसौन्दर्यमाध्वीकमास्वादितवन्त इत्यर्थः । पेयतदाधारयोरभेदनिर्देशश्च पेयप्राचुर्यविवक्षया । किञ्च—नेत्रस्यांजालितारूपकं तत्राप्यतिशयमविच्छेदञ्च द्योतयाति, तथैव पिबतां तृष्णायाश्च । तस्मादहो किन्नाम तदपूर्वं पंकजमिति भावः ॥ ३६ ॥ अवधारणान्यवधारणवाक्यानि । तत्र तेषु षट्स्ववधारणेष्वेकस्मिन्वाक्ये व्यतिरेकस्यैवकाराभावस्य प्रदर्शनमुपलक्षणार्थम्—सर्वेषामिति । " संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते " इत्युक्तेर्वाक्यभेददोषः स्यादित्यत्राह—न चेति । तत्र हेतुमाह—अनुवाद्येति । तथाहि—अस्यैवेत्यनुवादः, नापरस्येति विधिः १ । नापरेत्यनुवादः, रुक्मिण्येति विधिः २ । अनर्हा नेत्यनुवादः, अर्हतीति विधिः ३ । नैवापर इत्यनुवादः,असाविति विधिः ४ । नैवापरस्या इत्यनुवादः, भैष्म्या इति विधिः ५ । नैवानुचित इत्यनुवादः, उचित इति विधिः ६ । इत्थमुद्देश्यविधेयभेदान्न वाक्यभेदोऽत्र । "ग्रहं संमार्ष्टि" इत्यत्र यद्यपि मार्जनरूपविधेयभेदो नास्ति तथापि "उद्देश्यानां ग्रहाणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचित्सुचरितं यन्नस्तेन तुष्टस्त्रिलोककृत् ॥ अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः ॥ ३८ ॥ एवं प्रेमकलाबद्धा वदंति स्म पुरौकसः ॥ कन्या चांतःपुरात्प्रागाद्भटैर्गुप्तांबिकालयम् ॥ ३९ ॥

धारणानि । तत्रैकस्मिन्व्यतिरेकप्रदर्शनमुपलक्षणार्थम् । नापरेति । न च वाक्यभेददोषः । अनुवाद्यविधेयभेदेन विभिन्नानामेव वाक्यानां सह प्रयोगात् । ग्रहं संमार्ष्टीत्या दिवदिति ॥ ३७॥ अयमेवानुग्रह इति निर्दिशंति । गृह्णात्विति ॥ ३८ ॥ प्रेम्णः कला लेशस्तेन बद्धा वदंति स्म । संपूर्णं प्रेम तेषां हृद्येवावर्ततेत्यर्थः ॥ ३९ ॥

द्वादश ग्रहा भवंति ' इत्युक्तेर्भेदान्न वाक्यभेदः । अत्र विशेषमाह–ग्रहं संमार्ष्टीत्यत्र द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्प्रयोजनवत्त्वाच्च प्राधान्यं गम्यते । संमार्गस्तु ग्रहं प्रति गुणीभूतः' प्रतिप्रधानं गुण आवर्तनीयः ': इति न्यायात् । यावन्तो ग्रहास्तेषां सर्वेषां संमार्ग इति निश्चये सति कति ग्रहाः संमार्जनीया इति बुभुत्साया अभावात् । उद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितं यदुच्यते, नेदमुद्देश्यगतं–किन्तु स्वयं विधेयं ग्रहं संमृज्यात्, यं संमृज्यात्तं चैकमिति तथा सति वाक्यभेदः स्यात् ।' तथा बुभुत्साया अभावाद्विधिना योगाच्चोद्देश्यगता संख्या न विवक्षिता । उद्देश्यगतमपि किञ्चिद्विशेषणं विवक्षितम् । यस्य विशेषणस्य विवक्षां विनोद्देश्यप्रतीतिर्न पर्यवस्यति, अतो ग्रहत्वं विवक्षितं तद्विवक्षां विनोद्देश्यग्रहस्वरूपस्य ज्ञातुमशक्यत्वात् । तेन ग्रहजातीयसाधनसोमयागापूर्वार्थत्वाच्च सर्वेषु संमार्ग इति स्थितं, निरूपितं चैतन्मीमांसापरिभाषायाम् ॥ * ॥ ततश्च तयोः सर्वोत्तमयोः परस्पर योग्यतासौष्ठवदर्शनेन सर्वेषामपि चित्तमाक्रान्तम् । अत एवं वदन्ति स्मेति त्रिकेणाह–अस्यैवेति । तत्रतत्रेत्याद्यनुसारेणैव योज्यम् । अस्यैव नापरस्य, रुक्मिण्येव नापरा, अर्हत्येव न तु नार्हति, असावेव नापरः, भैष्म्या एव नापरस्याः, सम्यगेवोचितो न त्वीषदप्यनुचितमिति । वाक्यभेदः खल्वेकस्यैव वाक्यस्य भेदाय नानात्वकल्पनम् । तस्य च दोषत्वं कल्पनागौरवात्, अर्थमात्रस्यैव भेदेऽप्येकवाक्यस्य नानाप्रतिपाद्यत्वेन तात्पर्यनिर्णयासिद्धेः, शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति न्यायविरोधाच्च । सिद्धान्तमाह–अनूद्येति । अयमर्थः–न तावदत्रैकमेकवाक्यं कुत्रापि किमनूद्य विधीयते कुत्रापि किमपीति विभिन्नानामेव वाक्यानां वाग्मितया सह प्रयोगात् । तथाहि–अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा इति प्रथमवाक्यं, रुक्मिण्येवास्य भार्याभवितुमर्हतीत्यादिद्वितीयमित्याद्येवकारात् । वृत्तिभेदेन वाक्यभेदे दोषं परिहरति–ग्रहमिति । ' दशापवित्रेण ग्रहं संमार्ष्टि ' इति तु पूर्ववाक्यम् । दशापवित्रं वासःखण्डः, ग्रहो यज्ञीयपात्रविशेषस्तेन संमृज्यादित्यर्थः । तत्र हि ग्रहमिति द्वितीयया ग्रहस्योद्देशतया प्रयोजनवत्तया च प्राधान्यं गम्यते । ग्रहं प्रति गुणः संमार्जनम् ' प्रतिप्रधानं च गुण आवर्तनीयः ' इति न्यायेन तत्रोपयुक्तं सर्वं ग्रहं प्रति संमार्जनक्रियावृत्तिः कार्या, तत्रैकत्वञ्चाविवक्षितं ग्रहशब्दो ह्यत्र जातिद्वारा द्रव्यलक्षक इति सर्वोऽपि गृह्यते । किं तूक्तादन्यत्र वैयर्थ्यमिति तत्रत्येष्वेवावर्त्यत आवृत्तौ च वाक्य भेदः स्यादेव । किन्तु तत्र दोषस्यानभ्युपगमो वाक्यद्वैविध्यस्यैव न्यायसिद्धत्वात् । एवमत्रोद्देश्यतया प्रयोजनवत्तया च यद्यद्विवक्ष्यते तत्तदेव गुणभूतेन तन्निर्द्धारवाचकेनैवकारेण संबध्यते । यथा–प्रथमवाक्ये इदं मदीयत्वमुद्देश्यं प्रयोजनवच्च तदेवानूद्य भार्यात्वं विधीयते । द्वितीयवाक्ये रुक्मिणीत्वमुद्देश्यमित्यादि । ततो ग्रहवाक्यवदत्रापि न वाक्यभेददोष इति । सर्वत्रैवैवशब्दान्वयेन व्यञ्जितायामन्योन्ययोग्यतायां हेतुः–अनवद्यात्मेति । इदं हि द्वयोरेव विशेषणमिति ॥ ३७ ॥ पौरा ऊचुः–किञ्चिदिति । सुचरितं तपोदानादिरूपम् । तेन सुचारितेन । अयमेव पाणिग्रहणरूप एव ॥ * ॥ ततश्च रागातिशयोदयवाक्यम्–किञ्चिदिति । इह पूर्वेषु च जन्मसु यत्किञ्चिदित्यर्थः । त्रिलोककृदिति परमसामर्थ्यमुक्तम्, जीवार्थं तत्सृष्टेर्दयालुत्वञ्च । अच्युत इति समरूपगुणवत्त्वम् । वैदर्भ्या इति संबंधोल्लेखः । त्रिलोककृदच्युतयोर्भेदेनोक्तिर्नरलीलामाधुर्याक्रान्ताचित्तत्वेन । ततो वैलक्षण्यस्मरणात् । वदन्ति स्म परस्परमविच्छेदेन कथयामासुरित्यर्थः ॥ ३८ ॥ इत्यर्थ इति–संपूर्णप्रेमाविर्भावे न जाने ते किं कुर्युरिति भावः ॥ * ॥ ननु रुक्म्यादिभ्यो भयं कथमत्यजंस्तत्राह–प्रेम्णः कला कलना ' कलनाकालयोः कला ' इति नानार्थात् । कलना चात्र भावना ' कलिहली कवीनां कामधेनुः ' इत्यभ्युपगमात् । यद्वा–प्रेमकलया रुक्मिणीविषयकप्रेमवृद्ध्या । " कला मूले प्रवृद्धौ स्याच्छिल्पादावंशमात्रके " इति मेदिनी । यद्वा–कलालेशः प्रेमा चायमनुमोदनात्मकः । स पुनरिह वरे सखीभावयोग्यः परममहानेव । तया बद्धा इति तस्याः शृङ्खलात्वं दृढत्वं च ध्वनितम् । एवं तल्लेशप्राप्त्यापि तेषामेषाऽवस्था, किमुत तासामित्यर्थः । कन्या चेति चकारात्सम कालताप्रतीतिः तादृशप्रेमोत्कण्ठायोग्यमेवेदमिति सूचयति । किञ्च–पुरौकसां तादृशोक्तिश्रवणात्तस्या महाप्रीतिस्तदुक्तेर्मंगलोपश्रुतित्वादभीष्टसिद्धिश्च द्योतयति । अत एव प्रकर्षेण जित्तप्रसादादिनाऽगात् ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्भ्यां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवम् ॥ सा चाऽनुध्यायती सम्यङ्मुकुंदचरणांबुजम् ॥ ४० ॥ यतवाङ्मातृभिः सार्धं सखीभिः परिवारिता ॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥ मृदंगशंखपणवास्तूर्यभेर्यश्च जघ्निरे ॥ ४१ ॥ नानोपहारबलिभिर्वारमुख्याः सहस्रशः ॥ स्रग्गंधवस्त्राभरणै र्द्विजपत्न्यः स्वलंकृताः ॥ ४२ ॥ गायंतश्च स्तुवंतश्च गायका वाद्यवादकाः ॥ परिवार्य वधूं जग्मुः सूतमागधबंदिनः ॥ ४३ ॥ आसाद्य देवसदनं धौतपादकरांबुजा ॥ उपस्पृश्य शुचिः शांता प्रविवेशांबिकांतिकम् ॥ ४४ ॥ तां वै प्रवयसो बालां विधिज्ञा विप्रयोषितः ॥ भवानीं वंदयांचक्रुर्भवपत्नीं भवान्विताम् ॥ ४५ ॥ नमस्ये त्वांबिकेऽभीक्ष्णं स्वसंतानयुतां शिवाम् ॥ भूयात्पतिर्मे भगवान्कृष्णस्तदनुमोदताम् ॥ ४६ ॥

गमनं विशिनष्टि द्वयेन । पद्भ्यामिति ॥४०॥ अपि च । मृदंगेत्यादि । जघ्निरे आहताः । वादिता इत्यर्थः ॥ ४१ ॥ वारमुख्या गणिकोत्तमाः ॥४२॥४३॥ उपस्पृश्याचम्य ॥ ४४ ॥ प्रवयसो वृद्धाः भवान्वितामिति भवस्योपसर्जनत्वं स्त्रीकर्मौचितमुक्तम् ॥ ४५ ॥ नमस्य इति । रुक्मिण्या तदैव दृष्टोऽयं मंत्रः । स्वसंतानयुतां गणेशादिस

तस्यौ रुक्मिण्याः । सा सम्यक्तु मुकुंदांघ्रिमेव दध्याविति भावः ॥*॥ तदेव विस्तरेणाभिव्यञ्जयति–पद्भ्यामिति सार्धचतुर्भिः। तत्राद्यद्वयं युग्मकं च । सापि तादृशमाहात्म्यापि । पद्भ्यामेव ययावत्र भवानीभक्तिरेव हेतुरित्याह–द्रष्टुमिति ॥ **विश्वनाथस्तु**–स्वपुराद्भवान्यालयपर्यंतं नरयानेनागत्य तदालयाभ्यंतरचतुष्पञ्चप्रकोष्ठान्पद्भ्यां ययावित्याह । पादपल्लवमित्यपि तद्भक्त्यनुसारेणैवोक्तम्। ननु साक्षाल्लक्ष्म्यास्तस्यां कथमेतादृशी भक्तिर्युज्यते, तत्राह–मुकुन्दचरणमेवांबुजं परमकोमलत्यादिगुणतया स्फुरितम् । सम्यक् तन्माधुर्योपरक्तत्वेनैव अनु निरंतरं ध्यायती ध्यायन्ती सोत्कण्ठं स्मरतीति नात्मनस्तस्या वा महिमांशोस्फुरदिति भावः ॥ ४० ॥ यतवाग्धृतमौना । यात्रोत्सवमाह–अपि चेति । इत्यर्थ इति–आहता वादिताः, वादनमेव तेषां हननं, विना ताडनं वादनाऽसंभवादिति भावः ॥ * ॥ भक्तावनुध्याने च लक्षणम्–यतवागिति । इयमेव निर्याणे विशब्दस्यार्थव्यक्तिः । तस्यास्तादृशावरणे माहात्म्येन दुर्लभतामुत्कंठिताञ्च विशेषतो व्यञ्जयन् वर्णयिष्यमाणमाकस्मिकश्रीकृष्णलाभं रसयितुं बीजं वपति–मातृभिरित्यादिभिः । मातृभिर्मात्रा तुल्याभिः । राजभटैः श्रीकृष्णभिया रुक्मिनियुक्तैः । अत एव शूरैः । किञ्च–सन्नद्धैर्गृहीतकवचादिभिस्तथोद्यतायुधैः । विशेषणानामेतेषां यथोत्तरं गोपनप्रकारे श्रैष्ठ्यम् । मृदंगेत्यर्द्धकम् । मृदंगा मुरजाः, पणवा अन्तस्तन्त्रीकाः, तूर्याः, 'तुर' इति प्रसिद्धाः । एते आनद्धभेदाः। भेर्यश्च सुषिरभेदा आनद्धभेदाश्चेति द्विविधाः ॥ ४१ ॥ ० ॥ * ॥ नानेति युग्मकम् । नानाविधैरुपहारैरुपढौकनैर्बलिभिश्च नियतपूजाद्रव्यैः सह गायका गायन्तः, सूतादयश्च स्तुवंत इति विवेकः । वाद्यानां वादकाः, वाद्यानि वादयंत इति शेषः ॥ ४२ ॥स्तुवंतो देवीम् ॥ * ॥ ० ॥ ४३ ॥ धौतपादकरांबुजा प्रक्षालितहस्तपादा ॥ * ॥ पूर्ववद्भवानीभक्तिं विवृणोति–आसाद्येति षड्भिः । देवसदनं देव्याः प्रासादम् । महदालयांतर्गतमणिमंडपमिति **विश्वनाथः** । " कुक्कुट्यादीनामण्डादिषु " इति पुंवद्भावात्, भवादीनामपि तत्र स्थितत्वेनैकशेषत्वाद्वा । शांता समाहितचित्ता ॥ ४४ ॥ तां रुक्मिणीम् । उपसर्जनत्वं गौणत्वम् । स्त्रीकर्मसु स्त्रीणामेव प्राधान्यमिति द्योतनायेति भावः । विधिज्ञाः स्त्रीशास्त्रकुशलाः ॥ * ॥ भवानीं, भवपत्नीम्, भवस्य कामसहचरीम्, धर्मसहचरीमित्यर्थः । आद्ये पुंयोगे, द्वितीये यज्ञसंयागे ङीष्विधानात् । विप्रयोषितः पुरोहितस्त्रियः । विधिज्ञाश्शास्त्रविधिज्ञाः । पौराणिकप्रणवोज्झितैर्मूलमंत्रैः श्रीभवान्यै पाद्यादीनि समर्पयामि नम इत्यादिपूजाविधिज्ञा रुक्मिण्यंतर्गताभिप्रायज्ञा वा । भवान्वितामिति–हे भवानि त्वं यथा भवपत्नी भवान्वितासि तथैव मामपि कृष्णपत्नीं कृष्णान्वितां कुर्वीति ताभिः कृष्णमालोक्य 'किञ्चित्सुचरितं यन्नः' इति प्राक्प्रार्थितत्वादिति भावः ॥ ४५ ॥ तदैव पूजनावसर एव । दृष्टो ज्ञातः, न पूर्वं पठित इत्यर्थः । आदिना कार्तिकेयग्रहः । यद्वा–संतानपदं विस्तारपरम्, तेन नदिभृंग्यादिग्रहः । अत्राशंकते–आत्मारामेति । तत् मत्पतिभवनम् । भवती त्वम् । अनु

१–तस्या गमनं विशिनष्टीति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अद्भिर्गंधाक्षतैर्धूपैर्वासः स्रङ्माल्यभूषणैः ॥ नानोपहारबलिभिः प्रदीपावलिभिः पृथक् ॥ ४७ ॥ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् ॥ लवणापूप तांबूलकंठसूत्रफलेक्षुभिः ॥ ४८ ॥ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ॥ ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ॥ ४९ ॥ मुनिव्रतमथ त्यक्त्वा निश्चक्रामांबिकागृहात् ॥ प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना ॥ ५० ॥ तां देवमायामिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननाम् ॥ श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकितेक्षणाम् ॥ ५१ ॥

हिताम् । आत्मारामोऽसौ कथं त्वत्पतिर्भवेदिति चेदत आह । तदनुमोदतामिति । भवती श्रीकृष्ण एव वा ॥ ४६ ॥ वासःस्रग्गंधादिभिरंबिकां समपूजयत् ॥ ४७ ॥ तथा विप्रस्त्रियोऽपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयदिति ॥ ४८ ॥ शेषां निर्माल्यम् ॥ ४९ ॥ मुनिव्रतं मौनम् । भृत्यां सखीम् ॥ ५० ॥ तां विलोक्य वीरा मुमुहुरिति

मोदतामंगीकुरुताम् । तत्रानुमोदनेन त्वया सह तदभेदाच्छ्रीकृष्णोऽवश्यं मे पतिर्भविष्यतीति भावः । तदुक्तं कौर्मे–"न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मायाहं परं ब्रह्म स विष्णुः परमेश्वरः ॥ " इति । त्वदभिन्नत्वाद्वा कृष्ण एवानुमोदतामित्यर्थः ॥ * ॥ वंदनमंत्रस्तु–नमस्य इति । आम्बिके जगन्मातः । शिवामिति–शिवेन सह समाननामगुणत्वादिना भेदाभावात्तन्नाम्ना सोऽपि लभ्यत इति व्यक्तम् । ततस्तेन सहितामित्यर्थः । एवं योग्यतां निर्दिश्य प्रार्थयते–भूयादिति । भगवान् परमोर्द्धपरमैश्वर्यमाधुर्यवान् । अत एव कृष्णः सर्वचित्ताकर्षकः । किमुत तन्निष्ठाया ममेत्यर्थः । स्वसंतानयुतामिति–गणेशोऽत्र मम विघ्नं खंडयत्विति भावः । तत्तत्र । भवतीत्यनुमोदतां स एव मत्पतिर्भवत्विति संमतिमात्रमत्र दत्ताम् । सिद्धप्रायत्वान्मनोरथस्येति भावः । यद्वा–त्वदर्चनप्रभावेण कृष्ण एवेत्यौत्कंठ्यविह्वलायास्तत्स्वीकारस्यापि नातिप्रतीतेः ॥ ४६ ॥ अद्भिर्जलैः ॥ * ॥ अद्भिरिति युग्मकम् । अत्रादीनामक्रमोक्तिः श्रीकृष्णाविष्टत्वेन तस्या मुनेर्वा पूजाक्रमविस्मृतेः । स्रक् पौष्पी, माला रत्नमयी ॥ ४७ ॥ पतिमतीर्भर्तृमत्यः । लवणपदेन सलवणपाको ग्राह्यः, केवलस्य देवार्चनोपचारेष्वप्रसिद्धेः । अपूपो बहुच्छिद्रः पाकः । कंठसूत्रमुपवीतम्, हारः कंदविशेषो वा । तदुक्तम्–" पुष्पहारे रत्नहारे ह्युपवीतेऽथ भूषणे । स्त्रीणां कंठस्य शास्त्रज्ञे पाकभेदेऽथ कुंकुमे ॥ कंठसूत्रो नाटकज्ञे फले शार्कररकंदके । " इति निरुक्तिः । केचित्तु–"कण्ठसूत्रं नागरङ्गे स्त्रीणां सौभाग्यभूषणे" इत्याहुः ॥ * ॥ लवणापूपाः कचोरिका इति केचित् । पृथगिति रुक्मिणीदेव्या विप्रस्त्रीणां च पूजाद्रव्याणां पार्थक्यं बोधयति । विप्रस्त्रीणां पृथक्त्वं च तदिष्टसिद्धये स्वयमपि पृथक्पूजनात् ' किंचित्सुचरितत् ' इत्यादिवम् । अतः सम्यगपूजयत् । प्रदीपावलिभिरित्यंते महानीराजनात् । पतिमतीरित्येवंलक्षणकर्मणि पतिपुत्रवतीनामेवाधिकार इति बोधयति ॥ ४८ ॥ तस्यै रुक्मिण्यै । ता विप्रपत्न्यः । शेषां पुष्पमालाम् " देवार्पितार्चकप्रत्ता शेषा स्यात्पुष्पमालिका " इति संहितोक्तेः । विश्वकोशे तु–" प्रसादान्निजनिर्माल्यदाने शेषाऽनुकीर्तिता " इत्युक्तम् । ताभ्यो ब्राह्मणीभ्यो देव्यै च । वधू रुक्मिणी ॥ * ॥ ० ॥ ४९ ॥ अथ शेषाग्रहणोत्तरम् । ' भृत्या दासी सखी भृत्या भृत्या भृतिरिहोदिता " इति बह्वर्थवाग्विलासे ॥ * ॥ रत्नमुद्रा रत्नांगुलीयकम् ॥ ५० ॥ तां रुक्मिणीम् ॥ * ॥ अथावसरं प्राप्य विरोधिपरिभवाय तस्याः प्रभावोऽप्याविर्बभूवेत्याह–तामिति । **विश्वनाथस्तु**–तां चिदानंदमयीं श्रीभगवच्छक्तिं श्रीरुक्मिणीं भगवद्विषोऽसुरा मायामेव प्रतियंति स्मेत्याह–तामिति सार्द्धैः पादोनत्रिभिः । तां रुक्मिणीं देवमायामेव विलोक्य वीरा मुमुहुरिति तृतीयेनान्वयः । इवेत्येवार्थे । ' मल्लानामशनिः ' इत्यत्रायमशनिरेव न तु सुकुमारो बाल इति मल्लाः कृष्णं यथाऽमंसत । अशनित्वञ्च न तस्य स्वरूपमतो मल्लाद्याः स्वस्वदृग्भिस्तस्याऽस्वरूपमेव जगृहुः " कृष्णनिष्ठं स्वरूपं स्याददैत्यैः सुगमं जनैः " इत्युक्तेः । तथा देवानामपीयं माया परममोहिनी कापि सुंदरी न त्वियं मानुषीति तां मत्वेत्यर्थः । देवमायामेव विशिनष्टि–वीरेत्यादिभिः । श्यामाम् " शीतंकाले

१ पूर्वपद्यस्थं पृथक्पदमत्राऽप्यन्वेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलाम् ॥ पदा चलंतीं कलहंसगामिनीं शिंजत्कलानूपुरधामशोभिना ॥ ९२ ॥ विलोक्य वीरा मुमुहुः समागता यशास्विनस्तत्कृतहृच्छयार्दिताः ॥ ९३ ॥ यां वीक्ष्य ते नृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः ॥ पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छलेन हरयेऽर्पयतीं स्वशोभाम् ॥ ९४ ॥ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा ॥ उत्सार्य वामकरजैरलकानपांगैः प्राप्तान्ह्रियैक्षत नृपान्ददृशेऽच्युतं सा ॥ ९५ ॥

तृतीयेनान्वयः । श्यामामजातरजस्काम् । कुंतलेभ्यः शंकिते इव चपले ईक्षणे यस्यास्ताम् ॥ ९१ ॥ द्विजा एव कुंदानां कुड्मलानि मुकुलानि बिंबफलवद्योऽधरस्तस्यद्युतिभिः शोणायमानानि तानि यस्यास्ताम् । कला शोभा तद्युक्तं नूपुरं शिंजच्च तत्कलानूपुरं च तस्य धाम दीप्तिस्तेन शोभितुं शीलमस्य तेन पदा चलंतीम् ॥ ९२ ॥ ९३ ॥ न केवलं मुमुहुः पेतुश्चेत्याह । यामिति । यात्रामिषेण हरये स्वलावण्यं समर्पयंतीं यां वीक्ष्य क्षितौ पेतुः सा तान्प्राप्तान् ह्रिया ऐक्षत तदैवाच्युतं च ददर्शेत्युत्तरेणान्वयः ॥ ९४ ॥ चलत्पद्मको

भवेदुष्णा उष्णकाले च शीतला । स्तनौ यस्याः सुकठिनौ सा श्यामा परिकीर्तिता ॥ '' इत्युक्तलक्षणाम् । व्यञ्जयन्तौ व्यक्तीभवंतावेव स्तनौ यस्यास्ताम् । कुन्तलेभ्यः शंकिते इव चपले इवेक्षणे नेत्रे यस्यास्ताम् ॥ ९१ ॥ शिंजत् शब्दं कुर्वत् ' भूषणानां तु शिञ्जितम् ' इत्यमरः ॥ * ॥ बिम्बफलाधरस्य द्युतिभिः शोभायमाना द्विजा दंता एव कुन्दकुड्मलानि यस्यास्ताम् । शिजञ्च तत्कलानूपुरमतिशिल्पनिर्मितनूपुरं तस्य धामभिः शोभिना पदा चलन्तीम् ॥ ९२ ॥ ० ॥ * ॥ तत्कृतो मायाप्रतीतिजनितो यो हृच्छयः कामस्तेनार्दिताः, यथा गंधर्वदत्ताग्निस्थालीमुर्वशीमिव विलोक्य पुरूरवाः कामार्दितोभूयथैव तस्य काम उर्वशीज्ञानजन्य एव न तु स्थालीप्रतीतिजन्यस्तथैव वीराणां हृच्छयो मायाप्रतीतिजन्य एव न तु रुक्मिणीप्रतीतिजन्य एवेत्ययमेवार्थस्सत्संमतः, अन्यथा वीरत्वयशास्वित्वव्याघातः स्यादिति । यथाऽसुरमोहनार्थे श्रीभगवता मोहिनीरूपं दर्शितं तथात्रापि मोहिनीरूपमेव श्रीरुक्मिण्या दर्शितमिति ज्ञेयम् ॥ ९३ ॥ यां रुक्मिणीम् ॥ * ॥ यां मोहिनीरूपतया भातां वीक्ष्य नृपतयः क्षितौ पेतुः । स्वरूपतया सर्वतो विलक्षणां स्त्रीयां शोभां हरयेऽर्पयंतीं, न त्वसुरेभ्य इवान्येभ्यो भातामित्यर्थः ॥ ९४ ॥ सेति सार्द्धद्वयोरन्वयः । वामकरजैः सव्यहस्तनखैः । तदा नृपेक्षणसमये । सेति भिन्नवाक्यत्वान्न पौनरुक्त्यम् ॥ * ॥ सा कृष्णं दिदृक्षमाणैव प्राप्तांस्तत्राऽगतान् ह्रिया ऐक्षत । एतेऽन्ये पुरुषा इति तद्दर्शनेन लज्जाजनिष्टेति भावः । तन्मध्य एवाच्युतं स्वोक्तच्युतिवर्जितम् 'तामानयिष्ये' इत्याद्युक्तेः । किं कुर्वती—चरणावेवाब्जकोशौ तौ तस्य प्रत्यासत्तिकामनया शनैश्चालयंती ' चलत्पद्मकोशौ ' इति पाठः स्वामिसंमतः । अत्र रूपकबलेनैव रूप्यं लभ्यत इति चरणावध्याहृतौ । अतिशयोक्तिनामालंकारस्य प्रथमभेदोयम् । यथोक्तम्—" सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते । भेदेप्यभेदः संबंधेऽसंबंधस्तद्विपर्ययौ ॥[1] पौर्वापर्य्यात्ययः कार्यहेत्वोः सा पञ्चधा मता । '' इति । विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिनोध्यवसाय इति । ' अच्युतं च ' इति प्रायः स्वामिसंमतः पाठः । ' अच्युतं सा ' इति पाठः सर्वत्र दृश्यते । अत्र पूर्वत्र सा तादृशी

१ पूर्वपद्यतद्व्याख्यादर्शनात् ।

तां राजकन्यां रथमारुरुक्षतीं जहार कृष्णो द्विषतां समीक्षताम् ॥ रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ॥ ततो ययौ रामपुरोगमैः शनैः शृगालमध्यादिव भागहृद्धरिः ॥ ५६ ॥ तं मानिनः स्वाभिभवं यशःक्षयं परे जरासंधवशा न सेहिरे ॥ अहो धिगस्मान्यश आत्तधन्वनां गोपैर्हृतं केसरिणां मृगैरिव ॥ ५७ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंध उत्तरार्धे रुक्मिणीहरणं नाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥श्रीशुक उवाच ॥ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः ॥ स्वैःस्वैर्बलैः परिक्रांता अन्वीयुर्धृतकार्मुकाः ॥ १ ॥ तानापतत आलोक्य यादवानीकयूथपाः ॥ तस्थुस्तत्संमुखा राजन्विस्फूर्ज्य स्वधनूंषि ते ॥ २ ॥ अश्वपृष्ठे गजस्कंधे रथोपस्थे च कोविदाः ॥ मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ॥ ३ ॥ पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सुमध्यमा ॥ सव्रीडमैक्षत्तद्वक्त्रं भयाविह्वललोचना ॥ ४ ॥

शतुल्यौ चरणौ चालयंतीम् ॥ ५५ ॥ सुपर्णलक्षणं गरुडध्वजम् । हरिः सिंहः ॥ ५६ ॥ असहमानानां तेषामाक्रोशमाह । अहो धिगस्मान् । यतोऽस्माकं यशो गोपैर्हृतमिति ॥ ५७ ॥ इति श्रीमद्भागवते म० दशमस्कंध उत्तरार्धे श्री० टीकायां त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ चतुष्पंचाशत्तमे तु जित्वा राज्ञोऽरिपक्षगान् ॥ रुक्मिणं च विरूप्याथ भैष्म्याः पाणिं पुरेऽग्रहीत् ॥ १ ॥ इतीति । अहो धिगस्मानित्येवं वदंतः । सुसंरब्धाः क्रोधाविष्टाः । दंशिताः कृतसन्नाहाः ॥ परिक्रांताः परिवृताः । अन्वीयुरन्वधावन् ॥ १ ॥ विस्फूर्ज्य टंकारयित्वा ॥ २ ॥ परेषां शराणां बाहुल्ये यादवानामचलत्वे दृष्टांतः । मेघा इति ॥ ३ ॥ ऐक्षदैक्षत ॥ ४ ॥

यत्तदोरन्वयबलात्, उत्तरत्र सा रुक्मिणीति प्रकरणबलात् । अच्युतामिति—निजचित्ताच्च्युतिराहित्याभिप्रायेण । अतस्तत्परिचायनापेक्षा नास्तीति भावः ॥ ५५ ॥ तां रुक्मिणीम् । ततो राजसमूहात् । ‘ हरिः सिंहे कपौ हरे ’ इति कोशात् ॥ * ॥ रथमारुरुक्षतीं कालविलम्बाय तथा तदारोहणार्थमितस्ततश्चेष्टामात्रं कुर्वतीं न तु सहसारोहन्तीमित्यर्थः । पूर्वं तदनारोहणं देवयात्रागौरवेणेति ज्ञेयम् । समीक्षतामित्यनादरे षष्ठी । एवं परमप्रागल्भ्यं विक्रमवत्त्वं क्षिप्रकारित्वं च दर्शितम् । सुपर्णमिति—रथांतराऽऽशंकानिरासः, शोभातिशयश्चोक्तः । शनैर्ययाविति निर्भयत्वात् ॥ ५६ ॥ तं रुक्मिणीहरणरूपम् । तेषां जरासंधादीनाम् । आक्रोशं स्वपरनिंदनरूपम् । केसराः संति येषां ते “ केसरं हिंगुनि क्लीबं किंजल्के न स्त्रियां पुमान् । सिंहच्छटायां पुन्नागे बकुले नागकेसरे ॥” इति मेदिनी ॥ * ॥ यशसः क्षयो यस्मात्तम् । परे शत्रवः, तत्रापि मानिनः । ‘परैः’ इति पाठः क्वचित् । ‘जरासन्धवशाः’ इति च । आत्तं यद्धनुस्तत्प्रशस्तत्वेन विद्यते येषामारोपितधनुष्पाणीनां राज्ञामपि । गोपैरिति बहुत्वं श्रीकृष्णानुवर्तित्वेन यदूनामपि गोपत्वमननात् । ‘अस्मद्यशः’ इति पाठश्चिन्त्यः ॥५७॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्धे त्रिपञ्चाशत्तमोऽध्यायः॥५३॥ अरिपक्षगान् । शिशुपालपक्षीयान् । विरूप्य मुंडयित्वा (१) । सर्वे जरासंधादयः ॥ * ॥ वाहान् गजादीन् । धृतकार्मुका इति पूर्वं विमूढत्वेनोज्झितास्त्रतया गजादिभ्यो भूमौ पतनात् ॥ १ ॥ तान् राज्ञः । यादवानीकानां यूथानि पांति ये तथा ते बलदेवादयस्तत्संमुखा राजाभिमुखाः ॥ * ॥ त इति श्रीरामेण सहतदर्थमैव य आगता इत्यर्थः ॥ २ ॥ रथोपस्थे रथमध्ये “ उपस्थः शेफसि क्रोडे तथा मदनमंदिरे ” इति मेदिनी । क्रोडे मध्ये ॥ * ॥ रथोपस्थे तदुपरिस्थितनीडे । कोविदा युद्धाऽभिज्ञा जरासंधाद्याः ॥ ३ ॥ तद्वक्त्रं श्रीकृष्णमुखम् ॥ * ॥ सुमध्यमेति—लज्जयावनतमध्यत्वेन तत्र भंगुरत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रहस्य भगवानाह मा स्म भैर्वामलोचने ॥ विनंक्ष्यत्यधुनैवैतत्तावकैः शात्रवं बलम् ॥ ५ ॥ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः ॥ अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्रथान् ॥ ६ ॥ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि ॥ सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः ॥ ७ ॥ हस्ताः सासिगदेष्वासाः करभा उरवोंघ्रयः ॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ॥ ८ ॥ हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः ॥ राजानो विमुखा जग्मुर्जरासंधपुरःसराः ॥ ९ ॥ शिशुपालं समभ्येत्य हृतदारमिवातुरम् ॥ नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् ॥ १० ॥ भोभोः पुरुषशार्दूल दौर्मनस्यमिदं त्यज ॥ न प्रियाप्रिययो राजन्निष्ठा देहिषु दृश्यते ॥ ११ ॥ यथा दारुमयी योषिन्नृत्यते कुहकेच्छया ॥ एवमीश्वरतंत्रोऽयमीहते सुखदुःखयोः ॥ १२ ॥

मा स्म भैः मा भयं कुरु । हे वामलोचने वराक्षि तावकैस्त्वदीयैः ॥ ५ ॥ स चासौ विक्रमश्च तम् ॥ ६ ॥ उष्णीषाणि शिरोऽवतंसवस्त्राणि तत्सहितानि शिरांसि ॥ ७ ॥ करभाः प्रकोष्ठा ऊरुविशेषणं वा ॥ ८ ॥ ९ ॥ अप्राप्तदारमेव तं हृतदारमिवातुरम् ॥ १० ॥ निष्ठा स्थैर्यम् ॥ ११ ॥ कुहको नर्तयिता तस्येच्छया दुःखेऽपीहमानत्वेन

व्यक्तेः ॥ ४ ॥ एतद्दृश्यमानम् ॥ * ॥ प्रहस्येति स्वस्य निर्भयत्वं सूचयंस्तामाश्वासयति—हे वामलोचन इति । स्त्रीस्वभावं भीरुत्वं मा स्वीकुरु, त्वं वामे शोकाश्रुराहित्यान्मनोहरे एव लोचने भविष्यतो यस्यास्ता दृश्येवं भविष्यसि, न त्वस्मत्पराजयेन विक्लवनेत्रा भविष्यसीति भावः । तावकैरस्माभिः । स्वेषां तदीयत्वनिर्देशस्तस्यां परमप्रणयव्यंजकः ॥ ५ ॥ तेषां राज्ञाम् ॥ * ॥ तद्विक्रममिति—कर्मधारयेण नीलोत्पलमितिवद्विक्रमस्य स्वाभाविकत्वमसूचि । गदस्याग्रोक्तिर्भक्तिविशेषेणाग्रे भवनात् । हयानामतिचंचलत्वात्प्रथमम्, ततो गजानां स्थूलशरीरत्वात्, सर्वांते पराजयपूर्णतेच्छया सर्वतोमुखानां रथानामिति क्रमनिर्देशाभिप्रायः ॥ ६ ॥ 'उष्णीषं तु शिरोवेष्टे' इति मेदिनी । शिरोवतंसवस्त्राणि शिरःशोभाकरवस्त्राणि ॥ * ॥ पेतुरिति युग्मकम् ॥ ७ ॥ ऊरुविशेषणे तु करभतुल्या इति ज्ञेयम् । हस्ता इत्युक्तेरेव करग्रहणाद्विकल्पः । अश्वतरो गर्दभादश्वायां जातः ॥ * ॥ "मणिबंधादाकनिष्ठं करस्य करभो बहिः" इत्यमरानुसारेण करैकदेशो लक्ष्यते ॥ ८ ॥ ० ॥ * ॥ ० ॥ ९ ॥ नष्टत्विषं गतकांतिम् ॥ * ॥ नष्टत्विषमित्यादिना कायमनोवाचां क्रमेण शत्त्यपक्रम ऊह्यः ॥ १० ॥ दौर्मनस्यं वैमनस्यम् । निष्ठा नियतत्वम् "निष्ठोत्कर्षे व्यवस्थायां नियते नाशयाच्ञयोः" इति हलायुधः ॥ * ॥ श्रीमुनींद्रस्तेषां वाक्येनैव तानुपहसति—भोभोः इत्यादिना । वीप्सा त्वत्यार्तस्याभिमुख्यार्था । हे पुरुषशार्दूलेति—सत्पुंसो हि दौर्मनस्यं नोचितमिति भावः । देहिषु नानादेहं प्राप्तवत्सु जीवेषु । हे राजन्निति—राज्ञां पारंपर्यागतमेवेदं वृत्तं, काशीराजप्रभृतिकन्यासु भीष्मादिभिस्तथाकरणादिति न शोक उचित इति भावः ॥ ११ ॥ दृष्टांतेन बोधयंत आहुः—यथेति । ईहमानत्वेन वर्तमानत्वेन । व्यक्तं प्रसिद्धम् ॥ * ॥ तच्च कुतस्तत्राह—यथेति । अयं सर्वोऽपि जनः । ईहते प्रवर्तते । ईश्वरः "अपाणिपादो जवनो ग्रहीता" इत्युक्तलक्षणः, "सहस्रशीर्षा पुरुषः" इत्युक्तलक्षणो वेति राज्ञां भावः, एवमीश्वरमात्रज्ञाने पूर्णतदाविर्भावपरब्रह्मश्रीकृष्णवैमुख्यात्सर्वं तद्विधानं भस्मनि हुतमिति तु श्रीमुनींद्रस्य ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौरेः सप्तदशाहं वै संयुगानि पराजितः ॥ त्रयोविंशतिभिः सैन्यैर्जिग्य एकमहं परम् ॥१३॥ तथाऽप्यहं न शोचामि न प्रहृष्यामि कर्हिचित् ॥ कालेन दैवयुक्तेन जानन्विद्रावितं जगत् ॥१४॥ अधुनापि वयं सर्वे वीर यूथपयूथपाः ॥ पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालितैः॥१५॥रिपवो जिग्युरधुना काल आत्मानुसारिणि ॥ तदा वयं विजेष्यामो यदा कालः प्रदक्षिणः ॥ १६ ॥ एवं प्रबोधितो मित्रैश्चैद्योऽगात्सानुगः पुरम् ॥ हतशेषाः पुनस्तेऽपि ययुः स्वंस्वं पुरं नृपाः ॥ १७ ॥ रुक्मी तु राक्षसोद्वाहं कृष्णाद्विडसहन्स्वसुः ॥ पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्या वृतो बली ॥१८॥ रुक्म्यमर्षी सुसंरब्धः शृण्वतां सर्वभूभुजाम् ॥ प्रतिजज्ञे महाबाहुर्दंशितः सशरासनः ॥ १९ ॥ अहत्वा समरे कृष्णमप्रत्यूह्य च रुक्मिणीम् ॥ कुंडिनं न प्रवेक्ष्यामि सत्यमेतद्ब्रवीमि वः ॥ २० ॥ इत्युक्त्वा रथमारुह्य सारथिं प्राह सत्वरः ॥ चोदयाश्वान्यतः कृष्णस्तस्य मे संयुगं भवेत् ॥ २१ ॥ अद्याहं निशितैर्बाणैर्गोपालस्य सुदुर्मतेः ॥ नेष्ये वीर्यमदं येन स्वसा मे प्रसभं हृता ॥ २२ ॥

पारवश्यं व्यक्तं दर्शितम् ॥ १२ ॥ अत्र चाहमेव दृष्टांत इत्याह जरासंधः । शौरेरिति । कृष्णात्सकाशात् । एकं संयुगम् । परं केवलमंतिमं वा जितवानहम् ॥१३॥ दैवम् दृष्टं तद्युक्तेन ॥ १४ ॥ फल्गुतंत्रैः स्वल्पसैन्यैः ॥ १५ ॥ प्रदक्षिणोऽनुकूलः स्यात् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ गोपालस्य वेदपालकस्येति

अत्र च पारवश्ये च । संयुगानि संयुगेषु सप्तदशसु । सैन्यैरक्षौहिणीभिः "एव सप्तदशाक्षत्वस्तावत्यक्षौहिणीबलः" इत्युक्तेः । कमेकमित्याकांक्षाशमनायाह—अतिमं वेति ॥ * ॥ एवं संहत्योक्तेऽपि तस्य दौर्मनस्याऽत्यागं दृष्ट्वा स्वयं जरासंध एवं स्वानुभवदर्शनेन सान्त्वयति—शौरेरिति । कर्तरिषष्ठी छांदसी । शौरिणाहं त्रयोविंशाक्षौहिणीभिस्सहितोऽपि पराजितः । शूरनन्दनत्वेनेश्वरतामपह्नुवानो निंदयते । प्रौढित्वं चाह निजमानरक्षणार्थम्—एकमिति ॥ १३ ॥ यद्यपि पराजितस्तथापीत्यर्थः ॥ * ॥ तथापि पराजये न शोचामि, जये न हृष्यामि । विद्रावितं संक्षोभितम् । ननु कालस्य सर्वत्र साम्येन ततो न प्रियाऽप्रियप्राप्तिसंभवस्तत्राह—दैवेति । स्वकर्मणां वैचित्र्यादित्यर्थः । पूर्वमीश्वरेच्छैव कारणमुक्तमधुना तु दैवयुक्तः काल इति । अस्यायं भावः—जीवस्य दैवमनन्तमस्त्यनीदत्वात्, तत्रेश्वरचेष्टात्मककालविशेषो दैवविशेषमुपादत्त इति ॥ १४ ॥ 'तंत्रं परिच्छदे' इति कोशात्फल्गुतंत्रैः स्वल्पसेनापरिच्छदैः । 'फल्वसोरऽभिधेयवत्' इति मेदिनी ॥ * ॥ प्रकृतलज्जादुःखापलापं तत्सर्वं योजयति—अधुनापीति । संप्रति पश्येत्यर्थः । वयमिति सर्वापेक्षया । कृष्णेति मूलनामग्रहणमवज्ञासूचनार्थम् ॥ १५ ॥ "प्रदक्षिणोऽनुकूले परिक्रामेऽतिदक्षिणे ज्ञेयः" इति निरुक्तिः ॥ * ॥ आत्मनोऽनुसारिणि अनुकूले सति ॥ १६ ॥ एवमुक्तरीत्या ॥ * ॥ हतेभ्यः शेषाः, बहवो हता इति द्योतनायैव ॥ १७ ॥ असहन्नसहमानः । आर्षत्वाच्छताऽत्र ॥ * ॥ पूर्वोक्ते युद्धारम्भे रुक्मिणो वृत्तमाह—पृष्ठतः पश्चादिति । श्रीबलदेवादिषु युद्धभारं विन्यस्य श्रीकृष्णस्य द्वारकां प्रति प्रस्थानात् । तदुक्तं हरिवंशे—" आदाय रुक्मिणीं कृष्णो जगामाशु पुरं प्रति । रामे भारं समासज्य युयुधाने च वीर्यवान् ॥ अक्रूरे विपृथौ चापि गदे च कृतवर्मणि । चक्रदेवे सुदेवे च सारणे च महाबले ॥ निवृत्तशत्रौ विक्रान्ते भंगकारे विदूरथे । उग्रसेनात्मजे कंके शतद्युम्ने च केशवः ॥ राजाधिदेवे मृदरे प्रासने चित्रके तथा । अरिदान्ते बृहद्दुर्गे श्वफल्के सत्यके पृथौ ॥ वृष्ण्यंधकेषु चान्येषु मुख्येषु मधुसूदनः । " इति । सर्वान्वर्त्मनि स्थितांस्तान्वंचयित्वेति ज्ञेयम् ॥ १८ ॥ दंशितो बद्धकवचः ॥ * ॥ अमर्षी असहनः । सुसंरब्धोऽतिक्रोधी । महाबाहुरिति बाहूत्थापनाभिप्रायेण ॥ १९ ॥ अप्रत्यूह्य अन्यस्मै अदत्त्वाऽनानाय्य वा ॥ * ॥ संगरे न तु मायादिना । अप्रत्यूह्यानिवर्त्य । न प्रवेक्ष्यामीति पौरजनेषु निजमुखदर्शनायोग्यत्वात्, इयं च दैवी गर्भावित्वात् ॥ २० ॥ यतो यत्र । तस्य तेन ॥ * ॥ यतो यत्र द्वारकायां परमदुर्गेऽपि कुतस्तस्य मे मया सह संयुगं भवेत् । कामप्रवेदने लिङ् । ममेच्छेत्यर्थः । हेतौ वा, तद्भवनहेतोरित्यर्थः ॥ २१ ॥ प्रसभं हठात् ॥ * ॥ तच्च किमर्थं, तत्राह—अद्येति । नेष्ये गमयिष्यामि, हरिष्यामीत्यर्थः । तत्त्वार्थश्चायम्—गोपालस्य तद्रूपलीलत्वेनैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेन गोविंदं तिष्ठतिष्ठेत्यथाह्वयत् ॥ २३ ॥ धनुर्विकृष्य सुदृढं जघ्ने कृष्णं त्रिभिः शरैः ॥ आह चात्र क्षणं तिष्ठ यदूनां कुलपांसन ॥ २४ ॥ कुत्र यासि स्वसारं मे मुषित्वा ध्वांक्षवद्धविः ॥ हरिष्येऽद्य मदं मंद मायिनः कूटयोधिनः ॥ २५ ॥

वास्तवोऽर्थः ॥ तथा सुदुर्मतेरिति शोभनानुग्रहवती दुष्टेष्वपि मतिर्यस्य तस्येति ॥ २२ ॥ २३॥ यदूनां कुलपांसन कुलदूषण वस्तुतस्तु यदूनां कुलस्य पते हे अंसन स्वयं च रिपुहननचतुर ॥ 'अंस समाघाते' इत्यस्माद्धातोः कर्तरि ल्युट् प्रत्ययो नंद्यादिविहितः ॥ २४ ॥ ध्वांक्षः काकः स यथा हविर्मुष्णाति तद्वत् । वस्तुतस्तु अध्वांक्षवदिति

प्रकाशितापूर्वसर्वैश्वर्यमाधुर्यस्यानाद्यनंतकालसिद्धवेदसिद्धसर्वमंत्रश्रेष्ठयोरष्टादशदशाक्षरयोराधिदेवस्य स्वयं भगवत इत्यर्थः । तर्हि कथं बहूनामन्यत्र प्रवृत्तिस्तत्राह—सु सुष्ठु दुरतिकृच्छ्रेण मतिर्ज्ञानं. यस्य तस्य निशितैर्बाणैर्निजमेव वीर्यमदं नेष्ये गमयिष्यामि, क्षपयिष्यामीत्यर्थः । तर्हि कथं तत्र तस्य सामर्थ्यं, दर्शयति—येनेति । प्रसभं सर्वानपि राज्ञः पराभूयेत्यर्थः । म इति वीर्यमदमित्यनेनाप्यन्वितं वा ॥ २२ ॥ विकत्थमान आत्मानं श्लाघमानः ॥ ॥ * ॥ विरूपं कत्थमान आत्मानं श्लाघमानः, अतः कुमतिः, अतोऽप्रमाणवित् माहात्म्यानभिज्ञः, अत एव श्रीबलदेवं वर्त्मांतरेण वंचयित्वा एकेन रथेन सह वर्तमान एकाकिना भगवता स्वयमेवैकाकितया योद्धुं महा मदेन दूरतः सर्वसैन्यपरित्यागात् । तथा च हरिवंशे—" अवस्थाप्य च तत्सैन्यं रुक्मी मदबलान्वितः । चिकीर्षुर्द्वैरथं युद्धमभ्ययान्मधुसूदनम् ॥ " इति । गोविंदं पृथ्व्यामवतीर्णं साक्षाद्भगवन्तमपीत्यर्थः । एवमग्रे कृष्ण मित्यादिकं ज्ञेयम् । तदेवं मुहुरुक्तिस्तस्यात्यंताऽबुधत्वादिबोधनार्थम् ॥ २३ ॥ अत्र संग्रामे, मत्संमुखे वा ॥ * ॥ अवज्ञया तं भृशमुत्साहयितुमिच्छया च तदाह्वानमनादृत्य प्रयांतमेव पृष्ठतो जघ्ने । यद्वा—तदाह्वानादभि मुखतया स्थितं जघ्ने । तथापि क्षणं तिष्ठेति वीरदर्पस्वभावादेवाह । अरे हे शत्रो । यद्वा—अव्ययमिदं संबोधने । वास्तवार्थेऽरे क्षणं शीघ्रदर्शनं यथा स्यात्तथा तिष्ठ " लघुक्षिप्रमरं द्रुतम् " इत्यमरः ॥ २४ ॥ 'ध्वांक्षः काके बकेऽर्थिनि' इति कोशान्न ध्वांक्षोऽर्थी याचकोऽध्वांक्षः । इंद्रस्यापि याचकत्वे इन्द्रनामानन्वर्थता स्यादिति भाव इत्यभिप्रेत्यैव स्वामिचरणैः सहस्राक्षवदित्युक्तम् । यद्वा—अध्वेव विस्तृतान्यर्थाद्बहून्यक्षीणि यस्य स तथा । पृषोदरादित्वान्नुमार्षो वा । अर्थपदमुभयत्र व्याख्यापरम् । कूटयोधिनः छलप्रहर्तुः ॥ * ॥ क इव, किं मुषित्वा, तत्राह—ध्वांक्ष इव, हविर्मुषित्वेति । तत्र ध्वांक्षवदिति " हविर्होतव्यमात्रे च सर्पिष्यपि नपुंसकम् " इति मेदिनी । तत्त्वार्थस्तैर्व्याख्यातः । तत्र ध्वांक्षस्तावदेकाक्षः, नञा तद्विपरीतोऽनेकाक्षः । अनेकाक्षत्वं परमकाष्ठापन्नं सहस्राक्ष एवेति तत्र पर्यवसायितम् । एवममुषित्वा लक्ष्म्यास्त्वद्भागत्वान्न्यायेनैव लब्ध्वा कुत्र यासि न कुत्रापि गन्तुमर्हसि । भयाभावादित्यर्थः । मायिनो माहामायाशक्तेः पलायनं चेदमस्माभिर्युद्धयोग्यमेवेत्याह—कूटयोधिनः । कूटानबलानस्मान्साधु योधयतीति । अन्यथा वयमाभिमुख्येन न योत्स्यामह इति भावः । तादृशस्य तव मदं हर्षं हरिष्ये, मद्विधखलनिर्जयलीलया त्वां प्रति प्रापयिष्यामीत्यर्थः । भारं ग्रामं हरतीतिवद्द्विकर्मकत्वेपि तवेति षष्ठी संबंधविवक्षया । यद्वा—हविः यज्ञसिद्धं स्वभागमिव मे स्वसारमुषित्वेति, ध्वांक्षवत्क्षुद्रोहामिति च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावन्न मे हतो बाणैः शयीथा मुंच दारिकाम् ॥ स्मयन्कृष्णो धनुश्छित्त्वा षड्भिर्विव्याधरुक्मिणम् ॥ २६ ॥ अष्टभिश्चतुरो वाहान्द्वाभ्यां सूतं ध्वजं त्रिभिः ॥ स चान्यद्धनुरादाय कृष्णं विव्याध पंचभिः॥२७॥तैस्ताडितः शरौघैस्तु चिच्छेद धनुरच्युतः ॥ पुनरन्यदुपादत्त तदप्यच्छिनदव्ययः॥२८॥ परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ ॥ यद्यदायुधमादत्त तत्सर्वं सोऽच्छिनद्धरिः ॥ २९ ॥ ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया ॥ कृष्णमभ्यद्रवत्क्रुद्धः पतंग इव पावकम् ॥३०॥ तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ॥ छित्त्वासिमाददे तिग्मं रुक्मिणं हंतुमुद्यतः ॥३१॥ दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला ॥ पतित्वा पादयोर्भर्तुरुवाच करुणं सती ॥३२॥ योगेश्वराप्रमेयात्मन्देवदेव जगत्पते ॥ हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥३३॥ श्रीशुक उवाच ॥ तया परित्रासविकंपितांगया शुचाऽवशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रंसितहेममालया गृहीतपाद करुणो न्यवर्तत३४॥

च्छेदः । सहस्राक्षवदित्यर्थः । हे मंद स्थिरेत्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ परित्रासेन विकंपितान्यंगानि यस्यास्तया योज्यम् ॥ **विश्वनाथस्तु**–मंदश्चासौ मायी चेति तस्य कपटयोधिनो मम मदं गर्वं द्य खंडय ॥ २९ ॥ दारिकां कन्याम् । पूर्वमेव मुंचेत्यर्थः ॥ * ॥ यावदित्यर्धकम् । अत्र च मे मम बाणैर्हतः प्राप्तः सन् यावन्न शयीथा स्तेषां तुच्छतां दर्शयित्वा हृतायां रुक्मिण्यां सुस्थो न भवेस्तावद्दारिकां मुंच तत्सांत्वनं त्यज, तत्सांत्वनं मुक्त्वा युद्धमेव कुर्वित्यर्थः ॥ अत्र **विश्वनाथः**–यावदित्येवार्थे । मे बाणैस्त्वमहत एवातो दारिकां न मुञ्च "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः । ननु दारिकया मम किं प्रयोजनं, तत्राह–शयीथा अनया सह पुष्पशय्यायामिति शेषो लज्जया नोक्तः । मस्तकहस्तद्वयपादद्वयमध्यभागाख्यषडंगवेधनार्थं षड्भिरिति ॥ २६ ॥ स च रुक्मी ॥ * ॥ अष्टभिरिति प्रत्येकं द्वाभ्यामग्रिमपादद्वयवेधनार्थं, तत्साहचर्यात्सूतमपि द्वाभ्यां हस्तद्वयवेधनार्थम् । त्रिभिरिति–लक्षणपताकादंडानां पृथक्छेदनार्थम् । एतच्च रुक्मिण्यपेक्षया तद्वेधनमात्रं ज्ञेयम् ॥ २७ ॥ तैः पंचबाणैः । तत् तदपि ॥*॥ अत एव ताडितोऽपि शराणामोघैः समूहैरेव धनुरेव चिच्छेद । पुनरित्यर्द्धकम् । अन्यत्ततोपि दृढतरम् । 'अव्ययम्' इत्यपि पाठः ॥२८॥ शक्तितोमरैः सह परिघादीनि चिच्छेदेत्यर्थः॥*॥ तदनु परिघादीन्याच्छिनत् । आत्तानीति शेषः । पट्टिशास्योः शूलशक्त्योश्चेषदाकारभेदः । तोमरः शूल्यभेदः । आदद्यात् आदातुं समर्थ आसीदित्यर्थः । हरिर्दुष्टसंहारी ॥२९॥ ततः शस्त्रच्छेदानंतरम् ॥* ॥ अभ्यद्रवदाभिमुख्येनाधावत्॥३०॥ तस्य रुक्मिणः॥*॥ तिग्मं तीक्ष्णम् ॥३१॥ करुणं दीनं यथा स्यात्तथा॥*॥भ्रातुः केनापि दैवेन भ्रातृत्वं प्राप्तस्य वधोद्यमं दृष्ट्वा भयं लोकापवादात्कारुण्याद्वा तेन विह्वला । ननु तादृशदुष्टकर्मणो वधो युक्त एव, तत्राह–सती पंडिता । अयमतिक्षुद्रः श्रीभगवति न किंचिदनिष्टं विधातुं शक्नोति, केवलमज्ञानेनैव चातकीवद्दीनोऽयं विचेष्टते, ततो ममानन्यशरणाया देहसंबन्धधारिण्यस्मिन्नस्य दयैव युक्तेति विचारसमर्थेत्यर्थः । श्रीकृष्णस्य त्वयमभिप्रायः–मयि किमपि कर्तुं न समर्थोऽसाविति सत्यमेव, किन्त्वस्यां तादृशविपत्संपादकेच्छां कथमस्य सोढुं शक्नुयामित्यस्याः प्रार्थनया रक्षितप्राणस्यापि तादृशदुश्चेष्टामर्दनी परमा मनोरमा मानावहानिस्तु सदानुवर्तनीयेति ॥ **विश्वनाथस्तु**–भगिन्याः पुरत एव भ्रातुर्वधोऽभूदिति लोका मां किं वदिष्यन्तीति भयविह्वला, न तु स्नेहविह्वलेति ॥ ३२ ॥ संबुद्धिषट्केन भगवत ऐश्वर्यं द्योतयन्ती निजभ्रातृवधानौचित्यमेवाह ॥ * ॥ योगेश्वर त्वमतर्क्यमहामहैश्वर्यः, असावीशितव्येष्वपि निकृष्टः । हे अप्रमेयात्मन्–त्वमप्रमेयस्वरूपोसि, अयं परिच्छिन्नेष्वप्येककीटतुल्यः । देवदेव–त्वं देवानामपि देवः, अयं त्वद्वैमुख्यान्नरेष्वप्यधमः । जगत्पते–त्वं सर्वजगत्पालकोऽतो दुष्टोऽप्ययं जगदन्तर्वर्तित्वाद्रक्षितव्य एवेति भावः । तस्मात् हे कल्याण मंगलस्वरूप, हे महाभुज प्रबलमर्दकभुज इममंगलं भुजबलरहितं हन्तुं नार्हस्येव । मे भ्रातरमिति–अनन्यगतिकाया मे भ्रातृधर्मरहितत्वेपि तद्वल्लोकदृष्ट्या प्रतीयमानमिति भावः ॥ ३३ ॥ तया रुक्मिण्या । करुणो दयालुः । न्यवर्तत–वधादिति शेषः ॥ * ॥ करुणः स्वप्रतिकूलेऽतिदुष्टे स्वतनुत्यागानिमित्तीभूतेऽपि भ्रातरि ' दयाया भगिनी मूर्तिः ' इति लोकधर्मोक्ति

१ आदत्तत्यत्रोऽऽदद्यादिति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चैलेन बद्ध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयत् ॥ तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः ॥३५॥ कृष्णांतिकमुपव्रज्य ददृशुस्तत्र रुक्मिणम् ॥ तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः ॥ विमुच्य बद्धं करुणो भगवान्कृष्णमब्रवीत् ॥३६॥ असाध्विदं त्वया कृष्ण कृतमस्य जुगुप्सितम् ॥ वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ॥ ३७ ॥

शुचा शोकेनावशुष्यन्मुखं यस्याः रुद्धः कंठो यस्याः सा च सा च । तथा कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्यास्तया गृहीतौ पादौ यस्य सः ॥ ३४ ॥ सश्मश्रुकेशं सहितानि स्थानेस्थानेऽवशिष्टानि श्मश्रूणि केशाश्च यथा भवति तथा । तेनैवासिना प्रवपन्मुंडयन्व्यरूपयद्विरूपमकरोत ॥ ३५ ॥ तथाभूतं हतप्रायमित्युत्तर

भयादेव दयावत्यां रुक्मिण्यां सदयः स्वभावत एव करुणो विशेषतस्तया तथाभूतया गृहीतचरणत्वाच्च ॥ ३४ ॥ तं रुक्मिणम् । विरूपं सौंदर्यहीनम्, विलक्षणमुण्डनादित्यर्थः । यावत्कृष्णस्तं मुमुण्ड तावदित्यर्थः । नलिनीः[१] सरसीः । ' नलिन्यब्जे सारसे च ' इति ॥ * ॥ पुनरपि रुक्मिणीप्रातिकूल्यं मा कार्षीदिति तद्दुर्मदनिवर्तकेन पराभवस्मारकेण दुर्लक्षणेन केनचिदंकयित्यैव तमुपेक्षांचक्रे इत्याह—चैलेनेति । तदीयेनैव शिरोवेष्टनवस्त्रेण ग्रीवायां बद्ध्वा वामहस्तेन तच्चेलाग्रद्वयं विधृत्य दक्षिणहस्तधृतेनासिनोष्णीषं दूरीकृत्य सश्मश्रुकेशं यथा स्यात् स्थानेस्थाने केशगुच्छाः श्मश्रुगुच्छाश्च यथा तिष्ठेयुस्तथा प्रकर्षेण समूलकर्तनेन रुधिरमुद्गमय्य वपन्मुंडयन् व्यरूपयत् विरूपं कृतवान् ॥ ३५ ॥ तत्र कृष्णांतिके । तथाभूतं मुण्डितम् । उत्तरवाक्ये ' विमुच्य बद्धम् ' इत्यत्रेत्यर्थः ॥ * ॥ विमुच्य स्वयमेव स्वहस्तेन कृष्णवामहस्ताच्चेलखंडमपसार्येत्यर्थः । तथाभूतं प्राप्तवैरूप्यादिकम् । अत एव हतप्रायम् । ननु तादृशमहापराधिनो विमोको न युक्तस्तत्राह—भगवान् सर्वज्ञः । रुक्मिणीवत्तज्जानाति तथा रुक्मिण्या दुःखं श्रीकृष्णस्य भाविलीलां चेत्यर्थः । अत एव करुणः श्रीकृष्णस्य प्रथमवैवाहिकसंबन्धाच्चेति भावः । कृष्णमित्युपलक्षणं रुक्मिणीं चेति ज्ञेयम् । लज्जाहेतो रुक्मिण्यां च कृष्णमेवाब्रवीदिति तस्यैव प्राधान्यात् ॥ ३६ ॥ अस्य रुक्मिणः । इदं वपनम् । जुगुप्सितं वपनस्य नापितकर्मत्वान्नेदं क्षत्रोचितमिति भावः । किमर्थमाक्रोशासि मां नायं मारितवातिति चेदाह—वैरूप्यमिति ॥ * ॥ कृष्णेति केवलेन मूलनाम्ना संबोधनमग्रजोचितशुद्धवात्सल्योदयेन । तथैवास्माकं कुलतिलकीभूतभवत्कानां परमप्रतिष्ठावतां वृष्णीनां संबंधे जुगुप्सितं निंदितं कर्तुमयोग्यमित्यर्थः । किं तदित्यपेक्षायां लज्जादिना प्रागप्रकाशितमपि नीचैरिवाह—वपनमिति । न चैतदल्पं दण्डनमित्याह—वैरूप्यमिति, विरूपतापादनम् । एवं तु श्रीकृष्णोपालंभेन रुक्मिण्या एव सांत्वनमुद्देश्यं मत्संबंधेनैवैष संप्रत्युपालंभविषयो भवतीति तस्या लज्जोत्पत्तेः । तथा रुक्मिणं प्रत्यपि भर्त्सनमायाति साक्षात्तस्य तिरस्कारानुवादात् । तच्च तस्य शिक्षार्थमेव संपद्यत इति कारुण्य एव पर्यवस्यति । एवमग्रेपि ॥ **विश्वनाथस्तु**—वरं बंधोप्यस्य साधुरभविष्यदिदं खड्गेन मुंडनं त्वतिबीभत्सितमभूदिति शोचंत्या रुक्मिण्याः सांत्वनार्थं बहिः कृष्णं किंचिदुपालभमानोप्यंतस्तु भो भ्रातः समुचितकृत्यचतुरेण त्वया साध्वेव कृतमिति प्रसीदन्नेवाह—असाध्विति । सुहृदः श्यालकस्य ।

---

१ बहुवचनान्तपा० । कमलिनीर्वेत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैवास्मान्साध्व्यसूयेथा भ्रातुर्वैरूप्यचिंतया ॥ सुखदुःखदो न चान्योऽस्ति यतः स्वकृतभुक् पुमान् ॥ ३८ ॥ बंधुर्वधार्हदोषोऽपि न बंधोर्वधमर्हति ॥
त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः ॥ ३९ ॥ क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः ॥ भ्राताऽपि भ्रातरं हन्याद्येन घोरतरस्ततः ॥ ४०॥
राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः ॥ मानिनोऽन्यस्य वा हेतोः श्रीमदांधाः क्षिपंति हि ॥ ४१ ॥ तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदाम् ॥
यन्मन्यसे सदाऽभद्रं सुहृदां भद्रमज्ञवत् ॥ ४२ ॥

वाक्येऽप्यनुषंगः ॥ ३६ ॥ ३७ ॥ रुक्मिणीं सांत्वयति मैवास्मानिति ॥ ३८॥ पुनः कृष्णमाक्षिपति बंधुरिति ॥ ३९॥ पुनर्देवीं प्रत्याह । क्षत्रियाणामिति । येन धर्मेण भ्रातापि भ्रातरं हन्यात् । ततस्तस्माद्घोरतरोऽतिदारुणो धर्मश्च । अतः कोऽस्माकमपराध इति भावः ॥ ४० ॥ पुनः श्रीकृष्णं प्रत्याह । राज्यस्येति । तथाऽप्यस्माकमेतदनुचितमिति भावः ॥ ४१ ॥ पुनर्देवीं प्रत्याह । तवेयमिति । सर्वभूतेषु दुर्हृदामहितानां भ्रातॄणामज्ञवद्भद्रं मन्यसे इच्छसि इयं तव विषमा असमीचीना बुद्धिः । कुतः । यतस्तदेव सुहृदामभद्रमिति । यद्वा सर्वभूतेषु दुर्हृदामपि स्वसुहृदां भद्रमेव दंडरूपं मुंडनमभद्रं यन्मन्यसे तवेयं विषमा बुद्धिरिति । अथ वा सर्वभूतेषु मध्ये दुर्हृदां शिशुपक्षे, दुर्हृदोऽपि तस्य सुहृच्छब्दवाच्यत्वेन विपरीतलक्षणा व्यंग्या ॥ ३७ ॥ अन्यः स्वेतरः । अत्र हेतुः—यत इति ॥ * ॥ एतादृशे तं प्रत्युक्तेऽपि तस्याः शोकाऽत्यागात्तामेव साक्षात्सांत्वयन्नाह—मैवेति । अस्मान्छ्रीकृष्णादीन्मासूयेथा दोषारोपेण मा पश्य । एवेति साक्षात्तत्कारणे सत्यप्यसूयां निवारयति । चेति पक्षान्तरे । नञ् तन्निषेधे, अन्यो नास्ति किन्तु स्वयमेवेत्यर्थः । पुमान् जीवः । स्वकृतभुगिति—अस्मिन्नतिदुष्टे स्वस्य स्वभर्तुश्च प्रतिकूले कोऽयं ते वृथा स्नेह इति तां प्रत्युपालंभो ध्वनितः ॥ ३८ ॥ वधार्हो दोषो यस्य स तथापि । द्वितीयबंधुशब्दो हेत्वर्थः । यतो बंधुरतो वधं नार्हतीत्यर्थः । तर्हि किं कर्तव्यं, तत्राह—त्याज्य इति । त्यागो देशनिर्यातनादिरूपः " बंधूनां मरणं त्यागोऽनादरोऽपि तथाविधः " इति ग्रन्थांतरोक्तेः ॥ * ॥ देव्याः प्रीणनार्थं श्रीकृष्णं नीतिं शिक्षयन्निवाह—बंधुः श्यालः । बंधोर्भगिनीपतेः सकाशात् । त्याज्य इत्यत्यवज्ञेयत्वं दर्शयित्वा किञ्चित्कर्तुमसामर्थ्यमेवं दर्शितम् । नन्ववध्यस्य वधे यावांस्तावान्वध्यस्य रक्षणे दोषः स्मर्यते, तत्राह—स्वेनैव दोषेण हतः सल्लोकबहिष्कृततासाम्येन एवं यो हतः स किं पुनर्हन्यते नैवेत्यर्थः । सोऽयमपि रुक्मिण्या अन्यत्र दानेन तद्बहिष्कृतो जात इति भावः । वैकृत्यकरणमिदं हननमेव, मरणादपि दुःखदत्वादिति भावः ॥ ३९ ॥ देवीं रुक्मिणीम् । ईदृशं कर्म किमिति क्रियत इत्यत आह—क्षत्रियाणामिति । अयं कस्तत्राह—भ्रातेति । तस्माद्भ्रात्रादिहननरूपत्वात् । इति भाव इति—"श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्" इति स्मृतेः स्वधर्माचरणं न दोषायेति तात्पर्यम् ॥ * ॥ नीतिमिमां त्वदनुजो न वेत्तीति मनसा वदंतीं प्रत्याह—क्षत्रियाणामिति । भ्रातरमपि हन्यादिति शास्त्रविधिः, तत्र श्यालः खलु को वराक इति भावः ॥ **तोषिणी** तु—तथापि शोकानपगमात्पुनरपि देवीं स्वधर्मप्रदर्शनेन प्रबोधयति—क्षत्रियाणां धर्मः सदद्दष्टजनककर्तव्यविशेषः । पुनर्धर्मेण न्यायलक्षणयुद्धेन भ्रातापि भ्रातरं हन्यात् । धर्मत्वे हेतुः प्रजापतिना वेददृष्ट्या निर्दिष्ट इत्यर्थः । ततो भ्रातुर्हननाद्धेतोर्घोरतरोपीत्यर्थः ॥ ४० ॥ यद्यपि राज्याद्यर्थमन्यस्यैष्वन्यतमस्यार्थमपि क्षिपंति निघ्नंति, तिरस्कुर्वन्ति वा परांस्तथापीति । एतत् संबंधिवधादि । इति भाव इति—वधस्योचितत्वेऽपि वपनस्याऽनुचितत्वादित्याशयः ॥ * ॥ ननु क्षत्रियो बंधुं हन्तुं वरं किन्तु बीभत्सितवैरूप्यवन्तं कर्तुं नार्हतीति देव्याः स्वगतोक्तिमालक्ष्य तां प्रसादयितुं कृष्णमाह—राज्यादेर्हेतोर्मानिनोऽहंकारवंतस्तत्रापि श्रीमदेनांधाः क्षिपंति, तत्तद्व्यघातकानिति शेषः । अत्रादिना मानस्य पूजायास्तेजसः कांतेर्बलस्य वान्यस्यान्नपानादेर्ग्रहः । अस्माकं त्वेतदनुचितमनहंकारित्वेन मदांधत्वाऽभावादिति भावः ॥ ४१ ॥ भ्रातॄणां रुक्मिप्रभृतीनाम् । हेतुमाशंकते—कुत इति । सुहृदामस्माकम् । तज्जयेस्माकमभद्रमेवेति भावः । तर्हि तवापि बुद्धिर्विषमैवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्ममोहो नृणामेष कल्पते देवमायया ॥ सुहृद्दुर्हृदुदासीन इति देहात्ममानिनाम् ॥ ४३ ॥
एक एव परो ह्यात्मा सर्वेषामपि देहिनाम् ॥ नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ॥ ४४ ॥

पालादीनामभद्रं सुहृदां भद्रं च यन्मन्यसे तवेयं विषमा बुद्धिः समा न भवति अज्ञवदज्ञानामिव ॥ ४२ ॥ कुत इत्यत आह । आत्ममोह इति ॥ ४३ ॥ परमार्थमाह ।

रुक्मिण्याक्षेपोत्थानादाह—यद्वेति । " परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः " इति न्यायेन, ' न्याय्यो हि दंडः कृतकिल्बिषे नरे ' इत्युक्तेश्च । भद्रस्याभद्रमननमपि विषममेवेति भावः । " स्नेहाऽनुबंधो बन्धूनां मुने रपि सुदुस्त्यजः " इत्युक्त्याश्रयणमप्यज्ञानां धर्म इत्याह—अथ वेति ॥ * ॥ पूर्वं धर्मद्वारा देव्यां बोधितायामपि तथेदृशे श्रीकृष्णं प्रत्यवक्तव्येपि देव्याः सांत्वनार्थमुक्तम् । तस्याः शोकाऽत्यागात्तं हित्वा तामेव विवा हि तरहस्यांतर्गतेन ज्ञानोपदेशेन बोधयन्नादौ सक्रोधमाह—तवेति । सर्वभूतेषु मध्ये दुर्हृत्त्वेनं प्रतीतानां केषांचिद्यदभद्रमिच्छसि तथा दुर्हृदां सुहृत्त्वेन प्रतीतानां रुक्म्यादीनां यद्भद्रमिच्छसि तथाविशेषादन्येषु तु यदौदासीन्यं कुरुषे सेयं तवाज्ञानामिव विषमा बुद्धिरिति । अर्थांतरे सुहृदामित्यपि दुर्हृदामित्यनेन विशेषयितव्यं, सर्वभूतेषु दुर्हृदां शत्रुत्वेन प्रतीयमानानां शिशुपालादीनां तत्साहाय्येन तु तादृशामेव सुहृदां रुक्म्यादीनामपीति । यदि तेष्वभद्रं मन्तव्यं तदेतद्विधेष्वपि तदेव मंतव्यमिति भावः । दुर्हृदां सर्वभूतेषु दुष्टमनसां शिशुपालादीनां, सुहृदां स्वबंधूनां रुक्म्यादीनां भद्रमेव कृष्णकृतं दंडनं यत्सदाऽभद्रं मन्यसे इयं तव सर्वथा विज्ञाया विषमा बुद्धिर्नोचितेति भावः ॥ ४२ ॥ अत्र हेतुमाशंकते—कुत इति । सुहृद् निरपेक्षत्वेनोपकर्ता, दुर्हृद् स्वसुखविघाती, तदुभयहीन उदासीन इति ॥ * ॥ जानाम्येवेदं यदयं भ्राता मे दुष्ट एव तदप्यत्र बंधुभावो नापयाति किं करोमीति चेत्—सत्यम्, अप्राकृताया भवत्या एवायमविवेकोऽनुचित इत्याह । सांसारिकलोकानां त्वयं स्वाभाविको धर्म इत्याह—कश्चित्सुहृदिव कश्चिद्दुर्हृदिवेत्यादि । एक एव वा कदाचि त्सुहृदिवेत्यादि । अर्थांतरे श्रीकृष्णप्रेमाऽऽस्वादमजानतामेवान्यत्र दौर्हृदादिस्फूर्तिः स्यादित्यत आह—आत्मेति द्वाभ्याम् । आत्मेति देह एवात्मेति मन्यमानानां नृणां. न तु ज्ञानिनाम् ॥४३॥ याथार्थ्यमाह—एक एवेति । मूढै रनात्मज्ञैः ॥ * ॥ अत्र **तोषिणी**—ननु जगतो वैचित्री साक्षादेव दृश्यते, तथा च सुहृदादिर्घटेतैव कथमुच्यत आत्ममोह इति, उच्यते—चिन्मात्रेणैकरूपाणां जीवानां वस्तुतस्तु न संभवतीत्याह—एक इत्येकः परमात्मांशत्वेन मिथस्तुल्यस्वरूप इत्यर्थः । भानुस्थानीयस्याचिंत्यशक्तिमयस्य परमात्मनस्तटस्थांशत्वेन रश्मिपरमाणुस्थानीयत्वात्तस्य तत्र चाचिन्त्यशक्तिमयत्वादेवोभयत्रापि न कस्यापि पूर्वपक्षस्यावकाश इति ज्ञेयः । हि यतः परो देहा द्भिन्नः । अतो देहस्यैवावैचित्री न त्वात्मन इति भावः । तर्हि शांतत्वादिना विविधोऽसौ कुतः प्रतीयतेऽधिष्ठानस्यैव वैचित्र्यादिति सदृष्टान्तमाह—नानेति । प्रथमदृष्टान्ते बिंबप्रतिबिंबयोर्भेदप्रतीतेरुत्तरोत्तरो दृष्टान्तः । अर्थांतरे, हि यस्मात् " आततत्वाच्च मातृत्वादात्मा हि परमो हरिः " इत्युक्तेः यः खलु सर्वेषामपि देहिनां देहाभिमानिनामेक आत्मा हरिः स एव वस्तुतस्तेषां परः श्रेष्ठः परमप्रेम योग्य इत्यर्थः । यस्तु नाना पृथक्पृथगात्मा देहाभिमानिवर्गस्तन्मध्ये मूढैरेव पर इव गृह्यते, केषुचित्कश्चिन्मोहविवर्तः प्रभाभासमयैरेव । यथाद्यं तत्तद्योग्यता प्रतीयतेमात्रम्, तत्र दृष्टान्तौ यथा—रवेरेवाऽलाभे दीपो मर्त्यैः परतया गृह्यते, यथा विस्तृतेर्नभस एवालाभे उदुंबरमशकैस्तदन्तर्गतनभस्तत्तया गृह्यत इति **विश्वनाथः ॥** देहात्ममानिनां मतं द्वाभ्यां खण्डयन् प्रथमं देहः परमात्मा न भवतीत्याह—एक इति । पर आत्मा देहिनां देहवतां जीवानां हि निश्चितमेक एव प्रेरको भवति । एकस्यैवाधिष्ठानबाहुल्ये सति नानात्वे दृष्टान्तौ—ज्योतिरग्निर्दारुषु, घटेषु नभ आकाशः । तदुक्तम्—प्रथमे—" यथा ह्यवहितो वह्निर्दार्ष्वेकः स्वयोनिषु । नानेव भाति विश्वात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देह आद्यंतवानेष द्रव्यप्राणगुणात्मकः ॥ आत्मन्यविद्यया क्लृप्तः संसारयति देहिनम् ॥ ४९ ॥
नात्मनोऽन्येन संयोगो वियोगश्चासतः सति ॥ तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ॥ ४६ ॥

एक एवेति । परः शुद्धः ज्योतिश्चंद्रादिर्यथोदकेषु । नभो यथा घटादिष्विति ॥ ४४ ॥ कुतस्तर्हि न चंद्रादिवदात्मानमेकं शुद्धं प्रतीमस्तत्राह । देह इति । द्रव्यमाधिभूतम् । प्राणा इंद्रियाण्यध्यात्मम् । गुणशब्देनाधिदैवं तत्रितयात्मकः । देहोपाधिना शुद्धो न प्रतीयत इत्यर्थः ॥ ४५ ॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत्राह । नात्मन इति । हे सति अन्येनाधिभूतादिनाऽऽत्मनः संयोगवियोगौ न स्तः । कुतः । असतः असत्त्वादन्यस्येत्यर्थः । कुतोऽसत्त्वं तत्राह । तद्धेतुत्वादिति । तस्यान्यस्य भूतेन्द्रियादेः प्रसिद्धेः प्रकाशस्य तद्धेतुत्वादात्महेतुत्वात् । ननु देवैरधिष्ठितेभ्य इंद्रियेभ्यो भूतानां प्रतीतिः प्रसिद्धा । भूतप्रतीत्या च तत्प्रसिद्धिर्नात्मन इत्यत आह । दृग्रूपाभ्यां यथा रवेः यथा प्रकाश्यप्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयोः रवेः सकाशात्प्रसिद्धिर्द्वयोरपि तैजसत्वात्तदभेदश्च तथा भूतेंद्रियादीनां परस्परं सिद्धानामपि चैतन्याधीन एव प्रकाशस्तत्कार्यत्वाच्च तद्व्यतिरेकेणासत्त्वं चेत्यर्थः । तथा च द्वादशे वक्ष्यति । "दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् । एवं धीः खानि मात्राश्च न स्युरन्यभूतेषु च तथा पुमान् ॥ " इति ॥ ४४ ॥ पुनर्हेत्वाक्षेपः—कुत इति । गुणकार्यत्वाद्देवानाम् ' सत्त्वेन सुरतां याति ' इत्युक्तेः । तत्त्रितयात्मकोऽधिभूताध्यात्माधिदैवात्मकः । इत्यर्थ इति—न हि मालिन्याऽनपनयने मुकुरनैर्मल्यं प्रतीयत इति भावः । आत्मनि अधिष्ठाने रज्जुसर्पवदज्ञानकल्पितः स्वाध्यासेनात्मानं शुद्धमपि संसारयति संसारे क्षिपतीत्यर्थः ॥ * ॥ देहो जीवात्मापि न भवतीत्याह—यः सुहृद्बुद्ध्या पाल्यः, दुर्हृद्बुद्ध्या वध्यः स एष देह आद्यन्तवान् । द्रव्यमधिभूतम्, प्राणा इंद्रियाण्यध्यात्मम्, गुणशब्देनाधिदैवम्, तत्त्रियात्मकः आत्मनि जीवेऽविद्ययैव कल्पितः रागद्वेषादिविषयीभूतः सन् देहिनं संसारवन्तं करोति ॥ ४९ ॥ पुनराक्षिपति—नन्विति । हेतुमाशंकते—इत्यर्थ इति । अन्यस्येत्यध्याहार्यमिति भावः । असत्त्वे हेतुमाक्षिपति—कुत इति । तत्राक्षेपे । पुनराक्षिपति—नन्विति । तत्प्रसिद्धिरिन्द्रियप्रसिद्धिः। तदभेदश्चक्षूरूपयोरभेदः। तत्कार्यत्वाच्चैतन्यकार्यत्वात् । तद्व्यतिरेकेण चैतन्यं विना तेषामसत्त्वम् । इत्यर्थ इति—विवर्तस्याधिष्ठानमन्तरेण सत्त्वानुपलब्धेः प्रसिद्धत्वात् । एतदग्रे स्फुटीभविष्यतीत्याह—तथा चेति । आत्मन एव पुनर्मुख्यं प्रकाशकत्वं न त्विन्द्रियादेरित्याह—परस्परं सिद्धि रविप्रकाशितमेव चक्षूरूपं प्रकाशयति, रविप्रकाशितमेव रूपं चक्षुः प्रकाशयतीत्यर्थः । तद्वदात्मप्रकाशिता एव देवादयो विश्वं प्रकाशयन्ति "तस्य तेजसेद्धः सूर्यस्तपति, न तत्र सूर्यो भाति, न चन्द्रो,न तारकाः, नेमा विद्युतो भांति कुतोऽयमग्निः, तमेव भांतमनुभाति, सर्वं तस्य भासा सर्वमिदं विभाति " इति श्रुतेः, " येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम् । यथार्कोऽग्निर्यथा सोमो यथर्क्षग्रहतारकाः ॥ " इति स्मृतेश्च ॥ * ॥ संयोगो नास्ति संयोगापेक्षत्वाद्वियोगोपि नास्ति । संयोगाभावे हेतुः—असत इति । आत्मनीत्यर्थात् त्रिकालमप्यात्मनि तस्य स्पर्शाभावादित्यर्थः । तत्र हेतुः—तस्यान्यस्य प्रसिद्धेः शक्तेः । तद्धेतुत्वाच्चिद्रूपात्मकहेतुत्वात् । एवं सति तं कथं स्पृशेदित्यर्थः । रवेः राजमानदेवविशेषस्य सूर्यस्य दिवानक्तमप्यच्यवमानस्य दृग्रूपाभ्यां तल्लब्धप्रकाशाप्रकाशशक्तिभ्यां यथा स्पृश्यत्वाभावात्संयोगवियोगौ न स्तस्तद्वत् । हे सति विचक्षणे । अथांतरे, तदप्यस्तु नाम भवतु श्रीकृष्णनित्यलक्ष्मीरूपाया रुक्मिण्यादिना संबंध एव नास्तीत्याह—नेति । आत्मनस्तव । नन्वेतद्विधस्तन्माहात्म्यप्रसिद्धः कथमसौ न स्यात्तत्राह—सा परमलक्ष्मीरूपा त्वमेव हेतुर्यत्र तद्रूपत्वात्तस्याः प्रसिद्धिरिति । अवतरिष्यंत्यास्तव दृष्टिप्रभावोदयादेव सैषामेषा प्रसिद्धिरित्यर्थः । तर्हि मम संबंधे सति कथं संयोगवियोगौ न स्तस्तत्राह—दृग्रूपाभ्यामिति प्राञ्चः ॥ **विश्वनाथस्तु**—किन्तु जीवात्मनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मादयस्तु देहस्य विक्रिया नात्मनः क्वचित् ॥ कलानामिव नैवेंदोर्मृतिर्ह्यस्य कुहूरिव ॥ ४७ ॥
यथा शयान आत्मानं विषयान्फलमेव च ॥ अनुभुंक्तेऽप्यसत्यर्थे तथाप्नोत्यबुधो भवम् ॥ ४८ ॥

तमाद्दतात्।।"इति । यद्वा रवेः प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परं प्रसिद्धिर्यथा भवति तद्वदिति ॥ ४६ ॥ देहसंबंधाभावादेव नात्मनो जन्मादयोऽपीति वक्तुं जन्मादीनां देहधर्मत्व माह । जन्मादयस्त्विति । कथं तर्हि जातोऽहं बालोऽहं वृद्धोऽहमित्यात्मनि जन्मादिप्रतीतिः, देहजन्मादिनैवेति सदृष्टांतमाह । कलानामिवेति । इंदोः कलानामेव जन्यादयो नैवेंदोर्यथा तद्वत् । यथा च कलानाशादेव कुहूरमावास्या इंदुक्षय उच्यते तद्वदस्यात्मनो देहनाशादेव मृतिव्यवहार इत्यर्थः ॥ ४७ ॥ नन्वात्मनो देहादिसंबंधाभावे कथं भोक्तृभोग्यभोगप्रतीतिरित्याशंक्य स्वप्नदृष्टांतेन समर्थयति । यथा शयान इति । आत्मानं भोक्तारं विषयान् भोग्यान्फलं भोगमसत्यर्थेऽनुभुंक्ते तथाऽबुधः संसारं प्राप्नोति॥ ४८॥

देहलिप्तत्वादेव देह एवात्मेति प्रतीतिर्भवति । वस्तुतस्तु—देहेन लेपस्तस्य जीवात्मनो नैवास्ति । परमात्मनस्तु—जीवात्मनोपि लेपो नास्तीत्याह—नेति । प्रथमं जीवात्मपक्षौ व्याख्यायेते—हे सति आत्मनो जीवस्यान्येन जडेन देहेनासता आद्यंतवत्त्वादसर्वकालस्थायिना संयोगो लेपो नास्ति संयोगाभावादेव वियोगोऽपि नास्ति । कुतः—तत्प्रसिद्धेः देहप्रकाशस्य तद्धेतुत्वात् जीवात्महेतुकत्वात् । अतोऽध्यात्म्यादिमयदेहस्य जीवात्मप्रकाश्यत्वात्तेन सह जीवात्मनो न लेपः, न हि प्रकाशकः प्रकाश्येन क्वापि लिप्यते । अथ परमात्मपक्षः—आत्मनः परमात्मनोऽन्येन जीवेनासताऽचिरस्थायिना देहेन च न संयोगो न वियोगश्च । कुतः—तत्प्रसिद्धेः तयोर्जीवदेहयोः प्रकाशस्य तद्धेतुत्वात्परमात्महेतुकत्वात्, अतः परमात्मनः स्वप्रकाश्याभ्यां जीवदेहाभ्यां नैव लेपः, न हि प्रकाशकः प्रकाश्यलिप्तः क्वापि भवति । उभयपक्ष एव दृष्टान्तः—स्वेन प्रकाशिताभ्यां दृग्रूपाभ्यां दृशा चक्षुषा तत्प्रकाश्येन रूपेण च न लेपः । अत्र रविस्थानीयः परमात्मा, दृक्स्थानीयो जीवः, रूपस्थानीयो देहः ॥ ४६ ॥ अन्यदाह—देहसंबंधेत्यादिना ॥ * ॥ नन्वेतत्कुलजाताया मम कथमेतौस्तो न स्तस्तत्राह—जन्मादय इति । यद्यात्मनो जीवस्यापि न संति तदा सच्चिदानंदरूपविग्रहाया भगवत्स्वरूपशंकेस्तव तु किमुतेति भावः । इत्यर्थ इति—"मा स्वस्य कर्मबीजेन जायते सोप्ययं पुमान् । म्रियते चामरो भ्रांत्या यथाग्निर्दारुसंयुतः ॥ " इत्युक्तेरिति भावः ॥ ४७ ॥ जन्मादीनामात्मधर्मत्वाभावे पुनराशंकते—नन्विति अबुधोऽनात्मज्ञः ॥ * ॥ एवमात्मनो वस्तुतो देहलेपाभावेऽप्यतर्क्यशक्त्याऽविद्ययैव देहसंबंधमननात्संसार इति सदृष्टान्तमाह—यथेति । असत्यर्थे कस्मिंश्चिदपि वस्तुन्यवर्तमानेऽपि शयानः । आत्मानं च तुरगसेनादियुक्तम् । विषयान् जेतव्यदेशान् । फलं तज्जयात्स्रक्चन्दनवनितादिभोगसुखं, कदाचित्तदजयात्संबंधनताडनातिरस्कारादि चानुभुंक्तेऽनुभवति । जागरणसादृश्येन राजादिरूपेण पश्यतीत्यर्थः । तथैवाविवेकी असत्यपि देहसंबंधे देहसंबंधोत्थं सुखदुःखात्मकं संसारम् । तथा चोक्तम्—"अर्थे ह्यविद्यमानेऽपि संसृतिर्न

१–असता सतीति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादज्ञानजं शोकमात्मशोषविमोहनम् ॥ तत्त्वज्ञानेन निर्हृत्य स्वस्था भव शुचिस्मिते ॥ ४९ ॥ श्रीशुक उवाच ॥ एवं भगवता
तन्वी रामेण प्रतिबोधिता ॥ वैमनस्यं परित्यज्य मनो बुद्ध्या समादधे ॥ ५० ॥ प्राणावशेष उत्सृष्टो द्विड्भिर्हतबलप्रभः ॥ स्मर
न्विरूपकरणं वितथात्ममनोरथः ॥ ५१ ॥ अहत्वा दुर्मतिं कृष्णमप्रत्यूह्य यवीयसीम् ॥ कुंडिनं न प्रवेक्ष्यामीत्युक्त्वा तत्रावसद्रुषा ॥ ५२ ॥ भगवा
न्भीष्मकसुतामेवं निर्जित्य भूमिपान् ॥ पुरमानीय विधिवदुपयेमे कुरूद्वह ॥ ५३ ॥ तदा महोत्सवो नृणां यदुपुर्यां गृहेगृहे ॥ अभूदनन्यभावानां
कृष्णे यदुपतौ नृप ॥ ५४ ॥ नरा नार्यश्च मुदिताः प्रमृष्टमणिकुंडलाः ॥ पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ॥ ५५ ॥ सा वृष्णिपुर्युत्तभितेंद्रकेतुभि
र्विचित्रमाल्यांबररत्नतोरणैः ॥ बभौ प्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभाऽगुरुधूपदीपकैः ॥ ५६ ॥

आत्मानं शोषयति विमोहयति चेति तथा तम् । निर्हृत्यापाकृत्य ॥ ४९ ॥ समादधे समाहितमकरोत् ॥ ५० ॥ रुक्मिणस्त्वेवं श्रुतवतो नाज्ञानं निवृत्तमिति
दर्शयन्नाह । प्राणावशेष इति ॥ ५१ ॥ अहत्वा अज्ञात्वाऽदुर्मतिमिति च सत्योऽर्थः । अप्रत्यूह्यानावर्त्य । अप्रतिबुध्येति तु सत्यम् । यवीयसीं स्वसारम् । यत्र विरूपितस्त
त्रैवावसत् । तत्र च भोजकटं नाम पुरमभवत् ॥ ५२ ॥ ५३ ॥ ५४ ॥ वरयोर्वरवध्वोः । पारिबर्हं देयमुपस्करम् ॥ ५५ ॥ उत्तभितैरिंद्रकेतुभिर्ध्वजविशेषैः । उपक्लृप्तानि

निवर्तते । ध्यायतो विषयानस्य स्वप्ने जागरणं यथा ॥ " इति । अर्थांतरे, ननु एवं चेत्तत्त्वं तर्ह्ययं कथं श्रुत्वापि स्वभावाविष्ट एव लक्ष्यते, तत्राह—यथेति । अबुधो रुक्मी ॥ ४८ ॥ स्वस्था तत्त्वज्ञा
शुचिस्मित इति प्रोत्साहनार्था संबुद्धिः ॥ * ॥ अर्थद्वयमुपसंहरति—तस्मादात्मनः शोकः नीरसतापादनम् । हे शुचिस्मिते हे प्रसन्नहृदये इत्यर्थः । तव साक्षाल्लक्ष्मीत्वान्नेषदप्यज्ञानस्पर्शः किन्तु लौकिकलीलयैव त्वमित्थं
व्यवहरसि मयापि तथोपदिश्यस इति भावः ॥ ४९ ॥ बुद्ध्या निश्चयात्मिकया ॥ * ॥ तथैव साप्यनुकृतवर्तीत्याह—एवमिति । प्रतिबोधितेत्यत्र सा तावत्स्वयमेव चिच्छक्तिरूपत्वान्नित्यं बुधैव प्रत्युत तदंशसंबंधादेव
श्रीसंकर्षणादीनामपि बोधादिकं ततस्तेन तस्याः प्रतिबोधनं प्रतिदानरूपमेवेति प्रतिशब्दस्यार्थः ॥ ५० ॥ चित्तशुद्धिं विनोपदिष्टमपि तत्त्वं न प्रकाशत इत्याह—रुक्मिणस्त्विति । हते बलप्रभे वीर्यतेजसी यस्य स
तथा । वितथो व्यर्थ आत्मनो मनोरथः " अहत्वा समरे कृष्णमप्रत्यूह्य यवीयसीम् " इत्येवंरूपोऽभिलाषो यस्य स तथा ॥ * ॥ प्राणेति युग्मकम् । पूर्वं द्विड्भिर्हतबलप्रभः, ततो वितथात्ममनोरथः, ततो वैरूप्यपर्यन्त
करणात्प्राणमात्रावशिष्टीकृतः, तत उत्सृष्टः, पश्चाद्विरूपकरणं स्मरन्निति क्रमो ज्ञेयः । व्युत्क्रमोक्तिस्तद्वर्णनेऽनादरं सूचयित्वा तस्याप्यनादृतत्वं बोधयति । बलं सैन्यं वीर्यञ्च एकशेषत्वात् ॥ ५१ ॥ प्रतिज्ञाऽनिष्पत्ते
स्तत्रान्यदेव पुरं रचयामास । लज्जितः पितृनगरं न जगामेत्यर्थः ॥ * ॥ उपभुंक्त इति भोजो युवराजः । यद्वा—भोजो विदर्भराजवंश्यः " तत्रेश्वरेण क्रथकैशिकानां भोजेन दूतो रघवे विसृष्टः " इति रघुका
व्यात् । तस्य कटः शपथो यत्र तत् " कटः कलिंजे शपथे गजतुंडे कटावपि " इति कोशात् । सरस्वतीमते तु—भोजस्य तस्य कटः श्मशानमिव कटधूमस्य सौरभ्यमिव तद्वाचित्वात् । द्विड्भिरिति बहुवचनेन कृष्णपा
र्श्वात्ततः पद्भ्यां चलन्यदुसैन्यैरपि तिरस्कारभर्त्सनताडनादिभिर्विडंबित इति बोध्यते ॥ ५२ ॥ पुरं द्वारकाम् ॥ * ॥ जयतेर्द्विकर्मकत्वात्कर्मद्वयम् । तान्पराभवंस्तामाच्छिद्येत्यर्थः ॥ ५३ ॥ तदा विवाहावसरे ।
कृष्णे अन्यः शत्रुरिति भावरहितानां निरतिशयभक्तियुक्तानां वा ॥ * ॥ ० ॥ ५४ ॥ वरयोरिति—" पुमान् स्त्रिया " इत्येकशेषः ॥ * ॥ ० ॥ ५५ ॥ सा द्वारका । उत्तभितैरुच्छ्रितैः । " पञ्चवर्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिक्तमार्गां मदच्युद्भिराहूतप्रेष्ठभूभुजाम् ॥ गजैर्द्वास्सु परामृष्टरंभापूगोपशोभिता ॥ ५७ ॥ कुरुसृंजयकैकेयविदर्भयदुकुंतयः ॥ मिथो मुमुदिरे तस्मिन्सं
भ्रमात्परिधावताम् ॥ ५८ ॥ रुक्मिण्या हरणं श्रुत्वा गीयमानं ततस्ततः ॥ राजानो राजकन्याश्च बभूवुर्भृशविस्मिताः ॥ ५९ ॥ द्वारकायामभूद्राज
न्महामोदः पुरौकसाम् ॥ रुक्मिण्या रमयोपेतं दृष्ट्वा कृष्णं श्रियः पतिम् ॥ ६० ॥ इति श्रीभा ० म ० द० उ ० रुक्मिण्युद्वाहोत्सवे चतुष्पंचाश
त्तमोऽध्यायः ॥ ५४ ॥ श्रीशुक उवाच ॥ कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना ॥ देहोपपत्तये भूयस्तमेव प्रत्यपद्यत ॥ १ ॥

मंगलानि लाजांकुरपुष्पप्रकरादीनि तैः ॥ ५६ ॥ आहूताः प्रेष्ठा भूभुजस्तेषां गजैः परामृष्टाः उच्छ्रिता रंभाश्च पूगाश्च तैरुपशोभिता । यद्वा तैरेव गजैः परामृष्टाः संस्पृष्टा रंभाश्च पूगाश्च तैरुपशोभिता ॥ ५७ ॥ संभ्रमादौत्सुक्यात्परिधावतां बंधूनां मध्ये मिथः समेत्य मुदं प्रापुः ॥ ५८ ॥ ५९ ॥ ६० ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री ० टीकायां चतुष्पंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ पंचपंचाशत्तमे तु प्रद्युम्नोऽजनि कृष्णतः ॥ शंबरेण हृतः सोऽथ हत्वा तं कांतयाऽगमत् ॥ १ ॥ प्रद्युम्नहानिलाभाद्यैः शंबराहरणादिना ॥ कुटुंबिनामपत्यादिसुखदुःखमसूसुचत् ॥ २ ॥ जांबवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म ततो विवाहास्ततः शंबरागारात्प्रद्युम्नप्रत्यागमनम् । अतः पुत्रकथनप्रस्तावेऽपि प्रथमं प्रद्युम्नस्य जातमात्रस्य शंबरेण हरणं निरूप्यते प्रत्यागमनं तूत्तरकालीनमपि कथापर्यवसानायात्रोक्तमिति । वासुदेवाधिष्ठितचित्त

वैजयन्ती इंद्रध्वज इतीरितः । पीतो नीलः सितो रक्तो हरितः पञ्चवर्णकाः ॥ '' इत्युक्तलक्षणैरिंद्रध्वजैः । यद्वा—" चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम् । शक्रध्वजमिति प्राहुः पौरलोकसुखावहम् ॥ '' इत्युक्तलक्षणो ध्वज उत्तभितो येषु तैः " एवं यः कुरुते यात्रामिंद्रकेतोर्युधिष्ठिर । पर्जन्यः कालवर्षी स्यात्तस्य राज्ये न संशयः ॥ '' इति भविष्योत्तरोक्तेः ॥*॥०॥ ५६ ॥ " परामृष्टो विचारे च स्पर्शनोच्छ्रितयोरपि '' इति निरुक्तिः । सिक्तमार्गेति पृथग्विशेषणम् । हस्तिकर्तृकसर्वतस्सेकासंभवं मत्वाह—यद्वेति ॥ * ॥ ० ॥ ५७ ॥ परिधावतामितस्तत आनंदोद्रेकात्परिभ्रमताम् ॥ * ॥ प्रेष्ठभूभुज एवाह—कुरवो भीष्मधृतराष्ट्रपांडवादयः, सृंजया द्रुपदाद्याः, कैकेयाः संतर्दनादयः, विदर्भा इति कन्यास्नेहात्, क्षत्रियेषु तादृशहरणस्य प्रशस्यत्वेन पूर्वमेव च श्रीकृष्णस्य स्वाभिरुचितत्वेन योग्यवरलाभात्प्रायः श्रीबलदेवादिभिर्मुनिजनादिद्वारा बोधयित्वा तेषामानीतत्वेनासंकोचाच्च श्रीभीष्मकादीनामप्यागमनं बोध्यते । ते च भीष्मकक्रथकैशिकादयः, यदव उग्रसेनादयस्तदभेदान्नन्दादयोपि । तथोक्तं पाद्मोत्तरखण्डे—" नंदगोपोथ गोपालैर्गोपवृद्धैः समागतः । स्वलंकृताभिर्योषिद्भिर्यशोदापि समागता ॥'' इति । तत्र ते रुक्मिणीहरणतः प्रागेव भगवता सम्प्रार्थ्य नीता इति बोध्यम् ॥५८॥ ततस्ततस्तत्रतत्र । राज्ञां विस्मयस्तु बहुष्वेककर्तृककन्याहरणात् । राजकन्यानां त्वहो मातापित्रनुमतिं विना कथ मेलनसंकेतः कृत इत्यर्थः ॥ * ॥ ० ॥ ५९ ॥ रमया लक्ष्मीरूपया ॥ * ॥ श्रियः सर्वाश्रयभूतायाः परमलक्ष्म्याः पतिम् ॥ ६० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ अजनि उद्भूतः । स प्रद्युम्नः । शंबरेण तन्नामकाऽसुरेण (१) । अपत्यादिप्राप्त्या सुखं, तद्धान्या च दुःखम् (२) । ततः प्रद्युम्नजन्मोत्तरम् । ततो विवाहेभ्योऽनंतरम् । यतोऽन्यविवाहेभ्यः प्राक् जन्मातो हेतोः । पुत्रोक्तिप्रसंगे प्राप्ते सति । उत्तरकालिकं जांबवत्यादिविवाहेभ्यः पाश्चात्त्यमपि । पर्यवसानं समाप्तिः । "आत्मा वै पुत्रनामासि '' इति श्रुतेः, "स एष भगवान्द्रोणः प्रजारूपेण वर्तते'' इत्यादिश्रवणाच्च । तत्रांशत्वारोप उपचार एव । चित्ताधिष्ठितवासुदेवप्रभवात्सर्वेपि वासुदेवास्स्युः सर्वचित्तेषु तस्याधिष्ठितत्वादित्यरुच्याऽऽह । वासुदेवस्यैव कंजोद्भावनादिद्वारा सृष्टिहेतुत्वादिति भावः । प्राक्तारकतापितेन्द्रार्थितकामेन तपास्स्थितरुद्रसेवनार्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः ॥ प्रद्युम्न इति विख्यातः सर्वतोऽनवमः पितुः ॥ २ ॥
तं शंबरः कामरूपी हृत्वा तोकमनिर्दशम् ॥ स विदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहम् ॥ ३ ॥

प्रभवत्वाद्वासुदेवांशः सृष्टिहेतुत्वाच्च । देहोपपत्तये देहप्राप्तये ॥ १ ॥ अनवमोऽन्यूनः ॥ २ ॥ स प्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रास्य ऽऽगतहिमालयात्मजांगस्पर्शनप्रेरितरुद्रस्य वीर्यं पातितं, तेन क्रुद्धरुद्रेण स्वतृतीयनेत्राग्निना कामो दग्धः, पुनस्तद्भार्यया रत्या स्तुतो रुद्रस्तस्यै वरं ददौ–तत्र पतिः पुनः कृष्णवीर्येण रुक्मिण्यामाविर्भविष्यति स च त्वामेव पुनः प्राप्स्यतीति पुराणान्तरे स्पष्टम् ॥ * ॥ कामस्त्वित्यादावेवं विवेचनीयम्–श्रुतिपञ्चरात्रादौ खलु वासुदेवसंकर्षणाऽनिरुद्धाः, ते चेश्वराविर्भावा नित्याः, प्राकृतकामस्त्विन्द्रभृत्यत्वेनैवैकाद शादौ प्रसिद्धः । वासुदेवादयोऽपि द्विविधाः–देवलीलाः, मनुष्यलीलाश्च । तत्र पूर्वे–नारायणव्यूहस्तवादौ बहुविधाः, अपरे च श्रीकृष्णाद्याख्याः । तत्र पुराणादावुपासनायां तेभ्यो भेदेनोक्तास्ते च नित्याः । यथा श्रीगोपालतापन्यां श्रीमथुराप्रसंगे–"यत्रासौ संस्थितः कृष्णस्त्रिभिश्शक्त्या समाहितः । रामाऽनिरुद्धप्रद्युम्नै रुक्मिण्या सहितो विभुः ॥" इति । तस्मात्प्राकृतकामस्य भगवद्व्यूहत्वाऽसंभवादयमर्थः । तुशब्दो भिन्नोपक्रमे । वासुदेवस्य श्रीकृष्णादिलक्षणांशः रौक्मिणेयादिलक्षणः प्रद्युम्नरूपो यत्रेति तास्मिन्नसावंशेन कलयाविष्ट इत्यर्थः । प्रद्युम्नविभूतिरूप इत्यर्थः स कामो रुद्रमन्युना पूर्वं दग्धोऽतो देहोपपत्तये तमेव प्रद्युम्नमेव प्रत्यपद्यत । देहस्योपपत्तिर्नाम रुद्रेणानंगताविधानेन स्वतः प्राप्त्यसंभवात् । सामीप्येनान्यप्रसंगतोऽपि तत्प्राप्तिस्तदर्थं तमुपास्य तत्सायुज्यं प्राप्तवा नित्यर्थः । भूयःशब्देन स कामाख्यो जीवस्तस्मादेवाविर्भूत इति गमितम् । अर्थांतरन्तु न संगच्छते वासुदेवांशो दग्ध इति श्रीभागवतमतविरोधात् । संकल्पविकल्पकात्मकान्मनस एव कामप्रभवात्, न तु धारणमात्रात्मकाच्चित्तात् । तथा स च कामो मनोविकार रूप एव, स तु तद्देवतारूप इति विचारणासिद्धेः, कष्टतापत्तेश्च ॥ **विश्वनाथस्तु**–जांबवत्यादिविवाहेभ्यः प्रागेव प्रद्युम्नजन्म, ततो विवाहाः, ततः शंबरागारात्प्रद्युम्नप्रत्यागमनमिति क्रमो ज्ञेयः । अत्र तु प्रद्युम्नप्रसंगादेव तच्चरितमप्युक्तम् । तत्र स्वयं भगवतो नित्यलीलापरिकराणां प्रपंचे प्राकट्यं खलु भगवदिच्छया स्वस्मिन्प्रविष्टानां स्वस्वविभूतीना मेव प्रथमाश्रिता दृश्यते, न तु साक्षात्स्वस्वप्रथया बहिर्मुखानां वादानामुत्थानाऽभावार्थं, भक्तियोगसिद्धान्तस्य रहस्यत्वरक्षणार्थञ्च "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इति भगवदुक्तेः । यथा द्रोण एव नन्दो भूत्, धरैव यशोदा, वसुरेव उद्धवः, इन्द्र एवार्जुनः, यम एव विदुरः, गुह एव सांब इत्येवं किं बहुना, स्वयं भगवतोऽपि स्वप्रविष्टस्वांशप्रथयैव जन्म, यथा वैकुंठनाथ एवागत्य वसुदेवगृहे जातः क्वचिद्वामन एव क्वचिदृषिर्नारायण एव क्षीरोदनाथ एवेत्येवं तस्य तृतीयो व्यूहो यः प्रद्युम्नस्तस्यापि स्वप्रविष्टप्राकृतकंदर्पाख्यस्वविभूतिप्रथयैवाविर्भावमाह–कामस्त्विति । 'प्रजनश्चास्मि कंदर्पः' इति गीतोक्तेर्वासुदेवविभूति रित्यर्थः । देहस्योपपत्तिस्स्वाश्रयश्रीप्रद्युम्नदेहप्रविष्टत्वेनैव या प्राप्तिस्तस्यै तमेव विचित्रलीलानिधेस्तस्यैवेच्छया तं प्रत्यपद्यत न तु स्वशक्त्यैव तं प्रापेत्यर्थः ॥ १ ॥ स एव यो रुद्रेण दग्धः । 'न्यूने नीचेऽवमो मतः' इति निरुक्तिः ॥ * ॥ स एव काम एव । प्रद्युम्न इति विख्यातो लोके प्रथमेव प्राप्तः, वस्तुतस्तु सच्चिदानंदविग्रहः प्रद्युम्नः प्रद्युम्न एव तृतीयो व्यूहः, न तु कामो नाम केवलं जीवविशेष एव । तदुक्तं श्रीगोपालतापिन्याम्–"यत्रासौ०" इति । प्रथमे नारदोपास्यमंत्रोऽपि । यथा–"नमस्तस्मै भगवते कृष्णायाऽकुंठमेधसे । प्रद्युम्नायाऽनिरुद्धाय नमः संकर्षणाय च ॥" इति । अत्रापि श्लोके पितुः श्रीकृष्णात्सर्वतः सर्वप्रकारेणैवाऽन्यूनः, न हींद्रभृत्यः प्राकृतः काम एवं व्याख्यातुमुचितस्तस्मात्तस्मिन्प्रद्युम्ने तदिच्छया संप्रविश्य स्थिते । भगवति जगदित्वेत्येव श्रीनन्दादिष्वपि श्रीद्रोणादीनां स्थितिर्व्याख्येया ॥ **तोषिणीकारोपि**–तदेवं यः कृष्णवीर्यसमुद्भवः प्रतिकल्पं श्रीकृष्णांशाविर्भावी प्रद्युम्न इति विख्यातश्चतुर्व्यूहप्रसिद्धः स एव वैदर्भ्यां जातः प्रादुर्भूतः । प्राकृतकामस्य तु तत्र सायुज्यमिति भावः । तत्र हेतुः–सर्वत इति ॥ २ ॥ तं प्रद्युम्नम् । तोकम् "सद्योजातशिशौ तोकोऽपत्ये तुच्छे तथा ध्वनौ" इति धरणिः । उदन्वति समुद्रे ॥ * ॥ अत्र श्रीकृष्णस्य लीलाकौतुकं वर्णयति–तमित्यादिना यावदध्यायसमाप्ति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं निर्जगार बलवान्मीनः सोऽप्यपरैः सह ॥ वृतो जालेन महता गृहीतो मत्स्यजीविभिः ॥४॥ तं शंबराय कैवर्ता उपाजह्रुरुपायनम् ॥ सूदा महानसं नीत्वाऽवद्यन्स्वधितिनाऽद्भुतम् ॥५॥ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् ॥ नारदोऽकथयत्सर्वं तस्याः शंकितचेतसः ॥ बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनम् ॥ ६ ॥ सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी ॥ पत्युर्निर्दग्धदेहस्य देहोत्पत्तिं प्रतीक्षती ॥ ७ ॥ निरूपिता शंबरेण सा सूपौदनसाधने ॥ कामदेवं शिशुं बुद्ध्वा चक्रे स्नेहं तदाऽर्भके ॥ ८ ॥

प्रक्षिप्य गृहमगादिति ॥ ३ ॥ निर्जगार गिलितवान् ॥ ४ ॥ स्वधितिना शस्त्रिकया । अवद्यन्नवायन्खंडितवंतः ॥ ५ ॥ तत्त्वं कामोऽयं तव भर्तेति । उत्पत्तिं श्रीकृष्णाद्रुक्मिण्यामुत्पन्न इति ॥ ६ ॥ यशस्विनी पतिव्रता । भर्तृदेहप्राप्तिं प्रतीक्षमाणा ॥ ७ ॥ तं शिशुं कामदेवं बुद्ध्वा विज्ञाय ॥ ८ ॥

कामरूपीति—मायया धात्र्यादिरूपेणेत्यर्थः । अनिर्देशमिति—षष्ठेह्नीत्यर्थः । तदुक्तं वैष्णवे—“ षष्ठेऽह्नि जातमात्रं तु प्रद्युम्नं सूतिकागृहात् । ममैष हन्तेति मुने हृतवान्कालशम्बरः ॥ ” इति विदित्वा दुष्टशम्बरवधेच्छो र्नारदाच्छत्रुं हनिष्यन्तम् । अत्रायमभिसन्धिर्हरिवंशे—“ विदितं तच्च कृष्णस्य देवमायानुवर्तिनः । ततो न निगृहीतः स दानवो युद्धदुर्मदः ॥” इति ॥३॥ तं प्रद्युम्नम् । स येन निर्गारितः । जालेन सिचा वृतः संस्यूतः । मत्स्यजीविभिर्दाशैः ॥ * ॥ विचित्रलीलाचिकीर्षोर्भगवत इच्छयैव गिलितवान्न तु प्रद्युम्नान्मीनो बलवानिति ॥ ४ ॥ तं मत्स्यम् । कैवर्ता धीवराः ‘कैवर्ते दाशधीवरौ ’ इति कोशात् । उपायनभूतं ददुः । सूदा आंधसिकाः “ सूदस्तु कथितः सूपकारे च व्यञ्जनान्तरे ” इति मेदिनी । “ बहुशर्करके ग्रामे गेहे पाकस्थले पुमान् । महानस इति प्रोक्ते ” इति निरुक्तिः । “ कुठारे छुरिकायां च स्वधितिः परिकीर्तिता ” इति कोशांतरात् । द्रुतं शीघ्रम् । अवपूर्वात् ‘ दो—अवखण्डने ’ अतो लङ्, अडभावस्त्वार्षः ॥ * ॥ तमित्यर्द्धकम् । उपजह्रुरित्युक्तेऽप्युपायनमिति पौनरुक्त्यं तद्वैशिष्ट्यापेक्षया । अद्भुतत्वं बृहत्त्वादि । तस्यैवोपायनत्वे हेतुरयमेव । तत्र तन्निजविद्याप्रकाशनेन तन्नाम्नैव ख्यातायै रत्यै अर्पयामासुः, तस्याः सूदाधिपत्वात् ॥ ५ ॥ मायावत्यै महादेवप्रसादावाप्तानेकमायाज्ञानवत्यै रत्यपरपर्यायायै । तस्या रत्याः । तत्त्वं याथार्थ्यम् ॥ * ॥ शंकितचेतसः बालोऽयमतिसुन्दरो मत्पतितुल्यरूपः कथं मत्स्यगर्भे जातः, अन्य एवोत्पन्नश्चेत्कथमत्र न मृतः, अतो देववरोऽयं कश्चिन्मद्भर्तैव वा स्यादित्याद्याशंकायुक्तं चेतो यस्यास्तस्याः । सर्वमित्येव विवृणोति—बालस्येति, मत्स्योदरनिवेशनं च प्रवेशकारणम् । अत्र तस्या भर्तुः कामस्य तृतीयव्यूहेनाभेदोक्तिः, किरणस्य सूर्येणेव । सा च मायावत्याः शोकापनोदाय मेलनाय च । सापि निजरत्यभेदेन श्रीप्रद्युम्नमुपासितवत्यस्ति ‘ गोपीनां तत्पतीनां च ’ इत्यादिरीत्या । न च तस्या व्रतभंगः, अयञ्च स्पर्शमणिन्यायेन तामात्मयोग्यां चकार स्वीचकार च । श्रीमदनिरुद्धमातैव तु तस्य साक्षाच्छक्तिरिति ज्ञेयम् ॥ ६ ॥ ० ॥ * ॥ सा चेति युग्मकम् । अत्रेयमाख्यायिका मात्स्ये—शिवेन भस्मीकृते कामे रतिस्तद्देहोत्पादनाय चिरं तमुपासितवती । शंबरोऽपि तमुपासीन आसीत् । तत्र दृष्टायां तस्यां शम्बरेण मुहुः शिवात्सैव वव्रे । ततश्चोपासनावशेन तेन रतिरूचे—याद्यस्य सदनं तत्रैव तवेष्टसिद्धिर्भविष्यति, मद्दत्तमहाविद्याप्रभावेण तव व्रतभंगोपि न भविष्यतीति । तथा विष्णुपुराणे रुक्मिणीं प्रति नारदः—“ इयं मायावती भार्या तनयस्यास्य ते सती । शम्बरस्य न भार्येयं श्रूयतामत्र कारणम् ॥ मन्मथे तु गते नाशं तदुद्भवपरायणा । शंबरं मोहयामास मायारूपेण मोहिनी ॥ व्यवायाद्युपभोगेषु रूपं मायामयं शुभम् । दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥ ” इति । इत्थं हरिवंशेपि ॥ ७ ॥ सूपौदनस्य साधने संस्कारे, आधिपत्ये वा “ संस्कारे ह्याधिपत्येपि साधनं परिकीर्तितम् ” ‘ रूपो व्यञ्जनसूदयोः ’ इति मेदिनी । तदा नारदकथनावसरादारभ्य ॥ * ॥ सूपौदनसाधने तदाधिपत्ये । तदुक्तं वैष्णवे—“ कारयामास सूदानामाधिपत्यमनिंदिता ” इति । स्नेहं प्रेमविलासम् । स्नेहाऽऽचरणप्रकारश्च हरिवंशे—‘ धात्र्यास्तं सा समर्पयत् ’ इति, “ रसायनोपयोगैश्च शीघ्रमेव व्यवर्धयत् ” इति । एवं तस्या एव मायया शंबरोपि तं बालं न परिचितवानिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नातिदीर्घेण कालेन स कार्ष्णी रूढयौवनः ॥ जनयामास नारीणां वीक्षंतीनां च विभ्रमम् ॥ ९ ॥ सा तं पतिं पद्मदलायतेक्षणं प्रलंबबाहुं नरलोकसुंदरम् ॥ सव्रीडहासोत्तभितभ्रुवेक्षती प्रीत्योपतस्थे रतिरंगसौरतैः ॥ १० ॥ तामाह भगवान्कार्ष्णिर्मातस्ते मतिरन्यथा ॥ मातृभावमतिक्रम्य वर्तसे कामिनी यथा ॥ ११ ॥ रतिरुवाच ॥ भवान्नारायणसुतः शंबरेणाहृतो गृहात् ॥ अहं तेऽधिकृता पत्नी रतिः कामो भवान्प्रभो ॥ १२ ॥ एष त्वाऽनिर्दशं सिंधावक्षिपच्छंबरोऽसुरः ॥ मत्स्योऽग्रसत्तदुदरादिह प्राप्तो भवान्प्रभो ॥ १३ ॥ तमिमं जहि दुर्द्धर्षं दुर्जयं शत्रुमात्मनः ॥ मायाशतविदं त्वं च मायाभिर्मोहनादिभिः ॥ १४ ॥

विभ्रमं संमोहम्॥९॥अंग हे राजन्।सौरतैर्भावैरुपतस्थेऽभजत्॥१०॥११॥अधिकृता पत्नीत्यत्र हेतुः।रतिरहं भवान्काम इति॥१२॥१३॥दुर्जयत्वे हेतुः।मायाशतविदमिति।

ज्ञेयम् । तदा 'सदा' इति वा पाठः ॥ ८ ॥ स प्रद्युम्नः । कृष्णस्यापत्यं कार्ष्णिः । रूढं प्रादुर्भूतं यौवनं यस्य स तथा । विभ्रमं मनोधिकारम्, देवाद्यन्यतमोयमिति विशिष्टभ्रमं वा ॥ * ॥ नातिदीर्घेणेति—पौगंड एवेत्यर्थः । रूढमुद्भिन्नं यौवनं यस्य सः, यतः कार्ष्णिः श्रीकृष्णस्यैव पुत्रः । तस्यापि तथैव तारुण्यादिति भावः । च अपि वीक्ष्यमाणानामपि किम्पुनः संभाषणादि कुर्वतीनामित्यर्थः । विभ्रमं भावविशेषम् । किं वा—विशिष्टं भ्रममुन्मादमित्यर्थः ॥ ९ ॥ सा मायावती । तं प्रद्युम्नम् । सौरतैः सुरतोद्दीपकैरात्मसर्वस्वैः सेवयामास । कानि तत्सर्वस्वानीत्यत आह—सव्रीडेति ॥ * ॥ पूर्वतो विशिष्टताभिप्रायेण तं पदत्रयेण वर्णयति । तत्र पद्मेति सर्वसौंदर्योपलक्षणम् । प्रलंबेति महाबलिष्ठत्वसूचकम् । इत्युभयथा नरलोके भूलोके, जीवलोके वा सुन्दरमत एव प्रीत्योपतस्थे । कैः—सव्रीडहासेनोत्तभिता नर्तिता या भ्रूस्तयोपलक्षितैः सौरतैर्भावैः । अत्रेदं तत्त्वम्—अद्य वा श्वो वा सर्वं तत्त्वमस्मै ज्ञापयित्वैव सौरतान्भावान्प्रकाशयिष्यामीति विचारवत्या एव तस्या दैवाद्रहसि विज्ञापनात्पूर्वमेव कामवैवश्यात्ते भावाः स्वयमेवोद्भूता इति ॥ १० ॥ तां मायावतीम् । यतो मातृभावमतिक्रम्य कामिनीव पत्नीव त्वं वर्तसेऽतस्ते मतिरन्यथा मा नेत्यर्थः श्रेयान् । उत्तानार्थस्वीकारे तु भगवानिति पदमनर्थकं स्यात्, त्रिकालज्ञेष्वेव भगवत्प्रयोगदर्शनादिति भावः ॥ * ॥ भगवान् सर्वज्ञानादिसंपन्नोऽपि तद्विपरीतवदाह ऊचे । यतः कार्ष्णिः कृष्णपुत्रत्वात्तदभिरुचितनरलील इत्यर्थः । मातारिति मातृत्वबुद्धेः । तथा च हरिवंशे—"धात्र्याः सकाशात्स च तां शृण्वन्रुक्मिणिनंदनः । मायावतीमविज्ञानान्मेने तामेव मातरम् ॥" इति । एवं धात्र्या एव तादृशं मतं न तु तस्या इत्येकांत एव धात्र्या जातबुद्धये तस्मै तत्कथितम् । ततो बाल्याभासं विना पूर्वन्तु मातारिति संबोधनं तेन नाचरितं, ततः संप्रति क्रोधादेवाचरितमिति ज्ञेयम् । वास्तवार्थस्तु—अतो भावात्तेऽन्यथा मतिर्मा भवत्विति शेषः । यतस्त्वं मातृभावमतिक्रम्यैव वर्तसे यथा यथावदेव कामिनी मत्कान्तैवेति ॥ ११ ॥ तदेवाह—भवानिति । अधिकृता पूर्वदेहे स्वकृता वधूत्तमेत्यर्थः । तत्स्फुटयति—रतिरहमिति ॥ * ॥ नारायणेति तस्य सर्वाश्रयत्वं व्यनक्ति । गृहात् सूतिकाऽगारात् । अधिकृता त्वदधिकारतुल्या, इत्यात्मनस्तन्नित्यपत्नीत्वं द्योतितम् ॥ १२ ॥ एष यद्गृहेऽहमधुना तिष्ठामीत्येषपदार्थः । तदुदरान्मत्स्योदरात् ॥ * ॥ कथं हृत इत्यपेक्षायां तं प्रकारं कथयंती कोपं जनयति—एष इति ॥ १३ ॥ तं शंबरम् ॥ * ॥ इमं साक्षादत्रैव वर्तमानम् । दुर्धर्षं कृच्छ्रेणैव व्यप्रयितुं शक्यम् , अतः सुतरां दुर्जयम् । हननञ्च योग्यमेव शत्रुत्वादित्याह—आत्मनः स्वस्य शत्रुं क्लेष्टारम् ।

१ असर्वज्ञवत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिशोचति ते माता कुररीव गतप्रजा ॥ पुत्रस्नेहाकुला दीना विवत्सा गौरिवातुरा ॥ १५ ॥ प्रभाष्यैवं ददौ विद्यां प्रद्युम्नाय महात्मने ॥ मायावतीं महामायां सर्वमायाविनाशिनीम् ॥१६॥ स च शंबरमभ्येत्य संयुगाय समाह्वयत् ॥ अविषह्यैस्तमाक्षेपैः क्षिपन्संजनयन्कलिम् ॥ १७ ॥ सोऽधिक्षिप्तो दुर्वचोभिः पदा हत इवोरगः ॥ निश्चक्राम गदापाणिरमर्षात्ताम्रलोचनः ॥ १८ ॥ गदामाविध्य तरसा प्रद्युम्नाय महात्मने ॥ प्रक्षिप्य व्यनदन्नादं वज्रनिष्पेषनिष्ठुरम् ॥ १९ ॥ तामापतंतीं भगवान्प्रद्युम्नो गदया गदाम् ॥ अपास्य शत्रवे क्रुद्धः प्राहिणोत्स्वगदां नृप ॥ २० ॥ स च मायां समाश्रित्य दैतेयीं मयदर्शिताम् ॥ मुमुचेऽस्त्रमयं वर्षं कार्ष्णौ वैहायसोऽसुरः ॥ २१ ॥ बाध्यमानोऽस्त्रवर्षेण रौक्मिणेयो महारथः ॥ सत्त्वात्मिकां महाविद्यां सर्वमायोपमर्दिनीम् ॥ २२ ॥ ततो गौह्यकगांधर्वपैशाचोरगराक्षसीः ॥ प्रायुंक्त शतशो दैत्यः कार्ष्णिर्व्यधमयत्स ताः ॥ २३ ॥

कथं तर्हि हंतव्यस्तत्राह । मायाभिरिति ॥ १४ ॥ न चात्र विलंबः कार्य इत्याह । परिशोचति रोदितीत्यर्थः ॥ १५ ॥ ॥ १६ ॥ १७ ॥ १८ ॥ वज्रस्य निष्पेषे निर्घाते यथा निष्ठुरस्तीव्रो नादो भवति तथाभूतं नादं व्यनदत् । सामान्यविशेषतया व्याप्यव्यापकत्वमोदनं पाकं पचतीतिवत् । अतिनिष्ठुरं नादमकरोदित्यर्थः ॥ १९ ॥ २० ॥ वैहायस आकाशे स्थितः ॥ २१ ॥ सत्त्वात्मिकां सत्त्वगुणमयीं प्रायुंक्तेत्युत्तरस्यानुषंगः ॥ २२ ॥ ता मायाः व्यधमयद्व्यनाशयत् ॥ २३ ॥

आदिना शोषणादय आग्नेयादयो वा ॥ १४ ॥ 'उत्क्रोशकुररौ समौ' इत्यमरः । इत्यर्थ इति–पर्युपसर्गवशाच्छोचते रोदनार्थत्वं परस्मैपदित्वं चेति भावः ॥ * ॥ पुत्रस्नेहोत्थो मातुः प्रसिद्धो यश्चित्तद्रवविशेषस्तेनाकुला–किं कर्तव्यं कथं मे पुत्रदर्शनं स्यादित्येवं मूढा, अत एवातुरा व्याधितेव शोकरोगग्रस्ता तत एव दीना परिक्षीणा तत एव परितः सर्वत्रैव शोचति सरोदनं विलपतीत्यर्थः । तत्र हताशत्वांशे दृष्टान्तः–गतप्रजा कुररीवेति, कुररी पाक्षिविशेषभार्या । धृताशत्वांशे गौरिवेति । पूर्वा हि स्वबालकनाशे पूर्ववत्तदाहारं नाहरति किन्तु रोदित्येव, उत्तरा तु मृतमपि स्तनं पाययितुमुच्छतीति ॥ १५ ॥ एवमुक्त्वेति । महामायामतिप्रबलां विद्याम्, तदर्थमेव तत्पार्श्वे रुद्रेण न्यस्ता, न तु ततो विद्यास्वीकारेण तत्र गुरुत्वं संभावनीयं निजन्यासाऽऽदानेपि तत्स्वीकारेऽतिप्रसंगात् ॥ * ॥ प्रकर्षेण सोत्साहोत्तेजनादिना भाषित्वा । तस्यास्तद्दित्सायां हेतुः–महात्मने, अल्पवयस्त्वेपि प्रकाशितबलबुद्धित्वेन तद्योग्यायेत्यर्थः । यद्वा–गंभीराय प्रकाशितनिजप्रभावाय । विनाशिनीमिति णिन्यंतः पाठः, क्वचित्स्युडंतोपि ॥ १६ ॥ स च ज्ञातविद्यः प्रद्युम्नः । तं शंबरम् । आक्षेपैर्भर्त्सनावाक्यैः । "आक्षेपो भर्त्सनाकृष्टिकाव्यालंकृतिषु स्मृतः" इति मेदिनी । क्षिपंस्तिरस्कुर्वन् ॥ * ॥ सम्यग्युद्धत्वादिनाह्वयत् । आक्षेपैर्निंदावाक्यैः । सम्यक् तन्मरणपर्यंततया । जनयन् जनयितुम् ॥१७॥ स शंबरः ॥ * ॥ ० ॥१८॥ 'स्फूर्जथुर्वज्रनिष्पेषः' इति हलायुधः । इत्यर्थ इति–सामान्यं पाको बहुव्यापकत्वात्, विशेष ओदनमल्पव्यापकत्वात् । तत्र यथौदनस्य व्याप्यत्वं पाकस्य व्यापकत्वमेवमत्राप्यतिनिष्ठुरस्य व्याप्यत्वं, नादस्य व्यापकत्वमिति भावः ॥ * ॥वज्रनिष्पेषस्य नादमिव निष्ठुरं वज्रनिष्पेषनिष्ठुरम् । मध्यमपदलोपी समासः । व्यापकत्वं क्रियाया व्याप्यत्वं तु कर्मणः । अकरोदिति–सर्वेषां धातूनामंतर्भूतकृञर्थत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन कृञर्थमात्रपर्यवसानाच्च ॥ १९ ॥ तां गदाम् । अपास्य निवर्त्य ॥ * ॥ अपास्य प्रत्यक् क्षिप्त्वा । नृपेति–यथा त्वं नृपालनार्थं दुष्टान् गदापातैर्हंसि तथायमपि । तस्माद्दुष्टदैत्याल्लोकरक्षार्थमेव वस्तुतस्तस्मै गदां प्राहिणोदिति भावः ॥ २० ॥ स च शंबरः । दैतेयीं दैत्यकुलदेवतामिव वर्तमानाम् ॥ * ॥ मायां परोक्षत्वादिनाश्रित्य वैहायसः सन्नेव प्रद्युम्नगदामवञ्चयादिति सूचितम् । अश्ममयं शिलाप्रचुरम् । तदुक्तं हरिवंशे–"भस्मीभूते वृक्षवर्गे शिलासंवानवर्षयत्" इति ॥ २१ ॥ सत्त्वगुणमयीं बलज्ञाननिधिं विष्णुदेवताकाम् । महाविद्यां विज्ञानास्त्रसंज्ञाम् । उत्तरस्याग्रिमश्लोकस्थक्रियापदस्य । अनुषङ्ग आनयनम् ॥ * ॥ बाध्येति युग्मकम् । महारथो वीरवर्गश्रेष्ठः ॥ २२ ॥ ततो रौक्मिणेयकर्तृकास्त्रसंधानोत्तरम् । स कार्ष्णिः ॥ * ॥ गौह्यकेत्यादौ प्रथमं सामान्यतो निर्दिष्टानां स्त्रीप्रत्ययं विनैव द्वंद्वः, पश्चान्मायाविशेषणत्वेन स्त्रीत्वे

१ अत्र मूले नदन्नित्यपि पा० । २ अस्त्रमयमित्यत्राऽत्राश्ममयमिति० पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निशातमसिमुद्यम्य सकिरीटं सकुंडलम् ॥ शंबरस्य शिरः कायात्ताम्रश्मश्र्वोजसाऽहरत् ॥ २४ ॥ आकीर्यमाणो दिविजैः स्तुवद्भिः कुसुमोत्करैः ॥ भार्ययांबरचारिण्या पुरीं नीतो विहायसा ॥ २५ ॥ अंतःपुरवरं राजँल्ललनाशतसंकुलम् ॥ विवेश पत्न्या गगनाद्विद्युतेव बलाहकः ॥ २६ ॥ तं दृष्ट्वा जलदश्यामं पीतकौशेयवाससम् ॥ प्रलंबबाहुं ताम्राक्षं सुस्मितं रुचिराननम् ॥ २७ ॥ स्वलंकृतमुखांभोजं नीलवक्रालकालिभिः ॥ कृष्णं मत्वा स्त्रियो ह्रीता निलिल्युस्तत्रतत्र ह ॥ २८ ॥ अवधार्य शनैरीषद्वैलक्षण्येन योषितः ॥ उपजग्मुः प्रमुदिताः सस्त्रीरत्नं सुविस्मिताः ॥ २९ ॥ अथ तत्रासितापांगी वैदर्भी वल्गुभाषिणी ॥ अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ॥३०॥ को न्वयं नरवैदूर्यः कस्य वा कमलेक्षणः ॥ धृतः कया वा जठरे केयं लब्धा त्वनेन वा ॥ ३१ ॥

ताम्राणि श्मश्रूणि यस्मिंस्तत् । ओजसा बलेन ॥ २४ ॥ २५ ॥ विद्युता सह बलाहको मेघ इव ॥ २६ ॥ २७ ॥ नीलाश्च वक्राश्च येऽलकास्त एवालयस्तैः ह्रीता लज्जिताः ॥ २८ ॥ श्रीकृष्णो न भवतीत्यवधार्य स्त्रीषु रत्नं श्रेष्ठा रतिस्तत्सहितम् ॥ २९ ॥ ३० ॥ सुतं स्मरत्याह । को न्वयमिति नरवैदूर्यः पुरुषश्रेष्ठः ॥ ३१ ॥

विवक्षिते समस्तात्स्त्रीप्रत्ययो ज्ञेयः । शतश इति गौह्यकादीनामेवावृत्तिर्व्यक्ता । यद्वा—अन्या अपि शतशो मायाः । ताश्च हरिवंशे—"ततो मायां परां चक्रे देवशत्रुः प्रतापवान् । सिंहान्व्याघ्रान्वराहांश्च तरक्षूनृक्षवानरान् ॥ वारणान्वारिदप्रख्यान्हयानुष्ट्रान्विशां पते । " इत्यादिना गौह्यकादीनां यथोत्तरं हिंस्रत्वेन श्रैष्ठ्यम् । स्मै प्रसिद्धौ । ताः सर्वाः, यतः कार्ष्णिः 'मायिमायिनि' इत्युक्तेर्मायाविद्यामोहकश्रीकृष्णात्मजे का प्राकृतमायागणनेति भावः । अस्याग्रेप्यनुवृत्तिर्ज्ञेया ॥ २३ ॥ श्मश्रूणि मुखरोमाणि ॥ * ॥ आहरत् दूरीचकार ॥ २४ ॥ दिविजैः देवैः । भार्यया रत्या निजमायाबलेन पुरं द्वारकां नीतः प्रापितः ॥ * ॥ ० ॥ २५ ॥ अंतःपुरेषु वरं श्रेष्ठम् ॥ * ॥ अंतःपुरेषु वरं श्रीपट्टमहिषीप्रधानरुक्मिणीगृहम् । हे राजन्निति—यथा भवादृशराजगृहमतीवसुंदरस्त्रीशतसंकुलं भवति तद्वत्तदपीति भावः ॥ २६ ॥ तं प्रद्युम्नम् ॥ * ॥ तामिति युग्मकम् । श्रीकृष्णमननाय तत्सादृश्यं जलदेत्यादिसप्तपदैराह । ताम्रे रक्तवर्णे अक्षिणी यस्य तम्, अब्जदलवत्प्रान्तरक्तनेत्रम् 'पद्मदलायतेक्षणम्' इति प्रागुक्तेः ॥ २७ ॥ तत्रतत्रेतस्ततः । निलिल्युरंतर्हिता बभूवुः ॥ * ॥ निलिल्युर्निलीना बभूवुः, गृहकोणादिषु गुप्ता बभूवुरिति यावत् ॥२८॥ वैलक्षण्येन कृष्णलक्षणविपरीत लक्षणेन ॥*॥ ईषद्वैलक्षण्यं वर्णादिशोभातः किंचिन्न्यूनत्वम्, वयसश्च तादृशभावनिरीक्षणादिराहित्यैर्वेनायिदृष्टित्वादिकञ्च, तेनावधार्य उप समीप आजग्मुः । प्रकर्षेण मुदिताः श्रीकृष्णस्वरूपस्वाभाव्यात् । सुविस्मिताश्चान्यत्र तदसंभवात् । स्त्रीति सामान्यनिर्देशस्तत्पत्नीत्वविज्ञानरहितानां तासामभिप्रायेण । रत्नत्वनिर्देशस्तत्स्पर्शेन तादृशीत्वप्राप्तेः ॥ २९ ॥ अथ स्त्रीसमागमोत्तरम् । तत्र स्त्रीषु । आसितापांगी नीलरुचिनेत्रांता ॥ * ॥ अथ समागमोत्तरमेव । तत्र तासु पश्यंतीषु मध्ये । असितापांगीति विलोकनसौंदर्यस्य, वल्गुभाषिणीति भाषणसौंदर्यस्याभिप्रायेण । अस्मरत्सारूप्यदर्शनेनानुसंदधे । स्वशब्देन स्नेहाधिक्यमुक्तम् । तदेवाह—स्नेहेति । चिरातीतत्वेऽपि स्नुतपयोधराऽभूत् ॥ ३० ॥ अनेन नरश्रेष्ठेन, नराकारवैदूर्यमाणिवद्दीप्यमानेन वा ॥*॥०॥३१॥

१ स्म ता इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मम चाप्यात्मजो नष्टो नीतो यः सूतिकागृहात् ॥ एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ॥ ३२ ॥ कथं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः ॥ आकृत्यावयवैर्गत्या स्वरहासावलोकनैः ॥ ३३ ॥ स एव वा भवेन्नूनं यो मे गर्भे धृतोऽर्भकः ॥ अमुष्मिन्प्रीतिरधिका वामः स्फुरति मे भुजः ॥ ॥ ३४ ॥ एवं मीमांसमानायां वैदर्भ्यां देवकीसुतः ॥ देवक्याऽऽनकदुंदुभ्यामुत्तमश्लोक आगमत् ॥ ३५ ॥ विज्ञातार्थोऽपि भगवांस्तूष्णीमासीज्जनार्दनः ॥ नारदोऽकथयत्सर्वं शंबराहरणादिकम् ॥ ३६ ॥

एतेन तुल्यं वयो रूपं च यस्य स भवेदिति ॥ ३२ ॥ तस्य स्वपुत्रत्वं संभावयंत्याह । कथं त्विति ॥ ३३ ॥ तदेवाधिकं संभावयति । स एवेति ॥ ३४ ॥ देवक्यानकदुंदुभ्यां देवक्यानकदुंदुभिभ्यामित्यर्थः ॥ ३५ ॥ ३६ ॥

प्रकारांतरेण शंकते–ममेति ॥ * ॥ नष्टोऽदर्शनं गतः । अपि संभावनायाम् । यदि कुत्रापि जीवेत्तदैतत्तुल्यत्रयोरूपो भवेदित्यर्थः ॥ ३२ ॥ तस्य समागतनरश्रेष्ठस्य । भावयंती चिंतयंती । सारूप्यं सादृश्यम् । स्वरोऽत्र शब्दः ॥ * ॥ आकृत्याऽनुरूपपुष्टिशोभिताखिलदेहाकारविशेषेण, अवयवैस्तदनुरूपैरेव चरणाद्यंगैः, गत्याऽऽकाशादुत्तीर्य्य कियत्पदन्यासात्, स्वरैर्गंभीरशब्दैः, हासावलोकने प्रसिद्धे एव । समीपागतान्मात्रादीन्प्रति प्रश्नादिभिः स्वरादयोप्यवगता इत्यूह्यम् ॥ ३३ ॥ तदेव स्वपुत्रत्वम् । नूनं निश्चयः । निश्चयद्योतकं शकुनमाह–वाम इति ॥ * ॥ अधिकेति–स्वस्य जगन्मातृत्वेन सर्वेष्व प्यर्भकेषु समान्यतः प्रीतिं द्योतयति ॥ ३४ ॥ एवमित्थम् । मीमांसमानायां विचारयंत्याम् ॥ * ॥ श्रीदेवक्यादिभ्यां सहागमनं प्रायस्तदानीं तद्गृहगमनात् । उद्गतं तमोऽज्ञानं यस्मात्तादृशः श्लोको यशो यस्य । श्रीरुक्मिण्यादीनां तद्विषयकाऽज्ञाननिरासार्थमिति भावः ॥ ३५ ॥ विज्ञातार्थः ज्ञातसर्वतत्त्वः । मातापितृसमक्षं स्वयं लज्जया नाऽकथयदिति भावः । आदिना कथांतरग्रहः । तथाहि–रुद्रेण कामे दग्धे तत्प्राप्त्यर्थं रतिस्तपसा रुद्रमाराधयामास । शंबरोऽपि कामं दग्धमाकर्ण्य रतिलिप्सया रुद्रमाराधयामास । युगपत्तयोस्तपस्समाप्तौ रुद्रो वरं दातुमुभयत्र जगाम । रत्या तु मत्पतिर्मां प्राप्नोत्विति प्रार्थितो महादेवस्तस्यै कृष्णपुत्रो भूत्वा त्वत्पतिस्त्वां प्राप्स्यतीत्युवाच । शंबरस्तु रतिर्मां प्राप्नोत्विति प्रार्थितवान्, तस्मै तथास्त्वित्युक्त्वा गन्तुकामं रुद्रं रतिरुवाच–भगवन्कथं वैपरीत्यं कृतमेवं मास्त्वित्युक्तः पुनस्तस्यै नानाविद्या मोहवतीरुपदिदेश । त्वमाभिर्मायाभिरेनं मोहयिष्यसि, न त्वनेन तव संयोगो भविष्यति, त्वत्पतिरेव त्वां प्राप्स्यतीति न तु मदुक्तिर्व्यर्थेति पुराणांतरादवसेयम् । एतां च विद्यां प्राप्ताय निजपतये उपदेक्ष्यत्यनयैव विद्यया स एनं मारयिष्यतीति । इतः परं सार्द्धश्लोकत्रयं–'नारद उवाच॥ एष ते तनयः' इत्यारभ्य 'स्नुषेयं तव शोभन' इत्यन्तं प्रक्षिप्तमप्यस्ति क्वचित्पुस्तकेषु ॥ * ॥ विज्ञातार्थत्वेऽपि तूष्णीमासने हेतुः–जनानर्दयति याचयति लीलावैचित्र्येण सर्वेषां सुखप्रदः लज्जया मातृपितृसंनिधौ स्वयन्न किंचिदूचे नरलीलत्वादिति भावः । अन्यथा चिरं शोचंत्याः श्रीरुक्मिणीदेव्यास्तस्मिन्नसूयापि संभवेत् । अकस्मान्नारदागमनं श्रीकृष्णेच्छयैव ज्ञेयम् ॥ ३६ ॥

---

१ उत्तमःश्लोक इति पाठाभिप्रायेणार्षत्वाश्रयणेन वेदमवधेयम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छ्रुत्वा महदाश्चर्यं कृष्णांतःपुरयोषितः ॥ अभ्यनंदन्बहूनब्दान्नष्टं मृतमिवागतम् ॥ ३७ ॥ देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः॥ दंपती तौ परिष्वज्य रुक्मिणी च ययुर्मुदम् ॥ ३८ ॥ नष्टं प्रद्युम्नमायातमाकर्ण्य द्वारकौकसः ॥ अहो मृत इवायातो बालो दिष्ट्येति हाऽब्रुवन् ॥ ३९ ॥ यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन्रह–रूढभावाः ॥ चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्मरेऽक्षिविषये किमुतान्यनार्यः ॥ ४० ॥ इति श्रीभागवते महापुराणे दशमस्कंधोत्तरार्धे पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥

॥ ३७ ॥ ३८ ॥ ३९ ॥ अतिसौंदर्येण प्रद्युम्नं वर्णयति यमिति । पिता श्रीकृष्णस्तत्सरूपे तत्सदृशे प्रद्युम्ने निज आत्मीय ईशो भर्तेति भावो भावना यासां तास्तन्मातरः कृष्णपत्न्योऽपि रहसि निरूढभावाः सत्यो यमभजन्निति यत्तन्न खलु चित्रम् । कथं सति स्मरे स्मर्यमाणत्वेनैव क्षोभके कामेऽक्षिविषये सति किंच रमास्पदं श्रीकृष्णस्तस्य बिंबं श्रीमूर्तिस्तस्य बिंबे प्रतिबिंबे पुत्रे तदा किं नु वक्तव्यमन्यनार्यो भेजुरिति ॥ ४० ॥ इति श्रीमद्भागवते दशमस्कंध उत्तरार्धे श्री० टीकायां पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥

न्तारदोक्तम् । बहूनब्दानिति " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया । अभ्यनंदन्प्रीणयामासुः ॥*॥ महदाश्चर्यं महाश्चर्यम् । अभ्यनंदन् वक्ष्यमाणरीत्या सच्चक्रुः, प्रद्युम्नमिति शेषः ॥३७॥ तौ दंपती रतिप्रद्युम्नौ ॥ *॥ देवक्याः प्रागुक्तिः पितामहीत्वेन स्नेहविशेषात् । रामस्य पश्चादुक्तिः पश्चादेवागमनात् । स्त्रियः श्रीमहिष्यः । श्रीरुक्मिण्याः,सर्वान्ते निर्देशश्चिरपरिष्वंगार्थं पश्चात्स्थितत्वात् । किं वा–स्नेहविवशत्वेन किंचिद्विलम्बात् ॥३८॥ इति ह इत्थम् ॥*॥ अहो आनंदे । हेति पुरातनकथापरामर्शकम् ॥३९॥ तत्सरूपे तत्समानरूपे । भर्ता श्रीकृष्ण इति । तन्मातरः पद्युम्नमातरः, बहुत्वं समात्रपेक्ष्यम् । रहसि एकान्ते । निरूढो जातो भावः सात्त्विकसंज्ञः 'स्तंभः स्वेदोथ रोमाञ्चः' इत्याद्युक्तलक्षणो यासां तास्तथा । अन्यच्चित्राभावकारणमाह–किञ्चेति । " बिंबोऽस्त्री मंडलसमप्रतिमामुखलक्ष्मसु । प्रतिरूपे प्रतिकृतौ तथा स्याद्बिंबिकाफले ॥ " इति यादवः । मम त्वित्थं प्रतिभाति–तन्मातरो रुक्मिण्याद्या यं वीक्ष्य यच्चित्रमाश्चर्यमभजंस्तन्मुहुर्न किं त्वेकवारं तद्दर्शनक्षण एव । क्व सति–स्मरे स्मर्यमाणशरीरेऽक्षविषये सति । अहो स्मरणशरीरोऽयं कामः कथमस्मद्दृग्विषयो जात इत्याश्चर्यं प्रापुरित्यर्थः । किम्भूताः–रहस्त्यक्तो रूढो भावः कृष्णोऽयमित्येवंरूपोऽभिप्रायो याभिस्तारहस्रूढभावाः । यद्वा–यं वीक्ष्य रूढभावा जातप्रीतयस्सत्यो रह ऐकान्त्यमभजन्निलीना बभूवुः । रह इह सलोप आर्षः । यथाश्रुतार्थस्तु विगीत इव प्रतिभातीति ॥ * ॥ प्रद्युम्नसौंदर्यं वर्णयति–यं मुहुर्विलोक्य पितृसरूपात् पितुः श्रीकृष्णस्य समानसौंदर्याद्धेतोर्निजेशस्य श्रीकृष्णस्य भावो भावना " कथं त्वनेन सम्प्राप्तं सारूप्यं शार्ङ्गधन्वनः । आकृत्यावयवैः " इत्यादि चिन्तनं यासां ताः । तन्मातरः श्रीरुक्मिण्येव, गौरवेण बहुत्वम्, तदंतःपुरे कृष्णपत्नीनामन्यासामागमनायोग्यत्वात् । रहे रहसि तत्परिचयात्पूर्वमेव रूढ उद्भूतो भावो वात्सल्यमयी प्रीतिर्यासां ताः, 'अमुष्मिन्प्रीतिरधिका ' इत्युक्तेः । " स एव वा भवेन्नूनं वामः स्फुरति मे भुजः " इति निश्चयान्ते सति सन्देहे यत् अभजन् गात्रावलोकनमस्तकाघ्राणपाणितलकरणकगात्रमार्जनादिनाऽनुवृत्तिमकुर्वंस्तर्ह्यासां मातॄणां तस्मिन्प्रद्युम्ने न चित्रम् । कीदृशे–रमास्पदं सर्वशोभानिकेतनं यद्बिम्बं श्रीकृष्णगात्रं तस्य बिम्बे प्रतिबिम्बरूपे, तथाभूतस्यान्यस्य त्रिभुवनेप्यभावादेव तस्य कृष्णपुत्रत्वनिश्चयात्तथाभूतस्यानुभवाच्चेति भावः । किञ्च–तन्मातॄणामेव तस्मिंस्तादृशो भावो न त्वन्यासामित्याह–कामे स्मरे स्मरत्यस्मादिति स्मरस्तस्मिन् । कांतस्मरणहेतोर्यस्य परोक्षत्वेऽपि कामोद्भावकत्वं तस्मिन्नक्षिविषये तु सति, उत तथार्थेऽन्यनार्यस्तथा किं भवितुं शक्नुवन्ति अपि नैव,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः ॥ स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान् ॥ १ ॥ राजोवाच ॥ सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्बिषम् ॥ स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः ॥ २ ॥ श्रीशुक उवाच ॥ आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा ॥ प्रीतस्तस्मै मणिं प्रादात्सूर्यस्तुष्टः स्यमंतकम् ॥ ३ ॥ स तं बिभ्रन्मणिं कंठे भ्राजमानो यथा रविः ॥ प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ॥ ४ ॥ तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः ॥ दीव्यतेऽक्षैर्भगवते शंशसुः सूर्यशंकिताः ॥ ५ ॥

षट्पंचाशत्तमे मिथ्याऽभियोगे मणिमाहरत् ॥ कन्यां जांबवतः प्राप कृष्णः सत्राजितस्ततः ॥ १ ॥ पुत्रादिकामसौख्यस्य निष्ठामुक्त्वाऽतिचंचलाम् ॥ अर्थस्यानर्थतामाह स्यमंतहरणादिना ॥ २ ॥ सत्यभामाजांबवत्योर्विवाहप्रस्तावाय स्यमंतकाख्यानमाह । सत्राजित इति । सत्राजित इत्यकारांतः क्वचिच्च तकारांतोऽप्यन्वयानुसारेण द्रष्टव्यः । कृतापराधस्तच्छांतये स्वयमेवोद्यमं कृत्वा मणिना सह प्रादादिति ॥ १ ॥ २ ॥ भक्तस्य सत्राजितः । सूर्यः स्वाम्यपि सखेवासीदित्यर्थः । स च तुष्टस्तस्मै स्यमंतकं नाम मणिं प्रादात् । प्रीतः स्निग्धः ॥ ३ ॥ नोपलक्षितः सत्राजितोऽसावित्यविज्ञातः ॥ ४ ॥ दीव्यते क्रीडते ।

यतः क्षोभमेव प्राप्नुवन्तीत्यर्थः ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ मिथ्याभियोगे मिथ्याभिशापे (१) । निष्ठां सुस्थितिम् । स्यमन्तो मणिविशेषः (२) । ‘ प्रस्तावः स्तवने प्रोक्तः प्रकृते वस्तुनि ’ इति निरुक्तिः । सत्रेण हिरण्यादिदानलक्षणतपसा सूर्ये स्थितं मणिमाजितवानतः सत्राजिदिति नाम । अकारान्तपक्षे तु सत्रे सदादाने न केनापि जित इत्यर्थः । “ यज्ञभेदे सदादाने सत्रमाच्छादने वने ” इति यादवः । तच्छान्तयेऽपराधनिवृत्त्यर्थं स्वयमुद्यमं कृत्वा याचनादिपरप्रेरणामन्तरेण ॥ * ॥ कृष्णाय सर्वचित्ताकर्षकाय इति तस्याः पूर्वरागोऽसूचि ॥ १ ॥ तस्य सत्राजितः । कुतः, प्राप्त इति शेषः ॥ * ॥ हरेरिति चतुर्थीविषये षष्ठी, नातीच्छया दानात् ॥ २ ॥ इत्यर्थ इति–परमभक्त्या वशीकृतः सूर्यस्तेन सख्यं कृतवानित्याशयः । स च सूर्यः । तस्मै सत्राजिते ॥ * ॥ सखा उपासनासातत्येन सदा हितकारी । तत्रापि प्रीतः उपासनाविशेषेण तदा प्रीतिविशेषवान्सन् । प्रदानप्रकारस्तु श्रीहरिवंशे–“तस्योपतिष्ठतः सूर्यं विवस्वानग्रतः स्थितः । अस्पष्टमूर्तिर्भगवांस्तेजोमण्डलवान्प्रभुः ॥ अथ राजा विवस्वन्तमुवाच स्थितमग्रतः । यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषां पते ॥ तेजोमण्डलिनं देवं तथैव पुरतः स्थितम् । को विशेषो मे त्वत्तः सख्येनोपगतस्य वै ॥ एतच्छ्रुत्वा स भगवान्मणिरत्नं स्यमन्तकम् । स्वकण्ठादवमुच्यैनमेकांते न्यस्तवान्विभुः ॥ ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा । प्रीतिमानथ तं दृष्ट्वा मुहूर्तं कृतवान्कथाम् ॥ तमाह प्रश्रितो भूयो विवस्वंतं स सत्रजित् । लोकानुद्भासयस्येतान्येन त्वं सततं प्रभो ॥ तदेतन्मणिरत्नं मे भगवान्दातुमर्हसि । ततः स्यमन्तकमणिं दत्तवांस्तस्य भास्करः ॥ ” इति । ‘लोकानुद्भासयस्येतान्येन ’ इति सत्राजितोऽज्ञानमयोक्तिरेव, तस्य स्वासाधारणतेजसैव प्रकाशकत्वं न तु मणितेजसेति, अन्यथा तद्दानोत्तरं जगदांध्यप्रसंगः स्यादिति भावः । किञ्च–मणिदानमपि–“ हरिः सुदर्शनं चक्रं समुत्पाद्य स्वचक्रतः ” इति मार्कंडेयोक्तन्यायेनैव, न हि स्वासाधारणं देहालंकरणं मनुष्येण धर्तुं शक्यत इति ज्ञेयम् ॥ ३ ॥ स सत्राजित् । तं मणिम् ॥ * ॥ ० ॥ ४ ॥ तं मणिग्रीवं सत्राजितम् । मुष्टदृष्टयो हतदृष्टयः ॥ * ॥ अक्षक्रीडा हि नरविडम्बनमेव लोकचमत्कारायेति ध्येयम् ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारायण नमस्तेऽस्तु शंखचक्रगदाधर ॥ दामोदरारविंदाक्ष गोविंद यदुनंदन ॥ ६ ॥ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेण नृणां चक्षूंषि तिग्मगुः ॥ ७ ॥ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः ॥ ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ॥ ८ ॥ श्रीशुक उवाच ॥ निशम्य बालवचनं प्रहस्यांबुजलोचनः ॥ प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ॥ ९ ॥ सत्राजित्स्वगृहं श्रीमत्कृतकौतुकमंगलम् ॥ प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् ॥ १० ॥ दिनेदिने स्वर्णभारानष्टौ स सृजति प्रभो ॥ दुर्भिक्षमार्यरिष्टानि सर्पाधिव्याधयोऽशुभाः ॥ न संति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः ॥ ११ ॥

सूर्योऽयमिति शंकिताः संतः कथयामासुरिति ॥ ५ ॥ सूर्यं नमस्कारार्थमागतं कल्पयित्वोद्रिक्तभक्तीनां संबोधनानि नारायणेत्यादीनि ॥ ६ ॥ गभस्तिचक्रेण रश्मिजालेन मुष्णन्प्रतिघ्नन् । तिग्मास्तीक्ष्णा गावो रश्मयो यस्य सः ॥ ७ ॥ न चेदमघटमानमित्याहुः । नन्विति । अन्विच्छंति मृगयंते । अजः सूर्यः ॥ ८ ॥ बालानामज्ञानवचनम् । ज्वलन् विद्योतमानः ॥ ९ ॥ कृतानि कौतुकेनोत्सवेन मंगलानि यस्मिंस्तत् । विप्रैः कृत्वा ॥ १० ॥ भारप्रमाणं च । "चतुर्भिर्व्रीहिभिर्गुंजं गुंजान्पंच पणं

देवा अप्येतद्दर्शनार्थं भूमावायांत्यतोऽयमेव सर्वेश्वर इति हेतोरत्यन्तसंजातभक्तीनां द्वारकावासिनामित्यर्थः । नारायण सर्वादिकारण । दामोदरेति भक्ताभीष्टदानार्थमकार्यमपि करोतीत्याशयवती संबुद्धिः ॥ * ॥ सामान्यतस्तावत्स्वरूपैश्वर्यलीलाभिः स्तुवन्ति पदद्वयेन । नारायण हे सर्वजीवाश्रयत्वात्सर्वपरमस्वरूपैश्वर्य, तादृशत्वादेव लीलयापि दुष्टशिक्षयैव शंखादिधर । अथ विशेषतो गोकुलप्रकाशितप्रेमवश्यत्वलीलाभिः स्तुवन्ति–पदत्रयेण । दामोदर स्वजनवश्यतयोदरेंगीकृतदामबन्धन । हे अरविन्दाक्ष परमसुन्दरेत्यर्थः । हे गोविंद गोचारणोपलक्षिततत्तन्महालीलाप्रकाशक । एवं तत्रतत्र प्रायो निगूढ एव त्वं संप्रति तु कृपाभरस्तव किं वर्ण्य इत्याशयेनाहुः–हे यदुनंदनेति । यदूनानन्दयन्सभामध्ये साक्षाद्भासीति भावः ॥ ६ ॥ 'दृग्दृष्टिदीधिती' इत्यादिना गोपदं रश्मिवाचकमप्युक्तम् ॥ * ॥ अतो हे जगत्पते त्वां दिदृक्षुरायाति । अल्पदर्शनेऽस्य दूरतोपि स्वतः सिद्धत्वेन नातिसुखदत्वेन चास्पृहणीयत्वात् । त्वद्दर्शनस्य तु त्वदुपासनयैव साध्यत्वेन सर्वोर्ध्वसुखदत्वेन च परमस्पृहणीयत्वादिति भावः । ननु नैष सूर्य इत्याशंक्य तल्लक्षणमाहुः–मुष्णन्निति, यतास्तिग्मगुः ॥ ७ ॥ एतन्न संगच्छत इति चेदत्राहुः–न चेति । 'अजाय लोकत्रयभावनाय' इति भविष्योत्तरोक्तेरजशब्दः सूर्येऽपि प्रयुज्यते ॥ * ॥ त्रिलोक्यां ये विबुधर्षभा ब्रह्मादयस्ते सर्वे मार्गं प्राप्त्युपायमेवान्विच्छन्ति, प्राप्तिस्तु दूरे । ननु निश्चये । एवं गूढमपि त्वामद्याधुना यदुषु साक्षाद्वर्तमानं ज्ञात्वा कुतोऽपि भाग्यान्निश्चित्य । ननु ब्रह्मादयश्चेदन्विच्छंति सूर्यः कस्तत्राहुः–अजः द्वादशात्मत्वेन विश्वैकात्मा, तदधिष्ठानत्वेन तदभेदेनोपास्यो वा, अयमनादित्वान्न जायत इत्यजो वेदो वा, त्रयीमय इत्यर्थः । अतोऽसौ तु विशेषत इति भावः । प्रभोऽस्मदीश्वर । अहो भाग्यं त्वदीयानामस्माकमिति भावः ॥ ८ ॥ 'बालोऽज्ञे दुर्बले शिशौ' इति कोशात् ॥ * ॥ प्रहस्य स्मित्वा । प्रेति प्रारंभे । तत एवेषद्दृष्टिप्रसारणाभिप्रायेणोक्तम्–अम्बुजलोचन इति । अतः प्रकर्षेण स्मितावलोकनादिनाह–देव इति । देवोपि कश्चिन्न भवति किन्तु मनुष्य एव, तत्रापि सत्राजिदिति । अत्र श्रीमत्कौस्तुभे विद्यमानेऽपि श्रीभगवत्तत्तदिच्छानुसारेण प्रकाशादिति ज्ञेयम् । बालानामिति असूर्ये सूर्यबुद्धेः, श्रीकृष्णे चैतावन्तं कालमीश्वरत्वानवगमात्, सूर्यागमनमात्रसंभावनया कोलाहलाच्च ॥ ९ ॥ गृहांतर्गते देवागारे न्यवेशयत्प्रतिष्ठापयामास ॥ * ॥ श्रीमत् श्रीद्वारकांतर्वर्तित्वेन स्वत एव संपद्युक्तम् । देवसदने निजेष्टदेवसूर्यार्चास्थाने । विप्रैः प्रयोज्यकर्तृभिः । न्यवेशयदुत्तमपीठे पूजार्थं स्थापयामास ॥ १० ॥ स मणिः । अकालमृत्युः–योगवासिष्ठोत्पत्तिप्रकरणे कोनसततितमाध्याये उक्तः । तथाहि–" विषूचिकाभिधाना सा नाम्नाप्यन्यायबाधिका" इति । अस्या मन्त्रो हि–" ॐ ह्रीं ह्रां रीं रां विष्णुशक्तये नमः, ॐ नमो भगवति विष्णुशक्ति एनाम् ॐ हरहर नयनय पचपच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स याचितो मणिं क्वापि यदुराजाय शौरिणा ॥ नैवार्थकामुकः प्रादाद्याच्ञाभंगमतर्कयन् ॥ १२ ॥ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभम् ॥ प्रसेनो हयमारुह्य मृगयां व्यचरद्वने ॥ १३ ॥ प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी ॥ गिरिं विशञ्जांबवता निहतो मणिमिच्छता ॥ १४ ॥

पणान् । अष्टौ धरणमष्टौ च कर्षं तांश्चतुरः पलम् ॥ तुलां पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः" इति । मारीनामाकालमृत्युः। अरिष्टमभद्रम् । आधिर्मानसी व्यथा अशुभा दुःखहेतवः ॥ ११ ॥ क्वापि कदाचित् । अनेन भगवत्यसमर्प्य स्वयमग्रभोजिनः सर्वानिष्टनिर्वतकमप्यनिष्टहेतुरेव भवतीति सूचितम् ॥ १२ ॥ तदेव दर्शयितुमाह । तमेकदेति । प्रतिमुच्य बद्ध्वा । प्रसेनः सत्राजिद्भ्राता ॥ १३ ॥ आच्छिद्य आकृष्य गृहीत्वा ॥ १४ ॥

मथमथ उत्सादय दूरे कुरु स्वाहा हिमवन्तं गच्छ जीव सःसःसः चन्द्रमण्डलं गतोसि स्वाहा" इति मन्त्री मंत्रं न्यस्य वामकरोदरे "मार्जयेदातुराकारं तेन हस्तेन संयतः । हिमशैलाभिमुख्येन विद्रुतां तां विचिन्तयेत् ॥ कर्कटीकर्कशाक्रन्दां मन्त्रमुद्गरमर्दिताम् । आतुरं चिन्तयेच्चन्द्रे रसायनहृदि स्थितम् ॥ अजरामरणं युक्तं मुक्तं सर्वाधिविभ्रमैः । साधको हि शुचिर्भूत्वा स्वाचांतः सुसमाहितः ॥ क्रमेणानेन सकलां प्रोच्छिनत्ति विषूचिकाम् ।" इति । कालं विना मृत्योरसंभवादेतन्न संभवतीत्यत आह—सत्यपि वर्तितैले वायुना दीपनिर्वापणवदकालमृत्युरस्ति, दीपावशिष्टवर्तितैलयो रागामिदिनोपयोगवदकालमृत्युमृतस्यायुरवशिष्टमागामिजन्मांतरे पुनस्तेनैव भुज्यतेऽन्यथा "अकालमृत्युहरणं सर्वव्याधिविनाशनम्" इत्यादिविष्णुचरणामृतपानमंत्रादेरनाप्तोक्तिता स्यादिति । तत्र स्थाने ॥ * ॥ दिन इत्यर्धकम् । हे प्रभो भगवद्भक्तिसम्पदां भवादृशां तु न तदादिसंपदादरो यदृच्छया तदुपपत्तौ पूर्ववद्भगवत्येव समर्प्यत इति भावः । मारी नाम नगरग्रामादिषु प्रचुरलोकानां दिनंदिनं मृत्युकारो ग्रहविशेषः । मायिनः कपटिनः । अभितोऽर्चितः सन्नन्यथा तु नैव,अन्यथानिष्टं करोतीत्यर्थः । तच्चाग्रे व्यक्तं भावि ॥ ॥ ११ ॥ स सत्राजित् । मणिं प्रति । यदुराजायोग्रसेनाय दातुम् । शौरिणा कृष्णेन । अतर्कयत् प्राकाशयत् । 'तर्क–प्रकाशपृच्छाकारणभाषासु' चौरादिकः ॥ * ॥ यदुराजायोग्रसेनार्थं राजैकयोग्यत्वात्, न त्वात्मार्थं तत्र निरपेक्षत्वात् । कुत्रापि याचित एव न तु भेदादिना जिघृक्षितः । शौरिणेति शूरयशोविस्तारकस्य तस्य तद्योग्यमेवेति भावः । अर्थे धन एव न तु धर्मादौ कामुकः । अत एव श्रीभगवद्याच्ञाभंगेन दोषमविचारयन् । अयम्भावः–उत्तमद्रव्यत्वेन प्राक् स्वयमेवोद्यम्य दातुं योग्यं, तत्रापि तेन साक्षाद्याचितमपि नादात्, अतो महाऽनर्थः फलिष्यति, तच्चापश्यन् । एवशब्देन वारंवारमपि याचनायामदानं द्योत्यते । प्रशब्देन यदा याच्यते तदा तेनाप्युपयुज्यतामिति किञ्चित्स्वकारमिषेण वंचना च ज्ञाप्यते ॥ १२ ॥ तदेवाऽनिष्टहेतुत्वम् । प्रतिमुच्य प्रतिपूर्वो मुचिर्बंधने ॥ * ॥ स च श्रीभगवद्वंचनार्थमेव प्रसेनाय ददाविति । तदुक्तं वैष्णवे–सत्राजितोऽप्यच्युतो मां याचिष्यतीत्यवगम्य रत्नलोभात्स्वभ्रात्रे प्रसेनाय तद्रत्नमदादिति । अत एव प्रसेनः सर्वतोऽप्रतीत्या स्वरक्षणार्थं च तं स्वर्णसंपुटाद्याच्छन्नं कंठ एव प्रतिमुच्य तत्प्रभावज्ञ एकाक्यपि वनादौ गच्छतीति भावः ॥ १३ ॥ जांबवता ऋक्षराजेन ॥ * ॥ हत्वेति हिंस्रस्वभा

१ तान्तपाठाभिप्रायेण । २ अयमर्थनिर्देशः सि० कौमुद्यां केवलभाषार्थोपलब्धावप्यन्यत्रोपलब्धेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽपि चक्रे कुमारस्य मणिं क्रीडनकं बिले ॥ अपश्यन्भ्रातरं भ्राता सत्राजित्पर्यतप्यत ॥ १५ ॥ प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः ॥ भ्राता ममेति तच्छ्रुत्वा कर्णेकर्णेऽजपञ्जनाः ॥ १६ ॥ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि ॥ मार्ष्टुं प्रसेनपदवीमन्वपद्यत नागरैः ॥ १७ ॥ हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने ॥ तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः ॥ १८ ॥ ऋक्षराजबिलं भीममंधेन तमसा वृतम् ॥ एको विवेश भगवानवस्थाप्य बहिः प्रजाः ॥ १९ ॥ तत्र दृष्ट्वा मणिश्रेष्ठं बालक्रीडनकं कृतम् ॥ हर्तुं कृतमतिस्तस्मिन्नवतस्थेऽर्भकांतिके ॥ २० ॥ तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् ॥ तच्छ्रुत्वाऽभ्यद्रवत्क्रुद्धो जांबवान्बलिनां वरः ॥ २१ ॥ स वै भगवता तेन युयुधे स्वामिनात्मनः ॥ पुरुषं प्राकृतं मत्वा कुपितो नानुभाववित् ॥ २२ ॥ द्वंद्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः ॥ आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव ॥ २३ ॥

॥ १५ ॥ अजपन्नुपांशु अवोचन् ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ क्रव्यार्थे आमिषार्थम् ॥ २३ ॥

त्वात् । महामणिमाच्छिद्येति महाधनस्वभावत्वात्, मूषिकादौ दृश्यते ॥ १४ ॥ सोऽपि जांबवानपि क्रीडनकं क्रीडासाधनम् ॥ * ॥ सोपीत्यर्द्धकम् । कुमारस्य बिले गुहांतर्वर्तमानस्य सुकुमाराख्यस्य स्वपुत्रस्य क्रीडनकं बालक्रीडासाधनं चक्रे । अपश्यन्निति सार्धकम् । प्रायो वितर्के । तेन प्रभुत्वेपि या प्रार्थना कृता तस्या भंगादेव पर्यतप्यतेति भावः ॥ १५ ॥ तत् सत्राजिद्वचनम् । उपांशु नीचैः यथा कथनसमयेऽन्यो न शृणुयादित्यर्थः ॥ * ॥ जनास्तदनुवर्तिन एव नागरिका न तु सर्वे, प्रथमस्कंधे तेषां परमभक्तिवर्णनात् 'नताः स्म ते नाथ पदारविंदम्' इत्यादिभिः ॥ १६ ॥ लिप्तं लग्नम् । मार्ष्टुं शोधयितुं, द्रष्टुमिति यावत् ॥ * ॥ भगवान् सर्वसद्यशोयुक्तः । लोकपरम्परया उद्धवमुखेन श्रुत्वा । नागरैस्तैरेवानुव्रजत् ॥ १७ ॥ ० ॥ * ॥ तं केसरिणम् । अद्रेर्ऋक्षवतः । पृष्ठ उपरि । जनास्त एव ददृशुरित्यपवादतो विशुद्धिस्ततोऽभूदिति भावः ॥ १८ ॥ बिलं वासस्थानं गुहाम् "बिलं छिद्रे गुहायां च पुमानुच्चैःश्रवोहये" इति मेदिनी ॥ * ॥ तथापि सत्राजितद्वेषणाद्यर्थरत्नमादातुमृक्षपदान्यनुगच्छंस्तं बिलं प्राप्त इति प्राह–ऋक्षेति । अंधेनांधीकारकेण तत ऋक्षसंबंधित्वाच्च भयानकमत एव बहिर्बिलद्वारे प्रजा नागरजनानवस्थाप्य, यतो भगवान् परमदयादिगुणसागर इत्यर्थः ॥ १९ ॥ तत्र बिले । बालस्य क्रीडनकं कृतम् । तदुक्तं हरिवंशे–" सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः ॥ " इत्येवं वदंती धात्री बालं क्रीडयतीति । अयमेव श्लोको धर्मशास्त्रतिथिनिर्णये भाद्रसितचतुर्थीचंद्रदर्शनदोषशांतये एकविंशत्यावृत्त्या पठनीयत्वेनोक्तः । तस्मिन्बिले । अर्भकांतिके बालसमीपे ॥ * ॥ तत्र बिले । हर्तुं छलेन ग्रहीतुम् । अवतस्थेऽवसरप्रतीक्षां चक्रे ॥ २० ॥ तं श्रीकृष्णम् । अपूर्वमदृष्टपूर्वम् । यद्वा–ओऽकारः पूर्वो यस्य नाम्नस्तमच्युतमनंतं वेत्यर्थः । धात्र्युपमाता माता वा "धात्री जनन्यामलकी वसुमत्युपमातृषु" इति मेदिनी । तद् धात्र्याक्रोशवचः । बलिनां वरो रामरावणयुद्धेऽपि युद्धे तृप्तत्वात् ॥ * ॥ नरं तत्राप्यपूर्वं वीर्यशोभादिभिरद्भुतम् । वतिप्रयोग आगंतुकतया शंकास्पदत्वेऽपि सौम्यदर्शनत्वेनातिभयानुत्थानात् । अभ्यद्रवद्वेगेनागतः । वस्तुतस्तु न भीता तद्दर्शनस्वाभावेनैवानंदोदयादिति **विश्वनाथः** ॥ २१ ॥ स जांबवान् । तेन श्रीकृष्णेन । स्वामिनेति पूर्वावताराभिप्रायेण ॥ * ॥ प्राकृतं मत्वा कुपित इति । केशिचाणूरकंसजरासंधादिभिरल्पबलैर्भगवतो युद्धसुखं क्वापि नाभूदतः समबलेन स्वभृत्येन तेन सह युयुत्सोर्भगवतो युद्धसुखसिद्ध्यर्थमेव तद्भक्ताय जांबवते पूर्वं रावणसेनाभिरपि सम्यग्वीररससुखमप्राप्तवते तत्सुखपूर्तिदानार्थं लीलाशक्त्या योगमायाद्वारा भक्तमपि जांबवन्तं प्रति तन्माधुर्यावरणं ज्ञेयम् ॥ २२ ॥ 'क्रव्यं मांसपिशाचयोः' इति कोशात् ॥ * ॥ द्वंद्वेति युग्मकम् । तद्द्वंद्वयुद्धमष्टाविंशाहमासीदित्यन्वयः । सुतुमुलमत्यंतसंकुलं, हननविरामरहितमित्यर्थः । यतो विशेषतो जिगीषतोः । अत्र भगवतो लीलाकौतुकाज्जिगीषा, जांबवतश्च महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः ॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशम् ॥ २४ ॥ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः ॥ क्षीणसत्त्वः
स्विन्नगात्रस्तमाहातीव विस्मितः ॥ २५ ॥ जाने त्वां सर्वभूतानां प्राण ओजः सहो बलम् ॥ विष्णुं पुराणपुरुषं प्रभविष्णुमधीश्वरम् ॥ २६ ॥
त्वं हि विश्वसृजां स्रष्टा सृज्यानामपि यच्च सत् ॥ कालः कलयतामीशः पर आत्मा तथात्मनाम् ॥ २७ ॥

अष्टाविंशाहम् अष्ट च विंशतिश्चाहानि दिनानि यस्मिंस्तदष्टाविंशाहम् । विंशतिशब्दे तिलोप आर्षः । वज्रस्य निष्पेषो निर्घातस्तद्वत्परुषैर्निष्ठुरैः ॥ २४ ॥ श्रीकृष्णस्य
मुष्टीनां विनिष्पातैराघातैर्निष्पिष्टानि श्लथान्यंगानामुरूणि बंधनानि संधिस्थानानि यस्य सः ॥ २५ ॥ लोके को वाऽयं मत्तो बलीयानिति विस्मितः सन्विमृश्याह ।
जान इति । सर्वभूतानां यः प्राणस्तत्र यदोजः सहो बलं च इंद्रियहृदयदेहबलानि तत्सर्वं त्वमित्यहं जाने । कथं तथात्वमत आह । विष्णुमित्यादि ॥ २६ ॥
पुराणत्वे हेतुः । त्वं हीति । स्रष्टा निमित्तम् । यच्च सदुपादानम् । अतः पुराणम् । प्रभविष्णुत्वे हेतुः काल इति । अधीश्वरस्त्वमप्यत एवेत्याह ईशः पर इति ।
न च तटस्थ इत्याह आत्मनामात्मेति ॥ २७ ॥

बलिष्ठत्वाभिमानादिति ज्ञेयम् । दोर्भिरिति प्रत्येकभुजद्वयात् ॥ २३ ॥ तत् द्वंद्वयुद्धम् । अविश्रमं निरंतरम् ॥ * ॥ इतरेतरमुष्टिभिश्चेति च शब्द अध्याहार्यः । बहुदिनयुद्धेनायुधानां क्षयाज्जयाऽसिद्ध्या तेष्वनाद
राद्वा ॥ २४ ॥ तं श्रीकृष्णम् । मत्तोऽधिकबलः कोऽयमिति हेतोरतीव विस्मितः ॥ * ॥ विशब्दानिःशब्दाभ्यामूरुशब्देन च मर्मप्रहारोऽद्योति । अतीवेति रघुनाथेऽपि प्रकटतादृशशक्त्यदृष्टेः ॥२५॥ विमृश्य विचार्य ।
तत्र च प्राणे प्राणकार्यत्वात्सहादीनाम् । तथात्वं प्राणादिरूपत्वम् । विष्णुत्वमाकाशादेरपि तत्राह—पुराणेति । तथात्वं शेषस्यास्तीत्यत्र आह—प्रभविष्णुमिति । तथात्वं ब्रह्मणोऽस्तीत्यत आह—अधीश्वरमिति । "यो
ब्रह्माणं विदधाति पूर्वम्" इत्यादिश्रुतेः ॥ * ॥ प्रभविष्णुमचिन्त्यशक्तिम् । अधीश्वरं सर्वनियन्तारम् । यद्वा—महाबलिष्ठतामनुभूयादौ परमशक्तिकत्वेनैव स्तौति—जान इति । ज्ञानगोचरीकुर्वन्नस्मि । कथं तदाह—
सर्वेति । प्राणादीनां तच्छक्त्येकविभवत्वादभेदोपचार इति व्यष्ट्यन्तर्यामिपुरुषत्वं दर्शितम्, विष्णुं तत्तत्सर्वव्यापकमिति समष्टौ, पुराणपुरुषमिति प्रकृतौ च, प्रभविष्णुं ततोपि महाप्रभावमिति परमव्योमाधिपत्यम्, अधीश्वरं
सर्वोपरीशनशीलमिति स्वयं भगवत्त्वमिति ॥ **विश्वनाथस्तु**—सर्वभूतानामनंतकोटिब्रह्मांडवर्तिनां यः प्राण एकत्रैव पुंजीभूतो यदि स्यात्तद्विशेषश्च ओजः सहो बलं पृथक्पृथगिंद्रियमनोदेहसामर्थ्यं च यद्येकीकृतं
भवेत् तदपि त्वद्वित्त्वात्त्वामेवाहुः । जान इत्यत एकस्य भूतस्य मम बलेन त्वद्बलं पतंगेन गरुड इव कथं वार्यतामिति भावः । विष्णुं सर्वव्यापकम्, अहं तु व्याप्य एकः । पुराणपुरुषम्, अहमर्वाचीनपुरुषः । प्रभविष्णुम्,
अहं प्रभावहीनः । अधीश्वरम्, अहमीशितव्यः ॥ २६ ॥ तदेवाह—त्वं हीति । अतो भिन्ननिमित्तोपादानरूपत्वात् । अत एव कालरूपत्वादेव । तच्च परेशत्वादि न तटस्थः । पृथङ्नेत्याह—आत्मेति । आत्मनां चेतना
नामात्मा स्वरूपभूतः "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतेः ॥ * ॥ विश्वसृजां ब्रह्मादीनामपि स्रष्टाऽहं तु ब्रह्मसृष्टः, तैः सृष्टानां विश्वेषां यत्सत्कारणं तत्त्वमेव न तु ते विश्वस्रष्टारोऽपि ब्रह्मादयोऽपि विश्वस्य
कारणमतः पिष्टपेषणन्यायेनैव ते विश्वस्रष्टार इति भावः । अत एवोक्तं ब्रह्मणा—'सृजां सृजामि सृष्टोऽहम्' इत्यादि । कलयतां संहर्तॄणामन्तकादीनामपि कालः संहर्ता । ईशस्तत्र समर्थः । अहं त्वंतकसंहार्यस्तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः ॥ सेतुः कृतः स्वयश उज्ज्वलिता च लंका रक्षःशिरांसि भुवि पेतुरिषुक्षतानि ॥ २८ ॥ इति विज्ञातविज्ञानमृक्षराजानमच्युतः ॥ व्याजहार महाराज भगवान्देवकीसुतः ॥ २९ ॥ अभिमृश्यारविंदाक्षः पाणिना शंकरेण तम् ॥ कृपया परया भक्तं प्रेमगंभीरया गिरा ॥ ३० ॥ मणिहेतोरिह प्राप्ता वयमृक्षपते बिलम् ॥ मिथ्याऽभिशापं प्रमृजन्नात्मनो मणिनाऽमुना ॥३१॥ इत्युक्तः स्वां दुहितरं कन्यां जांबवतीं मुदा ॥ अर्हणार्थं स मणिना कृष्णायोपजहार ह ॥ ३२ ॥

यत एवंभूतोऽतो ममेष्टदैवतं रघुनाथ एव त्वमित्याह । यस्येति । ईषदुत्कलित उद्दीपितो यो रोषस्तेन ये कटाक्षमोक्षास्तैः क्षुभिता नक्रा ग्राहास्तिमिंगिला महामत्स्याश्च यस्मिन् सोऽब्धिर्वर्त्म मार्गमादिशद्दत्तवांस्तथाऽपि तस्मिन् येन त्वया स्वयश एव सेतुः कृतः । उज्ज्वलिता च दग्धा यस्येषुभिः क्षतानि छिन्नानि रक्षसो दशग्रीवस्य शिरांसि भुवि पेतुः स एव त्वमिति जाने ॥ २८ ॥ इति विज्ञातं विज्ञानं येन तम् । विज्ञानशब्दः करणसाधनः कर्मसाधनो वा । ऋक्षराजं प्रत्युक्तवान् ॥ २९ ॥ ३० वयं बहवो बिलद्वारं प्राप्तास्तत्र मिथ्याभिशापममुना मणिना प्रमृजन् प्रमार्ष्टुमहमंतर्बिलमिह प्राप्त इत्यर्थः ॥ ३१ ॥ सह मणिना समर्पयामास ॥ ३२ ॥

त्मनां जीवानां पर आत्माऽहं त्वेको जीव एव ॥ २७ ॥ एवम्भूतः पूर्वोक्तविशिष्टोऽतो हेतोः कटाक्षमोक्षा नेत्रांतपाताः । तिमिः शतयोजनो मत्स्यस्तं गिलतीति तथा । तथापि मार्गप्रदाने कृतेपि । येन रामेण । तस्मिन्नब्धौ । स्वयशः तद्धेतुभूतस्तद्रूपो वा । उद्देश्यगतत्वाल्लिंगमविवक्षितमजहल्लिंगत्वात्समासेऽपि लिंगविपर्ययाभावः । रक्षसो रावणस्यान्येषां वा ॥ * ॥ ० ॥ २८ ॥ इतीत्थम् । करणे साधनेऽर्थे साध्यत इति तथा, तत्र विज्ञायतेऽनेनेति विज्ञानं शास्त्रश्रवणादि, विज्ञायते यत्तद्विज्ञानं ज्ञेयं वस्तु ब्रह्मस्वरूपमयं च कर्मसाधनः ॥ * ॥ अच्युत इति तादृशयुद्धादौ जातेऽपि तस्मिन्वात्सल्याव्यभिचाराभिप्रायेण । यतो देवकीसुतो भगवान् केवलस्वजनरक्षार्थमेव देवक्यामवतीर्ण इति भावः । महाराजेति भवादृशां तदनुभूतमेवेति भावः ॥ २९ ॥ तमृक्षराजम् । शंकरेण सुखकरेण ॥ * ॥ अरविंदाक्ष इति–प्रसन्नस्निग्धदृष्ट्याऽवलोकयन्निति भावः । तत्र विज्ञानमित्यत्र करणपक्षे पूर्ववरप्रदानादि ज्ञेयं, कर्मपक्षे विज्ञातं विशेषादनुभूतं विज्ञानं स्ववैभवं भगवत्तत्त्वं वा येन ॥ ३० ॥ बिलं बिलद्वारम् । तत्र तेषु । इत्यर्थ इति–ममैव मिथ्याभिशापो न सर्वेषां तेनाहमत्रागतो नान्ये इत्याशयः । भगवंस्तव मिथ्याभिशापः कथमिति जांबवदाक्षेपं स्कान्दवाक्येनोत्तारयति–"मया भाद्रपदे शुक्लचतुर्थ्यां चंद्रदर्शनम् ! गोष्पदांबुनि वै राजन्कृतं दिवमपश्यता ॥ " इति । नारदोपि–" त्वया भाद्रपदे शुक्लचतुर्थ्यां चंद्रदर्शनम् । कृतं येनेह भगवन्वृथा शापमवाप्तवान् ॥ " इति । किञ्च–" येन भाद्रद्वितीयायां दृष्टश्चंद्रो हरे सिते । तस्य दोषो न भवति चतुर्थीदर्शनोद्भवः ॥ " इति । ननु स एव तद्दिने कथं चंद्रो दर्शनार्हो नेति चेदाह–भाद्रसितचतुर्थ्यां पंकस्खलितं गणेशं दृष्ट्वा चंद्रो जहास । तं च गणेशो यस्त्वामद्य द्रक्ष्यति स मिथ्याभिशप्तो भविष्यतीति शशाप । अतस्तद्दिने दर्शनानर्हतां चन्द्रोऽवापेति सति तद्दर्शने तद्दिन इष्टकाप्रक्षेपादिना कस्माच्चिद्गालीग्रहणादि कुर्यात्तेनापि तद्दोषशांतिरित्युक्तं पुराणांतर इत्यलमतिप्रसंगेन ॥ * ॥ ० ॥३१॥ इतीत्थं भगवतोक्तः । अर्हणार्थं गृहागतभगवदर्चननिमित्तम् । यत्तु पाद्मे सृष्टिखंडे जांबवत्कर्तृकप्रसेनवधादि, तथा श्रीकृष्णकर्तृकजांबवतश्चक्रेण वधादि, तत्सर्वं कल्पांतरविषयं, न त्वेतत्कल्पीयकृष्णावतारविषयम् । यद्वा–शं कल्याणं करोतीति शंकरं सुदर्शनं चक्रम् "येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन

१ अत्र त्रिंश ३० पद्यस्थपदैराशयाविष्कारो बोध्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदृष्ट्वा निर्गमं शौरेः प्रविष्टस्य बिलं जनाः ॥ प्रतीक्ष्य द्वादशाहानि दुःखिताः स्वपुरं ययुः ॥ ३३ ॥ निशम्य देवकी देवी रुक्मिण्यानकदुंदुभिः ॥ सुहृदो ज्ञातयोऽशोचन्बिलात्कृष्णमनिर्गतम् ॥ ३४ ॥ सत्राजितं शपंतस्ते दुःखिता द्वारकौकसः ॥ उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ॥३५॥ तेषां तु देव्युपस्थानात्प्रत्यादिष्टाशिषा स च ॥ प्रादुर्बभूव सिद्धार्थः सदारो हर्षयन्हरिः ॥३६॥ उपलभ्य हृषीकेशं मृतं पुनरिवागतम् ॥ सह पत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ॥ ३७ ॥ सत्राजितं समाहूय सभायां राजसन्निधौ ॥ प्राप्तिं चाख्याय भगवान्मणिं तस्मै न्यवेदयत् ॥ ३८ ॥ स चातिव्रीडितो रत्नं गृहीत्वाऽवाङ्मुखस्ततः ॥ अनुतप्यमानो भवनमगम त्स्वेन पाप्मना ॥ ३९ ॥

॥ ३३ ॥ ३४ ॥ श्रीकृष्णप्राप्तये चंद्रभागां नाम दुर्गामभजन् ॥ ३५ ॥ स च कृष्णस्तेषां प्रादुर्बभूव । आसव इति पाठे असव इंद्रियाणि तेषां प्रेष्ठ इत्यर्थः । कदा । देव्या उपस्थानात् तया तान्प्रति आदिष्टा दत्ता या आशीः कृष्णं द्रक्ष्यथेति तया सहैव ॥ ३६ ॥ लोके जनाः कथंचिन्मृतं बंधुं पुनरागतमुपलभंते तद्वदुपलभ्य सर्वे जातमहोत्सवा आसन्निति ॥ ३७ ॥ ३८ ॥ पाप्मनाऽपराधेनानुतप्यमानः ॥ ३९ ॥

जनार्दनेन । तेते गता विष्णुपुरिम् " इत्याद्युक्तेः । शंकरमस्त्यस्मिन्निति शंकरस्तेन पाणिना हस्तेनाभिमृश्य मर्दयित्वेत्यर्थः । तस्मै तुष्टेन भगवता वरं वरयेत्युक्तम् , तेन चोक्तम्—चक्रेण मे मृत्युं कारयेति । ततश्च रत्न ग्रहणकन्योद्वाहानंतरं तथैव कृतं भगवतेति, अन्यथाभिस्पृश्येत्येवं ब्रूयान्न त्वभिमृश्येति ॥ * ॥ स्वामिति—नरकन्यारूपत्वेऽपि तदीयत्वबोधनार्थम् , ऋक्षत्वेऽपि देवपुत्रतया नानारूपधृत्या तत्संभवात् । जांबवतीमिति तस्य स्नेहाधिक्यतया तन्नाम्नैव ख्याताम् । माथुरहरिवंशे चेदमाख्यानमस्तीति श्रूयते—पूर्वे श्रीरामावतार एव कन्येयं जातासीत्तस्मा एव जांबवान्दातुमैच्छत् । स चोचे—एकपत्नीव्रतधरेऽस्मिन्नवतारे ममैतन्न घटत इति श्रीकृष्णावतारे घटिष्यते, किन्तु बहुदिनं तपस्यां कुरु, ततः स श्रीगोवर्द्धने चिरं तपस्तप्त्वा तमभीष्टं प्रापेति ॥ ३२ ॥ प्रतीक्ष्य बिलद्वारे स्थित्वा ॥ * ॥ शौरेरिति—वसुदेवादीनां मध्यत्र प्रविष्टे दुःखं स्यादतस्तत्र विलंबो न घटत इति भावः । जनाः सत्राजिन्नागरिकाः । कृष्णेऽत्यंतप्रेमाऽभावाद्बिलप्रवेशमकृत्वैव पुरं ययुः ॥ ३३ ॥ अशोचन् शोकसंतप्ता आसन् ॥ * ॥ ० ॥ ३४ ॥ ते जनाः । शपंतो निन्दन्तः । चंद्रेण भज्यते सेव्यत इति तथा ताम् । " नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयम् । व्याधिमृत्युभयं दुर्गा पूजिता शमयिष्यति ॥ " इति हरिवंशोक्तेः, 'दुर्गे स्मृता हरसि भीतिमशेषजंतोः ' इति मार्कण्डेयाच्च ॥ * ॥ उपतस्थुरिति भगवद्व्रलीलावेशादेव । उपलब्धये शीघ्रं प्राप्तये ॥ ३५ ॥ तेषां देवीमुपातिष्ठतां मध्ये । ' आशिषाऽऽसवः' इति पाठे । इत्यर्थ इति—यथा प्रियेण धनेनापींद्रियाणि रक्षंति तद्दानेन च न ददति 'लक्षं ते दास्यामि निजमेकनेत्रं देहि' इति श्रुत्वापि धनमगृहीत्वा तन्न ददति प्रेष्ठत्वात् , तद्द्वारकावासिनां श्रीकृष्णोऽपीति भावः । कदा प्रादुर्बभूवेति चेदाह—देव्या इति । तया देव्या । तान् सेवमानान् । तयाऽऽशिषा । सहैव तत्क्षणमेव । सिद्धार्थः मणिसहितः ॥ * ॥ देव्या प्रत्यक्षीभूय प्रत्यादिष्टा दत्ता या आशीः 'कृष्ण आगतप्रायः' इति । तया आशिषा सहैव । असव इति हरेर्विशेषणम् । असवः प्राणतुल्यः 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । सिद्धोऽर्थो मण्यानयनजांबवदनुग्रहश्रीजांबवतीपरिग्रहसत्राजितद्वेषणादिरूपो लीलाप्रयोजनं यस्य स तथा ॥ ३६ ॥ अत्र मृतमिवेति लुप्तोपमा बोध्या । यद्वा—मृतेर्मृतिस्थानादागतं मृतं तद्धिताणो वैकल्पिकणित्वाद्वृद्ध्यभाव इतो लोपे च रूपम् ॥ * ॥ हृषीकाणामीशं तमंतरेणाचेतनत्वप्रायाभिप्रायेण । मणिग्रीवमिति स्वभक्तेन जांबवता स्वकन्यादानसमये ग्रीवायां मणिधारणात् ॥ ३७ ॥ प्राप्तिं महायुद्धद्वारा । तस्मै सत्राजिते ॥ * ॥ पूर्वमुप्रसेनार्थं प्रार्थितेऽपि तस्मिंस्तस्य लिप्साराहित्यबोधनाय न्यवेदयदर्पयामास । यतो भगवान् सर्वैश्वर्यपूर्णतया तदादिषु नैरपेक्ष्यादिति भावः ॥ ३८ ॥ स च सत्राजि

१ सारस्वतव्याकरणानुसारि व्याख्यानमिदमिति बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः ॥ कथं मृजाम्यात्मरजः प्रसीदेद्वाऽच्युतः कथम् ॥ ४० ॥ किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा ॥ अदीर्घदर्शनं क्षुद्रं मूढं द्रविणलोलुपम् ॥ ४१ ॥ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च ॥ उपायोऽयं समीचीनस्तस्य शांतिर्न चान्यथा ॥ ४२ ॥ एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभाम् ॥ मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ॥ ४३ ॥ तां सत्यभामां भगवानुपयेमे यथाविधि ॥ बहुभिर्याचितां शीलरूपौदार्यगुणान्विताम् ॥ ४४ ॥ भगवानाह न मणिं प्रतीच्छामो वयं नृप ॥ तवास्तां देवभक्तस्य वयं च फलभागिनः ॥ ४५ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंध उत्तरार्धे षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥

अघं दोषम् । आत्मनो रजो मलमपराधमिति ॥ ४० ॥ किं कृत्वा कस्मिन्कृते इत्यर्थः । साधु भद्रम् । अदीर्घदर्शनमविचारकं माम् । क्षुद्रं कृपणं मूढं मंदमतिम् ॥ ४१ ॥ एवं ध्यायन्नुपायं निश्चिनोति । दास्य इति । स्त्रीरत्नं दुहितरं तावद्दास्यामि तदनंतरं पारिबर्हत्वेन रत्नमपीति ॥ ४२ ॥ ४३ ॥ बहुभिः कृतवर्मादिभिः ॥ ४४ ॥ मणिं न प्रतीच्छामो न स्वीकुर्मः । देवः सूर्यस्तद्भक्तस्येति कटाक्षः । फलभागिन इति । तवापुत्रत्वात्त्वदीयं धनमस्माकमेवेति गूढोऽभिप्रायः ॥ ४५ ॥ इति श्रीमद्भागवते दशमस्कंध उत्तरार्धे श्री० टीकायां षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥

त् । अत्राङ्मुखोऽधोमुखः । ततः कृष्णात् । रत्नं मणिम् । अपराधेन मिथ्याभिशापकथनरूपेण । अनुतप्यमानः पश्चात्तापं कुर्वन् ॥ * ॥ ० ॥ ३९ ॥ स सत्राजित् । तदेव मिथ्योक्तिलक्षणम् ॥ * ॥ बलवता श्रीभगवता तदीयैर्बलवद्भिर्वा विग्रहो मिथ्यापवादोत्थापनेन विरोधस्तेना कुलश्चिन्तार्तोऽभूत् ॥ ४० ॥ इत्यर्थ इति—उभयोरव्ययत्वाद्यथेच्छमर्थ इति भावः । मह्यं मम । अविचारकं भविष्यज्ञानहीनम् ॥ * ॥ अनुध्यानमाह—सार्धद्वयेन ॥ ४१ ॥ एवमुक्तरीत्या । तावदादौ । तस्य अपराधस्य, कृष्णस्य वा ॥ * ॥ ननु त्वद्दुहित्रा कथं तस्य प्रसादस्स्याद्येन शांतिर्भवेदित्यत आह—स्त्रीरत्नमिति । रत्नञ्च स्यमंतकम् । तस्याच्युतस्य । शांतिश्च दुःखोपशमः । किं वा—मदपराधस्य शांतिरुपशमः, अन्यथा मरणादिनापि प्रकारेण नैव शांतिः ॥ ४२ ॥ एवम् इति । स्वसुतां सत्यभामाम् ॥ * ॥ एतावल्लीलापरिपाटीफलं मुख्यमेतदेवेत्याह— । एवं कथमित्यादिप्रकारेण । वसितः कृतनिश्चयः । शुभां सर्वोत्तमाम् । श्रीवसुदेवादिषु प्रार्थनयोद्यमं कृत्वा उपजहार ददौ ॥ ४३ ॥ उपयेमे विवाहितवान् ॥ * ॥ सत्यभामाख्यां यथाविध्युपयेम इति जांबवतीमपि गृहमानीयोपयेमे, किन्तु तद्वत्पितृकुलाभावान्न तदीयोचितक्रियेति भावः । तस्या वैशिष्ट्यमाह—बहुभिरिति । तत्र हेतुः—शीलं सुस्वभावः, शीलरूपयोरौदार्यं महत्त्वं, तेन तदनुगतैरन्यैर्विनयादिगुणैश्चान्विताम् । बहुभिरिति वक्ष्यमाणस्य कृतवर्मादिभिर्वैरस्य कारणं ध्वनितम् ॥ ॥ ४४ ॥ कटाक्ष इति—न हि देवभक्ता असत्यवादिनोऽतिलुब्धाश्च सन्तीति भावः । हरिवंशे तु तस्य पुत्रा ये उक्तास्तदन्तसूचनायोक्तम्—वयं च फलभागिन इति, कल्पांतरापेक्षा हरिवंशोक्तिः ॥ * ॥ वयमिति—बलदवाद्यपेक्षयास्माकं कोऽपि न गृह्णीयादित्यर्थः । हे नृपेति—तेनैव निजजनान्पालयेति कटाक्षः । फलभागिन इति भवतो मणिना यत्फलं दृष्टमदृष्टं वा श्रेयो भवेत्तत्परमांतरंगत्वादस्मास्वपि पर्यवस्येदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ विज्ञातार्थोऽपि गोविंदो दग्धानाकर्ण्य पांडवान् ॥ कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् ॥ १ ॥ भीष्मं कृपं सविदुरं गांधारीं द्रोणमेव च ॥ तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः ॥ २ ॥ लब्ध्वैतदंतरं राजञ्छतधन्वानमूचतुः ॥ अक्रूर कृतवर्माणौ मणिः कस्मान्न गृह्यते ॥३॥ योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः ॥ कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात् ॥४॥ एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः॥ शयानमवधील्लोभात्स पापः क्षीणजीवितः ॥ ५ ॥ स्त्रीणां विक्रोशमानानां क्रंदंतीनामनाथवत् ॥ हत्वा पशून्सौनिकवन्मणिमादाय जग्मिवान् ॥ ६ ॥

सप्तपंचाशत्तमे तु पुनः शतधनोर्वधे ॥ प्राप्तं स्म दुर्यशो मार्ष्टि कृष्णोऽक्रराहृतान्मणेः ॥१॥ अक्रूरमुररीकृत्य मणेः पात्रमथाच्युतः ॥ उपामंत्र्य तमेकांते सरामोऽगाद्गजाह्वयम् ॥ २ ॥ सत्राजितः श्रीकृष्णाज्ञाभंगफलं व्यक्तीकर्तुमाह । विज्ञातार्थोऽपीति।पांडवा बिलद्वारेण जतुगृहान्निर्गता इत्येवं विज्ञातोऽर्थो येन सः । कुंतीं च दग्धामाकर्ण्य । कुल्यकरणे कुलोचितसंव्यवहारार्थम् ॥ १ ॥ अन्येषां तद्दाहदुःखाभावाद्भीष्मादीन्संगम्येत्युक्तम् ॥ २ ॥ ३ ॥ ननु जीवन्न सत्राजित्कथं मणिं दास्यति तत्रोचतुः । योऽस्मभ्यमिति । भ्रातरं प्रसेनं मृतं कस्मान्नान्वियान्नानुगच्छेत् । म्रियतामित्यर्थः ॥ ४ ॥ ५ ॥ जग्मिवान् जगाम ॥ ६ ॥

वाक्यार्थः ॥४९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे षट्पञ्चाशत्तमोऽध्यायः ॥५६॥ अक्रूरादाहृत आनीतोक्रूराहृतस्तस्मात् (१) । उररीकृत्यांगीकृत्य।अथ मणिसमर्पणोत्तरम्।तमक्रूरम्।उपामन्त्र्य कथयित्वा—मणिस्त्वया ग्रहीतव्यः शतधन्वन इति तेन संविदं कृत्येत्यर्थः (२) । कुल्यं शवदाहोत्तरं तद्दुःखजिहासया तद्गृहगमनं, तस्य करणे तन्निमित्तमित्यर्थः । " कुल्यं स्यात्कीकसे मांसे मृतगेहगतौ तथा " इति कोशात् ॥ * ॥ अध्यायार्थे स्वामिभिरुक्तमक्रूरमुररीकृत्येति । तस्यायमर्थः—उररीकृत्य मनसांगीकृत्य । अथैकांते । सराम उपामन्त्र्य हस्तिनापुरवृत्तांतमन्त्रेण निश्चित्येति । अन्यथार्थत्वे तद्दुर्यशोमार्जनतात्पर्यस्यास्य प्रकरणस्य प्रत्युत तदाधिक्यप्रतिपादनप्रतिपत्तेः । गा इंद्रियाणि ईशत्वेन विन्दतीति गोविन्दशब्दो विज्ञापने हेतुः । कुल्यकरण इति तादृशक्रीडार्थमिति सिद्धान्तः ॥ १ ॥ अन्येषां दुर्योधनादीनाम् । तेषां पाण्डवानां दाहे दुःखाभावात् । संबंधित्वाचुल्यदुःखौ रामकृष्णौ ॥ * ॥ सविदुरं भीष्मं सव्यसनत्वादेकत्र स्थितेः । भष्मिस्य सर्वादरणीयत्वेन प्रथमोक्तिः । भीष्मादिभिः सह तुल्यं दुःखं दुःखानुकरणं ययोस्तौ, यथा विदुरस्य ॥ २ ॥ एतत् कृष्णगमनलक्षणम् । अन्तरमवकाशम् ॥ * ॥ एतदन्तरमिति—संप्रति रामकृष्णौ द्वारकायां न स्त इत्यधुनैव सत्राजितं हत्वा मणिर्ग्रहीतुं शक्यः, तत्रावाभ्यां त्वमेव शूरोऽतस्त्वयैव हन्यताम्, तस्य दुःशीलत्वात्कस्मान्माणिर्न गृह्यत इति ॥ ३ ॥ एतादृशं रत्नं जीवता दातुमशक्यमित्याशंकते—नन्विति । तत्राक्षेपे । इत्यर्थ इति—तं मारयित्वा मणिर्ग्रहीतव्य इत्यर्थः ॥ * ॥ प्रतिश्रुत्य दातुमंगीकृत्य । यतः कन्यारत्नं कलाश्रेष्ठत्वेनास्य तदभिलाषास्पदत्वादिति भावः । विशेषेण गर्हयित्वा दोषारोपेण तिरस्कृत्य । कृष्णायेति मूलनामग्रहणमवज्ञया । कन्यारत्नमिति तदप्राप्त्या महाधिश्च सूच्यते । कस्माद्भ्रातरमित्यादिशापव्याजवचनस्यायं भावः—अपुत्रस्यास्य भ्राता मृतोऽतोऽसहायस्यास्य हनने, हते चास्मिन्कस्मादपि भयं नास्त्येव । दायादाभावेन च मणिस्तदीय एव तस्माद्गृह्यतामिति । श्रीभगवद्भक्तवरस्याऽस्याऽक्रूरस्येदृशोक्तिर्नूनं श्रीगोकुलजनकोपात्, कृतवर्मणश्च भोजत्वेन तत्संगाभिदोषात् । अन्ये तु मन्यन्ते—श्रीभगवन्मिथ्यापवादोत्थापके सत्राजिति महाक्रोधेनैव भागवतवराभ्यामक्रूरकृतवर्मभ्यां शतधन्वप्रवर्तनार्थं तादृशमुक्तमिति ॥ ४ ॥ एवमित्थम् । ताभ्यामक्रूरकृतवर्मभ्याम् । स शतधन्वा ॥ * ॥ भिन्ना सन्मार्गतः पृथक्कृता मतिर्यस्य सः । यतोऽसत्तमः यदुवंशजोपि कंसवदसुरस्वभावः । पापः सत्संगान्निजस्वभावावरणेऽपि प्रबलपापवासनावशीभूतः । अतः क्षीणजीवितोऽपि । यद्वा—क्षीणजीवितत्वादेव ' प्रायः सत्पुरुषो विनाशसमये बुद्ध्या परित्यज्यते ' इत्यभियुक्तोक्तेस्तस्य तद्वधे प्रवृत्तिरिति ज्ञेयम् ॥ ५ ॥ सौनिकवन्मारकवत्, राक्षसव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यभामा च पितरं हतं वीक्ष्य शुचाऽर्पिता ॥ व्यलपत्ताततातेति हा हतास्मीति मुह्यती ॥ ७ ॥ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयम् ॥ कृष्णाय विदितार्थाय तप्ताऽऽचख्यौ पितुर्वधम् ॥ ८ ॥ तदाकर्ण्येश्वरौ राजन्ननुसृत्य नृलोकताम् ॥ अहो नः परमं कष्टमित्यस्राक्षौ विलेपतुः ॥ ९ ॥ आगत्य भगवांस्तस्मात्सभार्यः साग्रजः पुरम् ॥ शतधन्वानमारेभे हंतुं हर्तुं मणिं ततः ॥ १० ॥ सोऽपि कृष्णोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया॥ साहाय्ये कृतवर्माणमयाचत स चाब्रवीत् ॥ ११ ॥ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः ॥ को नु क्षेमाय कल्पेत तयोर्वृजिनमाचरन् ॥ १२ ॥ कंसः सहानुगोऽपीतो यद्द्वेषात्त्याजितः श्रिया ॥ जरासंधः सप्तदश संयुगान्विरथो गतः ॥ १३ ॥ प्रत्याख्यातः स चाक्रूरं पार्ष्णिग्राहमयाचत ॥ सोऽप्याह को विरुध्येत विद्वानीश्वरयोर्बलम् ॥ १४ ॥ य इदं लीलया विश्वं सृजत्यवति हंति च ॥ चेष्टां विश्वसृजो यस्य न विदुर्मोहिताऽजया ॥ १५ ॥

॥७॥८॥९॥ १० ॥ ११ ॥ हेलनं प्रातिकूलम् । वृजिनमपराधम् ॥ १२ ॥ अपीतो मृतः । सप्तदशसंख्याकान् संयुगान् संग्रामान् ॥ १३ ॥ १४ ॥ तौ रामकृष्णावे

दित्यर्थः । सूना हिंसास्थानं विद्यतेऽस्येति सौनिकः ॥ * ॥ ० ॥ ६ ॥ ० ॥ * ॥ ० ॥ ७ ॥ " द्रोणी काष्ठांबुवाहिन्यां गवादिन्यां च नीवृति । कूपोपकंठपानार्थक्लृप्तयंत्रेऽपि च स्मृता ॥" इति धरणिः । प्रास्य निक्षिप्य ॥ * ॥ तैलद्रोण्यामिति । दाहानंतरमवश्यकृत्यस्य तच्छ्राद्धादिकर्मणस्तदानीमशक्यत्वात् । किं वा—भगवता तस्य जिजीवयिषया । यद्वा—भगवतः शोकक्रोधजननाय तत्प्रदर्शनार्थम् । प्रास्य प्राक्षिप्य ॥ **विश्वनाथस्तु—**यस्या भर्ता परमेश्वरस्सा तद्द्वारा स्वतातं कथं नाजीवयिष्यदिति लोकोक्त्यैव जगाम, न तु कृष्णप्रतिकूले सत्राजिति तस्या वस्तुतः स्नेहः । कृष्णाय कृष्णमपि तापयुतीकर्तुम् । तप्तेति—यथाहं तप्ता तथा त्वमपि तापमेवाभिनयेति ज्ञापयंतीति भावः । विदितोऽर्थो मणेरवश्यंभाविशतधन्ववधादिरूपं प्रयोजनं येन तस्मै ॥ ८ ॥ तच्छ्वशुरमरणम् ॥ * ॥ ईश्वरौ लोकातीतावपि नृलोकतां बंधुवियोगे रोदनादि मनुष्यधर्ममनुसृत्य तल्लीलत्वात्, अन्यथा त्वतीवानौचित्यमेव । विलापमाह—अहो खेदे । न इति वसुदेवाद्यपेक्षया । परममिति बंधुवरस्य शयानस्य धनाद्यर्थं चौरेण वधात्, लोके लज्जाद्युद्भवाच्चेत्येतत्प्रकारेण । हे राजन्निति—तस्येदृशीं नरलीलामाधुरीं त्वया बुध्यत एव ज्ञानेन राजमानत्वादिति भावः ॥ ९ ॥ तस्माद्धस्तिनापुरतः । ततः शतधन्वनः ॥ * ॥ आरेभे—शतधन्वनः कृतवर्मादिसाहाय्यम् 'वाससो व्यचिनोन्माणिम्' इति वक्ष्यमाणाद्भगवानपि प्रियजनप्रेमवशनरलीलावेशेन गूढपुरुषादिद्वारा ज्ञात्वा साहाय्यार्थं बंधुवर्गसमाहरणोद्यमं कृतवान् । तच्च शतधन्वानं विद्राव्य तमेकाकिनं हंतुमित्यूह्यमित्यग्रे व्यक्तीभविष्यति ॥ १० ॥ सोपि शतधन्वापि । साहाय्ये सहायनिमित्तम् । स च कृतवर्मा ॥ * ॥ प्राणस्य जीवनस्यैव न तु यशोधर्मादेः, परितोऽक्षतदेहत्वादिना सर्वतोभावेनेप्सया गतप्रायस्य प्राप्तुमिच्छया । प्राक्कृतवर्मणो याचनं सेनाध्यक्षत्वात्, अक्रूरस्य परमभक्तत्वेन साहाय्ये संशयाच्च ॥ ११ ॥ तयो रामकृष्णयोः ॥ * ॥ अहमित्यन्यः करोतु नाम, अहं तु न कुर्यामिति भावः ॥ **विश्वनाथस्तु**—मया सत्राजिद्वध एव भवान्प्रवर्तितो न भगवत्प्रातिकूल्ये, त्वं तु तं यदि शरणं न यियासासि तर्हि त्वमिव किमहमपि तत्प्रातिकूल्ये बुभूषामीति ॥ १२ ॥ " पानाभावे च मरणेऽपीतः पीततरे गते " इति निरुक्तिः ॥ * ॥ तद्द्वेषाद्धेतोः श्रिया संपत्त्या हेतुकर्त्र्या त्याजितः स्वयमेव स इत्यर्थः । तस्यास्तत्र तथैव स्थितिस्तस्यैव त्वपगतिरिति ॥ १३ ॥ प्रत्याख्यातो निराकृतः । स शतधन्वा, कृतवर्मणेति शेषः । पार्ष्णिग्राहं पृष्ठदेशे रक्षितारम् । सोऽक्रूरः । " पार्ष्णिः सैन्यस्य पृष्ठे स्यात्पश्चात्पदजिगीषयोः " इति विश्वः ॥ * ॥ पार्ष्णिग्राहम् सहायम् ॥ १४ ॥ यः कृष्णः । यस्य कृष्णस्य ॥ * ॥ तत्रेश्वरो नाम एक एव स्यादिति रामस्यापि कृष्णान्तर्भावविवक्षयैकत्वेनाह—य इति त्रिभिः । इदं विचित्रानंताश्चर्यमयम् । ली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना॥दधार लीलया बाल उच्छिलींध्रमिवार्भकः॥१६॥नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे॥अनंतायादिभूताय कूटस्थायात्मने नमः॥ १७ ॥ प्रत्याख्यातः स तेनापि शतधन्वा महामणिम् ॥ तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ ॥१८॥ गरुडध्वजमारुह्य रथं रामजनार्दनौ॥ अन्वयातां महावेगैरश्वै राजन्गुरुद्रुहम् ॥ १९ ॥ मिथिलाया उपवने विसृज्य पतितं हयम् ॥ पद्भ्यामधावत्संत्रस्तः कृष्णोऽप्यन्वद्रवद्रुषा ॥ २० ॥ पदातेर्भगवांस्तस्य पदातिस्तिग्मनेमिना ॥ चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिम् ॥ २१ ॥

कमेव तत्त्वमित्यभिप्रेत्याह । य इदमिति । अजया मायया । मोहिताजयेति संधिरार्षः ॥ १५ ॥ १६ ॥ १७ ॥ अंतर्यामिकृष्णनियुक्तस्तस्मिन्नक्रूरे मणिं न्यस्य ययौ पलायत ॥ १८ ॥ गुरुः श्वशुरस्तद्धंतारम् ॥ १९ ॥ शतयोजनमात्रगामित्वात्ततः परं गंतुमशक्तस्तत्र पतितः । तं हयं विसृज्य ॥ २० ॥ व्यचिनोन्मृगया

याऽनायासेनेत्यर्थः । तच्च किमर्थमिति केपि ज्ञातुं नेशांचक्रिर इत्याह—चेष्टामिति । तत्र चेष्टामीहाम् , तत्तदभिप्रायमित्यर्थः । यस्येत्यस्याऽजयेत्यनेनाप्यन्वयः । अत एतामपि चेष्टां को जानीयादिति भावः ॥ १६ ॥ ॥० ॥ * ॥ इहापि तादृशः प्रत्ययो दृश्यतामित्याह—य इति । लीलया सप्तहायनत्वादेव । बालः आविष्कृतबाल्यानुरूपाकारादिस्तथापि दधार तत्रापि शैलं शिलामयमिति मृदाद्यभावेन महागुरुत्वं शिलानां खण्डशः पृथक् कृत्वा धारणाशक्यत्वादिकं चाभिप्रेतम् । तथाप्युत्पाट्य मूलतो भूतलादुद्धृत्य तत्राप्येकेन वामेनैव पाणिना तत्रापि लीलयानायासेन । तत्र दृष्टान्तमनुरूपमाह—उच्छिलींध्रमिवार्भक इति ॥ १६ ॥ ० ॥ * ॥ अत एवाद्भुतकर्मणे तस्मै नमः । अद्भुतत्वे हेतुः—कृष्णाय नराकृतिपरब्रह्मणे । अतो भगवते सर्वैश्वर्यपूर्णाय । अत एवानन्तायांतरहिताय सदा वर्तमानायानादय इत्यर्थः । किञ्च—मध्ये सृष्ट्यादावपि विकाररहितत्वात्कूटस्थाय । यत आत्मने सर्वांतर्यामिणे । एवं भक्त्युद्रेकेण साष्टांगं प्रणमन्पुनरप्याह—नम इति ॥ १७ ॥ स शतधन्वा । तेनाक्रूरेण ॥ * ॥ महामणिमिति तेनावार्यत्वं, सत्तमेनैव धार्यत्वं च सूचयति । अतोऽक्रूरं सत्तमं मत्वा तस्मिन्नेव न्यस्य न्यासरूपेण स्थापयित्वेति स्वात्मनोऽपि स्वधने ममत्वाधिक्यं दर्शितम् । विष्णुपुराणे तु—' वडवामारुह्य ' इत्युक्तम्, अत्राश्वमिति सामान्यनिर्देशो ज्ञेयः । शतयोजनगामित्वं तस्य स्वभावत एव, विपत्तौ तु बहुशतयोजनसामर्थ्यमपि ज्ञेयम् । अतो द्वारकातो मिथिलोपवनपर्यंतमतिकष्टेन गत्वा तत्रैव मृत इति वक्ष्यते ॥ १८ ॥ अष्टादशसु गुरुषु श्वशुरस्य गणितत्वाच्छ्वशुरोपि गुरुरेवेति बृहन्नारदीये ॥ * ॥ गरुडध्वजमिति—साक्षाद्गरुड एवोड्डीन इति लोकोत्प्रेक्षितमित्यर्थः ॥ १९ ॥ मिथिलाया नगर्याः ॥ * ॥ अन्वद्रवत् रथं हित्वा पश्चादधावत्, वीराणां तथैव न्यायात् । ननु पलायमानानुद्रवणमन्याय्यं तत्राह—रुषा, गुरुद्रुहि न्याय्यत्वादित्यर्थः ॥ २० ॥ पद्भ्यामातिर्गमनं यस्य स पदातिः । तस्य शतधन्वनः । तिग्मनेमिना चण्डधारेण । इति भाव इति—जानन्नेवायमेतन्मारणार्थमेवात्रागत इति रामो मदुपरि क्रुद्धो मा भवेदतोऽजानन्निव वस्त्रयोर्मणेरन्वेषणं चकारेति तात्पर्यम् ॥ * ॥ अतो धावतोऽपि ' भगवान् ' इति पाठे सर्वज्ञोऽपि अक्रूरे मणिरस्तीति सर्वज्ञतया ज्ञात्वापि दूरात्पश्यतो रामस्यैव मोहनाय व्यचिनोत् । तन्मोहनं च—स्वस्माद्वियुक्तस्य तस्य स्वप्रिये बहुलाश्वे नृपे कृपाभरप्रापणार्थमिति ज्ञेयम् ॥ **तोषिणी** तु—प्रियजनप्रेममयनरलीलाकौतुकेच्छावेशमयरुषा श्रीरामाग्रतोऽनानीय मणिवृत्तांतमपृष्ट्वैव चोत्कर्त्तनं ज्ञेयम्, शतधन्वनि स्वरोषातिशयव्यञ्जनाय । अत्रायमभिसन्धिः—अक्रूरे स्वभक्तेऽपि दुस्संगदुरनुसंधानदर्शनात् किंचित्कालपरित्यागातङ्कनादिलक्षणा शासनेच्छा भगवत आसीत्, संकोचतः सा च न साक्षादात्मकर्तृका, अत एवात्मनो भक्तमनोरथपरिपूरणस्वभावत्वाच्च तस्यैव च मणियोग्यत्वा

१ धावतस्तस्येति पाठोऽस्येष्टः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अलब्धमणिरागत्य कृष्ण आहाऽग्रजांतिकम् ॥ वृथा हतः शतधनुर्मणिस्तत्र न विद्यते ॥ २२ ॥ तत आह बलो नूनं स मणिः शतधन्वना ॥ कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्रज ॥ २३ ॥ अहं विदेहमिच्छामि द्रष्टुं प्रियतमं मम ॥ इत्युक्त्वा मिथिलां राजन्विवेश यदुनंदनः ॥ २४ ॥ तं दृष्ट्वा सहसोत्थाय मैथिलः प्रीतमानसः॥अर्हयामास विधिवदर्हणीयं समर्हणैः॥ उवास तस्यां कतिचिन्मिथिलायां समा विभुः॥२५॥ततोऽशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः ॥ मानितः प्रीतियुक्तेन जनकेन महात्मना ॥ २६ ॥ केशवो द्वारकामेत्य निधनं शतधन्वनः ॥ अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः ॥ २७ ॥ ततः स कारयामास क्रिया बंधोर्हतस्य वै ॥ साकं सुहृद्भिर्भगवान्यायाः स्युः सांपरायिकाः ॥ २८॥ अक्रूरः कृतवर्मा च श्रुत्वा शतधनोर्वधम् ॥ व्यूषतुर्भयवित्रस्तौ द्वारकायाः प्रयोजकौ ॥ २९ ॥

मास । अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वाऽपि रामवंचनाय तथा कृतवानिति भावः ॥ २१ ॥ ॥ २२ ॥ अन्वेषान्विच्छ ॥ २३ ॥ सर्वज्ञस्यैवं विचेष्टितं मद्वंचनायेति मत्वा गूढमन्युराह । अहमिति ॥ २४ ॥ कतिचित्समाः संवत्सरान् ॥ २५ ॥ प्रासंगिकमाह । तत इति ॥ २६ ॥ सत्यभामामप्यवंचयदिति सूचयन्नाह । केशव इति ॥ २७ ॥ बंधोः सत्राजितः । सांपरायिकाः पारलौकिक्यः ॥ २८ ॥ व्यूषतुर्द्वारकायाः सकाशात्क्वापि पलायितौ । प्रयोजकौ मणिहरणे शतधन्वनः प्रवर्तकौ । तत्रा

त्तस्मै मणिदित्साप्यवर्तत । अत एव चेममभिप्रायम्—रहसि मणिं लब्ध्वा स्वयमेवादौ पलायताम्, पश्चाद्विचारयितव्यम् इति आपाततः श्रुत्वा तद्वृत्तांतेन मदग्रजेनान्येन च तस्मिन्दुःखं प्राप्स्यते, ततः सर्वविशृंखलं भविभविष्यतीति ॥ २१ ॥ तत्र शतधन्वनि ॥ * ॥ अग्रजस्यांतिकमागत्य, वृथा हत इति गूढपुरुषाणामन्यथात्वं व्यञ्जितम् ॥ २२ ॥ उदासीनो बलस्तदाऽऽचरणेन किञ्चित्कुपित इवाह—तत इति । ततः शतधनुषो वधानन्तरम् । तं मणिम्, पुरुषं वा । अन्विच्छ मार्गय ॥ * ॥ नूनमित्यादि प्रणयकोपवाक्यम् । कस्मिंश्चिदिति—योग्यत्वादक्रूर एव तर्कित इति ॥ २३ ॥ अधुना त्वया सार्द्धं न गच्छामीत्याह—सर्वज्ञस्येति ॥ * ॥ यस्य मणेः संबंधेन तादृशं कलंकं लब्ध्वा बिलप्रवेशाद्यनेन कृतं तस्मै मणये तादृशमपि व्यवहारवन्तमक्रूरमयं । ज्ञात्वापि तत्पक्षपातं न त्यक्ष्यति तत्संबंधेन च पुनर्लोकापवादञ्च प्राप्स्यत्यसाविति मया दुःखसंदग्धेन सन्निधानं न शक्यत इत्याभिप्रेत्य प्रणयकोपं व्यनक्ति—अहमिति । यदुनंदन इति—यादवानन्दनार्थं द्वारकां गन्तुमर्होऽपीत्यर्थः । विदेहमिति—अहं त्वदीयद्वारकामपि न यास्यामि, त्वं स्वप्रियायै मणिं स्वच्छन्देनैव देहीति भावः । हे राजन्निति श्रीभगवल्लीलाश्रवणेन राजमानत्वात् ॥ २४ ॥ तं बलम् । अर्हणीयं पूजनीयम् ॥ * ॥ सहसेत्याकस्मिकैकाकितया गमनात् । 'अर्हण्यं वै' इति पाठेपि स एवार्थः । समर्हणैरुत्तमपूजाद्रव्यैः ॥२५॥ प्रासंगिकं प्रसंगायातम् । ततो बलदेवात् ॥ * ॥ काले श्रीकृष्णतो रुष्टैकांतागतत्वान्निजावसरे । धार्तराष्ट्र इति—दुर्मंत्रदक्षस्य पितुः प्रेरणादित्यर्थः । मानित इत्यस्य विभुरित्यनेनैवान्वयः । योग्यत्वात्तदेवाह—महान् श्रीकृष्णे तत्प्रियगणे चैव गतत्वात्सर्वोत्कृष्ट आत्मा मनो यस्य तेन ॥ २६ ॥ मण्यप्राप्तिकथनेन तस्या अपि वंचनमेव ॥ * ॥ प्रियायाः प्रियकृदिति—आयुरभावादेव त्वत्पिता जीवयितुमशक्यः किन्तु त्वत्पितृहंता मया स्वहस्तेन हत इति प्रियां प्रत्युक्तेः । केशव इति—तथा शीघ्रगतौ वीर्यसूचनं, ब्रह्मेशवशकारित्वाद्धेलया हततादृशकेशित्वाद्वा । प्राह प्रकर्षेण दूरधावनाद्यभिव्यंजनेनाह । यतो विभुरपि प्रेमवशत्वात्प्रियायाः प्रियकृदिति तोषिणी ॥ २७ ॥ ततो द्वारकाप्राप्त्युत्तरम् ॥ * ॥ कारयामास श्रीसत्यभामयेति । वै प्रसिद्धौ । यायास्तास्ताः । हतस्य चौरेण । शस्त्रहतेरनुरूपास्तत्प्रायश्चित्तपूर्विका इत्यर्थः ॥ २८ ॥ तत्र तयोर्मध्ये ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अक्रूरे प्रोषितेऽरिष्टान्यासन्वै द्वारकौकसाम् ॥ शारीरा मानसास्तापा मुहुर्दैविकभौतिकाः ॥ ३० ॥ इत्यंगोपादिशंत्येके विस्मृत्य प्रागुदाहृतम् ॥ मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ॥ ३१ ॥ देवेऽवर्षति काशीशः श्वफल्कायागताय वै ॥ स्वसुतां गांदिनीं प्रादात्ततोऽवर्षत्स्म काशिषु ॥ ३२ ॥ तत्सुतस्तत्प्रभावोऽसावक्रूरो यत्रयत्र ह ॥ देवोऽभिवर्षते तत्र नोपतापा न मारिकाः ॥ ३३ ॥ इति वृद्धवचः श्रुत्वा नैतावदिह कारणम् ॥ इति मत्वा समानाय्य प्राहाक्रूरं जनार्दनः ॥ ३४ ॥

क्रूरः कृष्णानुमतेनैव गतः कृतवर्मा तु भक्तपक्षपातप्राकट्यभयादिवोपेक्षित इति गम्यते कथमन्यथा सर्वज्ञेश्वरवंचनं तयोः संभवतीति ॥२९॥ तदेवं वाराणस्यां दानपतिसमाख्यया मणिहस्तेऽक्रूरे रुक्मवेदिकैर्महाध्वरैर्यजमाने निवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णेकर्णे जपति जने सत्यभामारामादीनामप्यविश्वासे जनसंग्रहायाक्रूरं समाहूय साक्षेपं श्रीकृष्णः प्राह । इदं च भगवन्मतं संगोप्य केचन ऋषयोऽन्यत्कारणमक्रूरानयने वर्णयंति तद्यथाश्रुतं दूषयितुमनुवदति । अक्रूरे प्रोषित इति ॥ ३० ॥ दूषयति इतीति । अंग हे राजन् । श्रीकृष्णमाहात्म्यं विस्मृत्येति । तदेवाह । मुनिवासनिवास इति । मुनीनां वासो यस्मिन्स श्रीकृष्णस्तस्य निवासे सत्यक्रूरापगममात्रेणारिष्टदर्शनं किं घटेत । तदिच्छां विना न घटेतेत्यर्थः ॥ ३१ ॥ पुनस्तन्मतमेवानुवर्णयति । देव इति । काशिषु देशेषु देवे मघवत्यवर्षति सति ॥ ३२ ॥ ३३ ॥ इत्येवंभूत

गम्यते ज्ञायते । तयोरक्रूरकृतवर्मणोः ॥ * ॥ शतधनुर्वधश्रवणेनातिभीताविति विशब्दार्थः ॥ २९ ॥ तदेवमित्थम् । वाराणस्यां काश्याम् । रुक्मवेदिकैर्हेमरचितवेदिकायुक्तैः । महाध्वरैर्महायज्ञैः । निवसति सति । तत् कारणम् । अरिष्टान्यरिष्टसूचकानि ॥ * ॥ तदेवं व्रजदेव्यपराधफलमिदमक्रूरस्य, यद्बहुवर्षपर्यंतं कृष्णविच्छेददुःखानुभवस्तद्विपक्षजनसंवर्द्धे काशीपुरे वासश्च, "उवास तस्यां कतिचिन्मिथिलायां समा विभुः" इत्युक्तेर्यावंत्येव वर्षाणि मिथिलायां बलदेवोऽवसत्तावंत्येवाक्रूरोऽपि वाराणस्याम्, तस्याश्च तस्य रुक्मवेदिकनानायज्ञान् ब्राह्मणेभ्यो बहुदानख्यातिं च श्रुत्वा कृष्णेनैव प्रस्थापितोऽक्रूर इति कर्णेकर्णे जपति जने सति सत्यभामारामादीनामप्यविश्वासे सति पुनरप्युद्भूतं स्वस्मिन्कलंकं मार्ष्टुं द्वारकास्थलोकद्वारैवाऽक्रूरानयनकारणानि भगवतैव सृष्टानि—नानारिष्टानीति । तत्त्वं तदबुद्ध्वा द्वारकाया अरिष्टदर्शनं कालवशादेवोद्भूतमिति वदतां मुनीनां मतमनूद्य दूषयति—अक्रूर इति द्वाभ्याम् ॥ ३० ॥ तदेव दूषणमेव । इत्यर्थ इति—न हि सूर्ये तपति तमोनिरासाय दीपः प्रज्वाल्यत इति न्यायेन भगवदिच्छैव प्रबला, यतः सत्यपि तस्मिन्कारणांतरकल्पनेति भावः ॥ * ॥ एके वैशंपायनादयः । प्राक्स्वयमुक्तमपि विस्मृत्याननुसंधायेत्यर्थः । मुनेरेकस्यापि निवासे सति तत्प्रभावाद्ग्रामेऽरिष्टदर्शनं न भवेत्, मुनीनां सर्वेषामपि वासो यत्र तस्य श्रीकृष्णस्य निवासे सति किमरिष्टदर्शनमेकमपि घटेत, नैवेत्यर्थः ॥ ३१ ॥ तन्मतं मुन्यंतरमतम् । श्वफल्कायाक्रूरपित्रे । ततो गांदिनीदानेन श्वफल्कपूजया । काशिषु काशिदेशेषु ॥ * ॥ देव इत्यादित्रिकम्, तृतीयपद्यगेनेति शब्देनान्वयात् । तत्कन्यार्थमेव काश्यामागताय । तां नित्यगोदानेन चिरकालजन्मना प्रसिद्धम् । अतः स्वीयामसाधारणीं सुताम् । प्रकर्षेण बहुलोपस्कारादिनाऽदात् । अतो मातामहसंबंधेनैवाक्रूरस्तत्र गत इति ज्ञेयम् ॥ ३२ ॥ तत्सुतः श्वफल्कसुतः । तस्य श्वफल्कस्येव प्रभावो यस्य स तत्प्रभावः । उपतापः क्लेशः ॥ *॥०॥३३॥ ०॥*॥ इति मत्वा तैस्सह विशेषतो विचार्येत्यर्थः । यद्वा—व्याजाय स्वयमुत्थापितारिष्टत्व

१ वै इत्यत्र तामिति पाठा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ॥ विज्ञाताखिलचित्तज्ञः स्मयमान उवाच ह ॥ ३५ ॥ ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना ॥
स्यमंतको मणिः श्रीमान्विदितः पूर्वमेव नः ॥३६॥सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुः सुताः ॥ दायं निनीयाऽपः पिंडान्विमुच्यर्णं च शेषितम्॥३७॥

मक्रूरमहिमप्रतिपादनपरं वृद्धानां वाक्यं श्रुत्वा सत्यमेवं तथाऽप्येतावदेव कारणं न भवति किंतु मणेरप्यपगम इति मत्वेत्येतदंतं परमतम् ॥ ३४ ॥ विज्ञातमखिलं येन स चासावत एव चित्तज्ञश्च । अयं भावः । महाभागवतस्यास्य मया दत्तेऽपि मणावपेक्षा नास्त्येव यस्मादाहूतो मणिना सहैवागत इति ज्ञात्वेति॥ ३५॥ ३६ ॥ततः किमत आह ।

वृद्धोपदेशग्रहणमिदं न परमतम् 'इत्यंगोपादिशंत्येके ' इत्यत्रैव तत्समाप्तिः स्पष्टा । ततश्च नैतावदिति–किन्तु तद्व्याजाय ममैवेच्छा कारणमिति स्वमनसि विचार्येत्यर्थः । सम्यक्परमादरेणानाय्य स्वयमुदासीनो भवन्सर्व यादवसमाह्वानद्वारैवागमय्येति णिजर्थः ॥ ३४ ॥ अत एव विज्ञाताखिलत्वादेव । अत्राकूतमाह–अयं भाव इत्यादिना ॥ * ॥ पूर्वोक्तमेव विशिनष्टि–पूजयित्वेति । अभिभाष्य कुशलप्रश्नादिना संभाष्य । प्रियाः भक्तिभक्तादिमाहात्म्यपराः, तस्य श्रीवसुदेवाद्यानुकूल्यार्थकं सनिकटसशंकस्थितितद्वृत्तांतःप्रयत्नतदाज्ञाव्याजत्रजगमनस्वदर्शनानन्यतद्धार्थस्वनयनादिरूपा, तथापि सांप्रतं दैवविघटनानुशोचनरूपाश्च । ह हर्षे । स्मयमान इति मणिज्ञानबोधनार्थनिगूढभावात् । **विश्वनाथस्तु**–विज्ञाता विज्ञः । विज्ञत्वादेवाखिलचित्तज्ञः, न तु केवलांतर्यामित्वादेवेति भावः । अंतर्यामीति अखिलचित्तानां ज्ञाता कृष्णस्त्वखिलांतर्यामिणामपि ज्ञाता भवति तस्याक्रूरचित्तज्ञानं किं चित्रमिति भावः । अतः–स्मयमान इति । न त्वं सत्राजिति कृतवैरो, नापि मणेश्चौरो, नापि धनलुब्धः, त्वं तु मत्परमभक्त एवेति त्वन्मनः किमहं न जानामि कथं मत्तस्त्वं बिभेषीति भावः ॥ ३९ ॥ ननु निश्चये । नोऽस्माकम् ॥ * ॥ अत्रार्थे त्वां किं पृच्छामि, जानाम्येवेत्याह–नन्विति । श्रीमान् सर्वसंपत्तियुक्तस्तत्प्रदत्वात् । यतो महादीप्तिमानतस्त्वया यत्नतश्चिरं निह्नोतुं न शक्य इति भावः । न चाधुनैव संभाव्यत एव, प्रागेव ज्ञातत्वादित्याह–विदित इति । शतधन्ववधात्पूर्वत एव त्वय्यस्तीति नोऽस्माकं सर्वेषामेव ज्ञातः ॥ ३६ ॥ ततो विदितात् । दायं भागम् । शास्त्रं याज्ञवल्क्यः । तथा च स्मरन्ति–सामश्रवआदयः । पत्नी त्वव्यभिचारिणी । तदभावे दुहितरः, ता अप्यनूढा एव । तदभावे पितरौ यदि माता भवेत्तदा माता, तदभावे पिता । तयोरभावे भ्रातरः, तेऽपि सोदरा एव, तदभावे भिन्नोदरा अपि । तदभावे भ्रातृपुत्राः । तदभावे गोत्रजाः, पितामही, सपिंडाः, समानोदकाश्च । पितामह्या अभावे सपिंडाः सप्तपुरुषावधयः । तदभावे समानोदकाश्च चतुर्दशपुरुषावधयः । ततः परे गोत्रजा इति विवेकः । गोत्रजाभावे बंधवः, ते च त्रिधा–आत्मबंधवः पितृबंधवो मातृबंधवश्च । तथाहि–"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबंधवः ॥ पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुस्सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः॥मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः॥" इति। तत्र चांतरंगत्वात्प्रथममात्मबंधवो धनभाजस्तदभावे पितृबंधवस्तदभावे मातृबंधव इति क्रमो ज्ञेयः । बंधूनामभावे आचार्य इति, तदभावे शिष्याः । आचार्यः श्लोकानुक्तोपि " पुत्राभावे यः प्रत्यासन्नस्सपिंडस्तदभावे आचार्य आचार्याभावेंतेवासी " इत्यापस्तंबस्मरणात् । शिष्याभावे सब्रह्मचारी धनभाक्, येन सहैकस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तिः स सब्रह्मचारी । तदभावे ब्राह्मणद्रव्यं यः कश्चिच्छ्रोत्रियो गृह्णीयात् " श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन् " इति गौतमस्मरणात् । तदभावे ब्राह्मणमात्रम् " सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः " इति मनूक्तेः । ब्राह्मणद्रव्यं राजा न कदापि गृह्णीयात् । " अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः " इति मनूक्तेः । "ब्राह्म

२ 'अन्तर्याम्यभिभाष्यैनम् ' इति पाठाभिप्रायेणेदमिति भाति । यथास्थितपाठे तु कल्पनया कथञ्चित्साधुत्वम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापि दुर्धरस्त्वन्यैस्त्वय्यास्तां सुव्रते मणिः ॥ किं तु मामग्रजः सम्यङ् न प्रत्येति मणिं प्रति ॥३८॥ दर्शयस्व महाभाग बंधूनां शांतिमावह ॥ अव्युच्छिन्ना मखास्तेऽद्य वर्तंते रुक्मवेदयः ॥ ३९ ॥ एवं सामभिरालब्धः श्वफल्कतनयो मणिम् ॥ आदाय वाससा छन्नं ददौ सूर्यसमप्रभम् ॥ ४० ॥ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः ॥ विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ॥ ४१ ॥

सत्राजित इति । अपः पिंडांश्च निनीय दत्वा ऋणं च पिमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सुता गृह्णीयुरिति शास्त्रम् । तथाच स्मरंति । "पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ तत्सुता गोत्रजा बंधुशिष्यसब्रह्मचारिणः" इति॥ ३७॥ अग्रजोऽपि न प्रत्येति न विश्वसितीति॥ ३८॥नास्तीति न वक्तव्यम् । यतोऽव्युच्छिन्नाः संतता मखा वर्तंत इति ॥ ३९ ॥ आलब्ध उक्तो हृदि स्पृष्ट इति वा ॥ ४० ॥ रजो मिथ्याभिशापं संमृज्य । अन्यैर्दुर्धर इत्यादिमिषेण प्रीत्या भूयस्तस्मै

णार्थस्य तन्नाशे दायादश्चेति कश्चन । ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोन्यथा ॥" इति नारदोक्तेश्च । क्षत्रियादिधनं सब्रह्मचारिपर्यंतानामभावे राजा हरेन्न ब्राह्मणः । "इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः" इत्येतत्सर्वं द्वादशविधपुत्राभावे ज्ञेयम् । शूद्रापुत्रं विनेत्यलमति प्रसंगेन ॥ * ॥ अक्रूरस्य सर्वेषामन्येषां च संप्रति विप्रतिपत्तिनिरसनार्थमाह–सत्रेति । अनपत्यत्वादिति कन्यांतरमपि निरस्तम् । सत्राजितः पत्नीनां तु सहमरणं ज्ञेयम् ॥ ३७ ॥ यद्यपि शास्त्रतोऽस्मानेवायाति तथापीति । अन्यैस्त्वदितरैः । दुर्धरः त्वत्तुल्यत्रदान्यत्वाभावाद्धर्तुमशक्यः । तदुक्तम्–"अदातुर्न चिरं लक्ष्मीस्तिष्ठतीति विदुर्बुधाः" इत्युक्तेः । यद्येवं तर्हि किमर्थं तमिच्छसीति चेदाह–किन्त्विति ॥ * ॥ तथापीत्यर्द्धकम् । हि[1] एव । सुव्रते ब्रह्मचर्यादिनिष्ठत्वादधिकारिण्यपि त्वय्यास्तांमात्रम्, तेन सर्वेषामस्माकमरिष्टनाशादिना हिताय भविष्यतीति मणौ सर्वेषां साधारण्यं विज्ञाप्य श्रीसंकर्षणादितर्किताः स्वेन तस्मै दानेच्छाप्याच्छादिता ॥ किन्त्विति सार्द्धकम् । किन्तु दर्शयस्वमात्रं, यतो–मामिति । तदेवं सहसा मणिप्रकाशनार्थमेव तमुद्वेजितवान्, न तु संकर्षणस्यापि तथा भाव इति मनसि वितर्कितवान्, "तत आह बलो नूनं स मणिः शतधन्वना । कस्मिंश्चित्पुरुषे न्यस्तः" इत्युक्तत्वात् । कस्मिंश्चिदित्यक्रूर एवेति गूढोभिप्रायः । तन्नामग्रहणं यथा शतधन्वकर्तृकसत्राजिद्वधोऽवगतस्तथा तत्कृतं शतधन्वनि दुर्मंत्रदानमयम् 'योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नम्' इति वचनं चावगतमिति तस्मै रोषात्, तथापि तत्पक्षपातममुंचंतं स्वानुजं प्रति प्रणयरोषाच्च । तत्र मणिं प्रति मणिर्मयि नास्तीति न प्रत्येति सम्यगिति । यद्यपि दानयज्ञादिना त्वय्याशंकते तथापि स्वदूरे शतधन्वनो मारणाद्विनयाच्च मय्यपीत्यर्थो वचसि ज्ञेयः । सम्यक् न प्रत्येति मदिच्छां ज्ञात्वैव त्वं मणिमादाय पलायितवानिति मन्यते । इत्यर्थस्तु मनसि ज्ञेयः । तत्र पूर्वार्थस्तु–परार्थस्य नातिदुष्टताव्यञ्जनाय च निर्दिष्टः ॥ ३८ ॥ शान्तिं प्रशमम् ॥ * ॥ महाभागेति–महान् भागो मद्भक्तिप्राप्यांशो वा यस्य तत्संबोधनमिति तत्र मरणापेक्षा नास्तीति भावः । यतो बहूनां बलदेवादीनामस्माकं शान्तिं मण्यर्थमन्योन्यकलहोपरतिम् आवह सम्यक्प्रापय । अद्याऽधुनापि श्रीबलदेवश्चायं मिथिलातः पूर्वमानीतः । तथा च श्रीहरिवंशे–" प्रत्याय्य तु ततो रामो वृष्ण्यंधकमहारथैः । आनीतो द्वारकामेव कृष्णेन च महात्मना ॥" इति ॥ ३९ ॥ आलभेरुक्त्यर्थोऽप्रसिद्धिं मत्वाह–हृदीति ॥ * ॥ श्वफल्कतनय इति–महानुभावमुनिपुत्रत्वेन तत्र सलज्जत्वं तस्य सूचितम् । सूर्यसमप्रभमत एव वाससाच्छन्नमेव ददौ ॥ ॥ ४० ॥ ज्ञातिभ्यो बलदेवादिभ्यः । तस्मै अक्रूराय ॥ * ॥ ज्ञातिभ्यो यादवान्प्रति मणिना हेतुना यद्रजः रजोमार्जनञ्चात्र सोऽयमक्रूरः स्वेच्छयैव मणिमग्रहतवान्न तु ममेच्छया, तथाप्यधुना यदस्मै तत्समर्पणं तत्खल्व

१ 'दुर्धरो ह्यन्यैः' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्वेतद्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च ॥ आख्यानं पठति शृणोत्यनुस्मरेद्वा दुष्कीर्तिं दुरितमपोह्य याति शांतिम् ॥४२॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे उत्तरार्धे स्यमंतकोपाख्याने सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ श्रीशुक उवाच ॥ एकदा पांडवान् द्रष्टुं प्रतीतान् पुरुषोत्तमः ॥ इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः ॥ १ ॥ दृष्ट्वा तमागतं पार्था मुकुंदमखिलेश्वरम् ॥ उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतम् ॥ २ ॥ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः ॥ सानुरागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ॥ ३ ॥ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनम् ॥ फाल्गुनं परिरभ्याथ यमाभ्यां चाभिवंदितः ॥ ४ ॥

प्रत्यर्पितवानिति ॥ ४१ ॥ दुष्कीर्तिं तन्मूलं दुरितं चेति ॥ ४२ ॥ इति श्रीमद्भागवते दशमस्कंधे उत्तरार्धे श्रीध० टीकायां सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ छ ॥ अष्टपंचाशत्तमे तु कृष्णः पंच करेऽग्रहीत ॥ कालिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणाम् ॥ १ ॥ कालिंदीं निजलाभाय तपः परमुपेयुषीम् ॥ परिणेष्यन्प्रियावास मिंद्रप्रस्थमथागमत् ॥ २ ॥ प्रतीतान्नष्टानपि द्रुपदगृहे पुनः सर्वैर्दृष्टान् । युयुधानः सात्यकिः ॥ १ ॥ प्राणा इंद्रियाणि मुख्यं पंचवृत्तिं प्राणमिव ॥ २ ॥ ३ ॥ ज्येष्ठयोः प्रणामं

स्यैव योग्यत्वादिति व्यञ्जनया ज्ञेयम् । यतो विभुः, भक्तगणपरिपालनसमर्थः । यदुकुलहितार्थं तथाकरोदिति भावः । यद्वा–साक्षादीश्वरोपि इत्येतत्साधुभिः कार्यमिति लोकशिक्षणार्थमिति भावः । ततःप्रभृति तन्मणिमक्रूरो व्यक्तं कंठे निधाय बभ्रामेति श्रीहरिवंशे–" स कृष्णहस्तात्संप्राप्तं मणिरत्नं स्यमन्तकम् । आबध्य गांदिनीपुत्रो विचचारांशुमानिव ॥ " इति ॥ ४१ ॥ दुष्कीर्तिं मिथ्याभिशापादिरूपाम् । तन्मूलं दुष्कीर्तिकारणम् । अपोह्य त्यक्त्वा । शान्तिं क्लेशानां संसारस्य वा ॥ * ॥ श्रीभगवतस्तदेवं सर्वं लीलाकौतुकमेव न तु पारवश्यमयम्, यतः यस्त्वेतदिति । भगवतः पूर्णैश्वर्यप्राकट्यस्य श्रीकृष्णस्य । अत एवेश्वरस्य सर्वं कर्तुं समर्थस्य । अत एव विष्णोः, निजशक्त्या सर्वव्यापकस्य । अत एव वीर्येणाद्भुतचरितेन आढ्यमाख्यानं कथाम् । वृजिनहरं संसारदुःखनाशनम् । सुमंगलं भगवद्भक्तिवर्धनादिना महामंगलकरम् । अनुश्रवणानन्तरं तदभावे स्मरेद्वा । अपोह्य हित्वा । शान्तिं चित्तप्रसादं सुखं वा प्राप्नोति ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ पञ्च–भार्या इति शेषः । ता नामतो निर्दिशति–कालिन्दीमित्यादिना (१) । निजस्य श्रीकृष्णस्य लाभाय । प्रियाणामर्जुनादीनामावासो यस्मिंस्तम् (२) । " प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोस्त्रिषु " इति मेदिनी । शौर्यादिगुणेन प्रख्यातान्, कोविदान् । वा–भगवद्भक्त्याऽभरणेन भूषितान् " प्रतीतो भूषिते ख्याते ज्ञाते प्रत्यर्थिते बुधे " इति यादवः ॥ * ॥ एवं प्रासंगिकं समाप्य प्राग्वकुमारब्धाञ्छ्रीभगवतो विवाहानेव पुनर्वक्ष्यन्नादौ कालिंदीविवाहं वक्तुमारभते–एकदेति । पुरुषोत्तम इति भक्तवात्सल्यवत्त्वात् ॥ १ ॥ तं कृष्णम् ॥ * ॥ अखिलेश्वरमपि स्वगृह आगतं शैघ्र्यात्, न तु पूर्वश्रुतागमनम् । मुकुन्दमिति दर्शनमात्रेण सर्वदुःखमोचनपूर्वकपरमानन्दप्रदानात् । अतो दृष्ट्वैव युगपदासनादुत्तस्थुः । यतः पितृष्वसृष्वपि परमस्निग्धायाः पृथायाः पुत्राः वीरा इति शीघ्रोत्थाने वैशिष्ट्यं दर्शितम् । इंद्रियाणि तद्गोलकानि । प्राणं महौषधादिप्रभावेणागतं, पुनर्देहे संचारितम् ॥ २ ॥ तस्य कृष्णस्य ॥ * ॥ अच्युतमिति चिरपरिष्वंगे परमानन्ददाने च च्युतिरहितम् । एनस्तदप्राप्तिजं दुःखम् । वक्त्रमेव वीक्ष्य मुदं प्राप्तास्तत्रापि सानुरागस्मितम् ॥ ३ ॥ ज्येष्ठयोर्युधिष्ठिरभीमयोः । समेनार्जुनेन । कनिष्ठाभ्यां नकुलसहदेवाभ्याम् ॥ * ॥ तदेवमुभयेष्यानन्दात्स्वस्वव्यवहारं विस्मृत्य पुनः सावधानतया तमकुर्वन्नित्याह–युधीति । पादयोरभिवंदनं शिरसा पादस्पर्शनपूर्वकं प्रणामम् । श्रीकृष्णार्जुनयो रोहिणीफाल्गुनीजन्मत्वेन ज्येष्ठकनिष्ठयोरपि सख्यमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमासन आसीनं कृष्णा कृष्णमनिंदिता ॥ नवोढा व्रीडिता किंचिच्छनैरेत्याभ्यवंदत ॥५॥ तथैव सात्यकिः पार्थैः पूजितश्चाभिवंदितः ॥ निषसादासनेऽन्ये च पूजिताः पर्युपासत ॥६॥ पृथां समागत्य कृताभिवादनस्तयातिहार्दार्द्रदृशाऽभिरंभितः ॥ आपृष्टवांस्तां कुशलं सहस्नुषां पितृष्वसारं परिपृष्टबांधवः ॥७॥ तमाह प्रेमवैक्लव्यरुद्धं कंठाश्रुलोचना ॥ स्मरंती तान्बहून्क्लेशान्क्लेशापायात्मदर्शनम् ॥८॥ तदैव कुशलं नोऽभूत् सनाथास्ते कृता वयम् ॥ ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ॥ ९ ॥ न तेऽस्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः ॥ तथाऽपि स्मरतां शश्वत्क्लेशान्हंसि हृदि स्थितः ॥ १० ॥

कृत्वा समेनालिंगितः कनिष्ठाभ्यामभिवंदितो बभूव ॥ ४ ॥ कृष्णा द्रौपदी । बहुभार्या सत्यपि निंदारहिता । पार्थैर्नवमचिरमूढा परिणीता ॥ ५ ॥ ६ ॥ अतिहार्देन स्नेहेनार्द्रे सजले दृशौ यस्यास्तया परिष्वक्तः । तया परिपृष्टा बांधवा यस्य सः ॥ ७ ॥ प्रेम्णा वैक्लव्यं तेन रुद्धः कंठो यस्याः क्लेशापाये आत्मनि दर्शनं यस्य तम् । भजतां क्लेशापायाय आत्मानं दर्शयतीति वा ॥ ८ ॥ ज्ञातीन् बंधून् नोऽस्मान् यदा भ्राताऽक्रूरः प्रेषितः ॥ ९ ॥ ज्ञातीनिति वचनात्प्राप्तं मोहं वारयंती स्तौति । न तेऽस्तीति ।

समव्यवहारे हेतुरिति ध्येयम् ॥ ४ ॥ कृष्णा द्रौपदी । नवोढा सद्यो विवाहिता ॥ * ॥ परमे राजासनतोपि श्रेष्ठे । कृष्णा कृष्णमिति सनामतयापि मैत्री दर्शिता ॥ ५ ॥ यथा कृष्णस्तथैवेत्यर्थः । पर्युपासत स्वस्वासन उपविष्टा बभूवुः ॥ * ॥ परितश्चतुर्दिक्षु, उप समीपे आसिता उपविष्टाः । पूजितैर्नमस्कृतैः[1] ॥ ६ ॥ तया पृथया । तां पृथाम् ॥ * ॥ पतीनामेकस्मिन्नप्यन्तःपुरे लब्धांतरविभागे श्रीद्रौपदी निवसतीति तस्मिन्नेवाकस्मादागतस्य श्रीकृष्णस्य तेषां मेलनानन्तरमेव तया मेलनं वर्णितम् । अथ तत्संलग्नांतःपुरान्तरे गमनपूर्वकं तत्र स्थितया श्रीकुन्त्या मेलनमाह—पृथामिति । कृतमभिवादनममुकोऽहं नमस्करोमीत्येवंविधिना प्रणामो येन सः । आ सम्यक्पृष्टवान् परिपृष्टा बांधवा भ्रात्रादयो येन सः । यद्वा—परिपृष्टा बांधवा यस्माच्छ्रीकुन्त्या स तथा । सहस्नुषामिति नवोढात्वेन तामपृष्ट्वा तस्या एव प्रष्टुं योग्यत्वात् ॥ **विश्वनाथस्तु**—अत्रैवौत्सुक्येन द्रष्टुमायांतमालक्ष्य स्वासनादुत्थाय द्रुतं तस्याः समीपमागत्याभिवादनं चकार । 'प्रेमा ना प्रियता हार्दम्' इत्यमरः । अभिरंभितः कोटिप्राणैस्तन्मुखच्छविं निर्मञ्छयामीत्युक्त्वा समस्तकाघ्राणमालिंगितः ॥ ७ ॥ तं कृष्णम् । तान्बुद्धिस्थान् जतुगृहादावनुभूतान् । पूर्वव्याख्याने हरेर्भक्तोपेक्षाप्रतीतेरर्थांतरमाह—भजतामिति ॥ * ॥ प्रेमवैक्लव्ये हेतुः—स्मरंतीति । तान् प्रसिद्धान् दुर्योधनकृतविषदानादीन् । बहून्क्लेशान्स्मरंती तमाहेत्यन्वयः । वस्तुतस्तु—तेषां यद्दुःखं जातं तद्दैन्यहर्षादिव्यभिचारिभावैः स्थायिभावं वर्धयितुं लीलाशक्त्यैव कृतमिति ॥ ८ ॥ भक्तानुपेक्षां हरेराह—तदैवेति । यदाऽक्रूरः प्रेषितस्तदैवेत्यन्वयः ॥ * ॥ त्वयैवाऽस्माकं कुशलं पूर्वं जातमित्याह—तदैवेति । तत्त्वया नोस्मान् ज्ञातीन्स्मरता पाल्यत्वेन लब्धान्यादवानिव भावयता मे मम भ्राता प्रेषितः । तत्र तव युक्तमेवेत्याह—हे कृष्णेति । भक्तवात्सल्यादशेषगुणप्रकटनपरत्वेन प्रसिद्ध इत्यर्थः ॥ ९ ॥ मोहमज्ञानम्, यद्यपि ते नास्ति तथापीति योज्यम् । तत्र स्वपरभ्रांत्यभावे ॥ * ॥ तदेवाभिव्यंजयंतीश्वरत्वेन सर्वत्र समस्याऽपि तस्य भक्तेष्वेवानुग्रहविशेषं दर्शयति—नेति । विश्वस्य यः सुहृत् स्वभावत एव ज्ञानक्रियाशक्तिदानेन हितकारी यत आत्मा परमात्मा तस्य यद्यपि स्वपरभ्रांतिः—अयं बंधुरयं शत्रुरिति भ्रमो नास्ति, स्मरतां कारुण्यादिगुणमयत्वेन भावयतां हृदि स्थितः प्रकटिततत्त्व

---

१ तृतीयान्तपाठाभ्युपगमेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युधिष्ठिर उवाच ॥ किं न आचरितं श्रेयो न वेदाहमधीश्वर ॥ योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसाम् ॥ ११ ॥ इति वै वार्षिकान्मासान्राज्ञा सोऽभ्यार्थितः सुखम् ॥ जनयन्नयनानंदमिंद्रप्रस्थौकसो विभुः ॥ १२ ॥ एकदा रथमारुह्य विजयो वानरध्वजम् ॥ गांडीवं धनुरादाय तूणौ चाक्षयसायकौ ॥ १३ ॥ साकं कृष्णेन सन्नद्धो विहर्तुं गहनं वनम् ॥ बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा ॥ १४ ॥ तत्राविध्यच्छरैर्व्याघ्रान्सूकरान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान्हरिणाञ्छशशल्लकान् ॥ १५ ॥ तान्निन्युः किंकरा राज्ञे मेध्यान्पर्वण्युपागते ॥ तृट्परीतः परिश्रांतो बीभत्सुर्यमुनामगात् ॥ १६ ॥

तत्र हेतुः विश्वस्येति । सुहृच्च आत्मा च तस्य । हंसि नाशयसि ॥ १० ॥ कुमेधसां विषयासक्तचित्तानां दृष्टोऽसि ॥ ११ ॥ सुखमवसदिति शेषः । सुखमभ्यर्थित इति वा क्रियासमाप्तिः ॥ १२ ॥ कालिंदीदर्शनप्रसंगमाह । एकदेति । अक्षयाः सायका ययोस्तौ तूणौ इषुधी ॥ १३ ॥ १४ ॥ १५ ॥ राज्ञे

द्गुणत्वात्तेषामेव प्रकटतया हृदि स्थितः ज्ञातः सन् शश्वन्मुहुः क्लेशान्हंसि, अंधेष्वपि तत्तद्दृष्ट्यादिप्रवर्तनया सूर्यस्य स्वभावत उपकारित्वेऽपि चक्षुष्मत्तमःखंडनवत् ॥ १० ॥ नोऽस्माभिः । "युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोः–" इति विपरीतनिर्देशादन्यासु विभक्तिष्वपि वान्नावादयस्स्युरिति तृतीयाबहुवचनस्य नसादेशः ॥ * ॥ एवं मात्रोक्तं भक्तवात्सल्यं श्रुत्वा विनयादिना स्वस्य भक्तत्वममन्यमानो दैन्यमवलंब्य दीनवात्सल्यं वर्णयति–किमिति, कतरत् । नोऽस्माभिः पूर्वजन्मस्वाचारितं श्रेयस्तत् यद्यस्मान्नोऽस्माकमपि दृष्टस्त्वं, दृशेर्बुद्ध्यर्थत्वाद्वर्तमाने क्तः । अस्माभिर्दृश्यत इत्यर्थः । कीदृशानाम्–कुमेधसां, भक्तिमात्रहीनानामित्यर्थः । कीदृशोऽपि दृष्टः–भक्तियोगेश्वराणामपि चिरेण दृश्योपि । अतः केवलदीनवात्सल्येनैव दृष्ट इति भावः । तदेवाह–हे अधीश्वर परमस्वतंत्र । यद्वा–अधियां मादृग्दीनानामपि परिपालक ॥ ११ ॥ इति सँल्लापे । वार्षिकान् वर्षाकालसंबंधिनः । स कृष्णः । "अर्के चेन्मधु विंदेत किमर्थं पर्वतं व्रजेत् । इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत् ॥" इति न्यायेन क्रियाशेषीकरणयत्नं विनैवेहेष्टसिद्धेस्तन्न कार्यमित्याह–सुखमिति । राज्ञा स प्रभुः सुखं प्रतिवार्षिकान्मासानभ्यर्थितः प्रार्थितः । किं भूतं सुखम्–नयनयोरानंदो येन तत्तथा, यावद्वर्षाकालं दर्शनं प्रति प्रार्थित इति भावः ॥ * ॥ टीकाद्वितीयपक्षे सुखमभ्यर्थित इह अर्थेर्याच्यर्थत्वेन द्विकर्मकत्वं राजा धनं याचित इतिवत् । ततश्च वार्षिकान्मासान्व्याप्य तद्वासने सुखप्राप्तये निवेदित इत्यर्थः ॥ १२ ॥ एकदा कदाचित् । विजयोऽर्जुनः "विजयः स्याज्जये पार्थे स्त्रियां तिथ्यंतरे स्मृतः" इति मेदिनी । 'तूणी नल्यां निषङ्गे ना' इति च ॥ * ॥ एकदेति युग्मकम् । एकदा खांडवदाहानंतरम् । तदानीमेवार्जुनस्य गांडीवादिलाभात् । तथाप्यत्रोक्तिः सुखविहारप्रसंगात् । वानरः श्रीहनुमान् ॥ १३ ॥ [2]विपिनं गंभीरमशब्दं वा "अशब्दे विपिनं प्रोक्तं वनगंभीरयोरपि" इति धरणिः ॥ * ॥ ० ॥ १४ ॥ तत्र वने । विशेषतो घ्राणनशीलान् व्याघ्रानिति सूकरविशेषणं, तन्[3]मांसस्याभक्ष्यत्वात् । यद्वा–हिंसकत्वात्तानविध्यन्न तूपयोगार्थम् । महिषान् वन्यानेव । रुरून् कृष्णमृगान् 'रुरुः कृष्णमृगे दैत्ये' इति धरणिः । शरभानष्टापदान् । खड्गान् गंडकान् । शल्लकान् शल्यान् "शरभोष्टा पदमृगे करभे वानरांतरे" इति मेदिन्यादौ । "खड्गो गंडकशृंगासिबुद्धभेदेषु गंडके" इति मेदिनी ॥*॥ रुरवो मृगविशेषाः । शरभा अष्टापदाः । गवया गोसदृशाः । खड्गा गंडकाः॥१५॥तान् व्याघ्रादीन् । पर्वणि श्राद्धोचिते यज्ञोचिते काले । "बीभत्सुर्नाऽर्जुने क्रूरतृणात्मविकृतौ

१ अल्पाच्तरत्वेन पूर्वनिपातस्वीकारे त्वार्षत्वमत्र शरणम् । २ 'विपिनं वनम्' इति पाठमभिप्रेत्येदम् । ३ प्रसिद्धव्याघ्रमांसस्य ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ ॥ कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनाम् ॥ १७ ॥ तामासाद्य वरारोहां सुद्विजां रुचिराननाम् ॥ पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमाम् ॥ १८ ॥ का त्वं कस्यासि सुश्रोणि कुतोऽसि किं चिकीर्षसि ॥ मन्ये त्वां पतिमिच्छंतीं सर्वं कथय शोभने ॥ १९ ॥ कालिंद्युवाच ॥ अहं देवस्य सवितुर्दुहिता पतिमिच्छती ॥ विष्णुं वरेण्यं वरदं तपः परममास्थिता ॥ २० ॥ नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनम् ॥ तुष्यतां मे स भगवान्मुकुंदोऽनाथसंश्रयः ॥ २१ ॥

युधिष्ठिराय। मेध्यान्कर्मार्हान् । बीभत्सुरर्जुनः ॥ १६ ॥ १७ ॥ सख्या श्रीकृष्णेन ॥ १८ ॥ १९ ॥२०॥ अयं मां कामयेदित्याशंकायामाह । नान्यमिति॥२१॥

त्रिषु '' इति मेदिनी ॥ * ॥ तेषु मेध्याः कर्मार्हास्तान् राज्ञे राजानं याजयितुं निन्युः । राज्ञ इति–राज्ञि तस्य धर्मत्वादिति भावः । ये त्वमेध्या व्यालाद्यास्तेषां दुश्चेष्टानां मारणेनान्येषां कृतार्थता स्यादित्यभिप्रायेण ॥ ॥ १६ ॥ तत्र यमुनायाम् । कन्यां दीप्तामुत्पन्नरजसं पतिमिच्छन्तीम् । " अनवाप्तपतिः कन्या जातवीर्या वरार्थिनी " इत्युत्पलः ॥ * ॥ महान् रथो ययोस्तौ, तच्च रथारोहणे दूराद्ददृशुरिति भावः । चरंतीमिति–रथादिशब्दं श्रुत्वा स्वगोपनायेतस्ततो भ्रमंतीम् । यद्वा–तपश्चरन्तीम्, तप इति शेषः । तच्च श्रीकृष्णमनःप्रणिधानरूपं ज्ञेयम्, उभयथापि कन्याकर्तृकदर्शनं तद्वयेन जातमिति परस्परदर्शनं नोक्तम् । कृष्णाविति सनामत्वे नाप्यन्योन्यं सख्येन चित्ताकर्षणात् । ददृशत इति दर्शनं रूपं, चारु तद्यस्यास्तां परमसुंदरीमित्यर्थः ॥ १७ ॥ तां कालिंदीम् ॥ * ॥ तदेवाभिव्यंजयन्विशिनष्टि–वरेत्यादिना । अनुक्तमन्यदपि सौंदर्यमुद्दिशति–प्रमदासूत्तमामिति । सख्या प्रेषितः सन्नेव, न तु स्वयं तत्कामेनेत्यर्थः । तत्र सखिशब्दप्रयोगेण श्रीकृष्णस्याप्यसंकोचो दर्शितः । एवं रथादवरुह्य गत इति च ज्ञेयम् । तस्य प्रेषणञ्च स्वपत्नीत्वकामनया, अन्यथा स्वयमेवागमिष्यदिति भावः ॥ १८ ॥ कस्य पुत्र्यसि ॥ * ॥ का देवी मनुष्यादीनां मध्ये कतमा, किंनाम्नी चेत्यर्थः । कस्य वा पुत्र्यसि । अत्र कुतः स्थानादागतासीति कुत्र तिष्ठसीत्यर्थः । यद्वा–कस्माद्धेतोः किं कर्तुमिच्छसीत्यर्थः । कन्यामपरिणीतामत एव पतिमिच्छन्तीं मन्ये । सुश्रोणीत्यत्र हे परमसुंदरीत्येव विवक्षितम् । भगिनीशब्दे स्वसृत्वमात्रस्यैव रूढ्या तत्र तावन्मात्रस्य प्रतीतेः । वरारोहाशब्दस्याप्येवमेव गतिः कार्या । शोभने हे परमगुणवति, इत्यतः स्वानुरूपपरमसौन्दर्यादियुक्तमेव पतिमिच्छसीति भावः । कथय तत्सर्वं मया पृष्टं प्रत्युत्तरय । कन्यामित्यत्र ' सर्वम् ' इति पाठः क्वचित् । यद्वा–हे शोभने इति शोभनप्रकारेण कथयितुमर्हसीति भावः ॥ १९ ॥ वरेण्यं प्रार्थनीयम् ॥ * ॥ तत्र मदभीष्टादन्योऽयं पुरुष इत्याशंक्य सहसैव स्वाभिलषितं व्यनक्ति–अहमिति । देवस्येत्यादरे । तथापि देव्यस्मीति भावः । विष्णुं निजैश्वर्येण सर्वव्यापकम्, अतो वरेण्यं सर्वश्रेष्ठम्, अतो वरदं सर्वाभीष्टदम्, अतस्तमेव पतिमिच्छती ॥ २० ॥ अनाथसंश्रयो दीनदयालुः ॥ * ॥ श्रीनिकेतनं प्रेमभरेण सदा लक्ष्मीं बिभ्रतमपीत्यर्थः । यद्वा–श्रिय आश्रयम्, सापि यमाश्रितवती तं वा का न वृणीतेति । यद्वा–श्रियः सर्वस्याः संपदो निकेतनमिति ब्रह्मरुद्रादयोऽपि व्यावर्तिताः । वीर हे धर्मशूरेति । अन्यकामां त्वं नैवेच्छसीति भावः । नन्वसौ दुर्लभः । सत्यम्, दीनवात्सल्यात्स्वीकरोत्वित्याह–तुष्यतामिति । स विष्णुर्यतो भगवान् कारुण्याद्यशेषगुणयुक्तः । अत एव मुकुन्दः सर्वदुःखविमोचकः । किञ्च–अनाथजनस्य नाथांतरशून्यस्य संश्रयः शरणम् । यद्वा–भगवान् परमेश्वरोपि तुष्यतु यतोनाथसंश्रयः । ननु तस्मिन्नेव कुत ईदृशाग्रहस्तत्राह–मुकुंदः, अनन्यकामित्वात्तस्मादेव ममापि मोचनं भविष्यतीति भावः । यद्वा–भगवानशेषैश्वर्यप्रकटनपरः श्रीकृष्ण इत्यर्थः । य एवानाथसंश्रयो मुकुंदोऽसुराणामपि गतिप्रदत्वात्, श्रीवैकुंठनाथादयोपि व्यावर्तिताः । अनेन क्वचिदेतद्विरुद्धोयमयमिति संवादश्च परिहृतः । ' एवं वदंति राजर्षे ' इत्यादिवत् । किञ्च–यमुनेयं खलु द्विविधया मूर्त्या वर्तते–भगवत्प्रेयसीत्वेन साक्षाद्रूपया, सागरपत्नीत्वेनाभासरूपया च । यथैव श्रीद्वारकायां वर्तमानापि श्रीबलदेवेनाकृष्यमाणापि तं तुष्टावेति वक्ष्यते । तत आभासांशेनापि यदि स्यात्तथा धर्मरक्षार्थमवतीर्णतया लोकान्तरबिभीषिकार्थमेव तत्प्रपञ्चितमिति ज्ञेयम् ॥ **विश्वनाथस्तु**–तस्माच्चंक्रमाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालिंदीति समाख्याता वसामि यमुनाजले ॥ निर्मिते भवने पित्रा यावद च्युतदर्शनम् ॥ २२ ॥ तथाऽवदद्गुडाकेशो वासुदेवाय सोऽपि ताम् ॥ रथमारोप्य तद्विद्वान्धर्मराजमुपागमत् ॥ २३ ॥ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतम् ॥ कारयामास नगरं विचित्रं विश्वकर्मणा ॥ २४ ॥ भगवाँस्तत्र निवसन्स्वानां प्रियचिकीर्षया ॥ अग्नये खांडवं दातुमर्जुनस्यास सारथिः ॥ २५ ॥ सोऽग्निस्तुष्टो धनुरदाद्धयाञ्श्वेतान्रथं नृप ॥ अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः ॥ २६ ॥ मयश्च मोचितो वह्नेः सभां सख्य उपाहरत् ॥ यस्मिन्दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः ॥ २७ ॥

॥ २२ ॥ आदावेव तद्विद्वान् ॥ २३ ॥ प्रसंगात्तत्कालीनं चरित्रांतरमाह । यदैवेति । पार्थैर्यदैव संदिष्टो विज्ञापितः श्रीकृष्णस्तदैव तेषां विश्वकर्मणा देवशिल्पिना नगरं कारयामास ॥ २४ ॥ किञ्च । भगवान्निरतिशयैश्वर्यगुणवानप्यर्जुनस्य धनुरादिलाभाय सारथिरास । खांडवं नामेंद्रस्य वनम् ॥ २५ ॥ अक्षयावक्षयसायका ॥ २६ ॥ खांडवदाहकाद्वह्नेः । सख्ये अर्जुनाय । यस्मिन्निति सामान्यतो निर्देशः । यस्यामित्यर्थः । जलस्थलयोर्दर्शेर्दृष्टेर्भ्रमः । यद्वा जले स्थलवत् दृक् दृष्टिर्य

स्वनिष्ठां व्यतिरेकेणापि व्यंजयंत्याह—नान्यमिति। अनाथसंश्रय इति स एव मे नाथः स्वभक्तजनरक्षक इति विश्वासादेवाहमबला निर्जने वसंत्यपि पुरुषांतरान्न बिभेमीति भावः॥२१॥कालिं द्यति खंडयतीति कालिंदो विष्णुः । 'यशः कलिमलापहम्' इत्युक्तेः । तस्येयं प्रिया कालिंदी । 'कालिदमनकारकः' इति संमोहनोक्तेः कालिशब्दोपि कालियपरः, तं दयते पालयति गरुडादिति वा । कलिंदाद्रिरेरुद्भूता वा कालिंदी नदी, तस्यां वासाद्वा तन्नाम्नी । पित्रा सूर्येण । भवने गृहवदाधारे ॥ * ॥ एवं जात्यादिकं तत्पृष्टं कथयित्वा नामाह—कालिंदीति । यमुनाहं सममेकपर्यायं यथा स्यात्तथा ख्याता सती जले निजप्रभावमये वसामि । ननु जले वासस्तव मत्स्यानामिव सर्वत्र चरंत्याः स्यात्तत्राह—निर्मित इति । जल एव कयापि विद्यया पित्रा श्रीरविदेवेन निर्मिते भवन इति । तस्य केनाप्यतर्क्यत्वं स्वेच्छया सर्वत्र संचारित्वं च व्यंजितम् । स्नेहेन भवनस्योत्तमत्वं च सूचितम् । तथापि तास्मिन्मम मोहो नास्तीत्याह—यावदिति । अच्युतस्य 'न मे भक्तः प्रणश्यति' इति स्वप्रतिज्ञातच्युतिरहितस्य भगवतो दर्शनं तत्कर्तृकांगीकारं यावत्तावंतमेव कालं व्याप्येत्यर्थः । अत एव दर्शने सति तपःफलसिद्धया नानेन मम प्रयोजनमिति भावः ॥ अत्र **विश्वनाथः**—समाख्यातेति सूर्यस्य कन्यां मां न जानातीति स्वप्रभावं च ज्ञापयति । पित्रा निर्मित इति पितुः सूर्यस्याप्यहमतिवात्सल्यपात्रमिति मत्प्रातिकूल्ये को नाम प्रभवेदिति भावः ॥ २२ ॥ यथा कालिंदी ऊचे तथा गुडाकेशो जितनिद्रो वक्रकेशो वाऽर्जुनः । सोऽपि वासुदेवोपि । तत् कालिंदीवृत्तम् ॥ * ॥ रथमारोप्येति—अयि सुंदरि वरेण्ये विष्णुरहमेवेत्यतः स्वपित्रुपदिष्टमदीयध्यानस्य स्वीयशुद्धहृदयोत्थभावस्य च प्रामाण्यादेव त्वं मां परिचिन्वित्युक्त्वा तस्या रथारुरुक्षामुत्पाद्यैवेति भावः । तां गृहीत्वा रथमारुह्येत्यनुक्तेः । तद्विद्वानिति पूर्वमेव तदर्थं गत इति भावः । धर्मराजमिति—धर्मज्ञतया तेनापि सर्वमबुध्यतैवेति भावः ॥ २३ ॥ नगरमिंद्रप्रस्थावांतरमेव ॥ * ॥ धर्मराजादीनां सर्वेषां प्रकारांतरेण हितमाचरदिति पूर्वकथामाह—यदेति चतुर्भिः । तत्रायं क्रमः—पूर्वं नगररचनं, ततः खांडवदाहः, ततः सभाहरणं, ततः कालिंदीलाभः । एवशब्देन पार्थवाग्वश्यत्वं तस्य बोधयति । परमाद्भुतत्वे हेतुः—विचित्रम्, चतुर्दशभुवनवार्तीविविधशोभाढ्यमित्यर्थः ॥ २४ ॥ न केवलं नगरमेव कारयामास, किन्तु बहुचित्रशस्त्रसभाद्यपि दापयामासेत्याह—किञ्चेति । तत्र नगरे ॥ * ॥ ० ॥ २५ ॥ यस्मै खांडवं दत्तं स इत्यर्थः । धनुर्गांडीवम् । [1]चर्मोच्छूरिका ॥ * ॥ स उपभुक्तखांडवः । हे नृपेति पितामहस्य तत्तल्लाभेन प्रहर्षात् । यद्वा—हे नृपेति तव नृपत्वमपि तत्प्रभावादेवेति भावः । अग्निरेव कृष्णाय चक्रमप्यादादित्यन्यत्र प्रसिद्धेरत्र नोक्तम् ॥ २६ ॥ सामान्यतः यत्रेत्यर्थः । प्रथमसमासेऽधिकरणं

१ वर्मेत्यत्र चर्मेति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः ॥ आययौ द्वारकां भूयः सात्यकिप्रमुखैर्वृतः ॥२८॥ अथोपयेमे कालिंदीं सुपुण्यर्त्वृक्ष ऊर्जिते ॥ वितन्वन्परमानंदं स्वानां परममंगलम् ॥ २९ ॥ विंदानुविंदावावंत्यौ दुर्योधनवशानुगौ ॥ स्वयं वरे स्वभगिनीं कृष्णे सक्तां न्यषेधताम् ॥ ३० ॥ राजाधिदेव्यास्तनयां मित्रविंदां पितृष्वसुः ॥ प्रसह्य हृतवान्कृष्णो राजन्राज्ञां प्रपश्यताम् ॥ ३१ ॥ नग्नजिन्नाम कौशल्य आसीद्राजाऽतिधार्मिकः ॥ तस्य सत्याऽभवत्कन्या देवी नाग्नजिती नृप ॥ ३२ ॥ न तां शेकुर्नृपा वोढुमजित्वा सप्त गोवृषान् ॥ तीक्ष्णशृंगान्सुदुर्धर्षान्वीरगंधासहान्खलान् ॥ ३३ ॥ तां श्रुत्वा वृषजिल्लभ्यां भगवान्सात्वतां पतिः ॥ जगाम कौशल्यपुरं सैन्येन महता वृतः ॥ ३४ ॥

स्मिंस्तज्जलस्थलदृक् तस्मिन् भ्रम आसीदिति ॥ २७ ॥ २८ ॥ सुपुण्य ऋतुः ऋक्षं च यस्मिन् ॥ २९ ॥ पंचमं मित्रविंदाविवाहमाह । विंदानुविंदाविति द्वाभ्याम् । आवंत्यावंवंत्यराजानौ ॥ ३० ॥ ३१ ॥ षष्ठमाह । नग्नजिदिति । कौशल्योऽयोध्यापतिस्तस्य नाम कन्याऽभवदासीत् । देवी कांतिमती । नाग्नजितीति पितृनाम्ना प्रसिद्धेत्यर्थः ॥ ३२ ॥ वीरस्य गंधमपि न सहंत इति तथा तान् । खलान् दुर्वृत्तान् ॥ ३३ ॥ वृषान् जयति यस्तेन लभ्याम् ॥ ३४ ॥

भ्रमस्य न ज्ञायतेऽत आह–यद्वेति । जलस्थलदृक् सभैकदेशस्तत्र भ्रम इत्यर्थः ॥ * ॥ मोचितो भगवता ॥ २७ ॥ स कृष्णः । तेन युधिष्ठिरेण ॥ * ॥ एवं पूर्ववृत्तमुक्त्वा कालिंद्यानयनोत्तरं वृत्तमाह–स इति । तेन धर्मराजेन सम्यगनुज्ञातः वारंवार जिगमिषन्नपि महास्निग्धस्य तस्यानुज्ञामनत्यंतां बुद्ध्वा पूर्वं न चचाल । अधुना श्रीकालिंदीविवाहापेक्षया तां प्राप्तः सन्निति स शब्दार्थः । सुहृद्भिरर्जुनादिभिः ॥ २८ ॥ अथ द्वारकाप्राप्तेरनन्तरम् । ऊर्जितेऽतिबलवति, काले इत्यर्थः ॥ * ॥ सुपुण्ये विवाहादिप्रशस्ते, ऋतौ वसन्तादौ, ऋक्षे च रोहिण्यादौ च द्वंद्वैक्यम् । तत्राप्यूर्जिते ऋतौ, रविशुद्ध्यादियुक्ते, ऋक्षे तु संपदाद्येकतरे, शुभचन्द्रे शुभग्रहयुक्ते दृष्टे च विहित इत्यर्थः । स्वत एव परममंगलोपि इति लोकशिक्षार्थमेव तत्तदपेक्षेति भावः । यद्वा–परममंगलम् । तत्प्रभावेण स्वयमेव सर्वमंगलोपसत्तेरित्यर्थः ॥ २९ ॥ दुर्योधनस्य वशानुगौ प्रियानुगौ । ‘ त्रिष्वायत्ते वशोऽभीष्टे ’ इति निरुक्तिः ॥ * ॥ स्वयंवरेपि कृष्णे सक्तां न्यषेधताम् ॥ ३० ॥ पितृष्वसुः वसुदेवभगिन्या राजाधिदेवीतिनामवत्याः ॥ * ॥ पितृष्वसुरिति–यदुवंशे स्वसम्बन्धिविवाहस्याचारप्राप्तत्वान्न दोष इति भावः । यद्वा–हरिवंशोक्तरीत्या यदुवंशो द्विधा–सौरश्चांद्रश्च, तदग्रे वर्णयिष्यामः । किञ्च–कृष्णः “ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ” इति रीत्या कृष्यमाणचित्तत्वादपि तन्नामेत्यर्थः । शिबिदेशोद्भवत्वादस्या एव शैब्येति नाम । अत एवाग्रे कुरुक्षेत्रे यात्रायां श्रीद्रौपदीप्रश्ने शैब्य इति संबोधनं, व्याख्यातञ्च तैः–शैब्या मित्रविन्देति ॥ ३१ ॥ विवाहांतरमाह–नग्नजिदिति । “ वेदो हि सर्वलोकानां वस्त्रवद्रक्षकः स्मृतः । तद्धीनः प्रोच्यते नग्नस्तज्जेता नग्नजिन्मतः ॥” इत्यन्वर्थनामा । तत्र हेतुः–अतिधार्मिक इति । इत्यर्थ इति–न तु तस्या इदं नामेति भावः ॥ * ॥ अतिधार्मिको भगवद्धर्मपर इत्यर्थः ॥३२॥ तां सत्याम् । वीरान् शूरान् गंधयंति हिंसन्तीति वीरगन्धाः शूरोत्तमास्तैरपि न सह्यन्त इति । तथा वीरं राहुं गंधयत्यल्पीकरोतीति वीरगन्धो विष्णुस्तदसहान् असुरावतारत्वात्तेषामिति । तन्त्रान्तरे विष्णुनैव सर्वांगत्यागपूर्वं शिरोरूपत्वेन शेषणाद्राहुरल्पीकृत इत्युक्तमधस्तात् । “ वीरो राहौ हरौ शक्रे भटे पुत्रे रसांतरे । भ्रातरि शंकरगणे वीरा पतिसुतान्विता ॥ ” इति यादवः । ‘ गंध–हिंसालेशयोः’ धातुः “ घ्राणग्राह्यगुणे गंधो लेशे ग्राहे च मारणे ” इति च ॥ * ॥ स च तां श्रीभगवते दातुमिच्छन्नपि दुष्टजरासंधादिभ्यो बिभ्यदुपायमकरोदित्यभिप्रेत्याह–नेति । गोवृषानिति गोबलीवर्दवदधिकार्थम् । यद्वा–वृषश्रेष्ठान् । यद्वा–गोषु धेनुषु स्थितानदान्तान् वृषाञ्जित्वा बंधनादिना वशान्कृत्वा । खलान् हिंस्रानसुरस्वभावत्वात् । तच्च द्वितीयस्कंधे ‘ ये च प्रलम्ब–’ इत्यादौ सप्तोक्षणामपि गणनान्मुक्तिकथनाच्च । मुक्तिश्च भगवत्स्पर्शप्रभावेण देहान्ते ज्ञेया ॥ ३३ ॥ लभ्यां लब्धुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स कोशलपतिः प्रीतः प्रत्युत्थानासनादिभिः ॥ अर्हणेनापि गुरुणा पूजयन्प्रतिनंदितः ॥ ३५ ॥ वरं विलोक्याभिमतं समागतं नरेंद्रकन्या चकमे रमापतिम् ॥ भूयादयं मे पतिराशिषोऽमलाः करोतु सत्या यदि मे धृतो व्रतैः ॥ ३६ ॥ यत्पादपंकजरजः शिरसा बिभर्ति श्रीरब्जजः सगिरिशः सह लोकपालैः ॥ लीलातनूः स्वकृतसेतुपरीप्सयेशः काले दधत्स भगवान्मम केन तुष्येत् ॥ ३७ ॥ अर्चितं पुनरित्याह नारायण जगत्पते ॥ आत्मानंदेन पूर्णस्य करवाणि किमल्पकः॥३८॥श्रीशुक उवाच ॥ तमाह भगवान्हृष्टः कृतासनपरिग्रहः ॥ मेघगंभीरया वाचा सस्मितं कुरुनंदन॥३९॥

प्रतिनंदितस्तं प्रतिनंदितवान् । श्रीकृष्णेन वा स प्रतिनंदितः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

योग्याम् ॥ * ॥ भगवान्सर्वशक्तियुतः । सात्वतां भक्तानां पतिः, पलनशीलः । अतस्तत्रैव महता सैन्येनावृतः । सैन्येनेति राजांतरभयदानार्थमेव ॥ ३४ ॥ प्रतिनंदितो जातश्लाघः । तं कृष्णम् । गुरुणाधिकतरेणार्हणेन पूजनसामग्र्याऽपूजयत्प्रतिनंदितवान् । वृद्धत्वात्तं श्रीकृष्णोऽप्याद्रतवानित्याह—श्रीकृष्णेनेति । गुरुणा सर्वश्रेष्ठेन । अर्हणेन सर्वपूज्येनापि स नग्नजित् प्रतिनंदितो वाचाऽपूजीत्यर्थः । "गुरुस्तु गीष्पतौ श्रेष्ठे गुरुः पितरि दुर्भरे" इत्युज्ज्वलः ॥ * ॥ स च तस्मा एव कन्यां दातुं कृततादृशव्याजः । अत एव प्रीतः प्रथमस्तावल्लौकिकरीत्याऽसनादिभिः पूजयन् पुनरर्चनरीत्या तु अर्हणेनोद्वाहोचिततत्तद्द्रव्येणाप्यपूजयदिति ध्येयम् ॥ ३९ ॥ अभिमतमभीप्सितम् । वरं वरणयोग्यं जामातरम् "वरो ना रूपजामात्रोर्देवादेरीप्सितावृतौ" इति यादवः । चकमे इयेष । आशिषः अभिलाषान् "आशीराश्यहिदंष्ट्रायां शुभवाक्याभिलाषयोः" इति यादवः । यदि मे मया व्रतः व्रतसमूहोऽधृत । धरतेः कर्मणि लुङ् । चिणभावस्त्वार्षः । व्रतानां समूह इत्यस्मिन्नर्थेऽच्प्रत्ययः । यद्वा—मे आशिषः धृतं व्रतं मद्विवाहनियमो येन स कृष्णः सत्याः करोत्वित्यर्थः ॥ * ॥ एवं सदसि वृत्तमुक्तं, ततश्चात्मीयैः सहाभ्यंतरकक्षामानीते भगवति वृत्तमाह—वरमिति । विलोक्य चंद्रशालागवाक्षत इति ज्ञेयम् । अभिमतमात्मनश्चिरादभीष्टम्, सर्वेषाञ्च संमतमित्यर्थः । यतः रमायाः पूर्णलक्ष्मीरूपाया रुक्मिण्या अपि पतिं, तया पतित्वेन नित्यमाश्रितमिति सर्वोत्तमगुणमित्यर्थः । अतः सापत्नदुःखमपि न वितर्कितमिति भावः । सम्यग् वरौचित्येनांतःपुरपर्यंतमागतं विलोक्य साक्षाद्दृष्ट्वा चकमे, भावविशेषेण क्षुभ्यंती संकल्पयामासेत्यर्थः । नरेंद्रस्य कन्येति कौशल्येन क्षोभाऽसहत्वं दर्शितम् । संकल्पमेवाह—भूयादिति । अनेलश्चिरमिष्टदेवतात्वेनाभ्यर्चितोऽग्निर्मे आशिषो वांछितानि सत्याः सफलाः करोतु । अत्रोत्कंठास्वाभाव्येन सम्यक्त्वेऽपि संदिहानेव सास्रगद्गदमाह—यदीति । यदि तत्पूजादिनियमो यत्नेन रक्षित इति । 'आशिषोऽमलाः' इति पाठेऽयं पतिरेव परमेश्वरत्वेन सत्याः करोत्वित्यन्वयः ॥ ३६ ॥ स्वकृतसेतुपरीप्सया स्वकल्पितवर्णाश्रमधर्मलक्षणसेतुपालनेच्छया । मम केन स्वीयेन कर्मणा तुष्यत्वित्यर्थः ॥ * ॥ पुनस्तस्य माहात्म्यविशेषेण तदेवोपपादयति—यदिति । श्र्यादीनां यथापूर्वं श्रैष्ठ्यम्, तथा निर्देशश्च कनिष्ठकनिष्ठक्रमेण निजातितुच्छतां बोधयितुम् । तत्राब्जजाद्गिरिशस्य कनिष्ठत्वं, पुत्रत्वेन शिष्यत्वव्यवहारात् । अब्जजस्य साक्षादेव श्रीकृष्णाष्टादशाक्षरोपासकत्वाच्च । योदधत् अदधादिति सर्वावतारित्वं सूचितम् । 'परीप्सयेशः' इति क्वचित्पाठः । परीप्सया परिपालनेच्छयेत्यर्थः । यः स्वयमधुना वर्तते स इति **विश्वनाथः** । 'कृष्णस्तु भगवान्स्वयम्' इत्यादौ प्रसिद्धो भगवान् केन हेतुना साधनेन वा ममाधमस्य भूयात्, तन्न संभावयामीत्यर्थः ॥ ३७ ॥ अल्पकः अतितुच्छः ॥ * ॥ अर्चितं पुनरिति—अर्चितं तु संतमित्यर्थः । नग्नजिदिति शेषः । नारायण हे सर्वजीवाश्रय । अतो जगत्पते सर्वद्रव्यस्वामिन् । विशेषतः स्वानंदपूर्णस्य तवेत्याद्यप्रयोगस्तथाग्रे प्रत्यक्षत्वेऽपि परोक्षवादः परमगौरवात् । अहं तव किं करवाणि, तत्राप्यल्पकः अल्पतोऽप्यल्पः ॥ ३८ ॥ तं नग्नजितम् ॥ * ॥ तमाहेत्यर्धेन

१ 'मे धृत व्रतः' इति पा० । २ 'आशिषोऽनलः' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ नरेंद्र याच्ञा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्तिनः ॥ तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां न हि शुल्कदा वयम् ॥ ४० ॥ राजोवाच ॥ कोऽन्यस्तेऽभ्यधिको नाथ कन्यावर इहेप्सितः ॥ गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी ॥ ४१ ॥ किं त्वस्माभिः कृतः पूर्वं समयः सात्वतर्षभ ॥ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ॥४२॥ सप्तैते गोवृषा वीर दुर्दांता दुरवग्रहाः ॥ एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्मजाः ॥ ४३ ॥

हे नरेंद्र । राजन्यबंधोः क्षत्रियस्य । शुल्कदा द्रव्यादिप्रदाः ॥ ४० ॥ गुणानामेकमेव धाम स्थानं तथाभूतस्य यस्य तवांगे ॥ ४१ ॥ ४२ ॥ दुर्दांता अशिक्षिताः । दुरवग्रहा अपरायत्ताः । कुतस्तदाह । एतैरिति । भग्ना भंगं प्रापिताः ॥ ४३ ॥

तस्य भाग्यस्य सूचनम् । तत्रापि मेघेत्यर्द्धेन तन्माधुर्यकृपाभ्यां हृतमनस्त्वस्य । कृतः आसनस्य चिरमार्पितस्यापि परिग्रहः स्वीकारो येन स इति निजाभिलषितस्य परस्वीकारेण मुदा सम्यगुपवेशात् । सस्मितमिति स्वभावादेव, तत्रापि विशेषतः स्वाभिलषितलाभादेव किंचिल्लज्जातश्च । अत एव कौतुकात्संबोधयति—हे कुरुनंदनेति । श्रीकृष्णयशःश्रवणेन स्ववंशमूलकुरुरपि त्वया नंदितोस्ति । ''नंदंति स्वकुलोद्भूतं दृष्ट्वा विष्णुपरायणम् । स्वर्गताः पितरोऽनेन वयं धन्यीकृता इति ॥ '' इति विष्णुधर्मोत्तरोक्तन्यायेनेति भावः ॥ ३९ ॥ यद्यपि गर्हिता तथापीत्यन्वयः । '' शुल्कं घट्टादिदेये स्याद्वरादर्थग्रहेऽस्त्रियाम् '' इति मेदिनी ॥ * ॥ तादृशोऽप्यहं स्वजनप्रेमानंदमयनरलीलामेवानुसरन्नस्मि, तत्रापि त्वद्विधप्रेम्णा क्वचित्तदुचितमर्यादामुल्लंघयन्नस्मीति सिद्धांतव्यंजिकया क्षत्रियोचितप्रार्थनाचातुर्याऽऽह—। नरेन्द्रेति, श्वशुरोचितामंत्रणं संबंधस्य दृढीभावाय । वस्तुतस्तु याचकेनादावेव प्रभुः स्तोतव्यः, पश्चान्निजार्थप्रकाशनं कार्यमिति बोधनायैवेति । यद्वा—त्वं नरेषु इंद्र इवाभिलषितवर्षणादिति भावः । यद्वा—त्वं न केवलं नृपः किन्तु नरेन्द्रोऽसीति । षोडशयोजनमितभूशास्ता नृपः, ततः शतगुणाधिको नरेन्द्र इति विवृतं ब्रह्मवैवर्ते । अर्थाच्छतशो नृपा अपि त्वदाज्ञां धारयन्ति नराणान्तु का कथात्रेति भावः । व्यासाद्यैः क्षत्रियाधमस्य याच्ञा विशेषेण गर्हिता निन्दिता । तत्र निजधर्ममाश्रितस्य क्षत्रियस्य तु सर्वथैव सा निंद्या, मम तु सर्वक्षत्रियश्रेष्ठस्य का तत्र कथेति भावः । '' वाल्मीकिव्यासवासिष्ठमुख्या हि कवयो मताः '' इत्युक्तेर्व्यासादयः कवयो मुख्यधर्मप्रणेतारस्तदनुगता अन्येपीति ज्ञेयम् । हरणस्यैव क्षत्रियधर्मत्वात् । सौहृदेच्छया त्वया सह सुसम्बंधार्थम् । यद्वा—तव यत्सौहृदं मयि प्रेम तेन या मदिच्छा तया । क्षत्रियधर्ममेव कथयन्बलीवर्दबंधनरूपं तच्छुल्कं विचार्य निगूढनर्माह—न हीति । वयं क्षत्रियाः । शुल्कदा द्रव्यदायिन इत्यर्थः ॥ ४० ॥ एकमेव मुख्यमेव ॥ * ॥ श्रीः सर्वगुणाश्रयरूपापि । गुणैकधाम्न इति यद्गुणवशीकृतत्वादेवेत्यर्थः ॥ ४१ ॥ समयः संकेतः '' समयः शपथाचारसिद्धान्तेषु तथा धियि । क्रियाकारे च निर्देशे संकेते कालभाषयोः ॥ '' इति मेदिनी । कन्याया वरपरीप्सया वरेच्छया ॥ * ॥ वयमपि न शुल्कग्राहिण इत्याह—किन्त्विति । अस्माभिरिति बहुत्वेन निजज्ञातिबांधवसंग्रहः । समयो नियमः । तं द्रढयति—कन्याया वरस्य धवतायोग्यस्य तव परीप्सया, पुंसां वीर्यस्य बलस्य च परीक्षार्थम् । पाठांतरे कन्याया यो वरस्तस्य या परीक्षा तया हेतुना । स चास्माकं समयः पालयितव्य एवेति संबोधयति—हे सात्वतानां भक्तानामृषभ परिपालक॥ **विश्वनाथोऽपि**—कन्याया वरप्राप्तीच्छया पुंसां वीर्यपरीक्षा तदर्थम् । अन्यथा मत्कन्यायाः सर्व एव नृपाः प्रार्थकाः । ते मया कथं प्रत्याख्येया इति भावः । कन्याया वरः श्रुतगुणरूपस्त्वमेव वरणीयस्तस्य तव प्राप्त्यर्थमित्यर्थ एव वास्तवः ॥ ४२ ॥ अपरायत्ता अपराधीनाः ' अधीनो निघ्न आयत्तः ' इत्यमरः । परानायत्तत्वे हेतुमाशंक्य समाधत्ते—कुत इति । तत्

१ ' कन्यावरपरीक्षया ' इति पाठे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदीमे निगृहीताः स्युस्त्वयैव यदुनंदन ॥ वरो भवानाभिमतो दुहितुर्मे श्रियः पते ॥ ४४ ॥ एवं समयमाकर्ण्य बद्ध्वा परिकरं प्रभुः ॥ आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ॥ ४५ ॥ बद्ध्वा तान्दामभिः शौरिर्हतदर्पान्हतौजसः ॥ व्यकर्षल्लीलया बद्धान्बालो दारुमयान्यथा ॥ ४६ ॥ ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः ॥ तां प्रत्यगृह्णाद्भगवान्विधिवत्सदृशीं प्रभुः ॥ ४७ ॥ राजपत्न्यश्च दुहितुः कृष्णं लब्ध्वा प्रियं पतिम् ॥ लेभिरे परमानंदं जातश्च परमोत्सवः ॥ ४८ ॥ शंखभेर्यानका नेदुर्गीतवाद्यद्विजाशिषः ॥ नरा नार्यः प्रमुदिताः सुवासः स्रगलंकृताः ॥ ४९ ॥ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः ॥ युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससाम् ॥ ५० ॥ नव नागसहस्राणि नागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ॥ ५१ ॥ दंपती रथमारोप्य महत्या सेनया वृतौ ॥ स्नेहप्रक्लिन्नहृदयो यापयामास कौशलः ॥ ५२ ॥ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकाम् ॥ भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ॥ ५३ ॥

यद्यदीमे गोवृषा निगृहीता दमिता नाथिता इति यावत् ॥ ४४ ॥ एतान्यो निगृह्णाति तस्य कन्येति समयः कृतस्तम् । सप्तधा कृत्वेति बह्वीनां योषितां संपूर्ण एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्यसापत्न्यप्रदर्शनार्थमात्मनः सप्तधा करणम् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ निष्कग्रीवाश्च ताः सुवाससश्च तासां युवतीनां च दासीनाम् ॥ ५० ॥ नागान्नागेभ्यः शतगुणान्नवलक्षाणि । रथाद्रथेभ्यः शतगुणान्नवकोटीः । अश्वादश्वेभ्यः शतगुणान्नव पद्मानि ॥ ५१ ॥ ५२ ॥ यदुभिर्गोवृषैश्च

परानधीनत्वम् । एतैर्वृषैः ॥ * ॥ इत्थं स्वदोषं स्ववर्गदोषं च परिजहार । समयमेवाह–सप्तेति । तत इति तदंगीकारमुपलभ्य वृषवासं तेन गत्वांगुल्या निर्दिशति–एतैर्भिन्नगात्रा अतो भग्नाः, एतद्व्याजेन भवद्विरोधिनां तेषां शांतिरेवास्माभिर्घटितेति भावः । हे वीरेति–तत्र वीर्येण तु निग्राह्या भविष्यंतीति भावः ॥ ४३ ॥ अभिमत उचितः ॥ * ॥ यदीति निश्चये । ‘ धत्से पदं त्वमविता यदि विघ्नमूर्ध्नि ’ इतिवत् । यद्वा–यद्यस्मात्त्वयैव निगृहीता एव स्युः बलवत्त्वेनान्यैरशक्यत्वात् वृषत्वेनातिपीडयितुमयुक्तत्वाच्च तस्मादनेन प्रबंधेन भवानेव वरोऽभिमतः, पूर्वमेवावधारितः, तस्मादस्माकं प्रतिज्ञाया मनोरथस्य च पूरणार्थं भवतैतत्कार्यमेवेति भावः । हे यदुनंदनेति–यदुकुलनंदनार्थमपि त्वयैतत्कार्यं चेति भावः । यद्वा–यदुकुलनंदनस्त्वमस्मत्कुलमपि नंदयिष्यसि, कुलनन्दकस्वभावत्वादिति भावः । हे श्रियः पते इति–श्रीर्यथा सर्वान्देवासुरादींस्त्यक्त्वा त्वामेव वृतवती तथा मम कन्येयमपि श्र्यंशत्वेन त्वामेव वरिष्यतीति भावः । देवासुरनिग्रहं कृत्वा श्रियं प्राप्तवतस्तवैतन्निग्रहो न ह्यशक्योतस्त्वमेव वरो निर्णीतः । वृषास्त्विमे त्वद्विद्वेषिवधार्थमेव स्थापिता इति संबुद्ध्यभिप्रायः ॥ ४४ ॥ परिकरं दृढगात्रिकाबन्धम् । एतान्वृषान् निगृह्णाति स्वायत्तीकरोति तं समयम् ॥ * ॥ सप्तधेति स्वामिचरणैर्व्याख्यातमेव । आकर्ण्याकर्णनानन्तरमेव स्मित्वेति ज्ञेयम् । परिकरं वस्त्रादिपरिच्छदं दृढं बद्ध्वा, यतः प्रभुः सर्वत्र समर्थः । यद्वा–गोपलीलाभ्यासादेव तत्र समर्थः । आत्मानं श्रीविग्रहं कृत्वा प्रकाश्य । एवशब्दोत्रेवार्थे । सप्तधा कृत्वेव क्षिप्रकारित्वादिति भावः ॥ ४५ ॥ तान् वृषान् ॥ * ॥ ० ॥ ४६ ॥ ततो वृषबंधनोत्तरम् । तां सत्याम् ॥ * ॥ विस्मितः अकस्मात्तादृशस्वभाग्यफलोदयात् । प्रत्यगृह्णात् उद्वहति स्म । अन्यत्स्पष्टम् ॥ ४७ ॥ चाद्राजापि ॥ * ॥ ० ॥ ४८ ॥ गीतादयः–अभूवन्निति शेषः ॥ * ॥ ० ॥ ४९ ॥ युवतिपदमत्र दासीपरम् ॥*॥०॥५०॥ नागादित्यादित्रिक एकत्वं सामान्याभिप्रायम् ॥*॥०॥५१॥ रथमारोप्य रथे स्थापयित्वा ॥*॥ ० ॥५२॥ एतद्वृषबंधनपुरःसरं सत्योद्वहनम् । कन्यकां नयंतं प्राप्नुवन्तम् । ‘यदेभिर्गोवृषैः’

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानस्यतः शरव्रातान्बंधुप्रियकृदर्जुनः ॥ गांडीवी कालयामास सिंहः क्षुद्रमृगानिव ॥ ५४ ॥ पारिबर्हमुपागृह्य द्वारकामेत्य सत्यया ॥ रेमे यदूनामृषभो भगवान्देवकीसुतः ॥ ५५ ॥ श्रुतकीर्तेः सुतां भद्रामुपयेमे पितृष्वसुः ॥ कैकेयीं भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ॥ ५६ ॥ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युताम् ॥ स्वयंवरे जहारैकः स सुपर्णः सुधामिव ॥ ५७ ॥ अन्याश्चैवंविधा भार्याः कृष्णस्यासन्सहस्रशः ॥ भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ॥ ५८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे उत्तरार्धेऽष्टमहिष्युद्वाहो नामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥

॥ राजोवाच ॥ यथा हतो भगवता भौमो येन च ताः स्त्रियः ॥ निरुद्धा एतदाचक्ष्व विक्रमं शार्ङ्गधन्वनः ॥ १ ॥ श्रीशुक उवाच ॥ इंद्रेण हृतच्छत्रेण हृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितम् ॥ २ ॥

भग्नवीर्या अपि सुदुर्मर्षा असहनशीला रुरुधुः ॥ ५३ ॥ अस्यतः क्षिपतः प्रयुंजानानिति यावत् ॥ ५४ ॥ ५५ ॥ सप्तमं विवाहमाह । श्रुतकीर्तेरिति । श्रुतकीर्तिर्नाम या पितृष्वसा तस्याः सुतां भद्रां नाम कैकेयीं तद्देशजाम् ॥ ५६ ॥ अष्टमं विवाहमाह । सुतां चेति । एक एव स श्रीकृष्णो लक्ष्मणां जहार ॥ ५७ ॥ तस्य निरोधोंतःपुरं तस्मात् ॥ ५८ ॥ भैष्मी जांबवती भामा सत्या भद्रा च लक्ष्मणा ॥ कालिंदी मित्रविंदा चेत्यष्टौ पट्टमहास्त्रियः ॥ १ ॥ इति श्रीमद्भागवते दशमस्कंधे उत्तरार्धे श्रीध० टीकायामष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ऊनषष्टितमे भौमं हत्वा तेनाहृता हरिः ॥ कन्याः सहस्रशः प्राप पारिजातं दिवोऽहरत् ॥ १ ॥ परिणीय ततस्ताभिस्तन्मनोरथपूरणैः ॥ आत्मारामोऽप्यसौ रेमे तद्गृहेषु गृहस्थवत् ॥ २ ॥ येन ताः स्त्रियो निरुद्धाः स भौमः । चकाराद्येन कारणेन हतस्तदाचक्ष्वेति ॥ १ ॥ इंद्रेण भौमविचेष्टितं ज्ञापितः

इति पाठे तु यत् ये एभिर्नग्नजिद्गृहस्थैः । सुदुर्मर्षा असहन्तः ॥*॥ रुरुधुरिति—विधिवद्विवाहे विलंबत्वाद्देशांतरान्नृपा आगता इति ॥५३॥ तान् रुन्धानन्नृपान् । गाण्डीवीत्यनेनार्जुनसाहित्यं दर्शितं कौशलपुरगमने ॥*॥ तत्रार्जुनस्यागमनं विवाहदर्शनार्थं निगूढसमाह्वानेनैव ज्ञेयम् । स्पष्टम् ॥ ५४ ॥ उपागृह्य सर्वमविकलमानीय ॥ * ॥ ० ॥ ५५ ॥ पितृष्वसा वसुदेवभगिनी । तद्देशजां केकयदेशोद्भूताम् ॥ * ॥ ० ॥ ५६ ॥ मद्रो विपाशैरावत्यंतर्गतो देशविशेषस्तदधिपतेर्बृहत्सेनस्य । लक्षणैः कन्योचितचिह्नैर्युताम् । लक्षणानि रुक्मिण्युद्वाह उक्तानि ॥ * ॥ ० ॥ ५७ ॥ निरोधाद् अदृश्यस्थानादंतःपुरस्थकारागारात् 'निरोधो नाशरोधयोः' इति मेदिनी ॥ * ॥ भौमं भूम्याः सुतं श्रीवराहात्तस्यां जातम् । तदुक्तं भूम्यैव विष्णुं प्रति विष्णुपुराणे—"यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । त्वत्स्पर्शसंभवः पुत्रस्तदायं मय्यजायत ॥" इति महाप्रभावोऽसूचि तस्य ॥ ५८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्धेऽष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ ऊनषष्टितमे एकोनषष्टितमे । तेन भौमेन । पारिजातं देववृक्षम् (१) । ततः परिणयनोत्तरम् । असौ कृष्णः । इह वतिना गृहासक्त्यभावो ध्वनितः (२) । " यदाहमुद्धृता नाथ त्वया सूकरमूर्तिना । त्वत्स्पर्शसंभवः पुत्रस्तदाऽयं मय्यजायत ॥ सोऽयं त्वयैव दत्तोऽयं त्वयैव विनिपातितः । " इति विष्णुपुराणोक्तेः स विष्णोरपि पुत्र एव, दैत्यत्वं तु तस्य निषिद्धचारमूर्तिसूकरोद्धृतत्वाद्धरेरिच्छयैव । कुकर्मकर्तृत्वात्तस्य हननं युक्तमेव, सुकर्मकर्तुः प्रह्लादस्यारिपुत्रत्वेपि रक्षणं च दंडदातुरुचितमेवेति द्योतनायास्याध्यायस्यारम्भ इति ध्येयम् । येन भौमेन ॥ * ॥ शार्ङ्गधन्वन इति शार्ङ्गसंबन्धित्वादेतच्छ्रवणेऽतीव मे प्रीतिरिति सूचितम् ॥ १ ॥ अन्वयः सार्धद्वयेन संबंधः । अमराद्रौ मेरौ । तस्यैवेंद्रस्यैव । तस्याः सत्यभामायाः । कौतुकायाद्भुतं दर्शयितुम् । तया सत्यभामया स्त्रिया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सभार्यो गरुडारूढः प्राग्ज्योतिषपुरं ययौ ॥ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमम् ॥ मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतम् ॥ ३ ॥
गदया निर्बिभेदाद्रीञ्छस्त्रदुर्गाणि सायकैः ॥ चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ॥ ४ ॥

सन्प्राग्ज्योतिषपुरं भौमनगरं ययावित्यन्वयः । किंभूतेन । हृतं छत्रं यस्य तेन । लोकपालप्रधानत्वादिंद्रस्य वरुणच्छत्रहरणेऽपि तस्यैव मानभंग इति तथोक्तम् । हृते कुंडले यस्याः सा अदितिर्बंधुर्माता यस्य तेन । हृतममराद्रौ स्थानं मणिपर्वतलक्षणं यस्य तेन । सत्यभामाया गृहे भगवंतमिंद्र आगत्य विज्ञापितवाँस्तदा तस्याः कौतुकाय तया भार्यया सह ययाविति । यद्वा त्वदनुज्ञयैव त्वत्पुत्रं हनिष्यामीति इतिहासोक्तं भूम्यै वरं दत्तं सत्यं कर्तुं सत्यभामाया भूम्यंशत्वात्तया सह ययौ । यद्वा नारदानीतपारिजातककुसुमे रुक्मिण्यै दत्ते सति कुपितां सत्यभामां सांत्वयता तुभ्यं पारिजातमेव दास्यामीति श्रीकृष्णेन प्रतिश्रुतमिति हरिवंशे प्रसिद्धं तदर्थं तां नीतवानिति ॥ २ ॥ गरुडेन याने कारणम् । गिरिदुर्गैरित्यादि । तैरुपलक्षितम् । जलाग्न्यनिलैश्च सर्वतो वर्तमानैर्दुर्गमम् ॥ ३ ॥ ४ ॥

सह गमनं युद्धे सर्वथानुचितमित्यतः कारणांतरमाह—यद्वेति । इतिहासोक्तम् इतिहासग्रंथोक्तम् । तथाहि—पृथ्व्या निजभरावतारार्थमर्थितो भगवान्पृथ्वीं—तत्र भारावतारणे तव पुत्रमपि हनिष्यामीत्याह, तच्छ्रुत्वा सा प्राह—मदाज्ञां विना मा मारयेति, त्वदाज्ञयैव तं हनिष्यामीति हरिः प्रत्युक्तवानिति । यद्यप्येवमस्ति तथापि स्त्रीणां युद्धभूमौ नयनमन्याय्यमेवातः कारणांतरमाह—यद्वेति । तदर्थं पारिजातानयनार्थम्, साऽविश्वस्ता सहैव यायादित्येतदर्थमित्यर्थः ॥ * ॥ इन्द्रेण स्वयं द्वारकामागतेनेति ज्ञेयम् । तदुक्तं वैष्णवे—“ द्वारवत्यां ततः शौरिं शक्रः सुरगणेश्वरः । आजगामाथ मैत्रेय मत्तैरावतपृष्ठतः ॥ ” इति । भौमचेष्टितमपि तत्रैव—“ भौमोऽयं नरको नाम प्राग्ज्योतिषपुरेश्वरः । करोति सर्वभूतानामुपघातमरिंदम ॥ देवसिद्धासुराणां च नृपाणां च जनार्दन । हृत्वा हि सोऽसुरः कन्या रुरोध निजमंदिरे ॥ छत्रं यत्सलिलस्राावि तज्जहार प्रचेतसः । मंदरस्य तथा शृंगं हृतवान्मणिपर्वतम् ॥ अमृतस्राविणी दिव्ये मन्मातुः कृष्ण कुंडले । जहार सोऽसुरोऽदित्या वाञ्छत्यैरावतं गजम् ॥ ” इति ज्ञापितो भक्त्याष्टांगप्रणामपूर्वकमिति ज्ञेयम् । “ ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनम् ” इत्यग्रे वक्ष्यमाणत्वात् ॥ २ ॥ तैर्गिरिदुर्गादिभिः । मुरपाशानामयुतैरनेकैः, षट्सहस्रैरित्यर्थः । “ षट्सहस्रैरथो पाशैर्मुरस्याच्छादितं पुरम् ” इति पुराणांतरात् । “ शताद्या द्विपरार्द्धांता संख्या स्वार्थपरा क्वचित् । प्रायोनेकार्थिका ज्ञेया इतिहासपुराणयोः ॥ ” इत्युक्तं नीलकंठेन । यद्वा—मुरपाशैरयुतैरसंयुतैः, पृथक्कृतैरित्यर्थः ॥ * ॥ तत्रैव सभार्य इति सार्द्धकम् । गरुडं स्मृतिमात्रेणागतं सन्तं, किं वा—प्रायस्तत्रैव वर्तमानमारूढः । सभार्यगमनं साक्षात्तद्धरणकौतुकदर्शनादिपूर्वकं तस्या एव पारिजातदानार्थमवहेलासूचनार्थं च । तत्र पूर्वं मया सार्द्धं युद्धसंकटे गता पारिजातं स्वयमुद्यम्य मद्वारा नीतवतीति श्रीरुक्मिण्यादिषु व्यंजनात्, उत्तरं मम विनोद एवायं न तु युद्धोद्यम इति नरकादिषु व्यंजनात् । अथेंद्रोऽपि स्वपुरं ययाविति ज्ञेयम् “ आरुह्यैरावतं नागं शक्रोपि त्रिदशालयम् । ततो जगाम मैत्रेय पश्यतां द्वारकौकसाम् ॥ ” इति वैष्णवोक्तेः । अनिलदुर्गः कुलालचक्रवद्भ्रमणमहाबलिष्ठदुष्टवायुः । गिरिदुर्गादीनां गणनमात्रमिदम्, क्रमस्तु भेदक्रमादग्रे ज्ञेयः । शस्त्रदुर्गाणि स्पर्शनमात्रेण शस्त्रादिच्छेदकनानाशस्त्रघटितदुर्गाणि । घोरैः क्षुरान्तत्वात् । “ प्राग्जोतिषपुरस्यासीत्समंताच्छतयोजनम् । आचिता मौरवैः पाशैः क्षुरान्तैर्द्विजसत्तम ॥ ” इति वैष्णवोक्ते । इह मुरुशब्द उकारान्तोपि । दृढैरच्छेद्यैः ॥ ३ ॥ अग्न्यादित्रयं चक्रेण ॥ * ॥ गदया क्षितया ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शंखनादेन यंत्राणि हृदयानि मनस्विनाम् ॥ प्राकारं गदया गुर्व्या निर्बिभेद गदाधरः ॥५॥ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणम् ॥ मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात् ॥ ६ ॥ त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगांतसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः ॥ ७ ॥ आविध्य शूलं तरसा गरुत्मते निरस्य वक्रैर्व्यनदत्स पंचभिः ॥ स रोदसी सर्वदिशोम्बरं महानापूरयन्नंडकटाहमावृणोत् ॥ ८ ॥ तदापतद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामभिनत्त्रिधौजसा ॥ मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्यमुंचत ॥ ९ ॥ तामापतंतीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा ॥ उद्यम्य बाहूनभिधावतोऽजितः शिरांसि चक्रेण जहार लीलया ॥ १० ॥ व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोऽद्रिरिवेन्द्रतेजसा ॥ तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रियामर्षजुषः समुद्यताः ॥११॥ ताम्रोंतरिक्षः श्रवणो विभावसुर्वसुर्नभस्वानरुणश्च सप्तमः ॥ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन्धृतायुधाः ॥ १२ ॥

॥ ५ ॥ युगांताशनेर्ध्वनिवद्भीषणम् । परिखाया जलात् ॥ ६ ॥ ७ ॥ आविध्य आतोल्य । स महान्नाद इत्यन्वयः ॥ ८ ॥ तस्मै श्रीकृष्णाय गदां व्यमुंचत व्यक्षिपत ॥ ९ ॥ १० ॥ इंद्रतेजसा वज्रेण । प्रतिक्रियया हेतुभूतया अमर्षजुषः ॥ ११ ॥ पीठं पीठनामानम् । निरगन्निरगमन् ॥ १२ ॥

एवं चक्रेणेत्यादिकमपि ज्ञेयम्, अतो दूरत एवेति च ॥ ४ ॥ यंत्राणि द्वारकपाटनिरोधार्थं लोहादिनिर्मितानि, हृदयानि च ॥ * ॥ यंत्राणि प्राकारन्यस्तानि, येषामग्रे परसैन्यागमदेशे पादघातमात्रेण चलन्तः प्राकारस्थानां शस्त्रक्षेपसंयोगाः स्युस्तन्निर्भेदनमुपरि स्थित्वा तादृशसंयोगान्यथाकरणं, महाशब्दस्य कंपनादिस्वभावत्वात् । मनस्विनां धीराणां हृदयान्यपि यंत्रतुल्यान्येव । गुर्व्येति प्राकारस्थापितगुरुत्वम्, तथापि तन्निर्भेदेऽनायासं सूचयति, यतो गदाधरः तद्विद्याप्रावीण्येन गदाधर इति नाम प्राप्त इत्यर्थः ॥ ५ ॥ परिखास्थतोयात् ॥ * ॥ जलदुर्गनिर्भेदनस्य पूर्वकथामाह—पांचजन्येति । पूर्वमेव पांचजन्यशब्दं श्रुत्वेति ज्ञेयम् । युगांताऽशनिभीषणमित्यसुरेष्वेव ज्ञेयम्, 'मल्लानामशनिः' इत्यादिवत् । शयानः सदा मदाविष्टत्वान्निश्चिन्तत्वाच्च तथास्वभावः ॥ ६ ॥ उल्बणो भयंकरः ॥ * ॥ युद्धादिकौतुकं गायन्निव दीर्घच्छंदसाह—त्रिशूलमिति । सुदुर्निरीक्षणत्वे हेतुः—युगांतेति । उल्बणो भीषणः । तदेवाह—ग्रसन्निति । अभ्यद्रवत् हरिम्, तच्च स्ववधायैवेति दृष्टांतेन द्योतयति—तार्क्ष्येति ॥ ७ ॥ गरुत्मते तं हन्तुम् । निरस्य निक्षिप्य । आपूरयन् नादेनेति शेषः ॥ ॥ * ॥ निरस्य क्षिप्त्वा । रोदसी दिवं भुवं च । अंतरं छिद्रम्, पातालमित्यर्थः ॥ ८ ॥ तत् शूलम् । अभिनत् अकृन्तत् । तं मुरम् । सोऽपि मुरोपि ॥ * ॥ आपतदेव न त्वापतितम् ॥ ९ ॥ अभिधावतः शिरांसीत्यन्वयः ॥ * ॥ गदाग्रज इति—गदस्यातिशूरत्वेन तस्यातिशूरतमत्वमुक्तम् ॥ १० ॥ तस्य मुरस्य । अमर्षं क्रोधं जुषंत इत्यमर्षजुषः ॥ * ॥ प्रतिक्रियया हेतुभूतयाऽमर्षजुषः ॥ ११ ॥ तान्नामतो निर्दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायुंजतासाद्य शरानसीन् गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः ॥ तच्छस्त्रकूटं भगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्त ह ॥ १३ ॥ तान्पीठमुख्याननयद्यमालयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः ॥ स्वानीकपानच्युतचक्रसायकैस्तथा निरस्तान्नरको धरासुतः ॥ १४ ॥ निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत् ॥ दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा ॥ कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगपत्स्म विव्यधुः ॥ १५ ॥ तद्भौमसैन्यं भगवान्गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः ॥ निकृत्तबाहूरुशिरोध्रविग्रहं चकार तर्ह्येव हताश्वकुंजरम् ॥ १६ ॥ यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह ॥ हरिस्तान्यच्छिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः ॥ १७ ॥ उह्यमानः सुपर्णेन पक्षाभ्यां निघ्नता गजान् ॥ गरुत्मता हन्यमानास्तुंडपक्षनखैर्गजाः ॥ १८ ॥

॥ १३ ॥ कृत्तानि शीर्षादीनि येषां तान् ॥ १४ ॥ शतघ्नीं शक्तिविशेषम् ॥ १५ ॥ विचित्रा वाजाः पत्राणि येषां तैर्बाणैः कृत्ता बाहव ऊरवः शिरोध्राः कंधरा विग्रहा देहाश्च यस्मिंस्तत् । तर्ह्येव तं यदा विव्यधुस्तस्मिन्नेव क्षणे ॥ १६ ॥ अत्याश्चर्ये कुरूद्वहेति संबोधनम् । तथाहि तैर्यानि प्रयुक्तानि शस्त्रास्त्राणि । तत्प्राप्तेः पूर्वमेव तत्सर्वसैन्यं हत्वा पश्चात्तानि शस्त्राण्यस्त्राणि च चिच्छेद तत्राप्येकैकं शस्त्रमस्त्रं च त्रिभिः शरैरित्याश्चर्यम् ॥ १७ ॥ किंच गरुत्मतेति ॥ १८ ॥

शति–ताम्र इति ॥ * ॥ ० ॥ १२ ॥ अजिते कृष्णाय । तेषां शस्त्राणां कूटं समूहम् ‘ कूटोऽस्त्री निश्चले राशौ ’ इति मेदिनी ॥ * ॥ प्रायुञ्जतेत्यर्द्धकम् । शरादीनां गुरुत्वे घातकत्वे चोत्तरोत्तरं श्रैष्ठ्यम् । ऋष्टिः खड्गभेदः ॥ १३ ॥ तांस्ताम्रादीन् । आस्रवन्मदो येभ्यस्तैः ॥ * ॥ यमक्षयं यमशब्दोपलक्षिताष्टांगयोगस्थानम् , मोक्षमिति वास्तवोर्थः । यं चाक्षयमाहुस्तमित्यर्थः । “ तत्रापि मोक्ष एवार्थ आत्यन्तिकतयेष्यते ” इति चतुर्थोक्तेः । अच्युतेति चक्राद्यवैयर्थ्याभिप्रायेण । निरस्ताँल्लीलयैव हतान्निरीक्ष्य उत्तुंगदुर्गाद्यारोहणेन दृष्ट्वा । नरक इति जातमात्रेण मनुष्यमस्तकस्य मुखे ग्रहणात् तत्संज्ञां प्राप्त इति, जन्मत एव दुष्टस्वभावः सूचितः । तदाख्यायिका च कालिकापुराणे ज्ञेया । धरासुत इति शक्तित्वं दर्शितम् ॥ १४ ॥ स भौमः । तस्मै कृष्णाय ॥ * ॥ पयोधिप्रभवैरैरावतकुलोद्भवैः सह, ‘ ऐरावतकुलेभांश्च ’ इति वक्ष्यमाणत्वात्, पुरान्निराक्रमत् । सभार्यमिति तद्दर्शनेनातिक्रुद्ध इति भावः । अहो मामपि कातरमयं मनुते, यतः सस्त्रीक आगतस्त्वं निर्भयं ज्ञापयितुमिति क्रोधे हेतुः ॥ १५ ॥ शिलीमुखैर्बाणैः । तत् उपस्थितम् ॥ * ॥ ० ॥ १६ ॥ कुरूद्वहेति–त्वय्यप्यस्त्रशस्त्रनिपुणे नैतत्कदाचिन्न दृष्टं श्रुतं वेति भावः । तैर्योधैः । तत्प्राप्तेः शस्त्रप्राप्तेः । तत्सैन्यं भौमसैन्यम् । तानि सैन्यप्रयुक्तानि । तत्रापि छेदेपि ॥ * ॥ ० ॥ १७ ॥ न केवलं भगवानेवाद्भुतमपि तु तद्वाहनमपीत्याह–किंचेति । तुंडं चंच्वग्रम् “ तुंडोऽस्त्री पक्षिचंच्वग्रे लवने ताडनेऽपि च ” इति निरुक्तिः ॥ * ॥ सुपर्णेनोह्यमान इति तत्रैव लीलयातिशीघ्रगत्येतस्ततो नीयमान इत्यर्थः । भगवन्तं वहतापि पक्षाभ्यां गजहननात्तत्प्रभावोत्कर्षोप्युक्तः । गजा एते योधैरनधिष्ठिताः, राजवाहकाः पृथक्स्थिता इति । कुरूद्वहेत्याश्चर्येण संबोधनम् , कुरुषु मध्ये भीष्मार्जुनादिभिरप्येतत्प्रयोगलाघवं कृष्णेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरमेवाविशन्नार्तो नरको युध्ययुध्यत ॥ दृष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकम् ॥ १९ ॥ तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः ॥ नाकंपत तया विद्धो मालाहत इव द्विपः ॥ २० ॥ शूलं भौमोऽच्युतं हंतुमाददे वितथोद्यमः ॥ तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः ॥ अपाहरद्गजस्थस्य चक्रेण क्षुरनेमिना ॥ २१ ॥ सकुंडलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् ॥ हाहेति साध्वित्यृषयः सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे ॥ २२ ॥ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे ॥ स वैजयंत्या वनमालयाऽर्पयत्प्राचेतसं छत्रमथो महामणिम् ॥ २३ ॥ अस्तौषीदथ विश्वेशं देवी देववरार्चितम् ॥ प्रांजलिः प्रणता राजन्भक्तिप्रवणया धिया ॥ २४ ॥ भूमिरुवाच ॥ नमस्ते देवदेवेश शंखचक्रगदाधर॥भक्तेच्छोपात्तरूपाय परमात्मन्नमोऽस्तु ते॥२५॥नमः पंकजनाभाय नमः पंकजमालिने॥नमः पंकजनेत्राय नमस्ते पंकजांघ्रये॥२६॥

॥ १९ ॥ यतो यया शक्त्या वज्रः प्रतिहत आस गरुडस्तु नाकंपत ॥ २० ॥ गरुडे वितथोद्यमः सन् शूलं त्रिशूलमाददे धृतवान् ॥ २१ ॥ २२ ॥ प्रतप्ते जांबूनदे यानि रत्नानि तैर्भास्वरे । मेर्वंशभूतं मंदराशिखरं महामणिं चार्पयदिति ॥२३॥२४॥ ऐश्वर्यं ज्ञात्वा भूमिः स्तौति । नमस्त इति । परमात्मन् देवाद्यंतर्यामिन् ॥ २५ ॥ येन मंत्रेण कुंत्याः प्रसन्नः पूर्वमासीत्तेन मंत्रेण नमस्यति । नम इति । पंकजं नाभौ यस्य तस्मै । जगत्कारणायेत्यर्थः । अत एव सत्कीर्तिमयी पंकजमाला विद्यते

ज्ञापितैरपि न ज्ञातुं शक्यत इति भावः ॥ १८ ॥ ० ॥ * ॥ युध्यीति तस्य निर्भयतोक्ता ॥ १९ ॥ तं गरुडम् । तया शक्त्या ॥ * ॥ यतो यया ॥ २० ॥ वितथोद्यमो व्यर्थप्रयत्नः । तद्विसर्गाच्छूलत्यागात् ॥ ॥ * ॥ ततोऽमोघशूलहस्तं भौममालक्ष्य शीघ्रमिमं जहीति सत्यभामयोक्तः कृष्णस्तं जघानेत्याह—तदिति ॥ २१ ॥ हाहेति दैत्याः, साध्विति मुनयः ॥ * ॥ हाहेति 'हा विषादशुगर्तिषु, इह निंदायां च इति क्षीरस्वामी । हा पापिष्ठ नरक, हा विश्वोद्वेजक त्वं यन्मृतस्तत्साधुसाध्विति ऊचुः । विकिरन्त आच्छादयन्तः, ऊचुरिति शेषः ॥ २२ ॥ ततो भौममृतेरनंतरम् । वनमालया सह कुंडले आर्पयदित्यन्वयः । किंभूतया—वैजयंती वसुविधमौक्तिकमाला, तत्सहितया । वनमाला तु हरेरर्चनायैव न तु भौमेन कस्यचिदानीतेति बोध्यम् । महांतो मणयो यत्र तं सुमेरोरंशभूतं मंदराख्यगिरिशिखरम्, । 'हृतामराद्रिस्थानेन' इत्युक्तेः ॥ * ॥ वैजयंती पंचवर्णा, वनमाला चरणलंबिनी पत्रपुष्पमयीति भेदः । यद्वा—अष्टधामौक्तिकानिर्मिता वैजयंती, पंचरत्नमयी वा । अनयोर्लक्षणं तृतीयस्कन्धे टीकायामस्माभिर्लिखितमेव ॥ २३ ॥ अथ भगवदर्चनकुंडलादिप्रत्यर्पणोत्तरम् । भक्त्या प्रवणया तद्गतया । "निम्नेऽथ तत्परे वक्रे प्रवणो वननिर्गतः" इति निरुक्तिः ॥ * ॥ अथ तत्तदर्पणोत्तरम् । भक्त्या प्रवणाऽऽयत्ता धीस्तया प्रणताऽवनतमस्तका सती । देववरैर्ब्रह्मादिभिरभ्यर्चितम् । हे राजन्निति—श्रीकृष्णयशःश्रवणेन राजमान एव राजा भवतीति भावः ॥ २४ ॥ देवाद्यंतर्यामिन्निति स्वस्यापि तदधीनत्वमाह ॥*॥ ननु त्वमपि देव्यसि कथं मत्स्तवने प्रवृत्ता, तत्राह—हे देवदेवेश, त्वं तु देवानामिंद्रादीनामपि ये देवा द्योतका ब्रह्मादयस्तेषामपि ईशस्तुत्यर्हो मम तु तत्सृष्टायास्तत्र का वार्तेति भावः । अतस्तेषामवनार्थमेव शंखादिशस्त्रधरोऽसीति भावः । तत्र हेतुत्वेन संबोधयति—हे परमात्मन्निति । त्वां विना ते न किञ्चित्कर्तुं समर्था इति भावः । अतस्ते नमोऽस्तु । यद्वा—परमात्मन्नित्यस्यायं भावः—भगवंस्त्वद्वेषिमातुरपि ममान्तःकरणं जानास्येवेति तात्पर्यम् ॥ २५ ॥ इत्यर्थ इति—न तु योगवृत्त्या नाभिस्थापितकमलः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ. नमो भगवते तुभ्यं वासुदेवाय विष्णवे ॥ पुरुषायादिबीजाय पूर्णबोधाय ते नमः ॥ २७ ॥ अजाय जनयित्रेऽस्य ब्रह्मणेऽनंतशक्तये ॥ परावरात्मन्भूता भा. दी. प्र.
श्री. टी. त्मन्परमात्मन्नमोऽस्तु ते ॥ २८ ॥ त्वं वै सिसृक्षू रज उत्कटं प्रभो तमोनिरोधाय बिभर्ष्यसंवृतः ॥ स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं टीका.
पुरुषो भवान्न परः ॥ २९ ॥

॥३३५॥ यस्य तस्मै । एवंभूतं ध्यायतां पंकजवत्सुप्रसन्ने तापोपशमने नेत्रे यस्य तस्मै । पंकजवत्सुसेव्यौ पंकजांकितौ वांघ्री यस्य तस्मै नम इति॥ २६॥ किञ्च भगवते निरतिशयैश्वर्याय अ० ५९
वासुदेवाय सर्वभूताश्रयायात एव विष्णवे व्यापिने । न हि सर्वभूताश्रयत्वं परिच्छिन्नस्य संभवतीति कुतः सर्वाश्रयत्वं तत्राह। पुरुषाय सर्वस्मात्कार्यात्पूर्वमेव सते " पूर्वमेवाहमि हासामिति तत्पुरुषस्य पुरुषत्वम्" इति श्रुतेः।एतदपि कुतः । आदिबीजाय आदेर्जगत्कारणस्यापि कारणाय । एवमपि न मृदादिवज्जाड्यमित्याह । पूर्णबोधायेति ॥२७॥ नन्वेवमपि स्वस्य कारणात्पूर्वं सत्त्वं न स्यादत आह । अजायेति । स्वयमजाय । अस्य च जगतो जनयित्रे । उभयत्रापि क्रमेण हेतुद्वयम् । ब्रह्मणे बृहते अनंतशक्तय इति च । बृहत्त्वादजत्वमनंतशक्तित्वात्तज्जनयितृत्वमित्यर्थः । ननु पित्रादयः पुत्रादीनां जनकास्तेषां च तत्पूर्वे तेषां च भूतानि तेषां च स्वकर्मद्वारेण जीवाः किमत्राहं तत्राह परावरा त्मन्नित्यादि । पुत्राद्यात्मकत्वात्त्वमेव जनक इत्यर्थः ॥ २८ ॥ ननु गुणा विश्वोत्पत्त्यादिहेतवस्ते च प्रधानस्यैव तस्य च पुरुषः क्षोभकस्तत्र च कालो निमित्तमिति प्रसिद्धं

कश्चिदपरो ग्राह्य इति भावः । अत एव जगत्कारणत्वादेव । एवम्भूतं जगत्कारणमुत्तमकीर्तिम् । न हि पंकजं प्रायः सेव्यत इत्यरुच्याह—पंकजांकिताविति ॥ * ॥ मन्नेत्रादिसर्वेन्द्रियकृतार्थीकर्तुमेवात्रागतोऽसीति प्रेम्णा माधुर्यं वर्णयति—नम इति । पंकजयोनितया नाभेस्सरोवरसाम्येन गांभीर्यमभिप्रेतम् । यद्वा—श्रीकृष्णनाभेः पद्माकारत्वात् । भक्त्युद्रेकेण चरणयोरन्ते निर्देशः । चरणयोरेकस्यैव पंकजांकितत्वेऽपि सजातीयत्वेनैक्यविवक्षया स्वामिचरणैः पंकजांकिताविति व्याख्यातम् ॥ २६ ॥ पुनर्हरेरैश्वर्यं द्योतयंत्याह—किञ्चेति । अत एव सर्वभूताश्रयत्वादेव । तदेवाह—न हीति । सर्वाश्रयत्वे हेतुमाशंकते—कुत इति । एतत् सर्वकार्यपूर्वकालीनत्वम् । जगत्कारणस्य ब्रह्मादेः । एवमपि बीजरूपत्वेऽपि । पूर्णबोधाय ज्ञानैकरूपाय ॥ * ॥ तवैश्वर्यामृतसिंधावप्यहं खेलयंत्यस्मीत्याह—नम इति । भगवते निरतिशयैश्वर्याय । भगवत्त्वेपि वासुदेवाय 'वासुदेवो भगवताम्' इत्युक्तेर्वसुदेवनंदनाय, स्वयं भगवत इत्यर्थः । वसुदेवपुत्रत्वेऽपि विष्णवे सर्वव्यापकाय । सर्वव्यापकत्वेऽपि पुरुषाय पुरुषवत्परिच्छिन्नायेत्यर्थः । पुरुषवत्परिच्छिन्नत्वेऽप्यादिबीजाय सर्वादेः । श्रीनारायणस्याप्याविर्भावप्रयो जकब्रह्ममोहनलीलायां तथा दर्शनात् । तादृशादिबीजत्वेऽपि पूर्णश्चासौ बोधश्चेति, पूर्णं ज्ञानस्वरूपं यद्ब्रह्म तस्मै । अप्राकृतानंतविशेषत्वेऽपि त्वमेव निर्विशेषं ब्रह्मेत्यर्थः ॥ **तोषिणीकारास्तु—** पुरुषाणां निजजनानामायः प्रेमादिलाभस्तस्यादिबीजाय कारणाय तद्दात्रे इत्यर्थमाहुः ॥ २७ ॥ पुनराशंकते—नन्विति । एवमपि पूर्णबोधरूपत्वेपि । अजाय कारणवर्जितायेत्यर्थः । अस्य विश्वस्य । उभयत्रापि—अजत्वे जनयितृत्वे च । इत्यर्थ इति—ब्रह्मण एवाजत्वं तद्भिन्नस्य तज्जत्वादनंतशक्तेरेव जनकत्वं, तद्भिन्नस्य जन्यत्वादिति भावः । अत्राऽऽशंकते—नन्विति । अत्र जनने। अहं किं, क इत्यर्थः । इत्यर्थ इति—पित्रादीनामपि जन्यत्वश्रुतेः परमकारणस्य तवैव मुख्यं जनकत्वमित्याशयः ॥ * ॥ त्वमजोऽपि अथ चास्य विश्वस्य जनयिता, जनयितापि त्वमेव ब्रह्म निर्विशेषरूपं, निर्विशेषस्वरूपमपि ॥३६५॥
त्वमेवानंतशक्तिः सविशेषस्वरूपश्च, अनंतशक्तित्वेऽपि तव तिस्र एव शक्तयस्तटस्थबहिरंगांतरंगलक्षणाः, ताश्च त्वमेव इत्याह—परावरेषामुत्कटनिकृष्टानामात्मा जीवस्त्वमेव त्वमेव भूतात्मा पञ्चभूतात्मको देहस्त्वमेव परमा त्मांतर्यामी ॥ २८ ॥ पुनर्भंग्यन्तरेणाऽऽशंकते—नन्विति । ते च गुणाः । तस्य प्रधानस्य । तत्र च क्षोभे । पूर्ववदाह—किमत्राहमिति । निरोधाय नाशाय । उत्कटमाधिकम् । इत्यर्थ इति—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इन्द्रियाणि ॥ कर्ता महानित्यखिलं चराचरं त्वय्यद्वितीये भगवन्नयं भ्रमः ॥ ३० ॥ तस्यात्मजोऽयं तव पादपंकजं भीतः प्रपन्नार्तिहरोपसादितः ॥ तत्पालयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्मषापहम् ॥ ३१ ॥ श्रीशुक उवाच ॥ इति भूम्याऽर्थितो वाग्भिर्भगवान्भक्तिनम्रया ॥ दत्त्वाऽभयं भौमगृहं प्राविशत्सकलर्द्धिमत् ॥ ३२ ॥ तत्र राजन्यकन्यानां षट्सहस्राधिकायुतम् ॥ भौमाहृतानां विक्रम्य राजभ्यो ददृशे हरिः ॥ ३३ ॥ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः ॥ मनसा वव्रिरेऽभीष्टं पतिं दैवोपसादितम् ॥ ३४ ॥

किमत्राहं तत्राह । त्वं वा इति । तमसो धारणेऽप्यसंवृत एव । स्थानाय पालनाय । जगतः सृष्ट्याद्यर्थमुत्कटं रजआदि त्वमेव बिभर्षि सृजसीत्यर्थः । कालप्रधानपुरुषाश्च त्वद्व्यतिरिक्ता न संति त्वं तु परः सर्वव्यतिरिक्तः । अतस्त्वमेव जनयितेत्यर्थः ॥ २९ ॥ कार्यकारणप्रपंचस्य तदव्यतिरेकं तस्य च सर्वव्यतिरेकमुपपादयति । अहमिति । अहं भूमिः । मात्राणीति देवा मन इंद्रियाणीति च त्रिविधाहंकारकार्याणि । कर्ताऽहंकारः ॥ ३० ॥ एवं स्तुत्वा प्रार्थयते तस्येति । हे प्रपन्नार्तिहर । तस्य नरकस्य । अयं भगदत्तो नाम भीतोऽत एव मया तव पादपंकजमुपसादितः ॥ ३१ ॥ अभयं दत्त्वा ॥ ३२ ॥ शताधिकमित्यपि ज्ञातव्यम् । यथाह श्रीपराशरः । "कन्यापुरे स कन्यानां

रजोधारणेन सर्गं करोषीति भावः । अतः सर्वव्यतिरिक्तत्वात् । इत्यर्थ इति—कालादीनां सामग्रीमात्रत्वात्त्वमेव मुख्यं कारणमिति भावः ॥ * ॥ समयभेदेनास्य सृष्ट्यादिकं मायाशक्त्या त्वमेव करोषीत्याह—त्वमिति । उत्कटम् उद्रिक्तम् । असंवृतो न तु जीववत्तैः संवृतः । अतस्त्वच्छक्तिकार्यत्वादिदं जगत्त्वदात्मकम् । ये च नित्याः कालमायाजीवास्तेऽपि त्वच्छक्तित्वात्त्वदात्मका एवेत्याह—काल इति । किन्तु स्वरूपशक्त्या उत्क्रम्य एतेभ्यः परोऽन्यः ॥ २९ ॥ तदव्यतिरेकं तदभिन्नत्वम् । तस्य भगवतः । सर्वव्यतिरेकं सर्वातिरिक्तत्वम् । मां स्वविषयज्ञानस्य सत्त्वेन त्रायन्त इति मात्रा इंद्रियाणि । अथ पुनरर्थे । अयं पृथिव्यादिरूपः प्रपञ्चः शुक्तिरजतवद्भ्रम एव न तात्त्विक इति भावः । यद्वा—अयं जगद्भ्रमः चक्रभ्रमणवद्विश्वस्य परिवर्तनं त्वयि नियतमित्यर्थः । भ्रमशब्दस्यारोपपरत्वेऽर्थक्रियानुपपत्तेरिति तीर्थः ॥ * ॥ ननु तत्तद्रूपश्चेत्कथं परत्वं तत्राह—अहमिति । तेषां त्वच्छक्तिरूपमात्रत्वेन तदनन्यत्वान्न विद्यते द्वितीयं यस्य तथाभूतेऽपि त्वयि पूर्वोक्तं कार्यं चराचरं भ्रमो भ्रमेणैव प्रतीतमित्यर्थः । अंतरंगशक्त्याऽऽलिंगितस्य ते बहिरंगशक्तिकार्यैर्न स्पर्शः । आकाशादीनां वाय्वादिभिस्तद्धर्मैरिव चेति भावः । तदुक्तम्—" मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि " इति ॥ **विश्वनाथस्तु**—ननु ममायं देहो भूतात्मक एव चक्षुरादींद्रियाण्यपि वैकारिकाण्येवेत्यतो मां मायाशबलं ब्रह्मेत्याचक्षते । कथमेतेभ्यः पर इत्यत आह—चरं मनश्चक्षुरादि, अचरं भ्रूघ्राणादि । त्वयि भ्रमः ये त्वय्यपि भूतेंद्रियादिकं ब्रुवते, ते भ्रांता एवेत्यर्थः । यतः न विद्यते द्वितीयं यस्मिन्, त्वयीदं देहेंद्रियादिकं सर्वं त्वदात्मकं चिदेव न तु त्वत्तो द्वितीयं मायिकमित्यर्थः ॥ ३० ॥ आत्मज औरसः । मां कुतो न नमतीति चेदाह—भीतस्त्रस्तः । अत एव त्रस्तत्वादेव । अहं किं करोमीत्यत आह—तदिति । यत उपसादितस्ततस्ततो हेतोः । एनं भगदत्तम् ॥ * ॥ ननु प्रस्तुतं किं तदुच्यताम्, तत्राह—तस्येति । महादुष्टत्वेन नामाऽग्रहणम् । ननु दुष्टस्यात्मजत्वादयमपि वध्य एव तत्राह—उपसादित इति, शरणं प्रापितः । किञ्च—अस्याऽपितृकत्वादिदुःखञ्च हरणीयमित्याह—प्रपन्नेति । तस्मादकुतश्चिद्भयमप्येनं विधेहीत्याशयेनाह—कुर्विति । ननु तथा सति पितृवद्दुष्टतां करिष्यति तत्राह—अखिलेति । त्वच्छ्रीहस्तस्पर्शप्रभावेण नायमपराधं कर्तेति भावः । पंकजरूपकेण स्वयमेव तापापगमादिकं ध्वनितम् ॥ ३१ ॥ इतीत्थम् ॥ * ॥ वाग्भिरेवार्चितस्ताभिरेव नानोपचारगणना द्राविंतः । ऋद्धिश्चोक्ता हरिवंशे—" न वै राज्ञा कुबेरेण न शक्रेण यमेन च । रत्नसंनिचयस्तादृग्दृष्टपूर्वो न च श्रुतः ॥ " इति । किञ्च—तत्रैव धनरक्षिणां दैत्यानामुक्तौ—" देवगंधर्वरत्नानि पन्नगानां च यद्वसु । तानि सर्वाणि सन्तीह नरकस्य निवेशने ॥ " इति ॥ ३२ ॥ तत्र भौमगृहे । पराशरमतमाश्रित्य समासः । षट्सहस्राणि च अधिकानि च अयुतश्चैतेषां समाहारस्तथा । अधिकपदमत्र शतार्थकम् । तेनैव पराशरेण । सोऽसुरो नरकासुरः ॥ * ॥ ० ॥ ३३ ॥ तं कृष्णम् ॥ * ॥ अभितः सर्वतोभावेनेष्टं वांछितं दैवेन प्राचीनतद्भक्तिरूपेण प्रापितम् । तदुक्तं हरिवंशे—" निवसन्त्यो यथा देव्योऽसुखिन्यः कामवर्जिताः । परिवव्रुर्महाबाहुमेकवेणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूयात्पतिरयं मह्यं धाता तदनुमोदताम् ॥ इति सर्वाः पृथक्कृष्णे भावेन हृदयं दधुः ॥ ३५ ॥ ताः प्राहिणोद्द्वारवतीं सुमृष्टविरजोंबराः ॥ नरयानैर्महाकोशान्रथाश्वान्द्रविणं महत् ॥ ३६ ॥ ऐरावतकुलेभांश्च चतुर्दंतांस्तरस्विनः ॥ पांडुरांश्च चतुःषष्टिं प्रेषयामास केशवः ॥ ३७ ॥

षोडशातुलविक्रमः ॥ शताधिकानि ददृशे सहस्राणि महामते ” इति । राजन्य इत्युपलक्षणं सिद्धादिभ्यश्चेति । तथा च तेनैवोक्तम् । “देवसिद्धासुरादीनां नृपाणां च जनार्दन ॥ हत्वा हि सोऽसुरः कन्या रुरोध निजमंदिरे” इति ॥ ३३ ॥ ३४ ॥ ३५ ॥ प्राहिणोत् प्रस्थापयामास । सुमृष्टा कमनीयाश्च ता विरजोंबराश्च ताः । नरयानैः

धरास्त्रियः ॥ सर्वाः काषायवासिन्यः सर्वाश्च नियतेंद्रियाः । व्रतोपवासतत्त्वज्ञाः कांक्षन्त्यः कृष्णदर्शनम् ॥ ” इति ॥ ३४ ॥ अयं कृष्णः । धाता ईशः । तदस्मत्पतित्वम् ॥ * ॥ मह्यं ममेति पृथक्पृथग्निगूढसंकल्पादेकवचनम् ॥ ३५ ॥ ता भौमगृहस्थाः ॥ * ॥ सुमृष्टाः स्नपनादिना निर्मलीकृताश्च ता विरजोंबराः शुद्धवस्त्राः, तथाभूताः कृत्वा प्राहिणोदित्यर्थः । द्रविणं रत्नादिकं गवादिकं मदनसारिकादिकञ्च । महत्त्वं बहुमूल्यादिना बाहुल्येन च, श्रेष्ठम् । तदुक्तं हरिवंशे तद्वनाध्यक्षैः—“ इमानि मणिरत्नानि विविधानि बहूनि च । गोषु चापि भवेद्यावत्कामस्तावज्जनार्दन ॥ तावतीः प्रापयिष्यामो वृष्ण्यंधकनिवेशनम् । कामव्याहारिणश्चैव पक्षिणः प्रियदर्शनाः ॥ चन्दनागुरुकाष्ठानि तथा कालीयकान्यपि । वसु यत्त्रिषु लोकेषु धर्मेणाधिगतं तव ॥” इति ॥ ३६ ॥ पांडुराञ्छ्वेतवर्णान् । चतुःषष्टिं चतुःषष्टिसंख्याकान् ॥*॥ चतुःषष्टिं चेति चकारात्तरस्विनोऽन्यांस्तावदूनषट्सहस्राणि चेति ज्ञेयम् । तदुक्तं वैष्णवे—“ चतुर्दंष्ट्रान् गजांश्चोग्रान् षट्सहस्रान्स दृष्टवान् । कांबोजानां तथाश्वानां नियुतान्येकविंशतिम् ॥ कन्यास्ताश्च तथा नागांस्तानश्वान्द्वारकापुरीम् । प्रापयामास गोविन्दः सद्यो नरककिंकरैः । ” इति । यत्र हरिवंशे रक्षिणामुक्तौ—“ भीमरूपाश्च मातंगाः प्रबलाविद्धतांकुशाः । हेमसूत्रमहाकक्षाश्चापतोरणमालिनः ॥ रुचिराभिः पताकाभिः सरला रुचिरांकुराः । ते च विंशतिसाहस्रा द्विस्तावत्यः करेणवः ॥ ” इति । तत्र, चतुर्दंष्ट्रेतरसंग्रहादुक्तेभ्य आधिक्यं ज्ञेयम् । द्वितीयचकारात्तानपि प्रेषयामासेति ज्ञेयम् । एवं वारुणं छत्रं मणिपर्वतं च तत्र न प्रेषयामास किन्तु गरुडोपरि निधाय दिवं गत इति । तथा च तत्रैव—“तादृशं वारुणं छत्रं तथैव मणिपर्वतम् । आरोपयामास हरिर्गरुडे पतगेश्वरे ॥ ” इति । श्रीहरिवंशे च—“ ततस्तद्वारुणं छत्रं स्वयमुत्क्षिप्य माधवः । हिरण्यवर्षं वर्षंतमारुरोह विहंगमम् ॥ ” इति । किञ्चाग्रे—“तस्य पर्वतराजस्य शृंगं यत्परमार्चितम् । विमलार्केन्दुसंकाशं मणिकांचनतोरणम् ॥ सपक्षिगणमातंगं समृगव्यालपादपम् । शाखामृगगणाकीर्णं सुप्रशस्तशिलातलम् ॥ न्यंकुभिश्च वराहैश्च रुरुभिश्च निषेवितम् । सप्रपातमहासानुं विचित्रशिखरद्रुमम् ॥ अत्यद्भुतमाचिंत्यं च मृगवृंदविलोडितम् । जीवंजीवकसंघैश्च बर्हिभिश्च निषेवितम् ॥ तदप्यतिबलो विष्णुर्दोर्भ्यामुत्पाट्य भास्वरम् । आरोपयामास बली गरुडे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गत्वा सुरेंद्रभवनं दत्त्वाऽदित्यै च कुंडले ॥ पूजितस्त्रिदशेंद्रेण सहेंद्राण्या च सप्रियः ॥ ३८ ॥ चोदितो भार्ययोत्पाट्य पारिजातं गरुत्मति ॥ आरोप्य सेंद्रान्विबुधान्निर्जित्योपानयत्पुरम् ॥ ३९ ॥ स्थापितः सत्यभामाया गृहोद्यानोपशोभनः ॥ अन्वगुर्भ्रमराः स्वर्गात्तद्गंधासवलंपटाः ॥ ४० ॥

शिबिकाभिः । अपि च महाकोशानिति ॥ ३६ ॥ ३७ ॥ सप्रियः सत्यभामासहितः ॥ ३८ ॥ ३९ ॥ गृहोद्यानं निष्कुटं तदुपशोभयति यः ॥ ४० ॥

पक्षिणां वरे ॥ मणिपर्वतशृंगं च सभार्यं च जनार्दनम् । उवाह लीलया पक्षी गरुडः पततां वरः ॥ " इति ॥ ३७ ॥ ० ॥ * ॥ सुरेन्द्रभवनगमनादिप्रकारविशेषश्च श्रीविष्णुपुराणे–" गरुडो वारुणं छत्रं तथैव मणिपर्वतम् । सभार्यं च हृषीकेशं लीलयैव वहन्ययौ ॥ ततः शंखमुपाध्मासीत्स्वर्गद्वारगतो हरिः । उपतस्थुस्ततो देवाः सार्घपात्रा जनार्दनम् ॥ स देवैरर्चितः कृष्णो देवमातुर्निवेशनम् । सिताभ्रशिखराकारं प्रविश्य ददृशे दितिम् ॥ स तां प्रणम्य शक्रेण सह ते कुंडलोत्तमे । ददौ नरकनाशं च शशंसास्यै जनार्दनः ॥ " इति । किञ्च–"अदित्या तु कृतानुज्ञो देवराजो जनार्दनम् । यथावत्पूजयामास बहुमानपुरःसरम् ॥ " इति । श्रीहरिवंशे च–"अर्चितो देवराजेन रत्नैश्च प्रतिपूजितः । सत्यभामा च पौलोम्या यथावदभिनंदिता ॥ " इत्यादि ॥ ३८ ॥ पारिजातलक्षणम्–" प्रवालमूलः सौवर्ण इंद्रनीलच्छदान्वितः । वैदूर्यवेदिको मुक्ताफलो माणिक्यपुष्पधृक् ॥ गोमेदपक्वप्रवरो वज्रकिञ्जल्करंजितः । मरकतस्थूलशाखो हि पारिजातः प्रकीर्तितः ॥ " इति तीर्थः ॥ * ॥ भार्यया चोदित इत्यत्र विशेषः श्रीविष्णुपुराणे–"ददर्श च सुगंधाढ्यं मंजरीपुष्पधारिणम् । शच्याह्लादकरं ताम्रबालपल्लवशोभितम् ॥ मथ्यमानेऽमृते जातं जातरूपसमत्वचम् । पारिजातं जगन्नाथः केशवः केशिसूदनः ॥ तं दृष्ट्वा प्राह गोविंदं सत्यभामा द्विजोत्तम । कस्मान्न द्वारकामेष नीयते देवपादपः ॥ यदि ते तद्वचः सत्यं सत्यात्यर्थं प्रियेति मे । मद्गेहनिष्कुटार्थाय तदयं नीयतां तरुः ॥ न मे जांबवती तादृगभीष्टा न च रुक्मिणी । सत्ये यथा त्वमित्युक्तं त्वया कृष्णाऽसकृत्प्रियम् ॥ सत्यं तद्यदि गोविंद नोपचारकृतं वचः । तदस्तु कल्पवृक्षोऽयं मम निष्कुटभूषणम् ॥ बिभ्रती पारिजातस्य केशपक्षेण मंजरीम् । सपत्नीनामहं मध्ये शोभेयमिति कामये ॥ " इति । निःशेषेण जित्वा पुरं द्वारकामुप दाक्षिण्येन निन्ये ॥ ३९ ॥ 'निष्कुटन्तु गृहोद्याने' इति मेदिनी । तस्य पारिजातस्य गंध एवाऽऽसवो मादकद्रव्यं तत्र लंपटा लोलुपाः 'लंपटो लोलुपे मत्ते' इति निरुक्तिः ॥ * ॥ पारिजातस्य माहात्म्यमाह–यद्गंधेति । तन्माहात्म्यमन्यच्च विस्तार्योक्तं तेनैव–" यमभ्येत्य जनः सर्वो जातिं स्मरति पौर्विकीम् । वास्यते यस्य पुष्पाणां गंधेनोर्वी त्रियोजनम् ॥ ततस्ते यादवाः सर्वे देहबंधानमानुषान् । ददृशुः पादपे तस्मिन्कुर्वतो मुखदर्शनम् ॥ " इति । हरिवंशे च–"नानाविधानि तूर्याणि गेयानि मधुराणि च । शुश्रुवुस्तस्य वृक्षस्य नातिदूरगता नराः ॥ यो यं संकल्पयामास गंधं हृद्यं नरस्तथा । स तदैव समाजघ्रौ पारिजातसमुद्भवम् ॥ " इति । किञ्चाग्रे–"मनीषितेन स तरुरल्पो भवति भारत । सुमहान्वासुदेवस्य तदद्भुतमभून्महत् ॥ कदाचिद्द्वारकां सर्वां प्रच्छादयति भारत । कदाचिद्धस्तधार्यश्च भवत्यंगुष्ठसंनिभः ॥ " इति । अत्र वारुणं छत्रमिंद्राय दत्तं, मणिपर्वतश्च द्वारकामानीत इति ज्ञेयम् । तथा च श्रीहरिवंशे–" प्रविवेश गृहं शौरिरादाय मणिपर्वतम् । तं च शक्रस्य दयितं पारिजातं महाद्रुमम् ॥ " इति ॥ ४० ॥

---

१ 'यद्गन्धासव–' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनम् ॥ सिद्धार्थ एतेन विगृह्यते महानहो सुराणां च तमोधिगाढ्यताम् ॥ ४१ ॥
अथो मुहूर्त एकस्मिन्नानागारेषु ताः स्त्रियः ॥ यथोपयेमे भगवाँस्तावद्रूपधरोऽव्ययः ॥ ४२ ॥

सैंद्रान्विबुधान्निर्जित्येतींद्रकृष्णयोः संग्राम उक्तस्तत्र ननु कथं प्रसाधितस्वमनोरथेन श्रीकृष्णेन महेंद्रस्य संग्राम इत्याह।ययाच इति । अच्युतमर्थसाधनमिति च कर्मद्वयं याचतिधातोः। विगृह्यते विग्रहं करोति महानपि तमः क्रोधः।आढ्यतां धनिकतां धिगिति॥ ४१ ॥यथा यथावत्।अनेन देवक्यादिबंधुजनसमागमोऽपि प्रतिगृहं यौगपद्येन सूचितः।

अर्थसाधनायेति चतुर्थ्याः "अकथितं च" इति कर्मत्वम् । एतेन कृष्णेन सह । विगृह्यत इति कर्मकर्तरि प्रयोग इत्यभिप्रेत्यैव स्वामिचरणैर्विग्रहं करोतीति व्याख्यातम् । यद्वा—एतेनेंद्रेण महानपि श्रीकृष्णो विगृह्यते विग्रहविषयीक्रियत इत्यर्थः । 'आढ्य इभ्यो धनी श्रीमान्' इति कोशात् । धिग्योगे द्वितीया ॥*॥ सैंद्रान्विबुधान्निर्जित्येत्युक्तम्, तत्र स्वार्थसाधकेनापि स्वेष्टदेवेनापि श्रीकृष्णेन सहेंद्रस्य युद्धं श्रुत्वातिविस्मितं राजानं प्रतींद्रदौरात्म्यमाह—ययाच इति । अर्थसाधनं स्वार्थसाधकं कृष्णं ययाचे—नरकं हत्वा कुंडलादीन्यानीय देहीति प्रार्थ्यते स्म । सिद्धार्थः प्राप्तकुंडलादिकः सन्नेतेन कृष्णेन सह । विगृह्यते इत्यार्षम् । विगृह्णाति विग्रहं करोति, तत्रापि महान्सुरेशः सन् अहो आश्चर्यं सुराणामपि तमः क्रोधः, सात्त्विकानां तेषामिदमत्यसंभवमिति भावः । तत्रापि सुरेशस्य तस्य, तस्मादाढ्यतां धनिकत्वं धिक्, आढ्यता हि कंकमसंभवमप्यनर्थं नोत्पादयतीति भावः ॥ ॥ ४१ ॥ अथो नरकवधोत्तरछत्रानयनानंतरम् । अनेन यथावदिति कथनेन । संकल्पमात्रेणानंतब्रह्मांडस्रष्टुर्निजसंबंध्यनेककिरणं नाद्भुतमिति भावः । अव्ययत्वात्तस्य सर्वसर्जनसामर्थ्यमस्तीति । अव्ययपदेऽकारो ब्रह्मविष्णुरुद्रवाचकः । 'ओ विष्णुः शंकरो ब्रह्मा' इति सौभरिकोशात् । उकारेण लोकपालाः, ईकारेण लक्ष्म्याद्या उक्ताः सौभरिणैव । तेषामय उत्पत्तिस्थानलयाधिकरणरूपः । अकारात्परोकारस्थाने वादेशे ईकारस्थाने यादेशे च कृतेऽव्य इति भवति । तथा च अश्च उश्च ई च अव्यस्तासामयोऽव्ययः " सावित्री पार्वती लक्ष्मीस्सर्वा देवांगनाश्च याः । ईवाचका लोकपाला उकारेणोदिता इह ॥ उत्पत्त्यादित्रये प्राप्तौ शुभावहविधावयः । " इति व्याडिः । एतेन श्रीकृष्ण एव सर्वेषामुत्पत्त्यादिकर्तेति ध्वनितम् । श्रीमद्भागवतस्य 'पुराणं ब्रह्मसंमितम्' इत्युक्तेर्वेदरूपत्वाद्वेदस्य च मंत्ररूपत्वान्मंत्रेषु वर्णानामपि वाचकत्वमस्ति यथा—" वियद्भृगुस्थमनुयुग् " इत्यादौ वियत् 'हः', भृगुः 'सः', मनुः 'औः' तेन विसर्गाढ्यं च सत् 'हौः' भवति । यथा—'दामोदरश्चंद्रयुतः' इति, 'विधिर्वासवशांतीन्दुयुक्तम्' इत्यादि । अत्र दामोदरः 'ऐ', बिंदुयुतः 'ऐं' भवति । तथा—विधिः 'कः', वासवः 'लः', शांतिः 'ई' बिंदुयोगे 'क्लीं' इति भवति । तथा वेदेपि—"शं वै प्रजापतिः कं वै प्रजापतिः" इत्यादिश्रुतिदर्शनात्, 'अक्षराणामकारोऽस्मि' इति स्मृतेश्च । वर्णानां वाचकत्वमस्त्येव, स्फुटितं चैतद्भाष्ये पतंजलिना । भागवतपदानां बीजरूपता पंचाध्यायीव्याख्याने 'जगौ कलं वामदृशां मनोहरम्' इत्यत्रापि स्फुटिता ॥ * ॥ अथो द्वारकामागत्य । एकस्मिन्मुहूर्ते इति—तस्यैव वैवाहिकलग्नस्य तदानीं सर्वतोभद्रत्वेन मौहूर्तिकलोकैरुक्तत्वात् । यावत्यः स्त्रियस्तावद्रूपधरः । रूपाण्यत्रैकस्यैव वपुषः प्रकाशभेदास्तानि धरतीति सः । न तु तावद्वपुर्द्धर इति कायव्यूहो व्याख्येयः । " चित्रं बतैतदेकेन वपुषा युगपत्पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ " इत्यग्रिमोक्तेः । यथा यथावदित्यनेन देवक्यादिबंधुसमागमोऽपि प्रतिगृहं यौगपद्येन सूचित इति स्वामिचरणाः । तेषामपि प्रकाशभेदोऽचिंत्यशक्त्यैव कारितो ज्ञेयः । **अव्ययः** सर्वत्रापि पूर्ण एव, न त्वंशेन वर्तमानः " प्रकाशो वस्तुभेदेषु गण्यते स हि नो पृथक् " इति भागवतामृतोक्तेः ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः ॥ रेमे रमाभिर्निजकामसंप्लुतो यथेतरो गार्हकमेधिकांश्चरन् ॥४३॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयाऽनुरागहासावलोकनवसंगमजल्पलज्जाः ॥ ४४ ॥

अन्वयः सर्वत्रापि संपूर्ण एव ॥ ४२ ॥ अहो भाग्यं नारीणामित्याह त्रिभिः । गृहेष्विति । अतर्क्याणि कर्माणि करोति तथा सः निरस्तं साम्यमतिशयश्च यैरन्येषां तेषु गृहेष्वनपाय्यवस्थितः । रमाभिर्लक्ष्म्या अंशभूताभिः । निजकामसंप्लुतः स्वानंदपरिपूर्णः । गार्हकमेधिकान् गृहस्थधर्मान् ॥ ४३ ॥ अनुरागं हाससहितमवलोकं च तत्पूर्वकं

तासां न विद्यतेऽपायो वियोगो यस्य स तथा ॥ * ॥ तदेव दर्शयन्नाह—गृहेष्विति । तासां गृहेषु अनपायी सन् अत्र समंतात्कायमनोवचोभिः स्थितश्च सन्, रमाभी रमायाः स्वरूपशक्तेरेव नानावृत्तिरूपाभी रेमे । भगवानिति पूर्वेणान्वयः । अतो नात्मारामतापूर्णकामतयोर्हानिरिति भावः । ननु तास्वप्यात्मभाव एव चेत्कस्तर्हि रसविशेषस्तत्राह—निजो न तु प्राकृतो यः कामः स्वजनविशेषेषु प्रेमविशेषस्तेन संप्लुत इति । शक्तित्वेन भेदाभेदवृत्तिमतीष्वपि तासु लीलार्थं पृथगाविर्भावाद्भेदवृत्तिप्रधानासु स्वरूपशक्तिभेदह्लादिनीवृत्तिविशेषप्रेममयीषु तासु तादृशप्रेमरसचमत्कारवैशिष्ट्यं तस्यापि जायत इति भावः । ननु भवत्वेवं प्रपंचावतीर्णत्वाद्गृहादिसामग्री, न तु तदनुरूपा तत्राह—निरस्तेति । परमवैकुंठतोऽपि श्रेष्ठेष्वित्यर्थः । अत एव तत्र रमयैकयैव, अत्र तु रमाभिर्बह्वीभिरित्युक्तम् । ननु कथं युगपत्सर्वत्रानपायित्वादिकं तत्राह—अतर्क्यकृत्, आचिंयशक्तिमय इत्यर्थः । अनपायित्वं चात्र योग्यावसरं व्याप्येति ज्ञेयम्, गृहमेधिकांश्चरन्नित्युक्तत्वात्, प्रथमस्कंधे चात्र च विप्रलम्भश्रवणात् । निजकामसंप्लुतत्वमेव दृष्टान्तेन दृढीकरोति—यथेति । तासां स्वरूपशक्तिवृत्तिरूपत्वं दर्शितं स्कांदे प्रभासखण्डे—“ पुरा कृष्णो महातेजा यदा प्रभासमागतः । सहितो यादवैः सर्वैः षट्पंचाशत्प्रकोटिभिः ॥ षोडशैव सहस्राणि गोप्यस्तत्र समागताः । लक्षमेकं तथा षष्टिरेते कृष्णसुताः प्रिये ॥ ” इत्युपक्रम्य “ ततो गोप्यो महादेवि विद्यायाः षोडश स्मृताः । तासां नामानि ते वक्ष्ये तानि ह्येकमनाः शृणु ॥ लंबिनी चन्द्रिका कान्ता क्रूरा शान्ता महोदया । भीषणी नंदिनी शोका सुपूर्वविमलाऽक्षया । सुभदा शोभना पुण्या हंससीता कला क्रमात् ॥ हंस एव मतः कृष्णः परमात्मा जनार्दनः । तस्यैताः शक्तयो देवि षोडशैव प्रकीर्तिताः ॥ चन्द्ररूपी मतः कृष्णः कलारूपाश्च ताः स्मृताः । संपूर्णमण्डला तासां मालिनी षोडशी कला ॥ प्रतिपत्तिथिमारभ्य संचरत्यासु चन्द्रमाः । षोडशैव कलायास्तु गोपीरूपा वरानने ॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक्पृथक् । एवं ते कथितं देवि रहस्यं ज्ञानसम्भवम् । य एवं वेद पुरुषः स ज्ञेयो वैष्णवो बुधैः ॥ ” इति । अत्र गोप्यो राज्य इत्यर्थः । ‘ गोपो भूपेऽपि ’ इति नानार्थात् । सर्वे गोपायन्तीति शक्तयो वा, श्रीदशाक्षरे व्याख्याविशेषवत् । लंबिनी अवतारशक्तिः । सुपूर्वविमला सुविमला । हंससीतेत्यत्र प्राप्तस्य हंसशब्दस्य वाच्यमाह—हंस एवेति । स च चन्द्ररूपी चन्द्रदृष्टान्तेनोद्देश्य इत्यर्थः । कलारूपा इति—ताश्च शक्तयश्चन्द्रस्याऽमृतादिकलादृष्टान्ता नोद्देश्या इत्यर्थः । अनुक्तामंतिमां महाशक्तिमाह—संपूर्णेति । दृष्टान्तोपपादनाय चन्द्रस्य तादृशत्वमाह—प्रतिपदिति । आस्वेतत्तुल्यासु कलासु यथा चन्द्रमाः प्रतिपत्तिथिमारभ्य संचरति, तथा सोपि लीलारसविशेषं प्राप्य तत्तच्छक्तिं प्रकाशयतीत्यर्थः । विवक्षितमाह—षोडशैवेति । षोडशानामेव विद्यारूपत्वादेतदुपदेशस्य ज्ञानसम्भवरहस्यत्वात्, तज्ज्ञानस्य वैष्णवतानुमापकलिंगत्वाच्च । क्रूराभीषणीशोकानामपि भगवत्स्वरूपभूतानामेव मतानाम् ‘ मल्लानामशनिः ’ इतिवत् । श्रीकृष्णस्य काठिनत्वप्रत्यायकत्वात् ‘मृत्युर्भोजपतेः’ इतिवत् । दुर्जनावित्रासकत्वादसतां शास्तेति तदीयशोकहेतुत्वादेव च तत्तन्निरुक्तिरुपपद्यते । यथा प्रकाशरूपाया एव सूर्यकांतेरुलूकेषु तमआदिव्यञ्जकतेति । अतः । “चन्द्ररूपी स्मृतः कृष्णः कलारूपाश्च ताः स्मृताः ”इति स्फुटमेव स्वरूपभूतत्वं दर्शितम् । अतोऽन्यथाख्यानं किंचित्तत्र जीवांतराप्रकाशापेक्ष्यं किञ्चिन्मायिकमिति ज्ञेयम् ॥ ४३ ॥ इत्थमुक्तरीत्या । ताः भौमादिवधेनानीताः । यदीयां कृष्णसंबंधिनीम् । अविरतं निरंतरमेधितया वर्धमानया ॥ * ॥ रमायाः पूर्णलक्ष्मीरूपायाः श्रीरुक्मिण्याः पतिमिति परमदौर्लभ्यं वैदग्ध्यादिकं च सूचितम् । ता रमांशभूताः । पतिमवाप्य स्वातंत्र्येण लब्ध्वा । ब्रह्मादयोऽपि किं पुनरन्ये, पदवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे पारिजातहरणनरकवधो नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ छ ॥ श्रीशुक उवाच ॥ कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गुरुम् ॥ पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥ १ ॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः ॥ स हि जातः स्वसेतूनां गोपीथाय यदुष्वजः ॥ २ ॥

नवसंगमं च तद्गतं जल्पं च तस्मिन् लज्जां च भेजुः ॥ ४४ ॥ विश्रमणं पादसंवाहनम् । केशप्रसारः केशप्रसाधनम् । दासीनां शतानि विद्यंते यासां तथाभूता अपि स्वयं विभोर्दास्यं विदधुः॥४५॥इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायामेकोनषष्टितमोऽध्यायः ॥५९॥ अथ षष्टितमे कृष्णः परिहासेन रुक्मिणीम् ॥ कोपयित्वा ततः प्रेमकलहे तामसांत्वयत् ॥ १ ॥ रामारामजनानंदमहोदयविडंबनैः ॥ रुक्मिण्या प्रेमकलहच्छद्मनैश्वर्यमीर्यते ॥ २ ॥ स्वतल्पस्थं स्वपर्यंकस्थम् ॥ १ ॥ वक्ष्यमाणं

मपि किं पुनस्तम्, न विदुरपि किं पुनर्लभेरन्नित्यर्थः । अतस्तस्य लाभो रमात्वेनैव संभवतीति साध्वेवोक्तं रमाभिरिति भावः । चिरमनवरतरतावपि नवसंगमेत्युक्तिरत्यौत्सुक्येन तासां नित्यनूतनत्वप्रतीतेः । अत एवानवरतमेधितया मुदेति हासादीनां तत्तत्क्रमेणोदयात्तथैवोक्तिः । मुदा तदेव भेजुः, कथम्—अनुरागेण हासादयो यासां ताः तत्तत्प्रकारेणेत्यर्थः ॥ ४४ ॥ प्रत्युद्गम आगतस्य संमुखगमनम् । वरेण कुंकुमेनार्हणमर्चनम् "वरो जामातारि श्रेष्ठे देवाद्यासे च कुंकुमे" इति धरणिः । कुंकुम इत्युपलक्षणम् । वीजनं व्यजनचालनम्, गन्धश्चन्दनमेव ॥ * ॥ अत एव प्रत्युद्गमेति, प्रत्युद्गमः श्रुत्वैवोत्थायाभिमुख्येन गमनम्, आदरस्तदनन्तरमन्या च संमाननक्रिया, तत्रापि भयं कदाचिदस्याभीष्टभंगः स्यात्, निजधर्मादिकाच्चेति शंकित्वं पाठोऽयं चित्सुखसंमतः । पाठांतरं तु प्रायिकम् । आसनादीनामपि तत्तत्संस्थापनक्रियासु तात्पर्यम्॥श्रीगोपीसदशोत्कंठिबादरायणये नमः। तादृग्व्याख्याकृतेऽप्यस्तु श्रीधरस्वामिने नमः ॥४९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोरार्द्धे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ततः कोपानंतरम् । तां रुक्मिणीम् (१) । रामास्त्वारामो रमणं येषां ते जनास्तेषामानंदस्तस्य महोदयस्तस्य विडंबनैः (२) । पर्यंकः शय्याभेदः ॥ * ॥ श्रीमदनिरुद्धविवाहानंतरमेव वक्तुं योग्यामप्येतां श्रीरुक्मिणीदेव्याः प्रेमकलहक्रीडां महिषीविलासप्रसंगाद्रसविशेषोदयेनाधुना वक्तुमारभते—कर्हिचिदित्यादिना यावदन्तम् । कस्मिंश्चिद्गृहसुखक्रीडाकाले तस्या गृहे तस्या एव पर्यंके वर्तमानम् । तादृशपरिचरणे हेतुः—जगतः सर्वस्मात्सकाशाद्गुरुं महत्तमम् । विशेषतश्च स्वपतित्वात्परमप्रेमास्पदञ्चेत्यर्थः । सखीजनैः सह पर्यचरन्नानापरिचर्यामकरोत्, पश्चात्तु व्यजनेन स्वयं पर्यचरदित्यर्थः । सखीजनानां बहुत्वस्य निर्देशात्, व्यजनस्यत्वेकत्वे तथा बह्वीनामेकसेवानर्हत्वात्, 'वालव्यजनमादाय—' इत्यनुवदिष्यमाणत्वाच्च ॥ १ ॥ तस्य कृष्णस्योक्तं तत्त्वम् 'ब्रह्मादयोपि न विदुः पदवीं यदीयाम्' इत्याद्युक्तम् । 'गोपीथं रक्षणे दुग्धे' इति निरुक्तिः ॥ * ॥ जगद्गुरुत्वमेव दर्शयति— । तु प्रसिद्धौ । एतद्विविधाश्चर्यमयम् । ईश्वरः प्रकृत्यादिनियंता पुरुषावतारः सन् हि एव स स्वयं भगवानेव स्वेनेश्वररूपेण कृतानां नानासेतूनां गोपीथाय रक्षणायाजोपि जातः जन्मलीलया

१ 'प्रत्युद्गमादरभयार्हण—' इतिरूपः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना ॥ विराजिते वितानेन दीपैर्मणिमयैरपि ॥३॥ मल्लिकादामभिः पुष्पैर्द्विरेफकुलनादितैः॥ जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ॥४॥ पारिजातवनामोदवायुनोद्यानशालिना ॥ धूपैरगुरुजै राजञ्जालरंध्रविनिर्गतैः ॥५॥ पयःफेननिभे शुभ्रे पर्यंके कशिपूत्तमे ॥ उपतस्थे सुखासीनं जगतामीश्वरं पतिम् ॥ ६ ॥ वालव्यजनमादाय रत्नदंडं सखीकरात् ॥ तेन वीजयती देवी उपासांचक्र ईश्वरम् ॥ ७ ॥ सोपाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रहस्ता ॥ वस्त्रांतगूढकुचकुंकुमशोणहारभासा नितंबधृतया च परार्ध्यकांच्या ॥ ८ ॥

रुक्मिण्याः श्रीकृष्णे परमप्रेमसंभावयितुं तस्योक्तमेव तत्त्वमनुस्मारयति । यस्त्विति ॥ २ ॥ आदौ तावत्त्रिभिः श्लोकैर्मंदिरमनुवर्णयति । तस्मिन्निति । तच्छब्देनातिप्रसिद्धमाह । भ्राजंति मुक्तादामानि तेषां विलंबाः संति यस्मिंस्तेन वितानेन । विराजिते तृतीयांतानां विराजितपदेनान्वयः ॥ ३ ॥ सुगंधितया द्विरेफकुलैर्नादिते । प्रविशद्भिश्चंद्ररश्मिभिः ॥ ४ ॥ निर्गच्छद्भिरगुरुसंभवैर्धूपैश्चातिमनोहरत्वं दर्शितम् ॥ ५ ॥ पयसः क्षीरस्य फेन इव मृदूनि पर्यंकस्थे कशिपूत्तमे हंसतूलिकायाम् । उपतस्थे असेवत ॥ ६ ॥ तदेवाभिनयति । वालव्यजनमिति ॥ ७ ॥ उपाच्युतमच्युतस्य समीपे सा मणिनूपुराभ्यां रेजे । क्वणयती मणिमयौ नूपुरौ कूजयंती

प्रादुर्भूतः ॥ २ ॥ "वितानो यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्" इति मेदिनी ॥ * ॥ तत्र प्रेमकलहक्रीडा च जातेति वर्णयितुं सप्तभिः पद्यैः प्रेम वर्णयन्नादावुभयोस्तदुद्दीपनसामग्रीं वर्णयति—सार्द्धैस्त्रिभिः । गृहस्य वर्णनं त्रिभिः, अर्धेन शय्यायाः, अथ श्रीरुक्मिण्याः प्रेमवर्णनं सार्द्धेन, ततः श्रीभगवतस्तत्त्ववर्णनं सोपेति द्वयेनेति सप्त । तत्र तस्मिन्निति चतुष्कम् । अंतर्गृहे चंद्रशालादियुक्ते नानागृहशालिस्वांगनांतःपुरमध्ये । विराजित इति स्वत एव रत्नभित्त्यादिना राजमाने वितानादिभिश्च विशेषतो राजित इत्यर्थः ॥ ३ ॥ 'दामोक्तं गुणमालयोः' इति कोशान्मल्लिकादामभिर्मल्लिकाधिकैः पुष्पैः शोभित इत्यर्थः ॥ * ॥ मल्लिकादामभिर्द्वारादिबद्धैः । पुष्पैरन्यैश्च स्थानेस्थाने विकीर्णैः । 'धूपैः' इति क्वचित्पाठे आगुरवस्त्वग्रे । अरुणैरिति प्रागुद्यन्मात्रता सूचिता । इयं क्रीडा प्रदोषारंभे ज्ञेया ॥ ४ ॥ ० ॥ * ॥ जालरंध्रप्रविष्टगोभिर्धूपैश्च गृहशोभादर्शिता । वनशब्दः सर्वासां पट्टराज्ञीनां गृहेष्विंद्रेण पूर्वप्रस्थापितपारिजातस्यैकैकस्य सर्वत्र वृत्तेः । न च केवलं तदामोद एव विचित्रान्यपुष्पादीनामपि सौरभ्यमस्तीत्याह—उद्यानेति । जालरंध्रेण विशेषतो निखिलदिग्व्यापकत्वादिना निर्गतैः । तादृशगृहे यश्चंद्रशालांगणगतः पर्यंकस्तस्मिन्यत्कशिपूत्तमं तस्मिन् ॥ ५ ॥ "एकोक्त्या कशिपुर्भक्ताच्छादने च द्वयोः पृथक्" इति विश्वः । "आयामः सप्ततालः स्याच्चतुस्तालं तु विस्तृतम् । द्वितालमुन्नतं ज्ञेयमेतत्पर्यंकलक्षणम् ॥" इति शिल्पिशास्त्रे । 'अंगुष्ठमध्यमयोर्विस्तृतयोरंतरालस्तालः' इति प्रयोगरत्ने । "शय्याच्छादनवस्त्रे च कशिपुर्लवुमश्नके" इति धरणिः ॥ * ॥ तदेव विशिनष्टि—पयइत्यादिपदाभ्याम् । उपतस्थं इत्यादेः पुनःपुनरुक्तिस्तु भावविशेषेण पुनःपुनस्तादृक्सेवाभिकामात् ॥ ६ ॥ तदेव उपस्थानम् । अभिनयति दर्शयति । तेन बालव्यजनेन ॥ * ॥ व्यजनसेवाप्रकारमाह—वालव्यजनं चामरम् । देवी महापट्टराज्ञी ॥ ७ ॥ अंगुलीयवलयान्यंगुलिभूषणानि । हस्तस्याग्रमग्रहस्तमिति राजदंतादित्वात्समासः । स्थगितावाच्छादितौ । 'पश्चान्नितंबः स्त्रीकट्याः' इत्यमरः । "कांची स्यान्मेखलादाम्नि प्रभेदे नगरस्य च" इति मेदिनी । 'स्यात्परार्ध्यमनर्घ्येऽपि परभागे द्वयोः' इति निरुक्तिः ॥ * ॥ सेति—सा क्वणयन्ती शब्दायमाना रेजे । राजने हेतुः—मणिनूपुराभ्यामुपलक्षिता, अंगुलीयेत्यादिलक्षणा । 'तत्र तत्स्मारितानंतहृताखिलेंद्रियः' इति, "वासुदेवे भगवति निमग्नहृदयोऽब्रवीत्" इत्यादिरीत्या प्रस्तूयमानतदेकस्फूर्त्या तां सभामप्यनवधाय 'बाहुप्रसारपरिरंभकरालकोरू—' इत्यादिकं यथाऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां रूपिणीं श्रियमनन्यगतिं निरीक्ष्य या लीलया धृततनोरनुरूपरूपा ॥ प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधां हरिराबभाषे ॥९॥
श्रीभगवानुवाच ॥ राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः ॥ महानुभावैः श्रीमद्भी रूपौदार्यबलोर्जितैः ॥ १० ॥

तथा अंगुलीयवलयव्यजनान्यग्रहस्ते हस्ताग्रे यस्याः सा । वस्त्रांतेन गूढौ स्थगितौ कुचौ तयोः कुंकुमं तेन शोणो हारस्तस्य भासा तथा नितंबे धृता या परार्ध्या अमूल्या कांची तया च रेजे ॥ ८ ॥ तां निरीक्ष्य प्रीतः सन्स्मयमानो हरिराबभाषे । कथंभूताम् । या लीलया धृतनरतनोस्तस्यानुरूपरूपा अनुरूपं रूपं यस्यास्ताम् । यथोक्तं श्रीपराशरेण–"देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥ विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनुम्" इति । किंचालकैः कुंडलाभ्यां निष्केण पदकेनालंकृतकंठेन च चतुर्दिक्षु शोभिते वक्त्रे उल्लसंती स्मितसुधा यस्यास्ताम् ॥ ९ ॥ सर्वगुणयुक्ताऽपि तव बुद्धिर्मंदेत्याशयेनाह राजपुत्रीत्याद्येकादशभिः । हे राजपुत्रि लोकपालानामिव विभूतिरै

वर्णयत्तथैव तत्सखीजनस्फुरणवशात्तद्भावितः संस्तस्या रहस्यामपि शोभां वर्णयति–वस्त्रेति । तत्र वस्त्रांतेत्यादिद्वयेनोपलक्षिता चेत्यर्थः । तत्र शाटीरूपवस्त्रस्य दीर्घत्वात् सम्यगेव गूढत्वं ज्ञेयम्, अन्तशब्दस्य स्वरूपार्थक कणने हेतुः–मणीति, वलयेति, परार्द्ध्येति च । वीजनेन, भावेन चलनादिति ज्ञेयम्॥८॥ तां रुक्मिणीम् । अनुरूपं योग्यम् । देवत्वे देवभावे । इयं लक्ष्मीः । पुनः शोभाधिक्यमाह–किंचेति।अलकादीनां चतुष्कत्वाच्चतुर्दिक्ष्विति ज्ञेयम् ॥*॥ तामिति–रूपिणीं वैकुंठलोकादौ लक्ष्मीरूपादेरप्यधिकरूपशालिनीमित्यर्थः । प्रशंसायां मत्वर्थीयः । तत्र हेतुः–येति । 'विस्मापनं स्वस्य च–' इत्यादिवचनप्रामाण्येन तेनाप्यधिकसौंदर्यप्रकटनादिति भावः । प्रति इति भावविशेषं द्योतयति । अत एव नर्मविशेषस्य वक्तव्यत्वात् । स्मयन्स्मयमानः । सर्वप्रकारेण मदनुरूपाया अप्यस्याः स्वस्यानुरूपत्वं युक्त्या प्रदर्श्य परिहसामि, तत इयं किं वदेत्तदहमद्य श्रृणवानीति भावः । अनन्य गतिमपि ताम् आ सम्यग्वाग्भंग्यादिना बभाषे । यतो हरिः नर्मादिना प्रियजनानां धैर्यादिहर इति भावः । यद्वा–आ इति पृथक्पदं खेदे । तां प्रति तादृगुक्तेरयोग्यत्वात् । तच्च वक्ष्यत्येव–अतदर्हामिति ॥ ९ ॥ अधि क्षिपति–सर्वगुणेत्यादिना । न हि राजपुत्रं विना राज्यपुत्र्यन्ययोग्या भवतीति सम्बुद्ध्याशयः ॥ * ॥ अत्रायं भगवतोऽग्रिमवाक्यदृष्ट्या भावोधिगम्यते–एकेनैव द्युतरुकुसुमेनास्यै दत्तेन सत्यभामा तादृशमानकोप रसवर्षिण्यभूद्–यथा मया पादपतनादिभिरप्युपशमयितुमशक्या, दत्तेन तद्वृक्षेणैव प्रसादिता, इयं रुक्मिणी तु तद्वृक्षदानदर्शनेनापि न कोपं व्यंजयामास, तदस्या असंभावितमानायाः परमगंभीरायाः प्रियंवदाया रोषोक्तिमाध्वीकं कथमहं लभेयेति विमृश्य खल्वियमुक्तिरेवास्याः कोपमुत्पादयिष्यतीति निरचैषीद्भगवानिति केचिदाहुः । अन्ये तु–नायकेन प्रेमवृक्षस्योन्मूलने कृते सति प्रेमवती नायिका कीदृशी भवेदिति दिदृक्षैव भगवत आसीदिति तत्वमित्याहुः । प्रिये त्वमात्मनः परमबुद्धिमत्त्वं मन्यसे, वस्तुतस्तु संपूर्णसाद्गुणवत्या अपि स्वार्थानभिज्ञायास्तव बुद्धिरेवैकात्यल्पीयसी भवति, कथमिति चेच्छ्रुयतामित्येकादशभिराह–हे राजपुत्रि इति । त्वं राज्ञः पुत्री, अहं तु वसुदेवस्याकिंचनस्य पुत्रोऽतः कस्मादस्मान् मां वव्रषे वृतवत्यासि । सविशेषगस्य बहुत्वमार्षम् । न च गत्यंतराभावात्त्वामहं वृतवत्यस्मीति वाच्यम्, भूपैरीप्सितासि । न च ते भूपा मत्तो विभूतिरूपगुणादिभिर्न्यूना इत्याह–लोकपालविभूतिभिरिति, श्रीमद्भिरिति, न तु रन्तिदेवाद्यैरिव धनसमृद्धिभोगरहितैरित्यर्थः ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तान्प्राप्तानर्थिनो हित्वा चैद्यादीन्स्मरदुर्मदान् ॥ दत्ता भ्रात्रा स्वपित्रा च कस्मान्नो ववृषेऽसमान् ॥ ११ ॥ राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतान् ॥ बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृपासनान् ॥ १२ ॥ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम् ॥ आस्थिताः पदवीं सुभ्रूः प्रायः सीदंति योषितः ॥ १३ ॥ निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्प्रायेण न ह्याढ्या मां भजंति सुमध्यमे ॥ १४ ॥ ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥ १५ ॥

श्वर्यं येषां तैस्तथा महाप्रभावैराढ्यै रूपादिभिरूर्जितैश्च पूर्वमीप्सितासि ॥ १० ॥ तान्हित्वा नोऽस्मानसमानान्कस्माद्ववृषे वृतवती त्वम् ॥ ११ ॥ किंच । प्रायशो राजभ्यो जरासंधादिभ्यो बिभ्यतो भयं प्राप्नुवतः ॥ १२ ॥ अस्पष्टवर्त्मनामविज्ञाताचाराणाम् । अलोकपथमस्त्रीपारतंत्र्यम् । पदवीं मार्गम् । आस्थिता अनुसृताः ॥ १३ ॥ किंच निष्किंचना इति ॥ १४ ॥ आत्मसमं परस्परमनुरूपम् । जन्मैश्वर्याभ्यां सहिता आकृतिः रूपं जातिर्वा समा ! भव आयतिः ॥ १५ ॥

अर्थिनस्त्वदिच्छावतः । स्मरदुर्मदान् युवानः । अस्मान् सर्वथा त्वत्सादृश्यरहितान् । दत्ता वाचा दत्ता ॥ * ॥ न च ते तदानीं दूरे स्थिता इत्याह—प्राप्तानिति । न च बंधूनां तत्रासम्मतिरित्याह—भ्रात्रा पित्रापि वाग्दत्तैवेत्यर्थः । स्वपित्रेत्यत्र स्वशब्देन कन्यायाः पित्रधीनतोक्ता ॥ **तोषिणी** तु—न इति बहुत्वम् “ अस्मदो द्वयोश्च ” इति वचनात् । यद्वा—नो मदादीन्यादवान्ववृषे पत्यादिरूपेणांगीचकर्थ । परोक्षनिर्देशस्तथैव वृतत्वात् । अन्यथाहमपि न्यवारयिष्यमिति भाव इत्याह ॥ ११ ॥ न केवलं त्वदसमाः किन्तु नृपांतरसमा अपि नेत्याह—किंचेति । प्रायःपदेन न सर्वथेत्यर्थो बोध्यः, ‘ वज्रं तत्राभ्यषेचयत् ’ इत्याद्युक्तेः ॥ * ॥ किंच—क्षत्रियजातेर्मम भीरुत्वलक्षणं महादोषमपि त्वं नाद्राक्षीरित्याह—राजभ्य इति । न च भीरुत्वेऽपि मम शिष्टत्वमस्तीत्याह—बलवद्भिरिति । प्रायोग्रहणाद्द्वित्रैरेवार्जुनादिभिर्मैत्र्यं न तु बहुभिः । किंच—यादवत्वान्नायतो राजत्वाभावेऽपि कंसवधात्प्राप्तं यद्राजत्वं तदप्युग्रसेनाय दत्त्वा त्यक्तमित्याह—त्यक्तेति ॥ अत्र **तोषिणी**—यद्वा—प्रायस्त्यक्तेति संबंधः । प्राय इति स्वस्य राजेंद्राभिषेकस्य क्षणमात्रस्वीकाराभिप्रायेणोग्रसेनादीनाञ्च तदंगीकारो बलादिवेति च । हे सुभ्रूरिति तच्छ्रवणात्तस्या भ्रूकौटिल्यदर्शनेन तादृशस्फूर्तेः स्तुतिपूर्वकमेवोपालंभस्य प्रारब्धत्वाच्च । एवमुत्तरत्रापि ॥ १२ ॥ प्रायःपदं पूर्वोक्तार्थपरम् । अस्त्रीपारतन्त्र्यं वनितानुकूल्यवर्जितम् ॥ * ॥ अत्रोत्तरमलभमानः साक्षादेव तदाक्षिपन्निव स्त्रीमात्रस्यापि मादृशभजनमयुक्तमित्याह—अस्पष्टेति । क्वचित्परदारसेवादिदर्शनेन, क्वचिद्वैदिकाचारदर्शनेनायं किं नास्तिक आस्तिको वा, आस्तिकत्वेऽपि क्वचिद्यज्ञाद्यर्थमृगयादिदर्शनेन, क्वचिन्मुचकुन्दादौ तन्निन्दादर्शनेन च किं प्रवृत्तो निवृत्तो वेत्यादि न स्पष्टं न सुबोधं वर्त्म अदुष्टहिताचरणं येषाम्, तथा लोकपथं स्त्रीपुत्राद्यपेक्षादिलक्षणं दृष्टहिताचरणं नतं प्राप्नुवन्तं स्त्रियाः पुरतस्तद्भ्रात्राद्यपमानाज्जातमात्रपुत्राद्यरक्षणाच्च । प्रायो वितर्के, बाहुल्ये वा । यच्च काश्चिन्न सीदंति तत्तासामेव गुण इत्यपि तादृशीभिर्वयमभजनीया एवेति भावः ॥ १३ ॥ निजनैःस्वं द्योतयति—किंचेति । निरव्ययमभावे । निष्किञ्चना अकिंचनाः । यतोऽकिंचनप्रियास्तस्माद्धेतोः । प्रायेणेत्युक्तेर्ध्रुवांबरीषादय आढ्या भजंत्यपीत्यर्थः ॥ * ॥ किंच—आढ्यमात्रस्यापि न मद्भजनमाचारमात्रप्राप्तमित्याह—‘ उदासीना वयं नूनम् ’ इति वक्ष्यमाणानुसारेण न विद्यते किंचन येषां ते वयं मत्प्रधाना इत्यर्थः । किंच—निष्किञ्चनजनानां प्रियाः । यद्वा—निष्किश्चनजन एव प्रिया येषां ते । शश्वन्नित्यम्, अस्योभयतोप्यन्वयः । प्रायेणेत्याढ्यत्वेप्यन्तर्विरक्तान्वर्जयित्वेति भावः । वस्तुमात्रेष्यासक्तिभावान्निष्किञ्चना एवेति भावः । अतो मां तेषु प्रधानं सुतरां न भजंतीत्यर्थः । अतो महाराजपुत्र्यास्तवाढ्यत्वेनांतर्वैराग्यासंभवेन सुतरां मद्भजनमयुक्तमिति भावः ॥ १४ ॥ मया तव विवाहस्तु सर्वथानुचित एवेत्याह—ययोरिति । आत्मना समं परस्परार्थकमत्रात्मपदम्, ययोरिति सांनिध्यात् । संनिवेशस्यर्थग्राहकत्वमुक्तम्—“ वाक्यवाच्यान्यसंनिवेः प्रस्तावदेशकालादेः ” इति काव्यप्रकाशे मम्मटेन । “ आकारेऽवयवे रूपे जातावाकृतिरुच्यते ” इति धरणिः । “ आयतिस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥ १६ ॥ अथात्मनोऽनुरूपं वै भजस्व क्षत्रियर्षभम् ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥१७॥ चैद्यशाल्वजरा संधदंतवक्रादयो नृपाः ॥ मम द्विषंति वामोरु रुक्मी चापि तवाग्रजः ॥ १८ ॥ तेषां वीर्यमदांधानां दृप्तानां स्मयनुत्तये ॥ आनीतासि मया भद्रे तेजोऽपहरताऽसताम् ॥१९॥ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्याऽऽस्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥ २० ॥

न दीर्घा समीक्षा विचारो यस्यास्तया॥ १६ ॥ अथ इदानीमपि॥ १७ ॥ तर्हि किमित्यानीताऽहमिति चेत्तत्राह। चैद्यशाल्वजरासंधेति। मम मां द्विषंति॥ १८ ॥ स्मयनुत्तये गर्वापनयनाय॥ १९ ॥ स्त्रीणामतिदुःसहमौदासीन्यमकामत्वं चाह। उदासीना इति। गेहयोर्देहगेहयोरुदासीना अत एव ज्योतिरक्रियाः ज्योतिः प्रदीपादि तद्वत्साक्षिमात्रतया क्रियारहिता

स्त्रियां दैर्घ्ये प्रभावागामिकालयोः " इति मेदिनी । " भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः " इति च । भव आयतिः, प्रभाव इत्यर्थः ॥ * ॥ किञ्च—सर्वेषामप्येवमेव युक्तमित्याह—ययोरिति। तयोरेव युज्यत इति शेषः। अन्यत्तैः। तत्रायतिरुत्तरकालो भवितव्यतेत्यर्थः। तज्ज्ञानञ्च ज्योतिःशास्त्रादिना। समकालजन्मना वयोऽभिप्रेतम्। न केवलं विवाहः मिथः सौहार्दमपि तयोरेव स्यादित्याह—मैत्री च, मैत्र्यपि व्यतिरेकेण। तदेव द्रढयति—नेति। क्वचित्कस्मिंश्चिद्देशे काले वा ॥ **विश्वनाथस्तु**—तव मद्भार्यात्वं नोपपद्यत इत्यत्र नीतिवाक्यं शृण्वित्याह—ययोरिति। तव पितृपितामहबहुधनवत्त्वाद्बहूनि वित्तानि, मम तु पितुर्वसुदेवस्य वित्ताभावान्मदुपार्जितमेवेह किञ्चिद्वृत्तम्। जन्मेति—त्वं महाकुलप्रसूता, अहं तु यादवत्वादकुलीनः। ऐश्वर्यमिति—तत्र वैदर्भदेशस्थकुंडिनादिबहुनगरेष्वधिकारः, मम त्वानर्तदेशस्यैकस्यां द्वारकानगर्यामेव। आकृतिरिति—त्वं गौरी, अहं तु कालः। ऐश्वर्येण सहाकृतिरैश्वर्याकृतिः। भव इति—'भवः क्षेमेशसंसारे' इत्यभिधानात्। त्वं तु सदा कल्याण्येव, मम तु कल्याणवत्त्वं बहुशत्रुत्वात्संदिग्धमेवेति ॥ १५ ॥ एतद् वित्तजन्मादि। मुधा वितथे ॥*॥ उपसंहरति—वैदर्भीति। एतत्सर्वं पूर्वोक्तमविज्ञायाविचार्य। ननु स्वैः सद्गुणैर्युक्ता एव यूयं, तच्च 'श्रुत्वा गुणान्—' इत्यादिना विज्ञापितमेव तत्राह—भिक्षुभिरिति। याचकैर्धनादिलोभेनैव श्लाविता इत्यर्थः। वैदर्भीति दूरदेशोद्भवत्वात्तद्द्वारकामात्रश्रवणमभिप्रेतम् ॥ १६ ॥ येनाऽनुरूपेण ॥ * ॥ एवमुक्तमिव यदुक्तं यच्च वक्ष्यते तत्रात्यंतासंभवोक्त्या तस्यां परमकोमलचित्तायां परिहासत्वं चातिस्फुटीकरोति, किञ्च—यदभूत्तदभूदेव तव स्थिरयौवनत्वादधुनापि काचित्क्षतिर्नाभूदतो विवेकं कुर्वित्याह—अथेति, इदानीमपि। वै एव, अनुरूपं सदृशमेव ॥ १७ ॥ स्वयमाशंक्य समाधत्ते—तर्हीति। आदिना पौंड्रकादिः ॥*॥ चैद्येत्यादि तैरवतारितम्, तत्र चेदित्यधिकं भाति। किञ्च द्वाभ्यामिति शेषः। विशेषस्तु तव मद्भक्ताया अग्रजोपीति। अत्र वर्तमानसमीप एव वर्तमानत्वमस्य मारितत्वेन वक्ष्यमाणत्वात् ॥ १८ ॥ तेषां चैद्यादीनाम्। स्मयो गर्वस्तस्य नुत्तये नाशाय ॥ * ॥ न च तत्र मम कोऽपि दोषः, किन्तु दुष्टस्वभावेनैव ते द्विषंतीत्याह—वीर्येण प्रभावेग बलेन वा यो मदो मत्तता तेनांधानां हतविवेकानामतो दृप्तानां गर्वितानामिति। अतस्तेषां स्मयनुत्तये आनीतासि। तत्र हेतुविशेषः—असतां तेजोपहरतेति। त्वदानयने तदेव प्रयोजनं न तु त्वद्विवाहादिकमिति भावः ॥ १९ ॥ स्वस्य स्त्रीणामयोग्यतामाह—स्त्रीणामिति। उदासीना अनासक्ताः विषयव्यापारशून्याः, खपुष्पादिवदप्रसिद्धा वा। ' उदासीनस्त्वप्रसिद्धे विषयासक्तिवर्जिते। मध्यस्थ ऊर्द्ध्वमासीने " इति धरणिः। अत एवोदासीनत्वादेव ॥ * ॥ ननु नानावैभवयुक्तस्य नानास्त्रीसंग्रहवतः कुतोऽकिंचनत्वादिकम्, किञ्च—अस्पष्टवर्त्मत्वादिनात्मनि वा कुतो दांभिकत्वमिवांगीक्रियत इत्याशंक्य सर्वं समादधदेव तद्विधानामतिदुःसहमाह—उदेति। नूनं निश्चये। उदासीना न तु कुत्राप्यासक्ता न चात्मीयेष्वपीत्याह—नेति। कुतः—आत्मेति। आत्मसुखेनैव सुखिन इत्यर्थः। गेहये

१ सौन्दर्यम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्न उपारमत् ॥ २१ ॥ इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियम् ॥ आश्रुत्य भीता हृदि जातवेपथुश्चिंतां दुरंतां रुदती जगाम ह ॥ २२ ॥ पदा सुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः ॥ आसिंचती कुंकुमरूषितौ स्तनौ तस्थावधोमुख्यतिदुःखरुद्धवाक् ॥ २३ ॥ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथद्वलयतो व्यजनं पपात ॥ देहश्च विक्लवधियः सहसैव मुह्यन्रंभेव वायुविहता प्रविकीर्य केशान् ॥ २४ ॥

आस्महे वर्तामह इति ॥ २० ॥ अविश्लेषाद्धेतोः आत्मानमेव वल्लभामित्येवार्थे इव शब्दः ॥ २१ ॥ २२ ॥ चिंतालक्षणमाह । पदेति । नखैररुणा श्रीः कांतिर्यस्य तेन सुजातेन सुकोमलेन पदा ॥ २३ ॥ सुदुःखमप्रियश्रवणात् । भयं त्यागशंकया । शोकोऽनुतापः तैर्विनष्टा बुद्धिर्यस्यास्तस्याः । श्लथंति पतंति वलयानि यस्माद्धस्तात् ।

रित्येकशेषात्, न च देहस्य गेहसामान्येन तच्छब्दप्रयोगा त् । ज्योतिरक्रिया इति—परमात्मैकभावेनेति भावः । तदिदं परमार्थतः । स्वस्य जीवांतर्यामित्वापेक्षयोक्तमतो देहगेहौ चात्र जीवसंबंधिनावभिप्रेतौ न तु स्वसंबंधिनौ, लीलाविनोदस्तु स्वदेहगेहेषु लौकिकज्ञानित्वाद्यारोपणायोक्तमिति ज्ञेयम् ॥ २० ॥ एतावत् ‘ राजपुत्रीप्सिता—’ इत्यारभ्य ‘ ज्योतिरक्रियाः ’ इत्यंतवाक्यसंदर्भम् । तद्दर्पघ्नो रुक्मिणीदर्पहरः ॥ * ॥ वल्लभाशब्दस्य परमप्रियभार्यायां रूढत्वस्वीकारेणाऽजहल्लिंगत्वादात्मतुल्याधिकरणत्वेऽपि स्त्रीत्वम् । तस्या दर्पो वल्लभात्वाभिमानस्तद्घ्न इवेति नर्ममयत्वात् । तथा च वक्ष्यति—‘हास्यप्रौढिमजानन्त्याः ’ इत्यादि । तथा च स्वयमेव वक्ष्यति—“ त्वद्वचःश्रोतुकामेन क्ष्वेल्याचरितमङ्गने ” इति ॥ **विश्वनाथस्तु**—वल्लभामिवेति—सर्ववल्लभासु श्रेष्ठामपि तां परमानुरागोत्थस्वयोग्यत्वमननेनैवात्मानं वल्लभामिव मन्यमानामेतावदुक्त्वा । अविश्लेषाद्धेतोरिति—भार्यात्वायोग्यामपि मामयं स्वगुणेनैव सुभगां भार्यां करोति तदहमेतावदद्भुतगुणार्णवभर्तुरेकैवास्मीति यो दर्पस्तं हंतीति सः । वल्लभाशब्दस्य परमप्रियभार्यावाचित्वेनोद्देश्यविधेयभावेनान्वयान्न पुंस्त्वम्, इहात्मोद्देश्यकवल्लभात्वस्य विधेयत्वात् । तदुक्तम्—“ यत्रोद्देश्यविधेयत्वं तत्रायं नियमो नहि । रामदाराश्च सीतेयं करुणाभाजनं हरिः ॥ ” इति । अयं नियमः समानलिंगविभक्तिवचनानामेव विशेषणविशेष्यभाव इत्यर्थः । तदप्युक्तम्—“ यल्लिंगं यद्वचनं या च विभक्तिर्विशेष्यस्य । तल्लिंगं तद्वचनं सा च विभक्तिर्विशेषणस्यापि ॥” इति **श्रीनिवासेन** ॥२१॥ इतीत्थम् । तत्पूर्वोक्तम् । ‘तदा’ इति वा पाठो ज्ञेयः । तत्र यदा हरिणेदृग्दुःखकरं वच उक्त्वोपरतं तदेत्यर्थः । दुरन्तामपाराम् ॥ * ॥ अस्या रासव्याख्यातः प्रेमजातिद्वये दाक्षिण्यमयप्रेमत्वान्मानस्य नोदयः, किन्तु परिहासतायाः स्फुटत्वेऽपि चिंताया एवोदय इत्याह—इतीति । इत्येतद्वचनम् । तदा सुखकेलिसमये । लोकेशानां ब्रह्मादीनामपि पालकस्येति तस्य सर्वपरिपालकतया पुरुषोत्तमयोग्यता विशेषता च । आत्मनः स्वस्य प्रियस्य । स्वयं देवी सर्वासु प्रेयसीषु मुख्यतया । तथाप्यप्रियम्, किञ्चाश्रुतपूर्वमिति तया दुस्तर्काभिप्रायत्वं परमासह्यत्वं चाभिप्रेतम् ! आ अतिनैकव्यादिना सम्यक् श्रुत्वा त्यागशंकया भीता । हृदीति कम्पस्यांतरतया भयस्य गौरवं सूचितम् । चिंतामनिष्टावाप्तिजन्यध्यानलक्षणाम् । दुरन्तां दीर्घां दारुणां वा । हेत्यव्ययमाचारातिक्रमे ॥ २२ ॥ लक्षणं चिह्नम् । रूषितौ लिप्तौ । ‘ रूष—संगे ’ धातुः ॥ * ॥ ० ॥ २३ ॥ तस्याः रुक्मिण्याः । रंभा कदली “ रंभा कदल्यप्सरसोर्ना वेणौ वारणांतरे ” इति कोशात् ॥ * ॥ सुदुःखमप्रियश्रवणात्, भयं त्यागशंकया, शोकस्ताभ्यां तापः, तैर्विनष्टा बुद्धिर्यस्याः । अतः परिहासोऽयमिति विचारोऽनाभूदिति भावः । श्लथंतीति सहसैव विरहपीडोत्थादतिकार्श्याद्वलयानि पेतुरिति गम्यते । तत्र हेतुमाह—न च केवलं विचारो नष्टश्चेतना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दृष्ट्वा भगवान्कृष्णः प्रियायाः प्रेमबंधनम् ॥ हास्यप्रौढिमजानंत्याः करुणः सोऽन्वकंपत ॥ २५ ॥ पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः ॥
केशान्समुह्य तद्वक्त्रं प्रामृजत्पद्मपाणिना ॥ २६ ॥ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ॥ आश्लिष्य बाहुना राजन्ननन्यविषयां सतीम् ॥ २७ ॥
सांत्वयामास सांत्वज्ञः कृपया कृपणां प्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः ॥ २८ ॥ श्रीभगवानुवाच ॥ मा मा वैदर्भ्यसूयेथा जाने
त्वां मत्परायणाम् ॥ त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमंगने ॥ २९ ॥

देहश्च पपात विक्लवा अवशा धीर्यस्यास्तस्याः ॥ २४ ॥ हास्यस्य प्रौढिं गांभीर्यम् ॥ २५ ॥ चतुर्भुज इति उत्थापनाश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतचतुर्भुज इत्यर्थः । समुह्य निबध्य ॥ २६ ॥ अश्रुकले अश्रुभिः शोभिते । शुचा शोकाश्रुभिः ॥ २७ ॥ सांत्वयामासानुनीतवान् ॥ २८ ॥ मा माम् । त्वद्वचः किं नु वदिष्यसीति

पीत्याह–विक्लवधियः, नष्टचेतनापीत्यर्थः । ततश्च मुह्यन्निति सहसैव नवम्यपि दशान्तः पपातेति । स्तंभादंतिमः प्रलयश्च सात्त्विकोऽभूदिति भावः ॥ २४ ॥ तत् प्रेमबन्धनम् । "प्रौढिर्गांभीर्यशक्त्योधारणास्वाधिकेऽपि च" इति निरुक्तिः । स कृष्णः ॥ * ॥ यथा सांसारिकजीवानामविद्यया बन्धनं तथा तस्याः प्रेम्णा बंधनं तदिति तस्य महादार्ढ्यं ध्वनितम् । यतः हासस्य प्रौढिं प्रौढत्वमजानन्त्या इति प्रेमपरिणामोऽनुरागो हि स्वाश्रयस्य प्रतिक्षणं दैन्यमेवापादयति, ततश्च नाहमेतद्योग्येत्यतोऽनेन त्यक्तैवाहमिति भ्रांतचित्ताया इत्यर्थः ॥ **तोषिणी** तु–अजानंत्या विचारयितुमशक्नुवत्या वाम्यमयद्वितीयप्रेमभेदाभावात्स महाकौतुकपरोऽप्यन्वकंपत । यतः करुणः सर्वप्राणिदयालुः, किमुत तस्यामिति भावः । यतो भगवान्कृष्णः, तत्तन्महागुणत्वेनातिप्रसिद्ध इत्यर्थः ॥ २५ ॥ तां रुक्मिणीम् । इत्यर्थ इति तात्पर्यम् । तद्वक्त्रं रुक्मिणीमुखम् ॥ * ॥ अनुकम्पामेवाह–पर्यंकादिति त्रिभिः । उत्थाप्य भूमितः स्वांके निवेश्येत्यर्थः । प्रकर्षेणाऽऽवृत्त्यादिनाऽमृजत् ॥ २६ ॥ अनन्यविषयां हठप्राप्तकृष्णाम् । "विषयो गोचरे देशे तथा जनपदेऽपि च । प्रबन्धाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान् ॥" इति मेदिनी । अतदर्हामेवंविधहास्यायोग्याम् ॥ * ॥ प्रमृज्येति युग्मकम् । प्रभुः सतीं पातिव्रत्यादिसद्गुणवतीं तां सांत्वयामास । सांत्वने हेतुः–सतां गतिः । सन्मात्राणां स्वयमेव शरणं किमुत तस्या इत्याह–अनन्यविषयामात्मैकाश्रयाम् । तादृशसांत्वने हेतुः–कृपयेति । तत्र हेतुः–कृपणां स्वोपेक्षामननेन दुःखदीनचित्ताम् । तत्र हेतुः–हास्येति । तत्र हेतुः–अतदर्हां परमसरलस्वभावत्वात् । ननु तादृशखेदने झटिति कथं सांत्वनं स्यात्तत्राह–सांत्वज्ञः सांत्वनाचातुर्यपण्डितः । तज्ज्ञत्वमेव विवृणोति–प्रमृज्येति । अश्रूणि कलयतः क्षरत इत्यश्रुकले । एवं तस्य खेदने सांत्वने च चातुरीमनुस्मृत्य साश्चर्यमिवाह–प्रभुर्यदा यत्करोति तदा तत्रैव समर्थ इत्यर्थः ॥ २७ ॥ ॥ २८ ॥ 'क्ष्वेलिर्नर्मणि हासे च' इति निरुक्तिः ॥ * ॥ मेत्यपि युग्मकम् । मा माम् । माभ्यसूयेथा मयि दोषदृष्टिं मा कुरु । नन्वनन्यगतिमपि मां त्यक्तुमिच्छसि कुतो नाभ्यसूया कार्या तत्राह–जान इति । अतः कदाचित्कथंचिदपि न त्याज्येति भावः । ननु तत्कुतस्तादृगुक्तं तत्राह–त्वद्वच इति । ननु तथापि सत्यवचनेन त्वया मिथ्या वक्तुं न युज्यते तत्राह–क्ष्वेल्याचरितमिति । नर्मसु तद्योग्यमित्यर्थः । अंगने परमसुन्दरीति स्तुतिः । अंगनास्वेतदुचितमेवेति भावः। हे वैदर्भीति–विशिष्टदर्भवनवासिभिर्मृगपक्ष्यादिभिरिव त्वयापि तन्न ज्ञातमिति भावः॥अत्र **विश्वनाथः**–ननु त्वया चेदिदं शरीरं त्यक्तं तर्हि कथमेष महाभारो मया वोढव्य इत्यतो मयाप्येतत्त्यज्यते, तत्राश्लेषाश्रुमार्जनादिना प्रकटप्रेमाणं प्रकटीकृत्य यत्प्रत्यूहं विधत्से तत्किमतोऽप्यतिदुःखदित्सा पुनरपि ते वर्तत इति स्वस्मिन्दोषारोपणमाशंक्याह–मेति । हे वैदर्भि मा मां मा अभ्यसूयेथाः । ननु च हंतहंत परमकारुणिके त्वयि मम मा मेयमसूया किन्तु त्वत्पार्श्वे स्थित्वा दुःखमेव प्राप्नुवत्या मम हितार्थमेव सुखमयीमन्यामेव गतिं यदुपदिष्टवानसि तदाकर्णितवत्या ममेयमानंदमूर्च्छैवाभूत्तद्वगं च त्वं किमकार्षीः, सा यदि क्षणमपरमप्यस्थास्यत्तदा मम तव च परमैव निर्वृत्तिरभविष्यदिति तस्याः सप्रेमवक्रोक्तिमाशंक्याह–त्वां मत्परायणां मदनन्यगतिमहं जाने । तर्हि कथमेवं दुर्वाक्यमवोचस्तत्राह–त्वद्वचः कांकां वक्रोक्तिं वदिष्यतीति श्रोतुकामेन मया क्ष्वेल्या नर्मणैवाचरितमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुखं च प्रेमसंरंभस्फुरिताधरमीक्षितुम् ॥ कटाक्षेपारुणापांगसुंदरभ्रुकुटीतटम् ॥ ३० ॥
अयं हि परमो लाभो गृहेषु गृहमेधिनाम् ॥ यन्नर्मैर्नीयते यामः प्रियया भीरु भामिनि ॥ ३१ ॥

श्रोतुकामेन श्रोतुमिच्छता क्ष्वेल्या नर्मणा एवमाचरितमुक्तं न तत्त्वतः । हे अंगने सुंदरि ॥ २९ ॥ प्रेमसंरंभेण प्रणयकोपेन स्फुरितः कंपितोऽधरो यस्मिंस्तत्। कटाशब्देन कटाक्षास्तैराक्षेपैररुणावपांगौ यस्मिंस्तत् । अत एव सुंदरं कुटिलं भ्रुकुटीतटं यस्मिंस्तत् ॥ ३० ॥ ननु कलहे किं कौतुकं सुखं वाऽत आह । अयं हीति । नर्मैर्नर्मभिः ।

मुक्तं न तु तत्त्वतः । हे अंगने सुंदरि ॥२९॥ एकदेशन्यायेन कटपदं कटाक्षपरम्॥*॥ नर्मोक्तौ प्रयोजनांतरं चाह–प्रेमसरभेणेति, तैर्व्याख्यातम् । ननु यदि सत्यकामस्य भगवतस्तथाभूतैवेच्छाऽऽसीत्तदा तदानीमेव रुक्मिणी सकोपकुटिलकटाक्षा कथं नाभूदिति चेत्–इच्छाशक्तिर्हि भगवत एवाधीना प्रेमा तु तं भगवंतमप्यधीनीकरोतीति प्रेम्णोऽग्रे न तस्याः कापि प्रभविष्णुता । प्रेमा ह्यानंदरूपमपि भगवंतमतिशयेनानन्दयितुं तदिच्छामपि कदाचिदन्यथा करोति । इदमत्र तत्त्वम्–आसां रुक्मिण्यादीनां मधुरप्रेमरसवतीनां रतिप्रेमस्नेहप्रणयमानरागानुरागेषु सत्सु स्थायिभावेषु मध्ये कदाचित्कश्चित्स्वावसरं प्राप्योदयत इत्यतस्तदानीं व्यजनसेवामयेऽनुरागः स्थायि भाव एवोदगात्, तस्य च दैन्यसंचारिप्राबल्यात्तस्याः खेदचिंतामोह एवाभूत्न तु तस्मिन्प्रणयकोपकटाक्षादयः । ते चोपरिष्टान्मानस्थायिभावोदयक्षणेषु भविष्यंत्येव । किञ्च–घृतस्नेहवत्या रुक्मिण्या मानकौटिल्यातिशयः प्रायो नोदयते, मधुस्नेहवत्याः सत्यभामाया अनुरागोऽपि मानगर्भ एवेति संरंभसकंपाधरकुटिलकटाक्षादिमुखं कृष्णस्य तत्रैव संपद्यत इति ॥ ३० ॥ कौतुकमद्भुतम् । यत् यः । 'नर्मस्तु नर्मणा सार्द्धम्' इति द्विरूपकोशाददंतोपि नर्मशब्दः । 'यामस्तु प्रहरे काले' इति मेदिनी ॥ * ॥ हि यस्मादयं गृहेषु वर्तमानानां गृहमेधिनां गृहेषु लाभः फलं सुखमित्यर्थः । गृहेष्विति–प्रोषितादीनां तत्सुखं निषेधति–याम एकप्रहरोपि । प्रिययेति सर्वाभ्यो मे त्वमतिवल्लभा, अतस्त्वयैव सहैतद्युज्यत इति । हे भीर्विति–भयमयदक्षिणप्रेमस्वभावादेव शंकां वहसि न तु विचारेणेति भावः । अतस्तदानीमपि क्रोधांशानभिव्यक्तौ सकौतुकं तदुद्भावनाय तमारोपयति–हे भामिनीति । एवं 'मा मा वैदर्भ्यसूयेथाः' इत्यपि । अत्र श्रीभगवतः सकौतुकोऽयममिप्रायः–इयं खलु सरलप्रेमवती परमगांभीर्यवतीति ततो ममाभीष्टः प्रियाकोपविलासः प्रेमनिर्बंधप्रकाशकसविकारकष्टोक्तिविशेषो वा नास्यां स्फुटमुपलभ्यते, तस्मात्कोपविलासो वा तज्जननाभावे तु द्वितीयस्तादृशोक्तिविशेषो वा यथास्यां प्रकाशेत तथा बाढं परिहासेन प्रयतिष्ये । तत्र यस्यां कोपजनने भ्रातृवैरूप्यादिकमपि कारणं नासीत्तस्यां तत्रान्यत्परसायोग्यमेव । किन्त्वहमेव मदविश्लेषसुखमेवास्याः सर्वस्वमिति तद्दर्पन्यक्कारेणैव कोपः संभवेद्यदि ततोपि कोपो नाविर्भवेत्तथापि मद्विश्लेषभयेन पूर्वानुरागवदधुनापि विकारविशेषसहितो निगदेनैव प्रेमनिर्बन्धः प्रकाश्येतेति । तत्र 'राजपुत्रीप्सिता भूपैः' इत्यादिकस्य तस्य श्रीकृष्णवचनस्य सप्रणयत्वं परिहासमयत्वं च 'तां रूपिणीम्' इति, 'प्रीतः स्मयन्' इत्यनेन च व्यक्तम्, परिहासमयत्वं तु विशेषतोप्युक्तं प्रसंगेन । तस्याः प्रेमसारल्यादिद्वयमपि 'तद्दृष्ट्वा भगवान्' इत्यादिना । हास्यं परिहासस्तत्र प्रौढिरवश्यमेनां सरलप्रेमवतीमपि गंभीरामपि क्षोभयिष्यामीति गर्वः तां प्रणयरसकौटिल्याभावेनाजानत्या इत्यर्थः । एवमग्रेपि हास्यप्रौढेर्भ्रमचित्तामिति । तत्र तेन परिहासेन कोपविलासादिदर्शनमेवाभीष्टमिति स्वयमेवोक्तम् 'मा मा वैदार्भि' इति त्रिभिः । अथ तस्य तत्प्रेमनिर्बंधप्रकाशकविकारदर्शनेच्छापि प्राक्तनेनैव वाक्येन व्यक्ता 'तद्दृष्ट्वा भगवान्' इत्यादिना । तथा निगदनेनैव तद्व्यक्तिदर्शनेच्छापि स्वयमेव व्यंजयिष्यते 'साध्व्येतच्छ्रोतुकामैः' इति । तथैव च तस्या वाक्यम्–'जाडयं वचस्तव गदाग्रज' इत्यादि । एवं स्वदर्पन्यक्कारेण तत्क्षोभो दर्शितः, अथ तदविश्लेषन्यक्कारेण तत्क्षोभो दर्शितः । तदविशेषन्यक्कारे श्रीशुकवाक्यम्–'एतावदुक्त्वा' इत्यादि । अन्यस्य तत्र हेतुत्वं भगवतैव निराकरिष्यते–'भ्रातुर्विरूपकरणम्' इत्यादिनेति । वैदर्भी तादृशानुरागेण विदर्भादागता वा । प्रियेण तेन यस्त्यागः स्वस्य त्याजनं तस्माद्भयम् ॥ **विश्वनाथस्तु**–ननु मत्कृतया व्यजनादिपरिचर्यया दुःखं लभसे किन्तु तां परित्यक्तवत्या मम कठोरकोपोक्त्यैव सुखं लभसे, अपरञ्च प्रियाया मम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ सैवं भगवता राजन्वैदर्भी परिसांत्विता ॥ ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ॥ ३२ ॥ बभाषे ऋषभं पुंसां वीक्षंती भगवन्मुखम् ॥ सव्रीडहासरुचिरस्निग्धापांगेन भारत ॥ ३३ ॥ रुक्मिण्युवाच ॥ नन्वेवमेतदरविंदविलोचनाऽह यद्वै भवान्भगवतोऽसदृशी विभूम्नः ॥ क्व स्वे महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥ ३४ ॥

यामः कालः ॥ ३१ ॥ ३२ ॥ भगवतस्तस्य ऐश्वर्ययुक्तं मुखं सव्रीडेन हासेन रुचिरेण स्निग्धेनापांगेन वीक्षमाणा ॥३३॥ "असमत्वं भयं दुर्गाश्रयणं प्रबलैः कलिः ।

हर्षेणोत्फुल्लं मुखं त्वन्नयनाभ्यां न रोचते, किन्त्वतिदुःखरूक्षं कोपविवर्णीकृतं रसप्रतिकूलं भ्रुकुटिभीषणं मुखमेव रोचते इति कोऽयं ते स्वभावस्तत्राह—अयमिति ॥ ३१ ॥ सा वैदर्भी । तस्य कृष्णस्य परिहासवचनम् ॥ * ॥ ० ॥ ३२ ॥ ॥ ० ॥ * ॥ पुंसामृषभमिति सर्वसौंदर्यवैदग्ध्यादिकमुक्तम् । अतो भगवदिति । स्वेनैव सुस्निग्धस्मितश्रमजलादिना च श्रीमत्, अत एव विशेषेणेक्षमाणा । केन—सव्रीडहासरुचिरस्निग्धापांगेन । तत्र व्रीडापूर्वं हास्यप्रौढिज्ञानाशक्तेः, हासः संप्रति हास्यप्रौढानुसंधानात्, व्रीडासहितेन हासेन रुचिरः स्निग्धश्च प्रेमरसार्द्रो योऽपाङ्गस्तेन, इतीक्षणविशेषोपि दर्शितः । एवञ्च परमोत्तमयोस्तयोः प्रेमसंवादो महावंशयशस्करगुणत्वात्त्वमेव बोद्धुमर्हसीत्यतस्तत्र मनो निवेहीत्याह—भारतेति ॥ ३३ ॥ असमत्वमतुल्यत्वम् । अविज्ञातं चालौकिकं चाविज्ञातालौकिके ते च ते ईहे चाविज्ञातालौकिकेहे ते चावसादनं चैतेषां समाहारो विज्ञातालौकिकेहावसादनम्, तथा चाविज्ञातेहालौकिकेहाऽवसादनं चेति त्रयम् । तत्प्रीतिर्निष्किंचनप्रीतिः । अनौचित्यमौचित्याभावः । असतोऽविद्यमानान् । भैष्म्या द्वौ दोषौ । तद्गुणस्तवैः कृष्णगुणकथनैः । ते दोषा एव गुणास्तद्गुणा इति वा । तत्र तेषु षोडशसु, तत्रेत्युक्तार्थमेव । यद्भवानाहैतदेवमेव । ननु एवार्थे । समो न त्वयेति । कथम्—विभूम्नो देशकालवस्तुपरिच्छेदसहितस्य व्यापकस्य भवतः सदृशो नास्तीति, किन्तु भवानेव भवत्समः " रामरावणयोर्युद्धं रामरावणयोरिव " इतिवत् । मत्सदृशी त्वमिति चेन्नेत्याह—क्वेति । ननु ब्रह्मादयो मत्सदृशा एवेति—चेदाह—अधीश इति । त्रिगुणस्वभावत्वे वैलक्षण्यासिद्धेराह—प्राकृतगुणमयी स्वाभाविकगुणविकारा । प्रकृतिर्मूलकारणं, गुणानामित्यर्थः । अत्राक्षिपति भगवान्—नन्विति । इत्यत इत्यत्र । अज्ञेति—विद्वांसस्तु मां त्यक्त्वैव त्वामुपासत इति भावः ॥ * ॥ अत्र टीकापद्येषु अविज्ञातेत्यादिना दोषत्रयमज्ञातेहा च लौकिकेहा चावसादनञ्चेति । भवतः सदृशी नाहमिति यद्भवानाह एतदेवं सत्यमेवेत्यर्थः । किन्तु भवत इति वक्तव्ये भगवत इति गौरवात् । वै व्यक्तम् । ननु निश्चितम् । कुतः—विभूम्नः, अनंताद्भुतमाहात्म्यपरिपूर्णस्य । अरविंदादपि विशिष्टलोचनेति सौंदर्येणापि न सदृशीति भावः । असदृशीत्वमेव व्यंजयति—क्वेति । स्वे महिम्नीति स्वरूपमेव महिमा परमप्रशंसाहेतुः, परमानंदरूपत्वात्तस्मिन्नित्यर्थः । तादृशे तत्रापि सर्वतोभावेन यतो भगवान्सर्वोत्कृष्टपदे वर्तते, अहं तु गुणा जाड्यादिदोषयुक्तास्तमःपर्यन्तास्त्रयः प्रकृतिः स्वरूपं यस्याः सा । क्व—सर्वनिकृष्टपदे वर्तेऽतो महदेवान्तरमिति भावः । एवं स्वरूपगते गौरवलाघवे दर्शिते । ऐश्वर्यगते अप्याह—त्रयाणां गुणानां ब्रह्मादीनां वा ईश आराध्यः पुरुषस्तस्याप्युपरीशो भगवानधीशः, अहं त्वज्ञैस्त्वद्बहिर्मुखैर्गृहीता आश्रिताः पादा अंशाः सत्त्वादिवैभवरूपा यस्याः सा, तत्सारांशजगल्लक्ष्मीत्वेप्यज्ञैरिंद्रादिभिरेवाश्रितौ पादौ चरणौ यस्यास्सा इत्यर्थांतरोक्तिरिति स्वस्य स्वरूपशक्तित्वेऽपि निजांशाभासमायाशक्तित्वेनोपन्यासो दैन्येनैव, टीकायां प्रथमार्थवत् । अतो वास्तवार्थे दैन्यं यथा स्वे स्वीये महिम्नि का कदा सर्वज्ञत्वादिरूपसौंदर्यसामर्थ्यादिरूपे वैभवेऽभिरतो भगवान् क्व, क्व वाऽहं स्वरूपभूतत्वेऽपि शक्तित्वेन शक्तिमत्त्वापेक्षया गौणी प्रकृतिर्यस्याः सा, तथा त्रयाणाम् " त्रिपाद्यास्तिः परे धाम्नि अनित्यं पादमैश्वरम् " इति पाद्मोत्तरखंडानुसारेण वैकुंठगतत्रिपाद्विभूतिरूपायां सर्वोपरीश्वरो भगवान्क्व, क्व चाहमस्य विष्णोस्तव ज्ञैर्ज्ञातृभिरेव गृहीतौ पादौ यस्याः सा, त्वन्महिमानुगतिमात्रसिद्धतत्तदैश्वर्येत्यर्थः । अथ दैन्यं विनापि वास्तवार्थे तत्तदुत्तरम्—यथैवमेवंभूतो भगवान्क्व कुत्रान्यत्र वर्तते किन्तु सर्वदा । ममाश्रयत्वेनैव वर्तते, अहं क्व कुत्रान्यत्र किन्तु सर्वदा त्वदाश्रितत्वेनैव वर्ते, तथा गुणा भवत ऐश्वर्यादय एव प्रकृतिः स्वरूपं यस्याः सा । अत एव न विद्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यं भयादिव गुणेभ्य उरुक्रमांतः शेते समुद्र उपलंभनमात्र आत्मा ॥ नित्यं कदिंद्रियगणैः कृतविग्रहस्त्वं त्वत्सेवकैर्नृपपदं विधुतं तमोंधम् ॥३९॥

अराजत्वमविज्ञाता लौकिकेहावसादनम् ॥ निष्किञ्चनत्वं तत्प्रीतिराढ्यानादरणीयता । अनौचित्यं निर्गुणत्वं वृथा श्लाघा च भिक्षुभिः ॥ औदासीन्यमकामत्वं स्वदोषान्षोडशाऽसतः ॥ अज्ञत्वादीर्घदर्शित्वे भैष्म्या राज्ञां बहून्गुणान् ॥ कृष्णनर्मोदितान्भैष्मी न्यषेधत्तद्गुणस्तवैः ॥" भगवता स्वनिंदापराणीव यानि वचनान्युक्तानि तानि सर्वोत्कर्षपरतया व्याचक्षाणा प्रतिभाषते स्म । तत्र यदुक्तं 'कस्मान्नो ववृषेऽसमान्' इति तत्रासाम्यं सत्यमेवेत्याह नन्वेवमिति । हे अरविंदविलोचन त्र्यधीशत्रयाणां ब्रह्मादीनामप्यधीशो नियंता त्वं क्व क्व चाहं गुणप्रकृतिस्त्रिगुणस्वभावा प्राकृता गुणमयी प्रकृतिर्वा । ननु त्वमेवाधीश्वरी श्रीः सर्वैरुपास्यत्वादिति चेदत आह । अज्ञैः सकामैर्गृहीतौ पादौ यस्याः सा ॥ ३४ ॥ यदुक्तं "राजभ्यो बिभ्यतः सुभ्रूः समुद्रं शरणं गतान्" इति तत्राह सत्यमिति । हे उरुक्रमेति भयाभावं दर्शयति । गुणाः शब्दादय एव राजंत इति

ज्ञः पंडितो येभ्यस्तैर्गृहीतपादेति । एवं कथमसमत्वं घटत इति भावः ॥ **विश्वनाथस्तु**—भगवता येनयेन वाक्येन स्वस्यापकर्षो रुक्मिण्या उत्कर्षश्चोक्तस्तदेव वाक्यमनुवदंती रुक्मिणी तद्विपर्ययं व्याचष्टे । तत्र यदुक्तम् ' कस्मान्नो ववृषेऽसमान् ' इति तत्राप्यसाम्यं सत्यमेवेत्याह—हे अरविंदलोचन, तत्सत्यमेव यद्भवान्कस्मान्नो ववृष इत्याह, तन्निश्चितमेव स्वे स्वीये षडैश्वर्यलक्षणे महिम्नि अभिरतः स्थितो भवांस्त्र्यधीशस्त्रिगुणनियंता भगवान्क्व, अहं गुणप्रकृतिर्जडा क्वेति त्वत्तोऽतिनिकृष्टाया मम कुतस्त्वत्साम्यसंभावनापीति भावः । गुणप्रकृतिर्बहिरंगा शक्तिस्तस्याः स्वांशत्वात्तत्स्वरूपमननमतिदैन्यादेव ॥ ३४ ॥ येन पादन्यासेनातिबलदैत्यानीकपतेर्बलेः पृथिवी गृहीता तस्य कुतो भयमिति संबुद्ध्यभिप्रायः । इत्यर्थ इति—समुद्रवदगाधांतःकरणं विषयाकारतरंगैर्न परिच्छिद्यत इति भावः । यद्यपीन्द्रियगण एक एव तथाप्येकैकेन्द्रियवृत्तीनामनंतत्वाद्बहुगौरिति बहुत्वमित्यर्थः । इन्द्रियाणां जडत्वात्स्वतो बहिर्मुखता न संभवतीत्यत आह—कुत्सितो विषयोन्मुखः । सत्यमित्यर्द्धांगीकारे । यद्वा—राजन्ते स्वशक्त्या द्योतन्ते इति राजानो गुणास्तेभ्यः इवेति शिक्षायां संसारावृत्तिहेतुगुणेभ्यो बिभ्यज्जनः समुद्रिक्तसुखाय समुद्रादिजलवासेन तपस्यति तथाहमपीति भावः । यद्वा—पंचभूतमुद्रासहिते शरीरे शेते भयादिवांगुष्ठमात्रः सन् " अंगुष्ठमात्रः पुरुषः " इति श्रुतेः । तर्हि जीववज्जन्माद्यपि स्यादत आह—उपलंभनमात्रः केवलचिन्मयः देहधर्मास्पृष्टः । कथम्—तत्राह—आत्मेति । सुखमेवाददाति नाण्वपि दुःखमित्यात्मा, जीवस्तु न तथेति । नृपपदं नृपासनं, न तु नॄन्पातीति नृपस्तत्पदन्तदर्थ इत्यर्थः ॥ * ॥ भगवद्विवक्षितस्योत्तरानुपपत्तेः—सत्यमिति । अस्य टीकायास्तात्पर्यमिदम्—' राजभ्यः—' इत्यादि यदुक्तं तत्तु गौण्यैव वृत्त्या संभवति न तु मुख्ययेत्याह—सत्यमिति । यद्भवानंतःसमुद्रे समुद्रमध्ये द्वारकायां दुर्गे शेते लीनतया प्रकाशते तद्भयादिवेत्येव, न तु भयादेवेत्यर्थः । यतो गुणाख्यराजभ्यश्चित्ताख्यांतःकरणसमुद्रे तस्मादिवांतर्यामिरूपेणापि शेते, न तु तस्मादेवेत्यर्थः । उभयत्र हेतुः—उपलंभनेति । यच्च ' बलवद्भिः ' इत्यादिकमुक्तं तत्तु मुख्यमैव । सत्यमित्याह—कदिंद्रियगणयुक्तैर्जीवैः कर्तृभिर्नित्यमेव कृतो विग्रहो विरोधो यत्र तथाभूतस्त्वमतः संप्रत्यपि तादृशे राजभिः स एव कर्तुं योग्य इत्यर्थः । श्लेषेण यतोंतर्यामिरूपत्वेपि कुत्सितैरिंद्रियगणैः कृतविग्रहस्त्वमित्यर्थः । यतस्तादृशेषु जीवेष्विन्द्रियेषु च त्वदीयस्वरूपादीनां यथावत्स्फूर्तिर्नास्ति ततस्तेषां त्वयि विरोधारुच्यादिमयद्वेषो युक्त एवेति भावः । अथ वा—आत्मा त्वम्, शेते इत्यन्वयानुपपत्तेरात्मत्वमित्येतयोः पदयोर्न विशेषणविशेष्यभावः, अत उपमानोपमेयभाव एव योज्यः । इवाद्यभावः न तु लुप्तोपमेयम् । अयमर्थः—हे उरुक्रम आत्मा शुद्धजीवो यथा गुणेभ्यस्तन्मयेभ्यः कदिंद्रियेभ्यो भयादिवांतर्हृदयाकाशे समुद्रवदनवगाह्ये शेते लीनतया वसति तथा त्वं गुणेभ्यः सदा, अधुना तु तत्प्रधानेभ्यो राजभ्यश्च भयादिवांतःसमुद्रे समुद्रस्य मध्ये श्वेतद्वीपादाविव द्वारकाख्ये धाम्नि शेषे नित्यं तथा वससि । तथा च श्रुतयः—" यमन्तःसमुद्रे कवयो वयंति तदक्षरे परमे प्रजातयः । प्रसूता जगतः प्रसूती तोयेन जीवान्व्याससर्ज भूम्याम् ॥ " इत्यारभ्य " तदेव ब्रह्म परमं कवीनाम् " इत्याद्याः, " यः कामयते मुग्धं कृणोमि तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यम् ॥ यस्मादलौकिकमिवेहितमीश्वरस्य भूमंस्तवेहितमथो अनु ये भवंतम् ॥३६॥ निष्किञ्चनो ननु भवान्न यतोऽस्ति किञ्चिद्यस्मै बलिं बलिभुजोऽपि हरंत्यजाद्याः ॥ न त्वा विदंत्यसुतृपोंतकमाढ्यतांधाः प्रेष्ठो भवान्बलिभुजामपि तेऽपि तुभ्यम् ॥ ३७ ॥

राजानस्तेभ्यो भयादिवेति अंतर्हृदये समुद्रे तद्वदगाधे विषयाकारैरपरिच्छिन्न इत्यर्थः । शेते निश्चलतया प्रकाशते । उपलंभनमात्रश्चैतन्यघन आत्मा भवानिति । 'बलवद्भिः कृतद्वेषान्' इति यदुक्तं तदपि सत्यमित्याह । नित्यमिति । कदिंद्रियगणैः कुत्सितैर्बहिर्मुखैरिंद्रियगणैः । वृत्त्यभिप्रायेण बहुवचनम् । कुत्सित इंद्रियगणो येषामिति वा । तैस्त्वं नित्यं कृतविग्रहः तेषु तवाप्रतीतेः । यदुक्तं 'त्यक्तनृपासनान्' इति तदपि युक्तमेवेत्याह त्वत्सेवकैरिति । नृपाणां पदमासनमंधं गाढं तम एव तत् । अविवेकबहुलत्वात् । त्वत्सेवकैरेव तत्त्यक्तं किं पुनर्वक्तव्यं त्वया त्यक्तमिति ॥ ३५ ॥ "अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषाम्" इति यदुक्तं तदपि तथैवेत्याह । त्वत्पादेति । नृपशुभिर्नराकारैः पशुभिः । किं पुनर्वक्तव्यं तव वर्त्मास्फुटमिति । किंच यस्माद्ये भवंतमनुवर्तंते तेषामपीहितमलौकिकमिव । अथो अतः किमु वक्तव्यं तवेश्वरस्येहितमलौकिकमित्यर्थः । "आस्थिता पदवीं सुभ्रूः प्रायः सीदंति योषितः" इत्यस्य परिहारं वक्ष्यति । यद्वाञ्छयेति पंचमश्लोके ॥ ३६ ॥ "निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः ॥

ब्रह्माणं तमृषिं तं सुमेधां समयोनिश्चरन्तः " इति महालक्ष्मीवचनाद्याश्च, " नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः " इत्येकादशवचनं च । तत्रोभयत्र साम्यमुपैति भगवत्यपि तन्मात्रत्वं सच्चिदानन्दविग्रहत्वादिति ॥ **विश्वनाथस्तु**–हे उरुक्रम महाशक्ते इति भयाभावं दर्शयति । ' क्रमः शक्तौ परिपाट्याम् ' इति विश्वः । गुणेभ्यो भक्तानां यद्भयं तदेव भक्ताधीनस्य तवापि भयमिवाऽतस्तद्भयादिव अन्तः समुद्रे समुद्रवदगाधे स्वभक्तहृदय एव शेते, अतः ' शरणं गतान् ' इति । शरणशब्दस्य गृहमित्यर्थः कृतः । तत्र ममास्तित्वे किं प्रमाणमिति चेत् ' नापैषि नाथ हृदयांबुरुहात्स्वपुंसाम् ' इति, ' प्रणयरसनया धृतांघ्रिपद्म ' इति ब्रह्मादिवाक्यात् । उपलंभनं मात्राणां रूपरसगंधादीनां यस्य सः । भक्तैर्ध्यानोपलभ्यमानसौंदर्यादित्यर्थः । आत्मा परमात्मा, भगवानेवेत्यर्थः । यदुक्तम्–'बलवद्भिः' इत्यादि तत्राह–नित्यमिति । स्वभक्तस्य विषयग्राहिभिरिंद्रियैः सह कृतयुद्धः , गणैरिति वृत्त्यभिप्रायेण बहुत्वम् । भक्तस्य संसारदुःखत्राणार्थमिति भावः । अयमर्थः–साधकभक्तानां प्रथमतो ध्यानगम्ययत्किंचिन्माधुर्य एव त्वं भवसि, न तु प्रत्यक्षीभवसि यत्–तन्मन्ये विषयेभ्यो भयादिव तदंतःकरणे प्रविश्य स्वपिष्येव, यतो भक्तिवृद्ध्या कदिंद्रियेषु विजितेषु सत्सु विषयनिवृत्तौ सत्यां स्वापादुत्थित इव साक्षादेव प्रत्यक्षीभूय स्वीयानेकमाधुर्याणि स्वभक्तान् ग्राहयसीति । यदुक्तम् ' त्यक्तनृपासनान् ' इति, तदपि युक्तमेवेत्याह–त्वत्सेवकैरिति । नृपपदं नृपासनम् । अविवेकबहुलत्वादंधं तम इव विधुतं त्यक्तं, किं पुनर्वक्तव्यं त्वया त्यक्तमिति । अत्र सेवकैरितिपददृष्ट्या पूर्वत्रोभयत्रापि भक्तसंबंधो व्याख्यातः ॥ ३५ ॥ तथैव सत्यमेव अलौकिकेहत्वमाह–किञ्चेति । इत्यर्थ इति–विधिनिषेधविषयताऽज्ञस्यैव न ज्ञानिनः, नतरां सर्वज्ञस्य तवेति भावः । पंचमश्लोके–अतः परत्र पंचम इत्यर्थः ॥ * ॥ ननु प्रेमसंबोधने, निश्चये वा । मुनयो ज्ञानिनस्तेषामपि त्वद्भक्तसंगादिप्रभावेण त्वत्पादयोर्मकरंदो यत्किंचिन्माधुर्यं तज्जुषां वर्त्म निजाभिरुचितचेष्टितम् । अस्फुटं स्वाच्छादनलोकसंग्रहाद्यर्थचेष्टितांतरावृतम् ' अतो दुर्विभाव्यम्, बोद्धुमशक्यमिति भावः । इहास्पष्टवर्त्मनामिति स्वमते योजितम् । अलौकिकमिव यतः लोकातीतं लौकिकत्वेप्यलौकिकत्वदर्शनात् । तत्र हेतुः–हे भूमन् अपरिच्छिन्नमाहात्म्येति ॥ ३६ ॥ अन्यतोऽन्येभ्यः । इत्यर्थ इति–न हि मत्कटा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वांछया सुमतयो विसृजंति कृत्स्नम्॥तेषां विभो समुचितो भवतः समाजः पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न॥३८॥

तस्मात्प्रायेण न ह्याढया मां भजंति सुमध्यमे" इत्येतच्छ्लोकोक्तं दोषत्रयं परिहरति । निष्किंचन इति । दारिद्रतालक्षणं निष्किंचनत्वं तु तव न घटत इत्याह । यस्मा इति । अन्यतो बलिभुजः पूज्या अपि ब्रह्मादयो यस्मै भवते बलिं हरंति तस्य सर्वेश्वरस्य भवतो दरिद्रता न घटत इत्यर्थः । निष्किंचनजनप्रिया इत्यत्र तत्पुरुषेण बहुव्रीहिणा वा निंदा स्यादिति स्वयमप्युभयथा स्तौति । प्रेष्ठो भवानिति । बलिभुजां ब्रह्मादीनां लोकेश्वराणां त्वं प्रेष्ठस्तेऽपि तुभ्यं तवेति। "तस्मात्प्रायेण न ह्याढया मां भजंति" इति तस्योत्तरम् । न त्वा विदंतीति । आढ्यतयांऽधास्त्वा त्वामंतकं न विदंति । अतस्ते असुतृपः असूनेव तर्पयंति न त्वां भजंतीत्यर्थः ॥ ३७ ॥ बलिभुजामपि भवान्प्रेष्ठ इत्यत्र हेतुं वदंती 'ययोरेव समं वित्तम्' इत्यनेनोक्तमनौचित्यं परिहरति । त्वं वा इति । फलात्मा परमानंदरूपः । 'एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति'

क्षापेक्षित्रह्मादिसेव्यगादमत्सेव्यस्य नैःस्वलक्षणदौर्गत्यं संगच्छत इति भावः । तत्पुरुषेग निष्किंचनजनानां प्रिया इत्येवंरूपेण । बहुव्रीहिणा निष्किंचनजनाः प्रिया येषां ते तथेत्येवंरूपेण वा । स्वयमपि रुक्मिण्यपि । उभयथा समासद्वयाभिप्रायेण । प्रेष्ठोऽतिप्रियः । इत्यर्थ इति—न हि प्राणतर्पणपराणां त्वद्दृष्टिर्भवतीति भावः ॥ * ॥ 'निष्किंचनाः' इत्यस्य योग्यमर्थं योजयति । निरिति निषेधे । ननु निश्चये । यतो यद्व्यतिरिक्तमन्यत्किञ्चिन्नास्त्यत एव निष्किंचनः, नान्यत इत्यर्थः । ननु दरिद्र एव निष्किंचनः प्रसिद्धः—सत्यम्, तादृशत्वं तु तव न घटत इत्याह—यस्मा इति । 'तस्मात्प्रायेण' इत्युक्तं सत्यमेवेत्याह—न त्वामिति । अन्तकमिति "वीर्याणि तस्याखिलदेहभाजाम्" इति, 'प्रमत्तमुच्चैरितिकृत्यचिन्तया' इत्यादिप्रामाण्येन, 'न यतोऽस्ति किंचित्' इति न्यायेन च तेषामंतकरूपं त्वां तद्रूपतया न विंदंति, स्वशासनकर्तृत्वेनापि नानुसंदधते । यद्वा—अंते मरणेऽपि कं स्मरणादिना सुखं यस्मात्तमपि न विंदंति । ते के—ये आढ्यतमांधा ज्ञानहीना न तु बहिराढ्यमात्राश्च । अत एव भवतापि प्रायेणेत्युक्तम् । यतो यत्र वाऽसुतृपो निजेंद्रियमात्रभरणतत्परा न त्वन्य इति । 'निष्किंचनजन—' इत्यस्य योग्यमर्थं योजयति—बलिभुजामिति । तेषामपि भवानेव प्रेष्ठो न तु बलयो बलिदातारो वा । 'तदस्तु मे नाथ स भूरिभागः' इत्यादिभ्यः । अत एवाढ्या अपि तेन तत्त्वयान्धाः प्रत्युत निष्किंचना एव, विषयभोगोऽपि तत्र रागाभावात् । ननु संपदभावमात्रेणान्ये तदंगब्रह्मचर्यतयाऽपि संभवादत एव त्वां त एव भजंति नान्ये, एवं तथापि त एव प्रेष्ठा इति तन्निष्किंचनत्वं परमविशिष्टमेवेति। अत्र समासभेदकस्य स्वरविशेषस्यानुसन्धानं वैकल्यादेव ज्ञेयम्। एकवाक्यता चैवम्—निश्चितं भवान् निष्किंचनो यदि तर्हि कथं मदुक्तमंगीचकर्थैव-सत्यम्, तत्र न दारिद्र्यत्वलक्षणेनार्थेन किन्त्वनेनैवेत्याह-नेति । अत एव यस्मा इत्यादि । ये तु त्वां न विंदंति ते खल्वाढ्यतान्धा असुतृपश्च, ये तु त्वां विंदंति ते खल्वतिप्रेष्ठा इत्येतद्योजनापेक्षयैव तदुक्तातिक्रमेणोत्तरम् । 'आस्थिताः' इत्यादेस्तूत्तरं संरंभयोग्यत्वात्तत्प्रसंगे देयम्॥ **विश्वनाथस्तु**—निष्किंचना इत्यादि यदुक्तं तत्राह—निष्किंचन इति । निर्निषेधे, नास्त्यधिकं किमपि वस्तु यस्मात्स निष्किंचनस्त्वम् । यद्वा—सार्वविभक्तिकस्तसिः, न विद्यते किंचन ऐश्वर्यमाधुर्ययशोबलज्ञान वैराग्यादिकं, किन्तु सर्वांशित्वात्सम्पूर्णमेव यस्य सः । दरिद्रत्वान्न विद्यते किञ्चनापि यस्य स इत्यर्थस्तु त्वयि न घटत इत्याह—यस्मा इति । 'तस्मात्प्रायेण' इत्यादि तदुक्तं तत्राह—नेति । आढ्यतयांधा अत एवासुतृपः स्वप्राणतर्पका बहिर्मुखास्त्वामंतकं दंडकर्तारं नैव विदंति कुतो भजिष्यन्तीत्यर्थः । 'निष्किंचनजनप्रियाः' इति यदुक्तं तत्र तत्पुरुषसमासमाश्रित्य कैमुत्येनाह—प्रेष्ठ इति । भवान् बलिभुजामपि सकामानामपि ब्रह्मादीनां प्रेष्ठः किमुत निष्किंचनानां निष्कामभक्तानां प्रेष्ठ इति । बहुव्रीहिमाश्रित्याह—तेऽपि सकामभक्ता अपि तुभ्यं तव प्रियाः किमुत निष्कामभक्ता निष्किंचनजनाः । "न येषां भजनादन्यच्चिकीर्षितमभीप्सितम् । जिज्ञासितं च किञ्चित्ते ज्ञेया निष्किंचना बुधैः ॥" इति पौराणिकोक्तेर्भक्तत्वाचित्वे निष्किंचनशब्दो व्याख्यातः ॥ ३७ ॥ समस्तपुरुषार्था धर्मार्थकाममोक्षास्स्वरूपमस्येति तथा । स्वरूपे मयट् । परमानन्दरूपत्वमाह श्रुतिः—एतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं न्यस्तदंडमुनिभिर्गदितानुभाव आत्मात्मदश्च जगतामिति मे वृतोऽसि॥हित्वा भवद्भ्रुव उदीरितकालवेगध्वस्ताशिषोऽब्जभवनाकपतीन्कुतोऽन्ये॥३९॥

इति श्रुतेः । समाजः सेव्यसेवकलक्षणसंबंधो न तु पुंसः स्त्रियाश्च मिथोरतयोः । अत एव तत्कृतसुखदुःखिनोः । तदाकुलयोरित्यर्थः ॥ ३८ ॥ 'भिक्षुभिः श्लाघिता मुधा' इत्यस्य परिहारः त्वमिति भिक्षुपदव्याख्यानं न्यस्तदंडैर्मुनिभिरिति । मुधेत्यस्य परिहारः आत्मेति । यदर्थं सर्वं प्रियं भवति तस्य जगतामात्मनस्तव वरणं न वृथेत्यर्थः। किंच आत्मद इति । "वैदर्भ्येतदविज्ञाय त्वयाऽदीर्घसमीक्षया"इति स्वस्मिन्नुक्तं दोषद्वयं परिहरति । इतीति । इति ज्ञात्वैव मे मया वृतोऽसीत्यज्ञानपरिहारः । हित्वेत्यदीर्घसमीक्षा

परमात्मरूपस्य मात्रामंशमुपजीवन्त्याश्रयन्तीत्यर्थः । अत एव मिथोरतत्वादेव । तत्कृते मिथोरतिकृते सुखदुःखे ययोर्विद्येते तौ तथा तयोः । इत्यर्थ इति–परस्परतिकृतसुखदुःखाक्लिष्टयोस्तव रतिः कदापि न संभवतीति भावः ॥ * ॥ वै प्रसिद्धौ । समस्ताः पुरुषार्था धर्मादयश्चत्वारस्तद्भक्तिभेदाश्च तन्मयस्तत्प्राचुर्यवान्, "सर्वगंधः सर्वरसः" इति "एतं सपत्वाम इत्याचक्षते, एतं सर्वाणि रामाणि अभिसंयन्ति, एष उ एव भामनीः, एष हि सर्वाणि रामाणि नयताम्, एष उ एव भामनीः, एष सर्वेषु वेदेषु भाति" इति "अयमात्मा उपहतपाप्मा" इत्यादिश्रुतेः । अत एव बृहत्साम्नि–" बृहत्पार्थिवं बृहदंतरीक्षं बृहद्दिवं बृहद्वामं बृहद्वयो वामं वामेभ्यो वामम्" इति ब्रह्मणः सर्वात्मत्वं सर्वेभ्योपि मनोहरत्वमुपदिश्यते । यतः फलात्मा "को ह्येवान्तात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति, "रसो वै सः, रसं ह्येवायं लब्ध्वा नंदी भवति" इति, "एतस्मै वा" इत्यादिश्रुतेः । अतो यदित्यादि । कृत्स्नं दैहिकं देहवित्ताद्यभिमानं लोकद्वयापेक्षं मोक्षादिकमपि सर्वं विसृजंति, अतस्त एवाकिंचनाः, भवानेव तत्प्रेष्ठ इति युक्तमेवेति भावः। एवं पूर्वार्थप्रतिपादनपूर्वकम् 'ययोरात्मसमम्' इत्यादावुत्तरमाह–तेषामिति । विभो हे सर्वेश्वर एवमपि तैः सहैव सम्यगुचितः,भवतो वित्ताद्यपेक्षाराहित्येन तैरेव साम्यात्, संशब्देनान्यैर्भक्तैरप्यौचित्याभासः सूचितः। रतयोरिति भाग्याभाव उक्तः । अत एव सुखदुःखिनोरिति, दुःखप्रतीकारमात्ररूपं सुखं दुःखं च तयोरुचितमिति भावः ॥३८॥ इत्यर्थ इति–"आत्मनस्तु कामाय सर्वं प्रियं भवति" इति श्रुतेरतिप्रीतेर्मोक्षहेतुत्वाद्वैयर्थ्यं नेति भावः ।अन्यदाह–किंचेति । वराकाः शोचनीयाः । इत्यर्थ इति–न हि सर्वेश्वरप्रीतिमता प्राकृताः सेव्यन्त इत्याशयः । "वराकः शंकरे पुंसि शोचनीयेऽभिधेयवत्" इति मेदिनी ॥ * ॥ तत्रैव समुद्रमथनवृत्तं स्मरंत्याह–त्वमिति । न्यस्तदंडेति गर्वादिराहित्यं सूच्यते, तेनांबुभिक्षुतावैशिष्ट्यम् । मुनिभिरित्यात्मारामत्वं, तेन तत्रापि वैशिष्ट्यम् । तैर्गदितोऽनुभावो माहात्म्यं यस्य स इति यथार्थगुणत्वं दर्शितम् । आत्मा सर्वमूलस्वरूपम् । भवद्भ्रुव इति कालस्यापि प्रवर्तकत्वेन कालापरिच्छिन्नत्वं तथा तदीयनिजलोकादेरपि नित्यत्वादिकं तथा ब्रह्माद्याशिषां तद्भ्रूक्षेपकालमात्रस्थायित्वादिकं चोक्तम् । नाकपतय इंद्राद्याः । अब्जभवमपि हित्वा किं पुनर्नाकपतीनित्येवं व्याख्येयमिति ब्रह्मादीनामवज्ञास्पदत्वं दर्शितवती । श्रीशिवस्यानुक्तिस्तु–तत्रावधानाविषयत्वं दर्शयित्वा तादृशत्वभाव एव तदकरणे हेतुं व्यनक्ति । यद्यपि स्वाभाविक एव तस्यास्तस्मिन्ननुरागो न तु विचारापेक्षस्तथापि स्वाभाविकत्वे सति विचारोऽप्यनुषज्जतीति तदंशमालंब्य सिद्धान्तितं, तस्यैव योग्यत्वात् ॥ **विश्वनाथस्तु**–भिक्षुभिरित्यादि यदुक्तं तत्र भिक्षुशब्दार्थं व्याचक्षाणा भिक्षुश्लाघैव सर्वोत्कर्ष इत्याह–त्वमिति । न्यस्तदंडेति–त एव भिक्षव उच्यंत इति भावः । गदितानुभावः श्लाघितप्रभावः । आत्मा परमात्मेति । यदर्थं सर्वं प्रियं जांतं तेषामात्मनस्तव श्लाघा न मुधेति त्वदुक्तिरेव मुधेति भावः । जगतामात्मन इति जगद्वर्तिजनेभ्योपि भजद्भ्यस्त्वमात्मानमपि ददासीति ज्ञात्वैव मे मया त्वं वृतोसि, तदपि यदुक्तं त्वया–' वैदर्भ्येतदविज्ञाय ' इति तन्ममेदं विलक्षणं ज्ञानमज्ञात्वैवेति भावः । भवतो भ्रुव इति तैर्व्याख्यातम् । यदुक्तं त्वया–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाड्यं वचस्तव गदाग्रज यस्तु भूपान्विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वम् ॥ सिंहो यथा स्वबलिमीश पशून्स्वभागं तेभ्यो भयाद्यदुदधिं शरणं प्रपन्नः ॥ ४० ॥ यद्वांछया नृपशिखामणयोऽङ्गवैन्यजायंतनाहुषगयादय ऐकपत्यम् ॥ राज्यं विसृज्य विविशुर्वनमंबुजाक्ष सीदंति तेऽनु पदवीं त इहास्थिताः किम् ॥ ४१ ॥ काऽन्यं श्रयेत तव पादरोजगंधमाघ्राय सन्मुखरितं जनताऽपवर्गम् ॥ लक्ष्म्यालयं त्वविगणय्य गुणालयस्य मर्त्या सदोरुभयमर्थविविक्तदृष्टिः ॥ ४२ ॥

परिहारः । भवतो भ्रुवः सकाशादुदीरितो यः कालस्तस्य वेगस्तेन ध्वस्ता आशिषो येषां तान्ब्रह्मादीनपि विहाय । कुतोऽन्ये वराका इत्यर्थः ॥ ३९ ॥ स्वाज्ञानं परिहृत्य पुरुषांतरगुणवर्णनप्रदीप्तकोपसंरंभेण तस्मिन्नेवाज्ञानमापादयति । जाड्यमिति । सिंहो यथा पशून्विद्राव्य स्वबलिं हरति तथा शार्ङ्गधनुर्निनादेनैव जरासंधादीन्विद्राव्य मां स्वभागं श्रियं यस्त्वं हृतवानासि तस्य तव राजभ्यो भयादुदधिं प्रपन्न इति यद्वचो भाषणं तज्जाड्यं मांद्यम् । न घटत इत्यर्थः ॥ ४० ॥ यच्च 'अन्यदस्पष्टवर्त्मनाम्' इत्यादिना अर्थात्त्वां भजतः सीदंतीत्यवसादनं श्रमावहत्वमुक्तं तदपि मंदमेवेत्याह । यद्वाछयेति । यस्य तव भजनवांछया नृपोत्तमाः । अंगो वेनस्य पिता, वैन्यः पृथुः, जायंतो भरतः, नाहुषो ययातिः, गयश्चादिर्येषां ते य एते तव पदवीं मार्गमाश्रितास्ते किं सीदंति न सीदंत्येव । अपि तु त्वत्पदं प्राप्ता इत्यर्थः । एवं कोपावेशेनावसादनस्य परिहारा दस्पष्टवर्त्मनामित्येतदानंतर्यं विहायात्रोत्कर्षः॥ ४१ ॥ यच्चोक्तम् 'अथात्मनोऽनुरूपम्' इति तत्राह । काऽन्यमिति श्लोकद्वयेन । गुणानामालयस्य तव पादसरोजगंधं जनताया

'अदीर्घसमीक्षया' इति तन्मम दीर्घसमीक्षामप्यविज्ञायैवोक्तमिति भावः ॥ ३९ ॥ संरंभस्संवेगः । तस्मिन्नेव श्रीकृष्ण एव । इत्यर्थ इति—अनुचितसंभाषणमेव मौढ्यापादकमिति भावः । "पौर्वापर्यमनालोच्य कथनं त्वधियां भवेत्" इत्युक्तेः ॥ * ॥ तदेवमकस्मान्मानाख्यस्थायिभावोदयरतिस्वज्ञानसमक्षियोरज्ञानं तस्मिन्नेव व्यंजनया वृत्त्योक्त्वापि पुनः पुरुषांतरगुणवर्णनप्रदीप्तकोपेनाभिधयापि तस्मिन्नज्ञानं संरंभभ्रुकुटिकुटिलकटाक्षं स्पष्ट यन्न्याह—जाड्यमिति । जाड्यमयमित्यर्थः । यस्त्वं भूपान्विद्राव्य स्वभागं मां श्रियं जहर्थ, तेभ्यो भयादुदधिं प्रपन्नः शरणं प्राप्तस्त्वमिति यत्तव वचो भाषणं तत्तव जाड्यमज्ञानज्ञापकमित्यर्थः । ननु च पूर्वमकोपतया त्वया 'सत्यं भयादिव' इत्यादिवचः सत्यमेव समाहितमिति चेत्—सत्यम्, तन्ममापि जाड्यमिति ज्ञेयम् ॥ **तोषिणी तु**—जाड्यं वच इति भावकर्मणोः ष्यङ्विधानाद्भावपक्षे यत्नतः सामानाधिकरण्यनिर्देशो वचसो जाड्य प्राचुर्यापेक्षया, कर्मपक्षे तु स्पष्ट एव । तु शब्दो विरोधे । हरणे हेतुः—स्वभागमिति । हे गदाग्रजेति—त्वत्कनिष्ठेन केनापि गदेन किमुत त्वयेति भावः । यत ईश हे अशेषशक्तियुक्त ॥ ४० ॥ इत्यर्थ इति—न हि सुखिनो दुःखमार्गे प्रवृत्तिरपि तु पूर्वसिद्धसुखादिकसिद्ध्यर्था तु भवत्येवेति तात्पर्यम् । एवमित्थम् । कोपावेशेनानंतर्यं प्रथमं वक्तव्यमस्पष्टवर्त्मपदार्थवर्णनं विहाय । अत्रोत्कर्ष उत्कर्षो वर्णितः ॥ * ॥ कोपावेशेनैवैतत्प रिहर्तुं योग्यमिति संप्रत्येवावसादनं परिहरति—यद्वांछयेति । यस्य वांछया, तस्य ते तवेति योज्यम् । नु प्रश्ने । इह जगति यत्र कुत्रापीत्यर्थः । प्रायः सीदंतीह योषितामुपलक्षणत्वात् ॥ अत्र **विश्वनाथः**—यत्त्वयोक्तम् 'अस्मत्पदवीमास्थिताः प्रायः सीदन्ति' इति तदपि जाड्यमिति । ते पदवीमाश्रितास्ते राजानो निर्बुद्धयः, किन्तु सुबुद्धयो यतो न सीदंत्यतो राजकन्या वयं निर्बुद्धयो यतः सीदाम इति त्वयोक्तमेव सीदतीति भावः ॥ ४१ ॥ जनताया जनसमूहस्य । आघ्राय आसेव्य । अविगणय्याऽगणयित्वा । अर्थे परमार्थे । विविक्ता विवेकवती ॥ * ॥ यत्त्वयोक्तम् 'अथात्मनः' इत्यादि तदपि तथैवेत्याह—केति । या त्वदीयं यशो न श्रुतवती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं त्वानुरूपमभजं जगतामधीशमात्मानमत्र च परत्र च कामपूरम्॥ स्यान्मे तवांघ्रिररणं सृतिभिर्भ्रमंत्या यो वै भजन्तमुपयात्यनृतापवर्गः ॥ ४३ ॥

अपवर्गं मोक्षरूपं लक्ष्म्या आलयं तत्सेव्यं सद्भिर्मुखरितं वर्णितमाघ्राय तमविगणय्य मर्त्या मरणधर्मिका सदा उरुभयं यस्य तमन्यं का स्त्री श्रयेत सेवेत । अर्थे विविक्ता दृष्टिर्यस्याः सा गुणालयस्येत्यनेन गुणैर्हीना इति यदुक्तं तदपास्तम् ॥ ४२ ॥ अतस्त्वामेवाहमभजमित्याह । तं त्वेति । किंच प्रार्थयते । स्यादिति । अरणं शरणम् । सृतिभिर्देवतिर्यगादिभिर्जन्मभिः । पाठांतरे त्वर्थवादबहुलकर्मश्रवणैरित्यर्थः । कथंभूतस्य तव । यस्त्वमनृतस्य संसारस्यापवर्गो नाशो यस्मात्स भजंतमुपयात्यात्मसात्करोति तस्य तवां

साऽन्यं श्रयतु नामेति भावः । सद्भिर्भ्रमरैरिव मुखरितं स्तुतम् जनताया जनमात्रस्यापि श्रवणादिभिरपवर्गसाधकम् । अवगणय्यावज्ञाय । मर्त्या मानुषीति । राक्षसप्रेतादिकन्या त्वन्यमाश्रयतामिति भावः । कीदृशमन्यम्—सदोरुभयम् । अर्थविविक्तदृष्टिरित्यविचारांधा त्वन्यं श्रयत्विति भावः । ‘गुणालयम्’ इत्यनेन गुणैर्हीनेत्यपि पराहतम् ॥ **तोषिणीकारास्तु**—अन्या पुनरन्यं श्रयेत नाम तव पादसरोजगंधमाघ्रायाप्यवगणय्य कान्यं श्रयेत, तदघ्राणेऽन्याश्रयणमेवावगणितमिति भावः । पादेत्यादिका भक्त्युक्तिः, गुणग्रामं श्रुत्वेत्यर्थः । कीदृशम्—सद्भिरात्मारामैरपि मुखरितं—सशब्दीकृतं—शब्दे संयोजितं—पूर्वमव्याख्यावर्णितमित्यर्थः । जनानां तापस्यापवर्गो वर्जनं यस्मात्तं सर्वसंपत्तेराश्रयश्चेति मुक्तमुमुक्षुविषयिसेव्यत्वमुक्तम् । अत एव गुणालयस्य सर्वगुणनिधेः । अन्यस्य दोषमाह—मर्त्यश्च सः । आसमंतात्सदा सर्वदा च उरुभयं यस्य स च स तं, उपलक्षणं चैतत्—सन्मुखरितं विपरीतत्वादिकस्य । नन्वन्यमन्यमाश्रयमाणा बह्वयो दृश्यंते तत्राह—अर्थेति । ता मूर्खा एवेति भावः ॥ ४२ ॥ अतो गुणालयत्वात्सत्यत्वाच्च । ‘सृतिर्जन्ममार्गयोः’ इति निरुक्तिः । पाठांतरे ‘श्रुतिभिः’ इति पाठे । इत्यर्थ इति—“अपाम सोमममृता अभूम” इत्यादिवाक्याकर्णनैरिति भावः । अतोऽनुरूपत्वात् । इत्यर्थ इति—‘अथात्मनोनुरूप—’ इति दत्तोत्तरं जातमिति भावः ॥ * ॥ तम् उक्तमाहात्म्यम् । अत एवानुरूपं भजनयोग्यमभजम् । जन्मांतरेष्वपि तवैव भजनं करिष्यामीति वदंती प्रेमभरदैन्येनात्मनो लीलामानुषीत्वं मत्वा तद्भजनं दुर्लभं मन्यमाना प्रार्थयते—स्यादिति । विविधजन्मभिरितस्ततो भ्रमंत्या अपि । ‘श्रुतिभिः’ इति पाठे काश्चिच्छ्रुतयस्त्वां सर्वत्रानासक्तं वदंति, काश्चित्तु भक्तासक्तं, काश्चित्तु कदाचिद्दुःखेष्युदासीनप्रायमित्येवं विविधाः, ताभिः शंकां प्राप्तवत्याः । योंघ्रिस्त्वमिति टीका विचार्या, उपयातीति प्रथमपुरुषेणान्वयाय त्वंपदस्य विशेषणत्वं, य इत्यस्य विशेष्यत्वमंगीकृत्य समाधेया वा । अन्यत्तैः । तत्र चेति ‘भीतस्य’ इत्यादिवाक्यार्थयोजना । इत्यनेन प्रकारेणेत्यर्थः । अत्रानुरूपपदस्य व्याख्यापूर्वमव्याख्यानादेवेति । यद्वा—सृतिभिर्गतिभिस्तव तादृशनानाचेष्टाभिः । पाठांतरे, श्रुतिभिर्लक्ष्मीप्रियत्वादिकथनपराभिस्तत्राप्यनासक्त्यादिविख्यापिकाभिः । यद्वा—तवान्यावतारे सीतादीनां परित्यागादिश्रवणैरत्र च श्रीगोपीनां तथाधैर्येवदृशवचनश्रवणैश्चानृतं तादृशविविधभ्रमस्तस्यापवर्गो यस्मात् । गीर्देवीव्याञ्जितार्थश्चायम्—तव सृतिभिर्नानावताररीतिभिर्भ्रमंत्या “देवत्वे देवदेहा सा मानुषत्वे च मानुषी” इत्यादिविष्णुपुराणोक्तेः । भवद्वल्लीलाकारप्रकटनेन त्वया सह विहरन्त्याः । पाठांतरे यथायथा तत्तदवतारे मत्प्रतिपादिका श्रुतयस्तथा विहरंत्य इत्यर्थः । कीदृशोंघ्रिः—अनृतस्यापवर्गो यत्र स सच्चिदानन्दरूप इत्यर्थः । अन्यत्समम् ॥ **विश्वनाथस्तु**—अहं तु श्रुतचरत्वद्गुणा मनुष्यकन्या विचारवतीत्यतस्त्वामेवाभजमित्याह—तमिति । अनुरूपं यत आत्मानम्, परमात्मनस्तव भजनमुचितमेवेत्यर्थः । स्वस्य लीलामानुषीत्वमेवाकस्मादतिदैन्योदयेन कर्ममानुषीत्वं मत्वा तद्भजनं प्रार्थयते—स्यादिति । सृतिभिर्विविधजन्मभिरपि भ्रमन्त्या मे । ‘स्तुतिभिः’ इति पाठे पूर्ववद्व्याख्यानं ज्ञेयम् । शंकामयं भ्रमं प्राप्नुवत्या अपि च यस्तवांघ्रिर्भजंतमुपयाति कृपया तत्समीपं स्वयमेवायाति, अनृतस्य विविधभ्रमस्यापवर्गो यस्मात्सः । तेन तवांघ्रिपद्ममेवास्मदादीनां सुखदं समरसञ्च शरणं भूयान्न तु मुखपद्मं, यत्तु खलु विषयरसमेव कदाचिन्मारकं विषमप्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्याः स्युरच्युत नृपा भवतोपदिष्टाः स्त्रीणां गृहेषु खरगोश्वबिडालभृत्याः॥ यत्कर्णमूलमरिकर्षण नोपयायाद्युष्मत्कथा मृडविरिंचसभासु गीता॥४४॥
त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्तवातम् ॥ जीवच्छवं भजति कांतमतिर्विमूढा या ते पदाब्जमकरंदमजिघ्रती स्त्री ॥४५॥
अस्त्वंबुजाक्ष मम ते चरणानुराग आत्मन्रतस्य मयि चानतिरिक्तदृष्टेः ॥ यर्ह्यस्य वृद्धय उपात्तरजोऽतिमात्रो मामीक्षसे तदु ह नः परमाऽनुकंपा॥४६॥

घ्रिरिति । भीतस्य हि अरणं शरणमेवानुरूपं भजनयोग्यमतस्त्वामहमभजामित्यर्थः ॥ ४३ ॥ ये चोक्ता राज्ञां बहवो गुणाः “ राजपुत्रीप्सिता भूपैर्लोकपालविभूतिभिः” इत्यादिना तत्र सेर्ष्यं सशापं सांगुलिभंगं चाह द्वाभ्याम् । तस्याः स्युरिति । खरा इव केवलं भारवाहा गावो बलीवर्दा इव नित्यं व्यापारक्लिष्टाः श्वान इवावमता बिडाला इव कृपणा हिंस्राश्च भृत्या इव किंकरा नृपास्तस्या दुर्भगायाः पतयः स्युः यस्याः कर्णपथं त्वत्कथा न प्राप्नुयादिति ॥ ४४ ॥ तथाहि । ते पदाब्जमकरंदमजिघ्रती सती या स्त्री विमूढा सा कांतोऽयमिति मतिर्यस्याः सा कांतमतिर्जीवच्छवं भजति । त्वगादिभिर्बहिः पिनद्धं छन्नमंतर्मांसादिमयामिति ॥ ४५ ॥ यदुक्तमुदासीना वयमित्यादिना तत्राह । अस्त्विति । यद्यपि त्वं निरपेक्षस्तथाऽपि मम ते चरणानुरागोऽस्तु मयि च मय्यपि नातिरिक्ता अतिशयवती दृष्टिर्यस्य तस्य ते आत्मन् आत्मन्येव रतस्य । तर्हि तव

द्घ्रिरिति, कदाचित्संजीवकमपीति द्योतितम् ॥ ४३ ॥ तत्र राजगुणेषु । सेर्ष्यमक्षांतिसाहितम् । सशापं परानिष्टोक्तिसहितम् । सांगुलिभंगं मुखेंगुलिप्रदानपूर्वकम् । अवमता अवज्ञास्पदाः । कृपणा मंदाः । ‘ कृपणः कुत्सिते मंदे क्रिमावपि ’ इति मेदिनी । दुर्भगाया मन्दभाग्यायाः । मृडः शिवः । तस्याः स्युरिति शापः, भवतोपदिष्टा इतीर्ष्या, खरगोश्वेति मुखांगुलियोग्यमिति विवेकः ॥ * ॥ हे अच्युतेति कालदेशाव्यभिचारि गुणो भवानेव, अन्यत्र गुणाभासमात्रत्वेऽपि व्यभिचारान्नान्य इति भावः । महादोषमप्याह—स्त्रीणामिति । अन्यत्तैः। तत्र किंकरा इति—किं करोमीत्याज्ञाप्रतीक्षका इत्यर्थः । क्षीरस्वामिना तथा तन्निरुक्तेः । यद्वा—खरपदेन ताडयमानोपि तामनुगंतृत्वात्, गौर्भारवाहकत्वात्, अश्वः कदाचित्तद्वोढृत्वात्, श्वा वा पिंड वांछया तदाज्ञाकारित्वात्, बिडालस्तदुच्छिष्टभोक्तृत्वात् , भृत्याः पूर्ववदिति । यस्याः कर्णस्य मूलमवधानाविषयमुप समीपे न यायात्, ईषदपि न गच्छेदित्यर्थः । युष्मदिति—गौरवेण बहुत्वात् । न च स्त्रीणामल्पबुद्धित्वात्तासां मनोहरा, अपि तु परमविदुषामपीत्याह—मृडेति । अरिकर्षण हे शत्रुसूदन भगवद्द्वेषेण ते मृतप्राया इति भावः । अत्र विश्वनाथः—श्वान इव तद्गृहपालनार्थं तदन्येषु वैरकारिणः, भृत्या इव दास्यकारिणः । अरिकर्षण ममारीञ्शिशुपालादीनन्तकनगरीं प्रति कर्षसि त्वमित्याह । अन्यत्समम् ॥४४॥ कफादिर्मलविशेषः । जीवच्छवं श्वसन्मृतकम् । एतेन श्रीकृष्णवपुस्तु “ आनंदस्मश्रुरानंदकेश–” इत्यादिश्रुतेर्मलमयं न, केवलचिद्घन एव, अंगरचनादि तु भक्तानुग्रहार्थमेवेति ध्वनितम् ॥ * ॥ ‘ स वै पतिः स्यादकुतोभयः स्वयम् ’ इत्यादिप्रमाणतो वस्तुतः त्रीणां सार्वकालिकीनामपि त्वमेव पतिस्तदपि या त्वदन्यं पतिं भजति सा प्रेतमेव रमयन्ती भजतीत्याह—त्वगिति, जीवच्छवत्वमेव दर्शयति विशेषणद्वयेन । त्वगादिभिः पिनद्धम्, अन्यथा दौर्गंध्याकृष्टमक्षिकाकीटकोटिभिश्च व्याप्तं स्यादिति भावः । ते सच्चिदानन्दघनविग्रहत्वेन प्रसिद्धस्य तवात्र त्वगादिषु केषांचित्तत्संगिमात्राणां निषेधः । वेदादावप्रसिद्धत्वात्स्वयमननुभवाच्च । केषांचित्तु लोकप्रसिद्धजडमलिनादिस्वरूपाणामेव न तु तत्र वेदप्रसिद्धानां सच्चिदानन्दस्वरूपाणामपि, वेदप्रसिद्धत्वादेव तथा स्वयमनुभवात्, बीभत्समात्रस्यैव त्यागस्य विवक्षितत्वाच्चेति ज्ञापितम् । मूढैवांतर्मांसादिमयं जीवं तमेव शवं कांतमत्या भजति, ते पादाम्बुजमकरन्दं गौराणिकजनभक्तैः सर्वतः प्रसारितमपि या न भजतीति हेतोः सा मूढा, नाहं मूढेति भावः ॥ ४५ ॥ स्वापेक्षामप्याह—किञ्चेति । यद्वा—अस्य जगतोऽभिवृद्धये सृष्ट्ये उपात्तं रजोतिमात्रं केवलं रजो येन स तथा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवालीकमहं मन्ये वचस्ते मधुसूदन ॥ अंबाया इव हि प्रायः कन्यायाः स्याद्रतिः क्वचित् ॥ ४७ ॥
व्यूढायाश्चापि पुंश्चल्या मनोऽभ्येति नवंनवम् ॥ बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥ ४८ ॥

तेन को लाभः। त्वच्चरणानुराग एव महाल्लाँभः। किञ्च। यर्ह्यस्य विश्वस्य वृद्धये उपात्ता रजसोऽतिमात्रा औत्कंठ्यं येन स तथाभूतः सन्मामीक्षसे। उ एवार्थे। ह हर्षे। तदेव नः परमानुकंपा अत्यनुग्रह इति ॥ ४६ ॥ तदेवं सर्वं तदुक्तं प्रतिव्याख्याय प्रसन्नचित्ता मंत्रमुपदिशंत्याह द्वाभ्याम्। नैवेति। अथात्मनोऽनुरूपमित्यादि ते वचोऽलीकं मिथ्येति नैव मन्ये यतो लोके कन्याया एव क्वचिद्रतिर्भवति। यथा काशिराजकन्यानामंबाम्बालिकांबिकानां तिसृणां मध्ये अंबायाः कन्याया एव शाल्वे रतिर्जाता तद्वत् ॥ ४७ ॥ व्यूढायाः परिणी

यद्वा—उपात्ता प्रलये मूलरजसि अतीतास्संगता मात्रा अंशा येन स तथा। यद्वा—स्थित्यै उपात्ता रजसोऽतिरिक्ता मात्रा सत्त्वलक्षणा येन, तदा मामीक्षते। यद्वा—वर्धनं छेदेन वृद्धिः संहारस्तस्यै उपात्ता रजोतिक्रांता मात्रा तमोलक्षणा येन स तथा। अत्रेक्षणं नाम तत्तत्कार्यमनुस्मृत्य रजआदिमदधीनतत्तद्गुणाभिवर्धनमभिप्रेतम्। अथ "त्रिगुणा ह्येष प्रकृतिरगुणो वा विष्णुः स यदात्मरजा रजोस्या उद्वर्धयती स्यात्" इत्यादि श्रुतेः। नैतत्स्वप्रयोजनमुद्दिश्येति—किं त्वस्मानुद्दिश्य परमानुकंपेति भावः ॥ * ॥ हे अंबुजाक्षेति सौरूप्योद्देशः। तत्रातिलोभे हेतुः—माम्। प्रकृतिरूपामिति दैन्येनाऽभेदोक्तिः, प्रकृतेस्तच्छायारूपकत्वेन निकृष्टांशत्वात्, न त्वात्मरत्या। तदपि न घटेतेत्याशंक्याह—उपात्तेति। उपादानमत्र सांनिध्यमात्रेणोपकरणम्, ईक्षणं च स्वैरितयैवेति, ज्ञेयम्। यद्वा—मत्संबंधाभासेन तत्रापि मद्रूपतामारोप्य तव दृष्टिरिति स्थिते मयि तु परमैवानुकंपेति मद्विधत्वदेकशरणजनसंबंधादन्यत्रैव तवौदासीन्यमिति भावः। तदेवमेव टीकाप्रतिज्ञातञ्च षोडशानामपि दोषाणामसत्त्वं घटेत। यद्वा—मयि च रतस्य, यतः अनतिरिक्तदृष्टेः स्वरूपशक्तित्वान्मय्यभिन्नदृष्टेः। रजो रागस्तत्राप्यन्यानुरागस्य विवृद्धये स्वयमुपात्तरागादिमात्रः सन् यन्मामीक्षसे कदाचिदालोकयसि तत्परमानुकम्पा तद्रूपमेव। अन्यत्समम्। अतः 'नामरूपे भगवति' इति षष्ठस्कंधोक्तेस्तत्र देहस्यात्मैकरूपत्वान्मम च तदभिन्नत्वात् तन्मत्संबंधादन्यत्रैवौदासीना इत्यादिवाक्यप्रवृत्तिरिति भावः ॥ अत्र **विश्वनाथः**—उदासीना इत्यादि यदुक्तं तत्रातिदैन्यसमुद्रे निमज्जन्त्येवाह—अस्त्विति। यद्यपि त्वं निरपेक्षस्तदपि मम ते चरणानुरागोऽस्तु यन्मय्यौदासीन्यं तत्तवात्मारामस्योचितमेव। अत एव यथा ते जगत्यस्मिन्नुदासीना दृष्टिस्तथा मयि चानतिरिक्ताऽतो नाधिकेति भावः। किञ्चेत्यारभ्य नः परमानुकंपेत्यंता टीका समैव। तदेवाहं परमं स्वसौभाग्यं मन्य इति भावः। अयमर्थः—"तथाहमपि त्वच्चित्तो निद्रां च न लभे निशि" इति त्वद्वचनान्मयि तवाऽऽसक्तिः, 'उदासीना वयम्' इति वचनादौदासीन्यञ्च दृश्यते, तस्मान्मयि भवानासज्जते चेदहं ते परमांतरंगा स्वरूपशक्तिरेवात एवात्मारामोपि मय्यात्मभूतायां रमते एव। मय्युदास्ते चेदहं ते बहिरंगा शक्तिर्गुणप्रकृतिरेवेत्यतो मयि तवोभयत्वमिव त्वय्यपि ममोभयत्वमिति ॥ ४६ ॥ मंत्रं रहस्यम्। तद्वदंबावत्—त्वय्येव मम रतिः पर्यवस्यतीति भावः। भारत चेयं कथा—काशिराजपुत्रीत्रयमंबादिकं भीष्मेण स्वयंवरे जितम्, जित्वा च ताः स्वभ्रात्रे विचित्रवीर्याय प्रायच्छत्तदा तास्वंबोवाच—हे भीष्म नाहं त्वां त्वद्भ्रातरञ्चान्यं वा विना शाल्वं वृणे, इत्युक्तो भीष्मस्तां शाल्वाय प्रस्थापयामासेत्यलं विस्तृत्या ॥ * ॥ अथवा—यदेतत्सर्वमुक्तं भवता तत्तु स्त्रीसाधारणत्वमेवाभिप्रेत्य न तु तद्विशेषत्वम्, तच्च युक्तमित्युपसंहरति—नैवेति युग्मकेन। वचः स्त्रीजातिस्वभावसूचकमीदृशं वचनम्, अलीकमविषयं नैव मन्ये, हि यस्मात्कन्याया अपि क्वचिदेकत्रैव पुरुषे रतिः स्यात्। प्रायो बाहुल्येनेति तासु साध्वी जातिरित्यर्थः। टीकायाञ्च कन्याया एव कस्याश्चिदेव कन्याया इत्यर्थः। तत्र दृष्टान्तः—अंबाया इवेति ॥ ४७ ॥ पुमांसं दृष्ट्वा चलति निजधर्माद्या सा पुंश्चली "या नारी रूपजात्याद्यैश्चितयित्वोत्सुका भवेत्। पुरुषोयमिति ज्ञात्वा रत्यै सा

॥ ३४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्रि प्रलंभिता ॥ मयोदितं यदन्वात्थ सर्वं तत्सत्यमेव हि ॥ ४९ ॥ यान्यान्कामयसे कामान्म य्यकामाय भामिनि ॥ संति ह्येकांतभक्तायास्तव कल्याणि नित्यदा ॥ ५० ॥ उपलब्धं पतिप्रेम पातिव्रत्यं च तेऽनघे ॥ यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ॥ ५१ ॥

ताया अपीति । उभयस्मादिहपरलोकद्वयाच्च्युतो भ्रष्ट इति ॥ ४८ ॥ उपहसिता प्रलंभिता । अन्वात्थान्वाख्यातवती ॥ ४९ ॥ मयि एकांतभक्तायास्ते कामाः संत्येव । अकामाय कामनिवृत्तये मोक्षपर्यवसायिन इत्यर्थः ॥ ५० ॥ अनुवादेन वरान् दत्वा तामभिनंदति । उपलब्धमिति । यद्यस्मान्मयि वर्तमाना धीर्नापकर्षिता नान्य

पुंश्चली स्मृता ॥ " इत्युक्तेः । असतीं पुंश्चलीं न बिभृयात् विवाहितामपि पृथक्शय्यां कुर्यादित्यर्थः । एवमकुर्वन्पतितो भवतीत्याह—तामिति । " पुंश्चल्यां गमनाद्विप्रस्तत्तसूर्मिं व्रजेत्पुनः । जीवन्नेव भवेच्छूद्रो मृतो भुंक्तेऽत्र यातनाः ॥ " इति स्मृतेः । विप्र इत्युपलक्षणम् । मृतः पुनरत्र तप्तसूर्मौ ॥ * ॥ पुनः पुंश्चल्यास्तु व्यूढाया अपीत्यादि । मादृशी तु सर्वोत्तमैव सर्वज्ञेन भगवता स्वीकारादित्याह—बुध इति । न बिभृयात्—बिभर्तीति न संभाव्यत इत्यर्थः । अत उभयच्युत एव तां बिभ्रद्भवतीत्यर्थः । एतेन ' अथात्मनोनुरूपम्. ' इत्याद्युत्तारितम् ॥ **विश्वनाथस्तु—**बुधो विज्ञोऽपि न बिभर्ति किं पुन स्त्वं सर्वज्ञ एव, यदि मां तादृशीमज्ञास्यस्तदा पूर्वमेवाऽत्यक्ष्य इति भावः । अन्यत्समम् ॥ ४८ ॥ एतत् पूर्वोक्तं वचः । अन्वाख्यातवती अनुवादं कृतवती । तत् अनुवादरूपकथनम् ॥ * ॥ यद्यपि हे साध्वि इति गुणेन, हे राजपुत्रीत्यैश्वर्यजातिभ्यां स्तूयते तथापि साध्वीति साध्व्येवोत्तरं विचार्य दातव्यं त्वयेति मयोक्तमिति भावः । तच्च युक्तमेवेत्याह—राजपुत्रीति । श्रोतुकामैरस्माभिरिति बहुत्वेन परिहासितुं तत्सख्योपि काश्चित्क्रोडीकृता अत्र, न तु " अस्मदो द्वयोश्च " इति बहुवचनं प्राप्नोति 'सविशेषणानां प्रतिषेधः ' इति तन्निषेधात्, तथाप्यस्मच्छब्दोऽध्याहृत एव । यद्वा—श्रोतुकामैर्मत्कर्णेंद्रियवृत्तिसमूहैरेव तद्द्वारा प्रलंभिता अनु अनंतरमेवात्थ मदुक्तिमेव प्रकारांतरेण व्याख्यातवतीत्यर्थः ॥ ४९ ॥ इत्यर्थ इति—कामनिवृत्तिरेव मोक्षः । तथाहि—" प्रजहाति यदा कामान्मानवो मनसि स्थितान् । तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ॥ " इति प्रह्लादः ॥ * ॥ अत्र परमसंतुष्टेनापि मया कस्तुभ्यं वरो देय इत्याह—यानिति । काम्यन्त इति कामा गुणाः संपदश्च अकामाय कामादन्यस्मै प्रेममात्रविलासाय ' अकामः सर्वकामो वा ' इत्यादौ तथार्थप्रतीतेः । हे कामिनीति स्वभावसंबोधने । मद्विषयककामवत्यास्तव ते मदीयमेवायोग्याः कामाः कन्याश्च सर्वोत्कृष्टा एवेति भावः । यद्वा—कामिनि त्वद्विषयककामयुक्ते मयि—एवमन्योन्यतत्परत्वेन परमप्रियतोक्ता । ' भामिनि ' इति पाठे हे कोपवति यतः कृत्रिमवाक्येनापि मत्परिचर्याप्रातिकूल्ये साति त्वं महाकोपमकार्षीरिति भावः । हि एव, संत्येव । स्वभावतो वर्तन्त एव । तत्रापि नित्यमेवाकामायेत्यादौ हेतुः—एकान्तभक्ताया निष्कामभक्तायाः । यद्वा—ए अकारवाच्ये मयि वासुदेवे कांतोऽयमतोऽस्याऽयोग्योक्तिरपि सोढव्येत्येवं भक्तायाः स्नेहवत्या इत्यर्थः । अतो हे कल्याणि नित्यमंगले । एकांतभक्ताया इत्युक्त्या कामानित्यस्याकामायेत्यस्य चान्यार्थकता परास्ता ॥ ५० ॥ अनुवादेन पुनरुक्तप्रायेण । यद्वा—अनुवादेन प्रीत इति शेषः तां रुक्मिणीम् । नान्यविषया जाता मत्तोऽन्यत्र न नीता । पातिव्रत्यं चाभीष्टाप्तौ निमित्तम् ॥ * ॥ यद्यस्माद्वाक्यैः प्रेमभंग प्रतिपादकवचनैर्नर्मलक्षणैर्मया चाल्यमानायाः क्षोभ्यमाणाया अपि तव धीः प्रकृष्टप्रेममयी नापकर्षिता यत्किंचिदपकर्षं न्यूनत्वं न प्राप्ता किमुत भंगं, किन्तु बद्धमूलैव स्थिताऽतः प्रेम्णो लक्षणं साक्षादनुभूतमिति भावः। तदुक्तम्—" सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे । यद्भावबंधनं यूनोः स प्रेमा परिकीर्तितः ॥ " इति । न तिष्ठत्यवमपराधो दासीनामपि यस्यामित्यतः प्रेयसो ममायमपराधः सुतरामेव क्षंतव्य इति भावः ॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये मां भजंति दांपत्ये तपसा व्रतचर्यया ॥ कामात्मानोऽपवर्गेशं मोहिता मम मायया ॥ ५२ ॥ मां प्राप्य मानिन्यपवर्गसंपदं वाञ्छन्ति ये संपद एव तत्पतिम् ॥ ते मंदभाग्या निरयेपि ये नृणां मात्रात्मकत्वान्निरयः सुसंगमः ॥ ५३ ॥

विषया जाता ॥ ५१ ॥ एकांतभक्तिमभिनंद्य तामेव दृढीकर्तुं सकामान् भक्तान्निंदति ये मामिति। दांपत्ये दंपत्युपभोग्यसुखार्थम् ॥ ५२ ॥ मायामोहितत्वमेवोपपादयति। मां प्राप्येति। अपवर्गेण सह संपदो यस्मिंस्तं माम्। प्राप्य प्रसाद्य ये केवलं संपद एव विषयान्वांछंति न तु माम्। तत्पतिं तासां संपदामपि योऽहमेव पतिस्तम् । तथा ये विषया निरयेऽप्यतिनिकृष्टयोनावपि स्युस्तान्। किंच तेषां पुंसां मात्रात्मकत्वाद्विषयात्मकत्वान्निरयः सुसंगमः शोभनसंगम एव स्यादतो मंदभाग्या एव त इत्यर्थः ॥ ५३ ॥

॥ ० ॥ * ॥ एवं तस्याः स्वस्मिन्पतिभावमयीमेकान्तमुक्तिं स्तुत्वा तत्पोषणाय प्राकृतीनां पतिभावार्थं स्वभजनमपि निंदत्नुभयेषां दांपत्यार्थमपि निंदति—ये मामिति। तपसा स्वधर्मेण। व्रतादीनां कृच्छ्रादीनां चर्यया पुनःपुनराचरणासक्त्या। भजने हेतुः—कामेषु विषयभोगेष्वात्मा चित्तं येषां ते। अपवर्गः पंचमस्कंधानुसारेण भक्तिलक्षणस्तस्येशं दातारमपि। हि एव मोहिता एव। एवमेवोक्तं केतुमालवर्षे भगवत्प्रादुर्भावविशेषेणैवेति भावः। यथा पंचमे—"स्त्रियो व्रतैस्त्वा हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम्। तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः ॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनम्। स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् ॥ यातस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा। तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाञ्चा भगवन्प्रतप्यते ॥" **विश्वनाथस्तु**—दांपत्ये दांपत्याय—मत्पतिर्मत्सुखदो भवतु, मद्भार्या मत्सुखदास्त्विति प्राकृतदंपत्युपभोगसुखार्थमित्यर्थः। अपवर्गेशं पञ्चमस्कंधगद्यानुसृत्या प्रेमदातारम्। यद्वा—अपकृष्टा भवंति वर्गाश्चत्वारो यतस्तथाभूतमीशं माम् ॥ ५२ ॥ "अतिनिकृष्टजनौ प्रोक्तो निरयो नरके दुर्भगसुभगयोश्च" इति निरुक्तिः। विषयिणां नरक एव न तु सुखमित्याह—किञ्चेति। तेषां मद्विमुखानां मात्रा सुशब्दादिविषयेष्वात्मा बुद्धिर्येषां ते मात्रात्मकास्तेषां भावस्तत्त्वं तस्मात्। अतो विषयाविष्टमनस्त्वादित्यर्थः। सुसंगमः सुलभः। इत्यर्थ इति—मंदभाग्या एव विषयैषिणो नरकेषु गच्छंति मद्विमुखत्वादिति। मत्पराणां तु मोक्षः करकलित एव 'यांति मद्याजिनोपि माम्' इति स्मृतेः ॥ * ॥ टीकायामपवर्गेण सह संपदो यस्मिन्नित्यर्थकथनमेव न तु विग्रहः, उपपदविभक्त्या समासाभावात्। अपवर्गयुक्ताः संपदो यस्मिन्निति विग्रहः, समासश्च मध्यमपदलोपी। अपवर्गोत्र मोक्षो भक्तियोगश्च। संपद्यन्त इति संपदो विषयाः, अतः संपद एव विषयानिति काकाक्षिन्यायेन संपद एव विषयानेव। न तु मामिति न संगच्छते समानविभक्त्यन्तरव्यावर्तकत्वादेवकारस्य। तेषां विषयवांछकानाम्। निरयो निकृष्टयोनिरपि सुशोभनोऽभिरुचितश्चासौ संगमनीयश्चेत्यर्थः। तत्र हेतुर्निरयस्यापि विषयात्मकत्वादिति। यद्वा—हे भामिनि परिहासेपि मद्विच्छेदशंकयात्मकोटितोपि परमप्रेमास्पदे मय्यपीर्ष्या रतिः अपवर्गरूपा प्रेमभक्तिलक्षणा संपद्यस्मात्तमपि तथा तत्पतिं पूर्वोक्तदांपत्यादिसंपदः पतिमपि मां प्राप्य वशीकृत्य संपदे दांपत्यादिसंपदर्थमेव मां वांछान्ति पुनःपुनः सेवितुमीहन्ते, न तु मदर्थं ते मन्दभाग्या अप्रशस्तभक्तिसंस्कारवन्तः। यतो ये तत्संपद्वांछकास्ते निरये नरकेऽपि संति तत्सादृश्यं कथं मद्भक्तियोगिनां युज्यत इति भावः। ननु संपदिच्छका महाविपत्तिरूपं निरयं कथं गच्छन्ति तत्राह—नृणां मात्रात्मकत्वात् पापेनापि तदुपार्जकत्वान्निरयः सुसंगमः, प्रयत्नं विनापि लभ्य इत्यर्थः। अन्यत्समम् ॥ **विश्वनाथस्तु**—अपकृष्टाऽवर्गसंपन्मोक्षानंदो यतस्तं मां प्राप्य संपदः प्राकृतीरेव वांछन्ति, यतस्तासामपि दातारं ते इति योज्यम्। यतो नारकीष्वपि योनिषु स्त्रीसंगादिविषयसुखान्य

१–'माषस्थाने मषं कुयाच्छंदोभंगं न कारयेत्' इत्युक्तेर्ह्रस्वः। 'न कार्यं पुन राजसु' इत्युक्तेश्च। २ वर्णाधिक्यमार्षम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्ट्या गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी खलैः ॥ सुदुष्कराऽसौ सुतरां दुराशिषो ह्यसुंभराया निकृतिंजुषः स्त्रियाः ॥ ९४ ॥ न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामि मानिनि यया स्वविवाहकाले ॥ प्राप्तान्नृपानवगणय्य रहोहरो मे प्रस्थापितो द्विज उपश्रुतसत्कथस्य ॥ ॥ ९५ ॥ भ्रातुर्विरूपकरणं युधि निर्जितस्य प्रोद्वाहपर्वणि च तद्वधमक्षगोष्ठ्याम् ॥ दुःखं समुत्थमसहोऽस्मदयोगभीत्या नैवाब्रवीः किमपि तेन वयं जितास्ते ॥ ९६ ॥

तस्मात् हे गृहेश्वरि त्वया मयि भवमोचनी निष्कामानुवृत्तिः कृता एतद्दिष्ट्या भद्रम् । कथंभूता । खलैः सुदुष्करा । दुराशिषो दुरभिप्रायाया अत एव असुंभरायाः प्राणतर्पणपराया निकृतिंजुषो वंचनपरायाः स्त्रियाः सुतरामसावनुवृत्तिर्दुष्करेति ॥ ९४ ॥ किंच संति निष्कामाः प्रेम्णैव मय्यनुवर्तमाना बह्व्यः किंतु त्वया सदृशीं क्वापि न पश्यामीति तस्या भक्तिं बहुमानेनाभिनंदति । न त्वादृशीमिति त्रिभिः । उपश्रुताः सत्यः कथा यस्य मे ॥ ९५ ॥ प्रोद्वाहपर्वण्यनिरुद्धविवाहे । अक्षगोष्ठ्यां द्यूतसभायाम् ।

नायासेनैव लभ्यन्त इत्याह—ये जीवा निरयेऽपि सूकरादिजातावपि वर्तंते तेषां नृणां जीवानां मात्रात्मकत्वाद्विषयात्मकत्वात् सस निरय एव सुसंगमः स्त्रीसंगादिसुखसाधकत्वाच्छोभनसंगहेतुरित्यर्थः । 'ना जन्तौ मानुषेऽपि च' इति कोशाज्जीवसामान्येऽपि नृशब्दोऽस्ति ॥९३॥ यस्माद्विषयिणां निरयदुःखं तस्माद्धेतोः। असकृत्पुनःपुनः । दुष्टः केवलविषयनिष्ठोऽभिप्रायो यस्यास्तस्याः । अत एव दुराभिप्रायत्वादेव। असुंभरायाः स्वप्राणपोषणपरायाः । वञ्चनञ्चात्र निजपातिव्रत्य प्रदर्शनपूर्वकं जारसेवनं, तत्परायणायाः ॥*॥ या भवमोचनी संसारबंधमोचनी सा त्वया कृता, तव भयाभावात्त्वयि सा ऋणवत्येवाभूदन्यैरेव त्वदनुगंतृलोकैः कृता भवमोचनी भवेदिति भावः । ननु तर्हि खला अपि मुक्ताः स्युस्तत्राह—खलैरिति ॥ **तोषिणी** तु—असकृत्सदेत्यर्थः । स्वयं च तत्कृतमदनुवृत्तिर्भवस्य प्रपञ्चस्यापि सर्वस्य मोचनी श्रवणादिना सर्वेषामपि सर्वदुःखतो मोक्षवती । तर्ह्येतदूर्ध्वं प्रपंचो न स्थास्यत्येव तत्राह—खलैः श्रीगुर्वादिवंचनापरैः सुदुष्करा करोत्यर्थस्य सर्वधात्वर्थव्यापकत्वा दुर्बोधादिरूपा च । दुराशिषो मन्निष्ठत्वाऽभावाद्दुष्टाऽऽशीः कामो यस्याः । तत्र हेतुः—यतः कुतश्चिदिंद्रियतर्पणपरायाः अतो निकृतिंजुषः पूर्ववत्खलाया इत्यर्थः । हे गृहेश्वरीति त्वयैव दृष्टान्तेन मम सर्वेष्वपि गृहेषु अनुवृत्तिः कृता प्रवार्तितेति त्वमेव सर्वगृहस्वामिनीति । यद्वा—गृहेश्वरी त्वमेव अहं तु त्वदधीन एवेति भावः ॥ ९४ ॥ रुक्मिण्या भक्तिं गुरूकरोति—किञ्चेति । क्वापि क्वास्वपि कुत्रापि वा यया त्वया अवगणय्य त्यक्त्वा रहोहरो रहस्यप्रापकः दूत इत्यर्थः । मे मम पार्श्वे इति शेषः ॥ * ॥ गृहेषु सार्वत्रिकेषु स्वीयेष्वपि वा स्वविवाहस्य कालेऽत्यासन्नसमये रहो रहस्यं वहति प्रापयतीति सः 'रहोहरः' इति पाठेऽपि स एवार्थ इति तादृशभावेष्वपि पितृमात्रादिसर्वजनेष्वप्यनादरः सूचितः । 'रहोऽतिगुह्ये सुरते' इति विश्वः । उपश्रुतसत्कथस्येति—गृहांतर्मद्वार्त्ताश्रवणमात्रेणैव न तु मन्माहात्म्यानुभवेनेत्यर्थः । किमुताधुना जातपरमासक्तित्वे सतीति भावः । मानिनीति—मानः पूजा चित्तसमुन्नतिर्वा हे तद्वति तद्योग्या त्वमेव न त्वन्येति भावः ॥ ९५ ॥ तेनातिदुःसहसहनादिना जिता वशीकृताः । अनेन तद्वधमितिवचनेन । अस्य क्ष्वेल्याचरितस्य ॥ * ॥ किञ्च-भ्रातुरिति बंधुवात्सल्येन तत्तदसह्यता, युधि निर्जितस्येति त्वद्भ्रातृत्वाद्युद्धेऽपि तस्य निर्जयायोग्यता, तथा प्रोद्वाहेत्यादिना तदानीं तद्वधायोग्यता सूचिता । यतोऽसहिष्ठा अतो नाब्रवीश्च । भीतिः शंका, ईश्वरोऽयं कदाचिन्मय्यनववानं कुर्यादित्याशंकयेत्यर्थः । अस्मदिति बहुत्वं निजबंधुजनापेक्षया । आत्मना सह वियोगेन तैरपि तत्सिद्धेः । किंवा—पराजिताः अस्माकं तादृशशक्त्यभावात् । वयमिति न केवलमहं मदीयाश्च ॥ **विश्वनाथस्तु**—परन्तु प्रेमवतीनां मद्भार्याणामपि मध्ये गृहिणो मम त्वमेव गृहिणीश्रेष्ठेत्याह—नेति । मान आदरः हे तद्वति तत्रास्मासु न युज्यते नौचिती भवतीत्यस्मदयोगस्तद्भीत्या किमपि दुःखं नाब्रवीः । कीदृशम्—असहो दुर्बलं केवललोकापेक्षैकहेतुकत्वादिति भावः । पुनः कीदृशम्—समुत्थं समुद्यथा स्यात्तथा तिष्ठतीति तत् दुःखं मत्प्रतिकूलरुक्मिहिंसनादतः सुखसहितम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दूतस्त्वयाऽऽत्मलभने सुविविक्तमंत्रः प्रस्थापितो मयि चिरायति शून्यमेतत् ॥ मत्वा जिहास इदमंगमनन्ययोग्यं तिष्ठेत तत्त्वयि वयं प्रतिनंदयामः ॥ ५७ ॥ श्रीशुक उवाच ॥ एवं सौरतसंलापैर्भगवाञ्जगदीश्वरः ॥ स्वरतो रमया रेमे नरलोकं विडंबयन् ॥ ५८ ॥ तथान्यासामपि विभुर्गृहेषु गृहवानिव ॥ आस्थितो गृहमेधीयान्धर्माँल्लोकगुरुर्हरिः ॥५९॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्द्धे कृष्णरुक्मिणीसंवादो नाम षष्टितमोऽध्यायः ॥ ६० ॥

तस्य भ्रातुर्वधम् । तस्मिन्काले कालांतरे वा तदनुस्मरणतः पुनःपुनः समुत्थं दुःखमस्माभिरयोगो वियोगस्तद्भीत्या असहः सोढवत्यसि । अनेनैवानिरुद्धविवाहानंतर्यमस्य ज्ञातव्यम् ॥ ५६ ॥ अपि च दूत इति आत्मलभने मत्प्राप्त्यर्थम् । मयि चिरायति श्वोभाविनि विवाहे आगंतव्यमिति कृते समये कथंचिद्प्राप्तवति सत्येतद्विश्वं शून्यं मत्वेदमनन्ययोग्यमंगं जिहासे त्यक्तुमिच्छामि त्यक्ष्यामीत्येवं दूतः प्रस्थापितः तथाह्युक्तं त्वया "यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशाञ्छतजन्मभिः स्यात्" इति । यद्वा अजिहास इतिच्छेदः । त्यक्तुमैच्छ इत्यर्थः । तत्तव कर्म त्वय्येव तिष्ठेत् । न तत्प्रतिकर्तुं शक्यमित्यर्थः । किंतु केवलं त्वां प्रति नंदयामो हर्षयाम इति ॥ ५७ ॥ सौरतसंलापैः सुरतनर्मगोष्ठीभिः ॥ ५८ ॥ ५९ ॥ इति श्रीमद्भा० दशमस्कंधोत्तरार्धे श्रीध० टीकायां षष्टितमोऽध्यायः ॥ ६० ॥

वेत्यर्थः ॥ ५६ ॥ अन्यदाह—अपि चेति । सुविविक्तमंत्रः सुष्ठु प्रकाशितरहोवचनः । जिहास इति तङार्षः । आर्षत्वाश्रयणस्यागतिकगतिकत्वादाह—यद्वेति । इत्यर्थ इति—सन्नंताज्जहातेर्लङो मध्यमपुरुषैकवचनमिति ध्येयम् । तत् मां विनाऽन्यत्यागरूपम् । इत्यर्थ इति—अपरिचितेऽतीवानुरागोऽप्रतिकार्यो भवतीति भावः ॥ * ॥ पुनः पूर्वानुरागवैशिष्ट्यं स्मृत्वाह—दूत इति । अस्यायमेवार्थः--प्रस्थापितो मत्पार्श्वे प्रेषितः । कीदृशः सुष्ठु विविक्तो निर्णिक्तो मंत्रो गुप्ता युक्तिर्यत्र सः । ततश्च मयि चिरायति तदातिथ्यत्वत्संदेशश्रवणावेशवर्त्मदैर्घ्यादिभिः किंचिद्विलंबे सति एतत् पितृमात्रादिबंधुयुक्तमपि विश्वं शून्यं मत्वा कुत्राप्यालंबनं न लब्ध्वेदं सर्वोत्कृष्टमप्यंगं शरीरमजिहासस्त्यक्तुमैच्छः 'दुर्भगाया न मेधाता' इत्यादिचिंतया भवत्याऽऽशाबंधच्छेदावगमात्, 'यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादम्' इत्यादिपूर्वोक्तस्वारस्याच्च । अजिहास इत्यत्र हेतुः अनन्ययोग्यमन्यस्मै समर्पणाऽयोग्यमित्यर्थः । प्रतिनंदयामः हर्षयंतीं त्वां हर्षयामः ॥ ५७ ॥ रुक्मिण्या गुणान्वक्तुमशक्यान्मत्वाह शुकः--एवमिति । स्वरत आत्मारामोऽपि । रमया साक्षाल्लक्ष्म्या । विडंबयन्ननुकुर्वन् ॥ * ॥ रुक्मिणीमाधवौ वन्दे ययोः कलहसन्निभा । वाग्वैदग्धी मिथस्तोत्रतात्पर्याश्चर्यता मता ॥ एवमिति अन्येऽपि तादृशा बहवो विलासाः सूचिताः । स्वरतो रमणस्वरूपशक्तित्वेन स्वरमणयोग्यया रुक्मिण्या सह रेमे । तस्मिन्रमणेऽपि विशेषः—नरेति । क्रीडालोभेनैश्वर्यांशं गुणीकृत्य तादृशलीलया नरलोकमनुकुर्वन्नपि परममाधुर्येण तमपि हीनोपमानं कुर्वन्नित्यर्थः । यतो भगवानपि देवकीसुतस्तथाविर्भावेणैव प्रारब्धलील इत्यर्थः ॥ ५८ ॥ इदमन्यत्रातिदिशति—तथेति । यथा रुक्मिण्या रेमे तथेत्यर्थः ॥ * ॥ अथातो हेतोर्विभुरपि स्वयमेवैकः सर्वाणि गृहाणि व्याप्नुवन्नित्यर्थः । एतच्चाग्रे व्यक्तं भावि । गृहवान्निवेति—यथाऽन्यो गृही तथेत्यर्थः । गृहमेधीयान् गृहस्थसंबंधिनस्तादृशप्रियाप्रेममयान्वैदिकांश्च धर्मानास्थित आचरदित्यर्थः । यतो लोकगुरुस्तस्मादेव ते धर्माः प्रवर्तंत इत्यर्थः । यतो हरिस्तेन शीलेन सर्वेषां मनोहर इत्यर्थः । यद्वा—आश्रितः सन्नेमे इति पूर्वक्रियययैवान्वयः । अतो गृहधर्मानुष्ठानेऽपि क्रीडार्थमेवेति ॥ ५९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे षष्टितमोऽध्यायः ॥ ६० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एकैकशस्ताः कृष्णस्य पुत्रान्दशदशाबलाः ॥ अजीजनन्ननवमान्पितुः सर्वात्मसंपदा ॥ १ ॥ गृहादनपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितम् ॥ प्रेष्ठं न्यमंसत स्वंस्वं न तत्तत्त्वविदः स्त्रियः ॥ २ ॥ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनिता विभूम्नः ॥ ३ ॥

एकषष्टितमे शौरेः पुत्रपौत्रादिसंततिः ॥ अनिरुद्धविवाहे च रुक्मिणो रामतो वधः ॥ १ ॥ अष्टाधिकशतद्व्यष्टसहस्रस्त्रीसमुद्भवान् ॥ कोटिशः पुत्रपौत्रादीन्हरिर्दारैरयोजयत् ॥२॥ तदेतद्वक्तुमाह । एकैकश इति । कृष्णस्याबला भार्याः सर्वा या आत्मनि संपत्तया पितुः सकाशादनवमानन्यूनान् ॥ १ ॥ प्रेष्ठं न्यमंसत अच्युतस्य प्रियतमं प्रत्येकं स्वंस्वं मेनिरे । न तस्य तत्त्वमात्मारामत्वं विदंति ताः॥ २॥ आत्मारामत्वं व्यनक्ति द्वयेन । चार्विति । चार्वब्जकोशवद्वदनं च आयतानि बाहुनेत्राणि च सप्रेम्णा हासरसेन वीक्षितानि च वल्गुजल्पाश्च भगवतः एतैः संमोहिता वनिताः स्वैःस्वैरनेकैर्विभ्रमैस्तस्य श्रीकृष्णस्य मनो विजेतुं हर्तुं न समशकन्न शक्ता बभूवुः । विभूम्नः परिपूर्णस्य॥ ३॥

चादन्येषामपि । रामतो बलदेवात् (१) । अष्टभिरधिकं शतमष्टाधिकशतम्, द्विरावृत्ता अष्टौ द्व्यष्टौ, द्व्यष्टौ च तानि सहस्राणि द्व्यष्टसहस्राणि, तच्च तानि च त्रियोऽष्टाधिकशतद्व्यष्टसहस्रस्त्रियस्तासु समुद्भवान् (२) । तदेतल्लोकविडम्बनम् । ता रुक्मिण्याद्याः । सर्वात्मसंपदाऽन्यूनदेहादिस्वभावसमृद्ध्या । अजीजनञ्जनयामासुः ॥ १ ॥ स्वंस्वं निजंनिजमात्मानं देहमिति यावत् । गृहात्स्वस्वपुरात् । अनपगं प्रीतिपूर्वकमन्यभार्यापुराणि नापगच्छंतं किन्त्वनुरोधवशात्कदाचिदेवेति । तोषिणी तु—अनपगं नायिकांतरगृहगमनरहितमित्याह । तस्य तत्त्वं सर्वगृहावस्थानरूपं न विदन्तीति ताः । विश्वनाथस्तु—अतर्क्ययोगमायया सर्वप्रियाजनसुभगतासम्पादकं तस्य तत्त्वं न विदन्तीति ता इत्याह ॥ २ ॥ नन्वेवं तस्यातिकामुकत्वमेव प्रतीयते, न, किन्तु प्रेमैकवशत्वमेवेत्युदाहरति द्वाभ्याम् । वनिता जनितात्यर्थाऽनुरागास्ताः स्त्रियः स्वैः स्त्रीजातीयैः विभ्रमैर्विलासैर्भगवतो मनो विशेषेण तत्प्रेमाधिकसपत्नीतुल्यत्वेन जेतुं वशीकर्तुं नाशकन्, किंतु स्वप्रेमांशानुरोधेनेति भावः । अत एव—सप्रेमेति । वनिताशब्देन गृहादनपगामित्वं वशत्वं च लक्षितम् । यद्यपि विसंशब्दयोरेकतरेणाप्यभीष्टार्थलाभस्तथापि विशब्देन श्रीभगवति वशीभावचिह्नं, संशब्देन तास्वपि तत्कृतियोग्यत्वचिह्नं तादृशं न दृष्टमितिपृथगवसितं तादृशविभ्रमव्यञ्जने हेतुश्चार्विति । चार्वब्जकोशवदनादिभिः संमोहिताः प्रेम्णा कामेन वा क्षोभिता इति । अत्र पूर्वं वदनं पश्यंति पश्चाल्लज्जादृष्ट्या बाहुं ततस्तद्दर्शनेन गाढालिंगनस्पृहाजातधाष्टर्येन पुनर्मुखे दृश्यमाने मिथो नेत्रमेलनं ततः सप्रेमहासादीति । एतदुक्तं भवति—परस्परं तस्य ताभिः सह प्रेमवशतास्त्येव किन्तु कदाचित्तत्प्रेमाधिकसपत्नीवत्तन्मनो वशीकर्तुं काममयान्विलासान् दर्शयंति तदा तस्य तद्वत्तन्न स्यादित्यतो न कामुकत्वं किन्तु प्रेमविशेषवशत्वमेवेति । विभूम्नः सर्वापेक्ष्यपरिपूर्णस्य कामुकत्वं न संभवति भक्तवश्यत्वरूपमहागुणस्य तत्र सद्भावोस्त्येवेति 'अहं भक्तपराधीनः' इत्युक्तेः । अत एव गोपालतापिन्यामुक्तम् "विद्यामयो यस्स कथं विषयीभवति, यो हि कामेन कामान्कामयते स कामी भवति, यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न शेकुः ॥ ४ ॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोऽपि न विदुः पदवीं यदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयाऽनुरागहासावलोकनवसंगमलालसाद्यम् ॥ ५ ॥ प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यम् ॥ ६ ॥ तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिताः ॥ अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते ॥ ७ ॥ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् ॥ सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ ८ ॥ चारुचंद्रो विचारुश्च चारुश्च दशमो हरेः ॥ प्रद्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ॥ ९ ॥ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ॥ चंद्रभानुर्बृहद्भानू रतिभानुस्तथाष्टमः ॥१०॥

तासां विभ्रमान्वर्णयन्नेतद्विवृणोति । स्मायेति । स्मायो गूढहसितं तद्युक्तोऽवलोकलवः कटाक्षस्तेन दर्शितः सूचितो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमंडलं तेन प्रहिताः प्रस्थापिता ये सौरता मंत्रास्तेषु शौण्डैः प्रगल्भैरनंगस्य बाणैः शरैरन्यैश्च करणैः कामशास्त्रप्रसिद्धैर्यस्येंद्रियं मनो विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शेकुरिति॥ ४॥ अनुरागेण हासोऽवलोकश्च नवसंगमे लालसमौत्सुक्यं च ते आद्या यस्य विभ्रमकदंबस्य तं भेजुः । अनुरागहासावलोकनवसंगमलालसाद्यं भेजुस्तस्य मनो विजेतुं न शेकुरिति वा ॥५ ॥ किंतु प्रत्युद्गमादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति । प्रौढभावेऽपि नवसंगमाद्यभिधानमगतसारत्वेनौत्सुक्येन च तथा प्रतीतेः । तेषामेव श्लोकानां प्रस्तावांतर पुनःपुनरावृत्तिरिति सौंदर्यात् ॥६॥ प्रासंगिकमुक्त्वा प्रस्तुतमाह तासामिति । दशदश पुत्रा यासां तासां मध्येऽष्टौ महिष्यो याः प्रागुक्तास्तत्पुत्रानिति ॥७॥८॥९॥१०॥

हि वै त्वकामेन कामान्कामयते सोऽप्यकामी भवति ": इति श्रुतेः । चारू रम्यो योऽब्जकोशोंऽबुजमध्यभागस्तत्तुल्यं वदनमास्यं तथा ॥ ३ ॥ तासां स्त्रीणाम् । सौरताः सुरतोद्बोधकाः । " शौंडो मत्ते प्रगल्भे च ख्याते शौंडी तु पिप्पली " इति धरणिः । कामशास्त्रप्रसिद्धैर्हावादिभिः । यस्य कृष्णस्य । न शेकुरशीकृतकामत्वेन दृढवीर्यत्वात् । बाणशब्देन भ्रूमंडलस्य धनुष्ट्वं ध्वनितम्, मंडलशब्देन तस्याकृष्टत्वम्, ततश्च तादृशभ्रूमंडलेन प्रहिता मुक्ताश्च सौरतमंत्रशौंडाश्चेति विग्रहः । अन्येऽपि बाणा मंत्रेण शौंडा भवंतीति । यस्येति यच्छब्दस्यांतिमनिर्देशात्तच्छब्दानपेक्षयैवान्वयः । तथा चालंकारिकाः–'यच्छब्दो प्युत्तरवाक्यार्थगतत्वेनोपपत्तेः पूर्ववाक्यगतस्य तच्छब्दस्योपादानं नापेक्षंते इति । यथा–" साधु चंद्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिके । उद्यताब्जजयिनि राधिकामुखे तेन साहसमनुष्ठितं पुनः " इति ॥ ४ ॥ ता रुक्मिण्याद्याः । यदीयां यत्संबंधिनीम् । विभ्रमपदाध्याहारे गौरवं मत्वार्थांतरमाह–अनुरागेति । पूर्वेणैव संबंधः । नवो नित्यनूतनः संगमोंगसंगश्च लालसा तष्ण्यभावश्च तदाद्यं तदादिकविलासमनेकं स्वकर्तृकं कृष्णक तृकं वा भेजुः । " तथाहमपि तच्चित्तो निद्रां च न लभे निशि " इति भगवदुक्तिज्ञाप्यः " ईक्षितोंतःपुरस्त्रीणां सव्रीडस्मितवीक्षितैः । कृच्छ्राद्विसृष्टे निरगाज्जातहासो हरन्मनः ॥" इति, "रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा " इत्यादिकोक्तिज्ञाप्यश्च पारिजाताद्यपहरणज्ञाप्यश्च तासां प्रेममयैर्विलासैस्तद्वशीभावस्त्वस्येति ज्ञेयम् ॥ ५ ॥ सेवनानुरागमाह–किन्त्विति । वरार्हणं पुष्पांजलिरत्नांजलिनिक्षेपादि । प्रौढभावेऽपि नवोढात्वाभावेपि । अगतसारत्वेनैकरसरूपयौवनादिमत्त्वेनौत्सुक्येनानुरागाधिक्येन च तथाप्रतीतेर्नवसंगसमास्वादप्रतीतेः । तेषामेव पूर्वोक्तानामेव । प्रस्तावांतरे प्रकृतांतरे ॥ ६ ॥ प्रासंगिकं प्रसं गानुगतम् । तासां सर्वासाम् । तत्पुत्रान्रुक्मिण्यादिपुत्रान् । ते तुभ्यम् ॥ ७ ॥ प्रद्युम्नादन्येषां कानि नामानीत्यत आह–चारुदष्ण इति । वीर्यवानिति सर्वविशेषणम् ॥ ८ ॥ ९ ॥ स्वर्भानुः स्वर्गेऽपि यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥ सांबः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥ ११ ॥ विजयश्चित्रकेतुश्च वसुमान्द्रविडः क्रतुः ॥ जांबवत्याः सुता ह्येते सांबाद्याः पितृसंमताः ॥ १२ ॥ वीरश्चंद्रोऽश्वसेनश्च चित्रगुर्वेगवान्वृषः ॥ आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्नजितेः सुताः ॥ १३ ॥ श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः ॥ शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोऽवरः ॥ १४ ॥ प्रघोषो गात्रवान्सिंहो बलः प्रबल ऊर्ध्वगः ॥ माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः ॥ १५ ॥ वृको हर्षोऽनिलो गृध्रो वर्धनोऽन्नाद एव च ॥ महाशः पावनो वह्निर्मित्रविंदात्मजाः क्षुधिः ॥ १६ ॥ संग्रामजिद्बृहत्सेनः शूरः प्रहरणोऽरिजित् ॥ जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः ॥ दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः ॥ १७ ॥ प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्मवत्यां महाबलः ॥ पुत्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे ॥ १८ ॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप ॥ मातरः कृष्णजातानां सहस्राणि च षोडश ॥ १९ ॥ राजोवाच ॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं युधि ॥ कृष्णेन परिभूतस्तं हंतुं रंध्रं प्रतीक्षते ॥ एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः ॥ २० ॥ अनागतमतीतं च वर्तमानमतींद्रियम् ॥ विप्रकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः ॥ २१ ॥

११ ॥ १२ ॥ श्रीमानिति वसोः कुंतेर्वा विशेषणम् ॥ १३ ॥ भद्रो नाम एकल एकः । सोमकोऽवरः कनीयान् । एते कालिंद्याः सुता इति ॥१४॥ माद्र्या लक्ष्मणायाः ॥ १५ ॥ क्षुधिश्च दशमः । एते मित्रविंदात्मजाः ॥ १६ ॥ संग्रामजित्प्रमुखाः सत्यकांता भद्रायाः सुताः, शैब्यानामपि सैव ॥१७॥ रोहिण्याः सुतानामुक्तिरन्यासामुपलक्षणार्थम् ॥ १८ ॥ एतेषामिति । अन्येषामपि श्रीकृष्णपुत्राणां शतसंख्यस्त्रीषु पुत्राः पौत्राश्च कोटिशो बभूवुः । तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति । मातरः कृष्णजातानामिति । चशब्देनाधिकाश्चेत्युक्तम् ॥ १९ ॥ यः कृष्णं हंतुं रंध्रं प्रतीक्षते स कथं प्रादादिति । वैवाहिकं विवाहनिमित्तम् ॥ २० ॥ रुक्मिणोऽभि

दीप्तिर्यश इत्यर्थः ॥ १० ॥ पुरुजिदसंख्यजयी ॥११॥१२॥ वेगवानिति नामैव । अमात्रोगान् हिनस्तीत्यामश्चिकित्साविज्ञः तद्धितप्रत्ययानां सर्वार्थे विधानाद्धिंसायामत्राण् ॥१३ ॥ वृषपदावृत्तिस्तु प्रवृत्तिनिमित्तभेदात्,पूर्वे वृषपदं धर्मवत्परमिह तु वदान्यपरम् “ वृषो धर्मे बलीवर्दे राश्याखुशुक्रलेषु च । श्रेष्ठे स्यादुत्तरस्थोयं व्यासेऽपि परिकीर्तितः ॥ ” इति मेदिनी । वीर इति वृषविशेषणं, सर्वेषां वा । स्वामिना त्वेकल इति भद्रविशेषणं कृत्वा वीर इति नामांतरमेवोक्तम् । पूर्वे वीरपदं शूरपरमिह तु वीराः संत्यस्येति वीरो मत्वर्थीयाच् । ‘ अवरश्चरमे त्रिषु ’ इति धरणिः इह ज्यैष्ठ्यानुजभावस्तूद्देशक्रमत एव ज्ञेयः ॥ १४ ॥ सहओज इत्यत्र विनिलोपः ‘ गम्यमानस्याप्रयोग एव लोपः ’ इति कैयटः ॥ १५ ॥ महानाशो भोजनं यस्य स तथा । वैयधिकरण्ये पूर्वपदस्याकार आर्षत्वादेव । महं तेजोऽश्नुत इति वा ‘ महश्च महसा सह ’ इति द्विरूपकोशात ॥ १६ ॥ सैव भद्रैव । अष्टानां सर्वमुख्यानां पुत्रानुक्त्वा षोडशसहस्रमुख्याया रोहिण्या आह–दीप्तिमानिति ॥ १७ ॥ प्रासंगिकमाह–प्रद्युम्नादिति । भोजकटे–स्थितस्येति शेषः ॥ १८ ॥ एतेषां प्रद्युम्नादीनाम् । तत्र कृष्णपुत्रपौत्रानंत्ये । अधिका अष्टोत्तरशतमिति ज्ञेयम् ॥ १९ ॥ अरिपुत्राय कृष्णपुत्राय । रंध्रमत्रकाशम् । यो रुक्मी । विवाहनिमित्तं विवाहकारणम् । ‘ रंध्रं तु दूषणे छिद्रे ’ इति मेदिनी ॥ २० ॥ ननु दुर्घटघटना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ वृतः स्वयंवरे साक्षादनंगोंगयुतस्तया ॥ राज्ञः समेतान्निर्जित्य जहारैकरथो युधि॥२२॥ यद्यप्यनुस्मरन्वैरं रुक्मी कृष्णावमानितः ॥
व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियम्॥२३॥ रुक्मिण्यास्तनयां राजन्कृतवर्मसुतो बली॥ उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥ २४ ॥
दौहित्रायानिरुद्धाय पौत्रीं रुक्म्यददाद्धरेः ॥ रोचनां बद्धवैरोऽपि स्वसुः प्रियचिकीर्षया ॥ जानन्नधर्मं तद्यौनं स्नेहपाशानुबंधनः ॥ २५ ॥

प्रायं कथं जानीम इति चेदत आह । अनागतमिति । अतींद्रियमस्मदादींद्रियागोचरम् । विप्रकृष्टं दूरस्थम् । व्यवहितं कुड्याद्यंतरितम् ॥ २१ ॥ तत्रोत्तरम् । स्वयंवरे रुक्मवत्या वृतः सन् राज्ञो निर्जित्य जहारेति ॥ २२ ॥ यद्यपि श्रीकृष्णावमानितस्तथापि वैरमनुस्मरन्नपि व्यतरत्प्रादात् । अन्वमोदतेत्यर्थः ॥ २३ ॥ सर्वासामपि एकैका कन्या तत्सर्वविवाहोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह । रुक्मिण्या इति ॥ २४ ॥ यौनं विवाहः । तद्यौनमधर्मं जानन्निति "द्विषदन्नं न भोक्तव्यं द्विषंतं नैव भोज

कारिणीयं भगवदिच्छा भगवल्लीलाशक्तिरेव वा सामान्यतो ज्ञायताम्, विशेषपर्यालोचनं त्वस्या अशक्यमित्याशंक्याह—अनागतमिति । योगिनस्तावदनागतादिकं जानंति, भगवद्भक्तिविशेषत्वेन परमतद्विशेषा भवन्तस्तु भगवत्सं बंधिनमपि तत्तद्विशेषं जानंतीति भावः । अनागतं भावि ॥ २१ ॥ तत्राक्षेपे । एकरथः सेनारहितः । भीतोऽयं वैरिपुत्राय कन्यां दित्सतीत्यप्रतिष्ठाभयाद्रुक्मिणा स्वपुत्र्याः स्वयंवरणमकारि इत्याह—वृत इति । वरणे हेतुः—अन्यत्रय आवेशभावेनानंगः स पुनरत्र साक्षात्पूर्णरूपोंगयुतश्चेत्यर्थः । समेतान् तथा स्वयंवरे तस्मिन्वृतेऽपि तेन सह योद्धुं मिलितान् । विवाहोत्तरं मातुलप्रीत्या तस्य पुरे चिरवासेन, यद्वा—द्वारकातः पुनरानयनात्तत्रानि रुद्धस्य जन्माभूदिति ज्ञेयम् ॥ २२ ॥ इत्यर्थ इति—न तु तेन श्रद्धया दत्ता हृतामन्यः शाल्व इवांबां न ग्रहीष्यतीति हेतोस्तद्दानं स्वीकृतवानिति भावः । कारणांतरमाह—स्वसुरिति, स्वप्राणरक्षिकायाः स्वसुः श्रीरु क्मिण्याः प्रियं कुर्वन् कर्तुम् ॥ २३ ॥ सर्वासां कृष्णभार्याणाम् । चारुमतीनाम्नीं बलीनामा । यद्यप्ययं विवाहोऽनुचितस्तथापि जन्मांतरीयकर्मवशाद्भगवदनुमोदनेनाशास्त्रीयमपि शास्त्रीयं भवति वेदस्यापि तदा ज्ञारूपत्वात्तदुक्तं क्रियते "मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके" इति कपिलदेवोक्तेः । "एतत्पुंसां परं श्रेयो यत्तवाज्ञानुपालनम्" इति भृगूक्तेः ॥२४॥ योन्यै तत्प्राप्तय इदं यौनं विवाहः । तत् मातुलपुत्रीविवाहरूपम् । यद्यपि "मातुलस्य सुतामूढ्वामातृगोत्रां तथैव च" इत्यादिस्मृतेः प्रायश्चित्तविधानादधर्मोऽपि तथापि "आयाहींद्र पथिभिरीळनेभिर्यज्ञमिमं नो भागं जुषस्व तृप्तां जहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयीमिव" इति मंत्रलिंगात् । "यौषापत्यं मातुलीयं यथा भागः पितृष्वसुः पुत्रस्यैवंवयांतेंशंजुषस्वेंद्रेत्यृषिर्जगौ" इति श्रुतेः स्मृत्यपेक्षया बलवत्त्वम् । तदुक्तम्—'श्रुत्या स्मृतेर्विरोधे श्रुतिर्बलीयसी' । तथाहि—"श्रुतिस्मृतिपुराणानांविरोधो यत्र दृश्यते । श्रौतं तत्र प्रमाणं स्याद्द्वयोर्द्वैधे श्रुतिर्वरा । श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ । स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक्पृथक् ॥" इत्याचारार्कोक्तेर्यद्यपि 'मातुलस्य सुतामूढ्वा' इत्यादिस्मृतेः 'मातुलस्येव योषाभागस्ते" इत्यादिश्रुतेः प्राबल्यमस्ति तथापि "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नहि" इति लोकविद्विष्टत्वाद्धर्मत्वेऽप्यकार्य्यत्वमेव । यच्चोक्तम् "दक्षिणे मातुलीकन्या ह्युत्तरे मांसभोजनम् । चर्मोदकं धन्वनि च न दुष्टं मनुरब्रवीत् ॥" इति तच्च तत्रत्यानां देशधर्मत्वान्न दुष्टम् । तदुक्तं स्मृत्यंतरे—"यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः । तथापि लौकिकाचारं मनसापि न लंघयेत् ॥ समयाचारिको धर्मो जातिदेशकुलो द्भवः । ग्रामाचारः परिग्राह्यः सर्वत्रैव यथोदितम्" इति । एवमेककुलस्थदेवकीवसुदेवकृष्णसत्यभामाविवाहवत्पूर्वोक्तचारुमतीकृतवर्मसुतविवाहोपि कुलधर्मत्वान्न दुष्टः । यद्वा—यादवानां चंद्रसूर्योभयवंश्यानामन्यतरत्वमादाय भिन्नवंशतापि संभवति । तथा च सर्वथैव तेषां परस्परविवाहे न दोषः । उभयवंश्यत्वं यदूनां हरिवंशे वर्णितम् । तथाहि—ययातेर्यदुः, यदोः क्रोष्टा, क्रोष्टुर्देवमीढः, तस्माच्छूरः, तस्माद्वसुदेवः, तत कृष्णः । पुनः सूर्यवंशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्नभ्युदये राजन्रुक्मिणी रामकेशवौ ॥ पुरं भोजकटं जग्मुः सांबप्रद्युम्नकादयः ॥ २६ ॥ तस्मिन्निवृत्त उद्वाहे कालिंगप्रमुखा नृपाः ॥ दृप्तास्ते रुक्मिणं प्रोचुर्बलमक्षैर्विनिर्जय ॥ २७ ॥ अनक्षज्ञो ह्ययं राजन्नपि तद्व्यसनं महत् ॥ इत्युक्तो बलमाहूय तेनाक्षै रुक्म्यदीव्यत ॥ ॥ २८ ॥ शतं सहस्रमयुतं रामस्तत्राददे पणम् ॥ तं तु रुक्म्यजयत्तत्र कालिंगः प्राहसद्बलम् ॥ दंतान् संदर्शयन्नुच्चैर्नामृष्यत्तद्बलायुधः ॥ २९ ॥ ततो लक्षं रुक्म्यगृह्णाद् ग्लहं तत्राजयद्बलः ॥ जितवाहनमित्याह रुक्मी कैतवमाश्रितः ॥ ३० ॥ मन्युना क्षुभितः श्रीमान्समुद्र इव पर्वणि ॥ जात्यारुणाक्षोऽतिरुषा न्यर्बुदं ग्लहमाददे ॥३१॥ तं चापि जितवान्रामो धर्मेणच्छलमाश्रितः ॥ रुक्मी जितं मयाऽत्रेमे वदंतु प्राश्निका इति ॥३२॥ तदाऽब्रवीन्नभोवाणी बलेनैव जितो ग्लहः ॥ धर्मतो वचनेनैव रुक्मी वदति वै मृषा ॥ ३३ ॥

येत् " इति लोकविरोधात् । "अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु" इति निषेधाच्चेत्यर्थः ॥ २५ ॥ २६ लोकविरुद्धाचरणफलं वक्तुमाह । तस्मिन्निति ॥ २७ ॥ अदीव्यत् क्रीडितवान् ॥ २८ ॥ २९ ॥ निष्काणां लक्षं ग्लहं पणं कृतवान् । कैतवं कपटम् ॥ ३० ॥ न्यर्बुदं दशकोटीर्ग्लहं क्षुभितो राम आददे ॥ ३१ ॥ छलमा

द्धर्यश्वाद्यदुः, यदोर्माधवः, तस्मात्सत्त्ववान्, सत्त्वतो भीमः, भीमादंधकः, ततो रैवतः, तत ऋक्षः, ततो विश्वगर्भः, ततो वसुः, वसोर्वसुदेवः, ततः कृष्ण इति चंद्रवंशीययदोः षष्ठस्य सूर्यवंशीयात्तत एकादशत्वं च कृष्णस्य न कल्पांतराभिप्रायं किन्तु गृहाद्गृहांतरप्रवेशवद्योगबलेनैक एव यदुः सूर्यवंशेऽपि प्रादुर्बभूव सूर्यवंशं स्ववंशे आनीतवान् । यथा ब्रह्मणो मानसः पुत्रो वसिष्ठः केनचिन्निमित्तेन पुनर्मित्रावरुणाभ्यां जन्म लब्ध्वापि वसिष्ठत्वं न जहौ । एवं यदुरपि लीलया देहद्वयं दध्रे, न तावद्द्वौ यदू जातावेक एव यदुर्वंशद्वयकर्तेति । एवं वसुदेवकृष्णावपि वंशद्वयानुगतावेक एव । एवं वसुशूरयोरपि पितृभेदान्नामभेदेऽपि स्कन्दसनत्कुमारवद्व्यक्त्यैक्यमेव । यादवानां देवतात्वेनाप्येकस्योभयसम्बन्धस्य युगपत्संभवान्न विरोधः । अत एव क्वचिन्नरधर्मोल्लंघनेऽपि न तेषां दोषः शास्त्रस्य मनुष्यपरत्वमेव प्राय इति लोकसंग्रहार्थं स्वीकुर्वंतु शास्त्रं मा वेत्यलं प्रसक्तानुप्रसक्तेन ॥ २९ ॥ तस्मिन्विवाहलक्षणे । अभ्युदये मंगले " आविर्भावे प्रकाशे च मंगलेऽभ्युदयः स्मृतः " इति धरणिः ॥ २६ ॥ तास्मिन्प्रकृते । अक्षैः पाशकैः " अक्षो रथस्यावयवे व्यवहारे बिभीतके । पाशके शकटे कर्षे ज्ञाने चात्मनि रावणौ ॥ " इति हेमचन्द्रः ॥ २७ ॥ तेन बलेन ॥ २८ ॥ पणं लापितद्रव्यम् " पणो वराटमाने स्यान्मूले कार्षापणे ग्रहे । द्यूतदेये धने चैव भृतिस्तुत्योरपि स्मृतः ॥" इति धरणिः । तं पणम् । तत्र तदा । कालिंगस्तद्देशेशः । केचित्तु दन्तवक्र एव स इत्यूचुः । "कालिंगो भूमिकर्कारौ दंतावलभुजंगयोः " इति मेदिनी । तद्व्रसनम् ॥ २९ ॥ ततः कालिंगहासोत्तरम् । निष्कणां दीनाराणाम् । " निष्कामस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोलंकरणे हेमपात्रे हेमपलेऽपि च ॥ " इति मेदिनी । ' दीनारः स्वर्णमुद्रिका ' इति मंजर्याम् । ' ग्लहो द्यूतपणीकृते ' इति च । तत्र तदा । कैतवस्तुच्छले द्यूते ' इति मेदिनी ॥ ३० ॥ " अर्बुदो मांसकीले स्यात्पुरुषे दशकोटिषु । महीधरविशेषे ना " इति मेदिनी । निश्चितोऽर्बुदोत्यर्बुदः ॥ ॥ ३१ ॥ तमपि पणम् । धर्मेण न्यायेन । प्राश्निकाः पार्श्वस्थाः " प्राश्निकः पार्श्वगे पुंसि गणके पृच्छकेऽपि च " इति निरुक्तिः । ' पार्श्विकाः ' इति पाठः सम्यग्भाति ॥ ३२ ॥ प्राश्निकानां दुर्जनत्वेन मिथ्यात्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामनादृत्य वैदर्भो दुष्टराजन्यचोदितः ॥ संकर्षणं परिहसन्बभाषे कालचोदितः ॥ ३४ ॥ नैवाक्षकोविदा यूयं गोपाला वनगोचराः ॥ अक्षैर्दीव्यंति राजानो बाणैश्च न भवादृशाः ॥ ३५ ॥ रुक्मिणैवमधिक्षितो राजभिश्चोपहासितः ॥ क्रुद्धः परिघमुद्यम्य जघ्ने तं नृम्णसंसदि ॥ ३६ ॥ कलिंगराजं तरसा गृहीत्वा दशमे पदे ॥ दंतानपातयत्क्रुद्धो योऽहसद्विवृतैर्द्विजैः ॥ ३७ ॥ अन्ये निर्भिन्नबाहूरुशिरसो रुधिरोक्षिताः ॥ राजानो दुद्रुवुर्भीता बलेन परिघार्दिताः ॥ ३८ ॥ निहते रुक्मिणि श्याले नाब्रवीत्साध्वसाधु वा ॥ रुक्मिणीबलयो राजन् स्नेहभंगभयाद्धरिः ॥ ३९ ॥ ततोऽनिरुद्धं सह सूर्यया वरं रथं समारोप्य ययुः कुशस्थलीम् ॥ रामादयो भोजकटाद्दशार्हाः सिद्धाखिलार्था मधुसूदनाश्रयाः ॥ ४० ॥ इति श्रीभागवते म० दशमस्कंधोत्त० अनिरुद्धविवाहे रुक्मिवधो नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ छ ॥ राजोवाच ॥ बाणस्य तनयामूषामुपयेमे यदूत्तमः ॥ तत्र युद्धमभूद्धोरं हरिशंकरयोर्महत् ॥ एतत्सर्वं महायोगिन्समाख्यातुं त्वमर्हसि ॥ १ ॥

श्रितो रुक्मी मया जितमित्याह ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ नृम्णसंसदि मंगलसभायाम् ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ सूर्यया नवोढया । सिद्धा अखिला अर्था अभ्युदयशत्रुवधादयो येषां ते ॥ ४० ॥ इति दशमस्कंधोत्तरार्धे श्रीध० टीकायामेकषष्टितमोऽध्यायः ॥ ६१ ॥ द्वियुक्षष्टितमे प्रोक्तमनिरुद्धस्य रोधनम् ॥

संभाव्य श्रीबलस्य कोपं वर्द्धयितुं पापरुक्मिवधार्थं नभोवाण्यभूदित्याह—तदेति। धर्मतो मर्यादाबंधतो यद्वचनं ग्लहस्वीकारवाक्यं तेनैव, रुक्मी तु मृषैव वदति। विष्णुपुराणेपि—"त्वयोक्तोऽयं ग्लहः सत्यं न मयैषोऽनुमोदितः ॥ एवं त्वया चेद्विजितं न मया विजितं कथम् ॥" इति । आकाशवाक्यमपि—" विजितं बलदेवेन रुक्मिणा भाषितं मृषा " इति । तदा पार्श्वगकथनावसरे ॥३३ ॥तामाकाशवाणीम् ॥ ३४ ॥ गोपाला इति वक्रोक्तिः। गास्तु स्तौत्येव—गवां धेनुपृथ्वीवेदादीनां पालका यूयम्, वने निर्जनदेशे एव गोचरा ध्यानविषया भवथ नैव न तु अक्षेषु द्यूतसभासु कोविदा येषां तादृशा भवथ यतोऽक्षैर्बाणैश्च राजानः श्रियोन्मत्ता एव दीव्यंति परहिंसायां रमंते न तु भवन्त इव दृश्यन्ते ये भगवद्भक्तास्तेपीत्यर्थः । ततो वयं न जानीमः किंतु भगवद्भक्ता एव जानंति स्वतंत्रललिानिबंधनमेवेदृशं भवतां चरितमिति भावः ॥ ३५ ॥ तं रुक्मिणम्। नृपूर्वकटवर्गपवर्गपञ्चमसंयोगमध्यश्चायमकारांतो नृम्णशब्दो वैदिको मंगलवाची ॥ ३६ ॥ दशमे तत्संख्ये । पदे पादन्यासे । ' शिखायां वा शिखा वै दशमं पदम् ' इति वारतांतविः ॥ ३७ ॥ निर्भिन्नानि बाहूरुशिरांसि येषां ते तथा ॥ ३८ ॥ ' श्यालस्तु पत्नीभ्राता ' इति कोशः । राजन्निति—यन्निमितं बलदेवेन श्रीकृष्णं प्रति पूर्वं परुषमुक्तं, तेनैव तद्वध इति क्षत्रियजातेश्चरितमद्भुतमिति संचिंत्याह । रुक्मिणो दुष्टत्वेन तद्वधे साध्विति वक्तुमुचितं, पत्नीभ्रातृत्वेन तद्वधेऽसाध्विति वक्तुमुचितम्, यन्नाब्रवीत्तत्र हेतुः—स्नेहभंगेति । साधूक्तौ रुक्मिण्याः, असाधूक्तौ बलदेवस्य स्नेहभंग इति विवेकः ॥ ३९ ॥ ततो रुक्मिहननानंतरम् । ' सूर्या तु स्यान्नवोढायां सूर्यपत्न्यामपि ' इति निरुक्तिः । सिद्धाखिलार्थत्वे हेतुः—मधुसूदनाश्रया इति । यद्वा—यथा मधुमादिदैत्यं वरदानचातुर्येणाहंस्तथा रुक्मिणमपि द्यूतक्रीडौदासीन्यमय्या बुद्ध्येति भावः । एतेन रामस्य तद्वधे कृष्णसंमतिरपि द्योतितेति ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्द्धे एकषष्टितमोऽध्यायः ॥ ६१ ॥ कन्यया ऊषया (१) । अन्यस्मिन् द्वितीये । ' पाणिग्रहणमुद्वहः ' इति नाममाला । अथ हरजयानंतरम् (२) ।

१ क्षुद्रजातयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः ॥ येन वामनरूपाय हरयेऽदायि मेदिनी ॥ २ ॥ तस्यौरसः सुतो बाणः शिवभक्तिरतः सदा ॥ मान्यो वदान्यो धीमांश्च सत्यसंधो दृढव्रतः ॥ ३ ॥ शोणिताख्ये पुरे रम्ये स राज्यमकरोत्पुरा ॥ तस्य शंभोः प्रसादेन किंकरा इव तेऽमराः ॥ सहस्रबाहुर्वाद्येन तांडवेऽतोषयन्मृडम् ॥ ४ ॥ भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः ॥ वरेणच्छंदयामास स तं वव्रे पुराधिपम् ॥ ५ ॥ स एकदाह गिरिशं पार्श्वस्थं वीर्यदुर्मदः ॥ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजम् ॥ ६ ॥ नमस्ये त्वां महादेव लोकानां गुरुमीश्वरम् ॥ पुंसामपूर्णकामानां कामपूरामरांघ्रिपम् ॥ ७ ॥ दोःसहस्रं त्वया दत्तं परं भाराय मेऽभवत् ॥ त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समम् ॥ ८ ॥ कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् ॥ आद्याऽयां चूर्णयन्नद्रीन्भीतास्तेऽपि प्रदुद्रुवुः ॥ ९ ॥ तच्छ्रुत्वा भगवान्क्रुद्धः केतुस्ते भज्यते यदा ॥ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥ १० ॥

कन्यया रममाणस्य बाणेन बहुबाहुना ॥ १ ॥ अनिरुद्धोद्वहेऽन्यस्मिन् बाणयादवसंयुगे ॥ श्रीकृष्णः श्रीहरं जित्वा बाणबाहूनथाच्छिनत् ॥ २ ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ पुराधिपं पुरपालकम् ॥ ५ ॥ ६ ॥ कामान्पूरयतीति कामपूरः स चासावमरांघ्रिपः कल्पतरुस्तं त्वाम् ॥ ७ ॥ ८ ॥ हे आद्य निभृतैर्भरितैर्दोर्भिरद्रींश्चूर्णयन् अयामग

उपयेमे " उपाद्यमः स्वकरणे " इत्यात्मनेपदम् । तत्र विवाहनिमित्तम् ॥ १ ॥ पुत्राणां शतं तत्र ज्येष्ठः । येन बलिना । अदायि दत्ता ॥ २ ॥ तस्य बलेः । पाणिगृहीतीभार्यायां जात औरसः । वदान्यः " गुणवान्दानशीलश्च वदान्यः पुरुषो मतः " इति नीलकण्ठः ॥ ३ ॥ स बाणः । तस्य बाणस्य । ते प्रसिद्धाः । तांडवे नृत्ये " तांडवं नटनं नाट्यं लास्यं नृत्यं च नर्तने " इत्यमरः । मृडं शिवम् ' गिरीशो गिरिशो मृडः ' इति च ॥ ४ ॥ छंदयामास वरार्थं प्रेरयामास । ' छदि—संवरणे ' । स बाणः । तं शिवं पुराधिपं वव्रे—त्वं मम पुराधिपः स्या इति वरयामास ॥ ५ ॥ स बाणः । तत्पदांबुजं हरपदारविंदम् ॥ ६ ॥ लोकानां गुरुं ब्राह्मणत्वात् । ब्राह्मण त्वं तु शिवस्य दिष्ट्या तृतीयस्कंधे स्फुटीकृतम् । " वधं भगवता साक्षात्सुनाभोदारबाहुना । आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणाद्विभो ॥" इति वाक्येन । " आचार्यत्वमाद्यवर्णे मया संस्थापितं धरे ' इति वाराहोक्तेः । कामपूरको योऽमरांघ्रिपः कल्पतरुस्तत्तुल्यस्तम् ॥ ७ ॥ तस्मान्ममापि कामः पूरणीय इत्याह—दोरिति । त्वदृते त्वां विनेति । यदि कृपया स्वयमेव मे प्रतियोद्धा त्वं भवेस्तदा मे रणकंडूयादुःखनिस्तार इति ध्वनिः । ततश्च त्वां विजित्यैव सर्वदिग्विजयेन संपूर्णेन संपूर्णयशा अहं भवेयमित्यनुध्वनिः ॥ ८ ॥ कंडूतिर्गात्रघर्षणम् । ' निभृतं भरिताचले ' इति कोषः । यातेर्लङि रूपमयामिति। कंडूत्या रणकंडूत्या नितरां भृतैः पूर्णैर्दोर्भिर्युयुत्सुरहं दिग्गजान्प्रति हे आद्य एतादृशबलैश्वर्यादेस्त्वमेव कारणमसीत्यतस्त्वमेवैतां रणकंडूतिं शमयेति भावः । ऐशानीदिशं विनाऽन्याः सर्वा मया जिता एव, परं त्वद्दृष्टौ दिग्गजाञ्जित्वा ममाष्टदिग्विजयोस्त्वित्यभिप्रायेणाहं गतवांस्तेऽपि भीताः प्रदुद्रुवुः । किं कुर्वन्—कंडूतिशांत्यर्थमद्रीनपि चूर्णयन् । अतः कथय त्वया सह युद्धं विना मम रणकंडूया कथमुपशाम्येत्, तस्या उपशमं विना मम कथं धैर्यं भवेदिति मयि दोषो न देय इति भावः ॥ ९ ॥ तदुद्धतवचः । ते केतुः भज्यते कर्मकर्तरि प्रयोगः । ते संयुगमिति पृथक्सम्बन्धादपौनरुक्त्यम् । मत्समेन मत्तुल्येन क्रुद्ध इति प्रथमं तज्जिघांसा शिवमनस्युदभूदिति भावः । ततश्च स्वहस्तेन स्वसेवक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्राविशन्नृप ॥ प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं कुधीः ॥ ११ ॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम् ॥ कन्याऽलभत कांतेन प्रागदृष्टश्रुतेन च ॥ १२ ॥ सा तत्र तमपश्यंती क्वासि कांतेतिवादिनी ॥ सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम् ॥१३॥ बाणस्य मंत्री कुंभांडश्चित्रलेखा च तत्सुता ॥ सख्यपृच्छत्सखीमूषां कौतूहलसमन्विता ॥ १४ ॥ कं त्वं मृगयसे सुभ्रूः कीदृशस्ते मनोरथः ॥ हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये ॥१५॥ ऊषोवाच ॥ दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः ॥ पीतवासा बृहद्बाहुर्योषितां हृदयंगमः ॥१६॥ तमहं मृगये कांतं पाययित्वाऽधरं मधु ॥ क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे ॥ १७ ॥ चित्रलेखोवाच ॥ व्यसनं तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते ॥ तमानेष्ये नरं यस्ते मनोहर्ता तमादिश ॥ १८ ॥

च्छम् ॥ ९ ॥ १० ॥ स्ववीर्यस्य नशनं नाशनं केतुभंगं प्रतीक्षमाणः ॥ ११ ॥ श्रीमहेशादिष्टसंग्रामस्य प्रसंगमाह । तस्योषेति । प्राद्युम्निनाऽनिरुद्धेन । तत्रापि स्वप्ने ॥ १२ ॥ तं कांतमपश्यंती सा उत्तस्थौ ॥ १३ ॥ ततः किं वृत्तं तत्राह । बाणस्येति ॥ १४ ॥ हस्तग्राहं भर्तारम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥

वधोऽनुचितः । परन्तु मत्प्रसादलब्धं महाबलवद्भुजसहस्रं यदाऽयं दुर्मदो भारं मन्यते तर्हि भारावतारणकर्ता मत्प्रभुरेव खल्विममपि भारमपनेष्यतीति परामृश्याह—हे मूढ स्वाभीष्टज्ञानशून्य । केतुर्मयूरध्वजः स्वयमेव यदा भज्यते त्रुट्यति । वर्तमानसामीप्ये वर्तमानवत् । मत्समेनेति—तं प्रीणयितुमुक्तम् । वस्तुतस्तु मा लक्ष्मीः तया सह वर्तत इति समः श्रीकृष्णः, मदीयो मत्सेव्यो यः समः स मत्समस्तेनेत्यर्थः । यद्वा—मा शोभा तत्सहितः समः, अहं समः सशोभो यतस्तेन । अत्र क्रुद्ध इतोग्रे उवाचेति शेषः ॥ १० ॥ स्वपराभवश्रुतेर्हर्ष एव कुमतित्वे हेतुः । पुनः कुधीरित्यत्यन्तमौढ्यमाह । सर्वेशेन युद्धाकांक्षावत्त्वात् । यदयं मूढेति मां संबोध्य त्वद्दर्पघ्नं संयुगं भवेदिति ब्रूते तदयमेव मूढो मद्दर्पघ्नसंयुगस्यासंभवादेवेति कुत्सिता मतिर्मननं यस्य सः । परं त्वेतद्वाक्येनानुमीयते मद्रणकंडूपशमकः कश्चिद्बलिष्ठो योद्धुमेष्यतीति मत्वा हृष्टः गिरिशादिष्टं केतुभंगं प्रतीक्षमाणः कदा मे केतुभंगो भविष्यतीत्यमंगलसोत्कण्ठत्वात्कुधीरेव स इति विश्वनाथः ॥ ११ ॥ तस्य बाणस्य। तत्रापि तस्मिन्नपि स्वप्नः । कन्या कुमारी। कांतेन श्रीपार्वत्या पतित्वेनादिष्टेनेत्यर्थः । तथा विष्णुपुराणे—"ऊषा बाणसुता विप्र पार्वतीं शम्भुना सह । क्रीडंतीमुपलक्ष्योच्चैः स्पृहां चक्रे तदाश्रयाम् ॥ ततः सकलचित्तज्ञा गौरी तामाह भाविनीम् । अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ॥ इत्युक्ता सा तदा चक्रे कदेति मतिमात्मनः । को वा भर्ता ममेत्येनां पुनरप्याह पार्वती ॥ वैशाखशुक्लद्वादश्यां स्वप्ने योऽभिभवं तव । करिष्यति स ते भर्ता बाणपुत्रि भविष्यति॥" इति ॥१२॥ सा ऊषा । विह्वला विवशा विरहात् । यद्वा—रतिश्रमाकुलाऽतो व्रीडिता । तथा च हरिवंशे—" सा स्वप्ने रमिता तेन स्त्रीभावं चापि लंभिता । शोणिताक्ता प्ररुदती सहसैवोत्थिता निशि ॥" इति ॥ १३ ॥ ततस्तदनन्तरम् । तत्सुता कुंभांडात्मजा ॥ १४ ॥ हस्तस्य ग्राहो यत्र स तथा विवाहः । यद्वा—हस्तं गृह्णातीति हस्तग्राहो भर्ता तमित्यर्थः । 'पत्युद्वाहे हस्तग्राहः' इति निरुक्तिः । अद्याप्यद्यपर्यंतमपि ॥ १५ ॥ हृदयंगमो मनोहरः ॥ १६ ॥ तं स्वप्नदृष्टम् । वृजिनार्णवे दुःखसागरे ॥ १७ ॥ भाव्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्का देवगंधर्वसिद्धचारणपन्नगान् ॥ दैत्यविद्याधरान्यक्षान्मनुजांश्च यथाऽलिखत् ॥ १९ ॥ मनुजेषु च सा वृष्णीन्छूरमानकदुंदुभिम् ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता॥२०॥ अनिरुद्धं विलिखितं वीक्ष्योषाऽवाङ्मुखी ह्रिया ॥ सोऽसावसाविति प्राह स्मयमाना महीपते॥२१॥ चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥ ययौ विहायसा राजन्द्वारकां कृष्णपालिताम्॥२२॥तत्र सुप्तं सुपर्यंके प्राद्युम्निं योगमास्थिता ॥ गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥ २३ ॥ सा च तं सुंदरवरं विलोक्य मुदितानना ॥ दुष्प्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समम् ॥ २४ ॥ परार्ध्य वासःस्रग्गंधधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्चितः ॥ २५ ॥ गूढः कन्यापुरे शश्वत्प्रवृद्धस्नेहया तया ॥ नाहर्गणान्स बुबुधे ऊषयाऽपहृतेंद्रियः ॥ २६ ॥ तां तथा यदुवीरेण भुज्यमानां हतव्रताम् ॥ हेतुभिर्लक्षयांचक्रुराप्रीतां दुरवच्छदैः ॥ २७ ॥ भटा आवेदयांचक्रू राजंस्ते दुहितुर्वयम् ॥ विचेष्टितं लक्षयामः कन्यायाः कुलदूषणम् ॥२८॥ अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ॥ कन्याया दूषणं पुंभिर्दुष्प्रेक्षाया न विद्महे ॥ २९ ॥

स्वप्ने त्वया दृष्टः एषां मध्ये को वा भवेदिति देवादीन्यथावत्पटेऽलिखत् ॥ १९ ॥ प्रद्युम्नं लिखितं वीक्ष्य श्वशुरोऽयमिति लज्जिता ॥ २० ॥ २१ ॥ ॥२२॥ शोणितपुरं नीत्वा ॥ २३ ॥ पुंभिर्दुष्प्रेक्ष्ये प्रेक्षितुमशक्ये ॥२४॥ स च परार्ध्यैरमूल्यैर्वासःस्रगादिभिः शुश्रूषणपूर्वकमर्चितः सन् ॥ २५ ॥ तया ऊषयाऽपहृतेंद्रियोऽहर्गणान् दिनसमूहान्न बुबुधे ॥ २६ ॥ आप्रीतामतिहृष्टाम् । दुरवच्छदैश्छादयितुमशक्यैः ॥ २७ ॥ विचेष्टितं विरुद्धाचरणम् ॥ २८ ॥ अनपायिभिः अपायोऽपसर्पणं

मल्लिखितस्तदाकारो भवत्याऽनुसंधीयेत तदा तमानेष्ये तस्माच्चित्राणि दृष्ट्वा आदिश कथय ॥ १८ ॥ इतीत्थमुक्तरीत्या ॥ १९॥ सा चित्रलेखा ॥२०॥ एतेषां मध्ये तव पुरुषः क इति पृष्टोषा प्रद्युम्नं वीक्ष्य श्वशुरोऽयमिति बुद्ध्या लज्जिता, चित्रपटेऽयमस्य पुत्रोऽयमस्य नप्तेति प्रतिलेख्यप्रतिमोपरि तयाऽक्षराण्यपि लिखितानीति बुध्यते । असावनिरुद्धः । वीप्सा संभ्रमे । स स्वप्नदृष्टः ॥ २१ ॥ तमूषोद्दिष्टम् । योगिनी दैत्यात्मजत्वान्मायायोगविशारदा । यद्वा—हरिवंशानुसारेण श्रीनारदतः प्राप्तविद्या । द्वारकां प्रवेष्टुमशक्नुवत्यै चित्रलेखायै नारदेन समाश्वास्य सोक्ता " गृह्यतां तामसी विद्या सर्वलोकप्रमोहिनी । कृतकृत्यां तु दैतेयि विद्यामेतां ददाम्यहम् ॥ " इति चित्रलेखा योगमायांशेति केचिदाहुः । हे राजन्निति बुद्ध्या प्रकाशमानस्त्वमवकलयस्येवेति भावः ॥ २२ ॥ तत्र द्वारकायाम् । योगं मायाबलम् " योगोऽपूर्वार्थसंप्राप्तौ संगतिध्यानयुक्तिषु " इति कोशः । नीत्वेति शेषः । सप्तम्यन्तपाठस्तु सुगमः ॥ २३ ॥ सा ऊषा । तमनिरुद्धम् ॥ २४ ॥ भोजनपदमत्र लेह्यादिपरम् ॥ २५ ॥ सोऽनिरुद्धः ॥ २६ ॥ हतो नष्टो व्रतः पितृदानपूर्वकपतिस्वीकाररूपो धर्मो यस्यास्सा तथा ताम् व्रतो धर्मोपवासयोः ' इति धरणिः । हेतुभिः पुंसंगबोधकैर्वक्रनिरीक्षणदेहसंस्कारादिभिः ॥२७॥ भटा गृहरक्षकाः "भटः स्यात्पुंसि वीरेऽथ प्रभेदे पामरस्य च" इति मेदिनी । कुलदूषणं व्यभिचारम् ॥२८॥ पाठांतरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः ॥ त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीद्यदूद्वहम् ॥ ३० ॥ कामात्मजं तं भुवनैकसुंदरं श्याम पिशंगांबरमंबुजेक्षणम् ॥ बृहद्भुजं कुंडलकुंतलत्विषा स्मितावलोकेन च मंडिताननम् ॥ ३१ ॥ दीव्यंतमक्षैः प्रिययाऽभिनृम्णया तदंगसंगस्तन कुंकुमस्रजम् ॥ बाह्वोर्दधानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः ॥ ३२ ॥ स तं प्रविष्टं वृतमाततायिभिर्भटैरनीकैरवलोक्य माधवः ॥ उद्यम्य मौर्वं परिघं व्यवस्थितो यथांऽतको दंडधरो जिघांसया ॥ ३३॥ जिघृक्षया तान्परितः प्रसर्पतः शुनो यथा सूकरयूथपोऽहनत् ॥ ते हन्यमाना भवनाद्विनिर्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ॥ ३४ ॥ तं नागपाशैर्बलिनंदनो बली घ्नंतं स्वसैन्यं कुपितो बबंध ह ॥ ऊषा भृशं शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरोदिषीत् ॥ ३५ ॥ इति श्रीभागवते म० दशमस्कंधोत्त० अनिरुद्धबंधो नाम द्विषष्टितमोध्यायः ॥ ६२ ॥

प्रमादो वा तद्रहितैः । पाठांतरे दुष्टा प्रेष्या सखी यस्यास्तस्याः पुंभिर्दूषणं कुतो वेति न जानीम इत्यर्थः ॥ २९ ॥ ॥ ३० ॥ कामस्यात्मनो देहाज्जातम् ॥ ३१ ॥ अभिनृम्णया सर्वमंगलया तस्या अंगसंगेन स्तनकुंकुमं यस्यां स्रजि तां बाह्वोर्मध्ये वक्षसि दधानम् । मधुमल्लिका वसंतभवा मल्लिकास्तदाश्रिताम् । तस्याग्र इत्यार्षः संधिः । तस्या अग्र इत्यर्थः ॥ ३२ ॥ आततायिभिरुद्यतशस्त्रैः । माधवोऽनिरुद्धः । मौर्वं मुरुर्लोहविशेषस्तन्निर्मितम् ॥ ३३ ॥ ३४ ॥ शोकविषादाभ्यां विह्वला अवशा । अश्रूणां कला बिंदवो ययोस्ते अक्षिणी यस्याः सा ॥ ३५ ॥ इति श्रीमद्भा० दशमस्कंधोत्तरार्धे श्रीध० टीकायां द्विषष्टितमोऽध्यायः ॥ ६२ ॥

' दुष्प्रेष्याया ' इति पाठे पुंभिः कृत्वा ॥ २९ ॥ ततो भटोक्तिश्रुत्युत्तरम् । " अपत्ये वायुभेदे चोद्वाहे उद्वह ऊर्द्धगे " इति निरुक्तिः ॥ ३० ॥ कामस्य प्रद्युम्नस्य ॥ ३१ ॥ ' नृम्णं रम्यभद्रयोः ' इति धरणिः । इत्यर्थ इति व्याख्या । तत्रागमनसौंदर्यनिर्भयत्वादिभिर्विस्मितो बाणोऽभूत् ॥ ३२ ॥ सोऽनिरुद्धः । तं बाणम् ॥ ३३ ॥ तान् बाणभटान् । ते बाणभटाः ॥ ३४ ॥ तमनिरुद्धम् । " नागपाशः पुमान्स्त्रीणां करणे वरुणायुधे " इति मेदिनी । बलिनंदन इति विरुद्धलक्षणया मंगलशब्दवत्तस्य दुःखदः पुत्र इत्यर्थः । बलीति श्रीकृष्णस्य लीलाविशेषेच्छाया विपर्ययादिति । यद्वा—कलिबली कामधेनू " अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः । यमामनंति स्म हि शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वम् ॥ " इति तृतीये विदुरप्रश्नाच्छब्दयोनिं निःश्वासव्यञ्जितवेदवृंदं मनोमयं चित्ते वासुदेववन्मनस्युपास्यं सत्त्वं शुद्धसत्त्वात्मकं भगवत्तत्त्वं तस्य च तद्व्यूहत्वे चतुर्थं व्यूहमित्यर्थः । विष्णुधर्मोत्तरे वज्रप्रश्ने–" कस्त्वसौ बालरूपेण कल्पांतेषु पुनःपुनः । पृष्टो यो न त्वया ज्ञातस्तत्र कौतूहलं मम ॥ मार्कंडेय उवाच ॥ भूयोभूयो मया दृष्टस्त्वसौ देवो जगत्पतिः । कल्पक्षये न विज्ञातः स मायामोहितेन वै ॥ कल्पक्षये व्यतीते तु तं देवं प्रपितामहात् । अनिरुद्धं विजानामि पितरं ते जगत्पतिम् ॥" । पाद्मसहस्रनाम्नि तस्य नामानि–" अनिरुद्धो बृहद्ब्रह्म प्राद्युम्निर्विश्वमोहनः । चतुरात्मा चतुर्वर्णश्चतुर्युगविधायकः ॥ चतुर्भेदैकविश्वात्मा सर्वोत्कृष्टांशकोटिसूः । आश्रयात्मा " इति । श्रीगोपालोत्तरतापिन्यां त्वसौ प्रणवार्थत्वेनापि दर्शितः–" रोहिणीतनयो रामः अकाराक्षरसंभवः । तैजसात्मकप्रद्युम्न उकाराक्षरसंभवः ॥ प्राज्ञात्मकोऽनिरुद्धो वै मकाराक्षरसंभवः । अर्द्धमात्रात्मकः कृष्णो यस्मिन्विश्वं प्रतिष्ठितम् ॥" इति । ' बलिनं ततो बली ' इति पाठे हरिवंशोक्तशक्तिप्रहारेण बाणनिर्जयात्साक्षाद्युद्धाशक्त्या

१ रतिबन्धाविशेषे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अपश्यतां चानिरुद्धं तद्बंधूनां च भारत ॥ चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥ १ ॥ नारदात्तदुपाकर्ण्य वार्तां बद्धस्य कर्म च ॥ प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥ २ ॥ प्रद्युम्नो युयुधानश्च गदः सांबोऽथ सारणः ॥ नंदोपनंदभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥ अक्षौहिणीभिर्द्वादशभिः समेताः सर्वतोदिशम् ॥ रुरुधुर्बाणनगरं समंतात्सात्वतर्षभाः ॥ ४ ॥ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ॥ प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥ ५ ॥ बाणार्थे भगवान्रुद्रः ससुतैः प्रमथैर्वृतः ॥ आरुह्य नंदिवृषभं युयुधे रामकृष्णयोः ॥ ६ ॥ आसीत्सुतुमुलं युद्धमद्भुतं रोमहर्षणम् ॥ कृष्णशंकरयो राजन्प्रद्युम्नगुहयोरपि ॥ ७ ॥ कुंभांडकूपकर्णाभ्यां बलेन सह संयुगः ॥ सांबस्य बाणपुत्रेण बाणेन सह सात्यकेः ॥ ८ ॥ ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ॥ गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥ ९ ॥ शंकरानुचराञ्छौरिर्भूतप्रमथगुह्यकान् ॥ डाकिनीर्यातुधानांश्च वेतालान्सविनायकान् ॥ १० ॥ प्रेतमातृपिशाचांश्च कूष्मांडान्ब्रह्मराक्षसान् ॥ द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥ ११ ॥

त्रियुक्षष्टितमे चाथ बाणयादवसंगरे ॥ स्तुतिर्ज्वरेण रुद्रेण बाणबाहुभिदो हरेः ॥ १ ॥ १ ॥ कर्म च युद्धादिकम् ॥ २ ॥ रामकृष्णानुवर्तिन इति । तौ पुरतो निर्गतावित्यर्थः ॥ ३ ॥ सर्वतोदिशमित्यस्योत्तरेणान्वयः ॥ ४ ॥ भज्यमानानि पुरोद्यानादीनि । द्वंद्वैकवद्भावः । अट्टालाः प्राकारादुपरितनान्युन्नतस्थानानि । अभिनिर्ययौ बाणः ॥ ५ ॥ सुतः स्कंद

कुंभाण्डोक्त्या मायया सर्पास्त्रैर्बबंधेति ज्ञेयम् "युध्यमानो यथाशक्ति यदा वीरेण निर्जितः । मायया युयुधे तेन स तदा मंत्रिचोदितः ॥" इति वैष्णवोक्तेः । "व्यष्टीनामंतरात्मानं श्वेतद्वीपेशमंशतः । बाणोऽबध्नात्प्रभोर्लीलाशक्तिरेवात्र कारणम् ॥" इति । निशम्य श्रुत्वा, कन्यागाराद्बहिर्युद्धात् । 'निशाम्य' इति पाठे तु "नागैर्विचेष्टितं दृष्ट्वा ऊषा प्राद्युम्निमातुरा" इति अरौदित्यर्थः । अरौदिषीदित्यार्षः सिचो लोपाभावः ॥ ३९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥ संगरः संग्रामः । बाणबाहून् भिनत्तीति तथा तस्य (१) तद्बंधूनामनिरुद्धबंधूनाम् । तदिति षष्ठ्या लुगार्षः । तस्य बंधूनाम्, चाद्यादादीनामित्यर्थः । वार्षिका वर्षाकालीनाः । वैशाखशुक्लद्वादश्यामूषायः स्वप्नदर्शनम् । "सप्तरात्रेण ते भीरु दर्शयिष्याम्यहं प्रियम्" इति हरिवंशे चित्रलेखोक्तेर्ज्येष्ठकृष्णपक्षेऽनिरुद्धहरणात् षण्मासेष्वतीतेषु वार्षिका अपि चत्वारो मासा गतास्ततो मार्गमासारंभोऽभूत् । हे भारतेति भरतवंशश्रेष्ठपांडुवंशोद्भवस्त्वं कृष्णलीलामौग्ध्यं जानास्येवेति भावः ॥ १ ॥ तदनिरुद्धबंधनम् ॥ २ ॥ तौ रामकृष्णौ । इत्यर्थ इति–अनुवर्तनमग्रस्थस्यैव भवतीति भावः ॥ ३ ॥ उत्तरेण सर्वतोदिशम् । 'भज्यमाने पुरोद्याने' इत्यादिना सर्वतोदिशमभिनिर्ययावित्यनेन वान्वयः ॥ ४ ॥ तुल्यसैन्यो द्वादशाक्षौहिणीसैन्यः । पुरे द्वादशाक्षौहिण्यवस्थितिस्तु रुद्रयोगबलाद्ध्येया ॥ ५ ॥ सुतपदेन गणेशो न ग्राह्यस्तद्युद्धाश्रवणात् । 'प्रमथाः स्युः पारिषदाः' इत्यमरः । भगवानिति–स्वयं सर्वज्ञोऽपि स्वपराभवेण बाणमन्यांश्च प्रति कृष्णमहिमानमबोधयदिति भावः । तृतीयार्थे षष्ठी रामकृष्णयोरिति ॥ ६ ॥ सुतुमुलं सुसंकुलम् "तुमुलः कलिवृक्षे ना क्लीबं तु रणसंकुले" इति मेदिनी ॥ ७ ॥ सात्यकेः संयुग आसीदित्यन्वयः ॥ ८ ॥ युद्धमिति शेषः ॥ ९ ॥ डाकिन्यः कालखंडाशन्यः ॥ १० ॥ कु ईषदूष्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथग्विधानि प्रायुंक्त पिनाक्यस्त्राणि शार्ङ्गिणे ॥ प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥ १२ ॥ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतम् ॥ आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥१३॥ मोहयित्वा तु गिरिशं जृंभणास्त्रेण जृंभितम् ॥ बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥१४॥ स्कंदः प्रद्युम्नबाणौघैरर्द्यमानः समंततः ॥ असृग्विमुंचन्गात्रेभ्यः शिखिनाऽपाक्रमद्रणात् ॥ १५ ॥ कुंभांडः कूपकर्णश्च पेततुर्मुसलार्दितौ ॥ दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः ॥ १६ ॥ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षणः ॥ कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिम् ॥ १७ ॥ धनूंष्याकृष्य युगपद्बाणः पंचशतानि वै ॥ एकैकस्मिञ्शरौ द्वौद्वौ संदधे रणदुर्मदः ॥ १८ ॥ तानि चिच्छेद भगवान्धनूंषि युगपद्धरिः ॥ सारथिं रथमश्वांश्च हत्वा शंखमपूरयत् ॥ १९ ॥ तन्माता कोटरा नाम नग्ना मुक्तशिरोरुहा ॥ पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥ २० ॥ ततास्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्रजः ॥ बाणश्च तावद्विरथश्छिन्नधन्वाऽविशत्पुरम् ॥ २१ ॥

स्तत्सहितैः प्रमथैर्गणैः । रामकृष्णाभ्यां युयुधे ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ प्रत्यस्त्राण्येवाह । ब्रह्मास्त्रस्येति । नैजं नारायणास्त्रम् ॥१३॥ १४ ॥ शिखिना मयूरेण वाहनेन ॥ १५ ॥ तयोरनीकानि । हतौ नाथौ येषां तानि ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ अनिरीक्षमाणस्तिर्यङ्मुखो

अण्डेषु बीजेषु यस्य स कूष्माण्डः । तदाकारत्वाच्छिवगणोऽपि कूष्माण्डः । शंकरस्य स्वभक्तत्वेन तदनुचरान्भूतादीन्केवलं द्रावयामास न त्ववधीत्, भक्तवत्सलत्वात् ॥ ११ ॥ अविस्मितस्तुल्यसमर्थत्वात् ॥ १२ ॥ "न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्षणम्" इत्युक्तेर्ब्रह्मास्त्रस्य ब्रह्मास्त्रमेव प्रत्यस्त्रमिति भावः ॥ १३ ॥ जृंभणास्त्रेण निद्रोत्पादकास्त्रेण । जृंभित जातास्फोटम् "जृंभितं करणे स्त्रीणां मोहास्फोटितयोरपि" इति मेदिनी ॥ ॥ १४ ॥ 'शिखिनौ वह्निकेकिनौ' इत्यमरः ॥ १५ ॥ सर्वतो दुद्रुवुः ॥ १६ ॥ संख्ये युद्धे 'संख्यं समिति' इति मेदिनी ॥ १७ ॥ एकैकस्मिन्धनुषि ॥ १८ ॥ अपूरयदवादयत् ॥ १९ ॥ तन्माता बाणमाता । श्रीहरिवंशानुरोधेन महातपसा श्रीशिवपुत्रतां प्राप्तस्य तस्य पार्वतीमातृकत्वात् कोटाराख्या पार्वत्याः काचिन्मूर्तिः श्रीहरिवंशादौ 'कोटवी' इति प्रसिद्धा । तथाहि—'बाणं त्रायस्व देवेशि देवि त्वम्' इति शिवादिष्ट्या पार्वत्या "गच्छेति लंबे शीघ्रं त्वं बाणस्य रक्षणं प्रति" इत्युक्तां लंबामधिकृत्य तद्वाक्यम्—"कृष्णस्यैकस्य तद्रूपं दर्शयत्पार्श्वमागता । अंतर्द्धानमुपागम्य त्यक्त्वा सा वाससी पुनः ॥ परित्राणाय बाणस्य विजयाधिष्ठिता पुनः । प्रमुखे वासुदेवस्य दिग्वासाः कोटवी स्थिता ॥" अस्यार्थः—दर्शयत् अदर्शयत् । विजयया विजयानाम्न्या पार्वतीसख्याऽधिष्ठिता कृतसाहाय्या । यद्वा—पार्वत्यैवाधिष्ठिता तन्मूर्तिविशेष इत्यर्थः । लंबैव कोटवीति । विष्णुपुराणे तु—कोटवी नाम मंत्रमयी दैत्यकुलदेवता—"नग्ना दैतेयविद्याऽभूत्कोटवी पुरतो हरेः" इति।बाणमाता त्वशनानाम्न्यस्ति "बाणज्येष्ठं पुत्रशतमशनायां ततोऽभवत्" इति षष्ठस्कंधोक्तेः॥२०॥गदाग्रज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ॥ अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥ २२ ॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥ २३ ॥ माहेश्वरः समाक्रंदन्वैष्णवेन बलार्दितः ॥ अलब्ध्वाऽभयमन्यत्र भीतो माहेश्वरो ज्वरः ॥ शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः ॥२४॥ ज्वर उवाच ॥ नमामि त्वाऽनंतशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ॥ विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतम्॥२५॥कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥ तत्संघातो बीजरोहप्रवाहस्तन्मायैषा तन्निषेधं प्रपद्ये॥२६॥

बभूवेति ॥ २१ ॥ ज्वरस्तु योद्धुमभ्यधावदिति ॥२२॥ श्रीनारायणः शीतज्वरमसृजत ॥२३॥ माहेश्वरः समाक्रंदन्युयुधे ॥ २४ ॥ आत्मानं परमशक्तिमंतं मन्यमानः श्रीकृष्णं तापयितुं प्रवृत्तः स्वयमेव ततः संस्तं परमेश्वरं ज्ञात्वा स्तुवन्नमस्करोति । नमामीति । त्वा त्वामनंतशक्तिं नमामि । कुतः । परेशं ब्रह्मादीनामीशम् । तत्र हेतुः । सर्वात्मानं सर्वस्यात्मानं चेतयितारम् । तत्कुतः । केवलं शुद्धं ज्ञप्तिमात्रं चैतन्यघनम् । तदेवं सर्वचेतयितृत्वेन परमेश्वरत्वमुक्तम् । किंच विश्वसृष्ट्यादिहेतुत्वादपीत्याह । विश्वोत्पत्तीति । नन्वेवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह । यत्तद्ब्रह्मेति । यद्ब्रह्म तदेव त्वमित्यर्थः । किं तद्ब्रह्मेत्यत आह । ब्रह्मलिंगं ब्रह्मणा वेदेन लिंग्यते द्योत्यत इति । तत्कुतः । प्रशांतम् । सर्वविक्रियारहितत्वान्न साक्षाद्वाच्यमिति भावः ॥ २५ ॥ किंच । यत्सविशेषं वस्तु तत्र वयं प्रभवामः त्वयि तु सर्वविशेषातीते न कस्यापि प्रभुत्वं किंतु त्वमेव सर्वप्रभुरिति ज्ञप्तिमात्रत्वं विवृण्वन्स्तौति । काल इति । कालः क्षोभकः । कर्म निमित्तम् । तदेव फलाभिमुखमभिव्यक्तं दैवम्, स स्वभावस्तत्संस्कारः । जीवस्तद्वान् । द्रव्यं भूतसूक्ष्माणि । क्षेत्रं शरीरम् । प्राणः सूत्रम् । आत्मा अहंकारः । विकार एकादशेंद्रियाणि महाभूतानि चेति षोडशकः । ततः संघातो लिंगदेहः । एतस्य च

इति—गदस्यापि तादृशशक्तिपरंपरा विराजतेऽत्र तु किमद्भुतमिति भावः । ततस्तन्मातृनग्नीभवनानंतरम् । अभूदिति शेषः । तावत्तदा ॥ २१ ॥ अभ्यपद्यत प्राप । श्रीहरिवंशे ज्वरस्वरूपमुक्तम्—"ज्वरस्त्रिपाद त्रिशिराः षड्भुजो नवलोचनः । भस्मप्रहरणो रौद्रः कालांतकयमोपमः ॥" इति ॥ २२ ॥ अथ माहेश्वरज्वराऽऽगमनारंभे । अथाऽव्ययमारंभेपि । तं ज्वरं । स्वीयं ज्वरम् । व्यसृजदादिदेश ॥ २३ ॥ वैष्णवेन बलेनार्दितः पीडितः समाक्रंदन्नाकुलीभवन् । अन्यत्र नारायणेतरस्थाने । शरणार्थी "शरणं गृहरक्षित्रोर्वधरक्षणयोरपि" इति मेदिनी ॥ २४ ॥ बलवद्विरोधो न सुखायेत्याह—आत्मानामित्यादिना । तं कृष्णम् । अनंतशक्तित्वे हेतुमाशंकते—कुत इति । तत्र परेशत्वे । तत्सर्वात्मत्वम् । प्रकारांतरेणापि परमेश्वरत्वमाह—किञ्चेति । निजपरमेश्वरत्वे पुनराशंकते—नन्विति । तत्राक्षेपे । इत्यर्थ इति—'अहं ब्रह्म परं धाम' इति श्रीमुखोक्तेरिति तात्पर्यम् । तत्राक्षिपति—किमिति । तत् वेद्द्योत्यत्वम् । इति भाव इति—वेदोऽपीदमित्थतया न बोधयति किन्तु तात्पर्येणेत्याशयः, "यतो वाचो निवर्तन्ते" इत्यादिश्रुतेः । अनंतशक्तिमिति—मत्स्वामिनः शंभोः सकाशादपि तव शक्तिरधिकाऽनुभूतेति भावः । तत्र हेतुः—परेशम् । स ईशस्त्वं तु परमेश इत्यर्थः । सर्वात्मानमिति सर्वेषां त्वं परमात्मा भवन्नेव सर्वस्य शंभोरप्यात्मा भवसीत्यर्थः । दन्त्यादिसर्वशब्दोऽपि शंभुवाची दृष्टः 'सर्वः शर्वः शिवः स्थाणुः' इत्यादौ । ज्ञप्तिमात्रमिति शुद्धचिन्मयस्त्वम्, केवलमिति मायाशारण्यं निरस्तम् । मत्स्वामी शंभुस्तु मायाशरण एवेति भावः । विश्वोत्पत्तीति त्वं तु सृष्टिस्थितिसंहारकर्ता स तु केवलं संहारकर्तेति भावः । ब्रह्मणा वेदेन लिंग्यते द्योत्यत इति ब्रह्मलिंगं यद्ब्रह्म प्रशांतं तदेव त्वं स तु उग्रं ब्रह्मेति भाव इति विश्वनाथः ॥ २५ ॥ भगवति निजासामर्थ्यमाह—किञ्चेति । तत्र सविशेषवस्तुनि । किन्तु प्रत्युत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानाभावैर्लीलयैवोपपन्नैर्देवान्साधूँल्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसया वर्तमानाञ्जन्मैतत्ते भारहाराय भूमेः ॥ २७ ॥ तप्तोऽहं ते तेजसा दुःसहेन शांतोग्रेणात्युल्वणेन ज्वरेण ॥ तावत्तापो देहिनां तेंऽघ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ २८ ॥ श्रीभगवानुवाच ॥ त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ॥ यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥ २९ ॥

बीजरोहवत्प्रवाहः । रोहोंऽकुरो देहाद्बीजरूपं कर्म ततोंऽकुररूपो देहस्ततः पुनरेवमिति प्रवाहः । एषा त्वन्माया । तस्या निषेधः अपोहो यस्मिंस्तं त्वां निषेधावधिभूतं प्रपद्ये भज इति ॥ २६ ॥ ननु देवकीतनयस्य मे कथमेवंभूतत्वं तत्राह । नानाभावैरिति । सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया स्वीकृतैर्मत्स्याद्यवतारैर्देवान् बिभर्षि पालयसि । तदर्थं लोकसेतून्वर्णाश्रमधर्मान् । तदर्थं तदनुष्ठातृन्साधून् । तदंगत्वेनोन्मार्गान् दैत्यादीन्हंसि संहरसि । एवमेतदपि तव जन्म भूमेर्भारहरणाय । लीलावतारोऽयं न कस्यापि त्वं तनय इत्यर्थः ॥ २७ ॥ अतोऽज्ञानतस्त्वदभिभवे प्रवृत्तं मां तप्तं रक्षेत्याशयेनाह । तप्तोऽहमिति । ते तेजसा त्वत्सृष्टेन तेजोरूपेण ज्वरेण शांतोग्रेण शीतज्वरेण । परसंतापकस्य युक्त एव ताप इति चेदत आह । तावदिति । सेवायां प्रवृत्तानामनुचित इति भावः ॥ २८ ॥ हे त्रिशिरः । व्येतु अपयातु । मदाज्ञापालकः सन्सुखं विचर ।

तदेव कर्मैव । तत्संस्कारः कर्मसंस्कारः । तद्वान् कर्मसंस्कारवान् । ततः कर्मणः । ततो देहात् पुनरेवं कर्म जीवस्य मायाभिन्नत्वेऽपि मायाग्रस्तत्वान्मायात्वं, तस्या मायाया निषेधो यत्र तं त्वां त्वद्देहेन्द्रियादीनि त्वन्मयान्येव न माया इत्यर्थः ॥ २६ ॥ निजैश्वरत्वमाच्छादयन्नाक्षिपति—नन्विति । एवंभूतत्वं मायानिषेधावधिभूतत्वम् । तदर्थं देवपालनार्थम् । पुनस्तदर्थं वर्णाश्रमधर्मार्थम् । तदनुष्ठातन्वर्णाश्रमधर्मनिष्ठान् । तदंगत्वेन धर्मानुष्ठानांगत्वेन । तेषां धर्मनाशकत्वेन तद्धननमपि धर्मानुष्ठानांगमेव । एतत्कृष्णरूपमपि । इत्यर्थ इति—ब्रह्मादिरक्षकत्वेन सर्वादिकारणीभूतस्य न कस्यापि पुत्रता संपनीपद्यत इति भावः । नन्वेवंभूतश्चेत्तर्ह्यनुग्रहनिग्रहज्ञापितौ रागद्वेषौ मायिकधर्मौ किं मयि दृश्येते तत्राह—नानेति । मद्भक्तानुकूलान् बिभराणि एतांस्तत्प्रतिकूलान् हनानीत्येवं भक्तवत्सलस्य तव ये नाना भावा अभिप्रायास्तैर्लीलयानया बाणयुद्धादिकयैवोपपन्नैर्देवानिंद्रादीन्साधून्मुन्यादींश्च बिभर्षि । उभयेषामपि विशेषणं लोकसेतून् लोकाश्रयभूतान् । तेन भक्तवात्सल्यांगभूतौ रागद्वेषौ तेन न मायिकाविति । अहो मयेदमवगतमित्याह—एतत्ते जन्म भूमेः परमभक्तायाः भारहाराय तादृशसाधुशिरोमणिभक्तवृंदानुग्रहमयत्वाद्दुष्टहिंसादिकोपि तव मायातीतो महागुण एवेति भाव इति विश्वनाथः ॥ २७ ॥ यतस्त्वमेव सर्वशोऽसीत्यतो हेतोः । इति भाव इति—" अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः " इति न्यायेन नायं महतामुचितः । किञ्च—तवास्मीति वदतो हननवदधुना मम संतापोऽपि पातक एवेति तात्पर्यम् । ज्वररूपेण ते तव तेजसा शान्तमपि ' मल्लानामशनिः ' इत्यादिवन्मादृशदुर्जनं प्रत्युग्रायमाणं यत्तेन तत्राप्युल्वणेन महोद्भटेन । तापः सर्वोपि किं पुनर्ज्वरमात्रकृत इत्यर्थः । नो सेवेरन्नाश्रयेरन् । तत्र हेतुः—आशाभिः पुत्रवित्तलोकेषणाभिर्बद्धा इति । अधुनाहं त्वत्सेवक एवाभूवमिति भाव इति तोषिणी ॥ २८ ॥ इमं श्लोकचतुष्टयात्मकम् ' नमामि ' इत्यारभ्य ' यावदाशानुबद्धाः ' इत्यंतं संवादम् । इत्यर्थ इति—त्वया स त्यक्तव्य इति भावः । भयं न भवेदिति भगवतोक्तं न तु तं त्वं मा स्पृशेत्युक्तमत एतत्संवादश्रोतुरपि कचिज्ज्वरो यातिष्ठति ततस्तस्य भयं न भवतीति बोध्यम् । हरिवंशे त्वत्र श्लोकद्वयात्मको मंत्रोपि ज्वरघ्न उक्तः । तथाहि—" त्रिपाद्भस्मप्रहरणस्त्रिशिरा नवलोचनः । स मे प्रीतः सुखं दद्यात्सर्वामयपतिर्ज्वरः ॥ आद्यंतवंतः कवयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ॥ बाणस्तु रथमारूढः प्रागाद्योत्स्यञ्जनार्दनम् ॥ ३० ॥ ततो बाहुसहस्रेण नानायुधधरोऽसुरः ॥ मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ॥ ३१ ॥ तस्याऽस्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ॥ चिच्छेद भगवान्बाहूञ्छाखा इव वनस्पतेः ॥ ३२ ॥ बाहुषु च्छिद्यमानेषु बाणस्य भगवान्भवः ॥ भक्तानुकंप्युपव्रज्य चक्रायुधमभाषत ॥ ३३ ॥ श्रीरुद्र उवाच ॥ त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ॥ यं पश्यंत्यमलात्मान आकाशमिव केवलम् ॥ ३४ ॥नाभिर्नभोऽग्निर्मुखमंबु रेतो द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी ॥ चंद्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेंद्रः ॥ ३५ ॥

काऽसावाज्ञा तामाह । य इति । नौ आवयोरिमं संवादं यः स्मरेत्तस्य त्वत् त्वत्तो न भयं भवेत् । त्वया भयं नोत्पादनीयमित्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ॥ ३३ ॥ भक्तरक्षणार्थं श्रीरुद्रो भगवंतं स्तौति । त्वं हीति । अयमर्थः । त्वामज्ञात्वाऽयं युध्यत इति न चित्रम् । यतस्त्वं वाङ्मये ब्रह्मण्यपि गूढं ब्रह्म अभिधाऽविषयत्वात् । कुतः । परं ज्योतिः ज्योतिषामपि प्रकाशकत्वादविषय इत्यर्थः । कथं तर्हि प्रतीतिरित आह । यमिति । अमलात्मनां स्वतः प्रकाशस इत्यर्थः ॥ ३४ ॥ आस्तां तावन्निर्गुणस्य तव ज्ञानं लीलयाऽधिष्ठितस्त्वया यो विराड्विग्रहः सोऽपि न ज्ञायते उदुंबरफलांतर्वर्तिमशकैरिवोदुंबरफलमित्याशयेन विराड्रूपेण स्तौति द्वाभ्याम् । नाभिरिति । यस्य नभआदयो नाभ्याद्यवयवाः स भवान् लोककल्पः पुरुष इत्युत्तरेणान्वयः । नभो यस्य नाभिः । अग्निर्मुखम् । अंबु रेतः । द्यौः शीर्षम् । आशा दिशः श्रुतिः श्रवणेंद्रियम् । उर्वी अंघ्रिः । चन्द्रो मनः । अर्को दृक् । अहं शिव आत्मा अहंकारः । समुद्रो जठरम् । इंद्रो भुजा बाहुः । इंद्रादयो लोकपाला बाहव इत्यर्थः ॥ ३५ ॥

पुराणाः सूक्ष्मा बृहंतोप्यनुशासितारः । सर्वाञ्ज्वरान् घ्नंतु ममानिरुद्धप्रद्युम्नसंकर्षणवासुदेवाः ॥ ” इति ॥ २९ ॥ प्रागात् युद्ध इति । योत्स्यन् योत्स्यमानः । जनान् दुष्टानर्दयति पीडयतीति निरुक्तेः स्वपीडकमित्यर्थः ॥ ३० ॥ ततो युद्धभूमावागमनानंतरम् । चक्रायुधेऽपि बाणच्छेदकास्त्रधरेऽपि बाणान्यतो मुमोचातो निर्बुद्धिरयमिति हसन् राजानं संबोधयति—नृपेति । नृपा एवंवृत्ता एव भवंति यथा त्वया समाधिष्ठं जानतापि शर्म.क कंठेऽहिर्निक्षिप्तस्तद्वदयामिति भावः ॥ ३१ ॥ तस्य बाणस्य । वनस्पतेर्बृहद्वृक्षस्य । तदा बाणैर्न किमपि कर्तुं शक्तस्तद्व्यथामापेति दृष्टांतमाह—वनस्पतेरिति ॥ ३२ ॥ ननु यदैव येनायुध्यत तदैव तमुपव्रज्य तुष्टावेति भवस्य लज्जापि नाभूत्तत्राह—भगवान् सर्वज्ञः । स्वस्य परस्य ब्रह्मादेरपि तन्मायामोहितत्वं न चित्रमिति जानात्येवातस्तस्मिन्स्वप्रभौ स्वयं भगवति का लज्जेति भावः । भवो रुद्रः ॥ ३३ ॥ युद्धप्रवृत्तिमाह—अयमर्थ इति । अयं बाणः । वाङ्मये वेदे । अभिधा कथनं तदगोचरत्वात् । कथनागोचरत्वे हेतुमाशंकते—कुत इति । इत्यर्थ इति—“ येनेद्धः सूर्यस्तपति ” इत्यादिश्रुतेरिति भावः । अविषयप्रतीतिप्रकारं शंकते—कथमिति । इत्यर्थ इति—‘ दृश्यते त्वग्रया बुद्ध्या ’ इति श्रुतेरिति भावः । त्वं परं ब्रह्मैव ज्योतिरप्राकृतज्योतिस्स्वरूपम् “ तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥” इति हरिवंशेऽर्जुनं प्रति भगवदुक्तेः । नन्वेवं जानन् कथं मया युद्धमकरोस्तत्राह—वेदेपि गूढं ब्रह्म साक्षादेव त्वं कथं ज्ञेयः स्या इति भावः । तर्ह्यहमज्ञेय एव तत्राह—यं मायामालिन्यरहिता एव पश्यंति अहं तमोमयः कथं पश्येयमिति भावः । मायाश्रयत्वेपि तव न तल्लेप इत्याह—आकाशमिवेति ॥ ३४ ॥ त्वं साक्षाद्ब्रह्मैव जगदिदमस्मदाद्यात्मकं तव विभूतय एवेत्याह—नाभिरिति । यस्य तव नभोंतरिक्षम्, द्यौः स्वर्गः, उर्वी भूमिः । इत्यर्थ इति—‘इन्द्रादयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोमाणि यस्यौषधयोंबुवाहाः केशा विरिंचो धिषणा विसर्गः ॥ प्रजापतिर्हृदयं यस्य धर्मः स वै भवान्पुरुषो लोककल्पः ॥ ३६ ॥ तवावतारोऽयमकुंठधामन्धर्मस्य गुप्त्यै जगतो भवाय ॥ वयं च सर्वे भवतानुभाविता विभावयामो भुवनानि सत ॥ ३७ ॥ त्वमेक आद्यः पुरुषोऽद्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीश ॥ प्रतीयसेऽथापि यथाविकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ ३८ ॥

ओषधयो रोमाणि । यच्छब्दावृत्तिः स्पष्टार्था । अंबुवाहाः केशाः । विरिंचो धिषणा बुद्धिः । प्रजापतिर्विसर्गो मेढ्रम् । धर्मो हृदयम् । लोकैः कल्प्यतेऽवकल्प्यत इति लोककल्पः ॥ ३६ ॥ ननु तत्त्वतः प्रादेशिकशरीरस्य कथं नभो नाभित्वादीत्यत आह । तवेति । हे अकुंठधामन्नप्रच्युतस्वरूप । भवायाभ्युदयाय । न केवलमेतावत्किं त्वस्मदनुग्रहार्थमपीत्याह । वयं चेति । सर्वे लोकपालास्त्वया पालिताः सन्तापि भुवनानि पालयाम इति ॥ ३७ ॥ ननु यदि विभावयितारो यूयं विभाव्यानि च भुवनानि संति तर्हि कथमुक्तं त्वं हि ब्रह्मेति न हि ब्रह्मत्वे मम सजातीयविजातीयभेदः संभवतीत्यत आह । त्वमिति । एकः सजातीयभेदरहितः । कुतः । आद्यः पुरुषः पुरुषाणामवस्थात्रयवतामाद्यः प्रकृतिभूतः पुरुषः । कुतः । तुरीयः शुद्ध इत्यर्थः । तदपि कुतः । स्वदृक् स्वप्रकाशज्ञानरूपः । शुद्धादेव ह्युपाधियोगाज्जीवा जायंते । "यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्व एव आत्मानो व्युच्चरंति" इति श्रुतेः । अतः सजातीयरहितः किंच अद्वितीयो विजातीयरहितोऽपि । कुतः । हेतुः सर्वस्य तथा स्वयं हेतुरहितश्चेति । कथं तर्हि प्रति

बाहव आहुरुस्राः ' इत्युक्तेरिति ज्ञेयम् ॥ ३५ ॥ ओषधय उद्भिज्जम् 'रोमाण्युद्भिज्जजातीनि' इत्युक्तेः । विसृज्यते रेतःसेचनद्वारोत्पाद्यते देहोऽनेनेति विसर्गः " बिंदुद्वये विसर्गोथ रादेशे सर्गशिश्नयोः " इति निरुक्तिः । लोकानकल्पयाति स्वनाभ्यादिभिश्चिन्मयैर्नभोख्यादीन्प्राकृतान् चयतीत्यर्थः ॥ ३६ ॥ पुनराशंकते—नन्विति । प्रादेशिकं प्रादेशमितं शरीरं यस्य तस्य " केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् " इति द्वितीयस्कंधोक्तेः । यद्वा—प्रादेशो यत्किंचिद्देशस्तत्र तिष्ठतीति प्रादेशिकः 'प्रादेशो देशमात्रेपि ' इति मेदिनी । साक्षाद्ब्रह्मणोऽदृश्यस्यापि यद्दृश्यत्वं तत्केवलं कृपानिबंधनमेवेत्याह—हे अकुंठधामन् परब्रह्मणो यद्दृश्यत्वं तस्मात्तर्कैस्तव प्रभावः कुंठीकर्तुमशक्य एवेति भावः । धर्मस्य स्वभक्तिलक्षणस्य तत्प्रतिपक्षमतनिरसनपूर्वकं रक्षणाय जगतः कर्मिज्ञानिमूढबहिर्मुखदुराचारपर्यंतस्याभवाय मोक्षाय न च सामान्यजगत्पालनायेत्याह—वयं सर्वे दिक्पाला भवतानुभाविताः पालिताः संतः पालयाम एव तन्मात्रार्थे तवाविर्भावे किं प्रयोजनमिति भाव इति विश्वनाथः ॥ ३७ ॥ पुनर्भंग्यंतरेणाऽऽक्षिपति—ननु यदीति । एकत्वे हेतुमाशंकते—कुत इति । अवस्था जाग्रदाद्याः । तत्र हेतुः—तुर्य्य इति । इत्यर्थ इति—मालिन्यहेत्ववस्थाऽस्पष्टत्वादिति भावः । तदपि तुर्य्यत्वमपि । उपाधिर्माया । विस्फुलिंगा अग्निकणाः । आत्मानो जीवाः । अत एवंभूतत्वात् । न केवलं सजाती यरहित एवेत्याह—किंचेति । विजातीयराहित्यं कस्मादत्राह—हेतुरिति । प्रतीयत इति । प्रातीतिक एव भेदो न स्वाभाविक इति भावः । अत्र विश्वनाथः—ननु केचिन्मम गुणावताराः केचिच्च विभूतय इति मत्तो यूयमभिन्ना एव तत्राह—त्वमेवैक ईशः वयं तु सेवका एव । कुतः—आद्यः पुरुषो यतस्तुरीयः विराट् हिरण्यगर्भश्च कारणश्चेत्युपाधयः " ईशस्य यत्त्रिभिर्हीनं तुरीयं तद्विदुर्बुधाः " । किंच—नारायणवासुदेवादयोऽपि त्वदन्तःपातादद्वितीयाः । अन्येषां हेतुः स्वयं हेतुरहितश्च यतः स्वदृक् स्वेनैव दृग्दर्शनं यस्य न त्वन्यः कोऽपि त्वां द्रष्टुं शक्नोतीति भावः । यद्वा—स्वानां भक्तानां दृग्यस्य सः । तथा स्वभक्तानां नित्यसत्ताविचित्रबहुलरूपेण प्रकाशस इत्याह—प्रतीति ।

१ स्वप्रकाशज्ञानरूपत्वात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथैव सूर्यः पिहितश्छायया स्वया छायां च रूपाणि च संचकास्ति ॥ एव गुणेनापि हितो गुणांस्त्वमात्मप्रदीपो गुणिनश्च भूमन् ॥ ३९ ॥ यन्मायामोहितधियः पुत्रदारगृहादिषु ॥ उन्मज्जंति निमज्जंति प्रसक्ता वृजिनार्णवे ॥ ४० ॥ देवदत्तमिमं लब्ध्वा नृलोकमजितेंद्रियः ॥ यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥ ४१ ॥ यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् ॥ विपर्ययेंद्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ ४२ ॥ अहं ब्रह्माऽथ विबुधा मुनयश्चामलाशयाः ॥ सर्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥ ४३ ॥

शरीरं जीवभेदः प्रतीयतेऽत आह । प्रतीयस इति । सर्वगुणप्रसिद्धयै सर्वविषयप्रकाशनाय ॥ ३८ ॥ तर्हि किमहमेवं संसारीत्युच्यते नहिनहीति सदृष्टांतमाह । यथैवेति । हे भूमन्स्वया छायया मेघलक्षणया परदृष्ट्या पिहितश्छादितोऽपि सूर्यश्छायां मेघं च रूपाणि च मेघांतरितान्घटादीनपि संचकास्ति प्रकाशयति एवं गुणेनाहंकारेण स्वकार्येण जीवावरकेण तद्दृष्ट्याऽपिहितोऽपि गुणान्सत्त्वादीनुपाधीन्गुणिनश्चोपहिताञ्जीवानपि चकास्ति । आत्मप्रदीपः स्वप्रकाशः । अतः सर्वसाक्षिणस्तव न संसार इत्यर्थः ॥ ३९ ॥किंच मायाश्रयस्यान्यान्मोहयतस्तव कुतः संसृतिरित्याशयेनाह—यन्मायेति । पुत्रादिषु प्रसक्ताः । वृजिनार्णवे दुःखसागरे । उन्मज्जंति देवादियोनिषु । निमज्जंति स्थावरादिषु । तदुक्तं वायवीये । "विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोः" इति॥ ४० ॥एवं जीवेश्वरव्यवस्थां निरूप्येदानीमभजंतं निंदति द्वाभ्याम्।देवेति।देवेन त्वया कर्माध्यक्षेण दत्तं नृदेहमिमं लब्ध्वापीति ॥ ४१ ॥ शोच्यत्वे हेतुः । यस्त्वामिति विपर्यया विपरीता अनात्माप्रियाऽनीश्वरा ये इंद्रियार्थाः पुत्रादयस्तदर्थम्॥ ४२ ॥अहमन्ये

स्वेषु या दया कृपा तया तेषामेकांतित्वादिसर्वगुणप्रसिद्धयै लोके विख्यात्यै यथाविकारं भावानुसारेण प्रतीतो भवसि । ईदृगैश्वर्यवानपि तुच्छमायागुणानामुपकरोषीत्याह—प्रतीयस इति । यथा विकारं प्रति शरीरं स्वमायया कृत्वा बुद्धींद्रियादिगुणानां प्रसिद्धयर्थमंतर्यामितयाऽनुभूयसे यदि त्वमंतर्यामित्वं न कुरुषे तर्हि तेषां प्रकाशकाभावात्ते जडतया व्यर्थाः स्युरिति भावः ॥ ३८ ॥ पुनराक्षिपति—तर्हीति । सूर्यकिरणा एव मेघाकारेण परिणमंत इत्युक्तं हरिवंशे । एवमित्थम् । अतः स्वप्रकाशत्वात् । इत्यर्थ इति—" ददामि बुद्धियोगं तं येन मामुपयांति ते " इत्युक्तेर्यत्कृपयाऽन्येषां संसारो नश्यति तस्य कुतः स भवेदिति भावः । एवं महाकृपां तन्वन्नपि त्वं साधुवर्गशिरोमणिः स्वाभाविकलज्जाविनयादिना साक्षान्न तनोषि किन्तु गुर्वादिद्वारा पारोक्ष्येणैवेति परमसद्गुणनिधित्वमाह—यथेति । पिहित एव सन्सम्यक्प्रकाशयसि गुणेन तत्रस्थांशेन तस्मिन्स्थानीयेन जीवे पूर्वपूर्वगुर्वादिरूपेणाच्छन्नस्संस्तद्वारैवेत्यर्थः । गुणान् कारुण्यादींस्तत्प्रकाशनार्थं गुणिनश्च कारुण्यादिकर्तॄन् परस्परगुर्वादीन्सम्यक्प्रकाशयसि । न च तत्तत्प्रकाशनेऽन्यो हेतुरस्तीत्याह—आत्मना स्वयमेव प्रदीपयति कृपया प्रकाशयतीति तथा सः । तत्र हेतुः—भूमन् हे अपरिच्छिन्नमाहात्म्य ' महांतो हि दयालवः ' इत्युक्तेरिति तोषणीकाराः ॥ ३९ ॥ मायायाः स्वाश्रयानावरकत्वं प्रसिद्धमायासु दृष्टम् ततोऽपि न तव संसाराशंकेत्याह—किञ्चेति । उन्मज्जंति ऊर्द्ध्वं गच्छंति । निमज्जंति अधो गच्छंति । तदुन्मज्जननिमज्जनम् । वायवीये वायुपुराणे । विपर्ययो वैपरीत्यम् । ब्रह्माऽप्यज्ञानवशात् स्थावरतां याति का कथाऽन्येषामित्यर्थः ॥ ४० ॥ अन्यदाह—एवमित्यादिना । इमं प्रत्यक्षसिद्धम् । आत्मवंचको निजप्रलंभकः। शोच्यः विज्ञैः शोचनीयः ॥ ४१ ॥ मर्त्यो मरणधर्मा ॥ ४२ ॥ सर्वज्ञतामाह—अहमित्यादिना । भक्तिर्विद्यते येषां ते भक्ता भजंत इत्यर्थः। सर्वात्मना कायवाङ्मनोव्यापारेण । भजनीयत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं त्वा जगत्स्थित्युदयांतहेतुं समं प्रशांतं सुहृदात्मदैवम् ॥ अनन्यमेकं जगदात्मकेतं भवापवर्गाय भजाम देवम् ॥ ४४ ॥ अयं ममेष्टो दयितोऽनुवर्ती मयाऽभयं दत्तममुष्य देव ॥ संपाद्यतां तद्भवतः प्रसादो यथा हि ते दैत्यपतौ प्रसादः ॥ ४५॥ श्रीभगवानुवाच ॥ यदात्थ भगवंस्त्वं नः करवाम प्रियं तव ॥ भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥ ४६ ॥ अवध्योऽयं ममाप्येष वैरोचनिसुतोऽसुरः ॥ प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥ ४७ ॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ॥ सूदितं च बलं भूरि यच्च भारायितं भुवः ॥ ४८ ॥ चत्वारोऽस्य भुजाः शिष्टा भविष्यंत्यजरामराः ॥ पार्षदमुख्यो भवतो नकुतश्चिद्भयोऽसुरः ॥ ४९ ॥ इति लब्ध्वाऽभयं कृष्णं प्रणम्य शिरसाऽसुरः ॥ प्राद्युम्निं रथमारोप्य सवध्वा समुपानयत् ॥ ५० ॥ अक्षौहिण्या परिवृतं सुवासःसमलंकृतम् ॥ सपत्नीकं पुरस्कृत्य ययौ रुद्रानुमोदितः ॥ ५१ ॥

च शुद्धमनसस्त्वामेव प्राप्ता इत्याह । अहमिति ॥ ४३ ॥ भगवतो भजनीयत्वे हेतून्वदंस्तद्भक्तिं प्रार्थयते । तं त्वेति । समत्वे हेतुः । प्रशांतमिति । सुसेव्यत्वमाह । सुहृदात्मदैवं सुहृद्बुद्धिप्रवर्तकत्वात् । आत्मा च सर्वात्मकत्वात् । एवंभूतं दैवमीश्वरं त्वाम् । भवापवर्गाय संसारमोक्षाय भजामेत्यन्वयः । न चान्यो भजनीयोऽस्तीत्याह । अनन्यमेकं समानासमानजातीयरहितम् । तत्कुतः । जगतात्मनां च केतमधिष्ठानम् ॥ ४४ ॥ स्वयं भक्तिमाशास्य स्वभक्तस्याभीष्टमाशास्ते । अयमिति । दैत्यपतौ प्रह्लादे ॥ ४५ ॥ ४६ ॥ वैरोचनिर्बलिर्मद्भक्तस्तत्सुतत्वादवध्यस्तावत् किंच प्रह्लादायेति । अन्वयो वंशः ॥ ४७ ॥ तर्हि किमित्येवं कृतं तत्राह । दर्पोपशमनायेति ॥ ४८ ॥ अनुगृह्णाति । चत्वार इति ॥ ४९ ॥ सह वध्वा ऊषया ॥ ५० ॥ रुद्रानुमोदित इति तदभिप्रेतस्यैव बाणभुजभंगस्य कृतत्वात् ॥ ५१ ॥

हेतुत्रयम्—आत्मानमित्यादि ॥४३॥प्रशांतस्य समता भवतीति प्रसिद्धमेव । ननु मदन्येऽपि ब्रह्मादयो भजनीयाः संतीति चेदत्राह—न चेत्यादि । नास्ति अन्यो भिन्नो यस्मात्स तथा तम् । तेषामपि त्वदभिन्नत्वात्त्वदाराधनेन तेष्याराधिता भवंतीति भावः । अनन्यत्वे हेतुः एकमिति । तद् एकत्वम् । जगतां स्थावराणामात्मनां जंगमानां च कल्पितत्वेनाधिष्ठानानतिरेकात् ॥४४॥ अयं बाणः । अमुष्य बाणस्य । तत् अस्याभयप्रदानमेव । भवतस्तव ममोपरि प्रसादः । कथमसुरे प्रसादस्त्वया कृत इति चेदाह—यथा हीति ॥ ४५ ॥ नोऽस्मभ्यम् । यद् अस्याभयप्रदानादि । अनुमोदितं निश्चितम् । वस्तुत आवयोरभेदत्वादिति भावः ॥ ४६ ॥ एष बाणः । अन्वयशब्दोऽत्र सजातीयपरः, तत्रैव तदभिमानोपपत्तेः । विजातीये तु देहान्निष्क्रष्टे कीटादौ प्रसूते च सर्पमंडूकादौ तदभिमानाभावेन झटिति तत्त्यागदर्शनात् । अतो बकबक्यवादीनामपि तिर्यग्गतःपातित्वात्कंसादीनां सजातीयत्वाभावाच्च वध्यतैव युक्तेति भावः ॥ ४७ ॥ अस्य बाणस्य । यत् बलम् । भार इवाचरतीति भारायते । ततः कर्तरि क्ते भारायितम् ॥ ४८ ॥ अस्येत्युक्तार्थः ॥ ४९ ॥ प्राद्युम्निमनिरुद्धम् । स—सहेत्यर्थः । 'क्वचिदादेशोऽप्यादेशित्वेन गृह्यते' इति वैयाकरणाः ॥ ५० ॥ तदभिप्रेतस्य रुद्राभिप्रायविषयस्य । "त्वद्दत्तवरो भवेन्मूढ संयुगं मत्समेन ते" इति रुद्रोक्तेः ॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वराजधानीं समलंकृतां ध्वजैः सतोरणैरुक्षितमार्गचत्वराम् ॥ विवेश शंखानकदुंदुभिस्वनैरभ्युद्यतः पौरसुहृद्द्विजातिभिः ॥ ५२ ॥ य एवं कृष्णविजयं शंकरेण च संयुगम् ॥ संस्मरेत्प्रातरुत्थाय न तस्य स्यात्पराजयः ॥५३॥ इति श्रीमद्भागवते महापु० दशमस्कंधोत्तरार्धे त्रिषष्टितमोऽध्यायः॥६३॥ श्रीशुक उवाच ॥ एकदोपवनं राजञ्जग्मुर्यदुकुमारकाः ॥ विहर्तुं सांबप्रद्युम्नचारुभानुगदादयः ॥ १ ॥ क्रीडित्वा सुचिरं तत्र विचिन्वंतः पिपासिताः ॥ जलं निरुदके कूपे ददृशुः सत्त्वमद्भुतम् ॥ २ ॥ कृकलासं गिरिनिभं वीक्ष्य विस्मितमानसाः ॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयाऽन्विताः ॥ ३ ॥ चर्मजैस्तांतवैः पाशैर्बद्ध्वा पतितमर्भकाः ॥ नाशक्नुवन्समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः ॥ ४ ॥ तत्रागत्यारविंदाक्षो भगवान्विश्वभावनः ॥ वीक्ष्योज्जहार वामेन तं करेण स लीलया ॥ ५ ॥ स उत्तमश्लोककराभिमृष्टो विहाय सद्यः कृकलासरूपम् ॥ संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक् ॥ ६ ॥ पप्रच्छ विद्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः ॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां गणयामि नूनम् ॥ ७ ॥ दशामिमां वा कतमेन कर्मणा संप्रापितोऽस्यतदर्हः सुभद्र ॥ आत्मानमाख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुम् ॥ ८ ॥

पौरादिभिरभ्युद्युतोऽभिमुखमागत्य सत्कृतः ॥ ५२ ॥ ॥ ५३ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायां त्रिषष्टितमोऽध्यायः ॥६३॥ चतुःषष्टितमे कृष्णो नृगं पापादमोचयत् ॥ ब्रह्मस्वहारिदोषोक्त्या राज्ञो दृत्वानशिक्षयत् ॥ १ ॥ विभूतिभाग्यभोगादिमदोन्नद्धमनोरथान् ॥ अन्वशासद्यदून्कृष्णो नृगोद्धारप्रसंगतः ॥ २ ॥ १ ॥ पिपासितास्तृषिता जलं विचिन्वंतः । सत्त्वं जीवम् ॥ २ ॥ तं च कृकलासं वीक्ष्य ॥ ३ ॥ चर्मजैश्चर्ममयैः पाशैस्तांतवैस्तंतुमयैश्च ॥ ४ ॥ ५ ॥ संतप्तं चामीकरं सुवर्णं तद्वद्वर्णो यस्य सः । अद्भुता अलंकारांबरस्रजो यस्य सः । स्वर्गी देवो बभूवेति ॥ ६ ॥ ॥ ७ ॥ यद्यदि । क्षमं योग्यम् ॥ ८ ॥

से कृष्णः॥ ५२ ॥ एवमित्थम् । कृष्णस्य विजयो यत्र तत्संयुगम् । तस्य स्मर्तुः ॥ ५३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ नृगं नृपम् (१) । विभूतिरैश्वर्यम्, भाग्यं संपदः, 'भोग्यम्' इति पाठे भोग्याः हयादयः । भोगस्तत्तद्विषयानुभवस्तेषां मदेनोन्नद्धा उच्छृंखला मनोरथा येषां तान् । अन्वशासत् विभूत्यादिमदांधानामेषा गतिर्भवतीति स च न कार्य इत्यशिक्षयदित्यर्थः ॥२॥ लीलेयमनुरुद्धतः जन्मतः प्रागूढा श्रीप्रद्युम्नादीनां यौवनोद्भेद एवास्या लीलाया औचित्यात्, क्रीडासक्तत्वात्तु कुमारशब्दप्रयोगः कुमारप्राचुर्याद्वा । सांबस्यादावुद्देशः प्रद्युम्नस्य शंबरपुरात्तत्कालागमनेनागमनाभावात् । स्वल्पपापेनापि तादृशजनस्य तादृशी गतिरित्याश्चर्येण संबोधयति–राजन्निति। हे हरिभक्तिद्योतमानेत्यर्थः । उपवनं नगरोपकंठवनम् ॥१॥ तत्रोपवने।"सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः।आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जंतुषु॥" इति मेदिनी ॥ २ ॥ कृकं लासयति नर्तयतीति कृकलासः । " शिरःप्राग्रं कृकं प्रोक्तं कृको गल उदीरितः " इति वामनः । तस्य कृकलासस्य । ते यदुकुमाराः । महाकायस्य तस्य चिरमुपवनांतर्वर्तिकूपस्थस्य भगवदिच्छातो दर्शनं तदैव जातं व्यवहारतस्तु तस्यातिपुरातनकूपस्य गभीरत्वेन चिरासंस्कृतत्वेन लतापत्राद्यावृतत्वेन जलान्वेषणवेलायामेव दृष्टत्वात् ॥३॥ " तंतुः संततिकार्पासादिसूत्रविस्तृतिषु च " इति निरुक्तिः ॥ ४ ॥ तत्र कूपसमीपे । तं कृकलासम् ॥ ५ ॥ सः कूपोद्धृतः । सुवर्णमिति " चामीकरं स्वर्णहेमहाटकं वह्निजं तथा" इति कोशांतरात् ॥ ६ ॥ तस्य नृगस्य ॥ ७ ॥ विवित्सतां ज्ञातुमिच्छताम् । अत्राधुना ॥ ८ ॥

१ 'स' 'राजधानीम्' इति पा० । सतोरणैरित्यत्र पृथक्कृत्य वा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इति स्म राजा संपृष्टः कृष्णेनानंतमूर्तिना ॥ माधवं प्रणिपत्याह किरीटेनार्कवर्चसा ॥ ९ ॥ नृग उवाच ॥ नृगो नाम नरेंद्रोऽहमिक्ष्वाकुतनयः प्रभो ॥ दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशम् ॥ १० ॥ किं नु तेऽविदितं नाथ सर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशो वक्ष्येऽथापि तवाज्ञया ॥ ११ ॥ यावंत्यः सिकता भूमेर्यावंत्यो दिवि तारकाः ॥ यावंत्यो वर्षधाराश्च तावंतीरददं स्म गाः॥१२॥ पयस्विनीस्तरुणीः शीलरूपगुणोपपन्नाः कपिला हेमशृंगीः ॥ न्यायार्जिता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददावहम् ॥ १३ ॥ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्य ऋतव्रतेभ्यः ॥ तपःश्रुतब्रह्मवदान्यसद्भ्यः प्रादां युवभ्यो द्विजपुंगवेभ्यः ॥ १४ ॥

॥ ९ ॥ यदि ते कर्णमस्पृशमित्यसंदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरितिवत् । कर्णपथं नूनं प्राप्तः स्यामित्यर्थः ॥ १० ॥ किंच किं न्विति । सर्वेषां भूतानामात्मनो बुद्धेः साक्षिणस्तेऽविदितं किं नु न किंचित् ॥ ११ ॥ १२ ॥ १३ ॥ ऋतव्रतेभ्योऽदंभाचारेभ्यः । तपसा श्रुताः प्रख्याताश्च ते ब्रह्माणि वदान्या अत्युदारा अध्यापनशीलाश्च ते संतश्च तेभ्यः ॥ १४ ॥

अनंतमूर्तिनेत्युक्त्या तद्दानकालेऽपि भगवान्मूर्त्यन्तरेणासीदिति ध्वनितम् । प्रश्नस्तु मनुष्यनाट्याभिप्रायेण श्रीमदमत्तजनशिक्षणार्थमेवेति भावः ॥ ९ ॥ इत्यर्थ इति–श्रीमताऽवश्यं मम नाम श्रुतमेवेति भावः ॥ १० ॥ श्रीहरेस्त्रिकालज्ञतामाह–किन्विति । यद्यपि ते नाविदितमथापीत्यन्वयः । 'नु वितर्कानुनययोः' ॥ ११ ॥ सिकता रजांसि । यद्वा–सिकता द्वीपाः, अदिवि मर्त्यलोके भारते तारका नद्यः, वर्षधाराः पर्वताः २७४९७ वामरीत्या सप्तविंशसहस्रचतुःशतसप्तपंचाशद्गावो नृगेण दत्ताः, यथाश्रुतार्थग्रहणे गवां स्थितिरपि दुर्घटास्तीति ज्ञेयम् । अददां ददातेर्लङ्‌ उत्तमपुरुषैकवचनम् ॥ १२ ॥ यादृशी गौर्देया तत्स्वरूपमाह–पयस्विनीरित्यनेन दुग्धाभाववत्याः तरुणीरित्युक्तेर्बालाया वृद्धायाश्च दानं न कार्यम् । शीलेत्याद्युक्तेः सुशीलायाः परताडनहीनायाः, सुरूपायाः शृंगभंगादिदोषहीनाया बहुदुग्धायाश्च दानं कार्यम् । कपिला इत्युपलक्षणम् । यद्वा–कपिला इति बहुत्वोक्तेर्वाराहोक्ता दशविधकपिला ग्राह्याः । तथाहि–"सुवर्णकपिला पूर्वा द्वितीया गौरपिङ्गला । तृतीया चैव रक्ताक्षी चतुर्थी गूढपिंगला॥पञ्चमी बहुवर्णा स्यात्षष्ठी स्याच्छ्वेतपिंगला। सप्तमी श्वेतपिंगाक्षी ह्यष्टमी कृष्णपिंगला ॥ नवमी पाटला ज्ञेया दशमी पुच्छपिंगला । एता दश समाख्याताः कपिलास्ते वरानने ॥ सर्वाश्चैता महाभागास्तारयंति न संशयः ॥" इति हेमशृंगरूप्यखुराद्युक्तेः सांगायाः । न्यायार्जिता इत्युक्तेर्मौल्यगृहीतायाः, स्वगेहजातायाः, प्रतिग्रहादिलब्धायाश्च । सवत्सा इत्युक्तेर्वत्सवत्सीसहितायाः, 'वत्सः पुत्रादिवर्षयोः' इत्युक्तेरिहादिरदं पुत्रीपरम्, तेन केवलाया दानं न कार्यमिति भावः ॥ १३ ॥ पात्रस्वरूपमाह–गुणाः सत्यशौचसौमनस्यादयः, शीलं सुचरितं तद्वद्भ्यः । एतेन कटुभाष्यादयः सत्यशौचादिहीना न दानपात्रम् । सीदत्कुटुंबेभ्य इत्यनेन धनिनामगृहस्थानां विद्यादिमतामपि पात्रत्वं नास्ति " वृथा दानं धनाढ्येषु यथा दीपो दिवाकरे " इत्युक्तेः, " हव्यकव्ये यत्र दुग्धघृताद्युपयुज्यते । तस्मै विप्राय गौर्देया यद्वा बालसुताय वै ॥ " इति भारतोक्तेश्च । ऋतव्रतेभ्य इत्यनेन दांभिकानां न पात्रत्वम् "धर्मश्च सत्यञ्च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूया । यज्ञश्च दानञ्च धृतिः श्रुतञ्च व्रतानि वै द्वादश ब्राह्मणस्य ॥" इत्युद्योगपर्वोक्तानि व्रतानि ग्राह्याणि । तपःश्रुतेत्याद्युक्तेस्तपश्चर्यापराणां वेदवेदांगाध्यापनपराणां सदाचारणामेव पात्रत्वम् । युवभ्य इत्युक्तेर्वृद्धानां दानप्रतिग्रहप्रायश्चित्तासमर्थत्वात् शौचाचारशैथिल्याद्गोसेवासामर्थ्याभावाच्च तेभ्यो दत्तानां गवां दुःखं स्यात्तेन पापोत्पत्तेश्चेति भावः । द्विजपुंगवेभ्य इत्युक्तेर्ब्राह्मणेतराणामविद्यादिमतां च पात्रत्वाभाव उक्तः । स्वलंकृतेभ्य ऊर्द्ध्वपुंड्रादिना भूषितेभ्यः । एतेन रिक्तमस्तकादीनामपि दानानर्हतोक्तेति 'सोर्द्ध्वपुंड्राय दानम्' इति मायापुरीमाहात्म्ये । यद्वा–मयैव पूर्वं सुवर्णकुण्डलादिनाऽलंकृतेभ्यः गोदानार्थवरणे पात्राय स्वर्णकुंडलाद्यवश्यं दत्त्वैव तस्मै गां दद्यादिति सूचित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यशय्याः ॥ वासांसि रत्नानि परिच्छदान्नथानिष्टं च यज्ञैश्चरितं च पूर्तम् ॥ ॥ १५ ॥ कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने ॥ संपृक्ताऽविदुषा सा च मया दत्ता द्विजातये ॥ १६ ॥ तां नीयमानां तत्स्वामी दृष्ट्वोवाच ममेति तम् ॥ ममेति प्रतिग्राह्याह नृगो मे दत्तवानिति ॥ १७ ॥ विप्रौ विवदमानौ मामूचतुः स्वार्थसाधकौ ॥ भवान्दाताऽपहर्तेति तच्छ्रुत्वा मेऽभवद्भ्रमः ॥ १८ ॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन वै ॥ गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयताम् ॥ १९ ॥ भवंतावनुगृह्णीतां किंकरस्याविजानतः ॥ समुद्धरतं मां कृच्छ्रात्पतंतं निरयेऽशुचौ ॥२०॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् ॥ नान्यद्गवामप्ययुतमिच्छामीत्यपरो ययौ ॥ ॥ २१ ॥ एतस्मिन्नंतरे याम्यैर्दूतैर्नीतो यमक्षयम् ॥ यमेन पृष्टस्तत्राहं देवदेव जगत्पते ॥ २२ ॥ पूर्वं त्वमशुभं भुंक्ष उताहो नृपते शुभम् ॥ नांतं दानस्य धर्मस्य पश्ये लोकस्य भास्वतः ॥ २३ ॥

पूर्तं वापीकूपादि चरितं कृतम्॥ १५॥एवं वर्तमानस्य मम संकटं किंचिदापन्नं शृण्वित्याह । कस्यचिदिति।द्विजमुख्यस्य प्रतिग्रहनिवृत्तस्य । संपृक्ता मिलिता ।अविदुषा ब्राह्मणस्येयमित्यजानता ॥ १६ ॥ १७ ॥ प्रतिग्राहिणोक्तं दातेति । स्वामिनोक्तमपहर्तेति । अभवद्भ्रमः व्याकुलोऽभवमित्यर्थः ॥ १८ ॥ ॥ तदोभावपि प्रत्येकमनुनीतौ प्रार्थितौ । कथं तदाह । गवामिति सार्धेन ॥ १९ ॥ २० ॥ अपरः प्रतिग्राही दुराग्रहो यल्लक्षं त्वयोक्तमन्यदपि गवामयुतं यदि तदपीमां विहाय नेच्छामीत्युक्त्वा गां त्यक्त्वा ययावित्यर्थः ॥२१॥ एतस्मिन्नंतर इति । इतः पूर्वं पापाभावान्नेतुमसमर्था इति भावः ॥ २२ ॥ उताहो इत्येकं पदम् । अथवा पूर्वं शुभमिति नान्तमिति यमस्य

मनेन ॥ १४ ॥ विप्रापराधः सुकृतानंत्यमपि नाशयतीत्याह—गोभूहिरण्येति । आयतनञ्च वासोचितगृहम् । वासांसि कार्पासोर्णाक्षौमकौशादीनि । परितश्छादयंतीति परिच्छदा वस्त्रगृहादयः । यद्वा—परिच्छदपदेन तत्तत्कार्योचितसामग्री ग्राह्या । तदुक्तम् “ विवाहादिक्रियाकाले तत्क्रियासाधनं तु यः । ददाति दीनविप्रेभ्यः सोऽश्वमेधफलं लभेत् ॥ ” इति पुराणात् ॥ १५ ॥ कृकलासत्वप्रापकं किं पापं तत्र अज्ञातापराधं निवेदयति—कस्येति । भ्रष्टाऽभ्यस्तदेशं विहायान्यदेशं गता ॥ १६ ॥ तां मयाऽज्ञातदत्तांम् गाम् । तत्स्वामी तस्या गोः पूर्वो नाथः ॥ १७ ॥ विवदमानौ “ भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः” इत्यात्मनेपदम् । “तङानावात्मनेपदम्” इत्यानस्यात्मनेपदसंज्ञेति । इत्यर्थ इति—भ्रमपदमत्र चेतोऽस्वास्थ्यपरमिति ज्ञेयम् ॥१८॥ अनुनीतौ प्रार्थितौ धर्मकृच्छ्रगतेन धर्मसंबंधिकष्टं प्राप्तेन । प्रकृष्टानामितोऽपि शोभनानाम् । एषा मदज्ञानदत्ता ॥ १९ ॥ कृच्छ्राद्धर्मकृच्छ्रात् । अशुचौ महामलादिपूर्णे अकाराऽप्रश्लेषे तते इत्यर्थः । ‘शुचिरनुपहते तते च ’ इति कोशात् ॥ २० ॥ राज्यं राजप्रतिग्रहमहं न प्रतीच्छे करोमीति प्रतिग्रहभयादपाक्रमद्गां त्यक्त्वैवापासरदित्यर्थः । इत्यर्थ इति—अव्ययानामनेकार्थत्वादितिपदं त्यागमपि बोधयतीति भावः ॥२१॥ एतस्मिन्नज्ञातापराधलक्षणे अंतरेऽवकाशे सति पापादायुषः संकोचे सति । यद्वा—अज्ञातविप्रगोदानतः प्राग्यमो ममाह्वानेऽपि न प्रभुरभूत्तत्सत्त्वे तेनाहमाहूतः । हे देवानां पूज्यानामपि पूज्य जगत्पते इति जगत्पालनार्थं त्वयैव नियुक्तस्य तदुचितमेव । यद्वा—त्वत्कृतनिबंधस्तेषामप्यलंघ्य एवेति भावः। इति भाव इति—‘याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः ’ इति न्यायेन धर्मशीलानां छिद्रं विना दंडो न भवतीति तात्पर्यम् । तत्र यमालये ॥ २२ ॥ यमो मामित्थमपृच्छदित्याह—पूर्वमिति । भुंक्षे भोक्ष्यसे । वर्तमानसामीप्ये लट् । “ भुजोऽनवने ”

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वं देवाशुभं भुंज इति प्राह पतेति सः ॥ तावदद्राक्षमात्मानं कृकलासं पतन्प्रभो ॥ २४ ॥ ब्रह्मण्यस्य वदान्यस्य तव दासस्य केशव ॥ स्मृति
र्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः ॥ २५ ॥ स त्वं कथं मम विभोऽक्षिपथः परात्मा योगेश्वरैः श्रुतिदृशाऽमलहृद्विभाव्यः ॥ साक्षादधोक्षज
उरुव्यसनांधबुद्धेः स्यान्मेऽनुदृश्य इह यस्य भवापवर्गः ॥ २६ ॥

स्वस्य वा वाक्यम् । पश्ये पश्यामि ॥२३॥ हे देव यम पूर्वमशुभं भुंज इति मयोक्ते स यमः पतेति प्राह ॥ २४ ॥ २५ ॥ दुर्घटेन श्रीकृष्णदर्शनेनविस्मितः सन्नात्मनो
भाग्यमभिनंदति । स त्वमिति । हे विभो स त्वं ममाक्षिपथो लोचनगोचरः सन्कथं साक्षात्प्रत्यक्षोऽसीत्यर्थः । किमत्राश्चर्यं तदाह । पर आत्मा अत एव योगेश्वरैरपि
श्रुतिदृशा उपनिषच्चक्षुषाऽमले हृदि विभाव्यश्चिंत्यः । यतोऽधोक्षजः अक्षजमैंद्रियकज्ञानं तदधोऽर्वागेव यस्मात्सः । यस्येह भवापवर्गो भवेत्तस्य भवाननुदृश्यः स्यात् । उरुव्य

इत्यात्मनेपदम् । ‘ उताहो परिप्रश्नविचारयोः ’ इति मेदिनी । दानस्य दानरूपस्य । यद्वा—मत्वर्थीयोऽत्र बोध्यस्तेन प्रकृष्टदानवतो धर्मस्येत्यर्थः ॥ २३ ॥ तावत्साकल्येन । कृकलासं सरटम् । वाल्मीकीये तु
ताभ्यां विप्राभ्यां त्वं कृकलासो भवेति शाप एव राज्ञे दत्तस्स च विरोधः कल्पांतरव्यवस्थयाऽनुसंधेय इति तोषणीकाराः ॥ २४ ॥ स्मृत्यनाशे हेतुः—तव दासस्येति । न हि नारदादिवद्भगवद्भक्तानां जन्मांतरीयस्मृतिनाशो
भवतीति भावः । दास्यत्वे च हेतुत्रयं ब्रह्मण्यस्येत्यादि । ब्राह्मणसेवा च वदान्यानामेव तया च भगवद्दर्शनेच्छोत्पद्यते । तया तद्दास्यं जायत इति स्मृतिर्ममेति शेषः । अथ कृकलासदेहे तथा महाभिमानिदेवदेहेऽपि न ध्वस्ता
भ्रष्टा तत्र हेतवः—ब्रह्मण्यस्येत्यादयः । ब्रह्मण्यस्य ब्राह्मणभक्तस्य, तत्रापि वदान्यस्य यथेष्टदानेन तांस्तोषयतः, तत्रापि दासस्य कर्मसाद्गुण्यार्थं तत्तत्कर्म समर्पणेन त्वदीय दास्यभक्तिं प्राप्तस्य ततो भवन्महिमज्ञानेन भवतः संदर्श
नार्थिनः । दास्ये हेतुः—हे केशव “ को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिनाम् । अवांतरांशसंभूतौ तस्मात्केशवनामवान् ॥ ” इति हरिवंशोक्तवैभव एवंभूतं त्वां त्यक्त्वा कस्मायन्यस्मै सत्कर्म समर्पयं इति भावः । संदर्भस्तु
ब्रह्मण्यस्य वदान्यस्य च तव योऽहं दासः ब्रह्मण्यवदान्यत्वांशेन त्वदनुगस्येत्यर्थः । न तु त्वत्सेवैकपुरुषार्थिन इति । भवत्संदर्शनार्थिन इति—भवतः परमब्रह्मण्यत्वं वदान्यत्वं च श्रुत्वा दर्शनकौतुकिन इत्येवार्थः । न तु तदर्था
नुरागिण इति । तस्मिन्नपि तद्गुणद्वयख्यापनेन तदंशमात्रव्यक्तेः गत्यंतरप्राप्तेश्च । अत एव साधकदशायामप्यंबरीषादिवत्सेवादिवत्सेवादिलक्षणसाक्षाद्भक्तिनादृतेति विघ्नो जातो न तु तद्वद्दुर्वाससा क्रोधे विघ्न इति गम्यते ।
भगवद्दर्शनादिकं तु यथाकथंचिदभिलाषगुणादिति ज्ञेयम् । विश्वनाथस्तु नृगस्य भक्तिमिश्रकर्मित्वाद्गुणा भूता या भक्तिस्तयैव भगवदग्रे दासस्येति विनयव्यंजिकोक्तिः । भवत्संदर्शनार्थिन इति कदाचिदतिसुंदरश्रीविग्रह
मंदिरादिश्रीगीताश्रीभागवतादिशास्त्रप्राप्त्युत्कंठस्य महाभागवतस्यापेक्षणीयं नृपेण यद्बोदारत्वात्संपादितं ततश्च तेन संतुष्यता भोराजंस्तव भगवद्दर्शनं भूयादित्याशीर्यदा दत्ता तदैव नृगस्य भगवद्दिदृक्षाऽभूदिति गम्यते ॥
॥ २९ ॥ कृष्णदर्शनदौर्लभ्यमाह—दुर्घटेत्यादिना । इत्यर्थ इति । साक्षादव्ययस्य प्रत्यक्षार्थकत्वादयमर्थः । प्रत्यक्षस्यानेकविधत्वात्साक्षादित्युक्त्या चाक्षुषप्रत्यक्षमेव न लभ्यतेऽत उक्तम्—अक्षिपथः स
न्निति । अत्र चाक्षुषप्रत्यक्षे । तदाश्चर्यम् । न हि परात्मा चक्षुषा गृह्यते ‘ दृश्यते त्वग्र्यया बुद्ध्या ’ इत्युक्तेः ‘ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषोत्रदीक्षेत ’ इति ब्रह्मणोक्तेश्च । अत एव चक्षुरिंद्रिया
गोचरत्वादेव । अपि शब्दात्किमुत मादृशैरित्यर्थः । यतो हेतोः । अधोक्षज इंद्रियजन्यज्ञानागोचर इत्यर्थः । यस्य पुंसः । भवापवर्गस्संसारांतः । साक्षात्पदमत्रापि योज्यं साक्षादनुदृश्य इति । इत्यर्थ इति—बहुजन्मसुकृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवदेव जगन्नाथ गोविंद पुरुषोत्तम ॥ नारायण हृषीकेश पुण्यश्लोकाच्युताव्यय ॥ २७ ॥ अनुजानीहि मां कृष्ण यांतं देवगतिं प्रभो ॥ यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदम् ॥ २८ ॥ नमस्ते सर्वभावाय ब्रह्मणेऽनंतशक्तये ॥ कृष्णाय वासुदेवाय योगानां पतये नमः ॥ २९ ॥

सनेन कृकलासभवदुःखेनांधबुद्धेस्तु ममैतच्चित्रमित्यर्थः ॥ २६ ॥ उद्रिक्तभक्तिर्बहुधा संबोधयन्नाह । देवदेवेति ॥ २७ ॥ अनुज्ञापयति । अनुजानीहीति । देवलोकेऽपि सतो वर्तमानस्यात्मनो मनसः सन्निधिं प्रार्थयते । यत्र क्वापीति । तत्पदमास्पदं विषयो यस्य तथाभूतं भूयादिति ॥ २८ ॥ यास्यन्नमस्यति । नम इति । सर्वभावाय सर्वस्य भावो जन्म येन तस्मै ब्रह्मणे कर्तृत्वेऽप्यविकाराय । कुतः । अनंतशक्तये अनंता मायाख्या शक्तिर्यस्य तस्मै वासुदेवाय सर्वभूताश्रयायेत्युपादानत्वमुक्तम् । श्रीकृष्णाय सदानंदरूपायेति पुरुषार्थत्वमुक्तम् । "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इति स्मृतेः ॥ किंच योगानां इष्टापूर्ता

वाप्तचरमदेहस्य तव दर्शनमुचितं तानाद्यनधिकारितिर्यग्जन्मनः कथं जातमिति न जान इति भावः ॥ २६ ॥ दशभिः संबुद्धिभिर्भगवतः परमवैभवं द्योतयन्ननुज्ञापयत्यनुज्ञां प्रार्थयति तद्दर्शनशुद्धचेताः स्वस्य श्रवणकीर्तनादिशुद्धभक्त्यभावेऽपि तद्दर्शने तस्य कारुण्यं प्रशस्यानुज्ञां ग्रहीष्यन्बहुधा संबोध्य प्रार्थयते युग्मेन । प्रथमदेवेति देवगतिगमनानुज्ञायां तद्गतिं प्राप्तस्यापि तस्यैव परमाश्रयत्वेन, द्वितीयदेवेति अधुना त्वमपि देवो जातः किमर्थं मां प्रार्थयसे तत्राह—हे देवानां ब्रह्मादीनामपि त्वं देवोऽसि मम तु का वार्तेति । ननु यद्यहं ब्रह्मादीनामपि देवस्तर्हि क्षुद्रस्त्वमीदृशप्रार्थनधाष्टर्येन कथं न संकुचसि तत्राह—हे जगत्पते, जगन्मध्यपातित्वेन प्रार्थनार्होऽस्मीति भावः । ननु सत्यादिलोकस्था ब्रह्मादय एव महांतोऽहं मर्त्यलोकस्थो न तादृशोऽतस्तानेव प्रार्थयस्व तत्राह—हे गोविंद, कृपया गां भुवं विंदतीति तथाभूत मादृङ्मूढपालनायैव भुवमागतोऽसीति भावः। किञ्च—हे पुरुषोत्तम दीनदयालो तेन त्वादृशकृपालव इति त्वं स्वभावत एव सर्वजीवाश्रयोऽसीत्याह—नारायणेति । नारं नरसमूहस्तस्यायनाश्रयीभूतेत्यर्थः । एतादृशप्रार्थनाप्रवर्तकोऽपि त्वमेवेत्याह—हे हृषीकेश सर्वेन्द्रियप्रवर्तक । त्वमेव पावकत्वात्प्रार्थनायोग्य इत्याह—हे पुण्यश्लोक नामोच्चारणादिना पावक मादृशदीनपालने च्युतिरहितत्वादपि त्वमेव प्रार्थयितुं योग्य इत्याह—हे अच्युत । किञ्च—अनन्तभक्ताभीष्टदानैरपि न क्षीयते इत्याह—हे अव्ययेति ॥ अत्र विश्वनाथः—देवानां देवोऽपि त्वं जगतामपि नाथत्वान्मन्नाथो भव । गोविंदेति कृपादृष्ट्या मां विंदस्व । अत्र हेतुः—पुरुषेषु विष्ण्वादिषूत्तमः । नारा जीवा अयनमाविष्ठानं यस्येति मां दुर्जीवमप्यधितिष्ठ । हृषीकेश मदिंद्रियाण्यात्मसात्कुरु । पुण्यश्लोक तवैषानृगमोचनी कीर्तिरभूदेव । अच्युत मदन्तःकरणाद्विच्युतो मा भव । अव्ययेति अत्र न ते कोप्यपचय इति ध्वनयः ॥ २७ ॥ सतः स्थितस्य । यत्र क्वापि यस्मिन्कस्मिन्योनौ स्थाने वा त्वत्पदमेवास्पदं विषयो यस्य तथा भूतं मच्चेतो भूयादिति ॥ २८ ॥ स्मृतेरितिपदमत्र श्रुतिपरं, गोपालतापनीयोपनिषद्यस्य पाठाच्छ्रुतिरेवेयम् । क्वचिच्छ्रुतिस्मृत्योरेकरूपत्वेनैव । यथा—" गोत्रं नो वर्द्धताम् " अयं श्लोकः श्रुतित्वेन स्मृतित्वेन च पठ्यते तथाऽयमपीति । न केवलं सच्चिदानंदरूप एव त्वमपि तु कर्मफलदातापीत्याह—किञ्चेति । स्वाशयं प्रकाशयति—अयं भाव इति । एवंभूतं सर्वकर्मफलदातारमनंतशक्तित्वादिरूपम् । सर्वेषां भावश्चेष्टा यस्मात्तस्मै । कुतः—ब्रह्मणे बाह्याभ्यन्तरव्यापकाय । ननु जीवाः स्वयमेव प्रत्यक्षं चेष्टंते, नेत्याह—अनन्तशक्तये तव शक्त्यैव तेषां तत्तच्छक्तिर्न स्वतः । कुतः—वासुदेवाय सर्वचित्ताधिष्ठात्रे । अत एव योगानां कर्मज्ञानादिलक्षणानां पतये प्रवर्तकाय एवंभूताय तुभ्यं कृष्णाय नमोनमः । भक्त्युद्रेकेण द्विरुक्तिः । यद्वा—सर्वेषां ब्रह्मादीनां स्थावरांतानां भावायोत्पादकाय । स्वरूपतः सर्वबृहत्तमाय । स्वरूपशक्तिमायाशक्तिवृत्तिभेदेनानंतशक्तये । एवमपि कृष्णाय नराकृतिपरब्रह्मणेतत्रापि वसुदेवाज्जन्मलीलयैव प्रकटीभूताय योगानां दुर्घटघटनाशक्तीनां पतये नमोनमो नतिमात्रमेव मुहुरस्तु तन्निकटस्थातुमयोग्यत्वादलं सेवाद्यभिलाषेणेति भावः । अत्र विश्वनाथस्तु—मम त्वयि दास्यभाव एवास्तु त्वं तु सर्वभावविषयीभूत एवासीत्याह—सर्वे भावा यस्मिंस्तस्मै । तत्र शांतभावस्य विषयालम्बनमाह—ब्रह्मणे मूर्तब्रह्मस्वरूपाय । दास्यभावस्याह—अनंतशक्तये महामहैश्वर्याय । सख्यभावस्याह—कृष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्त्वा तं परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना ॥ अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणाम् ॥ ॥ ३० ॥ कृष्णः परिजनं प्राह भगवान्देवकीसुतः॥ ब्रह्मण्यदेवो धर्मात्मा राजन्यानुशिक्षयन् ॥ ३१ ॥ दुर्जरं बत ब्रह्मस्वं भुक्तमग्नेर्मनागपि ॥ तेजीयसोऽपि किमुत राज्ञामीश्वरमानिनाम् ॥ ३२ ॥ नाहं हालाहलं मन्ये विषं यस्य प्रतिक्रिया ॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि ॥३३॥ हिनस्ति विषमत्तारं वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥ ब्रह्मस्वं दुरनुज्ञातं भुक्तं हंति त्रिपूरुषम् ॥ प्रसह्य तु बलाद्भुक्तं दशपूर्वान् दशापरान् ॥ ३५ ॥

दिकर्मणां पतये फलदात्रे । अयं भावः । एवंभूतं त्वां विहाय गंतुमनिच्छुरपि गमिष्यामि त्वद्दत्तकर्मफलभोगायेति ॥ २९ ॥ ३० ॥ ३१ ॥ मनागीषदपि भुक्तं सदग्नेरग्निसदृशस्य तेजीयसोऽतितेजस्विनोऽपि दुर्जरम् । ईश्वरमानिनां राज्ञां किमु ॥ ३२ ॥ ३३ ॥ किंच विषादपि घोरमित्याह हिनस्तीति । संसर्गिसंसर्गेण मारकत्वादग्नितुल्यता स्यात्तदपि नेत्याह । वह्निरिति । अपिच समूलमिति वह्निर्मूलान्यवशेषयति । ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं तदपि समूलमिति ॥ ३४ ॥ दुरनुज्ञातं

स्यार्जुनस्य नामरूपगुणादिभिः साम्यादेव सदानंददात्रे । वात्सल्यस्याह—वसुदेवस्य पुत्राय । उज्ज्वलभावस्याह—योगानां भक्तियोगमयीनां श्रीरुक्मिण्यादीनां पतये भर्त्रे ॥ २९ ॥ भोगांते मामाप्स्यसीत्यनुज्ञातः इत्युक्तरीत्या तं श्रीकृष्णम् । विमानाग्र्यं विमानश्रेष्ठम् ॥ ३० ॥ परिजनम् “ परीवारे समीपस्थे ज्ञातौ परिजनः स्मृतः ” इति निरुक्तिः ॥ ३१ ॥ ब्रह्मस्वं ब्राह्मणद्रव्यम् । ब्राह्मणेन स्वत्वेन स्वीकृतमन्यथा मरुत्तनृपयज्ञावात्तत्यक्तब्राह्मणस्वर्णाहरणे युधिष्ठिरस्य स्वर्णस्तेयित्वेन महापातकित्वं स्यादिति भावः । ‘ब्रह्म विप्रपरात्मनोः’ इति कोशात् । यद्वा—अग्नेरपि दुर्जरम्, अग्निस्तु भुक्तो यथाकथंचिज्जीर्णो भवेदपीत्यर्थः । तेजीयसस्तपस्विनोपि, क्षत्रियादेः किमुत केवलमीश्वरमानिनां प्रभुत्वाभिमानवतामित्यर्थः ॥ ३२ ॥ हालाहलमित्युपलक्षणं स्थावरजंगमोभयविधविषस्य । स्थावरं तिंदुकादि जंगमं सर्पवृश्चिकाद्युत्थम् । विषं नाशकं विशेषेण स्यत्यंतं करोतीति ‘ षो—अंतकर्मणि ’ इत्यतः “ आतश्चोपसर्गे ” इति कः । यस्य हालाहलादेः । प्रतिक्रिया मंत्रौषधादिरूपः शंभुना जर्जरितत्वान्निवृत्त्युपायोऽस्तीत्यर्थः । अस्य ब्रह्मस्वस्य । प्रतिविधिः प्रतिक्रिया “ प्रतीकारः प्रतिविधिर्निवर्तकप्रतिक्रियाः ” इति धरणिः । भुवीत्युक्तेर्भूशब्दोपलक्षिततीर्थस्नानादिकश्चास्य निवर्तकं नास्ति किन्तु बहुधा ब्राह्मणार्चनोपवासचांद्रायणादि कथंचिन्निवर्तकं भवेदिति भावः “ यो ब्राह्मणस्य सद्धनमभिनारदमन्यते । विषमेतद्देवकृतं राजा वरुणोऽब्रवीत् ॥ ” इत्यथर्वसंहिताचतुर्थकांडश्रुतेः “ न विषं विषमित्याहुर्ब्रह्मस्वं हि विषं स्मृतम् ” इति स्मृतेश्च॥३३॥ सर्वथाऽप्रतिकार्यत्वमेवाह—किञ्चेति । अत्तारं केवलं संसर्गिणम् । संसर्गेण वह्निसंसृष्टलोहसंसर्गो यथा मारकस्तथा नेत्यर्थः । ब्रह्मस्वलक्षणारणिजः ब्राह्मणधनरूपारण्युत्थितः पापाग्निः । तदपि कुलमपि । ब्राह्मणधनहारिणो वंशो नश्यतीत्यर्थः ॥ ३४ ॥ दुरत्र वर्जने । अनुज्ञां विना, यथावदनुज्ञां विना च । एतेन अयं मे बंधुरुपकारी मद्धनं मया खल्वदत्तमपि भुंक्ते चेत् भुंक्तामित्येवमनुज्ञातामित्यर्थः । प्रीत्यादत्तं सेवादिना गृहीतं च न दोषायेति भावः । ‘ प्रीतिदानं न दोषाय ’ इति वाल्मीक्युक्तेरत्र प्रीतिरुपलक्षणं संवादेः, अन्यथा ब्राह्मणजातेर्व्यवहारनिरोधः स्यादिति । राजाद्याश्रयादुत्कोचरूपेण गृहीतं पूर्वान्पितृवंश्यानपरान्मातृवंश्यान्[1], एकश्च भोक्तेत्येवमेकविंशतिपुरुषान् । हंतिरत्र दुर्गतिदानेऽस्तीति ध्येयमौचित्यात् ॥ ३५ ॥

१ पूर्वान्पित्रादीन् परान्पुत्रादीनित्यर्थः सम्यग्भाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजानो राजलक्ष्म्यांधा नात्मपातं विचक्षते ॥ निरयं येऽभिमन्यंते ब्रह्मस्वं साधु बालिशाः ॥ ३६॥ गृह्णंति यावतः पांसून्क्रंदतामश्रुबिंदवः ॥ विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनाम् ॥३७॥ राजानो राजकुल्याश्च तावतोऽब्दान्निरंकुशाः ॥ कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ॥ ३८ ॥ स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ॥ षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ३९ ॥ न मे ब्रह्मधनं भूयाद्यद्गृध्वाऽल्पायुषो नृपाः ॥ पराजिताश्च्युता राज्याद्भवंत्युद्वेजिनोऽहयः ॥ ४० ॥ विप्रं कृतागसमपि नैवद्रुह्यत मामकाः ॥ घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥ ४१ ॥ यथाहं प्रणमे विप्राननुकालं समाहितः ॥ तथा नमत यूयं च योऽन्यथा मे स दंडभाक् ॥ ४२ ॥ ब्राह्मणार्थो ह्यपहृतो हर्तारं पातयत्यधः ॥ अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ॥ ४३ ॥

यथावदननुज्ञातम् । त्रिपूरुषं कुलं स्वयं पुत्रं पौत्रं च । प्रसह्य हठात् । बलाद्राजाद्याश्रयतः ॥ ३५ ॥ ये ब्रह्मस्वमभिमन्यंते इच्छंति ते निरयमेवाभिमन्यंते । अतो बालिशा अज्ञा आत्मपातं न विचक्षत इति ॥ ३६ ॥ अपि च गृह्णंतीति ॥ ३७ ॥ ३८ ॥ ३९ ॥ गृध्द्वा अभिकांक्ष्य ॥ ४० ॥ ४१ ॥ प्रणमे नमामि ॥ ४२ ॥ न केवलम्

आत्मपातं राज्यश्रियः पतित्वा नरके स्वात्मपतनम् ॥ ३६ ॥ अन्यदाह—अपि चेति । यावतो यावत्संख्याकान् । पांशून्व्रजःकणान् । गृह्णंत्यार्द्रीकुर्वंति । वदान्यानां कुटुंबिनामिति विशेषणद्वयेन कदर्येभ्यः कुटुंबहीनेभ्यो गृहीत्वा तद्धनस्य कुटुंबिने स्वधर्मनिष्ठाय दाने राज्ञो न दोष इति सूचितम् ॥ ३७ ॥ राजकुल्यास्तदधिकारिपुरुषाः । दायो द्रव्यम् । 'कुल्यो मान्ये कुलोद्भवे' इति मेदिनी । "विभक्तव्ये पितृद्रव्ये दाने दायो धनेऽपि च" इति निरुक्तिः ॥ ३८ ॥ ब्रह्मवृत्तिं ब्राह्मणजीविकाम् ॥ ३९ ॥ श्रीकृष्णो लोकसंग्रहमाह—नम इति । उद्वेजितुं भीतं कर्तुं कंपयितुं वा शीलं येषां ते तथा ब्राह्मणोद्वेगकर्तारोऽहयः सर्पयोनिं लभंत इत्यर्थः । मे मदर्थं मत्संबंधि वा न भवतु न मयि पर्यवस्यतु । एतेन विप्रदत्तं भगवान्न किमपि गृह्णातीति न शंकनीयम्, कथम्—छलादिना मत्संबंधि मा भवत्विति भगवतोऽभिप्रायः । तदेवाह—यत् गृध्वा बलेन छलेन याच्ञया वा इदं ग्रहीष्यामीत्यभिकांक्ष्यापि इह जन्मन्यल्पायुषः जीवतोऽपि शत्रुभिः पराजितास्संतो राज्याच्च्युता जन्मांतरे सर्पा भवंति,येन लोकेषूद्वेजनं ददति स्वयं च लभंत इत्येवं महादुःखभाज एव चिरं भवन्तीति भावः ॥४०॥ ब्राह्मणो यदि कृतागा भवेत्तर्हि किं कार्यमिति चेदाह—विप्रमिति । द्रुह्यत द्रोहं कुरुत । मामका इत्यनेन 'विप्रद्रोही न मामकः' इत्युक्तम्, तत्र मदीयत्वाभिमानं त्यक्त्वा तान्न रक्षामीति भावः । घ्नंतं ताडयंतम् । शपंतं गालीप्रदानादि कुर्वंतम् ॥ ॥ ४१ ॥ प्रणम इत्यात्मनेपदमार्षम् । अनुकालमुहुर्मुहुः । योऽन्यथा मदाचरणविपरीतः । दंडभाक् नरकगामी भवति । तदुक्तं श्रीकृष्णेन पुराणांतरे—"विप्रोत्कर्षाऽसहा ये च नरा लोके नराधिप । ते मद्द्वेष्या न संदेहस्सर्वधर्मबहिष्कृताः ॥ तेषां भक्तिं न मन्येऽहं न दानं न व्रतादिकम् । तीर्थसेवां जपं ज्ञानं यदन्यत्सुकृतं कृतम् ॥ मदिज्याद्वेषिणस्तान्वै प्रक्षिपामि मुहुर्मुहुः । घोरे बहुक्लेशकरे नरके भृशदारुणे ॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् । सर्वं सहे महाराज विप्रनिंदां विना प्रभो ॥ जारजातस्स विज्ञेयो यो निन्दत्यनपत्रपः । ब्राह्मणं मम सर्वस्वं सर्वदेवमयं परम् ॥ दानं व्रतं तथा स्नानं श्राद्धं विप्रमृते वृथा । विप्रस्य देहो राजेंद्र सर्वदेहिषु सर्वदा ॥ परः शुचिर्विना कर्म सुकृतं किमु कर्मणा । नैव विप्रात्परं मन्ये आत्मानमपरं किमु ॥" इति ॥ ४२ ॥ अर्थवादेन ब्राह्मणोत्कर्षपुरस्सरतद्धनहरणनिषेधबोधकवाक्येन बिभीषिका भयहेतुकोक्तिः । अर्थवादवाक्यं हि स्वार्थप्रतिपादनपरं न भवति किन्तु विधेयनिषेध्ययोः प्राशस्त्यनिंदितत्वे लक्षणया प्रतिपादयन्नस्ति । तल्लक्षणञ्च—'प्राशस्त्यनिंदान्यतरपरं वाक्यमर्थवादः' इति बहुधा निरूपितमक्रूरस्तुतावेतत् । "वेदोक्तिस्तुतिनिंदायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विश्राव्य भगवान्मुकुंदो द्वारकौकसः ॥ पावनः सर्वलोकानां विवेश निजमंदिरम् ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे नृगोपाख्यानं नाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥छ॥ श्रीशुक उवाच ॥ बलभद्रः कुरुश्रेष्ठ भगवान् रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलम् ॥ १ ॥ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च ॥ रामोऽभिवाद्य पितरावाशीर्भिरभिनंदितः ॥ २ ॥ चिरं नः पाहि दाशार्ह सानुजो जगदीश्वरः ॥ इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ॥ ३ ॥ गोपवृद्धांश्च विधिवद्यविष्ठैरभिवंदितः ॥ यथावयो यथासख्यं यथासंबंधमात्मनः ॥ ४ ॥

र्थवादबिभीषिकेयं किं तु प्रत्यक्षमित्याह । ब्राह्मणार्थ इति ॥४३॥ ४४ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ पंचषष्टितमे रामश्चक्रे गोकुलमागतः ॥ रममाणस्तु गोपीभिः कालिंद्याः कर्षणं मदात् ॥ १ ॥ रामस्य चरितं चित्रं कालिंद्याकर्षणादि यत् ॥ पौंड्रकांतादि कृष्णस्य पृथगुक्तमतः परम् ॥ २ ॥ १ ॥ आशीर्भिरभिनंदितो बभूव ॥ २ ॥ तदाह । चिरमिति ॥३॥ गोपवृद्धांश्च विधिवदभिवंद्य यविष्ठैरभिवंदितो बभूवेत्यर्थः। अपि च यथावय इति ॥४॥

धनार्थशकटेऽपि च । शास्त्रार्थेऽप्यर्थवादोऽस्ति " इति निरुक्तिः । अजानन्तामित्युक्तेः किमु जानंतमिति भावः ॥ ४३ ॥ द्वारकौकस इत्युपलक्षणम् । कथनतात्पर्यमाह—पावन इति । पावयति शोधयति सन्मार्गोपदेशेनेति पावनः । लोकानां सन्मार्गप्रवृत्त्यर्थं भगवाञ्छ्रावयामासेति भावः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ कर्षणमाकर्षणम् (१) । चित्रमद्भुतम् (२) । बलेन भंदते लोकान्कल्याणयुतान्करोतीति बलभद्रः । अथ श्रीपरीक्षितस्तत्तल्लीलानंदमनुभवतो बलादनुगच्छता श्रीगोकुलव्याकुलतास्मरणेन दूयमानं मनो ज्ञात्वा श्रीमन्मुनींद्रः पुनस्तदाश्वासनकथां कथांतरावेशेन त्यक्तामपि पातयति—बलभद्र इति । संबुद्ध्या श्लाघते—हे कुरुश्रेष्ठेति । अतीवशुद्धकुलोद्भूतस्य तव हृदि श्रीव्रजलीलैव स्फुरति मुहुरिति भावः । सुहृदः श्रीवसुदेवादितोऽपि पितृत्वादिमयशुद्धस्नेहांशेन शोभनः सुहृद्येषां तान्नन्दादीन्दिदृक्षुः सन् यश्चिरविरहेणोत्सुकः नियतद्दर्शनोत्कंठस्तदा तु लब्धश्रीकृष्णानुज्ञ इति ज्ञेयम् । तदुक्तं श्रीहरिवंशे—" जगामैको व्रजं रामः कृष्णस्यानुमते स्थितः " इति । अत एव वक्ष्यति—कृष्णस्य संदेशैः सांत्वयामासेति । श्रीकृष्णस्तु श्रीवसुदेवादिभिरनुज्ञात एव तेन सह नागच्छत् । अयं श्रीनंदादिप्रेमबद्धः । पुनरत्रानागमिष्यतीत्यननुज्ञात इति ज्ञेयम् । प्रकर्षेण गोपवेशादिना ययौ । तदुक्तं श्रीहरिवंशे—" स प्रविष्टस्तु वेगेन तं व्रजं कृष्णपूर्वजः । वन्येन रमणीयेन वेशेनालंकृतः प्रभुः ॥ " इति । रथस्थितिस्तु शीघ्रगमनार्थैव ॥ १ ॥ पितरौ यशोदानंदौ । परिष्वक्तः सर्वांगसंगतं गाढं बहुविधमश्रुपुलकादिवलितं चालिंगितः, यतश्चिरोत्कंठः । पितरौ तस्य तयोश्च भावानुसारेण तत्र प्रथममितस्ततो लब्धैर्गोपैर्मेलनम् । व्रजाभ्यंतरे तु गोपीभिर्मातृवयस्याभिर्वृद्धाभिरपि । एवं चेत्यनुक्तसमुच्चये, पुरोहितादिभिरित्यपि ज्ञेयम् ॥ २ ॥ तद् आशीरभिनन्दनम् (नेत्रेभ्यश्चक्षुर्नाडीभ्यो निर्गतानि नेत्राणि तैः ' कारकात्क्रियायुक्ते ' इत्यपादानकारकान्निर्गतेऽर्थे अण्, वैकल्पिकागित्वाद्वृद्ध्यभावः) । ' नेत्रं नाड्यां तरोर्मूले ' इति यादवः । चिरं पाहीति वाग्भंग्या दीर्घायुष्ट्वाऽप्रतिहतबलवीर्याद्याशिषः सूचिताः । जगदीश्वरस्सन्नित्यनन्तरं यद्यपि स्वेषामपि दासार्हत्वमस्ति, तथा पाण्डवकौरववत्प्राचुर्यप्रयोगाविवक्षया यादवेष्वेव मुख्यत्वात्तच्छब्दप्रवृत्तिः । वसुदेवपुत्रत्वेनैव तथा संबोधितः । यद्यपि स्वीयोऽपि पुत्रभावस्तस्मिन्नधिकस्तथापि प्रियभ्रातृपुत्रतामाश्रित्यैव स्वयं पुत्रत्वेन पालितस्सौजन्योत्तरसंबंधमेव बहुतरं तेनात्मनश्चैक्यं व्यञ्जयित्वा स्वपुत्र एव विशिष्य दर्शितः । अत एव सानुज इति साक्षात्स्वपुत्रे तदनुजत्वमुक्तम्, तस्यैव प्राधान्यविवक्षया गौणत्वं च । अत एव न इत्यविशेषेणास्मान्यादवांश्चेत्यर्थः । अथवोत्कण्ठया श्लेषेण संप्रति तयोः स्वेष्वौदासीन्यं दर्शितम्, तदनुचितमित्याह—न इति । यथा यादवान्पासि तथाऽस्मान्पाहीत्यर्थः । विश्वनाथस्तु—सानुजोऽपि त्वं जगदीश्वर इति सर्वत्र श्रूयते, तदपि वृद्धौ स्वमातापितरावावां कथं न पालयसीति भावः ॥ ३ ॥ यविष्ठैः कनिष्ठैः । इत्यर्थ इति शेषः । यथोचितं कर्तव्यमाह—अपि चेति । आत्मनः वय

१ एतत्सर्वं सारस्वतव्याकरणानुसारेण बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समुपेत्याथ गोपालान्हास्यहस्तग्रहादिभिः ॥ विश्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः ॥ ५ ॥ पृष्टाश्चानामयं स्वेषु प्रेमगद्गदया गिरा ॥ कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः॥६॥कच्चिन्नो बांधवा राम सर्वे कुशलमासते ॥ कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः॥७॥ दिष्ट्या कंसो हतः पापो दिष्ट्या मुक्ताः सुहृज्जनाः ॥ निहत्य निर्जित्य रिपून्दिष्ट्या दुर्गं समाश्रिताः॥८॥ गोप्यो हसंत्यः पप्रच्छू रामसंदर्शनादृताः ॥ कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः॥९॥कच्चित्स्मरति वा बंधून्पितरं मातरं च सः॥अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति॥अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः॥ ॥ १० ॥ मातरं पितरं भ्रातॄन्पतीन्पुत्रान्स्वसॄरपि ॥ यदर्थेऽजहिम दाशार्ह दुस्त्यजान्स्वजनान्प्रभो ॥ ११ ॥ ता नः सद्यः परित्यज्य गतः संछिन्नसौहृदः ॥ कथं नु तादृशं स्त्रीभिर्न श्रद्धीयेत भाषितम् ॥ १२ ॥

ते सर्वे स्वेषु यादवेषु तं राममनामयमारोग्यं पप्रच्छुः ते च तेन पृष्टा इति ॥ ५ ॥ कृष्णप्राप्त्यर्थं संन्यस्ताखिलराधसस्त्यक्तसर्वविषयाः ॥ ६ ॥ ७ ॥ ८ ॥ रामस्य संदर्शनेनादृताः सादराः ॥ ९ ॥ १० ॥ ११ ॥ तर्हि तद्गमने युष्माभिः प्रतिबंधः किं न कृतः । तद्वाक्यविश्वासादिति चेत् । ननु विश्वासः किमिति कृतस्तत्राहुः ।

आद्यनातिक्रमेण गोपालान्सम्प्राप्येति सार्द्धेनान्वयः । तत्रादिनाऽश्लेषग्रहः ॥ ४ ॥ अथ गोपाः पप्रच्छुः । ' गोपालाः ' इति पाठोऽपि साधीयान् । ते च गोपाः । तेन रामेण ॥ ५ ॥ कृष्ण इति निमित्ते सप्तमी । यद्वा—कृष्णे संन्यस्ताः समर्पिता अखिलराधसः सर्वसम्पदः " राधस्तेजसि हिंसायां विषये सिद्धिसम्पदोः " इति धरणिः ॥ ६ ॥ बान्धवाः वसुदेवादयः । यथावयो वयआद्यनुरूपम् । गोपालान् हास्यहस्तग्रहादिभिः समुपेत्य तत्समीपगमनादिना मिलित्वा विश्रान्तं भोजनानन्तरं कृतशयनं पुनश्च सुखमासीनं तम् अनामयं कुशलं प्रपच्छुः । तेन रामेणापि स्वेषु गोपेषु या प्रेम्णा गद्गदा गीस्तया ते गोपाः कुशलं पृष्टाः।ते गोपाश्च कृष्णे सम्यक्प्रकारेण न्यस्तान्यर्पितान्यखिलस्य देहादिव्यवहारस्य राधांसि सिद्धयो यैस्ते, कृष्णगमनदिनमारभ्य तेषां स्वाभाविक्योऽपि शयनभोजनादिक्रियाः नैव सिध्यन्तीत्यर्थः । तोषिण्यान्तु—' यद्वामार्थसुहृत्प्रियात्मतनयाः ' इति रीत्या पुरैव तस्मिन्नर्पितसर्वविषया अतस्तद्विरहिणां स्वतस्तदनभिरुचिरपि तदागमनाऽशयैव तद्धारिण इत्युक्तम् । तत्र वृद्धाः पृच्छंति—कच्चिन्नोऽस्माकमिति।समानवयसः पृच्छंति—कच्चित्स्मरथ नोऽस्मानिति॥७॥मुक्ताः दुःखेभ्यः॥८॥ कच्चिदितीष्टप्रश्ने । पुरस्त्रीजनवल्लभ इति साभिप्रायोक्तिः, तदर्थं योऽस्मांस्त्यक्तवानिति । गोप्यः श्रीकृष्णप्रेयस्यः । हसंत्य इत्युन्मादबोधकम्, तादृशमहाविरहदुःखे श्रीबलदेवस्याग्रे तादृशपरमलज्जावतीनां कथमन्यथा हासस्संभवेदिति । रामोऽपि तन्महाभावलक्षणमधिगम्यैव ताः संमानयामासैव न त्ववहेलयामासेत्याह—रामेण कर्त्रा संदर्शनेन स्वानुजप्रेमवत्प्रेयसीबुद्ध्या स्वकर्तृकेण सवात्सल्यदर्शनेन कारणेनादृताः । कच्चित्कृष्णस्तत्र सुखमास्ते । ननु युष्मद्विरहे तत्र तस्य कुतः सुखं तत्राहुः—पुरेति । नागरीः सुंदरीः स्त्रीः प्राप्तस्य तस्य कुतोऽस्माकं ग्राम्याणां विरहदुःखं संभवेदतः सुखं घटतैवेति भावः ॥ ९ ॥ स कृष्णः । स्मरतीति चेत्त च्छ्रुत्वा तदागमनं संभाव्याहुः—सकृदिति । महाः पूज्या राजकन्या भुंक्ते सेवते इति महाभुजः । इगुपधत्वात्कः । अनेन राजकन्याभोक्ता कथमप्यस्मान्स्मरतीति भावः । अस्मान्मा स्मरतु नाम बंधून् पितृव्यमातुलादीन् पितरं नन्दं मातरं यशोदां च किं स्मरति न वा ? शृंगाररसविलासेनास्मत्तस्ताः पुरस्त्रियोऽधिकात्तमधिकं सुखयन्तीति जानीम एव । किन्तु वनमालाविरचनस्थासकसंपादनकुसुमपल्लवमयव्यजनशय्योल्लोचादिनिर्माणादिषु वयं तस्य स्मृतिपथमवश्यं याम एवेत्यभिप्रायेण पृच्छन्ति—अपि वेति । स्मरते स्मरति । महाभुज इति तस्य पीनभुजयोर्भक्तिच्छेदरीत्या कुंकुमरसचर्चा न जाने सांप्रतं कीदृशी भवतीति भावः ॥ १० ॥ यदर्थे कृष्णनिमित्तम् । अक्षराधिक्यमार्षम् । ननु भोः कृष्णप्रियाः स प्रेमवान् कृष्णः सदा वः स्मरत्येवेति चेन्न, अनन्यगतीनामस्माकं परित्यागेन तत्प्रेमाणि न विश्वसिम इत्याहुः—मातरमिति सार्द्धेन ॥ ११ ॥ ताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः पुरस्त्रियः॥गृह्णंति वै चित्रकथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः ॥१३॥ किं नस्तत्कथया गोप्यः कथाः कथयतापराः ॥ यात्यस्माभिर्विना कालो यदि तस्य तथैव नः ॥ १४ ॥ इति प्रहसितं शौरेर्जल्पितं चारु वीक्षितम् ॥ गतिं प्रेमपरिष्वंगं स्मरंत्यो रुरुदुः स्त्रियः ॥ १५ ॥

कथं न्विति वक्तृबहुत्वान्नानाविधानि वाक्यानि ॥ १२ ॥ तत्रान्या ऊचुः । कथं न गृह्णंतीति । अन्या ऊचुः । गृह्णंति वा इति । चित्रकथस्य चित्रकथाकथनकोविदस्य किंच सुंदरं स्मितं यस्मिंस्तेनावलोकनेनोच्छ्वसितः क्षुभितो यः स्मरस्तेनातुराः ॥ १३ ॥ अन्या ऊचुः । किं न इति । कालस्तावत्तस्य चास्माकं च यात्येव किंतु तस्य

सर्वत्यागवतीः । तन्निरोधः कथं न कृत इत्याह–तर्हीति । तस्य कृष्णस्य 'अहं शीघ्रमायास्ये' इत्यादिवाक्ये विश्वासात्सत्यप्रत्ययात् । विश्वासः कथं कृत इत्याशङ्कते–नन्विति । तत्राऽऽक्षेपे । तादृशं गुडजिह्विकालक्षणं किन्तु श्रद्धेयमेवेत्यर्थः । गुडजिह्विका चेत्थम्–यथा तत्कटुताभीत्या निम्बपानमकुर्वाणस्य जिह्वायां गुडलेपनं कृत्वा तं निम्बं पाययंति, तथा प्रियवाक्यान्युक्त्वा पश्चात्कपटकरोऽपि गुडजिह्विक एवेत्यर्थः । तास्तथाभूता अप्यस्मान्सद्यः परित्यज्य गतः । ननु तद्गमने युष्माभिः प्रतिबन्धः किन्न कृतः, तेन सार्द्धं वा किन्न गतास्तत्राहुः–तृणपत्रवत्संछिन्नं सौहृदं प्रेमशृंखला येन सः । अतः कथय किं वयं कुर्म इति भावः । ननु तेन विना प्राणधारणायुष्माभिरपि तस्मिन्प्रेम संछिन्नमेवेति चेन्नैवम्, 'आयास्ये' इति दूतद्वारा मुहुरुक्त्या सञ्छिन्नाया अपि प्रेमशृंखलायाः पुनर्ग्रथनान्निर्गच्छन्तोऽप्यस्माकं प्राणाः पुनर्बद्धा तेनैव स्थापिता इति । ननु तर्हि स आयास्यत्येव कथमधीराः स्थ इति चेन्नैवम्, अद्याप्यनागमनेन तेन तदा तन्मृषैवोक्तमित्यधुना विमृशामः । कथं तर्हि तदुक्तौ तदा विश्वस्तं तत्राहुः–कथं न्विति । स्त्रीभिरबुद्धिभिरवक्रधीभिरस्माभिस्तादृशं तद्वचः कथं न श्रद्धीयेत ॥ १२ ॥ तत्र तासु । अन्याः किञ्चिद्बुद्धिमत्यः । अन्यास्तच्चरितज्ञाः । न केवलमुक्तिकौविदेनैव मोहोऽपि तु तद्भावेनापीत्याहुः–किञ्चेति । किञ्च वन्याः स्त्रियो वयं निर्बुद्धय एव स्मः, नागर्यस्ता अतिसुधियस्तद्भाषिते कथं विश्वसन्तीत्याहुः–कथं न्विति । ताः प्रत्यन्याः समादधत्य आहुः–चित्रकथस्य मिथ्या कथापि तन्मुखे विस्मयरसमयी परमस्वाद्वी भवतीति कथारसत्यागाऽसामर्थ्यादेव शृण्वन्तीत्यर्थः । हेत्वंतरमप्यस्तीत्याहुः–सुन्दरस्मितपूर्वावलोकेनोच्छ्वसित उद्भूय प्रवृद्धो यः स्मरस्तेनातुराः ॥ १३ ॥ अन्या अर्धकुपिताः । तत्कथया कृष्णवार्तया । अपराः कृष्णभिन्नाः । तस्य कृष्णस्य । तथैव तेन विना । सुखेन तस्यान्यास्वासक्तत्वात्, अस्माकं तु तदासक्तानां तद्विरहाद्दुःखेन । ध्वनितं सूचितम् । ताः सर्वाः प्रत्यन्या असूयाप्रेमसंरंभरता आहुः–किन्न इति । कालस्तावत्तस्य चास्माकं च यात्येव, किन्तु तस्य सुखेनास्माकं दुःखेनेतीयानेव विशेषः । संयुक्तो जीवति वियुक्तो म्रियते वयं तु न जीवामो नापि म्रियामह इत्यन्यस्त्रीभ्यो विधात्रैवास्माकं ललाटे लिखितस्तत्र कः प्रतीकार इति भावः । इतीति–स्वीयसुधारसमयप्रहसितादिशल्यपंचकेन तासां हृदयं विद्ध्वा कृष्णचन्द्रेण गतमतस्ताः कथं जीवन्तु कथं वा म्रियंतामिति श्रीबलदेवाग्रेऽपि विह्वलीभूय रुरुदुरेव ॥ १४ ॥ स्त्रीणां धैर्यशिथिलवचनं वज्रधारोपममिति लोकसिद्धमित्याशयेनाह–इतीति । इतीत्थमुक्त्वा । प्रेम्णा परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंगमैः ॥ सांत्वयामास भगवान्नानाऽनुनयकोविदः ॥ १६ ॥
द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च ॥ रामः क्षपासु भगवान्गोपीनां रतिमावहन् ॥ १७ ॥

सुखेनास्माकं तु दुःखेनेत्येतावानेव विशेष इति ध्वनितम् ॥ १४ ॥ १५ ॥ नानाविधेष्वनुनयेषु कोविदः ॥ १६ ॥ मधुं चैत्रम् । माधवं वैशाखम् । गोपीनां रतिमिति ।

ष्वंगमालिंगनम् ॥ १९ ॥ ताः गोपीः । नानाप्रकारा येऽनुनया बोधकवाक्यानि तेषु कोविदः । ता इति याः खलु तादृगवस्था अपि ‘ कच्चिदास्ते ’ इत्यनेन पद्येन तत्सुखादेव सुखं मन्यमानाः, याश्च ‘ अपि वा ’ इत्यर्द्धेन स्वकर्तृकतत्सेवनाय तत्कर्तृकस्मरणमात्रेण कृतार्थं मन्यमानाः, याश्च ‘ मातरम् ’ इत्यनेन तदर्थं साक्षादेव मात्रादिकं सर्वमपि त्यक्तवत्यः, याश्च ‘ ता नः ’ इत्यर्द्धेन स्वेषां तु तस्मिन्नविचलसौहृद्यं विज्ञापितवत्यः, याश्च ‘ कथं नु ’ इत्यर्द्धेन स्वीयभावस्य तदेकनिष्ठकैमुत्याय द्वयंतरभावमपि प्रमाणीकृतवंत्यः, याश्च ‘ कथं नु गृह्णंति ’ इत्यर्द्धान्तरेण तस्यानवस्थितात्मकत्वं कृतघ्नत्वं च दर्शयित्वा स्वेषां तदव्यभिचारित्वं निश्चितवत्यः, याश्च ‘ गृह्णन्ति ’ इत्यर्द्धान्तरेण स्वेषां तदेकहृताचित्तत्वं सूचितवत्यः, याश्च ‘ किं नु तत्कथया ’ इत्युक्त्या महद्विरहदुःखासहिष्णुतया स्वमनःकठिनीभावाय निवृत्तप्राया अपि ‘ इति प्रहसिताम् ’ इति मुनींद्रवचनेन प्रत्युत तदीयस्नेहवारिधिमग्नतया लब्धद्रवा इत्यवगतास्तादृश्यस्ताः । आसां तावद्धेतुकवधांतसंध्यामारभ्य कुरुक्षेत्रगमनावधितदेकजीवनवर्णनेत्यर्थः । अत एवोत्तरे गोपीनामित्यत्राभियुक्तानामन्या एव मता इति तैर्व्याख्यास्यते । तत्र श्रीसंकर्षणस्यानुनयाः प्रथमतः सास्रावलोकनकला ततस्सश्लाघतानिवेदनाकर्णता, ततः सप्रेमतद्विषयकनिजानुकम्पावर्णना, ततः सानुतापतदागमनविलंबकारणनानोपद्रवसूचना, ततः सयुक्तिकशपथतदानयनप्रतिज्ञा, ततो युष्माकमीदृशरोदनार्तिं श्रुत्वा स तु प्राणकोटिप्रियतमो बहुतरं दुःखं प्राप्स्यतीति बिभीषिकेत्येवंरूपाः । श्रीकृष्णसंदेशानां हृदयंगमत्वं पराशरेण दर्शितम्—“ संदेशैः साममधुरैः प्रेमगर्भैरगर्वितैः । रामेणाश्वासिता गोप्यः कृष्णस्यातिमनोहरैः ॥ ” इति । तत्र साम्ना—स्तुतिपूर्वकाश्वासनेन । मधुरैरभिरुचितैः । स्तुतिश्च—‘ न पारयेयं निरवद्यसंयुजाम् ’ इत्यादिरूपा । आश्वासनम्—‘ अचिरान्मामुपैष्यथ ’ इत्येवंविधम् । प्रेमगर्भत्वम्—‘ यत्त्वहं भवतीनां वै ’ इत्यादिरूपम् । अगर्वितत्वम्—‘ तद्वः प्रतियातु साधुना ’ इत्येवंप्रकारम् । एवं च पूर्ववन्नित्यप्रियकृष्णसंयोगमयप्रकाशविशेषव्यंजनयातिमनोहरैरित्यर्थः । संकर्षण इति तासां मन आकृष्य श्रीकृष्णं प्रति प्रापकत्वादिति तोषणीकाराः । कृष्णस्य संदेशैरिति उद्धवस्य दास्यभावः, संकर्षणस्य वात्सल्यभावश्च कृष्णेन गणितः । किन्तूभयोः सख्यभाव एव संदेशप्रेषणे हेतुरभूदिति । बहुवचनेन कश्चित्संदेशो ज्ञानगर्भः, कश्चिदनुनयगर्भः, कश्चित्प्रभावगर्भ इत्येवं बहव एव संदेशाः । हृदयंगमैः रहस्यत्वात्सर्वत्र प्रकाशयितुमनर्हैः । नानानुनयकोविद इति—भो वत्स्यः समाश्वसित सांप्रतमहमेव द्वारवतीं गत्वा बलादेव तमिहानयिष्यामि नाहमुद्धव इव तदधीन एव केवलमिति स्वप्रौढिज्ञापक इत्यर्थ इति विश्वनाथः ॥ १६ ॥ तत्र व्रजे । अभियुक्तप्रसिद्धिस्तत्परप्रसिद्धिः, किंवदन्त्यस्तीत्यर्थः । “ अभियुक्तः परै रुद्धे तत्परे त्वभिधेयवत्” इति मेदिनी । गोपीनां गोप्यंतराणामित्येवार्थः । नानावाचकशब्दानां युक्त एवार्थो गृह्यते सैंधवमानयेतिवत् । न हि सर्वत्र गोपीशब्देन श्रीकृष्णप्रेयस्य एव गृहीता इति नियमः।“गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम्” इह ‘गोप्यस्तूर्णं समभ्येत्य’ इति, ‘रुदितमनुनिशम्य तत्र गोप्यः’ इति, “कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलम्” इह, ‘गोप्याददे त्वयि कृतागासि दाम—’ इह च तथा “परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेव च” इत्यत्र च व्यभिचारात् । न च पूर्वोत्तराणां प्रसंगप्राप्तत्वेनैकत्वमाशंक्यम्, यथा तत्प्राप्ततमत्वेऽपि स्वायंभुवांतरारंभगतपृथिवीमज्जनेनैव स्वजातहिरण्याक्षवधानुपपत्त्या तन्मज्जनमन्यदेव समर्थनीयं तथेहायुक्तप्रागुक्तान्यथानुपपत्त्या पूर्वाभ्यस्ता एता अन्या एवेति तस्मात्प्रकरणमिदमेवावतार्यम् । एवं कृष्णप्रियाः सुष्ठु सांत्वयित्वैव याः खलु कौमारगतेन ‘गोप्योंतरेण भुजयोः ’ इत्यनेन या अनुभूतास्ता एव ग्राह्याः॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्णचंद्रकलामृष्टे कौमुदीगंधवायुना ॥ यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः ॥ १८ ॥ वरुणप्रेषिता देवी वारुणी वृक्षकोटरात् ॥ पतंती तद्वनं सर्वं स्वगंधेनाध्यवासयत् ॥१९॥ तं गंधं मधुधाराया वायुनोपहृतं बलः ॥ आघ्रायोपगतस्तत्रललनाभिः समं पपौ ॥ २० ॥ उपगीयमानचरितो वनिताभिर्हलायुधः ॥ वनेषु व्यचरत्क्षीबो मदविह्वललोचनः ॥ २१ ॥ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया॥ बिभ्रत्स्मितमुखांभोजं स्वेदप्रालेयभूषितम् ॥ २२ ॥ स आजुहाव यमुनां जलक्रीडार्थमीश्वरः ॥ निजं वाक्यमनादृत्य मत्त इत्यापगां बलः ॥ अनागतां हलाग्रेण कुपितो विचकर्ष ह ॥ २३ ॥ पापे त्वं मामवज्ञाय यन्नायासि मयाऽऽहुता ॥ नेष्ये त्वां लांगलाग्रेण शतधा कामचारिणीम् ॥ २४ ॥ एवं निर्भर्त्सिता भीता यमुना यदुनंदनम् ॥ उवाच चकिता वाचं पतिता पादयोर्नृप ॥ २५ ॥ रामराम महाबाहो न जाने तव विक्रमम् ॥ यस्यैकांशेन विधृता जगती जगतः पते ॥२६॥ परं भावं भगवतो भगवान्मामजानतीम्॥ मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल ॥२७॥ ततो व्यमुंचद्यमुनां याचितो भगवान्बलः ॥ विजगाह जलं स्त्रीभिः करेणुभिरिवेभराट् ॥ २८ ॥ कामं विहृत्य सलिलादुत्तीर्णायासितांबरे ॥ भूषणानि महार्हाणि ददौ कांतिः शुभां स्रजम् ॥२९॥

श्रीकृष्णक्रीडासमयेऽनुत्पन्नानामतिबालानामन्यासामित्यभियुक्तप्रसिद्धिः ॥ १७ ॥ पूर्णचंद्रस्य कलाभिर्मरीचिभिरामृष्टे उज्ज्वले कौमुदीगंधवायुना कुमुद्वतीनां गंधवातेन सेविते । यद्वा कौमुदीशब्देन तद्विकासितानि कुमुदानि लक्ष्यंते कुमुदगंधवातेनेत्यर्थः ॥ १८ ॥ वारुणी सुधया सहोत्पन्ना मदिरा ॥ १९ ॥ २० ॥ क्षीबो मत्तः ॥ २१ ॥ स्वेद एव प्रालेयं हिमं तेन भूषितम् ॥ २२ ॥ मत्तोऽयमित्यनादृत्यानागतामापगां नदीम् ॥ २३ ॥ आहुता आहूता यद्यस्मान्नागच्छसि तस्मात् नेष्ये गमयिष्यामि ॥ २४ ॥ चकिता कंपिता ॥ २५ ॥ एकांशेन शेषाख्येन ॥ २६ ॥ २७ ॥ विजगाहावगाहनं कृतवान् ॥ २८ ॥ उत्तीर्णाय निर्गतायासितांबरादीनि कांति

“ कला वृद्धिमरीच्योश्च कला रक्षणमाययोः” इति धरणिः । कुमुदानि सन्त्यास्विति कौमुदाः सरस्यस्तासां कुमुद्वतीनामित्यर्थः । अत्रार्थे कुमुदानां गंधस्य कुमुद्वतीष्वारोपात्सौष्ठवानुपलब्धेरर्थांतरमाह—यद्वेति । इत्यर्थ इति—अयमर्थोऽपि लक्षणालब्धत्वात्प्राक्तनार्थसदृशो यद्यप्यस्ति तथापि कुमुद्वतीनां गंधासंभवादर्थानुपपत्त्या लक्षणैवोचितेति स्वामिचरणाशयः ॥१८॥ अध्यवासयत् सुगन्धितं चकार । प्राकृतमदिरातो वैलक्षण्यमाह—देवी देवतारूपा लक्ष्मीसहोदरीत्वादिति भावः ॥१९॥ तमपूर्वम् । यत्र वृक्षात्पतति तत्रेत्यर्थः । ‘ महेला ललना रामा ’ इति धरणिः ॥२०॥ वन्यंते सेव्यन्ते कामिभिरिति वनिताः स्त्रियः । ‘वन–संभक्तौ’ कर्मणि क्तः ॥२१॥ वैजयन्त्या पंचरत्नरचितया॥२२॥ अयं बलो मत्त इति हेतोरनागतामप्राप्ताम् । मत्तस्य वाक्यं न प्रमाणं यतो नदीमप्याह्वयसे, मज्जले विजिहीर्षा चेत्तर्हि स्वयमेवागच्छत्वित्यनादृत्यानागताम्॥२३॥ आहुतेति छांदसो ह्रस्वः । वस्तुतस्तु पापे निमित्ते लोकानां पापनिवृत्त्यर्थं स्वेच्छयेतस्ततो बहुधा गामिनीमित्यर्थः । देवी चेयं संज्ञाछायान्यायेन लक्ष्म्या विविधमूर्तिवत्तन्महिषीति ज्ञेयम् । यमुना चेयं समुद्रभार्या । समुद्रस्यापि भगवद्विभूतित्वात्तद्भार्यात्वमपि कालिंद्याः संगच्छत एवेति । वस्तुतस्तु द्वितीयव्यूहस्य भार्येयं कांतिरिति ॥ २४ ॥ एवम् ‘ पापे त्वं माम् ’ इत्याद्युक्तप्रकारेण ॥ २५ ॥ जगती भूः ॥ २६ ॥ परं भावं पारमैश्वर्यम् । मोक्तुं त्यक्तुम् । विश्वात्मन्सर्वाधार ॥ २७ ॥ ततः प्रार्थनातः ॥ २८ ॥ “ कांतिर्लक्ष्मी रमा माया वार्द्धिजा विष्णुवल्लभा । विभूतिर्भूतिपद्मा मा हिमांशुभगिनी शुभा ॥ ” इति धरणिः । वैष्णवे विष्णुपुराणे । अस्मै बलाय ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसित्वा वाससी नीले मालामामुच्य कांचनीम् ॥ रेजे स्वलंकृतो लितो[1] महेंद्र इव वारणः ॥ ३० ॥

ददौ । कांतिर्लक्ष्मीः यथोक्तं वैष्णवे । "वरुणप्रहिता चास्मै मालामम्लानपंकजाम् ॥ समुद्राभे तथा वस्त्रे नीले लक्ष्मीरयच्छत" इति ॥ हरिवंशे च बलं प्रति लक्ष्मीवाक्यम् "जातरूपमयं चैकं कुंडलं वज्रभूषणम् ॥ आदिपद्मं च पद्माख्यं दिव्यं श्रवणभूषणम् ॥ देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियाम् " इत्यादि ॥ २९ ॥ वसित्वा

मुद्रा लतादिचिह्नम्, तत्सहिते समुद्रे आभाते इत्याभे ते च ते समुद्राभे । यद्वा–मुद्राभिरामा मुद्राभा, तया सहिते समुद्राभे । जातरूपं सुवर्णम् । वज्रो हीरकमणिः । आदिपद्मम् ' महापद्मश्च पद्मश्च ' इत्यत्र निधिगणनायां पद्मस्यादिर्महापद्मोस्ति, तेन तदधिष्ठितकमलं ददौ । तच्च पद्माख्यं कर्णभूषणमुच्यते, तदपि देवानामेवास्तीत्याह–दिव्यश्रवणभूषणमिति प्रतीयत इति । पौराणीं प्राक्तनशेषरूपदेवदेहसंबंधिनीम् । " कदम्बकोटरे जाता नाम्ना कादम्बरीति सा । रूपिणी वारुणी तत्र देवानाममृतारणी ॥ कादम्बरीम् मदकलं विदित्वा कृष्णपूर्वजम् । तिस्रस्त्रिदशनार्यस्तमुपतस्थुः प्रियंवदाः ॥ मदिरारूपिणी भूत्वा कान्तिश्च शशिनः प्रिया । श्रीश्च देवी वरिष्ठा स्त्री स्वयमेवाम्बुजध्वजा ॥ सांजलिप्रग्रहा देवी रौहिणेयमुपस्थिता । वारुण्या सहिता वाक्यमुवाच मदविह्वलम् ॥ बलं जयस्व देवानां बलदेव दिवीश्वर । अहं ते दयिता कांता वारुणी समुपस्थिता ॥ त्वामेवांतर्हितं श्रुत्वा शाश्वतं वडवामुखे । क्षीणपुण्येव वसुधां पर्येमि विमलानन ॥ पुष्पचक्रानुलितेषु केसरेषूषितं मया । अतिमुक्तेषु चाक्षोभ्य पुष्पस्तबकवत्सु च ॥ अहं कदंबमालीना मेघकाले मुखप्रिया । तृषितं मार्गमाणा त्वां स्वेन रूपेण छादिता ॥ सास्मि पूर्णेन योगेन यथैवामृतमंथने । समीपं प्रेषिता पित्रा वरुणेन तवानघ ॥ सा यथैवार्णवगता तथैव वडवामुखे । त्वयोपभोक्तुमिच्छामि संमतस्त्वं हि मे गुरोः ॥ न त्वानन्त परित्यक्ष्ये भर्त्सितापि त्वयानघ । नाहं त्वया विना लोकानुत्सहे देव सेवितुम् ॥ आदिपद्मं च पद्मं च दिव्यं श्रवणभूषणम् । समुद्रार्हाणि नीलानि कौशेयानि च बिभ्रती ॥ मदिरानन्तरं कान्तिः संकर्षणमुपस्थिता । मदेनागलितश्रोणी किंचिदाघूर्णितेक्षणा ॥ प्रोवाच प्रणयात्कांतिर्बद्धांजलिपुटा सती । जयपूर्वेण योगेन सस्मितं वाक्यमर्थवत् ॥ अहं चंद्रादपि गुरुं सहस्रशिरसं प्रभुम् । स्वैर्गुणैरनुरक्ता त्वां यथैव मदिरा तथा ॥ श्रीश्च पद्मालया देवी विधेया वैष्णवोरसि । रौहिणेयोरसि शुभा मालेवामलतां गता ॥ सा मालाममलां गृह्य बलस्योरसि दर्शिता । पद्मास्या पद्महस्ता वै संकर्षणमथाब्रवीत् ॥ राम रामाभिरामस्त्वं वारुण्या समलंकृतः । कांत्या मया च देवेश संगतश्चन्द्रमा यथा ॥ इयं च सा मया मौलिः प्रोद्धृता वरुणालयात् । मूर्ध्नि शीर्षसहस्रस्य याते भानुरिवाबभौ ॥ जातरूपमयं चैकं कुंडलं वज्रभूषितम् । आदिपद्मं च पद्मं च दिव्यं श्रवणभूषणम् ॥ कौशेयानि च नीलानि समुद्रार्हाणि भावतः । हारश्च पीनतरलं समुद्राभ्यंतरोषितम् ॥ देवेमां प्रतिगृह्णीष्व पौराणीं भूषणक्रियाम् । समयस्ते महाबाहो भूषणानामलंक्रिया ॥ संगृह्य तमलंकारं ताश्च तिस्रः सुरस्त्रियः । शुशुभे बलदेवो हि शारदेंदुसमप्रभः ॥" इति । अत्र वडवामुखे वडवाग्निसन्निधौ । पाताले शेषरूपेण नित्यं स्थितं त्वामिदानीमंतर्हितम् । एतेन रामः पूर्ण एव शेषो न तु शेषांश इत्युक्तम् । पर्येमि परिभ्रमामि, अन्वेषयितुमिति शेषः । पुष्पचक्रं विकसितसमुदायः । केसराणां पुष्पविशेषाणामेव तेनानुलितेषु केसरवत्सु कुसुमादिषु अतिमुक्तेषु । वासन्तीलतासु पूर्णेन योगेन सर्वांगसम्पत्त्या युक्ता सती त्वया कर्त्रात्मानं भोक्तुमीहे । गुरोः पितुः । कांतिर्मूर्तिमती । जयपूर्वेण योगेन । रामसंबोधनेन हे राम त्वं जयेति शब्देनाभिमुखीकृत्येति शेषः । श्रीश्च वैष्णव्यपी राममेवानुमतेत्याह–श्रीश्चेति । दर्शिता वस्त्रभूषाद्यलंकृता । मौलिर्मुकुटः । वज्रं हीरकम् । समुद्रो मनोरथस्तदर्हाणि । भावतोऽत्यादरेण । भूषणानामेवालंक्रिया त्वया न तु तैस्त्वेति भावः । द्वितनुत्वेऽपि तयोरेकरूपत्वात्तत्र लक्ष्मीस्त्रीकारोपि न विरुद्ध इति विष्णुपर्वणि पञ्चनवतितमाध्याये वर्णितम् ॥ २९ ॥ माहेन्द्र ऐरावतः ॥ ३० ॥

---

१ वाजपेयसौत्रामण्यादिषु सराग्रहवत्सु क्रतुषु यदास्वादनेन पुरुषाः स्वर्गं प्राप्यामृतपानमप्याप्नुवन्तीत्यमृतारणत्वं तस्या इति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अद्यापि दृश्यते राजन्यमुना कृष्टवर्त्मना ॥ बलस्यानंतवीर्यस्य वीर्यं सूचयतीव हि ॥ ३१ ॥ एवं सर्वा निशा याता एकेव रमतो व्रजे ॥ रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषिताम् ॥ ३२ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे बलदेवविजये यमुनाकर्षणं नाम पंचषष्टितमोऽध्यायः ॥ ६५ ॥छ॥ श्रीशुक उवाच ॥ नंदव्रजं गते रामे करूषाधिपतिर्नृप ॥ वासुदेवोऽहमित्यज्ञो दूतं कृष्णाय प्राहिणोत् ॥ १ ॥ त्वं वासुदेवो भगवानवतीर्णो जगत्पतिः ॥ इति प्रस्तोभितो बालैर्मेन आत्मानमच्युतम् ॥ २ ॥ दूतं च प्राहिणोन्मंदः कृष्णायाव्यक्तवर्त्मने ॥ द्वारकायां वृथा बालो नृपो बालकृतोऽबुधः ॥ ३ ॥ दूतस्तु द्वारकामेत्य सभायामास्थितं प्रभुम् ॥ कृष्णं कमलपत्राक्षं राजसंदेशमब्रवीत् ॥४ ॥ वासुदेवोऽवतीर्णोऽहमेक एव न चापरः ॥ भूतानामनुकंपार्थं त्वं तु मिथ्याऽभिधां त्यज॥५॥यानि त्वमस्मच्चिह्नानि मौढ्याद्बिभर्षि सात्वत ॥ त्यक्त्वैहि मां त्वं शरणं नो चेद्देहि ममाऽऽहवम् ॥ ६ ॥ श्रीशुक उवाच ॥ कत्थनं तदुपाकर्ण्य पौंड्रकस्याल्पमेधसः ॥ उग्रसेनादयः सभ्या उच्चकैर्जहसुस्तदा ॥७॥ उवाच दूतं भगवान्परिहासकथामनु ॥ उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वमेवं विकत्थसे ॥ ८ ॥

परिधाय । आमुच्य कंठे निधाय । चंदनादिभिरालिप्तः ॥ ३० ॥ ३१ ॥ एकेव एकैव निशा यथा तथा माधुर्यैर्विलासैः ॥ ३२ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायां पंचषष्टितमोऽध्यायः ॥ ६५ ॥ षड्युक्षष्टितमे काशीं गत्वाऽहन् पौंड्रकं हरिः ॥ तन्मित्रं च ततो वृत्तं सुदक्षिणवधादिकम् ॥ १ ॥ १ ॥ प्रस्तोभितः स्तुत्या प्रोत्साहितः । बालैरज्ञैः ॥ २ ॥ बालकृतो नृपो बालैर्नृपत्वेन क्रीडायां परिकल्पितः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ हे मूढ उत्स्रक्ष्ये त्वयि प्रक्षेप्स्यामि ।

आकृष्टवर्त्मनाऽऽकर्षणमार्गेण उपलक्षिता ॥ ३१ ॥ आक्षिप्तचित्तस्य वशीकृतमनसः । एकैवेति प्रतिरजनि नवनवायमानानुभवात् ॥ ३२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ तन्मित्रं पौंड्रकमित्रं काशीशम् । ततः काशीशमरणोत्तरम् । वृत्तं जातम् । आदिपदात्काशीदाहादिग्रहः (१) । करूषो देशविशेषस्तदधिपतिः ॥ १ ॥ आत्मानं निजम् ॥ २ ॥ द्वारकायां कृष्णायेत्यन्वयः । तथा त्वमबुध आत्मानं कृष्णं मेन इति पूर्वेणान्वयः ॥ ३ ॥ राजसंदेशं पौंड्रकाज्ञाम् ॥ ४ ॥ ५ ॥ अस्मच्चिह्नानि चक्रादीनि । सात्वतेति हे यादवविशेषेति अनादरात् । वस्तुतस्तु न चाहं भूतानामनुकंपार्थं वासुदेवोऽवतीर्णः यतोऽपरः अश्रेष्ठस्तुच्छ इत्यर्थः । किन्तु त्वमेवावतीर्णः । अतः शुक्तौ रजतस्येव मयि या तव मिथ्याभिधा तां त्यज त्याजयेत्यर्थः । साक्षात्तं प्रति वक्ष्यते स्वयं भगवानेव " त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतम् " इति । तथा मौढ्याद्धेतोर्यान्यस्मच्चिह्नानि कल्पितचक्रादीनि बिभर्षि तानि त्यक्त्वा प्रक्षिप्य शरणं मुक्तिदत्वादाश्रयस्तन्मामेहि स्वीकुर्वित्यर्थः । यदि सहसाऽस्त्रविमोक्षं न करोषि तदा मह्यं युद्धं देहीति । युधि मां हत्वा मोक्षं प्रापयेति भावः । " येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । तेते गता विष्णुपुरीं नरेंद्राः क्रोधोऽपि देवस्य वरेण तुल्यः ॥ " इत्युक्तेः ॥ ६ ॥ कत्थनम् व्यर्थभाषणम् । तदहं वासुदेव इत्येवंरूपम् । तदा श्रवणकाले ॥ ७ ॥ यैः पार्श्वस्थैर्नरैः । इत्यर्थ इति—मूर्खैस्सहितो मूर्ख उच्छृंखलो भवसीत्यतस्तैस्सहैव तव नाश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुखं तदपिधायाज्ञ कंकगृध्रवटैर्वृतः ॥ शयिष्यसे हतस्तत्र भविता शरणं शुनाम् ॥ ९ ॥ इति दूतस्तदाक्षेपं स्वामिने सर्वमाहरत् ॥ कृष्णोऽपि रथमास्थाय काशीमुपजगाम ह ॥ १० ॥ पौंड्रकोऽपि तदुद्योगमुपलभ्य महारथः ॥ अक्षौहिणीभ्यां संयुक्तो निश्चक्राम पुराद्द्रुतम् ॥ ११ ॥ तस्य काशीपतिर्मित्रं पार्ष्णिग्राहोऽन्वयान्नृप ॥ अक्षौहिणीभिस्तिसृभिरपश्यत्पौंड्रकं हरिः ॥ १२ ॥ शंखार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितम् ॥ बिभ्राणं कौस्तुभमणिं वनमालाविभूषितम् ॥ १३ ॥ कौशेयवाससी पीते वसानं गरुडध्वजम् ॥ अमूल्यमौल्याभरणं स्फुरन्मकरकुंडलम् ॥ १४ ॥ दृष्ट्वा तमात्मनस्तुल्यवेषं कृत्रिममास्थितम् ॥ यथा नटं रंगगतं विजहास भृशं हरिः ॥ १५ ॥ शूलैर्गदाभिः परिघैः शक्त्यृष्टिप्रासतोमरैः ॥ असिभिः पट्टिशैर्बाणैः प्राहरन्नरयो हरिम् ॥ १६ ॥ कृष्णस्तु तत्पौंड्रककाशिराज योर्बलं गजस्यंदनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरार्दयद्भृशं यथा युगांते हुतभुक्पृथक्प्रजाः ॥ १७ ॥ आयोधनं तद्रथवाजिकुंजरद्विपत्खरोष्ट्रैर्हरिणाऽवखंडितैः ॥ बभौ चितं मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् ॥ ॥ १८ ॥ अथाह पौंड्रकं शौरिर्भोभोः पौंड्रक यद्भवान् ॥ दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥ १९ ॥

यैः सह त्वमेवं विकत्थसे तेष्वपीत्यर्थः । यद्वा यैः कृत्रिमैः सुदर्शनादिभिस्त्वमेवं श्लाघसे तान्युत्स्रक्ष्ये त्याजयिष्यामीत्यर्थः ॥ ८ ॥ मां शरणमेहीत्यस्योत्तरम् । मुखमिति । वटाः कंकादिवत्पक्षिविशेषाः । तत्र तदा शुनां शरणमाश्रयो भविताऽसि ॥ ९ ॥ काशीमिति । पौंड्रकस्यापि तदा मित्रपुरेऽवस्थानात् ॥ १० ॥ ११ ॥ पार्ष्णिग्राहः पृष्ठतो रक्षकः ॥ १२ ॥ १३ ॥ गरुडः कृत्रिमो ध्वजे यस्य तम् । अमूल्योऽनर्घ्यो मौलिराभरणं च यस्य तम् ॥ १४ ॥ १५॥ १६॥ गजस्यंदनादिचतुरंगबलमर्दितवान् । पृथक् प्रजाश्चतुर्विधं भूतग्रामं यथा युगांताग्निरिति ॥ १७ ॥ आयोधनं रणस्थानम् । अरिणा चक्रेण चितमाक्रीडनमिव कल्पांत रुद्रस्य क्रीडास्थानमिव ॥ १८॥ १९॥

उचित इति भावः । तत्प्रोत्साहकानामत्रानुक्तेरर्थान्तरमाह—यद्वेति । इत्यर्थ इति—अंतर्भावितण्यर्थः उत्स्रक्ष्ये उत्सर्जयिष्यामीति ध्येयम् । यद्वा—चिह्नानि स्वीयसुदर्शनादीनि उत्स्रक्ष्ये प्रक्षेप्स्यामि यैः सह त्वमेवं विकत्थसे भाषसे तेष्वपीत्यर्थः ॥ ८ ॥ तत्ततोऽर्थान्मदस्त्रत्यागोत्तरम् । यद्वा—येन मुखेन संप्रत्येवं ब्रूषे तन्मुखम् । अपिधायाच्छाद्य । शुनां सारमेयाणाम् । श्वानस्त्वां सुखेन भोक्ष्यन्तीति भावः ॥ ९ ॥ इत्युक्तम् । स्वामिने पौंड्राय । तदा प्रेषणादिसमये । मित्रपुरे काश्याम् ॥ १० ॥ तदुद्योगं कृष्णोद्योगम् । द्रुतं क्षिप्रम् ॥ ११ ॥ तस्य पौंड्रकस्य । काशीशब्दो विभाषया ङीषंतः "कृदिकारादक्तिनः" इति विधानात् । काशते प्रलयेऽपि प्रकाशते तेजोरूपेणेति काशी 'काशृ—दीप्तौ' अतो धातोरिः । मित्रमासीदिति शेषः ॥ १२ ॥ आरि चक्रम् । आदिना नंदकादिग्रहः ॥ १३ ॥ मौलिर्मुकुटम् । आभरणं कंकणोर्मिकादिरूपम् । "मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् । नाऽसावद्रौ स्त्रियां भूमौ" इति मेदिनी । अमूल्योऽल्पमूल्यः कृत्रिमत्वात् ॥ १४ ॥ तं पौंड्रकम् ॥ १५ ॥ अरयः पौंड्रसैनिकाः ॥ १६ ॥ तद्बलम् । युगांते प्रलये ॥ १७ ॥ मनस्विनां शूराणाम् 'मनस्वी योगिशूरयोः' इति धरणिः । भूतपते रुद्रस्य ॥ १८ ॥ अथ सेनाछेदोत्तरम् । वासुदेवोऽवतीर्णोऽहं यानि त्वमस्मच्चिह्नानीत्यादिकं यदाह—ते तानि उत्स्रजानि मुंचामि ते त्वयि वेत्यर्थः ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्याजयिष्येऽभिधानं मे यत्त्वयाऽज्ञ मृषा धृतम् ॥ व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगम् ॥ २० ॥ इति क्षिप्त्वा शितैर्बाणैर्वि
रथीकृत्य पौण्ड्रकम् ॥ शिरोऽवृश्चद्रथांगेन वज्रेणेंद्रो यथा गिरेः ॥ २१ ॥ तथा काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः ॥ न्यपातयत्का
शिपुर्यां पद्मकोशमिवानिलः ॥ २२ ॥ एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः ॥ द्वारकामाविशात्सिद्धैर्गीयमानकथामृतः ॥ २३ ॥
स नित्यं भगवद्ध्यानप्रध्वस्ताखिलबंधनः ॥ बिभ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् ॥ २४ ॥ शिरः पतितमालोक्य राजद्वारे सकुंडलम् ॥ कि
मिदं कस्य वा वक्त्रमिति संशयिरे जनाः ॥ २५ ॥ राज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्रबांधवाः ॥ पौराश्च हा हता राजन्नाथनाथेति प्रारुदन् ॥ २६ ॥
सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहंतारं यास्याम्यपचितिं पितुः ॥२७॥ इत्यात्मनोऽभिसंधाय सोपाध्यायो महेश्वरम् ॥
सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ २८ ॥ प्रीतो विमुक्तो भगवांस्तस्मै वरमदाद्भवः ॥ पितृहंतृवधोपायं स वव्रे वरमीप्सितम् ॥ २९ ॥

॥ २० ॥ गिरेः शृंगं यथेति॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ प्रथमं किमिदमिति पश्चाद्वक्त्रमिति विभाव्य कस्य चेति संशयं कृतवंत इति ॥ २५ ॥ २६ ॥
संस्थाविधिमुत्तरीक्रियाम् । अपचितिं निष्कृतिम् ॥२७॥ आत्मनाऽभिसंधाय बुद्ध्या व्यवस्य । सुदक्षिणोऽत्युदारः ॥ २८ ॥ वरमदात् वृणीष्वेत्युक्तवानित्यर्थः ॥ २९ ॥

त्याजयिष्ये हापयिष्यामि ॥ २० ॥ रथांगेन चक्रेण । " रथांगं न द्वयोश्चक्रे ना चक्रांगविहंगमे " इति मेदिनी ॥ २१ ॥ यथा पौंड्रकस्य रथांगेन तथा काशिपतेः पत्रिभिरिति योज्यम् । पद्मकोशः पद्ममुकुलम् । काशीराजस्य शिरसः काशीमध्यानिक्षेपे इदं कारणमुन्नेयम्—भोभोः काशिस्था अद्य शत्रोः शिर एव काशीमध्य उन्नेष्यामि मात्रसंशेध्वमिति प्रतिज्ञायैव युद्धाय काशीराजो यदगच्छत् अस्मद्भर्ताद्य द्वारकापतेः शिरोऽवश्यमा नेष्यतीति तत्पत्न्योऽपि पापिन्यः सप्रौढिस्ववयस्याः प्रति यदजल्पंस्तत एव हेतोस्तस्यैव शिरः काशीमध्ये तत्रत्यजनान्विस्मापयितुं प्रवेशयामास कौतुकी भगवानिति ॥ २२ ॥ एवमुक्तरीत्या ॥ २३ ॥ स पौंड्रकः। तन्मयः कृष्णस्वरूपः कृष्णसारूप्यमेव पेशस्कारीहृतकीटवदिति भावः ॥ २४ ॥ २५ ॥ २६ ॥ तत्पुत्रस्ततोऽपि दुर्बुद्धिरित्याह—तस्य काशिपतेः । " भवेदपाचितिः पूजाव्ययनिष्कृतिहानिषु" इति मेदिनी ॥ २७ ॥ इतीत्थम् । समाधिना ध्यानेन " समाधिर्ना समर्थने । ध्याने नीवाकनियमे काव्यस्य च गुणांतरे " इति मेदिनी । नीवाको धान्यसञ्चयः ॥ २८ ॥ अविमुक्तो महादेवः । ' अविमुक्तं हि मे गृहम् ' इति हरिवंशे पार्वतीं शिवः । " सो विमुक्ते प्रतिष्ठितः " इति जाबालश्रुतेश्च कुत्र तदविमुक्तमित्याकांक्षायाम् । " वरणायांनास्यां च मध्ये प्रतिष्ठितः " इति श्रुतेर्वाराणसीक्षेत्रं लभ्यते तत्रस्थत्वाच्छिवोप्याविमुक्त इत्युच्यते । तस्मै सुदक्षिणाय । स सुदक्षिणः । इत्यर्थ इति—वरशब्दस्य जामात्राद्यर्थकत्वादित्थं व्याख्येयमिति भावः । प्रीत इति तत्प्रतीत्यपेक्षया अविमुक्तस्तत्रत्याविमुक्ताख्यक्षेत्राधिष्ठातृत्वेन तत्संज्ञः । " अविमुक्ते महाक्षेत्रे भाषितस्तेन शंकरः " इति वैष्णवोक्तेः । भगवानिति—सर्वज्ञत्वादेव सव्याजं वरं ददाविति भावः । वधस्योपायमेव न तु वधमिति तदानीमपि बुद्धिविभ्रंशं चकारेति लक्ष्यते । ब्राह्मणैः सममिति तस्य यज्ञस्य तन्मूलत्वात्तद्भक्ते तु स न द्विष्यात्, एते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणाग्निं परिचर ब्राह्मणैः सममृत्विजम् ॥ अभिचारविधानेन स चाग्निः प्रमथैर्वृतः॥३०॥ साधयिष्यति संकल्पमब्रह्मण्ये प्रयोजितः॥इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्व्रती ॥ ३१ ॥ ततोऽग्निरुत्थितः कुंडान्मूर्तिमानतिभीषणः ॥ तप्ततामशिखाश्मश्रुरंगारोद्गारिलोचनः ॥ ३२ ॥ दंष्ट्रोग्रभ्रुकुटी दंडकठोरास्यः स्वजिह्वया ॥ आलिहन्सृक्किणी नग्नो विधुन्वंस्त्रिशिखं ज्वलत् ॥ ३३ ॥ पद्भ्यां तालप्रमाणाभ्यां कंपयन्नवनीतलम् ॥ सोऽभ्यधाव द्वृतो भूतैर्द्वारकां प्रदहन्दिशः ॥ ३४ ॥ तमाभिचारदहनमायांतं द्वारकौकसः ॥ विलोक्य तत्रसुः सर्वे वनदाहे मृगा यथा ॥ ३५ ॥ अक्षैः सभायां क्रीडंतं भगवंतं भयातुराः ॥ त्राहित्राहि त्रिलोकेश वह्नेः प्रदहतः पुरम् ॥ ३६ ॥ श्रुत्वा तज्जनवैक्लव्यं दृष्ट्वा स्वानां च साध्वसम् ॥ शरण्यः संप्रह स्याह मा भैष्टेत्यविताऽस्म्यहम् ॥ ३७ ॥ सर्वस्यांतर्बहिःसाक्षी कृत्यां माहेश्वरीं विभुः ॥ विज्ञाय तद्विघातार्थं पार्श्वस्थं चक्रमादिशत् ॥ ३८ ॥

ऋत्विजमृत्विजमिव स्वनियोगकारिणम् । " यज्ञस्य देवमृत्विजम् " इति श्रुतेः ॥ ३० ॥ अब्रह्मण्ये प्रयोजित इति कृष्णे प्रयोजितो विपरीतो भविष्यतीति सूचितम् । अभिचरन्नभिचारं कुर्वन् । व्रती गृहीतनियमः ॥ ३१ ॥ तप्तं ताम्रमिव शिखा श्मश्रूणि च यस्य सः । अंगारोद्गारीणि ज्वलदंगारान्वमंति लोचनानि यस्य सः ॥ ३२ ॥ दंष्ट्राभिश्चोग्रैर्भ्रुकुटीदंडैश्च कठोरं क्रूरमास्यं यस्य स त्रिशिखं त्रिशूलम् ॥ ३३ ॥ दिशः प्रदहन् ॥ ३४ ॥ ३५ ॥ त्राहित्राहीत्याहुरिति शेषः ॥ ३६ ॥ अहमवितास्मि रक्षिष्यामीति ॥ ३७ ॥ ३८ ॥

च ब्राह्मणा न भवंतीति भावः ॥ २९ ॥ दक्षिणाग्निमन्वाहार्यनामानम् । " अग्निमीडे पुरोहितम्, यज्ञस्य देवं मुख्यं कृष्णस्य ब्रह्मण्यत्वात्, नमो ब्रह्मदेवाय " इति मंत्रात् । ' तद्ब्रह्मण्याग्रणीर्भवान् ' इति वसुदेवया गोपाख्याने मुन्युक्तेश्च ॥ ३० ॥ विपरीतः संकल्पनाशकः । अभिचरन्निति शत्रुवधकामः । तथैवाह–अब्रह्मण्यम् इति । ब्रह्मण्ये तु न किञ्चित्करिष्यतीति ब्रह्मण्यदेवे तु तस्मिन्प्रयोजितः सन्प्रयोजयितॄणाम् ' हलांतं ब्रह्म वर्चसम् ' इति ब्राह्मण्यादिकं नाशयन्देहनाशमपि करिष्यतीति श्रीरुद्राभिप्रायः, कश्चिद्ब्राह्मणानामपि कृष्णनमनादिश्रवणात्कृष्णस्य विप्रनमस्कारजिघृक्षोर्ब्रह्मण्यता नैवास्तीति सुदक्षिणादेरभिप्रायः । ननु ' ब्राह्मणैस्समम् ' इत्युक्तेः कथं हिंसारूपेऽभिचारे विदुषां प्रवृत्तिः । " श्येनेनाभिचरन्यजेत् " इति वेदविहितत्वादितिचेन्न, वेदोक्तोऽभिचारो वेदविहितो न भवति फलत्वात् फलं न विधेयं किन्तु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेय मिति सिद्धांतात् । अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वेन तत्र न विदुषां प्रवृत्तिः किन्तु कर्मणि सा भवत्येवेत्यलम् ॥ ३१ ॥ ततोऽभिचारविधिना यजनोत्तरम् । अंगाराण्युद्गिरंतीत्यंगारोद्गारीणि ॥३२॥ "भृकुटी भ्रुकुटी चाथो भ्रूकुटिरूर्ध्वदेशके । नेत्रयोर्धनुवद्वक्रे रोमसंघसमाकुले ॥ " इति शब्दार्थकल्पद्रुमे ॥ ३३ ॥ " अंगुष्ठस्य प्रदेशिन्या व्यासः प्रादेश उच्यते । तालः स्मृतो मध्यमया " इति कोशात् । क्वचित्तु ' तालो हस्तचतुष्टयम् ' इत्यपि । सोऽभिचाराग्निः ॥३४॥ ३५ ॥ अक्षैर्दुरोदरैः ॥३६॥ तद् त्राहित्राहीत्येवंरूपम् । साध्वसं भयम् ॥३७॥ अक्षैः सह भवतीति साक्षं ज्ञानं तदेताति जानातीति साक्षात् ज्ञातेत्यर्थः । तद्विघातार्थं

१ साक्षीत्यत्र साक्षादिति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्सूर्यकोटिप्रतिमं सुदर्शनं जाज्वल्यमानं प्रलयानलप्रभम् ॥ स्वतेजसा खं ककुभोऽथ रोदसी चक्रं मुकुंदास्त्रमथाग्निमार्दयत् ॥ ३९ ॥ कृत्यानलः प्रतिहतः स रथांगपाणेरस्त्रौजसा स नृप भग्नमुखो निवृत्तः ॥ वाराणसीं परिसमेत्य सुदक्षिणं तं सर्त्विग्जनं समदहत्स्वकृतोऽभिचारः ॥ ४० ॥ चक्रं च विष्णोस्तदनु प्रविष्टं वाराणसीं साट्टसभालयापणाम् ॥ सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालाम् ॥ ४१ ॥ दग्ध्वा वाराणसीं सर्वां विष्णोश्चक्रं सुदर्शनम् ॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ॥ ४२ ॥ य एनं श्रावयेन्मर्त्य उत्तमश्लोकविक्रमम् ॥ समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे पौंड्रकादिवधो नाम षट्षष्टितमोऽध्यायः ॥६६॥ राजोवाच ॥ भूयोऽहं श्रोतुमिच्छामि रामस्याद्भुतकर्मणः ॥ अनंतस्याप्रमेयस्य यदन्यत्कृतवान्प्रभुः ॥१॥ श्रीशुक उवाच ॥ नरकस्य सखा कश्चिद्द्विविदो नाम वानरः ॥ सुग्रीवसचिवः सोऽथ भ्राता मैंदस्य वीर्यवान् ॥ २ ॥

रोदसी च प्रकाशयादिति शेषः । यद्वा स्वतेजसा खादीन्प्रति जाज्वल्यमानमत्यर्थं प्रकाशमानामित्यर्थः । आर्दयदपडियत् ॥ ३९ ॥ अर्दितोऽग्निर्यत्कृतवांस्तदाह कृत्यानल इति सहर्त्विग्भिर्जनैश्च वर्तमानम् । अभिचर्यते मार्यतेऽनेनेत्यभिचारः कृत्यानलः ॥ ४० ॥ अट्टादिसहिताम् । अट्टा मंचः ॥ ४१ ॥ ॥ ४२ ॥ ४३ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टी० षट्षष्टितमोऽध्यायः ॥ ६६ ॥ ॥ सप्तषष्टितमे रामो गिरौ रैवतके मदात् ॥ स्वैरं युवतिभिः क्रीडन्नवधीद् द्विविदं खलम् ॥ १ ॥ कालिंदीविदारणानंतरं रामचरित्रं द्विविदवधादिसंगतमप्यनुक्त्वा तत्पूर्वभावित्वेन पौंड्रकवधादि निरूप्येदानीं तदेव प्रस्तौति भूयोऽहमित्यादिना । रामचरित्रश्रवणेच्छायामद्भुतकर्मत्वं हेतुस्तत्र चानंतत्वं तत्राप्यप्रमेयत्वमिति ॥ १ ॥ नरकस्य सखेति हरिणा वैरे कारणम् । सुग्रीवसचिव इति तस्य मंत्रबलम् ।

कृत्याविघातार्थम् । यदा भगवदाज्ञापेक्षया मूर्तिमत्त्वेन समीपेऽवतिष्ठमानं सुदर्शनमित्यर्थः॥३८॥अथ भगवदाज्ञानन्तरम् । अध्याहारे गौरवमाशंक्याह—यद्वेति।इत्यर्थ इति—गम्यमानप्रतियोगे द्वितीया।खं व्योम।ककुभो दिशः । अथात्र चार्थे ॥३९॥ स सुदाक्षिणोत्पादितः । अस्त्रौजसा सुदर्शनतेजसा । प्रतिहत आस बभूव ॥ ४० ॥ तदनु सुदक्षिणदाहोत्तरम् । " अट्टं भक्ते मंचशुष्के क्षौमेऽत्यर्थे गृहांतरे " इति धरणिः । कोष्ठमंतर्गृहम् । कोशो धनागारम् ॥ ४१ ॥ ४२ ॥ ४३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे षट्षष्टितमोऽध्यायः ॥ ६६ ॥ द्विविदं वानरम् (१) । तत्पूर्वभावित्वेन द्विविदवधात्प्राक्तनत्वेन । तदेव रामचरितमेव । तत्राद्भुतकर्मत्वे । तत्राप्यनंतत्वेपि । अन्यत् कालिंदीकर्षणेतरत् । यत्कर्म ॥१॥ 'सचिवो मंत्रिचेटयोः' इति मेदिनी । मैन्दोऽपि वानरः नरकस्य सखेति—महाभक्तराजसुग्रीवसाचिवत्वेऽपि दुःसंगदोषस्यानर्थकारित्वज्ञापनार्थमुक्तम्,दुःसंगस्यापि कारणं श्रीमल्लक्ष्मणे तस्य पूर्वमनादर आसीदिति यद्यपि मैन्दद्विविदादीनां श्रीरामपूजायामावरणदेवत्वादेव नित्यं सिद्धत्वमेव तदपि महदपराधदुःसंगदोषादिज्ञापनार्थं जयविजयवदेकेन प्रकाशेनैव द्विविदस्य भ्रंशोयं दर्शितः । संदर्भस्तु—श्रीरामपूजावरणदेवौ तु तदीयवैकुंठस्थावन्यावेव, एतौ पुनस्तच्छक्त्यावेशिनावेवेत्याह । द्विविदो रात्रौ लंकां गत्वा राक्षसीर्नग्नाः कृत्वा तासां योनीः पस्पर्श तज्ज्ञात्वा ततो रामेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सख्युः सोऽपचितिं कुर्वन्वानरो राष्ट्रविप्लवम् ॥ पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ॥ ३ ॥ क्वचित्स शैलानुत्पाट्य तैर्देशान्समचूर्णयत् ॥ आनर्ता न्सुतरामेव यत्रास्ते मित्रहा हरिः ॥ ४ ॥ क्वचित्समुद्रमध्यस्थो दोर्भ्यामुत्क्षिप्य तज्जलम् ॥ देशान्नागायुतप्राणो वेलाकूलानमज्जयत् ॥ ५ ॥ आश्रमानृ षिमुख्यानां कृत्वा भग्नवनस्पतीन् ॥ अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ॥६॥ पुरुषान्योषितो दृप्तः क्ष्माभृद्द्रोणीगुहासु सः ॥ निक्षिप्य चाप्य धाच्छैलैः पेशस्कारीव कीटकम् ॥७॥ एवं देशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रियः ॥ श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥ ८ ॥ तत्रापश्यद्यदुपतिं रामं पुष्करमालिनम् ॥ सुदर्शनीयसर्वांगं ललनायूथमध्यगम् ॥ ९ ॥ गायंतं वारुणीं पीत्वा मदाविह्वललोचनम् ॥ बिभ्राजमानवपुषा प्रभिन्नमिव वारणम् ॥ १० ॥ दुष्टः शाखामृगः शाखामारूढः कंपयन्द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन् ॥ ११ ॥ तस्य धाष्टर्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसुर्बलदेवपरिग्रहाः ॥ १२ ॥ ता हेलयामास कपिर्भ्रूक्षेपैः संमुखादिभिः ॥ दर्शयन्स्वगुदं तासां रामस्य च निरीक्षतः ॥ १३ ॥ तं ग्राव्णा प्राहरत्क्रुद्धो बलः प्रहरतां वरः ॥ स वंचयित्वा ग्रावाणं मदिराकलशं कपिः ॥ १४ ॥ गृहीत्वा हेलयामास धूर्तस्तं कोपयन्हसन् ॥ निर्भिद्य कलशं धृष्टो वासांस्यास्फालयद्बलम् ॥ १५ ॥

मैंदस्य भ्रातेति रामायणेऽतिप्रसिद्धत्वेन वीर्याधिक्यमुक्तमिति ॥ २ ॥ सख्युर्नरकस्यापचितिमानृण्यम् । राष्ट्रस्य विप्लवो नाशो यथा भवति तथा पुरादीनदहदिति ॥ ३ ॥ किंच क्वचिदिति । कदाचित्स द्विविदः मित्रहा सखिहंता ॥ ४ ॥ तस्य समुद्रस्य जलं बाहुभ्यामुत्क्षिप्य वेलायाः कूले वर्तमानान् देशान् प्लावयामासेति ॥ ५ ॥ आश्रम स्थान्वनस्पतीन् भंक्त्वा आहवनीयाद्यग्निषु मूत्रादि कृतवान् ॥ ६ ॥ अप्यधात्पिदधे । पेशस्कारी भ्रमरः ॥ ७ ॥ ८ ॥ ९ ॥ प्रभिन्नं मत्तम् ॥ १० ॥ ११ ॥ जात्या स्वभावेनैव चापलं यासां ताः ॥ १२ ॥ हेलयामासावजज्ञे । निरीक्षतो निरीक्षमाणस्य तमनादृत्येत्यर्थः ॥ १३ ॥ १४ ॥ आस्फालयद्योषितां वासांस्याकृष्य पाटि

सैन्यान्निष्कासितस्तत्प्रार्थितेन पुनरुक्तम् बलदेवाद्द्वापरे मृत्युं प्राप्य पुनः स्वर्लोकं गमिष्यतीत्युक्तमन्यत्र ॥२॥ राष्ट्रं श्रीद्वारिकानिकटं सौराष्ट्रादि, तस्य विप्लवो येन तद्यथा स्यात्तथादयत् । उत्सृजन्ददत्॥३॥तैः शैलैः । यत्रान र्तेषु॥४॥वेला समुद्रजलं तस्य कूलं तटं समीपं तत्रत्यान्देशान् । तज्जलं समुद्रांबु । प्लावयामासानाशयदित्यर्थः ॥५॥ भंक्त्वा त्रोटयित्वा । आहवनीयाद्यग्निषु कुंडस्थेषु । शकृत्पुरीषम् । वितानो यज्ञस्तत्संबंधिनस्तथा तान् ॥६॥ क्ष्माभृतो गिरेर्द्रोण्यां नितंबदेशे या गुहा गह्वर देशास्तासु "द्रोणी काष्ठांबुवाहिन्यां गिर्यंतरनितंबयो" इति धरणिः । स द्विविदः । "पेशस्कारी पक्षिकीटस्स्वगृहे कीटगोपके" इति निरुक्तिः ॥७॥ एवं वह्निदाहादिना विप्रकुर्वन्विरूपयन् । विष्णुपुराणे तु—"कामरूपी महारूपं कृत्वा सस्यान्याशेषतः । लुठन् भ्रमणसंमर्दैः संचूर्णयति वानरः ॥" इति तद्दौष्ट्याधिक्यमप्युक्तम् ॥ ८ ॥ तत्र रैवतके ॥ ९ ॥ गलन्मदो गजः प्रभिन्नः ॥ १० ॥ किलकिलेति वानरजातिशब्दानु करणम् ॥११॥ 'जातिर्ज्ञातिनिसर्गयोः' इति धरणिः । बलदेवस्य परिग्रहाः पत्न्यः "परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः" इति मेदिनी ॥१२॥ ता बलदेवपत्नीः । भ्रूक्षेपैर्भ्रूचालनैः । इत्यर्थ इति—अनादराधिक्यषष्ठ्याऽयमर्थ इति भावः ॥ १३ ॥ तं द्विविदम् । ग्राव्णा पाषाणेन 'पाषाणग्रावप्रस्तराः' इति कोशात् । स द्विविदः ॥ १४ ॥ तं बलम् । ' स्फाल—कूर्दनपाटनयोः ' चुरादिः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदर्थीकृत्य बलवान्विप्रचक्रे मदोद्धतः॥तं तस्याविनयं दृष्ट्वा देशांश्च तदुपद्रुतान्॥१६॥क्रुद्धो मुसलमादत्त हलं चारिजिघांसया॥द्विविदोपि महावीर्यः शालमुद्यम्य पाणिना ॥१७॥ अभ्येत्य तरसा तेन बलं मूर्धन्यताडयत् ॥ तं तु संकर्षणो मूर्ध्नि पतंतमचलो यथा ॥१८॥ प्रतिजग्राह बलवान्सुनंदेनाहनच्च तम् ॥ मुसलाहतमस्तिष्को विरेजे रक्तधारया ॥ १९ ॥ गिरिर्यथा गैरिकया प्रहारं नानुचिंतयन् ॥ पुनरन्यं समुत्क्षिप्य कृत्वा निष्पत्रमोजसा ॥ ॥ २० ॥ तेनाहनत्सुसंक्रुद्धस्तं बलः शतधाऽच्छिनत् ॥ ततोऽन्येन रुषा जघ्ने तं चापि शतधाऽच्छिनत् ॥ २१ ॥ एवं युध्यन्भगवता भग्नेभग्ने पुनःपुनः ॥ आकृष्य सर्वतो वृक्षान्निर्वृक्षमकरोद्वनम् ॥ २२ ॥ ततोमुंचच्छिलावर्षं बलस्योपर्यमर्षितः ॥ तत्सर्वं चूर्णयामास लीलया मुसलायुधः ॥ २३ ॥ स बाहू तालसंकाशौ मुष्टीकृत्य कपीश्वरः ॥ आसाद्य रोहिणीपुत्रं ताभ्यां वक्षस्यरूरुजत् ॥ २४ ॥ यादवेंद्रोऽपि तं दोर्भ्यां त्यक्त्वा मुसललांगले ॥ जत्रावभ्यर्दयत्क्रुद्धः सोऽपतद्रुधिरं वमन् ॥ २५ ॥ चकंपे तेन पतता सटंकः सवनस्पतिः ॥ पर्वतः कुरुशार्दूल वायुना नौरिवांभसि ॥ २६ ॥ जयशब्दो नमःशब्दः साधुसाध्विति चांबरे ॥ सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणाम् ॥ २७ ॥ एवं निहत्य द्विविदं जगद्व्यतिकरावहम् ॥ संस्तूयमानो भगवाञ्जनैः स्वपुरमाविशत् ॥ २८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे द्विविदवधो नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ छ ॥ श्रीशुक उवाच ॥ दुर्योधनसुतां राजँल्लक्ष्मणां समितिंजयः ॥ स्वयंवरस्थामहरत्सांबो जांबवतीसुतः ॥ १ ॥

तवान् ॥ १५ ॥ विप्रचक्रे एवमपकृतवान् ॥ १६ ॥ शालं वृक्षम् ॥ १७ ॥ १८ ॥ सुनंदेन मुसलेनाहनत् । अहन्नित्यर्थः ॥ तं वानरम् । मस्तिष्कं मस्तकावयवविशेषः ॥ १९ ॥ गैरिकया लोहितधातुना । नानुचिंतयन्नगणयन् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अरूरुजत्ताडयामास ॥ २४ ॥ यादवेंद्रः संकर्षणः क्रुद्धः सन् । जत्रौ कंठबाहुमूले ॥ २५ ॥ टंकाः सतोयविवराणि तत्सहितः ॥ २६ ॥ २७ ॥ जगतो व्यतिकरं नाशमावहतीति तथा तम् ॥ २८ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध०टी०सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ अष्टषष्टितमे सांबे निरुद्धे कौरवैर्युधि ॥ तद्विमोक्षाय रामेण गजाह्वयविकर्षणम् ॥ १ ॥ रामचरित्रांतरं निरूप

कदर्थीकृत्य तिरस्कृत्य । तस्य द्विविदस्य । अविनयमौद्धत्यम् "विनया तु कलायां स्त्री शिक्षायां प्रणतौ पुमान्" इति मेदिनी । तदुपद्रुतान् द्विविदकृतोपद्रवयुक्तान् ॥ १६ ॥ १७ ॥ अभ्येत्य संमुखमागत्य । तेन शालेन । तं वृक्षम् ॥ १८ ॥ तं कपिम् । इत्यर्थ इति–शबार्षोऽत्रेति बोध्यम् । " सुनन्दो बलदेवस्य मुशले विष्णुपार्षदे " इति वारतांतविः । ' मस्तिष्कं मस्तकांतरम् ' इति धरणिः ॥ १९ ॥ अन्यं वृक्षम् । समुत्क्षिप्योत्पाट्य ॥ २० ॥ तेन वृक्षेण । तं वृक्षम् । ततस्तद्वृक्षच्छेदानंतरम् ॥ २१ ॥ २२ ॥ ततो वृक्षाभावानंतरम् ॥ २३ ॥ स द्विविदः । तालसंकाशौ तालतरुवल्लंबौ । ताभ्यां मुष्टीकृतबाहुभ्याम् ॥२४॥ तं द्विविदम् । स द्विविदः ॥ ॥ २५ ॥ " टंकस्सतोयविवरे कोपासिग्रावदारणे । मानभेदे खनित्रे च जंघायां स्त्री " इति धरणिः ॥ २६ ॥ २७ ॥ " व्यतिकरस्तु संघाते व्यसनव्यतिषंगयोः । अल्पग्राह्यकरे देशे नाशे क्षोभे विपर्यये ॥ " इति निरुक्तिः ॥ ॥ २८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ तद्विमोक्षाय सांबविमोक्षाय (१) । " हतो यदैव प्रद्युम्नः शंबरेणात्मघातिना । मासेऽस्मिन्नेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कौरवाः कुपिता ऊचुर्दुर्विनीतोऽयमर्भकः ॥ कदर्थीकृत्य नः कन्यामकामामहरद्बलात् ॥ २ ॥ बध्नीतेमं दुर्विनीतं किं करिष्यंति वृष्णयः ॥ येऽस्मत्प्रसादोपचितां दत्तां नो भुंजते महीम् ॥ ३ ॥ निगृहीतं सुतं श्रुत्वा यद्येष्यंतीह वृष्णयः ॥ भग्नदर्पाः शमं यांति प्राणा इव सुसंयताः ॥४॥ इति कर्णः शलो भूरिर्यज्ञकेतुः सुयोधनः ॥ सांबमारेभिरे बद्धुं कुरुवृद्धानुमोदिताः ॥५॥ दृष्ट्वानुधावतः सांबो धार्तराष्ट्रान्महारथः ॥ प्रगृह्य रुचिरं चापं तस्थौ सिंह इवैकलः ॥६॥ तं ते जिघृक्षवः क्रुद्धास्तिष्ठतिष्ठेति भाषिणः ॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन् ॥७॥ सोऽपविद्धः कुरुश्रेष्ठ कुरुभिर्यदुनंदनः ॥ नामृष्यत्तदचिंत्यार्भः सिंहः क्षुद्रमृगैरिव ॥ ८ ॥ विस्फूर्ज्य रुचिरं चापं सर्वान्विव्याध सायकैः ॥ कर्णादीन्षड्रथान्वीरस्तावद्भिर्युगपत्पृथक् ॥ ९ ॥ चतुर्भिश्चतुरो वाहानेकैकेन च सारथीन् ॥ रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् ॥ १० ॥

यितुमाह । दुर्योधनसुतामिति । समितिंजयः संग्रामाजित् ॥ १ ॥ २ ॥ नोऽस्माकं महीमस्माभिर्दत्ताम् । न ते भूपतय इति भावः ॥ ३ ॥ यांति यास्यंति । प्राणा इंद्रियाणीव । सुसंयताः प्राणायामादिभिर्दमिताः ॥ ४ ॥ कुरुवृद्धो भीष्मस्तेनानुमोदितास्तत्सहिताः षडेत इत्यर्थः ॥ ५ ॥ ६ ॥ कर्णोऽग्रणीर्येषां ते ॥ ७ ॥ नामृष्यत असहत् अचिंत्यस्य भगवतोऽर्भोऽर्भकः । अचिंत्यश्चासावर्भश्चेति वा ॥ ८ ॥९ ॥ तत्प्रपंचयति चतुर्भिरिति चतुर्भिश्चतुर इत्यत्र वीप्साऽनुसंधेया । तत्कर्म ते संमानितवंतः ॥

सांबस्तु जांबवत्यामजायत ॥ " इति हरिवंशोक्त्या प्रद्युम्नसवयस्कत्वात्तस्योद्वाहः पूर्वमेव वृत्तोप्यत्र संकर्षणमाहात्म्यप्रसंगादाह—दुर्योधनेति । जांबवतीसुत इति तस्या सौभाग्याधिक्यसूचनेन तस्मिन्पितृस्नेहाधिक्यं दर्शितम् । अतिस्नेहेनाम्बया सह वर्तत इति सांब इत्यन्वर्थताज्ञापनार्थं यत्र तत्र जांबवतीसुत इति विशेषणं दीयते । समितिं संग्रामं सभां च जयतीति समितिंजयः । बलेन शास्त्रेण चोभयजयी । " समितिः संपराये स्यात् । सभायां संगमेऽपि च " इति मेदिनी ॥ १ ॥ अकामामजातकामविकाराम् । यद्वा—तद्वरेच्छारहिताम् ॥ २ ॥ इमं सांबम् । दुर्विनीतमशिक्षितम् । ये वृष्णयः । इति भाव इति—यदुशप्तत्वात्तेषां राज्याधिकार एव नास्तीत्याशयः । बध्नीतेति हननिषेधो द्योत्यते । तत्स्पृष्टायाः कन्याया वरान्तरायोग्यत्वेन जामातृत्वावश्यकत्वात्, श्रीभीष्मविदुरादीनां संमतेश्च । अत एवाग्रे जिघृक्षव इति । बंधने हेतुः—दुर्विनीतमिति । अन्यथास्माकं पराभव एव जनैर्दृश्येत इति भावः ॥ ३ ॥ निगृहीतं बद्धम् । इह हास्तिनपुरे । शमं यांति—अस्मद्वश्या भवन्तीति भावः । दुर्वश्यानामपि वश्यत्वे दृष्टांतः—प्राणा इति ॥ ४ ॥ इति एवमुक्त्वा । शलादयस्त्रयो बाह्लीकात्मजसोमदत्तात्मजाः । यज्ञकेतुर्भूरिश्रवाः । यज्ञशब्देनात्र यूपो लक्ष्यते । इत्यर्थ इति—क्षत्रधर्मनिष्ठत्वात्पराभवमसहमानो वृद्धोऽपि भीष्मस्सांबवंधनार्थं ययाविति भावः ॥ ५ ॥ धार्तराष्ट्रान् धृतराष्ट्रसंबंधिनः । एक एवैकलः । स्वार्थे लः । यद्वा—एकान्प्रधानानपि लुनाति छिनत्तीत्येकलः । लुनातेर्डः ' एके मुख्यान्यकेवलाः ' इत्यमरः । शूरतमः ॥ ६ ॥ तं सांबम् । ते कर्णादयः ॥ ७ ॥ स सांबः । अपविद्धस्ताडितः । तत्कुरुताडनम् । ' अंधादंधो न जायेत ' इति न्यायेन नहि पितृसम एव प्रायः पुत्रो भवतीति भावः । हे कुरुश्रेष्ठेति पूर्वेषां दुर्विनयेन लज्जमानं सांत्वयतीति भावः । अचिंत्यार्भ इति श्रीभगवल्लीलाविशेषेच्छयैवानिरुद्धवत्तज्जातमिति भावः ॥ ८ ॥ यावंतस्ते तावद्भिः । षड्भिः तत्रापि प्रत्येकं, तत्रापि युगपदिति सङ्खाविरे ॥ ९ ॥ तत् षट्संख्याकबाणैस्ताडनम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हयान् ॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनम् ॥११॥ तं बद्ध्वा विरथीकृत्य कृच्छ्रेण कुरवो युधि ॥ कुमारं स्वस्य कन्यां च स्वपुरं जयिनोऽविशन् ॥१२॥ तच्छ्रुत्वा नारदोक्तेन राजन्संजातमन्यवः ॥ कुरून्प्रत्युद्यमं चक्रुरुग्रसेनप्रचोदिताः ॥१३॥ सांत्वयित्वा तु तान् रामः सन्नद्धान्वृष्णिपुंगवान् ॥ नैच्छत्कुरूणां वृष्णीनां कलिं कलिमलापहः ॥१४॥ जगाम हास्तिनपुरं रथेनादित्यवर्चसा ॥ ब्राह्मणैः कुलवृद्धैश्च वृत श्चंद्र इव ग्रहैः ॥ १५ ॥ गत्वा गजाह्वयं रामो बाह्योपवनमास्थितः ॥ उद्धवं प्रेषयामास धृतराष्ट्रं बुभुत्सया ॥ १६ ॥ सोऽभिवंद्यांबिकापुत्रं भीष्मं द्रोणं च बाह्लिकम् ॥ दुर्योधनं च विधिवद्राममागतमब्रवीत् ॥ १७ ॥ तेऽतिप्रीतास्तमाकर्ण्य प्राप्तं रामं सुहृत्तमम् ॥ तमर्चयित्वाभिययुः सर्वे मंगलपाणयः ॥ १८ ॥ तं संगम्य यथान्यायं गामर्घ्यं च न्यवेदयन् ॥ तेषां ये तत्प्रभावज्ञाः प्रणेमुः शिरसा बलम् ॥ १९ ॥ बंधून्कुशलिनः श्रुत्वा पृष्ट्वा शिवमनामयम् ॥ परस्परमथो रामो बभाषे विक्लवं वचः ॥ २० ॥ उग्रसेनः क्षितीशेशो यद्व आज्ञापयत्प्रभुः ॥ तदव्यग्रधियः श्रुत्वा कुरुध्वं मा विलंबितम् ॥ २१ ॥

॥ १० ॥ ११ ॥ स्वस्य दुर्योधनस्य कन्यां च नीत्वेति ॥ १२ ॥ १३ ॥ यतः कलिं नैच्छदतः सांत्वयित्वा जगामेति ॥ १४ ॥ १५ ॥ धृतराष्ट्रं प्रति बुभुत्सयेति अभिप्रायजिज्ञासयेत्यर्थः ॥ १६ ॥ विधिवदभिवंद्य ॥ १७ ॥ तमुद्धवमर्चयित्वा सत्कृत्य । मंगलपाणय उपायनहस्ताः ॥१८॥ वृद्धा अपि प्रणेमुः ॥१९॥२०॥२१॥

तस्य सांबस्य । तत्कर्म युगपत्ताडनरूपम् । ते कर्णादयः ॥ १० ॥ तं सांबम् । ते कर्णादयः ॥ ११ ॥ तं सांबम् । जयिनो जेतुकामा न तु लब्धजयाः । कुमारमिति—प्रौढैर्वृद्धैर्बहुभिश्च बालस्यैकस्य बंधनादिकमन्याय्यमिति भावः । गृहीत्वेति शेषः ॥ १२ ॥ तत् सांबबंधनम् ॥ १३ ॥ सन्नद्धान् युद्धार्थे परिणद्धकवचान् । कुरूणां वृष्णीनामिति । श्रीरोहिणीकुंत्यादिसंबंधेनैक्यतां प्राप्तत्वादिति भावः । कलेर्दुर्योधनस्य मलमभिमानमपहंति तन्मात्रं दूरीकरोति न तु तमपि हंतुमिच्छति, करुणस्वभावत्वादितिभावः । युग्मान्वयः । उग्रसेनेति श्रीकृष्णेन न तु प्रेरिताः परमात्मीये ज्येष्ठे बंधुवृंदे सति स्वपुत्रार्थोद्यमानर्हत्वात् ॥ १४ ॥ १५ ॥ बुभुत्सया बोधयितुमिच्छया । अंतर्भावितण्यर्थोयम् । तदभिप्रायजिज्ञासया दुर्योधनादीनां दुर्बुद्धेरपि धृतराष्ट्रमूलकत्वात् ॥ १६ ॥ स उद्धवः । युधिष्ठिरादीनामभिवादनेऽनुक्तिस्तु तेषां तदेन्द्रप्रस्थेऽवस्थानात् ॥ १७ ॥ ते भीष्मादयः । सुहृत्तममिति—सुहृदो यादवाः, सुहृत्तराः श्रीवसुदेवादयः, तेष्वपि पौरव्याः श्रीरोहिण्याः पुत्रत्वेन सुहृत्तमम् । यद्वा—दुर्योधनं प्रति गदाविद्याप्रदत्वे न पूज्यं बलरामम् । तमुद्धवम् ॥ १८ ॥ तं रामम् । तेषां मध्ये ॥ १९ ॥ अथो कुशलप्रश्नोत्तरम् ॥ २० ॥ क्षितीशेशो राजाधिराजः । क्षितीशा यूयं तेषामीशो राजा । तत्र हेतुः--प्रभुः । सुधर्मापारिजाताद्युपायनसमर्पका इंद्रादयो यदाज्ञाकारिणस्तत्र यूयं के वराका इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यूयं बहवस्त्वेकं जित्वाऽधर्मेण धार्मिकम् ॥ अबध्नीताथ तान्मृष्ये बंधूनामैक्यकाम्यया ॥ २२ ॥ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमं वचः ॥ कुरवो बलदेवस्य निशम्योचुः प्रकोपिताः ॥ २३ ॥ अहो महच्चित्रमिदं कालगत्या दुरत्यया ॥ आरुरुक्षत्युपानद्वै शिरो मुकुटसेवितम् ॥ २४ ॥ एते यौनेन संबद्धाः सहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतां नीता अस्मद्दत्तनृपासनाः ॥ २५ ॥ चामरव्यजने शंखमातपत्रं च पांडुरम् ॥ किरीटमासनं शय्यां भुंजंत्यस्मदुपेक्षया ॥ २६ ॥ अलं यदूनां नरदेवलांछनैर्दातुः प्रतीपैः फणिनामिवामृतम् ॥ येऽस्मत्प्रसादोपचिता हि यादवा आज्ञापयंत्यद्य गतत्रपा बत ॥ २७ ॥ कथमिंद्रोऽपि कुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुंधीत सिंहग्रस्तमिवोरणः ॥ २८ ॥ श्रीशुक उवाच ॥ जन्मबंधुश्रियोन्नद्धमदस्ते भरतर्षभ ॥ आश्राव्य रामं दुर्वाच्यमसभ्याः पुरमाविशन् ॥ २९ ॥

यद्यूयमित्युग्रसेनवाक्यम् । मृष्ये सहे । अथाशु तमानीय समर्पयतेति शेषः ॥ २२ ॥ वीर्यं प्रभावः शौर्यमुत्साहो बलं सत्त्वं तैरुन्नद्धमुच्छृंखलम् । कथम् । आत्मनः शक्तेः सममनुरूपम् ॥ २३ ॥ उपानत्पादरक्षा शिर आरोढुमिच्छतीति हीना अस्मानाज्ञापयंतीत्यर्थः ॥ २४ ॥ अस्यैव प्रपंच एत इति चतुर्भिः । यौनेन पृथाया विवाहेन ॥ २५ ॥ किंच । चामरव्यजने इति । भुंजंत्युपभुंजत इत्यर्थः । अस्मदुपेक्षयाऽस्माकमनाग्रहेण ॥ २६ ॥ अलमिति । अतः परं तान्यपहरिष्याम इत्यर्थः ॥ २७ ॥ अवरुंधीत स्वीकुर्यात् । उरणो मेषः ॥ २८ ॥ जन्मना बंधुभिश्चोपलक्षितया श्रिया उन्नद्ध उत्कटो मदो येषां ते । दुर्वाच्यं परुषं वाक्यम् । असभ्या दुर्जनाः ॥ २९ ॥

बयातिना यदूनां राजत्वमात्रं निषिद्धं न तु राजेशत्वमिति भावः । अव्यग्रधियः सन्त इत्यन्यथा स युष्मान् दंडयिष्यतीति भावः ॥ २१ ॥ धार्मिकमितिक्षत्रियधर्मे स्वयंवरे कन्याहरणरूपे स्थितम् ॥ २२ ॥ कुरवो दुर्योधनादयः ॥ २३ ॥ 'दुरंतया' इति पाठः सम्यक् । 'दुरत्यया' इति पाठे तृतीयार्थे प्रथमार्षत्वात्, दुरत्ययेत्यर्थः । यद्वा—औणादिककप्रत्यय एतेर्बोध्यः । तथा चात्येतीत्यत्यो नाशः, दुर्गतोऽत्यो यस्यास्सा दुरत्या तया । पादौ रक्षतीति पादरक्षा । इत्यर्थ इति—सर्वथास्मदतुल्याः स्वाविक्यवर्णनेन निर्लज्जा इति भावः ॥ २४ ॥ एते यदवः । ततः किं तत्राह—सहेत्यादि ॥ २५ ॥ न केवलं सहासनादिभिरेते मानिता अपि तु राजचिह्नैरपीत्याह—किञ्चेति । इत्यर्थ इति—भुंजंतीति परस्मैपदमार्षम् "भुजोऽनवने" इत्यात्मनेपदविधानादिति भावः । तीर्थस्तु—भुंजंति भजंति अन्योपद्रवमंतरेण रक्षंतीति पालनार्थमभिप्रेत्य परस्मैपदमेवोचितमित्याह । अनाग्रहेणौदासीन्येन ॥ २६ ॥ नैते राजचिह्नार्हा इत्याह—अलमिति । अतः परम् अद्यतनात्परम् । इत्यर्थ इति—मूषिकसिंहन्यायेन पूर्वसदृशान्कारिष्याम अर्थान्नृपचिह्नान्येतेभ्य उत्तारयिष्याम इति भावः । दातुरस्मद्वंशस्य । प्रतीपैर्विरोधिभिः । दृष्टांतः—सर्पदत्तममृतोपलक्षितं दुग्धादिरसं यथा विषात्मना परिणतं दातुरेव सर्पस्योपकाराग्रहीतृत्वाद्दंशनद्वारा मृतिप्रदं तथैतान्यपीत्यर्थः । बत खेदे ॥ २७ ॥ अदत्तमप्रत्तम् । अस्माकमिंद्रोऽनुकूलोऽस्तीति यदहं कुरुध्वे तत्रापि रे यदवः शृणुध्वमित्याह—कथमिति । अवरुन्धीत ग्रहीतुं शक्नुयात् । उरण इति—यदीन्द्रमपि मेषमिव पश्यामस्तत्र यूयं के इति भावः ॥ २८ ॥ ते कुरवः ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा कुरूणां दौःशील्यं श्रुत्वाऽवाच्यानि चाच्युतः ॥ अवोचत्कोपसंरब्धो दुष्प्रेक्ष्यः प्रहसन् मुहुः ॥ ३० ॥ नूनं नानामदोन्नद्धाः शांतिं नेच्छंत्यसाधवः ॥ तेषां हि प्रशमो दंडः पशूनां लगुडो यथा ॥ ३१ ॥ अहो यदून्सुसंरब्धान्कृष्णं च कुपितं शनैः ॥ सांत्वयित्वाऽहमेतेषां शममिच्छंन्निहागतः ॥ ३२ ॥ त इमे मंदमतयः कलहाभिरताः खलाः ॥ तं मामवज्ञाय मुहुर्दुर्भाषान् मानिनोऽब्रुवन् ॥ ३३ ॥ नोग्रसेनः किल विभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयो लोकपाला यस्यादेशानुवर्तिनः ॥ ३४ ॥ सुधर्माऽऽक्रम्यते येन पारिजातोऽमरांघ्रिपः ॥ आनीय भुज्यते सोऽसौ न किलाध्यासनार्हणः ॥ ३५ ॥ यस्य पादयुगं साक्षाच्छ्रीरुपास्तेऽखिलेश्वरी ॥ स नार्हति किल श्रीशो नरदेवपरिच्छदान् ॥ ३६ ॥ यस्यांघ्रिपंकजरजोऽखिललोकपालैर्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ॥ ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व ॥ ३७ ॥ भुंजते कुरुभिर्दत्तं भूखंडं वृष्णयः किल ॥ उपानहः किल वयं स्वयं तु कुरवः शिरः ॥ ३८ ॥ अहो ऐश्वर्यमत्तानां मत्तानामिव मानिनाम् ॥ असंबद्धा गिरो रूक्षाः कः सहेतानुशासिता ॥ ३९ ॥

॥ ३० ॥ नानाधनाभिजनादिमदैरुन्नद्धास्तेषां दंड एव प्रशमः प्रकर्षेण शमयतीति तथा । यथा लगुडो दंडः ॥ ३१ ॥ ३२ ॥ दुर्भाषानवाच्यशब्दान् ॥ ३३ ॥ दुर्भाषणमनुस्मरति षड्भिः नोग्रसेन इति । विभुराज्ञापयितुं समर्थः ॥ ३४ ॥ अहो धृष्टाः श्रीकृष्णमप्यधिक्षिपंतीति कुपित आह सुधर्मेत्यादिभिस्त्रिभिः ॥ ३५ ॥ ३६ ॥ मौल्युत्तमैर्मौलियुक्तैरुत्तमांगैः उत्तमैर्मौलिभिरिति वा । उपासितानि तीर्थानि यैर्योगिभिस्तेषामपि तीर्थम् । यद्वा उपासितं सर्वैः सेवितं तीर्थं गंगा तस्यास्तीर्थं तीर्थत्वनिमित्तम् । किंच ब्रह्मा भवः श्रीश्चाहमपि उद्वहेम । कथंभूता वयम् । यस्य कलाया अंशस्य कला अंशाः ॥३७॥३८॥ मत्तानामिव मद्यादिना

एते कियद्वा वदंति कियद्वा कुर्वन्ति तद्वदंतु कुर्वंतु चेत्यपेक्षया तदानीं तूष्णीमासीत्, गतेषु तेषु पौरलौकेषु च स्थितेषु स्वसमुचितं वक्तुं कर्तुं च कोपमाविश्चकारेत्याह–दृष्ट्वेति कोपाविष्टः । अवाच्यानि वक्तुमयोग्यानि ॥ ३० ॥ तेषामसाधूनाम् । लगुडः 'लगुडः काष्ठदंडे स्यात्' इति कोशात् दंड एव नानामदान् शमयति न तु क्षमादिरित्यर्थः ॥ ३१ ॥ एतेषां कुरूणाम् । शममुपद्रवराहित्यमिच्छन् । इह हास्तिनपुरे ॥ ३२ ॥ मानिनः श्रीमदांधाः ॥ ३३ ॥ न विभुः, अपि तु विभुरेव । यस्योग्रसेनस्य ॥ ३४ ॥ अलं यदूनामित्युक्त्या कृष्णस्य यादवत्वेन तमप्याक्षिपंतीति कुपित आह–सुधर्मेत्यादित्रिभिः येन कृष्णेन । सोऽसौ कृष्णः ॥ ३५ ॥ यस्य कृष्णस्य अर्हति तादृशोसौ तदति तुच्छं नार्हत्येवेत्यर्थ एवमग्रेपि ॥ ३६ ॥ एकदेशन्यायाश्रयणे गौरवं मत्वाह–उत्तमैरिति । तीर्थानि शास्त्राणि गुरवो वा तीर्थं पावित्र्यापादकम् । सर्वप्रसिद्धिमादाय–यद्वेति । तीर्थत्वं पवित्रहेतुत्वम् । तस्य निमित्तं कारणम्, भगवत्पदोद्भूतत्वमेव गंगायाः पावनत्वे हेतुरिति भावः । न केवलं गंगोत्पत्तिहेतुत्वादेव श्रीकृष्णस्याधिक्यमपि तु ब्रह्माद्युपास्यत्वादपीत्याह–किञ्चेति । उद्वहेम शिरसि धारयामः । अस्य कृष्णस्य । कलायाः पुरुषरूपायाः । ब्रह्मैव युष्मद्विधानां स्रष्टा इन्द्रादिभ्योऽप्यैश्वर्येणाधिकस्ततोपि भवस्ततोऽप्यहं तथाऽस्मत्तः सर्वेभ्योप्यधिका श्रीस्वरूपभूता शक्तिः उत्कर्षेण धारयामः । अस्य नृपासनं क्व किं तेभ्यः सकाशाद्भिक्षित्वैव तत्कृपयैव लभ्यं स्यादिति वक्रोक्तिः ॥ ३७ ॥ उपानहस्तद्वत्ताडनशीलाः । शिरस्तद्वत्ताड्या इति ध्वनिः ॥ ३८ ॥ असंबद्धा अयोग्याः । रूक्षाः शब्दतोऽर्थतश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयम् ॥ ४० ॥ लांगलाग्रेण नगरमुद्विदार्य गजाह्वयम् ॥ विचकर्ष स गंगायां प्रहरिष्यन्नमर्षितः ॥ ४१ ॥ जलयानमिवाघूर्णं गंगायां नगरं पतत् ॥ आकृष्यमाणमालोक्य कौरवा जातसंभ्रमाः ॥ ४२ ॥ तमेव शरणं जग्मुः सकुटुंबा जिजीविषवः ॥ सलक्ष्मणं पुरस्कृत्य सांबं प्रांजलयः प्रभुम् ॥४३॥ रामरामाखिलाधार प्रभावं न विदाम ते ॥ मूढानां नः कुबुद्धीनां क्षंतुमर्हस्यतिक्रमम् ॥४४॥ स्थित्युत्पत्त्यप्ययानां त्वमेको हेतुर्निराश्रयः ॥ लोकान्क्रीडनकानीश क्रीडतस्ते वदंति हि ॥ ४५ ॥ त्वमेव मूर्ध्नीदमनंतलीलया भूमंडलं बिभर्षि सहस्रमूर्धन् ॥ अंते च यः स्वात्मनि रुद्धविश्वः शेषेऽद्वितीयः परिशिष्यमाणः ॥ ४६ ॥ कोपस्तेऽखिलशिक्षार्थं न द्वेषान्न च मत्सरात् ॥ बिभ्रतो भगवन्सत्त्वं स्थितिपालनतत्परः॥४७॥नमस्ते सर्वभूतात्मन् सर्वशक्तिधराव्यय ॥ विश्वकर्मन्नमस्तेऽस्तु त्वां वयं शरणं गताः॥४८॥

रूक्षाः परुषाः । अनुशासिता स्वयं दंडधरः सन् ॥ ३९ ॥ ४० ॥ लांगलाग्रेण दक्षिणतः प्राकारमूले निखातेन उद्विदार्य उत्पाट्य ॥ ४१ ॥ ४२ ॥ जिजीविषव इत्यक्षराधिक्यं सोढव्यम् ॥ ४३ ॥ मूढानां प्रभावानभिज्ञानाम् । अतिक्रममपराधम् ॥ ४४ ॥ ४५ ॥ शेषे शयनं करोषि शेषपर्यंके परिशिष्यमाणो यः स च त्वमेवेति वा ॥ ४६ ॥ अस्मासु कोपश्च तवायमनुचित एवेत्याहुः । कोपस्तु इति स्थितिपालने तत्परस्तात्पर्यवान्कोपः । पाठांतरे संबोधनम् ॥ ४७ ॥ विश्वं कर्म कृत्यं यस्य स त्वमिति सम्बोधनम् ॥ ४८ ॥

कर्कशाः । अनुशासिता दंडकर्ता मादृशः कः सहेत अन्यथाऽनुशासितत्वहान्या सर्वेषामुच्छृंखलता स्यादिति भावः ॥ ३९ ॥ पालनार्थमवतीर्णत्वादिवोपादानम् । लांगलाग्रेण तदिच्छया वर्द्धितलांगलाग्रेण विचकर्ष बलाज्जलांतिकमानिनाय । किं कर्तुं प्रहरिष्यन्प्रहर्तुं सांबं विना सर्वमेव नगरं स्वजलेनैवं प्रह्वत्य वध्यतामिति गंगां प्रत्यादेशात् ॥ ४० ॥ स रामः ॥ ४१ ॥ जलयानमुडुपम् । जातसंभ्रमा उत्पन्नभयाः ॥ ४२ ॥ तं रामम् । सोढव्यमार्षत्वात्, यद्वा–'शेषं गाथा' इत्युक्तेर्गाथाख्यवृत्तमिदम् ॥ ४३ ॥ अतिक्रममपराधम् । कथं शरणं जग्मुस्तदाह–रामेति । हे जगत्सुखप्रद वीप्साऽतिभयात् । ननु भक्तानेव रमयामि न त्वन्यानिति चेत्सत्यम्, तथापि जगतस्त्वमेव गतिर्न त्वन्यः कोऽपीत्याहुः–हे अखिलाधार । तत्र हेतुः–अधीश्वरेति । हे ब्रह्मादीनामपीश्वरेति । अतो नास्माकमपराध इति शेषः । यद्वा–नोऽस्मान् क्षंतुमर्हसि । ननु महापराधिनो यूयं न क्षंतव्यास्तत्राहुः–मूढानामज्ञानामत एव कुबुद्धीनां दुरभिमानिनां दुष्टविचाराणां वा यतस्तव प्रभावं न विद्मो अतोऽस्मदादीनामपराधो दीनवात्सल्येन न ग्राह्य एवेति भावः ॥ ४४ ॥ स्थितेरादौ निर्देशः पालनापेक्षया । तेषु तवान्यापेक्षा नास्ति इत्याहुः–निजाश्रयः । 'निराश्रयः' इति पाठेपि स एवार्थः । न च तैः प्रयोजनमस्तीत्याहुः–लोकानिति । 'लोकवत्तु लीलाकैवल्यम्' इति न्यायेनेति भावः।तदुक्तम्–"सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानंदाद्यथा मत्तस्य नर्तनम् ॥ " इति । अतः क्रीडया त्वया वयं यथा नियुक्तास्तथैव प्रवृत्ताः । अतः कुबुद्धित्वेऽपि को नामास्माकं दोष इति भावः । ईशेति पाठे हे सर्वनियन्त इत्यर्थः ॥४५॥ किमहं जीववन्निद्रालुरित्याशंकायामर्थांतरमाह–शेषे पर्यंके इति । परमकृपालुतया त्वं हे अनन्तापरिच्छिन्न अधुना स्वस्मिन् जगद्बिभर्षि न तद्वृतौ किंचित्प्रयास इत्याहुः–हे सहस्रमूर्द्धन् । सहस्रमूर्द्धस्वेकस्मिन्नेव धृतमिदमज्ञातप्रायमेवोष्णीषसक्तरोमवदिति भावः ॥ ४६ ॥ मत्सरात्परोत्कर्षासहनात् । पाठांतरे निर्विसर्गपाठे । स्थितेः शिष्टमर्यादायाः पालने तत्परस्त्वं, तव कोपः शिक्षार्थमेव यतः पूर्वं दुष्टास्त्वामपश्यंतो मदांधा एव स्म इदानीं शिष्टा जाता इति भावः ॥ ४७ ॥ हे सर्वभूतात्मन्निति, सर्वभूतांतर्गता वयमपीति भावः । अहं दुष्टान्वधिष्याम्येवेति चेत्तत्राहुः–हे सर्वशक्तिधरेति । अस्मन्मारणे पालने च त्वं शक्त एवेति भावः । किञ्च हे विश्वकर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं प्रपन्नैः संविग्नैर्वेपमानायनैर्बलः ॥ प्रसादितः सुप्रसन्नो मा भैष्टेत्यभयं ददौ ॥ ४९ ॥ दुर्योधनः पारिबर्हं कुंजरान्ष
ष्टिहायनान् ॥ ददौ च द्वादशयुतान्ययुतानि तुरंगमान् ॥ ५० ॥ रथानां षट्सहस्राणि रौक्माणां सूर्यवर्चसाम् ॥ दासीनां निष्ककंठीनां सहस्रं
दुहितृवत्सलः ॥ ५१ ॥ प्रतिगृह्य तु तत्सर्वं भगवान्सात्वतर्षभः ॥ ससुतः सस्नुषः प्रायात्सुहृद्भिरभिनंदितः ॥ ५२ ॥ ततः प्रविष्टः स्वपुरं हलायुधः
समेत्य बंधूननुरक्तचेतसः ॥ शशंस सर्वं यदुपुंगवानां मध्ये सभायां कुरुषु स्वचेष्टितम् ॥ ५३ ॥ अद्यापि च पुरं ह्येतत्सूचयद्रामविक्रमम् ॥ समु
न्नतं दक्षिणतो गंगायामनुदृश्यते ॥ ५४ ॥ इति श्रीभागवते महापुराणे दशमस्कंधोत्तरार्धे हस्तिनापुरकर्षणसंकर्षणविजयो नामाष्टषष्टितमोऽध्यायः
॥ ६८ ॥ श्रीशुक उवाच ॥ नरकं निहतं श्रुत्वा तथोद्वाहं च योषिताम् ॥ कृष्णेनैकेन बह्वीनां तद्दिदृक्षुः स्म नारदः ॥ १ ॥ चित्रं बतैतदेकेन वपुषा
युगपत्पृथक् ॥ गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥ २ ॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत् ॥ पुष्पितोपवनारामद्विजालिकुलनादिताम् ॥
॥३॥ उत्फुल्लेंदीवरांभोजकह्लारकुमुदोत्पलैः ॥ छुरितेषु सरस्सूच्चैः कूजितां हंससारसैः ॥४॥ प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः ॥ महामरकतप्रख्यैः
स्वर्णरत्नपरिच्छदैः ॥५॥ विभक्तरथ्यापथचत्वरापणैः शालासभाभी रुचिरां सुरालयैः ॥ संसिक्तमार्गांगणवीथिदेहलीं पतत्पताकाध्वजवारितातपाम् ॥६॥

वेपमानमयनं पुरं येषां तैः ॥ ४९ ॥ तुरंगमांश्च द्वादशायुतानि ॥ ५० ॥ ५१ ॥ सुहृद्भिः कौरवैः ॥ ५२ ॥ मध्येसभायां सभामध्ये ॥ ५३ ॥ ५४ ॥
इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायामष्टषष्टितमोऽध्यायः ॥६८॥ एकोनसप्ततितमे गार्हस्थ्यं प्रतिमंदिरम् ॥ कृष्णस्य नारदो दृष्ट्वा विस्मितोऽगात्ततः स्तुवन् ॥
॥१॥१॥ दिदृक्षामभिनयेनाह । चित्रमिति । द्व्यष्टसहस्रस्त्रीरुदावहत्परिणीतवान् ॥२॥ तां द्वारवतीमनुवर्णयति पुष्पितेति सार्धत्रयेण । पुष्पितेषूपवनेष्वारामेषूद्यानेषु च द्विजाना
मलीनां च कुलानि तैर्नादिताम् ॥३॥ छुरितेषु व्याप्तेषु ॥४॥ महामरकतैः प्रख्यायंते प्रकाशंत इति तथा तैः । स्वर्णरत्नमयाः परिच्छदाः परिकरा येषु तैः ॥५॥ पतंत्यः

न्निति विश्वमिदं तवैव कार्यमतोऽस्मान् जीवयितुमेवार्हसीति भावः ॥ ४८ ॥ " अयनं गमने गेहे ज्ञाने च पुरवर्त्मनोः " इति निरुक्तिः ॥ ४९ ॥ ५० ॥ रौक्माणां हैमानाम् ॥ ५१ ॥ ५२ ॥ ततस्सुहृदभिनंदना
नंतरम् । स्वचेष्टितं नगराकर्षणरूपम् ॥ ५३ ॥ रामविक्रमोऽचिरविनाशी नेत्याह—अद्यापीति । एतत्पुरं हास्तिननगरम् । गंगाया दक्षिणे पुरीदक्षिणभाग इत्याह—तोषिणी ॥ ५४ ॥ इति श्रीमद्भागवतभावार्थदीपिका
प्रकाशे दशमस्कन्धोत्तरार्द्धेऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ततो द्वारकातः (१)। तद्दिदृक्षुस्तस्य वृत्तं तद्वृत्तं तस्य दिदृक्षुरत्र समासावस्थायां मध्यपदलोपः । कृष्णवृत्तं दिदृक्षुरित्यर्थः ॥ १ ॥ अभिनयो निमित्तम्
" निमित्तेऽभिनयः प्रोक्तो व्यंजकेऽनुकृतौ नये " इति निरुक्तिः । बताहो सौभर्यादयो हि कायव्यूहं कृत्वा युगपदनैकस्त्रीभी रमन्ते स्म न त्वेकेनैव कायेनेति चित्रम् । उदावहदिति छान्दसः । स च छंदसि "व्यव
हिताश्च " इति न्यायेन आसम्यगुदवहदिति योज्यम् ॥ २ ॥ इतीत्थम् । उत्सुको जातोत्कंठः ॥ ३ ॥ " छुरितं मिश्रितं व्याप्तं छिन्नमेकार्थवाचकम् " इति कोशांतरात् । इंदीवरकुमुदोत्पलानि नीलश्वेतरक्तान्युत्प
लान्येव । कह्लारं सौगंधिकमपि तद्भेद एव । अंभोजश्च विविधम्, एषामेतत्क्रमेणैव तत्र स्थितेरित्थम् निर्देशः ॥ ४ ॥ नवभिर्नवसंख्याकैः ॥ ५ ॥ रथ्यापथा रथमार्गाः, चत्वरं पथां श्लेषः, आपणो निषद्या । " चत्वरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यामंतःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ॥ हरेः स्वकौशलं यत्र त्वष्ट्रा कात्स्न्येन दर्शितम् ॥ ७ ॥ तत्र षोडशभिः सद्मसहस्रैः समलंकृतम् ॥ विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥ ८ ॥ विष्टब्धं विद्रुमस्तंभैर्वैदूर्यफलकोत्तमैः ॥ इंद्रनीलमयैः कुड्यैर्जगत्या चाऽहतत्विषा ॥ ९ ॥ वितानैर्निर्मितैस्त्वष्ट्रा मुक्तादामविलंबिभिः ॥ दांतैरासनपर्यंकैर्मण्युत्तमपरिष्कृतैः ॥ १० ॥ दासीभिर्निष्ककंठीभिः सुवासोभिरलंकृतम् ॥ पुंभिः सकंचुकोष्णीषसुवस्त्रमणिकुंडलैः ॥ ११ ॥ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतं विचित्रवलभीषु शिखंडिनोंग ॥ नृत्यंति यत्र विहितागुरुधूमम क्षैर्निर्यांतमीक्ष्य घनबुद्धय उन्नदंतः ॥ १२ ॥ तस्मिन्समानगुणरूपवयःसुवेषदासीसहस्रयुतयाऽनुसवं गृहिण्या ॥ विप्रो ददर्श चमरव्यजनेन रुक्म दंडेन सात्वतपतिं परिवीजयंत्या ॥ १३ ॥

प्रचलंत्यः पताका येषां तैर्ध्वजैर्वारित आतपो यस्यां ताम् ॥ ६ ॥ तस्यां द्वारकायाम् । सर्वैर्धिष्ण्यपैर्लोकपालैरार्चितम् । षोडशभिः सद्मसहस्रैः समलंकृतं हरेरंतःपुरम् । विवेश । तत्र च तस्य शौरेः पत्नीनां भवनेष्वेकतमं विवेशेत्यन्वयः । यत्र च स्वकौशलं त्वष्ट्रा दर्शितमित्यंतःपुरभवनयोर्विशेषणम् ॥ ७ ॥ ८ ॥ तदनुवर्णयति चतुर्भिः । विष्टब्धमिति । विद्रुमस्तंभैर्विष्टब्धं विधृतम् । वैदूर्यमयानि फलकोत्तमानि स्तंभाश्रयणानि छादनानि तैरिंद्रनीलमयैः कुड्यादिभिश्चोपलक्षितम् । जगत्या भूमिकया चेंद्रनीलमय्या । न हता त्विड् यस्यास्तया ॥ ९ ॥ मुक्तादाम्नां विलंबा विविधानि लम्बनानि विद्यंते येषु तैः मण्युत्तमैः परिष्कृतैर्भूषितैः ॥१०॥११॥ ईक्ष्य समीक्ष्य । घनो मेघोऽयमिति बुद्धिर्येषां ते॥ १२ ॥ अनुसवं सर्वकालम् । आत्मना समानानि गुणरूपवयांसि सुवेषोऽलंकारश्च यस्य तेन दासीसहस्रेण युतया गृहिण्या सह ॥ १३॥

तु पथां श्लेषे स्थंडिलांगणयोरपि " इति हैमः । " गृहपंक्तिपुरो मार्गो वीथी प्रोक्ता, गृहेऽपि वीथिरुच्यते " इति निरुक्तिः । विश्वनाथस्तु—रथ्या राजमार्गाः, पथा अन्ये मार्गाः । शाला अश्वादिगृहाः । सभाश्च वर्गशः पृथक्पृथक्स्वस्वस्थान्य इत्याह ॥ ६ ॥ तस्यां द्वारकायाम् । अन्तर्मध्ये हरेः पुरं सर्वसंपत्तिपूर्णं स्थानमस्तीति शेषः । पुरं गृहसमुदायो वा । तत्र पुरे । एकतमं भवनम् । यत्र पुरे । ' धिष्ण्यं लोहाग्निसद्मसु ' इति निरुक्तिः । " पुरं स्याद्गृहसंदोहे नगरे वर्ष्मणि गृहे " इति धरणिः । यत्र त्वष्ट्रा विश्वकर्मणा कौशल्यं शिल्पनैपुण्यं दर्शितं प्रकटितं प्रागुक्तेभ्योऽस्योत्कर्षोऽसूचीत्यनेन । यद्वा—यत्र हरेः स्वकौशलं कात्स्न्येन त्वष्ट्रा दर्शितं तच्छिक्षयैव त्वष्ट्रा सर्वं कृतं न तु स्वशक्त्या किञ्चित्कृतमित्यर्थः । तद्गृहं च श्रीरुक्मिण्या एवेति सहसोत्थितः श्रीपर्यंकत इत्युक्तेः ॥ ७ ॥ ८ ॥ तद्गृहम् । " स्तंभानामाश्रये तेषां छादने फलकं मतम् " इति स्वामी । न हता त्विट् कांतिर्यस्यास्तया ॥ ९ ॥ मुक्तादामविलंबिभिरवलंबमानमौक्तिकमालैः । दांतैर्गजदंतनिर्मितैः ॥ १० ॥ ११ ॥ यत्र सद्मनि । अक्षैर्गवाक्षैः ॥ १२ ॥ तस्मिन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं संनिरीक्ष्य भगवान्सहसोत्थितः श्रीपर्यंकतः सकलधर्मभृतां वरिष्ठः ॥ आनम्य पादयुगलं शिरसा किरीटजुष्टेन सांजलिरवीविशदासने स्वे ॥ १४ ॥ तस्यावनिज्य चरणौ तदपः स्वमूर्ध्नाबिभ्रज्जगद्गुरुतरोपि सतां पतिर्हि ॥ ब्रह्मण्यदेव इति यद्गुणनाम युक्तं तस्यैव यच्चरणशौचमशेषतीर्थम् ॥ ॥ १५ ॥ संपूज्य देवऋषिवर्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन ॥ वाण्याभिभाष्य मितयाऽमृत मिष्टया तं प्राह प्रभो भगवते करवाम हे किम् ॥ १६ ॥

श्रियो रुक्मिण्याः पर्यंकतः अवीविशदुपवेशयामास ॥ १४ ॥ अबिभ्रदबिभः दधारेत्यर्थः । बिभ्रदिति शत्रंतं वा । तदा संपूज्याभिभाष्य च प्राहेत्युत्तरेणान्वयः । कथंभूतः । यस्य चरणशौचं गंगा अशेषतीर्थं सः । अत एव जगद्गुरुतरोऽपि सतां धर्मभृतां पतित्वादेवमकरोदित्यर्थः । सतांपतित्वे हेतुः । ब्रह्मण्यदेव इति । यद्गुणकृतं नाम तस्यैव यतो युक्तं समंजसमतस्तद्धर्मप्रवर्तनायैवमाचरणमित्यर्थः ॥ १५ ॥ अभिभाष्य दिष्ट्याऽत्र त्वदागमनमित्यादि प्रियमुक्त्वा ॥ १६ ॥

गृहे । "सवो यागेऽनेहसि च प्रसवे प्रेरणासवे" इति निरुक्तिः । चमरमेव व्यजनं तेन ॥ १३ ॥ तं नारदम् ॥ १४ ॥ तस्य नारदस्य । इत्यर्थ इति—छांदसोऽडागम इति । छांदसकल्पने गौरवं मत्वाह—बिभ्रदिति । ननु स्वदासस्य नारदस्य चरणक्षालनादिकमयुक्तं तत्राह—ब्रह्मण्यदेव इति । यस्य गुणनाम गुणसूचकं नाम तद्युक्तं नारदस्य ब्राह्मणत्वात्तस्य ब्रह्मण्यदेवत्वादेतदुचितमेवेति । न च स्वपावित्र्यार्थमिदमिति वाच्यम् । यद्यस्मात्तस्यैव चरणशौचं गंगाऽशेषतीर्थमस्ति, नारदस्तु दास्येऽपि स्वप्रभोरिच्छाप्रातिकूल्ये प्रभुत्वं नाविश्वकारेति ज्ञेयम् । तदा ततः । अशेषांस्तीर्थयति शुद्धीकरोतीत्यशेषतीर्थम् । यद्वा—अशेषाणि तीर्थानि यस्मिंस्तत्तथा । अत एवाशेषशोधकत्वादेव । जगद्गुरुः शिवस्ततोऽपि विशिष्टः । इत्यर्थ इति—"संतः स्वधर्मनिष्ठाः स्युः शास्तारोऽनाशिनस्तथा" इत्युक्तेः । ब्रह्म ब्राह्मणसामान्यं देवोऽर्च्यो यस्य स तथा, पृषोदरादित्वात्साधुः । यद्वा—"यस्यात्मात्मजगेहस्त्रीभूधनाद्यखिलं वसु । नाऽदेयं विद्यते लोके ब्राह्मणाय नरोत्तम ॥ ब्राह्मणा हि परं ब्रह्म न तेभ्यो विद्यते परम् । यश्चैवं मन्यते नित्यं स ब्रह्मण्य इतीर्यते ॥" इत्युक्तलक्षणोपेतश्चासौ देवो ब्रह्मण्यदेव इति । गुणेन ब्राह्मणार्चनादिरूपेण कृतं तन्नाम तस्य नाम्न एव । यद्वा—यद्यस्य गुणकृतमिति नाम तस्य हरेरित्यर्थः । यतो हेतोः । अतोऽन्वर्थनामत्वात् । तद्धर्मप्रवर्तनाय नामोचितधर्मप्रवृत्तये—गृहागतब्राह्मणस्य जगत्पूज्येनापि पादप्रक्षालनादिरूपमर्चनं कर्तव्यमेवेति बोधनाय । एवमाचरणं नारदं पूजितवानित्यर्थः । "तुष्यति स्वागतेनाग्निरासनेन शतक्रतुः । पितरः पादशौचेन ह्यन्नाद्येन प्रजापतिः ॥" इति स्मृत्युक्ताचरणं शिक्षितवानिति भावः ॥१५॥ देवऋषीत्यत्र "ऋत्यकः" इति प्रकृतिभावः । तं नारदम् । हे नारद भगवते साक्षात्परमेशमूर्तये त्वामुद्दिश्य किं करवाम इत्याज्ञापयेत्यर्थः । यद्वा—हेभगवः ते किं करवामेत्यन्वयः । विसर्गलोपस्त्वार्षः । विधिवत्पूज्यविज्ञत्वे हेतुः—ऋषिर्मंत्रप्रवर्तकस्तत्रापि पुराणः पुरापि नवः स्वयं भगवत्त्वात् । किञ्च—नारायणो नरसखः । तादृशधर्मप्रवर्तनाय लोकेऽपि तद्रूपेणावतीर्णः । अभेदनिर्देशोयं तत्र श्रीनारायणर्षेरपि प्रवेशाभिप्रायेण । तस्य तत्र तादृशलीलाविर्भावे हेतुः—ऋषिवर्यमिति । पुरोहितादिवद्भक्तविशेषाविर्भावानुरूप्यादिति भावः । ननु स तु सर्वादिऋषिः नारायणत्वे च तस्य साक्षादेव गुरुरिति कथमेतत्पूजनं योग्यमित्यत्रापि सिद्धांतः—विधिमोदितेनेति । संप्रत्याविष्कृतक्षत्रियलीलस्य यस्य ब्राह्मणपूजा योग्यैव लोकवत्तु लीलाकैवल्यादिति भावः । "सत्यं ब्रूयात्प्रियं ब्रूयात्" इति शास्त्रेण मितया सिद्धया तथामृतवन्मिष्टया वाण्याभिभाष्य स्तुत्वा प्राह प्रार्थयामास । हे प्रभो विप्रत्वेनास्मत्स्वामिन् किं करवाम वयं तदाज्ञापयेत्यर्थः । भवत इति वक्तव्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ नैवाद्भुतं त्वयि विभोऽखिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानाम् ॥ निःश्रेयसाय हि जगत्स्थितिरक्षणाभ्यां स्वैरावतार उरुगाय विदाम सुष्ठु ॥ १७ ॥ दृष्टं तवांघ्रियुगलं जनताऽपवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥१८॥ श्रीशुक उवाच ॥ ततोन्यदाविशद्गेहं कृष्णपत्न्याः स नारदः ॥ योगेश्वरेश्वरस्यांग योगमायाविवित्सया ॥ १९ ॥

भगवता स्वस्यार्हणमनर्हं मन्यमानस्तत्संभावयन्नाह । नैवेति । सर्वमित्रत्वादेवमर्हणं न तु मम गौरवात् तर्हि कथं कंसादिष्वमैत्री तत्राह । खलानां दमश्च नैवाद्भुतमिति । कुतः । जगतः स्थितिर्धारणं रक्षणं पालनं ताभ्यां सह तस्य निःश्रेयसाय तवायं स्वेच्छावतार इति वयं सुष्ठु सम्यग्विद्मः । अतः खलदमः साधुसंमाननं च युक्तमिति भावः ॥ १७ ॥ यदुक्तं प्रभो किं करवामेति तत्राह । दृष्टमिति । भक्तजनताया अपवर्गरूपम् । किंच अतिदुर्लभतया ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यम् । किंच संसारकूपे पतितानामुत्तरणायावलंबमाश्रयम् । एवंभूतं तवांघ्रियुगलं मया दृष्टमतः कृतकृत्योऽस्मि । तथापि त्वत्स्मृतिर्यथा स्यात्तथाऽनुगृहाण ततस्तद्ध्यायन्नेव नित्यं चरामीति ॥ १८ ॥ १९ ॥

भगवत इति गौरवात् । एतच्च सर्वैश्वर्याय तुभ्यं मनुष्या वयं किं करवाम कर्तुं शक्नुमः, अपि तु न किंचिदिति व्यंजनायेति कौतुकविशेषाय तं प्रति वचसा तु निजैश्वर्यमत्यंतमाच्छादितं तादृशनिजवैभवं प्रति तस्य तादृशस्याप्याश्चर्यबुद्धित्वं दृष्ट्वा किंचिदुपालब्धमिव चेति तोषिणीकारसंदर्भौ ॥ १६ ॥ तत् अर्हणम् । संभावयन्संभवं मन्वानः । तत्राक्षेपे । अद्भुताभावमाशंक्य समाधत्ते—कुत इति । तस्य जगतः । लोके हि सेव्यो यदि सेवकमर्चयेत्तदा तस्यामंगलं भवेत्त्वं तु स्वतंत्रः स्वसेवकं संपूज्यापि तस्मात्पूजां गृहीत्वापि तं दंडयित्वापि तस्य यथार्हं मंगलमेव करोषीत्याह—नैवेति । तवाखिललोकानां नाथत्वादखिललोकानां जीवत्वात्त्वत्सेवकत्वमेव वस्तुतो भवेत् । तदुक्तं पाद्मे—"अकारेणोच्यते विष्णुः श्रीरुकारेण कथ्यते । मकारस्तु तयोर्दासः पंचविंशः प्रकीर्तितः॥" इति । पञ्चविंशो जीवः।तत्र केषांचिदस्माकं विप्राणां त्वामभीक्ष्णं सेवमानानामपि त्वत्कर्तृकं पूजनमस्मन्मनोतिदुःखदं केषांचिदुद्धवविदुरादीनां त्वां सेवमानानां त्वत्कर्तृकं पूजाग्रहणं तन्मनोतिदुःखदम् । अन्येषां पशुतुल्यसंसारिणां त्वामभजतां त्वत्कर्तृककृपावलोकः । अन्येषां खलानां जरासंधादीनां दमस्त्वत्कर्तृकं सर्वमिदं ते मैत्री हितकारित्वमेव यतो जगतः स्थितिर्धारणं रक्षणं पालनं ताभ्यां सह निःश्रेयसाय प्रेमभक्तियोगाय मोक्षाय च स्वैरोऽयमवतार इति जानीम इति विश्वनाथः ॥ १७ ॥ भगवत्प्रश्नोत्तरमाह—भो मुने किमर्थमागमनं किमत्रैव तिष्ठासान्यत्र प्रतिष्ठासेत्यपेक्षायामाह—दृष्टमिति । किमित्याक्षेपे कुत इत्यर्थः । विचिंत्यमेव न तु प्राप्यमित्यर्थः । इतोऽपि विशेषमाह—किञ्चेति । उत्तरणायोपर्यागमनाय । अतस्तवांघ्रिदर्शनात् । ततस्तवानुग्रहात् । तत् चरणद्वंद्वम् । ननु तद्ध्यानं तव मनःसाध्यमेव किं प्रार्थनया तत्राह—यथा स्मृतिस्स्यात्तथाऽनुगृहाणेति । तदपि त्वदनुग्रहसाध्यं नान्यसाध्यमित्यर्थः । यद्वा—यथा च स्मृतिर्मद्विषयकं कृपानुसंधानं तव स्यात्तथानुगृहाणेत्यर्थः ॥ १८॥ ततो भगवत्प्रार्थनोत्तरम् । स कृष्णसत्कृतः । अंगेति संबोधने । कृष्णपत्न्याः क्रमप्राप्तत्वात्सत्यभामाया गेहमाविशत योगमाया परमाचिंत्यशक्तिस्तस्या विवित्सया कार्यद्वारानुभवेच्छया ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीव्यंतमक्षैस्तत्रापि प्रियया चोद्धवेन च ॥ पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥२० ॥ पृष्टश्चाविदुषेवासौ कदाऽऽयातो भवानिति ॥ क्रियते किं नु पूर्णानामपूर्णै रस्मदादिभिः ॥ २१ ॥ अथापि ब्रूहि नो ब्रह्मञ्जन्मैतच्छोभनं कुरु ॥ स तु विस्मित उत्थाय तूष्णीमन्यदगाद्गृहम् ॥ २२ ॥ तत्राप्यचष्ट गोविंदं लालयंतं सुताञ्छिशून् ॥ ततोऽन्यस्मिन्गृहेपश्यन्मज्जनाय कृतोद्यमम् ॥ २३ ॥ जुह्वंतं च वितानाग्नीन्यजंतं पंचभिर्मखैः ॥ भोजयंतं द्विजान्क्वापि भुंजानमवशेषितम् ॥ २४ ॥ क्वापि संध्यामुपासीनं जपंतं ब्रह्म वाग्यतम् ॥ एकत्र चासिचर्मभ्यां चरंतमसिवर्त्मसु ॥ २५ ॥ अश्वैर्गजै रथैः क्वापि विचरंतं गदाग्रजम् ॥ क्वचिच्छयानं पर्यंके स्तूयमानं च बंदिभिः॥२६॥ मंत्रयंतं च कस्मिंश्चिन्मन्त्रिभिश्चोद्धवादिभिः ॥ जलक्रीडारतं क्वापि वारमुख्याऽबलावृतम् ॥ २७ ॥ कुत्रचिद्द्विजमुख्येभ्यो ददतं गाः स्वलंकृताः ॥ इतिहासपुराणानि शृण्वंतं मंगलानि च ॥ २८ ॥ हसंतं हास्यकथया कदाचित्प्रियया गृहे ॥ क्वापि धर्मं सेवमानमर्थकामौ च कुत्रचित् ॥ २९ ॥

अक्षैर्दीव्यंतमित्यादौ ददर्शेति ज्ञातव्यम् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ वितानाग्नीनाहवनीयादीनग्निहोत्रेण । पंचभिर्मखैर्महायज्ञैर्यजंतम् ॥ २४ ॥ २५ ॥ २६ ॥ ॥ २७ ॥ २८ ॥ २९ ॥

तत्रापि तस्मिन्नपि गेहे ॥ २० ॥ असौ नारदः । अविदुषेव पूर्वं गृहे नारदागमनमजानतेव । पूर्णानां विरक्तानां युष्माकम् । अपूर्णैर्गृहस्थैः । गृहकृत्यानामनंतत्वेन पूरयितुमशक्नुवद्भिरित्यर्थः । मनुष्यनाट्यविडंबनमेतत् ॥ २१ ॥ यद्यपि वयमनिच्छास्तथाप्यस्मत्पावनार्थमित्यर्थः । स नारदः ॥ २२ ॥ तत्राऽप्यन्यगृहेऽपि । अचष्टाऽपश्यदिति सर्वत्राग्रेऽपि ज्ञेयम् । अत्रैकस्य कृष्णवपुषो यथा बहून् प्रकाशानभिमानभेदक्रियाभेदसहितानपश्यत् तथैव एकेषामेवोद्धवादिवपुषामपि बहून्प्रकाशान् । किञ्चैकस्मिन् क्षणे मनोवेगेन प्रत्येकं षोडशसहस्रगृहान् गतो मुनिः पृथक्पृथक्कालभेदान् क्रियाभेदांश्चापश्यदित्यत एकक्षणमध्यमेव षष्टिघटिकं कालं पृथक्पृथक्स्थले प्रातरादिस्वभागांस्तदुचितक्रियाभेदसहितान् प्रकाशयन्प्राविशदित्यतः प्रातरादिकालानां षष्टिघटिकानां क्रियाणामपि सर्वकालवर्तित्वं मुनिर्ज्ञातवानिति ज्ञेयम् । मज्जनायेति प्रातःसमयो व्यंजितः। ततः सुतलालनपरदर्शनानंतरम् ॥२३॥ जुह्वंतं होमं कुर्वंतमिति पूर्वाह्णः । पंचभिः पाठहोमातिथ्यर्चनतर्पणबलिभिर्यजंतमिति मध्याह्नः । क्वापि गृहे ब्राह्मणभोजनादवशिष्टमन्नं भुंजानमित्यपराह्णः ॥२४॥ब्रह्म गायत्री,गायत्रीजपे सर्ववेदजपस्यांतर्भूतत्वात् 'गायत्री परमं ब्रह्म' इति स्मृतेरिति सायाह्नः । एकत्र एकस्मिन् गृहे।असिवर्त्मसु कौक्षेयकपरिवर्तनावर्तनोद्वर्तनादिमार्गेषु चरंतं शिष्यान् शिक्षयंतमिति पुनः प्रातः ॥२५॥ अश्वैर्गजैरिति पुनर्मध्याह्नः। क्वचिच्छयानमिति रात्रिशेषः॥२६॥ मंत्रयंतमिति प्रदोषः । जलक्रीडेत्यपराह्णः। वारे द्वारे मुखं गताऽऽगतपुरुषनिरीक्षणार्थं यासां ता वारमुख्याः ताश्च ता अबलाश्चेति वारमुख्याबलास्ताभिरावृतः । मुखमेव मुख्यं स्वार्थे यत्। "वारो द्वारे हरे कुब्जवृक्षे सूर्यादिवासरे।समूहेऽवसरे क्षणे" इति वारतांतविः॥२७॥द्विजमुख्येभ्य इत्युक्तेः क्षत्रियादीनां दानस्वीकारानधिकार उक्त इति पूर्वाह्णः । चोत्र पादपूरणे । मंगलानीति पुराणेतिहासविशेषणम् । "इतिहासपुराणानां श्रवणं मंगलं परम् । गीयते सर्वथैतेषु मंगलायतनो हरिः ॥ " इति नारदीये । अत्रापराह्णः । " इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत् " इति स्मृतेः ॥ २८ ॥ कदाचित् रत्यवसरे, इति निशीथः । क्वापि धर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यायंतमेकमासीनं पुरुषं प्रकृतेः परम् ॥ शुश्रूषंतं गुरून् क्वापि कामैर्भोगैः सपर्यया ॥ ३० ॥ कुर्वंतं विग्रहं कैश्चित्संधिं चान्यत्र केशवम् ॥ कुत्रापि सह रामेण चिंतयंतं सतां शिवम् ॥ ३१ ॥ पुत्राणां दुहितॄणां च काले विध्युपयापनम् ॥ दारैर्वरैस्तत्सदृशैः कल्पयंतं विभूतिभिः ॥ ३२ ॥ प्रस्थापनोपानयनैरपत्यानां महोत्सवान् ॥ वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥ ३३ ॥ यजंतं सकलान्देवान्क्वापि क्रतुभिरूर्जितैः ॥ पूर्तयंतं क्वचिद्धर्मं कूपाराममठादिभिः ॥ ३४ ॥ चरंतं मृगयां क्वापि हयमारुह्य सैंधवम् ॥ घ्नंतं ततः पशून्मेध्यान्परीतं यदुपुंगवैः ॥ ३५ ॥ अव्यक्तलिंगं प्रकृतिष्वंतःपुरगृहादिषु ॥ क्वचिच्चरंतं योगेशं तत्तद्भावबुभुत्सया ॥ ३६ ॥ अथोवाच हृषीकेशं नारदः प्रहसन्निव ॥ योगमायोदयं वीक्ष्य मानुषीमीयुषो गतिम् ॥ ३७ ॥ विदाम योगमायास्ते दुर्दर्शा अपि मायिनाम् ॥ योगेश्वरात्मन्निर्भाता भवत्पादनिषेवया ॥ ३८ ॥

॥ ३० ॥ ३१ ॥ काले तत्तत्समये विधिना उपयापनं प्रापणं विवाहमित्यर्थः । कल्पयंतं घटयंतम् । विभूतिभिर्विभवैः ॥ ३२ ॥ प्रस्थापनं दुहितृजामात्रादीनां स्वगृहात्तत्तद्गृहं प्रति नयनम् । उपानयनं तत्तद्गृहात्पुनरानयनम् । तैर्महोत्सवान्कल्पयंतम् । योगेश्वरेशस्य तेषामपत्यानां महोत्सवान्वीक्ष्य लोकाः सर्वे विसिस्मिरे विस्मयं चक्रुः । तथाभूतान् कल्पयंतम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ अव्यक्तलिंगं वेषांतरेण छन्नम् ॥ ३६ ॥ ३७ ॥ हे योगेश्वर आत्मन् आत्मनि

मित्यादिना दिनरात्री ॥ २९ ॥ गुरूनाचार्यादीन् । अत्र तोषिणी—त्रिवर्गपराणां लीलामुक्त्वा मोक्षपरां तामाह—ध्यायंतमिति । मनुष्यचेष्टानुकरणलीलामात्रत्वान्न वैष्णवसिद्धान्तहानिरिति तयोरावश्यकमुख्यलीलामाह—गुरूञ्छ्री सांदीपनिगर्गवसुदेवादीन् । कामादिभिः कामा अभीष्टपदार्था, भोगा उपभोगार्हपदार्थाः । सपर्या पारिचर्या, देवशुश्रूषा त्वग्रे वक्ष्यते, इति मध्याह्नादिः ॥ ३० ॥ कुर्वंतं कर्तुमिच्छंतमारभमाणं वा केशवं तत्रतत्र ब्रह्मेशयोरपि मोहनाद्व्यक्तीकृततन्नामार्थम् । सतां पांडवादीनाम् । कथमेषां शिवं स्यादिति चिन्तयन्तम् ॥३१॥ इत्यर्थ इति—उपयाप्यते प्राप्यते वरकन्याभ्यां श्वशुरगृहं यत्र तदुपयापनमिति निरुक्तेः । विभूतिभिर्बहुसंभारैः 'विभूतिर्विभवो वसु' इति नाममाला ॥३२॥ तथाभूतान् विस्मयजनकान् । योगेश्वराः सनकाद्यास्तेषां प्रभोर्वैकुण्ठनाथस्य लोका गरुडादयोऽपि विसिस्मिरे ॥ ३३ ॥ पूर्तं करोतीति पूर्तयति, ततः शतृप्रत्ययः । धर्मं धर्मस्वरूपमपि लोकसंग्रहाय तथा चरंतमित्यर्थः । धर्मं पूर्तयंतं पूरयन्तम् । 'पूर्तं कर्मणि पूरणे' इति निरुक्तिकोशात् । स्वस्य कलाः प्रतिमादिरूपान्साक्षाच्छ्रीविष्ण्वादिरूपांश्च क्रतुभिरर्चनात्मकैर्होमात्मकैर्वा । आलया देवादिगृहाणि तैः । पूर्ततया संपादयन्तम् । विश्वनाथस्तु—क्वचिद्यजंतं चैत्रादौ चातुर्मास्यादौ युगादौ चेत्याह ॥ ३४ ॥ सैंधवं सिन्धुदेशोद्भवम् । ततो मृगयायाम् मेध्यान् यज्ञियान् ॥ ३५ ॥ प्रकृतिषु राज्यांगेषु । तस्यतस्य प्रकृत्यादेर्भावस्याभिप्रायस्य जिज्ञासया । एते धर्मपरास्तद्धीना वेति ज्ञातुमिच्छयेत्यर्थः । यद्वा—प्रकृतिष्वन्तःपुरादिषु तत्रत्यजनाभिप्रायं ज्ञातुम् अव्यक्तलिंगं वेषान्तरेणाच्छन्नं योगेशं सर्वज्ञमपि प्रेममय्या लीलाशक्त्यैव सर्वज्ञताशक्तेराच्छादनादिति भावः ॥ ३६ ॥ अथानंतलीलादर्शनानन्तरम् । रतिं क्रीडाम् । इवपदमाश्चर्याभावमाह । आत्ममायामन्तर्धाय कोन्वर्थो दुर्घटो भवतीत्युक्तत्वात् । प्रहसन्निवेति—सर्वज्ञत्वेपि बुभुत्सादृष्ट्या प्रहासः । इवेत्याश्चर्यदृष्ट्या संकोचात्तत्संवरणमुद्रा च ॥ ३७ ॥ दुर्दर्शानां मनस्यपि भानं न संभवतीत्यरुच्याह—तवेत्यादि । इति भाव इति—अनंतत्वान्मायाया इत्याशयः । विदाम वेदाम । साक्षादनुभवितुं प्रार्थयामेति प्रार्थनायां लोट् । ननु युष्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुजानीहि मां देव लोकाँस्ते यशसाङ्कतान् ॥ पर्यटामि तवोद्गायँल्लीलां भुवनपावनीम् ॥ ३९ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्य वक्ताऽहं कर्ता तदनुमोदिता ॥ तच्छिक्षयँल्लोकमिममास्थितः पुत्र मा खिदः ॥ ४० ॥ श्रीशुक उवाच ॥ इत्याचरंतं सद्धर्मान्पावनान्गृहमेधिनाम् ॥ तमेव सर्वगेहेषु संतमेकं ददर्श ह ॥ ४१ ॥

मम मनसि तव स्वरूपे वा निर्भाताः प्रतीतास्तव योगमायाः केवलं विदाम विद्मः न तु त्वत्परमार्थमिति भावः ॥ ३८ ॥ त्वन्मानुष्यनाट्येन मुह्याम्यतो मां प्रस्थापयेत्याह । अनुजानीहीति ॥ ३९ ॥ तत्तस्माल्लोकं शिक्षयन्निमं धर्ममास्थितो न तु तत्त्वतः हे पुत्र मा खिदः मोहं मा प्राप्नुहीति ॥ ४० ॥ इत्येवमनुगृहीतस्तमेकमेव संतं ददर्शेति

द्विधैः सर्वज्ञैः किं दुर्दर्शं तत्राह—योगिनां योगिभी रुद्रादिभिरपि दुर्दर्शा द्रष्टुमशक्याः कुतोऽनुभवितुं कुतस्तरां कर्तुमिति भावः । हे योगेश्वर आत्मन्नात्मनि त्वय्येव निर्भाता अपि भवत्पादनिषेवया विदाम इति विश्वनाथः ॥ ३८ ॥ तवैता लीला अद्भुता दृष्ट्वा धैर्यं कर्तुं न शक्नोम्यतः स्वेष्टबंधुभ्यो नानादिग्वर्तिभ्यो वक्तुं यामीत्याह—अनुजानीहीति । अतो मोहजनकत्वात् ॥ ३९ ॥ यतोऽहमेव धर्मस्य वक्त्रादिस्तत्तस्माद्धेतोः । न तत्त्वतो वस्तुतः विधिनिषेधातीतत्वान्ममेति भावः । ननु पूर्वं पूजयित्वा पश्चात्कथं पुत्रेत्युक्तं तत्राह—हे पुत्र तद्वत्प्रिय । यद्वा—“ स्यादात्मजे च सुहृदि पवित्रे पवने हरौ । अग्नौ मंत्रे च पुत्रोक्तिः ” इति निरुक्तिः । यद्वा—पुत्रं कृत्वा त्यक्त इतिवद्धास्यसंबुद्धिः । ननु “ पूर्वं संपूज्य तं पश्चान्नैकृष्टयेन न योजयेत् ” इति स्मृतेः कथं श्रीकृष्णेन क्रियते किन्तु पूर्णानामपूर्णैरस्मदादिभिः “ पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ”, ‘ तन्मै तच्छोभनं कुरु ’ इत्याद्युक्तेः पुनः पुत्र मा खिदइति निकृष्टता दर्शितेति चेदर्थान्तरमाह—मखानां समूहो माखम् । “ तस्य समूहः ” इत्यण्, तदस्यास्तीति माखी परिषत् “यस्येदं देवयजनमनुयज्ञं वितन्वते ” इत्युक्तेः । पुत्रैः प्रचेतोभिर्युतो माखी पुत्रमाखी, तं दयते पालयति पुरंजनोपाख्यानेन ‘ तज्जन्म तानि कर्माणि ’ इत्यारभ्य “ नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ” इत्यंतेनोपदेशकदम्बेन संसाराद्रक्षतीति पुत्रमाखिदस्तत्सम्बुद्धौ तथा । अर्थाद्धे सर्वतारक अहं तु लोकशिक्षार्थमेव सर्वमाचरामीति भावः । “ तीर्थे देवे गुरौ विप्रे पुत्रः स्यान्नन्दने तथा ” इति कोशांतराच्च । हे पुत्र हे विप्र सर्वनियतानियतकालेऽपि शोधक “ पूर्णेष्वपि च कालेषु न शुद्धिर्ब्राह्मणैर्विना । अपूर्णेष्वपि कालेषु शोधयन्ति द्विजोत्तमाः ॥ ” इत्यापस्तम्बस्मृतेः । त्वदेकांतदासस्य मम त्वन्निकटस्थिताविदमेव महद्दुःखं यन्मे शश्वत्पर्यटनदुर्भगौ पादौ स्वहस्तकमलाभ्यां प्रक्षालयसि तत्राह—ब्रह्मन्निति । तत्तस्माल्लोकं शिक्षयन्निमं धर्ममाश्रित आह—तावत् क्षत्रियो गृहस्थस्त्वां ब्राह्मणं गृहागतं यदि नार्चयामि तदा स्वाचरणेन मत्प्रचारितो धर्मः कथं तिष्ठेत् ‘ यद्यदाचरति श्रेष्ठः ’ इति न्यायात्तेन धर्मप्रचारणार्थमेव त्वत्पादावद्य क्षालितौ न तु वस्तुतः । यदा तु मया धर्मप्रचारणलीला नारब्धा तदा केशिवधानन्तरं मत्पार्श्वागतस्य तत्कृतस्तुत्यादिकमश्रौषमेव नाणुमात्रमप्यर्हणाद्यकरवमिति विचार्य पश्येति भावः । ननु तदपीदानीं त्वत्कर्तृकावनेजनकर्मणि स्वपदस्पृष्टतत्पाने ममापराधो भवत्येवेत्यत आह—हे पुत्रेति । स्नेहं ज्ञापयित्वा सांत्वयति—यथा पितरि तदंकनिहितपादोऽपि पुत्रस्य नापराधस्तथैव मयि तवेति बुद्ध्यस्वेति भावः ॥४० ॥ इतिशब्दः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णस्यानंतवीर्यस्य योगमायामहोदयम् ॥ मुहुर्दृष्ट्वा ऋषिरभूद्विस्मितो जातकौतुकः ॥ ४२ ॥ इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना ॥ सम्यक् सभाजितः प्रीतस्तमेवानुस्मरन्ययौ ॥ ४३ ॥ एवं मनुष्यपदवीमनुवर्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः ॥ रेमेंऽग षोडश सहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ॥ ४४ ॥ यानीह विश्वविलयोद्भववृत्तिहेतुः कर्माण्यनन्यविषयाणि हरिश्चकार ॥ यस्त्वंग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यपवर्गमार्गे ॥ ४५ ॥ इति श्रीमद्भा० म० द० उ० कृष्णगार्हस्थ्यदर्शनंनामैकोनसप्ततितमोध्यायः ॥ ६९ ॥
श्रीशुक उवाच ॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन् ॥ गृहीतकण्ठ्यः पतिभिर्माधव्यो विरहातुराः ॥ १ ॥

॥ ४१ ॥ मुहुर्मुहुर्दृष्ट्वा जातकौतुको मुनिर्विस्मितोऽभूदिति ॥ ४२ ॥ श्रद्धितः श्रद्धया युक्त आत्मा यस्य तेन ॥ ४३ ॥ नारदद्दृष्टां श्रीकृष्णलीलां निगमयति । एव मिति अखिलस्य भवायोद्भवाय गृहीताः शक्तयो नानामूर्तयो येन सः सव्रीडं च तत्सौहृदं च तेन निरीक्षणं हासश्च ताभ्यां जुष्टः ॥ ४४ ॥ अनन्यविषयाण्यसाधारणानि । अपवर्गमार्गे मोक्षप्रदे ॥ ४५ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध०टीकायामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ततस्तु सप्ततितमे कृष्णस्याह्निककर्मणि ॥ दूतनारदयोः कार्ये कार्यमंत्रविचारणम् ॥ १ ॥ जगन्मंगलचारित्रमाह्निकं जगदीशितुः ॥ नारदेन क्वचित्किंचिद्दृष्टमाह यथाक्रमम् ॥ २ ॥ अथेति । "इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना" इति प्रस्तुतस्य श्रीकृष्णस्याह्निकस्याधिकारेऽथशब्दः । उपवृत्तायामासन्नायाम् । पतिभिः श्रीकृष्णैः । माधव्यो माधवस्य भार्याः ॥ १ ॥

प्रकारे । सद्धर्मान् वेदविहितान् । तं कृष्णम् ॥ ४१ ॥ ४२ ॥ इतीत्थम् । तं कृष्णम् ॥ ४३ ॥ हे अंग ॥ ४४ ॥ असाधारणान्यन्येन कर्तुमशक्यानि । :हि यस्माद्भक्तिर्भवति तस्मान्मुमुक्षुणा सेव्यानीति भावः । यद्वा–अनन्यविषयाणि स्वैकतात्पर्यकाणि, यद्वा–अन्या भक्ता विषया उद्देश्या येषां तानि । अपवर्गो[1] मोक्षमार्गः प्राप्त्युपायो यस्य सः संसारक्लेशध्वंसे सत्येव निर्विघ्नभक्तिसिद्ध्या प्राप्यत्वात्, " ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ " इति गीताभ्यः । यद्वा–अपवर्गो भक्तियोग एव मार्गो यस्य तत्र । यद्वा–अपवर्गा उपेक्षितचतुर्वर्गास्तैर्मार्ग्यतेऽन्वेष्यत इति तोषिणी ॥ ४५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ ततो नारदगमनोत्तरम् । दूतकार्यं जरासन्धबद्धनृपमोक्षणरूपम्, नारदकार्यं युधिष्ठिरयज्ञे कृष्णप्रेषणरूपमेवमुभयोः कार्ये प्राप्ते कार्यमंत्रविचारणं कर्तव्यमंत्रविमर्शनम् (१) । अह्नि कर्तव्यमाह्निकम् (२) । आसन्नायां व्यतीतप्रायायाम् । माधव्यो रुक्मिण्याद्याः । पतिभिरिति बहुत्वं प्रकाशबाहुल्यात् । अशपन्–रेरे कुक्कुटाः प्रियविच्छेदकप्रातर्बोधका यूयं शीघ्रमेव

१ अपवर्गो भक्तियोग एव, स च पञ्चमस्कन्धे उक्तः ' महापुरुषप्रसंग ' इत्यादिना ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयांस्यरूरुवन्कृष्णं बोधयंतीव बंदिनः ॥ गायत्स्वलिष्वनिद्राणि मंदारवनवायुभिः ॥ २ ॥ मुहूर्तं तं तु वैदर्भी नामृष्यदतिशोभनम् ॥ परिरंभणविश्लेषात्प्रियबाह्वंतरं गता ॥ ३ ॥ ब्राह्मे मुहूर्त उत्थाय वार्युपस्पृश्य माधवः ॥ दध्यौ प्रसन्नकरण आत्मानं तमसः परम् ॥ ४ ॥ एकं स्वयंज्योतिरनन्यमव्ययं स्वसंस्थया नित्यनिरस्तकल्मषम् ॥ ब्रह्माख्यमस्योद्भवनाशहेतुभिः स्वशक्तिभिर्लक्षितभावनिर्वृतिम् ॥ ५ ॥ अथाप्लुतोंभस्यमले यथाविधि क्रियाकलापं परिधाय वाससी ॥ चकार संध्योपगमादि सत्तमो हुतानलो ब्रह्म जजाप वाग्यतः ॥ ६ ॥

बंदिन इव श्रीकृष्णं बोधयंति संति वयांसि पक्षिणोऽरूरुवन्नतिशयेनाकूजन् । मंदारवनवायुभिर्गायत्स्वलिष्वनिद्राणि निद्रारहितानि वयांसि ॥ २ ॥ वैदर्भीत्युपलक्षणम् । परिरंभणविश्लेषात्तं पर्यालोच्य ॥ ३ ॥ ४ ॥ एकमखंडम् । तत्र हेतुः । अनन्यं निरुपाधिम् अत एवाव्ययं नित्यम् । स्वयंज्योतिष्ट्वे हेतुः । नित्यनिरस्तं नित्यनिवृत्तं कल्मषमविद्या यस्मात्तम् । उपलक्षणमाह । अस्येति । अस्य विश्वस्य लक्षितभावश्चासौ निर्वृतिश्च । भावः सत्ता । निर्वृतिरानंदः । तथाहि । गुणक्षोभात्पूर्वं सत्तामात्रं यः "सदेव सोम्येदमग्र आसीत्" इत्यादिश्रुतेः । स एवानंदश्च "विज्ञानमानंदम्" इत्यादिश्रुतेः । तं सदानंदमित्यर्थः ॥ ५ ॥ आप्लुतः स्नातः संध्याया उपगम

म्रियध्वमिति शापं ददुः ॥ १ ॥ २ ॥ मुहूर्तं मुहूर्तोपलक्षितं कालम् । तं परिरंभणाविश्लेषम् । आलोच्य विमृश्य "ल्यब्लोप–" इति पंचमी । बाह्वन्तरं वक्षःस्थलम् ॥ ३ ॥ ब्राह्मे मुहूर्ते चतुर्घटिकावशिष्टरात्रौ "अरुणोदयकालो हि मुहूर्तो ब्राह्म उच्यते । रात्रेः पश्चिमयामोऽपि मुहूर्तो ब्राह्म उच्यते ॥ ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी । तां कुर्वाणो द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति ॥" इत्याद्युक्तेः ॥ ४ ॥ तत्राऽखंडत्वे । अत एव निरुपाधित्वादेव । उपलक्ष्यते ज्ञायतेऽनेनेति तथा । तटस्थस्वरूपलक्षणोभयरूपमित्यर्थः । इत्यर्थ इति तात्पर्यम् । सर्वगृहेषु बहुधा स्थितमप्येकमेव तं ददर्श । एकत्वश्चेदं श्रीविग्रहपरमेव, भगवति विग्रहाविग्रहिभावस्य निषिद्धत्वाद्विग्रह एव विभुत्वादेर्दर्शितत्वात् । विग्रहिणस्तु विभुत्वे साध्ये श्रीनारदस्यासंदेहे तदुपगमनानुपपत्तेः, कृतकायव्यूहैः सौभर्यादितुल्यत्वापत्तेश्चित्रत्वानुपपत्तेश्च ॥ विश्वनाथस्तु–एकमित्यस्येत्थमर्थमाह आत्मानं:स्वं दध्यौ यथान्यो जनो ब्राह्मे मुहूर्ते तं ध्यायति तथा सोपि स्वमेव दध्यौ । तमसः प्रकृतेः परमेकमितीश्वरस्यैकस्यैवौचित्यात् । अतः स्वयं ज्योतिः स्वयमेव प्रकाशमानम् । ननु संकर्षणादयोऽपीश्वराः श्रूयंते तत्राह–अनन्यं न कोप्यवतारोऽन्यो यस्मात्तं संकर्षणादिषु स्वांशावतारेषु पृथङ्नित्यं वर्तमानेष्वप्यव्ययं परिपूर्णमित्यर्थः । प्रादुर्भावे तु कृपैव कारणमित्याह–स्वसंस्थया स्वस्य सम्यक्सर्वजनदृश्यतया स्थित्या निवृत्तं कल्मषमविद्या यस्मात्तम् । किञ्च–ब्रह्मण आख्या सम्यक्ख्यातिः प्रकाशो यस्मात्तम् "मदीयं महिमानं च परं ब्रह्मेतिशब्दितम्" इति श्रीमत्स्योक्तेः 'ब्रह्मणो हि प्रतिष्ठाहम्' इति गीताभ्यश्च । यद्वा–ब्रह्माख्यं ब्रह्मनामकम् । "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इति प्रथमस्कंधोक्तेः । सर्वश्रैष्ठ्यमाह–अस्य विश्वस्य उद्भव उद्रिक्तो भवः संसारस्तस्य नाशहेतुभिः स्वशक्तिभिः ज्ञानप्रदत्वभक्तिप्रदत्वादिभिर्लक्षिता सर्वत्रानुभूता भावानां मर्त्यादीनां निर्वृतिर्यस्मात्तम् । तत्र भक्तानां तद्दत्तप्रेमातिशयेन शिष्टानां तत्कृतसुष्ठुपालनेन दुष्टानां तद्वधानंतरमुक्तिप्राप्त्या निर्वृतिरिति ॥ ५ ॥ अथात्मस्वरूपध्यानोत्तरम् । एतेन प्रातरुत्थायादावात्मध्यानं कार्यम् "सुप्तप्रबोधयोः संधावात्मनो गतिमात्मदृक्" इत्याद्युक्तेः । तदभावे त्वीश्वरस्यापि जीवतास्यादिति बोधनायैव भगवदाह्निककर्मण्येतदुक्तमिति भावः । संधौ दिनरात्र्योः पूर्वाह्णापराह्णयोश्च या क्रियते सा संध्या प्राणायामोपस्पर्शनमार्जनादिपूर्वकगायत्र्युपासनरूपनित्यकर्मविशेषः तस्योपगम उपासनं तदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपस्थायार्कमुद्यंतं तर्पयित्वात्मनः कलाः ॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्य चात्मवान् ॥ ७ ॥ धेनूनां रुक्मशृंगीणां साध्वीनां मौक्तिकस्रजाम् ॥
पयस्विनीनां गृष्टीनां सवत्सानां सुवाससाम् ॥ ८ ॥ ददौ रूप्यखुराग्राणां क्षौमाजिनतिलैः सह ॥ अलंकृतेभ्यो विप्रेभ्यो बद्वंबद्वं दिनेदिने ॥ ९ ॥

उपासनमादिर्यथा भवति तथा क्रियाकलापं चकार । काण्वत्वादुदयात्पूर्वमेव हुतानलः । ब्रह्म गायत्रीं जजाप ॥६॥ कला अंशान्देवान् ऋषीन्पितॄंश्च तर्पयित्वा ॥७॥
गृष्टीनां प्रथमप्रसूतानाम् ॥ ८ ॥ बद्वमिति । " हिरण्येन परीवृतान् कृष्णाञ्छुक्लदतो मृगान् ॥ मष्णारे भरतोऽददाच्छतं बद्वानि सप्त च " इति श्रुत्युक्तानि सप्तो

दिकर्माणि सत्तमः परमकुशलः क्रियाकलापं संध्योपासनोत्तरामरार्चनादिरूपम् । एतेन सर्वकर्मणामुपक्रमः संध्योपासनमेव । तथाह दक्षः—"संध्याहीनो द्विजो नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फल
भाग्भवेत् ॥ " इति । कर्म नित्यनैमित्तिकम् । सा च—"उत्तमा तारकोपेता मध्यमा लुप्ततारका । अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता ॥ उत्तमा सूर्यसहिता मध्यमा लुप्तसूर्यका । अधमा तारकोपेता सायंसंध्या
त्रिधा मता ॥" पारिजाते तु—"उदयास्तमयादूर्द्ध्वं यावत्स्याद्घटिकात्रयम् । तावत्संध्यामुपासीत प्रायश्चित्तमतः परम् ॥" तच्च " संध्याकाले त्वतिक्रांते स्नात्वाऽऽचम्य यथाविधि । जपेदष्टशतं देवीं ततस्संध्यां समाचरेत् ॥ "
इति शातातपः । देवीं गायत्रीम् । " कालातिक्रमणे चैव चतुर्थार्घं प्रदापयेत् " इति पारिजाते । " गृहे त्वेकगुणा संध्या गोष्ठे दशगुणा स्मृता । शतसाहस्रिका नद्यामनंता विष्णुसंनिधौ ॥ " इति व्यासः ।
मध्याह्नसंध्याकालस्तु शातातपेनोक्तः—" अध्यर्द्धयामादासायं संध्या माध्याह्निकी मता " इति । ' दशधेनुसमा संध्या ' इत्यादिभिर्वाक्यैर्वात्स्यादिभिरस्याः फलं बहुधोक्तमित्यलं प्रसक्तानुप्रसक्तेन । उदितात्पूर्वमिति " उदिते
जुहोत्यनुदिते च " इति श्रुतेः । दक्षोऽप्याह—"संध्याकर्मावसाने तु स्वयं होमो विधीयते । ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ॥ एभिरपि हुतं यत्स्यात्तद्धुतं स्वयमेव हि " । तच्च ' कुंडे वा स्थंडिले वापि '
इति वचनात्स्वेच्छया कुर्यात् । " धमनीमंतरं कृत्वा तृणं वा काष्ठमेव वा । मुखेनाग्निं समिंधीत मुखादग्निरजायत ॥ " इति । " अंगुल्यग्रे न होतव्यं न कुर्यात्स्वांगुलिभेदनम् । अंगुल्युत्तरपार्श्वेन होतव्यमिति हि स्मृतम् ।
कुंडे दोषबहुत्वाच्च स्थंडिलं शोभनं मतम् ॥" होमस्तु व्याहृतिभिरेव कार्य इत्यलं प्रपञ्चेन । वाससीत्युक्तेः "नैकवस्त्रः प्रवर्तेत स्नानदानादिकर्मणि" इत्युक्तेर्वस्त्रद्वयं धार्यम् । धौतवस्त्रमुपवस्त्रं च "स्नात्वैव वाससी धौतेऽक्लिष्टे विप
रिधाय च । प्रक्षाल्योरू मृदद्भिश्च हस्तौ प्रक्षालयेन्मृदा ॥" इति । अक्लिष्टे रजकाक्षालिते । तेऽपि सदशे " अछिन्नाग्रं तु यद्धौतं तच्छुचि मनुरब्रवीत् " । ते अपि शुष्के "नार्द्रमेकं हि वसनं परिदध्यात्कथंचन " इत्युक्तेः ।
सप्तवाताहतमार्द्रमपि परिदध्यात् ' सप्तवाताहतं शुष्कवद्भवति ' इति शातातपोक्तेः । पाद्मे—" प्रत्यहं क्षालयेद्वस्त्रं दैवे पित्र्ये च कर्मणि । तोयैर्विण्मूत्रशुक्रैस्तु दूषितं तु मृदंबुभिः । कार्पासं कटिनिर्मुक्तं
कौशेयं भोजने धृतम् । क्षालनाच्छुद्धिमाप्नोति ऊर्णा वातेन शुद्ध्यति ॥" इति " ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् । अहतं तद्भवेद्वासः पावनं सर्वकर्मसु ॥" ईषद्धौतमक्षारधौतम् । नवं तद्दिनधौतं प्रत्यहं नवस्यासंभवात् ।
तत्राप्यकृत्रिमदशम् । तथाच—" अकृत्रिमदशं वस्त्रं प्रशस्तं सर्वकर्मसु । अकृत्रिमा दशा ज्ञेया सिद्धा वायनकर्मणि ॥" इति भारते । "अधौतवस्त्रसंस्पृष्टं स्त्रीधौतं क्षालनाच्छुचि" इत्यलम् । ब्रह्म जजाप नियतस्वाध्यायाध्ययनं
चकार । गायत्रीं वेत्युक्तं स्वामिना । " जपभोजनहोमेषु मूत्रोच्चारे च वाग्यतः " इत्युक्तेर्जपे मौनमेव न्याय्यम् । " सकृदुच्चारिते शब्दे प्रणवं समुदीरयेत् । प्रोक्ते पारशिके शब्दे प्राणायामं समाचरेत् ॥ बहुप्रलापी
त्वाचम्य न्यस्यांगानि ततो जपेत् ॥" इति तंत्रसारोक्तेः ॥ ६ ॥ उपस्थाय " अदृश्रमस्य केतवः " इत्यादिमंत्रैः संस्तुत्य । पितॄनित्युक्तेर्जीवत्पितृकस्यापि दिव्यपितृतर्पणेऽधिकारात् " देवानृषीन्मनुष्यांश्च दिव्यान्पितॄन्य
मांस्तथा । जीवत्पितापि प्रीणीयान्नित्यं स्नात्वा द्विजोत्तमः ॥" इति स्मृतेः । वृद्धान् नत्यादिना, विप्रान् दानमानादिना, आत्मा वेदः स विद्यते पाल्यतयायस्य स आत्मवान् "वेदविप्रौ ममात्मानौ मुख्यौ गावस्तथैव हि ।
वेदगोविप्ररक्षायै सर्वदा ध्रियते तनुः ॥" इति श्रीमुखोक्तेः ॥ ७ ॥ गृष्टीनां सकृत्प्रसूतानाम् । साध्वीनां पादबंधनादिक्रियानपेक्षाणाम् ॥ ८ ॥ अलंकृतेभ्यो दानात्प्राक् स्वयमेव स्वर्णकुंडलादिभिर्भूषितेभ्यः । मृगान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोविप्रदेवतावृद्धगुरून्भूतानि सर्वशः ॥ नमस्कृत्यात्मसम्भूतीर्मंगलानि समस्पृशत् ॥ १० ॥ आत्मानं भूषयामास नरलोकविभूषणम् ॥ वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥ ११ ॥ अवेक्ष्याज्यं तथाऽऽदर्शं गोवृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां पौरांतःपुरचारिणाम् ॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्यनंदत ॥ १२ ॥ संविभज्याग्रतो विप्रान्स्रक्तांबूलानुलेपनैः ॥ सुहृदः प्रकृतीर्दारानुपायुंक्त ततः स्वयम् ॥ १३ ॥ तावत्सूत उपानीय स्यंदनं परमाद्भुतम् ॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्यावस्थितोऽग्रतः ॥ १४ ॥ गृहीत्वा पाणिना पाणी सारथेस्तमथारुहत् ॥ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥ १५ ॥

त्तरशतं बद्वान्येकीकृत्य पुराणे चतुर्दशलक्षत्वेन गणितानि । यथोक्तं भरतमेवाधिकृत्य नवमस्कंधे " मृगाञ्छुक्लदतः कृष्णान्सुवर्णेन परिष्कृतान् । अदात्कर्मणि मष्णारे नियुतानि चतुर्दश " इति । ततश्चेयं बद्वसंख्या श्लोकेन संगृह्यते । " चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः ॥ बद्वं चतुरशीत्यग्रसहस्राणि त्रयोदश " इति । दिनेदिने च प्रतिगृहं चेति ॥ ९ ॥ आत्मसंभूतीः स्वविभूतीः मंगलानि कपिलादीनि ॥ १० ॥ नरलोकस्य विभूषणरूपमात्मानम् । स्वीयैः पीतांबरकौस्तुभादिभिः ॥ ११ ॥ कामानभिलषितानर्थान् ॥ १२ ॥ विप्रादीन्स्रगादिभिः संविभज्य तेभ्यस्तानि दत्त्वेत्यर्थः । उपायुंक्त भोगार्थमग्रहीत् ॥ १३ ॥ १४ ॥ पाणीकृतेंजलौ गृहीत्वा ॥

गजविशेषान् । ततश्च गणितशास्त्रानुसारात् । यद्यपि किंचिन्न्यूनचतुर्दशलक्षाणि सप्तोत्तरशतबद्वान्येकीकृतानि भवंति तथापि किंचिन्न्यूनमनन्यत्रदिति न्यायेन तावंत्येवोक्तानि । चतुर्दशलक्षसप्ताधिकशतांशकः बद्वसंज्ञः, स च चतुरशीत्यधिकत्रयोदशसहस्रसंख्यः १३०८४ । दिनेदिने प्रत्यहं प्रतिगृहं चेति सर्वगेहेषु स्थितत्वान्मूर्तिभेदेन भगवतः प्रतिगृहं बद्वदानात्तु एकविंशतिकोटयः सप्तलक्षाणि पञ्चायुतानि सप्तसहस्राणि सप्तत्यधिकानि । दिनेदिने इत्यत्र वीप्सया नित्यकर्मत्वे लब्धे बद्वमिह पुनर्वीप्सयातिदाढर्यमुक्तम् । बद्वइह दकारधकारसंयोगितयाँ श्रौतेषु बद्वमित्युक्तम् । क्षौमवस्त्रावृतं सोपस्करं मृगचर्मदानमपि प्रतिदिनमकरोदित्यर्थः । "कृष्णः कृष्णाचलो देवः कृष्णाजिनपरस्तथा । त्वत्स्पृष्ट्या धूतपापस्य प्रीयतां मे नमोनमः ॥ त्रयस्त्रिंशत्सुराणां हि त्वमाधारे व्यवस्थितः । कृष्णोऽसि मूर्तिमान्साक्षात्कृष्णाजिन नमोस्तु ते ॥ " इत्यादिमंत्राणां तद्दाने प्रमाणत्वात् ॥ ९ ॥ "कपिला दधि दूर्वा च हेम शंखोऽक्षतास्तथा । मौक्तिकं मणयो विप्रा आदर्शो वारि वारिजम् ॥ एतान्यन्यानि द्रव्याणि मंगलानि स्पृशेन्नरः । पावित्र्यं परमाप्नोति शुभं क्षेमं च विंदति ॥" इत्याद्युक्तेः । " अनलो गौर्हिरण्यञ्च दूर्वा गोरोचनामृतम् । अक्षतं दधि चेत्यष्टौ मंगलानि प्रचक्षते ॥ " इति नीलकंठोपि । भूतानि स्थावराण्यश्वत्थादीनि, जंगमानां गवादीनामुक्तत्वात् । देवताः श्रीशालग्रामादिरूपाः । नमस्कृत्य प्रत्येकं साक्षादेव किंवा गोभ्यो नमो विप्रेभ्यो नम इत्यभिवाद्य ॥ १० ॥ ११ ॥ अवेक्ष्याज्यमित्यनेन नित्यं छायापात्रदानमुक्तम् ॥ १२ ॥ तेभ्यो विप्रादिभ्यः । तानि स्रगादीनि । इत्यर्थ इति—पूर्वं ब्राह्मणेभ्यो दत्त्वाऽन्येभ्यो भोग्यं वस्तु देयम् ' क्षेत्रज्ञं ब्राह्मणाननु ' इति नारदोक्तेरिति भावः । गृहस्थस्य शेषभोजित्वविधेः ॥ १३ ॥ ततो विभागानंतरम् । तावत्तदाग्रतोऽवस्थितोऽभूदित्यन्वयः ॥ १४ ॥ अथातः । तं रथम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईक्षितोंतःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः ॥ कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः ॥ १६ ॥ सुधर्माख्यां सभां सर्वैर्वृष्णिभिःपरिवारितः ॥ प्राविशद्यन्निविष्टानां न संत्यंग षडूर्मयः ॥ १७ ॥ तत्रोपविष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन् ॥ वृतो नृसिंहैर्यदुभिर्य दूत्तमो यथोडुराजो दिवि तारकागणैः ॥ १८ ॥ तत्रोपमंत्रिणो राजन्नानाहास्यरसैर्विभुम् ॥ उपतस्थुर्नटाचार्या नर्तक्यस्तांडवैः पृथक् ॥ १९ ॥ मृदंगवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्च सूतमागधबंदिनः ॥ २० ॥ तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्म वादिनः ॥ पूर्वेषां पुण्ययशसां राज्ञां चाकथयन्कथाः ॥ २१ ॥ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितो भगवते प्रतीहारैः प्रवेशितः ॥ २२ ॥ स नमस्कृत्य कृष्णाय परेशाय कृतांजलिः ॥ राज्ञामावेदयद्दुःखं जरासंधनिरोधजम् ॥ २३ ॥ ये च दिग्विजये तस्य संनतिं न ययुर्नृपाः ॥ प्रसह्य रुद्धा स्तेनासन्नयुते द्वे गिरिव्रजे ॥ २४ ॥

॥ १५ ॥ सव्रीडप्रेमवीक्षितैरीक्षितः क्षणं स्थितस्ताभिरेव वीक्षितैः कृच्छ्राद्विसृष्टो निरगादिति ॥ १६ ॥ एवं सर्वगृहेभ्यः पृथक्पृथङ्निर्गत्यानंतरमेक एव सन्सुधर्मां प्राविशत् । यन्निविष्टानां यत्र प्रविष्टानाम् ॥ १७ ॥ नृसिंहैर्नृषु श्रेष्ठैः ॥ १८ ॥ उपमंत्रिणः परिहासकाः । पृथक्पृथक् स्वस्वसमुदायैः ॥ १९ ॥ मृदंगादयः प्रसिद्धाः । दरः शंखः । सूतादयस्तुष्टुवुः ॥ २० ॥ ब्राह्मणा ब्रह्म वेदमाहुर्मंत्रान्व्याचक्षतेत्यर्थः । वादिनो वदनचतुराः ॥ २१ ॥ २२ ॥ २३ ॥ गिरिव्रजे तत्संज्ञके

पूर्वाद्रिमुदयाचलम् । एतद्दृष्टांतेन रथस्य बृहत्त्वत्वरत्वादिकं श्रीभगवतः स्वतो भूषणादिकांत्या च तेजोमत्त्वं सूचितम् ॥ १५ ॥ श्रीकृष्णः प्रथममीक्षितोऽर्थात्सात्यक्यादिभिः, कीदृश ईक्षितः अंतःपुरस्त्रीणां सव्रीडप्रेमवीक्षि तैस्तद्विरहतापं कथं सहामह इति वैयग्र्यव्यंजकैर्बद्ध इति शेषः । ततश्च भो अधीरा एतन्मात्रविरहेण विह्वलीभवथ । अयमहमधुनैव भोक्तुमेष्यामीत्याश्वासव्यंजको हासो जातो यस्य सः । ततश्च मन्ये तादृशहासेनैव मनो हरन् कृच्छ्रादेव विसृष्टस्तत्प्रेमावलोकबंधाद्विमुक्तः सन्निरगादिति विश्वनाथः । ताभिरंतःपुरस्त्रीभिः । निरगान्निस्ससारेत्यर्थः ॥ १६ ॥ इत्थमेकैकान्मंदिरादेकैकेन प्रकाशेन बहिर्भूय तत्तत्पुरस्थैस्तत्तत्प्रातिवेशिभिश्च जनैरेव लक्षितो न त्वन्यैः पृथक्पृथक्प्रतोल्यां सुधर्मासभागोपुरवर्त्मपर्यंतमागत्य तत्र पुनरेकीभूय सुधर्मां तु पुनरेकेनैव प्रकाशेन प्रविशति स्मेत्याह—सुधर्माख्यामिति । हे अंग प्रियतम । न संति न बाधन्ते ॥ १७ ॥ तत्र सुधर्मा याम् ॥ १८ ॥ राजन्निति राजसभायामेतत्संभवत्येवेति भावः । तत्र सभायाम् ॥ १९ ॥ २० ॥ गानोत्तरं कः प्रसंगस्तत्राह—तत्राहुरिति । इत्यर्थ इति । वेदव्याख्यानमकुर्वन्नित्यर्थः । वादिनो वदनचतुराः । केचि दिति तद्वैरल्यमाह—आसीना इत्यनेन वेदेतिहासपुराणवक्तॄणामीश्वरेऽप्यागते नोत्थानं कार्यमिति ध्वनितम्, तच्च ब्राह्मणा इत्युक्तेर्ब्राह्मणस्यैवेति सूचितमत एव सूतस्य बलदेवेनानुत्थाने वधः कृत इत्यग्रे स्फुटीभविष्यति । इत्यभिप्रेत्यैव संहितायाम्—"व्यासासनोपविष्टस्तु विप्रो व्यासो न संशयः । गुरुविप्रनृपैश्चापि वृद्धैः पितृपितामहैः ॥ पूजनीयः प्रयत्नेन तथा धर्मो न हीयते । नो नमेन्नाशिवं चोद्यान्नाभ्युत्थानं तदासनात् ॥ कुर्वीत च महाप्राज्ञः सर्वपूज्यस्तदा हि सः ।" इत्युक्तम् । पुण्ययशसां नलादीनाम् ॥ २१ ॥ तत्र कथावसरे । अपूर्वदर्शनोऽदृष्टपूर्वः ॥ २२ ॥ सोऽपूर्वपुरुषः । ते राजानः ॥ २३ ॥ तस्य जरासन्धस्य । ये राजानः ते । तेन जरासंधेन । द्वे अयुते विंशतिसहस्राणि । साष्टशतानि द्वे अयुते चेत्यपि ज्ञेयम् । शतान्यष्टाविति वक्ष्यमाणत्वात् । रोधनप्रयोजनं चोक्तं सभापर्वणि युधिष्ठिरं प्रति श्रीकृष्णेन । "स हि राजा जरासन्धो यियक्षुर्वसुधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णकृष्णाप्रमेयात्मन्प्रपन्नभयभंजन ॥ वयं त्वां शरण यामो भवभीताः पृथग्धियः ॥ २५ ॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ २६ ॥ लोके भवाञ्जगदिनः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः ॥ कश्चित्त्वदीयमतियाति निदेशमीश किं वा जनः स्वकृतमृच्छति तन्न विद्मः ॥ २७ ॥

दुर्गे रुद्धा आसन् । तेषां च दुःखमावेदयदित्यन्वयः ॥ २४ ॥ कृष्णकृष्णेति षट्च्छ्लोकी राज्ञां विज्ञप्तिस्तत्र प्रथमेन शरणाश्रयणं त्रिभिर्भयानुवादो द्वाभ्यां प्रार्थन मिति ॥ २५ ॥ पृथग्दर्शिनो लोकस्य भवभयं विवृण्वंतो नमंति । लोक इति । विकर्म निषिद्धं काम्यं च तस्मिन्नितरां रतः । स्वे कुशले धर्मे । भवतोऽर्चने त्वयोदिते पंचरात्रे । सामान्यतश्च गीतासु । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम् " इति । प्रमत्तोऽनवहितो यावदयं लोक स्तावदेवास्य लोकस्य यः सद्यो जीविताशां छिनत्ति तस्मै तुभ्यमनिमिषाय कालात्मने नम इति ॥ २६ ॥ सेयं लोकस्य गतिर्वयं तु त्वद्भक्ता अतोऽस्माकं कुत एतद्दुःख मापन्नमित्याश्चर्येणाहुः । लोक इति । भो ईश । जगत इन ईश्वरः त्वयि सद्रक्षणार्थमवतीर्णेऽपि चेदस्माकं दुःखं स्यात्तर्हि किमन्यः कश्चिज्जरासंधादिस्त्वदाज्ञामपि

धिपैः । महादेवं महात्मानमुमापतिमरिंदम ॥ " इति प्रथमस्कंधेऽपि राजानं प्रति द्वारकातः समागतेनार्जुनेनाप्युक्तम्—" तेनाहृताः प्रमथनाथमखाय भूपाः " इति लक्षसंख्यराजबलिभिर्महादेवयजने तस्य कामनेति कथा भारतादिप्रसिद्धास्तीति ॥ २४ ॥ षण्णां श्लोकानां समाहारः षट्च्छ्लोकी । विज्ञप्तिः प्रार्थना । तत्र षट्सु । तोषिण्यान्तु—किं तेषां वचनं तत्राह—कृष्णेति षड्भिः । हे स्वयंभगवन् । वीप्सादैन्यात् । अप्रमेयात्मन् सर्वातीतवैभव । एवं सर्वोत्तमत्वेपि प्रपन्नेति । अतस्त्वामेव शरणं यामः । किमर्थम्—भवात्संसारदुःखाद्भीताः भवभयत्राणार्थमित्यर्थः । तद्भयं कुतः—पृथग्धियः त्वत्तः पृथग्बुद्धयस्त्वद्भक्तिरहितत्वादित्यर्थः । विश्वनाथस्तु— तेषां विज्ञप्तिमाह षड्भिः । ते प्रथमं शरणमाश्रयन्ते, कृष्णकृष्णेत्यादरे द्वित्वम् । अप्रमेयात्मन्निति त्वत्स्वरूपमज्ञात्वापि प्रपन्नेति । प्रपन्नपालकत्वमेव ज्ञात्वा शरणं यामः । पृथग्धियः त्वद्भक्तौ प्रार्थनां परित्यज्य त्वत्तः पृथग्भूते स्वीयदुःखत्राण एव धीर्येषां ते ॥ २५ ॥ पृथग्दर्शिनो यथार्थज्ञानशून्याः । तस्मिन्निषिद्धे काम्ये च । तोषिणी—नन्वेतावन्तं कालं न भजध्वं कथं चाधुना जातैतादृशबुद्धयो जाताः स्थ तत्राहुः—लोक इति । अस्मद्विध इत्यर्थः । कुशल इति स्वार्थप्रदत्वं सर्वानर्थहरत्वं च । स्व इति सार्ववर्णिकस्वधर्मत्वम् । त्वदुचित इति अन्योदितधर्मांतरातिक्रमित्वम्, त्वदर्चन इति त्वदुदितधर्मांतरातिक्रमित्वं सूचितम् । यथैवोदितञ्च— " सर्वगुह्यतमं भूयः शृणु मे परमं वचः । इष्टोऽसि मे दृढम् " इति । 'ततो वक्ष्यामि ते हितम्' । " मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु " इत्यादि, तथापि तस्मिन्प्रमत्तः । जीवितस्याशां शरणस्यानु संधाननिरसनेन विकर्मतयोक्ततद्विरुद्धकुकर्मणि प्रवर्तनीं कुशले च प्रमादकारिणीं दृढां वाञ्छां नासौ कथंचित्परिहर्तुं शक्येतेत्याहुः—बलवानिति । अनिमिषाय चेत्यनेन तस्याप्रमत्तता, तस्मै नम इति तद्भयेनैवाधुना त्वद्भ जनोद्यमात् । यथोक्तम्—'मर्त्यो मृत्युव्यालभीतः पलायन्' इति । अत्र विश्वनाथः—भवभीतत्वं विवृण्वन्तो नमंति—लोकोऽस्मद्विधः कुशले कर्मणि प्रमत्तः किं पुण्यकर्मणि न त्वदुदिते किं ज्ञानयोगसाधकशमदमानिय मादिकर्मणि न भवदर्चने त्वद्भजने । स्वे इति तदेव लोकस्य वास्तवं स्वं धनं भवदुःखनिवर्तकं त्वत्प्रेमसुखभोगप्रदायकं चेति भावः । किन्तु विकर्मणि स्त्रीपुत्रादिवैषयिकसुखसाधके कर्मणि नितरां रतः । किञ्च—तत्सु खमपि दुर्भगस्यास्य न सिध्यतीत्याहुः—यस्तावदिति । अनिमिषाय कालाय त्वच्छक्तिरूपाय नम इति । त्वद्भक्तेन तेन तथाकरणं समुचितमेवेति भावः ॥ २६ ॥ अहो त्वद्भक्तानामीदृशी गतिरित्युपालभंत इवाहुः—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वप्नायितं नृपसुखं परतंत्रमीश शश्वद्भयेन मृतकेन धुरं वहामः ॥ हित्वा तदात्मनि सुखं त्वदनीहलभ्यं क्लिश्यामहेऽतिकृपणास्तव माययेह॥२८॥तन्नो भवान्प्रणतशोकहरांघ्रियुग्मो बद्धान्वियुंक्ष्व मगधाह्वयकर्मपाशात् ॥ यो भूभुजोऽयुतमतंगजवीर्यमेको बिभ्रद्रुरोध भवने मृगराडिवाऽवीः ॥ २९ ॥

लंघयति । किंच त्वया रक्ष्यमाणोऽपि जनः स्वकर्मजं दुःखं प्राप्नोत्येवेति न विघ्नः न चैतदुभयमपि युक्तमिति भावः ॥ २७ ॥ किं दुःखं तदाहुः । स्वप्नायितमिति । स्वप्नवज्जातं नृपसुखं नृपोचितं सुखम् । यतः । परतंत्रं विषयसाध्यम् । किंच संप्रति शश्वद्भयं यस्मिंस्तेन मृतकतुल्येन शरीरेण धुरं पुत्रदारादिचिंतां केवलं वहामः । अहो कष्टं नः ये वयमितः पूर्वमेव निष्कामाः संतस्त्वां नाश्रिता इत्याहुः । हित्वेति । त्वत् त्वत्तो यदनीहैर्निष्कामैर्लभ्यमात्मनि स्वतः सिद्धं सुखं तद्धित्वा क्लिश्याम इति ॥ २८ ॥ त्वन्मायाकृतं कर्मबंधं त्वमेव निवर्तयेति प्रार्थयंते । तन्न इति । वियुंक्ष्व मोचय । मागधो जरासंधस्तत्संज्ञकात्कर्मपाशात् । भवद्भिरेव विक्रम्य ततो निर्गम्य

सेयमित्यादिना । किमत्र संशये वितर्के वा । तदुभयं त्वदाज्ञालंघनम्, त्वद्रक्ष्यमाणस्य दुःखं चेत्युभयम् । किञ्च लोके भवानिति जगदिनः साक्षात्सर्वेश्वर एव कलयांशेन श्रीबलदेवेन अन्यो निगृह्यमाणः खलः किं कस्मादन्यस्मात्कारणादित्यर्थः । हे ईशेति । जरासंधादेरपि त्वदधीनत्वं तज्जनस्यापि कर्माधीनत्वं सूचितम्, तद्वयं न विघ्नः । अन्यत्तैः । तत्र चेदस्माकमित्यस्य स्थाने जनः स्वकर्मजमिति पाठोऽसभ्यः । तथा सद्रक्षणार्थमित्यत्र चकारपातश्च ज्ञेयः । विश्वनाथस्तु—किञ्च साक्षादेव त्वां त्वद्भक्तांश्च यः कश्चिद्द्वेष्टि स कथं कालसंहृतो न भवतीत्यस्माकं महान्विस्मय इत्याहुः—लोक इति । जगदिनः जगदीश्वरः । ‘कलनाकालयोः कला’ इति नानार्थकोशात् । कलया कालेनावतीर्णः । यद्वा—बलदेवेन सह अन्यः खलः कश्चिज्जरासंधादिस्त्वदीयं निदेशमतिक्रामति । साधून्द्वेष्टि खलान्पालयतीत्यर्थः । तत्र खलनिग्राहके त्वय्यवतीर्णेपि यत्खलो वर्द्धते तत्किं स खलः स्वकृतमृच्छति स्वप्रारब्धकर्मफलं सुखं भुंक्ते । तथा सद्रक्षके त्वय्यवतीर्णेपि साधुजनस्तत्पीडितो यद्भवति तत्किं सोपि स्वकर्मफलं दुःखं भुंक्ते इदं न विद्मो निश्चेतुं न शक्नुमः, त्वत्तोपि कर्मयोगस्य जडस्य प्राबल्यमनुचितमिति भावः ॥ २७ ॥ तद्दुःखम् । ननु राज्यसुखं तु मरणलभ्यात्स्वर्गसुखादप्यधिकमिति चेदाहुः—स्वप्नायितमिति । विषयसाध्यमपि नानंदजनकमित्याह—किं चेति । इतो जरासंधबंधात् । तोषिणी—तथा प्यद्यापि वयं न तव मायया सम्यक्त्यक्ता इत्याहुः—स्वप्नेति । अन्यत्तैः । यद्वा—तव मायाऽतिकृपयाऽतिशयेन हतबुद्धयः सन्तः क्लिश्यामहे । तत्र हेतुः—मृतकेन स्वतोऽचेतनत्वेन तद्रूपेण देहेन या धूस्तां मृतकरूपं भारं वहाम इत्यर्थः । न केवलमृतकभारवाहित्वमेव क्लेशाय तत्रान्यच्चेत्याहुः—शश्वदिति । पुनःपुनर्भूतप्रेतादित इव रोगकालादितो भयं यस्मिंस्तेन । किमर्थं वहथ तत्राहुः—नृपस्य सुखं यस्मिंस्तद्यथा स्यात्तत्प्राप्त्यर्थमधुनापि तां न मुंचाम इत्यर्थः । तदेतदतीव गर्हितमिति भावः।न च तत्सुखे वास्तवत्वमपि यतः स्वप्नायितम् । न चैतावत्त्वमेव दोषायापि तु दुःखमयत्वमपीत्याहुः—परतंत्रं राज्याद्यनेकांगाधीनतामयम् । भवत्वपि तन्नाम यद्यन्यन्महासुखं स्वतः सिद्धं न स्यादित्याहुः—तत्सकलनिगमप्रसिद्धमनिर्वचनीयं परमपुरुषार्थरूपं हित्वेति । न चेदं वापरतन्त्रं किन्तु स्वत एवात्मनि प्रकाशमानत्वात्त्वत्तः सकाशादनीहैरेव भक्तैर्लभ्यमिति । अत्र विश्वनाथः—ननु तर्हि यूयं के मद्भक्ता मद्विद्वेषिणो वा तत्र न वयमुभये किन्तु सांसारिका जीवास्त्वां सांप्रतं प्रपन्ना इत्याहुः—स्वप्नेति । स्वप्नायितमचिरस्थायित्वात्स्वप्नतुल्यममात्यसुहृत्सेनाद्यधीनत्वात्परतंत्रं नृपसुखं नृपा वयमित्यभिमानमात्रेणैव सुखं वस्तुतस्तु धुरं संधिविग्रहाद्यायासबाहुल्यप्रदत्वाद्भारमेव शश्वद्भयं यस्मिंस्तेन मृतकतुल्येन शरीरेण वहामः । अहो कष्टं नः ये वयमितः पूर्वमेव निष्कामाः संतस्त्वां नाश्रिता इत्याहुः—तत् सकलसज्जनैः स्तुतत्वात्प्रसिद्धं न तु नृपसुखमिव तैर्निन्दितम् । आत्मनि स्वतः सिद्धमेव न तु परतंत्रं त्वत् त्वत्तः सकाशादेव न तु दुर्विषयेभ्यो जातम् । अनीहैर्निष्किंचनभक्तैर्लभ्यं न तु सकामैर्लब्धुं शक्यं सुखं हित्वा क्लिश्यामः ॥ २८ ॥ किमिदानी मावश्यकमित्याह—त्वन्मायेति । विक्रम्य पुरुषार्थं कृत्वा । ततः पाशात् । अतोऽत्र । यो जरासंधः । मतंगजानां गजानाम् । वीर्यं पराक्रमम् । ‘अविर्नाथे रवौ मेषे’ इति मेदिनी । तोषिणी—अतोऽस्माकं परमकृप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो वै त्वया द्विनवकृत्व उदात्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्यम् ॥ जित्वा नृलोकनिरतं सकृदूढदर्पो युष्मत्प्रजा रुजति नोऽजित तद्विधेहि॥३०॥
दूत उवाच ॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ॥ प्रपन्नाः पादमूलं ते दीनानां शं विधीयताम् ॥ ३१ ॥ श्रीशुक उवाच ॥
राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः ॥ बिभ्रत्पिंगजटाभारं प्रादुरासीद्यथा रविः ॥ ३२ ॥ तं दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववंद
उत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥ ३३ ॥ सभाजयित्वा विधिवत्कृतासनपरिग्रहम् ॥ बभाषे सूनृतैर्वाक्यैः श्रद्धया तर्पयन्मुनिम् ॥ ३४ ॥
अपिस्विदद्य लोकानां त्रयाणामकुतोभयम् ॥ ननु भूयान्भगवतो लोकान्पर्यटतो गुणः ॥ ३५ ॥ न हि तेऽविदितं किंचिल्लोकेष्वीश्वरकर्तृषु ॥ अथ
पृच्छामहे युष्मान्पांडवानां चिकीर्षितम् ॥३६॥ नारद उवाच ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायिनः ॥ भूतेषु भूमंश्चरतः
स्वशक्तिभिर्वह्नेरिव च्छन्नरुचो न मेऽद्भुतम् ॥ ३७ ॥

तामिति चेदत आहुः । य इति । एक एवायुतमतंगजानां वीर्यं बिभ्रत्सन्स्वभवने भूभुजोऽस्मान् रुरोध । सिंहो मेषीरिव ॥ २९ ॥ किंच युष्मदीया वयमित्यस्मानधिकं
बाधत इत्याहुः । यो वा इति । हे उदात्तचक्र उद्यतसुदर्शन यो वै द्विनवकृत्वोऽष्टादशवारांस्त्वया सह मृधे वर्तमाने तत्र सप्तदशकृत्वस्त्वया खलु भग्नः पराजितः पश्चा
दनंतवीर्यमपि नृलोके निरतं नरशरीरविनोदं भवंतं सकृज्जित्वोढदर्पः प्राप्तगर्वो युष्मत्प्रजा नो रुजति पीडयति तत्तत्र यद्युक्तं तद्विधेहीत्यर्थः ॥ ३० ॥ दूत आह ।
इतीति ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ भूयान्महान्गुणो लाभोऽयमस्माकं यत्सर्वलोकवृत्तांतज्ञानमिति ॥३५॥ ईश्वरः कर्ता येषां तेषु ॥३६॥ एवमविदुषेव सर्वज्ञेन

णानामनीहत्वाभावादात्मनि तन्न सिद्ध्येदिति स्वयमेव स्वं प्रकटयितुं तद्व्याघातकं बंधं विमोचयेत्याहुः—तन्न इति । तत्तस्मात्तन्मायया कृतकार्पण्याद्धेतोस्तद्बद्ध्वेत्यर्थः । नोस्मांस्तदेव विमोचय यतो भवान्
प्रणतानां शोकहरमंघ्रियुग्मं यस्य तथाभूतः । यद्वाऽकारप्रश्लेषेण न विद्यते भवः श्रेयो येषु तान्परमार्तानित्यर्थः । मागधेति नाममात्रेणैव जरासंधस्तत्त्वतस्त्वस्माकं कर्मपाश एवायं मूर्तिमांस्तस्मादित्यर्थः ।
अन्यत्तैः । यद्वा—अन्यथा तस्येदृशी शक्तिर्न स्यादित्याशयेनाहुः—य इति । अत्र विश्वनाथः—तस्मात्त्वन्मायाकृतं कर्मबंधं त्वमेव निवर्तयेति प्रार्थयन्ते—तन्न इति स्वामिवत् ॥ २९ ॥
भगवत्कोपमुद्दीपयंत आहुः—किंचेति । यो जरासंधः । इत्यर्थ इति—यद्युक्तमित्यध्याहृत्य व्याख्येयमिति भावः ॥ ३० ॥ इतीत्थं प्रार्थयंतः ॥ ३१ ॥ प्रादुरासीत्तत्राजगाम ॥ ३२ ॥ तं देवर्षिम् ॥ ३३ ॥ ३४ ॥ अद्य
त्रयाणां लोकानामकुतोभयम्, अपिस्विदिति वितर्के कुतोऽपि भयं नास्ति । ननु यतः पर्यटतो भगवतस्तव लोकान् लोकानां भूयान् गुणः । सर्ववृत्तांतश्रवणादिति वा योज्यम् ॥३५॥३६॥ श्रीभगवता लोकत्रयाकुतोभयं
यत्पृष्टं तस्याज्ञातत्वेन पांडवतात्पर्यकत्वेन चोत्तरमदत्त्वा त्वस्मिन्सर्वदर्शित्वं यदुक्तं तत्तु तच्छक्तिमयत्वेनैवांगीकरोति—दृष्टा इति। माया मायिककार्याणि नानाब्रह्मांडगतानि तथा विश्वसृजस्तत्तदन्तर्यामिब्रह्मविष्ण्वादयो मायिनस्तच्छ
क्त्यंशधारिणश्च दृष्टाः । तत्र 'त्वं पर्यटन्नर्क इव त्रिलोकीम्' इति व्यासोक्त्यनुसारेण स्वस्य तव शक्तिभिस्त्वद्भक्तिमयमच्छक्तिभिरेव वा सर्वव्यापकवह्नेरिव छन्नरुच आच्छादितसर्वज्ञस्य स्वतो भूतेषु चरतो मम नाद्भुतमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तवेहित कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्यमानात्मतयाऽवभासते तस्मै नमस्ते स्वविलक्षणात्मने ॥ ३८ ॥
जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छरीरतः ॥ लीलावतारैः स्वयशःप्रदीपकं प्राज्वालयत्त्वा तमहं प्रपद्ये ॥ ३९ ॥ अथाप्याश्रावये
ब्रह्म नरलोकविडंबनम् ॥ राज्ञः पैतृष्वसेयस्य भक्तस्य च चिकीर्षितम् ॥ ४० ॥ यक्ष्यति त्वां मखेंद्रेण राजसूयेन पांडवः ॥ पारमेष्ठ्यकामो नृपति
स्तद्भवाननुमोदताम् ॥ ४१ ॥ तस्मिन्देव क्रतुवरे भवंतं वै सुरादयः ॥ दिदृक्षवः समेष्यंति राजानश्च यशस्विनः ॥ ४२ ॥ श्रवणात्कीर्तनाद्ध्याना
त्पूयंतेंतेऽवसायिनः ॥ तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ॥ ४३ ॥ यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमंगल दिग्वितानम् ॥
मंदाकिनीति दिवि भोगवतीति चाधो गंगेति चेह चरणांबु पुनाति विश्वम् ॥ ४४ ॥

जरासंधवधार्थमेव पांडवचिकीर्षितं पृष्टो नारदो माययमिति ज्ञात्वाह दृष्टा इति त्रिभिः । विश्वसृजश्च ब्रह्मणोऽपि मायिनो मोहकस्य ते स्वशक्तिभिर्विद्यादिभिर्भू
तेष्वंतर्यामितया चरतो वर्तमानस्य ययहं भूतेषु वर्ते तर्हि भूतानि मां किं न पश्यंति तत्राह । वह्नेरिव च्छन्नरुच इति । स्वशक्तिभिरेव छन्ना रुक् प्रकाशो यस्य तस्य अतस्तवेदं
प्रश्नादि न मेऽद्भुतम् ॥ ३७ ॥ इदं जगत् । कथंभूतम् । असदेव यत्तव मायया विद्यमानात्मतया भासते तज्जगत्सृजतः किंतु केवलं तुभ्यं नमनमेव शक्यमित्याह । तस्मै
नम इति । कुतः । स्वेन रूपेण सर्वतो विलक्षणात्मने अचिंत्यायेत्यर्थः ॥ ३८ ॥ नन्वेवंभूतस्य किं मायाचेष्टितैरित्यत आह । जीवस्येति । अविद्यातमसावृतत्वेनानर्थ
प्रापकाच्छरीरात्संसरतः तेनैव तपसा तस्माच्छरीराद्विमोक्षोपायमजानतः। प्राज्वालयत्प्रदीपितवान् तं त्वा त्वाम् । यशःश्रवणादिभिर्जीवस्य मोक्षार्थमित्यर्थः॥ ३९॥ आश्रावये
श्रावयिष्यामि । नरलोकविडंबनं ब्रह्म त्वाम् । ब्रह्मन्निति पाठेऽपि हे ब्रह्मन्परमात्मन्नरलोकानुकारिणं त्वां श्रावयिष्यामीति ॥ ४० ॥ ४१ ॥ न चात्रैवानु
मोदनं कार्यं किं तु तत्रागंतव्यमित्याशयेनाह । तस्मिन्निति ॥ ४२ ॥ तत्रागताश्च सर्वे त्वद्दर्शनादिना पूता भविष्यंतीत्याह । श्रवणादिति । अंतेवसायिनः श्वपचा
अपि । ब्रह्ममयस्य ब्रह्मघनमूर्तेः । ईक्षा च अभिमर्शः स्पर्शनं च तौ विद्येते येषाम् ॥ ४३ ॥ कैमुत्यमतिशयेनाह । यस्येति । हे भुवनानां मंगलरूप दिवि पाताले भूमौ

तोषिणी । वृत्त्यभिप्रायेण बहुत्वं माया इति ॥ ३७ ॥ विद्यमानात्मतया स्वरूपस्थितिं लब्धवत्तया । इत्यर्थ इति । असदपि सत्कुर्वतस्तव मायावैभवमतर्क्यमिति भावः ॥ ३८ ॥ इत्यर्थ इति—" भवेऽस्मिन् क्लिश्य
मानानामविद्याकामकर्मभिः । श्रवणस्मरणार्हाणि " इत्याद्युक्तेरिति भावः ॥ ३९ ॥ श्रावये भविष्यति लट् आङ्पूर्वः । ब्रह्मेति पूर्णब्रह्मस्वरूपः । नलोपस्य संबुद्धौ विकल्पः ॥ ४० ॥ पारमेष्ठ्यकामः ब्रह्मपदकामः सर्वश्लाघ्य
त्वकामो वा । " सर्वश्लाघ्ये पारमेष्ठ्यं हरौ ब्रह्मपदेऽपि च " इति निरुक्तिः ॥ ४१ ॥ यजतु राज्ञां धर्म एवायमिति चेत्तत्राह—न चेति । किं लाभस्तत्र गमने तत्राह—भवंतमिति ॥ ४२ ॥ अंतेवसायिनो मातंगादयश्चां
डालाः ॥ ४३ ॥ अतिशयेन तात्पर्येण । " तात्पर्ये निश्चयाधिक्यजागरूकेष्वतिक्रमे । भवेदतिशयः " इति निरुक्तिः । इति भाव इति—यस्य नाम्ना त्रैलोक्यशोधकस्य तत्रागमने यदि तत्रत्याः पूता भविष्यंतीति किमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ तत्र तेष्वात्मपक्षेष्वगृह्णत्सु विजिगीषया ॥ वाचःपेशैः स्मयन्भृत्यमुद्धवं प्राह केशवः ॥ ४५ ॥ श्रीभगवानुवाच ॥ त्वं हि नः परमं चक्षुः सुहृन्मंत्रार्थतत्त्ववित् ॥ तथाऽत्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥ ४६ ॥ इत्युपामंत्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् ॥ निदेशं शिरसाऽऽधाय उद्धवः प्रत्यभाषत ॥ ४७ ॥ इति श्रीभा० म० द० उ० भगवद्याने सप्ततितमोऽध्यायः ॥ ७० ॥ श्रीशुक उवाच ॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् ॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः ॥ १ ॥ उद्धव उवाच ॥ यदुक्तमृषिणा देव साचिव्यं यक्ष्यतस्त्वया ॥ कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणाम् ॥ २ ॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो ॥ अतो जरासुतजय उभयार्थो मतो मम ॥ ३ ॥

च प्रथितं यस्य यशो विश्वं पुनाति । कथम् । प्रथितं दिग्वितानं दिग्भवनानां वितानवदलंकरणम् । तथा चरणांबु च प्रथितं पुनाति । कथं तत्प्रथितम् । दिवि मंदाकिनीति अधश्च भोगवतीति इह च भूमौ गंगेति । तस्य तवागमनात्सर्वं मंगलं पवित्रं च भविष्यतीति भावः ॥ ४४ ॥ तत्रैवं नारदोक्तं तेषु वर्तमानेष्वात्मीयपक्षेषु यादवेषु जरासंधस्य विजिगीषया अगृह्णत्स्वमन्यमानेषु । वाचःपेशैः पेशलवाग्भिरित्यर्थः ॥ ४५ ॥ चक्षुष्ट्वे हेतुः । मंत्रार्थानां मंत्रसाध्यानां तत्त्ववित्पारिपाकवेदिता ॥ ४६ ॥ ॥ ४७ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायां सप्ततितमोऽध्यायः ॥ ७० ॥ अथैकसप्ततितम उद्धवस्य तु मंत्रतः ॥ इंद्रप्रस्थं गते कृष्णे पार्थानां परमोत्सवः ॥ १ ॥ राजसूयमिषं कृत्वा भीमदुर्योधनादिषु ॥ कलिमुत्पाद्य तद्द्वारा भूभारमहरत्प्रभुः ॥ २ ॥ देवर्षेर्मतं राजसूयगमनम् । सभ्यानां मतं राजरक्षा । कृष्णस्य तूभयम् ॥ १ ॥ यक्ष्यतो यागं करिष्यतः पैतृष्वसेयस्य पितृष्वसुः पुत्रस्य साचिव्यं साहाय्यं तच्च कार्यम् । तथा शरणार्थिनां राज्ञां रक्षा च कार्या ॥ २ ॥ तत्र प्रथमं

वक्तव्यमित्यर्थः ॥ ४४ ॥ तत्र तदा । तेषु सभ्येषु । इत्यर्थ इति—‘ पेशस्सौंदर्यचूर्णयोः ’ इति धरणिः । वाचो वाण्याः पेशैः सौंदर्यैर्गांभीर्यमाधुर्याल्पाक्षरबह्वर्थादिभिरिति भावः । केशव इति—यथा गोकुलसुखार्थं केशिनं हतवांस्तथोद्धवस्य निजभक्तस्य कीर्त्युत्कर्षेण सुखार्थं तमाहेति भावः ॥ ४९ ॥ चक्षुश्चक्षुर्वत्प्रकाशकम् । यथाऽत्रानुष्ठेयं तथा ब्रूहि । अत्र राजमोक्षणराजसूयगमनरूपोभयकार्ये इत्यर्थः । त्वदुक्तौ श्रद्दध्मः श्रद्धां करिष्यामः । तदेव करिष्याम च “ सर्वं वाक्यं सावधारणम् ” इति न्यायागत एवकारः । उभयत्र भविष्यति लट्लोटौ ॥ ४६ ॥ इतीत्थम् । उपामन्त्रितः पृष्टः । मुग्धवदज्ञातवत् । ‘ मुग्धः सुन्दरमूढयोः ’ इति विश्वः ॥ ४७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे सप्ततितमोऽध्यायः ॥ ७० ॥ एकेनाधिकस्सप्ततितम एकसप्ततितमस्तास्मिंस्तथा (१) । तद्द्वारा भीमदुर्योधनद्वारा (२) । एकांतभक्तानां भक्त्यतिशयजननाय हरेर्बंधुकृत्याचरणलक्षणं माहात्म्यमाह । तत्रादौ कृष्णकटाक्षसूचिततत्कार्यविशेष उद्धवस्स्वां नीतिं वक्ति—इतीति। महामतित्वादेव सर्वेषां मतं ज्ञातवानिति भावः॥१॥हे देवेति। विचित्रक्रीडापरस्य तवाभिप्रायं न कोपि ज्ञातुं शक्त इति भावः । ऋषिणेति ऋषेराज्ञैवादौ संपाद्येति भावः ॥ २ ॥ कार्यद्वयसाधनोपायं वक्ति—तत्र तयोर्मध्ये । ततस्तत्र गमनादनन्तरम् । ननु राजभिरादौ निमंत्रणात्तेषां मरणसंकटपाताच्चादौ तत्रैव तद्रक्षणार्थं गंतुमुचितं यज्ञक्रिया तु पश्चादपि स्यात्तत्राह—यष्टव्यमिति । यत्रैकेन कार्येणोभयकार्यसिद्धिः सैव युक्तिः समीचीनेति। सा च राजसूयार्थगमनरूपैव। दिग्विजयं विना राजसूयो न स्यात् जरासन्धवधं विना दिग्विजयो नेति । तथा च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माकं च महानर्थो ह्येतेनैव भविष्यति ॥ यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः ॥ ४ ॥ स वै दुर्विषहो राजा नागायुतसमो बल ॥ बलिनामपि चान्येषां भीमं समबलं विना॥५॥द्वैरथे स तु जेतव्यो मा शताक्षौहिणीयुतः॥ ब्रह्मण्योभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित॥६॥ ब्रह्मवेषधरो गत्वा तं भिक्षेत वृकोदरः ॥ हनिष्यति न संदेहो द्वैरथे तव सन्निधौ ॥ ७ ॥ निमित्तं परमीशस्य विश्वसर्गनिरोधयोः ॥ हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥८॥गायंति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च॥गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च॥९॥

राजसूयार्थं गंतव्यं ततो राजरक्षा कर्तव्येत्याह यष्टव्यमित्यष्टभिः । अतो दिग्विजयहेतोः । उभयार्थो राजसूयार्थः शरणागतरक्षार्थश्च ॥ ३ ॥ ४ ॥ अत्युत्सुकतया सद्य एव जरासंधं हंतुमिच्छतो यादवानालक्ष्याह । स वा इति । अन्येषां ततो बलिनामपि यद्यपि समबल एव भीमस्तथापि तं विना । भीमादेव तस्य मृत्युर्विहित इति भावः ॥ ५॥ ननु स्वबलसाम्येऽपि सेनाबलं तस्याधिकमिति चेदत आह । द्वैरथ इति । द्वंद्वयुद्धे । शतेनाक्षौहिणीभिर्युतो मागधो मा न जेतव्य इत्यर्थः । नन्वसौ स्वसैन्यमेव युद्धाय नियुंजीत कुतस्तेन द्वैरथमिति तत्राह । ब्रह्मण्य इति । न प्रत्याख्याति न निराकरोति ॥ ६ ॥ भिक्षेत द्वंद्वयुद्धं याचताम् । तथाऽपि समबलत्वात्साम्यमेव स्यादत आह । तव सन्निधाविति ॥ ७ ॥ नन्वकिंचित्कुर्वतो मम सन्निधानात्किं स्यादत आह । निमित्तमिति । अयमर्थः । यथा तवारूपस्य कालात्मनो विश्वसर्गे निमित्तं केवलं हिरण्यगर्भस्तथा शर्वश्च तन्निरोधे तथाऽत्र त्वमेव सन्निधिमात्रेण हंता भीमो निमित्तमात्रमिति ॥ ८ ॥ अतोऽनेनोपायेन त्वया स शीघ्रं हंतव्य इत्याश

राजरक्षानिमंत्रणन्तु तदंगसिद्ध्यैव सेत्स्यतीत्येकाक्रिया द्व्यर्थकरी भविष्यतीति भावः । उभयाय राजसूयाय शरणागतरक्षणाय चायमुभयार्थः । “ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ” इति । ‘ अर्थेन नित्यसमासो विशेष्यलिंगता च ’ इत्यनुशासनात् ॥ ३ ॥ युधिष्ठिरकार्ये सिद्धवत्कृत्वा स्वकार्यमभिष्टौति—अस्माकमिति । एतेन जरासन्धवधेन । विमुञ्चतो विमोचयतः, अन्तर्भावितणिजर्थाच्छत्रन्तः ॥ ४ ॥ उद्धववाक्यं श्रुत्वा यादवा नोत्कण्ठिता इति चेदत्राह—अत्युत्सुकेत्यादि । ततो जरासंधात् । इति भाव इति—यद्यपि समबल एव तथापि तं विनेति भीमादेव तस्य मृत्युरिति बृहस्पतेः सकाशादधीतज्योतिरादिशास्त्रेण मयैव पूर्वं विचारितमिति विहि तस्य दुर्वार्यत्वेनाल्पबलोऽधिकबलं हंति किमुत समबल इति तात्पर्यम् ॥ ५ ॥ पुनस्साम्याशंकां वारयन्समाधत्ते—नन्वित्यादिना । तस्य जरासंधस्य । स जरासंधः । इत्यर्थ इति—महादेवप्रसादादिति भावः । पुनराशंक्य समाधत्ते—नन्वित्यादिना । द्वयो रथयो रथिनोरिदं द्वैरथं द्वंद्वयुद्धमित्यर्थः ॥६॥ तं जरासंधम् । वृकस्तत्संज्ञोऽग्निरुदरे यस्य स वृकोदरो भीमः । “ वृको नाम हि यो वह्निः स सदा उदरे मम। अतिवेलं यदाश्नामि तदा स उपशाम्यति॥” इति ब्रह्मवैवर्ते व्यासं प्रति भीमोक्तेः । भारतेऽपि “तीक्ष्णश्चैव प्रचण्डश्च वृको नामानलो मतः । स पांडवस्य जठरे तेन भीमो वृकोदरः॥”इति । यद्वा—वृकवत्कृशमुदरं यस्येति बलिष्ठता सूचिता।बलिष्ठानां हि सिंहादीनां कृशमध्यत्वमस्तीति भावः।अतिवेलमतिक्रांतमर्यादामित्यर्थः।पुनराशंक्य समाधत्ते—तथापीत्यादिना।स एव जेष्यति किं मया तत्र गमनेनेति तत्राह—तवेति।तव संनिधिं विना तु द्वैरथेपि हंतुं स न प्रभविष्यतीति भावः॥७॥भगवानाशंकते—नन्विति । तात्पर्यमाह—अयमर्थ इति । तन्निरोधे विश्वसंहारे॥८॥यतस्त्वमेव हर्ताऽतो हेतोः । अनेन युद्धयाच्ञारूपेण । स जरासंधः । करुणाकरो दयासमुद्रः । एवं करिष्यति तं मारयित्वा तव पितरं मोचयिष्यतीत्यर्थः।कथं गायंतीत्यत्र लुप्तोपमयाह—अत्रेति । अत्र गायने।अवतारांतरगतं कर्मेत्यर्थः।यतो गायंत्यतो हेतोः। एवंभूतानां त्वत्कर्म गायतीनाम् । तासां राजदेवीनामित्यर्थः।यद्वा—गोप्यश्चेत्यत्र चशब्द एवोपमार्थको

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जरासंधवधः कृष्ण भूर्यर्थायोपकल्पते ॥ प्रायः पाकविपाकेन तव चाभिमतः क्रतुः ॥ १० ॥

येनाह । गायंतीति । जरासंधधृतानां राज्ञां देव्यः पत्न्यस्ते विशदं कर्म स्वगृहेषु बालकलालनादौ गायंति । किं तत्कर्म । स्वशत्रोर्जरासंधस्य वधमात्मनां पतीनां विमोक्षणं च । वत्स मा रोदीः श्रीकृष्ण एवं करिष्यतीति । अत्र दृष्टांताः । गोप्यश्चेत्यादयः । यथा गोप्यः शंखचूडवधं स्वमोक्षं च गायंति । अवतारांतरगतं कुंजरपतेर्नक्रात् । जनकात्मजायाश्च रावणात् । पित्रोश्च कंसगृहान्मोक्षम् । अत एवंभूतानां तासां कृपया त्वया तथैव कर्तव्यमिति भावः ॥ ९ ॥ किंच जरासंधवध इति । भूर्यर्थायेति ।

निपातानामनेकार्थत्वात् । यद्वा–लब्धशरणा भक्तजनाः । कुंजरपतेरात्मनो देहस्य । विमोक्षणं स्वशत्रूणां कामादीनां वधं च मुनयो वाल्मीक्यादयो जनकात्मजाया विमोक्षणं स्वशत्रुवधमिति पूर्ववत् । वयं च यदवः पित्रो र्देवकीवसुदेवयोर्विमोक्षणं च यथा गायामस्तथा गायंतीत्यर्थः । अत्र विश्वनाथः–दुष्टनिग्रहशिष्टपालनात्मकं तव यशो यद्यपि सद्भिर्गीयमानं पूर्वसिद्धमेवास्ति तदपि जरासंधे हतेऽधुना विपुलीभविष्यतीत्याह–गायंतीति । जरासंधबद्धराज्ञां देव्यः सर्वज्ञश्रीनारदादिप्रबोधिता भाविनमपि जरासंधवधमात्मनां पतीनां विमोक्षणञ्च हे वत्स मारोदीः श्रीकृष्णो जरासंधं हत्वा तव पितरं मोचयिष्यतीति गायंति । अत्र गोप्यादयो दृष्टान्ताः । यथा– गोप्यः शंखचूडवधं तन्निरोधादात्मविमोक्षणं परस्परसांत्वनादौ गायंति, भोः सख्यः समाश्वसित रुदित्वारुदित्वा मा प्राणांस्त्यक्तुमुपक्रमध्वम् यः खलु तादृशशंखचूडमहाव्याघ्रग्रासादरक्षीत्स एव कृपासिंधुः स्वयमेव स्मृत्वा स्वविरहमहाविपत्कालसर्पदंशादपि रक्षिष्यतीति । तेन जरासंधं हत्वा ता देव्यस्तत्पतिभिः संगतीकृत्य त्वया यथा रक्षणीयास्तथैव राजसूयादि कृत्यं समाप्य तत आगमनसमये निभृतं व्रजं गत्वा ता गोप्योपि स्वसंगती कृत्य त्वया रक्षणीयास्ततश्चास्मदादयोपि तत्ते यशो गायाम इत्यवसरप्राप्तस्वाभीप्सितमंत्रणार्पणं ध्वनितम् । किंच–यथा देव्यो गोप्यश्च गायंति तथा लब्धशरणा मुनय आत्मारामभक्ता वयं दासभक्ताश्च स्वसुहृदाश्वासनादौ गायामः । किं तत् । कुंजरपतेः स्वशत्रोर्नक्रस्य वधं तस्मादात्मविमोक्षणं च । जनकात्मजायाः स्वशत्रो रावणस्य वधं पित्रोश्च स्वशत्रोः कंसस्य वधं तस्मात्तस्मादात्मविमोक्षणं चेति । भोस्तपोधना मा विषीदथ यथा नक्रादिभ्यो गजेंद्रादीनुद्दधार तथैवास्मानपि संसारादुद्धारिष्यतीति । भोभो वयस्या भाविकभक्ता यथैवोद्धृता गजेंद्रादिभ्यः स्वसामीप्यदानेन स्वाभीष्टसेवामदात्तथैवास्मभ्यमपि दास्यतीति । अथास्य मंत्रशास्त्रेऽनुष्ठान मपि लिखितं, तच्चेत्थम्–आचमनप्राणायामपूर्वकं संकल्प्य गणेशादीन्संपूज्य ओमस्य गायंतीतिश्लोकात्मकमंत्रस्य श्रीवेदव्यास ऋषिः । श्रीकृष्णः परमात्मा देवता । जगती छंदः । सर्वकार्यसिद्ध्यर्थे जपे विनियोगः ॥ गायंति ते विशदकर्मेत्यंगुष्ठाभ्यां नमः । गृहेषु देव्यो राज्ञां स्वशत्रुवधमिति तर्जनीभ्यां नमः । आत्मविमोक्षणं चेति मध्यमाभ्यां नमः । गोप्यश्च कुंजरपतेरित्यनामिकाभ्यां नमः । जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं चेति कनिष्ठिकाभ्यां नमः । संपूर्णमंत्रेण करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ अथ ध्यानम्–" ध्यायेद्धरिन्मणिनिभं जगदेकवंद्यं सौन्दर्यशार्ङ्गमरिशंखगदांबुजानि । दोर्भिर्दधानमजितं सुनसं सुभूषं सत्यासमेतमखिलप्रदमिंदिरेशम् ॥ " ॐनमो भगवते जरासंधघातकाय क्लीं क्रों अमुकमाकर्षयाकर्षय ॐ क्लीं कृष्णायाकर्षयाकर्षय स्वाहा ॥ इमं मंत्रमादौ पठित्वा तदनु ॐ गायंतीति श्लोकं पठेत् । इत्थमष्टोत्तर शतं प्रतिदिनं जपित्वा षड्भिर्मासैरनृणो भवेत् बद्धं च मोचयेत् स्वविमुखं स्वनिघ्नं कुर्यादन्यदप्यभीष्टं लभेत् । घृताक्तलाजैर्जपदशांशं जुहुयात् । सिद्धार्थजातीकुसुमांबुजातबिल्वैश्च जुहुयात् । एकविंशतिदिनैरतिकुपितं विप्रं चतुर्दशभिः क्षत्रियं दशभिर्वैश्यं त्रिभिः शूद्रं चाकर्षयेत् । मासेनैकेन देवमप्याकर्षयेत् । पञ्चाधिकत्रिशतोत्तरलक्षजपश्चास्य पुरश्चरणम् ॥ ब्राह्मणद्वारा करणे संकल्पवाक्यम्–अद्यामुकगोत्रस्यामुकवर्मणो देशाधिपतेर्वा परचक्रागतदेशोपद्रवजनितजनिष्यमाणसर्वारिष्टनिवृत्तिपूर्वकं देशस्वास्थ्यार्थं सपरिवारस्यात्मनः क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं जरासंधबद्धराजकृतस्वमोक्षणविज्ञप्त्यनंतरश्रीमदुद्धवोक्तवाक्यरूपश्रीमद्भागवतोक्तगायंतीतिश्लोकमंत्रस्य सपादलक्षजपं ब्राह्मणद्वारा कारयिष्ये तदंगतया ब्राह्मणवरणं च यथोक्तद्रव्यैरहं करिष्य इत्यलम् ॥ ९ ॥ किं बहुना जरासंधवधोऽनेकप्रयोजनोपेत इत्याह–किंचेति । ततो जरासंधवधात् । इति भाव इति–प्रबलसहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच॥इत्युद्धववचो राजन्सर्वतोभद्रमच्युतम्॥देवर्षिर्यदुवृद्धाश्च कृष्णश्च प्रत्यपूजयन्॥११॥अथादिशत्प्रयाणाय भगवान्देवकीसुतः॥ भृत्यान्दा रुकजैत्रादीननुज्ञाप्य गुरून्विभुः॥१२॥निर्गमय्यावरोधान्स्वान्ससुतान्सपरिच्छदान्॥संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥ सूतोपनीतं स्वरथमारुहद्ग रुडध्वजम्॥१३॥ ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैः प्रघोषघोषत्ककुभो निराक्रमत् ॥१४॥

ततः शिशुपालवधादयोऽपि सुखसाध्या भविष्यंतीति भावः । एतच्च सर्वं भविष्यत्येवेति संभावयन्नाह । प्राय इति । पच्यत इति पाकः कर्म तस्य विपाकः फलं तेन राज्ञां पुण्यविपाकेन जरासंधादीनां पापविपाकेनेति । पाठांतरे जरासंधस्य पापविपाकेनेति । तेनायं क्रतुस्तवाभिप्रेतस्तत्र गते त्वयि सर्वं भविष्यतीत्यर्थः ॥ १० ॥ अच्युतमुप पत्त्या वृद्धम् । यदुवृद्धा इति वदता अनिरुद्धादयस्तथा नापूजयन्निति सूचितम् ॥ ११ ॥ अनुज्ञाप्यानुज्ञां प्रार्थ्य गुरून्वसुदेवादीन् ॥ १२ ॥ अवरोधान्स्वान्दारान् । निर्गमय्य प्रमाणं कारयित्वा ॥ १३ ॥ भटाः पदातयः । सादिनोऽश्वारोहाः रथादिनायकैः करालया तीव्रयाऽऽत्मसेनया परिवृतो निराक्रमन्निरगात् । कुतः सकाशात् ।

यकनाशादित्याशयः । एतच्च—शिशुपालवधादिकं च । राज्ञां जरासंधबद्धानाम् । पुण्यविपाकेनेति त्वद्दर्शनपूर्वकं कारागारनिवृत्त्युत्तरं त्वदुपदेशाचरणात्तेषां मोक्षहेतुत्वात् । जरासंधादीनामित्यत्रादिना शिशुपालशाल्वदुर्यो धनादयो ग्राह्याः । तेषां मृत्युहेतुत्वान्मरणस्य "पुण्याज्जीवनमुद्दिष्टं पापान्मरणसंभवः" इत्युक्तेः पापफलत्वात् । इहैव महाभारतबीजांकुरोत्पत्तेर्दुर्योधनादीनामपि पापविपाकेनैवायं क्रतुरिति प्रायोग्रहणान्न केवलं पापविपाक एव सर्वत्र तव दर्शनादेसत्त्वाद्वस्तुतः पुण्यविपाक एवेति भावः । पाठांतरे, प्रायस्तस्य विपाकेनेति पाठे । फलितमाह—तेनेति । तेन पाकविपाकेन हेतुनाऽभिप्रेतोभिप्रायविषय एव । तत्र यागे । इत्यर्थ इति—भूभारावतारणा र्थमवतीर्णस्त्वं सर्वमेतत्करिष्यसीति भावः । भूयर्थाय राजसूयसिद्धये राजवृन्दरक्षासिद्धये शिशुपालादिवधसुखसाध्यत्वसिद्धये मद्धंजितार्थविशेषसिद्धये चापाकः राजसूयस्य निष्पत्तिस्तस्मिन्सति तस्य वा यो विपाकः । विसदृशं फलं कुरुवंशक्षयसूचकदुर्योधनमानभंगस्तेन हेतुना क्रतुश्च तवाभिमतः । 'पाकः परिणतौ शिशौ' इति "विपाकः पाचने स्वेदे कर्मणो विसदृक्फले" इति मेदिनी । एषोऽर्थस्तत्रत्ययादवकौरवैर्मा बुध्यतामित्युद्धवेन दुर्बोधार्थकं पदं प्रयुक्तम् । पापविपाकेनेति पाठे पापानां शिशुपालादीनां विनाशलक्षणपरिणामेन हेतुनेति विश्वनाथः । तोषिण्यां तु—पाकः साक्षादुद्दिष्टोऽर्थः पांडवराजस्य पारमेष्ठ्यादिः, विपाकः साक्षादनुद्दिष्टोपि मनसि स्थितः शिशु पालदुर्योधनादिलक्षणभूभारहरणरूपः तयोर्द्वैक्यं तेन हेतुना क्रतुश्च तवाभिमतोऽभिप्रेतः । प्रायःशब्देन पांडवानां वनवासादिदुःखनिदानांशे नानाभिमतोपि तेषां परिणामपरमसुखनिदानत्वादेवाभिमत इत्यर्थः । प्राय इति वितर्के वा । पाठांतरे पापानां जरासंधादीनां परिणामेन मोक्षादिलक्षणावस्थांतरप्राप्त्या हेतुना ततश्च पूर्वं राजसूयोद्यतं पांडवमाश्वास्य तदनुज्ञया भीमसेनेन जरासंधं घातयित्वा राजसूयः संपादयितव्य इति भावः । हे कृष्णेति परममहिमादिमयनामत्वात्तेनैव संबोधनं परममहिमानमेवावेदयति "यस्य नाम महद्यशः" इति श्रुतेः । तस्मादत्र दासभावो नाभासीक्रियते ॥१०॥ प्रत्यपूजयन् प्रत्यक्षरं साधुसाध्विति प्रीत्या संश्लाघिरे अच्युतम् । उप पत्त्या युक्त्या । वृद्धं युक्तम् । यदुवृद्धा अक्रूरकृतवर्मादयः यथा तद्वाक्यमश्लाघंत तथाऽनिरुद्धादयो न, तेषां मतं तु प्रथमं राजबंधनिवृत्त्यर्थं जरासंधेन युद्धमेवेति भावः ॥ ११ ॥ अथोद्धवोक्तिश्रुत्यनंतरम् । आदिना प्रब लार्हणादिग्रहः ॥ १२ ॥ 'शुद्धांतश्चावरोधश्च' इत्यमरः । "अवरोधस्तिरोधाने राजदारेषु तद्गृहे" इति मेदिनी च । यद्यप्यवरोधपदं राजदारेषु तद्गृहे चास्ति तथाऽपि भगवतो नृपतित्वाभावेपि "राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रे च पुंसि स्यात्" इति कोशात् प्रभुत्वात्क्षत्रियत्वाच्च राजशब्दवाच्यत्वादवरोधानित्युक्तम् ॥ १३ ॥ ततो रथारोहणोत्तरम् । रथादीनामुक्तेः परिशेषाद्भटपदं पदातिपरमेवात्र ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृवाजिकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनु सुव्रता ययुः ॥ वरांबराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥ १५ ॥ नरोष्ट्रगोम
हिषखराश्वतर्यनःकरेणुभिः परिजनवारयोषितः ॥ स्वलंकृताः कटकुटिकंबलांबराद्युपस्करा ययुरधियुज्य सर्वतः ॥ १६ ॥ बलं बृहद्ध्वजपटछत्रचा
मरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांऽशुभिस्तुमुलरवं बभौ रवेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः ॥ १७ ॥ अथो मुनिर्यदुपतिना सभाजितः
प्रणम्य तं हृदि विदधद्विहायसा ॥ निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शननिर्वृतेंद्रियः ॥ १८ ॥ राजदूतमुवाचेदं भगवान्प्रीणयन्गिरा ॥
मा भैष्ट दूत भद्रं वो घातयिष्यामि मागधम् ॥ १९ ॥ इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान् ॥ तेऽपि संदर्शनं शौरेः प्रत्यैक्षन्यन्मुमुक्षवः ॥ २० ॥
आनर्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः ॥ गिरीन्नदीरतीयाय पुरग्रामव्रजाकरान् ॥ २१ ॥ ततो दृषद्वतीं तीर्त्वा मुकुंदोऽथ सरस्वतीम् ॥ पांचालानथ
मत्स्यांश्च शक्रप्रस्थमथागमत् ॥ २२ ॥

मृदंगादिभिर्वाद्यैः प्रघोषेण घोषत्याः घोषितायाः ककुभः ॥ १४ ॥ नृवाजीति । नृवाजिभिर्नरयानैरश्वैश्च कांचनशिबिकाभिश्चाच्युतं पतिमनुययुः । सुव्रताः पतिव्रताः । वराण्यं बरादीनि यासां ताः ॥ १५ ॥ नरोष्ट्रादिभिर्यानैः । अश्वतरी गर्दभ्यामश्वाज्जाता । अनः शकटम् । करेणुर्गजी । परिजनयोषितो वारयोषितश्च । कटकुटय उशीरादि तृणनिर्मितगृहाः कंबलांबरादयश्चोपस्कराः कुड्यादिरूपा यासां ताः । अधियुज्य बलीवर्दादिषु तानुपस्करान् दृढं सन्नह्य ॥ १६ ॥ रवेरंशुभिश्च तद्बलं दिवा बभौ । कथं भूतम् । तुमुलरवमाकुलस्वनम्।क्षुभितैस्तिमिंगिलैरूर्मिभिश्च ॥ १७॥ मुनिर्नारदो विहायसा ययाविति शेषः॥ १८॥मा भैष्टेति बहुत्वं राजाभिप्रायेण ॥ १९॥ प्रत्यैक्षन्प्रत्यैक्षंत। यद्यस्मान्मुमुक्षवः ॥ २० ॥ आनर्तादयो मार्गस्थदेशास्तांस्तीर्त्वाऽतिक्रम्य विनशनं कुरुक्षेत्रम् । अतीयायातिक्रम्य ययौ ॥ २१ ॥ शक्रप्रस्थमिंद्र

ककुभो दिशः ॥ १४ ॥ सुसंवृताः परिवारिताः ॥ १५ ॥ "कटः किलिंजशरयोर्वीरणेपि प्रकीर्तितः" इति कोशात् । कटपदेन गुंद्रवीरणादिशाखा ग्राह्याः । संनह्य बद्ध्वा ॥ १६ ॥ अंशुभिरिति बृहद्ध्वजादेः, क्षुभिततिमिंगिलोर्मिभिरिति नरोष्ट्रादेरुदाहरणम् ॥१७॥ अथो सेनाप्रयाणोत्तरम् । तं कृष्णम् । तद्व्यवसितं कृष्णनिश्चितम्, पांडवानां बद्धराज्ञां च युगपन्मनोरथसंपादनरूपम् ॥ १८ ॥ भगवान्सूनृतागिरा इति पाठे सूनृता गिरा प्रेमयुक्तवाचा । "सूनृतं मंगलेपि स्यात्प्रियसत्ये वचस्यपि" इति मेदिनी ॥ १९ ॥ इतीत्थम् । तेऽपि नृपा अपि । परस्मैपदमार्षम् ॥ २० ॥ २१ ॥ ततो गिरिनद्यादिलंघनोत्तरम् । दृषद्वतीं चक्रनदीम् । अथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमुपागतमाकर्ण्य प्रीतो दुर्दर्शनं नृणाम् ॥ अजातशत्रुर्निरगात्सोपाध्यायः सुहृद्वृतः ॥ २३ ॥ गीतवादित्रघोषेण ब्रह्मघोषेण भूयसा ॥ अभ्ययात्स हृषीकेशं प्राणाः प्राणमिवादृतः ॥ २४ ॥ दृष्ट्वा विक्लिन्नहृदयः कृष्णं स्नेहेन पांडवः ॥ चिराद्दृष्टं प्रियतमं सस्वजेऽथ पुनःपुनः ॥ २५ ॥ दोर्भ्यां परिष्वज्य रमाऽमलालयं मुकुंदगात्रं नृपतिर्हताशुभः ॥ लेभे परां निर्वृतिमश्रुलोचनो हृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥ २६ ॥ तं मातुलेयं परिरभ्य निर्वृतो भीमः स्मयन्प्रेमजवाकुलेंद्रियः ॥ यमौ किरीटी च सुहृत्तमं मुदा प्रवृद्धबाष्पाः परिरेभिरेऽच्युतम् ॥ २७ ॥ अर्जुनेन परिष्वक्तो यमाभ्यामभिवादितः ॥ ब्राह्मणेभ्यो नमस्कृत्य वृद्धेभ्यश्च यथाऽर्हतः ॥ २८ ॥ मानितो मानयामास कुरुसृंजयकेकयान् ॥ सूतमागधगंधर्वा बंदिनश्चोपमंत्रिणः ॥ २९ ॥ मृदंगशंखपटहवीणापणवगोमुखैः ॥ ब्राह्मणाश्चारविंदाक्षं तुष्टुवुर्ननृतुर्जगुः ॥ ३० ॥ एवं सुहृद्भिः पर्यस्तः पुण्यश्लोकशिखामणिः ॥ संस्तूयमानो भगवान्विवेशाऽलंकृतं पुरम् ॥ ३१ ॥

प्रस्थम् ॥ २२ ॥ २३ ॥ प्राणा इंद्रियाणि प्राणं मुख्यं प्राणमिव ॥ २४ ॥ सस्वजे परिरेभे ॥ २५ ॥ रमाया अमलं निर्दोषमालयम् । विस्मृतो लोकव्यवहारो येन सः ॥ २६ ॥ २७ ॥ अर्जुनेन समत्वात्परिष्वक्त एव केवलम् । पादौ नमस्कुर्वन्नर्जुनः कृष्णेन भुजाभ्यां धृत इति भावः । यमाभ्यां त्वभिवादितश्चेति ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥

दृषद्वतीतरणानंतरम् । इह पाञ्चालविनशनौ मार्गस्थावन्यौ देशभेदौ ज्ञेयौ न तु लोकप्रसिद्धाविति संदर्भः । एवमग्रेऽपि ॥ २२ ॥ तं कृष्णम् ॥ २३ ॥ स युधिष्ठिरः ॥ २४ ॥ अथ दर्शनानंतरम् ॥ २५ ॥ लोकव्यवहारः स्वागतप्रश्नादिरूपः लोकातीतप्रेममग्नत्वात् । रमामलालयमिति रमाया अन्ये ये आलयास्ते सदोषा एवातस्तस्या अनभिरुचेस्तेषु न साक्षात्स्थितिः किंत्वाभासमात्रेण । अस्य तु निर्दोषसर्वगुणाश्रयत्वात्साक्षादेव स्थितिरिति भावः ॥ २६ ॥ तं श्रीकृष्णम् । अर्जुनस्य पश्चादुक्तिश्चिरालिंगनार्था । प्रेम्णा शीघ्रागमनाशक्त्या वा ॥ २७ ॥ इति भाव इति—नरावतारत्वेन मया सम एवायमित्याशयः । यमाभ्यां नकुलसहदेवाभ्याम् । मानिन इति पाठे कुरुषु मान्यान् मानयामासेत्यर्थः । यथार्हतो यथोचितम् ॥ २८ ॥ उप समीपं समेत्य । मंत्रिणो मंत्रकर्तारः ॥ २९ ॥ ब्राह्मणास्तुष्टुवुश्चान्नर्तक्यो ननृतुर्गायकाश्च जगुः । यद्वा—ब्राह्मणा एव भक्त्या ननृतुर्जगुश्च । तदुक्तम्—"ब्राह्मणो वासुदेवार्थं गायमानोऽनिशं परम् । नववर्षसहस्राणि कुबेरभवने वसेत् ॥ गीतनृत्यादि कुर्वीत द्विजदेवाग्नितुष्टये । न जीवनार्थं युंजीत विप्रः पापभिया क्वचित् ॥" इति वाराहे । श्रुतदेवोऽच्युतं प्राप्तमित्यारभ्य धुन्वन्वासो ननर्त ह इत्यन्तेनाग्रे वक्ष्यत्यपि । यद्वा—अस्माकमन्येषां च सद्धर्माणां पालयिता त्वं विजयी भवेति विप्रास्तुष्टुवुः । अरविंदाक्षं दृष्ट्यैव सर्वतापहरं परमामोदप्रदं चेत्यर्थः ॥३०॥ एवमुक्तप्रकारेण । पर्यस्तः परिवृतः पुण्यो मनोज्ञः साक्षाद्धर्मरूपो वा श्लोको येषां युधिष्ठिरादीनां तेषां शिखामणिर्मुख्यो न तादृशपुण्यश्लोकोऽन्योऽस्तीति भावः ॥३१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसिक्तवर्त्म करिणां मदगंधतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानम् ॥ ३२ ॥ उद्दीप्तदीपबलिभिः प्रतिसद्म जालनिर्यातधूपरुचिरं विलसत्पताकम् ॥ मूर्धन्यहेमकलशै रजतोरुशृंगैर्जुष्टं ददर्श भवनैः कुरुराजधाम ॥ ३३ ॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः ॥ सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ॥ ३४ ॥ तस्मिन्सुसंकुल इभाश्वरथद्विपद्भिः कृष्णं सभार्यमुपलभ्य गृहाधिरूढाः ॥ नार्यो विकीर्य कुसुमैर्मनसोपगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ॥ ॥ ३५ ॥ ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथोडुपसहाः किमकार्यऽमूभिः ॥ यच्चक्षुषां पुरुषमौलिरुदारहासलीलावलोककलयो त्सवमातनोति ॥ ३६ ॥ तत्रतत्रोपसंगम्य पौरा मंगलपाणयः ॥ चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ॥ ३७ ॥ अंतःपुरजनैः प्रीत्या मुकुंदः फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरम् ॥ ३८ ॥ पृथा विलोक्य भ्रात्रेयं कृष्णं त्रिभुवनेश्वरम् ॥ प्रीतात्मोत्थाय पर्यंकात्सस्नुषा परिषस्वजे ॥ ३९ ॥

चित्रध्वजादिभिर्विराजमानम् ॥ ३२ ॥ प्रतिसद्म उद्दीप्तैर्दीपैर्बलिभिः पुष्पादिप्रकरैश्च जुष्टम् । जालेभ्यो गवाक्षेभ्यो निर्गतैर्धूपै रुचिरम् । विलसंत्यः पताका यस्मिंस्तत् । मूर्धन्या मूर्ध्नि भवा हेमकलशा येषां तैः । रजतमयानि रूप्यमयान्युरूणि स्थूलानि शृङ्गाणि कलशाधस्तनभूमिका येषां तैर्भवनैर्जुष्टं कुरुराजस्य धाम पुरं ददर्श ॥ ३३ ॥ नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयम् । किं पुनर्नारीणामित्यर्थः ॥ ३४ ॥ सुष्ठु स्वागतं तत्प्रश्नादिकं प्रियमुत्स्मयवीक्षितेनैव विदधुः ॥ ३५ ॥ उडुपसहाः चंद्रसहचरा इत्यर्थः । अमूभिः किं पुण्यमकारि ॥ ३६ ॥ श्रेण्य एकशिल्पोपजीविनां संघास्तेषु मुख्याश्च ॥ ३७ ॥ अभ्युपेतोभिगमनेन सत्कृतः ॥ ३८ ॥ सस्नुषा द्रौपदीसहिता ॥ ३९ ॥

इत्यर्थ इति—नारीणां तु रम्यपुरुषावलोकनपुरं वर्णयति—संसिक्तेति । संसिक्तवर्त्म कुरुराजधाम ददर्शेति द्वितीयेनान्वयः । संसिक्तानि वर्त्मानि यस्मिंस्तत्तथा । 'धाम देहे गृहे पुरे' इति कोशात् ॥ ३२ ॥ ३३ ॥ इत्यर्थ इति—नारीणां तु रम्यपुरुषावलोकन मत्यानन्दकरमिति भावः । मध्याह्नभोजनोत्तरं केषांचिद्विषयासक्तानां शय्यायां निवेशादित्युक्तं तल्पे इति । 'तल्पं दाराट्टशय्यायाम्' इति कोशात् ॥ ३४ ॥ उत्स्मयो विनयस्तेन वीक्षितं तेन । "अगर्वे विनये ईषद्धास्याधिक्येपि चोत्स्मयः" इति निरुक्तिः । तस्मिन्राजमार्गे ॥ ३५ ॥ इत्यर्थ इति । उडुपशब्दस्यानेकार्थत्वादित्थं व्याख्येयमिति भावः । "चंद्रे प्लवे शिवेऽब्धौ च कीर्त्यत उडुपध्वनिः" इति निरुक्तिः । यासां चक्षूंषि यच्चक्षूंषि तेषाम् ॥ ३६ ॥ तत्रतत्र स्थलेस्थले "श्रेणी राजौ तथा संघ एकशिल्पोपजीविनाम्" इति धरणिः । यद्वा—श्रेणीमुख्या नगरप्रधानाः ॥ ३७ ॥ अभिगमनेन संमुखगमनेन ॥ ३८ ॥ स्नुषा पुत्रवधूः । स्नुषया सह सस्नुषा पृथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोविंदं गृहमानीय देवदेवेशमादृतः ॥ पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ॥ ४० ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्चक्रेऽभिवादनम् ॥ स्वयं च कृष्णया राजन्भगिन्या चाभिवंदितः ॥ ४१ ॥ श्वश्र्वा संचोदिता कृष्णा कृष्णपत्नीश्च सर्वशः ॥ आनर्च रुक्मिणीं सत्यां भद्रां जांबवतीं तथा ॥ ४२ ॥ कालिंदीं मित्रविंदां च शैब्यां नाग्नजितीं सतीम् ॥ अन्याश्चाभ्यागता यास्तु वासःस्रङ्मण्डनादिभिः ॥ ४३ ॥ सुखं निवासयामास धर्मराजो जनार्दनम् ॥ ससैन्यं सानुगामात्यं सभार्यं च नवंनवम् ॥ ४४ ॥ तर्पयित्वा खांडवेन वह्निं फाल्गुनसंयुतः ॥ मोचयित्वा मयं येन राज्ञे दिव्या सभा कृता ॥ ४५ ॥ उवास कतिचिन्मासान्राज्ञः प्रियचिकीर्षया ॥ विहरन्रथमारुह्य फाल्गुनेन भटैर्वृतः ॥४६॥ इति श्रीमद्भा० महा० द० उत्तरार्धे एकसप्ततितमोऽध्यायः ॥७१॥ श्रीशुक उवाच ॥ एकदा तु सभामध्य आस्थितो मुनिभिर्वृतः॥ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्ठिरः ॥१॥

कृत्यं प्रकारविशेषम् । प्रमोदेनोपहतोऽभिभूतः ॥ ४० ॥ गुरुस्त्रीणां च । कृष्णया द्रौपद्या च । भगिन्या सुभद्रया ॥ ४१ ॥ आनर्चार्चितवती ॥ ४२ ॥ अन्याश्च याः कृष्णपत्न्योऽभ्यागतास्ता अपि ॥ ४३ ॥ प्रत्यहं नवंनवं यथा भवति तथा सुखं निवासयामास ॥ ४४ ॥ कथंभूतम् । यः प्रेम्णा नित्यं फाल्गुनेन संयुतः । अत एव तस्य सहायेन सता येन खांडवेन वह्निं तर्पयित्वा तत्र च मयं मोचयित्वा तं मयं प्रयुज्य युधिष्ठिराय दिव्या सभा कृता तं जनार्दनम् । अनेन राज्ञः कृष्णोपकारानुस्मरणं दिव्यत्वात्सभाया यथामनोरथं सर्वावकाशसंपादनं च दर्शितम् ॥ ४५ ॥ ४६ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायामेकसप्ततितमोऽध्यायः ॥ ७१ ॥

ततो द्विसप्ततितमे राज्ञा कार्ये निवेदिते ॥ दुर्जयं मागधं बुद्ध्वा भीमेनाघातयद्धरिः ॥ १ ॥ आस्थितः आसनमिति शेषः ॥ १ ॥

शब्दस्मृतिस्तथाप्यत्र वक्ष्यमाणरीत्या समासस्यार्षत्वमंगीकार्यम् ॥ ३९ ॥ परिषस्वजे । स्नुषा तु पश्चास्थित्वैव नम्रत्वादिना तमादृतवतीत्यग्रे वक्ष्यते । यद्यपिविद्यमानता मात्रार्थस्य सहशब्देन समासः किन्त्वेकक्रियायोगिन एवेति गोविंदं शब्दमात्रैकगोचरम् । कथंचित्प्राकट्येपि । देवदेवानां श्रीब्रह्मादीनामपीशम् । आदृत इति । कथं संभ्रान्त इतस्ततो धावस्यहं त्वदधीन एवालं पूजाप्रयासेन सुखमत्रोपविश त्वां पश्यानीत्येवं बहुधा कृष्णेनादृतः सन् नृपः सर्वपूजोपयोगिसंपादने समर्थोपि नाविदत् । तत्र हेतुः—प्रमोदेन भगवदागमनजन्याह्लादेन ॥ ४० ॥ पितृष्वसुः पृथायाः । गुरुस्त्रीणां बाह्लीकादिभार्याणाम् । भगिन्येत्युक्तेर्ज्येष्ठभ्रातुः कनिष्ठभगिन्या अप्यभिवादनं कर्तव्य मेवेति सूचितम् । ईश्वरत्वाद्वा सर्वनमस्य इति ॥ ४१ ॥ श्वश्र्वा पृथया । शैब्यामिति मित्रविंदाविशेषणं द्वितीयतथाशब्देनानुक्तसमुच्चायकेन लक्ष्मणा च गृहीता । यद्वा—शिवं शुभं तद्युक्तां सर्वसुखपूर्णां लक्ष्मणामित्यर्थः॥ ४२॥ अन्या अनुक्तनाम्न्यः । अभ्यागतास्तत्रागताः । मंडनानि भूषणानि “ मंडनं भूषणे क्लीबं स्यात्त्रिष्वलंकारिष्णुनि ” इति मेदिनी ॥ ४३ ॥ ता अपि कृष्णपत्नीरपि ॥ ४४ ॥ यः कृष्णः । अत एव नित्यसंयुतत्वादेव तस्यार्जुनस्य । येन कृष्णेन । तत्र च खांडवे च । मयं दैत्यम् । तं खाण्डववह्निमुक्तं प्रयुज्य प्रेर्य अनेन सभाकारणादिकथनेन । राज्ञो युधिष्ठिरस्य ॥ ४५ ॥ तर्पयित्वेत्यादिश्लोकद्वयेनाष्टपञ्चाशत्तमाध्यायो क्तैव कथा पुनरत्रावेशादेवानुकथिता । ततश्चायं क्रमः । इंद्रप्रस्थे खांडवदाहगांडीवादिप्राप्तिमृगयाकालिंदीप्राप्तिवार्षिकचातुर्मास्यवासास्ततो द्वारकागमनकालिंदीभद्रादिविवाहनरकवधादिबहुकथांते एव राजसूयनिमंत्रणादिकमिति ज्ञेयम् ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्द्धे एकसप्ततितमोऽध्यायः ॥ ७१ ॥ ततः सभाप्राप्त्याद्यनंतरम् । राज्ञा युधिष्ठिरेण । कार्ये यज्ञरूपे (१) । एकदा कतिपयदिनविश्रामोत्तरं योग्यसमय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचार्यैः कुलवृद्धैश्च ज्ञातिसंबंधिबांधवैः ॥ शृण्वतामेव चैतेषामाभाष्येदमुवाच ह ॥ २ ॥ युधिष्ठिर उवाच ॥ क्रतुराजेन गोविंद राजसूयेन पावनीः ॥ यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो ॥ ३ ॥ त्वत्पादुके अविरतं परि ये चरंति ध्यायंत्यभद्रनशने शुचयो गृणंति ॥ विंदंति ते कमलनाभ भवापवर्गमाशासते यदि त आशिष ईश नान्ये ॥ ४ ॥ तद्देवदेव भवतश्चरणारविंदसेवाऽनुभावमिह पश्यतु लोक एषः ॥ ये त्वां भजंति न भजंत्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृंजयानाम् ॥ ५ ॥

शृण्वतामेवेति । यत्प्रसन्नः कृष्णः करोति न तदन्यः कश्चिदपि कर्तुं समर्थ इति निश्चित्य सर्वानेवताननादृत्य कृष्णमुवाचेत्यर्थः । आभाष्य भो भोः कृष्ण भक्तवत्सलेत्येवं संबोध्य ॥ २ ॥ विभूतीरंशान् ॥ ३ ॥ एष चक्रवर्तिनां मनोरथः कथं त्वया क्रियत इति चेदत आह । त्वत्पादुके इति । परि ये चरंतीति यच्छब्दव्यवधानमार्षम् । ये परिचरंति देहेन ध्यायंति मनसा । अभद्रस्य नशने नाशके गृणंति वाचा । ते भवस्यापवर्गं मोक्षं विंदंति । यद्याशासते तर्ह्याशिषोऽपि त एव विंदंति नान्ये चक्रवर्तिनोऽपि ॥ ४ ॥ भगवतो भक्तपक्षपातमाविष्कारयन्नाह । तद्देवदेवेति । तत्तस्मात्पश्यतु साक्षात् । एवं निश्चितेऽपि ये कर्मादिप्रधानाः केचित्कुरुसृंजया

इत्यर्थः । आसनं नृपोचितासनम् ॥ १ ॥ एतेषां मुन्यादीनाम् । इत्यर्थ इति । अनादरे षष्ठीयमिति ध्येयम् । इदं वक्ष्यमाणम् ॥ २ ॥ पावनीः त्वद्दर्शनेनात्मनः पावयन्तीति तथा च ता अपि त्वद्दर्शनदापनेन कृतार्थीकर्तुमिति । " तस्मिन्नेव क्रतुवरे भवन्तं वै सुरादयः । दिदृक्षवः समेष्यंति राजानश्च यशस्विनः ॥ श्रवणात्कीर्तनाद्ध्यानात्पूयन्तेंतेवसायिनः । तव ब्रह्ममयेशस्य किमुतेक्षाभिमर्शनम् ॥ " इत्युद्धवोक्तेः । हे गोविंदेति । निजाशेषैश्वर्यप्रकटनार्थं भुव्यवतीर्णस्य तव भक्तानामस्माकमीदृगिच्छा युक्तैवेति भावः । देवादीनामपि त्वद्विभूतिबुद्ध्यैव यजनादात्मनोऽनन्यपरत्वमेव भरतवद्दर्शितम् । पावनीः त्वद्भक्तिविघ्नादिदोषनिरसनीस्तृप्तत्वात् । ' त्वां सेवतां सुरकृता बहवोंतरायाः ' इत्युक्तेः । अंशान् इंद्रादीन् । " विभूतिस्संपदैश्वर्योत्पत्त्यंशेषु च भस्मनि " इति धरणिः । प्रभो इति त्वच्छक्त्यैव राजसूयः सेत्स्यतीति भावः । यद्वा—हे नः पांडवानां प्रभो त्वदेकपराणामस्माकं मनोरथः कथं न सेत्स्यतीति भावः ॥ ३ ॥ भगवदाक्षेपाशंकां वारयति—एष इत्यादिना । परिचरंति नित्यं पूजयन्ति । अभद्रं नश्यत आभ्यामित्यभद्रनशने आशासत इच्छन्ति आशिषोऽभिलषितार्थात् त एव पादसेवका एव तव पादुके उपानहावपि किं पुनः साक्षात्त्वच्चरणाब्जद्वयं परिचरंति इह कैमुत्यं ज्ञेयमेवमग्रेपि ततोप्यनायासेन ये कदापि गृणन्ति श्रीकृष्णपादुके एव मम गतिरिति कीर्तयन्तिमात्रं यतस्ते स्वत एवाभद्रनशने अतः शुचयो बहिरन्तर्भक्तिविघातकाभद्ररहितास्ते भक्तिमात्रपुरुषार्था अपि यदि कथंचिद्भक्त्युपयुक्तत्वेनाशासते तदाऽपवर्गं संसारध्वंसमाशिषः सर्वान्प्राकृतांश्च कामान्विन्दन्ति । " सर्वं मद्भक्तियोगेन मद्भक्तो लभतेञ्जसा । स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति ॥ " इति स्वयं भगवदुक्तेः । न त्वन्ये " सर्वासामपि सिद्धीनां मूलं त्वच्चरणार्चनम् " इत्यादेः । उभयत्रापि हेतुः—हे कमलनाभ स्वांशेन सर्वाश्रय । हे ईश सर्वेश्वरेति तोषिणीकाराः । अत्र विश्वनाथः—त्वच्चरणसरोजं पश्यतां त्वयाप्यपारकृपयात्मसात्कृतानामस्माकं राजसूये खलु न कोप्याग्रहः किं तु त्वामत्रत्या दुष्टान्तःकरणाः केचित्परमेश्वरं न मन्यन्ते नरमेव मत्वा प्रत्युत दोषदर्शिनो निंदन्त्येतदस्माकं शल्यमतो राजसूयमिषेण ब्रह्मरुद्रादीन्सर्वज्ञान्ब्रह्मर्ष्यादीनपि देवादीनपि चतुर्दशलोकस्थानाहूय काचित्सभा कार्या । तत्र सर्वाग्रिमपूजा तैर्यस्य स्थापयिष्यते स एव परमेश्वर इति साक्षाद्दर्शयित्वा हृच्छल्यं तन्निष्कासनीयमित्येव मदभीप्सितमित्याह—त्वदिति त्रिभिः । अभद्रस्याविद्यापर्यंतस्य नशनं याभ्यां ते ये ध्यायंति यद्याशासते तर्हि त एव विंदंति न त्वन्ये त्वच्चरणानर्चकाः कर्मिप्रभृतयः । किंतु त्वद्भक्ता नैवाशासत इत्यर्थः । अस्माकं तु त्वच्चरणाश्रितानां त्वां साक्षादेव पश्यतामन्यकामनाभावे कैमुत्यमेवेति भावः ॥ ४ ॥ आविष्कारयन् यतो भवच्चरणसेवाफलमनुभवसिद्धमतो लोकोपि प्रत्यक्षप्रमाणोत्थमाहात्म्यं दृग्विषयं करोत्विति प्रार्थयन्नित्यर्थः । यत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः ॥ संसेवतां सुरतरोरिव ते प्रसादः सेवानुरूपमुदयो न विपर्ययोऽत्र ॥ ६ ॥

भगवद्भक्तिं न बहु मन्यंते तेषां मोहनिवृत्तये ये त्वां भजंति यदि वा न भजंति तेषामुभयेषां निष्ठां स्थितिं प्रदर्शय ॥ ५ ॥ ननु रागादिरहिते मयि कथमिदं वैषम्यं स्यात्त त्राह । नेति । स्वः पर इति भेदमतिस्तव न स्यादेव । कुतः । ब्रह्मणो निरुपाधेः । किंच सर्वस्यात्मनोऽतः समदृशः । किंच स्वसुखानुभूतेः । अतो रागाद्यभावादिति भावः । तथापि संसेवमानानामेव त्वत्प्रसादो नान्येषाम् । तत्राऽपि सेवाऽनुरूपमुदयः फलं न त्वत्र विपर्ययोऽन्यथाभावः । यथा कल्पद्रुमस्य रागादिराहित्येऽपि सेवकेष्वेव

यस्मादीदृशस्ते सेवानुभावस्तत्तस्माद्धेतोः । एवं निश्चितेपि भगवद्भक्तिरैहिकामुष्मिकफलदास्तीत्येवं निर्णीतेपि । तेषामभक्तानाम् ॥ ५ ॥ भगवानाशंकते—नन्विति । ननु कुतस्तर्हि मद्भक्तिमहिमज्ञेन त्वया परिचर्यादिकं हित्वा राजसूयमिष्यते तत्राह—तदिति । यस्मादेवमेव सत्यं तत्तस्मात् हे देवदेव सर्वाराध्यानामप्याराध्य एवं यद्यपि तव परिचर्ययैव सर्वदेवतृप्तिः सिध्यतीति वयं जानीमस्तथापीत्यर्थः । तत्किमित्यत आह—इह सर्वलोककल्मषमये भवदवतारे एष प्रायो बहिःसंपत्तिमात्रदर्शनचमत्कारी लोको भवतश्चरणारविंदसेवानुभावं पश्यतु तदेव दर्शय । ये इति । येऽस्मल्लक्षणाः कुरुसृंजयास्त्वां भजन्ति ये उत वा दुर्योधनादयस्त्वां न भजंति तेषामुभयेषामपि बहिर्मुखेष्वपि त्वद्भक्तिमहिमप्रदर्शनार्थमेवायमस्माकमुद्यम इति भावः । सेयमानुषंगिकी कामना श्रीनारददर्शितपारमेष्ठ्यकामत्वाभिप्रायस्तु तत्सेवोपयोगो नेति संकोचत्वाद्धोपितः । अत्र विश्वनाथः—तत्तस्मात्तादृशसभायां वृत्तायां तैर्ब्रह्मादिभिस्तव परमेश्वरत्वे स्थापिते सति एष भूर्लोकस्थजनः पश्यतु ततश्च कुरुसृंजयादीनां मध्ये त्वामीश्वरं नत्वा ये भजन्ति ये वा प्राकृतमानुषं मत्वोत न भजन्ति तेषामुभयेषां निष्ठां सद्गतिमसद्गतिं च तैरुच्य मानां त्वं दर्शय । करणीयेऽस्मिन्राजसूये स्वसंमतिप्रदानेनेति भावः । सुरतरोरिवेति । तस्य यथायोग्योयं भजत्वयोग्योयं मा भजत्विति वैषम्यं नास्ति किन्तु सम्यक्सादरं सेवमानमात्राणां संबन्धे प्रसाद एव स्यात् । तथा तवेत्यर्थः । तथाप्यत्र भजने तद्वत्सेवानुरूपमेवोदयः फलं न स्यात्किन्त्वधिकोपि स्यात्, दैवात्सेवावैगुण्ये विपर्ययः फलाभावोपि न स्यात् । तत्र पूर्वं " तुलसीदलमात्रेण जलस्य चुलकेन च । विक्रीणीते स्वमात्मानं भक्तेभ्यो भक्तवत्सलः ॥ " इति विष्णुधर्मोक्तेः । तत्र भक्तेभ्य इत्युक्तत्वाद्भावाख्यभक्तितारतम्येनैव फलतारतम्यमिति भावः । अथोत्तरं त्यक्त्वा स्वधर्ममित्यादिवत्, अत्र च विश्वास एव कारणमिति भावः । अत्र विश्वनाथः—ननु किं ममापि मत्सरतास्ति यदनुकूलानामुत्कर्षं प्रतिकूलानामपकर्षं दर्शयामीति तत्राह—नेति । स्वपर इति भेदमतिस्तव न स्यादेव कुतो ब्रह्मणो निरुपाधेः । किंच सर्वस्यात्मनः त्वमेवांतर्यामी भूत्वाऽनादि कर्मप्रवाहपतितं सर्वमेव प्रति स्वकर्मणि प्रेरयसि । समदृश इति त्वमेवेश्वरस्तत्तदनुरूपमेव शुभमशुभं वा फलं ददासि न तु क्वापि ते पक्षपात इति भावः । किंच तैः सुखिभिर्दुःखिभिर्वा तव न किमपि कृत्यमित्याह—स्वसुखानुभूतेः । ननु तर्हि मम वात्सल्यौदार्यादयो गुणाः किंविषयकास्तत्राह—संसेवतां त्वां सम्यक्सेवमानेषु तेषु प्रसादो वात्सल्यं यत एव कर्मबंधनकर्तृकात्मपर्यंतप्रदानलक्षणमौदार्यं च ते भवेत् । ननु तर्ह्यायातं ममापि वैषम्यं तत्राह—सुरतरोरिवेति । गुणदोषादिकमविचारयतस्तस्य स्वाश्रितमात्रे यथा प्रसादस्तथा तवापि । यः कोपि सेवतां तत्रैव प्रसादस्तत्रापि सेवानुरूपमेवोदयः । सेवातारतम्येनैव प्रसादफलस्याप्युदयतारतम्यमेव नात्र वैषम्यं विपर्ययोऽन्यथाभावस्तस्माद्वैषम्येपि तत्र भक्तेषु वात्सल्यवशादेव पक्षपाते सिद्धे तेषामनुकूलप्रतिकूलेषु तवाप्यानुकूल्यप्रातिकूल्ये आयात एवेति भावः । तत्राक्षेपे हेतुमाशंकते—कुत इति । न केवलं निरुपाधिरेव त्वमित्याह—किञ्चेति । अतः सर्वात्मत्वात् । अन्यदाह—स्वसुखस्य स्वरूपानंदस्यानुभूतिरनुभवः पूर्णानन्दोहमिति यस्य तथा तस्य । अतः स्वानंदपूर्णत्वात् । इति भाव इति—पूर्णानन्दरूपस्य रागद्वेषादयो जीवधर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ सम्यग्व्यवसितं राजन्भवता शत्रुकर्शन॥कल्याणी येन ते कीर्तिर्लोकाननुभविष्यति॥७॥ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो॥
सर्वेषामपि भूतानामीप्सितः क्रतुराडयम् ॥८॥ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे॥ संभृत्य सर्वसंभारानाहरस्व महाक्रतुम्॥९॥एते ते भ्रातरो
राजँल्लोकपालांशसंभवाः ॥ जितोऽस्म्यात्मवता तेऽहं दुर्जयो योऽकृतात्मभिः ॥ १० ॥ न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया ॥ विभूति
भिर्वाऽभिभवेद्देवोऽपि किमु पार्थिवः ॥ ११ ॥

फलजनकत्वं नान्येषु ॥ ६ ॥ सत्यं मद्भक्तानामेव कैवल्यादि नान्येषामित्यनुमोदमान आह । सम्यगिति शत्रुकर्शनेति । संबोधयन्सर्वराजविजयशक्तिं संचारयति । अनुभविष्यति द्रक्ष्यति । सर्वलोकव्याप्तो भविष्यतीत्यर्थः ॥ ७ ॥ ८ ॥ किमत्र मयाऽन्येन वा संपादनीयं तव तु सुकर एव राजसूय इत्याह । विजित्येति । जगतीं सर्वां पृथ्वीम्। संभारान्यज्ञोपस्करान्संभृत्य संपाद्याहरस्वानुतिष्ठेत्यर्थः ॥ ९ ॥ ननु नृपतिविजयादि कथं शक्यं स्यादत आह । एत इति । किंच आत्मवता जितेंद्रियेण ते त्वयाऽहं च जितोऽस्मि वशीकृतोऽस्मि । अकृतात्मभिरजितेंद्रियैः ॥ १० ॥ आस्तां तावदेवंभूतस्य तव परैरभिभवशंका अकिंचनमपि मत्परं कोऽपि नाभिभवितुं प्रभवतीत्याह । न

नोदयंत इत्याशयः । नन्वसुराणां दुःखप्रदत्वं सुराणां सुखदत्वं मम प्रसिद्धमिति चेदाह–तथापीति । यद्यपि त्वं सम एव तथापि तत्रापि प्रसादेपि ॥ ६ ॥ नृपोक्तमंगीकुर्वन्नाह–सत्यमित्यादि । येन व्यवसितेन क्रतुराज निश्चयेन । इत्यर्थ इति–नहि जडायाः कीर्तेर्लोकानुभवोस्ति तथापि तदभिमानिदेवतामालक्ष्येत्थमुक्तमिति भावः । " राजा राजसूयेन यजेत " इति श्रुत्या हे राजन्निति महाराजकर्तव्यत्वमेव राजसूयस्योक्तमिति भावः । शत्रुकर्षणेति सर्वराजजयशक्तिं संचारयति यद्येतादृश्यापि संपत्त्या शत्रून्नोच्छेदयिष्यति तर्हि किमनयेति भावः । लोकाननुलक्ष्यीकृत्य भविष्यतीति त्वत्कीर्तिरेव मया सर्वथा निष्पादनीयेति भावः ॥ ७ ॥ न केवलं तवैवाभीष्टोऽयं क्रतुः किन्तु ऋष्यादीनां सर्वेषामेवेत्याह–ऋषीणामिति । ऋष्यादीनां पूजातेः सुहृदां मानात्तेरन्येषां केषांचित्कौतुकदर्शनात्तेः, केषांचित्स्थावरादीनां यज्ञार्थं निजव्यापादात्स्वदेहसाफल्यात्तेश्च सर्वेषामभिमत एवेति भावः ॥ ८ ॥ श्रीकृष्ण आह–किमत्रेति । अत्र यागनिमित्तम् । इत्यर्थ इति–उपसर्गादनुष्ठानार्थेऽपीति भावः ॥ ९ ॥ सांप्रतं सर्वजयो दुःशक इत्याशंकते–नन्विति । कैमुत्याभिसंध्याह–किंचेति । आत्माहमेव सेव्यत्वेन विद्यते यस्य तेनात्मवता मत्परमभक्तेनेत्यर्थः । न कृतो मयि नार्पित आत्मा यैस्तैर्मदभक्तैः वस्तुतस्तु लोकपाला अंशसंभवा येषां ते स्वयं भगवतोन्तरङ्गपरिकरत्वात् । ' यूयं नृलोके बत भूरिभागाः ' इत्याद्युक्तेः । तेभ्योपि तस्य श्रैष्ठ्यमाह–हे राजन्निति । नाहं त्वां विना कस्यापि वशवर्तीति चाह–जितोस्मीति ॥ १० ॥ तावदधुना । एवंभूतस्य मद्वशीकर्तुर्लो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीतः फुल्लमुखांबुजः ॥ भ्रातृन्दिग्विजयेऽयुंक्त विष्णुतेजोपबृंहितान् ॥ १२ ॥ सहदेवं दक्षिणस्यामादि शत्सह सृंजयैः ॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसाचिनम् ॥ प्राच्यां वृकोदरं मत्स्यैःकेकयैः सह मद्रकैः ॥ १३ ॥ ते विजित्य नृपान्वीरा आजह्रु र्दिग्भ्य ओजसा ॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥ १४ ॥ श्रुत्वाऽजितं जरासंधं नृपतेर्ध्यायतो हरिः ॥ आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥ १५ ॥ भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः ॥ जग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥ १६ ॥ ते गत्वातिथ्यवेलायां गृहेषु गृहमे धिनम् ॥ ब्रह्मण्यं समयाचेरन्राजन्या ब्रह्मलिंगिनः ॥ १७ ॥ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् ॥ तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥ १८ ॥ किं दुर्मर्षं तितिक्षूणां किमकार्यमसाधुभिः ॥ किं न देयं वदान्यानां कः परः समदर्शिनाम् ॥ १९ ॥

कश्चिदिति । तेजसा प्रभावेण । विभूतिभिः सैन्यादिसामग्रीभिः ॥ ११ ॥ अयुंक्त नियुक्तवान् । विष्णोस्तेजसोपबृंहितान्संवर्धितान् । तेजोपबृंहितानिति संधिरार्षः[1] ॥ १२ ॥ नकुलादीनां मत्स्यादिभिः सहायैर्यथासंख्येन संबंधः ॥ १३ ॥ कथंभूताय । यक्ष्यते यागं करिष्यते ॥ १४ ॥ आद्यो हरिः श्रीकृष्णः ॥ १५ ॥ ब्रह्मलिंगधरा ब्राह्मणलिंगधारिणः । यतो यत्र बृहद्रथसुतो जरासंधः ॥ १६ ॥ गृहेषु वर्तमानं समयाचेरन् सम्यगयाचंतेत्यर्थः ॥ १७ ॥ १८ ॥ नन्विदं कामयामह इति विशेषो निर्दि

कपालांशोद्भवभ्रातृयुक्तस्य । मत्परं मत्परायणमात्रं किमुत युष्मानिति भावः ॥ ११ ॥ विष्णोर्विश्वव्यापकस्य तेजसोपबृंहितान्दिग्विजयार्थं तदानीं निजतेजोर्पणादिति भावः ॥ १२ ॥ यथासंख्यमाह—सहदेवं सृंजयैः भीमं मत्स्यैर्नकुलं कैकयैस्सव्यसाचिनं मद्रकैश्च सहेति तत्रातिवात्सल्येन नकुलसहदेवौ प्रति दक्षिणप्रतीच्यौ व्यदिशत्तत्र बहुलदुर्गमदुर्जयाभावात् । सर्वदुर्गमसंचारित्वेन सर्वजयित्वेन च सव्यसाचिनमुदीच्यां महापर्वतमयत्वेन तस्या अतिदुर्गमत्वात्, दुर्जयबहुलदेवगंधर्वमयत्वाच्च । अत एव सव्येनापि पाणिना धनुर्गुणाकर्षणादिना तस्य माहात्म्यमप्युक्तम् । भीमश्च प्राच्यां तत्समबलजरासंधजयापेक्षयेति ज्ञेयम् ॥ १३ ॥ ते सहदेवादयस्त्रयः । अजातशत्रवे इति जितोपि कश्चित्तस्मिन्द्वेषं नाऽकरोत्किन्तु भक्तिमेव स्वभावतस्तस्य कस्मिंश्चिदपि द्वेषाभावात् । विजयस्तु केवलं राजसूयापेक्षयैवेति भावः । आजिग्युरिति पाठे जयतेर्द्विकर्मत्वान्नृपान् द्रविणं विजित्येत्यन्वयः । हे नृपेति स्वपूर्वेषामिदं यशः कर्णपुटैरापीयतामिति भावः ॥ १४ ॥ ननु " जरासंधं निहत्यैव पाण्डवैस्तु दिशो जिताः " इति पुराणांतरविरोधस्य कः परिहार इति चेदत्राह—शिष्टोक्तिरेवेति गृहाण । सा च—" पूर्वाः कथाः परं ब्रूयुः पराः पूर्वं तथैव च । मोहनार्थाय दुष्टानां सर्वव्यत्यास इष्यते ॥ " इति विजयध्वजः ॥ १५ ॥ हेति सूचितमितिहासमाह—ब्राह्मणलिंगानि वेदपाठादीनि । सभापर्वणि तु "तपस्विनां ब्राह्मणानां स्नातकानां परिच्छदाम्" इत्युक्तं जरासंधवधार्थं भीमस्यैव गन्तव्येर्जुनगमने हेतुरपि तत्रैवोक्तः । " मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः । मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः ॥ " इति ॥ १६ ॥ तं जरासंधम् । आतिथ्यवेलायामादित्ये दिनमध्यं गाहमाने । इत्यर्थ इति—अतीते लिङार्ष इत्याशयः ॥ १७ ॥ तद्वस्तु ॥ १८ ॥ स आक्षिपति—नन्विति । विशेषो याच्यवस्तुभेदः । अन्यथा निर्देशाभावे । अतोत्र

१ संधिरार्षोऽत्र तेजश्शब्दोऽदन्तो वा बोध्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽनित्येन शरीरेण सतां गेयं यशो ध्रुवम् ॥ नाऽऽचिनोति स्वयंकल्पः स वाच्यः शोच्य एव सः ॥ २० ॥ हरिश्चंद्रो रंतिदेव उञ्छवृत्तिः शिबि र्बलिः ॥ व्याधः कपोतो बहवो ह्यध्रुवेण ध्रुवं गताः ॥ २१ ॥ श्रीशुक उवाच ॥ स्वरैराकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि ॥ राजन्यबंधून्विज्ञाय दृष्ट पूर्वानचिंतयत् ॥ २२ ॥ राजन्यबंधवो ह्येते ब्रह्मलिंगानि बिभ्रति ॥ ददामि भिक्षितं तेभ्य आत्मानमपि दुस्त्यजम् ॥ २३ ॥ बलेर्नु श्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा ॥ ऐश्वर्याद्भ्रंशितस्यापि विप्रव्याजेन विष्णुना ॥ २४ ॥

श्यताम् । अन्यथा यस्य पुत्रादेर्वियोगो दुःसहः स कथं देयः तथा राजमंडनं किरीटाद्यदेयं यत्तद्भिक्षुभ्यः कथं देयं तथाऽतिरम्यं रत्नाभरणादि पुत्रादियोग्यं कथं परस्मै देयमिति चेदत आहुः । किंदुर्मर्षमित्यादि । अथ दृष्टांतत्वेनार्थांतरमाहुः । किमकार्यमिति । यथाऽसाधूनामकार्यं नास्ति तथा तितिक्षूणां दुर्मर्षं दुःसहं नास्ति । वदान्यानाम त्युदाराणामदेयं नास्ति समदर्शिनां परश्च नास्ति । अतः किं विशेषनिर्देशेनेत्यर्थः ॥ १९ ॥ किंच अर्थिने धीरेण मुद्गलादिवत्प्राणा अपि न वंचनीया इत्याशयेनाहुः । योऽनित्येनेति । नाचिनोति न संपादयति स वाच्यः स निंद्यः ॥ २० ॥ विश्वामित्रार्थानृण्याय हरिश्चंद्रो भार्यात्मजादि सर्वं विक्रीय स्वयं चांडालतां प्राप्तोऽप्यनिर्विण्णः सहायोध्यावासिभिर्जनैः स्वर्गं गतः । रंतिदेवः सकुटुंबोऽष्टचत्वारिंशदहान्यलब्धोदकोऽपि कथंचिल्लब्धान्नोदकार्थार्थिभ्यो दत्त्वा ब्रह्मलोकं गतः ! उञ्छवृत्तिर्मुद्गलः षण्मासं सीदत्कुटुंबोऽप्यातिथ्यदानेन ब्रह्मलोकं गतः । शिबिः शरणागतकपोतरक्षणाय स्वमांसं श्येनाय दत्त्वा दिवं गतः । बलिः सर्वस्वं ब्राह्मणवेषधारिणे हरये दत्त्वा तमेवात्मसा चकार । कपोतश्चातिथये व्याधाय कपोत्या सहात्ममांसं दत्त्वा विमानेन दिवं गतः । व्याधस्तयोः सत्त्वं वीक्ष्य स्वयमतिनिर्विण्णो महाप्रस्थाने वनाग्निदग्धदेहो निष्कल्मषो दिवमारुरोह । एवमन्ये च बहवोऽध्रुवेण शरीरेण ध्रुवं लोकं गता इति ॥ २१ ॥ ज्याहतैर्ज्याघातकिणांकितैः । दृष्टपूर्वान् द्रौपदीस्वयंवरादिषु ॥२२॥२३ ॥ इंद्रस्य श्रियं

अत्र दुर्मर्षत्वे यतस्तितिक्ष्वादीनामित्थं गतिरतो हेतोः । इत्यर्थ इति–देवभेदकथनं त्वब्रह्मण्याग्रे एवोचितं न तु तव ब्रह्मण्यस्यापीति भावः । यद्वा–असाद्गुभिः ओ वासुदेवः साधुः साधयिता येषां तेषां किमकार्यं कर्तुमशक्यमपि तु सर्वमेव शक्यमेवेत्यर्थः । ननु किमिच्छथ तद्ब्रूत अन्यथा यदि मत्पुत्र एव वः कामितः स्यात्तर्हि स ममतास्पदपुत्रविच्छेदः कथं सोढव्यस्तत्राहुः–किं दुर्मर्षमिति । विश्वामित्रादिभ्यो । दशरथादिकर्तृकपुत्रादिसमर्पणात् । नन्वेवं प्रार्थयन्तो यदि गृहजनैस्तिरस्क्रियध्वे यूयं तर्हि किं स्यात्तत्राहुः–किमकार्यमिति । ननु यदि मच्छरीरमेव याचथ तर्हि तत्कथं देयं तत्राहुः–किमदेयमिति । दध्यगादौ देवेभ्यः शरीरदानस्यापि दृष्टत्वात् । ननु यदि मच्छत्रवो भवथ तर्हि शत्रुभ्यः कथं देयं तत्राहुः–कः पर इति । समदर्शिनां ज्ञानिनां न हि त्वयि विषमदर्शनरूपमज्ञानमस्तीति भावः ॥ १९ ॥ पुरुषेण यशःसंपाद्यमाह–किंचेति । वाच्यो निंद्यः । " वाच्यस्तु कुत्सिते हीने वचनार्हे च वाच्यवत् " इति मेदिनी ॥ २० ॥२१॥ तानर्थिनः । प्रकोष्ठैः मणिबंधकूर्परांतरैः । "प्रकोष्ठो मणिबंधस्य कूर्परस्यांतरेपि च " इति मेदिनी । ' किणश्चिह्नं व्रणादीनाम् ' इति धरणिः । आदिना रुक्मि णीविवाहादिग्रहः स्वरैर्गंभीरैः । आकृतिभिर्हृष्टपुष्टसुंदराकारैः । क्षत्रबंधून् विप्रवेशेन याचनपरत्वेन निकृष्टक्षत्रियान् ॥ २२ ॥ तदेवाभिप्रेत्याह–राजन्येति । एतेऽर्थिनः ॥ २३ ॥ नेतिपाठे काकूक्त्या श्रूयत एवेत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रियं जिहीर्षतेंद्रस्य विष्णवे द्विजरूपिणे ॥ जानन्नपि महीं प्रादाद्वार्यमाणोऽपि दैत्यराट् ॥ २५ ॥ जीवता ब्राह्मणार्थाय को न्वर्थः क्षत्रबंधुना ॥ देहेन पतमानेन नेहता विपुलं यशः ॥ २६ ॥ इत्युदारमतिः प्राह कृष्णार्जुनवृकोदरान् ॥ हे विप्रा व्रियतां कामो ददाम्यात्मशिरोऽपि वः ॥२७॥ श्रीभगवानुवाच ॥ युद्धं नो देहि राजेंद्र द्वंद्वशो यदि मन्यसे॥ युद्धार्थिनो वयं प्राप्ता राजन्या नान्नकांक्षिणः ॥ २८ ॥ असौ वृकोदरः पार्थस्तस्य भ्राताऽर्जुनो ह्ययम् ॥ अनयोर्मातुलेयं मां कृष्णं जानीहि ते रिपुम् ॥२९॥ एवमावेदितो राजा जहासोच्चैः स्म मागधः॥आह चामर्षितो मंदा युद्धं तर्हि ददामि वः ॥ ३० ॥ न त्वया भीरुणा योत्स्ये युधि विक्लवचेतसा ॥ मथुरां स्वपुरीं त्यक्त्वा समुद्रं शरणं गतः ॥ ३१ ॥ अयं तु वयसाऽतुल्यो नातिसत्त्वो न मे समः ॥ अर्जुनो न भवेद्योद्धा भीमस्तुल्यबलो मम ॥ ३२॥ इत्युक्त्वा भीमसेनाय प्रादाय महतीं गदाम् ॥ द्वितीयां स्वयमादाय निर्जगाम पुराद्बहिः ॥ ३३ ॥ ततः समेखले वीरौ संयुक्ताावितरेतरौ ॥ जघ्नतुर्वज्रकल्पाभ्यां गदाभ्यां रणदुर्मदौ ॥ ३४ ॥ मंडलानि विचित्राणि सव्यं दक्षिणमेव च ॥ चरतोः शुशुभे युद्धं नटयोरिव रंगिणोः ॥ ३५ ॥ ततश्चटचटाशब्दो वज्रनिष्पेषसन्निभः ॥ गदयोः क्षिप्तयो राजन्दंतयोरिव दंतिनोः ॥ ३६ ॥

जिहीर्षता विप्रव्याजेन विष्णुना भ्रंशितस्यापि बलेः । नु अहो । नेति पाठे न श्रूयते किंम् अपि तु श्रूयत इति ॥ २४ ॥ तं श्लाघते । विष्णव इति । शुक्रेण वार्यमाणोऽपि । अत एव विष्णुरिति जानन्नपि ॥ २५ ॥ पतमानेन पतता क्षत्रबंधुना देहेन ब्राह्मणार्थाय विपुलं यशो नेहता नेहमानेनासंपादयता को न्वर्थः न कोऽपीत्यर्थः ॥ २६ ॥ एवं निश्चित्याह । हे विप्रा इति ॥ २७ ॥ २८ ॥ राजन्यतामेव प्रपंचयति । असाविति ॥ २९ ॥ ३० ॥ यतो मद्भिया समुद्रं शरणं गतः ॥ ३१ ॥ वयसाऽप्यतुल्यो नातिसत्त्वो नातिबलश्च न च देहेन मया समोऽतोऽर्जुनो योद्धा न भवेत् । भीमस्तु भवेत् यतो मम तुल्यबलः ॥ ३२ ॥ प्रादाय दत्त्वेत्यर्थः ॥ ३३ ॥ समेखले युद्धांगणे ॥ ३४ ॥ मंडलानि गदायुद्धगतिभेदान् । सव्यं दक्षिणं च यथा भवति तथा । रंगिणो रंगगतयोर्नटयोरिवेति निर्भयत्वेनोपमा ॥ ३५ ॥ चटचटेति

कश्यपाज्जातस्यास्य विप्रत्वमेव कथं विप्रव्याजेनेति । तर्हि तदिंद्रस्यापि प्रसज्जेत क्षत्रियवृत्त्या विंद्रस्य तल्लुतं चेत्तर्ह्युपेन्द्रलिप्सया वामनस्य चैतदलुप्तत्वेपि दंभमयविप्रत्वमेव गम्यत इति भावः ॥ २४ ॥ तं बलिम् । अत एव वार्यमाणत्वेप्यनिवृत्तेरेव । शुक्रेणेतिशेषः ॥ २५ ॥ जीवता क्षत्रबंधुना को न्वर्थ इति संबंधः । इत्यर्थ इति–अर्थावगतोर्थ इति ॥ २६ ॥ वो युष्मभ्यम् ॥ २७ ॥ इतोऽग्रे क्वचित्पुस्तकेषु श्लोकद्वयं प्रक्षिप्तमपि दृश्यते ‘ किं देवा ’ इत्यादिरूपम् । द्वंद्वशो द्वंद्वयुद्धम् । द्वंद्वश इति द्वंद्वशब्दाच्छस् प्रत्यय आर्षः ॥ २८ ॥ इदमेतदावंगुलिनिर्दिष्टपरौ ॥ २९ ॥ वो युष्मभ्यम् ॥ ३० ॥ कृष्णं प्रत्याह–न त्वयेति । विक्लवमस्थिरं चेतो यस्य तेन ॥ ३१ ॥ अयमर्जुनः अतुल्यः । नातिसत्त्वः न प्रशस्तपराक्रमः । मत्तुल्यगदायुद्धावित्त्वात् । अतो न मे मया सदृशः । असमत्वादेव योद्धा नेति संबंधः ॥ ३२ ॥ भारतीयबाहुयुद्धविरोधस्तु महतीं पूज्यां गदां वाचं प्रादाय भीमाय ‘ भीमस्तुल्यबलो मम ’ इत्युक्तेः । द्वितीयां द्वैरथायोग्यां स्वयं कोर्थः स्वयं भगवते ‘ न त्वया भीरुणा योत्स्ये ’ इत्युक्तेरादाय दत्त्वेति । पुराद्बिरित्रजात् ॥ ३३ ॥ ततः पुराद्बहिर्गमनोत्तरम् । मेखला परितः कृता मृन्मयमर्यादा तया सहिते । गदाभ्यां वाग्भ्यां निष्ठुरोक्तिभ्याम् ॥ ३४ ॥ नटयोरिवेत्युक्तेन शास्त्रयुद्धमिति । अन्यथा दृष्टान्तवैषम्यापत्तेः ॥ ३९ ॥ ततो युद्धप्रवृत्त्यनन्तरम् । गदयोः क्षिप्तयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते वै गदे भुजजवेन निपात्यमाने अन्योन्यतोंसकटिपादकरोरुजत्रून् ॥ चूर्णीबभूवतुरुपेत्य यथार्कशाखे संयुध्यतोर्द्विरदयोरिव दीप्तमन्य्वोः ॥३७॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्वमुष्टिभिरयःस्पर्शैरपिष्टाम् ॥ शब्दस्तयोः प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ॥ ३८ ॥ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः ॥ निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ॥ ३९ ॥ एवं तयोर्महाराज युध्यतोः सप्तविंशतिः ॥ दिनानि निरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥ ४० ॥ एकदा मातुलेयं वै प्राह राजन्वृकोदरः ॥ न शक्तोऽहं जरासंधं निर्जेतुं युधि माधव ॥ ४१ ॥ शत्रोर्जन्ममृती विद्वाञ्जीवितं च जराकृतम् ॥ पार्थमाप्याययन्स्वेन तेजसाऽचिंतयद्धरिः ॥ ४२ ॥ संचिंत्यारिवधोपायं भीमस्यामोघदर्शनः ॥ दर्शयामास विटपं पाटयन्निव संज्ञया ॥ ४३ ॥ तद्विज्ञाय महासत्त्वो भीमः प्रहरतां वरः ॥ गृहीत्वा पादयोः शत्रुं पातयामास भूतले ॥ ४४ ॥ एकं पादं पदाक्रम्य दोर्भ्यामन्यं प्रगृह्य सः ॥ गुदतः पाटयामास शाखामिव महागजः ॥ ४५ ॥

गदयोः परस्पराघातशब्दानुकरणम् । वज्रस्य निष्पेषः पातस्तत्सदृशः । युध्यतोर्दन्तिनोर्दंताघातशब्द इव शुशुभे ॥ ३६ ॥ अंसकट्यादीनुपेत्य । दीप्तो मन्युर्ययोस्तयोर्द्विरदयोर्गजयोरर्कशाखाभ्यां समं युध्यतोस्ते यथा चूर्णीभवतस्तद्वत् ॥ ३७ ॥ अपिष्टां चूर्णीचक्रतुः ॥ ३८ ॥ शिक्षा अभ्यासो बलं सत्त्वम् ओजः प्रभावः समानि तानि ययोस्तयोः ॥ ३९ ॥ ४० ॥ ४१ ॥ जन्म शकलरूपं मृतिः पुनः शकलीभावस्ते विद्वान् जानन्जरा नाम राक्षसी तत्कृतम् अचिंतयत्कथमसौ शकलीभवेदिति ॥ ४२ ॥ विटपं शाखाम् । करेण विटपं गृहीत्वा हरिर्भीमस्य यथाऽहं विटपं पाटयामि तथा त्वमेनं विपाटयेति संज्ञया संकेतेनारिवधोपायं दर्शयामासेत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥

रन्योन्यं निष्ठुरोक्त्योः सत्योश्चटचटाशब्दस्तलताडनोत्थ एव ज्ञेयः ॥ ३६ ॥ ते गदे तयोर्गृहीते । संध्यभाव आर्षः । भुजजवेन पाणिवेगेन । निपात्यमाने अधःक्रियमाणे । चूर्णीबभूवतुर्निष्फले बभूवतुः । पूर्वोक्तप्रशस्तवाचौ संरंभावेशात् अंसकट्यादीनुपेत्य अहं तेंसं भनज्म्यहं ते कटिमित्याद्युक्त्वा । अर्कशाखादृष्टान्तस्तु नाशमात्र एव ज्ञेय इत्येवं परिहार्यः । एवमग्रेपि ॥ ३७ ॥ प्रहतयोश्चूर्णीभूतयोः । वज्रस्य निर्घातो वज्रनिर्घातस्तद्वत्परुषो निष्ठुरः । राजदंतादित्वत्समासः ॥ ३८ ॥ तयोर्भीमजरासंधयोः । निर्विशेषमनुपमम् 'विशेषो भेदतुल्ययोः' इति धरणिः ॥ ३९ ॥ तत्र गिरिव्रजे ॥ ४० ॥ मातुलेयं श्रीकृष्णम् ॥ ४१ ॥ शत्रोर्जरासंधस्य । आप्याययत् वर्द्धयामास ॥ ४२ ॥ "विटपो न स्त्रियां स्तंबशाखाविस्तारपल्लवे" इति मेदिनी । इत्यर्थ इति–विना शकलीकरणमस्य मृत्युः कदापि नेति भावः ॥ ४३ ॥ ४४ ॥ अन्यं द्वितीयपादम् । स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकपादोरुवृषणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णेशकले ददृशुः प्रजाः ॥ ४६ ॥ हाहाकारो महानासीन्निहते मगधेश्वरे ॥ पूजयामासतुर्भीमं परिरभ्य जयाच्युतौ ॥ ४७ ॥ सहदेवं तत्तनयं भगवान्भूतभावनः ॥ अभ्यषिंचदमेयात्मा मगधानां पतिं प्रभुः ॥ मोचयामास राजन्यान्संरुद्धा मागधेन ये ॥ ४८ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे जरासंधवधोनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ श्रीशुक उवाच ॥ अयुते द्वेश तान्यष्टौ लीलया युधि निर्जिताः ॥ ते निर्गता गिरिद्रोण्या मलिना मलवाससः ॥ १ ॥ क्षुत्क्षामाः शुष्कवदनाः संरोधपरिकर्शिताः ॥ ददृशुस्ते घनश्यामं पीतकौशेयवाससम् ॥२॥ श्रीवत्सांकं चतुर्बाहुं पद्मगर्भारुणेक्षणम् ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलम् ॥ ३ ॥ पद्महस्तं गदाशंखरथांगैरुपलक्षितम् ॥ किरीटहारकटककटिसूत्रांगदाचितम् ॥४ ॥ भ्राजद्वरमणिग्रीवं निवीतं वनमालया ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥ ५ ॥

एकैकः पादादिर्ययोस्ते शकले ॥ ४६ ॥ ४७ ॥ दुर्वृत्तत्वादसौ हतो न तु राज्याभिलाषेणेति दर्शयन्नाह । सहदेवमिति ॥ ४८ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्रीध० टीकायां द्विसप्ततितमोध्यायः ॥ ७२ ॥ ततस्त्रिसप्ततितमे मोचयित्वा नृपान्हरिः ॥ राजार्हभोगैः स्वान्देशान्प्रस्थाप्य पुनरागमत् ॥ १ ॥ अत्युन्नद्धजरासंधवधात्तद्रुद्धभूपतीन् ॥ विमोक्ष्य कृपया कृष्णो निजरूपमदर्शयत् ॥ २ ॥ ये निर्जिता जरासंधेन निरुद्धाश्च गिरिद्रोण्यां ते ततो निर्गताः संतो घनश्यामं ददृशुरित्युत्तरेणान्वयः ॥ १ ॥ क्षुधा क्षामाः कृशाः । संरोधेन परिकर्शिताः क्लेशिताः ॥ २ ॥ ३ ॥ ४ ॥ भ्राजन् भ्राजमानो वरमणिः कौस्तुभो यया सा

भीमः ॥ ४९ ॥ ४६ ॥ मगधेश्वरे जरासंधे । जयोर्जुनः ॥ ४७ ॥ तत्तनयं जरासंधात्मजम् । दुर्वृत्तत्वाद्वाममार्गेण रुद्राराधकत्वात् । ननु तन्मार्गस्यापि शास्त्रविहितत्वेन तदाश्रयणे कथं दुर्वृत्तत्वमिति चेत्पुराणांतरार्ख्यानेन तदाह । तथा हि वाराहे गौतमशप्तविप्राणां कलौ वामाचारे प्रवृत्तिः–"पुरा सर्वजनानां तु मोक्षमार्गे व्यवस्थितिम् । दृष्ट्वा स्वर्गादिवैफल्यं देवैरुक्तः स्वयं हरिः ॥ भगवन्सृष्टिनाशं त्वं शमयानुग्रहेण नः । तदाऽहं विष्णुना प्रोक्तो मोहशास्त्रमकल्पयम् । वेदमार्गविरुद्धं यत्तद्रौद्रं मत्प्रवर्तितम् ॥ मदट्टहासपतिता मह्यां तोयस्य बिंदवः । असंख्यातास्तु ते रौद्रा भविष्यंति कलौ युगे ॥ कल्पयिष्यंति शास्त्राणि सुरामांसप्रिया नराः । मयापि कल्पिता विष्णोराज्ञया संहिता पुरा । निःश्वासाख्या वेदबाह्या वामाचारप्रवर्तिका ॥ तत्र मच्छासनरता मदाचारास्तु ये द्विजाः । तेषां वासस्तु नरके भविष्यति न संशयः ॥ शूद्रैस्तदधमैर्ग्राह्य आचारो वामसंज्ञितः । न द्विजैः सर्वथा ग्राह्य इति सत्यं वचो मम ॥" इति रुद्रोऽगस्त्यं प्रत्याह । कलिसंधित्वाज्जरासंधस्तस्मिन्नाचारे प्रवृत्त इति ज्ञेयम् । असौ जरासंधः ॥ ४८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे द्विसप्ततितमोऽध्यायः ॥७२॥ ततो जरासंधवधोत्तरम् (१) । अत्युन्नद्धोऽत्युच्छृंखलः । तद्रुद्धाञ्जरासंधबद्धान्नृपान् (२) । हे अयुत वासुदेवभक्त 'ईः करुणो द्वापुरि' इत्यनेकार्थमालोक्तेः । द्वाया भूम्या ईशो द्वेश ईश्चासौ द्वेश ईद्वेशस्तत्संबुद्धौ हे ईद्वेश । यद्वा–अयुतपदेन पुनः कर्मधारयेण अयुतेद्वेशेत्येकैव संबुद्धिः । तथा च–हे कृष्णभक्त्यालो धरित्रीश तानि षट् । 'टाद्या नव ' इति केरलोक्तेस्तशब्दः षट्संख्यापरः । अष्टौ च 'अंकानां वामतो गतिः ' इति रीत्या षडशीतिसंख्या संपद्यते । " राज्ञां षडशीतिर्जाताः शेषाश्चैव चतुर्दश " इति भारतविरोधोऽपहृतः । ततो गिरिद्रोण्याः । ते राजानः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ पिबंत इत्यादिभिः सर्वेन्द्रियै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः ॥ प्रणेमुर्हतपाप्मानो मूर्धभिः पादयोर्हरेः ॥ ६ ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्कमाः ॥ प्रशशंसुर्हृषीकेशं गीर्भिः प्रांजलयो नृपाः ॥ ७ ॥ राजान ऊचुः ॥ नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पाहि नः कृष्ण निर्विण्णान्घोरसंसृतेः ॥ ८ ॥ नैनं नाथान्वसूयामो मागधं मधुसूदन ॥ अनुग्रहो यद्भवतो राज्ञां राज्यच्युतिर्विभो ॥ ९ ॥ राज्यैश्वर्यमदोन्नद्धो न श्रेयो विंदते नृपः ॥ त्वन्मायामोहितोऽनित्या मन्यते संपदोऽचलाः ॥ १० ॥ मृगतृष्णां यथा बाला मन्यंत उदकाशयम् ॥ एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ॥ ११ ॥ वयं पुरा श्रीमदनष्टदृष्टयो जिगीषयाऽस्या इतरेतरस्पृधः ॥ घ्नंतः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वाऽविगणय्य दुर्मदाः ॥ १२ ॥ त एव कृष्णाद्यग भीररंहसा दुरंतवीर्येण विचालिताः श्रियः ॥ कालेन तन्वा भवतोऽनुकंपया विनष्टदर्पाश्चरणौ स्मराम ते ॥ १३ ॥

ग्रीवा यस्य तम् । निवीतं कंठलंबितया व्याप्तम् । पिबंत इवेत्यादीनां हरेः पादयोः प्रणेमुरित्युत्तरेणान्वयः ॥ ५ ॥ रंभंतः परिरंभमाणा इव ॥ ६ ॥ कृष्णदर्शनाह्लादेन ध्वस्तः संरोधनक्कमो येषां ते ॥ ७ ॥ संरोधाद्रक्षितानस्मान् घोरायाः संसृतेरपि पाहि मोचय ॥ ८ ॥ ननु भवंतो जरासंधासूयाविष्टा इहामुत्र भोगासक्ताश्च कथं संसृतेर्मोचनीया इत्याशंक्य संप्रति न वयं तथाभूता इत्याहुः नैनमित्यष्टभिः । हे नाथ वयमेनं नान्वसूयामः अन्वनु दोषदृष्ट्या न पश्यामः । कुत इत्यत आहुः । अनुग्रह इति । यद्यस्मात् ॥ ९ ॥ एतदेव व्यतिरेकेणोपपादयंति राज्यैश्वर्येति । राज्यैश्वर्याभ्यां मदस्तेनोन्नद्ध उच्छृंखलो नित्या अचलाश्च संपदो मन्यते । यद्वा । अनित्याः सतीरचलाः शाश्वतीर्मन्यते ॥ १० ॥ किंच अवस्तु सद्वस्तुतया पश्यंतीत्याहुः । मृगतृष्णामिति । वैकारिकीं सृष्ट्यादिविकारापन्नाम् । अयुक्ता अविवेकिनः ॥ ११ ॥ राज्यस्य योगवियोगयोरनर्थार्थावहत्वमस्मास्वेव दृष्टमित्याहुः वयमिति द्वाभ्याम् । श्रीमदेन नष्टा दृष्टिर्येषां ते । अस्याः पृथिव्याः इतरेतरस्पृधः परस्परं स्पर्धमानाः । पुरः पुरतः । त्वा त्वां मृत्युमविगणय्य । पुरा ये दुर्मदा वयम् ॥ १२ ॥ हे कृष्ण त एव वयमद्य विनष्टदर्पास्ते चरणौ स्मरामः स्मर्तुमाशास्महे । कथंभूताः । भवतस्तन्वा मूर्त्या कालेन

भगवत्सेवोक्ता ॥ ५ ॥ ६ ॥ ७ ॥ यथा शुनो रक्षितः सिंहादपि रक्ष्यत इत्याशयेनाहुः–संरोधादिति ॥ ८ ॥ हरिराशंकते–नन्विति । तथाभूता असूयावेशलोकद्वयभोगासक्ताः । एनं जरासंधम् । हेतुमाशंक्य समादधते–कुत इत्यादिना ॥ ९ ॥ एतदेवानुग्रहणमेव । व्यतिरेकेण पूर्वोक्तार्थवैपरीत्येन । नित्याचलयोरर्थाभेदं मत्वार्थांतरमाह–यद्वेति ॥ १० ॥ इत्थं ज्ञातारो मूर्खा एवेत्याह–किंचेति । सत् भवत् । मृगतृष्णामंबरप्रदेशसंसृष्टदिवाकरकरनिकरम् । उदकाशयं जलपूरम् । मायां महिमानं संपल्लक्षणम् । वस्तु प्रतिहतिरहितं नित्यम् । चक्षते पश्यंति । "गोअश्वेत्यादिमहिमेत्याचक्षते" इति श्रुतेः ॥ ११ ॥ स्वदृष्टयंतेनोक्तमर्थमाहुः–राज्यस्य योगे त्यादिना । अतिनिर्घृणा अतिनिर्दयाः ॥ १२ ॥ स्मरामेत्याशिषि लोट् । यतो राज्यमनर्थहेतुरतो हेतोः । इत्यर्थ इति–"मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद" इत्यादिवक्ष्यमाणत्वादिति भावः ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथो न राज्यं मृगतृष्णिरूपितं देहेन शश्वत्पतता रुजां भुवा ॥ उपासितव्यं स्पृहयामहे विभो क्रियाफलं प्रेत्य च कर्णरोचनम् ॥ १४ ॥ तं नः समा दिशोपायं येन ते चरणाब्जयोः ॥ स्मृतिर्यथा न विरमेदपि संसरतामिह ॥ १५ ॥ कृष्णाय वासुदेवाय हरये परमात्मने ॥ प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥ १६ ॥ श्रीशुक उवाच ॥ संस्तूयमानो भगवान्राजभिर्मुक्तबंधनैः ॥ तानाह करुणस्तात शरण्यः श्लक्ष्णया गिरा ॥ १७ ॥ श्रीभगवानुवाच ॥ अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे ॥ सुदृढा जायते भक्तिर्बाढमाशंसितं तथा ॥ १८ ॥ दिष्ट्या व्यवसितं भूपा भवंत ऋतभाषिणः ॥ श्रियैश्वर्यमदोन्नाहं पश्य उन्मादकं नृणाम् ॥ १९ ॥ हैहयो नहुषो वेनो रावणो नरकोऽपरे ॥ श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यनरेश्वराः ॥ २० ॥

श्रियो विचालिता विभ्रंशिताः अतो राज्यच्युतिर्भवदनुग्रह एवेत्यर्थः ॥ १३ ॥ अत एवाथो अनंतरं मृगतृष्णिसदृशं राज्यं शश्वत्पतता प्रतिक्षणं क्षीयमाणेन तथा रुजां रोगाणां भुवा जन्मक्षेत्रेण देहेनोपासितव्यं सेव्यं न स्पृहयामहे प्रेत्य परलोके च क्रियाफलं स्वर्गादिभोगमुपासितव्यं न स्पृहयामहे । कथंभूतं कर्णयो रोचनं रुचिजनकमात्रम् । तत्र गतस्य स्पर्धाद्यनपगमेन सुखाभावादित्यर्थः ॥ १४ ॥ यद्येवंभता यूयं तर्हि मम चरणौ स्मरत ततोऽनायासेन मुक्तिर्भविष्यतीति किं मदपेक्षयेति चेदत आहुः । तं न इति । त्वच्चरणस्मृतिरपि त्वत्प्रसादफलमेवेत्यर्थः ॥ १५ ॥ १६ ॥ श्लक्ष्णया मंजुलया ॥ १७ ॥ यथा भवद्भिराशंसितं तथा बाढं निश्चितं वो मयि भक्तिर्जायते जायतामित्यर्थः ॥ १८ ॥ हे भूपाः मद्भजनमेव कर्तव्यमिति भवद्भिर्व्यवसितं संकल्पितं दिष्ट्या भद्रम् । भवद्भिरुक्तं च सत्यमेवेत्याह । भवंत इति । श्रीश्च ऐश्वर्यं च ताभ्यां मदस्तेनोन्नाहमुद्बंधनं स्वैराचारमित्यर्थः । पश्ये पश्यामि ॥ १९ ॥ तदेवाह । हैहय इति । हैहयः कार्तवीर्यश्चक्रवर्ती नरेश्वरः पितुः कामधेनुहरणात्परशुरामेण सपुत्रो हतः । नहुषो देवेंद्रतां प्राप्त उन्मत्तः शचीसंगाय ब्राह्मणान् शिबिकां वाहयंस्तैरेव ततो भ्रंशितोऽजगरत्वमवाप । वेनोऽप्युन्मत्तो ब्राह्मणानधिक्षिपंस्तैरेव

अत एव भवदनुग्रहादेव । यत्र स्वर्गे । इत्यर्थ इति–" एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् " इत्याद्युक्तेरिति भावः ॥ १४ ॥ एवंभूता इहामुत्र भोगविरक्ताः । ततो मच्चरणस्मरणात् । मदपेक्षया मत्प्रसादेन । इत्यर्थ इति–नहि त्वत्प्रसादं विना त्वच्चरणानुरागः स्यादिति भावः ॥ १५ ॥ कृष्णायेत्यादिश्लोकरूपमंत्रजपात्सर्वेप्सितावाप्तिः । कामबीजसंपुटितेन च शीघ्रमेवेष्टलाभः । बंदीमोक्षोप्यस्य लक्षजपाद्भवति । ध्यानं चात्र गायंतिमंत्रवत् । ॐ अस्य श्रीकृष्णायेत्यादिमंत्रस्य श्रीकृष्णो देवता । व्यास ऋषिः । अनुष्टुप् छंदः । कामो बीजम् । सर्वाभिलषितावाप्तये जपे विनियोगः ॥ ॐ कृष्णायेत्यंगुष्ठाभ्यां नमः । वासुदेवाय तर्जनीभ्यां नमः । हरये मध्यमाभ्यां नमः। परमात्मनेऽनामिकाभ्यां नमः।प्रणतक्लेशनाशाय कनिष्ठिकाभ्यां नमः।गोविंदाय नमोनम इति करतलकरपृष्ठाभ्यां नमः।।एवं हृदयादिन्यासः।।यद्वा–'ददृशुस्ते घनश्यामम्' इत्यारभ्य 'निवीतं वनमालया'इत्युक्तमेवाध्याय रंभोक्तमेव ॥ १६ ॥ तान्राज्ञः । मंजुलया मनोज्ञया ॥ १७ ॥ इत्यर्थ इति–भवदुक्तं मया स्वीकृतमिति भावः ॥ १८ ॥ उन्मादकं बुद्धिभ्रंशकरम् ॥ १९ ॥ तदेवोन्मादकत्वमेव । तैरेवागस्त्यादिविप्रैरेव । अपरे मदुक्तेतरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवंत एतद्विज्ञाय देहाद्युत्पाद्यमंतवत् ॥ मां यजंतोऽध्वरैर्युक्ताः प्रजा धर्मेण रक्षथ ॥ २१ ॥ संतन्वन्तः प्रजातंतून्सुखं दुःखं भवाभवौ ॥ प्राप्तंप्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ ॥ २२ ॥ उदासीनाश्च देहादावात्मारामा धृतव्रताः ॥ मय्यावेश्य मनः सम्यङ् मामंते ब्रह्म यास्यथ ॥ २३ ॥ श्रीशुक उवाच ॥ इत्यादिश्य नृपान्कृष्णो भगवान्भुवनेश्वरः ॥ तेषां न्ययुंक्त पुरुषान्स्त्रियो मज्जनकर्मणि ॥ २४ ॥ सपर्यां कारयामास सहदेवेन भारत ॥ नरदेवोचितैर्वस्त्रैर्भूषणैः स्रग्विलेपनैः ॥२५॥ भोजयित्वा वरान्नेन सुस्नातान् समलंकृतान् ॥ भोगैश्च विविधैर्युक्तांस्तांबूलाद्यैर्नृपोचितैः ॥ २६ ॥ ते पूजिता मुकुंदेन राजानो मृष्टकुंडलाः ॥ विरेजुर्मोचिताः क्लेशात्प्रावृडंते यथा ग्रहाः॥२७॥ रथान्सदश्वानारोप्य मणिकांचनभूषितान् ॥ प्रीणय्य सूनृतैर्वाक्यैः स्वदेशान्प्रत्ययापयत् ॥ २८ ॥ त एवं मोचिताः कृच्छ्रात्कृष्णेन सुमहात्मना ॥ ययुस्तमेव ध्यायंतः कृतानि च जगत्पतेः ॥ २९ ॥ जगदुः प्रकृतिभ्यस्ते महापुरुषचेष्टितम् ॥ यथाऽन्वशासद्भगवांस्तथा चक्रुरतंद्रिताः ॥ ३० ॥ जरासंधं घातयित्वा भीमसेनेन केशवः ॥ पार्थाभ्यां संयुतः प्रायात्सहदेवेन पूजितः ॥ ३१ ॥ गत्वा ते खांडवप्रस्थं शंखान्दध्मुर्जितारयः ॥ हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहाः ॥ ३२ ॥

हुंकृतैर्हतः । रावणो राक्षसेश्वरः सीतामभिलषन्राघवेण हतः । नरको दैत्येश्वरोऽदितिकुंडलाद्याहरणान्मयैव हतः । अपरेऽपि श्रीमदात्स्थानाद्भ्रंशिताः ॥ २० ॥ यदुत्पाद्यं देहादि तदंतवत् । एवं विज्ञाय युक्ता अप्रमत्ता रक्षथ रक्षतेत्यर्थः ॥ २१ ॥ प्रजातंतून्पुत्रादिसंततीः । प्राप्तंप्राप्तं समत्वेन सेवमानाः ॥ २२ ॥ मां ब्रह्म यास्यथ ॥ २३ ॥ स्त्रियश्च तेषां मज्जनकर्मण्यभ्यंगस्नानादौ न्ययुंक्त ॥ २४ ॥ २५ ॥ सुस्नातान्सम्यगलंकृतान् भोगैश्च युक्तान्वरेणान्नेन भोजयित्वा पुनस्तेषां सपर्यां सहदेवेन कारयामास ॥ २६ ॥ ग्रहाश्चंद्रादयो यथा ॥ २७ ॥ प्रीणय्य नंदयित्वा ॥ २८ ॥ २९ ॥ जगदुः ऊचुः ॥ ३० ॥ ३१ ॥ खांडवप्रस्थमिंद्रप्रस्थम् ॥ ३२ ॥

त्रिशंक्वादयः ॥ २० ॥ २१ ॥ भवाभवौ मंगलामंगले ॥ २२ ॥ अंते देहावसानेऽज्ञानांते वा ॥ २३ ॥ तेषां बंधच्युतराज्ञाम् । स्त्रियः स्त्रीः ॥ २४ ॥ २५ ॥ वरान्नेन पायसादिना ॥ २६ ॥ ते राजानः ॥ २७ ॥ २८ ॥ ते नृपाः । तं श्रीकृष्णम् ॥ २९ ॥ ते नृपाः । प्रकृतिभ्यः सुहृदादिभ्यः । यथाऽन्वशासत् 'भवंत एतद्विज्ञाय' इत्यारभ्य 'मामन्ते ब्रह्म यास्यथ' इत्यंतेन ॥ ३० ॥ ३१ ॥ ते कृष्णार्जुनभीमाः । दुर्हृदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छ्रुत्वाप्रीतमनस इंद्रप्रस्थनिवासिनः ॥ मेनिरे मागधं शांतं राजा चाप्तमनोरथः ॥३३॥ अभिवंद्याथ राजानं भीमार्जुनजनार्दनाः॥सर्वमाश्रावयां चक्रुरात्मना यदनुष्ठितम् ॥३४॥ निशम्य धर्मराजस्तत्केशवेनानुकंपितम् ॥ आनंदाश्रुकलां मुंचन्प्रेम्णा नोवाच किंचन ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे द०स्कंधोत्त० कृष्णाद्यागमने त्रिसप्ततितमोऽध्यायः॥७३॥ श्रीशुक उवाच ॥ एवं युधिष्ठिरो राजा जरासंधवधं विभोः ॥कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् ॥ १ ॥ युधिष्ठिर उवाच ॥ ये स्युस्त्रैलोक्यगुरवः सर्वे लोकमहेश्वराः ॥ वहंति दुर्लभं लब्ध्वा शिरसैवानुशासनम् ॥ २ ॥ स भवानरविंदाक्षो दीनानामीशमानिनाम् ॥ धत्तेऽनुशासनं भूमंस्तदत्यंतविडंबनम् ॥३॥ न ह्येकस्याद्वितीयस्य ब्रह्मणः परमात्मनः॥कर्मभिर्वर्धते तेजो ह्रसते च यथा रवेः ॥ ४ ॥ न वै तेऽजित भक्तानां ममाहमिति माधव ॥ त्वं तवेति च नानाधीः पशूनामिव वैकृता ॥ ५ ॥

शांतं मृतम् । आप्तमनोरथो बभूव॥३३॥३४॥३५॥इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री०टीकायां त्रिसप्ततितमोऽध्यायः॥७३॥चतुःसप्ततितमे राजसूयक्रिया द्विजैः॥ अग्रपूजाप्रसंगेन चैद्यघातादि वर्ण्यते ॥ १ ॥ राजसूयमुखे हत्वा जरासंधं तदंतरे ॥ चैद्यं तदंते कुर्वंतं बीजं कलिमिवावपत् ॥ २ ॥ कृष्णस्य चानुभावमिति चकारात्तस्य स्वाज्ञाऽनुविधायित्वं चालक्ष्येत्यर्थः ॥ १ ॥ तदाह । ये स्युरिति । ये त्रैलोक्यस्यापि गुरवः स्युः सनकादयः सर्वे च लोका लोकपालाश्च ते शिरसैव तवानुशासनं वहन्ति । दुर्लभं लब्ध्वेति । भाग्येनैतल्लब्धमिति बहुमानेनेत्यर्थः ॥ २ ॥ स भवान्परमेश्वरोऽस्माकमनुशासनं धत्ते तदत्यंतविडंबनमननुरूपमनुकरणम् । स्वतेजोहानिप्रसंगादित्यर्थः ॥ ३ ॥ अथवा तव परिपूर्णस्याज्ञापनाज्ञाधारणाभ्यां न तेजसो हानिवृद्धी अतः कृपया सर्वं संगच्छत इत्याह । न ह्येकस्याद्वितीयस्येति । समानासमानरहितस्य ब्रह्मणस्त्वोभयं माया । परमात्मन इति । सर्वजीवनियंतुस्तव नियम्यत्वं सुतरां न वास्तवम् । अतः परानुग्रहार्थैरेतैः कर्मभिस्तव तेजो न च ह्रसति । रवेरिवोदयास्तमयादिकर्मभिरित्यर्थः । तथा च श्रुतिः । "न कर्मणा वर्धते नो कनीयान्" इति ॥ ४ ॥ नन्वेवमप्यहं परमेश्वरो ममेदं नीचं कर्मायोग्यमिति मनसि कथं न भवेदत आह । न वै त इति ।

शत्रूणाम् ॥ ३२ ॥ तच्छंखवादनम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे त्रिसप्ततितमोऽध्यायः ॥७३॥ (१) । मुखे आदौ । तदंतरे राजसूयमध्ये । तदंते यज्ञांते (२)। श्रोतृचित्तरञ्जकं क्षमाजनकं वीरवीर्यवर्द्धनं श्रीकृष्णकर्तृकशिशुपालवधमाह—एवं ब्राह्मणवेशादिना । इत्यर्थ इति—अहो सर्वेश्वरा मदाज्ञां कुरुत इति विमृश्येति भावः ॥ १ ॥ तत्स्वाज्ञानुवर्तित्वम् । इत्यर्थ इति—अहो अस्मद्भाग्यं यदीश्वरेश्वरोऽस्मानाज्ञापयतीति भावः ॥ २ ॥ दीनानामज्ञानामीशमानिनाम्, 'ईश्वरोहमहं भोगी' इत्याद्यभिमानवताम् । तदनुशासनधारणम् । अननुरूपमयुक्तम् । इत्यर्थ इति—लोके प्रभुकर्तृकप्रेष्याज्ञाकरणस्य हासास्पदत्वादिति भावः ॥ ३ ॥ पक्षांतरमाह—अथ वेति । यतो न तेजोहानिवृद्धी स्तः अतो हेतोः । सर्वमुच्चावचकर्मकरणम् । उभयमाज्ञास्वीकाराज्ञापनरूपम् । माया असदेव लीलैव वा । यतो माया अतो हेतोः । इत्यर्थ इति—नहि सर्वदैकरसतेजोवतो रवेस्तेजसो ह्रासवृद्धी यथा तथा भवतोपीति भावः । अत्र प्रमाणम्—तथा चेति । न कनीयान् अत्यल्पोपि न भवतीत्यर्थः ॥ ४ ॥ भगवदाक्षेपं समाधत्ते कैमुत्येन—नन्वित्यादिना । वै एवार्थे । विकृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ इत्युक्त्वा याज्ञिये काले वव्रे युक्तान्स ऋत्विजः ॥ कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्रह्मवादिनः॥६॥द्वैपायनो भरद्वाजः सुमंतुर्गौतमोऽसितः ॥ वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥ ७ ॥ विश्वामित्रो वामदेवः सुमतिर्जैमिनिः क्रतुः ॥ पैलः पराशरो गर्गो वैशंपायन एव च ॥८॥ अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः ॥ वीतिहोत्रो मधुच्छंदा वीरसेनोऽकृतव्रणः ॥ ९ ॥ उपहूतास्तथा चान्ये द्रोणभीष्मकृपादयः॥ धृतराष्ट्रः सहसुतो विदुरश्च महामतिः॥१०॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यज्ञदिदृक्षवः ॥ तत्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप॥११॥ततस्ते देवयजनं ब्राह्मणाः स्वर्णलांगलैः ॥ कृष्ट्वा तत्र यथाम्नायं दीक्षयांचक्रिरे नृपम् ॥ १२ ॥ हैमाः किलोपकरणा वरुणस्य यथा पुरा ॥ इंद्रादयो लोकपाला विरिंचिभवसंयुताः ॥ १३ ॥ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ मुनयो यक्षरक्षांसि खगकिन्नरचारणाः ॥ १४ ॥ राजानश्च समाहूता राजपत्न्यश्च सर्वशः ॥ राजसूयं समीयुः स्म राज्ञः पांडुसुतस्य वै ॥ १५ ॥ मेनिरे कृष्णभक्तस्य सूपपन्नमविस्मिताः ॥ अयाजयन्महाराजं याजका देववर्चसः ॥ १६ ॥ राजसूयेन विधिवत्प्राचेतसमिवामराः ॥ सुत्येऽहन्यवनीपालो याजकान्सदसस्पतीन् ॥ अपूजयन्महाभागान्यथावत्सुसमाहितः ॥ १७ ॥ सदस्याग्र्याहर्हणार्हं वै विमृशंतः सभासदः ॥ नाध्यगच्छन्ननैकांत्यात्सहदेवस्तदाऽब्रवीत् ॥ १८ ॥ अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान्सात्वतां पतिः ॥ एष वै देवताः सर्वा देशकालधनादयः ॥ १९ ॥

हे अजित तव भक्तानामेव तावदियं नानार्थीभेंदमतिर्नास्ति । यथा पशूनामज्ञानां वैकृता शरीरविषया । तव तु नास्तीति किं पुनर्वक्तव्यमित्यर्थः ॥ ५ ॥ यज्ञिये यज्ञोचिते वसंतादिकाले । युक्तानभियुक्तान् । स युधिष्ठिरः ऋत्विजो होतृप्रमुखान् वव्रे वृतवान् ॥ ६ ॥ तानाह द्वैपायन इति त्रिभिः ॥ ७ ॥ ८ ॥ अकृतव्रणांतानेतानृत्विगुपद्रष्ट्रादिभेदेन वव्रे ॥ ९ ॥ अन्ये चोपहूता यज्ञदिदृक्षवस्तत्रेयुरित्यन्वयः ॥ १० ॥ ११ ॥ देवयजनं यज्ञभूमिम् । कृष्ट्वा कर्षणादिभिः संशोध्य । दीक्षयांचक्रिरे दीक्षासंस्कारयुक्तमकुर्वन् ॥ १२ ॥ उपकरणा उपस्कराः । वरुणस्य राजसूये यथा आसन्निति शेषः । किंच इंद्रादयो देवगणाः ॥ १३ ॥ १४ ॥ ये च राजादयः समाहूतास्तत्र समीयुः स्म ते सर्वे कृष्णभक्तस्य पांडुसुतस्य राज्ञो युधिष्ठिरस्य राजसूयमविस्मिताः संतः सूपपन्नं सुसंपन्नं मेनिरे इत्यन्वयः ॥ १५ ॥ याजका ऋत्विजः ॥ १६ ॥ सुत्येहनि सोमाभिषवदिने ॥ १७ ॥ अग्र्याहर्णमग्रपूजा तस्यार्हं योग्यम् । अनैकांत्याद्योग्यानां बहुत्वेनैकस्यानिश्चयात् ॥ १८ ॥ १९ ॥

शरीरं तद्विषया वैकृता । इत्यर्थ इति—अर्थावगतं कैमुत्यमत्रेति ॥ ५ ॥ अभियुक्तान्कल्पोक्तन्यायवेदिनः ॥ ६ ॥ तानृत्विजो नामतो निर्दिशति—द्वैपायन इति त्रयेण ॥ ७ ॥ ८ ॥ उपद्रष्ट्राद्या ऋत्विजां संज्ञाः । ताश्च यज्ञविद्यातोऽवसेयाः ॥ ९ ॥ उपहूता मुनयस्तथान्येऽनुपहूता अपि द्रोणादयस्तूपहूता एव । महामतिः सदोचितोपदेष्टा ॥ १० ॥ तत्र यज्ञे ॥११॥ ततो वरणानन्तरम् । ते ऋत्विजः । तत्र यज्ञे । स्वर्णलांगलैः हेमहलैः ॥ १२ ॥ तत्र यज्ञे केवलं राजान एव नागताः किंतु देवा अपीत्याह—किंचेति ॥ १३ ॥ १४ ॥ १५ ॥ प्राचेतसं वारुणम् ॥ १६ ॥ १७ ॥ तदाऽनिश्चयवेलायाम् ॥ १८ ॥ अच्युतः स्वरूपतो गुणतो वा न क्षीणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः ॥ अग्निराहुतयो मंत्राः सांख्यं योगश्च यत्परः ॥ २० ॥ एक एवाद्वितीयोऽसावैतदात्म्यमिदं जगत् ॥
आत्मनाऽऽत्माश्रयः सभ्याः सृजत्यवति हंत्यजः ॥ २१ ॥ विविधानीह कर्माणि जनयन्यदवेक्षया ॥ ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणम् ॥२२॥
तस्मात्कृष्णाय महते दीयतां परमार्हणम् ॥ एवं चेत्सर्वभूतानामात्मनश्चार्हणं भवेत् ॥ २३ ॥ सर्वभूतात्मभूताय कृष्णायानन्यदर्शिने ॥ देयं शांताय
पूर्णाय दत्तस्यानंत्यमिच्छता ॥ २४ ॥ इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानुभाववित् ॥ तच्छ्रुत्वा तुष्टुवुः सर्वे साधुसाध्विति सत्तमाः ॥ २५ ॥

सांख्यं ज्ञानम् । योग उपासना ॥२०॥ ननु सांख्यं केवलपरं योगः सविशेषणपरः कथमुभयोरेकपरत्वं तत्राह । एक एवाद्वितीयोऽसावतः सांख्यस्यैतत्परत्वं युक्तम् । विशेषण भूतस्य सर्वप्रपंचस्य तन्मयत्वात्सविशेषणविषयस्य योगस्यापि युक्तमद्वितीयपरत्वमित्याह । ऐतदात्म्यमिति । एष श्रीकृष्ण आत्मा यस्य तदेतदात्म तस्य भाव ऐतदात्म्यम् । भवितर्येव भावनिर्देशः । "ऐतदात्म्यमिदं सर्वम्" इति श्रुतेः । अत्र हेतुः । आत्मनेति । हे सभ्या आत्माश्रयोऽन्यनिरपेक्षः स्वयमज इदं जगत्सृजत्यवति हंति चेति ॥२१॥ किंच विविधानीति । यस्यावेक्षयाऽनुग्रहेण विविधानि कर्माणि तपोयोगादीनि जनयन् कुर्वन् यद्यस्मादयं सर्वोऽपि जनो धर्मादिलक्षणं श्रेय ईहते साधयति । कर्माणि तत्फलानि च यदधीनानीत्यर्थः ॥ २२ ॥ २३ ॥ नन्वात्मना क्रियमाणमर्हणमात्मनः कथं स्यात्तत्राह । सर्वभूतानामात्मभूताय अनन्यदर्शिने निरस्तभेदमतये ॥ २४ ॥ श्रीकृष्णानुभाववित्सहदेव इत्युक्त्वा तूष्णीमभूत् ॥ २५ ॥

श्रीकृष्णः । श्रैष्ठ्यं गुणज्येष्ठयोग्याग्रपूजनम् । " गुणाः श्रुताः सुविरुद्धाश्च देवे सान्ति " इत्यादिश्रुतिवाक्यं हिना सूचयति । सात्वंतस्तंत्रप्रणेतारस्तेषां स्वामी । गतिश्च । इदं चाग्रपूजायोग्यत्वे लिंगम् । " इंद्रो वै सर्वेषां श्रेष्ठः, अग्निर्वै देवानां मुखम् " इत्यादिश्रुतेः । कथमयमर्हणार्ह इति चेदाह—एष कृष्णः । " यो देवानां पुरोहितः पूर्वो यो देवेभ्यो जातः " इत्यादिश्रुतेः । अचेतनमप्येतदधीनसत्ताकमेवेत्याह—देशेत्यादि ॥ १९ ॥ किं बहुना सर्वमेतदात्मकमेवेत्याह—यदात्मकमिति । तात्पर्यात्पुनरुक्तं करोति—क्रतव इति । यः कृष्णः परस्तात्पर्यविषयो यस्य स तथा ॥ २० ॥ सांख्ययोगयोरेकपरत्वमाक्षिपन्समाधत्ते—नन्विति । केवलपरमाद्वितीयपरम् । तत्राक्षेपे । असौ कृष्ण एवैकोऽद्वितीयो यतोऽतो हेतोः । एतत्परत्वं कृष्णतात्पर्यकत्वम् तन्मयत्वात् । " सर्वं खल्विदं ब्रह्म " इति श्रुतेः कृष्णस्वरूपत्वात् । हे सभ्याः सर्वार्थनिपुणाः । भवितारि भवनशीले कृष्णे । अत्र सर्वात्मकत्वे । अज इत्युपलक्षणममृतत्वस्य ॥ २१ ॥ कर्मफलदातृत्वादप्ययमेव योग्य इत्याह—किञ्चेति । ' अवेक्षानुग्रहेक्षणः ' इति निरुक्तिः । यस्य कृष्णस्य । यस्मात्कृष्णात् । तत्फलानि कर्मफलानि । यदधीनानि कृष्णायत्तानि । इत्यर्थ इति—सर्वकर्मफलप्रदस्यैवाग्र्यार्हणमुचितमिति भावः ॥ २२ ॥ यतोऽसौ कर्मफलदाता तस्माद्धेतोः अस्य तृप्तौ सर्वं तृप्तं स्यादित्याशयेनाह—एवं चेत् श्रीकृष्णार्चने कृते सति ॥ २३ ॥ पुनराशंक्य समाधत्ते—आत्मनेत्यादि । अपूर्णेषु दत्तमेव नश्यतीति चेदाह—पूर्णायेत्यादि ॥ २४ ॥ देवैः सह वर्तत इति सहदेवो देवव्रतोपि ग्राह्यो, भारते तद्वचनादग्रपूजादानाद्युक्तेः । यद्वा—देवेन देवशब्देन सह वर्तत इति सहदेवो देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुत्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदाम् ॥ समर्हयद्धृषीकेशं प्रीतः प्रणयविह्वलः ॥ २६ ॥ तत्पादाववनिज्यापः शिरसा लोकपावनीः ॥ सभार्यः सानुजामात्यः सकुटुंबोऽवहन्मुदा ॥२७॥ वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः ॥ अर्हयित्वाऽश्रुपूर्णाक्षो नाशकत्समवेक्षितुम् ॥२८॥ इत्थं सभाजितं वीक्ष्य सर्वे प्रांजलयो जनाः ॥ नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः॥२९॥इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः ॥ उत्क्षिप्य बाहुमिदमाह सदस्यमर्षी संश्रावयन्भगवते परुषाण्यभीतः ॥ ३० ॥ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः ॥ वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते ॥ ३१ ॥ यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितम् ॥ सदसस्पतयः सर्वे कृष्णो यत्संमतोऽर्हणे ॥ ३२ ॥ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठाँल्लोकपालैश्च पूजितान् ॥ ३३ ॥ सदसस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्यां कथमर्हति ॥ ३४ ॥ वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः ॥ स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति ॥ ३५ ॥

द्विजेरितं साधुसाध्विति घोषं श्रुत्वा । हार्दमभिप्रायम् ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ हे सदसस्पतयः सर्वे बालस्य भाषितं म मन्यध्वं मा जानीत मा गृह्णीत । किं तत् :। यद्यतः कृष्णोऽर्हणे अग्रपूजायां संमतस्तत् ॥ ३२ ॥ ३३ ॥ अस्यैव वास्तवोऽर्थः पूर्ववदुन्नेयः। गोपाल इति । वेदपृथिव्यादिपालक इत्यर्थः । कुत्सितं वेदविपरीतं लपंतीति कुलपाः पाखंडास्तान् अंसते समाघातयतीति तथा सः । अकाकः कं च अकं च काके सुखदुःखे ते न विद्येते यस्य सोऽकाकः आप्तकाम इत्यर्थः । स तथा । आप्तकामो देवयोग्यं केवलं पुरोडाशमात्रं नार्हत्यपि तु सर्वस्वमपि तथाऽयं श्रीकृष्णोऽपि ब्रह्मर्षियोग्यं सपर्यामात्रं कथमर्हति किं त्वात्मसमर्पणमप्यर्हतीत्यर्थः ॥ ३४ ॥ वर्णाश्रमकुलेभ्योऽपेतो ब्रह्मत्वात् । "अनामगोत्रम्" इति श्रुतेः । अत एवानधिकारित्वात्सर्वैर्धर्मैर्बहिष्कृतः । स्वैरत्वात् । अत

व्रतो भीष्म इत्यर्थः । तत्सहदेववचः । सत्तमा मुन्यादयः ॥ २५ ॥ २६ ॥ तत्पादौ कृष्णांघ्री ॥ २७ ॥ २८॥ सभाजितमार्चितम् । तं कृष्णम् ॥२९॥ इत्थं साधुसाध्विति उत्क्षिप्योर्ध्वं कृत्वा । इदं वक्ष्यमाणम् । परुषाणि निष्ठुराणि ॥ ३० ॥ सत्यवती अबाधितार्था । तदुपपादयति–वृद्धानां वयःश्रुतजात्याद्यधिकानाम् । यद्यस्मात् । बालवाक्यैः पौर्वापर्यविचारशून्योक्तिभिः ॥ ३१ ॥ अक्षराधिक्यमार्षम् । तद्बालभाषितं किम् ॥ ३२ ॥ ३३ ॥ इत्यर्थ इति–गोशब्दस्यानेकार्थत्वादिति ज्ञेयम् । इत्यर्थ इति–' आप्तकामः ' इत्यादिश्रुतेः साक्षाद्ब्रह्मैवायमिति भावः । स परमात्मा । इत्यर्थ इति–" परं ब्रह्म कृष्ण इत्यभिधीयते " इति श्रुतेरयं स एवेति भावः ॥ ३४ ॥ अपेतो हीनः । " ब्रह्म नामगोत्रहीनम् " इति श्रुति पदार्थः । नामगोत्रेति जात्यादेरुपलक्षणम् । अत एव ब्रह्मत्वात् । अनधिकारित्वाद्धर्माद्यधिकारस्य मनुष्यपरत्वमेव तदप्यज्ञानिपरमेव । कुत ईश्वरस्य कुतस्तरां साक्षाद्ब्रह्मरूपिणः कृष्णस्य । ' द्वयं तथा ब्रह्माणि कर्म नर्च्छति ' इति दक्षोपाख्याने शिवं प्रकृत्योक्तेरिति भावः । परमेश्वरत्वात्प्रयोजकांतराभावात् । " जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम् " इति स्मृतेः । अत एव परमेश्वरत्वादेव । एवंभूतः साक्षात्परमात्मरूपः श्रीकृष्णः । इत्यर्थ इति–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ययातिनैषां हि कुलं शप्तं सद्भिर्बहिष्कृतम् ॥ वृथापानरतं शश्वत्सपर्यां कथमर्हति ॥ ३६ ॥ ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसम् ॥ समुद्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः ॥ ३७ ॥ एवमादीन्यभद्राणि बभाषे नष्टमंगलः ॥ नोवाच किंचिद्भगवान्यथा सिंहः शिवारुतम् ॥ ३८ ॥ भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः ॥ कर्णौ पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा ॥ ३९ ॥ निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा ॥ ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ ४० ॥

एव निर्गुणस्तमआदिरहितः । एवंभूतो जीवानां योग्यं तुच्छं सपर्यामात्रं कथमर्हतीत्यर्थः ॥ ३५ ॥ अपि च कथं वर्णनीयो मादृशैरेषां यदूनां महिमा यस्मादेषां कुलं ययातिना शप्तमपि किं सद्भिर्बहिष्कृतमपि तु शिरसा धृतम् । किंचास्मदादिकुलवत्किं वृथापानरतमपि त्वतिनियताचारमित्यर्थः । अहो यदूनामेव तावदीदृशं माहात्म्यम् यदुकुलवृद्धस्य ययातेः शापो न प्राभूदित्यादि । अयं तु साक्षादीश्वरोऽतः सपर्यामात्रं कथमर्हतीत्यर्थः ॥ ३६ ॥ किं च । ये राजानो दुष्टानच्चाटयंति तदर्थं कीकटादिदेशानप्याश्रयंति एते तु ब्रह्मर्षिसेवितानेव देशानाश्रित्याब्रह्मवर्चसं समुद्रं दुर्गमपि हित्वा हापयित्वेत्यर्थः । बाधंते तथा या दस्यवः प्रजास्ताश्च । अयमर्थः वेदस्तदर्थाभियोगो ब्रह्मवर्चसं तद्विरुद्धमब्रह्मवर्चसं समुद्रं मुद्राऽत्र लिंगं तत्सहितं समुद्रम् । वेदविरुद्धलिंगधारिणं पाखंडमित्यर्थः । तल्लिंगं त्याजयित्वा बाधंते दंडयंति । कथंभूतं दुर्गम् । धर्मवत्प्रतीतेरधर्मतया दुर्ज्ञेयमित्यर्थः । तथा दस्यवो दस्यूनपि प्रजावेषेण वर्तमानान् दंडयंति । अतो यदुभ्योऽन्यः को नाम धार्मिकोऽस्तीति । पारुष्यं तूक्तार्थमेव ॥ ३७ ॥ शिवा फेरुस्तस्या रुतं श्रुत्वा यथा सिंहो न किंचिद्ब्रूते तद्वत् ॥ ३८ ॥ ३९ ॥ ४० ॥

सर्वस्वार्पणमर्हतीति भावः ॥ ३५ ॥ ननु कथमयं वर्णाश्रमाद्यपेतो गृहस्थाश्रमोपेतक्षत्रवर्णययातिकुले जातत्वात्तत्राह–ययातिनेति । परमार्थमाह–अपि चेति । इत्यर्थ इति–यत्र शापो न प्रबभूवेति भावः । अन्यदाह–किंचेति–वृथापानं मद्यम् । तदुक्तं मेरुतंत्रे–“ वृथापानं तु देवेशि सुरापानं प्रकीर्तितम् । तन्महापातकं ज्ञेयमिति वेदे निरूपितम् ॥ ” । इत्यर्थ इति–काकुना सर्वोत्कृष्टाचारमिति भावः । अतः साक्षादीशत्वादेव । इत्यर्थ इत्युक्तार्थ एव ॥ ३६ ॥ अन्यत्तदुत्कर्षमाह–किंचेति । तदर्थं दुष्टोद्धाटनार्थम् । कीकटादिदेशानशुचिदेशान् “ कीकटः कृपणे निःस्वेऽशुचिदेशेभगंडयोः ” इति निरुक्तिः । इत्यर्थ इति–‘ ओहाक्–त्यागे ’ इत्यत्र त्यागपदं त्यजनं त्याजनं वा त्याग इति निरुक्तेरुभयार्थपरत्वादिति भावः । अस्याशयमाह–अयमर्थ इति । तदर्थाभियोगः वेदार्थाभ्यासः “अभ्यासे त्वभियोगः स्यादुद्यमे योजनेऽपि च” इति । “ मुद्रा चिह्ने मुद्रणे च लक्ष्मीकार्षापणोर्मिषु ” इति च निरुक्तिः । इत्यर्थ इति–वेदविरुद्धाचार्यैत्र पाखंड इत्याशयः । तल्लिंगं पाखंडचिह्नम् । इत्यर्थ इति–मूढानां पाखंडमार्गेपि धर्मबुद्ध्या प्रवेशो भवतीति भावः । परुषार्थे तु समुद्राश्रयणाद्दाससाम्यमापादितम् ॥ ३७ ॥ ‘ शिवा क्रोष्ट्री शिवाऽभया ’ इति कोशात् । एवमादीनीत्युक्तेः । तस्य शतापराधक्षमणस्य भगवता प्रतिज्ञातत्वात् । तदुक्तं भारते–“ अपराधशतं क्षाम्यं मातुरस्यैव याचने । दत्तं मया याचितं च तानि पूर्णानि पार्थिवाः । अधुना वधयिष्यामि पश्यतां वो महीक्षिताम् ॥” इति सभापर्वणि ॥ ३८ ॥ तत्सभायां सीदंतीति तथा ॥ ३९ ॥ कुतो निर्जग्मुरिति चेदाह–निंदामिति । तत्परस्य भगवद्भक्तस्य । ततो निंदनस्थानात् । अपैति गच्छति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः पांडुसुताः क्रुद्धा मत्स्यकैकयसृंजयाः ॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥ ४१ ॥ ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी ॥ भर्त्सं
यन्कृष्णपक्षीयान्राज्ञः सदसि भारत ॥ ४२ ॥ तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा ॥ शिरः क्षुरांतचक्रेण जहारापततो रिपोः ॥ ४३ ॥ शब्दः
कोलाहलोऽप्यासीच्छिशुपाले हते महान् ॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ॥ ४४ ॥ चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत् ॥ पश्यतां सर्व
भूतानामुल्केव भुवि खाच्च्युता ॥ ४५ ॥ जन्मत्रयानुगुणितवैरसंरब्धया धिया ॥ ध्यायंस्तन्मयतां यातो भावो हि भवकारणम् ॥ ४६ ॥ ऋत्वि
ग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात् ॥ सर्वान्संपूज्य विधिवच्चक्रेऽवभृथमेकराट् ॥ ४७ ॥ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः ॥ उवास
कतिचिन्मासान्सुहृद्भिरभियाचितः ॥ ४८ ॥ ततोऽनुज्ञाप्य राजानमनिच्छंतमपीश्वरः ॥ ययौ सभार्यः सामात्यः स्वपुरं देवकीसुतः ॥ ४९ ॥
वर्णितं तदुपाख्यानं मया ते बहुविस्तरम् ॥ वैकुंठवासिनोर्जन्म विप्रशापात्पुनःपुनः ॥ ५० ॥ राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ॥ ब्रह्मक्षत्र
सभामध्ये शुशुभे सुरराडिव ॥ ५१ ॥ राज्ञा सभाजिताः सर्वे सुरमानवखेचराः ॥ कृष्णं क्रतुं च शंसंतः स्वधामानि ययुर्मुदा ॥ ५२ ॥

॥ ४१ ॥ ४२ ॥ तावदुत्थायेत्यस्यायमभिप्रायः । एष मत्पार्षदो मत्तुल्यबलः सर्वानेतान्हन्यादतो मयैव शीघ्रं हंतव्य इति तत्क्षणमेवोत्थाय शिरो जहारेति ॥ ४३ ॥
॥ ४४ ॥ ४५ ॥ नन्वेवं निंदकस्य कथं वासुदेवे प्रवेशस्तत्राह । जन्मत्रयेति । जन्मत्रयेऽनुगुणितमनुवर्तितं यद्वैरं तेन संरब्धयाऽऽविष्टया । तन्मयतां तत्स्वरूपतां यातः ।
पुनः पार्षदो बभूवेत्यर्थः । अत्र हेतुः । भावो हीति । भावो भावना अनुध्यानं भवस्य ध्येयाकारजन्मनः कारणम् । पेशस्कारिध्यानेन कीटादौ तथा दृष्टत्वादित्यर्थः ॥ ४६॥
॥ ४७ ॥ ४८ ॥ ४९ ॥५० ॥ ५१ ॥ सुरा मानवाः खेचराः प्रमथाश्च ॥ ५२ ॥

सोपि हरिहरिजननिंदाश्रोतापि ॥ ४० ॥ ततो निंदाश्रुतेः ॥ ४१ ॥ ततो मत्स्यादिराज्ञामुत्थानोत्तरम् । असंभ्रांतो निर्भयः ॥ ४२ ॥ ननु सत्स्वनन्तभगवद्योधेषु भगवानेव कथं तद्वधायोत्थित इत्याशंकायामाह–अयमभिप्राय इति । यतो मत्तुल्योऽतो हेतोः ॥ ४३ ॥ तस्य शिशुपालस्य ॥ ४४ ॥ ज्योतिर्जयचैतन्यात्मकम् ॥ ४५ ॥ तत्स्वरूपतां पार्षदः पुनर्बभूवेत्यर्थः । अत्र तत्स्वरूपत्वे । इत्यर्थ इति–" यंयं वापि स्मरन्भावं त्यजत्यंते कलेवरम् । तंतमेवैति कौंतेय सदा तद्भावभावितः ॥" इति श्री मुखोक्तेरंत्यस्मृतरूपावाप्तिर्भवत्येवेति भावः॥४६॥ एकराट् चक्रवर्ती ॥४७॥४८॥ ततो यज्ञांतस्नानानन्तरम् ॥४९॥ वैकुंठवासिनोर्जयविजययोः ॥५०॥५१॥५२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्योधनमृते पापं कलिं कुरुकुलामयम्॥यो न सेहे श्रियं स्फीतां दृष्ट्वा पांडुसुतस्य ताम्॥५३॥ य इदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकम्॥राजमोक्षं वितानं च सर्वपापैः प्रमुच्यते॥५४॥इति श्रीमद्भागवते महा० दशमस्कन्धोत्त० शिशुपालवधोनाम चतुःसप्ततितमोऽध्यायः॥७४॥ राजोवाच ॥ अजातशत्रोस्तं दृष्ट्वा राजसूयमहोदयम् ॥ सर्वे मुमुदिरे ब्रह्मन्नृदेवा ये समागताः ॥ १ ॥ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः ॥ इति श्रुतं नो भगवंस्तत्र कारणमुच्यताम् ॥ २ ॥ श्रीशुक उवाच ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः ॥ बांधवाः परिचर्यायां तस्यासन्प्रेमबंधनाः ॥ ३ ॥ भीमो महानसाध्यक्षो धनाध्यक्षः सुयोधनः ॥ सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ॥४॥गुरुशुश्रूषणे जिष्णुः कृष्णः पादावनेजने ॥ परिवेषणे द्रुपदजा कर्णो दाने महामनाः ॥ ५ ॥ युयुधानो विकर्णश्च हार्दिक्यो विदुरादयः ॥ बाह्लिकपुत्रा भूर्याद्या ये च संतर्दनादयः ॥ ६ ॥ निरूपिता महायज्ञे नानाकर्मसु ते तदा ॥ प्रवर्तंते स्म राजेंद्र राज्ञां प्रियचिकीर्षवः ॥ ७ ॥ ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणाभिः ॥ चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृथस्नपनं द्युनद्याम् ॥ ८ ॥ मृदंगशंखपणवधुंधुर्यानकगोमुखाः ॥ वादित्राणि विचित्राणि नेदुरावभृथोत्सवे ॥ ९ ॥ नर्तक्यो ननृतुर्हृष्टा गायका यूथशो जगुः ॥ वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् ॥ १० ॥

पापं धर्मद्विषम् । अत्र हेतुः । कलिं कलेरंशम् । अत एव कुरुकुलस्यामयं व्याधिवन्नाशकम् ॥ ५३ ॥ वितानं यज्ञं च ॥ ५४ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायां चतुःसप्ततितमोध्यायः ॥ ७४ ॥ पंचयुक्सप्ततितमे यज्ञावभृथसंभ्रमः ॥ सुयोधनस्य चाक्षांत्या मानभंगो दृशिभ्रमात् ॥१॥ दुर्योधनस्यैकस्यैव दुःखे कारणं प्रष्टुमुक्तमनुवदति । अजातशत्रोरिति ॥१॥ इति श्रुतम् । त्वन्मुखादेवेत्यर्थः॥२॥दुर्योधनस्यासहनकारणत्वेन यागमहोत्सवमेव पुनः सिंहावलोकनेन निरूपयति पितामहस्येत्यादिना एकदांतःपुरे तस्येत्यतः प्राक्तनेन ग्रंथेन । प्रेमबंधनाः प्रेमयंत्रिताः ॥३॥ पूजायां संमानने । द्रव्यसाधने नानावस्तुसंपादने ॥ ४ ॥ गुरूणां शुश्रूषणे चंदनालेपनादौ ॥५॥ ६ ॥ निरूपिता नियुक्ताः संतो नानाकर्मसु प्रवर्तंते स्म ॥ ७ ॥ ऋत्विजश्च सदस्याश्च सभासदो बहुविदश्च तेषु । स्विष्टेषु सम्यक्पूजितेषु । सूनृतं प्रियवाक् समर्हणमलंकारादि दक्षिणाश्च प्रसिद्धास्ताभिः द्युनद्यां गंगायाम् ॥ ८ ॥ ९ ॥ १० ॥

ऋते विना । अत्र धर्मद्वेष्टृत्वे । अत एव कल्यंशत्वादेव ॥ ५३ ॥ चैद्यस्य भगवद्विरोधित्वेन पाखण्डत्वात्तद्वधश्रवणमपि पापनाशकमित्याह—कर्म चैद्येत्यादि ॥ ५४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ संभ्रम उत्सवः (१) । अजामविद्यां तनोति विस्तारयतीत्यजातः कलिस्तद्रूपो दुर्योधनस्स एव शत्रुर्यस्य सोऽजातशत्रुः । यद्वा—अजातः श्रीकृष्णस्तेन हताः शत्रवो यस्य स तथा । मध्यमपदलोपी समासः । यद्वा—शत्रुरिति भावप्रधानो निर्देशः । तथा च न जातं शत्रुत्वं यस्य स तथा । तस्य युधिष्ठिरस्य । तमलौकिकम् ॥ १ ॥ तत्र दुर्योधनाप्रसन्नतायाम् ॥ २ ॥ तस्य युधिष्ठिरस्य । प्रेमैव बंधनमायत्तीकरणसाधनं येषां ते ॥ ३ ॥ महानसाध्यक्षः पाकशालाध्यक्षः “ महानसः पाकशालाप्रभूतशकटालये ” इति निरुक्तिः । धनाध्यक्षः सूतस्ततस्समागतधनस्वीकारपरः । तद्धस्ते धनवार्द्धेनी रेखाभूदतः श्रीकृष्णानुज्ञया स एव धनाध्यक्षः कृतस्तद्धस्तगतधनस्याक्षय्यत्वादिति ग्रंथांतरादवसेयम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ततः कालव्यवधानाभावेन ॥ ८ ॥ ९ ॥ तेषां वाद्यानाम् । स वाद्यगायननृत्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्रध्वजपताकाग्रैरिभेंद्रस्यंदनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ॥ ११ ॥ यदुसृंजयकांबोजकुरुकेकयकोसलाः ॥ कंपयंतो भुवं सैन्यैर्यजमानपुरःसराः ॥ १२ ॥ सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ॥ १३ ॥ स्वलंकृता नरा नार्यो गंधस्रग्भूषणांबरैः ॥ विलिंपंत्योऽभिषिञ्चन्त्यो विजह्रुर्विविधै रसैः ॥ १४ ॥ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ॥ १५ ॥ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ॥ ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः ॥ १६ ॥ ता देवरानुत सखीन्सिषिचुर्दृतीभिः क्लिन्नांबरा विवृतगात्रकुचोरुमध्याः ॥ औत्सुक्यमुक्तकबराच्च्यवमानमाल्याः क्षोभं दधुर्मलधियां रुचिरैर्विहारैः ॥ १७ ॥ स सम्राड्रथमारूढः सदश्वं रुक्ममालिनम् ॥ व्यरोचत स्वपत्नीभिः क्रियाभिः क्रतुराडिव ॥१८॥ पत्नीसंयाजावभृथ्यैश्चरित्वा ते तमृत्विजः ॥ आचांतं स्नापयांचक्रुर्गंगायां सह कृष्णया ॥ १९ ॥

चित्राणि ध्वजपताकाग्राणि येषु तैरिभेन्द्रैः स्यंदनैरर्वभिरश्वैर्भटैश्च । एवं चतुरंगैः सैन्यैर्निर्ययुः ॥ ११ ॥ यजमानो युधिष्ठिरः पुरःसरो येषां ते ॥ १२ ॥ सदस्या ऋत्विजोऽन्ये च द्विजश्रेष्ठा निर्ययुः ॥ १३ ॥ किंच । गंधादिभिः स्वलंकृता नरा नार्यश्च मिथो विजह्रुः ॥ १४ ॥ रसानेवाह । तैलेति । किंच सांद्रकुंकुमादिभिः पुंभिर्लिप्तास्तान्प्रलिंपंत्यो वारयोषितश्च विजह्रुः ॥ १५ ॥ नृभिर्गुप्ता रथादियानैर्नृदेव्यो राजपत्न्यो निरगमन्निरगुः । एतदुपलब्धं विमानवरैर्देव्यो यथा तद्वत् । मातुलेयैः सखिभिश्च परितः सिच्यमानाः सव्रीडेन हासेन विकसंति वदनानि यासां ताः ॥ १६ ॥ देवरान्पतिभ्रातॄन् उत सखीन्सखीनपि । दृतीभिरुदकनोदनचर्मयंत्रैः सेचनपात्रैश्च । मलधियां कामिनाम् ॥ १७ ॥ क्रियाभिरंगक्रियाभिः क्रतुराट् सशरीरो राजसय इव ॥ १८ ॥ पत्नीसंयाजो यागविशेषः । अवभृथसंबंधि आवभृथ्यं च । तैश्चरित्वाताननुष्ठायेत्यर्थः ॥ १९ ॥

ध्वनिः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ न केवलं निर्ययुरेवेत्याह–किञ्चेति ॥ १४ ॥ अन्यदाह्लादलीलामाह–किञ्चेति ॥ १५ ॥ एतत् क्रीडनम् । उपलब्धुं चक्षुर्विषयीकर्तुम् । देव्यो देवांगनाः । मातुलेयैरिति–कृष्णपट्टराज्ञ्यभिप्रायेण सहदेवादिभिरित्यर्थः । सखिभिः पतिकनिष्ठसखिभिः । ता नृदेव्यः ॥ १६ ॥ ता नृदेव्यः । 'दृतिश्चर्मपुटे मत्स्ये' इति मेदिनी । "स्याद्दृतिर्भेदने सेकपात्रे च साध्वसे तथा" इति निरुक्तिः । आर्द्रचर्मस्पर्शस्याशुचित्वापादकत्वादाह–सेचनपात्रैश्चेति, वंशदलादिनिर्मितैरित्यर्थः । मला मलिना कामाविष्टा धीर्येषां तेषाम् ॥ १७ ॥ स युधिष्ठिरः ॥ १८ ॥ इत्यर्थ इति–छांदस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवदुंदुभयो नेदुर्नरदुंदुभिभिः समम् ॥ मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः ॥ २० ॥ सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता नराः ॥ महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् ॥ २१ ॥ अथ राजाऽहते क्षौमे परिधाय स्वलंकृतः ॥ ऋत्विक्सदस्यविप्रादीनानर्चाभरणांबरैः ॥ २२ ॥ बंधुज्ञातिनृपान्मित्रसुहृदोऽन्यांश्च सर्वशः ॥ अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥ २३ ॥ सर्वे जनाः सुररुचो मणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः ॥ नार्यश्च कुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः ॥ २४ ॥ अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः ॥ ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥ २५ ॥ देवर्षिपितृभूतानि लोकपालाः सहानुगाः ॥ पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप ॥ २६ ॥ हरिदासस्य राजर्षे राजसूयमहोदयम् ॥ नैवातृप्यन्प्रशंसंतः पिबन्मर्त्योऽमृतं यथा ॥ २७ ॥ ततो युधिष्ठिरो राजा सुहृत्संबंधिबांधवान् ॥ प्रेम्णा निवासयामास कृष्णं च त्यागकातरः ॥ २८ ॥ भगवानपि तत्रांग न्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीम् ॥ २९ ॥ अथ राजा धर्मसुतो मनोरथमहार्णवम् ॥ सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥ ३० ॥ एकदान्तःपुरे तस्य वीक्ष्य दुर्योधनः श्रियम् ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥ ३१ ॥ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः ॥ ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुराडतप्यत् ॥ ३२ ॥ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभम् ॥ मध्ये सुचारुकुचकुंकुमशोणहारं श्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यम् ॥ ३३ ॥

॥ २० ॥ २१॥ अहते नूतने । आनर्चार्चितवान् ॥ २२ ॥ २३ ॥ सुराणामिव रुक् कांतिर्येषाम् । मणिकुंडलैः सहिता स्रगुष्णीषादयो येषां ते । कुंडलयुगेनालकवृंदेन च जुष्टा वक्त्रश्रीर्यासां ताः ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ गतज्वरो निश्चिंत आसीत् ॥ ३० ॥ अच्युते आत्मा यस्य तस्य ॥ ३१ ॥ नरेंद्रादीनां लक्ष्मीर्लक्ष्म्यो विभूतयो विश्वसृजा मयेनोपक्लृप्ता विरचिताः ताभिः सह । कुरुराट् दुर्योधनोऽतप्यत् ॥ ३२ ॥ महिषीसहस्रमिति बहुत्वोपलक्षणम् । क्वणद्भिरंघ्रिभिः शोभा यस्य । मध्येसुचारु सुचारुमध्यमित्यर्थः । कुचकुंकुमैः शोणा हारा यस्य तत् । श्रीमंति मुखानि यस्य तत् । चलैः कुंडलैः कुंतलैश्चाढ्यं संपन्नमशोभतेति शेषः ॥ ३३ ॥

त्वात्कर्मणि तृतीयेति भावः । तं युधिष्ठिरम् । आचांतं कारिताचमनम् । णिजंताच्चमेः क्तः ॥ १९ ॥ २० ॥ तत्र गंगायाम् । ततो युधिष्ठिरस्नानानन्तरम् । यतोऽवभृथस्नानात् । सद्यस्स्नानसमकालमेवेत्यर्थः ॥ २१ ॥ अथ स्नानोत्तरम् । क्षुमा अतसी तज्जे क्षौमे । अहतं नवमंबरमिति पूर्वोक्तलक्षणम् वेत्यर्थः ॥ २२ ॥ अन्यांस्तत्रागतान् ॥ २३ ॥ २४ ॥ अथावभृथस्नानानंतरम् ॥ २५ ॥ तं युधिष्ठिरम् ॥ २६ ॥ २७ ॥ तत ऋत्विगादिप्रस्थानोत्तरम् ॥ २८ ॥ तत्र युधिष्ठिरनगरे । युधिष्ठिरप्रियार्थम् ॥ २९ ॥ इत्थं पूर्वोक्तरीत्या ॥ ३० ॥ अंतःपुरे पुरवद्विस्तीर्णे विमानेंतस्तन्मध्ये । तस्य युधिष्ठिरस्य ॥ ३१ ॥ यस्मिन्नंतःपुरे । ताभिर्नरेंद्रादिविभूतिभिः । यस्यां द्रुपदराजसुतायाम् । कुरुराट् कुरुनगरहस्तिनापुरेश इत्यर्थः ॥ ३२ ॥ तदा यज्ञांतोत्सवे । इत्यर्थ इति–मध्यशब्दस्यैदंतत्वं निपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सभायां मयक्लृप्तायां क्वापि धर्मसुतोऽधिराट् ॥ वृतोनुजैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ॥ ३४ ॥ आसीनः कांचने साक्षादासने मघवानिव ॥ पारमेष्ठ्यश्रिया जुष्टः स्तूयमानश्च बंदिभिः ॥ ३५ ॥ तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृप ॥ किरीटमाली न्यविशदसिहस्तः क्षिपन्रुषा ॥ ३६ ॥ स्थलेऽभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थलेऽपतत् ॥ जले च स्थलवद्भ्रांत्या मयमायाविमोहितः ॥ ३७ ॥ जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे ॥ निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः ॥ ३८ ॥ स व्रीडितोऽवाग्वदनो रुषा ज्वलन्निष्क्रम्य तूष्णीं प्रययौ गजाह्वयम् ॥ हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत् ॥ बभूव तूष्णीं भगवान्भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा ॥ ३९ ॥ एतत्तेऽभिहितं राजन्यत्पृष्टोऽहमिह त्वया ॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे दुर्योधनमानभंगोनाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥

क्वापि कदाचित्स विरेज इति शेषः । स्वस्य चक्षुषा । हिताहितज्ञापकेन ॥ ३४ ॥ ३५ ॥ मानी साहंकारः । किरीटं च माला च विद्येते यस्य सः । न्यविशद्विवेश । क्षिपन् द्वास्थादीनधिक्षिपन् ॥ ३६ ॥ तत्र स्थले वस्त्रांतमभ्यगृह्णादाकुंचितवान् । कुतः । तस्मिन्स्थले एव भ्रांत्या जलं मत्वा । जले चापतत् । कुतः । स्थलवद्भ्रांत्या ॥ ३७ ॥ ३८ ॥ भुवो भरं भारं जिहीर्षुरिति । अद्य संपादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वेति । किंच यस्य दृशा दृष्टिमात्रेण दुर्योधनो भ्रमति स्म भ्रांतिं प्राप मयमाया तु निमित्तमात्रम् । स भूभारहरणबीजं दुर्योधनस्य भ्रमं भीमादिहास्येन च तस्य पराभवं विधाय तूष्णीमासीदित्यर्थः ॥ ३९ ॥ ४० ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायां पंचसप्ततितमोऽध्यायः ॥ ७५ ॥

त्यते । मध्यं सुचारु यस्य तन्मध्येसुचारु इति विग्रहादिति ध्येयम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ तत्र सभायाम् ॥ ३६ ॥ तत्र सभायाम् । आकुंचितवान् संकोचितवान् । तत्र हेतुमाशंकते—कुत इति । भ्रांतिरपि कुतस्तत्राह—मयमायेत्यादि ॥ ३७ ॥ तं दुर्योधनम् ॥ ३८ ॥ स दुर्योधनः । बीजहेतुमाह—किञ्चेति । यस्य कृष्णस्य । स कृष्णः । तस्य दुर्योधनस्य । इत्यर्थ इति—भीमं हास्यान्न वारितवान्दुर्योधनं च न सांत्वितवानिति भावः ॥ ३९ ॥ यत्त्वया दुर्योधनस्य दौरात्म्यमुद्दिश्येति शेषः । अहं पृष्ट एतदिति योज्यम् ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे पंचसप्ततितमोऽध्यायः ॥ ७५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीशुक उवाच ॥ अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप ॥ क्रीडानरशरीरस्य यथा सौभपतिर्हतः ॥ १ ॥ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः ॥ यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा ॥ २ ॥ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजाम् ॥ अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ॥ ३ ॥ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुम् ॥ आराधयामास नृपः पांसुमुष्टिं सकृद्ग्रसन् ॥ ४ ॥ संवत्सरांते भगवानाशुतोष उमापतिः ॥ वरेण च्छंदयामास शाल्वं शरणमागतम् ॥ ५ ॥ देवासुरमनुष्याणां गंधर्वोरगरक्ष साम् ॥ अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणम् ॥ ६॥ तथेति गिरिशादिष्टो मयः परपुरंजयः ॥ पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयम् ॥ ७ ॥ स लब्ध्वा कामगं यानं तमोधाम दुरासदम् ॥ ययौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन् ॥ ८ ॥ निरुध्य सेनया शाल्वो महत्या भरतर्षभ ॥ पुरीं बभंजोपवनान्युद्यानानि च सर्वशः ॥ ९ ॥ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः ॥ विहारान्स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः ॥ १० ॥

ततः षट्सप्ततितमे वृष्णिशाल्वमहामृधे ॥ द्युमद्गदाप्रहारेण रणात्प्रद्युम्ननिर्गमः ॥ १ ॥ संपाद्य धर्मराजस्य राजसूयमहोदयम् ॥ निहत्य सौभराजादीनथोपारमदच्युतः ॥ २ ॥ १ ॥ २ ॥ ३ ॥ प्रत्यहं सकृत्पांसुमुष्टिमेकां ग्रसन् भक्षयन् ॥ ४ ॥ संवत्सरांत इति । आशुतोषोऽपि भगवानुमापतिः श्रीकृष्णविद्विषि शाल्वे वरस्य वैफल्यं मन्यमानो न शीघ्रं प्रादुरभूत् तस्यातिनिर्बंधमालक्ष्य संवत्सरांते च वरेण च्छंदयामासेच्छां कारितवान्वरं वृणीष्वेत्युवाचेत्यर्थः ॥ ५ ॥ ६॥ तथेति तथेति प्रतिज्ञाय गिरिशेनादिष्टोऽयस्मयं लोहमयं पुरं सौभसंज्ञं निर्माय रचयित्वा प्रादात् ॥ ७ ॥ तमसोंऽधकारस्य धामाश्रयम् । अन्यैर्दुरासदं दुष्प्राप्यम् ॥ ८ ॥ ९ ॥ प्रासादा गृहा

ततो महाभारतबीजवपनोत्तरम् (१) । अथ सौभराजादिवधोत्तरम् (२) । अथ युधिष्ठिरराजसूयानंतरम् ॥१॥ तथा निर्जिताः ॥२॥३॥ इति उक्तरीत्या । पांसुर्धूलिः "पांसुर्धूलौ च सस्यार्थचिरसंचितगोमये" इति मेदिनी ॥४॥इत्यर्थ इति—कृष्णद्विषि वरदानानौचित्येपि भक्ताभीष्टदत्वात्तं वरार्थं प्रेरयामासेति भावः॥५॥स शाल्वः । यानं गमनवत्पुरम् "यानं वाहनमुद्दिष्टं यानं गमनवत्पुरम्" इति धरणिः । अभेद्यमिहाकारवाच्येन वासुदेवेन भेद्यमिति वाचोभिप्रायः । अत एव " तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा " इत्युक्त्या विरोधो नेति ॥ ६ ॥ " अयस्मयादीनि च्छंदसि " इति पाणिनिः ॥ ७ ॥ स शाल्वः । तमोधाम नीलरश्मिपुंजात्मकत्वात् ॥ ८ ॥ वृष्णिकृतं रुक्मिणीविवाहादिषु जातम् ॥ ९ ॥ तदुपरि प्रासादोपरि । तत्पर्यंतमट्टालिकापर्यंतम् । स शाल्वः । न केवलं स एव बभंजापि तु तस्मान्महादेवप्रसादलब्धविमानादपीत्याह—किं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिला द्रुमाश्चाशनयः सर्पा आसारशर्कराः ॥ प्रचंडश्चक्रवातोऽभूद्रजसाऽऽच्छादिता दिशः ॥ ११ ॥ इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशम् ॥ नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही ॥ १२ ॥ प्रद्युम्नो भगवान् वीक्ष्य बाध्यमाना निजाः प्रजाः ॥ मा भैष्टेत्यभ्यधाद्वीरो रथारूढो महायशाः ॥ १३ ॥ सात्यकिश्चारुदेष्णश्च सांबोऽक्रूरः सहानुजः ॥ हार्दिक्यो भानुविंदश्च गदश्च शुकसारणौ ॥ १४ ॥ अपरे च महेष्वासा रथयूथपयूथपाः ॥ निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः ॥ १५ ॥ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह ॥ यथासुराणां विबुधैस्तुमुलं लोमहर्षणम् ॥१६॥ ताश्च सौभपतेर्माया दिव्यास्त्रै रुक्मिणीसुतः ॥ क्षणेन नाशयामास नैशं तम इवोष्णगुः ॥१७॥ विव्याध पंचविंशत्या स्वर्णपुंखैरयोमुखैः ॥ शाल्वस्य ध्वजिनीपालं शरैः सन्नतपर्वभिः ॥ १८ ॥ शतेनाताडयच्छाल्वमेकैकेनास्य सैनिकान् ॥ दशभिर्दशभिर्नेतॄन्वाहनानि त्रिभिस्त्रिभिः ॥ १९ ॥ तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः ॥ दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः ॥ २० ॥ बहुरूपैकरूपं तद्दृश्यते न च दृश्यते ॥ मायामयं मयकृतं दुर्विभाव्यं परैरभूत् ॥ २१ ॥ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितम् ॥ २२ ॥

अट्टालास्तदुपरिगृहास्तोलिकास्तत्पर्यंतकुड्यानि ताः । विहारान् क्रीडास्थानानि च स बभंज । किंच विमानाग्र्यात्तस्माच्छस्त्रवृष्ट्यादयः पेतुः ॥ १० ॥ आसारशर्करा धारासंपातवज्जलोपलाः ॥ ११ ॥ शं सुखं नाभ्यपद्यत ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ तुमुलं व्याकुलम् । लोमहर्षणं रौद्रम् ॥ १६ ॥ नैशं निशि भवं तम उष्णगुः सूर्य इव ॥१७॥ किंच विव्याधेति । स्वर्णमयानि पुंखानि पृष्ठप्रांता येषां तैः । अयो लोहं तन्मयानि मुखान्यग्राणि येषां तैः । ध्वजिनीपालं सेनान्यम् । सन्नतानि निम्नानि पर्वाणि ग्रंथयो येषां तैः ॥ १८ ॥ सैनिकान्भटान् । नेतॄन्सारथीन् ॥ १९ ॥ स्वपरसेनयोर्वर्तमानाः सर्वे पूजयामासुः संमानितवंतः ॥ २० ॥ कदाचिद्बहुरूपं कदाचिदेकरूपं क्वचिद्दृश्यते क्वचिन्न दृश्यते एवं दुर्विभाव्यं दुर्वितर्क्यमभूत् ॥ २१ ॥ किंच क्वचिदिति । एवं तद्दुरवस्थितमनवस्थितं चाभूत् ॥ २२ ॥

चेति ॥ १० ॥ जलोपलाः करकाः ॥ ११ ॥ सौभेन तत्संज्ञपुरेण तत्रत्यशाल्वेन च ॥ १२ ॥ १३ ॥ १४ ॥ दंशिताः संनद्धाः ॥ १५ ॥ ततः पुरात् प्रद्युम्ननिर्गमनोत्तरम् ॥ १६ ॥ ताः शिलाद्रुमवर्षणादिरूपाः । उष्णा गावः किरणा यस्य स तथा ॥ १७ ॥ माया विनाश्य युद्धं चकारेत्याह—विव्याधेति ॥ १८ ॥ १९ ॥ तच्छाल्वादिताडनरूपम् । तं प्रद्युम्नम् ॥ २० ॥ तत्पुरम् ॥ २१ ॥ तत्पुरगतमन्यदद्भुतमाह—क्वचिदिति । तत्पुरम् ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रयत्रोपलक्ष्येत ससौभः सहसैनिकः ॥ शाल्वस्ततस्ततोऽमुंचञ्छरान्सात्वतयूथपाः ॥ २३ ॥ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानपु
रानीकः शाल्वोमुह्यत्परेरितैः ॥ २४ ॥ शाल्वानीकपशस्त्रौघैर्वृष्णिवीरा भृशार्दिताः ॥ न तत्यजू रणं स्वंस्वं लोकद्वयजिगीषवः ॥ २५ ॥ शाल्वामात्यो
द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः ॥ आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली ॥२६॥ प्रद्युम्नं गदया शीर्णवक्षःस्थलमरिंदमम् ॥ अपोवाह रणात्सूतो
धर्मविद्दारुकात्मजः ॥ २७ ॥ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सारथिमब्रवीत् ॥ अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणम् ॥ २८ ॥ न यदूनां कुले
जातः श्रूयते रणविच्युतः ॥ विना मत्क्लीबचित्तेन सूतेन प्राप्तकिल्बिषात् ॥ २९ ॥ किंनु वक्ष्येऽभिसंगम्य पितरौ रामकेशवौ ॥ युद्धात्सम्यगपक्रांतः
पृष्टस्तत्रात्मनः क्षमम् ॥ ३० ॥ व्यक्तं मे कथयिष्यंति हसंत्यो भ्रातृजामयः ॥ क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ॥ ३१ ॥ सार
थिरुवाच ॥ धर्मं विजानताऽऽयुष्मन्कृतमेतन्मया विभो ॥ सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ॥ ३२ ॥ एतद्विदित्वा तु भवान्मयापोवाहि
तो रणात् ॥ उपसृष्टः परेणेति मूर्छितो गदया हतः ॥ ३३ ॥ इति श्रीमद्भागवते महापुराणे द० उ० शाल्वयुद्धे षट्सततितमोऽध्यायः ॥ ७६ ॥

॥२३॥ अग्निवद्दाहकोऽर्कवद्युगपत्सर्वतः संस्पर्शो येषां तैः । आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वाद्दुरासदैर्दुःसहैः । पीड्यमानं पुरमनीकानि च यस्य सः । परैर्यदुभिरीरि
तैर्मुक्तैः ॥२४॥ भृशार्दिता अपि स्वंस्वं रणं स्वांस्वां युद्धभूमिम् ॥ २५ ॥ मौर्व्या कार्ष्णायसमय्या व्याहत्य प्रहृत्य ॥ २६ ॥ अपोवाहान्यतो निनाय ॥२७॥२८॥ मत
मत्तो विना । क्लीबं चित्तं यस्य तेन । त्वया सूतेन ॥ २९ ॥ पितरौ रामकृष्णावभिसंगम्य तत्पार्श्वे गत्वा ताभ्यां पृष्टः स्वयोग्यं किंनु वक्ष्यामीति ॥ ३० ॥ मे
भ्रातृभार्याः व्यक्तं निश्चितं मत्क्लैब्यं कथयिष्यंति । तत्कथनमनुकरोति । कथंकथमिति ॥ ३१ ॥ विभो हे समर्थ । एतदपसर्पणम् । धर्ममाह । सूत इति ॥ ३२ ॥
अपोवाहितोऽपनीतः । उपसृष्ट उपसर्गं पीडां प्राप्त इति कृत्वा । यतः परेण शत्रुणा गदया हतः सन्मूर्छितो निःसंज्ञतां गतो भवानिति ॥ ३३ ॥ इति श्रीमद्भा० महा
पुराणे द० उ० श्री० टी० षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

यत्रयत्र भूम्यादौ । ततस्ततस्तत्रतत्र ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ अपसर्पणं बहिर्निर्गमनम् ॥ २८ ॥ प्राप्तं कल्मषमपवादो येन तस्मात् 'कल्मषं पापनिंदयोः' इति निघंटुः ।
किल्बिषपाठेपि स एवार्थः ॥ २९ ॥ तत्र पितृपार्श्वे । किं वक्ष्यामि न किमपि वक्तुं योग्यो भविष्यामीत्यर्थः ॥ ३० ॥ तासां कथनं तत्कथनम् ॥ ३१ ॥ ३२ ॥ एतद्वचनम् ॥ ३३ ॥ इति श्रीमद्भाग
वतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे षट्सततितमोऽध्यायः ॥ ७६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः ॥ नय मां द्युमतः पार्श्वं वीरस्येत्याह सारथिम् ॥ १ ॥ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः ॥ प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् ॥२ ॥ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् ॥ द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ॥ ३ ॥ गदसात्यकिसांबाद्या जघ्नुः सौभपतेर्बलम् ॥ पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ॥ ४ ॥ एवं यदूनां शाल्वानां निघ्नतामितरेतरम् ॥ युद्धं त्रिणवरात्रं तदभूत्तुमुलमुल्बणम् ॥ ५ ॥ इंद्रप्रस्थं गतः कृष्ण आहूतो धर्मसूनुना ॥ राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते ॥ ६ ॥ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथाम् ॥ निमित्तान्यतिघोराणि पश्यन्द्वारवतीं ययौ ॥ ७ ॥ आह चाहमिहायात आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥ ८ ॥ वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणम् ॥ सौभं च शाल्वराजं च दारुकं प्राह केशवः ॥ ९ ॥ रथं प्रापय मे सूत शाल्वस्यांतिकमाशु वै ॥ संभ्रमस्ते न कर्तव्यो मायावी सौभराडयम् ॥ १० ॥ इत्युक्तश्चोदयामास रथमास्थाय दारुकः ॥ विशंतं ददृशुः सर्वे स्वे परे चारुणानुजम् ॥ ११ ॥ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥ १२ ॥

सप्तसप्ततितमे नानामायाविचक्षणः ॥ कृष्णेनागत्य शाल्वस्तु हतः सौभं च चूर्णितम् ॥ १ ॥ दंशितः सन्नद्धः ॥ १ ॥ विधमंतं क्षपयंतम् । प्रतिहत्य प्रतिरुध्य ॥ २ ॥ अष्टानां विनियोगमाह । चतुर्भिरिति ॥ ३ ॥ सौभेयाः सौभस्थाः ॥ ४ ॥ नवानां रात्रीणां समाहारो नवरात्रम् । त्रयाणां नवरात्राणां समाहारस्त्रिणवरात्रम् । सप्तविंशतिमहोरात्राणीत्यर्थः । तुमुलमाकुलम् । उल्बणं घोरम् ॥ ५ ॥ परमतमुपन्यस्यति । इंद्रप्रस्थं गत इत्यादिना ॥ ६ ॥ ७ ॥ आह चेति । स्वगतमेव पथि चिंताविजृंभितभाषणम् । आर्यमिश्राभिसंगतो बलभद्रसहितः ॥ ८ ॥ दुर्निमित्तदर्शनाकुलचित्त एवं चिंतयन् द्वारकामागत्य स्वानां कदनं वीक्ष्य सौभं च शाल्वराजं च वीक्ष्य रामं पुररक्षणं प्रति निरूप्य नियुज्य दारुकं प्राहेत्यन्वयः ॥ ९ ॥ ते त्वया ॥ १० ॥ आस्थाय सम्यगधिष्ठायारुणानुजं ध्वजे वर्तमानं गरुडम् ॥ ११ ॥ हतप्रायश्च बलस्य सैन्यस्येश्वरः ॥ १२ ॥

आगत्य राजसूयात् (१) । स प्रद्युम्नः ॥ १ ॥ उपसर्गवशाद्धमतिरत्र नाशने । शतृप्रत्ययः ॥ २ ॥ अष्टानां बाणानाम् । विनियोगं कृत्यम् ॥ ३ ॥ ४ ॥ तद्युद्धम् ॥ ५ ॥ परमतं व्यासेतरमतम् । उपन्यस्यति कथयति शुकः ॥ ६ ॥ ७ ॥ ८ ॥ तच्छाल्वकृतम् । कदनं मर्दम् 'कदनं मर्दपापयोः' इति मेदिनी ॥ ९ ॥ संभ्रमो भयम् "संभ्रमः साध्वसेऽपि स्यात्संवेगादरयोरपि" इति मेदिनी ॥ १० ॥ ११ ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामापतंतीं नभसि महोल्कामिव रंहसा॥भासयंतीं दिशः शौरिः सायकैः शतधाऽच्छिनत्॥१३॥तं च षोडशभिर्विद्ध्वा बाणैः सौभं च खे भ्रमत्॥अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः ॥१४॥ शाल्वः शौरेस्तु दोः सव्यं सशार्ङ्गं शार्ङ्गधन्वनः ॥ बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतम् ॥ १५ ॥ हाहाकारो महानासीद्भूतानां तत्र पश्यताम् ॥ विनद्य सौभराडुच्चैरिदमाह जनार्दनम् ॥ १६ ॥ यत्त्वया मूढ नः सख्युर्भ्रातुर्भार्या हृतेक्षताम् ॥ प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा ॥ १७ ॥ तं त्वाद्य निशितैर्बाणैरपराजितमानिनम् ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥ १८ ॥ श्रीभगवानुवाच ॥ वृथा त्वं कत्थसे मंद न पश्यस्यंतिकेंऽतकम् ॥ पौरुषं दर्शयंति स्म शूरा न बहुभाषिणः ॥१९॥ इत्युक्त्वा भगवाञ्छाल्वं गदया भीमवेगया ॥ तताड जत्रौ संरब्धः स चकंपे वमन्नसृक्॥२०॥ गदायां सन्निवृत्तायां शाल्वस्त्वंतरधीयत ॥ ततो मुहूर्त आगत्य पुरुषः शिरसाच्युतम्॥ देवक्या प्रहितोऽस्मीति नत्वा प्राह वचो रुदन् ॥ २१ ॥ कृष्णकृष्ण महाबाहो पिता ते पितृवत्सल ॥ बद्ध्वाऽपनीतः शाल्वेन सौनिकेन यथा पशुः॥ ॥ २२ ॥ निशम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः ॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥ २३ ॥ कथं राममसंभ्रान्तं जित्वाऽजेयं सुरासुरैः ॥ शाल्वेनाल्पीयसा नीतः पिता मे बलवान्विधिः ॥ २४ ॥ इति ब्रुवाणे गोविंदे सौभराट् प्रत्युपस्थितः ॥ वसुदेवमिवानीय कृष्णं चेदमुवाच सः ॥ २५ ॥ एष ते जनिता तातो यदर्थमिह जीवसि ॥ वधिष्ये वीक्षतस्तेऽमुमीशश्चेत्पाहि बालिश ॥ २६ ॥

॥ १३ ॥ तं च शाल्वम् । शरसंदोहैः शरजालैः । खं सूर्य इव रश्मिभिरिति सुनीलत्वविपुलत्वादिभिराकाशोपमा सौभस्य । अचिंत्यवेगबाहुल्यादिभिः शराणां रश्मिसादृश्यम् । अयत्नेनैव रश्मिवच्छरजालप्रसारणात्सूर्यतुल्यः श्रीकृष्ण इति ॥ १४ ॥ दोर्बाहुम् ॥ १५ ॥ १६ ॥ सख्युः शिशुपालस्य । ईक्षतामस्माकम् ।प्रमत्तोऽनवहितः । व्यापादितो निहतः ॥ १७ ॥ अपराजितोऽहमिति मानिनं मानवंतम् । अपुनरावृत्तिं मृत्युम् । तिष्ठेः स्थास्यसि ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ घृणी दयावान् ॥ २३ ॥ २४ ॥ २५ ॥ जनिता जनयिता ईशश्चेच्छक्तश्चेत् ॥ २६ ॥

तां शक्तिम् ॥ १३ ॥ तं शाल्वम् ॥ १४ ॥ तच्छार्ङ्गपतनम् ॥ १५ ॥ तत्र युद्धे । इदं वक्ष्यमाणम् ॥ १६ ॥ सखित्वादेव भ्रातुरित्युक्तम् । स शिशुपालः ॥ १७ ॥ तं सखिहंतारम् ॥ १८ ॥ अंतकं तवांतकर्तारं मामित्यर्थः ॥ १९ ॥ स शाल्वः ॥ २० ॥ ततोंतर्द्धानानंतरम् । मुहूर्ते मुहूर्तमिते काले गते सति । पुरुषः द्वारकास्थपुरुषः ॥ २१ ॥ २२ ॥ प्रकृतिं स्वभावम् ॥ २३ ॥ अहो विधिर्दैवम् ॥ २४ ॥ इदं वक्ष्यमाणम् ॥ २५ ॥ यदर्थं पितृनिमित्तम् । पितरि मृते त्वमपि मरिष्यसीति वृद्धवसुदेवकृपया त्वां न मारयामि । मृते त्वस्मिन्पुनस्त्वामप्यहं मारयिष्यामीति भावः ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं निर्भर्त्स्य मायावी खड्गेनानकदुंदुभेः ॥ उत्कृत्त्य शिर आदाय खस्थं सौभं समाविशत् ॥ २७ ॥ ततो मुहूर्तं प्रकृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषंगतः ॥ महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां मयोदिताम् ॥ २८ ॥ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्यदच्युतः ॥ स्वाप्नं यथा चांबरचारिणं रिपुं सौभस्थमालोक्य निहंतुमुद्यतः ॥ २९ ॥ एवं वदंति राजर्षे ऋषयः केच नान्विताः ॥ यत्स्ववाचो विरुध्येत नूनं तन्न स्मरंत्युत ॥ ३० ॥ क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ॥ क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ॥ ३१ ॥ यत्पादसेवोर्जितयाऽऽत्मविद्यया हिन्वंत्यनाद्यात्मविपर्ययग्रहम् ॥ लभंत आत्मीयमनंतमैश्वरं कुतो नु मोहः परमस्य सद्गतेः ॥ ३२ ॥

॥ २७ ॥ स्वबोधः स्वतःसिद्धज्ञानवानपि स्वजनस्नेहतः प्रकृतौ मनुष्यस्वभावे उपप्लुतो निमग्न आस्ते अतिष्ठत् ततस्तत्सर्वमासुरीं मायामबुध्यत् । मायेयमिति ज्ञातवान् ॥ २८ ॥ स्वाप्नः स्वप्नप्रपंचं यथा ॥ २९ ॥ एवं परमतमुपन्यस्तं निराकरोति । एवमिति । केच केचन । नान्विता अनन्विताः पूर्वापरानुसंधानरहिताः । तदाह । यत्स्ववाच इति । तन्नानुस्मरंतीत्यर्थः । अयमभिप्रायः । न तावद्राजसूयार्थं रामेण सह गतः श्रीकृष्णः संकर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ॥ ३० ॥ असंभावितं चेत्याह । क्व शोकमोहाविति।भयं वा दुर्निमित्तदर्शनकृतं नूनं हन्युः पुरीं ममेति यदुक्तं यच्च हस्ताच्छार्ङ्गं न्यपतदित्युक्तं तद्द्वयं वा क्वेति । अज्ञेषु संभवो येषां ते । अखंडितानि विज्ञानज्ञानैश्वर्याणि यस्य सः। तत्र विज्ञानं स्वरूपविषयम् । ज्ञानं बाह्यविषयम् ॥ ३१ ॥ किंच । यस्य पादसेवया ऊर्जिता पुष्कला या आत्मविद्या तया अनादिश्चा

एवमुक्तरीत्या निर्भर्त्स्य कटूक्त्वा । उत्कृत्त्य छित्त्वा ॥ २७ ॥ ततो वसुदेवशिरश्छेदोत्तरम् । स शाल्वः । तथा च श्रुतिः—" यदचरस्तन्वा वावृधानो बलानींद्र प्रब्रुवाणो जनेषु ॥ मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से " इति श्रुतिसिद्धोयमर्थः । तथा हि—हे इंद्र तन्वा वावृधानः स्वरूपेण भृशं वर्द्धमानस्त्वं बलानि वीर्याणि विक्रमलक्षणानि अचरः अकृतेति यत्स्वजनेषु प्रब्रुवाणः व्याकुर्वाणो वर्तस इति शेषः ॥ तस्मात्स्वभावरहस्यं स्वजना जानंतीत्यर्थः । शाल्वादिशत्रुणा क्रियमाणानि यानि युद्धान्याहुः । पुराणादावेतानि त्वामुद्दिश्य सा मयोदिता माया इत् इंद्रजाललक्षणैव त्वं पुरा प्रथमतो मुहूर्त्तं शत्रुसुख त्रोटनान्मायां न विवित्से न ज्ञातवानसि । अद्याधुना । विवित्से ननु पश्चात्सा सिद्धाभूदित्यर्थः ॥ २८ ॥ तत्र युद्धे । अच्युतो ज्ञानच्युतिरहितः ॥ २९ ॥ तदाह पूर्वपरानुसंधानराहित्यमाह । स्ववाचो यद्विरुध्येत । इत्यर्थ इति—तद्विरोधलक्षणं वचो नानुसंदधत इति । अत्र तात्पर्यमाह—अयमभिप्रायः । न तावदित्यादिना, मम त्वित्थं प्रतिभाति—केच ऋषयः । हे राजर्षे एवं वदंति । किंभूताः—"नान्विताः अनु पश्चादुक्तिं संकर्षणमनुज्ञाप्येत्यादिकां न इता न ज्ञातवन्त इत्यर्थः । यद्यतः । स्वस्य मम वाचः । संकर्षणमित्यादिकामेव ते न स्मरंति । अतस्तदुक्त्या " आह चाहमिहायात आर्यमिश्राभिसंगतः " इत्यादिकया विरुध्येत । तदुक्त्येति शेषः । विरुध्येतेति भावे लिङ् । उपसर्गवशाद्रुधेरकर्मकत्वम् । तीर्थस्तु—' खेचरान्विता विरुध्यंते ' इति पाठमाह । स्वस्य स्वतंत्रस्य हरेर्वाचो वेदलक्षणाः । विरुध्यंते यत् हरिमोहादिकं प्रति हरेर्मोहादिकं न सहंते । " अजस्यावक्रचेतसः " इति श्रुतेः । खेचरा भूतास्तदावेशयुतास्तथा ॥ ३० ॥ विपरीतं तत्कथनं निषेधति—क्वेति ॥ ३१ ॥ कैमुत्येन तदेव द्रढयति—किञ्चेति । अतो मोहाभावात् । एतद्वचनं ' ततो मुहूर्तम् '

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं शस्त्रपूगैः प्रहरंतमोजसा शाल्वं शरैः शौरिरमोघविक्रमः ॥ विद्धाऽच्छिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज ह ॥ ३३ ॥ तत्कृष्णहस्तेरितया विचूर्णितं पपात तोये गदया सहस्रधा ॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य शाल्वोऽच्युतमभ्यगाद्द्रुतम् ॥ ३४ ॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्त्वाऽथ रथांगमद्भुतम् ॥ वधाय शाल्वस्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोदयाचलः ॥ ३५ ॥ जहार तेनैव शिरः सकुंडलं किरीटयुक्तं पुरुमायिनो हरिः ॥ वज्रेण वृत्रस्य यथा पुरंदरो बभूव हाहेति वचस्तदा नृणाम् ॥ ३६ ॥ तस्मिन्निपतिते पापे सौभे च गदया हते ॥ नेदुर्दुंदुभयो राजन्दिवि देवगणेरिताः ॥ सखीनामपचितिं कुर्वन्दंतवक्रो रुषाऽभ्यगात् ॥ ३७ ॥ इति श्रीमद्भा० द० उत्त० सौभवधो नाम सप्तसप्ततितमोऽध्यायः ॥७७॥ श्रीशुक उवाच ॥ शिशुपालस्य शाल्वस्य पौंड्रकस्यापि दुर्मतिः ॥ परलोकगतानां च कुर्वन् पारोक्ष्यसौहृदम् ॥ ॥ १ ॥ एकः पदातिः संक्रुद्धो गदापाणिः प्रकंपयन् ॥ पद्भ्यामिमां महाराज महासत्त्वो व्यदृश्यत ॥ २ ॥ तं तथाऽऽयांतमालोक्य गदामादाय सत्वरः ॥ अवप्लुत्य रथात्कृष्णः सिंधुं वेलेव प्रत्यधात् ॥ ३ ॥ गदामुद्यम्य कारूषो मुकुंदं प्राह दुर्मदः ॥ दिष्ट्यादिष्ट्या भवानद्य मम दृष्टिपथं गतः ॥ ४ ॥

सावात्मविपर्ययग्रहश्च अहं कृशः सुखी दुःखीत्यादिलक्षणस्तं हिन्वंति नाशयंति संतः । ऐश्वरं पदं च । तस्य सतां गतेः कुतो नु मोह इति । अतो नैतद्वचनं सत्यमित्यर्थः ॥ ३२ ॥ किं तर्हि सत्यं तदाह । तं शस्त्रपूगैरिति । वर्म कवचम् । रुरोज बभंज ॥ ३३ ॥ ३४ ॥ लयार्कसंनिभं प्रलयकालीनसूर्यसदृशम् ॥ ३५ ॥ ३६ ॥ देवगणैरीरिता वादिताः । किंच सखीनामिति ॥ ३७ ॥ इति श्रीमद्भागवते दशमस्कंधे उत्तरार्धे श्री० टीकायां सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ततोऽष्टसप्ततितमे दंतवक्त्रविदूरथौ ॥ हत्वा हरिः पुरे रेमे रामः सूतं ततोऽवधीत् ॥ १ ॥ सखीनामपचितिं कुर्वन्नित्युक्तं तदेवाह । शिशुपालस्येति । पारोक्ष्यसौहृदं पारोक्ष्ये करणीयं सुहृत्कृत्यम् ॥ ॥ १ ॥ २ ॥ प्रत्यधात्प्रतिरुरोध ॥ ३ ॥ मुकुंदं प्राह दुर्मद इत्यादेरधिक्षेपपरता स्फुटैव । परमार्थस्तु दुर्मदो गतमदः प्राह । मुकुंदं तृतीये जन्मनि मुक्तिदानार्थमागतम् । अद्येति । जन्मत्रयेऽन्विष्यमाणोऽद्य ब्रह्मशापावसाने भवान्मम स्वामी दृष्टिपथं गतः प्राप्तः एतद्दिष्ट्यादिष्ट्या भद्रंभद्रम् । अतिहर्षे वीप्सा ॥ ४ ॥

इत्यादिरूपम् । इत्यर्थ इति—न सर्वथा सत्यम् । "यदचरस्तन्वा" इत्यादिश्रुत्या तद्व्यवहारस्य मायिकत्वावगमादिति भावः ॥ ३२ ॥ सत्यमाशंक्य वक्ति—किमिति । तत्सत्यम् ॥ ३३ ॥ तत्सौभं तच्चूर्णितसौभम् ॥ ३४ ॥ तस्य शाल्वस्य । अथ बाहुच्छेदानन्तरम् ॥ ३५ ॥ तेनैव चक्रेणैव । तदा शिरश्छेदनसमये ॥ ३६ ॥ तस्मिन् शाल्वे । अन्यदाह—किं चेति ॥ ३७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ततः शाल्ववधोत्तरम् । ततः श्रीकृष्णोपरत्यनन्तरम् (१) । तदेवापचयनमेव ॥ १ ॥ इमां भूमिम् ॥ २ ॥ तं दंतवक्रम् । तथायांतं सगदम् ॥ ३ ॥ कारूषः करूषदेशेशः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं मातुलेयो नः कृष्ण मित्रध्रुङ्मां जिघांससि ॥ अतस्त्वां गदया मंद हनिष्येवज्रकल्पया ॥ ५ ॥ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः ॥ बंधुरूपमरिं हत्वा व्याधिं देहचरं यथा ॥ ६ ॥ एवं रूक्षैस्तुदन् वाक्यैः कृष्णं तोत्रैरिव द्विपम् ॥ गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः ॥ ७ ॥ गदयाऽभिहतोऽप्याजौ न चचाल यदूद्वहः ॥ कृष्णोऽपि तमहन्गुर्व्या कौमोदक्या स्तनांतरे ॥ ८ ॥ गदानिर्भिन्नहृदय उद्वमन्रुधिरं मुखात् ॥ प्रसार्य केशबाह्वंघ्रीन्धरण्यां न्यपतद्व्यसुः ॥ ९ ॥ ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम् ॥ पश्यतां सर्वभूतानां यथा चैद्यवधे नृप ॥ १० ॥ विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः ॥ आगच्छदसिचर्मभ्यामुच्छ्वसंस्तज्जिघांसया ॥११॥ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना ॥ शिरो जहार राजेंद्र सकिरीटं सकुंडलम् ॥ १२ ॥ एवं सौभं च शाल्वं च दंतवक्रं सहानुजम् ॥ हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः ॥ १३ ॥ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः ॥ अप्सरोभिः पितृगणैर्यक्षैः किन्नरचारणैः ॥ १४ ॥ उपगीयमानविजयः कुसुमैरभिवर्षितः ॥ वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीम् ॥ ॥ १५ ॥ एवं योगेश्वरः कृष्णो भगवाञ्जगदीश्वरः ॥ ईयते पशुदृष्टीनां निर्जितो जयतीति सः ॥ १६ ॥

किंच । हे कृष्ण त्वमस्माकं मातुलेयो बंधुः । एवमपि मित्रध्रुक् मित्राणि घातितवान्मां च जिघांससि तस्मादस्माकं त्वत्तो मृत्युः सनकाद्यनुग्रहप्राप्तो नूनं दुर्वारः । अतस्त्वामेव तावन्मात्रमहं याचे । किं तदाह । अमंद सर्वसहनसमर्थ । क्षात्रधर्मेण सेवितुं गदया त्वां हनिष्ये प्रहरिष्यामि । तामेकवारं सहस्वेति । ननु वज्रतुल्यां त्वद्गदां को वा सहेत नैवमित्याह । अवज्रकल्पया उत्पलमालावदतिकोमलयेत्यर्थः ॥ ५ ॥ नन्वेवं हनने कस्तव पुरुषार्थस्तमाह । तर्हीति । अज्ञ न विद्यते ज्ञो यस्मात् हे सर्वज्ञेत्यर्थः । परमार्थतः । स्वामिनमेतद्देहसंबंधेन बंधुरूपमरिं ब्रह्मशापेन शत्रुत्वेन प्रतीतं त्वां हत्वा मित्राणामानृण्यमुपैम्युपैष्यामि । विशेषेणाधीयते मनसि चिंत्यत इति व्याधिः । देहेंऽतर्यामितया चरतीति तथा तमीश्वरं हत्वा क्षात्रधर्मेणाराध्य । हंतेर्गत्यर्थस्य ज्ञानार्थत्वाज्ज्ञात्वेति वा । तेन यथा पित्रादीनामानृण्यमुपयंति तद्वदिति ॥ ६ ॥ रूक्षैरित्यादि प्रतीत्यभिप्रायेण । तोत्रैरंकुशादिभिः ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ एवं श्रीकृष्णो महाबलानपि लीलया जयत्येवेति

सम्बन्धं द्योतयति–किञ्चेति । एवमपि बंधुस्सन्नपि । मित्राणि शिशुपालादीनि । यस्मान्मां जिघांससि तस्मादित्यर्थः । यतो दुर्वारोऽतो हेतोः।तद्याचनं स्वयमाशंक्य समाधत्ते–नन्विति।इत्यर्थ इति–अद्व्योऽज्यते प्राप्यते इत्यवज्रमुत्पलम् । अप्पूर्वादजतेरो बाहुलकाद्वीभावाभावः । तत्कल्पप्रत्यये रूपमिति ज्ञेयम्॥५॥पुनराशंकते–नन्विति । अनेकार्थत्वादर्थतात्पर्याद्वा हंतेराराधनार्थत्वं लभ्यते। किं क्लिष्टकल्पनयेत्याह–हंतेरित्यादि । तेनाराधनज्ञानयोरन्यतरेण । ‘ न किंकरो नायमृणी च राजन् ’ इत्यारभ्य ‘ गतो मुकुन्दं परिहृत्य कर्तम् ’ इति वक्ष्यमाणत्वात् । तद्वत्पित्राद्यानृण्यवत् ॥ ६ ॥ स दंतवक्रः ॥ ७ ॥ तं दंतवक्रम् ॥ ८ ॥ “ सेनातूर्यप्राण्यंगानां द्वंद्व एकवद्वा ” इति एकवचनांतमपि साधु केशबाह्वंघ्रीति ॥ ९ ॥ ततः पतनानंतरम् । ज्योतिर्विजयात्मकं तेजः ॥ १० ॥ तद्भ्राता दंतवक्रानुजः । तज्जिघांसया कृष्णहननेच्छया ॥ ११ ॥ तस्य विदूरथस्य ॥ १२ ॥ एवमुक्तविधया । अन्यैः कृष्णेतरैः ॥१३॥१४॥१५॥ महाबलानतिबलान् । स कृष्णः । पशुदृष्टीनां तन्माहात्म्यमविदुषाम् । योगेश्वरः अचिंत्यवैभवः । अत्र हेतुर्भगवानिति । तत्रापि हेतुर्जगदीश्वरः सर्वेश्वर इति ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पांडवैः ॥ तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥ १७ ॥ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् ॥ सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः ॥ १८ ॥ पृथूदकं बिंदुसरस्त्रितकूपं सुदर्शनम् ॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीं सरस्वतीम् ॥१९॥ यमुनामनु यान्येव गंगामनु च भारत ॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते ॥ २० ॥ तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अभिवंद्य यथान्यायं प्रणम्योत्थाय चाऽऽर्चयन् ॥ २१ ॥ सोऽर्चितः सपरीवारः कृतासनपरिग्रहः ॥ रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत ॥ २२ ॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिम् ॥ अध्यासीनं च तान्विप्रांश्चुकोपोद्वीक्ष्य माधवः ॥ २३ ॥ कस्मादसाविमान्विप्रानध्याऽऽस्ते प्रतिलोमजः ॥ धर्मपालां स्तथैवास्मान्वधमर्हति दुर्मतिः ॥ २४ ॥ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च ॥ सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥ २५ ॥ अदां तस्याविनीतस्य वृथापंडितमानिनः ॥ न गुणाय भवंति स्म नटस्येवाऽशितात्मनः ॥ २६ ॥

कृत्वा स कदाचिज्जरासंधादिभिर्निर्जित इति पशुदृष्टीनामीयते । नित्यजये हेतवः । योगेश्वरो भगवान् जगदीश्वर इति ॥१६॥ विदूरथांतमामथ्य पूतनादिदनोः कुलम् । कृष्णस्तूपारमन्नाराद्रामोऽहन्सूतबल्वलौ ॥ तत्प्रसंगमाह । श्रुत्वेति ॥ १७ ॥ प्रतिस्रोतं प्रातिलोमम् ॥ १८ ॥ सुदर्शनं तीर्थम् । चक्रं चक्रतीर्थम् ॥ १९ ॥ यमुनामनु यानि तीर्थानि गंगामनु च यानि तानि सर्वाणि गत्वा नैमिषमरण्यं जगाम ॥ २० ॥ अभिप्रेत्य श्रीराम इति ज्ञात्वा ॥ २१ ॥ महर्षेर्व्यासस्य ॥ २२ ॥ सूतं प्रतिलोमजम् । न कृतं प्रह्वणमंजलिश्च येन तम् । अध्यासीनं च तान् तेभ्योऽप्युच्चैरासीनमित्यर्थः ॥ २३ ॥ २४ ॥ अजानन्नध्यास्त इति चेन्नै वमित्याह । ऋषेरिति ॥ २५ ॥ ननु बहुज्ञः कथमेवं कुर्यात्तत्राह । अदांतस्येति । गुणाय यथोचितानुष्ठानाय ॥ २६ ॥

आमथ्यायि नाश्य । पूतनादिर्यस्य तत् । दनोर्दैत्यस्य मारणं मारो दैत्यनाशनं तस्मात् । कथांतरमाह—श्रुत्वेति । मध्यस्थ उदासीनः सन्॥१७॥१८॥प्राचीति महत्फलश्रवणात् । "नूनं प्राचीनपापानि मेरुतुल्यानि भारत । सद्यो दहति निस्नाता प्रातः प्राची सरस्वती ॥" इति पुराणात् ॥ १९ ॥ यत्र नैमिषे । आसते कुर्वंति । कृञर्थस्य सर्वधातुष्वनुस्यूतत्वात् ॥ २० ॥ तं रामम् ॥ २१ ॥ स रामः ॥२२॥ प्रह्वणं नमनम् । इत्यर्थ इति—"अधि पूर्वाणां शीङ्स्थासाम्" इति कर्मत्वं तानिति ज्ञेयम्॥२३॥तस्याग्निकुंडोद्भूतत्वेन जातिसूतत्वाभावेऽपि चरुनिक्षेपवैपरीत्यात्प्रातिलोमज इत्युक्तिः। अन्यः कश्चित्प्रतिलोमजो विप्रान्माध्यास्तादध्यास्ते चेत्तर्हि अस्माभिः स वध्य एव 'नाधर्मिणां वधे दोषः' इत्युक्तेः । अस्मानिति बहुत्वं तु भगवद्दत्ताधिकारमतुल्यनृपधर्मादिभिः स वध्य एवेति बोधयति । अन्यथा—"विप्रो वक्ता सुधीः कार्यो विशुद्धोभयवंशजः । इतिहासपुराणानां विप्रान्यो धर्महानिकृत् ॥" इति संहितोक्तिरसमंजसा स्यात् । किञ्च—नायं जातिसूत इति ज्ञात्वा निवृत्तोपि भगवति भावित्वात्तद्वधो जातोऽत एव तस्य प्रायश्चित्ते प्रवृत्तिरिति ॥ २४ ॥ २५ ॥ अत्राशंकते—नन्विति । एवं महदज्ञानम् । यथा नट शिक्षितप्राणायामादिर्न मोक्षाय तथाऽविनीतस्य शास्त्राभ्यासादिरपि न श्रेयसे इति । "विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय । खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय ॥" इत्याद्युक्तेः ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदर्थो हि लोकेऽस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥ २७ ॥ एतावदुक्त्वा भगवान् निवृत्तोऽसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २८ ॥ हाहेति वादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥ २९ ॥ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ॥ ३० ॥ अजानतैवाचरितस्त्वया ब्रह्मवधो यथा ॥ योगेश्वरस्य भवतो नाम्ना योऽपि नियामकः ॥३१॥ यद्येतद्ब्रह्महत्यायाः पावनं लोकपावन ॥ चरिष्यति भवाँल्लोकसंग्रहोऽनन्यचोदितः ॥३२॥ श्रीभगवानुवाच ॥ करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया ॥ नियमः प्रथमे कल्पे यावान्स तु विधीयताम् ॥ ३३ ॥

विप्रानध्यास्तामन्यद्वा किंचित्करोतु किं तवेति चेत्तत्राह । एतदर्थ इति । धर्मध्वजिन उत्तमलिंगधारिणः ॥ २७ ॥ भावित्वादिति । नहि भवितव्यं केनापि परिहर्तुं शक्यत इत्यर्थः । अहनत् अहन् ॥ २८ ॥ ते त्वया ॥ २९ ॥ अधार्मिकप्रतिलोमजवधः कोऽयमधर्म इति चेत्तत्राहुः । अस्येति । पुराणप्रवचनायात्मनः शरीरस्य नास्ति क्लमो यस्मिंस्तदायुश्च दत्तमिति॥ ३०॥ब्रह्मवधेऽपि किं ममेश्वरस्येति चेत्सत्यमेव तथापि प्रायश्चित्तं कर्तव्यमित्याशयेनाहुः योगेश्वरस्येति सार्धेन । आम्नायो 'ब्राह्मणो न हंतव्यः'इत्यादिलक्षणः॥ ३१ ॥तथाऽप्येतस्या ब्रह्महत्यायाः पावनं प्रायश्चित्तं हे लोकपावनानन्यचोदितः स्वयमेव भवान्यदि करिष्यति तर्हि लोकसंग्रहो भविष्यति नान्यथेति॥ ३२॥वधस्य

ननु शुभाऽशुभकर्मफलभोक्तृत्वं कर्तुर्भवति किं तव शासने प्रयोजनमित्याह–विप्रानध्यास्तामित्यादिना । उत्तमलिंगधारिणो नीचा भूत्वोत्तमजातिचिह्नधारिणः । हि यतः । ते धर्मध्वजिनः । अधिका ब्रह्महत्यादिमहापातकिभ्योऽधिकपापिनः । सर्वेश्वराज्ञारूपवेदातिक्रमकारित्वात् ।"नैतस्मादधिकं पापमहं मन्ये नराधिप । यद्वेदातिक्रमो लोके विनापदमकारयत्॥" इत्यादिपुराणात् ॥ २७ ॥ तं सूतम् । इत्यर्थ इति–"भवितव्यं भवत्येव प्रतिकारे कृते खलु" इत्याद्युक्तेः । "न हि चलति कदाचिद्भाविनी कर्मरेखा" इत्याद्युक्तेश्चेति भावः । करस्थकुशचालनमात्रेण मृत्युमापेत्यर्थः ॥ २८ ॥ २९ ॥ अधार्मिकेत्यादि भगवदाक्षेपं समादधिरे । अस्य सूतस्य । "अग्निर्वै ब्राह्मणः" इति श्रुतेः ।::तदुद्भूतत्वादयं ब्राह्मण एवात एव ब्रह्मासनं वेदेतिहासपुराणवक्तृब्राह्मणयोग्यासनं दत्तमिति । क्लमो ग्लानिः ॥ ३० ॥ इवयथाशब्दाभ्यां जानतैव ब्रह्मवधः कृत इति प्रतीयते इत्याह–ब्रह्मवधेपीति । नियामक इत्थं कुर्वित्थं मा कुर्वित्येवं नियंता । न कुत इति चेदाह–योगेश्वरस्य ज्ञानिनामधिपतेः । "त्रैगुण्यविषया वेदाः" इत्युक्तेर्ज्ञानिनोऽतीतविधिनिषेधत्वेन कुतस्तदधिपस्य तदाशंकेति भावः । यद्यपि :न नियामकस्तथापीति । "न मे पार्थास्ति कर्तव्यं वर्त एव हि कर्मणि"इति श्रीमुखोक्तेः । अन्यथा प्रायश्चित्ताकरणे । जगदांध्यं प्रसज्येतेति भावः ॥ ३१ ॥ ३२ ॥ स तावान् । मुख्यकल्पे मुख्यविधौ 'कल्पः शास्त्रे विधौ न्याये' इति मेदिनी । उपदिश्यताम् उपसर्गवशाद्धातोरुपदेशार्थत्वम् । किं च–"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते । न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम्॥" इति शांतिपर्वण्यापद्धर्मोक्तेः । प्रभुणा श्रीबलदेवेन प्रथमकल्प एव स्वीकृतः । "अनुकल्पः परो धर्मो धर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीर्घमायुर्बतैतस्य सत्त्वमिंद्रियमेव च ॥ आशासितं यत्तद्ब्रूत साधये योगमायया ॥३४॥ ऋषय ऊचुः ॥ अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च ॥ यथा भवेद्वचः सत्यं तथा राम विधीयताम् ॥ ३५ ॥ श्रीभगवानुवाच ॥ आत्मा वै पुत्र उत्पन्न इति वेदानुशासनम् ॥ तस्मादस्य भवेद्वक्ता आयुरिंद्रियसत्त्ववान् ॥ ३६ ॥ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ ॥ अजानतस्त्वपचितिं यथा मे चिंत्यतां बुधाः ॥ ३७ ॥ ऋषय ऊचुः ॥ इल्वलस्य सुतो घोरो बल्वलोनाम दानवः ॥ स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ॥३८॥ तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परम् ॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणम् ॥ ३९ ॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः ॥ चरित्वा द्वादशान्मासांस्तीर्थस्नायी विशुध्यसे ॥ ४० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे बलदेवचरित्रे बल्वलवधोपक्रमोनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

निर्वेशं प्रायश्चित्तम् । प्रथमे कल्पे मुख्यकल्पे । विधीयतामुपदिश्यताम् ॥ ३३ ॥ किंच बत हे मुनयः एतस्य दीर्घमायुः सत्त्वं बलमिंद्रियं तत्पाटवं च अन्यच्च यद्भवद्भिराशासितमपेक्षितं तद्ब्रूत सर्वम् ॥ ३४ ॥ अस्त्रादीनां यथा सत्यता भवेदस्माकं च वचः सत्यं यथा भवेत्तथा विधीयतामित्यर्थः ॥ ३५ ॥ तथा संपादयन्नाह । आत्मा वा इति । " अंगादंगात्संभवसि हृदयादभिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतम् " इत्यादि वेदानुशासनं वेदवचनम् । तस्मादस्य रोमहर्षणस्य पुत्र उग्रश्रवा भवतां पुराणप्रवक्ता भवेत्स चायुरादिमांश्च भवेत् अतः साक्षादजीवनादस्त्रस्य मृत्योश्च सत्यता पुत्ररूपेण चायुरादिसिद्धेर्युष्मद्वचनस्यापि सत्यता स्यादिति भावः ॥ ॥ ३६ ॥ प्रथमं तावदपेक्षितं कथयत तदहं करिष्यामीत्याह । किं वः काम इति । किंविषयो वः कामो वर्तते तद्ब्रूतेति । अथानंतरं ब्रह्मदंडं गृहीत्वाऽपचितिं निष्कृतिमजानतो मे हे बुधा यथावच्चिंत्यतामपचितिरिति ॥ ३७ ॥ प्रथमं तावदपेक्षितं कर्तव्यं कथयंति इल्वलस्येति द्वाभ्याम् ॥ ३८ ॥ ३९ ॥ प्रायश्चित्तमाहुः । ततश्चेति । परीत्य प्रदक्षिणीकृत्य । सुसमाधानादिगुणविशेषादेकाब्दमात्रमुक्तमित्यविरोधः । सुसमाहितः कामक्रोधादिरहितः । चरित्वा कृच्छ्राणि ॥ ४० ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायामष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

वादैस्तु केवलम् । विश्वैर्देवैश्च साध्यैश्च ब्राह्मणैश्च महर्षिभिः ॥ अन्यस्तुमरणाद्वीतैर्विधिः प्रतिनिधीकृतः ।" इत्यपि तत्रैव ॥ ३३ ॥ स्वसामर्थ्यं द्योतयन्नाह—किञ्चेति । एतस्य मृतसूतस्य । योगमायया निजैश्वरीसामर्थ्येन ॥ ३४ ॥ इत्यर्थ इति—अस्त्रवीर्ययोरमोघत्वं मृत्योरनावृत्तित्वमस्मद्वचसश्चावंध्यफलत्वं यथा स्यात्तथा कुर्विति भावः ॥ ३५ ॥ यथा मुनिभिरुक्तं तथा संपादयन्नित्यर्थः । अंगादंगात्पृथक्पृथगंगात्तत्तदंगरूपेण स त्वं जीवेत्यर्थः । स चोग्रश्रवाः । अतस्तत्पुत्रस्य तादृशकरणात् । इति भाव इति—तस्यैव जीवनादिना सर्वमेवासमंजसं भवेदित्याशयः ॥ ३६ ॥ यदन्यदभीप्सितं तदपि ब्रूतेत्याह—प्रथममित्यादि । निष्कृतिं प्रायश्चित्तं यथाऽजानतः प्रायश्चित्तं भवद्भिः कथ्यते तथा जानतोपि मे कथ्यतां ब्राह्मणाज्ञां विना करणात्फलानिष्पत्तिः । " श्रौतं स्मार्तं च यत्कर्म जानतापि च सर्वथा । विप्राज्ञयैव कर्तव्यमन्यथा निष्फलं हि तत् ॥" इति वारतंतव्युक्तेः ॥ ३७ ॥ तावदधुना । पर्वण्यमायां पौर्णमास्यां चेत्यर्थः ॥ ३८ ॥ तं बल्वलम् । तत् हननम् ॥ ३९ ॥ ततो बल्वलहननोत्तरम् । ननु ब्रह्मघ्नो द्वादशाब्दप्रायश्चित्तस्य " द्वादशाब्दाविति चरेद्ब्रह्मघ्नस्तत्कपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ ततः पर्वण्युपावृत्ते प्रचंडः पांसुवर्षणः ॥ भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः ॥१॥ ततोऽमेध्यमयं वर्षं बल्वलेन विनिर्मितम् ॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥ २ ॥ तं विलोक्य बृहत्कायं भिन्नांजनचयोपमम् ॥ तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखम् ॥ ३ ॥ सस्मार मुसलं रामः परसैन्यविदारणम् ॥ हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ॥ ४ ॥ तमाकृष्य हलाग्रेण बल्वलं गगनेचरम् ॥ मुसलेनाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ॥ ५ ॥ सोऽपतद्भुवि निर्भिन्नललाटोऽसृक्समुत्सृजन् ॥ मुंचन्नार्तस्वरं शैलो यथा वज्रहतोऽरुणः ॥ ६ ॥ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः ॥ अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा ॥ ७ ॥ वैजयंतीं ददुर्मालां श्रीधामाम्लानपंकजाम् ॥ रामाय वाससी दिव्ये दिव्यान्याभरणानि च ॥ ८ ॥ अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्मणैः ॥ स्नात्वा सरोवरमगाद्यतः सरयुरास्रवत् ॥ ९ ॥ अनुस्रोतेन सरयूं प्रयागमुपगम्य सः ॥ स्नात्वा संतर्प्य देवादीञ्जगाम पुलहाश्रमम् ॥ १० ॥ गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः ॥ गयां गत्वा पितॄनिष्ट्वा गंगासागरसंगमे ॥ ११ ॥

ऊनाशीतितमे रामो बल्वलं द्विजतुष्टये ॥ निहत्य तीर्थस्नानाद्यैः सूतहत्यामपानुदत् ॥ १ ॥ १ ॥ उपावृत्ते प्राप्ते ॥ २ ॥ भिन्नो विदीर्णोऽञ्जनचय उपमा यस्य तमति कृष्णमित्यर्थः । तप्तताम्रवच्छिखाश्मश्रूणि च यस्य तम् । दंष्ट्राभिरुग्रं भ्रुकुटीयुतं मुखं यस्य तम् ॥ ३ ॥ ४ ॥ ५ ॥ अरुणो रुधिरेण दैत्यः । शैलो धातु[illegible]र्यथेति ॥ ६ ॥ ७ ॥ श्रियो धामान्यम्लानानि पंकजानि यस्यां ताम् ॥ ८ ॥ किं तत्सरः । यत इति । आस्रवदुद्गात् ॥ ९ ॥ अनुस्रोतेनानुलोमतः पुलहाश्रमं हरिक्षेत्रम् ॥ १० ॥ गोमत्यां गंडक्यां विपाशायां च स्नात्वा शोणे च आप्लुतः इष्ट्वा संपूज्य ॥ ११ ॥

लभृत् । ख्यापयन्नात्मनः कर्म भिक्षां विप्रेषु संचरन् ॥ " इत्यादिना पाराशराद्यैर्विहितत्वात्तद्विरुद्धं 'द्वादशान्मासान्' इति कथमुच्यते–इति चेत्तत्राह–सुसमाधानादीति । समाधानं चित्तैकाग्र्यम् । आदिना बाह्येंद्रियनिग्रहादि ग्रहः । गुणविशेषसंबंधादेकाब्दोऽपि दक्षिणाविशेषयोगाद्युधिष्ठिरैकाश्वमेधस्याश्वमेधत्रयतुल्यत्ववद्द्वादशाब्दवद्भवतीत्युक्तमविरोध इति । कृच्छ्राणीति शेषः । कृच्छ्राणि कृच्छ्रतप्तकृच्छ्रपर्णकृच्छ्रातिकृच्छ्रादीनि । "एकभक्तैश्च नक्तैश्च तथैवायाचितैरपि । उपवासैश्चतुर्भिश्च कृच्छ्रः षोडशभिर्दिनैः ॥" इत्यादिना पराशरादिभिरुक्तलक्षणानि बहूनि संति विस्तरभियेह नोक्तानीति । द्वादशान् द्वादश ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धेऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ आदिना कृच्छ्रादिग्रहः (१) । ततः वरदानोत्तरम् ॥ १ ॥ ततो दुर्गंधप्राप्त्युत्तरम् । स बल्वलः ॥ २ ॥ तं बल्वलम् । इत्यर्थ इति–ततोधिकमन्यत्र कार्ष्ण्यं नास्तीति भावः ॥ ३ ॥ ते हलमुसले ॥ ४ ॥ तं दैत्यम् ॥ ५ ॥ स बल्वलः ॥ ६ ॥ ७ ॥ वैजयंतीं विजयकरीम् ॥ ८ ॥ अथ वस्त्रमालादिसत्कारानंतरम् । तैर्ब्राह्मणैः । मानसं सरोवरम् । यतः सरोवरात् ॥ ९ ॥ स बलः । आदिना दिव्यपित्रादिग्रहः ॥ १० ॥ पितॄनिति–ननु जीवत्पितृकेण रामेण कथं पितृयागः कृत इति चेदाह–" वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाऽभिवाद्य च ॥ सप्तगोदावरीं वेणां पंपां भीमरथीं ततः ॥ १२॥ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयम् ॥ द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेङ्कटं प्रभुः ॥१३॥ कामकोष्णीं पुरीं कांचीं कावेरीं च सरिद्वराम् ॥ श्रीरङ्गाख्यं महापुण्यं यत्र सन्निहितो हरिः ॥ १४ ॥ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा ॥ सामुद्रं सेतुमगमन्महापातकनाशनम् ॥ १५ ॥ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः ॥ कृतमालां ताम्रपर्णीं मलयं च कुलाचलम् ॥ १६ ॥ तत्रागस्त्यं समासीनं नमस्कृत्याभिवाद्य च ॥ योजितस्तेन चाशीर्भिरनुज्ञातो गतोर्णवम् ॥ दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः ॥ १७ ॥ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमम् ॥ विष्णुः सन्निहितो यत्र स्नात्वाऽस्पर्शद्गवायुतम् ॥ १८ ॥ ततोऽभिव्रज्य भगवान्केरलांस्तु त्रिगर्तकान्॥गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः॥१९॥आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः॥तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकम् ॥२०॥ प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी ॥ मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत्॥२१॥श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगे ॥ सर्वराजन्यनिधनं भारं मेने हृतं भुवः ॥ २२ ॥ स भीमदुर्योधनयोर्गदाभ्यां युध्यतोर्मृधे ॥ वारयिष्यन्विनशनं जगाम यदुनंदनः ॥ २३ ॥ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः ॥ २४ ॥

॥ १२ ॥ श्रीशैलं श्रीपर्वतम्॥ १३ ॥ कांचीं पुरीम् ॥ १४ ॥ १५ ॥ १६ ॥ दक्षिणमर्णवम् ॥ १७ ॥ फाल्गुनमनंतपुरम् । पंचाप्सरसं सरः । अस्पर्शदस्पृशत ददौ ॥ १८ ॥ केरलादीन्देशान् ॥ १९ ॥ द्वीपमयनं यस्यास्ताम् ॥ २० ॥ २१॥२२॥ विनशनं कुरुक्षेत्रम् ॥ २३ ॥ विवक्षुर्वक्तुमिच्छुः । किं वदिष्यतीति भिया तूष्णीमासन्निति ॥ २४ ॥

इति स्मृतेर्जीवत्पितृपितामहस्यापि श्राद्धेऽधिकारो न तु जीवत्पितृपितामहप्रपितामहस्यापीति । यच्चोक्तम्–"अमाश्राद्धं गयाश्राद्धं न कुर्यात्सपिता पुमान्" इति । तत्तु जीवत्पितृकेण गयामुद्दिश्य न गंतव्यमित्येवंपरं प्रसंगात्प्राप्तौ तु श्राद्धं कार्यमेवेति तत्त्वम् ॥ ११ ॥ उपस्पृश्येति पूर्वान्वयि । रामं जामदग्न्यम् । ततो रामदर्शनानंतरम् । सप्तशाखाभेदेन समुद्रं गताऽतः सप्तगोदावरीति ॥ १२ ॥ वेंकटमद्रिम् ॥ १३ ॥ यत्र श्रीरंगक्षेत्रे ॥ १४ ॥ दक्षिणा मथुराऽन्या व्रजानंतर्गतेति । तथा दृष्ट्वा । महापातकानि ब्रह्महत्यादीनि "केदारं रामसेतुं च दृष्ट्वा भारतसंहिताम् । श्रुत्वा कोटिश्च गायत्र्या ब्रह्महत्यां व्यपोहति ॥" इति पुराणांतरात् ॥ ॥ १५ ॥ तत्र रामसेतौ । कृतमालादीनां ययाविति शेषः ॥ १६ ॥ तत्र मलये । तेनागस्त्येन । तत्र दक्षिणार्णवतटे । स बलदेवः ॥ १७ ॥ ततः कन्यादेवीदर्शनोत्तरम् । फाल्गुनम्–अर्जुनेन तत्र ग्राहभावमिताः पंचाप्सरसो मोचिता इति फाल्गुनेन प्रकाशितत्वात्तत्संज्ञमिति । यत्र पंचाप्सरससरसि । गुण आर्षः ॥ १८ ॥ ततो गोदानानंतरम् । यत्र गोकर्णक्षेत्रे । धूर्जटेः शिवस्य ॥ १९ ॥ आर्यां दुर्गाम् । द्वैपायनीं द्वीपवासिनीं व्यासस्थापितां वा । शूर्पारकं क्षेत्रम् । अथ निर्विंध्यास्नानोत्तरम् । दंडकं वनम् ॥ २० ॥ यत्र रेवातटे ॥ २१ ॥ २२ ॥ विशेषेण नश्यति पापं यत्र तद्विनशनम् । स बलः ॥ २३ ॥ तं बलम् । किं किंचिद्विव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ ॥ मंडलानि विचित्राणि चरंताविदमब्रवीत् ॥२५॥ युवां तुल्यबलौ वीरौ हे राजन्हे वृकोदर॥एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकम्॥ २६ ॥ तस्मादेकतरस्येह युवयोः समवीर्ययोः ॥ न लक्ष्यते जयोऽन्यो वा विरमत्वऽफलो रणः ॥ २७ ॥ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् ॥ अनुस्मरंतावन्योन्यं दुरुक्तं दुष्कृतानि च ॥ २८ ॥ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ॥ २९ ॥ तं पुनर्नैमिषं प्राप्तमृषयोऽयाजयन्मुदा ॥ क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहम् ॥ ३० ॥ तेभ्यो विशुद्धविज्ञानं भगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ॥ ३१ ॥ स्वपत्न्यावभृथस्नातो ज्ञातिबंधुसुहृद्वृतः ॥ रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः ॥ ३२ ॥ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः ॥ अनंतस्याप्रमेयस्य मायामर्त्यस्य संति हि ॥ ३३ ॥ योऽनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः ॥ सायं प्रातरनंतस्य विष्णोः स दयितो भवेत् ॥३४॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे बलदेवतीर्थयात्रानिरूपणं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ राजोवाच ॥ भगवन्यानि चान्यानि मुकुंदस्य महात्मनः ॥ वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामहे प्रभो ॥ १ ॥

॥ २५ ॥ २६ ॥ अन्यः पराजयो वा । रणः संग्रामः ॥ २७ ॥ अर्थवद्वाक्यम् ॥ २८ ॥ दिष्टं प्राचीनं कर्म । समुपागतः संगतः ॥ २९ ॥ क्रत्वंगं यज्ञमूर्तिम् ॥ ३० ॥ आत्मन्यधिष्ठाने विश्वगं सर्वानुस्यूतं येनैव विदुः पश्यंति तद्विशुद्धं विज्ञानं व्यतरददात् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायामेकोनाशीतितमोऽध्यायः ॥ ७९ ॥ छ ॥ अथाशीतितमे कृष्णः श्रीदामानं गृहागतम् ॥ संपूज्यापृच्छदर्थेप्सुं गुरुवासकथां मुदा ॥ १ ॥ सुरारिमारको हरिः पुरा चकार शं सताम् ॥ अतः परं विनैव तन्निजोपकारमाचरत् ॥ २ ॥ रामचरितानि श्रुत्वा पुनर्मुकुंदवीर्याणि पृच्छति । हे भगवन् श्रोतुमिच्छामे

क्षतीति वा किंविवक्षुः ॥ २४ ॥ संरब्धौ क्रुद्धौ । इदं वक्ष्यमाणम् ॥ २५ ॥ प्राणाधिकं बलाधिकं भीमम् 'प्राणो हृन्मारुते बले' इति धरणिः ॥ २६ ॥ यतः समवीर्यौ तस्माद्धेतोः । अन्यः पराजयः ॥ ॥ २७ ॥ तद्वाक्यं रामवाक्यम् । अर्थवद्युक्तियुक्तम् । दुरुक्तं द्रौपदीमुद्दिश्य दुर्वचनम् । दुष्कृतानि जतुगृहदाहादीनि ॥ २८ ॥ तन्निजवाक्यानादरणं युद्धं वा ॥ २९ ॥ तं रामम् । सर्वैः प्रकृतिविकृतियागैः । निवृत्ताखिलविग्रहं दूरीभूतसर्वदुरितम् "काये तापे तथा पापे विरोधे विग्रहो ग्रहे" इति निरुक्तिः ॥ ३० ॥ तेभ्य ऋषिभ्यः । येनैत्र ज्ञानेनैव ॥ ३१ ॥ स्वपत्न्या रेवत्या ॥ ३२ ॥ ईदृग्विधानि पाखंडिदमनासुरहरणशुभाचरणलक्षणानि॥३३॥ स स्मर्ता ॥३४॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे एकोनाशीतितमोऽध्यायः ॥७९॥अथ बलदेवतीर्थयात्रानंतरम् । अर्थेप्सुं धनार्थिनम् (१) । पुरा पूर्वोपाख्यानेषु । शं कल्याणम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

को नु श्रुत्वा सकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः ॥ विरमेत विशेषज्ञो विषण्णः काममार्गणैः ॥ २ ॥ सा वाग्यया तस्य गुणान्गृणीते करौ च तत्कर्मकरौ मनश्च ॥ स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः ॥ ३ ॥ शिरस्तु तस्योभयलिंगमानमेत्तदेव यत्पश्यति तद्धि चक्षुः ॥ अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यम् ॥ ४ ॥ सूत उवाच ॥ विष्णुरातेन संपृष्टो भगवान्बादरायणिः ॥ वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ॥ ५ ॥ श्रीशुक उवाच ॥ कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो ब्रह्मवित्तमः ॥ विरक्त इन्द्रियार्थेषु प्रशांतात्मा जितेंद्रियः ॥ ६ ॥

त्यन्वयः ॥ १ ॥ उत्तमश्लोकस्य श्रीकृष्णस्य । सत्यो मनोहरा विषयवैतृष्ण्यजनिकाः कथाः । विशेषज्ञः सारवित् । विषण्णो विषादं प्राप्तः ॥ २ ॥ कथाश्रवणं स्तुवन् दृष्टांततयाऽन्यार्थानाह । सा वागिति । तावेव करौ यौ तत्कर्मकर्तारौ । तदेव मनो यत्स्थिरजंगमेषु वसंतं स्मरेत् । यस्तस्य पुण्याः कथाः शृणोति स एव कर्णः ॥ ३ ॥ उभयलिंगं स्थिरं जंगमं च तस्यैव लिंगमिति मत्वा आनमेत्तदेव शिरः । तदेव तस्य लिंगमित्येव यत्पश्यति तदेव चक्षुः । तान्येवांगानि यानि पादोदकं भजं

अतो दैत्यहननेन सज्जनावनात्।तं सुरारिनाशम्।निजा भक्ताः (२)। अधुना न केवलं हरिभक्तानां पारत्रिकमेव सुखं किंत्वैहिकमप्यलौकिकं तद्भवतीत्यध्यायद्वयेनाह—अन्यानि असुरसंहारादितराणि भक्तवात्सल्यबोधकानि॥ १ ॥ २ ॥यया वा चा । तत्कर्मार्चनादि कुरुत इति । तथा अनेन वागादिपदानामन्वर्थतोक्ता । वक्तीति वाक् । करोतीति करः । मन्यते जानातीति मनः । कर्णयति शृणोतीति कर्णः । क्रमाद्वचिकृञ्मनिकर्णीनां परिभाषणकरणज्ञानाकर्ण नार्थकानां धातूनामेतेऽन्वर्थकाः प्रयोगाः ॥ ३ ॥ तस्यैव भगवतो लिंगं मूर्तिम् " लिंगं चिह्ने तु माने च मूर्तिप्रकृतिहेतुषु । शिश्ने च शिवलिंगे च ज्ञानज्ञापकयोरपि ॥ " इति निरुक्तिः । तज्जनानां हरिभक्तानाम् । ' श्रिञ्—सेवायाम् ' । अस्य नमनलक्षणसेवायां शिर इति निपात्यते । चष्टे पश्यतीति चक्षुः । दर्शनेऽपि चक्षिरस्ति । अंगंति पानस्नानादिरूपां सेवां प्राप्नुवंतीत्यंगानि । अथ कोर्थो मंगलानि शुभानि । अथेति मंगला नंतरारंभकात्स्न्याधिकारसमुच्चयेष्विति । एतेन शीर्षादीनामप्यन्वर्थतोक्ता ॥ ४ ॥ निमग्नहृदयः प्रविष्टचेताः ॥ ५ ॥ " श्रीदामानौ सखायौ द्वौ लांगलिवासुदेवयोः । एको गोपाललीलायां द्वितीयः शास्त्रचिंतने ॥ आद्यो गोपः परो विप्रो द्वावेव परमप्रियौ । रामकेशवयोर्ज्ञेयौ श्रीकृष्णस्य विशेषतः ॥ " इति बृहत्संहितोक्तेः । " श्रीदामानाम गोपालो रामकेशवयोः सखा " इदमेवार्द्धं पृथुकोपाख्यानेऽपि मंडूकप्लुतिन्यायेनानेयं तत्र गोपालपदं श्लेषेण गा वेदलक्षणा वाणीः पालयते तदुक्तानुष्ठानेनेति गोपालो विप्र इति वक्ति । अत एव स्वामिचरणैश्श्रीदामसुहृद इति व्याख्यातम् । किंच तत्रैव श्रीदामपदार्थोऽप्युक्तः—" अमर्त्यालभ्या या संपत्सा श्रीरित्यभिधीयते। श्रीशेन दत्ता सा यस्मै स श्रीदामाभिधीयते ॥ " तच्चेहोक्तं स्वयं भगवता—"प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः " इति । एतेन श्रीदामपदं पृथुकोपाख्याने नास्ति प्रत्युक्तं प्राप्तो मामित्यादिवाक्येन सूचितत्वात् । ननु कश्चिदित्युक्तेस्सुदामेतर एव किं न स्यात्तत्रेदं बोध्यम् । " श्रीदामनामभक्तार्थं भूम्यानीतेंद्रवैभवे " इत्यष्टोत्तरशतनामपाठात्स एवेति। साक्षात्तन्नाम तु श्रीकृष्णस्य ज्येष्ठगुरुभ्रातृत्वेन गुरुत्वादेव श्रीयोगींद्रेण नोपात्तम् । " आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठपुत्रकलत्रयोः॥" इति स्मृतेः । यद्वा—'ब्राह्मणो ब्रह्मवित्तमः' इत्यनेनैव सुदामश्रीदामनाम्नोर्ग्रहणमर्थैक्येन पर्यायत्वात्, तथाहि—ब्रह्मणो वेदस्य विल्लाभो यस्मात्स ब्रह्मवित् । वेदनं वित् विल्लाभोऽतो भावे क्विप् । वेदाध्यापकत्वेनात्युदारोऽतिशयेर्थे तमपो विधानात् । "सर्वेभ्य एव दानेभ्यो विद्यादानं विशिष्यते । अहार्यधनमेतद्धि तद्दाता सर्वदायकः ॥ " इति स्मृतेः । सुष्ठु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदृच्छयोपपन्नेन वर्तमानो गृहाश्रमी ॥ तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा ॥७॥ पतिव्रता पतिं प्राह म्लायता वदनेन सा॥दरिद्रा सीदमाना सा वेपमानाभिगम्य च॥८॥ ननु ब्रह्मन्भगवतः सखा साक्षाच्छ्रियः पतिः ॥ ब्रह्मण्यश्च शरण्यश्च भगवान्सात्वतर्षभः॥९॥तमुपेहि महाभाग साधूनां च परायणम् ॥ दास्यति द्रविणं भूरि सीदते ते कुटुंबिने ॥१०॥ आस्तेऽधुना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः ॥ स्मरतः पादकमलमात्मानमपि यच्छति ॥ किं त्वर्थकामान्भजते नात्यभीष्टाञ्जगद्गुरुः॥११॥ स एवं भार्यया विप्रो बहुशः प्रार्थितो मृदु ॥ अयं हि परमो लाभ उत्तमश्लोकदर्शनम् ॥१२॥ इति संचिंत्य मनसा गमनाय मतिं दधे ॥ अप्यस्त्युपायनं किंचिद्गृहे कल्याणि दीयताम् ॥१३॥ याचित्वा चतुरो मुष्टीन्विप्रान्पृथुकतंडुलान् ॥ चैलखंडेन तान्बद्ध्वा भर्त्रे प्रादादुपायनम्॥१४॥स तानादाय विप्राग्र्यः प्रययौ द्वारकां किल॥कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन् ॥१५॥ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च सद्विजः ॥ विप्रोऽगम्यांधवृष्णीनां गृहेष्वच्युतधर्मिणाम्॥१६॥ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः ॥ विवेशैकतमं श्रीमद्ब्रह्मानंदं गतो यथा॥१७॥ तं विलोक्याच्युतो दूरात्प्रियापर्यंकमास्थितः ॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्यग्रहीन्मुदा ॥ १८ ॥ सख्युः प्रियस्य विप्रर्षेरंगसंगादिनिर्वृतः ॥ प्रीतो व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः ॥ १९ ॥ अथोपवेश्य पर्यंके स्वयं सख्युः समर्हणम् ॥ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः ॥ २० ॥

तीति ॥ ४ ॥ ५ ॥ ६ ॥ तथाविधा कुचैला । किंच क्षुत्क्षामा यत्किंचित्संपन्नमन्नं तस्मै परिविष्य स्वयं क्षुधा जीर्णा ॥ ७ ॥ पतिव्रता सती । म्लायता शुष्यता वदनेन । सीदमाना भर्तुर्भोगसंपादनाशक्त्याऽवसीदंती । वेपमाना भयेन कंपमाना ॥८॥९॥ १० ॥ भोजवृष्ण्यंधकेश्वर इति तत्स्वीकारमात्रेण सर्वे ते दास्यंतीति भावः । नात्यभीष्टान्परिपाकविरसत्वात् ॥११॥१२॥ अप्यस्ति किमस्तीति प्रश्नः ॥१३॥१४॥ मह्यं मम ॥१५॥ गुल्मानि रक्षार्थं सैन्यस्थानानि । कक्षाः प्रतोलीः । अतीयायातिक्रम्य जगाम । सद्विजः द्विजैः सहितः । ततश्च अगम्या दुर्गमा येंऽधा अंधका वृष्णयश्च तेषां गृहेषु ॥१६॥ तथा हरेर्द्व्यष्टसहस्राणां महिषीणां च ये गृहास्तेषु मध्ये श्रीमदेकतमगृहं विवेश । तदा च स द्विजो ब्रह्मानंदं गतो यथा तथा बभूवेति शेषः ॥१७॥ पर्यग्रहीत्पर्यरंभत ॥१८॥अब्बिंदूनानंदाश्रूणि॥१९॥ समर्हणमुपायनमुपहृत्य

ददातीति सुदामा । श्रीः ददातीति श्रीदामा सुष्ठुश्रीशब्दवाचको वेद एव "सा हि श्रीरमृता सताम्" इति श्रुतेः ॥ ६॥ तस्य विप्रस्य । तथाविधा भर्तृवन्मलिनवस्त्रा । न केवलं मलिनांबरैवेत्याह–किंचेति ॥७॥८॥९॥ तं भगवन्तम् । ते तुभ्यम् । सीदते दरिद्राय ॥ १० ॥ ते भोजादयः । इति भाव इति–स्वामिनाऽऽदृतस्य भृत्याः परमादरं कुर्वंतीति प्रसिद्धेः । परमार्थमाह–किंत्विति । पाकविरसान् परिणामे संतापकरान् । जगद्गुरुः सर्वहितकर्तेति हेतुगर्भितविशेषणम् ॥ ११ ॥ स विप्रः ॥ १२ ॥ इति हरिदर्शनलाभम् ॥ १३ ॥ 'पृथुकः स्याच्चिपिटके' इत्यमरः ॥ १४ ॥ तान्पृथुकतंडुलान् ॥ १५ ॥ प्रतोलीः रथ्याः 'रथ्या प्रतोली विशिखा' इत्यमरः । ततो गुल्मादिलंघनानन्तरम् । अच्युतधर्मिणामनवच्छिन्नधर्माणां हरिभक्तानां वा ॥ १६ ॥ तदा च गृहप्रवेशावसरे ॥ १७ ॥ तं विप्रम् ॥ १८ ॥ १९ ॥ अथांगसंगानन्तरम् । अस्य विप्रस्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्रहीच्छिरसा राजन्भगवाँल्लोकपावनः ॥ व्यलिंपद्दिव्यगंधेन चंदनागुरुकुंकुमैः ॥ २१ ॥ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा ॥ अर्चित्वाऽऽवेद्य तांबूलं गां च स्वागतमब्रवीत् ॥ २२ ॥ कुचैलं मलिनं क्षामं द्विजं धमनिसंततम् ॥ देवी पर्यचरत्साक्षाच्चामरव्यजनेन वै ॥ ॥ २३ ॥ अंतःपुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना ॥ विस्मितोऽभूदतिप्रीत्या अवधूतं सभाजितम् ॥ २४ ॥ किमनेन कृतं पुण्यमवधूतेन भिक्षुणा ॥ श्रिया हीनेन लोकेऽस्मिन्गर्हितेनाधमेन च ॥ २५ ॥ योऽसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः ॥ पर्यंकस्थां श्रियं हित्वा परिष्वक्तोऽग्रजो यथा ॥ ॥२६॥ कथयांचक्रतुर्गाथाः पूर्वा गुरुकुले सतोः ॥ आत्मनोर्ललिता राजन्करौ गृह्य परस्परम् ॥२७॥ श्रीभगवानुवाच ॥ अपि ब्रह्मन्गुरुकुलाद्भवता लब्धदक्षिणात् ॥ समावृत्तेन धर्मज्ञ भार्योढा सदृशी न वा॥२८॥प्रायो गृहेषु ते चित्तमकामविहतं तथा॥नैवातिप्रीयसे विद्वन्धनेषु विदितं हि मे॥२९॥ केचित्कुर्वंति कर्माणि कामैरहतचेतसः ॥ त्यजंतः प्रकृतीर्दैवीर्यथाऽहं लोकसंग्रहम् ॥ ३० ॥

समर्प्य । पादावनेजनीरपः ॥ २० ॥ २१ ॥ २२ ॥ धमनिभिः शिराभिः संततं व्याप्तम् ॥ २३ ॥ अवधूतं मलिनम् ॥ २४ ॥ विस्मयमाह किमनेनेति द्वाभ्याम् ॥ २५ ॥ संभृतः संमानितः ॥ २६ ॥ सतोर्वसतोः गृह्य गृहीत्वा ॥ २७ ॥ भार्या ऊढा परिणीता नवेति गृहस्थलिंगदर्शनाद्भोगादर्शनाच्च संशयादिव प्रश्नः ॥ २८ ॥ अप्रतिषेधादुद्वाहमनुमतं मत्वाऽऽह । प्राय इति । तर्हि ते चित्तं नूनमकामविहतं कामैर्विहतं न भवतीति मे विदितम् । तथाहि धनेषु वस्त्रादिषु नैवातिप्रीयसे । हे विद्वन्निति । विदुषस्तवैतद्युक्तमिति भावः ॥ २९ ॥ कामहतत्वाभावे किं गृहधर्मक्लेशेनेत्याशंक्याह । केचिदिति । दैवीरीश्वरमायारचिताः प्रकृतीर्विषयवासनास्त्यजंतः । कामैरनाकृष्टचेतसामपि। कर्मकरणे दृष्टांतः।यथाऽहमिति।लोकसंग्रहं लोकस्य संग्रहो ग्रहणं यथा भवति तथाऽहमीश्वरोऽपि कर्माणि यथा करोमि तद्वत् ॥ ३० ॥

॥ २० ॥२१॥ गां चेति व्याख्यातमक्रूरोपाख्याने ॥२२॥ शिरा नाडी " धमनी तु शिराहट्टविलासिन्योस्तु योषिति " इति मेदिनी । शैब्या भद्रा । अत्र ' देवी पर्यचरत्साक्षात् ' इति पाठ एव श्रीधरसंमतः । अग्रे ' पर्यंकस्थां श्रियं हित्वा ' इत्यत्र " तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः " इत्यत्र च श्रीपदोपादानात्स्वामिभिः शैब्यापरत्वेन व्याख्यानाच्च । अत एव चक्रवर्तिना ' गृहं द्व्यष्टसहस्राणाम् ' इत्यत्र रुक्मिणीगृहमिति व्याख्याय तत्र पाद्मोत्तरखण्डवाक्यं प्रमाणत्वेन न्यस्तम् । 'स तु रुक्मिण्यंतःपुरद्वारि क्षणं तूष्णीं स्थितः ' इति । बालबोधिन्यां शैब्येति पाठमंगीकृत्य शैब्या लक्ष्मणेति व्याख्याय श्रीपदं लक्ष्म्यंशभूतलक्ष्मणापरत्वेन व्याख्यातम् । तत्र च शैब्याशब्दस्य लक्ष्मणापर्यायत्वे मानमन्वेष्यम् । अशीतितमाध्याये ' शैब्ये रोहिणि लक्ष्मणे ' इत्यत्र शैब्ये मित्रविंदे इति पर्यायालेखनात्परस्परविरोधो विवेचनीयः सुधीभिरिति । अतः शैब्येति पाठोऽशोभनः प्रतिभाति ॥ ॥ २३ ॥ २४ ॥ किमनिर्वचनीयम् ॥ २५ ॥ श्रियं श्र्यंशभूतां शैब्याम् ॥ २६ ॥ आत्मनोर्निजयोः ॥ २७ ॥ गृहस्थलिंगमुष्णीषबन्धनादि । भुज्यंते इति भोगा वस्त्रभूषणादयः ॥ २८ ॥ अप्रतिषेधान्मया विवाहो न कृत इत्युत्तराप्रदानात् । इति भाव इति—नहि संसारतत्त्वविदो विषयासक्ता भवंतीत्याशयः ॥ २९ ॥ स्वयमाशंक्य समाधत्ते—कामहतत्वेत्यादिना । " यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः । मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ. कच्चिद्गुरुकुले वासं ब्रह्मन्स्मरसि नौ यतः ॥ द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते ॥ ३१ ॥ स वै सत्कर्मणां साक्षाद्द्विजातेरिह संभवः ॥ भा. दी. प्र.
श्री. टी. आद्योऽग यत्राश्रमिणां यथाऽहं ज्ञानदो गुरुः ॥ ३२ ॥ नन्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ॥ ये मया गुरुणा वाचा तरंत्यंजो भवार्णवम् ॥ ३३ ॥ टीका.
नाहमिज्याप्रजातिभ्यां तपसोपशमेन च ॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ ३४ ॥ अपि नः स्मर्यते ब्रह्मन्वृत्तं निवसतां गुरौ ॥
॥४०१॥ गुरुदारैश्चोदितानामिंधनानयने क्वचित् ॥ ३५ ॥ अ० ८०

नौ आवयोः । यतो गुरोः विज्ञेयं परमात्मतत्त्वम् । तमसः संसारस्य ॥ ३१ ॥ तत्रात्मज्ञानप्रदस्य गुरोरत्यंतं पूज्यत्वं वक्तुं पुरुषस्य त्रीन् गुरूनाह । स वा इति । इह संसारे यत्र संभवो जन्ममात्रं स पिता तावदाद्यः प्रथमो गुरुः पूज्यः । कर्मविद्याप्रदं गुरुमाह । द्विजातेः सतः पुंसः सत्कर्मणां यत्र संभवः उपनीय वेदाध्यापक इत्यर्थः । स द्वितीयो गुरुर्यथाऽहमीश्वरस्तथा प्रथमादपि पूज्य इत्यर्थः । ब्रह्मविद्याप्रदं गुरुमाह । आश्रमिणां सर्वेषामपि ज्ञानदो यः स तु साक्षादहमेवेति ॥ ३२ ॥ अतो ज्ञानप्रदं गुरुरूपं मामाश्रित्य ये संसारं तरंति ते बुद्धिमंत इत्याह । नन्विति । हे ब्रह्मंस्ते ननु वर्णाश्रमवतां मध्येऽर्थकोविदाः । इह मनुष्यजन्मनि तत्रापि वर्णाश्रमवत्त्वे सति ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेणांजः सुखेनैव भवार्णवं तरंतीति ज्ञानप्रदाद्गुरोरधिकः सेव्यो नास्तीत्युक्तम् ॥ ३३ ॥ अत एव तद्भजनादधिको धर्मश्च नास्तीत्याह । नाहमिति । इज्या गृहस्थधर्मः प्रजातिः प्रकृष्टं जन्म उपनयनं तेन ब्रह्मचारिधर्म उपलक्ष्यते । ताभ्यां तथा तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण वा अहं परमेश्वरस्तथा न तुष्येयं यथा सर्वभूतात्माऽपि गुरुशुश्रूषयेति ॥ ३४ ॥ किंच अस्माकं गुरुशुश्रूषणं किमपि दैवादेव संपन्नं तत्किं त्वया स्मर्यत इति पृच्छति । अपि न इति । गुरौ

इति श्रीमुखोक्तेः ॥ ३० ॥ पारं परमात्मानम् ‘ यस्तस्य पारेऽभिविराजते परः ’ इत्याद्युक्तेः ॥ ३१ ॥ तत्र तावत् । इत्यर्थ इति—आचार्य इति भावः । इत्यर्थ इति—“ उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ” इति मात्स्ये । ब्रह्म गायत्री वेदो वेति ज्ञेयम् । अहमेवेति—“ददामि बुद्धियोगं तं येन मामुपयांति ते ” इति गीतोक्तेः ॥३२॥ यतस्त्रयाणां गुरूणां मध्ये ज्ञानद एव श्रेष्ठोऽतो हेतोः । तत्रापि मनुष्यजन्मन्यपि॥३३॥अत एव ज्ञानप्रदगुरोर्मद्रूपत्वादेव । तद्भजनाज्ज्ञानदगुरुसेवातः । सर्वभूतात्मापि गुरुसेवातोऽहं यथा तुष्ये तथा नान्यधर्मैरिति । “ गुरुसेवा कृता येन तेन सर्वं कृतं शुभम् ” इत्यादिपुराणाद्गुरुसेवैव परो धर्मोऽतोऽन्यथा सर्वधर्मवैयर्थ्यं स्यादिति भावः । “ नित्यं कार्या गुरोः सेवाऽवसरे कार्यसंकुलैः । निजोपार्जितधर्माणां सांगतावाप्तये नृभिः । आषाढ्यां पौर्णमास्यां सा कार्या पूजा प्रयत्नतः ॥ आषाढ्यां पौर्णमास्यां च व्यासपूजाकृतो नराः । सुविद्याधनसंपत्तिं लभंते चाक्षयां सदा ॥ आषाढ्यां च नरश्रेष्ठ व्यासार्चाविमुखो नरः । याम्यैः पाशैः परिवृतः कष्टं प्राप्नोति दारुणम्॥ कामाल्लोभात्तथा मोहाद्व्यासार्चां न करोति यः । तस्य सांवत्सरो धर्मो नाशमायाति पांडव । व्यासपूजा गुरौ कार्या ब्राह्मणेऽध्यापके शुचौ।यद्वोपनेतरि गुरावलाभे पुस्तकादिषु॥अध्यापके क्षत्रियादौ विप्रे त्यक्तनिजाश्रमे।सा न कार्या कदाचिच्च व्यासार्चा शुभमीप्सुभिः॥व्यासार्चने पूर्णमासी त्रिमुहूर्त्ताधिका वरा।त्रिमुहूर्ताधिका नो चेत्तदा पूर्वदिने भवेत् ॥” ‘ त्यक्तनिजाश्रमे ’ इत्युक्तेः कलिप्रवृत्तनानाऽशास्त्रीयमार्गप्रवृत्ते ब्राह्मणेपि गुरौ सा न कार्येति भावः । पुस्तकादिष्विहादिपदेन शालिग्रामाक्षतपुंजतन्मूर्त्यादयो ग्राह्या इति। “धर्मोपदेष्टा सर्वेषां व्यासः सर्वगुरुर्मतः । तदर्चितेऽर्चिताः सर्वे पितरो गुरवोऽमराः॥” इति सर्वं स्मृतिसारे संहितायां चेह प्रसंगादुक्तं स्पष्टम् । अलं प्रकृतानुप्रकृतेन ॥ ३४ ॥ घुणाक्षरन्यायेन जातं गुरुशुश्रूषणमाह—किंचेति । दैवादेवाचिंतितमेव । तद्गुरुसेवनम् । ॥४०१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रविष्टानां महारण्यमपर्तौ सुमहद्द्विज ॥ वातवर्षमभूत्तीव्रं निष्ठुराः स्तनायित्नवः ॥ ३६ ॥ सूर्यश्चास्तं गतस्तावत्तमसा चावृता दिशः ॥ निम्नं कूलं जलमयं न प्राज्ञायत किंचन ॥३७॥ वयं भृशं तत्र महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे ॥ दिशोऽविदंतोऽथ परस्परं वने गृहीतहस्ताः परि बभ्रिमातुराः ॥ ३८ ॥ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः ॥ अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान् ॥ ३९ ॥ अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः ॥ आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ॥ ४० ॥ एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतम् ॥ यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ॥ ४१ ॥ तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः ॥ छंदांस्ययातयामानि भवंत्विह परत्र च ॥ ४२ ॥ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु ॥ गुरोरनुग्रहेणैव पुमान्पूर्णः प्रशांतये ॥ ४३ ॥

निवसतामस्माकं यत्किमपि वृत्तं तत् । क्वचित्कदाचित् ॥ ३५ ॥ अपर्तौ अपगते ऋतौ अकाल इत्यर्थः । वातश्च वर्षं च तयोः समाहारः । स्तनयित्नवो गर्जितानि चाभवन् ॥ ३६ ॥ निम्नं कूलं नतमुन्नतं च स्थानम् ॥ ३७ ॥ अंबूनां संप्लवो व्यामिश्रणं यस्मिन्नेकोदके तस्मिन्वने इत्यर्थः । परिबभ्रिम ' भृञ् भरणे ' इति धातो रूपम् । परि परितो बभ्रिम इडागमश्छांदसः । भारान् धृतवंत इत्यर्थः ॥ ३८ ॥ ३९ ॥ उवाच कृपया श्लोकत्रयीं यया वयं कृतार्था इत्याह । अहो इति। आत्मा देहः ॥४०॥ गुरोर्निष्कृतं प्रत्युपकारः सर्वे अर्था यस्मात्स आत्मा देहस्तस्यार्पणं विनियोगः ॥ ४१ ॥ अयातयामानि यातो यामो यस्य पक्वस्यान्नस्य तद्गतसारं भवति । तद्वदन्यदपि गतसारं गौण्या वृत्त्या यातयाममित्युच्यते । अगतसाराणि छंदांसि मत्तोऽधीयमानानि भवंत्वित्यर्थः ॥ ४२ ॥ इत्थंविधान्येवंप्रकाराण्यनेकानि वृत्तानि किं त्वया स्मर्यंत

गुरुदारैरिति दारशब्दस्य बहुवचनांतत्वात् , तत्पुरुषस्य परप्रधानत्वाद्वृत्तावपि बहुत्वमेवेति॥३५॥इत्यर्थ इति–वर्षाकालमंतरेणेति भावः॥३६॥तावत्तदा । जलमयं प्रचुरजलम् । किंचन तृणकण्टकादि च॥३७॥तत्र वने । इत्यर्थ इति–मार्गादीनां जलाच्छादितत्वेनैकोदकतयाऽप्रतीयमान इति भावः । इत्यर्थ इति–सभारा इतस्ततोऽगच्छाम इति भावः । भ्रमणस्य परिशब्दावगतत्वादिति ॥३८॥ एतत् इंधनार्थमस्मत्प्रेषणम् । विदित्वा भार्यातोऽवगम्य । आतुरान् क्लिष्टान् ॥३९॥यया श्लोकत्रय्या । तमात्मानम् । अनादृत्याऽगणय्य॥४०॥ [1]इयदेव एतावन्मात्रमेव ॥४१॥गौण्या वृत्त्या–शोणो धावतीतिवत्तत्तद्गुणसंबन्धाद्गौणी वृत्तिर्भवतीति । इत्यर्थ इति–मत्तोऽधीतं सकलमिह परत्र च सफलं भवत्विति भावः॥४२॥फलितं गुरुसेवनलब्धं वस्तु।प्रशांतये मोक्षाय।पूर्ण ऐहिकामुष्मिकसुखभोगेन विरक्तः सन्।एवकारेण–"न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयम्॥कर्तुं समेताःप्रभवन्ति पुं

१एतदेव–इत्यत्र इयदेव इति पाठेयमर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मण उवाच ॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो ॥ भवता सत्यकामेन येषां वासो गुरावभूत् ॥ ४४ ॥ यस्य च्छंदोमयं ब्रह्म देह आवपनं विभो ॥ श्रेयसां तस्य गुरुषु वासोत्यंतविडंबनम् ॥ ४५ ॥ इति श्रीमद्भा० म० द० उ० श्रीसुदामचरितेऽशीतितमोऽध्यायः ॥ ८० ॥ श्रीशुक उवाच ॥ स इत्थं द्विजमुख्येन सह संकथयन्हरिः ॥ सर्वभूतमनोऽभिज्ञः स्मयमान उवाच तम् ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रियम् ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः ॥ २ ॥ श्रीभगवानुवाच ॥ किमुपायनमानीतं ब्रह्मन्मे भवता गृहात् ॥ अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ॥ भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ ३ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ४ ॥ इत्युक्तोऽपि द्विजस्तस्मै व्रीडितः पतये श्रियः ॥ पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ॥ ५ ॥

इति शेषः । फलितमुपसंहरति । गुरोरिति ॥ ४३ ॥ अस्माभिः किमनिर्वृत्तमसंपन्नं येषामस्माकं भवता सह वासोऽभूत् ॥ ४४ ॥ भवतस्तु सर्वमेतद्विडम्बनमात्रमित्याह । यस्येति । छंदोमयं वेदाख्यं ब्रह्म तथा श्रेयसामावपनं तदुद्भवस्थानं देहो मूर्तिर्यस्य तस्य तव ॥ ४५ ॥ इति श्रीमद्भागवते म० दशमस्कंधोत्तरार्द्धे श्रीध० टीकायामशीतितमोऽध्यायः ॥ ८० ॥ एकाशीतितमे सख्युर्जग्ध्वा पृथुकतंडुलान् ॥ श्रियं निर्मितवानिंद्रदुर्लभां तु तदाश्रमे ॥ १ ॥ संकथयन्सुखगोष्ठीः कुर्वन् । सर्वभूतानां मनसोऽभिज्ञः मदर्थं पृथुकानानीय दातुं लज्जित इति जानन्नित्यर्थः ॥ १ ॥ प्रहसन् क्ष्वेलीं कुर्वन् ॥ २ ॥ लज्जया त्वकथयतस्तामपनुदन्नाह अण्वपीति द्वाभ्याम् ॥ ३ ॥ ४ ॥ ५ ॥

सप्तमीश्वरं त्वां शरणं प्रपद्ये ॥ " इति सूचितम् ॥ ४३ ॥ किमसंपन्नं किं तु सर्वमेव संपन्नमेव । सत्यकामेन सत्यसंकल्पेन । गुराविति सामीपिकाधारे सप्तमी, गुरुगृह इत्यर्थः ॥ ४४ ॥ एतत्कथनं तु सामान्यत एव न तु त्वामुद्दिश्येत्याह–भवत इति । श्रेयसां तपोयज्ञदानादिफलानाम् । आ समंतादुप्यते बीजरूपेण संतन्यतेऽन्नादि यत्र तदावपनम् । यस्य तवेति अनुकरणं लोकसंग्रहार्थमेवेति भावः ॥ ४५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्द्धेऽशीतितमोऽध्यायः ॥ ८० ॥ जग्ध्वा भक्षयित्वा । तदाश्रये तद्गृहे (१) । स हरिः । इत्यर्थ इति–राजराजाधिपे भगवति बहुसुखाद्यन्नाद्यशनकर्तरि दरिद्रजनाशनार्हमिदमन्नमहं कथं दास्यामीति व्रीडितोऽयं ज्ञातवानिति भावः ॥ १ ॥ क्ष्वेलीं 'क्ष्वेली स्यात्सवयोहास्ये' इति निरुक्तिः ॥ २ ॥ तां लज्जाम् । दरिद्रस्य मम भूरिद्रव्यासत्त्वात् भवतो महतोऽल्पं तुष्टिकरं न स्यादिति नानीतमिति चेदाह–अण्वपीति । भक्तैर्भक्तियुक्तैः । प्रेम्णांतरप्रीत्या । उपाहृतं समर्पितम् । एतेन–द्रव्यभूरित्वाभूरित्वे मत्प्रीतौ न हेतू किंतु भक्तिरेवेत्युक्तम् ॥ ३ ॥ तद्दर्शयति–पत्रमिति । विदुरस्य पत्रं गजेंद्रस्य पुष्पं शबर्याः फलं रन्तिदेवस्य तोयमिति । एतेषां प्रीत्या समर्पितपत्रादिभिरेव तृप्तेः प्रसिद्धत्वात् । तत्पत्रादि ॥ ४ ॥ तस्मै कृष्णाय । प्रसृतिमर्द्धांजलिम् 'अर्द्धांजलौ तु प्रसृतिः' इति यादवः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वभूतात्मदृक् साक्षात्तस्यागमनकारणम् ॥ विज्ञायाचिंतयन्नायं श्रीकामो माऽभजत्पुरा ॥ ६ ॥ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकीर्षया ॥ प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ॥ ७ ॥ इत्थं विचिंत्य वसनाच्चीरबद्धान्द्विजन्मनः ॥ स्वयं जहार किमिदमिति पृथुकतंडुलान् ॥ ॥ ८ ॥ नन्वेतदुपनीतं मे परमप्रीणनं सखे ॥ तर्पयंत्यंग मां विश्वमेते पृथुकतंडुलाः ॥ ९ ॥ इति मुष्टिं सकृज्जग्ध्वा द्वितीयां जग्धुमाददे ॥ तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः ॥ १० ॥ एतावताऽलं विश्वात्मन्सर्वसंपत्समृद्धये ॥ अस्मिँल्लोके तथाऽमुष्मिन्पुंसस्त्वत्तोषकारणम् ॥ ११ ॥ ब्राह्मणस्तां तु रजनीमुषित्वाऽच्युतमंदिरे ॥ भुक्त्वा पीत्वा सुखं मेने आत्मानं स्वर्गतं यथा ॥ १२ ॥ श्वोभूते विश्वभावेन स्वसुखेनाभिवंदितः ॥ जगाम स्वालयं तात पथ्यनुव्रज्य नंदितः ॥ १३ ॥ स चालब्ध्वा धनं कृष्णान्न तु याचितवान्स्वयम् ॥ स्वगृहान्व्रीडितोऽगच्छन्महद्दर्शननिर्वृतः ॥ १४ ॥

सर्वभूतानामात्मदृगंतःकरणसाक्षी ॥ ६ ॥ अमर्त्यानां देवानामपि दुर्लभाः ॥ ७ ॥ अतिजीर्णत्वाद्वसनस्य पुनस्तन्मध्ये चीरेण बद्धान् ॥ ८ ॥ अंग हे सखे । मां विश्वं विश्वात्मानं माम् ॥९॥ इति वदन्नेकां मुष्टिं जग्ध्वा । तत्परेति । अयं भावः । एतावता पुंस इहामुत्र च मत्कटाक्षविलासभूतानां सर्वसंपदां समृद्धयेऽलम् । अतःपरं द्वितीयमुष्ट्यदनेन मा मामेतदधीनां कुर्विति ॥१०॥ त्वत्तोषकारणं तव तोषस्य कारणं यथा भवेत्तथा सर्वसंपत्समृद्धये । यां भक्तस्य समृद्धिं दृष्ट्वा त्वं तुष्येरित्यर्थः ॥ ११ ॥ स्वर्गतं स्वर्गवासिनम् ॥ १२ ॥ श्वोभूते उदिते रवौ । विश्वं भावयतीति विश्वभावस्तेनेति पुरतो भाविनमिंद्रदुर्लभं विभवं सूचयति । स्वसुखेन स्वानंदपूर्णेनेति दानेऽदीनतां दर्शयति । नंदितो विनयोक्तिभिः ॥ १३ ॥ व्रीडितः स्वचित्तकार्पण्येन लज्जितः । महतः श्रीकृष्णस्य दर्शनेन निर्वृतः सुखं प्राप्तः ॥ १४ ॥

तस्य सुदाम्नः । अयं सुदामा ॥ ६ ॥ अस्य सख्युः ॥ ७ ॥ तन्मध्ये वस्त्रमध्ये । चीरेण वस्त्रखंडेन । इदं चीरबद्धं किमिति द्विजन्मनो वसनात्कक्षस्थसंकुचितजीर्णवस्त्रात्स्वयं जहाराददौ ॥ ८ ॥ एतत्पृथुकतंडुलरूपमन्नम् ॥ ९ ॥ तावत् द्वितीयमुष्टिग्रहणकाले । तत्परेति भगवदेकनिष्ठा । अत्राशयमाह—अयं भाव इति । एतावता एकमुष्टितंडुलादनेन । अलं पर्याप्तम् । पक्षांतरमाह—त्वत्तोषेति । इत्यर्थ इति—यादृशभक्तसमृद्ध्या तव तोषो भवेत्तादृशीं त्वेकमुष्ट्यशनेनैवाहं संपादयिष्यामीति भावः ॥ १० ॥ ११ ॥ यस्मिन्दिने गतस्तां रात्रिं तद्दिनरात्रिमित्यर्थः । भक्ष्यं भुक्त्वा पेयं दुग्धादि पीत्वा मेने इति शेषः ॥ १२ ॥ नहि विश्वकर्तुर्विप्रगृहेऽलौकिकसंपत्संपादनं स्वानंदतृप्तस्य च दाने दैन्याभावश्चमत्कृतिहेतुरिति भावः ॥ १३ ॥ स च सुदामा । लज्जितो—मां मत्प्रिया किं वदिष्यतीति संकुचितः । निर्वृतोऽवाप्तानंदः ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि॥१५॥ काहं दरिद्रः पापीयान्क कृष्णः श्रीनिकेतनः॥ब्रह्मबंधुरिति स्माहं बाहुभ्यां परिरंभितः॥१६॥निवासितः प्रियाजुष्टे पर्यंके भ्रातरो यथा॥महिष्या वीजितः श्रांतो बालव्यजनहस्तया॥१७॥ शुश्रूषया परमया पादसंवाहनादिभिः ॥ पूजितो देवदेवेन विप्रदेवेन देववत्॥१८॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदाम्॥सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम्॥१९॥ अधनोऽयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ॥ इति कारुणिको नूनं धनं मे भूरि नाददात् ॥ २० ॥ इति तच्चिंतयन्नंतः प्राप्तो निजगृहांतिकम् ॥ सूर्यानलेंदुसंकाशैर्विमानैः सर्वतो वृतम् ॥ २१ ॥ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः ॥ प्रोत्फुल्लकुमुदांभोजकह्लारोत्पलवारिभिः ॥२२॥ जुष्टं स्वलंकृतैः पुंभिः स्त्रीभिश्च हरिणाक्षिभिः ॥ किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् ॥ २३ ॥ एवं मीमांसमानं तं नरा नार्योऽमरप्रभाः ॥ प्रत्यगृह्णन्महाभागं गीतवाद्येन भूयसा॥२४॥पतिमागतमाकर्ण्य पत्न्युद्धर्षाऽतिसंभ्रमा ॥ निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात्॥२५॥

निर्वृतिमेवाह अहो इति चतुर्भिः । यद्यतः लक्ष्मीमुरसि बिभ्रता आश्लिष्टोऽहम् ॥ १५ ॥ पापीयान्नीचः ॥ १६ ॥ १७ ॥ पूजितश्चंदनलेपनादिभिः ॥१८॥ एवं संपूज्यापि धनस्यादाने कारणं कल्पयति स्वर्गापवर्गयोरिति द्वाभ्याम्॥ १९ ॥स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथाऽपि कारुणिकत्वादभूर्यपि स्वल्पमपि धनं मह्यं नाददात्॥ ॥ २० ॥ इत्येवं चिंतयन्निजगृहस्यांतिकं तत्प्रांतम् । तस्य विशेषणं सूर्येति ॥ २१ ॥ विचित्रोपवनादिभिर्वृतम् । कथंभूतैः । कूजद्भिर्द्विजकुलैः पक्षिसमूहैराकुलैर्व्याप्तैः । तथा प्रोत्फुल्लानि कुमुदादीनि येषु तानि वारीणि येषु तानि तथा तैः ॥ २२ ॥ किंच जुष्टमिति । हरिणीनामिवाक्षीणि यासां ताभिः । तदैश्वर्यं दृष्ट्वा वितर्कितवांस्तदाह । किमिदमिति । प्रथमं तेजःपुंजं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य चेति स्थानं स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमित्येवंरूपमभूदिति ॥ २३ ॥ अमरप्रभास्तत्तुल्यकांतयः प्रत्यगृह्णन्नुपायनादिभिरादृतवंतः ॥ २४ ॥ उद्भूतो हर्षो यस्याः सा । अति संभ्रम आदरो यस्याः सा । आलयात्कमलवनाद्रूपधारिणी श्रीरिव । स्वर्गस्य

॥ १५ ॥ दारिद्रस्यातिपापफलत्वात्पापीयानिति । नीचः नीचवत्परिहार्यः । ‘ दरिद्रो नादृतः क्वचित् ’ इत्युक्तेः । ब्रह्मबंधुर्ब्राह्मणानां बंधुर्दायादोऽयमिति स्मृत्वेत्यर्थः ॥ १६ ॥ भ्रा व्यावहारिकभारस्ती र्यतेऽनेनेति भ्रातरः । “ ऋदोरप् ” इत्यप् । ‘भ्राता भ्रा ब्रह्मा प्रकटो भारः’ इति सौभरिः । भ्रातर इत्यदंतोपि भ्रातृवाचकशब्दो व्याकरणार्णवनिष्पन्नो ज्ञेयः । ‘ यान्युज्जहार ’ इति भीमसेनोक्तेः । छांदसो वाऽन्यथा दृष्टांतवैषम्यं स्यात् एकत्वबहुत्वयोरसंबंधात् ॥ १७ ॥ १८ ॥ तच्चरणार्चनं कृष्णांघ्रिपूजनम् ॥ १९ ॥ अभूर्यपि स्वल्पमपि ॥ २० ॥ तस्य गृहस्य । विमानैः सप्तभूमिप्रासादैः “ विमानोऽस्त्री हये पोते प्रासादे सप्तभूमिके । व्योमयाने सार्वभौमगृहे मानविवर्जिते ॥ ” इति निरुक्तिः ॥ २१ ॥ २२ ॥ विशेषसौभाग्यमाह–किंचेति । तत् अलौकिकम् । तत्तार्कितम् । इदं स्थानं तत् द्वारकासदृशं कथं जातमिति ॥ २३ ॥ तं सुदामानम् । तत्तुल्या देवतुल्या कांतिर्यासां तास्तथा ॥ २४ ॥ तत्र सुदाम्नः स्थाने । तयोस्तत्स्त्रीसुदाम्नोः । इति भाव इति–यत्कृपाकटाक्षपातादद्भुतैश्वर्यं जातं तत एव तद्रूपमप्यद्भुतमभूदिति तात्पर्यम् ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठाऽश्रुलोचना ॥ मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे ॥ २६ ॥ पत्नीं वीक्ष्य विस्फुरंतीं देवीं वैमानिकीमिव ॥ दासीनां निष्ककंठीनां मध्ये भांतीं स विस्मितः ॥ २७ ॥ प्रीतः स्वयं तया युक्तः प्रविष्टो निजमंदिरम् ॥ मणिस्तम्भशतोपेतं महेंद्रभवनं यथा ॥ २८ ॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ पर्यंका हेमदंडानि चामरव्यजनानि च ॥ २९ ॥ आसनानि च हैमानि मृदूपस्तरणानि च ॥ मुक्तादामविलंबीनि वितानानि द्युमंति च ॥ ३० ॥ स्वच्छस्फटिककुड्येषु महामारकतेषु च ॥ रत्नदीपान्भ्राजमानाँल्ललनारत्नसंयुतान् ॥ ३१ ॥ विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसंपदाम् ॥ तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीम् ॥ ३२ ॥ नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः ॥ महाविभूतेरवलोकतोऽन्यो नैवोपपद्येत यदूत्तमस्य ॥ ३३ ॥ नन्वब्रुवाणो दिशतेऽसमक्षं याचिष्णवे भूर्यपि भूरिभोजः ॥ पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृषभःसखा मे ॥ ३४ ॥

तत्र भगवता आनीतत्वात्स्वर्गिणामिव तयो रूपं च बभूवेति भावः ॥ २५ ॥ बुद्ध्या अयमेवं वंद्य इति निश्चयेन । मनसा संकल्पेन ॥२६॥२७॥२८॥ यत्र मंदिरे पयःफेननिभाः शय्या आस्तरणानीत्यादिसंपदस्तत्र सर्वसंपदां समृद्धीर्विलोक्य तर्कयामासेति चतुर्थेनान्वयः । यत्र च दांता गजदंतमयाः पर्यंकाः ॥ २९ ॥ यत्रासनानि च मृदून्युपस्तरणानि तूलादिमयानि येषु तानि । यत्र मुक्तादामविलंबवंति द्युमंति च वितानानि ॥ ३० ॥ ३१ ॥ स ब्राह्मणो निर्व्यग्रः सन् स्थिरः सन्नहैतुकीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास । कुत एषा समृद्धिरागतेति ॥ ३२ ॥ निश्चिनोति । नूनमिति । एतन्ममेति । एष चासावहं च तस्यैतन्मम । महती विभूतिर्यस्य तस्यावलोकादन्यः ॥ ३३ ॥ ननु स चेदवलोकनमात्रेण महदैश्वर्यं दत्तवांस्तर्हीदं तुभ्यं मया दत्तमिति किं नावोचदत आह । नन्विति । ननु मे सखा समक्षमब्रुवाण एव याचिष्णवे याचकाय भूरि बह्वपि दिशते ददाति । अत्र हेतुः । भूरिभोजः । स्वयं तद्देयं पर्जन्यवदीक्षमाण इति । अयमर्थः । स्वयं तावद्भूरिभोजो बहुभोज आप्तकामत्वाल्लक्ष्मीपतित्वाच्च अतो यथा पारावारपरिपूरकोऽतिवदान्यः पर्जन्यः कदाचिद्बह्वपि वर्षमल्पमेव च मन्यमानो लज्जयेव समक्षमवर्षन्रात्रौ निद्राणे कर्षके तत्क्षेत्रमा

अयमेत्र पतिरेव ॥ २६ ॥ स सुदामा । विस्मितो जाताश्चर्यः ॥ २७ ॥ तया पत्न्या ॥ २८ ॥ २९ ॥ द्युमंति द्युतिमंति ॥ ३० ॥ यत्र स्वच्छस्फटिककुड्येषु विमलस्फाटिकभित्तिषु । रत्नदीपाः संति ' कुड्यं भित्तौ विलेपने ' इति मेदिनी ॥ ३१ ॥ तत्र मंदिरे । समृद्धिं वृद्धिम् ॥ ३२ ॥ बत हर्षे । दुर्भगस्य मंदभाग्यस्य । अवलोकः कृपाकटाक्षः ॥ ३३ ॥ अत्राशंकते—नन्विति । अत्राकथने । पर्जन्यो मेघः । अत्राशयमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी ॥ मयोपनीतां पृथुकैकमुष्टिं प्रत्यग्रहीत्प्रीतियुतो महात्मा ॥३५॥ तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि जन्मनि स्यात् ॥ महानुभावेन गुणालयेन विषज्जतस्तत्पुरुषप्रसंगः ॥ ३६ ॥ भक्ताय चित्रा भगवान्हि संपदो राज्यं विभूतीर्न समर्धयत्यजः ॥ अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवम् ॥३७॥ इत्थं व्यवसितो बुद्ध्या भक्तोऽतीव जनार्दने ॥ विषयाञ्जायया त्यक्ष्यन् बुभुजे नातिलंपटः ॥ ३८ ॥ तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः ॥ ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परम् ॥ ३९ ॥

प्रावयत्येवं श्रीकृष्णोऽपि स्वभोगापेक्षया तद्देयमिंद्रादिपदमप्यतितुच्छं मन्वानस्तस्य च भजनं बहुमन्यमानः समक्षमब्रुवाण एव ददातीति ॥ ३४ ॥ तदेवाह । किंचिदिति । उरु बह्वपि स्वदत्तं यत्किंचित्करोत्यल्पं मन्यते । सुहृत्कृतं फल्ग्वतितुच्छमपि भूरिकारी बहु मन्यत इत्यर्थः । अत एव मयोपनीतां समीपं नीतां प्रीतियुतः स्वयमेव प्रतिगृहीतवान् ॥ ३५ ॥ श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा तद्भक्तिं प्रार्थयते । तस्येति । सौहृदं प्रेम सख्यं हिताशंसनं च मैत्री उपकारकत्वं च दास्यं सेवकत्वं तत्समाहारैकवचनम् । तस्य तत्संबंधिनो मे मम स्यान्न तु विभूतिः । किंच महानुभावेन तेनैव विषज्जतो विशेषेण संगं प्राप्नुवतस्तद्भक्तेषु प्रकृष्टः संगः स्यादिति ॥ ३६ ॥ ननु भक्तेः फलं संपदं प्राप्य पुनर्भक्तिं किमिति प्रार्थयसेऽत आह । भक्तायेति । संपदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रादीन्न समर्थयति न ददात्यपि तु दृढां भक्तिमेव । कुतः । अदीर्घबोधाय । अविवेकिनो मम तु भक्त्यभावादेवं जातमतस्तद्भक्तिरेव स्यादिति भावः ॥३७॥ त्यक्ष्यन् शनैःशनैस्त्यागमभ्यस्यन् । जायया सह बुभुजे ॥३८॥ श्रीकृष्णस्यैवं

अयमर्थः—आप्तकामस्य श्रीपतेश्च सर्वलोकैश्वर्यमपि तुच्छं प्रतीयत इति भावः । अत आप्तकामत्वादेः । एवं पर्जन्यवत् । तस्य निजभक्तस्य । यथात्युदारः समक्षमल्पवस्तु दातुं लज्जमानस्तद्गृहे प्रेषयति तथा श्रीकृष्णोपीति ॥ ३४ ॥ तदेव भक्तभक्त्यपेक्षया स्वदानाल्पमननमेव । इत्यर्थ इति—भक्तवात्सल्यादल्पमपि बह्वेव जानातीति भावः । अत एव भूरिमननादेव ॥ ३५ ॥ तदभिलषितमाह—श्रीकृष्णस्येत्यादिना । तस्यैव श्रीकृष्णस्यैव । एवकारेणान्ययोगव्यवच्छेदः । तेषां सौहृदादीनाम् । समाहारद्वंद्वे एकवचनम् । न तु विभूतिरित्यर्थावगतं तस्य अग्रिमपद्येनानर्थहेतुकथनात् । अन्यदभिलषितमाह—किंचेति । महान् जगदुत्पादकत्वादिरूपोऽनुभावः प्रभावो यस्य तेन । तद्भक्तेषु ब्रह्मरुद्रादिष्वपि । एतेन भगवज्जनसंगं विना भगवद्भक्तिरपि भक्तानां तोषकरी नेत्युक्तम् ॥ ३६ ॥ हरिरैहिकमैश्वर्यदो नेति मंदानुमितस्वदोषमार्जनायेयं संपादितेतिभावेनाशंक्य समाधत्ते—नन्विति । अतोऽत्र आदिना गजाश्वादिग्रहः । ऐश्वर्यं प्रयोजकत्वं न प्रेर्यत्वम् । आदिना पौत्रस्नुषादिग्रहः । संपदाद्यदाने हेतुमाशंकते—कुत इति । एवं जातम् ऐश्वर्यादि जातं । यतोहमदीर्घबोधोऽतो हेतोः । इति भाव इति—मम संसृतिनिवर्तकदीर्घबोधाय श्रीकृष्णभक्तिरेवास्त्वित्याशयः ॥ ३७ ॥ नातिलंपटः अनासक्तः ॥ ३८ ॥ ब्राह्मण्यता ब्रह्मणभक्तिः । तस्य श्रीकृष्णस्य । देवदेवस्य सर्वपूज्यस्य यज्ञपतेः सर्वकर्मफलदातुः प्रभोः सर्वेश्वरस्यापि प्रभवः स्वामिनः । यद्वा—प्रभवः समर्था अशुचीनामपि शोधकत्वात्तदुक्तं वसिष्ठस्मृतौ—" समाप्ते शौचकालेपि न शुद्धिर्ब्राह्मणैर्विना । शोधयन्त्यसमाप्तेपि ततस्ते प्रभवो मताः ॥" इति । दैवं पूज्याः । ' वेदाः प्रमाणम् '

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितम् ॥ तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धाम लेभेऽचिरतः सतां गतिम् ॥ ४० ॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः ॥ लब्धभावो भगवति कर्मबंधाद्विमुच्यते ॥ ४१ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे पृथुकोपाख्यानंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ श्रीशुक उवाच ॥ अथैकदा द्वारवत्यां वसतो रामकृष्णयोः ॥ सूर्योपरागः सुमहानासीत्कल्पक्षये यथा ॥ १ ॥ तं ज्ञात्वा मनुजा राजन् पुरस्तादेव सर्वतः ॥ स्यमंतपंचकं क्षेत्रं ययुः श्रेयोविधित्सया ॥ २॥ निःक्षत्रियां महीं कुर्वन्रामः शस्त्रभृतां वरः ॥ नृपाणां रुधिरौघेण यत्र चक्रे महाह्रदान् ॥ ३ ॥

ब्रह्मण्यता नातिचित्रमित्याह । तस्येति ॥ ३९ ॥ अन्यैरजितमपि स्वभृत्यैः पराजितं दृष्ट्वा तस्य ध्यानं तस्य वेगस्तेनोद्ग्रथितमात्मबंधनमहंकारो यस्य सः । गतिमित्याविष्टलिंगं धामविशेषणम् । सतां ब्रह्मविदां प्राप्यमित्यर्थः ॥ ४० ॥ एतत्पृथुकोपाख्यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषतः श्रुत्वेति ॥ ४१ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० एकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ द्व्यशीतितम आगत्य कुरुक्षेत्रं रविग्रहे ॥ वृष्णीन् दृष्ट्वा मुदा भूपाश्चक्रुः कृष्णकथा मिथः ॥ १ ॥ श्रीदामसुहृदे कृष्णः प्रकल्प्यैन्द्रं पदं भुवि ॥ नंदादिसुहृदानंदी कुरुक्षेत्रं जगाम सः ॥ २ ॥ कल्पक्षये यथा सर्वग्रास इत्यर्थः ॥ १ ॥ ज्योतिर्विद्भिः कथ्यमानमादावेव ज्ञात्वा । स्यमंतपंचकं क्षेत्रं कुरुक्षेत्रम् ॥ २ ॥ अब्रह्मण्यक्षत्रियवधस्थानत्वेन परशुरामस्याघापनुत्तिस्थानत्वेन च क्षेत्रस्य पापनिरासकत्वमाह निःक्षत्रियामिति द्वाभ्याम् ॥ ३ ॥

इतिवद्ब्राह्मणा दैवमित्युद्देश्यविधेयभावत्वाल्लिंगसंख्यानियमाभावः । तेभ्यो ब्राह्मणेभ्यः । ‘ न ब्राह्मणैस्तुलये भूतमन्यत् ’ इति श्रीमदृषभोक्तेः ॥ ३९ ॥ अनासक्तभोगे सुदाम्नः का सिद्धिर्जातेति चेदाह—एवमित्थम् । तदाऽनासक्तभोगपूर्वकहरिभक्तिकरणसमये । तस्य श्रीकृष्णस्य । धाम स्वरूपम् । आविष्टं व्याप्तं लिंगं यस्मिंस्तत्तथा । व्याप्तस्य त्यागासंभवादजहल्लिंगमित्यर्थः । इत्यर्थ इति—गम्यते प्राप्यते साधनसंपत्त्या साक्षात्क्रियत इति गतिरिति निरुक्त्यायमर्थः ॥ ४० ॥ एतच्चरिताकर्णनफलमाह—एतदिति । लब्धभावः प्राप्तभक्तिः ॥ ४१ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्धे एकाशीतितमोऽध्यायः ॥ ८१ ॥ रविग्रहे सूर्यग्रहणे (१) । स कृष्णः (२) । इत्यर्थ इति—कल्प्यते तत्त्वसमूहेनेति कल्पं ब्रह्मांडं जगदिति यावत् । तस्य क्षये प्रलयादौ इत्यर्थोऽन्यदापि सर्वग्रासग्रहे प्रलयसाम्यं लोके भवतीति भावः । महाभारतस्य तदुत्तरभावित्वात् ॥ १ ॥ तं सूर्योपरागं दृष्ट्वा ज्ञात्वा पंचकस्य जामदग्न्यकृतह्रदपंचकस्य समंते समीपे वर्तमानो देशः समंतपंचकः । कुरुक्षेत्रदेशोऽष्टचत्वारिंशत्क्रोशात्मकस्तम् । सर्वतः सर्वदेशेभ्यः । श्रेयः पापहानिपूर्वकं कल्याणावाप्तिस्तस्य विधित्सा कर्तुमिच्छा तया ॥ २ ॥ ह्रदकारणमाह—निःक्षत्रियामिति । ननु श्रीभार्गवरामस्त्रिःसप्तकृत्वः क्षत्रियाणामनेकदेशहतानां रक्तेन कथं कुरुक्षेत्रे ह्रदांश्चक्रे इत्याशंक्य ब्रह्माण्डपुराणमध्यभागसप्तचत्वारिंशत्तमध्यायवचनैर्वारयति, तथाहि—“ ततो मूर्द्धावसिक्तानां राज्ञाममिततेजसाम् । षट्सहस्रद्वयं १२००० रामो जीवग्राहं गृहीतवान् ॥ ततो राजसहस्राणि गृहीत्वा मुनिभिः सह । स जगाम कुरुक्षेत्रं महातेजास्तपोमयः ॥

१ दृष्ट्वेत्यपि पाठे । २ समन्तपंचकमित्यपि पाठः सर्वत्र ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईजे च भगवान्रामो यत्रास्पृष्टोऽपि कर्मणा ॥ लोकस्य ग्राहयन्नीशो यथाऽन्योऽघापनुत्तये ॥ ४ ॥ महत्यां तीर्थयात्रायां तत्राऽगन्भारतीः प्रजाः ॥ वृष्णयश्च तथाऽक्रूरवसुदेवाहुकादयः ॥ ५ ॥ ययुर्भारत तत्क्षेत्रं स्वमघं क्षपयिष्णवः ॥ गदप्रद्युम्नसांबाद्याः सुचंद्रशुकसारणैः ॥ ६ ॥ आस्तेऽनिरुद्धो रक्षायां कृतवर्मा च यूथपः ॥ ते रथैर्देवधिष्ण्याभैर्हयैश्च तरलप्लवैः ॥ ७ ॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ॥ व्यरोचंत महातेजाः पथि कांचनमालिनः ॥ ८ ॥ दिव्यस्रग्वस्त्रसन्नाहाः कलत्रैः खेचरा इव ॥ तत्र स्नात्वा महाभागा उपोष्य सुसमाहिताः ॥ ९ ॥ ब्राह्मणेभ्यो ददुर्धेनूर्वासः स्रग्रुक्ममालिनीः ॥ रामह्रदेषु विधिवत्पुनराप्लुत्य वृष्णयः ॥ १० ॥ ददुः स्वन्नं द्विजाग्र्येभ्यः कृष्णे नो भक्तिरस्त्विति ॥ स्वयं च तदनुज्ञाता वृष्णयः कृष्णदेवताः ॥ ११ ॥ भुक्त्वोपविविशुः कामं स्निग्धच्छायांघ्रिपांघ्रिषु ॥ तत्रागतांस्ते ददृशुः सुहृत्संबंधिनो नृपान् ॥ १२ ॥ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान् ॥ कांबोजकेकयान्मद्रान्कुंतीनानर्तकेरलान् ॥ १३ ॥ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृप ॥ नंदादीन्सुहृदो गोपान्गोपीश्चोत्कंठिताश्चिरम् ॥ १४ ॥

अन्यो विद्वान्यथा ॥ ४ ॥ आगन्नाजग्मुः । भारतीर्भारत्यः ॥ ५ ॥ ६ ॥ सुचंद्रशुकसारणैः सहानिरुद्धो द्वारकारक्षायामास्ते । तथा कृतवर्मा च यूथपतिः सेनानीः । देवधिष्ण्याभैर्विमानसंकाशैः । तरलास्तरंगास्तद्वत् प्लवो गतिर्येषां तैः ॥ ७ ॥ विद्याधरद्युभिर्विद्याधराणामिव द्युतिर्येषां तैः । महातेजा महातेजसः ॥८॥ दिव्या अत्युत्तमाः स्रग्वस्त्रसन्नाहा येषाम् ॥ ९ ॥ पुनरन्येद्युराप्लुत्य । यद्वा तस्मिन्नेवाहनि मुक्तिस्नानं कृत्वा ॥ १० ॥ ११ ॥ स्निग्धा शीतला छाया येषामंघ्रिपाणामंघ्रिषु मूलेषु ॥ १२ ॥ १३ ॥ १४ ॥

सरसां पञ्चकं तत्र खानयित्वा भृगूद्वहः । सुखावगाहतीर्थानि तानि चक्रे समंततः ॥ जघान तत्र वै राज्ञस्तच्छरीरभवासृजा । सरांसि तानि वै पञ्च पूरयामास भार्गवः ॥ स्नात्वा तेषु यथान्यायं जामदग्न्यः प्रतापवान् ॥ पितॄन्संतर्पयामास यथाशास्त्रमतंद्रितः ॥ पितुः प्रेतस्य श्राद्धादि मातुश्चैव यथोदितम् । कृत्वा तीर्णप्रतिज्ञः स तीर्थानि तानि चाकरोत् ॥ संतुष्टपितृवरतस्ततः प्रोक्तं हि नाम तत् । समंतपञ्चकमिति मुनिभिर्दैवतैः सह॥'' इति । यत्र समंतपंचके ॥ ३ ॥ ईश्वरत्वेनाहंकाराभावादस्पृष्टकर्मापि " यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान्नायं हंति न हन्यते॥ " इति श्रीमुखोक्तेः । लोकसंग्रहार्थमीजे । यथान्यः प्राकृतः ॥ ४ ॥ तीर्थयात्रायामुपस्थितायाम् । तत्र कुरुक्षेत्रे ॥ ५ ॥ तत्क्षेत्रं समंतपंचकम् ॥ ६ ॥ ते वृष्णयः । " तरलश्चंचले वक्रे तरंगे सुरपिङ्गयोः " इति कोशात् । ' भेकोडुपगतौ प्लवः ' इति । भेकादीनां समाहारद्वंद्वः ॥ ७ ॥ महातेजा इति समासांतो डप्रत्ययः ॥ ८ ॥ तत्र रामह्रदेषु ॥ ९॥ अन्येद्युरन्यस्मिन्दिने द्वितीयदिवसस्नाने । पुनःपदप्रयोगास्वारस्यं मत्वाह–यद्वेति । मुक्तिस्नानं ग्रहणांतस्नानम् । "आदौ स्नानं तथा चांते मध्ये दानं प्रकीर्तितम्'' इति स्मृतेः ॥१०॥ तदनुज्ञाता ब्राह्मणादिष्टाः । 'स्निग्धः शीतलचिक्कणे' इति धरणिः । अंघ्रिषु अधस्तात् ॥११॥ तत्र कुरुक्षेत्रे । ते यदवः ॥१२॥ आनर्तेत्यत्र आरट्टेति पाठोपि क्वचित् ॥१३॥ आत्मप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्योऽन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदम् ॥ १५ ॥ स्त्रियश्च संवीक्ष्य मिथोऽतिसौहृदस्मितामलापांगदृशोऽभिरेभिरे ॥ स्तनैः स्तनान्कुंकुमपंकरूषितान्निहत्य दोर्भिः प्रणयाश्रुलोचनाः ॥ १६ ॥ ततोऽभिवाद्य ते वृद्धान्यविष्ठैरभिवादिताः ॥ स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथां मिथः ॥ १७ ॥ पृथा भ्रातॄन्स्वसॄर्वीक्ष्य तत्पुत्रान्पितरावपि ॥ भ्रातृपत्नीर्मुकुंदं च जहौ संकथया शुचः ॥ १८ ॥ कुंत्युवाच ॥ आर्य भ्रातरहं मन्ये आत्मानमकृताशिषम् ॥ यद्वा आपत्सु मद्वार्तां नानुस्मरथ सत्तमाः ॥ १९ ॥ सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि ॥ नानुस्मरंति स्वजनं यस्य दैवमदक्षिणम् ॥ २० ॥ वसुदेव उवाच ॥ अंब मास्मानसूयेथा दैवक्रीडनकान्नरान् ॥ ईशस्य हि वशे लोकः कुरुते कार्यतेऽथवा ॥ २१ ॥ कंसप्रतापिताः सर्वे वयं याता दिशंदिशम् ॥ एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ २२ ॥ श्रीशुक उवाच ॥ वसुदेवोग्रसेनाद्यैर्यदुभिस्तेऽर्चिता नृपाः ॥ आसन्नच्युतसंदर्शपरमानंदनिर्वृताः ॥ २३ ॥ भीष्मो द्रोणोंऽबिकापुत्रो गांधारी ससुता तथा ॥ सदाराः पांडवाः कुंती सृंजयो विदुरः कृपः ॥ २४ ॥ कुंतिभोजो विराटश्च भीष्मको नग्नजिन्महान् ॥ पुरुजिद्द्रुपदः शल्यो धृष्टकेतुः स काशिराट् ॥ २५ ॥ दमघोषो विशालाक्षो मैथिलो मद्रकेकयौ ॥ युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ॥ २६ ॥ राजानो ये च राजेंद्र युधिष्ठिरमनुव्रताः ॥ श्रीनिकेतं वपुः शौरेः सस्त्रीकं वीक्ष्य विस्मिताः ॥ २७ ॥

प्रोत्फुल्लैर्हृद्वक्त्रसरोरुहैः श्रीः शोभा येषां ते ॥ १५ ॥ अतिसौहृदेन यत् स्मितं तेनामला अपांगैर्दृशो दृष्टयो यासां ताः मिथः परस्परं संवीक्ष्य दोर्भिरभिरेभिरे आलिंगनं कृतवत्यः ॥ १६ ॥ १७ ॥ संकथया मिथः सप्रेमगोष्ठ्या ॥ १८ ॥ तामेव वसुदेवपृथयोः संकथामाह आर्येत्यादिचतुर्भिः । अकृताशिषमपूर्णमनोरथम् ॥ १९ ॥ यस्य दैवमदक्षिणमननुकूलं तं स्वजनमपि संतं सुहृदादयो नानुस्मरंति । अतो मम दैवं प्रतिकूलं युष्माकं कोऽपराध इति भावः ॥ २० ॥ २१ ॥ ईशवशत्वमेवाह । कंसप्रतापिता इति । हे स्वसः । एतर्ह्येव संप्रत्येव ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ युधिष्ठिरं येऽनुव्रतास्ते राज

क्षीयाः पांडवाद्याः । पराश्च दुर्योधनपक्षीया गांधाराद्याः ॥ १४ ॥ १५ ॥ निहत्य संयोज्य ॥ १६ ॥ ततः स्त्रीमेलापोत्तरम् । ते यदवः ॥ १७ ॥ तत्पुत्रान् भ्रातृस्वसृपुत्रान् । शुचः शोकान् अश्रूणि वा ' शोकेऽस्रे शुक् तथा शुद्धौ ' इति निरुक्तिः " गाथायां च पुराणादेः प्रेमगोष्ठ्यां च संकथा " इति च ॥ १८ ॥ तामेव प्रेमगोष्ठीरूपामेव । आर्यभ्रातर्ज्येष्ठभ्रातः । यद्यपि " अग्रजातेति तां कन्यां शूरोऽनुग्रहकाम्यया । अददत्कुंतिभोजाय " इति महाभारतोक्त्या पृथैव ज्येष्ठा तथापि तद्भ्रातृषु वसुदेवस्यैव ज्यैष्ठ्यमिति यत्तदोर्नित्यसंबंधाद्यतो नानुस्मरथ ततो हेतोरकृताशिषमात्मानमिति योज्यम् ॥ १९ ॥ यस्य तं नानुस्मरंतीत्यर्थः । " प्रतिकूले रमाकांत सरले वक्रता भवेत् " इत्याद्युक्तेः ॥ २० ॥ ' स्वसारि मातरि चांबा ' इति व्याडिः । अंब हे स्वसः ॥ २१ ॥ २२ ॥ ते कुरुक्षेत्रागताः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ये राजानः ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ ते रामकृष्णाभ्यां सम्यक्प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदा युक्ता वृष्णीन्कृष्णपरिग्रहान् ॥ २८ ॥ अहो भोजपते यूयं जन्मभाजो नृणामिह ॥ यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनाम् ॥ २९ ॥ यद्विश्रुतिः श्रुतिनुतेदमलं पुनाति पादावनेजनपयश्च वचश्च शास्त्रम् ॥ भूः कालभर्जितभगापि यदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोऽखिलार्थान् ॥ ३० ॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिंडबंधः ॥ येषां गृहे निरयवर्त्मनि वर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥ ३१ ॥ श्रीशुक उवाच ॥ नंदस्तत्र यदून्प्राप्ताञ्ज्ञात्वा कृष्णपुरोगमान् ॥ तत्रागमद्वृतो गोपैरनःस्थार्थैर्दिदृक्षया ॥ ३२ ॥ तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः ॥ परिषस्वजिरे गाढं चिरदर्शनकातराः ॥ ३३ ॥ वसुदेवः परिष्वज्य संप्रीतः प्रेमविह्वलः ॥ स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासं च गोकुले ॥ ३४ ॥

सूये जितत्वात् ॥ २७ ॥ २८ ॥ जन्मभाजो नृणां मध्ये सफलजन्मानः ॥ २९ ॥ किंच न केवलं तस्य दर्शनमेवापि त्वत्यंतदुर्लभं बहु युष्माकं स्वतःसंपन्नमित्याहुः यद्विश्रुतिरिति द्वाभ्याम् । यदिति पृथक्पदम् । यस्येत्यर्थः । विश्रुतिः कीर्तिः श्रुतिभिर्नुता वेदैः स्तुता इदं विश्वमलमत्यर्थं पुनाति । यद्विश्रुतिश्रुतिरमीवमलमिति पाठे श्रुतिः श्रवणममीवं पापमिति । यस्य पादावनेजनपयो गंगा च यस्य वचो वाक्यरूपं शास्त्रं च वेदाख्यं विश्वं पुनाति । किंच कालेन भर्जितं दग्धं भगं माहात्म्यं यस्याः सा तथाविधाऽपि भूर्यस्यांऽघ्रिपद्मस्पर्शेनोत्था आविर्भूता शक्तिर्यस्याः सा नोऽस्माकमखिलानर्थानभितो वर्षति ॥ ३० ॥ दर्शनं च स्पर्शनं चानुपथोऽनुगतिश्च प्रजल्पो गोष्ठी च शय्या शयनं चासनं चाशनं भोजनं च यौनं विवाहसंबंधस्तेन सह वर्तमानः सपिंडबंधो दैहिकसंबन्धः । तेन श्रीकृष्णेन सह दर्शनाद्युपलक्षितः सयौनः सपिंडबंधो येषां वोऽस्ति । किंच येषां वो गृहे विष्णुः स्वयमास आविरभूत् । निरयवर्त्मनि प्रवृत्तिमार्गे वर्तमानानां स्वर्गापवर्गाभ्यां विरमयति वितृष्णान्करोतीति तथा सः । ते यूयं जन्मभाज इति । यद्वा तदिति सामान्यनिर्देशः स इत्यर्थः । विष्णुः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्तमानानामपि बध्यते संबध्यत इति बंधो दर्शनादिभिः संबद्धः सन्स्वर्गापवर्गविरम आस परमसुखप्रदो बभूवेत्यर्थः ॥ ३१ ॥ अनःस्थार्थैरिति । तत्रैव वासचिकीर्षया शकटेषु स्थापितैरर्थैः सहागत इत्यर्थः ॥ ३२ ॥ ३३ ॥ वसुदेवस्तं परि

॥ २८ ॥ यद्यतः ॥ २९ ॥ अन्यदाह—किंचेति । बहु श्रीकृष्णनैकट्यम् । इत्यर्थ इत्यर्थकः । न केवलं वयं पूता एवापि त्वभीष्टमपि प्राप्ता इत्याहुः—किंचेति । कालेन कलिना । तथाविधापि नष्टसामर्थ्यापि ॥ ३० ॥ तेन यौनबंधसपिंडबंधेन । स यौनसापिंडबंधः । दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनैरुपलक्षितश्चासौ सयौनसपिंडबंधस्तथा । पुनस्तेन सह दर्शनादिः सपिंडबंधांतस्तया । येषामित्यस्य पुनरन्वयमाह—किंचेति । पूर्वव्याख्यायामर्थदौर्लभ्यं मत्वाऽऽह—यद्वेति । सामान्यनिर्देशो हि शब्दमात्रनिर्देशः । इत्यर्थ इति—स च प्रकृतार्थपर इति । इत्यर्थ :इति—परमसुखं भक्तिसुखमेव । “ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किंत्वंतकासिलुलितात्पततां विमानात् ॥” इति ध्रुवोक्तेरिति भावः । तीर्थस्तु स्वर्गापवर्गयोर्विशेषेण रमणं यस्मात्स तथा । “ ज्ञानादेव स्वर्गो ज्ञानादेवापवर्गः ” इति श्रुतेरित्याह ॥ ३१ ॥ तत्र कुरुक्षेत्रे । तत्र कृष्णादिपार्श्वे । इत्यर्थ इति—तीर्थयात्रामुख्यफलश्रीकृष्णदर्शनमेवेति मत्वा तत्पार्श्व एवागत इति भावः ॥ ३२ ॥ तं नंदम् ॥ ३३ ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृष्णरामौ परिष्वज्य पितरावभिवाद्य च ॥ न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह ॥ ३५ ॥ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च ॥ यशोदा च महाभागा सुतौ विजहतुः शुचः ॥ ३६ ॥ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीम् ॥ स्मरंत्यौ तत्कृतां मैत्रीं बाष्पकंठ्यौ समूचतुः ॥ ३७ ॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि ॥ अवाप्याप्यैंद्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥ ३८ ॥ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि ॥ प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्रचभयौ न सतां परः स्वः ॥ ३९ ॥ श्रीशुक उवाच ॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति॥ दृग्भिर्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापम् ॥ ४० ॥ भगवांस्तास्तथाभूता विविक्त उपसंगतः ॥ आश्लिष्याऽनामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ४१ ॥

ष्वज्य प्रेमविह्वलो बभूवेति शेषः ॥ ३४ ॥ ३५ ॥ तौ सुतौ परिरभ्य नंदो यशोदा च विरहशोकान्विजहतुस्तत्यजतुः । यद्वा शुचोऽश्रूणि विजहतुर्मुमुचतुरित्यर्थः ॥ ॥ ३६ ॥ व्रजेश्वरीं यशोदाम् ॥ ३७ ॥ अनिवृत्तां निवृत्तिकारणे सत्यप्यनुवर्तमानाम् । ऐंद्रमैश्वर्यं प्राप्यापि यस्याः प्रतिक्रिया कर्तुं न शक्यत इत्यर्थः ॥ ३८ ॥ तत्कृतां मैत्रीमाहतुः । एताविति । न दृष्टौ पितरौ याभ्यां तौ वस्तुतस्त्वजन्मत्वादेवादृष्टपितरौ । हे भवति युवयोः पित्रोर्न्यस्तावेतौ संप्रीणनादीनि प्राप्याकुत्रचभयौ क्वचिदपि भयरहितौ भूत्वोषतुर्वासं चक्रतुः । अक्ष्णोर्नेत्रयोः । रक्षकं पक्ष्म यद्वत्तथा रक्षकयोः युक्तं युवयोरेतद्यतः सतां परः स्व इति नास्ति वैषम्यम् ॥ ३९ ॥ अभीष्टत्वे लिंगम् । यद्यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु व्यवधायकं पक्ष्मकृतं विधातारं शपंति । दृग्भिर्नेत्रद्वारैर्हृदिकृतं हृदये प्रवेशितं परिरभ्य तद्भावं तदात्मतां प्रापुः । अपि नित्ययुजा

रामकृष्णयोर्जनमोहनविडंबनमाह—कृष्णरामाविति । पूर्वमभिवाद्य ततः परिष्वज्य ॥ ३५ ॥ चान्नंदः । शुक्पदस्योभयार्थत्वादाह—यद्वेति । इत्यर्थ इति—मोक्षणत्यागावेकार्थकावेवेति ॥३६॥ तत्कृतां यशोदाकृताम् । मैत्रीं पुत्ररक्षणरूपाम् ॥ ३७ ॥ वां युवयोर्नंदयशोदयोः । यस्या मैत्र्याः । इत्यर्थ इति—राजभयत्यक्तास्मत्सुतपालनं भवद्भ्यां विना कोपि तदा कर्तुं न समर्थः क्रूरकंसभयात्तचाप्रतीकार्यमेवैंद्रादिपददानेनापीति भावः ॥३८॥ तत्कृतां तयोः कृताम् । एतौ रामकृष्णौ । पितरौ पितृशब्दास्पदावावामेव । परमार्थमाह—वस्तुतस्त्विति । अजन्मत्वात्परमेश्वरत्वेन जन्मरहितत्वादेव । जन्मवतां जीवानामेव पितृदर्शनं भवतीति भावः । भातीति भवती दीप्तियुता तत्संबुद्धौ । तथा कुत्रचेत्यव्ययं ' किमः सामान्ये ' इति चांतं कुत्रार्थे । ततो नञा समासः । तथा च न कुत्रच भयं ययोस्तावकुत्रचभयौ । वस्तुतस्तु ईशत्वादेताभ्यामेव सर्वे बिभ्यति " भीषास्माद्वातः पवते " इत्यादिश्रुतेः । कथंभूतयोर्वा तथा तद्वत् रक्षकयोरिति शेषः । अर्थांतरं सूचयतः युक्तमित्यादिना । सतामुदाराणाम् । तदुक्तम् "अयं स्वीयः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुंबिनी॥" इति॥ ॥ ३९ ॥ लिंगं हेतुः । व्यवधायकं व्यवधानकर्तारम् । प्रेक्षणे तादर्थ्ये सप्तमी प्रेक्षणार्थम् । तदात्मतां तद्रूपताम् । आरूढयोगिनामित्यनेन भक्त्यतिशयो दर्शितः ॥ ४० ॥ ता गोप्यः । तथाभूताः प्रेमरताः । इदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया ॥ गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ॥ ४२ ॥ अप्यवध्यायथाऽस्मान्स्विदकृतज्ञाविशंकया ॥ नूनं भूतानि भगवान्युनक्ति वियुनक्ति च ॥ ४३ ॥ वायुर्यथा घनानीकं तृणं तूलं रजांसि च ॥ संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ॥ ॥ ४४ ॥ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते ॥ दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः ॥ ४५ ॥ अहं हि सर्वभूतानामादिरंतोऽन्तरं बहिः ॥ भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरंगनाः ॥४६॥ एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः ॥ उभयं मय्यथ परे पश्यताभातमक्षरे॥४७॥

मारूढयोगिनामपि ॥ ४० ॥ ४१ ॥ चिरायितान्विलंबितान् । अत्र हेतुः । शत्रूणां पक्षस्य क्षपणे चेतो येषां तान् ॥ ४२ ॥ अपि स्वित् अस्मानवध्यायथाऽवजानीथ । अकृतज्ञा एत इत्याविशंकया ईषच्छंकया । न शंकामात्रं निश्चितमेवैतत्परित्यज्य गतत्वादित्यत आह । नूनमिति ॥ ४३ ॥ एतत्सदृष्टांतमाह । वायुरिति । आक्षिपते पृथक्करोतीत्यर्थः ॥ ४४ ॥ अपि च अतिभद्रमिदं यदुत भवतीनां मद्वियोगेन मत्प्रेमातिशयो जात इत्याह । मयीति । मयि भक्तिमात्रमेव तावदमृतत्वाय कल्पत इति । यदुत भवतीनां मत्स्नेह आसीत्तद्दिष्ट्याऽतिभद्रम् । कुतः । मदापनो मत्प्रापण इति ॥ ४५ ॥ कीदृशस्त्वं यं वयं स्नेहेन प्राप्स्याम इत्यपेक्षायामात्मस्वरूपमाह । अहं हीति । हे अंगनाः भौतिकानां शरावसैंधवादीनां यथाऽऽकाशादीनि पंच महाभूतान्याद्यंतादिरूपाण्येवं सर्वभूतानां जरायुजादीनामहम् । अतो व्यापकं मां भवत्यः प्राप्ता एवेति ॥४६॥ ननु चतुर्विधभूतग्रामाणां तद्वोक्ता आत्मैवाद्यंतादिरूपस्तस्मिंश्च सर्वव्यापके सर्वभूतानि वर्तंत इति कुतस्त्वत्प्राप्तिरस्माकमित्यत आह । एवं हीति । अयमर्थः । शरावादीनां यथा भौतिकानां महाभूतान्याद्यंतादिरूपाण्येवमेवैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात्स्वकारणेषु भूतेष्वेव वर्तंते न तु भोक्तर्यात्मनि । आत्मा तु तेषु भूतेष्वात्मना भोक्तृरूपेण ततो व्याप्तो न कारणत्वेन । अथैतदुभयं भूतभौतिकरूपं भोग्यं च भोक्तारं चात्मानं मय्यक्षरे परिपूर्णे आभातं पश्यतेति ॥ ४७ ॥

वक्ष्यमाणम् ॥ ४१ ॥ अत्र चिरायितत्वे ॥ ४२ ॥ एतेऽस्मानिति बहुत्वं स्वस्यानेकरूपत्वबोधनाय रासक्रीडायां ताभिर्दृष्टचरत्वात् । एतदकृतज्ञत्वम् । भगवान् कालः ॥ ४३ ॥ एतत्संयोगवियोगकरणम् । भूतकृत्कालः ॥ ४४ ॥ गोपीभाग्यं श्लाघते—अपि चेति । अतिभद्रत्वे हेतुमाशंकते—कुत इति । मत्प्रापणो मत्सांनिध्यानंददः, अमृतत्वे एतन्न संभवत्यत एव भक्तैस्तन्नाद्रियते इति रहस्यम् ॥ ४५ ॥ प्राप्य स्वरूपं पृच्छंतीनां तदाह—कीदृश इत्यादिना । अहमाद्यंतरूपः यतोऽतो हेतोर्व्यापकं माम् ॥ ४६ ॥ अंत्राशंकते—तद्वोक्ता चतुर्विधभूतग्रामांतर्यामी । अत्राशयमाह—अयमर्थ इति । परिपूर्णे परमात्मनि । आभातं रज्जौ भुजं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः ॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ॥४८॥ आहुश्च ते नलिननाभपदारविंदं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबं गेहंजुषामपि मनस्युदियात्सदा नः ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे वृष्णिगोपसंगमोनाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ श्रीशुक उवाच ॥ तथानुगृह्य भगवान्गोपीनां स गुरुर्गतिः ॥ युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययम् ॥ १ ॥ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः ॥ प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः ॥ २ ॥ कुतोऽशिवं त्वच्चरणांबुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ॥ पिबंति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृतिच्छिदम् ॥ ३ ॥ हि त्वाऽऽत्मधाम विधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधम् ॥ कालोपसृष्टनिगमावन आत्तयोगमायाकृतिं परमहंसगतिं नताः स्म ॥ ४ ॥

अध्यात्मशिक्षया स्वरूपोपदेशेन शिक्षिता बोधितास्तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिंगं यासां तास्तमेवाध्यगन् प्रापुः ॥ ४८ ॥ एवं प्राप्तोऽपि कृष्णः पुनर्गृहव्यासंगेन माऽपयात्विति तच्चरणस्मरणं प्रार्थयामासुरित्याह । आहुश्चेति । हे नलिननाभ ते पदारविंदं गेहंजुषां गृहसेविनामपि नो मनसि सदा उदियादाविर्भवेत् ॥ ४९ ॥ इति श्रीमद्भागवते दशमस्कंधोत्त० श्री० टी० द्व्यशीतितमोऽध्यायः॥८२॥त्र्यशीतितम एवं च स्त्रीणां कृष्णकथोत्सवे ॥ द्रौपद्यै कृष्णभार्याभिरुक्ताः स्वस्वकरग्रहाः ॥१॥ अव्ययं कुशलम् ॥ १ ॥ तत्पादेक्षया हतमंहो येषां ते ॥ २ ॥ महतां मनस्तः सकाशान्मुखद्वारतो निःसृतं क्वचित्कदाचिद्देहंभृतां देहधारिणां देहकृच्चासावस्मृतिश्चाविद्या तां छिनत्तीति तथा तम् । देहकृदीश्वरस्तद्विषयाज्ञानच्छिदं वा ॥ ३ ॥ हि त्वेति पदद्वयम् । त्वा त्वां हि एव त्वामेव नताः स्मेत्यर्थः । कथंभूतम् आत्मधाम्ना स्वरूपप्रकाशेन विधुता निरस्ता आत्मकृता बुद्धिनिमित्तास्तिस्रोऽवस्था यस्मिंस्तम् । अत एवानंदसंप्लवं सर्वानंदकदंबरूपम् । अखंडं चापरिच्छिन्नम् । यतो न कुंठः कुंठितो बोधश्चिच्छक्तिर्यस्य तम् । नन्वेवंरूपता श्रीकृष्णस्य कुतः अस्मदादिवत्प्रतीतेरत आहुः । कालोपसृष्टेति । कालेनोपसृष्टा विप्लुताश्च ते निगमाश्च तेषामवने रक्षार्थमात्ता उपात्ता योगादिकमिव प्रतीतं यूयं पश्यत अधिष्ठेयस्याधिष्ठानातिरेकत्वाभावादित्यर्थः ॥ ४७ ॥ तमेव श्रीकृष्णमेव ॥ ४८ ॥ अपयातु विस्मृतिं गच्छतु । तच्चरणस्मरणं कृष्णपादस्मृतिम् । अगाधबोधैरनन्तबोधाढ्यैर्योगेश्वरैः सनकाद्यैः संसारकूपपतितानामुत्तरणायोर्द्ध्वगमनायावलंबं हस्ताधारम् । अनेन प्राप्तात्मतत्त्वैरप्यभीप्समानतया भक्तेराधिक्यं ध्वनितम् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे द्व्यशीतितमोऽध्यायः ॥८२ ॥ एवं गोपीवत् (१) । तथा प्रार्थनाऽनुसारेण । अथ गोप्यनुग्रहोत्तरम् । स कृष्णः ॥ १ ॥ ते सुहृदः । तत्पादेक्षया कृष्णांघ्रिदर्शनेन । अंहो दुरितम् ॥ २ ॥ न स्मृतिर्यया सा तथा । जडाया देहकरणासामर्थ्यं मत्वार्थांतरमाह—अथ देहकृदीश्वर इति । अन्ये तु हे प्रभो त्वच्चरणांबुजासवं त्वदंघ्रिमाहात्म्यबोधिकथामृतं कर्णपुटैर्ये पिबंति तेषां त्वत्त्वत्तो दुर्जनशास्तुः कालरूपात्कुतोऽशिवं भयं भवतीत्यन्वयः । “ आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ । तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्त्तया ॥” इत्युक्तेः । कथंभूतं महात्मनां व्यासादीनां मुखेभ्यो निस्सृतं गलितं क्वचित्कदाचिदपि व्यासादिवाक्यैस्त्वामात्मत्वेन जानतां न दुःखं भवतीत्यर्थः । ईश्वरस्य ममात्मत्वमेव कथं तत्राह—देहंभृत इति । देहंभृतो जीवाः त्वत्कृते त्वद्धेतुत्वेन उच्छ्वसंति जीवंति । “ को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् ” इति श्रुतेः । अथ वा त्वन्मुखनिस्सृतं त्वच्चरणांबुजासवं ये पिबंति तेषां महात्मनां कुतोऽशिवमित्यन्वयः । त्वत्कृते भगवन्नमस्कारकारणाय । अत्र पक्षे ‘ देहंभृतस्त्वत्कृत उच्छ्वसंति हि ’ इति पाठोस्ति ॥ ३ ॥ इत्यर्थ इति—व्याख्या । ‘ देहे बुद्धौ चितिश्चात्मा ’ इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषिरुवाच ॥ इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः ॥ समेत्य गोविंदकथा मिथोऽगृणंस्त्रिलोकगीताः शृणु वर्णयामि ते ॥ ५ ॥ द्रौपद्युवाच ॥ हे वैदर्भ्यच्युतो भद्रे हे जांबवति कोसले ॥ हे सत्यभामे कालिंदि शैब्ये रोहिणि लक्ष्मणे ॥ ६ ॥ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयम् ॥ उपयेमे यथा लोकमनुकुर्वन्स्वमायया ॥७॥ रुक्मिण्युवाच ॥ चैद्याय माऽर्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः ॥ निन्ये मृगेंद्र इव भागमजावियूथात्तच्छ्रीनिकेतचरणोऽस्तु ममार्चनाय ॥ ८ ॥ सत्यभामोवाच ॥ यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ॥ जित्वर्क्षराजमथ रत्नमदात्स तेन भीतः पिताऽदिशत मां प्रभवेऽपि दत्ताम् ॥ ९ ॥

मायया आकृतिर्निराकारमूर्तिर्येन तम् । परमहंसानां गतिं त्वाम् । अतस्तवैवंरूपत्वादस्माकं च त्वन्माययैतत्सर्ववैपरीत्यात्त्वामेव नताः स्मेति । यद्वा त्वामिति प्रकरणाज्ज्ञातव्यम् । त्वां नताः स्म । किं कृत्वा हित्वा । किम् । आत्मधाम आत्मा शरीरं धाम गृहं तच्च तच्च । देहदैहिकसंगं परित्यज्येत्यर्थः । समानमन्यत् ॥ ४ ॥ त्रिषु लोकेषु गीताः ॥ ५ ॥ कोसले हे सत्ये शैब्ये हे मित्रविंदे । रोहिणीनाम काचित्पट्टमहिषीतुल्या ॥ ६ ॥ हे अन्याः श्रीकृष्णस्य पत्न्यः ॥ ७ ॥ मा मामर्पयितुं संपादयितुं राजसु जरासंधादिषूद्यत्कार्मुकेषु सत्स्वजेया ये भटास्तेषां शेखरिता मुकुटवत्कृता अंघ्रिरेणवो येन । तेषां मूर्ध्नि पदं दधदित्यर्थः । तस्य श्रीनिकेतस्य चरणो ममार्चनायास्तु॥ ॥ ८ ॥ सनाभेर्भ्रातुर्वधेन सिंहकृतेन तप्तं हृदयस्य तेन मे ततेन तातेन लिप्तमभिशापं दुर्यशोऽपमार्ष्टुं परिहर्तुमृक्षराजं जित्वा रत्नं स्यमंतकमुपाजहारानीतवान् । अथानंतरं

धरणिः । अवस्था जागराद्याः । ‘ बुद्धेर्जागरणं स्वप्नस्सुषुप्तिरिति वृत्तय ’ इति नारदोक्तेः । अत एव अवस्थात्रयातीतत्वादेव । यतो यस्मात् । अत्राऽऽशंकते–एवंरूपता सर्वानंदाखंडाकुंठबोधरूपता । ‘ आकारो देह आकृतिः ’ इति यादवः । यतस्त्वं परमहंसगम्योऽसि अंतो हेतोः । प्रकरणलभ्यस्याप्यभ्यर्हितत्वेन “ पादादौ न प्रयोक्तव्याः प्रायशश्चादयो बुधैः ” इत्यालंकारिकसमयत्वाचाह–यद्वेति । इत्यर्थ इति–गृहत्यागस्य शक्यत्वेऽपि शरीरत्यागस्याशक्यत्वात्तयोरासक्तित्यागोऽर्थोऽत्र विवक्षित इति भावः ॥ ४ ॥ इत्युक्तरीत्या । उत्तमश्लोका युधिष्ठिराद्यास्तेषां शिखा शेखरीभूतो रुद्रस्तस्य मणिं मणिवद्धार्यं श्रीकृष्णम् ॥ ५ ॥ ६ ॥ यथा येन विधिना । एतं विधिम् ॥ ७ ॥ इत्यर्थ इति–‘ जहे पदं मूर्ध्नि दधत्सुपर्णः ’ इत्युक्तोरिति भावः । अजानामवीनां च यूथात् ॥ ८ ॥ भ्रातुः प्रसेनस्य । अथर्क्षराजजयानंतरम् । तेन मिथ्याभिशापरूपेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जांबवत्युवाच ॥ प्राज्ञाय देहकृदमुं निजनाथदैवं सीतापतिं त्रिणवहान्यमुनाऽभ्ययुध्यत् ॥ ज्ञात्वा परीक्षित उपाहरदर्हणं मां पादौ प्रगृह्य मणिनाऽहममुष्य दासी॥१०॥कालिंद्युवाच ॥ तपश्चरंतीमाज्ञाय स्वपादस्पर्शनाऽऽशया॥सख्योपेत्याग्रहीत्पाणिं योहं तद्गृहमार्जनी॥११॥मित्रविंदोवाच॥यो मां स्वयंवर उपेत्य विजित्य भूपान्निन्ये श्वयूथगमिवात्मबलिं द्विपारिः ॥ भ्रातंश्च मेऽपकुरुतः स्वपुरं श्रियौकस्तस्यास्तु मेऽनुभवमंघ्र्यवनेजनत्वम् ॥१२॥ सत्योवाच ॥ सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृंगान्पित्रा कृतान्क्षितिपवीर्यपरीक्षणाय ॥ तान्वीरदुर्मदहनस्तरसा निगृह्य क्रीडन्बबंध ह यथा शिशवोऽजतोकान् ॥ १३ ॥ य इत्थं वीर्यशुल्कां मां दासीभिश्चतुरंगिणीम् ॥ पथि निर्जित्य राजन्यान्निन्ये तद्दास्यमस्तु मे ॥ १४ ॥ भद्रोवाच ॥ पिता मे मातुलेयाय स्वयमाहूय दत्तवान् ॥ कृष्णे कृष्णाय तच्चित्तामक्षौहिण्या सखीजनैः ॥ १५ ॥

मत्पित्रे रत्नमदात् । तेन स्वापराधेन भीतः स मे पिता प्रभवे श्रीकृष्णाय मामदिशत् ददौ । दत्तामक्रूरादिभ्यः प्रतिश्रुतामपीत्यर्थः ॥९॥ देहकृत्पिता अमुं श्रीकृष्णं निजनाथं स्वामिनं देवमीश्वरं सीतापतिं प्राज्ञायाविज्ञाय त्रिणवहानि त्रिनवाहानि । ह्रस्वश्छंदोऽनुरोधेन । सप्तविंशतिदिनान्यमुनाऽभ्ययुध्यत् । परीक्षितः संजाता परीक्षा यस्य स परीक्षितस्तं साक्षात्सीतापतिरेवासाविति ज्ञात्वा पादौ प्रगृह्य मणिना सह मामर्हणमुपाहरदर्हणतया समर्पितवान्। अहो तर्हि त्वमतिश्रेष्ठाऽसि नेत्याह। अमुष्याहं दासीति॥ १०॥ सख्या अर्जुनेन। तस्या गृहमार्जनी गृहसंमार्जनकर्त्री ॥ ११ ॥ शुनां यूथगतं स्वबलिं द्विपारिः सिंह इवेति मे भ्रातॄंश्चापकुरुतोऽपकारं कुर्वतो विजित्य । श्रियौको लक्ष्मीनिवासः । तस्यांघ्र्यवनेजनत्वं चरणक्षालनकर्तृत्वमनुभवं प्रतिजन्म मेऽस्तु ॥ १२ ॥ सप्तोक्ष्णो वृषभान् । बलं च वीर्यं च सुतीक्ष्णशृंगाणि चातिशयितानि येषां तान्मे पित्रा कृतान्संपादितान्बलीयसे मां दातुं क्षितिपानां वीर्यस्य बलस्य परीक्षणाय ताननतिप्रसिद्धान्वीराणां दुर्मदं घ्नंति ये तांस्तरसा शीघ्रमेव निगृह्य दमयित्वा क्रीडन्ननायासेनैव बबंध । अजतोकानजापत्यानि ॥ १३ ॥ वीर्यमेव शुल्कं देयं यस्यास्ताम् । दासीभिः सह चतुरंगिणीं गजाश्वादिसेनायुक्तां पुरं निन्ये ॥ १४ ॥ हे कृष्णे हे द्रौपदि ।

इत्यर्थ इति—वाग्दत्ताया अन्यस्मै दानं न दोषाय ‘ सकृत्प्रदीयते कन्या ’ इति स्मृतिर्जलदत्तापरेति ध्येयमिति भावः ॥९॥ छंदोऽनुरोधेन छंदोलोभेन—“अपि माषं मषं कुर्याच्छंदोभंगं न कारयेत् ” इति शिष्टाचारात् । आर्षो गुणरूप एकादेशो वा। ज्ञात्वेति नहि प्राकृतो मया योद्धुं कल्पोऽतो मत्प्रियार्थं सीतापतिरेवायं रामायणयुद्धातृप्तं निजयुद्धेन मां तोषयितुमागत इति विज्ञायेत्यर्थः। अमुष्य कृष्णस्य ॥ १० ॥ यः कृष्णः । गृहमार्जनीति—निजभक्त्यतिशयमाह ॥ ११ भ्रातॄन् विंदानुविंदादीन् । तस्य श्रीनिवासस्य ॥ १२ ॥ तान् उक्ष्णः ॥ १३ ॥ यः कृष्णः ॥ १४ ॥ पिता धृष्टकेतुः । मातुलस्य वसुदेवस्य पुत्राय । तस्मिन्कृष्णे ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्य मे पादसंस्पर्शो भवेज्जन्मनिजन्मनि ॥ कर्मभिर्भ्राम्यमाणाया येन तच्छ्रेय आत्मनः ॥ १६ ॥ लक्ष्मणोवाच ॥ ममापि राज्ञ्यच्युतजन्मकर्म श्रुत्वा मुहुर्नारदगीतमास ह ॥ चित्तं मुकुंदे किल पद्महस्तया वृतः सुसंमृश्य विहाय लोकपान् ॥१७॥ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः ॥ बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः ॥ अयं तु बहिराच्छन्नो दृश्यते स जले परम् ॥ ॥ १९ ॥ श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः पुरम् ॥ सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः ॥ २० ॥ पित्रा संपूजिताः सर्वे यथावीर्यं यथावयः ॥ आददुः सशरं चापं वेद्धुं पर्षदि मद्धियः ॥ २१ ॥ आदाय व्यसृजन्केचित्सज्यं कर्तुमनी श्वराः ॥ आकोष्ठं ज्यां समुत्कृष्य पेतुरेकेऽमुना हताः ॥ २२ ॥ सज्यं कृत्वाऽपरे वीरा मागधांबष्ठचेदिपाः ॥ भीमो दुर्योधनः कर्णो नाविंदंस्तदवस्थितिम् ॥ २३ ॥

तस्मिन्नेव चित्तं यस्यास्तां माम् अक्षौहिण्या सेनया सह सखीजनैश्च सह॥१५॥ पादसंस्पर्शेनात्मनो मे तत्कैवल्याख्यं श्रेयो भवेत्सः । यद्वा येन कारणेनात्मनो जीवस्य । तच्छ्रेयः स एव पुरुषार्थ इति ॥१६॥ राज्ञि हे द्रौपदि यथा मित्रविंदायास्तथैव ममापि चित्तं मुकुंदविषयमासीत् सुसंमृश्य सुविचार्य पद्महस्तया श्रिया वृतः किलातोऽपि मम चित्तं श्रीमुकुंदे आसेति ॥ १७ ॥ तत्र श्रीकृष्णप्राप्तावुपायमचीकरत्कारयामास ॥ १८ ॥ यथा राज्ञि तव स्वयंवरे पार्थस्येप्सया आप्तुमिच्छया कृतस्तथा मत्स्यं कारितवान् । पाठांतरे पार्थस्येषुणाऽप्याकृतः । तर्हि ममाप्यर्जुन एव किं नाविध्यत्तत्राह । अयं त्विति । स मत्स्यो बहिरेवाच्छन्नो नांतरतः । स्तंभलग्नयोर्ध्वदृष्ट्या संलक्ष्यतेऽयं तु न तथा किंतु स्तंभमूले निहितकलशजले केवलं दृश्यतेऽतो दृष्टिरधस्तादुपरि च लक्ष्यमिति श्रीकृष्णव्यतिरेकेण न कस्यापि भेद्य इति भावः ॥ १९ ॥ २० ॥ मत्स्यं वेद्धुम् । पर्षदि संसदि । मद्धियो मय्येव धीर्येषामिति । अन्यचित्ता न वेद्धुं शक्ता इति भावः ॥ २१ ॥ तदेवाह । आदायेति । अमुना चापेन ॥ २२ ॥ नाविंदंस्तदव

तीर्थस्तु तस्येति पपाठ । तत्प्रसिद्धम् । स पादस्पर्शः । नहि सर्वकल्याणहेतुरेकस्य संभवतीत्यरुच्याह—यद्वेति । स एव पादस्पर्श एव । ‘ अद्यापि यत्पदरजः श्रुतिमृग्यमेव ’ इत्युक्तेः ॥ १६ ॥ अत लक्ष्मीवरणादेव ॥ १७ ॥ कृष्णं विना नान्यं वृणोमीति मम मतम् ॥ १८ ॥ पाठांतरे पार्थेष्वपाकृत इति पाठेऽपाकृतश्चालितः “ पार्थो यतोऽसृजद्बाणं नाच्छिनत्परस्पृशे परम् ” इति वक्ष्यमाणत्वात् । स मत्स्यस्तव स्वयंवरमत्स्यः । अयं यो मत्स्वयंवरे कृतो दीर्घस्थूणाशिखरेऽवलंबितः बहिराच्छन्नः काचकरंडिकादिनाच्छादितः यतो जल एव दृश्यतेऽतो हेतोः।इति भाव इति—अलक्ष्यलक्ष्यभेदने तु पार्थोपि शक्त एव तथापि लक्ष्मणाया लक्ष्म्यंशत्वेन कृष्णं विनाऽन्यस्य प्राप्तुमयोग्यत्वात्ततो न बिभिदेऽतो भगवानेव समर्थ इति तात्पर्यम् ॥ १९ ॥ एतन्मत्स्यस्वयंवरम् ॥ २० ॥ मत्स्यमिति शेषः । ‘सदसि सत्पर्षदौ च’ इति कोशात् । इति भाव इति—मत्स्यवेधने चित्ताभावात्तद्वेद्धुं नाशकन्निति तात्पर्यम्॥२१॥तदेवान्यचित्तत्वमेव॥२२॥सज्यं सगुणम् । तदवास्थितिं मत्स्यावस्थितिम् । इत्यर्थ इति—क्रियाशक्तिश्शस्त्रचालनादिसामर्थ्यं दैहिकबलवत्त्वेन भवेदपि तु लक्ष्याभिज्ञत्वं गुरुप्रसादा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्स्याभासं जले वीक्ष्य ज्ञात्वा च तदवस्थितिम् ॥ पार्थो यत्तोऽसृजद्बाणं नाच्छिनत्पस्पृशे परम् ॥ २४ ॥ राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु ॥ भगवान्धनुरादाय सज्यं कृत्वाऽथ लीलया ॥ २५ ॥ तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृज्जले ॥ छित्त्वेषुणाऽपातयत्तं सूर्ये चाभिजिति स्थिते ॥ २६ ॥ दिवि दुंदुभयो नेदुर्जयशब्दयुता भुवि ॥ देवाश्च कुसुमासारान्मुमुचुर्हर्षविह्वलाः ॥ २७ ॥ तद्रंगमाविशमहं कलनूपुराभ्यां पद्भ्यां प्रगृह्य कनकोज्ज्वलरत्नमालाम् ॥ नूत्ने निवीय परिधाय च कौशिकाग्र्ये सव्रीडहासवदना कबरीधृतस्रक् ॥ २८ ॥ उन्नीय वक्त्रमुरुकुंतलकुंडलत्विड्गंडस्थलं शिशिरहासकटाक्षमोक्षैः ॥ राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेऽनुरक्तहृदया निदधे स्वमालाम् ॥ ॥ २९ ॥ तावन्मृदंगपटहाः शंखभेर्यानकादयः ॥ निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ॥ ३० ॥ एवं वृते भगवति मयेशे नृपयूथपाः ॥ न सेहिरे याज्ञसेनि स्पर्धंतो हृच्छयातुराः ॥ ३१ ॥ मां तावद्रथमारोप्य हयरत्नचतुष्टयम् ॥ शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावाजौ चतुर्भुजः ॥ ३२ ॥ दारुकश्चोदयामास कांचनोपस्करं रथम् ॥ मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव ॥ ३३ ॥

स्थितिमिति मागधादीनां क्रियाशक्तिरेव न तु लक्ष्याभिज्ञतेत्यर्थः ॥ २३ ॥ यत्तो यत्नवान् । असृजन्मुमोच । स बाणो मत्स्यं नाच्छिनत्परं केवलं पस्पर्श । ज्ञानवानप्यर्जुनो बलेनापूर्ण इत्यर्थः ॥ २४ ॥ २५ ॥ अभिजिति सर्वार्थसाधके मुहूर्ते ॥ २६ ॥ २७ ॥ भगवत्प्राप्तिहर्षनिर्भरेणात्मानमेवानुवर्णयंत्याह द्वाभ्याम् । तद्रंगमिति । तत्तदा कलौ कलस्वनौ नूपुरौ ययोस्ताभ्यां पद्भ्यां रंगं प्राविशम् । कनकेनोज्ज्वलां रत्नमालाम् । निवीय प्रावृत्य परिधाय च नीवीबंधेन च । कौशिकाग्र्ये उत्तमकौशेयवस्त्रे । सव्रीडो हासो यस्मिंस्तद्वदनं यस्याः सा । कबर्यां धृताः स्रजो यया सा ॥ २८ ॥ उरवः कुंतला यस्मिन् । कुंडलयोस्त्विषो ययोस्ते गंडस्थले यस्मिंस्तच्च तच्च । शिशिरः संतापहरो हासो येषु तैः कटाक्षमोक्षैरपांगमोक्षणविलासैः अनुरक्तं हृदयं यस्याः साऽहम् ॥ २९ ॥ ३० ॥ याज्ञसेनि हे द्रौपदि ईशे श्रीकृष्णे मया वृते सति स्पर्धंतः स्पर्धमानाः । नन्वेवं परमैश्वर्यं दृष्टवतां कुतः स्पर्धाऽवसरस्तत्राह । हृच्छयातुरा इति । हृच्छयेन कामेनातुरा विवशाः । कामविजृंभिता स्पर्धेति भावः ॥ ३१ ॥ हयरत्नानां चतुष्टयं यस्मिंस्तं रथम् । द्वाभ्यां मामालिंग्य द्वाभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजस्तस्थौ ॥ ३२ ॥ मृगाणां मिषतां मृगराडिव तदा हरिर्जंगाम

भ्यासलभ्यमेवेति भावः ॥ २३ ॥ मत्स्यस्याभासं प्रतिबिम्बं पस्पृश इत्यार्षत्वात्तङ् । इत्यर्थ इति—छेदनस्य पूर्णबलसाध्यत्वेन छेदनज्ञाने सत्यपि तन्नास्तीति भावः ॥ २४ ॥ अथ सर्वराजाभिमाननिवृत्तेरनंतरम् ॥ २५ ॥ तस्मिन् धनुषि । तं मत्स्यम् । अभिजिति, तच्चोक्तम्—" मध्याह्ने तु यदा शंकोर्मूले छाया प्रजायते । सर्वार्थसाधनीवैकाभिजिदाख्या घटी स्मृता ॥ " इति ज्योतिःशास्त्रात् । मध्याह्नात्परतो घटिकैका यावत्तावदभिजिदित्यर्थः । विस्तरेण तृतीये स्कंधे चैतदस्तीति ॥ २६ ॥ २७ ॥ निर्भरोतिशयः । कलस्वनौ मधुरास्फुटशब्दौ । रंगं स्वयंवरस्थलम् । कबर्यां केशपाशरचनायाम् ॥ २८ ॥ २९ ॥ तावन्मालानिक्षेपसमये ॥ ३० ॥ ईशपदेनात्र न शंभुरग्रिमपद्ये चतुर्भुज इत्युक्तेः । अत्राऽऽशंकते—नन्विति । इति भाव इति—कामाकुलिताचित्तत्वाद्भगवदैश्वर्यविस्मृतिर्जाता । 'कामातुराणां न भयं न लज्जा' इत्युक्तेः ॥ ३१ ॥ ३२ ॥ तदा रथे स्थापयित्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेऽन्वसज्जंत राजन्या निषेद्धुं पथि केचन ॥ संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिम्॥३४॥ते शार्ङ्गच्युतबाणौघैः कृत्तबाह्वंघ्रिकंधराः॥निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः ॥ ३५ ॥ ततः पुरीं यदुपतिरत्यलंकृतां रविच्छदध्वजपटचित्रतोरणाम् ॥ कुशस्थलीं दिवि भुवि चापि संस्तुतां समाविशत्तरणिरिव स्वकेतनम् ॥३६॥पिता मे पूजयामास सुहृत्संबंधिबांधवान् ॥ महार्हवासोलंकारैः शय्यासनपरिच्छदैः॥३७॥ दासीभिः सर्वसंपद्भिर्भटेभरथवाजिभिः ॥ आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः ॥ ३८ ॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः ॥ सर्वसंगनिवृत्त्याऽद्धा तपसा च बभूविम ॥ ३९ ॥ महिष्य ऊचुः ॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाऽथ नः क्षितिजये जितराजकन्याः ॥ निर्मुच्य संसृतिविमोक्षमनुस्मरंतीः पादांबुजं परिणिनाय य आप्तकामः ॥४०॥ न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत ॥ वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदम् ॥४१॥

मेति शेषो ज्ञातव्यः । दारुकस्यैव वा मृगराजोपमा ॥ ३३ ॥ अन्वसज्जंत पृष्ठतः सक्ता बभूवुः । निषेद्धुं प्रतिबंधं कर्तुं केचन पुरतो गत्वा पथि संयत्ता बभूवुरित्यर्थः । उद्धृतेष्वासा ऊर्ध्वकृतचापाः । ग्रामसिंहाः श्वानो हरिं सिंहं यथेति ॥ ३४ ॥ ३५ ॥ रविं छादयंति ते रविच्छदा ध्वजेषु पटा यस्यां चित्राणि तोरणानि यस्यां सा च सा च । तां कुशस्थलीं पुरीं यदुपतिः समाविशत् । स्वकेतनं मंडलमस्ताचलं वा ॥३६॥ महार्हवासःप्रभृतिभिः सुहृदादीन्पूजयामास॥३७॥दास्यादिभिः सहायुधानि पूर्णायापि ददौ ॥ ३८ ॥ इमा अष्टौ वयं सर्वसंगनिवृत्त्या तपसा स्वधर्मेणाद्धा साक्षात्तस्य गृहदासिका बभूविम ॥३९॥ क्षितिजये दिग्विजये जितानां राज्ञां कन्या नोऽस्मांस्तेन रुद्धा ज्ञात्वा ततो निर्मुच्य संसृतेर्विमोक्षो यस्मात्तत्पादांबुजमनुस्मरतीर्नः परिणिनायोदवहत् । आप्तकामोऽपि यः ॥ ४० ॥ न वयमिति । साम्राज्यादि न कामयामहे किं तु

पणकाले । अध्याहारे गौरवं मत्वाह—दारुकस्येति ॥ ३३ ॥ ये तत्रागतास्ते । इत्यर्थ इति—मार्गं रुरुधुरिति भावः ॥ ३४ ॥ प्रधने युद्धे ॥ ३५ ॥ ततो मार्गस्थराजन्यजयोत्तरम् । तरणिः सूर्यः । मंडलमत्र सूर्यलोकः । स्वलोकं गतस्य प्रतिदिनागमनं यद्यपीशत्वाद्भगवतो रवेर्न संभवेत्तथाप्यज्ञजनबुद्ध्यारोहार्थमाह—अस्ताचलं वेति ॥ ३६ ॥ पिता बृहत्सेनः ॥३७॥ पूर्णायापि पूजायां रवये दीपदानवत्तत्कर्मांगत्वाद्ददाविति भावः ॥ ३८ ॥ तस्य श्रीकृष्णस्य दासीत्वञ्च तपआदिनाऽस्माभिर्लब्धमिति भावः ॥ ३९ ॥ महिष्यः शतोत्तरषोडशसहस्रसंख्याकाः । अथ भौममरणानंतरम् । यः श्रुत्या आप्तकामपदेनोक्तः परमात्मा सोप्यस्मत्पूर्वपुण्यसफलीकरणार्थं पारिणीतवान्न कामुकत्वेनेति भावः ॥४०॥ वयमपि तत्पादरजोभजनमंतरेण नान्यत्पदमाशास्महे इत्याहुः—न वयमिति । द्वयोरन्वयः । एतस्य श्रीकृष्णस्य । अत्राऽऽशंकते—नन्विति । तदुभयभोगभाक्त्वं सार्वभौमेंद्रभोगसेवित्वरूपम् । इत्यर्थ इति—अणिमादिसिद्धिमत एव विविधं राजमानत्वादिति भावः । तत्सालोक्यादि तत्समानलोकवासादि । आदिना सामीप्यादिग्रहः । लोकाद्वेदो गरीयानिति न्यायमाश्रित्याह—यद्वेति ॥ ४१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामयामह एतस्य श्रीमत्पादरजः श्रियः ॥ कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥ ४२ ॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः ॥ गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ श्रीशुक उवाच ॥ श्रुत्वा पृथा सबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः ॥कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्म्युर लमश्रुकलाकुलाक्ष्यः ॥ १ ॥ इति संभाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु ॥ आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥२॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः ॥ विश्वामित्रः शतानंदो भरद्वाजोऽथ गौतमः ॥ ३ ॥ रामः सशिष्यो भगवान्वसिष्ठो गालवो भृगुः ॥ पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ॥ ४ ॥

एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामहे इति । ननु तस्य गृहिण्यो यूयं सर्वसंपद्भाजः किमेवं कामयध्वमत आहुः । हे साध्वि । साम्राज्यं सार्वभौमपदम् । स्वाराज्यमैंद्रं पदम् । भौज्यं तदुभयभोगभाक्त्वम् । विविधं राजत इति विराट् तस्य भावो वैराज्यमणिमादिसिद्धिभाक्त्वमित्यर्थः । पारमेष्ठ्यं ब्रह्मपदम् । आनंत्यं मोक्षम् । हरेः पदं तत्सालोक्यादि न तु कामयामह इति । यद्वा बह्वृचब्राह्मणोक्तक्रमेण प्रागादिदिक्चतुष्टयाधिपत्यानि साम्राज्यभौज्यस्वाराज्यवैराज्यानि व्याख्येयानि ॥ ४१ ॥तर्त्कि तत्पादरज एव काम्यतेऽत आहुः । श्रियः कुचकुंकुमगंधाढ्यमिति । ब्रह्मादिसेव्यया लक्ष्म्याऽपि सेवितत्वादिति भावः॥ ४२॥ननु तर्ह्यतिदुर्लभत्वात्किं तद्वांछयाऽत आह। व्रजस्त्रिय इति । यद्यथा गावो गाः महात्मनोऽपि गाश्चारयतः पादस्पर्शं च गोपा यथा वांछंति तद्वत् । तत्पराणां सुलभ इति भावः ॥ ४३ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायां त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ चतुर्भिरधिकाशीतितमे मुनिसमागमे ॥ वसुदेवमखोत्साहबंधुप्रस्थापनादिकम् ॥ १ ॥ सुबलपुत्री गांधारी । माधवी सुभद्रा । क्षिति

किं कुतः । इति भाव इति—या सर्वसेव्या रमा तया तत् सेव्यतेऽतोऽस्माकमपि तत्रैव रतिरित्याहुः—श्रिय इति ॥ ४२ ॥ अत्राशंक्य समाधत्ते—नन्विति । इति भाव इति—अन्यैः प्रबलैरपि यन्नाप्यते तत्तद्भक्तैर्दुर्बलैरपि प्राप्यते, भक्तवात्सल्येन हरिर्निजजनानामसुलभमपि सुलभं करोतीति तात्पर्यम् । पादैः स्पृश्यते इति पादस्पर्शः पदरज एवेत्यर्थः ॥४३॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे त्र्यशीतितमोऽध्यायः॥८३॥ वसुदेवमखोत्साहोत्तरं बंधूनां नंदादीनां प्रस्थापनादिकम् । आदिना स्वप्रस्थानादिग्रहः (१)। हरेर्ज्ञानिप्रियत्वं यज्ञस्य तदेकविषयत्वं तत्प्रीतेर्मुक्तिसाधनत्वं पुत्रादिस्नेहस्य संसारमूलत्वं चात्राध्याये कथयति । तत्र व्यासादिमुनीनामागमनं वक्तुं पृथादिस्त्रीणां संतोषोद्रेकमाह—श्रुत्वेति । स्वशब्देन गोपीषु हरेस्नेहोद्रेकं वक्ति मुनिः । प्रणयानुबंधं कृष्णभार्याणामिति शेषः ॥ १ ॥ इत्युक्तरीत्या । तत्र रामकृष्णसमीपे ॥ २ ॥ अथ चार्थे ॥ ३ ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रस्तथांगिराः ॥ अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥ ५ ॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः ॥ पांडवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ॥ ६ ॥ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत् ॥ स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥ ७ ॥ उवाच सुखमासीनान्भगवान्धर्मगुप्ततनुः ॥ सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ॥८॥ श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं कात्स्न्येन तत्फलम् ॥ देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनम् ॥ ९ ॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषाम् ॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकम् ॥ १० ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥११॥ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ॥ उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥ १२ ॥

पानां राज्ञां पत्न्यः । स्वगोप्यः कृष्णभक्ता गोप्यः विसिस्म्युर्विस्मयं चक्रुः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ आनर्चुरर्चितवंतः ॥ ७ ॥ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्ततनुः । यता नियता वाग्यस्य तस्य सदसः ॥ ८ ॥ जन्मभृतः सफलजन्मानः । तत्फलं जन्मफलम् । किं तत् । यद्योगेश्वरदर्शनम् ॥ ९ ॥ किं च युष्माकं दर्शनमेव तावद्देवानामपि दुष्प्रापमस्माकं तु स्पर्शनादिकमपि कथं नु घटितमिति विस्मयेनाह । किमिति । स्वल्पतपसां तीर्थस्नानादिमात्रे तपो बुद्धिर्येषां तथाऽर्चायां प्रतिमायां देव इति चक्षुर्दृष्टिर्येषां तेषां योगेश्वरदर्शनादिकमिदं किमसंभावितमित्यर्थः ॥ १० ॥ एतत्प्रपंचयति न ह्यम्मयानीति त्रिभिः ॥ ११ ॥ वाङ्मनसयोरप्युपासना

द्वितत्रितैकताः सहोदराः । "त्रितः कूपेऽवहितो देवान्हवत ऊतये" इति श्रुतेः । तथा चार्थे । अपरे उक्तान्ये धौम्यकृपादयः ॥ ५ ॥ तान् मुनीन् । प्रागुत्थाय ॥ ६ ॥ यथा यथाविधि । अर्चयत् । अडागमाभाव आर्षः ॥ ७ ॥ तस्य सदसः विप्रनृपसभायाः ॥ ८ ॥ योगेश्वराणां भक्तिज्ञानयोगाद्युपदेष्टॄणां विप्राणां दर्शनम् ॥ ९ ॥ अतिदुर्लभलाभमाह—किंचेति । इत्यर्थ इति—किमत्रासंभावनायां व्याख्येयम् । 'अर्चा पूजाप्रतिमयोः' इति हलायुधः ॥ १० ॥ एतदर्चादिषु देवादिबुद्धित्वम् । नहि बहिर्मुखानां तीर्थादिना जन्मसाफल्यं किंतु सज्जनदर्शनादेवेत्याह—नहीति । तत्रतत्र सन्निहितास्तीर्थदेवादयः उरुकालेन कालक्षेपं कृत्वैव न तु तदानीमेव । तत्र किं कारणमित्यस्य देहलीदीपकन्यायेनोरुकालेनेत्येवोत्तरम् । तथाहि—कलनं कालः ज्ञानम्, 'कल–गतौ' गत्यर्थकानां ज्ञानार्थतापीति वामनादयः । उरुगुरुशब्दौ पर्यायौ । उरुणा गुरुणा दत्तः काल उरुकालः मध्यमपदलोपी समासस्तेन गुरूपदिष्टज्ञानेन तत्तत्स्वरूपं तत्तन्मन्त्रं तत्तदंगाचरणादिकं ज्ञात्वा समुपास्य तत्तद्दर्शनं प्राप्य तत्तद्देवादिप्रसादेनावश्यं पावित्र्यमतो गुरूपदेशः कारणमित्यर्थः । प्रकृते किमागतमिति चेदाह—दर्शनादेवेति । साधवः शास्त्रानुयायिनः शिष्टा इति यावत्, स्वदर्शनादन्यथाज्ञानमपगमयंति । एवशब्दः गुरूपदेशं व्यवच्छिनत्ति ॥ ११ ॥ तन्मूलमवमूलम् । अत्राज्ञानाहरणे देवानां भेदकर्तृत्वं भेदज्ञान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्व भिज्ञेषु स एव गोखरः ॥ १३ ॥ श्रीशुक उवाच ॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धियः ॥ १४ ॥ चिरं विमृश्य मुनय ईश्वरस्ये शितव्यताम् ॥ जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुम् ॥ १५ ॥ यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजाम धीश्वराः ॥ यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितम् ॥ १६ ॥

विषयत्वम् । "यो वाचं ब्रह्मेत्युपास्ते मनो ब्रह्मेत्युपास्ते" इति श्रुतेः । अयं तन्मूलमज्ञानं न हरंति । अत्र हेतुः । भेदकृतो भेदकर्तारः । यद्वा भेदबुद्धिं कुर्वतः पुंसः । विपश्चितो निरस्तभेदाः । ते तु मुहूर्तमात्रसेवयैवाघं घ्नंतीति ॥ १२ ॥ अतः साधून्विहायान्यत्रात्मादिबुद्ध्या सज्जमानोऽतिमंद इत्याह । यस्येति । आत्मबुद्धिरहमिति बुद्धिः । त्रयो धातवो वातपित्तश्लेष्माणः प्रकृतयो यस्य तस्मिन्कुणपे शरीरे स्त्रीपुत्रादिषु स्वधीः स्वीया इति बुद्धिः । भौमे भूविकारे इज्यधीर्देवताबुद्धिः । यद्यस्य तीर्थबुद्धिस्तीर्थ मिति बुद्धिः । अभिज्ञेषु तत्त्ववित्सु यस्य ता बुद्धयो न संति स एव गोष्वपि खरो दारुणोऽत्यविवेकी । यद्वा गवां तृणादिभारवाहः खरो गर्दभ इति ॥ १३ ॥ दुरन्वयम ननुरूपम् । भ्रमंत्यनवस्थिता बुद्धिर्येषां ते ॥ १४ ॥ ईशितव्यतामनीश्वरतां कर्माधिकारितां जनसंग्रहमात्रमेतदित्यूचुः । स्मयंतो हसंतः ॥ १५ ॥ अनन्वयं विवृण्वंत आहुर्द्वाभ्याम् । यन्माययेति । तत्त्ववित्सूत्तमा अपि वयम् । काऽसौ माया यया विमोहिता इति तामाहुः । यदिति । यद्यस्मादीहया नरचेष्टितेन गूढः सन्नीशितव्याय

त्त्वेनात्मस्वरूपज्ञानाभावात् । तदुक्तम्—"नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो नात्मतया गृहीताः" इत्युक्तेः, 'ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः' इत्याद्युक्तेश्च ब्रह्मादीनां शुद्धसात्विकत्वेन ज्ञानदाने समर्थत्वेन तेषामज्ञानि त्वकल्पनमनुचितं मत्वाह—यद्वेति । ते कस्य पापं न हरंतीति चेदाह—भेदबुद्धिं कुर्वत इति । ते ज्ञानिनस्तु ज्ञानिसंगस्य सर्वपुण्यावाप्तिहेतुत्वात् । 'स्नातं तेन समस्ततीर्थसलिले' इत्याद्युक्तेः ॥ १२ ॥ यतः साधव एव सर्वोत्तमा अतो हेतोः । अन्यत्र देहादिषु । प्रकृतयो मूलकारणं स्वभावा वा । कुणपे शववदचेतने "पूतिगंधौ शवे चैव पुद्गले कुणपः स्मृतः" इति मेदिन्यादयः । ता बुद्धय आत्मादिबुद्धयः । गोषु बलीवर्देषु खरः 'खरस्तीक्ष्णे च दारुणे' इति धरणिः । बलीवर्दास्तु स्वभावत एव दारुणाः संतीति खरपदकृतविशेषस्य तत्राभावादाह—यद्वेति । पशूनां पशुरित्यर्थः । यद्वा—गवि भूमौ खरो रासभवद्भारवाडेवेत्यर्थः ॥ १३ ॥ अकुंठमेधसोऽप्रतिहतज्ञानस्य । अननुरूपं दुर्ज्ञेयाभिप्रायम् ॥ १४ ॥ तं श्रीकृष्णम् । "ईशितव्यस्त्वनीशत्वे दास्ये च परिकीर्तितः" इति । जगद्गुरुं जगच्छास्तारम् ॥ १५ ॥ तां मायाम् । अत्राऽऽशंकते—नन्विति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनम् ॥ १७ ॥ अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च ॥ स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भवान् ॥ १८ ॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः ॥ यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परम् ॥ १९ ॥ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः ॥ सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान् ॥ २० ॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः ॥ त्वया संगम्य सद्गत्या यदंतः श्रेयसां परः ॥ २१ ॥

त्यनीश्वरवदाचरति भवान् । नन्वहमीश्वरश्चेत्किमित्येवमाचरेयं तत्राहुः । अहो इति । भगवतस्तव विचेष्टितं विचित्रमतर्क्यम् ॥ १६ ॥ भगवत्त्वमेवाहुः । अनीह इति । अनीहोऽक्रिय एव । आत्मना स्वरूपमात्रेण । बहुधेत्यत्र दृष्टांतः । यथा भौमैरिति । भौमैर्घटादिविकारैरुपलक्षिता । "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः । ननु कथमहं जगत्सृष्ट्यादिकर्ता वसुदेवपुत्रत्वादिति तत्राहुः । अहो इति । विभूम्नः परिपूर्णस्य तवेदं जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति ॥ १७ ॥ जनसंग्रहमाहुः अथापीति त्रिभिः । सत्त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि । स्वलीलया आचारेण वेदपथं च बिभर्षि ॥ १८ ॥ अत एव ब्राह्मणेषु बहुमानमपि करोषीति सहेतुकमाहुः । ब्रह्मेति । ब्रह्म वेदाख्यं शुक्लं शुद्धं ते हृदयमंतरंगं रूपम् । कुत इत्यत आहुः । यत्रेति । यत्र ब्रह्मणि व्यक्तं कार्यमव्यक्तं कारणं ततः परं सत्सन्मात्रं ब्रह्म च तपआदिभिरुपलब्धं तद्ब्रह्म ॥ १९ ॥ तस्माद्वेदहृदयत्वाद्वेदप्रवर्तकं ब्राह्मणकुलं शास्त्रयोनेर्वेदप्रमाणकस्य तव सद्धाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि संपूजयसि तत्तस्मादेव कारणात्त्वं ब्रह्मण्यानामग्रणीर्मुख्यस्तत्प्रवर्तकः सन्कर्माचरसीत्यर्थः ॥ २० ॥ तस्मादीश्वरस्य तवेदं जनसंग्रहमात्रं वयं तु तव संगत्या कृतार्था इत्याहुः अद्येति षड्भिः । सतां गत्या त्वया संगम्य संग

तत्राक्षेपे । विचेष्टितं लीला १६ ॥ सृष्ट्यादिकर्तृत्वमाक्षिपति—नन्विति ॥ १७ ॥ काले सज्जनोपद्रवसमये । वर्णाश्रमाणामात्मा नियंता तत्तद्धर्मप्रवर्तकः ॥ १८ ॥ अंतरंगरूपम् 'वेदो नारायणः साक्षात्' इति स्मृतेः । अंतरंगरूपत्वे हेतुमाशंकते—कुत इति । ब्रह्मणि वेदे । ततः कार्यकारणात् । ब्रह्म परमात्मा । ब्राह्मणैरिति शेषः । उपलब्धं साक्षाद्दृष्टम् ॥ १९ ॥ उपलब्धिस्थानं ब्राह्मणकुलम् । ब्राह्मणकुले एव त्वं लभ्यसेऽन्येषामपि तवोपलब्धिर्ब्राह्मणद्वारैव तस्यैवोपदेशाधिकारात् । "ब्राह्मणस्यैवाधिकारो धर्ममात्रोपदेशने" इति संहितोक्तेः । ततस्माद्ब्राह्मणकुलसभाजनादेव । तत्प्रवर्तको वेदमार्गप्रवर्तकः । इत्यर्थ इति—"यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः । मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥" इति श्रीमुखोक्तेरिति भावः ॥ २० ॥ यतस्त्वं वेदप्रवर्तकस्तस्मादित्यर्थः । गत्या प्राप्त्येन । न केवलं जन्मन एव साफल्यं किंतु विद्यादेरपीत्याह—विद्याया इति । "सा विद्या तन्मतिर्यया । तत्तपो यद्धरेः प्रियम् । तदेव यत्पश्यति तद्धि चक्षुः" इत्याद्युक्तेः । साफल्यमिति समासांतर्गतमप्यन्यत्रान्वेति "भीष्मद्रोणप्रमुखतः सर्वेषाञ्च महीक्षिताम्" इतिवत् । श्रेयसां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्तस्मै भगवते कृष्णायाकुंठमेधसे ॥ स्वयोगमायया च्छन्नमहिम्ने परमात्मने ॥ २२ ॥ न यं विदंत्यमी भूपा एकारामाश्च वृष्णयः ॥ मायाजवनिकाच्छन्नमात्मानं कालमीश्वरम् ॥ २३ ॥ यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक् ॥ नाममात्रेंद्रियाभातं न वेद रहितं परम् ॥ २४ ॥ एवं त्वा नाममात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥ २५ ॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथोऽनुगृहाण भक्तान् ॥ २६ ॥ श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरम् ॥ राजर्षे स्वाश्रमान्गंतुं मुनयो दधिरे मनः ॥ २७ ॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२८॥ वसुदेव उवाच ॥ नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् ॥ २९ ॥

प्राप्य । यद्यस्मात्त्वं श्रेयसां परोऽवधिः ॥२१॥२२॥ एकस्मिन्नेव स्थाने आरामो येषां तेऽपि । कालं सृष्ट्यादिकारणम् । ईश्वरं नियंतारम् ॥ २३ ॥ एतत्सदृष्टांतमाहुः । यथेति । शयानः स्वप्नान्पश्यन् । गुणतत्त्वदृक् स्वप्नविषयेषु तत्त्वदृष्टिः नाममात्रमिंद्रियेण मनसा आभातं सिंहव्याघ्रादिरूपमात्मानं वेद तद्रहितं देवदत्तादिरूपमात्मानं न वेद यथा ॥ २४ ॥ एवं त्वा त्वां नाममात्रेषु स्वप्नादितुल्येषु विषयेष्विंद्रियैर्या ईहा प्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद । स्मृतेर्विवेकस्योपप्लवान्नाशात् ॥ २५ ॥ अघौघस्य मर्षं नाशं करोति यद्गंगाख्यं तीर्थं तस्यास्पदमाश्रयं तेंघ्रिं सुविपक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य तेंघ्रिं ददृशिम दृष्टवंतो वयं बहुभिः पुण्यैरतोऽस्मान् भक्ताननुगृहाण । भक्तान् कृत्वाऽनुग्रहं कुर्वित्यर्थः । ननु किं भक्त्या यथापूर्वं तप एव तप्यतामिति नेत्याहुः । उत्सिक्ता उद्रिक्ता या भक्तिस्तयोपहत आशयलक्षणो जीवकोशो येषां त एव पूर्वे भवद्गतिमापुर्नान्य इति ॥ २६ ॥ २७ ॥ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा । बभाषे इदमिति संधिरार्षः ॥ २८ ॥ सर्वे देवा येषु तेभ्यः ।

कल्याणानाम् "श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत्" इति मेदिनी । परोऽवधिः । "श्रेयसामिह सर्वेषामात्मा ह्यवधिरर्थतः" इत्युक्तेः ॥ २१ ॥ महिमा स्वरूपम् ॥ २२ ॥ आराम आवासः " आरामो वासनिलये क्रीडायाश्च वने तथा " इति कोशात् । यं कृष्णम् ॥ २३ ॥ एतत् भगवत्स्वरूपाज्ञानम् । तद्रहितं सिंहव्याघ्रादिभ्योऽन्यम् ॥ २४ ॥ २९ ॥ यं मायया न वेद तस्येत्यर्थः । यतो वयं त्वच्चरणदर्शनाद्धूतपापा अथो अतोर्थे अतो हेतोः । इत्यर्थ इति–"यदा यस्यानुगृह्णाति भगवानात्मनां गतिः । भक्तियोगं स लभतेऽनेकजन्मार्जितैः शुभैः ॥" इत्यादिपुराणाद्भक्तिदानमेव भगवतः परमानुग्रह इति भावः । अत्राऽऽशंकते–नान्विति । आशयलक्षणो जीवकोशोऽहंकारः । "जरयत्याशु या कोशं निगीर्णमनलो यथा " इति कपिलोक्तेः । " विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेंजोऽच्युत ते गतिं पराम् " इति ब्रह्मोक्तेश्च ॥ २६ ॥ इतीत्थम् ॥ २७ ॥ तत् तेषां गमनम् । तान् मुनीन् ॥ २८ ॥ यावतर्यिवित्यः, तास्तावत्यः । इति श्रुतिपदार्थः । इयमेव श्रुतिर्विप्राणां तप्तमुद्राधारणाऽभावं द्योतयति । " श्रुतौ या वेदवित्त्वोक्तिः सा गायत्री वै सर्वमिदम् " इति श्रुतेर्गायत्र्याः सर्ववेदमूलत्वेन तन्मात्रविद्यपि वर्तत एव एतदभिप्रेत्यैव भगीरथं प्रति बृहन्नारदीये धर्मराजेनोक्तम्– " ब्राह्मणस्य तनुर्ज्ञेया सर्वदेवसमन्विता । सा चेत्संतापिता राजन्किं वक्ष्यामि तदेनसः ॥ शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा । एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥" किं च–"शंखचक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः ॥" इत्याश्वलाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वाऽर्भकं यन्नः पृच्छति श्रेय आत्मनः ॥ ३० ॥ संनिकर्षोऽत्र मर्त्यानामनादरणकारणम् ॥ गांगं हित्वा यथाऽन्यांभस्तत्रत्यो याति शुद्धये ॥ ३१ ॥ यस्यानुभूतिः कालेन लयोत्पत्त्यादिनाऽस्य वै ॥ स्वतोन्यस्माच्च गुणतो न कुतश्चन रिष्यति ॥ ३२ ॥ तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयम् ॥ प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः ॥ ३३ ॥ अथोचुर्मुनयो राजन्नाभाष्यानकदुंदुभिम् ॥ सर्वेषां शृण्वतां राज्ञां तथैवाच्युतरामयोः ॥ ३४ ॥ कर्मणा कर्मनिर्हार एष साधु निरूपितः ॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥ ३५ ॥

" यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंति" इति श्रुतेः । येन कर्मणा यथा कृतेन वा कर्मणा निर्हारो निरासो भवति तदुच्यताम् ॥ २९ ॥ श्रीकृष्णं हित्वाऽस्मान्पृच्छतीति विस्मितान्प्रत्याह । नातीति । बुभुत्सया बोद्धुमिच्छया ॥ ३० ॥ तत्रत्यो गंगातीरवासी ॥ ३१ ॥ श्रीकृष्णेऽर्भकत्वमानोऽविद्याविजृंभित इत्याह यस्येति द्वाभ्याम् । अनुभूतिर्ज्ञानं कुतश्चिदपि न रिष्यति न नश्यति । तदेवाह कालेन कर्कटिकाफलवत् । अस्य विश्वस्य लयोत्पत्त्यादिनाऽपि । स्वतश्च विद्युदादिवत् । अन्यस्माच्च मुद्गरादेर्घटादिवत् । गुणतो रूपाद्यंतरोत्पत्तेः पूर्वरूपादिना देहादिवत् ॥ ३२ ॥ तमेव कुतश्चिदप्यव्याहतानुभवमत एवेश्वरम् । किं च अद्वितीयं कृष्णमन्यः प्राकृत उपगूढमाच्छन्नं मनुष्यं मन्येत । कैः क्लेशकर्मादिभिः । तत्रक्लेशरागादयश्च तत्पूर्वकाणि कर्माणि च तत्परिपाके सुखदुःखे च सत्त्वादीनां गुणानां पुनः प्रवाहश्च तैः

नेनाप्युक्तम् । श्रुतौ ब्राह्मणपदं द्विजातिपरमेव बृहन्नारदीयादिवाक्यस्य तदुपबृंहणत्वात्, तद्वृतिविधायकवाक्यानि द्विजेतरपराण्येव वैष्णवाभासैर्विप्रपरत्वबोधकानि वाक्यानि कल्पयित्वा पुराणेष्वाधुनिकैर्निक्षिप्तानि । याः श्रुतयस्तत्र प्रमाणत्वेन न्यस्तास्ता वेदभाष्यकर्तृभिरन्यपरतया व्याख्याताः । स्मृतयश्च हारीताद्यास्तेषां प्रसिद्धस्मृतिभ्यो विरुद्धत्वात्कल्पिता एव । यदि प्राप्तौ सत्यां निषेध इति न्यायमाश्रित्य ब्राह्मणं प्रति प्राप्तमेवेति निषिध्यते तत्रोत्तरं नहि ब्राह्मणं प्रकृत्य कुत्रापि सुरापानं विधिर्निषेधस्तु सर्वत्रैवैवमत्राप्यप्राप्तनिषेधोयम् । किंच—तांत्रिकैः प्रसिद्धवर्णाश्रमेभ्य इतरेऽपि ब्राह्मणादिवर्णा ब्रह्मचर्याद्याश्रमाश्च स्वीकृतास्तद्विषयमेव वैताद्विधानं, स्पष्टं चैतत्सूतसंहितायाम् । वस्तुतस्तु तांत्रिकोयं विधिस्तत्र वैदिकानां नाधिकारस्तदुक्तम्—" विष्ण्वागमादितंत्रेषु दीक्षितानां विधीयते । शंखचक्रगदापद्मैरंकनं नान्यदेहिनाम् ॥ " किंच—" श्रुतिपथगलितानां मानुषाणां तु तंत्रं गुरुगुरुरखिलेशः सर्ववित्प्राह शंभुः । श्रुतिपथनिरतानामस्ति नैवात्र किंचिद्धितकरमिह सर्वं पुष्कलं सत्यमुक्तम् ॥ " इत्यलं प्रसक्तानुप्रसक्तेन । यद्वा—सर्वस्मिन्देशे काले शास्त्रे इतिहासे पुराणे वेदे आगमे च देवो देवनं प्रकाशनं येषां ते तेभ्यस्तथा । सर्वलोकपूज्येभ्य इत्यर्थः । निरासो मूलच्छेदः । तत् तथा ॥ २९ ॥ यद्वसुदेवो नः पृच्छति तन्नातिचित्रम् ॥ ३० ॥ अन्यांभस्तडागादिजलम् ॥ ३१ ॥ अर्भकत्वमानो बालत्वाभिमानः । तदेव ज्ञाननाशनमेव । रिष्यति ' रिष—हिंसायाम् ' दिवादिर्लट् ॥ ३२ ॥ तं कृष्णम् । अत एवाहतज्ञानत्वादेव । सर्वथा विद्यमानैश्वर्योप्यज्ञानामनीश एव प्रतीयते इत्याह—किञ्चेति । तत्र तेषु क्लेशादिषु । तत्पूर्वकाणि रागादिपूर्वकाणि । तत्परिपाके कर्मफले । पुनःपुनः प्रवाहो मुहुर्मुहुः सृष्ट्यादिरूपो वा शांतघोरविमूढत्वादिस्वभाववशाच्छुक्लादिकर्मकरणाविच्छेदः। अत्र कार्येणकारणावृतौ अभ्रतुषारराहवो हि रविप्रकाश्यत्वेन रविकार्याण्येव "तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः" इत्याद्युक्तेः । प्रकाश्यप्रकाशकयोरपि कार्यकारणभावोऽज्ञानप्रपंचादिषु दृश्यत एवेति॥३३॥ अथ नारदवाक्यानंतरम् ॥३४॥यद्यजेदे॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा ॥ दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ॥ ३६ ॥ अयं स्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाऽऽप्तवित्तेन शुक्लेनेज्येत पूरुषः ॥ ३७ ॥ वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् ॥ आत्मलोकैषणां देव कालेन विसृजेद्बुधः ॥ ३८ ॥ ग्रामे त्यक्तैषणाः सर्वे ययुर्धीरास्तपोवनम् ॥ ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो ॥ यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन्पतेत् ॥ ३९ ॥ त्वं त्वद्य मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते ॥ यज्ञैर्देवर्णमुन्मुच्य निर्ऋणोऽशरणो भव ॥ ४० ॥

प्राणादिभिश्च स्वैर्विभवैः स्वकार्यैः । अत्र दृष्टांतः । मेघहिमोपरागैरभ्रतुषारराहुभिः स्वविभवैः सूर्यमिवेति ॥ ३३ ॥ ३४ ॥ ३५ ॥ चित्तस्योपशम उपशमहेतुः । योगो मोक्षोपायश्च । शनैरात्ममुदमावहतीति तथा । सुगमः प्रवृत्त्याश्रयत्वात् । धर्मश्चावश्यकः । अन्यथा विहिताकरणेन मालिन्यप्रसंगात् ॥ ३६ ॥ ननु " न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" इत्यादिना त्यागस्यैव विहितत्वात्कथं कर्म मोक्षोपाय इत्याशंक्यादावेव त्यागस्याशक्यत्वादित्याशयेनाहुः अयमिति सार्धचतुर्भिः । स्वस्त्ययनः स्वस्ति क्षेममीयतेऽनेनेति तथा । श्रद्धया निष्कामतया शुक्लेन शुद्धेनाप्तेन वित्तेन पुरुष ईश्वर इज्येतेति यदेष पंथाः ॥ ३७ ॥ स्वस्त्ययनमाहुः । वित्तैषणामिति । वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत् । गृहैर्गृहोचितैर्भोगैर्दारसुतैषणां विसृजेत् । तदनुभवेनैव तदौत्सुक्यनिवृत्तेः । देहे मृते आत्मनः स्वर्गादिलोकैषणां कालेन क्षयानुसंधानेन विसृजेत् । देव हे वसुदेव । यद्वा देवकालेन देवानामपि मृत्युना मृत्युहेतुभूतेनेत्यर्थः ॥ ३८ ॥ अत्राचारं प्रमाणयति । ग्राम इति किं च ऋणैरिति । तथा च श्रुतिः । 'जायमानोह वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इत्यादि । तान्यनिस्तीर्य तेषामृणान्यनपाकृत्य । तथा च मनुः । ' ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ' इति ॥ ३९ ॥ निर्ऋणो निर्मुक्तऋणः । अशरणो भव

इत्यन्वयः ॥ ३९ ॥ अयम् आत्मन ईशस्य मुदावहः प्रीतिकरः चित्तशोधको वा । श्रद्धया विष्णुयजनलक्षणः । अन्यथा एतदनाचरणे ॥ ३६ ॥ अत्राशंकते—नन्विति । शुद्धेन न्यायार्जितेन ॥ ३७ ॥ बुधः संसारासारज्ञः । वित्तैषणां धनेच्छाम् । तदनुभवेन दारसुताद्यनुभवेन । तेष्वौत्सुक्यस्योत्कंठायाः । देवशब्देन वसुदेवग्रहणमेकदेशिन्यायापेक्षमत आह—यद्वेति । अत्रैषणात्रयत्यागे । धीरास्त्यागशक्तिमंतः । ग्रामे गृहस्थाश्रमे । गृहस्थस्यैव ग्रामस्थित्यधिकारात् 'तत्स्थ्यात्ताच्छद्व्यम्' इति न्यायेन ॥ ३८ ॥ अत्र संगतार्थमाह—किंचेति । 'अनृणः' इति श्रुतिशेषपदं ज्ञेयम् । स्मृतिरप्यत्र प्रमाणं तथा चेति । अपाकृत्य दूरीकृत्य । मोक्षे मोक्षमार्गे संन्यासादौ । अधो व्रजति देवादीनां कोपान्नरकं गच्छतीत्यर्थः ॥ ३९ ॥ ' शरणं गृहरक्षित्रोः ' इत्यमरः । न विद्यते शरणं यस्य सः । एतेनर्णापाकरणं विना गृहस्थत्वत्यागोऽनुचित इत्युक्तम् ॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुदेव भवान्नूनं भक्त्या परमया हरिम् ॥ जगतामीश्वरं प्रार्चः स यद्वां पुत्रतां गतः ॥ ४१ ॥ श्रीशुक उवाच ॥ इति तद्वचनं श्रुत्वा वसुदेवो महामनाः ॥ तानृषीनृत्विजो वव्रे मूर्ध्नाऽऽनम्य प्रसाद्य च ॥ ४२ ॥ त एनमृषयो राजन्वृता धर्मेण धार्मिकम् ॥ तस्मिन्नयाजयन्क्षेत्रे मखैरुत्तमकल्पकैः ॥ ४३ ॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः ॥ स्नाताः सुवाससो राजन्राजानः सुष्ठ्वलंकृताः ॥ ४४ ॥ तन्महिष्यश्च मुदिता निष्ककंठ्यः सुवाससः ॥ दीक्षाशालामुपाजग्मुरालिता वस्तुपाणयः ॥ ४५ ॥ नेदुर्मृदंगपटहशंखभेर्यानकादयः ॥ ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः ॥ जगुः सुकंव्यो गंधर्व्यः संगीतं सहभर्तृकाः ॥ ४६ ॥ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः ॥ पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः ॥ ४७ ॥ ताभिर्दुकूलवलयैर्हारनूपुरकुंडलैः ॥ स्वलंकृताभिर्विबभौ दीक्षितोऽजिनसंवृतः ॥ ४८ ॥ तस्यर्त्विजो महाराज रत्नकौशेयवाससः ॥ ससदस्या विरेजुस्ते यथा वृत्रहणोऽध्वरे ॥ ४९ ॥ तदा रामश्च कृष्णश्च स्वैःस्वैर्बन्धुभिरन्वितौ ॥ रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः ॥ ५० ॥ ईजेऽनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥ ५१ ॥

गृहात्प्रव्रज॥४०॥ किं च अविशुद्धचित्तानामयं क्रमस्त्वं तु कृतार्थ एवेत्याहुः । वसुदेवेति । भवान्नूनं निश्चितं परमया प्रेमलक्षणया भक्त्या हरिम् । प्रार्चोऽर्चितवान्। यद्यस्मात् वां युवयोः ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ आलिप्ताः कुंकुमादिभिः । वस्तुपाणयो गृहीतार्हणहस्ताः ॥ ४५ ॥ ४६ ॥ अक्तं नेत्रयोरंजनेन । अभ्यक्तं सर्वांगेषु नवनीतेन ॥ ४७ ॥ ताभिः पत्नीभिः सहितो दीक्षितो विरेजे ॥ ४८ ॥ ४९ ॥ जीवेशौ सर्वजीवानामीशौ ॥ ५० ॥ अनुयज्ञं प्रतियज्ञम् । आम्नातसर्वांगाः

न त्वामुद्दिश्यैतदुक्तमित्याह—किं चेति । प्रार्चः आर्चितवानसि । स हरिः । यद्यतः । किंभूतस्त्वम्—भं कलत्रं तदस्यास्तीति भवान्सकलत्र इत्यर्थः " कलत्रोडुतेजसि स्याद्भं भो भ्रातारि भास्करे " इति निरुक्तिः । वामित्युक्तिरप्येवं संगच्छते । प्रार्च इत्यनद्यतनातीतवाचिना लङा बहूनि जन्मानि सूचितानि । " बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते " इति गीतोक्तेः ॥ ४१ ॥ इतीत्थम् । तद्वचनं मुनिकथनम् । तान् मुनीन् ॥ ॥ ४२ ॥ तस्मिन् विनशने । मखैरिति बहुत्वमंगेष्ट्यपेक्षम् । कल्प्यंत आभिरिति कल्पकाः सामग्र्यः, उत्तमा राजसूयादयस्तेष्विव कल्पका येषु तैः । प्रकृतिविकृतियागैरित्यर्थः । धर्मेण कल्पोक्तविधिना । ' अहिंसाविधि पुण्येषु धर्मः ' इति कोशात् ॥ ४३ ॥ तद्दीक्षायां यज्ञारंभसंकल्परूपायाम् ' दीक्षा स्याद्व्रतसंग्रहः ' इति यादवः । पुष्करस्रजः कमलबीजमालावलंबिकंठाः ॥ ४४ ॥ तन्महिष्यो राजपत्न्यः, वसुदेवभार्या वा । गृहीतमर्हणं यैस्ते गृहीमार्हणास्ते हस्ता यासां तास्तथा । " हिरण्यं रजतं चापि गृहीत्वा क्रमुकं फलम् । शालां विशेद्यज्ञपत्नी शपेयुस्त्वन्यथा सुराः ॥ " इत्युक्तेः । यज्ञोस्यास्तीति यज्ञी यज्ञकर्ता तस्य पत्नीत्यर्थः ॥ ४५ ॥ ॥ ४६ ॥ तं वसुदेवम् । यज्ञारंभे यज्ञकर्तुरंजनं नेत्रयोर्दत्त्वा गोनवनीतेन तद्वपुः सर्वतो मर्दयित्वा च तं स्नापयेदिति श्रुत्या विहितम् ॥ ४७ ॥ विभवैर्भूषणाद्यैः स्वलंकृताभिः । अजिनमत्र मृगचर्म ॥ ४८ ॥ तस्य वसुदेवस्य । होत्राद्याः षोडश । ते पूर्वं वृता ये इत्यर्थः । वृत्रहण इंद्रस्य । कुत्वाभावालोपाभावावार्षौ ॥ ४९ ॥ तदा यज्ञसमये । स्वस्य विभूतिभिर्मूर्तिमद्भिरणिमादिभिः । यद्वा—लुप्तोपमा बोध्या । जीवेशौ जीवात्मपरमात्मानौ । स्वैर्विभूतिभिरहंकारादियोगमायादिभिः ॥५०॥ तेभ्यः प्राकृतेभ्यो यागेभ्यश्चोदनालिंगादिभिर्विधिलिंगप्रकरणसमाख्यादिभिः अतिदेशेन ' प्रकृतिवद्विकृतिः कर्तव्या ' इति वाक्येन प्राप्तान्यंगानि येषु ते वैकृताः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथर्त्विग्भ्योऽददात्काले यथाम्नातं स दक्षिणाः ॥ स्वलंकृतेभ्यो विप्रेभ्यो गोभूकन्या महाधनाः॥५२॥ पत्नीसंयाजावभृथ्यैश्चरित्वा ते महर्षयः ॥ सस्नू रामह्रदे विप्रा यजमानपुरःसराः ॥ ५३ ॥ स्नातोऽलंकारवासांसि बंदिभ्योऽदात्तथा स्त्रियः ॥ ततः स्वलंकृतो वर्णाना श्वभ्योऽन्नेन पूजयत् ॥ ५४ ॥ बन्धून्सदारान्स सुतान्पारिबर्हेण भूयसा ॥ विदर्भकोसलकुरूंन्काशिकेकयसृंजयान् ॥ ५५ ॥ सदस्यर्त्विक्सुरगणान्नृभूतापितृचारणान् ॥ श्रीनिकेतमनुज्ञाप्य शंसंतः प्रययुः क्रतुम् ॥ ५६ ॥ धृतराष्ट्रोनुजः पार्था भीष्मो द्रोणः पृथा यमौ ॥ नारदो भगवान्व्यासः सुहृत्संबंधिबांधवाः ॥ ५७ ॥ बंधून्परिष्वज्य यदून्सौहृदाऽऽक्लिन्नचेतसः ॥ ययुर्विरहकृच्छ्रेण स्वदेशांश्चापरे जनाः ॥ ५८ ॥ नंदस्तु सह गोपालैर्बृहत्या पूजयार्चितः ॥ कृष्णरामो ग्रसेनाद्यैर्न्यवात्सीद्बन्धुवत्सलः ॥ ५९ ॥ वसुदेवोऽञ्जसोत्तीर्य मनोरथमहार्णवम् ॥ सुहृद्वृतः प्रीतमना नंदमाह करे स्पृशन् ॥६०॥ वसुदेव उवाच॥ भ्रातरीशकृतः पाशो नृणां यः स्नेहसंज्ञितः ॥ तं दुस्त्यजमहं मन्ये शूराणामपि योगिनाम् ॥ ६१ ॥ अस्मास्वप्रतिकल्पेयं यत्कृताऽज्ञेषु सत्तमैः ॥ मैत्र्यर्पिताऽफला वापि न निवर्तेत कर्हिचित् ॥ ६२ ॥

प्राकृता ज्योतिष्टोमदर्शपूर्णमासादयस्तेभ्यश्चोदनालिंगादिभिरतिदेशप्राप्तांगा वैकृताः सौरसत्रादयस्तैः सर्वैः । द्रव्यं पुरोडाशादि । ज्ञानं मंत्रः । क्रिया कर्म । तेषामीश्वरम् ॥ ५१ ॥ ५२ ॥ सस्नुः स्नानं चक्रुः ॥ ५३ ॥ आ श्वभ्यः शुनोऽभिव्याप्य । अन्नेन पूजयदपूजयत् ॥ ५४ ॥ बंध्वादिचारणांतान्पारिबर्हेण प्रीतिदानेन चापूजयत् । ते च सर्वे प्रययुः ॥ ५५ ॥ ५६ ॥ प्रयाणे केषांचिद्विशेषमाह धृतराष्ट्र इति द्वाभ्याम् । अनुजो विदुरः । पार्था युधिष्ठिरभीमार्जुनाः । यमौ नकुलसहदेवौ ॥ ५७ ॥ सौहृदेनाक्लिन्नानि चेतांसि येषां ते ॥ ५८ ॥ ५९ ॥ मनोरथो यज्ञविषयस्तमेव महार्णवम् ॥ ६० ॥ शूराणां बलेन योगिनां ज्ञानेनापीत्यर्थः ॥ ६१ ॥ तत्कुतस्तत्राह । अस्मास्विति । कृताज्ञेषु कृतमुपकारमजानत्सु सत्तमैर्भवद्भिरप्रतिकल्पा अनुपमा मैत्रीयमर्पिता अफलाऽपि प्रत्युपकारशून्यापि कर्हिचिद्यस्मान्न निवर्तेत तस्मादीश्वरकृतः

ईश्वरं स्वामिनम्॥५१॥आम्नातानि कथितानि सर्वाण्यंगान्यारादुपकारकादीनि येषु ते आम्नातसर्वांगाः । अथ प्राकृतवैकृतयागोत्तरम् । काले यथोदितसमये । यथाम्नातं यथोदितम् । स वसुदेवः॥५२॥पत्नीसंयाजः पत्नीभिः क्रियमाणः, काश्चन देवता उद्दिश्य यजनम् । अवभृथः समाप्तिकर्मस्थानम् । उभयत्रेष्टिविशेषाश्च भवंति । तैश्चरित्वा तांश्च कृत्वेत्यर्थः ॥ ५३ ॥ यथा स ददौ तथा स्त्रियोपि ददुरित्यर्थः । ततः स्नानोत्तरम् ॥ ५४ ॥ पारिबर्हेण पूजाद्रव्येण बंध्वादींश्चापूजयदिति शेषः ॥ ५५ ॥ ते च बंध्वादयः ॥ ५६ ॥ ५७ ॥ आक्लिन्नान्यार्द्राणि ॥ ५८ ॥ न्यवात्सीत् उवास ॥ ५९ ॥ ६० ॥ तं स्नेहपाशम् । इत्यर्थ इति–नहि बलेन ज्ञानेन च स्नेहपाशश्छिद्यते, रामचंद्रादिषु तथा दर्शनादिति भावः ॥६१॥ अत्र प्रकारमाक्षिपति–तत्कुत इति । तत्स्नेहपाशाक्रंतनम् । कुतः कथमवगतम् । तत्रात्रेत्यर्थः । यद्यतः कृता तस्माद्धेतोः । इत्यर्थ इति–'सर्वः स्वार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द. उ.

श्री. टी.

॥४१५॥

प्रागकल्पाच्च कुशलं भ्रातर्वो नाचराम हि ॥ अधुना श्रीमदांधाक्षा न पश्यामः पुरः सतः ॥ ६३ ॥ मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद ॥ स्वजनानुत बंधूंन्वा न पश्यति यथांधदृक् ॥ ६४ ॥ श्रीशुक उवाच ॥ एवं सौहृदशैथिल्यचित्त आनकदुंदुभिः ॥ रुरोद तत्कृतां मैत्रीं स्मरन्नश्रु विलोचनः ॥ ६५ ॥ नंदस्तु सख्युः प्रियकृत्प्रेम्णा गोविंदरामयोः ॥ अद्यश्व इति मासांस्त्रीन्यदुभिर्मानितोऽवसत् ॥ ६६ ॥ ततः कामैः पूर्यमाणः सव्रजः सहबांधवैः ॥ परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ॥ ६७ ॥ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिः ॥ दत्तमादाय पारिबर्हं यापितो यदुभिर्ययौ ॥ ६८ ॥ नंदो गोपाश्च गोप्यश्च गोविंदचरणांबुजे ॥ मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ॥ ६९ ॥ "पाण्डवाश्च महात्मानः पृथा च नृपसत्तम ॥ अनुज्ञाताः केशवेन बाष्पगद्गदभाषिणः ॥ शक्रप्रस्थं ययुः सर्वे स्वजनैः परिवारिताः ॥ १ ॥" बंधुषु प्रतियातेषु वृष्णयः कृष्णदेवताः ॥ वीक्ष्य प्रावृषमासन्नां ययुर्द्वारवतीं पुनः ॥ ७० ॥ जनेभ्यः कथयांचक्रुर्यदुदेवमहोत्सवम् ॥ यदासीत्तीर्थयात्रायां सुहृत्संदर्शनादिकम् ॥ ७१ ॥ इति श्रीमद्भागवते म० दशमस्कंधोत्तरार्धे तीर्थयात्रानुवर्णनंनाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ श्रीबादरायणिरुवाच ॥ अथैकदात्मजौ प्राप्तौ कृतपादाभिवंदनौ ॥ वसुदेवोऽभिनंद्याह प्रीत्या संकर्षणाच्युतौ ॥ १ ॥

पाशोऽयं भवतामिति गम्यत इत्यर्थः ॥ ६२ ॥ अफलत्वमेवाह । प्रागिति । हे भ्रातः अकल्पादसामर्थ्याद्वः कुशलं प्रियं न ह्याचराम न कृतवंतो वयम् । श्रीमदेनांधान्यक्षीणि येषां ते ॥ ६३ ॥ राज्यश्रीर्माभूत् । छांदसोऽडागमः ॥ ६४ ॥ ६५ ॥ अद्य श्व इति प्रातर्निर्गमेऽद्यैवापराह्णे गम्यतामित्यपराह्णे निर्गमे श्वो गम्यतामिति पुनःपुनरेवं मानितः ॥ ६६ ॥ ६७ ॥ यापितो महासैन्येन प्रस्थापितः ॥ ६८ ॥ ६९ ॥ ७० ॥ यदुदेवस्य वसुदेवस्य महोत्सवं यज्ञादिलक्षणं सुहृत्संदर्शनादिकं चेति ॥ ७१ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायां चतुरशीतितमोऽध्यायः ॥ ८४ ॥ पंचाशीतितमे रामकृष्णौ संप्रार्थितौ सुतौ ॥ पित्रे ज्ञानमथो मात्रे मृतान्पुत्रानयच्छताम् ॥ १ ॥ नंदयित्वा कुरुक्षेत्रयात्रायां सुहृदो बहून् ॥ तत्त्वज्ञानं ततः पित्रोरादिशन्मृतसूनुभिः ॥ २ ॥ १ ॥

समीहते ' इति न्यायेन तं विना यत्नेषु प्रतीकारासमर्थेषु जानतां मैत्रीकरणमीशप्रेरणयैव संभवतीति भावः॥६२॥अकल्पत्वं च कंसोपद्रुतत्वात् । पुरः सतः अग्रे स्थितान्॥६३॥ अदर्शने हेतुमाह–मेति । सुजनान् गुरुजनान्। तपस्विबहुश्रुताचार्यादीनपि किं पुनरन्यान् । यया राज्यश्रियांऽधदृक् आवृतचक्षुः ॥६४॥ एवमुक्तरीत्या । तत्कृतां नंदकृताम् । मैत्रीं विपदि स्त्रीपुत्ररक्षणलक्षणाम् । प्रतिकर्तुमसमर्थः केवलं रुरोदेति ॥६५॥ सख्युर्वसुदेवस्य । निर्गमे गंतुमुद्यते ॥६६॥ ततो मासत्रयसहवासोत्तरम् । कामैर्नानाद्रव्यैः । तदाह–परार्ध्येति॥६७॥६८॥ क्षिप्तं लग्नम् ॥६९॥ प्रावृषं वर्षर्तुम् ॥७०॥७१॥ एतदाख्यानश्रुतिफलमाह–य इति ॥७२॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे चतुरशीतितमोऽध्यायः॥८४॥अथो पितृज्ञानदानानंतरम् । अयच्छतां ददतुः (१) । ततः सुहृदानंददानोत्तरम् । पित्रोर्मातापितृभ्याम् (२) । अथ तीर्थयात्रानंतरम् । अभिनंद्य संश्लाघ्य॥१॥

भा. टी. प्र

टीका.

अ० ८५

॥४१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनीनां स वचः श्रुत्वा पुत्रयोर्धामसूचकम् ॥ तद्वीर्यैर्जातविश्रंभः परिभाष्याभ्यभाषत ॥ २ ॥ कृष्णकृष्ण महायोगिन्संकर्षण सनातन ॥ जाने वामस्य यत्साक्षात्प्रधानपुरुषौ परौ ॥ ३ ॥ यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा ॥ स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ४ ॥

धाम प्रभावस्तत्सूचकम् । जातविश्रंभ उत्पन्नविश्वासः । परिभाष्य संबोध्य ॥ २ ॥ अस्य विश्वस्य यत्साक्षात्स्वरूपभूतं कारणं प्रधानपुरुषौ नाम परौ तयोरपि कारणत्वेनेश्वरौ च साक्षाद्वां युवामिति जाने ॥ ३ ॥ नन्विदं विश्वमनेकैः कारकैर्जायमानं कुतः प्रधानपुरुषात्मकं कुतस्तरामावयोस्तत्कारणत्वेनेश्वरत्वं तत्राह। यत्रेति । यत्राधिकरणे । येन कर्त्रा करणेन च। यतः अपादानात् । यस्य संबंधेन । षष्ठ्यर्थस्याकारकत्वेऽपि निमित्ततोक्ता।यस्मै संप्रदानाय । यद्यदिति प्रयोज्यकर्तृकर्मकारके दर्शिते। ननु तयोर्नास्ति भेदः। यथोक्तम्। 'करोति क्रियमाणेन न कश्चित्कर्मणा विना ॥ भवत्यर्थस्य कर्ता च करोतेः कर्म जायते' ॥ तथा । 'करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः ॥ भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते' इति च । सत्यम् । तथाऽप्यवस्थाभेदे भेदो विवक्षितः। दृश्यते चावस्थाभेदः । तंडुलानोदनं पचति मृदं घटं करोतीति । तदेवं सप्त विभक्त्यर्था दर्शिताः। यथेति यदेति च क्रियाविशेषणभूतानामन्येषां चाव्ययानामर्थाः। स्यादिति क्रियापदार्थोपलक्षणम्।एवं सर्वं प्रपंचमनूद्य तत्कारणस्य भगवद्रूपतां

तद्वीर्यैः श्रीकृष्णपराक्रमैः । उत्पन्नविश्वासोंकुरितनिश्चयः॥२॥परौ विलक्षणत्वेनोत्तमौ । तयोरपि प्रकृतिपुरुषयोरपि । "तन्मायाफलरूपेण द्विधा समभवद्बृहत्" इत्याद्युक्तेः ॥ ३ ॥ अत्राक्षिपति—नन्विति । अकारकत्वेऽपि यद्यपि संबंधस्य कारकत्वं नास्ति क्रियायोगाभावात्तथापि साक्षात्क्रियायोगाभावेपि साधोर्धनं तिष्ठतीत्यादिषु धनादिद्वारा तत्संबंधात्कारकनिमित्तमस्त्येवेति । पुनराशंकते—नन्विति । तयोः प्रयोज्यकर्तृकर्मणोः । प्रमाणमाह—यथोक्तमिति । क्रियमाणेन कर्मणा विना कश्चिन्न करोतीत्यन्वयः । भवत्यर्थस्य सत्तार्थकस्य धातोः भवतीत्यत्र धातुनिर्देशे श्तिप् । तथाहि—घटो भवतीह भवत्यर्थस्य कर्ता घटः, स करोतेः कर्म जायते कुलालो घटं करोतीतिवत् ॥ १ ॥ अन्यदाह—तथेति । करोत्यर्थस्य करणार्थस्य भवितुः सत्तार्थकस्य कर्तुः भविता सत्तार्थकधातुकर्ता तं प्रयोजकमपेक्ष्य प्रयोज्यत्वं प्रपद्यते । यथा—घटो भवति कुलालः प्रेरयतीत्यत्र करोत्यर्थकर्तुः कुलालस्य भवितुर्घटस्य प्रयोजकत्वम्, भवत्यर्थकर्ता घटस्तु तं कुलालमपेक्ष्य प्रयोज्यत्वं प्राप्तः । यथा—घटो भवति कुलालः प्रेरयति कुलालो वटं भावयतीति (१) "प्रेरणाविषयो यस्तु प्रयोज्यः स विधीयते । प्रयोजकः स विज्ञेयः प्रयुक्तो नापरैर्यदि ॥ मुख्यकर्तारमाचष्टे प्रत्ययोऽनेककर्तृकः । मुख्यप्रयोजकस्स स्याद्योऽप्रयुक्तः परेण हि ॥" इत्यलम् । इति च सत्यम् यद्यप्येतत्सत्यम् । तथापि दृश्यते चेति । यथा वस्तुतस्तंडुलौदनयोरभेदेपि तंडुलावस्थात ओदनावस्था पाकक्रियया भिन्नास्ति । यथा च—मृद्घटयोः करणलक्षणया क्रियया मृदवस्थातो घटावस्था भिन्ना । एवं प्रेरणाक्रियया प्रयोज्यकर्त्रवस्थातः प्रयोज्यकर्मावस्थापि भिन्नैवेति ज्ञेयम् । तदेवमित्थं क्रियाविशेषणता चेत्थं यदा भवतीति यत्कालिकं भवनं यथा भवतीति यत्प्रकारकं भवनमिति च भवनक्रिया विशेष्या । यदेत्यादिविशेषणं च अन्येषां क्रियाविशेषणताहीनानां चादीनां च । एवं च इत्थं च । सर्वप्रपञ्चं षट्कारकादिसाध्यं तस्य प्रपञ्चस्य कारणमभिन्ननिमित्तोपादानं भगवांस्तद्रूपतां भगवद्रूपताम् । तयोर्भोक्तृभोग्ययोः । तीर्थस्तु—यत्र यस्मिंस्तिष्ठति । "यस्मिन्निदम्" इति श्रुतेः । "येन जातानि जीवन्ति" इति श्रुतेः। "यतो वा इमानि भूतानि" इति च । "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनं मृत्युर्यस्योपसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ॥ आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यजः ॥ ५ ॥
प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चेष्टताम् ॥ ६ ॥

विधत्ते । इदं साक्षादिति । प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवाँस्त्वमेव साक्षादिति तयोरैक्यमभिप्रेत्यैकवचनम् ॥ ४ ॥ किंच धारणपोषणकर्ताऽपि त्वमेवेत्याह । एतदिति । हे आत्मन् प्राणः क्रियाशक्तिर्जीवो ज्ञानशक्तिश्च संस्त्वमेव बिभर्षि ॥ ५ ॥ ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशंक्य प्राणादिशक्तयोऽपि तस्यैवेत्याह । प्राणादीनामिति । प्राणः सूत्रं तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य परमकारणस्येश्वरस्यैव । कुतः पारतंत्र्यात् । यथा वेधशक्तिर्न बाणस्यापि तु पुरुषस्य तद्वदित्यर्थः । ननु भगवतः प्राणादिवर्गस्य च स्वातंत्र्यमेव किं न स्यादत आह । वैसादृश्याद्द्वयोरिति । चेतनाचेतनत्वेन विसदृशत्वाद्द्वयोः अचेतनप्राणादिवर्गस्य चेतनपारतंत्र्यमेवं युक्तमित्यर्थः । यद्वा प्राणादिषु द्वयोर्द्वयोरेव तावद्विसदृशत्वम् । विरुद्धक्रियाकारित्वात्किं पुनर्बहूनाम् । तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाऽधिष्ठितानामेव विशिष्टकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति । तथा चोक्तम् । "यदैते संहता भावा भूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः" इति ॥ तथा । 'नानात्वात्स्वक्रियाऽनीशाः प्रोचुः प्रांजलयो विभुम्' इत्यादि । ननु प्राणादीनां क्रियाकारित्वं शक्त्यभावे कुतः स्यादत आह । चेष्टैव चेष्टतामिति । चेष्टमानानामेषां चेष्टैव न तु शक्तिः । यथा वायोः

चनम् " इति काठकश्रुतेः । " यस्मा इदं क्रियते " इति । " सच्च त्यच्चाभवत् " इति । "यथास्थितं यदा काले इदं स्यात्तथा तदास्मात् ब्रह्मैवेदं सर्वम् " इति श्रुतेः । इदं जगत्साक्षात्स्पष्टं निर्विचारं प्रधान पुरुषेश्वरशब्दवाच्यो भगवानेव स्यात्तत्सत्ताया अपि तदधीनत्वादित्याह ॥४॥ अन्यदाह—किंचेति । आत्मना जीवेन रूपेण "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः ॥ ९ ॥ कारणत्वे पुनराशंकते—नन्विति । कारणत्वावगमात्कारणत्वानिश्चयात् । तस्यैव परमेशस्यैव । " प्राणो वै सूत्रम् " इति श्रुतेः । तदादीनां सूत्रमहत्तत्त्वाहंकारादीनाम् । प्राणादिवर्गस्य पारतंत्र्यात्स्वातंत्र्याभावात् । इत्यर्थ इति—तद्वद्बाणे वेधनशक्तिवदीशस्य तत्त्वमेव तेषामिति भावः । पुनराशंकते—नन्विति । इत्यर्थ इति—अचेतनस्य चेतनाधीनतैव युक्तेति भावः । प्राणादीनां स्वातंत्र्यावगमे सृष्ट्यादिनिरोध एव स्यादित्याह—यद्वेति । प्राणादिषु द्वयोरेव प्राणापानयोरेव । विरुद्धक्रिया प्राणस्योपरिगमनरूपाऽपानस्याधोगमनरूपा । यद्वा—प्राणस्य सूत्रात्मनः क्रियाशक्तिरूपाऽहंकारस्याभिमतिरूपा । एवमन्यत्राप्यूह्यम् । तस्मादैकमत्याभावात् । अत्र च पूर्वोक्तं स्मारयति—तथा चोक्तमिति । पुनरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कर्क्षविद्युताम् ॥ यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधोऽर्थतो भवान् ॥ ७ ॥ तर्पणं प्राणनमपां देवत्वं ताश्च तद्रसः ॥ ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर ॥ ८ ॥ दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः ॥ नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः ॥ ९ ॥ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः ॥ अवबोधो भवान्बुद्धेर्जीवस्यानुस्मृतिः सती ॥ १० ॥

शक्त्या तृणादीनां चलनम् । यथा वा पुरुषस्य शक्त्या शराणां वेग इति ॥६॥ पारतंत्र्यमेव प्रपंचयति कांतिरिति पंचभिः । चंद्रस्य कांतिः । अग्नेस्तेजः । अर्कस्य प्रभा । ऋक्षविद्युतां सत्ता स्फुरणमात्रेण सत्त्वम् । अर्थतो वस्तुतो भवान् । तथा च श्रुतिः । " न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः ॥ तमेव भात मनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति । स्मृतिश्च । "यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति । भूमेर्वृत्तिः प्राणिनामाधारत्वेन वर्तनं गंधश्च भवान् । तवैव शक्तिरित्यर्थः ॥ ७ ॥ किंच हे देव अपां तर्पणं तृप्तिजनकत्वं प्राणनं जीवनहेतुत्वं ता आपश्च तासां रसश्च त्वमेव । किंच वायोरोजःसहआदि तवैव शक्तिः ॥ ८ ॥ दिशामुपाधिकृताकाशप्रदेशानामवकाशो दिशश्च त्वम् । खं सामान्याकाशस्तदाश्रयः स्फोटश्च शब्दतन्मात्रं परावस्था वागि त्यर्थः । नादः पश्यंती । ओंकारो मध्यमा । वर्णश्चाकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदम् । वर्णपदाद्यात्मिका वैखरी च त्वमित्यर्थः ॥ ९ ॥ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिर्देवाश्चेंद्रियाधिष्ठातारस्तदनुग्रहस्तेषामधिष्ठानशक्तिश्च त्वम् । अवबोधोऽध्यवसायशक्तिः अनुस्मृतिः प्रतिसंधानशक्तिः ॥ १० ॥

शंकते—नन्विति । एषां प्राणादीनाम् ॥ ६ ॥ कांतिः कमनीयता । पारतंत्र्ये श्रुतिमाह—तथा चेति । तत्रात्मनि । तमेवात्मानमेव ॥ ७ ॥ अन्यदाह—किंचेति । इमं न्यायमन्यत्राप्यतिदिशति—किंचेति ॥ ८ ॥ तदाश्रयः सामान्याकाशाश्रयः । इत्यर्थ इति—अतीवसूक्ष्मा पराख्या वागेव शब्दतन्मात्रमिति भावः । आकृतीनां घटाद्याकाराणाम् । इत्यर्थ इति—परापश्यंतीमध्यमावैखरीरूपस्त्वमेव । प्रपंचयिष्यते चैतदेकादशस्कंधे । यद्वा—वैयाकरणाभिमताष्टविधस्फोटरूपोपि त्वमेव । ते चाष्टौ स्फोटाः—वर्णस्फोटपदस्फोटवाक्यस्फोटा इति त्रयो व्यक्तिस्फोटाः । वर्णत्वजातिर्वाचिकेति पक्षे वर्णपदवाक्यभेदेन त्रयो जातिस्फोटाः । वर्णपदस्फोटवाक्यपदस्फोटौ चेत्यष्टौ संति । यथा—राम इत्यत्र रकाराकारमकाराकारवर्णा वाचका इति वर्णस्फोटः १, राम इति पदमेव वाचकमिति पदस्फोटः २, राम मां पाहीति वाक्यमेव वाचकमिति वाक्यस्फोटः ३, तत्र व्यक्तिस्फोटवाचकानां मते वर्णपदवाक्यव्यक्तिरेव वाचिका । जातिस्फोटवाचकानां मते तु वर्णत्वपदत्ववाक्यत्वजातिरेव वाचिका ६, केषांचिन्मते वर्णानां पदस्यापि राम इत्यत्र वाचकत्वं तत्र वर्णपदस्फोटः ७, राम मां पाहीति वाक्ये पदवाक्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतानामसि भूतादिरिंद्रियाणां च तैजसः ॥ वैकारिको विकल्पानां प्रधानमनुशायिनाम् ॥११॥नश्वरेष्विह भावेषु तदसि त्वमनश्वरम् ॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितम् ॥१२॥ सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः ॥ त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥ १३ ॥ तस्मान्न संत्यमी भावा यर्हि त्वयि विकल्पिताः ॥ त्वं चामीषु विकारेषु ह्यन्यदाऽव्यावहारिकः ॥ १४ ॥ गुणप्रवाह एतस्मिन्नबुधास्त्वखिलात्मनः ॥ गतिं सूक्ष्मामबोधेन संसरंतीह कर्मभिः ॥ १५ ॥ यदृच्छया नृतां प्राप्य सुकल्पामिह दुर्लभाम् ॥ स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥ १६ ॥ असावहं ममैवैते देहे चास्यान्वयादिषु ॥स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत्॥१७॥युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ॥भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह॥१८॥

भूतानां कारणं भूतादिस्तामसोऽहंकारस्त्वमसि। इंद्रियाणां कारणं तैजसो राजसोऽहंकारस्त्वम्। विविधमधिदैवाध्यात्माधिभूतभेदेन विकल्प्यंत इति विकल्पा देवास्तेषां कारणं वैकारिकः सात्त्विकोऽहंकारश्च त्वम्। अनुशायिनां जीवानां संसारकारणं प्रधानं त्वम् ॥ ११ ॥ अपि च। नश्वरेषु नाशशीलेष्विहैतेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं तत्त्वमसि। द्रव्यविकारेषु मृत्सुवर्णादिकार्येषु घटकुंडलादिषु नश्वरेषु च द्रव्यमात्रं मृत्सुवर्णादिमात्रमनश्वरं यथा तद्वत् ॥ १२ ॥ ननु त्रिगुणात्मककार्यरूपोऽपि त्वमित्युक्तत्वात्कथमनश्वरत्वं तत्राह। सत्त्वमिति। तद्वृत्तयस्तत्परिणामाश्च महदादयः। अद्धा साक्षात्त्वयि परे ब्रह्मणि कल्पिताः ॥ १३ ॥ तस्मान्न संतीति। नन्वसतां कथं प्रतीतिरत आह। यर्हीति। यदा विकल्पितास्तदैव प्रतीतिमात्रेण त्वयि संति त्वं चामीषु तदैव कारणतयाऽनुगतः। अन्यदा त्वव्यावहारिकोऽविकल्पकस्त्वमेवावशिष्यस इत्यर्थः ॥ १४ ॥ एवंरूपत्वादज्ञाननिबंधनश्च संसार इत्याह। गुणप्रवाह इति। सूक्ष्मां निष्प्रपंचां गतिमबुधा अविद्वांसः। अबुद्धेति वा पाठः। अतोऽबोधेन देहाभिमानेन कृतैः कर्मभिः संसरंतीति ॥ १५ ॥ एवं तयोस्तत्त्वं निरूप्य तदप्राप्त्या शोचति। यदृच्छयेति। नृतां मनुष्यताम्। सुकल्पां पटुतरेंद्रियाम् ॥ १६ ॥ अहो किमिति प्रमत्तोऽसि त्वया बहुभिः पाशैर्निबद्धत्वादित्याह। असावहमिति। देहे अस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैत इति ॥ १७ ॥ अहो त्वत्पुत्रयोरावयोः किमिदमारोप्यते

योरुभयोर्वाचकत्वमिति पदवाक्यस्फोटः ८, स्फुटति प्रकटीभवत्यर्थोऽनेनेति स्फोटः। ध्वनिविशेषावच्छिन्नं ब्रह्मैव स्फोटपदवाच्यमिति सिद्धांतः ॥ ९ ॥ १० ॥ ११ ॥ अन्यदाह—अपि चेति। भावेषु देहादिषु ॥१२॥ त्रिगुणात्मत्वे शंकते—नन्विति ॥१३॥ यतः कल्पितास्तस्मादित्यर्थः। तदैव विकल्पसमय एव। अमीषु भावेषु। अन्यदा ज्ञानावस्थायाम्। अव्यावहारिकः सर्वव्यवहारातीतोऽविकल्पो जीवेश्वरादिविकल्परहितः। इत्यर्थ इति—'योऽवशिष्येत सोऽस्म्यहम्' इत्युक्तेस्तत्त्वज्ञानेनात्मकल्पितप्रपंचबाधे रज्जुज्ञानेन भुजंगबाधे रज्जुवत्त्वमेवाऽवशिष्यस इति भावः ॥ १४ ॥ एवंरूपत्वाज्ज्ञानं सर्वबाधावधित्वाज्ज्ञाननिबंधनं कारणं यस्य स तथा। एतस्मिन्प्रत्यक्षसिद्धे। पूर्वपाठापेक्षयाऽबुद्धेति पाठस्य झटित्यर्थप्रत्यायकत्वात्सम्यक्त्वम्। यतो न विदंत्यतो हेतोः ॥ १५ ॥ इत्थं तयो रामकृष्णयोः। तदप्राप्त्या तत्त्वाप्राप्त्या। इह संसारे। स्वार्थे तत्त्वावाप्तिरूपे। यदृच्छया प्रारब्धकर्मणा। ममेति शेषः ॥ १६ ॥ भगवदाक्षेपे स्वासामर्थ्यं द्योतयन्भगवतः सर्वसामर्थ्यमाह—अहो किमित्यादिना। अन्वयादिषु इंद्रियकलत्रादिषु। न केवलं मामेव किन्तु सर्वमिति ॥ १७ ॥ पुनराक्षिपति—अहो इत्यादि। भूभारक्षत्रक्षपण इति निमित्ते सप्तमी। "एङः पदांतादति" इति पूर्वरूपसंधिबाधस्त्वार्षः। कथयसि—"संरक्षणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय भविष्यामि युगेयुगे॥" इति गीतोक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्ते गतोऽस्म्यरणमद्य पदारविंदमापन्नसंसृतिभयापहमार्तबंधो ॥ एतावताऽलमलमिंद्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः ॥ १९ ॥ सूतीगृहे ननु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ॥ नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायाम् ॥ ॥ २० ॥ श्रीशुक उवाच ॥ आकर्ण्येत्थं पितुर्वाक्यं भगवान्सात्वतर्षभः ॥ प्रत्याह प्रश्रयाऽऽनम्रः प्रहसन् श्लक्ष्णया गिरा ॥२१ ॥ श्रीभगवानुवाच ॥ वचो वः समवेतार्थं तातैतदुपमन्महे ॥ यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः ॥ २२ ॥ अहं यूयमसावार्य इमे च द्वारकौकसः ॥ सर्वेऽप्येवं यदुश्रेष्ठ विमृश्याः सचराचरम् ॥ २३ ॥ आत्मा ह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः ॥ आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ २४ ॥

अत आह । युवामिति । भूभारक्षत्रक्षपणार्थमवतीर्णौ तथा ह निश्चितमात्थ कथयसि॥ १८॥ तत्तस्मादरणं शरणमापन्नानां संसृतिभयमपहंतीति तथा तत् । ननु त्वमतिसुखी वृथा किं निर्विद्यसेऽत आह। एतावतेति । इंद्रियलालसेनेंद्रियार्थतृष्णया । यद्येनेंद्रियलालसेन मर्त्ये शरीरे आत्मदृगात्मबुद्धिरहं त्वयि च परे परमेश्वरेऽपत्यबुद्धिरस्मि तेनालं पर्याप्तमिति ॥ १९ ॥ ननु कुत एतदहं परमेश्वर इति तत्राह । सूतीगृह इति । नौ आवयोः । अनुयुगं प्रतियुग्मम् । यदा सुतपाः पृश्निरिति युग्मम् ।यदा कश्यपोऽदितिश्चेति युग्मम् । अधुना वसुदेवो देवकीति युग्मम् । एवं हि प्रतियुग्ममज एवाहं संजज्ञेऽवतीर्ण इति भवान्नूनं जगाद । नन्वन्योऽसौ चतुर्भुजो देव इति तत्राह । नानातनूरिति । गगनवदसंग एव त्वम् । भूम्नः सर्वगतस्य विभूतिरूपां मायां को वेदेति ॥ २० ॥ २१ ॥ उपमन्महे उपमन्यामहे । समुद्दिश्य विषयीकृत्य । तत्त्वग्रामस्तत्त्वसमूहः ! उदाहृतः सम्यङ् निरूपितः ॥२२॥ इमामेव दृष्टिं सर्वत्र विधत्स्वेत्याह । अहमिति । एवं विमृश्या ब्रह्मत्वेनैवान्वेषणीयाः । किंच सचराचरं जगदपि ॥ २३ ॥ ननु नानाविकारवतां

रूपेण वदसीत्यर्थः ॥ १८ ॥ यतस्त्वमीशस्तत्तस्मात् । आर्तबंधो इति संसृतिभीतानां त्वमेव रक्षक इत्याह । आक्षिप्य समाधत्ते—नन्वित्यादि । एतावता इयत्प्रमाणकेनाद्यपर्यंतेनेति यावत् । मर्त्ये मृत्युशिरस्के । अह मिति बुद्धिरहंपदार्थः । तेनेंद्रियलालसेन ॥ १९॥ पुनराक्षिपति—नन्विति । एतत् इदं कुतोऽवगतमित्यर्थः । तत्राक्षेपे । अजः शुक्रशोणितसंपर्कजन्यशरीररहितः । ननु निश्चयेन । पुनराशंकते—नन्विति । असौ सूती गृहगः । उरुगायेति नानारूपतामाह । न कोपीत्यर्थः ॥ २० ॥ ब्रह्माद्यन्यतममंतरेण भगवता साक्षात्संलापो वसुदेवं विनाऽन्यस्य दुर्लभ इतिभावेन कृष्णस्य प्रतिवचनप्रकारमाह—आकर्ण्येत्यादि । प्रश्रयेण प्रणयेनेषन्नम्रः । " प्रकृष्टसेव्ये विनये प्रश्रयः प्रणयेपि च " इति निरुक्तिः ॥ २१ ॥ एतत्त्वदुक्तम् । समवेतार्थं श्रुतिस्मृत्युपपन्नार्थम् प्रसिद्धार्थं वा । यद्वचः ॥ २२ ॥ न केवलमिम एवापि तु सर्वमेवेत्याह—किंचेति । अन्वेषणीया द्रष्टव्याः " सर्वं खल्विदं ब्रह्म " इति श्रुतेः ॥ २३ ॥ अत्राशंकते—नन्विति । तत्कृतेषु पंचीकृतभूतकृतेषु । आदिनात्वादिग्रहः । आत्मसृष्टैः प्रकृतिं द्वारीकृत्य । तत्कृतेषु गुणकृतेषु । पुनश्च बहुधात्वेऽपि कुतः कथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयम् ॥ आविस्तिरोऽल्पभूर्येको नानात्वं यात्यसावपि ॥ २५ ॥ श्रीशुक उवाच ॥ एवं भगवता राजन्वसुदेव उदाहृतः॥श्रुत्वा विनष्टनानाधीस्तूष्णीं प्रीतमना अभूत् ॥ २६॥ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता ॥ श्रुत्वाऽऽनीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता ॥ २७॥कृष्णरामौ समाश्राव्य पुत्रान्कंसविहिंसितान् ॥ स्मरंती कृपणं प्राह वैक्लव्यादश्रुलोचना ॥२८॥ देवक्युवाच ॥ रामरामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर ॥ वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ॥२९॥कालविध्वस्तसत्त्वानां राज्ञामुच्छास्त्रवर्तिनाम् ॥ भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे ॥३०॥ यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ॥ भवंति किल विश्वात्मंस्तं त्वाऽद्याहं गतिं गता ॥ ३१ ॥ चिरान्मृतसुतादाने गुरुणा किल चोदितौ ॥ आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणाम् ॥ ३२ ॥ तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ ॥ भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृतान् ॥ ३३ ॥ ऋषिरुवाच ॥ एवं संचोदितौ मात्रा रामः कृष्णश्च भारत ॥ सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥ ३४ ॥ तस्मिन्प्रविष्टावुपलभ्य दैत्यराड् विश्वात्मदैवं सुतरां तथात्मनः ॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ॥ ३५ ॥

कुतो ब्रह्मत्वमिति चेन्न । ब्रह्मण एवोपाधिधर्मैर्बहुधा प्रतीतेरिति सदृष्टांतमाह द्वाभ्याम् । आत्मा हीति । यथा खादिभूतानि तत्कृतेषु घटादिष्वाविस्तिरोभावादि यांत्येवमसावात्माऽप्यात्मसृष्टैर्गुणैः कृत्वा तत्कृतेषु देहेषु बहुधा ईयते पुनश्च यथाशयं यथोपाध्याविर्भावतिरोभावादिरूपेण प्रतीयते न वस्तुतः।कुतः।एको बहुधा स्वयंज्योतिर्दृश्यत्वेन नित्योऽनित्यत्वेनानन्योऽन्यत्वेन निर्गुणः सगुणत्वेनेत्यादि बहुधात्वं प्रपंचनीयम्॥२४॥२५॥२६॥सुविस्मिता सती॥२७॥ समाश्राव्य संबोध्य ॥२८॥२९॥ भूमेर्भारायमाणानां राज्ञामर्थे तेषां निधनार्थं मे मयि किलावतीर्णौ ॥ ३० ॥ हे आद्य यस्यांशः पुरुषस्तस्यांशो माया तस्या अंशा गुणास्तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवंति । तं त्वा त्वां गतिं शरणं गताऽस्मि ॥ ३१ ॥ आनिन्यथुरानीतवंतौ । पितृस्थानाद्यमसदनात् ॥ ३२ ॥ ३३ ॥ ३४ ॥ दैत्यराट् बलिः ।

बहुधात्वं तदाह–एक इति । सर्वमिदमौपाधिकमिति भावः ॥ २४ ॥ २५ ॥ एवमित्थम् ॥ २६ ॥ अथ मंगलारंभे । तत्र तदा ॥ २७ ॥ कृपणं दीनम् ॥ २८ ॥ वां युवाम् ॥ २९ ॥ मे मयि, सप्तम्येकवचनेऽपि 'मे' आदेशो विपरीतग्रहात्सूत्रे अर्थे इति शेषः ॥ ३० ॥ 'शरणेपि गतिः स्मृता' इति कोशात् ॥ ३१ ॥ यमसदनात् यमलोकात् ॥ ३२ ॥ यथा गुरुकामं कृतवंतौ तथा मेऽपीत्यर्थः । योगेश्वरेश्वरावित्यक्तिष्टकारित्वमाह । आहृतान् आनीतान् ॥ ३३ ॥ एवमुक्तरीत्या । सुतलं तृतीयं विवरम् ॥ ३४ ॥ तस्मिन्सुतले । तयो रामकृष्णयोर्दर्शनेन य आल्हादस्तेन परिप्लुतो व्याप्त आशयोंतःकरणं यस्य स तथा ॥ ३५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः ॥ दधार पादाववनिज्य तज्जलं सवृंद आब्रह्म पुनद्यदंबु ह ॥ ३६ ॥ समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ॥ तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥३७॥ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया ॥ उवाच हाऽऽनंदजलाकुलेक्षणः प्रहृष्टरोमा नृप गद्गदाक्षरम् ॥ ३८ ॥ बलिरुवाच ॥ नमोऽनंताय बृहते नमः कृष्णाय वेधसे ॥ सांख्ययोगवितानाय ब्रह्मणे परमात्मने ॥ ३९ ॥ दर्शनं वां हि भूतानां दुष्प्रापं चाप्यदुर्लभम् ॥ रजस्तमःस्वभावानां यन्नः प्राप्तौ यदृच्छया ॥ ४० ॥ दैत्यदानवगंधर्वाः सिद्धविद्याध्रचारणाः ॥ यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ॥ ४१ ॥

कथंभूतौ । विश्वस्यात्मभूतं दैवम् । सान्वयः सपरिवारः ॥ ३५ ॥ सवृंदः सपरिजनः । कथंभूतौ पादाववनिज्य यदंबु ययोरवनेजनोदकमाब्रह्म ब्रह्माणमभिव्याप्य जगत्पुनत्पावित्रयद्वर्तते तौ ॥ ३६ ॥ ३७ ॥ इंद्रसेनो बलिः । प्रेमविभिन्नया प्रेमार्द्रया धिया । बिभ्रद्धारयन् ॥ ३८ ॥ अनंताय शेषाय । बृहते फणैकदेशे विश्वधारणाद्बृहत्तस्मै कृष्णाय सदानंदरूपाय च । वेधसे जगद्विधात्रे । सांख्ययोगवितानायेत्यादिपदत्रयमैक्यविवक्षया ॥ ३९ ॥ योगेश्वराणामपि दुर्दर्शौ युवामस्माभिर्दृष्टावित्येतन्नाति चित्रमित्याह । दर्शनमिति । दुष्प्रापमपि युष्मत्कृपया केषांचिददुर्लभं सुलभमपि भवति तदाह । रजस्तमःस्वभावानामिति । नो दर्शनं प्राप्तौ ॥४०॥ अहो विद्विषो वयं सात्त्वि

तयो रामकृष्णयोः । तत्र वरासने । तज्जलं पादोदकम् । ययो रामकृष्णयोः । वृष्णिषु प्राप्य जन्मनी इत्युक्तेर्वस्तुतो बलदेवोपि विष्णुरेवेति । ततश्च यदंब्विति समंजसम् । पुनत् पुनातेः शत्रंतः । तौ रामकृष्णौ ॥ ३६ ॥ स बलिः । तौ रामकृष्णौ । अमृतभक्षणं रसायनभोजनम् "अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले जग्धौ मोक्षणे हेम्नि गोरसे ॥ क्लीबे ना त्वमरे स्त्री तु गुडूच्यां मद्यभिक्षयोः । " इति यादवः । तच्च बलपुष्ट्यादिसंपादकौषधीविशेषः । गोत्रं कुलं, वित्तं धनम्, आत्मा देहस्तेषां समर्पणेन 'गोत्रं नाम्नि कुले बले' 'आत्मा देहे धृतौ जीवे' इति यादवः ॥ ३७ ॥ स प्रकृतः । हा शुभमिति स्मरन् 'हा विषाद शुभार्तिषु' इति । यद्वा–ह स्फुटम् ॥ ३८ ॥ सांख्ययोगयोर्ज्ञानकर्मणोर्वितानो विस्तारो येन तस्मै सांख्यशास्त्रकारिणे वा । अनीश्वरकपिलव्यावृत्तये ब्रह्मण इति । कथमनेन व्यावृत्तिरत्राह–परमात्मने इति । ऐक्य विवक्षया समाहारद्वंद्वविवक्षया । तथा च ज्ञानभक्तिकर्मयोगस्वरूपायेत्यर्थः ॥ ३९ ॥ इत्येतत् भवद्दर्शनम् । तत् दुर्लभसौलभ्यम् । यदृच्छयेति देवयोर्युवयोरिच्छया 'देवेच्छापि यदृच्छा स्यात्' इति हलधरः ॥ ॥ ४० ॥ निजभाग्यं श्लाघयन्नाह–अहो इत्यादि । शास्त्रं वेदादिग्रंथ एव शरीरं प्रतिमा यस्य तस्मिन् 'शास्त्रं ग्रंथनिदेशयोः' इति यादवः । अत एव श्रीभागवतं प्रकृत्य स्कांद उक्तम्–" तेनेयं वाङ्मयी मूर्तिः कृष्णस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि ॥ नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ॥ ४२ ॥ केचनोद्बद्धवैरेण भक्त्या केचन कामतः ॥ न तथा सत्त्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४३ ॥ इदमित्थमिति प्रायस्तव योगेश्वरेश्वर ॥ न विदंत्यपि योगेशा योगमायां कुतो वयम् ॥ ४४ ॥ तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात् ॥ निष्क्रम्य विश्वशरणांघ्र्युपलब्धवृत्तिः शांतो यथैक उत सर्वसखैश्चरामि ॥ ४५ ॥ शाध्यस्मानीशितव्येश निष्पापान्कुरु नः प्रभो ॥ पुमान्यच्छ्रद्धया तिष्ठंश्चोदनाया विमुच्यते ॥ ४६ ॥

कभक्तेभ्योऽपि सभाग्या इत्याह दैत्येत्यादित्रिभिः ॥ ४१ ॥ ४२ ॥ उद्बद्धवैरेण या भक्तिस्तया । केचनेति चैद्यादयः । कामतो भक्त्या गोप्यादयो यथा सन्निकृष्टास्त्वदात्मतां प्राप्ताः तथा च सत्त्वसंरब्धाः सत्त्वाविष्टा अपि सुरादयो न सन्निकृष्टा इति ॥ ४३ ॥ ननु सात्त्विकेभ्योऽपि राजसादयः सन्निकृष्टा इति चित्रं तदाह । इदमित्थमिति । इदमिति स्वरूपतः इत्थमिति विशेषतश्च ॥ ४४ ॥ तदेवं यद्यपि वैरभावेन त्वत्प्राप्तिर्भवेत्तथाऽपि मां सात्त्विकं कुर्विति प्रार्थयते । तदिति । तत्तथा नः प्रसीद । यथा निरपेक्षैराप्तकामैरपि विमृग्यं युष्मत्पादारविंदं तदेव धिषणमाश्रयस्तस्मादन्यद्गृहं तदेवांधकूपस्तस्मान्निष्क्रम्य निर्गत्य । विश्वस्य शरणं रक्षितारो वृक्षास्तेषामंघ्रिमूलेषु स्वत एव गलितैः फलादिभिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन सोऽहं शांतः सन्नेक एव चरामि । उत अथवा सर्वेषां सखायो महांतस्तैः सह यथा चरामीति ॥ ४५ ॥ कथमल्पपुण्यानामेवं भावः संभवतीति चेत्तर्हि यथैतद्भवेत्तथाऽस्माननुशिक्षयेत्याह । शाधीति । हे प्रभो ईशितव्याः सर्वे जीवास्तेषामीश यत्तवानुशासनमातिष्ठन्नाश्रयंश्चोदनाया

जगदीशितुः " इति । ' वेदो नारायणः साक्षात् ' इति च । ते वयं चान्ये राक्षसादयश्च तादृशा निबद्धवैराः । एतेनास्मासु न कापि भगवद्दर्शनयोग्यतेति ॥ ४१ ॥ ४२ ॥ ननु नित्यानुसंधानलक्षणांतःकरणगुणे नाविर्भूतज्ञानगुणोस्तीति माशंकीरिति चेदयं सुरादीनामपि नास्ति कुतोस्माकमित्याभिप्रेत्याह—केचनेति ॥ ४३ ॥ पुनराशंकते—नन्विति । तत्राक्षेपे । योगेशा ज्ञानिश्रेष्ठा नारदादयः । योगमायां जगत्सृष्ट्याद्यनुसंहितस्वरूपमाहात्म्यम् ॥ ४४ ॥ स्वाशयमाह—तदित्यादिना । तदेवमित्थम् । तस्मात्पादारविंदधिषणात् । ' सर्वः शर्वः शिवः स्थाणुः ' इति सहस्रनामसु सर्वशब्दो विष्णुवाचकोपि । सर्वो विष्णुः सखा येषां ते सर्वसखायो हरिजनास्तैरिति वा ॥ ४५ ॥ भगवदाक्षेपं समादधानो वक्ति—कथमित्यादिना । एवंभावः एवंविधत्यागः । एतत्त्यागादि । इति भाव इति—'देवर्षिभूताप्तनृणां पितृणां न किंकरो नायम्' इत्याद्युक्तेः ॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेंऽतरे ॥ देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतम् ॥ ४७ ॥ तेनासुरीमगन्योनिमधुनाऽवद्यकर्मणां ॥ हिरण्यकशिपोर्जाता नीतास्ते योगमायया ॥ ४८ ॥ देवक्या उदरे जाता राजन्कंसविहिंसिताः ॥ सा ताञ्छोचत्यात्मजान्स्वांस्त इमेऽध्यासतेंऽतिके ॥ ४९ ॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये ॥ ततः शापाद्विनिर्मुक्ता लोकं यास्यंति विज्वराः ॥ ५० ॥ स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद् घृणी ॥ षडिमे मत्प्रसादेन पुनर्यास्यंति सद्गतिम् ॥ ५१ ॥

विधिनिषेधलक्षणायाः सकाशाद्विमुच्यते । न खलु त्वद्भक्तो विधिकिंकरः स्यादिति भावः ॥ ४६ ॥ तदुक्तं सर्वमनुमोद्य स्वागमनकारणं सप्रपञ्चं कथयति आसन्निति पंचभिः । ऊर्णायां भार्यायाम् । प्रथमेंऽतरे स्वायंभुवमन्वंतरे । ते देवाः सुतां वाचं यभितुं यब्धुं मैथुनेन रमयितुमुद्यतमुद्युक्तं कं प्रजापतिं जहसुरुपहसितवंतः ॥ ४७ ॥ तेनावद्यकर्मणा पापेनासुरीं योनिमगन्नगमन् । अधुना तत्क्षणमेव । हिरण्यकशिपोर्जाता इत्यर्थः ॥ ४८ ॥ ते च योगमायया ततो नीताः संतो देवक्या उदरे जाताः । हे राजन् बले ते च कंसेन विहिंसिताः सा च तानात्मजान्मत्वा शोचति । ते चेमे तवांतिकेऽध्यासते ॥ ४९ ॥ लोकं देवलोकम् ॥ ५० ॥ स्मरोद्गीथः स्मरसहित उद्गीथः ।

तदुक्तं बल्युक्तम् । विगीतव्यावृत्त्यर्थमर्थान्तरमाह–सुखं तनोतीति सुता भार्या ताम् । नामैकदेशन्यायेन भीमादिवदक्षरमुष्टिन्यायेन वाऽऽभाकादिवदत्र सुना सुखप्रह इति ॥ ४७ ॥ तेन महदुपहासलक्षणेन । इत्यर्थ इति–अधुनेति पदमत्र नेदानीमर्थकं किं तु तत्क्षणार्थकमिति भावः । ते च हिरण्यकशिपुजाताः । ततो हिरण्यकशिपुगृहात् । योगमायापार्श्वमेतावत्कालपर्यंतं स्थित्वा पुनरधुना देवक्या उदरे जाता इत्युत्तरेणान्वयः । अत्र च हरिवंशीया कथाऽनुसंधेया । सा च–"हिरण्यकशिपुपुत्रकालनेमिनः षट् पुत्रा ब्रह्मप्रसादावाप्तये तपश्चक्रुस्तत्तपसा तुष्टो ब्रह्मा तदभीप्सितममरत्वं ददौ । तच्छ्रुत्वा तेषां पितामहो हिरण्यकशिपुस्ताञ्छशाप–यतो मां सर्वेश्वरं त्यक्त्वा ब्रह्माणमाराधितवंतोऽतः स्वपितृवध्या भविष्यतेत्युक्त्वा तांस्तत्याज । ततो विष्णुर्ब्रह्मवरं सत्यीकर्तुं तेषामात्मन आकृष्य योगनिद्रायै ददौ । ते च जलगर्भे शयनं चक्रुस्तेषां जीवात्मनो योगमाया भगवदाज्ञप्ता देवकीगर्भे निवेशितवतीति तेषां स्वप्नवत्स्वदृष्ट्या देवक्यां जनिर्लोकदृष्ट्या साक्षाज्जनिरिति ॥ ४८ ॥ सा च देवकी । तान्कंसविहिंसितान् । ते च कंसहिंसिताः । इमे संमुखस्थाः । अध्यासते तिष्ठंति ॥४९॥ इतस्तव पार्श्वतः । ततो मातृशोकापनुत्त्यनंतरम् । शापान्महदुपहासलक्षणपापात् "शापः पापाक्रोशादिव्यप्राप्तकल्याणकेषु च" इति निरुक्तिः ॥ ५०॥ अभिज्ञानार्थं तन्नामा।नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्त्वा तान्समादाय इंद्रसेनेन पूजितौ ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छताम् ॥ ५२ ॥ तान्दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी ॥ परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥ ५३ ॥ अपाययत्स्तनं प्रीता सुतस्पर्शपरिप्लुता ॥ मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ॥ ५४ ॥ पीत्वाऽमृतं पयस्तस्याः पीतशेषं गदाभृतः ॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥ ५५ ॥ ते नमस्कृत्य गोविंदं देवकीं पितरं बलम् ॥ मिषतां सर्वभूतानां ययुर्धाम दिवौकसाम् ॥ ५६ ॥ तं दृष्ट्वा देवकी देवी मृतागमननिर्गमम् ॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ॥ ५७ ॥ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः ॥ वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत ॥ ५८ ॥ सूत उवाच ॥ य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ॥ जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥ ५९ ॥ इति श्रीभागवते महापुराणे दशमस्कंधोत्तरार्द्धे मृताग्रजानयनंनाम पंचाशीतितमोऽध्यायः ॥ ८५ ॥

सद्दाति मोक्षम् । स्मरस्यैव पूर्वं कीर्तिमानिति नाम । अतः " कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः । अर्पयामास" इत्युक्तम् ॥ ५१ ॥ अयच्छतामर्पयामासतुः ॥ ५२ ॥ ॥ ५३ ॥ ५४ ॥ अमृतत्वे हेतुः । गदाभृतः पीतशेषमिति नारायणांगसंस्पर्शेन प्रतिलब्धं देवा वयमित्यात्मदर्शनं यैस्ते ॥५५॥ धाम देवलोकम् ॥५६ ॥ मृतानामागमनं निर्गमनं च श्रीकृष्णस्य मायां मेने । तेनैवापत्यादिरूपेण रचिताम् ॥ ५७ ॥ ५८ ॥ अमृतं कीर्तिर्यस्य तस्य । व्यासपुत्रैरिति बहुवचनं पूजार्थम् । जगतामघं भिनत्तीति तथा तत् । अलं निःशेषं यथा भवति तथा दिनकृच्छ्रादिवदिति । तदेवं मोक्षहेतुत्वं पापक्षयहेतुत्वं चोक्तम् । तद्भक्तानां तु सत्कर्णपूरं परमसुखावहं कर्णाभरणमिति स्वयं सुखरूपतामाह । किंच भगवति कृतमावेशितं चित्तं येन स तथा भूत्वा तस्य क्षेमधाम कालादिभयरहितं लोकं यातीति ॥ ५९ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायां पंचाशीतितमोऽध्यायः ॥ ८५ ॥

निर्दिशति—स्मर इत्यादि । अतस्तन्नामत्वात् ॥ ५१ ॥ तान्स्मरादीन् । मातुर्मात्रे ॥ ५२ ॥ ५३ ॥ यया मायया ॥ ५४ ॥ तस्या देवक्याः । 'अमृतपय' इति पाठे तु अमृतममृतत्वापादकं पयोऽमृतपयः । यद्वा—नंदगेहगमनात्पूर्वं स्वाविर्भावावसर एव जाताह्लादा देवकी तन्मुखे स्तनं ददौ । स्वयमेव मुखे स्तनं गृहीत्वा पुनर्वसुदेवाय मां नंदगृहं नयेत्युक्तवानिति ध्येयं पूर्वजन्मापेक्षयैतज्जन्मनोऽन्यत्वादिति ॥ ५५ ॥ ते स्मरादयः ॥ ५६ ॥ तत्तदा ॥ ५७ ॥ कृष्णलीलानंत्यमतिदिशति—एवमिति ॥ ५८ ॥ अमृतं कीर्तिरिव यस्येति कीर्तेरमृताधिक्यं मोक्षहेतुत्वात् । न कृच्छ्रादिवत्प्रयोगोक्तमात्रपापहरम् । आदिना चांद्रायणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वसारं रामकृष्णयोः ॥ यथोपयेमे विजयो या ममासीत्पितामही ॥ १ ॥ श्रीशुक उवाच ॥ अर्जुनस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः ॥ गतः प्रभासमश्रृणोन्मातुलेयीं स आत्मनः ॥ २ ॥ दुर्योधनाय रामस्तां दास्यतीति न चापरे ॥ तल्लिप्सुः स यतिर्भूत्वा त्रिदंडी द्वारकामगात् ॥ ३ ॥ तत्र वै वार्षिकान्मासानवात्सीत्स्वार्थसाधकः ॥ पौरैः सभाजितोऽभीक्ष्णं रामेणाऽजानता च सः ॥ ४ ॥ एकदा गृहमानीय आतिथ्येन निमंत्रितम् ॥ श्रद्धयोपाहृतं भैक्ष्यं बलेन बुभुजे किल ॥ ५ ॥ सोऽपश्यत्तत्र महतीं कन्यां वीरमनोहराम् ॥ प्रीत्युत्फुल्लेक्षणस्तस्यां भावक्षुब्धं मनो दधे ॥ ६ ॥

षडशीतितमे दंभात्सुभद्रामर्जुनोहरत् ॥ गत्वा च मिथिलां कृष्णो नृपविप्रावनंदयत् ॥ १ ॥ पित्रोः स्वज्ञानमादिश्य सुभद्रां फाल्गुनाय च ॥ जगाम मिथिलां कृष्णः स्वभक्तप्रियकृत्ततः ॥ २ ॥ देवक्या मृतपुत्रलाभवदर्जुनस्य सुभद्रालाभोऽपि रामप्रातिकूल्याद्दुर्घट इति मन्यमानः प्रसंगात्पृच्छति । ब्रह्मन्निति ॥ १ ॥ २ ॥ कथमशृणोत् । दुर्योधनायेति । अपरे वसुदेवादयो न दास्यंतीति । तल्लिप्सुस्तस्या मातुलेय्या लिप्सुः । रामं वंचयितुं पूज्यतमं त्रिदंडिवेषं विधाय गत इत्याह । स यतिरिति ॥ ३ ॥ स्वार्थसाधकः कन्यां प्रेप्सुः ॥ ४ ॥ तमातिथ्येन निमंत्र्य गृहमानीय बलेन यच्छ्रद्धयोपाहृतं परिविष्टं तद्भैक्ष्यं किलार्जुनो बुभुजे इत्यन्वयः ॥ ५ ॥ भावेन रत्यभिप्रायेण क्षुभितं मनो दधे ॥ ६ ॥

दिग्रहः । तदेवं निश्शेषाघहरत्वादुभयहेतुत्वं युक्तम् । तद्भक्तानां मुरारिभक्तानाम् । स्वयं सुखरूपतां परमानंदरूपतां व्यनक्तीत्यर्थः । लोकं वैकुंठम् । " न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नोऽनिमिषो लेढि हेतिः " इत्युक्तेः ॥ ५९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्द्धे पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ लोकवंचनविहितमिथ्यानुष्ठानं दंभः । अनंदयत् साह्लादौ चक्रे (१) । स्वसारं सुभद्राम् । विजयोर्जुनः ॥ १ ॥ तीर्थयात्रायां ब्राह्मणधनरिरक्षया स युधिष्ठिरद्रौपदीगृहांतर्गतधनुर्ग्रहणार्थतद्गतप्रतिज्ञातद्वादशवार्षिकतीर्थयात्रायामिति स्फुटं महाभारते । सोर्जुनः ॥ २ ॥ लिप्सुरिच्छावान् । त्रिदंडीति—एकदंडधारणं तु परमहंसस्यैव न तु हंसादेस्तेषां त्रिदंडविधानं ग्रंथांतरे प्रतिपादितम् । अत्र भारताविरोधः त्रिषु लोकेषु दण्डो यस्य स त्रिदण्डो जिष्णुर्विष्णुर्वा पुत्रत्वेन पालकत्वेन च यस्य विद्यते स त्रिदण्डी यतिः । कन्याहरणे यत्नवान्भैक्ष्यं प्रार्थनया दत्तं बुभुजे 'भिक्ष–याच्ञायाम्' इत्येवं परिहार्यः ॥ ३ ॥ तत्र द्वारकायाम् । सोर्जुनः ॥ ४ ॥ संध्यभाव आर्षः । बलेन रामेण ॥ ५ ॥ स त्रिदंडवेष्यर्जुनः । तत्र गृहे । तस्यां कन्यायाम् । क्षुभितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सापि तं चकमे वीक्ष्य नारीणां हृदयंगमम् ॥ हसंती व्रीडितापांगी तन्न्यस्तहृदयेक्षणा ॥ ७ ॥ तां परं समनुध्यायन्नंतरं प्रेप्सुरर्जुनः ॥ न लेभे शं भ्रमच्चित्तः कामेनातिबलीयसा ॥ ८ ॥ महत्यां देवयात्रायां रथस्थां दुर्गनिर्गताम् ॥ जहारानुमतः पित्रोः कृष्णस्य च महारथः ॥ ९ ॥ रथस्थो धनुरादाय शूरांश्चाऽऽरुंधतो भटान् ॥ विद्राव्य क्रोशतां स्वानां स्वभागं मृगराडिव ॥ १० ॥ तच्छ्रुत्वा क्षुभितो रामः पर्वणीव महार्णवः ॥ गृहीतपादः कृष्णेन सुहृद्भिश्चान्वशाम्यत ॥ ११ ॥ प्राहिणोत्पारिबर्हाणि वरवध्वोर्मुदा बलः ॥ महाधनोपस्करेभरथाश्वनरयोषितः ॥ १२ ॥ श्रीशुक उवाच ॥ कृष्णस्यासीद्द्विजश्रेष्ठः श्रुतदेव इति श्रुतः ॥ कृष्णैकभक्त्या पूर्णार्थः शांतः कविरलंपटः ॥ १३ ॥ स उवास विदेहेषु मिथिलायां गृहाश्रमी ॥ अनीहयाऽऽगताऽऽहार्यनिर्वर्तितनिजक्रियः ॥ १४ ॥ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत ॥ नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः ॥ १५ ॥ तथा तद्राष्ट्रपालोंऽग बहुलाश्व इति श्रुतः ॥ मैथिलो निरहंमान उभावप्यच्युतप्रियौ ॥ १६ ॥

व्रीडितापांगी सव्रीडकटाक्षा । तस्मिन्नेव न्यस्तं हृदयमीक्षणं च यया सा ॥ ७ ॥ अंतरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः । कामेन भ्रमच्चित्तं यस्य सः । शं रामादिसन्मान निमित्तं सुखम् ॥ ८ ॥ ९ ॥ आसमंताद्रुंधत आवरणं कुर्वतः ॥ १० ॥ ११ ॥ पारिबर्हाणि वरवध्वोः प्रीतिदेयानि ॥ १२ ॥ १३ ॥ अनीहयाऽनुद्यमेनैवागतं यदाहार्यं भोज्यं तेन निर्वर्तिता निजाः क्रिया येन सः ॥ १४ ॥ यात्रामात्रं शरीरादिनिर्वाहमात्रं भोज्यमुपनमति तं प्रत्यागच्छति ॥ १५ ॥ मिथिलस्य जनकस्य वंश्यो मैथिलः ॥ १६ ॥

संचलितम् ॥ ६ ॥ साऽपि कन्याऽपि । तं त्रिदंडिनम् । चकमे कामयामास ॥ ७ ॥ तां कन्याम् । परं केवलम् ॥ ८ ॥ पित्रोर्देवकीवसुदेवयोः । अनुमतोंगीकृतः । श्रीकृष्णेनैकांते सुभद्रामिच्छसि चेत्तर्हि देवयात्रागतां गृहीत्वा गच्छानुमतं चैतन्मम पित्रोश्च विना राममिति स्पष्टं भारते ॥ ९ ॥ १० ॥ तत्सुभद्राहरणम् । पर्वणि पूर्णिमायाम् ॥ ११ ॥१२॥ "यमेवैष वृणुते तेन लभ्यः" इति श्रुत्यर्थं व्यक्तीकुर्वन्नितिहासमाह—पूर्णार्थः भक्तिमंतरेणान्यमर्थमनाकांक्षमाणः । कृष्णलीलाप्रबंधकर्तृत्वात्कविः । शब्दादिविषयेच्छारहितत्वादलंपटः ॥ १३ ॥ मिथिलायां नगर्याम् । आहार्यमित्युपलक्षणं वस्त्रादेः । निर्वर्तिताः संपादिताः क्रिया भोजनाच्छादनादिरूपा नित्यनैमित्तिका वा ॥ १४ ॥ तावता दैवागतमात्रेण । उचिता अतिथिसत्कारादिरूपाः ॥ १५ ॥ यथा श्रुतदेवस्तत्परायणस्तथा तद्राष्ट्रपालो मिथिलाप्रांतदेशपतिः । उभौ श्रुतदेवबहुलाश्वौ ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयोः प्रसन्नो भगवान्दारुकेणाहृतं रथम् ॥ आरुह्य साकं मुनिभिर्विदेहान्प्रययौ प्रभुः ॥ १७ ॥ नारदो वामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः ॥ अहं बृहस्पतिः कण्वो मैत्रेयश्च्यवनादयः ॥ १८ ॥ तत्रतत्र तमायांतं पौरा जानपदा नृप ॥ उपतस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितम् ॥ १९ ॥ आनर्तधन्वकुरुजांगलकंकमत्स्यपांचालकुंतिमधुकेकयकोसलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः ॥ २० ॥ तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृण्वन्दिगंतधवलं स्वयशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥ ॥२१॥ तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा नृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥ २२ ॥ दृष्ट्वा त उत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वांस्तथा मुनीन् ॥ २३ ॥ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुम् ॥ मैथिलः श्रुतदेवश्च पादयोः पेततुः प्रभोः ॥ २४ ॥

प्रभुरेव स्वयं विदेहान्देशान् प्रययौ ॥ १७ ॥ कृष्णो व्यासः । रामो भार्गवः ।अहं शुकः । एवमादिभिः सह ॥ १८ ॥ १९ ॥ आनर्तायर्णांतास्तद्देशवर्तिन्यो नृनार्यः । उदारहासं स्निग्धमीक्षणं यस्मिंस्तत् । दृशिभिर्नेत्रैः ॥ २० ॥ स्ववीक्षणेनैव विनष्टतमिस्रा दृग्येषां तेभ्यः । क्षेममभयमर्थदृशं तत्त्वज्ञानं च ॥ २१ ॥ अभीयुः प्रत्युज्जग्मुः ॥ २२ ॥ प्रीत्योत्फुल्लान्याननान्याशया अंतःकरणानि च येषां ते । कैः शिरोभिः ॥ २३ ॥ २४ ॥

तयोश्श्रुतदेवबहुलाश्वयोः । भक्त्येति शेषः ॥ १७ ॥ मुनीन्नामतो निर्दिशति—नारद इत्यादि । कृष्णो व्यासः । रामो जामदग्न्यः । अहं शुकः । आदिना भृग्वादयः ॥ १८ ॥ तत्रतत्र पुरादौ । तं श्रीकृष्णम् । सूर्योदयसमये ग्रहाणामपि किंचित्प्रतीतिरस्तीति तेन प्रभुसमीपेऽपि ते पूज्या एवेत्युक्तम् ॥ १९ ॥ तद्देशवर्तिनृनार्यः तेष्वानर्ताद्यर्णान्तेषु देशेषु वर्तिन्यो नृनार्यो नरसहिता नार्यः । 'तात्स्थ्यात्ताच्छब्द्यम्' इति न्यायेन वाऽऽनर्ताद्या विद्यंते यासां निवासत्वेन तास्तथा । अन्ये उक्तदेशेभ्योऽन्यदेशस्थाश्च ॥ २० ॥ विनष्टतमिस्रा निरस्ताज्ञाना दृग्बुद्धिर्येषां तेभ्यः । अभयं सांसारिकभयाभावं तद्धेतुभूतं तत्त्वज्ञानमपरोक्षज्ञानञ्च । तेभ्य आनर्तादिवासिभ्यः । दिगंतान् धवलयाति शोभयतीति तथा । सर्वत्र व्याप्तम् । अशुभघ्नं महापातकनाशकम् । विदेहान् मिथिलादेशान् ॥ २१ ॥ ते मैथिलाः । तस्मै तं पूजयितुम् ॥ २२ ॥ ते उक्तार्थाः । यथा तं तथा मुनीन् पूर्वं श्रुताः श्रुतपूर्वास्तान्नेमुः ॥ २३ ॥ तं श्रीकृष्णम् । किंभूतम्—जगद्भिः सर्वलोकैर्गम्यते स्वस्वाभिलषितावाप्तये प्राप्यते इति जगद्गु औणादिकोत्र डुः ब्राह्मणकुलं तद्राति स्वीकरोति स्वीयत्वेनेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यमंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः ॥ मैथिलः श्रुतदेवश्च युगपत्संहतांजली ॥ २५ ॥ भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया ॥ उभयो
राविशद्गेहमुभाभ्यां तदलक्षितः ॥ २६ ॥ श्रोतुमप्यसतां दूराज्जनकः स्वगृहागतान् ॥ आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः ॥ २७ ॥
प्रवृद्धभक्त्या उद्धर्षहृदयास्राविलेक्षणः ॥ गत्वा तदंघ्रीन्प्रक्षाल्य तदपो लोकपावनीः ॥२८॥ सकुटुंबो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान् ॥ गंधमाल्यांबराक
ल्पधूपदीपार्घगोवृषैः ॥२९॥ वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान् ॥ पादावंकगतौ विष्णोः संस्पृशञ्छनकैर्मुदा ॥३०॥ राजोवाच ॥ भवान्हि सर्व
भूतानामात्मा साक्षी स्वदृग्विभो ॥ अथ नस्तत्पदांभोजं स्मरतां दर्शनं गतः ॥३१॥ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् ॥ यदात्थैकांतभक्तान्मे
नानंतः श्रीरजः प्रियः ॥ ३२ ॥ को नु त्वच्चरणांभोजमेवंविद्विसृजेत्पुमान् ॥ निष्किंचनानां शांतानां मुनीनां यस्त्वमात्मदः ॥ ३३ ॥

॥ २५ ॥ तदभिप्रेत्यांगीकृत्य तत्तदोभाभ्यामपि ताभ्यां मद्गृहादन्यस्य गेहं यातीत्यलक्षितोऽविदितः । यद्वा उभाभ्यां रूपाभ्यां तदलक्षितस्ताभ्यामलक्षित इति ॥ २६ ॥ २७ ॥ उद्धर्षमुद्गतहर्षं हृदयं यस्य अस्रैराविले क्लिन्ने ईक्षणे यस्य सः स च स च ॥ २८ ॥ ईश्वरान् ईश्वरं तत्तुल्यांश्चेत्यर्थः ॥ २९ ॥ प्रीणन्प्रीणयन् । संस्पृशन्संमर्दयन् ॥ ३० ॥ आत्मा चेतयिता । साक्षी प्रकाशकः । स्वदृक् स्वप्रकाशः । अथातःकारणात् ॥ ३१ ॥ अनंतो बंधुरपि श्रीर्भार्याऽपि अजः

जगद्गुरुरत्रापि रातेर्डुः ब्राह्मणकुलसहितमित्यर्थः ॥ २४ ॥ आतिथ्येनाऽतिथियोग्येन कर्मणा न्यमंत्रयेतां भोजनार्थं प्रार्थयताम् । संहतः कृतोंजलिः प्रसृतकरद्वयसंयोगो याभ्यां तौ तथा ॥ २५ ॥ तन्निमंत्रणम् । ताभ्यां श्रुतदेवबहुलाश्वाभ्याम् । तत्पदस्य तदार्थत्वे क्लिष्टकल्पनामपेक्ष्याह—यद्वेति ॥ २६ ॥ जनकः 'ईश्वरान्पूजयांचक्रे' इति तृतीयेनान्वयः । श्रोतुमपि दूरान् कर्णाविषयान् । असतां तच्छ्रवणमपि दुर्लभमिति भावः ॥ २७ ॥ तदंघ्रीन् कृष्णसहितमुनिचरणान् । तदपस्तच्चरणजलानि ॥ २८ ॥ ईश्वरश्चेश्वराश्चेत्येकशेषः । इत्यर्थ इति—ईश्वरवज्जगत्सु पूज्यत्वेनेश्वरतुल्यानिति भावः । यद्वा—ईश्वरो विद्यते येषु त ईश्वरा इति मत्वर्थीयोऽच् । ईश्वरसहितानित्यर्थः । गोवृषैरिति मधुपर्कांगत्वेनोक्तम्—"मा गामनागामदितिं वधिष्ट" इति श्रुत्या दर्शनमात्रं विहितं वधस्य निषिद्धत्वादित्युक्तं पुरस्तात्। गोषु वाक्सु वृषैश्श्रेष्ठैः श्रुतिवाक्यैरिति वा ॥२२॥ मधुरया लौकिकश्लाघायुक्तया । इदं वक्ष्यमाणम् ॥ ३० ॥ यतो भवान् स्वेषु प्रकाशते इति स्वप्रकाशः अतः कारणादित्यर्थः ॥ ३१ ॥ अनंतो बलदेवः । तत्स्ववचः तत्किं यदित्यात्थ । एकस्मिन्नंतोऽध्यवसायो यस्यास्सैकान्ता सा चासौ भक्तिरेकांतभाक्तिरभेदोपासना तद्वानेकांतभक्तो ज्ञानीत्यर्थः । " प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः " इत्युक्तेः ॥ ३२ ॥ एवंवित् उक्तार्थज्ञः । एकांतभक्तेभ्यः किं ददातीति चेदाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽवतीर्य यदोर्वंशे नृणां संसरतामिह ॥ यशो वितेने तच्छांत्यै त्रैलोक्यवृजिनापहम् ॥ ३४ ॥ नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे ॥ नारायणाय ऋषये सुशांतं तपईयुषे ॥ ३५ ॥ दिनानि कतिचिद्भूमन्गृहान्नो निवस द्विजैः ॥ समेतः पादरजसा पुनीहीदं निमेः कुलम् ॥ ३६ ॥ इत्युपामंत्रितो राज्ञा भगवाँल्लोकभावनः ॥ उवास कुर्वन्कल्याणं मिथिलानरयोषिताम् ॥ ३७ ॥ श्रुतदेवोऽच्युतं प्राप्तं स्वगृहाञ्जनको यथा ॥ नत्वा मुनीन्सुसंहृष्टो धुन्वन्वासो ननर्त ह ॥ ३८ ॥ तृणपीठबृसीष्वेतानानीतेषूपवेश्य सः ॥ स्वागतेनाभिनंद्यांघ्रीन्सभार्योऽवनिजे मुदा ॥ ३९ ॥ तदंभसा महाभाग आत्मानं सगृहान्वयम् ॥ स्नापयांचक्र उद्धर्षो लब्धसर्वमनोरथः ॥ ४० ॥ फलार्हणोशीरशिवामृतांबुभिर्मृदा सुरभ्या तुलसीकुशांबुजैः ॥ आराधयामास यथोपपन्नया सपर्यया सत्त्वविवर्धनांधसा ॥ ४१ ॥ स तर्कयामास कुतो ममान्वभूद्गृहांधकूपे पतितस्य संगमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्मनिकेतभूसुरैः ॥ ४२ ॥

पुत्रोऽपि ॥ ३२ ॥ ३३ ॥ तच्छांत्यै संसारोपशमाय ॥ ३४ ॥ ३५ ॥ गृहान् गृहेष्वित्यर्थः ॥ ३६ ॥ ३७ ॥ धुन्वन्परिभ्रमयन् ॥ ३८ ॥ अवनिजे अवनिर्निजे प्रक्षालितवान् ॥ ३९ ॥ ४० ॥ फलैरामलकादिभिरर्हणेनोशीरैस्तृणविशेषमूलैः सुवासितैः शिवैरमृतवत्स्वादुभिरंबुभिः । सुरभ्या मृदा कस्तूरीप्रमुखया । सपर्यया पूजया । यथोपपन्नयाऽनायासेन संपन्नया । भूतानुपद्रवलब्धत्वात् । सत्त्वविवर्धनं यदंधोऽन्नं तेन च ॥ ४१ ॥ अस्य श्रीकृष्णस्यात्मा मूर्तिस्तस्य निकेतैः स्थानविशेषैर्भूसुरैश्च सर्व

आत्मदः स्वरूपसाक्षात्कारप्रदः ॥ ३३ ॥ ३४ ॥ ३५ ॥ इत्यर्थ इति—सप्तम्यर्थे द्वितीया छांदसीति भावः ॥ ३६ ॥ ३७ ॥ अथ श्रुतदेवोत्सवमाह—श्रुतेति । धुन्वन्निति अंतर्भावितणिजर्थः ॥ ३८ ॥ तृणपीठानि कटानि कुशादिनिर्मितानि तान्येव वृष्यस्तासु । 'व्रतिनामासनं वृषी ' इत्यमरः । एतान् ऋषीन् । आनीतेष्वन्येषूर्गायासनेषु । अवनिजेऽत्राभ्यासलोपस्त्वार्षः ॥ ३९ ॥ तदंभसाऽवनेजनजलेन । आत्मानं स्वदेहम् । गृहं भार्याऽन्वयः पुत्रादिस्ताभ्यां सहितम् । सर्वेषां मनांसि रथो वाहनं यस्य स सर्वमनोरथः । सर्वहृद्वासी हरिस्स लब्धो येन स तथा । अंतर्यामी दृग्विषयो जातोऽहो भाग्यमित्यात्मानं श्लाघितवानिति भावः ॥ ४० ॥ अर्हणेन चंदनादिना । तृणविशेषस्य वीरणस्य मूलैः "स्याद्वीरणं बीरतरं मूलेस्योशीरमस्त्रियाम्" इत्यमरः । शिवैः कल्याणकरैरंबुभिस्तीर्थोदकैरित्यर्थः । तुलसीदलमालाकुशपवित्रकमलबीजपुष्पैः । सत्त्वविवर्द्धनं तमोरजोवारकं यदंधः नीवारादि ॥ ४१ ॥ स श्रुतदेवः । निकेतैः स्थानभूतैः । यद्वा—अस्यात्मा निकेत आश्रयो येषां तैः । सर्वतीर्थानामास्पदं पादरेणुः येषां तैः । " गंगाद्यास्सरितः सर्वास्तीर्थैश्च पुष्करादिभिः । तिष्ठंति सततं राजन्विप्रपादरजस्सु वै ॥" इत्यादिपुराणात् । वचनव्यत्यासेन कृष्णविशेषणं च अनुपदं विस्मयेऽप्रसिद्धमत आह—यद्वेति । अस्याकारवाच्यवासुदेवस्यात्मा वेदस्तस्य निकेतैराश्रयैः वेदस्य कृष्णात्मत्वे "वेदो नारायणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूपविष्टान्कृतातिथ्याञ्छुतदेव उपस्थितः ॥ सभार्यस्वजनापत्य उवाचांघ्र्यभिमर्शनः ॥४३॥ श्रुतदेव उवाच ॥ नाद्य नो दर्शनं प्राप्तः परं परमपूरुषः ॥ यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ॥ ४४ ॥ यथा शयानः पुरुषो मनसैवात्ममायया ॥ सृष्ट्वा लोकं परं स्वात्ममनुविश्यावभासते ॥ ४५ ॥ शृण्वतां गदतां शश्वदर्चतां त्वाऽभिवंदताम् ॥ नृणां संवदतामंतर्हृदि भास्यमलात्मनाम् ॥ ४६ ॥ हृदिस्थोऽप्यतिदूरस्थः कर्मविक्षिप्तचेतसाम् ॥ आत्मशक्तिभिरग्राह्योऽप्यंत्युपेतगुणात्मनाम् ॥ ४७ ॥ नमोऽस्तु तेऽध्यात्मविदां परात्मने अनात्मने स्वात्मविभक्तमृत्यवे ॥ सकारणाकारणलिंगमीयुषे स्वमाययाऽसंवृत रुद्धदृष्टये ॥ ४८ ॥

तीर्थास्पदपादरेणुभिः कृष्णादिभिर्यः संगमः स मम कुतोऽन्वभूदिति । अनु इति विस्मये । यद्वा आ इति वितर्के नु इति विस्मये ॥ ४२ ॥ उपस्थितः समीप उपविष्टः । भार्या भर्तव्याः स्वजना अपत्यानि च तैः सहितः । श्रीकृष्णस्यांघ्रिमभिमृशति संमर्दयतीत्यंघ्र्यभिमर्शनः ॥ ४३ ॥ यर्हीदं प्रविष्टस्तदैव दर्शनं प्राप्त इति स एव सन्मात्रो नाद्यतनीभूतस्त्वमित्यर्थः । यद्वा नोऽस्मानद्यैव प्राप्त इति न किंतु तदैव प्राप्तो यर्हीदं विश्वं स्वशक्तिभिः सत्त्वादिभिः सृष्ट्वा स्वसत्तयाऽनुप्रविष्टस्त्वम् । त्वद्दर्शनं तु परं केवलमद्यैव प्राप्तम् ॥ ४४ ॥ मायासृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौ दृष्टांततयाह । यथेति । आत्ममायया स्वाविद्यया । यद्वा आत्मनस्तव माययेति ॥ ४५ ॥ किंच । शृण्वतामिति । नित्यं श्रवणकीर्तनादिपराणाममलात्मनामपि हृद्येव त्वं भासि । मम तु लोचनगोचरस्त्वमहो भाग्यमिति भावः ॥ ४६ ॥ ननु सर्वेषां हृदि स्थितः कथं केषांचिदेव हृदि भासि मेघैः सूर्यवज्जीवोपाधिभिरावृतत्वादिति यद्युच्यते तर्हि न कस्यापि भायादित्यत आह । हृदिस्थोऽपीति । कर्मभिर्विक्षिप्तं चेतो येषां तेषामात्मशक्तिभिरहंकारादिभिरग्राह्यो व्यवहितोऽप्युपेतगुणः प्राप्तश्रवणकीर्तनादिसंस्कार आत्मा अंतःकरणं येषां तेषामंति समीपे । अव्यवहितस्त्वमित्यर्थः ॥ ४७ ॥ एतदेव प्रपंचयन्नमस्यति । नमोस्त्विति । ते तुभ्यं नमोऽस्तु अध्यात्मविदां निवृत्तदेहाद्यहंकाराणां परात्मने परमात्मत्वेन प्रकाशमानाय मोक्षप्रदायेत्यर्थः । अनात्मने देहाद्यभिमानिने जीवाय

साक्षात्'' इति यमपुरुषोक्तेरेव मानत्वम् । किंच—''ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्माग्विप्रांस्तपोव्रतधरान्मुखतश्च साक्षात्'' इति दक्षोक्तेश्च तथात्वम् ॥ ४२ ॥ अंघ्र्याभिमर्शनः पादसंवाहनं कुर्वन् ॥४३॥ ''तत्सृष्ट्वा तदेवानुप्राविशत्'' इति श्रुतेरिदं विश्वं यदा प्रविष्टः । इत्यर्थ इति—त्वं सृष्ट्यादिकर्ता साक्षान्नारायणो न त्वं देवदत्तादिसमः कश्चिदसीति प्राक्तनं निजानुभवं द्योतयमानो वक्तीति भावः । ननु मद्दर्शने पुनः कथं तव संसार इति चेदाह—यद्वेति।तदापाततो दर्शनेऽपि विवेकतस्तु दर्शनमद्यैव जातं विविक्तदर्शनस्यैव संसारनाशकत्वमिति भावः॥४४॥मायया सृष्टिप्रवेशौ तयोः।जाग्रद्रचनासमर्थस्य स्वप्नरचनमपि न संभवत्यतो भगवन्मायारचितजाग्रत्प्रपंचवत्स्वाप्नप्रपंचोपि तन्मायारचित एवेत्याह—यद्वेति ॥४५॥ अन्यदद्भुतमाह—किंचेति । त्वा त्वाम् । इति भाव इति—ऐकांतिकभक्तेभ्योपि मद्भाग्यमधिकमिति तात्पर्यम् ॥ ४६ ॥ अत्राक्षिपति—नन्विति । जीवोपाधिभिरहंकारादिभिः । भायात्प्रतीयात् । कर्मभिर्दानादानादिभिः । आत्मशक्तिभिर्जीवोपाधिभिः। ता आह—अहंकारादिभिः।आदिना क्रोधलोभादिग्रहः । व्यवहितोपि अज्ञानां दृष्ट्या दूरस्थोपि । इत्यर्थ इति—श्रवणादिनाऽज्ञाननिवृत्त्याऽपरोक्षीभवसीति भावः ॥ ४७ ॥ एतदेव तवाऽज्ञपरोक्षत्वविज्ञापरोक्षत्वमेव । इत्यर्थ इति—स्वरूपप्रकाशस्यैव मोक्षहेतुत्वादिति भावः । परत्वेन ब्रह्मरूपत्वेन अहं जीवानां मृत्युदोऽत्र । को हेतुरित्याशंकते—कुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स त्वं शाधि स्वभृत्यान्नः किं देव करवामहे ॥ एतदंतो नृणां क्लेशो यद्भवानक्षिगोचरः ॥ ४९ ॥ श्रीशुक उवाच ॥ तदुक्तमित्युपाकर्ण्य भगवान्प्रणतार्तिहा ॥ गृहीत्वा पाणिना पाणिं प्रहसंस्तमुवाच ह ॥ ५० ॥ श्रीभगवानुवाच ॥ ब्रह्मंस्तेऽनुग्रहार्थाय संप्राप्तान्विद्ध्यमून्मुनीन् ॥ संचरंति मया लोकान्पुनंतः पादरेणुभिः ॥ ५१ ॥ देवाः क्षेत्राणि तीर्थानि दर्शनस्पर्शनार्चनैः ॥ शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया ॥५२ ॥ ब्राह्मणो जन्मना श्रेयान्सर्वेषां प्राणिनामिह ॥ तपसा विद्यया तुष्ट्या किमु मत्कलया युतः ॥ ५३ ॥ न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम् ॥ सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् ॥ ५४ ॥

परत्वेनाप्रकाशमानत्वात् । स्वात्मनः सकाशाद्विभक्तः समर्पितो मृत्युः संसारो येन तस्मै । कुत एतत्तत्राह । सकारणं महदादि कार्यमकारणं प्रकृतिस्तदुभयालिंगमुपाधिं नियम्यतया ईयुषे प्राप्तवते । अत उभयनियंतुः स्वस्मात्सकाशात्तदुभयवश्याय जीवाय विभक्तमृत्यव इत्यर्थः । नियंतृनियम्यत्वे कारणं वदन्नाह । हे स्वमायया संवृतेति । अतोऽलुतैश्वर्यत्वान्नियंत्रे तुभ्यं नमः । किंच रुद्धदृष्टये मायावित्वादेवान्येषां रुद्धा आवृता दृष्टिर्येन तस्मै । यद्वा स्वमायया स्वस्यासंवृता अन्येषां रुद्धा दृष्टिर्येन तस्मै इत्येकं पदम् ॥ ४८ ॥ स एवंभूतः परमेश्वरस्त्वं नोऽस्मान्स्वभृत्यान् शाध्यनुशिक्षय ॥ ४९ ॥ ५० ॥ स्वस्मिन्नादरमत्यधिकं ब्राह्मणेषु मंदमिवालक्ष्य लोकसंग्रहपरो भगवान्मत्तोऽपि ब्राह्मणेषु श्रद्धातिरेकं कुर्वित्येवं तमनुशास्ति ब्रह्मन्निति सप्तभिः । मया हृदिस्थितेन ॥५१॥ देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठा इत्याह । देवा इति । ते शनैः पुनंति एते तु सद्यः । किंच देवादीनि यत्पुनंति तदप्यर्हत्तमानामीक्षया ॥ ५२ ॥ मम कला परिकलनमुपास्तिस्तया युतः ॥ ५३ ॥ किंच ब्राह्मणाराधनमेव मम

एतदिति । तत्राक्षेपे । यत उपाधिनियंता त्वमतो हेतोः । उभयनियंतुः कार्यकारणप्रेरकस्य । तदुभयवश्याय कार्यकारणाधीन । इत्यर्थ इति–नियंतैव नियम्यानां सुखदुःखविभाजको भवतीति भावः । तेने नियंत्र इति लब्धम् । जीवानां नियम्यत्वे असंवृतानाच्छादितदृष्टे । यतोऽसंवृतज्ञानोसि अतो हेतोः । अन्येषां लुप्तदृष्टित्वमाह–किंचेति । स्वमाययेति पदस्य रुद्धदृष्टय इत्यनेन पृथक्पृथक्संबंधे गौरवं मत्वाऽऽह–यद्वेति ॥ ४८ ॥ एवंभूतो वशीकृतमायः ॥ ४९ ॥ तदुक्तं श्रुतदेवोक्तम् । तं श्रुतदेवम् ॥ ५० ॥ इदानीं ब्राह्मणमहत्त्वमाह–स्वस्मिन्नित्यादिना । हृदिस्थेन सर्वदा मां हृदये वहंतो विचरंतीति तेनैते मत्तोऽधिका एते इति ध्येयम्। तदुक्त मभियुक्तैः–“पृथ्वी शेषधृता स शंभुमुकुटे कैलासवासोऽप्यसौ कैलासोपि दशाननेन तुलितो बद्धोप्यसौ वालिना । वाली राघवविष्णुना युधि जितो विष्णुः सतां मानसे तस्माद्विष्णुपरायणाद्गुरुतरो नान्योस्ति लोकत्रये ॥” इति ॥ ५१ ॥ तदेवाह–देवादिभ्योपीति । ते देवादयः । शनैश्चिरकालसेवनेन । एते तु ब्राह्मणास्तु । सद्यो दर्शनसमकालमेव । देवादिषु यच्छोधनसामर्थ्यं तदपि ब्राह्मणप्रसादकृतमेवेत्याह–किंचेति । अर्हतः कुल वृद्धाद्या अर्हत्तरा देवा अर्हत्तमा ब्राह्मणा ममापि पूज्यत्वात् । ‘स मत्परोऽहं द्विजदेवदेवः’ इति पंचमे ऋषभदेवोक्तेः । ‘सोऽहं भवद्भ्य उपलब्धसुतीर्थकीर्तिः’ इति सनकादीन्प्रति वैकुंठनाथोक्तेः । तेषामीक्षया प्रसादेन । “तीर्थयात्रा जपो दानं व्रतमिष्टादिकञ्च यत् । विप्राराधनतः सांगमन्यथा विगुणं शिव॥” इति तंत्रशास्त्रात् ॥ ५२ ॥ प्राणिनां जीवमात्राणाम् । जन्मना ब्राह्मणदेहावाप्तिलक्षणेन । शंखक्षीरन्यायेन कैमुत्यमाह–तपआदिना, विप्रश्रैष्ठ्यं तु वक्तुं न शक्यमिति भावः ॥ ५३ ॥ मम प्रियं स्वरूपं च ब्राह्मणा एवेत्याह–किंचेति । विप्राराधनस्य प्रेष्ठत्वे हेतुमाह–इत्यर्थ इति–मत्संबंधिज्ञानं विप्रद्वारैव भवति ते एव शास्त्रद्वारा मां प्रकाशयंति,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुष्प्रज्ञा अविदित्वैवमवजानंत्यसूयवः ॥ गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ॥५५॥ चराचरमिदं विश्वं भावा ये चास्य हेतवः ॥ मद्रूपाणीति चेतं स्याधत्ते विप्रो मदीक्षया॥५६॥तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयाऽर्चय ॥ एवं चेदर्चितोऽस्म्यद्धा नान्यथा भूरिभूतिभिः ॥५७॥ श्रीशुक उवाच ॥ स इत्थं प्रभुणाऽऽदिष्टः सहकृष्णान्द्विजोत्तमान् ॥ आराध्यैकात्मभावेन मैथिलश्चाप सद्गतिम् ॥ ५८ ॥ एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान् ॥ उषित्वाऽऽदिश्य सन्मार्गं पुनर्द्वारवतीमगात् ॥ ५९ ॥ इति श्रीमद्भाग० म० दशमस्कन्धोत्त० श्रुतदेवानुग्रहोनाम षडशीतितमोऽध्यायः ॥ ८६ ॥

प्रेष्ठमित्याह । नेति । हेतुमाह । सर्ववेदमयो विप्र इति । प्रमाणाधीनत्वात्प्रमेयस्य वेदमयो विप्रो देवमयादस्माद्रूपात्प्रेष्ठ इत्यर्थः ॥ ५४ ॥ असूयवो दोषदृष्टयः । इज्यदृष्टयः पूज्यबुद्धयः ॥ ५५ ॥ अस्य विश्वस्य हेतवो भावा महदादयः । मदीक्षया ममैव सर्वत्रेक्षया ॥ ५६ ॥ ५७ ॥ ५८ ॥ सतां वेदानां त्रिकांडविषयाणां प्रवृत्तिप्रकारमादिश्य ॥ ५९ ॥ इति श्रीमद्भागवते म० दशमस्कंधोत्तरार्धे श्री० टीकायां षडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥

प्रकाश्यापेक्षया प्रकाशक एव महानिति भावः । सर्ववेदमयत्वाद्विप्राः प्रकाशका वेदस्यैव देवप्रकाशकत्वान्मम देवत्वात् अहं प्रकाश्य इति ॥ ५४ ॥ मंदमतय इत्थं न जानंतीत्याह–दुष्प्रज्ञा इति । एवं मन्निश्चयम् । असूयवः पाषंडविभिन्नमतयः । मां मद्रूपम् । गुरुं वर्णाश्रमपूज्यम् । आत्मानं सर्वव्यापि ब्रह्मरूपम् । "ब्रह्म ब्राह्मण आत्मना" इति श्रुतेः । मामित्यनेन पुनरुक्तिर्न शंक्या सगुणाभिप्रायत्वात्तस्या इति । आदिना जलाग्न्यादिग्रहः ॥ ५५ ॥ विप्रो धत्त इत्यनेनाऽभेदविचारो ब्राह्मणस्यैव न त्वितरेषामिति सूचितम् । प्रव्रज्याधिकारिकत्वात्तद्विचारस्येति ॥ ५६ ॥ फलितमाह–तस्मादिति । यतो विप्रार्चनमेव मदर्चनं तस्माद्धेतोः । एतानुपस्थितान् । मयि या श्रद्धाऽऽदराधिक्यं तया मच्छ्रद्धया । एवं चेत् मच्छ्रद्धया विप्रोर्चिते सति । अद्धा साक्षात् । अन्यथाऽनरप्रीत्या विप्रानर्चनेऽहं भूरिभूतिभिर्बहुविधसामग्रीभिरप्यर्चितो न भवामीत्यर्थः । यतो मे मुख्या मूर्तिर्ब्राह्मण एव "ब्रह्म ब्राह्मण आत्मना" इति श्रुतेः । "सदाऽहं विप्ररूपेण विचरामि महीतले" इति स्मृतेश्च । किंच–"अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि" इति पाद्मोक्तेश्च । अत एव स्वयमेव भगवतोक्तम्–"न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजम्" इति ॥ ५७ ॥ इत्थमुक्तरीत्या । स श्रुतदेवः । सहस्य सादेशो बाहुलकत्वात् । एकात्मभावेनाभेदभावेन विप्राश्श्रीकृष्णस्वरूपाः श्रीकृष्णश्च विप्रस्वरूप इत्येवंरूपेण । मैथिलो बहुलाश्वश्च । तद्गतिं श्रीकृष्णसारूप्यम् ॥ ५८ ॥ एवमुक्तविधया । भक्तानां भक्तिर्विद्यते यस्य स तथा । भक्तेषु प्रसादलक्षणस्नेहवान् । त्रिकांडविषयाणां कर्मोपास्तिज्ञानरूपात्रिकांडविषयाणाम् ॥ ५९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे षडशीतितमोऽध्यायः ॥ ८६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परीक्षिदुवाच ॥ ब्रह्मन्ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ॥ कथं चरंति श्रुतयः साक्षात्सदसतः परे ॥ १ ॥

सप्ताशीतितमे नारायणनारदवादतः॥ वेदैः स्तुतिर्गुणालंबा निर्गुणावधि वर्ण्यते॥ १ ॥ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि॥ यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे॥ २॥ संप्रदायविशुद्ध्यर्थं स्वीयनिर्बंधयंत्रितः॥ श्रुतिस्तुतिमितव्याख्यां करिष्यामि यथामति॥ ३॥ श्रीमद्भागवतं पूर्वैः सारतः सन्निषेवितम्॥ मया तु तदुपस्पृष्टमुच्छिष्टमुपचीयते ॥ ४॥ पूर्वाध्यायांते, "एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान्। उषित्वाऽऽदिश्य सन्मार्गं पुनर्द्वारवतीमगात्" इत्यत्र सन्मार्गं सतां स्वतःप्रमाणभूतानामप्रामाण्यकारणरहितानां वेदानां मार्गं ब्रह्मपरत्वमुपदिश्य भगवानगादित्युक्तं तत्र वेदानां ब्रह्मपरत्वमघटमानं मन्वानः पृच्छति। ब्रह्मन्निति । तत्र तावन्मुख्या लक्षणा गुणभेदेन त्रिधा शब्दप्रवृत्तिः । मुख्या

भावार्थदीपिकाप्रकाशः वंशीधरी—नारायणनारदयोर्वादतः संवादेन। गुणान्कल्याणगुणानालंबते विषयीकरोति या सा गुणालंबा। निर्गुणोऽवधिर्यस्मिंस्तद्यथा भवति तथा वर्ण्यते (१)। स्वेष्टदेवं स्मरति—वागीशेति। वागीशा सरस्वती। संवित्सम्यग्ज्ञानम् (२)। संप्रदायो भक्तिरसाविघातः। स्वीयनिर्बंधोऽहं सर्वं भागवतं व्याख्यास्य इति हठस्तेन यंत्रितो बद्धः (३)। पूर्वैर्हनुमच्छंकरचित्सुखादिभिः। सारतः सारेण याथातथ्येन। संनिषेवितं व्याख्यातम्। तदुपस्पृष्टं तैरुपस्पृष्टम्। त्यक्तं सुगमत्वान्न व्याख्यातम्। उच्छिष्टमवशिष्टमुपचीयत एकत्र संपाद्यते (४)। अप्रामाण्ये कारणरहितानामिति—पुरुषवाक्यानामप्रामाण्यं भ्रम-प्रमाद-विप्रलिप्सा-करणापाटवरूपदोषचतुष्टयेन पुरुषबुद्धेर्दूषितत्वात्। भ्रमः संशयः, प्रमादोऽनवधानता, विप्रलिप्सा लोभाधिक्यम्, करणापाटवं रोगादिनेंद्रियाणां स्वविषयग्रहणे सामर्थ्याभावः। वेदस्य त्वपौरुषेयं वाक्यं वेद इति लक्षितत्वेन पौरुषेयत्वाभावादप्रामाण्ये कारणाभाव इत्यर्थः। वेदः प्रमाणमित्यत्र किं प्रमाणमित्यत आह—स्वतः प्रमाणभूतानामिति। वेदे वेद एव प्रमाणमन्यथाऽनवस्था स्यादिति भावः। तत्र भगवदुपदेशवाक्ये "वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया इमे" इति श्रीमुखोक्तिरूपे ब्रह्मपरत्वं केवलं ब्रह्मैव प्रतिपादयति। वेदो नान्यदित्येवंभूतत्वमघटमानमसंभवम्। किञ्चात्रान्यदपि प्रश्नबीजं ध्येयम्—पूर्वाध्याये "सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम्" इति स्वस्य स्वयमेव भगवता वेदप्रमेयत्वमुक्तम्। ब्रह्मरातेनापि तस्मिँच्छ्रीकृष्णाख्ये भगवति परब्रह्मत्वं तत्रतत्रावधारितम्। तद्यथा—'गूढं परं ब्रह्म मनुष्यलिंगम्' इति। 'परं ब्रह्म नराकृति' इति। 'तदमितं ब्रह्माद्वयं शिष्यते' इति। 'तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयम्' इति। "यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम्" इत्यादिषु। अतस्तत्रैव वेदप्रमेयत्वं संदिह्य पृच्छति—ब्रह्मन्निति। 'ब्रह्मविद्ब्रह्मैव' इति श्रुतेस्त्वमपि साक्षाद्ब्रह्मैव, वेदरूप एवेत्युत्तरकथने सामर्थ्यद्योतनं संबुद्ध्यभिप्रायः। तत्र तावत्सकलवेदादिशास्त्रे मुख्याद्यष्टशब्दवृत्तयः सन्ति। संज्ञा शब्दः, संज्ञी चार्थसंकेतः शक्तिः। सा च अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छातो भवति।

---

१ तत्त्वबुभुत्सोः कथा वादः, स चाष्टनिग्रहस्थानानामधिकरणम्। तानि च न्यूनाधिकापसिद्धान्तहेत्वाभासपञ्चकञ्चेत्यष्टौ। यथा—स्वसिद्धान्तसिद्धान्तितानामवयवानां मध्ये यत्किञ्चिदेकस्यावचनं तन्न्यूनम, यथा—हेत्ववयवाश्चत्वारो द्वौ वेति। हेतूदाहरणाधिक्यमधिकम्, यथा—नित्यः शब्दः श्रावणत्वाच्छब्दत्वाद्वेति। एकसिद्धान्तमाश्रित्य कथाप्रवृत्तौ तद्विरुद्धसिद्धान्तमालंब्योत्तरदानमपसिद्धान्तः, यथा—इदं द्रव्यं जगदेकप्रकृतिविकारत्वात्, एकमृत्पिण्डप्रकृतिकशरावविदिति। सांख्यमतमालम्ब्य प्रयुंक्ते का प्रकृतिः को विकार इति प्रतिवादिना पृष्टे यस्मिन्नवस्थिते धर्मिणि एकधर्मनिवृत्तौ धर्मान्तरमुत्पद्यते सा प्रकृतिः। यो धर्मो निवर्तते उत्पद्यते च स विकार इत्युत्तरमपसिद्धान्तः। तन्मतेऽसत उत्पत्तिर्नास्ति, किन्त्वाविर्भावतिरोभावमात्रं कार्यकारणयोरभेदः। कारणरूपेण सूक्ष्मतयाऽवस्थानं तिरोभावः, कार्यरूपेण स्थूलतयाऽवस्थानमाविर्भाव इति। सत्कार्यवादिमते, प्रकृतिविकारयोर्भेदाभावादनुमानमिद न सिद्ध्यति। असतः कार्यतावादे त्वपसिद्धान्त इति। हेत्वाभासेषु बहुवक्तव्यत्वात्तेऽत्र नोक्तास्तज्ज्ञैस्तेऽनुसंधेयाः। तिष्ठत्वेतत्। वादत इति तृतीयार्थे तसिः। तथा च वादेन संवादेनेत्युक्तम्। वादशब्दस्य संवादवाचकत्वं तूपसर्गस्य त्रिधा गतित्वाद्वाद एव संवाद इति। इह समुपसर्गो धातुस्थमेव संवादार्थं द्योतयति। "धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते। विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा॥" इति वाक्यात् वादसंवादपदयोरेकार्थतैव। अत एव तत्त्वस्य याथात्म्यस्य बुभुत्सोर्बोद्धुमिच्छोः कथाऽन्योऽन्यप्रश्नोत्तरादिकथनं वादः संवाद इत्यर्थः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽपि रूढियोगभेदेन द्विधा । रूढिश्च स्वरूपेण जात्या गुणेन वा निर्देशार्हे वस्तुनि संज्ञासंज्ञिसंकेतेन प्रवर्तते । यथा डित्थो गौः शुक्ल इति । लक्षणा च तेनैव संकेतेनाभिहितार्थसंबंधिनि । यथा गंगायां घोष इति । गौणी चाभिहितार्थलक्षितगुणयुक्ते तत्सदृशे । यथा सिंहो देवदत्त इति । यथाऽऽहुः । "अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता" इति । योगवृत्तिस्तु एतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन । यथा पंकजमौपगवः पाचक इत्यादि । तत्र तावद्ब्रह्मणि रूढिवृत्तिर्न संभवतीत्याह । साक्षात्कथं चरंतीति । तत्र हेतुः । अनिर्देश्ये । अनिर्देश्यत्वेऽपि हेतुं वदन्गुणवृत्तिं निराकरोति । निर्गुणे गुणवृत्तय इति । गुणैर्वर्तमानाअपि निर्गुणे कथं चरंतीत्यर्थः । निर्गुणत्वे च हेतुं वदन् लक्षणां योगं च निराकरोति । सदसतः पर इति । कार्यकारणाभ्यां परस्मिन्नसंगे केनचिदपि संबंधाभावान्न लक्षणायोगवृत्ती संभवत इत्यर्थः । एवं पदार्थत्वायोगादपदार्थस्य च वा वाक्यार्थत्वायोगान्न श्रुतिगोचरत्वं ब्रह्मण इत्यभिप्रायः ॥ १ ॥

शक्तेस्तु शब्दशब्दार्थोभयनिष्ठत्वात् संज्ञासंज्ञिसंकेतत्वम् । ततश्च स्वरूपेणारूढस्योदाहरणम्—डित्थ इति । छिन्नवृक्षस्य मूलभागो डित्थ इत्युच्यते । डित्थशब्दः संज्ञा, तद्वाच्यं छिन्नवृक्षस्य मूलपिण्डः संज्ञी, संकेतेनायमेव डित्थ इति रूढया प्रतयिते । समुदायशक्तिः रूढिः । न त्वत्रावयवकल्पनयार्थप्रतीतिरिति । एवं डवित्थोऽपि ज्ञेयः । वल्मीककीटसमुद्धृतबृहन्मृत्पिण्डो डवित्थः । सुपद्मव्याकरणे तु—"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः" इत्युक्तम्, कलापटीकायां तु—"श्यामरूपो युवा विद्वान्सुस्वरः प्रियदर्शनः । सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते ॥" इत्युक्तम्, तन्मते त्विमौ शब्दौ जातिरूढयुदाहरणत्वेन ज्ञेयौ । जातिरूढस्योदाहरणं गौरिति । जातेर्लक्षणञ्च—नित्यमेकमनेकसमवेतं सामान्यम् । तच्च परापरपरापरभेदेन त्रिधा । सकलसामान्यव्यापकं परं सत्ता, सामान्यांतरव्यापकमपरं, परिमाणभेदेन भिन्नेषु बाल्यकौमारादियुक्तशरीरेषु देवदत्तत्वादि । कस्याचित्सामान्यस्य व्यापकं कस्यचित्सामान्यस्य व्याप्यं चान्यं द्रव्यत्वादि । यथा—पृथिवीत्वादि घटत्वादेर्व्यापकं सत्ताव्याप्यञ्च तदिति । तथा च—गोशब्दो हि गोत्वजातिविशिष्टपिण्डस्य वाचकः । सास्नावत्त्वं गोत्वम्, एवं महिषादिरपि । गुणरूढस्योदाहरणम्—शुक्ल इति । शुक्लशब्दस्तु शुक्लगुणवाचकः, तथा रक्तपीतादिः । रूढिवृत्तिमुक्त्वा लक्षणावृत्तिमाह—लक्षणा चेति । तेनैव संज्ञासंज्ञिसंकेतेनाभिहितो यो गंगादिरूढोऽर्थः प्रवाहस्तत्संबंधिनि तीरादौ । मुख्यार्थबाधे गौणार्थकल्पनं लक्षणा । तथा च—गंगायां घोषो वसतीत्युक्ते गंगाशब्देन लक्षणया तीरमुच्यते, गंगातीरे घोषो वसतीत्यर्थः । 'घोष आभीरपल्ली स्यात्' इत्यमरः । तथा वटेषु गावो दुह्यन्त इत्यादि ज्ञेयम् । गुणवृत्तिमाह—गौणी चेति । अभिहितो वाच्योऽर्थः । सिंहादिशब्दस्य सिंहादिरूपः पिण्डः । तत्र लक्षिता ये विक्रमप्रसह्यकारित्वक्रूरत्वादिरूपा गुणास्तद्युक्ते देवदत्ते तत्सदृशे सिंहसदृशे तद्गुणयोगात् । अयं देवदत्तः सिंहः सिंहगुणयोगादिति । एवमयं देवोऽयं राक्षस इत्यादि ज्ञेयम् । लक्षणागौणीवृत्त्योर्लक्षणं वृत्तिकारभट्टवाक्येनाह—यथाहुरिति । अभिधेयेनाविना भूतमभिधेयाविनाभूतं तेन प्रवृत्तिरभिधेयाविनाभूतप्रवृत्तिर्लक्षणोच्यते । अभिधेयेन मुख्यावृत्त्या गंगादिशब्दवाच्येनार्थेन गंगादिस्वरूपेणाविनाभूतेन सार्धं शक्यसंबंधिनि तीरादौ गंगादिपदस्य या प्रवृत्तिर्व्यापारः सा लक्षणेत्यर्थः । यद्वा—अभिधेयस्य वाच्यार्थस्य योऽविनाभूततीरादौ संबंधस्तस्य प्रवृत्तिर्लक्षणेति पूर्वार्द्धार्थः । परार्धार्थमाह—लक्ष्यमाणगुणैः अभिधेये सिंहादिरूपे ये गुणा विक्रमप्रसह्यकारित्वादयो लक्ष्यमाणास्तैर्योगात्संबंधात्सादृश्याद्देवदत्तादौ या सिंहादिशब्दस्य प्रवृत्तिस्तस्या गौणतेष्टेति । रूढिवृत्तिमुक्त्वा योगरूढिमाह—योगवृत्तिस्त्विति । रूढिर्लक्षणा गौणी चेति वृत्तित्रयम् । एतत्त्रिविधया वृत्त्या प्रतिपादितयोः पदपदार्थयोः प्रकृतिप्रत्यययोगेन योगवृत्तिर्भवतीत्यर्थः । उदाहरणं पंकजादि योगरूढेरुदाहरणम् । पंकजमिति । पंकशब्दोपपदजनधातुः प्रकृतिः, प्रत्ययः जनेर्डः पंकाज्जायत इति पंकज इति योगरूढिवृत्तिः प्रतिपादितपदार्थत्वम् । अवयवसमुदायोभयशक्तिकमेकजातीयार्थप्रतिपादकं योगरूढम् । यथा—पंकजपदमवयवशक्त्या पंकजत्वेन रूपेण कमलमेव बोधयति समुदायशक्त्या च कमलत्वेन रूपेणात एव समुदायशक्तिरावश्यकी । पंकजमानयेत्युक्तौ शैवालादेरप्रतीतेः । किन्तु पद्म एव रूढित्वम् । तथा मंडप इत्युक्ते बहिर्मंदिरे रूढिः न तु मंडं पिबतीति यः स मंडपः । मण्ड ओदनाद्यग्रनिःसृतो रसः 'सर्वरसाग्रे मंडमस्त्रियाम्' इत्यमरः 'मंडपोऽस्त्री जनाश्रयः' इति च । औपगवः उप समीपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गावो यस्य स उपगुस्तस्यापत्यमौपगवः । उपगुशब्दस्तावल्लक्षणया प्रवृत्तो बहुव्रीहेस्तथैव प्रतीतेः । बहुव्रीहौ तार्किकैर्लक्षणैव स्वीकृता । यथा—चित्रगुरित्यत्र गोपदं चित्रगोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकम्, तथात्राप्युपगुरिह गोपदं समीपगोस्वामिलक्षकमुपपदं तात्पर्यग्राहकमिति ध्येयम् । उपगोः प्रकृतेः तद्धितप्रत्ययोऽण् स च गोत्रापत्ये । ‘ गोत्रं च चरणैः सह ’ इति भाष्योक्तजातिलक्षणस्य तत्र सत्त्वाज्जातिरूढिवृत्तिप्रतिपादितपदार्थत्वम् । यद्वा—उपगुपदं जातौ लाक्षणिकम् । पाचक इत्यत्र प्रकृतिः पचधातुः कृत्प्रत्ययो ण्वुल् पचतीति पाचकः स च पचनादन्यत्रापि पाचक इत्युच्यते पाचकत्वगुणयोगात् । गुणवृत्तिप्रतिपादितपदार्थत्वम् आदिपदादन्यदपि यथायथमूह्यम् । एवञ्चाष्टधा शब्दप्रवृत्तिरुक्ता । सा यथा—मुख्याया रूढेरुदाहरणं स्वरूपेण डित्थः जात्या गौर्गुणेन शुक्ल इति । लक्षणाया उदाहरणं गंगायां घोष इति । गौण्या उदाहरणं सिंहो देवदत्त इति । मुख्याया योगवृत्तेरुदाहरणं रूढया पंकजम्, जातिलक्षणया औपगवः । गुणेन पाचक इति । अथैतासां वृत्तीनां ब्रह्मण्यभावमाह—तत्रेति । तत्र तासां मध्ये तावदधुना चरन्ति गतार्था भवन्तीत्यर्थः । तत्र रूढ्यभावे गुणैर्मायामयैर्वर्तमानास्तत्प्रतिपादनपराः । इत्यर्थ इति—शब्दप्रवृत्तिर्मायामये भवति न तु मायाऽतीत इति भावः । इत्यर्थ इति—लक्षणायोगवृत्त्योरुभयोरपि शक्यसंबंधरूपप्रकृतिप्रत्ययसंबंधरूपसंगापरपर्याययोगसंबंधशब्दघटितत्वादसंगे तयोः प्रवृत्तिर्न संपद्यत इति भावः । तथैवाह—केनचिदिति । लक्षणायाः शक्यसंबंधविषयत्वात् । योगवृत्तेरपि प्रकृतिप्रत्ययार्थयोगविषयत्वान्न ते वृत्ती असंगे ब्रह्मणि प्रवर्तेते इति भावः । एवमुक्तविधया पदार्थत्वायोगाद्ब्रह्म न कस्यापि पदस्यार्थोऽतोऽपदार्थं ब्रह्म तस्यापदार्थस्य ब्रह्मणो वाक्यार्थत्वं सुतरां न भवति । पदार्थज्ञाने पदज्ञानमिव वाक्यार्थज्ञाने पदार्थज्ञानस्यैव कारणत्वात् । श्रुतिगोचरत्वं श्रुतिप्रतिपाद्यत्वम् । इत्यभिप्राय इति—श्रुतिर्हि पदकदंबवाक्यरूपास्ति ब्रह्मणश्च तदर्थत्वायोगान्न तद्विषयतेति तात्पर्यम् ॥ * ॥ **श्रीधरानुयायिनी** । पूर्वाध्यायान्ते वेदानां ब्रह्मपरत्वमुपदिश्य भगवानगादित्युक्तं, तच्चाघटमानं मत्वा राजा पृच्छति—हे ब्रह्मन्ब्रह्मणि श्रुतयः कथं चरन्तीति । ब्रह्मणो रूपादिरहितत्वेन तत्र प्रमाणान्तराप्रसक्त्या श्रुत्यैव तत्सिद्धिं मन्यसे इति ब्रह्मविदर्थकेन ब्रह्मन्निति संबोधनेन द्योत्यते तन्न संगच्छते । तथाहि—शक्तिर्लक्षणा गौणी चेति त्रिधा शब्दवृत्तिः । शक्तिरपि रूढियोगभेदेन द्विधा । तत्र प्रथमं रूढिं निराकरोति—साक्षादिति । ब्रह्मणि साक्षात्कथं चरन्तीत्यन्वयः । तत्र हेतुमाह—अनिर्देश्य इति । निर्देष्टुमनर्ह इत्यर्थः । रूढिर्हि स्वरूपेण, जात्या, गुणेन वा निर्देशार्ह एव । वस्तुनि संज्ञासंज्ञिसंकेतेन प्रवर्तते, यथा—डित्थो गौः शुक्ल इति । अत्र क्रमेण छिन्नवृक्षमूलभागात्मकस्वरूपेण, गोत्वजात्या, श्वेतरूपेण च डित्थादिशब्दप्रवृत्तिः । ब्रह्मणि चाकारजातिगुणाभावान्न रूढया वेदानां प्रवृत्तिः । अनिर्देश्येऽपि हेतुं वदन् गौणीं निराकरोति—निर्गुण इति । निर्धर्मक इत्यर्थः । यथाश्रुतार्थे तु निर्गुणानामपि गुणकर्मादीनां जात्यादिना निर्देशप्रसिद्ध्या निर्गुणत्वस्यानिर्देश्यत्वसाधकत्वानुपपत्तिः स्यात् । वाच्यार्थवृत्तिगुणसदृशगुणात्मकधर्माधार एव गौणी वृत्तिः । यथा—सिंहो देवदत्त इत्यत्र वाच्यार्थे सिंहे ये क्रौर्यादयो गुणास्तत्सदृशक्रौर्याधारो देवदत्तः । ब्रह्मणि च कस्यापि धर्मस्यासत्त्वान्न गौणीत्याशयः । निर्गुणत्वेऽपि हेतुं वदन् लक्षणां योगञ्च निराकरोति—सदसतः पर इति । कार्यकारणाभ्यां परस्मिन्नसंग इत्यर्थः । शक्यसंबंधो लक्षणा, यथा—गंगायां घोष इति । अत्र गंगापदशक्यस्य प्रवाहस्य संबंधिनि तीरे गंगापदस्य लक्षणा । ब्रह्मणश्च केनापि संबंधाभावान्न लक्षणा । अत एव न योगेऽपि रूढिलक्षणागौणीनां मध्ये कयाप्येकया वृत्त्या प्रतिपादितयोः पदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन योगवृत्तिः । यथा—पंकजमित्यत्र पदार्थयोर्योगेन योगः रूढया पंकेति जेतिपदाभ्यां प्रतिपादितयोः कर्दमजनिपदार्थयोः कर्दमापादानकजनिकर्तृत्वरूपेण योगात् पंकजपदं कमले यौगिकम् । यथा वा—औपगवः पाचक इत्यादौ प्रकृतिप्रत्ययार्थयोर्योगेन योगः । औपगवे उप समीपे गावो यस्य तस्योपगोरपत्यमित्यपत्यार्थेऽण् प्रत्ययस्तद्धितः । एवं चात्रोपगुसंबंध्यपत्यत्वरूपेण प्रकृतिप्रत्ययार्थयोर्योगेन यौगिकत्वम् । एवं पाचके पचिधातोः कृत्प्रत्ययो ण्वुल् । तथा चात्र पाककर्तृकत्वरूपेण प्रकृतिप्रत्ययार्थयोर्योगेन यौगिकत्वम्, तच्चासंगत्वादेव ब्रह्मणि न सङ्गच्छते । ननु वैदिकशब्दत्वाद्धर्मादिसंबंधरहितेऽपि शक्त्यतिशयेन श्रुतीनां प्रवृत्तिः स्यादित्याशंक्याह—गुणवृत्तय इति । गुणेषु धर्मेषु निमित्तभूतेषु सत्स्वेव वृत्तिः शक्तिलक्षणाद्या यासां ता गुणवृत्तय इत्यर्थः । लोके वेदे च शब्दार्थयोरैक्येन लौकिकशब्दवदेव वैदिकशब्दस्यापि धर्मसंबंधिन्येव वस्तुनि प्रवृत्तिरुचिता । लोके वेदे च शब्दार्थयोर्भेदे तु शक्तिग्रहासंभवेन वेदो मूक एव स्यादित्युभयथाऽपि श्रुतिभिर्निर्धर्मकब्रह्मणः प्रतिपादनमशक्यमेव । तथा च केन प्रमाणेन ब्रह्मणः सिद्धिरिति राज्ञः प्रश्नः ॥ * ॥ **तोषिणी**—ॐ सन्मार्गमादिश्येत्युक्तम् आदेशो च ‘तत्तु समन्वयात्’ इति न्यायेन वेदसमन्वयापेक्षा लभ्यते समन्वयपराकाष्ठा च । “ वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमव्ययम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ” इत्युक्तलक्षणे परतत्त्व एव । तच्च कैश्चिद्वस्तुतो निर्विशेषमेव । कैश्चित्तु सृष्ट्यादिशक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदेव मन्यमानैर्ब्रह्मेति शब्द्यते । स्वाभाविकशतयानंदविशेषमेव मन्यमानैः श्रीभागवतैः परमात्मेति, भगवानिति च । तत्रान्तर्यामित्वमात्रस्वशक्त्या भगवानेव परमात्मेति । शुद्धपरिपूर्णैश्वर्याद्यात्मिकया परमधामादौ स्वयं विलसन्त्या वशीकृतमायाशक्तकया परमशक्त्या तु भगवानिति । अद्वयत्वं च शक्तिमात्रं विना शक्तेरभावात्, तां च विना तत्कार्याभावात्, वस्त्वन्तरात्यन्ताभावाचेति । एवमेव खलु " एकमेवाद्वितीयं ब्रह्म" " नेह नानास्ति किञ्चन " इत्यनयोर्निषेध्यांस्तदवधिभूतांश्चार्थान्स्वयमाह मंत्रवर्णः–" न तस्य कार्यं करणञ्च विद्यते । न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते । स्वाभाविकी ज्ञानबलक्रिया च " इति । तदेवं सति मध्यमं मतं नात्याक्षिपन्सर्वशक्तित्रिशिष्टे परब्रह्मणि श्रीभगवति वेदस्य प्रवृत्तिं संमतां निर्विशेषे ब्रह्मण्यसंमतां मन्यमानः श्रीविष्णुरातत्वेन तद्गुणाद्यपलापनिंदामसहिष्णुः श्रीमन्मुनीन्द्राभ्युपगमेन स्वमतं पुपुक्षुः केवलतन्मात्रवेदार्थिन आक्षिपति–ब्रह्मन्निति । अथवा पूर्वोक्तं " सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् " इत्येवाक्षेपबीजं मंतव्यम् । यतस्तत्र व्याख्यातम् वेदानां भगवत्येव तात्पर्यमंगीकृत्य पूर्वरीत्या । परमतमाक्षिपति–ब्रह्मन्निति । तैर्व्याख्यातम् । तत्र गुणेनैतावद्रूढिवृत्तिर्न संभवतीति निर्गुणे गुणवृत्तय इत्युक्तम् । गुणाः सत्त्वादयस्तत्कार्यभूताः शुक्लपीतादयश्च तदतीत इत्यर्थः । निर्गुणत्वादेव जातिनिर्देश्यत्वमपि निरस्तं गुणभेदत्वाज्जातेः, तथा स्वरूपानिर्देश्यत्वं निर्गुणत्वेनैव दृष्टश्रुतविलक्षणस्वरूपत्वात् । अत आनंदादिपदैश्च न तन्निर्दिश्यते प्रसिद्धचित्तवृत्तिविशेषादावेव तेषां संकेतितत्वादिति तेषां मतम् । अतोऽर्थापत्तिसहितानि वृत्त्यंतराणि च निर्गुणत्वादिभिर्निरस्तान्येव । स्वरूपभूतगुणास्तु तेषां मते न सन्तीति निर्विशेषब्रह्मणि तेषां संमतिर्न संभवत्येव । श्रीभागवतानां तु श्रीभगवतो विलक्षणस्वरूपत्वेऽपि विलक्षणस्वरूपपरापौरुषेयतत्तच्छब्दवाच्यतया मायिकगुणासंबद्धत्वेऽपि मायातीतानंतगुणतया सदसद्भ्यां परत्वेऽपि तेन तयोरनुस्यूततया सर्वा अपि वृत्तयः श्रीभगवति "मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् " इति ' वेदैश्च सर्वैरहमेव वेद्यः ' इति श्रीभगवत्संमत्या यथायथं संभवत्येव । " यतो वाचो निवर्तन्ते " इत्यादिकं त्वानंत्यादिपरमेव । केवलानाप्तौ यत इत्यवधित्वनिर्देशो न घटेत कर्मणा ज्ञानेन वाप्तमेवावधिः क्रियते न त्वनाप्तमिति । अन्यथा यच्छब्देनापि निर्देष्टुं न शक्येत । अप्राप्येति तु प्रकर्षेणैवाप्तिं निषेधयति न त्वंशेनापि । आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति मंत्रशेषे तु दर्शयिष्यत एव ज्ञानेन प्राप्तिः । एतेन यद्वाचानभ्युदितमित्याद्यपि व्याख्यातम् । अत्राप्यभिशब्दोऽस्तीति अवचनेनैव प्रोवाचेत्यपि यतो वाच इत्यभिप्रायमेव अनंततया वक्तुमशक्यत्वेनैव तस्याप्रवचनमिति । ततश्च " शास्त्रयोनित्वात् " इति श्रुतेश्च शब्दमूलत्वादिति ' तर्काप्रतिष्ठानात्' इति च न्यायात् "तं त्वौपनिषदं पुरुषं पृच्छामि " इति " नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रष्ठ " इत्यादिश्रुतेश्च शास्त्रैकप्रमाणत्वादस्त्येव सर्ववेदसंगतिः । न च–प्रमाणान्तरप्रयुक्तदोषगंधोऽपीति विवेचनीयम् । तस्मात्तैः संमते निर्विशेषे ब्रह्मणि कथं चरन्ति नैव चरन्तीत्यर्थः ॥ * ॥ **विश्वनाथी**–पूर्वाध्यायान्ते सन्मार्गमादिश्य भगवानगादित्युक्तम्, तत्र सतां भक्तानां मार्गो हि भक्तियोगो भगवद्विषयकोऽवगम्यत एव । एवं सतां ज्ञानिनां ज्ञानयोगोऽपि ब्रह्मविषयक एव ज्ञातव्यः । किंतु– ब्रह्मणः श्रुतिप्रतिपादितत्वमेव तावन्न बुद्ध्यते, इत्यतः पृच्छति–ब्रह्मन्निति । ब्रह्मणि श्रुतयः कथं साक्षादव्यवधानेनाभिधया वृत्त्या चरन्ति । यतोऽनिर्देश्ये निर्देष्टुमशक्ये जातिद्रव्यगुणक्रियासु मध्ये ब्रह्म किमपि न संभवतीति तस्यानिर्देश्यत्वम् । तथाहि–निर्गुणे गुणेभ्यः परे, सदसतः परे सत्पृथिव्यादि द्रव्यमसदनिष्पन्नस्वभावं वस्तु क्रिया ताभ्यां परस्मिन् तथा । तत्तदाश्रितत्वाज्जातेरपि परस्मिन् । यद्वा–सद्द्रव्यमसद्द्रव्यं जातिः क्रिया च ततः परस्मिन् । गुणवृत्तयः गुणैः प्रवृत्तिनिमित्तैर्जात्यादिभिर्वर्तमानाः श्रुतयो निर्जात्यादिके ब्रह्मणि कथं चरन्ति ॥ १ ॥

नीलकंठी–ॐ श्रीगणेशाय नमः ॥ ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ॥ ॥ श्रीमद्गोपालमानम्य श्रीधरोदितया दिशा । वेदस्तुतिं विवृणुते नीलकंठो यथामति ॥ १ ॥ सर्वस्मिन्वाङ्मये सारं श्रीमद्भागवतं मतम् । तत्राप्येकादशस्कन्धस्तस्य सूत्रं श्रुतिस्तुतिः ॥ २ ॥ पञ्चमान्ते यथा गीताषष्ठाध्यायार्थसूत्रणम् । स्पर्शान्कृत्वा बहिर्बाह्यानित्यादिश्लोकयुग्मतः ॥ ३ ॥ दशमान्ते तथैवैकादशस्कंधार्थसूत्रणम् । श्रीमद्भागवते चक्रे वेदस्तुत्या महामुनिः ॥ ४ ॥ अत्र नर्कुटकैरष्टाविंशत्या यदुदीरितम् । तदेवान्यत्र विज्ञेयं यन्नेहास्ति न तत्क्वचित् ॥ ५ ॥ तत्र तु प्रथमे श्लोके कृत्स्नशास्त्रार्थसूत्रणम् । अध्यारोपापवादाभ्यां द्वितीये ब्रह्मलक्षणम् ॥ ६ ॥ कर्मन्यासो विविदिषोर्विदुषश्च तृतीयके । चतुर्थे बंधमूलञ्च सनाशोपायमीर्यते ॥ ७ ॥ समष्ट्युपास्तेर्ब्रह्मातिशेषत्वं पञ्चमे स्थितम् । मूर्तिध्यानपथेनैव षष्ठे ब्रह्मातिरीर्यते ॥ ८ ॥ स्वकर्मणार्चयेद्विष्णुं मुमुक्षुरिति सप्तमे । अवतारकथां विष्णोः शृणुयादिति चाष्टमे ॥ ९ ॥ अभक्तनिन्दा नवमे दशमे तु विमुक्तये । कामाद्द्वेषाद्भयाद्वापि ध्याता मूर्तिर्हरेर्भवेत् ॥ १० ॥ अतर्क्यमांध्यजं चित्तमात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ बुद्धींद्रियमनःप्राणाञ्जनानामसृजत्प्रभुः ॥ मात्राऽर्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥ २ ॥

उत्तरमाह । बुद्धींद्रियेति । बुद्ध्यादीनुपाधीन् जनानामनुशायिनां जीवानां मात्रार्थं प्रभुरीश्वरोऽसृजत् । मीयंत इति मात्रा विषयास्तदर्थम् । भवार्थं भवो जन्मलक्षणं कर्म । तत्प्रभृति कर्मकरणार्थमित्यर्थः । आत्मने लोकांतरगामिने।आत्मनस्तत्तल्लोकभोगायेत्यर्थः।अकल्पनाय कल्पनानिवृत्तये मुक्तय इत्यर्थः । अर्थधर्मकाममोक्षार्थमिति क्रमेण पद चतुष्टयस्यार्थः । जनानामिति वदन् जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति । प्रभुरितीश्वरस्योपाधिवश्यताभावेन नित्यमुक्ततां दर्शयति । अयमभिप्रायः । सगुणमेव गुणैरनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनियंतारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं सच्चिदानंदं भगवंतं श्रुतयः प्रतिपादयंति । "यः सर्वज्ञः

जगदिति त्रिभिः । ज्ञानेनाधिकृतः शुद्धब्रह्मोपास्त्यापि मुक्तये॥११॥इंद्रियैस्तर्प्यते यः स सर्वशक्तिभृदित्यपि । उक्तं पञ्चदशे सोऽयं सर्वस्रष्टेति षोडशे॥१२॥यं बहुत्वं प्रधानस्य हेतुत्वञ्च द्वयोर्हतम् । ततो द्वयोर्मुमुक्षूणां शरणं शिवसद्गुरू ॥ १३ ॥ वैराग्यमेकविंशे च द्वाविंशेऽभ्यास ईर्यते । श्रुतार्थमननं द्वाभ्यां ततः परमुदीरितम् ॥ १४ ॥ बंधमोक्षव्यवस्था च पञ्चविंशे समीरिता । निःशेषकामविलयः षड्विंशे मोक्षलक्षणम् ॥ १५ ॥ जीवन्मुक्तिः सप्तविंशेऽष्टाविंशे तु गिरां गतिः । अतान्निरसनेनैव निर्गुणात्मनि वर्णिता ॥ १६ ॥ वेदान्तक्षीरधेः सारं श्रुतिगीतिसुधां बुधाः । पायंपायं प्रतृप्यन्तु श्रीमद्व्यासप्रसादतः ॥ १७ ॥ श्रुतिशिरोम्बुनिधिर्गहनः क्व वा जडतरा मम बुद्धिरियं क्व वा । तदपि तं गुरुलक्ष्मणपादुकातरणिसंश्रयणेन तितीर्षति ॥ १८ ॥ पूर्वाध्यायान्ते आदिश्य सन्मार्गमिति ब्रह्मप्राप्तिमार्गमुपदिश्येत्युक्तम्, तदेतद्वाचामगोचरस्य ब्रह्मण उपदेश्यत्वमाक्षिपन्परीक्षिदुवाच–ब्रह्मन्नित्यादि । अनिर्देश्यत्वे निर्गुणत्वं हेतुः । निर्गुणत्वे सदसतः परत्वं हेतुः । सदसती हि कार्यकारणे त्रिगुणमयमायारूपे । तत्रैव खलु शब्दानां वृत्तिः संभवति, न तु मायातीते ब्रह्मणि ॥ १ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–अतन्निरसनेन ब्रह्मणि श्रुतयश्चरन्ति । तन्निषेधार्थं बुद्ध्यादीनुपाधीन् जनानामसृजदित्यध्यारोपापवादाभ्यां 'निष्प्रपञ्चं प्रपञ्च्यते' इत्युक्तेर्विनाध्यारोपमपवादो न संपनीपद्यत इत्युत्तरमाह–बुद्ध्यादीन् । इहादिनेन्द्रियादिग्रहः । उपाधीयते विषयतया स्वीक्रियते इत्युपाधिः । अनुशायिनां ब्रह्मणा सह प्रलये ईशं प्रविश्य शयित्वा जातानां मीयन्ते प्रमितिविषयीक्रियन्ते इति मात्राः । इत्यर्थ इति–जन्मना कर्म लक्ष्यते, इन्द्रियैर्विना कर्मानिष्पत्तेरिति भावः । इत्यर्थ इति–मनो विना "यतोयतो धावति दैवचोदितं मनो विकारात्मकमाप पञ्चसु" इत्याद्युक्तेर्लोकांतरभोगो न संभवतीति भावः । कल्पना माया । इत्यर्थ इति–प्राणं विना मोक्षोऽपि न संभवति । वक्ष्यति च "आहारार्थं समीहेत युक्तं तत्प्राणधारणम् । तत्त्वं विमृश्यते येन यत एतद्विमुच्यते ॥" इति श्रीकृष्णः । प्रभुरिति–कर्तुमकर्तुमन्यथा कर्तुं समर्थत्वादेव नित्यमुक्तः । अत्र लक्षणापरैक्यपरनिषेधपरोपासनापरसृष्टिपराणां पञ्चविधानां श्रुतीनां सगुणालंबनं निर्गुणे पर्यवसानमिति दर्शयितुमाह–अयमभिप्राय इति । यद्यप्युक्तविधानां वृत्तीनां मध्ये उक्तरीत्या कापि वृत्तिर्ब्रह्मणि न संभवति, तथापि सर्वश्रुतीनां परंपरादिना ब्रह्मपरत्वं घटत एवेत्याह–सगुणमेवेति । सगुणं समस्तगुणाश्रयं तैर्गुणैरनभिभूतमवशीकृतं पूर्वोक्तमर्थं क्रमेणाह–यः सर्वज्ञ इत्यादिश्रुतिभिः । "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्ववित् । यस्य ज्ञानमयं तपः । सर्वस्य वशी सर्वस्येशानः । यः पृथिव्यां तिष्ठन्पृथिव्या आंतरः । सोऽकामयत बहु स्याम् । स ऐक्षत तत्तेजोऽसृजत । सत्यं ज्ञानमनंतं ब्रह्म " इत्याद्याः । तथाभूतेश्वरतां तावत्संसारिणो जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्यानि बोधयंति । तत्र च तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते । तच्च प्रकारांतरेणाघटमानं ब्रह्मणि पर्यवसानं गमयति । तथाहि । न तावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यम् । यथोक्तम् । "आमिक्षां देवतायुक्तां वदत्येवैष

तपः " सर्वज्ञतोदाहरणम् । सामान्येन सर्वं जानातीति सर्वज्ञः, विशेषेण सर्वं वेत्तीति सर्ववित् । यस्य ज्ञानमयं ज्ञानविकार एव, सर्वज्ञतालक्षणं तपः, अनायासलक्षणमित्यर्थः । सर्वस्य वशीति—सर्वस्य ब्रह्मेंद्रादेर्वशी सर्वो ह्यस्य वशे वर्तते "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठतः" इति श्रुतेः । भारते च—"ससुरासुरगन्धर्वसयक्षोरगराक्षसम् । जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम् ॥ " इत्यनेन सर्वशक्तिता दर्शिता । न केवलं वशी, सर्वस्येशान ईशिता च । अनेन सर्वेश्वरता " यः पृथिव्यां तिष्ठन् पृथिव्या अंतरः पृथिवी यस्य शरीरं पृथिवी यं न वेद यः पृथिवीमंतरो यमयत्येष त आत्मांतर्याम्यमृतः " इति । अस्यार्थः—यः पृथिव्यां तिष्ठन् पृथिवीतोंतरो भवति, अन्तरोऽभ्यंतरो भूत्वा पृथिवीं यमयति नियमयति, एष ते तवांतर्यामी अमृतः सदैकरसः, इत्यनेन सर्वनियंतृत्वं सर्वोपास्यत्वं सर्वकर्मफलदातृत्वञ्चोक्तम् । श्रीभगवद्गीतासु च—" योयो यांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति । तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हितान् ॥ " इति । अनेनांतर्यामिणः श्रीकृष्णस्यैव तत्तद्देवतारूपेणोपास्यत्वं सर्वकर्मफलदातृत्वञ्चोक्तम् । सकलकल्याणगुणनिलयस्योदाहरणमाह—" सोऽकामयत बहु स्यां स ऐक्षत तत्तेजोऽसृजत " इति । अर्थश्च—यत आकाशः संभूतः सोऽकामयत कामितवान् कथं बहु स्यां बहुतरं यथा भवति तथा स्यां भवेयम्, स आत्मा सर्वज्ञस्वभावत्वात् एक ऐक्षत अद्राक्षीत् । ईक्षतेति पाठेऽडागमाभावश्छांदसः । स तत्प्रत्यक्षसिद्धं तेजोऽसृजत सृष्टवान् । ईश्वरस्य कामनादीनां लोकोपकारार्थत्वेन तादृशकल्याणगुणाभिव्यक्तेः । सच्चिदानंदत्वोदाहरणमाह—" सत्यं ज्ञानमनन्तं ब्रह्म " आदिना " विज्ञानमानंदं ब्रह्म " इति ग्रहः । अर्थस्तु—यद्रूपेण यन्निश्चितं तद्रूपं यतो न व्यभिचरति तत्सत्यं ब्रह्म । असत्यनिवृत्त्यर्थं विशेषणम् । असत्यतानिवृत्त्या विकारनिवृत्तिः, तन्निवृत्त्या च कारणता प्राप्ता । निर्विकारस्त्वावस्थो मृदादिरेव कारणं भवति न तु विकारो घटादिरिति । कारणस्य च कारकवस्तुत्वात् " कर्ता कर्म च करणं संप्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट् ॥ " इत्युक्तषट्कारकान्यतमरूपत्वात् मृदादिवदचिद्रूपता प्राप्ता तन्निवृत्तये ज्ञानं ब्रह्मेति । ज्ञानं ज्ञप्तिरवबोधस्तद्रूपमित्यर्थः । लौकिकज्ञानस्यान्तवत्त्वादिदर्शनात्प्राप्तं ज्ञानरूपस्यापि ब्रह्मणोन्तवत्त्वं तन्निवृत्त्यर्थमनंतमिति विशेषणम् । एतेन सच्चिदानंदरूपत्वं स्पष्टमेवोक्तम् । एवं लक्षणापराणां श्रुतीनां सगुणपरत्वं प्रदर्श्य, स्वरूपपराणामपि स्वरूपपरत्वञ्च प्रदर्श्य, ऐक्यपरत्वश्रुतीनामपि सगुणप्रतिपादनमुखेन निर्गुणे पर्यवसानं दर्शयन्ति स्वामिचरणाः—तथाभूतेत्यादिना । निर्गुणे पर्यवसानमित्यन्तेन तथाभूतेश्वरतां पृथिव्यादिनियमनरूपामीश्वरताम् । तावदधुना । तन्निवृत्तये संसारनिवृत्तये । इत्यादिवाक्यानीत्यत्रादिना " प्रज्ञानं ब्रह्म " " अहं ब्रह्मास्मि " "अयमात्मा ब्रह्म" इत्यादीनि गृह्यन्ते । तद्ब्रह्म त्वमसि भवसि नान्यः संसारीत्यर्थः । तत्र च महावाक्ये तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते । अपर्यायपदानामेकार्थवृत्तित्वं सामानाधिकरण्यम् । पर्यायत्वञ्च स्वरूपभिन्नत्वे सत्येकार्थबोधकत्वं घटकलशवत् । तच्च सामानाधिकरण्यम् । तथाहीति । " आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः " इत्यमरः । केचित्तु " पय एव घनीभूतमामिक्षेत्यभिधीयते " इत्याहुः । शृते स्थाल्यां कृतपाके उष्णे दुग्धे या विकृतिः सामिक्षेत्यर्थः । विश्वेदेवस्येयमामिक्षा वैश्वदेवी विश्वेदेवस्य संबंधिनी आमिक्षा भवति न तु विश्वेदेवत्वं प्राप्नोति अत आमिक्षाविश्वेदेवपदयोः सामानाधिकरण्यं नानर्थयोरिति । यथोक्तं भट्टैः—' आमिक्षां देवतायुक्तां वदत्येव ' इत्यादि । आमिक्षां देवतायुक्तां विश्वदेवसंबद्धाम् एष तद्धितोऽण् प्रत्ययो वदति कथम् आमिक्षापदस्य सान्निध्यात्सन्निहितत्वात् तस्यैव तद्धितप्रत्ययान्तस्यैव वैश्वदेवीपदस्यैव विषये आमिक्षापदस्यार्पणं तद्धितप्रत्ययेन क्रियत इति । यद्वा—ननु वैश्वदेव्यामिक्षापदयोर्नैकार्थाभिधायकत्वं वैश्वदेवीपदेनामिक्षाभिधाने, आमिक्षापदप्रयोगो नोचितः, ' उक्तार्थानामप्रयोगः ' इति न्यायात् । किञ्च—विश्वेदेवस्तुतिपराया ऋगादेरपि वैश्वदेवीपदार्थत्वसंभवात्कथमामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंद्धितः ॥ आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम्" इति । कुतः । भिन्नार्थत्वात् । न चाजहत्स्वार्थया निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमितिवत् । यथोक्तम् । "स्वबुद्धया रज्यते येन विशेष्यं तद्विशेषणम्" इत्यादि । कुतः । विरुद्धार्थत्वेन तदयोगात् । न च जहत्स्वार्थत्वेन संबंधिलक्षणया कुसुमितद्रुमा गंगेतिवत् । कुतः । एकार्थत्वस्य विवक्षितत्वात् । अतो जहदजहत्स्वार्थलक्षणया सोऽयं देवदत्त इतिवद्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थेन सामानाधिकरण्येन निर्गुणे पर्यवसानम् ।

क्षामात्रार्थकत्वमिति चेत्तत्राह—यथोक्तमिति । एष देवतार्थस्तद्धितोऽण्प्रत्ययो विश्वेदेवदेवतायुक्तामामिक्षां वदत्येव न तूक्तदूषणभिया न वदतीति शंकनीयम् । तर्ह्यामिक्षापदसान्निध्यवैयर्थ्यं तत्राह—आमिक्षापदसान्निध्यादिति । वैश्वदेवीपदेन विश्वेदेवताकः कश्चन द्रव्यविशेष इति सामान्येनामिक्षापदोक्तावपि कोऽसौ द्रव्यविशेष इत्यपेक्षायामामिक्षापदसान्निध्यादामिक्षारूप इत्यवगम्यते । वृक्षमात्रं पश्येत्यादौ सामान्यविशेषशब्देषु तथा दर्शनात् । तथा चामिक्षापदसान्निध्येन तस्यैव तद्धितस्यैव सामान्यतो वाचकस्य विशेषतो विषयार्पणं भवतीत्यर्थः । अनेन प्रकारेणैकार्थत्वाभावं प्रदर्श्य कुत इति हेतुमाशंक्य समाधत्ते—भिन्नार्थत्वादिति । तद्धितप्रत्ययेन पदयोः सामानाधिकरण्यं बोधितं न त्वर्थयोरिति भिन्नार्थतैवोभयोः । पुनः प्रकारान्तरेण दर्शयति—न चेति । न जहत् अत्यजन् स्वार्थौ नीलपीतादिरूपौ यया साऽजहत्स्वार्था तया तृतीयांतान्यपदार्थबहुव्रीहिः । निर्गतं रूढं प्राकट्यं प्रादुर्भावो यस्याः सा निरूढा सा चासौ लक्षणा चेति निरूढलक्षणा तया । यद्वा—नितरां रूढा निरूढा पुनः पूर्ववत् । अनादिपरंपरागतया न सांप्रतं रचितेत्यर्थः । विशेष्यमुत्पलं विशेषणं नीलं नीलमुत्पलमितिवत् । सामानाधिकरण्यं न च कुतः विरुद्धार्थत्वेन तत्त्वंपदार्थयोः परोक्षत्वापरोक्षत्वरूपविरुद्धार्थत्वेन तस्या निरूढलक्षणाया अयोगात् अभावात् । यथोक्तं भट्टैः—"स्वरूपसत्त्वमात्रेण नहि किञ्चिद्विशेषणम् । स्वबुद्धया रज्यते येन विशेष्यं तद्विशेषणम् ॥" अर्थस्तु—स्वाकारेण विशेष्यमनवभास्य किञ्चिदपि वस्तु स्वरूपसत्त्वमात्रेण स्वस्थित्यैव विशेषणं नहि न भवति, किन्तु येन पीतनीलादिना स्वबुद्धया स्वाकारज्ञानेन विशेष्यमुत्पलादि रज्यते भ्रमरादिभ्यो व्यावर्त्यावभास्यते तद्विशेषणमित्यर्थः । अयं भावः—नीलगुणोत्पलद्रव्ययोर्गुणगुणिनोरविरुद्धस्वभावत्वेन विशेषणविशेष्यभावः कल्प्यतेऽनुपपत्तेरभावात् । भवेत्तत्र जहत्स्वार्था निरूढलक्षणा । अत्र तु परोक्षत्वापरोक्षत्वादिविरुद्धार्थत्वेन विशेषणविशेष्यभावकल्पनानुपपत्तौ न निरूढलक्षणेति । अनेन विशेषणविशेष्यभावप्रकारेण चैकार्थत्वं प्रदर्श्य पुनः प्रकारान्तरेण दर्शयति—न चेति । जहत्त्यजन्स्वार्थौ यया सा जहत्स्वार्था, सा चासौ लक्षणा चेति जहत्स्वार्थलक्षणा तया कुसुमिता जातपुष्पा द्रुमा यस्यां सा कुसुमितद्रुमा गंगा इतिवत्सामानाधिकरण्यं न च कुतस्तत्त्वंपदयोरेकार्थत्वस्य विवक्षितत्वात् वक्तुमिष्टत्वात् । संबंधिलक्षणायां तु संबंधिनः संबंधस्य च स्फुरणान्नैकार्थत्वमिति भावः । प्रकारान्तरेणाघटमानं प्रदर्श्य येन प्रकारेण ब्रह्मणि पर्यवसानं तद्दर्शयति—अत इति । यतः प्रकारान्तरेण सामानाधिकरण्यं न संभवति अतो हेतोः । जहती त्यजत्यजहती न त्यजती स्वार्थौ ये ते तत्त्वंपदे यस्यां सा जहदजहत्स्वार्था सा चासौ लक्षणा चेति तया । एकार्थत्वेन निर्गुणे पर्यवसानं सोऽयं देवदत्त इति । यथा कश्चित् काश्यां दृष्टं देवदत्तं पुनर्बहुकालेन काश्यामपश्यत् देशकालविप्रकर्षात्प्रत्यभिज्ञातुमसमर्थः पूर्वदृष्टादन्यं पश्चाद्दृष्टं मन्यते तमन्यः प्रत्यभिज्ञाकुशलः प्रतिबोधयति सोऽयं देवदत्त इति यस्त्वया पूर्वं दृष्टः । तत्र तच्छब्देन विप्रकृष्टदेशकालविशिष्टोऽर्थोऽभिधीयते इदंशब्देन च सन्निकृष्टदेशकालविशिष्टोऽर्थोऽभिधीयते । तदुक्तम्—"इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥" इति । विप्रकृष्टं विदूरम्, सन्निकृष्टं सन्निहितम्, न च सन्निकृष्टविप्रकृष्टयोरेकार्थत्वं संभवति तस्माद्विरोधिविशेषणसंबंधपरित्यागेन भागलक्षणया सोऽयमिति पदद्वयं देवदत्तस्य स्वरूपमखण्डितं प्रतिपादयति । तथा जीवोऽपि परमार्थतो ब्रह्मैव सन्नविद्यादोषवशादसंसारिणो ब्रह्मणोऽत्यन्तभिन्नं संसारिणमात्मानं मन्यते तं श्रुतिर्बोधयति तत्त्वमसीति । तत्र तत्पदेन प्रकृतं परोक्षं वस्तु कथ्यते । प्रकृतमेकमद्वितीयमीक्षितृ जगत्कारणं ब्रह्म त्वंपदेनाप्यविद्याद्युपाधिपरिच्छिन्नो नित्यापरोक्षः प्रत्यगात्माऽभिधीयते । न च परोक्षापरोक्षपरिच्छिन्नापरिच्छिन्नयोरेकत्वं संभवति । तस्मात्तत्पदार्थगतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्थूलादिवाक्यानां तु साक्षादुपाधिनिषेधेन तत्पदार्थशोधन उपयोगान्निर्गुण एव पर्यवसानम्।तथा चात्रैवोपक्रमे स्वसृष्टमिदमापीयेत्यादिना विशिष्टमालंबनं वक्ष्यति।अंते च "श्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः" इत्युपसंहरिष्यंति। उपासनादिवाक्यानां तु क्रियार्थप्रवृत्तसृष्ट्याद्यवलंबनेन ज्ञानसाधनविधानेन तत्परत्वमित्येषा दिक् ॥२॥

परोक्षाऽपरिच्छेदादिकं त्वंपदार्थगतमपरोक्षपरिच्छेदादिकं परित्यज्य जहदजहत्स्वार्थलक्षणया तत्त्वंपदद्वयं सच्चिदेकरसमखण्डमात्मतत्त्वं प्रतिपादयति । असिपदमपि प्रकृत्यर्थस्य सतः प्रत्ययार्थस्य च प्रतीचः संवद्वनेनानुवददाभ्यां संबध्यते । इति निषेधपरश्रुतीनां तत्परत्वमाह–अस्थूलेत्यादि । अस्थूलमत एव ह्रस्वमदीर्घमित्यादिवाक्यानामुपाधिनिषेधेन स्थूलत्वाद्युपाधिनिषेधेन साक्षाद्ब्रह्मणि पर्यवसानमित्यर्थः । सगुणगतानामिव स्थूलत्वाद्युपाधीनामनुवादाद्विशिष्टालंबनत्वमस्त्येव । विशिष्टं सगुणम् । उपासनापरसृष्टिपरश्रुतीनां तत्परत्वमाह–उपासनादिवाक्यानामत्रादिना सृष्ट्यादिग्रहः । क्रियार्थो यज्ञार्थस्तत्र प्रवृत्तानां सृष्ट्यादिवाक्यानां "यतो वा इमानि भूतानि जायन्ते " इत्यादिवाक्यानां यज्ञार्थैव प्रवृत्तिः । यतो वा एतानि जातानि तं यजतेति । एवं " स ऐक्षत " इति य ऐक्षत तं यजत इत्यादिष्वपि ध्येयम् । मुख्या प्रवृत्तिस्तु वैराग्यार्थेत्याह–आगमापायिसृष्टिस्थितिप्रलयनिरूपणेन ज्ञानसाधनवैराग्यविधानं तेन तद्द्वारा तत्परत्वं ब्रह्मणि पर्यवसानम् । उपासनावाक्यैस्तूदराद्युपाध्यालंबनसगुणब्रह्मनिरूपणेनांतःकरणशुद्धिलक्षणं यत् ज्ञानसाधनविधानं तेन ब्रह्मणि पर्यवसानम् । कर्मादिपराणां " यावज्जीवमग्निहोत्रं जुहुयात् " इत्यादिकानां श्रुतीनां विविदिषायां विनियोगादनुपादानं तमेतं वेदानुवचनेन यज्ञेनेत्यादिश्रुतेर्ज्ञानेच्छायामुपयोगादत्र न ग्रहणमिति ज्ञेयं सुधीभिरिति । अथान्यः सिद्धान्त उच्यते–निर्गुणे ब्रह्मणि सगुणाः श्रुतयः कथं चरन्तीतिप्रश्नस्य सिद्धान्तः स्वामिचरणैर्लक्षणापरादिश्रुतीनां यथा ब्रह्मणि तात्पर्यं तथा प्रदर्श्य कृत एव । तथाप्यत्राशंकास्ति सा यथा–" बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥" इति लोकानां प्रभुरसृजदिति कथमुक्तं श्रीशुकदेवेन प्रश्नोत्तराऽनुपयोगित्वादिवेति–अत्रोच्यतेऽस्माभिः–बुद्धिर्हि द्विविधा–व्यवसायात्मिकाऽव्यवसायात्मिका चेति, तत्राव्यवसायात्मिका हि त्रिवर्गसाधने सत्त्वादिगुणभेदेन त्रिधा भूत्वाऽनंता बुद्धयः स्युः । "व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन । बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ॥" इति । " सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् " इत्युक्तेः । अतो बुद्धेः सर्जनं वेदोक्तकर्मप्रतिपादितभोगानंतरं मोक्षार्थमिति । इन्द्रियादिसृष्टेः प्रयोजनं यथा–इन्द्रियं वागिन्द्रियं तस्य मुख्यत्वात् । मुख्यत्वं तु वचनपूर्वकत्वात् सर्वव्यवहारासिद्धेः । ततश्च वाङ्मनःप्राणाः ऋग्यजुःसामवेदा भवन्ति । तथा च श्रुतिः–" ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये " इति । अन्येऽपि लोकादयः सर्वे वागादय एव भवन्तीत्यत्र सम्यक्प्रबोधनार्थमन्याः श्रुतयोऽपि लिख्यंते–"त्रीण्यात्मने कुरुतेति । मनो वाचं प्राणं तान्यात्मने कुरुत एव एतन्मयोऽयमात्मा वाङ्मयो, मनोमयः, प्राणमयः । त्रयो लोका एत एव–वागेवायं लोको, मनोऽन्तरिक्षलोकः, प्राणोऽसौ लोकः । त्रयो वेदा एत एव–वागेव ऋग्वेदो, मनो यजुर्वेदः, प्राणः सामवेदः । देवाः पितरो मनुष्या एत एव–वागेव देवाः, मनः पितरः, प्राणो मनुष्याः । माता पिता प्रजैत एव–वाङ्माता, मनः पिता, प्राणः प्रजा । विज्ञातं विजिज्ञास्यमविज्ञातमेत एव "यत्किञ्चिद्विज्ञातं वाचस्तद्रूपं वाग्घि विज्ञाता वागेनं तद्भूत्वावति, यत्किञ्चिद्विजिज्ञास्यं मनसस्तद्रूपं मन एनं तद्भूत्वावति, यत्किञ्चिदविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावति, तस्यैव वाचः पृथिवी शरीरं ज्योतीरूपमग्निः यावत्येव वाक्तावती पृथिवी तावानयमग्निः, अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः, तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यः, अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रः, तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रः । त एते सर्वे समाः सर्वेऽनन्ताः स यो हैतानंतवत उपास्ते, अंतवंतं लोकं जयति । अथ यो हैताननंतानुपास्ते सोऽनंतलोकं जयति " इति । सुगमत्वान्न व्याख्यायते । इहामुत्रानंतलोकसुखभोगाय त्रीणि मनो वाचं प्राणम् एतान्यात्मने आत्मार्थं यूयं कुरुत यत एतन्मयोऽयमात्मा यतस्त्रयो वेदा एत एव असौ लोकः परलोकः यत्किञ्चिद्विज्ञातं विशेषेण ज्ञातं वस्तु तत्सर्वं वाचो रूपमतो वाक्तद्विज्ञातं वस्तु भूत्वा एनं पुरुषं संकटादावति रक्षति एवमुत्तरत्रापि ज्ञेयम् । ज्ञातुमिच्छा जिज्ञासा यत्र विजिज्ञासा वर्तते तद्विजिज्ञास्यम् । अंतवतो विनाशवतः । ह स्फुटम् । जयति प्राप्नोति स्पष्टमन्यत् । अकल्पनायेत्यस्यार्थः । एवं धर्मार्थकामान् वेदोक्तमार्गेण संसेव्य विमुक्तये विरज्य परमात्मानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञात्वा प्रव्रजेदित्यत्र श्रुतिः—" एतमेव विदित्वा मुनिर्भवति एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रज्ञानं कामयन्ते । किं प्रजया करिष्यामो येषां नोऽयमात्मा लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा सा लोकैषणा उभे ह्येषणे एव भवतः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्, बाल्यञ्च पाण्डित्यञ्च निर्विद्याथो मुनिरमौनं मौनं च निर्विद्याथो ब्राह्मणः स ब्राह्मणः येन स्यात्तेनेदृश एवातोऽन्यदार्तम्" इति सुगमम् । तस्मादिति ब्राह्मणः ब्राह्मणजातिगुणविशिष्टः बाल्येन[१] बालस्वभावेन तिष्ठासेत् स्थातुमिच्छेत् । तर्हि सदा बाल्येन तिष्ठेत् नेत्याह—बाल्यं च पांडित्यं च निर्विद्य त्यक्त्वा मुनिर्यतवाग्भवेत् । तर्हि किं सदा मौनेन तिष्ठेत् नेत्याह—मौनं चामौनं च हित्वा ब्राह्मणः ब्रह्मनिष्ठः स्यात् । स ब्राह्मणः केन स्यादित्यस्योत्तरम्—येनेति । येन ब्राह्मणः स्यात्तेनानिर्वचनीयेन ब्रह्मात्मलाभेन ईदृश एवोक्तप्रकारेण ब्राह्मण एव स्यात् तद्वस्तु अतः पांडित्यादेरसतः अन्यत्पृथगेवार्तं सत्यमिति । तस्मादेतेन बुद्धीन्द्रियेत्यादिश्लोकेन जनानां चतुर्वर्गं प्रतिपादयंत्यः श्रुतयो यथा ब्रह्मणि चरन्ति तथा प्रदर्श्य शुकदेवेन राद्धान्तः कृतः । नीलकण्ठस्तु तदेतन्मनो वाचं प्राणं तान्यात्मने कुरुतेत्येतामेव श्रुतिमनुसृत्य परिहरन् श्रीशुक उवाचेत्याह—तत्र श्रुतौ मनसा बुद्धिज्ञानेंद्रियाणि वाचा कर्मेंद्रियाणि च संगृह्य तेषां सप्राणानामात्मप्रकाशार्थत्वमुक्तम् । अत्र तु विषयविभागेनेति विशेषः । तत्र विषयपरिच्छेदो मात्रा तदर्थं प्रभुर्जनानां बुद्धिमसृजत् । परिच्छिद्यन्ते हि बुद्ध्याऽतींद्रिया अप्यपूर्वादयः । ब्रह्मणश्च स्वयं फलात्मनो घटादिवत्फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वमुपगम्यते "यन्मनसा न मनुते" "मनसैवानुद्रष्टव्यम्" इति श्रुतिद्वयाविरोधाय । एवं वाच्यत्वाऽनुपगमेऽपि लक्ष्यत्वमुपगम्यते । "यद्वाचानभ्युदितं" " तं त्वौपनिषदं पुरुषं पृच्छामि " इति श्रुतिद्वयाविरोधाय । तथा च तत्त्वमसीतिवाक्यकरणकधीवृत्तिव्याप्यत्वोपगमान्नात्यन्तमनिर्देश्यत्वं ब्रह्मणोऽस्तीत्यर्थः । न केवलं बुद्धिमयकर्तृगोचरो ब्रह्मापि तु इन्द्रियमनआख्यकरणगोचरोऽपीत्याह—भवार्थमिंद्रियाण्यसृजत्, आत्मार्थं मनोऽसृजत्, इति । भवो घटाद्यधिष्ठानभूतप्रकाशः, प्राप्त्यर्थस्य भवतेर्ज्ञानार्थत्वोपपत्तेः । यमपेक्ष्य घटादिज्ञानमनुभव इत्युच्यते तदर्थमिंद्रियाण्यसृजत् । इयमत्र प्रक्रिया—चित्प्रतिबिंबगर्भमन्तःकरणं वृत्त्याकारेण परिणम्य यदा चक्षुरादिद्वारा घटादिविषयं प्राप्नोति तदा घटाद्यवच्छिन्नब्रह्मचैतन्यावरके ज्ञानेऽभिभूते स्वतःप्रकाशमाने ब्रह्मणि घटाद्यध्यस्यते । तत्रांतःकरणावच्छिन्नं चैतन्यं प्रमाता वृत्त्यवच्छिन्नं चैतन्यं प्रमाणं घटाद्यवच्छिन्नं प्रमेयम् तत्र कुल्याद्वारा तटाककेदारसलिलयोरिव वृत्तिद्वारा प्रमातृप्रमेयचैतन्ययोरैक्यं प्रमाफलमात्मबोध इति गीयते । एवं सति शुक्तिरजताद्यध्यास इव घटादिदृश्यवाच्याध्यासेऽपि दृग्वागन्वयव्यतिरेकयोरधिष्ठानप्रकाश एवोपक्षयः । तदेतदाह—भवार्थमिन्द्रियाण्यसृजदिति । फलमपि ब्रह्मैव शास्त्रं च तदन्यनिवृत्त्यर्थमेवेत्युक्तं वृद्धैः।परागर्थप्रमेयेषु या फलत्वेन संमता संवित्सैवेह मेयोऽर्थो वेदांतोक्तिप्रमाणत इति सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते। इति च घटरजतादिकं त्वाविद्यकं प्रतिभासमात्रम्। एवं च रज्ज्वां स्रक्सर्पधियोरिव ब्रह्मणि रज्जुसर्पधियोर्जाग्रत्स्वप्नयोर्वा परस्परनिरोधकत्वमेव बाधस्तु तयोर्ब्रह्मज्ञानेनैवेति दृष्टिसमसमयां सृष्टिमुपयन्तो वेदान्तवृद्धाः।तेषां ब्रह्मणि पारमार्थिकी सत्ता दृश्ये प्रातिभासिकी इतरेषां तु सत्ताद्वैविध्यमभिमतं स्वप्नरज्जुभुजंगादौ प्रातिभासिकी सत्ता प्रबोधरज्ज्वादिज्ञानेन सद्यो बाध्या,जाग्रद्रज्ज्वादौ तु-व्यावहारिकी ब्रह्मज्ञानैकबाध्येति।तत्र पूर्वेषां ब्रह्मणि सर्वशब्दवाच्यतास्ति"नामानि सर्वाणि यमाविशन्ति" इति श्रुतेः । अवाच्यत्वश्रुतिस्तु लौकिकशब्दप्रवृत्तिनिमित्तजातिगुणाद्यभावपरा। परेषां तु 'शरीरं रथमेव तु' इत्यत्र यथाशरीरशब्देन शरीरोपादानमव्यक्तं लक्ष्यते तद्वद्घटाद्युपादानं ब्रह्म घटादिशब्दैरिति मतम् । एवं कर्तृकरणसृष्टेः ब्रह्मप्रकाशार्थमुक्त्वा क्रियाशक्तिमत्प्राणसृष्टेरपि तदुभयानुग्राहकतया तदर्थत्वमाह—कल्पनाय प्राणानसृजत्, कल्पनं बुद्ध्यादेः स्वस्वविषयकप्रकाशनसामर्थ्यसंपादनं तस्मै । यस्माद्ब्रह्मणः सर्वशब्दप्रत्ययगम्यत्वमस्ति तस्माद्भवत्येव सन्मार्गोपदेश इति ॥ * ॥ **श्रीधरानुयायिनी—**उत्तरमाह श्रीशुकदेवः—बुद्धीति । प्रभवत्यस्मादिति प्रभुर्मायोपहितेश्वरः, आकाशादि सृष्ट्वा तत्सात्त्विकाद्यंशेभ्यो जनानां प्रमातॄणामुपाधिभूतान् बुद्धीन्द्रियमनःप्राणानसृजत्, कारणाज्ञाने लीनान्पुनः प्रादुरभावयत् । तत्र प्रयोजनमाह—मात्रार्थमिति । " मात्रा परिच्छदे माने प्रवृत्तौ कर्णभूषणे " इत्यनुशासनान्मात्राप्रवृत्तिस्तदर्थं, 'कथं चरन्ति श्रुतयः ' इति प्रश्नाच्छ्रुतीनामिति शेषः । तथा च—श्रुतीनां ब्रह्मण्यपि प्रवृत्त्यर्थमित्यर्थः । बुद्ध्यादिकं विना वचनस्याप्रवृत्तेः । "मनसा वा अग्रे संकल्पयत्यथ वाचा व्याहरति " इति

---

१ पंडाऽध्ययनजातब्रह्मबुद्धिः तद्वान्पंडितस्तस्य कृत्यं पांडित्यं श्रवणं तन्निर्विद्य निश्चयेन लब्ध्वा बाल्येन ज्ञानबलाभावेन मननेन शुद्धान्तःकरणेन वा स्थातुमिच्छेत्। तद्द्वयं लब्ध्वाऽथ श्रवणमननानंतरं मुनिर्मननशीलो निदिध्यासनपरः स्यात्। अमौनं श्रवणमनने मौनं च निदिध्यासनं लब्ध्वा उक्तत्रयस्य ब्रह्मसाक्षात्कारहेतुत्वात्त्रयानंतरं ब्रह्मावगच्छतीति ब्राह्मणः साक्षात्कृतब्रह्मा भवतीत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतेः । अयं भावः–निर्धर्मके शुद्धे ब्रह्मणि श्रुतीनां प्रवृत्त्यसंभवेऽपि "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते" इत्युक्त्वा "यतो वा इमानि भूतानि जायन्ते" "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्याद्याः
श्रुतयः ईश्वरात्सृष्ट्याद्युक्त्वा ता एव तत्त्वमसीत्याद्या जीवेश्वरयोरभेदं बोधयन्त्यः सोऽयं देवदत्त इत्यादौ विरुद्धयोर्देशकालयोरिवात्रापि विरुद्धयोर्जीवेशोपाध्योस्त्यागं विना तयोरभेदानुपपत्त्या जदजहल्लक्षणया शुद्धे पर्यवस्यान्ति ।
अत एवान्ते अतन्नि रसनेन भवान्निधनाः' इत्युक्तम् । एवं च मायोपहितस्येश्वरस्य कारणोक्त्या तत्र धार्मिसमसत्ताकधर्मसंबंधसत्त्वेन श्रुतीनां शक्त्यैव प्रवृत्तिः । असंगे शुद्धब्रह्मणि च तादृशधर्माभावेन वास्तवतत्संबंधाभावेऽपि
दीपे रज्जुर्सर्पस्येवाध्यासिकसंबंधोऽस्त्येवेति लक्षणायाः संबंधापेक्षत्वेऽपि तया वेदानां कल्पितधर्माधारे ब्रह्मणि प्रवृत्तिर्निराबाधैव । प्रेमभक्तास्तु–ब्रह्मणः शब्दवाच्यत्वाभावादेवानिर्देश्यत्वामित्याशंकायां यदि परमेश्वरो बुद्धीन्द्रिया
दीनि नास्रक्ष्यत्तदा रूपशब्दादयोऽप्यनिर्देश्यादृश्यत्वेन ब्रह्मतुल्या एवाभविष्यन् यतोऽद्याप्याजन्मांधमूकस्य रूपशब्दौ ब्रह्मवददृश्यानिर्देश्यावेव भवतः अतोऽस्मदादिभ्यो येनाग्रहेण ग्राहकाणि बुद्धींद्रियादीनि दत्त्वा सर्वे
विषयाः सुखेन दर्शननिर्देशादियोग्याः कृतास्तेनैव परमेश्वरेण कृपया कस्मैचित्स्वभक्ताय ब्रह्मणोऽपि ग्राहकं किमप्यलौकिकं सामर्थ्यविशेषं दत्त्वाऽऽकारजातिगुणक्रियातिरिक्तं किमपि शब्दप्रवृत्तिनिमित्तं सृष्ट्वाऽसृष्ट्वैव वा
ब्रह्मापि शब्दनिर्देश्यं करिष्यत्येव, यतः प्रभुः अनिर्देश्यमपि निर्देश्यं कर्तुं समर्थः । अतः श्रुतयो ब्रह्मणि चरेयुरेवेत्युत्तरमाहुः । अन्यदपि प्रयोजनद्वयमाह–भवायेति । ऐहिकपारलौकिकभोगसुखायेत्यर्थः । बुद्ध्यादीन
विना यज्ञादिकर्मणां सुखभोगस्य चासंभवात् । तथात्मनेकल्पनाय चेति । आत्मानं जीवमुद्दिश्य या जन्ममरणादिकल्पना तदभावाय मोक्षार्थमितियावत् । बुद्ध्यादिकं विना मोक्षसाधनीभूतस्य शमदमादेर्योगज्ञानयोश्चा
संभवात् । यद्वा–आत्मने स्वस्मै स्वोपासनार्थं यद्बुद्ध्यादीनां कल्पनं विनियोगस्तस्मै श्रीकृष्णभजनार्थमिति यावत् । बुद्ध्यादीन्विना भक्त्यंगस्य श्रवणकीर्तनादेरप्यसंभवात् । भोगमोक्षयोर्वैलक्षण्यसूचनाय संध्यकरणम् ।
त्रयाणामपि प्राधान्यद्योतनाय चकारत्रयम् । अन्ये तु स्वप्रकाशस्य ब्रह्मणः सिद्धिः प्रमाणं नापेक्षते इत्याशयेनोत्तरमदत्त्वैव ब्रह्मणो ज्ञानार्थं तटस्थलक्षणमाहुः–बुद्धीत्यादि । तत्सृष्टौ प्रयोजनान्याह–मात्रार्थमैहिकविषय
भोगार्थं भवार्थं पारलौकिकविषयभोगार्थम् आत्मने कल्पनाय मोक्षार्थं चेत्याहुरित्यलम् ॥ * ॥ **तोषिणी**–अत्र ऋषिरुवाचेति तस्य सर्वज्ञत्वात्तत्र प्रावीण्यं दर्शितम् । श्रीशुक उवाचेति पाठे ब्रह्मवैवर्तोक्तां कथां सूचयति ।
यत्र श्रीकृष्णेनैव तस्य तन्नाम कृतं मायाबंधनतश्च मोचित इति । ततः श्रीविष्णुरातवत्कृपाविशेषलाभेन समवासनतया सोऽपि तदनुकूलमेवोवाचेत्यर्थः । तथाहि–बुद्धीन्द्रियेति । एतदुक्तं भवति येन स्वरूपलक्षणेन तटस्थ
लक्षणेन वा परमकारणं तत्त्वं निरूप्यते, तदुभयमपि श्रीभगवत्तत्त्वमेव पर्यवसाययति न तु निर्विशेषब्रह्मत्वम् । तत्रादौ "यः सर्वज्ञः सर्ववित्" इत्याद्यनुसारेण प्रभुरित्यन्यनैरपेक्ष्येणोक्तत्वात्स्वरूपेणैवेश्वरत्वम् । स
च सर्वव्यापनशीलज्ञानेच्छाक्रियाशक्तिमान् "सत्यं ज्ञानमनंतं ब्रह्म" इति "विज्ञानमानंदं ब्रह्म" इति "यल्लक्ष्यते तस्यैव खल्वेतस्यानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति "को ह्येवान्यात्कः प्राण्याद्यद्येष
आकाश आनंदो न स्यात्" इति "आनंदादेव खल्विमानि भूतानि जायन्ते, आनंदेन जातानि जीवन्ति, आनंदं प्रयन्त्यभिसंविशन्ति" इति "न तस्य कार्यं करणञ्च विद्यते" इत्यादिश्रुतयः स्वाभाविकशक्तिं
दर्शयन्ति । वक्ष्यति च 'त्वमकरणः स्वराडखिलशक्तिधरः' इति उपाधिसंबंधेन तत्तच्छक्तित्वे तूपाधेरेवेश्वरतापातात् । वक्ष्यन्ति श्रुतयः 'त्वमसि यदात्मना समवरुद्धसमस्तभगः' इति । अथ द्वितीये 'तत्तेजोऽसृजत'
इत्याद्यनुसारेण जनानां बुद्धीन्द्रियादीनसृजादिति सुतरामेव तादृशत्वं परिणामे वा विवर्ते वा योग्यस्यैवोपादानात्तन्निमित्ते च स्वीकारौचित्यादिति योग्यत्वमेव हि शक्तिरिति । अत्र तु कर्तृनिर्देशात्स्वातंत्र्यप्राप्तेः सुतराम् ।
अत एव सर्वबुद्ध्यादिस्रष्टृत्वेन तदीक्षणात्पूर्वं प्रकृतिक्षोभाभावेन च तस्य हि विलक्षणस्वाभाविकबुद्ध्यादिमत्त्वमवगतम् । "स ऐक्षत" इत्याद्यनुसारेण मात्रार्थश्चेत्यादिना विचारपूर्वकस्रष्टृत्वनिर्णयात्तु सुतरां तथैव । मात्रार्थ
मित्यादिना तत्तत्सर्वपुरुषार्थं परमाश्रयत्वञ्च । "सर्वकामः सर्वगंधः सर्वरस अयमात्मापहतपाप्मा" इत्यादिश्रुतेः न चारोपितमेव सर्वमिदं तन्मतेऽपि तावदविषये वस्तुन्यारोपासंभवात् । ब्रह्मणः कालत्रयेऽपि शुद्धत्वे
नान्यस्य त्वारोप्यकोटिप्रवेशेनाज्ञानस्य जडत्वेनारोपकासंभवे च तदसंभवात् । तस्मान्न जीवरूपस्य स्वस्य स्वाज्ञानेन तदारोपकत्वं वेदस्यारोपकत्वम्, चेत्तस्य स्वाज्ञानमयत्वेन स्वप्नप्रलापतुल्यतया सकर्तृकारोप एव तात्पर्यं
सत्यविशेषात् । वेदस्य स्वातंत्र्येऽप्यारोप्यस्य हेयतया "प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरम्" इति न्यायेन स्वयं तद्बाधयितुमयोग्यत्वात् स्वाभाविकीत्यादिश्रुतिविरोधात् श्रुतेश्च शब्दमूलत्वादिति न्यायविरोधाच्च
आरोपितत्वे सत्यनीश्वरवादप्रसंगाच्च स्थाणौ पुरुषाभिमानिवद्ब्रह्मणीश्वराभिमानिनः कालत्रयेऽप्यभावापत्तेः स्वाज्ञानकल्पितपुरुषकल्पितत्वज्ञानस्य स्वाज्ञानकल्पितत्व एव पर्यवसानात् मध्ये कल्पकान्तरमननवैयर्थ्याच्च ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संज्ञामूर्तिक्लृप्तिस्तु 'त्रिवृत्कुर्वत उपदेशात् ' इत्यादिन्यायवृंदासंमतं हि तत् । निंदितञ्च श्रीगीतासु " असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥" इति । असत्यं मिथ्याभूतं सत्त्वा सत्त्वाभ्यामनिर्वचनीयत्वेनाप्रतिष्ठम् निर्देशशून्यं स्वाज्ञानकल्पितत्वादनीश्वरम् । अपरस्परसंभूतमनाद्यज्ञानपरंपराजातम्– " अपरस्पराः क्रियासातत्ये " अतः कामहेतुकं मनःसंकल्पमात्रजातं स्वप्नवदित्यर्थः । अत्र 'प्रवृत्तिं च निवृत्तिं च ' इत्यादिना पूर्वं तेषां संस्कारदोष उक्तः । 'एतां दृष्टिमवष्टभ्य ' इत्यादिना गतिश्च निंदिष्यते इति ज्ञेयम् । तस्मात्सर्ववेदार्थः श्रीभगवानेव "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च " इति श्रीनृसिंहतापिन्यां " वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् " इति श्रीगीतासु " नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती" इति विष्णुपुराणे "मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् " इति एकादशे च । तथा " सदेव सौम्येदमग्र आसीत् " इति यस्य सतः सर्वकारणतया स्थितत्वम् , "आत्मा वा इदमग्र आसीत्" इति परमात्मस्वरूपत्वम् , " सत्यं ज्ञानमनंतं ब्रह्म " "विज्ञानमानंदं ब्रह्म" इति स्वरूपलक्षणम् , "निर्गुणं निरंजनम्" इति दोषराहित्यम् , "न तस्य कार्यं करणञ्च विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबलक्रिया च" इति तत्तदागंतुकशक्त्यादिराहित्यानुवादेनैव स्वाभाविकविलक्षणशक्त्यादियुक्तत्वम् । एवं निषेधांतरवाक्येनाऽपि तथात्वम् । "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् तमात्मानं ये तु पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्" इति तत्तद्विवरणम् । "तमीश्वराणां परमं महेश्वरं तं देवतानां परमं तु दैवतम् । सकारणाकारणयोस्तथा धियो न तस्य कश्चिज्जनिता न चाधिपः" इतीदशमाहात्म्येनैव सर्वकारणत्वम् । "आनंदं ब्रह्मणो रूपं वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसःपरस्तात् न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति विलक्षणस्वरूपमूर्तित्वं दर्शितम् । तस्य तु "एको ह वै नारायण आसीन्न ब्रह्मा नेशानः" इत्यस्माकमेवाभीष्टरूपत्वमिति । तथा "यस्य पृथिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरमेष सर्वभूतांतरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः" इति श्रुत्यंतरम् । सर्वशक्तियुक्तत्वेन प्रकाशकत्वात्पृथिव्यादी नामात्मत्वेन तमेवाह, पुराणेतिहासवचनानि च–"ह्लादिनी संधिनी संवित्त्वय्येका सर्वसंश्रये । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥ कलाकाष्ठानिमेषादिकालसूत्रस्य गोचरे । यस्य शक्तिर्न शुद्धस्य प्रसीदतु स मे हरिः ॥ ज्ञानश क्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥ कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः ॥" इति । विष्णुपुराणे–"न शक्यः स त्वया द्रष्टुमस्माभिर्वा बृहस्पते । यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ॥ " इति । मोक्षधर्मस्थनारायणीयोपाख्याने–" एतत्त्वया न विज्ञेयं रूपवानिति दृश्यते । इच्छन्मुहूर्तान्नश्येयमीशोऽहं जगतो गुरुः ॥ माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं नैवं त्वं ज्ञातुमर्हसि ॥ " इति च । तथैव तत्रैव श्रीश्वेतद्वीपवति वाक्ये, अस्यार्थः–त्वयैतन्न विज्ञेयं रूपवान् इति हेतोः अयं दृश्यते इति । यतो मद्दर्शने मदिच्छैव कारणमित्याह–इच्छन्निति । नश्येयमदर्शनमापद्येयम् तस्मादि न्द्रियागोचरत्वादलौकिकम्, स्वेच्छया स्वतः प्रकाशमानत्वात्स्वप्रकाशमेव मद्रूपमिति भावः । यथोक्तं नारायणाध्यात्म्ये–" नित्याव्यक्तोऽपि भगवानीक्षते निजशक्तितः । तामृते परमात्मानं कः पश्येतामितं प्रभुम् ॥ " इति । तदेवमपि मां सर्वभूतगुणैर्युक्तं यत्पश्यसि तद्युक्तत्वेन प्रत्येषि एषा माया मयैव सृष्टा मम माययैव तथा भातमित्यर्थः । तस्मात्त्वमेवं ज्ञातुं नार्हसीति । तथा ' कूटस्थोऽक्षर उच्यते ' ' अक्षरं परमं ब्रह्म ' " यस्मात्क्षरमती तोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ मां च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ " इति गीतासु, वक्ष्यन्ति च श्रुतयः–' श्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ' इति, ' त्वमसि यदेष्ववशेषमृतम् ' इति, ' त्वमसि यदात्मना समवरुद्धसमस्तभगः ' इति, " त्वमुत जहासि त्वामहिरिव त्वचमात्तभगो महसि महीयसेष्टगुणितेऽपरिमेयभगः " इति, ' भवत उपासतेंघ्रिमभवं भुवि विश्वसिताः ' इति, " न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः " इति, अत एव "स्त्रिय उरगेन्द्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः" इति, व्याख्यास्यते तु तत्रतत्रैव । तदेवं सर्ववेदार्थत्वेन सर्वविलक्षणत्वात्सर्वविलक्षणत्वेनैव सर्ववेदार्थत्वाद्वेदैकवेद्यत्वाद्वेदानां च स्वतःप्रमाणभूतत्वादन्यशब्दवाच्यसाधारण्येन दोषा न प्रसञ्जनीयाः । श्रुतयोऽपि तथा वक्ष्यन्ति–'त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः ' इति । तदेवं श्रीभगवत्येव संगतिस्तु संगता, तथापि ते तत्त्वमस्यादिलक्षणमैक्य वाक्यमस्थूलादिलक्षणनिषेधवाक्यं वा महावाक्यत्वेन मत्वा लक्षणयोपासनादिवाक्यानि तदनुगतत्वेन मत्वा स्वमते ब्रह्मणि यथाकथञ्चिदेव संगतिं कुर्वन्ति । तथाहि–तत्र तावत्तेषां मते मुख्या गौणी च शब्दवृत्तिर्ब्रह्मणि न संभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वत्येव लक्षणा च न संभवतीत्युक्तम्, अत एव तन्निषेधान्यथानुपपत्त्यावगतार्थापत्तिश्च न । यद्वि स्वरूपादिभिः साक्षान्निर्देश्यं स्यात्तत्रैव सा संभवतीति । तथापि तत्र तावज्जहदजहल्लक्षणया मन्यन्ते सा कथं घटेत । सा च खलु शब्दवृत्तिसामान्येन पूर्ववद्दोषावहैव । शुक्त्यादौ रूप्यारोपेण संबंधाभावेऽप्यारोप्येण संबंधो मंतव्य एव तेन विना कल्पनाऽनर्हत्वात् । आरोपस्याप्यारोप्यत्वेऽनवस्थाप्रसंगः । आरोपश्च वाङ्मनसागोचरे न संभवति । कथ ञ्चित्संभवे वा शब्दविषयत्व इवारोपविषयत्वेऽपि कथमनित्यत्वादिकं नापतेत् रज्जुशुक्त्यादिवदिति । यत्त्वौपाधिक आविद्यक एव वा जीवेश्वरविभाग इति मतं ब्रह्मस्तवव्याख्यायां मया परिहृतं तच्च तथैवात्र द्रष्टव्यम् । श्रीवैष्ण वानां भाष्यतदीयटीकयोः शतदूषण्यादिषु च तत्त्ववादिनां विष्णुतत्त्वप्रकाशिकादौ न्यायामृतादौ तथाऽस्माकं तद्दृष्टिलेशावष्टंभिश्रीभागवतसंदर्भे तट्टीकादौ च विशेषो द्रष्टव्यः । किञ्चाज्ञानस्यैव भेदमात्रमूलत्वे सति तत्त्वंपदा र्थयोरैक्यज्ञानमात्रेणैक्यं संगच्छते । जीवत्वं तु कस्याज्ञानेन कुत्र कल्पितमिति न बुध्यते ब्रह्मणश्चिन्मात्रस्याज्ञानाश्रयत्वविषयत्वयोरसंभवात् । ईश्वरत्वं तु जीवाज्ञानकल्पितं विद्यामयश्चेति नाप्यसौ तदाश्रयविषयः जीवाज्ञानेन जीवे जीवत्वं कल्पितमिति तु परस्पराश्रयेण स्वाश्रयाश्रयेण च दुष्टमित्यलमतिप्रसंगेन । तस्माद्यत्किचित्सामानाधिकरण्यमुच्यते तत्राप्येषा गतिः । लक्षणा हि तत्स्वरूपस्यान्यस्वरूपत्वं न बोधयति किं तु तच्छब्देनान्यद्वाच यति, यथा नीलमुत्पलमिति तटमिदं गंगेति । सोऽयं देवदत्त इत्यत्र स इति तत्कालविशिष्टत्वेन स्मर्यमाण इत्यर्थः, अयमिति एतत्कालविशिष्टत्वेन दृश्यमान इत्यर्थः । ततोऽनयोः सामानाधिकरण्ये स्यान्न विरोध इति लक्षणैव न स्यात्, ततस्तद्वदत्र न लक्षणा गौणी चोभयत्र विवक्षितगुणयोगं स्थापयत्येव यथा–पित्तलमिदं सुवर्णमिति । तस्मात् " यस्यात्मा शरीरम् " इति श्रुतेः सूर्यतन्मण्डलगंगातत्प्रवाहगोजातितद्व्यक्तिवन्नियताधि ष्ठानाधिष्ठात्रोः प्रसिद्ध एवाभेदप्रयोगः । यद्वा–" इमास्तिस्रो देवता अनेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि " इति महापुरुषवचनश्रुतौ अनेनेति जीवस्य भेदनिर्देशादंशत्वे प्राप्ते " ममैवांशो जीवलोके जीवभूतः सना तनः " इति " अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ " इति गीतासु मायाख्या परप्रकृत्यतीततयैव जीवस्य तादृशत्वे व्यक्ते सत्यभिन्नशुद्धशक्त्या जीवेश्वरभेदे सूर्य तद्रश्मिपरमाणुवृन्दवदविनाभावेन प्रकाशैकरूपेण चाभेद उपदिश्यते । प्रयोजनं तु मुमुक्षूणां परमेश्वरतादात्म्यानुभवात् स्वशुद्धतानुभवेन देहाद्यावेशनिरसनं, भक्तीच्छूनां तन्नित्यसंबंधज्ञानेन तद्भजनम् । वक्ष्यन्त्येव श्रुतयः– " स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदन्त्यखिलशक्तिधृतोंशकृतम् । इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेंऽघ्रिमभवं भुवि विश्वसिताः ॥ " इति । येन श्रीभगवति सर्वपुरुषार्थशिरोमणिपरमप्रे मास्पदत्वस्यानुभवश्च स्यात्, तदनुभवं हि दुरवगमेत्यादौ ' न परिलषन्ति केचिदपवर्गमपीश्वर ते ' इति तथैव श्रीब्रह्मस्तवान्ते राजप्रश्नानंतरं श्रीमुनींद्रेणोत्तरितं च । ननु तत्त्वमस्यादिवाक्यानां महावाक्यत्वमात्मैकत्वं प्रयोजनं वा युक्तं लक्षणामयवाक्यस्य प्रमाणान्तरसापेक्षत्वेन स्वतः प्रामाण्यहानेर्गौणत्वापातात्, तादृशमहावाक्यानुगतानां सर्वासामपि श्रुतीनां तत्प्रसंगात् । अथानेकेषां वाक्यानां महावाक्यत्वायोगात् तेषां प्रादेशिकत्वाच्च निंदितं च तासां सर्वासामेव गौणार्थत्वमात्रस्वीकरणम् । तथाहुः–एकस्यापि च शब्दस्य गौणत्वस्वीकृतौ सत्यां " महती जायते लज्जा यत्रयत्राखिला वराः" अत्र मुख्यार्थ इति च देवास्तन्मार्गानुवर्तिनं "कथं न जायते लज्जा वक्तुं शाब्द त्वमात्मनः" इति । न च जीवेशयोरैक्यज्ञानं सर्ववेदार्थस्तत्सिद्धनिर्विशेषं वा निराकृतत्वात् भगवत एव तदर्थत्वेन दर्शितत्वाच्च । तथाऽस्थूलमित्यादीनां नेतिनेतीत्यादीनां च निषेध वाक्यानां तन्मते यद्वाङ्मनसातीतनिर्विशेषवस्त्वधिकत्वं तदपि न संभवति । न हि यन्न जायते तदवधिः कर्तुं शक्यते निर्विशेषं वा ज्ञातुं शक्यते तस्मात्प्राकृततत्तन्मात्रधर्मतानिषेधतात्पर्यत्वमेव तेषामप्राकृतयुगपद्विचित्रधर्माश्रयताज्ञापनाय तथा " नेहनानास्ति किञ्चन " इत्यस्यापि यदिह किञ्चन नास्ति तन्नाना नास्ति किन्त्वेकात्मैकत्वमेव विवक्षितम् अन्यथा इह किञ्चन नास्ति नाना वा नास्ति इति एकतरेणैवाभिप्रेतासिद्धिः स्यात्किं द्वयोरुपादानेन तस्मादपि तदीयधर्माणां तदेकात्मकत्वात्पूर्ववदेवाप्राकृतत्वादिकमिति न च निर्विशेषत्वं वक्ष्यमाणस्तुतेः संमतं जयजयेत्याद्युपक्रमे स्वरूपशक्तेरहेयत्वा वगमात् । द्युपतय इत्याद्युपसंहारे च अतश्चशब्देन पूर्वार्धोक्तस्यार्थः कालदेशपरिच्छेद एव लभ्यते । यदि च तस्यां स्तुतौ निर्विशेषज्ञानमेव विवक्षितं स्यात्, तर्हि तत्फलं ब्रह्मैक्यमेव मध्येमध्ये स्तूयेत प्रत्युत तदतिक्रमात् ' न परिलषन्ति ' इत्यादिभिः श्रीभगवद्भक्तिरेव स्तुता तस्माद्यद्विधीयते तदेव स्तूयते इति वैदिकन्यायेन श्रीभगवानेव प्रकरणार्थः । स्वमतेऽपि तत्त्वमस्यादिवाक्यैः कथञ्चिदेव तत्तदर्थस्यावगमः सिद्धिश्च ".न तु दुरव गमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः । न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ॥ " इतिवत् परमानंदेनैवेति ज्ञेयम् । तदेवं तत्त्वमस्यादीनामप्राधान्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्वा स्वतःप्रमाणभूतानां वेदानां प्रादुर्भावकक्षाद्यबीजस्य तद्बीजत्वादेव वेदः प्रणव एवाग्र इत्युक्तत्वात्सर्ववेदवाक्यार्थसमन्वयाविधानत्वेन महत्त्वमकाराद्यक्षरात्मकपरस्परसंबद्धपदसमूहत्वाद्वाक्यत्वम् । ततश्च परमवाक्यस्य
साक्षाद्भगवद्वाचकस्य श्रीमत्प्रणवस्यैव प्राधान्यम् । अत एव—" अमात्रोऽनंतमात्रश्च द्वैतस्योपशमः शिवः । ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥ " इति श्रुत्यन्तरं तदेव निर्धारयति—स्वयममात्र एकरूपः
स्ववृत्तिश्रुतिभिरनंतमात्रः द्वैतस्योपशमः भगवन्मात्रवाचकतया वे शांतरनिरासकश्चेत्यर्थः । तदाभिधेयस्य श्रीभगवत एव सर्वयोग्यताहेतुत्वेन परमयोग्यत्वं वदन्सर्ववेदाभिधेयत्वमाह—अत्र प्रणवस्य साक्षाद्वाचकत्वादिकम्
" ॐमित्येतद्ब्रह्मणो नेदिष्ठं नाम " इति श्रुतेः नेदिष्ठमातिशयेन निकटं स्वल्पमपि व्यवधानं विनैव वाचकमित्यर्थः । तथा ' ॐविश्वं विष्णुः ' इति सहस्रनामस्तोत्रात् " स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ।
स सर्वोपनिषद्ब्रह्मवेदबीजं सनातनम् ॥ " इति । " ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् । यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ " इति च द्वादशात् । श्रीभगवतः सर्वयोग्यताहेतुत्वं च ' दृतय इव
श्वसंत्यसुभृतो यदि तेऽनुविधाः ' इत्यादि वक्ष्यमाणात् " यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ". इति श्रुतेः " या वै साधनसंपात्तिः पुरुषार्थचतुष्टये । तया विना
तदाप्नोति नरो नारायणाश्रयः ॥ " इति मोक्षधर्मात् " यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेञ्जसा । स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि
वांछति ॥ " इति चैकादशात् । अतो मोक्षान्यथानुपपत्त्या सामानाधिकरण्यं व्यज्यत इति च निरस्तम् । अथ प्रणवार्थानुसारेण बुद्धीन्द्रियेत्यस्यार्थश्च अकाराद्यात्मकपदचयप्रणवार्थो हि ' सत्त्वं रजस्तम इति प्रकृतेर्गु
णास्तैर्युक्तः ' इत्यादौ स्थित्यादय इतिवत् स्थितिसृष्टिप्रलयकर्तृत्वोपलक्षितः प्रणवमयसर्ववेदैः सर्वभजनीयः परमपुरुष एव समर्थितः अत्रापि तथेति । तथाहि जनानां प्रलये निजैकाश्रयाणां जीवानां पालनाय मात्रार्थ
मैहिकविषयभोगार्थं, भवार्थं जन्मांतरतद्भोगार्थम्, आत्मने शुद्धात्मभावाय आत्यन्तिकप्रलयलक्षणमोक्षाय, अकल्पनाय कल्पनासंकल्पानंतरं तद्रहिताय प्रेमैकमयशुद्धस्वभजनायेत्यर्थः । तस्मात् " ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो
भक्तिलक्षणः । द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ॥ यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः । एको नानेयते तद्वद्भगवाञ्छास्त्रवर्त्मभिः ॥ " इति श्रीकापिलदेवदार्शितः सर्वतः पूर्णाविर्भावः श्रीभगवानेव न निर्विशेषं
ब्रह्मेति साध्वेवोक्तं भवता । अतः स एव बंदिजनतुल्यवेदस्तुत्यत्वेनोपक्रमोपसंहारादिभिर्दर्शयितव्यः । किंतु—ब्रह्मवादिनो द्विविधाः रजततया शुक्तिवदज्ञानेन ब्रह्मैव द्वैततया विवर्तत इत्येके । तत्र पूर्वे तु श्रुतेस्तु शब्दमूल
त्वादिति श्रीबादरायणमताद्बहिर्भूता अनीश्वरवादिन इति पूर्वपूर्वयुक्त्या खंडिताः । उत्तरे चैते खल्वीश्वरवादिनोऽपि भक्तिविशेषं विना सच्चिदानंदविग्रहत्वादिभगवत्ताविशेषग्रहणासमर्था भगवन्तमेव निर्विग्रहतया मन्यन्ते
उपासते च । तच्च तथैव बुद्धीन्द्रियेत्याद्यनुसारेण भगवद्दत्तशक्त्यैवानुभवन्ति । यथोक्तं श्रीमत्स्यदेवेन—" मदीयं महिमानं च परब्रह्मेति शाब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ " इति । अत्राभेदेऽपि महि
मत्वेन निर्देशस्तदपि स्वस्यैकदेशाविर्भावरूपमिति वैभवविशेषतया रूपयता स्वस्य भगवद्रूपतायां पूर्णप्रकाशकत्वं व्यञ्जितम् । यदुक्तं श्रीध्रुवेण—' या निर्वृतिस्तनुभृतां तव पादपद्मध्यानात् ' इत्यादौ
' सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् ' इति तादृशब्रह्मोपासनाफलं शुद्धात्मतया तत्तादात्म्यप्राप्तिश्च नादृता सालोक्यसार्ष्टिसारूप्येत्यादिना तदेतद्ब्रह्म च सर्वातीतप्रकाशत्वादप्राकृतस्वरूपगुणत्वा
दनिर्देश्यमेव तदेतच्च यया भगवद्दत्तशक्त्यानुभवन्ति सा चाप्राकृतस्वरूपगुणत्वावलम्बकोपनिषदाख्यश्रुतिसंबंधादुद्भवति । औपनिषदः पुरुष इति—" तं त्वौपनिषदं पुरुषं पृच्छामि " इति श्रुतेः ।
' यस्मान्मनोऽपि तस्मिंश्चरति ' इति वक्ष्यते " तदेतद्वर्णितं राजन्येन प्रश्नः कृतस्त्वया । यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि मनश्चरेत् ॥ " इति यथा जयजयेत्याद्यष्टाविंशप्रकारश्रुतिमार्गेणाप्रका
शितानिजगुणेऽपि किमुत प्रकाशितनिजगुण इत्यर्थः । अथवा पूर्वम्—" सर्ववेदमयो विप्रः सर्वदेवमयो ह्यहम् " इति स्वस्य स्वयं भगवता सर्ववेदप्रमेयत्वमुक्तम् । श्रीविष्णुरातेन च तस्मिन्
श्रीकृष्ण एव भगवति तत्रतत्र ब्रह्मत्वमवधारितम् ' गूढं परब्रह्म मनुष्यालिंगम् ' ' तदमितं ब्रह्माद्वयं शिष्यते ' " यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम् " इत्यादेः । अतः श्रीगोपालतापन्याम्—
' कथमस्यावतारस्य ब्रह्मता भवति ' इति प्रश्नः ब्रह्मत्वं त्वनुपचारितं बृहत्तमत्वं तच्च स्वरूपेण गुणेन च वाच्यम्, अतः वैकल्ये तदंशहीनत्वादुपचारितत्वप्राप्तेः तदेवं ब्रह्मता कथं स्यादिति प्रसिद्धानुवादेनैव श्रुतौ गांध
र्व्यायाः प्रश्नः । तत्र च श्रीपरीक्षितः तत्प्रस्ताव एव चानेनात्र कर्तुं युक्तः तदर्थमेव श्रीदशमस्कंधस्य श्रोतुमारब्धत्वात् । सर्वविद्वत्परंपरादिगुरूणां श्रुतीनामपि तदेकालम्बतावाक्ये श्रीमुनीन्द्रोऽपि तथैवांगीकरिष्यति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

" त्विय उरगेन्द्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंऽघ्रिसरोजसुधाः " इति । अतः श्रीनारदोऽपि तच्छ्रवणानंतरं तमेवोद्दिश्य तदभेदेन श्रीनारायणं नमस्यति–" नमस्तस्मै भगवते कृष्णायामलकीर्तये । यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ " इति । अत एव श्रीविष्णुरात उवाचेत्युक्त्वा ' ब्रौष्यस्त्रविप्रुष्टमिदं मदंगम् ' इत्याद्यर्थस्य सूचनात्तस्य तादृशाभिप्राय एव दृढीकृतः ततस्तत्रैव वेदप्रमेयत्वं संदिह्य पृच्छति– ' ब्रह्मन्निति ' श्रीकृष्णत्वस्य साक्षाद्व्यञ्जकपदविशेषाप्रयोगस्तु सामान्याकारतयापि प्रश्लेष्य जिज्ञासितं ज्ञास्यते किं विशेषेणेत्यभिप्रायात् । अतो जयजयेत्युपक्रमे वीप्सायुक्तो जिधातोरुत्कर्षाविष्करणरूपोऽर्थः श्रीकृष्णत्वव्यञ्जकासाधारणो गुणपर्यन्त एव ज्ञेयः । अतन्निरसनेनेत्युपसंहारेऽपि– " अंतर्भवेऽनंत भवंतमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः " इति श्रीब्रह्मव्याख्यानुसारेण तत्पर्यन्त एव । ततश्च ब्रह्मणि अनंतस्वरूपगुणे तत्राप्यनिर्देश्ये सर्वप्रत्यग्रूपत्वादेकांशेनापि निर्देष्टुमशक्ये श्रूयन्त इति श्रुतयः परिमिताः पराग्रूपाश्च साक्षान्मुख्यावृत्त्या कथं केन प्रकारेण चरन्ति तं प्रकारं कथयेत्यर्थः । " यतो वाचो निवर्तन्ते " " विष्णोर्नु कं वीर्याणि प्रवोचम् " " यद्वाचानभ्युदितम् " " येन वागभ्युद्यते " इति श्रुतेः ' भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्याम् ' ' अद्यापि यत्पदरजः श्रुतिमृग्यमेव ' इत्युक्तत्वाच्च यतो निर्गुणे निर्गता गुणेभ्यः सत्त्वादिभ्यो गुणा यस्य तस्मिन् मध्यमपदलोपी समासः । तथा सदसतः परे तेषां तत्कार्याणां च संबंधरहिते तत्तद्रूपत्वादृष्टान्तद्वारा गौण्या संबंधिद्वारा लक्षणया निर्देष्टुमनर्हे इत्यर्थः । कथं तत्राह–गुणवृत्तयः सत्त्वादिगुणेषु तत्कार्येषु च वृत्तिर्यासां ताः । यथोक्तं श्रीगीतासु " त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन " इति श्रीभगवतः प्रकृतिगुणातीत गुणत्वं च प्रसिद्धम् । तथैवाग्रे वक्ष्यति–" हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः । स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ " इति । श्रीविष्णुपुराणे–" सत्त्वादयो न संतीशे यत्र च प्राकृता गुणाः । स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु ॥ " इति । एकादशे–" मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम् । सुहृदं प्रियमात्मानं साम्यासंगादयो गुणाः ॥ " इति । अत्र निर्गुणं प्रकृतिगुणैरसंस्पृष्टमेव मां कथंभूतास्ते अगुणाः गुणपरिणामरूपा न स्युरिति टीकासंमतिश्च । प्रथमे " एते चान्ये च भगवन्नित्या यत्र महागुणाः " इति । अत्र च नित्यत्वादप्राकृतत्वमेव लभ्यते । एतदुक्तम् पूर्वं भगवति श्रुतीनां प्रमाणत्वं व्यञ्जितं तच्च साक्षात्कारणत्व एव संगच्छते, अन्यथा साधकतमं करणमित्यत्र तमबर्थहानेः । तासां तु विशेषतः स्वतःप्रमाणभूतत्वमेवांगीकृतं श्रीभगवतस्तदेकप्रमेयत्वञ्च । ततः साक्षाच्चरणमेवोभयवादिभिर्मंतव्यं विशेषतश्च भगवन्नामादिमहिमविज्ञैर्भवद्विधभागवतैरन्यथाचरणमात्रं मया न पृच्छ्यते मया त्विदं पृष्टं कथं साक्षाच्चरन्तीति । येन प्रकारेण साक्षाच्चरन्ति स प्रकारः कथ्यतामित्यर्थः । अत्र समाधत्ते–बुद्धीन्द्रियेति । जनानां मनुष्यत्वबीजनानाजातिजीवानां महाप्रलये प्रकृत्या सह स्वस्मिँल्लीनानां मात्रार्थं मीयन्ते गुणाः कार्याणि गुणातीतानि चाभिरिति मात्राः श्रुतयस्तदर्थं तद्धारणाद्यर्थं बुद्ध्यादीनसृजत् तद्द्वारा च भवार्थमभ्युदयार्थं ब्रह्मलोकादिभोगप्राप्त्यर्थम्, आत्मने जीवतत्त्वं ज्ञापयितुम् , अकल्पनाय कल्पना मायावृत्तयस्तद्रहितं भगवत्तत्त्वमकल्पनम् । यदुक्तं वरुणेन–" नमस्तस्मै भगवते ब्रह्मणे परमात्मने । न यत्र श्रूयते माया लोकसृष्टिविकल्पना ॥ " इति । तदपि ज्ञापयितुं बुद्ध्यादीनसृजत् तत्र विचाराऽसम्यक्त्वेन श्रुतिधारणादिकस्य पूर्वद्व्यार्थता तत्सम्यक्त्वेन तु भगवदेकार्थतेत्युत्तरोत्तरापादानप्राप्तपूर्वपूर्वपरितोषप्राप्तेनोत्तरोत्तरोत्कर्षेण लभ्यते । तदुक्तं द्वितीये–"भगवान्ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥ " इति । ' यं सर्वे देवा नमन्ति ' इत्यादिपूर्वोदाहरणेभ्यश्च । अयं भावः–श्रुतिधारणाद्यर्थं बुद्ध्यादीनसृजदिति ते च बुद्ध्यादयो भवादिसाधनानीति बुद्ध्यादिषु श्रुतौ च तत्तद्योग्यतां न्यस्तवान् अत एव प्रभुपदोपादानं तत्र बुद्ध्यादीनां योग्यता श्रुतिधारणादिषु स्वतः अन्येषु श्रुतिद्वारा बुद्ध्यादिसंस्कर्त्रीणां श्रुतीनां सर्वत्र स्वतः यथा मंत्रादीनां स्वरूपप्रभावमयी, उपनिषदादीनां तदंशमिश्रस्वाभिधादिशक्तिमयी, कर्मकांडादीनां तदंशद्वयमिश्रस्वविधिमात्रबलानुष्ठानमयीति । सासा पुनर्द्विविधा मायातद्गुणावलम्बिनी स्वरूपतद्गुणावलंबिनी च । तत्र स्वरूपतो मायातद्गुणानां निष्कर्षः प्रसिद्ध एव । स्वरूपे त्वात्मपरमात्मब्रह्मभगवद्रूपेणावस्थितेऽपि भगवत्येव परमोत्कर्षो ज्ञेयः । "कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" " विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " ' ब्रह्मणो हि प्रतिष्ठाहम् ' ' यस्मात्क्षरमतीतोऽहम् ' इत्यादिभ्यः । तस्मात्परमोत्कृष्टस्वरूपगुणनिर्देशेन चरन्त्यः श्रुतयः साक्षादेव श्रीभगवति चरन्ति । तदेकवाक्यत्वेनान्या अपि चरन्तीति ' त्रैगुण्यविषया वेदाः ' इति तु कर्मोपासनाविषयमेव । तथैव परममहावाक्यतयांगीकृतं प्रणवमुद्दिश्योक्तं द्वादशे–" स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । स सर्वमंत्रोपनिषद्वेदबीजं सनातनम् ॥ " इति । अतः खण्डवाक्येन क्रमात्तमुपदेष्टुमेव मायादिषु आत्मादिषु अपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरन्ति । तथैव वक्ष्यन्ति श्रुतयः–‘ क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ’ इति । तथैव व्याख्यातं ब्रह्मस्तवे–“ अंतर्भवेऽनंत भवन्तमेव ह्यतत्त्यजन्तो मृगयन्ति सन्तः ” इति । रासे च–‘ मनोरथान्तं श्रुतयो ययुः ’ इति । एवमेवोक्तं ‘ श्रुतिभिर्विमृग्यम् ’ इत्यादि । किञ्च–श्रीभगवति श्रुतयः साक्षाच्चरन्तीति किं वक्तव्यम् यत्र भगवन्नाममंत्रादिरूपा विनाप्यर्थज्ञानमुच्चारणमात्रेण तमाकर्षयन्ति । यथोक्तं षष्ठे–“नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः” इति । टीका च नामोच्चारणं पुरुषविषया मतिर्भवतीत्यादिका ‘ सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ’ इति । तत्स्वरूपभूता एव च ताः प्रभासपुराणे–“ मधुरमधुरमेतन्मंगलं मंगलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम् । सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत्कृष्णनाम ॥ ” इति । नारदपञ्चरात्रे, अष्टाक्षरमुद्दिश्य–“ व्यक्तं हि भगवानेव साक्षान्नारायणः स्वयम् । अष्टाक्षरस्वरूपेण मुखेषु परिवर्तते ॥” इति । श्रुतिश्च–“ नामचिद्विविक्तनमहस्ते विष्णो सुमतिं भजामहे ” इति । माण्डूकोपनिषच्च प्रणवमुद्दिश्य–“प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतम् ” इत्यादिका । अतो “ यतो वाचो निवर्तन्ते ” इत्यादिकाः श्रुतयश्चानंतत्वलोकप्रसिद्धतादि सूचयित्वा तथैव वदन्ति । वक्ष्यंत्येव श्रुतयः–‘द्युपतय एव ते न ययुरंतमनंततया’ इत्यादि, ‘इह न वेदवतावरजन्मलयोग्रसरम्’ इत्यादि ॥ * ॥ **विश्वनाथी**–जनानां जीवानां मात्रार्थं प्रभुरीश्वरो बुद्ध्यादीनसृजत् । मीयन्त इति मात्रा विषयास्तदर्थं कर्मफलभोगार्थमित्यर्थः । भवः पुनःपुनर्जन्म तदर्थं भवबंधहेतुकर्मकरणार्थमित्यर्थः । आत्मने ब्रह्मपरमात्मभगवत्स्वरूपिणे स्वस्मै यत्कल्पनं बुद्ध्यादीनां समर्पणं तदर्थम् । यद्वा–आत्मने स्वमुपासयितुं यत्कल्पनं बुद्ध्यादीनां त्रिनियोगास्तदर्थम् । त्रयाणामेव प्राधान्यबोधकं चकारत्रयम् । बुद्ध्यादीन्विना न कर्मफलस्वर्गादिभोगो, नापि कर्मकरणं, नापि शमदमाद्यंगज्ञानं, नाप्यष्टांगयोगो, नापि श्रवणकीर्तनादिभक्तियोगः सिद्ध्यतीत्यतस्तानसृजत् । ननु त्वं क्व गच्छसीति प्रश्ने, मयाद्य दध्यन्नं भुक्तमित्युत्तरं यथा तथैव श्रुतयः कथं ब्रह्मणि चरन्तीति प्रश्ने प्रभुर्मात्राद्यर्थं बुद्ध्यादीनसृजदित्युत्तरमभूत् । मैवम् “ परोक्षवादा ऋषयः परोक्षं मम च प्रियम् ” इति भगवदुक्तेरत्राभिधया वृत्त्या प्रश्ने व्यञ्जनावृत्त्येदमुत्तरं संगतमेव । तथाहि–शब्दवाच्यत्वाभावादेव ब्रह्मणः खल्वनिर्देश्यत्वं ब्रूषे यदीन्द्रियाणि परमेश्वरो नास्रक्ष्यत्तदा शब्दस्पर्शादयोऽप्यनिर्देश्या ब्रह्मतुल्या एवाभविष्यन् । अद्यापि जन्मांधबधिरस्य रूपशब्दौ ब्रह्मवदनिरूप्यौ भवत एव, तेनास्मदादिभ्यो येन ग्राहकाणीन्द्रियाणि दत्त्वा शब्दादयो निर्देश्याः सुगमाः कृतास्तेनैव परमेश्वरेण कस्मैचित्कृपया ब्रह्मणोऽपि ग्राहकं किमपि सामर्थ्यं दत्त्वा जातिद्रव्यगुणक्रियातिरिक्तं किमपि शब्दप्रवृत्तिनिमित्तं स्पृष्ट्वाऽस्पृष्ट्वैव वा ब्रह्मापि शब्दनिर्देश्यं कारिष्यते यतः स प्रभुरनिर्वचनीयमपि निर्वचनीयं कर्तुं समर्थः । ततश्च श्रुतयोऽपि तत्र सुखं चरेयुरिति । तदुक्तं भगवता मत्स्यदेवेन–“ मदीयं महिमानं च परंब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ॥ ” इति । अस्यार्थः–मम महिमानं महत्त्वरूपं सर्वव्यापकत्वलक्षणं यद्ब्रह्म तत्त्वं वेत्स्यसि कथं वेत्स्यामि संप्रश्नैस्तद्ब्रह्म कीदृशमिति तत्प्रश्नैर्ब्रह्मेदृशमिति मुनिदत्तैरुत्तरैश्च शब्दितं साक्षाच्छब्दनिर्दिष्टीकृतं ब्रह्म वेत्स्यासि । तत्र हेतुः–मे मयाऽनुगृहीतं प्रसादीकृतं मद्दत्तांतःप्रसादं विना ब्रह्मणः साक्षाच्छब्दानिर्दिष्टत्वं न संभवेदित्यर्थः । अत्र मदनुग्रहकल्पितत्वरूपहेत्वन्यथानुपपत्तेर्व्यवधानेन शब्दनिर्दिष्टत्वं न व्याख्येयम् तथा व्याख्यानाभ्युपगमे शब्दितमिति पदस्य वैयर्थ्यं स्यादित्यभिप्रायः । स्वामिचरणैर्व्याख्यातं यथा मे मयाऽनुगृहीतं प्रसादीकृतं परं ब्रह्म हृदि अपरोक्षं वेत्स्यसीति भगवत्कृपया श्रीमदर्जुनेनापि ब्रह्म साक्षाद्दृष्टम् । यथा श्रीहरिवंशे विप्रकुमाराहरणप्रसंगे तं प्रति भगवद्वाक्यम्–“ब्रह्म तेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥ प्रकृतिः सा मम परा व्यक्ताव्यक्तसनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥ सा साध्यानां गतिः पार्थ योगिनाञ्च तपस्विनाम् । तत्परं परमं ब्रह्म सर्वं विभजते जगत् ॥ ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत । ” इति । यद्वा–भो राजन् निर्विशेषे ब्रह्मणि श्रुतयो नैव चरन्ति ‘शब्दो न यत्र पुरुकारकवान्क्रियार्थः ’ इति ब्रह्मोक्तेस्तथा सविशेषे सच्चिदानंदाकारे ब्रह्मण्यपि श्रुतयो न चरन्ति तस्य प्राकृतजात्यादिपदार्थातीतत्वात् । किञ्च–“सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः ” इति वैष्णवोक्तौ प्राकृता न सन्तीत्युक्तेऽप्राकृताः सन्तीति लभ्यते ‘साक्षी चेता केवलः’ इत्यादिना निर्गुणत्वेऽप्यप्राकृतसाक्षित्वादिगुणोक्तेश्च ’ ‘ वेदैश्च सर्वैरहमेव वेद्यः ’ इत्यादिस्मृतेश्चाप्राकृतानंतगुणान्वये तास्मिन् शब्दप्रवृत्तिनिमित्तानामप्राकृतजात्यादीनां सत्त्वात्साक्षादेव श्रुतयस्तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरन्तीत्याह–बुद्धीति । बुद्धिपदेन महत्तत्त्वमिन्द्रियपदेन शब्दाद्याकाशादिकार्यज्ञानञ्च बोध्यते । मात्रार्थं शब्दादीनां ब्रह्मण्यपि प्रवृत्त्यर्थं बुद्ध्यादीनसृजत् " मात्राः परिच्छदे देशे प्रवृत्तौ कर्णभूषणे " इत्यनुशासनात् । प्राणादिकं विना वचनस्याप्यसंभवान्मनआदिसृष्टिरपि शब्दप्रवृत्त्यर्था ज्ञेया । सृष्टेः फलान्तरमप्याह–भवार्थं जीवानां कल्याणार्थं 'भवो भद्रे हरे प्राप्तौ' इत्यनुशासनात् । तथात्मने स्वस्मै बुद्ध्यादीनामप्राकृतानां प्राकृतानाञ्च यत्कल्पनं स्वमुपासितुं विनियोगस्तस्मै । यथा गोपालतापनी श्रुतिः " सत्पुंडरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥ " इति । अत्र सिद्धभक्तानामप्राकृतबुद्धीन्द्रियैरप्राकृतपुंडरीकमेघविद्युतां सुग्राह्यत्वात्ताभिरुपमितेषु भगवन्नयनवपुर्वसनेष्वप्राकृती तापनीश्रुतिर्भगवन्नयनादिवर्णयित्री सुखेनैव चरति । साधकभक्तानां तु बुद्ध्यादिभिरग्राह्यत्वेऽपि तत्र प्राकृतपुण्डरीकादिसादृश्यारोपेणैव ते यथाकथञ्चिदेव बुद्धिं प्रवेशयन्ताश्चैत्तैकाग्र्येणापि वस्तुतोऽस्पृष्टतद्रूपभासा अपि भगवंतं प्रभुं ध्यायाम इत्यभिमानिनो हृष्यन्ति । भगवानप्यपारकृपातरङ्गवशादेवैभिर्भक्तैरहं ध्यात इत्यभिमन्यमानस्तद्भक्तिपरिपाके सति तान्स्वभक्तान्स्वचरणान्तिकं सेवार्थमानयतीति भगवत्स्वरूपस्य श्रुतिगम्यत्वं तत्कृपयैव सिद्धम् ॥ २ ॥

नीलकण्ठी–तदेतन्मनो वाचं प्राणं तान्यात्मनेऽकुरुतेति श्रुतिमनुसृत्य परिहरन् श्रीशुक उवाच–बुद्धीन्द्रियेत्यादि । तत्र श्रुतौ मनसा बुद्धिज्ञानेंद्रियाणि वाचा कर्मेन्द्रियाणि च संगृह्य तेषां सप्राणानामात्मप्रकाशार्थत्वमुक्तम् । अत्र तु विषयविभागेनेति विशेषः । तत्र विषयपरिच्छेदो मात्रा तदर्थं प्रभुर्जनानां बुद्धिमसृजत् । परिच्छिद्यन्ते हि बुद्ध्या अतीन्द्रिया अप्यपूर्वादयः । ब्रह्मणश्च स्वयं फलात्मनो घटादिवत्फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वमुपगम्यते । ' यन्मनसा न मनुते ' ' मनसैवानुद्रष्टव्यम् ' इति श्रुतिद्वयाविरोधाय । एवं वाच्यत्वानुपगमेऽपि लक्ष्यत्वमुपगम्यते । " यद्वाचानभ्युदितम् " " तं त्वौपनिषदं पुरुषं पृच्छामि " इति श्रुतिद्वयाविरोधाय । तथा च तत्त्वमसीति वाक्यकरणकधीवृत्तिव्याप्यत्वोपगमान्नात्यन्तमनिर्देश्यत्वं ब्रह्मणोऽस्तीत्यर्थः । न केवलं बुद्धिमयकर्तृगोचरो ब्रह्मापि तु इन्द्रियमनआख्यकरणगोचरोऽपीत्याह–भवार्थमिन्द्रियाण्यसृजत् आत्मार्थं मनोऽसृजदिति । भवो घटाद्यधिष्ठानभूतप्रकाशः प्राप्त्यर्थस्य भवतेर्ज्ञानार्थत्वोपपत्तेः । यमपेक्ष्य घटादिज्ञानमनुभव इत्युच्यते तदर्थमिन्द्रियाण्यसृजत् । इयमत्र प्रक्रिया–चित्प्रतिबिम्बगर्भमंतःकरणं वृत्त्याकारेण परिणम्य यदा चक्षुरादिद्वारा घटादिविषयं व्याप्नोति तदा घटाद्यवच्छिन्नब्रह्मचैतन्यावरकेऽज्ञानेऽभिभूते स्वतः प्रकाशमाने ब्रह्मणि घटाद्यध्यस्यते तत्रान्तःकरणावच्छिन्नं चैतन्यं प्रमाता वृत्त्यवच्छिन्नं प्रमाणं घटाद्यवच्छिन्नं प्रमेयं तत्र कुल्याद्वारा तटाककेदारसलिलयोरिव वृत्तिद्वारा प्रमातृप्रमेयचैतन्ययोरैक्यं प्रमाफलमात्मबोध इति गीयते । एवं सति शुक्तिरजताद्यध्यास इव घटादिदृश्यवाच्याध्यासेऽपि दृग्वागन्वयव्यतिरेकयोरधिष्ठानप्रकाश एवोपक्षयः । तदेतदाह–' भवार्थमिंद्रियाण्यासृजत् ' इति । फलमपि ब्रह्मैव शास्त्रं च तदन्यनिवृत्त्यर्थमेवेत्युक्तं वृद्धैः–" परागर्थप्रमेयेषु या फलत्वेन संमता । संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥ " इति । " सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते । प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥" इति च । घटरजतादिकं त्वाविद्यकं प्रतिभासमात्रम् । एवञ्च रज्ज्वां स्रक्सर्पधियोरिव ब्रह्मणि रज्जुसर्पधियोर्जाग्रत्स्वप्नयोर्वा परस्परनिरोधकत्वमेव । बाधस्तु तयोर्ब्रह्मज्ञानेनैवेति दृष्टिसमसमयां सृष्टिमुपयन्तो वेदान्तवृद्धाः । तेषां ब्रह्मणि पारमार्थिकी सत्ता दृश्ये प्रातिभासिकी । इतरेषां तु दृश्ये सत्ताद्वैविध्यमभिमतं स्वप्नरज्जुभुजंगादौ प्रातिभासिकी सत्ता प्रबोधरज्ज्वादिज्ञानेन सद्योबाध्या । जाग्रद्रज्ज्वादौ तु व्यावहारिकी ब्रह्मज्ञानैकबाध्येति । तत्र पूर्वेषां ब्रह्मणि सर्वशब्दवाच्यतास्ति "नामानि सर्वाणि यमाविशन्ति" इति श्रुतेः । अवाच्यत्वश्रुतिस्तु लौकिकशब्दप्रवृत्तिनिमित्तजातिगुणाद्यभावपरा । परेषां तु 'शरीरं रथमेव तु ' इत्यत्र यथा शरीरशब्देन शरीरोपादानमव्यक्तं लक्ष्यते तद्वद्घटाद्युपादानं ब्रह्म घटादिशब्दैरिति मतम् । एवं कर्तृकरणसृष्टेः ब्रह्मप्रकाशार्थत्वमुक्त्वा क्रियाशक्तिमत्प्राणसृष्टेरपि तदुभयानुग्राहकतया तदर्थत्वमाह–कल्पनाय प्राणानसृजत् कल्पनं बुद्ध्यादेः स्वस्वविषयप्रकाशनसामर्थ्यसंपादनं तस्मै । यस्माद्ब्रह्मणः सर्वशब्दप्रत्ययगम्यत्वमस्ति तस्मात्संभवत्येव सन्मार्गोपदेशः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता ॥ श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ॥ ३ ॥
अत्र ते वर्णयिष्यामि गाथां नारायणान्विताम् ॥ नारदस्य च संवादमृषेर्नारायणस्य च ॥ ४ ॥

अत्र चानादिशिष्टपरंपरागतत्वान्न संदेहो युक्त इत्याह । सैषेति । सैषा यथोक्तालंबना ब्राह्मी ब्रह्मपरा । श्रद्धया आदरेण वैतंडिकतर्कानभिनिवेशेन यः श्रवणादिना धारयेत्सः अकिंचनो निरस्तदेहाद्युपाधिः सन् परं पदं प्राप्नुयादिति ॥ ३ ॥ एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपंचयितुमितिहासमवतारयति । अत्रेति । नारायणान्वितां नारायणः प्रवक्तृत्वेनान्वितो यस्यां ताम् । गाथामितिहासम् ॥ ४ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्र च वेदानां ब्रह्मपरत्वे च । वितंडा स्वपरपक्षस्थापनहीना कथा तद्युक्ता वैतण्डिकास्तेषां तर्का निष्फलवादास्तत्रानभिनिवेशेन हठाभावेन । आदिना मननादिग्रहः । निरस्तोऽपाकृतो देहाद्युपाधिर्देहाद्यभिनिवेशो येन स तथा सन् परं ब्रह्मावाप्तिरूपम् या त्रिवर्गसाधनपरा सा तूपनिषत् त्रिवर्गनिष्ठैर्मरीच्यादिभिर्धृता एषा तु ब्रह्मपरा ब्रह्मप्रतिपादिकाऽत एव ब्रह्मनिष्ठैः सनकादिभिर्धृतेति भावः । " उपनीयेयमात्मानं ब्रह्मापास्तद्वयं यतः । निहंत्यविद्यां तज्जं च तस्मादुपनिषद्भवेत् ॥ " इत्युपनिषल्लक्षणं भारते । उपनिषद्यते प्राप्यते ब्रह्म यद्विचारेण सोपनिषदिति निरुक्तेः । कर्मादिप्रतिपादकविद्यासूपनिषत्प्रयोगस्तु परंपरया तासामपि ब्रह्मपरत्वादेवेति ध्येयम् ॥ * ॥ **श्रीधरानुयायिनी**—तत्र तावद्वेदस्तुतेरनादित्वं वदन्नेतच्छ्रवणादेर्मोक्षं फलं चाह—सैषेति । श्रीनारायणादिबुद्धिस्थां तत एव दक्षादीनामपि पूर्वजैः सनकादिभिः श्रवणादिना धारितां ब्रह्मप्रतिपादिकां वेदान्तरहस्यविद्यामिमां यः श्रद्धया श्रवणादिना धारयेत्स निरस्तदेहाद्युपाधिः सन्मोक्षं प्राप्नुयात् ॥ * ॥ **विश्वनाथी**—पूर्ववाक्यं प्रमाणयति स्तौति च—सा प्रसिद्धा एषा श्लोकद्वयी प्रश्नोत्तरमयी ब्राह्मी उपनिषद्भवति आवाभ्यामाविर्भूतैव न त्वावाभ्यामेव कृता यतः पूर्वेषां श्रीनारदादीनां पूर्वजैः सनकादिभिः स्वान्तःकरणेषु धृता । यद्वा—सैषा जयजयेत्यादिना वक्ष्यमाणा । क्षेमं ' मर्त्यो मृत्युव्यालभीतः पलायन् ' इत्याद्यनुसारेण श्रीभगवच्चरणारविन्दरूपम् । ब्रह्मपरा उपाधिनिरसनद्वारा ब्रह्मप्रतिपादनपरा ॥ ३ ॥

नीलकण्ठी—अत्रार्थे आख्यायिकामारचयति—सैषा उपनिषद्रहस्यविद्या । अकिञ्चनो निष्परिग्रहः संन्यासीत्यर्थः ॥ ३ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—एतदेव ब्रह्मपरत्वमेव । अत्र श्रुतीनां ब्रह्मपरत्वे । एतेन क्षीरोदशायिनः श्रीनारायणाच्छ्रुत्वा सनंदादिभिर्यन्निर्णीतं तदेव श्रीनारायणोऽपि नारदायोक्तवानित्यवगम्यते । नियतलिंगत्वाद्गाथामित्यस्य विशेषणं संवादमिति ॥ * ॥ **श्रीधरानुयायिनी**—अत्र संदेहाभावार्थमाख्यायिकामवतारयति—अत्रेति । श्रुतीनां ब्रह्मपरत्वे श्रीनारायणेन नारदायोपदिष्टमितिहासं ते वर्णयिष्यामि ॥ * ॥ **विश्वनाथी**—उक्तमर्थं द्रढयितुमितिहासमवतारयति—अत्र एतत्प्रसंगे, गाथामितिहासम्, वर्तयिष्यामि चिरमतीतामपि वर्णयिष्यामीत्यर्थः । नारायणो महत्स्रष्ट्रादिपुरुषत्रयाश्रयः सर्वजीवाश्रयश्च । स तु नारायणस्त्वं नहि सर्वदेहिनामित्याद्यनुसारेण स्वयं भगवाञ्छ्रीकृष्णः स एवान्वित उपक्रमोपसंहारादिष्वनुगतो यस्यां तां नारदस्य परमभागवतत्वाच्छ्रीभगवन्माहात्म्यमेवोद्देश्यमिति सिद्धान्तः सूचितः । अतो भगवत्प्रिय इति । वक्ष्यते च संवादं संवादरूपाम् । ऋषेरिति क्षीरोदशायिपरमव्योमेश्वरयोर्व्यावृत्त्यर्थम् ॥ ४ ॥

नीलकण्ठी—॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकदा नारदो लोकान्पर्यटन्भगवत्प्रियः ॥ सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमम् ॥ ५ ॥ यो वै भारतवर्षेऽस्मिन्क्षेमाय स्वस्तये नृणाम् ॥ धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ॥ ६ ॥ तत्रोपविष्टमृषिभिः कलापग्रामवासिभिः ॥ परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह ॥ ७ ॥ तस्मै ह्यवोचद्भगवानृषीणां शृण्वतामिदम् ॥ यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनाम् ॥ ८ ॥

॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—एकदैकास्मिन्काले। नारायणाश्रमं कलापग्रामम्। सनातनं तन्नामानं प्राक्तनं वा नारायणं वा ॥ * ॥ **श्रीधरानुयायिनी**—कदाचिद्भगवद्भक्तो नारदो लोकान्पर्यटन्सन् भारतवर्षवासिनामैहिकामुष्मिककल्याणाकल्याणमभिव्याप्य ब्रह्मदिनप्रथमांशमारभ्य धर्मज्ञानशमोपेते तपसि स्थितं सनातनं श्रीनारायणमृषिं द्रष्टुं बदरिकाश्रमे कलापग्रामाख्यं तदाश्रमं ययौ ॥ * ॥ **विश्वनाथी**—सनातनमाद्यं श्रीभगवंतम् ऋषिं धर्मपुत्रं श्रीनारायणम् । श्रीनारायणाश्रमं तन्नाम्नैव प्रसिद्धं बदरिकाश्रमप्रदेशम् ॥ ५ ॥

नीलकण्ठी— ॥ ५ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—कोऽसावृषिस्तमाह—य इति । स्वस्तये सुस्थितये । क्षेमाय समृद्धये । आकल्पात्कल्पमभिव्याप्य ॥ * ॥ **श्रीधरानुयायिनी**—॥*॥ **विश्वनाथी**—ऋषित्वे कारणं वदँस्तदीयकारुण्यमयलीलामाह—य इति । क्षेमाय ऐहिकाय, स्वस्तये आमुष्मिकाय, मंगलाय लोकशिक्षार्थं धर्माद्युपेतं तपोयोगं स्वधर्मं वास्थितः । धर्मो भक्त्युपयोगि ज्ञानं भगवद्विषयं शमो भगवच्चित्ततेति विवेकः । आकल्पाद्ब्रह्मादिनप्रथमांशमारभ्य ॥ ६ ॥

नीलकण्ठी—॥ ६ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—तत्र कलापग्रामे। स्वाश्रमे स्थितम्। इदं श्रुतीनां ब्रह्मपरत्वम्। उपविष्टमिति वैयग्र्यराहित्यमाह तेन प्रश्नावसर उक्तः। ऋषिभिः परीतमिति सर्वसंगत्वेन प्रश्नमाहात्म्यं चोक्तम् ॥ * ॥ **श्रीधरानुयायिनी**—हे राजन् सशिष्यं स्वाश्रमे स्थितं नारायणं प्रणम्य नारदस्तमिदमेवापृच्छत् ॥ * ॥ **विश्वनाथी**—तत्र निजाश्रमे । उपविष्टमिति वैयग्र्यराहित्येन प्रश्नावसर उक्तः । ऋषिभिः परीतमिति सर्वसंमतत्वात्प्रश्नोत्कर्षोऽसूचि । इदमेव ब्रह्मन्ब्रह्मण्यनिर्देश्य इत्येव । कुरूद्वहेति शुद्धवंशोद्भूतत्वेनैव तवाप्ययं प्रश्न इति भावः ॥ ७ ॥

नीलकण्ठी—॥ ७ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—तस्मै नारदाय। इदं किं यो ब्रह्मवादस्तदिदम्। उद्देश्यविधेयभावत्वाल्लिंगवैषम्यमदोषः। "यत्रोद्देश्यविधेयत्वं तत्रायं नियमो नहि" इत्युक्तेः। शृण्वतामिति सावधानत्वमुक्तम्। जनशब्दोऽदन्तोऽपि भुवनवाची सान्तश्च 'जनस्तपःसत्यनिवासिनो जनाः' इति तृतीयोक्तेः ॥ * ॥ **श्रीधरानुयायिनी**—शृण्वतामृषीणां मध्ये स्थितो नारायणो जनलोकवासिभिः सनंदनादिभिः प्राक्प्रवर्तितां ब्रह्मविषयगाथां नारदायावोचत् ॥ * ॥ **विश्वनाथी**—शृण्वतामिति सावधानत्वम् । ब्रह्मणि वेदे वादस्तत्त्वबुभुत्सार्थकथारूपः न तु जल्पवितंडारूपः ॥ ८ ॥

नीलकण्ठी—॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

**श्रीभगवानुवाच ॥ स्वायंभुवं ब्रह्मसत्रं जनलोकेऽभवत्पुरा ॥ तत्रस्थानां मानसानां मुनीनामूर्ध्वरेतसाम् ॥ ९ ॥ श्वेतद्वीपं
गतवति त्वयि द्रष्टुं तदीश्वरम् ॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते ॥ तत्र हायमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि ॥ १० ॥
तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे ॥ ११ ॥**

ब्रह्मसत्रमिति । यथा यजमाना एव समाना ऋत्विगादिरूपेण यत्र कर्म कुर्वंति तत्कर्मसत्रं प्रसिद्धम् । तथा यत्र समाना एव वक्तृश्रोतृभावेन ब्रह्म मीमांसते तद्ब्रह्मसत्रम्॥ ॥ ९ ॥ अहो तर्हि मया कथं तन्न ज्ञातमित्यत आह । श्वेतद्वीपमिति । तदीश्वरं तत्रस्थं मामेवानिरुद्धमूर्तिम् ॥ १० ॥ ननु सर्वज्ञास्ते कस्तत्र वक्ता प्रष्टा वा तत्राह । तुल्यश्रुतेति । श्रुतादिभिरविशेषा अरिमित्रोदासीनहीनत्वेन निरुपमकरुणा अतः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेनैकं प्रवक्तारं कृत्वाऽन्ये पप्रच्छुरित्यर्थः॥ ११ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–स्वायंभुव स्वयंभुवोऽपत्यं स्वायंभुवस्तत्संबुद्धौ । गुणाभावश्चार्षः । पुरा कल्पादौ । तत्रस्थानां जनलोकस्थानाम् । मानसाना ब्रह्मणो मनसो जातानाम् सनकादीनाम् ॥ * ॥ **श्रीधरानुयायिनी**–श्रीभगवानुवाच । हे नारद श्वेतद्वीपपतिमनिरुद्धमूर्तिं मां द्रष्टुं त्वयि श्वेतद्वीपं गतवति सति श्रुतिसमाजवंति जनलोके पुरा कल्पादौ सनकादीनां वेदतपःशीलैः सर्वत्र समदृष्ट्या च तुल्यानामपि भगवच्चरित्रास्वादनार्थमेकं सनंदनं वक्तारं परिकल्प्य त्वत्पृष्टप्रश्नपूर्वकमेव ब्रह्मविचारः प्रावर्तत । यत्र समा एव सर्वे ब्रह्म वेदं वा मीमांसते तद्ब्रह्मसत्रम् ॥ * ॥ **विश्वनाथी**–हे स्वायंभुवेति । ब्रह्मसत्रे तत्रापि योग्यता स्तीति तत्समानत्वादिति भावः ॥ ९ ॥

नीलकण्ठी–॥ ९ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–तद्ब्रह्मसत्रम् । तदीश्वरं श्वेतद्वीपाधीशम् । तत्र जनलोके । अयं कः यं प्रश्नं त्वं मामिति । ततश्चायं प्रश्नस्त्वां विना न केनापि कृत इति श्लाघा सूचिता । श्रुतयः शेरते निवृत्तव्यापाराः वक्तुमशक्ता अभवन्निति यावत् । क्वचित्पुस्तके "ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते" इत्यर्धश्लोको नास्ति ॥ * ॥ **श्रीधरानुयायिनी**–॥ * ॥ **विश्वनाथी**–अनु तेभ्यः पश्चात्पृच्छसीति तत्पश्चादयं प्रश्नो न केनापि कृतोऽस्तीति श्लाघा सूचिता । अत्र पद्यार्धमधिकमपि क्वचिदस्तीति तदनुपयुक्तमेव । शेरते समन्विता भवन्तीत्यर्थः ॥ १० ॥

नीलकण्ठी–॥ १० ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–अत्र शंकते–नन्विति । तुल्यानि श्रुतानि शास्त्राणि तपांसि शीलानि च येषां ते तथा । यतः सर्वथा समाना अतो हेतोः केनापि कौतुकेन श्रौतविचारकुतूहलं । इत्यर्थ इति–एवंभूताः सनंदनमेकं वक्तारं विना श्रोतृजनाह्लादो न भवतीति भावः ॥ * ॥ **श्रीधरानुयायिनी**–॥ * ॥ **विश्वनाथी**–॥ ११ ॥

नीलकण्ठी–प्रवचनं प्रकृष्टं वचनं यस्येति प्रवक्तारम् । शेषं स्पष्टम् ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनंदन उवाच ॥ स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ॥ तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परम् ॥ १२ ॥

स्वसृष्टमिति । स्वयं निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य शयानं योगेन निद्राणमिव वर्तमानं तदंते प्रलयांते तल्लिंगैस्तत्प्रतिपादकैर्वाक्यैःपरमीश्वरं सृष्टिसमये प्रथम निश्वासभूताः श्रुतयः प्रबोधयामासुः ॥ १२ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—तत्रेतिहासपीठिकां बध्नाति—स्वसृष्टमिति । तत्प्रतिपादकैरीशप्रतिपादकैः । श्रुतय इति । श्रूयन्त एव शिष्याचार्यपरंपरया न तु भारतादिवत्केनचित्प्रणीयन्त इति श्रुतयो वेदाः।अपौरुषेयतया स्वतः प्रमाणभावा इत्यर्थः । यदि''अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः''इति वेदानां ब्रह्मप्रभवत्वं सिद्धं तथापि'वाचा विरूपनित्यये'ति तन्नित्यत्वबोधकश्रुत्यन्तरादीश्वरोऽपि पूर्वपूर्वकल्पीयामेवानुपूर्वी रचयति न त्वभिनवामित्यपौरुषेयत्वं ज्ञेयम् । एवमादिमत्तमाख्यायिका देवताविग्रहभुवनकोशानां प्रतिपादिका श्रुतिरादिमतीति प्रत्याख्यातव्यम् ''सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्'' इति प्रतिकल्पसृष्टेः समान नामरूपश्रवणेन व्रीह्यादिवदेषामपि संसारानादितया जातिशब्दतुल्यत्वादिति ॥ * ॥ **श्रीधरानुयायिनी**—तत्र ब्रह्मणि श्रुतीनां समन्वयं श्रुतिमुखेनैव प्रतिपादयन् सनंदन उवाच—यथानुजीविनो बंदिजनाः प्रातरागत्य शयानं चक्रवर्तिनं तद्यशोयुक्तदिग्विजयादिपराक्रमोक्तिभिर्बोधयन्ति तथा स्वसृष्टमिदं विश्वं प्रलयकाले संहृत्य लक्ष्म्यादिशक्तिभिः सह योगेन निद्राणमिव वर्तमानं परमेश्वरं सृष्ट्यादावीश्वरप्रथमश्वासप्रसूताः श्रुतयस्तत्स्वरूपगुणयशःपराक्रमादिसूचकशब्दैः सत्यज्ञानानंतादिजगत्कर्तृत्वादिलक्षणैः प्रबोधयामासुः ॥*॥ **विश्वनाथी**—पूर्वं यथा न निर्विशेषं ब्रह्म सर्ववेदाभिधेयं सविशेषत्वेऽपि तन्न मायाविभूत्यासक्तमिति व्यञ्जितम् । तथैव 'योऽस्योत्प्रेक्षक आदिमध्यनिधने' इत्यादिकमुपसंहरिष्यति तथैवोपक्रमते—स्वसृष्टमिति । स्वशब्देन विश्वस्य तदुपादानकत्वं तदधीनत्वं चोक्तम् । महदादिपृथिव्यन्तमिदं विश्वम् आ सम्यक् तत्कारणेन प्रकृत्या तद्भोक्त्रा जीववृन्देन च संयुक्तं यथा स्यात्तथा पीत्वा सूर्यो रसानिवाविनाश्य शक्तिभिस्तत्तच्छक्तिमयपुरुषाद्यवतारैः सह मिलित्वैकीभूय ''अनंतानि तथोक्तानि यान्यंडानि मया पुरा । सर्वाणि तानि संहृत्य समकालं जगत्पतिः ॥ प्रकृतौ तिष्ठति तदा सा रात्रिस्तस्य कीर्तिता॥'' इति विष्णुधर्मोत्तरादौ महापुरुषस्य स्वप्रकृतौ श्रीभगवति प्रवेशश्रवणात् शयानं जगत्कार्यं प्रति निद्राणमिव कृतानवधानं सन्तं परम् 'आद्योऽवतारः पुरुषः परस्य' इति द्वितीयोक्तेः स्वयं भगवंतं श्रीकृष्णं स्वलोकवासिनं तदन्ते तादृशशयनान्ते बहिरावरणगताः श्रुतयस्तदधिष्ठातृदेवतास्तल्लिंगैः साक्षात्परंपरया वा स्वयं भगवत्ताबोधकैर्वाक्यैर्बोधयांचक्रुः पुनर्विश्वसृष्ट्यामवधापयाञ्चक्रुः । सर्वज्ञमपि तं स्वीयस्तुत्यर्थेषूत्साहवशादेवाधापयामासुरिति विश्वनाथः । अयं भावः—यद्यपि तस्य बोधनं नाम मायावैभवं प्रत्यवधापनमेव तच्च तदीयस्वरूपवैभवमात्रतत्परेभ्यः स्वेभ्यो न रोचते तथापि बोधनस्य स्वाधिकारप्राप्तत्वेनावश्यकर्तव्यत्वात् तत्तिरस्कारपूर्वकस्वरूपवैभवपुरस्कारेणैव तच्चक्रुरिति तथैव जयजयेत्यादौ व्यक्तं भावि तादर्थ्यं, प्राकृतप्रलयेऽपि तदधिष्ठानवैकुंठस्यानश्वरत्वमेव तैः संमतम् यत्रासौ शेते । यदुक्तं द्वितीये—''प्रवर्तते यत्र रजस्तमस्तयोः सत्त्वञ्च मिश्रं न च कालविक्रमः । न यत्र माया किमुताऽपरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥'' इति ॥ १२ ॥

नीलकण्ठी—तत्र श्रुतीनां जीवबोधनप्रकारमवतारयन्सनंदन उवाच—स्वसृष्टमित्यादि । इदं नामरूपात्मकस्य जगत एकदेशभूतं देहपुत्रादि स्वसृष्टं अनाद्यविद्यावशादात्मत्वेनात्मीयत्वेन च कल्पितम् आपीय अमुष्य पुत्रोऽहं ममेदं पुत्रादीत्यभिनिवेशपूर्वकमवेत्य शयानं विस्मृतात्मयाथात्म्यम् । अत्र हेतुः—सह शक्तिभिरिति । रागद्वेषादिवासनाभिः तद्वता चित्तेन सहाभेदाध्यासादित्यर्थः । उक्तञ्च—''मायामये वासनया शयाने'' इति । तदन्ते वासनानां तानवे सति तल्लिङ्गैरात्मस्वरूपावगमकैः श्रुतियुक्त्यादिभिः परंपरमेव संतम् अबुद्धात्मतत्त्वमेनं श्रुतयः श्रूयन्त एव शिष्याचार्यपरंपरया न तु भारतादिवत्केनचिद्रच्यन्त इति श्रुतयो वेदाः अपौरुषेयतया स्वतःसिद्धप्रमाणभावा इत्यर्थः । यद्यपि ''अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः'' इति वेदानां ब्रह्मप्रभवत्वं सिद्धं तथापि 'वाचा विरूपनित्यया' इति तन्नित्यत्वबोधकश्रुत्यन्तरादीश्वरोऽपि पूर्वपूर्वकल्पीयामेवानुपूर्वी रचयति न त्वभिनवामित्यपौरुषेयत्वं ज्ञेयम् । एवमादिमतमाख्यायिकादेवताविग्रहभुवनकोशानां प्रतिपादिका श्रुतिरादिमतीति प्रत्याख्यातव्यम् । ''सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्'' इति प्रतिकल्पसृष्टेः समाननामरूपश्रवणेन व्रीह्यादिवदेषामपि संसारानादितया जातिशब्दतुल्यत्वात् बोधयाञ्चक्रुः ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा शयानं सम्राजं बंदिनस्तत्पराक्रमैः ॥ प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयंत्यनुजीविनः ॥ १३ ॥
श्रुतय ऊचुः ॥ जयजय जह्यजामजित दोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः ॥
अगजगदोकसामखिलशक्त्यवबोधक ते क्वचिदजयाऽऽत्मना च चरतोऽनुचरेन्निगमः ॥ १ ॥ १४ ॥

सुश्लोकैः शोभनाः श्लोकाः कीर्तयो येषु तैः पराक्रमैः ॥ १३ ॥ जयजयेति । भो अजित जयजय उत्कर्षमाविष्कुरु । आदरे वीप्सा । केन व्यापारेण । अगजगदोकसाम् अगानि स्थावराणि जगंति जंगमानि च ओकांसि शरीराणि येषां जीवानां तेषामजामविद्यां जहि नाशय । किमिति गुणवती हंतव्येत्यत आह ।

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्र दृष्टान्तमाह—सम्राजं चक्रवार्तिनम् । बंदिनः स्तावकाः । तत्पराक्रमैः पराक्रमा दिग्विजयादयो जगत्कर्तृत्वादयश्च क्रमेण दृष्टान्तदार्ष्टान्तिकयोर्ज्ञेयाः । प्रत्यूषेऽहर्मुखे 'प्रत्यूषोऽहर्मुखं कल्यम् ' इत्यमरः ॥ * ॥ **श्रीधरानुयायिनी**—॥*॥ **विश्वनाथी**—तच्च प्रबोधनं तासां सर्वपरावरगुरूणां सहजतद्दास्येनैवेति दृष्टान्तेन प्राचीनसिद्धान्तमेव द्रढयति—यथेति । सुश्लोकैः श्रेष्ठपद्यैः । तस्य पराक्रमः प्रभावो यत्र तैः सर्वैश्वर्यं सर्ववैलक्षण्यञ्च सूचयित्वाऽन्येन साम्यमपि नास्मिन्संदर्भे विवक्षितं किं पुनरैक्यमिति पूर्व एव सिद्धान्तः स्थापितः एवं सर्ववेदसंमतार्थत्वेन स्वयं भगवत्येव स्वभावतया लब्धे श्रीकृष्ण एव स इति लभ्यते । 'कृष्णस्तु भगवान्स्वयम्' इति निर्णीतत्वात्तत्वस्यास्य तल्लीलामहाप्रकरणान्तःपातात् 'निभृतमरुन्मनोक्ष' इत्यादितल्लिंगात् 'कृष्णञ्च तत्र छंदोभिः स्तूयमानं सुविस्मिता' इत्यादिसाक्षिकत्वात् 'योऽसौ सर्वेषु वेदेषु तिष्ठति' 'योऽसौ सर्वैर्वेदैर्गीयते' इति गोपालतापनीश्रुतेः 'नमस्तस्मै' इत्यादिना एतच्छ्रवणानंतरं नारदेन तस्यैव नमस्कृतत्वाच्च अत एव सर्वत्रैव पद्ये साक्षाच्छ्रीकृष्णताव्यञ्जकमर्थान्तरं ग्रंथांते लिखितमस्ति कौतुकश्चेदं द्रष्टव्यम् ॥ १३ ॥

नीलकण्ठी—अत्र दृष्टान्तमाह—यथेत्यादि । शोभनाः श्लोकाः यशांसि पद्यानि च पराक्रमा दिग्विजयादयः जगत्कर्तृत्वादयश्च क्रमेण दृष्टान्तदार्ष्टान्तिकयोर्ज्ञेयाः । अयं भावः—यथा शयानः सम्राट् प्रबुद्धमात्र एव दुःस्वप्नदुःखमसदपि सदिवाभातं जहाति सदप्यसद्वदनवभातं साम्राज्यसुखमाप्नोति एवं जीवस्यापि प्रत्यक्तत्त्वज्ञानमात्राद्भवदुःखक्षयस्वरूपानंदावाप्ती भवतः "ज्ञानादेव तु कैवल्यम्" इति श्रुतेः । "सुषुप्तनरवच्छ्रुत्या बोध्यते प्रेर्यते न तु" इति वार्तिकोक्तेश्च विनाप्यनुष्ठानं कृत्स्नपुरुषार्थहेतुज्ञानाय शास्त्रमारंभणीयमिति ॥ १३ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—अथ यद्यपि श्रुतयस्त्रिकाण्डविषयत्वात्त्रिविधा एव तथापि तत्तदवान्तरफलसाधनपरत्वेन बहुधा भवन्ति । तत्राप्यष्टाविंशातिभेदास्ताः सपरिकराः पृथक्पृथक् स्तुवन्तीति तत्तत्प्रसंगे दर्शयिष्यामः । तासां नामानि लक्षणाशरणान्तर्यामिभेदाभेदज्ञानानिंदोपदेशोपासनाभक्त्यनुक्रोशदुर्विज्ञेयत्वानिर्वचनीयत्वासद्वादादिखण्डनस्तवैकात्म्यसृष्टिबंधमोक्षातर्क्यशक्तित्वसर्वेश्वरत्वसोपाधिलयनिरुपाधिलयवैराग्यगुरूपसदनब्रह्मानंदातन्निरसनानंतत्वप्रतिपादनक्रमेण ज्ञेयाः । अत्र तावत्सर्वाः श्रुतयः सगुणं गुणैरनाभिभूतं श्रीनारायणमवलंब्य निर्गुणं परं ब्रह्म श्रीकृष्णाख्यं स्तुवन्तीति तात्पर्यम् । तथाहि श्रीगोपालतापन्याम्—'योऽसौ सर्वेषु वेदेषु तिष्ठति' योऽसौ सर्वैर्वेदैर्गीयतेऽसौ श्रीकृष्णः पूर्वतोऽनुवर्तते । दशमे—"कृष्णं च तत्र च्छन्दोभिःस्तूयमानं सुविस्मिताः" इति । एकादशस्कंधे एकविंशाध्याये—"किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् । इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् । एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥ मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति ।" इति । व्याख्यातं स्वामिचरणैः । इयं बृहती श्रुतिः कर्मकाण्डे मंत्रवाक्यैः किमाचष्टे किं प्रकाशयति, ज्ञानकांडे किमनूद्य निषेधार्थं विकल्पयेत् इत्यस्याः श्रुतेर्हृदयं तात्पर्यं मत्तोऽन्यः कश्चिदपि न वेद।स्वयमेव कथयति। मां विधत्ते मामेव यज्ञरूपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोषगृभीतगुणां दोषायानंदाद्यावरणाय गृहीता गुणा यया ताम्। हृग्रहोर्भश्छंदसीति भकारः। इयं हि स्वैरिणीव परप्रतारणाय गुणान् गृह्णात्यतो हंतव्येति। तर्हि मय्यपि दोषमावहेदिति ममापि तत्र का शक्तिः स्यादत आह। त्वमिति। यद्यस्मात्त्वमात्मना स्वरूपेणैव समवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्योऽसि। वशीकृत मायत्वादिति भावः। ननु स्वयमेते ज्ञानवैराग्यादिना किं न हन्युरित्यत आह। अखिलशक्त्यवबोधकेति। तेषां त्वमेवांतर्यामी सर्वशक्त्युद्बोधकः। अतो न ते ज्ञानादौ स्वतंत्रा इति भावः। नन्वहमकुंठज्ञानैश्वर्यादिगुणो जीवानां कर्मज्ञानादिशक्त्यवबोधनेनाविद्याहंतेत्यत्र किं प्रमाणमिति चेदहमेव प्रमाणमित्याह। निगमो वेदः। नन्वेवंभूते मयि कथं श्रुतीनां प्रवृत्तिस्तत्राह। क्वचिदिति। कदाचित्सृष्ट्यादिसमयेऽजया मायया चरतः क्रीडतो नित्यं चालुप्तभगतया सत्यज्ञानानंतानंदैकरसेनात्मना च चरतो वर्तमानस्य निगमोऽनुचरेत्प्रतिपादयेत्। कर्मणि षष्ठ्यौ। "यतो वा इमानि भूतानि जायंते॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥ य आत्मनि तिष्ठन्॥ सत्यं ज्ञानमनंतं ब्रह्म॥ यः सर्वज्ञः सर्ववित्" इत्यादिनिगमकदंबस्त्वामेवंभूतं प्रतिपादयतीत्यर्थः॥ जयजयाजित जह्यगजंगमावृतिमजामुपनीतमृषागुणाम्॥ नहि भवंतमृते प्रभवंत्यमी निगमगीतगुणार्णवता तव॥ १॥ १४॥

विधत्ते मामेव तत्तद्देवतारूपेणाभिधत्ते न मत्तः पृथक् यच्चाकाशादिप्रपञ्चजातम्—"तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिना विकल्प्यापोह्यते निषिध्यते तदप्यहमेव न मत्तः पृथगस्ति। एतावानिति। शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां भेदं मायामात्रमित्यनूद्य नेह नानास्ति किञ्चन इति प्रतिषिध्य प्रसीदति निर्वृत्तव्यापारो भवतीति एतावान्सर्ववेदार्थः। श्रीगीतासु च— "वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्" इति। तस्मात्सर्वाः श्रुतयः श्रीकृष्णमाहात्म्यमुदीर्य तमेव स्तुवन्तीति। ग्रन्थविस्तरभियात्राधिकं न लिखितम्। अथ प्रकृतमनुसरामः। प्रथमं स्वमनोरथं निवेदयन्त्यः श्रुत्यभिमानिदेवता आहुः। नर्कुटकं नाम छंदः 'हयदशभिर्नजौ भजजला गुरु नर्कुटकम्' इति तल्लक्षणात्। सप्तभिर्दशभिश्च यतिरत्रेत्यर्थः। हृग्रहोरिति—हृग्रहोर्धात्वोर्हस्य भादेशो वेद इत्यर्थः। यतो दोषाय गुणान्गृह्णात्यतो हेतोः। तत्र तद्धननादौ। इति भाव इति—मायापरतंत्रत्वाज्जीवेष्वेव तत्सामर्थ्यं न त्वयीति 'विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया' इत्युक्तेः। "नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च" इत्युक्तेश्चेत्याशयः। ते जीवाः। अतस्त्वदधीनप्रवृत्तित्वात्! इति भाव इति—"केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इत्युक्तेः। एवंभूतेऽकुण्ठज्ञानैश्वर्ये क्रीडतः पुरुषरूपेण नित्यं चात्मना ज्ञानानंदैकरसेन भगवदादिरूपेण स्वयोगमायया चिच्छक्त्यांतर्याम्यवतारादिशुद्धलीलायां चरतः निगमो वेदसमूहः प्रनुचरेत्त्वां प्रतिपादयेत्। अत्र श्रुतयो भृगुणा ब्रह्मणः किं लक्षणमिति पृष्टो वरुणः प्राह—यतो वा इति। वै प्रसिद्धौ यतो यस्मात् इमानि ब्रह्मादिस्तंबपर्यन्तानि जायन्ते जीवन्ति प्राणान्धारयन्ति वर्धन्ते च नाशकाले यत्प्रति प्रयन्ति गच्छन्त्यभिविशन्ति तादात्म्यमेत्र प्रतिपद्यन्ते तत्त्वं ब्रह्मेति विशेषेण ज्ञातुमिच्छेति उत्पत्तिस्थितिनाशकाले यदात्मतां न जहति भूतानि तद्ब्रह्मणो लक्षणमित्यर्थः। तटस्थलक्षणपरेयं श्रुतिः। यः परमेश्वरः। पूर्वं सर्गादौ। विदधाति ससर्ज। तस्मै ब्रह्मणे। प्रहिणोति प्रददौ। तं देवं द्योतमानमात्मबुद्धिप्रकाशं स्वविषयां बुद्धिं प्रकाशयन्तं मुमुक्षुरहं शरणं प्रपद्ये मोक्षसिद्ध्यर्थमाश्रयं प्राप्नोमि। शरणपरेयं श्रुतिः। इत्युभे श्रुती, 'अजया चरतः' इत्यस्योदाहरणम्। 'अगजगदोकसाम्' इत्यस्योदाहरणं दर्शयति—य आत्मनीति। "य आत्मनि तिष्ठन्नात्मनोंतरोयमात्मा न वेद यस्यात्मा शरीरमात्मानमंतरोयमयत्येष त आत्मांतर्याम्यमृतः" इति। अंतर्यामिणं ब्रूहीत्युद्दालकेन मुनिना पृष्टः प्राह याज्ञवल्क्यः—आत्मपदेन जीवात्मा गृह्यते य आत्मनि जीवात्मनि तिष्ठन्नात्मनः सकाशादंतरः दूरस्थः आत्मा यं न वेद न जानाति कुतः यस्य शरीरमात्मा भवति य आत्मानमंतरोऽभ्यंतरः सन् यमयति नियमयति एष ते तवांतर्याम्यात्माऽमृत इत्यर्थः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा "यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योंतरः यं सर्वाणि भूतानि न विदुः यस्य सर्वाणि भूतानि शरीरम् यः सर्वाणि भूतान्यंतरो यमयत्येष त आत्मान्तर्याम्यमृतः" इति । नियमनलीलापरेयं श्रुतिरपि ज्ञेया । 'आत्मना चरतः' इत्यस्योदाहरणमाह—सत्यमिति । व्याख्यातचरम् । स्वरूपलक्षणपरेयं श्रुतिः । निगमकदंबः श्रुतिसमूहः । स्वामिश्लोकार्थः । अगजंगमानामाव्रातिमावरकाम् । निगमैर्गीतो गुणानामर्णवो यस्य स तथा तान् जीवान् अव रक्ष ॥ * ॥ **श्रीधरानुयायिनी**—ॐनमो विघ्नहर्त्रे । हे अजित कारुण्यात्स्वप्रभावमाविष्कुरु । आदरे हर्षे वा वीप्सा । यतस्त्वं वशीकृतमायोऽसि अजितत्वे हेतुः । तथा स्वरूपेणैव संप्राप्तसमस्तैश्वर्यः सर्वेषामंतर्यामी अत एव सर्वशक्त्युद्बोधकोऽसि । नन्वज्ञाननाशेऽपि 'भक्त्याहमेकया ग्राह्यः' इत्युक्त्या भक्तिं विना कथं मत्प्राप्तिरित्याशंक्याह—सर्वशक्त्युद्बोधकोऽसीति । यथा बुद्ध्यादीन्सृष्ट्वा जीवानां भोगादिशक्तीरुद्बोधयासि तथा ज्ञान योगभक्तीरपि त्वमेव कृपयोद्बोधयसीत्यर्थः । यद्वा—अगस्थिरजगदोकसां जगदाश्रयभूतानां ब्रह्मादीनामपि सृष्ट्याद्यखिलशक्त्यवबोधकेति । अतः स्वतोऽस्वतंत्राणां स्थावरजंगमजीवानामानंदाद्यावरणार्थमंगीकृतगुणां वेश्यावद्बो गिजीवजातवंचनचतुराम् । यद्वा—दोषैरज्ञानदुःखादिभिर्गृहीताः संवृता जीवगुणः सत्य ज्ञानानंदा यया तां त्वत्प्राप्तिप्रतिकूलामविद्यां नाशय,अतो गुणवत्या अपि हननमावश्यकमेवेत्याशयः।किञ्च—सृष्ट्यादौ मायया क्रीडन्तमपि वर्णयन् वस्तुतस्तु तात्पर्येण सत्यज्ञानानंदैकरसस्वरूपमेव त्वां जहदजहल्लक्षणया वेद' प्रतिपादयति सेवते वा । यथा—'गामानय' 'घटो भग्नः' इत्यादौ गोघटशब्दयोर्व्यक्ताविव गोत्वघटत्वजात्योरपि शक्तत्वेन गोत्वे आनयनस्य घटत्वे भग्नत्वस्यासंभवाद्व्यक्तावेव तात्पर्यावसानं तथा तत्त्वमस्यादिवाक्येषु श्रूयमाणस्य जीवेशयोरभेदस्यासंभवेनोपाधिभागत्यागेन शुद्धचिदानंद एव पर्यवसानम् । एवं मायोपहित एव प्रवृत्तस्य 'सत्यं ज्ञानमनंतम्' इत्यादे श्चासत्यजडसांतोपाधौ सत्यत्वज्ञानत्वानंतत्वासंभवेनोपाधिमपहाय शुद्ध एव पर्यवसानमिति भावः । यद्वा—क्वचित्सृष्ट्यादावजया प्रकृत्या आत्मना पुरुषरूपेण जीवेन च चरतो वर्तमानस्य तव वेदः अनुचरेत् त्वच्चित्तानुव र्तित्वेन विधिनिषेधरूपेण प्रवर्तेत प्रलयकाले तु स्तुतिरूपेणेत्यर्थः । तदा विधिनिषेधप्रयोजनाभावात् । तथा च, यस्माद्विधिनिषेधविषयो जीवस्तस्मात्सृष्टिं विधाय वेदैर्जीवान्बोधयित्वा तदुक्तानुष्ठानं संपाद्य स्वज्ञानमु त्पाद्य त्वं प्रसन्नः सन् जीवेषु पिशाचीवदाविष्टामजां जहीति प्रार्थना । अत्राचार्याः—"सर्वश्रुत्यर्थसंपन्नाञ्श्लोकान्सत्यवतीसुतः । एकैकशाखाश्रुत्यर्थाञ्जगौ सर्वोपलक्षणान् ॥ बबंध तान्भागवते प्रतिश्लोकं प्रतिश्रुति ।" इति ॥ ॥ * ॥ **विश्वनाथी**—पूर्वं बुद्धीन्द्रियेत्यादिना प्रणवस्य साक्षाद्भगवद्वाचित्वं दर्शयित्वा तद्विवृतिरूपाः श्रुतयश्चाष्टाविंशतिधा तत्र च याः सर्वाध्यक्षा महोपनिषदः सर्वश्रुतिसमन्वयार्थं श्रुत्यंतरानुदितातन्निरसनपूर्वक स्वरूपगुणनिर्देशेन तत्र चरन्ति प्रथमं ता एव बंदिजनोचितपरिहासपूर्वकं प्रथमं स्वमनोरथं निवेदयन्ति—जयजयेति । हे अजित मायाद्यनभिभूत । जयजय निजोत्कर्षमवश्यमाविष्कुरु । कथं वा न करोषीति वी प्सार्थः । केन प्रकारेण तमाहुः—अजां मायां जहि नाशय यथा पुनरेषा सृष्ट्यादौ प्रवृत्ता जीवान्न दुनुयादिति भावः । ननु—"विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । बंधमोक्षकरी आद्ये मायया मे विनिर्मिते ॥" इत्येकादशस्थमदुक्त्यनुसारेण विद्यालक्षणगुणांशेन कृपाविषयापि भवत्येषा तत्राहुः—दोष एव विषये गृहीतो गुणो यया ताम् । स्ववृत्तिरूपयैवाविद्यया जीवान्बद्ध्वा तद्रूपयैव विद्यया मोचयतीति गुणोप्यस्या दोष एव पर्य वस्यतीति । ननु मम जगद्वैभवहेतुभूताया अस्या हनने ममैव हानिः स्यात्तत्राहुः—त्वमसीति । आत्मना स्वरूपभूतेन परमानंदेनैव तदभिन्नयैव शक्त्येत्यर्थः । सम्यग्निरवशेषं प्राप्तपूर्णैश्वर्यादिरसि किं तुच्छया तयेति भावः । तथा च वक्ष्यते स्वामिभिः—नहि निरन्तराल्हादिसंविल्कामधेनुवृन्दपतेरजया कृत्यमस्तीति । भगवता देवर्षिणा चोक्तम्—'विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थम्' इत्यादि । ननु—मम तादृशस्वरूपशक्तेरस्तित्वे किं प्रमाणं तत्राहुः—अगेति । अगानि सर्वदा स्थिराणि वैकुण्ठादीनि जगन्ति चास्थिराणि ब्रह्माण्डानि ओकांसि येषां तेषां जीवानां या अखिला अप्राकृत्यः प्राकृत्यो वा शक्तयः सन्ति हे तदवबोधक तच्छक्ती नामपि शक्तित्वदायक तत्र प्रकृतेर्जडत्वात्तद्वृत्तीनां तत्तच्छक्तीनामपि तादृशत्वादुद्बोधे तव स्वरूपशक्तिश्चिद्रूपैव कारणं लभ्येतेति स्पष्टमेव । अप्राकृतीनां चिच्छक्तिवृत्तिनामप्युद्बोधस्तस्या एव स्यात्सर्वाश्रयत्वादिति च गम्यत एव चेति भावः । ननु—युक्तिमात्रज्ञातार्थाः साक्षिणो न भवन्ति किन्तु साक्षाद्द्रष्टार एव किञ्च—मन्निकटस्था अपि मत्तत्त्वं न जानन्ति किन्तु मत्सेवका एवेति नैतावता युष्मद्वचसि प्रामाण्यं तत्राहुः—ते क्वचिदिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृष्टिलीलायां पूर्वोक्तयाऽजया मायया पुरुषरूपेण चरन्तं क्वचिद्विशुद्धानंदलीलायामात्मना पूर्वोक्तया स्वरूपानंदशक्त्या स्वयं भगवदादिरूपेण चरन्तं त्वां निगमांऽस्मल्लक्षणो वेदकदम्बः अनुचरेत्सेवेत इति तस्मादनां जहि । तदेवं वस्तुतो श्रुतयो गुणवृत्तय एव नं भवन्ति किन्तु तन्निषेधार्थं तदनुवादिन्यः स्वरूपैश्वर्यादिमति भगवति तत्तदालम्बनेनैव साक्षाच्चरेयुः । तत्रापि अजितसंबोधनेन चरेयुरित्येव किं वक्तव्यं यासां श्रुती नामत्यन्तान्तरंगभूतेन तत्तन्नामरूपेण शब्दविशेषेण सोऽप्यभिमुखीक्रियत इति । अत्रानुचरेदिति । तत्रतत्र मूलं कारणं भक्तिरेवेति सिद्धान्तोपक्रमः । श्रुतयस्तु—"सत्यं ज्ञानमनंतं ब्रह्म" "विज्ञानमानंदं ब्रह्म" "न तस्य कार्यं करणञ्च विद्यते" इत्यादि "तमेव भान्तमनुभाति सर्वम्" इत्यादिकाः । "सर्वे वेदा यत्पदमामनन्ति" "यस्य देवे परा भक्तिः" इत्यादिकाश्च ज्ञेयाः (१) ॥ १४ ॥

नीलकण्ठी—तत्र तावत्प्रथमे श्लोके कृत्स्नशास्त्रार्थप्रदर्शनेन श्रुतयः शिष्यं संमुखयंतीत्याह—जयजयेत्यादि । जयत्यविद्यां शास्त्राचार्योपदेशादिति हे जय हे जीव त्वं जय उत्कर्षमाविष्कुरु । कथम्, अविद्यां जहि अनात्मनि देहादावात्मबुद्धिरूपामविद्यां नाशय । एतेन स्वाज्ञानाद्बंधः स्वज्ञानान्मोक्ष इत्युक्तम् । अत्र 'सैषा ह्युपनिषद्ब्राह्मी' 'श्रुतयो बोधयाञ्चक्रुः' 'आश्रुत्यात्मानुशासनम्' इत्युपक्रमपरामर्शोपसंहारेषु विद्यावतारदर्शनादविद्यावाञ्जीव एव संबोध्यः न तु तद्रहित ईश्वरः स्तव्यः स्तुतिफलस्य प्रार्थितवरदानादेरत्रादर्शनात् । तेन अगजगदोकसामजां जहीति व्यवहितान्वयकल्पनाक्लेशोऽपार्थ इति दिक् । नन्वैहिकामुष्मिकसुखहेतुरजा कुतो निहंतव्येत्याशंक्याह—अजितदोषगृभीतगुणाम् अनिर्जितरागादिदोषैरेव गृभीतो रमणीयतालक्षणो गुणो यस्यां सा तथा । वारवनितावद्रागिजनवञ्चनचतुरैषा हंतव्यैव नीरागैरिति भावः । गृभीतः कल्पितः छान्दसं हस्य भत्वम् । नन्वजयैवाहं जितः कथं तां नाशयेयमत आह—त्वमिति । यद्यस्माद्धेतोस्त्वमात्मना स्वरूपेणैव प्राप्तकृत्स्नैश्वर्यादिषट्कोऽसि, अतस्तव तन्नाशनमीषत्करमित्यर्थः । "ऐश्वर्यस्य समग्रस्य ज्ञानस्य यशसः श्रियः वैराग्यस्य च धर्मस्य षण्णां भग इतींगना ॥" इति ऐश्वर्यादिषट्कम् । एवं तत्त्वमसीति शास्त्रान्नेश्वरादन्यस्त्वमित्युक्तं शुक्तेरिव रजतम् । सांख्यास्तु—जीव एव सत्त्वोत्कर्षवशात्समवरुद्धसमस्तभगो भवतीत्याहुस्तन्निरासायात्मने त्युक्तम् । ऐश्वर्यस्य परायत्तत्वे स्वतःसिद्धैश्वर्यप्रतिपादकं 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म' इत्यादिवाक्यं व्याकुप्येतैवेति भावः।यत्पुनः सांख्यो ब्रवीति 'पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्' इति 'जडं प्रधानं पुरुषस्य भोगापवर्गौ साधयितुं स्वत एव प्रवर्तते' इति तन्न । चेतनानधिष्ठिते जडे प्रवृत्त्यदर्शनादित्याह—अगजगतां स्थावरजंगमानाम् ओकसां क्षेत्राणाम् 'इदं शरीरं कौन्तेय क्षेत्रम्' इत्यादि "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः । एतत्क्षेत्रम्" इत्युक्तरूपाणाम् अखिलाः प्राणनादिशक्तयः तासामवबोधक एतच्च "येन प्राणः प्राणीयते" "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनंदो न स्यात्" इत्यादिश्रुतिप्रसिद्धम् । अत्रापि 'योऽतः प्रविश्य मम वाचमिमां प्रसुप्तां सञ्जीवयति' इत्युक्तम् । यदा तु अगजगदोकसामखिलशक्त्यवबोधक जयजयेति संबंधः क्रियते,तदा जयजयेति द्विरुक्तिरादरार्था।ननु यद्यहमीश्वरस्तर्हि कथं ब्राह्मणो यजेतेति मम नियोज्यत्वमित्याशंक्य शुद्धचिदात्मनस्तव द्वयमपि तन्मृषेत्याह—त इति । ते चरत इति कर्मणि षष्ठ्यौ । त्वं क्वचित्काले सुप्तिप्रलयादेरन्यत्राजया मायया जीवेशावाभासेन करोषि माया चाविद्या च स्वयमेव भवतीति सिद्धरूपद्वयेन शुद्धाशुद्धसत्त्वप्रधानेन त्वदुपाधितां गत्वा तवेश्वरत्वं जीवत्वं चापादयन्त्या सह चरन्तं शास्तृशास्यत्वादिधर्ममनुसरन्तं निगमः निश्चितं यथाभूतमर्थं गमयन्कर्मोपास्तिपरो वेदोऽनुचरति । मायिकाविद्यके तवैश्वर्यब्राह्मण्यादिके अनुवदत्येव न प्रतिपादयतीत्यर्थः । आत्मना चानुपाधिरूपेणानुचरन्तं कारणप्रपञ्चं ग्रसन्तं रज्जुमिव सर्पं "सत्यं ज्ञानमनंतं ब्रह्म" इत्यादिनिगमः अनृतजडपरिच्छिन्नत्वादिव्यावर्तनेनानुचरेत् लक्षणया आवेदयेन्न साक्षात् । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति श्रुतेः । अत्र क्वचिदिति जीवेशयोः स्वप्नेंद्रजालादिवत्कादाचित्कजीवितव्येशितव्यसापेक्षत्वेन मृषात्वं तदनुवादिवेदस्य च स्वप्नादिदृष्टार्थानुवादिवाक्यस्येव नाप्रामाण्यमतो न निगमत्वव्याहतिः । एवं जीवेशोपाध्योर्बाधे यच्छिष्टमनुपाधि तज्ज्ञानादजानाश इति च दर्शितम् (१) ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बृहदुपलब्धमेतदवयंत्यवशेषतया यत उदयास्तमयौ विकृतेर्मृदिवाऽविकृतात् ॥
अत ऋषयो दधुस्त्वयि मनोवचनाचरितं कथमयथा भवंति भुवि दत्तपदानि नृणाम् ॥ २ ॥ १९ ॥

ननु कथं मामेवं प्रतिपादयंति यतः "इंद्रो यातोऽवसितस्य राजा" इत्यादिभिः इंद्रो यातो जंगमस्यावसितस्य स्थावरस्य च राजेति प्रतिपाद्यते तथा "अग्निर्मूर्धा दिवः" इत्यादिभिश्चैवंभूतत्वेनाग्न्यादयः प्रतिपाद्यंते तत्राह । बृहदुपलब्धमेतदिति । अयमर्थः । एतदुपलब्धं दृष्टमिंद्रादि सर्वं बृहद्ब्रह्म त्वमित्येवावयंति जानंति। कथम् । बृहत एवावशेषतयाऽवशिष्यमाणत्वेन। कुतः। यतो बृहतः सर्वस्योदयास्तमयावुत्पत्तिलयौ सर्वोपादानत्वात् तर्हि किं विकारित्वं बृहतः। न। अविकृतात्। विवर्ताधिष्ठानत्वेनाविकारादित्यर्थः। वाशब्द उपमार्थः। यथा घटादेर्विकृतेर्मृदि उदयास्तमयौ तद्वत् । " वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ सर्वं खल्विदं ब्रह्म" इत्यादिभिस्तथा प्रतिपादनादित्यर्थः । अतः कारणादृषयो मंत्रास्तद्द्रष्टारो वा त्वय्येव मनोवचनाचरितं दधुः मनसा आचरितं तात्पर्यं वचनाचरितमभिधानं च धृतवंतः । न पृथग्विकारेष्वित्यर्थः । अत्र निदर्शनं कथमयथेति । नृणां भूचराणां यत्र कुत्रापि दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवंत्यदत्तानि भवंति । अतो यथा मृत्पाषाणेष्टकादिषु दत्तानि पदानि भुवं न व्यभि

भावार्थदीपिकाप्रकाशः वंशीधरी—सर्वश्रुतिप्रतिपाद्यत्वमाक्षिपति—नन्विति । अत्र श्रुतयः यातो जंगमस्य, 'या—प्रापणे' इत्यस्य शतृप्रत्ययान्तं रूपम् । अवसितस्य स्थावरस्य, अवपूर्व 'षिञ्—बन्धने' अस्य निष्ठान्तं रूपम् । तथा—"अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।अपाꣳरेताꣳसि जिन्वति" इति अयं परावररूपेणावस्थितोऽग्निर्दिवो मूर्धा, अहश्च सूर्यात्मना द्युलोकस्य मूर्धा भवति, ककुभां दिशां पतिः पालकः । भस्य तच्छांदसः । तथा पृथिव्याः पतिः अपां पयसां रेतांसि वीर्याणि जृण्वति उद्रिक्तभावं नयति "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः" इति स्मृतेः । जिन्वतीति पाठस्तु शाखाभेदेन । तथा "सूर्य आत्मा जगतस्तस्थुषश्च" इति "सोमोऽस्माकं ब्राह्मणानाꣳराजा" इत्यादिभिश्चैवंभूतत्वेनेश्वरत्वेन । भेदप्रतिपादनपरेयं श्रुतिः । अत्राशयमाह—अयमर्थ इति । कथं जानंति । बृहतो । ब्रह्मणः अत्र हेतुमाशकते—कुत इति । तर्हि सर्वोपादानत्वेनेत्याह—इत्यर्थ इति—अतात्त्विकान्यथाभावो विवर्तस्तदधिष्ठानत्वेन यथा रज्जुविवर्तो भुजंगस्तदधिष्ठानभूता रज्जुर्निर्विकारा तथा ब्रह्मविवर्तजगतोऽधिष्ठानं ब्रह्मापि निर्विकारमेव जगत्प्रतीतेस्तत्रातात्त्विकत्वादिति भावः । घटादेरिहादिना शरावादिग्रहः । वाचारंभणं वचनालंबनम् । वस्तुतस्तु सर्वं नामधेयमेव केवलं न विकारो नाम वस्त्वन्तरमस्ति परमार्थतस्तु मृत्तिकेत्येव सत्यं तत्रोत्पत्तिप्रलयत्वात् । तथा कार्यस्य प्रपञ्चस्य परमकारणब्रह्ममात्रत्वं बोधयति—सर्वं खल्विति । इदं सर्वं जगत् नामरूपविकृतं प्रत्यक्षादिविषयं ब्रह्मैव भवति कथं तज्जलान् तस्माद्ब्रह्मणो जातं तज्जम्, तस्मिन्ब्रह्मणि लीयत इति तल्लम्, तस्मिन्नेव स्थितिकालेऽनिति प्राणिति चेष्टत इति तदन् तज्जलानिति जगदित्यस्य विशेषणम् । यस्मात्त्रिष्वपि कालेषु ब्रह्मतयाऽविशिष्टं तद्व्यतिरिक्तं किञ्चिन्नास्ति, तस्मात्सर्वमिदं ब्रह्मातः शान्तः रागद्वेषादिरहितः उपासीत वाचारंभणं नरदेवतिर्यगादिनामधेयं परमकारणं ब्रह्म सत्यमिति ज्ञात्वोपासनां कुर्वीत अभेदोपासनपरेयं श्रुतिरित्यादिना गृहीताः । तथा प्रतिपादनात्सर्वोपादानत्वेन कथनात् । इत्यर्थ इति—परमकारणप्रतिपादन एव वाचारंभणादीनां तात्पर्यं दृष्टान्ततयेति भावः । यतस्त्वमेव सर्वकारणमतो हेतोः । तद्द्रष्टारो मंत्रद्रष्टारः । इत्यर्थ इति—'सर्वे पदा हस्तिपदे निमग्नाः' इति न्यायेन पृथक्पृथग्न ध्यायन्तीति भावः । अत्र सर्वाधिष्ठानत्वे निदर्शनं दृष्टान्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरंति । तथा यत्किमपि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयंतीत्यर्थः द्रुहिणवह्निरवींद्रमुखामरं जगदिदं न भवेत्पृथगुत्थितम् ॥ बहुमुखै रपि मंत्रगणैरजस्त्वमुरुमूर्तिरतो विनिगद्यसे ॥ २ ॥ १५ ॥

यतोऽदत्तानि स्युरतो हेतोः । इत्यर्थ इति–परमकारणाभिन्नत्वात्सर्वस्येति भावः । द्रुहिणो ब्रह्मा द्रुहिणाद्यमरा एवेदं जगत् पृथग्नोत्थितं भवेत् । किन्तु त्वत्त एव उद्देश्यविधेयभावत्वादेकवचनम् । अत एककारणकत्वात् बहुमुखैरग्नींद्रादिवर्णनरूपैरजोऽपि बहुमूर्तिः ब्रह्मेन्द्रादिरूपेण प्रतिपाद्यस इत्यर्थः ॥ * ॥ **श्रीधरानुयायिनी**–इन्द्रादीनामपि वेदप्रतिपाद्यत्वादीश्वरत्वमाशंक्याहुः घटादेर्मृत्तिकायामिवेन्द्रादिरूपप्रपञ्चस्य त्वयि विवर्ताधिष्ठान एवोत्पत्तिप्रलयौ भवतः । "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव । " इति श्रीगीतोक्तेः इत्यत ईश्वरत्वेन प्रतीयमाना अपि इंद्रादयो ब्रह्म त्वमेवेति तत्त्वविदो जानन्ति यतोऽधिकृताद्ब्रह्मणः सकाशात्सर्वस्योदयास्तमयौ भवतः । वाकार इवार्थे । मृदि विकृतेर्घटादेरिवेत्यन्वयः । यद्वा–मृद इवेति च्छेदः । आर्षत्वात्पञ्चम्यर्थे प्रथमा । यद्वा–बृहदिति इतइदमधिकमितोऽपीदमधिकमित्यान्विष्य विचार्य सर्वाधिक्येनावशेषतया त्वामेव बृहत्सर्वतोऽधिकं जानन्ति विज्ञा इत्यर्थः । ज्ञानेनेंद्रादिरूपप्रपञ्चे बाधिते ब्रह्मणस्तवैव घटादिनाशे मृत्तिकाया इवावशिष्यमाणत्वात् । यद्वा–यन्मनोवाचामगोचरस्यापि तव वर्णनं सेवनं वा तदेतदतिदुर्लभं बृहत् महत्फलमद्यास्माभिरुपलब्धम्, तत्र हेतुः–अवयन्तीति । अत्र यतस्त्वामित्यादिरर्थस्तुल्य एव यतो वेदवचनानामासमन्ताच्चरितं तात्पर्येण पर्यवसानं त्वय्येव । अतः, ऋषयस्त्वयि मनो धृतवन्तः । अत्र दृष्टान्तमाहुः–कथमिति । नृणां पाषाणेष्टिकादिरूपायां भुवि दत्तानि पदानि कथं भुव्यदत्तानि भवन्ति, पाषाणादीनामपि भूविकारत्वात् । एवं यत्किमपींद्रादिविकारजातमपि वदतां वेदानां तात्पर्यं त्वय्येवेत्यर्थः ॥*॥ **तोषिणी**–तदेवमस्वरूपगुणानिरसनपूर्वकसाक्षात्स्वरूपगुणनिर्देशेनान्यश्रुतिश्रव्यपक्षपातशून्यासु श्रुतिषु स्तुवतीषु तत्तत्पक्षपातिन्यः काश्चिदन्यास्तदविवेकेन तन्निर्देशिकाः श्रुतयः सलज्जा इव स्वेषां स्वापेक्षणीयानाञ्च तत्रैव लक्षणामयमपि चरणं साक्षादेव घटायितुं स्तुवन्ति–बृहदिति । उपलक्षकं दृष्टान्तमिदं यत्किञ्चिदेतज्जगत्सर्वं बृहद्ब्रह्मस्वरूपस्त्वमेवेत्यर्थः । तद्व्यतिरिक्तस्याप्यस्तित्वे बृहत्त्वहानेरिति भावः । ननु बृहज्जगतोर्वैलक्षण्यं महदेव सत्यं तथाप्येवं घटेतेत्याहुः–अवशेषतया प्रलये तस्यैवावशिष्यमाणत्वेन तदनतिरिक्तत्वप्राप्तेः । तत्र दृष्टान्तः । विकृतेर्घटादेः कारणं मृदेवेति । ननु घटादेरुत्पत्त्यादिकं मृदो दृश्यते न तु जगतो बृहतः, तत्राहुः–बृहतः सकाशात् , उदयास्तमयौ जगतो वदन्ति श्रुतिविशेषाः । कथम्, तर्हि तस्या इव तस्यापि विकारित्वं नहिनहीत्याहुः–अविकृताद्विकारशून्यादेव तस्मात्तौ वदन्ति । श्रुतेस्तु शब्दमूलत्वादिति न्यायेन चिंतामण्यादिदृष्टान्तेन च श्रुतिभिस्तथैवाचिन्त्यशक्तितया तत्प्रतिपादनादिति भावः । विवक्षितमाहुः–अत इति । अस्मादेव हेतोर्ऋषयो वेदाः केचिदस्मदनुवार्तिनस्तज्जगदेकदेशस्तावकइवापि तथास्मद्विधास्तच्छुद्धस्वरूपगुणाविवेकिन इवापि त्वय्येव बृहति मनोवचनाचरितं तात्पर्याभिधारूपं धृतवन्तः । तत्र तात्पर्यं सर्वस्य कार्यस्य कारणपर्यवसायित्वे स्थिते तन्निर्देशस्यापि तत्पर्यवसानात् । अभिधा च परमकारणं त्वां विना तेषामत्यंताभावादिति भावः । तदेव स्पष्टयितुमर्थान्तरन्यासमाहुः–कथमिति । पदानि पदार्था घटादिवस्तूनि तस्मात्त्वामेकमुद्दिश्य प्रवृत्तास्वस्मास्वज्ञानामेवान्यचारित्वं भाति न तु विज्ञानामिति भावः । अत्र मुख्याः श्रुतयः सर्वं खल्विदं ब्रह्मेत्यादिकाः । अथ तत्पक्षदृष्ट्या " इंद्रो यातोऽवसितस्य राजा " इत्यादिकास्तास्त्वेव दृष्टान्तदार्शिकाः, " वाचारंभणं विकारः " इत्यादिकाः, अत्रेतिशब्देन सर्वमेव वाक्यं परामृश्यते न तु मृत्तिकैव तस्यैव मुख्यत्वात् । विनापीति विवक्षितार्थसिद्धेः । तस्माद्वाचारभ्यते प्राकृतेन्द्रियैर्यत्किंचिद्घटादिकं व्यवहारास्पदीक्रियते तत्सर्वं विकारसंज्ञं मृत्तिका तदनन्यभूतमित्यर्थः । इत्येव सत्यं न तु गौतममतादिवत्ततोभिन्नमित्यर्थः । 'तदनन्यत्वमारंभणशब्दादिभ्यः' इति न्यायात् ॥*॥ **विश्वनाथस्तु**–सत्यशब्देन कारणमेव व्याख्यातम् । तदुक्तं भगवता–"यदुपादाय पूर्वस्तु भावो विकुरुते परम् । आदिरन्तो यदा यस्य तत्सत्यमभिधीयते ॥ " इति । ततश्चास्याः श्रुतेरयमर्थः–आरंभणं विकारः कार्यं भवति वाचा यस्य नामधेयं घटादिकं भवति मृत्तिकेत्येव सत्यं कारणं भवतीति (२)॥ १९ ॥

नीलकण्ठी–यद्ज्ञानादजानाशस्तस्य ब्रह्मणो लक्षणमाह–बृहदिति । ऋषय इत्युत्तरार्धादपकृष्यते । ऋषयो मंत्रद्रष्टारः स्वदृष्टमंत्रेभ्यः " पुरुष एवेदꣳसर्वम् " इत्यादिभ्यः एतदुपलब्धं प्रत्यक्षाद्यवगतम्, नामरूपात्मकं सर्वं बृहद्ब्रह्मैवेत्यवयन्ति जानन्ति । किं प्रपञ्च एव ब्रह्म नेत्याह–अवशेषतयेति । रजतं शुक्तिरितिवदिदं ब्रह्मेति सामानाधिकरण्यमध्यस्तप्रपञ्चबाधावधिभूतं ब्रह्मावशेषयन्ति । यथोक्तम्–" योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव । ब्रह्मास्मीतिधियाशेषा त्वंबुद्धिर्विनिवर्तते ॥ " इति । एवं जगद्विवर्ताधिष्ठानत्वं ब्रह्मणो लक्षणं दार्शितम् । कुत एतदित्याशंक्योभयविधश्रुतिदर्शनादित्याह–यत इति । " यतो वा इमानि भूतानि जायन्ते, येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथाऽमृताब्धिमवगाह्य तपांसि जहुः ॥
किमुत पुनः स्वधामविधुताशयकालगुणाः परम भंजंति ये पदमजस्रसुखानुभवम् ॥ ३ ॥ १६ ॥

त्वमेव सर्वनिगमगोचर इति सतां प्रवृत्त्या द्रढयति । इति तवेति । त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा भोः त्र्यधिपते त्रिगुणमायामृगीनर्तक सूरयो

जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेति, यथोर्णनाभिः सृजते गृह्णते च, यथा पृथिव्यामोषधयः संभवन्ति, यथा सतः पुरुषात्केशलोमानि, तथाक्षरात्संभवतीह विश्वम्" इत्याद्याः श्रुतयस्तूर्णनाभिदृष्टान्तेन ब्रह्मैव स्वप्राधान्येन चोपाधिभूतमायाप्राधान्येन च क्रमाज्जगतो निमित्तमुपादानं चेत्याहुः । तत्रोपादानांशे दृष्टान्तः–मृदिवेति । यथा मृद्विकृताः घटशरावो दंचनाद्याः लोष्टपांसुपिंडाद्याश्च मृदित्येवावयन्ति । एवं जगदपि ब्रह्मेत्यवयन्ति । किं मृद्वद्विक्रियते ब्रह्म नेत्याह–अविकृतादिति । "अजायमानो बहुधा विजायते" इत्यविक्रियमाणस्यैव बहुभवनश्रवणान्न विक्रियत इत्यर्थः । एवं ब्रह्मण उपादानत्वाविक्रियत्वश्रुतिभ्यां सिद्धं जगद्विवर्ताधिष्ठानत्वम्, अन्यथा श्रुतिद्वयविरोधपरिहारासंभवात् । 'जगतश्च ज्ञाने द्वैतं न विद्यते' इति ज्ञाननिवर्त्यत्वश्रुत्यर्थापत्त्या सिद्धं मिथ्यात्वम् । नन्वेवं मृदिवेति विषमो दृष्टान्तः, नहि मृद्विकाराणां रज्जुभुजङ्गवद्बाध्यतास्ति । न । "वाचारंभणं विकारो नामधेयम्" इति तेषामप्यनित्यत्वश्रवणात् । अयं भावः–पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः, स च नित्यपरिणामिनि प्रधाने पाकजरूपाद्याश्रये पार्थिवपरमाणौ चास्ति, अतस्तावपि विकारत्वादनृतौ तेन परमाण्वादिप्रासादान्तेषु मिथो व्यावर्तमानेषु मृद्विकारेषु यत्कुसुमसूत्रवदनुस्यूतं मृत्सामान्यं तदेव सत्यं "मृत्तिकेत्येव सत्यम्" इति श्रुतेः । तदेव चास्माकमात्मा । यथाहुः शाब्दिकाः–"संबंधिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ।" इति । व्यावहारिकत्वेन बाधाभावेऽपि श्रुतियुक्तिभ्यां मृद्विकाराणामपि मिथ्यात्वं सिद्धमिति न दृष्टान्तवैषम्यमिति । ननु–"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥" इति मंत्रवर्णात्सांख्याः सुखदुःखमोहात्मकस्य जगतस्तादृशीप्रकृतिरुपादानं बंधमोक्षादिव्यवस्थार्थं पुरुषाश्च बहव इत्याहुस्तत्कथं ब्रह्मण उपादानत्वं जगतश्च मिथ्यात्वमित्यत आह–अत इति । यतो वचनाचरितं त्वयि अतः ऋषयस्त्वयि मनो दधुरिति योजना । वचनानां वेदान्तानाम् आसमन्ताच्चरितं तात्पर्येण पर्यवसानं त्वयि, अतो न प्रधानादेरुपादानत्वम् 'ईक्षतेर्नाशब्दम्' इति न्यायादित्यर्थः । तथाहि छान्दोग्येतावत्–"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा श्वेतकेतो" इत्युपक्रमोपसंहारयोरैकरूप्यम् ऐतदात्म्यमित्यादेर्नवकृत्वः–श्रवणमभ्यासः मानान्तरानवगतत्वमपूर्वता उत्तमादेशम प्राक्ष्मः, येनाश्रुतं श्रुतं भवतीत्यादिना एकविज्ञानात्सर्वविज्ञानं फलं न्यग्रोधफलमत आहरेति बीजे वटस्येव सूक्ष्मे स्थूलस्य सद्भावः लवणमेतदुदकेवधायेति लवणोदकवत्कारणे कार्यलयश्च न्यग्रोधफलाहरणाद्यर्थवादैर्दर्शितः । यथा–"सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादित्येकविज्ञानात्सर्वविज्ञाने उपपत्तिश्चेति षड्विधतात्पर्यलिंगैरद्वैतं ब्रह्म प्रतिपाद्यते । " तथा आथर्वणे–"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इत्युपक्रम्य ब्रह्मैवेदममृतं पुरस्तादित्युपसंहृतम् । एवमजामंत्रेऽतितेजोबन्नरूपैवाजा प्रतिपत्तव्या । छांदोग्ये यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रूयमाणानामेव रोहितादीनां तत्रापि प्रत्यभिज्ञानात् । न च सुखदुःखमोहात्मत्वं घटादेर्घटते सुखादीनामन्तःकरणधर्मत्वात् । बंधमोक्षव्यवस्थाया अपि वक्ष्यमाणविधया सिद्धेर्न चेतनबहुत्वमभ्युपेतव्यमिति दिक् । ननु ब्रह्मण्यध्यस्तप्रपञ्चस्यान्यत्र सत्त्वं वाच्यम् अत्यंतासतो गगनकुसुमादेरनध्यासादित्याशंक्य दृष्टान्तमुखेनैव परिहरति–कथमिति । भुवीत्यलुक्समासः । नृणां भुवि दत्तानि पदानि कथमयथा भुव्यदत्तानि भवन्ति न कथंचित् । एवं ब्रह्मण्यध्यस्तस्य प्रपञ्चस्य "नेह नानास्ति किञ्चन" इति ब्रह्मण्येव निषिद्धस्यान्यत्र सत्त्वं कथं स्यादित्यर्थः । एवं चानादिभ्रमतत्संस्कारपरंपरयाऽध्यासोपपत्तिरिति भावः (२) ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धिं सकलजनवृंजिननिरसनहेतुं कीर्तिसुधासिंधुमवगाह्य निषेव्य तपांसि तपंतीति तपांसि पापानि दुःखानि वा जहुस्त्यक्तवंतः। त्वदीयकथामात्रेण यदा पापत्यागस्तदा किमु वक्तव्यं ये पुनः स्वधामविधुताशयकालगुणाः । स्वधाम्ना स्वरूपस्फुरणेनैव विधुतास्त्यक्ता आशयगुणा अंतःकरणधर्मा रागादयः कालगुणा जरादयश्च यैस्ते तथा हे परम तवाजस्रसुखानुभवमखंडानंदानुभवं पदं स्वरूपं भजंति सेवंते तथाभूता दुःखानि त्यजंतीति । "तद्यथा पुष्करपलाश आपो न श्लिष्यंते एवमेवंविदि पापं कर्म न श्लिष्यते ॥ न कर्मणा लिप्यते पापकेन । तत्सुकृतदुष्कृते विधुनुते ॥ एतꣳह वाव न तपति॥ किमहꣳसाधु नाकरवम् । किमहं पापमकरवम्" इत्यादिश्रुतेरित्यर्थः ॥ सकलवेदगणेरितसद्गुणस्त्वमिति सर्वमनीषिजना रताः ॥ त्वयि सुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमाः ॥ ३ ॥ १६ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—त्वमेव सर्ववेदप्रतिपाद्य इति । तद्यथा दर्शयति । अत्र श्रुतिः—"श्रृणु तस्य ब्रह्मणो माहात्म्यम्" इत्युपकोशलं प्रति जाबालस्य बचनम्।यथा पुष्करपलाश इति । यथा पुष्करपलाशे पद्मपत्रे आपो जलानि न श्लिष्यन्तिं न लगन्ति एवमेवंविदि यथोक्तब्रह्मविदि पापं कर्म न श्लिष्यते । तन्महिमानमाह—पापेन धर्माधर्मलक्षणेन कर्मणा न लिप्यते संबध्यते संसारहेतुत्वादुभयमेव पापपुण्ययोः परिपाकं ज्ञानेन परित्यजतीत्यर्थः । ह—वाव—शब्दाववधारणे । आसन्नमरणकालेऽविदुषां नरकपातादिभयं भवति तद्भयमेनं यथोक्तमात्मविदं न तपते नोद्वेजयति। किं तद्भयं तदाह—किं कस्मात्साधु शोभनं कर्म अहं नाकरवं न कृतवानस्मि, किं कस्मात्पापं निषिद्धं कर्माकरवमित्यादिभयम् एनं न तपतीति । भक्तिस्त्रिधा कर्ममयी ज्ञानमयी प्रेममयीति । ज्ञानमयीभक्तिपरेयं श्रुतिः । स्मृतिश्च—"समस्ततत्त्वांतरसंगतोऽपि सच्चिन्मयश्रेष्ठयिता विशुद्धः । षड्डूर्मिभावैर्गुणजैर्विकारैर्न भिद्यते वार्भिरिवाब्जपत्रम् ॥" इति स्वामिचरणाः । सकलेति । सकलवेदगणैरीरिता उक्ताः सद्गुणा यस्य स त्वम् इति हेतोर्हे सुभद्र सर्वे च ते मनीषिजना विवेकिनः रता अनुरागयुक्ता भवन्ति तवेति गुणश्रवणादिभिः पदस्मरणेनोभयत्र संबध्यते । क्लमो दुःखम् ॥ * ॥ **श्रीधरानुयायिनी**—त्वमेव सर्ववेदगोचर इति सतां प्रवृत्तिं द्रढयति—इतीति । हे त्रिगुणमायामृगीनर्तक सर्वकारणत्वेन परमार्थसत्यस्य तव या सर्वजीवपापनाशिकाऽमृतसमुद्रात्मककीर्तिरूपा कथा तच्छ्रवणमात्रेणैव यदा सामान्यविवेकिनां परोक्षज्ञानवतां संतापकपापदुःखहानिस्तदा त्वदीयस्वरूपस्फुरणेन हेतुना रागद्वेषादिभिरन्तःकरणधर्मैर्जरामरणादिभिः कालधर्मैश्च रहितानां त्वदीयाखंडानन्दानुभववतामपरोक्षज्ञानवतामनन्यभक्तानां सर्वपापदुःखहानिरिति किमाश्चर्यम् । यद्वा—पदं त्वच्चरणारविंदं तद्विशेषणमजस्रसुखस्यानुभवो यस्मादिति ॥ * ॥**विश्वनाथी**—अथ शुद्धलीलातात्पर्यं तेन तत्रैव केवलं चरन्त्यः श्रुतयस्तदेवमासां सर्वासां तत्रैव तात्पर्यं श्रुत्वा लब्धसमयाः स्तुवन्ति—इतीति । हे त्र्यधिपते ऊर्ध्वाधोमध्यवर्तमानानां सर्वेषामधीश्वर यत एवं सर्वासामेव श्रुतीनां त्वामेव प्रतिपादयितुं तत्तद्विचारप्रयास इति हेतोस्तं परित्यज्य सूरयो विवेकिनः अखिलमलस्य वासनापर्यन्तकर्मदोषस्य निरसनीया कथा सैवामृताब्धिः अपारपरमानंदः तव तमवगाह्याविश्य तपांसि सर्वसांसारिकदुःखानि जहुः । तदेवं सति हे परम हे सर्वोत्कृष्ट किमुत वक्तव्यं ये पुनः स्वधामविधुताशयकालगुणा आत्मारामतया जीवन्मुक्ता अपि अजस्रसुखानुभवं प्रतिक्षणं सुखानुभवोल्लासरूपपदं त्वच्चरणारविन्दं भजन्ति ते तमवगाह्य तानि जहुरिति । अपि तु तत्सुखेनात्मारामतासुखावेशमपि जहुरित्यर्थः । तदेवं स्वाभाविक एवातिशयित एव च लीलाप्रतिपादितानां श्रुतीनां भगवत्संबंधो विवक्षितः । अन्यथा तत्तन्नस्यादिति । अत्र मुख्याः श्रुतयः "नैवाभ्यसेद्बहूञ्शब्दान्वाचो विग्लापनं हि तत्" "यस्य नाम महद्यशः" "विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि" इत्यादिकाः । कमिति क इत्यर्थः । प्रवोचमित्यडागमाभावश्छान्दसः, प्रकर्षेण वदेदित्यर्थः । अथ तत्पक्षस्थाः "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनश्च" इत्याद्या ज्ञेयाः । नानाश्रुतीनां सर्वोत्तमत्वञ्च "यस्यां न मे पावनमंग कर्म सृष्टिस्थितिप्राणनिरोधमस्य । लीलावतारेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः ॥" इत्येकादशात् । सृष्ट्याद्यर्थं कर्म, साक्षादीक्षणादिलीलेत्यर्थः (३) ॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृतय इव श्वसंत्यसुभृतो यदि तेऽनुविधा महदहमादयोंऽडमसृजन्यदनुग्रहतः ॥
पुरुषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु यः सदसतः परं त्वमथ यदेत्रष्ववशेषमृतम् ॥ ४ ॥ १७ ॥

" असुर्या नाम ते लोका अंधेन तमसा वृताः ॥ तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः" तथा " न चेदवेदीन्महती विनष्टिः ॥ ये तद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवोपयंति " इत्याद्याः श्रुतयः पूर्वश्लोकोक्तोभयविधभजनहीनान्निंदंति । दृतय इवेति । असुभृतो नरा यदि ते अनुविधा अनु विदधतीत्यनुविधा अनुवर्तिनो भक्ता इति यावत् । तर्हि श्वसंति जीवंति सफलजीवना भवंति । इतरथा दृतय इव भस्त्रा इव । वृथाश्वासा इत्यर्थः । नन्वभक्तानामपि कामादि

नीलकंठी–ऋषयस्त्वयि मनो दधुरित्युक्तं तत्र मनःप्रणिधानस्याविक्षेपेण सिद्ध्यर्थम् "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" "वेदान्तान्विधिवच्छ्रुत्वा सन्न्यसेदनृणो द्विजः" इति श्रुतिस्मृतिप्रसिद्धं विविदिषासंन्या समाह–इति तव सूरय इति । हे त्र्यधिपते इति । इत्थमुक्तप्रकारेण तव कथा वेदान्तश्रवणं सैवामृतसाधनत्वा दुरवगाहत्वाच्चामृताब्धिस्तम् अवगाह्य उपक्रमादितात्पर्यलिंगैः पर्यालोच्य सूरयः पंडिता भूत्वा, तपांसि तपन्तीति तपांसि एषणा जहुस्त्यक्तवन्तः " तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः " वेदानिमं लोकममुञ्च परित्यज्यात्मानमन्विच्छेदित्यादिवचनेभ्यः हे त्र्यधिपते हे अखिललोकमलक्षपणेति संबोधनद्वयेन त्रयाणामाश्रमाणां कर्मफलप्रदातृत्वेनाधिपतिः अत एवाखिललोकमलक्षपणः । "त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति । प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः, सर्वे एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति " इति श्रुतेः । आश्रमत्रयोचितकर्मणा शुद्धसत्त्वः संपन्नात्मविविदिषः संन्यासेऽधिक्रियते इति दर्शितम् । विविदिषवः संन्यस्यन्तीत्युक्त्वा विदुषां संन्यसनं कैमुतिकन्यायसिद्धमित्याह–किमुतेति । स्वधाम्ना स्वरूपप्रकाशेन विधुता रज्जुभुजंगवद्बाधिता आशयो हृदयग्रंथिः, कालो मृत्युः, गुणाः सुखदुःखमोक्षात्मकाः सत्त्वरजस्तमःसंज्ञास्तन्मयी मूलाविद्या च यैस्ते । तथा–" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥" "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते । " इत्यादिश्रुतिभ्यः कृतकृत्याः पुरुषधौरेयाः याज्ञवल्क्यादयः । हे परम अजस्रसुखानुभवम् अखंडानंदसंविद्रूपं पदं पदनीयं तत्त्वं ये भजन्ति समाधिना ते संन्यस्यन्तीति किमु वक्तव्यम् । सोऽयं विद्वत्संन्यासः " एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति " इत्यादि श्रुतिसिद्धः । तत्र पूर्वार्धे साधनभूतो विविदिषासंन्यास उक्तः उत्तरार्धे फलभूतो विद्वत्संन्यास इति विवेकः (३) ॥ १६ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–उभयविधभजनं सगुणनिर्गुणभजनं तद्धीनान् श्रुतयो निंदन्ति । तथाहि–जनकं याज्ञवल्क्यः । असुर्या इति । भगवद्विमुखाः सर्वे एवासुराः ते हि श्रीमुखेनैवोक्ताः–" अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ कर्शयन्तः शरीरस्थं भूतग्राममचेतसः । मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥" इति श्रीगीतासु । आग्नेयेऽपि– " द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । विष्णुभक्तिपरो दैव आसुरस्तद्विपर्ययः ॥" इति । असुर्या नाम लोकाः कर्मफलानि अंधेन तमसा परमात्माज्ञानेनावृताः ये केच आत्महनो भगवद्विमुखाः प्रेत्य मृत्वा ताँल्लोकानभिगच्छन्ति । अभक्तनिंदापरेयं श्रुतिः । आदिनास्या अन्यासाञ्च ग्रहणम् । " इहैव सन्तोऽथ विद्मस्तद्वयं, न चेदवेदीर्महती विनष्टिः, यत्तद्विदुरमृतास्ते भवन्त्यपरे दुःखमेव यन्ति " इति । वयमिहैव सन्तस्तद्विजानीमः त्वं चेद्यदि नावेदीः तत्परमात्मतत्त्वं न विदितवान् तर्हि तव महती विनष्टिर्जन्ममरणादिरूपा महत्यनंता संसृतिः स्यात्कुतः ये तद्विदुस्तेऽमृता जन्ममरणादिदुःखाद्विमुक्ताः परमानंदरूपा भवन्ति । इतरेऽज्ञाः दुःखमेव यन्ति प्राप्नुवन्ति, इति । उपदेशपरेयं श्रुतिः । असून्प्राणेंद्रियादीन्बिभ्रतीत्यसुभृतः । अनुविदधति अनुसरान्ति । इतरथा भक्त्यभावे । इत्यर्थ इति–"धिक्तेषां धिक्तेषां येषां भक्तिर्न केशवे राजन्" इत्यादिपुराणात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलमस्त्येव न कार्यकारणानुग्राहकत्वेन जीवनहेतोः तवाभजने कृतघ्नानां तदपि न सिध्येदित्याशयेनाह । महदहमादय इति । महानहंकारश्चादिर्येषां ते यदनुग्रहतो यस्यानुप्रवेशेन लब्धसामर्थ्याः संतोऽडं देहं समष्टिव्यष्टिरूपं सृष्टवंतः । तत्र च पंचापि कोशानन्नमयादीनाविश्य तत्तदाकारः सन्यश्चेतयते स त्वं तदाह । पुरुषविध इति । पुरुषस्यान्नमयादेर्विधेव विधा आकारो यस्य स तथा । नन चिदेकरसस्य कथं तत्तदाकारताऽत आह । अन्वयोऽत्रेति । अत्र एष्वन्नमयादिष्वन्वेती त्यन्वयः अतस्तत्तदाकारतेति । एवं तर्हि सत्यत्वमसंगत्वं च कथं तत्राह । चरमोऽन्नमयादिषु य इति अन्नमयादिषूपदिश्यमानेषु यश्चरमो ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वेनोक्तः स त्वमिति संबंधः । ननु तथाप्यन्नमयादिष्वन्वितत्वेऽसंगत्वव्याहतिरेव तत्राह । सदसतः परं त्वमथ यदेष्ववशेषमृतमिति । सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तं तत्साक्षिभूतम् । अवशेषमवशिष्यतः इत्यवशेषमबाध्यम् । अथात एव ऋतं सत्यम् । तर्हि किमर्थं तेष्वन्वय उक्तः । शाखाचंद्रवच्छुद्धस्वरूपलक्षणार्थम् । तथाहि । "स वा एष

" श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥" इति । " सफलं जीवितं तेषां येषां भक्तिर्जनार्दने " इत्युक्तेरितरेषां वृथैवेति मुखत एवोक्तमिति भावः । अत्राक्षिपति—नन्विति । कामादीहादिनाऽर्थावाप्त्यादिग्रहः । नेत्याह—कार्यं देहादि कारणं महदादि तयोरनुग्राहकत्वेन निजचिच्छक्त्यावेशप्रदानेन जीवनहेतोः स्वस्वसामर्थ्यदातुः " देहेंद्रियप्राणमनोधियोऽमी यदंशबद्धाः प्रचरन्ति कर्मसु । नैवान्यदा लोहमिवाप्रतप्तं स्थानेषु तद्द्रष्ट्रपदेशमेति ॥" इत्युक्तेः । कृतघ्नानां तत्कृतमुपकारमजानतां तदपि कामादिसुखमपि तत्रांडे तत्तदाकारः अन्नमयाद्याकारः तदन्नमयाद्याकारत्वं विधेव प्रकार इव । अत्र पुनराशंकते—नन्विति । अतोऽन्वयात् । एवं तर्हि तत्तदाकारत्वे । तत्राक्षेपे । पुनराशंकते— नन्विति । तथापि पुच्छत्वेनोक्तेऽपि तत्साक्षिभूतमन्नमयादेः साक्षिभूतम् । अत एवाबाध्यत्वादेव । पुनराक्षिपति—तर्हीति, शाखा चन्द्रेति । यथा—द्वितीयायां चन्द्रनिरीक्षणार्थं बालं बोधयति प्रथमं वृक्षमेव चन्द्रमाह—यदा स वृक्षं पश्यति तदा नायं चन्द्रो वृक्षोऽयमिति पुनर्दर्शयितास्य दक्षिणशाखां चंद्रं वदति तां दृष्ट्वा शाखेयं न चंद्र इत्थं वदति स च पुनराहास्याः शाखायाः शिरासि चंद्रोऽस्ति तं पश्येत्युक्तः स चन्द्रमेव पश्यति शुद्धमेवमत्रापि तथा दर्शयति— स वा इत्यादिना । अथ पञ्चविधा अन्नमयादिषु यथा तैत्तिरीयोपनिषदि तथात्र लिखामः " ब्रह्मविदाप्नोति परम् " इत्यधिकृत्याम्नायांते प्रथममन्नरसमयपुरुषविधामाह— " स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः अयं दक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा इदं पुच्छं प्रतिष्ठा" इति । अस्यार्थः—अन्नाद्वै प्रजाः प्रजायन्ते, अन्नाद्वै पुरुषः संभूतः इत्याद्युक्तः अन्नरसविकारः एष पुरुषो देहः स वै अन्नरसमयः अन्नरसविकारः तस्येदं प्रसिद्धं शिरः न तु प्राणमयादिष्विव कल्पनामयम् एवं पक्षादिषु योजना । अयं दक्षिणो बाहुर्दक्षिणः पक्षः, अयं वामो बाहुरुत्तरः पक्षः, अयं मध्यमो देहभाग आत्मा "अंगानां मध्ये ह्येष आत्मा" इति श्रुतेः । इदं नाभेरधस्ताद्यदंगं तत्पुच्छमिव पुच्छमधो लंबनसाम्यात् तदेव प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठाऽऽश्रय इति (१) अथ प्राणमयं पुरुषमाह—"तस्माद्वा एतस्मादन्नरसमयादन्योंतर आत्मा प्राणमयस्तेनैष पूर्णः स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधस्तस्य प्राणमेव शिरः व्यानो दक्षिणः पक्षः अपान उत्तरः पक्षः आकाश आत्मा पृथिवी पुच्छं प्रतिष्ठा तस्यैष शारीर आत्मा यः पूर्वस्य" इति । अर्थः—तस्मादन्नरसमयात्पुरुषादन्य अंतरस्तदभ्यंतरस्थ आत्मा प्राणमयो वर्तते प्राणो वायुस्तन्मयस्तेन प्राणमयेन एषोऽन्नरसमयः पूर्णः वायुना दृतिरिव (दृतिश्चर्मयंत्रम्) स वै एष प्राणमय आत्मा पुरुषविधैः पुरुषाकारः कुतः तस्यान्नरसमयस्यात्मनः पुरुषविधतामनुलक्ष्यीकृत्यायं प्राणमयोऽपि पुरुषविधो भवति तदन्तर्वर्तित्वात् । मूषायंत्रनिषिक्तधातुप्रतिमावत् तस्य प्राणमयस्य वायुविकारस्य मुखनासिकादिनिःसरणशीलो वायुवृत्तिविशेषः प्राणः शिरः, व्यानो वायुवृत्तिविशेषः दक्षिणः पक्षः, अपानोऽधोवायुः उत्तरः पक्षः, आकाश आत्मा आकाशस्थो वायुवृत्तिविशेषः समानाख्यो यः स आत्मा मध्यभागः, पृथिवी तदभिमानिनी देवता तस्य पुच्छं प्रतिष्ठा आध्यात्मिकप्राणस्य धारयित्री स्थितिहेतुत्वात् । "सैषा पुरुषस्यापानमवष्टभ्य" इति श्रुतेः । अन्यथोदानवृत्त्योर्ध्वगमनं गुरुत्वात्पतनं वा स्याच्छरीरस्य तस्मात्पृथिवी पुच्छं प्रतिष्ठेति । तस्येति शरीरेऽन्नमये भवः शारीरः यएष प्राणमयः स तस्यान्नमयस्य शारीर आत्मा भवति अन्नमयात्प्राण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषोऽन्नरसमयस्तस्येदमेव शिरः''इत्यादिना स्थूलसूक्ष्मक्रमेण पंचकोशानुपदिश्य ''तस्य पुरुषविधतामन्वयं पुरुषविध''इति पुनःपुनस्तदन्वितत्वेनालक्ष्य ''ब्रह्मपुच्छं प्रतिष्ठा''

मयः श्रेष्ठश्च ''प्राणं देवा अनुप्राणन्ति'' इति श्रुतेः । प्राणबलेन सेन्द्रियस्य देहस्य बलमिति (२) अथ मनोमयं पुरुषमाह–''तस्माद्वा एतस्मात्प्राणमयादन्योन्तर आत्मा मनोमयस्तेनैष पूर्णः स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्षः आदेश आत्मा अथर्वांगिरसः पुच्छं प्रतिष्ठा तस्यैष शारीर आत्मा यः पूर्वस्य'' इति । अर्थः–तस्मात्प्राणमयादेतस्मादन्यः अंतर आत्मा मनोमयः मनः संकल्पविकल्पात्मकमंतःकरणं तन्मयः मनोमयः सोऽयं प्राणमयस्याभ्यंतर आत्मा तेन मनोमयेन प्राणमयः पूर्णः स एष पुरुषविधो भवति तस्य प्राणमयस्य पुरुषविधतामनुलक्ष्यीकृत्यायमपि पुरुष विधः तस्य मनोमयस्य यजुरेव शिरः यजुर्वेदमंत्रविशेषः शिरः तस्य शिरःप्रधानत्वात् यजुषा हि हविर्दीयते स्वाहाकारादिना । तथा ऋग्वेदमंत्रविशेषः तस्य दक्षिणः पक्षः, सामवेदमंत्रविशेष उत्तरो वामपक्षः, आदेशोऽत्र ब्राह्मणमंत्रविशेषः आत्मा, अथर्वणांगिरसा दृष्टा मंत्रविशेषाः ब्राह्मणं पुच्छं शांतिपौष्टिकादिप्रतिष्ठाहेतुकर्मप्रधानत्वात्प्रतिष्ठा । य एष मनोमयस्तस्य पूर्वस्य प्राणमयस्य शारीर आत्मा भवति प्राणमयादस्य श्रेष्ठत्वं ज्ञान सबंधात् । ''मनसा पश्यति मनसा शृणोति'' इत्यादिश्रुतेः (३) अथ विज्ञानमयं पुरुषमाह–''तस्माद्वा एतस्मान्मनोमयादन्योन्तर आत्मा विज्ञानमयस्तेनैष पूर्णः स वा एष पुरुषविधः तस्य पुरुषविधतामन्वयं पुरुष विधः तस्य श्रद्धैव शिरः ऋतं दक्षिणः पक्षः सत्यमुत्तरः पक्षः योग आत्मा महः पुच्छं प्रतिष्ठा तस्यैष शारीर आत्मा यः पूर्वस्य'' इति । अर्थः–तस्मान्मनोमयादन्योन्तरस्थ आत्मा विज्ञानमयो भवति निश्चयात्मिका बुद्धिर्विज्ञानं तन्मयः । 'बुद्धिर्विज्ञानरूपिणी' इत्युक्तेः । एष मनोमयस्तेन विज्ञानमयेन पूर्णःस एष विज्ञानमयः पुरुषविधः तस्य मनोमयस्य पुरुषविधतामनुलक्ष्यीकृत्यायमपि पुरुषविधो भवति । तस्य विज्ञानमयस्य श्रद्धैव शिरः । ऋतं सूनृता वाणी दक्षिणः पक्षः, सत्यं यथार्थभाषणमुत्तरःपक्षः, योगो युक्तिसमाधानं तस्यात्मा, महः महत्तत्वं पुच्छं प्रतिष्ठा सर्वेषां कारणत्वात् कारणं हि कार्याणां प्रतिष्ठेत्युक्तेः । य एष विज्ञानमयः स प्राणमयाच्छ्रेष्ठः सूक्ष्मश्च मनोमयो हि वेदात्मक उक्तः वेदार्थनिश्चयात्मिका बुद्धिर्विज्ञानं तन्मय आत्मा विज्ञानमयः प्रमाणविज्ञानपूर्वको हि यज्ञादिर्वितन्यते ''विज्ञानं यज्ञं तनुते'' इति श्रुतेः । निश्चयविज्ञानवतो हि पुंसः कर्तव्यार्थेष्वपूर्वश्रद्धोत्पद्यते सा श्रद्धा सर्वकर्तव्यानां प्राथम्यात्तस्य शिर इति (४) आनंदमयं पुरुषमाह–''तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मा आनंदमयस्तेनैष पूर्णः स वा एष पुरुषविधस्तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठा तस्यैष शारीर आत्मा यः पूर्वस्य'' इति । अर्थः–तस्माद्विज्ञानमयादन्योंतरोऽभ्यन्तर आत्माऽऽनंदमयः अन्नमयादीनां कार्यात्मनामधिकारात् मयट्प्रत्ययाच्चानंदमयः कार्यात्मा वेदितव्यः आनंदस्य विकारः आनंदमयः शुद्धजीवस्तेनानंदमयेन एष विज्ञानमयः पूर्णः स वै आनंदमयः पुरुषविधः पुरुषाकारः कुतस्तस्य विज्ञानमयस्य पुरुषविधतामनुलक्ष्यीकृत्य पुरुषविधस्तस्यानंदमयस्य प्रियमेव शिरः प्रियमिष्टस्त्रीपुत्रादिसंदर्शनं प्राधान्याच्छिर इव शिरः, मोदः प्रियवस्तुलाभनिमित्तो हर्षः मुखप्रसादरूपः दक्षिणः पक्षः, प्रमोदः स एव प्रकृष्टो हर्षप्रहास्ययुक्तः उत्तरः पक्षः, आनंदः सुखसामान्यं तस्यात्मा प्रियादीनां सुखावयवानां तेषु तस्यानंदस्यानुस्यूतत्वात् आनंद आत्मा एवं चोत्कृष्यमाणस्यानन्दमयस्यात्मनः ब्रह्म पुच्छं प्रतिष्ठा आश्रयः यस्य शाखाचन्द्रवद्‌तरतमत्वज्ञानार्थमन्नमयादिपञ्चकोशा उपन्यस्तास्तद्ब्रह्म सर्वेषामाश्रयः । इति पञ्चकोशाः (५) अत्रान्तर्यामिब्राह्मणं यः सर्वेषु भूतेषु तिष्ठन्निति प्रागेव लिखितम् '' यः प्राणे वै तिष्ठन्प्राणादंतरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः यो मनसि तिष्ठन्मनसोंतरो यं मनो न वेद यस्य मनः शरीरं यो मनोंऽतरो यमयत्येष त आत्मांतर्याम्यमृतः यो विज्ञाने तिष्ठन्विज्ञानादंतरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं यो विज्ञानमंतरो यमयत्येष त आत्मान्तर्याम्यमृतः य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः'' इति । अर्थस्तु प्राग्लिखितप्रायः ।अत्र तु अन्नमयादिषु यश्चरमः स त्वमित्यनेन श्रीकृष्ण एवोक्तः योंतर्यामी स कृष्ण एव । तदुक्तं ब्रह्मस्तुतौ श्रीशुकेन–''कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम् । जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥ सर्वेषामपि भूतानां भावार्थो भवति स्थितः । तस्यापि भगवान्कृष्णः किमतद्वस्तु रूप्यताम् ॥ '' इति । रासक्रीडायां च–''गोपीनां तत्पतीनाञ्च सर्वेषामपि देहिनाम् । योंतश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥ '' इति । तस्मात्तद्गुणकीर्तनादिभिर्निर्दिग्धपञ्चकोशस्य भक्तस्य सुखेन तत्प्राप्तिः सर्वत्रोक्ता–''पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये । त्वामेव धीराः पुरुषा विशन्ति'' इत्याद्युक्तेः । ''अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति सर्वसाक्षिशुद्धस्वरूपनिरूपणमित्यनवद्यम्॥ नरवपुः प्रतिपद्य यदि त्वयि श्रवणवर्णनसंस्मरणादिभिः॥ नरहरे न भजंति नृणामिदं दृतिवदुच्छ्वसितं विफलं ततः॥४॥१७॥

जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ '' इत्याद्युक्तेश्च । अथ ज्ञानेन तत्प्राप्तिमाह—जीवात्मा द्विविधो विद्यायुक्ताविद्यायुक्तभेदात् । यस्तु विद्यायुक्तः स तु नित्यमुक्त आनंदमयः शुद्धः, यस्त्वविद्यायुक्तः शुद्धस्य प्रतिबिम्ब
रूपः स तु नित्यबद्धोऽशुद्धश्चेति । अयमेवान्नमयादिपञ्चकोशात्मकः संस्तत्तत्कोशोत्थसुखदुःखरागद्वेषजराक्षुत्पिपासाशोकमोहादिकमनुभवति यद्वानंदमयत्वमस्याविर्भवति तदपि स्वाभीष्टस्त्रीपुत्रार्थदर्शनलाभाद्युपाधिनैव न
त्वात्मलाभेन ''सर्वेषामानंदानामुपस्थमेकं परमायतनम् '' इति श्रुतेः । अत एवात्मज्ञानाभावात्संसरतोऽस्य प्रबोधस्तत्त्वमसीत्यादिवाक्यैः क्रियते यदा दैवादहं ब्रह्मास्मीति प्रबुद्धस्तर्हि शुद्धात्मना सहैकीभूयानंदमयो भूत्वा
पञ्चकोशादविद्याकार्यादसंगः सन्विद्योपाधितोऽपि निर्मुक्तः सन्ब्रह्मैव भवतीति एतदर्थं पञ्चकोशोपन्यासोऽत्रेति दिक् । स्वामिचरणाः । नरेति । ततस्तर्हि तेषां नृणामुच्छ्वसितं जीवितं दृतिवद्विफलमित्यर्थः । न भजन्ति
नृणामिति पाठो लेखकप्रमादस्तथापि अस्य योजनिकेयम् त्वयि त्वां न भजन्ति किंतु सतम्यां द्वितीयाकल्पनमपौरुषेयत्वादयो वेत्यपपाठ एव नरहरे न रमन्ति नृणामिदमिति यथा विपूर्वस्य रमेः परस्मैपदित्वं तथा नञ्पूर्वादपि
ज्ञेयमर्थसाम्यात् अधर्माद्विरमतीत्यधर्मं न करोतीत्यर्थः।तद्वदत्रापीति ॥*॥ **श्रीधराऽनुयायिनी**—उक्तोभयविधभजनहीनान्निन्दन्ति—दृतय इति । हे हरे प्राणिनो यदि ते भक्तास्तदैव सफलजीवनाः अभक्ताश्चेत्तदा ते भस्त्रा इव
वृथाश्वासा जीवन्तोऽपि मृता एव । ननु भभक्तानामभक्तानामपि कामादिसुखमस्त्येवेत्याशंक्याहुः—महदिति । महत्तत्त्वाहंकारादयः स्वयमसमर्थाः पुनस्त्वदनुप्रवेशेन लब्धसामर्थ्यास्ततोऽन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्य
पञ्चकोशसमुदायात्मकं समष्टिव्यष्टिदेहसमूहमुत्पादितवन्तः, ततश्च तत्तत्कोशान्वयेन तत्तत्कोशविधः सन्नानंदमयकोशपुच्छत्वेनोक्तस्त्वमेव साक्षिरूपोऽसि एतेन त्वत्कृतप्रकाशादिरूपानुग्रहं विना जीवानां कामसुखादिकमपि न
सिद्ध्यतीत्युक्तम् । तत्तत्कोशान्वयित्वेऽप्यसंगित्वमाह—स्थूलसूक्ष्मस्वरूपान्नमयादेः परं तत्साक्षिरूपमबाध्यं सत्यं त्वमेवासीति ॥*॥ **विश्वनाथी**—तदेवं सामान्याकारेण सर्वश्रुतीनां समन्वयस्तच्छुद्धभक्तिप्रतिपादनपर्यन्तो दर्शितः ।
अथ तद्विशेषाणामपि दर्श्यते तत्र काश्चित्पूर्वोक्तशुद्धभक्तिप्रतिपादकश्रुत्यनुगामिन्यः श्रुतयोऽन्वयव्यतिरेकाभ्यां तद्वाक्यं पुष्णन्त्यस्तेनैवं तत्र चरन्त्यः काश्चित्स्वानुगतश्रुतीश्चान्यास्तत्पर्यवसानत्वेन स्तुवन्ति—दृतय इति । ते जना
दृतय इव श्वसन्ति त्वद्भक्तिहीनत्वेन मृतकसाधर्म्यान्निष्प्राणत्वेऽपि भस्त्रा इव वृथाश्वासा इत्यर्थः । यदि तु ते त्वानुविधा अनुविदधत्यानुकूल्यं कुर्वन्तीत्यनुचरा भक्ता इति यावत् । तदैवासुभृतः प्राणधारिणो जीवन्तो नरा
उच्यन्ते । नन्वभजतामपि सूक्ष्मः स्थूलश्च देहो जीवन्नेव दृश्यते न तु म्रियमाणस्तत्राहुः—महदहमादयश्चित्ताहंकारबुद्धिमनःश्रोत्रचक्षुरादयो देहद्वयारंभका यदनुग्रहतो यद्भजनप्राप्तानुग्रहादेव अंडं समष्टिव्यष्टिशरीरमसृजन्
''नमाम ते देव पदारविन्दं प्रपन्नतापोपशमातपत्रम् '' इत्यादितृतीयोक्तेश्चित्ताहंकारादयो भजने प्रवृत्ता एव दृष्टा अतो येषां चित्तश्रोत्रादयो नैव भजने प्रवर्तन्ते ते देहा नैव चित्तश्रोत्रादिमन्तः अतो देहाभासा एव मृता
एवेति भावः । नन्वहं कीदृशाकारः यं मां ते भजेरन्नित्यत आहुः—अन्नमयादिषु अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाः स्थूलदेहप्राणान्तःकरणजीवपरमात्मानः क्रमेण बस्तिपुच्छपृथिवीपुच्छाथर्वांगिरःपुच्छमहःपुच्छब्रह्म
पुच्छा एव ये पञ्चपुरुषाः श्रुतावुक्तास्तेषु मध्ये यश्चरम आनंदमयः स त्वमिति संबंधः । ननु तर्ह्यन्नमयाद्याः किमहं न भवामि तत्र विशिंषन्ति—अत्रान्नमयादिषु अन्वेति अनुप्रविशतीत्यन्वयः । स त्वं तत्र कारणत्वात् । अन्न
मयादीनां तत्कार्यत्वादेतेऽपि त्वमेव भवसि किंतु न स्वरूपेण, तु त्वमानंदमय एव सर्वकारणं परमात्मेत्यर्थः । किन्त्वेषु सर्वेष्वपि मध्ये यदवशेषं परमचरमं 'रसो वै सः ' इति श्रुत्या रसत्वेन प्रतिपादितम् 'स्त्रीणां स्मरो
मूर्तिमान् ' इति भागवतविवृतं सदसतः परमन्नमयादिस्थूलसूक्ष्मसर्वविलक्षणं सर्वश्रेष्ठात्सत आनंदमयादसतस्ततो निकृष्टाद्विज्ञानमयादेश्च परमन्यत् योऽसौ जाग्रत्स्वप्नसुषुप्तिमतीत्य तुर्यातीतो गोपाल इति । श्रीगोपालतापनीश्रु
त्युक्तम् 'ब्रह्मणो हि प्रतिष्ठाहम्' इति गीतास्पष्टीकृतं सर्वोत्कृष्टं श्रीकृष्णस्वरूपं वस्तु तदपि ऋतमस्माभिः श्रुतिभिस्तपःप्राप्तस्वरूपाभिः प्राप्तमनुभूतं वा । अर्तेर्गत्यर्थत्वाद्गत्यर्थानाञ्च प्राप्त्यर्थत्वाज्ज्ञानार्थत्वाच्च । अत्र ''असुर्या
नाम ते लोका अंधेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ '' इत्याद्या भक्त्यभावे दोषप्रतिपादिकाः । असुर्याः ''द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च । विष्णुभक्तिपरो दैव आसुरस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विपर्ययः ॥ ” इत्याग्नेयविष्णुधर्मोत्तरोक्तेरसुराणां विष्णुभक्तिहीनानां प्राप्य इत्यर्थः । “नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कान् तं पीठगं ये तु यजन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ” इत्याद्या भक्तिसत्त्वे गुणप्रतिपादिकाः श्रुतयः । “ स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिरः अयं दक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा इदं पुच्छं प्रतिष्ठा ” इत्येवमन्नमयादिचतुःपुरुषनिरूपणोत्तरं पञ्चम आनंदमयो निरूपितो यथा– “ तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मानंदमयस्तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठा ” इति तैत्तिरीयकश्रुतिर्जीवात्मपरमात्मब्रह्मप्रातिपादिका । अत्र यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यस्य विज्ञानं शरीरमिति जीवांतर्यामिप्रतिपादकश्रुतंरात्मनि तिष्ठन् इति श्रुत्यन्तरवाच्यविज्ञानमयो जीवात्मैवोक्तस्तदनंतरोक्त आनंदमयः सर्वान्तर्यामी परमात्मैव परमोपास्य इति वैष्णवमते व्याख्या । अतोऽत्र पुत्रदर्शनजानंदादिकं प्रियादिशब्दैर्न व्याख्येयम् किन्त्वेकस्यैव परमानंदरूपस्य परमात्मन आनंदोदयोत्कर्षतारतम्यादेव प्रियादीनां चतुर्णां तत्तन्नामभेदः । ब्रह्मणस्तु सर्वतोऽपि बृहत्तमानन्दत्वादानंदप्रातिष्ठात्वम् । प्रतिष्ठीयतेऽस्यामिति प्रतिष्ठा आश्रयः ‘ ब्रह्मणो हि प्रतिष्ठाहम् ’ इत्युक्तेः रसो वै स इति सर्वान्तिमश्रुत्युक्तेश्च तस्यापि प्रतिष्ठा कृष्णः सर्वबृहत्तमानंदस्तदवधिरूपो गोपालतापनीश्रुत्या तुरीयादपि विलक्षणत्वेन प्रतिपादितः प्रेमरसमयवपुरुपास्येषु परमावधिरुक्तः “ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ” इत्युक्तेरन्तर्याम्यानंदमयः खलु यस्यैक एवांशः अत एव प्रेक्षावच्छिरोमणीनां श्रुतीनां कृष्णस्यैवोपासना बृहद्वामने दृष्टा । प्राप्तिश्च गोपीत्वेन ‘ स्त्रिय उरगेन्द्रभोगभुजदंड ’ इति पद्येन वक्ष्यते । अतो भगवत्स्वरूपेष्वपि मध्ये कृष्णमेव सर्वोत्कृष्टतया श्रुतिभिः प्रतिपादितमवधार्य नारदः श्रीनारायणस्यापि पुरःस्थितो “नमस्तस्मै भगवते कृष्णायामलकीर्तये ” इत्युच्चारयन्कृष्णमेव नमस्करिष्यते (४) ॥ १७ ॥

नीलकण्ठी–एवं स्वधर्मानुष्ठानाच्चित्तशुद्धिस्ततो वेदान्तश्रवणं ततः संन्यासस्ततो निदिध्यासनं तेनात्मानुभव इत्येवं क्रमानभिज्ञान्निंदति–दृतय इति । हे भगवन्महदहमादयस्ते तवानुग्रहतो यदंडमसृजन् तदनुविधा यदि असुभृतः तर्हि दृतय इव श्वसन्तीति संबंधः । अयमत्राण्डसृष्टिक्रमः–“ तस्माद्वा एतस्मादात्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी ” इति श्रुतेरविद्याशबलाद्ब्रह्मणः शब्दवानाकाश उत्पन्नः, ततः शब्दस्पर्शवान्वायुः, ततः शब्दस्पर्शरूपवत्तेजः, ततः शब्दस्पर्शरूपरसवत्य आपः, ताभ्यः शब्दस्पर्शरूपरसगंधवती पृथिवी इति पञ्च सूक्ष्मभूतानि स्वकारणमायागुणात्रिकयुक्तानि संभूतानि तेष्वाकाशादिसात्त्विकांशेभ्यो व्यस्तेभ्यः क्रमेण श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि जातानि दिग्वातार्कप्रचेतोऽश्व्यनुगृहीतानि शब्दस्पर्शरूपरसगंधान्गृह्णन्ति तथा तेषामेव राजसांशेभ्यो व्यस्तेभ्यः क्रमाद्वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि जातानि, वह्नीन्द्रविष्णुमित्रप्रजापतिभिरनुगृहीतानि वचनादानगतिविसर्गानंदान्निर्वर्तयन्ति तेषामेव मिलितेभ्यः सात्त्विकांशेभ्योंतःकरणं जायते तच्च सर्वाणि ज्ञानेन्द्रियाण्यनुगृह्णाति तस्य मनोबुद्ध्यहंकारचित्ताख्याश्चतस्रो वृत्तयश्चंद्रबृहस्पतिरुद्रक्षेत्रज्ञाधिष्ठिताः संशयनिश्चयगर्वस्मरणानि विषयीकुर्वन्ति, तथा तेषामेव राजसांशेभ्यो मिलितेभ्यः प्राणो जायते स कर्मेन्द्रियाण्यनुगृह्णाति तस्य प्राणाद्याः पञ्च वृत्तयः तासु प्राणः श्वासप्रश्वासौ करोति, अपानोऽशितपीतादेरधोनयनं, व्यानो बलसाध्यं भारोद्यमनादि, उदानो देहादुत्क्रमणं, समानोऽशितपीतादिसमीकरणं तदेतल्लिङ्गशरीरम् । तदुक्तम्–“ पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥” इति । अत्र मनस्यहंकारस्यान्तर्भावः बुद्धौ चित्तस्य । तथा तेषामेवाकाशादीनां तामसांशेभ्यः पञ्चीकृतपञ्चमहाभूतानि जायन्ते । पञ्चीकरणञ्च–आकाशादीन्प्रत्येकं द्विधा विभज्य तेष्वेकैकमर्धं चतुर्धा कृत्वा स्वेतरेषु भूतचतुष्टयार्धेषु योजनमिति तेभ्यः पञ्चीकृतपञ्चमहाभूतेभ्यः इदं ब्रह्माण्डं स्थूलं परमात्मनः शरीरमुत्पन्नं तदेतदस्य समष्टिशरीरं तदन्तर्गतमस्मदादिशरीरं व्यष्टिः वनवृक्षवज्जलाशयतत्तरंगप्रातिबिंबितचंद्रवच्च एवं लिङ्गमपि समष्टिव्यष्टिभेदेन द्विविधमेवं कारणमपि । अत्र स्थूलसूक्ष्मकारणव्यष्टयः क्रमाद्विश्वतैजसप्राज्ञसंज्ञाः स्थूलसूक्ष्मकारणसमष्टयस्तु वैश्वानरहिरण्यगर्भेश्वरापरपर्यायाः विराट्सूत्रान्तर्यामिसंज्ञाः । तत्र हैरण्यगर्भे बुद्धिमनसी महदहंकारौ तत्प्रभृतयो महदहमादयस्ते तवानुग्रहतस्त्वदनुप्रवेशेन लब्धात्मकाः सन्तः तादृशमेव त्वदनुप्रविष्टं कार्यमसृजन्ब्रह्मांडं सृष्टवन्तः वटधानेव भूम्याद्यनुप्रवेशेन महान्तवटविटपिनम् । तदिति द्वितीयान्तं यच्छब्दाभिसंबंधादध्याहार्यं तत् अंडम् अनुविदधति तदभेदाध्यासेन तद्धर्माननुकुर्वन्ति ते अनुविधाः देहादिधर्मेणासंगमात्मानं विशिंषन्तो यदि स्युः तर्हि दृतिश्चर्मकोशो यथा वृथा श्वसिति तथा ते असुभृतः प्राणिनो व्यष्टिदेहाभिमानिनो व्यर्थं जीवन्तीत्यर्थः । असुभृत इति बहुवचनाद्व्यष्ट्यभिमानिनामेव व्यर्थं जीवनं न समष्ट्यभिमानिनामुपासकानामिति गम्यते । देहाद्यनुविधानञ्चासुभृतामसुष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रोऽहं ब्राह्मणोऽहमंधोऽहमित्याद्यनुभवात्स्पष्टम् । अत एवात्मविवादिनां विप्रतिपत्तिः । तथाहि—लोकायतेषु तावत्केचित्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाद्भूतयोगजचैतन्यवान्स्थूलो देह एवात्मेत्याहुः । देहस्य स्वप्नसुषुप्त्योरभोक्तृ
त्वादंधोऽहं बधिरोऽहं पश्यामि शृणोमीत्यनुभवादिंद्रियाण्यात्मेत्यन्ये तेषां संहतानामात्मत्वे एकविनाशेऽप्यात्मनाशापत्तेः । प्रत्येकमात्मत्वे विरुद्धदिक्क्रियया शरीरमुन्मथ्येताक्रियं वा स्यादतोऽशितपीतादिभोक्ता प्राण आत्मे
त्यन्ये । प्राणेऽपि सुप्तौ भोक्तृत्वादर्शनात्सुख्यहं दुःख्यहमित्यनुभवात्सुखादिधर्मकं मन आत्मेत्यपरे । तथा बौद्धेष्वपि सर्वेन्द्रियानुग्राहकतया मनसः करणत्वानुभवात्कर्तृरूपविज्ञानमात्मा । तच्च क्षणिकं प्रदीपकलिकाव
दिति योगाचारादयः । विज्ञानस्यापि सुप्तौ लयदर्शनाच्छून्यमात्मेति माध्यमिकाः । “ योऽहं बाल्ये पितरावन्वभूवं सोऽहं स्थविरे प्रणप्तॄननुभवामि ” इति बाल्यस्थाविरयोरात्मैक्यप्रत्यभिज्ञानान्न क्षणविनाशी नापि शून्यं
निरधिष्ठानकभ्रमासंभवात् स्तनपानादिप्रवर्तकजन्मान्तरीयसंस्काराऽनुवृत्तिदर्शनाच्च नित्यः, स च न व्यापकः प्रमाणाभावात् एकस्मिन्देहे सर्वात्मसान्निध्याविशेषेण भोगसाङ्कर्यप्रसंगाच्च । नाप्यणुः गंगाह्रदनिमग्नस्य युगप
त्सर्वाङ्गीणशैत्योपलंभाभावप्रसङ्गात् देहपरिमित इत्यार्हताः । एकस्यात्मनः क्रमेण मशकमतङ्गजमनुजशरीरप्राप्तावयवोपचयापचयस्यावश्यवक्तव्यत्वात्तथात्वे चानित्यत्वप्रसङ्गादणुत्वे चोक्तदोषाद्विभुत्वेऽपि तत्तदात्ममनसा
मनादिस्वस्वामिभावसंबंधवशेन तत्तदात्मनि तत्तन्मनःसंयोगजसुखादिव्यवस्थोपपत्तेश्च नित्यो विभुः स्वतो जडोऽपि बुद्ध्यादिगुणानामाश्रयः कर्ता भोक्तेति तार्किकवैशेषिकप्राभाकराः । अहमनुभवस्योभयात्मत्वदर्शनाज्जड
बोधरूप इति भाट्टाः । मध्यमत्वे उक्तदोषाद्विभुत्वेऽपि भोगवैचित्र्यादात्ममनसां स्वस्वामिभावनियमकल्पना ततश्च भोगवैचित्र्यमित्यन्योन्याश्रयतापत्तेर्भोगसांकर्यानिवारणाच्चंदनबिन्दुवदेकदेशस्थत्वेऽपि सर्वाङ्गीणशैत्योपलं
भदर्शनादणुरनागंतुकदुःखादिमानित्येकदेशिनः । सति घटे यावद्रूपनाशादर्शनात्सत्यात्मनि यावद्दुःखनाशलक्षणस्य मोक्षस्यासंभवः मोक्षाभ्युपगमे वा दुःखादेरात्मधर्मत्वासंभवः वह्न्यौष्ण्यवत्स्वाभाविकस्य धर्मस्य धर्मिनाश
मन्तरेण निवृत्त्यसंभवादनिर्मोक्षापत्तेः । नाप्यणुः चंदनबिन्दुशैत्यवत्स्वाश्रयांशप्रसर्पणद्वारा निरंश एवात्मोपलब्धेः सर्वाङ्गसंगित्वासंभवेनोक्तदोषतादवस्थ्यात् “ वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स
विज्ञेयः स चानन्त्याय कल्पते ॥ ” “ अणोरणीयान्महतो महीयान् ” इत्यादिश्रुतिस्त्वानंत्यादिवाक्यशेषादात्मनो दुर्लक्ष्यत्वमात्रपरा । नापि मध्यमः उक्तदोषात् । नाप्येकः अहमदोऽद्राक्षम् अदोऽश्रौषमितीन्द्रियान्तर
इव देहान्तरेऽप्यात्मैक्यप्रत्यभिज्ञापत्तेः । अतो विभुं दुःखाद्यसंस्पृष्टमकर्तारं शुद्धचिन्मात्ररूपम् “अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः” इति बंधमोक्षव्यवस्थापकश्रुत्यर्थापत्त्या जन्ममरणादिप्रतिनियमदर्श
नाच्च भोगसाङ्कर्यानुमानस्य दुर्बलत्वाच्चानेकमात्मानं सांख्याः पातंजलाश्चाहुः । अस्माकं तूक्तप्रक्रियया स्थूलदेहोऽन्नमयः कोशः कर्मेन्द्रियैः सह प्राणः प्राणमयः ज्ञानेन्द्रियैः सह ते मनोविज्ञाने मनोमयाविज्ञानमयौ एते त्रयोऽपि
क्रमेण क्रियाकरणकर्तृरूपाः । कारणशरीरमानंदमयः एतैरुपहितं चैतन्यं जीवोऽनुपहितमीश्वर इति । शुद्धचिन्मात्रस्योपाधिभेदमंतरेण भेदस्यासंभवात् । तर्कमते श्रोत्रैक्येऽपि तत्तत्कर्णशष्कुल्युपाधिभेदेन शब्दग्रहव्यवस्था
वदात्मैक्येऽप्यन्तःकरणभेदादेव बंधादिव्यवस्थोपपत्तेरेक एवात्मेति । तत्र चार्वाका बौद्धाश्च एकैकं कोशमात्मानमाहुः । तार्किकादीनां त्वानंदमय आत्मा विज्ञानमयस्तद्गुणाः उभयेऽपि क्षेत्रमेवात्मानं वदन्तो मूढा एव ।
नन्नभट्टवेदान्त्येकदेशिनस्तु क्षेत्रक्षेत्रज्ञवैशिष्टयस्यात्मतां वदन्तो मध्यमाः । त एते उपाध्यनुविधाना दृतय इव श्वसन्ति । इदं श्लोकार्धं पाठक्रममनादृत्यार्थक्रमेण व्याख्यातम् । कुतोऽनुविधानमित्यत आह—पुरुषेति । त
इत्यनुषज्यते यतस्ते तवात्र अण्डे महदादिसृष्टे द्विविधे शरीरेऽन्वयोऽनुगमोऽस्ति कीदृशोऽनुगमः पुरुषविधः स्थूलशरीरप्रकारानुकारी तस्य पुरुषविधतामन्वयं पुरुषविध इत्यन्नमयादिषु पूर्वपूर्वधर्मानुकारित्वमुत्तरोत्तरस्य श्रूयते ।
कोऽसौ यस्यान्वयोऽत्रास्ति तमाह—चरमोऽन्नमयादिषु य इति । आनंदमय इत्यर्थः । अस्य हि कारणीभूतमायाशबलस्य कार्यशबलता युक्ता । एवं देहाद्यनुविधानादीश्वरस्यापि संसार इत्युक्त्वा तन्नाशोपायमाह—सदिति ।
सत्कार्यम् असत्कारणम् अतः परं पदेषु कोशेषु रज्जुभुजंगवद्बाध्यमानेष्ववशेषं बाधावधिभूतमत एव ऋतं सत्यं पुच्छं ब्रह्म तदसि त्वमिति शेषः । तज्ज्ञानान्मुक्तिरित्याशयः । पाठान्तरे तु अथशब्दोऽतःशब्दार्थः । शेषं पूर्ववत् ।
सदसतः परं त्वमथेति पाठो वृत्तभंगादुपेक्षितः (४) ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरम् ॥
तत उदगादनंत तव धाम शिरः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे ॥ ५ ॥ १८ ॥

एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सद्भजनीयत्वमुक्त्वाऽभक्तनिंदया च तदेव दृढीकृत्येदानीमनवगाह्यमहिमनि प्रथमं तावद् " उपाध्यालंबनमुपासनमुदरं ब्रह्म इति शार्कराक्षा उपासते । हृदयं ब्रह्मेत्यारुणयो ब्रह्मा हैव ता इत ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत " इत्याद्याः श्रुतयो विदधतीत्याह । उदरमुपासत इति । ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु ये कूर्पदृशस्ते उदरालंबनं मणिपूरकस्थं ब्रह्मोपासते ध्यायंति । शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति कूर्पं शर्करारजो विद्यते दृक्ष्वक्षिषु येषां ते तथा रजःपिहितदृष्टयः स्थूलदृष्टय इति यावत् । उदरस्य हृदयापेक्षया स्थूलत्वात् । यद्वा कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः । तदा हृदयस्थं सूक्ष्ममेवालक्ष्य तत्प्रवेशाय प्रथममुदरस्थमुपासत इति भावः । आरुणयस्तु साक्षाद्धृदयस्थं दहरं सूक्ष्ममेवोपासते । हृदयविशेषणं परिसरपद्धतिमिति । परितः सरंति प्रसर्पंतीति परिसरा नाड्यस्तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः । विशेषणस्य फलमाह । तत इति । ततो हृदयात् । भो अनंत तव धामोपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरो मूर्धानं प्रत्युदगादुदसर्पत । मूलधारादारभ्य हृदयमध्याद्ब्रह्मरंध्रं प्रत्युद्गतमित्यर्थः । कथंभूतं धाम । यत्समेत्य प्राप्य पुनरिह कृतांतमुखे मृत्युमुखे संसारे न पतंति । तथा च श्रुतिः । " शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ॥ तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवंति" इति ॥ उदरादिषु यः पुंसां चिंतितो मुनिवर्त्मभिः ॥ हंति मृत्युभयं देवो हृद्गतं तमुपास्महे ॥ ५ ॥ १८ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—एवमुक्तरीत्या सर्वश्रुतीनां समन्वयेन गतार्थत्वेन सतां शास्त्रनिष्ठानां भजनीयत्वं तदेव सद्भजनीयत्वमेव अवगाह्यो दुर्ज्ञेयो महिमा यस्य तस्मिन् । प्रथममादौ तावदधुना उपाधिरालंबनं यस्य तत् । उदरमिति वैश्वानराग्निरूपेण जाठरानलभूतेन ब्रह्मणाधिष्ठितत्वादुदरं ब्रह्मेति । शर्कराक्षस्यापत्यानि शार्कराक्षा ऋषय उपासते । आरुणेरपत्यानि आरुणय ऋषयः हृदयमुदरादूर्ध्वप्रदेशं दहरब्रह्मोपलब्धिस्थानत्वात् ब्रह्मेत्युपासते । ब्रह्मा हैव ता ह स्फुटं ता ते उदरोरसी ब्रह्म ब्रह्मणी उपास्ते उदरोरसी ब्रह्मणी एव भवत इत्यर्थः । ब्रह्मा ता इति प्रथमाद्विवचनांते पदे छान्दसत्वादाकारः । तद्ब्रह्म ऊर्ध्वत्वे चोदसर्पत् ऊर्ध्वमुत्क्रम्यागच्छत् शिरोऽश्रयत आश्रितवत् शिरसि चक्षुःश्रोत्रादीनि करणानि स्वस्वस्थाने पृथङ्निक्षिप्य दर्शनादिव्यापारं कारयित्वा चास्त इत्यर्थः । स्थूलदृष्टीनां तूदरस्थोपासनापि दुर्घटेत्याह—यद्वेति । इत्यर्थ इति—"कूर्पं मृत्कणिकासूक्ष्महिंसाविक्षेपणेषु च" इति निरुक्तिः । तदोदरस्थोपासनकालेऽपि तत्प्रवेशाय हृदयस्थसूक्ष्मप्रवेशाय । इति भाव इति—स्थूलमार्गं विना सूक्ष्ममार्गस्य दुर्ज्ञेयत्वमिति तात्पर्यम् । इत्यर्थ इति—मार्गादेव प्रसरणमस्तीति भावः । इत्यर्थ इति—सुषुम्ना हि नाडी मूलाऽऽधाराख्यश्चक्रविशेषश्च पायुदेशेऽस्ति ततो निःसृत्य हृदयमध्यात् हृन्मध्यं प्राप्य ब्रह्मरंध्रं दशमद्वारं ब्रह्मलोकं गच्छतस्तद्द्विवृतं भवति, योगबलेन 'सुषुम्नया ब्रह्मपथेन शोचिषा ' इत्युक्तेरुद्गतोर्ध्वमितास्तीति भावः । अत्र प्रमाणमाह—तथा चेति । एकोत्तरशतं नाड्यो हृदयस्य संबंधिन्यः सन्ति तासां मध्ये एका नाडी मूर्धानमभि मूर्ध्नो बहिरूर्ध्वमभिनिस्सृता सुषुम्नाख्या तयाऽऽसमन्तादयन् गच्छन्नुपासकोऽमृतत्वं मोक्षमेति । अन्या नाड्यो विष्वङ् नानागतयस्तिर्यक्सार्पिण्यः उत्क्रमणे संसारभ्रमणद्वारे भवन्ति वर्तन्त इति । स्वामिश्लोकस्तु सुगमत्वान्न व्याख्यातः ॥ * ॥ श्रीधराऽन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यायिनी—तव भजनमावश्यकमित्युक्तं तत्र सुंदरसूक्ष्माक्षरालिखनचातुर्येच्छोः प्रथमस्थूलाक्षराभ्यास इव परब्रह्मप्राप्तीच्छोश्चित्तस्थैर्यार्थं तावदुपाध्यालम्बनं स्थूलोपासनं विधेयमित्याहुः—उदरमिति । हे अनंत तवोपासनमार्गेषु ये स्थूलदृष्टयस्ते उदरालंबनं मणिपूरकचक्रे वैश्वानरांतर्यामिणं त्वाम् अन्नरसादिप्रवर्तनया क्रियाशक्तिदायकं ध्यायन्ति । "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ " इति गीतोक्तेः । तथा स्वप्राप्त्या संसारनिवर्तिका भगवदुपलब्धिस्थानरूपा या ज्योतिर्मयी सुषुम्नाख्या नाडी सा मूलाधारादारभ्य हृदयमध्यतः शिरोगतं ब्रह्मरंध्रं प्रत्युद्गतेत्यतः सुषुम्नासंबंधिनि सकलनाडीप्रसरणमार्गे त्वन्नैक व्यापके हृदये तव सूक्ष्मं रूपं जीवान्तर्यामिणं बुद्ध्यादिप्रवर्तनया ज्ञानशक्तिप्रदायकं "अंगुष्ठमात्रः पुरुषोंतरात्मा सदा जनानां हृदये सन्निविष्टः " इति श्रुतेः । सूक्ष्मदृष्टयो ध्यायन्ति, उदरापेक्षया हृदयस्य सूक्ष्मत्वात्सूक्ष्मरूप ध्यानास्पदं हृदयमेव, अनेन दूरदेशगमनाद्यभावेनानायाससेव्यत्वं दर्शितम् । यद्वा—उद्गतोऽरः परिच्छेदो यस्मात्स उदरस्तम् । यद्वा—हे अनंत ततः अनुपदोक्तत्वदुपासनतः तत्र परमं सर्वोत्कृष्टमत एव धाम शिरः ब्रह्मलोकान्तानां चतुर्दशधाम्नां शिरो मौलिभूतं वैकुण्ठाख्यमुदगात् उदयं प्रापेत्यर्थः । अग्रे पुनरिहेत्यादि वैकुण्ठविशेषणमेव ॥ * ॥ **विश्वनाथी**—तदेवं तासु श्रुतिषु तत्र समन्वितासु ताभिः स्पष्टमप्रस्तुताः काश्चिदन्याः श्रुतयोऽपि स्वेषां तदनुगतिमेव दर्शयन्ति । तत्र च प्रथमं क्रमसोपानतया पञ्चात्मवर्णनमयं पूर्वोक्तश्रुतिसाम्याल्लब्धावसराः क्रममुक्तिवर्त्मदर्शकयोगोपदेष्टृश्रुतयः स्तुवन्ति—उदरमिति । उदरं तत्स्थितवैश्वानरान्तर्यामिणमन्नरसादिप्रवर्तनया क्रियाशक्तिदायकम् "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ " इति श्रीगीतोपनिषद्वचः । हृदयं तत्स्थितजीवान्तर्यामिणं बुद्ध्यादिप्रवर्तनया ज्ञानशक्तिदायकं "महान्प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः । अंगुष्ठमात्रः पुरुषोन्तरात्मा सदा जनानां हृदि सन्निविष्टः " इति श्रुतेः । क्रमस्तु द्वितीयस्कंधोक्तो ज्ञेयः । एवं व्यष्टिमारभ्य व्याख्यातम् । समष्टिमारभ्य त्वेवं ज्ञेयम् । उदरं नभस्तलं वैराजस्य नाभिविशिष्टोदरं 'नभस्तलं नाभिसरो गृणन्ति' इति द्वितीयोक्तेः । हृदयं स्वर्गरूपं वैराजस्य ' उरःस्थलं ज्योतिरनीकमस्य' इति तत्रैवोक्तेः । किंभूतं परिसरपद्धतिं त्वन्निकटप्रापकमित्यर्थः । दहरं दुर्गमम् । ततस्तस्मादुपासनद्वयात्तव धाम सुषुम्नाख्यं कर्तृभूतं 'सुषुम्नया ब्रह्मपथेन शोचिषा' इति द्वितीयोक्तेराधिदैविकी च सुषुम्ना ज्योतिर्मयी वर्तते शिरः परमं कर्मभूतमुदसर्पत् । शिरो ब्रह्मलोकः 'सत्यं च शीर्षाणि सहस्रशीर्ष्णः ' इति तत्रैवोक्तेः । ततोऽपि परमं श्रेष्ठं वैकुण्ठपुरं प्रविशतीत्यर्थः । तया सुषुम्नयोपासका वैकुण्ठं व्रजन्तीत्यर्थः । यद्वा—वैकुण्ठपुरं समेत्य "नावर्तन्त उपासकाः" इति श्रुतयस्तु दर्शिता एव (९) ॥ १८ ॥

नीलकंठी—सदसतः परं यद्वतं तदसीत्युक्त्वा तत्प्राप्त्युपायमाह—उदरमुपासते य इति । अत्र यथा—भूमौ बीजांकुरद्रुमाः द्रुमे च फलशलाटवस्तथा शुद्धचैतन्ये ईशसूत्रविराजः विराजि च कृष्णादयोऽस्मदादयश्च । यथा—फलान्तर्गते बीजे द्रुमप्रसवसामर्थ्यमस्ति न शलाट्वन्तर्गते; एवं कृष्णादिषु जगत्सृष्टिसामर्थ्यमस्ति नास्मदादिषु । यथा—बीजादयो भूमात्राः सन्तः विशिष्टशक्तियोगाद्भुवाऽऽपूरिता अंकुरादिभावं प्रतिपद्यन्ते एवमीशादयोऽपि चिन्मात्रा एव सन्तो मायाशक्तियोगाच्चिदाऽऽपूरिताः सूत्रादिभावम् । तत्रास्मदादीनां कृष्णादिभावः कीटभृंगन्यायेन भावनाजन्यः विराडादिभावस्तु लवणोदकन्यायेन मनःप्रणिधानप्राप्यः उपादानोपादेयभावस्याभाव सद्भावाभ्यां तथावगमात् । यथा हि—घटोदरगता दीपप्रभा तन्मात्रं व्याप्नोति घटच्छिद्रद्वारा बहिर्गता सती भवनोदरगतं विषयं सर्वात्मना घटाद्बहिर्गता सती कृत्स्नं भवनोदरं व्याप्नोति प्रबलाभिः सौरीभिर्भाभिरभिहता दीपकलिकामात्रीभवति कलिकोपरमेऽनुपाख्यं भावमेति एवं चित्प्रतिबिम्बगर्भमन्तःकरणसत्त्वं देहेनावच्छिन्नं तन्मात्रं प्रकाशयति । यदा इन्द्रियद्वारा वृत्तिरूपेण बहिर्गतं सत् घटादि सदाचार्यप्रसादलब्धयुक्त्या देहात्समुत्थितं सत्कृत्स्नब्रह्माण्डाकारं भवति, तदा सर्वात्म्यात्सार्वज्ञं सर्वकामावाप्तिश्च योगिनो भवति, पुनश्च ब्रह्माकारचरमान्तःकरणवृत्तिरूपया विद्ययोपसंहृतं सद्बीजमात्रं भवति । दग्धेंधनानलवद्वृत्त्युपशमे तु केवलाधिष्ठानप्रकाशादनुपाख्यं भावमेति । सोऽयं प्रत्यक्प्रवणचित्तानामात्मप्राप्त्युपायोऽनेन श्लोकेन विधीयते, अन्येषां तु प्रत्यक्प्रावण्यसंपादनाय कृष्णमूर्तिध्यानं तत्राशक्तानां कृष्णे स्वधर्मार्पणं तत्राप्यशक्तानां कृष्णगुणगानञ्च क्रमादुत्तरैस्त्रिभिर्विधास्यते । तत्र तावदुदरं ब्रह्मेति शार्कराक्षा उपासते, हृदयं ब्रह्मेत्यारुणयो ब्रह्मा हैव ता इत ऊर्ध्वत्वे चोदसर्पच्चच्छिरोश्रयत इति श्रुत्युक्तमाह तत्र शार्कराभिर्निर्वृत्तं शार्करं ब्रह्माण्डम् अदंहथाः शर्कराभिस्त्रिविष्टपीति मंत्रलिंगात्, अत्रापि छान्दसो द्वितीयालोपः । तत्राक्षिद्दृष्टिर्येषां ते शार्कराक्षाः अस्य प्रतिपदं कूर्पदृशः ऋषिवर्त्मसु आर्षोपासनामार्गेषु ये कूर्पदृशः समष्टिकार्योपासकास्ते उदरमल्पमुपासते कारणापरिज्ञानात् उदरशब्दस्याल्पवाचित्वम् उदरमंतरं कुरुत इत्यत्र दृष्टम् । आरुणयः अरुणवदकृत्स्नप्रकाशस्य मुनेः पुत्रास्ततोऽपि सूक्ष्मदृश इत्यर्थः, ते दहरं सूक्ष्मं हृदयं हृदयायतने ब्रह्मोपासत इत्यनुषंगः । "अथ यदिदम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्स्यऽनलवत्स्वकृतानुकृतिः ॥
अथ वितथास्वऽमूष्वऽवितथं तव धाम समं विरजधियोऽन्वयंत्यभिविपण्यव एकरसम् ॥ ६ ॥ १९ ॥

नन्वीश्वरस्यापि तर्हि जीववदुदरादिसंबंधे तदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमितीमामाशंकां परिहरंत्यः "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा।

स्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" इत्युपक्रम्य " तस्यैतदेव निरुक्तं हृदयम् " इति श्रुतेः। दहरं विशिनष्टि—परिसरपद्धतिमिति। परितः सर्वतः सरणं गमनं कामचारः सर्वकामावाप्तिः पद्धतिर्मोक्षमार्गस्तयोः प्रापकत्वात्परिसरपद्धतिर्दहरस्तम्। "तेषां सर्वेषु लोकेषु कामचारो भवति" "शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका। तयोर्द्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ति" इति दहरोपास्तिफलश्रुतेः। ननु 'अग्निर्ज्योतिरहः शुक्लः' इति भगवद्गीतासु योगिनाममृतस्य कालविशेषाधीनत्वोक्तेः पाक्षिकमस्य पद्धतित्वमिति चेन्न अहरादिशब्देनातिवाहिकतत्तत्कालाभिमानिदेवतापरत्वेन कालवाचित्वाभावात्। तत्तल्लोकप्रापकनाडीरश्मिसंबंधस्य नित्यत्वेन कालस्याकिञ्चित्करत्वात्। अन्यथा: " कर्मणा पितृलोको विद्यया देवलोकः " इति श्रुतेर्मरणकालभेदेन फलभेदेऽसत्यप्रामाण्यं प्रसज्येत, तस्मान्नित्यमेव दहरस्य पद्धतित्वम्। तत इति ल्यब्लोपे पञ्चमी। उदरहृदये सोपाधिके ब्रह्मणी प्राप्येत्यर्थः। " तयोर्ब्रह्मा हैव ता " इति श्रुतेर्ब्रह्मावाप्तिद्वारत्वावगमात्। हे अनंत त्रिविधपरिच्छेदशून्य। तव धाम स्वरूपप्रकाशः। राहोः शिर इतिवदभेदेऽपि भेदोपचारः। उदगात् उद्गतवत् निरुपाधिकस्य सोपाधिकादधिकत्वादित्यर्थः। अत्र तैत्तिरीयके " सर्वं वैते माप्नुवन्ति" " सर्वमेव ते आयुर्यन्ति" " न बिभेति कदाचन " इति " सर्वान्कामान्समश्नुते " इति " न बिभेति कुतश्चन " इति क्रमेणान्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्यानां पञ्चानां कोशानां पृथगुपास्तिफलान्युक्तानि। माण्डूक्ये तु—" जागरितस्थानो वैश्वानरोकारः स्वप्नस्थानस्तैजस उकारः सुषुप्तिस्थानः प्राज्ञो मकारः " इत्यादिना त्रयाणां पादानामयमेव संन्यासिनामनुष्ठानक्रमश्चतुष्पदो ब्रह्मणः पूर्वपूर्वपादस्योत्तरोत्तरमास्मिन्प्रविलापनरूपः सर्वत्र दृश्यते। तत्र तैत्तिरीयोक्तमध्यमकोशत्रयात्मा माण्डूक्योक्तस्तैजसः। अत्र तु कार्यत्वसामान्याद्विराट्सूत्रयोरैक्याविवक्षया कार्यकारणोपास्तिद्वयमेवोक्तम्। अन्यत्र तु सोपाधिकत्वसामान्यादीशसूत्रविराजामैक्यं विवक्षित्वा तस्यैव पुनर्जीवत्वमीश्वरत्वञ्चोक्तं विवक्षाभेदेन। यथोक्तम्— " सोपाधिकविवक्षायां जीव एव विराड्भवेत्।: निरुपाधिविवक्षाय परमात्मैव नेतरः " इति। " हिरण्यगर्भंपश्यत जायमानम् " " हिरण्यगर्भः समवर्तताग्रे " इति मंत्रलिंगात्तस्य कार्यत्वं कारणत्वञ्च संगच्छते। श्रुतिश्च— " स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवत् " इति। ऐतरेयके—देहाभिमानाद्युत्थितस्य विदुषः स्वर्गलोकाख्यसोपाधिकब्रह्मभावाप्तिद्वाराऽमृताख्यं निरुपाधिभावमाह— " एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते " इति। छांदोग्येऽप्येतदेवोक्तम्— " अत्रोपसंपद्य स्वेन रूपेण परं ज्योतिरभिनिष्पद्यते " इति। " संबंधः स्वरूपं य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः सत्यकामः सत्यसंकल्पः " इति। श्रुतगुणाष्टकयुक्तं परं ज्योतिर्निष्कलं ब्रह्म सोपाधिर्निरुपाधिश्च द्वेधा ब्रह्मविदुच्यते। " सोपाधिकः स्यात्सर्वात्मा निरुपाख्योऽनुपाधिकः ॥ " इत्यादिना वार्तिकसारेऽपि स्पष्टीकृतम्। कीदृशं धाम शिरः परमं शीर्यते नश्यतीति शिर उपाधिः ततः परममनुपाधीत्यर्थः। शिरसि वेदान्ते तात्पर्येण प्रतिपाद्यं वा इहास्मिन्नेव देहे यद्धाम समेत्य प्राप्य कृतान्तमुखे मृत्युमुखरूपसंसारे पुनः न पतन्ति कर्तृत्वादिमदन्तःकरणस्य विविक्तत्वेनात्मनि त्रैकालिककर्तृत्वबाधात्। "तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते" इति भूतभव्यकर्मणोर्दाहाश्लेषश्रुतेः। प्रारब्धस्य च भोगेनोपक्षयान्न संसारे पतन्ति हेत्वभावादित्यर्थः। प्राञ्चस्तु—उदरहृदयशिरःशब्दैस्तत्स्थानि मणिपूरानाहतसहस्राराणि ब्रह्मोपास्तिस्थानानि लक्ष्यन्त इत्याहुः (५) ॥ १८॥

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्राशंकते—नन्विति। तदनुप्रविष्टस्योदरादिष्वनुप्रविष्टस्य देहानां योनिभेदात्तारतम्ये न्यूनाधिकभावे सति परिहरन्त्यः श्रुतयः स्तुवन्तीत्याह—तथाहि। एको देव इति। एक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्माध्यक्षःसर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च'' इत्याद्याःश्रुतयःस्तुवंतीत्याह।स्वकृतविचित्रयोनिष्विति।स्वयं कृतासूच्चनीचमध्यमासु योनिष्वभिव्यक्तिस्थानेषु कार्येषु देहादिषु हेतुतयोपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासंभवाद्विशन्निव वर्तमानस्तरतमतो न्यूनाधिकभावेन चकास्सि अवभाससे।स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिरनलवत्।अग्निर्यथा स्वतस्तारतम्यहीनोऽपि काष्ठानुसारेण तथा तथा प्रकाशते तद्वत् । अथातो वितथासु मिथ्याभूतास्वमूषु योनिष्ववितथं सत्यं यतः सममविशेषमतः सत्यं तव धाम स्वरूपं विरजधियो निर्मलमतयोऽन्वयंति जानंति । नु इति पृथक्पदं वा । अत्र हेतुः । अभिविपण्यव इति । अभितो विगतव्यवहाराः । पण व्यवहार इत्यस्य रूपं पण्युरिति । ऐहिकामुष्मिककर्मफलरहिता इत्यर्थः । अविशेषत्वादेवैकरसं सन्मात्रमतस्तवोपाधिकृततारतम्याभावादप्रच्युतैश्वर्यस्योपास्यत्वमिति भावः ॥ स्वनिर्मितेषु कार्येषु तारतम्यविवर्जितम् ॥ सर्वानुस्यूतसन्मात्रं भगवंतं भजामहे ॥ ६ ॥ १९ ॥

इति मूर्तिभेदाभावमाह । देव इति ज्ञानघनत्वेनाजड इत्याह । सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु । तर्हि किमिति न प्रतीयते गूढोऽनादिमायया छन्नः । तत्तद्भूतावच्छिन्नत्वेन परिच्छिन्नत्वाभावमाह—सर्वव्यापीति । नभोवत्ताटस्थ्यं वारयति—सर्वभूतान्तरात्मेति । सर्वभूतेष्वन्तस्त्वेऽपि तत्तत्क्रियाकर्तृत्वाभावमाह—कर्माध्यक्षः सर्वकर्मसाक्ष्येव न तु कर्तेति । सर्वभूतेष्वित्यादिना भूतानां पृथगुक्तेः । सद्वितीयत्वमाशंक्याह— सर्वभूतानामधिष्ठानं न च कल्पितमधिष्ठानादर्थान्तरमित्यर्थः । न केवलं कर्मणामेवाध्यक्षोऽपि तु तत्कर्तॄणामपीत्याह—साक्षीति । साक्षित्वे हेतुः—चेता इति । चित्स्वभाव इत्यर्थः । केवलो दृश्यवर्जितोऽद्वितीयो निर्गुणो ज्ञानादिगुणवर्जित इति तद्वत्त्वमपि स्थूलसूक्ष्मशरीरेषु तथातथा भासीत्यर्थः । अन्वयन्तीति अनुपूर्वादयतेः परस्मैपदाविधानादार्षत्वाश्रयेण तन्निष्पत्तिर्भवेत्तच्चागातिकगतिरूपमित्याह—नु इति पृथक्पदं यन्तीति 'इण्—गतौ' लटो रूपम् । नु निश्चयेन जानन्ति । अत्र ज्ञाने । इत्यर्थ इति । कर्मफलेप्सूनां ज्ञानं दुर्लभमिति भावः । अविशेषत्वाद्विशेषाभाववत्त्वादेव । अत एकरसत्वात् । इति भाव इति—अप्रच्युतैश्वर्यः प्रच्युतैश्वर्येणोपास्यत एवेति तात्पर्यम् । स्वामिश्लोकः—कार्येषु देहेषु तारतम्यं न्यूनाधिकभावः ॥ * ॥ **श्रीधरानुयायिनी**— ईश्वरस्यापि जीववद्देहादौ प्रवेशोऽनुपास्यत्वमाशंक्याहुः—स्वकृतेति । स्वतोऽसंगस्य निर्विकारस्यापीश्वरस्य स्वमायारचितेषूत्तममध्यमाधमदेहेषु ब्रह्मादिस्थावरान्तेषु कुण्डलादौ सुवर्णस्येवाग्र एवोपादानतया स्थितस्य पुनः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेस्तत्तद्देहप्रवेशो न्यूनाधिकभावेन तत्तद्देहानुकारिता च प्रतीयमानापि स्वतस्तारतम्यरहितस्य वह्नेः काष्ठानुसारेणेव मिथ्यैव अतस्त्यक्तसर्वविश्वविश्वव्यवहारास्तत्त्वविदो मिथ्याभूततत्तद्देहेष्वविशेषं सत्यं सन्मात्रमेव तव स्वरूपं जानन्ति । तथा चोपाधिकृततारतम्यरहितत्वात्तवोपासना योग्यैवेत्याशयः ॥ * ॥ **विश्वनाथी**— ननु—परमात्मनः प्रतिदेहगतत्वेन बहुत्वाद्देहतारतम्येन तारतम्याच्च जीवसाम्ये सति कथमुपास्यत्वमत आहुः—स्वकृतासु स्वेनैवाचिन्त्यशक्त्या निष्पादितासु ब्रह्मादिस्थावरान्तासु योनिषु स्वाभिव्यक्तिभूमिषु हेतुतया प्रयोजकतयांतर्यामितया "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रुतेः । इवेन मुख्यप्रवेशासंभवो दर्शितः । तरतमतस्तारतम्येन चकास्सि स्वशक्तिं तत्रतत्र प्रकाशयसि । तत्र हेतुः—स्वकृतासु देवादियोनिषु अनुकृतिस्तदनुकरणशक्तिप्रकाशो यस्य सः । यावत्कार्यमुपादत्से तावतीमेव तत्र शक्तिं प्रकाशयसीत्यर्थः । अनलवत् अनलो यथा यावत्स्फुलिंगादिकमुपादत्ते तावतीमेव तत्र शक्तिं प्रकाशयति तद्वत्स्वतस्तु तत्राप्यनंतशक्तितास्त्येवेति भावः । विकारावार्त्ते च तथाहि दर्शयतीति न्यायात् । श्रुतयस्तु दर्शिता एव (६) ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलकंठी—उक्ता संगतिः । स्वकृतविचित्रयोनिष्विति । संकल्पमात्रेण कृता विचित्रा मत्स्यकूर्मादियोनयोऽभिव्यक्तिस्थानानि । योनिशब्दस्य स्थानवाचित्वं "योनिष्ट इन्द्र निषदे अकारि" इति मंत्रे दृष्टम् । तासु योनिषु विशन्निव घटाकाशवद्व्यापकत्वेन मुख्यप्रवेशायोगात् हेतुतया "परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगेयुगे ॥ " इति स्वोक्तहेतोरित्यर्थः । "ऐतदात्म्यमिदं सर्वम् " इतिवत् स्वार्थे भावप्रत्ययः । हेतुतया योनिकल्पनाधिष्ठानतया वा तासु योनिषु प्रविष्टश्च त्वं तरतमतश्चकास्सि तारतम्येन दीप्यसे कथम्, अनलवत् यथाऽनलोऽग्निरल्पे उपाधौ अल्पप्रकाशो महति महाप्रकाशस्तद्वत् । अत्र हेतुमाह-स्वकृतानुकृतिः । स्वेन कृता या मर्यादा तामनुकरोतीति स तथा । तथाहि—दाशरथेर्भार्यावियोगजं दुःखं भृगुशापनिमित्तं, बाणासुरसंग्रामे शंकरस्य कृष्णात्पराजय इति परमेश्वरस्यापि स्वकृतमर्यादापरिपालनं दृश्यते । नन्वैश्वर्यतारतम्यं क्वचिद्विश्रान्तं तारतम्यत्वाद्घटादितारतम्यवत् इत्यनुमानात् "य एष सर्वोत्तमः स एवोपास्यः" इत्याशंक्य अथ वितथास्विति । अथेत्युपास्त्यंतरारंभार्थः । अमूषु योनिषु वितथासु मिथ्याभूतासु प्रविष्टम् अवितथं सत्यं तव धाम स्वरूपप्रकाशः समं तुल्यमुपादानत्वात् । तथाहि योनीनां वितथत्वं गम्यते । शिवविष्णुब्रह्मणां मिथः पितृपुत्रादिभावस्मृतिभ्यः श्रुतिष्वपि "विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभियाति तृतीयम्" इति । "विष्णोः सोमतत्त्वज्ञानादर्चिरादिमार्गेणोपासकप्राप्यब्राह्मलौकिकैश्वर्याद्धूमादिमार्गेण कर्मिप्राप्यचंद्रलोकैश्वर्याच्चान्यस्य तृतीयस्य योगैश्वर्यस्यागस्त्यादेरिव प्राप्तिः "न ते विष्णो जायमानो न जातो देवमहिम्नः परं मतमा उ" इति । विष्णोरनंतमहिमत्वञ्च श्रूयते न चैतयोः श्रुत्योर्भूतार्थत्वं सर्वोत्तमदयायोगात, नाप्यन्यतरश्रैष्ठ्यनिश्चायकत्वं तुल्यबलत्वात्, नापीशे विकल्पार्थत्वं वस्तुनि तदयोगात, तस्मादुदितानुदितहोमवद्योनीनां निन्दास्तुतिभ्यां हानमुपादानं वा न विवक्षितं किंतु विधित्सितस्तुतिमात्रम् , अन्यथा हाने विधिद्वयवैयर्थ्यम् उपादाने त्वन्यतरवैयर्थ्यम् एकेनैव तत्त्वसाक्षात्कारोपयोगिचित्तैकाग्र्यासिद्धेः । तथा च—पारमर्षं सूत्रम् 'विकल्पो विशिष्टफलत्वात्'इति । उपास्तीनां विकल्पस्तुल्यफलत्वादिति सूत्रार्थः । तस्मान्नटवत्सौभर्यादिवच्च पर्यायेण युगपद्वा रामकृष्णहरिहरमैरालादिमूर्तीरधितिष्ठन्नेक एव शिवविष्ण्वादिशब्दैः प्रतिपाद्यते "सर्वशास्त्रपुराणेषु यो देवानां नामधा एक एव" इति श्रुतेः, परविद्याधिकारेषु शिवविष्ण्वोर्विष्णुशिवयोर्वा निंदास्तुती क्रमात्सगुणनिर्गुणब्रह्मापेक्षे । तत्र निंद्यभजनान्नरकं व्रजन्तीत्यपि कार्यब्रह्मलोकं व्रजन्तीत्येव । परं शास्त्रीयस्य भजनस्य रागतः प्राप्तब्रह्मवधादिवन्नरकहेतुत्वासंभवात् । शौनकीयप्रणवपटलव्याख्याने हेमाद्रिरप्येवमेव व्याचख्यौ नरकं ब्रह्मलोकमिति । तस्माद्भगवन्मूर्तिषूत्कर्षापकर्षचिन्ता पाखण्डापसदयोग्या स्वामिद्रोहहेतुः, अत एव तासु भेददृष्टिर्निंद्यते । स्कांदे—"ब्रह्माणं केशवं रुद्रं भेदभावेन मोहिताः। पश्यन्त्येकं न जानन्ति पाखण्डोपहता जनाः ॥" इति । योनीनां प्रतिपाद्यत्वे तु कृत्स्नं शास्त्रं परस्परविरोधादप्रमाणं स्यादतो युक्तमुक्तं वितथास्वमूष्विति । यद्वा—अथेति हेतौ । यतः स्वकृतानुकृतिःस्वकर्मार्जितदेहप्रतिकृतिः अनल इव दुष्पूरत्वात् । जाठरानलसंबंधादनस्य प्राणस्य लानादादानाद्वाऽनलो जीवदेहः लुप्तोपमा, पक्षे अनलवान्यो जीवदेहः तद्वद्भोगदा भवंति अतो वितथास्विति योज्यम् । अयं भावः—यथा चैत्रः स्वकर्मार्जिते देहे कौलिकप्रसिद्ध्या शत्रुनिर्मितायां वा देहप्रतिकृतौ कंटकेन तुद्यमानायां व्यथते एवमीश्वरोऽपि स्वमायाकल्पिते जीवाविद्याकल्पिते वा कृष्णादिविग्रहे द्रुग्धे पूजिते वा द्रुग्धः पूजितश्च भवति । यथा—चैत्रस्य देहप्रतिकृत्येव देहेनापि संबंधो मिथ्या तादृशेनापि भोगनिर्वाहे तत्सत्यकल्पनाया अयोगात् "असंगो ह्ययं पुरुषः" इत्यादिश्रुत्या बाधाच्च ततश्च सर्वास्ववस्थास्वनुवर्तमाने प्रत्यगात्मनि कदाचिदभेदेन पर्यायेण च प्रतीयमानं देहत्रयं मिथ्या शुक्ताविव रंगरजतादिकं "नेह नानास्ति किञ्चन " इति श्रुत्या बाधितत्वाच्च । एवमीश्वरेऽपि विग्रहादिर्मिथ्येति । तदेवं वितथासु हरिहरादिषु मूर्तिषु यत्समं कारणम् एकरसं शुद्धं तव धाम तद्विरजधियो वीतरागमतयोऽन्वयंति मूर्त्युपास्तिमनुप्रःप्नुवन्ति के अभिविपण्यवः सर्वतो विगतव्यवहाराः एकान्ते ध्यातार इत्यर्थः । एतेनैकादशोक्तोऽर्थो दर्शितः यथा—"तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् । नान्यानि चिन्तयेद्भूयः सुस्मितं भावयेन्मुखम् ॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् । तच्च त्यक्त्वा मदारोहो न किञ्चिदपि चिन्तयेत् ॥" इति । एकत्रांगे अन्यान्यंगानि न चिन्तयेत् । एकत्रेति यदुक्तं तदेवांगं दर्शयति—सुस्मितमिति । व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मयि शुद्ध ब्रह्मण्यारूढः सन्न किंचित् ध्यातृध्येयविभागमपि न चिन्तयेदिति श्रीधराचार्यव्याख्या (६) ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंशकृतम् ॥
इति नृगतिं विविच्य कवयो निगमावपनं भवत उपासतेंघ्रिमभवं भुवि विश्वसिताः ॥ ७ ॥ २० ॥

अपि च कुतो न्वियमाशंका स्याद्भगवतो देहाद्युपाधिकृतदोषप्रसंग इति यतोऽविद्याकामकर्मभिः संसरतो जीवस्यापि भगवद्भावं लक्षणया बोधयंत्यस्तं दोषं निषेधयंति "स यश्चायं पुरुषे ॥ यश्चासावादित्ये ॥ स एकः ॥ तत्त्वमसि" इत्याद्याः श्रुतयः । ननु क्रत्वर्थस्यात्मनः स्तुतिरियमीश्वरत्वेन क्रियते न तु तस्येश्वरत्वं बोध्यते । नैतद्युज्यते यतस्तत्र "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इत्याद्याः श्रुतयः कृतावतारस्य भगवतश्चरणभजनमुपायं वदंतीत्याह । स्वकृतपुरेष्विति । स्वकर्मोपार्जितेषु पुरेषु देहेष्वमीषु नरादिषु भोक्तृत्वेन वर्तमानं पुरुषमखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णस्य तवांशकृतं वदंति । अंश इवांशः कृत इव कृतः । त्वद्रूपं वदंतीत्यर्थः । ननु कार्यकारणसंवृतस्य कुत एवंभूतत्वं तत्राह । अबहिरंतरसंवरणमिति । बहिः कार्यमंतरं कारणं तत्संवरणं तदावरणम् । वस्तुतस्तदावरणशून्यम् । तयोरसत्त्वादित्यर्थः । इत्येवं नृगतिं नुर्जीवस्य गतिं तत्त्वं विविच्य विशोध्य कवयोऽन्यथेदं न प्राप्यत इति जानंतो निगमावपनं निगमोक्तकर्मणामावपनमासमंतादुप्यतेऽस्मि

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्र पूर्वोक्तार्थासंभवमाह—अपि चेति । यतो हेतोरविद्याकामकर्मभिः देहादावात्मबुद्धिरविद्या तद्वशेन विषयेच्छा कामस्तन्निष्पत्तये कर्माणि क्रियन्त इति तेन च संसार इति संसरतो जीवस्य लक्षणया भागत्यागरूपया भगवद्भावमीश्वरतां बोधयन्त्यः श्रुतयस्तद्दोषं देहाद्युपाधिकृतसंगदोषं निषेधयन्ति ततो हेतोर्भगवतोभगवतोऽप्रच्युतज्ञानैश्वर्यस्येयमांशका देहाद्युपाधिकृततारतम्यादिरूपा शंका नु वितर्के कुतः स्यात्कथं संभवेन्न कथमपीति भावः । श्रुतीराह—"स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः" ":अरे अयमात्माऽनंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" इति "तत्त्वमसि" इत्याद्या इहादिनाऽयमात्मा ब्रह्मेत्यादिग्रहः । अर्थः—परमे व्योम्नि आकाशाद्यन्नमयान्तं कार्यं सृष्ट्वा तदेवानुप्रविष्टो यः स एवायं पुरुषः । अयं कः यश्चासावादित्ये वर्तते । स एक एव भवति । अयमात्माऽनंतरः अंतरशून्यः अबाह्यो बाह्यशून्यः कृत्स्नः पूर्णः ज्ञानघनो ज्ञानस्वरूप इति । तत्त्वमसीति व्याख्यातचरम् । पुनराक्षिपत्यत्र—नन्विति । क्रतुर्यज्ञोऽर्थः प्रयोजनं यस्य स तथा यज्ञकर्तेत्यर्थः । आत्मनः पुरुषस्य तत्त्वमसीत्यादिवाक्यैः स्तुतिरियं न तु तस्य यज्ञकर्तुः । परिहरति—नैतदिति । एतद्यज्ञकर्तुः स्तवनं न युज्यते युक्तं यतो हेतोः भगवद्भक्तियुक्तस्यैव कथितार्थाः श्रुतितात्पर्यविषयीभूतार्था अतस्तत्रात्मज्ञाने यस्येत्याद्याः कृतावतारस्य रामकृष्णादिविग्रहस्य चरणभजनमुपायं तत्प्राप्तिकारणं वदन्तीति योज्यम् । श्रुतीराह—"यस्य देवे" इति । श्वेताश्वतरेण कथिता अर्थाः पदार्थास्तस्यैव महात्मनः प्रकाशन्ते यथावत्स्फुरन्ति नान्यस्येत्यर्थः । कस्येत्याकांक्षायामाह—यस्य पुरुषस्य देवे परमेश्वरे परा फलाभिसंधानशून्या भक्तिरनुरागो भवति, यथा देवे तथैव चेद्गुरौ सदर्थोपदेष्टरि भक्तिर्भवेत्तस्येत्यर्थः । तस्मादेवं ब्रह्मविद्यार्थिभिर्देवतागुरुविषया निरुपाधिर्भक्तिः कार्येति दर्शितम् । इत्यर्थ इति—"निष्फलं निष्क्रियं शान्तम्" इत्यादिश्रुत्या निरंशत्वबोधनादिति भावः । अत्राशंकते—नन्विति । कार्यं देहादि कारणमज्ञानं ताभ्यां संवृतस्याच्छन्नस्य । एवंभूतत्वं भगवद्रूपत्वम् । इत्यर्थ इति—न ह्यसद्भ्यां कार्यकारणाभ्यां स्वाभाविकी सद्रूपताऽपाकर्तुं शक्येति भावः । तत्त्वं स्वरूपम् । अन्यथा भक्तिं विना इदं ज्ञानं नाप्यते "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते"

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नित्यावपनं क्षेत्रं सर्वकर्मार्पणविषयमित्यर्थः । यत्रार्पितानि कर्माणि मुक्तिफलं फलंति तं भवतोंघ्रिमभवं भवनिवर्तकं विश्वसिताः कृतविश्वासा उपासतेऽर्चनवंदनादिभिः सेवंते । भुवीति मर्त्यलोके इदमेवोचितमिति दर्शयंति ॥ त्वदंशस्य ममेशान त्वन्मायाकृतबंधनम् ॥ त्वदंघ्रिसेवामादिश्य परानंद निवर्तय ॥ ७ ॥ २० ॥

इत्याद्युक्तेः । इत्यर्थ इति—सुक्षेत्रार्पितं बीजं शुभफलाय भवतीति भावः । अंशकृतामिति । गोपालतापनीय—"ब्रह्मणोंशभूतस्तथेतरो भोक्ता" इति । नारदपञ्चरात्रे—प्राधानिकसर्गमुक्त्वा शुद्धसर्गकथने "यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम् । रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" इति । श्रीगीतासु च—"ममैवांशो जीवलोके जीवभूतः सनातनः" इति । अंघ्र्युपासनमाह श्रुतिः—"चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन शुद्धेन पवित्रेण पूतेनातिपाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिष्मद्भ्राजमानं महस्वदमृतस्य धारा बहुधा दोहमानं चरणं लोके सुधितां ददातु" इति । अर्थः—श्रीकृष्णस्य कृतत्रिविक्रमरूपस्य चरणं याचमाना आहुः—येन पातक्यपि पूतः पवित्रः सन्दुष्कृतानि पापानि तरति तच्चरणं पवित्रकरं विततं विस्तीर्णं भूर्भुवःस्वरतिक्रम्य वर्तमानं पुराणं सनातनं तेन चरणेनारातिं वैरिणं पाप्मानं वयमतिशयेन तरेम, किंभूतेन शुद्धेन स्वयंभूदत्तार्घजलधौतेन । पुनश्च पवित्रेण पवित्रकारकेण पूतेन निर्मलेन । तच्चरणं लोके सुधितां सुधाधारां ददातु तारकादित्वादितच् । किंभूतम् लोकस्य वैकुण्ठस्यार्चिष्मद्दीपवत् द्वारं भ्राजमानं दंदीप्यमानं न केवलमेतावदपि तु महस्वत् महः ब्रह्मतेजोमंडलं तद्युक्तम् । अत एव लोके बहुधा बहुप्रकारा अमृतस्य धारा धर्मार्थकाममोक्षभक्तिरूपाः कामधेनुरिव भक्तेभ्यो दोहमानमत एवंभूतं चरणं भजामेत्यर्थः । भक्तिपरेयं श्रुतिः । स्वामिनां त्वदंशस्येति सुगमम् ॥ * ॥ **श्रीधरानुयायिनी**—एवं परमात्मानमुपास्यंनिरूप्य जीवात्मानं तदंशतुल्यत्वेन निरूपयन्कैमुत्यन्यायेन प्रागुक्तमेव द्रढयन्ति—स्वकृतेति । यतः स्वप्रारब्धोपार्जितेषु मनुष्यादिदेहेषु भोक्तृत्वेन वर्तमानमपि जीवं 'जातावेकत्वम्' सर्वशक्तेस्तव स्वरूपम्—"ममैवांशो जीवलोके जीवभूतः सनातनः" इति श्रीगीतोक्तेर्वस्तुतो देहाद्यनावृतं च विवेकिनो वदन्ति भेदकोपाधेः शरीरादेर्मिथ्यात्वात् । अत एवं जीवतत्त्वं विवेकिनो विशोध्य यत्रार्पितानि वैदिकानि कर्माणि "मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि" इति भगवदुक्तेर्मोक्षदायकानि भवन्ति । तं गर्भवासादिदुःखहरं कल्पपादपं तव पादपद्मं भारतखण्डे "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इत्यादि भगवद्वाक्ये कृतविश्वासा भजन्ति । यद्वाऽखिलशक्तिभृतस्तवांशोऽयमतस्तत्कृतमभक्तदण्डनार्थं स्वरचितेषु पुरेषु रौरवादिनरकेषु पुरुषं देहादिलंपटं जीवमुद्दिश्याबहिरंतरसंवरणम् अबहिर्यथा स्यात्तथा चौरमुद्दिश्य कारागार इवांतरेव संवरणं बंधनं वदन्ति तथा नरकभोगानंतरममीषु ऐहिकेषु स्वप्रारब्धरचितेषु पशुपक्ष्यादिविचित्रशरीरेषु संवरणमित्येवं जीवगतिं विविच्य विचार्य कवयः शास्त्रतात्पर्यज्ञास्त्वत्कृपयैव बंधनान्मुक्तिरिति विश्वसिताः सन्तो भुवि भारतखण्डे निगमानां वेदोक्तकर्मणामावपनं क्षेत्रमत एवाभवं भवनिवर्तकं भवतोंऽघ्रिमुपासत इत्यर्थः ॥*॥ **विश्वनाथी**—तदेवमन्तर्यामित्वांशेऽपि भगवतः शुद्धत्ववर्णनेन तत्पराणां श्रुतीनां वचनं श्रुत्वा स्वानुगृहीतानां जीवतत्त्वानुवादिनीनां श्रुतीनामपि तत्रैव तात्पर्यं काश्चिदन्याः श्रुतयो वर्णयन्ति—स्वकृतपुरेषु पूर्वोक्तेष्वेव वर्तमानं पुरुषं जीवसमूहं त्वत्तो भिन्नत्वेनाभिन्नत्वेन वा या वदन्ति तास्त्वांशेनैव कृतं सिद्धं वदन्ति, तथाभिप्रायेणैव वर्णयन्ति नान्यथेत्यर्थः । ब्रह्मणोंशभूतस्तथेतरो भोक्ता भवतीति श्रीगोपालतापनीश्रुतेः । ननु—कथमपरिच्छेद्यस्यांशत्वं तथा "ममैवांशो जीवलोके जीवभूतः सनातनः" इति गीतोपनिषदुक्तम् । "द्वासुपर्णा सयुजा सखाया" इत्यादिश्रुत्युक्तश्च नित्यत्वं स्यात् । अत्राहुः—अखिलशक्तिधृत इति । "विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा । अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥" इति विष्णुपुराणोक्त्यनुसारेण "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मेपराम् । जविभूतां महाबाहो ययेदं धार्यते जगत् ॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥" इति श्रीभगवतः प्रकृतिद्वयतत्कार्यसाधकत्वसूचनया दर्शितस्वरूपशक्तिपर्यन्तश्रीगीतोपनिषदनुसारेण च या अखिलास्त्रिविधाः शक्तयः कार्यमात्रगम्याचिन्त्यप्रभावास्ता धरसि यस्त्वं तस्य तावत्तादृश्यः शक्तय एव तत्तद्दोषं विनैव तत्तद्दुर्घटं संपादयन्त्यो नित्यमेव वर्तन्त इति स्थिते तव तादृशशक्त्याद्यात्मकजीववृंदरूपांशो नित्यमेव वर्तत इत्यर्थः । ननु—तर्हि मत्स्यदेवादिवदैश्वर्यमेवास्य युज्यते तदभावे महदादिवन्मायिकत्वमेव वा तत्राहुः—अबहिरंतरसंवरणमिति । न विद्यते बहिर्मायिकत्वे अंतस्तवांतरंगस्वरूपत्वेऽसंवरणं व्याप्तिर्यस्य तथाभूतमित्यर्थः । श्रीविष्णुपुराणादावांतरालपाठान्मार्तण्डमण्डलच्छाययोरन्तरालवर्तिमयूखपरमाणुवृन्दमिवेति भावः । अतो मण्डलस्थानीयस्य भगवत एव स्वल्पशक्तिव्यक्तिमयाविर्भावविशेषत्वात्स्वांशत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ॥
न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ॥ ८ ॥ २१ ॥

भक्तिरल्पसाधनमिति वचनमनुचितमिव मन्वानो भक्तिं गुरूकरोति । दुरवगमेति । भो ईश्वर दुरवगमं दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञापनाय तवात्ततनो

श्रीमत्स्यदेवादीनां रश्मिस्थानीयत्वाद्विभिन्नांशत्वं जीवानामिति तत्त्ववादिनः । अत्र तँदुदाहृतं महावाराहवचनञ्च "स्वांशश्चाथ विभिन्नांश इति द्वेधांश इष्यते । अंशिनो यत्तु सामर्थ्यं यत्स्वरूपं यथास्थितिः ॥ तदेव नाणुमात्रोऽपि भेदः स्वांशांशिनोः क्वचित् । विभिन्नांशोऽल्पशक्तिः स्यात्किञ्चित्सामर्थ्यमात्रयुक् ॥" इति । अत इदमेवं व्याचक्षते न विद्यते बहिः क्रियाशक्तिरंतर्ज्ञानशक्तिर्वा असंवरणमसंक्षिप्तत्वसर्वव्यापकत्वं यस्य तमिति अतच्छायया सूर्यमण्डलमिव भगवत्स्वांशश्रीमत्स्यदेवादिर्मायया नाव्रियते रश्मिस्थानीयो विभिन्नांशो जीवस्त्वाव्रियते । यथोक्तं विष्णुपुराणे—शक्तित्रयकथनानंतरमेव "यया क्षेत्रज्ञशक्तिः सा तारतम्येन वर्तते" इति । यया पूर्वोक्ताविद्याकर्मसंज्ञया अविद्याकर्मवृत्तिर्यस्याः साऽविद्याकर्मा तन्नाम्नी मायेत्यर्थः । यथोक्तं नारदपञ्चरात्रे—प्राधानिकसर्गमुक्त्वा शुद्धसर्गकथने "यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम् । रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" इति । अत एवांशकृतमिति । अंशश्चासौ कृतो मायोपाधितया संपादितश्चेति तमित्ययमेवार्थः । विवक्षितमेवाहुः—इतीति । पूर्वोक्तप्रकारान्तरेण जीवस्य गतिं त्वदंशत्वलक्षणं तत्त्वं विविच्य विश्वसिता जातविश्वासा ये कवयो विवेकिनस्ते भगवतोंऽशिस्वरूपस्यांघ्रिमुपासते, विनांशिभजनमंशस्य तुच्छतापत्तेः । नन्वन्येऽपि सन्ति केषाञ्चित्केऽप्यंशिनस्तेऽप्युपासन्ताम् तत्राहुः निगमाः सर्वे वेदाः आसमन्तादुप्यन्ते समन्विताः क्रियन्ते यस्मिंस्तादृशत्वात्सर्ववेदार्थत्वात्त्वमेव सर्वोत्तमभजनीयः सर्वोत्तमपुरुषार्थश्चेत्यर्थः । ननु—सावयवत्वेनान्यतुल्यत्वात्कथं तादृशत्वं तत्राहुः—निगमावपनत्वादेव न विद्यते भवो जन्म यस्य तं नित्यमित्यर्थः । न विद्यते भवो यस्मादिति विग्रहेऽपि कैमुत्येन तत्सिध्यति । भुवीति—पृथिव्यां तादृशसाधकप्राचुर्यविवक्षयोक्तम् । अत्र मुख्याः श्रुतयः "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । अस्यावयवभूतैश्च व्याप्तं सर्वमिदं जगत् ॥ यो योनिमधितिष्ठत्येको यस्मिन्निदं सञ्चरीचार्ति सर्वम् । तमीशानं वरदं देवमीड्यं विचार्येमां शान्तिमत्यन्तमेति ॥" इत्याद्याः तदनुगताश्च "सर्वे वेदा यत्पदमामनन्ति" इत्याद्याः "चरणं पवित्रं विततं पुराणम्" इत्याद्याश्च (७) ॥ २० ॥

नीलकण्ठी—संगतिः पूर्वोक्ता । स्वकृतपुरेष्विति । स्वाज्ञानकल्पितेषु सुरनरतिर्यगादिशरीरेषु अमीषु दृश्यमानेषु प्रविष्टं पुरुषं पुरि शयं जीवमखिलशक्तिधृतस्तव "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः सर्वशक्तिमत स्तवांशकृतमविद्यायांशमिव कृतं घटाकाशवन्निरंशस्य वास्तवांशांशिभावायोगात् वदन्ति श्रुतयः स्मृतयश्च "पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरः स पक्षीभूत्वा पुरः पुरुष आविशत्" इति । "ममैवांशो जीवलोके जीवभूतः सनातनः" इत्याद्याः । अस्य जीवस्य पूर्वश्लोकोक्तैकरसब्रह्मभावस्योपपादनाय तात्त्विकं रूपमाह—अबहिरन्तरसंवरणम् । न सन्ति बहिः अन्तरं संवरणञ्च यस्य तम् अस्य बहिर्नास्ति महत्तरत्वात्, नान्तरमणुतरत्वात्, संवृणोति व्याप्नोति संव्रियते व्याप्यते इति कर्तृकर्मव्युत्पत्तिभ्यां संवरणमुपादानमुपादेयञ्च तदुभयमस्य नास्तीत्यर्थः । तथा च श्रुतयः "अणोरणीयान्महतो महीयान्" "न तदश्नोति कश्चन" "न तदश्नोति कश्चन" इति शास्त्रानुभवाभ्यां नृणां जीवानां गतिं निःसंगित्वदुःखित्वरूपां विविच्य कवयः शास्त्रज्ञाः भवतो विष्णोरंघ्रिमुपासते । अंघ्रिं विशिंषन्नेवोपासनायाः स्वरूपं फलञ्चाह—निगमावपनम् । अभवं वेदोक्तकर्मणां समर्पणस्थानं "मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि" इति स्मृतेः । तत्त्वजिज्ञासुना भगवत्प्रीत्यर्थं कर्माणि कर्तव्यानीत्यर्थः । अभवं भवानिवर्तकं मूर्तिध्यानादिक्रमेण विश्वसिताः श्रद्धालवः 'श्रद्धावाँल्लभते ज्ञानम्' इति स्मृतेः, इदं मुख्यमधिकारिविशेषणम् । "इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीर्महती विनष्टिः" इति श्रुतेर्मर्त्यलोक एव साधनानुष्ठानं घटते नान्यत्रेति दर्शयितुं भुवीत्युक्तम् (७) ॥ २० ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—"तमेतं वेदानुवचनेन यज्ञेन दानेन तपसानाशकेन" इत्यादिषु ज्ञानसाधनेषु भक्तेरनुक्तत्वात्साऽल्पेति वचनमनुचितमिति मत्वाह—भक्तिरित्यादिना । इत्यर्थ इति—व्याख्या । अन्यत्स्वर्गादि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राविष्कृतमूर्तेश्चरितमहामृताब्धिपारिवर्तपरिश्रमणाः चरितमेव महामृताब्धिस्तस्मिन्परिवर्तो विगाहस्तेन परिश्रमणाः । परिवर्जनार्थः । श्रमणं श्रमः । गतश्रमा इत्यर्थः । अपवर्गमपि केचिन्न परिलषंति नेच्छंति कुतोऽन्यदिंद्रपदादि । केचिदित्येवंभता भक्तिरसिका विरला इति दर्शयंति । न केवलमन्यन्नेच्छंति किंतु तेनैव सुखेन पूर्णाः संतः पूर्वसिद्धं गृहादिसुखमप्युपेक्षंत इत्याह । तव चरणसरोजहंसकुलसंगविसृष्टगृहा इति । तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं तेन संगस्तेन विसृष्टा गृहा यैस्ते तथा । अनेन श्रवणकीर्तने दर्शिते । श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति । यथाऽऽह " यं सर्वे देवा नमंति मुमुक्षवो ब्रह्मवादिनश्च " इति । व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः । " मुक्ता अपि लीलया विग्रहं कृत्वा भजंते" इति ॥ त्वत्कथामृतपाथोधौ विहरंतो महामुदः ॥ कर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥ ८ ॥ २१॥

तेनैव भक्तिसुखेन । श्रुत्यर्थस्तु–सर्वे देवा यं परमेश्वरं नमन्ति तथा मुमुक्षवो ब्रह्मवादिनश्च यं नमन्ति । अत्र देवाः पृथिव्यन्तरिक्षनाकब्रह्मलोकनिवासिनो ये भगवद्भक्तास्ते सर्वे देवाः संसारविजिगीषुत्वान्मोदशालित्वाच्च । तेषां मध्ये द्विविधा उपासकाः मुमुक्षवः संसारान्मुक्तिकामाः ब्रह्मवदनशीला ब्रह्मवादिनो मुक्ता एते सर्वे यं नमान्ति भजन्त इति व्याख्यातं सर्वज्ञैर्भाष्यकृद्भिर्भगवत्पूज्यपादैर्नृसिंहतापन्याम् । मुक्ता अपि श्रीशुकादयो लीलया विग्रहं धृत्वा भजन्ति " आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिम् " इत्याद्युक्तेः । स्वामिनां त्वादिति । तव कथैवामृतपाथोधिरमृतसमुद्रस्तत्र ॥ * ॥ **श्रीधरानुयायिनी–** सर्वसाधनेभ्यो भक्तेराधिक्यं वदन्ति– दुरवगमेति । भो ईश्वर केचित्त्वदीयानन्यभक्तसमूहसंगलब्धत्वत्कीर्तिश्रवणकीर्तनहेतुकसुखेन परिपूर्णा अत एव प्राक्सिद्धमपि गृहपुत्रद्व्यादिसुखं परित्यज्य ते दुर्ज्ञेयात्मतत्त्वज्ञापनाय प्रकटीकृतश्रीमूर्तेस्तव चारित्रामृतसमुद्रावगाहनेन दूरीकृतसंसारश्रमसंतापास्त्वया दीयमानमपि मोक्षमपि नेच्छन्ति कुतोऽन्यदिन्द्रादिपदमिति । विरला एव ते । यद्वा–तव चारितान्येव महामृताब्धयस्तेषु ये परिवर्तास्तरंगभ्रमिपुञ्जास्तेषु निमज्जनोन्मज्जनोत्थं परिश्रमणमतिश्रमो येषां त इत्यर्थः । ननु–मोक्षमपि त्यक्त्वा पुनरीदृशपरिश्रमस्वीकारः किमर्थमिति चेच्छृणु– यथा विषयलंपटाः परमसुकुमाराः परिश्रमासहना अपि भोगसुखाद्युपयोगिनं युद्धव्यवहारादिपरिश्रममेव सर्वसुखाधिकं सुखं मन्यन्ते, तथा त्वद्भक्तास्त्वल्लीलाकथामाधुर्यपानोत्थं नर्तनकीर्तनादिपरिश्रममेव परमानंदसाधनत्वेन परमसुखं मन्यमाना ब्रह्मास्वादसुखं पशूनां तृणचर्वणसुखमिव मन्यन्तेऽत एवोक्तं भाष्यकारैः– मुक्ता अपि लीलया विग्रहं धृत्वा भगवन्तं भजन्ते, इति । त्वत्कथेत्याद्या श्रीधरकारिकाप्येतदभिप्रायिकैव ॥ * ॥ **तोषिणी–** तच्छ्रुत्वा लब्धनिजभावोद्दीपनाश्चरणोपनिषदाद्याः साक्षादेव तन्माधुरीं वर्णयन्ति–दुरवगमेति । हे ईश्वर सर्वोपरि विराजमानवैभव केचिद्विरलप्रचारा अपवर्गमपि पारि सर्वतो भावेन एकांशेनापि न लंषन्ति किमुतान्यत् । कथंभूतास्ते तत्राहुः– दुरवगमम् । सर्वागोचरपरमगोलोकादिवैकुण्ठविहारित्वेन दुर्बोधं यदात्मनस्तव तत्त्वं स्वरूपगुणलीलादियाथार्थ्यं तस्य निगमायानुभावनाय आत्ततनोः प्रपञ्चे समानीतनिजविग्रहस्य तव चरितरूपे महामृताब्धौ यदि महामृताब्धिः कश्चिद्भवति तदा साधारणजनबोधनाय तेन रूप्ये श्लेषात्स्वतस्त्वमृतानां सालोक्यादिमोक्षानंदानां तदन्तर्भावित्वात् त्वदीयमहासमुद्रतुल्ये यः परिवर्तो मुहुरवगाहाऽनुभवस्तेनानुषंगिकतयैव गतसंसारश्रमाय इत्यर्थः । ननु–बहवोऽपि तच्चरितं श्रृण्वन्ति तथापि न तादृशत्वमिति केषाञ्चित्तादृशत्वे किं कारणमित्याशंक्य परमरहस्यतया सर्वान्त एव तद्व्यञ्जयान्ति–चरणेति । हंसाः परमतत्त्वानुभाविनस्तेष्वपि चरणसंबंधिनः 'मुक्तानामपि सिद्धानाम्' इत्यादिशास्त्रे तच्चरणसंबंधेन लोकेऽपि सरोजसंबंधेन हंसानामुत्कर्षो वर्ण्यत इति परमोत्कृष्टा ये तन्माधुरीसमास्वादतिरस्कृतमोक्षानंदास्तेषां कुलं शिष्योपशिष्यादिरूपं तदेकस्यापि प्रसंगेन विसृष्टं त्यक्तमात्रं गृहं यैस्तेऽपि किमुत तत्र चिरं प्रवृत्ताः किमुततरां तादृशहंसानां शिष्यादयः किमुततमां स्वयमेव तादृशहंसा इत्यर्थः । अत्र मुख्याः श्रुतयः–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वदनुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रिय आत्मनि च ॥ न बत रमंत्यहो असदुपासनयाऽऽत्महनो यदनुशया भ्रमंत्युरुभये कुशरीरभृतः ॥ ९ ॥ २२ ॥

" आराममस्य पश्यंति न तं पश्यति कश्चन ॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव ॥ नीहारेण प्रावृता जल्प्याश्चासुतृप उक्थशासश्चरंति " इत्याद्याः " चरणं पवित्रं विततं पुराणं तेन पूतास्तरन्ति दुष्कृतानि । तेन शुद्धेन पवित्रेण पूतेनाऽतिपाप्मानमरातिं तरेम " " लोकस्य द्वारमर्चिष्मद्भ्राजमानं महस्वदमृतस्य धारा बहुधा दोहमानं चरणं लोके सुधितां दधातु ॐतत्सत् " इत्याद्याः, " अमृतस्य धारा बहुधा दोहमानम् " इति चरितमहामृताब्धिमत्त्वमुक्तम् भक्त्या चरणवर्णनं तदुपलक्षणत्वेन श्रीभगवन्तमेव बोधयन्तीति श्रुत्यैकार्थम् तदनुगताः श्रुतयस्तु "यं सर्वे देवा नमन्ति " इत्याद्याः । अत्र देवा विषयिणः ततश्च मुमुक्षव इत्यत उत्तरपाठाद्ब्रह्मवादिशब्देन क्रमोत्कृष्टदृष्ट्या तदुपदेष्टारो मुक्ता एव लभ्यन्ते ब्रह्माणि वदन्ति प्रकाशन्ते इति । अत्र मध्वाचार्यधृताः श्रुतयः— " मुक्ता ह्येनमुपासते मुक्तानामपि भक्तिर्हि परमानंदरूपिणी " इत्याद्याः । तथा च ब्रह्मसूत्रम्— ' मुक्तोपसृप्यव्यपदेशात् ' इति ॥*॥ अत्र **विश्वनाथाः**—भगवद्विषयकभक्तियोगस्य सर्वोत्कर्षं स्वाभिधेयञ्च द्योतयितुं तमेव पुनरप्यभ्यस्यन्ति—दुरवगमेति चतुर्भिः । हे ईश्वर सर्वनियन्तः दुरवगमं जीवैर्ज्ञातुमशक्यं यदात्मतत्त्वं स्वीयलीलारूपगुणरूपैश्वर्यमाधुर्यं तस्य निगमाय ज्ञापनायात्ततनोराविष्कृतश्रीमूर्तेस्तव चरितान्येव महामृताब्धयस्तेषु ये परिवर्तास्तरंगभ्रमिपुञ्जास्तेषु निमज्जनोन्मज्जनोत्थं परिश्रमगमतिश्रमो येषां ते । कतिचिद्विरलप्रचारा भक्ता अपवर्गं मोक्षसुखमपि नेच्छन्ति किमुत त्रिवर्गसुखम् । किन्तु—तदेव त्वच्चरितमहामृताब्धितरंगेषु निमज्जनोन्मज्जनपरिश्रमसुखमेवेति भावः । यथा विषयलंपटपरमसुकुमाराः श्रमलेशासहना अपि सांप्रयोगिकं परिश्रममेव सर्वसुखाधिकं सुखं मन्यन्ते तथैव त्वद्भक्तास्त्वल्लीलाकथामाधुर्यपानोत्थं नर्तनकीर्तनक्रोशनमिथःपादतलप्रपतनमूर्च्छनप्रबोधनहाहाकरणरोदनद्रावणादिपरिश्रममेव परमं सुखं मानयन्तो ब्रह्मास्वादसुखं पशूनां तृणचर्वणसुखमिव मन्यन्ते । तदुक्तं श्रीस्वामिचरणैरपि—" त्वत्कथामृतपाथोब्धौ विहरन्तो महामुदः । कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥ " इति । त्वत्सुखप्रातिकारणं वदन्तो विशिनष्टि ते तव चरणसरोजमाधुर्यास्वादिनो हंसा येः परमभागवतास्तेषां कुलस्य संगेन विसृष्टं गृहं स्त्रीपुत्रादिसंगसुखं यैस्तेऽन्यत्पूर्ववत् (८) ॥ २१ ॥

नीलकण्ठी—संगतिरुक्ता । दुरवगमात्मतत्त्वेति । दुरवगमं दुर्बोधम् आत्मनस्तत्त्वं याथात्म्यं तस्य निगमायापरोक्षज्ञानाय तत्र ब्रह्मणः आत्ततनोः स्वीकृतमत्स्यादिमूर्तेश्चरितं वेदोद्धारादि तदेव महान्निरतिशयफलहेतुत्वात् अमृतवन्मधुरत्वात् अब्धिवदनंतत्वाच्च महामृताब्धिः तत्र परिवर्तो नित्यं वर्तनं तेन हेतुना 'परिवर्जनार्थः' परित्यक्तं श्रमणं शोकमोहायासो यैस्ते तथाभूताः केचिद्विरलाः ईश्वर ते तव चरणसरोजे रममाणाः हंसा इव हंसाः संन्यासिनः तेषां कुलं समूहस्तेषां संगेन विसृष्टा गृहा यैस्ते तथाभूता यतय इत्यर्थः । ते अपवर्गं मोक्षमपि न परिलषन्ति नेच्छन्ति । पूर्वश्लोकोक्तकर्मयोगापेक्षया भक्तियोगो महीयानित्यर्थः । यत्तु भक्तेर्मोक्षाद्गरीयस्त्वमुक्तं "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिनः" इति श्रुत्या मुक्ता अपि लीलया विग्रहं कृत्वा सेवन्त इति तद्भाष्येण च दृढीकृतं तद्भक्तिस्तुत्यर्थम् कार्यब्रह्मलोकैकदेशभूतवैकुण्ठकैलासादिप्राप्तौ मुक्त्युपचारात् इति ध्येयम् । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदिति विद्यायां भेददर्शनाभावश्रुतेः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यविद्याविषयत्वात् भक्तेस्तद्वतां मुक्तत्वायोगाच्च प्रजापतिशिष्यस्यापि विरोचनस्य मोहवत्त्वश्रुतेर्जयविजययोर्वैकुण्ठात्पतनस्मृतेश्च न कार्यप्राप्तेः क्रममुक्तिहेतुतापि संभाव्यते अतो भक्तिस्तुत्यर्थमेव । तच्छ्रुतेस्तु जीवन्मुक्तविषयत्वमपि संभवतीति दिक् (८) ॥ २१ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—विषयिणो बहिर्मुखान्प्रत्यनुक्रोशन्त्यो जुगुप्सन्त्य "आराममस्य" इत्याद्याः श्रुतयः ता यथा—आराममिति । अस्यात्मन आराममारंसगं ग्रामं नगरं स्त्रियं पुत्रमन्नाद्यमित्यादिवासनारूपमाक्रीडस्थानं सर्वे पश्यन्ति तमात्मानं कश्चन कश्चिदपि न पश्यति अहो भाग्यहीनता लोकस्येति लोकं प्रत्यनुक्रोशं दर्शितम् । अत्यन्तविविक्तः स्वयञ्ज्योतिरात्मा स्वप्नादौ भवतीत्यर्थः। अनुक्रोशपरेयम् । विश्वकर्मा मनुष्याणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतयोऽनुक्रोशंत्यो जगदात्मनीश्वरे रतिमुपदिशंतीत्याह । त्वदनुपथमिति । त्वदनुवर्तित्वात्त्वत्सेवौपयिकमिदं कलायं कौ पृथिव्यां लीयत इति कुलायं शरीरम् । आत्मसुहृत्प्रियवत् आत्मा च सुहृच्च प्रियश्च तद्वच्चरति स्वाधीनतया वर्तत इत्यर्थः । तथाऽपि त्वयि उन्मुखे हिते प्रिये आत्मनि च । अप्यर्थे चकारः । एवंभूते सुसेव्येऽपि त्वयि बताहो कष्टं न रमंति न सख्यादिना भजंति । असदुपासनया देहाद्युपलालनेनात्महनः प्रमादिनः । कुतः । यदनुशयाः यस्यामसदुपासनायामनुशयो वासना येषां ते कुशरीरभृतः संत उरुभये संसारे भ्रमंति परिवर्तंते । अत आत्महन इति भावः । त्वय्यात्मनि जगन्नाथे मन्मनो रमतामिह ॥ कदा ममेदृशं जन्म मानुषं संभविष्यति ॥ ९ ॥ २२ ॥

हितमुपदिशति—न तमिति । तं यूयं न विदाथ न जानीथ य इमा इमानि भूतानि जजान जनयामास अतो युष्माकं तस्य चान्यन्महदंतरं बभूव स पुरुषो जनको यूयं जन्याः यदि ज्ञात्वात्मतत्त्वं सत्येनोपासिष्यध्वे तदा न संसृतिः स्यादित्यभिप्रायः। उपदेशपरेयं श्रुतिः। एवं प्रत्यक्षमुक्त्वा परोक्षमभिनयेन दर्शयन्नाह—नीहारेण ये च जल्प्या जल्पप्रवृत्तास्तार्किकाः, ये चासुतृपः असूनेव तर्पयन्तीत्यसुतृपो विषयिणः, ये चोक्थानां कर्मफलानामाशासितारो यज्वानः एते नीहारेणाविद्ययावृताः सन्तश्चरन्ति संसारे भ्रमन्तीति सनिन्दोपदेशपरेयम् । आदिनाऽसुर्यानामेत्यादिग्रहः । त्वामनु पंथा यस्य तत्तथा । उपयिकमुपयोगः । इत्यर्थ इति—यथात्मादयः स्वाधीना भवन्ति तथेदमपीति भावः । यद्वा—पंथानमनुगतमनुपथं स्वाधीनत्वं देहस्याह—आत्मवदहंकारास्पदत्वात् सुहृद्वद्विषयसमर्पकत्वात् प्रियवत्सर्वतः प्रीतिविषयत्वाद्देहस्त्वेवमाचरति तथापि तदापि । उन्मुखे भजनमात्रात्संसारादुद्धर्तुमुद्यते । हिते पितृवद्धितकरे । प्रिये मनोनुकूले सख्यौ । एवंभूते उन्मुखत्वादिरूपे सुखसेव्ये । यतो देहाद्युपासका अतो हेतोः । इति भाव इति—देहादिलालनपरा आत्महन एवानात्मप्रवृत्तत्वान्मोक्षमार्गमुग्धत्वादिति रहस्यं स्वामिनाम् । त्वयीति । ईदृशं त्वद्रमणशीलम् ॥ *॥ **श्रीवरानुयायिनी**—अतः सर्वथा परमेश्वरे रतिमेव व्यतिरेकमुखेनोपदिशन्ति—त्वदन्विति । समर्थमात्मवत् अहंकारास्पदत्वादात्मतुल्यत्वम्, सुहृद्वद्विषयसमर्पणलक्षणहितकारित्वात् सुहृत्तुल्यत्वं प्रियवच्च सर्वतः प्रीतिविषयत्वात्प्रियतुल्यत्वम् स्वाधीनं त्वत्सेवायोग्यं ब्राह्मणादिदेहं लब्ध्वापि तथा सदा प्रसादोन्मुखं परमदयालुमात्मत्वेन प्रियं सुसेव्यञ्च स्वामिनमपि त्वां लब्ध्वा ये मिथ्याभूतदेहाद्युपलालनपरा भोगलंपटा महाप्रमादिनस्त्वां बताहो कष्टं सख्यादिनापि न भजन्ति ते व्यर्थीकृतजन्मानः श्वशृगालादियोनिगता महाभये संसार एव भ्रमन्ति, अत आत्मघातिनस्ते । रमन्तीत्यार्षम् ॥ * ॥ **विश्वनाथी**—तदेवं पूर्ववत्तदीयशुद्धरतेरेवं सर्वतः प्रकर्षं ताभ्यां श्रुत्वापरास्तदनुगताः श्रुतयो व्यतिरेकेण पुष्यन्त्यः स्तुवन्ति—त्वदिति । पंथानमनुगतमनुपथं जीवरूपत्वदंशसंबंधपरंपरायामनुगतमित्यर्थः । तथाभूतमेव सदिति परमात्मनस्तव संबंधपरंपरयैवं इदं जडं कुलायं नश्वरशरीरमात्मादिवच्चरति भाति तत्तद्रूपतया स्फुरणेन रतिविषयतया प्रतीयत इत्यर्थः । मृतशरीरे तत्तद्भानाभावादिति भावः । अत्रात्मवत्त्वमहंकारास्पदत्वात्, सुहृद्वत्त्वं तस्मिन्विषयसमर्पणलक्षणहितकारित्वात्, प्रियवत्त्वं ततस्ततः प्रीतिविषयत्वात्, किंवात्मवत्त्वादेव तद्युगलवत्त्वमिति ज्ञेयम् । एवं यत्संबंधपरंपरयैव तस्मिंस्तत्तद्भानाद्रतिविषयत्वं तस्मिन्परमात्मत्वात्साक्षात्स्वयमेव तत्तद्रूपे विशेषत उन्मुखे स्वप्रकाशत्वात्स्वत एव तत्तदनुसंधानस्य कर्तरि कारयितारि च न तु जडत्वाद्देहवत्तदभाववति त्वयि तथा तुल्यतया न रमन्ति रतिं न कुर्वन्ति इत्यहो आश्चर्यं बत कष्टञ्चेत्यर्थः । नाप्याश्चर्यमिदमिति स्वयं हेतुञ्च विन्यस्यन्ति । असतस्तस्य कुलायस्य तत्संबंधिनां चासतामुपासनया शुश्रूषयेति तस्माद्युक्तमेवैतदित्याह—यदिति । तैर्व्याख्यातं श्रुतयोऽप्यत्र तद्दर्शिता एव ज्ञेयाः । अन्याश्च "असुर्या नाम" इत्याद्याः (९) ॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात् ॥
स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंऽघ्रिसरोजसुधाः ॥ १० ॥ २३ ॥

इदानीम् " आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः" इत्याद्याः श्रुतयो ध्यानमंगत्वेनोपदिशंतीत्याह । निभृतमरुन्मनोऽक्षदृढयोगयुज इति । मरुत्प्राणो मनश्चाक्षाणींद्रियाणि च निभृतानि संयमितानि यैस्ते च ते दृढं योगं युंजंति ते दृढयोगयुजस्ते तथाभता मुनयो हृदि यत्तत्त्वमुपासते तदेवारयोऽपि तव स्मरणाद्ययुः प्रापुः । स्त्रियोऽपि कामत उरगेंद्रभोगभुजदंडविषक्तधियः अहींद्रदेहसदृशयोर्भुजद॑ ..र्विषक्ता धीर्यासां ताः परिच्छिन्नदृष्टयः समदृशः सममपरिच्छिन्नं त्वां पश्यंत्यो वयं श्रुत्यभिमानिन्यो देवता अपि ते समा एव कृपाविषयतया । अंघ्रिसरोजसुधाः अंघ्रिसरोजं सुष्ठु धारयंत्यः । अयं भावः । इत्थंभूतस्तव स्मरणानुभावो ये योगिनस्त्वां हृद्यालंबनमुपासते याश्च

नीलकण्ठी–एवमीशसूत्रविराड्विष्णूनां बीजांकुरद्रुमफलाभानामुपास्त्या प्रत्यक्तत्त्वावगम उक्तः, अशक्तानां विष्णौ कर्मार्पणं तन्नामकीर्तनादिकञ्च चित्तशुद्ध्यर्थमुक्तं, तदुभयभ्रष्टं निन्दति–त्वदनुपथं कुलायमिति । इदं कुलायं कौ पृथिव्यां लीयत इति कुलायं नीडं शरीरं त्वदनुपथं त्वत्सेवानुकूलम् आत्मसुहृत्प्रियवत् आत्मवत्स्वायत्तत्वात्, सुहृत्प्रत्युपकारमनपेक्ष्योपकर्ता प्रियः प्रत्युपकारमनपेक्ष्योपाक्रियमाणः पुत्रादिस्तद्वत्, स्वाधीनतयाऽनुवर्तते श्रवणकीर्तनध्यानादिना त्वद्भजनं कर्तुं योग्यं शरीरमस्तीत्यर्थः । तथा त्वयि उन्मुखे भक्ताननुग्रहीतुम् अत एव हिते मित्रे प्रिये च निरुपाधिप्रेमगोचरत्वात्, प्रियत्वादेव आत्मनि प्रतीचि सुसेव्ये सतीत्यर्थः । अहो आश्चर्ये । बत खेदे । न रमन्ति त्वय्येव त्वद्गुणगानादिना न रमन्ते, कुतः असदुपासनया मृषाकल्पितहृद्याद्यमंगलवस्तुप्रावण्यादित्यर्थः । अत एवात्महनः आत्मानं नानादुःखेषु पातनात् घ्नन्ति हिंसन्तीति तथा । यदनुशयाः यस्यामसदुपासनायाम् अनुशयो वासना येषां ते भोगलंपटाः, उरुभये महाभयवति संसारे भ्रमन्ति । अत एव कुशरीरभृतः कापुरुषास्ते कुत्सितं शरीरं बिभ्रतीति वा । श्रूयते च–देवपितृमार्गभ्रष्टानां क्लिष्टा गतिः । " अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं शूकरयोनिं वा चंडालयोनिं वा अथैतयोः पथयोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम् " इति । " असुर्या नाम ते लोका अंधेन तमसा वृताः । ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥" इति च (९) ॥ २२ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–अधुना ध्यानमात्मप्राप्तावंगत्वेनाहुः–" आत्मा वा " इत्याद्याःश्रुतयस्ता आह । स्वभार्यां मैत्रेयीं प्रत्याह–याज्ञवल्क्यः । " न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेद ँ सर्वं विदितम् " इति । अरे इति निकृष्टसंबुद्धौ भार्यात्वात् । मैत्रेयि, सर्वस्य पतिस्त्रीपुत्रधनादिवसुमात्रस्य कामाय सर्वं प्रियं न भवति किन्त्वात्मनः कामाय सर्वं प्रियं भवति स आत्मा त्वया द्रष्टव्यः साक्षात्कर्तव्यः, श्रोतव्यः पूर्वमाचार्यत आगमतश्च पश्चान्मन्तव्यः तर्कादितः, ततो निदिध्यासितव्यो निश्चयेन ध्यातव्यः एवमात्मनो दर्शनं भवति मत्या मननेन विज्ञानेन निदिध्यासनेन । इयमप्युपदेशपरा । एतदभिप्रेत्यैव श्रीशुकेनोक्तम्–" तस्माद्भारत सर्वात्मा भगवान्हरिरीश्वरः । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ " इति द्वितीये । तथा पाद्मेऽपि–शिवः–"स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ॥ " इति । तदेव तत्त्वमत्र निर्गलितार्थमाह–अयं भाव इति–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं त्वां समं पश्यामो याश्च स्त्रियः कामतः परिच्छिन्नं ध्यायंति ये च द्वेषेण सर्वानपि तांस्त्वामेव प्रापयतीति ॥ चरणस्मरणं प्रेम्णा तव देव सुदुर्लभम् ॥ यथा कथंचिन्नृहरे मम भूयादहर्निशम् ॥ १० ॥ २३ ॥

वयं श्रुत्यभिमानिन्यो देवताः । ये च द्वेषेण शिशुपालादयः भवांस्तान्योगिप्रभृतीन् त्वामात्मानमेव प्रापयतीति । अत्रेदमवधेयम्—यद्यपि भगवत्प्रसादो गोपीनामसाधारणोऽस्ति " नायं श्रियोङ्ग उ नितांतरतेः प्रसादः स्वर्योषितां नलिनगंधरुचां कुतोऽन्याः । रासोत्सवेऽस्य भुजदण्डगृहीतकंठलब्धाशिषां य उदगाद्व्रजवल्लवीनाम् ॥ " इत्यादिभिरुक्तस्तथाप्यत्र ' तन्मध्यपातितस्तद्ग्रहणेन गृह्यते ' इतिन्यायात् मुन्यादीनां मध्ये कथितानां गोपीनामपि श्रीकृष्णस्मरणजन्यब्रह्मानंदसुखसाम्यं भवतु नाम किन्तु भजनानन्दसुखाधिक्यमस्त्येव निदर्शनञ्च—" अहल्या द्रौपदी सीता तारा मंदोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं सुप्रभातं दिनेदिने ॥ " एताः पञ्च कन्या नित्यं दिनेदिने स्मरेत्तर्हि तद्दिनं सुप्रभातं भवतीत्यर्थः । अहल्यादीनां मध्ये श्रीसीतापि पठिता एतावता ताभिः सह सीतायाः साक्षाल्लक्ष्म्याः किं साम्यं भवति किन्तु कन्यास्मरणफलदातृत्वेन साम्यमुक्तं सीता तु साक्षाल्लक्ष्मीरहल्याद्यास्तदंशांशा एवेति तथा कर्मादौ पञ्चदेवतापूजाविधौ गणेशादीनां मध्ये विष्णुरप्येको देव उक्तः एतावता विष्णुना तेषां किं साम्यं मंतव्यं किन्तु कर्मफलदातृत्वेन कर्माङ्गत्वात्समत्वम् , अन्यदा तु विष्णुरीश्वरो गणेशाद्यास्तदंशांशा एवेति दिक् । स्वामिनां चरणेति सुबोधः ॥ * ॥ **श्रीधरानुयायिनी**—इदानीमीश्वरभजने ध्यानमंगत्वेनापादिशंत्यस्त्वां स्मरता सर्वेषां तुल्यैव त्वत्प्राप्तिरित्याहुः—निभृतेति । ये वशीकृत प्राणेन्द्रियमनसो दृढयोगिनो हृद्युपासते, ये च कंसचैद्यादयो द्वेषेण त्वां स्मरन्ति, याश्च भवदीयशेषशरीरानुकारिभुजदंडद्वयासक्तधियो गोप्यस्त्वां परिच्छिन्नं कामोपभोगाय ध्यायन्ति, याश्च त्वत्पादपद्माराधनपरा वयं श्रुतय स्त्वामपरिच्छिन्नं ध्यायाम इति ते सर्वेऽपि समदृशस्तव समा एव । अहो अपूर्वस्तव स्मरणानुभावो यः सर्वानपि त्वामेव प्रापयतीति कीटभृङ्गन्यायेन ध्यानमात्रस्यैव ध्येयसारूप्यापादकत्वं न भक्तेरेवेत्याशयः ॥ * ॥ **विश्वनाथी**—भगवत्स्वरूपेष्वपि मध्ये श्रीकृष्णस्य तद्विषयकसर्वविलक्षणभक्तियोगस्य च सर्वोत्कर्षं वक्तुं प्रथमं ब्रह्मविषयकं ज्ञानयोगमपकर्षकक्षायां निक्षिपन्त्य आहुः—निभृतैः संयमितैर्मरुन्मनोक्षैर्यो दृढो निश्चलो योगस्तं युञ्जन्ति, ये तथाभूता मुनयो हृदि परमशुद्धे ब्रह्माकारीभूते यद्ब्रह्मस्वरूपमुपासते, तदरयः कृष्णावतारसमयगता असुरा अप्यरिभावमयादपि स्मरणाद्ययुः अहो कृष्णाकारस्य माहात्म्यं तादृशा अपि मुनयोऽपरिच्छिन्न दृष्ट्योऽपि यावद्ब्रह्मकेवलमुपासीना एव तिष्ठन्ति, तन्मध्य एव कंसादयोऽसुराः परिच्छिन्नदर्शिनः पापात्मत्वादशुद्धचित्ता अपि अरिभाववत्त्वात्कृष्णांगसंगमाधुर्यस्यापरोक्षानुभवरहिता अपि केवलतदाकारमात्रस्मरणात्तदेव ब्रह्म प्राप्यैव स्थिताः । मुनयस्तु न जानीमः कियता कालेन तं प्राप्स्यंतीति भावः । एवञ्च तच्छत्रुगणप्राप्तं ब्रह्मरसास्वादं मुनयो यत्नेन प्राप्नुवन्तीति पूर्वार्धेनोक्त्वा तन्मित्रगणप्राप्तं प्रेमरसास्वादं वयं श्रुतयो यत्नेन प्राप्नुम इत्याहुः—स्त्रियो व्रजदेव्यः उरगेन्द्रदेहसदृशयोस्तद्भुजदंडयोरतिरागेणैव विषक्ता सँलग्ना धीर्यासां ता हृदि स्ववक्षःस्थले ' यत्ते सुजातचरणाम्बुरुहं स्तनेषु ' इत्युक्तिरीत्या अंघ्रिसरोजयोर्याः सुधा उपासते सेवन्तेऽनुभव न्तीति यावत्, ता एव वयं श्रुतयोऽपि ययिम समास्तपसा गोपीत्वप्राप्त्या तत्तुल्यरूपाः सत्यः । कथं ययिथ तत्राहुः—समदृशः समदृष्टयः तासां यस्मिन्वर्त्मनि तदनुगत्या दृष्टिं ददाना इत्यर्थः । अत्र चत्वारो गणा वर्णि तास्तत्र पूर्वार्धगतौ मुनिगणदैत्यगणौ यथा समप्राप्यौ तथैवोत्तरार्धगतौ गोपीगणश्रुतिगणौ समप्राप्यौ पृथक्पृथगपि शब्दाभ्यां गम्येते । अत्र स्त्रियोऽपीत्यपिरध्याह्रियतेऽत्र पूर्वोऽपिरयोग्यतायामुत्तरो योग्यतायामिति गम्यते । पूर्वासामयोग्यताव्यञ्जनार्थमेवापिरध्याहृतः । यद्यपि स्त्रियो न योग्या वय तु योग्यास्तथापि भगवदाकारस्य तव स्मरणप्रभावेणास्माकं परमयोग्यानां साम्यं प्राप्ता इत्यर्थः । श्रुत्यभिमानिनां ब्रह्मणा लयाद्ययुरिति इह पूर्वार्ध परार्धयोर्वाक्यतया विभेदनं स्वसिद्धान्तानुसारेण दोषत्वेऽपि मीमांसकनये सोढव्यम् । इतिहासश्चात्र बृहद्वामन उत्तरस्थाने खिले—" ब्रह्मानंदमयो लोको व्यापी वैकुण्ठसंज्ञितः । तल्लोकवासी तत्रस्थैः स्तुतो वेदैः परात्परः ॥ चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान्गिरा । तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसीप्सितम् ॥ श्रुतय ऊचुः—यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः । भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥ श्रीभग वानुवाच—दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः । मयानुमोदितः सम्यक्सत्यो भवितुमर्हति ॥ आगामिनि विरिञ्चौ तु जाते सृष्ट्यर्थमुद्यते । कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥ पृथिव्यां भारते क्षेत्रे माथुरे मम मण्डले । वृन्दावने भविष्यामि प्रेयान्वो रासमण्डले ॥ जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् । मयि संप्राप्य सर्वेऽपि कृतकृत्या भविष्यथ ॥ ब्रह्मोवाच—श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं भगवताश्चिरम् । उक्तकालं समासाद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क इह नु वेद बतावरजन्मलयोऽग्रसरं यत उद्गादृषिर्यमनु देवगणा उभये ॥
तर्हि न सन्न चासदुभयं न च कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा ॥ ११ ॥ २४ ॥

" यतो वाचो निवर्तंते । अप्राप्य मनसा सह ॥ को अद्धां वेद क इह प्रवोचत् ॥ कुत आजाता कुत इयं विसृष्टिः ॥ अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत गोप्यो भूत्वा हरिं गताः ॥ " इति । अत्र " आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति । अर्थश्च—द्रष्टव्यः साक्षात्कर्तव्यः । अस्य साधनान्याह—श्रोतव्यः श्रीगुरोर्मखादुपक्रमादिभिस्तात्पर्ये णावधारयितव्यः, मन्तव्यः असंभावनाविपरीतभावनानिवारणाय स्वयं पुनर्विचारणीयः, निदिध्यासितव्यो निश्चयेन ध्यातव्य इति । अत्र ज्ञानिनां मते सविशेषानिर्विशेषभेदेऽपि निर्विशेष एव तात्पर्यम् । वैष्णवानां मते तु अप्राकृतविचित्रविशेषवति श्रीभगवदाकार एव " यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् " इति श्रुतेः कल्याणगुणमयतनुमानात्मा श्रीभगवान् द्रष्टव्यस्तत्साधनान्याह--श्रोतव्य इति । श्रीगुरोर्मुखात्तन्मंत्रश्रवणं " मंत्रमयवपुषः " इति क्रमदीपिकाद्युक्तेस्तन्मंत्रस्य तत्स्वरूपत्वोक्तेः । मन्तव्य इति । मंत्रशब्दार्थयोः सम्यङ्मननलक्षणं स्मरणम् । निदिध्यासितव्य इति " निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् " इत्यमरोक्तेर्निध्यानं दर्शनं तस्येच्छा निदिध्यासनं मंत्रार्थसम्यङ्मननपूर्वकभजनाभ्यासात्स्वेष्टदेवः स दिदृक्षितव्य इत्यर्थः । दिदृक्षाभ्यासाद्द्रष्टव्य इति । अत्र निनिरोरेकार्थत्वमिष्टम् । वेदानां कामभावेच्छायां तु " यं मां स्मृत्वा निष्कामः सकामो भवति " इति । श्रीकृष्णोक्तिरूपगोपालतापनी श्रुतिः " व्रजस्त्रीजनसंभूतश्रुतिभ्यो ब्रह्मसंगतः " इति । अर्थश्च—व्रजस्त्रीजनेषु संभूता बृहद्वामनदृष्टतपोभिरुत्पन्ना याः श्रुतयस्ताभ्यो हेतुभ्यः ताः प्राप्योति वा कृष्णो वा ब्रह्मसंगतः प्राप्तवे दसंगोभूदिति (१०) ॥ २३ ॥

नीलकण्ठी—एवमभक्ताननुक्रोश्य भक्तिं स्तौति–निभृतेति । निभृता निगृहीताः मरुत्प्राणः मनः प्रसिद्धम्, अक्षा इंद्रियाणि यैस्ते निभृतमरुन्मनोक्षाः ते च दृढयोगयुजश्च निभृता मरुन्मनोक्षा यस्मिन्दृढयोगे तद्युजो वा मुनयो यद्धृदि तत्त्वम् उपासते, तत् तदेव तत्त्वम् द्वेषपूर्वकं नित्यं चिन्तयन्तः अरयः कंसशिशुपालादयो ययुः प्रापुः कुतः स्मरणात् कीटभृंगन्यायेन ध्यानमात्रं ध्येयसारूप्यप्रापकं न भक्तिरेवेत्यर्थः । यथोक्तं सप्तमे–" गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः । संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं प्रभो ॥" इति । त्वां प्राप्ता इति शेषः । अत एव स्त्रियो गोप्यादय उरगेन्द्रभोगः फणीन्द्रशरीरं तत्सदृशौ यौ भुजदंडौ तत्राश्लेषसुखलिप्सया विषक्ता संलग्ना धीर्यासां तास्तथा । ता अपि यन्मुनय उपासते तद्ययुरिति संबंधः । ननु " यमेवैषे[1] वृणुते तेन लभ्यः " " एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते " इतीश्वरप्रसादप्रकोपापत्तेरूर्ध्वाधोगती श्रूयेते तत्कथं तदरयोऽपि ययुरित्युच्यते इत्याशंक्याह—वयमपीति । वयं वेदवाचोऽपि ते त्वत्संबंधिन्यः समाः तदरयोऽपि ययुरित्यस्य प्रतिपादने समाः । अयं भावः—तं यथायथोपासते तथैतः प्रेत्य भवति " यं यं चापि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ " इत्यंत्यप्रत्ययवशात्स्मर्यमाणसारूप्यं प्राप्यते अंत्यप्रत्ययश्च यथाकथञ्चित्तीव्रध्यानायत्तो न केवलं भक्त्यायत्तः, एष ह्येवेति श्रुतिस्तु कर्मगोचरगातिविषया न ध्यानविषया । एवं ध्यानेन भगवत्सारूप्यं प्राप्योपाधिविशेषमहिम्ना पूर्वं द्वेषादिमन्तोऽपि भगवल्लोके दिव्यज्ञानादिमन्तो भूत्वा मुच्यन्त इति कुत एतत् यतः समदृशः ब्रह्मदर्शिन्यः ब्रह्मदर्शनमपि तासां कुतः यतस्ते तवांघ्रिसरोजं पादपद्मं सुधेवामृतमिवातिवल्लभं यासां ताः । अंघ्रिसरोजं सुष्ठु धारयतीति वांघ्रिसरोजसुधा (१०) ॥ २३ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—यतो ध्यानज्ञानद्वेषभयकामसंबंधस्नेहभक्तिपराणां विषमस्वभावकर्मणां सर्वेषां त्वत्सायुज्यमेकमेव फलं स्यादतस्तव तत्त्वं दुर्ज्ञेयं वदन्त्यो "यतो वाचः " इत्याद्याः श्रुतयः उररीकुर्वत्यंगीकुर्वन्ति ता आह–यत इति । ब्रह्मप्रकाशनाय प्रयोक्तृभिः सर्वथा प्रयुज्यमाना अपि वाचः मनसा सह यदप्राप्य यतो यस्मान्निर्विकल्पादद्वयानंदात्मनो निवर्तन्ते तद्ब्रह्म आनंदं विद्वाञ्जानन् कुतश्चिन्निमित्तान्न बिभे

१ एष भक्त्या तुष्ट ईशः यमेव भक्तं वृणुते मामयं साक्षात्करोत्विति वाञ्छति तेन लभ्य इत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आबभूव ॥ अनेजदेकं मनसो जवीयो नैतद्देवा आप्नुवन् पूर्वमर्शत् ॥ तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति " इत्याद्याः श्रुतयो भगवत्तत्त्वं दुर्ज्ञेयं वदंत्यो भक्तिमेवोररीकृत्य स्तुवंतीत्याह । क इह नु वेदेति । बत अहो भगवन्निह जगत्यग्रसरं पूर्वसिद्धं त्वामवरजन्मलयोऽर्वाचीनोत्पत्तिनाशवान्को नु पुमान्वेद जानाति । ईश्वरस्य पूर्वसिद्धावन्यस्य चार्वाचीनत्वे प्रमाणं वदन् ज्ञानकारणाभावमाह।यत उदगादिति।यतस्त्वत्त ऋषिर्ब्रह्मा उत्पन्नो यं ब्रह्माणमनु उभये आध्यात्मिकाधिदैविका देवगणा उत्पन्नास्ततो ऽप्यर्वाचीनाःसर्वे।यदा तु भवान्सर्वमवकृष्योपसंहृत्य शयीत तर्हि तदा अनुशायिनां जीवानां ज्ञानसाधनं नास्ति । यतस्तदा न सत्स्थूलमाकाशादि।न चासत् सूक्ष्मं महदादि। न चोभयं सदसद्भ्यामारब्धं शरीरम् । न च कालजवस्तन्निमित्तभूतं कालवैषम्यम् । एवं सति तत्र तदा न किमपींद्रियप्राणाद्यपि न च ज्ञापकं शास्त्रमपि । अयमभिप्रायः । अर्वाक्सृष्टिगतानां देहाद्युपाधिकृतांतराणां कालवशेन च मलिनसत्त्वानां न तावद्भगवज्ज्ञानसामर्थ्यम् । तथा च श्रुतिः "न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव" इत्याद्या । यदा तु प्रलयसमये न बह्वंतरमस्ति तदापि साधनाभावान्न भगवज्ज्ञानसामर्थ्यम् । अतस्त्वदेकशरणतया श्रवणकीर्तनादिभक्तिरेव सुकरेति ॥ क्वाहं बुद्ध्यादिसंरुद्धः क्व च भूमन्महस्तव ॥ दीनबंधो दयासिंधो भक्तिं मे नृहरे दिश ॥ ११ ॥ २४ ॥

तीति अलभ्यलाभमाहात्म्यपरेयम् । परमात्मनो दुर्विज्ञेयत्वे श्रुत्यंतरमुदाहरति—क इति । तं परमात्मानमद्धा साक्षात्को वेद जानाति । इह कः प्रवोचत्प्रावोचद्वदति, इयं विसृष्टिर्विविधा सृष्टिः कुतो जाता कुतः कस्मादायाता । ननु हिरण्यगर्भादेः सकाशात्सृष्टिरुत्पद्यते नेत्याह—अर्वाग्देवा अर्वाचीना ब्रह्मादिदेवा अस्य जगतो विसर्जने न समर्था इत्यर्थः । अथा इत्याकारान्तो निपातोऽथेत्यर्थे अथा तं को वेद यत एतत्सर्वमाबभूवेति दुर्विज्ञेयत्वप्रतिपादनपरेयम् । ननु यदि कोऽपि न वेद कथं तर्हि संसारनिवृत्तिः तदर्थं तत्स्वरूपमनिर्वचनीयत्वेनाह—अनेजदिति । तत्परमात्मतत्त्वमनेजत्स्वरूपाच्चलनरहितमेकमद्वितीयं मनसो जवीयः मनसोऽपि वेगवत्तमं यत्र मनो धावति तत्र तस्य पूर्वमेव तद्वर्तत इत्यर्थः । एतत्परमात्मतत्त्वं देवाश्चक्षुरादीनीन्द्रियाणि तदधिष्ठातारो वा नाप्नुवन् न प्राप्ताः । तत्र हेतुः यस्मान्मनसोऽपि पूर्वमर्शत् पूर्वमेवागच्छत् तत्तिष्ठत्स्थिरतरमपि धावतोऽन्यान्वागिंद्रियादीनत्येति अतिक्रम्य गच्छति । मातरिश्वा वायुः तस्मिन्नपः प्राणिनां चेष्टालक्षणानि कर्माणि दधाति धारयतीति यः सर्वप्राणभृत् क्रियात्मकः यदाश्रयाणि कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि च यः सूत्रसंज्ञः वायुर्वै गौतम सूत्रमित्यादिभिरुक्तः सर्वस्य जगतो विधारयिता स मातरिश्वा वायुरिति ज्ञातव्यम् अनिर्वचनपरेयम् । ब्रह्माणमनु पश्चात् आध्यात्मिका देवगणा वाग्विन्द्रादयोऽधिकारिणो देवा आधिदैविकास्तान्देवानधिकृत्य तत्तन्नामान इन्द्रियाद्यधिष्ठातारश्च " दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः " एत इत्यर्थः । अधिकारिदेवानां ब्रह्मणः पश्चाद्भावित्वेन तत्समाननामत्वादाधिदैविकेष्वग्रभाविष्वपि पाश्चात्त्यकथनं ज्ञेयमिति । ततो देवगणेभ्योऽपि सर्वे मनुष्यादयः । निर्गलितार्थमाह—अयमभिप्राय इति । न तमित्यादिश्रुतिस्तु व्याख्यातार्था । साधनाभावाद्गुरुशास्त्रादिरूपसाधनस्याभावात् । यतः सर्वथा तव ज्ञानं दुर्घटमतो हेतोः स्वामिनां क्वाहमिति । अत्यन्ताघटनायां द्वौ क्वौ । हे भूमन्नपरिच्छिन्नव्यापक बुद्ध्यादिसंरुद्धो बुद्ध्यादिरहितः महःस्वरूपं वागाद्यगोचरं क्व अत्यन्तासंभावनाऽतो भक्तिं देहीति ॥ * ॥

श्रीधराऽनुयायिनी—पुनरपि भक्तेरेवावश्यकत्वं द्रढयितुं तदभावे तव ज्ञानमशक्यमित्याहुः—क इति । यतस्त्वत्तः सकाशात्तावत्तव किञ्चिन्मात्रतत्त्वज्ञापको वेदो ब्रह्मा वा जातस्तत उभये उभयेन्द्रियाधिष्ठातारो देवाः पश्चादर्वाचीनाः सर्वे इत्यतः सर्वेभ्यः पूर्वसिद्धं त्वामाधुनिको जन्ममरणभागी कः पुमान् जगति ज्ञातुं समर्थः स्यात् । प्रलयकालेप्याकाशादीनां महदादीनां तदारब्धशरीराणां तन्निमित्तभूतकालवैषम्यस्येन्द्रियप्राणादेस्तत्त्वज्ञापकस्य शास्त्रस्य च लीनत्वान्न त्वां ज्ञातुं कोऽपि समर्थः । अयं भावः—सृष्टिकाले देहाद्युपाधिकृतबहुव्यवधाने सत्यपि ज्ञापकस्य शास्त्रस्य साधनसमूहस्य च संभवाद्यत्किञ्चित्तत्त्वज्ञानं कदाचित्कस्यचिद्भवेदपि प्रलय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काले तु बहुतरव्यवधानाभावेऽपि शास्त्रस्य साधनसमूहस्य चाभावान्न किञ्चिन्मात्रमपि तत्त्वज्ञानं संभवेदतो ज्ञानाग्रहं त्यक्त्वा त्वद्भक्तिरेव कर्तुं युज्यत इति ॥ * ॥ **विश्वनाथी—**अथ काश्चिच्छ्रुतयस्तदेवानुमोदमानास्तदज्ञाने स्वदोषं परिहरन्ति—क इति । इह जगतीति तदानीं तदभावेऽपीदंशब्देनोक्तिः पूर्वसंस्कारात् । ता एव तदधिकृता एव । श्रुतय इति । नु सभ्रूभंगं वितर्के न कोऽपि वेदेत्यर्थः । तत्र हेतुः—अग्रसरम् सर्वेषां जन्मादे र्ज्ञानादेश्चागोचर एव वर्तमानम् । तत्र च हेतुः—यत ऋषिर्निःश्वासेन सर्ववेदप्रवर्तकः कारणार्णवशायी उदगात् 'आद्योऽवतारः पुरुषः परस्य' इति द्वितीयात् ''यस्यांशांशांशभागेन विश्वस्थित्यप्ययोदयाः'' इति श्रीकृष्णं लक्ष्यीकृत्य दशमात् । यमृषिमनु उभयेन्द्रियाधिष्ठातारो ब्रह्मलोकाद्यधिष्ठातारश्च दिग्वातार्कादयोऽध्यात्मसंज्ञा ब्रह्मादयश्चाधिदैवसंज्ञा देवगणा जाता इति ''एको ह वै नारायण आसीन्न ब्रह्मा नेशानस्तस्मा देवैते व्यजायंत'' इति श्रुतेः । तस्मात्ततोऽप्यवरजन्मलयस्तु को वेद सुतरामेव कश्चन न वेदेत्यर्थः । एवं स्थितिसमये शास्त्रे प्रवर्तमानेऽप्यश्रवणशक्तिभ्यां तत्त्वदज्ञानं यदा तु प्रलयसमये स्वस्तावकं शास्त्रं स्वलोक एव नीत्वा भवाञ्जगत्कार्यं प्रयत्नवधानं करोति ज्ञानमात्राभावात्सुतरामेव तेषां त्वदज्ञानमित्याह—तर्हीति । कालजवस्तद्व्यापारः सृष्ट्यादिरूपः । अत्र श्रुतयस्तैरेव दर्शिताः (११) ॥ २४ ॥

नीलकण्ठी—ननु तत्त्वज्ञानेनैव मुच्येमहि किं सगुणभक्त्येत्याशंक्य ज्ञानदौर्लभ्यमाह त्रिभिः—क इह नु वेदेति । इह लोके कः अवरजन्मलयः आन्तरालिकजन्ममरणः तौ जन्मलयौ समासान्तःस्थावपि बुद्धि स्थतया गृह्येते । ताविति । तौ जन्मलयौ तं चाग्रसरं पूर्वसिद्धं कर्तारं च को वेद न कोऽपीत्यर्थः । 'वेद तावत्वरजन्म' इति पाठे इदं व्याख्यानम् । वेद तावत्वरजन्मलयेति पाठस्तु वर्णव्यत्यासभ्रमनिबन्धनो वृत्तभंगादु पेक्षितः । अयं भावः—क्षणिकाः स्थिरा वा खरस्नेहोष्णेरणस्वभावाः पार्थिवाप्यतैजसवायवीयाः परमाणवः पुञ्जात्पुञ्जक्रमेण घटाद्याकारेण संहन्यन्ते त एव नित्या निरधिष्ठातृकाः साधिष्ठातृका वा द्व्यणुकादिक्रमेण कार्यमारभन्त इति सौगतलोकायततार्किकाः । अधिष्ठातुर्विकरणत्वात्कुलालवत्क्रियया वा योगिवत्संकल्पेन वा स्रष्टृत्वायोगादसहायं त्रिगुणात्मकं प्रधानं क्षीरादिवत्स्वयमेव महदाद्याकारेण परिणमत इति सांख्याः । तदस्मिन्मतत्रयेऽपि पुञ्जात्पुञ्जक्रमेण द्व्यणुकादिक्रमेण वा महदादिक्रमेण वा उत्पन्नैर्देहेन्द्रियादिभिरवच्छेदलाभे सत्यात्मनो बुद्ध्याद्युदयः । तथा तेषां नाशात्प्रागेव बुद्ध्यादेर्नाशः । एवं सत्यांतरालिकया बुद्ध्या पार्यन्तिकौ प्रथमचरमकार्योत्पादवि नाशौ तत्कर्ता च न केनचित्परिच्छेत्तुं शक्य इति । यतः अग्रेसराद्दृषिर्ब्रह्मा उदगात् उत्पन्नः ''यो ब्रह्माणं विदधाति पूर्वम् '' इति श्रुतेः । यं ब्रह्माणमनु पश्चात् उभये देवगणाः ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चोदगुः पश्चा द्भावित्वादेनमग्रसरं तत्कर्तव्यौ जगज्जन्मलयौ च ऋषिर्देवाश्च न विदुरित्यर्थः । तथा च श्रुतिः—''को अद्धा वेद क इह प्रवोचत् । कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव । '' इति सृष्टेर्दुर्ज्ञेयत्वमाह सृष्टेः प्राक्कोऽपि तामीशं च ज्ञातुं नासीदित्याह—तर्हीति । यदा भवान्सर्वं प्रपञ्चं अनुकृष्य संहृत्य शयीतस्वरूपमात्रेणास्ते तर्हि तदा न सत् प्रधानपरमाण्वादिकं नासीत् न असत् शून्यमपि नासीत् उभयञ्च सदसदात्मकम् अव्याकृतमपि नासीत् चकारान्नेत्यनुकृष्यते कालजवोऽपि संवत्सरत्वयनमासादिपरिवर्तः नासीत् सूर्याद्यभावात् । ''न रात्र्या अह्न आसीत्प्रकेतः '' इति श्रुतेः । न च किमपि शास्त्रं शास्तृशास्य योरभावात् तत्र स्वरूपे किमपि नासीदित्यर्थः। श्रुतिश्च—''नासदासीन्नो सदासीत्तदानीं । नासीद्रजो नो व्योमापरो यत् । '' इति असदिति शून्यस्य सदिति प्रधानस्य रज इति परमाणूनां व्योमेत्यव्याकृतस्य परमात्मनो हिरण्यगर्भस्य चाभावं प्राक् सृष्टेराह । अतस्तत्त्वज्ञानस्य दुर्लभत्वात्सगुणेश्वरभक्तिरेव श्रेयस्करीति भावः । यद्वा—ऋषिस्तैजसः स्वप्नाभिमानी देवगणो विश्वो जाग्रदभिमानी तावर्वाचीनत्वात्त्वां न वित्तः नापि प्राज्ञः तत्र सर्वा भावात् अतो भक्तिमार्गेणैवावस्थात्रयातीतं तव स्वरूपं विज्ञातुं शक्यमिति भावः । ननु ''यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन्प्राण एवैकधा भवति तदेनं वाक्सर्वैर्नामभिः सहाप्येति, चक्षुः सर्वैः रूपैः सहाप्येति, श्रोत्रं सर्वैः शब्दैः सहाप्येति, मनः सर्वैर्ध्यानैः सहाप्येति, स यदा प्रतिबुद्ध्यते यथाऽग्नेर्ज्वलतः सर्वा दिशः विस्फुलिंगाः प्रतिष्ठन्ते एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः '' इति जीवस्यैव नामरूपप्रपञ्चलयोदयाधिष्ठानत्वं श्रूयते नान्योऽतोऽस्ति द्रष्टेति द्रष्ट्रन्तरप्रतिषेधाच्च कस्येदं प्रतीचोन्यस्योपास्यत्वमुच्यते यद्येवं प्रतिबुद्धोऽसि नास्ति कश्चित्त्वदन्य इत्यवेहि । तर्हीत्यत्र ' रेफात्स्वरोपहिताद्व्यञ्जनोदयाद्द कारवर्णा स्वरभक्तिरुत्तरा' इति प्रातिशाख्ये स्वरव्यञ्जनयोर्मध्यः स्याद्रेफात्परतः स्वरभक्तिः ऋकाररूपाऽस्ति तस्याश्च 'द्राघीयसी तूष्मपरा' इति दीर्घत्वं विहितम् । तथा च तकारः दीर्घस्वरभक्त्या सहितो रेफः हिकार इति वर्णत्रयं वैदिकरीत्या सिद्धं 'वेदवद्वेदविदां वचनम्' इति न्यायेन च नात्र वृत्तभङ्गशंकावकाशः (११) ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरंत्युपदिशंति त आरुपितैः ॥
त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥ १२ ॥ २९ ॥

इतोऽपि ज्ञानं न सुशकम् उपदिशतामपि भ्रमबाहुल्यादित्याह । जनिमसत इति । असतो जगतो जनिमुत्पत्तिं ये वैशेषिकादयो वदंति । असत एव ब्रह्मत्वस्योत्पत्तिं ये च पातंजलादयः । सत एवैकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदंति ये नैयायिकाः । उतापि ये च सांख्यादय आत्मनि भिदां भेदं च । ये मीमांसका विपणं कर्मफलव्यवहारमृतं सत्यं स्मरंति वदंति ते सर्वे आरुपितैरारोपितैर्भ्रमैरेवोपदिशंति न तत्त्वदृष्ट्या । "सदेव सोम्येदमग्र आसीत् ॥ ब्रह्मैव सन् ब्रह्माप्येति ॥ अनीशया

भावार्थदीपिकाप्रकाशः वंशीधरी– इतोऽस्मादपि हेतोः कुतः यत उपदिशतामुपदेष्टृणामाचार्याणां भ्रमाधिक्यमस्ति इत इत्यन्वयः । ननु भक्त्या ब्रह्मात्मबोधेन मोक्ष इति कथं तत्र वादिनां विप्रतिपत्तिस्तत्राह–जनिमिति । असतः जगतः कार्यस्योत्पत्तिं पुनस्तस्यैव सत एकविंशतिप्रकारदुःखस्य मृतिं नाशं ध्वंसं मोक्षं ये तार्किकास्तत्र "सदेव सोम्येदमग्र आसीत्" "नासतो विद्यते भावो नाभावो विद्यते सतः" इत्यादिश्रुतिस्मृतीविरोधस्तथा स्वकारणे समवायः स्वस्मिन्सत्तासमवायो वाजनिः असतः समवायनिरूपकत्वाधारत्वयोरसंभवेन जन्यनुपपत्तिरसति सत्तासमवाये व्याघातः स्वभावपरित्यागश्च । एकविंशति दुःखानि–शरीरं षाडिन्द्रियाणि षड्विषयाः षडूर्मयः सुखं दुःखञ्चेति । तत्र श्रोत्रं चक्षुर्घ्राणं त्वग्रसना मन एतानीन्द्रियाणि, शब्दो रूपं गंधः स्पर्शो रसः संकल्पादिरेते विषयाः, "बुभुक्षा च पिपासा च प्राणस्य मनसस्तथा । शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः ॥" नन्वेकविंशतिदुःखान्तर्गतयोर्मनःश्रवणयोर्नित्यत्वात्कथं तन्नाश इति चेन्न, यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दुःखं तद्रूपस्य कर्णशष्कुल्या नाशेन तद्विशिष्टश्रवणेन्द्रियरूपदुःखस्य नाशात् । एवमात्मसंयोगरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखरूपतया व्यापारनाशेन तद्विशिष्टमनोरूपदुःखस्य नाशसंभवादिति विशेषणाभावे: विशिष्टाभावात् । एतच्च मतं विरुद्धं सदेवेति श्रुत्योक्तं तदर्थश्च–हे सोम्य श्वेतकेतो इदं नामरूपं विकृतं जगत् अग्रे सृष्टेः पूर्वं सदेवासीत् सद्वस्तु निर्विशेषं निरञ्जनं नित्यं निरवयवं यद्वेदान्तेषूपपाद्यं तद्रूपमासीत् । अनेन असद्वादः परिहृतः । सतो मृतिमिह श्रुतिमाह– "अथ योऽकामो निष्काम आप्तकाम आत्मकामो ब्रह्मैव सन्ब्रह्माप्येति" "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति । अर्थः–सकामस्य गतिमुक्त्वा निष्कामस्य गतिमाह–यस्तु अकामो नास्ति कामोऽभिलाषो यस्य स तथा निष्कामो निर्गतसर्वकामः आप्तकामः पूर्णकामः आत्मैव कामो यस्य स एवंभूतः आत्मानं निर्विशेषमद्वैतं चिद्रूपं ज्योतिःस्वरूपं पश्यति, स यद्यपि देहवानिव लक्ष्यते तथापीह ब्रह्मैव सन् शरीरपातोत्तरकालं ब्रह्माप्येति प्राप्नोति एतदर्थद्योतकमेव "यदा सर्वे" इति श्रुतिपद्यं स्पष्टमेव अनेनैकविंशतिदुःखध्वंसो मोक्ष इत्यपास्तम् । ये चासतो ब्रह्मत्वस्य योगाज्जनिं ये पातञ्जला योगशास्त्रतत्रापि ब्रह्मैव सन्निति श्रुतिविरोधो जन्यब्रह्मत्वस्य नश्वरत्वापत्तिश्च, ये सांख्यादयः आदिना तार्किकादिग्रहः एकमेवेत्यादिश्रुतिविरोधो नीरूपस्यात्मनः प्रत्यक्षाभावाद्व्याप्यभावेनानुमानाप्रवृत्तेरन्यात्माग्रहणेन तद्भेदग्रहानुपपत्तिश्चेति श्रुत्यर्थः । एकं सजातीयचेतनवस्त्वंतररहितम् । अद्वितीयं विजातीयाचेतनद्रव्यान्तररहितम् । इह जगति किञ्चन नाना वस्तु नास्ति एकं ब्रह्मैव । नन्वनेकत्वं प्रतीयत इति चेदाह–एक एव परमेश्वरः भूतेभूते सर्वेषु भूतेषु व्यवस्थितः तत्रोपाधेरेकत्वे एकधा भानं तदनेकत्वे चानैकधा भानम् । तत्र दृष्टान्तः–जलचन्द्रवदिति । यथा बहुयोजनव्यापके जलह्रदे प्रतिबिम्बितश्चंद्र एकधैव दृश्यते घटशरावादिषु प्रतिबिम्बितश्चानेकधेति तद्वदिति एतावता सांख्यादिमतं स्पष्टमेव निराकृतम्, अद्वैतप्रतिपादनपरेयम् । ये च मीमांसका इति । कर्मफलं सत्यमिति निराकरोति श्रुतिः "समानवृक्षे पुरुषो निमग्नो ह्यनीशया शोचति मुह्यमानः" इत्यादि । अर्थः–समाने वृक्षे देहे निमग्नो निरूढाभिमानः पुरुषः अनीशा माया तया मुह्यमानः शोचति अनेकैरपि प्रकारैश्चिन्तामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोचति मुह्यमानः ॥ अविद्यायामंतरे वर्तमानाः ॥ स्वयं धीराः पंडितंमन्यमानाः ॥ जंघन्यमानाः परियंति मूढा अंधेनैव नीयमाना यथांऽधाः ॥ एकमेवाद्वितीयं ब्रह्म ॥ एक एव हि भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत्" इत्यादिश्रुतिविरोधात् । किंच वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं संगच्छेत न तु तदस्तीत्याह । त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयीति । त्रिगुणमयः पुमानित्यनेन हेतुना या भिदा । उपलक्षणमेतद्भिदादि । सा यस्मात्त्वयि विषये अबोधकृता त्वद्विषयाज्ञानविजृंभिता । तर्हि किमज्ञानमस्ति वस्तुतः पुंसि नैवेत्याह । ततः अबोधात्परत्र परेऽसंगेऽवबोधरसे ज्ञानघने स अबोधो न भवेन्न संभवतीत्यर्थः ॥ मिथ्यातर्कसुकर्कशेरितमहावादांधकारांतरभ्राम्यन्मंदमतेरमंदमहिमंस्त्वज्ज्ञानवर्त्मास्फुटम् ॥ श्रीमन्माधव वामन त्रिनयन श्रीशंकर श्रीपते गोविंदेति मुदा वदन्मधुपते मुक्तः कदा स्यामहम् ॥ १२ ॥ २५ ॥

प्रोतीत्यर्थः, । किञ्चाविद्यायामन्तरे मध्ये वर्तमाना अविवेकप्रायाः स्वयं वयमेव धीरा धीमन्त इति मन्यमाना जरारोगाद्यनेकानर्थैर्जंघन्यमाना अत्यर्थं हन्यमानाः परियन्ति भ्रमन्ति । स्वयं मूढा मूढैरेवोपदिष्टा भ्रमन्तीत्यत्र दृष्टान्तमाह–अंधेनेति । कर्मफलनिंदापरेयम् । अथैतदपि स्यादेव पुरुष आत्मा यदि त्रिगुणात्मको भवेदित्याह–किञ्चेति । इदं पूर्वोक्तमसतो जनिः सतो मृतिः कर्मफलसत्यत्वात्मभेदादि तत्पुरुषस्य त्रिगुणात्मकत्वम् । स्वामिनाम्–मिथ्यातर्केण सुकर्कशं यथा स्यात्तथेति । यो महावादांधकारस्तस्यान्तरे भ्राम्यतो मन्दमन्तेः हे अमन्दमहिमन्नतीवोत्कृष्टकीर्ते त्वज्ज्ञानस्य वर्त्माऽस्फुटं भवति अतः श्रीमन्माधवेत्यादीनि नामानि वदन्संसारात्कदाऽहं मुक्तः स्यां भवेयम् । शिवनामान्यपि विष्णोर्नामानि भवन्तीति ज्ञापयितुमत्र त्रिनयनादि नामोक्तम् । नामापराधश्रवणाच्च यथोक्तं श्रीसनत्कुमारेण–" सतां निन्दा नाम्नः प्रथममपराधं वितनुते यतः ख्यातिं यातं कथमुत्सहेत्तद्विगर्हाम् । शिवस्य श्रीविष्णोर्य इह गुणनामादि सकलं धिया भिन्नं पश्येत्स खलु हरिनामाहितकरः ॥ " इत्यादिकं वर्णाश्रमाचारधर्मपराणामयमपराधः भगवदेकपराणां नामपराणां तु नास्तीति तेनैवोक्तं " नामापराधांस्तरति नाम्न एव सदा जपात् " इति । श्रीगोविंदपदारविंदशरणाःशुद्धा भवन्तीति दिक् ॥ * ॥ **श्रीधरानुयायिनी**–उपदिशतामपि भ्रमबाहुल्यात्तत्त्व ज्ञानं दुष्करमेवेत्याहुः– जनिमिति । वैशेषिकाः–परमाण्वादिष्वसत एव द्व्यणुकादेरुत्पत्तिं वदन्ति । अत्र मते " सदेव सोम्येदमग्र आसीत् " इति श्रुतिविरोधः (१) पातञ्जलाश्च यथा–ताम्रादिकमसुवर्णमपि रसायनप्रभावात्सुवर्णं संपद्यते तथैवाब्रह्मभूतोऽपि जीवो योगप्रभावाद्ब्रह्म संपद्यतेऽत्र मते " ब्रह्मैव सन्ब्रह्माप्येति " इत्यादिश्रुतिविरोधः (२) नैयायिकाश्च–षडिन्द्रियाणि षडिन्द्रियविषयाः षडिन्द्रियजन्यज्ञानषट्कं शरीरं वैषयिकसुखं दुःखञ्चेत्येकविंशतिदुःखानां सत्यानामेवं ज्ञानान्नाशो मोक्ष इति वदन्ति, अत्र मते " नासतो विद्यते भावो नाभावो विद्यते सतः " इति गीताविरोधः (३) सांख्यादयश्च–आत्मनि वास्तवं नानात्वं वदन्ति, अत्र मते " एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतिविरोधः (४) मीमांसकाश्च–' न कदाचिदनीदृशं जगत् ' इत्युक्तेर्यज्ञादिफलं स्वर्गादिकमनाश्यं परमपुरुषार्थञ्च वदन्ति, अत्र मते " नेह नानास्ति किञ्चन " अतोऽन्यदार्तं " तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इत्यादिश्रुतिविरोधः (५) एवमिमे पञ्चापि मतप्रवर्तका अंधपरंपरया भ्रमेणैवोपदिशन्ति शिष्यादीन्न तु तत्त्वदृष्ट्या " अविद्यायामन्तरे वर्तमाना अंधेनैव नीयमाना यथांधाः " इत्यादिश्रुतेः " अंधस्येवांधलग्नस्य विनिपातः पदेपदे " इति न्यायेनैते स्वयं नष्टाः परानप्युपदेशेन नाशयन्तीत्याशयः । किञ्च–यदि पुरुषे त्रिगुणमयत्वं वास्तवं स्यात्तदाऽनेन हेतुना तत्र भेदादिकमपि वास्तवं स्यात् तच्चासंभवि यतो भेदादिकं त्वदीयाविद्याशक्त्यैव कल्पितं न वस्तुतः सा च जीवात्मन्येव प्रभवति न तु त्वय्यपीत्याहुः– सोऽबोधस्त्वयि न कुतः ततः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परत्र " आदित्यवर्णं तमसः परस्तात् " इति श्रुतेः तद्विषयत्वाश्रयत्वयोरयोग्ये । तव मायातीतत्वादविद्यायाश्च मायावृत्तित्वात्त्वन्नियम्यत्वाच्चेति भावः । तदपि कुतः अवबोधरसे संपूर्णचिदेकरसे यथांधकारस्ते जोंशीभूतस्वर्णाद्यावरकोऽपि तेजःपुंजं सूर्यमावरीतुमसमर्थ एवेत्याशयः । यद्वा–" तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदायुदायुधम् " इत्येवंरूपेण तव वसुदेवगृहे दर्शनमभूत् । तथा च प्राक् तेन रूपेणासत एव तत्र जनिं तवोत्पत्तिं ततस्तेनैव रूपेण सतो वर्तमानस्य तव पुनर्मृतिं यादववंशावसाने प्रभासे मरणं तथात्मनि त्वयि सच्चिदानंदविग्रहे भिदां देहात्मभेदं तथा विपणं तव पितृमातृगुर्वादिव्यवहार मृतं सत्यं ये वदन्ति, तथा पुराणपुरुषोऽपि श्रीकृष्णस्त्रिगुणमयो जीवविशेषं एवेति ये वदन्ति पुनः शिष्येभ्यस्तथैव सर्वमिदमुपदिशन्ति त आरुपितैर्भ्रमैर्मौढयादेव न वस्तुत इत्यर्थः । श्रुतिस्मृतियुक्त्यनुभव विरोधात् । तत्फलमनिष्टमेवेत्याहुः–यद्यतः अवबोधरसे त्वयि अबोधकृता अबोधमज्ञानं करोतीत्यबोधकृत् प्रागुक्तो वादिसमूहस्तेन तत्संगेन स्फुरितेन भिदा भेदादिना हेतुना ततः जन्मांतरेऽपि परत्र पर लोकेऽपि स बोधो मोक्षो वा न भवेदेव तेषामित्यर्थः । किन्तु तेन पापेन जन्ममरणनरकवासादिदुःखमेवानिशमनुभवन्तीति यावत् । अत्रत्यस्वामिश्लोकपदार्थमाह–मिथ्यातर्केण सुकर्कशं यथा स्यात्तथेरितो यो महावादः स एवांधकारस्तस्यान्तरे भ्राम्यतो मंदमतेरित्यन्वयः । त्रिनयनेति संबुद्धिद्वयं हरिहरयोरभेदबोधनाय । यद्वा–त्रयाणां लोकानां नेत्ररूपो नायको वा । तथा श्रिया प्रेमसंपत्त्या वा भक्तानां शं सुखं करोतीत्यर्थः । गोविन्द गोकुलादौ विहारशील मुक्तः मुक्त्युत्तरकालमपि मुदा मोक्षतोऽधिकानंदेन वदन् कदा स्यामित्यन्वयः ॥ * ॥ **विश्वनाथी–**अथ तदेवानुमोदमानाः काश्चित्पारिशेष्यप्रमाणे नैव तत्र चरन्त्यः सर्वगुरुमन्यानामपि तदज्ञानं दर्शयन्ति–जनिमिति । आत्मनि सर्वस्मिञ्जीवे स्थितिं परमात्मन एकस्यामननात् । किञ्च त्वयि परमात्मनि येनावबोधेन त्वय्यन्यथाज्ञानेन कृता त्रिगुणमयः पुमान् जीव इति भिदा भेदः केनचिन्मन्यते स एव स्वयमबोधस्त्वयि न संभवति किमुत तद्विदेत्यर्थः । यस्मात्ततः परत्र प्रत्यग्रूपे तद्विषयत्वाश्रयत्वयोरयोग्य इत्यर्थः । तत्र हेतुः–अवबोधरसे । स खलु बोधस्त्वं पुनरवबोधैकरसः कथमिव यस्त्वां तिमिरमिव तेजोमालिनं विषयमाश्रयं करोत्वित्यर्थः । तस्मात्तवाचिन्त्यशक्तिवैभवस्याज्ञानादेव ते तथोत्प्रेक्षन्त इति भावः । शेषं टीकाभिप्रायम् । अत्र जनिमसत इत्यस्य परिहाराय " सदेव सोम्येदमग्र आसीत् " इति सतो मृतिरित्यस्य " यत्प्रयन्त्यभिविशन्ति " इति यथोदके शुद्धमुदकमासिक्तं तादृगेव भवति । एवं " मुनेर्विज्ञानत आत्मा भवति गौतम इति, " समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः " इति च आत्मनि भिदामित्यस्य " एको देवः " इत्यादौ । " सर्वभूतान्तरात्मा " इति । " एकधा बहुधा चैव दृश्यते जलचन्द्रवत् " इति च । विपणमृतं स्मरन्तीत्यस्य " यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इति । त्रिगुणमय इत्यादेः " आदित्यवर्णं तमसः परस्तात् " इति । अचिन्त्यशक्तित्वस्य "परास्य शक्तिर्विविधैव श्रूयते " " मायां तु प्रकृतिं विद्यात् " इत्यादिश्रुतीरवलंब्य श्रुतयोऽप्येताः " नैषा तर्केण मतिरापनेया " " प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ " " अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पंडितमन्यमानाः । जंघन्यमानाः परियन्ति मूढा अंधेनैव नीयमाना यथांधाः " इत्याद्याः । जलचन्द्रवदित्यनेकधात्वमात्रे प्रतिबिम्बतुल्यत्वान्न तु प्रतिबिंबत्वादेव ' अंबुवदग्रहणात्तु न तथात्वम् " " वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् " इति न्यायात् (१२) ॥ २९ ॥

नीलकण्ठी–एवं रमते जगदुत्पत्त्यादेर्दुर्ज्ञेयत्वमुक्त्वा परोक्तान्सृष्ट्युपपादनप्रकारान्दूषयति–जनिमसत इति । अत्रासतः सत इति पदद्वयं पञ्चम्यन्तं कार्यस्येति षष्ठ्यन्तं पदं जनिमृतिसंबंधवाचकमध्याहार्यम् । ततश्चासतः कारणात् सतोऽसतो वा कार्यस्योत्पत्तिप्रलयाविति शून्यवादिनां द्वौ पक्षावुक्तौ तौ चात्यन्तहेयौ न ह्यसतः सतः शशशृंगस्य विकारो विवर्तो वा धनुः क्वचिद्दृष्टम्, अप्रकृतिकविकारासंभवान्निरधिष्ठानकभ्रमासंभवाच्च कथमसतः सज्जायेतेत्यसद्धेतुककार्यासंभवश्रुतेश्च । अतः सत एव कारणादसतः सतो वा कार्यस्य जनिमृती वक्तव्ये । तत्र वैशेषिकास्तार्किकाश्च कारकव्यापारात्प्रागसदेव कार्यं तदूर्ध्वमुत्पद्यते ध्वस्तञ्च निरन्वयनाशमेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईदृशावेव जीवोत्पत्तिविनाशाविच्छन्तः पाञ्चरात्राः कृतहानाकृताभ्यागमदोषं न पश्यन्ति । एवं सर्वेऽपि तैर्थिकाः सतो बंधस्य निरन्वयनाशमसतो मोक्षस्य जनिं चेच्छान्ति । सांख्यपातञ्जलास्तु असत उत्पत्तौ निदर्शनाभावात्कूर्मावयववत्सिंधुसैंधववद्वा सत एव कार्यस्याविर्भावतिरोभावावेव जनिमृती इत्याहुः । अत्यन्तासतो जन्मायोगादत्यन्तसतो निरन्वयनाशायोगाच्च एकस्य सतो विवर्तः कार्यमिति वृद्धाः । तद्व्याख्यातं बृहदुपलब्धमित्यत्र । एवं जनिमसतः सतो मृतिं ये स्मरन्ति उत अपि च आत्मनि भिदां भेदञ्च ये स्मरन्ति सांख्यादयः यथा जन्ममरणकरणानां प्रति नियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सिद्धं त्रैगुण्याविपर्ययाच्चैवेति । तार्किकास्तु परसमवेतानां जन्मादीनामात्मनि घटानामिव व्योम्नि भेदकत्वासिद्धेरात्मसमवेतमेव दुःखं स्वाश्रयभेदसिद्धिहेतुर्वाच्यं नान्यसमवेतमित्याहुः । ये च मीमांसका विपणं व्यवहारम् ऋतं प्रवाहनित्यं 'न कदाचिदनीदृशं जगत्' इति स्मरन्ति ते सर्वे आरुपितैरारोपैः क्षेत्रधर्मं क्षेत्रज्ञे दतय इवेत्यत्रोक्तदिशा स्फटिके जपाकुसुमलौहित्यवदारोप्यात्मानं दुःखादिमन्तमुपदिशन्ति स्वशिष्यान्प्रति बोधयन्ति । अत्रेदं विवक्षितं यावद्दुःखनाशो हि तेषां मोक्षः स च घटे यावद्रूपनाशवदात्मनि धार्मिनाशमन्तरेण न संभवति वक्ष्यमाणरीत्या जगतः सत्यत्वं प्रधानाद्युपादानत्वं च न संभवतीति ते 'अंधस्येवांधलग्नस्य विनिपातः पदेपदे' इति न्यायेन स्वयं नष्टाः परानपि नाशयन्तीति तदिदमाह श्रुतिः—"अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः । जंघन्यमानाः परियन्ति मूढा अंधेनैव नीयमाना यथांधाः " इति । त्रिगुणमयः पुमानित्यत्रेतिशब्दः प्रकारार्थः । तेनैवंप्रकारकम् आकाशकालदिङ्मनसां पार्थिवाप्यतैजसवायवीयपरमाणूनाञ्च नित्यत्वमपि तेषु सत्त्वं निरवयवत्वञ्चारोप्य स्वोत्प्रेक्षितमारंभप्रकारमपश्यन्तः उपदिशन्तीत्यपि संग्राह्यम् । नन्वारुपितैरुपदिशन्तीत्येतदेव कुत इत्याशंक्याह—भिदा यदबोधकृतेति । भिदा भेदो यत् यस्मादबोधेन भावरूपेणाज्ञानेन अमित्रादिपदवदबोधपदस्यात्र भाववाचित्वं न त्वभावपरत्वं तेनाबोधेन कृता । इदमत्राकूतं स्वप्नद्रष्टरीव स्वरूपाबोधकृतैवेयं ब्रह्मणि जगत्कल्पना न च स्वप्नादिकं निःस्वरूपाज्ज्ञानाभावाद्भवितुमर्हति तस्य सर्वत्र सुलभत्वेन सर्वस्मात्सर्वोद्भवापत्तेः । दृश्यते हि निद्रारूपमज्ञानं व्यावहारिकौ जगज्जीवावावृत्य स्वाप्नौ जगज्जीवौ विक्षिपतीति तस्मादावरणविक्षेपशक्तियोगादज्ञानं भावरूपं त्रिगुणात्मकं प्रकृतिरविद्या माया प्रधानं देवात्मशक्तिरव्यक्तमव्याकृतमित्यादिशब्दैर्वेदान्तेषूच्यते "न तं विदाथ " इति मंत्रेऽपि जगज्जनयितृज्ञानाभावमुक्त्वा नीहारेण प्रावृता इति तन्निमित्तं भावरूपमज्ञानमुक्तम् । 'अज्ञानेनावृतं ज्ञानम् ' इति गीतास्वपि न ह्यभावस्य स्वप्रतियोग्यावरकत्वं खड्गकोशवत्संभवत्यतो भावरूपमेवाज्ञानं न च तेन द्वैतापत्तिः शक्तिशक्तिमतोरभेदात् , भेदे हि गौरश्व इतिवदग्निरुष्ण इति सामानाधिकरण्यं न स्यात् । न च वह्नावौष्ण्यं समवायसंबंधेनास्तीति तत्र सामानाधिकरण्यं युज्यते । अन्यत्र तदभावान्नेति वाच्यं वह्निसमवाययोरपि भिन्नत्वाविशेषात्संबंधांतरापेक्षावश्यंभावेनाऽनवस्थापातात् , अनुपेक्षायाञ्च समवायवदेवौष्ण्यमपि वह्नौ संबंधान्तरमनपेक्षैवास्तु किं समवायकल्पनेन तस्माद्द्रव्यमेव तत्तदवस्थाविशेषापन्नम् , उष्णो लोहितः प्रकाशते बालो युवा वृद्धो भूर्बीजमंकुरो वृक्षः, कनकं कटकं कुण्डलमिति भेदेन विकल्प्यते न त्वौष्ण्यादिकं भावान्तरं स्वतंत्रमिति श्लिष्टम् । न चैवं ब्रह्मणो विचित्रशक्तियोगादेकरस्यहानिः शक्तिमद्विनाशमन्तरेण शक्त्यनाशापत्तिश्चेति वाच्यम् "तम आसीत्तमसा गूढमग्रे प्रकेतं सलिलं सर्वमाइदं तुच्छेनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् " इति । तमःशब्दितायाः शक्तेस्तुच्छत्वश्रवणात् न ह्यध्यस्तेनाधिष्ठानस्य सद्वितीयत्वमस्ति तमसोऽध्यस्तत्वञ्चोपरिष्टात्सत इदामित्यत्रोपपादयिष्यते । तस्मान्मामहं जानामीत्यनुभवसिद्धमात्माश्रयविषयं वा जीवाश्रयं ब्रह्मविषयं वाऽज्ञानं जगत्कारणमस्तीति सुष्ठूक्तम् । भिदा यदबोधकृतेति । आरुपितैरुपादिशंतीति च । ननु स्वप्नदृष्टवन्ममापि कारणीभूताज्ञानाधीनतयानीश्वरत्वं स्यादत आह—त्वयि नेति । स अबोधः त्वयि आश्रये न भवेन्न संभवति कुतः ततः परत्र अबोधात्परस्मिन् "आदित्यवर्णं तमसः परस्तात् " इति श्रुतेः । अत एवावबोधरसे शुद्धचिन्मात्रे । तथा च श्रुतिः—"स यथा सैंधवघनोनंतरोबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्मानंतरोबाह्यः कृत्स्नप्रज्ञानघनः " इति । अकार्यकारणे त्वय्यज्ञानसंबंधसंभावनापि नास्ति मायाशबलस्यापि तवैंद्रजालिकवन्मायाप्रयोक्तुर्न मायाधीनत्वम् " अस्मान्मायी सृजते विश्वमेतत्तस्मिँश्चान्यो मायया सन्निरुद्धः " इति । मायानियामकात्त्वत्तो मायानियम्यस्य श्वेताश्वतरैः पृथगाम्नानात् (१२) ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सदिव मनस्त्रिवृत्त्वयि विभात्यसदा मनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः॥
नहि विकृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयाऽवसितम ॥ १३ ॥ २६ ॥

ननु यद्यसन्नोत्पद्यते यदि च त्रिगुणमयः पुरुषो न भवति तर्हीदं प्रपंचजातं पुरुषश्च पृथङ् नास्तीत्युक्तं स्यात् कथं तर्हि तयोः सत्त्वेन प्रतीतिरत आह। सदिव मन इति। मनोमात्रविलसितमिदं त्रिवृत्त्रिगुणात्मकं प्रपंचजातमसदेव सदिव विभाति। कथमिति चेत्तत्राह। त्वयीति। त्वय्यधिष्ठाने। अधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः। न केवलमिदंकारास्पदं किंत्वा मनुजात्। मनुजः पुरुषः। अभिविधावाकारः। पुरुषमभिव्याप्येति। पुरुषस्यापि पृथक्सत्त्वप्रतीतिर्मनोमात्रविलसितेत्यर्थः। तथाच श्रुतिः। “असतोऽधिमनोऽसृज्यत ॥ मनः प्रजापतिमसृजत ॥ प्रजापतिः प्रजा असृजत ॥ तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंच” इति। नन्वात्मविदामपि विश्वं सदेव स्फुरत्यतः कथमसत्यादत आह। सदभिमृशंतीति। आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकं विश्वमात्मतयैव सदभिमृशंति सदिति जानंति। आत्मकार्यत्वान्न पृथगित्यर्थः। तथाहि।यदुपादानकं यत्कार्यं भवति तत्तेनैव रूपेण प्रतीयते उपादीयते चेति लोकाचारेण दर्शयति।नहि विकृतिमिति। कनकस्य विकृतिं कुंडलादिकं कनकार्थिनो न त्यजंति। अत्र हेतुः।तदात्मतया कनकरूपत्वेनेत्यर्थः।अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवावसितं निश्चितम्॥ यत्सत्त्वतः सदाभाति जगदेतदसत्स्वतः॥ सदाभासमसत्यस्मिन्भगवंतं भजाम तम् ॥ १३ ॥ २६ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्राशंकते—नन्विति। पृथङ्नास्ति किन्त्वेक एवेत्येवं स्यात् भवत्विति चेदाह—कथमिति। तयोः प्रपञ्चपुरुषयोः। नन्वसतः प्रतीतिः कथमिति चेदाह—त्वयीति। इत्यर्थ इति। रज्जुसत्तयाऽहिरसन्नपि यथा सद्वत्प्रतीयते इति भावः। इदंकारास्पदं घटादि पुरुष आत्मा। इत्यर्थ इति—पृथक्सत्त्वप्रतीतिर्न वास्तवी स्वप्नादिवन्मनस्येवेति भावः। विश्वस्य मानसत्वे प्रमाणमाह—तथा चेति। असतः अव्याकृतात्परमेश्वरादधि अधिकं समष्टिरूपं मनोऽसृज्यताभूदित्यर्थः। कर्मकर्तरि प्रयोगः अनायासेन सृज्यमानत्वात्स्वयमभूदित्यर्थः। पच्यते ओदनः स्वयमेवेत्यादिवत्। तच्च मनः प्रजापतिं ब्रह्माणमसृजत्स च प्रजा असृजत् तत्तस्मादिदं दृश्यमानं किञ्च किञ्चन वस्तु तन्मनस्येव मनोभावापन्नेऽव्याकृते एव परमं यथा भवति तथा प्रतिष्ठितं प्रकर्षेण स्थितमित्यर्थः, सृष्टिपरेयम्। पुनराशंकते—नन्विति। यतो ज्ञानिनामपि सत्त्वेन प्रतीयतेऽतो हेतोः। इत्यर्थ इति—कार्यस्य कारणात्मकत्वादिति भावः। अत्रात्यागे। इत्यर्थ इति—कुण्डलादिरूपत्वेन स्वर्णमेव प्रतीयते न तस्य पृथक्सत्त्वं दृष्टमिति भावः। यतः कारणमेव कार्यरूपेण प्रतीयतेऽतो हेतोः। आत्मतया परमात्मरूपतया। स्वामिनाम्—यदिति। एतज्जगत् असत्स्वतः स्वरूपेण यत्सत्त्वतः यतस्सत्त्वतः सत्तां प्राप्य तत्सत्यमाभाति। अस्मिन्नसति संसारे सदाभासं सर्वदा प्रकाशमानम्॥ * ॥ **श्रीधरानुयायिनी**—ननु कथं भिदाया मिथ्यात्वं सत्यत्वेन प्रतीतेरित्याशंक्याहुः—सदिवेति। जलचन्द्रवदध्यस्तेन प्रमात्रा सहितं त्रिगुणात्मकमिदं प्रपञ्चजातं यतो मनोमात्रविलसितमतोऽसदेव तदप्यधिष्ठानस्य तव सत्तयैव त्वयि सदिव रज्जुसर्पादिवद्विभाति। आत्मविदस्तु भोक्तृभोग्यात्मकमिदं विश्वं न शिष्यत इत्यशेषं यथा स्यात्तथाऽऽत्मतयैव सदिति जानान्ति न तु प्रमातृप्रमेयादिविभक्तरूपेणापि यदुपादानात्मकं यत्कार्यं तत्तेनैव रूपेण प्रतीयते उपादीयते चेति प्रसिद्धेः। यथा सुवर्णविकारं कुण्डलादिकं सुवर्णार्थिनो न त्यजन्ति किंतु सुवर्णत्वेन तद्गृह्णन्त्येव तथात्रापि। अतः स्वकृतमिदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वं तदनुप्रविष्टं पुरुषस्वरूपञ्चात्मतयैव निश्चितम् । यद्वा—अवसितमवसामं बाधं प्रापितमित्यर्थः । एतदेवापरोक्षज्ञानं संसारबंधमोचकम् । एवञ्चाज्ञानां :सत्यत्वेन प्रतीयमानापि भिदा ज्ञानोदये मिथ्यैव ! ज्ञानञ्च भक्तिं विना नैवोदेतीत्याशयः । यद्वा—आमनुजात् मनुजमविद्याद्युपहितं जीवमभिव्याप्य त्रिवृत्त्रिगुणात्मकमशेषमिदं विश्वं मनोविलसितमतः सदिव शोभनमिव वर्तमानमप्यसत् अशोभनमेव । पुनरेवंभूतमपि यदि त्वयि त्वत्सेवानिमित्तं समर्पितं स्यात्तदा सच्छोभनमेव विभाति । नन्विदमज्ञानामेव किमित्याशंक्याहुः—आत्मविदस्त्यक्तदेहमात्रैषणा अपि त्वयि समर्पितमिदमात्मतया वल्लभतयाऽभिमृशन्ति स्पृशन्ति अङ्गीकुर्वन्ति नान्यवत्त्यजन्तीत्यर्थः । अत्यागे दृष्टान्तमाहुः—नहीति । यथा सुवर्णस्य विकृतिं स्वसंबंधाद्विकारकारकमपि रौप्यताम्रादिकं तदात्मया सुवर्णप्राप्तिहेतुत्वेन तत्स्वरूपतया नहि त्यजन्ति तद्वत् । किञ्च—स्वकृतं त्वया स्वयं निर्मितं पुनरात्मतयांतर्यामितया त्वयाऽनुप्रविष्टं विश्वमतस्त्वदावासस्थानमित्यपि निश्चित्य न त्यजन्तीत्यर्थः ॥ * ॥ **विश्वनाथी—**अत्रासतोऽधि मनोऽसृज्यतेत्यादिश्रुतिरपि अत्रासच्छब्देन सच्छब्दप्रसिद्धकार्यपरंपरातिरिक्तं सर्वकारणं श्रीभगवानुच्यते "असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषात्" इति न्यायात् । अधिमनःशब्देन सर्वाधिकारि तदीयमेव मनः ततश्चासत इत्यसता तेनासृज्यतेति तदर्थं व्यापारयामासेत्यर्थः । अथ पुनरेव नारायणः—" सोऽन्यं कामं मनसा ध्यायेत्तस्य ध्यानान्तःस्थस्य ललाटात्स्वेदोऽपतत् ता इमाः प्रथमापः तासु तेजो हिरण्मयमण्डं तत्र ब्रह्मा चतुर्मुखोऽजायत " इति श्रुतेः । एतमर्थमज्ञातुः कस्यचित्पूर्वपक्षमाशंक्य समादधते—तत्राशंका, ननु—श्रुत्या शून्यमेव प्रथममुपदिष्टं तदनंतरं मनोविज्ञानपरंपरा ततोऽसत एव पर्यवसानेऽपि स्थितिः स्यात् तथा मनसः प्रधानत्वात्तर्क एव सर्वत्र ज्ञाने हेतुः श्रुतेस्तु तत्कल्पितत्वात्तदनंतरमेव कथं पुनः श्रुत्या तत्तद्दूष्यत इति । समाधानं तु—सदिवेति । त्रिवृत् उत्पत्तितो गुणत्रये वर्तमानं मनस्त्वयि असत् प्रवर्तमानं :चेत्तदा सदिव यथार्थदर्शीव प्रतीयते वस्तुविचारे त्वयथार्थदर्श्येवेत्यर्थः । "तर्काप्रतिष्ठानात्" इति भावः । यत एवात्मविदः सर्वमूलस्वरूपस्य तव वेत्तारो ये ते तु जीवमभिव्याप्याशेषमिदं सद्रूपत्वेनानुगतं त्वामेव पश्यन्ति तच्चात्मतया सर्वमूलस्वरूपतया । यथा पाद्मे—"चेतना तु द्विधा प्रोक्ता जीव आत्मा च सा प्रभो । जीवा ब्रह्मादयः प्रोक्ता आत्मैकस्तु जनार्दनः ॥ इतरेष्वात्मशब्दस्तु सोपचारोऽभिधीयते ।" इति । तदेवार्थान्तरन्यायेन बोधयन्ति—नहीति । कनकस्य विकृतिं कटककुण्डलादिकं कनकवणिजो हि न त्यजन्ति । तत्र हेतुः—तदात्मतया तदनुगततन्मात्रदृष्ट्येति । उभयत्र साम्यं योजयन्ति—स्वकृतमिति । स्वेन कृतं स्वेनाप्यनुगतञ्चेति । उपसंहरन्ति । तस्मादात्मतया तत्स्वरूपतयैव निश्चितमिति । तस्मान्न शून्यस्य कारणत्वं न वा मनसः प्राधान्यं किन्तु तवैव तत्तदिति त्वद्वचनरूपायाः श्रुतेरेव मुख्यं प्राधान्यमिति भावः । अत्र श्रुतयः—"यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा । तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः । यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः । न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥ यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ यस्तु विज्ञानवान्भवति समनस्कः सदाशुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥ विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ॥" इत्याद्या "औपनिषदः पुरुषः" इत्याद्याश्च (१३) ॥ २६ ॥

नीलकंठी—ननु भेदस्याबोधकृतत्वे शुक्तिरजतवन्मिथ्यात्वं स्यात्तथा च कथं लौकिकवैदिकव्यवहार इत्यत आह—सदिव मन इति । आमनुजात्त्रिवृन्मनः असदपि सदिव त्वयि विभातीति संबंधः । आ इत्यभिविधावाङ् । मनुजः प्रमाता जलचन्द्रवत्प्रमातुरप्यध्यस्तत्वेन तत्सहितं मनोमयं सर्वं मन एव स्वरूपेणासदपि सदिव त्वयि अधिष्ठाने स्वप्नदृशीव विविधं भाति भेदस्य :मिथ्यात्वेऽपि स्वप्नवद्व्यवहारोपपत्तिरिति भावः । मनो विशिनष्टि—त्रिवृदिति । त्रिभिर्मातृमानमेयैः सत्त्वरजस्तमोभिस्तेजोऽबन्नैर्वा सह वर्तते इति त्रिवृत् । तत्र तेजोऽबन्नात्मत्वे मनसस्तत्त्वान्तरत्वनिरासो लभ्यते । "तासां त्रिवृतं त्रिवृतमेकैकामकरोत्" इति तेजोऽबन्नानां त्रिवृत्करणश्रुतेः । तच्चैषामेकैकस्मिन्नर्धे स्वांशः अर्धमितरयोरंशः समत्वेनेति तदेतत्त्रिवृत्करणं पञ्चीकरणोपलक्षणार्थं सृष्टिवदित्येके । अन्ये तु संप्रदायागतमपि पञ्चीकरणं नाद्रियन्ते त्रिवृत्करणमेव श्रौतं विवक्षितमित्याहुः । ननु स्वप्नवद्व्यवहारश्चेद्बुद्धानां तद्वदेव स लुप्येतेत्याशंक्याह—सदिति । आत्मविद इदं सत् अशेषं न शिष्यते इत्यशेषं यथा स्यात्तथा आत्मतयाभिमृशन्ति तत्त्वज्ञाः परिदृश्यमानं कार्यं द्विचन्द्रवत्सहैव बाधनात्मतया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तव परि ये चरंत्यखिलसत्त्वनिकेततया त उत पदाऽऽक्रमंत्यविगणय्य शिरो निर्ऋतेः ॥
परिवयसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः ॥ १४ ॥ २७ ॥

ननु "सत्यं ज्ञानमनंतं ब्रह्म ॥ नेह नानाऽस्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिश्रुतिभिरेवंभूतस्य भगवतः प्रतिपादनात्तज्ज्ञानं सुकरमेवेति जानन्ति समाधौ भेददर्शनाभावेऽपि व्युत्थाने दग्धपटवदविद्यासंस्कारादनुवर्तमानमनःकल्पितं भेदं प्रत्याख्यातुं समर्थास्ते इत्यतो न तेषां व्यवहारलोप इति भावः। ननु, स्वरूपानंदतृप्तास्ते मातृमानमेयात्मकं मनोव्यवहारं कुतो न त्यजन्तीत्यत आह–नहीति। अत्र मनस इति षष्ठ्यन्तं विपरिणामेनानुषञ्जनीयम्। कनकस्येति दृष्टान्तार्थमुक्तम्। तदात्मतयेति हेतुः। यथा कनकार्थिनः कनकस्य विकृतिं कुण्डलादिरूपां कनकात्मतया न त्यजन्ति एवमात्मविदोऽपि प्रारब्धकर्मावष्टब्धमनःकल्पितदेहेन्द्रियादिनिर्वाहार्थिनः मनोविकृतिं मात्रादिरूपां व्यवहृतिं चक्रभ्रमिवदनुवर्तमानमनस्तादात्म्यमत्तया न त्यजन्तीत्यर्थः। मनस्तादात्म्ये बीजमाह–स्वकृतमनुप्रविष्टमिति। "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः। स्वकृतं स्वस्मिन्कल्पितमनुप्रविष्टं स्वेनैव सदात्मतानुविद्धं शुक्तिसत्तयेव तत्र कल्पितं रजतं प्रतीच्यध्यस्तत्वात्तत्त्वविदामपि व्यवहारेऽस्त्येव मनस्तादात्म्यमित्यर्थः। मनसोऽध्यस्तत्वेऽनुमानमाह–इदमात्मतयावसितमिति। इदमर्थास्पदत्वेन दृश्यत्वेन हेतुनेति यावत्। अवसितमवसानं बाधं प्रापितम्। तथा चायं प्रयोगः सूचितः। अहमादिर्बाधयोग्यः दृश्यत्वात्स्वप्नमायादिवदिति। न च पुष्कलार्थक्रियाकारित्वेन बाधायोग्यत्वमपि सिद्ध्यतीति वाच्यम्–गरुडोऽस्मीति भावनायाः सत्यविषनिवर्तकत्वेऽपि बाधदर्शनात्। एवं च तुच्छादज्ञानान्मनस उत्पत्तिः ततः प्रमात्रादिविकल्प इति सिद्धम्। तथा च श्रुतिः–"असतोऽधि मनोऽसृज्यत मनः प्रजापतिमसृजत प्रजापतिः प्रजा असृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किञ्च" इति (१३) ॥ २६ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–ज्ञानस्य सुलभत्वेनातीव कठिनायां भक्तौ प्रयासो न कार्यो ज्ञानैकावाप्तव्यत्वेन मोक्षस्येत्याशंकते–नन्विति। एवंभूतस्य सत्यज्ञानादिरूपस्य तद्ज्ञानं भगवज्ज्ञानमिति श्रुत्यर्थः पूर्वमुक्तः। इत्यर्थ इति–"एक एव हि भूतात्मा" इत्यादिश्रुतिभिः सर्वभूतावासत्वेनोक्तत्वादिति भावः। इत्यर्थ इति–"ये मां सर्वेषु भूतेषु भगवंतमुपासते। ऐहिकामुष्मिकं त्यक्त्वा

१–एक एव हीत्यादेरर्थः। जगतो ब्रह्मादिभेदेन प्राप्तमीश्वरानेकत्वं निरस्यति–एक इति। "एक एव हि रुद्रो न द्वितीयाय तस्थुः" इति। रुद्रः परमात्मा "एष एव रुद्र एष एवेन्द्रः" इत्यादिश्रुतेः। एतेषामैश्वर्यं प्राकृतमनित्यञ्चाभासिकञ्चेति एवकारेणासूचि। तत एकत्वं कारणत्वञ्चाव्याकृते पर्यवसितं निरस्यति–देव इति। कालत्रयेऽपीतराऽनपेक्षयाऽखण्डचिदात्मना स्वयमेव दीप्यते "प्रकाशत" इति देवः। अव्याकृतस्य जडत्वेन देवत्वासंभवात् स्वतः कारणत्वानुपपत्तेः देवत्वैकत्वसंपत्त्या रवेः प्राप्तमीश्वरत्वं निरस्यन्नाह–सर्वेति। सर्वेषु भूतेषु चिदेकरसात्मना स्थित इत्यर्थः। एतेन रवेर्देवत्वे एकत्वेऽपि चिदात्मना भूतेष्ववस्थितेरसत्त्वादीश्वरत्वाभावः। सर्वभूतेषु सर्वदैकरूपेण चित्प्रकाशात्मना स्थितत्वेन ब्रह्मणः प्राप्तं सर्ववेद्यत्वं निरस्यति–गूढ इति। सर्वभूतेषु प्रकाशात्मना विद्यमानत्वेऽपि मेघैः सूर्यवदविद्यातत्कार्यैस्तिरोहितत्वात्परमात्मा न सर्वेषां वेद्योऽस्तीत्यर्थः। भूतेषु गूढत्वे सति ब्रह्मणा प्राप्तं बुद्ध्यादिवत्परिच्छिन्नत्वं निरस्यति–सर्वव्यापीति। घटादिकं मृदिव जगद्बहिरंतश्च सर्वतः स्वसत्तया व्याप्नोतीति सर्वव्यापी बहिरन्तःपूर्णत्वाद्ब्रह्मणः परिच्छित्त्यभावः। गूढात्मना सर्वव्यापकत्वमाकाशेऽस्ति तत्राह–सर्वभूतांतरात्मेति। सर्वेषां भूतानामन्तर्बुद्धिगुहायामात्मरूपेण तिष्ठतीत्यर्थः। सर्वव्यापकत्वेऽप्याकाशस्य जडत्वेन सर्वभूतात्मत्वासंभवान्न ब्रह्मत्वम्। सर्वभूतात्मत्वे ब्रह्मणः कर्मकर्तृत्वतत्फलभोक्तृत्वसंसारित्वञ्च प्राप्तं तत्राह–कर्माध्यक्ष इति। उपाधिमधिष्ठाय तद्धर्मानीक्षत इत्यध्यक्षः, भूतानां तत्कर्मणां तत्फलभोगानाञ्च साक्ष्येवात्मा निरवयवत्वान्निष्क्रियत्वाच्च स्वयं कर्म न किञ्चित्करोति नापि भुंक्ते इत्यर्थः। ब्रह्मणः सर्वभूतान्तरत्वे भूताश्रयत्वं तदधीनत्वं चाप्तं निरस्यति–सर्वभूताधिवास इति। वसत्यस्मिन्सर्वमिति वासः अधिकंतमश्चासौ वासश्चेत्यधिवासः शुक्तौ रजतवद्दर्पणे पुरवत्स्वस्मिन्कल्पितानां भूतानां परमात्माऽधिवासोऽधिष्ठानमेवाऽस्ति न तु स्वयं तदधिकरण इत्यर्थः। न केवलं कर्मणामेव ज्ञाताऽयमात्मा किन्तु भूतानां तद्धर्माणां तत्कर्मणां तत्फलानुभूतीनां तदवस्थानाञ्च द्रष्टेत्याह–साक्षीति। बुद्धितद्विकाराणां सर्वेषां साक्षीत्यर्थः। साक्षादीक्षत इति साक्षीत्यात्मन ईक्षणक्रियाकर्तृत्वे प्राप्ते सत्याह–चेतेति। चेतयितृत्वमविक्रियत्वं स्वयमविक्रियात्मना सर्वं पश्यतीत्यर्थः। अविक्रियत्वे हेतुः–केवल इति। केवलो निरवयवः निरवयवत्वादविक्रियः स्वयमविक्रियः सन्नेव सर्वं पश्यतीत्यर्थः। शब्दगुणमाकाशमिति निरवयवस्याप्याकाशस्य यथा गुणवत्त्वं तथा ब्रह्मणो निरवयवस्यापि सत्त्वचित्त्वादिगुणवत्त्वे प्राप्ते परिहरति श्रुतिः–निर्गुण इति। "आत्मन आकाशः संभूतः" इत्याकाशस्य जनिश्रुतेस्तस्य जनिमत्त्वेन सावयवत्वादाकाशस्य गुणवत्त्वं युक्तम्। निष्कलमिति श्रुतेर्ब्रह्मणो निरयवत्वाद्गुणवत्त्वमनुपपन्नमेव ततः सत्त्वचित्त्वादिस्वरूपमेव भवति न तु गुण इति परस्य ब्रह्मणोऽखिलविशेषाभावप्रतिपादनाय चकार इति शंकरानंदो गीतायां व्याचख्यौ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतं भक्त्या, अत आह । तव पारि ये चरंतीति । तवेति कर्मणि षष्ठी । त्वां ये परिचरंति । छंदसि "व्यवहिताश्च" इति यच्छब्देन व्यवधानमदोषः । केन रूपेण अखिलसत्त्वनिकेततया अखिलानि सत्त्वानि निकेतो यस्य स तथा तस्य भावस्तत्ता तया । सर्वभूतावासतयेत्यर्थः । उत एव अविगणय्य तिरस्कृत्य त एव निर्ऋतेर्मृत्योः शिरो मूर्धानं पदा पादेनाक्रमंति मृत्योर्मूर्ध्नि पदं दधति । ते तरंति मुच्यंत इत्यर्थः । ये पुनर्विमुखा अभक्तास्तान् गिरा वाचा पशूनिव विबुधान्विदुषोऽपि परिवयसे बध्नासि । कुतः । त्वयि कृतसौहृदाः त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितं पुनंति पवित्रयंति आत्मानमन्यानपीति शेषः । नेतरे । तथाच श्रुतिः । "तस्य वाक्तंति र्नामानि दामानि ॥ तस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितम्" इति । अयमभिप्रायः । सत्यमेवंभूतमात्मानं श्रुतयः प्रतिपादयंति तत्र च यद्यपि वस्तुनोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते तथाऽप्यसंभावनाविपरीतभावनातिरस्कृतत्वान्मलिनचित्तेषु परोक्षमेव भवतीति नापरोक्षसंसारभ्रमनिवृत्तिसमर्थम् । भगवत्परिचर्यया तु सम्यगमलचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञानानामयत्नत एव करकलितो मोक्ष इति । तथा च श्रुतयः । "देहांते देवः परं ब्रह्म तारकं व्याचष्टे ॥ यमेवैष वृणुते तेन लभ्यः ॥ यस्य देवे परा भक्तिः" इत्यादयः ॥ तपंतु तापैः प्रपतंतु पर्वतादटंतु तीर्थानि पठंतु चागमान् ॥ यजंतु यागैर्विवदंतु वादैर्हरिं विना नैव मृतिं तरंति ॥ १४ ॥ २७ ॥

तान्मृत्योरतिपारये ।" इत्यादिश्रीमुखोक्तेर्मृत्युमतितुच्छं कृत्वा मुच्यन्त इति भावः । अन्यान्निजसङ्गिनोऽपीत्यर्थः । इतरे त्वद्विमुखा नात्मानं कुतोऽन्यानिति भावः । अभक्तान्बध्नातीत्यत्र श्रुतिमाह—तथा चेति । तस्येश्वरस्य वाक् वेदरूपा तंतिर्बंधनार्थं महारज्जुः नामानि ब्राह्मणादीनि दामानि गलबंधनानि नामभिर्दामस्थानीयैः सर्वमशेषं सितं बद्धम् अमुकस्त्वमेवं कुर्वित्याज्ञया बद्धमित्यर्थः । अभक्तबंधनपरेयं श्रुतिः । स्वामिचरणानामाशयस्त्वयमित्याह—अयमिति । सत्यं निश्चितं तत्र प्रतिपादनेऽपरोक्षत्वात्प्रत्यक्षत्वात् करे कलितः स्थापितः । अत्र प्रमाणमाह—तथा चेति । श्रीनृसिंहतापन्यां "य इह स्थातुमपेक्षते सर्वैश्वर्यं ददाति यत्र कुत्रापि म्रियेत देहान्ते देवः तारकं व्याचष्टे येनामृतीभूत्वा सोऽमृतत्वं गच्छति" इति । अर्थः—य उपासक इह लोके स्थातुमपेक्षते इच्छति तस्मै सर्वैश्वर्यं ददाति देवः श्रीनृसिंहः स यत्र कुत्रापि कीकटम्लेच्छदेशादावपि म्रियते तत्तस्य देहान्ते तारकं परमं ब्रह्म व्याचष्टे तारः प्रणवः तत्रस्थं तारकं सामाङ्गप्रणवे व्याख्यातं परं ब्रह्म कथयतीत्यर्थः । येन परब्रह्मकथनेनामृतीभूत्वा स श्रोताऽमृतत्वं कैवल्यं प्राप्नोतीत्यर्थः । श्रुत्यन्तरमाह—" नायमात्मा प्रवचनेन लभ्यो न मेधया बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः " इति । अर्थः— अयमात्मा प्रवचनेन शास्त्राध्ययनेन मेधया बुद्ध्या बहुना श्रुतेन श्रवणेन च न लभ्यते किन्तु यमात्मानमेष उपासको वृणुतेऽनन्यभावेन भजते तेनैव वरणेनैव स आत्मा लभ्यो नान्यसाधनान्तरेण । यद्वा—यमेव भक्तं भक्त्या परितुष्ट एष आत्मा हरिर्वृणुते आत्मसात्कर्तुमिच्छति तेनैवैष लभ्यते नान्यैरिति भक्तमोक्षपरेयम् । "यस्य देवे परा" इति व्याख्यातैव । स्वामिनाम्—तपन्त्विति । तापैः पञ्चाग्न्यादिभिः । पर्वतात् भृगुतुंगात् । तीर्थानि पुष्करादीनि । आगमान्सांगवेदादीन् । यागैरग्निहोत्रादिभिः । योगैर्युक्तिसमूहैः । वादैरिति पाठे तु वादैर्जल्पवितण्डादिभिः मृतिं मृत्युं सृतिमितिपाठे संसृतिं जन्मजरामृत्युरूपामित्यर्थः ॥ * ॥ **श्रीधरानुयायिनी**—सत्यज्ञानादिस्वरूपेण तस्य ज्ञानं सुकरमेव किं भक्त्येत्याशंक्याहुः—तवेति । द्वितीयार्थे षष्ठी । ये च त्वां सर्वान्तर्यामितया भजन्ति ते कोऽयं वराको मृत्युरिति तिरस्कृत्य मृत्योरपि शिरसि पदं धृत्वा मुच्यन्ते तत्सोपानेन त्वत्पदं गच्छन्तीति निश्चितम् । किन्तु महता कष्टेन तत्रापि केचिदेव ये तु त्वयि प्रेमभक्तास्ते सर्वे स्वयमतिपूता एवान्यान् शिष्यादीन्निश्चितं पुनन्ति । एवं च भगवद्भक्त्या नितरां निर्मलीकृतमनसां सर्वेषामेव त्वत्कृपया विना प्रयासं लब्धापरोक्षज्ञानानां सुलभ एव मोक्षः । ये तु त्वय्यभक्तास्ते स्वात्मानमपि न पवित्रयन्ति कुतोऽन्यानतस्तान् विबुधानपि ऐहिकामुष्मिकसाधनसमूहदक्षानपि ज्ञानिनोऽपि वा विधिनिषेधरूपायां तत्तन्मतप्रातिपादिकायां वा वेदवाचि तंत्यां ब्राह्मणतार्किकादिनामभिस्त्वं खरोष्ट्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिषादिपशूनिव बध्नासि । एवं चापरोक्षज्ञानमेवापरोक्षभ्रमनिवर्तकमिति नियमाज्ज्ञानिनामपि भक्तिं विना ज्ञानं परोऽक्षमेवातो व्यर्थमित्याशयः । यद्वा–नराकारत्वेऽपि पशुतुल्यत्वमाहुः–अविबुधानिति । अवयो मेषाख्याः पशवस्तद्वद्बोधो येषां तानाहारनिद्राभयमैथुनमात्रं जानत इत्यर्थः । त एवाग्रेऽविमुखा इत्युक्ताः । नये वेदशास्त्ररहस्ये तद्वर्णनेऽविवन्मेषपशुवन्मुखानि येषां ते इत्यर्थः । यथा ते वृथैवामंगलं प्रलपन्ति तथा तवाभक्ताः पण्डितम्मन्या अपि स्वस्वमतारूढाः परबुद्धिभ्रंशार्थं वृथैव प्रलपन्ति । अत एव मदीयमाशयमन्यथैते वर्णयन्तीति महता क्रोधेन तांस्त्वं बध्नासीत्यर्थः । यद्वा–ये त्वयि कृतसौहृदा अत एव न ये सांसारिकव्यवहारे विमुखा विरक्ताः । अत एव “वासुदेवः सर्वमिति स महात्मा सुदुर्लभः” इति गीतोक्त्या सर्वात्मत्वेन त्वामुपासते ते मृत्युं तिरस्कृत्य तस्य शिरः स्वपादेनाक्रमन्त्येव । तथात्मानमन्यांश्च पवित्रयन्त्येव । भक्तानां मृत्युभयाभावे हेतुः तान्मृत्युप्रभृतीन्देवानपि गिरा मद्भक्तेष्वेवं कुरुध्वमेवं मा कुरुध्वमिति अप्रतिहताज्ञारूपया वाण्या त्वं पशूनिव बध्नासि ॥ * ॥ **तोषिणी**–

पूर्वस्मिन्पद्यद्वये परमपुरुषार्थनिरूपणमधिकृत्यासदुत्पत्तिवादिनः सद्विनाशवादिनः सगुणत्वभेदवादिनो विपणवादिनो विवर्तवादिन इत्येवं पञ्च वादिन उक्ताः । इह पद्ये तु परिचर्यावादिन उच्यन्ते । काश्चिदन्या भक्तिपराः श्रुतय आहुः–किं तेन कृच्छ्रसाध्येन त्वत्प्रेमशून्येन ज्ञानेन तत्फलभूतं परमप्रेममयं त्वत्परिचरणमेव श्रेयो यतस्तत्रेति आखिलसत्त्वानिकेततया सर्वाश्रयतया सर्वगुणाकाराखण्डशुद्धसत्त्वाश्रयतया वा सर्वान्तःकरणाभिनिवेशात्मतया वा हेतुना ततः परमप्रेम्णा कृतत्वात्तदेव तेषां यद्यपि परमपुरुषार्थस्तथाप्यपवर्गश्चानुषंगिकतया त्वत्प्रसादेन निर्विरोध एव स्यात् । पूर्वोक्तज्ञानसाधकानां तु त्वन्मायामयविधिनिषेधलक्षणगिरा स्वाभाविकबंधो नापयात्येवेत्याहुः–त उतेति पदद्वयेन । उतापि ते मृत्योः शिरोऽप्यविगणय्य अननुसंधायैव पदाक्रमन्ति मुच्यंते इत्यर्थः । विबुधानपि श्रुतिविनिर्णीतपूर्वोक्तज्ञानानपि तान्परिवयसे यतस्त्वयि कृतं सौहृदं तादृशप्रेमसेवेच्छा तद्युक्ता एवात्मानं परञ्च पुनन्ति न तु ये ततो विमुखास्त इति । तदुक्तम्–“श्रेयःस्रुतिं भक्तिमुदस्य” इत्यादिना । श्रुतयश्च–“जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः” “ऋचोअक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः । यस्तं न वेद किमृचा करिष्यतिय इत्तद्विदुस्त इमे समासते ” इत्याद्याः । जुष्टं प्रीत्या सेव्यमानं सन्तं पश्यति तदास्य महिमानं च पश्यत्यनुभवति इत्यनेन प्रकारेण वीतशोको भवति कुत्र परमे व्योमन् परमव्योमाभिधे महावैकुण्ठे कीदृशेऽक्षरे नित्यरूपे । यत ऋच इति । ऋचः संबंधिनि तत्प्रतिपाद्य इत्यर्थः । यस्मिन्परमव्योमनि देवाः पार्षदादयः विश्वे सर्वेऽधिनिषेदुरधिरूढा इत्यर्थः । अग्रे च जुष्टत्वमेव दर्शयति––“यो देवानामधिपो यस्मिँल्लोका अधिश्रिताः य ईशो द्विपदश्चतुष्पदस्तस्मै देवाय हविषा विधेम ” इति । **विश्वनाथस्तु**–वैष्णवमते जीवः खलु चित्कणः अल्पज्ञः अल्पव्यापी अस्वतन्त्रो निर्गुण एव । तस्य संसारदुःखनिवृत्तये भगवत्प्राप्तये च भक्तिरेव घटते न त्वन्यो ज्ञानादिकः कोऽप्युपायो “ दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ ” इति । ‘ भक्त्याहमेकया ग्राह्यः ’ इति च भगवदुक्तेस्तद्भक्तिरेवोपायः ‘ दुरवगमात्म ’ इत्याद्यस्मदुक्तेश्च सैवोपायः परमपुरुषार्थ इति । वैष्णवमतस्यैव सर्वमतश्रैष्ठ्यं प्रतिपादयन्त्यो वैष्णवानेवोत्कर्षयन्त्योऽन्यान्सर्वानेव वादिन आक्षिपन्ति–तवेति । द्वितीयार्थे षष्ठी त्वां ये परिचरन्ति “ छन्दसि व्यवहिताश्च ” इति यच्छब्देन व्यवधानमदोषः । अखिलानां लोकानां सत्त्वं सत्यत्वमेव निकेत आश्रयो येषां तेऽखिलसत्त्वनिकेतास्तेषां भावस्तत्ता तयोपलक्षिताः “ सत्यं ह्येवेदं विश्वमसृजत ” इति माध्वभाष्यधृतश्रुतेः ‘प्रधानपुंभ्यां नरदेव सत्यकृत्’ इति सप्तमोक्तेश्च द्वैतप्रपञ्चस्य सत्यत्वमिति मतमाश्रित्य वर्तमाना इत्यर्थः । श्लेषेण खिलं निकृष्टमशुद्धमखिलं श्रेष्ठं शुद्धं यत्सत्त्वं तदेव निकेतो वैकुण्ठादि धाम यस्य तत्तयोपलक्षितं त्वामित्यर्थः । त उत त एव आविगणय्य तिरस्कृत्य निर्ऋतेर्मृत्योः शिरः पदा स्वपादेन आक्रमन्ति अवहेलामात्रेणैव संसारं तरन्तीत्यर्थः । ननु पूर्वे वादिनोऽश्रुत्युक्तज्ञानाद्युपायेन तरन्त्येव तत्र नेत्याहुः–परिवयस इति । गिरा तत्तन्मतप्रतिपादिकया वेदवाचैव “असतोऽधि मनोऽसृज्यत मनः प्रजापतिम्” इत्यादिकया रज्ज्वा तान्विशिष्टबुधान् दार्शनिकानपि पशूनिव बध्नासि न च सोपपत्तिं वक्तुमपारयन्तो वैष्णवा एव न ज्ञानवन्त इति वाच्यम् “यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥” इति श्रुतेस्त एव सम्यग्ज्ञानवन्तो ज्ञेयाः । तस्मात्त्वयि कृतं सौहृदं प्रेम यैस्ते खलु निश्चितं पुनन्ति स्वयं पूता अन्यानपि स्वोपदेशात्पवित्रयन्तीत्यर्थः । ये विमुखा अभक्तास्ते तु न । अत्र “नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तं पीठगं येऽनु यजन्ति विप्रास्तेषां सिद्धिः शाश्वती नेतरेषाम्”इति । “जुष्टम्”इत्याद्याश्च (१४) ॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलकंठी—एवं क इहेत्यादिश्लोकत्रयेण जगत्कारणस्य दुर्ज्ञेयत्वं तमसो जगत्कारणत्वं जगतो मनोमात्रत्वञ्चोक्तम् अर्थाच्च तत्त्वज्ञानेनाज्ञाननाशे तत्कार्यस्य मनसो नाशः तस्मिन्सति संसारोच्छेद इति श्रौतयौक्तिकविचारः सांख्यनामोक्तः अत्यन्तबुद्धिमान्द्याद्वा विशिष्टगुर्वाद्यलाभाद्वा ये तत्राशक्तास्ते निर्गुणब्रह्मोपास्तिलक्षणयोगेनापि मुच्यन्त इत्याह–तव पारि ये चरन्तीति । येन ये विमुखा अखिलसत्त्वनिकेततया तव परिचरन्ति ते उत निर्ऋतेः शिरः पदाक्रमन्तीत्यन्वयः । ये पुरुषा नये श्रवणमननात्मकन्यायविचारे विमुखा अयोग्याः संतः अखिलसत्त्वनिकेततया सर्वभूताधिवासतया "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" इति श्रुत्युक्त्या । तव त्वां कर्मणि षष्ठी । परिचरंति "ईश्वरो जीवकलया प्रविष्टो भगवानिति । प्रणमेद्दण्डवद्भूमावाश्व चण्डालगोखरम् ॥" इति स्मृत्युक्तप्रकारेणोपासते व्युत्थानकाले । समाधिकाले तु–उपाध्यंशमनंतर्भाव्य केवलं निर्गुणमुपासते ते उत तेऽपि विमुच्यंत इति शेषग्रंथार्थः । यद्वा–अखिलं रजस्तमोबोधशून्यत्वेन कृत्स्नं शुद्धं सत्त्वमंतःकरणसत्त्वं तदेव निकेत उपलब्धिस्थानं ज्ञापकं वा यस्य तस्य भावस्तत्ता तया । "विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः" इति श्रुतेः । तत्र शुद्धसत्त्वे प्रकाशमानतया हेतुना ये त्वामात्मानं सर्वप्रत्यग्भूतं परिचरंति तत्तदुपाध्याकारतां परित्यज्य प्राप्नुवंति त उत तेऽपि निर्ऋतेः शिरः अविगणय्य हेलया पदा आक्रमंति मुच्यंत इत्यर्थः । विनापि श्रवणादिप्रनाडीं केवलोपास्त्यापि मुच्यंत इति गीतास्वपि दृष्टम् । "अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते । तेऽपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥" (१) । ध्यानदीपे–"अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् । यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम् ॥ " (१) । वासिष्ठे–"द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानञ्च राघव । योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥ १ ॥ असाध्यः कस्यचिद्योगः कस्यचित्तत्त्वनिर्णयः । प्रकारौ द्वौ ततो देवो जगाद परमः शिवः ॥ २ ॥ " इति । ननु–"ज्ञानादेव तु कैवल्यं " "नान्यः पंथा विद्यतेऽयनाय " इति प्रकारान्तरव्यावृत्तेः कथमुपास्त्यापि मुच्यन्त इति उच्यते उपास्तेरपि साक्षात्कारार्थत्वान्न कोऽपि दोषः । यथोक्तं भगवता–"यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं सांख्यञ्च योगं च यः पश्यति स पश्यति ॥ " ननु–कुतो मत्परिचर्याया ईदृशो महिमेत्याशंक्य तव सर्वेश्वरत्वादित्याह–परीति । विबुधान्सूर्यादीन्गिरा आज्ञावचनेन पशूनिव पारिवयसे कालयसे । "भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥ " इति । "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः " इत्यादिश्रुतिभ्यः अत्यल्पमिदमित्याह–अपि तानिति । तानपि विबुधानपि त्वयि कृतसौहृदाः नारदादयः खलु निश्चितं पुनन्ति दर्शनादिना । अयमर्थः—द्विविधमुपास्त्यपरपर्यायं ध्यानं "योषितमग्निं ध्यायीत" इत्यादि प्रभूतविषयं भावनारूपमेकम्, परोक्तस्य रत्यादिगतसूक्ष्मविशेषस्य ग्रहणाय चक्षुष इव श्रुत्युक्तस्य प्रतीचोऽवस्थात्रयातीतनिर्विशेषत्वस्य ग्रहणाय मनसः प्रणिधानरूपं द्वितीयम्, आद्यं मानसक्रियारूपत्वादनित्यफलं द्वितीयं धर्ममेघसमाधिरूपं वस्तुतत्त्वविषयत्वान्मुक्तिहेतुरपि " क्षणमेकं क्रतुशतस्य चतुःसप्तत्या " इति श्रुतेर्धर्मर्द्धिहेतुरपि ध्यानजधर्माधिक्याच्च नारदादयोऽन्यान्पुनन्ति स्वयञ्च जीवन्मुक्तिसुखं पुष्कलमनुभवन्ति । श्रवणादिप्रनाडीप्राप्तज्ञानास्तु स्वयं कृतार्था अपि पुष्कलतपोवृद्ध्यभावान्नान्यं पातुं क्षमा इति ध्यानयोगस्य श्रेष्ठत्वमिति । अत्रायं योगानुष्ठानक्रमः– शमदमादिसंपन्नो मनोऽनुकूले शुचौ देशे स्थिरसुखमध्यासीनः उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशान्तं " य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः । अथ यदतः परोदिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमन्तः पुरुषे ज्योतिः " इत्याद्याध्यात्मविद्यानां " सैषा दहरविद्याऽत्र द्विधा ते परिकीर्तिता । आध्यात्मिकी भवेदेका तथाऽन्या त्वाधिभौतिकी ॥" इति शैवे चिदंबरमाहात्म्यादौ आधिभौतिकीकरणात् । " ध्यानमन्तः परे तत्त्वे लक्ष्येषु च निवेशयेत् " इति बाह्यलक्ष्यश्रुतेश्च उमामहेश्वरप्रतिमायां सूर्यमण्डले वा निबिडतरशुक्लभास्वरांधकारकल्पसततोदितानस्तमितरूपांतरदर्शनापलापिषु सूर्यरश्मिषु वा गुरूक्तयुक्त्या दत्तदृष्टिरुमासहायादिशब्दान्संज्ञासांज्ञिसंकेतग्राहकानुमानस्मृतिपूर्वकं तदर्थांश्चानुसंदधानोऽयमहमस्मि सांबशिव इत्याद्याकारं प्रत्ययांतरानंतरितां सवितर्काख्यां भावनां कुर्यात् । इयमेवोक्तविधानुसंधानाकारशून्या देहाहंधीवदर्थमात्रनिर्भासाकारा निर्वितर्केत्युच्यते । तथा च श्रुतिः– " अतो विशेषविज्ञानं विशेषमुपगच्छति " इति । अतो विशेषेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्याननिवेशनाद्विशेषः स्थूलभौतिकः तत्र विविधं शब्दादिविकल्पोपेतं ज्ञानं विज्ञानं विशेषं विगलितः शेषो ज्ञानादन्यो विकल्पो यस्मात्तत्तथेति श्रुत्यर्थः । इदमेव प्रतिमादिकं यदा विषयेभ्यः प्रत्याहृतकरणः स्वप्न इव विगलितस्थूलदेहाभिमानः पूर्ववदेव शब्दाद्युल्लेखसहितं च समापद्यते तदा ते सविचारनिर्विचारसमापत्ती उच्येते । एतद्द्वयं मानसम् । एताश्चतस्रः समापत्तयः सूत्रिता भगवता पतञ्जलिना । तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता । अतिपरिशुद्धिर्विवर्जनं स्वरूपशून्याहमिदं भावयामी त्याकारशून्या, उत्तरत्र सूक्ष्मविषयेति विशेषणात्पूर्वयोः स्थूलविषयत्वं सिद्धम्, तेन स्थूले आत्ममनःशरीरविषयाणां सांनिध्यमस्ति सूक्ष्मे आत्ममनसोरेव । स्थूलेऽपि यदा देहासंगाद्वृत्तिलाभस्तदाऽसौ महाविदेहा नाम धारणा । अत्रेदमुक्तम्—" बहिरकल्पिता वृत्तिर्महाविदेहा तत्संयमात्प्रकाशावरणक्षयः " इति । अस्यां चावश्यं ध्येयस्यातिवाहिकत्वं व्यक्तीभवति । तथाहि वितर्कालम्बने प्रतिमादौ यद्यपि लोकदृष्ट्या देवतादृष्टिरध्यस्यते तथाप्यातिवाहिकी देवतैवाधिभौतिक्याः प्रतिमायास्तत्त्वं शुक्तिरिव रूप्यस्य तत्र भातस्य । यथोक्तं वासिष्ठे—" आतिवाहिक एवायं त्वादृशैश्चित्तदेहकः । आधिभौतिकया बुद्ध्या गृहीतश्चिरभावनात् ॥ " इति । अयं प्रपञ्चः अतिक्रम्य शिलोदरादिकमपि वहत्यभिमानिनमित्यतिवाहि अप्रतिमं भूतसूक्ष्मं तेन निर्वृत्त आतिवाहिकः । अस्यापि तत्त्वं चित्तदेहकः चित्तमेव देहो यस्य स तथा । एवं च यथा तीव्राभियोगेन निरीक्ष्यमाणे शुक्तिरजते रजतं तिरोधीयते शुक्तिश्च प्रकाशते, एवं देवताभावनादार्ढ्ये प्रतिमाया अचेतनत्वं तिरोधीयते शास्त्रीयं चेतनं देवतारूपमाविर्भवति । अत एव दृढभक्ता बाणादयः स्वाराध्यैः शंकरादिभिः सह व्यवहरन्तीति बहुलमुपाख्यायते । एवं परिच्छिन्नाविग्रहवत्या देवताया अपि तत्त्वमनंतत्वमेव । तद्भावनया तत्परिच्छेदतिरोधानेऽनंतं सर्वतःपाणिपादं तदित्याद्युक्तलक्षणं विश्वरूपमपि प्रकाशते, यदपश्यद्यशोदा कृष्णमुखे । विश्वरूपाध्यायोऽप्येतमर्थमुपबृंहयति । तदेतदेव निर्वितर्कजं प्रत्यक्षं प्रकृत्योक्तं योगभाष्ये तत्परं प्रत्यक्षं तच्च श्रुतानुमानयोर्बीजमिति विश्वरूपस्यापि तत्त्वं निर्विशेषसन्मात्रम् । तदेव चक्षुरादीनां प्रमेयामित्युक्तम् ' बुद्धीन्द्रियमनःप्राणान् ' इत्यत्र । उपपद्यते चैतत् । यथा गोपुराकारे मुकुरे दत्तदृगपि तमतिस्वच्छत्वादजानंस्तत्र प्रतिबिम्बितं पुरमेव पश्यति यथा वा हिंगुलारूढं स्फटिकं पश्यन्नेव चन्द्रिकायां नीलमणिमिव सौरालोके पद्मरागमिव च मन्यते । एवं चक्षुःसौक्ष्म्यतारतम्यात्प्रतिमादौ चेतनत्वमनंतत्वं सन्मात्रत्वं चास्मितापरपर्यायं गृहीत्वा विलीयते तदेतत्स म्यग्दर्शनं श्रुत्याप्युक्तम्—" मानसे च विलीने तु यत्सुखं स्वात्मसाक्षिकम् । तद्ब्रह्म चामृतं शुक्रं सा गतिर्लोकः एव सः ॥ " इति । सोऽवितर्कक्रमोऽनलवत्स्वकृतानुकृतिरित्यस्य द्वितीयव्याख्यानरीत्या कौलिकन्या येन बहुतरमहामुनिमहीकृतायां श्रीकण्ठश्रीनाथादिप्रतिमायां प्रयुक्तः क्षिप्रं प्रसिद्ध्यति निबिडतरार्करश्म्यालम्बनस्त्वव्यवधानेन विश्वरूपमेव गोचरयन्नाशुतर इति विवेकः । निर्विचारवैशारद्यफलं सार्वज्ञ्यं पातञ्जले प्रोक्तम् । तत्सर्वस्य कल्पितत्वं विना न संगच्छते इत्युक्तं वेदान्तकतके—" अतीतानागतं वस्तु वीक्षते करबिल्ववत् । योगी संकल्पमात्रोत्थमिति शास्त्रेषु डिंडिमः (१) मायायां सर्वदा सर्वं सर्वावस्थमिदं जगत् । अस्तीति तदुपाधिश्चित्सार्वात्म्यात्सर्वमीक्षते (२) आरंभपरिणामाभ्यां स्वेन रूपेण यन्न सत् । अतीतानागतं वस्तु योगी तद्वीक्षतां कथम् (३) संकल्पमात्रभातं वस्त्वतीतादि यदीष्यते । नष्टस्त्रीदर्शनाभं तत्स्याद्योगिज्ञानमप्रमा (४) योगिसंकल्पमात्रेण तस्योत्पत्तिर्यदीष्यते । ईशसंकल्पमात्रेण सर्वोत्पत्तिस्तदेष्यताम् (५) नारंभे परिणामे वा दृष्टः कालाद्यतिक्रमः । कल्पनायां तु स स्पष्टः स्वप्नमायाभ्रमादिषु (६) तस्मान्नाणुभिरारब्धं भित्तिवन्नापि गव्यवत् । प्रकृतेः परिणामो वा जगत्किं त्विन्द्रजालवत् (७) " इति । उक्ता ग्राह्यसमापत्तिरीश्वरप्रणिधानरूपाऽस्याः फलं व्याधिदुःखाद्यन्तरायाभाव पूर्विका आशुसमाधिसिद्धिः । यतो भगवान्पतञ्जलिः—अधिमात्रश्रद्धाद्युपायोपेतानामधिमात्रवैराग्यादासन्नतमं समाधिलाभमुक्त्वाऽसूत्रयत्—"ईश्वरप्रणिधानाद्वा"इति । "ततः प्रत्यक्चेतनाऽधिगमोऽप्यन्तरायाभावश्च" इति च । अंतराया व्याधिदुःखादयः निर्विचारग्राह्यं षष्ठश्लोकोक्तरीत्या विलाप्य मनोमये समष्टौ चित्तं धारयतो मनोमयः प्राणशरीरो भारूपः "सत्यसंकल्पः सर्वकामः सर्वगंधः सर्वरसः " इत्यादिश्रुत्युक्तसार्वात्म्यं सार्वज्ञ्यं सत्यसंकल्पत्वं चाविर्भवति तत्र कुतूहलितया मनसो विषयविकल्पाभिमुख्ये सानंदस्तदभावे सास्मितः संप्रज्ञातो भवति । त एते ग्रहणगृहीतृसमापत्ती पूर्ववच्छब्दादिविकल्पसंकीर्णत्वासंकीर्णत्वाभ्यां प्रत्येकं द्विविधे । मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वर इत्यनयोरेव नामद्वंद्वानि । सोऽयमवान्तरभेदादष्टविधश्चतुर्विधः सूत्रितः । " वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातः " इति । अस्मितासमापत्तिरेव शास्त्रसंस्कृतधियां तत्त्वमस्यादिवाक्योत्था

ब्रह्मविद्याख्या चेतोवृत्तिः । अस्याः फलम्—"भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ " इति । परो हिरण्यगर्भः अवरो यस्मात्स परावर ईश्वरः । उपबृंहितश्चायमन्त्यः पाद एकादशे 'दृष्ट एवात्मनीश्वरे' इति । हृदयग्रंथिभेदः सत्त्वपुरुषान्यताख्यातिरित्यनर्थान्तरम् । विवेकख्यातेरपि परवैराग्यबलान्निरोधे दग्धेंधनानलवदुपशमे वा सति असंप्रज्ञातो धर्ममेधाख्यः समाधिर्भवति । यमपेक्ष्य श्रूयते "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यन्मनुते नान्यद्विजानाति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोति अन्यन्मनुते अन्यद्विजानाति तदल्पं यो वै भूमा तत्सुखं नाल्पे सुखमस्ति" इति "तावन्मनो निरोद्धव्यं हृदि यावत्क्षयं गतम् । एतद्ज्ञानं च ध्यानञ्च शेषोऽन्यो ग्रंथविस्तरः ॥" स्मर्यते च वसिष्ठेन—"निर्विकल्पसमाधिर्हि सिद्धान्तः सर्ववाङ्मये" इति । यं चासूत्रयत् "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः" प्रसंख्यानेऽस्मितान्तध्यानफले ऋतंभरप्रत्यक्षादावभिलाषशून्यस्य सर्वथा विवेकख्यातिरेव भवति । तत्फलेऽपि सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वञ्चेति सूत्रिते विरक्तस्य धर्ममेघो भवतीत्यर्थः । तत्त्वं चास्य " क्षणमेकं क्रतुशतस्य चतुःसप्तत्या यत्फलं तदवाप्नोति" इति श्रुतेः एतत्समापत्तिपंचकम् । "यच्छेद्वाङ्मनसी" इति श्रुत्या वाङ्मनोज्ञानमहच्छान्तशब्दैरुपात्तं वाचं बाह्येन्द्रियं स्वविषये निरुध्य जित्वा स्वकारणे मनसि प्रविलापयेदिति यच्छेदित्यस्यार्थः । एवमुत्तरत्र शान्तावधि यच्छेत् । अत्रापि विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणि । तत्र वितर्कालम्बनाद्विशेषाद्विचारानंदालम्बनम् अविशेषं प्रतिविविक्षतो योगिनो दैनंदिनलयाभ्यासान्मनो लीयते प्रविष्टमात्रं वा रजःप्राबल्यात्पूर्वां भूमिमुत्सर्पति सर्वे क्षेपः तावेतौ लयविक्षेपौ हेयतया श्रूयेते "लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् । यदा यात्यमनीभावं तदा तत्परमं पदम् ॥" इति एवमविशेषादस्मितालम्बनं लिंगमात्रं प्रविविक्षतस्ततः पुरुषञ्च प्रविविक्षतो लयविक्षेपौ स्तः । तेष्वाद्यो लीनो मूढ एव । द्वितीयतृतीयौ क्रमाद्विदेहप्रकृतिलयावन्वर्थसंज्ञौ क्रममुक्तिभाजौ । एतयोरवान्तरभेदकल्पनया फलभेदः स्मर्यते वायुपुराणे—"दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥ बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः । पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः ॥ पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते ।" इति । सूत्रं च—"भवप्रत्ययो विदेहप्रकृतिलयानाम्" इति । एषामसंप्रज्ञातो लयरूपत्वाद्भवप्रत्ययो जन्महेतुरिति सूत्रार्थः । असंप्रज्ञातावस्थायां योगी जीवन्मुक्त इत्युच्यते । यां प्रकृत्योक्तं योगभाष्ये अस्यामवस्थायामीश्वरस्यानीश्वरस्य विवेकज्ञानवतोऽन्यस्य वा कैवल्यं सिद्धमिति । सोऽयं योगी त्र्यवस्थः । यः स्वतो व्युत्तिष्ठति स विद्वद्वरः, यः परतः स विद्वद्वरीयान्, यो नोभयतः स विद्वद्वरिष्ठः । इमं प्रकृत्योक्तं "देहं विनश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम्" इति । वासिष्ठे सप्त योगभूमय उक्ताः—"ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता । विचारणा द्वितीया तु तृतीया तनुमानसा ॥ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका । पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ॥" इति । आस्वाऽऽद्या शास्त्रोक्ता साधनसंपत्, द्वितीया श्रवणमनने, यस्यां क्रमेण मीमांसातर्कावुपक्षीणौ । तृतीया निदिध्यासनं, यस्यां पातञ्जलं योगशास्त्रं चरितार्थम् । चतुर्थी साक्षात्कारो, यस्यां ध्यायी विद्वानित्युच्यते । शेषा जीवन्मुक्तेरवान्तरभेदाः । यासु योगी क्रमेण विद्वद्वरादिसंज्ञां लभते । आसु विचारणादार्ढ्ये क्षणिकसत्त्वापत्त्यापि कृतार्थतास्तीति श्रवणादिप्रणाली नेदीयसी इतरापि नित्योद्युक्तस्य शीघ्रमेव सिद्ध्यति नान्यस्येति श्रूयते—"षड्भिर्मासैस्तु युक्तस्य नित्ययुक्तस्य देहिनः । आनंदः परमो गुह्यः सम्यग्योगः प्रवर्तते (१) रजस्तमोभ्यां विद्धस्य सुसमिद्धस्य देहिनः । पुत्रदारकुटुम्बेषु सक्तस्य न कदाचन (२)" "अथेदानीं ज्ञानोपसर्गाः राजन् " इत्युपक्रम्य "अथ ये चान्ये ह नित्यप्रमुदिता नित्यप्रवासिता नित्ययाजनका नित्यशिल्पोपजीविनोऽथ ये चान्ये ह पुरयाचका अजाज्ययाजकाः शूद्रशिष्याः शूद्राश्च शास्त्रविद्वांसोऽथ ये चान्ये ह यक्षराक्षसभूतगणपिशाचोरगग्रहादीनामर्थं पुरस्कृत्य श्रमयाम इत्येवं ब्रुवाणा अथ ये चान्ये चाटजटनटभटप्रव्रजितरंगावतारिणो राजकर्मणि पतितादयोऽथ ये चान्ये ह वृथातर्कदृष्टांतकुहकेन्द्रजालैर्वैदिकेषु परिष्ठातुमिच्छंति तैः सह न संवसेत् बृहस्पतिर्हि शुक्रो भूत्वेन्द्रस्याभयायासुरेभ्यः क्षयायेमामविद्यामसृजत् तया शिवमशिवमित्युपादिशंत्यशिवामिति वेदादिशास्त्रं हिंसाधर्माभिधानं मास्त्विति वदंतः" इत्यादि । एवं चात्र नये विमुखा इत्यशास्त्रज्ञानां पुनंतीति गुर्वनुग्रह उक्तः । त्वयि कृतसौहृदा इति । ग्राह्यसमापत्तिः परिवयसे पशूनिति ग्राह्यैश्वर्यम् । अखिलसत्त्वनिकेततयेति । ग्रहणगृहीतृसमापत्ती । निर्ऋतेरिति । "द्वितीयाद्वै भयं भवति" इति श्रुतेर्भयहेतुर्द्वैतम् । अविगणय्येति । ब्रह्मलोकांते यत्र वैराग्यम् आक्रमंतीति । तदतिक्रमेण भूमब्रह्मस्थितिः।इत्येते अर्था दर्शिताः । विस्तरभयात्तु नातिप्रपञ्चिताः (१४) ॥२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयाऽनिमिषाः ॥
वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र य त्वधिकृता भवतश्चकिताः ॥ १५ ॥ २८ ॥

ननु यद्यखिलसत्त्वनिकेतत्वेन भवतः सेव्यत्वमुच्यते तर्हि तत्करणसंबंधात्कर्तृत्वभोक्तृत्वे प्रसज्जेयातां न वस्तुतस्तथात्वमिति चेत्तर्हि जीवानामपि तत्तुल्यत्वमिति केन विशेषेण पुनः सेव्यसेवकत्वमितीमामाशंकां परिहरंत्यः "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः॥स वेत्ति वेद्यं न च तस्य वेत्ता तमाहुरग्र्यं पुरुषं पुराणम्" इत्याद्याः श्रुतयः स्तुवंतीत्याह । त्वमकरण इति । करणसंबंधरहित एवाखिलकारकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणींद्रियाणि तेषां शक्तीर्धारयति प्रवर्तयतीति तथा । कुतः स्वराट् यतः स्वेनैव राजसे दीप्यसे नहि स्वतःसिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः । अतस्तव बलिमुद्वहंति पूजां कुर्वंति । अजयाऽविद्यया सहितास्तया वृता इत्यर्थः । अनिमिषा देवा इंद्रादयस्तत्पूज्या विश्वसृजो ब्रह्मादयोऽपि । यथा सस्त्रीका एव किंकराः स्वामिनं सेवंते तथाऽविद्यायुक्ता देवादयस्त्वामिति लोकोक्तिः । समदंति च मनुष्यैर्दत्तं हव्यकव्यादिलक्षणं बलिं भक्षयंति । अत्र दृष्टांतः । वर्षभुजोऽखिलक्षितिपतेरिवेति । यथा वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडलेश्वरस्य स्वप्रजादत्तबलिभुजो बलिमुद्वहंति तद्वदिति । कथं बलिं वहंति तदाह । विदधति यत्र ये त्वधिकृता भवतश्चकिता इति । त्वत्तो भीताः संतो यस्मिन्कर्मणि नियुक्तास्ते तत्कुर्वंतीति । त्वदाज्ञापालनमेव बल्युद्वहनमित्यर्थः । तथा च श्रुतिः । " भीषाऽस्माद्वातः पवते ॥ भीषोदेति सूर्यः ॥ भीषाऽस्मादग्निश्चेंद्रश्च ॥ मृत्युर्धावति पंचमः " इति ॥

अनिंद्रियोऽपि यो देवः सर्वकारकशक्तिधृक् ॥ सर्वज्ञः सर्वकर्ता च सर्वसेव्यं नमामि तम् ॥ १५ ॥ २८ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्राक्षिपति—नन्विति । तत्तत्करणसंबंधात्तत्तद्देहेन्द्रियसंयोगात् ब्राह्मणोऽहं पश्यामि तीर्थमित्यादिप्रतीतेस्तीर्थदर्शने कर्तृत्वं तज्जन्यफलभोक्तृत्वञ्च प्रसक्तमेवात्मनीति चेदाह—न वस्तुत इति । तथात्वं तत्तत्करणसंबंधत्वमात्मनः "असंगो ह्ययं पुरुषः " इत्यात्मनोऽसंगत्वादेवं चेज्जीवस्यात्मत्वाविशेषात्परमात्मसाम्यतैवेत्येवंरूपामाशंकां परिहरन्त्यः "अपाणिपादः" इत्याद्याः । तासामर्थस्तु सुगमः । अकरणेऽपाणिपाद इत्याद्याः । अखिलकारकशक्तिधरत्वे तु "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते निर्चिचिक्युर्ब्रह्म पुराणमग्र्यम् " इति । पुरुषस्यातर्क्यशक्तिपरेयम् । करणसंबंध इन्द्रियसंबंधस्तेन रहितः । इन्द्रियाणि श्रोत्रादीनि । तेषां शक्तीः शब्दग्रहाद्याः । अत्र हेतुमाशंकते—कुत इति । इत्यर्थ इति—स्वप्रकाशस्य प्रकाशकान्तरापेक्षणे स्वप्रकाशत्वमेव न स्यादिति भावः । "करणं कारकञ्चेमे इन्द्रियेऽपि स्मृते पदे " इति निरुक्तिः । यतः स्वराडतो हेतोः । इत्यर्थ इति—अविद्वदधिकारित्वात्कर्ममार्गस्येति भावः । अत्र साविद्यदेवकर्तृकभगवत्संप्रदानकबलौ तद्वत्त्वामनिमिषा इत्यर्थः । इत्यर्थ इति—"एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ । यदादरेण ग्रहणमाज्ञायाः " इत्याद्युक्तन्यायेन मुख्यसेवनमाज्ञाधारणमेवेति भावः । अत्र प्रमाणम्—तथा चेति । " भीषा " इति । अस्मादीश्वराद्भीषा भीत्या पवते वातीत्यर्थः । धावति स्वकालवशं प्राप्तानेव प्राणिनो नयन्सर्वत्र चरतीत्यर्थः । यद्यपीह पञ्चानां ग्रहणं तथापि तदादिन्यायेन ब्रह्मादीनामपि ग्रहणं ज्ञेयम् । सर्वेश्वरत्वकथनपरेयम् । स्वामिश्लोकः स्पष्टार्थः ॥ * ॥ **श्रीधरानुयायिनी**—ननु सर्वान्तर्यामित्वे तत्तज्जीवेन्द्रियसंबंधेनेश्वरे कर्तृत्वभोक्तृत्वापत्त्या तस्यावास्तवत्वे जीवेऽपि तथात्वमेवेति जीवसाम्यादसेव्यत्वमाशंक्याहुः—त्वमिति । यस्मात्त्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकाशत्वेनेन्द्रियानपेक्षतयेन्द्रियसंबंधरहितोऽपि सर्वजीवेन्द्रियप्रवर्तकोऽसि तस्मादविद्यया वृता इन्द्राद्या देवास्तत्पूज्या ब्रह्मादयश्च त्वां सस्त्रीकाः सेवकाः स्वामिनमिव सेवन्ते । यथा खण्डमण्डलेश्वराः स्वस्व प्रजादत्तं बलिं चक्रवर्तिने निवेद्यैव तदाज्ञया यत्किञ्चित्स्वयमपि गृह्णन्ति तथा यस्मिन्कर्मणीन्द्रादयस्त्वया यथा नियुक्तास्ते त्वत्तो भीताः सन्तस्तथैव तत्कुर्वन्तीति त्वदाज्ञां पालयन्तो यज्ञादौ मनुष्यैर्दत्तं हव्य कव्यादिरूपं बलिं त्वयि निवेद्यैव स्वयमपि भक्षयन्ति । यद्वा–त्वमकरणः असाधारणं कारणं करणम्, यथा च–घटादौ दंडचक्रादि । सृष्ट्यादौ करणानपेक्षोऽसीत्यर्थः । न तु सर्वसौन्दर्यहानिकारककरनेत्रा द्यभाववानित्यर्थः । अन्यथा परमसुन्दरश्रीकृष्णमूर्तिध्यानमसंगतं स्यात् । करणानपेक्षत्वे हेतुमाह–अखिलेत्यादि । अखिलानां कारकाणां ब्रह्मादीनां शक्तीर्धारयसीत्यर्थः । अनेन ब्रह्मादिभिर्विनापि तदीयसर्व व्यापारसाधनसामर्थ्यमेकस्मिन्नेव त्वयीति सूचितम् । सृष्ट्यादौ तेषां प्रवृत्तिश्च केवलं त्वत्कृपयैवेत्याशयः । अत एवाजया श्रीराधया श्रीरुक्मिण्या वा सह सिंहासने स्थितस्य तवाग्रे महिष्या सह सार्वभौमस्याग्रे मंडलेश्वरा इव ब्रह्मादयो भीताः सन्तो बलिमुद्वहन्ति स्वयञ्च तद्दत्तमदन्तीत्यर्थः । अथवा नन्वेवं मम माहात्म्यं व्यर्थं कथमुच्यते यतोऽहं नंदात्मजः कंसकरप्रदोऽस्मीति चेत्तत्राहुः–हे अखिलकारक ! अखिलं विश्वं ब्रह्मादिद्वारा कारयसीति तथा तत्संबोधनमिदम् । अत एव त्वमकरणः स्वयं सृष्ट्यादिश्रमं न करोषि, यतस्त्वं शक्तिधरः शक्तिं सामर्थ्यमव्याहताज्ञां वा धारयासि । अत एव स्वराट् सकलचक्रवर्तिशिरोमणिस्त्वमेवासि । अत ए ७ यत्र कर्मणि ये यथा कृतास्ते विश्वसृजो ब्रह्मादयोऽपि त्वदाज्ञप्तकार्यान्यथाभावभयान्निमेषरहिताश्चकिताश्च सन्तोऽजया स्वाविद्यया पत्न्या सहितास्तथैव त्वदाज्ञां पालयन्तश्चक्रवर्तिनोऽग्रे वर्षभुज इव तवाग्रे बलिमुद्वहन्ति । उत ऊर्द्ध्व शिरसि कृत्वा वहन्तिं प्रापयन्ति विष्टिं कुर्वन्तीति यावत् । ते च त्वद्दत्तं विष्टिवेतनरूपं समदन्ति । लोके विष्टिकर्तृभ्यो भोजनं दीयत एवेत्यर्थः । तथा च यस्य ब्रह्मादयो विष्टिकर्तारस्तस्य कंसाय करदानमत्यन्तासंभावित मेवेत्याशयः ॥ * **तोषिणी**–अन्यास्तदेव पुष्णन्त्य आहुः–त्वमिति । अकरणः सृष्ट्यादौ कुलालादिवत्पृथक्साधनरहितोऽत एव क्रियारहितश्च । ब्रह्मादिर्जीवेन्द्रियप्रवर्तनलीलायां तत्तदिन्द्रियसंबंधरहितः स्वतः स्थितौ तद्वत्पृथगिन्द्रियरहितोऽपि त्वं स्वरूपतस्तत्तत्करणपरार्धातिक्रमिपरमातिपरमशक्तितया प्रादुर्भावभेदेन, संख्यातश्चानंततयाऽखिलानि यानि कारकाणि करणानि तानि तथा " सर्वतःपाणिपादं तत् " इति न्यायेन कदाचित्तत्रतत्र तादृशनिजकरणप्राकट्यरहितोऽपि तत्तदर्थं तत्तच्छक्तीर्धरसि बिभर्षि तथा यथायोगं तत्तदंशाभासांस्तत्रतत्र प्रापयसि चेति तथाभूत इत्यर्थः । कथम्, स्वराट् अचिन्त्यशक्तिमयेन स्वेनैव तथातथा राजस इति । अतो जीवकरणानामिव तव करणानां तदधीनप्रकाशत्वाभावात् प्रत्युत तत्करणानां त्वदधीनत्वात् । अनिमिषा ब्रह्मादयस्तव बलिमुद्वहन्ति । संतु च ते तेषामधिकारिणी माया च तथेत्याहुः– अजयेति । सहार्थे तृतीया । शेषं तैर्व्याख्यातम् । अतः साधूक्तं पूर्वाभिस्तव ये परिचरन्तीति । श्रुतयश्चात्र " न तस्य कार्यम् " इत्याद्यनुगता एव " अपाणिपादः " इत्याद्याः ॥ * ॥ **विश्वनाथी**–तस्मादस्वतन्त्रैरी शितव्यैः जीवैस्त्वमेव स्वतंत्र ईश्वरः सेव्य इति चेन्मैवम्, नेत्रश्रोत्रभुजादिमत्त्वादहमपि जीव इव करणपरतंत्र इत्यतः कुतो मे स्वातंत्र्यमैश्वर्यं वेत्यत आहुः–त्वमकरणः । आहंकारिकमनोनेत्रश्रोत्रादिरहितस्तर्हीमानि मन्नेत्रादीनि कुतस्त्यानि तत्राहुः–स्वराट् । स्वैः स्वरूपभूतैरेव नेत्रश्रोत्रादीन्द्रियै राजस इति स्वराट् । अत एव खिलानि तुच्छानि प्राकृतानीत्यर्थः । अखिलानि खिलभिन्नानि चिदानंदमयत्वत्स्वरूपभूतानींद्रियाणि शक्तीः " चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम् " इति श्रुतेः । प्राकृतेन्द्रियशक्तीश्च धरतीति तथा सः । न त्वं प्राकृतेन्द्रियो नाप्यनिन्द्रियः किन्तु पराख्यस्वरूपशक्तिमयेन्द्रियः प्रत्युत प्राकृतेन्द्रियेष्वपि श्रवणादिशक्त्याधायक इत्यर्थः । "न तस्य कार्यं करणम् " इत्यादिश्रुतेः महैश्वर्यमाहुः–तव बलिं पूजोपहारम् अनिमिषा ब्रह्माद्याः प्रापयन्ति तुभ्यं समर्पयन्ति । अजया सहेति । या तेषामधिकारिणी खल्वजा माया सापि ते बलिहारिणीत्यर्थः । समदन्ति त्वत्प्रसादान्नरैर्दत्तं हव्यादिकं भक्षयन्ति । तत्र दृष्टान्तः–वर्षभुजो मंडलेशा अखिलक्षितिभुजः सम्राज इवेति सुगमम् । कीदृशा भूत्वा तत्राहुः–यत्र कर्मणि ये त्वया नियुक्तास्तत्कर्मणि त्वत्तश्चकिता भीता एव विदधति । अत्र "भीषाऽस्मात्" इत्याद्याः श्रुतयः (१९) ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः ॥
न हि परमस्य कश्चिदपरो न परश्च भवेद्वियत इवाऽपदस्य तव शून्यतुलां दधतः ॥ १६ ॥ २९ ॥

तदेवं करणप्रवर्तकमीश्वरं करणपरतंत्रा नरा भजंतीत्युक्तम् । न केवलमियदेव कारणं तत उत्पन्नत्वेनापि तत्परतंत्रत्वादिति वदंति " यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरं त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानो व्युचरंति " इत्याद्याः श्रुतय इत्याह । स्थिरचरजातय इति । हे विमुक्त नित्यमुक्त यदि तवाजया मायया विहरो विहारः क्रीडा भवति तदा स्थिरचरजातयः स्थिराश्च चराश्च जातयो जात्यालिंगिता देहा येषां ते जीवाः स्युर्भवेयुः । कथं

नीलकंठी–एवं सांख्ययोगाभ्या शोधितौ तत्त्वंपदार्थावनूद्य तयोरभेदमभिधत्ते द्वाभ्याम्–त्वमकरण इति । हे भगवन् त्वमकरणः अनिंद्रियोऽपि स्वराट् स्वेनैव राजसे प्रकाशसे, अनिन्द्रियोऽपि स्वरूपप्रकाशेनैव सर्वमवभासयसीत्यर्थः । " तस्य भासा सर्वमिदं विभाति " " अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रृणोत्यकर्णः । स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् " इति श्रुतिभ्याम् । यद्वा–न सन्ति करणानि सृष्टिक्रियायां साधकतमानि मृद्दण्डादिस्थानीयानि यस्य सोऽकरणः । अत एव प्राक्सृष्टेः स्वेनैव एकाद्वितीयेन स्वरूपेण राजत इति स्वराट् " आत्मा वा इदमेक एवाग्र आसीत् " इत्यादिश्रुतिभ्यः । एवंविधोऽप्यखिलकारकशक्तिधरः सर्वेषां कर्तृकरणादिकारकाणां शक्तयः कार्यजननसामर्थ्यानि धारयतीति स तथा " न तस्य कार्यं करणं च विद्यते न तत्सम श्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च " इति श्रुतेः । केवलात्त्वत्त एव सर्वमुत्थितमिति भावः । एवं तत्पदार्थमुक्त्वा त्वंपदार्थमनुवदति–तवेति । अनिमिषाः प्राणाद्यभिमानिदेवताः । अजया आत्मनस्त्वदभेदाज्ञानाच्च तत्तत्करणात्मताभिमानेन तव देहेन्द्रियादिसंघातापन्नस्य तुभ्यं बलिमन्नाद्युपहारम् उद्वहन्ति प्रापयन्ति समदन्ति स्वयं च भुञ्जते । " सर्वेऽस्मै देवा बलिमावहन्ति प्राणे तृप्यति सति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति " इति श्रुतेः प्राणादयः स्वयं तृप्यन्ति स्वाधिष्ठातारं त्वामपि तर्पयन्तीति भावः । अत्र दृष्टान्तः–वर्षेति । अत्रापि तर्हीतिवत्स्वरभक्त्या अक्षरपूरणम् । यथा वर्षभुजो मण्डलाधिपतयः स्वयं प्रजाभ्यो बलिमाददानाः सन्तः अखिल क्षितिपतेः सार्वभौमस्य तस्मै बलिमुद्वहन्ति तद्वत् । किञ्च–तेषामनिमिषाणां मध्ये ये चक्षुःश्रोत्रादयो यत्र रूपशब्दादिग्रहणे अधिकृताः ते तत्स्वग्राह्यविषयाश्रयभूतं तेजोवियदादि विदधते निर्मिमते अत एव ते विश्वसृजः एतेन "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिः सहाप्येति" इत्यारभ्य "स यथा प्रतिबुद्ध्यते यथाग्नेर्ज्वलतः" इत्यग्निविस्फुलिंगदृष्टान्तेन जीवस्यैव सुप्तिप्रबोधयोर्जगल्लयो दयाम्नानाद्दोषनिमित्तं रूपादयो विषयाः संकल्पकृता इत्यक्षपादसूत्राच्च सिद्धा दृष्टि–सम–समयैव सृष्टिरिति शास्त्ररहस्यं दर्शितम् । "आत्मन आकाशः संभूतः" इत्यादिश्रुतीनामद्वैतप्रतिपत्तावेव तात्पर्यं न सृष्टौ वियत्प्राणपादयोरपि सृष्टिश्रुतिविरोधपरिहारोऽप्यभ्युपेत्य वाद एव । वक्ष्यते चैतन्न यदिदमित्यस्मिञ्छ्लोके । भवतश्चकिता इति । सर्वलयाधिष्ठानात्त्वत्तः स्वनाशभीत्या त्रस्ताःश्रुतिश्चैषां प्राक्प्रावण्यं प्रत्यगवृत्तिमाह–"पराञ्चि खानि व्यतृणत्स्वयंभूस्त स्मात्पराङ् पश्यन्ति नान्तरात्मन्" इति । व्यतृणद्धिंसितवान् (१९) ॥ २८ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–तदेवं तदित्थम् । इयदेव इयन्मात्रमेव । तद्भजने कारणं किंतु तत ईश्वरात् । "यथाग्नेः" इत्याद्याः श्रुतयो वदंतीति योज्यम् । तदर्थः पूर्वमात्मव्यतिरिक्तं वस्त्वंतरं नास्ती त्युक्तं तदुत्पन्नत्वात्सर्वस्य । तत्र दृष्टांतः–यथैकरूपादेकस्मादग्नेः सकाशात् क्षुद्रा अल्पप्रमाणा विस्फुलिंगा वह्निकणा विविधा उच्चरंति उत्तिष्ठंते एवमस्मादात्मनः विज्ञानमयस्य प्राक्प्रबोधाद्यत्स्वरूपं तस्मात् एत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतस्य । ततोऽजातः परस्य दूरे वर्तमानस्यासंगस्येत्यर्थः । कथं विहारः । उदीक्षया ईक्षणलेशेन । ननु मयि लीनानां जीवानां कथं जन्म स्यात्तत्राह । उत्थनिमित्तयुज इति । ईक्षयैवोत्थान्युत्थितान्याविर्भूतानि निमित्तानि कर्माणि तद्युक्तानि लिंगशरीराणि वा तैर्युज्यंत इति तथा । ननु किं निमित्तोत्थानेन मदिच्छयैव भवंतु । न । त्वयि वैषम्याभावाद्विषमसृष्टेरयोगादित्याह । परमस्येति । तव परमस्योत्तमस्य परमकारुणिकस्य वियत इवाकाशसदृशस्य । समस्येत्यर्थः । कश्चिदपरः स्वीयः परोऽस्वीयश्च न भवेत् न संभवतीत्यर्थः । "असद्वा इदमग्र आसीत् ॥ ततो वै सदजायत" इत्यादिश्रुत्या शून्यपूर्वकत्वमिव प्रतीयते तदर्थं पुनर्विशिनष्टि । शून्यतुलां दधतः । शून्यसाम्यं भजतः । तदेव दर्शयितुं पुनर्विशिनष्टि । अपदस्येति । न पद्यत इत्यपदस्तस्य वाङ्मनसयोरगोचरस्येत्यर्थः ॥ त्वदीक्षणवशक्षोभमायाबोधितकर्मभिः॥ जातान्संसरतः खिन्नान्नृहरे पाहि नः पितः ॥ १६ ॥ २९ ॥

आत्मानो जीवा व्युच्चरंति उपाधिसंपर्कजनितविशेषप्रतिबुद्ध्यमाना आत्मान इत्यर्थः । तत्र प्राणा इन्द्रियाणि, लोकाः कर्मफलानि, देवा इंद्रियाणां लोकानाञ्चाधिष्ठातारोऽग्न्यादयो, भूतानि ब्रह्मादिस्थावरांतानि एते आत्मान इति । केवलात्मसृष्टिपरेयम् । 'यद्गत्वा न निवर्तंते' "न स पुनरावर्तते" इत्यादिस्मृतिश्रुत्योरर्थं मनस्याधायाक्षिपति—नन्विति। तत्राक्षेपे । केवलकर्मणा विना शरीराणामकिञ्चित्करत्वादाह—तद्युक्तानीति । कर्मयुक्तानीत्यर्थः । लिंगशरीरसंबंध एव तेषां जन्म न तूत्पत्तिलक्षणम् 'सर्गेऽपि नोपजायंते' इत्याद्युक्तेः । पुनराक्षिपति—नन्विति । नेत्याह—त्वयीति । इत्यर्थ इति—असंगस्येति भावः । इत्यर्थ इति—अविषमत्वेन सर्वत्र समत्वादिति भावः । श्रुत्यवष्टंभेनाशंकते—असदिति । इदं सर्वमग्रे जगदुत्पत्तेः पूर्वमसदेवाविद्यमानमेवासीत् । ततः सृष्ट्यवसरे सदजायत सद्रूपत्वेनाविर्बभूव इत्यादिश्रुतेः । तदर्थं तन्निवृत्त्यर्थम् । तदेव शून्यसाम्यम् । इत्यर्थ इति—अविषयत्वाच्छून्यमिव प्रतीयत इति भावः । स्वामिनां त्वदीक्षणवशेन क्षोभो यस्यां मायायां तया बोधितैः कर्मभिर्जातान् ॥ * ॥ **श्रीधरानुयायिनी**—स्वजनकत्वादपि त्वद्भजनमावश्यकमित्याहुः—स्थिरेति । हे नित्यमुक्त त्वमसंगो मायासंगरहितोऽपि यदा वीक्षणमात्रेण मायया क्रीडसि "मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः" इति पाद्मात् । तदा तव वीक्षणेन कार्योत्पत्त्यनुकूलेक्षणेनैवोत्थितैराविर्भूतैः प्रारब्धकर्मभिस्तद्युक्तलिंगशरीरैर्वा निमित्तभूतैर्युक्ताः स्थावरजंगमस्थूलशरीरोपाधयो जीवा घटाकाशवदुपाधिसृष्टिसमकालमेव भवेयुः । ननु मदिच्छयैवाविर्भवन्तु किन्निमित्तोत्थापनेनेत्याशंकायामाहुः—नहीति । परमदयालोर्वाङ्मनसयोरगोचरत्वेन शून्यवत्प्रतीयमानस्य महादुरात्मनामपि मूढानां नास्तिकानां शून्यतुलामविद्यमानसादृश्यं दधतोऽप्याकाशवत्समस्य तव कोऽप्येकोऽपि स्वीयः परकीयो वा न संभवति । एवं च त्वयि "समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः" इत्यादि गीतोक्तेर्वैषम्याभावात्त्वेच्छया कथमियं विषमा सृष्टिरुपपद्यत इति भावः । यद्वा—तव श्रीकृष्णस्य शून्यतुलां खपुष्पतुल्यामसतीमेव तुलामहमेवेश्वर इतीश्वरतुल्यतां दधतोंगीकुर्वतोऽत एवापदस्य त्वामपदस्य त्वामनादृत्य क्वाप्यलब्धशरणस्य वेनादेरिवाभाग्यस्य साहंकारस्य पापिनः पुरुषस्य फलमेकैकस्थावरजंगमयोनावनेकजन्मानि स्युः । ननु "कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः" "मा भैष्ट वातवर्षाभ्यां तत्त्राणं विहितं हि वः" इत्यादि श्रीकृष्णसादृश्यं भजतीनां गोपीनामपि किमियमेव गतिरित्याशंक्य नहिनहीत्याहुः—अजयेति । अजया व्रतैराराधितया श्रीकात्यायन्या कर्त्र्या उत्थितमुद्बोधितं यन्निमित्तं श्रीकृष्णविहारप्राप्तिकारणमदृष्टं तद्वत्यो गोप्यस्तु विहरे श्रीरासविहारे इपरस्य इः कामसुखं तत्परस्य तव उदीक्षया प्रेमामृतदृष्ट्या स्थावरजंगमजन्मभागिन्यो हि निश्चयेन न स्युः किन्तु परं सर्वोत्कृष्टं श्रीकृष्णप्राप्तिरूपमेव तासां फलं भवेदित्यर्थः । नन्वेवं मयि वैषम्यमागतमित्याशंक्याहुः—वियत इवेति । आकाशवत्समस्येत्यर्थः । साम्यमेवाहुः—अस्य तु कश्चिदनपरः स्वजनोऽपि परो भवति, यथा कंसो रुक्मी वा । कश्चित्परोऽपि अनपरः स्वीयो भवति, यथा रावणानुजो बिभीषणः । एवं च सर्वशुभाशुभफलप्रदस्य जडस्य प्रारब्धस्योद्बोधनमात्रमेव त्वया क्रियत इत्याशयः । अत एव ततो वैषम्याद्विमुक्तेति संबुद्धिः ॥ * ॥ **विश्वनाथी**—तदेवं करणप्रवर्तकः परमोत्कृष्टगुणः श्रीभगवाँ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तदधीनकरणपरतंत्रैः स्वल्पगुणैर्जीवैर्भजनीय इति पूर्वाचारेण पूर्वाभिर्दर्ढाकृतम् । तत्र परा शक्तिश्च दर्शिता । तथैवान्याः श्रुतयोऽभिप्रयान्ति । यतो न केवलमियदेव कारणं तत उत्पन्नत्वमपीत्याहुः—स्थिरेति । हे विमुक्त प्रकृत्यादिसंगातीत यदि तव विहरः प्रपञ्चगतभक्तवृन्दसुखार्थं प्रपञ्चे तत्तदवतारैर्विहारो दृष्टःस्यात्ततस्तदनंतरम् उदीक्षया प्रकृतिलीलासिद्धभक्तोद्देशत्वेनोत्कृष्टया त्वदुदीक्षया उत्थानि प्रकृतिक्षोभेणोत्थितानि यानि निमित्तानि कर्मादीनि तैर्युक्ताः स्थिरचरजातय उद्बुद्धतत्तज्जातिसंस्कारसूक्ष्मदेहाः सर्व एव जीवा उद्भवन्ति स्वाविर्भावमाप्नुवन्ति । कीदृश्येक्षया अजया प्रकृतिक्षोभात्प्राचीनत्वात्स्वभावसिद्धयैवेत्यर्थः । तथैव व्याख्यातं भाष्यकृद्भिः " ईक्षतेर्नाशब्दम् " इत्यत्र । कथंभूतस्य तव परस्य सर्वविलक्षणस्वरूपतच्छाक्तिकस्य । ननु यैः सह विहरेच्छा तेषामेवोद्बोधो यथा स्यात्तथैव कुतो नेक्षते तत्राहुः—नहीति । परमस्येति—परमत्वात्प्राकृतधर्मेष्वादररहितस्येत्यर्थः । अत एव न कश्चिदपरः परश्च भवेत्, अन्यत्र रागद्वेषाभावेन तदसंकोचनादित्यर्थः । " समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः । ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥" इति श्रीगीतोक्तेः " मद्भक्तानां विनोदार्थं करोमि विविधाः क्रियाः " इति पाद्मोक्तेश्च । तर्हि कथं तेऽपि न भजन्ति येन तव विहारहेतवः स्युस्तत्राह—शून्यतुलां दधतः । वियत इवापदस्येति सर्वागोचरस्येत्यर्थः । अयं भावः—यद्यपि वियत् खलु वस्त्वेव तथापि न केनचिद्ग्रहीतुं शक्यते तद्ग्रहणशक्त्यभावात् । एवं सर्वागोचरस्वभावगुणो भवानपि भक्त्यभावादिति । तस्माद्भक्तेभ्यो भक्तिर्ग्राह्येति च श्रुतयश्च " स ऐक्षत " इति । " यथाऽग्नेः क्षुद्राः " इत्यादि । " अक्षरात्परतः परः " इति । " असद्वा इदमग्र आसीत् " " न संदृशे तिष्ठति रूपमस्य " इत्यादि । " सद्रूपमद्वयं ब्रह्म मध्याद्यन्तविवर्जितम् । सुप्रभं सच्चिदानंदं भक्त्या जानाति चाव्ययम् ॥ " इत्याद्याः (१६) ॥ २९ ॥

नीलकण्ठी—पूर्वश्लोके जीवकर्तृका जीवसृष्टिरुक्ता । तत्रैव प्रथमे पादे ईशकर्तृकापि सृष्टिः शक्तिधर इति सूत्रिता, तां प्रपञ्चयति—स्थिरचरजातय इति । हे ततो विमुक्त अजातो नित्यमुक्त यदि तव विहरः विहारः भोगः क्रीडा वा इष्टा भवति " भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे " इति श्रवणात् तर्हि तव उदीक्षया ईक्षणेन स्थिरचरजातयः स्थावरजंगमशरीराणि तदुपाधयो जीवाश्च घटाकाशवदुपाधिसृष्टिसमकालमेव स्युः प्रादुः स्युः " स ऐक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत " " यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्त्येवमेतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि च भूतानि सर्व एते आत्मानो व्युच्चरन्ति " इति श्रुतिभ्याम् । नन्वेवं सृष्टेराकस्मिकत्वे ईश्वरस्योच्चनीचस्रष्टृत्वेनैर्घृण्यवैषम्ये जीवानाञ्च कृतनाशादिप्रसक्तिरत आह—अजयोत्थनिमित्तयुजः । माययोत्थितं यन्निमित्तं कालादृष्टादि तेन युज्यन्ते इति तथा । ईक्षा पर्जन्यवत् साधारणं कारणं जीवजातीनामदृष्टन्तु बीजवदसाधारणं फलभेदहेतुरतो नोक्तदोषप्रसक्तिः । ननु कुलालवद्विहरत उदीक्षितुरप्यदृष्टादि युक्तं स्यादित्याशंक्याह—परस्येति । अदृष्टादिभ्यो हि वर्जितस्य ' हिरुग्वर्जने ' इत्यव्ययपाठात् रुग्भूतस्येत्यर्थः । अत एव संबोधनं—ततो विमुक्तेति । अयं भावः—" देवस्य हि स्वभावोऽयमात्मकामस्य का स्पृहा " इति श्रुते रज्ज्वा भुजङ्गस्रष्टृत्वमिव तव जगत्स्रष्टृत्वं न स्वादृष्टनिमित्तं किन्त्वज्ञानाश्रयजीवादृष्टनिमित्तेन विवर्तमानत्वरूपम् । एवमीश्वरसृष्टिमुक्त्वा पूर्वश्लोके त्वमकरणः तव बलिमित्येकपदोपादानेन सूचितं जीवेशयोरभेदमुपाधिप्रहाणसिद्धमाह—नहीति । परमस्य मायातत्कार्यबहिर्भूतस्य तव कश्चिन्नापरः पूर्वभाविकारणं भवेदस्ति नापि परः पश्चाद्भाविकार्यमस्ति । अत्र परमतसिद्धो दृष्टान्तः—वियत इवेति । यथा निरवयवत्वाद्वियतः कारणं कार्यं वा नास्ति तथा तवापीति । अत एवापदस्य पद्यते गम्यतेऽनेनेति पदं गमकं नास्येत्यपदस्तस्य " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " इति श्रुतेर्वाङ्मनसातीतस्येत्यर्थः । अत एव शून्यतुलां शून्यत्वान्निर्गुणत्वमनुपाख्यत्वं च दधतो न तु शून्यतां तत्साक्षित्वात् । अयं भावः—" न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा । अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ॥ न रूपमस्य नांतोऽस्य छित्त्वैनमिति चेशगीः । युक्ता भवतरोरिन्द्रजालत्वे सति नान्यथा ॥ सम्यग्दृशा वीक्ष्यमाणं रूपं नास्योपलभ्यते । उपादानस्य नित्यत्वादयमाद्यन्तवर्जितः ॥ दुःस्वप्न इव संसारः संगमात्रेण दुःखदः । तमसंगासिना छित्त्वा प्रयाति परमं पदम् ॥ " इति वेदान्तकतकोक्तदिशा ईश्वरोऽस्त्येव सर्वदा इन्द्रजालतुल्यः प्रपञ्चः इति तस्य तत्स्रष्टृत्वं युक्तम् । तथा सत्येव विषये द्वौ स्तो घटौ मृन्मयधीमयावित्युक्तेरसति विषये धीमय एव घटोऽस्ति नान्यः अत एव स्वप्ने " न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते " इति श्रुतिर्भौतिकान्रथादीन्निषिध्य धीमयानां सृष्टिमाह—उक्तविधः प्रपञ्चोऽपि धीमय एव तेन तत्स्रष्टा बुद्ध्युपाधिर्जीव इत्यपि युक्तम् । तथा च—" गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा ॥
अजनि च यन्मयं तदविमुच्य नियंतृ भवेत्सममनुजानतां यदमतं मतदुष्टतया ॥ १७ ॥ ३० ॥

एवं तावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः संसरंतो भजंतीत्युक्तम् । तत्र यद्येकाऽविद्या तदा जीवस्याप्येकत्वादेकमुक्तौ सर्वमुक्तिप्रसंगः । अथ नानाविद्यास्तर्हि तस्यैवांशांतरेण संसारानपगमादनिर्मोक्ष इत्यादितर्कबलेन वस्तुत एव नानात्मानस्तत्र च तेषामणुत्वे देहव्यापि चैतन्यं न स्यात् । देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात् । अतः सर्वगता नित्याश्चेति केचन मन्यंते। तत्र न तावदुक्तदोषप्रसंगः।अविद्याभेदेन तच्छक्तिभेदेन वा बद्धमुक्तव्यवस्थासंभवात्।ईश्वरस्य तु न केनाप्यंशेन संसारशंकेत्युक्तमेव । प्रसिद्धं चात्मैक्यं सर्वश्रुतिषु । किंच इमं पक्षमंतर्यामिब्राह्मणमपि न सहत इत्याह । अपरिमिता इति । वस्तुत एवानंता ध्रुवा

देवतासु'' इति । '' एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं यन्ति '' इति च श्रुतिद्वयोक्तो विदुषो विदेहकैवल्यकाले प्राणमनःप्रभृतीनां कलानां प्रलयः परदृष्ट्या स्वकारणेषु विद्वद्दृष्ट्या स्वरूपे चेत्युपपद्यते । यथा धीमियमपींद्रजालं बुद्धानां नास्त्येवाबुद्धानामस्त्येव तद्वत् । अत्र सार्द्धश्लोकेन जीवेशयोः सोपाधिके रूपे भूतमयधीमयजगत्कर्तृत्वेनानूद्यार्धेन वटमठाकाशवत्तयोरनुपाध्योरभेद उक्त इति ध्येयम् (१६) ॥ २९ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–एवमित्थम् । तत्र पक्षे । अस्यार्थः–अत्र तार्किका दूषयन्ति यद्येकाविद्या जीवोऽप्येकविधस्तया बद्धोऽस्ति तर्हि जीवस्याप्येकत्वादेकस्य मुक्तौ सर्वजीवमुक्तिप्रसंगः स्यात् । अथैकविधो जीवो नानाविधा अविद्यास्ताभिर्बद्धश्चेत्तर्हि तस्यैवेश्वरस्यैवांशान्तरेण जीवरूपांशेन कृत्वा संसारानपगमात्संसारानिवृत्त्यभावादनिर्मोक्षः स्यात् । एकयाऽविद्यया मुक्तो जीवः पुनरन्यया बद्धः पुनरन्यया मुक्तः पुनरन्यया बद्ध इत्यनिर्मोक्षः । एवं च सति चतुर्थपुरुषार्थाभावः स्यादित्यादितर्कबलेन नानात्मानः स्थाप्यन्ते । तत्र च नानात्वेऽपि सर्वगतत्वमाह–तेषामात्मनामणुत्वे सूक्ष्मत्वे देहस्य स्थूलत्वे सर्वव्यापि चैतन्यं न स्यादिति जीवपरिमाणमुक्तं श्रुत्या ''आराग्रमात्रो ह्यपरो हि दृष्टः'' इति । श्रुत्यन्तरं च ''वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः सुखदुःखफलैकभुक् ॥ '' इति । 'सूक्ष्माणामप्यहं जीवः' इत्येकादशे भगवदुक्तेः । एवंभूतसूक्ष्मस्य स्थूलदेहैकप्रदेशे पिपीलिकादिस्पर्शजं चैतन्यं कथं स्यात्, तस्मात् सर्वगता इति नित्यत्वं साधयति–देह इति । देहपरिमाणत्वे च देहस्य मध्यमं हृदयं दशांगुलिपरिमाणम् ''अत्यतिष्ठद्दशांगुलम्'' इति श्रुतेः। हृदयपरिमाणानामात्मनां सावयवत्वादनित्यत्वं स्यात्तस्मात्परिमाणाभावान्नित्या अत एवात्मानो नाना सर्वगता जीवरूपेणैव नित्याश्चेति केचन तार्किका मन्यन्ते, एतन्मतं निराकुर्वन्सिद्धान्तयति–तत्र न तावदित्यादिना । तत्र बंधमोक्षप्रसंगे उक्तदोषः एकस्मिन्बद्धे मुक्ते च सर्वबन्धमोक्षरूपो दोषो नास्ति कुतः अविद्याभेदेन अविद्यया बंधो विद्यया च मोक्षः ''अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते''इति श्रुतेः । एकादशे च–''विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ॥ '' इत्युक्तः शक्तिभेदो भगवतापि । अविद्यायाः क्रियाशक्त्या बंधो विद्यायाः ज्ञानशक्त्या मोक्षः । श्रुतिश्च–'' काममयोऽयं पुरुषः स यत्कामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म करोति यत्कर्म कुरुते तदभिसंपद्यते '' इति, ''तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय '' इति च । ईश्वरांशस्य जीवस्य बंधमोक्षव्यवस्थां प्रदर्श्यांशिनस्तु बंधशंकां निराकरोति–ईश्वरस्येति । समष्ट्युपाधेरखंडितत्वस्येश्वरत्वात् तस्य विद्याशक्तिप्रधानत्वात् केनाप्यंशेन संसारशंका नेत्यर्थः । '' एक एव हि भूतात्मा '' इत्यादिश्रुतिष्वात्मैक्यं प्रसिद्धमस्त्येव कुतो नानात्वं किञ्च जीवस्य कुतः स्वातन्त्र्यमन्तर्यामिसंभवात् अत इमं तार्किकपक्षं नाना जीवाः स्वतंत्रा नित्याः सर्वगता इति मतमंतर्यामिब्राह्मणाख्यो वेदो न सहते इत्याह–अपरिमिता इति । ध्रुवाः स्थिराः । तेनैव रूपेण ध्रुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तेनैव रूपेण नित्याः सर्वगताश्च तनुभृतो जीवा यदि स्युस्तर्हिं तेषां समत्वाच्छास्यता न घटत इति कृत्वा हे ध्रुव नियमो नियमनं त्वया न स्यादितरथा तु घटेत। कथम्। यन्मयमुपाधितो यद्विकारप्रायं यज्जीवाख्यमजनि जातं तत्तस्य स्वविकारस्य नियंतृ नियामकं भवेत्। अविमुच्य कारणतयाऽपरित्यज्य। किं तत्। सममनुस्यूतम्। ननु किं यत्तच्छब्दैर्ज्ञायते चेदुच्यतामिदं तदित्यत आह। अनुजानतां यदमतमिति। जानीम इति वदतां यदमतमविज्ञातप्रायम् अविषयत्वात्। तथा च श्रुतिः। "यस्यामतं तस्य मतं मतं यस्य न वेद सः॥ अविज्ञातं विजानतां विज्ञातमविजानताम्॥ अवचनेनैव प्रोवाच स ह तूष्णीं बभूव" इत्यादि। किंच मतस्य ज्ञातस्य दुष्टतया दोषश्रवणात्। तथाच श्रुतिः। "यदि मन्यसे सुवेदेति दह्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेषु" इत्यादि। तस्माद्यत्तच्छब्दावद्योत्यमतर्क्यं किमपि सर्वानुस्यूतत्वेना समं नियंतृ भवेदित्यर्थः॥ अंतर्यंता सर्वलोकस्य गीतः श्रुत्या युक्त्या चैवमेवावसेयः॥ यः सर्वज्ञः सर्वशक्तिर्नृसिंहः श्रीमंतं तं चेतसैवावलंबे॥ १७॥ ३०॥

त्वरूपेणैव। तेषां जीवानाम्। समत्वात्तुल्यत्वात्। शास्यता शासनगोचरता इति कृत्वा व्यापकानेकात्मवादे भोगसांकर्यप्रसंगोऽपि दुर्वारस्तथाहि नह्येकत्रान्तःकरणे सुखादिरूपेण परिणते तत्प्रातिसंवेदी एक एव चेतन इति नियन्तुं शक्यं सर्वेषां सान्निध्याविशेषेण प्रतिसंवेदनापत्तेरवर्जनीयत्वात्। श्रोत्रस्यैकस्यापि कर्णशष्कुलीरूपोपाधिभेदादिवान्तःकरणरूपोपाधिभेदादेकस्याप्यात्मनः शब्दग्रहव्यवस्थावज्जन्मादि व्यवस्थापि सेत्स्यतीति न पुरुषबहुत्वं वक्तव्यमिति नीलकण्ठः। शास्यता गोचराभावत्वेन नियमनं नियोगत्वम्। इतरथा समत्वाभावे कथं तदाह—यदग्निमयं विस्फुलिंगं जातं तदग्नित्वं कर्तृ विस्फुलिंगं स्वकार्यमपरित्यज्य स्वरूपांशेन सत्यांशेन च सर्वांशं व्याप्यैव नियंतृ प्रवर्तकं भवेत्। कार्याभावे कारणस्य प्रवृत्त्यभावात्तद्वत्। किं तदिति प्रश्ने तद्दर्शयति—सममनुस्यूतं मणिषु सूत्रमिव प्रोतम्। अत्राक्षिपति—नन्विति। तद्ब्रह्मेदमिदमाकारकमिति समपदमावृत्त्या योज्यम्। समं क्वचिदप्यंशेन तुल्यं वस्त्वंतरं ज्ञात्वा तद्ब्रह्म यदन्तर्याम्याख्यं तद्रूपं परमकारणम् अमतम्। अत्र प्रमाणमाह—तथा चेति। यस्य ब्रह्मविद अमतमविज्ञातमविदितं ब्रह्मेति मतम् तस्य मतं ब्रह्म सम्यग्ज्ञातमिति यस्य पुनर्मतं मया ब्रह्म ज्ञातमिति स न वेदैव। अत एव विजानतां जानीम इति वदतामविज्ञातमज्ञातमेव। अविजानतां न जानीम इति वदतां विज्ञातमिति निदर्शनम्। अवचनेनेति। वेदान्तशास्त्रमधीत्य गुरुकुलादागतं पुत्रं पिता पृष्टवान् प्रत्यग्ब्रह्म त्वं ज्ञातवान्न वेति। अविशेषे प्रत्यग्ब्रह्मणि शब्दप्रवृत्तिहेतुजातिगुणादेरभावाद्ब्रह्मवित्त्वप्रद्योतकमुखकान्त्यादिना तदभिनयं कृत्वाऽवचनेनैव कथनाभावेनैव प्रोवाच प्रत्यग्ब्रह्म मयानुभूतमिति सूचितवान् स पिता तूष्णीं बभूव ब्रह्मात्मतत्त्वमयं ज्ञातवानेति निश्चयं जगामेत्यर्थः। अन्यदाह—किञ्चेति। मतस्य दुष्टत्वे श्रुतिः—यदीति। यदि कदाचिदस्य ब्रह्मणो यद्रूपमहं सुवेदेति मन्यसे तर्हिं दह्रं दभ्रं स्वल्पमेवापि त्वं न वेत्थ न जानीषे न केवलमेतावदपि तु अध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो वेदेषु यद्रूपं गीतं तदपि त्वं दभ्रमेव वेत्थेति मन्येऽहं यत्तु निरुपाधिभूमाख्यं ब्रह्म न तत्सुवेद्यमित्यभिप्रायः। मतखंडनपरेयं श्रुतिः। अन्तर्यामिब्राह्मणम् "यः पृथिव्यां तिष्ठन्" इत्यादिकं प्रागेव लिखितम्। स्वामिनाम्—अन्तारिति। अन्तर्यन्तान्तर्यामी श्रुत्या गीतो युक्त्या चैवमेवावसेयो निश्चितस्तम्॥ * ॥ **श्रीधरानुयायिनी**—ननु किमिति लिंगाद्युपहितत्वेनैकस्यैव परमस्य पुंसो बहुत्वमुक्तम्। यतः सांख्यादयस्तार्किकाश्च वस्तुत एव बहवो नित्या विभव आत्मान इति मन्यन्ते तत्राहुः—अपरिमिता इति। हे ध्रुव जीवा यदि वस्तुत एवानन्तास्तेनैवोपहितरूपेणैव नित्याः सर्वगताः स्वतन्त्राश्चेश्वरवत्स्युस्तदा सर्वेषां तेषां त्वत्तुल्यत्वापत्त्या न शास्यता। सर्वैः सर्वदाऽनुभूयमानापि त्वच्छासनयोग्यता न स्यादित्यर्थः। तत्रेष्टापत्तौ त्वाह—इति नियमो नेतरथेति। इतीत्यनेन सर्वैः शिष्टैः प्रमाणीकृतः "शास्ता विष्णुरशेषस्य" इति नियमोऽभिनीय दर्शितः, स च नेतरथा कदाप्यन्यथा न भवतीत्यर्थः। "य आत्मानमन्तरो यमयति" इति श्रुतेः "न त्वत्समश्चाभ्यधिकश्च दृश्यते" "स्वतंत्रो नापरः कश्चिद्विष्णोः प्राणपतेः परः" इत्याद्युक्तेश्च। तदेव सयुक्तिकमाह—अजनीति। मुखादिव बिम्बरूपाद्ब्रह्मणः सकाशाद्दर्पणादौ प्रतिमुखमिवाविद्यान्तःकरणादौ प्रतिबिम्बरूपं यज्जीवाख्यं यन्मयमुपाधिप्राधान्येनाजनि उपाधिजन्मना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदध्यासेन जातं तदिदं जीवाख्यं कार्यमत्यजन्नेवोपाधावपि समत्वेनानुस्यूतं कारणीभूतं बिम्बरूपं ब्रह्म सर्वेषां जीवानां स्वतो मिथो व्यावृत्तत्वेन परस्परमनियम्यानां प्रतिमुखानां मुखमिव नियंतृ भवेत् । तच्च मनोवाचामगोचरमतर्क्यं किमपि सर्वत्रानुस्यूतं साक्षिभूतमित्येव तस्य ज्ञानं नान्यत् अविषयत्वात् "यस्यामतं तस्य मतं मतं यस्य न वेद सः" इत्यादिश्रुतेर्ज्ञातस्य दोषश्रवणाच्च जानीम इति वदतामविज्ञातप्रायम् ॥ * ॥ **विश्वनाथी**—तदेवं भगवद्भक्तिप्रतिपादनोपयोगार्थमेव वयमप्येवं जीवस्वरूपं निरूपयाम इत्यन्या आहुः—अपरीति । अत्रैके वदन्ति—एकमेव सर्वव्यापि चैतन्यमेकस्या एवाविद्याया रजस्तमःप्रधानवृत्तिभेदोपाधित्वेनानंतजीवायते । सत्त्वप्रधानमूलाविद्योपाधित्वेन तु परमेश्वरायते इति । अपरे तु वदन्ति तदसत् अविद्यायाः शुद्धचैतन्याश्रयत्वात् । तन्मूलपक्षांतराणां च तत एव निरस्तत्वात् तस्मादेवं मन्तव्यम् ईश्वरवत् स्वत एव सिद्धा अनन्ता नित्या विभवश्च जीवा इति । तत्राग्रे स्वतःसिद्धत्वं खंडयिष्याम इति मनसिकृत्वाऽनंतत्वं नित्यत्वञ्च यदिशब्दात्पूर्वपाठेन स्वीकुर्वत्यस्तदुत्तरपाठेन विभुत्वं परिहरन्ति—हे ध्रुव सर्वाश्रय उभयसंमतावनंता नित्याश्च जीवा यदि सर्वगता विभवो भवन्ति तर्हि जीवानां त्वच्छास्यतेति यो नियमः शास्त्रे निर्णयः स न स्यात्, व्याप्यत्वाभावात् । इतरथा विभुत्वाभावे तु त्वन्नियमो न स्यादिति न किन्तु स्यादेवेत्यर्थः व्याप्यत्वात् । किञ्च—त्वत्तो न कश्चित्पदार्थः स्वतन्त्रोऽस्ति सर्वेषामन्वयैरैकात्म्यश्रवणात् एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्च । विशेषतो जीवानां त्वत्तो जन्मापि श्रूयते तत एव त्वद्व्याप्यत्वात्त्वच्छास्यत्वं तेषामित्याहुः—अजनि चेति । यदग्न्यादिमयं स्फुलिंगादिकमजनि जातं तदग्न्यादिकमेव कर्तृ स्फुलिंगादिस्वकार्यमविमुच्य स्वरूपांशेन शक्त्यांशेनैव वा सर्वांशं व्याप्यैव नियंतृ भवेत्प्रवर्तकं भवेत् तदभावे तत्प्रवृत्त्यभावात् । किञ्च समं क्वचिदंशे तुल्यं वस्त्वन्तरमनुजानतां यत्किञ्चित्तथा वदन्ति तत्रानुज्ञामपि ददतां यदन्तर्याम्याख्यं त्वद्रूपं परमकारणं वस्तु अमतमज्ञातम् । तत्र हेतुः—मतस्य तस्य दुष्टतया दर्शयिष्यमाणश्रुतित्यक्ततयेति । तस्माद्रवितद्रश्मिपरमाणुवृन्दवत्तदुद्भूतनित्यतटस्थांशरूपाश्रितपरमाणवोऽप्ययस्कान्तादिवत्स्वप्रभावाविशेषरूपेण गुणेन गुणाद्वेति न्यायसिद्धेन स्वशरीरमखण्डमपि चेतयन्ति तस्य महानज आत्मेति महद्व्यपदेशश्च प्राज्ञस्येव यत्किञ्चिद्गुणसारत्वादेव लोके महारत्नादिशब्दप्रयोगवत् । तदेवमेव शास्यशासकत्वे सिद्धे सेव्यसेवकत्वमपि सिद्ध्यतीति पूर्वापरदर्शिता भक्तिः सिद्ध्यतीति भावः । अत्र श्रीगीतोपनिषदः—"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥" इति । भगवदुद्धवसंवादश्च—'महतां च महानहम्' इति महत्त्वस्य स्वरूपपरिमाणानंतर्येणोक्तत्वात्तथैव जीवस्य परिमाणोक्तौ 'सूक्ष्माणामप्यहं जीवः' इति । अत एव विष्णुधर्मोत्तरं "वालाग्रशतशो भागः कल्पितो यः सहस्रधा । तस्यापि शतशो भागो जीव इत्यभिधीयते ॥" श्रुतयश्च—"वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः" इत्याद्याः । "एको देवः सर्वभूतेषु गूढः" इत्याद्याः । "न तत्समश्चाभ्यधिकश्च दृश्यते" इत्याद्याश्च । अत्र विशेषविचारश्च भगवत्संदर्भे परमात्मसन्दर्भतट्टीकयोश्च दृश्यः (१७) ॥ ३० ॥

नीलकण्ठी—एवं द्वैतस्य मिथ्याभूतमनोमात्रत्वेन जीवस्य ब्रह्माभिन्नत्वेन च ब्रह्माद्वैतं साधितम् । परे तु जीवबहुत्वं जीवेश्वरयोर्भेदं चाहुस्तन्निरस्यति—अपरिमिता इति । हे ध्रुव यदि अपरिमिता असंख्याता ध्रुवा अबाध्याः तनुभृतो जीवाः सर्वे सर्वगता व्यापकाः स्युस्तर्हि तेषां न शास्यता स्यात् । पृथिव्यादिवाद्विभूनां व्योमादीनां परस्पराधीनत्वादर्शनेन त्वत्तुल्यत्वादित्यर्थः । न चैषामदृष्टाद्यचेतनशास्यता युज्यते दृष्टान्ताभावात् ! नहि चेतनस्याचेतनः शास्ता क्वचिद्दृष्टोऽस्ति नापि स्वस्य स्वशास्यता धीपूर्वकारिणश्चेतनस्य निषिद्धे प्रवृत्त्यनुपपत्तेः । "यो विज्ञाने तिष्ठन्विज्ञानादंतरो यं विज्ञानं न वेद यस्य विज्ञानं शरीरं विज्ञानमंतरो यमयति य आत्मनि तिष्ठन्नात्मनोन्तरः" इति विज्ञानात्मशब्दवाच्याज्जीवात्तच्छास्तुः पृथगाम्नानात् । तस्मात्त्वच्छास्यानां जीवानां त्वत्तौल्यत्वं वाच्यम् । तच्च मध्यमत्वाणुत्वयोरुक्तदोषात् "घटसंवृतमाकाशं नीयमाने यथा घटे । घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः ॥ एक एव तु भूतात्मा भूतेभूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥" इति श्रुत्यनुसारेण घटाकाशवज्जलचन्द्रवद्वौपाधिकं बोध्यम् । ननु, शास्यतैव मास्त्वित्याशंक्याह—इतीति । इतरथा जीवानां शास्यत्वाभावेन प्रवृत्तेर्यादृच्छिकत्वाभ्युपगमे इति नियमो न स्यात् । इतिशब्देन दृश्यमानं नियममभिनीय दर्शयति दृश्यन्ते हि दुर्बलैरपि बलवन्तो बाध्यन्ते अनिरुद्धा अपि व्याघ्रादयः स्वभक्ष्यैर्नृपशुभिः परिपूर्णेऽपि भुवने क्षुधा पीड्यमाना मितमेवाहारं लभन्ते न यथेष्टम् सोऽयं नियमः शास्यत्वाभावे न स्यादित्यर्थः। ननु देहेन्द्रियावच्छेदेन जीवानां शास्यत्वं न विभुत्वेन रूपेणेति चेत्तर्हि—"कार्योपाधिरयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न घटत उद्भवः प्रकृतिपूरुषयोरजयोरुभययुजा भवन्त्यसुभृतो जलबुद्बुदवत् ॥
त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥ १८ ॥ ३१ ॥

ननु यदि च परमात्मनो जीवा जायंते इति नियंतृनियम्यभाव उच्यते तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतनाशाकृताभ्यागमप्रसंगः स्यात । किंच तदा मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् न चैतद्युक्तम् । स्वप्रकाशानंदात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्याशंक्योपाधिजन्मनैव जीवानां जन्मोच्यते न स्वतः अघटनादित्याह । न घटत इति । तत्र किं प्रकृतेर्जीवरूपेणोद्भवः स्यात्पुरुषस्य वा उभयोर्वा । आद्ये जीवानां जडत्वापत्तिः । द्वितीये पुरुषस्य विकारित्वप्रसंगः । अत एव न तृतीय इत्याशयेनोक्तं प्रकृतिपूरुषयोरुद्भवो न घटत इति श्रुत्याऽजत्वप्रतिपादनादपीत्याह । अजयोरिति । तथाच श्रुतिः । " अजामेकां लोहितशुक्लकृष्णा बह्वीं

जीवः कारणोपाधिरीश्वरः " इति श्रुतेरौपाधिके जीवेश्वरयोर्जीवानां च परस्परं भेदे सिद्धे किमन्तर्गडुना तेषां विभुत्वेन बहुत्वेन वा । तर्कमते श्रोत्रैक्येऽपि कर्णशष्कुलीरूपोपाधिभेदेन शब्दग्रहव्यवस्थावदात्मैक्येऽप्युपाधिभेदादेव शास्यशासितृविभागस्य बंधमोक्षव्यवस्थायाश्च सिद्धेरित्याशयवानाह—अजनि च यन्मयं तदविमुच्य नियंतृ भवेदिति । अत्र द्वयी प्रक्रिया—उदाहृतश्रुतेर्मायाप्रतिबिम्बितं चैतन्यमीश्वरः, मायाकार्यान्तःकरणप्रतिबिंबितं जीवः, बिंबस्थानीयं शुद्धं चैतन्यं तृतीयमित्येका । "यथा ह्ययं ज्योतिरात्मा विवस्वानथो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा " इति श्रुतेः प्रतिबिंबो जीवः, बिंबभूत ईश्वरः, इति चिद्द्वैविध्यरूपाऽपरा । तत्राद्यायामुभावप्यध्यस्तौ परस्यां जीव एव । तथा च कार्यकारणोपाधिकयोरध्यस्ताधिष्ठानस्वरूपयोर्वा जीवेशयोर्मिथो वियोगाभावेन नियम्यनियामकत्वं संभवति । परेषां तु तटस्थस्येश्वरस्य नांतर्यामित्वं संभवतीत्याशयः । अक्षरार्थस्तु—यन्मयं यस्य कारणस्याधिष्ठानस्य वा विकारो विवर्तो वा यत् कार्यं घटादि रजतादि वा तस्य कार्यस्य तन्मृच्छुक्त्यादिरूपं नियंतृ भवेत् । कथं तत् अविमुच्य अपरित्यज्य । कार्यमिति । यन्मयं कार्यं तत्किंविधमित्यपेक्षायामाह—सममनुजानतां यदमतं मतदुष्टतयेति । "समं सर्वं नभन्तामन्यके समे " " माभूवन्नन्यके सर्वे " इति मंत्रतन्निरुक्ताभ्यां समशब्दस्य सर्वपर्यायत्वावधारणात् । तेन समं कारणं ब्रह्मेत्यर्थः । अस्य तात्त्विकं रूपमाह—यदनुजानताम् । शास्त्राचार्योपदेशमनु साक्षात्कुर्वताम् अमतमज्ञातं प्रत्यक्त्वेनाविषयत्वात् । " अदृष्टं द्रष्टृ अमतं मंतृ अज्ञातं विज्ञातृ " इति श्रुतेः । अमतत्वे हेतुः—मतदुष्टतयेति । मतस्य ज्ञातस्य घटादिवदनात्मत्वेन " अतोऽन्यदार्तम् " इति श्रुतेर्मिथ्यात्वापत्तिदोषग्रस्ततया यत् ज्ञातं तन्न ब्रह्मेत्यर्थः । तथा च श्रुतिः—" यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ यदि मन्यसे सुवेदेति दह्रमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपम् " इति (१७) ॥ ३० ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—पुनराक्षिपति—तथा सति जीवानामुत्पत्त्यङ्गीकारे सति । "यज्जन्यं तद्विनाशि" इति व्याप्तेरनित्यप्रसंगेन । तथा च कृतानां कर्मणां विनैव फलभोगं नाशोऽकृतानां पूर्वमसंपादितानामेव फलदानायाभ्यागमः प्राप्तिः स्यादिति । न केवलमेतावानेव दोषः किन्त्वन्योऽपीत्याह—किञ्चेति । तदोत्पत्तिस्वीकारे स्वरूपहानिः स्वरूपनाशः । भवत्विति चेदाह—न चेति । एतज्जीवस्वरूपनाशलक्षणमुक्त्युपादानं न च युक्तं स्वप्रकाशानंदात्मनः स्वयंज्योतिःसुखस्वरूपस्यात्मनोऽविद्याकृतानर्थस्य कर्तृत्वभोक्तृत्वादिधर्माणां निवृत्तिमात्रस्य । तत्रोत्पत्तिस्वीकारे । उभयोः प्रकृतिपुरुषयोः । आद्ये प्रकृतेर्जीवरूपेणोद्भवे । द्वितीये पुरुषस्य जीवरूपेणोद्भवे । अत एव पूर्वोक्तोभयदोषत्रासादेव तृतीयः उभयोर्जीवरूपेणोद्भवपक्षोऽपि नेत्यभिप्रायेणाह—प्रकृतिपूरुषयोरिति । श्रुतिमाह—तथा चेति । न जायत इत्यजा मूलप्रकृतित्वात् । मूलप्रकृतिरविकृतिरिति सत्तत्यामुक्तेः ।

१ द्वितीयायाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजां जनयंती सरूपाम् ॥ अजो ह्येको जुषमाणोऽनु शेते जहात्येनां भुक्तभोगामजोऽन्यः" इति । उभययुजां तु भवंति उभयं च तद्युज्यत इति युक् संबद्धं परस्पराध्य स्तमिति यावत् । तेनासुभृतः प्राणाद्युपाधयो जीवा जायंत इत्यर्थः । जलबुद्बुदवदिति । यथा केवलेन जलेनानिलेन वा जलबुद्बुदा न भवंति किंतु मिलिताभ्यां तद्वत् । तत्र यथाऽनिलो निमित्तं जलमुपादानमेवमत्रापि प्रकृतिर्निमित्तं पुरुष उपादानम् । "तस्माद्वा एतस्मादात्मन आकाशः संभूतः । सोऽकामयत बहुस्यां प्रजायेय" इति । "यथाऽग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एवात्मानो व्युच्चरंति" इत्यादिश्रुतिषु चेतनाचेतनप्रपंचस्य परमात्मोपादानत्वश्रवणात् । न च विकारित्वं परिणामानंगीकारात् । केचित्पुनः परिणाममंगीकृत्यात्मनो विकारभिया विपरीतं निमित्तोपादानभावमिच्छंति । सर्वथा तावत्प्रकृतिपुरुषैक्याद्भवतीति सिद्धम् । तत् "एकमेवाद्वितीयं ब्रह्म । अजामेकाम् । अविनाशी वा अरेऽयमात्मा" इत्यादिश्रुतिबलादुत्पत्तिश्रवणाच्च जीवानामौपाधिकमेव जन्म न वस्तुत इत्युक्तम् । उपाधिलयेन परमात्मनि पुनर्लयश्रवणादपि न वास्तवं जन्मेत्याह । त्वयि त इति । त्वयि कारणात्मनि त इमे जीवाः । तत इति । यतो न वास्तवं जन्म तस्माद्विविधनामगुणैरनेकप्रकारकार्योपाधिभिः सह निलिल्युर्लीना बभूवुः । तत्र सुषुप्तिप्रलययोर्मधुन्यशेषरसा इव लीयंते । यथा मधुनि सकलकुसुमरसा विशेषतोऽनुपलक्ष्यमाणा अपि सामान्येनोपलक्ष्यंते एवं स्वापादौ विशेषमात्रलयात्कारणस्य विद्यमानत्वात्सामान्यतो वर्तंते । मुक्तौ तु कारणस्यापि लयात्त्वयि परमे निरुपाधौ सरित

तां लोहितशुक्लकृष्णां रजःसत्त्वतमोवर्णाम् । सरूपां राजसीसात्त्विकीतामसीरूपां नरसुरनारकीमित्यर्थः । अजः पुरुषः एकोऽजः क्षेत्रज्ञो जीवः अजां जुषमाणः सेवमानः अनुशेते निरंतरं मुह्यति । अन्योऽजः परमात्मा एनामजां जहाति । किंभूतां पुरुषरूपेण भुक्तो भोगो यस्यास्ताम् । सृष्टेः पूर्वं प्रकृतौ पुरुषस्तु वीर्यं निहितवान् । तद्वीर्यं प्रकृतेर्गर्भान्महत्तत्त्वं जातमित्यत आह—भुक्तभोगाम् । बंधमोक्षनिदर्शनपरेयम् । उभयं प्रकृतिपुरुषं तेन परस्पराध्यासेन । इत्यर्थ इति—तात्पर्यम् । दृष्टान्तेनोक्तमर्थं स्फुटयति—जलबुद्बुदेति । दृष्टान्तं स्फुटयति मिलिताभ्यां जलानिलाभ्यां तद्वदत्रापीति । तत्र च दृष्टान्ते । अत्रापि प्रकृतेऽपि । पुरुषोपादानत्वे श्रुतिमाह—"तस्माद्वा" इति । "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तं यत्तस्मादात्मशब्दवाच्यात् । स्पष्टमन्यत् । सृष्टिपरेयम् । श्रुत्यंतरे च व्याख्याते । "यथाग्नेः" इत्यादिश्रुतौ चेतनाचेतनात्मकप्रपञ्चस्य परमात्मोपादानकत्वमेव श्रूयते । तथा च परमात्मन उपादानत्वे विकारित्वं स्यादिति चेदाह—न चेति । केचित्तु परिणामे वस्तुस्वरूपास्थितेः कुण्डलादिरूपेण परिणामेऽपि स्वर्णस्वरूपानाशदर्शनात्तमंगीकृत्यापि विकारभियाऽऽत्मन उपादानत्वं नांगीकुर्वन्ति किन्तु निमित्तत्वं स्वीकुर्वंति । एवं कृतेऽप्यस्मत्पंथा एवांगीकृतो भवेदित्याह—सर्वथेति । तदित्थम् "अजमेकम्" इत्यादिश्रुतेरजत्वस्मरणात् "यथाग्नेः" इत्यादिश्रुतेरुत्पत्तिश्रवणान्न वास्तवं किन्त्वौपाधिकं देहाद्युपाधिकृतमेवेत्याह—न वस्तुत इति । लयो हि नित्यनैमित्तिकात्यन्तिकभेदात्त्रिधा । तत्र तेषु सुषुप्तिर्नित्यलयः प्रलयः प्राकृतिकनैमित्तिकरूपो ज्ञेयः । सुषुप्तिप्रलययोर्दृष्टान्तमाह—मधुनीति । विशेषोऽनेकभेदभिन्नः प्रपञ्चः कारणस्याज्ञानस्य विद्यमानत्वात् "न किञ्चिदवेदिषम्" इति तत्स्मृतेः । आत्यन्तिकलये त्वहं ब्रह्माऽस्मीति स्वरूपसाक्षात्कारेणाज्ञानं निवर्तत एवेत्याह—मुक्तौ त्विति । मधुनि लिल्युरित्यत्र प्रमाणमाह—तथा चेति । यथेति । यत्पृच्छसि अहन्यहनि संपद्य न विदुः सत्संपन्नाः स्म इति । शृणु तत्र दृष्टान्तम्—हे सोम्य श्वेतकेतो यथा लोके मधुकृतो मधुमक्षिका मधु निस्तिष्ठन्ति थूत्कृत्य निष्पादयन्ति । तत्प्रकारमाह—नानात्ययानाम् । नानाशब्द उभयत्र संबध्यते । नानाभवा नानात्या, नाना यान्तीति नानायाः । ततश्च नानात्यानां नानास्थानोद्भवानां नानायानां नानाजातिं प्राप्तानां वृक्षाणां रसान् समवहारं समवहृत्य एकतां गमयन्ति मधुत्वमापादयन्ति तथा ते रसास्तत्र मधुनि विवेकं न लभन्तेऽमुष्य वृक्षस्याहं रसोऽस्मीति । एवमेवेमाः सर्वाः प्रजाः सति श्रीनारायणे संपद्य न विदुः सुषुप्तिकाले मरणप्रलययोश्च । अत एव "तस्मिन्सति संपद्यामहे" इति । सोपाधिलय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इवार्णवे लीयंत इति विवेकः । तथा च श्रुतयः । "यथा सोम्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां संगमयंति ॥ ते यथा तत्र न विवेकं लभंते अमुष्याहं वृक्षस्य रसोस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति । यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् " इत्याद्याः ॥ यस्मिन्नुद्यद्विलयमपि यद्भाति विश्वं लयादौ जीवोपेतं गुरुकरुणया केवलात्मावबोधे ॥ अत्यंतांतं व्रजंति सहसा सिंधुवत्सिंधुमध्ये मध्येचित्तं त्रिभुवनगुरुं भावये तं नृसिंहम् ॥ १८ ॥ ३१ ॥

परेयम् । सरित इवार्णव इत्यत्र श्रुतिमाह—यथेति । यथा स्यंदमाना गच्छन्त्यो नद्यः नामरूपे विहाय समुद्रेऽस्तं गच्छन्ति अदर्शनं यान्ति एवं विद्वान् ज्ञानी नामरूपे त्यक्त्वा परात्परं सूक्ष्मात्प्रकृतिपुरुषादपि परं दिव्यं यथोक्तलक्षणं पुरुषमुपैति । निरुपाधिलयपरेयम् । श्रुत्यन्तरं चात्र टीकाकारैर्गृहीतं "यथोदके शुद्धमुदकमासिक्तं तादृगेव भवत्येवं मुनेर्विजानत आत्मा भवति गौतम" इति । यथा नद्यादिजले घटादिष्ठं शुद्धं निर्मलं जलमासिक्तं तादृगेव भवति हे गौतम एवं विजानतो ज्ञानवतो मुनेरात्मा देहान्ते शुद्धो लिंगनिर्मुक्तः सन्ब्रह्मणि युक्तो ब्रह्मैव भवतीति । अथ स्वामिनाम्—यस्मिन्निति । तं नृसिंहं मध्येचित्तं चित्तस्य मध्ये "पारे मध्ये षष्ठ्या वा" इति समासः । भावये चिन्तयामि । 'भू—मिश्रीकरणचिन्तनयोः' । तं कम्, यस्मिञ्जीवोपेतं जीवसमेतं विश्वम् उद्यत् उद्भवत्, यस्मिन्विलयमपि यत् गच्छत्, यस्मिन्भासते प्रकाशते तम् । लयादौ सुषुप्तिप्रलयादिषु भाति । गुरुकरुणया केवलात्मावबोधे सति यस्मिन्नत्यन्तमपुनरावृत्तिं व्रजति तम् । तत्र दृष्टान्तः—सिंधुवन्नदीवत् । सिंधुमध्ये समुद्रमध्ये यथा सिंधुर्गंगा समुद्रेऽत्यंतांतं व्रजति तद्वत्सर्वा नद्यो गंगायां निपतन्ति सैव समुद्रे प्रविशतीति । यद्वा—सिंधुभिस्तुल्यं सिंधुवत् यथा नद्यः समुद्रे इति ॥ * ॥ **श्रीधरानुयायिनी—**बिंबाद्ब्रह्मणो जातानां प्रतिबिंबरूपाणां जीवानां कारणत्वेन ब्रह्मैव नियामकमित्युक्तम् । तथा च जीवानामनित्यत्वापत्त्या कृतनाशाकृताभ्यागमादिदोषापत्तिरित्याशंक्यान्तःकरणरूपोपाधिजन्मनैव जीवानां जन्म न स्वतः । यथाऽनवच्छिन्नमाकाशमेव घटोपाधिना घटाकाशं भवति घटभंगे तु पुनस्तदेव महाकाशम् एवमविद्योपाधिनान्तःकरणोपाधिना वा जीवानां जन्म तद्भंगे मोक्षः । अतः स्वरूपतो जीवोऽपि ब्रह्मैवेत्याहुः—नेति । प्रकृतेर्जीवरूपेणोत्पत्तौ जीवानां जडत्वापत्तिः पुरुषस्य जीवरूपेणोत्पत्तौ तस्य विकारित्वप्रसंगः उभयोः प्रकृतिपुरुषयोर्द्वयोर्मिलित्वापि जीवरूपेणोत्पत्तिर्न संगच्छते । "अजामेकामजो ह्येकः" इत्यादिश्रुतौ "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि " इति श्रीगीतायाञ्च द्वयोरप्यजत्वेन प्रसिद्धेः । अत उभयोः परस्पराध्यासरूपसंबंधेनैव प्राणाद्युपाधयो जीवा जलवायुसंबंधेन बुद्बुदा इव जायन्ते । यथा केवलेन जलेन वायुना वा बुद्बुदा नोत्पद्यन्ते किन्तूपादानकारणीभूते जले निमित्तकारणीभूतेन वायुनेति मिलितयोस्तयोः संबंधेनैव त उत्पद्यन्ते, तथात्राप्युपादानकारणभूते पुरुषे निमित्तकारणीभूतया प्रकृत्या विवर्तरूपा बुद्बुदा इव जीवा जायन्ते । यद्वा—प्रकृतिरूपोपादानकारणे निमित्तकारणीभूतेन पुरुषेण परिणामरूपा जीवा जायन्ते । उभयथापि प्रकृतिपुरुषयोरैक्यादेवाविद्यया परस्पराध्यासादेवेत्यर्थः । परमात्मनि प्रकृतिः स्वरूपेणाध्यस्ता प्रकृतौ च परमात्मापि सत्तास्फूर्तिरूपेण संसर्गेऽध्यस्तः । यथाऽधिष्ठानस्य शुक्त्यादेः संसर्गमात्रं रजतेऽध्यस्यते रजतं तु स्वरूपेण शुक्तावध्यस्यते परमात्मनोऽपि स्वरूपेणाध्यासे बाधापत्त्या शून्यवादप्रसंगादिति । एवं चौपाधिकमेव जीवानां जन्म न वास्तवमित्युक्तम् । उपाधिलयेन जीवानां ब्रह्मणि लयश्रवणादपि न वास्तवं जन्मेत्याहुः—त्वय्यीति । सर्वे जीवाः स्वोपाधिसहिता यतस्त्वत्त उत्पन्ना अतस्त्वय्येव कारणे लीना बभूवुः । लयश्च सुषुप्तिप्रलययोर्मुक्तौ चेति द्विधा । आद्यो यथा—मधुमक्षिकाभिर्नीता अनेकपुष्परसा मधुनि लीनाः सन्तोऽमुकस्य पुष्पस्याहं रस इति विशेषतोऽनुपलक्ष्यमाणा अपि सामान्यत उपलक्ष्यन्त एव, तथा प्रारब्धकर्मनीता अन्तःकरणाद्युपाधिसहिता जीवास्त्वयि लीनाः सन्तो मनुष्यपशुपक्ष्यादिरूपेण विशेषतोऽनुपलक्ष्यमाणा अपि सामान्यतोऽवशिष्टसंस्कारा लक्ष्यन्त एव, तदानीं संसारकारणीभूताविद्यायाः विद्यमानत्वात् । अत एव जीवानां पुनर्जन्म । द्वितीयो यथा—मुक्तौ च ज्ञानेनाविद्याया अपि विलयात्तदा त्वयि निरुपाधिब्रह्मणि सर्वे जीवाः समुद्रे श्रीगंगादिनद्य इव सामान्यविशेषाभ्यामनुपलक्ष्यमाणा अनवशिष्टसंस्कारा एव लीयन्ते ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत एव न तेषां पुनर्जन्मेत्यर्थः । एवञ्चाविद्योपहितानामप्यनादित्वाज्जीवानां वास्तवजन्ममरणराहित्यान्न कृतनाशाकृताभ्यागमादिदोषापत्तिरिति ध्येयम् । यद्वा—ननु, स्वप्रियया सह लोकवद्विदेहवृषभानुभीष्मकदशरथनंदवसुदेवादिगृहे वारंवारमुत्पद्यमानस्य कथं मम महती स्तुतिरित्याशंक्य सर्ववैलक्षण्यं वदन्त्यः स्तुवन्ति—नेति । हे प्रभो प्रकृतिपुरुषयोर्जगज्जननीजनकयोः श्रीसीतारामयोः श्रीराधाकृष्णयोः श्रीरुक्मिणीवासुदेवयोर्वोद्भवो जन्म न घटते । यतः अजयोर्नित्यसिद्धत्वेन जन्मरहितयोः । इमे जीवास्तु ततः त्वत्तो नियन्तुरीश्वराद्धेतुभूतात् उभययुजा मातृपितृसंयोगेन जलवायुसंयोगजन्यजलबुद्बुदवत् असुभृतः क्षणविनाशिदेहधरा भवन्ति । एवंभूता अपि ते केचित्कृतपुण्यपुञ्जास्तवः विविधनामगुणैः कृत्वा त्वदीयनानाविधनामगुणकीर्तनश्रवणादिना परमे मधुनि परमामृतरूपे त्वयि लिल्युर्लयं प्रापुः त्वत्पादपद्मच्छायायां लीना बभूवुः । ननु, नानाभेदाः प्राणिनः कथं समफलभाज इत्याकांक्षायां दृष्टान्तमाहुः—यथाऽशेषरसाः मधुरक्षारादिविविधजलाः सरितो नद्योऽर्णवे समुद्रे लीना बभूवुस्तद्वदित्यर्थः । अभीष्टप्राप्तौ मार्गे निरोधकाभावेऽप्ययं दृष्टान्तो बोद्धव्यः । यद्वा—हे उभय युगुलमूर्ते श्रीराधाकृष्ण असुभृतो देवमनुष्याद्या जीवाः अजयोः आद्वासुदेवात्त्वत्तो जातयोराविर्भूतयोः प्रकृतिपुरुषयोर्युजा संयोगेन जलवायुसंयोगेन बुद्बुदा इव जायन्ते । ततस्तदनंतरं त इमे जीवाः अशेषरसाः न शेषो रसः पुनरुत्पत्तिहेतुरदृष्टादिर्येषां ते तथाभूताः सन्तो मधुनि अमृतादपि मिष्टतमे परमे परा मा यस्येति । युगुलमूर्तावेव त्वयि समुद्रे नद्य इव विविधनामगुणैः सह लीना भवेयुः । एवं च त्वयि लीनानां तेषां पुनरुद्भवो जन्म न घटत इत्यर्थः । स्वामिश्लोकपदार्थः—लयादौ प्रलये सुषुप्तिकाले च सर्वजीवसहितं लिङ्गदेहादिरूपं विश्वं यस्मिंस्त्वय्यधिष्ठाने विलयं यदपि प्राप्नुवदपि भाति संस्काररूपेण सूक्ष्मतया तिष्ठति । ‘इण्—गतौ’ अतः शतारि यादिति रूपम् । ततः सृष्टिकाले जाग्रति चोत्पन्नं भवतीत्यर्थः । गुरूपदेशेन कूटस्थात्मसाक्षात्कारे सति अत्यन्तान्तं निरवशेषप्रलयम् समुद्रमध्ये श्रीगंगावत् चित्तस्य मध्ये ॥ * ॥

विश्वनाथी—अथ पूर्वोक्तमजनि च यन्मयमिति व्याचक्षाणा जीवानां तद्व्याप्यत्वमेव स्थापयन्तस्तदनुगताः काश्चिदन्याश्च श्रुतयस्तत्तात्पर्येणैव स्वतात्पर्यं ज्ञापयन्ति—न घटत इति । अयमर्थः—कार्यलक्षणं द्विविधम्, अन्यथासिद्धीनियतपश्चाद्भावित्वं परान्वयव्यतिरेकानुकारित्वञ्चेति । तत्र पूर्वं रसादावव्याप्तमाश्रयसमानकालत्वेन प्रतीयमानत्वात् । भवतु वा स्वादौ वस्तुनि रसादेरुत्तरभावित्वम्, अण्वादौ तु न संभवत्येव । अथोत्तरं च परमपुरुषस्य व्यतिरेकाभावान्नेष्टम् । अतो जीवस्य तादृशत्वात्स्वरूपतो जन्मासंभवेनोपाधित एव जन्मन्यपि तद्व्याप्यत्वं सिद्ध्यति । यथा प्रकृतेस्त्रिगुणात्मशक्तेरिव जीवस्योद्भवो न घटते, कुतः अजयोः “अजामेकाम्” इत्यादिश्रुतौ द्वयोरप्यजत्वेन सिद्धयोरीश्वरवदनाद्यन्तयोरित्यर्थः “प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि” इति तद्वाक्यादौ ततश्चाजनि च यन्मयमिति यदुक्तं तत्तु परमेश्वरव्याप्यत्वेनोपाधिजन्मनि तत्तादात्म्यापेक्षयैवेत्याहुः—उभययुगिति । उभयं प्रकृतिपुरुषरूपं युनक्ति व्याप्नोतीत्युभययुक् । त्वदंशः परमपुरुषः तेन तच्छक्तिद्वयविशिष्टेन हेतुनाऽसुभृतः सोपाधिकावस्थतया ते जीवा जायन्ते । यथा जलवायुविशिष्टेनाकाशेन बुद्बुदा इत्यर्थः । तथापि त्वदुपादानत्वं “प्रकृतिर्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥” इत्येकादशस्थश्रीभगवदुक्तन्यायेन लब्धशक्तिमतः सकाशाच्छक्तेरनन्यत्वेन एव स्वरूपतोऽपि त्वद्व्याप्यत्वमेव तेषां स्थितमिति । तथा च श्रीविष्णुपुराणे—“प्रधानञ्च पुमांश्चैव सर्वभूतात्मभूतया । विष्णुशक्त्या महाबुद्धे वृतौ संश्रय धर्मिणौ ॥” इति । यत एवं तत आत्यन्तिकाख्येऽपि किमुत प्राकृताख्ये प्रलये तेषां त्वयि प्रवेश एवेत्याहुः—त्वयीति । अत्र यथा सरितामशेषरसानाञ्च तत्तद्गुणनाम्नामेव नाशः न तु तत्तत्स्वरूपस्य नाप्यभेदवत्त्वं पृथक्तत्तदंशसंभवात् तथा मयि त्वयीत्यपि ज्ञापितम् । अत्र पूर्वार्धे श्रुतयः “हंतेमास्तिस्रो देवता अनेनात्मनानुप्रविश्य नामरूपे विहाय व्याकरवाणि” इत्याद्याः । उत्तरार्धे च “यथा सोम्य मधुकृतः” इत्याद्याः (१८) ॥ ३१ ॥

नीलकंठी—एवं जीवेश्वरयोर्जीवानां च परस्परं भेदो निराकृतः । इदानीं कार्योपाधीनां जीवानामुपाधिजन्मना जन्मवतां कृतनाशाकृताभ्यागमप्रसंगः स्यादित्याशंक्य न हि वयं कार्यस्य प्रागत्यन्तासत उत्पत्तिं ब्रूमः ‘नासतो विद्यते भावः’ इत्यसदुत्पत्तिनिषेधात् । किन्तु कारणे सत एव तिलतैलवदाविर्भावं जन्मेति मत्वा किं प्रकृत्युत्पत्त्या पुरुषोत्पत्त्या वा जीवानां जन्माशंक्यत इति विकल्प्य दूषयति—न घटत इति । प्रकृतिपुरुषयोरुभयोरपि उत्पत्तिर्न घटते । अत्र हेतुगर्भं विशेषणम् अजयोरिति । “अजामेकामजो ह्येकः” इति श्रुत्या, “प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि” इति स्मृत्या च तयोरजत्वावगमादित्यर्थः । कथं तर्हि, एते आत्मानो व्युच्चरन्ति इत्यग्निविस्फुलिंगन्यायेन ब्रह्मणः सकाशाज्जीवोत्पत्तिराम्नायतेऽत आह—उभययुजेति । जलबुद्बुदे यथा जलं नोत्पद्यते नापि तदवच्छिन्न आकाशः अथापि केनचिन्निमित्तेन जलक्षोभे सत्युभयात्मको बुद्बुद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृषु तव मायया भ्रममभीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवम् ॥
कथमनुवर्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयम् ॥ १९ ॥ ३२ ॥

नन्वेवं तावत्परमेश्वराज्जीवा जायंते तद्वशेन च कर्माणि कुर्वंति पुनस्तत्र लीयंत इति संसारचक्रे परिभ्रमणमुक्तमिदानीं तन्निवृत्तये "परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च॥ उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश" इत्याद्या भगवदनुवृत्तिं विदधतीत्याह। नृषु तव माययेति। नृषु जीवेष्वमीष तव मायया भ्रममुक्तलक्षणमवगत्य ज्ञात्वा सुधियो भृशं त्वय्यभवे भवनिवर्तके भावं स्वभावमनुवृत्तिं दधति कुर्वंति । कीदृशं भ्रमम् । अनुप्रभवम् अन्वनुप्रभवो यस्मिंस्तं भ्रमम् । ततः किमत आह । कथमिति । अनुवर्तताम् अनुवर्तमानानां त्वामेव शरणं भजतां भवभयं संसारभयं कथं भवेत्न कथंचिदपीत्यर्थः । कुतः यद्यस्मात्तव भ्रुकुटिर्भ्रूभंगरूपस्त्रिणेमिस्तिस्रो नेमय इवावच्छेदाः शीतोष्णवर्षाकाला यस्य संवत्सरात्मकस्य कालस्य सः । अभवच्छरणेषु न भवान् शरण रक्षिता येषां तेष्वेव भयं जन्ममरणादिलक्षणं सृजति करोति । अत एवंभतं संसारमाकलय्य तन्निवृत्तये सुधियस्त्वयि भावं दधतीति ॥ संसारचक्रक्रकचैर्विदीर्णमुदीर्णनानाभवतापतप्तम् ॥ कथंचिदापन्नमिह प्रपन्न त्वमुद्धर श्रीनृहरे नृलोकम् ॥ १९ ॥ ३२ ॥

आविर्भवति । एवं जीवेऽपि नान्तःकरणमुत्पद्यते नापि तदवच्छिन्नं चैतन्यम्। अथापि अनादिकालप्रवृत्तजीवादृष्टादिना मायाक्षोभे सत्युभयात्मा जीव आविर्भवतीति युज्यते । एवं व्युच्चरणश्रुतिः कृतहानाद्यभावश्चेति भावः । यत एवं ततोहेतोः त इमे जीवाः जले बुद्बुदा इव त्वयि परस्मे विविधैर्नामभिर्गुणैश्चोपलक्षिताः सन्तोऽर्णवे सरित इव मधुनि अशेषरसा इव च पूर्वकल्पान्ते लिल्युः लीनाः । अस्मिन्कल्पेऽपि त्वत्त एवोत्पन्नास्त्वय्येव वसन्तीत्यर्थः । तथा च श्रुती भवतः—"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् " "यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान्समवहारमेकतां रसं गमयन्ति ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीति एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामहे " इति। यद्वा—त्वयि मधुनीति संबंधः "इदं वैतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच" इति ब्रह्मण्यपि मधुशब्दप्रयोगदर्शनात् । स च " एतद्वै मधु दैव्यं यदाज्यम्" इति श्रुतेर्घृतापरपर्यायः सन्ब्रह्मणि घृतकाठिन्यवत्प्रपञ्चप्रलयोदयौ, इति दर्शयति— अस्मिन्पक्षे रसा विषयानंदाः "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः सर्वेऽपि विषयानंदा ब्रह्मानंदांभोधेरेव विप्रुष इति दर्शितम्। पूर्वस्मिन्व्याख्याने रसाः कटुतिक्तकषायादयस्तत्तद्वृक्षोद्भवाः (१८)॥ ३१॥

भावार्थदीपिकाप्रकाशः वंशीधरी—एवमुक्तरीत्या तद्वशेनेश्वरप्रेरणया पुनः सृष्ट्यन्ते तत्रेश्वरे तन्निवृत्तये संसारभ्रमणानिवृत्त्यर्थम् । "परीत्य" इत्याद्याः श्रुतयो भगवदनुवृत्तिं भगवद्भक्तिं विदधतीति श्रुत्यर्थः । स मुनिः भूतानि प्राणिनः परीत्य संसारचक्रे भ्रमन्तीति ज्ञात्वा लोकान्स्वर्गादीन्क्षयिष्णुत्वेन परीत्य ज्ञात्वा सर्वा दिशः प्राच्याद्या विदिश आग्नेय्याद्याश्च दुःखमयत्वेन दिगादिशब्दस्तत्रत्यपरो ज्ञेयः । ऋतस्य सदा सत्यस्य श्रीविष्णोः प्रथमजां वाचं त्रयीलक्षणामुपस्थाय त्रय्युक्तनैष्कर्म्यमासेव्यात्मना सर्वतो विरक्तेन मनसात्मानं परमात्मानं भगवंतं शरणमभिसंविवेश गतवान् । व्याख्यांतरं पूर्वैः कृतम् सर्वेषु भूतेषु अहमस्मि सर्वाणि भूतानि मयि संतीति ज्ञात्वा ऋतस्य प्रथमजां वाचमुपस्थाय यावज्ज्ञानोत्पत्तिःतावत् आत्मना शुद्धेन त्वंपदार्थेनात्मानं तत्पदार्थं परमात्मानमभिसंविवेशैक्यं गतवानिति ततस्त्वदनुवृत्तेः । इत्यर्थ इति व्याख्या । अत्र हेतुमाशंकते—कुत इति । यतस्त्वद्विहीनानां संसारोऽतो हेतोः एवंभूतं पौनःपुन्येन भवनशीलमाकलय्य विचार्य तस्य संसारस्य निवृत्तये सुधियो विवेकिनः । स्वामिनाम्—संसारेति । संसारचक्रमेव क्रकचं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करपत्रं काष्ठविदारणास्त्रविशेषस्तेन विदीर्णम् । बहुलं संसारचक्रदुःखानंत्यपरम् । उदीर्णा उत्कटा नानाध्यात्मादिरूपा भवतापाः संसारतापास्तैस्तप्तम् अत आपन्नमापद्ग्रस्तम् इह संसारे कथञ्चित्केनापि भाग्योदयेन त्वां प्रपन्नं शरणागतं त्वमुद्धर ॥ * ॥ **श्रीधरानुयायिनी**—एवं नानामतान्यनूद्य वैष्णवमतमेव स्थापयन्ति—नृष्विति । नृषु विद्वन्मानिषु अमीषु जनिमसत इत्यादिश्रुतिकदंबोक्तनानावादिषु तव मायया भृशं भ्रमं भ्रान्त्यैव नानामतकल्पनं ज्ञात्वा भवनिवर्तके त्वयि अनु प्रतिजन्म सुधियः श्रीनारदाद्या भक्तिं कुर्वन्ति "नानायोनिसहस्रेषु येषुयेषु भ्रमाम्यहम् । तत्रतत्राच्युता भक्तिरच्युतास्तु दृढं त्वयि ॥" इति विष्णुपुराणात् । एवं सर्वमतशिरोमाणिं वैष्णवमतमेव ते स्थापयन्तीत्याशयः । एवमेषां वैष्णवानां संसारभयं कथमनुवर्ततामनुवृत्तं भवतु न कथमपीति त्वद्भजनारंभदशायामेव तेषां तस्यापगमात् । अतस्त्वद्भ्रूभंगरूपः कालस्तवाभक्तेष्वेव जन्ममरणादिभयं मुहुः सृजति न तु भक्तेष्वपीत्यर्थः । यद्वा—अन्यसर्वसाधनसंपन्नानामपि त्वद्भजनं विना संसारभयं न निवर्तत इत्याहुः—नृष्विति । अमीषु वेदविज्ञेष्वपि नृषु दीक्षितविप्रादिषु तव मायया भ्रममिन्द्रादिभ्योऽन्नमदत्त्वा प्रागेव गोपालजातये श्रीकृष्णाय न देयमिति भ्रमं भगवद्याचनाभंगेन तेषां भाविजन्ममरणभ्रमणानवस्थां वा निश्चित्य सुधियो यज्ञपत्न्यादयस्त्वयि भवनिवर्तके अनुप्रभवम् अन्वनु प्रति क्षणं प्रभव उल्लासो यस्य तं तादृशं भावं भक्तिं भृशमत्यन्तं कुर्वन्ति एवं त्वामनुवर्ततां भजतां संसारभयं कथं न कथमपीत्यर्थः । "सकृदेव प्रपन्नो यस्तवास्मीति च याचते । अभयं सर्वथा तस्मै ददाम्येतद्व्रतं मम ॥" इति श्रीभगवदुक्तेः । अयं भावः—संसारदशायां त्वन्माधुर्यरसावेशेन भयानवधानमेव भयहेतूनामकिञ्चित्करत्वं वा । संसारातीतदशायां तु भयहेतव एव न सन्ति । अत एव त्रयो गुणा नेमयश्चक्रधारावदावरका यस्यां सा तव भ्रुकुटिरभक्तेषु जन्ममरणादिदुःखं मुहुः सृजति । अथवाऽमीषु भगवदाराधनपरेष्वपि नृषु पञ्चायतनमध्ये को देवः पूज्यः सेव्यश्चेति भ्रमं मनोभ्रमणात्मकं संशयमवगत्य तेषां निश्चयार्थं सुधियः श्रीनारदाद्यास्तव मायया कृपया 'माया दंभे कृपायां च' इति विश्वः । अभवे भवनिवर्तके त्वय्येव सर्वदेवेभ्यो मुख्यतया भावं सख्यदास्यादिकं प्रतिजन्म प्रतिक्षणं कुर्वन्तीत्यर्थः । स्वामिश्लोकपदार्थस्तु—चक्रवदूर्ध्वाधोभावेन भ्रमणवति संसारे क्रकचवद्दुःखप्रदे रोगादिभिर्विदीर्णमुदीर्णैरुत्कटैर्नानाविधाध्यात्मिकादिसंसारतापैस्तप्तमत आपन्नमापद्ग्रस्तमिह संसारे कथञ्चिदार्ततया जिज्ञासुतया कामनया दंभादिना वा केनापि भाग्योदयेन त्वां शरणागतं नृलोकमुद्धरेत्यर्थः ॥ **तोषिणी**—तदेवं पूर्वोक्तानुसारेण लब्धावसरा भवभयनिवर्तकतालक्षणे तस्मिन्भक्तितात्पर्यकाः काश्चिदन्याः श्रुतयः स्तुवन्ति—नृष्विति । साधारणजीवानां यया मायया भ्रमो भवति सैव त्वद्भक्तसंगजातसद्बुद्धीनां भक्तिमाधुर्यानुभावेन तां त्यक्तुं न शक्नुवन्तीत्यर्थः । हेतुर्भवति भ्रममय्यां तस्यां भयहेतुत्वं त्वयि तु तन्निवर्तकत्वं बुद्ध्वेति भावः । तत्रापि तु अनुक्षणं प्रभव उल्लासो यस्य तादृशं भावम् । यद्वा—प्रतिजन्मैव तं दधाति पक्षद्वयेऽपि परममाधुर्यानुभावेन तां त्यक्तुं न शक्नुवन्तीत्यर्थः । तदुक्तं वैष्णवे—'सा हानिस्तन्महच्छिद्रम्' इत्यादि 'नाथ योनिसहस्रेषु' इत्यादिना 'न वै जनः' इत्यादि 'विहातुमिच्छेन्न रसग्रहो यतः' इति श्रीभागवते च । तर्हि किं तस्माद्भक्तिर्जाता तदपि नेच्छेत् नहीत्याहुः—संसारिदशायां तन्माधुर्यावेशेन तदनवधानात् भयहेतूनां किंचित्कर्तुमशक्तत्वाद्वा । तदतीतदशायां तु भयकारणानामपि नाशादिति भावः । तत्र कैमुत्येनाहुः—तवेति । "सकृदेव प्रपन्नो यस्तवास्मीति च याचते । अभयं सर्वदा तस्मै ददाम्येतद्व्रतं मम ॥" इति रामायणे श्रीराघवेन्द्रप्रतिज्ञानुसारेण च 'ददात्येतद्व्रतं हरेः' इत्यत्र तादृशगरुडपुराणोक्तानुसारेण च शरणागतमात्रेष्वपि भयाभावादित्यर्थः । त्रिणेमिरिति । भूतभविष्यद्वर्तमानार्थकत्वेनेति । अत्र श्रुतयः परीत्येत्याद्या एव । तत्र प्रथमजाम्—"कालेन नष्टा वाणीयं प्रलये वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥" इत्येकादशानुसारेण भक्तिप्रतिपादिका ऋतस्य स्वयं भगवतो वाणीति व्याख्येयम् । यद्वा—तादृशमोक्षप्रस्तावमसहिष्णवः काश्चिदन्या आहुः । नृषु अमीषु पूर्वोक्तेषु मुक्तिसाधकेषु त्वद्भक्तिसुखानवधानरूपं त्वन्मायाहेतुकभ्रममवगत्येति व्याख्येयम् । श्रुतयस्तु पूर्वपूर्वानुसारेणान्वेषणीयाः । अत्र **विश्वनाथः**—एवं नानामतान्यनूद्य दूषयन्त्यो वैष्णवमतमेव स्थापयन्ति । नृषु विद्वन्मानिषु अमीषु पूर्वपक्षद्वयार्थावगमितेषु नानावादिषु भ्रममवगत्य भ्रान्त्यैव नानामतकल्पनं ज्ञात्वा त्वयि अभवे भवनिवर्तके भावं दास्यसख्यादिकमेव केवलम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनु प्रतिक्षणं प्रभव उल्लासो यस्य तम् । यद्वा–प्रतिजन्मैव दधति कुर्वन्ति । यथोक्तं वैष्णवे–" नाथ योनिसहस्रेषु येषुयेषु भ्रमाम्यहम् । तत्रतत्राच्युता भक्तिरच्युतास्तु दृढा त्वयि ॥" इति । ननु, तर्हि त्वंपदार्थतत्पदार्थयोर्ज्ञानाभावात्संसारद्वेषाभावाच्च तेषां संसारस्तु नैव निवर्तते तत्राहुः–कथमिति । भवभयं तेषां कथमनुवर्ततामनुवृत्तं भवेत् त्वद्दास्यारंभदशायामेव तस्यापगमात् । किन्तु–निष्कामत्वातिशयाद्भजनोत्थदैन्याच्च स्वेषु तेषां संसारित्वाभिमानः यद्यस्मात्तव भ्रुकुटिर्भ्रूभंगरूपस्त्रिणेमिस्त्रिगुणः तीक्ष्णधारः कालः अभवच्छरणेषु त्वच्छरणापत्तिरहितेष्वेव भवभयं जन्ममरणादिलक्षणं सृजति । तदुक्तं त्वयैव–'सकृदेव प्रपन्नाय' इत्यादिना "दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति । अयं भावः–अन्येषां वादिनामिव परमतखण्डने स्वमतस्थापने च नात्याग्रहः, अत्याग्रहस्तु त्वद्भजन एव वैष्णवानां तत्र च न केषामपि वादिनां विप्रतिपत्तिरिति तन्मतमेव सर्वशास्त्रार्थसारम् । विचित्ररूपगुणलीलामहोदधौ त्वयि कृष्णरामादिस्वरूपे उपास्यबुद्धिः स्वेषूपासकबुद्धिरित्येव तेषां तत्पदार्थत्वंपदार्थयोर्ज्ञानं सूर्योपमस्य भगवतो बाह्यप्रभोपमा जीवा अत एव ततो भिन्नत्वेनाभिन्नत्वेनापि व्यपदिश्यन्ते 'सूक्ष्माणामप्यहं जीवः' इति भगवदुक्तेः "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश" इति । "वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः " इति । "आराग्रमात्रो ह्यवरो हि दृष्टः " इत्यादिश्रुतिभ्यश्च तेषां परमाणुपरिमाणत्वमेव तदपि संपूर्णदेहव्यापि शक्तिमत्त्वं जतुजटितस्य महामणेर्महौषधखण्डस्य च शिरस्युरसि वा धृतस्य संपूर्णदेहपुष्टिकरिष्णुशक्तिमत्त्वमिव नासमञ्जसम् । स्वर्गनरकनानायोनिषु गमनञ्च तेषामुपाधिपारवश्यादेव । यदुक्तं प्राणमधिकृत्य दत्तात्रेयेण–'येन संसरते पुमान्' इति । तेषां बहुत्वं नित्यत्वञ्च–"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इति श्रुत्या प्रतिपादितम् । समुदितानां तेषां भगवतस्तटस्थशक्तित्वेनैकत्वञ्च ज्ञेयम् । ते च मेघोपमयाऽविद्ययाऽऽवृता बद्धजीवा एके, अन्ये भक्तिमज्ज्ञानेन तदावरणोन्मुक्ता मुक्तजीवाः, अन्ये केवलया प्रधानीभूतया वा भक्त्या तदावरणोन्मोचितप्रापितचिदानंदमयभजनोपयोगिशरीराः सिद्धभक्ताः, अन्येऽविद्यायोगरहिता एव नित्यपार्षदा इति चतुर्विधाः । तल्लक्षणञ्च नारदपञ्चरात्रे–"यत्तटस्थं तु चिद्रूपं स्वसंवेद्याद्विनिर्गतम् । रञ्जितं गुणरागेण स जीव इति कथ्यते ॥" अस्यार्थः–यत्तटस्थं विशेषतो ज्ञेयं चिद्वस्तु स जीवः "यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरन्ति" इति श्रुतेः । स्वसंवेद्याच्चित्पुञ्जाद्भगवतः सकाशाद्विनिर्गतं चेत्तदा गुणरागेण रञ्जितं बहिरंगया मायाशक्त्या स्वीयानां गुणानां रागेण रञ्जितं मायिकाकारं स्यादित्यर्थः । यदा तु केवलया प्रधानीभूतया वा भक्त्या मायोत्तीर्णं स्यात्तदाऽन्तरंगया चिच्छक्त्या स्वीयकल्याणगुणेन रञ्जितं भगवत्यनुरक्तीकृतं चिन्मयाकारयुक्तं स्यादित्यर्थः । एवञ्च, मायाचिच्छक्त्योस्तटस्थवर्त्तित्वात्तटस्थमिति तन्नाम कृतम् । यदा तु भक्तिमज्ज्ञानेन मुक्तं स्यात्तदा ब्रह्मण्यपृथग्भूय स्थितं नैव गुणरागेण रञ्जितमित्युपासकनिरूपणम् । अत एव राजकीयपुरुषोऽपि राजपुरुष इति तत्पदार्थसंबंधी त्वंपदार्थ इति तत्त्वमसीतिमहावाक्यार्थं केचित्तु तस्य त्वमिति षष्ठीतत्पुरुषेणापि वदंति । अथोपास्यनिरूपणम्–सूर्योपमस्य भगवतः प्रसृमरसान्द्रज्योतिःपुञ्जोपमं ब्रह्म "ब्रह्मसंज्ञमभूदेकं ज्योतिर्यत्सर्वकारणम्" इति नारसिंहोक्तेः "ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत" इति हरिवंशोक्तेश्च । तस्यान्तर्मण्डलोपमः परमात्मा रथसारथ्यादिपरिकरविशिष्टवदननयनपाणिपादादिसुंदरसूर्योपमः सपरिकरः श्रीभगवान् यथा–नगरस्यातिदूरस्था जना विशेषमनुपलभमाना इदमग्रे स्थितं कान्तिमयं वस्तुमात्रमिति तदेव तदेव नगरं पश्यन्ति, अनतिदूरस्था ध्वजपताकादिविशिष्टं वृक्षखण्डमिति, अतिसमीपस्थास्तु पुरगोपुरनिष्कुटरथ्याप्रासादादियुक्तं नगरमिति, तथैवातिदूरस्था भगवन्तमेव ज्योतिर्मयं ब्रह्मेति, अनतिदूरस्था अतिचिद्विशेषमयः परमात्मेति, अतिसमीपस्था नानानंतचिद्विशेषमयो भगवानिति तत्राप्यन्तःप्रविष्टा अपारमाधुर्यानुभविनः कृष्ण इति वदन्ति । यथाहुः प्राञ्चोऽपि–"चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभावितकृतिम् । विभुर्विभक्तावयवं पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥" इत्येवमेतावन्मात्रमपि स्वमतं वैष्णवाः केऽपि ज्ञातुमपेक्षन्ते च केऽपि नापेक्षन्ते सदैवापेक्षन्ते भजनप्रकारमेवेति । अत्र श्रुतयः–"एतद्विष्णोः परमं पदं ये नित्योद्युक्ताः संयजन्ते न कामात् । तेषामसौ गोपरूपः प्रयत्नात्प्रकाशयेदात्मपदं तदैव । " इत्याद्याः (१९) ॥ ३२ ॥

नीलकण्ठी–एवं ब्रह्माद्वैतं प्रसाध्य तदज्ञानाद्बंधस्तज्ज्ञानान्मुक्तिरित्याह–नृषु तवेति । अमीषु नृषु पुरुषेषु न तु मनुष्यमात्रेषु " तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम् " इति देवादीनां ब्रह्मविद्यायां तुल्यवदधिकारश्रवणात्तव मायया कर्तैवाहं पुत्रादिरेव हितः अर्थकामावेव पुरुषार्थावित्येवंरूपया अविद्या भ्रममूर्द्ध्वाधोगमनेनानेकयोनिसञ्चरणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विजितहृषीकवायुभिरदांतमनस्तुरगं य इह यतंति यंतुमतिलोलमुपायखिदः ॥
व्यसनशतान्विताः समवहाय गुरोश्चरणं वणिज इवाज संत्यक्तकर्णधरा जलधौ ॥ २० ॥ ३३ ॥

स च भगवति भावो मनोनियमे सति भवति सोऽपि गुरूपसदनादिति गुरूपसदनं विदधति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ आचार्यवान्पुरुषो वेद ॥ नैषा तर्केण मतिरापनेया ॥ प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ" इत्याद्याः श्रतय इत्याह । विजितहृषीकवायुभिरिति । विजितानि हृषीकाणींद्रियाणि

भृशमत्यन्तमवगत्य "न सांपरायः प्रतिभाति बलं प्रमाद्यंतं वित्तलोभेन मूढम् । अयं लोको नास्ति पर इति मानी पुनःपुनर्वशमापद्यते मे" इति श्रुतेर्ज्ञात्वा सुधियः सूक्ष्मधियः "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदार्शिभिः" इति श्रुतेः शोभनधियो वा त्वयि अभवे न भवत्ययमिति न भवत्यस्मादिति व्युत्पत्तिभ्यामकार्यकारणे ब्रह्मणि भावं जीवात्मानं मनो वा 'आत्माभावो मनोभावः' इत्यनेकार्थपदमञ्जरी । दधत्यभेदेन स्थापयन्ति । "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति तद्यच्छेच्छान्त आत्मनि" इति श्रुत्युक्तप्रकारेण "यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवति" इति भेददर्शनस्य निंदितत्वात् । "यच्छेत्" इति श्रुतिस्तु भाष्ये व्याख्याता—वाचं मनसि नियच्छेत् वागादिबाह्येन्द्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत्, मनोऽपि विषयविकल्पाभिमुखं विषयदोषदर्शनेन ज्ञानशब्दोदितायां बुद्धौ अध्यवसायस्वभावायां धारयेत्, तामपि बुद्धिं महत्यात्मनि भोक्तारि अग्र्यायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत्, तं महान्तमात्मानं शान्त आत्मनि प्रकरणवति परस्मिन्पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति । ये त्वयि भावं विदधति तेषां भवभयं संसारदुःखं कथमनुवर्ततम् न कथमपीति यत्तच्छब्दाध्याहारेण योज्यम् । भयाननुवृत्तौ हेतुः—अनुप्रभवम् । प्रभव उपाध्यभिव्यक्तिः तामनुसृत्य वर्तत इत्यनुप्रभवम् "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वा व संतं न प्रियाप्रिये स्पृशतः" इति श्रुतेः उपाधिनिरसनेन त्वयि भावं विदधतां नास्ति भवभयमित्यर्थः । ननु कुतो मय्येव भावो विधेयो नान्यत्र धर्मादावित्यत आह तत्र—यदिति । यत् यस्माद्धेतोस्तव भ्रुकुटिस्तल्लक्ष्यी इक्षा "तदैक्षत बहु स्यां प्रजायेय" इति श्रुत्या अभवच्छरणेषु न भवान् शरणं रक्षिता येषां तेषु भयं जन्ममरणादिदुःखं मुहुः सृजति । भ्रुकुटिं विशिनष्टि—त्रिणेमिरिति । त्रयो गुणा नेमिश्चक्रधारा तद्वत् आवरका यस्यां सा तथा । "न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥" इति स्मृतेः । त्वद्विमुखाः त्वदीक्षाकृते त्रिगुणमये संसारचक्रेऽनवरतं भ्रमन्तीति भावः (१९) ॥ ३२ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—स च भक्तिलक्षणो भावः प्रेमा मनसो नियमे निरोधे, सोऽपि मनोनियमोऽपि गुरूपसदनं गुरुसमीपगमनम् श्रुतयो विधानं कुर्वन्ति । ताश्च तद्विज्ञानार्थमित्याद्याः । "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः" इत्यादि । अर्थः—ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः कर्मचितान्संसारगतिभूतान् लोकान् परीक्ष्य प्रत्यक्षानुमानागमैः सर्वतो याथात्म्येनावधार्य निर्वेदं वैराग्यमायात् कुर्यात् । ब्राह्मणग्रहणं ब्रह्मविद्याधिकारिषु प्राधान्यात् । वैराग्यप्रकारं दर्शयति—इह संसारे कश्चिदपि पदार्थः अकृतो नास्ति किं कृतेन कर्मणायासबहुलेन इत्येवं निर्विण्णो विद्वज्जनप्राप्यं नित्यं पदं यत्तद्विज्ञानार्थं स ब्राह्मणः समित्पाणिः गृहीतकाष्ठभारहस्तो गुरुमेवाभिगच्छेत्प्राप्नुयात् । समित्पदं रिक्तपाणिर्न गच्छेदितिपरम् वस्त्वन्तराभावे काष्ठमेव गृहीत्वा गच्छेदिति । श्रोत्रियमध्ययनश्रुतार्थसंपन्नं ब्रह्मनिष्ठं सर्वाणि कर्माणि हित्वा केवले ब्रह्मणि निष्ठा यस्य तम् । ननु, विद्वान्स्वयमेव जानातु नेत्याह—आचार्यवान् गुरुमानेव पुरुष आत्मानं वेद जानाति नान्य इति । यदा तु आत्मन्युत्पन्नागमप्रतिपाद्यात्ममतिः एषा तर्केण स्वबुद्ध्याभ्यूहनमात्रेण नापनेया न हंतव्या किन्तु सेयं मतिरन्येनैवागमाभिज्ञेनाचार्येण प्रोक्ता सती सुज्ञानाय भवति । हे प्रेष्ठ प्रियतम नाचिकेत संप्रति यमस्य संबुद्धिः । यद्वा—एषा ब्रह्मात्मविषया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वायुश्च प्राणो यैस्तैरप्यदांतमनस्तुरगमदांतमदंमितं मन एव तुरगो दुर्दमत्वसाम्यात्तं ये यंतुं नियंतुं यतंति प्रयतंते । अतिलोलमतिचंचलम् । गुरोश्चरणं समवहायानाश्रित्य ते उपायेषु खिद्यंते क्लिश्यंतीत्युपायखिदः संतो व्यसनशतान्विता बहुव्यसनाकुला इह संसारसमुद्रे संति तिष्ठंति दुःखमेव प्राप्नुवंतीत्यर्थः । हे अज अकृतकर्णधरा अस्वीकृतनाविका वणिजो यथा तद्वत् । गुरुणोपदर्शितभगवद्भजनसुखानुभूतौ तु स्वत एव मनो निश्चलं भवति नान्यथेति भावः ॥ यदा परानं दगुरो भवत्पदे पदं मनो मे भगवँल्लभेत ॥ तदा निरस्ताखिलसाधनश्रमः श्रयेय सौख्यं भवतः कृपातः ॥ २० ॥ ३३ ॥

मतिस्तर्केणोहापोहरूपेण नापनेया न प्राप्या किन्त्वन्येन गुरुणा प्रोक्तैव सुज्ञानाय सुबोधायेति । गुरूपसदनपरेयम् । नवोऽश्वो यथा दुर्दमो भवति तथा मनोऽपीति साम्यात् । इत्यर्थ इति–दुःखतरणज्ञानाभावात्तदनुभवन्तीति भावः । 'कर्णधारस्तु नाविकः' इत्यमरः । छन्दोभङ्गभयात्कर्णधरा इति । यो मनुष्यदेहं प्राप्य गुरुं नाश्रयते सोऽतिपापीयान्भवतीत्यभिप्रायेणोक्तं श्रीकृष्णेनैकादशे–'नृदेहमाद्यम्' इति। नृदेहं प्लवं संसारतरणसाधनं सुलभमधुना विना यत्नं प्राप्तं सुदुर्लभं पुनर्यत्नेनापि प्राप्तुं दुर्लभं सुकल्पं रोगादिरहितमाद्यं पुरुषार्थचतुष्टयहेतुम् । यद्वा–आद्यं द्विजोत्तमरूपं नृदेहं प्राप्येति शेषः । मयाऽनुकूलेन पवनेन पवनवत्पारं नेतुं चालयित्रेत्यर्थः । ईरितं प्रेरितम् । गुरुरेव कर्णधारो यस्मिंस्तम् । यो भवाब्धिं संसाराब्धिम् । स आत्महा आत्मघातीत्यर्थः । अभियुक्तोक्तं गुरुलक्षणमाह–प्राकृतैर्नरनागपैशाचादिभाषाभिः संस्कृतैर्देवभाषाभिर्गद्यैश्छन्दोबंधहीनवाक्यैः पद्यैश्छन्दोबंधयुक्तैर्वाक्यैरक्षरैर्देशभेदभिन्नैर्वर्णैः देशभाषा तत्तद्देशभाषादिना संकेतैः परंपरावाप्तैः बोधयेत् विद्वांसं कुर्यात्स गुरुरिति । इति भांत्र इति–गुरुभक्तिलब्धोपायं विना संसारतरणं भवतीति तात्पर्यम् । स्वामिनां यदेति–पदं स्थानम् । निरस्तोऽखिलसाधनश्रमो येन स तथा ॥ * ॥ **श्रीधरानुयायिनी**–सा च भगवति भक्तिर्गुरूपदेशसाध्यं मनोनिग्रहं विना दुर्लभेत्याहुः–विजितेति । हे अजित जितेंद्रियप्राणैर्योगिभिरप्यशक्यवशीकारमतिचञ्चलं दुर्दमतुरगतुल्यं मनो वशीकर्तुं गुरूपदेशं विना कर्णधारस्य गुरोस्तव परिचरणं विना वा ये प्रयतन्ते तेऽनेकविधभक्तिभिन्नोपायक्लेशेन दुःखिता एव "युञ्जानानामभक्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन्दृश्यते क्वचिदुत्थितम् ॥" इत्युक्तेर्मनोनिरोधरूपफलालाभाद्व्यसनशतान्विता असंख्यविपदाकुलाः सत्स्वपि ज्ञानसाधनेषु संसारसमुद्रे कर्णधारं विना नाव्यारूढा वणिजः सत्यपि पोते समुद्र एव निमज्जन्ति एवञ्च गुरूपदिष्टसत्साधनानुष्ठानेनानायासेन स्थिरीकृते मनसि स्वत एव भगवन्मूर्तिस्फूर्तीरिति सुलभा भक्तिरिति भावः ॥ **विश्वनाथी**–तच्छ्रुत्वान्याः श्रुतय आहुः–वयमित एव श्रीगुरुचरणाश्रयं प्रशंसामः, सर्वगुरुत्वस्य त्वदुपदेष्टृगुरुत्व एव विश्रान्तेः, तत्प्रभावं विना त्वद्भावासिद्धेश्च । साप्यस्तु संसारध्वंसनिदानम् केवलमनोनिरोधोऽपि न स्यात्– "युञ्जानानामभक्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन्दृश्यते क्वचिदुत्थितम् ॥" इति न्यायेन त्वद्भक्त्यभावात्तदासिद्धेः । यतो विजितेति–हे अज जीववज्जन्ममात्रेण सुकरं यत्प्रत्यक्षत्वं तदतीतेत्यर्थः । ये तादृशस्य गुरोश्चरणं समवहाय ईषदप्यनाश्रित्य यतः स्वत एवातिलोलं तदनाश्रयेणादान्तं दमनाशक्यं च मनस्तदेव तुरगस्तं विजितहृषीकवायुभिः प्राणैरिन्द्रियैश्च विजितैः क्रियमाणैर्नियन्तुं प्रयतन्ते ते तु तद्विजयाद्युपायेषु खिद्यमाना एव भवन्ति यतस्तत्प्रभावं विना व्यसनशतान्विता भवन्ति । अतः साधनबाहुल्ये सत्यपि वणिजः सांयात्रिका जलधावकर्णधरा इव संसारजलधावेव तिष्ठन्ति न तु तत्पराः परमानंदद्वीपायमानं त्वां प्राप्नुवन्तीत्यर्थः । श्रुतयः "तद्विज्ञानार्थम्" इत्याद्याः, "आचार्यवान्पुरुषो वेद" इत्याद्याः, "सर्वं ह्येतद्गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत्" इत्याद्याः स्मृतयश्च (२०) ॥ ३३ ॥

नीलकंठी–एवं ज्ञानान्मुक्तिरन्यथा बंध इत्युक्तम् । तत्र ज्ञानावाप्तये "परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" इति श्रुतिभ्यामुक्तं निर्वेदपूर्वकं गुरुभजनमाह–विजितहृषीकवायुभिरिति । हे अज ये नरा गुरोश्चरणं समवहाय परित्यज्य विजितानि हृषीकाणि इन्द्रियाणि वायवश्च प्राणा यैस्ते तैः अदान्तंप्रतिपत्त्ययोग्यं मनस्तुरगं चित्तहयम् अतिलोलं स्वभावतः तं नियन्तुं निग्रहीतुं यतान्ति यतन्ते यत्नं कुर्वन्ति ते इह संसारे जलधौ अकृतकर्णधराः वणिज इवावसन्नाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वजनसुतात्मदारधनधामधराऽसुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे ॥
इति सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगे ॥ २१ ॥ ३४ ॥

"परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन" ॥ तथा "यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इत्याद्या वैराग्यमंगं विदधतीत्याह । स्वजनसुतेति । आत्मा देहः । धाम गृहम् । असुः प्राणः । स्वजनादिभिः किम् । सर्वरसे सर्वे रसाः सुखानि विद्यंते यस्मिंस्त स्मिंस्त्वयि परमानंदे "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति" इति श्रुतेः । श्रयतस्त्वां सेवमानस्य पुंस आत्मनि सति नृणां तुच्छैरेतैः किं क उपयोग इति सत् सत्यं परमार्थसुखमजानतामत एव मिथुनतः स्त्रिया मिथुनीभूय रतये मायासुखाय चरतां प्रवर्तमानानाम् । कर्मणि षष्ठ्यौ । अजानतश्चरतः पुरुषान् को न्वर्थः सुखयत्यानं दयति न कोपीत्यर्थः । इह संसारे । कथंभूते । स्वविहते स्वत एव नश्वरे । स्वनिरस्तभगे स्वत एव गतसारे । पाठांतरे तु को न्वित्यस्यैतद्विशेषणद्वयम् । अतस्त्वद्भजनमेवो चितमित्यर्थः ॥ भजतो हि भवान्साक्षात्परमानंदचिद्घनः ॥ आत्मैव किमतः कृत्यं तुच्छदारसुतादिभिः ॥ २१ ॥ ३४ ॥

सन्ति न बहिर्निर्गन्तुं शक्नुवन्तीत्यर्थः । अत एव ते उपायखिदः आसनबंधाद्यैरुपायैः खिद्यन्ते व्यर्थश्रमा इत्यर्थः । व्यसनशतान्विताश्च ते भवन्ति व्यसनानि नानौषधिमन्त्रयन्त्रादिशक्तिपातादिसाधनानि प्राकृतानिदावभा रद्वाजादिवदर्थानुष्ठानपाठाग्रहरूपाणि तेषां शतैरन्विताः । गुरूपयुक्तिं विना नानोपायैरपि मनोजयो न भवति तदभावादभवे भावनिधानासंभवः ततो भवभयं न निवर्तते । इति मुमुक्षुणा गुरुभक्तिपूर्वकं श्रवणादि कर्तव्यमित्यर्थः (२०) ॥ ३३ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—इदानीं भक्तेरङ्गं वैराग्यमाहुः परीक्ष्येत्याद्याः श्रुतयः—यदेति । व्याख्यातापि पुनरत्र व्याख्यानं सुखबोधाय । अस्य विदुषो ज्ञानात्प्राक् ये कामा वासनारूपेण हृदि मनसि स्थिताः ते सर्वे यदा प्रमुच्यन्तेऽथाऽनंतरं मर्त्योऽमृतो भवति तदाऽत्रैव दीपनिर्वाणवत्सर्वबंधनोपशमात् ब्रह्म समश्नुते ब्रह्मैव भवतीति । कामास्तु मनस्येव स्थिता न त्वात्मनि । तथा च श्रुतिः—"कामः संकल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनएवेति" किंकिं प्रयोजनं न किमपीत्यर्थः । 'रसः स्यात्पारदे सुखे' इति धरणिः । परमानन्दत्वे पूर्णां श्रुतिमाह, यथा—"स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानु ष्यकैर्भोग्यैः सम्पन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानंदाः स एकः पितृलोक आनन्दोऽथ ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोकानामानन्दाः स एकः कर्मदेवानामानन्दोऽथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दोऽथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दोऽथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मण आनन्दो ऽथैष एव परम आनन्द एषोऽस्य परमानन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति । आजानदेवा अधिकारिण इन्द्राद्याः । कर्मदेवाः कर्मणा देवभावं प्राप्ताः । मात्रा अंशः । स्पष्टमन्यत् । आत्मनि त्वयि अत एव ज्ञानाभावादेव । पाठान्तरे स्वविहितः स्वनिरस्तभग इति पाठे यतोऽज्ञानां सुखाभावोऽतो हेतोः । इत्यर्थ इति—तव ज्ञानार्थं तव भजनमेव योग्यम् 'अयुज्यमानया भक्त्या' इत्याद्युक्तेरिति भावः । स्वामिनाम्—भजत इति । हि यतो भजतो जनस्य साक्षादात्मैव भवान्भवति अतस्तुच्छैर्दारादिभिः किं कृत्यं न किमपि अवाप्तावाप्तव्यत्वात् ॥ * ॥ **श्रीधरानुयायिनी**—इदानीं भक्तौ वैराग्यमङ्गमाहुः—स्वजनेति । नृणां भारतखण्डवासिनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुष्याणां मध्ये श्रयतः अनेकजन्मसाधितपुण्यपुञ्जस्य कस्यापि विरलस्य गोप्यादेरिव यज्ञपत्न्यादेरिव वा त्वामनन्यभक्त्या सेवमानस्य सर्वरसे सर्वसुखस्वरूपे सर्वेषां सुखानां बिम्बभूते "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेरात्मनि जीवननिदाने च त्वयि सति सन्निहिते सति वा तुच्छैः स्वजनसुतशरीरप्राणपत्नीपतिधनधामादिभिश्चिन्तामणौ लब्धे काचादिभिरिव किमपि तु न किमपि प्रयोजनमिति यत्तत्सत्यमेव अत एव स्वाम्यादिभिर्निरोधिता अपि श्रीरासलीलादिविलासार्थे गोप्यस्त्वद्दर्शनार्थे यज्ञपत्न्यो वा त्वामेवाभिययुः । किञ्चाजानतां चरतामिति कर्मणि षष्ठ्यौ अजानतः प्रागुक्तमिदं सत्यतया ये न जानन्ति तान्स्वत एव नश्वरे गतसारे च इह देहादिसंसारे मिथ्याभूताय मिथुनीभूय कामसुखलेशलवाय कृतव्यर्थश्रमान् त्वद्दयां विना कोऽर्थः स्वजनादिः सुखयत्यपि तु न कोऽपि कचिच्चक्रवर्तिनामप्याधिव्याध्यादिना स्वजनसुतविरोधादिना वा सुखलेशादर्शनात् । यद्वा—भगवद्भजनमेव सदित्यजानतो दीक्षितविप्रादीन् मिथुनतो रतये स्वर्गादावुर्वश्यादिभिर्मिथुनीभूय रतये कामसुखाय चरतो यज्ञादिकर्म कुर्वतः स्वत एव नश्वरे गतसारे च इह ऐहिकविषयतुल्ये यज्ञादिफलीभूते स्वर्गादौ कः पदार्थः सुखयति अपि तु न कोऽपि स्वर्गादिपतीनामपीन्द्रादीनां विपत्सहस्रश्रवणात्तत्रापि तवानुग्रहं विना न किमपि सुखमतस्त्वद्भजनमेवोचितमित्याशयः ॥ * ॥ **विश्वनाथी**—अत एव वयमन्यासक्तिं निन्दामः किन्तु केवला भक्तिरेव कार्येति वदामः । नृणां श्रयतां मध्ये श्रयतः सेवमानस्य त्वय्यात्मनि परमात्मनि प्राप्तव्ये सति स्वजनाः स्वीयसेवकजनाः सुता गुणवन्तः पुत्रा आत्मा सुंदरं शरीरं दाराः सुन्दर्यः कामिन्यः धनानि स्वर्णादिरत्नादिसम्पदः धामानि दिव्या गृहा धरा भूयसी पृथ्वी असवः शारीरबलानि रथास्तदुपलक्षिता हस्त्यश्वादय एतैः कामितैः किं फलमित्यर्थः । अन्यत्सर्वं स्वामिचरणोक्तिवत् । "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति ब्राह्मणमत्रानुसन्धेयम् (२१) ॥ ३४ ॥

नीलकंठी—तत्र "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" इति स्मृतेर्गुरुर्मनोजयाभ्यासवैराग्ये उपदिशति तत्र वैराग्येण विषयस्रोतः खिलीक्रियते अभ्यासेन कल्याणस्रोत उद्घाटयते तद्द्वयं क्रमेण द्वाभ्यामाह—स्वजनसुतेति । नृणां त्वयि सति स्वजनादिभिः किमित्यन्वयः । आत्मा देहः, स च द्विविधो विदितो मैत्रायणीये—"भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तकफसंघाते दुर्गन्धे निःसारेऽस्मिञ्छरीरे किं कामोपभोगैः कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसम्प्रयोगक्षुत्पिपासाजरामृत्युरोगशोकाद्यैरभिहतेऽस्मिञ्छरीरे किं कामोपभोगैः" इति । अथान्यत्राप्युक्तम्—"शरीरमिदं मैथुनादेवोद्भूतं संवृद्ध्युपेतं निरयेऽथ मूत्रद्वारेण निष्क्रान्तमस्थिभिश्चितं मांसेनानुलिप्तं चर्मणावनद्धं विण्मूत्रपित्तकफमज्जामेदोवसाभिरन्यैश्चामयैर्बहुभिः परिपूर्णं कोश इव सुनेति" इति च । कोशो जरठकोशातकी सुना तन्तुजालेन धाम गृहम् असुः प्राणः रथो गजादेरुपलक्षणम् । कीदृशे त्वयि श्रयत आत्मनि त्वां ध्यायतः प्रत्यग्भूते अत एव सर्वरसे "सद्वैतत्सुकृतं रसो वै सः रसं ह्येवायं लब्ध्वानन्दीभवति" इति श्रुतेः "यथा कृताय विजितायाधरे याः संयन्त्येवमेवैनं सर्वं तदभिसमैति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद" इत्यात्मविद्यायां सर्वसाधुक्रियाफलान्तर्भावश्रुतेश्च निरुपाधिप्रेमगोचरत्वलिंगाच्च सर्वसुखस्वरूपे अत एव त्वयि लब्धे स्वजनादिभिः किमपि प्रयोजनं नास्ति इत्येवंप्रकारेण सत्प्रत्यगात्मैव परं ब्रह्मेत्यजानतामत एव मिथुनतो विषयसंबंधेन रतये सुखाय चरतामितस्ततो धावतां कर्माणि षष्ठ्यौ तानिह संसारे कोनु स्वजनादिष्वन्यतमः स्वविहते स्वतो नश्वरे "सर्वं चेदं क्षयिष्णु यथेमे दंशमशकादयः" इत्युपक्रम्य "शोषणं महार्णवानां शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं व्रश्चनं वातरज्जूनां निमज्जनं पृथिव्याः स्थानादपसरणं सुराणाम्" इति मैत्रायणीये सर्वस्य क्षयिष्णुत्वोपपादनात् "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति ब्रह्मलोकसहितानां लोकानामसकृदावृत्तिश्रवणाच्च । स्वनिरस्तभगे निरस्तैश्वर्ये । एतदपि । तत्रैव श्रूयते—"महानदीषूर्मय इवानिवर्तकमस्य यत्पुरा कृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनं सदसत्फलमयैः पाशैः पंगुमिव बद्धबन्धनस्थस्येवास्वातन्त्र्यं यमविषयस्वरूपस्येव बहुभयावस्थं मदिरोन्मत्त इव मोहमदिरोन्मत्तं पाप्मना गृहीत इव भ्राम्यमाणं महोरगदष्टमिव विषयाविष्टं महान्धकारमिव रागान्धमिन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शनं कदलीगर्भ इवासारं नट इव क्षणवेषं चित्रभित्तिरिव मिथ्यामनोरमम् ।" इति । एवं बाह्यविषयसंगेन सुखप्रेप्सून्नरापसदानिह संसारे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुवि पुरुपुण्यतीर्थसदनान्यृषयो विमदास्त उत भवत्पदांबुजहृदोऽघभिदंघ्रिजलाः ॥
दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुखे न पुनरुपासते पुरुषसारहरावसथान् ॥ २२ ॥ ३५ ॥

एवं गुरूपदेशेन तत्त्वमवगम्य सारासारविवेकेन च सर्वतो निर्विद्य तदेव महत्संगेनोपपत्तिभिः सम्यगवधारयितुं तीर्थसदनानि मुनयः पर्यटंतीति "श्रोतव्यो मंतव्यः" इत्यादिश्रुत्यर्थमाह । भुवि पुरुपुण्यतीर्थसदनानीति । ते उक्तलक्षणा ऋषयो विमदा निरहंकारा यतो भवत्पदांबुजहृदः भवतः पदांबुजं हृदि येषां तेऽतःस्वयमेवाघभिदंघ्रिजलं येषां ते उत अपि तथाविधा अपि पुरूणि बहूनि पुण्यानि तीर्थानि सदनानि च क्षेत्राणि तान्येवोपासते सेवंते प्रायस्तत्रैव महत्संगो भवतीति । अथवा पुरु अधिकं भगवद्भजनलक्षणं येषां तानि च तानि तीर्थानि च गुरवो महांत इत्यर्थः । तेषां सदनान्याश्रमान् । यथाहामरसिंहः । "निपानागमयोस्तीर्थमृषिजुष्टे जले गुरौ" इति । न पुनः पुरुषसारहरावसथानुपासते पुरुषाणां सारं विवेकस्थैर्यधैर्यक्षमाशांतिप्रमुखं हरंतीति तथा ते च ते आवसथा गृहास्तान् । न च तेषां गृहादिभवकुत्सितसुखापेक्षेत्याह । दधति सकृन्मनस्त्वयि य आत्मनि नित्यसुख इति । सकृदपि त्वयि ये मनो दधति तेऽपि गृहाद्यासक्ता न भवंति किं पुनरेवंभूता इत्यर्थः ॥ मुंचन्नंग तदंगसंगमनिशं त्वामेव संचिंतयन्संतः संति यतोयतो गतमदास्तानाश्रमानावसन् ॥ नित्यं तन्मुखपंकजाद्विगलितत्वत्पुण्यगाथामृतस्रोतःसंप्लवसंप्लुतो नरहरे न स्यामहं देहभृत् ॥ २२ ॥ ३५ ॥

त्वविहते स्वनिरस्तभगे च स्वजनादिष्वन्यतमः को नु सुखयति न कोऽपीत्यर्थः । तस्मादात्मैव सर्वरस इत्यन्वेष्टव्यः । तथा च श्रुतिः–"तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा" इति । अन्यत्रापि–"न वा अरे पत्युः कामाय पतिः प्रियो भवति" इत्युपक्रम्य "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्" इति (२१) ॥ ३४ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–इत्थं तदेव गुरूपदेशाततत्त्वम् उपपत्तिभिरुपपादनयुक्तिभिः । श्रुतिस्तु "श्रोतव्यः" इत्यादि । तथा–"तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति" इत्यादि । अर्थस्तु–हे गार्गि तदेतदक्षरं ब्रह्मान्यैरदृष्टं स्वयं सर्वेषां द्रष्टृ तथाऽश्रुतं श्रोतृ अमतं मननाविषयं स्वयं मन्तृ अन्यैरविज्ञातं स्वयं विज्ञातृ अतोऽन्यत्किञ्चिदपि वस्तु द्रष्टृश्रोत्रादि नास्तीति एतन्मननार्थं पर्यटन्तीत्युक्तम् । उक्तलक्षणा गुरूपदेशावाप्तविद्याः तथाविधा निजाङ्घ्रिजलस्पर्शिपापनाशका अपि प्रायो बाहुल्येन तत्रैव तीर्थक्षेत्रेष्वेव । प्रायःपदेनास्वरसादाह–अथवेति । इत्यर्थ इति–तीर्यते संसारो यैरित्यर्थसाम्यान्महान्तोऽपि तीर्थान्येवेति भावः । तीर्थपदस्य गुरुवाचकत्वे प्रमाणमाह–यथेति । एवंभूताः सदा भक्ताः । इत्यर्थ इति–सदा हरिभक्तिपराणां तु गृहाद्यासक्तिः कदापि न संभवतीति । स्वामिनाम्–मुञ्चन्निति । अंगेन स्वांगेन तेषां पुरुषसारहरावसथानां जायापत्यादीनां संगं मुञ्चन् तन्मुखपंकजात्सतां मुखकमलात् विगलिते त्वत्पुण्यगाथामृतस्रोतसि यः सम्प्लवः स्नानं तेन सम्प्लुतो युतः, पुनरहं देहभृन्न स्यां भवेयम् ॥ * ॥

श्रीधरानुयायिनी–गुरूपदिष्टतत्त्वनिश्चायकसत्संगार्थं तीर्थसेवामुपदिशन्ति–भुवीति । हृद्गतभवत्पादप्रभावेण स्वत एव पापापनोदकपादोदका अपि निरहंकाराः प्रागुक्ताः भगवद्भक्ताः सत्संगार्थं बहूनि बहुपुण्यजनकानि श्रीगंगादितीर्थानि श्रीवृन्दावनादिक्षेत्राणि च सेवन्ते । यद्वा–भगवद्भजनाभिधबहुपुण्यशालिनां महतामाश्रमान्सेवन्ते न पुनः पुरुषसाररूपविवेकधैर्यादिहरान् गृहान् यतो ये त्वय्यात्मनि नित्यसुखे सकृदपि मनो धारयन्ति तेऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहाद्यासक्ता न भवन्ति किं पुनः प्रागुक्ता मुक्ता भगवद्भक्ताः । यद्वा—तदेवं याज्ञिकविप्रप्रसंगेनाभक्ता योगिनोऽर्थपराश्च निन्दिताः । अथ परमनिर्भयश्रीकृष्णचन्द्रदर्शनार्थं कुतोऽपि मिषात् क्रोशचतुष्टयमात्रव्यवहितत द्विहारभूमौ वासमसाधितवतस्तानेव पुनर्निन्दन्ति—एतेन प्रकटीभूय श्रीकृष्णदर्शनार्थमस्मद्गमने कंसस्तत्र श्रीकृष्णं निश्चित्यापकारं करिष्यतीति भगवति कंसकृतानिष्टभयं कंसदत्तजीविकोच्छेदादिभयञ्च निरस्तम् । भुवीति—ये त्वयि स्वस्वरूपे नित्यसुखस्वरूपे च सकृदपि मनो धारयन्ति तेन ते स्वमनसि त्वत्पदाम्बुजं दधाना अत एव स्वयमघभिदंघ्रिजलाश्च भूत्वाऽत एव ऋषयः परमपूज्या निरहंकाराश्च भूत्वा भुवि सर्वतोऽपि पुरुपुण्यानां सार्धं विजह्रुः । कृतपुण्यपुञ्जा इत्युक्तमहिम्नां श्रीगोपानां तीर्थरूपाणि सदनानि गृहान् तथा श्रीकृष्णविहारमहिष्ठानि श्रीवृन्दावनस्थानानि चोपासते न पुनः पुरुषसारहराणां कंसादिदुष्टानामावसथान् तत्पालितनगरगृहादीनित्यर्थः । अतस्तत्पराङ्मुखा याज्ञिकविप्रादयो मन्दभाग्या एवेत्युपसंहारः । यद्वा—पुरुषसार हे पुरुषोत्तम ये एकवारमपि त्वयि मनो धारयन्ति ते पुनर्जन्मान्तरे हरस्य श्रीरुद्रस्यावसथान् श्मशानभूमीर्न सेवन्ते जन्ममरणशून्या भवन्तीत्यर्थः । "महाभाग्यन्तु कैवल्यमज्ञानां कः प्रदास्यति । अतः सन्तो विजानंति हरिन्ते त्वनहंकृताः ॥ " इति विमदपदार्थः । अंगं शरीरं तदंगानि सुतदारधनादीनि तेषु संगमासक्तिं मुञ्चन्निति स्वामिश्लोकपदार्थः ॥ * ॥ **तोषिणी**—तदन्याः सदाचारेण द्रढयन्ति—भुवीति । ऋषयः सर्ववेदतत्त्वज्ञा ये सकृदपि मनो दधति ते पुनः स्वजनादिमयान्पुरुषसारहरावसथान्नोपासते इत्यादि तैर्व्याख्यातम् । ॥ * ॥ **विश्वनाथी**—स्वजनादींस्त्यक्त्वा साधवो भजनानुकूलेषु तीर्थेषु वसंतीत्याहुः--भुवि पुरुपुण्यानि तीर्थानि गंगादीनि सदनानि वृंदावनादिक्षेत्राणि भगवद्धामानि ऋषयो भक्ता अधिवसंतीति शेषः । विमदा विगतगर्वाः । उत यतस्ततः भवत्पदाम्बुजहृदः मनसि त्वत्पदाम्बुजं दधानाः अत एवाघं भिन्दंति अङ्घ्रिजलानि येषां ते तादृशाः कदापि स्वजनसुतात्मदारगृहान्नोपासते इति किं वक्तव्यम् । ये जनाः सकृदपि त्वयि नित्यसुखमय स्वरूपे मनो दधति तेऽपि पुनः पुरुषाणां सारं विवेकधैर्यक्षांत्यादिकं हरंतीति तथाभूतानावसथान् गृहान्नोपासते । अत्र श्रुतयः—"सकाम्या मेरोः श्रृंगे यथा सप्तपुर्यो भवंति तथा सकाम्या निष्काम्याश्च भूगोल चक्रे सप्तपुर्यो भवंति तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हि" इति "मथुरायां स्थितिर्ब्रह्मन्सर्वदा मे भविष्यति । चित्स्वरूपं परं ज्योतिःस्वरूपं रूपवार्जितम् ॥ हृदि मां संस्मरन्ब्रह्मन्मत्पदं याति निश्चितम् । " इति श्रीगोपाल तापन्याम् (२२) ॥ ३९ ॥

नीलकण्ठी—एवं वैराग्यमुक्त्वा यान्येव विद्वल्लक्षणानि तान्येव ज्ञानसाधनानीति मत्वा विद्वदाचारप्रदर्शनेनाभ्यासं विधत्ते—भुवीति । ये त्वयि नित्यसुखे आत्मनि प्रतीचि सकृन्मनो दधति त एव भुवि कर्मभूमौ पुरुपुण्यादिमन्तः सन्तः पुनः ज्ञानोत्पत्त्यनन्तरं पुरुषसारहरावसथान् पुरुषाणां सारं बुद्धिवैभवं हरन्ति तादृशान्गृहान् न एवोपासते "दृष्टाऽऽनुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् " " तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् " इति योगोक्तदिशा साधकदशायामेव विरक्तस्य सिद्धदशायां ज्ञातविषयवैरस्यस्य सुतरां तेषु वैतृष्ण्यं भवतीति भावः । अत्र पुरूणि पुष्कलानि पुण्यानि इष्टापूर्तव्रतजपादीनि चित्तशुद्धिद्वारा आत्मविविदिषोत्पादकानि " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन " इत्यादिश्रुतेः तीर्थसदनं गुरूपसदनं तेन तद्वारके श्रवणमनने लक्ष्येते । " आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः " इत्यात्मदर्शनार्थत्वेन वेदान्तश्रवणादिविधानात् पुरुपुण्यतीर्थसदनानि कृतवन्तः इत्यध्याहारः । अत एव ऋषयः ऋषन्ति प्राप्नुवन्त्यात्मानमित्यृषयः पारोक्ष्येण ज्ञातात्मतत्त्वा भूत्वा विमदाः, अत्र मदाभावेन शमादिषट्कमुच्यते । तथा च श्रुतिः—" तस्मादेवंविच्छान्तो दान्त उपरतास्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् " इति । " श्रद्धान्वितो भूत्वा " इति शाखान्तरम् । श्रवणादिप्रणाड्या परोक्षज्ञानवत आत्मापरोक्षार्थं शमादीन्विधत्ते । प्रणाड्यन्तरमाह—उतापि च भगवतो विष्णोः पदं पदनीयं " सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् " इति श्रुत्युक्तं कृष्णादिमूर्तेः पदं वा अम्बुजवदभिरामं तत्रैव हृन्मनो येषां ते निर्गुणस्य सगुणस्य ब्रह्मण उपासका इत्यर्थः । तेऽप्यावसथान्नोपासत इत्यावर्तते उभयेऽपि अघभिदङ्घ्रिजलाः शुद्ध्यादिकामैराराधनीया इत्यर्थः । "यंयं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् तंतं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः " इति श्रुतेः (२२) ॥ ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत इदमुत्थितं सदिति चेन्ननु तर्कहतं व्यभिचरति क्व च क्व च मृषा न तथोभययुक् ॥
व्यवहृतये विकल्प इषितोंधपरंपरया भ्रमयति भारती त उरुवृत्तिभिरुक्थजडान् ॥ २३ ॥ ३६ ॥

नन्नु 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् ।' 'तद्भूतानां क्रियार्थेन समन्वयः' इति तत्रतत्र जैमिनिना वेदस्य क्रियापरत्वाभिधानादुपनिषदामपि तदेव युक्तम् । यथोक्तं तंत्रवार्तिककृता । एतेन क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकांक्ष्यं व्याख्यातमिति न "एकमेवाद्वितीयं ब्रह्म । विज्ञानमानंदं ब्रह्म । अचक्षुरश्रोत्रम्" इत्येवं तद्विपरीतात्मप्रतिपादनात् । नह्यद्वितीयपरमानंदरूपस्य कर्मांगत्वं युज्यते । अननुमतं चैतद्वार्तिककृतः । कथम् । "सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते ॥ परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यताम्" इति तेनैवोक्तत्वात् । एतदर्थमेव मननाय मुनयः पर्यटंतीत्युक्तम् । तत्र तावद्द्वैतस्य सत्यत्वे भवेदप्येवं

भावार्थदीपिकाप्रकाशः वंशीधरी—मीमांसका हि कर्मण एव स्वर्गादिरूपपुरुषार्थहेतुत्वं निश्चित्य सर्वस्य वेदस्य क्रियापरत्वं यज्ञादिकर्तुर्यजमानस्य कर्माङ्गस्य स्तावकत्वेनोपनिषदामपि क्रियापरत्वं वर्णयन्तीति तन्मताभिप्रायेणाक्षिपति—नन्विति ।"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते" इति पूर्वपक्षसूत्रम् । अस्यार्थः—"चोदनालक्षणोऽर्थो धर्मः" इत्युपक्रमात् "तस्य ज्ञानमुपदेशः" इति मध्ये परामर्शात् "तद्भूतानां क्रियार्थेन समन्वयः" इत्युपसंहाराच्चाम्नायस्य क्रियार्थत्वमवगतम् । ततश्चायमर्थः—आम्नायस्य वेदस्य क्रियार्थत्वात् यज्ञादिक्रियापरत्वात् अतदर्थानामक्रियार्थानां वेदानामानर्थक्यमनर्थता "सोऽरोदीत्तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदद्देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्" इत्येवमादीनामानर्थक्यं धर्माधर्मरूपार्थप्रतिपादकत्वराहित्यं तस्मादेवञ्जातीयकं वाक्यजातमनित्यमुच्यतेऽनित्यमिव न पुनरनित्यमेव अपौरुषेयत्वेन तन्निरासात् । एवमादिवाक्यानामक्रियार्थत्वं तु रोदनवपोत्खातादिगज्ञानादिरूपसिद्धार्थबोधकत्वेनेति बोद्धव्यम् । अथ सिद्धान्तसूत्रमाह—"तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात्" इति सूत्रम् । अस्यार्थः—तेषु पदार्थेषु रोदनवपोत्खातदिगज्ञानादिषु भूतानां वर्तमानानां पदानां सोऽरोदीदित्यादीनां क्रियार्थेन पदेन यजेतेत्यादिना समाम्नायः समुच्चारणं सम्बन्ध इत्यर्थः । कुतः, अर्थस्य पदार्थस्य तन्निमित्तत्वात् तस्य वाक्यार्थप्रत्ययस्य निमित्तत्वात् पदानि तावत्स्वार्थानभिदधति पश्चात्ते पदार्था आकांक्षायोग्यतासन्निधिमत्त्वाद्वाक्यार्थमवगमयंति अत आकांक्षादिमहिम्ना रोदनादिवाक्यानां कथञ्चिद्विध्येकवाक्यता कल्पनीयेति तस्माद्यथाशक्ति आवेशेन क्रिया कर्तव्येत्यर्थः । "कल्प्यते—" इत्यादिसूत्रैर्मीमांसायां तत्रतत्र जैमिनिना वेदस्य क्रियापरस्याभिधानादुपनिषदामपि क्रियापरत्वमेव युक्तं यथोक्तमिति क्रत्वर्थः यज्ञांगभूतो यः कर्ता यजमानस्तस्य प्रतिपादनं तत्त्वमसीत्यादिवाक्यैरीश्वराभेदेन स्तुत्यत्वेन निरूपणम् । एतेनोपनिषदां नैराकांक्ष्यं सार्थकत्वं ब्रह्मप्रतिपादनरूपं प्रत्याख्यातमपास्तम् । उपनिषद्भिर्यजमानः स्तूयते न तु निर्विशेषं ब्रह्म प्रतिपाद्यत इति भावः । तदेवं वेदस्य क्रियापरत्वाभिधानमुपनिषदां नैराकांक्ष्यमीश्वरस्य कर्मांगत्वं न भवतीत्याह—नेति । एकमेवाद्वितीयमित्यादिश्रुतिभिस्तदुक्ताद्विपरीतस्यात्मनः प्रतिपादनात् न ह्यद्वितीयपरमानन्दरूपात्मनः कर्मांगत्वं युज्यतेऽतो न भवति कर्तुः स्तुतिरियमित्यर्थः । कथं तर्हि वार्तिककृता तथा व्याख्यातं, सत्यम्, एतद्व्याख्यानं तस्य वार्तिककृतोऽप्यननुमतमसंमतमास्ति कथमिति चेदाह—सर्वत्रेति । असंसार्यात्मज्ञानं विना हि सर्वत्र विज्ञानं यत्किञ्चिद्विविधज्ञानजातं संस्कारत्वेन गम्यते ज्ञायते परेषां कर्मणामंगं परांगं ज्ञानञ्च प्राक्कृतस्यानुप्रवर्तकः संस्कारः जातमात्रस्य स्तनपानादिज्ञानं संस्कारवशादेव जायते औपनिषदं परमात्मज्ञानन्तु गुरूपदेशं विना न भवतीति तात्पर्यम् । तेनैव वार्तिककृतैवैतदर्थमेवात्मज्ञानार्थमेव पूर्वोक्तश्रुतिसमूहाविरोधनिवृत्त्यर्थं मननस्योपयोगोऽस्तीत्युक्तमेतदर्थं मननायेति । तत्र तावत्तव मतेऽपि द्वैतस्य स्वर्गादिविश्वस्य सत्यत्वे भवेदेवम्, उपनिषदां यजमानस्तुतिपरत्वं स्यात् । तदेव, उपनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेव तु न संभवतीति प्रश्नोत्तराभ्यां मननेन तत्त्वावधारणप्रकारमाह । सत इदमुत्थितं सदिति चेदिति । इदं विश्वं धर्मि । सदिति साध्यो धर्मः । सत उत्पन्नत्वाद्धेतुः । यद्यत उत्पन्नं तत्तदात्मकमेव दृष्टम् । यथा कनकादुत्पन्नं कुंडलादि तदात्मकं तद्वदिति । तत्र यदि सदभेदः साध्यते तदाऽपादानत्वनिर्देशेनैव भेदप्रतीतेर्विरुद्धो हेतुरित्याह । ननु तर्कहतमिति । ननु नाभेदं साधयामः किंतु तदुत्पन्नत्वेन कुंडलादिवद्भेदं प्रतिषेधयामः । तत्राभेद एव स्यादित्याशंक्यानैकांतिकत्वेन दूषयति । व्यभिचरति क चेति । पितृपुत्रादिषु मुद्गरघटप्रध्वंसादिषु च तथादर्शनादिति भावः । ननु तदुत्पन्नत्वं नाम तदुपादानत्वं न तु तन्निमित्तत्वमतो नानैकांतिकत्वमित्याशंक्य दूषयति । क्वच मृषेति । गुणोपादानस्यापि फणिनो न गुणत्वं किंतु मिथ्यात्वम् । अन्यथा कुंडलादिवदबाधप्रसंगात् । अतः पुनरप्यनैकांतिकत्वमेवेति भावः । ननु न तत्र केवलं गुणमात्रं फणिन उपादानं किंत्वविद्यायुक्तम् । तथाभूतस्यावस्तुत्वाद्युक्तं फणिनो मिथ्यात्वमित्याशंक्य तत्तुल्यमत्रापीति दूषयति । न तथोभययुगिति । अयमर्थः । अत्राप्यविद्यायुक्तस्यैव

षदां यजमानस्तुतिपरत्वमेव न संभवतीति प्रश्नोत्तराभ्यां मननेन विचारेण तत्त्वावधारणस्य परमार्थनिश्चयस्य प्रकारं रीतिमाह—सत इति । धर्मिपक्षः, सतः परमेश्वरात् इदमनुमानं मीमांसकानाम् तत्र विश्वस्मिन् सदभेदः साध्यते चेत्तदा दोषमाह वेदान्ती—तर्कहतमिति । भेदसाधकेन हेतुनाऽभेदसाधनं युक्तिविरुद्धं हेतौ सत इति पञ्चम्या अपादानार्थकाया भेदप्रतीतेर्विरुद्धो हेतुरित्यर्थः । साध्याभावव्याप्तो हेतुर्विरुद्धः, यथा—शब्दो नित्यः कृतकत्वादित्यत्र कृतकत्वहेतुः साध्याभावेनानित्यत्वेन व्याप्तस्तथात्रापि सत उत्पन्नत्वरूपो हेतुरभेदरूपसाध्यस्याभावेन भेदेन व्याप्तः, वृक्षात्पत्रं पततीत्यादाविव यत्रापादाननिर्देशस्तत्र भेद इति नियमात् न । नन्वत्राभेदं पुनर्भङ्ग्यन्तरेणाक्षिपति—नन्विति । साधयामः किन्तु तदुत्पन्नत्वेन कुण्डलादिवद्भेदं प्रतिषेधामः तद्भेदनिषेधे च जगति सत्यत्वमेव सिद्ध्येत् एवं चापादाननिर्देशेन जातापि भेदप्रतीतिर्न भेदनिषेधस्य विरोधिनी, यथा—कनकात्कुण्डलमुत्पन्नमिति पञ्चम्या जातापि भेदप्रतीतिः कारणकार्ययोः कनककुण्डलयोः सुवर्णत्वेन भेदनिषेधसाधने विरुद्धा न, तथा—सत उत्पन्नत्वादित्यपादानपञ्चम्या जातापि भेदप्रतीतिर्ब्रह्मजगतोः सत्यत्वेन भेदनिषेधसाधने विरुद्धा नेति । तथा चेदमनुमानं विश्वं सद्भिन्नं न सत उत्पन्नत्वात्, यत् यत उत्पन्नं तत्ततो भिन्नं न, यथा—कनकादुत्पन्नं कुण्डलं कनकान्न भिन्नम् अत्र हेतोः साध्याभावव्याप्तत्वाभावान्न विरुद्धो हेतुरित्यभिप्रेत्याहुः स्वामिचरणाः—तत्राभेद एवेत्यादि । तत्र भेदनिषेधे अनैकान्तिकत्वेन व्यभिचारित्वेनेति व्यभिचरति—क चेति । हेतुमति साध्याभावो व्यभिचारः । यथा—पर्वतो वह्निमान्द्रव्यत्वादित्यत्र जलादौ द्रव्यत्वरूपहेतोः सत्त्वेऽपि वह्निरूपसाध्यस्यासत्त्वाद्व्यभिचारस्तथात्रापि पितुरुत्पन्ने पुत्रे मुद्गरप्रहारादुत्पन्ने घटध्वंसे च तत उत्पन्नत्वरूपहेतोः सत्त्वेपि तद्भेदाभावरूपसाध्यस्यासत्त्वाद्व्यभिचारः । पुत्रे पितृभेदस्याभावरूपे घटध्वंसे भावरूपमुद्गरप्रहारभेदस्य च प्रसिद्धत्वात् । आदिना चक्रघटादिग्रहः । तथादर्शनाद्भेददर्शनात् । इति भाव इति—भावादभावस्याभावाद्भावस्योत्पत्तिदर्शनान्न नियतं कार्यकारणाभेदमभावादप्यविद्यानाशाद्भावरूपस्य ज्ञानस्योत्पत्तेरिति तात्पर्यम् । पुनराक्षिपति—नन्विति । तदुत्पन्नत्वं तदुपादानकत्वं तथा चेत्थमनुमानं विश्वं सतो भिन्नं न सदुपादानकत्वात्, यद्यदुपादानकं तत्तत्ततो न भिन्नमिति, अतो नात्र व्यभिचारः । पुत्रे पितृभेदाभावरूपस्य घटध्वंसे च मुद्गरभेदाभावरूपस्य साध्यस्यासत्त्वे तदुपादानकत्वरूपहेतोरप्यसत्त्वात् । न हि पुत्रस्य पिता घटध्वंसस्य मुद्गरो वोपादानकारणं किन्तु पिता मुद्गरश्च । तत्र निमित्तकारणमेव पुत्रोपादानं वीर्यं घटध्वंसोपादानं कपालादीत्याशंक्याह—क च मृषेति । क्वचिदुपादानकार्यं मिथ्या भवतीत्यर्थः । तथा च रज्जूपादानके सर्पे पुनरपि व्यभिचारः, अत्र सर्पे रज्जूपादानकत्वरूपहेतोः सत्त्वेऽपि रज्जोर्भिन्ने सर्पे रज्जुभेदाभावरूपसाध्यस्यासत्त्वात्, रज्जोर्व्यावहारिकसत्यत्वात्सर्पस्य च प्रातीतिकत्वात् तत्र सर्पे रज्जुतो भेदो निराबाध एव, अन्यथा रज्जुज्ञाने जाते सर्पस्य बाधो न स्यात् । ननु सन्मात्रोपादानकत्वं हेतुः, तथा च विश्वं सतो भिन्नं न सन्मात्रोपादानकत्वात् यत्तन्मात्रोपादानकं तत्ततो न भिन्नमित्यनुमानम् । तथा च न रज्जुसर्पे व्यभिचारः, रज्जुभेदाभावस्तदसाध्याभाववति मिथ्याभूते रज्जुसर्पेऽज्ञानयुक्तरज्जूपादानके रज्जुमात्रोपादानकत्वरूपहेतोरभावादित्याशंक्य तत्तुल्यमत्रापीत्याह—न तथेति । उभाभ्यां सदविद्याभ्यां युनक्तीति उभययुक् उभययुगपीदं जगन्न तथा न सदित्यर्थः । अविद्यासंवलितस्यैव ब्रह्मणो जगदुपादानत्वं न सन्मात्रस्येति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत उपादानत्वम् । एवंभूतस्य च न वस्तुसत्त्वम् । अतः सदुपादानत्वमसिद्धमिति न वस्तुसत्त्वं प्रपंचस्येति । ननु माभूदनेन हेतुना प्रपंचस्य सत्त्वं हेत्वंतरेण तु साधयामः।
तथाहि सदिदमर्थक्रियाकारित्वात् । न यदेवं न तदेवं यथा शुक्तिरजतमिति तत्राह । व्यवहृतये विकल्प इषित इति । व्यवहारायार्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव।
कूटकार्षापणादिनाऽपि क्वचिद्व्यवहारदर्शनात् । नन्वेकत्र सतोऽन्यत्रारोपो भ्रमः प्रसिद्धोऽत्यंतासत्त्वे कथं प्रपंचो भ्रमः स्यात् सत्त्वे वा नाद्वैतसिद्धिः। उक्तं च भट्टैः । "अध्यस्यते
खपुष्पत्वमसत्कथमवस्तुनि ॥ प्रज्ञातगुणसत्ताकमध्यारोप्येत वा न वा" इति नेत्याह । अंधपरंपरयेति । अंधपरंपरया यो विकल्प इत्यन्वयः । अयं भावः । संस्कारजन्यो
भ्रमः । संस्कारसिद्धये पूर्वप्रतीतिमात्रमपेक्षते न वस्तुसत्त्वम् । प्रतीतौ सत्यां वस्तुसत्त्वाभावेन ब्रह्मव्यतिरेकादर्शनात् । अतोऽनादित्वात्पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तर आरोपो
भविष्यति । अंधपरंपरान्यायेन व्यवहारः सेत्स्यतीत्यप्रयोजको हेतुरिति । ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ॥ अपाम सोममममृता अभूम" इत्यादिभिः
कर्मफलस्य नित्यत्वप्रतिपादनादसत्त्वं न घटते न हि नित्यवस्त्वसद्भवति । तस्माद्वेदप्रतिपादितत्वाद्द्वैतं सदेवेत्याशंक्याह । भ्रमयतीति । हे भगवंस्ते भारती वेदलक्षणा उरुवृत्ति

सन्मात्रोपादानकत्वरूपो हेतुर्विश्वस्मिन्पक्षे नास्तीति स्वरूपासिद्धो हेतुः, पक्षे हेत्वभावः स्वरूपासिद्धः । एवं च रज्जुसर्पादेरिव विश्वस्यापि कल्पनमध्यासमूलकमेव । अध्यस्तस्य च
मिथ्यात्वाद्विश्वं मिथ्यैवेति सिद्धम् । अयमेवार्थोऽयमर्थ इत्यारभ्य न वस्तुसत्त्वं प्रपञ्चस्येत्यन्तेनोक्तं स्वामिचरणैः । पुनरत्राशंकते—नन्वित्यादिना । अनेन हेतुना सत उत्पन्नत्वा
दित्यनेन हेतुना हेत्वन्तरेणान्यहेतुना । तथाहि—विश्वं सत्, अर्थक्रियाकारित्वात् । न यदेवं न तदेवम् यथा शुक्तिरजतमित्यनुमानेन विश्वसत्यत्वं साधयाम इत्याशंक्यात्रापि
व्यभिचारमाह—व्यवहृतय इति । व्यवहृतयेऽर्थक्रियार्थं विकल्पो भ्रम इषित इष्ट एव कूटकार्षापणादिनेति । मिथ्याभूतकृत्रिमरजतसुवर्णादेरप्यर्थक्रियाकारित्वात्, आदिना मिथ्यागजागमने
सत्यस्य भयांगकम्पादेः स्वाप्नांगमसंगमसर्पादिनाऽसत्येन सुखभयादेर्भाविशुभाशुभस्य च ग्रहणम्, एवं चात्र सर्वत्र मिथ्याभूते सत्यत्वरूपसाध्यस्यानधिकरणेऽर्थक्रियाकारित्वरूपहेतोः सत्त्वाद्व्यभिचार इत्याशयः ।
पुनरत्राक्षिपति—नन्विति । एकत्र सत्यत्वेन प्रमाविषयीभूतस्यान्यत्रारोपो भ्रमः । यथा—हट्टपत्तनादौ बिलादौ च सत्यत्वेन प्रमाविषयीभूतस्य रजतसर्पादेरन्यत्र शुक्तिरज्ज्वादावारोपो भ्रमः, स चात्र न संगच्छते ब्रह्मणोऽन्यत्रा
धिष्ठाने प्रपञ्चस्य सत्त्वे तव द्वैतापत्तिः असत्त्वे च क्वाप्यदृष्टत्वेनाकाशपुष्पतुल्यस्य विश्वस्य ब्रह्मणि कथमारोपः तस्माद्विश्वं सत्यमेव न तु मिथ्येत्यभिप्रेत्यैवोक्तं भट्टैर्मीमांसकैः खपुष्पत्वमसत् अवस्तु तस्मिन्कथमध्यस्यतेऽध्यासः
क्रियते सुगन्धादेः प्रज्ञाता गुणसत्ता यस्य रजतादेस्तत्प्रज्ञातगुणसत्ताकं शुक्त्यादावध्यारोप्येत भ्रमादि स्याच्चेत्तदभावेनाध्यारोपो भवतीत्यर्थः । तथा च विश्वस्मिन्पक्षे सत्यत्वरूपसाध्यवत्येवार्थक्रियाकारित्वरूपहेतुरस्तीति न
व्यभिचार इत्याशङ्क्य व्यभिचारतादवस्थ्यमेव वदन् हेतोः साध्यासाधकत्वरूपमप्रयोजकत्वमप्याह—अन्धेति । अन्धपरम्परया विकल्प इत्यन्वयः । अथाशयमाह—अयं भाव इति—संस्कारजन्यो भ्रमः स्वजनकसंस्कारसिद्धये
पूर्वकालिकं ज्ञानमात्रमपेक्षते न तु यथार्थज्ञानं विषयसत्यत्वं वा भ्रान्तिज्ञानेनापि संस्कारसिद्धेः, तादृशसंस्कारमात्रेण चोत्तरत्र भ्रमसिद्धिः । यथा—यक्षशून्ये एव वटे ततोऽन्यत्र तत्प्रमायामजातायामपि इह वटे यक्षो दृष्ट
इति केनचिदन्धेनान्ध उपदिष्टस्तेनान्यस्तेनान्य इत्यन्धपरम्पराभ्रमसिद्धस्य मिथ्यारोपितस्यापि यक्षस्य मूर्च्छामरणाद्यर्थक्रियाकारित्वं दृष्टमेव तत्र, तथात्रापि । एवं च विश्वस्मिन्पक्षे सत्यत्वरूपसाध्यासाधकतयाऽर्थक्रियाकारित्व
रूपो हेतुरप्रयोजकः, पक्षे हेतुरस्तु साध्यं मास्त्वित्युक्तेऽनुकूलतर्काभावात् तथा च प्रागुक्तव्यभिचारोऽपि तदवस्थ एव । पुनराशङ्कते—ननु "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोममममृता अभूम" इत्यादि
श्रुत्यनुगृहीतस्य विश्वस्मिन्यदि सत्यत्वं न स्यात्तदा सर्वेषामर्थक्रियाकारित्वं न स्यादित्यनुकूलतर्कस्य सत्त्वाद्विश्वं सत्यमेव तथा चात्र कूटकार्षापणमिथ्यायक्षादिनार्थक्रिया च महामूढानामेव न तु विज्ञानामपि विश्वस्मिञ्छरावा
दिना जलाहरणजलपानाद्यर्थक्रिया तु महामूढानामिव नारददत्तात्रेयादीनां ज्ञानिना मपि समानैव ज्ञानिनामपि यदर्थक्रियाकारि तत्सत्यमेवेति नियमाद्विश्वं सत्यमेवेति हेतोरप्रयोजकत्वं व्यभिचारो वा नैवेत्याशङ्क्याह—भ्रमयतीति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिर्बह्वीभिर्गौणलक्षणादिवृत्तिभिरुक्थजडान्कर्मश्रद्धाभराक्रांतमंदमतीन् भ्रमयति मोहयति । अयं भावः । नहि वेदः कर्मफलं नित्यमभिप्रैति किं तु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात् । अन्यथा वाक्यभेदप्रसंगात् । "तद्यथेह कर्मचितो लोकः क्षीयते ॥ एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति न्यायोपबृंहितश्रुत्यंतरविरोधाच्च । अतः कर्मजडानामिदं भ्रममात्रमिति । एतेनैव "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादीनामन्यपरत्वं दर्शितं भवति ॥ उद्भूतं भवतः सतोऽपि भुवनं सन्नैव सर्पः स्रजः कुर्वत्कार्यमपीह कूटकनकं वेदोऽपि नैवंपरः ॥ अद्वैतं तव सत्परं तु परमानंदं पदं तन्मुदा वंदे सुंदरमिंदिरानुत हरे मा मुंच मामानतम् ॥ २३ ॥ ३६ ॥

हे हरे तव वेदलक्षणा भारती उरुवृत्तिभिर्मुख्यालक्षणागौण्यादिवृत्तिभिः आदिनाऽऽसां भेदग्रहः।उत्तिष्ठति स्वर्गादिफलं यस्मात्तदुक्थं कर्म तत्र जडान्कर्मश्रद्धाभराक्रान्तमतीन् वेदतात्पर्यानभिज्ञान्भ्रमयति मोहयति।अत्राशयमाह– अयं भाव इत्यादि । तथाहि प्रागुक्तार्थवादवाक्यस्थाक्षय्यामृतपदयोर्यागप्राशस्त्ये जहल्लक्षणा यतश्चातुर्मास्ययागः प्रशस्तस्तस्माच्चातुर्मास्ययागेनेष्टं भावयेदित्येवमक्षय्यमित्याद्युक्तार्थवादयोश्चातुर्मास्येन यजेतेति विधिनैकवाक्यत्वात् । यतो मीमांसकमतेऽर्थवादानां प्राशस्त्ये लक्षणा तेषां स्वार्थपरित्यागेनैव विधिवाक्येऽन्वयश्च अन्यथा वाक्यभेदप्रसंगात् । एकोद्देशेनानेकविधानं वाक्यभेदः । चातुर्मास्ययागजनितस्वर्गादिफलमुद्दिश्य चातुर्मास्यनामा यागो विधीयते, इत्येकं स्वर्गादिफलस्य नित्यत्वं चेति द्वितीयमित्युभयविधाने स्पष्टतरो वाक्यभेदः। स च वाक्यगतत्वान्महादोषः । लक्षणा चामृतादिपदगतत्वादल्पदोषरूपा।तस्मादक्षय्यामृतपदयोः प्राशस्त्यमात्रलक्षणया प्रशस्तयागमात्रमेव कर्म स्वर्गादिफलोद्देशेन विधीयते इत्येकस्यैव विधानान्न वाक्यभेद इत्यर्थः । ननु वेदान्तसिद्धान्ते "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्याद्यर्थवादानामपि स्वार्थे प्रामाण्यमंगीकृतं तद्वदक्षय्यादिवाक्येष्वप्यस्त्विति चेन्न स्वर्गादिः क्षयिष्णुः यागादिकर्मसम्पादितत्वात् कृष्यादि कर्मसम्पादितसस्यादिवदित्यनुमानगर्भितेन "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इत्यादिश्रुत्यन्तरेण विरोधात् दृष्टान्तदार्ष्टान्तिकयोरुक्तार्थवादयोर्महावैषम्याच्च । तथा चोक्तम्–"विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ॥" अयमर्थः–प्रमाणान्तरविरोधे सत्यर्थवादो गुणवादः यत्राक्षय्यमिति "अमृता अभूम" इत्यादि च कर्मजन्यस्वर्गादेः सत्यत्वस्य तद्यथेहेत्यादिश्रुतिभिर्युक्तिभिश्च बाधितत्वात्। ऐहिकापेक्षया चिरकालसत्त्वपरत्वेनैव तद्वाक्यानां निर्वाहात् । प्रमाणान्तरावगतार्थबोधकोऽनुवादः यथा–अग्निर्हिमस्य भेषजमित्यादि हिमविरोधित्वस्याग्नौ प्रत्यक्षावगतत्वात् । प्रमाणान्तराविरुद्धार्थबोधको भूतार्थवादः। यथा–"इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादि स्वर्गादिकं तथा च कर्मफलं यतः प्राशस्त्यपरत्वश्रुत्यन्तरविरोधवतो हेतोरित्यभिप्रेत्याह–नित्यमिति । कर्मजडानां भ्रममात्रम् एतेन जगतोऽनित्यत्वसाधनेनान्यपरत्वमद्वैतपरत्वमित्यन्तस्य तात्पर्यमाह तथा "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादि श्रुतयोऽपि "नेह नानास्ति किञ्चन" इत्यादिनिषेधकश्रुत्यपेक्षितनिषेध्यसमर्पिका ब्रह्मोपादानकत्वोक्त्या जगतो ब्रह्मण्येवोत्पत्तिप्रलयावित्यद्वैतसाधिका वा न तु नानाविधद्वैतप्रतिपादनपराः । एवं च कूटकार्षापणादावुक्तदोषेऽप्यादिपदोपात्तमिथ्याभूतस्यापि स्वप्नांगनादेः स्वप्नाध्यायवाक्यैर्मूढ इव ज्ञानिन्यपि यावच्छरीरं भाविशुभाशुभफलोत्पादकत्वात् वीर्यपातादिजनकत्वाच्चार्थक्रियाकारित्वं दृश्यत एव । तथा च ज्ञानिनामपि यदर्थक्रिया तत्सत्यमेवेति नियमो भग्न एव तस्मादर्थक्रियाकारित्वरूपहेतावप्रयोजकत्वं व्यभिचारश्च तदवस्थ एवेति नानेनानुमानेन विश्वस्मिन्पक्षे सत्यत्वरूपं साध्यं सिद्ध्यति प्रत्युतानुमानगर्भितप्रागुक्तश्रुतिभिर्मिथ्यात्वमेवेति निश्चितं विश्वस्येति संक्षेपः । किञ्च कार्मिणां गतागतप्रकारस्य श्रुत्या वर्णितत्वेनानित्यत्वमेव कर्मफलस्य । तथा च श्रुतिः–"अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् षण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रलोकं प्राप्यान्नं भवन्ति तांस्तत्रैव देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेतांस्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैत्यथेममाकाशमभिनिष्पद्यंते आकाशाद्वायुर्वायोर्वृष्टिर्वृष्टेः पृथिवीं प्राप्यान्नं भवति एवमेवानुपरिवर्तन्ते" इति । स्फुटोऽप्यर्थः कथ्यते–धूममभिसम्भवन्ति प्रथमं धूमाभिमानिनीं देवतां प्राप्नुवन्ति एवमुत्तरोत्तरं ज्ञेयम् । अपक्षीयमाणपक्षं कृष्णपक्षं यान् दक्षिणादित्य एति तान्षण्मासान् कर्कादिचापान्तानित्यर्थः । अन्नं देवानामन्नं तत्रस्था देवा यथा चन्द्रं चन्द्रादमृतं पिबन्ति तथा तान्भक्षयन्ति तेभ्यः पुण्यफलमन्नं भक्षयन्तीत्यर्थः । तेषां तत्पुण्यं यदा पर्यवैति नाशं गच्छति तदा सोमलोकादिममाकाशमभिनिष्पद्यन्ते प्राप्नुवन्ति । पृथिवीं प्राप्य मनुष्यादीनामन्नं भवति, इति अन्नाद्वीर्यरूपेण परिणतात्पुनर्जायन्ते इति । प्रवृत्तिमार्गपरेयं श्रुतिः । स्वामिनां तु–उद्भूतमिति । सतोऽपि भवतः सकाशात् उद्भूतं भुवनं न सत् यथा स्रजो मालातः उद्भूतः सर्पो न सत् तद्वत् कार्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यवहारं कुर्वदपि न सत् कूटकनकमिव, वेदोऽप्येवम्परः कर्मफलप्रतिपादनपरो न भवति किन्तु परमानन्दाद्वैतपर एवेत्याह तवाद्वैतं मद्वैतापादकं परमानन्दं सत्पदं तत्ततोऽहं वन्दे हे इन्दिरानुत । स्पष्टमन्यत् । केचिदिदं पद्यं माथुरविप्रस्तुतिं पुरस्कृत्य कृष्णभक्तपरत्वेन योजयन्ति । तथाहि ननु "माथुरा मम पूज्या हि माथुरा मम वल्लभाः । माथुरे परितुष्टे हि तुष्टोऽहं नात्र संशयः ॥ " इति वाराहोक्त्या माथुराणां मद्भक्तत्वात्तत्कुलोत्पन्ना इमेऽपि विप्राः सन्त एवेति कुतो निन्द्यन्त इत्याशङ्क्याहुः–सत् इति । इदं दीक्षितविप्रवृन्दं सत् सतो दीक्षितकुलादुत्थितमुत्पन्नमिति चेन्न । नु इति वितर्के । यत इदं तर्कहतं युक्तिबाधितं तदेवाहुः–व्यभिचरति क चेति । त्रयीमया त्त्वत्प्रिययमुनाजनकात्सतः सूर्यादुत्पन्नस्यापि कर्णस्य दुष्टत्वदर्शनाद्व्यभिचार इत्यर्थः । किञ्च क च मृषेति–यथा श्रीवेदव्यासादुत्पन्नेऽप्यन्तर्निगूढदुष्टभावे धृतराष्ट्रे दृश्यमानापि बहिःसाधुता मिथ्यैवेत्यर्थः । ननु "ईश्वरस्य विधिं को नु विधुनोत्यन्यथा पुमान्" इत्युक्त्या धृतराष्ट्रस्य श्रीकृष्णेच्छावशवर्तित्वान्न दुष्टत्वमित्याशंक्याहुः–न तथेति । तथापि यथा विदुरादयस्त्वयि भक्तास्तथा नायमन्तर्निगूढधूर्तभावत्वात् । ननु कर्णस्य सूर्योत्पन्नत्वेऽपि सहस्रकवचाख्यदैत्यावतारत्वाद्युक्तमेव दुष्टत्वं दीक्षितानां विप्रत्वात्कथं दौष्ट्यमित्याकांक्षायामाहुः–उभययुगिति । दीक्षितवृन्दमुभाभ्यां खलत्वब्राह्मणत्वाभ्यां युक्तं ब्राह्मणत्वेऽपि कंसस्याहिताशंसनात्तदन्नवृत्तिभोगाच्च खलत्वम् । ननु तर्हि तथाविधास्ते कथं मद्भक्तैर्गोपैः प्रणतास्तत्राहुः–व्यवहृतये इति । दुष्टेष्वपि विप्रेष्वन्धपरम्परया विकल्पो विविधो नमस्कारादिकल्पनारूपो व्यवहार इष्ट एव खलेष्वपि तेषु ब्राह्मणत्वेन गोपैस्तथा व्यवहृतमित्यर्थः । ननु सर्ववेदवेद्ये मयि वेदविदोऽपि ते कथमभक्तास्तत्राहुः–भ्रमयतीति । अत्रापि पूर्व एवार्थः । एवं च दीक्षितब्राह्मणनिन्दायां न तात्पर्यं किन्तु यदीदृशा वेदविदो विप्रा अपि श्रीकृष्णानुरागरहिता निन्द्या एव तदा किमु वक्तव्यम् तथाविधा इतर इति श्रेयोऽर्थिभिः सर्वथा श्रीकृष्णानुराग एव कार्य इत्यत्रैव तदित्याशयः ॥ * ॥ **श्रीधरानुयायिनी**–सत इदमित्यादेर्दीक्षितविप्रपक्षे प्रसिद्धपक्षे च व्याख्यानं पूर्वव्याख्यानेषु लिखितमतस्तत्रैव द्रष्टव्यम् ॥ **विश्वनाथी**–समाम्नायस्येति पूर्वपक्षसूत्रं तद्भूतानामिति सिद्धान्तसूत्रम् तत्र प्रथमसूत्रस्य तस्मादनित्यमुच्यत इति शेषः । "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं प्रजापतिरात्मनो वपामुदखिदत् देवा वै देवयजनमध्यवसाय दिशो न प्रजानन् " इत्येवमादीनामतदर्थानां न सांशयत्रयवती भावनाऽर्थो येषां पुरुषास्वाधीनत्वेन विधौ पर्यवसाययितुमशक्यानामानर्थक्यं स्यात् । सोऽरोदीदिति यद्यशीर्यत तद्रजतमभूत् प्रजापतिरात्मनो वपामुदखिददिति इत्यादेरर्थस्तु तेषु रोदनवपोत्खातदिगज्ञानादिषु भूतानां सिद्धार्थप्रतिपादकत्वेन वर्तमानानां विधिप्रत्ययशून्यानां क्रियार्थेन क्रियाप्रतिपादकेन "बर्हिषि रजतं न देयं पशुना यजेत वायव्यं श्वेतमालभेत " इत्यादिना समाम्नायसमुच्चारण सम्बंध इत्यर्थः । कर्मपरवाक्येन संबंधेऽयं प्रकारः–यतो रोदनरूपामंगलजन्यं तद्रजतमतो बर्हिषि यागे न देयमिति । यतो वायुः क्षिप्रकार्यकारी देवोऽतो वायव्यं वायुसंप्रदानकं श्वेतमजमालभेत यतो ब्रह्मणा निजवपया मेदसा पशुर्निर्मितो विशिष्टफलत्वात्पशुना यजेत, यतो देवानामपि देवयजनाधिष्ठाने दिगज्ञानमतोऽन्यत्रानासक्त्या यतेतेत्येवं विधिनिषेधवाक्योपक्षितप्राशस्त्यनिन्दान्यतरपूरणेनान्वये कृते सर्ववेदस्य क्रियापरत्वसिद्ध्या निरर्थकत्वनिरासेन प्रामाण्यं सिद्धम् । "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविध्युपात्ते सर्वस्मिन्वेदे न कस्यापि वाक्यस्यानर्थक्यासम्भवान्निरर्थकाध्ययनविध्यनुपपत्तेरित्यर्थः । कथितसिद्धान्तसूत्रशेषस्यार्थमाह–अर्थस्य रोदनादेस्तन्निमित्तत्वात् क्रिययैवार्थः फलं यस्य तस्य भावस्तत्त्वं तस्माद्यतः स रोदनादिरूपोऽर्थो निन्दाप्राशस्त्यद्वारा क्रियायामेवान्वितो बभूव तस्मादन्यैरपि यथाशक्त्यावेशेन क्रियैव कर्तव्येति यत्रयत्र वेदस्य क्रियापरत्वं न दृश्यते तत्रतत्रेत्यर्थः । उपनिषदां तत्त्वमस्यादिवाक्यानामपि एतेन विधिनैकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरिति द्वितीयपादोक्तसूत्रसिद्धान्तेनोपनिषदां नैराकांक्ष्यं वयं कर्मपराः कथं स्याम इत्याकांक्ष्याराहित्यं क्रियापरत्वेन सार्थकत्वमिति यावत् । केन प्रकारेण व्याख्यातमित्यपेक्षायामाह–क्रत्वर्थो यज्ञांगरूपो यः कर्तायजमानस्तस्येश्वराभेदेन स्तुत्या वर्णनम् यथादित्यो यूपः, इह स्तुत्या यूपः पशुनियोजनक्रियायामन्वेति यजमानः प्रस्तरः, प्रस्तरः कुशपुत्तल इति स्तुत्या क्रियानिष्पत्तावन्वेति तत्त्वमस्यादीनां तद्वैपरीत्यान्न क्रियापरत्वं यदुक्तमानर्थक्यमतदर्थानां तन्न विधिना स्वस्य प्रयोजनवदर्थपर्यवसायित्वं गमयता सहैकवाक्यत्वादर्थवादवाक्यानि स्तुत्यर्थेन स्तुत्यंगत्वेन विधीनां स्युर्विधिशेषाणि भवन्तीति संक्षेपः । वैपरीत्यं स्फुटयति–एकं सजातीयभेदशून्यं यजमानसजातीया बहवो यजमानास्तिष्ठन्ति, अद्वितीयं विजातीयभेदशून्यं तस्य विजातीयाः शूद्राद्या बहवः संति ब्रह्म व्यापकं यजमानो हि परिच्छिन्नः कोष्ठैकदेशस्थत्वात् विज्ञानं चिन्मात्रं यजमानो हि चिज्जडग्रन्थ्यहंकारवत्त्वेन न ज्ञानमात्रं ब्रह्म हि आनन्दमात्रं यजमानो हि दुःखात्मककर्मकरणाद्दुःखी ब्रह्म हि चक्षुःश्रोत्रादिशून्यं तस्य तादृक्त्वेंधबधिरादिदोषवत्त्वाद्यज्ञानधिकाराद्यजमानत्वमेव हीयेत–"अर्थी समर्थो विद्वान्यजेत" इत्यादिश्रुतेः । इत्थं सुखस्वरूपस्यात्मनः क्षुद्रस्वर्गादिसुखार्थं प्रवृत्त्यसम्भवात् न हि सम्राट् तुच्छधनोद्धर्तुरधिकारिणोऽधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारं स्वप्नेऽपि नेच्छति यथा तद्वत् । ननु भवतु वेदान्तमत इत्थं परन्त्वस्माभिर्निजाचार्यवार्तिककृत आज्ञा मनःकर्मांगतालक्षणा पाल्यैवेत्याशंक्याह—अननुमतमिति । तदाह एतदात्मनः कर्मांगत्वं सर्वत्रैव हीति सर्वस्मि न्नेव वेदे विविधं द्रव्यदेवतावघातादिविषयं ज्ञानं 'व्रीहिभिर्यजेत' 'वैश्वदेव्यामिक्षा' 'व्रीहीनवहन्यात्' इत्यादिवाक्यजन्यं संस्कारत्वेन संस्कारस्वरूपत्वेन गम्यते ज्ञायते यथा प्रोक्षणादिसंस्कारादेवापूर्वोत्पत्तिस्तथा वेदवा क्यजन्य एव व्रीहिज्ञाने कश्चन फलप्रापको भवति न तु पौरुषवाक्यजन्ये तदेव संस्काररूपं विज्ञानं परस्य यागादिकर्मणोंगं च संस्कारस्य स्वतः फलत्वाभावात्, किन्त्वात्मज्ञानादन्यत्र उपनिषज्जन्यात्मज्ञानं विना आत्मज्ञानं च न संस्काररूपं न कस्यापि कर्मणोंगं तस्य स्वयंप्रकाशत्वात् परमानन्दरूपत्वेन परमांगित्वात् । पराभिमतोपनिषद्वाक्यानां क्रियापरत्वं तन्निवृत्तये यन्मननं विधिनिषेधप्रत्ययरहितानामेवोपनिषद्वा क्यानां युक्तिभिः सिद्धे ब्रह्मणि तात्पर्यावधारणं तदर्थं तत्र मिमांसकमत एवं भवेदात्मना कर्मांगत्वं भवेद् द्वैतस्य सत्यत्वं चेति प्रश्नोत्तराभ्यां मीमांसकस्य प्रश्नो वेदान्तिनामुत्तरं ताभ्यां यन्मननं श्रुत्यर्थस्य युक्तिभिर्म नस्यवस्थापनं तेनेत्यर्थः ॥ (२३) ॥ ३६ ॥

नीलकण्ठी—एवं गुरुमुपासीनः श्रुतोपनिषत्कः शास्त्रात्प्रपञ्चस्य ब्रह्मविवर्तत्वमज्ञानपरिणामत्वमज्ञानस्य च तुच्छत्वमित्यवगच्छाति अत्रापि 'यत उदयास्तमयौ विकृतेर्मृदि वा विकृतात्' 'भिदा यदबोधकृता' 'असदा मनुजात्' इति तत्त्रयमुक्तं तत्राशंकते—सत इदामिति । इदं सत् सदुत्थत्वात् यद्यदुत्थं तत्तदात्मकं यथा कनकोत्थं कुण्डलं कनकात्मकम् । यद्वा—इदं सदुत्थम् अनात्मत्वे सति सत्त्वात् यद्यदात्मकं तत्तदुत्थं यथा कनकात्मकं कुण्डलं कनकोत्थमिति । अत्र कारणस्य श्रुतिसिद्धं सत्यत्वमाश्रित्य प्रपञ्चस्य सत्यत्वं साध्यत इत्येकः पूर्वपक्षः । प्रपञ्चस्य रज्जुभुजंगादिवद्बाधादर्शनात्तत्सत्यत्वमाश्रित्य तत्कारणस्य प्रधानादेः सत्यत्वं साध्यत इत्यन्यः । तदे तद्द्वयं तन्त्रेण निरस्यति—ननु तर्कहतमिति । सर्वथापि निर्युक्तिकमेतादित्यर्थः । तथाहि—सदुत्थत्वं सद्विवर्तत्वं सत्परिणामत्वं वा आद्ये इष्टापत्तिः द्वितीये परिणामिनः सतः क्षीरादिवदनित्यत्वेन कारणत्वासिद्धिरित्याह— व्यभिचरति क्व चेति । ननु दध्यादावपि प्रधानगतं सुखदुःखमोहात्मत्वमस्त्येव कुण्डलादाविव कनकात्मत्वमतः कनकवदस्य नित्यत्वं स्यादत आह—क्व च मृषेति । सुखाद्यात्मकस्यापि स्वप्नांगनादेः कार्यस्य मृषात्वात्तत्का रणस्यापि मृषात्वं दुर्वारमित्यर्थः । अस्तु तर्हि कार्यस्यासत्यत्वमत आह—न तथोभययुगिति । स्वप्नांगना हि न स्वघटादिवदबाध्या अनुभवविरोधात् । नाप्यत्यन्तमसती शशशृंगवत् चरमधातुविसर्गान्तार्थक्रियाकारिर त्यादिसुखहेतुत्वात्, न च तादृशपरस्परविरुद्धधर्मद्वययोगि एकं वस्त्विति वक्तुं शक्यमतो न सत्या किन्त्वनिर्वाच्या । यच्चास्या उपादानं निद्रादिरूपमज्ञानं पराभिमतं प्रधानं वा तदप्यनिर्वाच्यं वाच्यं कार्यकारणयोः साजात्यनियमात् । एवं द्वितीयानुमानेऽप्येतैरेव श्लोकपदैर्हेत्वसिद्धिर्वक्तव्या । तथाहि—कार्यस्य सत्त्वात्कारणमपि सदितिचेत् ननु, तर्कहतं सत्यस्यापि भयकम्पादेर्हेतौ रज्जुसर्पे मृषात्वदर्शनात् । न चायं सन् सत्त्वे ह्यस्य विज्ञानमात्रं देशान्तरस्थत्वं स्मर्यमाणत्वं वा वाच्यम्, नायं सर्प इति स्वाधिष्ठाने बाधितत्वात् । किञ्चिद्विज्ञानं सद्विषयं किञ्चिदसद्विषयम् इन्द्रियाणि कञ्चित्सन्निकृष्टमर्थं गृह्णन्ति कञ्चिदसन्निकृष्टं स्मर्यमाणं किञ्चिदिदन्तया गृह्यते किञ्चिदनिदन्तयेति पक्षत्रयेऽपि व्यभिचार इत्याह—व्यभिचरति क्वचेति । तस्मान्न रज्जुसर्पः सत्यः नापि शशशृंगवदत्यन्तमसन्नित्याह—क्व च मृषा नेति । असत्त्वपक्षे अलीकमपि नेत्यर्थः । शशशृंगरज्जुसर्पयोर्निःस्वरूपत्वे समानेऽपि, अन्त्यो दृश्य त्वाद्भयादिकार्यजनकत्वाच्च नात्यन्तमसन् शशशृंगं तद्विपरीतत्वादत्यन्तमसदित्यर्थः । नन्वत्यन्तसत्त्वे अत्यन्तासत्त्वे चासिद्धे अस्तूभयात्मेत्याशंक्याह—तथोभययुगिति । यथा मृषा न तथा सदसदात्मापि न विरोधादित्यर्थः । तस्मा त्सत्त्वेनासत्त्वेन सदसदात्मत्वेन वा निर्वक्तुमशक्यत्वेनानिर्वाच्यत्वात् मिथ्याभूतमपि रज्जुसर्पशंकाविषादिकं व्यवहारकालाबाध्यभयमरणाद्यर्थक्रियाकारि दृष्टम्, तथा वियदाद्यपि स्वरूपेणेन्द्रजालवन्मिथ्याभूतमपि स्वर्गनरकब न्धमोक्षगुरुशिष्यादिव्यवहारकालाबाध्यव्यवस्थाहेतुर्भविष्यतीति स्वप्नांगनासंगमवदबाधितार्थक्रियाकारित्वेऽप्यनिर्वाच्यं वियदादि तादृशाज्ञानोपादानकमिति सिद्धं प्रधानादेरनिर्वाच्यत्वम् । नन्विदं सत्यमिदं मिथ्येति सत्यसर्प रज्जुसर्पयोः कथं विविधाकारेण कल्पनं सर्वस्य तुल्यवन्मिथ्यात्वे तदनुपपत्तेरित्याशंक्याह—व्यवहृतये विकल्प इति । स्वप्नदृष्टरज्जुरज्जुभुजंगयोर्मिथ्यात्वाविशेषेऽपि रज्जुः सत्या रज्जुभुजंगो मिथ्येति स्वाप्नव्यवहारमात्राल म्बनो विकल्पो न वस्तुतत्त्वावलम्बनः । एवं जाग्रत्यपि भविष्यति नहि गरुडभावनाशंकाविषादेरसत्याज्जातो विषदेहवियोगस्तत्प्रतियोगी वर्तमानो वा विषदेहसँय्योगः परमार्थसत्य इति वक्तुं शक्यं शून्यभावनयापि पारमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थिकं नैरात्म्यं सेत्स्यतीति जितं माध्यमिकेनेति भावः । ननु जाग्रद्दृष्टौ रज्जुरज्जुभुजंगमौ सत्यमिथ्यारूपौ स्वप्नेऽपि सँस्कारवशात्तेन रूपेण भात इति युक्तं तत्र द्वयोरपि मिथ्यात्वम् । तर्हि जाग्रत्यपि प्राग्भवी यद्भ्रमसँस्कारवशादेतद्युज्यते अनादित्वाच्च भ्रमतत्संस्कारपरम्परायाः न कचिद्द्वयेषु सत्यासत्यविभागोऽस्तीत्याह–इषितोन्धपरम्परयेति । आरोपे हि पूर्वप्रतीतिमात्रमुपयुज्यते । ननु प्रतीतस्य स्वरूपसत्त्व मपि तेन विनापि संस्कारमात्रादुत्तरभ्रमसम्भवात् मूर्खपरम्परयायं सत्यासत्यविकल्प इषितोऽभ्युपगतो न शास्त्रदृग्भिरित्यर्थः । नन्वेतदेवं शास्त्रतत्त्वं सर्वेऽपि कुतो न जानन्तीत्याशंक्याह– भ्रमयतीति । ते तव भारती निःश्वासरूपा वेदवाणी–“ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ” इति । “ अपाम सोमममृता अभूम ” “ प्रजामनु प्रजायसे तदु ते मर्त्यामृतं नापुत्रस्य लोकोऽस्ति ” इत्यादिका उक्थजडान् उत्तिष्ठति स्वर्गादिफलं यस्मात्तदुक्थं कर्म प्रतीकोपास्तिश्च तत्र विषये श्रद्धाजडान् उरुवृत्तिभिः बह्वीभिर्गौणलक्षणादिशब्दवृत्तिभिः भ्रमयति मोहयति यस्मादतस्ते शास्त्रतत्त्वं न जानन्तीत्यर्थः । अत्र शब्दवृत्तिस्तावत्त्रिधा–मुख्या गौणी लक्षणा च । आद्या–जातिसङ्केतयोगैस्त्रिधा । तत्र जातिशब्दाः–गौः घटः अश्वकर्ण इत्यादयः । सङ्केतशब्दाः–डित्थ डवित्थ इत्याद्याः । योगस्त्रेधा–कृत्तद्धितसमासभेदात् । आद्यौ प्रकृतिप्रत्यययोगौ द्वौ, अन्त्यः पदद्वययोगः, पाठकः औपगवः पङ्कजम् । गौणी तु–लक्ष्यमाणगुणयोगात्परशब्दस्य परत्र प्रवृत्तिः, यथा यजमानः प्रस्तरः सिंहो देवदत्तः । अत्र हि यजमानशब्देन यजमानगतं क्रतुनिर्वर्तकत्वं तत्प्रस्तरेऽप्यस्ति एवं सिंहवत्क्रौर्यं देवदत्ते सेयं लक्षितलक्षणेत्युच्यते । लक्षणापि शब्दस्य स्वशक्यसम्बन्धे वृत्तिः । सा त्रिधा–जहत्स्वार्था अजहत्स्वार्था जहदजहत्स्वार्था च । गङ्गायां घोष इत्याद्या अत्र गंगापदशक्यस्य प्रवाहस्य घोषाधारत्वासम्भवात्तत्सम्बद्धे तीरे गङ्गापदस्य वृत्तिः । द्वितीया तु शोणो धावतीति, अत्रामूर्त्तस्य शोणगुणस्य धावनासम्भवाच्छोणपदं स्वार्थमजहत्तद्वति वर्तते, एवं काकेभ्यो दधि रक्ष्यतामि त्यत्रापि काकपदं स्वार्थमजहदपि स्वस्वेतरदध्युपघातकमात्रे वर्तते । सोऽयं देवदत्त इति तृतीया–अत्र हि तद्देशकालविशिष्टो देवदत्तस्तच्छब्दार्थः, एतद्देशकालविशिष्ट इदम् शब्दार्थः । तत्र विशिष्टयोरभेदासम्भवादुभयत्र विशेषणांशं त्यक्त्वा विशिष्ये देवदत्तस्वरूपमात्रे तदिदंशब्दयोर्वृत्तिः । एवं तत्त्वमस्ययमात्मा ब्रह्मेत्यादावप्येषैव लक्षणेति वक्ष्यते । क्वचिद्वाक्येऽपि लक्षणा भवति । यथा विषं भुंक्ष्वेति । अत्र हि विषभोजनरूपस्वार्थपरि त्यागेन शत्रुगृहे न भोक्तव्यमित्यस्मिन्नर्थे वाक्यं वर्तते । एवं सति ये कर्मजडाः ते “अक्षय्यं ह वै अमृता अभूम” इत्यादावक्षय्यादिशब्दानां यत्कृतकं तदनित्यमिति न्यायेन तदनुगृहीतया “तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते ” इति श्रुत्या च गम्यमानं कर्मफलस्यानित्यत्वं स्वयमप्रतिपद्यमानाः “ आभूतसम्प्लवं स्थानममृतत्वं हि भाष्यते ” इति स्मृत्या व्याख्यातमपि चिरकालतामात्रपरत्वं न पश्यन्ति तान्कर्मफलस्य नित्यत्वंमन्यमानान्भारती भ्रमयति । एवं ये उपासनाजडाः । “ अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मीति न स वेद यथा पशुरेव स देवानां तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति सर्वं परादाद्योन्यत्रात्मनः सर्वं वेद ” इत्यादिभेददर्शननिन्दायां सत्यामपि एष ह्येव साधुकर्मेत्यादिशास्तृशास्यभेदश्रुतेरौपाधिकभेदपरत्वं सत्स्वपि नान्योऽतोऽस्ति द्रष्टा तत्त्व मस्यहं ब्रह्मास्मीति जीवब्रह्माभेदपरवाक्येषु अप्रतिपद्यमानाः भेदं सत्यं मन्वते तानपि भ्रमयति भारती । तथा च श्रुतिः–“न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्याचासुतृप उक्थ शासश्चरन्ति ” इति । स्मृतिरपि–“यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ” इति । ये तु हार्दादिविद्याविदोऽहंग्रहेण ब्रह्मोपासते ते भेददृष्ट्यभावान्मूर्द्धन्यनाड्यार्चिरा दिमार्गेण ब्रह्मलोकं गत्वा तत्रैव लब्धात्मबोधा ब्रह्मणा सहैव मुच्यन्ते । तथा च श्रुतिः–“ शतं चैका च हृदयस्य नाड्यः ” इति । “ ते ब्रह्मलोके तु परान्तकाले ” इति । एवं च कर्मप्रजास्तुतिपरो वेदः कर्मणामक्षय्य फलत्वं प्रजायाश्चामृतत्वं ब्रवीति न तात्पर्येणेति भावः (२३) ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यदिदमग्र आस न भविष्यदतो निधनादनुमितमंतरा त्वयि विभाति मृषैकरसे ॥
अत उपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः ॥ २४ ॥ ३७ ॥

तदेवं प्रपंचस्य सत्त्वे साधकं नास्तीत्युक्तम् इदानीमसत्त्वे सृष्टिप्रलयश्रुतयः "यतो वा इमानि भूतानि जायंते " इत्याद्यास्तन्मूलं चानुमानं प्रमाणमित्याह । न यदिदमिति । यद्यस्मादिदं विश्वमग्रे सृष्टेः पूर्वं न आस नासीत् ॥ "सदेव सोम्येदमग्र आसीत् ॥ आत्मा वा इदमेक एवाग्र आसीत् " इत्यादिश्रुतेः । न च निधनात्प्रलयादनु अनंतरं भविष्यद्भविष्यति । "नासदासीन्नो सदासीत्तदानीम्" इत्यादिश्रुतेः । अतः कारणादंतरा मध्येऽप्येकरसे केवले त्वयि मृषा मिथ्यारूपमेव विभातीति मितं निश्चितम् । यत एवमतः श्रुत्या द्रविणजातिविकल्पपथैर्द्रविणजातीनां द्रव्यमात्राणां मृल्लोहकार्ष्णायसरूपाणां विकल्पा भेदा घटकुंडलादयस्तेषां पंथानो मार्गाः प्रकारास्तैरुपमीयते सदृशतया निरूप्यते । यथा तत्र कार्याकाराणां नामधेयमात्रताकारणं मृदाद्येव तु सत्यं तथाऽत्राप्याकाशादीनां नाममात्रता ब्रह्मैव सत्यम् । तथाच श्रुतिः " यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं भवति ॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ यथा एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् ॥ यथा एकेन नखनिकृंतनेन सर्वं कार्ष्णायसम्" इत्यादि । तस्मादस्य सत्त्वे प्रमाणाभावादसत्त्वे प्रमाणस्य विद्यमानत्वाद्वितथमनोविलासमृतं सत्यमिति ये अवयंति जानंति तेऽबुधाः अज्ञा इत्यर्थः । अत्रैवं प्रयोगः । विवादाध्यासितं न सत् । आद्यंतयोरविद्यमानत्वाद्विकारित्वाद्दृश्यत्वाच्च शुक्तिरजतादिवत् । इत्यन्वये दृष्टांतः । आत्मवच्चेति व्यतिरेके

भावार्थदीपिकाप्रकाशः वंशीधरी—तदेवमुक्तरीत्या सत्त्वे सत्यत्वे सृष्टिप्रलययोः प्रतिपादकाः श्रुतयः सृष्टिप्रलयश्रुतयः । आदिना " नेह नानास्ति किञ्चन " इत्यादिग्रहः । तन्मूलं श्रुतिमूलकं चानुमानमत्रैवंप्रयोग इत्यादिनात्रैव वक्ष्यमाणं प्रमाणं मानम् । सदेवेत्याद्याः श्रुतयस्तु सुगमा एव । नासदिति । इदं जगत् अग्रे सृष्टेः पूर्वमात्मैवासीत् अखण्डैकरसो जगदधिष्ठानत्वेन वास्तवस्वरूपभूतः पदार्थ एवासीत् । न तु तत्कार्यभूतं नामरूपात्मकं जगदासीदित्यर्थः । तदानीं प्रलयानन्तरं सृष्टेः पूर्वमसत्कारणं नासीत् सत्कार्यं नो आसीदित्यर्थः । यत आद्यन्तयोर्नैवास्ति अतो हेतोः । यतो हेतोरेवं मिथ्याऽतो हेतोः । तत्र द्रविणविकल्पपथिषु अत्रापि ब्रह्मण्यपि अत्र प्रमाणं तथा चेति श्रुतीराह " यथा सोम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृन्मयं विज्ञातं भवति वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं तथैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यं तथैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं काष्णार्यसम् " इत्येव सत्यमिति । अर्थस्तु—हे सोम्य यथैकेन घटादिकारणभूतेन मृत्पिण्डेन विज्ञातेन सर्वमन्यत्कुम्भशरावादिकं विज्ञातं स्यात् कारणानन्यत्वात्कार्यस्य । कथं तर्हि लोके इदं कारणमिदं कार्यमिति वदन्ति व्यवहरन्ति चेति तत्राह—वाचारम्भणमिति । वाचारम्भणं यावद्वस्तु तत्सर्वं नामधेयमेव केवलं न तु विकारो नाम वस्त्वन्तरमस्ति परमार्थतो मृत्तिकेत्येव सत्यम् । एवमुत्तरत्रापि योज्यम् । तथा लोहमणिना मणिकारणभूतेन सुवर्णपिण्डेन लोहमयं स्वर्णमयम् नखनिकृन्तनेन नखनिकृन्तनकारणभूतेन कार्ष्णायसपिण्डेन कार्ष्णायसं छुरिकादात्रादिकम् । यथा विकारो न सत् कारणं सत्यं तथा विकारस्य प्रपञ्चस्य परमकारणं ब्रह्ममात्रत्वं सत्यमिति यतो मृन्मयादितुल्यत्वं तस्माद्धेतोः । इत्यर्थ इति—असतः सत्यत्वेन मननमज्ञधर्म एवेति भावः । श्रुतिमूलकमनुमानमाह—अत्रायमिति । अत्र जगदसत्यत्वे विवादाध्यासितं विवादास्पदीभूतं जगत्, अन्वये दृष्टान्तः—यदाद्यन्तयोरविद्यमानं दृश्यं विकारि च तदसत्, यथा शुक्तिर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टांतः ॥ मुकुटकुंडलकंकणकिंकिणीपरिणतं कनकं परमार्थतः ॥ महदहंकृतिखप्रमुखं तथा नरहरेर्न परं परमार्थतः ॥ २४ ॥ ३७ ॥

जतमिति । व्यतिरेके दृष्टान्तमाह—यदाद्यन्तयोरविद्यमानं न दृश्यं विकारि च न तदसदपि न यथात्मेति । स्वामिनाम्—मुकुटेति । मुकुटादिरूपेण परिणतं परमार्थतः कनकमेव तथा महदादिप्रमुखं जगन्न किन्तु परमार्थतः परमेव ब्रह्मैवेति ॥ * ॥ **श्रीधरानुयायिनी**—तदेवं विश्वस्य सत्यत्वे वाद्युक्तजगत्सत्यत्वानुमानादिकं किमपि साधकं नास्ति, तथा च—गौतमस्स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः मायागन्धर्वनगर मृगतृष्णावद्वेति । साङ्ख्यवृद्धा अपि—" गुणानां परमं रूपं न दृष्टिपथमृच्छति । यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम् ॥ " तथा "आरम्भपरिणामाभ्यां पूर्वं सम्भावितं जगत् । पश्चाद्गौतमसांख्याभ्यां युक्त्या मिथ्येति निश्चितम् ॥ " इति । इदानीं विश्वस्यासत्यत्वे साधकं श्रुत्यनुमानादिकं प्रमाणमस्तीत्याह—नेति । यस्माद्विश्वं सृष्टेः पूर्वं नासीत्प्रलयानन्तरं च न भविष्यति तस्मादादावन्ते च यन्नास्ति वर्तमाने तत्तथेत्युक्तेर्मध्ये केवले त्वय्यधिष्ठाने मृत्सुवर्णादौ घटकुण्डलादिवत्प्रतीयमानमप्याकाशादि नाममात्रं मिथ्यैव मृदादिवद्ब्रह्मैव सत्यमिति निश्चितम् । ये तु " मिथ्याभूतं सद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किञ्च " इति श्रुतेर्मनोविलास मात्रं विश्वं सत्यमिति जानन्ति ते मूढाः । अत्र प्रमाणं श्रुतयः—" यतो वा इमानि भूतानि जायन्ते " " वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इत्याद्याः तन्मूलकमनुमानं च विवादास्पदं विश्वं मिथ्या द्यन्तयोरसत्त्वाद्विकारित्वाद्दृश्यत्वाद्वा शुक्तिरजतादिवद्व्यतिरेके आत्मवद्वा । यद्वा—ननु दीक्षितविप्रादय एव मुह्यन्निन्द्यन्ते कथं कलभाषणमारभ्य मन्निन्दातत्परौ दुरात्मानौ शिशुपालदन्तवक्त्रावपि नेत्याशंक्य तयोर्दौरात्म्यं वास्तवं नेत्याहुः—न यदिदामिति । यद्यस्मादिदं दौरात्म्यमग्रे तयोर्जयविजयभावे नासीत् तथा निधनात् एतत्क्षत्रदेहनाशादनु च न भविष्यति तदा तयोः पुनः पार्षदत्वप्राप्तेः । अतोन्तरा मध्ये एव शिशुपालदन्तवक्त्राख्यक्षत्रियजन्म न्येव त्वयि विषये तयोर्यद्दौरात्म्यं विभाति तन्मृषैवेति मितं निश्चितं अत्यन्तापराधिनोरपि तयोः पुनः पार्षदीकरणे हेतुमाहुः—एकरस इति । सर्वदा प्रेमभक्तविषयकपरमानुग्रहैकरस इत्यर्थः । यथा पूर्वं पश्चाच्च तयोस्तवानुग्रहस्त थैवान्तरापीति यावत्, अन्यथा तदनुपपत्तेः । आद्यन्तयोरसत्त्वेऽपि मध्ये प्रतीतौ दृष्टान्तमाहुः—उपमीयत इति । द्रविणजातयो मृत्सुवर्णाद्यास्तेषां विकल्पा भेदा विकारा वा घटकुण्डलादयस्तेषां पन्थानः प्रकारास्तैरुपमीयते तत्सदृशतया निरूप्यते, यथा—घटकुण्डलादयो मृत्सुवर्णादावाद्यन्तयोरसन्तोऽपि मध्ये प्रतीयन्ते तद्वदेवेदं दौरात्म्यं तयोरित्यर्थः । अतो ये शाल्वादय इदं वैरानुबन्धादिकम्, ऋतं सत्यमेवेत्यवयन्ति जानन्ति ते मूर्खा एव । ईदृशानन्यभक्तयोरपिस्वामिनि वैरानुबन्धे हेतुमाहुः—वितथमनोविलासमिति । विशिष्टं तथा तथ्यं यस्मिन्निति वितथः सत्यवादी वैकुण्ठवासी श्रीविष्णुस्तस्य मनोविलासं जानन्ति न तु कंसादिवत्तयोः स्वमनोविलासरूपमिदं दौरात्म्यं किन्तु तव युयुत्सायां सत्यां मत्तुल्यबलावेतावेव नान्यः कश्चनेति विचार्य त्वयान्तर्यामिणा प्रेरिताभ्यामेव ताभ्यां निरुद्धैः सनकादिभिर्दत्तं शापं निमित्तीकृत्य सर्वमिदं त्वयैव सम्पादितम्, अन्यथा वैकुण्ठस्थयोः पुना राक्षस जन्मानुपपत्तेरित्याशयः । तथा च—'शापोमयैव निर्मितस्तदवैत विप्राः' इति तृतीयोक्तिः समञ्जसा "ब्रह्मतेजः समर्थोऽपि हन्तुं नेच्छे मतं तु मे" इति च । यथा मुकुटादिरूपेण तं विकारभावं प्राप्तं सर्वं परमार्थतः स्वर्णमेव । तथामहदादिकं कार्यजातं परमार्थतो वस्तुतो नरहरेः परमकारणात्परं भिन्नं नास्तीति स्वामिश्लोकार्थः ॥ **तोषिणी**—ननु तर्हि कथं नहि विकृतिं त्यजन्तीत्युक्तं तत्रान्याः सिद्धान्तयन्त्यः पूर्वार्थमेव द्रढयन्ति—नेति । यत् यदि इदं विश्वं निधनात्प्रलयं प्राप्याग्रे सृष्ट्यादौ नासीत् तदा न भविष्यत् त्वत्तो नाभविष्यदेव सिकताभ्य इव तैलम् अतः सत्तादात्म्येन इदंशब्दवाच्यस्य विश्वस्य सूक्ष्मरूपेण तदानीं स्थितिः श्रूयते—"सदेव सोम्येदमग्र आसीत्" इत्यादौ "नासदासीत् " इत्यादिश्रुतिस्तु प्राकट्यमेव निषेधति अतोऽनुमितं किम् अन्तरास्थितिसमयेऽपि त्वय्येव विभातीति "यद्भूतं भवच्च भविष्यच्च " इति श्रुतेः एकरसे शुद्धे त्वयि विभातीति यत्तन्मृषैवाविवेकादेवे त्यर्थः । "अयमात्माऽपहतपाप्मा " इति श्रुतेः । अयं भावः—विश्वं यज्जायते त्वच्छक्तित्वेन त्वदनन्यस्मात्त्वदुपहितात्प्रधानादेव तदा स्थितिप्रलयावपि तत्रैव अतस्त्वद्व्यतिरेकेण तद्व्यतिरेकादेव हि त्वय्युच्यते, स्वतस्तु त्वम न्तरंगया चिच्छक्त्या बहिरंगतदस्पृष्ट एवेति । तदुक्तं प्रथमे श्रीमदर्जुनेन—"त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः । मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥" इति । अतस्तदविवेकादेवेदं द्रविणजातिविक ल्पपथैरुपमीयते न तु तद्विवेकात् । ततश्च तदात्मतयेति तन्मात्रदृष्ट्यैव नहि विकृतिं त्यजन्तीत्युक्तं न तु विकृतिदृष्ट्येति । तस्मादिदं वितथं मनोविलासं मनःसंकल्पमात्रासिद्धं ये वदन्ति ये च ऋतं त्वदत्यन्ताभिन्नमपि वदन्ति ते उभयेऽपि मूर्खा एव मनसोऽपि कार्यान्तःपातात् अनिर्मोक्षप्रसंगाच्च । श्रुतयो दर्शिता एव (२४) ॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलकण्ठी—जगतः सत्यत्वे युक्त्यभावमुक्त्वा मिथ्यात्वे युक्तिमाह—न यदिदमग्र इति । इदमन्तरामितं मृषेति सम्बन्धः । तथा चायं प्रयोगः । इदं प्रत्यक्षादिसिद्धं जगन्मृषा अन्तरा मितत्वात् स्वप्नवदिति हेतुं साधयति—
न यदिति । यत् यतः इदं दृश्यमग्रे सृष्टेः प्राक् नाभूत् तथा निधनादनु विनाशादूर्ध्वं न भविष्यदभावं गमिष्यत् "तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति" इति सर्वेषां भावानामुत्पत्तिप्रलययोः श्रवणाद्द्वै
वादिसम्मतत्वाच्चेदमन्तरामितमतो मृषेत्यर्थः । यदाहुः सम्प्रदायप्रवर्तकाचार्याः—"आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा" इति । ये तु स्वरूपेणाद्यन्तयोरसन्नपि घटः सन्निति तार्किकाः प्राहुः, सांख्याश्च स्थूलरूपेण
सूक्ष्मरूपेण वा घटादिः सन्नेव सर्वदेत्याहुस्तान्प्रत्याह—त्वयि एकरसे विभातीति । स्यादेतत् एवं यदि घटादिर्द्व्यणुकादिक्रमेणारभ्येत सूक्ष्मरूपेण सन्वा कारकव्यापारेणाविःक्रियेत । न त्वेतदस्ति किन्तु स्वप्नदृशीव स्वरूपमा
त्रेण केवले एकरसे भासमाने त्वयि विविधमनेकरसमिदं भातीति । यद्धि यत्रैकस्मिन्नविकृतेनेकं रूपं भाति तन्मृषा रज्ज्वां सर्पदण्डादिवत् तस्मात्स्वप्नवत्सर्वव्यवहारोपपत्तौ जगतः सत्यत्वं कल्प्यम् "मायामात्रमिदं द्वैतमद्वैतं
परमार्थतः " इति श्रुत्या सत्यत्वकल्पनाबाधात् । नापि प्रत्यक्षासिद्धं तत् रज्जुभुजंगादौ अनैकान्तत्वात्प्रत्यक्षस्य यत एकरसे इदं विभाति अतः द्रविणजातिविकल्पपथैरुपमीयते द्रविणं मृल्लोहादिस्तद्दृष्टान्तमार्गेण तथा जातिः
ज्ञापयत्यर्थमिति जातिलिंगं युक्तिमार्गेण तथा विकल्पः शब्दज्ञानानुपाती वस्तुशून्यस्तन्मार्गेण चेदं जगद्वेदे उपमीयते । तत्र छान्दोग्ये तावत् "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्येकविज्ञानात्सर्वविज्ञानमुपक्षिप्य
"कथं नु भगवः स आदेशो भवति यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् " इत्याक्षेपपूर्वकं दृष्टान्तमुखेन समर्थितं सोऽयं द्रविणपथो द्वैतप्रतिपत्त्यु
पायः । यथोक्तं—"मृल्लोहविस्फुलिंगैस्तु सृष्टिर्या चोदिता पुरा । उपायः सोऽवताराय नास्ति भेदः कथंचन ॥ " इति । अस्मिन्मार्गे मृद्घटवत्कनककुण्डलवच्च ब्रह्मजगतोरुपादानोपादेयभावः सगुणोपास्त्यर्थं बन्धमोक्षा
दिव्यवस्थार्थमिष्टः । तथा " जात एव न जायते कोन्वेनं जनयेत्पुनः " इति श्रुतिः लोकदृष्ट्या जातो घटादिरेव नोत्पद्यते किन्तु " अजायमानो बहुधा विजायते " इति जन्माख्यं विकारमनश्नुवान एव परमात्मा
बहुधा विजायत इति श्रुतेरध्यस्यत एव रज्जुभुजंगमवत् उपादानाभावात् । न च प्रधानं परमाणवो वास्त्युपादानमिति वाच्यम् । आद्यस्य पूर्वश्लोके निरस्तत्वात् अणोरपि दिग्दशकावच्छेद्यप्रदेशभेदवत्त्वाभ्युपगमेणुत्वव्याघातः,
अन्यथा परमाणुव्योम्नोर्निःप्रदेशत्वाविशेषात्तुल्यपरिमाणतापत्तिः । संयुक्तयोरण्वोरणुमात्रत्ववत्तयोरप्यन्यतरमात्रत्वापत्त्यवश्यम्भावात् । तथा च व्योम्नोणुत्वमणोर्विभुत्वं चापद्येत निःप्रदेशस्यापि कल्पितैः प्रदेशैरवच्छेदकल्पने
स्वप्नदृष्टेष्टकानिचयेनापि सत्यं गृहमारभ्येत करणवच्चेतनानधिष्ठितेषु तेष्वचेतनेषु प्रथमचरमसंयोगाविभागासम्भवात्, द्व्यणुकोत्पत्तिनाशाद्ययोगेनारम्भवादासम्भवः क्षीरपरमाणोर्दधिपरमाणूत्पत्तौ अवयवसंयोगरूपस्यासमवायिकारणस्या
भावेन केवलव्यावृत्तत्वेन केवलसमवायिकारणादेव कार्योत्पत्तेरवश्यवक्तव्यतया परिणामवादस्यैव ततो लघुत्वात् । एतेन निरवयवतया समवाय्यसमवायिकारणासम्भवाद्व्योमादीनामणूनां चानुत्पत्तिः परास्ता दधिपरमाणुवत्केवला
याः स्वप्रकृतेरेव तदुत्पत्त्युपपत्तेः शब्दाद्यनित्यगुणाश्रयत्वेन च तेषां घटादिवत् कार्यत्वोपपत्तेश्च।एतेन सगुणद्वैतात्मवादोऽपि परास्तः । निर्गुणाद्वैतात्मवादिनस्तु नैते दोषाः प्रादुःष्युः। तस्मान्न वियदादि सत्यं नापि तत्कारणं प्रधानं
सत्यं पूर्वश्लोके तन्मिथ्यात्वस्योपपादितत्वात् ,व्यावृत्तत्वादेव कार्यत्वात्।"तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति स्मृतेश्च सोऽयमसत्यस्योपादानस्यासम्भवोऽनूद्यते श्रुत्या—कोन्वेनमिति । सोऽयं जातिपथो ब्रह्मप्रपञ्चयोर्गुण
भुजगयोरिवोपादानोपादेयभावं प्रख्यापयति ब्रह्मणः कौटस्थ्यसाधकः । तथा सः "यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" इति।यथा कनककुण्डलयोरज्जुभुजं
गमयोर्वा उपादानस्वरूपमन्तरमुपादेयस्वरूपं बाह्यं नैवं ब्रह्मजगतोरन्तर्बहिर्भावोऽस्ति यथा सैन्धवघनो बहिरन्तश्चैकरस एवमयमात्मा व्युत्थानसमाध्योः प्रज्ञानघन एव।तत्र या कार्यकारणभावकल्पना सावन्ध्यायाः सुतः पुरुषस्य
चैतन्यमितिवद्विकल्पमात्रम् । अत एव छान्दोग्ये मृदादिदृष्टान्तान्ते—" वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इति विकाराणां वागालम्बनत्वापरपर्यायं विकल्पमात्रत्वं श्रुतं सोऽय विकल्पपथः त एते द्रविणजा
तिविकल्पपथास्तापनीयेऽप्युक्ताः ' ओतानुज्ञात्रनुज्ञाविकल्पैः ' इति—" ओतत्वं कारणव्याप्तिः कार्ये यद्वन्मृदो घटे । सर्वं ब्रह्मेति तन्निष्ठा जानते परिणामतः (१) । कार्यस्यासमसत्त्वं यत्कारणे समुदीरितम् । तदनु
ज्ञातृशब्दार्थो मरौ वारिविवर्तनम् (२) । एतन्निष्ठास्ततो भूत्वा जगन्मिथ्येति जानते । अनुज्ञायां जगत्तुच्छं शशश्रृङ्गादिवन्मतम् (३) तत्स्थास्त्वन्तर्बहिर्ब्रह्म सत्ता सामान्यमात्रकम् । दिक्कालाद्यनवच्छिन्नमेकमस्तीति जानते
(४) एवं सोपानरीत्यैव भूमित्रितयलङ्घनात् । अविकल्पं परं यत्तदहं ब्रह्मास्मि निर्भयम् (५) विवृतं चैतत्सर्वज्ञात्मगुरुभिरारोपदृष्टिरित्यादिना।यत एकरसे कनकशुक्तिशशस्थानीये त्वयि कुण्डलरजतश्रृङ्गस्थानीयमिदं परिणामारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स यदजया त्वजामनुशयीत गुणांश्च जुषन्भजति सरूपतां तदनु मृत्युमपेतभगः ॥
त्वमुत जहासि तामहिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ॥ २५ ॥ ३८ ॥

ननु यदि प्रपंचोनाम नास्त्येव तदाऽसता तेन न चैतन्यस्य संबंधगंधोऽपि तर्हि किमपराद्धं जीवेन यतोऽयं संसरति किंवा बहुपुण्यमीश्वरस्य यतो नित्यमुक्तः किंविषयं च तदा कर्मकांडमित्यपेक्षायां जीवेश्वरविशेषम् "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ अजामेकां लोहितशुक्लकृष्णाम्" इत्याद्या वदंतीत्याह । स यदजयेति । स तु यद्यस्मादजया मायया अजामविद्यामनुशयीतालिंगेत्ततो गुणांश्च देहेंद्रियादीन् जुषन्सेवमान आत्मतयाऽध्यस्यंस्तदनु तदनंतरं सरूपतां तद्धर्मयोगं च जुषन्नपेतभगः पिहितानंदादिगुणः सन् मृत्युं संसारं भजति प्राप्नोति । तद्विषयमेव च कर्मकांडमिति भावः । त्वमुत त्वं तु जहासि तामजां मायाम् । ननु सा मय्येवास्ति कथं त्यागस्तत्राह।अहिरिव त्वचमिति।अयं भावः।यथा भुजंगःस्वगतमपि कंचुकं गुणबुद्ध्या नाभिमन्यते तथा त्वमजां नहि निरंतराह्ला

पविकल्पैर्विविधं यथा स्यात्तथा विभाति, अतः द्रविणजातिविकल्पपथैर्मन्दमध्यमोत्तमाधिकारिणां क्रमेणाद्वैतप्रतिपत्तये उपमीयते इति निष्कर्षः । ततश्च—" न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ " इति श्रुत्युक्तमर्थं फलितमाह—वितथमनोविलसितमिति । " असतोऽधि मनोऽजायत मनः प्रजापतिमसृजत " इति श्रुतेर्मिथ्याज्ञानोपादानकमनोमात्रं जगदित्यर्थः । यतो द्रविणादिपथैरुपमीयतेऽतो वितथमनोविलासमात्रमिदम् । तथा च गौतमः—" स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः मायागन्धर्वनगरमृगतृष्णावद्वा " इति । साङ्ख्यवृद्धा अपि—" गुणानां परमं रूपं न दृष्टिपथमृच्छति । यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छम् ॥ " इति । " आरम्भपरिणामाभ्यां पूर्वं सम्भावितं जगत् । पश्चाद्गौतमसांख्याभ्यां युक्त्या मिथ्येति निश्चितम् ॥ " इति । एवंविधबोधशून्याननुक्रोशति—ऋतमित्यवयन्त्यबुधा इति । असदप्येतन्मूढाः सत्यमिति जानन्ति यथेन्द्रजालिकानिर्मिते नगरे व्यवहरतो वणिग्जनान् निरालम्बनव्यवहारतया पुरतत्त्वविदव्यहरन्नुपहसति तेऽप्येनं लाभद्वारानभिज्ञोऽयं निर्व्यापार इत्युपहसन्ति एवं बुद्धाबुद्धौ परस्परमुपहसतः । तथोक्तं वार्तिके—" बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशाचवत् । बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवत् ॥ " इति । गीतास्वपि—'या निशा सर्वभूतानाम्' इति " परिणामविवर्तविकल्पपथैर्जडमध्यमसत्तमपुंविषयैः । शिवमेकरसं प्रतिपद्य पुमानभयं पदमद्वयमेति सुखम् ॥ " (२४) ॥ ३७ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—पुनराशंकते—नन्विति । असताऽसत्येन तेन प्रपञ्चेन सम्बन्धस्य गन्धो लेशः सम्बन्धगन्धः । अपराद्धमपकृतम्, अयं जीवः किंविषयः कोऽधिकारी जीवेश्वरयोर्विशेषं भेदं "द्वा सुपर्णा" इत्याद्या वदन्ति । तदर्थः—द्वौ सुपर्णा सुपर्णौ 'प्रथमाद्विवचनस्याकारादेशः छन्दसि' एवमग्रेऽपि । शोभनगमनौ । सयुजौ विम्बप्रतिविम्बभावेन सदा संयुक्तौ सखायौ नित्योपकारकोपकार्यत्वेन वर्तमानौ समानमेकमेव वृक्षं देहं परिषस्वजाते परिष्वक्तवन्तौ नियामकनियम्याद्युपाधिमत्त्वेन परिगृह्य वर्तेते तयोर्द्वयोर्मध्येऽन्यः प्रतिविम्बभूतो जीवः पिप्पलं कर्मफलं स्वादु विविधविषयास्वादनं यथा भवति तथा उपभुंक्ते, तस्मादन्यो विम्बभूतः परमात्मेश्वरः पिप्पलमनश्नन्नभिचाकशीति स्वप्रकाशाखण्डवृत्तिमात्ररूपेणास्त इत्यर्थः । अत्र सुपर्णत्वं पक्षित्वं तयोर्नानाधिष्ठानस्वीकारपरित्यागसाम्यात् । "अजामेकां" इति पूर्वव्याख्याता । अजया तव मायया मोहित इति शेषः । ततस्तस्मात् गुणान् गुणपरिणामान् अध्यस्यन्मन्यमानः तद्धर्मयोगं देहेन्द्रियधर्माणां कार्श्यबाधिर्यशोकादिरूपाणां योगं सम्बन्धं तद्विषयमविद्यावद्विषयम् । इति भाव इति—अविद्यया देहाद्यध्यासेन च तत्तत्फलेच्छया कर्ममार्गप्रसक्तो भवतीति तात्पर्यम् । स्वगतस्य परित्यागोऽसम्भव इत्याक्षिपति—नन्विति । तत्त्यागो मायात्यागः । निर्गलितार्थमाह—अयं भाव इति—निरन्तराह्लादिन्यो याः संवित्काम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिसंवित्कामधेनुवृंदपतेरजया कृत्यमिति तामुपेक्षस इति । कुत एतत्तदाह । आत्तभगो नित्यप्राप्तैश्वर्यः महसि परमैश्वर्येऽष्टगुणितेऽणिमाद्यष्टविभूतिमति महीयसे पूज्यसे विराजसे । कथंभूतः । अपरिमेयभगोऽपरिमितैश्वर्यः । नह्यन्येषामिव देशकालादिपरिच्छिन्नं तवाष्टगुणितमैश्वर्यमपि तु परिपूर्णस्वरूपानुबंधित्वादपरिमितमित्यर्थः ॥ नृत्यंती तव वीक्षणांगणगता कालस्वभावादिभिर्भावान्सत्त्वरजस्तमोगुणमयानुन्मीलयंती बहून् ॥ मामाक्रम्य पदा शिरस्यतिभरं संमर्दयंत्यातुरं माया ते शरणं गतोऽस्मि नृहरे त्वामेव तां वारय ॥ २५ ॥ ३८ ॥

धेनवः स्वस्वरूपविद्याकामधेनवस्तासां वृन्दस्य संघस्य पतेः । बहुत्वं वृत्त्यभिप्रायम् । अजया छागीसमया यथाऽपरिमितदुग्धप्रदधेनुवृन्दपतेः छाग्या कृत्यं न, तथा परमानन्दस्वरूपावस्थितस्य मायाया निवृत्तत्वात्तया सह कृत्यं कथं संगच्छेतेति भावः । एतन्मायोपेक्षणं कुतः तदाह—आत्तभग इति । अन्येषामिन्द्रादीनामिव । इत्यर्थ इति—अपरिमितैश्वर्यस्य तव परिमितैश्वर्याज्जीवान्महान्विशेष इति भावः । स्वामिनाम्—नृत्यन्तीति । भो नृहरे त्वामेव शरणं गतोऽस्मि तां मायां वारय । का सा माया, त्वां किं करोतीत्यत आह—ते तव माया तत्र वीक्षणमेवांगणं तत्र गता नृत्यन्ती तव दृष्टिलब्धसामर्थ्या नानाविधभावं कुर्वन्ती गुणमयान्भावान् शान्तघोरमूढलक्षणान् उन्मीलयन्ती प्रकाशयन्ती सती मां शिरसि पदा पादेनाक्रम्यातिभारं यथा स्यात्तथा संमर्दयन्ती तवैव माया त्वमेव तां वारय नान्यस्य तद्वारणे सामर्थ्यमस्ति—"दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" इति श्रीमुखोक्तेः ॥ * ॥ **श्रीधरानुयायिनी**—नन्वविद्यातत्कार्यरूपसंसारस्यासत्त्वे तेनासता सम्बन्धाभावात् किन्निमित्तको[1] जीवस्य संसारः कथं[2] वा नित्यमुक्तत्वमीश्वरस्य कर्मकाण्डं च किंविषयमित्याकांक्षायां संसारे निमित्तं जीवेश्वरविशेषं चाह—स इति । स च जीवो यस्मान्मायया मोहितः स्थूलसूक्ष्मदेहाकारेण परिणतामविद्यामालिंग्य देहेन्द्रियादीनात्मतयाध्यस्य तदनन्तरमेव तत्तद्धर्मानात्मन्यध्यस्य भोग्यविषयान्प्रीत्या सेवमानस्तेनैव हेतुना मनसा भोग्याकारतां सम्प्राप्याविद्यया पिहितानन्दादिगुणः सन्संसरति एतद्विषयकमेव कर्मकाण्डम् । किञ्च—यथा सर्पः स्वगतमपि कञ्चुकं गुणबुद्ध्या नाभिमन्यते किन्तु स्वेच्छया तं दूरतस्त्यजत्येव तथैव नित्यप्राप्तापरिमितैश्वर्यस्त्वं तामविद्यां मायां वा दूरतस्त्यक्त्वाऽणिमाद्यष्टविभूतिमति परमैश्वर्ये सदा विराजसे । नहि कोटिकामधेनुपतेश्छाग्या कृत्यं किमपीति प्रसिद्धतरम् । अयमाशयः—तेजोंशं सुवर्णादिकं तम इव त्वदंशं जीवमविद्यावृणोत्येव तेजःपुञ्जं भास्करमिव चिद्घनं त्वां तमोरूपाविद्या कदापि नावृणोति चिद्रूपत्वाविशेषेऽपि न त्वय्यविद्यासम्बन्धगन्धोऽपि, अत एव न मायासम्बन्धगन्धोऽपीति ध्येयम् । यद्वा—चैद्यादिप्रसंगेन स्मारितस्य कंसस्य व्यवस्थामाहुः—स यदिति । स प्रसिद्धो महावैरी कंसः यद्यस्मात् इतगुणान् इतान् देवक्यामागतान्गुणान् त्वदवतारसूचकप्रभावान् जुषंश्च अनुभवन्नपि सरूपतां तदवस्थामेव दुष्टतां भजति स्म । 'इतः कर्बुर आगते' इति मेदिनी । अतस्तवाजया माययाऽजामविद्यां मोहमनुशयी त्वदवतारावसरे सपरिजनः कंसो निद्रामवाप त्वसुत त्वं तु श्रीगोकुलमागत्य तां मायां जहासि भगिनीत्वेनांगीकृतामपि कंसं प्रत्येव प्रस्थापयसि । तत्रानासक्तौ दृष्टान्तमाहुः—अहिरिवेति । तदनु तदनन्तरं स कंसो मृत्युं भजति स्म यतः स कंसः अपेतभगः हतभाग्यः त्वं तु आत्तभगः नित्यप्राप्तपरिपूर्णैश्वर्योऽसि तत्राप्यष्टभिः श्रीराधादिप्रियाभिर्महालक्ष्म्यवतारनिजकान्ताभिः श्रीरुक्मिण्यादिभिर्वा गुणिते शोभिते महसि वनविहारजलविहाररासविहारान्तःपुरविहारादिमहोत्सवे महीयसे विराजसे वैमानिकादिभिः कुसुमवर्षणादिभिः पूज्यसे वा तत्राप्यपरिमेयभगोऽसि ॥ * ॥ **विश्वनाथी**—अथ श्रीमदीश्वरस्य प्रधानास्पृष्टत्वमेव जीववैलक्षण्येन दर्शयन्त्यः काश्चित्तदनुगताः स्तुवन्ति किञ्च ननु भवतु जगतो मद्वैलक्षण्यं तादृशजाड्यादितः जीवस्य तु अनाशच्चिद्रूपत्वात्सालक्षण्यमेव तर्हि कथं ममैव भजनीयत्वं पूर्वाभिर्दर्शितामित्याशंक्य तदर्थमेव जीवेश्वरस्वरूपवैलक्षण्यं प्रतिपादयन्त्यः स्तुवन्ति—स इति । तैर्व्याख्यातम् । पिहितानन्दादिगुणत्वेन स्वतोऽपि जीवस्य सविशेषत्वं प्राप्तं तच्च युक्तमेवेश्वरांशत्वात्, एतद्विवरणं श्रीभागवतसन्दर्भतट्टीकयोर्द्रष्टव्यम् । यद्वा—स जीवो यद्यस्मादजया माययाऽजां स्वरूपाज्ञानमनुलक्ष्यीकृत्य शयीत मुह्यति तत्तस्मादपेतस्वरूपसामर्थ्यः सन्सरूपतां मायाकार्योपाधिसामर्थ्यं भजन्गुणांश्च विषयाञ्जुषन् अनुमृत्युं संसारं भजतीति । तत्रैकेनोपाधिना स्वस्मिन्स्थितेन कस्यचित्स्पर्शः कस्यचिन्नेति सामर्थ्यवैलक्षण्यात्स्वरूपवैलक्षण्यमवगम्यते तच्च ब्रह्मस्तवे दर्शितम् । अत्र श्रुतयो 'द्वा सुपर्णा' इत्याद्याः (२९) ॥ ३८ ॥

१ केनापराधेन । २ कन पुण्यौघेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि न समुद्धरंति यतयो हृदि कामजटा दुरधिगमोऽसतां हृदि गतोऽस्मृतकंठमणिः ॥
असुतृपयोगिनामुभयतोऽप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥ २६ ॥ ३९ ॥

एवं तावदुक्तसाधनकदंबेन ये भगवंतं भजंति ते मृत्युं तरंति इतरे संसरंतीत्युक्तम् इदानीं ये बहिःसंगं परित्यज्य भगवन्मार्गे प्रवृत्ता अपि कथंचिदंतर्वांताशिनः कामान्न मुंचंति ते न भगवंतं प्राप्नुवंति न चेह सुखं लभंते केवलं कुयोनीरेव प्राप्नुवंति। तान् शोचन् "कामान्यः कामयते मन्यमानः स कर्मभिर्जायते तत्रतत्र" इत्यादिश्रुत्यर्थमाह ।

नीलकंठी–एवं परिणामविवर्तविकल्पमार्गा अद्वैतप्रतिपत्तिसोपानरूपा मन्दमध्यमोत्तमाधिकारिगम्या उक्ताः । तत्र द्वितीये जीवैक्यं स्वप्नवद्व्यवहारः एकमुक्तौ सर्वमुक्तिरिति न बन्धमोक्षव्यवस्थास्ति । नतरां तृतीये सर्वापवादरूपत्वात् । प्रथमे तु तत्सर्वं सम्भवतीत्यभिप्रेत्य "तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्" इति श्रुत्युक्तां बन्धमोक्षव्यवस्थामाह–स यदजयेति । यदिति क्लीबत्वमार्षम् यः त्वम जयाऽजामनुशयीत स त्वम् उत अपरिमेयभगोऽसीति सम्बन्धः । यस्त्वं पूर्वमजया मूलाविद्ययाऽजां स्थूलसूक्ष्मदेहद्वयाकारेण परिणतां मायामनुशयीत तद्धर्मानात्मन्यध्यस्यासीत च ततोऽध्यासानन्तरं गुणान्भोग्यजातं जुषन्प्रीत्या सेवमानः। हेतौ शतृप्रत्ययः। सेवनाद्धेतोः सरूपतां भोग्याकारतां मनसा भजति तदनु भोग्यसारूप्यमनु मृत्युं संसारं भजतीत्यनुषज्यते । कुत एवं यतोऽपेतभगः अविद्यया तिरस्कृतैश्वर्यः य एवंविधः संसारी स त्वमुत त्वमेव कथम् आत्तभगः उपात्तवैराग्यादिसाधनसम्पत्तिः सन् तामुक्तविधामविद्यां शास्त्राचार्यप्रसादलब्धसन्मार्गो भूत्वा जहासि त्यजसि । क्षीरसर्पिर्न्यायेनाविद्यातः सकृत्पृथग्भूय न पूर्ववत्तदैक्यमनुकरोषि । अत्र दृष्टान्तः–अहिरिव त्वचमिति । यथा सर्पः पूर्वमात्मतयोपात्तां त्वचं त्यक्त्वा पुनर्वल्मीकबिले शयानायां तस्यां सञ्चरन्नपि न तामात्मत्वेनाभिमन्यते, एवं त्वमपि देहादावभिमानमिति । तथा च श्रुतिः–"तद्यथाहिनिर्ल्वयिनीं वल्मीके मृतो प्रत्यस्तां शयीत एवमेवेदं शरीरं शेतेऽथायमशरीरो मृतः प्राणो ब्रह्मैव तेज एव चक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव" इति । अयं भावः–रज्ज्वादीनामकेनतूलाज्ञानविषयत्वात्तत्र निवृत्तोऽपि सर्पभ्रमः पुनरुदेति न त्वेकमूलाज्ञानविषये प्रतीचि सकृन्निवृत्तस्य देहात्मभ्रमस्य पुनः सम्भवोऽस्ति कारणाभावात् । तत्त्वपक्षपातित्वाच्च बुद्धेः । यदाहुर्बाह्या अपि–"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः । न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥" इति । तस्मात्सुष्ठूक्तमहिरिव त्वचमिति । एवमनर्थनिवृत्तिं विद्याफलमुक्त्वानन्दावाप्तिमप्याह–महसि महीयस इति । अजां हित्वा स्वे महिम्नि प्रतिष्ठिते चित्प्रकाशे स्वरूपभूते विद्योतस इत्यर्थः । कीदृशे महसि, अष्टगुणिते । "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघित्सोऽपिपासः सत्यकामः सत्यसंकल्पः" इति श्रुत्युक्तैः अणिमामहिमालघिमागरिमाप्राप्तिप्राकाम्येशित्ववशित्वाख्यैर्वाऽष्टभिर्गुणैर्युक्ते । अत एव त्वमपरिमेयभगः अनन्तैश्वर्यः । अत्र "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति श्रुतेरजानुशयी बद्धः तत्त्यागी मुक्त इत्युक्तम् । तत्र–"कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः" इति श्रुतेरनेकतरंगप्रतिबिम्बचन्द्राभा अनेके जीवाः । जलाशयप्रतिबिम्बाभ एक ईश्वरः । तत्र यस्तरंगो जलाशये लीनस्तत्प्रतिबिम्बो जलाशयप्रतिबिम्बत्वमेति नान्यः । एवं यदन्तःकरणं विद्यया जीवोपाधिभूतं स्वकारणे मायायां लीयते तदुपहिता चितिरीशत्वमेति नान्योपहिता । ततो मायाया अपि बाधे शुद्धचिन्मात्रत्वमिति युज्यते–"लवणं सलिलद्वारा तेजोऽभ्येति न तु स्वतः । एवं जीवाशिवद्वारा याति विष्णोः परं पदम्" (२९) ॥ ३८ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–इतरे भक्तिविमुखाः । बहिःसंगं विषयसंगम् । अन्तर्वान्ताशिनश्चेतासि वान्ताशनवत्त्यक्तविषयध्यानं कुर्वन्तो ये तान् । श्रुतिं पूर्णां पठति "कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्रतत्र । पर्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः" इति मुमुक्षोः कामत्याग एव प्रधानसाधनमिति दर्शयति–कामान्दृष्टादृष्टविषयान् यः कामयते मन्यमानस्तद्गुणांश्चिन्तयानः सः तैः कामभिः कामैः सह जायते यत्रयत्र विषयप्राप्तिनिमित्तकामाः कर्मसु पुरुषं नियोजयन्ति तत्रतत्रेष्टविषयेषु तैरेव कामैर्वेष्टितो जायते, इत्यर्थः । कृतात्मनः परमात्मनि कृत आत्मा येन तस्य प्राप्तात्मतत्त्वस्य तु इहैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि न समुद्धरंतीति । हे भगवन्ये यतयो हृदि स्थिताः कामजटाः कामस्य मूलानि वासना यदि न समुद्धरंति नोत्पाटयंति तेषामसतां भवान् हृदि गतोऽपि दुरधिगमो दुष्प्रापः । कथम् । अस्मृतकंठमणिर्विस्मृतो यः कंठमणिस्ततुल्यः स यथा कंठे वर्तमानोऽप्यस्मृतश्चेदप्राप्त इव भवति तद्वदिति । न केवलमेतावत्किंत्वसुतृपयोगिनामिंद्रियत र्पणपराणां योगच्छद्मनामुभयतोऽप्यसुखमिहामुत्र च दुःखमेव । तदाह । अनपगतांतकादनिवृत्तान्मृत्योः । लोकाराधनधनार्जनादिक्लेशाद्रोगवैभवप्राकट्यभयाच्चेह तावद्दुःखं भवत ईश्वरादपि दुःखम् । कथंभूतात् । अनधिरूढपदात् अनधिरूढं पदं स्वरूपं यस्य तस्मात् । त्वत्स्वरूपप्राप्त्यभावादविद्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमनिबंधनत्वद्दंड रूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः ॥ दंभन्यासमिषेण वंचितजनं भोगैकचिंतातुरं संमुह्यंतमहर्निशं विरचितोद्योगक्लमैराकुलम् ॥ आज्ञालंघिनमज्ञमज्ञजनतासंमाननासम्मदं दीनानाथदयानिधान परमानंद प्रभो पाहि माम् ॥ २६ ॥ ३९ ॥

सर्वे कामाः प्रविलीयन्ति विलयं गच्छन्ति । किंभूतस्य—परमार्थतत्त्वविज्ञानात्परि समन्ततः प्राप्ताः कामा येन तस्य पर्याप्तकामस्येति । तदुक्तं गीतासु—''आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् । तद्वत्कामा यं प्रविशन्ति सर्वे स शांतिमाप्नोति न कामकामी ॥'' इति । नन्वयमात्मज्ञः कृतात्माऽयं कामीति कथं ज्ञायते तज्ज्ञानमाह श्रुतिः—''आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनु सञ्ज्वरेत् ॥'' इति । अर्थश्च—सच्चिदानन्दरूपः परमात्मा देहादिव्यतिरिक्तोऽयमहमस्मीति आत्मानं यः पुरुषश्चेति यदि जानीयात्तर्हि स किमिच्छन् किमात्मातिरिक्तं वस्त्वन्तरमस्ति तदिच्छन् कस्य कामाय आत्मनो व्यतिरिक्तस्य कस्य वस्तुनः कामाय प्राप्तये शरीरमनुसञ्ज्वरेत् शरीरोपाधिकृतसुखदुःखरागद्वेषभयमानापमानादिभिः सन्तप्तो भवेत्स्वार्थाद्भ्रश्येत् तस्मादात्माज्ञानविमूढानां विषयासक्तचित्तानां कुयोगिनामुभयतोऽप्यसुखमित्युक्तम् । प्रकृतम नुसरामः—अस्मृतकण्ठमणिरिह लुप्तोपमा बोध्या, एतावत् अप्राप्तवदेव त्वं भवसीत्येतावन्मात्रमेव । तदाह उभयतो दुःखमाह । निजधर्मस्यातिक्रम उल्लंघनमेव निबन्धनं कारणं यस्यास्त्वद्दण्डरूपनरकप्राप्तेः । अमुत्रापि परलोकेऽपि । इत्यर्थ इति—''कालिका भिक्षवो दृष्टा उभाभ्यां मार्गतो गताः । दुग्धश्रीफललोभेन हंसोदिष्टबको यथा ॥'' इति न्यायेनेह भोगाप्राप्तेः परत्र सुखाप्राप्तेश्च दुःखमेवेति भावः । न्यायार्थस्तु—मत्स्या न्निघ्नन्तं सुरूपं बकं दृष्ट्वा हंसस्तं सुभोगेन लोभयित्वा निष्पापं कर्तुमिच्छन्नुवाच—अहो किमर्थं हिंसया जीविकां करोषि मया सार्द्धं गच्छ त्वामतिस्वादुतरं भोजनं पेयञ्च दास्यामि । स च भोगलोभेन तेन साकं गच्छंस्तत्तुल्यमुड्डयितुमशक्नुवन्नाह त्वया साकं गन्तुं न शक्तोऽस्मीति । ततो हंसस्तं स्वपृष्ठमारोप्य ययौ । स चोवाच मां क्षुधार्तं भोजनं देहीत्युक्तः सन् नारिकेलफलं चञ्च्वा निर्भिद्य तद्गतं दुग्धं बकाय पाययामास, स च तदेवातिस्वादु मत्वात्रैवाहं प्रतिदिनमिदं क्षीरं पीत्वा स्थास्यामीति विचार्य हंसमाह—नाहमितोऽग्रे यास्ये त्वं याहीति । एवं सत्संगमिषेण स्वगृहं त्यक्त्वा भोगेष्वासक्तो हरिभजनमकुर्वाणोऽप्युभयभ्रष्टो भवतीत्यर्थः । स्वामिनाम्—दम्भेति । अत्रैतज्ज्ञातव्यं स्वयं परमहंसर्षभो निवृत्तसमस्तमायागुणेन्द्रियव्यापारोऽनवरतभगवद्गुणस्मरणकीर्तनादिभिर्निदिध्यासितपरमात्मतत्त्वोऽपि स्वस्य संन्यासित्वात्कुसंन्यासिनां दोषानात्मन्या रोप्य परमानन्दं श्रीकृष्णं प्रार्थयन्नाह—दंभेन यो न्यासस्तस्य मिषेण छलेन । वञ्चिता जना येन तम् । दम्भन्यासत्वात् भोगेषु एका केवला या चिंता तयाऽऽतुरं दुःखितम् । अत एवाहर्निशं मुह्यन्तं मोहं प्राप्नुवंतम् । विरचितो य उद्योगो मठनिर्माणादिव्यापारस्तत्र यः क्लम इतस्ततो धनाद्यर्थपरिश्रमस्तेनाकुलमवशम् अतोऽज्ञमतस्त्वदाज्ञालंघिनम् । ''यावज्जीवमग्निहोत्रं जुहुयाच्छान्तो दांतः'' इत्याज्ञां विलंघ्य कृतसंन्यासम् । तत्रापि संन्यासधर्मं परित्यज्य भोगाद्या कुलत्वादाज्ञालंघिनमिति । तत्कुतः यतः अज्ञानां जनतानां समूहानां सम्माननाभिः सत्कारैः सम्यग्मदोऽभिमानोऽहो एते मां सर्वोत्कृष्टं ज्ञात्वाऽर्चयंतीत्येवंलक्षणो यस्य तम् एवंभूतं माम् । हे दीनैरासमंतान्नाथ्यते प्रार्थ्यते इति तथाभूत, दयैव निधानं धनं यस्य हे तथाभूत । एतेनैवंभूतं कुमार्गगामिनं समुद्धर्तुं श्रीकृष्ण एव प्रभुर्नान्य इति दर्शितं स्वामिचरणैः ॥ * ॥ **श्रीधरानुयायिनी**—ये तु कपटभक्तास्तेषां न तव प्राप्तिर्न वा किमपी हामुत्र सुखमित्याहुः—यदीति । हे भगवन् ये च बहिर्बकाकारा मिथ्यासंन्यासिनो वासनासहस्राक्रान्तान्तःकरणा देहेंद्रियलालनपरा रहसि रात्रौ परस्त्रीबालभोगादिसुखभोक्तारस्तेषां त्वं हृदि स्थितोऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरूपदेशान्मनसि प्राप्तोऽपि वा विस्मृतकण्ठमाणिरिव यथावदनुभवितुमशक्य एवासि प्रत्युत तेषां लोकाराधनधनार्जनादिक्लेशाद्योगवैभवप्राकट्यभयाचैहिकं दुःखमेव, तथा तवेश्वरस्याज्ञानादज्ञत्वेनावश्यकर्तव्यसन्ध्योपासनादिनिजनित्यधर्मपरित्यागाच्च त्वत्तो दण्डरूपनरकप्राप्त्या पारलौकिकमपि दुःखमेव, यदि योगिनामप्येवं तदा किमु वक्तव्यमसतामित्याशयः ॥ * ॥ **विश्वनाथी**–तदेव तत्सन्ततभक्त्यर्थमेवान्यपरत्वमीषदपि वयं न सहामह इत्यन्या ज्ञानयोगामिश्रभक्तिप्रतिपादकश्रुतय आहुः–यदीति । यतयो निर्जितबहिरिन्द्रियाः संन्यासिनोऽपि यदि हृदि कामवासनाः समस्ता एव नोन्मूलयन्ति तर्हि तेषामसतामुत्तमावस्थानप्राप्तानां हृदि गतो ज्ञानसिद्ध्यर्थं मनस्याश्रितोऽपि भवान् दुरधिगमो यथाकथञ्चिदेव स्मृतिविषयः स्यात् ताभिरावृतचित्तत्वात् । ननु, परमदुर्लभोऽपि भाग्येन लब्धश्चेत्क इव तादृशः स्यात् । अस्मृतेति । कण्ठे परिहितोऽपि महामणिः कामाद्यासक्तिसमये विस्मृतो दृश्यत इत्यर्थः । ये त्विन्द्रियतर्पणतत्परास्तेषां योगिनां योगसिद्ध्यर्थं त्वदुपासनाप्रवृत्तानामप्युभयतोऽप्यसुखम् तत्रानपगतान्तकान्मृत्युपरम्परामयसंसारादाध्यात्मिकादिदुःखं न अधिगतं नात्मोन्मुखीकृतं पदं चरणारविन्दं यस्य तस्माद्भवतस्तूपेक्ष्यरूपामिति । श्रुतयस्तद्दर्शिता एव (२६) ॥ ३९ ॥

नीलकण्ठी–पूर्वस्मिन् श्लोके सत्त्वमित्यपेतभगस्य जीवस्यापरिमेयभगत्वलक्षणमीश्वरत्वमुक्तं तस्य शशशृङ्गवद्विकल्पमात्रत्वे शुक्तिरजतवत्प्रातिभासिकत्वे मनोरथवनितावत्प्रतिभामात्रत्वे वा मिथ्यात्वापत्त्या "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म" इति वाक्यजातमनर्थकं स्यात् । कीटभ्रमरवदुत्पाद्यत्वे दधिवद्विकारत्वे जन्यतया तस्यानित्यत्वापत्तिः, नदीसिन्धुवदवाप्यत्वमपि न नरागारवद्भेदेन घटाकाशमहाकाशवदभेदेन आद्ये वाक्यानर्थक्यम्, अन्त्ये जीवब्रह्मणोर्वास्तवांशांशिभावापत्तेः "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इति निरवयवत्वश्रुतिव्याकोपः काञ्चनशुद्धिवद्भावकत्वे निरञ्जनत्वश्रुतिव्याकोपः 'असंगो ह्ययं पुरुषः" इति श्रुतेः, इत्यभिसन्धाय कण्ठमणिवन्नित्यप्राप्तमप्यावरणापगममात्रलभ्यं जीवस्येश्वरत्वमित्याह–यदि न समुद्धरन्तीति । हृदि गत इत्युपलब्धिस्थानमुक्तम्, शेषग्रन्थेन वासनाक्षय उपलब्धिहेतुरुक्तः एवं श्रुतियुक्तिभ्यां निश्चितेऽप्यात्मैक्ये भेदवासनाप्राबल्याद्विपरीतवासना न निवर्ततेऽतस्तान्निवृत्त्यर्थं निदिध्यासनमत्र श्लोके विधीयते इति तात्पर्यार्थः । अक्षरार्थस्तु–हे भगवन् यतयः संन्यासिनो यदि हृदि स्थिताः कामजटाः काममूलवासनाः न समुद्धरन्ति समूलं नोन्मूलयन्ति तर्हि त्वं तेषामसतां दुरधिगमो दुष्प्रापः, कामोन्मूलनकृतां तु हृदिगतः स्मृतकण्ठमणिरिव सुखलभ्यः । "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" "प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम्" इति श्रुतिस्मृतिभ्याम् । ननु–"अपि वृन्दावने शून्ये शृगालत्वं स इच्छति । न तु निर्विषयं मोक्षं कदाचिदपि गौतम ॥" इति रागिगीतावचनात्कामोऽपि रागिणां सुखहेतुरेवातः कथं तस्य हेयत्वमुच्यत इत्याशङ्क्याह–असुतृपेति । इन्द्रियतृप्तिकामानां योगिनां परिव्राडपसदानाम् उभयतोऽप्यसुखं भवति । अयं भावः–वैराग्यपूर्वकं यमनियमाद्यष्टाङ्गोपेतमनुतिष्ठतां पुरस्तादणिमादिसिद्धिषूपस्थितासु योगैश्वर्यासक्तास्तेऽसुतृपयोगिनः तेषां न सिद्धिजं सुखमन्तवत्त्वात् नापि मोक्षसुखमवैराग्यात् किन्तु संसार एव । यदाह भगवान्पतञ्जलिः–"स्थान्युपनिमन्त्रणोसङ्गस्मयाकरणपुनरनिष्टप्रसंगात्" इति । स्थानिनो देवाः । किं तदुभयं यस्मादसुखं तदाह–अनपगतेति । अनपगतोऽनतिक्रान्तोऽन्तको बन्धको मृत्युरूपी कामः विषयाभिलाषः "अशनाया हि मृत्युः" इति श्रुतेः । अवैराग्यादेकं भयं यदाह भगवान्–"बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः । अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥" इति । तथा भवतः श्रीविष्णोः अनधिरूढान्निदिध्यासनबलेनानधिगतात्पदात्पदनीयात्स्थानात् "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति श्रुतिप्रसिद्धात् अज्ञातादात्मनो जन्ममरणप्रवाहपाताख्यं द्वितीयं भयमित्यर्थः । तस्माद्वैराग्यबलेन कामवासनानां समूलमुन्मूलने यतमानस्य योगिश्रेष्ठस्य स्वरूपानन्दलाभः कण्ठमणिवद्भवति नान्यस्येति तात्पर्यम् (२६) ॥ ३९ ॥

---

१ संस्कार्यत्वे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः ॥
अनुयुगमन्वहं सगुणगीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ २७ ॥ ४० ॥

ननु यतेर्न किमपि कृत्यमस्ति प्रारब्धमेव सुखोपभोगेनापक्षय्यते अतः किमिति वृथा शप्यते उभयतोऽप्यसुखमिति, श्रूयते च "एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्" इत्यादि तत्राह । त्वदवगमीति । हे सगुण षड्गुणैश्वर्ययुक्त त्वदवगमी त्वज्ज्ञानवान्भवदुत्थशुभाशुभयोर्भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्मणोः फलभूतान् गुणविगुणान्वयान्सुखदुःखसंबंधान्न वेत्ति नानुसंधत्ते तर्हि तदानीं च देहभृतां देहाभिमानिनां प्रवृत्तिनिवृत्तिकरीर्गिरो विधिनिषेधलक्षणा न वेत्ति। विगतदेहाभिमानतया कार्याकार्यबोधाभावान्न नियुज्यत इत्यर्थः । युक्तं चैतत् । यतः कारणान्मनुजैरन्वहं श्रवणभृतः अनुदिनं श्रवणेन चेतसि धृतस्त्वं तेषामपवर्गगतिरपवर्गरूपा गतिर्भवसि । कथम् । श्रवणभृतः । अनुयुगं प्रतियुगं या गीतपरंपरा उपदेशसंततिस्तया सत्संप्रदायानुसारेणेत्यर्थः । एतदुक्तं भवति । ये तावत्तत्त्वज्ञानिनो न तेषां कर्माधिकारशंकाऽपि । ये चानवरतं त्वत्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभवत्पदानां विधिनिषेधबाधः इतरेषां तु योगच्छद्मनेंद्रियलालसानामुभयतोऽप्यसुखमिति ॥ अवगमं तव मे दिश माधव स्फुरति यन्न सुखासुखसंगमः ॥ श्रवणवर्णनभावमथापि वा नहि भवामि यथा विधिकिंकरः ॥ २७॥ ४० ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—अत्राक्षिपति—नन्विति । यतेः संन्यासिनः । कृत्यं कर्तव्यम् । सुखोपभोगेन विषयसुखास्वादनेन । अपक्षय्यतेऽपाक्रियते । यतोऽतो हेतोः स यतिः शप्यते उपालभ्यते उभयतोऽप्यसुखम् इत्येवंरूपेण । श्रुत्यापि तथैव प्रोक्तमित्याह—श्रूयते चेति—" एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेन नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजो विचिकित्सो ब्राह्मणो भवति " इति । अर्थः—ब्राह्मणस्य ब्रह्मविदः एष महिमा माहात्म्यं नित्यमतः कर्मणा शुभेन न वर्द्धते वृद्धिं न याति, तथाऽशुभेन कर्मणा नो कनीयान् क्षीयते अन्ये तु महिमानः कर्मकृता अनित्याः अतस्तं महिमानं विदित्वा यस्यैष महिमा तस्यैव परमात्मनः पदवित्स्वरूपवित् स्यात् स पापकेन शुभाशुभलक्षणेन कर्मणा ज्ञानाज्ञानकृतेन न लिप्यते इति । ततः किमत आह श्रुतिः—एनं ब्रह्मविदं पाप्मा पापं न तरति नातिक्रामति स तु सर्वं भूतं भवद्भविष्यत्पापं तरति अतिक्रम्य वर्तते एवं योज्यं न तपति न तापयति स तु सर्वं तपति भस्मसात्करोति इति । तदानीं त्वदवगमावसरे । इत्यर्थ इति—देहाभिमानिनामेव विधिनिषेधे प्रवृत्तिरस्ति तद्धीनानां न सास्तीति भावः । एतद्विधिनिषेधराहित्यं युक्तमुचितम् । इत्यर्थ इति—एतेन काल्पनिकासत्सम्प्रदायप्रवृत्तानां तु स्वप्नेऽपि भगवत्प्राप्तिर्न सम्भवतीति भावः । फलितमाह—एतदुक्तं भवतीत्यादिना । इतरेषां त्वदवगमत्वद्भक्तिरहितानाम् । स्वामिनाम्—अवगममिति । अवगमं ज्ञानम् । यद्येन त्वदवगमेन । सुखासुखयोः संगमो न स्फुरति भासते । अथापि यद्वा । यथा येन । विधिकिङ्करः प्रवृत्तिमार्गानुयायी ॥ * ॥ **श्रीधरानुयायिनी**—इदमेव स्पष्टीकरोति—त्वदिति । यतस्तव यथार्थसाक्षात्कारवानत एव देहाभिमानशून्यः, अत एव स कर्मफलप्रदपरमेश्वरप्रेरितप्राचीनधर्माधर्मकर्मफलीभूतसुखदुःखसम्बन्धान् देहाद्यासप्रयुक्तकर्मादिकर्तव्यताबोधकवेदवाचश्च नानुसन्धत्ते।ये वा परम्परागतसनातनसत्सम्प्रदायानुरोधेनानुक्षणप्रवर्तमानत्वत्कथाश्रवणादिनिष्ठया त्वां चित्ते धारयन्ति तेषामपि त्वत्पादपद्मासन्नतया मिथ्यासंन्यासिनामिव न विधिनिषेधाधिकारो दुःखं वा किन्तु तस्य तेषां च मोक्षाख्या तुल्यैव गतिस्त्वमेव भवसि।यद्वा—युगेयुगे प्रतिदिनं मनुजैः कृता या सगुणस्याप्राकृतगुणाढ्यस्य तव या गीतपरम्परा त्वन्नामकीर्तनादिप्रवाहरूपा तया त्वं श्रवणभृतस्तत्कर्णयोः परिपूर्णः सन्नपवर्गगतिर्भवसि।अपकृष्टा वर्गा धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्था यतस्तथाभूता गतिर्भवसि प्रेमभक्तिप्रद इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावत्–"कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम्" इत्याद्युक्तेः॥*॥ **तोषिणी**–तच्छ्रुत्वा तदेकपरायणाः सोल्लासमभिस्पष्टयन्ति–त्वदिति। त्वद्याथार्थ्यानुभवी तु भवदुत्थयोर्भवद्भक्तिप्रभावेण स्थातुमसमर्थयोरपि साधनबाहुल्याय तद्देहं रिरक्षूणां भवतैव तदाभासत्वेन स्थापितयोः शुभाशुभयोः प्रारब्धरूपयोर्गुणविगुणौ सुखदुःखे तयोरन्वया अनुवृत्तयस्तान्न वेत्ति ते सन्ति न वेति न जानात्यपि, यदा तान्न वेत्ति तदा देहभृतां देहाभिमानिनां विधिनिषेधरूपा गिरः सुतरां न वेत्ति। यद्वा–गिर स्तुतिनिन्दारूपाश्च न वेत्तीति। अथवा भवत् उद्भवत् उत्थमुत्थितं च देहभृतां तयोर्जायमानोत्थितयोः देहभृद्भिः क्रियमाणयोः कृतयोरिति यावत्, तयोः शुभाशुभयोः पुण्यपापयोर्गुणविगुणान्वयान् गुणदोषसम्बन्धान्न वेत्ति कः किं करोति कृतवान्वा। ततो वा भद्राभद्रं किं जातं तत्सर्वं न जानातीत्यर्थः। तर्हि तेषां स्तुतिनिन्दारूपाः स्वविषयिका गिरश्च न वेत्ति, त्वदनुभवानन्दाविष्टत्वादेवेत्यर्थः। तर्हि किं करोतीत्यपेक्षायां तत्सम्प्रदायप्रवर्तकमहाजनदृष्टान्तेन दर्शयति–अन्विति। यतोऽनुगमाद्धेतोः स्वभक्त्येकवशत्वं मनुजैः श्रीस्वायम्भुवमनुतुल्यैः प्राणिभिरनुयुगं तत्राप्यन्वहं गुणगीतपरम्परया श्रवणद्वारा चेतसि धृतो भवसि। तदुक्तं तृतीये श्रीमनुमुद्दिश्य–" अयातयामास्तस्यासन्यामाः स्वान्तरयापनाः। शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः॥" इति। तत्र हेतुः–अपवर्गस्यापि गतिराश्रयो दशमपदार्थस्त्वं परमपुरुषार्थत्वादेवेति भावः। तदेवं " यावत्त्वच्छ्रवणादेरेवंभूतं महिमानं न जानन्ति तावदेव साधनान्तरे प्रवर्तन्ते" इति च 'तावत्कर्माणि कुर्वीत' "मत्कथाश्रवणादौ च श्रद्धा यावन्न जायते" इत्यादेः॥*॥ **विश्वनाथस्तु**–अपवर्गगतिः पञ्चमस्कन्धगद्यदृष्ट्या प्रेमभक्तिप्रदः। अपकृष्टा वर्गाश्चत्वारोऽपि यतस्तथाभूतो वा गतिर्भवसीत्याह–अत्र श्रुतयः–" तैरहं पूजनीयो वै भद्र कृष्णनिवासिभिः। तद्धर्मगतिहीना ये तस्यां मयि परायणाः। कलिना ग्रसिता ये वै तेषां तस्यामवस्थितिः। यथा त्वं सह पुत्रैश्च यथा रुद्रो गणैः सह। यथा श्रियाभियुक्तोऽहं तथा भक्तो मम प्रियः॥" गोपालतापन्यः॥ तद्धर्मगतिहीना इति कलिना ग्रसिता इति च दुराचारत्वव्यञ्जकम्। तस्यां मथुरायां तदेवं दुराचारे सति द्वयोरुपासकयोर्मध्ये " यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति॥ सुरानात्मानमात्मस्थं निन्हुते मां च धर्महा। अविपक्वकषायोऽस्मादमुष्माच्च विहीयते॥" इति भगवतायतिर्निन्दितः। "अपि चेत्सुदुराचारो भजते मामनन्यभाक्। साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥" इति स्वभक्तोऽभिनन्दितो यथा तथैव स्वस्तवान्ते श्रुतिभिरपि त्वदनुवर्तिनीभिः समवादीति ज्ञेयम् (२७)॥ ४०॥

नीलकंठी–एवं श्रवणमनननिदिध्यासनाभ्यासेन साक्षात्कृतात्मतत्त्वस्य स्थितप्रज्ञस्य द्वे अवस्थे समाधिर्व्युत्थानं च क्रमेण पूर्वोत्तरार्धाभ्यामाह–त्वदवगमीति। त्वदवगमी त्वां साक्षाद्विद्वान् भवतो विदुषः सकाशादुत्थे उत्थिते दूरीभूते "तत्सुकृतदुष्कृते विधुनुते" "तदा विद्वान्पुण्यपापे विधूय" इत्यादिश्रुतिभ्यः त्वत्तो दूरीभूतयोः शुभाशुभयोः सुखदुःखयोः। कर्मणि षष्ठी। न वेत्ति न जानाति। समूलमुन्मूलितवासनो विद्वान्समाधौ दुःखं न वेत्ति "यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते" इति स्मृतेः। अत्र हेतुः, यस्मात्तर्हि समाधिकाले देहभृतां प्राणिनां गुणविगुणान्वयानुत्तमत्वाधमत्वसम्बन्धान्न वेत्तीत्यनुषज्यते। तथा गिरः शब्दादीन्विषयाँश्च न वेत्ति। "अत्र पिताऽपिता भवति माताऽमाता–लोका अलोका वेदा अवेदाः" इत्यादि–श्रुतेः। "यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम्॥ तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्। अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ" इत्यादि च। उत्तमाधमजात्यादिव्यवस्था वेदशास्त्रादिप्रामाण्यं च प्रबोधात्प्रागेव न तदूर्ध्वमिति भावः। एवं स्थितप्रज्ञस्य समाध्यवस्थामुक्त्वा व्युत्थानावस्थामाह–अनुयुगमिति। युगं मिथुनं चिज्जडैक्यं प्रमातृत्वमनुसृत्येत्यर्थः। अन्वहम् अहंकारममकारावनुसृत्येति। अनुयुगमन्वहं सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः तं दग्धपटवदनुवर्तमानमनुसृत्य स्थितो योगी सगुणस्य श्रीकृष्णादेर्गीतं यशोवर्णनं तस्य परम्परया सातत्येन पूर्वोक्तं सर्वं न वेत्तीत्यनुवर्तते। समाहितो योगी ज्ञेयाभानात्सुखदुःखादिकं न वेत्तीति। "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इति श्रुतेः। व्युत्थितश्च भगवद्गुणगानानन्दनिमग्नो न द्वैतातपसन्तापकणिकामनुभवति–"स चक्षुरचक्षुरिव" इत्यादिश्रुतेः। "देहं विनश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम्। दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः॥" इति स्मृतेश्च। अयं भावः–"उभे उ हैवैष एते तरति" इति विदुषः पूर्वपुण्यपापतरणस्य "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" इत्यागामिपुण्यपापासम्बन्धस्य च श्रवणान्न तदुत्थसुखादिप्रसक्तिरस्ति, अस्ति तु प्रारब्धकर्मोत्थयोस्तयोः "विमुक्तश्च विमुच्यते" "भूयश्चान्ते विश्वमायानिवृत्तिः" इति द्विर्विमुक्तिश्रवणेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांऽडनिचया ननु सावरणाः ॥
ख इव रजांसि वांति वयसा सह यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः ॥ २८ ॥ ४१ ॥

त्वदवगमी न वेत्ति सुखदुःखे न च विधिनिषेधावित्युक्तं तत्र ननु कथमवगंतुं शक्यते दुरधिगमत्वस्योक्तत्वादित्येवमाशंक्य सत्यमेवमनवगाह्यमहिम्नो वाङ्मनसगोचरत्वाद विषयत्वेनैव ज्ञानमिति दर्शयन् "यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्च" इत्यादिश्रुतिप्रतिपादितमपरिमितं महिमानमाह । द्युपतय एवेति । हे भगवंस्ते अंतं द्युपतयः स्वर्गादिलोकपतयो ब्रह्मादयो न ययुर्न प्रापुः । तत्कुतः । यदंतवद्वस्तु तत्किमपि त्वं न भवति । आस्तां द्युपतयो न ययुरिति यद्यस्मात्त्वमप्यात्मनोंऽतं न यासि । कुतस्तर्हि सर्वज्ञता सर्वशक्तिता वाऽत आह । अनंततया अंताभावेन । नहि शशविषाणाज्ञानं सार्वज्ञ्यं तदप्राप्तिर्वा शक्तिवैभवं विहंति । अनंतत्वमेवाह । यदंतरेति । यस्य तवांतरा मध्ये ननु अहो सावरणा उत्तरोत्तरं दशगुणसप्तावरणयुक्ता अंडनिचया ब्रह्माण्डसमूहा वांति परिभ्रमंति । वयसा कालचक्रेण खे रजांसीव सह एकदैव न तु पर्यायेण । हि यस्मादेवमतः श्रुतयस्त्वयि फलंति तात्पर्यवृत्त्या पर्यवस्यंति न तु साक्षाद्वदंत्ययमेतावानिति । सगुणस्य गुणानंत्यान्निर्गुणस्य चागोचरत्वात् । कथं तर्ह्यपदार्थे तात्पर्यमिति । तत्र विधिमुखवाक्ये भवेदयं नियमः पदार्थस्यैव वाक्यार्थत्वमिति निषेधमुखे तु नायं नियम इत्याह । अतन्निरसनेति । "अन्यदेव तद्विदितादथो अविदितादधि । अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अस्थूलमनणु" इत्यादिप्रकारेण लक्षणया च तत्त्वमसीत्यादयः पर्यवस्यंति ।

प्रारब्धकर्मणामनष्टत्वावगमात् । तथाप्युक्तविधो योगी नान्यवत्सुखदुःखे विन्दतीति । ननु विद्वदविदुषोर्व्यवहारः समानः "पश्वादिभिश्चाविशेषात्" इति न्यायात् । तथा च व्युत्थितो योगी कर्म वा देहपुत्राद्यभिमानं वा कुतो नानुसरतीत्यत आह–श्रवणेति । यतो हेतोरपवर्गगतिस्त्वं मोक्षलक्षणः प्राप्यात्मा त्वं मनुजैरधिकारिभिः श्रवणेन भगवत्कथाश्रवणादिप्रणाड्या भृतो धृतः साधकदशायामतः सिद्धदशायामपि तदेव तेऽव्यवहि तपूर्वसंस्कारदार्ढ्यादनुतिष्ठन्ति न कर्मादीत्यर्थः । अन्यदपि जीवन्मुक्तलक्षणम्–" अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च । निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ " इत्यादि शास्त्रादवगन्तव्यम् (२७) ॥ ४० ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–पुनराक्षिपत्यत्र–त्वदवगमीति । पूर्वोक्तपद्ये त्वदवगमीत्यादि यदुक्तं तत्राशंकते–नन्विति । अवगन्तुं ज्ञातुम् । दुरधिगमत्वस्य दुर्ज्ञेयत्वस्य अनवगाह्यमहिम्नो दुर्ज्ञेयमाहा त्म्यस्य । तथाह श्रुतिः–" स होवाच यदूर्ध्वं गार्गि यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाशे तदोतं प्रोतं च " इति । अर्थः–स ह याज्ञवल्क्य उवाच–हे गार्गि त्वयोक्तं यत् ऊर्द्ध्वम् उपरि दिवः अण्डकपालात् यच्चार्वागधः पृथिव्या अधोऽण्डकपालात् यच्चान्तर्मध्ये द्यावापृथिवी द्यावापृथिव्योरण्डकपालयोरिमे द्यावापृथिवी यद्भूतमतीतं भवच्च वर्तमानं भविष्यच्च भवितव्यं तच्च यत्सूत्रमाचक्षते तत्सूत्रमाकाशे ओतं प्रोतं च, यद्वै व्याकृतं सूत्रात्मकं जगत् अव्याकृताकाशे ब्रह्मरूपे वस्तुमात्रं त्रिष्वपि लोकेषु वर्तत इत्यर्थः । अनन्तत्वपरे यदप्रापणे हेतुं पृच्छति–तत्कुत इति । अन्ता ज्ञाने सर्वज्ञता तव कथं स्यादित्याशयेनाह–कुतस्तर्हीति । विद्यमानवस्तुनो ज्ञानाग्रहणे हि सार्वज्ञं शक्तिवैभवं च विहन्ति न त्वविद्यमानस्यापीति भावः । हि यस्मादेवमनन्तोऽसि अतो हेतोः । पुनराशंकते–कथमिति । अपदार्थे पदाशक्ये । तत्र तात्पर्यनिर्णये । विधिमुखे वाक्ये तत्त्वमसीत्यादिके । अयं क इति चेदाह–पदार्थस्यैवेति । अतन्निरसनेन आरोपितापवादेनेति । तदाह श्रुत्या–" अन्यदेव तद्विदितादथो अविदितादधि । अन्यत्र धर्मादन्यत्राधर्मादन्यस्मात्कृताकृतात् । अन्यत्र भूताद्भव्याच्च यत्पश्यसि तद्वद " इति । अर्थः–तद्वस्तु विदितात् ज्ञानात् वस्तुनोऽन्यत् पृथगेव भवति । तर्हि, अवच्छिन्नमज्ञातं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न च वाच्यं निषेधैः शून्यमेव ज्ञाप्यत इति।यतो भवन्निधनाः।भवति त्वयि निधनं समाप्तिर्यासां तास्तथा नहि निरवधिर्निषेधः संभवत्यतोऽवधिभूते त्वयि फलंतीत्यर्थः॥ द्युपतयो विदुरंतमनंत न ते न च भवान्न गिरः श्रुतिमौलयः ॥ त्वयि फलंति यतो नम इत्यतो जयजयेति भजे तव तत्पदम् ॥ २८ ॥ ४१ ॥

प्राप्तमत आह—अथो अविदितादधि अथो अप्यर्थे अविदितात् अज्ञातादपि वस्तुनो अधि उपरि तद्वर्तते उपर्यर्थलक्षणयाऽन्यदित्यर्थः । यद्धि यस्मादुपरि भवति तद्धि तस्मादन्यदिति प्रसिद्धम् । धर्माच्छास्त्रीयादन्यत्र तथाऽधर्मादन्यत्र तथा कृतं कार्यमकृतं कारणं तस्मादन्यत्र भूतादतिक्रान्तात्कालाद्भाव्याद्भविष्यतश्चकाराद्वर्तमानाच्चान्यत्र यदीदृशं सर्वव्यवहारगोचरातीतं पश्यसि जानासि तदेति यमं प्रति नचिकेतसः प्रश्नः । अत्रैवं श्रुत्यन्तरम्—“ यस्मिन्नाकाशे सर्वमोतं प्रोतं स कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च ” इति गार्गिप्रश्ने याज्ञवल्क्यो वदतीत्याह—“ स होवाचैतद्वै तदक्षरं परमं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमलाञ्छमतमोऽवाय्वनाकाशमसंगमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नोति कश्चन ” इति “ यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः ” इति । सुगमत्वात्किञ्चिद्व्याख्यायते—हे गार्गि यदेतत्कथितं तदक्षरं परमं परं ब्रह्म ब्राह्मणा ब्रह्मविदोऽभिवदन्ति तदाह—अस्थूलमित्यादि । अलोहितम् अग्नेर्गुणो लोहितः अपां स्नेहस्ताभ्यामन्यत् सर्वथाप्यनिर्देश्यम् । लाञ्छः छाया तद्रहितमच्छायम् । तर्हि तमः, न अतमः । अमुखमदूरम् । मीयन्ते येन तन्मात्रं रूपं तदस्य नास्तीत्यमात्रम् । छिद्रवदन्तरं नास्तीत्यनन्तरम् । तर्हि बाह्यम् , न अबाह्यम् । इति । अतन्निरसनेन ब्राह्मणास्तदक्षरं वदन्ति—तदक्षरं किञ्चन वस्तु नाश्नाति नोपभुंक्ते कश्चन कोऽपि पुमाँस्तन्नाश्नोति नानुभवतीति पर्यवस्यन्ति प्रतिपादयन्ति । इत्यर्थ इति—निरवधिकनिषेधादर्शनात्तदवधिभूतं त्वामेव प्रतिपादयन्तीति भावः । स्वामिनाम्—द्युपतय इति । हे अनन्त ते तवान्तं द्युपतयो न विदुर्भवाँश्च न वेत्ति । श्रुतीनां वेदानां मौलयो मुकुटीभूता गिरो वेदान्तवाक्यानि न विदुः किन्तु—यतस्ता गिरस्त्वयि नमो जय जयेतीत्युक्त्वा फलन्ति निवृत्तव्यापारा भवन्ति अतोऽहं त्वत्पदं नमो जयजयेति ब्रुवन्भजे ॥ * ॥ **श्रीधरानुयायिनी**—निर्विषयत्वेन ब्रह्मणः साक्षात्कारासम्भवमाशङ्क्य वागाद्यगोचरं ब्रह्मेति ज्ञानमेव ब्रह्मसाक्षात्कार इत्याहुः—द्युपतय इति । उत्तरोत्तरदशगुणभूम्यादिसप्तावरणसंयुता ब्रह्माण्डकोटयोऽपि त्वय्याकाशे रजांसीवैकदैव न तु क्रमेण कालचक्रेण परिभ्रमन्तीति । यद्वा—सृष्ट्यादौ लब्धप्राकट्या निष्क्रामन्ति प्रलयादौ लब्धाप्राकट्याः प्रविशन्तीत्यर्थः । तवान्ताभावात् स्वयमपि स्वस्यान्तं त्वं न यदि यासि तदा ब्रह्मादयस्तवान्तं न ययुरिति किमाश्चर्यम्, तत्रापि वयं काः, तस्माच्छ्रुतयः कल्पितप्रपञ्चबाधावधिभूते त्वय्येव तात्पर्यवृत्त्या पर्यवस्यन्तीत्यतो जयजयेत्यर्थः । यद्वा—अहो कियदस्माकं वाग्वैभवं येन त्वदीयवैभवं विषयीकृत्य स्तोष्याम इत्युपसंहरन्ति—द्युपतय इति । यदन्तरा यस्य तवैकैकरोमकूपमध्ये कालचक्रेण सहैव सावरणासंख्यब्रह्माण्डानि द्युपतयो ब्रह्मादयो देवताश्च गवाक्षेषु परमाणव इव परिभ्रमन्ति, अत एव ते ब्रह्मादयस्तवान्तं न ययुरेव । तथा तवान्ताभावात्त्वमपि स्वस्यान्तं न यासि यत् यद्यप्येवं तथापि त्वयि विषयेऽस्मदाद्याः श्रुतयः फलन्त्येव त्वां विषयीकृत्य सफला भवन्त्येव, त्वदीयवास्तवस्वरूपनिरूपणासामर्थ्येऽपि श्रुतयः खलु भगवद्विषयिण्य इति प्रथयैवास्माकं साफल्यमिति भावः । अथ कथमेवं विषण्णा भवथेति चेत्तत्राहुः—अतन्निरसनेनेति । अतत् मिथ्याभूतं विश्वं तस्य “नेह नानास्ति किञ्चन ” “ अस्थूलमनणु” इत्यादिना निरसनेन बाधेनैव भवतीति भवद्वर्तमानं प्राप्तं निधनं मरणं यासां ता वयमित्यर्थः, आसन्नमरणा इति यावत् । अयं भावः—यथा सुवर्णवज्रादिक्षेत्रे मृत्पाषाणजलादिषु महता यत्नेन दूरीकृतेष्वेव सुवर्णवज्रादिकं लभ्यते तथात्रापि मिथ्याभूतप्रपञ्चान्तर्गतानन्तवस्तूनां निरासे कृत एव तत्पदलक्ष्यार्थप्राप्तिर्नान्यथा । एवं च सृष्ट्यारम्भकालमारभ्य प्रलयकालपर्यन्तमप्यतद्वस्तूनां गणनमप्यशक्यं किं वक्तव्यं तन्निरसनमशक्यमिति । तन्निरसनं विना च तव ज्ञानमशक्यं तद्विना तु सुतरां त्वद्वर्णनमशक्यमिति कृत्वाऽत्यन्तासाध्ये कार्ये प्रवृत्तानामस्माकमन्ततो मरणमेव प्राप्तमित्याशयः । यद्वा—नन्वेवं दुर्गमश्चेदहं तदा भवतीभिर्वृत्त्यन्तरमेवांगीकार्यमिति चेत्तत्राहुः—भवन्निधना इति । भवानेव नितरां धनं यासां ता वयमित्यर्थः । त्वां विना क्षणमप्यस्माकं न निर्वाहस्तस्मात्तव जागरणलक्षणप्रकाश एवास्माकं जीवनमतो जागृहीत्याशयः । तस्माद्यदा तवानुकम्पां वयं लभेमहि अन्यो वा कश्चन लभेत तदैव दुष्प्रापमपि तव तत्त्वं सुगमं भवेदिति—अखिलशास्त्रयवबोधकेति । प्रथमश्रुत्युक्तमेवात्राप्यनुसन्धेयमिति संक्षेपः ॥ * ॥ **विश्वनाथी—**तदेवं स्तुतौ संक्षेपदर्शितनिजनिजार्थाः सर्वविधश्रुतीर्मुख्यया लक्षणया च वृत्त्या तत्स्वरूपनिरूपणद्वारा तत्स्वरूपवैभवनिरूपणद्वारा च तत्र चरन्तीरपि पर्याप्तिमनाप्तवतीर्दृष्ट्वा लब्धसमयास्तथैव स्वेषां तत्र चरणं युक्तमित्युपसंहरन्त्यः काश्चिदुपक्रमश्रुतीनां संवादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहुः—द्युपतय इति । अनादिकालपरम्परासम्बन्धिनोऽनन्तब्रह्माण्डसम्बन्धिनश्च नानाब्रह्मरुद्रादयोऽपि त्वं सर्वकालदेशव्यापकोऽपि अनन्ततयेति द्युपतय इत्यस्य च तत्त्वाप्राप्तौ हेतुः । इदमेव टीकायां यदन्तरेत्यादिना पूर्वत्रापि योजितम् । यस्य तवांशेनाविर्भूतस्य कारणार्णवशायिरूपस्याप्यन्तरा एकैकरोमकूपमध्ये ब्रह्माण्डनिचया असंख्येया वान्ति सृष्ट्यादौ लब्धप्राकट्या निष्क्रामन्ति प्रलयादौ लब्धाप्राकट्याः प्रविशान्ति चेत्यर्थः । गवाक्षे परमाणव इवेति भावः । वयसा तेषां परिच्छेदकेन कालचक्रेण सह इति देशकालानन्त्यं दर्शितम् । तस्य स्वरूपवैभवाभ्यामेव तत्तदीयतत्तत्सर्वाश्रयत्वात् । यद्यस्मादानन्त्याद्धेतोः श्रुतयोऽप्यतन्निरसनेन अनन्तादनन्तवैभवाच्च त्वत्तोऽन्येषां सान्तानां सान्तवैभवानां चानुवादपूर्वकत्यागेन भवत्येवानन्तेऽनन्तवैभवे पाराप्राप्त्या निधनं समाप्तिर्यासां तथाभूताः सत्यः सर्वा अपि श्रुतयः फलन्ति सफला भवन्ति, अनन्तपुरुषार्थप्राप्त्या सार्थका जायन्ते । एतदुक्तं भवति—यस्माच्छ्रुतयः सर्ववाक्यान्वयेन त्वय्येव सार्थका जायन्ते, तस्मात्तासामेकदेशवाक्यरूपस्तत्तदनुवादोऽपि तत्तन्निरसनपूर्वकत्वदुपदेशवाक्यार्थपर्यवसान एव । अतन्निरसनवाक्यमपि त्वदवधिकमेव साक्षात्त्वदुपदेशवाक्यमपि तथैवातन्निरसनपूर्वकमेवेति लक्ष्यो वाच्यो वा भवसि । अस्मदेकप्रामाण्येन सर्वथैवाप्राकृतानन्तस्वरूपवैभवतया निर्णीयमानस्त्वमस्माकं परमपुरुषार्थोऽसि । एतदेवोक्तमुपक्रमवाक्येऽपि—जयजय जह्यजामित्यादीति । तत्रानन्ततया प्रतिपादिकाः श्रुतयोऽपि "यतो वाचो निवर्तन्ते" इत्याद्याः सर्वब्रह्माण्डाद्याश्रयत्वस्य, "यदूर्ध्वं गार्गि दिवः" इत्याद्याः सर्वकालाश्रयत्वस्य, "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि" इत्याद्याः सर्वश्रुत्यर्थरूपस्य, "सर्वे वेदा यत्पदमामनन्ति" इत्याद्या अतन्निरसनपूर्वकश्रुत्यर्थत्वस्य, "न तस्य कार्यम्" इत्याद्याः । अतन्निरसनं तु तावद्द्विविधम्—साक्षाद्वृत्त्या तात्पर्यवृत्त्या चेति । यथा—"न तस्य कार्यम्" इत्यादिषु, "इन्द्रो यातोऽवसितस्य राजा" "सर्वं खल्विदं ब्रह्म" इत्यादिषु । तत्पुनश्चतुर्विधम्—शान्तस्वरूपनिरसनं स्वाभाविकानन्तगुणत्वेन प्राकृतनियतसान्तवैभवनिरसनं सान्तफलसाधनसाध्यत्वनिरसनं सान्तसंबन्धेनानृजुमार्गमयतत्प्रतिपादननिरसनं चेति । तत्राद्यम्—"अन्यदेव तद्विदितात्" इत्यादौ, द्वितीयम्—"अस्थूलमनणु" इत्यादौ "न तस्य कार्यम्" इत्यादौ च, तृतीयम्—"अन्यत्र धर्मादन्यत्राधर्मात्" इत्यादौ, चतुर्थम्—"नैषा तर्केणमतिरापनेया" "नैवाभ्यसेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्" इत्यादाविति (२८) ॥ ४१ ॥

नीलकंठी—एवं ब्रह्मविदः "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति ब्रह्मैव सन्ब्रह्माप्येति" इत्यादिश्रुतेः प्राप्तब्रह्मभावस्य "य एवं वेद" "अहं ब्रह्मास्मि" इति "स इदं सर्वं भवति" "सलिल एको द्रष्टाद्वैतो भवति" "तत्केन कं पश्येत्" इत्यादिश्रुतिसिद्धौ सार्वात्म्यनिर्विशेषभावौ तयोराद्यो विशेषानन्त्यात्परो निर्विशेषत्वाच्च वाङ्मनसातीत इत्यस्य विदुषोऽनन्तत्वमाह—द्युपतय इति । ते तव ज्ञातात्मतत्त्वस्य "स एकधा भवति त्रिधा भवति" इत्यादिश्रुतेः "आत्मनां तु सहस्राणि बहूनि भरतर्षभ । योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् ॥ प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत् । संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव ॥" इत्यादिस्मृतेश्च । 'प्रदीपवदावेशस्तथाहि दर्शयति' इति न्यायाच्च योगबलेन प्रदीपवदनेकधा भावं गतस्य अन्तमवसानं द्युपतय एव ये सर्वज्ञत्वेन प्रसिद्धाः ब्रह्मेन्द्रादयस्त एव न ययुर्न प्रापुः किमुतान्येऽल्पज्ञाः । किञ्च त्वमपि ते अन्तं न यासीति विपारिणामेनानुषञ्जनीयम् अतः अनन्ततया यथा एकस्मिन्बीजे कृत्स्नो वटस्तत्रानन्तानि बीजानि तेषु प्रत्येकं वटा इत्येवं सन्तानपरम्परया तवाप्यानन्त्यमस्तीत्यर्थः । कुतोऽनन्तत्वमत आह—यदिति । यद्यस्माद्धेतोः ते इत्यनुकृष्यते ते तवान्तरा मध्ये हार्दाकाशे अण्डनिचयाः प्रत्येकं परितः पञ्चाशत्कोटियोजनप्रमिताः ब्रह्माण्डसमूहाः सावरणाः स्वापेक्षयोत्तरोत्तरदशगुणैः पृथिव्यप्तेजोवाय्वाकाशमनोबुद्धिप्रकृत्यावरणैः सहिताः खे आकाशे रजांसीव धूलिकणा इव वयसा भूतभविष्यद्वर्तमानकालेन सह वान्ति भ्रमन्ति । तथा च श्रुतिः—"यावान्वा अयमाकाशस्तावानेषोन्तर्हृदय आकाशः" इत्युक्त्वा "यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहितम्" इति हार्दाकाशे सर्वसद्भावं दर्शयति । स्मृतिरपि—"अनागतमतीतं च भविष्यत्स्थूलमण्वपि । तथा दूरमदूरं च निमेषः कल्प इत्यपि ॥ चिदात्मनि स्थितान्येव पश्य मायाविजृम्भितम् ।" इति । ननु, माया तु काचिन्मरुमरीचिमहाह्रदतरङ्गतुल्यानां विशेषाणामन्तं भूतुल्यस्याधिष्ठानभूतस्य सत्यस्य त्वन्तं यास्यत्येवेत्याशंक्याह—यच्छ्रुतय इति । यत् यस्मिन् त्वयि विषये हि यस्मात् श्रुतयः "सत्यं ज्ञानमनन्तं ब्रह्म" "तत्त्वमसि" "अस्थूलमनण्वह्रस्वमदीर्घम्" इत्यादयः अतन्निरसनेन अनृतत्वजडत्वपरिच्छिन्नत्वादीनां पारोक्ष्यसद्वितीयत्वयोर्वा उपाधिभूतयोर्मायाविद्ययोर्वा स्थूलत्वाणुत्वादीनां चानात्मभूतानां क्रमेण व्यावर्तनेन फलन्ति ब्रह्म ज्ञापयन्ति न विधिमुखेन, अतस्तव वाचामगोचरत्वादनन्तत्वमिति भावः । एवं सर्वनिषेधे शून्यतापात्तिं वारयति—भवन्निधना इति । भातीति भवान् चिज्ज्योतिःस्वरूपः तत्र त्वयि निधनं तात्पर्येण पर्यवसानं यासां तास्तथा निरवधिकनिषेधासम्भवात्सर्वनिषेधेन त्वामेव चिन्मात्रं सत्यादिश्रुतयोऽवशेषयन्तीत्यर्थः । अयं भावः—यद्यपि "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति" "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिवाक्यानि विधिमुखेन ब्रह्म प्रतिपादयन्तीव भान्ति तथाप्यतन्निरस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवानुवाच ॥ इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनम् ॥ सनंदनमथानर्चुः सिद्धा ज्ञात्वाऽऽत्मनो गतिम् ॥ ४२ ॥
इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥ ४३ ॥

॥ ४२ ॥ इत्यशेषसमाम्नायपुराणोपनिषद्रस इति । सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ॥ ४३ ॥

नेनैव तान्यपि पर्यवस्यन्ति । तथाहि तत्त्वमसीत्यन्तःकरणोपाधेर्जीवस्य मायोपाधिना ईश्वरेणाभेदः श्रूयते स च विशिष्टयोर्न सम्भवतीति उभयत्राप्युपाध्यंशप्रहाणेन शुद्धं चैतन्यं लक्षणया प्रतिपाद्यते वाक्येन तत्त्वमिति सामानाधिकरण्यात् सोऽयं देवदत्त इतिवत् । अत्र पदद्वयेऽपि लक्षणा एकपदलक्षितानिष्कृष्टस्येतरपदोक्तविशिष्टेनाभेदायोगात् । अंशांशिभावेनाभेदोपगमे तु "त्वमहमस्मि भगवो देव ते अहं वै त्वमसि" इति श्रुतिव्यतिहारसंकोचापत्तेः कनककुण्डलतुल्ययोः श्रुतिरजततुल्ययोर्वा जीवेशयोरंशांशिभावायोगात्, अन्यथा कण्ठमणिदृष्टांतबाधः स्यात् । तथा च—तत्त्वमसिवाक्येन एकवाक्यतामापादितं यतो वेत्यादिवाक्यं कारणत्वनिरसनेनैव ब्रह्मणि पर्यवस्यति, राधेयः कौन्तेय इतिवद्वा राधेयत्वबाधेन च कौन्तेयत्व इव जीवत्वबाधेन ब्रह्मणि पर्यवस्यति । एवं सत्यादिवाक्यमपि प्रकृष्टप्रकाशादिवाक्यवत् । अत्र हि असतोऽज्ञानस्य शून्यतापत्तेरचितः सतो भानायोगाच्च सत्त्वे सति चित्त्वमज्ञातब्रह्मज्ञापकं प्रकृष्टत्वे सति प्रकाशत्वमिव चन्द्रस्य । न च चंद्रमसीव ब्रह्मणि वैशिष्ट्यं प्रत्यक्षं नापि शाब्दं शब्दस्याज्ञातज्ञापनार्थस्य वैशिष्ट्याप्रतिपादकत्वात् । नापि लक्षणवैशिष्ट्यादनुमेयम् अनंतमिति विशेषणेनानुमानबाधात् । एवं च सत्यं ज्ञानमित्यपर्यायपदाभ्यामप्यखण्डं वस्तु सिद्धं तच्च परमप्रेमास्पदत्वादानंदरूपम् अर्थाच्चानृतजडदुःखादेर्व्यावृत्तिः । एवं च यथा तरंगचंद्रघटाकाशानुगताभ्यां चन्द्रत्वाकाशत्वाभ्यां लक्ष्यमाणौ मुख्यचंद्राकाशौ चंद्रत्वाकाशत्वे न त्यजतः । एवं ब्रह्माध्यस्तघटाद्यनुगतसत्त्वेन चित्तवृत्त्युपाधिभेदभिन्नचिद्व्यक्त्यनुगतचित्त्वेन च लक्ष्यमाणं ब्रह्मापि सत्त्वचित्त्वे न त्यजति नाप्यखण्डत्वं सत्ताजातिवत्, सा हि स्वतो व्यावृत्तैरपि गोत्वादिभिर्न विशेष्टुं शक्या नीलत्वादिनेवोत्पलम् । अथ च तदात्मिका एवं ब्रह्मापीत्यत्र विस्तरः । तथा च—सत्यादिपदानां विशिष्टाप्रतिपादकत्वादनृतादिव्यावर्तनेनैव ब्रह्मप्रमापकत्वं पर्यवस्यति । नेतिनेत्यस्थूलादिवाक्यानां तु स्पष्टमेव मूर्तप्रपञ्चतद्गतस्थौल्यादिनिषेधेनाखण्डे ब्रह्मणि पर्यवसानं ततश्च ब्रह्मणो जन्मादिहेतुत्वं जन्मादिसापेक्षत्वादौपाधिकं सत्तटस्थतया शुद्धं लक्षयति शाखाग्रमिव चंद्रम् । एवं परापरविद्याधिकारस्थानां सविशेषवाक्यानां तत्त्वप्रपत्त्युपास्तिविधिशेषतया देवताधिकरणन्यायेनावांतरतात्पर्यवत्त्वेऽपि न परमतात्पर्यविषयत्वमुभयत्र तत्कल्पने वाक्यभेदापत्तेः। ये तु कृत्स्नं शास्त्रं सविशेषपरमित्याहुः तेषां सर्वविशेषवति तस्मिन्नस्थूलमित्यादिनिषेधवाक्यानामत्यंतानर्थक्यं तस्मान्नित्यशुद्धबुद्धमुक्तस्वभावं निरस्ताशेषविशेषमेकरसं प्रत्यगभिन्नं ब्रह्माशेषविशेषनिषेधमुखेन श्रुतयः प्रतिपादयंतीति सिद्धम् (२८) ॥४१॥

भावार्थदीपिकाप्रकाशः वंशीधरी—इत्यनेन प्रकारेणोक्तमेतदात्मनोर्जीवब्रह्मणोरैक्यरूपस्यानुशासनम् । अथ श्रवणोत्तरमानर्चुः । आत्मनो गतिं स्वरूपम् ॥ * ॥ **श्रीधरानुयायिनी**—श्रीभगवानुवाच—एवं श्रुतिकृतं ब्रह्मोपदेशं श्रुत्वा ब्रह्मस्वरूपं ज्ञात्वा कृतकृत्याः सन्तः सनकादयः सनन्दनमानर्चुः ॥*॥ **विश्वनाथी**—इत्येवमष्टाविंशतिवेदस्तवपद्यैर्बुद्धीन्द्रियमनःप्राणानिति ब्रह्मोपनिषद्विवरणमयमात्मानुशासनं जीवहितोपदेशं सर्वमूलस्वरूपस्वयंभगवत्सम्बन्ध्युपदेशं वा आ सम्यक् श्रुत्वा अथ अत एवात्मनो जीवस्य गतिं गम्यं तादृशभगवतो ज्ञानप्रकारं वा ज्ञात्वा भगवद्वैभववर्णनस्य तादृशस्वभावत्वादपूर्ववदनुभूय सिद्धा अपि किं वा पूर्णमनोरथाः सन्तः ॥ ४२ ॥

नीलकण्ठी—आख्यायिकामनुसरति श्रीभगवानुवाचेत्यादिना—इत्येतदिति ॥ ४२ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—इतीत्थम् । पूर्वजातैः सनकादिभिः । व्योम्नाऽऽकाशेन यानं येषां तैः ॥ * ॥ **श्रीधरानुयायिनी**—हे ब्रह्मणो मानसपुत्र नारद तव ज्येष्ठभ्रातृभिः व्योमयानैः "खं ब्रह्म" इति श्रुतेर्ब्रह्मानन्दविहारैः ब्रह्मपारगैर्वा समुद्धृतं नृणां सर्वकामवासनाबाधकं यदिदमशेषवेदोपनिषत्पुराणरहस्यतात्पर्यं तच्छ्रद्धया मनसि धारयंस्त्वं यथेच्छं भुवि चरेति ॥ * ॥ **विश्वनाथी**—इत्येवं समाम्नायादिरसः । पूर्वजातैः सर्वादौ ब्रह्मणः प्रादुर्भूतत्वात्सर्वतः श्रेष्ठैरित्यर्थः । अतो व्योमयानैः सर्वत्रानासक्त्या चरद्भिरत एव महात्मभिरुदारमतिभिस्तैः सम्यगुद्धृतः गुरुकृताभ्यस्ताभ्य एव श्रुतिभ्य इति शेषः, इति योग्यता दर्शिता । अत्र समाम्नायः सामान्यत उक्तः, पुराणं च तदुपलक्षत्वेनेतिहासश्च । तत्त्रयं च वक्ष्यमाणावशिष्टत्वेन कर्मोपासनारूपं द्विविधमेव ग्राह्यम् । उपनिषत्तु—तत्रतत्र च्छान्दोग्यादिरूपो भगवद्गीतादिरूपो वा ज्ञानभागः । पुराणस्य मध्ये पाठस्तदभेदविवक्षया । "यद्ब्राह्मणानीतिहासान्पुराणानि" इति स्वाध्यायोपदेशश्रुतेः । एवम् —"वा अरे अस्य महतो भूतस्य निःश्वसितमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं चैतद्ब्रह्मदायाद श्रद्धयात्मानुशासनम् ॥ धारयंश्चर गां कामं कामानां भर्जनं नृणाम् ॥ ४४ ॥ श्रीशुक उवाच ॥ एवं स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥ ४५ ॥ नारद उवाच ॥ नमस्तस्मै भगवते कृष्णायाऽमलकीर्तये ॥ यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ ४६ ॥

ब्रह्मदायादेति । ब्रह्मैव दायमिवायत्नप्राप्यमत्ति सेवत इति तथा । ब्रह्मपुत्रेति वा ॥४४॥ पूर्णः कृतकृत्यः । श्रुतधरः श्रुतमर्थं मनसि धारयन् । वीरव्रतो नैष्ठिकः ॥४५॥ नम इति । श्रीकृष्णावतारतया नारायणं नमस्यति । उक्तं हि " एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् " इति ॥ ४६ ॥

तदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासपुराणम् " इत्यादितः सोदरत्वश्रुतेः । "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम् " इति छान्दोग्योपनिषदि । एतदेवानूद्यते पुराणेषु—"इतिहासपुराणानि पञ्चमो वेद उच्यते " इत्यादिना । तथाप्यत्र सूताधिकारो भगवन्नामादिवद्विधिबलादेव लभ्यते—"वर्षासु रथकारोऽग्नीनादधीत " इत्यादिवत् तेषां रसः 'पिबत भागवतं रसम् ' इत्यादिदृष्ट्या भगवद्भक्तिरसमयं तात्पर्यम् । तच्च त्रिविधम्—प्रत्येकवाक्यगतमवान्तरवाक्यगतं महाप्रकरणगतं च । तत्राद्ययोः पूर्वपूर्वदर्शितम्, अन्यस्य तु—"उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ॥ " इत्यनुसारेण षड्भिर्लिङ्गैः । तच्च सर्ववेदाद्यन्तस्थितस्य सृष्ट्याद्यनुवादेन दर्शितप्रणवार्थस्य प्रकाशकेनाप्रसिद्धानां प्रसिद्धानामपि श्रुतीनामैक्यार्थेन मूलपद्यैरेवोदाह्रियते । यथा—जयजयेति । 'द्युपतयः ' इत्युपसंहारोपक्रमयोरैक्येन 'स यदजया त्वजाम् ' इत्यादिभिरभ्यासेन । 'अनुचरेन्निगमः ' 'श्रुतयस्त्वयि हि फलन्ति ' इत्याद्या अपूर्वतया । 'न परिलषन्ति केचित् ' इत्यादिभिः फलेन । ' त्वमकरणः स्वराट् ' इत्यादिभिरर्थवादेन । 'दृतय इव श्वसन्त्यसुभृतः ' इत्यादिभिरुपपत्त्या यथोक्तलक्षणः श्रीभगवानेव विवक्षित इति । अस्य श्रीकृष्णत्वं तु पूर्वोक्तयुक्त्या ज्ञेयम् ॥ ४३ ॥

नीलकंठी—॥ ० ॥ ४३ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—एतत् आत्मानुशासनम् । कामानां कर्मवासनानाम् । भर्जनं दाहकम् । यथा सनकादयो ब्रह्मदायादा ब्रह्मपुत्रास्तथा त्वमपीत्याह—ब्रह्मपुत्रेति । यथा त एतद्गृहीत्वा चरन्ति तथा त्वमप्येतद्गृहीत्वैव चरेति भावः ॥ * ॥ **श्रीधरानुयायिनी**—॥ ० ॥ * ॥ **विश्वनाथी**—ब्रह्मदायादेति योग्यतोक्ता । धारयन् हृदि मुखे च । ' वर्जनम् ' ' भर्जनम् ' इति पाठद्वयस्यैक एवार्थः । एतच्छ्रवणेन श्रीभगवद्भक्त्युत्पत्त्या नृणां कामा विनश्यन्त्वेतदर्थमपीत्यर्थः ॥ ४४ ॥

नीलकण्ठी—ब्रह्मदायादः ब्रह्मणो मानसः पुत्रः ॥ ४४ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—स मुनिर्नारदः । ऋषिणा नारायणेन । एवमादिष्टम् इत्थं प्रोक्तं तत्त्वम् । श्रद्धया गृहीत्वाऽऽह ॥ * ॥ **श्रीधरानुयायिनी**—श्रीशुक एवं नारायणोपदिष्टं श्रद्धया श्रुत्वा मनसि धारयन्नविस्मरन् कृतकृत्यो भूत्वा नैष्ठिको नारद उवाच ॥*॥ **विश्वनाथी**—यतो वीरव्रतो नैष्ठिकत्वादविक्षिप्तचित्तोऽतः श्रुतधरः सकृच्छ्रवणमात्रेण शब्दतस्तद्धरः । यतश्च मुनिर्मननशील आत्मवान्भगवन्निष्ठश्चातस्तत्क्षणा दर्थतोऽपि श्रद्धया निश्चयात्मिकया बुद्ध्या गुरुणा नारायणेनादिष्टं गृहीत्वा पूर्णः प्राप्तस्वमनोरथपूर्तिः सन्नाह—राजन्निति । एतदुत्तरश्रवणेन स्वाराज्याप्त्या त्वं सर्वतो दीप्तिमान् जातोऽसीति भावः ॥ ४५ ॥

नीलकण्ठी—श्रुतधरः श्रुतमात्रं धारयति न बहुकृत्व उपदेशमपेक्षते । श्वेतकेतुवद्वीरव्रतो नैष्ठिकः ॥ ४५ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी—सर्वाः श्रुतयस्तावच्छ्रीकृष्णमेव स्तुवन्तीति ज्ञात्वा सप्रेमश्रीकृष्णस्यावतारतया नारायणं प्रणमति—नम इति । कोऽसौ कृष्णः यः अभवाय संसारनिवृत्तये उशतीः कमनीयाः कला अवतारान् । तच्चोक्तं प्रथमे—' एते चांशकलाः ' इत्यादिना " रक्षाभूमिकृपामूर्तिषोडशांशो कला मता " इति वारतान्त्विः । " वंशैश्वर्ये धने लेशे सम्भृतौ खत्रिभागके । मेषादीनां तथा वीर्ये सतालव्योंऽश ईरितः ॥" इति च ॥ * ॥ **श्रीधरानुयायिनी**—भक्तानां संसारनिवृत्त्यर्थं गृहीतनानाकमनीयावताराय विमलकीर्तये श्रीकृष्णरूपाय नारायणाय तुभ्यं नमः ॥ * ॥ **विश्वनाथी**—सर्वश्रुतितात्पर्यं श्रीकृष्ण एवावधार्य तस्मै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥ ४७॥ सभाजितो भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्ण यामास नारायणमुखाच्छ्रुतम् ॥ ४८ ॥ इत्येतद्वर्णितं राजन्यन्नः प्रश्नः कृतस्त्वया ॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेऽपि श्रुतिश्चरेत् ॥ ४९ ॥

साक्षात्पितुरिति योनिव्यवधानं विना जनकस्य । अग्निमथनावसरे कथंचिदरणौ रेतः पतितं ममंथ व्यासस्तदैव तत उत्पन्नः शुक इति हि वदंति ॥ ४७ ॥ ४८॥ ४९॥

वोत्कर्षं व्यञ्जयति–नमस्तस्मा इति । अत्र मार्गेषु ज्ञानयोगभक्तिषु मध्ये भक्तिरेव श्रेष्ठा । उपासकेषु ज्ञानिप्रभृतिषु भक्त एव श्रेष्ठः। उपास्येषु ब्रह्मस्वरूपादिषु भगवानेव श्रेष्ठ इति सकलश्रुतिवाक्यैरेव निर्धारितम् । भगवत्यपि 'सदसतः परं त्वमथ यदेष्ववशेषम्' इति' स्त्रिय उरगेन्द्रभोग' इति वाक्याभ्यां कृष्ण एव श्रेष्ठो निश्चित इत्यभिज्ञायैव साक्षादपरोक्षस्य श्रीनारायणस्याग्रेऽपि नमस्तुभ्यं नारायणायेत्यप्रयुज्य नमस्तस्मै कृष्णायेत्युच्चैरुच्चारयामास । अमला असुरेभ्योऽपि मोक्षप्रदत्वादविद्यामालिन्यनिवर्तिका कीर्तिरेव यस्य तस्मै। ननु, किं पुरः सन्तं मां स्वगुरुं हित्वा तमेव प्रणमसि तत्राह–य इति।अभवाय भवनिवृत्तये उशतीः कमनीयाः कला भवद्विधानवतारान्धत्ते इति तन्नमस्कारेणैव त्वन्नमस्कारोप्यभूदिति भावः। वर्तमाननिर्देशेन तस्य नित्यत्वमपि स्पष्टीकृतम् । तथा च श्रुतिः–"तस्मात्कृष्ण एव परो देवस्तं धारयेत्तं रसयेत्तं भजेत्तं यजेत् ॐ तत्सत्" इति गोपालतापनी ॥ ४६ ॥

नीलकण्ठी–अभवाय मोक्षाय । उशतीः कमनीयाः । कलाः अवतारान् ॥ ४६ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–इत्यनेन श्लोकेनर्षिं नारायणं तच्छिष्यांश्चानम्य ॥ * ॥ **श्रीधरानुयायिनी**–एवं श्रीकृष्णं सशिष्यं नारायणं च । नारदस्तदाश्रमात्साक्षाद्योनिव्यवधानमन्तरेण पितुर्व्यासस्याश्रममगात् ॥ * ॥ **विश्वनाथी**–ब्रह्मवैवर्ते तु श्रीशुकजन्मकथा प्रकारान्तरेणोक्ता । सा च नवमस्कन्धे वर्णिता । परं त्वत्र साक्षात्पितुरित्युक्तेररणिसम्भूतशुकेनैव श्रीपरीक्षिते श्रीमद्भागवतं श्रावितमित्यवसीयते ॥ ४७ ॥

नीलकंठी–आद्यमृषिं नारायणम् । साक्षात् पितुः योनिव्यवधानं विना जनकस्य । अग्निमथनावसरे कथञ्चिदरणौ रेतः पतितं ममन्थ व्यासस्तदेव तत उत्पन्नः शुक इति हि वदन्तीति श्रीधराचार्याः ॥ ४७ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–सभाजितोऽर्चितः । तस्मै मत्पित्रे ॥ * ॥ **श्रीधरानुयायिनी**–स च व्यासेनातिथ्यरीत्याद्दतो व्यासाय नारायणाच्छ्रुतं सर्वं वर्णयामास । अनेन श्रीनारायणान्नारदस्ततो व्यासस्तस्मादहं मत्तश्च त्वं प्राप्तवानसीति गुरूपदेशपरम्परा सूचिता ॥ * ॥ **विश्वनाथी**–भगवतेति । भगवच्छब्दनिर्देशात्सनकादिवत्तस्यापि तद्विज्ञानादिसामर्थ्येऽपि तच्छ्रवणम् । "आचार्यवान्पुरुषो वेद" इति श्रुतिसामञ्जस्याय लोकसंग्रहणाय चेति ज्ञेयम् ॥ ४८ ॥

नीलकण्ठी–सभाजितः पूजितः ॥ ४८ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–यथा मनःश्रुतिः तथाहि–"प्राणन्नेव प्राणो नाम भवति वदन्वाक्पश्यंश्चक्षुः" इत्यादिश्रुतेर्वाक्प्रबंधरूपायाः श्रुतेर्मनोरूपत्वान्मन इत्युक्तम् । "मनः पूर्वरूपं वागुत्तररूपम्" इति श्रुतेर्वा । ब्रह्मणि यथा चरेत्प्रविशति तथा वर्णितम् ॥ * ॥ **श्रीधरानुयायिनी**–हे राजंस्त्वया कृतस्य प्रश्नस्य सर्वमिदमुत्तरं मया दत्तम् । तत्किमित्यपेक्षायामाह–यथा सगुणालम्बनेन प्रकारेण चरन्तीनां श्रुतीनां द्वारा निर्गुणे ब्रह्मणि मनोऽपि प्रचरेत् किमुत श्रुतयः ॥ * ॥ **विश्वनाथी**–उपसंहरति–इतीति । नोऽस्मान्प्रति यः प्रश्नः कृत इत्यत्रैतद्वर्णितम् । 'तदेतत्' इति पाठे तु तत्तत्र किम्, इत्यपेक्षायामाह–यथेति । यथा भगवत्त्वाद्यवलम्बनेन भगवत्प्रसादोत्थभक्तिप्रकारेण वा चरन्तीनां श्रुतीनां द्वारा मनोऽपि चरेत्प्रविशेत् किमुत श्रुतय इत्यर्थः । एता हि "तत्तु समन्वयात्" इति न्यायेन तदेकपर्यवसानतया पूर्वं दर्शिताः । "शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू" इति न्यायेन तदेकरूपत्वात्तादृशशक्तयश्च । यथोक्तं स्वयं भगवति श्रीकृष्णे श्रुतीर्विनापि शक्तिप्रागल्भ्यं 'निभृतमरुन्मनोक्ष' इत्यादौ 'तदरयोऽपि ययुः स्मरणात्' इत्यत्र ॥ ४९ ॥

नीलकण्ठी–तदेवमनिर्देश्ये ब्रह्मणि श्रुतयः कथं चरन्तीत्याक्षेपस्य 'बुद्धीन्द्रियमनःप्राणान्' इति श्लोकेन बुद्ध्यादीनां वस्तुतत्त्वावधारणाद्यर्थत्वोक्त्या तासां शब्दादिप्रमाणजन्यत्वेनास्ति ब्रह्मण्यपि शब्दप्रवृत्तिरिति संक्षेपेणोत्तरं दत्तम् । तदेव पुनः श्रीभगवन्नारदसंवादरूपाख्यायिकामुखेन विस्तरतः प्रतिपाद्याख्यायिकां च समाप्योपसंहरति–इत्येतदिति । मन इति बुद्ध्यादिचतुष्टयोपलक्षणम् । "मनसा ह्येव पश्यति मनसा शृणोति कामः संकल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति दर्शनादिकरणानामिन्द्रियाणां धीशब्दिताया बुद्धेश्च मनोऽनतिरिक्तत्वश्रवणात् । प्राणस्याप्यत्रैवान्तर्भावः । "स एष इह प्रविष्ट आनखाग्रेभ्य."

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः॥यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम्॥५०॥इति श्रीमद्भा०म०दशमस्कधोत्त०नारायणनारदसंवादे वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः॥८७॥

समस्तवेदस्तुत्यर्थं संगृह्यानुस्मारयति।योऽस्योत्प्रेक्षक इति।योऽस्य विश्वस्योत्प्रेक्षकः।एवमनुशायिनां समस्तपुरुषार्थसिद्धये सृष्टिस्थितिप्रलयादिप्रापणीयमित्यालोचक इत्यर्थः।अनेन निमित्तत्वमुक्तम्।एवमालोच्यास्यादिमध्यनिधने आदिर्जन्म मध्यः पालनं निधनमंत एतेषु कर्मसु यो वर्तते।अनेनोपादानत्वमुक्तम्।ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वे प्रसिद्धे। सत्यम्।तयोरपि तत एवोद्भूतत्वान्मूलकारणं स एवेत्याह।योऽव्यक्तजीवेश्वर इति।प्रवेशनियमने दर्शयति।य इति।पूर्वोक्तप्रकारेणेदं सृष्ट्वा।यदर्थमेतत्सृष्टं तेन ऋषिणा सृष्टे कार्येऽहमिति दर्शनात् ऋषिर्जीवस्तेन सहानुप्रविष्टः पुरः शरीराणि तस्य भोगायतनानि चक्रे ताः पुरः शास्ति तस्य भोगं ददत्परिपालयति।उपासकस्य च कैवल्यरूपो भवतीत्याह।यं संपद्येति।यं संपद्य प्राप्यानुशयी अन्वनु दंडवत्प्रणामैश्वरणमूले शेते इति तथा स जीवोऽजां कार्यकारणरूपामविद्यां त्यजति।ननु ब्रह्मसंपन्नस्यापि जीवस्य तत्संबन्धो दृश्यतेऽत आह। सुप्तः कुलायं यथेति।अयं भावः।यथा सुप्तं शरीरवंतमन्ये पश्यंति स तु नात्मानं तथा पश्यति एवं जीवन्मुक्तमप्यन्ये देहवंतं पश्यंति स तु न किंचित्पश्यतीति तं हरिमजस्रमनवरतं ध्यायेत्।किमित्यत आह।अभयं न भयं यस्माद्भयनिवर्तकमित्यर्थः।कुत एतत्।कैवल्यनिरस्तयोनिं कैवल्येनाप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिर्मूलकारणं माया येन तम्।सर्वश्रुतिशिरोरत्ननीराजितपदांबुजम्॥ भोगयोगप्रदं वंदे माधवं कर्मिनम्रयोः॥५०॥इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री०टीकायां सप्ताशीतितमोऽध्यायः ॥८७॥

इति पूर्वप्रकृतस्य बुद्ध्यादिसंघातप्रविष्टस्य "स प्राणन्नेव प्राणो नाम भवति वदन् वाक्पश्यंश्चक्षुः शृण्वञ्छ्रोत्रं मन्वानो मनः तान्यस्यैतानि कर्मनामान्येव" इति प्राणाद्यात्मत्वश्रुतेः । तत्रापि बुद्धेरेव प्राणाद्यात्मत्वं युक्तं न चित इति युक्तोऽत्र मनसैवेतरसंग्रहः । एवं च निर्मृष्टनिखिलानर्थव्रातनिरतिशयानन्दप्रत्यगात्मज्योतिःस्वरूपे ब्रह्मणि प्रमातृत्वाद्यनर्थमूलस्तम्भभूताज्ञानध्वान्तविध्वंसिनी तत्त्वमस्यादिवाक्यकरणिका मनोवृत्तिः सम्भवतीति युज्यत एवानिर्देश्येऽपि ब्रह्मणि वाचः सञ्चार इति सिद्धम् ॥ ४९ ॥

भावार्थदीपिकाप्रकाशः वंशीधरी–इदं विश्वम् । इत्यर्थ इति–भगवदिच्छापूर्वकत्वात्सृष्ट्यादेः "स ऐक्षत" इत्यादिश्रुतेरिति भावः।अनेनालोचकत्वकथनेन।अनेनादिमध्यान्तेषु वर्तनेन तथा चाभिन्ननिमित्तोपादानत्वमुक्तं भगवतः सृष्ट्यादेः । पुनराशंकते–नन्विति । सत्यमित्यर्द्धांगीकारे । तयोः प्रकृतिपुरुषयोः।ततो भगवत एव।स भगवानेव।अव्यक्तं प्रकृतिः जीवः पुरुषस्तयोरीश्वरः शक्त्यंशरूपेणाश्रयः । यदर्थं यस्य भोगाद्यर्थम् । एतद्विश्वम् । अहमितिदर्शनात् सोऽहमिति ज्ञानात् । यमीशम् । तत्सम्बन्धोऽविद्यासंबंधः।अतोऽत्र।अत्राशयमाह–अयं भाव इति । किं तद्ध्यानेनेति चेदाह–अभयमिति।इत्यर्थ इति–"पुंसां नो मम सेवाया ऋते दुःखं निवर्तते"इत्याद्युक्तेरिति भावः। अत्र हेतुमाशंकते–कुत एतदिति।योऽस्योत्प्रेक्षक इत्याद्यर्थे श्रुतिमाह–"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।तमीश्वराणां परमं महेश्वरं तद्देवानां परमं तु दैवतं।तमात्मस्थं ये तु पश्यन्ति धीरास्तेषां शांतिः शाश्वती नेतरेषाम्"इति । सर्वेश्वरपरेयम् सुगमत्वान्न व्याख्याता । यः सृष्ट्वेत्यत्र सृष्टे कार्ये सोऽहमिति दर्शनादृषिर्जीवः । तथाच श्रुतिः–"आत्मैवेदमग्र आसीत्पुरुषविधः सोऽनु वीक्ष्य नान्यदात्मनोऽपश्यत्सोहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वाऽथान्यन्नाम प्रब्रूत" इति ।अर्थः–अग्रे सृष्टेः कार्ये प्रथमं पुरुषविधःपुरुषाकारो जीवात्मा एवासीत् । स अनु अनंतरं सर्वतो वीक्ष्यात्मनः स्वस्मादन्यन्नापश्यत्सोऽहमस्मीति व्याहरत् प्रथममुक्तवान् ततः कारणादहंनामाभवत् तस्मात्कारणादेतर्हीदानीमपि केनाप्यामंत्रितः सन्नग्रे प्रथमं अहमयमित्येवमुक्त्वाऽथानन्तरमन्यन्नाम ब्रूते कस्त्वमित्युक्तः अहममुकोऽस्मीति । सुप्तः कुलायमित्यत्र श्रुतिः तद्यथा–"प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"इति । सम्भोगकाले मरणकाले वा प्रिययाऽऽलिङ्गितः प्राज्ञेन सुषुप्तिसाक्षिणा विशुद्धात्मना सम्परिष्वक्त एकीभूत इति श्रुतिपदार्थः।स्वामिनाम्–सर्वेति।सर्वश्रुतीनां शिरोरत्नैरुपनिषद्भिर्दीपस्थानीयैर्नीराजितं निर्मंछनीकृतं पदाम्बुजं यस्य तम् । "सुदीपैर्विविधैर्वर्ष्णोश्चालनेन यतस्ततः । प्रोक्तं निर्मंछनं तद्धि नीराजनमिति स्मृतम्॥"इति संहितोक्तेः।पुनश्च कर्मिणां भोगप्रदं नम्राणां भक्तानां भक्तियोगप्रदम्।यद्वा–योगः सायुज्यं तत्प्रदमित्यर्थः॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धे वेदस्तुतिर्नामसप्ताशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तितमोऽध्यायः॥८७॥*॥**श्रीधरानुयायिनी**—समस्तवेदश्रुत्यर्थं स्मारयन्भोगमोक्षप्रदत्वेन हरिरेव भजनीय इत्याह—योऽस्येति।जीवानां सर्वपुरुषार्थसिद्धय एवमिदं सृष्ट्यादिकं करिष्यामीत्यालोच्य तथैव तत्र प्रवृत्तः सन् यो हरिः प्रकृतिपुरुषयोः प्रवर्तकोऽपि वियदादि विराडन्तं विश्वं तदन्तर्गतानि जीवभोगायतनानि देवमनुष्यतिर्यगादिशरीराणि च सृष्ट्वा तेषु शरीराभिमानिना सह साक्षिरूपेण प्रविश्य तानीन्द्रियादिरूपशरीराणि तत्तदिन्द्रियगोलकाधिष्ठातृदेवतारूपेण शास्ति स्वस्वविषयग्रहणे प्रवर्तयाति जीवं च नानाभोगसुखदानेन पालयति।तथा येन हारिणा पालितोऽविद्याश्लिष्टो जीवो यं सम्प्राप्यानुक्षणं यच्चरणमूले दण्डवत्पतितश्चेत्तदानाद्यविद्यां तथा परैर्दृश्यमानेऽप्याविद्यके शरीरे सुप्त इवाभिमानं च यदनुकम्पया त्यजति तं भक्तभयहरं नित्यानन्दस्वरूपमहिम्ना दूरतोऽपास्तमायं च हरिं ध्यानोत्तरभाविनोपाधित्वाविशेषेण स्वस्वेतरोपाधिविरोधिना चरमसाक्षात्कारेण सत्कार्यमज्ञानं हरतीत्येकः परमात्मैव हरिस्तं प्रतिक्षणं ध्यायेत्।अनात्मप्रत्ययतिरस्कारपूर्वकात्मैकाकारप्रत्ययप्रवाहात्मकं तद्ध्यानं कुर्यादिति वेदस्तुतिसारम्॥"पुत्रस्यानन्वितालापैः पितराविव तुष्यतः।मम श्रीराधिकाकृष्णौ वेदगोलार्थभाषया॥"इति श्रीमद्भागवते श्रीधराऽनुयायिन्यां टीकायां वेदस्तुतौ सप्ताशीतितमोऽध्यायः॥८७॥*॥**विश्वनाथी**—उक्तं सर्वं संगृह्यानुस्मारयति—य एवास्य विश्वस्योत्प्रेक्षकः मयाऽनुशायिनां जीवानां कर्मिणां कर्म प्रोद्बोध्य कर्मफलस्य साधनार्थं भोगार्थं च तथा ज्ञानिनां ज्ञानफलस्य सायुज्यस्य साधनार्थं तथा भक्तानां भक्तिफलस्य प्रेमवत्पारिषदत्वस्य साधनार्थं बुद्धीन्द्रियादिकं सृष्ट्वा एवमेवं तत्रतत्र प्रेरयिष्यामीत्यालोचक इत्यर्थः । त्रैकालिकीं सत्तामाह—अस्य विश्वस्यादिमध्यानिधनेषु य एव वर्तत इति । विश्वसृष्टेः पूर्वं विश्वमध्ये विश्वनाशेऽपि । यदुक्तं भगवतैव—"अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् । पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥" इति । सर्वकारणत्वं सर्वनियन्तृत्वं चाह—योऽव्यक्तेति । सर्वं जगदिदं यन्मयं तयोः मायाजीवयोरपि य एवेश्वरः कारणं नियन्ता च तयोस्तच्छक्तित्वाच्छक्तीनां च शक्तिमतोऽनन्यत्वादव्यक्तजीवावपि स एवेत्यतस्तस्यैवोपादानत्वं निमित्तत्वं नियन्तृत्वं च सिद्धम् । प्रवेशविसर्गावपि करोतीत्याह—य एवेदं सृष्ट्वानुप्रविश्य ऋषिणा ब्रह्मणा पुरः देवमनुष्यातिर्यगादिशरीराणि चक्रे । तथा ऋषिणेति । ऋषिवन्निर्लेपत्वादृषिरन्तर्यामी तेन स्वस्वरूपभूतांशेन ताः पुरः शास्ति । यद्भक्त्यैव जीवः संसारं तरतीत्याह—यं सम्पद्यानुशयी अविद्याश्लिष्टो जीवः अन्वनु दण्डवत्प्रणामैश्चरणमूले शेत इति तैर्व्याख्यातम् । अजां कार्यकारणरूपां मायां त्यजति । ननु, भगवत्प्रपन्नस्यापि मायिकं शरीरं दृश्यत एव तत्राह—सुप्ते जनः कुलायं स्वशरीरं जहाति यथा वर्तमानमपि तन्नानुसन्धत्ते तद्वत् भगवत्प्रपन्नानां शरीराभिमानत्याग एवाविद्यात्याग उच्यत इत्यर्थः । क्वचित्तदत्यागस्तु सम्यक्प्रपत्त्यभावमूलक एव ज्ञेयः । किञ्च—साधननिरपेक्षमपि तस्य क्वचित्संसारनिस्तारकत्वमाह—केवलस्य भावः कैवल्यमेकाकित्वं तेन जीवानुष्ठितमोक्षसाधनविनाभूतेनापि निरस्ता दूरीकृता योनिर्जीवाविद्या येन तम्। 'यमिह निरीक्ष्य हता गताः स्वरूपम्' इति भीष्मोक्तेरघबककेश्यादीनामन्येषां बहूनां मोक्षसाधनं विनापि मोक्षदर्शनादिति भावः । विशेषणेनानेन स्वयं भगवाञ्छ्रीकृष्ण एव द्योतितः । हरिं स्वमाधुर्येण प्रेमवतां मनोहारकस्तम् । अभयं यथा स्यात्तथा स्वीयकर्मकालकूटविविधवादिभ्यो भयं परित्यज्यैव निरंतरं ध्यायेदिति विधिरुक्तः । यद्वा—शस्त्रास्त्रादिपरित्यागेन परिगृहीतवेणुत्वात्सर्वतो निर्भयं सर्वेश्वरत्वादिति भावः ॥९०॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे विश्वनाथीटीकायां वेदस्तुतिर्नाम सप्ताशीतितमोऽध्यायः॥८७॥

नीलकंठी—तमिमं सर्वोपनिषदर्थं संगृह्य स्मारयति—योऽस्योत्प्रेक्षक इति । यो हरिः समूलसंसारदुःखसंहर्ता अस्य चेतनाचेतनस्य जगतः आदिमध्यनिधने सर्गस्थित्यन्तविषये उत्प्रेक्षकः कल्पकः रज्जुरिव भुजङ्गस्य तेन जगद्विवर्ताधिष्ठानत्वरूपमुपादानत्वमुक्तम् । अत्र हेतुः—योऽव्यक्तजीवेश्वरः अव्यक्तं माया जीवश्चिदाभासस्तयोरीश्वरः प्रवर्तकः "प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति श्रुतेः । अज्ञानविषयीकृता शुक्तिर्यथा रजताभासस्य रजतज्ञानाभासस्य च प्रवर्तिका एवं ब्रह्माप्यनादौ जीवेश्वरविभागे जीवाश्रिताज्ञानविषयीकृतं सत्सदाभासस्य कार्यकारणस्य चिदाभासस्य प्रवर्तकमितो युक्तमस्योपादानत्वमित्यर्थः । अज्ञानाश्रयविषयभेदाच्चेतनभेदः प्राप्तः स्रष्टृप्रवेष्ट्रोरैक्यादौपाधिक इत्याशयवानाह—यः सृष्ट्वेदमनुप्रविश्येति । इदं वियदादिविराडन्तं सृष्ट्वाऽनुप्रविश्य च ऋषिणा । इत्थंभावे तृतीया । ब्रह्मरूपेण पुरः जरायुजाण्डजस्वेदजोद्भिज्जानि चतुर्विधानि शरीराणि चक्रे निर्ममे । ताः पुरः तत्तदिन्द्रियगोलकाधिष्ठातृदेवतारूपेण शास्ति प्रवर्तयति । स्वस्वविषयग्रहणे यं हरिं सम्पद्याभेदेन प्राप्य समाधौ अनुशयी कर्मबद्धो जीवः अजां कर्ममूलभूतामविद्यां जहाति त्यजति । तत्र दृष्टान्तः—सुप्तः कुलायं यथेति । यथा—सुषुप्तः स्थूलसूक्ष्मदेहौ त्यजति एवं समाहितः कारणदेहमपीत्यर्थः । "द्वैतस्याग्रहणे तुल्यमुभयोः प्राज्ञतुल्ययोः । बीजनिद्रायुतः प्राज्ञः सा तु तुर्ये न विद्यते ॥" इति श्रुतिसिद्धोऽयं दृष्टान्तः । अत एव तं हरिं कैवल्येन निरुपाधिकत्वेन निरस्तं योनिर्मूलाज्ञानं येन स तथा । एतेन ब्रह्मैव संसरति ब्रह्मैव मुच्यत इत्यपि दर्शितम् । अत एवाभयं संसारभयशून्यं द्वितीयाभावात्—"द्वितीयाद्वै भयं भवति" इति श्रुतेः । अजस्रं सन्ततं ध्यायेत् अनात्मप्रत्ययतिरस्कारेणात्मैकाकारं प्रत्ययप्रवाहं कुर्यात् आत्मनो । वृत्तिव्याप्यत्वाद्ध्यायेदित्युक्तं न तु पश्येदिति प्रत्ययब्रह्मप्रकाशस्य स्वरूपत्वादिति भावः ॥ ९० ॥ व्याचक्रतुः श्रीधररामचंद्रौ वेदस्तुतिं गामिव सूर्यचन्द्रौ । व्याचक्र चान्यः कवितारकाभः सुलोचनानां पदवीप्रसिद्ध्यै ॥ १ ॥ पारावारश्रितकचकविर्ज्येष्ठगंगाप्रतीची सेव्या चातुर्धरकुलभृतां कूर्परग्रामवासात् । काश्यां तेषां हरिहरपरः कोऽपि गोविंदसूनुः फुल्लांबाजः श्रुतिनुतिमसौ व्याकरोन्नीलकण्ठः ॥ २ ॥ इति श्रीमन्नीलकण्ठीये वेदान्तकतके वेदस्तुतितात्पर्यपरिशुद्धिर्नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

॥ समाप्तेयं वेदस्तुतिः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ देवासुरमनुष्येषु ये भजंत्यशिवं शिवम् ॥ प्रायस्ते धनिनो भोजा न तु लक्ष्म्याः पतिं हरिम् ॥ १ ॥ एतद्वेदितुमिच्छामः संदेहोऽत्र महान्हि नः ॥ विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः ॥ २ ॥ श्रीशुक उवाच ॥ शिवः शक्तियुतः शश्वत्त्रिलिंगो गुणसंवृतः ॥ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ३ ॥

अष्टाशीतितमे विष्णुभक्तः कैवल्यमश्नुते ॥ ततोऽर्वाग्देवभक्तस्तु विभूतिमिति वर्ण्यते ॥ १ ॥ हरिर्भजतां मुक्तिद इत्युक्तमभयं ध्यायेदजस्रं हरिमिति तत्र शंकते । देवासुरेति । अशिवमवधीरितभोगम् । भोजा भोगिनः । लक्ष्म्याः पतिं सर्वभोगयुक्तम् ॥ १ ॥ २ ॥ अन्योन्योपमर्देन तमसस्त्रैविध्यात्त्रिलिंगः । त्रिलिंगत्वमाह । वैकारिक इति ।

ततो विष्णोरर्वाचामर्वाचीनानां देवानां भक्तो विभूतिमैश्वर्यमेव न तु कैवल्यम् (१) । तत्र हरिदत्तमुक्तौ । प्रायःशब्देन न केवलं धनप्रदत्वमेव शिवस्य किंतु सर्वाभीष्टप्रदत्वमपीति ध्वनितम् । एवं विष्णावपि न केवलमोक्षप्रदत्वमेव विष्णोर्भक्तेच्छानुसारेण सर्वार्थदत्वमेवेति बोध्यम् । हरिं ये भजन्ति ते धनिनो नेति योज्यम् ॥ * ॥ **तोषिणी**—एवं सर्वथा सर्वतः श्रीकृष्णस्योत्कर्षमाकर्ण्यापि कांश्चिदसंतुष्टान् केवलत्रिदेवीमात्रदृष्टीनैहिककामिनः शैवान्कटाक्षविषयीकुर्वन्नेव कृपया शिक्षयन्पृच्छति—देवेति द्वाभ्याम् । प्राय इति । प्रायिकत्वात्तयोः कदाचिद्व्यभिचारश्चेन्न तेन संदेहापगम इति भावः ॥ अत्र **विश्वनाथः**—“ निर्गुणौ विष्णुतद्भक्तौ मिथोऽवाप्तमदौ सदा । सगुणेषु मिथः क्लेशो महेशावृकयोरिव ॥” ब्रह्मपरमात्मभगवत्स्वरूपेषु भगवत्स्वरूपस्यैव तदुपासकस्य च श्रुतिवाक्यैरेव सर्वोत्कर्षमुक्त्वा इदानीं सार्धाध्यायेन ब्रह्मविष्णुरुद्रेष्वपि विष्णोरेव सर्वोत्कर्षात्सेव्यत्वमाह—ननु, ‘ध्यायेदजस्रं हरिम्’ इति त्वं हरिभजनमेव विदधासि तदपि हरिभजने दारिद्र्यमाशंक्य किमिति सर्वे हरमेव भजंतीति पृच्छति—देवेति । अशिवं चिताभस्मकपालपात्रादियोगाद्बहिर्दर्शिजनैरमंगलत्वेन प्रतीयमानम् । लक्ष्म्याः पतिं तु भजंतो न धनिनो नापि भोगवंतो भवंति कुत इत्यर्थः ॥ १ ॥ एतद्विरुद्धफलदातृत्वम् । अत्र विरुद्धफलदाने । विरुद्धशीलयोः श्मशानाटनभूतगणपरीतत्वादि . रुद्रस्य, देवगणपरीतत्वेन शुद्धभूम्यटनादि सुशीलं विष्णोः । यद्वा—सविभूतिकत्वनिर्विभूतिकत्वस्वभावयोः विरुद्धा गतिर्लक्ष्मीपतिभक्तानां धनराहित्यं निर्धनभक्तानां धनिकत्वं चेत्यर्थः ॥ * ॥ **तोषिणी**—एतदिति । अत्र किं कारणं तदित्यर्थः । इच्छाम इति बहुत्वं तत्र वर्तमानानां तेषां सकटाक्षसंग्रहात् । अत्र पूर्वोक्तविरोधे तमेवाह—विरुद्धं शीलं पूर्वोक्तस्वभावो ययोस्तयोः । प्रभ्वोरिति कर्मणि षष्ठी । भजतां विरुद्धा तत्स्वभावविपरीता क्रमाद्धनभोगप्राप्तितन्नाशलक्षणा । गतिः फलम् । अतः श्रीशिवभक्तानां साक्षाद्धनादिविभूतिदर्शनाद्धरेः पत्न्यपि लक्ष्मीः श्रीशिवस्याधीनेति तस्यैवोत्कर्षो घटेतेति भावः । साक्षात्तथानुक्तिस्तु संकोचादेवेति भावः ॥ अत्र **विश्वनाथः**—विरुद्धेति । भिक्षुकं शिवं भजंतः सम्पन्नाः स्युः लक्ष्मीपतिं विष्णुं भजंतस्तु भिक्षवो भवंतीति वैपरीत्यमनुचितमिति भावः ॥ २ ॥ अत्रोत्तरं तु सत्त्वादिगुणतारतम्यसंबद्धदेवसेवनेन तदनुकूलैव फलावाप्तिरित्याह—शिवः शक्त्याहंकाररूपया युक्तः । शश्वत्सदैव । स चाहंकारः—अन्योन्योपमर्देनान्योन्यगुणसंबंधेन च तमसः—“ तमःप्रधानस्त्वभवद्योऽहङ्कारः प्रमोहनः ” इत्युक्तेः । तमोगुणप्रधानस्याहङ्कारस्यैव शुद्धतमोरजोमिश्रतमस्सत्त्वमिश्रतमोरूपभेदत्रयवत्त्वात्, त्रिलिङ्गत्वम् । तदेवाह—वैकारिक इति ॥ * ॥ तत्र—“ सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥ ” इत्यादिकस्य द्वितीयादौ ब्रह्माद्युक्तस्यानुसारेण शास्त्रान्तरविलक्षणं सर्ववेदेतिहासवेदान्तसारं श्रीभागवतं सिद्धान्तं वदँस्तत्र चास्तां तावत्स्वयं भगवच्छ्रीकृष्णमाहात्म्यं तदंशांशस्यापि कृतगुणाधिष्ठातृत्वलीलस्य श्रीविष्णोर्वैलक्षण्यं श्रूयतामिति बोधयंस्तत्राभेदश्रवणेऽपि शिवविष्ण्वोरुपाधिधर्मयुक्तत्वायुक्तत्वे निर्दिश्य प्रतिबिम्बबिम्बवन्न्यूनाधिकशक्तिव्यञ्जनया स्थापयँस्तदुत्प्रेक्षिते गुण एव दोषत्वं दोषं एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो विकारा अभवन्षोडशामीषु कंचन ॥ उपाधावन्विभूतीनां सर्वासामश्नुते गतिम् ॥ ४ ॥
हरिर्हि निर्गुणःसाक्षात्पुरुषःप्रकृतेःपरः ॥ स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ ५ ॥

अहमहंकार इति ॥ ३ ॥ विकारा मनइंद्रियभूतरूपाः । षोडशातींद्रियदेवानामभेदविवक्षया । कंचन यत्किंचिद्विकारोपाधिकं भजन्नुपाध्यनुरूपाणां विभूतीनां प्राप्नोतीति ॥ ४ ॥ उपद्रष्टा साक्षी सन् । यतः सर्वदृक् सर्वं पश्यति । अतः प्रकृतेः पर इति । अत्रेदं तत्त्वम् । "वस्तुनो गुणसंबंधे रूपद्वयमिहेष्यते ॥ तद्धर्मायोगयोगाभ्यां बिंबवत्प्रतिबिंबवत् ॥ गुणाः सत्त्वादयः शांतघोरमूढाः स्वभावतः ॥ विष्णुब्रह्मशिवानां च गुणयंतृस्वरूपिणाम् ॥ नातिभेदो भवेद्भेदो गुणधर्मैरिहांशतः ॥ सत्त्वस्य शांत्या नो जातु विष्णोर्विक्षेपमूढते ॥ रजस्तमोगुणाभ्यां तु भवेतां ब्रह्मरुद्रयोः ॥ गुणोपमर्दतो भूयस्तदंशानां च भिन्नता ॥ अतः समग्रसत्त्वस्य विष्णोर्मोक्षकरी मतिः ॥ अंशतो भूतिहे

गुणत्वं च प्रतिपादयँस्ताद्विधानामतिमूर्खत्वं व्यञ्जयति–शिव इति यावदध्यायसमाप्ति–तत्रैव शिवस्योपाधिधर्मयुक्तत्वं दर्शयंस्तादृशविभूतिहेतुत्वं बोधयति द्वाभ्याम् । शश्वच्छक्तियुतक्रमेणाविर्भवन् प्रथमतस्तावन्नित्यमेव शक्त्या गुणसाम्यावस्थप्रकृतिरूपोपाधिना युक्तः गुणक्षोभे सति त्रिलिङ्गो गुणत्रयोपाधिः प्रकटैश्च सद्भिस्तैर्गुणैः संवृतश्च । ननु, तमउपाधित्वमेव तस्य श्रूयते कथं तत्तदुपाधित्वं तत्राह–वैकारिक इति । अहमहंत्वं हि तत्तद्रूपेण त्रिधा–स च तदधिष्ठातेत्यर्थं मुख्यं यस्तत्रस्थगुणद्वयमप्युपाधत्ते तस्य त्रिगुणत्वादित्यर्थः ॥ **विश्वनाथस्तु**–शक्त्या युतः संसृष्टः तिलतण्डुलवन्मिश्रित एव न तु तादूप्यं प्राप्तः । गुणैः संवृतः अस्मान्कृपया स्वीकुर्वीति वृतत्वात्त्रिलिङ्गस्त्रिगुणमयः न तु जीव इव तैर्बद्ध इति भावः । त्रिगुणमयत्वं विवृणोति–अहं त्रिधेति । अहङ्कारात्मकः स एव त्रिविधो भवत्येवेति ॥ ३ ॥ ततस्त्रिविधाहङ्कारात् । नन्विन्द्रियाधिष्ठातृदेवानामपि सात्त्विकाहङ्कारकार्यत्वेनाधिकानां दिग्वातादीनां सत्त्वात्कथं षोडशेति चेदत्राह–अतीन्द्रियदेवानामिति । अमीषु षोडशसु आकाशादिष्वधिष्ठानप्रकारेषु कञ्चनाकाशाद्युपाधिकं "भवायाकाशमूर्तये नमः" इत्यादिमन्त्रोक्तमूर्तिकं शिवमुपाधावन् भजन् विभूतीनामुपाध्यनुरूपाणां सर्वासां गतिं स्वरूपं प्राप्नोति । आकाशोपाधिकसेवनात्सर्वशब्दज्ञानं विषयेष्वसंगं च, जलोपाधिकसेवनेन वृष्ट्यादिसामर्थ्यं रसपरावर्तनसामर्थ्यं च, तेजउपाधिकसेवने नाग्न्याद्यवगाहनतत्स्तम्भनादिसामर्थ्यं च लभते । एवं यथायथं योज्यम् ॥ * ॥ ननु भवत्वेवं सोपाधिरसौ प्रकृते किमागतं तत्राह–तत इति । ततस्तेन भगवत्प्रतिनिधीभूतेनाधिष्ठितादहन्तत्त्वात् षोडशविकारा येऽभवन्, अमीषु विकारेषु मध्ये सर्वासां विभूतीनां सम्बन्धे किञ्चनोपाधावन् तदुपाधिकत्वेन तमुपासीनो गतिं प्राप्यं फलं लभत इति इन्द्रियाणां देवानाञ्चाभेदात्तानि दश, मन एकम्, भूतानि पञ्चेति षोडश । किञ्चन जैह्वयमौपस्थ्यं मानसं वा सुखमुद्दिश्य शिवं भजन्सर्वासां विभूतीनां सम्पत्तीनां गतिं स्वरूपं प्राप्नोति तेषां परस्परसापेक्षत्वादेकप्राप्तावपि सर्वविषयसुखानि प्राप्नोति तत्सुख एव सर्वसम्पत्तीनां पर्याप्तेर्भजनतारतम्यात्तत्तारतम्यं प्राप्नोति । अतः शिवस्य त्रिगुणमयत्वात्सम्पदामपि त्रिगुणमयत्वात्तद्भजने तत्प्राप्तिरिति । न त्वदुक्तो विरोध इति भावः । शिवविष्ण्वादिभेदाभेदविचारस्तु प्रथमस्कन्धे–'सत्त्वं रजस्तमः' इति पद्यव्याख्याने कृतः स तत्रैव दृश्यः ॥ ४ ॥ अत्र उपाख्याने । इदं तत्त्वं तात्पर्यम् । वस्तुनः चितः । गुणसम्बन्धे सति एकस्यैव रूपद्वयं भवति । तद्धर्माणां गुणधर्माणाम् । योगेन सगुणत्वमन्यथा निर्गुणत्वमिति । निर्गुणं बिंबसमं सगुणं तु प्रतिबिम्बसममिति । स्वभावतः स्वभावेन स्वरूपेणेति यावत् । गुणनियन्तृत्वं स्वरूपं येषां तेषां गुणनियन्त्रिति भावप्रधानो निर्देशः । वस्तुतो भेदो ब्रह्मादीनां भेदो नास्ति । गुणधर्मकृतो भेदोऽपि न सर्वथा किन्त्वंशत एवेत्याह–नाति भेदइत्यादि । ब्रह्मरुद्रयो रजस्तमोगुणकृते विक्षेपमूढते भवेतां स्तः । सत्त्वगुणसम्बन्धेनांशतो ब्रह्मापि विष्णुरेव । तथा रुद्रोऽपि । तमआदिगुणसम्बन्धेन विष्णो रुद्रता ब्रह्मतापि च भवत्येवेत्याह–गुणोपम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः ॥ शृण्वन्भगवतो धर्मानपृच्छदिदमच्युतम् ॥ ६ ॥

तुश्च तथाऽऽनंदमयी स्वतः ॥ अंशतस्तारतम्येन ब्रह्मरुद्रादिसेविनाम् ॥ विभूतयो भवंत्येव शनैर्मोक्षोऽप्यनंशतः ॥ " इदमेवाभिप्रेत्य तत्रतत्रोच्यते 'श्रेयांसि तत्र खलु

दैत इत्यादि । समग्रसत्त्वस्य विष्णोः सम्बन्धिनी मतिर्बुद्धिरुपासनारूपा मोक्षकरी, अंशतो रजआदिसम्बंधेन तदुपासा विभूत्यादिहेतुरपि । स्वतः स्वभावतः । सात्त्विकीत्वेनानन्दमय्येवेति । एवं ब्रह्मरुद्रभक्ता अपि
रजस्तमउपाधितया ये तावुपासते ते विभूत्यादि लभंते । ये शुद्धसत्त्वरूपत्वेन तावुपासते ते मोक्षमपीत्यभिप्रेत्योक्तं स्वामिनांशतस्तारतम्येनेत्यादि । इदमभिप्रेत्य समग्रसत्त्वरूपत्वं विचार्य । तत्रतत्राख्याने । एवं च
सति त्रयाणां वास्तवाभेदे सति । न किञ्चिदसमञ्जसम् । न त्रयाणामन्यतमस्य न्यूनतेति तत्तद्भक्तानां विष्णुशिवादिभक्तानां कलह एकस्य वैशिष्ट्यापादनमन्यस्य हीनतापादनं च मोहमात्रमज्ञानमेवेत्यर्थः । अथ चात्र
प्रकृतोपयोगिविशेषोऽपि शास्त्रान्तराविचारितो लिख्यते । तथाहि—ब्रह्मादीनामेकरूपत्वं चेत्तर्हि तत्तन्माहात्म्यपरपुराणादिष्वितरनिन्दा न स्यात्, दृश्यते च सा, तथा च—तदन्यथानुपपत्त्या साम्यमपि दुर्लभमैक्यस्य तु का कथा ।
तथा च 'पतन्तमनु धावतो बद्धोऽपि गतः' इति न्यायापात इति चेदत्राहुः—श्यालशुनकन्यायेन भेदवादिनः कोपोत्पादनाय तदिष्टदेवस्यान्यपरपुराणेष्वपकर्षवर्णनमिति । परे तु कल्पभेदमाश्रित्य स्वेच्छया परस्पर
स्माज्जन्मानिमित्तकं क्वचिदुत्कर्षापकर्षवर्णनमित्याहुः—'नहि निन्दानिन्द्यं निन्दितुं प्रवर्ततेऽपि तु विधेयं स्तोतुम्' इति न्यायाद्विधेयं हि स्तूयते वस्तु, इतिन्यायप्राप्ततत्तद्विग्रहावच्छिन्नेशध्यानादिस्तुतये तदन्यविग्रहावच्छिन्ने
शापकर्षवर्णनम् । तच्च 'यत्परः शब्दः' इतिन्यायात्स्तुतिपरमेव । योऽर्थः परस्तात्पर्यविषयो यस्य स यत्परः इति । न त्वन्यनिन्दापरमपि फलाभावात् उभयपरत्वे वाक्यभेदापत्तेश्च । अन्यत्रापि ह्येवं दृश्यते । तद्यथा—
'सर्वशाखाप्रत्ययमेकं कर्म' इति न्यायान्नानाशाखाविहितमप्यग्निहोत्रं न भिद्यते इति स्थिते, केचित् "उदिते जुहोति" इति श्रुतिमाश्रित्योदितेऽर्के होमं कुर्वन्ति, केचित् "अनुदिते जुहोति" इति श्रुतिमवलम्ब्यानुदिते जुह्वति ।
तत्र ये शाखिन उदये जुह्वति ते "उदयन्न खलु वा आदित्य आहवनीये तु रश्मीन्संदधाति" इत्युपक्रम्य "प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्यमदिवः कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरे
षाम्" इत्यनुदितहोमं निन्दन्ति । ये त्वनुदये जुह्वति ते "आदित्यो वा अस्तं यन्नग्निमनु प्रविशति" इति श्रुतिमुपजीव्य "यदुदिते सूर्ये प्रातर्जुहुयाद्यथातिथये प्रद्रुताय शून्यायावसथाहार्यं हरति तादृगेव तत्" इत्यु
दितहोमं निंदंति । अनयोः स्वार्थतात्पर्यकल्पने रागप्राप्तसुरापानादिवत् कालद्वये त्याज्यस्य शेषिणो होमस्यैव बाधः । तथा च—"यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादयश्चोदना उपरुध्येरन् । एवं च कालभेदेनाग्निहो
त्रमिव गुणभेदेन विग्रहभेदेन वा नेशो भिद्यते ततश्चैकास्मिन्नीशे यो गुणादिभेदेन भेदं प्रकल्प्यैकविग्रहावच्छिन्नमुपासीनोऽन्यं निन्दति स ईशविमुखः स्वामिद्रोहान्नरकमेतीति ज्ञेयम् । तस्मान्नैतावता सर्वविग्रहावच्छिन्नेशैक्य
विघातः शंक्य इत्यलं प्रपञ्चेन प्रकृतमनुसरामः ॥ * ॥ अथ श्रीविष्णोरुपाधिराहित्यं दर्शयंस्तादृशपरमपुमर्थहेतुत्वं स्थापयति—हरिर्हीति । हि प्रसिद्धौ हेतौ वा । प्रकृतेरुपाधितः परः तद्धर्मैरस्पष्टः, अत एव निर्गुणोऽपि
कुतस्त्रिलिंगत्वादिकमिति भावः । अत्र हेतुः—साक्षादेव पुरुष ईश्वरः न तु प्रतिबिम्बवद्व्यवधानेनेत्यर्थः । अतो—'विद्याविद्ये मम तनू' इतिवत् तनुशब्दोपादानात्कुत्रचित्सत्त्वशक्तित्वश्रवणमपि प्रेक्षादिमात्रेणोपकारित्वादिति
भावः । अत एव सर्वेषां शिवब्रह्मादीनां दृक् ज्ञानं यस्मात्तथाभूतः सन् उपद्रष्टा तदादिसाक्षी भवति । अतस्तं भजन्निर्गुणो भवेत् गुणातीतफलभाग्भवति । अतो यस्या लक्ष्म्याः पतिरसौ सापि स्वरूपभूतैव शक्तिर्न
तु शिवाद्यधीना प्रतीता । प्राकृतविभूतिं खण्डयत्येव । यथा वक्ष्यते च—'यतः शान्तिर्यतोऽभयम्' "धर्मः साक्षाद्यतो ज्ञानं विज्ञानं च तदन्वितम् । ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहम् ॥" इति । अतो गुणो वा दोषो
वा विचार्यतामिति भावः ॥ **विश्वनाथस्तु**—कुतो निर्गुणः यतः प्रकृतेः परः स्वत एव गुणानतिक्रम्य स्थितः । अतो गुणातीतस्य भजनात्कथं गुणमयीं सम्पदं प्राप्नुयुरिति भावः । सर्वेषां शिवादीनामपि ज्ञानं यतः स इति
तं भजन् ज्ञानचक्षुः प्राप्नोति न तु सम्पदुद्भूतमज्ञानान्ध्यमिति भावः । उपद्रष्टा गुणलेपाभावादौदासीन्येन केवलं साक्षीति तं भजन्नपि गुणलेपरहितो निर्गुणो भवेत् अत एव 'यतः शांतिः' इत्याद्यग्रे वक्ष्यते ॥ ९ ॥
अश्वमेधेष्विति । दक्षिणाभेदेनैकाश्वमेधस्य त्रिरूपत्वाद्बहुत्वमविरुद्धम् । युष्मत्पितामहो युधिष्ठिरः । इदं लक्ष्मीशोपासकनैर्धन्यतद्धीनरुद्राद्युपासकधनिकत्वलक्षणवैपरीत्यम् ॥ * ॥ न केवलं तस्य स्वभावोऽयं किन्तु विचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स आह भगवाँस्तस्मै प्रीतःशुश्रूषवे प्रभुः ॥ नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोःकुले ॥ ७ ॥
श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ॥ ततोऽधनं त्यजंत्यस्य स्वजना दुःखदुःखितम् ॥ ८ ॥

सत्त्वतनोर्नृणां स्युः ' इति । तथा ' सत्त्वं यस्य प्रिया मूर्तिः ' इति तथा 'सत्त्वं तत्तीर्थसाधनम् ' इति। तथा ' त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ' इति । तथा ' न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ' इत्यादि । एवं च सति न किंचिदसमंजसम् । तद्भक्तानां तु कलहो मोहमात्रमिति ॥ ५ ॥ ६ ॥ ७ ॥ यस्याहमनुगृह्णामीति । अयमर्थः । यो विषयान्परिजिहीर्षुरपि कथंचिद्विद्यमानेषु विषयेषु सज्जते क्लिश्यति च तस्य विषयापहार एवानुग्रह इति । यथाश्रुतत्वे ध्रुवादीनामैश्वर्यविरोधात् । अथवा प्रथमं विभूतीः कामानुरूपा दत्त्वा शनैर्विषयभोगावसाने तस्य निर्वेदमुत्पाद्य हरिष्यामि परमानुग्रहं कर्तुमिति । तदुक्तं भगवतैव । " न मय्यावेशितधियां कामः कामाय

रश्वेति । तद्योग्यं तद्वाक्यमयमितिहासमुपक्षिपति–समाप्तेष्विति । नानामतमुनिसभायां श्रीभगवतैव निर्णीतमस्तीति भावः । तदेवं शास्त्रांतरविरोधस्य दौर्बल्यं दर्शितम् । राजा युधिष्ठिरः । युष्मत्पितामह इति । तादृशभगवदात्मीयपौत्रत्वेन तस्य प्रोत्साहनार्थम् अत्र प्रश्ने योग्यताव्यञ्जनार्थं च । अत एव गौरवाद्युष्मदित्युक्तम् । भगवतस्तस्मादेव भागवतधर्माञ्छृण्वन् इदं त्वत्पृष्टमेव, तदेवं द्वयोर्माहात्म्यमुक्तम् । अच्युतमिति । सर्वैश्वर्येण भक्तवश्यतादिसद्गुणैरपि परिपूर्णं किं वा तस्य गृहे सदा वर्तमानमिति भावः ॥ ६ ॥ स कृष्णः । निःश्रेयसायेत्युक्तेर्न केवलं भूभारहरणमेवावतारप्रयोजनमपि तु लोकनिःश्रेयसकरणमपीत्यपि ज्ञेयम् ॥ * ॥ प्राहेत्यत्र हेतुः–प्रीतः स्वभावत एव तत्रापि शुश्रूषवे श्रोतुमिच्छवे । नुन तु तथापि निजोत्कर्षं तादृशविनयादि गुणगणार्णवो वक्तुं नार्हति तत्राहुः–प्रभुः यः स्वतन्त्र एव सन् नृणामित्यादिलक्षणं निजोत्कर्षप्रकाशनं विना स्वभक्त्यसम्पत्त्या लोकानां मंगलासिद्धेरित्यर्थः । तदेवमपि यस्तादृशमुपदेशं न गृह्णीते तस्यैव दौर्भाग्यमिति भावः ॥ ७ ॥ अनुगृह्णामि अनुग्रहं कर्तुमिच्छामि । ननु धनहरणं कोऽयमनुग्रह इतिचेदत्राशयमाह–अयमर्थ इति । विद्यमानेषु विषयेषु । दत्तापहारित्वदोषमाशंक्याह–अथवेति । प्रथमं भोगेच्छावसरे । तस्य निजभक्तस्य । परमानुग्रहं स्वाप्तिलक्षणम् । एतच्च चीरहरणोपाख्याने श्रीकृष्णेनैवोक्तमित्याह–तदुक्तमित्यादि । ततो मत्कृतधननाशोत्तरम् । अधनं निर्धनम् । अस्य निर्धनस्य । स्वजनाः पुत्रादयः । त्यजन्त्यनादरं कुर्वन्ति । इत्यर्थ इति–धनहान्यातीवदुःखितमिति भावः ॥ * ॥ अथ किमाहेत्यपेक्षायां स तु तेन देवासुरेत्यादिना पृष्टस्योत्तरं सस्मितं तदभिप्रायविपरीतमेवेत्याह–श्रीभगवानुवाचेति । यमुपासकमनुगृह्णामि यं तु कामयमानं नानुगृह्णामि किन्तु तदभिरुचिमात्रमापाततः सम्पादयामि तस्मा एव धनं ददामीति भावः । हरिष्य इति लृट्प्रयोगोऽक्षमायाम् "अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि " इति स्मरणात् । तद्धनदर्शनाक्षमापूर्वकं हरामीत्यर्थः । शनैरिति । सहसा हरणे तस्य सर्वाच्छादकः क्षोभ एव स्याच्छनैर्हरणे तु क्रमेण धनादुदासीनीभूतः सत्संगे रतिः स्यादित्यभिप्रेत्येति भावः । ततः किं तत्राह–तत इति । शनैरित्यस्य त्यजन्तीत्यनेनाप्यन्वयः । अत एव दुःखे वीप्सा । क्रमाद्दारिद्र्यातिशयं प्राप्तमित्यर्थः ॥ * ॥ अत्र **विश्वनाथः**–दुःखाद्धनविगमजन्यादपि पुनर्दुःखितं स्वजनकर्तृक

१ निवृत्तेष्वित्यस्य स्थाने समाप्तेष्विति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया ॥ मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहम् ॥ ९ ॥

कल्पते " इति । दुःखदुःखितमिति । दुःखादनु पुनर्दुःखितमिव प्रतीयमानमित्यर्थः ॥ ८ ॥ स पुनर्बंधूनामाग्रहेण धनेहया प्रवृत्तोऽपि मदनुग्रहेण यदा निष्फलोद्यमो

त्यागात् । दुःखमिदं भगवद्दत्तत्वात्तस्य न कर्मफलं सुखमपि भगवद्भक्तानां न कर्मफलं किन्तु भक्तेरननुसंहितं फलमिति प्रथमस्कन्धे 'धर्मस्य ह्यापवर्गस्य' इत्यत्र भीष्मोक्तावपि प्रतिपादितम् । भक्तानां भक्तिमात्रे प्रवृत्त एवाप्रारब्धकूटबीजप्रारब्धकर्मणां क्रमेण नाशः 'उत्पलसहस्रदलभेदवत्' इति भक्तिशास्त्रमतम् । तथा च श्रुतिर्गोपालतापनी—" भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यम् " इति । अर्थश्च—उपाधिनैराश्येन कामनाराहित्येन मनःकल्पनं कृष्णे मनआदिसर्वेन्द्रियविनियोगो यस्तदेव भजनमेव नैष्कर्म्यमिति । भवति हि तात्पर्यात्ताच्छब्द्यमतः सामानाधिकरण्याद्भजने प्रवृत्ते एव भक्तानां नैष्कर्म्यं सर्वकर्मध्वंसो भवति । देहस्थितिस्तु—भजनाधिक्यतत्फलप्रतिपादकभगवदचिन्त्यशक्तेरेवेति । ये तु प्रारब्धफल इव सुखदुःखे दृश्येते ते भगवद्दत्ते एव । यदुक्तं श्रुतिभिः—'भवदुत्थशुभाशुभयोः' इति । भक्तवत्सलो भगवान्भक्तेभ्यः कथं दुःखं ददातीति चेत्सत्यं पुत्रवत्सलोऽपि पिता पुत्रेभ्यो भोगदूरीकरणेनाध्ययनादि कृच्छ्रं यद्ददाति तद्वात्सल्यं स एव जानाति न तु तदानीं तत्पुत्रोऽपीति । न च प्रह्लादध्रुवादिभ्यो भोगसम्पत्तिसुखमात्रदानात्साधकेभ्य एव हितार्थिना भगवता दुःखं दीयत इति वाच्यम्, सिद्धशिरोमणीनां युधिष्ठिरादीनामपि 'यत्र धर्मसुतो राजा' इत्यत्र 'सुहृत्कृष्णस्ततो विपत्' इति भीष्मोक्तौ दुःखश्रवणात् । तस्मात्—" न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितम् " इति भीष्मोक्तेस्तस्य विधित्सितं स एव भक्तवत्सलो वेद नान्य इति सिद्धान्तः । किञ्चित्तत्र समाहितं तदपि तत्रैव दृश्यम् । ननु च—स्वकर्मोत्थयोर्भगवदुत्थयोश्च सुखदुःखयोर्भोग्यत्वेन तुल्यत्वात्को विशेषः, उच्यते, कर्मोत्थानां सुखदुःखानां भोगेनापि तद्बीजं तिष्ठत्येव तद्वतां नरकपातश्च कर्मतारतम्यवतां सुखदुःखतारतम्यं चेति त्रितयं भवेत् । भगवदुत्थानां तु भगवदिच्छयैव बीजं सा च प्रयोजनपर्यन्तैव न तदुत्तरा 'जिह्वा न वक्ति भगवद्गुणनामधेयम्' इत्यादियमोक्तेस्तद्वतां न नरकपातः भगवतः स्नेहपात्रत्वान्न दुःखातिशयश्चेति । कर्मोत्थभगवदुत्थयोः शत्रुकृतमातृकृतताडनोत्थयोरिव दुःखयोर्विषामृतयोरिव कुतस्तुल्यतेति विवेचनीयम् । ननु च, सर्वसमर्थस्य भगवतो भक्तदुःखदानं विना किं तत्प्रयोजनं न सिद्ध्येत् सत्यं लीलानिधेस्तस्य न सिद्ध्येदेव । भक्तियोगस्य रहस्यत्वरक्षार्थं नानान्यमतानामुत्थानाभावार्थं भक्त्यौत्कण्ठ्यादिवर्धनार्थं च क्वाचित्प्रियेभ्यो दुःखदानमपि तत्सुखोदर्कमेव, यथा नयनाभ्यां कटुतराञ्जनदानमिति । तथाहि—यदि भक्ताः सदा सुखिन एव कृताः स्युस्तदा " परित्राणाय साधूनां विनाशाय च दुष्कृताम् " इति गीतोक्तनिमित्ताभावे सति कृष्णरामाद्यवतारा अपि न स्युस्तदा रासादिलीलामृतासिन्धौ भक्तानां खेलनं कथं स्यादिति । ननु च, साधुदुःखत्राणात्मकं निमित्तं विनापि तस्यावतारे को दोषः स्यात्, सत्यं भो भ्रातस्त्वं न रसाभिज्ञोऽसि श्रूयताम्, यामिन्यां सत्यामेव सूर्यादयः शोभन्ते, ग्रीष्मे सत्येव शीतलाम्भः सुखदम्, शीते सत्येवोष्णाम्भः, तमस्येव दीपः शोभते न तु प्रकाशे, क्षुत्पीडायां सत्यामेवान्नमतिस्वादु भवतीत्यलमतिविस्तरेण ॥ ८ ॥ मत्परैर्मत्परायणैः सह । कृतमैत्रस्य कृतप्रीतेः । असाधारणं मुक्तिलक्षणमनुग्रहम् ॥ * ॥ 'करिष्ये मदनुग्रहम्' इति द्वितीयोऽयमनुग्रहोऽसाधारणो भक्तिरसामृतवर्षी यदर्थमेव मे प्रथमोऽनुग्रहो दुःखसन्तापफलोऽभूदिति भावः । अत एवानुग्रहं करिष्य इत्यप्रयुज्य मदनुग्रहमिति मामिवानुग्रहं करिष्य

१ इच्छा । २ चन्द्रादय इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनंतकम् ॥ अतो मां सुदुराराध्यं हित्वान्यान्भजते जनः ॥ १० ॥ ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः ॥ मत्ताः प्रमत्ता वरदान्विस्मरंत्यवजानते ॥ ११ ॥ श्रीशुक उवाच ॥ शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः ॥ सद्यःशापप्रसादोंग शिवो ब्रह्मा न चाच्युतः ॥ १२ ॥ अत्र चोदाहरंतीममितिहासं पुरातनम् ॥ वृकासुराय गिरिशो वरं दत्त्वाऽऽप संकटम् ॥ १३ ॥ वृको नामासुरः पुत्रः शकुनेः पथि नारदम् ॥ दृष्ट्वाऽऽशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः ॥ १४ ॥

निर्विण्णः स्यात्तदा मदनुग्रहमिति ममासाधारणमनुग्रहम् ॥ ९ ॥ तमेवाह । तद्ब्रह्मेति । अतः पश्चादपि मोक्षमरोचयन् । अत्यासक्तो जन इत्यर्थः ॥ ॥ १० ॥ ११ ॥ एतदेवेतिहासेन स्फुटयितुमाह । शापप्रसादयोरिति । ब्रह्मा चेत्यन्वयः ॥ १२ ॥ १३ ॥ शकुनेः पुत्रः ॥ १४ ॥

इत्यर्थः ॥ ९ ॥ तमेवानुग्रहमेव यत्सूक्ष्मं परमं ब्रह्म तन्मां हित्वा । अतः पश्चाद्धननाशोत्तरकालेऽन्यं भजते । इत्यर्थ इति–धनादिनाशेऽपि तद्वासनानाशाभावाद्देवतान्तरमेवं 'वसुकामो वसूनुद्रान्' इत्यादि वाक्यैर्धनादिप्रदं मत्वाऽऽराधयतीति भावः ॥ * ॥ अत एवानुग्रहं स्वतुल्यत्वेन विशिनष्टि–तद्ब्रह्मेति । बृहत्तमत्वाद्बहिरंगलोकदुर्लक्ष्यत्वाच्च ब्रह्मतुल्यं परमं सर्वोत्कृष्टम् । अनुग्राह्यस्य भक्तस्याप्यगम्यत्वात्सूक्ष्मं प्रेमर सानुभावकत्वाच्चिन्मात्रम् । प्राकृतसुखराहित्यान्मात्रपदप्रयोगः । सत्सर्वकालसत्ताकम् । अनन्तकं नास्त्यन्तकमभयं यत इत्यननुसंहितफलरूपः संसारक्षयश्चोक्तः । क्वचिदत्र विज्ञाय इत्यर्धकमस्ति तदसाम्प्रदायिक मिति । अत इत्यर्धकम् । अतो धनात्प्राप्तेर्हेतोः । जनः साधारणः । 'यस्याहमनुगृह्णामि' इत्युक्ताभिप्रायेण 'अकामः सर्वकामो वा' इत्युक्तरीत्या च त्वमपि धनं ददासि तर्हि कथमन्यान्भजन्ते तत्राह– सुदुराराध्यमिति । तस्याराधनतत्त्वाज्ञानात् श्रीभगवतश्च सुविचार्यैव फलदातृत्वादिति भावः । तथोक्तं तृतीये–"तं सुखाराध्यमृजुभिरनन्यशरणैर्नृभिः । कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ॥" इति । अथवा तदज्ञानस्य हेतुत्वमेव व्यञ्जयन्स्वविशेषणत्वेन तद्ब्रह्मेत्याद्यर्धमुक्तम् । तस्माद्ब्रह्मतोऽपि परमं 'ब्रह्मणो हि प्रतिष्ठाहम्' इत्यादि प्रसिद्धम् अतः सूक्ष्मं दुर्ज्ञेयम् यतश्चित्स्वरूपं ब्रह्म च मात्रा अंशो यस्य, यद्वा–चिद्रूपा मात्रा शक्तिर्यस्य तम् । सच्चानन्तञ्च यत्कं परमानन्दस्तत्स्वरूपमिति ॥ १० ॥ यतो मां विहायान्यामुपासते ततो हेतोस्ते तान्वरदातॄनेवावजानते तेषामेव देवानामवज्ञां कुर्वत इत्यर्थः । तत्र हेतुः– लब्धराज्येत्यादि । मत्ता मद्यादिना । प्रमत्तास्तामसादिदेवाराधनादिना ॥ * ॥ तच्च तेषां भजनं प्राप्ते फले वैपरीत्यायैव स्यादित्याह–तत इति । आशुतोषेभ्यो विचारं विनैव तुष्यद्भ्योऽन्येभ्यः । उद्धता अतिक्रान्त मर्यादाः मत्ता गर्विताः प्रमत्ताश्च अनवहिताः सन्तः वरदानपि तान्कालेन विस्मरन्त्येव, कथंचित्स्मरणेऽप्यवजानते च अवज्ञाविषयीकुर्वते च ॥ ११ ॥ आदिनेन्द्रादिग्रहः । सद्यो झटित्येवैषदप्यपराधे शापस्तथै षदप्यर्चने प्रसादो यस्य स तथा शिवो ब्रह्मा चेति द्वावेतादृशौ नाच्युत इत्यर्थः ॥ * ॥ श्रीभगवदुक्तरीत्या तेषामाशुतोषप्राप्ताविचारत्वम् । तथापि–श्रीभगवदाश्रयबलेन सर्वसिद्धिम् । श्रीभगवतस्तु दुराराध्यता प्राप्तसुविचारत्वं तेषां भगवदाश्रयमूलानां सदांगीकारश्चेतिहासेन दर्शयितुमुपन्यस्यति–शापेति । शापे प्रसादे च वरदाने ईशाः समर्थाः । आदिनेन्द्रादयः । अंग भो राजन्निति । सत्यमेवेदमिति भावः । अच्युत इति निजतत्तद्गुणच्युतिराहित्यात् ॥ १२ ॥ अत्र शिवस्य सद्यःप्रसादत्वे ॥ * ॥ पुराविदः पूर्ववृत्तान्तज्ञाः पौराणिका इत्यर्थः । पुरातनमिति क्वाचित्कः ॥ १३ ॥ ० ॥ * ॥ पथि दृष्ट्वेति काकतालीयेनैव

१ परामर्शशून्याः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स आह देवं गिरिशमुपाधावाशु सिध्यसि ॥ योऽल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥ १५ ॥ दशास्यबाणयोस्तुष्टः स्तुवतोर्बंदिनोरिव ॥ ऐश्वर्यमतुलं दत्त्वा तत आप सुसंकटम् ॥ १६ ॥ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः ॥ केदार आत्मक्रव्येण जुह्वानोऽग्निमुखं हरम् ॥ १७ ॥ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेऽहनि ॥ शिरोऽवृश्चत्स्वधितिना तत्तीर्थक्लिन्नमूर्धजम् ॥ १८ ॥ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोऽनलात् ॥ निगृह्य दोर्भ्यां भुजयोर्न्यवारयत्तत्स्पर्शनाद्भूय उपस्कृताकृतिः ॥ १९ ॥ तमाह चांगाऽलमलं वृणीष्व मे यथाभिकामं वितरामि ते वरम् ॥ प्रीयेय तोयेन नृणां प्रपद्यतामहो त्वयात्मा भृशमर्द्यते वृथा ॥ २० ॥ देवं स वव्रे पापीयान्वरं भूतभयावहम् ॥ यस्ययस्य करं शीर्ष्णि धास्ये स म्रियतामिति ॥ २१ ॥ तच्छ्रुत्वा भगवान्रुद्रो दुर्मना इव भारत ॥ ओमिति प्रहसंस्तस्मै ददेऽहेरमृतं यथा ॥ २२ ॥

॥ १५ ॥ सुसंकटमाप कैलासोत्पाटनं पुरपालनं च ॥ १६ ॥ स्वगात्रत उपाधावत् । कथम् । आत्मक्रव्येण स्वमांसेन जुह्वान इति ॥ १७ ॥ अवृश्चच्छेत्तुमुद्यतः ॥ १८ ॥ मूर्तिमानग्निरिव देदीप्यमानः वयमधुनातना यथा किंचिद्दुःखेन मर्तुकामं वारयामस्तद्वदिति । स च उपस्कृताकृतिः परिपूर्णदेहोऽभवत् । तं न्यवारयदेवमाह च ॥ १९ ॥ तोयेनापि भजतां प्रीतः स्यां त्वया तु देहो वृथा पीड्यत इति ॥ २० ॥ २१ ॥ दातुमनर्हमपि दत्तवान् । सर्पाय क्षीरमिव ॥ २२ ॥

संगमेन तस्य दुष्टत्वं तत्रैवापृच्छादिति सद्व्यवसायानभिज्ञत्वं दार्शितम् । त्रिषु ब्रह्मादिषु ; आशुतोषं शीघ्रप्रसादम् । दुर्मतित्वं च अग्रे प्रकटीभविष्यति ॥ १४ ॥ स नारदः सिद्ध्यति कृतार्थो भविष्यति । वर्तमानसमीपे भविष्यति लट् । यो गिरिशः ॥ आशु उपाधाव सेवस्व । ततश्च सिद्ध्यसि समीप एव सेत्स्यसि सिद्धस्पष्टार्थो भविष्यसीत्यर्थः । अल्पाभ्यामिति अल्पेन गुणेन तुष्यति, अल्पेन दोषेण कुप्यति चेत्यर्थः ॥ १५ ॥ दशास्यबाणयो रावणबाणासुरयोः । ततस्तदुपरि तोषात् ॥ * ॥ नन्वेवं चेत्तर्हि बिभेमि चेति नाशङ्क्यं यतो हरात् लब्धवरस्य तवासौ न किमपि कर्तुं शक्ष्यतीत्याह दृष्टान्तद्वारा–दशेति । सकामत्वाद्बन्दिनोरिव स्तुवतोस्तुष्टः सन् सुसङ्कटं बहुसङ्कटं क्रमेण कैलासोत्पाटनं पुरपालनरूपं चापेति तैर्व्याख्यातम् ॥ १६ ॥ इतीत्थम् । तं रुद्रम् । अग्निर्मुखं यस्य तम् । केदारे तन्नामकक्षेत्रे । स्वगात्रतो निजशरीरेण । उपाधावदसेवत ॥ * ॥ केदारे तदाख्यशिवक्षेत्रे । अग्निर्मुखं यस्य तं सर्वदेवानामग्निमुखत्वात्तमुद्दिश्याग्नौ होमं कुर्वन्नित्यर्थः । स्वगात्रतः सकाशात् । आत्मना छिन्नं क्रव्यं मांसमात्मक्रव्यमिति मध्यपदलोपी समासः, तेन ॥ १७ ॥ स्वधितिना छुरिकया । 'स्वधितिश्छुरिका मता' इति कोशात् । तत्तीर्थेन केदारपादोदकेन क्लिन्नान्यार्द्राणि मूर्द्धजानि शिरोरुहाणि यस्य तच्छिरः ॥ ॥*॥ देवस्य निजाराध्यस्य शिवस्योपलब्धिं दर्शनम् । निर्वेदाद्दुःखात् । स्वधितिना खड्गेन परश्वधेन वा । 'स्वधितिश्छेदनार्हशस्त्रे' इति कोशकाराः । नित्यं त्रिषवणपरत्वात्क्लिन्नकेशं छेदनार्थं सद्यः स्नानाद्वा ॥ १८ ॥ तदा शिरश्छेदनावसरे । योऽर्चितः स धूर्जटिः रुद्रः । तमिति शेषः ॥ * ॥ त्रिलिङ्गत्वात्सत्त्वगुणोदयमप्याह–तदेति । तदा सद्य एव महाकारुणिकः विना विचारं करुणोदयात् । यथा वयमिति अजहल्लक्षणया साधारणजनप्राप्तिः । दृष्टान्तत्वं च महाकारुणिकतयेश्वरत्वत्यागेन लौकिकसादृश्यप्राप्तेः । अन्यथान्तःप्रेरणयैव तद्वारणसम्भवात् ॥ १९ ॥ तं वृकासुरम् । यथा निकामं नितरां काममनतिक्रम्य यथाभीष्टमित्यर्थः । प्रीयेय प्रीतो भवेयम् ॥ * ॥ अंगेति सलालनं सम्बोधनम् । अलं स्वशिरश्छेदनेन प्रयोजनं नास्तीत्यर्थः । वीप्सा तु वैयग्र्यात् । मे मत्तः । यथा निकामं स्वाखिलेच्छानुसारेण । अभिकाममित्यपि पाठः । वयमित्युभयत्रान्वेति । अहो खेदे । देवात्सर्वसद्वरप्रदादपि श्रीशिवात् । देवमिति वा पाठः ॥ २० ॥ स वृको देवं देवादित्यर्थः ॥ * ॥ तादृशवरणे हेतुः–पापीयानिति । चतुर्थकोटिकेनेयसुना तस्यातीवपापित्वं ध्वनितम् । यस्ययस्येति वीप्सया तस्य सक्तत्वं च वारयति । देवादिकं च सर्वं परामृशति॥२१॥तद्वचः । दुर्मना अपि प्रहसन्निव स्वदौर्मनस्यमप्रकाशयन्निव । तस्मै वृकाय । ॐमित्युक्त्वा ददे । अपात्रायादेयदाने दृष्टान्तः–अहेरहयेऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तः सोऽसुरो नूनं गौरीहरणलालसः ॥ स तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि किलासुरः ॥२३॥ स्वहस्तं धातुमारेभे सोऽबिभ्यत्स्वकृताच्छिवः ॥ तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः ॥यावदंतं दिवो भूमेः काष्ठानामुदगादुदक्॥२४॥अजानंतः प्रतिविधिं तूष्णीमासन्सुरेश्वराः॥ ततो वैकुंठमगमद्भास्वरं तमसः परम्॥२५॥यत्र नारायणः साक्षान्न्यासिनां परमा गतिः॥शांतानां न्यस्तदण्डानां यतो नावर्तते गतः॥२६॥तं तथाव्यसनं दृष्ट्वा भगवान्वृजिनार्दनः॥ दूरात्प्रत्युदियाद्भूत्वा बटुको योगमायया ॥ २७ ॥ मेखलाजिनदंडाक्षैस्तेजसाग्निरिव ज्वलन् ॥ अभिवादयामास च तं कुशपाणिर्विनीतवत् ॥ २८ ॥ श्रीभगवानुवाच ॥ शाकुनेय भवान्व्यक्तं श्रांतः किं दूरमागतः ॥ क्षणं विश्रम्यतां पुंस आत्माऽयं सर्वकामधुक् ॥ २९ ॥

॥२३॥उपसृष्टोऽनुगतः । उदगादधावत् । उदगुत्तरतः ॥ २४ ॥ वैकुंठं श्वेतद्वीपम्॥२५॥२६॥तं वृकासुरम् । तथाव्यसनं तादृग्व्यसनं यस्य तम् । वृजिनार्दनो दुःखहंता। दूरत एव दृष्ट्वा मेखलादिभिरुपलक्षितः प्रत्युदियात्संमुखमागतः ॥२७॥२८॥ व्यक्तं निश्चितम् । किं किमर्थम् । आत्मा देहः सर्वपुरुषार्थहेतुः । अतो मा पीडयेति॥२९॥

मृतं दुग्धमिव । 'घृतक्षीरजलेऽमृतम्' इति व्याडिः ॥ * ॥ तच्छ्रवणाद्दुर्मना दुःखिताचित्तः । इवेति श्रीविष्णोस्तत्प्रतीकारसम्भावनया दौर्मनस्यह्रासात् । तत्र हेतुः—भगवानिति । सर्वज्ञ इत्यर्थः । तस्य दुर्मतित्वेन प्रहसन् । अमृतत्वसाम्यं वरमात्रांशे । हे भारतेति भरतवंशबीजभूतो भवान्, यथा श्रीभगवता रक्षितस्तथा तद्भयाज्जगद्रक्षिष्यत इति भवता कापि चिन्ता न कार्येति भावः ॥ २२ ॥ इत्थमुक्तः स वृको गौरीहरणलालसोऽभूदिति । ततश्च तस्य वरस्य परीक्षार्थं विश्वासार्थम् ॥ * ॥ किल वार्तायाम् ॥ २३ ॥ स शिवः । स्वकृताद्वरादबिभ्यत् अबिभेत् । तेन असुरेण । यावद्दिवः आद्यन्तं तावत् ॥ * ॥ स्वकृता त्स्वयं दत्तवरात् अबिभेत् भयं प्राप्तः । अबिभ्यदिति पाठस्त्वार्षः । ततश्च पराङ्मुखोऽधावदिति ज्ञेयम् । शिव आत्मनोऽन्येषां च मंगलेप्सुरितिभावः । द्युप्रभृतीनामन्तमवधिं यावत् पराधावन्पलायमानः सन् । परा धावदिति पाठे उदगिति श्वेतद्वीपजिगमिषया ॥ २४ ॥ प्रतिविधिं प्रतिक्रियाम् । ततः सर्वदेवलोकगमनोत्तरम् । तमसस्तत्कार्याद्ब्रह्माण्डात्परम् । यद्वा—वैकुण्ठं श्वेतद्वीपम् । तमसः परं तेजोरूपम्, अत एव भास्वरम् ॥ * ॥ प्रतिविधिं तत्प्रतीकारम् । सुरेश्वरा ब्रह्मादयः । अगमच्छ्रीशिवः । भास्वरं सदा स्वयमेव प्रकाशमानम्, कुतस्तमसः प्रकृतेः परम् । महावैकुण्ठावतारस्य श्वेतद्वीपाख्यस्यास्य पृथ्वीगतत्वेऽपि ततः परत्वम् । श्रीभगवानिविकारावर्ति च । 'तथाहि दर्शयति' इति न्यायेन ॥ २५ ॥ यत्र वैकुण्ठे । यतो यत्र ॥ * ॥ तत्रैव हेतुमाह—यत्रेति । साक्षाद्वर्तते न्यासिनां भगवदर्थे त्यक्ताशेषाणाम् । अतः शान्तानां रागद्वेषा दिरहितानाम् भगवन्निष्ठचेतसां वाऽत एव न्यस्तदण्डानां हिंसारहितानाम् । परमा सर्वोत्तमा गतिः प्राप्यः । अत एव यतो यत्र गतो नावर्तते पुनः संसारे न पतति । "अनावृत्तिः शब्दात्" इति न्यायात् ॥ २६ ॥ बटुको ब्रह्मचारी ॥ * ॥ तामिति सार्द्धकम् । व्यसनं क्रोधजदोषोऽभिनिवेशो वा । भगवानिति । तत्तत्सर्ववृत्तान्तज्ञत्वस्य वक्ष्यमाणतत्तच्छक्तिमत्त्वस्य च । वृजिनार्दन इति । श्रीशिवस्यापि दुःखमोचनाभिप्रायेण । दूरादिति । श्रीवैकुण्ठाद्बहिरित्यर्थः । प्रति तदभिमुखतः । उदियादाविर्भूत इत्यर्थः । योगमायया स्वशक्तिविशेषेण । बटुको बालब्रह्मचारी भूत्वा ॥ २७ ॥ अभिवादयामास कथयामास । तम् असुरम् । वतिना वस्तुतो विनीतत्वाभावो द्योतितो वञ्चनप्रवृत्तत्वात् ॥ * ॥ अक्षम् अक्षमाला । अत्र बटुकत्वमादरस्नेहयोरुदयार्थम् । तत्र च तेजसेति दृष्टिमात्रेणैव तद्बुद्ध्याद्यभिभव उक्तः । अभीत्यर्द्धकम् । तं वृकासुरमभिवा दयामास आशिषं ब्रुवँस्तमात्मानमभिवादयामास स्वं नमस्कारयामास । यद्वा—अस्माकं ब्रह्मदार्शिनां सर्वभूतान्येवाभिवाद्यानि भवांस्तु शकुनेः पुत्रो ज्ञानी तपस्वी मम बटोरभिवाद्य एवेति द्योतयामास । वतिना वास्तव विनयाभावो दर्शितोऽत्र ॥ २८ ॥ यतः सर्वपुरुषार्थहेतुः, अतो हेतोर्मा पीडयेति शेषः । विश्वासोत्पादनार्थं पितृनाम्ना सम्बोधयति—शाकुनेयेति ॥ * ॥ हे शाकुनेय शकुनिनन्दनेति पितृतः परिचयतया विश्वासार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि नः श्रवणायालं युष्मद्व्यवसितं विभो ॥ भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते ॥ ३० ॥ श्रीशुक उवाच ॥ एवं भगवता पृष्टो वचसाऽमृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठितम् ॥ ३१ ॥ श्रीभगवानुवाच ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि ॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥ ३२ ॥ यदि वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ ॥ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयताम् ॥ ३३ ॥ यद्यऽसत्यं वचः शंभोः कथंचिद्दानवर्षभ ॥ तदैनं जह्यऽसद्वाचं न यद्वक्ताऽनृतं पुनः ॥ ३४ ॥ इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः ॥ भिन्नधीर्विस्मितः शीर्ष्णि स्वहस्तं कुमतिर्न्यधात् ॥ ३५ ॥

प्रायशः पुंभिर्धृतैर्भवान् स्वार्थान्समीहते साधयितुमिच्छति । अथवा जनः पुंभिः सहायैः स्वकार्याणि साधयत्यतो नः कथ्यतामिति ॥ ३० ॥ ३१ ॥ पैशाच्यं पिशाचानामिव वृत्तिम् ॥ ३२ ॥ ३३ ॥ यद्यथा वक्ता वदिष्यति ॥ ३४ ॥ चित्रैर्भ्रामकैः । सुपेशलैरतिरम्यैः । भिन्नधीर्भ्रंशितमतिः ॥ ३५ ॥

तत्सन्तोषार्थं च । भवानित्यादरार्थम् । ननु, न विश्रामसमयोऽयं तत्राह—पुंस इति । यस्य कस्यापि पुरुषस्यायं देहो निजभाग्यप्राप्तः किं पुनर्महापुरुषस्य तवेत्यर्थः । यद्वा—पुंसस्तवायं सर्वसद्गुणवान्देहः सर्वेषामन्येषामपि कामधुक् मनोरथपूरकः ॥ २९ ॥ विरिव भाति झटिति गमनेनेति विभुः तत्सम्बुद्धौ तथा । धृतैर्निजत्वेन स्वीकृतैः । अहमेवैतादृश इति चेदर्थान्तरमाह—अथवेति । जनः सर्वः प्राणिजातः यतः सहायैः कार्याणि साधयति अतो हेतोः नोऽस्मभ्यं तव पितृपितामहादिसंगिभ्यस्त्वया कथ्यतामिति भावः ॥ * ॥ विश्रान्तं प्रत्याह—यदीति । अलं योग्यम् । युष्मदित्यादरात् । न इति तद्विश्वासार्थमात्मनो गौरवाय । विभो हे सर्वं कर्तुं समर्थेति । त्वद्व्यवसितं सेत्स्यत्येवेति भावः । धृतैर्वशीकृतैः । हे पुरुषव्याघ्रेति महापुरुषमान्यपुरुषद्वारा स्वार्थसाधनं किल योग्यमिति भावः । टीकायां धृतैः सहायैः । प्रायश इति पदत्रयमध्याहृतमेव । धृतैरिति पाठे तु टीका पतिता ज्ञेया तेन मां प्रति स्वव्यवसितमुच्यताम् यथा मयापि ब्रह्मतेजोबलेनापि तत्र साहाय्यं कर्तुं शक्यं स्यादिति भावः ॥ ३० ॥ एवमुक्तरीत्या वचसामृतेति वाच्येव मृदुत्वं नान्तरित्याह । तस्मै भगवते ॥ * ॥ अमृतमिव वर्षितुं शीलं यस्य । तात्पर्यतोऽन्यथोक्तत्वेऽपि स्वरूपगुणो न हीयत इति भावः ॥ ३१ ॥ एवं चेत् शिवेन त्वां प्रति वरं दत्तं यदि । तद्वाक्यं शिवोक्तिम् । यः शिवः पैशाच्यवृत्तित्वाद्वक्तव्यावक्तव्यं नानुसन्धत्ते । तत्र हेतुः—दक्षशापादिति । तत्साहित्याद्वेत्याह—प्रेतेत्यादि ॥ * ॥ एवं चेत् महादेवेन यदि तुभ्यं वरं दत्तं चेत् । पैशाच्यम् अनवमृश्य वक्तृत्वम् ॥ ३२ ॥ तत्र शिवे । जगत्सर्वं गृणातीति जगद्गुरुः । अपरिमितवक्तारि दैत्यमोहके । दानवेन्द्रेति तद्बुद्धिमत्ताम्, अंगेति निजतां च द्योतयितुं सम्बुद्धिद्वयं तद्व्यामोहार्थमेव ॥ * ॥ जगद्गुराविति । तत्तया भवद्भिः प्रतीते इत्यर्थः । प्रतीयतां तद्वाक्यस्यामिथ्यात्वं त्वयैव ज्ञायताम् । दानवेन्द्रेति । दानवा अपि देवानां नैसर्गिकशत्रुत्वेन तद्वाक्येषु श्रद्धां न कुर्वन्ति त्वं तु दानवेन्द्रः सन्कथं तत्र श्रद्धां कुरुष इति भावः ॥ ३३ ॥ यदीति । सर्वथा शिवस्य सत्यवक्तृतां सूचयति । कथञ्चिच्च एनं शिवम् । दानवर्षभ तद्धननसामर्थ्यं द्योतयति ॥ * ॥ शम्भोरिति । तदद्यपर्यन्तं सुखेन युक्तस्याप्यधुना सुखं न भविष्यतीति बोधनाय कथञ्चिदपीति तदेकांशस्यापि विघातेनेत्यर्थः । यद्वा—कथञ्चिदल्पेनं जहि इति योज्यम् । तदन्ते तत्पश्चात् स्वरूपार्थो वान्तशब्दः तदानीमेवेत्यर्थः । क्वचित्तदेनमिति पाठः । नयदिति । वधात्पश्चाद्वचनाभावात् । यद्वा—योगबलेन कुत्रचिदुत्पद्यापि न वदिष्यति । हे दानवर्षभेति सर्वं कर्तुं समर्थोऽसीति भावः ॥ ३४ ॥ भ्रामकैर्भ्रमोत्पादकैः । सोऽसुरः । विगता स्मृतिर्योग्यायोग्यविचारो यस्य स विस्मृतः । कुमतिर्वरदात्रवहेलकत्वात् । न्यधात् स्थापितवान् ॥ * ॥ चित्रैश्चातुरीयोगतो मोहनमन्त्रस्वरूपतश्च विस्माप्य भ्रामकैरित्यर्थः । विनयादिना सुपेशलैर्मनोहरैः भिन्नाऽन्यथात्वं नीता धीर्यस्य सः । विस्मितो भिन्नधीत्वादेवानुसन्धानरहितः सन् । सर्वत्र हेतुः—दुर्मतिरिति । दुर्मतीनां न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथापतद्भिन्नशिरा वज्राहत इव क्षणात् ॥ जयशब्दो नमःशब्दः साधुशब्दोऽभवद्दिवि ॥ ३६ ॥ मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे ॥ देवर्षिपितृगंधर्वा मोचितः संकटाच्छिवः ॥ ३७ ॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः ॥ अहो देव महादेव पापोऽयं स्वेन पाप्मना ॥ ३८ ॥ हतः को नु महत्स्वीश जन्तुर्वै कृतकिल्बिषः ॥ क्षेमी स्यात्किमु विश्वेशे कृतागस्को जगद्गुरौ ॥ ३९ ॥ य एवमव्याकृतशक्त्युदन्वतः परस्य साक्षात्परमात्मनो हरेः ॥ गिरित्रमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथाऽरिभिः ॥ ४० ॥ इति श्रीमद्भा० म० दशमस्कंधोत्तरार्धे रुद्रमोक्षणंनामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥

॥ ३६ ॥ ३७ ॥ ३८ ॥ किमु वक्तव्यं विश्वेशे त्वयि कृतागस्कः कृतापराध इति ॥ ३९ ॥ अव्याकृतशक्त्युदन्वतो वाङ्मनसागोचरशक्तिसमुद्रस्य । गिरित्रमोक्षं शिवमोचनरूपं चरितम् । संसृतिभिर्नानायोनिसंचारैः ॥ ४० ॥ भक्तसंकटमालोक्य कृपापूर्णहृदंबुजः ॥ गिरित्रं चित्रवाक्यात्तु मोक्षयामास केशवः ॥ १ ॥ इति श्रीमद्भागवते दशमस्कंधोत्तरार्धे श्री० टीकायामष्टाशीतितमोऽध्यायः ॥ ८८ ॥

किमपि हिताहितज्ञानं भवतीत्यर्थः ॥ ३५ ॥ अथ शिरसि हस्तस्थापनोत्तरमेव ॥ * ॥ अथानन्तरम् । क्षणात्तत्क्षणमतिक्रम्येत्यर्थः । तस्मात्सदा भीतैर्देवैस्तन्मरणनिर्धारणार्थम् । जयशब्दादौ क्षणविलम्बात् जयशब्दोऽत्युल्लासस्य नम इति भक्तेः साध्विति विस्मयस्य व्यञ्जनार्थः ॥ ३६ ॥ सङ्कटाच्छिवे मोचिते सति । सप्तम्यर्थे प्रथमे । यद्वा—इत्थंपदशेषेणान्वयः कार्यः ॥ * ॥ ० ॥ ३७ ॥ ० ॥ * ॥ अहो देवेत्यर्द्धकम् । देव जगत्पूज्य । तत्र हेतुः—हे महादेव सर्वदेवश्रेष्ठ । स्वेनैव पाप्मना न तु मयेत्यर्थः । हे ईशेति । तं स्वयं हन्तुं शक्तोऽपि केवलं निजाराधनापेक्षयोपेक्षितवानित्यर्थः ॥ * ॥ **विश्वनाथस्तु**—पुरुषोत्तमो विनयादिगुणैस्तेभ्यः सर्वेभ्य उत्तमः । अहो देवेति । भो अपरिणामदर्शिन् ऋजुबुद्धे दुष्टेभ्य एवं वरो न देयः यत्स्वमृत्युहेतुवरमपि न परामृशसि अद्य तु त्वामरक्षम् अपरस्मिन्दिने किं भविष्यतीत्युपालम्भोऽपि मया महादेवत्वादेव न दत्त इति ॥ ३८ ॥ हत इति पूर्वान्वयि । महत्सु साधुषु । जगद्गुरौ सर्वपूज्ये शास्तरि वा ॥ * ॥ ० ॥ ३९ ॥ चरितकथनादिफलमाह—य इति । संसृतिभिः संसरणहेतुभिः कामादिभिः ॥ * ॥ श्रीशिवस्य संकटान्मोचनेन साक्षाच्छ्रीभगवन्माहात्म्यमिदं नासम्भवं यतस्तस्यैतच्चरितकथनेनापि सर्वेषां सर्वसंसारदुःखाद्विमुक्तिर्भवतीत्याह—य इति । अधिकारापेक्षा निरस्ता यः कश्चिदित्यर्थः । एवमीदृशम् । अव्याकृतानां प्रपञ्चातीतानाम् । शक्तीनां स्वरूपशक्तिवृत्तीनां नदीरूपाणाम् । समुद्रस्य सर्वसमावेशाश्रयस्य साक्षात्परस्य निरुपाधिकतया स्वयं परमेश्वरस्य न तु शिवादिवत्सोपाधिकतया । तत्प्रतिरूपत्वेनैव तद्रूपस्येत्यर्थः । यतः परमात्मनस्तेषामपि मूलस्वरूपतया सर्वशक्तिप्रवर्तकस्येत्यर्थः । अत एव हरेस्तत्तत्सर्वाकर्षकतया तन्नाम्न इत्यर्थः । एवं निष्कामस्य कथनादिफलमुक्त्वा सकामस्याप्याह—तथेति समुच्चये । कथं संसृतिभिर्विमुच्यते तदाह—षड्वर्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीशुक उवाच ॥ सरस्वत्यास्तटे राजन्नृषयः सत्रमासत ॥ वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान् ॥ १ ॥ तस्य जिज्ञासया ते वै भृगुं ब्रह्मसुतं नृप ॥ तज्ज्ञप्त्यै प्रेषयामासुः सोऽभ्यगाद्ब्रह्मणः सभाम् ॥ २ ॥ न तस्मै प्रह्वणं स्तोत्रं चक्रे सत्त्वपरीक्षया ॥ तस्मै चुक्रोध भगवान्प्रज्वलन्स्वेन तेजसा ॥ ३ ॥ स आत्मन्युत्थितं मन्युमात्मजायात्मना प्रभुः ॥ अशीशमद्यथा वह्निं स्वयोन्या वारिणात्मनः ॥ ४ ॥ ततः कैलासमगमत्स तं देवो महेश्वरः ॥ परिरब्धुं समारेभ उत्थाय भ्रातरं मुदा ॥ ५ ॥ नैच्छत्त्वमस्युत्पथग इति देवश्चुकोप ह ॥ शूलमुद्यम्य तं हंतुमारेभे तिग्मलोचनः ॥ ६ ॥

नवाशीतितमे देवः को महानिति संशये ॥ परीक्ष्य विष्णोरुत्कर्षं मुनिभ्योऽवर्णयद्भृगुः ॥ १ ॥ इतिहासांतरमाह । सरस्वत्या इति ॥ १ ॥ २ ॥ ३ ॥ स्वयोन्या स्वस्यैव रूपांतरेणाभिव्यक्तिस्थानेन स्वकार्येणेत्यर्थः । तेन यथा कश्चिद्वह्निं शमयति तथा स्वकार्येण पुत्रेण निमित्तेन क्रोधं शमयामासेत्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥

रूपारिभिर्विशेषेण समूलतया मुच्यते ॥ ४० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्धोत्तरार्द्धेऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥ उत्कर्षं महत्त्वम् (१) । वितर्कः संशयः । "तर्काभावे वितर्कः स्यात्संचये च विचारणे" इति निरुक्तिः । त्रिषु ब्रह्मविष्णुरुद्रेषु । महानुत्तमः ॥ * ॥ तदेवम् सोपाधिरूपादाशुतोषादाशुकोपाच्च शिवात् शुद्धसत्त्वस्वरूपतयोदर्कशुद्धांगीकारमयपरमार्थदातृविचारतया च श्रीविष्णो रुत्कर्षमुक्त्वा परमापराधेऽपि विनयपूर्वकपरमांगीकारमयकरुणया च वदंस्तत्प्रसंगे ब्रह्मणोऽपि दर्शयति–सरस्वत्येति । आसत इति लटा सदा सत्रपरत्वेनाद्याप्यस्त्येव सत्रमिति बोध्यते । तेषां कर्माविष्टत्वमेवानिर्णये हेतुरुक्तः । वितर्को विचारः ॥ १ ॥ तस्य महत्त्वस्य । स्वयं जिज्ञासया लोकेषु तज्ज्ञप्त्यै आधिक्यज्ञापनाय । स भृगुः ॥ * ॥ तस्य महत्त्वस्य । 'महर्षीणां भृगुरहम्' इति तस्यैव तत्र योग्यत्वादिति भावः । ब्रह्मणि लाल्यत्वस्य शिवे भ्रातृत्वस्य ब्रह्मण्यदेवे श्रीविष्णौ तु ब्राह्मणत्वस्यातिशयस्फूर्तेः । सोऽपि भृगुरपि । तस्य महत्त्वस्य ज्ञापनाय अभि निर्भयमाभिमुख्येन वा ॥ २ ॥ तस्मै ब्रह्मणे । प्रह्वणं नमनम् । सत्त्वस्य महत्त्वहेतु त्वात्कार्ये कारणप्रयोगः । तस्मै भृगवे ॥ * ॥ सत्त्वं महत्त्वं तद्धेतुः सत्त्वगुणो वा । तस्य परीक्षया हेतोः । प्रह्वणं प्रणामं स्तोत्रं च न चक्रे एवमुत्तरत्रापि । भगवान् सर्वपूज्यः ॥ ३ ॥ स ब्रह्मा । आत्मजाया त्मजमुद्दिश्य । इत्यर्थ इति–"अग्नेरापः" इति श्रुतेर्वारिणो वह्निकार्यत्वावगमादिति भावः । तेन वारिणा । इत्यर्थ इति–पुत्रोऽयमिति मत्वा शान्तिं ययाविति भावः ॥ * ॥ आत्मनि मनसि । स्वयमेव क्षमापणं विनैव यतः प्रभुर्विचारसमर्थः । तत्र हेतुः–आत्मनः शुद्धसत्त्वमयहरेः सकाशाद्भवतीत्यात्मभूः । विचारमेवाह–स्वयोन्येति । स्वं वह्निरेव योनिरुत्पत्तिस्थानं यस्य तेन वारिणा "अग्नेरापः" इति श्रुतेः । यथा वह्निकार्येण वारिणा वह्निं शमयति । यद्वा–स्वस्य वह्नेर्योन्या कारणेन वारिणेव, क्रोधस्य कारणेनात्मनैव क्रोधं शमयामास । 'कूपीटयोनिर्ज्वलनः' इत्यमरात् । जलादपि वह्निर्जायत इति प्रसिद्धेः ॥ ४ ॥ ततो ब्रह्मलोकगमनोत्तरम् । स भृगुः । तं भ्रातरम् । रुद्रस्यापि ब्रह्मललाटोद्भूतत्वेन भ्रातृतेति । महः पूज्यश्चासावीश्वरश्चेति महेश्वरः । परिरब्धुमालिंगितुम् ॥ * ॥ एवं ब्रह्मण्यवज्ञारूपं मानसमपराधं कृत्वा तत्र रजोगुणं दृष्ट्वा ततोऽपि श्रेष्ठे शिवे मानसादधिकं वाचिमकपराधं कृतवानित्याह–तत इति । केलतः क्रीडत इति केलौ पार्वतीशिवौ । 'किल–श्वैत्यक्रीडनयोः' इतः पचाद्यच् । तावासाते अत्रेति केलासः स एव कैलासः स्वार्थिकोऽण् । ब्रह्मणः सत्त्वबाध्यं रजो दृष्ट्वा शिवस्य तमोबाध्यं सत्त्वं पार्वत्यां तदर्द्धांगीभूतायां सत्त्वबाध्यं तमश्च दर्शयति । देवो जगत्पूज्यः यतो महेश्वरः सर्वाहंकाराधिष्ठातृत्वात् । तथापि परिरब्धुं बाहुप्रसारणादिनाऽऽरेभे । यतः भ्रातरं ब्रह्मपुत्रत्वेन भ्रातृभावेनांगीकृतम् ॥५॥ आलिंगितुं नैच्छत् । श्मशानवासित्वादिनोत्पथगो लोकविरुद्धमार्गगाम्यशुभाचारोऽस्यतो मा मां स्पृशेति भावः । इति इत्युक्तः । तं भृगुम् । तिग्मलोचनो रक्तनेत्रास्त्रिलोचनो वह्निनेत्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतित्वा पादयोर्देवी सांत्वयामास तं गिरा ॥ अथो जगाम वैकुंठं यत्र देवो जनार्दनः ॥ ७ ॥ शयानं श्रिय उत्संगे पदा वक्षस्यताडयत् ॥ तत उत्थाय भगवान्सह लक्ष्म्या सतां गतिः ॥८॥ स्वतल्पादवरुह्याथ ननाम शिरसा मुनिम् ॥ आह ते स्वागतं ब्रह्मन्निषीदात्रासने क्षणम् ॥९॥ अजानतामागतान्वः क्षंतुमर्हथ नः प्रभो ॥ अतीव कोमलौ तात चरणौ ते महामुने ॥ इत्युक्त्वा विप्रचरणौ मर्दयन्स्वेन पाणिना ॥१०॥ पुनीहि सहलोकं मां लोकपालांश्च मद्गतान् ॥ पादोदकेन भवतस्तीर्थानां तीर्थकारिणा ॥११॥ अद्याहं भगवँल्लक्ष्म्या आसमेकांतभाजनम् ॥ वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः ॥१२॥

७ ॥ ८ ॥ ९ ॥ १० ॥ तीर्थकारिणा तीर्थत्वनिमित्तेन ॥ ११ ॥ १२ ॥

वा । "तिग्मं तीक्ष्णत्रिरक्ताग्नितमोव्याप्तजनेषु च" इति निरुक्तिः । तं शिवम् ॥*॥ उत्पथगोऽसि श्मशानभस्मादिधारणेन पाखण्डमार्गं प्राप्तोऽसीति परिवदँस्तत्परिरंभं नैच्छदिति।तिग्मलोचनः क्रोधान्नेत्राग्निप्रसर्पणात् ॥६॥ अथो रुद्रपरीक्षणोत्तरम् । यत्र वैकुण्ठे ॥*॥ सान्त्वयामास गिरा सामपूर्वकन्यायोक्त्या । रुद्रादप्यतिश्रेष्ठे विष्णौ वाचिकादप्यधिकं कायिकमपराधमाह—अथो इति । वैकुण्ठं प्रपञ्चान्तर्गतविकुण्ठासुतानिर्मितं विष्णुलोकविशेषम् । 'एवं ब्रुवति वैकुण्ठे' इति वक्ष्यमाणत्वात् । "पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः । तयोस्तु कलया जज्ञे वैकुण्ठो भगवान्स्वयम् ॥ वैकुण्ठो निर्मितो येन लोको लोकनमस्कृतः ।" इत्यष्टमस्कन्धाच्च ॥७॥ ततः पादप्रहारोत्तरम् ॥ * ॥ श्रिय उत्संगे शयानमिति तयोस्तदागमनाज्ञाने हेतुः मिथःप्रेमावृतज्ञानत्वात् । तदेवं तदानीं तादृशदारुणकर्मणोऽत्यन्तायोग्यत्वमुत्तरोत्तरमाविनयाधिक्यं च तस्योक्तम् । वैष्णवत्वं त्वेतदुत्तरकाले तादृशभगवद्गुणदर्शनेनैव जातमिति ज्ञेयम् । ततस्तस्मात्ताडनादनन्तरं तं दृष्ट्वेत्यर्थः।सहसा सम्भ्रमेण लक्ष्म्या सहोत्थाय । लक्ष्म्या अपि तादृशसमयेऽपि तादृशविविक्तेऽप्यागन्तारि स्वांगावलोकनसम्भविष्णावपि तस्मिन्मुनौ न कोपगन्धोऽपीति शुद्धसत्त्वगुणधर्मः प्रियतमचित्ताभिज्ञत्वेन तत्तिरस्कारदर्शनेऽपि नान्तःकोप इति शुद्धसत्त्वधर्मः श्रियि इष्टः । उत्थानादौ हेतुः सतां सन्मार्गप्रवर्तकानां गतिराश्रयः तत्रैव हेतुगर्भवान्सर्वसद्गुणयुक्तः परमेश्वरो वा ॥ ८ ॥ ० ॥ * ॥ स्वशब्देन तल्पस्य परमधिष्ण्यत्वमुक्तम् । ते त्वया सुखेनागतम् । यद्वा—तव स्वागतं शोभनमागमनम् । हे ब्रह्मन् वेदस्वरूपेति परमपूज्यत्वमुक्तम् । अत्र मत्तल्परूपे किं वा विप्रार्थं पृथक्स्थापिते किं वा मयार्पितेऽस्मिन्नासने । एवं च स्वयमेव सत्वरमासनमानीतमिति ज्ञेयम् ॥ ९ ॥ अजानतां नः । तात पूज्य । अहो अतीवकठोरदैत्यप्रेषितगदादीनामपि निजस्पर्शेन विदारकस्य मदुरसो व्याघातेनातीवकोमलौ ते चरणौ भग्नावित्युक्त्वा ॥ * ॥ ननु, त्वयाऽभिगमनाभ्युत्थानादिना मत्संमाननाकरणादहं तवेदमासनं न स्वीकरोमीति चेत्सत्यं मन्महापराधः खल्वभूदेव तत्र त्वत्कृपैव मे गतिरित्याह—अजानतामिति । वो युष्मान्बहुत्वं गौरवात् । नोऽस्माकमिति लक्ष्म्याद्यपेक्षया ॥ १० ॥ तीर्थत्वनिमित्तेन पावकेन । 'तीर्थं शास्त्राम्बुपावने' इति यादवः ॥ * ॥ रक्षणोपदेशे प्रयोजनं च मम सुखमेवमित्येवमतिस्तुत्या प्रतिपादयति—पुनीहीति द्वाभ्याम् । सहलोकं श्रीवैकुण्ठलोकेन चतुर्दशभुवन्या च सहितम् । लोकपालान्ब्रह्मरुद्रादीन् मद्गतान्मयि वर्तमानान् । तस्य विश्वोदरत्वात्तेषां तदंशत्वाद्वा । भगवन् हे परमपूज्य । ब्रह्मण्यदेवत्वान्मम पूज्यत्वेन त्वमेव भगवान्नाहं भगवान् मय्यपि तत्त्वत्प्रसादजमिति भावः । अतः क्षणं प्रविष्टस्य पादौ प्रक्षाल्य तज्जलं धारयामीति भावः ॥ * ॥ अत्र **विश्वनाथः**—यदि चेमं महापराधं क्षांतवानासि तर्हि देहि पादोदकमित्याह—पुनीहीति । तीर्थानां गंगादीनामपि तीर्थकारिणेति एतत्प्राप्त्यैव गंगादीनि तीर्थान्यभूवन्नित्यर्थः । पापिजनमलिनीकृततीर्थानां भवादृशमहानुभावसंसर्गादेव पुनः पावकत्वप्राप्तेः "साधवो न्यासिनः शांता ब्रह्मिष्ठा लोकपावनाः । हरन्त्यघं तेऽङ्गसंगात्" इति श्रीगंगां प्रति भगीरथोक्तेः । अत्र भृगुकृत एतावत्यपराधे क्षमैव सत्त्वगुणधर्मः । प्रत्युत स्वस्यापराधित्वमननेन तत्प्रसादनं यदेतच्छुद्धसत्त्वधर्मो ज्ञेयः ॥ ११ ॥ " नित्यं मे वसतिर्देव विप्रपादांकि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एवं ब्रुवाणे वैकुंठे भृगुस्तन्मंद्रया गिरा ॥ निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठोऽश्रुलोचनः ॥१३॥ पुनश्च सत्रमाव्रज्य मुनीनां ब्रह्मवा
दिनाम् ॥ स्वानुभूतमशेषेण राजन्भृगुरवर्णयत् ॥ १४ ॥ तन्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः ॥ भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतोऽभयम् ॥
॥ १५ ॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितम् ॥ ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहम् ॥ १६ ॥

गिरा निर्वृतस्तूष्णीं बभूवेति शेषः ॥ १३ ॥ १४ ॥ विस्मिता अपराधातिरेकेऽपि निर्विकारित्वेन । भूयांसं श्रद्दधुः । महत्तमं निश्चितवंतः । यतो यस्मिन् ॥ १५ ॥ वैराग्यं
च चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यम् । विषयांस्त्यक्तुमशक्नुवतोऽपि संमानेच्छात्याग आद्यं वैराग्यम् । विषयाणां मध्ये लवणादिव्यतिरेकेणापि वृत्तिर्द्वितीयम् । तथा
वृत्तावपि मनसि रागशैथिल्येन बाह्येंद्रियैरिव विषयसेवनं तृतीयम् । तत्राप्यौदासीन्यं चतुर्थम् । यथाऽऽहुः । "वैराग्यमाद्यं यतमानसंज्ञं क्वचिद्विरागो व्यतिरेकसंज्ञः ॥ एकेंद्रि
याख्यं हृदि रागसौक्ष्म्यं तस्याप्यभावस्तु वशीकृताख्यम्" ॥ १६ ॥

तस्थले" इति लक्ष्मीवाक्यादधुना मां लक्ष्मीर्न हास्यतीत्याह—अद्येति । भवति सर्वदा तिष्ठतीति भवन्स चासौ पादस्तेन हतांहसो नष्टकिल्बिषस्य । लोकसंग्रहार्थैयमुक्तिः ।
एतेनैतद्भवत्पादचिह्नं सर्वदा श्रीस्थैर्यायाहं न त्यक्ष्य इति ध्वनितम् । एतदेव श्रीवत्सपदेनापि वर्ण्यते कैश्चिदिति "श्रीवत्समिति नामापि जायतां पादलक्षणम्" इति । एतच्च तृतीयस्कन्धे
बहुधा वर्णितम् । 'भूतिः श्रीजन्मभस्मसु' इति यादवः ॥ * ॥ ननु मनोदुःखभरेण मया महापराधः कृतोऽतो लज्जया कुतोऽत्रोपवेष्टव्यमित्याशङ्क्य महाननुग्रह एव भवता कृत इत्याह—अद्येति । एकान्तं
परमं भाजनमाश्रयः । तत्र च त्वमेव समर्थोऽसीत्याह—हे भगवन् सर्वशक्तियुक्त अतो भूतिर्लक्ष्मीः सदा वत्स्यतीत्यर्थः । तत्र हेतुमाह—भवदिति । विकुण्ठासुते लक्ष्म्या आत्यन्तिको वक्षसि वासः श्रीभृगुपादस्पर्शानंतर
मेव जात इति गम्यते ॥ * ॥ अत्र **विश्वनाथः**—ननु, च—तुभ्यं त्वत्प्रियायै प्रेमवत्यै लक्ष्म्यै च दुःखं ददानस्य ममाकल्पं नरकवासो भविष्यति यद्य पामरविप्रस्य महापापिनो ममापवित्रपादस्त्वद्वक्षसि लग्न इत्यनुतापजर्जरे
सति तस्मिन् भो मुने कृपासिन्धो आवयोस्त्वं परममुत्सवमेव कृतवानसीत्याह—अद्येति । "यत्सेवया चरणपद्मपवित्ररेणुं न श्रीर्विरक्तमपि मां विजहाति यस्याः । प्रेक्षालवार्थमितरे नियमान्वहन्ति" इति तृतीयोक्तेः
॥ १२ ॥ एवमुक्तविधया । तस्य विष्णोः । मन्द्रया गंभीरया । 'मन्द्रस्तु गम्भीरे' इत्यमरः । तर्पितस्तृप्तिं प्रापितः ॥ * ॥ तूष्णीमित्यश्रुरुद्धकण्ठत्वेन स्तुत्यसामर्थ्यात् । अत्र भगवल्लीलाविनोदसूत्रधारनार्तितस्य
भृगोरेतत्कर्मणि नापराधो वाच्य इति प्राञ्चः ॥ १३ ॥ ० ॥ * ॥ ० ॥ १४ ॥ तद्भृगूक्तम् । अथ श्रवणोत्तरम् । अतिरेक आधिक्यम् । अभयं भयनिवर्तकता ॥ * ॥
विष्णुं स्वमाहात्म्येन विश्वव्यापकम् । भूयांसं त्रिष्वप्यधीशेषु अतिशयेन महान्तं न तु महन्मात्रम् । तच्च युक्तमेवेति तेषां वाक्यमनुवदति—यत इत्यादिना तत्तीर्थसाधनत्वि
न्तेन । यतो हेतोरन्येषामपि भृगोरिव शांतिरक्षोभो भवति किमुत स्वस्यैव तस्येत्यर्थः । स्वल्पे प्रदीपादावेव क्षोभो दृश्यते न तु महति सूर्यादाविति, तेन महत्तमत्वमनुमितमिति भावः ।
अतः सापराधानामप्युपसन्नानां यतो भृगोरिव भयाभावोऽपि भवति ॥ १५ ॥ भगवच्छब्दार्थतां वर्णयंस्तत्राह—धर्म इति । साक्षात्पूर्णः । तदन्वितं ज्ञानान्वितम् । आद्यं यतमानाख्यम् । तत आद्यावाप्तेरनन्त
रम् । लवणादीत्यत्रादिना वृतादिग्रहः । द्वितीयं व्यतिरेकाख्यम् । तथा वृत्तावपि कस्यचिद्विषयत्यागे सत्यपि तृतीयमेकेन्द्रियाख्यम् । तत्रापि बाह्येन्द्रियविषयसेवनेऽपि । औदासीन्यमिच्छाराहित्यं चतुर्थं वशीकाराख्यम् ।
अत्रार्थे सांख्यवृद्धसंमतिमाह—तत्राहुरिति । तस्यापि हृदि रागमोक्षस्यापि । यस्माद्यस्य ॥ * ॥ तदेव महत्तमत्वस्य चिह्नमुक्तम् । हेतुमपि तथैव कैमुत्येन दर्शयंस्ततोऽप्राकृतमहासम्पत्तिमपि दर्शयति—धर्म इति त्रिभिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनीनां न्यस्तदंडानां शांतानां समचेतसाम् ॥ अकिंचनानां साधूनां यमाहुः परमां गतिम् ॥१७॥ सत्त्वं यस्य प्रिया मूर्तिर्ब्राह्मणास्त्विष्टदेवताः॥ भजंत्यनाशिषः शांता यं वा निपुणबुद्धयः ॥१८॥ विविधाकृतयस्तस्य राक्षसा असुराः सुराः ॥ गुणिन्या मायया सृष्टाः सत्त्वं तत्तीर्थसाधनम् ॥ १९ ॥ श्रीशुक उवाच ॥ एवं सारस्वता विप्रा नृणां संशयनुत्तये ॥ पुरुषस्य पदांभोजसेवया तद्गतिं गताः ॥ २० ॥

॥१७॥१८ ॥ तस्य भगवत एव यद्यपि त्रिविधा आकृतयः । तत्तास सत्त्वमेव तीर्थसाधनं पुरुषार्थहेतुः ॥ १९ ॥ इत्थं निश्चित्य सरस्वतीतीरवासिनो विप्रा हरिसेवया मुक्तिं प्रापुरिति ॥ २० ॥

साक्षाद्धर्मो भगवद्धर्मः श्रवणकीर्तनादिरूपः । यतः साक्षात्पदस्य सर्वैरप्यन्वयः । तेन साक्षाज्ज्ञानं श्रीभगवदनुभवस्तदन्वितम् “ चैष त्रिक एककालः’ ‘ भक्तिर्विरक्तिर्भगवत्प्रबोधः’ इत्येकादशोक्तरीत्या सप्रेमतदनुभवान्वितमेव ‘न तु शुष्कं चतुर्विधम्’ इति पाठस्तैर्व्याख्यातः । तत्र यतमानसंज्ञामिति । यतः संयतो मानः संमाननेच्छा यत्रेत्यर्थः । क्वचिदिति लवणादौ विरागो नाम व्यतिरेकसंज्ञं वैराग्यम् , इत्यन्वयः । एकेति एकानि एकमुखीकृतानीन्द्रियाणि यस्मिंस्तत् रागसौक्ष्म्यं रागस्याल्पतयाऽवसानमिति ज्ञेयम् । यद्वा—भक्त्येकरागतश्चतुर्वर्गत्यागेन चतुर्विधम् । ततश्चाष्टधाऽणिमादिभेदैश्वर्यमप्राकृतं तदप्रार्थितमपीति भावः । यथा तृतीये—‘“भक्तिरनिच्छतो गतिमण्वीं प्रयुंक्ते” इत्युक्त्वा श्रीकपिलदेवोऽप्याह—“अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तम् । श्रियं भागवतीं वाऽस्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते हि लोके” इति । यत इति मुहुर्निर्देशः शान्त्यादीनां तदेकनिष्ठतां बोधयति । यस्माच्चात्मनः सर्वेषां मनसो मलं चाञ्चल्यादिदोषं श्रवणादिनाऽपहन्ति दूरादेव नाशयतीति तथा तत् ॥ * ॥ **विश्वनाथोऽप**—तदन्वितमित्यस्य ज्ञानेऽप्यन्वयात् ‘ भक्तिः परेशानुभवो विरक्तिः ’ इति त्रिकस्य यौगपद्यमेकादशोक्तमिवात्रापि द्रष्टव्यम् ॥ १६ ॥ मुनीनामित्यादिना शमादिषट्कोपेतानामित्यर्थः ॥ * ॥ तदेवमैश्वर्यप्रदत्वेऽप्यनुपद्रवहेतुत्वान्मुनीनामित्यादि । प्रथमतो मननशीलानां ततो भगवच्चिन्तनार्थं परित्यक्तमहादोषात्मकभूतद्वेषाणां ततो भगवच्चित्ततया यदृच्छालाभतुष्टानां ततो भगवदेकस्पृहत्वेनान्यत्र स्वर्गापवर्गनरकेषु तुल्यदर्शिनामत एव भगवन्तं विनान्यत्र ममताशून्यानामत एव प्रोज्झितकैतवानामिति क्रमेणार्थः ॥ * ॥ **विश्वनाथस्तु**—मुनिशान्तसाधुशब्दैरेकैकविशेषणयुक्तैर्मुमुक्षुमुक्तभक्ता उक्ता इत्याह ॥ १७ ॥ तुरवधारणे । यं विष्णुम् । अनाशिष इति यस्येत्यस्य विशेषणम् ब्राह्मणानां वा ॥ * ॥ एवमप्राकृत शुद्धसत्त्वात्मकवैभवत्वेऽपि, प्राकृतसत्त्वे यस्यानुग्रहदृष्टिरिति तत्रैव गुणाविशेषं दर्शयति मूर्तीरिव मूर्तिरधिष्ठानम् । प्रिया कृपादृष्टियोग्या । तन्मयेष्वपि विशेषतो ब्राह्मणा इष्टदेवतावदाराध्यमानाः तादृशगुणा कृष्टत्वादेव यं च निपुणबुद्धयः सत्संगशोधितचित्ताः यद्यप्यनाशिषः शान्ताः सर्वत्र रागद्वेषरहिताः । वा चार्थे एवार्थे वा ॥ १८ ॥ तस्य विष्णोः । यद्वा—तीर्थस्य हरेः साधनं प्राप्त्युपायम् ॥ * ॥ सत्त्वं प्रियामूर्तिरित्युक्तं तत्रान्या वा का मूर्तय इत्यपेक्षायां विविच्याह—त्रिविधा इति । तत्र राक्षसास्तामस्योऽसुरा राजस्यः सुराः सात्त्विक्यः । तत्तदुपलक्षणत्वेनान्येऽपि तत्तद्रूपा ज्ञेयाः । ननु, मायानासक्तस्य तस्य मायिकसत्त्वगुणे कथं रतिस्तत्राह—सत्त्वं खलु तस्य भगवतो यत्तीर्थमागमस्तद्भक्तिप्रतिपादकं शास्त्रं तस्य साधनमवगमद्वारभूतं भवति परम्परया तद्भक्तिसम्बन्धादेवेति भावः ॥ * ॥ **विश्वनाथस्तु**—जगत्पालकस्य कृपालोस्तस्य जीवहितदृष्ट्यैव सत्त्वं प्रियवद्भासमानत्वात्प्रियं न तु वस्तुत इति गुणेष्वौदासीन्यमेव ॥ १९ ॥ सारस्वताः सरस्वतीतीरवासिनः ॥ * ॥ नृणां संशयनुत्तये इत्थं निश्चित्येति शेषः । तदेवं शास्त्रद्वारा तु ते स्वयं निश्चितवन्त एवेति गम्यते । तद्गतिं गतास्तमुपलब्धवन्तः । यद्वा—तत्रान्येषां नृणां त्रिदेव्यां महत्त्वसंशयस्य नुत्तये जातमिति भावः ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ इत्येतन्मुनितनयास्यपद्मगंधपीयूषं भवभयभित्परस्य पुंसः ॥ सुश्लोक्यं श्रवणपुटैः पिबत्यभीक्ष्णं पांथोऽध्वभ्रमणपरिश्रमं जहाति॥२१॥

व्यासनंदनस्य मुखपंकजादुद्गतं गंधयुक्तपीयूषतुल्यं हरेः प्रशस्तं यशो यः संसारी सेवते स मुक्तो भवतीति ॥ २१ ॥

इत्येतत् पूर्वोक्तरीत्या वर्णितं विष्णुमहत्त्वोपाख्यानम् । गन्धपीयूषं सुगन्धिवन्मनोहरम् पीयूषवत्स्वादु भवभयं भिनत्तीति तथा । सुश्लोकैराकलितं सुश्लोक्यमाख्यानं यशो वा । अभीक्ष्णं पौनःपुन्येन । पथि संसार मार्गे वर्तमानः पान्थः 'पथि–गतौ' अतोऽच् पुनः स्वार्थिकोऽण् । अध्वभ्रमणपरिश्रमम् इदं श्रेयोऽदो वेति भ्रमणेनेतस्ततः पर्यटनेन प्राप्तं परिश्रमम् ॥ * ॥ तदेतच्छास्त्रविदामपि महासंशयापनोदनं श्रीगुरुचरणोपदेशं परमसन्तुष्टः श्लाघते तेनान्यानप्यतीव श्रद्धापयति–इतीति । पूर्वप्रकारकमेतत्पूर्वोक्तम् । मुनितनयेति साक्षादुभयनामाग्रहणं भक्त्युद्रेकात् "आत्मनाम गुरोर्नाम नामातिकृपणस्य च । श्रेय स्कामो न गृह्णीयाज्ज्येष्ठपुत्रकलत्रयोः ॥" इति निषेधाच्छ्रेयस्काम्यया वा । तदास्यपद्मस्य गन्धः सौरभ्यमित्यनुभवनीय आमोदविशेषो यत्र तादृशं पीयूषतुल्यञ्च तदेतत्स्वतः पुरुषार्थत्वं तत आनुषंगिकतया जरामरणाद्यात्मिकभवभयच्छेदकं च । सुश्लोकामिति । समृद्ध्यर्थेऽव्ययीभावः । सुशोभनः श्लोकः कीर्तिर्यत्र तदेतच्चरितं वा । श्रवणपुटैरिति तद्बहुत्वं तच्छ्रवणाय बहुलीकृतत्वादिव । पान्थः संसारपथिकः । अध्वपरिश्रमं जहाति तदानन्देन प्राचीनदुःखविस्मृतेः ततः परं श्रवणाभावाच्चेति । तदेवं श्रीभागवतेन श्रीविष्णोरेव सर्वोत्कर्षे स्पष्टे शास्त्रान्तरेषु श्रीविष्णुशिवयोर्भेदमनने दोषो यः श्रूयते सोऽनैकान्तिकवैष्णव विषय एव । वैष्णवशास्त्रे हि तद्विपरीतं श्रूयते । यथा पाद्मादौ–" यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः । समत्वेनैव जानाति स पारंकी भवेद्ध्रुवम् ॥" इत्यादि । तथा च विष्णुधर्मोत्तरान्ते लिंगस्फोटनन्नृसिंहोपाख्यानम्–विष्वक्सेननामा विप्रः कश्चिदेकान्तिविष्णुभक्त आसीत्तस्य पृथ्वीं भ्रमतो दैवात्केनचिद्ग्रामाध्यक्षपुत्रेण मेलनमभूत् तयोः संकथा चेयम्–"देवकर्मण्यशक्तिर्मे त्वतः पूजय शंकरम् । देवतायतनं गत्वा यत्र तात प्रतिष्ठितम् ॥ लिंगमस्ति सुरेशस्य महादेवस्य निर्मलम् । एवमुक्तः प्रत्युवाच वयमेकान्तिनः श्रुताः ॥ चतुरात्मा हरिः पूज्यः प्रादुर्भावगतोऽथवा । पूजयामश्च नैवान्यं तस्मात्त्वं गच्छ मा चिरम् ॥" इत्यादिका । ततो ग्रामाध्यक्षपुत्रे तस्य विष्वक्सेनस्य शिरश्छेत्तुमुद्यते तद्धस्तेन मृत्युमनभीप्सन्स इदं विचारयामास, भवतु तत्रैव गच्छाम इति । ततो लिंगसमीपं गत्वा तस्मिन्नधिष्ठाने नृसिंहाय नम इति पुष्पाञ्जलौ विक्षिप्ते तच्छ्रुत्वा पुनः शिरश्छेत्तुमुद्यते तल्लिंगं स्फोटयित्वा निर्गतेन श्रीनृसिंहेन सपरिवारस्य ग्रामाध्यक्षपुत्रस्य शिरांसि छिन्नानीति । तदेतदुक्तं स्कान्दे श्रीशिवेन–" शिवशास्त्रेषु तद्ग्राह्यं भगवच्छास्त्रयोगि यत् " इति । श्रीहरिवंशेऽपि–" हरिरेव सदाराध्यो भवद्भिः सत्त्वसंश्रयैः । विष्णुमन्त्रान्सदा विप्राः पठध्वं ध्यात केशवम् ॥" इति । यत्तु श्रीभागवतमेव–" त्रयाणामेकभावानां यो न पश्यति वै भिदाम् । सर्वभूतात्मनां ब्रह्मन्स शान्तिमधिगच्छति ॥" इत्यादि, तत्खलु विष्णोः सकाशादन्यास्वातन्त्र्यापेक्षयैव । तदुक्तं श्रीब्रह्मणा–" सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥" इति । अत्रैवोक्तं श्रीसंकर्षणेन–' ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः ' इति । " यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्धनि कृतेन शिवः शिवोऽभूत् " इति । एतदभिप्रेत्यैवोक्तं पाद्मेऽपि–" शिवस्य श्रीविष्णोर्य इह गुणनामादिसकलं धियाभिन्नं पश्येत्स खलु हरिनामाहितकरः ॥" इति । तत्र श्रीविष्णुनेति तृतीयाया अनिर्देशादत्रैव श्रीशब्ददानाच्च श्रीमतः सर्वशक्तियुताद्विष्णोः सर्वव्यापकत्वेन तन्नाम्न स्तस्माद्यः शिवस्य गुणनामादि सकलं धिया भिन्नं स्वतन्त्रं पश्येदित्यर्थः । अतो मार्कण्डेयं प्रति श्रीशिवस्य वाक्यं चेदमेव–" न ते मय्यच्युते ये च भिदामण्वपि चक्षते । नात्मनश्च जनस्यापि तद्युष्मान्वय मीमहि ॥" इति । तत्तेभ्योऽपि सर्वसमदृष्टिभ्यो वयं युष्मानेव ईमहि प्रियत्वेन जानीम इति । " अथ भागवता यूयं प्रियाः स्थ भगवान्यथा । न मे भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥" इति चतुर्थे तस्यैवोक्तेः । अत एवापि तत्पूर्वे " नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत । भक्तिं परां भगवति लब्धवान्पुरुषेऽव्यये ॥ " इति श्रीशिवोक्तमहिमभक्त्या भगवति समाधिस्थस्य देव्यै महिमप्रदर्शनार्थं हृदि छलेन स्वयं शिवे प्रविष्टे विरतिर्जाता । यथोक्तम्–" किमिदं कुत एवेति समाधेर्विरतो मुनिः " इति । तच्चान्यथा न सम्भवतीति । अतः श्रीविष्णोरेव सर्वोत्कर्षे सिद्धे श्रीविष्वक्सेनमार्कण्डेयादिवत्तदीयत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ एकदा द्वारवत्यां तु विप्रपत्न्याः कुमारकः ॥ जातमात्रो भुवं स्पृष्ट्वा ममार किल भारत ॥ २२ ॥ विप्रो गृहीत्वा मृतकं राजद्वार्युपधाय सः ॥ इदं प्रोवाच विलपन्नातुरो दीनमानसः ॥ २३ ॥ ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः ॥ क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोऽर्भकः ॥ २४ ॥ हिंसाविहारं नृपतिं दुःशीलमजितेंद्रियम् ॥ प्रजा भजंत्यः सीदंति दरिद्रा नित्यदुःखिताः ॥ २५ ॥ एवं द्वितीयं विप्रर्षिस्तृतीयं त्वेवमेव च ॥ विसृज्य स नृपद्वारि तां गाथां समगायत ॥ २६ ॥ तामर्जुन उपश्रुत्य कर्हिचित्केशवांतिके ॥ परेते नवम बाले ब्राह्मणं समभाषत ॥ २७ ॥ किंस्विद्ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः ॥ राजन्यबंधुरेते वै ब्राह्मणाः सत्रमासते ॥ २८ ॥

स चोक्तलक्षणो भगवान् कृष्ण एवेति दर्शयितुमाख्यानांतरमाह । एकदेति ॥२२॥२३॥२४ ॥ २५ ॥ ब्रह्मद्विष इत्यादिकां तां गाथां वाक्यम् । मयि न कश्चिद्दोषोऽतो राजदोषेणैव मत्पुत्रा म्रियंत इति वारंवारं चुक्रोशेत्यर्थः ॥२६॥२७॥ ब्रह्मन् किंस्विदिति । किमर्थं वृथा रोदिषि । यतस्त्वन्निवासे धनुर्धरमात्रोऽपि राजन्यबंधुरपि नास्ति ब्रह्मण्यस्य तु का वार्ता एते तु सत्रे याग इव ब्राह्मणा मिलिता भवितुमर्हंतीत्यर्थः ॥ २८ ॥

नैव वैष्णवैः स आदरणीयः ‘ वैष्णवानां यथा शंभुः ’ इति द्वादशान्तवचनात्परमवैष्णवत्वेन तु सुतराम् । यत एवोक्तमादिवाराहे–“ जन्मान्तरशतेनाऽपि समाराध्य वृषध्वजम् । वैष्णवत्वं लभेद्धीमान्सर्वपापक्षये सति ॥ ” इति । निन्दादिकं तु सर्वथा परिहर्तव्यम् “ यो मां समर्चयेन्नित्यमेकान्तं भावमाश्रितः । विनिन्दन्देवमीशानं स याति नरकं ध्रुवम् ॥ ” इत्यादिश्रीभगवद्वाक्यादिभ्यः । अत्र श्रुतयः–“ यं कामये तमुग्रं कृणोमि तं ब्रह्माणं तं सुमेधाम् ॥ मम योनिरप्स्वन्तः समुद्रे ”इति महाशक्तिवचने । “मध्येवामनमीशानं विश्वेदेवा उपासते” इति तैत्तिरीयोपनिषदि । “रुद्रजापकशतमेकमथर्वाङ्गिरसशिखाध्यापकेन तत्सममथर्वाङ्गिरसशिखाध्यापकशतमेकं मंत्रराजाध्यापकेन तत्समम्” इति श्रीनृसिंहतापन्याम्।तदेतच्छ्रीभागवतसंदर्भपरमात्मभक्तिसंदर्भयोर्विस्तृतमस्तीत्यलमतिविस्तरेण॥२१॥स च भृगुपरीक्षित उक्तलक्षणो नित्यधर्मज्ञानादिरूपः श्रीकृष्ण एवेत्याह–एकदा श्रीकृष्णस्य यज्ञकाले ॥*॥ इत्थमुक्तः श्रीविष्णोरुत्कर्षः स्वयं भगवति श्रीकृष्ण एव पर्यवस्यतीत्याशयेन साक्षात्तन्माहात्म्यमेव विशेषतो निरूपयितुं प्रसंगान्तरमारभते–एकदेति।तुशब्दः पूर्वोक्ताविशेषापेक्षया।किल प्रसिद्धौ प्रसिद्धमेवैतादित्यर्थः । हे भारतेति । यथा नष्टो भरतवंशस्त्वज्जीवनेन भगवतोद्धृतस्तथास्य विप्रस्य वंशमप्येतत्पुत्रजीवनेनोद्धरिष्यतीति भावः । यद्वा–भरतवंशयशोवृद्ध्यर्थमेव भगवता तदा जीवित इति भावः ॥ २२ ॥ इदं वक्ष्यमाणम् ॥ * ॥ यस्य सा पत्नी स विप्रः राज्ञ उग्रसेनस्य द्वारि प्रोवाच सकाकु चुक्रोशेत्यर्थः ॥ २३ ॥ ब्रह्मद्विषः वेदविष्णुविप्रविरोद्धुः । शठधियो वञ्चनापरस्य ॥ * ॥ ब्रह्म वेदो ब्राह्मणजातिर्वा तद्द्वेष्टीति तथा तस्य । ब्राह्मणमरणेऽप्यौदासीन्यादिति भावः । यतः शठा धर्मरहिता धीर्यस्य तस्य । तत्र हेतुर्विषयेष्वात्मा बुद्धिर्यस्य । तत्रापि हेतुः क्षत्रबन्धोरिति क्षत्रियाधमस्य ॥ २४ ॥ दुःशीलं धर्मद्वेष्टारम् । सीदन्ति क्लिश्यन्ति ॥ * ॥ राजदोषेण स्वबालमरणे शास्त्रं प्रमाणयति–हिंसेति । हिंसाविहारे हेतुः–दुःशीलं दुष्टस्वभावम् । तत्र च हेतुः–अजितेन्द्रियम् । सीदन्ति विषण्णा भवन्ति ॥ २५ ॥ इत्यर्थ इति–अधर्मवर्तिनां राज्ञां विषये कुतः प्रजानां सुखमिति भावः ॥ * ॥ विप्रर्षिरिति । तस्य स्वतो दोषेऽभावे आदरणीये च योग्यता दर्शितेति ॥ २६ ॥ परेते मृते ॥ * ॥ केशवान्तिक इति पार्थस्याधार्ष्ट्यबोधनार्थम् । केशौ जगत्स्रष्टृसंहर्तारावपि यस्य वशे तस्य तद्रक्षणं किं दुर्घटमित्यविचारात् ॥ २७ ॥ एते यदवस्तु । इत्यर्थ इति–यागे यथा भोजनाद्यर्थमितस्ततो ब्राह्मणा आगत्य तिष्ठन्ति एवं यादवा अपि विषयसुखलम्पटत्वारक्षणाद्ब्राह्मण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः ॥ ते वै राजन्यवेषेण नटा जीवंत्यसुंभराः ॥ २९ ॥ अहं प्रजां वां भगवन्रक्षिष्ये दीनयोरिह ॥ अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः ॥ ३० ॥ ब्राह्मण उवाच ॥ संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः ॥ अनिरुद्धोऽप्रतिरथो न त्रातुं शक्नुवंति यत् ॥ ३१ ॥ तत्कथं नु भवाकर्म दुष्करं जगदीश्वरैः ॥ चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयम् ॥ ३२ ॥ अर्जुन उवाच ॥ नाहं संकर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च ॥ अहं वा अर्जुनो नाम गांडीवं यस्य वै धनुः ॥ ३३ ॥ माऽऽवमंस्था मम ब्रह्मन्वीर्यं त्र्यंबकतोषणम् ॥ मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ॥ ३४ ॥ एवं विश्रंभितो विप्र फाल्गुनेन परंतप ॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ॥ ३५ ॥ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः ॥ पाहिपाहि प्रजां मृत्योरित्याहार्जुनमातुरः ॥ ३६ ॥

तदेवाह । धनदारात्मजापृक्ता यत्रेति । धनादिभिर्वियुक्ताः संतो यत्र येषु जीवत्सु राजन्येषु शोचंति ते जीवंति केवलं जीविकां संपादयंति ॥ २९ ॥ हतकल्मष इति । अग्निप्रवेशेन ब्राह्मणविलापश्रवणपातकात्पूतो भवेयमित्यर्थः । अहतकल्मष इति वा ॥ ३० ॥ ३१ ॥ न श्रद्दध्महे न संप्रतीमः ॥ ३२ ॥ ३३ ॥ ३४ ॥ एवं प्रौढिवादैर्विश्रंभितो विश्वासं प्रापितः । निशामयन् शृण्वन् ॥ ३५ ॥ ३६ ॥

दिकं नानुसन्दधत् इति भावः ॥ * ॥ ब्रह्मन्निति सगौरवसम्बोधनं तत्सान्त्वनार्थं विश्वासार्थं तत्रत्यानां तदुपेक्षादोषव्यञ्जनार्थं च । वै उत्प्रेक्षायाम् ॥ २८ ॥ तदेव ब्राह्मणारक्षणमेव । येषु क्षत्रियेषु । ते क्षत्रियविडम्बना एव नटा इव प्राणादिधारणार्थं शस्त्रादि बिभ्रतीत्यर्थः ॥ * ॥ परमनीचत्वेनैव वितर्क्या इत्याह–धनेति ॥ २९ ॥ इह द्वारकायाम् । वां युवयोः स्त्रीपुंसयोः । इत्यर्थ इति–ब्राह्मणदुःखं समर्थेनापाकार्यमन्यथा पातकी स्यादिति भावः । अहतकल्मषश्चेत्तर्हि मिथ्याप्रतिज्ञत्वादग्निं प्रवेक्ष्य इत्यर्थः ॥ * ॥ वां युवयोरिति महाशोकेन ब्राह्मण्यात् अपि तत्रागमनात् । प्रतिज्ञाभङ्गदोषरहितः स्यामित्याह–हतकल्मष इति ॥ ३० ॥ ॥ ० ॥ * ॥ सङ्कर्षेति युग्मकम् । तत्र सङ्कर्षणादिचतुर्णां नामव्युत्पत्त्यैव स्पष्टमहिमतया साम्येऽपि उत्तरयोर्विशेषणदानेन सामान्यमभिप्रैति । यत् मदपत्यरक्षणरूपं कर्म । त्रातुं निर्विघ्नीकर्तुं न शक्नुवन्ति ॥ नो सहन्ते ॥ ३१ ॥ बालिश्यान्मौर्ख्यात् । ' बालिशो बालमूर्खयोः ' इति हलधरः ॥ * ॥ ० ॥ ३२ ॥ ० ॥ * ॥ सङ्कर्षण इति गर्भसङ्कर्षणस्य । कृष्णश्चेति सुश्यामत्वमात्रस्याभिप्रायेण । नञः पुनः प्रयोगो निषेधदार्ढ्याय । कार्ष्णिरेव प्रद्युम्नोऽपि । अत्यन्तावज्ञयानिरुद्धस्य नामापि न प्रस्तुतम् ॥ ३३ ॥ मृत्युं यमराजम् । प्रधने युद्धे ॥ * ॥ त्र्यम्बकस्य किरातच्छन्नवेषस्य तोषणं तत्तुल्यतया प्रीतिकरं तथा भारताख्यानात् । अथ विप्राश्वासनार्थं प्रतिजानीते–मृत्युमिति । प्रधने रणे विशेषेण मारणादिनापि जित्वा प्रजाः सर्वानपि न केवलमेतामेव । प्रजामिति पाठो बहुत्र । श्रीमदर्जुनस्यापि ईदृशी गर्वोक्तिर्ब्रह्मण्यदेवस्य विप्रोपेक्षया सख्येन क्रोधभवमनोदुःखविशेषोत्पत्तेः तेन तदुपेक्षा च ' विप्रात्मजा मे युवयोर्दिदृक्षुणा ' इति श्रीमहाकालपुराधिपवक्ष्यमाणानुसारेण तदुत्कण्ठाप्रतिपालनाय न तव भयमपि समञ्जसम् ॥ ३४ ॥ एवमुक्तरीत्या । प्रौढिवादैः साहङ्कारवाक्यैः ॥ * ॥ ० ॥ ३५ ॥ ० ॥ * ॥ हे परन्तपेति । हे शत्रुनाशन त्वदेतादृशत्वकरणस्य त्वत्पितामहस्योक्तौ वीर्ये वा विप्रस्य विश्वासो युक्त एवेति भावः । प्रसूतिकाल इत्यनेन तदर्थं द्वारकायामर्जुनस्यैकाब्दं वासो ज्ञेयः । स्वपुराद्वा गर्भपूर्तिं ज्ञात्वा पुनरागतः । आतुरो भयपीडितः सन्नाह–भार्यावचनादानयार्जुनमिति । रात्रावर्जुनान्तिकमागत्येति शेषः । एवमग्रेऽपि तद्विप्रगृहं गतः सन्निति शेषः । तथा च हरिवंशेऽर्जुनवाक्ये–" गतेऽर्धरात्रसमये ब्राह्मणो भयविह्वलः । उपागम्य भयादस्मानिदं वचनमब्रवीत् ॥ " इत्यादि । " मुहूर्तेन वयं ग्रामं तं प्राप्य भरतर्षभ । विश्रान्तवाहनाः सर्वे निवासायोपसंस्थिताः ॥ "

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स उपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरम् ॥ दिव्यान्यस्त्राणि संस्मृत्य सज्यं गांडीवमाददे ॥ ३७ ॥ न्यरुणत्सूतिकागारं शरैर्नानास्त्रयोजितैः ॥ तिर्यगूर्ध्वमधः पार्थश्चकार शरपंजरम् ॥ ३८ ॥ ततः कुमारः संजातो विप्रपत्न्या रुदन्मुहुः ॥ सद्योऽदर्शनमापेदे सशरीरो विहायसा ॥ ३९ ॥ तदाह विप्रो विजयं विनिंदन्कृष्णसंनिधौ ॥ मौढ्यं पश्यत मे योऽहं श्रद्दधे क्लीबकत्थनम् ॥ ४० ॥ न प्रद्युम्नो नानिरुद्धो न रामो न च केशवः ॥ यस्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ॥ ४१ ॥ धिगर्जुनं मृषावादं धिगात्मश्लाघिनो धनुः ॥ दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥४२ ॥ एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः ॥ ययौ संयमिनीमाशु यत्रास्ते भगवान्यमः ॥ ४३ ॥ विप्रापत्यमचक्षाणस्तत ऐंद्रीमगात्पुरीम् ॥ आग्नेयीं नैर्ऋतीं सौम्यां वायव्यां वारुणीमथ ॥ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥ ४४ ॥ ततोऽलब्धद्विजसुतो ह्यनिस्तीर्णप्रतिश्रुतः ॥ अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ॥ ४५ ॥

ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरं नमस्कृत्य ॥ ३७ ॥ न्यरुणदावृतवान् । तदेवाह । तिर्यगूर्ध्वमिति ॥ ३८ ॥ अदर्शनमापेदे देहोऽपि नावशिष्ट इत्यर्थः ॥ ३९ ॥ ४० ॥ यस्य प्रजाः तत्तत्र ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥ प्रत्युक्तो वारितः । उपपत्तिभिः प्रतिषेधं कुर्वता ॥ ४५ ॥

इति च ॥ ३६ ॥ सोऽर्जुनः । दिव्यानि देवेभ्यो लब्धानि ॥ * ॥ सोऽर्जुनः । महेश्वरं न तु कृष्णं तत्र सख्यादेव ब्राह्मणोपेक्षकत्वेन दोषदर्शनात् । परन्तु भगवदवज्ञया शिवभजनमकिञ्चित्करमिति द्योतितम् ॥ ३७ ॥ ० ॥ * ॥ नानास्त्रैर्ब्रह्मास्त्रादिविधानेन योजितैः प्रयुक्तैः ॥ ३८ ॥ ततः शरपञ्जरकरणानन्तरम् । इत्यर्थ इति– " हठाद्यत्क्रियते कर्म तन्न सिद्ध्यति कर्हिचित् " इत्युक्तेश्वरावज्ञया प्रवृत्तत्वा दतीव वैषम्यं जातमिति भावः ॥ * ॥ विहायसाऽऽकाशमार्गेणादर्शनमापेदे । तदुक्तं तत्रैव–" अथाकाशे पुनर्वाचमश्रौषं बालकस्य वै । हं हेति क्रियमाणस्य न चापश्याम राक्षसम् ॥ " इति । कृष्णेच्छया विना दिव्यास्त्राणि स महेश्वरश्च बालकस्य शरीरमपि रक्षितुं नाशक्नुवन्निति भावः ॥ ३९ ॥ तदा बालशरीरदर्शनाभावकाले ॥ * ॥ तदा ततः । विजयमिति । सर्वविजयशीलस्य निन्दा त्वतिदुःसहेति भावः । कृष्ण सन्निधाविति । स्वगृहान्तिके रहसि तन्निन्दने रसालाभादिति भावः ॥ ४० ॥ यस्य मम प्रजा इति शेषः ॥ * ॥ यस्य यम् । तत्तस्मादन्यः क ईश्वरोऽस्ति तेषां चतुर्णामेकात्मकत्वाद्द्वितीयेश्वराभावादन्यो नास्ती त्यर्थः ॥ ४१ ॥ दैवेनोपसृष्टं नाशितम् । आनिनीषत्यानेतुमिच्छति ॥ * ॥ दैवेन प्रारब्धकर्मणा ईश्वरेच्छया वा । उपसृष्टं हतम् । न केवलं मूर्ख एव दुर्मतिर्दुष्टबुद्धिरपीत्यर्थः । नाहं सङ्कर्षण इत्याद्युक्तेः ॥ ४२ ॥ शपति आक्रोशति सति । संयमनीं यमपुरीम् । विद्यां मनुष्यागम्यगमनसामर्थ्यकरीम् ॥ * ॥ भगवान् भूतानां प्रवृत्तिनिवृत्त्यादिवेत्ता तद्बालकनयनेऽतियोग्य इत्यर्थः । अत आदौ तत्रैव गमनमिति भावः ॥ ४३ ॥ ततो यमपुरान्वेषणोत्तरम् । अन्यानि धिष्ण्यानि यक्षकिंपुरुषादिस्थानानि ॥ * ॥ विप्रेति सार्द्धकम् । अचक्षाणः अपश्यन् । विद्याबलादेवावगतस्य तस्य तद्रूपस्यादृष्टेः । सौम्यामुत्तरदिग्वर्तिनीं सोमपुरीम् । वारुण वायव्यपुरीद्वयातिक्रमेण तस्यां गमनं सर्वद्रष्टुः सर्वदेशभ्रमणशीलस्य तस्य निजादिपुरुषस्य पृष्टेच्छया । ततश्च मया न दृष्टं तथाप्यन्विष्यतामित्युक्तः । पश्चाच्चोत्क्रमेण । वायव्यां वारुणीमपि । ऐशान्यामगमनञ्च स्वगु रुणा शिवेन तन्नयनारम्भवात् । धिष्ण्यानि ब्रह्मादिस्थानानि । उदायुधो युद्धोत्साहेनोद्यतास्त्रशस्त्र इत्यस्य पूर्वैरप्यन्वयः ॥ ४४ ॥ ततः सर्वत्र गमनोत्तरम् । न लब्धो द्विजसुतो येन स तथा । न निस्तीर्णं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दर्शये द्विजसूनूंस्ते मावज्ञात्मानमात्मना ॥ ये ते नः कीर्तिं विमलां मनुष्याः स्थापयिष्यंति ॥४६॥ इति संभाष्य भगवानर्जुनेन सहेश्वरः ॥ दिव्यं स्वरथमास्थाय प्रतीचीं दिशमाविशत् ॥ ४७ ॥ सप्त द्वीपान्सप्त सिंधून्सप्तसप्त गिरीनथ ॥ लोकालोकं तथाऽतीत्य विवेश सुमहत्तमः ॥ ४८ ॥ तत्राश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ तमसि भ्रष्टगतयो बभूवुर्भरतर्षभ ॥४९॥ तान्दृष्ट्वा भगवान्कृष्णो महायोगेश्वरेश्वरः ॥ सहस्रादित्यसंकाशं स्वचक्रं प्राहिणोत्पुरः ॥ ५० ॥ तमः सुघोरं गहनं कृतं महद्विदारयद्भूरितरेण रोचिषा ॥ मनोजवं निर्विविशे सुदर्शनं गुणच्युतो रामशरो यथा चमूः ॥ ५१ ॥ द्वारेण चक्रानुपथेन तत्तमःपरं परं ज्योतिरनंतपारम् ॥ समश्नुवानं प्रसमीक्ष्य फाल्गुनः प्रताडिताक्षोऽपिदधेऽक्षिणी उभे ॥ ॥ ५२ ॥ ततः प्रविष्टः सलिलं नभस्वता बलीयसैजद्बृहदूर्मिभूषणम् ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशोभितम् ॥ ५३ ॥

मावज्ञ माऽवजानीहि। ये निंदंति त एव मनुष्या नः कीर्तिं स्थापयिष्यंति निश्चलां करिष्यंति । पाठांतरं तु छन्दोभंगभयादागंतुकमिति ॥ ४६॥४७॥ सप्तसप्तसंख्या गिरयो येषु द्वीपेषु तान् ॥ ४८ ॥ ४९ ॥ ५० ॥ कृतमिति प्रकृतिपरिणामरूपं नालोकाभावमात्रम् ॥ ५१ ॥ चक्रानुपथेन चक्रमनुगतेन द्वारेण । तत्तमःपरं तस्मात्तमसः परं दूरे वर्तमानं परं श्रेष्ठं भागवतं ज्योतिः समश्नुवानं व्याप्नुवत्प्रसमीक्ष्य प्रताडिताक्षो नेत्रे न्यमीलयदिति ॥ ५२ ॥ एजंत उच्चलंतो बृहंतो महांत ऊर्मयो भूषणं यस्य तत् । तत्र सलिले भवनं महाकालपुरम् । द्युमत्तमं द्युतिमत्सु श्रेष्ठम् ॥ ५३ ॥

प्रतिश्रुतं ब्राह्मणाऽपत्यानयनलक्षणं येन स तथा ॥ * ॥ ततस्तेष्वलब्धद्विजपुत्रः सन् । हि निश्चितम् । प्रत्युक्तस्तन्मुमूर्षाप्रातिकूल्येन मा विशाऽग्निं प्राप्स्यसि द्विजापत्यामित्येवंरूपेणोक्तः ॥ ४५ ॥ ते तुभ्यम् । आत्मना स्वयमात्मानम् । पाठान्तरं तु स्थापयिष्यन्तीति पाठस्तु आगन्तुकम् आयास्यत्येव । स्थापयिष्यन्तीति बहुत्वं तु अन्वययोजनायां वाच्यमेवेत्यर्थः । " कीर्तिं त एते विपुलां स्थापयिष्यन्ति मानवाः " इति पाठस्तु सुगम एव । यद्वा–स्थापयिष्यतीत्येकत्वमार्षम् ॥ * ॥ ० ॥ ४६ ॥ इति इत्थम् ॥ * ॥ ० ॥ ४७ ॥ तथा सप्तद्वीपलंघनरीत्या । अथ लोकालोकलंघनोत्तरम् ॥ * ॥ ० ॥ ४८ ॥ तत्र तमसि ॥ * ॥ ० ॥ ४९ ॥ तानश्वान्भ्रष्टगतीन् ॥ * ॥ ० ॥ ५० ॥ गुणाज्ज्यायाश्च्युतम् । आलोकाभावमात्रं तम इत्येवं वदन्तस्तार्किकाः कृतमित्युक्त्या परास्ताः ॥ * ॥ गहनं निबिडं महत् विततं च यथा स्यात्तथा कृतं परमेश्वरेणैव सम्पादितं तमो भूमिगतमित्यर्थः । तदुक्तं हरिवंशे–" पञ्चभूतं हि तिमिरं स्पर्शाद्विज्ञायते न तु " इत्यादि ॥५१॥ अनन्तपारमन्तपाररहितम् ॥ * ॥ चक्रानुपथेन द्वारेण चक्रेणैव तदा सप्तावरणभेदो ज्ञेयः । यत् तदनन्तरं गच्छन् फाल्गुनः तमसः प्रकृतेः परं प्रकृत्यावरणादष्टमात्परं पारभूतं तद्वेदान्तादिप्रसिद्धं परं ब्रह्मभूतं भागवतं ज्योतिः प्रसमीक्ष्य चिच्छक्तिमयतया साक्षाच्चक्षुषा दृष्ट्वा तेन प्रताडिताक्षः चकितेक्षणः नेत्रे न्यमीलयत् । परत्वमाह–अनन्तेति । तत्रैव हेतुः–समश्नुवानं सदा सर्वव्यापकम् । तत्र पुनर्मायावृतदृष्टित्वादेवादर्शनमभूदिति । तथा हरिवंशेऽर्जुनवाक्यम्–"ततस्तेजः प्रज्वलितमपश्यं तत्तदम्बरे । सर्वलोकं समाविश्य स्थितं पुरुषम्" इत्यादि।तच्चरितसमाप्तौ श्रीकृष्णोपदेशश्च–"ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि । अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् ॥ प्रकृतिः सा मम परा व्यक्ताव्यक्ता सनातनी । तां प्रविश्य भवन्तीह मुक्ता योगविदुत्तमाः ॥ सा सांख्यानां गतिः पार्थ योगिनां च तपस्विनाम् । तत्परं परमं ब्रह्म सर्वं विभजते जगत् ॥ ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ।" इति । अत्र मत्तेज इति तद्ब्रह्म मत्तेजोऽपि । अहं स इति सोऽहमेवेति तेजस्तेजस्विनोरभेदात् । प्रकृतिः सा मम परेति । तच्चिन्मयं ब्रह्म ममैव स्वरूपशक्तिः । परेति मायातीतत्वात् । व्यक्ता चिन्मयनेत्रग्राह्यत्वात्, अन्यथाऽव्यक्तेत्यर्थः । ममैवेत्येवकारस्तन्मध्यस्थेनाष्टभुजेन स्वाभेदापेक्षयेति ज्ञेयम् ॥ ५२ ॥ ततो ज्योतिषो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्धन्यफणामणिद्युभिः ॥ विभ्राजमानं द्विगुणोल्बणेक्षणं सिताचलाभं शितिकंठजिह्वम् ॥५४॥ ददर्श तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमोत्तमम् ॥ सांद्रांबुदाभं सुपिशंगवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणम् ॥ ५५॥ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलम् ॥ प्रलंबचार्वष्टभुजं सकौस्तुभं श्रीवत्सलक्ष्म्या वनमालया वृतम् ॥ ५६ ॥ सुनंदनंदप्रमुखैः स्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥ पुष्ट्या श्रिया कीर्त्यजयाऽखिलर्द्धिभिर्निषेव्यमाणं परमेष्ठिनां पतिम् ॥ ५७ ॥ ववंद आत्मानमनंतमच्युतो जिष्णुश्च तद्दर्शनमात्तसाध्वसः ॥ तावाह भूमा परमेष्ठिनां प्रभुर्बद्धांजलि सस्मितमूर्जया गिरा ॥ ५८ ॥

सहस्रं मूर्ध्नि भवाः फणास्तासु मणयस्तेषां द्युतिभिः । द्विसहस्रनेत्रैरूर्जितं स्फटिकगिरिसंकाशम् । शितिकंठजिह्वं कंठाश्च जिह्वाश्च कंठजिह्वाः शितयो नीलाः कंठजिह्वा यस्य तम् ॥५४॥ तद्भोगसुखासनं तस्यानंतस्य भोगो देहः सुखकरमासनं यस्य तम् ॥५५॥ महांतो मणिव्राता येषु तेषां किरीटकुंडलानां प्रभा तया परिक्षिप्ताः सर्वतः स्फुरंतःसहस्रमपरिमिताः कुंतला यस्य तम् ॥ ५६ ॥ कीर्त्यजया कीर्तिसहितया अजया । अखिलर्द्धिभिरणिमादिविभूतिभिर्मूर्तिधराभिः ॥ ५७ ॥ ऊर्जया ऊर्जितया गिरा ॥ ५८ ॥

दर्शनोत्तरम् । रथेन सलिलं प्रविष्टं जले रथः प्रविष्ट इत्यर्थः ॥ * ॥ ततस्तत्रैव वर्तमानं सलिलं विरजानदीरूपं "प्रधानपरमव्योम्नोरन्तरे विरजा नदी" इति पाद्मोत्तरखण्डात् । कारणार्णवोदकमिति **विश्वनाथः** ॥ नभस्वता हेतुना । अद्भुतं सर्वलोकातीतम् । वै प्रसिद्धौ । द्युमत्तमं पूर्वोक्ततेजसोऽप्याधिक्यमभिप्रेतम् । तत्रैव हेतुः—भ्राजन्तम् । सदा स्वयमेव प्रकाशमानानां मणिमयस्तम्भानां सहस्रेण द्योतितम् । एवं भवनस्यातिविस्तारश्चोक्तः । तैरुद्दिष्टं महाकालपुरं चेदं मृत्युञ्जयतन्त्राल्लभ्यते "ब्रह्माण्डस्योर्द्ध्वतो देवि ब्रह्मणः सदनं महत् । तदूर्द्ध्वं देवि विष्णूनां तदूर्ध्वं रुद्ररूपिणाम् ॥ तदूर्द्ध्वं च महाविष्णोर्महादेव्यास्तदूर्द्ध्वगम् । कालातिकालयोश्चाथ परमानन्दयोस्ततः ॥ परिपूर्णमहावेगः कालः सर्वभयावहः । ततः श्रीरत्नपीयूषवारिधिर्नित्यनूतनः ॥ तस्य तीरे महाकालः सर्वग्राहकरूपधृक् । तस्यांतिके समुद्रोस्ति रत्नद्वीपः शिवाह्वयः ॥" इत्यादि । "ध्यायेत्तत्र परानन्दं रामोपास्यं परं महत् । स्मरेद्वृन्दावने रम्ये मोहयन्तमनारतम् ॥ बल्लवीवल्लभं कृष्णं गोपकन्याः सहस्रशः ।" इत्येवमंतं बहुविस्तृतमस्ति । तत्र ब्रह्मणः सदनं सत्यलोकः । विष्णूनां विकुण्ठासुतानां वैकुण्ठः । रुद्ररूपिणामिति अहंकारावरणस्थो रुद्रलोकः । महाविष्णोरिति महत्तत्त्वावरणस्थो महाविष्णुलोकः । महादेव्या इति प्रकृत्यावरणस्थो महादेवीलोकः । ब्रह्मपीयूषवारिधिः कारणार्णवः । महाकालः परमव्योमस्थो महावैकुण्ठनाथः । तस्यैव कारणार्णवजलान्तर्गतं भवनं महाकालपुरम् फाल्गुनो ददर्शेति पूर्वस्योत्तरस्य चानुषंगः ॥ ५३ ॥ तस्मिन्भवनेऽनन्तं ददर्श । तथा तद्भोगसुखासनं विभुं च ददर्श । नोत्तरेणान्वयः । महाभीममतिभयंकरम् ॥ * ॥ तस्मिन्निति चतुष्कम् । महान्फणादिभिरपरिच्छिन्नो भोगो देहो यस्य तम् । 'शिती धवलमेचकौ' इत्यमरः ॥ ५४ ॥ ० ॥ * ॥ पुरुषेषु त्रिषु उत्तमो विष्णुस्तेभ्य उत्तमो गर्भोदशायी आदिपुरुषो वा तस्मादप्युत्तमम् ॥ ५५ ॥ ० ॥ * ॥ ० ॥ ५६ ॥ परमेष्ठिनां ब्रह्मादिदेवानाम् । छत्रिणो यांतीतिवद्बहुत्वम् ॥ * ॥ स्वैरसाधारणैः पार्षदैर्मूर्तिधरैः स्वमस्तकोपरि तत्तच्चिह्नशोभितदेहैर्निजैः स्वाभाविकायुधैः आदिना शंखगदाखड्गचर्मशरचापपाशाः अष्टभुजत्वात् । श्रीर्महिषी । पुष्ट्याद्याः शक्तयो मूर्तिमत्य एव । परमेष्ठिनां द्विपरार्द्धान्तं मुक्तानां ब्रह्मणां तत्र कूटीभूतानां पतिं मुक्तिप्रदत्वात् । तस्य पदस्य ॥ ५७ ॥ तमात्मानं स्वस्वरूपमेवाच्युतो जिष्णुश्च ववन्दे "अहं स भरतश्रेष्ठ मत्तेजस्तत्सनातनम् । ब्रह्मतेजोमयं दिव्यं महद्यद्दृष्टवानसि ॥" इति हरिवंशाच्छ्रीकृष्णेनात्मैवार्जुनाय मायया दर्शित इति । तद्दर्शनेन महाकालपुरेक्षणेन जातं साध्वसं संभ्रमो यस्येति तथा द्वयोर्विशेषणमिदम् । भूमा सर्वेश्वरः । तौ कृष्णार्जुनौ । ऊर्जितया प्रगल्भया ॥ * ॥ आत्मानमिति । गोवर्धनपूजायां " तस्मै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये ॥ कलावतीर्णाववनेर्भरासुरान्हत्वेहभूयस्त्वरयेतमंति मे ॥ ५९ ॥ पूर्णकामावपि युवां नरनारायणावृषी ॥ धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहम् ॥ ६० ॥

मे कलावतीर्णाविति संबोधनम् । शीघ्रं मे अंति सकाशमितमागच्छतम् ॥ ५९ ॥ आचरतामाचरतम् । इदं भारतयुद्धात्पूर्वमेव कृतमपि श्रैष्ठ्यकथनप्रस्तावेनात्रोक्तम्॥ ६०॥

नमो व्रजजनैः सह चक्रे[1]ऽऽत्मनाऽऽत्मने " इतिवल्लीलाकौतुकमात्रार्थं तत्तदिति ज्ञापितम् । अनन्तमिति आत्मनोऽसंख्यस्वरूपेणानन्त्यात् सोऽष्टभुजोऽप्येक आत्मेत्यर्थः । अच्युत इति स्वयं भगवत्त्वेन तत्रापि व्यापकत्वादिच्युतिरहितः स्वीयनरलीलाच्युतिरहितोऽपीत्यर्थः । अयं वन्दने हेतुर्ज्ञेयः । विष्णुश्च तादृशोऽपि तस्य दर्शनाज्जातसान्वसः सन्ववन्दे । तावंगीकृतात्मनरलीलौ । श्रीकृष्णोऽसौ ब्रह्माक्रूरादीन्प्रति तादृशवैभवानि कदाचिदेव प्रकाशयति गोवर्धनपूजनलीलायामिव सदा कौतुकेन नरलील एव तदनुसारेणार्जुनाद्या अपीति भावः । स तु भूमा श्रीगोवर्धनबलिभुग्वत्ततोऽपि दर्शितात्ममहत्त्वः । तत्सहायाश्च तादृशा इत्याह—परमेष्ठिनां प्रभुरिति । अत ऊर्जया श्रीकृष्णानुसारेणैवार्जुनस्य स्ववाक्यादराद्युत्पत्तये उर्जितया संप्रगल्भयेत्यर्थः । सास्मितामिति स्वप्रसादव्यंजनार्थम् ॥ * ॥ **विश्वनाथस्तु**—श्रीकृष्णस्य नरलीलत्वरक्षणार्थमेव सोऽष्टभुज ईश्वरलील एतदंशोऽपि तं वन्दितवानिति भावः । जातसाध्वसः प्राप्तसंभ्रम इति कृष्णादप्ययमधिकैश्वर्यवानिति लब्धप्रतीतिक इत्यर्थः । ऊर्जयेति तयैवार्जुनं मोहयितुं प्रगल्भयेत्यर्थः । सस्मितमिति त्वदभिप्रायेणैव त्वदंशोऽप्यहं स्वाधिक्यं प्रकटीकरोमि वस्तुतस्तु तस्मिन्नेव वाक्ये तवैव रूपगुणैश्वर्याधिक्यं मदंशित्वं च द्योतयामि पश्य मे चातुर्यं त्वयापि पश्चादर्जुनाय स्वतत्त्वमवश्यं ज्ञाप्यमिति स्मितेन प्रार्थना च द्योतिता ॥ ५८ ॥ मे कलावतीर्णाविति द्वयोः सम्बोधनमर्जुनाभिप्रायकमेव लिंगसमवायन्यायेन । यद्वा—कं सुखं लाति ददातीति कला रक्षा तदर्थमवतीर्णौ मे ममावनेर्भूमेर्भरासुरान्हत्वा इहात्र मे ममान्ति समीपं युवामितमागच्छतमिति योज्यम् । अन्यथा 'कृष्णस्तु भगवान्स्वयम्' इति 'ववन्द आत्मानमजं तमच्युतः' इति पूर्वश्लोकोक्तं च कथं संगच्छेतेति ॥ * ॥ तथापि तस्य मुखात्तयोः स्वतोऽप्यधिकं माहात्म्यमुद्गतमिति तादृशं तद्वाक्यमेवाह— द्विजेति । हे धर्मगुप्तये कलावतीर्णौ धर्मस्य ब्रह्मण्यत्वादेर्गुप्तये रक्षणाय कलाभिः सर्वाभिः शक्तिभिर्युक्तावतीर्णौ सर्वांशसंबलिततया प्रकटौ । मध्यमपदलोपी समासः । युवयोर्युवां दिदृक्षया । मे मया । मे मम भुवि धाम्नि द्विजात्मजा उपनीता आनीताः एवमेव वक्ष्यतेऽर्जुनेन तत्तत्त्वे पृष्टे श्रीकृष्णेनापि श्रीहरिवंशे—"मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना । विप्रार्थमेष्यते कृष्णो मत्समीपं न चान्यथा ॥" इति । तदेतच्च नापूर्वम्—"यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् । विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणांगम् ॥" इति तृतीयेऽपि श्रीमदुद्धवोक्तेः । तदेवं यद्यपि तत्र तस्य स्पृहयालुत्वं तथा सर्वत्रापि करतलमणिवत्सर्वदार्शित्वं सर्वाकर्षित्वं च । तथापि तेन स्वेच्छया निकटमागत्य दर्शनदानं विना स तं द्रष्टुं न शक्नोति कष्टकल्पनयैव तत्सम्पादितमिति च शक्त्याधिक्यमप्यायातं किमुत सौन्दर्यादिगुणाधिक्यमिति स्थितम् । हरिवंशादत्र त्वयं विशेषः—यः खल्वर्जुनं प्रत्यपि तथा तस्य दिदृक्षेति । युक्तं च तत्—"ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः । तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥" इति न्यायेन । तदुक्तं विष्णुधर्मे श्रीकृष्णेनैव तं प्रति—"यस्त्वां वेत्ति स मां वेत्ति यस्त्वामनु स मामनु । अभेदेनात्मनो वेद्मि त्वामहं पांडुनन्दन ॥" इति । प्रस्तुतपद्यावशेषो व्याख्यायते—नन्वेवमपि जातमधुना तु किं कर्तव्यं तत्राह—भूयः पुनरपि अवशिष्टानवनेर्भरासुरान्हत्वा मे मम अन्ति अन्तिकाय समीपमागन्तुं त्वरयेतं शीघ्रं प्रस्थापयेतं मोचयतमित्यर्थः । अत्रागत्य ते मुक्ता भवन्त्विति द्वितीयस्कन्धे क्रममुक्तिसृतावष्टावरणभेदानन्तरमेव मोक्षश्रवणात् तद्धाम्नो मुक्तगम्यत्वेन हरिवंशोक्तत्वात् । अन्तीत्यव्ययाच्चतुर्थ्या लुक् । चतुर्थी च " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति स्मरणात् एधोभ्यो व्रजतीतिवत् । त्वरयेतमिति हेतुमण्णिजन्तस्य त्वरोर्लिङि रूपम् । क्त्वाऽऽख्यान्तक्रिययोरेककर्मत्वं च कटं कृत्वा प्रस्थापयेतिवत् । अर्थान्तरे मे कलावतीर्णाविति व्यवहितान्वयः। त्वरयेतमिति सोपसर्गमेव प्रयुज्येत स्वनिकटप्रापणादेशे तथा व्यवहारात् । आस्तां तावदस्मन्मतं श्रीकृष्णस्य स्वयं भगवत्त्वं नित्यलीलत्वञ्चेति ॥ ५९ ॥ पूर्णकामावपि लोकसंग्रहार्थं धर्ममाचरतं युवाम् । इदं ब्राह्मणपुत्रानयनादि । श्रैष्ठ्यं प्राशस्त्यम् ।

१ अत्राऽऽकारलोपसंधिरार्षः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिना ॥ ओमित्यानम्य भूमानमादाय द्विजदारकान् ॥ ६१ ॥ न्यवर्ततां स्वकं धाम संप्रहृष्टौ यथागतम् ॥ विप्राय ददतुः पुत्रान्यथारूपं यथावयः ॥ ६२ ॥ निशाम्य[1] वैष्णवं धाम पार्थः परमविस्मितः ॥ यत्किंचित्पौरुषं पुंसां मेने कृष्णानुकंपितम् ॥ ६३ ॥

॥ ६१ ॥ ६२ ॥ ६३ ॥

प्रस्तावः प्रसङ्गः ॥ * ॥ नन्वावां सर्वतः परिपूर्णौ कथं ब्रह्मण्यत्वादिधर्मपरौ स्याव इत्याशंक्य केवलकरुणया धर्मसंस्थापनार्थमेवेति सिद्धान्तयन्नुदाहरणं दर्शयति–पूर्णेति । युवामृषभौ सर्वाविर्भावश्रेष्ठावपि तत एव पूर्णकामावपि स्थित्यै सर्वपालनाय लोकसंग्रहं धर्ममाचरताम् मध्ये नरनारायणौ ऋषी तौ युवयोर्विभूतिरूपावंशावित्यर्थः । वक्ष्यते हि श्रीकृष्णेनोद्धवं प्रति विभूतिप्रसंगे ' नारायणो मुनीनां च ' इति । अतस्तावपि यदि तादृशौ तदा किमुत साक्षाद्भगवन्ताविति भावः । अत्र चाचरतामित्यर्थ एव खल्वाचरतामिति न प्रसिद्धमित्यादि तथा न व्याख्यातमित्यपि ज्ञेयम् । किञ्च–मदन्तिकमागच्छतमिति नरनारायणौ भूत्वा धर्ममाचरतमिति पारस्परिकविरोधश्च ज्ञेयः ॥ ६० ॥ इतीत्थम् । आदिष्टावाज्ञप्तौ । द्विजपुत्रानादाय स्वकं धाम न्यवर्ततामिति द्वयोः सम्बन्धः ॥ * ॥ इतीत्यर्द्धकम् । इति पूर्वोक्तप्रकारेण गोवर्धनमखवल्लीला विशेषसंपादनाभिप्रायेण आदिष्टावादेशमुद्रयोक्तौ । तत्र भगवच्छब्दः स्पष्टैश्वर्यादिव्यपेक्षया । कृष्णशब्दश्च स्वयं भगवति ' कृषिर्भूवाचकः शब्दः ' इत्यादिप्रामाण्येन परब्रह्मत्वापेक्षया । श्रीमदर्जुनेऽपि तत्सनामत्वेन निर्देशः पूर्ववत्समशीलत्वापेक्षया उभयत्र तादृशत्वेऽपि नराकृतिपरब्रह्मेत्यादिप्रसिद्ध्या नरलीलावित्यर्थः ॥ ६१ ॥ इत्यादिष्टावित्यारभ्य यथावय इत्यन्ते द्वे पद्ये सन्तत्यर्थे सपादनियुते जप्ये तेनावश्यं सन्तोतलाभ इति, लिखित्वा धारणादपीति मंत्रशास्त्रादवसेयम् । अस्य श्लोकद्वयात्मकमंत्रस्य व्यासऋषिः कृष्णो देवताऽनुष्टुप् छन्दः सन्तत्यवाप्तये जपे विनियोगः । ध्यानं तु–" विजयेन युतो रथास्थितः प्रसमानीय समुद्रमध्यतः । अददत्तनयान्द्विजन्मने स्मरणीयो वसुदेवनन्दनः ॥ " जपश्च स्मरबीजसम्पुटितः कार्यः जीवपुत्रकमालया । "जीवपुत्रस्य बीजैश्च दशांशं होममाचरेत् । अस्य धारणमपि स्त्रिया कार्यं वामभुजे इति ॥ * ॥ स्वकं धामेति । यथा तस्य तन्नित्यं धाम तथास्य च द्वारकाख्यमिति भावः । वक्ष्यते ह्येकादशे–" नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः " इति । संप्रहृष्टावित्यर्जुनाभीष्टसिद्धेः । श्रीभगवतस्तत एवेति । यथागतमिति पूर्वव्यतिक्रमेण ज्योतिरादिभेदक्रमादित्यर्थः । विप्रायेत्यर्द्धकम् । यथारूपं तत्पित्रादिदृष्टरूपानतिक्रमादित्यर्थः । तत्र योग्यतामाह–प्रभू दुर्घटघटनासमर्थावित्यर्जुनस्यापि तादृशत्वं व्यक्तम् ॥ ६२ ॥ ० ॥ * ॥ एतच्चरितस्य फलितमाह–वैष्णवं धाम महाकालपुराख्यं तदीयपुरं तदीयप्रभावं वा निशाम्य निशम्य दृष्ट्वा परमविस्मितोऽपि पुंसां सर्वेषामेव जीवानाम् ईश्वरः प्रादुर्भावानां च यत्किञ्चित्पौरुषं शक्तिस्तत्कृष्णस्यैव अनुकम्पितं कृपासम्पादितं मेने । तादृशेनापि तेन तस्यावसरप्रार्थनात् स्वस्य च ' द्विजात्मजा मे युवयोर्दिदृक्षुणा ' इत्यादिद्वयेन तादृशतयोक्तेः । यद्वा–पूर्वोक्तप्रकारेण तत्पर्यन्तव्यापकतया विष्णुः कृष्णस्तस्य धाम प्रभावं तद्गतं स्वगतं च निशम्य " द्विजात्मजा मे युवयोर्दिदृक्षुणा " इत्यादिना तन्मुखाच्छ्रुत्वेत्यादि हरिवंशेऽप्यर्जुने तत्तत्त्वं पृष्टवति श्रीकृष्णः सर्वं तन्महापुरुषपर्यन्तं स्वस्यैव वैभवतया ज्ञापितवानिति तत्रैव दृश्यम् , तदेतद्व्याख्याकारणं मूलम् "एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्" इत्येव प्रथमस्कन्धतृतीयाध्याये सर्वभगवदाविर्भावसूत्ररूपे तत्परिभाषारूपत्वात् सूत्र्यते । विवरणीयार्थः संक्षेपेण दर्श्यते येन तद्धि सूत्रं तत्र चानियमे नियमकारिणी परिभाषा शास्त्रारंभे सकृदेव पठ्यमाना सर्वमेव व्याप्नोति । तस्मात्तदधीनान्येतदाख्यानवाक्यान्यपि यथा श्रीभागवतस्य सर्ववेदेतिहाससारभूतत्वादन्यशास्त्रवृन्दान्यपि प्रतिज्ञावाक्यमात्रस्यान्यत्रापि सर्वोपमर्दकत्वं दृश्यते । यथा–आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवतीत्यादिवाक्यमाकाशादीनामनुत्पत्तिवाक्यमन्यथयति किञ्च–" श्रुतिलिंगवाक्यस्थानप्रकरणसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात् " इति पूर्वमीमांसानिर्णयः " श्रुत्यादिबलीयस्त्वाच्च न बाधः " इत्युत्तरमीमांसासंमतिश्च तत्र साक्षाच्छब्देनोपदेशः । श्रुतिर्यथा–" एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् " इति । अन्यानि तु कृष्णसन्दर्भे विवृतानि । तेषां परंपरं दुर्बलम् अर्थस्य दूरदूरप्रतीतेः, इति स्थिते सर्वश्रीभागवतोपदेशप्रवृत्तस्य श्रीसूतस्य सर्वनिर्णयार्थं साक्षात्स्वयं भगवच्छब्देनोपदेशाय सर्वतो बलवानेवेति । इत्थमेव सर्वत्रैव तैस्तैरिदमेव वाक्यं प्रमाणीक्रियते लीलायाश्च नानाकौतुकिनः

---

१ निशाम्येतिपाठः प्राचीनः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन् ॥ बुभुजे विषयान्ग्राम्यानीजे चात्यूर्जितैर्मखैः ॥ ६४ ॥
प्रववर्षाखिलान्कामान्प्रजासु ब्राह्मणादिषु ॥ यथाकालं यथैवेंद्रो भगवान्श्रैष्ठ्यमास्थितः ॥ ६५ ॥

॥ ६४ ॥ ६५ ॥

श्रीभगवतो लाघवदर्शनं न तत्प्रमापकं गोवर्धनबलिभुग्रूपेऽपि नारदादावपि लघुतया व्यवहारादिति च स्थिते साध्वेवोपन्यस्तम् । इत्थमुक्तः श्रीविष्णोरुत्कर्षः स्वयं भगवति श्रीकृष्ण एव पर्यवस्यतीति । तथैव हि तेषामप्युपन्यासः संगच्छते स चोक्तलक्षणो भगवान् श्रीकृष्ण एवेति दिक् ॥*॥ अत्र **विश्वनाथः**—परमविस्मित इति । प्रथममात्यन्तिकमहैश्वर्यदर्शनेनाहो तावदहं पाण्डुपुत्रो मर्त्योऽपि कृष्णप्रसादादेव सर्वमूलभूतं परमेश्वरमि ममपश्यमिति विस्मितः । ततः क्षणं परिमृश्याहो तेन कथं ‘ युवयोर्दिदृक्षुणा ’ इत्युक्तं सर्वादिपरमेश्वरस्य तस्य स्वांशे कृष्णे दिदृक्षा कथं सम्भवेत्संभवतु वा सा कादाचित्की किन्तु दिदृक्षतेत्यनुक्त्वा दिदृक्षुणेति ताच्छी ल्यप्रत्ययेन दिदृक्षायां सार्वदिकत्वं बुध्यते । भवतु वा सार्वदिकी दिदृक्षा द्वारकायां कृष्णविभुत्वात्स्वसृज्यविश्वस्य करामलकतुल्यत्वाच्च तत्र स्थित्यैव कथं न पश्यति नास्तु वा विभुत्वं विप्रापत्यहरणार्थं प्रतिवर्षं द्वारकां गच्छत्येव तत्रत्यतैलिकताम्बूलिकादिभिरपि दृश्यमानं कृष्णं कथं न पश्यति कृष्णस्येच्छां विना कृष्णदर्शनं न भवेदिति चेन्नास्तु कृष्णदर्शनं ब्रह्मण्यदेवो भूत्वापि ब्राह्मणं प्रतिवर्षं कथं दुःखयति तन्मन्ये कृष्णदर्शनौत्कण्ठ्यं त्यक्तुमपि न शक्नोति यदर्थमकृत्यमपि कुरुते करोत्वनर्थं तदर्थं किन्तु विप्रापत्याहरणार्थं कमपि सेवकं किं न प्रहिणोति स्वयं कथं याति तन्मन्ये द्वारकातस्तदाहरणं तदन्यैर्दुःशकं तस्मात्कृष्णनगरस्थं विप्रं तथा दुःखयामि यथा तद्दुःखं सोढुमसमर्थः कृष्णो मह्यं दर्शनं दास्यतीति तदभिप्रायोऽवगम्यते । अत एवान्तर्यामिस्वरूपेण तेनैव प्रेरितो मुखरो विप्रः कृष्णसान्निधावेवागत्य प्रतिबालकनाशान्ते तां गाथां गाय ति । तस्मात्ततोऽप्यस्य कृष्णस्यैव पारमैश्वर्यमधिकमनुमीयते इति विभाव्य परमविस्मितः । ततश्च कृष्णमेव पृष्ट्वा तत्त्वमवधारयामीति विमृश्यार्जुनेन पृष्टे सति कृष्णेनोक्तम् । यथा हरिवंशे—“ मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना । विप्रार्थमेष्यते कृष्णो मत्समीपं न चान्यथा ॥ ” इति । मया तु विप्रार्थमपि न गतं तत्समीपं किन्तु सख्युस्तव प्राणरक्षार्थमेवं । यदि विप्रार्थमहमगमिष्यं तदा प्रथमबालकहरणानन्तरमेव खल्वग मिष्यम् । नवमे बाले हृते सत्येव यस्मादगमं तस्मान्न तस्यानुरोधात् , किन्तु त्वदनुरोधादेवेति सर्वं तत्त्वं कृष्णमुखाच्छ्रुत्वाऽर्जुनो यत्किञ्चित्पौरुषं पुंसां परमव्योमनाथपर्यन्तानामपि पुरुषाणां तत्सर्वं कृष्णानुकम्पासम्पादितमेव मेने । इत्येवं वेदस्तवमारभ्यैव तत्कथापर्यन्तमत्र दशमस्कन्धान्ते दशमस्याश्रयतत्त्वस्य कृष्णस्यैव सर्वोत्कर्षविवरणमभूदिति ज्ञेयम् ॥ ६३ ॥ अथ श्रीकृष्णकर्मणामानन्त्यमाह— इतीति । नरलोकविडम्बनमाह—बुभुज इति । अत्यूर्जितैरन्येन कर्तुमशक्यैर्मखैरश्वमेधादिभिः ॥ * ॥ तथैतत्प्रसङ्गेनान्यान्यपि तच्चरितानि स्मृत्वा सास्रगद्गदमाह—तानि च सर्वाणि विवक्षन्नपि श्रीपरीक्षिदायुःस्वल्पतासङ्को चेन सदुःखमुपसंहरन्नेव चाह—इतीति । इति पूर्वोक्तप्रकारेण । ईदृशानि पूर्वोक्ततुल्यानि वीर्याण्यद्भुतकर्माणि । इह लोके । प्रकर्षेण दर्शयन्नपि लीलया ग्राम्याँल्लौकिकानपि सर्वान् विषयान्बुभुजे । ईजे च अत्यूर्जितैर्महासं विधानसम्पन्नैः ॥ ६४ ॥ श्रैष्ठ्यं गृहस्थधर्मोत्कृष्टयम् ॥ * ॥ प्रववर्ष अविच्छेदेन पूरयामास । कामान्दृष्टार्थान् । आदिना अन्त्यजादिग्रहः । भगवान्परिपूर्णैश्वर्यः । श्रैष्ठ्यं सर्वावतारावतारिभ्य आधिक्यमास्थितो नित्यमेव प्राप्तः भारतयुद्धादित्यादि स्वामिचरणैर्युक्तमेवोक्तम् । ‘वीर्थे त्र्यम्बकतोषणम्’ इत्यर्जुनेनोक्तत्वात् यद्यप्यज्ञातवासानन्तरमेवार्जुनस्य तदिदं चरितं लभ्यते तथापि तदन्तराभिमन्युविवाहपरीक्षिदाधानयोरन्तराले कालबाहुल्यमुप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हत्वा नृपानधर्मिष्ठान्घातयित्वार्जुनादिभिः ॥ अंजसा वर्तयामास धर्मं धर्मसुतादिभिः ॥ ६६ ॥ इति श्रीमद्भा०म०दशमस्कन्धोत्त० द्विजकुमारानयनं नामैकोननवतितमोऽध्यायः ॥ ८९॥ श्रीशुक उवाच ॥ सुखं स्वपुर्यां निवसन्द्वारकायां श्रियः पतिः ॥ सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः ॥१॥ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः ॥ कंदुकादिभिर्हर्म्येषु क्रीडंतीभिस्तडिद्द्युभिः ॥ २ ॥ नित्यं संकुलमार्गायां मदच्युद्भिर्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वै रथैश्च कनकोज्ज्वलैः ॥ ३ ॥ उद्यानोपवनाढ्यायां पुष्पितद्रुमराजिषु ॥ निर्विशद्भृंगविहगैर्नादितायां समंततः ॥ ४ ॥ रेमे षोडशसाहस्रपत्नी नामेकवल्लभः ॥ तावद्विचित्ररूपोऽसौ तद्गेहेषु महर्द्धिषु ॥ ५ ॥

॥ ६६ ॥ इति श्रीमद्भागवते दशमस्कंधोत्त० श्री० टीकायामेकोननवतितमोऽध्यायः ॥८९॥ चरमे तु पुनः प्रोक्ता कृष्णलीला समासतः ॥ यदुवंशप्रसूतानामानंत्यं च सकारणम् ॥ १ ॥ श्रीकृष्णविभूतिं समासेन दर्शयति । सुखं स्वपुर्यामिति । सर्वसंपदादिविशिष्टायाम् । श्रियःपतिः । षोडशसहस्रपत्नीनामेकवल्लभःसंस्तासां गेहेषु रेमे इत्यन्वयः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

लभ्यते । तदन्तरान्तरा चार्जुनस्य द्वारकागमनं सम्भाव्यत इति ॥ ६९ ॥ स्वयं कंसादीन् । अर्जुनस्यादिः प्रथमो भीमसेनोऽर्जुनादिः । तैरिति बहुत्वं धनञ्जयादिग्रहार्थम् । दुर्योधनादीन्घातयित्वा । यद्वा—अर्जुनसदृशैर्वीरैः। धर्मसुतादीत्यत्रोक्तादिना जारासन्धिसहदेवादिग्रहः ॥ * ॥ ॥ ६६ ॥ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कन्ध उत्तरार्धे एकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ चरमे नवतितमे । स्कन्धसमाप्त्यपेक्षं चरमपदम् । सकारणम्—कारणं चात्र भगवत्प्रसादो दैतेयनिग्रहश्च ‘ देवासुराहवहता ’ इत्यादिश्लोकद्वयेनात्रैव तथोक्तेः (१) स्वपुर्यां स्वत्वेन स्वीकृतायाम् ॥ * ॥ ततश्च चित्तसमाधानाय समाप्तौ परमसुखमयं लीलाविशेषं स्मरन्नाह—सुखमित्यादिना स्त्रिय इत्यन्तेन । तत्राद्यं षट्कम् । स्वस्य स्वयं भगवतः पुर्याम् इति स्वाभाविकता स्वलीलासुखनिवासयोग्यता चोक्ता । अत एव नितरां वसन्निति वैकुण्ठादिभ्योऽप्याधिक्यम् । अतस्तदीयासाधारणलक्ष्म्या रुक्मिणीरूपाया अपि तथैव तत्र वास इत्याह—श्रियः पतिरिति । अत एव सर्वाभिस्तल्लीलायोग्याभिः सम्पद्भिः समृद्धायां सम्यग्वृद्धायाम् । एवमुत्तरोत्तरत्रापि वैशिष्ट्यमेवोह्यम् ॥१॥ आदिना लीलान्तरग्रहः । हर्म्येषु धनिनां योग्येषु समुन्नतगृहेषु ॥ * ॥ नवं नित्यमेव पूर्वपूर्वतो विलक्षणं यौवनं कान्तिश्च यासां ताभिः । एवं वेषवयःकान्तीरुक्त्वा वैदग्ध्यादिकमाह—कन्दुकेति । आदिना गीतनृत्यादयः । तत्र च इतस्ततः कन्दुकादिक्रीडया चलन्तीनां तडितामिव द्यौश्शोभा यासां ताभिः ॥ २ ॥ ० ॥ * ॥ एवमन्तरीणां सम्पदमुक्त्वा बाह्यां वदन्सदा चतुरङ्गसेनासेवितत्वमाह—नित्यमतिसङ्कुलाः सङ्कीर्णा मार्गा यस्यास्तस्याम् । अलंकृतैरित्यस्य मतंगजादिभिरप्यन्वयः । तत्रापि रथैः सौवर्णचित्रमयैः ॥ ३ ॥ निर्विशद्भिर्मध्वादि भुञ्जानैर्भृंगैर्विहगैश्च घोषवत्कृतायाम् ॥ * ॥ अधुना तद्बाह्यमप्याह—उद्यानेति । नादितायामधिकरणे निष्ठा । भृंगादिभिर्हेतुभिः सुजातनादितायामित्यर्थः ॥ ४ ॥ श्रियः पतिरिति कर्तृपदमाद्यपद्यगतमत्र सम्बध्यते । तावन्ति स्त्रीसमसंख्यानि विचित्राणि रूपाणि यस्यासौ । महत्य ऋद्धयो येषु तेषु ॥ * ॥ रेमे बहुधा चिक्रीड । कथं तत्राह—षोडशेति । एकोऽपि वल्लभः सन्युगपत्प्रीतिदानपूर्वकमिति भावः । न च तदसम्भाव्यं तस्य सर्वशक्तिविशेषादित्याह—तावन्तीति—रूपाण्येकस्यैव विग्रहस्य सर्वत्र स्फुरणानि, ‘चित्रं बतैतदेकेन वपुषा’ इत्यादिश्रीनारदोक्तेः । अत एवोक्तं श्रीहरिवंशे जलक्रीडाप्रसंगे—“अहमिष्टा मया सार्द्धं जले वसति केशवः । इति ता मेनिरे सर्वा मुदा नारायणस्त्रियः ॥ सर्वाः सुरतचिह्नान्ताः सर्वाः सुरतदर्पिताः । मानमूहुश्च ताः सर्वा गोविन्दे बहुमानजम् ॥ अहमिष्टाऽहमिष्टेति स्निग्धे परिजने तदा । नारायणस्त्रियः सर्वा मुदा संश्लाघिरे शुभाः॥” किञ्च—“एकार्पितमनोदृष्ट्या नेर्ष्या ताश्चक्रुरंगनाः । नारायणेन देवेन तर्प्यमाणमनोरथाः ॥ शिरांसि गर्वितान्यूहुः सर्वा निरवशेषतः । बाल्व्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रोत्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः ॥ वासितामलतोयेषु कूजद्द्विजकुलेषु च ॥ ६ ॥ विजहार विगाह्यांभो ह्रदिनीषु महोदयः ॥ कुच कुंकुमालिप्तांगः परिरब्धश्च योषिताम् ॥ ७ ॥ उपगीयमानो गंधर्वैर्मृदंगपणवानकान् ॥ वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ॥ ८ ॥ सिच्यमानोऽच्युतस्ताभिर्हसंतीभिः स्म रेचकैः ॥ प्रतिसिंचन्विचिक्रीडे यक्षीभिर्यक्षराडिव ॥ ९ ॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचंत्य उद्धतबृहत्कबर प्रसूनाः ॥ कांतं स्म रेचकजिहीरषयोपगुह्य जातस्मरोत्सवलसद्वदना विरेजुः ॥ १० ॥ कृष्णस्तु तत्स्तनविषज्जितकुंकुमस्रक् क्रीडाभिषंगधुतकुंतलवृंद बंधः ॥ सिंचन्मुहुर्युवतिभिः प्रतिषिच्यमानो रेमे करेणुभिरिवेभपतिः परीतः ॥ ११ ॥

गेहविशेषणं प्रोत्फुल्लेत्यादिश्लोकेन ॥ ६ ॥ तथा ह्रदिनीषु चांभो विगाह्य विजहार । महानुदयो वैभवं यस्य सः । योषितां कुचकुंकुमैर्लिप्तांगः यतस्ताभिः परिरब्धः ॥ ७ ॥ सूतमागधवंदिभिश्चोपगीयमानः ॥ ८ ॥ ९ ॥ ताः क्लिन्नवस्त्रा अत एव विवृतोरुकुचप्रदेशाः । उद्धतानि विस्रस्तानि बृहत्कबरेभ्यः प्रसूनानि यासां ताः । जातेन स्मरेण य उत्सवस्तेन लसंति वदनानि यासां ताः ॥ १० ॥ तासां स्तनेभ्यो विषज्जितकुंकुमा स्रग्यस्य । क्रीडाया अभिषंगेणाभिनिवेशेन धुतः कंपितः कुंतलवृंदबंधो यस्य सः ॥ ११ ॥

केशवमयं वहन्त्यश्चारुदर्शनाः ॥" इति । महत्यस्तादृश्यामुत्कृष्टा ऋद्धयो येषु ॥५॥ वासितानि परिमलीकृतानि तोयानि येषु गृहेषु ॥*॥ कह्लारं सौगन्धिकम् । उत्पलकुमुदयोः श्वेतरक्तत्वेन भेदः ॥*॥ अत्र **विश्वनाथः**– अथ 'मधुरेण समापयेत्' इति न्यायेन कृष्णस्य जलविहारं वर्णयन्प्रथममुद्दीपनत्वेन नगररामणीयकमाह–सुखमित्यादिना । तद्गृहेष्विति गृहेषु रमणमुक्त्वा जलेषु तदाह–प्रोत्फुल्लेति । वासितानि सुगन्धिद्रव्यैरमलानि तोयानि येषु । यद्वा–सुखमित्यादिकमेव प्रोत्फुल्लेति युग्मकम् ॥ ६ ॥ ह्रदिनीषु नदीषु । 'ह्रादिनी तटिनी नदी' इत्युत्पलोक्तेः । ताभिर्योषिद्भिः ॥ * ॥ जलविहारप्रकारमाह–विगाह्येति । ह्रदिनीष्वित्युपलक्षणम् , हरिवंशानुसारेण सागरेऽपि ज्ञेयम । महोदय इति–जलक्रीडोपकरणसम्पत्तिरपि महती सूचिता । सा चोक्ता तत्रैव–"काश्चित्काष्ठमयैस्तेरुः प्लवैः सर्वांगशोभनाः । क्रौञ्चबर्हिणनागानामाकारसदृशैः स्त्रियः ॥ मकराकृतिभिश्चान्या मीनाभैरपि चापराः । बहुरूपाकृतिधरैः पुप्लुवुश्चापराः स्त्रियः ॥" किञ्च–"नौभिर्गृहप्रकाशाभिश्चिक्रीडुरपराः स्त्रियः । स्नातानुलिप्तमुदिताः सायाह्नेंधकवृष्णयः ॥ आयताश्चतुरस्राश्च वृत्ताश्च स्वस्तिकास्तथा । प्रासादा नौषु कौरव्य विहिता विश्वकर्मणा ॥" किञ्च–"भक्ष्यभोज्यानि पेयानि चोष्यं लेह्यं तथैव च । बहुप्रकारं मनसा ध्यातं तेषां भवत्युत ॥" किञ्च–"नारायणाज्ञया वृक्षाः पुष्पाणि मुमुचुर्भृशम् । ऋतवश्चानुरूपाणि विहायसि गतास्तथा ॥ ववौ मनोहरो वातो रतिस्वेदहरः सुखः । रजोभिश्चापि पुष्पाणां युक्तश्चन्दनशैत्यभृत् ॥ शीतोष्णमिच्छतां तत्र बभूव वसुधापते । वासुदेवप्रसादेन भौमानां क्रीडतां तदा ॥" किञ्च–"उवाह सर्वगन्धाढ्यं स्वच्छं वीर महोदधिः । तोयं चालवणं वीर वासुदेवस्य शासनात् ॥ गुल्फदघ्नं जानुदघ्नमूरुदघ्नं तथैव च । नारीणां स्तनदघ्नं च जलं समभिकांक्षितम् ॥" इत्यादि ॥ ७ ॥ ० ॥ *॥ उपेति युग्मकम् । गीतगानोपकरणत्वेन गन्धर्वैर्मृदंगादीन्वादयद्भिः सूतादिभिश्च पुराणगानाद्युपकरणत्वेन वीणामिति ज्ञेयम् । एते च जलं परितः पटप्राकाराद्बहिर्ज्ञेयाः ॥ ८ ॥ रेचकैः चर्मादिनिर्मितसेचनयन्त्रैः । "यन्त्रे चर्मादिरचिते सेचनार्थे तथौषधे । द्रावके रेचकः शिश्ने" इति धरणिः । विचिक्रीडे स्म । यक्षराट् कुबेरः । यक्षाणामतीवकामित्वेन तत्साम्यमुक्तम् ॥ * ॥ रेचकैर्जलक्षेपणयन्त्रविशेषैर्विविधं चिक्रीडे चिक्रीड । अच्युत इति प्रत्येकं पार्श्वस्थित्यभिप्रायेण । तत्र धाष्ट्यार्थे दृष्टान्तः यक्षीभिरिति । यक्षराट् कुबेरः ॥ ९ ॥ ताः स्त्रियो विरेजुः स्मेति संबंधः । अत एव क्लिन्नवस्त्रत्वादेव विवृताः प्रत्यक्षीभूता ऊरुप्रदेशाः कटिप्रदेशाश्च यासां ताः ॥ * ॥ ततश्च ता अधिकमशोभन्तेत्याह–ता इति । स्मेति विस्मये । जिहीर्षया तन्मिषेण । उत्स्मयेतिपाठे उत्स्मयः कमप्युत्कर्षं प्राप्तवत्स्मितम् ॥ १० ॥ विषज्जितकुंकुमा लग्नकाश्मीररागास्रक् माला ॥ * ॥ भगवांस्तु परमानन्दं प्रापेत्याह–कृष्णस्त्विति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नटानां नर्तकीनां च गीतवाद्योपजीविनाम् ॥ क्रीडालंकारवासांसि कृष्णोऽदात्तस्य च स्त्रियः ॥ १२ ॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः ॥ नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां किल हृता धियः ॥ १३ ॥ ऊचुर्मुकुंदैकधियो गिर उन्मत्तवज्जडम् ॥ चिंतयंत्योऽरविंदाक्षं तानि मे गदतः शृणु ॥ १४ ॥ महिष्य ऊचुः ॥ कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ॥ वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन ॥ १५ ॥

॥ १२ ॥ १३ ॥ मुकुंदैकधियः समाहिता इव क्षणमगिरः सत्यः पुनस्तमेवेशं चिंतयंत्यो जडं यथा भवति तथा यानि वाक्यानि ऊचुस्तानि मे मत्तो गदतः शृण्वित्यर्थः ॥१४॥ ईश्वरः श्रीकृष्णः स्वपिति । त्वं तु निद्राभंगं कुर्वती विलपसि न शेषे न स्वपिषि तदनुचितमित्यर्थः।अथवा नापराधस्तवापीत्याशयेनाऽऽहुः। नलिननयनस्य भगवतो हासेन सहितमुदारं यल्लीलेक्षितं तेन कच्चिद्गाढं निर्विद्धचेतास्त्वमिति ॥ १५ ॥

तुशब्दो विशेषे, तदेव दर्शयति–तदित्यादिविशेषणैः । जलक्रीडायां स्तनकुंकुमलेपेऽपि तद्विषजितस्रक्त्वं प्रागेव स्रजि लग्नत्वेन तदानीमपि तस्यानपगमात् । सिञ्चन्त्यस्तु मुहुरित्यस्योभयतोऽप्यन्वयः । परीतो युवतिभिरेव वेष्टितः । स्वच्छन्दतया जलक्रीडासुखे दृष्टान्तः–करेणुभिरिति ॥ ११ ॥ क्रीडासमकालिकानि वस्त्रादीनि । तस्य श्रीकृष्णस्य ॥ * ॥ अतो नर्तकादीनप्यनन्दयदित्याह–नटानामिति । षष्ठ्यश्चतुर्थ्यर्थे । स्त्रियश्चाहुः ॥ १२ ॥ 'क्ष्वेलिर्हास्योक्तिरुच्यते' इति ॥ * ॥ तत्रैवाश्चर्यविशेषं वक्तुमाह–कृष्णस्येति द्वाभ्याम् । एवम् पूर्वोक्तप्रकारेण । विहरतः कदाचिद्गृहे कदाचिज्जले क्रीडतः कृष्णस्य गत्यादिभिः स्त्रीणां स्वभावत एवोल्लंघितविचारप्रेम्णां धियो हृताः स्ववशीकृताः नर्मक्ष्वेलिस्तनालभनादीनां धीहरणे यथोत्तरं श्रैष्ठ्यम् । नर्म प्रियोक्तियुतं हास्यवचनम्, क्ष्वेलिर्धाष्ट्र्ययुतं तत् । किल वार्तायाम् । इदमाश्चर्यवृत्तं श्रूयतामित्यर्थः ॥ १३ ॥ इत्यर्थ इति–या गिर इति बहुवचनेन पदसमूहात्मकवाक्यानि लक्ष्यन्त इति भावः ॥ * ॥ तत्र च कदाचिदुन्मत्तवत् धत्तूरादिविक्षिप्तचित्ता इव तत्रैवागिरः मोहप्राप्त्या क्षणं निद्राणा इव तूष्णीं स्थिताः सत्यः अरविन्दाक्षमपि परोक्षतयाऽपरोक्षतया वा स्थितं भावयन्त्यः जडं विचारशून्यं यथा स्यात्तथा यान्यूचुः स्वप्न इव प्रलेपुस्तानि मत्तः शृणु । उन्मादेऽपि तच्चिन्तने हेतुः–मुकुन्दे निजसर्वदुःखमोचके तस्मिन्नेवैकाऽव्यभिचारिणी धीर्यासाम् । तत्रापरोक्षत्वपक्षे श्रीभगवांस्तु तच्छ्रवणकौतुकाय तूष्णीं तत्र स्थित इति ज्ञेयम् । वैचित्र्यविप्रलम्भोत्थो हि भावोऽयं बोपदेवादिभिर्मुक्ताफलादौ स्वीकृतः, वर्णितश्च हर्षमिश्रादिभिरिति ॥ * ॥ **विश्वनाथस्तु**–इयं प्रेम्णः षष्ठी भूमिकाऽनुरागभेदः प्रेमवैचित्त्यात्यस्तल्लक्षणमुज्ज्वलनीलमणावुक्तम् यथा–"प्रियस्य सन्निकर्षेऽपि प्रेमोत्कर्षस्वभावतः । या विश्लेषधियार्तिस्तत्प्रेमवैचित्त्यमुच्यते ॥" इति ॥ १४ ॥ 'उत्क्रोशकुररौ समौ' इत्यमरः । हे कुररि उत्क्रोशपक्षिभार्ये । इत्यर्थ इति–"निद्राभंगः कथाछेदो दम्पत्योः प्रीतिभेदनम् । शिशुमातृविभेदश्च ब्रह्महत्यासमः स्मृतः ॥" इति स्मृतेरनुचितं करोषीति भावः । किं त्वमप्यस्मत्सदृशत्वान्न स्वपिष्याकुलत्वादित्याहुः–अथवेत्यादिना । कच्चिदिष्टप्रश्ने । नयननलिनस्य कमलनेत्रस्य । आर्तानां निद्रा न भवतीति भावः ॥ * ॥ ततश्चात्मनो भावमुन्मादवशात् प्रायः सर्वत्र पश्यन्त्यः कुर्यादीनाहुर्दशभिः । हे कुररि यस्य विरहेण त्वं विलपसि, वीतनिद्रा गतनिद्रा सती स तु त्वयि प्रेमशून्य ईश्वरोऽस्माकं पतिः स्वपिति, अतस्त्वद्विलापं न शृणोति अत एव त्वद्विलापश्रवणोत्था कृपाप्यस्य न सम्भवेत् यतस्त्वत्संगं कुर्यात् । किं युष्माभिः सह स्वपिति, नहिनहि गुप्तबोधः अस्माभिरज्ञाततत्त्व एव जगत्यस्मिन्कापि रात्र्यां तदन्वेषणविरोधिन्यां शेते, अतस्त्वं वा किं करिष्यसि वयं वा किं कुर्म इति भावः । शिवशिव त्वं पक्षिजातिरपि हे सखि सादृश्यात्सख्यं वयमिव गाढनिर्विण्णचेता अभूः, अवश्यमेव मे तत्संगो भवत्विति निर्बन्धं त्यक्तुमपि न शक्नोषीति भावः । निर्बंधे हेतुः–नलिनेति । तवोच्चैर्विलापोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेत्रे निमीलयसि नक्तमदृष्टबंधुस्त्वं रोरवीषि करुणं बत चक्रवाकि॥दास्यं गता वयमिवाच्युतपादजुष्टां किं वा स्रजं स्पृहयसे कबरेण वोढुम् ॥१६॥ भोभोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोधिगतप्रजागरः ॥ किंवा मुकुंदापहृतात्मलांछनः प्राप्तां दशां त्वं च गतो दुरत्ययाम् ॥ १७ ॥ त्वं यक्ष्मणा बलवताऽसि गृहीत इंदो क्षीणस्तमो न निजदीधितिभिः क्षिणोषि ॥ कच्चिन्मुकुंदगदितानि यथा वयं त्वं विस्मृत्य भोः स्थगितगीरुपलक्ष्यसे नः ॥ १८ ॥

नक्तं रात्रावदृष्टबंधुः सती रोरवीषि । किंवा नैतावदपि तु वयमिव स्पृहयसे ॥१६॥ अलब्धनिद्रः सदा निष्टनसे क्रोशसि । किं वा अस्माभिः प्राप्तां दशां त्वमपि गतोऽसि अहो कष्टं यथा वयं संभोगेन मुकुंदापहृतकुचकुंकुमादिलांछनास्तथा त्वमपि । यतोऽपहृतश्रीकौस्तुभादिलांछनो लक्ष्यसे ॥ १७ ॥ मुकुंदगदितानि रहस्यानि विस्मृत्य

यमस्माकमपि साचिव्याय स्यादिति भावः ॥ १५ ॥ एतावत् बन्धुवियोगमात्रमेवस्पृहयसे इच्छसि । कबरेण केशविन्यासेन ॥ * ॥ तस्या अप्याधिकमार्तनादं चक्रवाक्याः श्रुत्वा तथैवाहुः—नेत्रे इति । बन्धुः प्रियतमः । करुणं यथा स्यात्तथा रोरवीषि भृशमार्तनादं तनोषि । बत खेदे । अस्मत्समैव त्वमपीति भावः । अहो बतेदृश आर्तनादः स्वपत्यदर्शनमात्रेण न स्यात् किं तु श्रीभगवति भावविशेषेणैवेति । पक्षान्तरमाहुः—दास्यमिति। वयमिव दास्यं गता दासी सती अच्युतस्य सदा सर्वगुणरूपादिपरिपूर्णस्य भगवतः पादाभ्यां जुष्टामुपभुक्तां चरणोपधानीकृतां वोढुं स्पृहयसे स्पृहयसि,भावविशेषेण परम्परयाऽपि तच्चरणस्पर्शं कामयस इत्यर्थः । पादशब्दोऽत्र पातिव्रत्योचितभक्त्या । श्रीभगवत्स्पृष्टतामात्रे तु तात्पर्यम् । यद्वा—वयमिव दास्यं गता सती तां तथा वोढुं स्पृहयसीति कान्ता भूत्वा तदुचितसौभाग्यमिच्छसीत्यर्थः । स्पष्टानुक्तिस्तु शालीन्यात् । यथोक्तं यज्ञपत्नीभिः—'प्राप्ता वयं तुलसिदाम पदावसृष्टं कैशैर्निवोढुम्' इति ॥ १६ ॥ निष्टनसे 'ष्टन—शब्दे' निपूर्वः । दुरत्ययां दुर्लंध्याम् ॥ * ॥ तस्या अप्यधिकतरमाक्रोशन्तं समुद्रं तथैवाहुः—भो इति । 'समुद्रः सरसामहम्' इति भगवद्विभूतित्वेन सादरं सम्बोधनम् । वीप्सा अतिखेदात् । अलब्धनिद्रत्वादेवाधिगतोऽधिकं प्राप्तः प्रकृष्टो जागरो येन तथाभूतः सन् किं निष्टनसे, अस्माकं केनापि दुःखेन भवतु नाम तत्तत्, भवतः तद्विनापि कथमिति भावः । क्षणं विमृश्याहुः—किं वेति । मुकुन्देनापि सर्वदुःखविमोचकेनाप्यपहृतमात्मलाञ्छनं स्वभावस्थैर्यगाम्भीर्यादिरूपं लक्षणं यस्य तथाभूतः सन् तत्र अस्मद्विधवत् त्वमपि दुरत्ययामनतिक्रम्यां दशां तदप्राप्तिदुरवस्थां गतोऽसि हा कष्टमिति भावः ॥*॥ **विश्वनाथस्तु**—भो उदन्वन् गाम्भीर्यं परित्यज्यातितरललोक इव निष्टनसे शब्दायसे निर्निद्रः सन्नुच्चैः फूत्कृत्य रोदिषि अत्र कारणं वद । अथवा अलं कारणकथनेन ज्ञातमस्माभिरित्याहुः—किं येति । यथा सम्भोगमिषेणापहृतास्मत्कुंकुमहारमालाकः स चोरः तथैव त्वमपि तेनैवापहृतश्रीकौस्तुभादिलाञ्छनः ॥ १७ ॥ यक्ष्मणा क्षयरोगेण "यक्ष्मा तु क्षयरोगे स्याद्ग्रहे च बालवृद्धयोः" इति नाममाला । दीधितिः घृणिः । तदेकचिन्तया मुकुन्दैकचिन्तया स्थगिताऽऽच्छादिता गीर्यस्य स तथा । 'स्थगे—आच्छादने' ततः क्ते स्थगितेति सिद्धेः । नोऽस्माभिः । तथैवास्मत्तुल्य एव ॥ * ॥ नन्वहो यद्यप्येते तिर्यगाद्याः समुद्रान्तास्तद्भावादुत्तरोत्तराधिक्येन क्रोशन्ति तर्ह्येवं सर्वसद्गुणचन्द्रमाः कथं मौनी वर्तते ज्ञातं चेदमपीति भंगीपूर्वकमाहुः—भो इन्दो त्वं बलवता सुधामूर्तेरपि पराभवात् प्रशस्तबलेन यक्ष्मणा निगृहीतोसि, यतः क्षीणो हीनः सन् निजा यावत्यो दीधितयस्ताभिः पूर्णिमायामपि तमो न क्षिणोषि सूर्यवत्क्षयं प्रापयितुं न शक्नोषि, यथा वयं मुकुन्दविरहेण क्षीणा निजदुःखहरणेऽप्यसमर्थास्तथा त्वमपीत्यहो त्वय्यधिककष्टमेवेति भावः । क्षणं परामृश्यैवाहुः—काच्चिदिति । किं वा मुकुन्दस्य गदितानि विश्लेषारम्भे समयबन्धादीनि विस्मृत्य तद्विरहप्रागल्भ्येनापस्मृत्य तदनिश्चयेनैव क्षीणः संस्तमो न क्षिणोषि, यतो वयमिव त्वं स्थगितगीश्च नोऽस्माभिरुपलक्ष्यसे कुर्यादिवदाक्रोशनादेतत्प्रश्नेऽप्युत्तरादानादिति भावः । वयमपि तद्विश्लेषात्तथा तद्वचनविस्मरणोत्थानुतापात्स्थमितागिरो विशीर्याम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं वाचरितमस्माभिर्मलयानिल तेऽप्रियम् ॥ गोविंदापांगनिर्भिन्ने हृदीरयसि नः स्मरम् ॥१९॥ मेघ श्रीमंस्त्वमसि दयितो यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवान्ध्यायति प्रेमबद्धः ॥ अत्युत्कंठः शबलहृदयोऽस्मद्विधो बाष्पधाराः स्मृत्वास्मृत्वा विसृजसि मुहुर्दुःखदस्तत्प्रसंगः ॥ २० ॥

तदेकचिंतया कच्चित्त्वं क्षीणोऽसि वयमिव स्थगितगीस्तनुवाक् । हे इंदो नस्तथैवोपलक्ष्यसे ॥ १८ ॥ अप्रियाचरणं विना स्मरोदीरणेन व्यथाजननं मलयानिल तवानुचित मित्यर्थः ॥ १९ ॥ मेघेति । आतपार्तिहरणादिसाम्यात्त्वं यादवेंद्रस्य नूनं दयितः सखाऽसि अतो भवांस्तं ध्यायति । ध्याने लिंगान्याहुः । अत्युत्कंठइत्यादि । अहो किमिति

इति भावः ॥ १८ ॥ इत्यर्थ इति—कृष्णकटाक्षपातेषु निर्भिन्नचेतसामार्तानामस्माकमकृतत्वदपराधानां पुनरन्यत्कामव्यथोत्पादनं न योग्यमिति भावः ॥ * ॥ रात्रिशेषे मृदु वहन्तं स्मरोद्दीपनं मलयवातं स्तुतिव्याजेन निन्दन्त्य आहुः—किं वेति । तत्र स्तुतिर्यथा—हे मलयानिल मलयस्य परमार्थतः श्रीमदगस्त्यादिनिवासस्य व्यवहारतश्चन्दनाकरस्यानिल ते तव अप्रियमस्माभिर्नु अहो किमाचरितं यतो गोविन्दस्य भारहरणाय पृथिव्याम वतीर्णस्य परमवीरस्येत्यर्थः । तस्यापाङ्गेन निर्भेदकत्वाद्बाणरूपेण निःशेषेण भिन्ने हृदि जीवाधारकोशे स्मरं स्मृतिं चैतन्यमीरयासि पुनः प्रवेशयासि । यद्वा—स्मरं काममीरयसि किमुत चैतन्यमिति भावः । यद्वा—अनिलेन त्वयेरणान्निजानुभवाच्च स्मरस्य वह्नित्वमवगम्यते । ततस्तान्निर्भिन्नत्वान्मृतकत्वं प्राप्ते हृदि यदन्तिमक्रियोचितं तद्रूपं वह्निमीरयसि ददासि तस्माल्किं वाऽऽचरितमित्यादि । अथ निन्दा यथा—हे तादृश अस्माभिरेव तवाप्रियं किमाचारितं तद्वदेत्यर्थः । नु वितर्के । विचारेणापि नास्मद्बुद्धिगोचरं तदित्यर्थः । कथं तदाह—तादृशगोविन्दापांगनिर्भिन्नेऽप्यस्माकं तादृशे हृदि तादृशं स्मरमीरयसि तत्तु विनाप्यप्रियाचरणमन्यहतस्य तत्रापि म्रियमाणस्य दाहनं तादृशस्य तव नोचितम्, तथा क्षणविलम्बासहत्वात्परमचापल्यं चेति भावः । यद्वा—तादृशेऽपि हृदि स्मरं काममीरयसि अहो तव मूर्खत्वं वृथा विडम्बनकर्तृत्वं चेति भावः ॥ १९ ॥ किञ्च—मेघ जलसेक्तृत्वेन सर्वतापापनोदक श्रीमन् विद्युद्युक्तत्वात् अतः सखित्वात् । तं यादवेन्द्रम् । लिंगानि ज्ञापकानि । अत्युत्कण्ठस्तद्द्रष्टुमतीवेच्छावान् । शबलहृदयो विह्वलः । यथा वयं ध्यायामस्तथा भवानप्यस्मद्विधोऽस्मत्तुल्य एवार्तः । बाष्पधारा अश्रुप्रवाहान् । तत्प्रसंगः श्रीकृष्णप्रसंगः । वस्तुतस्तु त्वं प्रेमभक्तोऽसि प्रह्लादादिवत्तद्धर्माणाम् 'वाग्गद्गदा द्रवते यस्य चित्तम्' इत्यादीनां त्वयि दर्शनात् । तथा च श्रीकृष्णसंगः दुःखानां सांसारिकतापानां दरछेदक एवात एव सर्वस्वत्यागपुरःसरं तद्यशःश्रवणमात्रेण महान्तोऽरण्यमाप्य तद्ध्यायन्तस्तामिताः । तदुक्तम्—"कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनम् । सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः ॥" इति ॥ * ॥ अथ समुद्रान्तिके वर्षन्तं मेघं श्रीभगवद्विरहार्त्या रुदन्तं मत्वा तत्सारूप्यदर्शनजातेनाकृत्रिमसौहृद्येनाहुः—मेघेति । नूनं वितर्के, इति सर्वत्र वाक्ये योज्यम् । हे मेघ त्वं यादवेन्द्रस्य नूनं दयितोऽसि प्रियसखोऽसि, यतः हे श्रीमन् प्राप्ततत्सारूप्यलक्ष्मीक । ततः किं तत्राहुः—प्राप्तसारूप्यादपि भवद्विधाद्विलक्षणलक्ष्मीकममुं भवान्नूनं ध्यायति । ननु, प्राप्ते पर्यन्तफले फलस्य वा न्यूनत्वे किं तद्ध्यानेन तत्राहुः—प्रेमबद्ध इति । तच्छ्रीमूर्तेस्तथा स्वभावो यथा तत्र प्रेमैव जायते नौदासीन्यं न चेर्ष्येति भावः । तत्रोभयत्र दृष्टान्तः—वयमिवेति । यस्मादेवं प्रेमबद्धस्तस्मान्नूनमत्युत्कण्ठस्तेन निर्वेदादिनानाभावशबलचित्तोऽप्यसि । तत्रापि हेतुः—अस्मद्विध इति । प्रेमबद्धतासादृश्यात्स्वानुभावेन ज्ञायस इत्यर्थः । यद्वा—अत्युत्कण्ठत्वेन लक्षणं शबलहृदयः शबलं वैवर्ण्येन नानावर्णं हृदयं मध्यभागो यस्य तथाभूतोऽसीति । तच्च युक्तमित्याहुः—अस्मद्विध इति । अहो नूनमत एव त्वं स्मृत्वास्मृत्वा वृष्टिरूपा बाष्पधारा मुहुः सृजासि सर्वत्र विकिरासि । युक्तं च तत्तदित्याहुः—दुःखद इति । प्रसंग आसक्तिः प्रस्तावमात्रं वा ॥*॥ **विश्वनाथोऽपि**—दयितः सखा त्वमसि प्रेमबद्धः प्रेम्णा प्राप्तबन्धनः संस्तं ध्यायसि । श्रीवत्साङ्कमिति—वर्णेन साम्येऽपि तस्य श्रीवत्सांकोऽधिक इति तत्रासक्तिकारणमवगतमिति भावः । शबलहृदयः विशदमलिनचेता वृष्टिमिषेण रोदिषि । अहो किमिति तत्रासक्तिः कृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रियरावपदानि भाषसे मृतसंजीविकयाऽनया गिरा ॥ करवाणि किमद्य ते प्रियं वद मे वल्गितकंठ कोकिल ॥ २१ ॥ न चलसि न वदस्युदारबुद्धे क्षितिधर चिंतयसे महांतमर्थम् ॥ अपि बत वसुदेवनंदनांघ्रिं वयमिव कामयसे स्तनैर्विधर्तुम् ॥ २२ ॥ शुष्यद्ध्रदाः करशिता बत सिंधुपत्न्यः संप्रत्यपास्तकमलश्रिय इष्टभर्तुः ॥ यद्वद्वयं यदुपतेः प्रणयावलोकमप्राप्य मुष्टहृदयाः पुरुकार्शिताः स्म ॥ २३ ॥

त्वया तेन सख्यं कृतं यतो दुःखदस्तत्प्रसंग इति ॥ २० ॥ हे कोकिल मे प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दांस्त्वं भाषसे । मृतान्संजीवयतीति तथा तयाऽनया कोमलया गिरा वल्गितकंठः रमणीयकंठः मे कथय किं तव प्रियं करवाणीति ॥२१॥ हे क्षितिधर त्वं न वदसि न चलसि अतो नूनं महांतमर्थं चिंतयसे । बत तर्हि अपि किं यथा स्तनैर्विधर्तुं वयं कामयामहे तथा त्वं स्तनतुल्यैः शृंगैर्वोढुं कामयसे । ओमिति चेत्तर्हि तवाप्यस्मदवस्था भविष्यतीति भावः ॥ २२ ॥ भोः सिंधुपत्न्यो नद्यः संप्रति ग्रीष्मे सिंधुर्मेघद्वारा अमृतवृष्ट्या युष्मान्नानंदयति । बत अहो कष्टम् । अतः शुष्यंतो ह्रदा यासां ताः अपगतकमलशोभाः कृशाश्च वयं यथा प्रियतमस्य

यतस्तत्प्रसंगोऽपि दुःखद एव ॥ २० ॥ प्रियं रौति वदतीति प्रियरावस्तस्य । 'वल्गितं प्लुतरम्ययोः' इति ॥ * ॥ रात्र्यवसाने कूजन्तं कोकिलं पूर्ववत्स्तुतिनिन्दाभ्यामाहुः । तत्र स्तुतिः—हे कोकिल पञ्चमगानप्रसिद्ध । तत्रापि वल्गितः प्रियेणैव शिक्षाविशेषाद्वल्गूकृतः कण्ठो यस्य । हे तथाविध प्रियस्य राव इव रावः पञ्चमस्वरो यत्र तादृशानि पदानि गीतनिबद्धानि भाषसे । यद्वा—प्रियस्य रावः शिक्षावचनं येषु तादृशानि दूत्यानुरूपाञ्छब्दान्भाषसे, ततस्तन्नैकट्यबोधनेन तद्विरहमृतान् सम्यग्जीवयतीति तया गिरा हेतुना किं प्रियं तन्मे मह्यं वद कृपया ज्ञापय । अत्रैकवचनं प्रत्येकमपि तत्क्षमताविवक्षया पृथगुक्तेः । अथ निन्दा—हे चञ्चलकण्ठ कोकिल मृतसञ्जीविकया तया गिरा हेतुना प्रियस्य रावः शिक्षा यत्र तादृशानि पदानि भाषसे मया तद्विरहासहिष्णुत्वाज्जीवनान्मरणमेव वरं मन्यते तत्तु स इव त्वमप्यापाततोऽमृतायमानवचनेन मध्येमध्ये विघातयन्दुःखद एवासीति भावः । तस्मात्तवाप्रियं तुण्डत्रोटनादिकमत्रापराधे किं करवाणि त्वमेव वदस्व दण्डविशेषं स्वयमेवानुमन्यस्व अन्यथाऽपराधक्षयो न भवेदिति भावः ॥*॥ अत्र **विश्वनाथः**—हे प्रियराव कोकिल अनया गिरा पदानि अस्मद्विरहदुःखदान्येव भाषसे "पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु" इत्यमरः । वल्गितः वल्गूकृतः कण्ठो येन, हे तादृश । अत्र विरहे कोकिलशब्दस्य दुःखदत्वात् प्रियरावेत्याद्याः सर्वा एव विपरीतलक्षणया वक्रोक्तय एव, तेन स्वशब्देन मां ज्वालयतस्तव किं प्रियं करवाणि तुण्डमेव धक्ष्यामीति भावः ॥ २१ ॥ स्तनतुल्यैस्तीक्ष्णाग्रैः । ओमिति चेत्सत्यं तं धर्तुमिच्छामीति यदि वदसि । इति भाव इति—यथा वयं निरस्तसमस्तैहिकामुष्मिकाः सत्यस्तदेकतानास्तथा त्वमपि कृतार्थो भविष्यसीत्याशयः ॥ * ॥ महास्थिररात्रौ प्रायः शयितसर्वजनत्वात्तूष्णीं स्थितं चारुणोदये श्रीरैवत दृष्ट्वाहुः—नेति । हे क्षितिधर यद्यपि पञ्चाशत्कोटियोजनविस्तीर्णां पृथ्वीं धरसि तथापि न चलसि, न वदसि, तस्मादेव हे उदारबुद्धे महाचित्त । तदेव दर्शयन्ति—कमपि महान्तमर्थं चिन्तयसि कामयसे । तत्रापि सशंकमाहुः । अपि प्रश्ने । बत खेदे । स च महार्थो मतभेदान्नानाविध इति । तत्र देवस्यास्मत्पूज्यस्य श्वशुरस्य यो नन्दनः प्रधानपुत्रोऽस्मत्पतिरित्यर्थः । आर्यपुत्र इतिवत् स्पष्टतयाऽनुक्तिर्लज्जया । तस्य वसु परमधनरूपमंघ्रिं स्तनैर्विधर्तुं किं कामयसे, यदि कामयसे तदाऽस्माकमिव बुद्धिहीनत्वं स्वत्राणमात्रेऽपि धारणासामर्थ्यं भविष्यतीत्यर्थः । स्तनानां बहुत्वनिर्देशस्तु तस्य लोभातिशयं द्योतयाति । अत्र वसुदेवपदयोर्भिन्नक्रमतया प्रयुक्तयोरप्येकत्र सम्पातेन श्वशुरनामोच्चारणप्रमाद उन्मादोक्त्या न दोषायेति भावः । टीकायां न वदति न चलतीति व्युत्क्रमनिर्देशः प्रायो लेखकभ्रमादिति ॥ २२ ॥ कृशानि तटानि कूलानि यासां ताः । क्वचित् 'करशिता' इति पाठे तु गुणादेशस्त्वार्ष एव । अत आनन्दाभावात् । शुष्यत्तोया विगतजला ह्रदाः स्नानाद्यर्थं जनावतरणस्थानानि । मधुपतेर्यदुपतेः मुष्टहृदयाः हृतचेतसः । पुरु अधिकम् " पुरुः पुरोगे प्रचुरे स्वर्लोकनृपभेदयोः "

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंस स्वागतमास्यतां पिब पयो ब्रूह्यंग शौरेः कथां दूतं त्वां नु विदाम कच्चिदजितः स्वस्त्यास्त उक्तं पुरा ॥ किं वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं क्षौद्रालापय कामदं श्रियमृते सैवैकनिष्ठा स्त्रियाम् ॥ २४ ॥ इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे ॥ क्रियमाणेन माधव्यो लेभिरे परमां गतिम् ॥ २५ ॥

भर्तुर्यदुपतेः स्म प्रसिद्धम् ॥ २३ ॥ तदैव दैवादागतं हंसं दूतं कल्पयित्वाऽऽहुः । हंसेति । नोऽस्मान्प्रति पुरा रहस्युक्तं किं वा चलसौहृदः स्मरति । स्मृत्वैव मां प्रस्थापितवानिति चेदत आहुः । हे क्षौद्र क्षुद्रस्य दूत कस्मात्तं वयं भजामः । कामार्थमाह्वयति युष्मानिति चेदत आहुः । अहो तर्हि तमालापयाकारय । ओमिति गच्छंतमिव तं पुनराहुः । याऽस्मान्वंचयित्वा एकाकिनी सेवते तां श्रियमृते तमेवालापय । सा तदेकनिष्ठा कथं परिहर्तुं शक्यत इति चेदत आहुः । स्त्रियां जातावेकवचनम् । अस्मासु स्त्रीषु मध्ये किं सैवैकनिष्ठा न तु वयमित्यर्थः । पाठांतरे तु क्षौद्रं मधु तद्वन्मधुरालापमात्रं यस्य तमकामदमरतिप्रदं श्रियमृते वयं कस्माद्भजामः । किं त्वनादृताऽपि सती पुनःपुनः

इति हैमः ॥ * ॥ अथ निदाघक्षुद्रा नदीर्दूरतो दृष्ट्वा ताश्च मूर्छिता मत्वा पूर्ववत्सम्बोध्याहुः—सिन्धोरपि पत्न्य एताः सम्प्रति बताहो अपेतकमलमिव मुखश्रियो जाताः तथा कर्शिताश्च तथा शुष्यन्तो ह्रदास्तद्रूपहृदयानि यासां तथाभूताश्च जाताः, किं कृत्वा इष्टभर्ता च यः सिन्धुस्तस्य प्रणयावलोकं विरहात्मना निदाघेनैव विच्छेदं प्राप्य तदहो अस्मत्सादृश्यमेता अपि गता इति म्लानमुखमाहुः—यद्वद्वयमिति पुरुकर्शिता इति । पुरुशब्देनापेतमुखश्रीत्वमप्यन्तर्भावितम् ॥ २३ ॥ स्वागतं सुष्ठ्वागमनं जातम्, आस्यतामुपविश्यताम् । पयः क्षीरम् । चलसौहृदः क्षणिकमैत्रीकः । युष्माकमाज्ञा केति शेषः । यद्वा—युष्मास्वाज्ञा युष्मदाज्ञेति इहापि तस्येति, पदशेषेणैव शोभनं भातीति । अतोऽत्राहुः—तं शौरिम् । इत्यर्थ इति—वयमपि तदेकनिष्ठा एवेति । तस्येहागमनमुचितमेव भक्तवात्सल्यादिति भावः । पाठान्तरे 'क्षौद्रालापमकामदम्' इति पाठे तु क्षुद्रा मधुमक्षिकास्ताभिर्निष्पादितं क्षौद्रम् ॥ * ॥ प्रातरागतं कमपि हंसं दूतं प्रकल्प्याहुः—हंसेति । सदवसरे यत्स्वयमागतस्तच्छोभनमित्यर्थः । ततश्चास्यतामुपविश्यताम् । पयः क्षीरं पिब । एवमातिथ्येन सम्भाव्य प्रार्थयन्ते—ब्रूहीति । अङ्गेति । अस्माकमंगतुल्य हे परमात्मीयेत्यर्थः । शौरेः शूरस्य वंशे केनापि सर्वेषां भाग्येन जातस्यास्मद्भर्तुः कथां समुदाचारं ब्रूहि । तच्च युक्तमेवेत्याहुः—नु निश्चितं त्वा त्वां दूतं विदामः विद्मः । तत्रादौ कुशलं पृच्छन्ति—कच्चिदिति । स्वस्ति सुखम् । अजितः प्रेम्णा न केनचिदपि वशीकृत इत्यर्थः । इत्यन्तरीर्ष्याभिव्यक्तिः । ननु, देव्यो भवतीनां विरहेणासौ कथं सुखमास्तामिति चेत्तर्हि, पुरा पूर्वमनुनयादिना च प्रयुक्तं किं वा स्मरति । किञ्चेत्येकपदमेव वा, सभ्रूभंगप्रश्ने किं वेत्यादिवत् । यद्वा—पुरोक्तम् , नोऽस्मान्वा स्मरति । ननु, तदेकसेवापरा युष्मान्कृतज्ञोऽसौ स्मरत्येवेति चेत्तत्र न विश्वसिम इत्याहुः—चलसौहृदोऽस्थिरप्रेमेति । ननु, तत्तत्प्रियतमाः स्थिरसौहृदोऽसौ युष्मान्किल कामयते तत्रासहमानमाहुः—तमिति । ननु, त्वद्विरहार्तैः कामदोऽसौ भजनीय एवेति चेत्तर्हि, तमत्रैवालापय । अत्र तद्धितान्तत्वेनान्यथाप्राप्तत्वात् , न साक्षाच्छ्वशुरपितुर्नामग्रहणं शङ्क्यम् । टीकायामेकनिष्ठेति—एकस्मिन्नेव निष्ठा दृढा स्थिरता यस्याः सेति काकूक्तिः । युष्मदाज्ञेति—अत्र यथा युष्माकमाज्ञा स्यादित्यर्थः । यद्वा—युष्मान् इति लेखो लेखकभ्रम इति ॥ * ॥ **विश्वनाथस्तु**—हंसेति । ननु भवतीर्विना स कथं स्वस्त्यास्तामिति चेत्—उक्तं पुरेति । 'न त्वादृशीं प्रणयिनीं गृहिणीं गृहेषु पश्यामि' इत्यादि स्वप्रेमवाक्यं स्मरति । ननु, स्मृत्वैव मां प्रस्थापितवानतस्तदन्तिकं चलत तं भजतेति तत्राहुः—कस्मादिति । स चेदस्मान्न भजते नाप्यागच्छति तर्हि वयं कस्माद्भजामः कस्माद्वा यामः । भोः करुणासिन्धवस्तर्हि कामपीडितस्य कथं निस्तारस्तत्राहुः—हे क्षौद्र क्षुद्रस्य दूत आलापय अत्रैव तं कामदं कामपीडितमपि दर्शनमात्रेणैव कामपीडाप्रदमाकारय स एवास्मानायातु न तु गर्ववत्यो वयं तं याम इति भावः । तमिति—गच्छन्तं तं मत्वा पुनराहुः—या ह्यस्मान्वञ्चयित्वैकाकिनी रमते तां श्रियमृते तमेव केवलमाकारय । ननु, सा तदेकनिष्ठा कथं परिहर्तुं शक्याऽत आहुः—स्त्रियामिति । जातावेकत्वम् । स्त्रीष्वस्मासु मध्ये सैवैकनिष्ठा न तु वयमित्यर्थः । अन्यत्तैः ॥ २४ ॥ इति इत्थम् । भावेन प्रेम्णा । माधव्यो माधवभार्याः । अतीवप्रेमवशविवशानां क्षणिकवियोगेऽपि चित्तविभ्रमो भवत्येवेति भावः ॥ * ॥ इत्थं भणितम् । तादृश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः ॥ उरुगायोरुगीतो वा पश्यंतीनां कुतः पुनः ॥ २६ ॥ याः संपर्यचरन्प्रेम्णा पादसंवाहनादिभिः ॥
जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥ २७ ॥ एवं वेदोदितं धर्ममनुतिष्ठन्सतां गतिः ॥ गृहं धर्मार्थकामानां मुहुश्चादर्शयत्पदम् ॥ २८ ॥
आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनाम् ॥ आसन्षोडशसाहस्रं महिष्योऽष्टशताधिकम् ॥ २९ ॥

सैव भजतु यतोऽस्मादृश्यो मानिन्यः स्त्रिय एकनिष्ठा एकत्रैव स्वसंमानसिद्धौ निष्ठा यासामिति ॥ २४ ॥ २५ ॥ तासां कृष्णे एवंभूतो भावो नातिचित्रमित्याह । श्रुतमात्रोऽपीति । उरुभिर्गायैर्गीतैः उरुधा गीतो वा यैः कैश्चिदपि गीतैः कथाभिः कथंचिदपि गीतो वेत्यर्थः ॥ २६ ॥ २७ ॥ पदं स्थानम् ॥ २८ ॥ २९ ॥

प्रेमवतीनां तासां माहात्म्यमाह—इतीति । अनेनोक्तरीतिकेनेदृशेनान्यत्राविद्यमानेन । कृष्णे स्वयं भगवति अत एव योगेश्वरेश्वरे परमदुर्लभ इत्यर्थः । क्रियमाणेन सदा विधीयमानेनेति तस्मिंस्तासामतृप्तिर्भावानिवृत्तिश्च सूचिता । माधव्यः मधुवंशोद्भवस्य तस्य पत्न्यः । विष्णुः स्वयं भगवत्त्वात्सर्वव्यापकः श्रीकृष्ण एव तदीयां गतिं दशां लेभिरे । यादृश एवासौ साक्षात्ता अपि तादृश्य एव भवेयुरित्यर्थः । यद्वा—स यथा सर्वव्यापकस्तथा ता अपि तस्य व्यापका जाता इत्यर्थः । ‘ परमाम् ’ इति पाठे त्वप्रकटरूपामलौकिकीमित्यर्थः । शाणप्रयोगेण व्यवधानावगत्या । कासांचिदर्जुनपराजयानन्तरगत्यन्तरं तु मायिकमात्रमित्यभ्युपगतं तच्च युक्तम्, विवाहप्रसंगे तासां तत्स्वरूपशक्तित्वेन दर्शितत्वात् ॥ * ॥ **विश्वनाथस्तु**—तासामेतादृशश्रीकृष्णविषयकभाववतीनां किं प्राप्यं वस्तु इत्यपेक्षायामाह—इतीति । वैष्णवीं वैष्णवप्राप्यां प्रेमभक्तिमेव तासामप्राकृतीनां भगवन्नित्यप्रेयसीनां सच्चिदानन्दवपुषां ब्रह्मरसास्वादाधिकभगवन्माधुर्यास्वादवतीनां पुनर्मोक्षादिफलप्राप्त्यसम्भवात्प्रेमाधिक्यमेवेत्यर्थः । यद्वा—वैष्णवीं विष्णोस्तस्यैव कृष्णस्य भावोन्मादप्रौढिम्ना :तादात्म्यमयीं गतिं रासान्तर्द्धाने व्रजसुन्दर्यो नानाप्रश्नाद्यनन्तरमुन्मादस्य प्रौढिम्ना यथा—‘ कृष्णोऽहं पश्यत गतिम् ’ इति कृष्णतादात्म्यमयीं गतिं लेभिरे तथैवैता अपि कुर्यादिप्रश्नानन्तरं तामेवेत्यर्थः । प्रेमवैचित्त्यादि कृष्णतादात्म्यादिदशा अनुरागविलासा एव । पट्टमहिषीणामनुरागपर्यन्ता दशाः श्रीमदुज्ज्वलनीलमणौ व्याख्याता एव ॥ २५ ॥ एवंभूतश्चित्तविभ्रमकरः । भावः प्रेमा । उरुभिरनन्तैः । उरुधाऽनेकधा । इत्यर्थ इति—येन केनचित् संस्कृतेन प्राकृतेन वा गीतेन गीतोऽपि श्रीकृष्णश्चेचेतआकर्षणं करोति, तदा किमु वक्तव्यं पश्यतां चेतआकर्षणं वृत्तमिति कैमुत्यमुक्तम् ॥ * ॥ तत्र तस्यापि तादात्म्यमाह—श्रुतमात्र इति । यः स्त्रीणां मन आकर्षति गीतैः प्रबन्धैरुरु यथा स्यात्तथा गीतस्तद्विषयीकृतो वा किं पुनस्तत्र साक्षात्पश्यन्तीनां तु किं पुनर्वक्तव्यमित्यर्थः । ‘ कुतः पुनः ’ इति पाठेऽपि स एवार्थः । अतस्तत्पत्नीनां स्वाभाविकमहाप्रेमवतीनां सदा तेन सह विचरन्तीनां तासां तादृश एव भावो युक्तः क्वचिदन्यथा श्रवणं तु मुनीनामपि मोहायैव । ‘ इत्यंगोपदिशन्त्येके ’ इत्यादेः ॥ २६ ॥ या रुक्मिण्याद्याः । किंशब्दस्तपोमहत्त्वं वक्ति ॥ * ॥ अतस्ता एव धन्या न त्वन्ये केचनेति । भावविशेषोदयानाह—या इति । याः काश्चिदन्या अपि भर्तृबुद्ध्या भावनामात्रगम्यत्वेनापि भर्तृत्वेन न तु साक्षाद्भर्तृत्वेन यः प्रेमा तेन यानि पादसंवाहनादीनि मानसरूपाणि तैर्जगद्गुरुं परमपुरुषोत्तमं सम्यक् तदेकनिष्ठतया पर्यचरन्नसेवन्तेत्यर्थः । तासां तपस्तदुपासनाभाग्यं किं वर्ण्यतेऽपि तु वर्णयितुं न शक्यत इत्यर्थः । साक्षाद्भर्तृत्वेन नित्यमेव तथा सेवमानानां तासां वार्ता दूरत एवेति भावः ॥ २७ ॥ गृहं गृहस्थम् । पदं स्थानम् ॥ * ॥ तदेवं तस्य क्रीडात्वेनैव स्फुटं प्रतीयमानं चरितं वर्णयित्वा तादृशत्वमेव वैधकर्मण्यतिदिशन्सर्वेषामपि शर्मदत्वमाह—एवं सतां गतिस्तत्क्रीडैकपरभक्तानां गतिः सन्वेदोदितं धर्मं यज्ञादिकं च मुहुरनुतिष्ठन्गृहं खलु धर्मार्थकामानां पदमित्यप्यदर्शयत् अन्येभ्य उपादिशत् “ यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ” इत्यादिश्रीमुखोक्तेः । यतः सतां तत्क्रीडैकजीविनां धर्मादिपराणाञ्च गतिराश्रयः ॥ २८ ॥ परम् अतिथिपूजनादिनोत्कृष्टम् ॥ * ॥ तथा तादृशगार्हस्थ्यांगभूतानां श्रीभगवत्पुत्रादीनां सर्वेषां यादवानामपि माहात्म्यमुक्तानुवादपूर्वकं

१ ‘ वैष्णवीं गतिम् ’ इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः ॥ रुक्मिणीप्रमुखा राजंस्तत्पुत्राश्चानुपूर्व्यशः ॥ ३० ॥ एकैकस्यां दशदश कृष्णोऽजीजनदात्मजान् ॥ यावत्य आत्मनो भार्या अमोघरतिरीश्वरः ॥ ३१ ॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥ आसन्नुदारयशसस्तेषां नामानि मे शृणु ॥ ३२ ॥ प्रद्युम्नश्चानिरुद्धश्च दीप्तिमान्भानुरेव च ॥ सांबो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ॥ ३३ ॥ पुष्करो वेदबाहुश्च श्रुतदेवः सुनंदनः ॥ चित्रबाहुर्विरूपश्च कविर्न्यग्रोध एव च ॥३४॥ एतेषामपि राजेंद्र तनुजानां मधुद्विषः ॥ प्रद्युम्न आसीत्प्रथमः पितृवद्रुक्मिणीसुतः ॥ ३५ ॥ स रुक्मिणो दुहितरमुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥ ३६ ॥ स चापि रुक्मिणः पौत्रीं दौहित्रो जगृहे ततः ॥ वज्रस्तस्याभवद्यस्तु मौसलादवशेषितः ॥३७॥ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः ॥ सुबाहोः शांतसेनोऽभूच्छतसेनस्तु तत्सुतः ॥३८॥ न ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥ ३९ ॥ यदुवंशप्रसूतानां पुंसां विख्यातकर्मणाम् ॥ संख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप ॥ ४० ॥

या रुक्मिणीप्रमुखा अष्टावुदाहृताः प्राक् ॥ ३० ॥ एवमष्टोत्तरशताधिकषोडशसहस्रमहिषीणां पुत्रा लक्षमेकमशीत्युत्तरैकषष्टिसहस्राणि च भवंति ॥ ३१ ॥ ३२ ॥ अनिरुद्धश्चेति । अतः पुत्राणां मध्ये सप्तदशैव महारथा ज्ञेयाः । अथवा अनिरुद्धनामाऽपि कश्चित्पुत्र एवेति ॥३३॥३४॥३५॥३६॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

वर्णयति—आस्थितस्येत्यादिना परममुत्कृष्टं प्रायः सर्वेषामप्याश्रमिणामाश्रयत्वात् । तदुक्तम्—“ भिक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः । तेप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै वरम् ॥ ” इति । यद्वा—परं मुख्यं मुख्यकल्पत्वेन कृतत्वात् । कृष्णस्याशेषैश्वर्यप्रकटनार्थमवतीर्णस्य स्वयं भगवतः । यद्वा—तद्धर्मानुष्ठानमाधुर्याणामपि सर्वचित्ताकर्षकस्य । तुशब्दो भेदे । महामहिष्यस्तावदष्टावासन्नेव षोडशसाहस्रं महिष्यश्च शताधिकं यथा स्यात्तथाऽऽसन् ॥ २९ ॥ तासां सर्वासां मध्ये तत्पुत्रा रुक्मिण्याद्यष्टमहिष्यात्मजाः ॥ * ॥ ० ॥ ३० ॥ तासां सर्वासां पुत्रसंख्यां निगमयति—एवमिति । अमोघरतिरिति सर्वासामवन्ध्यात्वमाह ॥ * ॥ अमोघरतिरव्यर्थसुरतवृत्तान्तः अव्यर्थसंकल्पः ॥ ३१ ॥ तेषामेकलक्षाशीत्युत्तरषष्टिसहस्राणां मध्ये तेषामष्टादशानाम् ॥ * ॥ ० ॥ ३२ ॥ यतोऽनिरुद्धोऽपि महारथत्वेनोक्तोऽतो हेतोः । एवं चाष्टादशमहारथा एतदादौ तेषामुद्दामेत्यादीनां पुत्राणां प्रकृतत्वात्तत्र पौत्रस्वीकारेणास्वारस्यं प्रतीयते तन्निवृत्त्यर्थमाह—अथ वेति ॥ * ॥ ० ॥ ३३ ॥ ० ॥ * ॥ ० ॥ ३४ ॥ एतेषामुक्तानुक्तानां मध्ये प्रथमः सर्वज्येष्ठः पितृवत्सर्वकर्मणीति ॥ * ॥ हे राजेन्द्रेति । राजकुले सर्वत्र प्रसिद्धया त्वं जानास्येवेति भावः । यद्वा—अल्पराज्ञां स्वकृत्याविष्टचेतस्त्वाच्छ्रीकृष्णलीलाश्रवणावकाशो न भवति तव तु त एव किंकरत्वात्सर्वं कुर्वन्त्यतः श्रीकृष्णलीलालब्धावकाशत्वात्त्वं राजेन्द्रोऽसीति भावः । “ बालक्रीडनकैश्चापि कृष्णलीलां य आददे ” इत्याद्युक्तेः ॥ ३५ ॥ स प्रद्युम्नः । तस्मात्प्रद्युम्नात् ॥ * ॥ महारथ इति । राजवर्गनिर्जयपूर्वकरुक्मवतीहरणात् नागायुतबलेनान्वित इति लोकलीलानुकरणरीत्यैवोक्तम् । वस्तुतस्त्वीश्वर एवेति ॥ ३६ ॥ स चाप्यनिरुद्धोऽपि । ततस्तदनन्तरम् । तस्यानिरुद्धस्य यो वज्रः । मौसलान्मुसलकृतादुपप्लवात् ॥ * ॥ न केवलं प्रद्युम्न एव मातुलेयीमुपयेमे किन्त्वनिरुद्धोऽपीति चापिशब्दार्थः । देहलीदीपकन्यायेन दौहित्रपौत्रीशब्दाभ्यामुभाभ्यामेव रुक्मिण इत्यन्वेति ॥ ३७ ॥ तस्माद्वज्रात् । तस्य च प्रतिबाहोः । तत्सुतः शान्तसेनसुतः ॥ * ॥ भद्रसेनस्य पुत्रादीनामनुक्तिः प्रायः साङ्कर्यादेवैशलोपारम्भात् । श्रुतसेनस्त्विति क्वचित्पाठः ॥ ३८ ॥ एतस्मिन्कुले श्रीकृष्णकुले ॥ * ॥ अस्मिन्भगवत्कुले शुद्धक्षत्रियमातृपितृपर्यन्तमधनादयो नासन्निति ज्ञेयम् ॥ ३९ ॥ ० ॥ * ॥ विख्यातकर्मणामपि संख्या न शक्यते कर्तुं किं पुनरन्येषामित्यर्थः । अत एव माथुरेषु प्रसिद्धिरियम् । बद्धमुकुटा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिस्रः कोटयः सहस्राणामष्टाशीतिशतानि च ॥ आसन्यदुकुलाचार्याः कुमाराणामिति श्रुतम्॥४१॥ संख्यानं यादवानां कः करिष्यति महात्मनाम्॥ यत्रायुतानामयुतलक्षेणास्ते स आहुकः॥४२॥देवासुराहवहता दैतेया ये सुदारुणाः॥ ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे॥४३॥तन्निग्रहाय हरिणा प्रोक्ता देवा यदोः कुले॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ॥ ४४ ॥ तेषां प्रमाणं भगवान्प्रभुत्वेनाभवद्धरिः ॥ ये चानुवर्तिनस्तस्य ववृधुः सर्वे यादवाः ॥४५॥ शय्यासनाटनालापक्रीडास्नानादिकर्मसु ॥ न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः ॥ ४६ ॥

सहस्राणामपरिमितानां कुमाराणामित्यन्वयः ॥ ४१ ॥ यदा प्रत्येकं बहूनध्यापयतामाचार्याणामियं संख्या तदपि श्रुतमात्रं न तु सम्यग् ज्ञायते तदा कुमाराणामेवं संख्यानं कर्तुं न शक्यते कुतः पुनः सर्वयादवानामिति ॥ ४२ ॥ ते चोत्पन्ना इति । प्रत्येकं बहुभी रूपैरिति ज्ञेयम् ॥ ४३ ॥ एवमेवं यदुकुलेऽपि देवा इति । तथा चोक्तम् "सहस्रशः समुद्भूता देवा यदुकुले पृथक्" इति ॥ ४४ ॥ ४५ ॥ ४६ ॥

राजान एव यादवाः षट्पञ्चाशत्कोटय इति ॥ ४० ॥ यदूनां संख्याया अभावेऽपि तद्बालाचार्याणां कामपि संख्यां श्रावयामीत्याह—तिस्र इति । यदुकुले सहस्राणामनन्तानां कुमाराणां तिस्रः कोट्योऽष्टाशीतिशतानि चाचार्या आसन्नित्यन्वयः । अत्र यदुकुले आचार्या इति च्छेदः यलोपस्यासिद्धत्वेऽपि सन्धिस्त्वार्षः । तीर्थस्तु—"आसन्यदुकुमाराणामाचार्या इति नः श्रुतम्" इति पाठमाह । इति श्रुतिरिति पाठे, इत्थं श्रूयत इत्यर्थः ॥ * ॥ संख्याऽशक्तौ हेतुमाह—तिस्र इति । एकम् एकम् सहस्रमेकैकस्याचार्यस्येत्याचार्यसंख्यैव । अस्य पद्यस्य योजना पूर्वमेवास्माभिरलेखि समञ्जसा ॥ ४१ ॥ यत्र येषां यदूनामयुतानामयुतलक्षेण पद्मपरिमितेन सैन्येन सदास्ते इति । आस्तां तावत्सर्वेषां संख्या नित्यराजसेवकानामपि सा किलाशक्येत्याह—संख्यानमिति । महात्मनां मुख्यानामपि । अयुतानामिति बहुत्वं कपिञ्जलाधिकरणन्यायेन त्रित्व विशिष्टायां संख्यायां पर्यवसायितम् । अयुतानामयुतलक्षेण बिंदुत्रयोदशयुक्तेनांकत्रयेण शंखत्रयेणेत्यर्थः । आसीदिति वक्तव्ये आस्त इति नित्यलीलास्फूर्त्योक्तम् । सा चाग्रे स्थापयिष्यते ॥ ४२ ॥ देवासुराहवे देवासुरसंग्रामे हता ये त एव मनुष्येषु राजसु प्रत्येकमिति एकैकस्यानेके देहा आसन्नित्यर्थः ॥ * ॥ ते च यादवा द्विविधाः—देवा नित्यपार्षदाश्च । तत्र देवानां यदुकुलावतीर्णत्वमसंख्यत्वञ्च सहेतुकमाह—देवेति द्वाभ्याम् । सुदारुणा अत्युग्राः, अत उत्तरजन्मन्यपि दृप्ताः सन्तः प्रजा बबाधिरे ॥ ४३ ॥ तन्निग्रहाय तेषां दण्डप्रदानाय । तेषां यदूनाम् । यदुकुले देवा अवतीर्णा इह प्रमाणमाह—पुराणान्तरवाक्यम्—तथा चेति । 'भवद्भिरंशैर्यदुषूपजन्यताम्' इति ब्रह्मणापि भूम्यार्तिनिवेदनोत्तरविष्णुवाक्यश्रवणान्ते उक्तत्वात् ॥ * ॥ अत एव तेषां निग्रहाय क्वचित्तद्वारा क्वचित्सहयोगेन च तद्वधकौतुकाय यदोः कुलेऽवतीर्णाः क्वचित्प्रवेशेन क्वचित्पार्थक्येन च जाताः । 'एकाधिकं कलशतम्' इति यदुवृष्णिमधुकुकुरान्धकादिनाम्नः कुलस्यैव संख्या कृता न तु व्यक्तीनामसंख्यत्वादिति भावः ॥ ४४ ॥ तेषामेकोत्तरशतकुलानां प्रभुत्वे नायमेवास्माकं प्रभुरित्येवंरूपेण ज्ञानेन हरिरेव प्रमाणं नान्य उग्रसेनादिः । यद्वा—भगवतो नारायणरूपत्वेन देवदेवत्वात् यादवानां देवत्वे तु श्रीकृष्णप्रभुत्वमेव प्रमाणमिति । तस्य श्रीकृष्णस्य ॥ * ॥ ये च ये तु तस्य भगवतोऽनुवर्तिनो नित्यपार्षदा ववृधुरुत्तरोत्तरसङ्ख्यातो वैभवतश्च वृद्धिं प्राप्तास्तेषां विभुत्वे चात्संख्यायां भगवान्हरिरेव प्रमाणं साक्षी बभूव न त्वन्यः ब्रह्माद्यबुद्धिगोचरत्वात् । ते च देवगणतो विभिन्नाः । यथोक्तं हरिवंशे श्रीमदक्रूरेण—"देवानाञ्च हितार्थाय वयं जाता मनुष्यताम्" इति । अत्र हरिर्बहिरन्तश्च सर्वसमाहरणशक्तः । यतो भगवान्पूर्णैश्वर्यादिषड्गुणसम्पन्नश्चेति नामद्वयतात्पर्यम् ॥ ४५ ॥ ० ॥ * ॥ तेषां वृष्णीनाम् परमेव माहात्म्यमित्याह—शय्यादिषु सन्तं जाग्रतमप्यात्मानं न विदुः श्रीभगवत्प्रेरणयैव सर्वे कुर्वन्ति न तु स्वयमनुसन्धातुं शक्नुवन्तीत्यर्थः । यतः कृष्णचेतसः । क्रीडा द्यूतादिः । आदिना सौरतादय इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वःसरित्पादशौचं विद्विट्स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेऽन्ययत्नः ॥ यन्नामाऽमंगलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः कृष्णस्यैतन्न चित्रं क्षितिभरहरणे कालचक्रायुधस्य ॥ ४७ ॥

तस्मात्कृष्णकीर्तेः सर्वतीर्थोत्तमत्वं कृष्णस्य च सर्वदेवोत्तमत्वं न चित्रमित्याह । तीर्थं चक्र इति । इतः पूर्वं स्वःसरिदेव सर्वतोऽधिकं तीर्थमित्यासीत्। इदानीं तु यदुषु यदजनि जाततीर्थं श्रीकृष्णकीर्तिरूपमेतत्स्वःसरिद्रूपं पादशौचं तीर्थमूनमल्पं चक्रे । स्वयमेव सर्वतीर्थोपरि विराजत इत्यर्थः । श्रीकृष्णस्य विद्विषः स्निग्धाश्च तत्सारूप्यं ययुरित्यपि नातिचित्रम् । तस्य परमकारुणिकत्वात् । तथेदं च न चित्रम् । किं तत् । अजितपरा अजिता कैश्चिदप्यप्राप्ता परा सर्वतः परिपूर्णा श्रीः कृष्णस्यैव नान्यस्येति तदेवाह । यदर्थेऽन्येषां ब्रह्मादीनां यत्न इति । ननु निरपेक्षं तमेव लक्ष्मीः श्रयत इति चित्रमेवेति चेन्नहि परममंगलनामधेयत्वात्तस्येत्याह । यन्नामेति । तदपि नार्थस्मरणापेक्षमित्याह । श्रुतमथ गदितमिति । सर्वधर्माश्रयत्वादपीत्याह । यत्कृतो गोत्रधर्म इति । गोत्रेषु तत्तदृषिवंशेषु धर्मो यत्कृतो येन प्रवर्तितः तस्य क्षितिभरहरणं नैव चित्रमित्याह । कृष्णस्यैतदिति । कालचक्रायुधस्येति।सर्वसंहारककालमूर्तेर्विशेषतो दुरंतप्रभावचक्रायुधस्य कियदेतदित्यर्थः ॥ ४७ ॥

'यद्यादवं कुलमहो अविषह्यमास्ते' इत्यादिकं तु नान्यादशत्वख्यापकं किन्तु तद्विरहोन्मादभयाख्यापकमेव । वक्ष्यते च–"ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम्" इत्यादि ॥ ४६ ॥ यतो यादवा देवाः श्रीकृष्णश्च तेषामीश्वरस्तस्माद्धेतोः । इत्यर्थ इति–सूर्योदये दीपस्येव तुच्छत्वमेवेति भावः । तत्सारूप्यं कृष्णसारूप्यम् । तस्य कृष्णस्य । यथा विद्विट्स्निग्धानां सारूप्यदानं न चित्रं तथैवेदं वक्ष्यमाणमपि । तत्पृच्छति–किं तदिति । अन्यस्य कृष्णेतरस्य तदेव श्रियाः कृष्णपरत्वमेव यदर्थे यस्याः श्रियो निमित्तम् । अत्राशंकते–नन्विति । तमेव श्रीकृष्णमेव । शंकोद्धारमाह–नहीति । तस्य श्रीकृष्णस्य । यन्नाम यस्य श्रीकृष्णस्य नाम । तदपि नामापि । अर्थस्मरणं नापेक्षत इत्याह–श्रुतमथेति । यद्वा–नन्वन्येऽप्यग्निहोत्रादयो धर्माः सन्ति तान्विहाय कथं तत्र प्रवृत्तिः स्यादिति चेत्तत्राह–सर्वधर्मेति । धर्मोऽग्निहोत्रादिः । येन कृष्णेन तस्येत्यर्थः । इत्यर्थ इति–इच्छयैव सर्वसंहर्तुश्चक्रधारणे तु भूभारावतारणं न किञ्चिदिति भावः॥*॥ तदेवं यदुकुलरूपमधिष्ठानं प्रशस्य श्रीकृष्णरूपमधिष्ठातारं प्रशंसति–कृष्णस्य स्वयं भगवत एतत्पूर्ववर्णितं क्षितिभारहरणं न चित्रं विबुधहृदयविस्मयावहं न भवति यतः परमाण्वादिद्विपरार्द्धान्तरूपो यः कालः स एव चक्रं चक्रवद्विच्छिद्य परिवर्तमानत्वात् तदेव चायुधं सर्वसंहारसाधनं यस्य स्वतःसिद्धत्वात्तदर्थोद्यमेनालमिति भावः।तदचित्रताबोधनाय तमेव चित्रविशेषणैर्विशिनष्टि–यतस्तादृशोऽपि लोककृपया यदुष्वजनि जातः य एव स्वस्सरिदाख्यं श्रीवामनपादशौचरूपं तीर्थमूनं चक्रे निजचरणरजःसम्बन्धियमुनादिभिरिति भावः । "गंगाशतगुणा पुण्या माथुरे मम मण्डले । यमुना विश्रुता देवि नात्र कार्या विचारणा ॥" इत्यादिवाराहात् । "यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः । सद्यः पुनन्त्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥ को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः । शुद्धिकामो न शृणुयाद्यशः कलिमलापहम् ॥" इति शौनकस्य तत्प्रश्नकरणाच्च । किञ्च–विभक्तिविपरिणामात्, यद्येन हेतुना स्निग्धा इव विद्विषः पूतनादयः । यद्वा–विद्विषः स्निग्धाः पितृभ्रात्रादयोऽपि स्वरूपं सर्वमूलभूतं श्रीभगवन्तमेव ययुः 'सद्वेषादिव पूतनापि सकुला त्वामेव देवापिता' इत्यादेः । यत् यत्र श्रीः रूपादिसम्पत्तिः परा सर्वोत्कृष्टाऽजिताऽन्याऽस्पृष्टा चेत्यर्थः । यथोक्तम्–'यन्मर्त्यलीलौपयिकम्' इत्यादि । 'अदृष्ट्वान्यतमं लोके' इत्युपक्रम्य 'तृतीयेऽस्मिन्भवेऽहं वै' इत्यादि । यदर्थे यस्य दर्शनादिरूपेऽर्थेऽन्येषां महाकालपुराधिपादीनामपि यत्नः परमब्रह्मण्यदेवत्वेऽपि मुहुर्मुहुर्ब्राह्मणबालहरणब्राह्मणदुःखातिशयदानदोषानादरपूर्वकप्रयासः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जयति जननिवासो देवकीजन्मवादो यदुवरपर्षत्स्वैर्दोर्भिरस्यन्नधर्मम् ॥ स्थिरचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्धयन्कामदेवम् ॥४८॥

यतं एवंभूतः श्रीकृष्णस्ततः स एव सर्वोत्तम इत्याह । जयतीति । जनानां जीवानां यो निवास आश्रयस्तेषु वा नित्यमंतर्यामितया तथां स कृष्णो जयति । देवक्यां यथोक्तम्—‘ द्विजात्मजा मे युवयोर्दिदृक्षुणा ’ इत्यादि । अत एव यस्यैव नाम अथ कार्त्स्न्येन सर्वतोऽपि सामस्त्येन तदतिरिक्तसर्वपरित्याजनादिनाऽमंगलघ्नं तदुपलक्षणतया सर्वमंगलदातृ च । यथोक्तं ब्रह्माण्डपुराणे तन्नामाष्टोत्तरशतप्रसंगे—“ सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत्फलम् । एकावृत्त्या तु कृष्णस्य नामैकं तत्प्रयच्छति ॥ ” इति । तत्रापि विशेषः श्रुतं किमुत गदितमित्यर्थः । किञ्च—यत्कुलो येनैवोपदिष्टो गोत्रधर्मः अनाद्यृषिपरम्पराप्राप्तो भगवद्धर्मः । तदुक्तमेकादशे स्वयमेव—“ कालेन नष्टा वाणीयं प्रलये वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ” इति । यद्वा—गोत्रधर्मो वैष्णवधर्मः, वैष्णवानां तद्गोत्रतया प्रसिद्धेः । “अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः” इति चतुर्थे । यद्वा—अगोत्रधर्मः सत्कुलाद्यपेक्षारहितः स एव धर्मः यत्कृतः—“मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । ” इति गीतासु । यद्वा—अत्र जगति तादृशधर्मः सदा सर्वत्रागः स्थिरः । यथा द्वितीये—‘न ह्यतोऽन्यः शिवः पन्थाः’ इत्युपक्रम्य तदुपसंहारे “तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्वदा । श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम् ॥ ” इति । यद्वा—गां पृथिवीमपि त्रायत इति गोत्रः स चासौ धर्मश्च ‘अपि चेत्सुदुराचारः ’ इत्यादिकं श्रीगीतासु, ‘मद्भक्तियुक्तो भुवनं पुनाति’ इति एकादशे च । यद्वा—प्रसिद्ध्या योगवृत्त्या गोत्रस्य श्रीगोवर्धनस्य धर्मो मखरूपो येनैव कृतः भक्तवात्सल्यं दर्शयतेन्द्रमपि तुच्छीकृत्य प्रकाशितः । यद्वा—तदेव दर्शयता बलिमाददानेन गोत्रधर्मः शैलत्वमपि स्वस्मिन्येन प्रकाशितः । यद्वा—गोत्रधर्मः स्वदेहसंबन्धभावनारूपो धर्मो यस्मिन्कृतो विहितः ‘न कर्हिचिन्मत्पराः ’ इत्यादि “येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम् ” इत्यादि च । यद्वा—श्रीनन्दादौ श्रीवसुदेवादौ श्रीयुधिष्ठिरादौ च गोत्रधर्मः स्वस्वसम्बन्धपुरस्कृतप्रेमा येन यत्र वा तैः कृतः । यद्वा—गास्त्रायन्त इति गोत्राः श्रीगोपास्तेषां धर्मः स्वभावः असमोर्द्ध्वप्रेमा येन यत्र वा कृतः । यद्वा—गोत्रधर्मः सर्वस्वरूपातिक्रमि परमरूपं गोपत्वं येन प्रकाशितमिति । यद्वा—गा दिशः त्रायन्ते रक्षन्तीति गोत्रा दिक्पालास्तैर्धर्मः स्वस्वकर्म वर्षणदहनादिरूपं यतः कृतः “ वर्षतीन्द्रो दहत्यग्निर्वातश्चरति यद्भयात् ” इत्याद्युक्तेः “भीषास्माद्वातः पवते ” इत्यादिश्रुतेश्च । गवा वाचा त्रायन्त इति गोत्रा विप्रास्तेषां धर्मः सन्ध्योपासनादिः येन ‘वेदो नारायणः साक्षात् ’ इतिन्यायेन वेदरूपेण भगवतैव कृतः “अहरहः सन्ध्यामुपासीत ” इति श्रुतेः, “यावज्जीवमग्निहोत्रं जुहुयात् ” इति श्रुतेश्च । यद्वा—यत्र यस्मिन्कृतः समर्पितो धर्मोऽत्र जगति अगः कर्हिचिन्न गच्छति न केनाप्यपहर्तुं शक्यते ‘धर्मोऽर्पितः कर्हिचिद्ध्रियते न यत्र ’ इति तृतीये ब्रह्मोक्तेः । यद्वा—गोत्रस्य यदुकुलस्य धर्मो राज्यासनाग्रहणरूपो येन कृतः अपाकृतः ‘कृ—हिंसायाम् ’ तच्चोग्रसेनाय राज्यदानलक्षणमिति । यद्वा—स एव येन स्वयं कृतः स्वीकृत इति दिक् ॥*॥ **विश्वनाथस्तु**—श्रीकृष्णनित्यलीलारत्नाकरं श्रीदशमस्कन्धमुपसंहरन् श्रीकृष्णस्यान्यावतारवैलक्षण्यपञ्चकमाह—तीर्थमिति । यद्यदुषु अजनि जातं तीर्थं कृष्णकीर्तिरूपं तत्कर्तृ स्वस्सारिद्रूपं पादशौचं तीर्थमूनं चक्रे । इदमेकं चित्रम् । तथा यत् यस्य विद्विषः कंसादयः स्निग्धा गोप्यादयश्च स्वरूपं क्रमेण सायुज्यं प्रापुस्तदीयश्रीविग्रहं च भोक्तुं प्रापुः । इदं द्वितीयं चित्रम् । यस्याः कृपालवाप्त्यर्थमन्येषां ब्रह्मादीनां यत्नः सा श्रीः अजितं जयाभावस्तत्परैवाभूत् बहुतपोभिरपि व्रजस्त्रीश्रेणिरिव यत् यं जेतुं वशीकृत्य रासादिभी रमयितुं न शशाकेत्यर्थः । इदं तृतीयं चित्रम् । यद्यस्य नाम कृष्णेति द्व्यक्षरं नारायणादिनिखिलतदंशनामोत्कृष्टम् अमंगलमविद्यापर्यन्तं हरतीति तत् । यद्वा—मुक्तप्रग्रहया वृत्त्या मंगलः सर्वोत्कर्षः अमङ्गलं तदभावस्तं हंतीति तत् । श्रुतान् अविशेषेण सर्वसाधनफलोत्कर्षान्मथ्नाति स्वीयसर्वोत्कर्षत्वेन विलोडयतीति श्रुतिमथं गदितं यस्य तत्, नारायणादिनिखिलतदंशनामोत्कृष्टमित्यर्थः, ‘सहस्रनाम्नां पुण्यानाम् ’ इत्याद्युक्तेः । इदं चतुर्थं चित्रम् । गां सर्वामपि पृथ्वीं त्रायते चतुर्भिरेव पादैर्निरन्तरं सर्वत्रैवाभिद्रुत्य पालयति स चासौ धर्मश्चेति स तादृशो येनैव कृतः, द्वापरान्ते त्रिपादहीनोऽपि धर्मो येन चतुष्पादेव कृत इत्यर्थः । “चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ” इति पृथिव्युक्तेः । इदं पञ्चमं चित्रम् । विस्मयावहं वैलक्षण्यं तस्य कृष्णस्यैतत् क्षितिभारहरणं तु न चित्रं येनैव लोका विस्मिता भवन्तीति भावः ॥ ४७ ॥ एवंभूतः ‘ तीर्थं चक्रे ’ इत्यादिपद्यप्रतिपादितवैभवैकदेशो यतस्ततो हेतोः । स एव श्रीकृष्ण एव आश्रयोऽधिष्ठानम् । अधिष्ठानत्वं तु पृथिव्यादेरप्यस्तीत्यत आह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मेति वादमात्रं यस्य सः । वस्तुतो अजन्मा । यदुवराः पर्षत्सभा सेवकरूपा यस्य । इच्छामात्रेण निरसनसमर्थोऽपि क्रीडार्थं दोर्भिरधर्ममस्यन् क्षिपन् । स्थिरचरवृजिनघ्नोऽधिकारिविशेषानपेक्षमेव वृंदावनगततरुतृणलतादीनां संसारदुःखहंता । तथा विलासवैदग्ध्यानपेक्षं व्रजवनितानां परवनितानां च सुस्मितेन शोभनहास्ययुतेन श्रीमता मुखेनैव कामदेवं वर्धयन् । कामश्चासौ दीव्यति विजिगीषति संसारमिति देवस्तम् । भोगद्वारा मोक्षप्रदमित्यर्थः ॥ ४८ ॥

तेषु जीवेषु । वादमात्रं न वस्तुतः 'न जायते म्रियते वा' इति स्मृतेः । यद्यपि वृक्षादियोनिमतः संसृतिनिवृत्तावधिकारो नास्ति तथापि परमदयालोः श्रीकृष्णस्य न तदपेक्षेत्याह—अधिकारिविशेषेति । तथैव विलासे वैदग्ध्यं दाक्षिण्यं नापेक्षते यत्र तत्तथेति । इत्यर्थ इति—वर्द्धयन्नतीवोद्दीपयन्निति—तथा च तासामतीव भोगान् सम्पादयंस्तेषु च विरक्तिद्वारा मोक्षं सम्पादयामास । "विरज्येत तथा चित्तं कामानामतिसेवया" "पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः" "न ह्यंगाजातनिर्वेदो देहबन्धं जिहासति" इत्याद्युक्तेरिति भावः ॥ * ॥ एवं तस्य सर्वोत्कृष्टत्वं श्रुत्वा सुखं प्राप्नुवतोऽपि श्रोतॄंस्तदवस्थत्वमतीतमिवाशङ्क्य म्लायतः स्वानुभवेन सान्त्वयन्नाह—जयतीति । देवक्यां जन्म जननलीलानुकरणेन प्रादुर्भावो वादस्तत्त्वबुभुत्सुकथा न तु च्छलजात्यादिरूपो यस्य । यद्वा—जन्मनो वादः ख्यातिः 'नन्दस्त्वात्मज उत्पन्ने' इत्यत्र व्याख्यातरीत्या तु श्रीयशोदायामपि तर्क्यं जन्म यस्येत्यर्थः । स प्रसिद्धः श्रीकृष्णो जयति सर्वदेवस्वरूपरूपगुणलीलापारिकरस्थानगतेन सर्वोत्कर्षेण विराजते । अत्र च लोडर्थत्वं न सम्भवति सदोत्कृष्टतापराकाष्ठामहिष्ठे श्रीभगवति तद्विज्ञानां तादृशानामाशीर्वादायोगात् । यदि वा तद्योगः कथञ्चित्कल्प्यस्तथाप्याशीर्वादविषयस्य सविशेषणस्य तस्य तदापि तदैवावस्थितिप्राप्ते विवक्षितार्थ एव लभ्यते, धार्मिकसभ्यतादिसम्पन्नो विष्णुमित्रो वर्द्धतामितिवत् । अथ कथंभूतः सन् जयतीत्यपेक्षायां विशेषणानि वदन्परिकरविशिष्टतयाह—तेन च तादृशतान्नित्यजयेऽबिभ्यत् । प्रत्यक्षलक्षणं प्रमाणमप्याह—'जनेषु सालोक्य—' इत्यादिपद्ये जना इतिवत् तदीयेष्वन्तरंगेषु यादवगोप्यादिषु साक्षान्निवासोऽन्येषु तत्स्फूर्तिरूपो यस्य सः । तत्र चान्यार्थतां परिहरंस्तास्मिञ्जये विवृत्यैव तैर्जनैर्विशिष्टतामाह—यदुवरेत्यादिना । तत्रान्तरगैर्विशिनष्टि—यदुवराः क्षत्रिया गोपाश्च परिषत्सभारूपा यस्य सः । बहिरंगैर्विशिनष्टि—स्वभक्तजना एव दोषो भुजा इव भुजास्तैः । अधर्ममेतादृशार्थे नास्तिकादिकं जगति चास्यन्दूरीकुर्वन् अतस्तत्तत्सम्बन्धेन स्थिरचराणामन्तरंगानां संसारहन्तापि सन् । अथ तत्रापि परमान्तरंगैर्विशिनष्टि—सुस्मितेति । शोभनं स्मितं तदुपलक्षितं प्रसादविलासादिकं यत्र । तेन स्वभावत एव श्रीयुक्तेन मुखेनैव च प्राधान्यतः प्रथमोक्तानां व्रजवनितानां तदन्तरंगाणां पुरवनितानां च जनितात्यर्थानुरागाणां तासां योषितां यः कामः स एव दीव्यति परमप्रेमरूपत्वात्सर्वतोऽपि विराजत इति देवस्तं वर्द्धयन्सदैवोद्दीपयन्, इति स्वरूपरूपगुणलीलास्थानाविशिष्टतापि दर्शिता । तदेवं सर्वस्यापि विशेषणस्य विधेयेन जयतीत्यर्थेनानुगतत्वात्तादृशोऽसौ स्वयमेव तादृशैः परिकरैः सह तादृशविलासादिविशिष्टो व्रजे पुरद्वये च सदा सर्वोत्कर्षेण विराजत एवेति स्थितं, युक्तमेव तत्स्वयंभगवत्त्वात् । आगन्तुकतादृशत्वे स्वयंभगवत्त्वहानेः, तस्मादविचारेणैवास्य कानिचिद्वचनानि प्रतिकूलायन्ते वस्तुतस्तु अनुकूलान्येव तत्र दशमस्कन्धस्य तत्रतत्र व्याख्यातान्येव । तत्स्वरूपनित्यत्वे, प्रथमस्कन्धस्य 'ययाऽहरद्भुवो भारम्' इत्यादिद्वयं तु यथा—तनुरूपकलेवरशब्दाभाववाचिन एव । यथा—तृतीयस्कन्धे विसर्गप्रसंगे ब्रह्मणि तत्पर्यायशब्दस्यैवार्थः स्वीकृतः अनुपपत्तेः । तत्र यदि सा तर्हि कथं स्वयं भगवति न स्यात् स च भावोऽत्र भूभारजिहीर्षालक्षणः मायाकार्यसम्बन्धित्वाद्भावाभास एव च ततः साम्ये कण्टकदृष्टान्तत्वं सुसंगतमेव । नटदृष्टान्तत्वं श्रव्यरूपकाभिनेतुर्नटस्य स्वरूपावेशाभासमेव स्थितस्य तत्तद्भावाभासस्वीकारपरित्यागमात्राभ्यामिति । एवमन्यत्राप्याकृतिदेहशब्दौ व्याख्येयौ । अथवा त्यागस्वीकारौ नामान्तर्द्धानाविर्भावने एव, यथा श्रीमध्वाचार्यधृतं तन्त्रभागवतवचनं पूर्वमुदाहृतम् "अहेयमनुपादेयं यद्रूपं नित्यमव्ययम् । स एवापेक्ष्य रूपाणां व्यक्तिमेव जनार्दनः ॥ अगृह्णाद्व्यसृजच्चेति कृष्णरामादिकां तनूम् । पठ्यते भगवानीशो मूढबुद्धिव्यपेक्षया॥" इति । एवं प्रथमस्य द्वादशे 'विधूय' इत्यादिपद्ये स्वामिभिरप्युक्तम्, यत्र दृष्टस्तत्रैवान्तर्हितो न त्वन्यत्र गतः यतो विभुः सर्वगत इति । अत एव तृतीये "प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥" इत्यत्राऽपि लोकलोचनरूपं स्वबिम्बं निजमूर्तिं प्रदर्श्य पुनरादायैव चान्तरधान्न तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्त्वेत्युक्तम्, 'यथा मत्स्यादिरूपाणि' इत्यनन्तरमपि । तथोक्तम्—'यदा मुकुन्दो भगवानिमां महीं जहौ स्वतन्वा' इति । तथा पाद्मे निर्वाणखण्डे—"पश्य त्वं दर्शयिष्यामि स्वरूपं वेदगोपितम्" इति । भगवद्वाक्यानन्तरं ब्रह्मवाक्यम्—"ततोऽपश्यमहं बालं कालाम्बुदसमप्रभम् । गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥ कदम्बमूल आसीनं पीतवाससमद्भुतम् । वनं वृन्दावनं नाम नवपल्लवसस्मितम् ॥" इति । श्रीगोपालतापनी चैवम्—"तदुहोवाच ब्राह्मणोऽसावनवरतं मे ध्यातः स्वतः परार्द्धान्ते सोऽबुध्यत गोपालवेशो मे पुरस्तादाविर्बभूव" इति।सिद्धनिर्देशोऽपि श्रूयते बृहन्नारदीयमंगलाचरणे—"वन्दे वृंदावनासीनमिन्दिरानन्दमन्दिरम्" इति।स्कान्दे द्वारकामाहात्म्ये श्रीबलिं प्रति प्रह्लादवाक्ये—"गृहे संतिष्ठते यस्य माहात्म्यं दैत्यनायक । द्वारकायाः समुद्भूतं सान्निध्यं केशवस्य च ॥ रुक्मिणीसहितः कृष्णो नित्यं निवसते ततः ॥" इति । कार्तिकमाहात्म्ये तत्प्रातःस्नानार्घ्यमन्त्रे—"व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम । गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥" इति । एवं नाना मन्त्रा अपि साक्षात्तथैव तं निर्दिशन्ति । अत एव गोपालतापन्याम्—"गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं तोषयामि" इति । तदेवमभिप्रेत्य श्रीशुकदेवोऽपि निजाभीष्टदेवत्वेनाह—"पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां भो भगवान्सतां पतिः" इति । 'प्रीयान्न इन्द्रो गवाम्' इति च । श्रीमन्नराकृतित्वमेवाधिकृत्य नारायणवर्मण्यप्याह—"मां केशवो गदया प्रातरव्याद्गोविन्द आसंगवमात्तवेणुः" इति । एवं श्रीमन्नराकारे वा येषां या भ्रांतिः सा तेषामपि निरस्ता । यथोक्तम्—"यत्पादपांशुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यम्" इत्यादि । "स एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसाम्" इत्यादि । एवं 'न चान्तर्न बहिर्यस्य' इत्यादि । 'नौमीड्य ते' इत्यादि । 'सकृद्यदंगप्रतिमा' इत्यादि । 'अहो भाग्यमहो भाग्यम्' इत्यादिना । एवमेव ब्रह्माण्डे श्रीकृष्णाष्टोत्तरशतनामस्तोत्रे श्रीमन्नराकृतित्वमेवाधिकृत्य "नन्दव्रजजनानन्दी सच्चिदानन्दविग्रहः । नवनीतविलिप्तांगो नवनीतनटोऽनघः ॥" इति । श्रीगोपालतापन्यामपि—"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तं पीठगं ये तु यजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्" इति । विशेषश्चोक्तः—'गोप्यस्तपः किमचरन्यदमुष्य' इत्यादौ । तथा च पाद्मे निर्वाणखण्डे श्रीवेदव्यासवाक्यम्—"दृष्ट्वातिहृष्टो ह्यभवं सर्वभूषणभूषणम् । गोपालमबलासंगमुदितं वेणुवादिनम् ॥ ततो मामाह भगवान्वृन्दावनचरः स्वयम् । यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम् ॥ निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहम् । पूर्णं पद्मपलाशाक्षं नातः परतरं मतम् ॥ इदमेव वदन्त्येते वेदाः कारणकारणम् ।" इत्यादि । अथ तस्य मानसानां शारीराणां गुणानां स्वाभाविकत्वमव्यभिचारित्वं चोक्तं प्रथमे—'सत्यं शौचं दया क्षान्तिः' इत्यादिना "एते चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥" इत्यन्तेन । अथ तत्तत्परिकरनित्यत्वे प्रतिकूलायमानानि यथार्थं व्याख्यायन्ते । तत्र देवावतरणवाक्यमेकदेशप्रस्तावमयमिति पूर्वपूर्वदर्शितमस्ति मौसलादिकञ्च ब्रह्मशापमर्यादारक्षार्थं मायिकमेव । आह स्म च तदानीमेव दारुकं प्रति श्रीभगवान्—"त्वन्तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः । मन्मायारचितामेतां विज्ञायोपशमं व्रज ॥" इति । अस्यार्थः—त्वं तु दारुको ज्ञाननिष्ठो मदीयलीलातत्त्वज्ञः मद्धर्मं मम स्वभक्तपालयितृरूपं स्वतुल्यपारिकरसंगित्वरूपञ्च स्वभावमास्थाय विश्रम्य एतामधुना प्रकाशितां सर्वामेव मौसलादिलीलां मम माययैव इन्द्रजालवद्रचितां विज्ञाय उपेक्षको बहिर्दृष्ट्या जातं शोकमुपेक्षमाण उपशमं चित्तक्षोभनिवृत्तिं व्रजेति । अत्र श्रीदारुकस्य स्वयमेव तल्लोकादवतीर्णत्वेन सिद्धत्वात् एतामित्यत्रातिसान्निहितार्थलाभाच्चान्यथा व्याख्यानमेव प्रथमप्रतीत्यविषये इति विवेक्तव्यम् । यथा चैकादशे पद्यत्रयम्, तत्र प्रथमं यथा—"राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवेहि यथा नटस्य । सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते ॥" इति । अस्यार्थः—श्रीकृष्णस्य ये तनुभृतः पार्षदा यादवादयस्तेषां जननाप्ययरूपा ईहाश्चेष्टाः केवलं परस्यैव मायया विडम्बनमनुकरणमवेहि । यथेन्द्रजालवेत्ता नटः कांश्चिज्जीवत एव मारयित्वेव दग्ध्वेव च पुनश्च तद्देह जनयित्वेव च दर्शयति तस्येव विश्वसर्गादिहेत्वविचिन्त्यमहाशक्तेस्तस्य तादृशशक्तित्वं न च चित्रमित्याह—सृष्ट्वेति । एवमेव दृश्यते चाद्याप्युपासकानामित्यादि तद्व्याख्यानं संगच्छते तत्तत्परिकरेणैव सार्द्धम् । तेषु तत्तत्साक्षात्कार इति । एवं सति सङ्कर्षणादौ मुग्धानामन्यथा हेतूदाहरणाभासः सुतरामेव मायिकः स्कान्दायोध्याखण्डे श्रीलक्ष्मणस्यापि तादृशत्वं न सम्प्रातिपन्नम् । तथाहि तदन्तिमदशानुकरणलीलायाम्—"ततः शेषात्मतां यातं लक्ष्मणं सत्यसङ्गरम् । उवाच मधुरं शक्रः सर्वस्य च स पश्यतः ॥ इन्द्र उवाच—लक्ष्मणोत्तिष्ठ शीघ्रं त्वमारोहस्व स्वकं पदम् । देवकार्यं कृतं वीर त्वया रिपुनिषूदन ॥ वैष्णवं परमं स्थानं प्राप्नुहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं सनातनम् । भवन्मूर्तिः समायाता शेषोऽपि विलसत्फणा ॥ " इत्यादि । ततश्च " इत्युक्त्वा सुरराजेन्द्रो लक्ष्मणं सुरसङ्गतः । शेषं प्रस्थाप्य पाताले भूभारहरणक्षमम् ॥ लक्ष्मणं यानमारोप्य प्रतस्थे दिवमा दरात् । " इति । अत एव जरासन्धवाक्ये ' तव राम यदि श्रद्धा ' इत्यत्र स्वामिभिरपीत्थं वास्तवार्थो व्यञ्जितः । अच्छेद्यदेहोऽसाविति स्वयमेव मत्वापरितोषात् पक्षान्तरमाह—यद्वा—मां जहीति । अथ द्वितीयम्—यथा अप्राकृतानां तेषां तन्न सम्भवतीत्यास्ताम् । श्रीकृष्णपाल्यत्वेनैव न सम्भवतीत्याह—" मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम् । जिग्येन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनय न्मृगयुं सदेहम् ॥ " अस्यार्थः—यः श्रीकृष्णः यमलोकं गतमपि गुरुसुतं गुरोर्जातेन पञ्चजनभक्षितेन तेन मर्त्येन देहेनैवानयत् । न च ब्रह्मतेजसो बलवत्तमन्तव्यम् । त्वां च ब्रह्मास्त्रदग्धं यस्तस्माद्ब्रह्मास्त्रादानयत् रक्षितवानित्यर्थः । किमन्यद्वक्तव्यं यश्चान्तकान्तकमपीशं श्रीरुद्रमपि बाणसंग्रामे जितवान् । अहो यश्च तं जराख्यं मृगयुमपि स्वैर्वैकुण्ठविशेषं सशरीरमेव प्रापितवान्, स कथं स्वानां यदूनामवने ईशो न भवति । तस्मात्तेष्वन्यथा दर्शनं न तात्त्विकलीलानुगतं सशरीरं तु तेषां स्वलोकगमनमतीवयुक्तमित्यर्थः । अथ तृतीयं यथा—ननु गच्छन्तु तादृशशरीरां एव स्वधाम तत्रापि स्वयं भगवान् विराजत एवेति न तेषां तद्विरह दुःखमपि । भगवांस्तु तथासामर्थ्यश्चेत्तर्हि कथमन्यांस्तादृशान्निर्माय तैः सह मर्त्यलोकानुग्रहार्थमपरमपि कियन्तं कालं मर्त्यलोकेऽपि प्रकटो नासीदित्यत्र सिद्धान्तयंस्तेषां भगवतश्च सौहार्दभरेणापि परस्परमव्यभिचा रित्वमाह—" तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् । नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥ " इति । अस्यार्थः—यद्यप्युक्तप्रकारेणाशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुर्यद्यस्मात्तदूर्ध्व मप्यनन्ततादृशशक्तिधृक् तथापि यादवानन्तर्द्धाप्य निजं वपुरत्र शेषितं प्रणेतुं कञ्चित्कालं स्थापयितुं नैच्छत् किंतु स्वयमेव लोकमनयत् तत्र हेतुः तान्विना मर्त्येन लोकेन किं मम प्रयोजनमिति स्वस्थानां तद्धामगतानां तेषां गतिमेव स्वस्याभिरुचितत्वेन प्रकृष्टां दर्शयन्निति । अतस्तेषां श्रीभगवद्वदन्तर्द्धानमेव न त्वन्यदस्तीति श्रीभगवदभिप्रायकथनेनापि श्रीमांनुद्धव आह तृतीये—" मिथो यदैषां भविता विवादो मध्वामदाताम्र विलोचनानाम् । नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेन्तर्दधते स्वयं स्म ॥ " इति । अस्यार्थः—एषां यदूनां यदा मिथो विवादस्तदाप्येषामुपायो भवेत् । अत्र पुनः परामृशति—अतो वधादन्य एव इयानेतावानेवोपायो वर्तते । कोऽसौ मय्युद्यते ममेच्छाया एते स्वयमेवान्तर्दधते इति । यः स्मेति निश्चये । यद्वा वधस्योपायो न विद्यते इत्येव व्याख्या । यः अतो वधोपायादन्य इयान् वधोपायतुल्य उपायो विद्यत इति व्याख्येयम् । तेन कूर्मपुराणोक्तसीताहरणवत् पुरस्त्रीहरणमपि मायिकं ज्ञेयम् । तथैवासां विवाहप्रसंगे स्वरूपशक्तित्वं प्रमाणितम् । किञ्च—तेषु यच्चान्यच्छस्त्रावातमूर्छातत्त्वबुभुत्सादिकं श्रूयते तद्भगवत इव नरलीलौपयिकतया प्रपञ्चित मिति । कञ्चित्प्रकटलीलायाः प्रापंचिकमिश्रत्वाद्यथार्थमेव च तत्तत्, यथा शतधन्ववधादौ—अन्तरङ्गाणाञ्च भगवत्साधारण्यमेव तत्तन्नित्यपरिकरत्वेन दर्शितत्वाद्युक्तम् । तदनुकूलानि चैतानि वाक्यानि । यथा पाद्मका र्तिकमाहात्म्ये श्रीसत्यभामां प्रति भगवद्वाक्यम्—" एते हि यादवाः सर्वे मद्गणा एव भामिनि । सर्वदा मत्प्रिया देवि मत्तुल्यगुणशालिनः ॥ " इति । पाद्मोत्तरखण्डे—" यथा सौमित्रिभरतौ यथा सङ्कर्षणादयः । तथा तेनैव जायन्ते निजलोकाद्यदृच्छया ॥ पुनस्तेनैव गच्छन्ति तत्पदं शाश्वतं परम् । न कर्मबन्धनं जन्म वैष्णवानां च विद्यते ॥ " इति । श्रीगोपालतापन्याम्—" जन्मजराभ्यां भिन्नः स्थाणुरच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति योऽसौ गोषु तिष्ठति योऽसौ गोपान्पालयति योऽसौ गोपेषु तिष्ठति " इत्यादि । सौर्य्ये यमुनायास्तीरे श्रीवृन्दावने, सहस्रनाम्नि 'सुयामनः' इति तथा भाष्ये व्याख्यातम् । अथ प्रपञ्चे प्रकटाप्रकट रूपेण प्रकाशभेदेन स्थितानि श्रीवृन्दावनादीन्येव नित्यस्थानानीति च पूर्वोदाहरणमेतेन व्यक्तमेवास्ति । यथोक्तं पाद्मनिर्वाणखण्डे श्रीभगवद्वाक्यम्—" नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा । ममावतारो नित्योयमत्र मा संशयं कृथाः ॥ " इति । तथा च बृहद्गौतमीये श्रीकृष्ण उवाच—" इदं वृन्दावनं रम्यं मम धामैव केवलम् । अत्र ये पशवः पक्षिवृक्षकीटा नरामराः ॥ ये वसन्ति ममाधिष्ण्ये मृता यान्ति ममालयम् । अत्र या गोपकन्याश्च निवसन्ति ममालये ॥ योगिन्यस्ता मया नित्यं मम सेवापरायणाः । पञ्चयोजनमेवास्ति वनं मे देहरूपकम् ॥ कालिन्दीयं सुषुम्नाख्या परमामृतवाहिनी । अत्र देवाश्च भूतानि वर्तन्ते सूक्ष्मरूपतः ॥ सर्वदेवमयश्चाहं न त्यक्ष्यामि वनं क्वचित् । आविर्भावस्तिरोभावो भवेन्मेऽत्र युगेयुगे ॥ तेजोमयामिदं रम्यमदृश्यं चर्मचक्षुषा । " इति । यथैकादशस्कन्धान्ते— " द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् । वर्जयित्वा महाराज श्रीमद्भगवदालयम् ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः । स्मृत्याशेषाशुभहरं सर्वमङ्गलमङ्गलम् ॥ " इति । एवमेव विष्णुपुराणे—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं परस्य निजवर्त्मरिरक्षयाऽऽत्तलीलातनोस्तदनुरूपविडंबनानि ॥ कर्माणि कर्मकषणानि यदूत्तमस्य श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥ ॥ ४९ ॥ मर्त्यस्तयाऽनुसवमेधितया मुकुंदश्रीमत्कथाश्रवणकीर्तनचिंतयैति ॥ तद्धाम दुस्तरकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः॥ ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां श्रीकृष्णचरितानुवर्णनंनाम नवतितमोऽध्यायः ॥९०॥

॥ समाप्तोऽयं दशमः स्कन्धः ॥ १० ॥

तत्तत्कार्यविशेषैः स्वीकृतमत्स्यकूर्मादिनानामूर्तेर्विशेषतो यदूत्तमस्य सतः परस्य तदनुरूपानुकारीणि कर्मकषणानि कर्माणि चरितानि श्रूयात् शृणुयादित्यर्थः ॥४९॥ अनुवृत्तेः फलमाह । मर्त्य इति । श्रीमत्याः कथायाः श्रवणकीर्तनयुक्तया चिंतया संवर्धितयाऽनुवृत्त्या तया तन्निष्ठत्वेन तस्य धाम लोकमेति । लोकत्वेऽपि कालानाकलितत्वमित्याह । दुस्तरेति । दुर्लभपुरुषार्थतामाह । ग्रामादिति ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधोत्तरार्धे श्रीधरस्वामिविरचितायां भावार्थदीपिकाख्यायां टीकायां नवतितमोऽध्यायः ॥ ९० ॥ समाप्तोऽयं दशमः स्कन्धः ॥ १० ॥

“ प्लावयामास तां शून्यां द्वारकां च महोदधिः । यदुदेवगृहं त्वेकं नाप्लावयत सागरः ॥ नात्यक्रामत्ततो ब्रह्मंस्तदद्यापि महोदधिः । नित्यं सन्निहितस्तत्र भगवान्केशवो यतः ॥ ” इति दिक् ॥ ४८ ॥ इत्थं परस्य भूम्नः श्रीकृष्णस्य तदनुरूपानुकारीणि स्वीकृतलीलातनोरुचितानि कर्मकषणानि दुष्कर्महरणसमर्थानि मोक्षोपयोगीनि । वा अमुष्य बुद्धिष्ठस्य अनुवृत्तिं सन्ततप्रवाहम् । यद्वा—पदयोरैहिकामुष्मिकस्थानयोरनुवृत्तिं निवृत्तिम् । उपसर्गाणामनेकार्थत्वादनु निषेधेऽपि एतेनैहिकामुष्मिकभोगविरक्तिरुक्ता भगवन्निष्ठावतः । इत्यर्थ इति—पुरुषेण निजकल्याणार्थं हरिकथैव सर्वधर्मान्परित्यज्य श्राव्या “ ज्ञानं यदा प्रतिनिवृत्तिगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः । कैवल्यसम्मतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥ ” इत्युक्तेरिति भावः ॥ * ॥ हन्तैतादृशपरमधाम्नस्तस्यानुगतिं कथं लभेत, उच्यते—नेदं मदुक्तं श्रीभगवल्लीलावर्णनशास्त्रं शास्त्रान्तरमिव स्वाभिहितानुष्ठानेनैव फलप्रदं िक तु श्रवणमात्रेणापीत्याह—इत्थमिति । यद्वा—तेषां तन्नित्यपार्षदानां नित्या तदेकधामस्थितिः किं वर्ण्यतां तैः सह या लीलास्ताः शृण्वतामपि सा नित्यैव स्यादित्याह—इत्थमिति । अनेन पूर्वोक्तप्रकारेण परस्य सर्वागोचरगतेरपि कृपया निजधर्मस्य स्वभक्तिरूपस्य रिरक्षिषया आत्ता प्रपञ्चं प्रत्यानीता प्रकटिता लीलाप्रधाना तनूर्निजविग्रहो येन तस्य कर्माण्यमुष्य पदयोरनुवृत्तिमनुगतिमिच्छन् जनः शृणुयात् । परस्येति विशिनष्टि—यदूत्तमस्य । पूर्वपूर्वप्रामाण्येन यदुषु पुरस्थेषु च व्रजस्थेषु उत्तमस्य तत्तदाश्रयतत्तयैव नित्यलीलस्येति यावत् । कर्माणि विशिनष्टि—तदनुरूपाणि लीलातनुयोग्यानि च तानि विडम्बनानि अन्यसादृश्यातिक्रमीणि च तानीति । यद्वा—तदनुरूपाणि तत्सदृशानि अवतारान्तरकर्माणि तान्यपि विडम्बयन्ति हीनोपमत्वं प्रापयन्ति यानि तानि असमोर्द्ध्ववैभवानीत्यर्थः । अत एवोक्तम् ‘कर्माणि चात्ममहिमोपनिबन्धनानि ’ इति । तथा कर्मरूपाण्यपि कर्मकषणानि जगतां कर्मविलोपकानीति ॥ ४९ ॥ तया पादयोरनुवृत्त्या । तन्निष्ठत्वेन भगवन्निष्ठत्वेन । लोकं वैकुण्ठादि स्वरूपं वा कालेनानाकलितमस्पृष्टम् । दुस्तरश्चासौ कृतान्तजवस्तस्यापवर्गस्त्यागो यस्मिंस्तत्तथा । यदर्थं यस्य हरेर्धामैवार्थो येषां ते क्षितिभुजो ग्रामाद्वनं ग्रामं विहाय वनं ययुः । एतेन राज्यादपि तत्र सुखाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयो व्यज्यत इति ध्वनितम् (९०) क्वचित्पुस्तकेषु 'चित्रं न चेत्यादिकोऽधिकः श्लोकोऽप्यस्ति तस्य चायमर्थः—गोप्यादिस्त्रीणां यदुरुगायस्य पवित्रलीलया विध्वस्तः कल्मषाणां कदम्बको यस्मिन्मुक्तिरूपे तद्यज्जातमेतच्चित्रं न चेत्यन्वयः । अन्यत्पूर्ववत् ॥ स्वाम्यभिप्रायदौर्बोध्याद्यन्मया साहसं कृतम् । तन्मे क्षाम्यंतु विद्वांसो ह्ययुक्तं शोधयंतु ते ॥ १ ॥ कालिंदजातीरविहारशालिनं गोपांगनाभिर्धृतवेणुवादिनम् । सदा नमस्ये निजचेतसा धृतं श्रनिंदसूनुं सुरराजवंद्यम् ॥ २ ॥ इति श्रीखरडपत्तनवास्तव्यपंडितवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे दशमस्कंधोत्तरार्धे नवतितमोऽध्यायः ॥ ९० ॥ * ॥ यथा तच्छ्रवणेन तदनुवृत्तिप्राप्तिः स्यात्तथा विवृणोति—ननु हे राजन् मर्त्यो मरणधर्मा यः कोऽपि तया पूर्वोक्तमाहात्म्यया मुकुन्दश्रीमत्कथाश्रवणकीर्तनचिन्तया मुकुन्दस्य सर्वदुःखविमोचकत्वेन महाकारुणिकस्य स्वयं भगवतो या श्रीमती सर्वसम्पदां धात्री विधात्री च कथा तस्याः श्रवणेन जातं यत्कीर्तनं स्वयमुल्लासतो गानं तत्र या चिन्ता तत्प्राप्त्युत्कण्ठामयी स्मृतिस्तया समेधितया नित्यमेव तेन गानेन वार्द्धितया सत्या पूर्वोक्तं श्रीवृन्दावनादिप्रकाशविशेषरूपं तद्धाम प्रति वासनानुसारेण तदेकतरं प्राप्नोति । तदेव विशिनष्टि—दुस्तरो ब्रह्मादिभिरपि स्वतोऽपरिहार्यो यः कृतान्तः कृतः सर्वस्यान्तो येन स कालस्तस्यापि जवस्य विक्रमस्यापवर्गः समाप्तिर्यत्र तत् । तदुक्तम्—'न यत्र माया न च कालविक्रमः' इति । "दर्शयामास गोपानां लोकं स्वं तमसः परम्" इति च । तच्च परमविषयान्धानामपि लोभनीयशोभं किमुत मुमुक्षुमुक्तभक्तानामुत्तरोत्तरपरमदृश्यमित्याह—ग्रामादिति । क्षितिः सप्तद्वीपवती पृथिवी तां भुञ्जते ये प्रियव्रतादयो बहवो यदेव परमपुरुषार्थो येषां तथाभूताः सन्तो ग्रामात् अन्यसर्वारोचकतया जनस्थानमात्रं त्यक्त्वा वनं जनमात्रशून्यं प्रदेशं भाग्यवशाद्द्वादशवनात्मकं श्रीमथुरामण्डलं वा ययुस्तत्र गत्वा नित्यमेवावसन् । श्रीमन्मथुरामण्डलस्यैव परमसाधनसाध्यरूपत्वात् । तथाह्यादिवाराहे—"न पापेभ्यो भयं यत्र न भयं यत्र वै यमात् । न गर्भवासभीर्यत्र तत्क्षेत्रं को न संश्रयेत् ॥ मथुरां च परित्यज्य योऽन्यत्र कुरुते रतिम् । मूढो भ्रमति संसारे मम मायाविमोहितः ॥ " इति । किञ्च स्कान्दे—"तन्मण्डलं माथुरं हि विष्णोश्चक्रोपरि स्थितम् । पद्माकारं सदा तत्र वर्तते शाश्वतं नृप ॥ " इति । किञ्च वाराहे—"लाभानां मथुरालाभो ज्ञानानां ज्ञानमुत्तमम् । प्रीतीनां परमा प्रीतिर्गतीनां गतिरुत्तमा ॥ " इति । अत एवोक्तं पाद्मे पातालखण्डे—"अहो मधुपुरी धन्या वैकुण्ठाच्च गरीयसी" इत्यादि ॥ ९० ॥ इति श्रीमद्भागवते दशमस्कन्धोत्तरार्धे विश्वनाथीटीकायां नवतितमोऽध्यायः ॥ ९० ॥ समाप्तश्चाऽयं दशमस्कन्धः ॥ १० ॥

अथास्य श्रवणमाहात्म्यं पाद्मे—॥ " हरिरुवाच ॥ शृणु ब्रह्मन्ममांगेषु दशमो ब्रह्मरन्ध्रकम् । तं श्रुत्वा च महापापान्मुच्यते नात्र संशयः ॥ १ ॥ चमत्कारपुरे विप्रो वामनाख्योऽभवत्पुरा । पठनार्थं स काश्यां हि जगाम बलवत्तरः ॥ २ ॥ श्रीकण्ठकाद्द्विजात्तत्र पपाठ निगमं द्विजः । गुरुपत्नीं रूपवतीं दृष्ट्वा रन्तुमियेष सः ॥ ३ ॥ बहुशः प्रार्थयामास रत्यर्थं कामपीडितः । तदप्रीतिं विचार्याशु मनसा चिन्तयंश्च सः ॥ ४ ॥ इत्थं पापं चकारासौ तच्छृणुष्व महामते । हत्वास्याः स्वामिनं पश्चादेषा यद्धुमिहार्हति ॥ ५ ॥ एकदा गुरुणा सार्द्धं गतो देशान्तरं द्विजः । मार्गे गुरुं नाशयित्वा पाशास्त्रादिभिरेव सः ॥ ६ ॥ गुरुगेहे रुरोदोच्चैर्हा गुरो क्व गतो भवान् । सा पप्रच्छ तदा शिष्यं कथं रोदिषि पुत्रक ॥ ७ ॥ प्रोवाच शृणु देवि त्वं सर्पदष्टो मृतो गुरुः । तद्दाहादिककर्माणि कृत्वा चात्र समागमम् ॥ ८ ॥ हर्षयुक्तो महापापी गुरुगेहेऽवसत्तदा । मद्यं पीत्वैकदा रात्रौ हंतुं स्मृत्वा गुरोर्वधे ॥ ९ ॥ सुरतं कृतवान्पापो हठाद्गृह्य गुरुस्त्रियम् । सुरतान्ते रुदित्वोच्चैर्नष्टसंज्ञा व्यजायत ॥ १० ॥ गृहीत्वा गेहगं द्रव्यं प्रदुद्राव स वामनः । चतुष्टयं पातकानां कृत्वा स्वगृहमाविशत् ॥ ११ ॥ स्वविवाहं चकाराशु वामनोऽथ प्रजाशया । पत्नीं प्राप्य वरारोहां नाम्ना राजीं खलस्तदा ॥ १२ ॥ तस्यामुत्पादयामास कन्यां कमललोचनाम् । षोडशाब्दा यदा कन्या तदा पत्नी मृता शुभा ॥ १३ ॥ स मद्यपो महापापी सुतया रतिमाचरत् । तदा ज्ञातं ज्ञातिजनैस्ततो निष्कासितः कुलात् ॥ १४ ॥ यदा सुता मृता तस्य तदा स वनमध्यगात् । हत्वा पक्षिगणांस्तत्र

---

१ चित्रं न चैतदुरुगायविचित्रलीलाविध्वस्तकल्मषकदम्बकमुक्तिरूपम् । स्त्रीणां सुदुस्त्यजकृतान्तजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालक्षेपं चकार ह ॥ १५ ॥ कदाचिद्गोमतीतीरे स ययौ हिंसनाशया । तत्र शाशं[1] भक्षितवान्सर्पगर्भसमन्वितम् ॥ १६ ॥ स तेन मूर्छितो भूत्वा पपात दिनविंशतिम् । तत्र गाथा मुनिकृता दशमस्कन्धसम्भवा ॥ १७ ॥ किञ्चित्संज्ञेन तेनाथ श्रुता पञ्चदिनं विधे । ततो मरणकालेऽस्य चागता यमकिङ्कराः ॥ १८ ॥ विष्णुदूतास्तथायाता ब्रुवन्तो मुच्यतामिति । इति श्रुत्वा वचो याम्याः प्रत्यूचुर्वैष्णवान्प्रति ॥ १९ ॥ कथं समागता यूयं पापोऽयं खलु सर्वथा । अहो मूढतमा यूयं विष्णुना प्रेषिता वयम् ॥ २० ॥ दशमश्रुतिमात्रेण सन्तुष्टोऽस्य जनार्दनः । इत्युक्त्वा वैष्णवास्तं हि विमाने स्थाप्य वामनम् ॥ २१ ॥ वैकुण्ठमनयल्लोकं सुरेडेयं[2] ब्राह्मणाधमम् । सुरापं गुरुहन्तारं सुवर्णस्तेयकारिणम् ॥ २२ ॥ पुत्रीरतं गुरुस्त्रीषु संसक्तं सर्वगर्हितम् । निवृत्त्य यमदूतास्ते यमराज्ञे न्यवेदयन् ॥ २३ ॥ श्रुत्वा यमः प्रत्युवाच स्वदूताञ्छृणु तद्विधे । दशमाक्षराकर्णनेन मुक्तः स्यात्पापकोटिभिः । किं श्रुतं निखिलं येन कृष्णरूपमिदं यतः ॥ २४ ॥ इति दशमस्कन्धश्रवणमाहात्म्यं समाप्तम् ॥

---

१ मांसम् । २ लोकविशेषणम् ।

इदं पुस्तकं खेमराज श्रीकृष्णदासश्रेष्ठिना मुंबय्यां स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणालये मुद्रयित्वा प्रकाशितम् ।

शके १८३० संवत् १९६५.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया चोपेते श्रीमद्भागवते दशमस्कन्धोत्तरार्द्धं समाप्तम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ श्रीधरीयटीकया संदर्भ-विश्वनाथी-दीपिकादीपनादि-पर्यायोपेतवंशीधरीयतद्भावार्थ
दीपिकाप्रकाशटीकया चोपेते श्रीमद्भागवत एकादशस्कन्धप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकादशस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते वासुदेवाय ॥ श्रीबादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ॥ भुवोऽवतारयद्भारं जविष्ठं जनयन्कलिम् ॥ १ ॥

॥ श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः ॥ ॥ ॐनमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामचंद्राय ॥ विजयंते परानंदकृष्णपादरजःस्रजः ॥ या धृता मूर्ध्नि जायंते महेंद्रादिमहःस्रजः ॥ १ ॥ उक्तैकत्रिंशताऽध्यायैर्मुक्तिरेकादशे ततः ॥ जायंतेयेतिहासाद्यैः समासव्यासरूपतः ॥ २ ॥ नारदो वसुदेवाय समासेन न्यवर्णयत् ॥ भगवानुद्धवायाथ विस्तरेणोपपत्तिभिः ॥ ३ ॥ तत्र तु प्रथमेऽध्याये यदुवंशस्य संक्षयः ॥ उपक्षितो विरागाय मौसलव्यपदेशतः ॥ ४ ॥ प्रवृत्तितः परानंदकृष्णक्रीडाऽनुवर्णिता ॥ तन्निवृत्त्या परानंदपदारोहोऽनुवर्ण्यते ॥ ५ ॥ एवं तावद्दशमस्कंधे भूभारावतारणाय निजविभूतिविभूषितयदुवंशस्य यदुवंशावतारितसकलसुरांशस्य भगवतः श्रीकृष्णस्य तदुचितप्रवृत्तिविडंबनेन तच्छ्रवणस्मरणादिपराणां परेषामानंदकारणं क्रीडा निरूपिता । अथेदानीमपरिमितयोगमायावैभवस्य भक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थं भूतलेऽवतारितानां चाधिकारिणां सुरांशानां मौसलापदेशेन तत्तदधिकारपदप्रापणपूर्वकं च ब्रह्मायनुग्रहाय निजपदारोहो निरूप्यते । तत्र कुरुक्षेत्रयात्रायामविरक्तस्य वसुदेवस्य "कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम्" इत्येवं कर्मयोगं पृष्टवता नारदादिभिः कर्मयोगो निरूपितः । "कर्मणा कर्मनिर्हार एष साध निरूपितः ॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः" इत्यादिना । तेन च विशुद्धसत्त्वस्य श्रीकृष्णरामौ परमेश्वरत्वेन ज्ञातवतः षड्गर्भानयनाध्याये श्रीकृष्णेनात्मतत्त्वमुपदिष्टम् । "वचो वः समवेतार्थं तातैतदुपमन्महे ॥ यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः" इत्यादिना । तच्च विषयभोगातिशयेन पुनस्तिरोहितमिवासीत्तदेवेदानीं नारदमुखेन प्रथमं पंचाध्याय्या निरूप्यते । तत्र प्रथमेऽध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनात्युन्नतविषयसुखानामप्यनित्यता प्रतिपाद्यते । ततश्चतुर्भिर्निमिजायंतेयसंवादेन सपरिकरं परमतत्त्वनिरूपणम् । ततः षष्ठे भगवदुद्धवसंवादप्रस्तावः । ततस्त्रयोविंशत्या उद्धवं प्रति भगवतस्तत्त्वनिरूपणम् । ततो द्वाभ्यां मौसलक्रीडेत्येवमेकत्रिंशताऽध्यायैरेकादशस्कंधस्य प्रवृत्तिः । तस्य च यथामति व्याख्यानमारभ्यते । तत्र मौसलप्रसंगार्थं पूर्वस्कंधार्थमनुवदति श्लोकद्वयेन । कृत्वेति ।

ॐ स्वस्ति श्रीगणेशाय नमः ॥ श्रीकृष्णं राधिकानाथं गोपगोपीनिषेवितम् ॥ नत्वैकादशभावार्थदीपिकोद्योतिनीं ब्रुवे ॥ १ ॥ ॐ नमः श्रीपरमहंसेति पूर्वं व्याख्यातमेव ॥ परानन्दकृष्णपादयोर्या रजसां स्रजः पंक्तयः विजयन्ते सर्वोत्कर्षेण वर्तंते महेन्द्रादीनां महसस्तेजसः सृजंतीति स्रजो रचनाकर्त्र्यः । 'सृज—विसर्गे' क्विपि निपातनाद्गुणादेशेऽरोरादेशे स्रगिति रूपम् । यद्वा—या मूर्ध्नि स्रजो मालारूपा जायन्ते किंभूताः महेन्द्रादिभिर्महान्ते पूज्यंत इति महेंद्रादिमहः श्रीकृष्णांघ्रिरजोधारिणमिंद्रादयोऽप्यर्चन्तीति भावः (१) । जयंत्या ऋषभदेवाय दत्ताया इन्द्रकन्याया अपत्यानि 'कविर्हरिरन्तरिक्षः' इत्यादिना वक्ष्यमाणानि तेषामितिहास आद्यो येषामितिहासानां तैस्तथा । समासः संक्षेपो व्यासो विस्तारः (२) । अथ वसुदेवनारदसंवादानन्तरम् । उपपत्तिभिर्नानाप्रमाणैः "युक्तौ विश्वासदार्ढ्ये च प्रमाणेष्युपपादनम्" इति निरुक्तिः । उपपादनमुपपत्तिरित्येकार्थतैव (३) । तत्रैकत्रिंशदध्यायेषु मध्ये उपक्षित उपन्यस्तः । अपदेशतः छद्मना (४) । प्रवृत्तितः प्रवृत्त्या प्रवृत्तिरूपा तृतीयार्थे । प्रथमार्थे वा तसिः । परानंदश्चासौ कृष्णस्तस्य क्रीडा । यद्वा—पर आनन्दः परेषां ब्रह्मादीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाऽऽनन्दो यस्यां क्रीडायां सा परानंदा सा चासौ कृष्णक्रीडेति तथा । तन्निवृत्त्या प्रवृत्तिरूपक्रीडानिवृत्त्या (९) । एवं पूर्वोक्तरीत्या तावन्निश्चयेन निजविभूतिभिरपरिहार्यसंपद्भिर्विभूषितो यदुवंशो येन सः तस्य । यदुवंशेऽवतारिताः सकलसुराणामंशा येन स तथा तस्य श्रीकृष्णस्य । तदुचितप्रवृत्तिविडम्बनेन क्षत्रकुलोचितमार्गानुगमनेन । तच्छ्रवणस्मरणादिपराणां तस्याः प्रवृत्तिक्रीडायाः श्रवणादिपराणाम् । आदिना कीर्तनादिग्रहः । अथ प्रवृत्तिक्रीडानिरूपणोत्तरम् । तत्तदविकारपदप्रापणपूर्वकम् यतो यः समागतस्तस्य तत्रैव प्राप्तिपुरःसरं तत्र निजपदारोहप्रसंगे तेन च कर्मयोगेन विशुद्धान्तःकरणस्य तच्च कृष्णोपदिष्टात्मतत्त्वं तदेव विषयभोगतिरोहितात्मतत्त्वमेव । तत्र पञ्चाध्याय्याम् । ततस्तदनंतरम् । सपरिकरं ससाधनम् । ततस्तदनु । प्रस्तावः प्रसंगः । ततः षष्ठाध्यायोत्तरं त्रयोविंशत्या सप्तमत एकोनत्रिंशांतैरध्यायैः :तत्त्वनिरूपणम् स्वरूपनिरूपणम् । द्वाभ्यां त्रिंशैकत्रिंशाभ्याम् । तस्य चैकादशस्कंधस्य । तत्रादौ । सरामो बलेन सहितः । इत्यर्थ इति—वेगवति कलहे हिंसाया अवश्यंभावित्वादिति भावः ॥ * ॥ ॐ गणपतये नमः ॥ अथैकादशसन्दर्भे संदर्भाणां समाहृतिः । क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः (१) । अथैकादशस्कन्धस्य संदर्भः । तत्र प्रथमतस्तावदिदं विवेचनीयम् । पूर्वं श्रीमति दशमस्कन्धे श्रीकृष्णलीला वर्णिता तस्याश्च फलं साधारणानामपि तद्भक्तिलाभपूर्विका तत्प्राप्तिरेवेत्यन्ते निर्दिष्टम् । "इत्थं परस्य निजधर्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंबनानि । कर्माणि कर्मकषणानि यदूत्तमस्य श्रूयादमुष्य पदयोरनुवृत्तिमिच्छन् ॥ मर्त्यस्तया" इत्यारभ्य 'यदर्थाः' इत्यंतद्वयेन । तत्र तत्पदं भुवि प्रकाशमानानां द्वारकादीनां लौकिकत्वानुकरणेनान्यथा प्रतीतानामपि नित्यसिद्धालौकिकप्रकाशविशेष एव । यथास्य स्कंधस्यैवांते वक्ष्यते—'द्वारकां हरिणा त्यक्ताम्' इत्यादिद्वयेन । अतोऽत्र स्कंधे तज्ज्ञापनार्थं सपरिकरस्य भगवतस्तत्र प्रवेशो वर्ण्यते मौसलादिकं त्वनुकरणमेव । यथैव दर्शितं श्रीकृष्णसंदर्भे प्रथमतृतीयक्रमसंदर्भयोश्च । यच्चात्र श्रीवसुदेवनारदसंवादेन तत्त्वं निरूपयिष्यते तत्खलु तद्वारा बहिर्मुखानामन्यावेशत्याजनेन तल्लीलाप्रवेशनार्थमेव । श्रीवसुदेवोद्धवादौ च तन्मतादरार्थं तत्रोपलक्षणावेव कृतौ न तूद्देश्यौ "शय्यासनाटनालापक्रीडास्नानाशनादिषु । न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः ॥" इत्यादि सामान्यतः "वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिम्" इति "नोद्धवोण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्स तु तिष्ठतु ॥" इति विशेषतस्तत्तन्माहात्म्यात् । अतस्तादृशां तत्तत्पृच्छा तु लीलामात्रमन्येषामुपकाराय कल्पते यथैव भगवत इति तदेव तद्दर्शयितुमुपक्रमते—कृत्वेति ॥ * ॥ **विश्वनाथस्तु**—श्रीश्रीकृष्णचैतन्यचन्द्राय नमः । गोवर्धनवराधारं श्रीमद्गोवर्धनप्रभुम् । गोवर्धनवराधारं श्रीगोवर्धनमाश्रये ॥ तदीयप्रियदासाय मां मदीयमहं ददे । एकेन मौसलारंभो जायंतेयकथा ततः ॥ चतुर्भिः स्तुतिरेकेन ब्रह्मेशादिदिवौकसाम । श्रीकृष्णोद्धवसंवादो विंशत्या त्रियुजा ततः ॥ एकेन कुलसंहार एकेनांतर्द्धिरीशितुः । एवमेकोत्तरत्रिंशदध्यायैस्तत्त्वबोधकैः ॥ मुक्तिरेकादशस्कन्धे कीर्तिता पूर्वलक्षिता । तदेवं दशमस्कन्धे दशमाश्रयतत्त्वं विचित्रचारित्रामृतवितरणविस्मापितप्रीणितस्वभक्तसुमनसं स्वयं भगवन्तं श्रीकृष्णं निरूप्य तच्चरणपरिचरणाश्रितां मुक्तिमेकादशेऽत्र स्कन्धे निरूपयन् किंचिदवशिष्टं तच्चरितं वक्तुं पूर्वोक्तानुवादेनोपक्रमते—कृत्वेति ॥ तैर्व्याख्यातम् ॥*॥ अत्र **दीपिकादीपनमपि**—अथ भगवद्वाक्यत्वेन परमप्रामाण्यापन्नमेकादशस्कन्धं व्याकुर्वच्छ्रीधरयतींद्र उपास्यचरं श्रीरघुनाथं प्रणतिरूपं मंगलं प्रत्यूहनिकरनिर्मूलकं निबध्नाति—नम इति ॥ श्रिया परमप्रेमसंपत्त्या युक्ता ये भागवतपरमहंसास्तैरास्वादितश्चरणकमलयोश्चिद्रूपो मकरंदो यस्य तस्मै । चिदत्रानंदाऽपरपर्यायमनुकूलज्ञानमेव । भक्तजनानां मानसमेव निवासो गृहं यस्य तस्मै श्रीरामचंद्राय नमः ॥ अथ श्रीभागवते परमप्रतिपाद्यश्रीकृष्णपादरजःसौभाग्यं वर्णयति—विजयंत इति ॥ " सच्चिदानंदरूपाय कृष्णाय " इति श्रुतेः । परानंदविग्रहरूपो यः श्रीकृष्णस्तस्य पादरजसां संबंधिन्यो याः स्रजो मालाः श्रेण्यो वा ता विजयंते सर्वोत्कर्षेण वर्तन्ते । कीदृशः यास्तादृशस्रजो महेंद्रादिभिर्मूर्ध्नि धृताः सत्यस्तेषां महेंद्रादीनां महसामुत्सवानां स्रजः समूहा जायन्ते तेभ्यस्तत्तत्पादोत्सवान्ददतीत्यर्थः । 'मह उद्धव उत्सवः ' इत्यमरः । " सर्वेऽसंताश्च ये शब्दास्तेःदंता अपि संति हि " इति द्विरूपकोशाददंतोपि महशब्दो ज्ञेयः । पक्षे परानंदनामा स्वगुरुरेव कृष्णस्तस्य । अन्यत्सर्वं पूर्ववत् (१) । अथैकादशार्थं सामस्त्येनाह—उक्तेति ॥ ततः प्रायिकक्रममनुसृत्य दशमे दृष्टे भूभृन्निरोधवर्णनानंतरमेकादश एकत्रिंशताध्यायैः श्रीशुकेन मुक्तिः संक्षेपविस्ताररूपेणोक्ता । जायंतेया जयंतींद्रात्मजा पुत्रा नवयोगेश्वराः कव्यादयस्तेषामितिहासः पुरावृत्तमाद्यो येषां

१ इतोऽग्रे यावदेकादशस्कंधं प्रतिपद्य (*) मेतच्चिह्नतोऽग्रे संदर्भ-विश्वनाथ-दीपिकादिसम्मतव्याख्यानं बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये कोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वा निमित्तमितरेतरतः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः ॥ २ ॥
भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिंतयदप्रमेयः ॥ मन्येऽवनेर्ननु गतोऽप्यगतं हि भारं यद्यादवं कुलमहो ह्यविषह्यमास्ते ॥ ३ ॥

अवतारयदवातारयदित्यडागमो द्रष्टव्यः । जविष्ठं वेगवत्तरमंतिशीघ्रम् । हिंसापर्यवसायिनमित्यर्थः । कलिं कलहम् ॥ १ ॥ एतद्विवृणोति । ये कोपिता इति । सपत्नैर्दुर्योधनादिभिः कोपिताः कोपं कारिताः । सुबहु यथा भवति तथा । बहुवारानित्यर्थः । तदेवाह । दुर्द्यूतहेलनकचग्रहणादिभिरिति । दुर्द्यूतं कपटद्यूतम् । हेलनमवज्ञा । कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणम् । एतान्यादिर्येषां गरदानजतुगृहदाहादीनां तैः कृत्वा ये कोपितास्तान्पांडुसुतान्निमित्तं कृत्वा इतरेतरत उभयोः पक्षयोः समेतान्मिलितान्नृपान्हत्वा क्षितेर्भारं निरहरज्जहार । यद्वा ये कोपिता यैश्च कोपितास्तानितरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः । ये तावत्प्रकटदैत्याः पूतनादयस्तान्स्वयमेव हतवान् । ये तु प्रलंबादयस्तान्बलेन घातितवान् । ये तु दैत्या बांधवच्छद्मना स्थितास्तान्परस्परं निमित्तं विधाय हत्वा भूभारमपाकृतवानित्यर्थः ॥ २ ॥ अपिच भूभारेत्यादि । अन्याश्च भुवो भारभूता राजपृतना राज्ञां पृतनाः सेनाः राज्ञस्तेषां पृतनाश्चेति वा । स्वबाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिच्छलेन निरस्य हत्वा । बाहुभिरिति बहुवचनं वस्तुतश्चतुर्भुजाभिप्रायेण । नन्वेवं कृष्णश्चिकीर्षतीति ज्ञात्वा कथं तस्मै यादवा न द्रुह्यंति स्म तत्राह । अप्रमेयः प्रमातुमशक्यः । चिंतामाह । मन्य इति । नन्विति वितर्के । अवनेर्भूमेर्भारो यद्यपि लोकप्रतीत्या गतस्तथाऽप्यहमगतमेव मन्ये । हि निश्चितम् । यद्यस्मादविषह्यं सोढुमशक्यम् । यादवं कुलमित्यनेनैव स्ववंशत्वात्स्वयं हनन

तैरितिहासैः (२) । संग्रहवाक्यमुक्त्वा विवृत्तिवाक्यमाह—नारदः संक्षेपेण मुक्तिं न्यवर्णयत् । तदनु उपपत्तिभिर्युक्तिभिः (३) । उपक्षितो वर्णयितुमारब्धः विरागाय विरागं जनयितुम् (४) । प्रवृत्तिमार्गानुकारिणी लीला इदानीमेकादशस्कन्धे "कामान् सिषेवे द्वार्वत्यामसक्तः सांख्यमास्थितः" इत्युक्तेस्तस्याः प्रवृत्तेः सकाशान्निवृत्त्या परानन्दपरे द्वारकायामप्रकटप्रकाशे कृष्णस्यारोहो निरूप्यते श्रीशुकेनेति शेषः (५) । इत्थं श्लोकैरुक्त्वा प्रघट्टकेनापि तमेवार्थमाह—एवमिति ॥ निजविभूतिभिरैश्वर्यादिभिर्विभूषितोऽलंकृतो यदुवंशो येन तस्य । तत्र हेतुः—यदुवंशेऽवतारिताः सकलसुरांशा येन तस्य । एतेन सुरांशेभ्यो यदुवंशस्य पृथक्त्वमुक्तम् । तदुक्तं पाद्मे कृष्णेन सत्यभामां प्रति—"एते हि यादवाः सर्वे मद्गुणा एव भामिनि । मत्तुल्यगुणशीलाश्च मत्तुल्याचारवादिनः ॥" इति । तदुचितप्रवृत्तिविडंबनेन यदुवंशोचितप्रवृत्त्यनुकरणेन तस्याः क्रीडायाः श्रवणादिपराणां श्रीकृष्णस्य तदुचितप्रवृत्तिविडम्बनेन परेषां ब्रह्मादीनामानंदकारणं क्रीडा दशमस्कन्धे श्रीशुकेन निरूपितेत्यन्वयः । तदुक्तं "प्रपञ्चं निष्प्रपञ्चोऽपि विडंबयसि भूतले । प्रपन्नजनतानंदसंदोहं प्रथितुं प्रभो ॥" इति । उपरमितमंतर्धापितं योगमायाया अचिंत्यशक्तेर्वैभवं येन तस्य । निजपुरे द्वारकाख्याप्रकटप्रकाशे । आरोह आरोहणम् । प्रवृत्तिः प्रचारः ॥ १ ॥ एतद्भूभारहरणम् । इत्यर्थ इति—सुबह्वित्यत्र सुशब्देनावृत्तिरुक्तेति ज्ञेयम् । तदेव सुबहुत्वमेव । पांडुसुतान्युधिष्ठिरादीन् । उभयोः पक्षयोर्युधिष्ठिरदुर्योधनपक्षयोः । निरहरत् अपाकार्षीत् । पूर्वव्याख्याने उभयोस्तुल्यनिमित्तत्वे सत्यप्येकस्योपादानादस्वारस्यमत आह—यद्वेति । बांधवच्छद्मना स्थिताः शिशुपालादयः । इत्यर्थ इति—कपटान्कपटैरितरानितरथा यथाकथंचिद्धत्वा स्वावतारकृत्यं संपादयामासेति भावः ॥ * ॥ **संदर्भः**—निरहरत् प्रायः स्वकृतभारांते निःशेषेणाहरदित्यर्थः । तदेव टीकायाः प्रथमपक्षस्य संगतिः स्यात् । द्वितीयपक्षे तस्यां प्रायिकत्वं ज्ञेयं शिशुपालादौ व्यभिचारात् । तच्चिंतनस्यान्यैरज्ञातत्वादप्रमेय इति **विश्वनाथः** ॥ २ ॥ न केवलमेतावदेव कृतवान्किंत्वन्यदपीत्याह—अपि चेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्मत्संश्रयस्य विभवोन्नहनस्य नित्यम् ॥ अंतःकलिं यदुकुलस्य विधाय वेणुस्तंबस्य वह्निमिव शांतिमुपैमि धाम ॥ ४ ॥ एवं व्यवसितो राजन्सत्यसंकल्प ईश्वरः ॥ शापव्याजेन विप्राणां संजह्रे स्वकुलं विभुः ॥ ५ ॥ स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणाम् ॥ गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ॥ ६ ॥

मनुचितमिति सूचितम् ॥ ३ ॥ तर्हीदमप्यन्यैर्घात्यतां तत्राह । नैवेति । अन्यतो देवादिभ्योऽपि यादवकुलस्य परिभवस्तिरस्कारो न भवेत् । कुतः । मत्संश्रयस्य मां संश्रयत इति मत्संश्रयं कुलं तस्य । किंच नित्यं विभवोन्नहनस्य विभवैर्गजतुरगादिभिरुच्छृंखलस्य । यद्वा । तर्हीदं किमिति संहर्तव्यं तत्राह । विभवोन्नहनस्येति । तस्मादेवं करिष्यामीत्याह । अंतःकलिमिति । शांतिमुपशममुपैमि । वर्तमानसामीप्ये वर्तमानवद्वा । उपैष्यामि । तदनंतरं धाम च वैकुंठाख्यमुपैष्यामीत्यर्थः ॥ ४ ॥ व्यवसितः कृतनिश्चयः । संजह्रे उपसंहृतवान् ॥ ५ ॥ तदेवमवतारप्रयोजनं सर्वं संपाद्य स्वं लोकं जगामेत्याह श्लोकद्वयेन । स्वमूर्त्येति । लोकानां लावण्यस्य निर्मुक्तिस्त्यागो यया यामपेक्ष्य लोकेषु लावण्यं नास्तीत्यर्थः । यद्वा लोकेभ्यो लावण्यस्य निर्मुक्तिर्दानं यतः । यत्संपर्केण लोका लावण्यवंतो भवंतीत्यर्थः । तया स्वमूर्त्या नृणां लोचनमाच्छिद्याकृष्य ततोऽन्यस्यावलोकने लोचनस्याप्रवृत्तेः । तथा स्वगीर्भिस्ता गिरः स्मरतां चित्तं चाच्छिद्य । तथा पदैस्तत्रतत्रांकितैस्तानि पदानीक्षतामीक्षमाणानामन्यतो गमनादिकाः क्रियाश्चा

न केवलं राजपुतनैव भूभारः किंतु तेऽपीत्याह—राज्ञस्तेषां पृतनाश्चेति वेति । अत्राक्षिपति—नन्विति । तस्मै कृष्णाय । प्रमातुं ज्ञातुम् ॥ * ॥ संदर्भः—भूभारेति । यादवानां नित्यपरिकरत्वात्तत्त्यागेन स्वयं भगवत एवांतर्धाने सति तद्वियोगक्षुभितैरुन्मत्तचेष्टैरुपमर्दिता पृथिव्येव नश्येदिति प्रथमं तेषामंतर्द्धापनं तदेवाह—स्वबाहुभिरिति । बहुत्वं तत्र चतुर्भुजत्वप्रकाशनाभिप्रायेण । नैतावानेव तस्याभिप्रायः किंत्वन्योपि भवेदिति भावः । अत्र तेषामधार्मिकतया तु पृथिवीभारत्वं न मंतव्यं 'ब्रह्मण्यानां वदान्यानाम्' इत्याद्युक्तेः । "शय्यासनाटनालापक्रीडास्नानाशनादिषु । न विदुः संतमात्मानं वृष्णयः कृष्णचेतसः ॥" इत्युक्तेस्तेषां परमैकांतिकत्वप्रसिद्धेः पृथ्व्या भारश्च व्यक्तिबाहुल्यमात्रेणापि नेष्टः ससमुद्रपर्वतानंत्यसत्त्वेनापि भारत्वाप्रसिद्धेः । अतोन्तर्धापनोक्तिरेव भारत्वारोपणे हेतुः ॥ ३ ॥ अत्राक्षिपति—तर्हीति । इदं यादवकुलम् हेत्वाक्षेपे हेतुगर्भविशेषणमाह—मत्संश्रयस्येति । न केवलमेतावदेव किंत्वन्यदपीत्याह—किं चेति । ननु स्वकुलहननसंकल्पोप्ययुक्तः कुतस्तद्धननमिति चेदत्राह—यद्वेति । उच्छृंखलानां नाश एवोचित इति भावः । वेणुस्तंबस्यान्तःकलिर्मिथःसंघर्षणलक्षणस्तस्माज्जातं वह्निमिव 'शांती प्रशममंगले' इति यादवः । यद्वा—शांतिं धाम मंगलं धामेति उपैमि बहिर्लीलासंकोचेन नित्यलीलामुपैमि । इत्यर्थ इति—अतीवोच्छृंखलं यदुकुलमिहावशेषयित्वा ममांतर्धानं नोचितमिति भावः ॥ * ॥ नैवेति । अन्यतः परिभवोऽपि न भवेत् । किंतु स्वेभ्य एव नाशस्तु स्वतोपि न संभवेदित्यर्थः । तत्र हेतुः—नित्यं मत्संश्रयस्यैव स्वतो विभवोन्नहनस्य निरवधिवैभवस्य अतः परिभवोत्र भुवि प्रकाशाद्बहिर्मुखीकरणम् । धाम निजनित्यद्वारकाख्यम् । दृष्टांतश्च नाशानुकरणनाशयोः साम्यप्रतीतेः तथांतर्नाशानुकरणञ्च न स्यात् । कालांतरे बहिश्च प्राकट्यं भावीत्येतदंशेन चैक्यप्रायत्वाद्घटयामास विवर्तादिभिरपि लोहादिभिरपि लोहादिदृष्टान्तः—परिणामपरिहारायैकदेशेनैव मन्यन्ते परिणामवादिभिरपि मूलानुच्छेदेनैवेति वह्निं मिथःसंघट्टनोत्थापितमग्निम् ॥ ४ ॥ चिंताफलमाह—एवमिति । संजह्रेंतार्हितवान् ॥ * ॥ विप्राणां शापव्याजेनेति । ब्राह्मणमाहात्म्यदर्शनमप्यत्र प्रयोजनमिति भावः । संजह्रे पूर्वोक्तस्वपदे सामस्त्येन नीतवान् प्रवेशितवानित्यर्थः ॥ ५ ॥ पुनः श्रीकृष्णकृत्यमाह—तदेवमित्यादिना । इत्यर्थ इति—निखिलसौंदर्याधिष्ठानभूतयेति भावः ।

१ यादवानां नित्यपरिकरत्वादित्याद्या प्रथमं तेषामन्तर्धापनमित्यन्ता ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ ॥ तमोऽनया तरिष्यंतीत्यगात्स्वं पदमीश्वरः ॥ ७ ॥ राजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसाम् ॥ ८ ॥

च्छिद्य । तदानींतनानां सर्वेषां चक्षुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वेत्यर्थः ॥ ६ ॥ किंच । इत उपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां शोभनाः श्लोकाः सुश्लोकाः कवीनां यस्यां तां स्वकीर्तिं वितत्य विस्तार्यानया कीर्त्या अंजसा सुखेनैव नु निश्चितं तमस्तरिष्यंतीत्यभिप्रेत्येश्वरः स्वं पदं स्थानमगादिति ॥ ७ ॥ तन्वब्रह्मण्येभ्योऽदातृभ्यो वाऽसेवकेभ्यो वा विप्राः कुप्यंति वृष्णयस्तु न तथेत्याह ब्रह्मण्यानामित्यादिना । किंच कोपे जातेऽपि कृष्णचेतसां कथमभूत्कथं प्रादुरभूदित्यर्थः ॥ ८ ॥

एतेन लोके दृष्टचरस्यापि लावण्यस्योच्छेदप्रतीतेरर्थांतरमाह–यद्वेति । इत्यर्थ इति–परमकारणतया तत्संपर्केणांतर्यामितया वा श्रीकृष्णसंबंधेनैव लोके यदंशांशेन लावण्यमिति भावः । ततः श्रीकृष्णमूर्तेः । इत्यर्थ इति–स्वमूर्तिप्राकट्यसमकालीनसर्वजनेंद्रियवृत्तीः स्वस्मिन्नावेश्यार्थात्स्वसमकालीनजनान्निजपदाधिकारिणो विधायेति भावः ॥ * ॥ तदीदृशं यत्पदं तदेव श्रीदशमोक्तश्रीलीलामहाशक्तिप्राप्तिपूर्वकं फलमित्याह–स्वमूर्त्येति युग्मकेन । त्यागशब्दस्य मुख्यार्थासंभवाद्यपेक्षादिगौरवं मत्वाह–यद्वेति । यत्संपर्केण यन्मूर्त्यवलोकनादिसंबंधेन । तदुक्तम् " तत्र प्रवयसोऽप्यासन्युवानोतिबलौजसः । पिबंतोक्षैर्मुकुन्दस्य मुखांबुजसुधां मुहुः ॥" इति । तमस्तदज्ञानमयं संसारं तरिष्यन्तीति तीर्त्वा तत्पदं प्राप्स्यन्तीत्यर्थः । तदेवं तटस्थानामप्येवमवस्था चेत्तर्हि सुतरां यादवानामभवादिति भूभारेत्यत्र दर्शित एव सिद्धान्तः स्थापितः । गिर इति कर्णेन्द्रियोपलक्षणं वागिंद्रियरहितानां कर्णेन्द्रियाभावदर्शनात् गीर्भिः कर्णेन्द्रियं वागिन्द्रियं चापहृत्येत्यर्थः । ननु कृष्णोऽवतीर्य नृणां चक्षुरादि सर्वस्वं हृत्वा तानंधमूकबधिरोन्मत्तजडानेवाकरोदित्यतः कस्तं दयालुं वेदेन्महाचौर एव स इति व्याजस्तुतिः । वस्तुतस्तु दैत्येभ्योऽपि संहृत्य मुक्तिं ददौ तदन्येभ्यस्तु सौंदर्यादिलावण्यसिंधौ निमज्ज्य प्रेमाणमेव ददावित्येतावान् निरुपाधिदयालुर्नास्ति कोपीति भावः ॥ ६ ॥ तरिष्यंतीति । अतः परं जनिष्यमाणा जना अनया तरणसाधनीभूतया कीर्त्या सुखेन तरिष्यन्तीति भविष्यज्जनेष्वप्येतावती दयेति भावः । स्वं पदं स्वीयं व्यवसायमगात् । " पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु " इत्यमरः । सपादशतवर्षांते सर्वस्मिन्नेव स्वीयचिकीर्षिते निष्पन्ने सति सांप्रतं प्रापंचिकलोकादृश्यो भविष्यात्मीयुपस्थितो यः स्वव्यवसायस्तं प्रापेत्यर्थः । न तु सर्वांशेनैव स्वीयं पदं प्रसिद्धवैकुंठमगादिति व्याख्येयम् । तस्य द्वारकादिधामत्रये नित्यविहारित्वस्य पूर्वस्कंधान्ते व्याख्यातत्वादेतत्स्कंधान्ते च श्रुत्यादिप्रमाणतो व्याख्यास्यमानत्वाच्च । तृतीयादावुद्धवोक्तौ च ' कृष्णद्युमणिनिम्लोचे ' इत्यत्र ' अजोपि जातो भगवान्यथाग्निः ' इत्यत्र च द्युमण्यादिदृष्टान्तेन तस्य द्वारकादिस्वधामत्यागाभावस्य दृढीकृतत्वाच्च ॥ * ॥ न केवलं स्वसमकालीनोद्धर्त्तैवापि तु भविष्यतामपीत्याह–किंचेति । स्वं पदं व्यवसितं वा " पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु " इत्यमरः । सपादशतवर्षान्ते स तस्मिन्नेव स्वीय चिकीर्षिते निष्पन्ने सति सांप्रतं प्रापंचिकलोकादृश्यो भविष्यामीत्युपस्थितो यः स्वव्यवसायस्तं प्रापेत्यर्थः । " निर्मुक्तिर्मोचने त्यागे मुक्तौ दानेपि बंधने " इति निरुक्तिः " तमो ध्वान्ते च संसारेऽज्ञाने ग्लानौ प्रकीर्तितम् " इति च । तमोऽज्ञानं संसारं वा ॥ * ॥ ० ॥ ७ ॥ " ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः प्रतिपूज्यन्ते निर्दहंत्यपमानिताः ॥ " इति स्मृत्युपंभेनाशंकते–नैन्वब्रह्मण्यैभ्य इति । न तथा, अब्रह्मण्यादयो नेत्यर्थः । असंभावनयाक्षिपति–किंचेति । इत्यर्थ इति–न हि कृष्णभक्तेषु शापः प्रभवितुमुचितः । " कृष्णानुकूलेषु ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९ ॥ श्रीशुक उवाच ॥ बिभ्रद्वपुः सकलसुंदरसन्निवेशं कर्मा
ऽऽचरन्भुवि सुमंगलमाप्तकामः ॥ आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥ १० ॥ कर्माणि पुण्यनिवहानि सुमं
गलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मना निवसता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥ ११ ॥

अतः स्पष्टस्य निमित्तस्याभावान्निमित्तांतरं पृच्छति । यन्निमित्त इति । एकात्मनामेकचित्तानां कथं भेदः कलहः ॥९॥ ईश्वरेच्छैवात्र निमित्तमिति परिहरति । बिभ्रदिति । सकलानां सुंदरवस्तूनां सन्निवेशो विन्यासविशेषो यस्मिंस्तद्वपुर्बिभ्रत् । तर्हि किमतिसौंदर्याद्विषयपरः । न । सुमंगलं कर्माचरन् । तत्किं कयाऽपि कामनया । न । आप्तकामः । तर्हि किमिति कर्माचरति । धाम द्वारवत्याख्यं गृहमास्थाय रममाणः । गृहे रममाणान्कर्म ग्राहयितुमित्यर्थः । ननु किमाप्तकामस्य गृहरत्या कर्मभिर्वा तत्राह । उदारकीर्तिः उदारा बहुफलप्रदा कीर्तिर्यस्य सः । कीर्तिवितानार्थमित्यर्थः । एवं परमैश्वर्येण वर्तमान एव कुलं संहर्तुमैच्छत् । तत्कस्य हेतोः । स्थितः कृत्ये भूभारहरणे तावन्मात्रः शेषो यस्य सः ॥ १० ॥ ईश्वरेच्छयोत्थितं ब्रह्मशापनिमित्तं वक्तुमाह । कर्माणीति । कर्मार्थमाहूताः कर्माणि कृत्वा निसृष्टाः प्रस्थापिताः

यथा महत्सु क्षुद्रैः प्रयुक्ता रुशती रूक्षवाचः ” इत्युक्तन्यायेनेति भावः ॥ * ॥ **संदर्भः**—अथ यो विप्रशापव्याजः कृतः स एव न संभवति दोषासंभवादित्याह—ब्रह्मण्यानामिति । विप्राणां विदुषां तत्तया श्रीभगवदात्मीयजनपरिभवदोषमपि जानतां तेषां शापः कथमभूदित्यर्थः । तदात्मीयत्वमेवाह—वृष्णीनां कृष्णचेतसामिति । तच्छापाप्रभुत्वेऽपि हेतुरयम् ॥ ८ ॥ स्पष्टं निमित्तं भेदे यतो नास्त्यतो हेतोः । निमित्तां तरं कारणान्तरम् । यन्निमित्तो यत्कारणकः । यादृशो यत्प्रकारकः ॥ * ॥ **विश्वनाथः**—एकात्मनामेकमनसां तेषां भेदः संहारहेतुः कलहः । यद्वा—एकः कृष्ण एवात्मा परमेष्टः परमप्रवर्तकश्च येषाम् ॥ ९ ॥ अत्र भेदे । सुंदरवस्तूनामुपमानविशेषाणां मृगलोचनसिंहस्कंधादीनां विन्यासविशेषो रचनाविशेषो यस्मिंस्तत् । अत्राशंकते—तर्हीति । विषयेषु भोगेषु परस्तत्परः । नेत्याह—तत् सुमंगलकर्माचरणं कामनयाऽभिलाषेण । नेत्याह—आप्तकामस्य किं कर्मभिरित्याशंकते—तर्हीति । इत्यर्थ इति—“ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ” इति न्यायेन लोकशिक्षार्थं तथाचरतीति भावः । पुनस्तथैव शंकते—नन्विति । इत्यर्थ इति—मत्कीर्तिश्रवणादिना लोकं संसारं तारिष्यतीति भावः । तत्कुलसंहरणम् । अत्र हेतुगर्भं विशेषणं स्थितेत्यादि ॥ * ॥ अत्र विप्रशापे ईश्वरस्य कृष्णस्येच्छैव परंपरया निमित्तमिति परिहरति—परीक्षिदाक्षेपं समाधत्ते ॥ * ॥ **विश्वनाथः**—स्वीयान्रूपलीलाविलासान्सर्वोत्कृष्टान्दर्शयित्वा जनान्कृतार्थीकृतवता स्वचिकीर्षितनिष्पत्तिसमाप्तौ तैर्वृष्णिभिः सहांतर्द्धित्सता भगवतैव ब्रह्मशापः स्वेच्छया विप्रद्वारा कल्पित इत्याह—बिभ्रदिति । सन्निवेशो रचनाविशेषः इति रूपमुक्तम् । कर्मेति—लीला चोक्ता । धाम द्वारकादिकमास्थाय तत्र स्थित्वा रममाणः तत्रतत्रत्याभिः प्रियाभिर्विहरन्नित्यद्भुतो विलासश्चोक्तः । आप्तकामः सिद्धस्वचिकीर्षितः । उदारकीर्तिर्जनिष्यमाणलोकेभ्योऽप्युदारा प्रेमभक्तिदायिनी कीर्तिः स्वीयरूपलीलाविलासप्रथामयी यस्य सः । ब्रह्मशापद्वारैव कुलं सहर्तुमैच्छत् । स्थितः कृत्यशेषः किंचिन्मात्रावशिष्टं कृत्यं यस्य सः । तच्च यदुषु प्रवेशितानां देवानां दिवि प्रस्थापनं स्वांशानां वैकुंठश्वेतद्वीपबदर्याश्रमादिषु प्रस्थापनं नित्यपार्षदसहितस्य स्वस्य प्रापंचिकलोकचक्षुर्भ्योऽन्तर्द्धानञ्चेति त्रयम् ॥ * ॥ **संदर्भः**—बिभ्रत्प्रकटयन् । आप्तकामः तेनतेन निजभक्तजनानामभीष्टदानात्सिद्धमनोरथो जातः तदनंतरं च धाम प्रपञ्चातीतप्रकाशतत्तन्निजधामैवास्थायाधिष्ठाय रमणहेतोः कुलं संहर्तुं तत्रैव सम्यङ्नेतुमैच्छत् । नन्वाप्तकामश्चेत्पुनः किमन्यक्रीडेच्छया तत्राह—स्थितः सर्वदा स्थायीकृत्य शेषः स्वप्रेष्ठजनैस्सह लीलाविशेषो यस्य सः । अवतारगतलीलेच्छैव पूर्णा न तु सर्वेत्यर्थः । अत एवोदारा भक्तसुखदस्वभावमयी कीर्तिर्यस्य सः ॥ १० ॥ प्रश्नं परिहरञ्छापहेतुमाह—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वामित्रोऽसितःकण्वो दुर्वासा भृगुरंगिराः ॥ कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः ॥ १२ ॥ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः ॥ उपसंगृह्य पप्रच्छुरविनीता विनीतवत् ॥१३॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतम् ॥ एषा पृच्छति वो विप्रा अंतर्वत्न्यसितेक्षणा ॥ १४ ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति ॥ १५ ॥ एवं प्रलब्धा मुनयस्तानूचुः कुपिता नृप ॥ जनयिष्यति वो मंदा मुसलं कुलनाशनम् ॥ १६ ॥ तच्छ्रुत्वा तेऽतिसंत्रस्ता विमुच्य सहसोदरम् ॥ सांबस्य ददृशुस्तस्मिन्मुसलं खल्वयस्मयम् ॥ १७ ॥

मुनयः पिंडारकं नाम ततो नातिदूरे तीर्थविशेषं समगमन्नित्यन्वयः । पूर्वोक्तामुदारकीर्तितां विवृण्वन्कर्माणि विशिनष्टि पुण्यनिवहानीत्यादीत्रिभिः पदैः । कानिचिदश्वमेधादिकर्माणि पुण्यमेव जनयंति । पुत्रोपलालनादीनि तु तत्काले सुखमेव कुर्वंति । प्रायश्चित्तादीनि तु पापमेव हरंति । एतानि तु सर्वतोमुखानीत्याह । पुण्यनिवहानि कीर्तनादिना पुण्यानि निवहन्ति प्रापयंतीति । तथा सुमंगलान्यतिसुखात्मकानि । गायतो जगतः कलिमलापहराणि कृत्वा । मुनिप्रस्थापने हेतुः । कालात्मना संहारकरूपेण यदुदेवगेहे वसुदेवगृहे निवसता । स्वकुलं संजिहीर्षतेत्यर्थः ॥ ११ ॥ १२ ॥ उपसंगृह्य पादग्रहणं कृत्वा ॥ १३ ॥ प्रश्नप्रकारमाह ते वेषयित्वेति द्वयेन । हे अमोघदर्शना विप्राः । एषा अंतर्वत्नी गर्भिणी वो युष्मान् साक्षात्प्रष्टुं विलज्जती लज्जमानाऽस्मन्मुखेन पृच्छति । प्रसोष्यंती आसन्नप्रसवा । किंस्वित्संजनयिष्यति कन्यां वा पुत्रं वा तत्प्रब्रूत ॥ १४ ॥ १५ ॥ प्रलब्धा वंचिताः ॥ १६ ॥ तस्मिन्नुदरे । अयस्मयं लोहमयम् ॥ १७ ॥

ईश्वरेच्छयेत्यादि । कर्मार्थं किंचिदिष्ट्यादिरूपकर्मकरणार्थमाहूताः आह्वानविषयीकृताः कलेर्युगस्य कलहस्य वा मलानां त्रिविधपापानामपहराणि नाशकानि अपवर्गबोधाय शोधकानीत्यर्थः । यदुषु दीव्यति द्योतते कृष्णपितृत्वेनेति यदुदेवो वसुदेवस्तस्य गेहे । यद्वा—यदुदेव उग्रसेनस्तस्य गेहे गेहमिव रक्ष्यमाणे द्वारकानगरे । इत्यर्थ इति—यदुकुलसंहारेतरसर्वावतारकार्यस्य कृतत्वात्कुलसंहारार्थमेव तत्र वास इति भावः । ततो द्वारकातः नातिदूरे समीपे ॥*॥ कालोंतर्यामी आत्मा रूपं यस्येति । सर्वस्य तदिच्छाधीनत्वं दर्शितम् । ततश्च प्रभुः प्रथमं ब्रह्मशापप्रकारं कापट्येन प्रश्नरूपं कर्माणि दर्शनस्पर्शनसंलापादिचरित्राणि तैर्विप्रैः सह कृत्वेति व्याख्येयम्, अन्यथा विशेषणासंगतिः स्यात् । वैदिककर्मभ्यो वैलक्षण्यं द्योतयितुं स्वैरचरित्रात्मकानि कर्माणि विशिनष्टि विशेषणैर्वर्णयति—कालात्मना यादवानामुपसंहारेऽयमेव प्रकार इति कालात्मनेत्युक्तम् ॥ ११ ॥ कांश्चिन्मुनीन्नामतो निर्दिशति—विश्वामित्र इति । आदिना गौतमादिग्रहः ॥*॥०॥१२ ॥ तान्मुनीन् । अविनीता अनम्राः ॥ * ॥ अविनीताः श्रीकृष्णेच्छयैव तदानीमेव तथाभूताः ॥ १३ ॥ ते यदुकुमाराः । असितेक्षणा नीलनेत्रा ॥*॥ स्त्रीवेषैः स्त्र्युचितवस्त्रालंकारतूलपिंडादिभिर्गर्भपौष्ट्यादिभिः सांबस्य वृद्धस्यापि बालानुमतिग्रहणेपि सैव हेतुरिति ज्ञेयम् ॥ १४ ॥ ० ॥ * ॥ ० ॥ १५ ॥ तान्कुमारान् । वो युष्माकम् ॥ * ॥ कुपिता इहापि सैव मुख्य हेतुरन्यथा श्रीकृष्णनंदनादिषु महाभागवतानां तेषां कोपासंभवात् । हे नृपेति—यथा तव परममहाभागवतस्य ब्रह्मण्यस्य शमीकार्षिसमाधिपरीक्षणार्थं तत्कंठे सर्पक्षेपादौ धीराविर्भूता तथा सांबादीनामपि तादृशी धीरिति भावः । प्रलब्धा उपहसिताः ॥ १६ ॥ तत् ऋषिवचः । ते बालाः ॥ * ॥ तत् शापात्मकं वाक्यम् । विमुच्य उच्छूनवस्त्रादिसंघातपृथक्कृत्वा सांबस्य सभारत्वेन संशयवचनत्वादिति भावः । तस्मिन्मुसलभाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं कृतं मंदभाग्यैर्नः किं वदिष्यंति नो जनाः ॥ इति विह्वलिता गेहानादाय मुसलं ययुः ॥१८॥ तच्चोपनीय सदसि परिम्लानमुखश्रियः ॥ राज्ञ आवेदयांचक्रुः सर्वयादवसन्निधौ ॥ १९ ॥ श्रुत्वाऽमोघं विप्रशापं दृष्ट्वा च मुसलं नृप ॥ विस्मिता भयसंत्रस्ता बभूवुर्द्वारकौकसः ॥ २० ॥ तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः ॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितम् ॥ २१ ॥ कश्चिन्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः ॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥ २२ ॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लोहं स शल्ये लुब्धकोऽकरोत् ॥२३॥ भगवाञ्ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत ॥ २४ ॥ इति श्रीमद्भागवते म० एकादशस्कंधे यदुकुलस्य विप्रशापोनाम प्रथमोऽध्यायः ॥१॥ ॥ श्रीशुक उवाच ॥ गोविंदभुजगुप्तायां द्वारवत्यां कुरूद्वह ॥ अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥१॥

मंदभाग्यैर्नोऽस्माभिः किमेतत्कृतम् । नोऽस्मान् किं वदिष्यंतीति विह्वलिताः संतो मुसलमादाय गेहान्ययुः ॥ १८ ॥ राज्ञे उग्रसेनाय न तु श्रीकृष्णाय ॥ १९ ॥ २० ॥ आहुक उग्रसेनः । सोऽपि श्रीकृष्णमपृष्ट्वैव प्रास्यत् चूर्णं प्रक्षिप्तवान् अस्य मुसलस्य चूर्णीक्रियमाणस्यावशेषितं लोहं च प्रास्यत् ॥ २१ ॥ तरलैस्तरंगैः ॥ २२ ॥ अन्यैर्मत्स्यैः सह । शल्ये शराग्रे ॥ २३ ॥ ज्ञाताः सर्वेऽर्था येन स ईश्वरोऽपि समर्थोऽपि सन्नन्यथा कर्तुं नैच्छत् किंत्वन्वमोदत । यतः कालरूपी ॥ २४ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां प्रथमोऽध्यायः ॥ १ ॥ द्वितीये निमिजायंतसंवादेनाह नारदः ॥ धर्मान्भागवतान्भक्त्या वसुदेवाय पृच्छते ॥ १ ॥ अभीक्ष्णं प्रस्थापितोऽपि पुनःपुनरवात्सीदित्यर्थः । ननु नारदस्य दक्षादिशापान्नैकत्र वासः संभवतीत्याशंक्याह । गोविंदभुजगुप्तायामिति । न तस्यां शापादेः प्रभाव इत्यर्थः । कृष्णोपासने लालसा औत्कंठ्यं यस्य सः ॥ १ ॥

वत्युदरे शापशक्त्या लोहमयं तत्तदैव जातमिति भावः ॥ १७ ॥ विह्वलिता व्याकुलाः ॥ * ॥ ० ॥ १८ ॥ तन्मुसलम् । न तु श्रीकृष्णाय तत्प्रतीकारसमर्थाय । नैतत्कृष्णाय चाख्येयमिति तेषां मनसि श्रीकृष्णेच्छयैव जातमिति भावः ॥ * ॥ ० ॥ १९ ॥ ० ॥ * ॥ ० ॥ २० ॥ तत्सांबोद्भूतम् । सोप्युग्रसेनोपि ॥ * ॥ कृष्णाग्रे कथनात्सांबस्य लज्जाभये मा भूतामित्यतो राजा कृष्णमपृष्ट्वैव तच्चूर्णयित्वाऽब्धौ प्राक्षिपत् अवशेषितं लोहमकिञ्चित्करमिति मत्वा सलिलेऽब्धावेव ॥ २१ ॥ ततस्तस्य समुद्रस्य वेलायां तटे एरका दीर्घसूचिमुखतृणविशेषाः ॥ * ॥ उह्यमानानि तरंगैरितस्ततश्चाल्यमानानि तत एव हेतोः वेलायां तटे लग्नानि एरकाः पटेरेतिख्यातास्तृणविशेषाः ॥ २२ ॥ तस्य मत्स्यस्य । स इति—येन मत्स्यो गृहीतो जरानामकेन स इत्यर्थः । लुब्धको व्याधः ॥ * ॥ २३ ॥ तादित्यव्ययं तामित्यर्थः ॥ * ॥ तत्तम् । अन्वमोदत सुष्ठु जातमित्यंगीचकार । कालरूपी संहारेच्छावत्त्वात् ॥ * ॥ ० ॥ २४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे पं० वंशीधरविरचित एकादशस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ निमेरैक्ष्वाकवस्य जायंतेयानां च संवादेन । भागवतान् भगवत्प्रापकान् (१) । अधुनाध्यायचतुष्केण वसुदेवनारदसंवादमिषेण भगवत्तत्त्वं तत्प्राप्तिसाधनं तदधिकारिस्वरूपं च निरूपयति—इत्यर्थ इति—प्रस्थापितोऽपि मुहुर्मुहुरायातीति भावः । अत्राशंकते—नन्विति । इत्यर्थ इति—सर्वेश्वररक्षितद्वारकानगरे शापः प्रवेष्टुं न शक्नोतीति भावः । पुनःपुनरागमने को हेतुरिति चेदाह—कृष्णोपासनेति । कृष्णस्य उप समीपे आसनं स्थितिस्तत्र लालसा यस्येति स तथा ॥ * ॥ **संदर्भः—**अथ तदानंतर्यप्राप्तं श्रीवसुदेवनारदसंवादं वक्तुं भगवदिच्छया तादृशानर्थसहकारित्वेपि श्रीनारदस्य द्वारकायामेव वास आसीदिति सहेतुकमाह—गोविन्देति । यद्भुजेनात्यंतानर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

को नु राजन्निंद्रियवान्मुकुंदचरणांबुजम् ॥ न भजेत्सर्वतो मृत्युरुपास्यममरोत्तमैः ॥ २ ॥ तमेकदा तु देवर्षिं वसुदेवो गृहागतम् ॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥ वसुदेव उवाच ॥ भगवन्भवतो यात्रा स्वस्तये सर्वदेहिनाम् ॥ कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनाम् ॥ ४ ॥ भूतानां देवचरितं दुःखाय च सुखाय च ॥ सुखायैव हि साधूनां त्वादृशामच्युतात्मनाम् ॥ ५ ॥

यद्भजने मुक्तानामपीदृशमौत्सुक्यं तं को नाम न भजेदित्याह । को न्विति । इंद्रियवानिति । इंद्रियवत्त्वमात्रमेव यत्राधिकारिविशेषणमित्यर्थः । सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः ॥ २ ॥ ३ ॥ यथा पित्रोर्यात्रा आगमनमपत्यानां स्वस्तये मंगलाय यथा चोत्तमश्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां स्वस्तये तथा हे भगवन् भगवद्रूपस्य भवतो यात्रा सर्वदेहिनां स्वस्तय इति ॥ ४ ॥ देवैरपि महतामुपमानमनुचितमित्याह । भूतानामिति । देवानां चरितमतिवृष्ट्यादिना भूतानां दुःखायापि भवति ।

कारींद्रकृतमहावृष्ट्यादितो व्रजोगोपि तस्य दक्षादिशॉपतः श्रीद्वारकाऽवने कः प्रयास इति गोविंदभुजपदेनासूचि । अभीक्ष्णं श्रीभगवता लोकवृत्तजिज्ञासालीलया मुहुस्तत्रतत्र प्रस्थापितोपि तत्रैवावात्सीत् कृष्णस्योप समीपे आसने स्थितौ लालसा यस्य तादृशः । तद्भजगुप्तत्वेन स्थानसौख्यमपि दर्शितम् ॥ १ ॥ यस्य हरेर्भजने मुक्तानां जीवन्मुक्तानां नारदादीनाम् । तं हरिम् । इंद्रियत्वं सर्वेंद्रियसामर्थ्यवत्त्वम् । तेन मनुष्य आयातीत्यर्थः । अन्येषां सर्वेंद्रियकौशलहीनत्वात् । यत्र हरिभजने । इत्यर्थ इति—मनुष्यमात्रस्य हरिभजनेऽधिकार इति भावः । यद्वा—यश्च न भजेत्स क इंद्रियवानपि तु न कोपि इंद्रियफलासंपादनात् । ‘ बर्हायिते ते नयने नराणाम् ’ इत्याद्युक्तेः । सर्वतो मृत्युरित्यनेन ‘ यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते ’ ‘ मृत्युरस्मादपैति ’ इति पूर्वोक्तं स्मारितम् । अमरोत्तमैर्ब्रह्मादिभिः । एतेन परमेशत्वमुक्तम् ॥ * ॥ अत्र तद्वासे कैमुत्यम्—को न्विति । अन्योऽपि क इंद्रियवानित्यनिन्द्रियवस्तु तरुगुल्मादिष्वपि तद्भजनसौख्यं वर्णितम् । ततः सेंद्रियो वा को न भजेदिति स्वभावत एव तद्योग्यं सर्वेषामित्यर्थः । विचारतः सर्वतो मृत्युरिति । न चैवं साधारणजनानामेव तद्भजनीयत्वमित्यायातम्, अपि तु मुक्तानामपीत्याह—उपास्यमिति । तदेवं विषयिमुमुक्षुमुक्तानामपि तद्भजनीयमितिस्थिते महाभक्तराजः श्रीनारदस्तत्कथं न भजेदिति भावः ॥*॥ **विश्वनाथस्तु—** श्रोत्रादींद्रियवत्त्व एव तद्भजनेधिकार इति भावः । न केवलमीशितव्या जीवा एवं तं भजन्ति किं त्वमरोत्तमै रुद्रादिभिरपि॥*॥ **दीपिका—**इन्द्रियवत्त्वमेवेति वर्णाश्रमाद्यपेक्षापि निरस्ता । अधिकारिविशेषणमिति । यथा—स्वाराज्यकामो राजा राजसूयेन यजेतेत्यत्र स्वाराज्यकामस्य राज्ञः सतो राजसूयेधिकारो नान्यस्य तथेंद्रियवतः सर्वस्यापि तद्भजनेधिकार इत्यर्थः । तदुक्तं पाद्मे माघमाहात्म्ये—“ सर्वेधिकारिणो ह्यत्र हरिभक्तौ यथा नृप ” इति । ‘ सर्वेषां मदुपासनम् ’ इत्यत्रैवोक्तेः ॥ २ ॥ अस्तूक्तं प्रकृते किमायातं तत्राह—तमिति । तं नारदम् । गृहागतत्वेनार्चितमपि प्रश्नांगतया पुनरभिवादनमित्याह—अभिवाद्येति ॥ * ॥ ० ॥ ३ ॥ स्वस्तय इति । अव्ययानां शब्दनिर्देशे विभक्तेर्लुग्नेत्युक्तं शब्दशास्त्रे । उद्गतं तमो यस्मात्स उत्तमो हरिस्तस्य श्लोक इव श्लोको येषां त उत्तमश्लोकाः महान्तस्तेषां वर्त्म येषां ते उत्तमश्लोकवर्त्मानस्तेषां भूतानुकम्पिनां यात्रा कृपणानां गृहव्यापारासक्तानाम् सर्वदेहिनां देहाध्यासवतां स्वस्तये देहाध्यासबाधेन ब्रह्मानंदलाभाय ॥ * ॥ सर्वदेहिनां साधारणानाम् कृपणानां सर्वनिकृष्टानाम् उत्तमश्लोकवर्त्मनां सर्वोत्कृष्टानां भक्तानामपि स्वस्तये । ‘ देवर्षित्वमुपेत्य सः ’ इति भगवदवतारांतर्गणितत्वेन भगवद्रूपत्वम् । यथा पित्रोरागमनं त्रिविधानामपि पुत्राणां स्वस्तये भवति तथा । एतेन श्रीनारदस्य सर्वभूतवात्सल्यमुक्तम् ॥ ४ ॥ उपमानं सादृश्येन वर्णनम् । सुखत्वे हेतुः—अच्युतात्मनामच्युताविष्टचेतसाम् । “ सुखाय लोकस्य चरन्ति नित्यं भूतानि भव्यानि जनार्दनस्य ” इत्युक्तेः । “ नेहाथ वामुत्र च कश्चनार्थ ऋते परानुग्रहमात्मशीलम् ” इत्युक्तेश्च ॥ * ॥ ० ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भजंति ये यथा देवान्देवा अपि तथैव तान् ॥ छायेव कर्मसचिवाः साधवो दीनवत्सलाः ॥६॥ ब्रह्मंस्तथापि पृच्छामो धर्मान्भागवतांस्तव ॥यान्श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ॥ ७ ॥ अहं किल पुरानंतं प्रजार्थो भुवि मुक्तिदम् ॥ अपूजयं न मोक्षाय मोहितो देवमायया ॥ ८ ॥ यथा विचित्रव्यसनाद्भवद्भिर्विश्वतो भयात् ॥ मुच्येमह्यंजसैवाद्धा तथा नः शाधि सुव्रत ॥ ९ ॥ श्रीशुक उवाच ॥ राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता ॥ प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः ॥ १० ॥

त्वादृशां त्वया सदृशानाम् । अच्युते आत्मा येषां तेषाम् ॥ ५ ॥ किंच सुखं कुर्वतोऽपि देवा भजनानुसारेण कुर्वंति न तथा साधव इत्याह भजंतीति । छायेव यथा पुरुषो यावत्करोति तावदेव तस्य च्छायापि तथा । कर्मसचिवाः कर्मसहाया देवाः ॥ ६ ॥ तदेवं यद्यपि भवत आगमनमात्रेणैव वयं कृतार्थास्तथापि पृच्छामः । तवेति । तव यैर्धर्मैः प्रसन्नो भगवांस्तानित्यर्थः ॥ ७ ॥ ननु त्वत्तोऽपि किमन्यो भगवत्प्रसादपात्रमस्ति तत्राह । अहं किलेति । भुवि प्रजार्थोऽपूजयं पुत्रलाभप्रयोजनः सन् पूजितवान् । किलेति सूतीगृहे भगवदुक्तमनुस्मरति ॥ ८ ॥ अतो यथा मुच्येमहि तथा नोऽस्मान् शाधि शिक्षय । विचित्राणि व्यसनानि यस्मिन्संसारे तस्मात्संसारात् । तथा विश्वतः सर्वतो भयं यस्मिंस्तस्मात् । भवद्भिर्हेतुभूतैः । अंजसाऽनायासेन । अद्धा साक्षात् ॥ ९ ॥ हरेर्गुणैर्वर्णनीयत्वेन प्रस्तुतैर्हरिः संस्मारित इत्यर्थः ॥ १० ॥

अन्यद्विशेषमाह—किं चेति । कर्मसहायाः यादृक्कर्म करोति तादृक्फलं देवा ददति नाधिकमिति । साधवस्तु कर्मानपेक्ष्यैव फलं ददतीति भावः ॥ * ॥ किञ्च—देवाः स्वार्थपरतयैव सुखयंति साधवस्तु न तथेत्याह—भजंतीति । साधवः कर्मणा भगवद्भजनेन सचिवाः सहायकाः संतो दीनेषु प्रत्युत तद्धीनेषु दयालव एव संतीति भावः ॥ ६ ॥ तदेवं तादित्थम् । इत्यर्थ इति—तवेति संबंधे षष्ठी, यैर्धर्मैस्त्वं कृतार्थोऽभूरिति भावः । यद्वा—तव त्वां पृच्छामः । यानित्यनेन यद्धर्मश्रवणमात्रं भयमोचकं किमुत तदनुष्ठानमिति । विश्वतो भयादिति पाठे संसारात् ॥ * ॥ तदेवं साधूनां दीनवत्सलत्वाभिधानप्रकारेण । ननु कृतार्थस्य तव किं सद्धर्मप्रश्नेन तत्राह—मत्प्रसंङ्गेन श्रुत्वा त्वद्दर्शनसंभावनाराहितोपि मर्त्योपि किमुताचर्य ॥ ७ ॥ अत्राक्षिपति नारदः—नन्विति । भुवि मुक्तिदं न तु स्वर्गादौ मोक्षो भवतीति सूचनाय । भुवीति । स्वर्गेतु मोक्षसाधनीभूतभगवत्स्मृतेरभाव एव " न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टातिशयेंद्रियोत्सवात् " इत्युक्तेः ॥ * ॥ अथ ब्रह्मशापश्रवणेन श्रीकृष्णांतरायभ्रमव्यग्रः स्वप्रयोजनमप्याह—अहमिति द्वाभ्याम् । देवस्य भगवतो मायया कृपया मोहितस्तन्माधुरीवशीभूतो मोक्षायापि नापूजयम् किमुतान्यस्मै किन्तु प्रजार्थे तद्रूपपुत्रास्तय एव ॥ ८ ॥ नन्वपुत्रस्य गतिर्नास्तीत्युक्तेः पुत्रस्यापि गतिहेतुत्वश्रुतेः कथं प्रजार्थ इति मन्निन्दा ध्वन्यत इति चेदाह—यथेति । विचित्राणि विविधानि व्यसनानि देहेंद्रियस्त्रीपुत्रादिष्वासक्तिलक्षणानि यस्मिंस्तस्मात् । पुत्रादेः स्वर्गादिरूपगतिहेतुत्वेऽपि नात्मसाक्षात्कारलक्षणमुक्तिहेतुत्वं किन्तु तल्लालनादिना तदासक्तेः प्रत्युत संसारहेतुत्वमिति । एतत्समर्थकविशेषणमाह—विश्वतः स्त्रीपुत्रधनमित्रादिभ्यः । सर्वेभ्यो भयं यस्मिंस्तस्मादिति ॥ * ॥ **दीपिका**—यतो मोक्षाय नापूजयम् अतस्तस्मात्संसारात्साक्षात् " तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये " इति श्रुतेर्विदेहमुक्तिं प्राप्नुयामेत्यर्थः ॥*॥ **संदर्भः**—विश्वतो भयात् सर्वतोपि भयहेतोर्ब्रह्मशापात् ॥ ९ ॥ एवमुक्तरीत्या । तं वसुदेवम् । संस्मारितः स्मरणं कारितः । इत्यर्थ इति—हरिगुणप्रश्नश्रवणमात्रेण तत्स्मरणानंदमग्नोऽभूदिति भावः ॥ * ॥ हरेर्गुणैस्तस्मिन्नवतीर्णत्वात्तद्दर्शनेन प्रकाशितैः ॥ * ॥ **विश्वनाथः**—हरेरिति " अधीगर्थदयेशां कर्मणि " इति षष्ठी । गुणैः सहितो हरिः सम्यक्स्मारितः स्मरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारद उवाच ॥ सम्यगेतद्व्यवसितं भवता सात्वतर्षभ ॥ यत्पृच्छसे भागवतान्धर्मांस्त्वं विश्वभावनान् ॥ ११ ॥ श्रुतोनुपठितो ध्यात आदृतो वाऽ
नुमोदितः ॥ सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोऽपि हि ॥ १२ ॥ त्वया परमकल्याणः पुण्यश्रवणकीर्तनः ॥ स्मारितो भगवानद्य देवो नारायणो
मम ॥ १३ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ आर्षभाणां च संवादं विदेहस्य महात्मनः ॥ १४ ॥ प्रियव्रतोनाम सुतो मनोः स्वायं
भुवस्य यः ॥ तस्याग्नीध्रस्ततो नाभिर्ऋषभस्तत्सुतःस्मृतः ॥ १५ ॥ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया ॥ अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगम् ॥
॥ १६ ॥ तेषां वै भरतो ज्येष्ठो नारायणपरायणः ॥ विख्यातं वर्षमेतद्यन्नाम्ना भारतमद्भुतम् ॥ १७ ॥

प्रीतिमाविष्करोति सम्यगितित्रिभिः । पृच्छसे पृच्छसि । विश्वभावनान्सर्वशोधकान् ॥ ११ ॥ आदृत आस्तिक्येन गृहीतः । अनुमोदितः परैः क्रियमाणः संस्तुतः । सद्धर्मो भागवतो धर्मः । देव हे वसुदेवेत्यर्थः । यद्वा देवेभ्यो विश्वस्मै च द्रुह्यंति ये तानपि ॥ १२ ॥ किंच त्वया महानुपकारः कृत इत्याह । त्वयेति । पुण्ये श्रवणकीर्तने यस्य सः ॥ १३ ॥ अत्रापि भगवद्धर्मनिर्णयेऽपि । विदेहस्य जनकस्य ॥ १४ ॥ आर्षभाणामुत्पत्तिं सान्वयां विविच्य कथयति प्रियव्रत इति सप्तभिः ॥ १५ ॥ मोक्षधर्मविवक्षया मोक्षधर्माणां प्रवर्तनेच्छया अवतीर्णं वासुदेवांशमाहुः । तस्य च वेदपारगं सुतशतमासीत् ॥ १६ ॥ तेषामृषभसुतानां मध्ये नवयोगीश्वराणां चरितं वक्तुमितरेषां चरितं ततो विविच्याह । तेषामिति । एतदजनाभंनाम वर्षं खंडं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत् । एतेन तस्य धर्मातिरेको निरूपितः ॥ १७ ॥

विषयीकारित इत्यर्थः ॥ १० ॥ प्रष्टारं संश्लाघ्य तत्र निजप्रीतिं प्रकटयति–त्रिभिः श्लोकैः । सात्वतर्षभेति परमभागवतत्वं वसुदेवस्याह–एतात्किम् यत्पृच्छस इति । यद्वा–विश्वस्याभीष्टस्य भावनानुत्पादकान् “ विश्वं सर्वेष्टयोः स्मृतम् । चित्तोत्पत्त्योर्भावना स्यान्मिश्रणे भवनेपि च ” इति निरुक्तिः ॥ ＊ ॥ तत्र तदीयप्रयोजनस्योत्तरं सर्वान्ते दास्यति । भगवद्धर्मस्योत्तरमाह–सम्यगिति ॥ ११ ॥ इत्यर्थ इति–एकदेशन्यायेन देवपदं वसुदेवपरमत्र ज्ञेयम् । एकदेशः पूर्वः परो वा न्यायेनोच्यतेऽत्र परस्य ग्राह्यत्वे त्विदमेव मानमिति भावः । ऋज्वीं गतिमुत्सृज्य वक्राश्रयणमनुचितं मत्वाह–यद्वेति । किञ्च–विश्वपदेनैव देवस्यापि गृहीतत्वात्पुनर्देवपदोपादानमनिवर्त्यदोषपरिहारसूचनार्थं हीति तद्दार्ढ्यमाह “ब्रह्महत्यासहस्रस्य पापं शाम्येत्कथंचन । न पुनस्त्वदवज्ञाने कल्पकोटिशतैरपि ॥” इति पुराणांतरात् ॥ ＊ ॥ ० ॥ ॥ १२ ॥ ममाप्यनेन पुण्यवृद्धिर्भविष्यतीत्याह–किं चेति । स्मारितः नित्यं स्मृतोपीदानीं प्रश्नप्रसंगेन विशेषतः स्मारित इत्यर्थः ॥ ＊ ॥ नारायणस्तादृशधर्मे मदीयो गुरुरूपो नारायणर्षिः स्मारित इति कृष्णावेशेन तस्यापि स्मरणात् ॥ १३ ॥ इमं वक्ष्यमाणम् । आर्षभाणामृषभात्मजानां कन्यादीनाम् ॥ ＊ ॥ अत्र श्रीनारायणोपदिष्टे धर्मेपि उदाहरंति स्मरंति तच्छिष्या इति माहात्म्यविशेषायोक्तम् ॥ १४ ॥ सान्वयां सवंशाम् । तस्य प्रियव्रतस्य । तत आग्नीध्रस्य । तत्सुतो नाभिसुतः ॥ ＊ ॥ अत्रार्षभाणामित्युक्तं तत्रर्षभ एव क इत्यत आह–प्रियव्रत इति ॥ १५ ॥ तम् ऋषभम् । तस्य ऋषभस्य ॥ ＊ ॥ ० ॥ १६ ॥ यस्य भरतस्य “ ख्याते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिम् ॥ उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः ॥ १८ ॥ तेषां नव नवद्वीपपतयोऽस्य समंततः ॥ कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः ॥ १९ ॥ नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः ॥ श्रमणा वातरसना आत्मविद्याविशारदाः ॥ २० ॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥२१॥ एते वै भगवद्रूपं विश्वं सदसदात्मकम् ॥ आत्मनोऽव्यतिरेकेण पश्यंतो व्यचरन्महीम् ॥ २२ ॥

इमां पृथ्वीम् । गृहान्निर्गतः । हरिमुपासीनः सेवमानः सन् ॥ १८ ॥ नव सुताः अस्य भारतस्य वर्षस्य समंततः । नवद्वीपपतयो नवानां ब्रह्मावर्तादिभूखंडानां पतयः । एकाशीतिः सुताः कर्ममार्गप्रवर्तका ब्राह्मणा अभूवन् ॥ १९॥ अर्थशंसिनः परमार्थनिरूपकाः । श्रमणाः श्रमवंत आत्माभ्यासे कृतश्रमा इत्यर्थः । वातरसना दिगंबराः । आत्मविद्यायां विशारदा निष्णाताः ॥ २० ॥ २१ ॥ तेषां पारमहंस्यचरितमाह त एत इति द्वाभ्याम् । भगवद्रूपं विश्वं पश्यंतः । सदसदात्मकं स्थूलसूक्ष्मरूपम् । तच्च

चित्रे तथा भक्ष्ये भक्षितेप्यद्भुतं स्मृतम् " एतेन वर्षनामांतरकरणेन । धर्मातिरेकः पुण्याधिक्यम् । 'यशः पुण्यैरवाप्यते' इत्याद्युक्तेः ॥*॥०॥१७॥ स भरतः । तत्पदवीं हरिमार्गं मोक्षमित्यर्थः । तत्पदाभ्यां वीयते प्राप्यत इति तत्पदवी भक्तिलभ्या मुक्तिरिति वा । त्रिभिः क्षत्रमृगविप्ररूपैः ॥ * ॥ तपसा ध्यानलक्षणेन 'तप—आलोचने' इत्यतोऽसुच् । " यस्य ज्ञानमयं तपः " इति श्रुतेः । मन आद्यैकाग्र्येण वा " मनसश्चेंद्रियाणाञ्च ऐकाग्र्यं परमं तपः" इति स्मृतेः ॥ १८ ॥ "द्वीपोंब्वंतरिते देशे भूभागमृगभेदयोः । पुलिने तारके सेतौ तथा जंब्वादिसप्तसु ॥" इति निरुक्तिः ॥ * ॥ "द्वीपोंबुस्थोन्नतस्थले । जंब्वादिसप्तसु द्वीपो रमणादिषु चाष्टसु ॥ ब्रह्मावर्तादिनवसु द्विरुक्ते बिष्णुनामनि ।" इति वारतांतविः ॥ १९ ॥ इत्यर्थ इति—' श्रमणो जिनभिक्षुकं' इति कोशात्ते नात्र ग्राह्या इति भावः ॥ * ॥ वातवसना इति गौडीयः पाठः । 'श्यामो हिरण्यरसनोर्क किरीटजुष्टः ' इत्यत्र चतुर्थस्कन्धे स्वामिचरणै रसनापदं वस्त्रपरतया लक्षणया व्याख्यातमतो 'वातरसनाः' इत्येव पाठस्तत्संमतः ॥ २० ॥ एतेषां नामनिरुक्त्यैव पूर्वश्लोकोक्तोर्थस्तेषु सिद्ध इत्यतो तन्नामानि निर्वक्ति—कौति मुमुक्षुभ्य उपदिशत्यात्मतत्त्वमिति कविः । हरत्युपदेशेनाज्ञानमिति, हं हर्षं राति श्रोतृभ्य इति वा हरिः । अंतश्चेतसीक्षत आत्मानमित्यंतारिक्षः ईकारस्य ह्रस्वत्वमार्षम् । प्रकर्षेण बुद्धं ज्ञातमात्मतत्त्वं येन स प्रबुद्धः । पिप्पलो विष्णुः 'अश्वत्थः सर्ववृक्षाणाम् ' इति स्मृतेस्स चायनमाश्रयो यस्य स पिप्पलायनः । यद्वा—पिप्पलं जलमयनं तपश्चर्यास्थलं यस्य स तथा "पिप्पलं सलिले वृक्षे विषये वस्त्रखंडके " इति कोशात् । आविः प्रकटे होत्रं सर्वेषां कर्मणां होमो ज्ञानाग्निना दाहो यस्य स आविर्होत्रः । " ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन " इत्युक्तेः । चमंति वेदतीर्थमिति चमा वैदिकास्तान्सरति मुख्यत्वेन प्राप्नोतीति चमसः वैदिकोत्तमः । " सरतेडः " । ' द्रुद्रुमौ वृक्षौ ' इति कोशात् द्रुषु वृक्षेषु वनेषु मिल्यते प्राप्यते दिदृक्षुभिरिति द्रुमिलः, यद्वा—द्रु द्रुतं मिलो वेदार्थानामेकीकरणं यस्येति । भां प्रकाशं जनयतीति भाजनं वेदार्थज्ञानं करे हस्ते भाजनं यस्य स करभाजनः, हस्तामलकवत्प्रतिभातवेदार्थ इत्यर्थः ॥ *॥ ० ॥ २१ ॥ तेषां कव्यादीनां ये मुनित्वेनोक्तास्त एते महीं व्यचरन् । केचित्तु विश्वं पूर्णं सदसदात्मकं कार्यकारणव्यापि भगवद्रूपम् आत्मनो जीवाव्यतिरेकेण वैलक्षण्येन पश्यन्तः । यद्वा—सदसदात्मकं कार्यकारणात्मकं भगवद्रूपं भगवतो रूपं प्रतिमास्थानीयं विश्वं प्रपञ्चमात्मनो ऽव्यतिरेकेण पश्यन्त इति । यद्वा—विश्वमंतः प्रविश्य वर्तमानं सदसदात्मकं बहिश्च जगत् व्याप्य बर्तमानं भगवद्रूपं ब्रह्मसंज्ञमंतर्यामिणो हरेरव्यतिरेकेणाभेदेन पश्यन्तः । "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः " इति श्रुत्यर्थरसमनुभवंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान् ॥ मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामम् ॥ २३ ॥
त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरजनाभे महात्मनः ॥ २४ ॥ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप ॥ यजमानोऽग्नयो
विप्राः सर्व एवोपतस्थिरे ॥ २५ ॥ विदेहस्तानभिप्रेत्य नारायणपरायणान् ॥ प्रीतः संपूजयांचक्र आसनस्थान्यथार्हतः ॥ २६ ॥ तान्रो
चमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव ॥ पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः ॥ २७ ॥ विदेह उवाच ॥ मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः ॥
विष्णोर्भूतानि लोकानां पावनाय चरंति हि ॥ २८ ॥ दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः ॥ तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनम् ॥ २९ ॥

आत्मनोऽव्यतिरेकेण स्वाभेदेन पश्यंतः ॥ २२ ॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते । मुक्ता अनासक्ताः ॥ २३ ॥ महात्मनो निमेः । वितायमानमनुष्ठीयमानम् । अजनाभे भारतवर्षे ॥ २४ ॥ यजमानो निमिः । अग्नय आहवनीयादयः । विप्रा ऋत्विगादयः ॥ २५ ॥ अभिप्रेत्य ज्ञात्वा ॥ २६ ॥ स्वरुचैव रोचमानान्न त्वाभरणादिप्रकाशैः । ब्रह्मपुत्रोपमान्सनत्कुमारादिसदृशान् ॥ २७ ॥ परमप्रीत्या तद्दर्शनमभिनंदति द्वाभ्याम् । मन्य इति । ननु भगवतः पार्षदानां कथमत्रोपलब्धिस्तत्राह । विष्णोरिति । विष्णुभक्ता लोकपावनार्थं सर्वत्र पर्यटंतीत्यर्थः ॥२८॥ मया दुर्लभं लब्धमहो भाग्यमित्याह । दुर्लभ इति । बहवो देहा भवंति येषां ते देहिनो जीवास्ते

इत्याहुः ॥ * ॥ भगवान् परं ब्रह्मैवाधिष्ठानतया रूपं यस्य तां दृशं पश्यन्तः कल्पितस्याधिष्ठानरूपमंतरा स्वतोऽनिरूप्यत्वात् । तच्च ब्रह्मस्वरूपमपि स्वाव्यतिरेकेण त्वंपदार्थाभेदन स्थूलसूक्ष्मरूपं महदाद्याकाशादिरूपम् ॥ * ॥ **संदर्भस्तु**–भगवतो रूपं स्फूर्तिर्यत्र तादृशं तत्सत्ताव्याप्तं पश्यंतः । तच्चात्मनोऽव्यतिरेकेण आत्मानमपि तदनुगतं पश्यन्त इत्यर्थमाह ॥ * ॥ **विश्वनाथस्तु**–आत्मनः परमात्मनः सकाशादव्यतिरेकेण विश्वस्य तच्छक्तिमयत्वादिति भावः ॥ २२ ॥ ननु महीसंचरणं सर्वेषां जंगमानामस्ति किं तेषामाधिक्यमित्यत आह–सुरादिलोकांस्ते चरंतीति । भूतानां नाथो भैरवः 'भैरवो भूतनाथश्च' इत्युक्तेः । द्विजा गरुडादयस्तेषामपि लोकः । गवां लोकस्तु प्रसिद्धः । किं कर्मवशाच्चरंति नेत्याह–मुक्ता जीवन्मुक्तास्संतः कामं स्वेच्छयैवेति । बलवता प्रतिषेधे कामतोऽपि संचरणं दुश्शकमित्यत अव्याहतेष्टगतय इति ॥*॥ कामं यथेच्छम् ॥ २३ ॥ प्रकृतमाह–ते मुनयः ॥ * ॥ यदृच्छया स्वैरतया ॥ २४ ॥ तान्मुनीन् ॥ * ॥ हे नृपेति । नृपाणामयमेव मुख्यो धर्मो यद्धरिभक्त्युपयोगिकर्मनिष्ठावत्त्वं तत्रैव हरिजनसंगो भवतीति संबुद्ध्यभिप्रायः । नारायणपरायणान् महाभागवतत्वेन परमदुर्लभान् "मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ॥" इति षष्ठस्कंधोक्तेः । यथार्हतः पूर्वमर्हितविप्रापेक्षया वैशिष्ट्येन ॥२५॥ ॥ ० ॥ * ॥ ० ॥ २६ ॥ नवसंख्याकान् ॥ * ॥ प्रश्रयेणांतःस्थविनयेन सह कायेनाप्यवनतो नम्रः ॥ २७ ॥ तद्दर्शनं मुनिदर्शनम् । पार्षदोपलब्धिमाक्षिपति–नन्विति । इत्यर्थ इति–परमदयालुत्वात्ते लोकहितार्थं चरंत्येवेति भावः ॥ * ॥ सर्वत्राव्याहतगतित्वेन रूपांतरेणापि हरिभक्तिशक्त्या सर्वत्र गन्तुं शक्यत्वेप्यत्र साक्षादित्युक्ते रूपांतरं विनैव मां पावयितुमागता इति भावः ॥ * ॥ **संदर्भस्तु**–विष्णोर्भूतानि पार्षदा एव रूपांतरेण चरंतीत्याह ॥ * ॥ **विश्वनाथस्तु**–ननु विष्णुपार्षदानां कथमन्यत्र गमनं संभाव्यते तत्राह–विष्णोरिति ॥ २८ ॥ तत्रापि मानुषत्वेऽपि ॥*॥ अद्य मया स्वभाग्यमेव प्रत्यक्षीकृतमित्याह–दुर्लभो मोक्षसाधनत्वात् । तत्रापि दुर्लभत्वेपि वैकुंठप्रियाणां मोक्षादप्यधिकस्य भक्तियोगस्य प्रदायकत्वात् । टीकायां परमपुरुषार्थपदेनापीदमेवोक्तं परमपुरुषार्थो भक्तियोग एव पंचमपुरुषार्थः, तच्च गौतमीये श्रीनारदेनोक्तम् "भद्रमुक्तं भवद्भिस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत आत्यंतिकं क्षेमं पृच्छामो भवतोऽनघाः ॥ संसारेऽस्मिन्क्षणार्धोऽपि सत्संगः शेवधिर्नृणाम्॥३०॥धर्मान्भागवतान्ब्रूत यदि नः श्रुतये क्षमम् ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः॥३१॥नारद उवाच ॥ एवं ते निमिना पृष्टा वसुदेव महत्तमाः॥ प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपम्॥३२॥

षां क्षणभंगुरोऽपि मानुषो देहो दुर्लभः । परमपुरुषार्थसाधनत्वात् । वैकुंठः प्रियो येषां वैकुंठस्य वा प्रियास्तेषां दर्शनम् ॥ २९ ॥ हे अनघा निरवद्याः । भवतो युष्माना त्यंतिकं क्षेमं पृच्छामः । यतः क्षणार्धकालभवोऽपि सत्संगः शेवधिर्निधिः । निधिलाभे यथाऽऽनंदो भवति तथात्र परमानंद इत्यर्थः ॥ ३० ॥ तदर्थं च भागवतान्धर्मान्ब्रूत यदि नोऽस्माकं श्रुतये श्रवणाय क्षमं योग्यं भवति । कथंभूतान् । यैर्धर्मैः प्रपन्नाय भक्तायाजो हरिरात्मानमपि दास्यति तान् ॥ ३१ ॥ सह सदस्यैर्ऋत्विग्भिश्च वर्तमानम् । तेऽपि भगवद्धर्मश्रवणपरा बभूवुरित्यर्थः । भगवद्धर्म—तद्भक्त—माया—तत्तरणानि च ॥ ब्रह्म—कर्मा—वतारेहा—भक्तप्राप्य—युगक्रमान् ॥ १ ॥ ज्ञातुं क्रमेण कृतवान्नव

मुक्तिस्तुर्य्या परात्परा । निरहं यत्र चित्सत्ता तुर्या सा मुक्तिरुच्यते ॥ पूर्णाहंतामयी भक्तिस्तुर्यातीता निगद्यते । " इति । श्रुतिश्च—"सर्वदैनमुपासीत" "मुक्तानामपि भक्तिर्हि परमानंदरूपिणी " इत्यादिका ॥ २९ ॥ यतो भागवतदर्शनं दुर्लभमतो हेतोः । आत्यंतिकम्—येन विना निःश्रेयसं न स्यात्तदात्यंतिकं क्षेमं मंगलं मोक्षसाधनं पृच्छामः 'कार्येण कारणमुपलक्ष्यते' इति न्यायात् । इत्यर्थ इति—न ह्यात्यंतिकक्षेमादधिकोऽन्यो लाभोस्त्यतः परमानंदहेतुता तस्येति भावः ॥ * ॥ अत आत्यंतिकमित्यस्यायं भावः अतिथिष्वागतेषु कुशलप्रश्न आवश्यकः, स च तावदात्मारामेषु साक्षात् कुशलस्वरूपेष्वनुचितः स्वस्यापि व्यावहारिककुशलप्रश्नो भवत्सु व्यर्थः ,अत आत्यंतिकं पारमार्थिकमेव । हे अनघाः न विद्यन्ते अघानि यत इति दर्शनदानमात्रेणैव मदघानि दूरीकृतान्येव किंत्वभीष्टलाभो ऽस्मदपेक्षितो वर्तत एवेत्यतः पृच्छामः । ननु विलंब्य पृच्छ्यतां तत्राति शैघ्र्यं किमर्थमत आह—क्षणार्धोपि । क्षणार्धकालमितोऽपि शेवधिः सर्वाभीष्टदो निधिरत आकस्मिकं निधिं प्राप्य स्वाभीप्सितापादने विलंबं कः सहेतेति भावः । मम तु कुतस्तावान्भाग्यविशेषो येन भवंतोऽत्र चिरं स्थास्य न्तीति भावः ॥ ३० ॥ तदर्थमात्यंतिकक्षेमार्थम् । तान् धर्मान् ॥ * ॥ तादृशक्षेमपर्यवसानान्धर्मांश्च ब्रूत । ननु सर्व एव धर्माः क्रमेण तत्पर्यवसाना एव 'यथाद्रिप्रभवा नद्यः' इत्यादौ 'तद्वत्त्वां गतयोंततः' इत्युक्तेस्तत्राह—भागवतानेव किमन्यैर्व्यवहितैः । आत्यंतिकं क्षेममेव विशदयति—यैरिति । दास्यतीति वर्तमानसामीप्यप्रयोगात् । शीघ्रमेवात्मानमनवरतस्फूर्त्यादिवशं कुर्यादित्यर्थ इति **विश्वनाथः** ॥ * ॥ तर्हि पृच्छ्यतां किं तवाभीष्टमत आह—धर्मानिति । श्रुतये श्रोतुं नोऽस्माकं कर्णेंद्रियमिति मन्यस इति च शेषः । क्षमं योग्यम् "नित्यं कृष्णयशःश्रोतृ योग्यं श्रोत्रेंद्रियं मतम् " इति शिष्टोक्तेः, " बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य " इत्युक्तचरत्वाच्च । ते च धर्माः सारभूता एव वाच्या इत्याह—यैरिति—इति **संदर्भः** ॥ ३१ ॥ ते मुनयः । इत्यर्थ इति—सर्वे तस्मिन्सदसि भगवद्धर्मश्रवणेप्सवोऽतः सर्वान्प्रतिपूज्येत्युक्त मिति भावः । भगवद्धर्मश्च तद्भक्तश्च माया च तत्तरणं चेति द्वंद्वश्चतुर्णाम् । ब्रह्म च कर्म चावतारेहा चाभक्तप्राप्यं च युगक्रमश्चेति पंचानां द्वंद्वः । अल्पश्रुतस्यैकस्य बहुभिर्विचक्षणैर्युगपदुच्यमानवचनार्थावधारणं दुःश कमिति हेतोः क्रमश एकैकस्य प्रश्नस्यैकैकः प्रत्युत्तरमुक्तवानित्यर्थः ॥ * ॥ हे वसुदेवेति—श्रीकृष्णपितृत्वेन स्वत एव त्वं वसुभ्योपि दीप्तिमानसि किं तव धर्मप्रश्नाद्यैः, यद्वा—अंतःकरणशुद्धय एव धर्मा अपेक्षिताः संति त्वं तु 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इत्युक्तेः स्वत एव शुद्धांतःकरणोसि साक्षात्तद्रूपेण वा, नित्ययोगार्थे मत्वर्थीयाजंतत्वेनेति भावः । यद्यपि राज्ञैव 'एवं ते निमिना पृष्टाः' इत्युक्ते राज्ञैव प्रष्टा तथापि ससदस्य र्त्विजं नृपमित्युक्त्वा सदस्यादयोप्यनुयोगानुमतिदानेन प्रष्टारो बोध्याः । नन्वत्र प्रथमप्रश्नस्य कविनैव किमुत्तरं दत्तं हर्यादिषु बहुषु सत्स्विति चेदत्रेदमवधेयम्, नवसु कवेरेव प्रथमत्वात् 'संख्यासाम्ये यथाक्रमम्' इति न्यायमाश्रित्य प्रश्नानां योगेश्वराणां च नवत्वेन प्रश्नानुक्रमेण वक्तारोऽप्यत्र नवैव जाताः । प्रश्नास्तु—भगवद्धर्मप्रश्नः प्रथमः १, तद्भक्तप्रश्नो द्वितीयः २, मायाप्रश्नस्तृतीयः ३, तत्तरणप्रश्नश्चतुर्थः ४, ब्रह्मप्रश्नः पञ्चमः ५,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यम् ॥ उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्तते भीः ॥ ३३ ॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ॥ अंजः पुंसामविदुषां विद्धि भागवतान्हि तान् ॥ ३४ ॥ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् ॥ धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥ ३५ ॥

प्रश्नान्निमिर्नव ॥ एकैकस्योत्तरं प्रोचुः कविमुख्या मुनीश्वराः ॥ २ ॥ ३२ ॥ प्रथममात्यंतिकं क्षेमं कथयति । मन्य इति । न कुतश्चिद्भयं यस्मात्तदकुतश्चिद्भयम् । अत्र संसारेऽसदात्मभावादसति देहादावात्मभावनातो नित्यं सर्वदोद्विग्नबुद्धेः । विश्वात्मना सर्वथा निःशेषं यत्र पादांबुजोपासने सति भीर्निवर्तते ःतत् ॥ ३३ ॥ भागवतधर्मलक्षणमाह । ये वा इति । मन्वादिमुखेन वर्णाश्रमादिधर्मानुक्त्वाऽतिरहस्यत्वात्स्वमुखेनैव भगवताऽविदुषामपि पुंसामंजः सुखेनैवात्मलब्धये ये वै उपायाः प्रोक्तास्तान्भागवतान्धर्मान्विद्धि ॥ ३४ ॥ अंजःपदेनोक्तं सुकरत्वं विवृणोति । यानिति । यानास्थायाश्रित्य योगादिष्विव न प्रमाद्येत विघ्नैर्न विहन्येत । किंच निमील्य नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत् । निमीलनं नामाज्ञानम् । यथाहुः “ श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते ॥ एकेन विकलः काणो द्वाभ्यामंधः प्रकीर्तितः ॥” इति । अज्ञात्वापीत्यर्थः । यथा पदन्यासस्थानमतिक्रम्य शीघ्रं परतः पदन्यासेन गतिर्धावनं तद्वदत्रापि किंचित्किंचिदतिक्रम्यातिशीघ्रानुष्ठानं धावनम् । तथाऽनुति

विदुषकर्मप्रश्नः षष्ठः ६, अवतारचेष्टाप्रश्नस्सप्तमः ७, अभक्तप्राप्यप्रश्नोऽष्टमः ८, युगक्रमेणार्चनादिप्रश्नो नवमः ९, वृत्तिवैविध्येन तु ‘कविः कल्पो निपुणदृक्’ इत्यत्र सप्तमे स्वामिचरणैः कविर्विद्वानिति व्याख्यातम् । विदुषश्चैतदेव वैदुष्यं यद्भागवतधर्मवर्णनेनात्यन्तिकक्षेमापादनम् “एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम्” इति न्यायात्कविरेवैतत्प्रश्नोत्तरं दत्तवानिति । एवमग्रेपि ज्ञेयम् ॥ ३२ ॥ तत् उपासनम् ॥ * ॥ संदर्भः—न कुत इति—आत्यंतिकं क्षेमम् अच्युतस्य पादांबुजयोरुप समीप आसनं स्थितिस्तच्च तद्ध्यानमेव “दूरस्थोपि समीपस्थो यो यस्य हृदि वर्तते” इति न्यायेन । अत एवोक्तं तद्रूपलीलास्फूर्त्यादि । इह चरणपदं तस्यैव बोधकम् “पादपर्यायशब्दैस्तु महतां ग्रहणं भवेत्” इति । यद्वा—अवयवावयविनोरभेदोपचारात् । विश्वात्मनेति—तत्साधनावस्थायामपि क्रमशो भयनिवृत्तिमाह ॥ * ॥ विश्वनाथस्तु—भो राजन्सर्वे धर्माः सभया एव किञ्चिद्वैगुण्येपि फलानापादकत्वात् , भागवतधर्म एव निर्भयः । “स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्” इति श्रीमुखोक्तेरित्याह—मन्य इति । अत्र संसारे न कुतश्चिदपि कालकर्मविघ्नादिभ्यो भयं यतस्तत्पादांबुजोपासनम् । तत्र मुख्याधिकारिणमाह—असति असाधौ देहे गृहकुटुम्बादौ वाऽऽत्मा इति आत्मीय इति यो भावो भावना दुस्त्यजा तत एवोद्विग्ना त्रस्ता बुद्धिर्धीर्यस्य तस्य भक्तिः प्रतिकूलदेहादिष्वासक्तिं त्यक्तुकामस्येत्यर्थः ॥ ३३ ॥ हरिपदसेवनमेव मुख्यो भागवतो धर्म इति तदंगत्वेनान्येऽपि योगा भागवतधर्मा भवन्तीत्याह—अविदुषामज्ञानात्मदर्शीनाम् । आत्मलब्धये हरेरेवात्मत्वेन प्राप्तये ॥ * ॥ भगवता स्वयं भगवता स्वमुखेनैव यथा—“ काले तु प्रलये नष्टा वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥” इत्यनुसारेण “श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनम्” इत्यादिवचनैः ‘यत्करोषि यदश्नासि’ इत्यादिवाक्यैश्च । अविदुषामिति कर्तरि षष्ठी । तन्माहात्म्यविद्भिरपि कर्तृभिः आत्मनो ब्रह्मपरमात्मभगवदादिशब्दबोध्यस्य स्वस्य कर्मभूतस्य अंजोऽव्यवधानेनैव लब्धये य उपायाः साधनानि प्रोक्तास्तानुपायान्भागवतान्धर्मांज्जानीहि । हि प्रसिद्धौ । तत्र साक्षाद्भक्तेरपि भागवतधर्माख्यत्वम् ‘एतावानेव लोकेस्मिन्’ इत्यादौ परमधर्मख्यापनाय दर्शितम् । तत्रात्मलब्धये प्रोक्ता इति तटस्थलक्षणम् अन्येन तदलाभादव्यभिचारि, आत्मलब्धये य उपाया इति तु स्वरूपलक्षणम् । तल्लाभोपायो हि तदनुमतिरेव ॥ ३४ ॥ यान्भागवतधर्मान् । यथा योगविचारादयो विघ्नैः संगादिरूपैर्नाश्यन्ते तथा भागवतधर्मनिष्ठो न विहन्येतेति भावः । तत्रान्यत्सौकर्यमाह—किञ्चेति । एषु भागवतधर्मेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ॥ करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥ ३६ ॥

ध्वन्नपि न स्खलेन्न प्रत्यवायी स्यात्तथा न पतेत्फलान्न भ्रश्येत् ॥ ३५ ॥ ननु के ते भागवता धर्माः ईश्वरार्पितानि सर्वकर्माण्यपीत्याह । कायेनेति । आत्मना चित्तेनाहंकारेण वा । अनुसृतो यः स्वभावस्तस्मात् । अयमर्थः । न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारिलौकिकमपीति । तथा च भगवद्गीतासु । "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणम्" इति । यद्वा । ननु कायादीनामेव कर्म नात्मन इत्याशंक्याह । अध्यासेनानुसृताद्ब्राह्मणत्वादिस्वभावा

स्खलनं मार्गे नतोन्नतस्थलावातेनाऽर्द्धपतनीभावः । निमीलनपदोक्ताज्ञानस्वरूपमाह—यथाहुः । एकेनोभयोरन्यतरेण । इत्यर्थ इति—श्रुतिस्मृतिविकलोपि भागवतः परमार्थान्न भ्रश्येदिति भावः । अत्रापि भागवतधर्मेपि । अत्र निर्गलितार्थमाह—ब्राह्मणादीनामित्यादिना । इत्यर्थ इति—"त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि " इत्यत्रैतदर्थस्य निर्णीतत्वादिति तात्पर्यम् ॥ * ॥ **विश्वनाथः**—आस्थाय[1] विश्वासविषयीकृत्वापि किं पुनराचर्येत्यर्थः । न प्रकर्षेण माद्येत मदो गर्वस्तद्वान्योगीव कर्मीव न भवेदित्यर्थः । यद्वा—प्रमादोऽनवधानताऽसावधानो न भवेदित्यर्थः । अतोत्र विघ्नानां न प्रभविष्णुतेति भावः । किञ्च—यानाश्रित्य भगवन्मार्गं भूतानास्थाय नेत्रे निमील्योन्मील्य वा धावन्न स्खलेत् न वा पतेत् । यथा केनापि कश्चिदतिसमीचीनमतिसुगमं मार्गमानीतो जन उच्यते मदुपदिष्टेनानेन मार्गेण नेत्रे मुद्रयित्वा सुखेनाभिद्रवन्नेव याहि न कश्चिदपि ते संशय इति धावने बहुतरत्वे पतनमपि संभवेत्, अत्र भक्तिमार्गे भजनधर्मस्यांगिनो विहितानामंगानां स्वल्पतरातिक्रमे बहुतरातिक्रमे वा कर्ममार्ग इव न प्रत्यवायी भवेदतः फलादपि न भ्रश्येत् । तत्रापि नेत्रे निमील्येति वर्तमानेऽपि नेत्रे मुद्रयित्वेत्यनेन ज्ञात्वाप्यतिक्रमे न दोषः किमुताज्ञात्वेति ज्ञापितम् । यान् धर्मानास्थायेत्युक्तत्वादंगिनस्त्वतिक्रमो दोष एव तथा सति मार्गच्युत एव स्यात् भगवत्प्राप्त्यर्थं पृथङ्मार्गकरणं त्वतिदूषणावहमेव " श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना । ऐकांतिकी हरेर्भक्तिरुत्पातायैव कल्पते ॥" इत्युक्तम् । अत्र भागवतधर्मे प्रवर्तमानस्य वर्णाश्रमधर्मेऽधिकार एव नास्तीति तदनुष्ठानाननुष्ठानविचारो नात्र प्रवेशयितव्यः " तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥" इति भगवदुक्तेः । ' भक्त्यैकयेशं गुरुदेवतात्मा ' इत्यग्रिमवाक्ये भक्त्येत्यस्यैकयेति विशेषणोपन्यासात्कर्ममिश्रा भक्तिर्नात्र प्रस्तुतेत्यवसीयते ॥ * ॥ **दीपिका** तु—नर इति—नृमात्रस्यात्राधिकारितोक्ता । योगादिष्वित्यत्रादिना कर्मतपःसांख्यज्ञानवैराग्यादिग्रहः । तत्र योगे—सिद्धय एव विघ्ना " अंतरायान्वदंत्येता युंजतो योगमुत्तमम् " इत्युक्तेः, कर्मणि यज्ञादौ तु—यत्किंचित्संस्कारादिवैगुण्येपि फलानुत्पत्तेः, यथा—व्रीहीन्प्रोक्षतीत्यत्र प्रोक्षणरूपसंस्कारविस्मृतावपि, यथाऽऽहुतौ—तिर्यक्स्रुवादिनापि अग्नये स्वाहेत्यत्र वह्नये स्वाहेत्युक्तावपि, मंत्रादौ—स्वरादिवैगुण्येपि ' यथेंद्रशत्रुः स्वरतोपराधात् ' इत्युक्तेः, तपसि—गर्वे सति विघ्नः " अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव " इत्युक्तेः तपः शौचं दयेति त्रयः, सांख्ये—त्वीश्वरामननात्साहाय्याभाव एव विघ्नः " सर्वं वेदविरुद्धं च कपिलोऽन्यो जगाद ह " इत्युक्तेः, अन्योऽन्यवरः यथावदात्मानात्मविवेकासंपत्तेः, ज्ञाने तु—भगवदपराध एव विघ्नः " जीवन्मुक्ता अपि पुनर्बंधनं यान्ति कर्मभिः । यद्यचिंत्यमहाशक्तौ भगवत्यपराधिनः ॥ " इति वासनाभाष्योक्तेपि भगवत्परिशिष्टवचनात् " नानुव्रजति यो मोहाद्व्रजन्तं जगदीश्वरम् । ज्ञानाग्निदग्धकर्मापि स भवेद्ब्रह्मराक्षसः ॥ " इत्यादिमहाभारतादिस्मृतेश्च, वैराग्ये तु—प्रसादाद्यग्रहणमेव सः ' प्रसादाऽग्रहणं विष्णोः ' इति सेवापराधांतर्गतत्वात्, तदुक्तमभियुक्तैः " प्रापञ्चिकतया बुद्ध्या हरेः संबंधिवस्तुनः । मुमुक्षुभिः परित्यागे वैराग्यं फल्गु कथ्यते॥" ॥ ३५ ॥ भागवतधर्मान्पृच्छति—नन्वित्यादिना । मनसा संकल्पाद्यधिकरणेन, बुद्ध्या निश्चयज्ञानाधिकरणेन, चित्तेन मननलक्षणज्ञानाधिकरणेनाहंकारेणाहं हरिमर्चयामीत्यादिलक्षणेन, अनुसृतोऽनुगतः स्वभावोऽसाधारणसाधारणवृत्तिः । अत्र स्फुटार्थमाह—अयमर्थ इति ।

[1] 'ब्राह्मणादीनामुक्तानपि धर्मान्कांश्चिदकुर्वाणो भागवतान्धर्माञ्छ्रवणकीर्तनादीन्कुर्वाणस्तत्फलं प्राप्नुयादित्यर्थः' इति पाठः भ्रश्येदित्यतोग्रे श्रीधरीयटीकायां केनचित्प्रक्षिप्तः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ॥ तन्माययाऽतो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥ ३७ ॥

यद्यत्करोतीत्यर्थः । तत्सकलं परस्मै परमेश्वराय नारायणायेति समर्पयेत् । तथा सति सकलमपि कर्म भागवतो धर्मो भवतीति भावः ॥ ३६ ॥ ननु किमेवं परमेश्वरभजनेन अज्ञानकल्पितभयस्य ज्ञानैकनिवर्त्यत्वादित्याशंक्याह । भयमिति । यतो भयं तन्मायया भवेदतो बुधो बुद्धिमांस्तमेवाभजेत् । ननु भयं देहाद्यभिनिवेशतो भवति स च देहाहंकारतः स च स्वरूपास्मरणात्किमत्र तस्य माया करोत्यत आह । ईशादपेतस्येति । ईशविमुखस्य तन्माययाऽस्मृतिर्भगवतः स्वरूपास्फूर्तिस्ततो विपर्ययो देहोस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति । एवं हि प्रसिद्धं लौकिकीष्वपि मायासु । उक्तं च भगवता । " दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ " इति । एकयाऽव्यभिचारिण्या भक्त्या भजेत् । किंच गुरुदेवतात्मा गुरुरेव देवता ईश्वर आत्मा प्रेष्ठश्च यस्य । तथादृष्टिः सन्नित्यर्थः ॥ ३७ ॥

यथा स्वभावकृतकर्मणो भागवतधर्मत्वं भगवत्यर्पणाद्भवतीति भगवतैवोक्तं तथा चेत्यादिना । यद्यपि कायादीनां जडत्वात्कर्मकरणेपि भोक्तृत्वं न संभवति "भोक्तृत्वे सुखदुःखानां कारणं पुरुषं विदुः" इत्युक्तेरतः कायादीनां कर्मफलभोक्तृत्वाभावेन बंधाभावात्तन्निवृत्त्यर्थं भगवति कर्मार्पणमनुचितमिव भातीति, तथापि चिदध्यस्तानामेव देहादीनां कर्मकर्तृत्वेन जडानां स्वतस्तदसम्भवाद्देहादिकृतमपि तदध्यासेनात्मन्येवाऽऽयातीत्यत आह—अध्यासेनेति । इत्यर्थ इति—तपोयुद्धकृष्यादिकं कर्मेति भावः । तथा सति भगवति समर्पिते सति । इति भाव इति—"नावमः कर्मकल्पोपि विफलायेश्वरार्पितः" इत्याद्युक्तेः । कर्माभासोपीश्वरार्पितो बंधनिवर्तको भवतीत्याशयः ॥ * ॥ आत्मनोऽकर्तृत्वेन कथं कायादिकृतकर्मार्पणं संगच्छेत परकृतस्य परेण समर्पणायोगादित्यरुच्या—यद्वेति । तथासति समर्पिते सति । इति भाव इति—वाच्योत्थव्यंग्योर्थः, तत्र पापकर्मसमर्पणं तु "मत्तुल्यो नास्ति पापात्मा नापराधी च कश्चन । व्याहारेपि च लज्जा मे किं ब्रुवे परमेश्वर ॥" इति दैन्येन तन्निवेदनमेव ॥ * ॥ अत्र **संदर्भः**—एते च श्रीप्रबुद्धेनापि विविच्य वक्ष्यन्ते स्वयमपि संक्षेपेणेत्यभिप्रेत्य प्रथमतस्तत्राप्यलसानां तद्द्वारमाह—कायेनेति ॥ * ॥ **विश्वनाथस्तु**—'शृण्वन्सुभद्राणि' इत्युपरिष्टाद्वर्णयितव्येषु भागवतधर्मेषु प्रवर्तमानेन सुधिया जनेन कायिकादिव्यापारा अपि भगवद्धर्मांतरेव प्रवेशनीया इत्याह—कायेनेति । अयमर्थः—यथा विषयिणः प्रातरारभ्य मूत्रपुरीषोत्सर्गमुखप्रक्षालनदन्तधावनस्नानदर्शनश्रवणादिव्यापारा विषयसुखभोगार्थमेव, कर्मिणस्तु देवपित्रादिपूजार्थमेव क्रियन्ते तथैव भगवद्भक्तेन तेते व्यापारा भगवत्सेवार्थमेव कर्तव्या इति तेतेऽपि तेषां भक्त्यंगानि भवेयुरिति । अनुसृतस्वभावात्—अनादिना देहाध्यासेन योऽनुसृतोऽनुवृत्तः स्वभावस्तस्मात्कायादिभिर्यद्यत्करोति तत्सर्वं नारायणार्थमेव नारायणं सेवितुमिति वा समर्पयेद्विनियोजयेत् । तादर्थ्ये "क्रियार्थोपपद—"इत्यनेन वा चतुर्थी ॥ ३६ ॥ अत्राक्षिपति—नन्विति । यथा धीवरप्रसारितमहाजालान्तर्गतमत्स्यानां तत्पादयोरेव जालाभावेन निःसरणमार्गस्तथेशमायाजालान्तर्गतजीवानां तत्पादोपगमनमेवोद्धारपथमित्यभिप्रेत्य मुमुक्षोर्बोधमुद्दिश्य तत्संस्कारान्वितभक्तियोगमाह—भयमिति । तन्मायया भगवन्मायया । तमेव भगवंतमेव । पुनराक्षिपति—नन्विति । आदिनेन्द्रियग्रहः, स च देहाद्यभिनिवेशः देहेऽहंकारतो देह एवाहमस्मीत्येवंलक्षणतः, स च देहाहंकारोपि स्वरूपास्फुरणान्निजरूपानवबोधात् । अत्र भये । तस्य हरेः । तन्मायया ईशमायया भगवतो निजस्वरूपस्य अस्फूर्तिरज्ञानम् ततः स्वरूपास्फूर्तेः विपर्ययोऽन्यथा ज्ञानम् ततो विपर्ययात् देहादिरूपद्वितीयाभिनिवेशात् लौकिकीष्वपींद्रजालादिरूपासु चर्मखण्डकृतसर्पे चर्मखण्डस्वरूपाज्ञानात्तत्र सर्पोयमिति द्वितीयाभिनिवेशत एव तद्द्रष्टॄणां भयं भवतीति प्रसिद्धम् । मायातरणं मायिकाश्रयणे सत्येव भवतीत्यत्र श्रीमुखोक्तिं प्रमाणयति—उक्तं चेति । देवस्य मम शक्तिरूपा दैवी, एवपदमन्यव्यवच्छेदमाह । न गुरुभक्तिहीनानां मायातरणं भवतीत्याह—किंचेति । इत्यर्थ इति—गुरुं विना सेवाप्रकाराज्ञाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा॥तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात् ॥३८॥

ननु विषयविक्षिप्तचित्तस्य कुतोऽव्यभिचारिणी भक्तिः संभवति कुतस्तरामभयम् । तत्र न तावद्विषयो नाम वास्तवोऽस्ति किंतु मनोविलासमात्रमतो मनो नियमनेन भजनादभयं स्यादित्याह । अविद्यमानोऽपीति । द्वयः द्वैतप्रपंचः ध्यातुः पुंसो धिया मनसा स्वप्नश्च मनोरथश्च यथा तथेत्यर्थः । तत्तस्मात्कर्माणि संकल्पयति

दिति भावः । यद्वा—एकयाऽऽत्मत्वानुसंधानरूपया ॥ * ॥ ज्ञानैकनिवर्त्यत्वात् रज्ज्वां भुजंगधिया जातभयस्य यथा रज्जुस्वरूपज्ञानेन निवृत्तिस्तथा स्वरूपाज्ञानकल्पितभयस्य स्वरूपज्ञानमात्रेण निरास्यत्वात् किमिहेशभ त्त्येत्याक्षेपः । तन्माया किं करोतीति भगवतो जगदधिकारिण्या यमवदभक्तदण्डकारिण्या कर्त्र्या स्वरूपास्फूर्तिर्जीवस्य स्वरूपविस्मृतिः कार्यते, ततः स्वरूपास्फूर्तेः भक्त्यैव ज्ञानं न तु वाक्यमात्रेण यथा भोजनेनैव क्षुन्निवृ त्तिर्न तु पायसापूपादिनाम्नेति "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी" इति भगवत्पूज्यपादोक्तेः, "न युज्यमानया भक्त्या भगवत्यखिलात्मनि । सदृशोस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये ॥" इति श्रीकपिलदेवोक्तेश्च, 'रहूगणैतत्तपसा न याति' इत्याद्युक्तेश्च, सर्वभयादिरोगवैमुख्यनिदानत्वाच्च भक्तिरेव कार्येति ॥ * ॥ **दीपिका**—'मन्ये ऽकुतश्चित्' इत्येव स्थापयन् क्रमेण निष्ठापयति—भयमिति । यतो भयं तन्मायया भवेदतो बुधस्तमे वाभजेत् प्रथमतः कायेनेत्याद्युक्तप्रकारेणैषदपि भजेत् ततो गुरुदेवतात्मा सन्भक्त्या साक्षाद्भागवतधर्मरूपया तत एकया नित्यपादांबुजोपासनरूपयेति विशेषतोर्थः ॥ * ॥ **संदर्भः**—किंच, भक्तैस्संसारान्न बिभेतव्यम् स हि भक्तौ प्रवृत्तस्य स्वत एवापयातीत्याह—भयमिति । द्वितीये देहेन्द्रियादावुपाधिभूतेऽभिनिवेशतोभिमानात् ईशविमुखजीवस्य न त्वीशोन्मुखस्य "तावद्रागादयः स्तेनास्तावत्कारागृहं गृहम् । तावन्मोहोंघ्रिनिगडो याव त्कृष्ण न ते जनाः ॥" इति ब्रह्मोक्तेः, 'तावद्भयं द्रविणदेहसुहृन्निमित्तम्' इत्यारभ्य 'यावन्न तेंघ्रिमभयं प्रवृणीत लोकः' इति तृतीयेपि तदुक्तेश्च । तच्च भयं द्विविधम्—विपर्ययोऽस्मृतिश्च विपर्ययरूपमस्मृतिरूपञ्चेत्यर्थः। विपर्ययस्त्वात्मभिन्ने देहादावात्मबुद्धिः, अस्मृतिरात्मनि स्मृतिभ्रंशः कोहं किं करोमि पूर्वं कीदृश आसमग्रे कीदृग्भविष्यामीति पूर्वापरानुसंधानराहित्यम् । एतदेव तस्य भगवतो मायया भयम् । तदुक्तम्—"स्मृतिभ्रंशाद्बु द्धिनाशो बुद्धिनाशात्प्रणश्यति" इति । अत एव हेतोर्बुधः श्रीगुरुचरणप्रसादाल्लब्धविवेकस्तमेव आ सम्यक्कामनाराहित्येन एकया केवलया न तु ज्ञानकर्मादिमिश्रया भक्त्या भजेत्। अन्यत्स्पष्टम् ॥ ३७ ॥ पूर्वोक्तभक्तेर शक्यत्वमाशंकते—नन्विति । तत्र विषयविक्षेपाक्षेपे । इत्यर्थ इति—दृष्टांतवैषम्याभावाय समासं विदार्य व्याख्येयमिति भावः । संकल्पयति सामान्यतः विकल्पयति विशेषतः। ततश्च मनोनिरोधात् । इत्यर्थ इति—"मन एव मनुष्याणां कारणं बंधमोक्षयोः" इत्याद्युक्तेर्मनोनिरोध एवाभयहेतुरिति भावः । यद्वा—कर्मणः कार्यविश्वस्य सम्यक्सत्यत्वेन कल्पकं विविधतया च कल्पकं यन्मननात्मिकाऽविद्यापरिणामभूतं मनस्तद्बुधः श्रवणमननजबो धवान् विपर्ययाप्रतिबद्धं साक्षात्कारार्थं जातसाक्षात्कारश्चेज्जीवन्मुक्तौ निरुंध्यात्। ततो भयहेतुद्वितीयाभावादभयं स्यादिति भावः ॥ * ॥ **संदर्भः**—अथ साक्षात्तद्धर्मरूपामेव ग्राहयन्मनोनिरोधोक्त्या कायेनेत्याद्युक्तमतिक्र मयति—अविद्येति द्वाभ्याम् ॥ * ॥ **विश्वनाथः**—ननु स्रक्चन्दनवनितादिपरित्यागप्रपञ्चो यस्य नैव विद्यते विद्यमानमपि तं परित्यज्य यो वा वने वसति तस्य भयं न भवेदिति चेन्मैवं वादीरित्याह—अविद्यमान इति । द्वयोर्भोग्यप्रपञ्चो ह्यविद्यमानोपि ध्यातुः पुंसोऽवभाति मानसप्रत्यक्षो भवति धिया 'सर्वो द्वंद्वो विभाषयैकवद्भवति' इति न्यायात् "ऊकालोज्झस्वदीर्घप्लुतः": इतिवदेकवचनपुंस्त्वे श्रीमद्भागवतस्य साक्षाद्देवस्वरूपत्वात्साक्षात्तद्रूपपा णिनिसूत्रमेव दृष्टांतितमत्रेति मूले तत इत्युक्ते मनोनिरोध एव वाच्य एकयेत्यादिकं त्वार्थकमेवाकृष्टमत उक्तमित्यर्थ इति । स च मनोनिरोधो गुरुचरणभक्तिं विना प्रकारांतरेण न भवेत्तदुक्तं श्रुतिभिः—'विजितहृषीकवायुभिरदांतमनस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके ॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥ ३९ ॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ॥ हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥

विकल्पयति च यन्मनस्तन्निरुंध्यान्नियच्छेत् । ततश्चैकया भक्त्या भजनादभयं स्यादित्यर्थः ॥ ३८ ॥ एतदत्यंताशक्यमित्याशंक्य सुगमं मार्गमाह । शृण्वन्निति । तदर्थकानि तान्येव जन्मानि कर्माणि चार्थो येषां तानि । एतान्यपि साकल्येन ज्ञातुमशक्यानीत्याशंक्याह । यानि लोके गीतानि प्रसिद्धानि तानि शृण्वन्गायंश्च विचरेत् । असंगो निःस्पृहः ॥ ३९ ॥ एवं च भजतः संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह । एवमिति । एवं व्रतं वृत्तं यस्य सः । स्वप्रियस्य हरेर्नामकीर्त्या जातोऽनुरागः प्रेमा यस्य सः । अत एव द्रुतचित्तः श्लथद्धृदयः । कदाचिद्भक्तपराजितं भगवंतमाकलय्योच्चैर्हसति । एतावंतं कालमुपेक्षितोऽस्मीति रोदिति । अत्यौत्सुक्याद्रौति क्रोशति हे हरे मामनुगृहाणेति अतिहर्षेण गायति । जितंजितमिति नृत्यति । किं दांभिकवत्परान्प्रति प्रकाशयितुम् । न । उन्मादवद्ग्रहगृहीतवत् । लोकबाह्यो

रगम्' इत्यत्र 'समवहाय गुरोश्चरणम्' इति । सप्तमेऽपि—''सर्वं चैतद्गुरौ भक्त्या पुरुषो ह्यञ्जसा जयेत्'' इति । अत एवात्रापि गुरुदेवतात्मेत्युक्तम् ॥ ३८ ॥ एतन्मनोनुरोधलक्षणम् । एतानि जन्मकर्मार्थकानि यशोदानंदनपूतनार्यादीनि ॥*॥ दीपि०—एतन्मनोनिरोधेन भजनमत्यंताशक्यं दुष्कराष्टांगमयत्वात् । 'अंजः पुंसामविदुषाम्' इत्युक्तेस्सुगममार्गमाह—स्वत एव मनोनिरोधश्च परमोपयुक्तोयमिति एतत्पृथक्त्वे एवात्यंताशक्यतादि स्यादिति भावः । साक्षाद्भगवद्धर्ममेवाह—शृण्वन्निति । यानि शास्त्रद्वारा सत्परंपराद्वारा च लोके गीतानि अपभ्रंशभाषयापि निबद्धानि नामानि नानादेशभाषयापि तदर्थकान्येव स एवार्थो वाचो येषां तानि कान्हा इति कानड इति कान इति कनैया इत्येवमादीनि जन्मार्थकानि देवकीनंदनयशोदानंदनादीनि कर्मार्थकानि मुरारिमधुसूदनादीनि च गायन्विचरेदित्यन्वयः । असंगो वस्त्वंतरासक्तिशून्यः ॥ ३९ ॥ एवं नामश्रवणादिना । एवं पूर्वोक्तं वृत्तं वर्तनम् । अत एव जातानुरागत्वादेव । अत्यौत्सुक्यादत्यौत्कंठ्यात् ॥ * ॥ ततोऽजसा तृतीया फलरूपा भक्तिः स्यादित्याह—एवंव्रत इति । अत्र नामकीर्त्येति तृतीया श्रुत्याऽनुरागजनने साधकतमत्वव्यंजनात् । तत एवं शृण्वन्नित्यादिप्रकारं व्रतं नियमो यस्य तथाभूतोपि सन् स्वप्रियाणि तन्नामस्वसंख्येषु मध्ये यानि स्ववासनापोषकाणि तेषां कीर्त्या कीर्तनेन मुख्येन कारणेन जातानुराग आविर्भूतमहाप्रेमेत्यर्थः । हासादीनां कारणानि भक्तिभेदानामानंत्यादनंतान्येव ज्ञेयानि ॥ * ॥ **विश्वनाथस्तु**—भक्त्यंगेषु नामकीर्तेरेवोत्कर्षमाह—स्वप्रियस्य कृष्णस्य नामकीर्त्या स्वप्रियं वा यद्भगवन्नाम तस्य कीर्त्या कीर्तनेन जातोऽनुरागः प्रेमा यस्य स दर्शनोत्कंठाग्निद्रुतीकृतचित्तजांबूनदः अये हैयंगवीनं चोरयितुं यशोदासुतश्चौरो गृहं प्रविष्टस्तदयं ध्रियतामाध्रियतां वेति बहिर्जरतीगिरमाकर्ण्य पलायितुं प्रवृत्तं कृष्णं स्फूर्तिप्राप्तमालक्ष्य हसति । स्फूर्तिभंगे सत्यहो प्राप्तो महानिधिर्मे हस्तगतश्च्युत इति विषीदन् रोदिति, हे प्रभो क्वासि देहि मे प्रत्युत्तरमिति फूत्कृत्य रौति, भो भक्त त्वत्फूत्कारं श्रुत्वैवायातोस्मीति पुनः स्फूर्तिप्राप्तं तमालक्ष्य गायति, अद्याहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यः ॥ ४१ ॥
भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाऽश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥ ४२ ॥

विवशः ॥ ४० ॥ किंच खमिति । सत्त्वानि भूतानि आकाशादि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत् । संभावनायां लिङ् ॥ ४१ ॥ नन्वियमारूढयोगानामपि बहुभिर्जन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भवेदित्याशंक्य सदृष्टांतमाह । भक्तिरिति । प्रपद्यमानस्य हरिं भजतः पुंसो भक्तिः प्रेमलक्षणा । परेशानुभवः प्रेमास्पदभगवद्रूपस्फार्तैः तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिक एककालो भजनसमकाल एव स्यात् । यथाऽश्नतो भुंजानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षन्निवृत्तिश्च प्रतिघासं स्युः । उपलक्षणमेतत् । प्रतिसिक्थमपि यथा स्युस्तद्वत् । एवमेकैकस्मिन् भजने किंचित्प्रेमादित्रिके जायमानेऽ

कृतार्थोस्मीत्यानंदेनोन्माद उन्मत्तवन्नृत्यति, लोकबाह्यः लोकानां हास्यप्रशंसासंमानावमानादिष्ववधानशून्यः ॥ ४० ॥ हरेः शरीरं " सर्वं खल्विदं ब्रह्म " " ब्रह्मैवेदं सर्वम् " इति श्रुतेः । सत्त्वानि जीवानि " सत्त्वं स्याद्गुणजीवयोः" । आदिना बल्यादिग्रहः । यद्वा–तत्पदार्थेशानिरूपकवाक्यैरीशव्याप्तिमवगत्य 'यच्च किंचिज्जगद्वस्तु' इत्यादिभिरिति महावाक्याद्वा प्रत्य[illegible]भासावगतभेदविशेषेनानवगतब्रह्मात्मंवस्तुः खादीनिहरेः शरीरमित्यवगत्य अनन्य ईशातिरिक्तममन्वानः प्रणमेत्तदा शुद्धो बाधितप्रत्यक्षाभासकृतासंभवोऽनन्य ईशाभिन्न एव स्यात् इति वार्थः "अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योहमस्मीति न स वेद यथा पशुः" इति श्रुतेः ॥ * ॥ **संदर्भः**–ततः श्रीभगवतः सर्वत्र स्फूर्तेः खं वायुमिति सत्त्वानि भूतानि आकाशादिक यत्पश्यति तत्त्वनुरागातिशयेन " जगद्वनमयं लुब्धाः कामुकाः कामिनीमयम् " इति तद्वरेः शरीरं श्यामसुंदरपीतवसनादिरूपमेव पश्यन्प्रणमेत्, तत्रतत्र भक्त्या नम्रात्मा भवतीत्यर्थः । तत्र हेतुरनन्यः स्फूर्त्यन्तररहित इत्यर्थः । 'या निशा सर्वभूतानाम्' इत्यादेः ॥ * ॥ **विश्वनाथोपि**–ततश्च " नारायणमयं धीराः पश्यन्ति परमार्थिनः । जगद्वनमयं लुब्धाः कामुकाः कामिनीमयम ॥ " इति पौराणिकवाक्यस्योदाहरणीभवतीत्याह–खमिति । प्रणमेदिति संभावनायां लिङ् । खवाय्वादिषु यत्रयत्र दृष्टिः पतेत्तत्रतत्र हरेः शरीरं श्यामसुंदराकारमेव स्फुरितं पश्यतीत्यर्थः । यद्वा–भक्तस्य फलप्राप्तिदशां निर्वर्ण्य पुनः साधनदशायां किंचिद्विदधाति–खमिति। हरेः शरीरमधिष्ठानं ज्ञात्वा प्रणमेत् प्रणम्रो भवेत् । न विद्यतेऽन्यः कृष्णं विना सेव्यो यस्य सः ॥ ४१ ॥ अत्र पुनराशंक्य भागवतधर्मफलमाह–नन्विति । एतत्प्रतिग्रासमित्येतत् । प्रतिसिक्थं प्रतिपुलाकं " सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम् " इति मेदिनी । पुलाकस्तंडुलातिसूक्ष्मावयवविशेषः । एकैकस्मिन्नेकैकवारमित्यर्थः ॥ * ॥ **संदर्भः**–ननु पूर्वं पादांबुजोपासनमित्यादिना तादृशतत्स्फूर्तिमयं फलमुद्दिष्टम् एवंव्रत इत्यादिना तत्प्रेम लोकबाह्यमित्यनेन वैराग्यञ्चेति क्रमो गम्यते स च न संभवति मिथः सापेक्षत्वात्, यौगपद्ये च परस्पराश्रयो दोषः स्यात्तदेतदाशंक्य यौगपद्यमेव दृष्टांतेन साधयति–भक्तिरिति । तत्र भक्तितुष्ट्योः सुखरूपत्वात् परेशानुभवपुष्ट्योरात्मभरणरूपत्वाद्विरक्तिक्षुदपाययोरन्यत्र वैतृष्ण्यरूपत्वात्साम्यम् इह भक्त्यादित्रयमुद्दिश्यैककालमात्रत्वं विधीयते 'अप्राप्तशास्त्रमर्थवत्' इति न्यायात् । " प्राप्ते कर्मणि न त्वेको विधातुं शक्यते गुणः । अप्राप्ते तु विधीयंते बहवोप्येकयत्नतः ॥" इत्युक्तेश्च, तथा चेह भक्त्यादिकेऽप्राप्तमेव यौगपद्यं शास्त्रेण विधीयत इति भावः । यथाऽप्राप्त एवापगाप्रवाहे सेतुर्विधातुं शक्यते न तु प्राप्तेपि तस्मिन्सोतिप्रयत्नेनापि विधातुं शक्य इति ॥ * ॥ अत्र **विश्वनाथस्तु**–भक्तिमार्गेऽस्मिन्नतिसुखदे साधनदशायामपि फलप्राप्तिं सदृष्टान्तामाह–भक्तिः श्रवणकीर्तनादिः परेशस्येष्टदेवस्य श्रीकृष्णस्य यदा भवेत्तदैव तदनुभवो माधुर्यास्वादोपि तदनुरूपो भवेत्तदैवान्यत्र मायिकसुखे विरक्तिरपि तदनुरूपा भवेदिति त्रिकः त्रयोऽवयवा यस्य स त्रिकः । अत्रावयवार्थे कः । अत्रेदमवधेयम्–किञ्चिन्मात्रभोजिनः किञ्चिन्मात्रैव तुष्टिः पुष्टिः क्षुदपायोपि तदनुरूप एव बहुभुंजानस्य पूर्णास्तुष्टिपुष्टिक्षुदपाया एवं किञ्चिच्छ्रवणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवंति वै भागवतस्य राजंस्ततः परां शांतिमुपैति साक्षात् ॥ ४३ ॥ राजोवाच ॥ अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणाम् ॥ यथाऽऽचरति यद्ब्रूते यैर्लिंगैर्भगवत्प्रियः ॥ ४४ ॥ हरिरुवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५ ॥

नुवृत्त्या भजतः परमप्रेमादि जायत एव । बहुग्रासभोजिन इव परमतुष्ट्यादि ॥ ४२ ॥ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह । इत्यच्युतांघ्रिमिति ॥ ४३ ॥ भागवतस्य भवंतीत्युक्ते तस्य लक्षणं पृच्छति । अथेति । यद्धर्मो यस्मिन्धर्मे परिनिष्ठितः । यादृशो यत्स्वभावः । यथाचरति वर्तते । यत् ब्रूते वदति । यैश्च लिंगैर्भगवतः प्रियो भवति ॥ ४४ ॥ यद्धर्म इत्यस्योत्तरमाह त्रयेण । सर्वभतेष्विति । आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं पश्येत् । तथा ब्रह्मरूपे आत्मन्यधिष्ठाने भूतानि च यः पश्येत् । यद्वा "आततत्वात्प्रमातृत्वादात्मा हि परमो हरिः" इति तंत्रोक्तेरात्मनो हरेः सर्वभतेषु मशकादिष्वपि नियंतृत्वेन वर्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येन्न तु तस्य तारतम्यं तथात्मनि हरावेव भूतानि च यः पश्येत् । कथंभते भगवति अप्रच्युतैश्वर्यादिरूपे । न पुनर्जडमलिनभूताश्रयत्वेन

दिभजने किञ्चिन्मात्रे परेशानुभवविरक्ती भवतः बहुभजतस्तु संपूर्णा एव भक्तिपरेशानुभवविरक्तयः स्युः । किं तु बहुभोजिनस्तु भोजनासामर्थ्यं भवति बहुभजतस्तु भजने सामर्थ्यातिशयो भवतीति विशेषो द्रष्टव्यः ॥ ४२ ॥ ततश्च भक्त्यादित्रिकाविर्भावात् इति । प्रीत्या भजतोऽनु भगवत्प्रबोधः । भगवदपरोक्षज्ञानमनंतरं पूर्वस्मादधिका संसारविरक्तिरनंतरं चाधिका भक्तिरित्येतानि भागवतस्य भवंतीति यस्मात्तस्मात्ततोनंतरं साक्षात्तुर्यावस्थालक्षणां परामुत्तमां शांतिसंयोग्यां मुक्तिमुपैतीत्यन्वयः । अत्र पूर्वाधिक्यविवक्षया प्रबोधादीनां हेतुहेतुमद्भावकथनं न विरुद्धमिति ॥ * ॥ ततश्च भक्त्यादित्रिकोत्पत्त्यनंतरं परां शांतिमात्यंतिकं क्षेमम् ॥ ४३ ॥ तस्य भागवतस्य ॥ * ॥ अथेति–अथानंतरं भागवतं ब्रूत तज्ज्ञानार्थं स च नृणां मध्ये यद्धर्मो यत्स्वभावस्तं स्वभावं ब्रूतेति मानसलिंगप्रश्नः । यादृश इति तस्यैव तारतम्यप्रश्नः. । यथाऽऽचरतीति अनुतिष्ठतीति तदनुष्ठानं ब्रूत इति कायिकलिंगप्रश्नः । यं ब्रूते तद्वचनं ब्रूतेति वाचिकलिंगप्रश्नः । ननु पूर्वं 'शृण्वन्सुभद्राणि रथांगपाणेः' इत्यादिग्रंथेन तत्तल्लिंगं श्रीकविनैवोक्तम्, सत्यम्, तथापि पुनस्तत्तदनुवादेन तेषु लिंगेषु यैर्लिंगैः स भगवत्प्रियो यादृश उत्तममध्यमेत्यादिभेदो विविक्तो भवति तानि लिंगानि विविच्य ब्रूतेत्यर्थः ॥ ४४ ॥ समन्वयं व्याप्तिम् । एतत्त्वद्वैतनिष्ठानां भवति भक्तास्तु सगुणनिष्ठामेवाद्रियंत इत्यत आह– यद्वेति । आततत्वाद्व्याप्तत्वात् मातृत्वाज्ज्ञातृत्वात् । इत्यात्मशब्दानिरुक्तिं हरावेव मन्यन्ते तांत्रिका अन्वर्थामिति । मशकोऽतीव तुच्छो दंशनशीलो जीवविशेषः । आदिना कीटादिग्रहः । तस्य निरतिशयैश्वर्यस्य तथा यथा भूतेषु । इत्यर्थ इति–आब्रह्मकीटादिष्वेक एवाप्रच्युतैश्वर्यस्तिष्ठतीति भावनावान्भागवतो भवतीति भावः । यद्वा–भगवति आत्मनि स्वस्वरूपे भगवत्येव कल्पितानि भूतानीत्यतो मुख्यसमानाधिकरणेनात्मनो भगवद्भावं बाधसमानाधिकरणेन भूतेषु च यः पश्येदेष भागवतोत्तम इति ॥ * ॥ अत्र 'हरिर्हरति पापानि' इति स्मृतेर्हरिशब्दस्य परममुख्यावृत्तिर्भगवत्येवेति च भागवतलक्षणं भगवतैव वक्तव्यं न तु स्वमुखेन स्वलक्षणं भागवतेन वक्तव्यमन्यथात्मसंभावनाप्रसंग इति तन्नामत्वाद्धरिरेवोवाचेति ज्ञेयम् । तत्र मानसधर्मोत्तरमाह–स्वस्य त्वंपदार्थस्य ब्रह्मभावेन ब्रह्मास्मीति भावनया सर्वभूतेषु कल्पितेष्वधिष्ठानत्वेन समन्वयमनुस्यूतत्वमधिष्ठाने कल्पितानि नः तु वास्तवानीति यः पश्येत्स भागवतोत्तम इत्यर्थः । एतत्तु ब्रह्मज्ञानिलक्षणं न तु भागवतलक्षणमित्याम्रनिम्बोत्तरन्यायापत्तेरित्यरुच्याह–यद्वेति । आततत्वात्सर्वव्यापकत्वात् मातृत्वात्सर्वज्ञातृत्वाच्चेत्यक्षरसाम्यान्निरुक्तिः । तस्य भगवद्भावस्य हरावेव भूतानि चेति 'मत्स्थानि सर्वभूतानि' इति भगवदुक्तेः । सर्वाश्रये भगवत्येवाश्रितानि यःभूतानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥

जाड्यादिप्रसक्त्या ऐश्वर्यादिप्रच्युतिं पश्येत् । स सर्वत्र परिपूर्णं भगवत्तत्त्वं पश्यन् भागवतोत्तम इत्यर्थः ॥ ४५ ॥ प्रेम च मैत्री च कृपा च उपेक्षा च ता ईश्वरादिषु

पश्येदिति सर्वस्य तद्व्याप्यत्वात्तदायत्तवृत्तिकत्वान्न कस्यापि स्वातंत्र्येण सत्तां यः पश्येदित्यर्थः । जडानि मलिनानि च यानि भूतानि चराचरशरीराणि तान्याश्रयो यस्य तेषाञ्चाश्रयस्तस्य भावस्तत्ता तया वा जाड्यमांलिन्यादिप्रसाक्तिस्तयैश्वर्यादीनां प्रच्युतिं न पश्येत् स्वाभाविकाचिच्छक्त्या मायाभिभावकत्वादिति भावः । "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति श्रीमदर्जुनोक्तेरिति **दीपिका** ॥ * ॥ **संदर्भस्तु**—तत्रोत्तरं तदनुभवद्वारा गम्येन मानसलिंगेन महाभागवतं लक्षयति—सर्वभूतेष्विति । 'एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागः' इति कविवाक्योक्तरीत्या यश्चित्तद्रवहासरोदनाद्यनुभावकानुरागवशात् 'खं वायुमग्निम्' इत्यादितदुक्तप्रकारेणैव चेतनाचेतनेषु सर्वभूतेषु आत्मनो भगवद्भावम् आत्माभीष्टो यो भगवदाविर्भावस्तमेवेत्यर्थः । पश्येदनुभवति अतस्तानि च भूतानि आत्मनि स्वचित्ते तथा स्फुरति यो भगवांस्तस्मिन्नेव तदाश्रितत्वेनैवानुभवति एष भागवतोत्तमो भवति । इत्थमेव श्रीव्रजदेवीभिरुक्तम्—"वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः" इत्यादि । यद्वा—आत्मनो यो भगवति भावः प्रेमा तमेव चेतनाचेतनेषु भूतेषु पश्यति । शेषं पूर्ववत् । अत एव भक्तरूपतदधिष्ठानबुद्धिजातभक्त्या तानि नमस्करोतीति 'खं वायुम्' इत्यादौ पूर्वमिति भावः । तथैव चोक्तं ताभिरेव—"नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः" इत्यादि । श्रीपट्टराज्ञीभिरपि—'कुररि विलपसि त्वम्' इत्यादि । अत एव न ब्रह्मज्ञानमभिधीयते भगवति तज्ज्ञानस्य तत्फलस्य च हेयत्वेन जीवभगवद्विभागाभावेन च भागवतत्वविरोधात् । "अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे" इत्यादिकात्यंतिकभक्तिलक्षणानुसारेण सुतरामुत्तमत्वविरोधाच्च न च निराकारेश्वरज्ञानं 'प्रणयरसनया धृतांघ्रिपद्मः' इत्युपसंहारगतपरमकाष्ठाविरोधादेवेति विवेचनीयम् ॥ * ॥ **विश्वनाथस्तु**—आत्मानं स्वस्योपास्यो यो भगवांस्तस्य भावं विद्यमानतां सर्वभूतेषु यः पश्येत्, यथा—स क्वेति हिरण्यकशिपुना पृष्टः प्रह्लादः सर्वत्रैवेत्युक्त्वा स्तंभेपि मत्प्रभुर्दृश्यत इति स्वोपास्यं भगवन्तं दृष्टवानित्यर्थः । तथात्मन्यात्मीये आत्मोपास्ये भगवति च भूतानि पश्येत्, यथा श्रीयशोदा कृष्णस्य जठर एव सर्वभूतान्यपश्यत् । यद्वा—आत्मनि मनसि स्फुरति यो भगवांस्तस्मिन्नेव भूतानि तद्विषयकप्रेमवंति यः पश्येत्, यथा 'वनलतास्तरवः' इत्यादि 'नद्यस्तदा तत्' इत्यादिकं व्रजसुंदर्यः, 'कुररि विलपसि त्वम्' इति, 'क्षितिधर चिंतयसे स्तनैर्विधर्तुम्' इत्यादिकं पट्टराज्यश्चोक्तवत्य एव । अत एव "आत्मनो भगवद्भावं सर्वभूतेषु पश्यति । भाववंति च भूतानीत्यर्थो वै संमतः सताम् ॥" इति श्रीमत्सनातनगोस्वामिचरणानां कारिका प्रसिद्धा । अत्र पश्येदिति तथादर्शनयोग्यतैव विवक्षिता, न तु तथादर्शनस्य सार्वकालिकता । तथात्वे नारदव्यासशुकादावप्यव्याप्तिः स्यान्नहि ते सर्वदैव सर्वत्र भगवन्तं पश्यंति किंतु तद्दिदृक्षाधिक्य एवातस्तद्दर्शनौत्कंठ्यमत्याधिकं यदा वर्धेत तदैव 'कामुकाः कामिनीमयम्' इति न्यायेन सर्वजगदेव भगवन्मयं पश्येत्, तथैव 'आत्मवन्मन्यते जगत्' इति सर्वभूतान्येव प्रेमोत्कंठाव्याकुलान्येव पश्येदिति ज्ञेयम् । अत्र दशोर्ज्ञानार्थत्वे व्याख्याते भगवतः सर्वभूताधेयत्वाधारत्वज्ञानवतः शास्त्रज्ञमात्रस्यैव भागवतोत्तमत्वं स्यादिति तन्न व्याख्यातम् ॥ ४५ ॥ मध्यमभागवतमाह—ईश्वरे प्रेम तदधीनेषु सत्सु मैत्रीं बालिशेष्वज्ञेषु कृपाम् द्विषत्सु द्वेषं कुर्वत्सूपेक्षा । एवंभूतस्येश्वरादिरूपस्य ॥ * ॥ **संदर्भः**—अथ मानसलिंगविशेषणैरेवं मध्यमभागवतं लक्षयति—ईश्वर इति । परमेश्वरे प्रेम करोति तस्मिन्भक्तियुक्तो भवतीत्यर्थः । तथा तदधीनेषु भक्तेषु च मैत्रीं बंधुभावम् 'वैष्णवं बंधुसत्कृत्या' इति वक्ष्यमाणत्वात्, बालिशेषु तद्भक्तिमजानत्सु उदासीनेषु कृपाम्, तथोक्तं श्रीप्रह्लादेन—"शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय भरमुद्वहतो विमूढान्" इति । आत्मनो द्विषत्सूपेक्षां तदीयद्वेषेण चित्ताक्षोभादौदासीन्यमित्यर्थः, तेष्वपि बालिशत्वेन कृपांशसद्भावात्, यथैव प्रह्लादो हिरण्यकशिपौ, भगवतो भागवतस्य वा द्विषत्सु तु सत्यपि चित्तक्षोभे तत्रानभिनिवेशमेव कुर्यात् अर्थात्तत्सामीप्यं त्यजेदन्यथा पुण्यहानेः । तदुक्तम्—"निंदां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः ॥" इति । अस्य बालिशेषु कृपाया एव स्फुरणं द्विषत्सूपेक्षाया एव न तु पूर्ववत्सर्वत्र तस्य तत्प्रेम्णो वा स्फुरणं ततो मध्यमत्वम् ॥ * ॥ अत्र **विश्वनाथोपि**—ईश्वरे स्वोपास्ये तस्मिन्नासक्तो भवति सोऽधीनो येषाम् 'अहं भक्तपराधीनः'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्चायामेव हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वापींद्रियैरर्थान्यो न द्वेष्टि न हृष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥ ४८ ॥ देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥ ४९ ॥

चतुर्षु क्रमेण यः करोति स मध्यमो भागवतः । एवंभूतस्य भेदस्य दर्शनात् ॥ ४६ ॥ अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेष्वन्येषु च सुतरां न करोति । प्राकृतः प्रकृतप्रारंभः अधुनैव प्रारब्धभक्तिः शनैरुत्तमो भविष्यतीत्यर्थः ॥ ४७ ॥ पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्षणान्याह । गृहीत्वाऽपीति । श्रीवासुदेवाविष्टचेता न गृह्णाति तावदिंद्रियैरर्थान्गृहीत्वाऽपि न तत्र रागद्वेषवानित्यपिशब्दार्थः । यत इदं विश्वम् ॥ ४८ ॥ किंच । देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्याऽविमुह्यमानः स भागवतप्रधानः । तत्र देहस्य जन्माप्ययौ । प्राणस्य क्षुत्पिपासे । मनसो भयम् । बुद्धेस्तर्षस्तृष्णा ।

इति नवमे भगवदुक्तेस्ते तदधीना भक्तास्तेषु बंधुत्वं बालिशेषु येषु कृपा स्वयमुदेति तेष्वेव कृपामिति भरतव्यासशुकादीनामपि कृपाया असार्वत्रिकत्वात् । " गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् " इति गिरिदृष्टान्तेन वर्षर्तुवर्णने एतदुपपादनात् । भगवंतं द्विषत्सूपेक्षां तत्र कृपावैफल्यदर्शनादिति भावः । आत्मानं द्विषत्सु तु बालिशत्वमननाद्दूरतः स्थित्यैव तच्छुभानुध्यानमात्रमिति सदाचारः । अत्र सर्वभूतेषु भगवद्दर्शनयोग्यता कदापि नेष्टा तस्यैवैतल्लक्षणचतुष्टयत्वे मध्यमत्वम्, यस्य तु सा दृष्टा तस्य तूत्तमत्वमेवेति विवेचनीयम् । अत एव भागवतोत्तमेषु नारदादिष्वपि प्रेममैत्रीकृपोपेक्षा दृश्यन्त एव ॥ ४६ ॥ अवमभागवतमाह—'अर्चा पूजाप्रतिमयोः' इति धरणिः । एवपदेन प्रतिमातोऽन्यत्र स्थितविष्णुज्ञानव्यावृत्तिः क्रियते । हरये हरिमुद्दिश्य ईहते करोति तद्भक्तेषु हरिभक्तेषु अन्येषु भक्तेतरेषु"प्रारंभे गुणसाम्ये च स्वभावे प्रकृतिः कृतौ । मुख्ये बहुकृतौ मूले कारणे च निरुद्यमे ॥ " इति निरुक्तिः । इत्यर्थ इति—बद्धपरिकरो गंतव्यदेशमिव प्रारब्धभक्तिकोपि भागवतो भवतीति भावः ॥ * ॥ **संदर्भः**—अथ भागवतधर्माचरणरूपेण कायिकेन मानसेन च लिंगेन कनिष्ठं लक्षयति—अर्चायामेवेति । विशेष्यसंगतैवकारस्यान्ययोगव्यवच्छेदार्थमाह—न तद्भक्तेषु अन्येषु च सुतरान्न भगवत्प्रेमाभावाद्भक्तमाहात्म्यज्ञानाभावात्सर्वादरलक्षणभक्तगुणानुदयाच्च स प्राकृतः प्रकृतिप्रारंभस्तैर्व्याख्यातम् । इयं च श्रद्धा न शास्त्रावधारणजा । 'यस्यात्मबुद्धिः कुणपे ' इत्यादिशास्त्राज्ञानात् । तस्माल्लोकपरंपराप्राप्तैव "अर्चयित्वा तु गोविंदं तदीयान्नार्चयेत्तु यः । न स भागवतो ज्ञेयः केवलं दांभिकः स्मृतः ॥" इति शास्त्रज्ञानसत्त्वे तु भक्तपूजाया आवश्यकत्वमेव तस्माद्भक्ताभासो गौणः कनिष्ठोयम् । अतश्चाजातप्रेमा शास्त्रीयश्रद्धायुक्तः साधकस्तु मुख्यः कनिष्ठो ज्ञेयः, तदेवं त्रिभिः 'यद्धर्मो यादृशः ' इति प्रश्नयोरुत्तरमुक्तम् ॥ ४७ ॥ अभ्यर्हितत्वादुत्कृष्टत्वात् । 'उत्कृष्टेऽभ्यर्हितः पूज्यः ' इति निरुक्तिः । इंद्रियैः श्रोत्रादिभिरर्थान् शब्दादीन् । तथा च प्रियशब्दादिश्रवणादिना न हृष्यति अप्रियं तन्न द्वेष्टि, इदं विषयनिष्ठं प्रियत्वाप्रियत्वं मायैव न तु परमार्थत इति प्रवाहागतं सुखादि सेवमानोऽनासक्तो भगवदेकनिष्ठो भागवतोत्तम इत्यर्थः ॥ * ॥ अभ्यर्हितत्वात्परमपूज्यत्वात् ॥ * ॥ **संदर्भः**—पूर्वोक्तप्रकारेण मायां बहिरंगशक्तित्वाद्धेयामित्यर्थः । अत्रापि कायिकमानसयोः सांकर्यम् ॥ ४८ ॥ अन्यमाह—किञ्चेति—स्मृत्यात्मत्वनिश्चयेनेति वा ॥ * ॥ अथ केवलमानसलिंगेनाह—यावत्प्रकरणम् । यो हरेः स्मृत्या जन्माद्यैः संसारधर्मैरविमुह्यमानः स भागवतेषु मुख्यः—"येषां त्वंतगतं पापं जनानां पुण्यकर्मणाम् । ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न कामकर्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैकनिलयः स वै भागवतोत्तमः॥५०॥न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः॥सज्जतेऽस्मिन्नहं भावो देहे वै स हरेः प्रियः॥५१॥न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभूतसमः शांतः स वै भागवतोत्तमः॥५२॥त्रिभुवनविभवहेतवेऽप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ न चलति भगवत्पदारविंदाल्लवनिमिषार्धमपि यः स वैष्णवाग्र्यः ॥ ५३ ॥

इंद्रियाणां कृच्छ्रं श्रमस्तैः ॥ ४९ ॥ कामश्च कर्माणि च बीजानि च वासनास्तेषाम् । वासुदेव एवैकनिलय आश्रयो यस्य सः । एतेन गृहीत्वापीत्यादिश्लोकत्रयेण द्वेषहर्षमोहकामादिरहितश्चरतीति । यथा चरतीत्येतस्योत्तरमुक्तम् ॥ ५० ॥ यैर्लिंगैर्भगवत्प्रिय इत्यस्योत्तरमाह । न यस्येति । जन्म सत्कुलम् । कर्म तपआदि । जात योऽनुलोमप्रतिलोमजा मूर्धावसिक्तादयः । अस्मिन्देहे । अहंकाररहितैः सत्कुलजन्मकर्मादिलिंगैर्हरेः प्रियो भवतीत्यर्थः ॥ ५१ ॥ वित्तेषु स्वीयं परकीयमिति । आत्मनि स्वः पर इति भेदो नास्ति ॥ ५२ ॥ किंच त्रिभुवनविभवहेतवेऽपि त्रैलोक्यराज्यार्थमपि लवार्धमपि निमिषार्धमपि भगवत्पदारविंदभजनाद्यो न चलति स वैष्णवाग्र्यः । ननु लवार्धमात्रभजनोपरमे चेत्तावाँल्लाभो भवेत्तत्कुतो न चलेत्तत्राह । अकुंठस्मृतिः भगवत्पदतोऽन्यत्सारं नास्तीत्येवंरूपाऽकुंठाऽनपगता स्मृतिर्यस्य सः । भगवत्पदारविंदादन्यत्सारं नास्तीति कुतोऽत आह । अजिते हरावेवात्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभात् किंतु केवलं विमृग्यात् । तदपेक्षया सर्वस्य तुच्छत्वं स्मरन्यो

द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः ॥ ” इति श्रीगीतोक्तेः ॥ ४९ ॥ कामो भोगेच्छा । आश्रयश्चेतोऽवसानभूमिः । एतेन पूर्वोक्तेन ॥ * ॥ न कामेति । चेतस्यादौ बीजानि वासना उत्पद्यन्ते, ततः स्त्र्यादिविषयकः कामस्ततः कर्म इंद्रियद्वारा तत्तद्व्यापारः, एतत्त्रितयस्य यच्चेतसि न संभवः तदेवं ‘गृहीत्वापि ’ इत्यादित्रिभिर्हीनश्चरतीत्युच्चरितम् । अतःपरं यावदध्यायसमाप्ति यद्धर्म इत्युत्तरमेव प्रपंचयिष्यते ॥ ५० ॥ अनुलोमा उत्तमपुरुषेभ्योऽधमस्त्रीषु जाताः । विलोमा अधमपुरुषेभ्य उत्तमस्त्रीषु जाताः । मूर्द्धावसिक्तादयः एषां स्वरूपमग्रे प्रकटयिष्यामः । इत्यर्थ इति—नहि देहगेहाद्यभिमानिनां भागवतत्वं भवति “विषममतिर्न यत्र नृणां त्वमहमिति मम तवेति यदन्यत्र” इत्याद्युक्तेरिति भावः ॥ * ॥ जन्म सत्कुलोद्भवत्वं कर्म जपध्यानादि जातयस्तु तैर्व्याख्याताः । किंतु भगवत्सेवोपयिके साध्ये देह एव सज्जत इत्यर्थः । स हरेः प्रियो भागवतोत्तम इति पूर्वेणैवान्वेति प्रकरणत्वात् ॥५१॥ एतदेव स्फुटयति—नेति । वित्तेषु स्त्र्यादिषु स्वत्वविषयेषु । आत्मनि प्रत्यगात्मनि ॥ * ॥ स्वः स्वपक्षः परो विपक्षः । वित्तेषु स्वस्यैवेदं न परस्येति आत्मनि स्वशरीर एव प्रीतिर्न परशरीर इति ॥ * ॥ **संदर्भस्तु**—वित्तेषु ममतास्पदमात्रेषु । अत्र वित्तवदात्मनि च स्वपक्षपातमात्रं निषिध्यते न व्यक्तिभेदः ॥ ५२ ॥ अपरलक्षणमाह—किञ्चेति । वैष्णवाग्र्यो भागवतमुख्यः । अत्राक्षिपति—नन्विति । तावान् त्रैलोक्यराज्यरूपः। तत्तर्हि । भगवत्पदारविंदादन्यत्र साराभावे हेतुमाशंकते—कुत इति । तथाभूतैर्भगवदर्पितचित्तैः । दौर्लभ्यमाह—किंत्विति । तदपेक्षया भगवत्पदारविंदापेक्षया । सर्वस्य प्रपञ्चस्य । इत्यर्थ इति—“सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः ” इत्यौत्तानपाद्युक्तेरिति भावः ॥ * ॥ किंच—त्रिभुवनविभवाय त्रैलोक्यराज्याप्तयेपि किमुत तद्धेतव इत्यर्थः । ‘सर्वोपि द्वन्द्वो विभाषयैकवद्भवति ’ इति न्यायादेकवचनम् । कथं विचारात् किंत्वावेशादेवेत्याह—अकुंठा संकोचमात्ररहिता स्मृतिर्यस्य सः । तच्च तस्य युक्तमेवेत्याह—अजिते हराविति पूर्ववत् ॥ * ॥ **विश्वनाथस्तु**—न कुंठा प्रलोभयितुमशक्या स्मृतिर्यस्य सः ‘न पारमेष्ठ्यं न महेंद्रधिष्ण्यम्’ इत्यादौ ‘ वांछन्ति यत्पादरजः प्रपन्नाः ’ इत्यादिवचनात् । अत एव निमिषार्धमपि भगवच्चरणारविंदादन्यत्र न चलति, कीदृशात्—अजितेत्यादि पूर्ववत् । यद्वा—अजितात्मानोऽजितेंद्रिया ये सुरादयस्तैस्तु त्रिभुवनराज्यार्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतउरुविक्रमांघ्रिशाखानख मणिचंद्रिकया निरस्ततापे॥हृदि कथमुपसीदतां पुनः स प्रभवति चंद्र इवोदितेऽर्कतापः ॥ ५४ ॥ विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघनाशः ॥ प्रणयरसनया धृतांघ्रिपद्मः स भवति भागवतप्रधान उक्तः ॥ ५५ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे नारदवसुदेवसंवादे जायंतेयोपाख्याने विदेहप्रश्नवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥ राजोवाच ॥ परस्य विष्णोरीशस्य मायिनामपि मोहिनीम् ॥ मायां वेदितुमिच्छामि भगवंतो ब्रुवंतु नः ॥ १ ॥

न चलतीत्यर्थः ॥ ५३ ॥ अपिच विषयाभिसंधिना चलनं कामेनातिसंतापे सति भवेत्स तु भगवत्सेवानिर्वृतौ न संभवतीत्याह । भगवत इति । उरुविक्रमौ च तावंघ्री च तयोः शाखा अंगुलयस्तासु नखानि च तानि मणयश्च तेषां चंद्रिका शीतला दीप्तिस्तया निरस्तः कामादितापो यस्मिंस्तस्मिन्नुपसीदतां भजतां पुंसां हृदि कथं पुनः संतापः प्रभवति । चंद्रे उदिते सत्यर्कस्य ताप इव । 'न यस्य स्वः परः' इत्यादिना श्लोकत्रयेण यादृश इत्यस्योत्तरमुक्तं वेदितव्यम् । यद्ब्रूते इत्यस्य च हरि नामानीति अर्थात् ज्ञातव्यम् ॥ ५४ ॥ उक्तसमस्तलक्षणसारमाह । विसृजतीति । हरिरेव स्वयं साक्षाद्यस्य हृदयं न विसृजति न मुंचति । कथंभूतः । अवशेनाप्यभिहितमात्रोऽप्यघौघं नाशयति यः सः तत्किं न विसृजति । यतः प्रणयरसनया धृतं हृदये निबद्धमंघ्रिपद्मं यस्य स भागवतप्रधान उक्तो भवति ॥ ५५ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां द्वितीयोऽध्यायः ॥ २ ॥ मायातत्तरणब्रह्मकर्मप्रश्नचतुष्टये ॥ तृतीये तूत्तरं दत्तमार्षभैर्मुनिभिः पृथक् ॥ १ ॥ विष्णोर्मायामिदं

विमृग्यात् नो राज्यहानिः कदापि मा भवत्वेतदर्थं मनसि निधाय सेव्यादित्यर्थः ॥५३॥ भगवत्पदारविंदाच्चलनाभावे कारणमाह–अपि चेति । विषयाणामभिसंधिनाऽभिलाषेण कामेन हृदयस्थमनोरथेन । स तु कामनोद्भवसंतापस्तु । उरुविक्रमावन्यत्राविद्यमानौ पादन्यासौ ययोस्तथाभूतौ । वेदितव्यं ज्ञेयं ब्रूते इति कंठतो ज्ञातव्यमित्यर्थः॥*॥ तदेव दृष्टांतमुपपादयति–चंद्रिका तापहारिणी दीप्तिः । यादृश इत्युत्तरं हि स्वतंत्रतया भेददर्शनाभावपूर्वका विरततत्पदारविंदनिमग्नत्वमेव तत्स्वभाव इत्यर्थः ॥ ५४ ॥ भागवतोत्तमोत्तमलक्षणमाह–'सर्वं वाक्यं सावधारणम्' इति न्यायेन हरिरेवेति यस्य पुंसः अवशेन स्खलनादिना अभिहितमात्रः श्रद्धादिराहित्येनोच्चारितमात्र एव "सकृदुच्चारयेद्यस्तु जगन्नाथेति हेलया । ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ॥" इत्याद्युक्तेरघौघं पापसमूहं नाशयति । हृदयात्यागमाशंकते–तत्किमिति । प्रणयरशनया प्रेमरज्ज्वा । यद्यपि विभुत्वेन न कस्यापि हृदयं विसृजति तथापि सर्वत्राव्यक्तोऽत्र तु व्यक्त इति विशेषः ॥ * ॥ **दीपि०**–भक्तो न विसृजतीति किं वक्तव्यं हरिरेव स्वयमित्येवकारार्थः । साक्षादिति । भक्तस्यानवरतस्फूर्तिविषयः सन् असाक्षात्तु न कस्यापि हृदयं विसृजति सर्वांतर्यामित्वादिति । साक्षात्पदमितरव्यावर्तकम् । अवशेनापि किं पुनः सावधानतया अभिहितमात्रोपि किं पुनर्ध्यातः सन् । तत् भक्तहृदयम् । किं कुतः भक्तो भवति–भागवतप्रधानशब्देन मुख्यतया वाच्यो भवति निरुक्तलक्षणानां सामस्त्येनात्र संभवादिति भावः ॥ * ॥ **संदर्भः**–अत्र हरिः स्वयं न विसृजति तेन धृतांघ्रिपद्मश्चेति परस्परपरमासक्तिर्दर्शिता । सर्वत्र तत्प्रेमस्फूर्तिपक्षे तु तादृशगुणे तत्र भगवति को न रज्येदिति तदभिप्राय इति भावः । अत्र विशेषजिज्ञासायां भक्तिसंदर्भोऽन्वेष्यः ॥ * ॥ **विश्वनाथस्तु**–हरिरेव तस्य हृदयं स्वयं न मुंचति तत्र कल्मषकुञ्जराणां कुतो वार्तेत्याह–यः खल्ववशेनापि कदाचिदभिहितमात्रोपीति तैर्व्याख्यातम्, किं पुनः सरसास्वादं येन प्रतिक्षणमभिभाषित इति भावः । एतेन यद्ब्रूत इत्यस्योत्तरमभिव्यञ्जितम् । ननु कथं तदीयहृदयमंदिरान्न निर्गच्छति तत्राह–प्रणयरसेनाति । तैर्व्याख्यातम् । यथा प्रेमवशीकृत्य यशोदयोदर उलूखले बद्धस्तथा सर्वजीवान्मायाशृंखलया निबध्नन्स भक्तजीवैः प्रेमशृंखलया निबध्यत इति भावः ॥ ५५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ माया च तत्तरणं मायातरणं च ब्रह्म च कर्म च ते प्रश्नास्तेषां चतुष्टयं यस्मिंतस्मिंस्तृतीयेऽध्याये (१) । परस्य पूर्णस्य । मायिनां मानं माज्ञानं तद्यातुं शीलं येषां ते मायिनः । यद्वा–मातुं ज्ञातुं शीलं येषां ते, तेषां ज्ञानिनामित्यर्थः । नोऽस्मभ्यम् ॥ * ॥ **दीपि०**–ईशस्य मायानियंतुरत एव मायातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतम् ॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजम् ॥२॥ अंतरिक्ष उवाच ॥ एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज ॥
ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ॥ ३ ॥ एवं सृष्टानि भूतानि प्रविष्टः पंचधातुभिः ॥ एकधा दशधात्मानं विभजञ्जुषते गुणान् ॥ ४ ॥

पश्यन्नित्युक्तमतो मायां पृच्छति । परस्येति । हे भगवंतः भवंतोऽस्मान्ब्रुवंतु ॥ १ ॥ ननूक्तलक्षणो भागवतो भूत्वा कृतार्थः स्याः किं बहुप्रश्नैरत आह । नानुतृप्य इति । संसारतापैर्नितरां तप्तोऽहं तस्य तापस्य भेषजं हरिकथामृतरूपं युष्मद्वचो जुषञ्जुषमाणो नानुतृप्यामि ॥ २ ॥ मायायाः स्वरूपतो निरूपणासंभवात्सृष्ट्यादिकार्यद्वारेण निरूपयितुमाह । एभिरिति । आद्यः पुरुषो यया शक्त्या भूतानामात्मा कारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज । एषा माया भगवत इति चरमश्लोकपादस्य प्रतिश्लोकमनुषंगः । किमर्थं ससर्ज । स्वमात्रात्मप्रसिद्धये स्वं मिमीते प्रमिमीते उपास्ते यः स स्वमाता तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धये । यद्वा स्वांशभूतानां जीवानां मात्राप्रसिद्धये विषयभोगाय आत्मप्रसिद्धये मोक्षाय चेत्यर्थः । तदुक्तं वेदस्तुतौ । "बुद्धींद्रियमनःप्राणाञ्जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च" इति ॥ ३ ॥ एवं जीवोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतान्यंतर्यामिरूपेण प्रविष्ट एकधा मनसा दशधा

परस्य मायिनां मायया स्वशक्त्यान्यजीवमोहकानां ब्रह्मादीनामपि मोहिनीं बुद्ध्यावरकां किं पुनरन्येषां यूयं भगवन्तः 'उत्पत्तिं प्रलयं चैव' इत्याद्युक्तभगवल्लक्षणयुक्ता अतो ब्रुवंत्वित्यर्थः । व इति सभ्याद्यभिप्रायं बहुत्वम् ॥ १ ॥ अत्राक्षिपति—नन्विति ॥ * ॥ हरिकथामृतमिति । मायावर्णनेऽपि तत्स्वभावत्वात्तत्प्रधानमेव तव वचो भवेदिति भावः । इति **संदर्भः** ॥ * ॥ **विश्वनाथः**—युष्मत्संगार्थिनो मे युष्मद्वचोमृतपानलोभस्य दुर्वारत्वमेव प्रश्ने कारणमिति भावः ॥ २ ॥ मायायाः शक्तित्वेन कार्यैकगम्यतयाऽनिर्वचनीयत्वेन साक्षाद्वक्तुमशक्यत्वात्कार्यद्वारा तदवगमाय सर्गमाह—मायाया इति । स्वमात्मानं प्रमिमीते जानाति । प्रकृष्टायै मोक्षरूपायै । विना संसारानुभवं वैराग्यानुत्पत्तेर्मोक्षासंभवादित्यस्वारस्यादाह—यद्वेति । इत्यर्थ इति—विषयानुभवोत्तरं तत्तैक्ष्ण्यज्ञानाद्वैराग्योत्तरं विचारान्मोक्षो भवत्येवेति भावः । अत्रार्थे प्रमाणमाह—तदुक्तमिति । महाभुजेति क्षत्रधर्मपरत्वेन शुद्धान्तःकरणत्वेन प्रश्नौचित्यमाह ॥ * ॥ अंतरिक्ष इति । अंतरिक्षशब्दस्योर्ध्वाधोलोकमध्यवर्तिस्थानवाचित्वात् तथा मायांतःपतितस्य तदभिभाव्यत्वेन तद्वर्णनासंभवात् सिद्धस्यापि ब्रह्ममात्रानुभवित्वेन तदसंभवान्मध्यस्थस्यैव तन्निरूपणकर्तृत्वमित्यभिप्रायेणांतारिक्ष उवाचेत्युक्तम् । स्वरूपत इति—मायाया नीरूपत्वेन स्वरूपतो निरूपणं न संभवतीति सृष्ट्यादिलक्षणं यन्मायाकार्यं तद्वारेण तद्द्वारीकृत्य मायां निरूपयितुं सृष्ट्यादिमायाकार्यमाहेत्यर्थः । पूर्वार्थे स्वमातृशब्दस्य जीववाचकत्वाप्रसिद्धेः सृष्टेः—पुरुषार्थचतुष्टयार्थत्वाभावाच्च यद्वेत्याह स्वशब्देन जीवपरामर्शस्तस्य स्वीयत्वेन स्वांशत्वात् । आत्मप्रसिद्धिरात्मसाक्षात्कारः । द्वंद्वांते श्रूयमाणत्वात्प्रसिद्धिशब्दस्य प्रत्येकमभिसंबंध इति प्रतिपत्तिगौरवादित्यर्थ इत्युक्तमिति **दीपिका** ॥ * ॥ **संदर्भस्तु**—भक्तार्थ एव सृष्टौ मुख्यः प्रयत्न इति प्रथमार्थे दार्शितम्, एतदेव वास्तवं प्रयत्नांतरस्यानुषंगिकत्वात् ॥ * ॥ **विश्वनाथस्तु**—गुणकार्याणां सृष्टिस्थितिसंहाराणां निरूपणादेव गुणा निरूपितास्स्युः गुणैश्च निरूपितैः स्वत एव गुणमयी माया निरूपिता स्यादित्यभिप्रेत्याह—एभिरिति । भूतात्मा परमेश्वरः उच्चावचानि देवनृतिर्यगादीनि ससर्ज, किमर्थम्, स्वमात्रात्मप्रसिद्धये स्वीयानां जीवानां मात्राणां विषयप्राप्तीनामात्मनः स्वप्राप्तेश्च या प्रकृष्टा सिद्धिस्तदर्थम् । तदुक्तं वेदस्तुतौ "बुद्धींद्रियमनःप्राणाञ्जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥" इति ॥ ३ ॥ जीवकलया ब्रह्मैव भोगायतने शरीरे प्रविष्टः कर्मफलं भुंक्ते परमात्मरूपेण स्वांशभूतान्भोजयति चेत्याह—तत्तद्विषयान्मनआदिविषयान्संकल्पादीन् । इत्यर्थ इति—अंतर्भावितणिजर्थो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते॥५॥कर्माणि कर्मभिः कुर्वन्सनिमित्तानि देहभृत् ॥ तत्तत्कर्मफलं गृह्णन्भ्रमतीह सुखेतरम्॥६॥इत्थं कर्मगतीर्गच्छन्बह्वभद्रवहाः पुमान्॥आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः॥७॥ धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकम् अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥ ८ ॥ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥ ९ ॥

बाह्येंद्रियरूपेणात्मानं विभजन्गुणांस्तत्तद्विषयाञ्जुषते जोषयतीत्यर्थः । यद्वा तमात्मानं प्रति गुणान्विभजन् जुषते प्रीयत इत्यर्थः ॥ ४ ॥ स च जीव आत्मनांतर्यामिणा प्रद्योतितैर्गुणैरिंद्रियैर्गुणान्विषयान्भुंजान इदं सृष्टं शरीरमात्मानं मन्यमान इह शरीरादौ सज्जते । अत एव संसरतीति भावः ॥ ५ ॥ ननु कर्माणि भुंजानः कथं सज्जते भुंजानो भोगसमाप्तौ मुच्यत इति चेत्तत्राह । कर्माणीति । कर्मभिः कर्मेन्द्रियैश्च सनिमित्तानि सवासनानि कर्माणि कुर्वंस्तत्तत्पूर्वकर्मफलं च गृह्णन्नयं देहभृद्भ्रमतीह संसारे न तु मुच्यते । कथंभूतं कर्मफलम् । सुखेतरं सुखदुःखात्मकम्॥६॥ननु कियंतं कालं भ्रमति तदाह । इत्थमिति । बहून्यभद्राणि बहंतीति तथा ताः। सर्गप्रलयावुत्पत्ति मरणे ॥ ७ ॥ एवं मायामयीं सृष्टिमुक्त्वा प्रलयं दर्शयितुमारभते । धातूनां महाभूतानामुपप्लवे नाशहेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणः सूक्ष्मं तदात्मकमव्यक्तायाव्यक्तं प्रति नेतुमाकर्षति ॥ ८ ॥ नाशहेतूनाह । शतवर्षेति । तस्मिन्काले उपचितश्चासावुष्णश्चासावर्कश्च । यद्वा तेन कालेनोपचितमुष्णत्वं यस्य सः ॥ ९ ॥

श्रयणमत्र कार्यं, सेवयतीति भावः । प्रकारांतरेणार्थसिद्धावभूतनञाश्रयणमनुचितमिति मत्वाह—यद्वेति । योंतर्यामिरूपेण प्रविष्टस्तमित्यर्थः । प्रतिगुणान् गुणंगुणं प्रति । इत्यर्थ इति—पृथक्पृथग्विषयमहं पश्याम्यहं शृणोमीत्येवं गृह्णन्प्रीतिमाप्नोतीति भावः ॥ * ॥ **दीपिकापि**—जीवोपकरणार्थं जीवभोगार्थं भूतानि शरीराणि । आत्मस्थं जीवं मनआदितादात्म्याध्यासेन तत्तद्रूपत्वेन विभजन्भेदविशिष्टं कुर्वंस्तत्तद्विषयान्सुखदुःखशब्दस्पर्शादीञ्जोषयति भोजयति । तदुक्तं प्रथमे—“ असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः ” इत्यादिपूर्वार्थेन्तर्भावितणिजर्थकल्पनातो गौरवं मत्वाह—यद्वेति । तं मनोबाह्येंद्रियरूपेणैकधा दशधा संतमात्मानं जीवं प्रति गुणान्सुखादिशब्दादिविषयान् विभजन् ददत् प्रीयते प्रसन्नो भवतीत्यर्थः ॥ * ॥ **संदर्भः**—अत एव जुषते गुणानिति “ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः । न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥” इत्यादिन्यायेन तादृशभक्तानां स्वप्रेमतद्विलासरूपाण्येव प्रीत्या सेवत इत्यर्थः ॥ * ॥ **विश्वनाथः**—सृष्टिमुक्त्वा स्थितिमाह—एवमिति त्रिभिः । अन्यत्तैः ॥ ४ ॥ यद्वा—गुणैर्गुणात्मकान्तःकरणवृत्तिभिः । स्वप्रतिबिंबव्याप्तेरिति । आदिनेंद्रियादिग्रहः ॥ * ॥ स च स तु जीवः प्रभुः प्रभ्वंशत्वाद्यत्किंचिज्ज्ञानादिशक्तियुक्तोपीत्यर्थः । तत्र कारणं तु ‘ भयं द्वितीयाभिनिवेशतः ’ इत्यादावेव दर्शितम् । यद्वा—स आद्यः पुरुष आत्मना प्रकाशितैर्गुणैः कारुण्यादिभिर्हेतुभिरुदितान् गुणान्भक्तप्रेमतद्विलासान्भुंजान आस्वादयन् इदं सृष्टं भक्तशरीरमात्मानमात्मदेहमेव मन्यमान इह भक्तशरीरे सज्जते ‘ साधवो हृदयं मह्यम् ’ इत्यादेः । इति **संदर्भः** ॥ * ॥ **विश्वनाथ**स्वामिनोरेकमेव व्याख्यानम् । प्रकर्षेण देवतिर्यगादिषु भवतीति प्रभुरियान्भेदः ॥ ५ ॥ पुनरप्याक्षिपति—नन्विति । इह संसारे । तत्तत्कर्मफलं तस्यतस्य कर्मणः फलम् ॥ * ॥ साधारणजीवानां गतिमाह—अत एवासक्तत्वादेव । संसरति जन्ममरणादिना भ्रमति । कर्माणीति—सुखं च तदितरच्चेति सुखेतरम् । विशेषणयोः कर्मधारयः । पुंस्त्वमार्षम् ॥ ६ ॥ भ्रमणकालावधिं पृच्छति—नन्विति । आभूतसंप्लवात् जगत्प्रलयपर्यंतम् । अवशः कर्माधीनः ॥ * ॥ आभूतसंप्लवाद्भूतसंप्लवमभिव्याप्य महाप्रलयपर्यंतामित्यर्थः । आहूतेति पाठे भस्य हश्छांदसः । अवशः प्रकृत्यधीनः ॥ ७ ॥ आसन्ने प्राप्ते । अव्यक्तं प्रति नेतुं कर्षति, प्रकृत्यवशेषं कर्तुमिच्छतीत्यर्थः ॥ * ॥ आसन्ने सविधमाप्ते सति द्रव्यं महाभूतानि गुणाः महदादयः अव्यक्तं प्रधानं प्रति ॥ ८ ॥ उल्बणा भयंकराः । अर्कवृद्धेरश्रवणादस्वारस्येनाह—यद्वेति । तेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पातालतलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वग्वर्धते वायुनेरितः ॥ १० ॥ सांवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥ ११ ॥ ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः ॥ १२ ॥ वायुना हृतगंधा भूः सलिलत्वाय कल्पते ॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥ १३ ॥

ऊर्ध्वशिख ऊर्ध्वज्वालः । विष्वक्परितः ॥ १० ॥ सांवर्तकः प्रलयकर्ता । धाराभिर्न तु बिंदुभिः । हस्तिहस्ताभिस्तत्प्रमाणाभिः ॥ ११ ॥ तत उपाधिलयाद्वैराजः पुरुषोऽव्यक्तं कारणं प्रविशति । ननु "ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशंति परं पदम्" इति स्मृतेः "यावदधिकारमवस्थितिराधिकारिकाणाम्" इति न्यायाच्च वैराजशब्दाभिधेयस्य च ब्रह्मणः परमभागवतत्वान्मोक्ष एव संगच्छते नान्येषामिव कारणमात्रप्रवेशः । सत्यम् । अश्वमेधादिना सत्यलोकं गतानामप्यभक्तानामावृत्तिश्रवणादभक्तत्वे च ब्रह्मणोऽपि प्रकृतौ लयः पुनरुत्पत्तिश्चेति मोक्षदौर्लभ्यसूचनायैवमुक्तम् । वस्तुतस्तु तस्य मोक्ष एवेत्यविरोधः । यद्वा केनापि प्रमाणेन न व्यज्यत इत्यव्यक्तं ब्रह्मैव तत्प्रवेशेन च मोक्ष एवोक्त इति द्रष्टव्यम् ॥ १२ ॥ एवं विराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यंतानां प्रातिलोम्येन

कालेन प्रलयसमयेन उष्णत्वमिति भावप्रधानो निर्देशः ॥ * ॥ **दीपिका**—नाशहेतूननावृष्ट्यादीन् । पूर्वार्थेन "कर्मभिर्वर्द्धते चासौ ह्रसते च यथा रवेः" इत्युक्तेरर्कस्योपाचितत्वासंभवादाह—यद्वा, उष्णामिति भावप्रधानो निर्देशः । अत एवोष्णत्वमिति व्याख्यातम् ॥ * ॥ **संदर्भः**—उपचितः प्रवृद्ध उष्णोत्युष्ण इति कर्मधारयः ॥ ९ ॥ ० ॥ * ॥ ईरितः प्रेरितः ॥ १० ॥ स्मेति पादपूरणे । तत्प्रमाणाभिर्गजशुंडादंडतुल्याभिः । विराट् ब्रह्माण्डम् ॥ * ॥ संवर्तकः तदग्निधूमाभ्यां सूर्याकृष्टरसेन जातः, धूमज्योतिःसलिलमरुतां सन्निपातस्यैव मेघत्वात् ॥ ११ ॥ विराजि ब्रह्माण्डे वर्तत इति वैराजः पुरुषो ब्रह्मा । अत्राशंकते—नन्विति । आधिकारिणां ब्रह्मादीनां यावदधिकारमधिष्ठितपदस्थित्यंतमवस्थितिः स्थितिस्ततो मोक्ष इति सूत्रार्थः । सत्यमर्द्धांगीकारे । नहि ब्रह्मणोऽभागवतत्वमज्ञानित्वं च यतस्तत्सेविनामपि "ये त्वनन्येन भावेन भावयन्त्यात्मभावनम् । तेषां सुपक्वयोगानां न कुतश्चित्पराभवः ॥" इत्युक्तेः पराभवशब्दोदितः संसारो न भवति कुतस्साक्षात्तस्य स चेत्यरुच्याह—यद्वेति ॥ * ॥ **दीपिका**—व्यष्टिजीवैः सहोपाधिलयाद्यष्टिजीवानामपि लयो वैराज एव ज्ञेयः, वैराजः समष्टिजीवः । अव्यक्तं प्रधानम् । ते ब्रह्मोपासकाः प्रलयपरस्य द्वितीयपरार्धस्य कृतात्मानः शुद्धचित्ताः । सूत्रार्थस्तु—अधिकारिकाणां लौकिकस्थितिहेतुषु वेदप्रवर्तनचराचरसृष्ट्याद्यधिकारेषु नियुक्तानां योजितानामवांतरतमो ब्रह्मादीनां यावदधिकारं लोकव्यवस्थासु स्वामित्वमधिकारस्तमनतिक्रम्य तत्प्रापकं प्रारब्धं यावदस्ति तावत्कालं जीवन्मुक्तत्वेन स्थितिः, प्रारब्धक्षये तु प्रतिबंधकाभावाद्विदेहमुक्तिरित्यर्थः । अन्येषां कार्याणामिव । सत्यमित्यर्द्धांगीकारे एवमुक्तं ब्रह्मणोपि प्रकृतिप्रविष्टत्वमुक्तमित्याविरोधः । अन्तारिक्षवाक्यस्य श्रुतिसूत्रयोश्च विरोधो नास्तीत्यर्थः । पूर्वार्थे मोक्षदौर्लभ्यलक्षणस्य प्रयोजनस्य कल्पनागौरवादतो यद्वेत्युक्तम् । यदि अव्यक्तशब्देन ब्रह्मैवोच्यते तदा तत्प्रवेशेन मोक्षस्यैवाभिहितत्वाच्छ्रुतिसूत्राभ्यां विरोध एव नास्तीति न कल्पनागौरवमपीति स्वारस्यम् ॥ * ॥ **संदर्भः**—तत इति । पूर्वं तु व्यष्टिजीवानामपि लयो ज्ञेयः । वैराजोऽत्र समष्टिजीवः ॥ * ॥ **विश्वनाथः**—समष्टिजीवो ब्रह्मा । अव्यक्तं प्रकृतिम् । अत्र ब्रह्मणोऽपि कार्मिज्ञानिभक्तत्वेन त्रैविध्यात्कस्यचित्पुनरावृत्तिः कस्यचिन्मुक्तिः कस्यचित्प्रेमवत्पार्षदप्राप्तिश्चेति द्रष्टव्यम् । "आ ब्रह्मभुवनाल्लोकाः पुनरावार्तिनोऽर्जुन" इति । "विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोः" इति । 'ब्रह्मणा सह ते सर्वे' इत्यादिभ्यः ॥ १२ ॥ एवमित्थम् । विराजो ब्रह्मांडस्य । तत्कारणानां विराट्कारणानाम् । प्रतिलोम्येनोत्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतरूपं तु तमसा वायौ ज्योतिः प्रलीयते ॥ हतस्पर्शोवकाशेन वायुर्नभसि लीयते ॥ कालात्मना हतगुणं नभ आत्मनि लीयते ॥ १४ ॥
इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशंति ह्यहंकारं स्वगुणैरहमात्मनि ॥ १५ ॥ एषा माया भगवतः सर्गस्थित्यंतकारिणी ॥ त्रिवर्णा
वर्णितास्माभिर्भूयः किं श्रोतुमिच्छसि॥१६॥राजोवाच॥ अथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरंत्यंजः स्थूलधियो महर्ष इदमुच्यताम् ॥१७॥

लयमाह । वायुनेति । वायोर्हि गंधरसहारित्वं प्रसिद्धम् । सांवर्तकेन वायुना हृतगंधा अत एव गंधस्य व्यावर्तकस्य गतत्वात्सलिलत्वाय कल्पते सलिले लीयत इत्यर्थः । तद्धृतरसं तेन वायुनैव हृतो रसो यस्य तत् ॥ १३ ॥ तमसश्च रूपतिरस्कारित्वं प्रसिद्धम् । सांवर्तकेन तमसा अवकाशेनाकाशेन स्वकारणेन । कालात्मना शब्दस्य हि कालत एव नाशः प्रसिद्धस्तद्रूपेणात्मना ईश्वरेण । आत्मनि तामसाहंकारे ॥ १४ ॥ इंद्रियाणि बुद्धिश्च राजसाहंकारं प्रविशंति । मनो वैकारिकैर्देवैः सह सात्विकाहंकारम् । एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितोऽहमहंकार आत्मनि महति स च प्रकृताविति द्रष्टव्यम् ॥ १५ ॥ त्रिवर्णा त्रिगुणा । मायाश्रवणभीतं राजानं तन्निवृत्त्युपायश्रवणे स्वयं छंदयति । किं भूय इति ॥ १६ ॥ एवमनुकंपितस्तन्निवृत्त्युपायमेव पृच्छति । यथैतामिति । यद्यपि तन्मायया ऽतो बुध आभजेत्तमिति भक्तिस्तत्तारकत्वेनोक्तैव तथापि किं भक्तिरेवान्योऽपि वा तत्रोपायोऽस्तीति ज्ञातुं पुनः प्रश्नः । अकृतात्मभिरवशीकृतांतःकरणैः । स्थूलधियः स्थूले

त्विवैपरीत्येन) अत एव हृतगंधत्वादेव । व्यावर्तकस्य जलादेर्व्यावृत्तिजनकस्य । गतत्वान्नष्टत्वात् । इत्यर्थ इति–यद्धर्मव्यावृत्ता जलपार्थक्यमिता तद्धर्मलये तदेव भवतीति भावः । ज्योतिष्ट्वाय तेजस्त्वाय । पूर्ववद्व्यावर्तकधर्माभावादित्यवधेयमत्रापीति ॥ * ॥ **दीपिका**–सांवर्तकेन प्रलयकर्त्रा वायुना तद्बहिरावरणरूपेण । अत एव गन्धस्य हृतत्वादेव व्यावर्तकस्य जलादिभ्यो भेदकस्य । हृतगन्धेत्युपलक्षणम् हृतस्पर्शा च काठिन्यस्य स्पर्शविशेषरूपत्वेन वायुगुणत्वात्स्पर्शस्यापि वायोरेव प्रवेश इत्यर्थः ॥ * ॥ इत्थमेव **संदर्भविश्वनाथौ** ॥१३॥ नभसि आकाशे । तद्रूपेण कालरूपेण निमित्तभूतांतराभावेन शब्दांतरानुत्पत्तौ पूर्वशब्दानां कालेन नाशात्कालात्मनेति । हृतो गुणः शब्दो यस्य तत्तथा आत्मनि कारणे 'आत्मा कारणब्रह्मणोः' इति धरणिः । तथा च नभसः शब्दतन्मात्राद्वारा तामसाहंकार एव कारणमत उक्तं तामसाहंकार इति ॥ * ॥ **दीपिका**–प्रलयकर्त्रा तमसा वाय्वावरणमारम्य प्रकृत्यावरणव्यापकेन 'चत्वारि स्पर्शवंति हि' इत्युक्तेराकाशेस्पर्शाभावात्तस्य स्पर्शहारित्वम् । कालात्मनेत्यर्द्धकम ॥ १४ ॥ अहंकारं यथायथं राजसाहंकारं सात्विकाहङ्कारं च आत्मनि स्वकारणे महत्तत्वे स च महाननुक्तोपि प्रकरणाज्ज्ञेयः ॥ * ॥ हि यतः शब्दस्य क्षणत्रयरूपत्वात्कालत एव नाशः प्रसिद्धः, शब्दबुद्धिकर्मणां विरम्य व्यापाराभावादिति न्यायात् । तद्रूपेण कालरूपेण । स्वकार्यै भूतेन्द्रियबुद्धिमनोरूपैः त्रिविधोहंकारः । महतोऽत्रात्मत्वं कारणत्वादेव ज्ञेयम् ॥ १५ ॥ एषोक्तविधा त्रयाणां गुणानां वर्णो वर्णनं यस्यां सा तथा । तन्निवृत्त्युपायश्रवणे मायानिवृत्त्युपायाकर्णने । स्वयंछंदयति नियोजयति ॥ * ॥ एषा ईदृशकार्यरूपा तस्या मायाया निवृत्तिस्तरणंतत्रोपायो भक्तियोगस्तच्छ्रवणे छन्दयति स्वयमंतरिक्षः छन्दयतीच्छां कारयति ॥ १६ ॥ एवं पूर्वोक्तरीत्याऽनुकम्पितः किं भूय इत्यादिनानुगृहीतः, तन्निवृत्त्युपायं मायानिवृत्तियोगम् । नन्वयमर्थ उक्तः पूर्वं पुनः कुतः प्रश्न इति चेदाह–यद्यपीत्यादिना । तत्तारकत्वेन मायातारकत्वेन । अन्योऽपि भक्तीतरोपि कश्चित्तत्र मायातरणे । इदं मत्पृष्टम् ॥ * ॥ एवं छंदनेनानुकपितोन्तारिक्षेण कृपाविषयीकृतः । ननु 'शृण्वन्सुभद्राणि' इत्यादिना तदुपायस्तूक्त एवेत्याशंक्याह–यद्यपीति । तत्तारकत्वेन मायातारकत्वेन । अंजस्तरतीति ज्ञानं व्यवच्छिद्यते ''क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्'' इत्यादेः ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रबुद्ध उवाच ॥ कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥ १८ ॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥ १९ ॥ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितम् ॥ सतुल्यातिशय ध्वंसं यथा मंडलवर्तिनाम् ॥ २० ॥ तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥ २१ ॥

शरीरे अहंधीर्येषां ते ॥ १७ ॥ भक्तिव्यतिरेकेण नास्त्यन्य उपाय इत्यभिप्रेत्य भक्तिमेव ससाधनां निरूपयति । तत्र प्रथमं वैराग्यद्वारा गुरूपसत्तिमाह चतुर्भिः । कर्माणीति । दुःखहत्यै दुःखप्रतीकाराय । पाकविपर्यासं फलवैपरीत्यम् । मिथुनीचारिणां मिथुनीभूय प्रवर्तमानानाम् ॥ १८ ॥ कर्मभिः साधिता अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह । नित्यार्तिदेनेति । आत्मनः स्वस्य मृत्युरूपेण । चलैरनित्यैरपायिभिश्च ॥ १९ ॥ एवं लोकं परमिति । कर्मनिर्मितत्वान्नश्वरम् । तथा च श्रुतिः । " तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते " इति । किंच वर्तमानसमयेऽपि दुःखयुक्तं पश्येदित्याह । सतुल्यातिशयध्वंसं सह तुल्येनातिशयेन ध्वंसेन च वर्तमानम् । अतस्तुल्ये स्पर्द्धातिशयेऽसूया ध्वंसालोचने भयादिकं चापरिहार्यमित्यर्थः । यथा खंडमंडलवर्तिनां तत्पत्तीनां मिथः स्पर्द्धादि तद्वत् ॥ २० ॥ उत्तमं श्रेयो ज्ञातुमिच्छुः । शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञम् । अन्यथा संशयनिरासकत्वायोगात् । परे च ब्रह्मण्यपरोक्षानु

विश्वनाथः—यद्यपि 'तन्मायातो बुधः' इत्याद्युक्तेर्भक्त्यैव मायां तरन्तीति राज्ञा निश्चितमेव तदपि तत्रत्यान्विद्वन्मानिनः कर्मिणो दृष्ट्वा पृच्छति—यथेति । अकृतात्मभिरिति 'युगपर्याप्तयोः कृतम् । पर्याप्तः परिपूर्णता' इत्यमरोक्तेरपूर्णत्वं मंदत्वमतो मंदधीभिर्दुस्तरामपि स्थूलधियः कर्मिप्रभृतयोऽप्यंजः सुखेनैव यथा तरन्ति इदमुच्यतामिति । शुनःपुच्छमालंब्य दुस्तरमपि समुद्रं सुखेन यथा तरान्ति तदुच्यतामिति कश्चित्कमपि यथा पृच्छेत्तथैव तत्रत्यान्कर्मिणः प्रति सकटाक्षभंगीकः प्रश्नोयं राज्ञो ज्ञेयः ॥ * ॥ **संदर्भस्तु**—वयं तावत् 'शृण्वन्सुभद्राणि' इत्यादिना तदुपायं ज्ञातवंत एव । स्थूलेऽश्वमेधादावेव कर्माणि धीः प्रतीतिर्येषां ते यथांजस्तरन्तीत्यर्थः ॥ १७ ॥ भक्तिरेव मुख्योपाय इत्यभिप्रेत्याह—भक्तीत्यादिना । गुरूपसत्तिं गुरुपार्श्वगमनम् ॥ * ॥ **दीपिका**—प्रबुद्धो हि मायाशयनादुद्बुद्ध इत्युच्यतेऽतो मायातरणोपायवर्णनं तस्यैव संभवतीति प्रबुद्ध एवोवाच । साधनैर्गुरूपसत्त्यादिभिस्सहितां भक्तिं प्रेमलक्षणाम् । तत्र तेषु साधनेषु ॥ * ॥ **संदर्भस्तु**—अथ प्रथमतस्तेषां तत्र कर्मण्यनादरं जनयति कर्माणीति त्रिभिः । तत्र दृष्टान्तो द्वाभ्यां दार्ष्टीतिकमेकेन ॥ * ॥ **विश्वनाथस्तु**—कर्मिणो नैव मायां तरन्तीति साक्षादेव विवेकेन पश्येदित्याह—कर्माणीति त्रिभिः ॥१८॥ कर्मभिः कृषिपण्यादिरूपैः । नित्यमागमनकाले रक्षणकाले व्ययकाले चार्तिमतिपीडां ददतीति तथा ते । तथापि दुर्लभेन कृतेप्यनेकधायासे प्राप्तुमशक्येन । तदुक्तं भर्तृहरिणा "उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवो मंत्राराधनतत्परेण मनसा नीताः श्मशाने निशाः । त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला लब्धा काणवराटकापि न मया तृष्णेऽधुना मुञ्च माम्" इति । मृत्युरूपेण धनिनमेव चौरादयो घ्नंतीति भावः । का प्रीतिः किं सुखम् ॥ * ॥ **दीपिका**—अनित्यैर्नश्वरैरपायिभिर्विश्लेषवद्भिः ॥ * ॥ **विश्वनाथस्तु**—वित्तेन का प्रीतिर्न कापीत्यर्थः । तथैव तेन वित्तेनापि साधितैर्गृहादिभिश्च का प्रीतिर्यतश्चलैः ॥ १९ ॥ एवमेतल्लोकवत् । नश्वरत्वे प्रमाणमाह—तथा चेति । अन्यदाह—किञ्चेति । वर्तमानसमये स्वर्गभोगसमये । यतो दुःखयुक्तमतो हेतोः । स्पर्द्धा पराभवेच्छा । अतिशयेऽधिके । असूया दोषारोपणम् । इत्यर्थ इति—ध्वंसादिभयस्यानिवार्यत्वान्न परलोकः सुखहेतुरिति भावः । खण्डमण्डलपतीनामल्पदेशराज्ञाम् । तद्वत्स्पर्द्धादिकामित्यर्थः ॥ * ॥ एवमैहिकलोकवत् । तथा च नश्वरत्वे प्रमाणम्, लोको भोगः । भयादिकमित्यादिना चिन्तादैन्यग्रहः ॥ २० ॥ यस्मादैहिकामुष्मिकसाधनयोः फलतः स्वरूपतश्च दुःखरूपत्वं तस्मात्तत्परित्यज्य । उत्तमं श्रेयः स्वात्मज्ञानम् । न्यायतस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र भागवतान्धर्माञ्छिक्षेद्गुर्वात्मदैवतः ॥ अमाययाऽनुवृत्त्या यैस्तुष्येदात्मा॒ऽऽत्मदो हरिः ॥ २२ ॥ सर्वतो मनसोऽसंगमादौ संगं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥ २३ ॥ शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवम् ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः ॥ २४ ॥

भवेन निष्णातमन्यथा बोधसंचारायोगात् । परब्रह्मनिष्णातत्वद्योतकमाह । उपशमाश्रयमिति ॥२१॥ गुरुरेवात्मा दैवतं च यस्य सः । अनुवृत्त्या सेवया । यैर्धर्मैः । वस्तुत आत्मप्रदश्चोपासकानाम् । यथा बलिप्रभृतीनाम् ॥ २२ ॥ यथोचितमिति । हीनेषु दयां समेषु मैत्रीमुत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः ॥२३॥ शौचं बाह्यं मृज्जलादिभिः । आभ्यंतरं चादंभामानादि शिक्षेत् । तपः स्वधर्माचरणम् । तितिक्षां क्षमाम् । मौनं वृथावाचामनुच्चारणम् । स्वाध्यायमधिकारानुरूपं वेदपाठादिकम् । आर्जवं स्वच्छताम् ।

त्पर्यज्ञानात् । अन्यथा शाब्दब्रह्मनिष्णातत्वाभावे संदेहापाकरणसामर्थ्यं न भवतीति भावः । अन्यथा अपरोक्षज्ञानाभावे संबोधस्य सम्यग्ज्ञानस्यायोगात् । स्वस्यापरोक्षज्ञानं विना शिष्यबुद्धेस्तत्र संचारणं सर्वथा दुष्करं भवति नहि घटाज्ञानवानन्यं प्रति घटं ज्ञापयितुं समर्थो भवतीत्याशयः । उपशमाश्रयं मनोविभ्रमशून्यम् ॥ * ॥ **दीपिका**—तस्माद्विषयभोगस्यासारत्वात्ततो विरज्य गुरुं प्रपद्येतेति वैराग्यद्वारा गुरूपसत्तिः प्रोक्ता । न्यायतो विचारतः । तत्त्वज्ञं यथार्थवेत्तारम् । अन्यथा शब्दब्रह्मणि निष्णातत्वाभावे पुनरन्यथा परब्रह्मणि निष्णातत्वाभावे बोधसंचारं शिष्ये उपदिष्टज्ञानसंक्रमणं शब्दब्रह्मणि निष्णातत्वद्योतकं व्याख्यानोपपत्त्यादिना संशयखण्डनमेवेत्यपि ज्ञेयम् ॥ * ॥ **संदर्भस्तु**—तस्मादेवमेव कुर्वीतेत्याह—तस्मादित्यादिना ॥ * ॥ **विश्वनाथस्तु**—अतः पूर्वप्रोक्ता भक्तिरेव संसारतारणी सैव वेद्रियते शृण्वित्याह—तस्मादिति । शाब्दे ब्रह्मणि वेदे तत्तात्पर्यज्ञापके पुराणादौ च निष्णातं कुशलम् अन्यथा शिष्यस्य संशयच्छेदाभावे वैमनस्ये च सति कस्यचिच्छ्रद्धाशैथिल्यमपि संभवेत् परे ब्रह्मणि निष्णातमपरोक्षानुभवसमर्थम् अन्यथा तत्कृपा सम्यक्फलवती न स्यात् । उपशमाश्रयं क्रोधलोभाद्यवशीभूतम् ॥ २१ ॥ तत्र ततो गुरोः । अमायया नैष्कापट्येनानुवृत्त्यानुकूलाचरणेन । यद्वा—विस्मृतात्मनां बोधेनावरणबाधेनात्मप्रदः । स्वात्मसाक्षात्कारप्रद इत्यर्थः ॥ * ॥ तत्र भागवतानित्यष्टकम् । आत्मा सर्वमूलस्वरूपत्वादसमोर्ध्वानन्दरूपम् । “आनन्दाद्धीमानि भूतानि जायन्ते” इति श्रुतेः । तस्यापि दाता भक्तसात्कर्ता काम्यकर्माधिकारविषयमिदं प्रकरणमित्यापाततोऽश्रद्धामाशंक्य श्रद्धाद्वारभूतानाह—सर्वत इत्यादिना । ततः शुद्धान्तःकरणतया जातश्रद्धांस्तान्प्रति साक्षाद्भक्तिरूपानाह—श्रवणमित्यादिना । तत्र श्रवणमित्यादिना युग्मकम् । ननु पूर्वं यज्ञादिकर्म कृतं यच्च दारादिकं द्रव्यं संचितं तत्तत्किं कर्तव्यं तत्राह—इष्टमिति । एवंरीत्यावस्थायां स्थावरजंगमयोः परिचर्याम् तत उत्कर्षेण नृषु ततः साधुषु ततः श्रीभागवतमात्रेषु यथार्हं शिक्षेत् कृष्ण एवात्मा नाथः परप्रेमास्पदं येषां तेषु श्रीभागवतविशेषेषु तु सौहृदं शिक्षेत् तत्तद्विशेषानुसन्धानक्रमेण मनस्यानयेदित्यर्थः प्रकरणार्थः इति **संदर्भः** ॥ * ॥ तुष्येदित्यस्य द्योतकमाह—आत्मात्मदः आत्मनः स्वस्यात्मानं श्रीविग्रहं ददाति द्रष्टुं स्प्रष्टुं साक्षात्परिचरितुं चेति भाव इति **विश्वनाथः** ॥ २२ ॥ सर्वत ऐहिकामुष्मिकपदार्थेषु । असंगमनासक्तिम् । प्रश्रयं विनयम् । इत्यर्थ इति—न तु प्रमाद्येतेति भावः ॥ * ॥ ० ॥ ॥ २३ ॥ मृज्जलादिभिः “एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश” इत्यादिनोक्तं प्राक्, आदिना मन्त्रोच्चारणादिग्रहः । द्वितीयादिना क्रोधादिग्रहः । अधिकारानुरूपं यस्य वेदस्य तत्रापि यस्याः शाखायाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ॥ विविक्तचीरवसनं संतोषं येन केनचित् ॥ २५ ॥ श्रद्धां भागवते शास्त्रेऽनिंदामन्यत्र चापि हि ॥
मनोवाक्कर्मदंडं च सत्यं शमदमावपि ॥ २६ ॥ श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥ २७ ॥
इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनम् ॥ २८ ॥ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम् ॥
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ २९ ॥

ब्रह्मचर्यं यस्य यादृगुचितमृतुकाले स्वदारनियमादि । अहिंसां भूतेष्वद्रोहम् । द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः समत्वं हर्षविषादराहित्यम् ॥ २४ ॥ आत्मेश्वरान्वीक्षां सच्चिद्रूपेणात्मान्वीक्षां नियंतृरूपेणेश्वरान्वीक्षां च । कैवल्यमेकांतशीलत्वम् । अनिकेततां गृहाद्यभिमानराहित्यम् । विविक्तचीरवसनं विजनपतितानां वस्त्रखंडानां शुद्धानां वा वल्कलानां परिधानम् ॥ २५ ॥ भागवते भगवत्प्रतिपादके । अन्यत्र शास्त्रादौ या अनिंदा ताम् । मनसः प्राणायामैर्वाचो मौनेन कर्मणोऽनीहया दंडम् । सत्यं यथार्थभाषणम् । शमदमावंतःकरणबाह्येंद्रियनिग्रहौ ॥ २६ ॥ हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थे हर्युद्देशेन न तु स्वर्गाद्युद्देशेन अखिलचेष्टितं सर्वं कर्म विशेषतश्च यजनादि यत्तदर्थे शिक्षेत ॥ २७ ॥ इष्टं दत्तमित्यादयो भावे निष्ठाः । वृत्तं सदाचारः । आत्मनः प्रियं गंधपुष्पादि । दारादीनप्यालक्ष्य परस्मै परमेश्वराय निवेदनं तत्सेवकतया समर्पणं यत्तच्छिक्षेत ॥ २८ ॥ कृष्ण एवात्मा नाथश्च येषाम् । कृष्ण आत्मनो जीवस्य नाथो येषामिति वा तेषु । उभयत्र स्थावरे जंगमे

अधिकारस्तदनुरोधेन जपेदित्यर्थः । आदिना स्त्रीच्छया नियमाभावपरिग्रहः । अन्यस्य सर्वथा यथोक्तमेव कर्तव्यमिति भावः ॥ * ॥ ० ॥ २४ ॥ सर्वत्र ब्रह्मादिस्थावरांतेषु । विजन एकान्तदेशे पतितानामयत्नप्राप्तानामित्यर्थः, वल्कलानां । भूर्जपत्रादीनाम् संतोषमलंबुद्धिं येन केनचिद्दैववशाऽऽप्तस्वल्पबहुसुसुष्ठ्वसुष्ठुवस्तुनेत्यर्थः ॥ * ॥ सच्चिद्रूपेणेति । " अस्ति भाति प्रियं रूपं नाम चेत्यर्थपंचकम् । आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ " इत्युक्तेर्वटोस्ति, अनुभूयते, इति सत्तानुभूतिरूपेणात्मेक्षां ब्रह्मविचारं शिक्षेत्, नियंतृरूपेण तु ईश्वरस्यांतर्यामिणोऽन्वीक्षां विचारं शिक्षेदित्यर्थः । विविक्तपदस्य शुद्धैकांतार्थद्वयवाचित्वाद्विजनपतितानामित्यादि व्याख्यातम् । वाससामिह वस्त्रखंडानामित्येव पाठः, चीरशब्दस्य तत्रैव शक्तेः । वल्कलानामिति तु लक्षणया व्याख्यातम् ॥ २५ ॥ अन्यत्र शास्त्रादौ तर्कमीमांसाज्योतिःकलाविद्यादिष्वित्यर्थः ॥ * ॥ अन्यत्र शिवादिप्रतिपादकशास्त्रादौ या अनिन्दा ताम् । तदुक्तम्—" विष्णुरेव सदाराध्यः सर्वदेवेश्वरः पुमान् । इतरे ब्रह्मरुद्राद्या नावज्ञेयाः कदाचन ॥ " इति । अनीहयाऽकामेन । तदुक्तम्—" नाकामस्य क्रिया काचिद्दृश्यते नेह कर्हिचित् । यद्यद्धि कुरुते जंतुस्तत्तत्कामस्य चेष्टितम् ॥ " इति ॥ * ॥ संदर्भस्तु—मानसवाचिककायिकविकर्मराहित्यमेव मनआदीनां दण्डः ॥ २६ ॥ यजनादि दानतीर्थावगाहपाठदीनामादिना ग्रहः ॥ * ॥ चान्नाम्नामपि । तदर्थे तत्परिचर्यार्थमेवाखिलचेष्टितं दंतधावनादिराह्निकः सर्व एव व्यापारः ॥ २७ ॥ तत्सेवकतया यथाहं हरिसेवकस्तथा मत्पुत्रादयोऽपीत्यर्थः ॥ * ॥ इष्टं विष्णुसंप्रदानको यागः, दत्तं विष्णुवैष्णवसंप्रदानकदानम्, तप एकादश्यादिव्रतम्, जप्तं विष्णुमंत्रजपः, दारादीन् यत् व्याप्नुवत् । इणः शत्रंतस्य रूपम् । दारादीनां तत्सेवार्थमेव नियोजनं यत् तच्छिक्षेदित्यर्थः ॥ २८ ॥ पूर्वसमासे स्वस्य स्वनाथत्वमनुचितमिव मत्वा समासांतरमाह—आत्मनो जीवस्येति । भगवत्परायणेषु । यद्वोभयत्र भगवति भागवतेषु च तत्रापि नृष्वपि ततोपि स्वधर्मशीलेष्वपि । महत्त्वं च भागवतेषूक्तमेवाभियुक्तैः । "पृथ्वी शेषधृता स शंभुमुकुटे कैलासवासोप्यसौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्परानुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ३० ॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिम् ॥ भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥ ३१ ॥ क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः ॥ नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः ॥३२॥ इति भागवतान्धर्मांञ्छिक्षन्भक्त्या तदुत्थया ॥ नारायणपरो मायामंजस्तरति दुस्तराम् ॥३३॥ राजोवाच ॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः ॥ निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥ ३४ ॥

च या परिचर्या ताम् । विशेषतो नृषु । तत्रापि साधुषु स्वधर्मशीलेषु । ततोऽपि महत्सु श्रीभागवतेषु ॥ २९ ॥ तैश्च सह संगम्य यत्पावनं भगवद्यशस्तस्य परस्परानुकथनं शिक्षेत् । यद्वा यशसः कथने संस्पर्धादिपरित्यागेनात्मनो मिथो या रतिः रमणं या च तुष्टिः सुखं या च निवृत्तिः समस्तदुःखनिवृत्तिस्तां च शिक्षेत् ॥ ३० ॥ एवं वर्तमानानां परमानंदप्राप्तिमाह स्मरंत इति द्वयेन । भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या ॥ ३१ ॥ अजं हरिमनुशीलयंति तल्लीलामभिनयंति । एवं परं ब्रह्म एत्य प्राप्य निर्वृताः हृष्टाः संतस्तूष्णीं भवंति ॥ ३२ ॥ उपसंहरति । इतीति । भागवतधर्मोत्पन्नया भक्त्या ॥ ३३ ॥ नारायणपरो मायां तरतीत्युक्ते पृच्छति । नारायणाभिधानस्येति । निष्ठां स्वरूपम् । अयं भावः । ब्रह्मैव तावन्नारायण इति भगवानिति परमात्मेति चोच्यते । तदुक्तम् "वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञा

कैलासोपि दशाननेन तुलितो बद्धोप्यसौ वालिना । वाली राघवविष्णुना युधि जितो विष्णुः सतां मानसे तस्माद्विष्णुपरायणाद्गुरुतरो नान्योस्ति लोकत्रये ॥ " इति ॥ * ॥ कृष्ण एवात्मनाथः प्राणनाथो येषां ते नृषु सौहृदं स्नेहविशेषम् उभयत्र श्रीभगवति तद्भक्तेषु च महत्सु स्वस्यादरणीयेषु साधुषु स्वतुल्येष्विति **विश्वनाथः** ॥ २९ ॥ तैश्च भागवतैश्च । यत्तदोरुभयोरध्याहारापेक्षत्वमुभयत्र समानमपि भिन्नान्वयापेक्षया सहान्वयस्य लघुत्वेन न्याय्यत्वादाह—यद्वेति । तत्र यशसि संस्पर्द्धा चायमधिकं वर्णयत्यहमतोप्यधिकं वर्णयामीत्येवंरूपा । आदिनाऽसूयादिग्रहः ॥ * ॥ मिथस्तुष्टिः परस्परसंगोत्थसुखम् । आत्मनो मिथो निवृत्तिरिति भक्तिप्रतिकूलविषयभोगात्स्वस्य स्त्रीसंभोगादिलक्षणात् त्वया चेन्निवृत्तं तर्हि मयाप्यद्यारभ्य निवृत्तमित्येव या भोगनिवृत्तिस्ताश्च शिक्षेत् । टीकायां भगवत्संबंधमंतरा मिथो रत्यादेर्भक्तित्वासंभवाद्यत्तच्छब्दयोरध्याहृतेश्चाह—यद्वेति ॥ ३० ॥ साधनभक्त्या श्रवणकीर्तनादिरूपया । प्रेमलक्षणया परानुरागरूपया । उत्पुलकामुद्गतरोमांचाम् ॥ * ॥ एवं साधनभक्त्या साध्यभक्तिप्राप्तिमाह—स्मरंत इति **विश्वनाथः** ॥ ३१ ॥ अलौकिकाः लोकैर्ज्ञातुमशक्याः वैदिकीर्वाचः लोकाचारविरुद्धा वा ॥ * ॥ अद्यापि कृष्णो न प्राप्तस्तर्हि किं करोमि क्व गच्छामि को मां तं प्रापयेदित्येवं चिंतया रुदंति, क्वचिच्च हसंतीति, गोपवधूचौर्यार्थं तामस्यां रात्रौ कस्यचिद्गोपस्य प्रांगणे कोणस्थतरुतले निह्नुत्य स्थितं कोऽसि त्वं कोसीति तस्या गुरुजनवाचा पलायितुं प्रवृत्तं कृष्णं स्फूर्तिमालक्ष्येत्यर्थः, नंदंति तदपरोक्षानुभवेनानंदं प्राप्नुवन्ति, हा प्रभो एतावद्भिर्दिनैस्त्वामहं प्राप्तोस्मीति वदंति, अलौकिका लोकातीताः, अजं श्रीकृष्णमनुशीलयंति स्वीयश्रोत्रादींद्रियविषयीकुर्वंति, तूष्णीं भवंतीति रसास्वादोद्रेकेशः ॥ ३२ ॥ इत्युक्तरीत्या । तदुत्थया भागवतधर्माभ्यासोद्रेकजातया । अन्यैर्दुस्तराम् ॥ * ॥ आनुषंगिकं फलं कथयन्ससाध्यान्भागवतधर्मान्समापयतीत्युपसंहृतिपदार्थः । इतीति—धर्मान् शिक्षन्निति स्मारयंतश्चेत्येतदंतानामनुष्ठानस्य शिक्षणं तदुत्तरेषां पुलकितत्वरोदनादीनां त्वभिलाषस्य शिक्षणं कदाहमुत्पुलकिततनुर्भवेयमित्येतत्प्रकारकं तदुत्थया शिक्षितभक्तिजनितया उक्तलक्षणप्रेमभक्त्या मायां तरतीत्यानुषंगिकफलमुक्तम् ॥ ३३ ॥ "निष्ठोत्कर्षव्यवस्थास्वरूपांतव्रतपाचने" इति कोशः । उत्कर्षादीनामत्र समाहारद्वंद्वः । अत्राशयमाह—अयं भाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिप्पलायन उवाच॥स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च॥देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेंद्र॥३५॥

नमद्वयम् ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥" इति । तथा । " नारायणे भगवति तदिदं विश्वमाहितम् ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतः ॥ " इत्यादिषु । तत्र किमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते अस्ति वा कोपि विशेषांश इति ॥ ३४ ॥ अत्रोत्तरम् । स्थित्युद्भवेति । अयमर्थः । अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं चाहेतुर्हेतुरहितः स नारायण इति परमेव तत्त्वमवेहि । स्वप्नजागरसुषुप्तिषु सदनुवर्तमानं यत् । वक्ष्यति च । 'तुरीयं त्रिषु संततम्' इति । बहिश्च समाध्यादौ यत्सत्तद्ब्रह्मेति परमेव तत्त्वमवेहि । देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति प्रवर्तंते तत्परमात्मेति परमेव तत्त्वमवेहि । एवं लक्षणभेदैर्नाराय

इति । तत्र पूर्वोक्तेषु वदंतीत्यादिषु स्थलेष्वेभिर्भगवन्नारायणादिशब्दैः निर्विशेषं सदसद्विशेषशून्यं तदेव वेदान्तैकवेद्यं कोऽपि वक्तुं शक्यो विशेषो भेदकोंशो यत्र स विशेषांशः सविशेषः इत्यर्थः ॥ * ॥ **दीपिका**—नारायणाद्याविर्भावस्य तद्विभूत्याश्रयणमंतरा निरूपकत्वायोगात्, ' अश्वत्थः सर्ववृक्षाणाम् ' इति भगवदुक्तेः । पिप्पलं भगवद्विभूतिरयनमाश्रयो यस्य स तथेति तत्स्वरूपवर्णने तस्यैवौचित्यात्स एवोवाचेत्युक्तम्, तन्नामग्रहणे किं प्रयोजनमित्याशंक्य प्रयोजनीभूतं व्यंग्यार्थं विशदयति—अयं भाव इति । निर्विशेषणं ब्रह्मैव यावच्छक्तिविशिष्टं चेत्तर्हि पूर्णाविर्भावान्नारायण इतिनामा भगवानुच्यते तदेव तत्त्वं मायायंतर्यामित्वमात्रशक्तिप्रकाशकं चेत्परमात्मेति चोच्यते । तदुक्तम्—तत्त्वस्य त्रैविध्यमुक्तम् । भगवतो नारायणनामत्वे मानमाह—तत्रैकस्यैव तन्नामत्वे सति विशेषांशस्तत्तन्नामप्रवृत्तिरूपो भेदांशः । इति दीपिका ॥ * ॥ **संदर्भः**—नारायणाभिधानस्य भगवतो ' ब्रह्मेति परमात्मेति ' इत्यादिप्रसिद्धतत्समुदायतृतीयतया पाठात् । "नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते" इत्यत्र स्पष्टभावित्वाच्च । निष्ठां तत्त्वम् ॥ * ॥ **विश्वनाथस्तु**—नारायणपर इति श्रुत्वा नारायणस्वरूपं पृच्छति—नारायणेति । " नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते " इत्युक्तेर्नारायणाभिधानो यो भगवांस्तस्य निष्ठा स्वरूपम् । ननु, स तवेष्टदेव एव गुरूपदेशमार्गेण तस्य स्वरूपं त्वं जानास्येव तत्राह—ब्रह्मण इति । स एव नारायणो ब्रह्म स एव परमात्मा अत एकस्वरूपस्यैव तस्य त्रितयत्वेन कथने कः प्रकारस्तमहं जिज्ञास इति भावः ॥ ३४ ॥ अत्र पूर्वोक्तप्रश्ने । बुद्ध्यारोहाय स्फुटयति—अयमर्थ इति । हेतुः कारणम् । पुंस्त्वेन नारायणाक्षेप इत्याह—स नारायण इतीति । सत्त्वस्यैवानुवृत्तिरस्ति नासत्त्वस्येत्यत्र प्रमाणं—वक्ष्यति चेति । सदनुवर्तमानं जाग्रदादीनां सर्वानुभवसिद्धत्वादांतरत्वं समाधेश्चातथात्वाद्बहिष्ट्वमित्यभिप्रायेणोक्तं बहिश्च । समाध्यादावित्यादिना प्रलयग्रहः । संजीवितानि प्रकाशितानि । एवमित्थं लक्षणानां जगदुत्पादकत्वादिजाग्रदाद्यनुवृत्तत्वदेहेंद्रियादिसंजीवकत्वरूपाणां भेदैः ॥ * ॥ अत्र प्रश्नक्रमेणैवोत्तरं वस्तुतोऽभेदेपि " चयस्त्विषामित्यवधारितं पुरा ततः शरीरीति विभाविताकृतिम् । विभुर्विभक्तावयवः पुमानिति क्रमादमुं नारद इत्यबोधि सः ॥ " इति प्रवृत्तिनिमित्तरूपविशेषं स्फुटीकरोति । अयमर्थ इति—नारायण इति भगवानिति नारायणनामा भगवानित्यर्थः । परमेवं पूर्णमेव तत्त्वमवेहि जानीहि । अवैहीति पाठस्त्वसभ्यो वृद्धेरसाधुत्वात् । अनुवर्तमानमनुगतम् । समाध्यादौ वृत्तिनिरोधः समाधिः । आदिना मुक्तावस्थाग्रहः । तत्तुरीयतत्त्वं ब्रह्मेत्युच्यते तदपि परं परमार्थस्वरूपमेकमेव तत्त्वमवेहि येन परमात्मना कर्त्रा संजीवितानि प्रवर्तितानि । एवमिति स्वरूपशक्त्यैकविलासमयत्वे सति स्वांशद्वारा सृष्ट्यादिशक्तिमत्त्वं भगवत्त्वं, निरुपाधिविशेष्यमात्रत्वं ब्रह्मत्वं, मायातत्कार्यप्रेरकत्वलक्षणांतर्यामित्वं परमात्मत्वम्, इत्येवं लक्षणभेदैरित्यर्थः । इति **दीपिका** ॥ * ॥ **संदर्भस्तु**—प्रश्नक्रमेणैवोत्तरमाह—स्थितीति । यत्स्थित्यादिहेतुरहेतुश्च यच्च जागरादिषु सद्बहिश्च येन च संजीवितानि देहादीनि संति चरंति तदेकमेव परं तत्त्वं स्वप्रश्नक्रमेण नारायणादिरूपं विद्धीति योजनीयम्, तथापि ब्रह्मत्वस्पष्टीकरणाय विपर्ययेण व्याख्यायते तत्रैकस्यैव विशेषणभेदेन तदवशिष्टत्वेन च प्रतिपादनात्, तथैव तत्तदुपासकपुरुषानुभवभेदाच्चाविर्भावनाम्नोर्भेद इति तात्पर्यम् । एतदुक्तं भवति—स्वयमहेतुः स्वरूपशक्त्येकविलासमयत्वेन तत्रोदासीनमपि प्रकृतिजीवप्रवर्तिकावस्थपरमात्मापरपर्यायस्वांशलक्षणपुरुषद्वारा यदस्य सर्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथाऽनलमर्चिषःस्वाः॥शब्दोपि बोधकनिषेधतयाऽऽत्ममूलमर्थोक्तमाह यदृते न निषेधसिद्धिः३६॥

णादिनामभिरुच्यमानमपि परमेकमेव तत्त्वं जानीहि ॥ ३५ ॥ अवेहीत्यनेन विषयत्वं प्राप्तं निषेधति । नैतदिति । एतत्परं तत्त्वं मनो न विशति न विषयीकरोति । वागुत वागपि चक्षुश्चात्मा बुद्धिश्च प्राणश्च क्रियाशक्त्या न प्राप्नोत्यन्यानि चेंद्रियाणि । यथाऽनलं स्वाः स्वांशभूता अर्चिषो विस्फुलिंगादयो न प्रकाशयन्ति न दहंति च तथा जडासु मनआदिवृत्तिष्वभिव्यज्यमानस्यात्मप्रकाशस्य च तत्तद्वृत्तिप्रकाशकस्य न तत्प्रकाशविषयत्वम् । "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः" इति । तथा "यतो वाचो निवर्तंते अप्राप्य मनसा सह" इत्यादिश्रुतेः । ननु " तं त्वौपनिषदं पुरुषं पृच्छामि " इति श्रुतेः शब्दगोचरत्वं प्रतीयते तत्राह । शब्दोऽपीति । शब्दोऽप्यात्ममूलमात्मनि प्रमाणं सदर्थोक्तमर्थादुक्तं यथा भवति तथा आह नं साक्षात् । कुतः । बोधकनिषेधतया स्वस्यैव बोधकस्य निषेधरूपत्वात् । "यतो वाचो निवर्तंते अप्राप्य मनसा सह ॥ यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि । यन्मनो न मनुते । न चक्षुषा पश्यति कश्चनैनम्" इत्यादिश्रुतेः । ननु तर्हि नैवाह श्रुतिः किमिदमुच्यते अर्थोक्तमाहेति तत्राह । यदृत इति । "अथात आदेशो नेति नेति । अस्थूलमनणु । यतो वाचो निवर्तंते । यद्वाचानभ्युदितम्"

स्थित्यादिहेतुर्भवति तद्भगवद्रूपं विद्धि । पुनस्तेनैव येन हेतुकर्त्रात्मांशभूतजीवप्रवेशनद्वारा संजीवितानि संति, देहादीनि तदुपलक्षणानि प्रधानादीनि सर्वाण्येव तत्त्वानि येनैव प्रेरिततयैव चरंति स्वस्वकार्ये प्रवर्तंते, तत्परमात्मरूपं विद्धि । तथा च "तस्मै नमो भगवते ब्रह्मणे परमात्मने" इत्यत्र वरुणकृतश्रीकृष्णस्तुतौ टीका च—परमात्मने सर्वजीवनियंत्रे इत्येषा । जीवस्यात्मत्वं तदपेक्षया तस्य परमत्वमित्यतः परमात्मशब्देन तत्सहयोगी स एव व्यज्यत इति तत्तदविशिष्टत्वेन ब्रह्ममात्रत्वं चैवमुपतिष्ठतीत्याह—स्वप्नेति । यदेव तत्त्वं स्वप्नादौ यदन्वयेन यच्च बहिस्तद्बहिः शुद्धायां जीवाख्यशक्तौ तथा स्थितं ततः परत्रापि व्यतिरेकेण स्थितं स्वय मवशिष्टं तद्ब्रह्मस्वरूपं विद्धीति ॥ * ॥ **विश्वनाथस्तु**—प्रश्नक्रमेणैव प्रथमं नारायणं लक्षयति—स्थितीति । "जगृहे पौरुषं रूपं भगवान्महदादिभिः । संभूतं षोडशकलमादौ लोकसिसृक्षया ॥" इत्याद्युक्तेः । पुरुष एवास्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं त्वहेतुर्हेतुशून्यः श्यामसुन्दराकारश्चतुर्भुजाष्टभुजसहस्रभुजसच्चिदानंदमूर्तिः परमव्योमनाथभूमवासुदेवमहाविष्णुक्षीरोदनाथनृसिंहरामकृष्णादिनामा नारायणो यो भगवच्छब्द वाच्यः स्वप्नादिष्वनुवर्तमानं सव्यापकं वस्तु तदेवं ब्रह्मशब्दवाच्यं येन परमात्मशब्दवाच्येन देहेन्द्रियाणि संजीवितानि तत्परं परमेकमेव तत्त्वमवेहि ॥ ३५ ॥ विषयत्वं ज्ञानविषयत्वं निषेधति तज्ज्ञानं त्वावरणनिवृत्तौ स्वप्रकाशतया न तु विषयतयेत्याह—नैतदिति । अन्येंद्रियाणि श्रोत्रादीनि च । अनलमग्निम् । तत्तत्प्रकाशविषयत्वं तत्तद्वृत्तिप्रकाश्यत्वं श्रुतिप्रमाणादित्याह—"प्राणस्य प्राणम्" इत्यादि । इन्द्रियाविषयत्वेपि न सर्वथाऽ विषयत्वमिति शंकते—नन्विति । औपनिषदमुपनिषत्प्रतिपाद्यं तं त्वा त्वामित्यर्थः । शब्दगोचरत्वमुपनिषद्रूपवेदविषयत्वम् । तत्र शब्दगोचरत्वे । शब्दोऽपि वेदोऽपि । अर्थादुक्तं वेदस्यान्यकथने तात्पर्याभावात्तात्पर्येणाह— निषेधावधितयैव बोधेन तद्गतावरणविघटकतया प्राहेत्यर्थः । न साक्षादिदमित्थमेवेति नाहेत्यर्थः । अत्र हेतुमाशंकते—कुत इति । स्वस्यैव वेदस्यैव । अनभ्युदितमकथितम् । अत्राक्षिपति—नन्विति । सर्वनिषेधे किमपि नोक्तं भवतीति । "अथात आदेशः" इति श्रुतिर्वेदस्तुतौ व्याख्यातापि अधुना सौगम्यार्थं पुनराह—अथपदं पञ्चभूतोक्त्यानन्तर्यपरं तस्याः परब्रह्मधीहेतुत्वम्, अतःशब्दार्थ इतिशब्दः पूर्वोक्तपञ्चभूतपरामर्शी तन्निषेधावधि भूतः परमात्मेत्यादेश उपदेश इत्यर्थः ॥ * ॥ **दीपिका**—न विषयीकरोति संकल्पविकल्पविषयं न करोति, वागिंद्रियमपि न वचनविषयं करोति, बुद्धिरपि न निश्चयविषयं करोति, अन्यानि श्रोत्रत्वगादीनि मन आदिवृत्तिषु उपाधितयाभिव्यंजकासु अभिव्यज्यमानस्य यथा करतलोपाधिना रविरश्मयः प्रकटीक्रियन्ते तथा प्रकटीक्रियमाणस्येत्यर्थः । आत्मप्रकाशस्य प्रकाशात्मनो ब्रह्मण इत्यर्थः । तत्तद्वृत्तिप्रकाशकस्य यथा रविरश्मयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवम् ॥ ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ ३७ ॥

इत्यादिनिषेधस्य यदवधिभूतं ब्रह्म ऋते विना सिद्धिर्नास्ति सर्वस्य निषेधस्य सावधित्वात् ॥ ३६ ॥ ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्येतात आह

करतलाभिव्यंग्या अपि करतलं प्रकाशयंति तथा मनआद्यभिव्यंग्यत्वेपि मनोवागादिवृत्तिप्रकाशकस्येत्यर्थः । न तत्प्रकाशाविषयत्वं यथा रविरश्मीनां प्रकाशैकशीलानामप्रकाशमानकरतलादिप्रकाशविषयत्वं न संगच्छते तथा जडीभूतमनआदिप्रकाशाविषयत्वं ब्रह्मणो नास्तीत्यर्थः । तत्तद्वृत्तिप्रकाशकत्वे प्रमाणं श्रुतिः "प्राणस्य" इत्यादि । प्राणस्य प्राणं क्रियाशक्तिप्रकाशकम्, चक्षुषश्चक्षुः रूपदर्शनशक्तिप्रकाशकम्, अन्नस्यान्नशब्दवाच्यपृथिवीकार्यस्य घ्राणेन्द्रियस्येत्यर्थः, अन्नं गंधज्ञानवृत्तिप्रकाशकम्, मनसो मनः संकल्पविकल्पवृत्तिप्रकाशकं ब्रह्म ये विदुस्ते तत्त्वज्ञा इत्यर्थः । मनसा सह वाचो यमप्राप्य यतः सकाशान्निवर्तन्ते शंकते—नन्विति । तमिति । हे शाकल्य तं सकारणसूत्रस्याधिष्ठानमौपनिषदमुपनिषद्भिः प्रकाश्यं पुरुषं पूर्णं त्वा त्वां पृच्छामीत्यर्थः । शब्दगोचरत्वं शब्दप्रमाणविषयत्वं प्रतीयत इति कुतो वाग्न विशतीति पूरणीयम् । शब्दोपि उपनिषदाख्यवेदोपि आत्मनि परतत्त्वेऽर्थान्निषेधमुखेन तात्पर्यान्न साक्षादभिधावृत्त्या विधिमुखेनाह स्वस्यैव वेदस्यैव बोधकस्य तात्पर्यवृत्त्या निषेधमुखेन च ज्ञापकस्य निषेधरूपत्वाद्ब्रह्मणो वाग्विषयत्वे निषेधकत्वात् । निषेधात्मकं वेदं लिखति यत इत्यादि—यद्ब्रह्म वाचा नाभ्युदितं न प्रकाशितम्, अभ्युद्यते प्रकाश्यते, मनः कर्तृ यद्ब्रह्म न मनुते संकल्पादिविषयं न करोति, यर्हि वाग्गद्यविषयं तर्हि प्रमाणाभावात्खपुष्पादिवच्छ्रुतिर्ब्रह्म नैवाहेत्यर्थः । तत्र तस्यामाशंकायां तात्पर्यवृत्त्या ब्रह्मणि वेदस्य पर्यवसानमाह—अथेति । अथ मूर्तामूर्तस्थूलसूक्ष्मपुरुषरूपवर्णनानंतरम् । अत आरोपस्य निषेधार्थत्वान्निषेधद्वारा आदेशो ब्रह्मकर्मक उपदेशो भवति, कीदृश इत्याशंकायामाह—नेतिनेतीति । 'नात्मा वपुः पार्थिवमिंद्रियाणि' इत्यादिवक्ष्यमाणवदिदं ब्रह्म न इदं ब्रह्म नेति । अस्थूलमिति स्थूलादिद्वैतशून्यमित्यर्थः । तथा च परमार्षसूत्रम्—"प्रकृतैतावत्त्वं प्रतिषेधति ततो ब्रवीति च भूयः" इति अस्यैव च विषयवाक्यमिदम् "अथात आदेशः"इति । प्रकृतं प्रकरणप्राप्तमेतावत्त्वमियत्तापरिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपमभ्यस्तम्, अथात आदेश इत्यादिशब्दः प्रतिषेधति पुनः सर्वस्य निषेधस्य सावधिकत्वाच्छब्द एवार्थतो ब्रह्म ब्रवीति चेति सूत्रार्थः 'शब्दोपि बोधकानिषेधतयात्ममूलम्'इत्यर्द्धपद्येन सूचितो विज्ञेयः, 'अर्थोयं ब्रह्मसूत्राणाम्' इति गारुडोक्तेः ॥*॥**संदर्भस्तु**—परत्वमेवाह—नैतदिति । वाक् लौकिकी शब्दो वेदोपि अर्थैः स्वाभिधादिवृत्तिभिरुक्ततया यदाह तदपि बोधकानां मनआदीनां निषेधो यत्र तत्तया तेषामविषयतयैवेत्यर्थः । अप्राकृतानंतस्वरूपगुणत्वादिति भावः । न नु सर्वथैवं निःस्वरूपं निर्गुणं चेत्याह—आत्मनः स्वस्य मूलं कारणमिति यद्वत इति यदि च सर्वथैव वक्ति तदा निषेधं वा कुत्र कथं वा कुर्यादित्यर्थः ॥ * ॥ **विश्वनाथस्तु**—भगवत्तत्त्वं मयोपास्यं मदभ्यस्तमेवास्ति किं तु दुर्ज्ञेयं ब्रह्मतत्त्वं विस्तार्य कथयेत्यपेक्षायां ब्रह्मतत्त्वमाह—नैतदिति चतुर्भिः । एतद्ब्रह्म मनो न विशतीत्यादि तैर्व्याख्यातम्, शब्दोप्यात्मनः स्वस्य मूलं ब्रह्मबोधकनिषेधतयाह यस्य बोधकं किमपि नास्ति तद्ब्रह्मेत्येवं रीत्यैवार्थादुक्तमर्थत एवोक्तं न तु शब्दत इदं तदिति निर्देशेनाहेत्यर्थः । "यद्वाचा" इत्यादिश्रुतिभ्यः । ननु "तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥" इति हरिवंशोक्तेः, 'ब्रह्मज्योतिः सनातनम्' इति दशमोक्तेः, "यस्य प्रभाप्रभवतो जगदंडकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नम् । तद्ब्रह्म" इति ब्रह्मसंहितोक्तेः । भगवदंगज्योतीरूपं चेद्ब्रह्म तर्हि कथं न मनआदिकं विषयीकरोतीति उच्यते—भगवदंगज्योतिर्हि न मायिकं तृतीयं भूतं किंतु मायातीतं सच्चिदानंदरूपमेव वाङ्मनआदिकं तु मायिकं तत्कथं स्वविषयीकर्तुं शक्नोतु 'शाब्दं ब्रह्मवपुर्दधत्' 'यन्मित्रं परमानंदं पूर्णं ब्रह्म' इति "तव ब्रह्ममयेशस्य किमुतेक्षामि मर्षिणः" इति "सच्चिदानंदविग्रहः" इत्याद्युक्तेर्भगवद्वपुरपि ब्रह्मैव यद्यपि तदपि तत्कृपाशक्त्याऽतर्क्ययैव प्रापञ्चिकलोकगोचरीकृतम् अत एव नीलोत्पलदलश्यामादिशब्दवर्णितं यत्तदप्यप्राकृतनीलोत्पलदलश्याममपि प्राकृतनीलोत्पलवर्णत्वेन भक्तैर्ध्यातमेतादृशमपि तद्वपुः केवलमतर्क्यया तत्करुणयैव भक्तनयनयोराविर्भवति । अतः प्रापञ्चिकलोकैर्मनोवचोगोचरीकर्तुमशक्यं केवलं ब्रह्मोपासकैरेव साधनपरिपाके सत्यपि भगवदनुग्रहप्राप्त्यैव ब्रह्माकारेन्तःकरणेऽनुभूयते, इत्यतो वेदेपि "यन्मनो न मनुते" इत्यादि । 'दृश्यते त्वग्र्यया बुद्ध्या' इत्याद्यप्याहेति विवेचनीयम् ॥ ३६ ॥ प्रमाणेनैवार्थसिद्धेः सार्वत्रिकत्वात्तद्विषयत्वानंगीकारे शशविषाणादिवत्तदभावप्रसंगः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वमिति । सत्स्थूलं कार्यमसत्सूक्ष्मं कारणं तत्सर्वं ब्रह्मैव भाति । कुतः । यद्यस्मात्तयोः सदसतोः परं कारणम् । कार्यं हि कारणाद्भिन्नं न भवति "वाचारंभणम्" इत्यादिश्रुतेः । ननु कथमेकं बहुविधस्य कारणं तत्राह । उरुशक्ति अनेकशक्तिमत् । उरुर्महती मायालक्षणा शक्तिर्यस्य तदिति वा । बहुधा भानमेव दर्शयति । आदौ यदेकं ब्रह्म तदेव सत्त्वं रजस्तम इति त्रिवृत्प्रधानं प्रवदंति । ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति तदेव प्रवदंति । ततोऽहमिति जीवं जीवोपाधिमहंकारं च तदेव प्रवदंति । ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञानशब्देन देवताः क्रिया इंद्रियाणि अर्था विषयाः फलं तत्प्रकाशः सुखदुःखादि वा तद्रूपतया ब्रह्मैव भाति । नहि सर्वस्वरूपेण

स्यादिति शंकते—नन्विति । सर्वस्य ब्रह्मरूपत्वे हेतुमाशंकते—कुत इति । कार्यस्य कुंडलादेः कारणात्स्वर्णाद्भिन्नत्वादर्शनादिति भावः । पुनराशंकते—अनंतशक्तिमतो बहुधा भवनं न विरुद्धम् । अनंतशक्तिकल्पने गौरवमालक्ष्याह—उरुर्महतीति । मायायां सर्वसंभवस्य प्रतिपादितत्वादित्यर्थः । आदौ सृष्ट्यादौ । ततः प्रधानरूपेण भवनोत्तरम् । तदेव यत्सृष्ट्यादावेकमित्यर्थः । तत उभयशक्तिप्रधानमहद्रूपेण भवनोत्तरम् । ततश्चाहंकारसृष्ट्युत्तरम् । इति भाव इति—अनुगततत्सत्त्वभानविवेके प्रपंचस्यासत्त्वनिर्णये निर्णेतुः स्वसिद्धयेऽन्यप्रमाणापेक्षैव नोदेतीत्याशयः ॥ * ॥ तर्हि यदिशब्देन निषेध एव पर्यवसान इतिशब्दस्य निषेध एव प्रामाण्यं न ब्रह्मणि तदा प्रमाणाविषयत्वान्निष्प्रमाणकत्वान्न ब्रह्मास्ति, यन्निष्प्रमाणकं तदसदिति व्याप्तेः । ततः प्रधानकल्पनानंतरं तदेव ब्रह्मैव, ततः महत्कल्पनानंतरं ततश्चाहंकारकल्पनानंतरं देवताः सात्त्विकाहंकारकार्याः इंद्रियाणि राजसाहंकारकार्याणि विषयास्तामसाहंकारकार्याः, तत्प्रकाशो विषयप्रकाशः सुखादि सुखं सात्त्विकम्, आदिना दुःखमोहयोर्ग्रहः । सर्वस्वरूपेण प्रमाणप्रमेयादिरूपेण स्वतो भासमानस्य स्वप्रकाशस्य ॥ * ॥ अथ **संदर्भः**—शक्तेस्तत्स्वाभाविकरूपत्वमाह—ब्रह्मैव उरुशक्ति अनेकात्मकशक्तिमद्भाति । एवकारेण ब्रह्मण एव सा शक्तिर्न तु कल्पितेति स्वाभाविकरूपत्वं शक्तेर्बोधयति—तत्र हेतुः, यद्ब्रह्म सत्स्थूलं कार्यं पृथिव्यादिरूपम् असत्सूक्ष्मं कारणं प्रकृत्यादिरूपं तयोर्बहिरंगवैभवयोः परं स्वरूपवैभवं श्रीवैकुंठादिरूपं तटस्थवैभवं शुद्धजीवरूपम् अन्यथा तत्तद्भावासिद्धिः, किंरूपतया तत्तद्रूपज्ञानक्रियार्थफलरूपतया, महदादिलक्षणज्ञानशक्तिरूपत्वेन, सूत्रादिलक्षणक्रियाशक्तिरूपत्वेन, तन्मात्रादिलक्षणार्थरूपत्वेन, प्रकृतिलक्षणतत्तत्सर्वैक्यरूपत्वेन सदसद्रूपं फलरूपत्वेन तयोः परतंत्रफलं पुरुषार्थस्वरूपं सवैभवं भगवदाख्यं चिद्वस्तु तदनुगतत्वाच्छुद्धजीवाख्यं चिद्वस्तु च एतेन ज्ञानक्रियादिरूपेणोरुशक्तित्वं व्यंजितम् । शक्तेः स्वाभाविकरूपत्वं सप्रमाणं स्पष्टयति—आदौ यदेकं ब्रह्म तदेव सत्त्वंरजस्तम इति त्रिवृत् प्रधानम्, ततः क्रियाशक्त्या सूत्रम्, ज्ञानशक्त्या महानिति ततोहमहंकार इति तदेव च जीवं शुद्धस्वरूपं जीवात्मानं तदुपलक्षणकं वैकुंठादिवैभवं च प्रवदंति वेदाः ते च "सदेव सोम्येदमग्र आसीत्" इत्याद्याः, आदावेकं ततस्तद्रूपमिति शक्तेः स्वाभाविकत्वमायातम् । अन्यस्यासद्भावेनोपाधिकत्वायोगात् स्वरूपवैभवस्यांगप्रत्यंगवन्नित्यसिद्धत्वेऽपि सूर्यसत्तया तद्रश्मिपरमाणुवृंदस्येव तत्सत्तया लब्धसत्ताकत्वात्तदुपादानकत्वं तदादित्वं च स्यात् । "यस्य भासा सर्वमिदं विभाति" इति श्रुतेः । शक्तेरचिंत्यत्वं स्वाभाविकत्वं चोक्तं विष्णुपुराणे—"निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः । कथं सर्गादिकर्तृत्वं ब्रह्मणोभ्युपगम्यते ॥" इति मैत्रेयप्रश्नानंतरं श्रीपराशर उवाच—"शक्तयः सर्वभावानामचिंत्यज्ञानगोचराः । यतो हेतोर्ब्रह्मणस्ताः सर्गाद्या भावशक्तयः॥ भवंति तपतां श्रेष्ठ पावकस्य यथोष्णता ।" इति । श्रीस्वामिटीका च । तदेवं ब्रह्मणः सृष्ट्यादिकर्तृत्वमुक्तं तत्र शंकते—निर्गुणस्येति । सत्त्वादिगुणरहितस्य अप्रमेयस्य देशकालाद्यपरिच्छिन्नस्य शुद्धस्य सहकारिशून्यस्य अमलात्मनः रागादिशून्यस्य एवंभूतस्य ब्रह्मणः कथं सर्गादिकर्तृत्वमिष्यते, एतद्विलक्षणस्यैव लोके घटादिषु कर्तृत्वादिदर्शनादित्यर्थः । परिहरति—शक्तय इति सार्धेन । लोके हि सर्वेषां भावानां पावकस्योष्णताशक्तिवदचिंत्यज्ञानगोचराः शक्तयः संत्येव अचिंत्याभिन्ना भिन्नत्वादिविकल्पैश्चिंतयितुमशक्याः केवलमर्थापत्तिज्ञानगोचराः संति ब्रह्मणः पुनस्ताः स्वभावभूताः स्वरूपादभिन्नाः शक्तयः "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः । अतो मणिमंत्रादिभिरग्न्यौष्ण्यवन्न केनचिद्धन्तुं शक्यन्ते, अत एव तस्य निरंकुशमैश्वर्यम् । तथा च श्रुतिः "स वा अयमस्य वशी सर्वस्येशानः सर्वस्याधिपतिः" इत्यादि । यत एवम्, अतो हेतोः ब्रह्मणः सर्गाद्या भवंति नात्र काचिदनुपपत्तिरित्येषा । किञ्च—ब्रह्मपदेन "सर्वं खल्विदं ब्रह्म" इति प्रसिद्धं व्यज्य सत्त्वादिगुणमयमायायास्तदनन्यत्वेपि निर्गुणस्येति प्राकृतगुणैरस्पृष्टत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते सवनविद्व्यभिचारिणां हि॥सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ॥३८॥

स्वतो भासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ॥ ३७ ॥ ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोऽपि तत्प्रसंगः स्यादत आह । नात्मेति । आत्मा ब्रह्म न जजान न जातः । जन्माभावादेव तदनंतरास्तितालक्षणोऽपि विकारो नास्ति । नैधते न वर्धते वृद्ध्यभावादेव विपरिणामोऽपि निरस्तः । कुतः । हि यस्माद्व्यभिचारिणामागमापायिनां बालयुवादिदेहानां सवनवित्तत्तत्कालद्रष्टा । नह्यवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः । ननु निरवस्थः कोऽ

मंगीकृत्य तेषां बहिरंगत्वं स्वीकृतं तदेतदेव " मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् " इत्येषा श्रुतिः स्वीचकार । " मायाञ्च तदपाश्रयाम् " इतिवन्महेश्वरत्वं मायाया बहिरंगाया आश्रय इति तां परा भूय च स्थितमिति लभ्यते । पूर्ववदत्र शक्तेः स्वाभाविकत्वं मायादोषास्पृष्टत्वं च साधितम्, अत एव श्रीगीतासु—" ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादि मत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ सर्वतःपाणिपादं तत्" इत्यादिना । अत्रेयं प्रक्रिया—एकमेव तत्परमं तत्त्वं स्वाभाविकाचिंत्यशक्त्या सर्वदैव स्वरूपतैद्रूपवभवजीवप्रधानरूपेण चतुर्धावतिष्ठते, सूर्यांतर्मंडलस्थतेज इव मंडलतद्बाहिर्गततद्रश्मितत्प्रतिच्छविरूपेण । एवमेव श्रीविष्णुपुराणे—" एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥ " इति । " यस्य भासा सर्वमिदं विभाति " इति श्रुतेः । अत्र व्यापकत्वादिना तत्तत्समावेशाद्यनुपपत्तिश्च शक्तेरचिंत्यत्वेनैव पराहता दुर्घटघटकत्वमचिंत्यत्वम् । शक्तिश्च सा त्रिधा—अन्तरङ्गा बहिरंगा तटस्था च, तत्रांतरंगया स्वरूपशक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुंठादिरूपवैभवरूपेण च तदवतिष्ठते, तटस्थया रश्मिस्थानीयचिदेकात्मशुद्धजीवरूपेण, बहिरङ्गया मायाख्यया प्रतिच्छविगतवर्णशाबल्यस्थानीयतदीयबहिरंगवैभवजडात्मप्रधानरूपेण च । चतुर्द्धात्वमत एव तदात्मकत्वेन जीवस्यैव तटस्थशक्तित्वं प्रधानस्य च मायांतर्भूतत्वमभिप्रेत्य शक्तित्रयं विष्णुपुराणे गणितम्—" विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा । अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥ तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥" इति अविद्या कर्म कार्यं यस्याः सा तत्संज्ञा मायेत्यर्थः । यद्यपीयं बहिरंगा तथाप्यस्या तटस्थशक्तिमयमपि जीवमावरयितुं सामर्थ्यमस्तीत्याह—तयेति । तारतम्येन तत्कृतावरणस्य ब्रह्मादिस्थावरांतेषु देहेषु लघुगुरुभावेन वर्तत इत्यर्थः । तदुक्तम्—' यया संमोहितो जीवः ' इति ययैवाचिंत्यया मायया चिद्रूपता निर्विकारतादिगुणराहितस्य प्रधानस्य विकारित्वं चेति ज्ञेयम् । अत्रांतरंगत्वतटस्थत्वबहिरंगत्वादिनैव तासामेकानां तत्तत्साम्यं न तु सर्वात्मनेति तत्तत्स्थानीयत्वमेवोक्तं न तु तत्तद्रूपत्वम् अतस्तत्तद्दोषा अपि नावकाशं लभन्ते, अत्र विशेषो भगवत्संदर्भे द्रष्टव्यः ॥*॥ **विश्वनाथस्तु**—किञ्च—ब्रह्मणः स्वरूपानुभव एव लोकैर्दुष्करस्तस्य प्रामाण्ये तु नास्ति कोपि संशयो यतो " ब्रह्मैवेदं सर्वम् " इति " यस्य भासा सर्वमिदं विभाति " इति श्रुत्युक्तं वस्तुमात्रमेव सर्वं ब्रह्मकार्यत्वाद्ब्रह्मैवेति यत्तदेव विवृणोति—सत्त्वमिति । अन्यत्तैः । विशेषस्तु " तत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥ " इति हरिवंशोक्तेः । अस्यार्थस्तु—तत्परं सर्वस्मात्परं यत् परमं ब्रह्म सर्वं जगद्विभजते स्वत एव महदहंकारादिरूपेण विभक्तं करोति तन्ममैव तेजो ज्ञातुमर्हसीत्यतो ' ब्रह्मणो हि प्रतिष्ठाहम् ' इति भगवदुक्तेः सूर्यस्य घनं तेज इतिवत्तस्य वपुस्तेज एव ब्रह्मेत्यवगन्तव्यम्, अत एव 'यस्य भासा सर्वमिदं विभाति' इति श्रुतौ यस्य कृष्णस्येति व्याचक्षते ॥ ३७ ॥ सर्वात्मकत्वे पुनराक्षिपति—नन्विति । तत्प्रसंगो जन्मादिविकारप्रसंगः । तदनंतरो जन्मानंतरः । वृद्धेरेव परिणामोऽनुमीयते तदभावात्स च न संभवतीति निरस्तोऽप्याकृतः । जन्माद्यभाववत्त्वे हेतुमाशंक्य समाधत्ते—कुत इत्यादिना । तत्तत्कालद्रष्टा बाल्युवादिकालसाक्षी । तदवस्थोऽवस्थावदवस्थो जाग्रदाद्यवस्थः । इत्यर्थ इति—न हि साक्षिणः साक्ष्यरूपत्वं भवतीति भावः । पुनराशंकते—निरवस्थ इति । उपलब्धिमात्रं ज्ञानस्वरूपम् । उपलब्धिमात्रत्वेऽप्याक्षिपति—नन्विति । तर्हि क्षणिकत्वं क्षणस्थितिकत्वं क्षणिकविज्ञानमतमित्यर्थः । तन्निराकरोति—नेति । अनपायि नाशरहितम् । अनपायित्वमप्याक्षिपति—नन्विति । इंद्रियबलेन चक्षुषो झटिति तत्तत्पदार्थयोगेन तत्तदाकारा प्रतीतिर्जायत इति । इति भाव इति—ज्ञानस्यैकत्वेन बहुत्वासंभवः । तथाहि—घटज्ञानात्पटज्ञानं न भिद्यते उपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वात् । आकाशवदिति । एवं नीलज्ञानात्पीतज्ञानं न भिद्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्रतत्र ॥ सन्ने यदिंद्रियगणेऽहमि च प्रसुते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥ ३९ ॥

सावात्मा अत आह । उपलब्धिमात्रमिति । नन्वायातं तर्हि क्षणिकत्वं नेत्याह । सर्वत्रेति । सर्वत्र देशे शश्वत्सर्वदा अनपाय्यनुवर्तमानम् । ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्न ज्ञानस्यानपायित्वमत आह । इंद्रियबलेनेति । सदेव ज्ञानमिंद्रियबलेन विविधं कल्पितम् । नीलाद्याकारवृत्तय एव जायंते नश्यंति च न ज्ञानमिति भावः । व्यभिचारिष्वव्यभिचारे दृष्टांतः । प्राणो यथेति ॥ ३८ ॥ दृष्टांतं विवृण्वन्निंद्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति । अंडेष्विति । पेशिषु जरायुजेषु तरुषु उद्भिज्जेष्वविनिश्चितेषु । स्वेदजेषु उपधावत्यनुवर्तते । एवं दृष्टांते निर्विकारत्वं प्रदर्श्य दार्ष्टांतिकेऽपि दर्शयति । कथम् । तदैवात्मा सविकार इव प्रतीयते यद्यदा जागरे इंद्रियगणो यदा च स्वप्ने तत्संस्कारवानहंकारः । यदा तु प्रसुप्तं तदा तस्मिन्प्रसुप्ते इंद्रियगणे सन्ने लीने अहम्यहंकारे च सन्ने कूटस्थो निर्विकार एवात्मा । कुतः आशयमृते लिंगशरीरमुपाधिं विना । विकारहेतोरुपाधेरभावादित्यर्थः । नन्वहंकारपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्येत तत्कथं तदा कूटस्थ आत्मा अत आह । तदनुस्मृतिर्नः तस्य दर्शनस्पर्शनादिविशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति एतावंतं कालं सुखमहं सुप्तो न किंचिदवे

ज्ञानत्वात्, पीतज्ञानवदिति ज्ञानस्यैकत्वेन नित्यत्वान्न तन्नाश इति तात्पर्यम् । व्यभिचारिषु व्यभिचारवत्सु । यस्य न व्यभिचारः सोऽव्यभिचारस्तत्र दृष्टान्तः—दृष्टांतः सादृश्यबलेन प्रकृतार्थनिर्णयो येन स दृष्टान्तः ॥*॥ **दीपिका**—तत्प्रसंगो जन्मादिविकारप्रसंगः । तत्तत्कालद्रष्टा बाल्युवाद्यवस्थासाक्षी । अवस्थावतां देहानाम् । तदवस्थो बाल्युवाद्यवस्थः। उपलब्धिमात्रं ज्ञानैकरसम् । क्षणिकविज्ञानवादी बौद्धः शङ्कते—नन्विति । सर्वदा सर्वस्मिन्काले अनुवर्तमानं नित्यत्वेनानुगतम् । पुनः शङ्कते—नन्विति । अनपायित्वं नित्यत्वेनानुवर्तमानत्वं सदेव नित्यस्थिरमेव जायंत इति, अध्यस्तानां वृत्तीनामेव जन्मनाशौ नाधिष्ठानत्वेनानुगतस्य ज्ञानस्येत्यर्थः । व्यभिचारिषु बाल्यादिदेहेषु । अत्रागमापायि देहेभ्यस्तदवधिरूप आत्मा भिन्न इति प्रथमस्तर्कः । तथा द्रष्टात्मा दृश्यदेहभिन्न इति द्वितीयोपि तर्क इति ज्ञेयम् ॥*॥ **संदर्भस्तु**—अत्र यदि त्वंपदार्थस्य जीवात्मनो ज्ञानत्वं नित्यत्वं च प्रथमतो विचारगोचरं स्यात्तदैव तत्पदार्थस्य तस्य तादृशत्वमपि सुबोधं स्यादिति । तद्बोधयितुम् 'अन्यार्थश्च परामर्शः' इति न्यायेन जीवात्मनस्तद्रूपत्वमाह द्वाभ्यां—नात्मेति । आत्मा शुद्धो जीवः' उपलब्धिमात्रं ज्ञानैकरूपम्, कथंभूतम् सर्वत्र देशे शश्वत्सदानुवर्तमानम्, अन्यत्तैः । अत्र ज्ञानमिति भाव इत्यंतेन अयमागमापायितदवधिभेदेन प्रथमस्तर्कः, द्रष्टृदृश्यभेदेन द्वितीयोपि तर्को ज्ञेय इति ज्ञेयम् ॥ * ॥ **विश्वनाथस्तु**—तस्य ब्रह्मणस्तत्पदार्थस्यापरोक्षानुभवो न सर्वस्य किंतु शुद्धजीवस्यापरोक्षानुभवानंतरमेवेत्यतः शुद्धजीवमाह—नात्मेति त्रिभिः । आत्मा शुद्धजीवो न जजान न जात इत्याद्यो विकारो निषिद्धः । न भविष्यतीत्यंतः षष्ठः, अन्यत्तैः ॥ ३८ ॥ इंद्रियादीन्यत्रादिनाऽहंकारग्रहः । यद्यपि जरायुजादयोऽपि सर्वथा निश्चेतुमशक्या एव तथापि तेषां यथाकथंचिज्ज्ञानं भवेदेव स्वेदजेष्वतिसूक्ष्माणां बहूनामप्रसिद्धत्वादनिश्चितत्वमेवेत्युक्तमनिश्चितेषु स्वेदजेष्विति । उपधावति प्रतिशरीरं जीवं तत्रतत्रोपधावति एक एव प्राणस्तत्तदात्मना भाति तथा निर्विकार एव सच्चिदानंदरूप आत्मा इन्द्रियविकल्पितं नानाविकारापन्नं भातीत्यर्थः । कथं निर्विकारत्वमिति प्रश्ने, उत्तर यद्यदेति । यदा जागर इंद्रियगणः स्वप्ने च तत्संस्कारवानिन्द्रियविषयसंस्कारवान् । अहंकारस्तदैव सविकार इव प्रतीयते, इवेन वस्तुतो विकाराभाव एवोक्तो विकाराणामवस्तुत्वेन तत्संबंधस्य सुतरामवस्तुत्वादिति भावः । निर्विकारत्वे हेतुमाशङ्कते—कुत इति । इत्यर्थ इति—'यावल्लिंगान्वित आत्मा तावत्कर्मनिबंधनम्' इत्युक्तेर्लिंगदेहसंबंधस्यैव संसृतिलक्षणविकारापादकत्वमिति भावः । पुनरत्राशंकते—नन्विति । यतः स्मृतिरतो हेतोः । चेत्तत्र साक्षिणोऽनुभवस्तर्हि कथं न स्पष्ट इति चेदाह—विषयेति । इति भाव इति—स्पष्टत्वेऽनुभवस्य विषयसंबंधस्यैव हेतुत्वात्सुषुप्तौ तदभावान्न तथेत्याशयः । सुषुप्तौ विषयाभावेपि ज्ञानमस्तीत्यत्र प्रमाणमाह—तथा चेति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि ॥ तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथाऽमलदृशोः सवितृप्रकाशः॥४०॥

दिषमिति । अतोऽननुभूतस्यास्मरणादस्त्येव सुषुप्तावात्मानुभवो विषयसंबंधाभावात्तु न स्पष्ट इति भावः । तथा च श्रुतिः । "यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति ॥ ३९ ॥ ननु यदि सुषुप्तौ कूटस्थात्मानुभवो भवेत्कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्कदा तर्हि तन्निवर्तकोऽनुभवो भवेदत आह । यर्हीति । वित्तैषणादि विहाय केवलमब्जनाभस्यैव चरणेच्छया या उरुभक्तिस्तया पुमांश्चेतसो मलानि विधमेन्नाशयेत् । चेत एव वा कर्तृ । स्वगतानि मलानि तया भक्त्या क्षालयेत् । तदा तस्मिन्विशुद्धे चेतसि सति साक्षादव्यवधानेनात्मतत्त्वमुपलभ्यते । अमलयोर्दृशोः सत्योर्यथापूर्वमेव सिद्धः

यद्यदा सुषुप्तौ वै प्रसिद्धं तत्प्रासिद्धं जगत् न पश्यति पश्यन्नात्मानं तद्ब्रह्म द्रष्टव्यं वस्तुजातं द्रष्टुरात्मनो दृष्टेर्ज्ञानस्य विपरिलोपो नाशो न ह्यस्तीति श्रुतिपदार्थः ॥ * ॥ **दीपिका**—निर्विकारोपलब्धेः सुषुप्तौ निर्विशेषात्मानुभवमनुवर्तते उपाधित्वेनानुगच्छति । दृष्टान्ते प्राणे निर्विकारित्वमजडादिवदनश्वरत्वं दार्ष्टांतिके प्राणदृष्टान्तेनोपपादनीये शुद्धात्मनि कथमिति, केन प्रकारेण निर्विकारित्वदर्शनमित्यर्थः । प्रकारमेवोदाहरणेन व्याचष्टे—तदैवेति । मूले यदित्यव्ययं यदेत्यर्थे, तस्यैव पुनर्मूले योजनार्थे यदा चेत्यावृत्तिः कृता । तत्संस्कारवान् जागरवासनावान् । एवमवस्थाद्वये विकारित्वप्रतीतिं मूलाद्बहिरेव संयोज्य निर्विकारत्वं मूले योजनयाह—यदा त्विति । प्रसुप्तमिति भावे क्तः, जीवेन सुप्यते स्मेत्यर्थः । तस्मिन् जीवे । प्रसुप्ते सति । सर्वस्य स्थूलसूक्ष्मोपाधेः । तदा सुषुप्त्यवस्थायाम् । विशेषज्ञानं वृत्तिज्ञानं तेन शून्यस्याखंडात्मन इत्यर्थः । नोऽस्माकम् । जाग्रद्द्रष्टॄणां स्मृति मभिनयेन दर्शयति—एतावन्तमिति । अतः जागरे तथास्मरणात् पूर्वं नानुभूतं यत्तस्य स्मरणासंभवादनुभवस्मरणयोश्च सामानाधिकरण्यात् सुषुप्त्यवस्थायामज्ञानसाक्षिसुखात्मनोऽनुभवोऽस्त्येव । विषयेति—स्वरूपातिरिक्तस्य विषयस्य देहेंद्रियाद्युपाधेः संबंधाभावात्स्वरूपमात्रानुभवो जाग्रदाद्यनुभववन्न स्पष्ट इत्यर्थः । तथा च सुषुप्तावात्मानुभवे प्रमाणं, श्रुतिः—" यद्वै तत् " इत्यादिका । पश्यन्नलुप्तज्ञान एवात्मा तत्तदा सुषुप्तौ न पश्यतीति यत्तद्द्रष्टव्यं विषयं न पश्यतीत्यभिप्रायादेव सुषुप्तावप्यलुप्तज्ञानत्वे हेतुः—न हीति । हि यतो द्रष्टुः साक्षिणः दृष्टेः स्वरूपज्ञानस्य विपरिलोपो नाशो न विद्यते नाशायोग्यत्वादित्यर्थः । न हि प्रकाश्यनाशे सवितृप्रकाशो नश्यतीति भावः । तर्हि कुतो न पश्यति द्रष्टव्यस्य द्वितीयस्याभावादिति ज्ञेयम् । तदुक्तं भगवद्भाष्यकृद्भिः—" अंतरा च " इति सूत्रव्याख्यानावसरे सुषुप्तं प्रकृत्य विषयाभावादियमचेतनता न चैतन्याभावादितीति, अयं साक्षिसाक्ष्यविभागेन तृतीयस्तर्कः । सुखमात्रावशेषात् दुःखिप्रेमास्पदत्वविभागेन चतुर्थोऽपि तर्को ज्ञेयः, तदुक्तमभियुक्तैः—" अन्वयव्यतिरेकाख्यस्तर्कः स्याच्चतुरात्मकः । आगमापायितदवधिभेदेन प्रथमो मतः ॥ द्रष्टृदृश्यविभागेन द्वितीयोऽपि मतस्तथा । साक्ष्यसाक्षिविभागेन तृतीयस्सम्मतः सताम् ॥ दुःखिप्रेमास्पदत्वेन चतुर्थः सुखबोधकः । " इति ॥ * ॥ **संदर्भस्तु**—तदनुस्मृतिर्न इति । तस्याखण्डात्मनः सुषुप्तिसाक्षिणो नोऽस्माकं जाग्रद्द्रष्टॄणां जायते । अन्यत्तैः । तत्र तस्य स्पष्ट इति भाव इत्यंते अतः प्रकाशमात्रवस्तुनः सूर्यादेः प्रकाशवदुपलब्धिमात्रस्याप्यात्मन उपलब्धिः स्वाश्रयमस्त्येवेत्यायातमिति ज्ञेयम् । विपरिलोपो विद्यते इत्यंतेऽयं साक्षिसाक्ष्यविभागेन तृतीयः । सुखावेशात् दुःखिप्रेमास्पदत्वविभागेन च चतुर्थोऽपि तर्कोऽवगन्तव्यः, अन्यत्पूर्ववत् ॥ * ॥ **विश्वनाथस्तु**—इंद्रियादिलये निर्विकारात्मोपलब्धिं दर्शयति—अंडेष्विति । उपधावति जीवमाददान एव जीवमनुवर्तते । अन्यत्तैः ॥ ३९ ॥ " तमेव विदित्वातिमृत्युमेति " इति श्रुतेः कूटस्थानुभवस्य मोक्षहेतुत्वात्पुनः संसारानुभवो नोचित इत्याशंकते—नन्विति । तत्संस्काराणामविद्यासंस्काराणाम् । आदिना लोकैषणादिग्रहः । गुणकर्मजानि सत्त्वादिगुणावेशकृतानि रागद्वेषादीनि । कर्तुरध्याहारे गौरवं मत्वाह—चेत एवेति । कर्तृ कर्तृपदम् ॥ * ॥ **दीपिका**—नन्विति शंकासमाधानाभासः । अविद्या " न किंचिदवेदिषम् " इत्यनेनोक्तं मूलाज्ञानम् । तत्संस्कारा अज्ञानवासनाश्च तेषां विद्यमानत्वात्सुषुप्तौ कूटस्थानुभवेऽपि सुषुप्त्युपरमे पुनरपि संसारः स्यादिति योजना । यर्हि पुनरपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ कर्मयोगं वदत नः पुरुषो येन संस्कृतः ॥ विधूयेहाशु कर्माणि नैष्कर्म्यं विंदते परम् ॥ ४१ ॥ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरंतिके ॥ नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यताम् ॥ ४२ ॥ आविर्होत्र उवाच ॥ कर्माकर्मविकर्मेति वेदवादो न लौकिकः ॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ॥ ४३ ॥

सवितृप्रकाश इति ॥ ४० ॥ भक्तेः कर्मयोगाधीनत्वात्तं पृच्छति । कर्मयोगमिति । नैष्कर्म्यं कर्मनिवृत्तिसाध्यं ज्ञानम् ॥ ४१ ॥ प्रश्नांतरमाह । एवमिति । 'कर्मयोगं वदत नः' इत्युक्तप्रकारेण प्रश्नं प्रष्टव्यमर्थम् । पितुरिक्ष्वाकोः । ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि नाब्रुवन् ॥ ४२ ॥ गहनत्वद्योतनाय प्रथमं द्वितीयप्रश्नस्योत्तरमाह । कर्मेति । कर्म विहितम् । अकर्म तद्विपरीतं निषिद्धम् । विकर्म विगतं कर्म विहिताकरणम् । एतत्त्रयं वेदवादो वेदैकगम्यं न लौकिकः । वेदस्येश्वरात्मत्वादीश्वराद्दुद्भूत

संसारस्तर्हि तन्निवर्तकोऽविद्यादिनाशकः । वित्तैषणादीत्यादिना पुत्रैषणालोकैषणयोर्ग्रहः । अव्यवधानेन सुषुप्तिवदविद्यादिव्यवधानाभावेन । तथा च श्रुतिः—"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" इति ॥ * ॥ **संदर्भस्तु**—ननु यदि सुषुप्तावित्यादि । तैः भवतु नाम केवलज्ञानिनां तु ज्ञानेनाहंकारपर्यंतलये महत्तत्त्वप्रधानयोर्लयः कथं स्यात्सुषुप्तिवत्प्रयत्नांतरासंभवात्, आश्रयाव्याघाताच्च तदेवं सति शुद्धत्वंपदार्थस्य जीवस्याप्युपलब्धिसंभवात्किमुत तत्पदार्थस्य भगवत इति सत्यम्, तत एवेदमुच्यते इत्याह—यर्हीति । यदा पुरुषार्थचतुष्टयैषणां विहायाब्जनाभचरणैषणाप्रातीच्छा यस्यां तया भक्त्या भक्तिप्रभावेण चेतोमलानि विधमेत्तदा तस्मिंश्चित्ते प्रभावेणैवात्मनो जीवस्य तत्त्वमाश्रयः श्रीभगवानुपलभ्यते किमुतात्ममात्रमिति ॥ * ॥ **विश्वनाथस्तु**—नन्वित्यादि भवेदंतं पूर्ववत् । तत्र भक्तिमिश्रज्ञानपरिपाकेन प्रथमं शुद्धजीवानुभवस्ततः "ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति । समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥" इति भगवदुक्त्या भक्त्युत्थज्ञानेन तत्पदार्थस्य ब्रह्मणोऽपरोक्षानुभवस्ततो ब्रह्मसायुज्यमिति क्रमः । यदि तु—"यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्" इति वाक्यबलाद्ब्रह्मानुबुभूषुः केवलामेव भाक्तिं कुर्यात्तदा 'सत्यं दिशत्यर्थितमर्थितो नृणाम्' इति न्यायेन ब्रह्मानुभवं प्राप्य भगवदनुभवमपि प्राप्नोतीत्याह—यर्हीति । यदा उरुः केवला भक्तिस्तया चेतसो मलानि गुणकर्मजानि विधमेन्नाशयेत् । त्रैगुण्यापगमे यदा नैष्कर्म्यं भवेदित्यर्थः । कीदृश्या—अब्जनाभस्य चरणाच्चरणोपासनादेव एषणा कामना ध्रुवादीनामिवान्यकामनापि भवेद्यतस्तया तदा तस्मिन्विशुद्धे चेतसि आत्मनस्तत्पदार्थस्य ब्रह्मणस्तत्प्रतिष्ठारूपस्य भगवतोपि तत्त्वमुपलभ्यते, यथाऽमलदृशोः पटलापगमे सति निर्मलयोः सत्योः सवितुः सूर्यस्य प्रकाशः । साक्षादिति पदेन भक्तिमहिम्ना तत्प्रतिष्ठारूपं सवितापि सवितृभक्तेन स्वदृग्भ्यां पाणिपादादिविशिष्टो वाहनादिपरिकरसहितोऽप्युपलभ्यते ॥ ४० ॥ "नृणां कर्मभिराशुद्ध्या हरिभक्तिः प्रजायते" इत्याद्युक्तेः कर्मभिः शुद्धचित्तस्य भक्तिर्भवतीत्यभिप्रायेणाह—भक्तेरित्यादि । येन कर्मयोगेन । संस्कृतः शुद्धः । इह देहे । कर्माणि तत्फलानि । कर्मफलत्यागस्यैव कर्मत्यागत्वात्साक्षात्कर्मत्यागस्य कर्तुमशक्यत्वात् । "न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्" इत्याद्युक्तेः ॥ * ॥ **दीपिका**—भक्तेरिति—'कुर्वाणा यत्र कर्माणि भगवच्छिक्षया' इत्यादेः "यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥" इत्यादेश्च कर्माधीनत्वाद्भगवदर्पितकर्माधीनत्वादित्यर्थः । तं तादृशकर्मयोगम् । येन कर्मयोगेन । संस्कृतः शुद्धचित्तः सन् । कर्मनिवृत्तिः कर्माणि कर्तृत्वाभिनिवेशाभावस्तया साध्यं परं ज्ञानम् । तथा च श्रुतिः—"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते" इति ॥ * ॥ **संदर्भस्तु**—पूर्वं 'कर्माण्यारभमाणानाम्' इत्यादिना श्रीप्रबुद्धेन काम्यकर्माण्येव त्याजितानि न तु नित्यनैमित्तिकानि फलस्यैव विनिंदितत्वात्, ततस्तेषां परमार्थोपयोगित्वं मनसि कृत्वाह—कर्मयोगमिति ॥ * ॥ **विश्वनाथस्तु**—गुणकर्मजानि विधमेदिति श्रुत्वा भक्त्या ज्ञानेन च नैष्कर्म्यं स्यादिति मया ज्ञायत एव । कर्मण्यपि नैष्कर्म्यं यथा स्यात्तदहं जिज्ञास इत्याह—कर्मयोगमिति ॥ ४१ ॥ एवमित्थं कर्मयोगप्रश्नम् । पूर्वं पूर्वकाले । नाब्रुव उत्तरं न ददुः । तत्रोत्तरादाने ॥ * ॥ स्पष्टम् ॥ ४२ ॥ द्वितीयस्योत्तरादानरूपद्वितीयप्रश्नस्य । विहितम् "अहरहः संध्यामुपासीत" इत्यादिश्रुतिविहितं संध्यावंदनादि । तद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परोक्षवादो वेदोऽयं बालानामनुशासनम् ॥ कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ४४ ॥

तत्वादपौरुषेयत्वादित्यर्थः । पुंवाक्ये हि वक्तुरभिप्रायतोऽर्थज्ञानं शक्यमपौरुषेये तु केवलं वाक्यपौर्वापर्येणैव तात्पर्यावधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसोऽपि मुह्यंति किमुतान्ये । अतस्तव तदा बालत्वात्सर्वज्ञा अपि ते नैवाब्रुवन्निति ॥ ४३ ॥ दुर्ज्ञेयं वेदतात्पर्यमाह । परोक्षवाद इति । यत्रान्यथास्थितोर्थः संगोपयितुमन्यथा कृत्वोच्यते स परोक्षवादः । तथा च श्रुतिः "तं वा एतं चतुर्हूतꣳसंतम् ॥ चतुर्होतेत्याचक्षते परोक्षेण ॥ परोक्षप्रिया इव हि देवाः " इति । परोक्षवादत्वमेवाह । कर्ममोक्षायेति । ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह । बालानामनुशासनं यथा भवति तथा । अत्र दृष्टांतः । अगदमौषधम् । यथा पिता बालमगदं पाययन्खं

परीतं विहितविपरीतम् " ब्राह्मणं न हन्यात् " इत्यादिश्रुतिनिषिद्धं विहितस्य संध्यावंदनादेरकरणम् । इत्यर्थ इति–' अपौरुषेयं वाक्यं वेदः ' इति जैमिनिनोक्तत्वादिति भावः । वाक्यपौर्वापर्य्येणोपक्रमादिषाड्विधलिंगेनैव " उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्ती च लिंगतात्पर्यनिर्णयः ॥ " इत्युक्तेः । तच्च तात्पर्यावधारणम् । यतो विद्वांसोऽपि मुह्यंति अतो हेतोः । बालत्वादर्थं बोद्धुमशक्यत्वात्, न तूत्तराज्ञानादित्यर्थः ॥ * ॥ **दीपिका**–गहनत्वद्योतनाय कर्मतत्त्वस्य दुर्ज्ञेयत्वज्ञापनाय द्वितीयप्रश्नस्योत्तरादाने कारणप्रश्नस्य । विहितं संध्यावंदनादि । अकर्मेत्यत्र विरोधे नञ् असुराधर्मवत् । अतस्तद्विपरीतं निषिद्धमिति व्याख्यातम्, तच्च सुरापानादि विकर्मशब्दस्य विहिताकरणत्वरूपोर्थस्तु ' नाचरेद्यः ' इत्यादौ " विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः " इति वक्ष्यमाणमूलस्वारस्यादेव व्याख्यातः " शास्त्रयोनित्वात् " इति न्यायेनेश्वर एवात्मा कारणं यस्य तादृशत्वात् । तत्र स्वरूपज्ञाने अपौरुषेयत्वस्य मोहे हेतुत्वमुपपादयति–पुंवाक्य इति । अपौरुषेये अजीवजाते स्वतःसिद्धे वेदे तु पुरुषाभावात्केवलमित्यादि योज्यम् । तदुक्तं शास्त्रज्ञैः–" वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । वेदाध्ययनसामान्यादधुनाध्ययनं यथा ॥ " इति तात्पर्यं वेदरहस्यम् । अतो वेदतात्पर्यस्य दुर्ज्ञेयत्वात् । तदा प्रश्नकाले बालत्वात्, इति पितुरांतिके तदुक्त्यैवेत्यर्थः ॥ * ॥ **संदर्भः**–ब्रह्मपुत्राणाम दत्तोत्तरत्वे कारणमाह–कर्माकर्मेति । ' नाचरेद्यस्तु ' इति वक्ष्यमाणाद्विकर्मणो विहिताकरणत्वमेवार्थः । वेदस्येश्वरादिति शब्दरूपेण तदाविर्भावविशेषरूपत्वादित्यर्थः । " शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू " इति " वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुमः " इत्युक्तेः, " यदि चास्य महतो भूतस्य निःश्वसितमेतदृग्वेदः " इत्यादिना, " तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छंदाꣳसि जज्ञिरे तस्मात् " इत्यादिना च तत उद्भूतत्वं तथापि तत्रैव तात्पर्यम् अवतारांतरवत्, अपौरुषेयत्वं त्वजीवजातत्वमेव भ्रमादिदोषचतुष्टयनिरसनं हि तावतैव स्यात् । तदेव तस्य परमाचिंत्यस्यात्मत्वं परमपण्डितशिरोमणेर्वचनत्वं वा भवतु भवेदेवाभिप्रायत्वम् ॥ * ॥ इत्थमेव **विश्वनाथोपि** ॥ ४३ ॥ यत्र वाक्ये अन्यथा स्थितोऽर्थः अन्यार्थप्रतिपादकत्वेन स्थितः । परोक्षवादत्वे प्रमाणमाह–तथा चेति । चित्यादिशब्दवच्चतुर्होत्रादिशब्दानामप्यात्मवाचकत्वस्य । " आत्मन्नात्मन्नित्यामंत्रयत । तस्मै चतुर्थꣳहूतः प्रत्यशृणोत् । स चतुर्हूतोऽभवत् । चतुर्हूतो ह वै नामैषः । तं वा एतं चतुर्हूतꣳसंतम् । चतुर्होतेत्याचक्षते परोक्षेण । " इति श्रवणात् । आमंत्रणमनुसंधानं प्रतिश्रवणमुपवक्तुः साक्षात्कार इति । एवं दशहोत्रादिषु योज्यमिति दिक् । हूतशब्दस्य ह्रस्वांतः प्रामादिकः पाठः । तं प्रक्रांतमेतमात्मानम् इत्याचक्षते वदंति परोक्षेण न तु साक्षात्, साक्षात्तु सर्वोऽपि स एव न केवलं चतुर्होतैव " ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ " इति स्मृतेः । परोक्षकथने हेतुः–परोक्षः प्रियो येषां ते परोक्षप्रियाः । इव एवार्थे । हि प्रसिद्धौ, देवाः । देवप्रीत्यर्थं परमेशप्रीत्यर्थम् " यत्परोक्षप्रियो देवो भगवान्मधुसूदनः । परोक्षं मम च प्रियम् " इत्युक्तेः । देवा इति बहुत्वं पूजायाम् । तदेवाह–परोक्षवादत्वमिति । कर्ममोक्षत्वे शंकते–नन्विति । अत्रानुशासने । तल्लाभः खण्डलड्डुलाभः । विशदयति पूर्वोक्तम्–कर्मभिरेवान्तःकरणशुद्धौ बोधोदयेऽज्ञानतत्कार्यकर्मबंधबाधायैव कर्म विधत्ते, यथा–पिता पुत्ररोगापनुत्तये भेषजं पातुमेव मोदकं दर्शयति, तत्र मोदके भेषजे च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेंद्रियः ॥ विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ४६ ॥

डलड्डुकादिभिः प्रलोभयन्पाययति ददाति च तानि नैतावताऽगदपानस्य तल्लाभः प्रयोजनमपि त्वारोग्यम् । तथा वेदोऽप्यवांतरफलैः प्रलोभयन्कर्ममोक्षायैव कर्माणि विधत्ते ॥ ॥ ४४ ॥ ननु कर्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्रथममेव कर्म त्यज्यतामत आह । नाचरेदिति । अजितेंद्रियत्वादज्ञः स्वयं यदि नाचरेत्तर्हि विकर्मणा कर्मानाचरणलक्षणेना

नाभिप्रायः किंतु भेषजेन रोगापनोदे भेषजत्याग एवेति ॥ * ॥ आविः प्रकटं सुज्ञेयं होत्रम् अग्निहोत्रोपलक्षितं कर्म यस्येति निरुक्त्या तद्वर्णने तस्यैव योग्यत्वात्स एवोवाचेति ज्ञेयम् । यत्र वादे परोक्षवादे । श्रुतिं प्रमाणयति–" तं वा एतं प्रसिद्धं मंत्रं पृथिवी होता द्यौरध्वर्युरित्यादिकं चतुर्हूतं चत्वारो होत्रादयो हूयंते श्रूयंते यत्र तादृशं संतमपि नाम्ना चतुर्होतेत्याचक्षते । अथवा तस्य मंत्रस्याभिमाने तेनात्मभूतः कश्चित्पुरुषः प्रत्युत्तरमुवाचेति–स पुरुषश्चतुर्हूतस्तदीयनाम्ना मंत्रोपि चतुर्हूत इत्युच्यते । पूज्यानां प्रत्यक्षनामग्रहणमयुक्तमित्यभिप्रायेण हुतशब्दस्थाने होतृशब्दः । एवं यद्यपि चतुर्हूतमेव निरुक्त्या संगच्छते न तु चतुर्होतेति तथापि परोक्षगदनस्वाभाव्याच्चतुर्होतेत्याचक्षत इत्यर्थः । विधिवाक्यं तु– " प्रजाकामः चतुर्होता यजेत " इति ज्ञेयम् । परोक्षगदने हेतुमाह–" परोक्षप्रिया इव " इति ' परोक्षं मम च प्रियम् ' इति भगवदुक्तेः । कर्ममोक्षाय अनाद्यदृष्टकर्मपरम्परानाशायैव किमुत कर्मत्यागाय शङ्कते–नन्विति । " स्वर्गकामो यजेत " इत्यादौ यागेन स्वर्गं भावयेदित्यर्थात्मभावनया स्वर्गाद्यर्थमेव कर्माणि विधत्ते । परोक्षसिद्धान्तमाह–बालाना मशुद्धचित्तत्वेन स्वाभाविकप्रवृत्तिप्रतिबंधार्थमेवैतानि कर्माणि न तुच्छस्वर्गाद्यर्थमित्यजानतामित्यर्थः । अनुशासनं स्वर्गादिभिः प्रलोभनं यथा स्यात्तथा । अत्रानुशासने । अवांतरफलैर्गौणफलैः ॥ * ॥ **संदर्भः**–अथ तदेव व्यंजयन् क्रमेण नित्यनैमित्तिकान्यपि त्याजयित्वा भगवदर्चनं ग्राहयितुमाह–परोक्षेति । बालानां नातिप्रज्ञानामशांतानामनुशासनरूपोयं कर्मकाण्डलक्षणोपि वेदः कर्ममोक्षाय अनाद्यदृष्टपरंपराशान्तय एव कर्माणि सर्वाण्येव विधत्ते यतः परोक्षवादः स्वयमीश्वरात्मा वेदो हि यन्नित्यनैमित्तिकाकरणे विकरणे च लोकं भीषयते यच्च नित्यादावानुषंगिकं फलं दिशते तत्तत् खलु तत्तत्करणेन तदकरणेन च शोधयित्वाऽनादिदुःखमयकर्ममोक्षार्थमेव प्रवर्तयितुं न तु भयमेव तादृशतुच्छफलमेव वा दातुमिति गम्यते, परमसुहृत्त्वात्तस्येत्यर्थः । तत्र दृष्टांतः–बालानां तादृशस्वभावानामगदं पित्रा तद्दानं यथेति–पिता च रोगशांत्यर्थमेवौषधं पातुं तांस्तथा प्रवर्तयति न त्वौषधपानमेव तस्योद्देश्यमित्यर्थः ॥ * ॥ **विश्वनाथ**श्रीधरौ सममेवाहतुः ॥ ४४ ॥ अत्र पुनराक्षिपति–नन्विति । अज्ञस्य कर्मत्यागे दोषमाह श्रुतिः । तथा चेति–स्वकर्मभिः सुतरामकर्मभिर्वे दोक्तकर्मत्यागेनेति श्रुतिपदार्थः ॥ * ॥ प्रथममेव चित्तशुद्धेः प्रागेव । अजितेंद्रियत्वात् इहामुत्र भोगाविरक्तत्वात् । अज्ञः स्वरूपज्ञानशून्यः भगवत्कथादौ श्रद्धात्मकज्ञानशून्यश्च यः स्वयं नाचरेत्किं त्वात्मानं विज्ञं मत्वाऽन्यान् शिक्षयेदिति स्वयंपदस्यार्थः । कर्मानाचरणलक्षणेन तज्जन्येनाधर्मेण मृत्योर्मृत्युं मृत्युपरंपराम्, वक्ष्यते च–'तावत्कर्माणि कुर्वीत' इत्यादि । तथा च विकर्मणाधर्मेण मृत्युपरंपराप्राप्तौ श्रुतिः प्रमाणं स्वकर्मभिर्वेदोक्तैः स्वध मैंरकृतैः सद्भिः अर्द्यमानः पीड्यमानः अकृतानां तेषां पापजनकत्वात्, यद्वा–स्वकर्मभिः पीड्यमानो दुःखबुद्ध्या तानि त्यजन्नित्यर्थ इति **दीपिका** ॥ * ॥ **संदर्भः**–तत्र यथा बालानां बालचिकित्सैव हिताय स्यात्तदतिक्रम स्त्वहिताय तथा तेषां कर्मतदतिक्रमौ ज्ञेयावित्याह–नाचरेदिति । बालवदजितेन्द्रिय इहामुत्र भोगाविरक्तोपि वेदोक्तं यो नाचरेत्, तथा अज्ञः न विद्यते भगवत्कथादौ श्रद्धारूपा ज्ञा धीवृत्तिर्यस्य स च यो नाचरेत् सोऽपि नित्यनैमित्तिककर्माकरणजेनैवाधर्मेण मृत्योर्मृत्युपैति न तु पुण्येनेत्यर्थः । वक्ष्यते च ' तावत्कर्माणि कुर्वीत ' इत्यादि ॥ * ॥ **विश्वनाथस्तु**–वेदोक्तं प्रातःस्नानसंध्यावंदनादिकं कर्म नाचरेत्तदा " नहि कश्चित्क्षणमपि जातु तिष्ठ त्यकर्मकृत्" इति भगवदुक्तेर्दैहिकव्यापारं विना स्नातुमशक्यत्वात् । अजितेन्द्रिय इतीन्द्रियजयाभावात्पशुरिव प्रातरारभ्यानियतभोजनस्त्रीसंगादिविविधपापनिरत एव स्यात् । यतोऽज्ञो विवेकशून्यः, ततश्च विकर्मणा निषिद्धाचरण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदोक्तमेव कुर्वाणो निःसंगोऽर्पितमीश्वरे ॥ नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥ ४६ ॥

धर्मेण मृत्योरनंतरं मृत्युमेव प्राप्नोति । तथा च श्रुतिः । "मृत्वा पुनर्मृत्युमापद्यंते अर्द्यमानाः स्वकर्मभिः" इति ॥ ४५ ॥ तस्माद्वेदोक्तमेव कुर्वाणो न तु निषिद्धम् । ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं च स्यान्न तु नैष्कर्म्यरूपा सिद्धिरत आह । वेदोक्तमिति । निःसंगोऽनभिनिवेशवान् । ईश्वरेऽर्पितं न तु फलोद्देशेन कृतम् । ननु फलस्य श्रुतत्वात्कर्मणि कृते फलं भवेदेव न रोचनार्थेति । कर्मणि रुच्युत्पादनार्थमगदपाने खंडलड्डुकादिवत् । ततश्च कर्माभिरुच्या वेदार्थं सम्यग्विचारयति । तदा च "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणः" इत्यनात्मज्ञस्यैव कृपणताम् "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति ब्रह्मचर्येण तपसा यज्ञेनानाशकेन" इति यज्ञादीनां ज्ञानशेषतां चावधार्य निष्कामेषु कर्मसु प्रवर्तते । ततश्च "स्वर्गकामो यजेत" इत्यादिभिः कामितस्यैव स्वर्गादेः फलत्वेनावगमादकामितोऽसौ न भवतीति नैष्कर्म्य

लक्षणेनाधर्मेण मृत्योर्यमात् मृत्युं नरकमेव प्राप्नोति । तथा च श्रुतिः—" मृत्वा " इत्यादिका ॥ ४५ ॥ यतो वेदोक्तकर्मत्यागे दोषस्तस्मादित्यर्थः । नैष्कर्म्यसिद्धौ शंकते—नन्विति । फलमनुद्दिश्यापि कृते कर्मणि भोजने तृप्तिवत्फलं भवत्येवेति शङ्कते—नन्विति । " कर्मणा पितृलोकः " इत्यादिश्रुतेः । फलस्य कर्मफलस्य । नेत्याह—रोचनेति । ततश्च फलश्रवणतः तदा च विचारणे कृते च कृपणतां कृपणो यथेह दानभोगादिहीनः परत्र दुःखमनुभवति तथाऽनात्मज्ञोपीति तत्तुल्यताम् ।ज्ञानशेषताम् ज्ञानसाधनताम्।ततश्च तथा च । कामितस्य कामवासनाविषयस्य । अवगमात् बोधात् । अकामितोऽनपेक्षितः । असौ स्वर्गादिः । इति भाव इति—लौकिकाद्भोजनादेर्लौकिकयागादेः कामितत्वोपाधिकृतो भेद इति तात्पर्यम् ॥ * ॥ तस्मात्कर्मत्यागस्य मृत्युहेतुत्वात्।तस्मिन्कर्मणि। तत्फलं कर्मफलम् । नैष्कर्म्यरूपा कर्मनिवृत्तिसाध्यज्ञानरूपा । अनभिनिवेशवान् अहं कर्तेत्यभिनिवेशशून्यः । ततश्च फलश्रवणे सति । तदा च सम्यग्विचारकाले। " यो वा " इति श्रुतिः—हे गार्गि यो जन एतदक्षरं कूटस्थं ब्रह्म विदित्वा ज्ञात्वाऽस्माल्लोकाल्लोकांतरं विषयसुखस्पृहया गच्छति स कृपणो दीनस्तुच्छ इत्यर्थः । इत्यनेन प्रकारेणानात्मज्ञस्य देहाभिमानिनोऽज्ञस्य कृपणतामवधार्य श्रुत्वा तं परोक्षमेतं वेदांतैकवेद्यं परमात्मानं ब्राह्मणा ब्रह्मचारिणो वेदानुवचनेन वेदाध्ययनोपलक्षितस्वधर्मेण विविदिषंति ज्ञातुमिच्छन्ति, एवं वानप्रस्थास्तपसा, श्रद्धयाऽऽस्तिक्येन यज्ञेन च गृहस्थाः, अनाशकेन भोजनसंकोचेन यतयो विविदिषन्ति। दन्त्यसकारपाठेऽनासक्त्येति श्रुत्या ज्ञानशेषतां ज्ञानांगत्वं चावधार्य " यज्ञादिश्रुतेरश्ववत् " इति न्यायात् । ततश्च निष्कामकर्मप्रवृत्त्यनंतरं स्वर्गकाम इति नियोज्य विशेषणेन तस्य श्रुत्यर्थविचारेण निष्कामता चेत् स्वर्गस्याकामितत्वं कामित एव च स्वर्गादिः फलत्वेनावगम्यते यागेन स्वर्गं भावयेदिति । तथा च—संयोगपृथक्त्वन्यायेन वैदिककर्मणां विविदार्थत्वादीश्वरार्पणप्रभावाच्च नैष्कर्म्यापरपर्यायज्ञानभक्तिलक्षणा सिद्धिरित्यर्थः । भक्तिरस्य भजनम् " तदिहामुत्रोपाधिनैराश्येनास्मिन्मनःकल्पनमेतदेव च नैष्कर्म्यम् " इति श्रुतेः, " यदत्र क्रियते कर्म भगवत्परितोषणम् । ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥ " इति स्मृतेश्च ॥ * ॥ **संदर्भस्तु**—ननु कर्म खलु सजातीयत्वात्कर्मवृद्धये एव भवेत् प्रत्युत कथं तन्मोक्षाय भवतु इत्याशंक्योभयत्रापि समाधत्ते—वेदोक्तमिति । तत्र क्रियमाणकर्मण्यासंगं निरस्यति—निःसंग इति । तत्फलावाप्तिं निरस्यति—रोचनार्थेति । तदेतद्धेतुद्वयं कर्मवृद्धये दर्शितम् । तन्मोक्षाय हेतुः—ईश्वरेर्पितमिति । तत्संबंधप्रभावेण संस्कृतत्वादिति भावः । 'आमयो येन भूतानाम्' इत्यादेः ॥ * ॥ **विश्वनाथस्तु**—अत एव परमकारुणिको वेदो भक्तिविमुखानां नराणां पशूनामिवेंद्रियारामत्वातिशयवारणायैव तानुद्दिश्य कर्माणि फलदर्शनया रोचयंस्तथा विधत्ते यथा प्रातरारम्य स्नानादिभिर्विहितानुष्ठानैर्विकर्मण्यवसरमेव ते न प्राप्नुवंति । अनिषिद्धभोजनव्यवायादिषु प्रवर्त्यैव पापेभ्यो भीषयमाणाः स्वदत्तां भीषणां तान्मानयतान्यथा तदाज्ञापालनासामर्थ्यादेव ते नामानयिष्यन्नित्येवं वेदतात्पर्यमवधार्य स्वस्याजितेन्द्रियत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य आशु हृदयग्रंथिं निर्जिहीर्षुः परात्मनः ॥ विधिनोपचरेद्देवं तंत्रोक्तेन च केशवम् ॥४७॥ लब्धानुग्रह आचार्यात्तेन संदर्शितागमः ॥ महापुरुषमभ्यर्चे न्मूर्त्याभिमतयात्मनः ॥ ४८ ॥

सिद्धिर्भवतीति भावः ॥ ४६ ॥ वैदिकं कर्मयोगमुक्त्वा तांत्रिकमाह । य आश्विति । परात्मनः परस्यैव सत आत्मनो जीवस्य हृदयग्रंथिमहंकारबंधं निर्हर्तुमिच्छुः संस्तंत्रोक्तेन च विधिना प्रकारेण भजेत् । तंत्रमागमः । चकाराद्वैदिकेन सह समुच्चयमाह ॥ ४७ ॥ तमेव विधिमाह । लब्धानुग्रह इत्यादिना । तेनाचार्येण संदर्शित

दुर्वारमालक्ष्य विवेकी कर्मैव कर्तुमर्हतीत्याह–वेदोक्तमेवेति । अन्यत्तैः ॥ ४६ ॥ परस्यैव सतः वस्तुतः परस्यैवोपाधितो जीवभावं प्राप्तस्य । आगमः पांचरात्रादिः ॥ * ॥ दीपिका–वैदिकं बालान्प्रति ज्ञानसाधनत्वेन कर्मयोगमुक्त्वा विज्ञान्प्रति तांत्रिकं नारदपंचरात्राद्युक्तं साक्षाद्भक्त्यात्मकमर्चनलक्षणं कर्मयोगमाहेत्यर्थः । परस्यैव वस्तुतोऽहंकारादिद्रष्टृत्वेन दृश्यात्तस्मात्परस्यैव ॥ * ॥ संदर्भोपि–तदेवमपि बालान्प्रत्युक्तं विज्ञान्प्रति तु श्रूयतामिति श्रीभगवदर्चनामेव ग्राहयति–य इति । चकारेण पाद्याद्युपचरणैर्वैदिकमंत्रानपि गृह्णाति । अन्यत्तैः ॥ ४७ ॥ तमेवागमोक्तमेव । महापुरुषं विष्णुम् । आत्मनः स्वस्य । अभिमतया प्रियया । एतेन हरेर्मूर्तेर्बहुत्वमुक्तम् । केचित्पामरा मूर्तिपूजामवैदिकीं मन्यंते "न तस्य प्रतिमास्ति" इति श्रुत्यवष्टंभेन ते चाथर्वशिरःस्थया श्रीरामतापनीस्थया "अविमुक्ते तव क्षेत्रे सर्वेषां मुक्तिसिद्धये । अहं सन्निहितस्तत्र पाषाणप्रतिमादिषु ॥ क्षेत्रेऽस्मिन्योर्चयेद्भक्त्या मंत्रेणानेन मां शिव ॥ ब्रह्महत्यादिपापेभ्यो मोक्षयिष्यामि मा शुचः । " इत्यादिकश्रुतिसंहत्या निराकार्याः । आदिना धात्वादिप्रतिमा ज्ञेयाः। " न तस्य प्रतिमा " इत्यादिश्रुतौ प्रतिमापदमुपमापरं न मूर्तिपरमिति प्रतिमाबहुत्वमवताराभिप्रायं वा वक्ष्यमाणशैलीलौहीदारुमयीत्याद्यभिप्रायम् । लब्धानुग्रहः प्राप्तदीक्षः । आचार्यश्च ब्राह्मण एव सोऽपि गृहस्थ एव । तदुक्तमगस्त्यसंहितायाम्–" तत्त्वज्ञो यंत्रमंत्राणां पुरश्चर्यारतः सदा । तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥" पाद्मेपि–" महाभागवतश्रेष्ठो ब्राह्मणो वै गुरुर्नृणाम् । सर्वेषामेव लोकानामसौ पूज्यो यथा हरिः ॥" तत्रैव–" आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः। ब्राह्मणो वीतरागश्च क्रोधलोभविवर्जितः ॥ " श्रुतिरपि–" तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् " इति श्रुत्युक्तं श्रोत्रियत्वं ब्राह्मण एव पर्यवस्यति " श्रोत्रियो ब्राह्मणो ज्ञेयो न वैश्यो नैव बाहुजः । वेदाध्ययनसाम्येपि पुरुषोत्तमशब्दवत् ॥ " " हरिर्यथा वै पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापरः । इन्द्रो यथा वै शतमन्युरुच्यते विप्रस्तथा श्रोत्रिय एव सम्मतः ॥ " इति संहितोक्तेः । अत्रैवकारो विप्रपदेनैवान्वेति विप्र एव श्रोत्रिय इत्यर्थः । तदुक्तं देवलस्मृतौ–" एकां शाखां सकल्पां वा षड्भिरंगैरधीत्य वा । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥ " इति । किञ्च–" जन्मना ब्राह्मणो ज्ञेयः संस्काराद्द्विज उच्यते । विद्याभ्यासाद्भवेद्विप्रस्त्रिभिः श्रोत्रियशब्दभाक् ॥ " इति याज्ञवल्क्येनाप्ययमर्थ उपबृंहितः । रूढिर्योगमपहरतीति पंकजादिवदयं न्यायोऽत्रानुसंधेयः । " ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः कथ्यते बुधैः " इति जातूकर्ण्योक्तेः । यच्च " जन्मना जायते शूद्रः संस्काराद्द्विजसंज्ञिकः" इति केनचिद्यथाजातेनोक्तं तन्न संपनीपद्यते "न हि गवोर्महिषोत्पत्तिर्न हेम्नो लोहसंभवः । यथा कथं तदा शूद्रो विप्रयोर्जायते वद ॥" इति निर्णयसारे आक्षेपस्य दृष्टत्वात् । "वर्णोत्कृष्टो न लभते हीनवर्णस्य शिष्यताम् । हीनवर्णोपि न गुरुर्वर्णोत्कृष्टस्य जायते ॥ वर्णोत्कृष्टो हीनवर्णं गुरुं मोहाद्यदाऽऽचरेत् । प्रायश्चित्तं तदा कृत्वा गुरुं विप्रं समाश्रयेत् ॥ अन्यथा गुरुशिष्यौ तौ जायेते नरकौकसौ । परीक्ष्यैव गुरुः कार्यः शिष्योपीह परीक्ष्य च । अपरीक्षितकार्येण पश्चाद् दुःखं प्रजायते॥ " ब्राह्मणविषये विशेषमाह वाराहे–"ब्राह्मणः स्वेतरान्वर्णान्गुरून्मोहात्करोति यः । स याति नरकं घोरं विपन्नोपि भवेद् ध्रुवम् ॥ ब्राह्मणो नीचवर्णेभ्यो मंत्रग्रहणमाचरन् । न मंत्रफलमाप्नोति श्वयोनिञ्चाधिगच्छति ॥ " । वाराहे एव–" उत्तमायाधमो वर्णो मंत्रं यस्तु प्रयच्छति । स याति पतितो भूत्वा श्वचांडालादियोनिषु ॥ ब्राह्मणः क्षत्रियो वापि वैश्यो वा मोहमाश्रितः । न कुर्याद्धीनवर्णेभ्यो मंत्रादानं कदाचन ॥ " । भविष्येऽपि–" शृणु राजेन्द्र वक्ष्यामि मंत्रग्रहणमुत्तमम् । ब्राह्मणं श्रोत्रियं शुद्धं नारायणपरायणम् ॥ प्रणम्य विधिवद्भक्त्या मंत्रं गृह्णीत संशतः । यो मोहादन्यवर्णेभ्यो मंत्रं गृह्णाति कर्हिचित् । वेषांतरमितेभ्योऽपि न स कल्याणभाग्भवेत् ॥ अतः कार्यो गुरुर्विप्रो गृहस्थो गृहिभिः सदा । " इति । यत्तूक्तम्–" अवैष्णवोपदिष्टेन मंत्रेण निरयं व्रजेत् "

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुचिः संमुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य सन्न्यासकृतरक्षोऽर्चयेद्धरिम् ॥ ४९ ॥

आगमोऽर्चनप्रकारो यस्य सः ॥ ४८ ॥ मूर्तेः संमुखमासीनः । आदिशब्देन भूतशुद्ध्यादिभिः पिंडं देहं विशोध्य सन्न्यासैः सद्भिर्न्यासैः मातृकान्यासादिभिः कृता

तत्रापि–“ ब्राह्मणा वैष्णवा मुख्या यतो विष्णुमुखोद्भवाः । अंगेषु देवताः सर्वा मुखे वेदा व्यवस्थिताः ॥ विप्रैः कृता वैष्णवास्तु त्रयो वर्णा भवंति हि । ” इत्यादिपुराणीयवृंदावनमाहात्म्यवाक्येन समाधेयम् । किं च–“ अन्योन्यं गुरवो विप्रा न ह्येषामपरो गुरुः । वर्णानामाश्रमाणाञ्च गुरुर्विप्रः सदा विभो ॥ सेव्य एव हि सर्वेषां विप्रो राजर्षिसत्तम । देवानां दानवानां च मनुष्याणाञ्च का कथा ॥ आरोपयंति ये विप्रे सेवकत्वं नराधमाः । ज्ञेयास्ते सर्वथा पापा अंते निरयगामिनः ॥ ” इति पुराणान्तरात् । गृहस्थेतरविप्रदीक्षापि न ग्राह्या । “ यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनाम् । विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिका ॥ ” इति गणेशविमर्षिण्याम् । एतच्च सर्वं कल्याणार्थदेवतामंत्रग्रहणपरं बोध्यम् “ यदि भाग्यवशेनैव सिद्धविद्यां लभेत्प्रिये । तदैव तां तु गृह्णीयात्त्यक्त्वा गुरुविचारणाम् ॥ ” इति यामलोक्तेः । किञ्च– “ यः शूद्रो लिंगधृग्भूत्वा ब्राह्मणं दीक्षयेत्क्वचित् । नृपस्तस्याखिलं चर्म कृत्त्वाऽऽपूर्य बुसेन तत् ॥ अधोमुखं लम्बयेत्तं प्रकटय्य चतुष्पथे । नो चेत्तं शमनः क्ष्मेशं तद्विधं प्रकरिष्यति ॥ ” । अन्यच्च–“स त्याज्योन्त्यजवन्नित्यं दैवे पित्र्ये च कर्मणि । योऽधीते लिङ्गिनः शूद्राद्वेदाङ्गादि द्विजोत्तमः ॥ न तस्य निष्कृतिर्दृष्टा धर्मशास्त्रपुराणयोः । न स विप्रः परिज्ञेयः शूद्र एव न तत्समः ॥ तदर्चको विप्रधिया सान्वयो नरकं व्रजेत् । ” इति नारदवरतन्तुसंहिताभ्यामिति सर्वार्थचिन्तामणौ । हीनवर्णगुरुतदुच्छिष्टाशनप्रायश्चित्तमपि संहितायाम्–“ हीनवर्णगुरूच्छिष्टभक्षणे निष्कृतिं चरेत् । चांद्रायणत्रयं कृच्छ्रदशकं ब्रह्मकूर्चकम् ॥ गंगाम्बुपानं मासं वा गोदानदशकं तथा । गायत्र्या लक्षमेकं च ब्राह्मीपानं च यावकम् ॥ मासद्वयं ततो विप्रान्संभोज्योपनयेत्पुनः । उच्छिष्टाभक्षणे चैव दत्त्वा गा विप्रसेवनम् ॥ मासं कृत्वोपनयनं कुर्यात्तेन ततो शुचिः । ” इति । गुरोरपि प्रायश्चित्तं तत्रैवोक्तम्–“ प्रमादादुत्तमं वर्णं शिष्यं कृत्वाऽधमो गुरुः । जापयेल्लक्षगायत्रीं ब्राह्मणान्भोजयेद्बहून् ॥ गा दद्याद्बालवद्विप्रे ततः पूतो भवेत्पुनः । ” इति । बाला विद्यंते यस्य स बालवान् स चासौ विप्रस्तस्मिंस्तथा, चतुर्थ्यर्थे सप्तमीत्यलं प्रसक्तानुप्रसक्तेन ॥ * ॥ **दीपिका**–तमेव विधिं तत्रोक्तमेव प्रकारं महापुरुषमित्युक्त्या समान्यतः सर्वासामपि प्राप्तौ आत्मनः स्वस्याभिमतया प्रेष्ठयेत्युक्तम् ॥ ४८ ॥ भूतशुद्धिप्रकारस्तु मंत्रशास्त्र उक्तः–“ मूलाधारे कुंडलिनीं ध्यात्वा सुषुम्नामार्गेण हृदिस्थं जीवं ब्रह्मणि हंस इति विलाप्य पादादिजान्वंतं पृथिवीं लंबीजयुतां ध्यात्वा जान्वादिनाभ्यन्तं वंबीजयुतं जलं ध्यात्वा नाभ्यादिहृदयान्तं रंबीजयुतं वह्निं ध्यात्वा हृदादिभ्रूमध्यान्तं यंबीजयुतं वायुं ध्यात्वा भ्रूमध्यादिब्रह्मरन्ध्रान्तं हंबीजयुतमाकाशं ध्यात्वा भूतानि प्रत्येकं संविलापयेत् । पृथ्वीमप्सु संहरामि जलमग्नौ संह० अग्निं वायौ संह० वायुमाकाशे संह० आकाशमहंकारे संह० अहंकारं महत्तत्त्वे सं० महान्तं प्रकृतौ सं० प्रकृतिं शुद्धब्रह्मणि सं० आत्मानं ब्रह्माहमस्मीति ध्यात्वा दक्षकुक्षावधोमुखं पापपुरुषं ध्यात्वा यमितिबीजेन द्वात्रिंशद्वारमावर्तितेन वामनासया वायुमापूर्य रमिति बीजेन चतुःषष्टिवारमावर्तितेन कुंभकं कृत्वा पुनर्यमिति बीजेन षोडशवारमावर्तितेन पापभस्मदक्षनासया रेचयेत्, ततस्तं पापपुरुषं दग्धं भावयेत् । ततो वमित्यमृतबीजेन देहोत्थं भस्म संप्लाव्य लमिति बीजेनैकीकृत्य सुवर्णं भावयित्वा हमिति बीजेन सर्वांगान्युद्धृत्य कनकमयं शरीरं धात्वा पुनः “आत्मनः सकाशादाकाशः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी”इति भूतान्युत्पाद्य स्वस्थानगानि ध्यात्वा ‘सोहम्’इति मंत्रेण कुंडलिनीसहितं जीवं हृद्यानीय सुधामयं जीवं हृदि निधाय कुंडलिनीं मूलाधारगतां ध्यायेत् ” इति भूतशुद्धिप्रकारः ॥ प्राणप्रतिष्ठाप्यत्र कार्या–“ अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुःसामानि च्छंदांसि, प्राणशक्तिर्देवता, आं बीजम्, क्रों शक्तिः, प्राणस्थापने विनियोगः । ब्रह्मविष्णुरुद्रेभ्यो नमः शिरसि । ऋग्यजुःसामभ्यो नमो मुखे । प्राणशक्त्यै नमो हृदये । आंबीजाय नमो गुह्ये । क्रोंशक्त्यै नमः पादयोः । इति ऋष्यादिन्यासः ॥ ङं कं खं घं गं आकाशवायुवह्निजलपृथिव्यात्मने हृदयाय नमः । ञं चं छं झं जं शब्दस्पर्शरूपरसगंधात्मने शिरसे स्वाहा । णं टं ठं ढं डं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने शिखायै वषट् । नं तं थं धं दं वाक्पाणिपादपायूपस्थात्मने कवचाय हुम् । मं पं फं भं बं वक्तव्यादानगमनविसर्गानंदात्मने नेत्रत्रयाय वौषट् । शं यं रं वं लं षं क्षं हं सं मनोबुद्ध्यहंकारचित्तात्मनेऽस्त्राय फट् । ततः प्राणशक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्चादौ हृदये चापि यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनम् ॥ ५० ॥ पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः॥
हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत् ॥ ५१ ॥ सांगोपांगां सपार्षदां तांतां मूर्तिं स्वमंत्रतः ॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥५२॥
गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिम् ॥ ५३ ॥

रक्षा येन सः ॥ ४९ ॥ आदावेव द्रव्याणि पुष्पादीनि जंत्वादिशोधनेन क्षितिं संमार्जनादिना आत्मानमव्यग्रतया लिंगं मूर्तिमनुलेपक्षालनादिना निष्पाद्य योग्यानि कृत्वा ॥ ५० ॥ पाद्यादिपात्राण्युपकल्प्य सन्निधाप्य हृदि संपूजितं श्रीमूर्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैर्मूलमंत्रेण च देवे कृतन्यासो मूलमंत्रेणार्चयेत् ॥ ५१ ॥ अंगानि हृदयादीन्युपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां,सपरिवाराम् । कैरुपचारैरर्चयेत्तदाह । पाद्येति । आदिशब्देन मधुपर्कमाचमनं च ॥ ५२ ॥ अक्षतास्तिलकालंकारे न तु पूजायाम् । " नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वरम् " इति निषेधात् । उपहारो नैवेद्यम् ॥ ५३ ॥

ध्यात्वा मनसा संपूज्य हृदये करं निधाय आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं सं हं सः मम प्राणा इह प्राणाः । आं ह्रीं क्रोमित्याद्युच्चार्य मम जीव इह स्थितः । आं ह्रीं मम सर्वेन्द्रियाणि । आं ह्रीं मम वाङ्मनश्चक्षुःश्रोत्रघ्राणपदाः प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा । ॐ क्षं सं हं सः ह्रीं ॐ अष्टत्रिंशदधिकशताक्षरममुं प्राणप्रतिष्ठामंत्रं त्रिवारं जपित्वा षोडशप्रणवान् जपेत् ॥ " इति प्राणप्रतिष्ठा इत्यलम् ॥ सद्भिर्वर्णपदमातृकादिन्यासैः कृता रक्षाऽऽत्मनः कर्मणो वा येन स तथा । " भूतप्रेतादिभिश्चैव कृतन्यासो न हन्यते " इत्युक्तेः, " न्यासेन रहितं कर्म त्वर्द्धं गृह्णंति राक्षसाः " इत्युक्तेश्च ॥ * ॥ दीपिका—भूतशुद्ध्यादिपदेन तत्सेवोपयोगिपार्षदमूर्तिचिंतनपरिग्रहः । भूतशुद्धिर्व्याख्यास्यते सद्भिः केशवादिभिः ॥ ४९ ॥ अर्चादावित्यत्रादिना स्थंडिलादिग्रहः । जंत्वादिना गलितपत्रादिग्रहः । संमार्जनादिना लेपनादिग्रहः । क्षालनादिना वस्त्रासनशोधनादिग्रहः ॥ * ॥ अर्चादाविति युग्मकम् । सन्निधाप्य यथायोग्यस्थाने स्थापयित्वा । अर्चादावित्यादिना वक्ष्यमाणसूर्यादिग्रहः । सन्निधाप्येत्यस्यैव व्याख्यानम्—श्रीमूर्तौ ध्यात्वेति, मनसान्तरं श्रीमूर्तिरूपेण श्रीकृष्णं संनिधाप्येति वा । हृदयाय नमः शिरसे स्वाहा । शिखायै वषट् कवचाय हुम् । नेत्राभ्यां वौषट् अस्त्राय फडित्येवं मंत्रैर्मूलमंत्रेणाष्टादशाक्षरद्वादशाक्षरादिना स्वगुरूपदिष्टमंत्रेण वा ॥५०॥ पाद्यादीत्यत्रादिनाऽर्घ्याचमनीयादिग्रहः । उपकल्प्य सप्तविंशाध्यायव्याख्याने वक्ष्यमाणद्रव्यैः संपाद्य । हृदि संपूजितं प्रथमं हृदये मानसोपचारैः संपूजितं पश्चात्तमेव श्रीमूर्तौ पाषाणादिविग्रहे । मूलमंत्रलक्षणं गारुड उक्तम्—" आदावोंकारमुच्चार्य नमोंते मध्यदेशके । देवतायाः स्वकं नाम मूलमंत्रः प्रकीर्तितः ॥ " इति । यथा—' ॐ विष्णवे नमः ' इत्यादि । यद्वा—मूलमंत्रो वैदिकस्तत्तद्देवतामंत्रो मंत्रशास्त्रविहितो वा यथाधिकारविहितः । अर्चयेत्सर्वोपचारान्समर्पयेत् । उपचाराश्च षोडश मंत्रशास्त्रे विहिताः—" पाद्यार्घ्याचमनीयं च स्नानं वसनभूषणे । गंधपुष्पधूपदीपनैवेद्याचमनं तथा । तांबूलमर्चना स्तोत्रं तर्पणं च नमस्क्रिया । प्रयोजयेत्प्रपूजायामुपचारांश्च षोडश ॥ " इति । दशोपचाराश्च—" पाद्यार्घ्याचमनीयं च मधुपर्काचमं तथा । गंधादयो नैवेद्यांता उपचारा दश क्रमात् ॥ " पंचोपचाराश्च—" गंधं पुष्पं तथा धूपं दीपं नैवेद्यमेव च " इति । क्वचिच्चतुःषष्ट्युपचारा अप्युक्तास्ते च महापूजायां, न नित्यपूजायामशक्यसंपाद्यत्वात् ॥ * ॥ ० ॥ ५१ ॥ सपरिवारां शक्तिपार्षदायुधादिसंयुताम् ॥ * ॥ सांगेत्यादि युग्मकम् । वस्त्रभूषणानां प्रत्यहं प्रोक्षणं कृत्वा समर्पणमिति " वासोभूषोपवीतानि प्रत्यहं प्रोक्ष्य चार्पयेत् । नैर्माल्यकालात्प्रागेव नैर्माल्ये त्वपरं ददेत् ॥ " इति तंत्रसारादेः । नैर्माल्यकालमग्रे वक्ष्यामः ॥ ५२ ॥ स्तवैः श्रौतागमपौराणैः स्तोत्रैः । नमेद्दंडवदित्यर्थः ॥ * ॥ अक्षता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानं तन्मयं ध्यायन्मूर्तिं संपूजयेद्धरेः ॥ शेषामाधाय शिरसा स्वधाम्न्युद्वास्य सत्कृतम् ॥ ५४ ॥ एवमभ्यर्कतोयादावतिथौ हृदये च यः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥ इति श्रीमद्भा० महापुराण एकादशस्कंधे वसुदेवनारदसंवादे जायंतेयोपाख्याने विदेहप्रश्ने तृतीयोऽध्यायः ॥ ३ ॥ ॥ राजोवाच ॥ यानियानीह कर्माणि यैर्यैः स्वच्छंदजन्मभिः ॥ चक्रे करोति कर्ता वा हरिस्तानि ब्रुवंतु नः ॥१॥ द्रुमिल उवाच॥ यो वा अनंतस्य गुणाननंताननुक्रमिष्यन्स तु बालबुद्धिः ॥ रजांसि भूमेर्गणयेत्कथंचित्कालेन नैवाखिलशक्तिधाम्नः ॥ २ ॥ भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् ॥ स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ॥ ३ ॥

शेषा निर्माल्यम् । स्वधाम्नि स्वस्थाने । देवं हृदि मूर्तिं करंडके उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः ॥५४॥ तांत्रिकं कर्मयोगमुपसंहरति । एवमिति ॥५५॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां तृतीयोऽध्यायः ॥३॥ चतुर्थे त्ववतारेहाप्रश्नस्योत्तरमुक्तवान् ॥ जयंतीनंदनो नाम्ना द्रुमिलो नवसत्तमः ॥ १ ॥ "मूर्त्याभिमतयाऽऽत्मनः" इत्यनेनात्मनः प्रियमवतारं पूजयेदित्युक्तेऽवतारज्ञानमपेक्षितम् । तथा "स्तवैः स्तुत्वा नमेद्धरिम्" इत्युक्ते गुणकर्मज्ञानं चापेक्षितमतः पृच्छति । यानियानीति । कर्ता करिष्यति ॥ १ ॥ त्वया पृष्टानि कालत्रयसंबंधिसकलावतारगुणकर्माणि कथयितुमशक्यानि संक्षेपतस्तु कानिचित्कथयिष्यामीत्याह यो वा इत्यादिना । अनुक्रमिष्यन्गणयितुमिच्छति यः स तु बालानामिव बुद्धिर्यस्य स मंदमतिः । कालेन महता । कोऽपि महामतिः । रजांसि गणयेदप्यखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्य भगवतो गुणांस्तु नैव गणयेत् । तथा च श्रुतिः "विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि" इत्यादि ॥ २ ॥ तत्रादौ पुरुषावतारमाह । भूतैरिति । यदा

श्चानुपहताश्च ताः स्रज इति वा ॥ ५३ ॥ तन्मयं तत्स्वरूपम् । 'नाऽविष्णुरर्चयेद्विष्णुम्' इत्यादिशास्त्रात् ॥ * ॥ आत्मानं तन्मयं तदाविष्टं ध्यायन् "नारायणमयं धीराः पश्यन्ति परमार्थिनः" इत्यादिवत् । स्वधाम्नि श्रीकृष्णमूर्तिस्थाने उद्वास्योत्थाप्य शयनादिमुद्रया स्थापयित्वा । यद्वा—स्वधाम्नि प्रदेशविशेषे उद्वास्य इत उत्थाप्य शयनलीलायमानत्वेन ध्यात्वा ॥५४॥ सोऽर्चकः ॥ * ॥ संभवेनान्यान्यपि पूजांगान्याह—एवमग्न्यादिना । इति संदर्भः ॥ ५५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ अवताराणामीहा लीला तस्याः प्रश्नस्योत्तरम् । नवसु सत्तमो नवसत्तमः (१) । यतोऽपेक्षितमतो हेतोः । इह लोके । स्वानां स्वस्य च छंद इच्छा तेन । जन्मभिराविर्भावैः । कर्तेति भवष्यति लुट् ॥ * ॥ अवतारेहाऽवतारलीला । नवसु सत्तमः "मूर्त्याभिमतया" इति श्रुतेः । भगवतः कियत्यो मूर्तय इत्यवतारजिज्ञासा तथा "स्तवैः स्तुत्वा नमेद्धरिम्" इति श्रुतेस्तस्य कियंति गुणचरितानि स्तव्यानीति चरितेपि जिज्ञासेत्यतः पृच्छति—यानीति ॥ १ ॥ प्रश्नस्य कात्स्न्येनोत्तरदानं तु सर्वथाऽशक्यमित्याह—विष्णुःवीर्यगणनाशक्यत्वे प्रमाणमाह—तथा चेति । कं कः न कोपीत्यर्थः । व्याख्यातेयं श्रुतिर्द्वितीयस्कंधे ॥ * ॥ द्रुमिल इति—द्रु द्रुतमवतारैः स्फूर्तिप्राप्तैर्मिलतीति द्रुमिलः । यद्वा—द्रावयंति स्वाविर्भावेनाधर्मं दुष्टदैत्यादीन्वा ते द्रवयः 'यदायदा हि धर्मस्य ग्लानिर्भवति' इत्याद्युक्तेस्तान्मिलति शास्त्रजध्यानेन संयुनक्तीति द्रुमिल इति निरुक्त्या तस्यैव सर्वावतारगुणकर्मादियाथार्थ्यविज्ञानात्स एवोवाचेति ज्ञेयम् । कोपि महामतिरिति कर्तुराक्षेपाल्लाभः । गणयेदपीति तद्गणनं संभवतीति । विष्णोर्गुणानामगण्यत्वे श्रुतिं प्रमाणपति—यः कविः पार्थिवानि रजांसि विममे गणितवान्सोपि विष्णोर्वीर्याणि कं कः प्रावोचं प्रावोचदित्यर्थः ॥ २ ॥ तत्र तेषु स्वच्छन्दावतारेषु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेंद्रियाणि ॥ ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्त्वादिभिः स्थितिलयोद्भव आदिकर्ता ॥४॥
आदावभूच्छतधृती रजसाऽस्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः॥रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु॥५॥

स्वसृष्टैर्भूतैर्विराजं ब्रह्मांडं पुरं निर्माय तस्मिन् लीलया प्रविष्टो न तु भोक्तृत्वेन । प्रभूतपुण्यस्य जीवस्य तत्र भोक्तृत्वात् ॥ ३ ॥ अस्य गुणकर्माण्याह द्वयेन । यत्काय इति । यस्याधिष्ठेयः काय एषः । काय इति सप्तमी वा । तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानकर्मेंद्रियाणि यस्य स्वतः स्वरूपभूतात्सत्त्वात्तनुभृतां ज्ञानम् यस्य स्वतःसिद्धं ज्ञानमिति वा । यस्य श्वसनतः प्राणाद्बलं देहशक्तिः ओज इंद्रियशक्तिः ईहा क्रिया । यश्च सत्त्वादिभिर्विश्वस्य स्थितिलयोद्भवे आदिकर्ता ॥ ४ ॥ आदिकर्तेत्यनेन तत्पूर्वकं कर्त्रंतरमपि सूचितं तद्दर्शयितुं गुणावतारद्वारा चराचरसृष्ट्यादिकर्तृत्वमाह । आदाविति । यस्येत्यनुषंगः । यस्य रजसाऽस्य जगतः सर्गे कार्ये शतधृतिः ब्रह्माऽभूत् । स्थितौ च विष्णुर्यस्य सत्त्वेनेति शेषः । क्रतुपतिस्तत्फलदाता । द्विजातीनां तद्धर्माणां च सेतुः पालक इत्यर्थः । यस्य तमसाऽस्याप्ययाय संहाराय रुद्रोऽभूत् । इत्येतैर्ब्रह्मा

तस्मिन्विराजाख्यपुरे । स्वांशेन चिच्छक्त्या । प्रभूतपुण्यस्य बहुपुण्यस्य । तत्र विराडाख्यसमष्टिस्थूलप्रपंचरूपदेहे बहुपुण्यवशाज्जीव एव वैराजत्वमाप्नोतीत्यर्थः । वस्तुतस्तु सोऽपीश एवेत्याह—नारायण आदिदेव इति । नारायण एव स्वमायया विराडादिभावं प्राप्नोतीति भावः ॥ * ॥ दीपिका—तत्र तेष्ववतारेषु । तस्मिन्ब्रह्माण्डे । स्वांशेनांतर्यामिरूपेण । लीलया नियमनलीलया प्रविष्टः न तु भोक्तृत्वेन । "अनश्नन्नन्योऽभिचाकशीति" इति श्रुतिविरोधात्, 'स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिंचितामेति' इत्युक्तेः। प्रभूतं प्रचुरं पुण्यं यस्य तस्य हिरण्यगर्भाख्यसमष्ट्यभिमानिनो जीवस्य । तत्र ब्रह्माण्डे । भोक्तृत्वात् भोक्तृत्वाधिकारात् । यदा स्वांशेन प्रविष्टस्तदा पुरुषाभिधानं पुरुषसंज्ञामवाप आदिदेवो नारायणो भगवान् " नारायणस्तुरीयाख्यो भगवच्छब्दशाब्दितः " इत्यादेः । यदा महत्स्रष्टृत्वेन पुरुषाभिधानमवाप तदा भूतैर्विराजं विरचय्य तस्मिन् स्वांशेनांतर्यामितया प्रविष्टो भूत्दिति **संदर्भोदयः** ॥ ३ ॥ यस्य पुरुषाभिधानस्याधिष्ठातुं योग्योऽधिष्ठेय एष प्रसिद्धः प्रपञ्चः । एतेन जगत आधारत्वं पुरुषस्याधेयत्वमाधेयापेक्षयाधारस्यैव महत्त्वमाधेयस्याल्पत्वं च भवतीति भगवतोऽल्पत्वस्यानौचित्यादाह—सप्तमी वेति । तनुभृत्त्वाविशेषात्तस्यापि ज्ञानमन्यत एव स्यादत आह—यस्य स्वतः सिद्धमिति । स्थितिश्च लयश्चोद्भवश्चेति समाहारद्वंद्वे सप्तम्यन्तम् ॥ * ॥ **दीपिका**—अस्य पुरुषावतारस्य गर्भोदशायिनः । यस्य ब्रह्माण्डप्रविष्टस्य ' द्वितीयं त्वंडसंस्थितम् ' इत्युक्तेरधिष्ठेयो नियम्यः । सप्तमीपक्षे तु नवीनोपासकानां चित्तस्थैर्यार्थं यस्य काय एव भुवनत्रयसंन्निवेशः ' पातालमेतस्य हि पादमूलम् ' इत्यादिशास्त्रेण कल्पितः । यद्वा—काय इति सप्तमी तृतीयार्थे, यस्य कायेनैव भुवनत्रयसन्निवेशो भवति " भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोस्य नाभितः" इत्यादेः । ज्ञानकर्मेंद्रियाणि यस्येंद्रियैर्भवंति 'वाचां वह्नेर्मुखं क्षेत्रम्' इत्यादेः । स्वत इत्यस्य व्याख्या स्वरूपभूतसत्त्वादिति । यस्य स्वरूपभूताविशुद्धसत्त्वादेव तनुभृतां ज्ञानं भवति । पूर्वार्धे विशेष्यस्य सत्त्वस्याध्याहार उत्तरार्धे तु यस्य स्वतःसिद्धं ज्ञानामिति सर्वज्ञत्वमुक्तम्"शास्त्रयोनित्वात्"इति न्यायोऽप्यत्रानुसन्धेयः॥*॥**संदर्भोऽपी**त्थमेव॥ ॥*॥ **विश्वनाथस्तु**—यस्य महाविष्णोः काये भुवनत्रयाणामूर्ध्वाधोमध्यभुवनमयानां कोटिकोटिब्रह्मांडानां प्रतिरोमकूपगतत्वेन सन्निवेशो भवति।तनुभृतामिति—यस्य स्वतः स्वांशभूतादंतर्यामित एव तनुभृतां ज्ञानम् । अन्यत्तैः ॥४॥तत्पूर्वकं पुरुषावतारपूर्वकम् । तत् कर्त्रन्तरत्वम्। गुणोपाधिका अवतारा ब्रह्मविष्णुरुद्रा गुणावताराः तद्द्वारा तान्द्वारीकृत्य। यस्य पुरुषस्य । रजसा रजःशक्त्या।सर्गे सर्गार्थम्, निमित्ते सप्तमी ।"शतानंदः शतधृतिः पंकजोद्भव आत्मभूः" इति धरणिः । तत्फलदाता क्रतुफलदाता । तद्धर्माणां द्विजातिधर्माणाम् । इत्यर्थ इति—सेतुरिव रक्षक इति भावः । सततं प्रतिकल्पम् ॥ * ॥ तत्पूर्वकम्—स पुरुष एव पूर्वः यस्य कर्त्रन्तरस्य तत्तथा । तद्दर्शयितुं ब्रह्मादिलक्षणं कर्त्रंतरं ज्ञापयितुं, यस्येत्यनुषङ्गः। यस्येंद्रियैरिहान्वितस्य यच्छब्दस्य पुनः संबंध इति ॥ * ॥ एवं **संदर्भस्तु**—तस्माद्गुणावतारमाह—सर्गे विसर्गे विष्णुः, सत्त्वेनेत्यनुक्तिस्तस्य शुद्धरूपत्वात, सान्निध्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नरऋषिप्रवरः प्रशांतः ॥ नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋषिवर्यनिषेवितांघ्रिः ॥६॥
इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपाख्यम् ॥ गत्वाप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥
विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् ॥ मा भैर्विभो मदनमारुतदेववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वम् ॥ ८ ॥

दिभिर्निमित्तभूतैः प्रजासूद्भवादयो यतो भवंति स आद्यः पुरुष इत्यन्वयः ॥ ५ ॥ नरनारायणावतारमाह । धर्मस्येति । धर्मस्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेनाजनिष्ट जातः । तच्चरितमाह । नैष्कर्म्यमात्मस्वरूपं लक्ष्यते येन तत्कर्म कर्मनिर्हाररूपं वा उवाच नारदादिभ्यः स्वयं चचार च । योऽद्यापि कर्माचरन्नास्ते । ऋषिवर्यैर्निषेवितावंघ्री यस्य सः ॥ ६ ॥ भगवदवतारत्वद्योतकं परमोपशमं दर्शयितुमितिहासमाह इंद्र इति दशभिः । धाम स्थानं तपसा ग्रहीतुमिच्छतीति विशंक्य तपोनाशाय कामं सपरिवारं प्रेषयामास । स कामो बदरीभिरुपाख्यायते यस्तं तस्याश्रममप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येव इषवो बाणास्तैः । न तस्य महि महिमानं जानातीत्यतन्महिज्ञः ॥ ७ ॥ अक्रममपराधम् । अहो अहं धीर इति विस्मयो गर्वस्तद्रहितः । एजमानान् शापभिया कंपमानान् । भो विभो समर्थ मदन मारुत हे देववध्वः कामवाय्वप्सरसः मा भैष्ट । बलिमातिथ्यम् । तान्प्रार्थयते । इममस्माकमाश्रममशून्यं पूर्णं कुरुध्वम् । आतिथ्याभावे शून्यप्रायः स्या

नैव सत्त्वगुणोपकारकत्वाच्च ॥ ५ ॥ तच्चरितं नरनारायणचरितम् । कृतावतारप्रयोजनोऽपि लोकानुग्रहकातरो भूमावेकत्राश्रमविशेष आस्त इत्याह—योद्यापीति । ऋषिवर्यैर्नारदाद्यैः ॥ * ॥ निर्गतं कर्म कर्तृत्वं यस्मात्तदकर्तृ आत्मस्वरूपं निष्कर्मेत्युच्यते, ततः स्वार्थे ष्यञ्, नैष्कर्म्यं तल्लक्ष्यते ज्ञायतेऽनेन तत्कर्म भगवदाराधनलक्षणमुवाच नारदादिभ्यः । "तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मिणां यतः" इति प्रथमोक्तेः । कर्म भगवद्ध्यानलक्षणं तपः ॥ ६ ॥ श्रीनारायणं प्राणं च विना कामादयो ज्ञानरोधिनः सर्वान्सुरानप्याविशंति किमुतान्यानित्यभिप्रायेणेन्द्रस्याज्ञानं भगवन्महिम्नोऽप्रतिहतत्वं च प्रकटयति—उपाख्यायते लोकैः कथ्यते । तस्य नरनारायणस्य । काम इतींद्रादीनामुपलक्षणम् । अतन्महिज्ञत्वे कामादयो भगवदभिभवेऽसमर्था इत्यत्र प्रमाणमाह—"अथैनमेव नाप्नोत् योऽयं मध्यमः प्राणः एवमेता देवताः पाप्मनाविद्धाः" इत्यादिश्रुतेः, " तेहासुरा रुत्वा विदध्वसुर्यथाश्मानमास्ये धृत्वा विध्वंसेतैवं है व विध्वंसमाना विष्वंचो विनेशुः" इत्यादिश्रुतेश्च । असुरा असुरतुल्याः कामादय इत्यर्थः ॥ * ॥ परमोपशमं सर्वोत्कृष्टांतरिंद्रियनिग्रहं, किं वा—'शमो मन्निष्ठता बुद्धेः' इति भगवदुक्तेर्लोकसंग्रहार्थं बुद्धेर्भगवन्निष्ठाम् ॥ ७ ॥ भातीति भुस्तत्संबुद्धौ भो, कामं प्रतीयं संबुद्धिः । मादयति कामिन इति मदनो वसन्तः 'वसंत उन्मादकरः प्रजानाम्' इत्युक्तेः । तत्संबुद्धौ हे वसंतर्तो । मारयति विरहिण इति मरुत्स एव मारुतो मलयानिल इति ज्ञेयम् । प्रकृतत्वात्स एव कामोद्द्योतकः । यद्वा—मदनपदेनैव मारुतग्रहणमपि सिद्धम् । इह मारुतेति क्रियापदम् । हे देववध्वः यूयमिन्द्रभयान्मा रुत रोदनं मा कुरुतेति मत्कृपया सोऽपि वः किंचिन्न वदिष्यतीत्यर्थः । तान्कामादीन् भगवान्प्रार्थयते । इत्यर्थ इति—"गतानां यत्र पांथानां न सत्कारो भवेद्यदि । तत्स्थलं शून्यमेवेह नाशून्यं गृहवासिभिः ॥" इत्युक्तेरिति भावः ॥ * ॥ प्रहस्येति । अहो मन्मायामाहात्म्यं यदमी मामपि मोहयितुं प्रवृत्ता इत्युपहस्य भवति प्रभवतीति भुरौणादिको डुस्तत्संबुद्धौ भो विभो समर्थेति यावत् । तान्मदनादीन् । पूर्वमेत्र नारदादिविशिष्टस्य स्वस्य तत्र सत्त्वात्स चाश्रमोऽशून्य एव । अशून्यस्याशून्यकरणं न संगच्छते, इत आतिथ्याभावेनैव तत्र शून्यत्वमुत्प्रेक्षणीयमिति । अत एव प्रायःशब्दप्रयोगेण व्याख्यातमत उक्तमित्यर्थ इति ॥ * ॥ **विश्वनाथस्तु**—बलिम्पूजोपहारं शाकरत्रादिकपस्मदातिथ्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्थं ब्रुवत्यभयदे नरदेवदेवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥ त्वां सेवतां सुरकृता बहवों तरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते ॥ नान्यस्य बर्हिषि बलीन्ददतः स्वभागान्धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि ॥ १० ॥ क्षुत्तृट्त्रिकालगुणमारुतजैह्वयशैश्न्यानस्मानपारजलधीनतितीर्य केचित्॥क्रोधस्य यांति विफलस्य वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्सृजंति ॥११॥

दित्यर्थः ॥ ८ ॥ हे नरदेव अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडानि नम्राणि शिरांसि येषां ते । लज्जाभरेणैवावनतशिरस्का इत्यर्थः। सघृणं यथा भवति तथा कृपां जनयंत इत्यर्थः । कृपायुक्तं तमिति वा मायातः परे अतोऽविकृते । स्वारामाश्च ते धीराश्च तेषां निकरैरानतं पादपद्मं यस्य तस्मिन् । त्वय्ये तदक्षोभानुकंपादि न विचित्रम् ॥ ९ ॥ अस्माकं चापराधाचरणं स्वभावत्वान्न चित्रमित्याहुः । त्वामिति । त्वां सेवतां सेवमानानां सुरैरिंद्रादिभिः कृता अंतराया विघ्ना भवंति । कस्मादित्यत आहुः । स्वौक इति । स्वस्थानं स्वर्गमतिक्रम्य परमं तव स्थानं व्रजताम् । नान्यस्य त्वामसेवमानस्य । कुतः । बर्हिषि यज्ञे स्वभागान्पुरोडाशादीन्बलीन्करान्कृषिक इव राज्ञे इंद्रादिभ्यो ददतः प्रयच्छतः । तर्हि किं मद्भक्तो विघ्नैर्भ्रश्यति नेत्याहुः । धत्त इति । यदीति निश्चये । यतस्त्वं सर्वसुराधीश्वरोऽविता रक्षकोऽतोऽसौ विघ्नानां मूर्ध्नि पदमंघ्रिं धत्ते । कुतः पुनस्त्वयि विघ्नशंकेति भावः ॥ १० ॥ त्वदभक्तानां तु केवलं तपश्चरतामियं गतिः । अस्माकं वा वशं यांति क्रोधस्य वा तत्रास्मद्वशाः कामोपभोगमपि तावदनुभवंति क्रोधस्य वशाः पुनरतिमंदा इत्याहुः । क्षुत्तृडिति । क्षुच्च तृट् च त्रिकालगुणाश्च शीतोष्णवर्षाणि च मारुतश्च प्राणो बाह्यो वा जैह्वया जिह्वाभोगाश्च शैश्न्या गुह्योपभोगाश्च एतानस्मानपारजलधिरूपानतितीर्य विलंघ्य गोष्पदे मज्जंति । कुतः । यतः क्रोधस्य विफलस्य वशं यांति गच्छंति । किं च

गृहीत वयं संपन्ना एव भवेमेति चेत् इममाश्रममशून्यमिति तैः ॥ ८ ॥ इत्यर्थ इति—अहो अपकारिष्वप्यस्मास्वयमुपकरोतीति धिगस्मानित्यधोवदना बभूवुरिति भावः । इत्यर्थ इति—तानधोमुखान् दृष्ट्वा भगवतः करुणोदयोऽभूदिति भावः । संभवत्वाद्भगवद्विशेषणमेवेत्याह—कृपायुक्तं तमिति वेति । यतो मायातः परोऽत एव हेतोः । अविकृते कामादिविकारहीने । निकरैः समूहैः ॥ * ॥ हे नरदेवेति—नरस्य सतो नृपस्य केवलं भूदेववद्देवशब्दयोगेनैवातिथ्यं विहितं ते तु साक्षादेव देवा इति भावः । यद्वा—यथा त्वं नरदेवत्वाल्लोकरक्षकस्तथा स देवदेवत्वाद्देवरक्षक एव " अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः " इत्यस्य नरदेवदेवयोस्तुल्यन्यायत्वादेवेति भावः । किं च—लज्जाया मनोधर्मत्वेन शिरस्सु तदसंभवात्साहित्यस्य लज्जानुभावत्वेनैव विवक्षितत्वाल्लज्जाभरेणैवेत्यादि आर्थिकार्थत्वेन व्याख्यातम्। क्रियाविशेषणे घृणाया विषयो न व्यक्तोऽत इत्यर्थ इत्युक्तम् । एतच्छब्दस्याव्यवहितपूर्वपरामर्शकत्वादक्षोभानुकम्पादीति व्याख्यातम्, तत्र प्रहस्येत्यनेन क्रोधाभावरूपोऽक्षोभ उक्तः । मा भैष्टेत्यनेन भयात्मकदुःखप्रहाणेच्छारूपानुकंपोक्तादिनातिथ्यं, तच्च बलिं गृहीतेत्यनेनोक्तम् ॥ ९ ॥ यद्वा—स्वस्वभावं द्योतयंत आहुः—अस्माकमिति । मद्भक्ताः किमिन्द्रादिभिर्भक्तेश्च्याव्यंत इत्याक्षिपति—तर्हीति । इति भाव इति—यदि त्वत्कृपया भक्ता एव विघ्नान्न गणयंति तव तु सा केत्याशयः ॥ * ॥ दीपिका—यदीति 'यदि वेदाः प्रमाणं स्युः' इतिवन्निश्चये । यतस्त्वं भक्तानां निश्चयेन रक्षकोऽतोऽसौ भक्तो विघ्नाञ्जयतीत्यर्थः । त्वद्भक्ता अपि त्वत्प्रसादादस्मान्न गणयंति कुतः पुनस्त्वं गणयसीत्याहुः । अन्यत्तैः ॥ १० ॥ द्वयी द्विरूपा । त्रयो मासचतुष्कचतुष्कपरिमाणाः, कालस्य संवत्सरात्मकस्य, बाह्यमारुतजयस्तत्सहनं, प्राणजयः प्राणायामरूपः ॥ * ॥ दीपिका—तत्र क्रोधास्मद्वशगयोर्मध्ये । कामोपभोगमपीति—यद्यपि कामोपभोगस्तपःफलं न भवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति प्रगृणतां तेषां स्त्रियोऽत्यद्भुतदर्शनाः ॥ दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥ १२ ॥ ते देवानुचरा दृष्ट्वा स्त्रियः श्रीरिव रूपिणीः ॥ गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥ १३ ॥ तानाह देवदेवेशः प्रणतान्प्रहसन्निव ॥ आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणाम् ॥ १४ ॥ ओमित्यादेशमादाय नत्वा तं सुरबंदिनः ॥ उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १५ ॥ इन्द्रायानम्य सदसि शृण्वतां त्रिदिवौकसाम् ॥ ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः ॥१६॥ हंसस्वरूप्यवददच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः ॥ विष्णुः शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥ १७ ॥

जले मज्जंतो यथा विवशाः संतो मस्तकारोपितं भारमुत्सृजंति तथा वृथैव न मोक्षाय न च भोगाय शापादिना दुश्वरं तप उत्सृजंति ॥ ११ ॥ स्त्रियो योगनिर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठ्वलंकृतास्तेषां स्वलावण्यादिदर्पोपशमाय दर्शयामास ॥ १२ ॥ रूपिणी मूर्तिमती श्रीरिव ताः स्त्रियः स्त्रीर्दृष्ट्वा। तासां तु रूपस्यौदार्येण महत्त्वेन हता श्रीः कांतिर्येषां ते ॥ १३ ॥ वृङ्ध्वं वृणीध्वम्। क्व वयं वराकाः क्व चेमा इति चेत्तत्राह। सवर्णां समानरूपाम्। नैकाप्यस्मदनुरूपेति चेन्मा भवतु तथापि स्वर्गस्य भूषणरूपां स्वर्गं नेतुमर्हामित्यर्थः ॥ १४ ॥ सुरबंदिनो देवभृत्याः ॥ १५ ॥ इंद्राय इंद्रं प्रति नारायणबलमूचुः। शक्रस्तत्रास त्रासं प्राप्तो विस्मितश्च। तत्र विस्मित आसेति वा ॥ १६ ॥ अन्यानप्यवतारांस्तच्चरितानि चाह। हंसस्वरूपीति। दत्तो दत्तात्रेयः। कुमारः सनकादिः। नः पिता ऋषभश्च। विष्णुरेव कलयाऽवतीर्णः सन्नात्मयोगमवदत्। तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता ततः श्रुतय आहृताः ॥ १७ ॥

तथाप्यस्मद्दशागास्तुच्छमपि तमनुभवंतीत्यपेरर्थः । क्रोधस्य गोष्पदत्वं स्वविषयघातमात्रेण नष्टत्वाज्जिह्वादिजयापेक्षया तुच्छत्वाच्च, न तु विषयलोभवदनश्वरत्वम्। तदुक्तं सप्तमे—"कामस्यांतं हि क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात्। जनो याति न लोभस्य जित्वा भुक्त्वा दिशो दश ॥" इति क्रोधस्य गोष्पदत्वारोपेण तद्वतां च मज्जनकर्तृत्वारोपेण तपसि मस्तकभारत्वमारोपितम्। वृथैवेत्यस्य व्याख्यानं—न मोक्षायेत्यादि ॥११॥ इत्युक्तप्रकारेण। तेषां कामादीनाम्। स्वस्य लावण्यादिभिर्यो दर्पस्तस्योपशमाय। आदिना माधुर्यादिग्रहः। अत्यद्भुतदर्शना अदृष्टश्रुतचरदर्शनाः। विभुरिति सर्वसमर्थः ॥ * ॥ योगबलेन तद्दर्शयामास सेवां कुर्वतीरिव, प्राकृतीरित्यर्थः ॥ १२ ॥ तासां भगवदुद्भावितस्त्रीणाम् ॥ * ॥ तासामुर्वश्यादीनाम् ॥ १३ ॥ तेषां पराभवदर्शनेन हसन्निव शमिनां हासानौचित्यादेव मुखप्रसत्तिर्द्योतिता। यद्वा—भगवदाराधनतपोनिष्ठानां न विघ्ना भवंतीति प्रहसंस्तथा चेवेत्यादिनाधिकार्थम्। स्वर्गभूषणरूपामिति व्याख्यानाद्भूषणमित्येव स्वामिसंमतः तान्कामादीन्। वृङ्ध्वमित्यार्षम्। वराकाः शोच्याः "वराकः शङ्करे पुंसि शोचनीयेऽभिधेयवत्" इति मेदिनी ॥ * ॥ ० ॥ १४ ॥ आदेशमाज्ञाम्। ओमिति अंगीकारेऽव्ययम् ॥ * ॥ ओमित्यंगीकारे। आदेशमाज्ञाम् ॥ १५ ॥ तत्रास 'त्रसी—उद्वेगे' लिट्। संदेहजनकत्वेन पूर्वार्थस्यान्यार्थमाह—तत्र तदा। आस बभूवेत्यर्थः ॥ * ॥ तत्र नारायणबले। विस्मितो बभूव ॥ १६ ॥ तच्चरितान्यन्यावतारचरितानि। आत्मयोगं आत्मनोर्जीवपरात्मनोर्योगमभेदमिति। त्रयाणामेकमेव कर्मेति। मधुदैत्यं भिनत्तीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुप्तोऽप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरतांभसः क्ष्माम् ॥ कौर्मे धृतोऽद्रिरमृतोन्मथने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुंचदार्तम् ॥ १८ ॥ संस्तुन्वतोऽब्धिपतिताञ्छ्रमणानृषींश्च शक्रं च वृत्रवधतस्तमसि प्रविष्टम् ॥ देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय सतां नृसिंहे ॥ १९ ॥ देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः ॥ भूत्वाऽथ वामन इमामहरद्बलेः क्ष्मां याच्ञाच्छलेन समदाददितेः सुतेभ्यः ॥ २० ॥ निःक्षत्रियामकृत गां च त्रिःसप्तकृत्वो रामस्तु हैहयकुलाऽप्ययभार्गवाग्निः ॥ सोऽब्धिं बबंध दशवक्त्रमहन्सलंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः ॥ २१ ॥ भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहयति यज्ञकृतोऽतदर्हाञ्छूद्रान्कलौ क्षितिभुजो न्यहनिष्यदंते ॥ २२ ॥

इला पृथ्वी । ओषधयश्च गुप्ताः । क्रौडे च वाराहावतारे । ग्राहाद्गजेंद्रममुंचन्मोचयामास । एवमादौ यत्रावतारनाम नास्ति तत्र विष्णुः शिवाय जगतां कलयाऽवतीर्ण इत्यनुवर्तनीयम् ॥ १८ ॥ संस्तुन्वतः स्तुतिं कुर्वाणान् ऋषीन्वालखिल्यान्कश्यपार्थं समिदाहरणे गोष्पदे निमग्नानिंद्रेणोपहसितानुद्धृत्यापदोऽमोचयत् । तमसि ब्रह्महत्यां प्रविष्टं मोचयामास । असुरगृहे पिहिता निरुद्धा या देवस्त्रियस्ताश्चामुंचदनेकावतारैः ॥ १९ ॥ अंतरेषु सर्वमन्वंतरेषु कलाभिर्मूर्तिभिर्भुवनान्यदधादपालयत् । इमां क्ष्मां समदाद्ददौ ॥ २० ॥ हैहयानां कुलस्याप्ययाय भार्गवरूपोऽग्निः । स रामो दाशरथिः सन्सलंकं लंकायां स्थितम् । स च जयति । वर्तमानकालीनोऽवतार इत्यर्थः ॥ २१ ॥ भाविनं रामकृष्णावतारमाह । भूमेरिति । बुद्धावतारमाह । वादैरिति । अतदर्हान्यज्ञानर्हान्दैत्यान्विमोहयिष्यति । कल्क्यवतारमाह । शूद्रानिति ।

तथा तेन । ततो मधोः । आहृता आनीताः ॥ * ॥ आत्मयोगम्—तत्र हंसः सनकादिभ्यः, दत्तो यदुप्रह्लादिभ्यः, कुमारो नारदाय, ऋषभश्चास्मभ्यमवदत् । ततो मधुदैत्यात् ॥ १७ ॥ अप्यये प्रलये । मनुः सत्यव्रतो नाम । मात्स्ये मत्स्यावतारे । अमृतोन्मथनेऽमृतार्थं क्षीरसमुद्रमथने । प्रपन्नं शरणागतम् । एवमादौ ग्राहात्प्रपन्नमित्यादिस्थले ॥ * ॥ ० ॥ १८ ॥ कर्मणान्यावतारचरितान्यप्याह—संस्तुन्वत इति । स्तौतेस्सौवादिकत्वमार्षम् । ततः शतृप्रत्ययः ॥ * ॥ ० ॥ १९ ॥ 'कला मूर्तौ षोडशांशे' इति धरणिः । मूर्तिभिर्विष्वक्सेनादिभिः । अथ वैवस्वतमन्वंतरे । अदितेः सुतेभ्यो देवेभ्यः ॥ * ॥ अदधादपालयत्, धातूनामनेकार्थवात् । अथेत्यर्थान्तरे ॥ २० ॥ अप्ययाय नाशाय । भार्गवरूपः पर्शुरामरूपः । स रामः पर्शुराम एव । इत्यर्थ इति—सीरध्वजस्य समये रामाविर्भावोऽतस्तदा भविष्यदपि नित्यविहाराभिप्रायेण वर्तमानत्वोक्तिरिति भावः ॥ * ॥ स इति अंशांशिनोरभेदाभिप्रायेण । सहाव्ययस्यानेकार्थत्वाद्विद्यमानार्थतामभिप्रेत्य लंकायां स्थितमिति व्याख्यातम्, अनेकार्थता तु सहस्याव्ययीभावसमासे पाणिन्यादिभिः सहरिसाग्निप्रभृतिप्रयोगेषु दर्शिता । यद्वा—" तात्स्थ्यात्ताच्छब्द्यम् " इति न्यायेन लंकास्थसर्ववीरा लंकाशब्देन ग्राह्या लंकास्थसर्ववीरसहितमहन् ॥ २१ ॥ भाविनं भविष्यम् । अजन्मा प्राकृतजन्मातीतः । सुरैरपीति किं पुनर्मानुषैरित्याह—अंते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविधानि कर्माणि जन्मानि च जगत्पतेः ॥ भूरीणि भूरियशसो वर्णितानि महाभुज ॥ २३ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे वसुदेवनारदसंवादे जायंतेयोपाख्याने विदेहप्रश्ने चतुर्थोऽध्यायः ॥ ४ ॥ राजोवाच ॥ भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः ॥ तेषामशांतकामानां का निष्ठाऽविजितात्मनाम् ॥ १ ॥ चमस उवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ॥ चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ २॥

न्यहनिष्यन्निहनिष्यति ॥ २२ ॥ २३ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे भक्तिहीनानां का निष्ठा को युगेयुगे ॥ पूजाविधिरिति प्रश्नद्वयस्योत्तरमुच्यते ॥ १ ॥ त्वां सेवतां सुरकृता बहवोंतराया इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि पदं दत्त्वा परां गतिं यांति अभक्तानां तु विघ्ना भवंतीत्युक्ते तर्हि तेषां का गतिर्भवतीति पृच्छति । भगवंतमिति । हे आत्मवित्तमाः अविजितात्मनामत एवाशांतकामानां का निष्ठा किं प्राप्यमित्यर्थः ॥ १ ॥ स्वजनस्य गुरोर्भगवतोऽ

कलियुगावसाने । लृडर्थे लृङ् न्यहनिष्यदिति ॥ * ॥ शूद्रानित्युभयत्रान्वेति । पूर्वत्रोग्राख्यान् परत्र म्लेच्छान् विमोहयति बुद्धः, हनिष्यति कल्किः ॥२२॥ अवतारतत्कर्मणामानंत्यं निगमयति—एवमिति । एवंविधानि एतादृशानि । महतो भुनक्ति हरिभक्तिनिष्ठान्सेवनेन पालयतीति तथा । सत्संगानिरतत्वात्तत्रोक्तेतरावतारज्ञानमपि न दुःसंपाद्यमिति संबुद्ध्यभिप्रायः ॥ * ॥ ० ॥ २३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥ का निष्ठा का स्थितिः ' निष्ठा स्यात्स्थितिनाशयोः '' इति निरुक्तिः (१) । ये न भजन्ति तेषामित्यन्वयः । अत एवाजितात्मत्वादेव । इत्यर्थ इति—का तेषां गतिर्भवतीति भावः ॥ * ॥ **दीपिका**—का निष्ठा किं प्राप्यम् । पूजाविधिः पूजाप्रकारः । पूर्वाध्यायेनावसरसंगतिमाह—' त्वां सेवताम् ' इत्यादिना । तेषामभक्तानां का गतिः, किं प्राप्यम्, एवं कतियावतारैः ख्यापितयशस्यपि भगवति विमुखीभूय किं लिप्सन्ते इत्युद्भूतविस्मयः पृच्छति—हे आत्मवित्तमा इति । आत्मविदो जीवश्चेतनो देहादिर्जड इति ज्ञानवन्त एव, जीवेश्वरविभागतारतम्यविदस्त्वात्मवित्तराः सर्वशास्त्रतात्पर्यविषयं केवलं श्रीकृष्णभक्तियोगमेव ये जानन्ति ते आत्मवित्तमा एतादृशा यूयमेव । अतः स्वयं मुक्ता अन्यान्मोचयितुं क्षमा इत्यर्थः । यद्वा—' वेदो नारायणः साक्षात् ' इति न्यायेनात्मशब्दोऽत्र वेदपरो ज्ञेयः । पाठतो वेदज्ञा आत्मविदोऽर्थतस्तज्ज्ञा आत्मवित्तरा उपक्रमोपसंहारादिभिर्वेदतात्पर्यज्ञा आत्मवित्तमास्त एव हि दानतीर्थाटनयज्ञतपोज्ञानप्राप्य गतिज्ञाभवंति, न तु पूर्वेऽतो मत्प्रश्नोत्तरं दातुं कल्पा यूयं वदतेति संबुद्ध्यभिप्रायः ॥ १ ॥ गुरुद्रोहात्तेषां महान्दोष इत्याह—स्वजनकस्येति । नन्वत्र "मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह । चत्वारो जज्ञिरे वर्णाः " इत्यस्य " गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम । वक्षःस्थलाद्वने वासो न्यासः शीर्षणि संस्थितः ॥ " इत्यनेन विरोधो न शंक्यः । पुरुषादुत्पत्तिमात्रस्य विवक्षितत्वात्तथाहि वर्णा एव पुरुषस्य मुखादिभ्यो जज्ञिरे न त्वाश्रमास्तेषां सहोक्तिस्तु पुरुषादुत्पत्तिमात्र एवाऽन्यथा गृहाश्रम इति भगवदुक्तिव्याकोपः स्यात् । यद्वा—सृष्ट्यादावाश्रमोत्पत्तिस्तु ब्रह्मणः पूर्वादिमुखतः श्रुत्वा तृतीयस्कन्धे तत्र "न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ" इत्युक्तेश्च चतुर्विधसंन्यासश्चतुर्मुखेभ्य उद्भूतो मुखं हि शिर एवावयवावयविनोरभेदोपचारात् ॥ * ॥ चमसशब्दस्य यज्ञपात्रवाचकत्वेन सुपात्रत्वात्सुपात्रेणैव कुपात्रगतिर्वाच्येति स एवोवाच मुखेति विराट्तदंतर्यामिणोरभेदोक्तिः । मुखबाहूरूपादेभ्य इत्युपलक्षणमेवाश्रमेषु । तदुक्तम्—"गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम । वक्षःस्थलाद्वने वासो न्यासः शीर्षणि संस्थितः ॥ " इति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—अत्र मुखादिभ्य आश्रमैः सह चत्वारो वर्णा जज्ञिरे इत्यन्वये आश्रमाणामपि मुखादिभ्य एवोत्पत्तिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ॥ न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः ॥ ३ ॥ दूरेहरिकथाः केचिद्दूरेचाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयश्चैव तेऽनुकंप्या भवादृशाम् ॥ ४ ॥ विप्रो राजन्यवैश्यौ च हरेः प्राप्ताः पदांतिकम् ॥ श्रौतेन जन्मनाथापि मुह्यंत्याम्नायवादिनः ॥ ५ ॥

नादराद्गुरुद्रोहेण दुर्गतिं यांतीति वक्तुं भगवतः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह । मुखेति । गुणैः सत्त्वेन विप्रः । सत्त्वरजोभ्यां क्षत्रियः । रजस्तमोभ्यां वैश्यः । तमसा शूद्र इति ॥ २ ॥ एषां मध्ये येऽज्ञात्वा तं न भजंति ये च ज्ञात्वाप्यवजानंति । आत्मनः प्रभवो जन्म यस्मात्तम् । तदभजने कृतघ्नतामप्याह । ईश्वरमिति । स्थानाद्वर्णाश्रमाद्भ्रष्टाः ॥ ३ ॥ तत्र येऽज्ञास्ते भवद्विधानामनुग्राह्या इत्याह । दूर इति । दूरे हरिकथाश्रवणं येषां ते अत एव दूरे चाच्युतकीर्तनं येषां ते । दूरे अच्युतकीर्तनाश्चेति वा ॥ ४ ॥ ज्ञानलवदुर्विदग्धास्त्वचिकित्स्यत्वादुपेक्ष्या इत्याशयेनाह । विप्र इति । श्रौतेनोपनयनाख्येन । उपलक्षणमेतत् । अध्ययनादिनाऽपि हरेः पदांतिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यंति कर्मफलेषु सज्जंते । कुतः । आम्नायेषु ये वादा अर्थवादास्ते मोहकतया विद्यंते येषां ते । तदुक्तं गीतासु । " यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ॥

प्रसज्यते सा च न तथा यद्वक्ष्यते गृहाश्रम इत्यादि । तस्मान्मुखबाहूरुपादेभ्य इत्यतः प्राग् जघनहृद्वक्षोमस्तकादित्यध्याहार्यं ततश्च जघनादिभ्यो मुखादिभ्यश्च सहाश्रमैः क्रमेण वर्णा जज्ञिर इति संगतम् ॥ २ ॥ एषां चतुर्णां वर्णानां मध्ये । ईश्वरं सर्वकर्मफलप्रदम् । फलदातुरभजने कृतघ्नता स्फुटतरैवेत्यर्थः । ईश्वरावज्ञानाद्वर्णाश्रमधर्माच्च्युता नरकेषु पतंतीति भावः ॥ * ॥ **दीपिका**–एषां मध्ये ये न भजंति आत्मनः प्रभवो यस्मात्तमादिपितरमित्यर्थः । न भजन्त्यत एवावजानन्ति अवश्यभजनीयस्य गुरोरभजनमेवावज्ञेति भावः । स्थानाद्वर्णाश्रमलक्षणात् ॥ * ॥ **संदर्भस्तु**–केचिदश्रुत्वा न भजंति केचित्तु श्रुत्वापि न भजंति चेदवजानंत्येवेत्यर्थः । स्वाश्रमाद्भ्रष्टाः संतः क्रमादधो गच्छन्तीत्यर्थः ॥ ३ ॥ तत्र तयोर्मध्ये । भवद्विधानां भवादृशानाम् । अत एव हरिकथाश्रवणाभावादेव । हरिकथाश्रवणमपि हरिभक्तसंगं विना न लभ्यत इत्याह–अच्युतस्य कीर्तनं येषां ते भगवद्भक्ता अपि येषां दूरे सन्तीत्यर्थः । तानाह–स्त्रिय इत्यादि । आदिनांत्यजादिग्रहः । 'न शूद्राय मतिं दद्यात्' इति निषेधस्तु केवलवेदपर एव, हरिभजने तु "स्त्रियः शूद्रास्तथा वैश्यास्तेपि यांति परां गतिम्" इति श्रीगीतोक्तेः स्त्रीशूद्राणामप्यधिकार इति ॥ * ॥ तत्र येऽज्ञास्ते भवद्विधानामनुग्राह्या एवेत्याह–दूर इति । दूरे हरिकथा येषां ते ये साधुसंगभाग्यहीना इत्यर्थः । दूरे चाच्युतकीर्तना बधिरा इत्यर्थः । तेऽनुकंप्यास्तत्राद्या भक्त्युपदेशेन, द्वितीया मूर्ध्नि चरणधूलिदानेन च कृतार्थी कार्याः । "न ते विदुः स्वार्थगतिं हि विष्णुं विना महत्त्वादरजोभिषेकम्" इति श्रीप्रह्लादोक्तेः ॥ ४ ॥ "अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः । ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रंजयति ॥" इति भर्तृहरिवचनात् । अचिकित्स्यत्वाद्बोधितुमशक्यत्वात् । उपेक्ष्यास्त्याज्याः । अध्ययनादिनेहादिना यजनादिग्रहः । अतः कर्मफलासक्तेः । अत्र प्रमाणमाह–तदुक्तमिति । पुष्पितां पुष्पवदापातरमणीयामिमां बुद्धिस्थां "अपाम सोमममृता अभूम" इत्यादिकां स्वर्गविषयाम् । अविपश्चितो वेदतात्पर्यानभिज्ञाः । अतः परं किंचिदपि पुरुषार्थो नास्तीति वदंत इत्यर्थः । एतेन हरिभक्तिं विना जन्मादि न श्रेयस्करमित्युक्तमिति ॥ * ॥ ज्ञानेति, विप्र इति, श्रौतेनेति,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मण्यकोविदाः स्तब्धा मूर्खाः पंडितमानिनः ॥ वदंति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥६॥ रजसा घोरसंकल्पाः कामुका अहिमन्यवः ॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥ ७ ॥ वदंति तेऽन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः ॥ ८ ॥

वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥" इत्यादिना ॥ ५ ॥ भक्तिमार्गदार्ढ्याय तेषां मोहं प्रपंचयन्निंदति कर्माणीत्यादिना । अकोविदा यथा बंधकं न भवति तथा कर्तुमज्ञाः । न चाभिज्ञान्पृच्छंति । यतः स्तब्धा अनम्राः । स्तब्धत्वे हेतुः । यतो मूर्खा अपि पंडिता वयमिति मानवंतः अतः "अपाम सोमममृता अभम ॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ॥ यत्र नोष्णं न शीतं स्यान्न ग्लानिर्नाप्यरातयः" इत्यादिकया यया माध्व्या गिरोत्सुकाः संतो मढास्तया चाटुकानप्सरोभिः सह विहरिष्याम इत्यादिप्रियान् शब्दान्वदंति ॥ ६ ॥ किं च तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो वर्धंत इत्याह त्रयेण । रजसेति । घोरोऽभिचारादिः संकल्पो येषां ते । अहिवन्मन्युर्येषां ते ॥ ७ ॥ कामुकत्वं प्रपंचयति । वदंतीति । उपासिताः स्त्रियो यैर्न तु वृद्धास्ते मैथुन्यं मिथुनसुखमेव परं न त्वातिथ्यादि येषु गृहेषु तेष्वाशिषो वदंति । "इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥" इत्याकाराः । दांभिकतां प्रपंचयति । यजंतीति ।

आम्नायवादिनो जैमिनीयाः, आम्नायः कर्मकाण्डम्, ते हि तन्मात्रवदनशीलास्तस्य सुतरां ब्रह्मकांडस्य याथार्थ्यवेदिनोऽनीश्वरवादिनः ॥ ५ ॥ ननु वेदोक्तकर्मणस्तत्त्वज्ञानहेतुत्वात्कथं ते मुह्यन्ति "कर्मणा ज्ञानमातनोति" इति श्रुतेरिति चेत्तेषां तदुदितकर्मयाथार्थ्यानवबोधादित्याह—अकोविदा इति । कुतो न पृच्छन्ति यतो हेतोः, अतो पंडितंमन्यत्वादेव । यत्र स्वर्गे । अरातयः शत्रवः ॥ * ॥ 'निन्दा निन्दितुं न प्रवर्तते किन्तु विधेयंस्तोतुम्' इति न्यायेन विधेयस्य: भक्तिमार्गस्य दढीकरणाय तेषां कामकर्मिणां मीमांसकानाम् । अतः पंडितमानितत्वात् । सोमममृतमपाम पास्यामः अमृता मरणशून्या अभूम भाविष्यामः । चातुर्मास्यसंज्ञयागेन यष्टुं शीलस्य सुकृतमपूर्वमक्षय्यमनश्वरम् । यत्र स्वर्गे ग्लानिर्बलक्षयः। माध्व्या मादकया । चाटुकान्—हंहो अप्सरोभिः सह विहरिष्याम इत्यादिप्रियान्॥६॥अन्यदनिष्टमाह—किं चेति । तेषां वेदतात्पर्यानभिज्ञानाम् । मन्युः क्रोधः 'मन्युः क्रोधे क्रतौ युधि' इति कोशात् । विहसंति तेषु दोषानारोप्य निंदंति, कामुका विषयलोलुपाः॥*॥अभिनिवेशः स्वीकृतस्य पुनस्त्यागासहिष्णुत्वम् । अभिचार्यते मार्यतेऽनेनेत्यभिचारो मारणप्रयोगः,आदिना परस्त्रीवशीकारादिः॥*॥अत्र संदर्भः—ग्रंशाधिपातौ च क्रमेण दर्शयति—रजसेति त्रिभिः । तत्र प्रथमेन सर्वेषामेव तेषां निन्दा, द्वितीयेन विप्राणां,तृतीयेन राजन्यवैश्यानामिति ज्ञेयम् । एते काष्ठमालाभृतो भिक्षुका उदरंभरा विष्णुमाराध्य दुःखमेव प्राप्स्यंतीति अच्युतप्रियान्विहसन्ति ॥ ७ ॥ परं केवलम् । आशिषोऽभिलषितान् । अन्नविधानं पाकप्रक्रियोदितान्नसंपादनम्, दक्षिणा चाचार्यर्त्विग्भोक्तृभ्यो हिरण्यादिरूपद्रव्यदानं तच्च सा च यत्र न संपादिते केवलायासव्यर्थव्ययरूपम् 'हतं यज्ञमदक्षिणम्' इत्याद्युक्तं तामसं कर्म कुर्वन्ति तदा यजनावसरे घ्नन्ति हिंसन्ति न त्वालभंत इत्यर्थः ॥ * ॥ उपासिताः पादपतनादिभिः सेविताः । आतिथ्यादि आतिथ्यमतिथियोग्यसत्कारः, आदिना चनपुराणश्रवणादिग्रहः । मूले चोऽवधारणे, आशिष एव न तु ज्ञानवैराग्यादिवार्ताः । अन्नानां यथोदितरीत्या पाकादिकरणम्, दक्षिणा च 'हतं यज्ञमदक्षिणम्' इत्युक्तेर्दक्षिणाप्यवश्यं देया । यद्वा—अन्नस्य विधानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ॥ जातस्मयेनांधधियः सहेश्वरान्सतोऽवमन्यंति हरिप्रियान्खलाः ॥ ९ ॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरम् ॥ वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्तया ॥ १० ॥ लोके व्यवाया ऽमिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना ॥ व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥ ११ ॥

असृष्टान्नविधानदक्षिणं न सृष्टा न संपादिता अन्नविधानदक्षिणा यथा तथा यजंति। तदा च वृत्त्यै जीविकार्थं परं केवलं पशून् घ्नंति । अतद्विदो हिंसादोषानभिज्ञाः ॥ ८ ॥ मानितां प्रपंचयति । श्रियेति । श्रिया धनादिसंपदा । विभूत्या ऐश्वर्येण । श्र्यादिना जातो यः स्मयो गर्वस्तेनांधा धीर्येषां ते ईश्वरसहितान्सतोऽवमन्यंते ॥ ९ ॥ किंच एवं वर्तमानास्ते वेदतत्त्वार्थं स्फुटमपि न जानंतीत्याह । सर्वेष्विति । केन रूपेणावस्थितं तदाह । आत्मानमीश्वरमात्मतया ईश्वरतया चावस्थितम् । एवमप्यसंगतामाह । यथा खम् आकाशम् । पुरुषार्थतामाह । अभीष्टम् । स्फुटत्वमाह । वेदोपगीतं चेति । तत्कुतः । यतो मनोरथानां व्यवायामिषमद्यसेवाविषयाणां वार्तया प्रवदंति । निवृत्तिपरं संतं वेदं प्रवृत्तिपरं वर्णयंति ॥ १० ॥ ननु व्यवायादीनामपि "ऋतौ भार्यामुपेयात् । हुतशेषं भक्षयेत्" इत्यादिना विहितत्वात्किमेवं निंद्यतेऽत

यथाश्रुति होमादिकरणं च दक्षिणा चान्नविधानदक्षिणम् । तदा च अन्नविधानाद्यभावे ॥ ८ ॥ अभिजनः परिवारमदः । सतो भागवतान् ॥ * ॥ श्रीविभूत्योरेकार्थत्वेन पौनरुक्त्यमाशंक्य धनादिसंपदेति व्याख्यातम् । अभिजनेन सत्कुलेन, विद्ययाऽध्ययनेन, त्यागेन दानेन, रूपेण सौंदर्येण, बलेन देहपाटवेन, कर्मणा यागादिना ॥ ९ ॥ तेषां हरिभक्तावज्ञानेन हरिप्रसादाभावाद्वेदतात्पर्यमप्यन्यथैव प्रतीयत इत्याह—किं चेति । तदवस्थानम् । एवमपि आत्मत्वेश्वरत्वे अपि उभे चैते संगावहे, विषयसंसर्गप्रेरणरूपधर्मेणेति ज्ञेयम् । तद्वेदतात्पर्याज्ञानं कुत इति ॥ * ॥ एवं कामुकत्वमानित्वादिप्रकारेण वर्तमानास्ते कर्मठाः वेदस्य तत्त्वार्थं वास्तवार्थं श्रीहरिम् "सर्वे वेदा यत्पदमामनन्ति" इति श्रुतेः। स्फुटं प्रव्यक्तम् । आत्मतया रश्मीनां सूर्यवन्मूलरूपत्वेन ईश्वरतयांतर्यामितया । एवमपि द्वैविध्यत्वेनावस्थितत्वेपि । पुरुषार्थताम् परमानन्दरूपताम् । वेदोपगीतं वेदांतैकवेद्यम् 'नमो वेदांतवेद्याय' "नावेदविन्मनुते तं बृहन्तम्" इति श्रुतेः । तत्कुतः—स्फुटत्वेप्यश्रवणे को हेतुरित्यर्थः। अग्रिमपद्यसंगतिलाभाय मनोरथपदं तद्विषयप्रदर्शनेन व्याचष्टे—व्यवायेत्यादि॥*॥**संदर्भस्तु**—तेषां मोहजं प्रमादं दर्शयति—सर्वेष्विति । तत्र शश्वदिति विद्वदनुभवसिद्धत्वं वेदेति वेदासिद्धत्वं चेश्वरस्य दर्शितम् ॥ * ॥ **विश्वनाथस्तु**—दृढतरं प्रबोध्यमाना अपि ते नैव प्रबोध्यन्त इत्याह—सर्वेष्विति । यथा खमाकाशमित्यसंगत्वम्, अभीष्टमित्यसंगत्वम्, ईश्वरमित्यनाराधने दंडदातृत्वं वेदोपगीतं चेति सर्वथा विख्यातत्वं चोक्तम् । न शृण्वत इति—कन प्रकारेणेत्यत आह—मनोरथानां व्यवायामिषादिविषयाणां वार्तयेति भगवत्कथायां सद्भिः प्रवर्तितायामपि तत्र विषयभोगवार्ता बलात्पातयन्तीत्यर्थः । प्रवदंतीति तदा स्वयमेव प्रकर्षेण वक्तारा भवन्तीत्यर्थः ॥ १० ॥ अत्र आक्षेपं करोति—नन्विति । आदिना आमषमद्यग्रहः । ज्योतिष्टोमादौ पश्वंगानां होमे हुतशेषं मांसम्, सौत्रामण्यां सुराग्रहैर्मद्यहोमे हुतशेषं मद्यम्, इष्टौ च पुरोडाशं च भक्षयेत् । विवाहविधिपरिगृहीतां पत्नीं षोडशादिनेष्वनिषिद्धदिने गच्छेदित्यादिविधिप्राप्ताः स्त्रीसंगादयो विरागिणाऽप्यवश्यानुष्ठेयत्वान्निन्दार्हा नेत्यर्थः । विधिर्नास्तीति अपूर्वविधिर्नास्तीत्यर्थः । तथाहि—"विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति । उभयोर्नित्यतः प्राप्ते परिसंख्येति गीयते ॥" इति । तत्रापूर्वविधिर्यथा—"व्रीहीन्प्रोक्षेदहरहः संध्यामुपासीत" इति । अत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आह । लोक इति । व्यवायः स्त्रीसंगः आमिषं मांसम् । नित्या रागत एव नित्यं प्राप्ताः जंतोः प्राणिमात्रस्य अतस्तत्र तासु चोदनां विधिर्नास्ति । ननु ऋतावुपेयादित्यादिना विधिर्दर्शितः । सत्यम् । न त्वयमपूर्वविधिः । रागतः प्राप्तत्वात् । किं तु नियमविधिरूपेण रागिणामभ्यनुज्ञामात्रं क्रियते तदाह । व्यवस्थितिरिति । तेषु व्यवायादिषु । कैः । विवाहयज्ञसुराग्रहैः विवाहविषय एव व्यवायः कार्यः । यज्ञ एवांमिषसेवा । "सौत्रामण्यां सुराग्रहान् गृह्णाति" इति श्रुतेस्तत्रैव मद्यसेवेति नियमः क्रियते । ननु च नियमपक्षेऽप्यावश्यकत्वान्न निंदा युक्ताऽत आह । आसु निवृत्तिरिति । आसु व्यवायामिषमद्यसेवासु निवृत्तिरिष्टा । अयं भावः । नायं नियमविधिरपि नित्यप्राप्तत्वादत आसु व्यवायामिषमद्यसेवासु परिसंख्याविधिरेवेष्टः । कथं तर्हि व्यवस्थितिरित्युक्तम् । उच्यते । न तावत्परिसंख्याविधिना श्रुत्या निवृत्तिरुच्यते । तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् । अतः क्वचित्प्राप्स्यतोप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वाराऽन्यनिवृत्तिः फलतो भवति । तद्यथा । "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र रशनालिंगतो गर्दभाश्वाभिधानीरशनाद्वये प्राप्स्यतो मंत्रस्यापूर्वविधिद्वारा परिसंख्योच्यते । यथोक्तं तंत्रवार्तिके । "अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः ॥ परिसंख्या फलेनोक्ता न विशेषः पुनः श्रुतेः॥" इति । क्वचित्तु रागतो नित्यप्राप्तस्याप्राप्तांशपूरणलक्षणस्य नियमफलस्याप्यभावान्नियमविधिद्वारा फलतः परिसंख्या भवति । यथा 'पंच पंचनखा भक्ष्याः' इति । तथा रागतो नित्यवत्प्राप्तस्य व्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा परिसंख्यैवेति । ननु यद्यभ्यनुज्ञामात्रमेतद्भवेत्तर्हि "ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः॥" इत्यादिदोषश्रवणं न स्यात् । नैष दोषः । मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना वा तामनुपगच्छतो दोषश्रवणोपपत्तेरिति सर्वमनवद्यम् ॥ ११ ॥

हि प्रोक्षणसंध्यावंदनादीनामेतद्वाक्यं विना लोकतोनुमानादिना प्राप्त्यभावादयमपूर्वविधिः । पक्षप्राप्तावप्राप्तांशपूरणफलको नियमविधिः, यथा—"व्रीहीनवहन्ति स्वाध्यायोऽध्येतव्यः" इति । अत्र पुरोडाशादिविधिभिस्तण्डुलनिष्पत्तावाक्षिप्तायां लोके तण्डुलनिष्पत्तिसाधनत्वेन दृष्टानि नखविदलनावघातादीनि विकल्पेन प्राप्तानि इति नाववातप्राप्त्यर्थोऽपूर्वविधिरयं किं तु विदलनादेः साधनांतरस्य पक्षे प्राप्तावघातस्य पाक्षिकत्वप्राप्तौ पाक्षिकप्राप्तांशपूरणार्थो नियमविधिः, 'अवहन्यादेव' इति नियमेन सर्वथावघाते प्रापितेऽप्राप्तांशभावादप्राप्तांशपूरणरूपनियमफलसिद्धिः, एवं क्रतुविधिभिः स्वानुष्ठानार्थमिति कर्तव्यताद्विज्ञाने आक्षिप्ते ज्ञानसाधनत्वेन वेदाध्ययनं पौरुषप्रयोगादिग्रंथाध्ययनं च पक्षे प्राप्तम्, तत्र वेदाध्ययनेनैव क्रत्वनुष्ठानज्ञानं संपादयमिति नियम्यते । न चात्रोभयोः समुच्चयेन प्राप्तिरस्तु, ततश्च पक्षप्राप्तिरिति शंक्यम्, एकेन फलसिद्धौ साधनांतरप्राप्त्यसंभवात् । उभयोर्नित्यप्राप्तावन्यनिवृत्तिफलकः परिसंख्याविधिः, यथा—गृहमेधीये इष्टिप्रकरणे "आज्यभागौ यजति" इति । अत्र हि आज्यभागयोर्नात्यंतमप्राप्तिः "प्रकृतिवद्विकृतिः कर्तव्या" इत्यत्यतिदेशिकन्यायेन प्राप्तेः, अतो नापूर्वविधिर्नापि नियमः अतिदेशेन नित्यप्राप्त्या पक्षप्राप्त्यभावात् । कि न्त्वाज्यभागयोरिव प्रयाजाद्यंगजातस्यापि नित्यप्राप्त्या प्रयाजादिनिवृत्तिफलक आज्यभागावेव कर्तव्यावित्येवंरूपः परिसंख्याविधिरिति । ननु नियमपरिसंख्याविध्योः पक्षप्राप्तिनित्यप्राप्तिभ्यां भेदेपि फलतो भेदो न दृश्यते, अवघातनियमेन नखविदलनादिनिवृत्तेराज्यभागविधिना प्रयाजादिनिवृत्तेश्च दृष्टत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नान्यनिवृत्तेः फलस्य समानत्वादिति चेन्मैवं, नियमविधावप्राप्तांशपूरणमेव प्राथमिकं फलमप्राप्तांशपूरणं विनान्यनिवृत्त्यसंभवात् । तदनंतरमर्थाज्जायमानान्यनिवृत्तिस्तु न फलमेकफललाभेऽन्यफलाकांक्षाभावात् । पारि
संख्याविधौ तु अप्राप्तांशाभावादप्राप्तांशपूरणरूपफलासंभवादन्यनिवृत्तिरेव फलमिति तस्मात्स्त्रीसंगादीनां रागतः प्राप्तत्वात्तेष्वपूर्वविधिर्नास्तीति सिद्धम् । उक्ताशयमजानानः सर्वविध्यभावोक्तिं मत्वा शंकते—नन्वृता
वित्यादिना । स्वाशयमाह—सत्यमिति । किन्तु नियमविधिरूपेणेति—नियमविधिः रूपमाकारो यस्य स तथा तेन, नियमविधिद्वारकपरिसंख्याविधिनेत्यर्थः । तेषु व्यवायादिष्विति स च तच्च सा च तानि तेष्विति "नपुंसक
मनपुंसकेन" इति नपुंसकस्यैकशेषः । विवाहविषय एवेति उपलक्षणमेतत् ऋतावेवेत्यस्य "ऋतौ भार्यामुपेयात्" इत्यत्र यदुपेयात्तद्भार्यामेव ऋतावेवेति द्विविधनियमे तात्पर्यात् । उपेयादेवेति तृतीयनियमस्तु
न, उपगमनस्यैव रागतो नित्यप्राप्तत्वेन व्यावर्त्याभावात् निवृत्तिरिष्टेति वक्ष्यमाणत्वाच्च । ननु च नियमपक्षेपीति अपिशब्दात्परिसंख्यापक्षेपीति उक्तोदाहरणेषु व्रीह्यवघातवेदाध्ययनाज्यभागादेरवश्यमनुष्ठेयत्वमवघाता
द्यकरणे क्रतुवैगुण्यापत्त्या प्रायश्चित्तापत्तेः, एवं स्त्रीसंगाद्यकरणे प्रायाश्चित्तापत्तेर्हेयत्वबोधिका निन्दा न युक्तेत्यर्थः । आसु निवृत्तिरिष्टेति प्रतीकग्रंथाग्रे टीकापाठः प्राचीनसंमतः । एवमासु व्यवायामिषमद्यसेवासु निवृत्ति
रिष्टा अयं भावः—नायं नियमविधिरपि नित्यप्राप्तत्वात् अतो निवृत्तिः परिसंख्यैव । कथं तर्हि व्यवस्थितिरित्युक्तमित्यादिः पाठांतरं लेखकप्रमादः। ननु विधिविषयेष्ववश्यानुष्ठेयत्वदर्शनात्प्रवृत्तिरेवोचिता तत्कथं सिद्धांती
ष्टापि निवृत्तिः संभवतीत्याशंकायामाह—अयं भाव इति । कथं तर्हीति परिसंख्याविध्यंगीकारे व्यवस्थितिपदोक्तनियमविधित्यागापत्त्या व्यवस्थितिपदेन नियमविध्यंगीकारवैयर्थ्यमित्यर्थः । उपलक्षणमेतत् परिसंख्या
विध्यंगीकारेपि परिसंख्याविषयेष्वाज्यभागाश्वरशनादानादिष्ववश्यानुष्ठेयत्वदर्शनात्सिद्धांतीष्टाया निवृत्तेरसंभवेन पूर्वपक्षोक्तदोषतादवस्थ्यस्याप्युपलक्षणीयत्वात् । दोषद्वयस्यापि परिहारं प्रतिजानीते—उच्यत इति ।
स्वतंत्रः परिसंख्याविधिः क्वापि नांगीक्रियते किं तु क्वचिदपूर्वविधिद्वारकः क्वचिन्नियमविधिद्वारक इति । प्रकृते तु नियमविधिद्वारकः परिसंख्याविधिरिति विधिद्वयोक्तेरप्यविरोधेन स्वीकृतपरित्यागादुक्तदो
षासंभवः, अपूर्वविधिद्वारकपरिसंख्याविधावेव विधेयस्यावश्यानुष्ठेयत्वं नियमविधिद्वारकपरिसंख्यायां तु विधेयस्यावश्यानुष्ठेयत्वं तस्यानित्यत्वे तु न विधेयस्यावश्यानुष्ठेयत्वमिति सिद्धान्तीष्टा निवृत्तिरपि संभवतीति
दोषद्वयसमाधिरुच्यत इत्यर्थः । प्रतिज्ञातमर्थं सहेतुकं सोदाहरणं सप्रमाणमुपपादयितुमुपक्रमते—न तावदित्यादिना । परिसंख्याविधिनेति कर्तरि तृतीया श्रुत्येति करणे, सर्वत्र परिसंख्याविधिना श्रुत्या शब्देनान्यनि
वृत्तिर्नोच्यते अन्यनिवृत्तिः शब्दार्थो न भवति किं तु अर्थादेव सज्यते, तथा सति सतिशब्दत एवान्यनिवृत्तिप्रतिपादनांगीकारे सतीत्यर्थः । स्वार्थत्याग इति—इत्यश्वाभिधानीमादत्त इति परिसंख्याविधिवाक्येऽनेन
मंत्रेणाश्वाभिधान्यादानं कर्तव्यमिति स्वार्थस्तत्राश्वाभिधानीमादत्त इति वाक्यस्थानेन मंत्रेण गर्दभरशनादानं न कर्तव्यमिति शब्दांगीकारेऽश्वाभिधान्यादानस्य स्वार्थस्य त्यागः विध्यपेक्षायाः परस्य निषेधस्यार्थः गर्दभरशनादानं
न कार्यमित्येवंरूपस्तस्य कल्पनालिंगात् रशनाद्वये प्राप्तस्य मंत्रस्य गर्दभरशनाग्रहणे बाध इति दोषत्रयं स्यादित्यर्थः । तत्राद्यं दोषद्वयं शब्दविषयं, तृतीयदोषोर्थविषयः। फलतोन्यानिवृत्तिरिति पक्षेपि प्राप्तबाधोस्त्येव, तथापि
तस्यार्थिकत्वाद्वास्तविकप्राप्त्यभावाद्वा न दोषः । ततो दोषत्रयप्रसंगाभावायापूर्वविधिद्वारको वा परिसंख्याविधिरंगीकार्य इत्याह—अतः क्वचित्प्राप्स्यतोपीति । यथा प्राप्तस्य प्रापणमनर्थकमेवं विधिप्रवृत्तिक्षणे प्राप्तिरहितस्य
विधिप्रवृत्त्युत्तरकाले प्राप्स्यतोपि प्रापणमनर्थकमिति दृष्टान्तव्यंजकमपि पदं श्रुतिर्हि विलंबितप्रवृत्तिकाल्लिंगात्पूर्वमेव प्रवर्तते, श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्येषूत्तरोत्तरापेक्षया पूर्वपूर्वस्य प्रथमं प्रवृत्तेः । यथा—" ऐंद्र्या गार्ह
पत्यमुपतिष्ठते" इत्यत्रैंद्रालिंगेनैंद्रोपस्थाने मंत्रविनियोजनात्पूर्वमेव श्रुत्या गार्हपत्योपस्थाने इंद्रपदोपेतो मंत्रो विनियुज्यत एवम् "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र लिंगप्रवृत्तेः पूर्वमेव श्रुतिरश्वाभिधान्यादाने मंत्रं
विनियुक्ते, श्रुतिप्रवृत्तिक्षणे लैङ्गिकविनियोगप्राप्त्यभावादपूर्वविधिरयम् एतद्विध्यभावेपि रशनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिंगान्मंत्रोऽश्वरशनादाने प्राप्स्यति । ऋतस्याव्यभिचारितफलस्य क्रतोः संबंधिनीं रशनां पशुरज्जुम् अगृभ्ण
न्निति मंत्रार्थसत्त्वात् । यथा—"बर्हिर्देवसदनं दामि" इति मंत्रो विधिं विनैव छेदनप्रकाशनसामर्थ्याल्लिंगादेव बार्हिर्बलेन प्राप्नोति तद्वत् । अतः प्राप्स्यतः प्रापणमनर्थकमिति विधिवैयर्थ्ये प्राप्ते रशनालिंगसामान्यादश्वरशना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दान इव गर्दभरशनादानेपि मंत्रः प्राप्स्यति । चयनेऽश्वरशनादानस्येव गर्दभरशनादानस्याप्यनुष्ठीयमानत्वात् । ततो गर्दभरशनादाने मंत्रनिवृत्तिर्विधेः फलमिति फलतोन्यानिवृत्तिप्रयोजनोऽपूर्वविधिद्वारकः परिसंख्याविधिः, "आज्यभागौ यजति"इत्यपि अपूर्वविधिद्वारा परिसंख्या उपदेशादतिदेशस्य विलम्बितप्रवृत्त्याज्यभागौ यजतीति विधिप्रवृत्तिक्षणेऽतिदेशादाज्यभागाद्यंगसमूहप्राप्त्यभावात् । अत्र वार्तिकं प्रमाणयति—अप्राप्तेति । अतः श्रुतिप्रवृत्तिक्षणे लिंगप्राप्त्यभावादन्यनिवृत्तौ शाब्दादिदोषत्रयप्रातेश्चायमश्वाभिधानीति विधिरपूर्वविधिरेव मंत्रस्य निश्चितः । परिसंख्या गर्दभरशनादाने मंत्रनिवृत्तिस्तु फलेनोक्ता सूचिता । ननु लिंगेन रशनासामान्येन विनियोग उक्त इति "अश्वाभिधानीमादत्ते" इति श्रुतेः पुनरश्वरशनारूपो विशेष उक्त इत्यवगम्यते इत्यस्तु, ततश्च श्रुत्या लैंगिकविनियोगस्य बाधो न, उपसंहारन्यायेन श्रौतलैंगविनियोगयोरैक्यवाक्यत्वसंभवात् । उपसंहारो नाम सामान्य प्राप्तस्य विशेषे संकोचः, यथा—पुरोडाशं चतुर्धा करोतीति पुरोडाशसामान्यप्राप्तं चतुर्धाकरणमाग्नेयं चतुर्द्धा करोतीति वाक्येनाग्नेये संकोच्यते, तेन वाक्यद्वयैकवाक्यता तद्वदत्र संभवात् लिंगबाधेन गर्दभरशनानिवृत्तिफलकत्वं विधेर्न संगच्छते तत्राह—'न विशेषः पुनः श्रुतेः' इति लिंगेन सामान्यतोवगम्यते । विशेषस्तु श्रुतेरेव गम्यत इति न वाच्यमित्यर्थः । श्रौतविनियोगक्षणे लिंगेन सामान्यविनियोगोक्तेरेवाभावेनोपसंहारन्याय वैलक्षण्यात्, उपसंहारे हि प्रथमं सामान्यं प्रवर्तते पश्चाद्विशेषः । प्रकृते तु प्रथमं श्रुत्युक्तविशेषप्रवृत्तिः पश्चात्सामान्यलिंगबोधकप्रवृत्तिरिति नियमविधिद्वारा परिसंख्यामाह—क्वचिदिति । पंचनखभक्षणस्य रागतो नित्यप्राप्तत्वाद पूर्वविधिर्न, दोषत्रयदुष्टत्वाच्छाब्दी परिसंख्यापि न, ततः पक्षप्राप्त्यभावेपि परिशेषान्नियमविधिः, तस्य चाप्राप्तांशपूरणलक्षणफलाभावादितरानिवृत्तिः फलत्वेन कल्प्यते । अत एव व्याकरणशास्त्रे सूत्रांतरैर्नित्यप्राप्तिविषये आरम्यमाणः सर्वोपि परिसंख्यांविधिर्नियमविधित्वेन व्यवह्रियते । स्वार्थत्यागादिदोषत्रयपरिहाराय च विधिमुखेन प्रवृत्तिं स्वीकृत्य नियमार्थकैवकारगर्भित एव प्रायो वाक्यार्थाकार उच्यते, न तु नञ्गर्भितः । अन्यथा "उभयप्राप्तौ कर्मणि"इत्यादेः कर्मण्येव षष्ठीनिवृत्तिर्नोच्यते किं तु कर्मपदस्य कर्तरि लक्षणान्नञोऽध्याहारञ्च कृत्वा कर्तरि षष्ठी नेत्येव वृत्तिरुच्येत,राजपुरुषादौ च"कृत्तद्धितसमासाश्च"इति प्रातिपदिकसंज्ञेति ग्रंथाश्च संगच्छरेन्। नियमस्य निषेधमुखेन प्रवृत्तौ समासग्रहणस्य वाक्ये प्रातिपदिकसंज्ञा नेत्यर्थकत्वेन राजपुरुषादौ संज्ञाविधायकत्वाभावात् । तस्मात्पंचनखभक्षणादौ नियमविधिद्वारकः परिसंख्याविधिर्व्याकरणशास्त्ररीत्या युक्त इति । यथा— "पंचपंच" इति "पञ्चपञ्चनखा भक्ष्या विप्रक्षत्रेण राघव । शशकः शल्लको गोधा कूर्मः खड्गी च पंचमः ॥" इति पंचैव पंचनखा भक्ष्या अर्थादितरे वानरादयो न भक्ष्या इति । अत्र हि विधिविषयस्य पंचानां भक्षण स्यावश्यकत्वं न, भक्षणाकरणे प्रायश्चित्ताभावात्, किं तु पंचेतरभक्षणे प्रायश्चित्तम् । एवं व्यवायादेरावश्यकत्वाभावाद्वार्यागमनाद्यकरणे प्रायश्चित्तं न, किन्तु परदारगमनादौ प्रायश्चित्तमिति प्रकृते योजयति—तथेति । एवं विधेयस्यावश्यकत्वानावश्यकत्वे बीजं स्थूलबुद्धिसमाधानाय व्यंजयित्वैतदपि न सर्वव्यापके व्याकरणशास्त्रे नियमद्वारकपरिसंख्याविषयेष्ववश्यानुष्ठेयत्वदर्शनात् , तद्वदत्रापि अवश्यानुष्ठेयत्वमास्त्विति गूढां शंकां मनसि निधायावश्य कत्वानावश्यकत्वे बीजांतरं व्यंजयन्नाह—रागत इति, नित्यवदिति च । अयं भावः—नात्रावश्यकानावश्यकत्वेऽपूर्वविधिद्वारकत्वनियमविधिद्वारकत्वे एव बीजं किंतु पक्षप्रापकस्य उभयोर्नित्यप्रापकस्य च प्रमाणस्य शाश्वतिकत्वाशाश्वतिकत्वे व्रीहीनवहंतीत्यादिनियमस्थलेपि तंडुलनिष्पत्त्याक्षेपकनित्यप्रवृत्तपुरोडाशादिविधिबलादेवावघातस्यानुष्ठानम् , न तु नियमविधिबलात्स्वत एवावघाते प्रवृत्तं प्रति नियमविधिप्रवृत्त्ययोग्यात् । एवं वेदाध्ययनादावपि योज्यम् । तथा—परिसंख्यास्थलेपि रशनालिंगस्यातिदेशस्य नित्यप्रवृत्तत्वाद्बलादेवानुष्ठानम् , न तु परिसंख्याविधिबलात् । परिसंख्याया अन्यनिवृत्तौ तात्पर्येणावश्यकत्वे तात्पर्याभावात् । एवं व्याकरण शास्त्रेपि सामान्यविधीनां नित्यत्वादेव परिसंख्याविषयेष्ववश्यानुष्ठेयत्वमूह्यम् । प्रकृते तु यथा पञ्चनखभक्षणादौ नित्यतः प्रापकस्य रागस्य कादाचित्कत्वेन शश्वत्प्रवृत्त्यभावात् । रागसत्त्वे भक्षणं रागाभावे न भक्षणमिति न विधेयस्यानुष्ठानम् । एवं स्त्रीसंगादौ नित्यतः प्रवर्तकस्य रागस्य शाश्वतिकत्वाभावात् रागसत्त्वेऽवश्यानुष्ठानम् । विरागिणां तु नावश्यकम् । तद्व्यंजनायैव नित्यवत्प्राप्तस्येति वतिप्रत्ययः । रागस्य सर्वपुरुषे सर्वकाले च नियतत्वाभावेन नित्यत्वाभावादिति एतामेव गूढाशंकां स्पष्टयन्नाह—नन्वित्यादिना । 'भ्रूणहत्यागर्भहत्याश्रवणं न स्यात्' इति दोषश्रवणान्नियमविधिद्वारकपरिसंख्याविषयेप्यवश्यानुष्ठेयत्वमास्त्वित्यर्थः । समाधानं स्पष्टयति—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसि काम इति । रागस्यैव मूलप्रवर्तकप्रमाणत्वान्नियमद्वारकपरिसंख्याविधेस्तु इतरनिवृत्तावेव तात्पर्येणावश्यानुष्ठाने तात्पर्याभावात् , रागाभावे प्रवर्तकप्रमाणस्यैवाप्रवृत्त्यानुष्ठानाभावे दोषाभावोऽयुक्त एव । एवमग्नीषोमीयादेः पशुद्रव्यकयागस्य सुरायुक्तसौत्रामण्यादेश्च विषयरागिणि पुरुषेन्तःकरणशुद्ध्यभावात्, विषयरागाभावेन्तःकरणशुद्धिसिद्ध्या कर्माधिकाराभावात् । ज्ञाने भक्तौ वाधिकारोत्पत्त्या ज्योतिष्टोमाद्यनुष्ठानस्यैवावश्यकत्वाभावात् । आमिषमद्यसेवयोरनावश्यकत्वं न त्वत्र ज्योतिष्टोमः कार्यो मांसमात्रं न भक्षणीयमिति तात्पर्यं विधिवैगुण्यापत्तेः । सुराग्रहस्य कलिवर्ज्यत्वात्कलौ सौत्रामणिरेव न कार्य इति केचित् । अन्ये तु—सौत्रामणिः कार्यः सुराग्रहस्थाने प्रतिनिधिः कार्य इत्याहुः । मम तु श्लोकतात्पर्यमित्थं प्रतिभाति—व्यवायादिषु रागतः प्राप्तत्वादपूर्वविधिर्न, पक्षप्राप्त्यभावान्नियमो न, दोषत्रयग्रस्तत्वादपूर्वनियमयोर्द्वारत्वासंभवाच्च परिसंख्यापि न, किन्तु सामान्यप्राप्तस्य विशेषे संकोचरूप उपसंहारः । तथाहि—यथा पुरोडाशं चतुर्धा करोतीति पुरोडाशसामान्ये प्राप्तं चतुर्धाकरणमाग्नेयं चतुर्द्धा करोतीति वाक्येनाग्नेये संकोच्यते नात्र नियमः परिसंख्या वा मीमांसकैरुच्यते एवं रागतः प्राप्तं पंचनखसामान्ये भक्षणं पंचसु पंचनखेषु संकोच्यते । परिसंख्योदाहरणं तु ‘ इत्यश्वाभिधानीमादत्ते ’ इत्यादिकमपूर्वविधिद्वारकमेकविधमेव । तथा रागतः स्त्रीसामान्ये कालसामान्ये च व्यवायः प्राप्तः ऋतौ भार्यायां च संकोच्यते । एवमामिषसेवादावपि योज्यम् । तथा च—विधिबलात्प्राप्त्यभावेन रागत एव प्राप्तत्वेन निवृत्तिरेव विरागिणामिष्टेति । इत्थमेतत्पक्षे श्लोकयोजना—व्यवायादयो नित्या रागतः प्राप्ता इति तेषु चोदना कोपि विधिर्नास्ति तर्हि ऋतौ भार्यामुपेयादित्यादेः कोर्थः, तत्राह—व्यवस्थितिरिति । अव्यवस्थया सर्वत्र रागतः प्राप्तं व्यवायादिकं तस्य विवाहयज्ञसुराग्रहैर्व्यवस्था क्रियते, उपसंहारापरनामा संकोचः क्रियत इत्यर्थः । तस्माद्विधेरभावान्मूलभूतप्रापकरागस्य दुर्बलत्वाद्विचारेणापनोद्यत्वाच्च विरागिणां निवृत्तिरेवेष्टा न प्रवृत्तिरिति विधिरपूर्वविधिर्नास्तीत्यर्थः । तदुक्तम्—“विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ॥ तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥” इति । तत्रापूर्वविधिर्यथा—व्रीहीन्प्रोक्षतीति वाक्यं प्रत्यक्षाद्यप्राप्तावपूर्वविधिः । नियमविधिर्यथा—व्रीहीनवहन्ति अत्र घरट्टनखादिभिर्वितुषीकरणरूपे पक्षे प्राप्ते पाक्षिकाप्राप्तांशपूरणार्थे नियमविधिः । उभयोर्नित्यप्राप्तावन्यत्र निवृत्तिफलकः परिसंख्याविधिः, यथाज्यभागौ यजतीति । अत्र नात्यन्तमप्राप्तिः प्रकृतिवद्विकृतिः कर्तव्येत्यातिदेशिकन्यायेन प्राप्तोतो नापूर्वविधिर्नापि नियमविधिरतिदेशेन नित्यप्राप्त्या पक्षप्राप्त्यभावात् । किन्त्वाज्यभागयोरिव प्रयाजाद्यंगजातस्यापि नित्यप्राप्त्या प्रयाजादिनिवृत्तिफलक आज्यभागावेवं कर्त्तव्यावित्येवंरूपः परिसंख्याविधिरिति सकलांगो यागः प्रकृतिशब्दवाच्यः, विकलांगो यागो विकृतिशब्दवाच्यः, तुल्यवत्कथनमतिदेशः, तस्माद्रागतः प्राप्तत्वात्स्त्रीसंगादिष्वपूर्वविधिर्नास्तीत्युक्तमाशयमजानञ्छंकते—नन्विति । स्वाशयमाह—सत्यमिति । नियमविधिरूपेण नियमविधिद्वारकपरिसंख्याविधिनेत्यर्थः । ऋतावेवेति यदुपेयात्तद्भार्यामेव ऋतावेवेति नियमे तात्पर्यात् । उपेयादेवेति तृतीयनियमस्तु न, उपगमनस्यैव रागतो नित्यप्राप्तत्वेन व्यावर्त्याभावात् निवृत्तिरिष्टेति वक्ष्यमाणत्वात् । तत्र शंकते—कथं तर्हीति । परिसंख्याविध्यंगीकारे व्यवस्थितिपदोक्तविध्यंगीकारवैयर्थ्यमित्यर्थः । परिसंख्यायामप्यश्वरशनादिष्ववश्यमनुष्ठेयत्वान्न निवृत्तिरित्युक्तमित्यर्थः । परिहरति—उच्यत इति । परिसंख्याविधिः क्वचिदपि न स्वतंत्रः किं तु क्वचिदपूर्वविधिद्वारकः, क्वचिन्नियमविधिद्वारकः, प्रकृते तु नियमविधिद्वारकोऽतो नावश्यानुष्ठेयता, तस्मान्निवृत्तिरिष्टेति युक्तम् । तदेव व्यनक्ति—न तावदित्यादिना । परिसंख्यादिना कर्त्रा श्रुत्या करणेन शब्देन नोच्यते किन्त्वर्थादेवान्यनिवृत्तिः सूच्यत इत्यर्थः । तथा सति शब्दत एवान्यनिवृत्तिप्रतिपादनाङ्गीकारे सतीत्यर्थः । स्वार्थत्याग इति—अश्वाभिधानीमादत्त इति परिसंख्याविधिवाक्ये हि अश्वाभिधान्या ग्रहणं स्वार्थः । अनेन मंत्रेण गर्दभाभिधानीग्रहणं न कर्तव्यमित्यङ्गीकारे स्वार्थत्यागः परस्य निषेधकामना इमामिति लिङ्गात् रशनाद्वये प्राप्तस्य मंत्रस्य गर्दभरशनाग्रहणे बाध इत्यर्थः । तत्राद्यं दोषद्वयं शब्दविषयमर्थविषयमन्यत् क्वचित्प्राप्स्यत इति । यथाप्राप्तस्य प्रापणमनर्थकमेवं विधिप्रवृत्तिलक्षणे प्राप्तिरहितस्य विधिप्रवृत्त्युत्तरकाले प्राप्स्यतो प्रापणमनर्थकमिति दृष्टान्तव्यंजकमपि पदम् इमामिति । ऋतस्याव्यभिचारिफलस्य क्रतोः सम्बधिनीं रशनां ये पशुरशनामभ्यगृभ्णन्नगृह्णन्नित्यर्थः । “ हृग्रहोर्भश्छन्दसि ” अत्र वार्तिकम्प्रमाणयति—अप्राप्तेति । अतः श्रुतिप्रवृत्तिलक्षणे लिंगप्राप्त्यभावात् अन्यनिवृत्तौ शब्दाद्दोषत्रयप्राप्तेश्चायमश्वाभिधानीविधिरपूर्वविधिरेव मंत्रस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निश्चितः । परिसंख्या गर्दभरशनादाने मंत्रनिवृत्तिस्तु फलेनोक्ता सूचिता न विशेषः पुनः श्रुतेरिति लिंगेन सामान्यतोवगम्यते विशेषस्तु श्रुतेरवगम्यत इति न वाच्यमित्यर्थः । एवमपूर्वविधिद्वारा परिसंख्योक्ता नियमद्वारापि तामाह—क्वचित्त्विति । पञ्चनखेति—“शशकः शल्लको गोधा कूर्मः खड्गी तु पञ्चमः । पञ्च पञ्चनखा भक्ष्या विप्रक्षत्रेण राघव॥” इति वाल्मीकिये पञ्चैव पञ्चनखा भक्ष्या इतरे वानरादयो वर्ज्याः । अत्र पञ्चनखभक्षणं नावश्यकं तदकरणे प्रायश्चित्ताभावात्, अधिकभक्षणे प्रायश्चित्तविधानात् । एवं व्यवायादिकमपीत्याह—तथेति । तत्रैव बीजांतरमाह—रागत इति । यथा रागसत्त्वे पञ्चनखभक्षणं रागाभावे नावश्यकं तद्वद्व्यवायादीनां सेवनं रागसत्त्वे रागाभावे नावश्यकमिति व्यञ्जयितुं नित्यवत्प्राप्तस्येति वतिप्रत्ययः । नियमविधिद्वारकपरिसंख्याविषयेप्यवश्यानुष्ठानमाशंकते—नन्विति । भ्रूणहत्यागर्भहत्या तस्यामित्यर्थः ॥ * ॥ **दीपिका**—व्यवायादीनामपि निंद्यत्वेनाभिप्रेतानामपीत्यपेरर्थः । ऋतौ सदा मैथुनार्थं भार्यामुपगच्छेदिति हुतान्मांसादवशेषं मांसं भक्षयेदित्यादिना विधिरूपेण वेदेन । आदिना ‘सौत्रामण्याम्’ इति वक्ष्यमाणवाक्यग्रहः । रागत एवेच्छात एव नित्यप्राप्ताः नित्यवत्प्राप्ताः अतो नित्य प्राप्तत्वात् तासु व्यवायामिषमद्यसेवासु विधिरुपदेशो नास्ति “चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः” इत्यभियुक्तोक्तेः । विधिर्दर्शित उपेयादिति विध्यर्थेलिङ्प्रयोगश्रवणात् । सत्यमित्यर्द्धांगीकारे । अयमृतुगमनविधानेरूपोऽपूर्वविधिर्नास्ति । अप्राप्तार्थविधायको ह्यपूर्वविधिः यथा—व्रीहीन्प्रोक्षति, यथा च—स्वर्गकामो यजेतेत्यादिः । अत्र यागार्थव्रीहीप्रोक्षणस्य स्वर्गार्थयागस्य च वाक्यांतरेण रागेण चात्यंतमप्राप्तत्वादपूर्वविधित्वम् । अत्र तु स्वेच्छयैव नित्यप्राप्तत्वात्तन्नास्त्येवेत्यर्थः । ननु तर्हि कथं लिङ्श्रवणं तव्यादिलिङ्लोटां विधिबोधकत्वात्तत्राह—किन्त्विति । नियमविधिरूपेण नियमविधिसदृशेन विधिवाक्येन अभ्यनुज्ञामात्रं प्रमाणांतरप्रतिपन्नानिष्टसाधनत्वैतदभावमात्रबोधनं क्रियते तदाह—नियमविधिसमानार्थत्वमाह—द्वंद्वस्य परवल्लिंगत्वे सति तास्विति वक्तव्ये तेष्वित्येकशेषत्वान्नपुंसकत्वम् । विवाहेत्युपलक्षणं, तत्रापि ऋतावेवेत्यर्थः । सौत्रामण्यां तत्संज्ञके यागे सुराग्रहान्मद्यपात्राणि गृह्णीयादिति श्रुतिपदार्थः । तत्रैव सौत्रामण्यामेव नियमः सार्वदिकव्यवायादिव्यावृत्तये संकोचः । नन्विति शंकते—नियमपक्षेप्यावश्यकत्वादिति । यथा—व्रीहीनवहन्यादिति नियमविधिप्राप्तोववातो ह्यावश्यकस्तथेत्यर्थः । आसु निवृत्तिरिष्टेत्यग्रे आसु व्यवायामिषमद्यसेवासु निवृत्तिरिष्टेति पठनीयम्, ततोऽयं भाव इति युज्यते । व्यत्ययस्तु लेखकप्रमादादेव पूर्वं प्रवृत्तादिति ज्ञेयम् । सिद्धान्तं विशदयति—अयं भाव इति । अयमृतौ भार्यामुपेयादित्यादिर्नियमविधिर्न भवति, कुतः नित्यप्राप्तत्वात् । पक्षे प्राप्तावप्राप्तांशपूरको विधिर्नियमविधिर्यथा—व्रीहीनवहन्तीत्यादिः । अत्र यथा तंडुलनिष्पत्त्यर्थं नखविदलनादि लोकतः प्राप्तं तथावघातोपि तदर्थमेव लोकतः प्राप्तोपि नखविदलनादिव्यावृत्तये नियम्यते । किं तु यस्यां दशायामवघातं परित्यज्य नखविदलनादौ स्वेच्छया पुमान्प्रवर्तते तस्यां दशायामवघातस्याप्राप्तत्वात्तत्पूरकत्वेन नियमविधित्वमिति लक्षणसमन्वयः । तदुक्तं भट्टैः—“अवघातेपि नियमो देशादाविव तेन सः । प्रधानेन प्रयुक्तः स्यात्संबंधः प्रक्रियोक्तिभिः ॥” इति । अतः नित्यप्राप्तत्वेनाप्राप्तांशपूरणलक्षणनियमविधेरसंभवात् परिसंख्यैवेति । उभयस्य युगपत्प्राप्तौ इतरव्यावृत्तिपरो विधिः परिसंख्याविधिः सैवेष्टेति, उच्यते—उभयविधिसांकर्ये नियमविधिद्वारैवेयं परिसंख्येति समाधीयते । एतत्प्रकारमाह—न तावदिति । परिसंख्याविधिना कर्तृत्वेन श्रुत्या वाच्यार्थेन करणेन तथा सति वाच्यार्थसंभवेन न विरोधिप्रत्यनीकलक्षणया निवृत्तिपरिभाषणे सति स्वार्थस्य श्रुतस्य वाच्यार्थस्यर्तुगमनस्य त्यागः स्यात् । तथा परार्थस्याश्रुतस्यानृत्वगमनस्यातृप्तौ भार्यां नोपेयादित्येवं कल्पनेति दोषद्वयं शब्दव्यवहारेण प्रतीयत इति शब्दनिष्ठम् । तथा रागतः प्राप्तस्यानृतुगमनस्य बाध इत्येको दोषोऽर्थविचारात्फलितं इत्यर्थनिष्ठ इत्येवं दोषत्रयं स्यात् । यतो वाच्यार्थसंभवाल्लक्षणातो निवृत्तिपरिभाषणे दोषत्रयं ततस्तन्निर्वहणाय क्वचिदपूर्वविधिद्वारा तात्पर्यतः परिसंख्या, क्वचित्तु नियमविधिद्वारा । तत्र पूर्वमाह—क्वचिदिति । क्वचिदश्वाभिधानीमादत्त इत्यादौ प्राप्स्यतः मंत्रे ऋतस्य सामान्योक्त्या पक्षे प्राप्स्यतोऽश्वाभिधानीरशनाग्रहणलक्षणार्थस्याश्वाभिधानीमादत्त इति ब्राह्मणवाक्येन पुनः प्रापणमनर्थकं व्यर्थम्, “अप्राप्ते शास्त्रमर्थवत्” इति न्यायात् । इति हेतोः अपूर्वविधिद्वाराऽपूर्वविधिसदृशतया सर्वांशेनाश्वाभिधानीग्रहणं मानांतरेणाप्राप्तमित्यपूर्वविधित्वं पाक्षिकतया त्वंशेन प्राप्तमिति नापूर्वविधिः संगच्छते तद्द्वारान्यस्य गर्दभरसनाग्रहणस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवृत्तिः फलतस्तात्पर्यतो भवति । गर्दभाभिधानीं न गृह्णीयादिति । तद्यथा तदेव दर्शयति–"ऋतस्य यज्ञियपशोरिमां रशनामगृह्णन् गृह्णीयादिति" इति सामान्यतो रशनाविधायकमंत्रं पठित्वाऽश्वाभिधानीमश्वोऽवधीयतेऽवस्थाप्यते यया तां रशनामादत्ते । गृह्णीयादित्यत्र रशनालिंगतो रशनाशब्दसामर्थ्यात् रशनाद्वये गर्दभाश्वरशनयोर्विषये प्रयोगकाले प्राप्स्यतो मंत्रस्य संबंधी अयमश्वाभिधानीमेवाददीतेति मंत्रार्थनिश्चायक इत्यर्थः । अयमश्वाभिधानीग्रहणविधिः परिसंख्योच्यते परिसंख्यात्वेनोच्यते । पूर्वोक्तदोषत्रयनिवारणार्थं तत्र द्वारमाह–अपूर्वविधिद्वारेति । तत्र वृद्धसंमतिमाह–यथोक्तमिति । अयमश्वाभिधानीविधिर्लकारव्यत्ययेनाप्राप्तविधिरपूर्वविधिरेव मंत्रस्य पाक्षिकविधायकत्वेपि सर्वांशेनाप्राप्तत्वात् । अतस्तादृशविधेर्हेतोर्मंत्रार्थोपि अश्वाभिधानीमाददीतेति निश्चितः स्यात् । अतोऽपूर्वविधिद्वारा फलेन तात्पर्येण गर्दभाभिधानीं न गृह्णीयादिति परिसंख्योक्तविशेषो नियमविधिर्नास्ति । कुतः–पुनः श्रुतेः अंशेन प्राप्तस्यैवाश्वाभिधानीग्रहणस्य पुनः श्रुतत्वात्, अप्राप्तांशपूरणभावादित्यर्थः । नियमविधिद्वारा परिसंख्यां दर्शयति–क्वचिदिति ! क्वचित्पञ्चनखभक्षणवाक्ये रागतः स्वाभाविकेच्छातो नित्यप्राप्तस्य पंचनखभक्षणादेः व्यवायादेः संबंधेऽप्राप्तांशस्य पूरणमेव लक्षणं स्वरूपं यस्य तस्य नियमफलस्याप्यभावात् । अपिरत्रापूर्वविध्यभावं समुच्चिनोति । नियमविधिद्वारा नियमाविविसदृशतया फलतस्तात्पर्यतः परिसंख्या भवति । पंचनखेतरा अभक्ष्या इति दार्ष्टांतिकमाह–तथात्रेति । अत्रर्तौ भार्यामुपेयादित्यादावभ्यनुज्ञाद्वारा प्रमाणांतरप्रतिपन्नानिष्टसाधनत्वेपि तदभावमात्रबोधको विधिरभ्यनुज्ञाद्वारा परिसंख्यैव् नापूर्वविधिर्नापि नियमविधिरित्यर्थः।अनृतौ भार्यां नोपेयात्,अहुतशेषं न भक्षयेत्, सौत्रामणिव्यतिरिक्ते सुरां न गृह्णीयादित्येवं सर्वत्र परिसंख्यैव । न त्वपूर्वनियमयोरिव शास्त्रप्राप्तत्वेनावश्यकत्वमिति निवृत्तावेव तात्पर्यमित्यर्थः।विधित्रयलक्षणमभिज्ञैरुक्तम्–"विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र संप्राप्तौ परिसंख्येति गीयते॥" इति।अन्यदतिरोहितार्थमिति प्रकाशः॥*॥संदर्भकारैरपीत्थमेव व्याख्यातम्म्।तथाहि–लोके इति तैः।तत्र नियमविधिरूपेणेति तत्सदृशेनेत्यर्थः।तदाहेति तत्समानार्थमाहेत्यर्थः। द्वंद्वस्य परवल्लिंगत्वे सतीति पूर्ववत्।नियमपक्षेऽप्यावश्यकत्वादिति यथाश्वाभिधानीमादत्त इत्यत्रादानमावश्यकं तथेत्यर्थः । सिद्धांतमाह–अत आहेति । नियमेआदानस्य विधिप्राप्तत्वान्न सर्वतो निवृत्तौ तात्पर्यं परिसंख्यायां तु भक्षणस्य रागतः प्राप्तत्वात सर्वत एव निवृत्तौ परमतात्पर्यमिति युक्तैत्र निन्देत्यर्थः । आसु व्यवायेत्यादिकमयं भाव इत्यतः पूर्वमेव युज्यते, तत्र तु लेखकप्रमादादिति ज्ञेयम्।व्यवस्थितिरिति–तच्छब्देन व्याख्यातो नियम इत्यर्थः। नियमद्वारैवेयं परिसंख्येति सिद्धांतयितुमाह–उच्यते,परिसंख्याविधिना कर्तृभूतेन श्रुत्या शब्देन करणभूतेन। प्राप्स्यतः पाक्षिकतयेति ज्ञेयम्–क्वचिदिति । रागतो नित्यप्राप्तस्येत्यस्य नियमेत्यादिनान्वयः।तत्र हेतुः–प्राप्तांशेति । यथा पाक्षिकतयांशेनाप्राप्ताश्वाभिधानी सर्वांशेन पूर्यते तादृशत्वाभावादित्यर्थः। अत्रापि नियमविधिस्तत्सदृश एव ज्ञेयः । मनसीति विध्यभावेप्यभ्यनुज्ञाविषयाणां रागिणामभ्यनुज्ञातिक्रमः स्यादेवेति भावः । अथवा लोक इति । तथाहि–"विधिरत्यंतमप्राप्तौ" इति पूर्ववत् । अत्र विधिर्यथा–" अहरहः संध्यामुपासीत " इति । इदं खलु सर्वथैव न प्राप्नोति अयमेवापूर्वविधिरुच्यते । नियमो यथा–"इमामगृभ्णन्रशनामृतस्य" इति मंत्रेण ऋतस्य याज्ञिकपशो रसनां रज्जुमगृभ्णन् अगृह्णन्नित्यर्थेन गर्दभाश्वाभिधान्योरेकतरस्यां स्वाच्छंद्येन प्राप्तायां ब्राह्मणेन नियम्यते " अश्वाभिधानीमादत्ते " इति । परिसंख्या च " पंच पंचनखा भक्ष्याः " इति । अत्र रागप्राप्तेषु प्रायः सर्वेष्वेव मांसवत्सु भक्ष्येषु पञ्चैव परिसंख्यायन्ते तदनुसारेण तावन्त एवाभ्यनुज्ञायंते मात्रं न तु विधीयंत इत्यर्थः । तत्र नियमे प्राप्स्यतोप्यर्थस्य प्रापणमनर्थकमिति ब्राह्मणेनापूर्वविधिनाऽन्यनिवृत्तिस्तात्पर्यतो भवति । अतः परिसंख्या चात्र पर्यवसिता । तंत्रवार्तिके यथोक्तम्–"अप्राप्तविधिरेवायमतो मंत्रस्य निश्चितः । परिसंख्याफलेनोक्ता न विशेषः पुनः श्रुतेः ॥" इति । अयमश्वाभिधानीविधिरप्राप्तविधिरेव नकारव्यत्ययात्, तस्मादतो विधेर्मंत्रार्थश्च निश्चितः–अश्वाभिधानीमाददीतेति । अतोत्र परिसंख्यात्वमपि फलेन तात्पर्येण प्राप्तम् । ननु सामान्यतो मंत्रप्राप्तस्य रशनाद्वयस्याश्वाभिधानीमित्यनेन विशेष एवोक्तः अपरोपि ज्ञास्यत इति वाच्यम्, तत्राह–पुनः श्रुतेः पुनरुक्तत्वादनर्थकत्वादित्यर्थः । अत्र परिसंख्यायामिदं विविच्यते न तावत्परिसंख्याविधिशब्दो नान्यनिवृत्तिं वक्ति, तथा सति पञ्चनखीभक्षणरूपस्य स्वार्थस्य त्यागः तथान्यनिवृत्तिरूपस्य परार्थस्य कल्पनम् । ततश्च प्राप्तस्य पञ्चनखीभक्षणरूपस्य बाधश्च स्यादिति । तस्मात्तादृशनियमविधौ पाक्षिकतयांशेन प्राप्ताश्वाभिधानी सर्वांशेनैव पूर्यते रागतो नित्यप्राप्तेषु नियमफले तादृशत्वाभावान्नियमद्वारा तात्पर्यतः परिसंख्या भवतीति । तस्मादयमर्थः–लोके व्यवायादयो जंतोर्मनुष्यादेर्नित्या रागत एव नित्यप्राप्ताः । तत्र व्यवायः स्वभावत एव, आमिषमद्ये तु मनुष्यस्य परम्पराप्राप्तत्वादिति ज्ञेयमतस्तत्र चोदनाऽपूर्वविधिर्नास्ति । किं तु तेषु रागिषु विवाहयज्ञसुरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति ॥ गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यम् ॥ १२ ॥

तदेवं व्यवायादिमनोरथाकुलितत्वादभीष्टमात्मानं न शृण्वंतीत्युक्तमिदानीं धनस्यापि धर्मद्वारा परमात्मप्रापकस्य दृष्टोपभोगार्थं विनियोगान्नात्मज्ञानगंधोऽपीत्याह । धनं चेति । धर्म एवैकं मुख्यं फलं यस्य तत् । कुतः । यतो यस्माद्धर्मात्सविज्ञानमपरोक्षज्ञानसहितं दृढं परोक्षज्ञानं भवति । कथंभूतम् । अनुप्रशांति अन्वनंतरमेव प्रकृष्टा शांति र्निर्वाणलक्षणा यस्य तत् । एवंभूतं धनं गृहेषु देहाद्यर्थं युंजंति ॥ १२ ॥

ग्रहैर्व्यवस्थितिः क्रियते नियमद्वारा परिसंख्या क्रियते । तद्यथा–विवाहेत्युपलक्षणं विवाह एव तत्रापि ऋतावेव व्यवायः कार्यः, यज्ञ एवामिषसेवा, सुराग्रहे सौत्रामण्यामेव मद्यसेवेति । ननु परिसंख्यात्वे सति व्यवायादौ विधित्वमस्त्येव लिङ्गादिसद्भावात्, ततस्ताः कथं निन्दया त्यज्यन्ते तत्राह–आसु व्यवायादिषु निवृत्तिरेवेष्टेति । रागप्राप्तत्वादभ्यनुज्ञामात्रं क्रियते न त्वपूर्वनियमयोरिव शास्त्रप्राप्तत्वादवश्यं कार्यते, इति निवृत्तावेव तात्पर्यमित्यर्थः । ऋतुस्नाताया भार्यायाः परित्यागदोषश्रवणं तु विध्यतिक्रमाद्विध्यनुपपत्तेः, न च वैराग्येणाभ्यनुज्ञातिक्रमात्, तत्राभ्यनुज्ञाया अभावात् । किन्तु सत्यामप्यनुज्ञायामन्यस्यां रागादौ स्वभार्यायामरुच्यादिनैवाप्रवृत्तेस्तदतिक्रमात्, ततो भ्रूणहत्यापर्यवसनाच्च । एवमांमषमद्ययोरपि ज्ञेयम् ॥ * ॥ **विश्वनाथस्तु**–चोदनाशास्त्रविधिः अप्राप्तप्रापणैव विधित्वात् । व्यवस्थितिर्व्यवस्थैव दत्ता । यदि स्त्रीमांसमद्यादि विना न स्थातुं शक्यते तदा विवाहविषय एवेत्यादि वाभ्यनुज्ञा दत्ता, न तु वस्तुतोविधिरत आसु निवृत्तिरेवेष्टेति निवृत्तावेव शास्त्रतात्पर्यम् । तथाहि–भार्यामेवोपेयान्न स्त्रीमात्रम्, ऋतावेवोपेयान्नान्यत्र, तत्रापि पंचपर्वातिरिक्तसमय एव, रात्रावेव, पुत्रकामनयैवेति क्रमक्रमतो निवृत्तिरेवाभिप्रेता । पञ्च पर्वाणि च–द्वादशीपूर्णिमामावास्यासंक्रान्तिश्राद्धरूपाणि । विधिरत्यंतमप्राप्तेति कारिकार्थस्तु प्रवृत्तिकर्मैकनिष्ठानां मते, अत्यंतमप्राप्तौ विधिर्यत्र रागतो विध्यंतरतो वा सर्वथैव प्राप्तिर्नास्ति स विधिः । यथा–" अहरहः संध्यामुपासीत " " माघस्नानं प्रकुर्वीत " इति निशि न स्नायाच्चन्द्रग्रहे तु स्नायादिति । अत्यंताप्राप्तिरहिते स्थले तु विधिर्न भवति, किन्तु नियमः परिसंख्या वा । तत्र कुत्र नियमः कुत्र वा परिसंख्याऽतआह–पाक्षिके सति नियमः पाक्षिकेंऽशेऽसति निन्दा प्रायश्चित्तार्हे सति नियमः । यथा–' ऋतौ भार्यामुपेयात् ' इति ऋतुसमये हि भार्यागमनं रागप्राप्तं तत्रागमनांशे निन्दा । यथा–' ऋतुस्नातां तु यो भार्याम् ' इत्यादि स्मृतेरत एव नियम एव । ऋतौ भार्यामुपेयादेवेति ऋतौ भार्यागमनायोगो न कर्तव्य इति फलितार्थः । अथ तत्र च तन्मध्य इत्यर्थः । अन्यत्र च अन्यत्र तु अन्यस्मिन्भागेऽसति सति परिसंख्या, यथा–पञ्च पञ्चेति । अत्र रागप्राप्ते पंचनखभक्षणे च निन्दा न श्रूयते, किन्तु तादितर भक्षण एव । अतः पञ्चैव पञ्चनखा भक्ष्या नान्य इति परिसंख्यैव अभ्यनुज्ञादानमात्रमतो मांसमात्रस्याप्यभक्षणे नास्ति दोष इत्यायातम् । अथ निवृत्तकर्मैकनिष्ठानां मतेऽर्थो यथा–अत्यन्तं सर्वथाप्राप्तौ विधिः, यथाऽहरहः संध्येत्यादि, पाक्षिके प्रापणे सति विधित एवैकत्र कोटौ प्राप्तौ सत्यामन्यत्राप्राप्तौ च सत्यां नियम इत्यर्थः । यथेमामित्येकवचनेन गर्दभाश्वाभिधान्यो रसनयोरेकतरस्यां प्राप्तिर्बुध्यते, तत्र किमश्वाभिधान्यामुत गर्दभाभिधान्यामिति संशये नियम्यतेऽश्वाभिधानीमादत्त इत्यश्वाभिधानीमेवादान्न गर्दभाभिधानीमिति नियमे निषेधो वाक्यार्थः । तदेवमपूर्वविधिरिति नियमविधिरिति द्वावप्येतौ विधी । का खलु परिसंख्येत्यपेक्षायामाह–तत्र च तन्मध्ये त्वित्यर्थः । अन्यत्र विधित इतरत्र रागस्थले प्राप्तौ सत्यां या परिसंख्या विधीयते–यथा रागतो मांसभक्षणप्राप्तौ पंच भक्ष्या इति पंचपंचनखेतरमांसानि सर्वाण्यभक्ष्याणि भोक्तुः प्रत्यवायजनकानीत्यर्थः । मांसभक्षणे पंचपंचनखमांसान्येव परिसंख्यातान्यभ्यनुज्ञातानीति तत्रैव न प्रत्यवायः परिसंख्याया अभ्यनुज्ञानदानमात्रार्थत्वात्सर्वमांसाभक्षण एव शास्त्रतात्पर्यमत एव भार्यामेवाभिगच्छेन्न परकीयामृतावेव नान्यत्रेत्यभ्यनुज्ञामात्रदानात्स्त्रीमात्रानभिगमन एव शास्त्रतात्पर्यमिति ॥ ११ ॥ तदेवं तदित्थम् । न केवलमात्मानं न शृण्वन्तीत्येव किन्तु धनमतिदुःखसंपाद्यमपि व्यर्थमेव व्ययीकुर्वंतीत्याह–इदानीमिति । विनियोगाद्व्ययीकरणात् । एको मुख्यधर्मस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद् घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा ॥ एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मम् ॥ १३ ॥
ये त्वनेवंविदोऽसंतः स्तब्धाः सदभिमानिनः ॥ पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् ॥ १४ ॥

किंच व्यवस्थयाऽपि व्यवायाद्यभ्यनुज्ञानं न यथेष्टमपि त्वन्यथैवेत्याह । यदिति । यद्यस्मात्सुराया घ्राणंभक्षोऽवघ्राणं स एव विहितो न पानम् । तथा पशो रप्यालभनमेव विहितं न तु हिंसा । अयमर्थः । देवतोद्देशेन यत्पशुहननं तदालभनं "वायव्यं श्वेतमालभेत" इत्यादिश्रुतेर्न तु हिंसा । " या वेदविहिता हिंसा न सा हिंसेति कीर्त्यते" इति वचनात् । भक्षणोद्देशेन तु क्रियमाणं हननं लौकिकवद्धिंसैव । अत्र ह्यालभनमेव विहितं न तु हिंसा । अतो न यथेष्टभक्षणाभ्यनुज्ञेत्यर्थः । व्यवायोऽपि प्रजया निमित्तभूतया न तु रत्यै । अतो मनोरथवादिन इमं विशुद्धं स्वधर्मं न विदुरिति ॥ १३ ॥ एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपंच्य तन्निष्ठां प्रपंचयति ये त्विति पंचभिः । अनेवंविदः न एवं परं धर्मं विदंति ये ते । विस्रब्धा निःशंकाः । अनेन मनोरथो भविष्यतीति विश्वस्ता वा तदानींतनपोषणेन वा । तैः पशुभिर्विश्वस्तास्ते

मुख्यफलत्वे कुत इति हेतुमाशंक्य यत इति समाधत्ते । एवंभूतं मोक्षफलदम् । आदिना पुत्रादिग्रहः । कलेवरस्य कले शुक्रे मधुरास्फुटध्वनौ वा वरं श्रेष्ठं कलेवरं शरीरम् एतदेव शुक्रे श्रैष्ठ्यं यच्छरीरकरणं मुधा तत्त्यागे श्रैष्ठ्याभावात् । यद्वा–कं सुखं लाति ददातीति कलं तस्मिन्मोक्षसुखदे वरस्य श्रेष्ठस्य मानुष्यदेहस्य चरमस्येति यावत् । ' अंत्यांगेपि कलेवरम् ' इति निरुक्तिः ॥ * ॥ **दीपिका**–तदेवं पूर्वोक्तप्रकारेण धर्मद्वारा भगवत्परितोषकतदर्पितकर्मद्वारा ज्ञानभक्तिलक्षणपरमार्थप्रापकस्य इष्टोपभोगार्थमैहिकपुत्रकलत्राद्युपभोगार्थं विनियोगाद्व्ययकरणात् । आत्मज्ञानगंधोपि न, कुतः पुनः श्रवणमित्यपेरर्थः । अपरोक्षज्ञानमनु भवः । परोक्षज्ञानं शास्त्रीयम् । कलेवरस्येति संबंधसामान्यविवक्षया चतुर्थ्यर्थे षष्ठी । तथा चाजहल्लक्षणया देहाद्यर्थमिति व्याख्यातम् ॥ * ॥ **विश्वनाथस्तु**–तथा धनस्यापि दृष्टोपभोगार्थमेव विनियोगादबुधा एव त इत्याह । अन्यत्तैः ॥ १२ ॥ पूर्वोक्तव्यवायादिव्यवस्थामपि संकोचयन्नाह–किञ्चेति । आलभनपदार्थं स्फुटयति–अयमर्थ इति । वायव्यं वायव इदं वायव्यं श्वेतं शुक्लवर्णमजामिति श्रुतिपदार्थः । इति वचना च्छास्त्रात् । इत्यर्थ इति–आलभने पापाभावात्स्वस्य पशोश्च स्वर्गहेतुत्वात्तदेवकार्यं न त्वितरथेति भावः । " यतो यज्ञे मृता ऊर्द्ध्वं यांति दैवे च पैतृके । अतो लाभादालभनं स्वर्गस्य न तु मारणम् ॥ " इति तीर्थोक्तेश्च । यतो हेतोः व्यवस्थापि दुष्करातो हेतोः । केचिदालभनशब्दस्य स्पर्शार्थकतां मन्यमाना यज्ञेषु पशुं निषेधन्ति तदंतत्सच्छास्त्रं विचारार्हं न वेति सुधी भिर्विवेचनीयम् । अन्यत्र सर्वत्रापि यज्ञे विशसनं विहितं तदालभनशब्दस्य विशसनार्थकत्वमेव न तु स्पर्शार्थकत्वम्, यज्ञ आलंभनपर्यायाया हिंसाया विहितत्वादन्यत्र च निषेधकवचनात्स्पृष्टपश्वादि कल्पनाया बालस्तोभनकत्वमेवेति । ततस्तेषां मताग्रह एवात्र बीजं ते वदन्ति " यज्ञेष्वालंभनं प्रोक्तं देवतोद्देशतः पशोः । हिंसा नाम तदन्यत्र तस्मात्तां नाचरेद् बुधः ॥ " इति । परन्त्वनेन वचनेन तेषां किय त्यभिमतार्थसिद्धिर्भवति त एव जानन्तु । सर्वेपि याज्ञिकाः " यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा । तस्माद्यज्ञे वधोऽवधः " इत्यादिवाक्यान्यूरीकृत्यालंभनशब्देन हिंसामेव मन्यन्ते स्पर्शार्थतां न क्वचिदपीत्यतः सर्व वैदिकसंमतं पशुविशसनमेवालंभनशब्दार्थो न स्पर्श इति सच्छास्त्रघंटापथः । अत्रास्माभिः 'न दद्यादामिषं श्राद्धे ' इत्यत्र सप्तमे श्रीमन्महाभारतीयवसूपाख्यानेन समाहितमतोत्र न प्रपञ्चितमिति ॥ * ॥ **दीपिका**– व्यवस्थयापि नियमविधिसदृशतयापि । अन्यथैव वक्ष्यमाणप्रकारेणैव । नन्वालंभनहिंसयोः को भेद इत्यत आह–अयमर्थः । तथा च–वेदाज्ञापालनार्थं शास्त्रीयहननमालभनं तदनादरेण भक्षणार्थमेव हननं हिंसेति तयोर्भेदः । अत्र तु वेदे तु । अतः सुरापानादेरवघ्राणाद्यर्थत्वात् । अतो व्यवायादेः प्रजाद्यर्थत्वात् । इमं चित्तशुद्ध्यर्थं वेदाज्ञापालनरूपम् ॥ १३ ॥ एवं धर्मम् ' यद् घ्राणभक्षः ' इत्यादिना विहितम् । स्तब्धा दयार ॥ ३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरम् ॥ मृतके सानुबंधेऽस्मिन्बद्धस्नेहाः पतंत्यधः ॥ १५ ॥
ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढताम् ॥ त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते ॥ १६ ॥
एत आत्महनोऽशांता अज्ञाने ज्ञानमानिनः ॥ सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥ १७ ॥

च पशवः प्रेत्य अमुत्र तान् खादंति । "मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः ॥ " इति वचनात् ॥ १४ ॥ व्यभिचारादिना द्विषंतः । मृतके देहे । सानुबंधे पुत्रादिसहिते ॥ १५ ॥ अज्ञास्तत्त्वज्ञैरनुकंपितास्तरंति तत्त्वज्ञास्तु स्वतः । ये तु नात्यंतमज्ञा न च तत्त्वज्ञास्तेंतरालवर्तिनः पतंतीत्याह । य इति । कैवल्यं तत्त्वज्ञानमसंप्राप्ताः । मूढतामत्यंतजडताम् । अत्र हेतुः । त्रिवर्गप्रधानाः । अक्षणिका उपशांतिक्षणरहिता देहादिस्थैर्यबुद्धयो वा स्वयमेवात्मानं घातयंति ॥ १६ ॥ तदाह । एत इति । आत्महनः आत्मापह्नवकर्तारः । अज्ञाने कर्मणि । तथाच श्रुतिः । " असुर्या नाम ते लोका अंधेन तमसा वृताः । तांस्ते प्रेत्याभि

हिताः । निःशंका ऐहिकनिन्दापारलौकिकभयशून्याः । निश्शङ्कानां तु देवाराधनादौ श्रद्धैव नास्ति कथं तेषां तत्र प्रवृत्तिरित्यरुच्याह—अनेनेति । अनेन बलिदानेन । ननु हिंसकतः पशवोऽपि बिभ्यतस्तत्पार्श्वे नायान्ति तत्कथमुक्तमनेनेति स्वारस्याभावादाह—तदानीमिति । तदानीं बलिदानपूर्वक्षणे । तेन पोषणेन । तत्कृततृणान्नादिदानहस्तस्पर्शादिना विश्वस्ता एते मद्धितकरा इति कृतविश्वासाः । तान्हिंसकान् । अत्र प्रमाणमाह—यथाहेति । व्याख्यातेयं स्मृतिः पुरंजनोपाख्याने ॥ * ॥ तन्निष्ठां बहिर्मुखप्राप्यम् । एतेन पशुयागेन । अस्मिँल्लोके यस्य पशोर्मांसमहमद्मि स पशुरमुत्र यमालये मां भक्षयिता भक्षयिष्यति । एतन्मांसस्य मांसशब्दस्य मांसत्वनिरुक्तिं मनीषिणः प्रवदंतीति स्मृत्यर्थः ॥ * ॥ **विश्वनाथस्तु**—एवमुक्तलक्षणं धर्मं न विदन्ति ते "या शास्त्रविहिता हिंसा न सा हिंसेति कथ्यते" इत्यादिवाक्यतात्पर्यमज्ञात्वा ये पशून्प्राणत एव हिंसन्तीत्यर्थः । विश्रब्धा वधकालेऽप्येतेऽस्मत्पोषका अस्मान्न हनिष्यन्ति किन्तु शस्त्रदर्शनयाऽस्माभिः खेलितुमुपहसन्त्येवेति पालितैः पशुभिः कृतविश्वासास्तान् द्रुह्यन्ति घ्नन्त्येव । ततश्च ते पशवस्तान्स्वघातकान् खादन्ति । अत एव योगबलेन यज्ञपशून्प्रत्यक्षं प्रदर्श्य प्राचीनबर्हिषं प्रत्युक्तं श्रीनारदेन—" भोभो प्रजापते राजन्पशून्पश्य त्वयाध्वरे । संज्ञापिताञ्जीवसंघान्निर्घृणेन सहस्रशः ॥ एते त्वां संप्रतीक्षन्ते स्मरन्तो वैशसं तव । संपरेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ॥ " इति ॥ १४ ॥ मृतके मरणधर्मके ॥ * ॥ परकायेष्वप्यात्मानमीश्वरं वसन्तं द्विषन्तः । अभिचारादिनेत्यादिना लौकिकहिंसाग्रहः । अभिचारः श्येनयागादिः ॥ * ॥ **विश्वनाथस्तु**—द्विषन्त इति—मांसार्थं पशून्हिंसन्ति लोकान्वा यद्विषन्ति तत्त्वात्मानं हरिमेव द्विषन्तीत्यर्थः ॥ १५ ॥ विज्ञाज्ञविलक्षणपुरुषगतिमाह—अज्ञा इत्यादिना । अत्र तत्त्वज्ञानाप्राप्तौ उपशांतिवर्जितानां त्रिवर्गे प्रवृत्तिरपि दुःसंपाद्या इत्यरुच्याह—देहादीति । घातयन्ति क्लेशयन्ति " यश्च मूढतमो लोके यश्च बुद्धेः परं गतः । तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः ॥ " इत्युक्तेः ॥ * ॥ अंतरालवर्तिनो ज्ञानलवदुर्विदग्धा उपशांतिक्षणरहिताः क्षणमात्रमपि शान्तिशून्या रजोविक्षिप्तमतय इत्यर्थः । द्वितीयपक्षे सर्वं हि पदार्थजातं देहादि क्षणिकमेव नित्यप्रलये तथाभ्युपगमात्, तथापि नास्ति तत्र क्षणिकं क्षणिकत्वज्ञानं येषामिति देहादिस्थैर्यबुद्धय इति व्याख्यातम् ॥ * ॥ **विश्वनाथस्तु**—अज्ञास्तत्त्वज्ञैरनुकंपिता भवंति तत्त्वज्ञास्तु स्वतः । ये त्विति तैः । कैवल्यप्रापकज्ञानशून्या नापि पश्वादिवन्मूढाः । तर्हि किं ज्ञानार्थिनो भक्त्यर्थिनो वा, न, त्रैवर्गिका धर्मार्थकामपराः । भवन्तु कदाप्यवसरे हरिकथां शृण्वंति, न, अक्षणिकाः क्षणमात्रमप्यवकाशं न लभन्ते । तर्हि ते आत्मानमेव घातयंतीत्यर्थः ॥ १६ ॥ तदात्महननम् । आत्मापह्नवकर्तार आत्मज्ञानरहिताः । अज्ञानेऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हित्वाऽत्यायासरचिता गृहापत्यसुहृच्छ्रियः ॥ तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः ॥ १८ ॥ राजोवाच ॥ कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यताम् ॥ १९ ॥ करभाजन उवाच ॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः ॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते ॥ २० ॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू ॥ २१ ॥ मनुष्यास्तु तदा शांता निर्वैराः सुहृदः समाः ॥ यजंति तपसा देवं शमेन च दमेन च ॥ २२ ॥

गच्छंति ये के चात्महनो जनाः ॥ " इति ॥ १७ ॥ या गृहापत्यसुहृच्छ्रियस्ता हित्वा ॥ १८ ॥ तदेवं भगवद्भक्तिरेव कर्तव्येति स्थिते तत्र विशेषं पृच्छति । कस्मिन्काल इति । किंवर्णः कीदृग्वर्णवान् । कीदृशः कीदृगाकारः । केन वा नाम्ना केन वा विधिना ॥ १९ ॥ एषु कृतादिकालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः । नानैव विधिना विविधेनैव मार्गेण ॥ २० ॥ तदेव वर्णादिचतुष्टयमाह कृत इत्यादिना । कृष्णाजिनादीन्बिभ्रदिति ब्रह्मचारिवेषो दर्शितः ॥ २१ ॥ तपसा ध्यानेन॥ २२॥

ज्ञानविषये । सीदन्ति क्लिश्यन्ति । अत्र प्रमाणमाह–तथा चेति । असुर्या असुरप्राप्याः, व्याख्यातचरेयं श्रुतिः । न कृतं कर्तुं योग्यमात्मविचारादि यैस्तेऽकृतकृत्याः, 'पद्ममुकुलभ्रमरन्यायेन' कालाऽपाकृतोति कृत्याः । न्यायस्तु पूर्वं व्याख्यातः ॥ * ॥ तदाह आत्मघातित्वमाह । तथा च श्रुतिः काम्यकर्मिणामात्महंतृत्वे प्रमाणं श्रुतिः ईशावास्योपनिषदि अविद्वन्निन्दार्थोयं मंत्रः–ते लोका इति । तच्छब्दो यच्छब्दार्थे । परमात्मभावमद्वयमपेक्ष्य देवादयोप्यसुरास्तेषां स्वभूता आसुर्याः । नाम शब्दोऽनर्थको निपातः । लोक्यंते दृश्यन्ते । भुज्यंत इति त्वन्यानि कर्मफलानि । अंधेनादर्शनात्मकेनाज्ञानेन तमसाऽऽवृता अच्छादितास्तान्स्थावरांतान्ये लोकांस्ते जनाः, प्रेत्येमं देहं त्यक्त्वा यथाकर्म यथाश्रुतं गच्छन्ति । ते के–ये केचिदात्मनः आत्मानं घ्नन्तीत्यात्महनोऽविद्वांसः, त हि आत्मानं नित्यं हिंसन्ति अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात् ॥ १७ ॥ अत्यायासेन नित्यकृत्यपरित्यागादिपुरस्सरकायक्लेशेन रचिताः । आनिच्छन्तो गृहादित्यागं, तमःप्रवेशं वेति । तमःप्रवेशे हेतुः–वासुदेवेत्यादि । तमो नरकम् " तमोज्ञाने तथेच्छायां निरयध्वान्तराहुषु इति निरुक्तिः ॥ * ॥ अत्यायासेनातिश्रमेण रचिताः संपादिता या गृहापत्यसुहृत्श्रियस्ता हित्वेति यत्तदोर्गम्यत्वमेवान्यथा श्रिय इति प्रथमान्तमनन्वितं स्यात् ॥ १८ ॥ तत्र भक्तिकरणे । यन्मया पृष्टं तदित्यर्थः ॥ * ॥ तदेवमभक्तनिन्दया भक्तिमार्गेदार्ढ्यप्रकारेण । तत्र भक्तौ । यस्य भक्तिः कर्तव्या स भगवान् इह जगति पूज्यते । तत्कालवर्णाकारादि भवद्भिरुच्यता मिति **दीपिका** ॥ * ॥ **विश्वनाथस्तु**–एतादृशानामुद्धारो भगवदवतारं विना न संभवेदिति मनसि कृत्वा पृच्छति–कस्मिन्निति । नृभिः साधारणैरित्यर्थः । असाधारणानामन्यावताराणां ह्युपासनायाः सर्वदा श्रुतत्वात् ॥ १९ ॥ मार्गेण वैदिकतांत्रिकादिरूपेण ॥ * ॥ तत्तत्कालीनयुगावतारवर्णपूजादिज्ञानं संग्रहकर्तुर्न स्यात् । करावेव भाजनं यस्य तथा । " पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही " इत्युक्तेस्तु करभाजनो न संग्रहीति तथाभूतत्वात्स एवोवाचेति ॥ २० ॥ सामान्यत उक्तं विशिनष्टि–कृत इत्यादिना । कस्मिन्काल इत्यस्योत्तरं–कृत इति । किंवर्ण इत्यस्योत्तरं–शुक्ल इति । कीदृश इत्यस्योत्तरं–चतुर्बाहुरित्यादि । केन नाम्नेत्यस्योत्तरं–हंस इत्यादि।केन विधिनेत्यस्योत्तरं–तपसेत्यादि । शांता इत्याद्यधिकारिलक्षणं नृभिरित्यनेन पृष्टमेव । एवमुत्तरत्रापि । अक्षो जपमाला ॥ * ॥ शुक्ल इति शुक्लवर्णः शुक्लनामा च । कृष्णाजिनं कृष्णसारचर्म, उपवीतं यज्ञसूत्रम् , अक्षोऽकारादिक्षकारांतवर्णमयमालासा च कमलमयी । दंडं च कमंडलुं च बिभ्रत् । दंडश्च कमंडलुश्चेति 'सर्वोपि द्वंद्वो विभाषयैकवद्भवति' इति । यद्वा–दंडेन सहितं कमंडलुम् । दंडकमंडलू इति पाठः सुगमः । ब्रह्मचारिवेषो दर्शितः ॥ २१ ॥ तदा कृतयुगे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोऽमलः ॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥ २३ ॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः ॥ हिरण्य केशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४॥तं तदा मनुजा देवं सर्वदेवमयं हरिम्॥यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः॥२५॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः ॥ वृषाकपिर्जयंतश्च उरुगाय इतीर्यते ॥२६॥ द्वापरे भगवाञ्छ्यामः पीतवासा निजायुधः ॥ श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः ॥ २७ ॥ तं तदा पुरुषं मर्त्या महाराजोपलक्षणम् ॥ यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप ॥ २८ ॥

॥ २३ ॥ त्रिगुणा दीक्षांगभूता मेखला यस्य स यज्ञमार्तिः । हिरण्यकेशः पिशंगकेशः ॥ २४ ॥ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः ॥ २५ ॥ पृश्निगर्भः पृश्निः सुतपसः प्रजापतेः पत्नी तस्याः पुत्रः । वृषाकपिः स्मृतः सन्वर्षति कामानाकंपयति क्लेशानिति तथा वृषाकपिर्यज्ञवराहमूर्तिः । जयत्येव सर्वदा जयंतः ॥२६॥ श्यामोऽतसी पुष्पसंकाशः । निजानि चक्रादीन्यायुधानि च यस्य सः । श्रीवत्सो नाम वक्षसो दक्षिणभागे रोम्णां प्रदक्षिणावर्तः स आदिर्येषां करचरणादिगतपद्मादीनां तैरंकैरांगिकैश्चिह्नै र्लक्षणैर्बाह्यैः कौस्तुभादिभिः ॥२७॥ महाराजोपलक्षणं छत्रचामरादियुक्तम् । वेदतंत्राभ्यां वैदिकेनागमिकेन च मार्गेण । यजंति पूजयंति । परमीश्वरं ज्ञातुमिच्छवः॥२८॥

तपसा कृच्छ्रादिरूपेण । शमेन मन्निष्ठबुद्ध्यात्मकेन । दमेनेंद्रियनिग्रहलक्षणेन ॥ * ॥ तदा कृतयुगे । शांताः निरुद्धान्तःकरणाः ॥ २२ ॥ तदानींतनप्रायोभजननामानि—हंसो नित्यं सदसद्विवि क्तदृक् । सुष्ठु पर्णमाविर्भावो भक्तानुकूल्येन यस्य । विगता कुंठता निजजनावनातीक्ष्णता यस्मात्स विकुंठः भावप्रधानो निर्देशोऽत्र स एव वैकुंठः । धर्मो हृच्छोधकः । योगेश्वरो भक्तहृन्निरोधकः । अविद्यादिमल हरोऽमलः । ईश्वरो नियन्ता । पुरुषः क्षेत्रज्ञः । अव्यक्तः शुद्धबुद्धिं विना प्राकट्यवर्जितः "दृश्यते त्वग्र्यया बुद्ध्या" इति श्रुतेः । "सर्वोपाधिसंगशून्यः परमात्मा" इत्युपनिषत्सु गीयते ॥ * ॥ ० ॥ २३ ॥ असौ भगवान् । स्रुक् शार्मीली जुहूः । स्रुवः खादिरो होमसाधनम् । आदिना स्फ्यादिग्रहः । तैरुपलक्ष्यते यज्ञरूपोयमिति ज्ञायत इति तथा ॥ * ॥ त्रयी तत्प्रतिपाद्यो यत आत्मा मूर्तिर्यस्य स तथा । उपलक्षणं ज्ञाप कम् । आदिना ग्रहचमसादिग्रहः ॥ २४ ॥ तं हरिम् । तदा त्रेतायुगे । सर्वदेवमयं सर्वदेवप्रधानम् ॥ * ॥ ० ॥ २५ ॥ पृश्निनाम्नी सुतपसः प्रजापतेर्भार्या । यद्वा—" पृश्निरित्युच्यते चान्नं वेद आपोमृत तथा । ममैतानि सदा गर्भः पृश्निगर्भस्ततो ह्यहम् ॥" इति भारते । यज्ञः पूज्यः । सर्वे देवा यस्मिन्स सर्वदेवः ॥ * ॥ ० ॥ २६ ॥ ० ॥ * ॥ द्वापरयुगावतारं श्रीकृष्णाविर्भावमयं तद्युगविशेषस्य वैशिष्ट्यातिशयम भिप्रेत्य तमेव तत्तत्सर्वमयमाह—द्वापर इति । सामान्यतस्तु द्वापरे शुकपत्रवर्णत्वं कलौ श्यामत्वं विष्णुधर्मोत्तरे दर्शितम्—" द्वापरे शुकपत्राभः कलौ श्यामः प्रकीर्तितः " इति । द्वापरे छत्रचामरादियुक्तमिति श्रीकृष्ण स्यैव विशेषणं हरिवंशदर्शितराजेन्द्राभिषेकात् ॥ २७ ॥ तं हरिम् । तदा द्वापरे । महाराजोयमित्येवमुपलक्षयंतीति महाराजोपलक्षणानि छत्रचामरादीनि तानि चाल्पराज्ञो न संतीत्यर्थः । तानि विद्यन्तेस्येति महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्ते वासुदेवाय नमः संकर्षणाय च ॥ प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥ २९ ॥ नारायणाय ऋषये पुरुषाय महात्मने ॥ विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः ॥ ३० ॥ इति द्वापर उर्वीश स्तुवंति जगदीश्वरम् ॥ नानातंत्रविधानेन कलावपि यथा शृणु ॥ ३१ ॥ कृष्णवर्णं त्विषा कृष्णं सांगोपांगास्त्रपार्षदम् ॥ यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः ॥ ३२ ॥

नामान्याह । नमस्त इति ॥ २९ ॥ ३० ॥ नानातंत्रविधानेनेति कलौ तंत्रमार्गस्य प्राधान्यं दर्शयति ॥ ३१ ॥ रूक्षतां व्यावर्तयति । त्विषा कांत्या कृष्ण मिंद्रनीलमणिवदुज्ज्वलम् । यद्वा त्विषा कृष्णं कृष्णावतारम् । अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति । अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि अस्त्राणि

राजोपलक्षणम् । मत्वर्थीयोच् । ईश्वरं तमेव ज्ञातुं साक्षात्कर्तुम् ॥ * ॥ तादृशं परं पुरुषं यजंतीत्यन्वयः । यजने हेतुः—जिज्ञासवोऽनुभवितुमिच्छवः ॥ २८ ॥ नामान्युक्तार्थान्येव ॥ * ॥ चतुर्व्यूहतालिंगेन श्रीकृष्णत्वमेव स्पष्टयन्नामान्याह—नमस्त इति ॥२९॥ नानावतारमयत्वेनाप्याह—नारायणाय ऋषय इति । दिग्दर्शनं कृत्वा तत्तदनन्तावताराकरपुरुषावतारमयत्वेनाह—पुरुषाय महात्मन इति । अत एव विश्वेषामीश्वराय । विश्वायः तत्त द्रूपाय चेत्यर्थः । किं बहुना सर्वभूतरूपाय सर्वात्मरूपाय च ॥ * ॥ ऋषये सर्वज्ञाय । महात्मने पूज्यत्वे सति व्यापकाय । विश्वस्येश्वरायाधिष्ठानाय । अधिष्ठानत्वादेव विश्वस्य तदनतिरेकाद्विश्वाय तद्रूपाय । क्षेत्रज्ञत्वादेव सर्व भूतानामा त्मने स्वरूपाय ॥ ३० ॥ इतीत्थम् ॥ * ॥ "इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् । धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ सत्त्वम्॥" इति प्रह्लादोक्तेः । कलियुगीयावतारस्छन्नत्वेन सर्वलोकदुर्बोधोवगम्यतेऽतस्तत्प्रमापकवचनमपि सोपक्रममर्थांतरेणाच्छन्नतयैवाह—नानेति । कलौ तंत्रमार्गस्य प्राधान्यमित्याच्छादकोर्थः । यथा—नानाकलौ अपिकारात् "आसन्वर्णास्त्रयो ह्यस्य गृह्णतो नुयुगं तनूः" इति गर्गोक्तिप्राप्तवैवस्वताष्टाविंशचतुर्युगीयद्वापरांतरकलावपि तंत्रविधानेन तंत्राख्यन्यायविधिना श्वेतो धावतीतिवदेकप्रयत्नोच्चार्येणैकदैवार्थद्वयबोधकेन शब्देनेत्यर्थः । अत एव शृण्विति । शृण्वंतमपि राजानं पुनः प्रेरणं रहस्यत्वेन तंत्रेणोच्यमानमर्थं त्रिःशिष्यावधापयितुमिति **विश्वनाथः** ॥ * ॥ स्तुतिश्चेयं तदाविर्भावास्पदद्वापरारंभत एव तज्ज्ञैर्ऋषिभिः क्रियत इति सैवानूद्येति **संदर्भः** ॥३१॥ द्वापरेपि कृष्णकांतित्वं तु प्रद्युम्नादी नामप्यस्ति ततः को विशेष इति—यद्वेति । त्विषा निजतेजसा कर्षत्यायत्तीकरोति ब्रह्मेंद्रादीनिति त्विषाकृष्णो नंदनन्दनस्तम् । आङ् पूर्वात्कृपेर्नक् । कृष्णश्चासाववतरति लोकहितार्थमित्यवतारश्चेति कृष्णावतारस्तम् । अनेन त्विषा कृष्णमित्युक्तेन " प्रायो बाहुल्यप्राधान्यामरणानुशनेषु च " इति धरणिः ॥ * ॥ **दीपिका**—' शुक्लो रक्तस्तथा पीतः ' इति पूर्वोक्ताभिप्रायेण इंद्रनीलमणेर्भास्वररूपत्वात् गुप्तावतारसूचनं तथापि 'छन्नः कलौ' इति प्रह्लादोक्तेर्गोपनमेव युक्तमिति रहस्यत्वादित्यभिप्रेत्याह—यद्वेति । न केवलं वर्णतः कृष्णमपि तु कांत्यापि कृष्णवर्णावतारमित्यर्थः । अनेन श्लोकेन कृष्णावतारस्य प्राधान्यमित्युक्त्या 'द्वापरे भगवाञ्छ्यामः'इत्यत्र रूक्षश्यामवर्णः कश्चिच्छ्रीकृष्णादन्य एतावतार इति स्वाम्यभिप्रायः । गुप्ततया तु तदिष्टिरपि तत्र प्रथमं सूचितैव । व्यक्तगौरावतारपक्षस्तु संदर्भादौ दृश्यत इति ॥ * ॥ **संदर्भस्तु**—श्रीकृष्णावतारानंतरकलियुगावतारं पूर्ववदाह—कृष्णेति । त्विषा कांत्या योऽकृष्णो गौरस्तं सुमेधसो यजंति । गौरत्वं चास्य—"आसन्वर्णास्त्रयो ह्यस्य गृह्णतोनुयुगं तनूः। शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः॥"इत्यत्र पारिशेष्यप्रमाणलब्धम्।इदानीमेतदवतारास्पदत्वेनाभिरूयाते 'द्वापरे कृष्णतां गतः' इत्युक्तेः । शुक्लरक्तयोः सत्यत्रेतागतत्वेन दर्शितं पीतस्यातीतत्वं प्राचीनावतारापेक्षयात्र श्रीकृष्णस्य परिपूर्णरूपत्वेन वक्ष्यमाणत्वाद्युगावतारांतरत्वं तस्मिन्सर्वेप्यवतारा अंतर्भूता इति तत्तत्प्रयोजनं तास्मि न्नेकस्मिन्नेव सिध्यतीत्यपेक्षया तदेवं यद्वापरे कृष्णोवतरति तदेव कलौ श्रीगौरोप्यवतरतीति स्वारस्यलब्धेः श्रीकृष्णाविर्भावविशेष एवायं गौर इत्यायाति तदव्यभिचारात् तदेतदाविर्भावत्वं तस्य स्वयमेव विशेषणद्वारा व्यन क्ति। कृष्णवर्णं कृष्णेत्येतौ वर्णौ च यत्र यस्मिञ्श्रीकृष्णचैतन्यदेवनाम्नि कृष्णत्वाभिव्यंजकं कृष्णेति वर्णयुगलं प्रयुक्तमस्तीत्यर्थः । तृतीये श्रीमदुद्धववाक्ये—'समाहुताः' इत्यादिपद्ये श्रियः सवर्णेनेत्यत्र टीकायां श्रियो रुक्मिण्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यम् ॥ भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वंदे महापुरुष ते चरणारविंदम् ॥ ३३ ॥

सुदर्शनादीनि पार्षदाः सुनंदादयः तत्सहितम् । यज्ञैरर्चनैः । संकीर्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः । सुमेधसो विवेकिनः ॥ ३२ ॥ स्तुतिमाह । ध्येयमिति । हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे । कथंभूतम् । ध्येयं ध्यातुं योग्यम् । सदेति सर्वत्र संबध्यते । ध्येयत्वे हेतवः । इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारस्तं हंतीति तथा तत् । किंच अभीष्टदोहं मनोरथपूरकम् । किंच तीर्थास्पदं गंगाद्याश्रयत्वेन परमपावनम् ।ननु शिवविरिंचिभ्यां नुतं स्तुतं महत्तमम्।ननु महत्तमौ तौ कृतार्थावेव

समानवर्णद्वयं वाचकं यस्य स श्रियः सवर्णो रुक्मीत्यपि दृश्यते । यद्वा—कृष्णं वर्णयति तादृशस्वपरमानंदविलासस्मरणोल्लासवशतया स्वयं गायति परमकारुणिकतया च सर्वेभ्योपि लोकेभ्यस्तमेवोपदिशति यस्तम् । अथवा—स्वयमकृष्णं गौरं त्विषा स्वशोभाविशेषेणैव कृष्णोपदेष्टारश्च यद्दर्शनेनैव सर्वेषां कृष्णः स्फुरतीत्यर्थः । किंवा—सर्वलोकद्रष्टारं कृष्णं गौरमपि भक्तविशेषदृष्टौ त्विषा प्रकाशविशेषेण कृष्णवर्णं तादृशश्यामसुन्दरमेव संतमित्यर्थः । तस्मात्तस्मिन् श्रीकृष्णरूपस्यैव प्रकाशात्तस्यैवाविर्भावविशेषः स इति भावः । तस्य भगवत्त्वमेव स्पष्टयति—सांगोपांगास्त्रपार्षदम्—अंगान्येव परममनोहरत्वादुपांगानि भूषणादीनि महाप्रभावत्वात्तान्येवास्त्राणि सर्वदैवैकांतवासित्वात्तान्येव पार्षदाः बहुभिर्महानुभावैरसकृदेव तथादृष्टोऽसाविति गौडवरेंद्रवंगोत्कलादिदेशीयानां महाप्रसिद्धेः । यद्वा—अंत्यतप्रेमास्पदत्वात्तत्तुल्या एव पार्षदाः श्रीमदद्वैताचार्यमहानुभावचरणप्रभृतयस्तैः सह वर्तमानमिति चार्थांतरेण व्यक्तं तदेवंभूतम् । कैर्यजन्ति—यज्ञैः पूजासंभारैः 'न यत्र यज्ञेशमखा महोत्सवाः' इत्युक्तेः । तत्र विशेषेण तमेवाभिधेयं व्यनक्ति—संकीर्तनं बहुभिर्मिलित्वा तद्गानसुखं श्रीकृष्णगानं तत्प्रधानैः । तथा संकीर्तनप्राधान्यस्य तदाश्रितेष्वेव दर्शनात्स एवात्राभिधेय इति स्पष्टम् । अत एव सहस्रनाम्नि तदवतारसूचकानि नामानि कथितानि—"सुवर्णवर्णो हेमांगो वरांगश्चन्दनांगदी । संन्यासकृच्छमः शांतः" इत्येतानि । दर्शितं चैतत्परमविद्वच्छिरोमणिना श्रीसार्वभौमभट्टाचार्येण—"कालान्नष्टं भक्तियोगं निजं यः प्रादुष्कर्तुं कृष्णचैतन्यनामा । आविर्भूतस्तस्य पादारविन्दे गाढंगाढं लीयतां चित्तभृंगः ॥ " इति ॥ * ॥ **विश्वनाथस्तु—** कृष्णेति नानाकलियुगपक्षे कृष्णवर्णदेहं कृष्णत्वं व्यावर्तयति । त्विषेति तैः । एकतः कलियुगपक्षे कृष्णवर्णं किन्तु त्विषा बहिस्फुरन्त्या कान्त्याऽकृष्णं शुक्लरक्तश्यामानामुक्तत्वात्पारिशेष्येण पीतमंतःकृष्णं बहिर्गौरमित्यर्थः । यद्वा—कृष्णावतारलीलादिवर्णनात्कृष्णवर्णं सांगोपांगेत्यादिकमुभयपक्षेपि स्पष्टप्रच्छन्नत्वाभ्यां तुल्य एवेत्यर्थः । यज्ञैः पारिचर्यामार्गैः संकीर्तनप्रधानैर्यै सुमेधसः " शुक्लो रक्तस्तथापीत इदानी कृष्णतां गतः " इति । 'छन्नः कलौ' इति कलावपि तथा श्रुण्वित्यादीनां तात्पर्यधारणावती येषां बुद्धिः शोभमाना भवेत्त एव नान्य इत्यर्थः ॥ ३२ ॥ सदा ध्येयं सदा परिभवघ्नं सदाभीष्टदोहमित्येवं सर्वत्र योज्यम् । कृष्णचरणाश्रितानाम् । 'यत्र न मृत्युहासः ' इत्याद्युक्तेः कालकृतोपि परिभवो नास्ति कुत इंद्रियादिकृत इति । अन्यदाह—किंचेति । मनोरथपूरकत्वं त्वन्यदेवांघ्रीणामप्यस्ति न त्वयं तादृशः किंत्वधिक इत्याह—किंचेति, तीर्थेति । महत्तमं पूज्यतमम् । अत्राशंकते—नन्विति । इत्यर्थ इति—"आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥ " इति न्यायेन कृतार्था अपि तन्निष्ठा भवन्त्येवेति भावः । स्तोतुमशक्यत्वमाक्षिपति—तर्हीति । प्राकृतस्य सामान्यनरस्य ॥ * ॥ **दीपिका**—तावपि शिवविरिंच्यावपि । आश्रययोग्यं कृतार्थयोरप्यत्यधिकसुखावाप्तिरेव नुतौ हेतुरित्यभिप्रेत्य सुखात्मकमित्यार्थिकोर्थः । 'तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत्' इत्युक्तेः । यस्य कस्यापीत्यनेन वर्णाश्रमाचारादिनियमव्यावृत्तिः । आगंतुकार्तिर्ज्वरादिपीडा ॥ * ॥ **विश्वनाथस्तु—**अयमवतारः कलियुगवर्तिनो जनान्प्रायः कृष्णरामयोर्भजनमार्गमुपदिशत्यतस्तयोः स्तुतिनुती आह द्वाभ्याम् । ध्यातुमर्हं सदेति नात्र कालदेशनियम इति भावः । इंद्रियेत्यादि, तैरित्यनुसंहितं फलम् अभीष्टदोहमित्यनुसंहितम् । तीर्थास्पदमिति ध्यानमात्रेण गंगादिसर्वतीर्थस्नानासिद्धेः कलौ द्रव्यदेशक्रियादिजनितं दुर्वारमपावित्र्यं नाशंकनीयमिति भावः । तत्र सदाचारमाह—शिवविरिञ्चीति । सुखसेव्यत्वमाह—शरण्यमिति । भक्तवात्सल्यमाह—भृत्यार्तिहमिति । न च भृत्यानां परिचर्यादिकमप्यपेक्षत इत्याह—हे प्रणतपालेति । भृत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम् ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदम् ॥ ॥ ३४ ॥ एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः ॥ मनुजैरिज्यते राजञ्छ्रेयसामीश्वरो हरिः ॥३५॥ कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥

किमर्थं ताभ्यां नुतं तत्राह । शरण्यमाश्रययोग्यम् आत्मसुखात्मकमित्यर्थः । तर्हि ब्रह्मादिस्तुत्यं प्राकृतस्य कथं गोचरः स्यात् । न । भृत्यार्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिहंतृ । न केवलमागंतुकार्तिमात्रं हंति । किंतु भवाब्धिपोतं संसारार्णवतारकं च ॥३३॥ इदानीं स्वयमाप्तकामत्वान्नैरपेक्ष्यं भक्तार्थे च सापेक्षतां दर्शयन् श्रीरामचंद्रं स्तौति । त्यक्त्वेति । अन्यैः सुदुस्त्यजा या सुरेप्सिता राजलक्ष्मीस्तां त्यक्त्वा । यदिति य इत्यर्थः । योऽरण्यमगात् । किं राज्यवैकल्यदर्शनेन । न । धर्मिष्ठः । कुतः । आर्यस्य गुरोर्दशरथस्य वचसा । किंच एवं राज्यं त्यक्त्वाऽपि भक्तवात्सल्येन दयितया सीतयेप्सितं मायामृगं स्वर्णाकारं योऽन्वधावत् । तस्य भगवतश्चरणारविंदं वंदे । यद्वा हे धर्मिष्ठेति संबोधनम् । तथाऽप्यविवक्षितत्वादार्षपदेन संधिर्न भवति । तथा यदगादिति चरणारविंदमेवोच्यते । यन्मायामृगमन्वधावत्तत्ते चरणारविंदं वंद इत्यन्वयः । अन्यत्समानम् ॥ ३४ ॥ युगानुरूपाभ्याम् नामरूपाभ्याम् ॥ ३५ ॥ एतेषु चतुर्युगेषु कलिरेव श्रेष्ठ इत्याह । कलिमिति । गुणज्ञाः कलेर्गुणं जानंति ये ते । ननु दोषाणां

भिमानवन्तं प्रणतिमात्रेणैव पालयतीति भावः । भवाब्धिपोतमिति—“तत्पादपोतेन महत्कृतेन कुर्वंति गोवत्सपदं भवाब्धिम्” इति ब्रह्माद्युक्तेर्भवाब्धिः कदा निस्तीर्ण इत्यपि तद्भृत्यो न जानातीति भावः । श्लेषेण तस्याप्यवतारस्यानेनैव स्तुतिनुती । यथा—हे महापुरुष हे परमहंस महामुनींद्रशिवविरिंचिनुतमाचार्यहरिदासाभ्यां नुतम्, अन्यत्समानम् ॥ ३३ ॥ इत्यर्थ इति व्याख्येयम्, आर्षत्वादिति तात्पर्यम् । नेति पूर्वपक्षपरिहारे । धर्मिष्ठत्वे हेतुमाशंकते—कुत इति । राज्यत्यागेपि भक्तवात्सल्यात्त्यागं दर्शयति—किंचेति । यदित्यस्यार्षत्वकल्पनापेक्षया सरलपंथानमाह—यद्वेति । तथापि संबोधनेपि । अविवक्षितत्वात्प्लुतत्वात् ॥ * ॥ **दीपिका**—नैरपेक्ष्यं राज्यापेक्षारहितत्वं तेन सदाचारपालकत्वं लक्ष्यते पित्राज्ञापालनात् । भक्तार्थे च सापेक्षतामिति कारुण्यं लक्ष्यते । रामचंद्रं स्तौतीत्युक्तेपि वस्तुतः कृष्णावतारप्रसंगात्तत्रैव तात्पर्यावसानम् । सदाचारपालकत्वकारुण्ये तव नाधुनिके तवैव श्रीरामावतारे तथा दृष्टत्वादिति वचनभंग्या तथा प्रतिपत्तेः । राज्यवैकल्यं राज्यव्यभिचारं दृष्ट्वा किमरण्यमगान्नेति समाधानम् । पूर्वार्थे नपुंसकवत्पदस्याव्ययत्वमुपेत्य—य इति । पुंस्त्वपरिणामगौरवं मत्वाह—यद्वेति ॥ * ॥ **विश्वनाथस्तु**—श्लेषपक्षे—असुभ्यः प्राणोभ्योऽपि दुस्त्यजा च सुरैरपीप्सितं राज्यं स्वकांतेन विराजमानत्वं यस्याः सा च या लक्ष्मीस्तां त्यक्त्वा यद्योरण्यमगात् आर्यस्य विप्रस्य वचसा तव सर्वमपि गार्हस्थ्यसुखं ध्वस्तं भवत्विति यज्ञोपवीतत्रोटनपूर्वकं यच्छापवचस्तेन धर्मिष्ठो धर्मवतां मध्येतिशयेन श्रेष्ठः विप्रवाक्यं माऽन्यथा भवत्विति कृतशापस्वीकार इत्यर्थः । गत्वा किमकरोदित्यत आह—मायां कलत्रपुत्रवित्तादिकं मृग्यत्यन्वेष्यतीति मायामृगः संसाराविष्टो जनस्तमन्वधावत् । कीदृशं—दयातिशयेनास्तीति दयी तस्य भावो दयिता तया हेतुना ईप्सितं स्वाभीप्सितम्, आलिंगनामिषेण स्वस्पर्शं दत्त्वा संसाराब्धौ पतितं तं प्रेमाब्धौ पातयितुमिति निरुपाधिमहाकारुण्यं द्योतितम् ॥ ३४ ॥ युगानुवर्तिभिस्तत्तद्युगजातैः । एतत्तु सामान्यविधानं विशेषस्तु गुरूपदेशगम्यो विस्तरभियात्र नोक्तः, शास्त्रान्तरसिद्धत्वाद्वेति ॥ * ॥ श्रेयसां सर्वपुरुषार्थानामीश्वरो दाता । युगानुरूपाभ्यामिति—भागवतामृते—“ कथ्यते नामवर्णाभ्यां शुक्लः सत्ययुगे हरिः । रक्तः श्यामः क्रमात्कृष्णस्त्रेतायां द्वापरे कलौ ॥” इति । अत्र सत्यत्रेताद्वापरेषु हंसः सुपर्णेति—विष्णुर्यज्ञेति—वासुदेवसंकर्षणेत्यादिकीर्तनीयभगवन्नामावली यथोक्ता तथा कलौ सा वर्तमानापि नोक्ता रहस्योद्घाटनाभावार्थमिति ज्ञेयम् ॥ ३५ ॥ कलेः प्राधान्यमाह—एतेष्विति । सत्यप्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ॥ ३७ ॥
कृतादिषु प्रजा राजन्कलाविच्छंति संभवम्॥(यत्र संकीर्तनान्नृणां हरिर्दास्यत्यसंभवम्) कलौ खलु भविष्यंति नारायणपरायणाः॥३८॥

बहुत्वात्कथं सभाजयंति तत्राह । सारभागिनो गुणांशग्राहिणः । कोऽसौ गुणस्तमाह । यत्रेति । तदुक्तम् । "ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥" इति ॥ ३६ ॥ तस्मात्कलावतोऽस्मात्संकीर्तनात्परमो लाभो नास्ति । यतः संकीर्तनात् ॥ ३७ ॥ किंच कृतादिष्विति ॥ ३८ ॥

कगुणे बहुदोषस्त्याज्य एवेति शंकते—नन्विति । सभाजयंति सत्कुर्वन्ति । प्रबलतरो गुणो बहून्दोषानाच्छादयति 'सव्यापसव्यकरन्यायेन' तदुक्तमभियुक्तैः—" गृह्णीते च रिपोः शिरः प्रथमतो गृह्णात्यसौ
वाजिनं नीत्वा चर्मधनुः प्रयाति सततं संग्राममूमौ पुरः । द्यूतं चैव परस्त्रियं परधनं जानाति नायं करो दाता नैव च तन्निरीक्ष्य विधिना शौचाधिकारी कृतः ॥ " इति । गुणं पृच्छति—कोऽसाविति ।
तत्र प्रमाणमाह—तदुक्तमिति ॥ * ॥ संकीर्तनेनैव साधनांतरनिरपेक्षेण तेनेत्यर्थः । सर्वः कृतादिषु ध्यानादिसाधनसाहस्रैः साध्य इति **संदर्भः** ॥ * ॥ गुणज्ञाः कीर्तननामोच्चारणरूपं तद्गुणं जानते अत एव तद्दो
षाग्रहणात्सारभागिनः सारमात्रग्राहिणः गुणमेवाहुः—यत्र प्रचरितेन संकीर्तनेनैवेति पूर्ववत् । ननु कलेरपरदोषत्वात्कथं ते सारभागमेव गृह्णन्ति, सत्यम्, यथा—पारदोषवत्त्वं तथा पारगुणवत्त्वमपीत्याह—यत्रेति ।
" ध्यायन्कृते यजन् यज्ञैस्त्रेतायां द्वापरेर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥ " इति **विश्वनाथः** ॥ ३६ ॥ यतः कलिः कीर्तनात्परमेष्टदस्तस्माद्धेतोः । देहिनां देहाध्यासवताम् । परमां क्लेशबीजद्वै
तशून्यां ज्ञानरूपाम्, ततश्च संसृत्यभावः ॥ * ॥ **दीपिका**—कीर्तनमाहात्म्यमाह—न ह्यत इति । तस्मात्कीर्तनस्य सर्वार्थोपलंभकत्वात्कलेः प्रसंगात्कलावित्यध्याहृतम् । परमां सर्वोत्कृष्टां शान्तिं भगवन्निष्ठां प्राप्नोति
' शमो मन्निष्ठता बुद्धेः ' इति श्रीमुखोक्तेः । अनुषङ्गेण संसृतिश्च नश्यति इह श्रेयःप्राप्त्युपायेषु भ्राम्यतां भ्रमं प्राप्नुवतां शांतिं भक्तिं परमामिति विशेषणात् 'भक्तिस्सिद्धेर्गरीयसी' इति श्रीकापिलोक्तेः ॥ ३७ ॥ कलि
युगस्याभीप्स्यतामाह—किंचेति । संभवं जन्म ॥ * ॥ **दीपिका**—किंचान्यदपि कलेर्वैशिष्ट्यमाह—कृतादिष्विति सार्द्धकम् । नारायणपरायणास्तदीयप्रेमातिशयवन्तः । क्वचित्क्वचिद्द्रौडादाविति श्रीकृष्णचै
तन्यात्रताराभिप्रायेण, द्रविडेषु च भूरिशस्तत्र ' वेदैश्च सर्वैरहमेव वेद्यः ' इति भगवदुक्तिमाश्रित्य वैदिकास्तद्देशीया भूरिशो भक्ता भवंतीत्यर्थः । अथ कलेर्न नामसंकीर्तनगुणोत्कर्षप्रयोजकत्वं किंतु सर्वयुगेषु
संकीर्तनस्य समानमेव सामर्थ्यम् , तथापि कृतादिषु सामर्थ्यादिसद्भावात्तत्संयोगेनान्यान्यपि साधनानि तद्रहस्यरक्षणाय ऋषिभिः स्मर्यंतेऽत्र त्वनायत्त्या स्वतंत्रमेव तदतिप्रशस्यते नारदादौ—"हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ " इति ॥ * ॥ अत्र **संदर्भः**—अत एव ध्यानादिनिष्ठा अपि कृतादिप्रजा एतादृशीं भगवन्निष्ठां न प्राप्तवत्यः " महाभागवता नित्यं कलौ कुर्वन्ति कीर्तनम् " इति स्कांदाद्यनु
सारेण तादृशनिष्ठाकारणं कीर्तनमाहात्म्यं च दीनैककृपातिशयशालिना भगवता तदानीं तत्तत्सामर्थ्यावसरे यस्मान्न प्रकाशितं तस्माद्ध्यानादिना समर्थास्ता जिह्वौष्ठस्पंदनमात्रस्य नातिसाधनत्वं भवेदिति मत्वा तन्न प्रतिशोधितव
त्यश्च, ततः कलिप्रजानां परमभगवन्निष्ठतां श्रुत्वा तदर्थं कलावेव केवलं निजजन्म प्रार्थयन्ते इत्याह—कृतादिष्विति सार्द्धकेन । तत्र हेतुः—कलाविति । तद्भक्तीच्छायामपि तद्भक्तसंगं विना न संपाद्येतेति विभाव्येति भावः ।
तत्परायणत्वं तदीयप्रेमातिशयवत्वमेतदेव परमां शांतिमित्यनेन कार्यद्वारा व्यंजितम् 'मुक्तानामपि सिद्धानाम्' इत्यादेः । क्वचित्क्वचिद्द्रौडादाविति पूर्ववत् । अत्र कलिसंगेन कीर्तनस्य गुणोत्कर्ष इति न वाच्यं भक्तिमात्रे
कालदेशादिनियमस्य निषिद्धत्वात् । विशेषतो नामोपलक्ष्य च विष्णुधर्मे क्षत्रबंधूपाख्याने—"न देशनियमस्तत्र न कालनियमस्तथा । नोच्छिष्टादौ निषेधश्च श्रीहरेर्नाम्नि लुब्धक ॥ " इति स्कांदे । पाद्मवैशाखमाहात्म्ये
विष्णुधर्मे च—"चक्रायुधस्य नामानि सदा सर्वत्र कीर्तयेत्" इति । स्कांद एव च—"न देशकालावस्थात्मशुद्ध्यादिकमपेक्षते । किंतु स्वतंत्रमेवैतन्नाम कामितकामदम् ॥" इति । न च कलावन्यसाधनासमर्थत्वादेव तेनाल्पे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ ३९ ॥ कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर ॥ प्रायो भक्ता भविष्यंति वासुदेवेऽमलाशयाः ॥ ४० ॥ देवर्षिभूताप्तनृणां पितृणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तम् ॥ ४१ ॥

॥ ३९ ॥ अमलाशयाः संतः प्रायः प्रायशो भगवति भक्ता भवंति ॥ ४० ॥ भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह। देवर्षीति । आप्ताः पोष्याः कुटुंबिन इतरे दवोदयः पंचयज्ञदेवताः एतेषां यथाऽभक्तः ऋणी अत एव तेषां किंकरस्तदर्थं नित्यं पंचयज्ञादिकर्ता । तथाच स्मृतिः । "हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् " इति । अयं तु न तथा । कोऽसौ । यः सर्वभावेन श्रीमुकुंदं शरणं गतः । कर्तं कृत्यं परिहृत्य । यद्वा कर्तं भेदं परिहृत्य । कृती छेदन इत्यस्मात् । वासुदेवः सर्वमिति बुद्ध्येत्यर्थः ॥ ४१ ॥

नापि महत्फलं भवति न तु तस्य गरीयस्त्वेनेति मंतव्यम् । "यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिन्तने विघ्नो यत्र निवेशितात्ममनसां ब्राह्मोपि लोकोल्पकः । मुक्तिं चेतसि यत्स्थितोऽमलधियां पुंसां ददात्यव्ययः किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥" इति समाधिपर्यंतादपि तत्स्मरणात्कैमुत्येन कीर्तनस्यैव गरीयस्त्वं श्रीविष्णुपुराणे दर्शितम् । अत एवोक्तम्—'एतन्निर्विद्यमानानाम्' इत्यादि । तथा च—"अघच्छित्स्मरणं विष्णोर्बह्वायासेन साध्यते । ओष्ठस्पंदनमात्रेण कीर्तनं तु ततो वरम् ॥" इति । वैष्णवचिन्तामणौ—"येन जन्मशतैः पूर्वं वासुदेवः समर्चितः । तन्मुखे हरिनामानि सदा तिष्ठंति भारत ॥ " अन्यत्र 'सर्वापराधकृदपि' इत्यादि नामापराधभजनस्तोत्रे च । तस्मात्सर्वत्रैव युगे श्रीमत्कीर्तनस्य समानमेव सामर्थ्यं कलौ तु श्रीभगवता कृपया तद्ग्राह्यत इत्यपेक्षयैव तत्र तत्प्रशंसेति स्थितिः । अत एव यद्यन्यापि भक्तिः कर्तव्या तदा तत्संयोगेनैवेत्युक्तम्—'यज्ञैः संकीर्तनप्रायैः' इति । अत्र च स्वतंत्रमेव नामकीर्तनमत्यंतप्रशस्तम् ।"हरेर्नाम हेरर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥" इत्यादौ साधूक्तम् । तस्मात्'कलिं सभाजयंत्यार्याः ' इत्यादित्रयम् ॥ * ॥ **विश्वनाथस्तु**—साधुसंगजनिता केवला भक्तिः कलावेव प्रायेण लभ्यत इत्याह—कृतादिष्विति । यत्र बहवो नारायणार्थिनस्तद्भक्तिमात्रार्थिनस्तत्रावश्यं तेषां संगमतो भक्तिस्ततः प्रेमभक्तिश्च संभवेदित्याकांक्षयेति भावः । चकाराद्गौडांध्रयोः ॥ ३८ ॥ क्वचित्क्वचिदिति पूर्वान्वयि । यत्र द्राविडेषु ॥ * ॥ ० ॥ ३९ ॥ प्रतीची महानदी नाम्ना वेत्रवती वराहक्षेत्रात्सह्यगिरिं भित्त्वा पश्चिमसमुद्रं स्यंदमाना ॥ * ॥ **संदर्भस्तु**—प्राय इति । तेषु भक्तेष्वपराधिनो विनेत्यर्थः ॥ ४० ॥ पोष्याः पोषितुं योग्याः । इतरे पोष्येतरे । देवा ऋषयो भूता नरः पितरश्च येषां पञ्चयज्ञदेवानाम् । अत एव वर्णितत्वादेव । ऋणिनः कर्मकरणे प्रमाणमाह—तथा चेति । हीनजातिमुत्तमर्णजातेरधमर्णं निकृष्टजातिं परिक्षीणं निर्धनमृणपूर्त्यर्थं कर्म तदुचितक्रियां कारयेदिति याज्ञवल्क्यः । क्रियत इति कर्तम्, करोतेरौणादिकस्तप् । औणादिकत्वकल्पनाया अगतिकगतित्वादाह—यद्वेति । इत्यर्थ इति—सकलमिदमहं च वासुदेव इति भावनया सर्वत्रैकबुद्धित्वेन तं देवादयोपि पूजयंति "सर्वे देवा यं नमंति" इत्यादिश्रुतेरिति भावः ॥ * ॥ इतरे पोष्यव्यतिरिक्ताः । पञ्चयज्ञाश्च—"पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पंच महायज्ञा ब्रह्मयज्ञादिसंज्ञकाः ॥" इत्युक्ताः । अत एव ऋणित्वादेव । तेषां देवादीनाम् । तदर्थमृणापाकरणार्थम् । तथा च—कर्मानुष्ठानेन ऋणक्षये प्रमाणं स्मृतिः—हानजातिः हीना उत्तमर्णसकाशान्निकृष्टा जातिर्यस्य तं परिक्षीणं दातुमसमर्थं ऋणार्थमृणनिवृत्त्यर्थं कर्मैव कारयेदिति । मशकार्थो धूम इतिवदर्थशब्दोनिवृत्तिपरोऽत्र । अयं वक्ष्यमाणस्तु न तथा न ऋणी । कर्तृशब्दस्य कृत्यवाचकत्वमयुक्तमतो—यद्वेति । भेदं मुकुंदाद्देवतादीनां स्वातंत्र्यं परिहृत्य त्यक्त्वा । इत्थमुक्तं गारुडे—"अयं देवो मुनिर्वन्द्य एष ब्रह्मा बृहस्पतिः । इत्याख्या जायते तावद्यावन्नार्चयते हरिम् ॥" इति । अत एव 'वासुदेवः सर्वम्' इति बुद्ध्येत्यर्थ इत्युक्तम् । तथैवोक्तं श्रीमदर्जुनेन—'सर्वं समाप्नोषि ततोसि सर्वः' इति । तथा च—सर्वस्य तद्व्याप्यत्वात्तदायत्तवृत्तिकत्वात्तदभेदानिर्देशः । यथा—प्राणायत्तवृत्तिकत्वेनेंद्रियाणामपि प्राणत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि सन्निविष्टः ॥ ४२ ॥ नारद उवाच ॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः ॥ जायंतेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ॥ ४३ ॥

विहितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह । स्वपादमूलमिति । त्यक्तोऽन्यस्मिन्देहादौ देवतांतरे वा भावो येन । अत एव तस्य विकर्मणि प्रवृत्तिर्न संभवति । यच्च कथंचित्प्रमादादिना विकर्म उत्पतितं प्राप्तं भवेत्तदपि हरिर्धुनोति । ननु यमस्तन्न मन्येत तत्राह । परेशः । ननु 'श्रुतिस्मृती ममैवाज्ञे' इति भगवद्वचनात्स्वाज्ञाभंगं कथं सहेत तत्राह । प्रियस्य । ननु नायं पापक्षयार्थं भजते तत्राह । हृदि सन्निविष्टः । न हि वस्तुशक्तिरर्थितामपेक्षत इत्यर्थः ॥ ४२ ॥ जायंतेयान् जयंत्याः पुत्रान् ॥ ४३॥

निर्देशः । तथा च छांदोग्ये पठ्यते—"न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणो ह्येतानि सर्वाणि भवंति" इति । यत्तु कैश्चिद्द्बाधितसामानाधिकरण्यं स्वीकृतं तच्छरणं गत इति भक्तिप्रकरणानुपयोगित्वात्, क्षोदासहत्वाच्च त्यक्तम् । विश्वस्य मिथ्यात्वे हि तत्संगच्छते, तदेव तु न संभवति "तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः ॥ सत्याद्भूतानि जातानि सत्यं भूतमयं जगत् ।" इति । "तत्सत्यतामाचक्षते" इति । "नित्यो नित्यानां चेतनश्चेतनानाम्" इति । "सत्यस्य सत्यम्" इति च । विष्णुपुराणभारतादिस्मृश्रुतिभिः कंठोक्त्या तत्सत्यत्वप्रतिपादनात्क्वचित्तथा वर्णनं तु ज्ञानप्रकरणे युक्तमेव वैराग्यार्थत्वादिति सुधीभिर्विभावनीयम् ॥ * ॥ **संदर्भस्तु**—तेषां न किंकरः किंतु भगवत एवेत्यनधिकारित्वं कर्त्तृ भेदमित्यर्थे । ततो देवतादीनां स्वातंत्र्यमिति यावत् । तदुक्तं गारुड इति पूर्ववत् । भक्तस्य नित्यनैमित्तिकश्राद्धतर्पणादिकर्मयंत्रणाराहित्यमाह—देवर्षीति । देवादयः पंचयज्ञदेवताः, नरः पोष्याः पितृमातृभार्यादयः, एतेषां कर्मी यथा ऋणी अत एव तेषामिति तैः । यद्वा—पृथिवीपतिना स्वकिंकरत्वेन गृहीतस्य जनस्य मंडलेश्वराद्यनुवृत्तिर्न संभवेत् । कृत्यं वर्णाश्रमविहितं कर्म । 'यथा तरोर्मूलनिषेचनेन' इत्यादिन्यायेन विष्णुपूजने संवृत्ते देवर्ष्यादयः साधु पूजिता एवेति । अत एव—"मत्कथाश्रवणादौ वा श्रद्धायावन्न जायते" इति वदता भगवता स्वभक्तस्य कर्माधिकारो दूरीकृतः ॥ ४१ ॥ आदिना स्त्रीपुत्रादिग्रहः । अन्यशब्दस्य जन्मांतरवाचित्वमादायाह—देहांतरे जन्मांतरे वेति । भावः प्रेमा । अत एवैहिकामुष्मिकत्यागित्वादेव । विकर्मणि निषिद्धहिंसाकर्मणि । कथंचिद्बलवदहष्टवशात् । यच्च विकर्म । आदिना पारवश्यादिग्रहः । अत्राक्षिपति—नन्विति । परेशः यमादिनियंता । पुनराक्षिपति—नन्विति । प्रियस्यापराधोऽपि क्षम्यत एवेत्यर्थः । प्रियेणाप्यनिवेदितं कथं क्षमेतेति शंकते—नन्विति । इत्यर्थ इति—न हि दाहेऽग्निः प्रार्थनमपेक्षत इति भावः ॥ * ॥ **दीपिका**—अत एवानन्यभावत्वादेव । तस्यानन्यशरणस्य । कथंचिदित्यस्याभिप्रायः—विकर्मणीत्यादि । प्रमादोऽनवधानता । आदिना उत्कंठाभक्तिवार्धिष्णोर्विष्णोरिच्छा गृह्यते । यथा चित्रकेतौ । तत् हरिकर्तृकं विकर्मधूननम् । परेशः परेषां ब्रह्मादीनामपीशो नियंता, तदाज्ञामनने यमस्य का शक्तिरिति भावः । "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते । आज्ञाछेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः ॥" इति सकलं वाक्यं गम्यम् । अयं भक्तः । आर्थितां पापक्षयार्थित्वम् ॥ * ॥ **संदर्भः**—विकर्म प्रायश्चित्तरूपं कर्मांतरं न च कर्तव्यं तस्य तच्छ्रवणस्य विकर्मप्रवृत्त्यभावात् । कथं चिदापतितेऽपि विकर्मणि तदनुस्मरणेनैव प्रायश्चित्तस्याप्यानुषंगिकत्वसिद्धेरित्याह—स्वपादमूलेति । हृदि सन्निविष्टत्वे हेतुः—त्यक्तान्यभावस्य, त्यक्तोऽन्यत्र देवतान्तरे भगवतीव भावो भक्तिर्येन । विकर्मधूनने हेतुः—हारः स्वभावत एव सर्वदोषहरः । परेशः शक्तितश्चेत्यर्थः । तत्रापि प्रियस्येत्याग्रहतश्चेत्यर्थः ॥ ४२ ॥ स निमिः ॥ * ॥ प्रीतः अनन्यशरणस्य माहात्म्यश्रुत्या हृष्टः । सोपाध्याय इति—तत्संगिनामपि कृतार्थत्वोक्त्या साधुसंगमातिशयो व्यंजितः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततोंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजा धर्मानुपातिष्ठन्नवाप परमां गतिम् ॥ ४४ ॥ त्वमप्येतान्महाभाग धर्मान्भागवताञ्छ्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परम् ॥ ४५ ॥ युवयोः खलु दंपत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ॥४६॥ दर्शनालिंगनालापैः शयनासनभोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥ वैरेण यं नृपतयः शिशुपालपौंड्रशाल्वादयो गति विलासविलोकनाद्यैः ॥ ध्यायंत आकृतधिय । शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किम् ॥ ४८ ॥

उपातिष्ठन्ननुतिष्ठन् ॥ ४४ ॥ निःसंगो भूत्वा ॥ ४५ ॥ शास्त्रप्रक्रियेयमुक्ता युवां तु संगत एव कृतार्थावित्याह युवयोरिति । वां युवयोः ॥ ४६ ॥ न च सर्वकर्मार्पणादिभागवतधर्मैरन्येषामिव युवयोः सत्त्वशुद्धिरापादनीया पुत्रोपलालनेनैव भागवतधर्मसर्वस्वनिष्पत्तेरित्याह । दर्शनेति । कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वां युवयोः तस्य दर्शनादिभिरात्मा पावितः शोधितः॥ ४७॥ एतदेव कैमुत्यन्यायेन स्फुटयति । वैरेणेति । यं शयनासनादौ वैरेणापि ध्यायन्तस्तस्य गतिविलासाद्यैराकृतधियस्तत्तदाकारा धीर्येषां ते तत्सारू

अपूजयदिति—वैष्णवानां विष्णुवत्पूजनमभिप्रेतं न तु सत्कृतिमात्रम् “ अर्चयित्वा तु गोविन्दं तदीयान्नार्चयेत्तु यः । न स भागवतो ज्ञेयः केवलं दांभिको मतः ॥ ” इत्युक्तेः ॥ ४३ ॥ ततः पूजनानन्तरम् । राजा निमिः ॥ * ॥ ततः पूजनानन्तरम् । धर्माञ्श्रवणकीर्तनादीन्भागवतधर्मान् । परमां गतिं वैकुंठम् ॥ ४४ ॥ परं मोक्षम् ॥ * ॥ एवं तत्प्रश्नानुरूपमन्याहितान्भागवतधर्मानुक्त्वा तदीयस्वप्रयोजनांतरमाह—त्वमपि परं यास्यसे काका त्वं तु न इत्यर्थः । सर्वतः परस्य कृष्णस्य नित्यप्राप्तत्वादिति भाव इति **संदर्भः** ॥ * ॥ **विश्वनाथोपि**—नित्यसिद्धभगवत्पितृभावस्यापि भगवत इव नित्यमूर्तेरपि भगवदिच्छयैव भक्तिरसोत्कंठानिमग्नस्य स्वस्मिन्प्राकृतनरत्वाभिमानमालक्ष्य तं प्राकृतनरमिवोपदिदेश । भाग्यश्लाघादिभिरानंदयति—त्वमिति षड्भिः । परं परमेश्वरं प्राप्स्यसि ॥ ४५ ॥ युवयोर्देवकीवसुदेवयोः ॥ * ॥ पुत्रतामगमदिति प्रकटलीलाभिप्रायेण, नित्यलीलायाम् ‘ जयति जयनिवासः ’ इत्याद्यनुसारेण नित्यपुत्रत्वात् ॥ ४६ ॥ वां युवाभ्यामित्यर्थः । तृतीयार्थे षष्ठी । यद्वा—दर्शनादिभिः कर्तृभिर्युवयोरात्मा पावित इति ॥ * ॥ ननु परमेश्वरे पुत्रबुद्धिरेवानर्थकारिण्यावयोरपराधोत्पादनादिति चेन्मैवम्, प्रातिकूल्यभावेनापि कृष्णेऽर्पितमनसः कृतार्था भवंति किं पुनरानुकूल्यभावेन युष्मदादय इत्याह—वैरेणेति । गतिविलासाद्यैर्या आकृतिः कृष्णस्याकारस्तन्मात्र एव न तु तन्माधुर्ये धीर्येषां ते । स्वीयशयनादिकर्मणि ध्यायन्तः सन्तः साम्यं सारूप्यं सायुज्यं किं पुनस्तत् तेभ्योऽप्यधिकं प्राप्यं स्यादपराधस्य संभावनैव नास्तीति भाव इति **विश्वनाथः** ॥ * ॥ **संदर्भस्तु**—तथापि जयविजयवद्ब्राह्मणापराधाद्बिभेमि, तत्राह—दर्शनेति । पावितः दोषाभासादपि दूरे रक्षितः, तत्र हेतुः—कृष्ण इति । तत्रापि ‘ पुत्रस्नेहं प्रकुर्वतोः ’ इति ताभ्यां युवयोर्महदंतरमिति भावः । तथैव टीकाकृतामिष्टिः । न चेत्यादि भागवतधर्मोणां यत्सर्वस्वं सारभागो वात्सल्यमिति यावत्, तस्य निष्पत्तेर्नित्यसिद्धेः शोधितः ब्राह्मणाद्यपराधाभासादपि दूरे रक्षितः । इत्युक्त्या भाविष्यत्तदपराधस्य च तत्कार्यस्य च मायिकलीलामयत्वं व्यंजितम् ॥ ४७ ॥ मुक्तेरंतरंगसाधनं भक्तिरेवेति दर्शयितुं वैरप्रधानभक्तानामपि सायुज्यं भवति किमुत नित्यानुरक्तबुद्धीनामिति कैमुत्यन्यायेन व्यंजितम् । यं कृष्णम् । तस्य कृष्णस्य । आहृता तत्तदाकारा धीर्येषां ते तथा । तीर्थस्त्वाकृतधिय इति पपाठ ॥ * ॥ एतदेव कृतार्थत्वमेव । तत्साम्यं सच्चिदानंदरूपत्वं भवति नित्यमेवास्तीति मोक्षेपि साम्योक्त्या ऐक्यमनादृतम् “ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेपि नोपजायंते प्रलये न व्यथंति च ॥ ” इति श्रीगीतोक्तेः । “ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम ” “ निरंजनः परमं साम्यमुपैति ” इति मोक्षेति भेदप्रतिपादकश्रुतेश्चेइति **दीपिका** ॥ * ॥ **संदर्भस्तु**—आस्तां युवयोर्वार्ता श्रीकृष्णस्य सर्वोत्कृष्टभगवत्स्वभावत्वात्साधारणानुरक्तजनानामपि सुतरां तत्तुल्या गतिः किं पुनर्यदूनामिति तान्प्रति शोचन्तं कैमुत्येनाह—वैरेणेति ॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मापत्यबुद्धिमकृथाः कृष्णेऽसर्वात्मनीश्वरे ॥ मायामनुष्यभावेन गूढैश्वर्ये परेऽव्यये ॥४९॥ भूभारासुरराजन्यहंतवे गुप्तये सताम् ॥ अवतीर्णस्य निर्वृत्यै
यशो लोके वितन्यते ॥ ५० ॥ श्रीशुक उवाच ॥ एतच्छ्रुत्वा महाभागो वसुदेवोतिविस्मितः ॥ देवकी च महाभागा जहतुर्मोहमात्मनः ॥ ५१ ॥
इतिहासमिमं पुण्यं धारयेद्यः समाहितः ॥ स विधूयेह शमलं ब्रह्मभूयाय कल्पते ॥ ५२ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे वसुदेवनारदसं
वादे जायंतेयगमनं नाम पंचमोऽध्यायः॥५॥ श्रीशुक उवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः॥१॥

प्यमापुः । किं पुनर्वक्तव्यमनुरक्तधियां तत्साम्यं भवतीति ॥ ४८ ॥ ननु पुत्रस्नेहश्चेन्मोक्षहेतुस्तर्हि मुच्येरंस्तत्राह । माऽपत्यबुद्धिमिति । अपत्यमिति बुद्धिं मा कृथाः ।
अडागमश्छांदसः ॥ ४९ ॥ ननु कथमीश्वरो मानुषः स्यात्कथं वा तस्य विश्वसृष्ट्यादिकर्तुः पूतनाशोषणादि कर्माश्चर्यमिव निरूप्यते तत्राह । भूभाररूपा असुरा एव राज
न्यास्तेषां हंतवे तान्हंतुम् । निर्वृत्यै मोक्षाय ॥ ५० ॥ ५१ ॥ इहास्मिन्नेव देहे शमलं मोहं विधूय ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ॥ ५२ ॥ इति श्रीमद्भागवत एकादशस्कं
धे श्री० टीकायां पंचमोऽध्यायः ॥ ५ ॥ षष्ठे ब्रह्मादिभिः स्तुत्वा गंतुं विज्ञापितं हरिम् ॥ उद्धवः प्रार्थयामास स्वधाम नय मामिति ॥ १ ॥ अतः परमतिविस्तरेणात्म

अत्राक्षिपति—नन्विति । सर्वेश्वरबुद्धिं कुर्विति भावः ॥ * ॥ **दीपिका**—अपत्यबुद्धिं पुत्रसामान्यमतिं मा कुरु । मायेति—कृपाप्रधानमनुष्यलीलाप्रकटनेन । गूढं दुर्विज्ञेयमैश्वर्यं यस्य तस्मिन् ॥ * ॥ **संदर्भस्तु**—
यतः कृष्णे 'कृषिर्भूवाचकः' इत्यादिलक्षणे अत एव सर्वात्मनि सर्वावतारिणि । अत एवेश्वरे सर्वकर्तरि, वशीकर्तरि । अत एव परे तथापि मायेति पूर्ववत् । यद्वा—'पुत्रस्नेहं प्रकुर्वतोः' इति कथं पुत्रोचितः
स्नेहस्तस्मिञ्श्लाघितस्तत्राह—मेति । अपत्यबुद्धिं मा अकृथाः किंतु कुरुष्वैवेत्यर्थः । तत्र हेतुः—कृष्ण इति ॥ * ॥ **विश्वनाथस्तु**—तस्मात्त्वयानुरक्तधियैव भाव्यं न तूदासितव्यमित्याह—मेति । सर्वात्मनीश्वरे मदपत्य
त्वमारोपितमेव न वस्तुत इत्यसंभावनया कृष्णे या अपत्यवदेव बुद्धिस्तां मा कृथा मदपत्यमेवायमिति कृष्णे पुत्रभावं कुर्विति भावः । ननु मनुष्यस्य मम कथं परमेश्वरः पुत्रः स्यात्तत्राह—मायेति । त्वदपत्यत्वप्राप्त्यर्थं
मायया मनुष्यत्वेन गूढं गुप्तीकृतमैश्वर्यं येन तास्मिन् । अतो मनुष्यस्य तव मनुष्यः कृष्णः पुत्रो भवेदेवेति भावः । परेऽव्यय इति—तदपि तस्य श्रेष्ठत्वमैश्वर्यव्ययराहित्यञ्च भवेदेवेति भावः । अत्र वसुदेवप्रयोजना
र्थमेव मायाशब्दः प्रयुक्तः वस्तुतस्तु कृष्णो मनुष्यस्वरूपेणैव, तदापि मायाशब्दः स्वरूपवाची ॥ ४९ ॥ पुनराक्षिपति—नन्विति । तत्र श्रीकृष्णे । हंतवे तुमर्थे तुरार्षः ॥ * ॥ **दीपिका**—अवतीर्णस्य प्रपंचगोलो
कादिति शेषः । तथा चाप्रसिद्धनराकृति ब्रह्मत्वं न तु पार्थिवमनुष्यत्वमिति भावः ॥ ५० ॥ एतन्नारदोक्तम् । आत्मसंबंध्यज्ञानं तत्यजतुः ॥ * ॥ एतद्भक्तिपंचाध्यायीवर्णितम् । मोहं प्रकटलीलावेशेन प्राकृतापत्यमतिं
ब्रह्मशापभयञ्च ॥ ५१ ॥ कल्पते योग्यो भवति, जीवन्मुक्तः स्यादित्यर्थः ॥ * ॥ कल्पते योग्यो भवति ॥ ५२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ आदिना रुद्रा दिग्रहः ।
स्वधाम वैकुंठम् (१) । अतः पंचाध्यायीतः । तत्प्रस्तावमात्मविद्याप्रसंगम् । अथ वसुदेवात्मविद्योपदेशोत्तरम । आत्मजैर्मनसो जातैः । भूतशब्दोपलक्षिताः पिशाचादयस्तेषां भव्यं कल्याणं तस्येशो दाता । तदेवाह—भूतगणै
रिति ॥ * ॥ **दीपिका**—मां स्वधाम वैकुंठं नयेति प्रार्थयामास । अतः पञ्चाध्यायीतः । आत्मविद्यां परमात्मज्ञानम् । तत्प्रस्तावमात्मविद्याप्रसंगम् । अथ नारदोपदेशानन्तरम् । तदेव विवृणोति—तत्रेन्द्र इति सार्धयुग्मकम् ॥१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इंद्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ॥ ऋभवोंगिरसो रुद्रा विश्वे साध्याश्च देवताः ॥ २ ॥ गंधर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥ ३ ॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥ वपुषा येन भगवान्नरलोकमनोरमः ॥ यशो वितेने लोकेषु सर्वलोकमलापहम् ॥ ४ ॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ॥ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनम् ॥ ५ ॥ स्वर्गोद्यानोपगैर्माल्यैश्छादयंतो यदूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ॥ ६ ॥ देवा ऊचुः ॥ नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः ॥ यच्चिंत्यतेंतर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात् ॥ ७ ॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः ॥ नैतैर्भवानजित कर्मभिरज्यते वै यत्स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ॥ ८ ॥

विधां निरूपयितुं तत्प्रस्तावमाह । अथेति । आत्मजैः सनकादिभिः । अभ्यगात् द्वारकामिति चतुर्थेनान्वयः ॥ १ ॥ २ ॥ ३ ॥ ननु तेषामुपेंद्रादिरूपं भगवंतं नित्यं पश्यतां केयमतिदिदृक्षा अत आह । वपुषेति । येन वपुषा नरलोकमनोरमः सन्सर्वलोकेषु यशो वितेने तदतिसुंदरं वपुर्दिदृक्षवः ॥ ४ ॥ व्यचक्षतापश्यन् ॥ ५ ॥ स्वर्गोद्यानस्थैर्माल्यैः चित्राणि शृंखलाबंधप्रायाणि पदान्यर्थाश्च यासु ताभिर्गीर्भिः ॥ ६ ॥ बुद्धींद्रियादिभिर्दर्शनादिना प्राणेन च बलहेतुना दंडवत्प्रणिपातेन वयं नता नमस्कृतवंतः । स्मेति विस्मये । यथाहुः । "दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा ॥ मनसा वचसा चेति प्रणामोऽष्टांग ईरितः ॥" इति । स्मशब्दोक्तविस्मयाय विशेषणम् । कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमंतर्हृदि चिंत्यते न तु दृश्यते तद्वयं नताः अहो भाग्यमित्यर्थः ॥ ७ ॥ ननु ममापि दृष्टादृष्टकर्मकरणात्कुतो मत्पदारविंदांचि

॥ ० ॥ * ॥ ० ॥ २ ॥ ० ॥ * ॥ ० ॥ ३ ॥ देवानामागमनमाक्षिपति—नन्विति । तेषामिंद्रादीनाम् ॥ * ॥ कृष्णेति लुप्तद्वितीयान्तं पृथक्पदम् "सुपां सुलुक्—" इति स्मृतेः । अत एव वपुर्दिदृक्षव इत्यग्रे योजयिष्यति ॥ * ॥ **विश्वनाथस्तु**—येन वपुषा नरलोकमनोरमस्तत् । कृष्णं दिदृक्षव इत्यभेदोक्त्या वपुषः सकाशाज्जीवस्य यथा भेदस्तथा नेश्वरस्येति ज्ञापितम् । तदुक्तम्—"देहदेहिविभागोयं नेश्वरे विद्यते क्वचित्" इति । येन कृष्णाख्येन । अंतर्भूतोपेंद्रादिरूपेण ॥ ४ ॥ तस्यां द्वारवत्याम् । महर्द्धिभिर्दिव्यर्द्धिभिः ॥ * ॥ अद्भुतं दर्शनं दृश्यत इति दर्शनं श्रीविग्रहो यस्य तम् । 'विस्मापनं स्वस्य च' इत्युक्तेः ॥ ५ ॥ शृंखलाबंधप्रायाणि शृंखलाबंधवदन्योन्यसंग्रथितपदार्थानि न तु शृंखलाबंधा एवोक्तलक्षणस्यात्राघटनादिति । " अन्योन्याक्षरवर्तिन्या एकांतारितयाथवा । शृंखलाबंध इत्युक्तः" इति तल्लक्षणात् ॥ * ॥ शृखलाबंधा ह्येकं चित्रकाव्यं चकाराद्वर्णाश्च ग्राह्यास्तदत्र पूर्वपूर्वपद्यचरमस्थवर्णपदतदर्थैरुत्तरोत्तरादिमवर्णपदपदार्थानां सादृश्येन शृंखलाबंधो विवेचनीयः ॥ ६ ॥ बुद्ध्यादिभिर्नत्या साष्टांगनतिरुच्यते । अत्र प्रमाणम्—यथाहुरिति । दोर्भ्यां भुजाभ्याम् । इत्यर्थ इति—अहो अलभ्यलाभातिरस्माकमिति भावः ॥ * ॥ अस्मिन्पद्येंतिमवर्णस्य तकारस्योत्तरपद्याद्यतकारेण शृंखलाबंधः । न च तत्र त्वंकारो न तकार इति वाच्यम् 'काव्यमार्गे स्वरो न गम्यते' इति न्यायात्संयुक्तवकारानुस्वारयोरविवक्षितत्वादिति । एवं परत्रापि ज्ञेयम् ॥ ७ ॥ अहमपि भवत्सदृश एव किं माचिंतयेत्याक्षिपति भगवान्—नन्विति । इदानींतनमाधुनिकम् । अलेपे हेतुमाशंक्य समाधत्ते—कुत इत्यादिना । इति भाव इति—"न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति" इति पुष्पदंतोक्तेस्तव बंधाभावात्परमेश्वरत्वेन सेव्यत्वमेवेत्याशयः ॥ * ॥ **दीपिका**—दृष्टमैहिकं पुत्रपौत्रादिविवाहरूपं कर्म, अदृष्टं पारलौकिकं यज्ञादि कर्म, तयोः करणात् मत्कर्तृकानुष्ठानात् दृष्टादृष्टकर्तृभ्यो जीवेभ्यो मम विशेषाभावात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः॥सत्त्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात्॥९॥
स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः॥ यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥१०॥

तनं कर्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः । त्वमिति । हे अजित । आस्तामिदानींतनमिदमत्यल्पं कर्म त्वं व्यक्तं महदादिप्रपंचं सृजसि पालयसि संहरसि च तदप्यात्मन्येव
न पृथक् । दुर्विभाव्यं मनसाऽप्यन्यैरवितर्क्यम् । तद्गुणस्थस्तस्या मायाया गुणेषु नियंतृत्वेन स्थितः । अत एव तैः कर्मभिर्भवान्नाज्यते न लिप्यते । कुतः । यो भवा
ननवद्यो रागादिरहितः । यतः स्वे आत्मरूपे सुखे अव्यवहितेनावृते अभिरतः अतस्त्वं कर्म कुर्वन्नप्यात्मारामः परमेश्वर इति मुमुक्षुभिश्चिंत्यस इति भावः ॥ ८ ॥
नन्वात्मारामस्य किं कर्मकरणेनात आहुः । शुद्धिरिति । हे ईड्य हे ऋषभ । दुराशयानां रागिणां विद्या उपासना । विद्यादिभिस्तथा शुद्धिर्न भवति । सत्त्वात्मनां सतां
ते यशसि श्रवणेन संभृतया परिपुष्टयाऽभिवृद्धया सच्छ्रद्धया यथा स्यात् । परमपावनस्य यशसो वितानाय तव कर्माचरणमिति भावः ॥ ९ ॥ तदेवं त्वद्यशसि श्रद्धैव शुद्धि
हेतुरस्माभिस्तु तवांघ्रिर्दृष्टोऽतस्तवांघ्रिर्नोऽस्माकमशुभाशयानां विषयवासनानां धूमकेतुस्तद्दाहकः स्यात् । कथंभूतः । यः क्षेमाय मोक्षाय मुनिभिर्मुमुक्षुभिः प्रेमार्द्रहृदा ऊह्य
मानश्चिंत्यमानः । यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहेऽर्चितः । तेषु च कैश्चिदात्मवद्भिर्जितात्मभिर्धीरैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुंठप्राप्तये

कुतो ममेत्यादि योजनीयम् । इदानींतनावतारकालीनमिदं मानुष्यनाट्यानुरूपं दृष्टादृष्टकर्मास्ताम् । तदपि सृष्ट्यादिकमपि आत्मनि स्वरूपभूताधिष्ठाने एव न पृथगिति कुलालादिवदिति अभिन्ननिमित्तोपादानत्वमभ्युपगतं,
तत्र विवर्ताधिष्ठानत्वेनोपादानत्वमिति भगवाञ्छंकरः स्वरूपशक्तिवेशतया निमित्तत्वं प्रधानशक्तिवेशतयोपादानत्वमिति तत्त्ववादिगुरवः । आत्मन्येव न तु पृथगिति स्वामिव्याख्यानं सर्वानुकूलमिति । एतैः सृष्ट्यादिकर्मभिः ।
रागादिदोषरहित इदं मया सम्यक्कृतमिदमसम्यागिति कर्तृत्वाभिनिवेशशून्य इत्यर्थः । आत्मरूपे स्वस्वरूपभूते । सुखे उपाध्यावरणरहिते । अतः सृष्ट्यादिमहत्कर्मभिरलिप्तत्वादिति हेतोः । भावः वाच्योत्थो व्यंग्यः ॥ ८ ॥
परमेशस्य कर्मकरणं नोचितमित्याशंकते—नन्विति । सत्त्वात्मनां सत्त्वगुणधर्मनिष्ठानाम् । इति भाव इति—अतीवकारुणिकत्वेन लोकपावनार्थं कर्म करोति भवानित्याशयः ॥ * ॥ अनवद्यः शुद्ध इत्यत्र प्रकृतार्थमादाय
शृंखलाबंधः । शुद्धिरिति—उपासना खंब्रह्मोपासना न तु भक्तिरुत्तरार्द्धे तस्यास्तदादेरुत्कर्षयिष्यमाणत्वात् । सती चासौ श्रद्धा चेति तया । सती: निर्गुणा । आभासोक्तशंकासमाधानाय भावार्थमाह—परमपावनायेति ।
तथा च भक्तसुखार्थमेव तव लीलेति फलितम् । "मद्भक्तानां विनोदाय करोमि विविधाः क्रियाः" इति भगवदुक्तेरेवेति ॥ * ॥ **संदर्भस्तु**—विद्यादिसद्भावेपि दुराशयानां शुद्धभक्तिश्रद्धाया अभावात् विद्याद्यसद्भावेपि सत्त्वा
त्मनामिति तद्भावात् । तदेवं शृण्वतामपि तथात्वे किमुत पश्यतामिति भक्तसुखार्थमेव तल्लीलेति भावः ॥ * ॥ **विश्वनाथस्तु**—यथा त्वच्चरणमेव नमस्यं तथैव त्वद्यश एव श्रवणस्मरणादिविषयी कर्तव्यमित्याहुः ।
विद्यादिभिस्तथा शुद्धिर्न यतस्ताभिरेव दुष्टो गर्वेणाशयो भवत्येवेति भावः । सत्त्वात्मनां शुद्धसत्त्वावताराणां मध्ये ऋषभ श्रेष्ठ तव यशसि श्रोतुः कीर्तयितुः स्मर्तुश्च प्रवृद्धा सती श्रेष्ठा या श्रद्धा तया शुद्धिः स्यात् ,
कीदृश्या—शास्त्रादिश्रवणोद्भूतया ॥ ९ ॥ धूमः केतुरुपलक्षको यस्य स तथा वह्निरित्यर्थः । वासुदेवादिव्यूहे वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपे चतुर्व्यूहे ॥ * ॥ पूर्वपद्येन संगतिमाह—तदेवमिति । तेषु च भक्तेष्वेव
मध्ये । आत्मवद्भिः आत्मा त्वमेव नाथो येषाम् । तथा च चिंताशून्यत्वाद्धीरैरिति व्याख्यातम् । वैकुंठप्राप्तय इति—एवं चैश्वर्येच्छुत्वाभावाद्दिदृक्षयैव वैकुंठप्राप्तिरभिप्रेति पूर्वतो वैशिष्ट्यम् ॥ * ॥ **संदर्भविश्वनाथौ** तु—समान.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यश्चिंत्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा॥अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परीष्टः॥११॥
पर्युष्टया तव विभो वनमालयेयं संस्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः सुप्रणीतममुयाऽर्हणमाददन्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः ॥ १२ ॥

सवनशस्त्रिकालमर्चितः ॥ १० ॥ किंच प्रयतपाणिभिः संयतहस्तैर्हविर्गृहीत्वाऽध्वराग्नौ आहवनीयादौ याज्ञिकैर्यश्चिंत्यते । ननु "यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट् करिष्यन्" इति वचनात्तत्तद्देवताश्चिंत्यंते । अत आहुः । त्रय्या निरुक्तेन विधिनेंद्रादिरूपेणैव यज्ञपुरुषश्चिंत्यत इत्यर्थः । उत किंच । अध्यात्मयोगे आत्माधिकारे योगे योगिभिरप्यात्मनस्तव माया अणिमादिस्तां जिज्ञासुभिस्त त्तत्कामैर्यश्चिंत्यते । परमभागवतैस्तु मुक्तेर्यः परीष्टः सर्वतः पूजितः स तवांघ्रिर्नोऽशुभाशयधूमकेतुः स्यादिति पूर्वेणान्वयः ॥ ११ ॥ एतेषां च मुनिसात्वतादीनां षण्णां सेवकानां मध्ये परमभागवतेषु लक्ष्म्या अपि तव प्रीतिरधिकेति संस्तुवंति । पर्युष्टयेति । इडभावश्छांदसः । अहं यत्र वसामि

स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनां नारायणपरायणानां या विभूतिः प्रेमसंपत्तिस्तस्यै स्वरतिक्रमाय स्वर्गादिवासनात्यागाय चार्चितः । तदुक्तं प्रह्लादेन–"कामानां हृद्यसंरोहं भवतस्तु वृणे वरम्" इति ॥ १० ॥ न केवलं मुन्यादिभिरेवार्चितः किंत्वन्यैरपीत्याह–किंचेति । अत्राक्षिपति–नन्विति । इत्यर्थ इति–इंद्रादीनामपि " स चेंद्रस्स बृहस्पतिः " इत्यादिश्रुतेस्त्वद्रूपत्वमेवेति भावः । योगे सविकल्पे तत्कामैरणिमादिसिद्धीप्सुभिः । मुक्तैर्नारदादिभिः ॥ * ॥ याज्ञिकैः श्रीभरताद्यैरिति सिद्धपदप्रत्यासत्तेरध्याहृतम् । यस्यै देवतायै यां देवतामुद्दिश्य वषट् करिष्यन् वषडिति मंत्रमुच्चारयन् इंद्रादिरूपेण बाह्यादिरूपतया ध्यानेन । एवं च तेषां त्रयीतात्पर्यवेत्तृत्वं सिद्धम् । एतदज्ञातॄन्प्रत्येव पृथक् तत्तद्देवता विधीयन्त इति भावः । आत्माधिकार इति–आत्मनः परमात्मनोधिकारः फलत्वेन स्फूर्तिर्यस्मिंस्तस्मिन्योगे, चित्तस्यैकाग्र्यावस्थायां बहिर्वृत्तिनिरासात्कारणे लयो योगस्तस्मिन्योगिभिरपि चिंत्यते । परमभागवतैर्नित्यमुक्तैरिति **दीपिका** ॥ * ॥ सर्वार्थदत्वेन चरणस्य चरणोपनिषदुदाहरिष्यते–"चरणं पवित्रम्" इत्यादिकेति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**–याज्ञिकैस्त्वद्भुजादिविभूतय एवेंद्रादयो न ते त्वदन्य इति भाव्यते, "यज्ञभाजो देवास्तान्पुरुषावयवेष्वध्यायत्" इति पंचमनिगमोक्तेः । मायातरणार्थं जिज्ञासुभिश्चिंत्यते यत्तितीर्षितं भवति तत्प्रथमं जिज्ञास्यत एवेति भावः ॥ ११ ॥ षण्णां षट्संख्याकानां मुनिसात्वतात्मविद्याज्ञिकयोगिपरमभागवतानाम् । पर्युषितयेति वक्तव्य इडभाव आर्षः । प्रतिपत्नी सपत्नी । संभवत्वात्–सुप्रणीतामिति । तस्येति पदाध्याहारे गौरवमालक्ष्याह–यद्वेति । अत्रादानादिरवयविधर्मः केवलमवयवस्यापि युक्त एव, हरेरवयवस्य पादस्यावयविवत्स्वातंत्र्येणाप्यादानादिरपि सर्वेश्वरावयवत्वेन विलक्षणत्वादिति भावः । इदानीं हरिप्रियकरत्वेन सर्वेभ्यो हरिकथाश्रवणैकनिष्ठा एव महीयांस इत्याह–अथ वेति । एतेभ्यः पूर्वमुक्तेभ्यः । वैजयंत्या पंचवर्णपुष्पपत्रमय्या ॥ * ॥ **दीपिका**–मुन्यादिषण्णामिति–तत्र मुनयो मुमुक्षवः १, सात्वताः साधकभक्ताः २, धीरास्तत्राप्येकांतिनः ३, याज्ञिकाः ४, योगिनः ५, परमभागवताश्चेति ६, ये षट्सेवकास्तेषां मध्ये । 'वस–निवासे' इति धातुर्निष्ठायां सेट्, पर्युषितयेति तु साधुः, इडभावश्छांदसः । पूर्वार्थेंद्रिवर्णनक्रमभंगः पर्युष्टयेत्यार्षत्वकल्पनं चातो–यद्वेति । द्वितीयार्थेप्यार्षत्वकल्पनं तदवस्थमेव । यशसि श्रद्धावतां सप्तमाधिकारिणां मुन्यादिषड्भ्योपि श्रैष्ठ्यं वदंतस्तद्यश एव मालारूपकत्वेन वर्णयंति–अथ वेति ॥ * ॥ **संदर्भस्तु**–तादृशस्यापि चरणस्य स्वेषु परमानुग्रहं दर्शयितुमाहुः–पर्युष्टयेत्यर्द्धेन । तदेवं पर्युष्टापि लक्ष्मीर्दुःसहापि कथं सा न त्यज्यत इति पूर्वपक्षमुत्थाप्य तमेव सिद्धान्तेन दर्शयन्ति–य इत्यर्धेन । योंघ्रिः नोस्मत्कर्तृकममुया वनमालया करणभूतयाऽर्हणं सुष्ठु प्रणययुक्तं यथा स्यात्तथाददत्स्वीकृतवानसि । अनेन स्वैः कदाचिद्यद्दत्तां सीत्तामेव तदा श्रीभगवान्धृतवानिति ज्ञापितम् । यद्यपि तस्या मालाया दिव्यत्वात्पर्युषितत्वं न संभवति लक्ष्म्याश्च तत्रेर्ष्या प्रेष्ठभूषणत्वान्न संभवति तथापि प्रणयविनोदोक्तिमात्रमिदम् ॥ * ॥ **विश्वनाथोऽपि**–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः ॥ स्वर्गाय साधुषु खलेष्वितराय भूमन्पादः पुनातु भगवन्भजतामघं नः ॥१३॥
नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः ॥ कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥१४॥

तत्रैव वक्षसि पर्युषिताऽपीयं वसतीति प्रतिपत्निवत्सपत्नीवच्छ्रीः संस्पर्धमाना भवति तथाऽपि तां स्पर्धमानां श्रियमनादृत्य यो भवान्पर्युषितयाऽपि अमुया वनमालया भक्तैरर्पि तेयमिति प्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा भवति तथाऽर्हणं पूजामाददत्स्वीकृतवान् । सुप्रणीतमित्यर्हणविशेषणं वा । तस्य तवांघ्रिर्नोऽशुभाशयधूमकेतुर्भूयात् । यद्वा योंघ्रिर मुया सुप्रणीतमर्हणमाददत्स नोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः । अथवैवं संबंधः । एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योऽपि त्वद्यशसि प्रवृद्धसच्छ्रद्धावंत एव कृतार्था भगवतो यशःप्रियत्वादित्याहुः । पर्युष्टया वश कांतावित्यस्मात् परितः सर्वांगे उष्टया कांतया शोभितया वनमालया वक्षस्येकदेशे वर्तमाना श्रीः संस्पर्धमाना भवति तथाऽप्याम्नायम धुव्रतैर्बहुधा वर्णितया कीर्तिमय्या वैजयंत्या वनमालयैव यो भवान्सुप्रणीतमर्हणमाददादित्यादि पूर्ववत् ॥ १२ ॥ त्वच्चरणस्य भक्तपक्षपातः प्रसिद्ध एवेति स्तुवंतः प्रार्थयन्ते । केतुरिति । बलिबंधने त्रिभिर्विक्रमैर्युतः । तत्र द्वितीयविक्रमे सत्यलोकं गतस्तव पादः केतुरत्युच्छ्रितो विजयध्वज इव । तत्संपादयंति । त्रिपतत्पताकः त्रिधा पतंती त्रिषु लोकेषु वा पतंती गंगा पताका यस्य तथाऽसुरदेवचम्वोस्तत्सेनयोरुभयोर्भयाभयकरः । साधुषु सुरेषु स्वर्गाय खलेष्वसुरेष्वितरायेतरस्मै अधोगमनाय । य एवं केतुरूपस्ते पादः स भजतां नोऽघं पुनातु शोधयतु । अघादिति पाठे भजतां न इति कर्मणि षष्ठ्यौ । अघाद्भजतोऽस्मान्पुनात्विति । तथा च श्रुतिः । "चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि ॥ तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ॥ लोकस्य द्वारमर्चिष्मत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् ॥ अमृतस्य धारा बहुधा दोह मानं चरणं नो लोके सुधितां दधातु" इति ॥१३॥ ननु युद्धे देवासुरादयः परस्परं जयंति जीयंते च किमहं तत्रेत्यत आहुः । नसीति । मिथुर्मिथोऽर्द्यमानां युद्धादिभिः पीड्यमाना ब्रह्मादयोऽपि यस्य तव वशे भवंति न तु जये पराजये वा स्वतंत्राः के इव नसि नासिकायामोता नासिकामाविध्य बद्धा गावो बलीवर्दा इव । कुतः । कालस्य

स्पार्धिनीत्युत्प्रेक्षैव द्रष्टृलोककृता न तु श्रियः कदाचित्कापि स्पर्द्धा दृष्टा ॥ १२ ॥ तत्र त्रिविक्रमेषु तदुच्चध्वजत्वं देवादयः संपादयन्ति साधयन्ति । यद्यपि संख्याशब्दानां वृत्त्याश्रयणमभीष्टार्थलाभाय न दुष्टं तथापि तद्विनैव तत्सिद्धौ तन्न कार्यमित्याह—त्रिषु लोकेष्विति । भगवच्चरणस्याघनाशकत्वे श्रुतिमाह—तथा चेति । व्याख्यातचरेयं वेदस्तुतिव्याख्याने ॥ * ॥ दीपिका—तत् ध्वजत्वम् । संपादयंति साधयंति । त्रिष्विति—तत्र दिवि मंदाकिनी, पाताले भोगवती, भुवि तु गंगेति ज्ञेयम् । चरणमिति—पवित्रं शुद्धं विततं व्यापकं पुराणमनादि नित्यनूतनं वा येन पूतः पवित्रीकृतः तेन पवित्रेण पापकुलिशत्रायकेण शुद्धेन स्वयं च पवित्रेणारातिं संसा रलक्षणं लोकस्य वैकुंठस्य स्वोपासनया द्वारं प्रापकम् अर्चिष्मतः पवित्रादंघ्रेरपि पवित्रं ज्योतिष्मत्सूर्यादिष्वपि भ्राजमानं महस्वत्स्वस्मै स्वयंप्रकाशम् अमृतस्य प्रेमानंदस्य धाराः प्रवाहान् बहुधा वैचित्र्येण पूरयत् चरणं लोके स्वभक्तजने सुधितां सुधिततां सुधावदाहरणीयतां दधातु ॥ १३ ॥ सुरासुराभयभयकरत्वं चरणस्याक्षिपति—नन्विति । तत्र जयपराजये । मिथुरव्ययमपि मिथोर्थे । नासिकौतत्वे हेतुमाशंक्य समाधत्ते—कुत इति । तदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः ॥ सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् ॥ १५ ॥ त्वत्तः पुमान्समधिगम्य ययास्य वीर्यं धत्ते महांतमिव गर्भममोघवीर्यः ॥ सोऽयं तयाऽनुगत आत्मन आंडकोशं हैमं ससर्ज बहिरावरणैरुपेतम् ॥ ॥ १६ ॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणाविक्रिययोपनीतान् ॥ अर्थाञ्जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहतादपि बिभ्यति स्म ॥ १७ ॥

कलयितुः प्रवर्तकस्य । तदेव कुतः । प्रकृतिपुरुषयोरपि परस्य । तस्य ते पुरुषोत्तमस्य पादो नः शं तनोतु ॥ १४ ॥ प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः कालत्वेन पुरुषोत्तमत्वमाहुः । अस्येति । अस्य जगत उदयादीनां हेतुरसि । कुतः । अव्यक्तं प्रकृतिर्जीवः पुरुषो महान्महत्तत्त्वं तेषां कालं नियंतारं त्वामाहुः "अक्षरात्परतः परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥" इत्याद्याः श्रुतयः । किंच अयं संवत्सरात्मको यः कालस्त्रिणाभिस्त्रीणि चातुर्मास्यानि नाभयो यस्य सोऽपि त्वमेव । अतस्त्वमुत्तमपुरुष इति । तथा च गीतासु । "यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" इति ॥ १५ ॥ त्वमेव प्रकृत्यादिद्वारा जगत्सृष्ट्यादिहेतुरित्युक्तम् । तत्केन प्रकारेण तदाहुः । त्वत्तः पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया मायया सह महांतं धत्ते । कमिव । अस्य विश्वस्य गर्भमिव । सोऽयं महांस्तयैव माययाऽनुगतः सन्नात्मनः सकाशादांडकोशं ससर्ज । त्वयाऽनुगत इति पाठेऽपि तया मायया त्वयाऽधिष्ठितः सन्निति ॥ १६ ॥ नन्वेवंभूतमीश्वरत्वं मम कुतोऽवगतं तदाहुः । तदिति । तत्तस्मात्तस्थुषः स्थावरस्य जगतो जंगमस्य च भवानधीशः । यद्यस्मान्माययोत्था उज्जृंभिता

प्रवर्तकत्वमेव ॥ * ॥ तत्र देवासुरजयपराजययोरहं किं करोमीति शेषः । परस्य कारणस्येति दीपिका ॥ १४ ॥ यद्वा—महान् हिरण्यगर्भः । नियंतारं स्वस्वव्यापारप्रवर्तकम् । अक्षरात्प्रधानात्परतः जीवात्पर इत्यर्थः । महतः महत्तत्वात् । अव्यक्तं प्रधानम् । 'पुरुषान्न परं किञ्चित्' इति या बुद्धिः सा काष्ठा दिक्समाप्तिः समाप्तिस्थानम् । तदेवाह—सा परा गतिरिति श्रुतिपदार्थः । प्रकारांतरेण तदेवाह—किञ्चेति । यतस्त्वं क्षराक्षरशब्दवाच्यप्रकृतिपुरुषादिभ्यः श्रेष्ठोसि, अतो हेतोः । प्रमाणमाह—तथा चेति ॥ * ॥ प्रकृतिपुरुषाभ्यां प्रधानजीवाभ्यां परत्वमुपपादयंतः युक्त्या प्रतिपादयन्तोनुमानार्थापत्त्यन्यतमत्वं हि युक्तिरत्र हि प्रकृत्यादिनियन्तृत्वान्यथानुपपत्त्या तत्परत्वं सिद्धम् । प्रकृतेः परतोऽक्षराज्जीवात्पर इति जीवपरत्वं महत्तत्त्वात्परमव्यक्तं प्रधानं प्रधानात्परस्तत्प्रवर्तकः पुरुषः परमेश्वरः पुरुषात्परमेश्वरात्परं किंचिदन्यन्नास्ति सा पुरुषरूपा, अत्र तच्छब्दस्य विधेयधर्मीहेतुत्वात्स्त्रीत्वं स हि पुरुषः परमोऽवधिरित्यर्थः । परा गतिः परमपुरुषार्थ इति श्रुतिपदार्थः । अतः कालत्वात् । क्षरः प्रधानादिवर्गः । अक्षराज्जीवात् ॥ १५ ॥ बहिरावरणैः पृथिव्यादिभिरुत्तरोत्तरदशगुणाधिकैः सप्तावरणैः ॥ * ॥ दीपिका—तत् मद्वारकहेतुत्वम् । यया मायया सह यस्यां मायायामित्यर्थः । अनुगतः व्याप्तः सन् । आत्मनः स्वस्मात्सकाशात् । हैमं प्रकाशबहुलम् । पांठातरे माययैव त्वयाधिष्ठितो न तु शुद्धस्वरूपेणान्यथा विकारप्रसंगः स्यादिति ॥ १६ ॥ ममैतादृक्त्वं कुत इत्याशंकते—नन्विति । एवंभूतं सर्वोत्पादकस्वरूपम् । तदीश्वरत्वम् । तत्पदस्य यत्पदेनान्वयः । उपनीतान्प्रापितान् । हृषीकपते सर्वेन्द्रियनियंतः । लिप्त आसक्तः । जीवा दरिद्रास्तेषां स्वत एवार्था न संति योगिनां योगबलादाप्तानपि तैर्बंधभिया त्यजंतीति । इत्यर्थ इति—अप्राप्तत्यक्तयोरप्यर्थयोर्वासनासद्भावाद्बंधो दुष्परिहर इति भावः ॥ * ॥ एवं सृष्ट्यादिकर्तृत्वेन । माययेति—अत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः ॥ १८ ॥
विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हंतुम् ॥ आनुश्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शुचिषदस्त उपस्पृशंति ॥१९॥
बादरायणिरुवाच ॥ इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिम् ॥ अभ्यभाषत गोविंदं प्रणम्यांबरमाश्रितः ॥ २० ॥

या गुणविक्रिया इंद्रियवृत्तिस्तयोपनीतानर्थान्विषयान् जुषन् जुषमाणोऽपि हे हृषीकपते न लिप्तस्त्वम् । ये त्वन्ये जीवा योगिनो वा स्वतः परिहृतादप्यविद्यमानात्त्यक्ताद्वा विषयजोषणाद्बिभ्यति । वासनामात्रेण बध्यंत इत्यर्थः ॥ १७ ॥ अलिप्तत्वमाहुः । स्मायेति । स्मायावलोको मंदस्मितविलसितोऽवलोकस्तस्य लवः कटाक्षस्तेन दर्शितो यो भावोऽभिप्रायस्तेन मनोहारि यद्भ्रूमंडलं तेन प्रहिता ये सौरता मंत्रास्तैः शौंडैः प्रगल्भैरनंगबाणैः कामस्य बाणैः संमोहनैः करणैः कामकलादिभिः षोडशसहस्रं पत्न्यो यस्येंद्रियं मनो विमथितुं क्षोभयितुं न विभ्व्यो न समर्थाः स भवान्न लिप्त इति पूर्वेणान्वयः ॥ १८ ॥ तत्तस्मात्तवामृतरूपा या कथा तदेव उदकं वहंतीति कथाकीर्तिनद्यः । तथा पादावनेजसरितः पादोदकनद्यो गंगाद्याश्च त्रिलोक्याः शमलानि हतुं विभ्व्यः । केन प्रकारेण । आनुश्रवं गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेदस्तत्र भवं कीर्तिरूपं तीर्थं श्रुतिभिः श्रवणेंद्रियैरंघ्रिजं चांगसंगैरेवं शुचिषदः स्वाश्रमधर्मस्थितास्तव तीर्थद्वयमुपस्पृशंति सेवंत इति ॥ १९ ॥ विबुधैः सह ॥ २० ॥

सर्वावतारावतारिशिरोमणेः श्रीकृष्णस्य स्तोतव्यत्वेन प्रकृतत्वात् स्वांशेन प्रकृतिप्रवर्तकपुरुषरूपेण वर्णनमिदं ज्ञेयम् । कर्मफलं प्रायोक्तरीतिन्यायेन जुषमाणत्वेपि स्वरूपभूताचिच्छक्त्याऽलिप्तत्वम् “ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि” इति श्रीमदर्जुनोक्तेः ॥ १७ ॥ सौरतमंत्रास्सुरतसंबंधिगुप्तभाषणानि । कामकलाभिरालिंगनादिचेष्टाभिः ॥ * ॥ साक्षाद्रूपेप्यलिप्तत्वमाहुः–स्मायेति । अभिप्रायोत्र रमणरूपः । प्रहिताः प्रयुक्ताः सौरताः संभोगांगरूपाः मंत्रवत्संमोहका भावहावहेलादयस्ते च ते शौंडाश्च प्रगल्भास्तैरनंगबाणरूपैः करणैः क्रियते वशीक्रियते नायक एभिरिति करणानि तैः । तथा च–कामकलाभिरिति व्याख्यातम् । कामस्य संभोगशृंगारस्य कला अलंकारशब्दवाच्या भावहावहेलालीलाविलासविच्छित्तिविब्वोककिलकिंचिताद्या द्वाविंशतिः । विशेषेण स्वोत्तमप्रेमवतीतुल्यत्वेन क्षोभयितुं न शेकुः किंतु यासां यादृशः प्रेमा तादृशमेव शेकुरिति पत्नीनां चिच्छक्तिवृत्तित्वात्तासां कामकला अप्यप्राकृताश्चिन्मय्य एव ताभिरप्यवशीकारदर्शनादलिप्त एव त्वम् । किञ्च–पारिजाताद्याहरणज्ञापितवशीकारदर्शनात् ताश्च कदाचित्तासां चिद्विशेषप्रेममय्योपि भवन्तीत्युज्ज्वलनीलमणौ प्रतिपादितम् । ततश्च त्वं प्रेमवश्य एव न तु प्राकृताप्राकृतकामवश्य इति भावः । यद्वा–विमथितुं व्रजसुंदर्य इव विशेषेण मथितुं न शेकुः किन्तु यावांस्तत्र प्रेमांशस्तावदेवेत्यर्थः ॥ १८ ॥ यद्ययं भगवान्देवदत्तवद्विषयलंपटत्वेन स्त्रीजितः स्यात्तर्हि तत्कथा तत्पादोदनदीस्नानं पापहरं न स्यान्न च तथेति तर्कं मनसि धृत्वाह–यस्माद्भवानलिप्तस्तस्माद्धेतोः । यद्यपि पादावनेजसरित्त्वं गंगाया एव तथापि गंगायाः सर्वनदीषु स्मरणीयत्वसंबंधेन सर्वासां गंगोपासकत्वेन च सर्वा गंगा एव “गंगा सर्वासु संध्येया स्नानकाले नदीषु च । गंगास्नानफलावाप्त्यै नान्यां तस्यां स्मरेत्क्वचित् ॥ रेवाद्याः सकला नद्यस्सदोपासत जाह्नवीम् । ताद्रूप्यप्राप्त्यै श्रीविष्णुपादपूतजलां विभो ॥” इत्यादिपुराणात् । तत्र वेदे । अंघ्रिजं गंगादि ॥ * ॥ यद्यपि त्वमेवालिप्तस्तथापि तव कथामृतं चरणामृतं च संसारबंधात् लोकान्मोचयत्येवेत्याहुः–तवामृतरूपा याः कथास्ता एवोदवहाः पुण्यनद्यः पादावनेजसरितः श्रीगंगायमुनाद्याः शमलान्यविद्यामालिन्यानि हन्तुं विभ्व्यः समर्थाः, यतस्तीर्थद्वयं सुखविशेषप्राप्त्यर्थं शुचिसदो निर्मलचित्ता अपि पस्पृशंति सदा सेवन्ते । केन प्रकारेणेत्यग्रे शमलहंतृत्वमिति शेषः ॥ १९ ॥ इत्युक्तरीत्या । सेशः सशिवः ॥ * ॥ नहि देवा भुवं स्पृशंतीत्यत उक्तम्–अंबरमाश्रित इति । स्वमर्यादादर्शनाय भगवतोऽपि मनुष्यमर्यादायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मोवाच ॥ भूमेर्भारावताराय पुरा विज्ञापितः प्रभो ॥ त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितम् ॥ २१ ॥ धर्मश्च स्थापितः सत्सु सत्यसं
धेषु वै त्वया ॥ कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा ॥ २२ ॥ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमम् ॥ कर्माण्युद्दामवृत्तानि
हिताय जगतोऽकृथाः ॥ २३ ॥ यानि ते चरितानीश मनुष्याः साधवः कलौ ॥ शृण्वंतः कीर्तयंतश्च तरिष्यंत्यंजसा तमः ॥ २४ ॥ यदुवंशेऽ
वतीर्णस्य भवतः पुरुषोत्तम ॥ शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो ॥ २५ ॥ नाधुना तेऽखिलाधार देवकार्यावशेषितम् ॥ कुलं च विप्रशापेन
नष्टप्रायमभूदिदम् ॥ २६ ॥ ततः स्वधाम परमं विशस्व यदि मन्यसे ॥ सलोकाँल्लोकपालान्नः पाहि वैकुंठ किंकरान् ॥ २७ ॥ (श्रीशुक उवाच ॥
संस्तुतो भगवानित्थं विबुधैः पद्मजादिभिः ॥ प्रतिनंद्याह तान्राजन्मायामनुज ईश्वरः ॥ १ ॥) श्रीभगवानुवाच ॥ अवधारितमेतन्मे यदात्थ विबुधे
श्वर ॥ कृतं वः कार्यमखिलं भूमेर्भारोऽवतारितः ॥ २८ ॥ यदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतम् ॥ लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः ॥ २९ ॥

॥२१॥ विक्षिप्ता विस्तारिता ॥२२॥ उद्दामानि वृत्तानि विक्रमा येषु तानि कर्माणि ॥ २३ ॥ २४ ॥ २५ ॥ २६॥२७॥२८॥ वीर्यशौर्ययुक्तया श्रिया ॥२९॥

स्थेयत्वं दर्शयतीति भावः ॥ २० ॥ तद्भूमिभारावतरणम् । यथा प्रार्थितं तथैव प्रार्थनानतिक्रमेण ॥ * ॥ भूमेरिति युग्मकम् । ननु युष्माभिः क्षीरोदशाय्येव विज्ञापितो न त्वहं तत्राह–
हे अशेषात्मन् हे सर्वावतारावतारिस्वरूप तस्यापि त्वत्सरूपत्वादित्यर्थः । यद्वा–भूम्यादीनां दुःखं ज्ञात्वैवेत्यर्थः । तद्विज्ञापनम् । तथैव विज्ञप्त्यनुरोधेनैव । प्रभो इति तत्साम्पादनसामर्थ्यमाह ॥ २१ ॥ ० ॥ * ॥ सत्यसंधेषु
सत्यप्रतिज्ञेषु ॥ २२ ॥ उद्दामानि उत्कटानि । अकृथाः कृतवानसि ॥ * ॥ बिभ्रज्जगति दर्शयन् । यानीति यच्छब्दस्योत्तरवाक्यगतत्वेन तच्छब्दानपेक्षत्वम् ॥ २३ ॥ ते तरिष्यंतीति योज्यम् ॥ * ॥ अंजसेति–श्रवण
कीर्तनयोः स्वतः पुरुषार्थत्वम्, तरणस्यानुषंगिकत्वं चोक्तम् ॥ २४ ॥ पञ्चविंशाधिकं पंचविंशत्यृत्वाधिकम् । तदुक्तम्–"वत्सराणां शतं चैव ऋतूनां पञ्चविंशकम् । अवतीर्णस्य कृष्णस्य यदा प्रागात्तदा हरिम् ॥
स्वस्थानगमनापेक्षी ब्रह्मा तुष्टाव सामरः ।" इति पुराणांतरमाह विजयध्वजः ॥ * ॥ विवक्षितमाह–यदुवंश इति ॥ २५ ॥ अवशिष्टदेवकार्यापेक्षयापि न स्थेयमिति चेत्तत्राह–नाधुनेति । यदुकुलमवशिष्टमपेक्ष्यापि न
स्थेयमित्याह–कुलं चेति ॥*॥०॥२६॥ यादवानां देवत्वात्तत्स्थितौ कलेरप्रवेशात्तस्य चापेक्षितत्वात्तत्कुलसंहारार्थं किंचित्कालं स्थित्यपेक्षायां तत्कृत्वा झटिति स्वधाम प्रवेष्टव्यमित्याशयेनाह । तदुक्तं च–" संवत्सरद्वयं तत्र पश्चा
त्स्थित्वा जनार्दनः । अभिपेदे परं स्थानं चतुर्मासाधिकं पुनः ॥" इति तीर्थः॥*॥यतो देवकार्यानवशेषस्ततो हेतोः स्वधाम प्रपञ्चागोचरीभूतं द्वारकाया एवाप्रकटप्रकाशं स्वयं भगवत्कृष्णरूपेण प्रविश, वैकुंठश्वेतद्वीपादिकं तु
नारायणादिस्वरूपेण सर्वांशमादायावतीर्णत्वात् । श्रीविष्णुरूपेण तु–"सलोकाँल्लोकपालान्नः पाहि वैकुंठ किंकरान्" नानावैकुण्ठनाथरूपैश्च वैकुंठाकिंकरान्पाहीति॥२७॥ अवधारितं निश्चितम्॥*॥०॥२८॥ तर्हि कालक्षेपे किं
कारणं तत्राह–तदिदमिति । लोकं विश्वं जिघृक्षत् अवमानादिभिर्जगद्ग्रसनेच्छु । मे मया । रुद्धं निरुद्धमस्ति ॥*॥ वीर्यं बलिष्ठत्वम्, शौर्यं युद्धोत्साहस्तयोः श्रिया संपत्त्या उद्धतं हताद्धननादुद्धतमवध्यमित्यर्थः । लोकं जिघृ
क्षदनंतत्वाद्व्याप्तुमिच्छत् मयाऽचिंत्यशक्तिना द्वारकायामेव रुद्धमन्यथा सर्वभूर्लोकेपि पर्याप्तमिति । व्रजे गोपगोपीनामनंतयूथवत् अनंतरूपायाश्श्रीराधाया देहोद्भूतत्वाद्गोपीनामानंत्यं तथैव ममानंतस्य देहोद्भूतत्वाद्गोपाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलम् ॥ गंतास्म्यनेन लोकोऽयमुद्वेलेन विनंक्ष्यति ॥ ३० ॥ इदानीं नाश आरब्धः कुलस्य द्विजशापतः ॥ यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ॥ ३१ ॥ श्रीशुक उवाच ॥ इत्युक्तो लोकनाथेन स्वयंभूः प्रणिपत्य तम् ॥ सह देवगणैर्देवः स्वधाम समपद्यत ॥३२॥ अथ तस्यां महोत्पातान्द्वारवत्यां समुत्थितान् ॥ विलोक्य भगवानाह यदुवृद्धान्समागतान् ॥ ३३॥ श्रीभगवानुवाच ॥ एते वै सुमहोत्पाता व्युत्तिष्ठंतीह सर्वतः ॥ शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ॥३४ ॥ न वस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः॥ प्रभासं सुमहत्पुण्यं यास्यामोऽद्यैव मा चिरम् ॥३५॥ यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् ॥ विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयम् ॥ ३६ ॥

उद्वेलेन लंघितमर्यादेन ॥ ३० ॥ वैकुंठं यास्यंस्तव भवनं यास्यामि ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ प्रभासं यास्याम इति वदतोऽयमभिप्रायः । एते देवांशाः स्वाधिकारानेवार्हंति न तु सद्योमोक्षम् । द्वारवत्यां मृता मुच्येरंस्तस्मादभ्युदयफलं प्रभासं नेष्यामीति ॥ ३५ ॥ दक्षशापाद्यक्ष्मणा रोगेण गृहीत उडुराट् चंद्रो यत्र

मप्यानंत्यमेव ध्येयं नात्र शंकावकाशः ॥ २९ ॥ अनुपसंहारे को दोष इति चेदाह–अनेनेति । सतोपि यदुकुलस्योद्वेलत्वं युगधर्माद्भविष्यतीत्यभिप्रायेणोक्तमाचार्यैः–"सतामपि कलौ प्राप्ते विकारो मनसो भवेत् । तस्माद्यदूंश्च संजह्रे नैते स्युः पापिनः खलु ॥ पुनर्लोकविवृद्ध्यर्थमौत्तरेयादिकान् हरिः । आविश्य रक्षामकरोज्जगतः पुरुषोत्तमः ॥ स्वात्मनः सहयानेन पुरुषार्थोधिको भवेत् । इत्यनुग्रहबुद्ध्या हि संजह्रे स्वकुलं विभुः ॥" इति ॥ * ॥ **दीपिका**–नन्वेतेषां ब्रह्मण्यानां वदान्यानां नित्यवृद्धोपसेविनां व्याप्त्या भद्रमेव भवेत्तत्राह–यदीति । उद्वेलेन मद्वियोगात्कर्तव्याकर्तव्यविचारलोपादुन्मत्तचेष्टेन ॥ * ॥ **विश्वनाथस्तु**–दृप्तानां मामकत्वेन धृताहंकाराणाम्, उद्वेलनातिक्रान्तमर्यादसमुद्रोपमेनेत्यर्थः। लोको भूर्लोकः । यद्यपि मत्परिकराणामेषां धार्मिकाणां यदूनां भारं पृथिवी न मन्यते तदपि तस्याः स्वामिना मयाऽयं भारोऽवतारणीय एव सुकुमार्या वनिताया अतिबहुतरभूषणभारो यथा तत्कांतेनावतार्य्यते तथा । यद्यपि स्पृहणीयवस्तुनो भारः सुसह एव तदप्यतिभारस्तु न सुसहो यथाऽकस्मात्प्राप्तोपि कनकराशिभारो गृध्नुना वणिजा दुर्वह एव 'धृतरथचरणोभ्ययाच्चलद्गुः' इति व्यासवर्णनात्तद्भारोपि पृथिव्या दुःसह एव दृष्ट इति ॥ ३० ॥ एतस्य यदुकुलसंहारस्यान्ते । अनद्यत्वात्तव त्वदीयभवनं यास्यामीत्यभिप्रायः ॥ * ॥ नाशोऽदर्शनं निगूढायां द्वारकायां प्रवेशनमित्यर्थः । एतस्य प्रवेशनस्यांते तव भवनं विकुंठासुतरूपेण यास्यामि तदुपरिगं वैकुंठं यास्यन्नित्यर्थः ॥ ३१ ॥ इतीत्थम् । तं श्रीकृष्णम् ॥ * ॥ लोकनाथेनेति–लोकसंग्रहार्थं ब्राह्मणशापवर्णनमुचितमिति भावः ॥ ३२ ॥ अथ ब्रह्मादिप्रार्थनोत्तरम् । महोत्पातान् धूमकेतूदयत्रयोदशदिनपक्षभूकंपदिग्दाहादिरूपान् । 'त्रयोदशदिने पक्षे यादवा निधनं गताः' इत्याद्युक्तेः ॥ * ॥ महोत्पातान्भगवदिच्छयैवाविर्भूतान् "मुनिवासनिवासे किं घटेतारिष्टदर्शनम्" इत्युक्तेस्तत्र तदसंभवात् ॥ ३३ ॥ एते धूमकेतूल्कापातसंध्याविकृतिरूपाः । इह द्वारकायाम् । दुरत्ययो दुर्लंघ्यः ॥ * ॥ ० ॥ ३४ ॥ "ते मुक्ता ब्रह्म संयांति ये मृता द्वारकापुरे" इति द्वारकामाहात्म्योक्तेन तु सद्योमोक्षमिति । अभ्युदयः स्वर्गारोग्यादिः ॥ * ॥ अस्माभिरिति तेषां स्वसाम्यमेव निर्दिष्टम्, तत्र जिजीविषुभिरित्यात्मवदेव तेषामुत्पातनिरसनमभिप्रेतम् । तत्र व्याजमात्रं प्रभासमित्यादिमंगलरूपायां स्वपुर्याममंगलानुकरणमपि मा भूदित्यभिप्रायकं च । अनुकरणमात्रत्वञ्च जिजीविषुभिरित्यनेनैव व्यंजितमन्यथा श्रीभगवदंगीकारभंगः स्यात् । प्रभासमिति–मन्नित्यपारिकरैर्विशिष्टैव द्वारका सदा विराजतु तेषु प्रविष्टान्देवानेव यादवरूपान् अलक्षितं तेभ्यः सकाशाद्योगबलेन निष्कास्य प्रभासं नीत्वा तत्रैव तान्मायया मौसलसंग्रामं प्रापय्य स्वर्गं प्रस्थाप्य विकुंठासुतादिरूपोहमपि वैकुंठादिधामानि यास्यामि पूर्णस्वरूपेण तु सपरिकरोहं द्वारकायां सदैवास्म्येवेति भगवन्मनोगतं ज्ञेयमिति **विश्वनाथः** ॥ ३५ ॥ तदेवाह–यत्र प्रभासे ॥ * ॥ तीर्थस्य ब्रह्मशापशमनयोग्यतामाह–यत्रेति । अन्यथा श्रीभगवतो युक्तिभंगः स्यात् ॥ ३६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सुरान् ॥ भोजयित्वोशिजो विप्रान्नानागुणवतांधसा ॥ ३७ ॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महांति वै ॥
वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवम् ॥३८॥ श्रीशुक उवाच ॥ एवं भगवताऽऽदिष्टयादवाः कुलनंदन॥गंतुं कृतधियस्तीर्थं स्यंदनान्समयूयुजन्॥
॥ ३९ ॥ तन्निरीक्ष्योद्धवो राजञ्छ्रुत्वा भगवतोदितम् ॥ दृष्ट्वाऽरिष्टानि घोराणि नित्यं कृष्णमनुव्रतः ॥ ४० ॥ विविक्त उपसंगम्य जगतामीश्वरे
श्वरम् ॥ प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत ॥ ४१॥ उद्धव उवाच ॥ देवदेवेश योगेश पुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते
भवान् ॥ विप्रशापं समर्थोपि प्रत्यहन्न यदीश्वरः ॥ ४२ ॥ नाहं तवांघ्रिकमलं क्षणार्धमपि केशव ॥ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥४३॥
तव विक्रीडितं कृष्ण नृणां परममंगलम् ॥ कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहां जनः ॥ ४४ ॥

स्नानमात्रं कृत्वा किल्बिषात्तस्माद्रोगदुःखात्सद्यो विमुक्तः सन्भूयः कलावृद्धिं भेजे ॥ ३६ ॥ उशिजः कमनीयान् । अंधसा अन्नेन ॥ ३७ ॥ उप्त्वेति । यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्रे इति द्योतयति ॥ ३८ ॥ ३९॥४०॥४१॥ लोकं मर्त्यलोकम् । यद्यस्मान्न प्रत्यहन्प्रतिहतवान् ॥४२॥४३॥४४॥

तस्मिन् प्रभासे । उशिजः वष्टेरौणादिक इज् संप्रसारणञ्च । कमनीयांस्तपोविद्यावृत्तयुतान् । नानागुणवता माधुर्यदर्शनीयसुस्पृश्यादित्वगुणयुक्तेन ॥ * ॥ नौकादृष्टान्तेन साधनेन तदेव द्रढयति—वयमिति युग्मकेन । एतद्व्याख्यानिदानविवरणं श्रीकृष्णसंदर्भे : सप्तदशोत्तरशततमवाक्यचूर्णिकामारभ्य चतुस्त्रिंशदुत्तरतत्पर्यंतग्रंथे दृश्यम् ॥ ३७ ॥ तेषु विप्रेषु । पात्रेपूक्तलक्षणेषु ॥ * ॥ ० ॥ ३८ ॥ तीर्थं प्रभासम् ॥ * ॥ ० ॥ ३९ ॥ तत्प्रभासयात्रोद्योगम् । भगवतोदितम्—'शापश्च नः कुलस्य' इत्यारभ्य 'नौभिरिवार्णवम्' इत्यंतेन ॥ * ॥ तन्निरीक्ष्येति पाठो न तु तानिति । तत्प्रभासयात्रोद्यमनं दृष्ट्वा पश्चा जयपरंपरयैव यदुभ्यो भगवतोदितम् 'एते वै' इत्यादिपद्यपञ्चकं श्रुत्वा तस्माद्दुःखीकृत्यैव तेभ्यस्तेनोपदेशात् । घोराण्यरिष्टानीति यद्यपि तन्न संभवति तथापि बहिर्दृष्ट्या तदाभासानेव दृष्ट्वा । विविक्ते रहसि ॥ ४० ॥ तं श्रीकृष्णम् ॥ * ॥ ० ॥ ४१ ॥ ० ॥ * ॥ देवानामपि देवा ब्रह्मादयस्तेषामीशेति देवकार्यं ब्रह्मप्रार्थितञ्च त्वया सर्वं संपादितमिति भावः । न केवलमेतदर्थमेवावतीर्णस्त्वमभूः किंतु दुर्वितर्क्यविचित्ररसमयगुणरूप चरित्रप्रकाशनया भक्तजनानंदनार्थमपीत्याह—योगेशेति । तदुक्तम्—" यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् " इति । जनिष्यमाणजनतानिस्तारार्थमपीत्याह—पुण्येति । अत एतत्त्वदीयसर्वविधित्सित संपन्नत्वादिदानीमिमं लोकं संत्यक्षते । नूनमिति वितर्के, भवानंतर्द्धास्यतीति तर्कयामि । किञ्च—शापनिवर्तकं प्रभासस्नानमुपदिशासि किं त्वद्दर्शनादपि प्रभासस्नानमाधिकं भवेत् । विप्रशाप एषां मा फलत्विति तव मनोगते सत्यपि किं शापः प्रभवितुं शक्नुयात् तस्मात्त्वदंतर्द्धित्सैव दृश्यते । यद्यतः समर्थोपि भवान्विप्रशापं न प्रत्यहन्न प्रतिहतवान् ॥ ४२ ॥ ० ॥ * ॥ अतः स्वस्मिंस्तद्द्रोपनमनयनं दृष्ट्वा प्रार्थयते—नाहमिति । यथा यादवान्नेष्यस्येव तथा मामपि नयेत्यपिशब्दार्थः । स्वकर्तृकत्यागाशक्यत्वं कैमुत्येनाह—तवेति । विक्रीडितं भावे निष्ठा । लीलाश्रवणेपि त्वदेकनिष्ठत्वं स्यात्किं पुनः साक्षाद्दर्शनादाविति भावः ॥ * ॥ **विश्वनाथस्तु**—नन्वीश्वरोहं यथेच्छामि तथा करोमि तेन तव किमिति चेत्तत्राह—नाहमिति ॥ ४३ ॥ अन्यस्पृहामैहिकामुष्मिकविषयेच्छाम् ॥ * ॥ अन्यस्पृहां पुत्रकलत्रादिमोक्षांतस्पृहां त्यजंति न तु विक्रीडितुं त्यक्तुं शक्नुवन्ति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेम हि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥
उच्छिष्टभोजिनो दासास्तव मायां जयेम हि ॥ ४६ ॥ वातरशना य ऋषयः श्रमणा ऊर्ध्वमंथिनः ॥ ब्रह्माख्यं धाम ते यांति शांताः संन्यासिनोऽ
मलाः ॥ ४७ ॥ वयं त्विह महायोगिन्भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ॥ ४८ ॥ स्मरंतः कीर्तयंतस्ते कृतानि
गदितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडंबनम् ॥ ४९ ॥ श्रीशुक उवाच ॥ एवं विज्ञापितो राजन्भगवान्देवकीसुतः ॥ एकांतिनं
प्रियं भृत्यमुद्धवं तमभाषत ॥ ५० ॥ इति श्रीमद्भागवत एकादशस्कंधे ब्रह्मादिप्रार्थनानिरूपणं नाम षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ श्रीभगवानुवाच ॥
यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्ववांसं मेऽभिकांक्षिणः ॥ १ ॥

शय्यादिषु त्वां भक्ता नित्यं सेवितवंतो वयं कथं त्यजेम ॥ ४५ ॥ त्यक्तुमशक्नुवन्प्रार्थयते न मायाभयादित्याह । त्वयेति । चर्चिता अलंकृताः ।
हि निश्चितं जयेम ॥ ४६ ॥ संन्यासिनो हि ब्रह्मचर्यादिक्लेशैः कथंचित्तरंति वयं त्वनायासेनैव तारिष्याम इत्याह । वातरशना इति । ऊर्ध्वमंथिन ऊर्ध्वरेतसः ॥ ४७ ॥
तावकैर्भक्तैः सह त्वद्वार्तया दुस्तरं तमः संसारम् ॥ ४८ ॥ क्ष्वेली परिहासः । द्वंद्वैकत्वम् ॥ ४९ ॥ एकांतिनमित्यादि स्वाभिप्रायावंचने हेतुः ॥ ५० ॥ इति श्री
भा० म० एकादशे श्री० टीकायां षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ सप्तमे तूद्धवस्यात्मज्ञानसिद्धयै हरिः स्वयम् ॥ अवधूतेतिहासोक्तगुरुष्वष्टाववर्णयत् ॥ १ ॥ यदात्थ

अहं तु त्वामपि त्यक्तुं कथं शक्नुयामिति भावः ॥ ४४ ॥ न कथमपि त्यक्तुं समर्था इत्यर्थः ॥ * ॥ ० ॥ ४५ ॥ अत एव प्रार्थय इत्याह—त्यक्तुमिति । चर्चिताः 'चर्च—अलंकारे' ॥ * ॥ मायां जयेमेति—
यदि साऽस्मान्प्रति विक्राम्यंती आयास्यति तर्ह्येतैरेवास्त्रैः प्रबलीभूय तां जयेम जेतुं शक्नुमः । न तु ज्ञानादिभिरित्यर्थः । परोक्षपूजादौ साधकभक्तानामप्युपभुक्तस्रगादिना तज्जयः सुप्रसिद्ध एव किं पुनः साक्षाद्वयमिति
भावः ॥ ४६ ॥ वाता त्यक्ता रशना कौपीनबंधनसूत्रं यैस्ते वातरशनाः "वातस्त्यागेथ पवने व्याधिभेदे च हिंसने । रशना कटिसूत्रे च " इति कोशात् । श्रमणा भिक्षावृत्तयः ॥ * ॥ वातरसनेति—रसना
शब्देन वस्त्रं लक्ष्यते, हिरण्यरसन इत्यत्र चतुर्थे तैस्तथा व्याख्यातत्वात् । वातरसनाद्यास्तैस्तैर्ज्ञानवैराग्यादिभिः ब्रह्माख्यं तव धाम "यत्परं परमं ब्रह्म सर्वं विभजते जगत् । ममैव तद्घनं तेजो ज्ञातुमर्हसि भारत ॥" इत्यर्जुनं
प्रति त्वदुक्तेस्तवैव ज्योतिर्विशेषं ते यान्ति । सत्यम्, ते यान्तु वयं तु न यियासामः, किंतु त्वन्मुखचंद्रमधुरस्मितसुधापानमत्ता एव तिष्ठाम इति भावः ॥ ४७ ॥ अस्माकं तु न कापि चिंतेत्याह—वयमिति ।
द्वयोरन्वयः । उत्पन्नतत्त्वज्ञानोप्युद्धवः 'भ्रमन्तः कर्मवर्त्मसु' इत्युक्त्या स्वस्यावमतां वक्तीति यत्तत्सतां स्वभाव एव "आत्मनोऽवमतां ब्रूयुरुत्तमा अपि सर्वशः । कदाचिदेव स्वगुणान्स्निग्धेष्वेव न सर्वतः ॥ "
इत्युक्तेः ॥ * ॥ किञ्च—त्वदेकान्तभक्ता मायातरणं भक्तेः फलत्वेन नैवानुसंदधते वयं तु न तादृशा इति तादृशीं प्रौढिं कथं कुर्म इति दैन्येनैवात्मनि मायातितीर्षामारोप्याह—वयं त्विति । तुर्भिन्नोपक्रमे, वयं तु
दासा अपि सख्यरसालंबिनस्त्वदाज्ञयापि ज्ञानाभ्यासमचिकीर्षव एवेति भावः । हे महायोगिन्निति—तव योगमायां मायां च नैव विविदिषाम इति भावः । तावकैस्त्वद्भक्तजनैः सहेति । ते खल्वस्मत्तुल्यस्वभावा
एवेति तैरेवास्माकं साहित्यमुपपद्यते न वातरसनाद्यैरिति भावः ॥ ४८ ॥ उत्स्मितेक्षणं सस्मितवीक्षणम् । यदन्यल्लोकविडंबनं लोकानुकरणं तच्च स्मरंतस्तारिष्यामः ॥ * ॥ तत्तरणे वः कः प्रकार इत्यत आह—स्मरन्त
इति । त्वदीयचरितश्रवणकीर्तनादिसुदर्शनास्त्रतेजसैवास्माकं तत्तरणं सुगममेवेति भावः । क्ष्वेलिः प्रेयस्या सह सौरतपरिहासः ॥ ४९ ॥ स्वाभिप्रायस्यावंचने स्वीकारे । एकस्मिञ्श्रीहरावेवांतो निश्चय एकान्तः, सोऽस्यास्तीति
तम् ॥ * ॥ एकांतिनमित्यादि स्वाभिप्रायावञ्चने हेतुः ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ अवधूतो दत्तात्रेयस्तस्येतिहासे उक्ता ये चतुर्विंशतिगुरवस्तेष्वष्टे
त्यर्थः (१) । ईदृगिच्छावंत एव महाभागा इति संबुद्ध्यभिप्रायः ॥ * ॥ यत् यदुकुलसंहारादिकं स्वधाम्नि तव नयनञ्चात्थ । अंशेन बलदेवेन सह । हे महाभागेति—त्वमेव मदाश्रितज्ञानभागित्वेनोत्कृष्टभाग्योसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः॥२॥कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात्॥ समुद्रः सप्तमेऽह्न्येतां पुरीं च प्लावयिष्यति ॥ ३ ॥ यर्ह्येवायं मया त्यक्तो लोकोऽयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ ॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥५॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गाम् ॥ ६ ॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥ ७ ॥

संहृत्यैतत्कुलमिति । स्वर्वासं वैकुंठवासं प्रति ॥ १ ॥ २ ॥ त्वं च सर्वत्यागेनात्मनिष्ठो भवेति वक्तुमाह कुलमिति त्रयेण ॥ ३ ॥ तदैवायं नष्टमंगलो भविष्यति । निराकृतो नितरामाक्रांतः ॥ ४ ॥ न वस्तव्यमेव त्वया ॥ ५ ॥ ६ ॥ ननु गुणदोषाभ्यां विषमे लोके कुतः समदृष्टिः स्यामत आह । यदिदमिति । मनआदि

यतो लोकानपि भाग्यवंतो विधास्यसि मत्तत्त्वोपदेशेन ‘ ग्राहयन्निह तिष्ठतु ’ इति तृतीयोक्तेः ॥ १ ॥ अंशेन निष्पादितं यदुकुलक्षयस्यावशिष्टत्वात् । यदर्थे देवकार्यार्थमहमशेषतः सामस्त्येनावतीर्णे आविर्भूतः ॥ * ॥ ० ॥ ॥ २ ॥ एतां द्वारकाम् । प्लावयिष्यति अंतर्द्धापयिष्यति । अर्थांतरांगीकारे तु “ अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः । अद्यापि श्रूयते राजन्द्वारकायामहर्निशम् ॥ ” इति पुराणांतरवाक्यं व्याकुप्येतेति ॥ * ॥ शापानिर्दग्धमित्यनुकरणाभिप्रायं वस्तुतस्तु शापेपि निर्गतं दग्धं देहो यस्मात्तथाभूतं सत् नंक्ष्यत्यदर्शनमेव प्राप्स्यतीत्यर्थः । प्लावयिष्यति चतुर्दिक्षुत्रावरिष्यति न तु मध्येपि “ वर्जयित्वा महाराज श्रीमद्भगवदालयम् ” इति वक्ष्यमाणत्वात् ॥ ३ ॥ निजविग्रहमन्तर्द्धापयता मया यदा त्यक्तो भविष्यति तदैवेत्यर्थः । निराकृतस्तिरस्कृतः ॥ * ॥ तव स्वधामनयनं तु किञ्चिद्विलंबेनैव करिष्यामि यतो मुनिषु स्वोपदेशग्रहणाय संप्रति स्थापयिष्यामीत्यभिप्रेत्य तथोपदेष्टुमुपचक्रमे–यर्ह्येवेति । हे साधो मद्धर्मनिष्ठ “ नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ॥ ” इति तृतीयस्थतदुक्तेरिति **संदर्भः** ॥ ४ ॥ ० ॥ * ॥ न वस्तव्यम् एकत्र स्थानं बद्ध्वा न स्थेयम् ‘ समदृग्विचरस्व गाम् ’ इत्युक्तेः ॥ ५ ॥ मयि सर्वगतसच्चिदात्मनि मन आवेश्य विषमं नामरूपमनवाध्य सम्यक् समं मां पश्यतीति समदृक् तथा चैवं मम तव विच्छेदाभाव इति भावः ॥ * ॥ अतस्तमुपलक्ष्य तदुपदेश्यान्प्रत्येवाह–त्वन्त्विति सप्तभिः ॥ * ॥

विश्वनाथस्तु–अत्रांतरे मनसि भगवान् किञ्चित्परामर्श–रुक्मिण्यादिविवाहे बाणासुराद्यसुरवधप्रसंगतस्तत्रतत्र बंधुमेलनप्रसंगतश्चेन्द्रप्रस्थमिथिलादिषु यातायातैर्मां दिदृक्षूणां भूतलस्थभक्तानां मनोरथो मया संपादितप्राय एव, पृथिव्या अधःस्थितानां बलिरविनंदनादीनामपि षड्गर्भानयनगुरुपुत्रानयनप्रसंगेन, ऊर्ध्वस्थानामदितिकश्यपादीनामपि पारिजाताद्याहरणप्रसंगेन, महावैकुंठस्थानामादिपुरुषभूमादीनामपि विप्रबालकानयनप्रसंगेन व्यंजितं मद्दर्शनं निष्पादितमेव, किन्तु बदरिकाश्रमवासिनां नरनारायणादिपरमहंसमहामुनीन्द्राणामेवं मद्दर्शनौत्सुक्यं न सफलीभूतं बभूव संप्रति तु सपादशतवर्षपर्यन्तमत्प्राकट्यमर्यादा च वृत्तेत्यतस्तत्र प्रस्थापयितुमयमुद्धव एव निरूपयितव्यः । अयं हि मत्तुल्यत्वान्मत्प्रतिमूर्तिरेव तेभ्य उपायनत्वेन देयः, मदीयभगवच्छब्दवाच्ययोर्ज्ञानवैराग्ययोरेकमेकं कणं मद्भक्तियोगं च महानर्घ्यं रत्नमिवादाय यास्यंस्तेषां मनोभीष्टं स्पष्टमेव पूरयिष्यति । यद्यप्यस्य मत्प्रेमपरिपूर्णस्य तदुत्थज्ञानवैराग्ये वर्तेते एव संप्रति मयोपदेष्टव्ययोर्ज्ञानवैराग्ययोर्नास्त्येवास्य जिघृक्षा तदपि मदिच्छायां सत्यां तत्राप्यस्य जिघृक्षा खल्वधुनैवोत्पत्स्यते तथैव, यद्यप्यस्य मद्विच्युतौ सद्य एव प्राणहानिस्तदपि मदिच्छाशक्तिरेव बलवती प्राणानस्य पालयित्वा तावद्दूरमप्येनं प्रापयिष्यति प्रापञ्चिकलोकालक्षितं मदंतिकेपि स्थापयिष्यतीति परामृश्य च श्रीमदुद्धवचेतसि ज्ञानवैराग्ययोर्भक्तियोगस्य च जिघृक्षां संचार्याह–त्वं त्विति । स्वजनबंधुषु यादवादिषु स्नेहं परित्यज्येति, तेषु च तत्स्नेहो द्विविधः–मत्परिचयात्प्रथमत एव स्वदेहसंबंधेनैकः, मत्संबंधोत्थो द्वितीयः । तत्र पूर्व एव त्वया त्यक्तुं शक्यः स एव मया त्यागे विधीयते न तूत्तरः त्वदशक्यत्वाद विगीतत्वाच्चेति भगवदाशय उद्धवेन ज्ञायत एव ॥ ६ ॥ स्वजनादिस्नेहत्यागः कथमिति चेत्तत्राह–यदिति । सुखदुःखादिजनकाः स्वजनादयोऽसत्याः स्वप्नवद्गंधर्वपुरवच्चेति । यद्वा–आक्षिप्य समाधत्ते–नन्विति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुंसो युक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥ ८ ॥ तस्माद्युक्तेंद्रियग्रामो युक्तचित्त इदं जगत् ॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥ ९ ॥ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् ॥ आत्मानुभवतुष्टात्मा नांतरायैर्विहन्यसे ॥ १० ॥ दोषबुद्ध्यो भयातीतो निषेधान्न निवर्तते ॥ गुणबुद्ध्या च विहितं न करोति यथार्भकः ॥ ११ ॥

भिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि । तदपि न स्थिरं किंतु नश्वरं विद्धि ॥ ७ ॥ मनोमयत्वे हेतुः । पुंस इति । अयुक्तस्य विक्षिप्तमनसः । नानार्थो भेदविषयो भ्रमः स भ्रम एव गुणदोषभाक् । ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यतोक्ता । न । भ्रमविजृंभितगुणदोषबुद्धेः पुंसः । कर्म विहितम् । अकर्म तल्लोपः । विकर्म निषिद्धमिति भिदा भेदः प्रोक्तः । अविद्यावद्विषय एव वेद इत्यर्थः ॥ ८ ॥ कथमात्मनि परिच्छिन्ने विततं जगदीक्षणीयं तत्राह । आत्मानमिति । मयि ब्रह्मणि तद्रूपेणेक्षस्व ॥ ९ ॥ नन्वेवं युक्तचित्तत्वेन कर्माकरणे देवादयो विघ्नान् करिष्यंति तत्राह । ज्ञानेति । ज्ञानं वेदतात्पर्यनिश्चयः विज्ञानं तदर्थानुभवस्ताभ्यां सम्यग्युक्तस्तत् आत्मानुभवेनैव तुष्टचित्तोऽतः शरीरिणां देवादीनामात्मभूतोंतरायैर्न प्रतिहन्यसे । अयं भावः । यावदनुभवं यथाश्रमं कर्माणि कुर्यादेव तदनंतरं सर्वेषामात्मभूतत्वान्न कोऽपि विघ्नाचरति । तथाच श्रुतिः । "तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवति ॥" इति ॥ १० ॥ न चोत्पन्नज्ञानस्यापि यथेष्टाचरणप्रसंग इत्याह । दोषबुद्ध्येति । उभ

आदिना श्रोत्रादिग्रहः । गृह्यमाणं वस्तुजातम् । तदपि मनोमयमपि ॥ * ॥ ननु कदिशं समदक्त्वं तत्राह—यदिदमिति । यत् पृथिव्यादिकमस्ति तत्सर्वं जागरे मायाकल्पितत्वांशेन तुल्यमेव, स्वप्ने मनःकल्पितत्वांशेन सर्वं तुल्यमेवेति **विश्वनाथः** ॥ * ॥ अत्र **संदर्भः**—जागरे मायाप्रधानं स्वप्ने मनःप्रधानं विद्धि, अत एव नश्वरञ्च विद्धीत्यर्थः ॥ ७ ॥ विक्षिप्तमनसोऽधिष्ठानभानशून्यस्य । एकस्मिन्नात्मनि भेदविषयो नानात्वेन प्रतीतिः । अत्राक्षिपति—नन्विति । नेत्याह—भ्रमेण विजृंभिता विसृता गुणदोषौ इदं श्रेष्ठमिदं नेतिलक्षणौ धर्मौ तद्विषयिणी बुद्धिर्यस्य तस्य।विहितं नित्यकर्मादि । तल्लोपो विहिताकरणम् निषिद्धम् । पारदार्यादि । इत्यर्थ इति—अविद्यावान् विषयो गोचरो यस्य स तथा 'त्रैगुण्य विषया वेदाः' इत्युक्तेः । "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति । तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इत्युक्तेश्चेति भावः॥*॥ उक्तमेवार्थं प्रपञ्चयांत—पुंस इति । नानाविधोर्थो यो गुणदोषभाक् अयमर्थो गुणं भजत इत्युत्कृष्टः, अयमर्थो दोषं भजत इति निकृष्टः पुंसोऽयुक्तस्याज्ञानिनो भ्रमः, भ्रमप्रतीत इत्यर्थः । गुणप्रवाहपतितानां को वार्थ उत्कृष्टः को वार्थो निकृष्ट तदुक्तं चित्रकेतुना—"गुणप्रवाह एतस्मिन्कः शापः कोन्वनुग्रहः । कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा ॥" इति । अन्यत्तैः ॥ ८ ॥ पुनराशंकते—कथमिति । यतोऽयुक्तचित्तादेरेव भ्रमो भवति तस्माद्धेतोः । आत्मदर्शनविक्षेपकरानिंद्रियादीन्नियम्य मद्रूपेणाहं ब्रह्मास्मीत्येवंरूपेणात्मानं पश्येत्यर्थः ॥ * ॥ तस्माद्युक्तेंन्द्रियग्रामो निरुद्धेंद्रियवृंदः निरुद्धचित्तः सन्निदं सुखदुःखमयं जगदात्मनि भोक्तरि जीवे भोग्यत्वेन स्थितं पश्य । तं च भोक्तारमात्मानं मय्यधीश्वरे परमात्मनि नियम्यत्वेन स्थितं पश्य ॥ ९ ॥ पुनराशंकते । तदर्थानुभवो वेदार्थसाक्षात्कारः । ततश्च ज्ञानविज्ञानयुक्तत्वोत्तरम् । यतः शरीरिणामात्मभूतोऽतो हेतोः । अंतरायैर्देवादिरूपैः । अत्राशयमाह—अयं भाव इति । यावदनुभवमात्मानुभवपर्यंतम् । यथाश्रममाश्रमधर्माननतिक्रम्य । तदनंतरमात्मानुभवोत्तरम् । सर्वेषां देवादीनाम् । विघ्नाभावे प्रमाणमाह—तथा चेति । तस्यात्मविदः देवा अप्यभूत्यै विघ्नाद्याचरणासमृद्धये नेशते न समर्था भवंति, हि यत एषां देवानामपि स आत्मविदात्मा भवतीति, हनेत्यव्ययमप्यर्थे । इति श्रुत्यर्थः ॥ * ॥ ० ॥ १० ॥ न चेति—यथेष्टाचरणप्रसंग इत्यनेनान्वेति । प्राक्तनसंस्कारा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वभूतसुहृच्छांतो ज्ञानविज्ञाननिश्चयः ॥ पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः ॥ १२ ॥ श्रीशुक उवाच ॥ इत्यादिष्टो भगवता महाभागवतो नृप ॥ उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतम् ॥ १३ ॥ उद्धव उवाच ॥ योगेश योगविन्यास योगात्मन्योगसंभव ॥ निःश्रेयसाय मे प्रोक्तस्त्यागः संन्यासलक्षणः ॥ १४ ॥ त्यागोऽयं दुष्करो भूमन्कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः ॥ १५ ॥

यातीतो गुणदोषबुद्ध्यतीतोऽपि प्राक्तनसंस्कारान्निषेधान्निवर्तत एव किंतु न दोषबुद्ध्या विहितं च प्रायशः करोति न गुणबुद्ध्या । यथाऽर्भकः संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्तते तद्वत् ॥ ११ ॥ एवंभूतस्य न पुनः संसार इत्याह । सर्वभूतेति । न विपद्येत न पुनः संसरेत् ॥ १२ ॥ १३ ॥ त्वं तु सर्वं परित्यज्ये त्याद्युपदेशमात्मनोऽयोग्यं मन्वानः पृच्छति । योगेशेति । योगफलदायिन् । योगविदां न्यासो नामातिगोप्यो निक्षेपविशेषः । यद्वा योगो विन्यस्यते क्रियते यस्मिन् । योगात्मन्योगे आत्मा प्रकटो भवति यस्य । योगस्वरूपेति वा । योगस्य संभवो यस्मात् । चतुर्भिरेतैः संबोधनैः स्वमहिम्ना केवलं त्वयोपदिष्टं न तु मदधिकारं पर्यालोच्येति द्योतितम् । तदाह । निःश्रेयसायेति।न चारोग्याद्यर्थं सर्वस्वदानादिवदयं त्यागः किंतु संन्यासलक्षणोऽप्रत्यापत्तिरूपः ॥ १४ ॥ १५ ॥

त्साधनदशाकृतमलिनवासनाक्षयाभ्याससंस्कारानुवृत्त्यैव न गुणबुद्ध्येति न श्रमफलप्राप्तिबुद्ध्या, किंतु साधनाभ्याससंस्कारानुवृत्त्यैव । अर्भको बालः ॥ * ॥ ० ॥ ११ ॥ एवंभूतस्योभयातीतस्य । न पुनः संसरेत्, भेदभ्रांत्यैव विपत्त्यादिरिति भावः ॥ * ॥ एवंभूतस्य जीवन्मुक्तस्य । ज्ञानविज्ञानाभ्यां परोक्षापरोक्षानुभवाभ्यामात्मविषयको निश्चयो यस्य स तथा । न संसरेज्जन्मादि नानुभवेत् ॥ १२ ॥ ० ॥ * ॥ महाभागवतत्वेन कृष्णाख्यपरतत्त्वस्य नित्यप्राप्तेस्तदुपदेशगौरवेणैव तत्त्वजिज्ञासुरित्यर्थः ॥ १३ ॥ न हि योगविदां किंचिदपि गोप्यं भवति सर्वत्रात्मदर्शित्वाद्भगवतस्तवाबालगोपालप्रसिद्धस्य गोपनासंभवादित्यत आह—यद्वेति । योगेऽष्टांगयोगे । न केवलमष्टांगयोग एव 'भक्त्या मामभिजानाति' इत्याद्युक्तेर्भक्त्यापि तत्प्राकट्यमस्तीत्यत आह—योगस्वरूपेति वेति । स्वमहिम्ना निजदयालुतया । तद्दयालुत्वम् । निःश्रेयसाय मोक्षाय । अयं त्वदुक्तः 'त्वं तु सर्वं परित्यज्य ' इत्यादिरूपः । आरोग्याद्यर्थम् "सर्वस्वदानात्सिध्यन्ति सकलास्सिद्धयो नृणाम्" इत्याद्युक्तेः । आदिना धनपुत्रादिग्रहः । न प्रत्यापत्तिः पुनः स्वीकारो रूपं स्वरूपं यस्य स तथा ॥*॥ आत्मनोऽयोग्यमिति—भगवता स्वत्यागात्स्वायोग्यतातिशयमननादित्यर्थः । निरुपमस्य भगवतो निक्षेपविशेषत्वेन वर्णनमनुचितमिवेत्यरुचौ—यद्वेति । "योगश्चित्तवृत्तिनिरोधः" योगे संप्रज्ञातसमाधावात्मा स्वरूपं प्रकटो ज्ञातो भवति यस्य । तदुक्तं पतंजलिना—" तदा द्रष्टुः स्वरूपेवस्थानम्" इति । अत्र प्रकटपदाध्याहारात्पक्षांतरम्—योगस्वरूपेति । योगोऽसंप्रज्ञातसमाधिः स्वरूपं निर्विकल्पकं यस्य स तथा । तदुक्तं पातंजले—"विरामप्रत्ययाभ्यासपूर्वकः संस्कारशेषोऽन्यः" इति । विरामप्रत्ययो नेतिनेतीत्यतदंशापवादस्तदभ्यासपूर्वोऽन्योऽसंप्रज्ञातसमाधिः, स च ब्रह्मात्मक एव । अभावस्याधिकरणात्मकत्वादित्यर्थः । योगस्य संभवः सुगमतयोत्पत्तिर्यस्माद्ध्यातात्तदप्युक्तं तत्रैव—"ईश्वरप्रणिधानाद्वा" इति । न त्वारोग्याद्यर्थमिति—कालपुरुषप्रतिग्रही सर्वस्वदानात् स्वप्राणान्रक्षति पुनश्च द्रव्यार्जनं करोतीति तदीयसर्वस्वदानवन्नायं संन्यासरूपस्त्यागः । पुनर्ग्रहणं प्रत्यापत्तिः । अप्रत्यापत्तिरूपः पुनरग्रहणस्वरूपः । 'भिक्षोरिन्द्रियलौल्यतः' इति पुनर्ग्रहणे वांताशित्वेन निन्दाश्रुतेरित्यर्थः । विषयाविष्टचित्तैस्त्वद्भक्तैरपि दुष्करः, अभक्तैस्तु सुतराम् । तदुक्तं त्वयैव—"युंजानानामभक्तानां प्राणायामादिभिर्मनः । अक्षीणवासनं राजन्दृश्यते पुनरुत्थितम् ॥" इति मुंचकुंदं प्रति ॥ १४ ॥ त्यागस्य दौष्कर्यमाह—त्याग इति । त्वयि सर्वात्मनि अभक्तैः, छांदसो डेर्लोपः संबुद्धिर्वा ॥ * ॥ ० ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे ॥ तत्त्वंजसा निगदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यम् ॥ ॥ १६ ॥ सत्यस्य ते स्वदृश आत्मन आत्मनोऽन्यं वक्तारमीश विबुधेष्वपि नानुचक्षे ॥ सर्वे विमोहितधियस्तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ १७ ॥ तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यम् ॥ निर्विण्णधीरहमु हवृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये ॥ १८ ॥

यं प्रति त्यागाद्युपदिष्टं सोऽहं मूढमतिः । कुतः ममेत्यहमिति च सानुबंधे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो निमग्नोऽतस्तत्तु भवता निगदितं यथाहमंजसा संसाधयामि तथा भृत्यं मामनुशाधि शनैः शिक्षय ॥ १६ ॥ मया संक्षेपत उक्तं विस्तरतस्त्वन्यान्पृच्छेति चेदत आह । सत्यस्येति । स्वदृशः स्वप्रकाशस्य सत्यस्यात्मन आत्मनो मां प्रति वक्तारं ते त्वत्तोऽन्यं नानुचक्षे न पश्यामि । स्वदृशः स्वतःसिद्धज्ञानात्त्वत्तोऽन्यमिति वा । कुत इत्यत आह । सर्व इति । बहिरर्थभावा विषयेष्वर्थबुद्धयः ॥ १७ ॥ केचिद्दुःशीला भवंति केचित्सेविताः फलकाले विनश्यंति केचिदज्ञाः केचिद्रक्षणेऽसमर्थाः केचित्तु स्थानाद्भ्रष्टास्तद्व्यावृत्त्यर्थमनवद्यमित्यादीनि पंच विशेषणानि । न अंतः कालतः पारं देशतश्च यस्य तम् । कालादिभिरकुंठो विकुंठलोको धिष्ण्यं स्थानं यस्य तम् । उ हे भगवन् । ह स्फुटम् । निर्वेदे हेतुः । वृजिनैर्दुःखैरभितप्तः । हकारगौरवाय वृकारो युक्त इव पठनीयः । नन्वनवद्यत्वादीनि कुतो मम तदाह । नारायणमिति । अनुकंपितामाह । नरसखं नरो जीवस्तस्य सखायं भवंतं शरणं

मूढमतित्वे हेतुं पृच्छति—कुत इति । अतो देहे विगाढत्वाद्धेतोः । तत् 'ज्ञानविज्ञानसंयुक्तः' इत्यादिनोक्तम् ॥ * ॥ स च विषयाविष्टचित्तोऽहमेव यतस्त्वन्मायारचिते देहे सानुबंधे निमग्न इति देहस्यांधकूपत्वमारोपितम्, तेन तदावेशत्याग एवादौ कार्यस्तदनंतरमेव ज्ञानाद्युपदेश इति ध्वनिः ॥ १६ ॥ आत्मन इति षष्ठी द्वितीयार्थे, तेन मामित्यर्थः । संभवत्वात्स्वदृश इति त्वत्स्थानिकादेशीभूतस्य त इत्यस्य विशेषणमत आह—स्वदृश इत्यादि । मनुष्येष्वसंभवेपि देवेषु कश्चिद्भवेदेवेति चेदाह—विबुधेष्वपीति । सर्वत्र वक्तृभावे हेतुं पृच्छति—कुत इति ॥ * ॥ सत्यस्येति षष्ठीत्रयं कर्मणि । आत्मनः परमात्मनः । पुनरात्मनो मे मां प्रतीत्यर्थः । द्वितीयपक्षे—स्वदृश इति पञ्चम्यन्तं त इत्यस्य विशेषणम् ॥ १७ ॥ यतोन्यत्र वक्तैव न लभ्यते तस्माद्धेतोः । अकुंठोऽविकलः । निर्वेदे वैराग्ये । हकारगौरवाय हकारस्य गुरुत्वलाभाय । 'उक्ता वसंततिलका तभजा जगौ गः' इत्युक्तलक्षणवसंततिलकावृत्ते तृतीयस्थाने जगणो मध्यगुरुं विना नो निष्पद्यतेऽतो गुरुं विनापि गुरुवत्पठनीय आर्षत्वात् । स्वस्योक्तरूपतामाक्षिपति भगवान्—नन्विति । नारायणत्वात्तव सर्वं संगच्छत इति भावः । अनुकंपितां दयालुताम् ॥ * ॥ नारायणस्य महत्स्रष्ट्रादिपुरुषसमूहस्यापि परमाश्रयं तथापि नरसखं नरमात्रानुग्रहायावतीर्णम् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः ॥ समुद्धरंति ह्यात्मानमात्मनैवाशुभाशयात् ॥ १९ ॥ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ॥ यत्प्रत्यक्षानुमानाभ्यां श्रेयोऽसावनुविंदते ॥ २० ॥ पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः ॥ आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहितम् ॥ २१ ॥ एकद्वित्रिचतुष्पादो बहुपादस्तथाऽपदः ॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥ २२ ॥ अत्र मां मार्गयंत्यद्धा युक्ता हेतुभिरीश्वरम् ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥ २३ ॥

प्रपद्ये ॥ १८ ॥ तदेवमसंभावनाविपरीतभावनाभ्यामुपदिष्टं तत्त्वमनवगाहमानं प्रति तन्निवृत्तये गुरूपदेशं विनाऽपि स्वान्वयव्यतिरेकाभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह । प्रायेणेति । लोकतत्त्वस्य विचक्षणाः परीक्षकाः । अशुभाशयाद्विषयवासनातः ॥ १९ ॥ तदुपपादयति । आत्मनः पश्वादिशरीरेऽप्यात्मैव हिताहितज्ञाने गुरुः ॥ २० ॥ तत्र प्रत्यक्षं दर्शयति । पुरुषत्वे चेति । तथाच श्रुतिः । " पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनायापिपासे एवाभिविज्ञानम् " इति ॥ २१ ॥ अतः पुरुषत्वं स्तौति । एकेति ॥ २२ ॥ अनुमानमाह । अत्र

तदेवमुक्तरीत्या । असंभावना हि नास्ति ब्रह्मेत्येवंरूपा चित्तवृत्तिः, विपरीतभावना हि ब्रह्म यथा शास्त्र उपदिष्टं तथा न किंत्वन्यथैवेत्येवंरूपा चित्तवृत्तिस्ताभ्याम् । अनवगाहमानमज्ञातवन्तम् । तन्निवृत्तयेऽसंभावनाविपरीतभावनानिवृत्तये । स्वस्यात्मनोऽन्वयव्यतिरेकाभ्यां हिताहिते प्रवृत्तिनिवृत्तिभ्याम् । तत्त्वस्य स्वरूपस्य प्रतिपत्तिर्ज्ञानम् । लोकतत्त्वे विश्वाधिष्ठाने विचक्षणा विचारदक्षा आत्मानं साक्षिप्रत्यक्चैतन्यमशुभाशयादाविद्यककोशसंघातात्सम्यक् समष्टिव्यष्ट्युपाधिबाधपूर्वकमुद्धरंति ब्रह्मरूपतामवधारयंतीति वा ॥ * ॥ अनवगाहमानमनिश्चिन्वन्तमुद्धवं प्रति । तत्रोपदिष्टार्थत्यागोऽसंभावना, सोहं ममाहमिति विपरीतभावना, ताभ्यां तन्निवृत्तयेऽसंभावनादिनिवृत्तये । हिते कर्मणि प्रवृत्तिरन्वयः, अहितान्निवृत्तिर्व्यतिरेकः । एवकारस्य व्यावर्त्यमाह—गुरूपदेशं विनापीति । तत्त्वप्रतिपत्तिरनुमानार्थापत्तिभ्यां शुद्धात्मज्ञानम् । प्रायेणेति तेषां विरलत्वमाह । लोकतत्त्वस्य जनयाथार्थ्यस्य । लोकतत्त्वविचक्षणा लोकभद्राभद्रहेतुविचारप्रवीणाः ॥ १९ ॥ तदात्मसमुद्धरणम् । पुरुषस्य मनुष्यशरीरं प्राप्तस्य यद्यतः असौ पुरुषः श्रेयः पुरुषार्थम् आत्मा मनो जीवो वा, अतो मनःपूर्वकं चक्षुषा कृष्यादिना व्रीह्यादिसंपल्लक्षणश्रेयःप्राप्तिदर्शनेन यागादिसाधनसामग्र्या स्वर्गादिश्रेयः प्राप्यत इत्यनुमीयत इति ॥ * ॥ तत आत्मनैवोद्धरणमुपपादयति साधयति । पुरुषस्य मनुष्यस्य तु आत्मा विशेषतो गुरुरिति गुर्वनुसरणे प्रवर्तक इत्यर्थः । श्रेयस्तत्त्वज्ञानमिति **संदर्भः** ॥ २० ॥ तत्र द्वयोर्मध्ये । धीराः शमादिसंपन्नाः । सांख्यं श्रवणमननतर्कविचारः, योगो निदिध्यासनं, तयोर्विशारदाः सर्वशक्त्युपबृंहितमपि तत्तज्जीवेशोपाधिबाधेनाविस्तरां नित्यापरोक्षं पश्यंति । अत्र प्रमाणमाह—तथा चेति । आतिशयेनाविराविस्तराम् । हि यतः स पुरुषः प्रज्ञानेन बुद्ध्या संपन्नतमोतिशयेन युक्तः । लोकालोकौ इह लोकपरलोकौ । अमृतं मोक्षम् । अग्रे स्पष्टम् ॥ * ॥ **दीपिका**—तत्र प्रत्यक्षानुमानयोर्मध्ये । पुरुषत्वे पुरुषदेहे । आत्मानमाविस्तरां प्रपश्यन्ति । तत्र च धीराः शास्त्रविचक्षणाः संतो मामपि पश्यन्ति । मनुष्यदेहे प्रमाणं श्रुतिः । पुरुषत्वे मनुष्यदेहे । आत्मा नितरां प्रकटो वर्तते । स हि मनुष्यदेहावच्छिन्न आत्मा प्रज्ञानेन प्रकृष्टज्ञानेन संपन्नतमः । विज्ञातम् अर्थविशिष्टतया विज्ञातं शब्दं वदति । विज्ञातं विचारितमुपादेयतया पश्यति । श्वस्तनं श्व इदमेव कर्तव्यमिति वेद । लोकालोकौ प्रकाशाप्रकाशौ स्वर्गनरकौ वेद । मर्त्येन मरणधर्मवता देहेन साधनं कृत्वा मोक्षमीप्सतीत्येवं संपन्नज्ञानेनार्च्यतमः । अथेत्यर्थांतरे । इतरेषां तद्व्यतिरिक्तानां पशूनामश्वादीनामशनापिपासे एव । तयोरेव ज्ञानम्, न तु शब्दार्थादिज्ञानमित्यर्थः ॥ २१ ॥ यतः सर्वलक्षणसम्पन्नः पुरुषोऽतो हेतोः ॥ * ॥ ० ॥ २२ ॥ मार्गणेऽन्वेषणे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्राप्युदाहरंतीमामितिहासं पुरातनम् ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥ २४ ॥

पौरुष्यां पुरि । युक्ता अप्रमत्ता अंग्राह्यं ग्राह्येभ्योऽहंकारादिभ्यो व्यतिरिक्तं मामद्धा साक्षान्मृगयंति । मार्गणे प्रकारद्वयमाह । गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः । जडानां प्रकाशः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखेन लक्षकैः । तथा तैरेव लिंगैर्व्याप्तिमुखेनानुमानत ईश्वरं प्रवर्तकं मृगयंते । बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वा द्वास्यादिवदिति । तदुक्तम् । " भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ॥ " इति । न चैतावता आनुमानिक आत्मेति मंतव्यम् । देहादिव्यतिरिक्तत्वम्पदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् ॥ २३ ॥ भूयोऽन्वयव्यतिरेकाभ्यामसंभावनादिनिवृत्ताावितिहासमाह । अत्रापीति ॥ २४ ॥

प्रथमप्रकारस्तु 'गुणप्रकाशैरनुमीयते भवान्' इत्यत्र दशमस्कंध उक्त एव । द्वितीयमाह—तथेति । तैरेव बुद्ध्यादिभिरेव । व्याप्तिमुखेन यत्रयत्र कारणत्वं तत्रतत्र कर्तृप्रयोज्यत्वमित्येवंरूपेण । एतदपि प्रतिपादितं द्वितीयस्कन्ध इत्याह—तदुक्तमिति । एतावताऽनुमानज्ञाप्यत्वेनानुमानिकोऽनुमानगम्य एवात्मेति । न च ज्ञेयमिति देहाद्यतिरिक्तस्त्वंपदार्थो जीव इति ज्ञानस्यैवानुमानगम्यत्वात् ॥ * ॥ **दीपिका**—अतो ज्ञानसाधनत्वात्साक्षान्मां मृगयंति न तु जीवम् । अनुपपत्तिमुखेनार्थापत्तिप्रमाणेन । अनुपपद्यमानार्थदर्शनेन तदुपपादकमर्थांतरकल्पनमर्थापत्तिः । यथा—पीनो देवदत्तो दिवा न भुंक्तेऽत्र यथा दिवाऽभुंजानस्य रात्रिभोजनमंतरा पीनत्वानुपपत्त्या तदुपपादकं रात्रिभोजनं कल्प्यते रात्रौ भुंक्त इति, तथा जडानां बुद्ध्यादीनां प्रकाशमेकमात्मानमंतरा प्रकाशानुपपत्त्या तदुपपादकः स्वप्रकाश आत्मा कल्प्यते बुद्ध्यादीनां प्रकाशकः परमात्मास्तीति लक्षकैः प्रमाणांतरं दर्शयति—तथेति । तैर्बुद्ध्यादिभिरेव करणत्वेन लिंगैर्लीनस्य परमात्मनो गमकैर्हेतुभिरित्यर्थः । व्याप्तिमुखेन व्याप्तिव्यापारद्वारा । तत्र हेतुः—समानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः, करणत्वं हि हेतुस्तत्समानाधिकरणस्तदधिकरणवृत्तिर्हि घटाद्यभावस्तत्प्रतियोगी घटादिरप्रतियोगि तु कर्तृप्रयोज्यत्वलक्षणं साध्यं तेन सहैकाधिकरणवृत्तित्वं करणत्वस्येति लक्षणसमन्वयः । अनुमानतः परामर्शात् । कर्तृप्रयोज्यत्वव्याप्यकरणत्ववत्ताज्ञानादित्यर्थः । बुद्ध्यादिकरणानीति पक्षः, कर्तृप्रयोज्यत्वं साध्यो धर्मः, करणत्वादिति हेतुः वास्यादिवदिति दृष्टान्तः । यत्रयत्र करणत्वं तत्रतत्र कर्तृप्रयोज्यत्वं यथा वास्यादिरित्यन्वयव्याप्तिः । यत्र कर्तृप्रयोज्यत्वं नास्ति न तत्र करणत्वं यथात्मेति व्यतिरेकव्याप्तिस्तथा च स्वतंत्रः कर्ता परमेश्वर इति सिद्धम् । एतावतानुमानेनान्वेषणमात्रेण । वैशेषिकादिसंमतः केवलानुमानगम्य आत्मेति न मंतव्यम्, "मंतव्यः" इति श्रुत्या देहादिभ्यो व्यतिरिक्तत्वस्य त्वंपदवाच्यस्येश्वराभेदेन या शुद्धिरसंभावित्वं तावन्मात्रस्यैवानुमानेन विवक्षितत्वादित्यर्थः । उपलक्षणं चैतत् शास्त्रानुसारिलिंगस्यापीश्वरसाधने विहितत्वादिति ॥ * ॥ **विश्वनाथस्तु**—पूर्वोक्तानुमानेनास्वतंत्रकर्ता जीवोऽनुमीयते, तथा प्रयोजकः स्वतंत्रोंतर्यामी च कथंचिदनुमीयते न तु कृष्णः स्वयं भगवानहम्, मम तर्कातीततादृप्यगुणलीलैश्वर्याणामप्यतर्क्यत्वादिति ॥ २३ ॥ पुनरन्वयव्यतिरेकाभ्यां हिताहितस्वीकारपरित्यागाभ्यामसंभावनादिनिवृत्तौ । इहादिना संशयादिग्रहः । आत्मार्थमेव हिते प्रवर्ततेऽहितान्निवर्तते चेति प्रवृत्तिनिवृत्तिभ्यामात्मा संभाव्यते निःसंशयत्वेन । तथा च—यत्र हिताहितप्रवृत्तिनिवृत्तित्वं तत्रात्मत्वं यत्रैतन्न तत्रात्मत्वमपि न, यथा घटादावित्थमत्रान्वयव्यतिरेकौ ज्ञेयौ, " व्यतिरेको निवृत्तिः स्यात्प्रवृत्तिरन्वयः स्मृतः " इत्यभियुक्तोक्तेः । अत्रापि पुरुषशरीरेऽहंमार्गणेन सुलभ इत्यस्मिन्नर्थे । इतिहासं पुरावृत्तम् । अस्यैव विवरणं—पुरातनमिति । 'स कीचकैर्मारुतपूर्णरंध्रैः' इतिवद्विशिष्टवाचकानां पदानां सति विशेषणसमवधाने विशेष्यमात्रपरतायाः स्वीकारादिति समाधेयम् । अमिततेजसोऽनल्पबलस्य " तेजो बले प्रभावे च ज्योतिष्यार्चिषि रेतसि " इति कोशात् ॥ * ॥ अत्राप्यनुमानगम्यत्वेप्यंतर्यामिस्वरूपस्य मम प्राप्तौ ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवधूतं द्विजं कंचिच्चरंतमकुतोभयम् ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥२५॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ॥ यामासाद्य भवाँल्लोकं विद्वांश्चरति बालवत् ॥ २६ ॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः ॥ हेतुनैव समीहंत आयुषो यशसः श्रियः ॥ २७ ॥ त्वं तु कल्पः कविर्दक्षः सुभगोऽमृतभाषणः ॥ न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥२८॥ जनेषु दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसेऽग्निना मुक्तो गंगांभःस्थ इव द्विपः ॥ २९ ॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानंदकारणम् ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ ३० ॥ श्रीभगवानुवाच ॥ यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥ ३१ ॥ ब्राह्मण उवाच ॥ संति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः ॥ यतो बुद्धिमुपादाय मुक्तोऽटामीह तान्छृणु ॥३२॥ पृथिवी वायुराकाशमापोऽग्निश्चंद्रमा रविः ॥ कपोतोऽजगरः सिंधुः पतंगो मधुकृद्गजः ॥३३॥

॥ २५ ॥ सुविशारदा अतिनिपुणा सर्वलोकविलक्षणा ॥ २६ ॥ सर्वलोकवैलक्षण्यमेवाह । प्राय इति । धर्मादिविवित्सायामात्मविचारे च मानवाः समीहंते प्रवर्तंते तत्रापि आयुरादेर्हेतुना कामनयैव ॥ २७ ॥ त्वं तु न कस्यचित्कर्मणः कर्ता भवसि । न किंचिदीहसे इच्छसि । नन्वशक्त्याऽज्ञानेन वाऽनैपुण्येन वा विरूपत्वेन वाऽवाग्मितया वा औदासीन्यं घटत एव नेत्याह कल्प इत्यादिना ॥ २८ ॥ महानानंदश्च तव कुत इति पृच्छति । जनेष्विति ॥ २९ ॥ स्पर्शविहीनस्य विषयभोगरहितस्य । अत्र हेतुः । केवलात्मनः कलत्रादिशून्यस्य ॥ ३० ॥ ३१ ॥ बुद्ध्यैवोपाश्रिताः स्वीकृता न तूपदेशेन । अटामि पर्यटामि ॥ ३२ ॥ गुरूनाह । पृथिवीति ॥ ३३ ॥

कञ्चिददृष्टपूर्वम् ॥ * ॥ द्विजं दत्तात्रेयम् । 'योगर्द्धिमापुरुभयीं यदुहैहयाद्याः' इति द्वितीयोक्तेः । धर्मवित्परमहंसधर्मज्ञः ॥ २५ ॥ अकर्तुरशनाद्यर्थं प्रवृत्तिशून्यस्य, निषिद्धाचरणहीनस्य वा । यां बुद्धिम् ॥ * ॥ इयं बुद्धिः, कुत उपलब्धेति शेषः । आदाय प्राप्य ॥२६॥ बालवत्संचरणं ज्ञानार्थमेव किन्न स्यादिति चेदाह—नेत्थं मनुष्याः ज्ञानार्थं यतंतो दृष्टाः किंतु विवित्सायां सत्यां ते धर्मादिष्वेव प्रवर्तमाना दृश्यंत इत्याह—प्राय इति । स्वामिनस्तु धर्मा दीनां विवित्सातः पृथक्प्रयोजनं मन्यमाना आहुः—तत्रापीति । न केवलं निष्कामा प्रवृत्तिरपित्वायुराद्यार्थिक्येव । तत्रापि प्रवृत्तावपि ॥ * ॥ प्राय इति निष्कामप्रवृत्तेर्दौर्लभ्यमाह । अत्रापि आत्मविचारप्रवृत्तावपि । अत्र विवित्सापदस्य स्वाश्रयसमवायेन विचारो लक्षणा ॥ २७ ॥ शक्त्यादिसाधनसामग्र्यप्रभावादेवमवस्थानमिति चेत्तत्राह—त्वं त्विति । कल्पः समर्थः । कविर्विज्ञः । दक्षोतिनिपुणः । सुभगः सुरूपः । अमृतमिव भाषत इत्यमृतभाषणः । पिशाचपदेन तद्ग्रस्तो लक्ष्यते ॥ * ॥ अशक्त्येति—कर्मणि पश्वादीनामशक्त्या सामर्थ्याभावेन तत औदासीन्यं घटते । त्वं त्विति—कल्पः समर्थः । एवमन्येपि कव्यादिशब्दा अज्ञानादिप्रतियोगितया व्याख्येयाः । कविरिति नाज्ञानेन । दक्ष इति न त्वनैपुण्येन । सुभग इति—न तु कौरूप्येण हेतुना वनितादिकन्नेच्छसीत्यर्थः । मितभाषण इति—न त्ववाग्मितया केनापि सह न संलापमिच्छसीत्यर्थः । किंत्वेतादृशोऽपि जडादिवद्वर्तसे ॥ २८ ॥ ० ॥ * ॥ किंच तरुणस्यापि कामादिसंतापो न कुत इति पृच्छति ॥ २९ ॥ अत्र विषयभोगराहित्ये । कलत्रादिशून्यस्य शरीरमात्रपरिग्रहस्य ॥ * ॥ अत्र भोगरहितत्वे ॥ ३० ॥ ब्रह्मण्येनेत्यधिकारद्योतकविशेषणम् ॥ * ॥ 'मुखमेव वार्तां कथयति' इति न्यायेन दृश्यमान एतावानानंदश्च तव कुत इति । ब्रह्मण्येन तत्परिचर्ययैव तद्वशीकरिष्णुनेत्यर्थः । सुमेधसेति स्वबुद्धिप्रीणिततन्मनस्केनेति तत्प्रतिवचने हेतुः ॥ ३१ ॥ यतो येभ्यः । बुद्धिं शिक्षावृत्तिम् । मुक्तः शरीराभिमानमुक्तः । तान् गुरून् ॥ * ॥ मुक्तः सांसारिकतापात् ॥ ३२ ॥ कपोतः पक्षिविशेषः " कपोतः स्याच्चित्रकंठपारावतविहंगयोः " इति मेदिनी । अजगरो महासर्पः । अजो नित्यो गरो विषं यस्य स तथा, अजस्य छागस्य गरो गरणं यस्येति वेति । मधु करोति संपादयतीति । यद्वा—मधु कृंतति पुष्पादिभ्यः छिनत्तीति मधुकृद्भ्रमरः मधुमक्षिका ॥*॥०॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः ॥ कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥ ३४ ॥ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः ॥
शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥ ३५ ॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥ ३६ ॥
भूतैराक्रम्यमाणोऽपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतम् ॥ ३७ ॥ शश्वत्परार्थसर्वेहः परार्थैकांतसंभवः ॥ साधुः शिक्षेत
भूभृत्तो नगशिष्यः परात्मताम् ॥ ३८ ॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥ ३९ ॥

शोभनं रूपं कीटस्य करोतीति सुपेशकृत् ॥ ३४ ॥ मे मयाऽऽश्रिताः । तदाह । एतेषां वृत्तिभिरात्मनः शिक्षाः शिक्षणीयानर्थान्हेयोपादेयादीनन्वशिक्षमनुशिक्षितवानस्मि ॥ ३५ ॥ नाहुषो ययातिः ॥ ३६ ॥ क्षितेः क्षमां शिक्षितवानस्मीत्याह । भूतैरिति । आक्रम्यमाणः संपीड्यमानः । तद्विद्वान्भूतानां दैववशवर्तित्वं विद्वान् । व्रतं नियमम् ॥ ३७ ॥ पर्वतरूपा वृक्षरूपा च या पृथिवी तस्याः शिक्षितमाह । शश्वदिति । सर्वदा परार्थाः परोपकारार्थाः सर्वा ईहा यस्य सः । परार्थ एव एकांततः संभवो यस्य सः । भूभृत्तः पर्वतात् । तस्य हि वृक्षतृणनिर्झरप्रसवक्रियाः परार्था एव यथा तद्वत् । तथा नगशिष्यो वृक्षशिष्यः सन्परात्मतां पराधीनात्मताम् । वृक्षो यथा परैरवखंड्योत्पाट्य वा नयनमप्यनुमन्यते तद्वत् ॥ ३८ ॥ वायुरपि द्विविधः प्राणो बाह्यश्च । तत्र प्राणस्य गुरुत्वमाह । प्राणवृत्त्येति । प्राणो ह्याहारादिमात्रेण प्रवर्तते रूपरसादीनिंद्रियविषयांस्तु नापेक्षते तथा मुनिरपि भवेदित्यर्थः । प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यादतो देहनिर्वाहः कर्तव्यः । गुणलिप्सायां तु वाङ्मनश्च विक्षिप्येतातो नाधिकं लिप्सेदित्याह ।

मधुहा मधुग्रहीता सरघापटलादिभ्यः । पिंगला तन्नाम्नी वेश्या । कुरर उत्क्रोशः । कुमारी विप्रकन्या । शरकृद्बाणसारल्यविधाता । सुपेशकृद्भृंगी, चातुर्मास्ये प्रायस्तस्या उद्भवो भवतीति ॥ * ॥ ० ॥ ३४ ॥ एते पृथिव्यादयः ॥ * ॥ ० ॥ ३५ ॥ यतो यस्मात्पृथिव्यादेः । यद्वर्तनम् । 'शिक्ष–विद्योपादाने' भौवादिक आत्मनेपदी, परस्मैपदमार्षम् । शिक्ष इत्यर्थः । ते तुभ्यम् ॥ * ॥ ० ॥ ३६ ॥ मार्गाद्ब्रह्मात्मानुसंधानलक्षणात् । नियममचलत्वम् । अत एव पृथिव्या अचलेति नामांतरम् ॥ * ॥ ० ॥ ३७ ॥ यद्वा–परेषां गुरुदेवद्विजसज्जनानामर्थे आत्मनः सर्वेहां सकलचेष्टां संभवं वृद्धिं च "सज्जनार्थेनुमन्येत ऐहिकीं वृद्धिमात्मनः" इत्याद्युक्तेः ॥ * ॥ परार्थाः सर्वा ईहा भूधारणनिर्झरोत्क्रमणस्वोत्पन्नरत्नादिप्रदानरूपा चेष्टा यस्य भूभृत इति । शिक्षेदेवंभूतो भवेत् । परात्मतां परेष्वेवार्पित आत्मा येन तस्य भावस्तत्ता ताम् । वृक्षं खलु स्थानात्स्थानांतरं नीत्वा यदारोपयति सेचनादिकं च करोति तत्र सोऽनुमन्यत एव न तु विप्रतिपद्यत इति तथा योगी भवेत् । पर्वतादत्र विशेषो द्रष्टव्यः ॥ ३८ ॥ इत्यर्थ इति–यावता यथाकथंचिच्छरीरनिर्वाहो भवेत्तावदेव गृह्णीयादिति भावः । यतो ज्ञानार्थं देहधारणमावश्यकमतो हेतोः । यतोधिकेच्छा विक्षेपिकाऽतो हेतोः ॥ * ॥ प्राणस्य वृत्तिराहारमात्रम् । इंद्रियप्रियै रूपादिना चक्षुरादिलालनैः न विक्षिप्येतेति, अतिरूक्षेणासंस्कृतेनाहारेण वाङ्मनः वाङ् नं निःसरेत् मनोपि विक्षिप्तं स्यादेवमतिस्निग्धेप्यालस्यशुक्रादिवृद्ध्या वाङ्मनसयोर्विक्षोभ इति तथा न कुर्यात्, किंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ॥ ४० ॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक् ॥ ४१ ॥ अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन ॥ व्याप्त्याऽव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत् ॥ ४२ ॥

ज्ञानामिति । नावकीर्येत न विक्षिप्येत ॥ ३९ ॥ विषयान्सेवमानोऽपि तेष्वनासक्तिं बाह्याद्वायोः शिक्षेदित्याह । विषयेष्विति । नानाधर्मेषु शीतोष्णादिधर्मकेषु । न हि वायुर्वने दहने वा सज्जते तद्वत् ॥ ४० ॥ यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोऽपि वस्तुतो न तद्योगी एवं देहादिधर्मयोगेनाहंप्रत्ययेन प्रतीयमानोऽप्यात्मा न तद्धर्मवानिति संभावितमिति । वायोरेव शिक्षितमित्याह । पार्थिवेष्विति । तद्गुणाश्रयो देहधर्मान्बाल्यादीनाश्रित्य वर्तमानो गुणैस्तैरेव ॥ ४१ ॥ आकाशाच्छिक्षितं संभावनाद्वयमाह अंतर्हितश्चेति द्वयेन । अंतर्हितश्च देहांतर्गतोऽपि मुनिरात्मनो देहाद्यसंगमत एवाव्यवच्छेदं च भावयेत् । कुतः । स्थिरजंगमेषु समन्वयेन या व्याप्तिस्तया । किं मणिषु सूत्रस्येव व्याप्तिः । न । विततस्य सर्वगतस्य । तत्कुतः । ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया । “ तत्त्वमसि ” इति श्रुतेः । नन्वेतत्सर्वं कथं संभवति तत्राह । नभस्त्वं तत्तुल्यत्वं संभावयेत् । यथा नभसः सर्वगतस्य न घटादिभिः संगः परिच्छेदो वा एवमात्मनोऽपि संभवतीति ॥ ४२ ॥

नातिरूक्षं नातिस्निग्धमश्नीयादिति । आदिना गुरुत्वलघुत्वोत्कर्षनिकर्षादिग्रहः । देहादीनां ये गुणाः कार्श्यादयस्तेषामहंप्रत्ययेनाश्रयोपि तैरसंगत्वाद्वस्तुतो न युज्येत ॥ ३९ ॥ तेषु विषयेषु । गुणदोषाभ्यां व्यपेत आत्मा बुद्धिर्यस्य स तथा । तद्वद्वायुवत् ॥ * ॥ ० ॥ ४० ॥ तद्योगी गंधादियोगी । एवं वायुवत् । तद्धर्मवान्देहादिधर्मवान् । संभावितं विचारितम् । यथा वायुः पार्थिवेषु पुष्पादिषु आविशन्नपि तद्गुणसुरभ्याद्याश्रयत्वेन प्रतीतोपि गंधैर्न युज्यते न तद्वान्भवति गंधस्य वाय्वानीततत्तत्सूक्ष्मावयवाश्रितत्वात् । एवमात्मा पार्थिवदेहेष्वाविशन्नपि तद्गुणाश्रयत्वेन स्थौल्यकार्श्यादिना स्फुरन्नपि तद्गुणैर्न युज्यत इति ॥ * ॥ ० ॥ ४१ ॥ अत एवासंगत्वादेव । अव्यवच्छेदं व्यवच्छेदो भेदस्तद्राहित्यं च । अत्र हेतुं पृच्छति—कुत इति । किमिति वितर्के । नेत्याह—तत्सर्वगतत्वम् । अत्राशंकते—नन्विति । एतदंतर्हितत्वादिकम् । समन्वयेन उपक्रमादितात्पर्ययुक्तप्रमाणेन संबन्धेन वा “ सोपक्रमादिमाने च संबंधे च समन्वयः ” इति निरुक्तिः ॥ * ॥ एकस्य सजातीयभेदरहितस्याद्वितीयस्य विजातीयभेदरहितस्य । अत एवासंगतत्वादेव । अव्यवच्छेदमपरिच्छिन्नत्वम् । समन्वयेनाधिष्ठानतयानुगमेन । तत् जीवस्य विततत्वम् । तत्त्वमसीति—तत्पदेनेश्वर उच्यते, त्वंपदेन जीवश्च, असिपदेन ब्रह्म । तत्र मायोपहितं चैतन्यं सर्वज्ञं सर्वकारणम्, अविद्योपहितं चैतन्यं किंचिज्ज्ञं जगत्सृष्ट्याद्यशक्तमिति तयोरैक्याभावात् मुख्यार्थस्य बाधः विशिष्टवाचकस्य शब्दस्य विशेष्यांशेपि वाचकतया कथंचिद्योगः, ऐक्यं तु प्रयोजनं सोऽयं देवदत्त इतिवन्मायाविद्याविशेषणपरित्यागेनानुगतचिन्मात्रोपादा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः ॥ न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ॥ ४३ ॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणाम् ॥ मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः ॥ ४४ ॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः ॥ सर्वभक्षोऽपि युक्तात्मा नादत्ते मलमग्निवत् ॥ ४५ ॥ क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छताम् ॥ भुंक्ते सर्वत्र दातृणां दहन्प्रागुत्तराशुभम् ॥ ४६ ॥ स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः ॥ प्रविष्ट ईयते तत्तत्सरूपोऽग्निरिवैधसि ॥ ४७ ॥

किंच कूटस्थस्यात्मनो नागमापायिदेहादिसंबंध इत्याह।तेजोबन्नमयैः तेजश्च आपश्चान्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न स्पृश्यत इति नभोवत्संभवतीति ॥ ४३ ॥ स्वच्छत्वादिभिर्गुणैरुदकं जगत्पुनातीति तद्गुणा मया शिक्षिता इत्याह । स्वच्छो निर्मलः । प्रकृतितः स्वभावतः । स्निग्धो जनेष्वनुरागवान् । माधुर्यो मधुरालापी । तीर्थभूस्तीर्थस्थानम् । अपां मित्रमुदकतुल्यः । अघादिति पाठे सखायं पापात्पुनाति । स्वच्छत्वादिगुणैरर्थादुदकसादृश्यं ज्ञातव्यम् ॥ ४४ ॥ अग्नेः शिक्षितमाह । तेजस्वीति । ज्ञानातिशयात् । विशेषतस्तपसा दीप्तः । दुर्धर्षोऽक्षोभ्यः स चासावुदरभाजनश्चापरिग्रहः । युक्तात्मा मुनिः ॥ ४५ ॥ अग्नेरेव शिक्षांतरमाह । क्वचिदिति । यथाऽग्निः परेच्छयैव हविर्गृह्णाति तथा मुनिरित्याह । दातृणामिति । प्रागुत्तराशुभं भूतं भविष्यच्च पापम् ॥ ४६ ॥ आत्मनो देहोपाधिकमेवोच्चनीचत्वादि

नेन भागलक्षणया जीवेपि ब्रह्मस्वरूपभावनयावितितत्वोपपत्तिरित्यर्थः । एतदसंगत्वमपारिच्छिन्नत्वम् ॥ ४२ ॥ अन्यदाकाशशिक्षितमाह–किञ्चेति । यद्वन्नभस्तद्वत्पुमान् ॥ * ॥ ० ॥ ४३ ॥ अद्भ्यः शिक्षितमाह–स्वच्छः स्वभावतः प्रकृतितः "प्रकृतिः पंचभूतेषु स्वभावे मूलकारणे" इति यादवः । तीर्थवच्छोधकः सर्वतीर्थाश्रयत्वात् " मुनयः सर्वतीर्थानां निवासो हरिचिंतनात् " इत्याद्युक्तेः । 'अघान्मित्रम्' इति पाठे स्वीकृते मूलेऽप्छब्दानुपलंभेप्यर्थात्तत्सादृश्यमिति ध्येयम् ॥ * ॥ ' मुनिः पुनात्यघान्मित्रम् ' इति पाठांतरम् । तत्र स्वच्छादयो गुणा जल उपलभ्यंत इत्यर्थात्तात्पर्याज्जलसादृश्यं ज्ञेयम् । पाठांतरे मित्रसखायमित्यर्थः ॥ ४४ ॥ पक्षेऽर्चिष्मत्यतस्तेजस्वी तपसा कृच्छ्रादिनाऽन्यत्र संतापहेतुज्वालया अक्षोभ्यः कोपयितुमनर्हः पराभवितुमयोग्य इति यावत् " पराभवो वर्षणं स्यादत्रज्ञानमथापि वा । न तत्सत्सु सदा कुर्यात्सहासाशयनं तथा ॥ " इत्युक्तेः । एवंविधो ज्ञानी सर्वभक्षोपि मलं भक्ष्यदोषं नादत्ते " सर्वान्नानुमतिः प्राणात्यये तद्दर्शनात् " इति न्यायात् । सर्वान्नानुमतिश्च प्राणात्यय एवेति सावधारणमिदं सूत्रम् । परस्यामापदि सर्वमन्नं सुरावर्जं विद्वांसमविद्वांसं प्रति चादनीयत्वेनानुमतम्, न स्वस्थं प्रति तद्दर्शनात् । अभक्ष्यभक्षणस्यापत्काल एव श्रुतौ दर्शनादित्यर्थः । तथाहि–अटचीहतेषु कुरुष्वित्येतस्मिन्ब्राह्मणो चाक्रायणः किलर्षिः कुरुदेशे दुर्भिक्षे जाते क्षुत्पीडितो देशांतरमागतः कदाचिद्धस्तिपालकदेशं सन्निविष्टः, तेन हस्तिपालकेन दत्तानर्द्धभक्षितान्कुलित्थान्माषान् भक्षितवान् । तेनोदपात्रं गृहाणेत्युक्ते सत्युच्छिष्टं न मे पीतं स्यादिति प्रतिषिद्धम् । किमेते माषा उच्छिष्टा नेति हस्तिपकेनोक्ते नेत्यत्र हेतुमाह चाक्रायणः–कुल्माषभक्षणं यद्यहं न कुर्यां तर्हि मे जीवनमेव न स्यात्, उदपानं तु तटाकादिषु स्वतो भविष्यतीति । एवमिभोच्छिष्टान्माषान्खादित्वा शिष्टाञ्जायार्थं ददौ, तथा च भर्तुः स्वभावज्ञया निहितानुत्तरादिनेपि भक्षितवानिति श्रुतम् । एवं स्वपरोच्छिष्टपर्युषितान्नभक्षणं दर्शयन्त्याः श्रुतेरयं भावः–परस्यामापदि प्राणनिर्वाहार्थमभक्ष्यमपि भक्षणीयं स्वस्थावस्थायां विदुषापि तन्न कर्तव्यमिति । अटची पाषाणवृष्ट्यो रक्तवर्णाः क्षुद्रपक्षिविशेषा वा ग्राह्याः ॥ * ॥ ० ॥ ४५ ॥ यथाऽग्निः काष्ठेषु छन्नो गुप्तः क्वचिच्च स्पष्टः, तथा मुनिः कुसंगे छन्नः मुमुक्षुषु सज्जनेषु स्पष्टः। अग्निः कार्मिणामग्वं मुनिर्मुमुक्षूणामुपास्यो दातृणां प्रागुत्तराशुभं दहन्सर्वत्र भुंक्ते। " हुत्वाग्नौ मुच्यते पापाद्दत्वान्नं ज्ञानिने तथा " इत्युक्तेः ॥ * ॥ ० ॥ ४६ ॥ तस्यैव शिक्षांतरमाह–स्वमायया स्वेच्छाधीनप्रकृत्या वा मनुष्येष्वर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विसर्गाद्याः स्मशानांता भावा देहस्य नात्मनः ॥ कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना ॥ ४८ ॥ कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषाम् ॥ ४९ ॥ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥ ५०॥ बुध्यते स्वेन भेदेन व्यक्तिस्थ इव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत् ॥ ५१ ॥

न स्वाभाविकमित्यग्निदृष्टांतेन संभावितमित्याह । स्वमाययेति । स्वमायया स्वाविद्यया सृष्टं सदसल्लक्षणं देवतिर्यगादिरूपं वा विप्रशूद्रादिरूपं वा ॥ ४७ ॥ आत्मनो जन्मादिषड्विकाराभावश्चंद्रदृष्टांतेन संभावित इत्याह । विसर्गाद्या इति । विसर्गो जन्म । श्मशानं नाशः । तत्रेयं ज्योतिःशास्त्रप्रक्रिया । आप्यमंडलं चंद्रस्तेजोमयं मंडलमादित्यस्तयोरेकनक्षत्रावस्थाने चंद्रो न दृश्यते चक्षुष आदित्यमंडलेन समदेशस्थितेन व्यवधानात् सा अमावास्या । अथ षष्टिघटिकाभिश्चंद्रो नक्षत्रांतरं गच्छति । आदित्यस्तु त्रयोदशभिरहोरात्रैः । अतः प्रतिपदमारभ्य विषमस्थितस्यादित्यमंडलस्य पंचदशः पंचदशो भाग आप्यमण्डले प्रतिबिंबितो दृश्यते सा कलेत्युच्यते । एवं पंचदशेऽह्नि त्रयोदशभिर्नक्षत्रैरंतरमिति राशिचक्रस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये संमुखौ चंद्रादित्यौ तिष्ठतस्तदा संपूर्णं प्रतिबिंबं भूछायालांछितं दृश्यते सा पौर्णिमा । तस्याममावास्याप्रतिबिंबेन सह षोडशकलश्चंद्र उपचर्यते । ततः पुनः प्रतिपदमारभ्य मंडलयोर्विषमीभावात्कलाह्रासः । तत्र यथा कलानामेवोत्पत्त्यादयो नाप्यमंडलस्य तथात्मनोऽपीत्याह । कलानामिवेति ॥ ४८ ॥ सिंहावलोकनेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरतया वैराग्यं शिक्षितमित्याह कालेनेति । ओघवद्वेगो यस्य तेन । आत्मनः संबंधिनां भूतानां देहानामित्यर्थः । अर्चिषां ज्वालानाम् ॥ ४९ ॥ आदित्याच्छिक्षितमाह द्वयेन । गुणैरिति । गुणैरिंद्रियैर्गुणान्विषयानुपादत्ते यथाकालमर्थिन्यागते सति विमुंचति च न तेषु युज्यते दत्तमिति वाऽभिनिवेशं न करोति । गोभिः रश्मिभिर्गाः जलानि गोपतिः सूर्यो यथा ॥ ५० ॥ स्वतो भेदशून्यस्याप्यात्मनो भेदप्रतीतिरुपाधिवशादित्यादित्यदृष्टांतेनैव संभावितमित्याह । बुध्यत इति । स्वे स्वस्वरूपेऽवस्थित आत्मा भेदेन न बुध्यते । अभिव्यनक्तीति । व्यक्तिरुपाधिः। व्यक्तिस्थ उपाधौ प्रतिबिंबितस्तु

संभवेऽन्यत्र तत्कल्पनातारतम्यस्य सर्वत्र बोधनार्थमित्याह–विप्रशूद्रादिरूपं वेति । तत्तत्स्वरूपः स्वोपाध्यनुरूपः । एधासि काष्ठे । यथाग्नौ वक्रवर्तुलत्वाद्यभावेपि काष्ठवक्रत्वादिना तादृश इव प्रतीयते तद्वत् ॥ * ॥ तथैव भगवाञ्जगत्प्रविष्ट ईयते श्रवणकीर्तनाद्यभ्यासात्प्रत्यक्षी भवति ॥ ४७ ॥ तत्र कलानां जन्मनाशवत्त्वे दृष्टान्तः शास्त्रांतरोपन्यासेन स्वामिचरणैः स्फुटीकृतः–इयं ज्योतिःशास्त्रप्रक्रियेत्यादिना ॥ * ॥ ० ॥ ४८ ॥ सिंहावलोकनेन–सिंहो यथा किंचिद्देशं गत्वा पुनर्ग्रीवां विवृत्य पश्यति तद्वत् । ओघवन्नदीप्रवाहवत् । 'ओघो वेगे जलस्य च' इति मेदिनी । इत्यर्थ इति–भूतशब्देन तत्कार्यं लक्ष्यते "गोभिः श्रीणीत मत्सरम्" इतिवदिति भावः । नित्यौ प्रवाहरूपेण व्यवाच्छिन्नौ ॥ * ॥ ० ॥ ४९ ॥ गोपतिः रश्मिपतिः ॥ * ॥ ० ॥ ५० ॥ आत्मनो भेद औपाधिक एवेत्यपि सूर्यादेव शिक्षितमित्याह–बुध्यत इति ॥ * ॥ व्यापक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केनचित् ॥ कुर्वन्विंदेत संतापं कपोत इव दीनधीः ॥ ५२ ॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ ॥ कपोत्या भार्यया सार्धमुवास कतिचित्समाः ॥ ५३ ॥ कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः ॥ ५४ ॥ शय्यासनाटनस्थानवार्ताक्रीडाशनादिकम् ॥ मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥ ५५ ॥ यंयं वांछति सा राजंस्तर्पयंत्यनुकंपिता॥ तंतं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ॥ ५६ ॥ कपोती प्रथमं गर्भं गृह्णती काल आगते ॥ अंडानि सुषुवे नीडे स्वपत्युस्सान्निधौ सती ॥५७॥ तेषु काले व्यजायंत रचितावयवा हरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥ ५८ ॥ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ ॥ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५९ ॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥६०॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः॥६१॥ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरम्॥६२॥ दृष्ट्वा तांलुँब्धकः कश्चिद्यदृच्छातो वनेचरः ॥ जगृहे जालमातत्य चरतः स्वालयांतिके॥६३॥कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥ ६४ ॥

तद्गत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते । अर्कवदित्यन्वयः ॥५१॥ कपोताच्छिक्षितमाह । नातिस्नेह इति । स्नेहः प्रीतिः । प्रसंग उपलालनाद्यासक्तिः॥५२॥ दृष्टांतं प्रपंचयति । कपोतः कश्चनेति ॥ ५३ ॥ तयोर्मिथः स्नेहप्रसंगौ दर्शयति कपोताविति त्रयेण । स्नेहेन गुणितं बद्धं हृदयं ययोस्तौ ॥ ५४ ॥ विस्रब्धौ निःशंकौ ॥ ५५ ॥ सा कपोती तर्पयंती सहासवीक्षितालापादिभिः प्रीणयंत्यत एव तेनानुकंपिता सती यंयं वांछति तंतं कामं समनयत्संपादयामास । राजन्निति त्वं यथेति सूचितम् ॥ ५६ ॥ ५७ ॥ तेषु जलभरितेष्वंडेषु । हरेः स्वभावकर्मादिशक्तिभी रचितावयवाः पक्षिणः । कोमलान्यंगानि तनूरुहाश्च येषां ते ॥ ५८ ॥ ५९ ॥ पतत्रैः पक्षैः अदीनानां हृष्टानाम् ॥६०॥ शिशून्बालान्प्रजाः पुत्रान् ॥ ६१ ॥ ६२ ॥ स्वालयांतिके चरतः क्रीडतः तान् कपोतपुत्रान् । आतत्य प्रसार्य ॥ ६३ ॥ उत्सुकत्वा

त्वादसंगत्वाच्च, वस्तुतः प्रवेशासंभवादिवेत्युक्तम् ॥ ५१ ॥ ० ॥ * ॥ ० ॥ ५२ ॥ ० ॥ * ॥ ० ॥ ५३ ॥ तयोः कपोतकपोत्योः । बबंधतुः युयुजतुः ॥ * ॥ ० ॥ ५४ ॥ आदिना पानादिग्रहः ॥ * ॥ ० ॥ ५५ ॥ अत एव तर्पणादेव । तेन कपोतेन । राजानोपि प्रायः स्त्रीवशवर्तिनो भवंतीति संबुद्ध्यभिप्रायः, ऐलादिवत् । आजितेन्द्रियः कामवशः ॥ * ॥ अनुकम्पिताऽनुकम्पाविषयीकृता । प्रथमसंततावौत्सुक्याधिक्येनासक्त्याधिक्यं व्यंजितम् ॥ ५६ ॥ ० ॥ * ॥ ० ॥ ५७ ॥ दुर्विभाव्याभिः कथमाभिरेतत्कृतामिति ज्ञातुमशक्याभिः ॥ * ॥ ० ॥ ५८ । प्रजाः संततीः । तासां प्रजानाम् ॥ * ॥ कलभाषितैरव्यक्तमधुरालापैः ॥ ५९ ॥ मुग्धचेष्टितैश्चंचुचालनेतस्ततश्चलनादिभिः । प्रत्युद्गमैः संमुखागमनैः ॥ * ॥ मुग्धचेष्टितैर्बालचेष्टाभिः । प्रत्युद्गमैः सशब्दं संमुखागमनैः ॥ ६० ॥ ० ॥ * ॥ दीनधियौ प्रजापालनपोषणव्यग्रतया कृपणाचित्तौ ॥ ६१ ॥ अर्थिनौ प्रजान्नप्रयोजनवन्तौ ॥ * ॥ एवं वैषयिकसुखमुक्त्वा "यत्तदग्रेऽमृतमिव परिणामे विषोपमम्" इति न्यायेन तस्यैव दुःखमाह–एकदेति ॥ ६२ ॥ ० ॥ * ॥ स्वालयांतिके स्वनीडसन्निधौ ॥ ६३ ॥ तत्पोषणार्थं प्रजापालनार्थम् ॥ * ॥ विशेष्ययोर्द्वयोर्द्वित्वमादाय विशेषणे द्वित्वं न विरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कपोती स्वात्मजान्वीक्ष्य बालकाञ्जालसंवृतान् ॥ तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता ॥ ६५ ॥ साऽसकृत्स्नेहगुणिता दीनचित्ताऽजमायया ॥ स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ॥ ६६ ॥ कपोतश्चात्मजान्बद्धानात्मनोप्यधिकान्प्रियान् ॥ भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥६७॥ अहो मे पश्यतापायमल्पपुण्यस्य दुर्मतेः ॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥६८॥ अनुरूपानुकूला च यस्य मे पतिदेवता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ॥ ६९ ॥ सोऽहं शून्ये गृहे दीनो मृतदारो मृतप्रजः ॥ जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥ ७० ॥ तांस्तथैवावृताञ्छिग्भिर्मृत्युग्रस्तान्विचेष्टतः ॥ स्वयं च कृपणां शिक्षु पश्यन्नप्यबुधोऽपतत् ॥ ७१ ॥ तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनम् ॥ कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहम् ॥ ७२ ॥ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् ॥ पुष्णन्कुटुंबं कृपणः सानुबंधोऽवसीदति ॥ ७३ ॥

देव तत्पोषणार्थं गतौ संतौ । पोषणं भक्ष्यम् ॥ ६४ ॥ ६५ ॥ शिचा जालेन ॥ ६६ ॥ आत्मानुरूपां भार्यां च विललाप शुशोच ॥६७॥ विलापमाह त्रयेण । अहो इति । अतृप्तस्य दृष्टसुखे अकृतार्थस्यादृष्टमसंपादयतः ॥ ६८ ॥ ६९ ॥ ७० ॥ तानावृतान्पश्यन्नपि । शिक्षु जालेषु ॥ ७१ ॥ ७२ ॥ दार्ष्टांतिके योजयति । एवमिति ॥ ७३ ॥

द्वम् ''तयोर्जगृहतुः पादान्राजा राज्ञी च मागधीः'' इत्यत्र कर्तृद्वयेन क्रियाद्वित्ववत् ॥ ६४ ॥ ० ॥ * ॥ क्रोशतो मातरं दृष्ट्वा विलापं कुर्वतः । तानभ्यधावत्संमुखमगच्छत् ॥ ६५ ॥ 'शिग्जाले पक्षिणां शिक्ये' इति कोशात् । असकृत्स्नेहेनातीवस्नेहेन । बद्धान् शिचा बद्धान् ॥*॥ अपस्मृतिः शोकेन नष्टचेतना सती ॥ ६६ ॥ ० ॥ * ॥ ० ॥ ६७ ॥ दृष्टसुखे मैथुनादिरूपेऽदृष्टं पारलौकिकम् । गृहाः दाराः ''गृहं गृहाश्च पुंभूम्नि कलत्रेपि च सद्मनि'' इति मेदिनी । त्रैवर्गिका धर्मार्थकामसाधनींभूताः 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः । दुर्मतेरस्या मृतेर्मम मतिरन्यहृद्यभिलाषिणी भविष्यतीति दुर्बुद्धेः ॥ * ॥ दृष्टसुखे ऐहिकभोगे अदृष्टं पारलौकिककृत्यम् ॥ ६८ ॥ अनुरूपा वयोरूपकुलादिनाऽनुकूला, चित्तानुवर्तिनी भार्येति शेषः ॥ * ॥ ० ॥ ६९ ॥ विधुरो भार्यावियुक्तः ''विधुरः प्रत्यवाये स्यात्कष्टविश्लेषयोरपि'' इति विश्वः । विधुरो विश्लेषो स्यास्तीति मत्वर्थीयोऽच् । दुःखेन जीवितं जीवनं यस्य स तथा । ''धनधान्यसमायुक्तं पुत्रपौत्रसमाकुलम् । स्त्रिया विरहितं यच्च यथारण्यं तथा गृहम् ॥ '' इत्युक्तेः पुत्रादियुक्तस्यापि स्त्रीवर्जितस्य गृहं न सुखदं कुतस्सर्वविहीनस्येत्यर्थः ॥ * ॥ ० ॥ ७० ॥ तान्कलत्रपुत्रान् । तथैव यथा पतनावसरे जालैरावृतस्तथैव न किंचिन्निःसृतान् । विचेष्टत इतस्ततोंगानि चालयतः । कृपणो मंदः ''कृपणस्तु कृमौ पुंसि मंदकुत्सितयोस्त्रिषु'' इति मेदिनी । तद्विवरणम्–अबुध इति ॥ * ॥ ० ॥ ७१ ॥ गृहमेधित्वं विवृणोति–कपोतकानिति । सिद्धः कुटुंबपालनरूपोर्थो यस्य स तथा ॥ * ॥ ० ॥ ७२ ॥ एवमुक्तरीत्या ॥ * ॥ ० ॥ ७३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥ ७४ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधेऽवधूतगीतेऽष्टगुरुनिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥ ब्राह्मण उवाच ॥ सुखमैंद्रियकं राजन्स्वर्गे नरक एव च ॥ देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः॥ ॥ १ ॥ ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव वा ॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः ॥ २ ॥ शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक् ॥ ३ ॥ ओजःसहोबलयुतं बिभ्रद्देहमकर्मकम् ॥ शयानो वीतनिद्रश्च नेहेतेंद्रियवानपि ॥ ४ ॥ मुनिः प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः ॥ अनंतपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ॥ ५ ॥

एवं गृहासक्तिस्तिरश्चामप्यनर्थहेतुर्मनुष्यस्य त्वतिनिंदितेत्याह । यः प्राप्येति ॥ ७४ ॥ इति श्रीमद्भागवते म० एकादशस्कंधे श्री० टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमेऽजगरादिभ्यो नवभ्यः शिक्षितं हरिः ॥ अवधूतगिरा प्राह विवेकायोद्धवं प्रति ॥ १ ॥ प्रारब्धकर्मभोगस्यावश्यंभावित्वादतदर्थोद्यमैर्नायुर्व्ययो वृथा कर्तव्य इत्यजगराच्छिक्षितमित्याह सुखमित्यादिना । यदैंद्रियकं सुखं तत्स्वर्गे नरके च भवत्येव यथा दुःखम् । तस्माद्बुधस्तन्नेच्छेत् ॥ १ ॥ शरीरनिर्वाहमात्रं तु यथालब्धेन कर्तव्यमित्याह । ग्रासमिति । आजगरोऽजगरवृत्तिः । अक्रिय उदासीनः ॥ २ ॥ यदा नापतति तदा किं कर्तव्यं तत्राह । शयीतेति । अनुपक्रमो निरुद्यमः । दिष्टभुक् दैवमेव प्रापकमिति धैर्यवान् ॥ ३ ॥ ननु समर्थोऽपि शयीतैव किम् ओमित्याह । ओज इति । ओज इंद्रियबलं सहो मनोबलं बलं शारीरमेव तद्युक्तमपि देह मकर्मकमेव बिभ्रच्छयान एव भवेत् । वीतनिद्रः स्वार्थे दत्तदृष्टिश्च भवेन्न पुनरीहेत किंचित् । इंद्रियवानपीति दर्शनादिव्यापारमपि निवारयति ॥ ४ ॥ समुद्राच्छिक्षितमाह ।

एवमित्थम् । आरूढच्युतं प्राप्यस्थानं प्राप्यपतितम् । एतदभिप्रेत्यैव भगवता वैनतेयायोक्तम्—"जातीशतेन लभते किल मानुषत्वं तत्रापि दुर्लभतरं किल भो द्विजत्वम् । यस्तन्न पालयाति लालयतींद्रियाणि तस्यामृतं क्षरति हस्तगतं प्रमादात् ॥" इति ॥*॥०॥७४॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे एकादशस्कन्धे सप्तमोऽध्यायः॥७॥ अवधूतगिरा दत्तात्रेयवाचा (१) । ऐंद्रियकं श्रोत्रादीन्द्रियविषयशब्दादिसुखं दुःखशिरस्कं, नरके तत्तुल्ये सूकरादिदेहे यतः सर्वत्र भवति तस्मात् । तदैन्द्रियकसुखम् ॥*॥ हे राजन्निति—राज्यस्यापि विषयसुखान्तःपातित्वेन हेयत्वमेवेति भावः । तस्माद्विषयसुखस्य सूकरादिसाधारण्येन तुच्छत्वात् ॥ १ ॥ सुमृष्टं सरसम् 'मृष्टं सरसशुद्धयोः' इति निरुक्तिः । स्तोकमल्पम् । 'स्तोकस्त्रिष्वल्पचातके' इति धरणिः । अल्पचातक इति समाहारद्वंद्वः । यदृच्छयैवापतितमतर्कितत्वेनोपपन्नम् ॥ * ॥ यथालब्धेन यादृच्छिकतया प्राप्तग्रासेन । विरसं कटुतीक्ष्णादि । यथा दुःखमवांछितमपि स्यात्तथा सुखमपि भवेदेव कर्मफलत्वात्किं तदिच्छयेति भावः ॥ २ ॥ आपतति आयाति ॥ * ॥ ० ॥ ३ ॥ अत्राशंकते—नन्विति । ओमित्यंगीकारे । शयानः सर्वप्रवृत्तिशून्यः । तर्हि निद्रालुः स्यादत आह—वीतनिद्रः स्वार्थे परात्मालोचने ॥ * ॥ ० ॥ ४ ॥ इत्यर्थ इति—प्रसन्नत्वादिधर्मानादाय समुद्रतुल्यो भवेदिति भावः । यद्वा—अनंतेन भगवता पारः पूर्तिर्यस्य तथा भवेत् । "पारं तीरांतरं प्रोक्त पारः पूर्तिस्तथा पुमान्" इति कोशात् ॥ * ॥ बहिः प्रसन्नश्चेति—अर्णवपक्षे—जलप्रसत्तावप्यंतर्दृष्ट्याऽनलस्पर्शः । मुनिपक्षे—सर्वत्र चित्तप्रसत्तावप्यंतर्निजरहस्योपास्याप्रकाशकः अतः—एवंभूत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समृद्धकामो हीनो वा नारायणपरो मुनिः ॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ॥ ६ ॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः ॥ प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ॥ ७ ॥ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ॥ ८ ॥ स्तोकंस्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता ॥ गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ॥ ९ ॥

मुनिरिति । बहिःप्रसन्नश्चासावंतर्गंभीरश्च । दुर्विगाह्य एवंभूत इति परिकलयितुमशक्यः अलक्ष्याभिप्रायत्वात् । दुरत्ययोऽनतिक्रमणीयः तेजस्वित्वात् । अनंतपारः कालतो देशतश्चापरिच्छेद्यः स्वरूपाविर्भावात् । अक्षोभ्योऽविकार्यः रागाद्यभावात् । स्तिमितोदो निश्चलोदकोऽर्णवो यथा तद्वदेतैर्गुणैर्भवेदित्यर्थः ॥ ५ ॥ किंच । वर्षासु सरिद्भिः समृद्धोऽपि सागरो यथा नोत्सर्पेत । ग्रीष्मे तद्विहीनोऽपि न शुष्येत । तथा समृद्धकामस्तद्विहीनो वा न हृष्येन्न शोचेदित्यर्थः । अत्र हेतुः । नारायणपरो न तु विषयपर इति ॥ ६ ॥ रूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीना हता अतस्तेष्वनासक्तौ पंचैते गुरवः । तदुक्तम् । “ पतंगमातंगकुरंगभृंगमीना हताः पंचभिरेव पंच ॥ एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंच ॥ ” इति । तत्र रूपविलासमोहितो नश्यतीति पतंगाच्छिक्षितमाह । दृष्ट्वेति । तस्या भावैः प्रलोभितः ॥ ७ ॥ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति । योषिदिति । उपभोगबुद्ध्या सुखसाधनबुद्ध्या प्रलोभितात्मा ॥ ८ ॥ मधुकराच्छिक्षितमाह । स्तोकमिति । गृहान्गृहस्थानहिंसन्नपीडयन् । अयं भावः । यथा मधुकरो विशिष्टगंधलोभेनैकस्मिन्नेव पद्मे वसन्नस्तमयसमये मुकुलिते तस्मिन्बध्यते एवं

इति । उभयपक्षेप्यनिर्णयांतस्तत्त्व इत्यर्थः । तेजस्वित्वादिभिः—समुद्रपक्षे—जलनक्रादिमयत्वादनतिक्रमणीयत्वं, रागाद्यभावादिति लाभालाभादिनेति एतैर्गुणैर्विशिष्टो भवेत् ॥ ५ ॥ समुद्रशिक्षांतरमाह—किंचेति । उत्सर्पेत उत्सिक्तो भवेत् । तद्विहीनोऽपि परिपूर्णजलसरित्संगवर्जितोपि । इत्यर्थ इति—हर्षाभावस्यैव शोकपदार्थत्वादिति भावः । अत्र शोकाभावे । विषयपराणामेव तदप्राप्तिनाशादिना शोको भवति, न तु हरिनिष्ठानामिति भावः ॥ ॥ * ॥ तद्विहीनः सरिद्विहीनः । समृद्धकामः संप्राप्तभोगोपि । तद्विहीनस्संभोगहीनः । अत्र हर्षशोकाभावे । नारायणैकनिष्ठः ॥ ६ ॥ यत एते एतैर्हता अतो हेतोः । तेषु रूपादिषु । एते पतंगादयः । अत्र प्रमाणं गारुडे—तदुक्तमिति । स्पष्टार्थः । तत्र तेषु पंचसु । पतंगो दीपेक्षणलालसोऽल्पपक्षो जीवः । देवस्य हरेर्मायां मोहकशक्तिम् । तस्याः स्त्रिया भावैः शृंगारचेष्टाभिः । अंधे दृष्टिव्यापारशून्ये । तमसि नरके ॥*॥ **दीपिका—** अतः रूपादीनां पतंगादिनाशकत्वात् । तेषु रूपादिषु । एते पतंगादयः । तत् पञ्चानां मोहितत्वं गारुडे प्रोक्तम् । तत्र पंचसु । भावैर्हावाद्यैः । यद्यपि स्त्रियां पञ्चापि विषयास्संति तदपि योषिदादिषु प्रथमं दृष्टिरेव पततीति रूपस्यैव प्राधान्यम् ॥ ७ ॥ उपलक्षणीकृत्योपलक्षणत्वेन स्थापयित्वा । एतत् विषयसेवनस्य नाशहेतुत्वम् । आदिना भक्ष्यभोज्यादि ग्रहः । मायारचितेषु मायैव क्वचिद्योषिद्रूपा क्वचिद्धिरण्याभरणादिरूपा भाति न तु ततोऽन्यत्किंचिदित्यर्थः । उपभोगबुद्ध्या भोगसाधनबुद्ध्या । प्रलोभितात्मा विवशमनाः ॥ * ॥ ० ॥ ८ ॥ गृहशब्दो गृहस्थपरः ‘ तात्स्थ्यात्ताच्छब्द्यम् ’ इति न्यायेन । अत्राशयमाह—अयं भाव इति । मुकुलिते मुद्रीभावं गते । तस्मिन्पद्मे । गुणलोभेन, इहातीव स्वाद्वन्नमतीव कोमलवस्त्रं चास्तीति बुद्ध्या । अहिंसन्नित्युक्तेरहिंसासत्त्वे त्वेकत्रापि भुंजीतेत्यपि ज्ञेयम् । माधुकरीं मधुकरवदीषदीषदन्नग्रहणरूपाम् ॥ * ॥ ननु यद्येक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ॥ सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ १० ॥ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितम् ॥ पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही ॥ ११ ॥ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षुकः ॥ मक्षिका इव संगृह्णन्सह तेन विनश्यति ॥ १२ ॥ पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि ॥ स्पृशन्करीव बध्येत करिण्या अंगसंगतः ॥ १३ ॥ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥१४॥ न देयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितम् ॥ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥ १५ ॥

मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यत इति ॥ ९ ॥ किंच अणुभ्यश्चेति ॥ १० ॥ द्विविधो मधुकृत् मधु कृंतति पुष्पादाच्छिद्य गृह्णातीति मधुकृद्भ्रमरः । मधु करोत्याहारत्वेन स्वरूपेण चेति मधुमक्षिका च । तत्र प्रथमाच्छिक्षितमुक्तं द्वितीयाच्छिक्षितमाह । सायमिदं भोक्ष्यामि श्व इदं भोक्ष्यामीति भिक्षितमन्नादि न संगृह्णीत । किंतु पाणिपात्रस्तन्मात्रग्राही । यद्वा उदरमेवामत्रं पात्रं यस्य सः । एकभिक्षायामुदरमात्रग्राही भवेत् । संग्रही तु मक्षिकेव न भवति न जीवतीत्यर्थः ॥ ॥ ११ ॥ एतद्विवृणोति पुनः । सायंतनमिति ॥ १२ ॥ स्पर्शासक्तिर्नाशहेतुरिति गजाच्छिक्षितमित्याह । पदापीति । पादेनापि दारवीं दारुमयीमपि । गजो हि करिणीं प्रदर्श्य निखाततृणपिहितगर्ते निपात्य बध्यते ॥ १३ ॥ किंच नाधिगच्छेदिति । नोपगच्छेत् ॥ १४ ॥ त्यागभोगविहीनो धनसंचयः परगामी भवतीत्यत्र मधुहा गुरुरित्याह । न देयमिति । तदन्यो बलवान्भुंक्ते तदप्यन्यस्तच्चान्यः । मधुहा मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् अन्यो वा बलवान् भुंक्ते तद्वत् । ननु सुगुप्तं

त्रैवाविशिष्टग्रासोपलब्धिः स्यात्तर्हि स्तोकग्रासे को हठस्तत्राह—अयमिति ॥ ९ ॥ न केवलमन्न एव माधुकरी वृत्तिर्ग्राह्यापि तु शास्त्रेपीत्याह—किंचेति । अत्राणुत्वमहत्त्वे संख्ययोच्येते न त्वर्थतः शास्त्रमात्रस्याभ्यर्हितत्वात् । सारं भगवद्भक्तिज्ञानजनकं वाक्यम् ॥ * ॥ त्रिविधो मधुकृत् । एको भ्रमरजातिः । असंग्रहित्वसंग्रहित्वभेदेन द्वयी च मक्षिकाजातिरिति पद्यत्रयेण क्रमादुदाहरणानि ज्ञेयानि ॥ १० ॥ तत्र तयोर्मध्ये । प्रथमाद्भ्रमरात् । द्वितीयान्मधुमक्षिकारूपात् । तन्मात्रग्राही यावतान्नेन पाणिगृहीतेन तृप्तिर्भवेत्तावन्मात्रं गृह्णीयादित्यर्थः । यदि पाणिगृहीतेन तृप्तिर्न स्यात्तदोदरपूर्तिमात्रं वस्त्रादिनापि गृह्णीयादित्याह—यद्वेति । इत्यर्थ इति—अत्यल्पधनसंग्राह्यपि चोरादिना नाश्यते धनेन सहैवेति भावः ॥ * ॥ भिक्षितनिषेधान्निमंत्रणं संगृह्णीयादिति केचित् । केन पात्रेण गृहेगृहे भिक्षां कुर्यादत्राह—पाणिपात्र इति । सर्वतो भिक्षितग्रासानानीय कुत्र स्थापयेदत्राह—उदरामत्र इति । उदरमेवामत्रं भिक्षानिधानभांडं यस्य स च स च सः ॥ ११ ॥ एतत्संग्रहिनशनम् ॥ * ॥ संग्रहे कृते किं भवेत्तत्राह—सायंतनमिति । प्रथमपद्ये यथा मक्षिकाजातिराहारमात्रं करोति संग्रहं न करोति, तथा यतिरपि स्यात् । द्वितीया—क्षौद्रमक्षिका तु संगृह्णती तेन सहैव नश्यति, तद्वद्यतिरपीति भावः ॥ १२ ॥ स्पर्शासक्तिः स्त्र्यादिस्पर्शप्रेमा । भिक्षुर्यतिः । आपिना चित्रस्थामपि न स्पृशेदित्यर्थः । करी हस्ती ॥ * ॥ ० ॥ १३ ॥ एतदेव विवृणोति—किंचेति । स स्त्रीगंता । बलाधिकैस्तदभिलाषिभिरन्यै राजादिभिस्तत्पत्यादिभिर्वा ॥ * ॥ इयं ममैव भोग्येति स्त्रियं नाधिगच्छेन्न विश्वस्तः स्यात्, यतस्तयानीतैर्बलाधिकैर्जारैः स किल हन्यते ॥ १४ ॥ समागतं धनं दद्याद्वा भुंजीतान्यथा संग्रहीतुः परिश्रम इत्याह—त्यागेत्यादिना । अत्रार्थे । तद्वत् मधुग्राहिवत् । अत्राक्षिपति—नन्विति । लिंगैः सत्यप्यागमेऽयं व्ययं न करोतीत्यतोऽस्य पार्श्वे धनमस्तीत्यादिहेतुभिरर्थं धनं तदुपायं संगृहीतधनहरणोपायं चायमत्रैव स्थले सदा तिष्ठति नास्य स्थलस्य विश्वासं करोतीत्यतोऽत्रैवास्य धन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनाम् ॥ १६ ॥ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ॥ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् ॥१७॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषिताम् ॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः ॥ १८॥ जिह्वयाऽतिप्रमाथिन्या जनो रसविमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥ इंद्रियाणि जयंत्याशु निराहारा मनीषिणः ॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते ॥ २० ॥

धनं कथमन्यो ज्ञास्यति हरिष्यति चेति तत्राह । अर्थवित् लिंगैरर्थं तदुपायं च वेत्तीत्यर्थवित् यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हरति च ॥ १५ ॥ स्वोद्यमं विनाऽपि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह । सुदुःखेति । आशासानानामिति वक्तव्ये वर्णलोप आर्षः । "यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ । तयोरन्नमदत्त्वा तु भुक्त्वा चांद्रायणं चरेत् ॥" इति गृहिणामावश्यकत्वेन दानविधानात् ॥ १६ ॥ हरिणाच्छिक्षितमाह । ग्राम्येति । भगवद्गीतं तु शृणुयादेव । मृगयोर्लुब्धकस्य ॥ १७ ॥ हरिणशब्दादेव हरिणीसुत ऋष्यशृंगोऽपि गुरुर्ज्ञातव्य इत्याह । नृत्येति । वश्यो बभूवेति शेषः ॥ १८ ॥ रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमित्याह । जिह्वयेति । अतिप्रमाथिन्या अतिक्षोभिकया दुर्जयया । ऋच्छति प्राप्नोति । बडिशैरामिषलिप्तैर्लोहकंटकैः ॥ १९ ॥ दुर्जयत्वमुपपादयति इंद्रियाणीति द्वाभ्याम् । अयं भावः । यद्याहारस्त्यज्यते तर्ह्यन्येंद्रियजयः केवलं भवति रसनेंद्रियं तु वर्धते । यदि तु भुज्यते तर्हि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात् । अतो

मस्तीति विज्ञाय सुरंगादिना च ततो हरतीत्यर्थः । तरुकोटरादिगतं वृक्षकांडबृहच्छिद्रगतं तत्र मक्षिकागमनागमनैर्लिंगैर्वेत्ति ॥ * ॥ लिंगैस्तत्स्थानमार्जनोपवेशनमुहुरीक्षणादिचिह्नैरर्थं धनं तदुपायं तद्धरणोपायं च वेत्तीति ॥ १५ ॥ इत्यत्राप्यस्मिन्नर्थेपि । स एव मधुहैव । सुदुःखोपार्जितैः कृषिसेवनादिनोपपादितैः । गृहाशिषः अनेन द्रव्येण स्त्रिया भूषणान्यनेन च सुतविवाहहर्म्यादिसंपादनं च करिष्यामीत्येवंरूपाः । आशासानानामिच्छताम् । 'आङः शासु इच्छायाम्' इत्यतः शानच् । अत्रार्थे मनुं प्रमाणयति—यतिश्चेति । पक्वान्नस्वामिनावित्युक्तिस्तयोः पाककरणनिषेधात् " आद्यंताश्रमिणौ पाकं न कुर्यातां कदाचन । ब्राह्मणागारपक्वान्नं गृह्णीयातां सदैव हि ॥ प्रायश्चित्तं प्रकुर्यातामन्यथाकरणादुभौ ॥" इति स्मरणात् । तयोर्ब्रह्मचारिसंन्यासिनोरन्नमदत्त्वा यो गृही भुंक्ते सोपि प्रायश्चित्ती भवेदित्याह—चांद्रायणमिति । स्वयं पाककरणे तयोरपि चांद्रायणमेवैकक्षाप्रविष्टत्वादिति ज्ञेयम् । अन्नमित्युपलक्षणमित्याह—गृहिणामित्यादिना ॥ * ॥ अतोऽन्नार्थं यतिनान्योद्यमो न कार्य इति भावः । आशासानानामिति वक्तव्ये वर्णलोप आर्षः ॥ १६ ॥ ग्राम्याणां विषयिणां गीतं दंपतीप्रीत्यादिवर्णनरूपम् । क्वचित्कदाचिदपि । व्याधो यथा मृगवधाद्यर्थं मृगमोहकगीतं गायति तच्छ्रुत्वा ते तत्पार्श्वमायांति स च तान्बध्नाति मारयति चेति प्रसिद्धम् ॥ * ॥ ग्रामं विषयसमूहं सेवंत इति ग्राम्या विषयिणस्तेषाम्, विशेषणस्य व्यावर्तकत्वाद्भगवद्गीतं त्विति व्याख्यातम् । तदुक्तं पाद्मे—"ब्राह्मणो वासुदेवाख्यं गायमानोऽनिशं परम् । हरेः सालोक्यमाप्नोति" इति ॥ १७ ॥ किंचित्साम्येन तज्जत्वेन च मृगसाम्यता विभांडकात्मजेप्यस्ति ततोपि किंचिच्छिक्षितमाह—ग्राम्याणि, कामोद्बोधकानि । आसां स्त्रीणाम् ॥ * ॥ ० ॥ १८ ॥ असती अतत्त्वज्ञा बुद्धिर्यस्य स तथा ॥ * ॥ असती बहिर्मुखा बुद्धिर्यस्य सः ॥ १९ ॥ जिह्वाया दुर्जयत्वम् । अत्र तात्पर्यमाह—अयं भाव इति । यत इन्द्रियक्षोभकरा रसासक्तिरतो हेतोः ॥ * ॥ रसनेन्द्रियजयस्तु भगवदुच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान् ॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ २१ ॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा ॥ तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन ॥२२॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती ॥ अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥२३॥मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ ॥ तान्छुल्कदान्वित्तवतः कांतान्मेनेऽर्थकामुका ॥ २४ ॥ आगतेष्वपयातेषु सा संकेतोपजीविनी ॥ अप्यन्यो वित्तवान्कोऽपि मामुपैष्यति भूरिदः ॥ २५ ॥ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलंबती ॥ निर्गच्छंती प्रविशती निशीथं समपद्यत ॥ २६ ॥ तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः ॥ निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः ॥ २७ ॥ तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ॥ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥ २८ ॥

रसासक्तिं परित्यज्यौषधवद्भुंजीतेति । प्राणवृत्त्यैव संतुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जयत्वज्ञापनायोच्यत इति विशेषः ॥ २० ॥ २१ ॥ पिंगलाया नैराश्यं शिक्षितमिति वक्तुं तदाख्यानमाह पिंगलेत्यादिना । मे मया शिक्षितम् ॥ २२ ॥ स्वैरिणी कामचारिणी । संकेते रतिस्थाने ॥ २३ ॥ तान्वित्तवतः सधनानत एव शुल्कदान्मूल्यदान् । कांतान्सुरतार्हान्मेने ॥ २४ ॥ अपिः संभावनायाम् । अन्योऽपि कश्चिन्मामुपैष्यत्येवं दुराशयेत्युत्तरेणान्वयः ॥ २५ ॥ द्वार्यवलंबती अवलंबमाना पुनः प्रविशती पुनर्निर्गच्छंती एवंकुर्वती निशीथमर्धरात्रं प्राप ॥ २६ ॥ निर्वेदोऽलंबुद्धिः । वित्तचिंतैव हेतुर्यस्य सः ॥ २७ ॥ यथा यथावत् । मम मत्तः । शृणु ।

नामकीर्त्तनरसास्वादाद्भवेत् । तदुक्तम्—"रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते" ॥ २० ॥ ० ॥ * ॥ ० ॥ २१ ॥ तदाख्यानं पिंगलेतिहासम् । तस्याः पिंगं स्वर्णं लाति स्वीकरोति निजदेहार्पणेन, पिंगं पीताम्बरं श्रीकृष्णं लातीति वा तस्या अन्वर्थनाम्न्याः । किंचिद्वैराग्यम् । नृपा नंदंति येन वैराग्येण तन्नृपनन्दनं तद्वांस्तथा तत्संबुद्धौ । न ह्यविरक्तं वयमुपदेक्ष्याम इति संबुद्ध्यभिप्रायः ॥ * ॥ ज्ञानप्रकरणेप्यस्मिन्प्रसंगात्परमभक्तिमपि दर्शयति—पिंगलेति ॥ २२ ॥ स्वैरिणी अनिश्चितपतिका । संकेते वित्तसमये सति । कान्तमुपनेष्यती स्वसमीपं प्रापयिष्यन्तीति वा । काले सायंकाले । बहिर्द्वारि द्वारबहिर्भागे । अभूत्तस्थावित्यर्थः । उत्तमं प्रतारणोचितम् ॥ * ॥ संकेते रतिस्थाने उपनेष्यती स्वसमीपमानेष्यन्ती आनेतुमित्यर्थः । काले संध्यायां बहिर्द्वारि स्थिता ॥ २३ ॥ अत एव सधनत्वादेव । शुल्कं मैथुनमूल्यं तत्प्रदानम् ॥ * ॥ हे पुरुषर्षभ विषयवार्ताश्रवणेन सामान्यपुरुषाणां चेतसि क्षोभो भवेत्त्वं तु पुरुषेषु सत्पुरुषेष्वपि श्रेष्ठोस्यतस्तव चेतसि स नोदयत इति भावः । शुल्कदान्मूल्यं दत्त्वा सुरतग्राहिणः ॥ २४ ॥ आगतेष्वल्पप्रदत्वेनास्वीकृतत्वादपयातेषु गतेषु । यद्वा रतिं कृत्वा गतेष्वधिकवित्ताशयान्यमपेक्षन्त्याह—अप्यन्य इति ॥ * ॥ ० ॥ २५ ॥ दुराशया निजांगप्रदानेन धनाशया । एवं कुर्वती बहिरंतर्गमनागमनं कुर्वती ॥ * ॥ ० ॥ २६ ॥ 'हेतिः' इति पाठे चिन्ताछेदने हेतिः शस्त्रमित्यर्थः ॥ * ॥ अलंबुद्धिः स्वावज्ञया विषयेषु हेयत्वबुद्धिः । परम इति लौकिकनिर्वेदव्यावृत्तिः । तत्र हेतुः—सुखावह इति । सुखं श्रीकृष्णविषयकानंदमावहति प्रापयतीति सः । प्रसंगाच्चिन्तापदेन वित्तस्यैवोपस्थितेर्वित्तचिन्ताहेतुर्यस्य स तथा ॥ २७ ॥ अत्राक्षिपति—नन्विति । तत्राशाछेदे ॥ * ॥ तस्या इत्यर्धकम् । तस्याः संबंधसामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ह्यंगाजातनिर्वेदो देहबंधं जिहासति ॥ यथा विज्ञानरहितो मनुजो ममतां नृप ॥२९॥ पिंगलोवाच ॥ अहो मे मोहविततिं पश्यताऽविजितात्मनः ॥ या कांतादसतः कामं कामये येन बालिशा॥३०॥संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय॥ अकामदं दुःखभयादिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा॥३१॥अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्याऽर्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती॥३२॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धम् ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ॥ ३३ ॥

ननु किं निर्विण्णाया गीतश्रवणेन तत्राह । हि यस्मात्पुरुषस्याशापाशानां निर्वेदोऽसिर्यथा तथा छेत्ता ॥ २८ ॥ तत्र हेतुः । न हीति । अंग हे राजन् ॥ २९ ॥ अविजितात्मत्वे हेतुः । याऽहं बालिशा विवेकशून्या तस्या मे कुतः । येन कारणेनासतस्तुच्छान्नरात्कामं कामये ॥ ३० ॥ बालिशत्वं प्रपंचयति संतमिति चतुर्भिः । समीपे संतमंतर्यामित्वात् । इममपरोक्षमीश्वरम् ॥ ३१ ॥ अतिविगर्ह्याऽतिनिंद्या या वार्ता जीविका तया । कुतः । सांकेत्येन या वृत्तिस्तया । बहुव्रीहिणा स्वविशेषणं वा । परितापं प्रपंचयति । स्त्रैणादिति । स्त्रीलंपटादथ चार्थतृषो लुब्धादत एवानुशोच्यान्नराद्याऽहं वित्तं रतिं चेच्छती । मया वृथाऽऽत्मा परितापितः । केन वित्तमिच्छति तेन नरेण क्रीतेन स्वयं विक्रीतेनात्मना देहेन ॥ ३२ ॥ अहो धिङ् मां याऽहमतिबीभत्सितं भजामीत्याह । यदीति । वंशो नाम स्थूणासु निहितस्तिर्यग्वेणुः वंश्यास्तस्मिन्नुभयतो निहिता वेणवः अस्थिभिरेव निर्मिता वंशादयो यस्मिंस्तत् । तत्र पृष्ठे दीर्घमस्थि यत्स वंशः । पार्श्वास्थीनि वंश्यानि । स्थूणा हस्तपादास्थीनि ।

न्ये षष्ठी तयेत्यर्थः । आशा एव संसारबंधस्य पाशाः स्युस्तासां छेदने निर्वेद एवासिर्भवेत् । धर्मलुप्तोपमाधर्मच्छेदः ॥ २८ ॥ अजातनिर्वेदोऽनुत्पन्नवैराग्यः । देहबंधं संसारम् । मोक्षसाधनीभूतज्ञानाधिकारिविशेषणत्वादिहामुत्रार्थभोगविरागस्येति भावः ॥ * ॥ अस्या वश्योपादेयत्वमाह—न हीति । कामं कन्दर्पं कामये ॥ २९ ॥ बालिशत्वं पृच्छति—कुत इति । कामं निजाभीष्टम् ॥ * ॥ ० ॥ ३० ॥ रतिप्रदमानंददं रमणं पतिं नित्यमविनाशिनम् । अकामदमभीष्टपूरणासमर्थम् । अपरोक्षं स्वात्मरूपतयेत्यर्थः ॥ * ॥ निर्वेदेन श्रीदत्तात्रेयप्रभावजेन झटिति पूर्वसंस्कारोदयात्तादृशं तद्वाक्यं—सन्तमित्यादि । अंतर्यामित्वात्समीपे सन्तं न तु दूरगं, तत्रापि परमसुंदरत्वेन रमणं प्रेष्ठमिममेवाहं कथं न रमयामीति भावः । तत्रापि रतिप्रदं रतिसुखदं सैरंध्र्यादिभ्य इव अयमेव कथं मां न रमयत्विति किमन्येन पापिष्ठपुरुषेणेति भावः । वित्तप्रदं मद्दत्तरतितुष्टोयं वित्तमपि प्रचुरं दास्यत्येवेति भावः । तथापि नित्यमकामकलितं तत्रापि परोक्षं स्वयंप्रकाशत्वान्न तु परोक्षं तथाभूतमीश्वरं विहाय अकामदं कामपूर्तिं दातुमसमर्थं यथार्थसुखाप्रदत्वेन प्रत्युत दुःखप्रदम्, तत्र हेतुः—स्तुच्छम् । तस्यां निशि तदंगणे यदृच्छयागतशयितस्य श्रीदत्तात्रेयस्य कृपाभराद्भगवत्येतादृशी मतिरभूदिति प्राञ्चः ॥ ३१ ॥ विनिंद्या निजदेहार्पणरूपा । यद्वा—वार्ता किंवदन्ती । निंद्यत्वे हेतुं पृच्छति—कुत इति । संकेतेन गृह्यत इति सांकेत्यं रतिमौल्यरूपं द्रव्यं तेन । हेतौ तृतीया । स्वविशेषणे कृते हेत्वाकांक्षैव नोदेष्यतीत्याह—बहुव्रीहिणेति । अतिविग्रह्या वार्ता यस्यास्तया सांकेत्येन वृत्तिर्यस्यास्तया तथा चेति समासेनोभयं स्वविशेषणं वेति । अथ च स्त्रीलंपटत्वेपि । अत एव लब्धत्वादेव । अभिलषितादानेनानुशोच्यान्मुहुःशोकप्रदान् । तया मया ॥*॥ सांकेत्येन संकेतीकृतेन रतिप्राप्तवित्तेन वृत्तिर्वर्तनं तया हेतुना या विनिंद्या जीविका सा यस्यास्तया । स्त्रैणात्स्त्रीलंपटात् । इच्छत्यभूवम् ॥ ३२ ॥ बीभत्सितं निंदितम् । नवद्वाराणि नेत्रनासिकाकर्णानां षट्कं मुखं गुदालिंगे चेत्येवंरूपाणि । एतेनान्यकांतानां हेयत्वमुक्तम् ॥ * ॥ अतिबीभत्सितं विष्ठागृहमेवाहं शृंगाररसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ॥ याऽन्यमिच्छंत्यसत्यस्मादात्मदात्काममच्युतात् ॥ ३४ ॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ॥ तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥ ३५ ॥ कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः ॥ आद्यंतवंतो भार्याया देवा वा कालविद्रुताः ॥ ॥ ३६ ॥ नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा ॥ निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ॥ ३७ ॥ मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः ॥ येनानुबंधं निर्हृत्य पुरुषः शममृच्छति ॥ ३८ ॥

तथा रोमभिर्नखैश्च पिनद्धं छादितम् । तथाऽपि क्षरंति नवद्वाराणि यस्मिंस्तत् । एवंभूतागाररूपं नृशरीरमेतन्मत् मत्तोऽन्या का वा कांतबुद्ध्या उपैति सेवते ॥ ३३ ॥ सत्संगतौ सत्यामप्यहो मम मोह इत्याह । विदेहानामिति । याहमसती अच्युतादन्यम् । कामं भोगमिच्छंती सा ॥ ३४ ॥ एवं निर्विण्णा सती अतः परमेवं करिष्यामीत्याह । सुहृदिति । अयमीश्वरः । आत्मनैवाऽऽत्मानमेव निवेद्य तं विक्रीय विशेषेण क्रीत्वाऽनेनैव सह रमे । रमा लक्ष्मीर्यथा ॥ ३५ ॥ अन्यस्यासेव्यत्वं दर्शयति । कियदिति । आद्यंतवंतो ये कामा विषयाः कामदा नरा वा देवा वा कालकलिता भार्यायाः कियत्प्रियं कृतवंतो न किंचित् । अतो नेहामुत्र च तद्व्यतिरिक्तः कोऽपि सेव्योऽस्तीत्यर्थः ॥ ३६ ॥ एवं निश्चित्य स्वभाग्यमभिनंदति । नूनमिति । दुष्टा आशा यस्यास्तस्या मे ॥ ३७ ॥ ननु धनाप्राप्त्या क्लिष्टाऽसि कथं विष्णुः

स्वभोग्यमविदमित्याह–यदगारमिति ॥ ३३ ॥ अस्मात्स्वात्मरूपत्वेन नित्यापरोक्षात् । आत्मदात्संसारमोक्षदात् । अच्युतात्च्युतिरहितात् । एतेन सदा स्वपार्श्ववर्त्यत्युदारा विनाशिनं पतिं हित्वा तद्विपरीतमिच्छन्ती मूढैवेति सूचितम् ॥ * ॥ अस्मादिति स्फूर्त्या साक्षादिव निर्देशः । अच्युतात्स्वभक्तस्यापि कालभयवारकात् । तदुक्तं पाद्मे–"न च्यवन्ते तु यद्भक्ता महत्यां प्रलयापदि । अतोऽच्युतोऽखिले लोके विष्णुरेव न संशयः ॥" इति ॥ ३४ ॥ यद्वा–अयं हरिर्निरपेक्षोपकारित्वात्सुहृत्, आनंदघनत्वात्प्रेष्ठतमः, कामदत्वान्नाथः । वस्तुतस्तु आत्मा, तेनात्मना चेतसा रमे । विक्रीय तच्चरणारविन्दे चित्तं समर्प्येत्यर्थः । इयं पिंगला सामान्यवेश्या न किन्तु विशिष्टाप्सरस्स्वेका, अन्यथाऽस्या नैतादृशी बुद्धिरुत्पद्येत । तदुक्तम्–"भगवद्भार्यतायोग्याः काश्चिदप्सरसः स्त्रियः । रमावेशात्कदाचित्स्युस्तास्वेका पिंगलाऽभवत् ॥ तदन्यासां महान्दोषो भगवद्भर्तृता स्मृतौ । " इति तीर्थोक्तेः ॥ * ॥ तर्हि किमतः परं चिकीर्षसीति चेदेवं करोमीत्याह–आत्मना च देहेनानेन मूल्यभूतेन दत्तेन तं विशेषेण क्रीत्वाऽहं प्राप्तेन तेन प्रेष्ठतमेन सह रमे 'अहं भक्तपराधीनः' 'वशे कुर्वन्ति मां भक्त्या' इति स्मृतेः,"भक्तिवशः पुरुषः" इति श्रुतेश्च । अनेनैवेत्यवधारणेनान्यस्यासेव्यत्वमभजनीयत्वम् । अतो देवादीनां कालग्रस्तत्वे प्रियं कर्तुमशक्यत्वात् ॥ ३५ ॥ लोकसिद्धकांतत्यागे लोकविलक्षणकांतस्वीकारेऽलंबुद्धिर्गोचरकामादातृत्वमाद्यंतवत्वं च निमित्तमित्यभिप्रेत्यैवाहुः स्वाभिचरणा–अन्यस्य भगवदितरस्येति । यदि नरा अयोग्यास्तर्हि देवा भवेयुरित्यत आह–देवा वेति । यतो देवा अपि किञ्चित्कर्तुं न समर्था अतो हेतोः । इत्यर्थ इति–न हि श्रीकृष्णं विना कोपि किञ्चिद्दातुं पातुं वा समर्थोऽतः स एव सर्वेश्वरत्वात्सेव्य इति भावः ॥ * ॥०॥ ३६ ॥ एवं निश्चित्य विश्वबंधविध्वंसिनि श्रीकृष्णे प्रसन्ने सति किमसुलभमपि तु सर्वमेवेत्येवं निश्चयं कृत्वा । नूनमिदानीम् । केनापि जन्मांतरीयेण वक्तुमशक्येन । यद्यतः । दुष्टा स्वांगार्पणेन धनविषयाऽऽशा तृष्णा यस्याः ॥*॥ एवमन्यस्यासेव्यत्वकथनेनेश्वरस्यैव सेव्यत्वं निश्चित्य । केनापि सतां संगलक्षणेन ॥ ३७ ॥ अत्राशंकते–नन्विति । इत्यर्थ इति–न हि मंदभाग्यानां सर्वबन्धापनोदकवैराग्योदयो भवतीति भावः । अनुबध्नातीत्यनुबंधस्तम् । यद्वा–समुद्भूतभगवद्भक्तिसुधा पिंगला पुनः शब्दादिविषयनिमित्ताः क्लेशा मा भूवन्निति प्रार्थयते–मैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनोपकृतमादाय शिरसा ग्राम्यसंगताः ॥ त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरम् ॥ ३९ ॥ संतुष्टा श्रद्दधत्येतद्यथालाभेन जीवती ॥ विहरा
म्यमुनैवाहमात्मना रमणेन वै ॥४०॥ संसारकूपे पतितं विषयैर्मुषितेक्षणम् ॥ ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥४१॥ आत्मैव ह्यात्मनो
गोप्ता निर्विद्येत यदाखिलात् ॥ अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥ ४२ ॥ ब्राह्मण उवाच ॥ एवं व्यवसितमतिर्दुराशां कांततर्षजाम् ॥
छित्त्वोपशममास्थाय शय्यामुपाविवेश सा ॥ ४३ ॥ आशा हि परमं दुःखं नैराश्यं परमं सुखम् ॥ यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ॥
॥ ४४ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधेऽजगरादिनवगुरुशिक्षानिरूपणं नामाष्टमोऽध्यायः ॥ ८ ॥

प्रीतस्तत्राह । मैवमिति । मंदभाग्या चेदहं स्यां तर्ह्येवं निर्वेदहेतवः क्लेशा न स्युरित्यर्थः । येन निर्वेदेनानुबंधं गृहादिकं निर्हृत्य परित्यज्य ॥ ३८ ॥ अतस्तेन श्रीविष्णुनोपकृतं कृतमुपकारं निर्वेदलक्षणम् । ग्राम्येषु नरेषु विषयेषु वा संगताः ॥ ३९ ॥ कथं व्रजसि तदाह । संतुष्टेति ॥ ४० ॥ ननु ब्रह्मादीन्हित्वा अमुनै वेति कोऽयं नियमस्तत्राह । संसारेति । मुषितेक्षणमपहृतविवेकम् ॥४१॥ तर्हि किमात्मत्राणोपाधिना तं भजिष्यसि । न । तत्र सर्वतो निर्विद्य भगवद्भजने प्रवृत्तस्यात्मन एव समर्थत्वादित्याह । आत्मैवेति । यदा एवं जगत्पश्येत्ततश्चाप्रमत्तः सन्निखिलादिहामुत्र च भोगान्निर्विद्येत तदा ह्यात्मनैवात्मनो गोप्तेत्यन्वयः । अतः केवलं प्रेम्णैव भजामी ति भावः ॥ ४२ ॥ कांतस्य तर्षोऽभिलाषस्ततो जाताम् ॥४३॥ फलितमाह । आशा हीति॥४४॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायामष्टमोऽध्यायः ॥८॥

मिति । अनुबंधं संसारबंधम् । शं भगवन्निष्ठालभ्यं सच्चिदानंदलक्षणम्, अं सर्वविलक्षणं ब्रह्म प्राप्नोतीत्यर्थः । कुतो मा भूवन्नित्यतो वाह—येन हेतुना पुरुषोऽनुबंधं बंधनिवर्तकं भक्त्यादिकं निर्हृत्य त्यक्त्वा शमं शमलं नरकमृच्छतीति । एतस्मादिति शेषः । एकदेशविकृतः शमलशब्दोनन्यवदिति न्यायोत्रानुसंधेयः ॥ * ॥ मंदभाग्या चेदहं स्यामित्यार्थिकार्थत्वादित्यर्थ इत्युक्तम् । शमं बुद्धेर्भगवन्निष्ठताम् ॥ ३८ ॥ यतो निर्वेदस्सुखा हेतुरतो हेतोः । वृत्तेः सुलभत्वात्—विषयेषु वेति । संगताः प्राप्ता दुराशास्त्यक्त्वा तमधीश्वरमीश्वरस्याप्यधिष्ठानं तत्कल्पनाधारं कृष्णमेव ॥ * ॥ अतो विष्णोः प्रीतत्वात् । तं कृतोपकारम् ॥ ३९ ॥ एतद्वक्ष्यमाणम् 'संसार कूपे' इत्यग्रिमश्लोकाभ्यां वक्ष्यमाणम् । श्रद्दधती श्रद्दधाना । वैराग्यप्रभावाविर्भावेनामुनेत्यपरोक्षोक्तिः ॥ * ॥ शरणं गता सती कीदृशी बुभूषसीत्यत्राह—संतुष्टेति । एतच्छ्रद्दधती विश्वसती । एतदेव किं तत्राह—विहरा मीति ॥ ४० ॥ अत्राक्षिपति—नन्विति । अन्यः कृष्णादन्यः । यद्वा—स्वात्मनो वा न कोपीत्यर्थः ॥ * ॥ कोऽन्यस्त्रातुमधीश्वरो न कोपि तस्माद्ब्रह्मादीनां त्रातुमनीश्वरत्वात् पातीति पतिरिति निरुक्त्या पतित्वं न संगच्छत इत्यमुनैवेति सावधारणमुक्तम् ॥ ४१ ॥ पुनराशङ्कते—तर्हीति । आत्मत्राणमुपाधिर्निमित्तं यत्र तेन संकल्पेन । नेत्याह । तत्रात्मत्राणे । आत्मन एव समर्थत्वादिति योज्यम् । यदा यस्यामवस्थायाम् । एवं संसारकूप इत्याद्युक्तम् । ततश्चैवं दर्शनात् । यतो भगवद्भजनप्रवृत्त आत्मा स्वतः समर्थो भवत्यतो हेतोः । इति भाव इति—पररक्षणसमर्थभगवद्भक्तानां स्वरक्षणार्थं न यत्नो भवतीति तात्पर्यम् ॥ * ॥ तर्हीत्यादि शंकासमाधाना भासः । आत्मैवेति—यदात्माऽखिलाद्भोगान्निर्विद्येत, तत्र हेतुः—इदं जगत्कालाहिना ग्रस्तं पश्येत्तदात्मा परमात्मा आत्मनो जीवस्य स्वस्य गोप्ता संसाराद्रक्षिता भवेन्ममात्मा च संप्रत्येतादृश एवाभूदतोहं स्वत एव निस्तीर्ण संसाराभूवमेव तेनातः परं केवलं प्रेम्णैव तं भजिष्य इति भावः ॥४२॥ एवमुक्तरीत्या। निश्चितधीः । सा पिंगला॥*॥उपशमं बुद्धेः श्रीकृष्णकांतैकनिष्ठारूपं रागम्, तथा चास्या रागरूपा भक्तिर्न तु वैधीति सूचितम्।साधनानुष्ठानमं तरैव 'रमेऽनेन यथा रमा' इति प्रेममयतृष्णाया एव दर्शितत्वात् । रागरूपायाश्चेदं लक्षणम्—"इष्टे स्वारसिकी रागः परमाविष्टता भवेत् । तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोदिता ॥" इति । इष्टे स्वानुकूलविषये स्वारसिकी स्वाभाविकी या परमाविष्टता तद्धेतुः प्रेममयी तृष्णा सा रागो भवेत् । तन्मयी तदेकप्रेरिता या श्रवणमननादिरूपा भक्तिः सा रागरूपोच्यते इत्यर्थः ॥ ४३ ॥ सुखमानंदैकरसं हरिमेव यथा सुष्वाप तस्मिँल्लीनाभवत् । यथायोगे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मण उवाच ॥ परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणाम् ॥ अनंतं सुखमाप्नोति तद्विद्वान्यस्त्वकिंचनः ॥ १ ॥ सामिषं कुररं जघ्नुर्बलिनो ये निरामिषाः ॥ तदामिषं परित्यज्य स सुखं समविंदत ॥ २ ॥ न मे मानावमानौस्तो न चिंता गेहपुत्रिणाम् ॥ आत्मक्रीड आत्मरतिर्विचरामीह बालवत् ॥ ३ ॥ द्वावेव चिंतया मुक्तौ परमानंद आप्लुतौ ॥ यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः ॥४॥ क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान् ॥ स्वयं तानर्हयामास क्वापि यातेषु बंधुषु ॥५॥ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव ॥ अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ॥ ॥६॥ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः ॥ बभंजैकैकशः शंखान्द्वौद्वौ पाण्योरशेषयत् ॥ ७ ॥ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः ॥ तत्राप्येकं निरभिदद्देकस्मान्नाभवद्ध्वनिः ॥ ८ ॥

नवमे कुररादिभ्यो देहतश्चोपशिक्षितम् ॥ श्रुत्वा यदुः कृतार्थोऽभूदिति कृष्णेन वर्णितम् ॥ १ ॥ कुरराच्छिक्षितमाह । परिग्रहो हीति । यद्यत्प्रियतमं तस्यतस्य परिग्रहः । तद्विद्वान् परिग्रहो दुःखमिति विद्वान्सन् । यस्त्वकिंचनस्त्यक्तपरिग्रहो न तु दरिद्रः ॥ १ ॥ तदाह । सामिषमिति ॥ २ ॥ अर्भकशिक्षामाह । नेति । गेहपुत्रिणां तद्वतां या भवति चिंता सा च मे नास्ति । आत्मनैव क्रीडा यस्य सः । आत्मनि रतिः प्रीतिर्यस्य सः ॥ ३ ॥ नन्वज्ञसर्वज्ञयोः किं सादृश्यं नैश्चिंत्यं परमसुखमित्याह । द्वाविति । विमुग्धोऽज्ञः जडोऽनुद्यमः एवंभूतो यो बालो यश्च प्रकृतेः परमीश्वरं प्राप्तस्तौ द्वौ ॥ ४ ॥ कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह । क्वचिदित्यादिना । वृणानान्स्ववरणायागतान् । बंधुषु पित्रादिषु ॥ ५ ॥ शंखाः शंखवलयाः । महद्यथा भवति तथा स्वनं चक्रुः ॥ ६ ॥ सा महती बुद्धिमती । तत्स्वयं शाल्यवहननं जुगुप्सितं दरिद्रताद्योतकम् । एकैकशः क्रमेणैकमेकं बभंज स्वकरादपसारितवती ॥ ७ ॥ निरभिदत् पृथक्कृतवती ॥ ८ ॥

द्वितीया 'ततोऽन्यत्रापि दृश्यते' इत्युक्तत्वात् ॥ * ॥ सुष्वाप भगवदेकाश्रयत्वेन निर्वृता बभूवेत्यर्थः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धेऽष्टमोऽध्यायः ॥ ८ ॥ कृतार्थः कृतकृत्यः (१) । यः स सुखमाप्नोतीत्यन्वयः ॥ * ॥ ० ॥ १ ॥ तत् प्रियतमत्यागात्यागयोस्सुखदुःखम् । सामिषं समांसम् । तत्स्वीकृतामिषम् । स त्यागी कुररः ॥ * ॥ ० ॥ २ ॥ तद्वतां गृहवतां पुत्रवतां च या चिन्ता—मे गृहे सदा शुभं भवतु न कदाप्यशुभम्, मे पुत्राः सुचरिता भवेयुर्माऽसुचरिताः इत्येवंरूपा सेत्यर्थः ॥ * ॥ ० ॥ ३ ॥ चिंता त्वज्ञानामपि न संभवतीत्यज्ञसर्वज्ञयोः को भेद इत्याक्षिपति—नन्विति । अज्ञसर्वज्ञयोः किं सादृश्यं केन धर्मेण तौल्यमित्यत्राह—नैश्चिंत्यं परमं सुखं तुल्यं विवेकाविवेककृतो भेद इति ज्ञेयम् । विशेषेण मुग्धो मूढो विमूढः 'मुग्धः सुंदरमूढयोः' इति विश्वः । एवंभूतो ज्ञानोद्यमरहितः । गुणेभ्य इति बहुत्वात्त्रिगुणा प्रकृतिर्लक्ष्यतेऽत आह—प्रकृतेः परमिति ॥ * ॥ ० ॥ ४ ॥ वरवरणोत्तरं कुंमारीवरणमपि वरपक्षीयैः क्रियते "पंचांगशुद्धिदिवसे चंद्रताराबलान्विते । विवाहोक्तेषु ऋक्षेषु कुजवर्जितवासरे ॥ मासाद्यदिवसं रिक्तामष्टमीं नवमीं तिथिम् । त्यक्त्वान्यदिवसे गंधस्रक्तांबूलफलान्वितैः ॥ सह वृद्धद्विजगणैर्वरयेत्कन्यकां सतीम् ।" इति कश्यपेन तद्वरणमुहूर्तोक्तेः ॥ * ॥ अर्हयामास आवृतसर्वांगैव गेहान्निष्क्रम्य दर्भासनजलादिभिरातिथ्यं चक्रे ॥ ५ ॥ तेषां वरणार्थमागतानाम् । "भोजनेभ्यवहारः स्याद्युद्धत्यागेऽभिवर्जितः" इति कोशात् । शंखवलया भाषायाम् 'चुरियाँ' इति प्रसिद्धाः ॥ * ॥ कदा ते आयास्यन्ति कदा ते तंडुलान्कारिष्यन्तीति मनसि कुर्वत्यास्तस्याश्चेष्टितमाह—समग्रशखानां प्रकोष्ठत्वायोगान्मुख्यार्थबाधः कार्यकारणलक्षणो योगो रूढिश्चेति शंखशब्दस्य वलये लक्षणा । स्वनशब्देन पुंस्त्वेन महदिति न तद्विशेषणमतः क्रियाविशेषणम् ॥६॥ यथाश्रुतधात्वर्थस्वीकारेऽमंगलं स्यादिति हेतोरवतारणमर्थो धातूनामनेकार्थत्वादाह—स्वकरादित्यादि ॥*॥ भंजनस्यामंगलत्वे तु धातूनामनेकार्थत्वापदसारितवती ॥ ७ ॥ तत्रापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्वशिक्षमिमं तस्या उपदेशमरिंदम ॥ लोकाननुचरन्नेतॉंल्लोकतत्त्वविवित्सया ॥ ९ ॥ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ॥ एक एव चरेत्तस्मात्कुमार्या इव कंकणः ॥ १० ॥ मन एकत्र संयुज्याज्जितश्वासो जितासनः ॥ वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः ॥ ११ ॥ यस्मिन्मनो लब्धपदं यदेतच्छनैःशनैर्मुंचति कर्मरेणून् ॥ सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनम् ॥ १२ ॥

ननु कुमार्यास्तव च कथं संगतिस्तत्राह । लोकानिति ॥ ९ ॥ वास इति प्रथमांतपाठे कलहहेतुः । वार्ता गोष्ठी हेतुर्भवेदित्यर्थः ॥ १० ॥ चित्तैकाग्रता द्वैतास्फूर्तिलक्षणसमाधिहेतुरिति शरकाराच्छिक्षितमित्याह । मन इति । तत्रोपायमाह । जितेति । आसनजये श्वासजयस्तस्य च जये श्वासाधीनं मनो निश्चलं भवति । ननु क्षणं निश्चलं सदपि मनो विषयवासनया यदि विक्षिप्येत सुषुप्ताविव सर्वथा लीयेत वा तदा किं तत्राह । वैराग्येणेति । वैराग्येणाविक्षिप्यमाणमभ्यासयोगेन लक्ष्ये ध्रियमाणं स्थिरीक्रियमाणम् ॥ ११ ॥ एकत्रेति कुत्र तदाह । यस्मिन्निति । यल्लयविक्षेपात्मकं मन एतद्यस्मिन्परमानंदरूपे भगवति लब्धास्पदं सत्कर्मरेणून्कर्मवासनां मुंचति तस्मिन् । ननु कर्मवासनात्यागेऽपि सुषुप्तिवल्लयो दुर्वारः । न । सत्त्वेनेति । वृद्धेनोपशमात्मकेन । रजस्तमसोरभावे विक्षेपलयाभावान्निर्वाणमवृत्तिकं ध्येयाकारेणावस्थान

द्वयोरपि मध्ये ॥ * ॥ ० ॥ ८ ॥ अत्राशंकते–नन्विति । तस्याः कुमार्याः । इमं वक्ष्यमाणम् 'वासे बहूनाम्' इत्यादिरूपम् ॥ * ॥ लोकाननुचरन्निति–तद्दिने मया तत्रैव स्थितं सर्वेप्येते गुरवो मया स्वचक्षुषैव दृष्टा न तु सर्वज्ञत्वेन ज्ञाता इति भावः। इमं योगिभिरप्यसंकीर्णत्वलक्षणमुपदेशं कर्तव्यार्थम्।हे अरिंदम–त्वमप्यात्मनिष्ठाध्वंसकं जनसंमर्दलक्षणमरिं नाशयेति भावः। लोकेषु जनेषु यद्धेयोपादेयवस्तुनस्तत्त्वं स्वरूपं तज्जिज्ञासया "तत्त्वं वाद्यप्रभेदे स्यात्स्वरूपे परमात्मनि"इति भावः॥९॥इत्यर्थ इति–प्रायेण मिलितौ द्वौ वार्तामेव कुर्वाणौ दृश्यते इति भावः।अत्र दुर्जनैः सह वासो निषिध्यते न तु सज्जनैरपि तस्य विहितत्वात्।"असज्जनैस्तु संवासो न कर्तव्यः कथंचन । यावद्यावच्च बहुभिः सज्जनैः स तु मुक्तिदः॥" इति तीर्थोक्तेः। "संगः सर्वात्मना त्याज्यश्चेत्त्यक्तुं शक्यते न च । सत्स्वेव स विधातव्यः सन्तः संगस्य भेषजम् ॥" इति शिष्टोक्तेश्च । यस्मात्कलहादिरनुसंधानविरोधी तस्मादित्यर्थः ॥ * ॥ वासे वास इति पाठौ द्वौ । अत्र दारिद्रकुमारी अप्राप्तपतिका झणत्काराभावार्थं कंकणान्यथा दूरीकरोति तथैव ज्ञानयोगः स्वाश्रितान्मुनीन्निःसंगानेव करोति । यथा च राजकुमारी पतिमती झणत्कारसिद्ध्यर्थं कंकणान्परिधत्ते तथा श्रीमती भक्तिकुमारी स्वाश्रितान्वैष्णवान्मधुमधुरतरनामकीर्तनध्वनिरसार्थं तान्परस्परसंगिन एव विधत्ते न त्वसंगिन इति ज्ञेयम् ॥ १० ॥ एकत्रेति वक्ष्यमाणत्वाद्ब्रह्मणि तत्र मनस एकत्र योगे, तस्य च श्वासस्य च "सत्संगो वासनात्यागोध्यात्मविद्याविचारणम् । प्राणस्पंदनिरोधश्चेत्युपाया मनसो जये॥" इति योगवासिष्ठे । श्वासजयस्यापि मनोनैश्चल्यहेतुत्वोक्तेः । पुनराक्षिपति–नन्विति । अतंद्रितो नासाग्रदत्तदृष्टिः । निमीलने लय उन्मीलने विक्षेपस्तन्निवृत्तयेऽर्द्धोन्मीलितनेत्रस्तिष्ठेदिति भावः ॥ * ॥ द्वैतस्य प्रपंचस्य स्फूर्तिहेतुलक्षणं स्वरूपं यस्यैवंभूतो यस्समाधिस्तस्य हेतुश्चित्तैकाग्र्यतैव । तत्र चित्तैकाग्र्यतायाम् । तस्य श्वासस्य जये । ध्रियमाणमित्यस्यैवाविक्षिप्यमाणमित्यप्यर्थस्तत्र वैराग्येण विक्षेपसंभावना निरस्ताभ्यासयोगेन लयोपि निरस्तः ॥ * ॥ **संदर्भस्तु**–रागबलादेव मनःइतस्ततश्चलति तत्राह–वैराग्येणेति ध्रियमाणं भगवत्येव ॥ ११ ॥ पुनराशंकते–नन्विति । नेत्याह । तत्कार्यं गुणकार्यम् । तद्वृत्तयः । अवृत्तिकमनसो ध्येयाकारेण स्थितौ प्रमाणमाह–तदुक्तमिमिति । स्पष्टार्थः श्लोकः ॥*॥ **दीपिका**–तल्लक्ष्यमाह–तत्कार्यं च रागादितद्धेयाकारावस्थानम् । वृत्तिशून्यस्य वितर्कादिचतुर्भेदरहितस्य मनसोऽध्येयब्रह्माकारतया या स्थितिरेकाग्रतावस्थाऽसावसंप्रज्ञातनामा समाधिरुच्यते । यथाह भगवान्पतंजलिः–" तस्याऽपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा ॥ यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे ॥ १३॥ एकचार्यऽनिकेतः स्यादप्रमत्तो गुहाशयः ॥ अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः ॥ १४ ॥ गृहारंभो हि दुःखाय विफलश्चाध्रुवात्मनः ॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते ॥ १५ ॥ एको नारायणो देवः पूर्वसृष्टं स्वमायया ॥ संहृत्य कालकलया कल्पांत इदमीश्वरः ॥ १६ ॥

मुपैति । कुतः । अनिंधनम् इंधनं गुणास्तत्कार्यं च तद्रहितम् । तदुक्तं योगशास्त्रे । " मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ॥ याऽसंप्रज्ञातनामाऽसौ समाधिरभिधीयते ॥ " इति ॥ १२ ॥ ततश्च न द्वैतस्फूर्तिरित्याह । तदेति । बहिर्दर्शनादिना । अंतरं स्मृत्या । इषौ गतात्मा तस्य ऋजूकरणे दत्तचित्तो भेरीघोषैः सेनया च सहांतिके व्रजंतं नृपतिमपि न वेद तद्वत् ॥ १३ ॥ सर्पाच्छिक्षितमाह । एकचारीति । योगिसंमर्दस्यापि त्यागे कुमारी गुरुरुक्तः । जनसंगत्यागे तु सर्पः । स यथा जनाच्छंकमान एकाकी विचरति नियतनिकेतरहितश्च सदाऽप्रमत्तश्चैकांतवासी च । आचारैर्गतिभिः सविषो निर्विषो वेति न लक्ष्यते च । असहायश्च मितभाषी च तद्वन्मुनिर्वर्तेतेत्यर्थः ॥ १४ ॥ किंच गृहारंभ इति । अध्रुवात्मनो नश्वरदेहस्य । सुखं यथा भवति तथा वर्धते ॥ १५ ॥ कारकसामग्रीनिरपेक्षात्केवलादीश्वराद्विश्वसृष्टि

निरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधिः " इति । अस्यार्थः—तस्य संप्रज्ञातस्य विलये सति सर्वचित्तवृत्तीनां परमात्मनि विलयान्निर्बीजोऽसंप्रज्ञातसमाधिरिति ॥ १२ ॥ ततश्च ध्येयाकारेण मनसः स्थितेश्च । आदिना श्रवणादिग्रहः । बहिरंतरं बाह्याभ्यन्तरं वस्तु ॥ * ॥ दीपिका—ततश्च ध्येयाकारेणावस्थानानंतरं यदाऽसंप्रज्ञातसमाधिर्भवति तदात्मनि परमात्मानि, एवमेकाग्रतयाऽवरुद्धं निरुद्धं चित्तं येनः सः । बहिर्दर्शनादिना घटादि, अंतरं स्मृत्या सुखादि किंचिदपि न वेद ॥ १३ ॥ एकचारी द्वितीयसंगशून्यः । मन्निकेतमिदमित्यध्यासशून्यो वाऽनिकेतः । अप्रमत्तः स्वरूपे एकान्तवासी निर्विक्षेपवासी । यद्वा—गुहायां हृत्कमलमध्ये गूढायां परदेवतायामाशयोन्तःकरणं यस्य स तथा, निरंतरं भगवदुपासनापर इत्यर्थः । तद्वत्सर्पवत् । इत्यर्थ इति—न हि सर्पः सजातीयमिलितः संभाषमाणः कृतैकत्रवासश्च दृश्यते यथा तथैव विवेकिना भाव्यमिति भावः ॥ * ॥ संगत्यागत्वेनाभेदात्पौनरुक्त्यमाशंक्य विशेषं व्याचष्टे—गुहाशय एकान्तवासी । गतिभिः सक्रोधदशनादिचेष्टाभिः । एकचारित्वादिविशेषणानां सर्पासाधारणत्वात्सर्पोत्र गुरुर्व्याख्यातः । मुनिपक्षे—आचारो जडवद्योगचर्यास्तैर्विद्वानविद्वान्वेति न ज्ञायमानः ॥ १४ ॥ अन्यच्च सर्पशिक्षितमाह—किंचेति । गृहारम्भो गृहकरणम् । अतिदुःखाय आमेष्टकानिर्मितस्य प्रत्यब्दं लेपनादिना पक्वेष्टकादिनिर्मितस्य कुड्येष्टकापातादिना चातीवक्लेशो भवतीति भावः । परकृतवेश्मप्रविष्टस्तु जलपातादिना कुड्यपातादौ संभाव्यमाने ततो निजकंथाद्युपादायान्यत्र गत्वा सुखमाप्नोत्येवेति भावः ॥ * ॥ विफलः प्रत्युतातिदुःखायैव भवति । तर्हि कुत्र वसेदित्यपेक्षायामाह—सर्प इति ॥ १५ ॥ ० ॥ * ॥ एक इति सार्द्धकम् । नारायणो महत्स्रष्ट्राख्यः सर्वब्रह्मांडांतर्यामी पुरुषः । एकः स्वशक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ॥ कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥ सत्त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥१७॥ परावराणां परम आस्ते कैवल्यसंज्ञितः ॥ केवलानुभवानंदसंदोहो निरुपाधिकः ॥ १८ ॥ केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ॥ संक्षोभयन्सृजत्यादौ तया सूत्रमरिंदम ॥ १९ ॥ तामाहुस्त्रिगुणव्यक्तिं सृजंतीं विश्वतोमुखम् ॥ यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् ॥ २० ॥

संहारावूर्णनाभिदृष्टांतेन मया संभाविताविति वक्तुं प्रथमं संहारप्रकारमाह एक इति सार्धत्रयेण । एकः कारकनिरपेक्षः पूर्वसृष्टमिदं जगत्कालकलया कलाशक्त्या संहृत्य ॥ १६ ॥ एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत् । कारणभूतासु सत्त्वादिषु शक्तिष्वपि साम्यं नीतासु सतीषु गुणसाम्यं प्रधानं तदुपाधिः पुरुषश्च तयोरीश्वरः ॥ १७ ॥ परावराणां परे ब्रह्मादयः अवरेऽन्ये च मुक्ता जीवास्तेषां परमः प्राप्य आस्ते । कुतः । कैवल्यसंज्ञितो मोक्षशब्दाभिधेयः । तत्र हेतुः । केवलेति । केवलो निर्विषयः । स्वप्रकाशः आनंदानां संदोहः समूहः परमानंद इत्यर्थः । कुतः । निरुपाधिकः ॥ १८ ॥ अतः केवलादेव सृष्टिं दर्शयति । केवलेनात्मानुभावेन कालेन । सूत्रं क्रियाशक्तिप्रधानं महत्तत्त्वं सृजति । जीवसंसारहेतुभूते सूत्रे सृष्टेऽपि त्वं मा भैषीरिति संबोधयति । अरिंदम अरीन् रागादीन्दमयितुं समर्थः ॥ १९ ॥ सूत्रस्यैव व्यक्तिशब्देनोच्यमानस्य तामिति स्त्रीलिंगेन परामर्शः । त्रिगुणव्यक्तिं गुणत्रयकार्यम् । अत एव विश्वतोमुखं नानाविधं त्रिगुणात्मकं विश्वमहंकारद्वारेण सृजंतीम् । त्रिगुणकार्यस्य सूत्रसंज्ञायां कारणमाह । यस्मिन्निति । कारणभूते समष्टिरूपे यस्मिन्निदं विश्वं प्रोतं ग्रथितम् । " वायुर्वै गौतम सूत्रं वायुना वै

व्यतिरिक्तकारकशून्यः । कालोपि कला यस्यास्तया यया स्वशक्तिरूपया कल्पादौ पूर्वं सृष्टमिदं तथैव कल्पांते संहृत्य ॥ १६ ॥ आत्मानुभावेनात्मशक्तिरूपेण ॥ * ॥ अखिलानां तेषामाश्रयो लयस्थानं सत् । अत एवैकः स्वजातीयचिद्रूपजीवभेदरहितः । अद्वितीयो विजातीयप्रधानादिभेदरहितश्च सन्नात्माधारः स्वांशिरूपमहावैकुंठनाथःनामाधारोऽभूत् । तस्मिन्नेव प्रविष्ट आसीदित्यर्थः । सर्वस्य तत्र लयेन पृथग्व्यपदेशानर्हत्वादिति भावः ॥ * ॥ संदर्भः—कालेनेति युग्मकम् । आत्मानुभावेन स्वप्रभावरूपया शक्त्या कालेन "प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्" इति कापिलेयोक्तेः । आदिपुरुषो महत्स्रष्ट्राख्यः प्रथमः पुरुषः । प्रधानपुरुषेश्वरः प्रकृतेर्जीवानां च नियंता ॥ १७ ॥ प्राप्यत्वे हेतुं पृच्छति—कुत इति । तत्र कैवल्यत्वे । इत्यर्थ इति—सर्वानंदास्पदत्वात्तद्रूपत्वाद्वा परमानंद इति भावः ॥ * ॥ परेषां स्वीयांशानामवरेषां विभिन्नांशानां च परमाश्रयो सौ कैवल्यसंज्ञितस्तदाख्ययाम्नातः सन्नास्ते तदानीमासीदित्यर्थः । केवल एव कैवल्यम्, स्वार्थे ष्यञ् चातुर्वर्ण्यादिवत् । तत्र केवलत्वे । स्वगतभेदं दर्शयति—केवलेति । स्वरूपशक्तिवैचित्र्यात् केवलानां शुद्धानां स्वरूपभूतानामनुभावानां यः संदोहस्तद्रूपः । केवलत्वं दर्शयति—निरुपाधिक इति । तदुक्तं तृतीये—'सुप्तशक्तिरसुप्तदृक्' इति ॥ १८ ॥ यतः परमानन्दोस्ति अतो हेतोः "आनंदादेव खल्विमानि भूतानि जायंते" इत्यादिश्रुतेः । तया मायया ॥ * ॥ स्वरूपशक्तिमेव स्थापयन्सृष्टिं योजयति—केवलेति । सृष्टिकाले महावैकुंठनाथादाविर्भूय स एव शुद्धस्वरूपप्रभावरूपया शक्त्या त्रिगुणात्मिकां प्रधानैकरूपां स्वमायां संक्षोभयन्विषमगुणां कुर्वन् ॥ १९ ॥ अत एव त्रिगुणकार्यत्वादेव । श्रोतत्वे प्रमाणमाह—"वायुर्वा" इत्यादिश्रुतिम् । हे गौतम सूत्रमेव वायुः संदब्धानि संग्रथितानीति श्रुतिपदार्थः । संसरति देहयोगवियोगमनुभवति ॥ * ॥ तामिति स्त्रीलिंगेन सूत्रस्यैव परामर्शस्तत्सूत्रमेव त्रिगुणव्यक्तिं गुणत्रयकार्यमाहुरित्यर्थः । तच्छब्देन क्वचिद्विधेयपरामर्शकत्वस्यापि सिद्धांतितत्वात्, नित्यं यत्कर्म स यम इतिवत् । अत एव गुणत्रयस्यादिकार्यत्वादेव । हे गौतम वायुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ॥ तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ २१ ॥ यत्रयत्र मनो देही धारयेत्सकलं धिया ॥ स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ॥ २२ ॥ कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः ॥ याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन् ॥ २३ ॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः ॥ स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो ॥ २४ ॥ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कम् ॥ तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसंगः ॥ २५ ॥

गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदब्धानि " इति श्रुतेः । येन वाय्वात्मना प्राणरूपेण जीवः संसरति ॥ २० ॥ तदेवं शिक्षितमर्थमुक्त्वा दृष्टांतमाह । यथेति । हृदयादुद्गताम् । वक्त्रतो वक्त्रेण संतत्य प्रसार्य विहृत्य क्रीडित्वा ॥ २१ ॥ भगवद्ध्यानपराणां तत्सारूप्यं न चित्रमिति पेशस्कृतो भ्रमरविशेषाज्ज्ञातमित्याह । यत्रयत्रेति । सकलमेकाग्रम् ॥ २२ ॥ कुड्यां प्रवेशितो निरुद्धो भयेन ध्यायंस्तत्सात्मातां तत्सारूप्यम् । साम्यतामिति पाठे त्वार्षता । पूर्वरूपमसंत्यजन्नित्यस्यायमभिप्रायः । यदा तेनैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहांतरेण सारूप्यं घटत इति ॥ २३ ॥ स्वदेहादेव शिक्षितमाह । स्वात्मेति । स्वात्मनो देहाच्छिक्षिताम् ॥ २४ ॥ गुरुत्वे हेतुः । विरक्तिविवेकयोर्हेतुः । विरक्तिहेतुत्वमाह । सत्त्वनिधनमुत्पत्तिविनाशौ बिभ्रत्स्म । किंच सततं संततमार्त्युदर्कम् आर्तिर्दुःखं तदेवोदर्कम् उत्तरफलं बिभ्रत् । यद्वा सततार्तिरेवोदर्कं उत्तरफलं यस्य तत्सत्त्वनिधनं बिभ्रत् । विवेकहेतुत्वमाह । तत्त्वानीति । यथा यथावत् । एवमत्युपकारित्वेऽपि देहे

समष्टिप्राणः सूत्रं सूत्रशब्दवाच्यः । संदब्धानि संग्रथितानि वाय्वात्मना वायोः स्वरूपभूतेन ॥ २० ॥ तयोर्णया । एवमीशोऽपि स्वस्माद्विश्वं प्रकटय्य तेन विहृत्य पुनस्तं ग्रसतीत्यर्थः ॥ * ॥ ऊर्णनाभिरत्र दीर्घसूक्ष्मः कीटविशेषस्तस्यैव वक्त्रेणोद्गीर्णनिगरणदृष्टेः । उद्गीर्णामुत्पन्नाम् । वक्त्रेण द्वारेण ॥ २१ ॥ ० ॥ * ॥ तत्सारूप्यं भगवत्समानरूपताम् । भ्रमरविशेषात् भृंगीति ख्यातात् । यत्रयत्रेति स्नेहादिना भरतादौ मृगसारूप्यादेर्दृष्टत्वात् । 'अंते या मतिः सा गतिः' इति न्यायाच्चेति भावः ॥ २२ ॥ साम्यशब्दाद्भावार्थकप्रत्ययविधानमार्षत्वादेवेत्याह–साम्यतामिति पाठे त्वार्षतेति ॥ * ॥ साम्यतामिति–साम्यस्य समत्वरूपत्वात्समत्वेऽपि समत्वत्वसत्त्वेऽनवस्थापातात् । 'पूर्वदेहमसंत्यजन्' इति ध्यातृदेह एव ध्येयस्तुल्याकारः स्याद्ध्रुवादिषु दृष्टत्वात् । क्वचिद्ध्यातृभक्तानां दृश्यमानो देहत्यागस्तु भक्तियोगस्य रहस्यत्वरक्षार्थमेव भगवतापि मायया तथा दर्श्यत एव न तु तात्त्विकस्त्यागः स इति ॥ २३ ॥ उपसंहरन्नाह–एवमिति ॥ * ॥०॥ २४ ॥ "ज्ञानवैराग्ययोर्दाता गुरुर्लोकेषु कथ्यते" इति शिष्टोक्तेर्देहस्योभयहेतुत्वेन गुरुत्वमाह–देह इति । न केवलमुत्पत्तिविनाशधार्येव किन्तु दुःखाधिक्यमपीत्याह–किंचेति । कस्य फलमिति साकांक्षत्वादाह–यद्वेति ॥ * ॥ देहैकदेशः कुक्षिरपि द्वित्रदिवसीयभक्ष्यमसंगृह्णन्विरक्त इवेति तस्मादप्यसंग्रहं शिक्षेत् । यथा तत्त्वानि विमृशामि तथैव श्रोत्रादींद्रियत्रताऽनेन श्रीभगवत्प्रापकश्रवणकीर्तनादिमयं भक्तियोगमपि प्राप्नोमीत्यर्थः । यथा कश्चिद्रसिको महाभक्तः सर्वरसास्वाद्यपि रसाऽलिप्तः । किंतु हरिरसासक्तोऽनुरागी स्यादेवं जिह्वापि घृतादिसर्वरसास्वादिन्यपि न तत्तत्संपर्कवती किंतु तांबूलरससंपर्कवत्येव दृष्टा यत इयमरुणा स्यात् । एवमत्युपकारिण्यपि गुरावप्यस्मिन्देहे स्वीय इति स्थिर इति बुद्धिर्न कार्येत्याह–पारक्यमद्य श्वो वा श्वशृगालादिभक्ष्यमित्यवसितं निश्चयो यस्मिन्सः । पारक्यमिह क्लीबत्वमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन्॥स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मा ॥२६॥
जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ॥
॥२७॥सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्॥तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः२८॥

नैवास्था कर्तव्येत्याह । तथापीति । पारक्यं श्वसृगालादिभक्ष्यमिति निश्चितवान् ॥ २५ ॥ सततार्त्युदर्कतां प्रपंचयति जायेति द्वाभ्याम् । यस्य देहस्य प्रियचिकीर्षया भोगसंपादनेच्छया जायादिवर्गान्वितन्वन्संपादयन्पुष्णाति पुरुषः । कथंभूतः । सकृच्छ्रं सायासं यथा भवति तथाऽवरुद्धानि संचितानि धनानि येन सः । देहविशेषणं वा । स देहः स्वांते स्वस्यायुषोंतेऽवसीदति नश्यति । किंच । देहनाशेऽपि न दुःखसमाप्तिरित्याह । अस्य पुरुषस्य देहांतरबीजं कर्म सृष्ट्वेति । वृक्षस्येव धर्मो यस्य सः ॥ २६ ॥ किंच जिह्वेति । अमुं देहं तदभिमानिनं पुरुषं वा एकतो रसं प्रति जिह्वा अपकर्षत्याच्छिनत्ति । कर्हि कदाचित्तर्षा पिपासा जलं प्रति । शिश्नो व्यवायं प्रति । त्वक् स्पर्शं प्रति । उदरमन्नमात्रं प्रति । श्रवणं शब्दं प्रति । घ्राणो गंधं प्रति । चपलदृक् रूपं प्रति । क्व च क्वचित्स्वस्वविषयं प्रति कर्मशक्तिः । अन्यदपि कर्मेंद्रियम् । लुनंति त्रोटयंति ॥ २७ ॥ तदेवं देहो गुरुरित्यादित्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यातिदुर्लभत्वं दर्शयन्नीश्वरनिष्ठां विधत्ते सृष्ट्वेति द्वाभ्याम् । पुराणि शरीराणि । पुरुषं पुरुषदेहम् । ब्रह्मणोऽवलोकायापरोक्षज्ञानाय धिषणा बुद्धिर्यस्मिंस्तम् । तदुक्तं 'तासां मे पौरुषी प्रिया' इति । श्रुतिश्च "पुरुषत्वे चाविस्तरामात्मा" इत्यादि । ईश्वरो हि करणाधिष्ठात्रीरग्न्यादिदेवता वागादिभिः सह सृष्टवान् । ताश्च तं प्रति भोगार्थं शरीरमयाचंत । स च ताभ्यो गोशरीरमश्वशरीरं पुरुषशरीरं यथाक्रममानीतवान् । ततस्ता देवताः सोऽब्रवीद्यथाऽऽयतनं चक्षुरादिस्थानमस्मिन्देहे प्रविशतेति । तदाह । ताभ्य इत्यादि यथा—"ताभ्यो गामान

र्षम् ॥ २९ ॥ पाठा० चिकीरिषयेत्यत्र रस्यादंतत्वमार्षम् । संभवत्वाद्देहविशेषणमेवेति—न देहनाशेनैव झकटनिवृत्तिरित्याह—किञ्चेति । यथा वृक्षो बीजेन बीजांतरपरंपरारंभणहेतुस्तथाऽयं देहोप्यसज्जायादिपोषणलक्षणबीजेन देहांतरपरंपरारंभकारणमित्यर्थः ॥ * ॥ ननु विरक्तिविवेकभक्तिप्रदातुः सर्वगुरुषु श्रेष्ठस्य देहस्यास्य नश्वरस्यापि सेवा परमासक्त्यैव कर्तुं युज्यतेऽन्यथा कृतघ्नत्वलक्षणो दोषः स्यादित्यतः कथमसंग इति ब्रूषे, सत्यम्, विचित्रचारित्रोयं गुरुर्यतः परमासक्त्या सेव्यमानो ह्ययं विवेकवैराग्यादिकं किमपि नोत्पादयति प्रत्युत संसारमहांधकूप एव निक्षिपतीत्याह द्वाभ्याम्—जायेत्यादि । यस्य देहस्य प्रियचिकीर्षया जायादींस्तन्वन्विस्तारयन्पुष्णाति । यदा देहस्य प्रियचिकीर्षोत्पद्यते तर्हि जायादीन्संपाद्य तानेव पुष्णाति तेष्वेवासक्तो भवति "लोहदारुमयैः पाशैः पुमान्बद्धो विमुच्यते । पुत्रदारमयैः पाशैः पुमान्बद्धो व्रजत्यधः ॥" इति गारुडोक्तेः । लुप्तविवेकादिवित्तः स देहोंते वृक्षो वृक्षांतरवद्देहांतरबीजं सृष्ट्वैव येन पुनर्भवरहस्यान्नश्यतीत्यर्थः । यद्वा—उद्भिज्जसाम्येनात्र वृक्षपदं यवाद्योषधीपरं ज्ञेयम् ॥ २६ ॥ अवसीदतीत्युक्तं विवृणोति—किञ्चेति । कर्मशक्तिः पाण्यादिलक्षणाः पूर्वाऽदृष्टशक्तिर्वाऽत एवोक्तं स्वामिचरणैः—कर्मशक्तिः कर्मेंद्रियमन्यदप्यदृष्टमपि कर्मशक्तिरिति ॥ * ॥ तस्माद्गुरवे देहाय केवलं प्राणधारणकरमन्नमात्रं देयं तदप्यनासक्त्यैव एषैवास्य गुरोः शुश्रूषा श्रद्धयास्मै भोगाश्चेद्दीयंते तर्हि शृणु तत्त्वमित्याह—जिह्वेति । अमुं देहासक्तं नरमेकतो जिह्वेत्यादि ॥ २७ ॥ तदेवमित्थं पुरुषदेहस्य दुर्लभत्वे ज्ञानयोग्यत्वे च प्रमाणमाह—श्रुतिश्चेति । ईश्वरो हीत्यादिका कथा वैदिकी । करणाधिष्ठात्रीरिंद्रियाधिष्ठात्रीः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः ॥ तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥ २९ ॥ एवं संजातवैराग्यो विज्ञानालोक आत्मनि ॥ विचरामि महीमेतां मुक्तसंगोऽनहंकृतिः ॥ ३० ॥ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलम् ॥ ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ३१ ॥

यत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं बत " इति च ॥ २८ ॥ तस्माद्बहूनां संभवानां जन्मनामंते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं दैवाल्लब्ध्वेदमनुमृत्यु अन्वनु निरंतरं मृत्यवो यस्य तद्यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत । विषयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव ॥ २९ ॥ तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं 'त्वं तु कल्पः कविर्दक्षः' इत्यादि तत्रोत्तरमाह । एवमिति । एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवाऽऽलोकः प्रदीपो यस्य सः । सप्तम्यंतं वा आत्मविशेषणम् । आत्मनि स्वस्वरूपे स्थित एव महीं विचरामि ॥ ३० ॥ ननु किं बहुभिर्गुरुभिर्न हि श्वेतकेतुभृगुप्रमुखैर्बहवो गुरव आश्रितास्तत्राह । न ह्येकस्मादिति । बहुधा सप्रपंचनिष्प्रपंचभेदादिभिः । अयं भावः । नैते परमार्थोपदेशगुरवः किंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकास्तेषां बहुत्वं युक्तमेवेति । ज्ञानप्रदं गुरुमेकमेव वक्ष्यति । 'मदभिज्ञं गुरुं शांतमुपासीत' इति । उक्तं च " तस्मा

ताश्च देवताः । तमीश्वरम् । स चेश्वरः । ताभ्यो देवताभ्यः । ततः शरीरमानयनानंतरम् । ता इंद्रियदेवताः प्रति । स ईशः । यथायतनं स्वस्वस्थानानतिक्रमेण । इतीत्थम् । तदा तस्मिन्काले । गां गोशरीरम् । नोस्माकम् । भोगाय न वै एतदलं पर्याप्तामिति । एवमग्रेपि पुरुषशरीरं दृष्ट्वाहुः—सुकृतम् । एतत्ते सुकृतमस्मद्भोगायालमित्यर्थः ॥ * ॥ **दीपिका**—उपपाद्य हेतुरूपया संसाध्य । सततार्त्युदर्कत्वाद्विरक्तिहेतुत्वं साधनीयं ज्ञानसामग्रीसद्भावात्तु विवेकहेतुत्वमिति ज्ञेयम् । अयं प्रयोगः—मनुष्यदेहो विरक्तिहेतुः सततार्त्युदर्कत्वात् रोगादिवत् यन्नैवं तन्नैवं यथा देवादिदेहः । एवं मनुष्यदेहो विवेकहेतुः ज्ञानसामग्रीसद्भावात् देवदेहवत् यन्नैवं तन्नैवं यथा पश्वादिदेहः । निरुक्तव्याख्यायां श्रुतिप्रमाणमाह—ताभ्यः करणाधिष्ठातृदेवताभ्यः गां गोशरीरमानयद्ददौ नोऽस्माकमयं गोदेहो भोगाद्यर्थं नैवालं न समर्थः । एवमग्रेपि ॥ २८ ॥ यतो मनुष्यदेहो दुर्लभस्तस्मादित्यर्थः । अनुमृत्यु पृष्ठतोनुगतांतकमित्यर्थः । निःश्रेयसाय कल्याणावाप्तये । तदुक्तम्—" यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो यावच्चेंद्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः । आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्संदीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ॥ " इति श्रीकृष्णेन गरुडं प्रति ॥ * ॥ ० ॥ २९ ॥ एवमित्थम् । आत्मपक्षे—विज्ञानेनालोकः साक्षात्कारो यस्य तस्मिन् । " दृश्यते त्वग्र्यया बुद्ध्या " इति श्रुतेः ॥ * ॥ यदुक्तम् 'त्वं तु कल्पः कविः' इत्यादि तत्रोत्तरमाह—एवमिति । आत्मनि परमात्मनि । यद्विज्ञानमपरोक्षानुभवस्तत्रैवालोके दृष्टिस्तात्पर्यं यस्य सः । तदेवं पंचविंशतिगुरुभ्यः शिक्षितार्थकथनप्रकारेण । तत्र यदुप्रश्ने । ब्रह्मण्येवाहं स्थितो न तु बाह्ये विषये ममेच्छोत्पत्तिरिति । रसो वै सः, रसं ह्येवायं लब्ध्वानंदी भवतीति भावः ॥ ३० ॥ अत्राक्षिपति—नन्विति ।: अत्राशय माह—अयं भाव इति । परमार्थोपदेष्टा गुरुस्त्वेक एव भवतीति भावः ॥ * ॥ एते व्यावहारिकपदार्थाः । अन्वयव्यतिरेकाभ्यां तत्तद्धर्माणां हेयत्वोपादेयत्वाद्विधिनिषेधाभ्यामित्यर्थः । असंभावना गुरूपदिष्टे सन्देहः । ननु 'मदभिज्ञं गुरुं शांतमुपासीत' इति । " तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् " इत्याद्युक्तिभ्य एक एव गुरुराश्रणीयोवगम्यते नापि श्वेतकेत्वित्यादि, सत्यम् , ममापि मंत्रोपदेष्टा गुरुरेक एवोपास्योस्ति किंतूपास्त्यायामानुकूल्यप्रातिकूल्यदृष्टांतीभूताः पदार्था एते परामृश्य गुरूकृता इत्यन्वयव्यतिरेकाभ्यां मे शिक्षागुरव एवैते न दीक्षागुरव इति ॥ * ॥ **संदर्भस्तु**—तस्मान्महागुरूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. ए. श्री. टी. ॥ ५१ ॥

श्रीभगवानुवाच ॥ इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः ॥ वंदितोऽभ्यर्थितो राज्ञा ययौ प्रीतो यथागतम् ॥ ३२ ॥ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः ॥ सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ॥ ३३ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कन्धे भगवदुद्धवसंवादे नवगुरुशिक्षानिरूपणं नाम नवमोऽध्यायः ॥ ९ ॥

भा. दी. प्र. टीका. अ० ९

द्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् " इति ॥ ३१ ॥ विप्रो दत्तात्रेयः । 'योगर्द्धिमापुरुभयीं यदुहैहयाद्याः' इत्युक्तत्वात् । यथागतं तथैव । यदृच्छया ययावित्यर्थः ॥ ३२ ॥ भगवान्स्वीयं ब्रह्मवित्कुलमिति श्लाघते । नः पूर्वेषां पूर्वज इति । समचित्तो ब्रह्मनिष्ठः । अत्र संग्रहश्लोकाः । " कपोतमीनहरिणकुमारीगजपन्नगाः ॥ पतंगः कुररश्चाष्टौ हेयार्थे गुरवो मताः ॥ मधुकृन्मधुहर्ता च पिंगला च द्वयोस्त्रयः ॥ उपादेयार्थविज्ञाने शेषाः पृथ्व्यादयो मताः ॥ तदवांतरभेदश्च तत्रतत्र स्फुटीकृतः ॥ अध्यायत्रितये चाष्ट नवाष्टावीरिताः क्रमात् ॥ " इति ॥ ३३ ॥ इति श्रीमद्भागवते म० एकादशस्कंधे श्री० टीकायां नवमोऽध्यायः ॥ ९ ॥ छ ॥

दिष्टमतपोषाय तद्विरुद्धमतनिरासाय च स्वबुद्ध्या मननार्थं व्यावहारिकपदार्था एव गुरुत्वेन संभाविता न तु कापिलादिमतांतरस्थापका इति भावः ॥ ३१ ॥ विप्रपदेन दत्तात्रेयस्यैवात्र ग्रहणं नान्यस्येति 'योगर्द्धिम्' इत्यादिना द्वितीयस्कंधे यदुहैहयादीनां तस्यैवोपदेष्टृत्वावगमात् । इत्यर्थ इति—यथातथयोर्नित्यसंबंधाद्यथा निरपेक्षत्वेन समागतस्तथा ययौ तत्कृतपूजाद्रव्यादि विवाहायैवेति भावः ॥ ॥ * ॥ ० ॥ ३२ ॥ अत्र पञ्चविंशगुर्वाख्याने । हेयार्थे त्यक्तव्यार्थेऽष्टौ गुरवो गृहीताः । क्रमात्कपोतादिभ्यः गृहासक्तित्यागरसत्यागग्राम्यगीतश्रुतित्यागसजातीयसंगत्यागस्त्रीसंगत्यागगृहकरणबहुभाषणादित्यागचाक्षुषविषयत्यागाप्रियवस्तुत्यागाः शिक्षिताः १ । मधुकृदादयस्त्रयः द्वयोस्त्यक्तव्यग्राह्ययोरर्थयोर्गुरवः, मधुकृत्तः संचयत्यागासारोपादाने द्वे एव, तथा मधुहर्तृतोपि स्वसंचयत्यागपरसंचितोपादाने, तथैव पिंगलात आशात्याग नैराश्योपादाने च शिक्षिते । शेषा उक्तशेषाश्चतुर्दशस्वशरीरसहिताः उपादेयार्थस्य ग्राह्यार्थस्य विज्ञाने । पृथ्व्यादयः—पृथ्वीवाय्वाकाशाग्निचंद्ररविसिंध्वजगरार्भकशरकृदूर्णनाभिसुपेशकृन्निजदेहा,: एभ्यः क्रमात् क्षमापरार्थताप्राणमात्रवृत्तिविषयानासक्त्यात्मासंगत्वस्वच्छत्वादितेजस्वित्वादिस्वाभाविकात्मानिरुपाधित्वनिश्चयात्मजन्मादिविकाराभावनिश्चयसमयस्वीकारपरित्यागात्मोपाधिसंगराहित्यनिश्चयप्रसन्नत्वगंभीरत्वादिद्रव्यागमनागमनकृतहर्षशोकाभावदैवागतभोगस्वीकारात्मारामत्वविधिनिषेधातीतत्वचित्तैकाग्र्यसृष्ट्यादीश्वरस्वातंत्र्यसर्वदेश्वरध्यानाविवेकविरागाः शिक्षिता इति २ । तयोर्हेयोपादेययोरवांतरभेदस्तत्रतत्र तत्तदुपाख्याने, प्रथमेऽध्यायेऽष्टपृथिव्यतेजोवाय्वाकाशरवींदुकपोताः, द्वितीये त्वजगरसमुद्रपतंगमधुकरगजमधुहर्तृहरिणमीनपिंगलाख्याः, तृतीये—कुररार्भककुमारीशरकृत्सर्पोर्णनाभिपेशस्कृन्निजदेहाख्या अष्टौ वर्णिताः ३ ॥ * ॥ समचित्तोऽभिन्नात्मनिष्ठो बभूव । यद्वा—स्वर्गापवर्गनिरयेषु समचित्त एकांतभक्तो बभूवेति । कपोतादयोऽष्टौ हेयार्थे गुरव इति—कपोतवत्संगो हेयः । मीनवद्रसासक्तिर्हेया । हरिणवच्छब्दासक्तिर्हेया । कुमारीकंकणवत्सजातीययोगिसंगोपि हेयः । गजवत्स्पर्शासक्तिर्हेया । सर्पवज्जनसंगानियतनिकेतादिकं हेयम् । पतंगवद्रूपासक्तिर्हेया । कुररेण यथामिषं त्यक्तं तथा धनादिपरिग्रहो हेयः । मधुकरादयस्त्रयो द्वयोर्हेयोपादेययोर्गुरवः, तत्र मधुकृद्वन्माधुकरवृत्तिसारसंग्रहावुपादेयौ । तत्सजातीयमधुमक्षिकावत्संग्रहो हेयः । मधुहर्तुः परमदुःखदानेन संचितग्रहणं हेयम् । उद्यममंतरैव देहनिर्वाहकभोग उपादेयः । पिंगलाया आशामयी पूर्वावस्था हेया, नैराश्यमुपादेयम् । पृथिव्यादीनां तु सहनादयः सर्वे धर्मा उपादेयाः, इति विवेचनीयं सर्वत्र बुद्ध्या ॥ ३३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे नवमोऽध्यायः ॥ ९ ॥

॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मा समाचरेत् ॥ १ ॥ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनाम् ॥ गुणेषु तत्त्वध्यानेन सर्वारंभविपर्ययम् ॥ २ ॥ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ॥ नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ॥ ३ ॥ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत् ॥ जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनाम् ॥ ४ ॥

चतुर्विंशतिगुर्वाख्यालब्धसंभावनाभुवः ॥ उद्धवस्यात्मतत्त्वाप्त्यै साधनोक्तिरतः परैः ॥ १ ॥ दशमे देहसंबंधात्संसृतिर्नात्मनः स्वतः ॥ इत्येतद्वर्णयामास मतांतरनिरासतः ॥ २ ॥ तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्य तत्त्वज्ञानायादित आरभ्य साधनान्युपदिशति भगवान् । मयेति । मया पंचरात्राद्युक्तवैष्णवधर्मेष्ववहितोऽप्रमत्तः संस्तद विरोधेन वर्णाद्याचारं समाचरेदनुतिष्ठेत् ॥ १ ॥ कथमकामात्मता संभवति तत्राह । अन्वीक्षेतेति । स्वधर्मैर्विशुद्धचित्तः सन्देहिनां विषयेषु सत्यत्वाभिनिवेशेन ये सर्वे आरंभास्तेषां फलवैपरीत्यं पश्येत् एवं फलवैपरीत्यादकामः स्यात् ॥ २ ॥ किंच काम्यविषयाणां मिथ्यात्वादपीत्याह । सुप्तस्येति । विफलोऽर्थशून्यः । अत्रैवं प्रयोगः । इंद्रियैर्या बहिर्नानाबुद्धिः सा विफला नानात्मकत्वात् ऐंद्रियकत्वाच्च मनोजन्यस्वप्नमनोरथवदिति ॥ ३ ॥ "मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ॥ नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ॥" इति स्मृतिरतः प्रवृत्तं काम्यं कर्म त्यजेन्निवृत्तं नित्यनैमित्तिकमेव कुर्यात् । आत्मविचारे तु सम्यक् प्रवृत्तो निवृत्त

चतुर्विंशतिगुरूणामाख्यया कथनेन लब्धा संभावनात्मास्तीत्येवंरूपा भूर्भूमिर्येन तस्य तथा । अतो नवमाध्यायतः परैरध्यायैः (१) । स्वतो न स्वाभाविकी नेत्यर्थः । मतांतरं वेदांतमतापेक्षया मीमांसकमतं तस्य निरासतः खण्डनेन (२) । अन्वयव्यतिरेकाभ्यां कर्तव्यस्वीकाराकर्तव्यपरित्यागाभ्याम् । तदविरोधेन मदुक्तधर्माविरोधेन । अकामात्मा विषयानासक्तचेताः ॥ * ॥ **दीपिका**—चतुर्विंशतिगुरुकथनेन लब्धा संभावना आत्मानुभवे स्वयोग्यताऽध्यवसायस्तस्या भुवः स्थानस्योद्धवस्येत्यर्थः (१) । स्वतः स्वरूपतो न इत्येतज्जीवसंसृतेरवास्तवत्वम् । मतांतरं मीमांसकमतम् (२) । तदेवं चतुर्विंशतिगुरुवर्णनप्रकारेणान्वयव्यतिरेकाभ्यां हेयोपादेयत्वेन विधिनिषेधाभ्यां तदविरोधतः वैष्णवधर्माविरोधेन तत्प्राप्तिनिश्चयाभावान्निष्कामः स्यादिति भावः ॥ १ ॥ अत्राशंकते—कथमिति । फलवैपरीत्यं यत्सुखार्थं क्रियमाणं तत्रापि दुःखमेव पश्येदित्यर्थः ॥ * ॥ ० ॥ २ ॥ न केवलमारंभविपर्ययेक्षणमेवाकामताहेतुरन्योपीत्याह—किंचेति । अत्र विफलत्वे । प्रयोगोऽनुमानम् । ऐन्द्रियकत्वादिन्द्रियग्राह्यत्वात् । स्पष्टार्थमन्यत् ॥ * ॥ गुणैरिन्द्रियैः । भेदात्मधीर्बहिर्नानाबुद्धिः । भक्तिरूपा भेदात्मधीस्तु नानात्मिका न भवति श्रीभगवद्रूपालंबनैक्यात्मत्वादिति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—व्यावहारिकफलस्य नश्वरत्वात्प्राप्तिरन्यप्राप्तिसमैव, पारमार्थिकफलं तु कदिन्द्रियैर्नाप्यत एवेत्याह—सुप्तस्येति । नानात्मकत्वान्नानापदार्थालंबनत्वाद्विफलः परमार्थफलशून्यः । तथैव गुणैरिन्द्रियैर्भेदात्मसु नानाविषयेषु धीर्नानापदार्थालंबिनी कृता इत्यर्थः । तथा च प्रयोगः—इन्द्रियैर्गुणमयवस्तुषु पृथक्पृथग्बुद्धिः पारमार्थिकफलशून्या, भद्राभद्रात्मकनानापदार्थालंबनत्वान्मनोजन्यस्वप्नादिवत् । तस्मात्परमेश्वरैकालंबना बुद्धिरेव पारमार्थिकफला तद्रूपगुणलीलाभक्तादीनां ततः पार्थक्याभावाच्चिदेकमयत्वात्केवलभद्रात्मकत्वाच्च तदैक्यमेव ज्ञेयम् । अत एवोक्तम्—"व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन । बहुशाखा ह्यनंताश्च बुद्धयो व्यवसायिनाम् ॥" इति ॥ ३ ॥ तत्र कर्मसु मध्ये, इति स्मृतिपदार्थः । अतः स्मृत्युक्तेः । नित्यनैमित्तिकानां प्रत्यवायनाशपूर्वकांतःकरणशुद्ध्यापादकत्वान्निवृत्तिप्रवर्तकत्वेन निवृत्तत्वमेवेत्याह—निवृत्तं नित्यनैमित्तिकमिति । नाद्रियेदतीव हठं न कुर्यात्तत्करणे, यथादेशकालं कुर्यादित्यर्थः ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् ॥ मदभिज्ञं गुरुं शांतमुपासीत मदात्मकम् ॥ ५ ॥ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ॥ असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ॥ ६ ॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु ॥ उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः ॥ ७ ॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् ॥ यथाऽग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ॥ ८ ॥

कर्मचोदनामपि नाद्रियेत ॥ ४ ॥ किंच यमानहिंसादीनभीक्ष्णमादरेण सेवेत । शौचादींस्तु नियमान्क्वचिद्यदा शक्तिस्तदा आत्मज्ञानाविरोधेन । यमान्द्वादश नियमांश्चैकोनविंशेऽध्याये वक्ष्यति । किंच यमेष्वप्यादरं परित्यज्य गुरुमुपासीतेत्याह । मदभिज्ञमिति । मदात्मकं मद्रूपम् ॥ ५ ॥ गुरुसेवकस्य धर्मानाह । अमानीति । दक्षोऽनलसः । निर्ममो जायादिषु ममताशून्यः । गुरौ तु दृढसौहृदः । असत्वरोऽव्यग्रः । अमोघवाग्व्यर्थालापरहितः । एतान्येव शिष्यलक्षणानि ज्ञेयानि ॥ ६ ॥ ननु स्वजायादिषु कथं निर्ममः स्यात्तत्राह । जायेति । औदासीन्यहेतुं विवेकं दर्शयति । आत्मनोऽर्थं प्रयोजनं सर्वत्र सममिव पश्यन्निति । अयं भावः । सर्वदेहेष्वात्मन एकत्वाज्जायादिदेहेऽस्मिंश्च स्वदेहे आत्मनोऽर्थः सुखादिः सम एव । केन विशेषेणैतेष्वेव ममत्वाभिनिवेश इत्येवमुदासीनः सन् गुरुं प्रपद्येतेति ॥ ७ ॥ अहो कोऽसौ देहादिव्यतिरिक्त आत्मा यस्यैक्यादर्थः सर्वेषु समः स्यात्तमाह । विलक्षण इति । स्थूलसूक्ष्मदेहद्वयादात्माऽन्यो यतो विलक्षणः । द्वेधा वैलक्षण्यं दर्शयति । ईक्षिता स्वदृगिति ।

संदर्भः—मत्पर इति क्रियात्रयेऽपि योज्यम्, मदाश्रयं विना सर्वमपि तत्तद्व्यर्थमित्यभिप्रायात । संशब्देन परमवैराग्यपूर्वकं सूचयति । यथोक्तं गीतासु—"आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥" इति ॥ ४ ॥ तर्हि यमादिचोदनायाः का गतिरिति चेदाह—किंचेति । तदा विचारकाले । यमनियमानग्रे वक्ष्यमाणानपीहोपयोगित्वादाह—"अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः । आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयम् ॥" इति यमाः । "शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम् । तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् ॥" इति नियमाः । ज्ञानोत्पत्तावंतरंगसाधनमाह—किञ्चेति । मदात्मकं मद्रूपम् । ननु "सर्वं खल्विदं ब्रह्म" इति श्रुतेस्सर्वे त्वदात्मका एवेति भेदभ्रमव्यवच्छिन्नत्वान्न सर्वेषां मदात्मकत्वमिति कीदृशस्त्वदात्मकोऽस्तीति चेदाह—मदभिज्ञं बोधबाधितभेदभ्रममिति । यद्वा—मदभिज्ञं शास्त्रतः कृतमन्निश्चयम् । मदात्मकं मद्ध्याननिष्ठम् । एतेन "श्रोत्रियं ब्रह्मनिष्ठम्"इति श्रुत्यर्थो गृहीतः । "मामेव नित्यं ध्यायेद्यो मदात्मा स प्रकीर्तितः" इति तीर्थोक्तेः । अत एव शांतमुपशमनिष्ठम् ॥ * ॥ यमानित्यर्द्धकम्, मदभिज्ञमिति युग्मकम् ॥ ५ ॥ अमानी मानानाकांक्षी । अमत्सरी तच्छिष्यांतरास्पर्द्धी ॥ * ॥ असत्वरः साध्यवस्तुप्राप्तौ त्वरामकुर्वन् ॥ ६ ॥ स्वजायादिषु ममतात्यागो दुष्कर इत्याशंकते—नन्विति । अत्राशयमाह—अयं भाव इति । एतेष्वेव जायादिष्वेव । सर्वान्स्वीयान्पराकीयांश्च सादृश्येन पश्यन्सर्वेषां सुखादिदाने तुल्यमेव यत्नं कुर्यान्न वैषम्येणेति भावः । यद्वा—आत्मनोऽर्थमभीष्टं हरिं सर्वेषु समं पश्यन्निति ॥ * ॥ जायादिषु उदासीनो ममताविशेषमभावयन् । यतः सर्वेषु जीवेषु सुखप्राप्तिदुःखहानिरूपमर्थं चात्मन इव पश्यन्वांछन्नतः समं च पश्यन्निति ॥ * ॥ **विश्वनाथस्तु**—आत्मनः स्वस्यार्थं स्वर्णरूप्यादिमुद्राधनमिव पश्यन् । तद्यथा—व्यावहारिकं यावद्यस्य करगतं स्यात्तावदेव तस्य ममतास्पदं न तु सर्वदेव तत्तदेवं जायादिकमपीति तत्रतत्र ममताया अनैकांतिकत्वदर्शनान्निर्ममतैवोचिता । तदुक्तं चित्रकेतुपुत्रेण—'यथा वस्तूनि पण्यानि हेमादीनि' इत्युपक्रम्य "नित्यस्यार्थस्य संबंधो ह्यनित्यो दृश्यते नृषु । यावदेव हि संबंधो ममत्वं तावदेव हि॥" इति श्रीगुरुदेवेष्टदेवयोस्तु तादृशत्वासंभवात्तत्र दृढसौहृद्यमेवोचितम् ॥ ७ ॥ विस्मित इव पृच्छति—अहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान् ॥ अंतः प्रविष्ट आधत्त एवं देहगुणान्परः ॥ ९ ॥ योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि ॥
संसारस्तन्निबंधोऽयं पुंसो विद्याच्छिदात्मनः ॥ १० ॥ तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं परम् ॥ संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमम् ॥ ११ ॥

द्रष्टा हि दृश्याद्विलक्षणः । स्वप्रकाशश्च जडाद्विलक्षणः । तयोरन्यत्वे दृष्टांतः । यथाऽग्निर्दाहकः प्रकाशकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति ॥ ८ ॥
अनेनैव दृष्टांतेन नित्यत्वानादित्वविभुत्वैकत्वादयोऽपि सिध्यंतीत्याह । निरोधेति । तथा च दारुष्वंतः प्रविष्टोऽग्निस्तत्कृतान्नाशादीन्प्राप्नोति न तु स्वतो नाशादिमान् ।
एवं देहगुणाननित्यत्वादीन् देहात्परो नित्यादिस्वरूपोऽप्यात्माऽनुभवति । ततश्च नित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति भावः ॥९॥ नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते ।
आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा कुतस्तन्निवृत्तिस्तत्राह । योऽसाविति । पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योऽसौ सूक्ष्मोऽयं च स्थूलो देहो विरचितः
पुंसो जीवस्यायं संसारस्तन्निबंधनस्तदध्यासकृतः । हि यस्मादेवं तस्मादात्मविद्या तन्निवर्तिकेत्याह । आत्मनो विद्या विज्ञानम् आत्मज्ञानमित्यर्थः । तस्य अध्यासप्रयु
क्तसंसारस्य छित् छेत्री । आच्छिदिति वा पदच्छेदः ॥ १० ॥ यस्मादेवं तस्माज्जिज्ञासया विचारेण । आत्मस्थमात्मनि कार्यकारणसंघात एव स्थितं सम्यग्ज्ञात्वा

कोऽसाविति । तमात्मानम् । विलक्षण इति हेतुगर्भितविशेषणमित्याह—यत इति । तयोर्द्रष्टृप्रकाशयोः । तद्वदग्निवदात्मापीत्यर्थः ॥ * ॥ संदर्भः—ननु जायादिषु संबंधवैशिष्ट्येन ममता
वैशिष्ट्याचद्धितानुसंधानवैशिष्ट्यं दुर्निवारमित्याशंक्य तत्संबंधं वारयति—चतुर्भिर्विलक्षण इत्याद्यैः ॥ * ॥ विश्वनाथस्तु—स्वदेहे च हितानेव कुर्यादित्यत्र विचारमाह—विलक्षण इति । आत्मा चेतयिता द्रष्टा च जडाद्दृश्या
देहादन्य एवातः कथं तत्राहंतां कुर्यादिति भावः । यद्यपि परमात्मैव स्वप्रकाशः जीवात्मा तु परमात्मप्रकाश्य एव प्रसिद्धस्तदपि तस्य परमात्मप्रकाश्यत्वेपि किंचित्स्वप्रकाशत्वमपि स्यात् । यथा सूर्यप्रकाशितत्वे सत्येव
कनकरजतादेरपि किञ्चित्स्वप्रकाशकत्वं स्यादिति । यद्यप्यविद्यादशायां जीव इवाग्निः काष्ठस्यादाहकः काष्ठावृत एव तिष्ठेत्तथापि विद्यादशायां विद्वान् जीवो विद्याद्वाराऽविद्याया नाशकोपि स्यात्काष्ठानावृतो मंथनो
द्भूतोग्निरिवेत्यर्थः ॥ ८ ॥ अनेनैवाग्निदृष्टान्तेनैव । इति भाव इति—नित्यत्वादिधर्मवत आत्मनोऽनित्यत्वादिधर्मवतो देहाद्वैलक्षण्यं प्रथितमेवेति तात्पर्यम् ॥ * ॥ किंच—दारुधर्मा नाशादयो वह्नौ यथा भ्रमादारोप्यंत
एव न तु ते तत्र सन्ति एवमेव देहधर्मा अपि नाशादय आत्मनीत्याह—निरोधेति । निरोधो नाशः । यथाग्निर्नष्ट उत्पन्नोऽल्पो महानित्येवं नानाकार उच्यते तथैवात्मापीति । अत्र जीवात्मनां नानात्वे वास्तवेपि एकस्यापि
जीवस्य देवादेर्युगपत्क्रमेण वा नानादेहगतत्वेन यन्नानात्वं तत्त्ववास्तवमेवेति ज्ञेयम् ॥ ९ ॥ दृष्टान्तवैषम्यमाशंकते—नन्विति । तद्धर्मान्दारुधर्मान्भजतीति तद्धर्मभाक् तस्य भावस्तत्त्वम् । "असंगोह्ययं पुरुषः"
इति श्रुतेरात्मनोऽसंगत्वात् । तद्धर्मैर्देहधर्मैः कृशत्वादिभिः । वस्तुतस्तु संबंधो नास्ति 'तुष्यतु दुर्जनः' इति न्यायेन तत्स्वीकारे कुतः केन साधनेन तन्निवृत्तिः संबंधनिवृत्तिः । तत्राक्षेपे । अप्रत्यक्षत्वाद्यच्छब्देन
सूक्ष्मः प्रत्यक्षत्वादिदंशब्देन स्थूलश्च गृह्यते । तदध्यासेन तयोः स्थूलसूक्ष्मदेहयोरध्यासेनात्मत्वाभिनिवेशेन कृतस्तदध्यास कृतः, एवमात्मा ज्ञानकृत एव । तन्निवर्तिका संसारनिवर्तिका । छिनत्तीति छित्, छिदेः क्विप् ।
अज्ञातश्छेदशंकानिवृत्त्यय आह—आच्छिदिति वा ॥ * ॥ ० ॥ १० ॥ एवमात्मविद्यैव तच्छेदकर्त्री तस्मादित्यर्थः । यद्वा—तस्माज्जिज्ञासया तत्साध्यविचारेणात्मस्थं पञ्चकोशानुगतमात्मानं तत्साक्षिणं क्षेत्रज्ञं केवलं
तदुपाधेरन्वयव्यतिरेकाभ्यां जहदजहल्लक्षणया च विवेचितं परमानन्दं ब्रह्मैव संगम्य तस्मिन्प्रपञ्चे वस्तुबुद्धिं यथाक्रमं तत्कार्याणां कारणानन्यत्वक्रमेण परमकारणकृष्णब्रह्माव्यतिरेकं यथा स्यात्तथा निरसेत् ॥ * ॥०॥११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचार्योऽरणिराद्यः स्यादंतेवास्युत्तराऽरणिः ॥ तत्संधानं प्रवचनं विद्यासंधिः सुखावहः ॥ १२ ॥ वैशारदी साऽतिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूताम् ॥ गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्यसमिद्यथाग्निः ॥ १३ ॥ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः ॥ नानात्वमथ नित्यत्वं लोककालागमात्मनाम् ॥ १४ ॥

एतदेतस्मिन्देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत् त्यजेत् ॥ ११ ॥ गुरोर्लब्धा विद्या अविद्या तत्कार्यनिरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेण निरूपयति । आचार्य इति । आद्योऽधरः । तत्संधानं तयोर्मध्यमं मंथनकाष्ठं प्रवचनमुपदेशः विद्या तु संधिः संधौ भवन्नग्निरिव । तथा च श्रुतिः "आचार्यः पूर्वरूपम् । अंतेवास्युत्तररूपम् । विद्या संधिः । प्रवचन ९ संधानम्" इति ॥ १२ ॥ अग्निसादृश्यमेवाह । वैशारदीति । विशारदोऽतिनिपुणस्तेन शिष्येण प्राप्ता तेन गुरुणोपदिष्टा वा अतिविशुद्धा बुद्धिर्गुणकार्यरूपां मायां निवर्तयति । यदात्मकमेतद्विश्वं जीवस्य संसृतिनिमित्तं तान् गुणांश्च दग्ध्वा असमिन्निरिंधनः । तस्मात्कार्येण कारणेन विद्यया च व्यवधानाभावात्साक्षात्परमानंदरूपो भवतीति ॥ १३ ॥ एवं तावत्स्वप्रकाशज्ञानस्वरूपो नित्य एक एवात्मा कर्तृत्वादयश्च धर्मास्तस्य देहोपाधि

विद्योत्पत्तौ श्रुतिः स्पष्टार्था ॥ * ॥ ० ॥ १२ ॥ विशरणं विशारः 'शॄ—हिंसायाम्' हिंसाप्रधानोऽविद्यामार्गस्तं द्यति खण्डयति ब्रह्मविद्योपदेशेनेति विशारदः । शिष्यपक्षे—विगतः शारदो यस्य स विरक्त इत्यर्थः । अतिविशुद्धं जीवेशोपाधिविनिर्मुक्तं ब्रह्म बुद्ध्यतेऽनयेति विशुद्धबुद्धिः केवलचिदाकारा धीः । संदह्य सम्यक्कार्येण द्वैतेन सह बाधयित्वा स्वयञ्चांतःकरणवृत्त्यात्मकतया द्वैतांतःपातित्वात् शाम्यति अतो न विद्यया द्वैतापत्तिरिति भावः ॥ * ॥ विशारदो भगवांस्तदीयाऽतिविशुद्धज्ञानरूपा विद्या मायामविद्यां यदात्मकमेतद्देहद्वयाध्यासरूपं संसारबंधनं तान्गुणान्दग्ध्वाऽसमिद्यथाग्निर्भूतसूक्ष्मरूपेण तिष्ठन्स्पष्टं न तिष्ठति तथा स्वयं विद्यापि शाम्यति । ततः केवलयैव भक्त्याऽभ्यस्तया शांतिरतिं प्राप्य भगवत्सालोक्यं प्राप्नोति । तदुक्तम्—"भक्तिर्मुक्त्यैव निर्विघ्नेत्यतयुक्तविरक्तता" इति शांतिरतिमतां मतम् । गुणीभूतभक्तिमतां ज्ञानिनां तु विद्याविद्ययोरुपरमे 'ततो मां तत्त्वतो ज्ञात्वा' इति गीतोक्तेर्भक्त्युत्थज्ञानेन परमात्मैक्यम् ॥ १३ ॥ उक्तमर्थं निगमयति—एवमिति । तस्यात्मनः । तद्व्यतिरिक्तमात्मातिरिक्तमनित्यं विनाशि मायामयम् । प्रतीतिमात्रशरीरमाविद्यकमिति यावत् । यतः सर्वमात्मातिरिक्तमनित्यमवास्तवञ्चातो हेतोः । सर्वत आत्मातिरिक्ताखिलवस्तुतः । शास्त्रनिर्णीतोऽप्यर्थो मतांतराकर्णनेन संदिग्धो भवतीति हेतोर्मतांतरं निरस्यति, इह च मतांतरं निरीश्वरमीमांसकमतमेव तन्मतं निराकर्तुं खण्डयितुमुद्भावयति प्रकटयति—अथेति प्रश्ने । हे उद्धवेत्यर्थः। मीमांसकमतं निगमयति—एवं हीति । जैमिनीया जैमिनेर्मुनेरनुयायिनः । अहं करोम्यहं गच्छामीत्यादिरूपेणाहं प्रत्ययेनाहमाकारकज्ञानेन । सचात्मा तत्स्वरूपभूतस्तस्याहंप्रत्ययज्ञेयस्य स्वरूपभूतोऽसाधारणरूपः । अत्रार्थे स्वाचार्यसंमतिमाहुः—यथाहुरिति । तेषामेव वाक्यांतरम् । तथेत्यादिवैराग्याभावमाह । तदेव दर्शयति—तथाहीति । भोगस्थानानां स्वर्गादीनां तेषां भोगस्थानानां प्राप्त्युपायीभूतकर्मणां बोधकस्यागमस्य शास्त्रस्य अनित्यत्वाद्वेति चतुर्भिः संबध्यते । एतद्वाशब्दत्रयेणोक्तम् । एतत् भोगस्थानभोगकालतदुपायकर्मबोधकागमभोक्तृलक्षण चतुष्कानित्यं नास्तीति । द्वितीयोथशब्दः पुनरर्थे । अथ चेत्यर्थः । नित्यत्वं लोकादीनां मन्यस इत्युद्धवमेव मीमांसकत्वेन लक्ष्यीकृत्याह—भगवान् ॥ * ॥ अथेति युग्मकम् ॥ * ॥ **दीपिका**—अहं ब्राह्मण इत्यादिप्रतीत्या ज्ञेय एव न तु ज्ञानैकरूपः । अत एव प्रतिशरीरं भिन्नः यागादिकर्तृत्वात्तत्फलभोक्तृत्वात्कर्तृभोक्तृरूपश्च । वेदांतमतं निराचष्टे—नान्विति । तेषां जीवानां स्वरूपभूतः कल्पितानामधिष्ठानत्वेन मूलस्वरूपभूतो निर्विकारज्ञानस्वरूप एकः परमात्मा नास्ति । यथाहुर्जैमिनीयाः—"अहं प्रत्यय—" इति।अहमिति प्रत्ययो ज्ञातृविषय एव यो हि परामृशति स आत्मानमहमित्येव परामृशति तेनाहंप्रत्ययस्य ज्ञातृगोचरत्वं निर्विवादमेव । यत्तु शरीरस्य कृशोऽहं स्थूलोह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्यसे सर्वभावानां संस्था ह्यौत्पत्तिकी यथा ॥ तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥ १९ ॥

कास्तद्व्यतिरिक्तं सर्वमनित्यं मायामयं चातः सर्वतो विरक्तः सन्नात्मज्ञानेन मुच्यत इत्युक्तं 'विलक्षणः स्थूलसूक्ष्मात्' इत्यादिना,।तदेव श्रुतिसमन्वयेन निर्णीतेऽप्यर्थे मतां तरविरोधेन संदेहो मा भूदिति तन्मतं निराकर्तुमुद्भावयति। अथेति। अथ मन्यसे एषां जीवात्मनां कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति। एवं हि जैमिनीया मन्यंते। अहंप्रत्ययविज्ञेय एवात्मा स च प्रतिशरीरं भिन्नः कर्तृभोक्तृरूपश्च न तु तत्स्वरूपभूतो निर्विकार एकः परमात्माऽस्तीति। यथाहुः "अहंप्रत्ययविज्ञेयो ज्ञातव्यः सर्वदैव हि" इति। तथा वैराग्यं च न संभवति। तथाहि भोगस्थानानामनित्यत्वाद्वा वैराग्यं भवेद् भोगकालस्य वा तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वा न त्वेतदस्तीत्याह। अथ नित्यत्वं लोककालागमात्मनां मन्यस इति ॥ १४ ॥ न च सर्वभोग्यानां विच्छेदान्मायामयत्वाद्वा वैराग्यं स्यादित्याह। मन्यस इति। सर्वभावानां स्रक्चंदनादीनां संस्था स्थितिरौत्पत्तिकी प्रवाहरूपेण नित्या। तथा च वदंति 'न कदाचिदनीदृशं जगत्' इति। अतस्तत्कर्ता कश्चिदीश्वरो नास्तीति भावः। किंच यथा यथावत्। न तु मायामयीत्यर्थः। न चात्मस्वरूपभूतं नित्यमेकं ज्ञानमस्तीत्याह। तत्तदिति। घटपटाद्याकारभेदेन धीर्जायते अतोऽनित्य भिद्यते च। अयं गूढोऽभिप्रायः। न हि नित्यज्ञानरूप आत्माऽपि तु ज्ञानपरिणामवान्। न च विकारित्वेनानित्यत्वप्रसंगः। यथाऽऽहुः "विक्रिया ज्ञानरूपाऽस्य न

मित्यादिज्ञानसामानाधिकरण्यादहंप्रत्ययविषयत्वं तदत्यंतसन्निकृष्टयोरेकत्वभ्रांत्या उष्णतोयप्रतीतिवद्भास्वरायःपिंडप्रतीतिवच्च संगमनीयम्, ममेदं शरीरं कृशमिति षष्ठ्यास्मदर्थस्यात्मनः शरीरव्यतिरेकेण विवेकतः प्रतीतेः, शरीरस्येदमाकारास्पदत्वप्रतीतेः। तथा—"स्वर्गकामो यजेत" इत्यादिश्रुतयोपि शरीरातिरिक्तं परलोकभोगयोग्यं कर्तारमंतरेणानुपपद्यमानास्तमाक्षिपंति, ताभिश्चाक्षिप्तं साक्षादेवोपनिषदः समर्पयन्ति—"अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मा" इत्यादयः। इति सिद्धम्—शरीरातिरिक्तो मानसप्रत्यक्षरूपोहंप्रत्ययगम्यो ज्ञातेति, तस्य ज्ञातृत्वं ज्ञेयत्वं च सिद्धम्। न चैकस्य कर्तृत्वं कर्मत्वं स्वात्मनि क्रियाविरोधात्कथं संभवतीति वाच्यम्, आत्मनः स्वकर्तृकायामेव क्रियायां कर्मव्यवहारस्य लोके वेदे दृष्टत्वात्। तत्र लोके तावद्भाष्य एव स्वसंवेद्यः संभवतीति कर्मवाचिकृता प्रयोगः, वेदेप्यात्मानमुपासीतात्मानं वेदात्मा ज्ञातव्य इत्याद्यनेकशः प्रयोगः तस्मान्मानसाहंप्रत्ययविज्ञेय एवात्मेति सिद्धम्।तथा च श्रुतिः—"स मानसीन आत्मा जनानाम्"इति।सर्वदैवेत्यस्यायं भावः—विषयज्ञानवेलायामपि न विषयज्ञानकर्तृतयात्मावभासः, किन्तु मानसाहंप्रत्ययकर्मतयैव किं पुनः स्वरूपज्ञानवेलायामिति। एवं सिद्धांतोक्तं ज्ञानरूपत्वादिकं प्रत्याक्षिप्य वैराग्यमपि तदुक्तमाक्षिपति—तथेति। वैराग्यासंभवमेव दर्शयति—भोगकालस्य वेति।भोगकालस्याप्यनित्यत्वाद्वैराग्यं भवेत्, तस्य स्वर्गादिभोगस्योपायभूतानि यागादिकर्माणि तेषां बोधकस्यागमस्य"स्वर्गकामो यजेत" "वृष्टिकामः कारीर्या यजेत"इत्यादिशास्त्रस्याप्यनित्यत्वाद्वैराग्यं भवेत्।न त्वेतादिति—एतद्भोगस्थानादीनां चानित्यत्वं नास्तीत्यर्थः॥१४॥ननु भोगानां विच्छेदावास्तवत्वे एव वैराग्यहेतू स्यातामिति चेदाह—न चेति। वैराग्यं स्यान्न चेत्याह। विच्छेदाभावमेवाह—सर्वभावानामिति। नित्यत्वे प्रमाणमाहुर्निजाचार्यवाक्यम्—तथा चेति। अनीदृशं न ईदृशमनदिशम्, पर्युदासनञा सर्वदेदृशमेव भवतीति बोध्यते 'पर्युदासः सदृग्ग्राही' इत्युक्तेः। यतस्सर्वदेदृशमेव तिष्ठति जगदतो हेतोः। तत्कर्ता जगत्कर्ता। इति भाव इति—अविद्यमानस्यैवोत्पादनं भवति न तु सर्वकालिकस्य, तथा च सर्वदा विद्यमानस्य जगतः कर्त्रपेक्षैव नास्तीति तात्पर्यम्। इममेवार्थं पोषयति—किंचेति। इत्यर्थ इति—मायिकानां कादाचित्कत्वादस्य च सार्वदिकत्वान्न मायामयत्वमिति भावः। अथात्मनो ज्ञानरूपत्वं प्रतिषेधति—न चेति। धीर्ज्ञानतारूपा। तत्तदाकृतिभेदेन ज्ञातो घट इति विषय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमप्यंग सर्वेषां देहिनां देहयोगतः ॥ कालावयवतः संति भावा जन्मादयोऽसकृत् ॥ १६ ॥ अत्रापि कर्मणां कर्तुरस्वातंत्र्यं च लक्ष्यते ॥ भोक्तुश्च दुःख सुखयोः को न्वर्थो विवशं भजेत् ॥ १७ ॥ न देहिनां सुखं किंचिद्विद्यते विदुषामपि ॥ तथा च दुःखं मूढानां वृथाऽहंकरणं परम् ॥ १८ ॥

नित्यत्वे विरोत्स्यते । ” इति । अतो मुक्ताविंद्रियादिरहितस्य परिणामासंभवाज्जडत्वेन तत्प्राप्तेरपुरुषार्थत्वात्प्रवृत्तिरेव श्रेयसी न निवृत्तिरिति ॥ १५ ॥ तत्र तावदुक्तमंगीकृत्य वैराग्योपपादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपंचयति एवमपीत्यादिना—लोकानां लोकपालानामित्यतः प्राक्तनेन ग्रंथेन । अंग हे उद्धव । कालावयवतः संवत्सरादिरूपात् ॥ १६ ॥ अत्रापीति । स्वातंत्र्यपक्षे दुष्कर्मणो दुःखभोगस्य वाऽसंभवादित्यर्थः ॥ १७ ॥ ननु ये सम्यक्कर्म कर्तुं जानंति ते सुखिन एव ये तु न जानंति त एव दुःखिन इति चेत्तत्राह । नेति । विदुषामपि क्वचित्सुखं न विद्यते तथा मूढानामपि दुःखं न विद्यतेऽतो वयं कर्मकुशलत्वात्सुखिन इति तेषां केवलं

धर्मतया भिद्यते नैकात्मस्वरूपं ज्ञानमिति मन्यते । अथ मीमांसकाभिप्रेतात्मस्वरूपमाह—अयं गूढ इत्यादिना । ज्ञानपरिणामवदात्मस्वीकारे दध्यादिवदनित्यत्वं स्यादिति चेदाह—न चेति । अत्र वृद्धसम्मतिमाह—यथाह्वरिति । ज्ञानरूपा विक्रियाऽस्यात्मनो नित्यत्वे न विरोत्स्यते।ज्ञानाकारेण परिणामो नित्यत्वविघातको न भवतीत्यर्थः । तव मते देहेंद्रियादिविवर्जितकेवलं चित्स्वरूपावस्थितेरेव मुक्तित्वम्। किंच—श्रोत्रसंगेन शब्दज्ञानाकारेण परिणामो घ्राणसंगेन च गंधज्ञानाकारेण चैवमन्यत्रापि तत्संबंधाभावे परिणामाभावात्प्राप्तमात्मनो ज्ञानाभावेन पाषाणादितुल्यं जंडत्वं तेन तत्प्राप्तेर्मुक्तिप्राप्तेर्जडत्वापादकत्वेन पुरुषार्थत्वं नास्तीत्यतः प्रवृत्तेरिन्द्रियसंबंधसत्त्वेन सर्वज्ञान संभवाच्छ्रेयस्त्वमिति भावः ॥ * ॥ भोगानां स्रक्चंदनवनितादीनां विच्छेदादनित्यत्वान्मायामयत्वान्मिथ्यात्वाद्वा वैराग्यं स्यात्तदपि च नेत्याह—सर्वभावानामिति । तथा च जगतो नित्यत्वं जैमिनीया वदन्ति—न कदाचिदिति । जगत्कदाचिदनीदृशं नेति किन्त्वीदृशमेवेति सृष्टिप्रलयाभावो दर्शितः । अतः सर्वभावानां नित्यत्वात्—विक्रियेति । अस्यात्मनो ज्ञानरूपा विक्रिया नित्यत्वे न विरोत्स्यते विरोधं न प्राप्नोति, यथा सूर्यो धूमाद्युपाधिं प्राप्य रश्मिद्वारा मेघरूपेण परिणमते स्वरूपेण तु नित्य एव तिष्ठति तद्वदिति ज्ञेयम् । तत्प्राप्तेर्मोक्षप्राप्तेः ॥ १५ ॥ तत्र प्रवृत्तिनिवृत्त्योर्मध्ये । तावदधुना । उक्तं मीमांसकमतमंगीकृत्य श्रुत्वेत्यर्थः । असकृत्पुनःपुनः ॥ * ॥ तत्र मीमांसकमते । तदुक्तमुद्धवोक्तम् । एवमपि गूढाभिप्रायेण मीमांसकमतस्वीकारेऽपि । देहसंबंधाद्भावा विकाराः । कालावयवतः संवत्सरादिरूपात् । जन्मादय इति—तत्रापि जन्ममरणयोरतिकष्टप्रदत्वं सार्वत्रिकं प्रसिद्धमेवेति भावः ॥ १६ ॥ अधुना कर्मकर्तुरस्वातंत्र्येणेश्वरं साधयति । अत्रापि लोके । अस्वातंत्र्यमनिच्छन्नपि बलात्कार्यत एव । यः कारयिता स एवेश्वर इति । एतदर्थस्तु—“जानामि धर्मं न च मे प्रवृत्तिर्जानामि पापं न च मे निवृत्तिः । केनापि देवेन हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमि ॥” इति दुर्योधनेन स्फुटितः । श्रुतिरपि—“एष एव साधु कर्म कारयति यमेभ्यो लोकेभ्य उन्निनीषते” इत्यादिकेति । इत्यर्थ इति—सुखं त्वौत्सुक्याद्भुज्यते तथैव तत्साधनं कर्मापि क्रियत एव, दुःखं तु वैवश्येन पाशबद्ध इव भुज्यते एवं जानतस्तत्साधनकर्मणि प्रवृत्तिरपीत्यतो नास्य जीवस्य स्वातंत्र्यमिति भावः । एतदेवाह—विगतो वशः पराधीनता यस्य स तथा, तं विवशं स्वतंत्रमीश्वरं कः सुखदुःखादिरूपोर्थः भजेत्प्राप्नुयान्न कोपीत्यर्थः । यद्वा—विवशमस्वतंत्रं कोऽर्थः पुरुषार्थो भजेन्न कोपीति । न हि स्वतंत्रप्रेरणां विनाऽस्वतंत्रः किञ्चित्कर्तुं शक्नोतीति भावः । यद्वा—विवशं कालकर्मगुणाधीनं पुरुषं को न्वर्थो विषयो भजेत्सुखयेन्न कोपीत्यर्थः ॥ * ॥ कर्मणां कर्तुरिति कर्मकरणे सुखदुःखयोर्भोक्तुरिति भोगेप्यस्वातंत्र्यं लक्ष्यते । स्वतंत्रो हि कः खलु दुःखं भुंजीत, को वा विवेकी दुष्कर्म कुर्यादिति भावः । को नु अर्थः पुरुषार्थः विवशमस्वतंत्रं कर्तारं भोक्तारं भजेत्तत्र स्थिरीभवेदित्यर्थः ॥ १७ ॥ न हीश्वरायत्तं दुःखभोगादि किंत्वन्यथैवेत्याक्षिपति—नन्विति । इत्यर्थ इति—लोकेतीव विद्वांसो मूढानाश्रित्य दीनवृत्त्या दुःखिनो दृश्यन्ते । मूढाश्चाधीनविद्वत्कत्वेन सुखिन इत्यतः कर्मनैपुण्यानैपुण्ये न सुखदुःखप्रयोजके इति भावः ॥ * ॥ विदुषां कर्माभिज्ञानां दक्षादीनामपि क्वचिद्विहितेपि काम्यकर्मणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः ॥ तेऽप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥ १९ ॥ को न्वर्थः सुखयत्येनं कामो वा मृत्युरंतिके ॥ आघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥ २० ॥ श्रुतं च दृष्टवद्दुष्टं स्पर्धासूयात्ययव्ययैः ॥ बह्वंतरायकामत्वात्कृषिवच्चापि निष्फलम् ॥ २१ ॥ अंतरायैरविहतो यदि धर्मः स्वनुष्ठितः ॥ तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु ॥ २२ ॥

वृथैवाहंकार इत्यर्थः ॥ १८ ॥ अंगीकृत्याप्याह । यदीति । तं योगमुपायं न विदुर्यथा साक्षान्मृत्युर्न प्रभवेत् ॥ १९ ॥ तथापि यावज्जीवं सुखं भविष्यतीति चेन्नेत्याह । को न्विति । यतोंतिके वर्तमानो मृत्युः । न तुष्टिदो न तुष्टिं ददाति । आघातं वधस्थानं प्रति नीयमानस्य वध्यस्य स्रक्चंदनादि यथा न सुखयेत् ॥ २० ॥ एवमस्मिँल्लोके सुखं नास्तीत्युक्तं लोकांतरेऽपि तथैवेत्याह । श्रुतमिति । श्रुतं स्वर्गादि । तदपि दुष्टम् । स्पर्धा परसुखासहनम् । असूया परगुणे दोषाविष्करणम् । अत्ययो नाशः । व्ययोऽपक्षयः तैर्दुष्टम् । यद्वा व्ययो नाशः । अत्ययोऽन्यस्यातिशयः । तं दृष्ट्वा तदप्राप्त्या दुःखमित्यर्थः । किंच बहवोंतराया वैगुण्यादिरूपा विघ्ना यस्मिन्कामे सुखे तस्य भावस्तत्त्वं तस्मात् । कृषिर्यथा बहुविघ्ना तद्वत् । बहुसुखत्वेन श्रुतमपि निष्फलम् ॥ २१ ॥ विघ्नवैगुण्याद्यभावमंगीकृत्यापि नाशदुःखं दुष्परिहरमित्याह अंतरायैरिति पंचभिः । निर्जितं साधितम् ॥ २२ ॥

सुखं न विद्यते प्रत्युत स्वनाशपर्यंतं दुःखमेव दृश्यते, प्रमादादिना कर्मवैगुण्यादिति भावः । तथा मूढानां कर्म कर्तुमजानतां सरलानां कचित्कर्माकरणेपि दुःखं न विद्यते, सारल्यादिगुणेनाकस्मात्तीर्थादिसंबंधजातपुण्येन च प्रत्युत सुखमेव दृश्यते, अतः कर्मणां सुखदुःखप्रयोजकत्वात् । ननु यः दुष्कर्म कुर्यात्स विद्वानेव नोच्यते तस्य दुःखभोगो न्याय्य एव, यस्तु कर्माकुर्वन्कर्म कर्तुं जानीयात्तस्य न कदापि दुःखमिति चेन्मैवं वादीः, देहधारिणां मध्ये सर्वदैव सुखी सर्वदैव दुःखी कोपि न दृष्ट इत्याह–नेति । अन्यत्तैः ॥ १८ ॥ कर्मनैपुण्यानैपुण्येनैव सुखदुःखे इत्यंगीकारेऽत्यंतदुःखरूपमृत्युप्रतीकारं कथं न कर्मनैपुण्येन कुर्यादतोपि ज्ञायते न कर्मकौशलं सुखहेतुरिति भावः । न प्रभवेद्वाधेत् ॥ * ॥ साक्षान्मृत्युरिति जीवन्मुक्तमृत्युं व्यावर्तयति ॥ १९ ॥ यद्यपि कर्मकौशलेन मृत्युरनिवर्त्यस्तथापि तेन यावदायुः सुखमस्तीति चेदकिञ्चित्करमेतदिति दृष्टांतेन यस्यांतिके समीपे मृत्युरस्ति । एनमित्यन्वादेशनिर्देशाद्यस्येति लब्धम् । यथा मारणार्थं पाशेन बद्धकंठं न कोपि स्रक्चंदनवनितादिरूपः कामोऽर्थो वा सुखयति तथा सर्वदा पृष्ठलग्नमृत्युमपीति भावः ॥ * ॥ आघातमिति–वध्यस्य संप्रति त्वं पायसपिष्टकादिकं यथेष्टं भुंक्ष्वेति दीयमानोपि भोगो यथा न सुखयति ॥ २० ॥ इममर्थमन्यत्रातिदिशति–एवमिति । व्ययशब्देनापक्षयस्वीकारो व्यर्थस्तस्य नाशेंतर्भावादित्याह–यद्वेति । इत्यर्थ इति–परोत्कर्षासहनं न महतां धर्मः किंतु निकृष्टानामेवेति । तच्च दुःखहेतुरेवेति भावः । तद्दौर्बल्यमाह–किंचेति । वैगुण्यं त्वल्पेनापि विपर्ययेण भवतीति यथाग्नये स्वाहेत्यस्य स्थाने वह्नये स्वाहेत्युक्तेः वह्न्यग्निप्रकृती 'वह–प्रापणे' अगि–'गतौ' इति प्राप्त्यर्थत्वेन समानौ, प्रत्ययश्चोभयत्रैकस्मिन्नेवार्थे, एक एव निः, इकारान्तचतुर्थ्येकवचनांतत्वेनापि समानावेव वह्न्यग्निशब्दौ सर्वथा तौल्येपि वह्निपदोच्चारणमपूर्वप्रतिबंधकं भवतीति विचारितं पूर्वमीमांसायाम् । कृषिवद्बह्वन्तरायकामत्वादिति योज्यम् । कृषिश्चेतिभिरुपद्रुता भवति । ताश्च–" अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः ॥ " इत्युक्ताः । निष्फलं परिणामविरसत्वादिति ॥ * ॥ व्ययः भोक्ष्यमाणस्वर्गादेरल्पताप्रतिपादकः किञ्चित्किञ्चिन्नाशः ॥ २१ ॥ विघ्नवैगुण्याद्यभावेपि नाशस्त्ववश्यंभावीत्याह–विघ्नेत्यादिना ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥ भुंजीत देववत्तत्र भोगान्दिव्यान्निजार्जितान् ॥ २३ ॥ स्वपुण्योपचिते शुभ्रे विमान उपगीयते ॥ गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् ॥ २४ ॥ स्त्रीभिः कामगयानेन किंकिणीजालमालिना ॥ क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः ॥ २५ ॥ तावत्प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते ॥ क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः ॥ २६ ॥ यद्यधर्मरतः संगादसतां चाऽजितेंद्रियः ॥ कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ॥ २७ ॥ पशूनविधिनाऽऽलभ्य प्रेतभूतगणान्यजन् ॥ नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः ॥ २८ ॥ कर्माणि दुःखोदर्काणि कुर्वन्देहेन तैः पुनः ॥ देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः ॥ २९ ॥ लोकानां लोकपालानां मद्भयं कल्पजीविनाम् ॥ ब्रह्मणोऽपि भयं मत्तो द्विपरार्धपरायुषः ॥ ३० ॥

यज्ञैर्देवता इंद्रादिरूपा इष्ट्वा ॥ २३ ॥ स्वपुण्यैरुपचिते सर्वभोगसंपन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते ॥ २४ ॥ कामगेनेच्छया गच्छता विमानेन । किंकिणीजालमालिना क्षुद्रघंटिकासमूहशोभिना । सह स्त्रीभिः सुराक्रीडेषु नंदनादिषु क्रीडन्नात्मपातं न वेद ॥ २५ ॥ कालेन चालितः पातितः ॥ २६ ॥ प्रवृत्तिर्द्विविधा विध्यनुसारेण काम्ये कर्मणि वा तल्लंघनेनाधर्मे वा तत्र काम्यप्रवृत्तेर्गतिरुक्ताऽधमप्रवृत्तेर्गतिमाह । यदिति । यदिवेत्यन्वयः । अजितेंद्रियत्वात्कामात्माऽतः कृपणो दीनोऽतो लुब्धो भोगतृष्णाकुलोऽतः स्त्रैणः स्त्रीलंपटस्तदर्थं भूतविहिंसकः ॥ २७ ॥ किंच दुष्टजनप्रलोभितो धनाद्यर्थं पशूनविधिना हत्वा तमः स्थावरतां याति ॥ २८ ॥ एवं कर्मसु प्रवृत्तस्य न सुखं न च दुःखनिवृत्तिरित्युपसंहरति । कर्माणीति ॥ २९ ॥ तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राह । लोकानामिति । द्वौ परार्धौ परमायुर्यस्य तस्य ब्रह्मणोऽपि । तथाच श्रुतिः "भीषास्माद्वातः पवते भीषोदेति सूर्यः ॥ भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचमः ॥" इति । अतः

" विघ्नमध्यस्यान्तधनेष्वन्तरायः प्रकीर्तितः " इति निरुक्त्युक्तैरंतरायैर्विघ्नैः । तेनांतराविहतेन । तत्स्थानम् ॥ * ॥ तेन विघ्नवैगुण्यहीनस्वधर्मेण ॥ २२ ॥ तत्र स्वर्लोके । निजार्जितान्स्वयं यज्ञादिद्वारार्जितान् ॥ * ॥ भोगान्वैषयिकसुखसाक्षात्कारान् । भुंजीत कुरुते । पाकं पचति, तपस्तप्यतीत्यादिवत्सामान्यविशेषतया व्याप्यव्यापकत्वम् ॥ २३ ॥ देवीनामप्सरसाम् । हृद्यो मनोहरः ॥ * ॥ उपगीयते प्रोत्साहनेन स्तूयते ॥ २४ ॥ निर्वृतः स्वर्गानन्दमग्नः ॥ * ॥ आत्मपातं स्वार्गान्निजपतनम् ॥ २५ ॥ अर्वागधः ॥ * ॥ कालेन भोगसमाप्त्यवच्छेदकेन ॥ २६ ॥ अतः कामात्मत्वात् । अतः कृपणत्वात् । अतो लुब्धत्वात् । तदर्थं स्त्रीभोगसिद्ध्यर्थं हिंसामपि कृत्वा तत्प्रीतये धनाद्यानयतीति भावः ॥ * ॥ काम्यकर्मणि पशुयागादौ । तदर्थं स्त्र्यादिप्राप्त्यर्थम् ॥ २७ ॥ अन्यानर्थमाह–किञ्चेति ॥ * ॥ अविधिना स्वेच्छाचारेण । यद्वा–अविधिना "श्येनेनाभिचरन्यजेत" इत्यादिविरुद्धविधिना ॥ २८॥ निवृत्तिः कर्मभ्य इति शेषः । कर्माणि दुःखोदर्काणि ' उदर्क एष्यत्कालीनफले ' इति मेदिनी । पुण्यानि फलन्ति पापानि च फलकाले दुःखदानि तत्र कर्मकरणे देहे च किं सुखं न किमपीत्यर्थः ॥ * ॥ ० ॥ २९ ॥ यद्यपि मर्त्यधर्मिणोऽत्र सुखं नास्ति तथापीति । लोकानां स्वर्गादीनां सर्वलोकपालेशब्रह्मणोपि किमुत लोकपालानामिति कैमुत्यं सूचितम् । अत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणाः सृजंति कर्माणि गुणोऽनुसृजते गुणान् ॥ जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ॥ ३१ ॥
यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ॥ नानात्वमात्मनो यावत्पारतंत्र्यं तदेव हि ॥ ३२ ॥

प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्विरक्त्या ततो निवृत्तिरेव युक्तेति तात्पर्यार्थः ॥ ३० ॥ एतेनैव स्वयमीश्वरत्वाविष्कारेणेश्वराभावांगीकारः परित्यक्तः अन्यदपि प्रौढ्या पूर्वमंगीकृतं निराकरोति चतुर्भिः । तत्र यदुक्तं कर्तृभोक्तृरूप एवात्मेति तन्निराकरोति । गुणा इति । गुणा इंद्रियाणि कर्माणि सृजंति न त्वात्मा । आत्मैवेंद्रियाणि प्रवर्तयन्कर्माणि करोतीति चेन्नेत्याह । गुण इति । गुणः सत्त्वादिर्गुणानिंद्रियाण्यनुसृजते प्रवर्तयति न त्वात्मा । अत आत्मनः कर्तृत्वं तावन्नास्ति भोक्तृत्वमप्यौपाधिकमित्याह । जीवस्त्विति । गुणसंयुक्त इंद्रियादिसंयुक्तः । कुत इत्यत आह । असौ तेष्वहंकारवानित्यर्थः ॥ ३१ ॥ यच्चोक्तमात्मनो नानात्वं तदप्यौपाधिकमित्याह । यावत्स्यादिति । गुणानां वैषम्यमहंकारादिकार्यरूपम् । नन्वात्मन एकत्वे कथं पारतंत्र्यमुक्तं कथं वा लोकपालादीनामपि मद्भयमित्युक्तं त्वयेत्यत्राह । नानात्वमिति ॥ ३२ ॥

प्रमाणमाह—तथा चेति । यतः प्रवृत्तौ दुःखमतो हेतोः । ततः प्रवृत्तिमार्गात् ॥ * ॥ यच्च 'तुष्यतु दुर्जनः' इति न्यायेन स्वर्गादीनां नित्यत्वमंगीकृतं तन्निराकरोति—लोकानामिति ॥ ३० ॥ एतेन मत्त इति वचनेन । अन्यदपि आत्मनः कर्तृत्वादि । प्रौढ्या वृथा हठेन । 'प्रौढिर्व्यर्थहठेऽपि च' इति धरणिः । तत्रान्यांगीकृतेषु । अतः प्रवर्तकत्वाभावात् । औपाधिकमस्वाभाविकम् । जीवस्येंद्रियसंयुक्तत्वे हेतुं पृच्छति—कुत इति । इत्यर्थ इति—अहं पश्याम्यहं शृणोमीत्यादिना जीवस्येंद्रियेष्वहंकारदर्शनात्तत्तत्कर्मफलभोक्तृत्वमिति भावः । यद्वा—नात्मनः कर्तृत्वमित्याह—गुणाः कामसंकल्पप्रयत्नचेष्टारूपाः कर्माणि सृजन्ति । गुणो गुणात्मकं मनस्तान्कामादीन्सृजति । "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति श्रुतेः । असौ जीवो गुणेन संयुक्तोऽध्यासापन्नः कर्मफलानि भुंक्त इति ॥ * ॥ संदर्भस्तु—एतेन पूर्वदर्शित 'भीषे' त्यादिश्रुत्यात्मकपुराणरवरूपस्ववाक्यप्रामाण्येनेत्यर्थः । न त्वात्मेति । अयस्कांतस्येवात्मनः सांनिध्येनैव तत्तत्प्रेरकत्वान्न तु स्वेच्छयेति भावः । यद्वा—अथ जीवस्य स्वतः कर्मकर्तृभोक्तृरूपत्वं तन्मतं सांख्यामतेन निराचष्टे—गुणा इति । तत्तत्स्वभाव एव तत्रतत्र कारणमिति भावः॥ ३१ ॥ अन्यदाह—यच्चेति । अहंकारादिकृतमेव नानात्वं तन्निवृत्तौ तन्निवृत्तिदर्शनात् । पुनराशंकते—नन्विति । नानात्वनिवृत्तौ पारतंत्र्यं स्वत एव निवर्तत इति भावः । यद्वा—यावद्गुणवैषम्यं स्थूलसूक्ष्मदेहरूपेण परिणामस्तावत्तत्तद्देहाध्यासेनात्मनानात्वभ्रमः स्यादिति ॥ * ॥ औपाधिकमहंकारादिकार्यनिबन्धनम् । यावदिति सार्द्धकम् । नानात्वं चाद्वयवादिमतेन निराकरोति—यावदित्यर्द्धेन । तत्रैवाद्वयवादिनां सिद्धान्तनिर्वाहं दर्शयति—नानात्वमित्येकेन । अयमर्थः—एक एव खलु चिदेकलक्षणसत्तामात्रस्वरूप आत्मा स एवात्मनि अनाद्यविद्यया गुणमयीं मायां तद्वैषम्यजातकार्यवर्गं च कल्पयन्नस्मदर्थमेकं युष्मदर्थांश्च बहून्कल्पयति स्वप्नवत् । तत्रास्मदर्थः स्वस्वरूपः पुरुषः । युष्मदर्थास्त्रिविधाः—पुरुषान्तररूपा जडरूपा ईश्वराख्यपुरुषविशेषरूपाश्चेति । ततस्तस्यामविद्यायां गतायां नानात्वभावादीश्वरो नाम यो वस्तुतो नास्ति स नास्त्येव, किमुत तत्पारतंत्र्यं, किमुततरां ततो भयं, किमुततमां वान्यपारतंत्र्यादिकामिति । तदेवं मतद्वयेन नहि कदाचिदनीदृशं जगदिति ज्ञानं नित्यं नास्तीति परिहृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावदस्याऽस्वतंत्रत्वं तावदीश्वरतो भयम् ॥ य एतत्समुपासीरंस्ते मुह्यंति शुचार्पिताः ॥ ३३ ॥ काल आत्मागमो लोकः स्वभावो धर्म एव च ॥ इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ॥ ३४ ॥ उद्धव उवाच ॥ गुणेषु वर्तमानोऽपि देहजेष्वनपावृतः ॥ गुणैर्न बध्यते देही बध्यते वा कथं विभो॥३५॥

यच्च गूढमभिप्रेतं प्रवृत्तिरेव श्रेयसीति तत्राह । य एतदिति । एतद्गुणवैषम्यं तत्कृतं भोगं कर्म चेत्यर्थः । उपासीरन्सेवेरन् । ते लोकादीनामनित्यत्वाच्छुचार्पिताः प्रोताः संतो मुह्यंति ॥ ३३ ॥ न केवलमनित्यतामात्रं किंतु मायामयत्वमपीत्याह । काल इति । स्वभावो देवत्वादिपरिणामहेतुः । धर्मस्तद्भोगकारणम् । गुणव्यतिकरे मायाक्षोभे सति मामेव प्राहुर्न तु मद्व्यतिरिक्ताः संति ॥ ३४ ॥ ततो निवृत्तिरेव मुक्तिहेतुत्वाच्छ्रेयसीति सिद्धम् । एवं तावदेक एवात्मा तस्य च गुणकार्यदेहसंबंधकृतः संसार आत्मज्ञानाच्च मुक्तिरित्युक्तं 'विलक्षणः स्थूलसूक्ष्मात्' इत्यादिना । तदेव च मतांतरनिरासेन दृढीकृतमथैषामित्यादिना ।

तत्तदुपाधेर्जन्मनाशदर्शनाज्ज्ञानस्य त्वनाशदर्शनादिति भाव इति संदर्भः ॥ ३२ ॥ इत्यर्थ इति—त्यदानीनां बुद्धिस्थपरामर्शकत्वाद्व्यवहितमपि गुणवैषम्यमिह गृह्यत इति व्याख्येयम् । यद्वा—उपासीरन्सत्यत्वमभिमन्येरन् ते मुह्यंति स्वरूपान्मुह्येरन् संसृतिशोकार्ताश्च भवंति ॥ * ॥ तदेतत्पूर्वोक्तमतांतरत्रयमपि निंदाति—य एतदित्यर्द्धेन । य एतत्कर्मैवोपासीरन्सेवेरन् ते शोकप्रोताः सन्तः मुह्यन्ति दुःखेन मूर्च्छामाप्नुवन्ति ॥ ३३ ॥ यतोहमेव सर्वे स्वरूपस्ततो विवृत्तौ यतत "निवृत्तं कर्म सेवेन प्रवृत्तं मत्परस्त्यजेत्" इत्युक्तेः, 'निवृत्तो मामवाप्नोति' इत्युक्तेश्च निवृत्तिरेव श्रेयस्कामैः कार्येति भावः । यद्वा—'कल—गतौ' इति धातोः कमनीयानां गुणानामाधारत्वात्कालः सर्वेषां सर्वस्मात्प्रेष्ठत्वादात्मा सर्वमासमंताज्जानातीत्यागमः । 'लोकृ—दर्शने' । प्रकाशापरपर्यायज्ञानस्वरूपत्वात् लोकः स्वाधीनो भावः सत्ता यस्य स स्वतंत्र इत्यर्थः । सर्वं धारयतीति धर्मः । इति ममैव नामानीति तीर्थः ॥ * ॥ यत्काल इति कालादिचतुष्टयं जैमिनिमतानुवादोक्तं विश्वव्यवहारसिद्धिनिमित्तं तत् पारिशेष्यात्स्वभावः सांख्यमतं गुणादेः प्रत्येकं विलक्षणकार्यकरत्वम्, धर्मस्त्वद्वयमतं सत्तामात्रम्, अपूर्ववाचित्वे तु कर्मेत्येवावक्ष्यत्, सुखदुःखभो गकारणस्य विवक्षितत्वात् । ततश्च मामेव ते प्राहुः, किंतु—काल इत्यादिरूपेण तद्यथावन्मद्रूपेण, तत्रापि बहुधा प्रत्येकं कारणप्राचुर्येण, मिथश्च कैमुत्येन, न त्वखंडकारणत्वेन मामेकं प्राहुरित्यर्थः । "तेऽपि मामेव कौंतेय यजंत्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥" इतिवत् । तत्र हेतुः—गुणव्यतिकरे गुणैस्तमआदिभिरासंगे पराभूतत्वे सतीति । तत्पराभवादेव श्रुतिस्मृतियुक्तिविरुद्धानीश्वरवादिनो भूत्वा ते तथा वदंतीत्यर्थः । ईश्वरकारणवादिनां तु प्रायस्तान्यपि न दूषणायेति भावः । तथाहि—"यदंशाविद्धाः प्रचरन्ति कर्मसु नैवान्यदा लोहमिवाप्रतप्तम्" इति न्यायेन परमात्मस्वरूपेश्वरांशत्वात्स्वस्वजडवर्गप्रवर्तकत्वात् । चिदात्मनां जीवानां स्वरूपसिद्धेऽपि कर्तृभोक्तृत्वे उपाधिं विना न स्पष्टीभवतः, तत्सांनिध्येनोपाधितो जाते च ये, ताभ्यां न साक्षात्संबंधः किंत्वज्ञानेनैव, तस्मादथैषामित्यत्र कर्मेति सुखदुःखयोरिति च विशेषितम् । तथा प्रत्यात्मं नानात्वं भवतु, किंतु परमात्मरूपेणैकत्वमेव, तथा लोकस्याव्यक्ताख्यकारणरूपेण भवतु नाम नित्यत्वं, किंतु स्थूलरूपेणानित्यत्वमेव, तथात्मनामुपाध्यंशेन नास्ति सर्वथा नित्यत्वं किंतु स्वरूपेणैव, तथा कालस्य तत्प्रभावरूपतया आगमस्य च तन्निश्वासात्मतया नित्यत्वमस्तु, प्रलये तत्र प्रचारो नास्त्येव, तथा गुणादेरपि स्वभावः कारणं भवतु, अविद्योपाहित आत्मा वा, किंतु सर्वकारणेश्वरशक्त्यात्मकत्वेनैवेति । तदेवं सर्वस्येश्वराश्रयैकासिद्धितया तस्य चेश्वरस्य श्रुतिस्मृतिविद्वदनुभवप्रामाण्येन मद्रूपतया मत्तोऽन्यत्र रक्तानां भयमिति वैराग्यमेव श्रेयः । तदेतज्जैमिनिमतनिरासायात्रैवोक्तम्—'लोकानां लोकपालानाम्' इत्यनेन । मतांतरनिरासाय चान्यत्रोक्तम्—"आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधो नादृतयुष्मदंघ्रयः" इत्यनेनेति तात्पर्यम् ॥ ३४ ॥ तत्र मुक्तौ । प्रश्नं विवृणोति—अयमर्थ इति । आद्ये गुणाभावे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं भुंजीतोत विसृजेच्छयीतासीत याति वा ॥ ३६ ॥ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर ॥ नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रमः॥३७॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवादे संसारप्रकारनिरूपणं नाम दशमोऽध्यायः॥१०॥

श्रीभगवानुवाच ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ॥ गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनम् ॥ १ ॥

तत्र पृच्छति । गुणेष्विति । अयमर्थः । गुणेष्वसत्सु मुक्तिः सत्स्वेव वा । आद्ये ज्ञानसाधनाभावान्न मुक्तिः । द्वितीये च गुणेषु वर्तमानोऽपि तत्कार्यदेहजेषु कर्मसु सुखादिषु च कथं न बध्येत । तथापि तैराकाशवदनावृतत्वान्न बध्यत इति चेत्तर्हि बंधो न संभवतीत्याह । अनपावृतः कथं बध्यत इति ॥ ३५ ॥ यदि तु सत्स्वेव तदहंकारेण बध्यते तन्निवृत्त्या च मुच्यत इति मतं तर्हि तत्कथं ज्ञातव्यमिति पृच्छति । बद्धो मुक्तो वा कथं वर्तेतेत्यादि । किं भुंजीत कथं भुंजीते त्यर्थः ॥ ३६ ॥ एतत् एतद्विषयं प्रश्नम् । किंच एक एवात्माऽनादिगुणसंबंधान्नित्यबद्धः । मुक्तेर्जन्यत्वेऽनित्यत्वप्रसंगान्नित्यमुक्त इत्यप्यंगीकार्यं स्यात् । तत्र मे भ्रमो भवतीत्याह । नित्यबद्ध इति ॥ ३७ ॥ इति श्रीमद्भागवत एकादशस्कन्धे श्री० टीकायां दशमोऽध्यायः ॥ १० ॥ एकादशे तु बद्धानां मुक्तानां चाथ लक्षणम् ॥ साधूनां च तथा भक्तेर्लक्षणं हरिणेरितम् ॥ १ ॥ 'नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः' इति यदुक्तं तत्किं वस्तुतो विरोधः प्रतीतितो वा, नाद्यः, बंधमोक्षयोर्वास्तवत्वाभावादित्याह बद्धो मुक्त इति द्वाभ्याम् । आत्मा बद्धो मुक्तश्च मे गुणतो मदधीनसत्त्वादिगुणोपाधितो न तु वस्तुतः । नन्वौपाधिकत्वेऽपि तंडुल

सत्त्वगुणकार्याणां श्रद्धाविवित्सादीनां ज्ञानहेतूनां गीतोक्तानां सत्त्वशुद्ध्यादीनां च कारणाभावे कार्याणामभावात्साधनाभावे साध्याभावोऽपि स्यादित्यर्थः । तथापि गुणकार्यसत्त्वेपि ॥ * ॥ **संदर्भः**—ननु भवन्मते मोक्ष एव पुरुषार्थोऽवगतः, स च भक्तिज्ञानवैराग्याभ्यासाद्भवति, तास्मिन्सति पुरुषो मुक्त उच्यत इति मया गुणेष्वसत्सु मुक्तिरित्यत्र बंधस्तु स्तब्धत्वन्यायेन स्वत एव ज्ञेयः ॥ * ॥ **दीपिका**—तदेवं संसारस्य मिथ्यात्वमात्मज्ञानस्यैव मोक्षहेतुत्वञ्च, तत्र मुक्तेर्निवृत्तिहेतुत्वे गुणानां मायामयत्वाद्गुणेषु वर्तमान इत्यनुपपन्नम् । अतोऽयमर्थः—आद्ये गुणासत्त्वपक्षे द्वितीये च प्रातीतिकगुणसत्त्वपक्षे यद्यपि गुणेषु वर्तमानस्तथापि तैर्गुणैः अह कर्ता भोक्तेति कथं बध्यते बद्धत्वेन प्रतीयते ॥ ३५ ॥ तदहंकारेण गुणाहंकारेण । तन्निवृत्त्या गुणनिवृत्त्या । इत्यर्थ इति—लक्षणं विना पदार्थज्ञानासंभवात्तल्लक्षणं वक्तव्यमिति भावः ॥ * ॥ वर्तन विहरणभोजनमलमूत्रविसर्जनशयनासनगमनानि कर्माणि मुक्तस्य बद्धस्य च तुल्यान्येव दृश्यन्ते, तानि च निरभिमानानि साभिमानानीति मया कैर्वा लक्षणैर्ध्यायत इति ॥ ३६ ॥ अन्योऽपि संदेह इत्याह—किञ्चेति । तत्र बन्धे मोक्षे च ॥ * ॥ नित्यमुक्तो दत्तात्रेयभरतादिर्नित्यबद्धो देवदत्तयज्ञदत्तादिस्तुल्यदैहिकाक्रियत्वादेक एवेति भ्रम इति वैलक्षण्यं मया ग्रहीतुमशक्यमप्यस्त्येव तत्त्वयाहं ज्ञापयितव्य इति भावः । अत्र नित्यपदमनधि कार्थम् ॥ ३७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे दशमोऽध्यायः ॥ १० ॥ अथ बद्धमुक्तलक्षणानंतरम् । तथा बद्धादिलक्षणवत् (१) । तत् किं भ्रमः, विरोधाद्वा प्रतीतः । नाद्यः, भ्रमस्य वास्तवत्वं नास्तीत्यर्थः । तत्र—हेतुः बंधमोक्षयोरिति । औपाधिकः सत्यः किन्न स्यादिति शङ्कते—नन्विति । यथा तंडुलेषु पाकोऽग्न्याद्युपाधिसंगकृतोपि वास्तवो भवति तद्वदित्यर्थः । गुणस्येति सामान्याभिप्राय मेकत्वं, गुणानामित्यर्थः । मायामूलत्वान्मायिकत्वादवास्तवत्वादिति यावत् । अत एव बंधनाभावादेव । सर्वशास्त्रेषु बंधमोक्षस्य व्युत्पादनमास्ति तत्कथं तदभाव उच्यत इत्याशंकते—नन्विति । इत्यर्थ इति—मत्कृत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोकमोहौ सुखं दुःखं देहोत्पत्तिश्च मायया ॥ स्वप्नो यथाऽऽत्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥ २ ॥
विद्याऽविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् ॥ मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ॥ ३ ॥

पाकादिवद्वास्तवत्वं किं न स्यात्तत्राह । गुणस्य मायामूलत्वाद्बंधनं नास्ति । अत एव मोक्षश्च नास्ति । ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राह । इति मे व्याख्येति । एवं मत्कृतो निर्णयः । अलमतिकुतर्कैरित्यर्थः । अथवैवमन्वयः । आत्मा बद्धो मुक्त इति या व्याख्या उक्तिः सा मे गुणतो मद्गुणपारतंत्र्यात् । अत्र हेतुत्वेन गुणनियंतरि स्वस्मिंस्तद्व्यतिरेकमाह । अत एव न मे बंधनं मोक्षो वेति । अन्यत्समानम् ॥ १ ॥ एवं कारणभूतगुणानां मायामयत्वात्तत्कार्यसंसृतिर्मायेति प्रपंचयति । शोकमोहाविति । यथा स्वप्न आत्मनो बुद्धेरेव ख्यातिर्विवर्तस्तद्वत् ॥ २ ॥ अतो वस्तुविरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकी घटत इत्याह । विद्याऽविद्ये इति । तन्येते मोक्षबंधावाभ्यामिति तनू शक्ती । कुतः । मे मायया विनिर्मिते मायावृत्तिरूपत्वात् । मोक्षबंधकरीत्येकवचनं द्विवचनार्थे । ननु तत्कार्यत्वं बंधमोक्षयोरनादित्वनित्यत्वेन स्याताम् । न आद्ये अनादी । अतो यावदविद्यां प्रवर्तयामि तावद्बंधो यदा विद्यां ददामि तदा मोक्षः स्फुरतीत्यर्थः । तथा च स्कंदपुराणे । "बंधको भवपाशेन भवपा

सिद्धांतस्य सर्वशास्त्राधिकत्वादिति भावः । परमेश्वरस्य तव बंधादिर्यद्यपि नास्ति तथापि जीवस्य स चास्त्येवेति चेदाह—अथवेति । मदधीनगुणकृतत्वादहमेव तत्तददृष्टवशात्तत्तद्गुणकार्येषु जीवान्संयोज्य वियोज्य च बंधमोक्षौ ददामीति भावः । अत्र बंधमोक्षयोर्गुणसंगासंगकृतत्वे । तद्व्यतिरेकं बंधमोक्षाभावम् । अत एव गुणनियंतृत्वादेव । स्वस्मिन्स्वत एव निर्गुणे गुणकृतौ बंधमोक्षौ वारयति । अन्यद्विवरणं समानं पूर्ववत् ॥ ॥ * ॥ **दीपिका**—तत् एकस्यैव बद्धमुक्तत्वम् । प्रतीतितो भ्रांत्या । नाद्यः वस्तुविरोधपक्षो न संभवति । मे गुणत इति—गुणा जीवस्य नैव, म इति वक्ष्यमाणत्वान्नियंतृनियम्यभावेन संबंधं व्याचष्टे—मदधीनेति । बंधमोक्षयोरौपाधिकत्वेऽपि यथा 'स्थाल्यग्नितापात्पयसोभितापः' इति न्यायेन स्थाल्याद्युपाधिकत्वेऽपि वह्निसंयोगेन तंडुलपाको वास्तवो भवति तद्वद्बंधमोक्षयोर्वास्तवत्वं किं न स्यादित्यर्थः । मायामूलत्वाद्दार्ष्टांतिके गुणलक्षणोपाधेर्मिथ्यात्वात् । अत एव बंधाभावादेव । पूर्वार्थे शास्त्रानादर इति व्याख्येत्यस्यास्थानपतितत्वं चातः—अथवेति । उक्तिः शास्त्रेषु वर्णनम् । अत्र बंधमोक्षव्यवस्थायाम् । हेतुत्वन व्यतिरेकव्याप्तिघटितेन । तद्व्यतिरेकं बंध मोक्षाक्षाभावम् । अत एव बंधमोक्षयोर्गुणप्रयुक्तत्वादेव । अत्रायं प्रयोगः—असौ बंधमोक्षविषयः, गुणपरतंत्रत्वात्, अमुकवत्, यन्नैवं तन्नैवं, यथाहमिति ॥ * ॥ **विश्वनाथसंदर्भौ** तु—गुणस्य गुणसंबंधस्य मायामूलत्वान्माययाऽविद्यया दुस्तर्कशक्त्या दुर्घटस्य देहेंद्रियादिसंबंधस्य मिथ्यैव स्फोरणादित्यर्थः । अत एव मे मम, मते इति शेषः ॥ १ ॥ एवमुक्तविधया । विवर्त इति—अतात्त्विकोऽन्यथाभावो विवर्त इति यथा शुक्तौ रजतमिति ॥ ॥ * ॥ अत्र बद्धस्य मिथ्यात्वं दर्शयति—शोकेति । देहापत्तिर्देहाद्देहांतरप्राप्तिर्देहस्यापत्तिरपमृत्युर्वा, मायया मायिकोपाधिसंबन्धेन अविद्यया मायिकोपाधिरंतःकरणे सूक्ष्मदेहजीवस्याभिमानादेव, तदीयधर्माणां शोकमोहादीनामपि स्वीयत्वेन ग्रहणमित्यर्थः । अतः शोकमोहादिमत्त्वलक्षणा संसृतिर्न वास्तवी न सत्या, शोकमोहादीनां मायासृष्टत्वेन सत्यत्वेपि तत्संबंधस्य जीवेऽविद्याकल्पितत्वान्मिथ्यात्वमित्यर्थः ॥ २ ॥ यतो गुणकृतौ बंधमोक्षावतो हेतोः । तत्प्रतीतिर्विरोधप्रतीतिः । अत्राशंकते—तत्कार्यत्वं मायाकार्यत्वेनेत्याह । यतोऽनादी अतो हेतोः । इत्यर्थ इति—अहमेव बंधमोक्षदातेति भावः । अत्र प्रमाणमाह—तथा चेति । 'विष्णुरेव' इत्येवकारेण विशेष्यसंबद्धेनान्ययोगव्यवच्छेदकार्थेन विष्णोरन्यत्र 'पार्थ एव धनुर्धरः' इत्यत्रत्यैवकारेण पार्थादन्यत्र धनुर्धरत्वस्येव विष्णोरन्यत्र मोक्षप्रदत्वस्य योगो व्यवच्छिद्यत इति । विनिर्मिते स्वस्मिन्नेव गुणविभागेन विभक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकस्यैव ममांशस्य जीवस्यैव महामते ॥ बंधोऽस्याविद्ययाऽनादि र्विद्यया च तथेतरः ॥ ४ ॥

शाच्च मोचकः ॥ कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥" इति ॥ ३ ॥ तत्र शरीरिणामिति बहुवचननिर्देशाद्विषयभेदेनाविरोध उक्त इति भ्रांतिं व्यावर्तयन्बंधमोक्षव्यवस्थामुपपादयति । एकस्यैवेति । तर्हि किमात्माभेदात्तवापि बंधो नहीत्याह । अस्य जीवस्यैवेति । नन्वात्माभेदे जीवो नाम कोऽन्योऽस्ति पृथक् । कथं च बंधमोक्षसुखदुःखादिव्यवस्था तत्राह ममांशस्येति । अयं भावः । यथैकस्यापि चंद्रादेर्जलाद्युपाधिना बिंबप्रतिबिंबरूपो भेदो यथा च तत्र जलकृताः कंपादयः प्रतिबिंबस्यैव ।

तया प्रत्यायिते, जन्यत्वे त्वाद्ये इतिविशेषणविरोधः स्यात् ॥*॥ संदर्भः—वस्तुतो नित्यमुक्तोपि प्रतीतितोऽनादिबद्ध इति युगपदुभयत्वं घटत इत्यर्थः । अत्र मे मम मायया शक्त्या कर्त्र्या तनू स्वदृष्टांतरूपत्वात्स्वांशरूपे अत एवानादी निर्मिते प्रसारिते ते एव मम शरीरिणां मदीयानां मोक्षबंधकर्त्र्यौ भवत इति स्थिते 'सा धर्मराजवद्भक्ता' 'भयं द्वितीयाभिनिवेशतः स्यात्' इति न्यायेन यस्य यावन्मद्वैमुख्यं तस्य तावदविद्यां प्रसार्य स्वरूपावरणपूर्वकं गुणावेशं कुर्वती बंधं करोति, मत्सांमुख्ये तु गुणावेशत्याजनपूर्वकं स्वरूपस्फुरणं कुर्वती मोक्षं करोतीति ज्ञेयम् । अतस्तस्या एव तयोः कर्तृत्वेपि मद्धेतुकत्वात् 'वंधको भवपाशेन' इत्याद्युच्यत इति भावः । बंधमोक्षकरी इति—"सुपां सुलुक्पूर्वसवर्णा—" इत्यादिना पूर्वसवर्णश्छांदसः ॥ * ॥ विश्वनाथस्तु—ननु केयमविद्या यया मिथ्याभूतोऽपि गुणसंबंधः स्फोरितस्तत्राह । अन्यत्तैः । इमे च मम मायया महाशक्त्या सृष्टे, मायावृत्तिरूपत्वात्तयोर्मायासृष्टत्वमौपचारिकमेवोच्यते । अनादी " अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययम् " इति द्वादशोक्तेः, ' पुंसोस्ति प्रकृतिर्नित्या ' इति वैद्यकोक्तेश्च । मायाशक्तिरिव तद्वृत्ती विद्याविद्ये अपि नित्ये, तदेवं मायायास्तिस्रो वृत्तयः—प्रधानमविद्या विद्या च। प्रधानेनोपाधिः सत्य एव सृज्यते, अविद्यया तदध्यासो मिथ्याभूतः, विद्यया तदुपराम इति तिसृणां कार्यम् । 'विष्णुरेव' इत्येवकारेण देवतांतरस्य मोक्षदातृत्वेऽनधिकारः सूचितः ॥३॥ तत्र बंधमोक्षव्यवस्थायाम् । विषयभेदेन जीवभेदेन । अत्राशंकते—तर्हि किमिति । पुनराशंकते—नान्वित अत्राशयमाह—अयं भाव इति । तथा चोभयभेदत्वे च । तत्र द्वयोर्मध्ये। तत्कृतोऽविद्याकृतः । तस्य च जीवस्य। अत्र प्रमाणमथर्वोपनिषदि पठ्यते—तथा चाहुरिति । अत्र निर्गलितार्थमाह—शरीराध्यासप्रयुक्तनानात्वभ्रमस्य मृषात्वादेकस्यैव ममांशस्याखंडेंशविभागात्संभवे चांशिनो नश्वरत्वापत्तेरंशत्वेन तत्रतत्र श्रूयमाणस्य भगवत एव जीवत्वापत्तेश्च मद्रूपस्यैव जीवस्यानादिबंधभ्रमान्नित्यबद्धत्वं वस्तुतोऽविद्याया अभावात्, विद्यया तत्त्रैकालिकाभावबोधनात्तद्दृष्ट्या इतरो मोक्षोप्यनादिरिति नित्यमुक्तत्वं चेति ॥*॥ आभ्यामेव मदीयशक्तिभ्यामाविद्याविद्याभ्यां मदीयजीवशक्तेर्देहाध्यासप्रसारणाप्रसारणाभ्यामवस्तुभूतावपि बंधमोक्षौ प्रत्यायितौ मदीयसृष्ट्यादिलीलाशक्तिप्रेरणवशादेवेत्याह—एकस्यैवेति । अंशस्य विभिन्नांशशब्दवाच्यस्य । "प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत्" इति मदुक्तेर्जीवस्य मम शक्तित्वेऽपि "ममैवांशो जीवलोके जीवभूतः सनातनः" इति मदुक्तेरेवांशत्वं चेत्यर्थः । न तु शरीरिणामिति पूर्वोक्तेः । "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इति श्रुतेर्जीवानां बहुत्वेपि कथमेकस्येत्युक्तम्, उच्यते—एकस्यापि तटस्थाख्यजीवशक्तेर्वृत्तिबाहुल्यादेव बहवो जीवा इत्युच्यन्ते, यथा एकस्या अपि बहिरंगाख्याया मायाशक्तेः प्रथममविद्या विद्या चेति द्वे वृत्ती, तयोश्चापि प्रतिजीवं वृत्तिबाहुल्याद्बहुत्वमेव । यथा च—मायावृत्तीनां मायाशब्दवाच्यत्वं तथैव जीवावृत्तीनामपि जीवशब्दवाच्यत्वम् । किञ्च—जीवशक्तिमायाशक्त्योर्वृत्तीनामपि नित्यत्वमेव ज्ञेयम् "नित्यो नित्यानाम्" इति 'बंधमोक्षकरी आद्ये' इत्यादिवचनेभ्योऽविद्याध्वंसे सति 'जीवस्य निर्वाणः' इत्यादिवाक्येषु ध्वंसनिर्वाणशब्दाभ्यामुपरामब्रह्मसायुज्ये उच्येते । ब्रह्मणा सह युज्यत इति सयुक् तस्य भावः सायुज्यमिति जीवस्य न तत्र स्वरूपध्वंसः । किञ्च—"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा । अविद्या कर्मसंज्ञाख्या तृतीया शक्तिरुच्यते ॥ यया क्षेत्रज्ञशक्तिः सा तारतम्येन वर्तते ।" इति विष्णुपुराणोक्तेर्जीवशक्तिर्मायाशक्तेः प्रायो वशीभूता सृष्टिर्लीलासिद्ध्यर्थमित्याह—बद्ध इति । अस्य जीवस्याविद्यया बंधः स च कर्मणोऽनादिः मोक्षसंभवात्, सांत इतरो मोक्षः । स च जन्यत्वात्सादिरनश्वरत्वान्निरन्तो ज्ञेयः । ममांशस्य रश्मिपरमाणुस्थानीयस्य, अत एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ॥ विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥ ५ ॥
सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ॥ एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् ॥ ६ ॥

तथा च प्रतिबिंबानामप्युपाधिभेदेन भेदादेकस्मिन्नुदकुंभे मग्ने तद्गतप्रतिबिंबस्यैव विंबैक्यं नान्यगतस्य तथाऽविद्यायां प्रतिबिंबस्य मदंशस्य जीवस्यैव तत्कृतो बंधस्तस्य चोपाधितो भेदान्नाव्यवस्थेति । तथाचाहुः । " यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते ॥ न सर्वे संप्रयुज्यंते तथा जीवाः सुखादिभिः ॥ " इति । एतच्चातिरहस्यं स्वबुद्ध्या निश्चेतव्यमिति संबोधयति । हे महामते । इतरो मोक्षः ॥ ४ ॥ तदेवं व्यवस्थामुपपाद्य कथं वर्ततेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह । अथेति । तच्च वैलक्षण्यं द्विविधम् । जीवेश्वरयोरेकं जीवानां चैकम् । तत्र जीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरिति सार्धद्वयेन । शोकानंदधर्मवतोरेकस्मिन्धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः ॥ ५ ॥ सुपर्णौ वृक्षात्पक्षिणाविव देहात्पृथग्भूतौ । सदृशौ चिद्रूपत्वात् । सखायौ अवियोगादैकमत्याच्च । यदृच्छयाऽनिरुक्तया मायया । वृश्च्यत इति वृक्षो देहः । " ऊर्ध्वमूलमवाक्छाखं वृक्षं यो वेद संप्रति " इति श्रुतेः । " ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ " इति स्मृतेश्च । तस्मिन्कृतं नीडं निकेतनं हृदयरूपं याभ्यां तौ तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलोऽश्वत्थो देहस्तस्मिन्नदनीयं कर्मफलमित्यर्थः । खादति भक्षयति । अन्य ईश्वरो निरन्नोऽभोक्ताऽपि निजानंदतृप्तो बलेन ज्ञानादिशक्त्या भूयानधिकः । श्रुतिश्च । " द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ॥ तयोरन्यः

जीवस्यैव न तु मंडलस्थानीयस्यात एवैकस्यैव न तु सर्वस्येत्यर्थ इति **संदर्भः** ॥ ४ ॥ यतो जीवस्यैव बंधमोक्षावथ तस्मात् । अथाव्ययं हेतौ । विरुद्धधर्मिणोरीशत्वानीशत्वधर्मवतोर्वा । नियम्यो जीवो नियंता ईश्वरः ॥ * ॥ वैलक्षण्यप्रश्नस्य बद्धमुक्तयोः परस्परं विरुद्धलक्षणाक्रांतत्वलक्षणप्रश्नस्येति **दीपिका** ॥*॥ **विश्वनाथः**—अयं जीवो बद्धोऽयं मुक्त इतिवज्जीवात्मा बद्धः परमात्मा मुक्त इत्यप्युच्यते । " अयमात्मापहतपाप्मा " इतिवत् । चिद्रूपत्वात्सदृशाविति, चिद्रूपत्वेनैव क्वचिदभेदनिर्देश इति भावः ॥ ५ ॥ अवियोगाज्ज्ञानात्प्राग्मूढानां वियोगप्रतीतिः सा चावास्तवी वस्तुत ऐक्यात् । एका चासौ मतिस्तस्या भावस्तथा तस्मात् । ऐकमत्यं चोभयोर्देहादिधारकत्वात् । कृतनीडौ तत्रैकस्य चिदात्मनोऽनाधेयस्यासंगस्य द्वित्वकृतनीडत्वासंभवेपि नियम्योपाधेर्बुद्धेर्नियामकोपाधेर्नियमनशक्तेर्मायाया देहानुगततया तदुपहितत्वेन द्वित्वकृतनीडत्वयोरविरोध एव । देहस्य वृक्षरूपत्वे प्रमाणमूर्द्ध्वमूलमिति । " ऊर्द्ध्वम् " " आनंदाद्ध्येव खल्विमानि भूतानि जायंते " इति श्रुतिप्रसिद्धं मानुषानंदमारभ्योत्तरोत्तरशतगुणविवृद्धानंदसोपानपंक्तेरुपरिस्थितं परमानंदाद्वयं वस्तु तदेव मूलं कारणमस्य संसारवृक्षस्य तमूर्द्ध्वमूलम् , अवाक् ऊर्द्ध्वादधोधः सोपानस्थानीयाः शाखा इव शाखा अव्यक्तमहदहंकारपञ्चतन्मात्राषोडशविकारहिरण्यगर्भविराट्प्रजापतिसुरगंधर्वासुरनरतिर्यक्स्थावररूपा यस्य सोऽवाक्शाखस्तम्, यो नरः संप्रति विनाशित्वेन वेदेति श्रुतिपदार्थः । एतदर्थिकैव श्रीगीतास्मृतिश्च । इत्यर्थ इति—" पिप्पलोऽत्रैषोश्वत्थः सनातनः " इति श्रुत्युक्तो देह एव, तं विना कर्मफलभोगासिद्धेः, पिप्पलान्नं कर्मभोग इति भावः । भक्षयति भोक्तुपाधिबुद्ध्यध्यासात् । श्रुतिस्तु व्याख्यातचरैवेति । भूयान् शुद्धमायोपहितत्वेनानावृतस्वरूपत्वात् ॥ * ॥ अवियोगाद्देहाधिकरणे परस्परं वियोगाभावात् । ऐकमत्यात् एका समाना हृदयावस्थानव्यवसायलक्षणा मतिर्ययोस्तौ एकमती तयोर्भावस्तत्त्वं तस्माच्च सखायौ । वृश्च्यते कालेन छिद्यत इति वृक्षो देहः । ऊर्द्ध्वः सर्वोत्तमो नारायणो मूलं यस्य तम्, अवाक् ततोऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः ॥ योऽविद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तुः नित्यमुक्तः ॥ ७ ॥ देहस्थोऽपि न देहस्थो विद्वान्स्वप्राद्यथोत्थितः ॥ अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥ ८ ॥ इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च ॥ गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः ॥ ९ ॥

पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ " इति ॥ ६ ॥ बलाधिक्यमेवाह । आत्मानमिति । अतो योऽविद्यया युग्युक्तः स तु नित्यबद्धोऽनादिबद्धः यस्तु विद्याप्रधानः स तु नित्यमुक्तः । मायाया अनावरकत्वादाश्रयाव्यामोहकत्वाच्च ॥ ७ ॥ इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह देहस्थोऽपीति दशभिः । विद्वान्मुक्तः संस्कारवशेन देहस्थोऽपि देहस्थो न भवति । तथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितोऽपि तत्रस्थो न भवति तद्गतसुखदुःखाद्यभावात् तद्वत् । तथाच वस्तुतोऽदेहस्थोऽपि कुमतिरविद्वान्देहस्थस्तन्निमित्तसुखदुःखभाक्त्वात् । यथा स्वप्नदेहगत इति ॥ ८ ॥ अत्र हेतुत्वेन वैलक्षण्यांतरमाह द्वाभ्याम् । इंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि यस्तु वि

र्वाचीना हिरण्यगर्भादयः शाखा इव शाखा यस्य तम्, यः संप्रति वेद स तत्त्वं वेदेत्यर्थः । एवं स्मृतावश्वत्थमिति । नश्वरत्वात् श्वः प्रभातपर्यंतमपि स्थास्यतीति विश्वासानर्हत्वादश्वत्थं प्राहुः, प्रवाहरूपेणाविच्छेदादव्ययं च प्राहुरिति । तस्मिन्वृक्षे तयोर्जीवेश्वरयोर्मध्ये सयुजा सयुजौ समानं रूपं चिद्रूपत्वं युज्येते भजत इति सदृशावित्यनेन समानोऽर्थः । समानमेकम " रथाभ्यां नो णः समानपदे " इति वत् । अभिचाकशीति साक्षितया प्रकाशते ॥ ६ ॥ यतोऽविद्याया आवरकत्वमतो हेतोः । अनादिबद्ध इति--अत्र बोधबाध्यबंधस्य नित्यत्वमनादित्वं यावत्कालावस्थायित्वं वा, अन्यथा बन्धनिवृत्तये प्रवृत्तमोक्षशास्त्रस्यारण्यरुदितत्वप्रसंगः स्यादिति भावः ॥ * ॥ विद्याशब्देनात्र स्वरूपशक्तिवृत्तिरेव अक्रूरस्तुतौ तथा व्याख्यातत्वात्, न तु बहिरंगमायाशक्तिवृत्तिः । तथा च गोपालतापनी श्रुतिः– " द्वौ सुपर्णौ भवतो ब्रह्मणोंऽशभूतस्तथेतरो भोक्ता भवति । अन्यो हि साक्षी भवतीति । भोक्तृभोक्तारौ वृक्षधर्मे तिष्ठतः । यत्र विद्याविद्ये न विदामो विद्याविद्याभ्यां भिन्नो विद्यामयो हि यः स कथं विषयीभवतीति " स्मृतिश्च–" छायातपौ यत्र न गृध्रपक्षौ " इति । छायातपौ विद्याविद्ये इति व्याख्या ॥ ७ ॥ देहस्थो न भवतीति तद्देहमृषात्वाध्यवसायात् बाधितानुवृत्त्या देहस्थोपीति । तत्रस्थः स्वप्नदेहस्थः । तद्गतानां स्वप्नदेहगतानाम् । सुखदुःखादीनामभावात् तद्वद्विद्वानपीत्यर्थः । वस्तुतः, अपरिच्छिन्नत्वेनात्मनो हेहकृतपरिच्छेदाभावेप्यविद्वानविद्यावशात्तथात्मानं मन्यत इत्यर्थः । तन्निमित्तानां देहहेतुकानां सुखदुःखानां भागी भवतीति ॥ * ॥ **दीपिका–**वस्तुतो वस्तुस्वरूपविचारेणेत्यर्थः । तन्निमित्तेति–अध्यासेन देहोपाधिकसुखदुःखभागित्यर्थः ॥ ८ ॥ अत्र सुखदुःखादिभोक्तृत्वाभोक्तृत्वे । कुतो नाहंकरोतीति चेदाह–गुणैर्गुणकार्यैरिन्द्रियैर्गुणेषु गुणकार्येषु विषयेषु अत एव गुणा गुणेषु वर्तन्त इति ज्ञानादेव । अत्र भगवदुक्तिं प्रमाणयति–तदुक्तमित्यादि । हे महाबाहो गुणकर्मविभागयोस्तत्त्वविद्यथार्थज्ञ इति मत्वा न सज्जते न कर्तृत्वाभिमानं करोतीति गीतार्थः ॥ * ॥ विकारवत्त्वेप्यहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैवाधीने शरीरेऽस्मिन्गुणभाव्येन कर्मणा ॥ वर्तमानोऽबुधस्तत्र कर्ताऽस्मीति निबध्यते ॥ १० ॥ एवं विरक्तः शयन आसनाटनमज्जने ॥
दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥ ११ ॥ न तथा बध्यते विद्वांस्तत्रतत्रादयन्गुणान् ॥ प्रकृतिस्थोऽप्यसंसक्तो यथा खं सविताऽनिलः ॥ १२ ॥
वैशारद्येक्षयाऽसंगशितया छिन्नसंशयः ॥ प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥ १३ ॥ यस्य स्युर्वीतसंकल्पाः प्राणेंद्रियमनोधियाम् ॥ वृत्तयः स
विनिर्मुक्तो देहस्थोपि हि तद्गुणैः ॥ १४ ॥ यस्यात्मा हिंस्यते हिंस्रैर्येन किंचिद्यदृच्छया ॥ अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः ॥ १५ ॥

गुणैर्गुणेषु गृह्यमाणेषु । अत एवाविक्रियो रागादिशून्यः । तदुक्तं गीतासु । "तत्त्ववित्तु महाबाहो गुणकर्म द्वान्स नाहं कुर्यादहं गृह्णामीति मतिं न कुर्यादित्यर्थः । कुतः । गुणैर्गुणेषु गृह्यमाणेषु । अत एवाविक्रियो रागादिशून्यः । तदुक्तं गीतासु । "तत्त्ववित्तु महाबाहो गुणकर्म विभागयोः ॥ गुणा गुणेषु वर्तंत इति मत्वा न सज्जते ॥" इति ॥ ९ ॥ अबुधस्तु पूर्वकर्माधीनेऽस्मिञ्छरीरे वर्तमानो गुणैरिंद्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्यते । कुतः । कर्ताऽस्मीत्यहंकारेण । तदुक्तं तत्रैव । "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्ताऽहमिति मन्यते ॥" इति । एतैस्त्रिभिः श्लोकैः कथं वर्तेतेत्यस्य प्रश्नस्य सुखदुःखशून्यो निरभिमानश्च देहे वर्तत इत्युत्तरमुक्तं भवति ॥ १० ॥ वैलक्षण्यांतरं वदन्किं भुंजीतेत्यादिप्रश्नोत्तरमाह एवमिति त्रिभिः । अन्यगतमेवं कर्म मां बध्नातीत्येवं विरक्तो विद्वान् । तथा अविद्वानिव शयनासनादिषु न बध्यते । कुतः । तत्रतत्र विषयेषु गुणानिंद्रियाण्यादयन् भोजयंस्तत्साक्षित्वेन वर्तमानो न तु स्वयमदन् । एतदेव कुतस्तत्राह, प्रकृतिस्थोऽपीति सार्धेन । यथा खं सर्वत्र स्थितमपि न सज्जते यथा सविता जले प्रतिबिंबितोऽपि यथाऽनिलः सर्वत्र संचरन्नपि तद्वत् ॥ ११ ॥ १२ ॥ असंगेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया असंभावनादयो यस्य सः । नानात्वाद्देहादिप्रपंचात् ॥ १३ ॥ कथं विहरेदि त्यस्योत्तरत्वेन वैलक्षण्यांतरमाह । यस्य स्युरिति । तद्गुणैर्देहगुणैः । संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरन्मुक्त इत्यर्थः ॥ १४ ॥ एवं तावद्बद्धमुक्तयोः स्वसंवेद्यमेव

न किमपि करोमीति वाचैव ब्रुवन्कपटी महाबद्धो ज्ञेय इति **विश्वनाथः** ॥ ९ ॥ तत्रैव गीतास्वेव । सर्वशः सर्वाणि कर्माणि । प्रकृतेर्गुणै क्रियमाणान्यपि । अहंकारेण देहाद्यध्यासेन विमूढचेता अहं कर्तास्मीत्यभि मन्यत इत्यर्थः ॥ * ॥ ० ॥ १० ॥ रक्तिः रागोऽध्यासस्तद्रहितो विरक्तः । सार्धेनान्वयः ॥ * ॥ ० ॥ ११ ॥ एतदेवाबंधनमेव । प्रकृतिस्थः प्रकृतिकार्ये देहे स्थितोप्यसंसक्तस्तदध्यासरहितः । यथा खादय उपहिता अप्युपाधिधर्मैर्न विक्रियंते तद्वदित्यर्थः ॥ * ॥ एतदेव साक्षित्वेन वर्तमानत्वमेव । प्रकृतिस्थोऽपीति सार्द्धकम् ॥ १२ ॥ वैशारद्येक्षया ब्रह्मैवात्मेति दृष्ट्या । आदिना विपरीतभावनादीनां ग्रहः । प्रतिबुद्धो जागरणं प्राप्तः ॥ * ॥ ० ॥ १३ ॥ किञ्च—प्राणेंद्रियमनोधियां वृत्तयः चेष्टाशब्दादिसंकल्पाध्यवसायादिरूपाः । वीतसंकल्पाः फलानुसंधानरहिताः । देहस्थोऽपि तद्गुणैर्देहधर्मैः कार्श्यादिभिः । इत्यर्थ इति— नालिकेरकपालमुक्तांतस्थनालिकेरवदसंगो विहरन्मुक्तो भवतीति भावः ॥ * ॥ प्राणेंद्रियमनोधियां वृत्तयः क्षुत्पिपासादर्शनश्रवणादिसंकल्पविकल्पनिश्चयरूपाः पुरुषकर्तृकसदसत्संकल्पशून्या भवन्ति । देहगुणैर्जन्म नाशादिभिर्मुक्तः ॥ १४ ॥ स्वसंवेद्यविद्वदविद्वद्वैलक्षण्यमुक्त्वा परसंवेद्यं तदाह—एवमिति । इत्यर्थ इति—रुष्टस्तुष्टो वा ताडनार्चनाभ्यामिति भावः । एतल्लक्षणीभूतं प्रमाणमाह—तदुक्तमिति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न स्तुवीत न निंदेत कुर्वतः साध्वसाधु वा ॥ वदतो गुणदोषाभ्यां वर्जितः समदृङ् मुनिः ॥ १६ ॥ न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा ॥ आत्मारामोऽनया वृत्त्या विचरेज्जडवन्मुनिः ॥ १७ ॥ शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि ॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ॥ १८ ॥ गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च ॥ वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया रक्षति दुःखदुःखी ॥ १९ ॥

वैलक्षण्यमुक्तमिदानीं 'कैर्वा ज्ञायेत लक्षणैः' इत्यस्योत्तरतया परैरपि सुज्ञेयं वैलक्षण्यमाह यस्यात्मेति त्रिभिः । हिंस्रैर्दुर्जनैरन्यैर्वा प्राणिभिर्यस्यात्मा देहः पीड्यते । यदृच्छया येन केनापि कचित्किंचिदर्च्यते वा स बुद्धश्चेत्तत्र न व्यतिक्रियते नातिविक्रियत इत्यर्थः । तदुक्तं याज्ञवल्क्येन । "यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति ॥ अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य च ॥" इति ॥ १५ ॥ किंच । साध्वसाधु वा कुर्वंतो वदतो वा जनान्न स्तुवीत न च निंदेत । यो लौकिकव्यवहारे विमुखः स मुक्त इत्यर्थः ॥ १६ ॥ अपि च न कुर्यादिति । यो दैहिकेऽपि कर्मण्युदासीनः स मुक्तः । इतरो बद्ध इत्यर्थः । एतान्येव सर्वाणि मुमुक्षोः साधनानि ज्ञातव्यानि ॥ ॥ १७ ॥ यस्तु केवलं शब्दब्रह्मण्यभिज्ञः पांडित्यमात्रश्लाघी न तूक्तैः साधनैस्तदर्थनिष्ठो भवेत्तं निंदति । शब्दब्रह्मणि निष्णातोऽर्थतः पारं गतोऽपि परे ब्रह्मणि न निष्णायात् ध्यानाद्यभियोगं न कुर्यात्तस्य शास्त्रश्रमः श्रमैकफलो न तु पुरुषार्थपर्यवसायी । अधेनुं चिरप्रसूतां गाम् ॥ १८ ॥ एतदेवान्यार्थनिदर्शनैः प्रपंचयति । गा

तस्य कंटकवेद्धुः । तस्य च चंदनलेपयितुश्च । समो निर्विकार एकरूप इत्यर्थः ॥ * ॥ स्वसंवेद्यं बद्धमुक्ताभ्यामव सुज्ञेयम् । नातिविक्रियते हर्षशोकादिवशो न स्यात्तत्परवेद्यलक्षणम् ॥ १९ ॥ अन्यदाह—किंचेति । गुणदोषाभ्यां नामरूपगतगुणदोषाभ्यां तयोर्बाधेन वर्जितोऽधिष्ठानतया सच्चिदात्मनानुगतब्रह्मदृक् मुनिस्तदैक्यानुसंधानपरः । इत्यर्थ इति—पश्यन्नप्यपश्यन्निव जानन्नप्यजानन्निव विहरेदिति भावः ॥ * ॥ ० ॥ १६ ॥ इममेवार्थं पुनराह—अपि चेति । द्वैतस्य मृषात्वनिश्चयान्न किञ्चित्कथनादिकं कुर्यात् । इत्यर्थ इति—सर्वकर्मातीतो मुक्तस्तदासक्तो बद्ध इति भावः । यानि मुक्तस्य स्वाभाविकधर्माणि तान्येव मुमुक्षोः साधनानीत्याह—एतानीति ॥ * ॥ एतानि निरहंकारत्वविरक्तत्वादीनि सिद्धस्य मुक्तस्यासाधारणलक्षणान्यपि साधकस्य मुमुक्षोः साधनानि मुक्त्यर्थमनुष्ठेयानीति ज्ञेयानि ॥ १७ ॥ मुक्तैर्निरहंकारादिभिः । तदर्थनिष्ठः तस्मिन् शब्दब्रह्मणोऽर्थे विचारे निष्ठा यस्य स तथा । पुरुषार्थो मोक्षस्तदवसानः ॥ * ॥ ध्यानादीत्यादिना भक्त्यंगनामकीर्तनादिग्रहः । पुरुषार्थपर्यवसायी मुक्तिसाधकः ॥ * ॥ **विश्वनाथस्तु**—भक्तिं सच्चिदानंदमयाकारत्वभावनया भगवति कुर्वीत तदैवायमुक्तलक्षणो मुक्तजीवः सिध्येदन्यथा तु पतेदित्याह—शब्दे वेदशास्त्रे ब्रह्मणि तत्प्रतिपाद्ये निर्विशेषे ब्रह्मणि च निष्णातः विशिष्टज्ञानकुशलः, किंतु परे ताभ्यामपि सकाशात्परमाश्रयत्वेन श्रेष्ठे भगवति न निष्णायात् भक्तिकौशलवान्न भवेत् । निष्णातशब्दस्य कुशलार्थत्वाद्भगवति सच्चिदानंदाकारत्वभावनया भक्तिरेवात्र कुशलडा, यां विना तस्य श्रमः साधनश्रमः श्रमैकफलो व्यर्थ एव न तु पुरुषार्थप्रापकः, दुग्धकामस्य अधेनुं वंध्यां चिरप्रसूतां वा रक्षतो यथा श्रमः । अत्र शब्दब्रह्मणि वेदे निष्णातोपि परे ब्रह्मणि निर्विशेष इति व्याख्यायामेकदेशान्वय उत्तरश्लोकतात्पर्यविरोधश्च स्यात् ॥ * ॥ **संदर्भस्तु**—पूर्वं ज्ञानयोगमुक्त्वाऽधुना भक्तियोगमुद्भावयितुमाह—शब्दब्रह्मणीति । अत्र परब्रह्मपदेन परतत्त्वमात्रमुच्यते न तु ब्रह्मत्वभगवत्त्वादिविवेकेनेति ज्ञेयं सर्वत्र तत्सामान्यात् ॥ १८ ॥ एतदेव श्रमफलत्वमेव । अन्यार्थानां निदर्शनैर्दृष्टान्तैः । दुग्धदोहां दुग्धदानहीनामिति व्यवहारे दृष्टान्तः । परमार्थे तु "न गोसेवनतो धर्मः परोस्ति ह्यनिमित्तकात्" इत्यादिपुराणात्सर्वदा गोसेवा कल्याणदेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य ॥ लीलावतारेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धीरः ॥ २० ॥
एवं जिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि ॥ उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥ २१ ॥

मिति । दुह्यत इति दोहः पयः । दुग्धो दोहो नोत्तरत्र दोह्योऽस्ति यस्यास्तामर्थशून्याम् । असतीं भार्यां कामशून्याम् । देहं पराधीनं प्रतिक्षणं दुःखहेतुम् । असत्प्रजां दृष्टादृष्टसाधनशून्यं पुत्रम् । अतीर्थीकृतमागते पात्रेऽदत्तं वित्तं दुष्कीर्तिदुरितापादकम् । अंग हे उद्धव । दुःखानंतरं दुःखमेव यस्य स रक्षति ॥ १९ ॥ मया हीनां वाचमित्युक्तमेव विवृणोति । यस्यां वाचि मे जगतः शोधकं चरित्रं न स्यात् । किं तत् । अस्य विश्वस्य स्थित्यादिरूपम् । तद्धेतुरित्यर्थः । लीलावतारेष्वीप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म वा न स्यात् । तां निष्फलां गिरं धीरो धीमान्न धारयेत् ॥ २० ॥ उक्तं ज्ञानमार्गमुपसंहरति । एवं निश्चित्य विचारेणात्मनि नानात्वभ्रमं

भावः । अर्थो दुग्धदानम्, तच्छून्याम् । 'सती साध्वी पतिव्रता' इत्यमरोक्तेः पातिव्रत्यधर्महीनां विरक्तां वा । दुःखहेतूनि परान्नभक्षणादीनि, व्यसनानि । दृष्टसाधनानि ऐहिकसेवादीनि, अदृष्टानि "सोयं परलोकः पुत्रेण जय्यः" इति श्रुतेः परमेश्वरनिष्ठास्वधर्मनिष्ठादीनि तद्रहितां संततिम् । मया हीनां मत्कीर्तनादिशून्याम् । 'वाचस्तु गोविंदगुणस्तवे फलम् ' इत्याद्युक्तेः सर्वदा दुःखीति भावः ॥ * ॥ दीपिका—एतदेव ध्यानाद्य भावे शास्त्राभ्यासस्य श्रमैकफलत्वमेव । अन्यार्थनिदर्शनैरन्यपदार्थदृष्टान्तैः । असतीं व्यभिचारिणीत्वात्कामशून्याम् । दृष्टमैहिकं धनार्जनवचनांगीकारादि, अदृष्टं श्राद्धादि, तच्छून्यम्, मया हीनां मदीयलीलादिशून्यां वैदिकीमपि वाचम् ॥ * ॥ संदर्भस्तु—तदेवं शब्दब्रह्माभ्यासस्य परब्रह्माभ्यासः प्रयोजनमित्युक्तम् । तत्र सर्वेष्वंशेषु विशेषत उपनिषद्भागे शब्दब्रह्मणस्तत्प्रतिपादकत्वे स्थितेपि तद्विचारकोटिभिरपि परब्रह्मनिष्ठा कथनमात्राद्दते न जायते । किन्तु यस्य यस्मिन्नंशे श्रीभगवदाकारपरब्रह्मलीलादिकं प्रतिपद्यते तदभ्यासेनैव च भगवदाकारे च निष्ठा जायते । तद्वक्ष्यति द्वादशे—"संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य । लीलाकथारसनिषेवणमंतरेण" इति, "श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये । तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥" इति च विरिञ्च्युक्तेः । अत एव मदीय लीलाशून्यां वैदिकीमपि वाचं नाभ्यसेदित्याह द्वाभ्याम्—गामिति । मया श्रीभगवता हीनां मम लीलादिशून्याम् ॥ * ॥ दीपिकाप्रकाशस्तु—दृश्यश्रव्यादीन्विषयान्मत्संबद्धानेव स्वीकुर्यान्न तु मत्संबंधशून्यान् । एतदेव मयि निष्णातत्वमिति वक्तुं सर्वेंद्रियव्यापारोपलक्षकमेकं वागिंद्रियव्यापारमेव लक्षीकृत्य स बहुतरदृष्टान्तमाह—गामिति । दुह्यत इति दोहः पयः, दुग्धो दोहो नोत्तरत्र दोहोऽस्ति यस्यास्तां कस्माच्चिन्मूल्यदानेन विनैव प्राप्तां रक्षति पाति गौरियं मद्दत्तबहुतरघासादिचारणैर्दुग्धवती पुनः प्रसूतिमती च भविष्यतीति बुद्ध्या दुग्धलोभी दुःखदुःखी ऐहिकदुःखवान् आयत्यां तस्या गोर्दुग्धलाभादर्शनेनोपेक्षणादुपेक्षणजन्यपापात्पारत्रिकं च यद्दुःखं तद्वान् । एवमसतीं भार्यां सतीजनकृतधर्मोपदेशेनेयमायत्यां सती भविष्यतीति बुद्ध्या संतानकामलोभी रक्षतीत्येवमसत्प्रजामित्यादावपि व्याख्येयम् ॥ १९ ॥ देवतांतरप्रसंगपरं वाचःफलं किं न स्यादित्यतो 'मया हीनाम्' इत्येव विवृणोतीति । यस्यां वाचि । इत्यर्थ इति—विश्वसृष्ट्यादिप्रभाववर्णनरूपमिति भावः । यद्वा—अध्यारोपापवादाभ्यामुपाधिबाधकत्वादाधिष्ठानविचाररूपमित्यर्थः । जन्मपदमवतारकार्यपरं कारणेन कार्यग्रहण मिति । "एकान्तलाभं वचसो न पुंसां सुश्लोकमौलेर्गुणवादमाहुः" इत्युक्तेर्निष्फलामित्यर्थः ॥ * ॥ ननु त्वत्सहितैव वाक् का, किं तत्त्वमस्यादिर्जीवब्रह्मैक्यप्रतिपादिका वा काचिदन्यैवेति तां स्पष्टमावेदयेत्यपेक्षायामाह—यस्यामिति । तां निष्फलां गिरं वेदलक्षणामपि । तदुक्तं श्रीनारदेन—'इदं हि पुंसस्तपसः श्रुतस्य वा' इत्यादि । अत एव गीतं कलियुगपावनावतारेण श्रीभगवता—"श्रुतमप्यौपनिषदं दूरे हरिकथामृतात् । यन्न संति द्रवच्चित्तकंपाश्रुपुलकोद्गमाः ॥" इति ॥२०॥ उपारमेत्प्रवृत्तिमार्गादिति शेषः । इत्यर्थ इति—न शास्त्रपांडित्यं कृतकृत्यतापादकम् "नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्" इत्यादिश्रुतेः, "तदा गंतासि निर्वेदं श्रोत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलम् ॥ मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ २२ ॥
श्रद्धालुर्मे कथाः शृण्वन्सुभद्रा लोकपावनीः ॥ गायन्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः ॥ २३ ॥

देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधार्य उपारमेत । न शास्त्रपांडित्यमात्रेणेत्यर्थः ॥ २१ ॥ यद्यनीशोऽशक्तस्तर्ह्यास्तामिदं कृतार्थो भविष्यसीत्याह । मयीति । मयि मदर्पणेनेत्यर्थः ॥ २२ ॥ मदर्पणेन कर्मणा विशुद्धसत्त्वस्यांतरंगां भक्तिमाह श्रद्धालुरिति द्वाभ्याम् । अभिनयन्स्वयमनुकुर्वन् ॥ २३ ॥

व्यस्य श्रुतस्य च" इति स्मृतेश्चेति भावः ॥ * ॥ तदेवं भक्त्यैव ज्ञानं सिध्यतीत्युक्तम् । एवं जिज्ञासया बद्धो मुक्त इत्यादिपूर्वोक्तप्रकारविचारेण आत्मनि शुद्धजीवे नानात्वं देवत्वमनुष्यत्वादिभेदमपोह्य एवं मल्लीलादिश्रवणेन मनो मयि ब्रह्माकारे सर्वगे संधार्य साधनप्रयासाद्विरमेन्न तु पांडित्यमात्रश्लाघी भवेदित्यर्थः ॥ २१ ॥ मयीति निमित्ते सप्तमी, मन्निमित्तमित्यर्थः ॥ * ॥ तदेवं ज्ञानमिश्रां भक्तिमुपदिश्य तदनादरेणानुषंगिकसिद्धगणां शुद्धामेव भक्तिमाह—चतुर्भिः । यदीति निश्चये । टीकायाम् 'धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि' इत्यादिवत् । अत्र खलु ज्ञानेच्छुरेव प्राकृतः श्रीमदुद्धवं प्रति च तादृशत्वमारोप्यैवेदमुच्यते । ततश्च—'श्रेयःसृतिं भक्तिमुदस्य' इत्यादिप्रमाणेन भक्तिं विना केवलज्ञानमार्गेण ब्रह्मणि धारयितुं निश्चितमेवानीशो भवति, ततोपि स्वतो ज्ञानादिगुणसेवितं भक्तिमार्गमेवाश्रयति । तत्सोपानमुपदिशति—यदीत्यादिना । अथवा प्राक्तनभक्तिबलाभावाद्ब्रह्मज्ञानेच्छुर्यदि तत्र मनो धारयितुमनीशः स्यात्तदाधुनाप्येवं कुर्विति योज्यम् । समाचर अर्पय । निरपेक्षः वांछांतररहितः । किंवा—तदेवमपि यस्य लीलाकथायां श्रद्धा न स्यात्तस्य ब्रह्मधारणायामप्यशक्तिस्स्यात्, किमुत भगवद्धारणायामिति लक्ष्येण शुद्धभक्तावेव पर्यवसायितुमाह—यद्यनीश इति संदर्भः ॥ * ॥ **विश्वनाथस्तु**—एवञ्च मदर्पितनिष्कामकर्मणैवांतःकरणशुद्धिः, अंतःकरणशुद्ध्यधीनमेव भक्तिसहितं ज्ञानम्, तेन च ब्रह्मणि निश्चलमनोधारणा, ततः 'ब्रह्मभूतः प्रसन्नात्मा' इत्यादिमदुक्तेर्विद्योपरामसमये विद्योत्तीर्णाया मद्भक्तेः प्राप्तिः, तया च विपक्वकषायस्य मनसो मयि सम्यङ्निदिध्यासनम्, ततो भक्त्युत्थेन शुद्धज्ञानेन सायुज्यमिति क्रमः । तत्र कश्चिद्यदि निश्चलमनोधारणात्मिकां चतुर्थीं भूमिकामप्यधिरोढुं न शक्नुयात्तदा स्वान्तःकरणस्य सम्यक्छुद्धभावमनुमाय तच्छुद्ध्यर्थं पुनरपि मदर्पितनिष्कामकर्मैव कुर्यादित्युद्धवं लक्ष्यीकृत्याह—यद्यनीश इति । सर्वाणि नित्यनैमित्तिकनिवृत्तकर्माणि ॥ २२ ॥ सुभद्राः श्रवणादेव मंगलकराः । लोकानां तीर्थस्नानादपि पावनीः पावित्र्यापादकाः । अनुकुर्वन् रावणवधरासलीलादिकं मुहुः प्रतिदिनं पर्वादौ वा कारयन्नित्यर्थः ॥ * ॥ तदेवं सार्धचतुर्भिर्ज्ञानयोगमुक्त्वा भक्तियोगमाह—श्रद्धालुरित्यादिना 'मया स्या ह्यकुतोभयः' इत्यन्तेन । अत्र शीलार्थकेनालुच्प्रत्ययेन भक्तावौपाधिकश्रद्धावन्तो ज्ञानिप्रभृतयो व्यावृत्ताः । प्रथमत एव श्रद्धालुरिति पदोपन्यासो भक्तावीदृशश्रद्धावानेवाधिकारीति ज्ञापयति । यद्वक्ष्यते—"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् । न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः ॥" इति । "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥" इति । ज्ञानकर्माधिकारिभ्योऽस्य भेदाश्च—सुभद्राः दधिपयःपरस्त्रीचौर्यवेणुगानरासाद्या गायन्ननुस्मरन्निति, गानस्य पौनःपुन्येन स्मरणस्यापि पौनःपुन्यं स्वत एव भवेदिति भावः । कर्म कालियदमनादिकम्, जन्म नंदोत्सवादिकम्, नाटकादिरीत्याऽभिनयत् जन्मकर्मलीलयोर्मध्ये येंशा निजाभीष्टभावं भक्त गतास्तान्स्वयमनुकुर्वन् । भगवद्भक्तान्भक्तांतरगतांश्च तानन्यद्वारानुकुर्वन्नित्यर्थः ॥ २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्चलां भक्तिं मय्युद्धव सनातने ॥ २४ ॥ सत्संगलब्धया भक्त्या मयि मां समुपासिता ॥ स वै मे दर्शितं सद्भिरंजसा विंदते पदम् ॥ २५ ॥ उद्धव उवाच ॥ साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो ॥ भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता ॥ ॥ २६ ॥ एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो ॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यताम् ॥ २७ ॥ त्वं ब्रह्म परमं व्योम पुरुषः प्रकृतेः परः ॥ अवतीर्णोसि भगवन्स्वेच्छोपात्तपृथग्वपुः ॥ २८ ॥

आचरन्सेवमानः ॥ २४ ॥ ततश्चानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या स भक्तो मामुपासिता ध्याता भवति स च ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं सुखेनैव मे पदं स्वरूपं प्राप्नोति ॥ २५ ॥ सत्संगलब्धया भक्त्येत्युक्तं तत्र सतां भक्तेश्च विशेषं पृच्छति । साधुरिति । साधवः स्वस्वमतिकल्पिताः संति बहवस्तव तु कीदृशो मतः संमतः भक्तिरपि बहुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत । सद्भिश्च नारदादिभिरादृता ॥ २६ ॥ एतच्च कथ्यताम् । इदं चातिगुह्यं त्वयैव वक्तव्यमित्यैश्वर्यमाविष्करोति हे पुरुषाध्यक्षेत्यादिना । ब्रह्मादिंनियंतः ॥ २७ ॥ अत्र हेतुः । त्वमिति । व्योमवदसंगः । यतः प्रकृतेः परः । स्वेषां भक्तानामिच्छयोपात्तं पृथक्शरीरमितं

मदर्थे मत्सेवार्थम् । धर्मान्नित्यादिकर्माणि, कामान्भोज्यवासोलंकारादीन्, अर्थानर्थसंचयान्।तत्रापि मदपाश्रय एव न स्वप्रयत्नाभिमानी।हे उद्धव मयि सनातने सच्चिदात्मना प्रत्यगात्मना च सर्वानुगते निश्चलां भक्तिं लभते ॥*॥ किञ्च—यो धर्मो गोदानादिलक्षणस्तमपि मदर्थे मदीयजन्मोत्सवाद्यंगत्वेनैवेत्यर्थः, यश्च कामो महाप्रसादसेवननिवासादिलक्षणस्तमपि मदीयसेवार्थमन्मंदिरयासादिलक्षणत्वेनैव, यश्चार्थो धनसंग्रहस्तमपि मदर्थे मत्सेवोपयोगित्वेनैवाचरन्सेवमानस्तामेव कथाश्रवणादिलक्षणां निश्चलां सर्वदाप्यव्यभिचारिणीं लभते, तत्सुखेन कैवल्यादेरप्यनादरात् "या निर्वृतिस्तनुभृतां तव पादपद्मसेवाभवज्जनकथाश्रवणेन वा स्यात्" इत्याद्युक्तेः । न च भजनीयस्य चलतया तस्यापि चलता शंक्या, यतः सनातने ॥ * ॥ **विश्वनाथस्तु**—मदर्थे मत्सेवार्थम्, मज्जन्मयात्रादिदिवसे मत्स्वरूपश्रीगुरुदेवाराधनदिवसे च धर्मा ब्राह्मणवैष्णवसंप्रदानकान्नवस्त्रादिदानानि, कामा वैष्णवसमाजप्राप्तमधुरमहाप्रसादान्नभोजनस्रक्चंदनतांबूलोपयोगिवसनधारणाद्याः, अर्था विष्णुवैष्णवसेवार्थद्रव्याहरणानि, एतानाचरन्कुर्वन् निश्चलां साधनसाध्यदशयोः स्थिरां नैष्ठिकीम् । सनातन इति—तदाराध्यस्य मद्विग्रहस्य सनातनत्वाद्भक्तिरपि सनातनी निश्चलैवेति भावः ॥ २४ ॥ दर्शितं स्वस्मिन्नेव साक्षाद्बोधितम् ॥ * ॥ ० ॥ २५ ॥ लोकोपकारप्रश्नमुत्थापयति—तत्र सत्संगेत्याद्युक्तौ । लोकास्त्वसाधूनपि स्वानुरागेण साधून्मन्यन्ते, समलांश्च निर्मलान्मन्यंते, विरुद्धक्रियां च भक्तिं मन्यंते । भवतोपि तादृशं मतं भिन्नं वेत्याशयवान्पृच्छति—साधुस्तवेति ॥ * ॥ **दीपिका**—विशेषं विशिष्टलक्षणम् । नारदादिभिरादृतेति भक्तेस्तत्त्वं त एव जानन्ति तेषां च माहात्म्यं भवानेवेति भेदेन दृष्टं भक्तिप्रादुर्भावकं साधुं पृच्छति—साधुस्तवेति ॥ २६ ॥ एतच्च साधूनां भक्तेश्च लक्षणम् । पुरुषाध्यक्षेत्यादिसंबुद्धित्रयं साभिप्रायम्—प्रणताय पुरुषोपि वदति किं पुनः पुरुषाध्यक्षः, अनुरक्ताय लोक्यंते यज्ञेषु ये ते लोका देवा अपि वदंति किं पुनस्तदध्यक्षः, प्रपन्नाय जगत् सर्वो वदति किं पुनर्जगत्प्रभुर्भवानिति । यद्वा—पुरुषाध्यक्षपदेन प्राप्तां राजतुल्यतां लोकाध्यक्षपदेन वारयित्वा तेन प्राप्तेंद्रादिसमतां जगत्प्रभो इत्युक्त्या वारयित्वा सर्वेश्वरत्वेन मद्धितकरणमप्युचितमेवेति प्रार्थयते ॥ * ॥ हे पुरुषाध्यक्ष महत्स्रष्ट्राद्यवतारिन् । लोको वैकुंठम् । जगच्चानंतब्रह्मांडात्मकम् । प्रणताय भक्ताय । अनुरक्ताय स्निग्धाय । प्रपन्नाय स्वैकशरणाय ॥ २७ ॥ अत्र सर्वेश्वरत्वे । कुतोऽसंगः यतः प्रकृतेर्मायातः । तर्हि कथं मायातीतस्य ब्रह्मणो देहसंबंध इति चेदाह—स्वेषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनाम् ॥ सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः ॥२९॥ कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः॥ अनीहो मितभुक्छांतः स्थिरो मच्छरणो मुनिः॥३०॥अप्रमत्तो गभीरात्मा धृतिमाञ्जितषड्गुणः॥अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥३१॥

वपुर्येन सः ॥ २८ ॥ तत्र त्रिंशल्लक्षणैः साधुं निरूपयति कृपालुरिति पंचभिः । कृपालुः परदुःखासहिष्णुः । सर्वदेहिनां केषांचिदप्यकृतद्रोहः । तितिक्षुः क्षमावान् । सत्यं सारः स्थिरं बलं वा यस्य सः । अनवद्यात्माऽसूयादिरहितः । सुखदुःखयोः समो हर्षविषादरहितः । यथाशक्ति सर्वेषामुपकारकः ॥ २९ ॥ कामैर्विषयैरक्षुभित चित्तः । दांतः संयतबाह्येंद्रियः । मृदुरकठिनचित्तः । शुचिः सदाचारः । अकिंचनोऽपरिग्रहः । अनीहो दृष्टक्रियाशून्यः । मितभुक् लघ्वाहारः । शांतो नियतांतःकरणः । स्थिरः स्वधर्मे । मच्छरणो मदेकाश्रयः । मुनिर्मननशीलः ॥ ३० ॥ अप्रमत्तः सावधानः गभीरात्मा निर्विकारः । धृतिमान्विपद्यप्यकृपणः । जितषड्गुणः " क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः" एते जिता येन सः । अमानी न मानाकांक्षी । अन्येभ्यो मानदः । कल्पः परबोधने दक्षः । मैत्रोऽवंचकः । कारुणिकः करुणयैव प्रवर्त

मिति । स्वीयानां भक्तानामिति यावत् । उपात्तं स्वीकृतम् । वपुश्शुभाकारतनुः 'शुभाकारतनौ वपुः' इति यादवः । "नित्यानंदशरीरोपि वसुदेवादिदेहगः । प्रदर्शयेज्जनिं स्वस्य नित्यं कारणवर्जितः ॥" इति तीर्थोक्तेः ॥ * ॥ साक्षाद्भगवानेव त्वमवतीर्णो भगवत एव वैभवमाह–ब्रह्म त्वं परमव्योमाख्यो वैकुंठस्त्वं प्रकृतेः परः पुरुषोपि त्वमिति । भगवानपि कथंभूतः सन्नवतीर्णः–'स्वेच्छामयस्य' इत्यनुसारेण स्वेषां सर्वेषामेव भक्तानामिच्छयैतां पूरयितुमुपात्तानि ततस्तत आकृष्टानि पृथग्वपूंषि निजतत्तदाविर्भावा येन तथाभूतः सन्निति, तं प्रति यथाह जांबवान्–'यस्येषदुत्कलितरोषकटाक्षमोक्षैः' इत्यादि । तथा च देवाः–'केतुस्त्रिविक्रमयुतः' इत्यादि । तथा च ब्रह्मणा–'नारायणस्त्वम्' इत्यादौ 'नारायणोंगम्' इति । यथा च देवाः–'स्यान्नस्तवांघ्रिः–' इत्यादि । अत एवाक्रूरः–'अद्भुतानि' इत्यादि । अत एव 'गोविंदभुजगुप्तायाम्' इत्यादि ॥ २८ ॥ तत्र साधुभक्त्योर्मध्ये ॥ * ॥ कर्मज्ञानादिमिश्रा केवला चेति मद्भक्तेर्द्वैविध्यात्तत्प्रवर्तकः साधुरपि द्विविधस्तत्राद्यमाह त्रिभिः । कृपालुत्वाद्यष्टाविंशतिगुणवानयं सत्तम इत्युत्तरस्यानुषङ्गः । अत्र शांत इति जितषड्गुण इति पदाभ्यामयं सिद्धभक्तो निर्वाणवांछाशून्यत्वात् । भक्तात्मारामः शांत इति संज्ञाभ्यामुच्यतेऽयं स्वपूर्वदशायां ज्ञानमिश्रभक्तिमान्, तत्पूर्वदशायां कर्ममिश्रभक्तिमानासीदतस्तदातदास्य भक्तेः प्राधान्यम् । सिद्धिदशायां तु कर्मज्ञानाद्यावरणाच्छुद्धभक्त एवायमुच्यत इत्यतः–सत्तम इति । ज्ञानमिश्रभक्तिमान् सत्तरः, कर्ममिश्रभक्तिमांस्तु सन्नित्यवगम्यते । अतोयं स्वसंगिनं स्वतुल्यं चिकीर्षुः प्रथमं कर्ममिश्रां भक्तिमुपदिशति, ततस्तेनोपदिष्टः स च निष्कामः कर्ममिश्रामेव भक्तिं कुर्वन् "न कर्माणि त्यजेद्योगी कर्मभिस्त्यज्यते हि सः" इति न्यायेनारूढदशायामनादृतत्वात् स्वत एव कर्मणामुपरामे सति ज्ञानमिश्रां भक्तिं लभते । ततस्तत्पाकदशायां भक्तेः प्राबल्ये सति ज्ञानेप्यनादृतत्वादुपरमत्प्राये सति भक्तात्माराम इति शांतभक्त इति संज्ञाभ्यां स चाप्युच्यमानो भवति । तस्य ज्ञानेनादरो यथा–भक्तिरसामृतसिंधुधृता तदुक्तिः–"अस्मिन्सुखघनमूर्तौ परमात्मनि वृष्णिपत्वेन स्फुरति । आत्मारामतया मे बत वृथा गतश्चिरं कालः ॥" इति । "हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः" इति प्रथमे च । तद्दशायां भक्तिबाधितस्य ज्ञानस्य सत्त्वेपि तस्य भक्त्यनावरकत्वात् । "अन्याभिलाषताशून्यं ज्ञानकर्माद्यनावृतम् । आनुकूल्येन कृष्णानुशीलनं भक्तिरुच्यते ॥" इति भक्तिलक्षणस्य तत्र नाव्याप्तिर्ज्ञेया ॥ २९ ॥ अकिञ्चनत्वं सर्वथा न संभवति पानपात्राच्छादनादेरग्रहणप्रसंगादतोऽर्थांतरमाह–न विद्यते किंचन किमिदमिति प्रश्नयोग्यं धनं यस्य स तथा, संक्षिप्तस्वीकारवान् "संकोचेऽकिंचन व्यर्थे मुधा" इति यादवः । दृष्टक्रिया गणिताचिकित्सादिरूपा तद्रहितः ॥ * ॥ ० ॥ ३० ॥ सावधानो विहिताचारे । निर्विकारः कामाद्यनाकुलचित्तः । यद्वा–आत्मनि विद्यमानगुणाभिमानवर्जितोऽमानीति । मानदो ज्ञानोपदेष्टा वा । विहितकरणनिपुणो वा कल्पः । कृपालुत्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आज्ञायैवं गुणान्दोषान्मयाऽऽदिष्टानपि स्वकान् ॥ धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः ॥ ३२ ॥

मानो न दृष्टलोभेन । कविः सम्यग्ज्ञानी ॥ ३१ ॥ किंच । मया वेदरूपेणादिष्टानपि स्वधर्मान्संत्यज्य यो मां भजेत सोऽप्येवं पूर्वोक्तवत्सत्तमः । किमज्ञानान्नास्तिक्याद्वा । न । धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान्विपक्षे नरकपातादीन्दोषांश्चाज्ञाय ज्ञात्वाऽपि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान्संत्यज्य । यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य । अथवा विद्धैकादश्युपवासकृष्णैकादश्यनुपवासानिवेद्यश्राद्धादयो ये भक्तिविरुद्धा धर्मास्तान्संत्यज्येत्यर्थः ॥ ३२ ॥

मनोधर्मः, कारुणिकत्वं देहधर्म इति पृथगुक्तम् ॥ * ॥ ० ॥ ३१ ॥ स्वधर्मान्वर्णाश्रमधर्मान् । त्यागः किं धर्मस्याज्ञानाद्धर्मस्वरूपज्ञानाभावाद्वा नास्तिक्याद्गुरुशास्त्रोपदेशे श्रद्धाराहित्यादिति चेदाह—नेति । विपक्षे धर्मत्यागे । दोषान्प्रत्यवायादिरूपान् । एवं च "स्वेस्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" इत्युक्तेः का गतिरिति चेद्भगवद्वचनेनैवोत्तरयति—"सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति भगवतैव निजभक्तेराधिक्यबोधनात्तत्र प्रवृत्तानां न स्वधर्मत्यागदोषः "त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि । यत्र क्वा भद्रमभूदमुष्य किं कोवार्थ आप्तो भजतां स्वधर्मतः ॥" इत्युक्तेरित्याभिप्रेत्याह—यद्वेति । भक्तिदार्ढ्येपि धर्मत्यागो नोचित इति चेदाह—अथवेति । इत्यर्थ इति—भक्तिविरुद्धधर्माणामेव त्यागो न तु नित्यनैमित्तिकानामपि 'निवृत्तं कर्म सेवेत' इत्युक्तेरिति भावः । विद्धैकादशीविधिमाह—"पारणाहे न लभ्येत द्वादशी कलयापि चेत् । तदानीं दशमीविद्धाप्युपोष्यैकादशीस्थितेः ॥" इति श्रुंग्युक्तेः । कृष्णैकादश्युपवासानुपवासस्तु निर्णयामृते—"शयनीबोधनीमध्ये या कृष्णैकादशी भवेत् । सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥" इति । अनिवेद्य श्राद्धादिविधिस्तु—"दानाध्ययनदेवार्चाजपहोमव्रतादिकान् । न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात ॥" इत्याश्वलायनोक्तेः । एषां भक्तिविरुद्धत्वं च—"सपुत्रश्च सभार्यश्च सजनो भक्तिसंयुतः । एकादश्यामुप वसेत्पक्षयोरुभयोरपि ॥" इति नारदोक्तेः, "विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरम् । पितृभ्यश्चापि तद्देयं तदानंत्याय कल्पते ॥" इत्युक्तेश्च । यद्वा—सर्वानीशजीवधर्मान्सर्वज्ञत्वाल्पज्ञत्वादीन् विरुद्धभागान् भागत्यागलक्षणया सम्यग्बाधेन त्यक्त्वा मामुभयविविक्तं लक्ष्यं सच्चिदानंदघनं श्यामसुंदरं भजेत स सत्तमोऽन्ये संत एवेति ॥ * ॥ मध्यममिश्रसाक्षाद्भक्तिसाधकत्वमाह—आज्ञायैवमिति । निवृत्ताधिकारतया संत्यज्येत्यंता व्याख्या ज्ञेया । तथा च हयशीर्षपञ्चरात्रोक्तनारायणव्यूहस्तवः—"ये त्यक्तलोकधर्मार्था विष्णुभक्तिवशं गताः । ध्यायन्ति परमात्मानं तेभ्योपीह नमोनमः ॥" इति । अत्र त्वेवं व्याख्या—यदि च स्वात्मनि तत्तद्गुणयोगाभावस्तथाप्येवं पूर्वोक्तप्रकारेण गुणान् कृपालुत्वादीन्दोषांस्तद्विपरीतांश्चाज्ञाय हेयोपादेयत्वेन निश्चित्यापि यो मया तेषु गुणेषु मध्ये तत्रादिष्टानपि स्वकान्नित्यनैमित्तिकलक्षणान्सर्वानेव वर्णाश्रमविहितान् तदुपलक्षणं ज्ञानमपि मदनन्यभक्तिविघातकतया संत्यज्य मां भजेत्स सत्तमः । चकारात्पूर्वोपि सत्तम इत्युत्तरस्य तत्तद्गुणाभावेऽपि पूर्वसाम्यं बोधयति । ततो यस्तु तत्तद्गुणान् लब्ध्वा धर्मज्ञानपरित्यागेन मां भजति केवलं स तु परमसत्तम एवेति व्यक्त्यानन्यभक्तस्य पूर्वत आधिक्यं दर्शितम् । अत्र 'अद्वेष्टा सर्वभूतानाम्' इत्यादिश्रीभगवद्गीताध्यायप्रकरणमप्यनुसंधेयम् । सत्तम इत्यनेन तदवरत्रापि सत्तरत्वं सत्त्वमप्यस्तीति दर्शितम् । अस्तु तावत्सदाचारस्य तद्भक्तस्य सत्त्वम् अनन्यदेवताभक्तत्वमात्रेण दुराचारस्यापि सत्त्वान्यपर्यायसाधुत्वं विधीयते—'अपि चेत्सुदुराचारः' इत्यादौ । अत्र च साधुसंगप्रस्तावे यत्तादृशलक्षणं नोत्थापितं तत्खलु तादृशप्रसंगस्य भक्त्युन्मुखेऽनुपयुक्तत्वाभिप्रायेण । यथोक्तं श्रीप्रह्लादेन—'संगेन साधुभक्तानाम्' इति सदाचार एवात्र साधुः ॥ * ॥ **विश्वनाथस्तु**—पूर्वाधिकारी धर्मानसंत्यज्य भजेदयं तु संत्यज्यैव भजेदिति भेदः । तथा पूर्वः कृपालुत्वादिसंपूर्णगुणवानेव सत्तमः, अयं तु विशेषणांतरानुपादानात्तावत्संख्याकगुणवत्त्वाभावेऽपि सत्तमः । न चास्य तावद्गुणाभाव एवाशंकनीयः "भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः" इति, "यस्याऽस्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः" इत्यादिश्रवणादचिरेणैव सर्वदोषोपशमपूर्वकसर्वगुणोदयस्य तत्रावश्यंभावित्वात् । किञ्च—पूर्वो जितषड्गुणत्वात्सिद्धदशावस्थ एव सत्तमः, अयं तु तादृशत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञात्वाऽज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः ॥ भजंत्यनन्यभावेन ते मे भक्ततमा मताः ॥३३॥ मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम्॥परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनम् ॥३४॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥३५॥ मज्जन्मकर्मकथनं मम पर्वानुमोदनम् ॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः॥३६॥यात्रा बलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम्॥३७॥

किंच यावान्देशकालापरिछिन्नः । यश्च सर्वात्मा । यादृशः सच्चिदानंदादिरूपः । तं मां ज्ञात्वा अज्ञात्वाऽपि । यद्वा । विशेषतः पुनःपुनर्ज्ञात्वा एकांतभावेन ये भजंतीति ॥ ॥ ३३ ॥ साधुलक्षणमुक्तं भक्तेर्लक्षणमाह । मल्लिंगेत्यष्टभिः । लिंगानि प्रतिमादीनि ॥ ३४ ॥ सर्वलाभोपहरणं सर्वस्य लब्धस्य समर्पणम् । दासभावेनात्मसमर्पणम् ॥ ॥ ३५ ॥ पर्वाणि जन्माष्टम्यादीनि तदनुमोदनम् ॥ ३६ ॥ बलिविधानं पुष्पोपहारादिसमर्पणम् । सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ॥ ३७ ॥

युक्तेः साधकदशावस्थोपि सत्तम इत्यस्य पूर्ववत् तावान्व्यंजित उत्कर्षः प्रथमत एव शुद्धभक्तिमत्त्वाज्ज्ञेयः ॥ ३२ ॥ अन्यदाह—किंचेति । अज्ञात्वा तु भजनमेव न संभवतीति चेदाह—यद्वेति । अर्थांतरमस्याह—श्रवणमननाभ्यामात्मत्वेन निर्णीयानन्यभावेन भेदनिरासेन भजंति निदिध्यास्यन्ति किंवात्मत्वेन निर्णीय "आत्मेत्येवमुपासीत" इति श्रुतिमवलंब्याभेदेन भजंति ये ते मे भक्ततमाः दास्यादिना भजंतस्तु भक्ता इति ॥ * ॥ तदेवमीश्वरबुद्ध्या विधिमार्गभक्तयोस्तारतम्यमुक्तं तत्रैवोत्तरस्यानन्यत्वेन श्रेष्ठत्वं दर्शितं तत्रैवार्चनमार्गे त्रिविधत्वं लभ्यते पाद्मोत्तरखण्डात् महत्त्वमध्यमत्वकनिष्ठत्वभेदात् । अथ शुद्धदास्यसख्यादिभावमात्रेण योऽनन्यः स तु सर्वोत्तम इत्याह—ज्ञात्वेति । ज्ञात्वाऽज्ञात्वा वा ये केवलमनन्यभावेन श्रीव्रजराजनंदनाद्यालंबनो यः स्वाभीप्सितो दास्यादीनामेकतरो भावस्तेनैव भजति न कदाचिदन्येनेत्यर्थः । ते तु मे मया मताः 'साधुस्तव' इत्याद्यनुसारेण 'ते मे भक्ततमा मताः' इत्यन्तिमस्यैव स्वमतस्यातिशयो दर्शितः । अत एव योगेश्वरैरपि चतुर्थे प्रार्थितम्—'प्रेयान्न तेऽन्यः' इत्यादिना । ज्ञात्वाऽज्ञात्वेत्यत्र हेयोपादेयत्वं निषिद्धम् । भक्ततमा इत्यत्र पूर्ववाक्यस्थ सत्पदनिर्देशमतिक्रम्य विशेषतो भक्तपदनिर्देशाद्भक्तेः स्वरूपाधिक्यमत्रैव विवक्षितम् । मे मता मम तु विशिष्टा संमतिरत्रैवेति सूचितम्, ईदृशानुक्तचरत्वात् । अत एव प्रकरणप्राप्तमेकवचननिर्देशमप्यतिक्रम्य गौरवेणैव मता इति बहुवचनं निर्दिष्टम् । ततः किमुत तद्भावसिद्धप्रेमाण इति भावः ॥ ३३ ॥ अत्र कर्तव्यपदमध्याहार्यं विधिप्रकरणत्वात् । आदिना शालग्रामादिग्रहः ॥ * ॥ मल्लिंगमद्भक्तजनेति षष्ठीलुक् छांदसः, उत्तरार्धेप्यन्वयात् । प्रह्वत्वं नमस्कारः ॥ ३४ ॥ दास्येन सहात्मनि मनसि वेदनं भगवज्ज्ञानम् ॥*॥ दास्येनात्मनिवेदनमिति वैधभक्तौ दास्यस्य प्राधान्यात् । उपलक्षणं चैतद्भावांतरेणाप्यात्मनिवेदनस्य 'आत्मार्पितोत्र भवतोऽत्र विभो विधेहि' इत्याद्युक्तेः ॥३५॥ आदिना रामनवम्यादिग्रहः । "द्वादश्येकादशी वाथ होली श्रीपंचमी तिथिः । सर्वावतारतिथयः पवित्रारोपणं तथा ॥ रथयात्रा बले राज्यं हिंदोलक्रीडनं तथा । रासलीलादिकं विष्णोः पर्वाण्यन्यान्यपि प्रभो ॥" इत्यादिसंहितोक्तेः । तांडवं नटनम् । गोष्ठी वैष्णवसमाजकरणम् । मद्गृहे मन्मंदिरादिस्थले उत्सवः कार्य इत्यर्थः ॥*॥ अनुमोदनमभिनयेन श्लाघनम् ॥३६॥ यात्रा रथयात्रादिरूपा, भगवद्गृहगमनरूपा वा । 'बलिः पुष्पोपहारादौ' इति कोशात् । वर्षासु भवानि वार्षिकाणि । यद्यपि वर्षापदेनात्र मासद्वयविशिष्टतन्नामकर्तुबोधो भवति तथाप्यत्र तत्परः शरदृतुरपि गृह्यते "चातुर्मास्यं भवेदुष्मश्चातुर्मास्यं हिमोदयः । चातुर्मास्यं भवेद्वर्षं कालचकस्य नेमयः ॥" इत्युक्तेः । आदिना द्वादश्यादिग्रहः । यद्वा—वार्षिकाण्यब्दभवानि सर्वाणि पर्वाण्युत्सवदिनानि ग्राह्याणीति । वैदिकी दीक्षा तु त्रिवर्णस्यैव, तांत्रिकी तु स्त्रीशूद्रयोरपीति । दीक्षाग्रहणाभावे तु—"ते नराः पशवो लोके किं तेषां जीवने फलम् । यैर्न लब्धा हरेर्दीक्षा नार्चितो वा जनार्दनः ॥ अदीक्षितस्य वामोरु सुकृतं स्यादनर्थकम् । पशुयोनिमवाप्नोति दीक्षाविरहितो नरः ॥ द्विजानामनुपेतानां स्वकर्माध्ययनादिषु । यथाधिकारो नास्तीह स्याच्चोपनयनादनु ॥ तथात्र दीक्षितानां तु मंत्रतंत्रार्चनादिषु । नाधिकारोस्त्यतः कुर्यादात्मानं शिवसंस्तुतम् ॥" "सहस्रवेदाध्ययनोपि विप्रो दीक्षाविहीनो नरकं प्रयाति" इत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ॥ उद्यानोपवनाक्रीडपुरमंदिरकर्मणि ॥ ३८ ॥
संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः ॥ गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥ ३९ ॥
अमानित्वमदंभित्वं कृतस्यापारिकीर्तनम् ॥ अपि दीपावलोकं मे नोपयुंज्यान्निवेदितम् ॥ ४० ॥

उद्यानादिकरणे सामर्थ्ये सति स्वतः । असति चान्यैः संभूयोद्यमः। उद्यानं पुष्पप्रधानम् । उपवनं फलप्रधानं वनम् । आक्रीडः क्रीडास्थानम् ॥ ३८ ॥ संमार्जनं रजसोपाकरणम् । उपलेपो गोमयोदकादिभिरालेपनम् । सेकस्तैरेव प्रोक्षणम् । मंडलवर्तनं सर्वतोभद्रादिकरणम् । मह्यं मम ॥ ३९ ॥ कृतस्य धर्मस्यापारिकीर्तनम् । स्वयमन्येन वा निवे

दिवाक्यैर्दोषश्रवणात्सावश्यं कार्या सर्वाश्रमिणाम् । तदुक्तं तंत्रसारे–"दीक्षामूलो जपः सर्वो दीक्षामूलं परं तपः । दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन् ॥ अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः । न भवन्ति श्रियस्तेषां शिलायामुप्तबीजवत् ॥ देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः । तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥ अदीक्षितो हि मरणे रौरवं नरकं व्रजेत् । यो यस्मिन्नाश्रमे तिष्ठन्दीक्षां प्राप्नोति मानवः ॥ स तस्मिन्नाश्रमे तिष्ठंस्तत्तद्धर्मान्न लंघयेत् ॥ नित्यनैमित्तिकाचारपालकस्य नरस्य हि । दीक्षावैकल्यविरहात्सद्यो मुक्तिस्तु जायते ॥ तत्रापि गुरुभक्तस्य गतिर्भवति नान्यथा । दृष्टाद्यर्थतया यस्य गुरुभक्तिस्तु कृत्रिमा ॥ कृतापि निष्फला तस्य प्रायश्चित्तं पदेपदे । दिव्यं भावं यतो दद्यात्क्षपयेद् दुरितानि च । अतो दीक्षेति सा प्रोक्ता सर्वागमविशारदैः ॥" इत्यादि बह्वस्ति दीक्षाप्रतिपादकमित्युपरम्यते । "कल्पे दृष्ट्वा तु मंत्रं वै यो गृह्णाति नराधमः । मन्वंतरसहस्रेषु निष्कृतिर्नैव विद्यते ॥ यदृच्छया श्रुतं वापि च्छन्नेनाथ च्छलेन वा । पत्रस्थितं वा गाथायां वर्जयेत्तदनर्थवत्॥ मंत्रमार्गानुसारेण साक्षात्कृत्येष्टदेवताम् । गुरुश्चोद्बोधयेच्छिष्यं मंत्रदीक्षेति सोच्यते ॥"। सा चानेकधोक्ता विश्वसारे–"महादीक्षा तथा दीक्षोपदेशस्तदनन्तरम् । युगेयुगे हि कर्तव्य उपदेशः कलौ युगे॥"। स च–"सूर्यचंद्रग्रहे तीर्थे सिद्धक्षेत्रे शिवालये । मंत्रमात्रप्रकथनमुपदेशः स उच्यते ॥"। तत्प्रकारश्च–"शंखं संपूज्य विधिवत्साक्षतेन तदंबुना । शिष्यं संप्रोक्ष्य मूलेन ह्यष्टवारं तु के करम् ॥ निधायाष्टौ जपेत्कर्णे ह्युपदेशे त्वयं विधिः । गुरोरभावे मंत्राणां पुस्तकं गुरुमाचरेत् ॥" । योगिनीतंत्रे तु–"स्वयं लब्धे तु कलशे गुरोः प्राणान्निवेशयेत् । वटपत्रे कुंकुमेन लिखित्वा ग्रहणं भवेत् ॥ ततः सिद्धिमवाप्नोति ह्यन्यथा निष्फलो भवेत् ।" । पाद्मे तु–"गुरोरभावे विप्रेंद्र मंत्रग्रहणमुच्यते । कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ॥ तालपत्रे मनुं लिख्य स्थापयेद्वै तदग्रतः । संपूज्य दक्षिणामूर्तिमुपचारैस्तु षोडशैः ॥ पायसं विनिवेद्याथ प्रणमेद्दंडवत्ततः । तालपत्रं समालोक्य पठेदष्टोत्तरं शतम् ॥ एवं गृहीतो मंत्रस्तु गुरोरपि विशिष्यते । गुरोः संभाविता दोषाः प्रायेण तु कलौ युगे॥तस्मात्सर्वप्रयत्नेन न हि कार्यः कलौ गुरुः । सर्वथा यो भवेद्योग्यस्तं गुरुं यत्नतश्चरेत् ॥" इति च । यादृशो गुरुः कार्यस्तत्प्रतिपादितमधस्तात् । मदीयव्रतानामेकादश्यादीनां धारणम् । यद्वा–मदीयानां यद्व्रतं वृत्तं विविक्तसेवनादिरूपं तस्य धारणमिति ॥ स्वतः स्वयमेव उद्यमः करणादौ प्रयत्नः । पुरकर्म पूजानिर्वाहार्थं ग्रामं मौल्येन गृहीत्वा समर्पणम् । एतदुपलक्षणं क्षेत्रादीनामपि 'क्षेत्रापणपुरग्राम–'इत्यादिवक्ष्यमाणत्वात् ॥ वर्त्तनं प्रदक्षिणवर्तनम्–"विशेषजीवनं प्रोक्तं वर्तनं गमनं तथा" इति हलायुधः ॥ अमायया परप्रेम्णा ॥ * ॥ सर्वेषु वार्षिकेषु वत्सरसंबंधिषु पर्वसु फाल्गुनपौर्णिमादिषु या दोलादियात्रास्तासु बलिविधानं विविधवस्त्रालंकारमिष्टान्नस्रक्चंदनपुष्पादि पूजोपहरणम् । आदिना पवित्रारोपदमनकादिग्रहः ॥ उद्यानादिकरणे सामर्थ्ये सति स्वत एव असति अन्यैर्मिलित्वाप्युद्यमः । आक्रीडं क्रीडास्थानम् । पुरं चक्रवेष्टनम् ॥ * ॥ दासवदिति–यथा लौकिको दासः स इत्येत्यन्यदपि तथैव कर्तव्यम् । अमायया चलचित्ततावित्तशाठ्यादिकं विहायेति **संदर्भः** ॥ * ॥ संमार्जनं तृणधूल्याद्यपाकरणं प्रथमम्, गोमयमृज्जलैरुपलेपो द्वितीयः । स्थले शुष्के सति सेकः पुष्पोदकैस्तृतीयः । अन्यत्तैः ॥ ३७ ॥ ३८ ॥ ३९ ॥ न स्वीकुर्यात्स्वप्रयोजनायेति शेषः । एतच्च निवेदितास्वीकरणं साधारणस्थावरं बहुभिस्संभूय स्थापितदैवतं तद्विषयं तन्निवेदितं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः ॥ तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ॥ ४१ ॥ सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् ॥ भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ॥ ४२ ॥ सूर्ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम् ॥ आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना ॥ ४३ ॥

दितं न स्वीकुर्यात् । एतच्च साधारणं स्थावरविषयं रागप्राप्तविषयं वा । भक्त्या तु ग्राह्यमेव । “षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितम् ॥ विष्णोर्नैवेद्यसिक्थेन पुण्यं तद्भुंजतां कलौ ॥ हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ॥ पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥” इत्यादिवचनेभ्यः । यद्वा अन्यस्मै निवेदितं मे नोपयुंज्यात् । मह्यं न निवेदयेदित्यर्थः । “ विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरम् ॥ पितृभ्यश्चैव तद्देयं तदानंत्याय कल्पते ॥ पितृशेषं तु यो दद्याद्धरये परमात्मने ॥ रेतोधाः पितरस्तस्य भवंति क्लेशभागिनः॥” इत्यादिवचनेभ्यः ॥ ४० ॥ ४१ ॥ इदानीमेकादशपूजाधिष्ठानान्याह । सूर्य इति । हे भद्र ॥ ४२ ॥ अधिष्ठानभेदेन पूजासाध

गृह्णीयात् । यद्वा—स्वादलोभेन न गृह्णीयात् भक्तिमांस्तु स्वीकुर्योदेवान्यथा फलश्रवणं मुधा स्यादित्याह—भक्त्येति । “सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्” इति मेदिनी । ‘पुलाकस्तुच्छधान्ये स्यात्संक्षेपे’ इति च । ‘परदत्ते निवेदितम्’ इति कोशांतराभिप्रायेणाह—यद्वेति । अन्यस्मै देवाय निवेदितं समर्पितम् । इत्यर्थ इति—सर्वेश्वराय मेन्योच्छिष्टं न दद्यादिति भावः । तद्विष्णुनिवेदितदानम् । अन्यशेषस्य मह्यं दानेन दोषभाग्भवतीत्याह—पितृशेषमिति । पितृपदमुपलक्षणं देवानामपि । रेतोधा नरबीजभक्षकाः ‘रेतः शुक्रे पारदे च’ इति मेदिनी । श्रुतिरप्येतदर्थोपबृंहिकास्ति—“एक एव नारायण आसीन्न ब्रह्मा नेमे द्यावापृथिव्यौ सर्वे देवाः सर्वे पितरः सर्वे मनुष्या विष्णुनाशितमश्नंति विष्णुनाघ्रातं जिघ्रन्ति विष्णुना पीतं पिबन्ति तस्माद्विद्वांसो विष्णूपहृतं भक्षयेयुः” इति, विष्णूपहृतं विष्णवे निवेदितमिति श्रुतिपदार्थः । यद्वा—सकृन्निवेदितं न पुनर्निवेदयेत् ‘स्वोच्छिष्टमपि नैवाद्यात्’ इति स्मृतेः । अनिवेदितं तु कदाचिदपि न स्वीकुर्याद्दोषश्रुतेः “अनर्पयित्वा गोविंदे यो भुंक्ते धर्मवर्जितः । शुनो विष्ठासमं चान्नं नीरं तु सुरया समम् ॥” इति पाद्मे ॥ * ॥ अदंभित्वं लोकेषु मिथ्या स्वभक्तिख्यापनराहित्यं नोपयुज्यात्स्वार्थं न व्यवहरेत् । साधारणं कस्याप्यनिजं पथिकादिपूज्यमाने महारण्यदेवालयादावधिकार्यभावात् । स्थावरं कालांतरावस्थातृ भगवदुपयोगयोग्यत्वात् । यथा—दीपावलोकः किं वा क्षीरादिप्रसादो मह्यं देयोऽन्यस्त्वन्येभ्य इति लोभेन प्राप्तो यस्तद्विषयम् । असाधारणमस्थावरं चेत्तदा त्वधिकारीच्छायां सत्यां स्वाधिकृतत्वे सति वा । भक्त्या तु ग्राह्यमेव ॥ * ॥ **विश्वनाथस्तु**—मह्यं निवेदितस्यान्नादेः स्वव्यवहारमात्र उपयोगो न कर्तव्यः किंतु परमार्थसिद्ध्यर्थं वैष्णवेभ्यो दत्त्वा स्वयमप्युपभुंजीतैवेत्यर्थः । लोके शास्त्रे च यदिष्टतमं तन्मह्यं निवेदयेत तेन दर्भमंजर्यादीनि शास्त्रविरहितान्यपि लोके इष्टतमत्वाभावात् तथा मद्यादीनि संकर्षणप्रियाण्यपि शास्त्रे इष्टतमत्वाभावान्न निवेदयेदिति भावः । तत्रापि यच्चात्मनस्स्वस्यातिप्रियं तत्तु विशेषतो लोकशास्त्राविरुद्धं निवेदनीयमित्यर्थः ॥ ४० ॥ इष्टतमं स्पृहणीयमतीवसुंदरं वस्तु आनंत्याया विनश्वरफलाय मोक्षायेत्यर्थः ॥ * ॥ त्वां कुत्र पूजयेदित्यपेक्षायामेकादशपूजाधिष्ठानान्याह—सूर्य इति ॥ ४१ ॥ अधिकारिणां योग्यताया बहुविधत्वेन फलविशेषायार्चनं कुत्र कार्यमिति प्रश्नोपशमनार्थं स्वयमाह—इदानीमिति । वैष्णवः ‘त्रिभुवनविभवहेतवे’ इत्यादिनोक्तलक्षणः । यद्यपि ‘ब्राह्मणा वैष्णवा मुख्याः’ इत्यादिपुराणवचनमस्ति तथाप्यत्र पृथग्ग्रहणात् “गृहीतविष्णुदीक्षाकः सदा विष्णुगतांतरः । सर्वत्र विष्णुसंदर्शी वैष्णवोभिमतो बुधैः ॥” इत्युक्तलक्षणो भगवद्भक्तो ग्राह्यः । स च द्विविधः—“बाह्य आभ्यंतरश्चैव वैष्णवो द्विविधो मतः । बाह्यस्तु शंखचक्राभ्यां वीतरागस्तु चांतरः ॥” इति वैष्णवोक्तेः चक्रादिधारणं ब्राह्मणेतरपरमित्यन्यत् । यद्वा—‘श्रीपादो वैष्णवो भिक्षुः’ इति शारदीनाममालोक्तेर्वैष्णवो गृहीतदंडो विप्रो ब्राह्मणस्त्वितराश्रमस्थो विप्र एवोभयत्र विधीयते ‘संन्यासी मे चला मूर्तिः’ इति जैमिनीयोक्तेः । आत्मा स्वात्मैव ॥ * ॥ किञ्च—सूर्य इति युग्मकम् । सूर्यांतर्यामितोषणार्थं त्रयी पठितव्या ॥ ४२ ॥ सूक्तैः “उद्यन्नद्य विवस्वान्” इत्यादिमंत्रसमूहैः । उपस्थानं स्तवनम् । आदिनार्घादिग्रहः । विप्राग्र्ये श्रुतिस्मृत्युदिताचारवति । आतिथ्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया ॥ वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः॥४४॥स्थंडिले मंत्रहृदयैर्भोगैरात्मानमात्मनि ॥ क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत माम् ॥ ४५ ॥ धिष्ण्येष्वेष्विति मद्रूपं शंखचक्रगदांबुजैः ॥ युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ॥ ४६ ॥

नान्याह सूर्य इति त्रिभिः । त्रय्या विद्यया सूक्तैरुपस्थानादिना । अंग हे उद्धव यवसादिना तृणादिना ॥ ४३ ॥ बंधुसत्कृत्या बंधुवत्संमानेन । हृदि खे हृदयाकाशे । मुख्यधिया प्राणदृष्ट्या । तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ॥ ४४ ॥ स्थंडिले भुवि । मंत्रहृदयैः रहस्यमंत्रन्यासैः ॥ ४५ ॥ सर्वाधिष्ठानेषु ध्येयमाह । धिष्ण्येष्विति । इत्यनेन

पादशौचार्चनान्नप्रदानादि "आतिथ्यं देयमतिथेस्तत्स्वरूपं शृणु द्विज । स्वागतासनपादार्चासंवाहान्नप्रदानता ॥ गृहस्थस्य परो ह्यस्मान्नास्ति धर्मो हितावहः ।" इत्यादिपुराणात् । यवसं तृणम् । आदिना जलदानपृष्ठसंघर्षणादिग्रहः ॥ * ॥ तत्र सूक्तैर्वैदिकवाक्यैः "चित्रं देवानाम्" इत्यारभ्य "सूर्य आत्मा जगतस्तस्थुषश्च" "ॐ तच्चक्षुर्देवहितम्" इत्यादिभिः । आदिना गायत्र्या पुष्पांजलिनिक्षेपतर्पणादिग्रहः ॥ ४३ ॥ ध्याननिष्ठया अजपाख्यप्रणवभावनया । तत्प्रकारश्च योगशास्त्रे । तथाहि—"गुदध्वजांतरे कंदमुत्सेधाद्व्यंगुलं विदुः । तस्माद्विगुणविस्तारं वृत्तरूपेण शोभितम् ॥ नाड्यस्तत्र समुद्भूता मुख्यास्तिस्रः समर्थिताः । इडा वामे स्थिता नाडी पिंगला दक्षिणे मता ॥ तयोर्मध्यगता नाडी सुषुम्ना वंशमास्थिता ॥ पादांगुष्ठद्वयं याता शिफाभ्यां शिरसा पुनः । ब्रह्मस्थानं समापन्ना सूर्यसोमाग्निरूपिणी ॥ तस्या मध्यगता नाडी चित्राख्या योगिवल्लभा । ब्रह्मरंध्रं विदुस्तस्यां पद्मसूत्रनिभं परम् ॥ आधारांश्च विदुस्तत्र मतभेदादनेकधा । दिव्यमार्गमिदं प्राहुरमृतानंदकारणम् ॥ आधारकंदमध्यस्थं त्रिकोणमतिसुंदरम् । तत्र विद्युल्लताकारा कुंडली परदेवता ॥ सुप्ताहिभोगसदृशाकृतिर्जीवं समाश्रिता ॥ हंसः प्राणाश्रयो नित्यं प्राणो नाडीपथाश्रयः । आधारादुद्भतो वायुर्यथावत्सर्वदेहिनाम् ॥ देहं व्याप्य स नाडीभिः प्रयाणं कुरुते बहिः । अंगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने ॥ नासारंध्रे मध्यमाभ्यामन्याभिर्वदनं दृढम् । बद्ध्वात्मप्राणमनसामेकत्वमनुभावयन् ॥ धारयेन्मारुतं सम्यग्योगोयं योगिवल्लभः । नादः संजायते तस्य क्रमादभ्यसतः शनैः ॥ मत्तभृंगांगनागीतसदृशः प्रथमो ध्वनिः । वंशिकास्यानिलापूर्णवंशध्वनिसमोपरः ॥ घंटारवसमः पश्चाद्घनिर्मेघसमोपरः । एवमभ्यसतां पुंसां संसारध्वान्तनाशनम् ॥ ज्ञानमुत्पद्यते पूर्वं हंसलक्षणमव्ययम् । पुंप्रकृत्यात्मकौ प्रोक्तौ बिंदुसर्गौ मनीषिभिः ॥ ताभ्यां क्रमात्समुद्भूतौ बिंदुसर्गावसानकौ । हंसौ तौ पुंप्रकृत्याख्यौ हं पुमान्प्रकृतिस्तु सः ॥ अजपा कथिता ताभ्यां जीवोयमुपतिष्ठते । पुरुषं स्वाश्रयं मत्वा प्रकृतिर्नित्यमाश्रिता ॥ यदा तद्भावमाप्नोति तदा सोहमिदं भवेत् । सकारार्णं हकारार्णं लोपयित्वा ततः परम् ॥ संधिं कुर्यात्पूर्वरूपं तदाऽसौ प्रणवो भवेत् । आत्मा भेदस्थितं योगी भावयेत्प्रणवं सदा ॥" इत्यलम् । मुख्यधिया 'सर्वदेवोत्तमो वायुः' इति ज्ञानेनेति वायुज्ञानस्यापि मृत्युतरणापरपर्यायमोक्षहेतुत्वं श्रुत्योच्यते—"तस्माद्वायुरेव व्यष्टिर्वायुस्समष्टिरयं पुनर्मृत्युं जयति य एवं वेद" इत्येवंरूपयेति । आदिना पुष्पगंधादिग्रहः । पुनरादिना नत्यादिग्रहः ॥ * ॥ प्राणोयं मुख्य इति बुद्ध्या मुख्यत्वं तु तस्य "अनुप्राणांति यं प्राणाः प्राणन्तं सर्वजन्तुषु" इत्यादेः ॥ ४४ ॥ चंदनादिना गोमयादिलिप्तभूमौ गोप्यमंत्राँल्लिखित्वा तदुपरि भगवंतमर्चयेदित्यर्थः । आत्मनि मनसि स्वशरीरे वा । भोगैः स्रग्गंधादिधनैस्तत्तद्भोगे मम पूजनध्यानेन 'भोगो राज्ये धने सौख्ये' इति यादवः । क्षेत्रज्ञं जीवांतर्यामिणम् । समत्वेन तुल्यभावनया । स्वसदृशभोगैः सर्वानर्चयेदित्यर्थः ॥ * ॥ आत्मनि देहे । आत्मानं जीवं भोगैरुचितान्नवस्त्रालंकारादिभिरयं मम देहोपि मत्प्रभोरधिष्ठानमिति बुद्ध्यैव न तु लोभेन पुष्ट्याद्यर्थम् । समत्वेन सुखदुःखयोः समधिया यजेत ॥ ४५ ॥ धिष्ण्येष्वधिष्ठानेषु ॥ * ॥ धिष्ण्येष्विति । अत्र सर्वत्र चतुर्भुजरूपध्याने सत्यपि पूजाप्रकारस्य

१ पृष्ठवंशम् । २ मूलाभ्याम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इष्टापूर्तेन मामेवं यो यजेत समाहितः ॥ लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ॥ ४७ ॥
प्रायेण भक्तियोगेन सत्संगेन विनोद्धव ॥ नोपायो विद्यते सध्र्यङ् प्रायणं हि सतामहम् ॥ ४८ ॥

मंत्रप्रकारेण एषु धिष्ण्येषु ॥ ४६ ॥ उक्ताया भक्तेः फलमाह । इष्टापूर्तेनेति । सद्भक्तिं दृढां भक्तिम् । अस्या भक्तेरंतरंगसाधनमाह । इत्थं मत्स्मृतिः साधुसेवया भवति ।
यद्वा स्मृतिर्ज्ञानम् । ततश्च दृढभक्तिमतः पुंसः साधुसेवया मज्ज्ञानं भवतीत्यर्थः ॥ ४७ ॥ ज्ञानभक्तिमार्गावुक्तौ तत्र ज्ञानमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह । प्रायेणेति ।
द्वैविध्यम् । गवादिषु तु मंदिरलेपादिना यथा तदधिष्ठातृप्रतिमायाः परिचर्या स्यात्तथैव यवसादिना परिचर्या । हृदयाकाशे जलादौ तु साक्षात्तदधिष्ठातुरेवोपासनेति यवसादेरभक्ष्यत्वेन चतुर्भुजसंप्रदानकत्वासंभवात् ।
अत्राग्न्यादौ तदंतर्यामिरूपस्यैव चिंतनं कार्यं न जातु निजप्रेमसेवाश्रयस्य । स तु सर्वथा परमसुकुमारत्वादिबुद्धिजनितया प्रीत्यैव सेवनीयः । तथोक्तं भगवतैव—'वस्त्रोपवीतस्मरण—' इत्यादि । तेषां तथाभक्तिरीत्या परमेश्वर
स्यापि तथाबुद्धिः श्रूयते । यथा नारदीये—"भक्तिग्राह्यो हृषीकेशो न धनैर्धरणीसुराः । भक्त्या संपूजितो विष्णुः प्रददाति समीहितम् ॥ जलेनापि जगन्नाथः पूजितः क्लेशहा हरिः । परितोषं व्रजत्याशु तृषार्तः सुजलै
र्यथा ॥" इति । वैपरीत्ये दोषश्च यथा—ग्रीष्मे जलस्थपूजा प्रशस्ता वर्षासु निंदिता । तदुक्तं गारुडे—"शुचिशुक्रगते काले येर्चयिष्यन्ति केशवम् । जलस्थविविधैः पुष्पैर्मुच्यंते यमयातनात् ॥ घनागमे प्रकुर्वन्ति जलस्थं
वै जनार्दनम् । ये जना नृपतिश्रेष्ठ तेषां वै नरकं ध्रुवम् ॥" इति । एवमन्यत्रापि तत्तद्देशकालसुखदानि शतशो विहितानि । तद्विपरीतानि विष्णुयामले—'विष्णोः सर्वर्तुचर्या च' इति । अत उक्तम्—'यद्यदिष्टत
मम्' इति । तत्रतत्रेष्टमंत्रध्यानस्थानञ्च सर्वर्तुसुखमयमनोहररूपरसगंधस्पर्शशब्दमयत्वेनैव ध्यातुं विहितमस्तीति ॥ ४६ ॥ अस्या दृढभक्तेः । इत्थं मत्स्मृतिर्दृढा मद्भक्तिः । दृढाभक्तिस्तु भगवत्प्रीत्यर्थकारितेष्टापूर्तादि
साधनैरेव । पुनस्तदर्थमंतरंगताविधानं सत्सेवायाः पुनरुक्तमिव प्रतीयत इति चेदाह—यद्वेति । फलितमाह—ततश्चेति । तेनेत्यर्थः । इत्यर्थ इति—"रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा । न च्छंदसा
नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेकम् ॥" इति जडविप्रोक्तेः, "नैषा मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः । महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत यावत् ॥" इति प्रह्लादोक्तेश्च । सत्सेवां
विना ज्ञानोत्पत्तिर्न भवतीति भावः ॥ * ॥ अत्रेष्टशब्देन सप्तमस्कंधोक्तोक्तरीत्याऽग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुयागवैश्वदेवबलिहरणमुच्यते । पूर्तशब्देन सुरालयारामकूपवापीतडागप्रपान्नसत्राण्युच्यन्ते । मत्स्मृति
स्तु साधुसेवया सतां संगेन । मद्भक्तिमंतरंगभक्तिनिष्ठाम्प्राप्नोतीत्यर्थः । तत्राग्निहोत्रादीनां भक्तौ प्रवेशः, अग्न्यंतर्यामिरूपभगवदधिष्ठानत्वेनाग्न्यादिसंतर्पणात् । कूपारामादीनां च तत्परिचर्यार्थं क्रियमाणत्वात्तत्र प्रवेशः ॥
॥ * ॥ **विश्वनाथस्तु**—मत्कर्तृका स्मृतिर्मत्स्मृतिः । साधुसेवयेति—यस्तु साधूनाधिक्येन सेवते तं त्वहं स्मरामि सदेत्यर्थमाह ॥ ४७ ॥ भक्तेराधिक्यं दर्शयति—ज्ञानेत्यादिना । प्रायेणेत्यवधारणे 'प्रायोऽधिक्येऽवधारणे'
इति धरणिः । इत्यर्थ इति—सत्संग एव मत्प्राप्तौ मुख्यं साधनमिति भावः ॥ * ॥ वस्तुतस्तु संसारतरणाद्युपेयवस्तुनो भक्तिरेवोपाय इत्याह—प्रायेणेति वितर्के । यद्वा—सत्संगेन हेतुनैव यः प्रायेण भक्तियोगस्तेन
विना नोपायो विद्यते । प्रधानभूता केवला चेति द्विविधा भक्तिः साधुसंगेनैव भवेदिति व्याख्यातमेव । यच्च मोक्षसाधकं भक्तिमिश्रज्ञानं तत्र गुणभूता या भक्तिः सा तु साधुसंगं विनापि
भवेदित्यत उक्तं—प्रायेणेति । तस्या भक्तेस्तज्ज्ञानमेव कारणं यथा कर्षकस्य करदानादिना यत्पृथ्वीश्वरोपासनं तस्य कारणं कृषिरेव, अन्यथा तस्या वैफल्यादिति प्रथमस्कंध एव व्याख्यातम् । एवं च
' यत्कर्मभिर्यत्तपसा ' इत्यादिभगवदुक्तेर्ज्ञानादिकं विनापि भक्तिः सर्वफलदात्री भक्त्या तु विना ज्ञानादिकं न मोक्षादिसाधकमिति तत्रतत्रापि भक्तिरेव फलदायिनी व्याख्येयातोऽन्य उपायोऽ
जागलस्तनन्यायेनैवेति केचिदाहुस्तत्रेयं भगवदुक्तिरपि प्रमाणम् । " तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीह । पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ॥ " इत्युद्धवोक्तिरपि ।
" संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य । लीलाकथारसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ " इति शुकोक्तिरपि । " किं वा योगेन सांख्येन न्यासस्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथैतत्परमं गुह्यं शृण्वतो यदुनंदन ॥ सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ॥ ४९ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कन्धे भगवदुद्धवसंवाद एकादशोऽध्यायः ॥ ११ ॥ श्रीभगवानुवाच ॥ न रोधयति मां योगो न सांख्यं धर्म एव च ॥ न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ १ ॥

सत्संगेन यो भक्तियोगस्तेन विनोपायः संसारतरणे न विद्यते । सत्संगेनेत्यत्र हेतुमाह । हि यस्मात्सतामहं प्रायणं प्रकृष्टमयनमाश्रयः । अतः सत्संगो मध्यंतरंग इत्यर्थः ॥ ॥ ४८ ॥ इदानीं सांख्ययोगादीनि साधनांतरसव्यपेक्षाणि सव्यभिचाराणि च सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्णयितुमाह । अथेति । एतद्वक्ष्यमाणं परमं गुह्यमतः शृण्वित्यर्थः ॥ ४९ ॥ इति श्रीमद्भागवत एकादशस्कंधे भावार्थदीपिकायां टीकायामेकादशोऽध्यायः ॥ ११ ॥ द्वादशे साधुसंगस्य महिमा वर्णितः पुरा ॥ कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परम् ॥ १ ॥ न रोधयति नवशीकरोति । योग आसनप्राणायामादिः । सांख्यं तत्त्वानां विवेकः । धर्मः सामान्यतोऽहिंसादिः । स्वाध्यायो वेदजपः । तपः कृच्छ्रादि । त्यागः संन्यासः । इष्टापूर्तमिष्टं च पूर्तं च । तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादिनिर्माणम् । दक्षिणाशब्देन

ध्याययोरपि । श्रेयोभिरन्यैश्च तथा न यत्रात्मप्रदो हरिः ॥'' इति नारदोक्तिरपि ॥ ४८ ॥ उत्तराध्याये वक्ष्यमाणार्थप्राशस्त्यमाह--इदानीमित्यादिना । अयेति हेतौ, यतस्त्वं भृत्यो ज्ञानेन भर्तुं योग्यः, सुष्ठुजितं हृन्मनो यस्य स सुहृत्, रहस्यार्हत्वात्सखासि अतो हेतोः । इत्यर्थ इति--योग्यसुहृदेऽतीवगोप्यमपि वक्ष्यामीति भावः ॥ * ॥ "ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत'' इति स्मृतेस्तुभ्यमनन्यप्रकाश्यमपि वस्तु वच्मि । सांख्ययोगादीनीति--आदिना धर्मादिग्रहः । तत्र सांख्यं वैराग्यादिसापेक्षम् । योगः समाधिर्यमाद्यपेक्षः । धर्मादीन्यपि धनक्लेशाद्यपेक्षाणि सव्यभिचाराणि भक्त्यभावे फलव्यभिचारवंति । स्वतंत्रो वैराग्याद्यनपेक्ष एव साध्यं साधयितुं समर्थः, फले भगवत्प्रसादनलक्षणेऽव्यभिचारी च । अथात एव परमं गुह्यम् । अतो गुह्यत्वात् । कृष्णसुहृत् व्रजसंदेशप्रापणलक्षणहितकर्ता । सखा यंत्रणाशून्यमित्रवृत्तिमान् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्ध एकादशोऽध्यायः ॥ ११ ॥ ततः परं सत्संगमहत्त्वत्रवर्गनोत्तरम् । तत्त्यागः कर्मत्यागः (१) । ० ॥ * ॥ योगादयस्तथा वेत्युक्त्या किंचिद्वशीकुर्वंतीत्यायातम् । तथा च भक्तिमिश्रा एव ते ज्ञेया न साधारणा अत एव व्रतान्येकादश्यादीनीति व्याख्यातम् । न चैतावता नित्यव्रतानामकर्तव्यत्वप्रसंग इति वाच्यम्, एकस्य फलाधिक्यप्रशंसयाऽन्यस्य निराकरणायोगात् । कर्माधिकारिणः विप्रमुखहुतप्रशंसया ग्निहोत्रापरित्यागवत्, भक्त्यधिकारिणश्च भक्तपूजाभ्यधिकत्वश्रवणाद्धर्यर्चनापरित्यागवच्च तत्त्यागायोगाच्च । अन्यथा "वैष्णवो यदि भुंजीत एकादश्यां प्रमादतः । विष्ण्वर्चनं वृथा तस्य नरकं घोरमाप्नुयात् ॥'' इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा यमाः ॥ यथावरुंधे सत्संगः सर्वसंगापहो हि माम् ॥ २ ॥ सत्संगेन हि दैतेया यातुधाना मृगाः खगाः ॥ गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥ ३ ॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंऽत्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेऽनघ ॥ ॥ ४ ॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥ ५ ॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथा परे ॥ ६ ॥ तेऽनाधीतश्रुतिगणा नोपासितमहत्तमाः ॥ अव्रतातप्ततपसः सत्संगान्मामुपागताः ॥ ७ ॥

सामान्यतो दानं लक्ष्यते ॥ १ ॥ व्रतानि एकादश्युपवासादीनि । यज्ञो देवपूजा छंदांसि रहस्यमंत्राः । अवरुंधे वशीकरोति॥ २॥ यातुधाना राक्षसाः ॥ ३ ॥ ४ ॥ त्वाष्ट्रो वृत्रः । कयाधूनाम्नी दानवी तस्याः पुत्रः कायाधवः प्रह्लादः ॥ ५ ॥ ऋक्षो जांबवान् । गृध्रो जटायुः । वणिक्पथस्तुलाधारः । व्याधो धर्मव्याधः । यज्ञपत्न्यो दीक्षितभार्याः ॥ ६ ॥ तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह । त इति । न अधीताः श्रुतिगणा यैः तदर्थं च नोपासिता महत्तमा यैस्ते तथा । किंच अव्रतातप्ततपसः न व्रतानि

गौतमीयादिवचनव्याकोपः स्यात् ॥ १ ॥ सर्वसंगो भगवदितरसंगः । "अत्यन्तं विषयासंगः सर्वसंग इति स्मृतः" इति निरुक्तिः । तमपहंति तज्जं पापमपाकरोतीति सर्वसंगापहः । 'संतः संगस्य भेषजम्' इत्यभियुक्तोक्तेः ॥ * ॥ योगादयो न मत्प्राप्त्युपाया इत्यतो नोपायो विद्यत इति पूर्वोक्तिरेव दृढीकृता । सत्संगो मां वशीकरोतीत्यनंतप्रयोगेण भक्त्युत्पत्तेः पूर्वमपि स एव मां वशीकरोति, किं पुनर्भक्तिं जनयित्वेत्यर्थाल्लब्धम् । 'भक्त्या हमेकया ग्राह्यः' इत्यग्रिमवाक्येनैक्यार्थात् । सर्वसंगापहः सर्वत्रासक्तिनिरासकः । इति वशीकारे हेतुः ॥ २ ॥ यातूनि रक्षांसि दधंति पुष्णंतीति यातुधानाः 'स्वजातिपोषा रक्षांसि' इति वचनात् ॥ * ॥ ० ॥ ३ ॥ "रंग कारो नटो व्राटः सखश्च धत्र एव च । कैवर्तमेदभिल्लाश्च सप्तैते ह्यंत्यजास्स्मृताः ॥" इति गारुडे ॥ * ॥ ० ॥ ४ ॥ शृंगग्राहिकतया दर्शयितुमाह—त्वाष्ट्र इत्यादि । आदिना घंटाकर्णादिग्रहः ॥ * ॥ ० ॥ ५ ॥ अपरे बहवः ॥ * ॥ सुग्रीवस्य हनुमत्संगः, हनुमदृक्षयोर्भगवत्संगः, गजेंद्रस्य पूर्वजन्मनि सत्संगः उत्तरजन्मांते भगवत्संगः, गृध्रस्य गरुडदशरथादिसत्संगः, वणिक्पथस्य महाभारते जाजलिमुनिगर्वप्रसंगे प्रोक्तमहिम्नः श्रीनारदादिसंगोऽन्वेषणीयः । धर्मव्याधस्य हि आदिवाराह इयं कथा—वसुनामा कश्चिद्वैष्णवो राजा तेन च मृगभ्रांत्या कश्चिद्ब्राह्मणो हतः, ब्रह्मराक्षसतां प्राप्तस्तस्य प्रापंचिकविष्णुलोकगमनसमये तच्छरीरं प्रविष्टो बभूव । तद्भोगांते राजतां प्राप्तस्य ब्रह्मपराख्यस्तवपाठतेजसा तद्देहान्निर्गतस्तत्कृतधर्मव्याधसंज्ञः सन् हिंसाविमुखः नीलाद्रिनाथं दृष्ट्वा प्राप्ततदालिंगनस्तत्सायुज्यमापेति । कुब्जाया भगवत्संगः पूर्वजन्मनि नारदसंगश्चेति माथुरहरिवंशप्रसिद्धेः । गोपीनां साधनसिद्धानां नित्यसिद्धगोपीसंगः । यज्ञपत्नीनां व्रजस्थश्रीकृष्णदूतीभिर्मालिकतांबूलिकादिस्त्रीभिः क्रयविक्रयाद्यर्थं मथुराप्रस्थानसमये संगः । अपरे दैतेयादयः ॥ ६ ॥ ते सुग्रीवादयः । तदर्थं श्रुतिगणप्राप्त्यर्थम् । महत्तमा वेदविदः । वेदाध्ययनाभावेऽपि तपोव्रतादिरूपसाधनांतरमप्यास्ति त्वत्प्राप्तिसाधनमिति चेदाह—किंचेति । व्रतानि यमनियमादीनि, तपांसि पञ्चाग्नितापादीनि । सत्संगस्वरूपमाह—सत्संगो नामेति । ममैव संग इत्यभिप्रेत्योक्तं—मत्संगादिति । यस्य संगिसंगात्पुरुषाणां सत्तमत्वं तस्य भगवतस्तत्त्वाभावे संशय एव नो पनीपद्यत इत्याह—यद्वेति । भगवता विवक्ष्यते । स्वस्यापि स्वरूपस्यैव सत्त्वात्साधुत्वात । अत्र पक्षे सत्त्वा द्भगवत्संगस्यैव मोक्षसाधनत्वमायाति न तु तदीयसंगस्येत्यरुच्याह—यद्वेति । मदीयानां संगो मत्संगः । आर्षत्वमाश्रित्य तद्धितलोपः । इत्यर्थ इति—'मद्रूपा एव मद्भक्ताः' इत्युक्तेर्भगवद्भागवतानामभेद इति भावः ॥ * ॥ त इति—पूर्ववदध्ययनादिकं भगवत्प्रीणनमेव ग्राह्यम्, अत्रैकेषां वृत्रादीनां प्राग्जन्मादौ साधनान्तरं यत्तदपि सत्संगानुषंगसिद्धमित्यभिप्रेत्याह—सत्संगस्यैव तत्तत्फलमुक्तं धर्मव्याधादीनां केवलस्यैव तस्येति ज्ञेयम् । मत्संगशब्देनात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केवलेन हि भावेन गोप्यो गावो नगा मृगाः ॥ येऽन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा ॥ ८ ॥ यं न योगेन सांख्येन दानव्रततपोऽध्वरैः ॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ॥ ९ ॥ रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः ॥ विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय ॥ १० ॥

येषां न तप्तानि तपांसि यैस्ते च ते च । तथा । सत्संगादिति सद्भिः संगो नाम मयैव संग इत्यभिप्रेत्योक्तम् । यद्वा स्वसंगस्यापि सत्संगत्वं विवक्ष्यते । स्वस्यापि सत्त्वात् । यद्वा मदीयसंगादित्यर्थः ॥ ७ ॥ तत्र वृत्रादीनां भवतु नाम कथंचित्साधनांतरं गोपीप्रभृतीनां तु नान्यदस्तीत्याह । केवलेनेति । सत्संगलब्धेन केवलेनैव भावेन प्रीत्या । नगा यमलार्जुनादयः । नागाः कालियादयः । यद्वा तदानींतनानां सर्वतरुगुल्मादीनामपि भगवति भावोऽस्तीति गम्यते । तदुक्तं भगवतैव । "अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणम् ॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतम्॥" इत्यादि । नागाः कालियादयः सिद्धाः कृतार्थाः संतः ईयुः प्रापुः॥८॥ स्वप्राप्तेर्दुर्लभतामाह । यमिति । योगादिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात्तं मामीयुरिति पूर्वेणान्वयः । अत्र च प्रथमं या गोप्यः पश्वादयो वा श्रीकृष्णेन सह संगतास्ते संतस्तत्संगोऽन्येषां सत्संगस्तेन च तेषां भक्तिरिति ज्ञातव्यम् ॥ ९ ॥ गोपीनां भावं प्रपंचयति रामेणेति चतुर्भिः । श्वाफल्किना अक्रूरेण मयि प्रणीते

मम संगो मदीयानां च संगः, उभयत्रापि मत्संबंधित्वात् । तत्र स्वस्यापि सत्संगप्रकरणेंतर्भावितत्वात्सत्त्वमेवात्राभिहितम् । यत्तु पुरा भागवतसंगेनैव भगवत्कृपा भवतीत्युक्तं तत्तु तत्सांमुख्यजन्मन्येव भागवतसंगसाधनविशेषत्वेनोच्यत इति न दोषः । यदि वात्र कुत्रचित्सांमुख्यजन्मकारणमपि भगवत्संगो भवेत् तदाप्येवमाचक्ष्महे स्वरक्षार्थमवतारमंगीकृत्य यत्कदाचित्कृपां वितनोति भगवान् तच्च सत्संबंधत्वेनैवेत्यतो नाभ्युपगमहानिः । भावतारतम्याद्वशीकरणतारतम्यं ज्ञेयम् ॥ ७ ॥ तत्र तेषु । प्रभृतिपदेन गवादिग्रहः । केवलं तदानीं कालियादय एव न कृतार्था अपि तु सर्वे व्रजस्थस्थावरजंगमा इति भावेनाह—यद्वेति । तदानींतनाः श्रीकृष्णप्रादुर्भावकालिकाः । अत्र प्रमाणमाह—तदुक्तमिति ॥ * ॥ अथ मुख्यं वशीकरणमसंभावितं साधनांतरेणेति सत्संगमात्रेण श्रीगोप्यादीनां दर्शयति—केवलेनेति । भावेन प्रकरणप्राप्तसत्संगमात्रजन्मना प्रीत्या । भावोऽत्र वशीकारमुख्यत्वे चिह्नम् "वशीकुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" इत्यादेः । 'भक्त्याहमेकया ग्राह्यः' इत्यादेश्च । केवलेन ज्ञानकर्माद्यमिश्रेण निष्कामेन । भावेन शृंगारवात्सल्यसख्यदास्यभावशालिना भक्तियोगेन । गोप्यः शृंगाररसेन, गावो वात्सल्यरसेन, नगा गोवर्धनादिपर्वताः सख्यरसेन, मृगा अपि मूढधियो वृंदावनीयतरुगुल्माद्याः, नागाः कालियाद्या दास्यरसेन मामीयुः । अत्र गोप्यादयः सिद्धा एव पूर्वरागाद्यनंतरमामीयुरिति केवलेन भावेन तेषां मत्प्राप्तिमत्त्वमनादितो नित्यसिद्धमेवेत्यर्थोऽवसीयतेऽन्यथा सिद्धा इति पदस्य वैयर्थ्यम् ॥ ८ ॥ एतच्चातीवदुर्लभमित्याह स्वामी । संप्रदायपरंपरामाह—अत्र चेत्यादिना ॥ * ॥ तामेव व्यनक्ति—यमिति । यं भावम् । अत्रापि योगादयो भगवत्परा एव योगादिभिर्यत्नवानपीत्यनेन तत्प्राप्त्यर्थं प्रयुज्यमानत्वावगमादिति **संदर्भः** ॥ * ॥ केवलस्य भक्तियोगस्य सत्संग एव हेतुर्न तु सुकृतांतरं किमपीत्याह—यमिति । यत्नवानपि योगादीनां सम्यगनुष्ठाननिरतोपीति **विश्वनाथः** ॥९॥ सुखाभावे हेतुं पृच्छति—कुत इति। अत्र तीव्राधित्वे ॥ * ॥ **संदर्भः**—अथ साधकचरीणां गोपीनां प्रथमतत्प्राप्तिप्रस्तावेन नित्यप्रेयसीनामपि तन्महावियोगांतरप्राप्तिस्तस्य वियोगस्यातीतत्वनिर्देशाद्द्रढयति द्वाभ्याम् । यतोऽनुरक्तचित्ताः प्रेम्णः षष्ठीभूमिकायानुरागस्तन्मयीभूतानि चित्तानि यासां ताः । अत्र ददृशुरिति भूतनिर्देशादधुना तु दंतवक्रवधांते मया सह संयुक्ता एव वर्तंत इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण ॥ क्षणार्धवत्ताः पुनरंग तासां हीना मया कल्पसमा बभूवुः ॥ ११ ॥
ता नाविदन्मय्यनुषंगबद्धधियः स्वमात्मानमदस्तथेदम् ॥ यथा समाधौ मुनयोऽब्धितो ये नद्यः प्रविष्टा इव नामरूपे ॥ १२ ॥

सति मे मत्तोऽन्यं सुखाय न ददृशुः । कुतः । वियोगेन तीव्रो दुःसह आधिर्यासां ताः । अत्र हेतुः । मयि विगाढेनातिदृढेन भावेन प्रेम्णाऽनुरक्तानि संसक्तानि चित्तानि यासां ताः ॥ १० ॥ तीव्राधित्वं व्यनक्ति । तास्ता इति । मया सह या एव क्षपा रात्रयः क्षणार्धवन्नीतास्ता एव पुनर्मया हीनास्तासां कल्पसमा बभूवुः । कथंभूताः । तास्ताः वाचामगोचरा इत्यर्थः ॥ ११ ॥ किंच एवं तीव्राधयस्ता मोहमिषेण समाधिं प्राप्ता इत्याह । ता इति । मय्यनुषंगेणासक्त्या बद्धा धियो याभिस्ताः स्वमात्मानं स्वदेहमदो दूरस्थमिदं सन्निहितं च नाविदन् । यद्वा स्वं पतिपुत्रादि ममतास्पदम् । आत्मानमहंकारास्पदं देहम् । अदः परं लोकमिदमिमं लोकं च नाविदन्निति यथा

द्योतितम् ॥ १० ॥ इत्यर्थ इति—परमानन्दरसप्रदत्वाद्वक्तुमशक्या इति भावः ॥ * ॥ "कल्पस्य क्षणता: योगे वियोगे तद्विपर्यय" इति प्रेम्णः सप्तम्या भूमिकाया महाभावभेदस्य रूढभावस्य लक्षणं सर्वतो विलक्षणं दर्शयति—तास्ता इति । ब्रह्मरात्रमिता अपि क्षणार्धवत् वृन्दावनगोचरेण वृन्दावने गोभिः सह चरता हीनास्ताः प्रहरचतुष्टयपरिमिता अपि धारयितुमशक्यत्वात्कल्पैर्बहुभिः समा बभूवुः । अधुना तु तादृश्यो न संति नास्त्येव वियोग इत्यर्थः । पूर्वं त्वेतस्यैवोद्धवं प्रति 'मयि ताः प्रेयसां प्रेष्ठे' इत्यादौ वर्तमानप्रयोगाः कृता इति ॥ ११ ॥ गोपीनां भक्त्यतिशयमाह—किञ्चेति । स्वशब्देनैवात्मनो गृहीतत्वात्पुनरुक्तिमस्मिन्नर्थे संभाव्याह—यद्वेति । तद्वन्मुनिवन्न किञ्चिद्विदुः । तासां सायुज्येन मुनिभ्य आधिक्यमाह—किंत्विति ॥ * ॥ ततश्च प्रकटाप्रकटलीलयोः पृथक्त्वाप्रतिपत्त्यै वा प्रकटभावमापद्य स्वनामरूपयोरेव ताः स्थिता इत्याह—तास्तथाभूताविरहोत्कंठातिशयेनाभिव्यक्तदुर्द्धरमहाभावाः सत्यः, अथ 'आगमिष्यत्यदीर्घेण कालेन' इत्यादिभगवदुक्त्यनुसारेण 'यर्ह्यंबुजाक्षापससार भो भवान्कुरून्मधून्वा' इत्यादिद्वारकावासिप्रजावचनानुसारेण च कदाचित्तासां दर्शनार्थं गते मयि लब्धो योनुषंगो महामोदनभावाभिव्यक्तिकारी पुनः संयोगस्तेन बद्धा धीर्यासां तथाभूताः सत्यः स्वममतास्पदमात्मानमहंकारास्पदम् । अदः अप्रकटलीलानुगतत्वेनाभिमतं वा तथेदं प्रकटलीलानुगतत्वेनाभिमतं वा यथा स्यात्तथा तदानीं नाविदन्, किंतु द्वयोरैक्येनाविदुरित्यर्थः । प्रकटाप्रकटतयाभिन्नं प्रकाशद्वयं लीलाद्वयं चाभेदेनैवाभ्यजानन्निति विवक्षितम् । ततश्च नाम च रूपं चेति समाहारद्वंद्वेन नामरूपात्मनि प्रकटप्रकाशविशेषे प्रविष्टा इव न तु प्रविष्टा वस्त्वभेदादित्यर्थः । अत्राहंकारास्पदे प्रविष्टा इवेति वस्त्वभेदेनैव योजयति—यथा समाधौ समाध्युपाधौ तुरीयाख्यात्मनि मुनयो जाग्रदाद्युपाधितया विश्वतैजसप्रज्ञाख्यामतीतमात्मानं प्रविष्टा इव किंतु तेषाम् । 'तुरीयं त्रिषु संततम्' इति न्यायेनोपाधिनैव तुरीयाद्भिन्नतया ख्यातानां तदुपाधिपरित्याग एव प्रवेशतयोपचर्यते । तथा तासां मत्प्राप्त्यन्तरायतत्तत्परित्याग एव प्रवेशतयोपचर्यत इत्यर्थः । अथ ममतास्पदे प्रविष्टा इवेत्यपि सम्यगंशाप्रवेशेन योजयति—यथाब्धितोये नद्यः प्रविष्टा इव भवन्ति पृथिव्यामविच्छेदात् तद्वृत्तयोः प्रकाशयोर्मिथो विच्छेदाज्ञानात् प्रविष्टा इवेति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—मोहाद्यभावेपि सर्वविस्मरणामिति विगाढभावस्यापरमप्यनुभावमुज्ज्वलमप्युक्तं दर्शयति—मयि अनुषंगेण बद्धा धियो याभिस्ताः । अत्र बद्धपदेन कृष्णस्य त्रिजगन्मोहनविचित्रलीलास्तंभत्वम् अनुषंगस्य बलवद्दामत्वं धीवृत्तीनां कृष्णवांछितसंपादककामधेनुत्वञ्चारोपितम् । स्वमात्मानं देहं न विदुः रासाभिसारादौ क्व स्थितं क्व वायातमिति नानुसंदधुः । तथादः परलोकं धर्मातिक्रमादिति भावः । इदमिमं लोकं लज्जाभयाद्यतिक्रमादिति भावः । समाधौ मुनय इति—तेषां यथा सर्वविस्मरणे ब्रह्मानुभवोतिरिच्यते तथैवासां मदनुभव इति सर्वविस्मरणांशे दृष्टान्तः, न तु प्राप्यांशे । गोपीप्राप्यप्रेममुनिप्राप्यनिर्वाणयोरह्हो महदेवांतरं यस्मान्ममत्वाममते तयोः । तथाहि—सर्वसंतापनिवर्तकात्परमाह्लादकात् दृश्यमानाच्चंद्रादपि सकाशात्सर्वगुणहीनोपि दृश्यमानः पतिपुत्रादिको यत्सुखमधिकं दत्ते तत्र ममतैव यदि कारणं तदा किं पुनः सर्वगुणमंडिते स्वभावादेव निरवधिकसुखप्रदे श्रीकृष्णे परब्रह्मणि निराधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्कामा रमणं जारमस्वरूपविदोऽबलाः ॥ ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः ॥ १३ ॥

मुनयः समाधौ नामरूपे न विदुस्तद्वत् । किंत्वब्धितोये नद्य इव मयि प्रविष्टा इत्यन्वयः ॥ १२ ॥ एवं ता अबलाः केवलं मत्कामा अस्वरूपविदः स्वरूपं तु न

कैव ममतासुखाधिक्यकारणं भक्तानामिति । अत एवोक्तम्—"ब्रह्मानंदो भवेदेष चेत्परार्द्धगुणीकृतः । नैति भक्तिसुखांभोधेः परमाणुतुलामपि ॥" इति ब्रह्म च भक्तेष्वासक्तं तद्दृश्यं च मुनिषु तु नैवासक्तं न तद्दृश्यञ्चेति ।
नद्यो यथाब्धितोये नामरूपे स्वीये न विदुरिति रसचर्वणांशे दृष्टान्तः ॥ १२ ॥ इत्यर्थ इति—वस्तुशक्तिर्बुद्धिं नापेक्षत इत्युक्तं प्रागिति भावः । वस्तुतस्तु—जरयति संसाररोगमिति जारः, रमयति नित्या
नंदप्रदानेनेति रमण इतिबुद्धिवर्जितानामपि स्वप्रभावेण स्वस्मिँल्लयं कृतवानिति तात्पर्यम् ॥ * ॥ तदेवं प्रकटाप्रकटयोर्द्वयोरपि लीलयोस्तासां स्वप्राप्तौ भाव एव कारणं दर्शितम्, ततश्चाप्रकटलीलायां
प्रविष्टा अपि यद्विशेषेणाधिक्येन तं प्रापुस्तद्दर्शयन्नन्यदप्यनुवदाति—मत्कामा इति । यथा भीष्ममुदारं दर्शनीयं कटं करोतीत्यत्र क्रिया खलु विशेष्यस्य कृतिं प्रत्याययंती विशेषणानामपि प्रत्याययति—कटं करोति तं च
भीष्मामित्यादिरीत्या । तथात्रापि प्रतीयते विशेष्यं चात्र ब्रह्मैव सर्वविशेषाश्रयणीयपरमवस्तुतया तेषु तस्याभेदनानुगमात् । तदेवं स्थिते "अनुवादमनुक्त्वैव न विधेयमुदीरयेत्"इत्युक्तदिशा पाठानुरोधेनात्र न विधेयं निर्णीयते
किंत्वर्थानुरोधेन तस्यैव बलवत्त्वात् । यथा—"यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" इत्यत्र 'पच्यन्तां विविधाः पाकाः' इत्यादौ 'सर्वदोहश्च गृह्यताम्' इत्यत्र "अग्निहोत्रं जुहोति यवागूंश्च पचति"
इत्यत्र च पर्णमयीत्यादीनामेव विधेयत्वम्, तद्वत् तस्मिन्नेवाकांक्षापूर्तेरर्थानुरोधस्य बलवत्त्वम् । ततश्च पूर्वोक्तरीत्या ता ब्रह्म प्रापुः । किं निर्विशेषतयाविर्भूतः, न, किंतु परमं परा मा लक्ष्मीर्यस्मिंस्तादिति भगवद्रूपमि
त्यर्थः । 'परमं यो महद्ब्रह्म' इति सहस्रनामस्तोत्रात् । तादृशत्वं च "शुभाश्रयः स चित्तस्य सर्वगस्य तथात्मनः" इति विष्णुपुराणरीत्यान्यत्रापि भगवदाविर्भावे संभवतीत्याशंक्याह—मां कृष्णाख्यमेव । यथोक्तं तासु स्वय
मेव—'मय्यावेश्य मनः कृष्णे' इत्यादि 'मयि भक्तिर्हि' इत्यादि । तत्र च मां निजभावविशेषमयभेदेन द्विधा प्रापुरिति बोधयितुं तासां तत्तद्विशेषेण साहित्येन सविशेषणद्वयमाह—मत्कामा रमणमिति, जारस्वरूपविद इति, रम
णशब्देनात्र पतिरेवोच्यते नंदनशब्देन पुत्र इव रूढ्या यौगिकत्वबाधात् 'रूढिर्योगमपहरति' इति न्यायात् । यथा मित्रानंदनशब्देन मित्रापुत्र एवोच्यते न तु मित्रापतिः, मित्रारमणशब्देन मित्रापतिर्न तु मित्रापुत्रस्तद्वद
त्रापि जारशब्देनोपपतिरेवोच्यते न तु पतिः । कोशकारमते तत्रैव रूढः "रमणं स्यात्पटोलस्य मूलेऽपि रमणः प्रिये" इति विश्वप्रकाशात् । स्त्रीजातिसंबंधेन रमणशब्दवत्प्रियशब्देन पतिरेवोच्यते तत्रैव प्रसिद्धेः । "धवः
प्रियः पतिर्भर्ता जारस्तूपपतिः समौ' इत्यमरात्, 'जारः पापपतिः' इति त्रिकांडशेषाच्च । पतित्वं तूद्वाहेन कन्यायाः स्वीकारित्वमिति लोक एव, भगवति तु स्वभावेनापि दृश्यते परमव्योमाधिपस्य महालक्ष्मीपतित्वं
ह्यनादिसिद्धमिति । अस्वरूपविद इति—नित्यमेव मत्प्रेयसीत्वलक्षणमवतारसमये मदीयलीलाशक्त्या मोहितत्वान्न विदन्ति यास्तथा सत्यो जारं जारबुद्धिवेद्यं सन्तं मां प्रापुः । तथापि रमणत्वप्राप्तौ हेतुः—मत्कामा इति । मग्नि
कामः कथमस्माकमन्यस्मिन्पतित्वं स्वप्नवद्विलीयेत श्रीकृष्ण एव जागरणवत्तत्तत्प्रादुर्भवेदित्याभिलाषो यासां तथा सत्यो मां रमणं प्रापुः । तादृगभिलाषश्चासां स्पष्ट एवोपलभ्यते । यथा—'अपि बत मधुपुर्यामार्यपुत्रोऽधुना
स्ते' इत्यत्र तस्य स्वीया एव वयमिति व्यज्य तत्र च—'किंकरीणाम्' इति 'श्यामसुंदर ते दास्यः' इतिवद्दैन्यात्किंकरीत्वेनापि निश्चिताः । 'भुजमगुरुसुगंधं मूर्ध्न्यधास्यत्कदा नु' इत्यनेन तदेवासावसंकोचांगीकारेण कदा
सांगीकरिष्यतीति श्रीराधा स्वयमेव प्रार्थितवतीति । तथा—'कात्यायनि महामाये' इत्यादौ 'गोप्यः किमाचरन्' इत्यादौ ' यत्पत्त्यपत्यसुहृदाम् ' इत्यादौ च । श्रीभगवता च स्वमतं तदेवोद्धवायोपदिष्टम्—'बल्लव्यो मे
मदात्मिकाः' इति । अत्र 'यात यूयम्' इत्याद्यनुसारेण श्रीमन्नंदराजे निजपितृत्वाभिमननेन स्वस्मिन्गोपत्वमननात् । ब्राह्मणस्य मम ब्राह्मणीतिवत् । बल्लवस्य मम बल्लवीरूपास्ता इति श्रीशुकदेवेन च कृष्णवध्व इत्येवो
क्तम् । तदेवं जारबुद्धेर्हेयत्वं रमणस्तूपादेयत्वं जारबुद्धिवेद्यमपीति व्याख्याय स्वामिचरणैरवगमितम् । भर्त्राभिलाषप्राप्तिरवश्यमवगन्तव्या । अन्यथा—"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति श्रीगीतोपनिषद्वचः ।
यथेति—यदभिलाषेणेत्येवार्थः । तस्मात् रमणतया विद्यत इति प्रतिज्ञाहानिर्न स्यात् । 'तत्क्रतुन्यायेन' 'अहं भक्तपराधीनः' इति, 'स्वेच्छामयस्य' इति, प्रतिज्ञाहानिश्च स्यात् । स्वयमेवेदं दृष्टान्तद्वारा बोधयितुम् ' मय्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ॥ प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥ १४ ॥

जानंति तथाऽपि सत्संगाज्जारं ब्रह्म जारबुद्धिवेद्यमपि ब्रह्मस्वरूपमेव मां परमं प्रापुरित्यर्थः ॥ १३ ॥ यस्मादेवंभूतो मद्भजनप्रभावस्तस्मात्त्वं चोदनां श्रुतिं प्रतिचोदनां

वेश्य मनः कृष्णे' इत्यादावनंतरम् "या मया क्रीडता रात्र्यां वनेस्मिन्व्रज आस्थिताः। अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिंतया ॥" इति। अथ खल्वंतर्गृहगतानां तासां तान्पतींस्तांश्च देहांस्त्यक्तवतीनामौपपत्यं न संभवतीति हे कल्याण्य इत्यनेन भवतीनां तत्तद्देहत्याग इति वैशिष्ट्यमवगमितम्। तदेतदाभिप्रेत्यैव पूर्वमपि तमुद्धवं प्रति--"धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन। प्रत्यागमनसंदेशैः" इत्युक्त्वा तासां प्राणधारण आग्रहो दर्शितः। जारतया प्रतीतत्वेन रमणत्वेन च मत्प्राप्तौ मम कारुण्यं तु परमसहायमित्याह—अबला इति। तादृशमत्प्रेमकैवल्येन तासु स्वस्वरूपानुसंधानबलतिरोधानान्न विद्यते बलं मत्साहाय्यं विनान्यद्यासां तादृश्य इति। अत एव ममातिकरुणोदयादिति भावः। आस्तां नित्यप्रेयसीनां वार्ता तासां संगादन्या अपि शतसहस्रशस्तथा मां प्रापुरिति। किंच—ब्रह्मत्वं परमेश्वरत्वञ्च तत्र स्वाभाविकमेव तादृशप्रेमविशेषेण तयोरावरणमेव न तु निर्धुननं परममाधुर्यस्य तु परमोल्लासः। अथ जारत्वं तु तत्रासत्यं दुःखमयजुगुप्सितान्यसंबंधाविष्कृतं चेति तेन प्रेमविशेषेण निर्धुननमेव न तु पूर्ववदावरणमात्रं परमरमणस्य तु परमोल्लास इति। अत्र पद्ये विशेषः कृष्णसंदर्भे दृश्यः ॥ १३ ॥ यतो मुमुक्षूणामहमेव शरणमतस्त्वमपि मां शरणं व्रजेत्युपसंहरति द्वाभ्याम्। सर्वथा श्रुतिस्मृतित्यागे नास्तिक्यं स्यादिति चेदाह—यद्वेति। तदेव स्फुटयति—प्रवृत्तं प्रवृत्तिकारकं काम्यकर्मबोधकं, निवृत्तं निवृत्तिबोधकञ्च शास्त्रं, श्रोतव्यं श्रुतं च कर्मफलं तदपि त्यक्त्वा "परीक्ष्य लोकान्कर्मचितान्" इत्यादिश्रुतेः ॥ * ॥ तदेवं तदभीष्टतमां श्रीगोपीनामपि स्वप्राप्तिं कथयित्वा तस्यापि तां क्रोडीकुर्वन्नुपसंहरति—तस्मादिति युग्मकेन। यस्मान्मदीयत्वेन लब्धसद्भावानां तेषां नारदांगिरःप्रभृतीनामपि संगस्यैव तावन्महिमा तस्मात्तद्गुणपरमाश्रयत्वेन परमसंतं मामेकमेव शरणं याहि, शरणागतिपर्यंततया भजेत्यर्थः। ततश्च हि निश्चितं मया त्वमकुतोभयः स्या भविष्यसि। तत्र कैमुत्यायात्मनः स्वभावतः सर्वहितत्वं दर्शयति—सर्वदेहिनामात्मानं परमात्मानमिति। एकमेव शरणमित्येव दर्शयति—सर्वात्मभावेनेति। तदेव विवृणोति—उत्सृज्येत्यादिना। श्रोतव्यं श्रुतमिति ज्ञानाश्रयत्वमपि निराकरोति—तत्रैकमिति। तदात्वे एव कालांतरे चाश्रयांतरस्य भावनामपि निषेधस्तस्येति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—तदेवमुद्धवेन साधुलक्षणं श्रीभगवांस्तारतम्येन त्रिविधं साधुं लक्षयित्वा तत्तत्सगप्रादुर्भूतां प्रधानीभूतां केवलां च भक्तिं सामान्यतो निरूप्य भक्तेः स्ववशीकारं विवक्षुः कैमुत्येन सत्संगस्यैव वशीकारित्वमुक्त्वा सत्संगिनो भक्तांश्च निर्दिश्यांते गोप्यादिनिकृष्टकेवलं भक्तियोगं दुर्लभत्वेन स्तुत्वा सहसैव 'रामेण सार्द्धम्' इत्यादिना तत्रापि गोपीविषयकस्वप्रेमबाष्पं सदा जाज्वल्यमानं गांभीर्येण हृदि मुद्रितमप्यधीरतयोद्घटय्य तासामेव भक्तियोगस्य स्ववशीकारसर्वोत्कर्षपरावधित्वं च तासामेव साधुत्वस्यापि सर्वमहामहोत्कृष्टत्वकक्षाविश्रामित्वमभिव्यज्य केवले तदनुष्ठिते भक्तियोग एवोद्धवं प्रवर्तयितुमाह—तस्मादिति। विहितं निषिद्धं च कर्म त्यक्त्वेति भावः। तर्हि किं संन्यासं कुर्वे न प्रवृत्तं गृहस्थधर्मं निवृत्तं संन्यासिधर्मं च त्यक्त्वा तत्रापि श्रोतव्यं च श्रुतं च त्यक्त्वेति भाविधर्मश्रवणमनाकांक्षधर्मश्रवणं च विस्मृत्येत्यर्थः। सर्वात्मभावेन सर्वोपाय आत्मना मनसा भावो दास्यसख्यादिस्तेनैकमेव मामालंबनीकृत्य शरणं याहि। मयैवाकुतो भयः स्या इति तव नास्ति कर्माधिकारो नापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामेकमेव शरणमात्मानं सर्वदेहिनाम् ॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥१५॥उद्धव उवाच ॥ संशयः शृण्वतो वाचं तव योगेश्वरेश्वर॥ न निवर्त्तत आत्मस्थो येन भ्राम्यति मे मनः ॥ १६ ॥ श्रीभगवानुवाच ॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ॥ मनोमयं सूक्ष्म मुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ १७ ॥

स्मृतिं च । यद्वा विधिं च निषेधं चोत्सृज्य मां शरणं याहि ॥ १४ ॥ मयैवाकुतोभयः स्याः भव ॥ १५ ॥ पूर्वं तावन्मयोदितेष्ववहितः स्वधर्मेष्वित्यादिना कर्म कर्तव्यमित्युक्तमिदानीं तु सर्वं त्यक्त्वा मां शरणं याहीत्युच्यते । तत्र किमात्मनः कर्तृत्वाद्यस्ति नास्ति वेत्यात्मस्थ आत्मविषयः संशयो न निवर्तते । यद्वा कर्म कार्यं त्याज्यं वेत्यात्मस्थो हृदिस्थः संशयो न निवर्तत इति पृच्छति । संशय इति । येन संशयेन ॥ १६ ॥ उत्तरं स एष इत्यष्टभिः । अयं भावः । ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मना भाति तत्प्रपंचाध्यासाच्च जीवानामनाद्यविद्यया कर्तृत्वादि ततो विधिप्रतिषेधाधिकारस्तदानीं सत्त्वशुद्ध्यर्थं कर्माणि कुर्वित्युक्तम् । सत्त्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय

ज्ञानाधिकारस्तदपि तंतमात्मन्यारोप्य प्रत्यवायभयं संसारभयञ्चात्मनि मन्यसे चेत्तदा तद्भयद्वयात्त्राताऽहं विद्यमान एवास्मीत्यर्थः ॥१४॥ एकं केवलम् । एवकारेण देवतांतरव्यवच्छेदः । सर्वात्मभावेन श्रीकृष्ण एव सर्वेषामात्मेत्यभेदभावनया । यद्वा–सर्वात्मभावेन चराचरस्वरूपेण श्रीकृष्णार्चनेन सर्वमर्चितं स्यात् 'सर्वार्हणमच्युतेज्या' इत्युक्तेः । ''सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥'' इति श्रीगीतोक्तेः ॥ * ॥ ० ॥ १५ ॥ बहुविधवाक्यश्रवणेन जातसंशयः पृच्छतीत्याह–पूर्वं तावदित्यादिना । तत्रोभयविधवाक्योपलंभे । यदि वस्तुत आत्मा कर्त्रादिरूपोस्ति तदा कर्मत्यागो वक्तुं न शक्यो यदि नास्ति तर्हि कर्मविधिर्न वक्तुं शक्य इत्येवं संशयः । कर्मकार्याकार्यविधावात्मविषयसंशयस्यायोग्यत्वादाह–यद्वेति ॥ * ॥ पूर्वं तावच्छ्रीभगवता 'मयोदितेषु' इत्यादिना कर्ममिश्रा भक्तिरुक्ता, ततश्च तत्परत्वे सति 'निवृत्तं कर्म सेवेत' इत्यादिना सर्वं कर्म त्याजितम् । 'किं तज्ज्ञानम्' इत्यादिना ज्ञानमिश्रा विहिता ज्ञानार्थमात्मतत्त्वनिरूपणञ्च सुष्ठु कृतं श्रीमदुद्धवेनापि गुणेषु 'वर्तमानोपि' इत्यादिना पृष्ट्वा 'बद्धो मुक्तः' इत्यादिना श्रीभगवदुक्तसिद्धांतोऽवधारितः । तत्तु ज्ञानं भक्तिं विना न सिध्यतीति स्वयं भगवतैव पुनः 'शब्दब्रह्मणि निष्णातः' इत्यादिनोट्टंकितम्, 'श्रद्धालुः' इत्यादिना भक्तिश्च दर्शयित्वा तस्या भक्तेर्जन्मनि सिद्धौ च कारणं सत्संग एवेति दर्शितम्, पुनरुद्धवेन 'साधुस्तव' इत्यादिना तौ विशेषतः पृष्टौ, श्रीभगवता च तावुद्दिश्य 'प्रायेण भक्तियोगेन' इत्यादिना केवलं सत्संग एव दृढीकृतोऽतिशायितश्च । 'तस्मात्त्वमुद्धव' इत्यादिना कर्म च ज्ञानञ्च सम्यगेव त्याजितम्:। तदेवं यद्यपि संशयावसरो नास्ति तथाप्याह–संशय इति । तव वाचं शृण्वतोऽवधारयतो ममात्मस्थं सशयम् 'मयोदितेष्ववहितः' इत्यादिकाध्यायत्रयगतमहावाक्यार्थपर्यालोचनासामर्थ्यं न निवर्तते, कुतो येन मम मनो भ्राम्यति वैयग्र्यविशेषाविष्टमास्ते तस्मात्पुनः सम्यक्तेनोपदिश्यतामिति भावः । संशयोऽत्र तत्तत्प्रकरणानामेकतात्पर्यताग्रहणे वफैल्यम्। शृण्वत इति शृण्वतोपीत्यर्थ इति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**–संशयो न निवर्तत इत्येतत्पूर्वलक्षण एव ''मयि सर्वाणि कर्माणि निरपेक्षः समाचरन्'' इति वदता त्वया मह्यं कर्माधिकारो दत्तः, तत्पूर्वं तु 'यदिदं मनसा वाचा' इत्यादिना 'विद्धि मायामनोमयम्' इत्यादिना ज्ञानाधिकारो दत्तः, अधुना तु सर्वं त्यक्त्वा मां शरणं याहीति भक्त्यधिकारं ददासि न जाने पुनरग्रे कमधिकारं दास्यसीति सख्यरसोद्भूता वक्रोक्तिर्द्योतिता ॥ १६ ॥ स्वाशयमाह भगवान्–अयं भाव इति । ततः कर्तृत्वाद्यंगीकारात् । तदानीं विधिनिषेधाधिकारवेलायाम् । सत्त्वस्यांतःकरणस्य शुद्ध्यर्थं कर्मजाड्यं कर्मासक्तिस्तत्परिहाराय । तत्र प्रश्नोत्तरनिमित्तम् । तत्रेति निमित्तार्थसप्तम्यंतात्त्रल् । तावदधुना । किंच–अवाङ्मनसगोचरात्मविषयकसंशयस्याध्यारोपापवादैकनिरसनीयत्वादारोपं वदन्स्थूलसूक्ष्मक्रमेण वागुत्पत्तिमाह–आधारादिचक्रेषु । तानि च योगशास्त्रे उक्तानि–''मूलाधारः स्वाधिष्ठानं मणिपूरकमेव च । अनाहतं विशुद्ध्याख्यमाज्ञा षट्चक्रमुच्यते ॥ मूलाधारे लिंगमूले नाभौ हृदि च कंठके । भ्रुवोर्मध्ये ब्रह्मरंध्रे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तिविक्षेपककर्मादरं परित्यज्य दृढविश्वासेन भजेत्युक्तम् । जातायां तु विद्यायां न किंचित्कर्तव्यमस्तीति । तत्र तावदीश्वराद्रागादींद्रियद्वारा जीवसंसृतिकारणभूतं प्रपंचोद्गममाह सार्धैश्चतुर्भिः । स एषोऽपरोक्षः जीवयतीति जीवः परमेश्वरः । अपरोक्षत्वे हेतुः । विवरेष्वाधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य सः । तामेवाभिव्यक्तिमाह । घोषेणेति । घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन्मनोमयं सूक्ष्मं रूपं पश्यंत्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे चोपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वर उदात्तादिर्वर्णः ककारादिरित्येवं वैखर्याख्यः स्थविष्ठोऽतिस्थूलो नानावेदशाखात्मको भवति । तथाच श्रुतिः । "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति ॥" इति । अभियुक्तश्लोकश्च । "या सा मित्रावरुणसदनादुच्चरंती त्रिषष्टिं वर्णानंतःप्रकटकरणैः प्राणसंगात्प्रसूते ॥ तां पश्यंतीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं चक्रे करणविशदां वैखरींच प्रपद्ये ॥" इति ॥ १७ ॥

क्रमाच्चक्राणि चिंतयेत् ॥ इति । परा–पश्यंती–मध्यमा–वैखरीरूपेण चतुर्द्धा वाक्तु वैखर्येव वक्तुं शक्या नान्या । अत्र प्रमाणमाह–तथा चेति । वाक्परिमितानि वाचाः परिमितानि चत्वारि पदानि स्थानानि परा पश्यंती मध्यमा वैखरी, तानि च ये ब्राह्मणा मनीषिणोऽध्यात्मकुशलास्ते विदुः, तेषां मध्ये आदौ त्रीणि पदानि गुहायां शरीरे आधारनाभिहृदयेषु निहितानि तानि नेंगयंति न जानंति तुरीयं चतुर्थं वैखर्याख्यं मनुष्या वदन्ति मनुष्याणां वदने वर्तमानोऽर्थबोधकः शब्दो भवतीति श्रुतिपदार्थः । अभियुक्तानां कुशलानां श्लोकः–"शास्त्रज्ञे तत्परे शत्रुयुक्ते काले च निर्भये । अभियुक्तः स्मृतो विज्ञैः" इति निरुक्तिः । श्लोकार्थश्च–तां त्रिविधां भारतीं प्रपद्ये या सा मित्रावरुणसदनात् अग्नीषोमस्थानात् उच्चरंती उद्भवन्ती मित्रोऽग्निर्वरुणः सोमः तयोस्सदनमावासस्थानं परमात्मा यतः श्वासस्य शीतोष्णत्वं तस्मादुच्चरंती त्रिषष्टिं वर्णान् जनयति वायुसंगजान् प्रकटकरणैः बुद्धिं गतैः प्रत्यक्षरूपैरिंद्रियैः अंतः पश्यति तनूच्चारयति सा पश्यंत्याख्या तां प्रथममुदितामुत्पन्नां बुद्धिसंस्थामुच्चारयामीति विचारयुक्ताम्, मध्यमां मुखेवस्थिताम्, करणविशदां स्थानप्रयत्ननिर्मलां वैखरीञ्च प्रपद्ये । "त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृताश्चाष्टौ चत्वारश्च यमाः स्मृताः ॥ अनुस्वारो विसर्गश्च ᳵ क ᳶ पौ चापि पराश्रितौ । दुःस्पृष्टश्चेति विज्ञेय ऋकारः प्लुत एव च ॥" इति।अस्यार्थः–अ इ उ ऋ एषां ह्रस्वदीर्घप्लुताः कालकृता द्वादशभेदाः, ऌकारस्यैकस्तस्य दीर्घाभावात्, प्लुतस्तु कैश्चिदिष्टः कैश्चिन्न । एचां चतुर्णामष्टौ तेषां ह्रस्वाभावादित्येकविंशतिस्वराः । स्पर्शाः कादयो मावसानाः पंचविंशतिः । यादयो हांताश्चाष्टौ । यमा वर्गेष्वाद्यानां पंचमे परे मध्ये पूर्वसदृशाः प्रातिशाख्ये प्रसिद्धाश्चत्वारो वर्णाः । यथा–पलिक्क्नीः, चख्ख्नतुः, अग्ग्निः, पतिघ्घ्नीत्यादौ । अनुस्वारादयश्चत्वारः स्पष्टाः । पराश्रितावित्युक्तिस्तु कखयोः परयोरेकविधः, पफयोः परयोरन्यविधः । कंठ्यौष्ठ्यभेदादिति ज्ञापनाय दुःस्पृष्ट ईषत्स्पृष्टऌकार इति शब्दार्थरत्ने । अत्र विशेषोऽपि योगशास्त्रे मातृकापूजाप्रकरणे वर्णितः । तथाहि–प्रथममध्यमोत्तमानामधिकारिणां स्वाधिकारानुसारेण मातृकापूजाकरणमित्यभिप्रेत्य तस्यास्त्रैविध्यमाह–"मातृका च त्रिधा स्थूला सूक्ष्मा सूक्ष्मतरापि च । गुरूपदेशतो ज्ञेया नान्यथा शास्त्रकोटिभिः ॥" प्रथमोऽधिकारी स्थूलया मातृकया पूजयेत्, मध्यमः सूक्ष्मया, उत्तमः सूक्ष्मतरयेति विभागः । स्थूलादिरूपत्रयं चैवमवगन्तव्यम्–नियतकालपरिपाकानां प्राणिकर्मणां मध्ये परिपक्वानामुपभोगेन प्रत्ययात्, इतरेषां चापरिपक्वानां भोगाभावेन तदर्थायाः सृष्टेरनुप्रयोगात् । प्राकृतलये ग्रस्तसमस्तप्रपंचा माया स्वप्रतिष्ठे निष्कले परशिवे विलीना यावदवशिष्टकर्मपरिपाकं वर्तते । उक्तं हि–"प्रलये व्याप्यते तस्यां चराचरमिदं जगत्" इति । तथा–"जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥ वायुः प्रलीयते व्योम्नि तदव्यक्ते प्रलीयते । अव्यक्तं पुरुषं ब्रह्म निष्कले संप्रलीयते ॥" इति । अव्यक्तं माया तस्याश्च सम्यक्प्रलयो नाम मुक्ताविव नात्यंतिको विनाशः किन्तु सुषुप्तौ सत्यां मायागोचरवृत्तीनामप्यभावात् । स्वप्रतिष्ठपरमात्मप्रकाशस्याप्यत्यंतानिर्विकल्पिकतया तद्बलाद्भासमानाया अप्यप्रतिभातप्रायत्वं न पुनरनवभानमेव । प्रतिभासमात्रशरीरस्य हि मिथ्यावस्तुनोऽनवभाने सत्यभाव एव स्यादिति । न चाभाव एवास्तु उत्तरसर्गानुपपत्तिप्रसंगादिति, अवशिष्टैः प्राणिकर्मभिश्च तस्यां मायायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विलीयेव क्रमेण प्राप्तपरिपाकैः स्वफलप्रदानाय परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जन्यते सैषा मायावस्था ईक्षणकामतमोत्रिचिकीर्षादिशब्दैरभिधीयते । " तदैक्षत बहुस्यां प्रजायेय " इति छांदोग्ये, " स ईक्षत लोकान्नु सृजा इति " इति ऐतरीयके, " सोकामयत बहु स्यां प्रजायेय " इति तैत्तिरीयके, "तपसा चीयते ब्रह्म " इति मुंडके, " विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिंदुताम्" इति प्रपञ्चसारे । अपरिपक्वकर्मभेदाद्घनीभावस्तदर्थव्यापारीश्चिकीर्षापरिपक्वकर्माकारपरिणतमायाविशिष्टं बिंदुस्तदिदमविभागावस्थमव्यक्तमुच्यते । अत एव तस्योत्पत्तिः स्मर्यते–" तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति । स एव जगदंकुराकारोऽध्यात्मञ्च आधारादानाभिव्यज्यमानकुण्डलादिशब्दैरुच्यते । यथाहुः–"शक्तिः कुंडलिनीति विश्वजननव्यापारबद्धोद्यमां ज्ञात्वेत्थं न पुनर्विशंति जननीगर्भेऽर्भकत्वं नराः" इति । "कुंडलिनी सर्वथा ज्ञेया सुषुम्ना तु गतैव सा" इति च । बिंदोः कालक्रमेणाचिच्चिदचिच्चिदंशविभागात्त्रैविध्यं तत्रैवोक्तम्–"कालेन भिद्यमानस्तु स बिंदुर्भवति त्रिधा । स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते ॥ स बिंदुनादबीजत्वभेदेन च निगद्यते ।" इति । अचिदंशः स्थूलो बीजं चिदचिन्मिश्रः सूक्ष्मो नादः स एव पुरुषश्चिदंशः परो बिंदुः स एवेश्वरः तस्य च त्रिधा विभागसमये शब्दब्रह्मापरनामधेयस्य परस्योत्पत्तिरुक्ता–"बिन्दोस्तस्माद्भिद्यमानाद्रवो व्यक्तात्मको भवेत् । स रवः श्रुतिसंपन्नैः शब्दब्रह्मेति गीयते ॥" इति । स एव ब्रह्मात्मरवो जगदुपादानं बिंदुतादात्म्येन संगतोऽपि प्राणिनां मूलाधारे व्यज्यत इत्युक्तम् । स तु सर्वत्र संस्यूतो जाते भूताकारे पुनराविर्भवति देहेषु प्राणिनामर्थविस्तृत इति देहेष्विति मूलाधारप्रदेशे तस्यानुस्यूतस्य रवस्य संस्कृतपवनबलेनाभिव्यक्तिराविर्भावस्तत्र हि पवनस्योत्पत्तिरुक्ता–"देहेपि मूलाधारेस्मिन्समुद्यति समीरणः" इति । ज्ञातमर्थं विवक्षोः पुरुषस्येच्छया जातेन प्रयत्नेन मूलाधारस्थः पवनः संस्कृतस्तेन पवनेन सर्वत्र स्थितं ब्रह्म तत्राभिव्यज्यते तदभिव्यक्तं शब्दब्रह्मकारणं बिन्द्वात्मकं स्वप्रतिष्ठतया निष्पंदं सत् परा वागित्युच्यते, तदेव नाभिपर्यंतमागच्छता तेन पवनेनाभिव्यक्तं विमर्शरूपेण मनसा युक्तं सामान्यस्पंदप्रकाशरूपिणी कार्यं बिंदुतत्त्वात्मिकाधिदैवमीश्वररूपा पश्यंती वागित्युच्यते, तदेव ब्रह्म तेनैव वायुना हृदयपर्यंतमभिव्यज्यमानं निश्चयात्मिकया बुद्ध्या युक्तं विशेषस्पंदरूपनादबिन्दुमयी अधिदैवतं हिरण्यगर्भरूपा मध्यमा वागित्युच्यते, तदेवास्यपर्यंतं तेनैव वायुना कंठादिस्थानेष्वभिव्यज्यमानमकारादिक्षकारांतवर्णमालारूपं परश्रोत्रग्रहणयोग्यं बीजात्मकमधिदैवतं विराड्रूपा वैखरी वागित्युच्यते । तदुच्यते आचार्यैः–"मूलाधारात्प्रथममुदितो यस्तु भावः पराख्यः पश्चात्पश्यंत्यथ हृदयगो बुद्धियुङ् मध्यमाख्यः । वक्त्रे वैखर्यथ रुरुदिषोरस्य जंतोः सुषुम्नाबद्धस्तस्माद्भवति पवनप्रेरितो वर्णसंज्ञः ॥" इति । तत्र वैखरी स्थूलमातृका, सा प्रथमाधिकारिणः पूजोपकरणं, मध्यमा सूक्ष्मा मातृका मध्यमाधिकारिणः पूजोपकरणं, कारणकार्यबिन्द्वात्मिका परा पश्यंतीरूपा सूक्ष्मतरा मातृका सोत्तमाधिकारिणः पूजोपकरणम् । मातृकात्रैविध्यं सर्वमंत्रोपलक्षणम् । अतश्च सर्वे मंत्रा उक्तरीत्या स्थूलसूक्ष्मसूक्ष्मतररूपाः प्रथममध्यमोत्तमाधिकारिविषया इत्यर्थः । बहुवक्तव्यश्चायमर्थः । गुरूपदेशत इति–गुरूपदेशमंतरेण शास्त्रैर्दुरधिगमत्वात्तथैव फलातिशयवत्त्वाच्चेत्यर्थ इत्यलमतिप्रपञ्चेन । मंत्रोपयोग्यप्ययं वाङ्निरूपणप्रसंगादत्र लिखितः "वागेव विश्वा भुवनानि जज्ञे"इति श्रुतिरपीममर्थमाह । वागेव विश्वाकारेण विवर्तते परिणमते वेत्यर्थः । श्रुत्यन्तरञ्च–"वाचैव विश्वं बहुरूपं निबद्धं तदेतदेकं विभज्योपभुंक्ते " इति ॥ * ॥ **संदर्भः**–वैयग्र्यं च द्विविधम्–एकं पूर्वत एवानुगतया स्वत्यागभीत्याऽन्यत्संप्रति ज्ञातया 'रामेण सार्द्धम्' इत्याद्युक्त्या हंत तासामनेन संगमः कुत्र कथं वर्तत इति विशेषं ज्ञानमुत्कंठया तत्र स एष इत्यस्यार्धद्वयेन द्विविधं वैयग्र्यमपनेतुं स्वत्यागभीत्या कृतं तत्तत्प्रकरणैकतात्पर्यग्रहणवैयग्र्यं प्रथमेनार्धेन निवारयति–'तस्मात्त्वमुद्धवोत्सृज्य' इति । पर्यवसानं सर्ववेदार्थं युतः संक्षेपतस्तन्नेतृत्वं तदाश्रयत्वं च तथाविधे मय्येवेति दर्शयितुं सर्वेषां वेदानां शब्दरूपेण सर्वाविर्भावरूपत्वमाह–स एष इति द्वाभ्याम् । आधारचक्रादिकमत्र चतुर्भ्यो मुखेभ्यः प्रथमतो वेदाविर्भावसमये चतुर्मुखस्यैवेति ज्ञेयम् । अत एव नादो वेदशब्दात्मको भवतीत्यादिटीका च संगच्छते । व्याख्यास्यते चैकविंशे–'आकाशाद्घोषवान्प्राणः' इत्यत्र । प्राणस्तदुपाधिहिरण्यगर्भरूपः घोषवान्नादोपादानवानिति । अनंतपारामित्यत्र न समष्टिप्राणादिमयस्य कालतो देशतश्चापरिच्छेदादिति श्रुत्यभियुक्तश्लोकौ दृष्टान्तावेवालौकिकवाङ्मयत्वात् । तत्र श्रुतौ वाक्परिमितानि शास्त्राणि निर्णीतानि चत्वारि पराख्यादीनि पदानि रूपाणि तेषां मध्य आदौ त्रीणि गुहायां शरीरे आधारनाभिहृदयेषु स्फुरंत्यपि नेंगयन्ति स्वरूपं न प्रकाशयन्तीति श्रुतिपदार्थः । श्लोकार्थस्तु–या सा पराख्या मित्रोग्निर्वरुणः सोमस्तयोः सदनमाधारचक्रं तस्मात्प्राणसंगेनोच्चरंती स्वयमेव सूक्ष्मरूपमुद्वहन्ती त्रिषष्टिं वर्णान्सूते । कैः । अन्तःकरणाभ्यां प्रकटकरणेन च ततस्तां प्रथममुदितां सतीं पश्यंत्याख्याम् अन्तः पश्यति न तूच्चारयति या तां प्रथमां तथा बुद्धिसंस्थामुच्चारयामीति विचारयुक्तां मध्यमां करणविशदां स्थानप्रयत्ननिर्मलां वैखरीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाऽनलः खेऽनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी ॥ १८ ॥ एवं गदिः कर्मगतिर्विसर्गो घ्राणो रसो दृक्स्पर्शः श्रुतिश्च ॥ संकल्पविज्ञानमथाभिमानः सूत्रं रजःसत्त्वतमोविकारः ॥ १९ ॥ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः ॥ विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥ २० ॥

अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः । यथेति । यथाऽग्निः खे ऊष्मा अव्यक्तोष्मरूपः दारुण्यधिकं मथ्यमानोऽनिलसहायः सन्नणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः प्रकृष्टो जातो हविषा संवर्धते तथैवेयम् वाणी ममाभिव्यक्तिः ॥ १८ ॥ उक्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिष्वतिदिशति । एवं गदिर्गदनं भाषणं मे व्यक्तिरित्युपसंहारः । कर्म हस्तयोर्वृत्तिर्गतिः पादयोर्विसर्गः पायूपस्थयोरिति कर्मेंद्रियाणाम् । घ्राणोऽवघ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेंद्रियाणाम् । संकल्पो मनसो विज्ञानं बुद्धिचित्तयोरभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विकारोऽधिदैवादि त्रिविधः प्रपंचो मे व्यक्तिरिति पूर्वेणान्वयः ॥ १९ ॥ तस्मादीश्वरादिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नोऽस्तीत्याह । अयमिति । अयं जीव ईश्वर आदावव्यक्त एक एव ।

प्रपद्ये । त्रिषष्टिरिति=ह्रस्वदीर्घप्लुतभेदेन वर्णा नव । दीर्घत्वाभावात् ऌत्ववर्णाश्चत्वारः । ह्रस्वत्वाभावादेचोष्टौ । उदात्तादिस्वरास्तदन्तर्गता एव । विसर्गानुस्वारजिह्वामूलीयोपध्मानीयाश्चत्वारः । एवं पंचविंशतिस्स्पर्शास्तावंत एवं पंचाशत् । यवलाः सानुनासिकानिरनुनासिकाः षट् । रेफ एकः।नकारस्य दंत्यमूर्धन्यत्वेन द्विःपाठात् शषसहलक्षाः षट् । एवं त्रिषष्टिरिति । अथ द्वितीयं वैयग्र्यं द्वितीयेनार्थे निराकरोति–स एष इति।स एष जीवो जगतो जीवनहेतुमलक्षणः विशेषतो व्रजस्य जीवनहेतुर्वा।प्राणेन मत्प्राणभूतेन घोषेण व्रजेन सह विवरप्रसूतिर्विवरादप्रकटलीलातः प्रसूतिः प्रकटलीलायामभिव्यक्तिर्यस्य तथाभूतः सन् गुहां पुनरप्रकटलीलामेव प्रविष्टः।कीदृशः सन् , किं कृत्वा–मात्रा मर्मचक्षुरादीनि स्वरो भाषागानादिः वर्णरूप इतीत्थं स्थविष्ठः । स्वपरिजनानां प्रकट एव सन् बहिरंगभक्तानां मनोमयं कथंचिन्मनस्येव गम्यमन्येषां सूक्ष्ममज्ञेयं यद्रूपं प्रकाशस्तदुपेत्य ॥ १७ ॥ इममर्थं दृष्टांतेन स्फुटयति–अव्यक्तस्येति । खे काष्ठच्छिद्रे । तथैव अग्निवत् । इयम् उक्तलक्षणा ॥ * ॥ प्रथमेर्थे यथानल इति तथैव मम व्यक्तिरूपा वाणी चेत्यर्थः । द्वितीयेर्थे प्रकटलीलाविष्कारश्च सदृष्टान्तं स्पष्टयति–यथेति । हि यस्मादियं स्वरहस्यैकवेद्यविज्ञस्य ममैव वाणी नात्रासंभावना विधेयेत्यर्थः । दृष्टान्तोऽयं गर्भादिक्रमेणाविर्भावमात्रांशे । तृतीयस्कन्धेपि श्रीमदुद्धवेनोक्तम्–'अजोपि जातो भगवान्यथाग्निः' इति ॥ * ॥ **विश्वनाथस्तु**–मे व्यक्तिर्मदाविर्भावरूपा इयं वेदलक्षणा वाणी अतोऽस्या अतिगूढमर्थं मां विना को ज्ञास्यति ज्ञात्वा च जीवस्य संसारनिस्तारणार्थान्भक्तिज्ञानकर्माद्युपायान्को वा व्यवस्थास्यतीत्यतस्त्वयि परमयोग्ये पात्रे स्वतुल्ये तानुपायान्सांप्रतं कृपया न्यस्यामि त्वत्तो बदरिकाश्रमस्था मुनयः प्राप्य कृतार्था भविष्यन्तीति भावः ॥ १८ ॥ सूत्रं क्रियाशक्तिप्रधानं महत्तत्त्वम् ॥ * ॥ **संदर्भः**–तदेवं वेदस्य स्वाविर्भावत्वं दर्शयित्वा तदर्थद्वारा जीवानां जगदादेशं त्याजयितुं जगति लौकिकरागादिवृत्तीनामपि तत उद्भवं दर्शयति–एवं गदिरिति । यथा परात्र्यादिक्रमेण वैदिकी वाग्वृत्तिरुत्पन्ना तथा गदिर्लौकिक्यप्युत्पन्ना, किन्तु पूर्वा स्वरूपशक्त्या परा तु माययेति ज्ञेयम् । ततश्च यथा गदिस्तथा कर्मादयोपीत्यर्थः ॥ * ॥ **विश्वनाथोऽपि**–यथा मत्स्वरूपभूता वदेलक्षणा वाणी ब्रह्मशरीरादुद्भूता तथैव प्रकृतापि वाणी प्राकृतलोकशरीरादपभ्रंशरूपा संभवतीत्याह–एवं गदिर्वागिंद्रियव्यापारो भाषणम् एतदादिप्रपञ्चो मायिकी व्यक्तिरित्यर्थः ॥ १९ ॥ यतः कार्यं कारणादभिन्नं तस्माद्धेतोः । अयमिति शास्त्रेण प्रत्यक्षमेव दर्शितत्वात् , जीवयति सर्वमिति निरुक्तेः । आदौ सृष्ट्यादौ । सूक्ष्मरूपत्वादव्यक्तः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः ॥ य एष संसारतरुः पुराणः कर्मात्मकः पुष्पफले प्रसूते॥२१॥ द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः ॥ दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः॥२२॥अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः॥ हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदम् ॥ २३ ॥

वयसा कालेन विश्लिष्टा विभक्ता वागादींद्रियरूपाः शक्तयो यस्य । यद्वा विशेषेण श्लिष्टा आलिंगिता मायाशक्तिर्येन सः । बहुप्रकार इवाभाति । यतः स एवाद्यः । त्रिवृत् त्रिगुणाश्रयः । अब्जयोनिर्लोकपद्मस्य कारणभूतः । एकस्य बहुधा भाने दृष्टान्तः । योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति ॥ २० ॥ तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदं जगन्न ततः पृथगिति सदृष्टांतमाह । यस्मिन्निति । तंतुविताने संस्था स्थितिर्यस्य स पटो यथा तथा यस्मिन्निदं विश्वमोतं दीर्घतंतुषु पट इव प्रोतं तिर्यक्तंतुष्विव । एवंभूतं समष्टिव्यष्ट्यात्मकं विश्वमविद्ययाऽऽत्मन्यध्यस्तं वृक्षरूपं जीवस्य कर्तृत्वादिसंसारहेतुरतस्तद्विवेकज्ञानेन कर्मादि सर्वं त्याज्यमित्युक्तमित्याशयेनाह य एष इति सार्धैस्त्रिभिः । पुराणोऽनादिः । कर्मात्मकः प्रवृत्तिस्वभावः । पुष्पफले भोगापवर्गौ । कर्म तत्फले वा प्रसूते जनयति ॥ २१ ॥ वृक्षरूपकं प्रपंचयति । द्वे इति । द्वे पुण्यपापे अस्य बीजे । स च शतमूलः शतमपरिमिता वासना मूलानि यस्य । त्रयो गुणा नालानि प्रकांडा यस्य । पंच भूतानि स्कंधा यस्य । पंच रसाः शब्दादिविषयास्तेषां प्रसूतिर्यस्मात् । दश च एका च शाखा इंद्रियाणि यस्य । द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं यस्मिन् । त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य । द्वे सुखदुःखे फले यस्य सः । अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः । तन्निर्भिद्य गतस्य संसाराभावात् ॥ २२ ॥ तत्फलभोक्तॄनाह । गृध्यंति अभिकांक्षंत इति गृध्राः कामिनो ग्रामेचरा गृहस्था अस्य वृक्षस्यैकं फलं दुःखमदंति परिणामतः स्वर्गादेरपि दुःखरूपत्वात् । हंसा विवेकिनोऽरण्यवासाः संन्यासिन एकं फलं सुखमदंति । एकं परमात्मानं माया

पूर्वव्याख्याने भगवतः कालाधीनत्वप्रतीतेराह—यद्वेति । कालेन सह बहुरूपेण भानं कुत इति चेदाह—यत इति । त्रयो वर्ततेऽत्रेति त्रिवृत् । दृष्टान्तः स्फुटतर एव ॥ * ॥ तथैव दर्शयति—अयं हीति सार्द्धकम् । बीजानीति—व्रीजानां मध्ये यदेकमपीत्यर्थः । अत एव—यस्मिन्निति ॥ २० ॥ यतः स एव कारणं तत्तस्मादिति । अध्यस्तं रज्जूरगवत् । आदिना भोक्तृत्वादिग्रहः । यतः संसारहेतुरतो हेतोः । तद्विवेकज्ञानेन तस्य जीवस्य विवेकः कर्तृत्वादिरूपसंसाराद्विवेचनं स एव ज्ञानं तेन । आदिना तदुपायग्रहः । य एष आबालगोपालप्रसिद्धः । अपवर्गस्य नित्यत्वेन 'नित्यसिद्धो ह्ययं मोक्षः' इत्याद्युक्तेः प्रसूतेरसंभवादाह—कर्म तत्फले वेति ॥ * ॥ विशेषबोधाय जगदेव रूपकेण दर्शयति—य एष इति सार्द्धेन ॥ २१ ॥ अस्य संसारतरोः । स च संसारतरुश्च । प्रकांडाः स्थूलशाखाधाराः । "प्रकांडो विटपे शस्ते मूलस्कंधान्तरे तरोः" इति हैमः ॥ * ॥ संदर्भः—तदेवं वेदं जगच्च निरूप्य 'तस्मात्त्वमुद्धवोत्सृज्य' इति पर्यवसानं पूर्वोक्तं वेदार्थमेव समासेन दर्शयति द्वाभ्याम् ॥ २२ ॥ तत्फलभोक्तॄन्संसारतरुफलभोगकर्तॄन् । ननु "यन्न दुःखेन संभिन्नं तत्पदं स्वःपदास्पदम्" इत्युक्तेः स्वर्गाधिकारिणां गृहस्थानां कथं दुःखभोक्तृत्वमित्यत आह—परिणामत इति । भोगकालेपि स्पर्द्धासूयादिसत्त्वेन दुःखरूपमेवेति भावः । वस्तुत एकं बहुरूपं मायाकल्पितना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं गुरूपासनयैव भक्त्या विद्याकुठारेण शितेन धीरः ॥ विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रम् ॥ २४ ॥ इति श्रीमद्भा० म० एकादशस्कंधे भगवदुद्धवसंवादे सत्संगमाहात्म्यादिनिरूपणं नाम द्वादशोऽध्यायः॥१२॥श्रीभगवानुवाच॥सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः ॥ सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि ॥ १ ॥ सत्त्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः ॥ सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते ॥ २ ॥

मयमेव बहुरूपमिज्यैर्गुरुभिः कृत्वा यो वेद स वेदं वेदतत्त्वार्थं वेद ॥ २३ ॥ त्वं चैवं ज्ञात्वा कृतकृत्यः सर्वं साधनं त्यजेत्याह । एवमिति । एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण । स्वतंत्रता वा द्वयोर्ज्ञानभक्त्योः । जीवोपाधित्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्त्वा परमात्मानं च संपद्य प्राप्याथास्त्रं साधनं त्यजेति ॥२४॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां द्वादशोऽध्यायः ॥ १२ ॥ ॥ त्रयोदशेऽथ सत्त्वस्य वृद्ध्या विद्योदयक्रमः ॥ हंसेतिहासतश्चित्तगुणविश्लेषवर्णनम् ॥ १ ॥ विद्याकुठारेण जीवाशयं विवृश्च्य साधनं त्यजेत्युक्तम् । ननु तत्र तमआदिगुणत्रयवृत्तिप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह सत्त्वमिति सप्तभिः । तत्र यद्यानंदादिवदात्मधर्मा गुणाः स्युस्तर्हि तत्स्वरूपत्वात्तेषामनिवृत्त्या विद्योत्पत्तिर्न स्यान्न त्वेतदस्तीत्याह बुद्धेः प्रकृतेरेते गुणा न त्वात्मन इति। अतः सत्त्वेन सत्त्ववृद्ध्याऽन्यतमौ हन्यात् । रजस्तमोवृत्तीर्जयेदित्यर्थः । सत्त्वं च सत्यदयादिवृत्तिरूपमुपशमात्मकेन सत्त्वेनैव हन्यात् ॥१॥ ननु गुणत्रयवृत्तीनां परस्परोपमर्दनरूपत्वात्कथं सत्त्ववृत्त्यैवेतरवृत्तयो

नाकारम् । इज्यैः पूज्यैः कृत्वा तद्द्वारेण ॥ * ॥ तत्र वेदोक्तसाध्येष्वधिकारभेदमाह—अदंतीत्येकेन । तत्र संन्यासिनः खलु सुखमिति तत्फलेन ब्रह्मलोकगतानां तत्रैव ब्रह्मणा सह मोक्षं प्राप्स्यतां पाताभावात् । एक मेव स्वरूपशक्तिवैचित्र्याद्बहुरूपं चतुर्व्यूहादिलक्षणं क्वचिन्मायामयं मायाशक्त्या जगद्रूपं यो वेद । मामिति शेषः । स वेदं वेदतत्त्वार्थं वेदेति ॥ २३ ॥ एवं ज्ञात्वा एक एवेति ज्ञात्वा । साधनं कर्म विचाररूपं स्वतंत्रभावात् स्वतंत्रमन्योऽन्यापेक्षत्वम् । जीवोपाधिलिंगशरीरनाशे "जरयत्याशु या कोशं निगीर्णमनलो यथा" इति कपिलोक्तेर्या भक्तिः 'वयुनेन येन चिच्छेद संशयपदं निजजीवकोशम्' इति पृथुकोपाख्यानोक्तेश्च भक्तिज्ञा नयोर्द्वयोरेव स्वतंत्रत्वेन श्रवणादित्यर्थः । विवृश्च्य बाधयित्वा । अस्त्रं भक्तिज्ञानरूपम् । कृतकृत्यस्य साधनैः प्रयोजनाभावात् 'स्वराडिव निपानखनित्रमिंद्रः' इति न्यायेनेति भावः ॥ * ॥ तदेवं वेदार्थं प्रदर्श्य 'तस्मात्त्वमुद्धवोत्सृज्य' इत्यादिवाक्यैकार्थेन निगमयति—एवमिति । एवं पूर्वोक्तप्रकारेण मद्रूपस्य सद्वृंदाश्रयस्य गुरूपासनया जातेन विद्याकुठारेण शुद्धजीवात्मज्ञानस्वरूपेण परशुना जीवाशयं भयमयसंतारतरुरूपं मद्व्यवधायकं विवृश्च्य गुरूपासनयैव जातया प्रेमलक्षणयैकांतभक्त्यात्मानं सर्वाश्रयस्वरूपं मां संपद्य साक्षात्कृत्याथानंतरमेवास्त्रं तद्रूपत्वेन कृतरूपकं विद्याकुठारं त्यजेति मया सर्ववाक्यानां त्वमेव लक्ष्यीक्रियसे यथा गीताशास्त्रे पूर्वमर्जुन इत्यतः स्वानिष्टं नाशंकनीयमिति भावः । तस्य तद्वृश्चनमात्रप्रयोजनत्वात्त्यागो युक्तः, भक्तेस्तु दृष्टेरेव सदा तत्तत्साक्षात्कारहेतुत्वान्न युक्त इति भावः । वक्ष्यते च—"संछिद्य हार्दमनुमानसदु क्तितीक्ष्णज्ञानासिना भजत माऽखिलसंशयाधिम्" इति ॥ २४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ चित्तस्य गुणानां विषयाणां चान्योन्यविश्लेषस्य वर्णनम् (१) । विद्योत्पत्तावाक्षिपति—नन्विति । तत्र विद्योत्पत्तौ । तन्निवृत्त्या गुणप्रतिबंधनिवृत्त्या । प्रतिबंधकत्वं च सामग्रीसमकालीनकार्यानुत्पादप्रयोजकत्वम् । यथा—सत्यप्यग्नौ दाहानुत्पाद इति । तत्र भवदाक्षेपे । तत्स्व रूपत्वादात्मस्वरूपत्वात् । तेषां गुणानाम् । एतदात्मस्वरूपत्वं गुणानाम् । यतो बुद्धेरतो हेतोः । इत्यर्थ इति—प्रबलेन निर्बलजयः संपद्यत एवेति भावः । शांतस्वभावत्वेन स्थितिरेव सत्त्वजयः स एव तद्धननमि त्यर्थः ॥ * ॥ पूर्वोक्ताध्यायार्थेन निर्वाह्यनिर्वाहकसंगतिमवतारयति—पूर्वोक्तसत्संगलब्धो मद्भक्तिलक्षणो धर्मो वृद्धिं प्राप्तात्सत्त्वाद्भवेत् मालाकारेणोप्तं चंपकबीजविशेषं क्षीरसेकेन जातवीर्यो भवेद्यथेत्यर्थः ॥ १ ॥ पुनराशङ्कते—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मो रजस्तमो हन्यात्सत्त्ववृद्धिरनुत्तमः ॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते ॥ २ ॥ आगमोऽपः प्रजा देशः कालः कर्म च जन्म च ॥ ध्यानं मंत्रोऽथ संस्कारो दशैते गुणहेतवः ॥ ४ ॥ तत्तत्सात्त्विकमेवैषां यद्यद् वृद्धाः प्रचक्षते ॥ निंदंति तामसं यत्तद्राजसं तदुपेक्षितम् ॥ ५ ॥ सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ॥ ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनम् ॥ ६ ॥

नियमेन हंतव्यास्तत्राह । सत्त्वादिति । मद्भक्तिं लक्षयति यो धर्मः स मद्भक्तिरूप एव वा । सत्त्वमेव कथं वर्धेत तत्राह । सात्त्विकानां पदार्थानामुपासया सेवया सत्त्वं वृद्धं भवतीत्यर्थः ॥ २ ॥ स च धर्मो रजस्तमश्च हन्यात् । कुतः । न विद्यते उत्तमो यस्मात्स सर्वोत्तमः । यतः सत्त्ववृद्धिः सत्त्वस्य वृद्धिर्यस्मिन्कारणे सः अत एव तत्कार्यो धर्मे प्रतिबंधोऽपि नास्तीत्याह । तस्मिन्नुभयस्मिन्हते तन्मूलः ते रजस्तमसी रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः ॥ ३ ॥ सात्त्विकोपासनया सत्त्वं वर्धत इत्युक्तं तानेव सत्त्ववृद्धिहेतून् दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह । आगमः शास्त्रम् । अपः आपः । क्वचिदागमोऽर्थ इति पाठः ॥ ४ ॥ एषु सात्त्विकादिनिर्णयमाह । एषामेव मध्ये यद्यद्वृद्धाः शास्त्रज्ञाः प्रचक्षते प्रशंसंति तत्तत्सात्त्विकम् । यच्च निंदंति तत्तामसम् । यत्तु तैर्वृद्धैरुपेक्षितं न स्तुतं न च निंदितं तद्राजसम् ॥ ५ ॥ सात्त्विकान्येवेति । निवृत्ति शास्त्राण्येव सेवेत न प्रवृत्तिपाखंडशास्त्राणि राजसतामसानि । तीर्थाप एव न गंधोदकसुरायाः । प्रजा जनाः । निवृत्तान् जनान्न प्रवृत्तदुराचारान् । विविक्तदेशं न रथ्याद्यूतदेशान् । कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादीन् । कर्म च नित्यं न काम्याभिचारादीनि । जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तक्षुद्रदीक्षारूपम् । ध्यानं श्रीविष्णोर्न कामिनीविद्विषाम् । मंत्रं प्रणवादिकं न काम्यक्षुद्रान् । संस्कारमात्मनः शोधकं न तु केवलं देहगृहादीनाम् । ननु ज्ञानं महावाक्यश्रवणादेवोत्पद्यते किं तत्र

नन्विति । 'धर्मिकल्पनातो धर्मकल्पनमेव वरम्' इति न्यायमाश्रित्याह—भक्तिरूप एव वेति । सत्त्ववृद्धिं पृच्छति—सत्त्वमेवेति । तत्राक्षेपे । इत्यर्थ इति—सात्त्विकोपासनमेव सत्त्ववृद्धिहेतुरिति भावः ॥ * ॥ सत्त्वस्येतरगुणपराभावकत्वे बलमाह—मद्भक्तिः गुणभूतलक्षणं चिह्नं यत्र सः । यद्वा—मद्भक्त्यैव लक्षणं यस्य सः । तां विना तु विगीत एव धर्म इति भावः । 'धर्मः सत्यगुणोपेतः' इत्यारभ्य "मद्भक्त्यपेतमात्मानं न सम्यक्प्रपुनाति हि" इत्युक्तेः ॥ २ ॥ स च भक्तिलक्षणः । रजस्तमोहनने हेतुं पृच्छति—कुत इति । अत एव सर्वोत्तमत्वादेव । तत्कार्यो रजस्तमःकार्यः । उभयस्मिन्रजस्तमोद्वये ॥ * ॥ ० ॥ ॥ ३ ॥ उपोद्घातत्वेनान्यदप्याह—सात्त्विक इत्यादिना । अर्थो द्रव्यं गंगांभआदीत्यर्थः । पाठांतरे आगमः शास्त्रम्, अपो जलानि, प्रजा पुत्रादिः, देशो वाराणस्यादिः, कालो वसंतादिः, कर्म वर्णाश्रमादिविहितादि, जन्मोभयकुलविशुद्धादि, ध्यानं देवादिविषयम्, मंत्रो गायत्र्यादिः, संस्कारो गर्भाधानादिः, एते आगमादयो दशसंख्याकाः ॥ * ॥ ० ॥ ४ ॥ एष्वागमादिषु । वृद्धा ज्ञानवृद्धाः शास्त्रनिपुणाः प्रशंसन्ति साध्वेतदिति वदन्ति ॥ * ॥ वृद्धा व्यासादयः ॥ ५ ॥ निवृत्तिशास्त्राणि भक्तिज्ञानपराणि सत्पुराणवेदांतलक्षणानि, प्रवृत्तिपाखंडपराणि प्रवृत्तिपराणि, राजसानि पूर्वमीमांसादीनि, पाखंडपराणि बौद्धशास्त्राणि तामसानि । तीर्थापःश्रीगंगोदकविष्णुतीर्थरूपाणि सात्त्विकानि, गंधोदकादीनि राजसानि, सुरापीतशेषादीनि तामसानि । निवृत्तान् हरिभक्तिविचारनिष्ठान्सात्त्विकान्, प्रवृत्तिपरा राजसाः, दुराचारा मद्यमांसादिसेवनास्तामसाः । विविक्तः सात्त्विको देशः, रथ्यापणादिस्तु राजसः, द्यूतपानादिदेशस्तामसः । ब्राह्ममुहूर्तो रात्रेरष्टमभागः सात्त्विकः,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेणुसंवर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनम् ॥ एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ॥ ७ ॥ उद्धव उवाच ॥ वदंति मर्त्याः प्रायेण विषयान्पद मापदाम् ॥ तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ॥ ८ ॥ श्रीभगवानुवाच ॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि ॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः ॥ ९ ॥

सत्त्ववृद्ध्या धर्मेण वाऽत आह । यावत्स्मृतिरात्मापारोक्ष्यम् । यावच्च देहद्वयतत्कारणभूतगुणापोहस्तावत्पर्यंतं ज्ञानं भवतीत्यर्थः । अन्यथा तु नैतादृशम् ॥ ६ ॥ ननु गुणव्यतिकराज्जातो देहः कथं स्वाश्रयभूतान् गुणान्स्वत एवोत्पन्नया विद्ययाऽपोह्य स्वयमप्युपरमेत्तत्राह । वेणूनां संघर्षाज्जातोऽग्निर्यथा स्वत एवोत्पन्नाभिर्ज्वालाभिस्तद्वनं सर्वं दग्ध्वा पश्चात्स्वयं शाम्यति। एवं देहोऽपि तत्क्रियस्तस्याग्नेरिव क्रिया व्यापारो यस्य सः ॥७॥ ननु नियतेंद्रियतया सात्त्विकसेवायामियानस्ति पुरुषार्थस्तथाऽपि राजसादीन्विषयान्दुःखमिति जानंतोऽपि कथं सेवंत इति पृच्छति । विदंतीति । पदं स्थानम् । श्वानो यथा भर्त्स्यमाना अपि । खरा यथा पद्भ्यां ताड्यमाना अपि खरीमनुधावंतः । अजा यथा निर्लज्जा हंतुमानीता अपि तद्वत् ॥ ८ ॥ मिथ्याऽभिनिवेशेन भुंजत इति सहेतुकमाह । अहमिति त्रिभिः । प्रमत्तस्य विवेकशून्यस्य देहादावह

ध्यानादावित्यादिना पूजनजपादिग्रहः । प्रदोषो राजसस्तदा ध्यानादिकं लोकरंजनार्थं प्रायो भवतीति राजसत्त्वम्, निशीथोर्धरात्ररूपस्तु तामस एव, निद्रानिरोधादिना प्रायस्तदा बुद्धेरस्थिरत्वादिति । नित्यं कर्म सात्त्विकं सत्त्वशुद्धिहेतुत्वात्, काम्यं पुत्रेष्ट्यादिराजसम्, अभिचारादि तामसं नरकहेतुत्वात् । आदिना निषिद्धग्रहः । वैष्णवशैवदीक्षारूपं सात्त्विकं जन्म, शाक्तं तु राजसम्, क्षुद्रा भूतप्रेतादयस्तद्दीक्षा तु तामस्येव परमार्थविघातकत्वात् । श्रीहरिध्यानं सात्त्विकम्, कामिन्यादिध्यानं राजसम्, विद्विड्ध्यानं तु तन्मरणाद्यनिष्टचिंतनात्तामसम् । प्रणवादिमंत्रः सात्त्विकः, काम्यमंत्रस्तु राजसः । क्षुद्रमंत्रा भूतप्रेतादिमंत्रास्तामसास्तन्निष्ठानम् 'भूतानि यांति भूतेज्याः' इत्यनिष्टश्रवणात् । आत्मनश्चेतसः शोधकः संसारः सात्त्विकः, देहगेहादिशोधको राजसः । आदिना वस्त्रादिग्रहः । तामसस्तु—मांसादिशोधनरूपो नरकहेतुत्वादिति दिक् । केवलपदेन श्रीकृष्णसेवार्थं देहगेहादीनां संस्कारः कर्तव्य एवेत्यर्थः । अत्राक्षिपति—नन्विति । महावाक्यानि "तत्त्वमसि" इत्यादीनि तेषां श्रवणात् । तत्र ज्ञाने किं प्रयोजनमित्यर्थः । आत्मापारोक्ष्यमात्मसाक्षात्कारः । देहद्वयं स्थूलसूक्ष्मरूपं तत्कारणभूता गुणा रजआदयस्तेषामपोहो नाशः । इत्यर्थ इति—यावत्पर्यंतमात्मसाक्षात्कारो न जायते, यावच्च गुणापोहो न भवति तावत्पर्यंतं सात्त्विकसेवाधर्माचरणञ्च कर्तव्यमेव, साध्यसिद्धिमंतरा साधनत्यागायोगादिति भावः ॥ * ॥ तावत्पर्यंतमिति शास्त्रादैक्यज्ञानं परोक्षज्ञानमेव स्यान्न त्वपरोक्षम् । आत्मापारोक्ष्यं तु सात्त्विकपदार्थसेवाजनितभक्तिलक्षणधर्मादेव । "प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत्" इत्यादेः ॥ ६ ॥ पुनराशङ्कते—नन्विति । तत्राक्षेपे । देहो जिज्ञासुदेहः । उपलक्षणं चैतद्बोधादेः । बोधादिश्च तत्क्रियः स्वोत्पादकवेणुदाहवद्गुणान्संदह्य शाम्यतीत्यर्थः ॥ * ॥ ० ॥७॥ भवतु सात्त्विकसेवनं पुरुषार्थहेतुत्वात् । आदिना तामसग्रहः । तद्वत् खरादिवत् ॥ * ॥ यद्यपि विदंति तथापि श्वादयो ये न विदंति तद्वत् कथं भुंजते । प्रायेणेति—श्वादिभिर्निर्विशेषास्तावद्भुंजतामित्यर्थः । विषयांस्त्र्यादीन् । आपदां भाविदुःखानां पदमव्यभिचारिस्थानम् 'दुःखोदर्काणि संपश्यन्' इति वक्ष्यमाणात् । अत्र श्वा मैथुनांते शुन्यां बंधं न जानाति, खरो रजकदर्शिततृणमुष्टिभोगांते महाभारवहनम् । अजा नानाभोजनाद्यंते शिरश्छेदं न जानंतीति तथा दृष्टांतितम् । यद्वा—श्वा भर्त्स्यमानोऽप्युच्छिष्टग्रासं ग्रसत्येवेति ॥ ८ ॥ वस्तुतत्त्वज्ञानाभावात्तेषां भोग इत्याह—मिथ्येत्यादि । इत्यर्थ इति—देहाद्यहंबुद्ध्या सात्त्विकमनो राजसत्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ॥ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः ॥ १० ॥ करोति कामवशगः कर्माण्यविजितेंद्रियः ॥ दुःखोदर्काणि संपश्यन्रजोवेगविमोहितः ॥ ११ ॥ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः ॥ अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते ॥ १२ ॥ अप्रमत्तोऽनुयुंजीत मनो मय्यर्पयञ्छनैः ॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः॥१३॥एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः॥सर्वतो मन आकृष्य मय्यद्धाऽवेश्यते यथा॥१४॥उद्धव उवाच ॥ यदा त्वं सनकादिभ्यो येन रूपेण केशव ॥ योगमादिष्टवानेतद्रूपमिच्छामि वेदितुम्॥१५॥

मिति मिथ्याबुद्धिर्हृदि यथावदुत्सर्पति ततोऽहंबुद्धेश्च वैकारिकं सत्त्वप्रधानमपि मनः प्रति घोरं दुःखात्मकं रज उत्सर्पति । मनो व्याप्नोतीत्यर्थः ॥ ९ ॥ इदमेवमिदमेवं भोग्यमिति सविकल्पः संकल्पः स्यात्ततश्च अहो रूपमहो भाव इति गुणाभिध्यानाद्दुर्धरः कामः स्यात् ॥ १० ॥ ततो विषयान् भोक्तुं कर्माणि करोति दुःखैकफलानि संपश्यञ्जानन्नपि ॥ ११ ॥ एवं चेन्न कस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह । यदपि यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान्विवेकी पुनर्मनो निरुंधन्न सज्जते ॥ १२ ॥ विषयदोषदृष्ट्याऽपि मनोनिरोधाशक्तौ सुखं तन्निरोधोपायमाह । अप्रमत्त इति । अनिर्विण्णोऽनलसः । यथाकालं त्रिषवणम् । मयि परमानंदरूपेऽर्पयन्स मादध्यात् ॥ १३ ॥ विषयैः संग्रथितस्य मनसस्तद्वियोगेनेश्वरनिष्ठत्वमसंभावितं मन्यमानं प्रति तन्निरूपणायेतिहासमुपक्षिपति । एतावानिति । यथा यथावन्मय्यावेश्यते एतावानित्यर्थः॥ १४ ॥मच्छिष्यैरित्युक्ते तेषामतिज्यायसामनेन रूपेण निरूपणासंभवात्पृच्छति । यदेति । तं कालं तदेतद्रूपं च वेदितुमिच्छामि तदेतत्कथयेति॥ १५॥

मेतीति भावः ॥ * ॥ प्रमत्तस्य पूर्वकर्मविशेषेण लुप्तविवेकस्य देहादावहमित्यन्यथाबुद्धिर्यथोत्सर्पति अतिशेते तथारजोप्युत्सर्पति ततो हेतोर्वैकारिकं सात्त्विकमपि मन उत्सर्पति दुर्वशं भवति ॥ * ॥ **दीपिका**—मिथ्याभिनिवेशो नाम ज्ञात्वापि स्वीकृतस्य पुनस्त्यागासहिष्णुत्वम् । सहेतुकं सयुक्तिकम् । युक्तिश्चेयं—विषयाणां दुःखरूपत्वज्ञानेऽपि मनुष्या देहादौ यथावन्मिथ्याज्ञानवंतो यथावद्विवेकशून्यत्वात् पश्वादिवदिति ज्ञेयम् ॥ ९ ॥ काम इच्छा । दुर्धरो वोढुमशक्यः ॥ * ॥ गुणाधानाच्छ्रेष्ठत्वारोपात् । दुर्धरोऽसह्यः ॥ १० ॥ ततो दुर्द्धरत्वादेव दुःखमुदर्क उत्तरफलं येषां तानि पश्यन्कथं करोतीति चेत्तत्राह—रजोवेगेति ॥ * ॥ दुःखोदर्काणि दुःखोत्तरफलानि ॥ ११ ॥ एवं चेद्रजोवेगेन विमोहिते सति कर्मत्यागाभावान्न कस्यापि दुःखनिवृत्तिः संसारनिवृत्तिः, तथा च मोक्षशास्त्रं मुधा स्यादिति चेदज्ञस्यैव रजोवेगकृतं दुःखं न तत्त्वज्ञस्येत्याह—अतंद्रितः सावधानः । पुनरिति वीप्सार्थे, पुनःपुनर्दोषदृष्टिर्विषयेण सज्जते । शरीरयात्रार्थं विषयान्सेवमानोऽपि तैर्न बध्यत इति भावः ॥ * ॥ एवं चेदिति—चेद्यदि दुःखोदर्कत्वज्ञानेऽपि कर्मकरणं तर्हि विरक्त्यभावान्न कस्यापि दुःखनिवृत्तिः स्यादित्यर्थः ॥ १२ ॥ तन्निरोधोपायं मनोनिरोधोपायम् । युंजीत समादध्यात् निरुंध्यात् । यद्वा—मामित्यध्याहृत्य युंजीत ध्यायेत् "योगः सन्नहनोपायध्यानसंगतियुक्तिषु" इति यादवः । अनिर्विण्णः प्रयासवैफल्ये निर्वेदरहितो वा ॥ * ॥ सुखं मयि मनोर्पणे नानायासं यथा स्यात्तथा तन्निरोधोपायम् । मनोनिरोधसाधनं स्वस्मिन्परमसुंदरे तद्धारणमिति ॥ * ॥ **दीपिका**—अतंद्रित इत्यस्यार्थमाचष्टे—अप्रमत्त इति । कुत्र मनो युंजन्नित्यत आह—मयीति । अनिर्विण्ण इति—यदपि मनोनिरोधो न स्यात्तदपि तत्प्रयत्नान्न विरमेदिति भावः ॥ १३ ॥ तद्वियोगेन विषयवियोगेन । इत्यर्थ इति—चित्तवृत्तिनिरोधस्यैव योगत्वादिति भावः ॥ * ॥ तद्वियोगेन विषयविच्छेदेन । असंभावितमघटितम् । तन्निरूपणाय ईश्वरनिष्ठत्वोपपादनाय । उपक्षिपति आरभते । अद्धा साक्षादिति वैराजधारणा व्यावृत्तेति ॥ १४ ॥ लोकोपकाराय मेरुशृंगोपरिस्थितौ पधोपदेशवत्सनकाद्यादिष्टयोगोपदेशनमत्यश्रद्धेयमिति भावेन स्वाम्याह—मच्छिष्यैरित्यादिना ॥ * ॥ अतिज्यायसामतिवृद्धानाम् । अनेन कृष्णाख्येन । त्वं नित्यनराकृतिपरब्रह्मरूपः सर्वावतारी । यदा येन रूपेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ॥ पप्रच्छुः पितरं सूक्ष्मां योगस्यैकांतिकीं गतिम् ॥ १६ ॥ सनकादय ऊचुः ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो ॥ कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षोः ॥ १७ ॥ श्रीभगवानुवाच ॥ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ॥ ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः ॥ १८ ॥ स मामचिंतयद्देवः प्रश्नपारतितीर्षया ॥ तस्याहं हंसरूपेण सकाशमगमं तदा ॥ १९ ॥ दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवंदनम् ॥ ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति ॥ २० ॥ इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहं तेभ्यस्तदुद्धव निबोध मे ॥ २१ ॥ वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः ॥ कथं घटेत वो विप्रा वक्तुर्वा मे क आश्रयः ॥ २२ ॥

मानसाः पुत्राः । सूक्ष्मां दुर्ज्ञेयाम् । ऐकांतिकीं गतिं परां काष्ठाम् ॥ १६ ॥ तदेवाह । गुणेष्विति । विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति ते चानुभूता विषया वासनारूपेण चेतसि प्रविशंति । अतितितीर्षोर्विषयानतिक्रमितुमिच्छोः ॥ १७ ॥ एवमिति । महान्देवोऽपि स्वयंभूरपि भूतानां स्रष्टाऽपि ध्यायमानो विचारयन्नपि प्रश्नस्य बीजं यदज्ञानादयं प्रश्नस्तन्नाविंदत् । यतः कर्मविक्षिप्तधीः ॥ १८ ॥ प्रश्नस्य पारमुत्तरमभिप्रायो वा तस्य तितीर्षया जिज्ञासया हंसरूपेणेति । यथा हंसो नीरं क्षीरं च पृथक्कर्तुं शक्त एवमहं गुणांश्चेतश्चेति द्योतयितुं हंसरूपेण गतोऽस्मीति ॥ १९ ॥ २० ॥ इत्यहं मुनिभिः पृष्ट इति पृथग्वाक्यम् । यदवोचमिति च पृथक् । अतोऽस्मच्छब्दावृत्तिरदोषः । तेभ्यो यदवोचं तन्मे वचनं निबोध ॥ २१ ॥ देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात्स्वयमेव विषयचेतसोर्विश्लेषो भवतीति

तं कालं तद्रूपं च ज्ञातुमिच्छामि ॥ १९ ॥ विश्वासायेतिहासमाह—योगस्य सर्वत आकृष्टचित्तस्य भगवति निवेशलक्षणस्य ॥ * ॥ ० ॥ १६ ॥ तदेव प्रश्नवाक्यम् । अन्योन्यसंत्यागः विषयेभ्यश्चेतसः आकर्षणं चेतसो विषयाणामाकर्षणं पृथक्करणं कथमित्यर्थः । तदुच्यतामिति शेषः ॥ * ॥ **दीपिका**—तदेवैकांतिकगतेः प्रश्नकरणमेव । स्वभावतः स्वरसत एव । रागादिवशादिति—अनुकूलेषु रागः प्रीतिः । आदिना प्रतिकूलेषु द्वेषस्तद्वशात् । वासनारूपेण संस्काररूपेण ॥ १७ ॥ चतुर्भिरपिभिः प्रश्नस्यातिगहनत्वमाह स्वामी । यदज्ञानाद्यस्यात्मनोऽज्ञानात् । अयं चेतोविषयविश्लेषरूपः । कुतो नाविंददिति चेदाह—यत इति । “ कर्मावेशितचित्तानां ब्रह्मावेशः सुदूरतः । वारुणीदिग्गतं वस्तु व्रजन्नैंद्रीं किमाप्नुयात् ॥ ” इति मैत्रेयोक्तेः । यद्वा—प्रश्नो बीजं हेतुर्यस्य तमुत्तरमित्यर्थः ॥ * ॥ यदज्ञानात् यस्यात्मस्वरूपस्याज्ञानात् । अयमन्योन्यत्यागरूपप्रश्नः । तत् आत्मस्वरूपम् । इति **दीपिका** * **संदर्भस्तु**—एवमिति—“ यावानहं यथाभावो यद्रूपगुणकर्मकः । तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥ ” इति । “एतन्मतं समातिष्ठ परमेण समाधिना । भवान्कल्पविकल्पेषु न विमुह्यति कुत्रचित् ॥ ” इति । “ ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः ” इति लब्धभगवद्वरत्वेपि ‘ न भारती मेंग मृषोपलक्ष्यते ’ इत्यादिना व्यंजिततादृशस्वानुभवत्वेपि ‘योंतर्हितः ’ इत्यादौ ‘ पित्रानुवर्णितरहः ’ इति श्रीभगवन्तं प्रति सनकादीनां वाक्येऽपि च ब्रह्मणः कर्माधीनत्वं संप्रति स्वमहिमव्यंजनाय भगवदिच्छयैव ज्ञेयम् । हंसोपनिषदि वाद्यादिस्तंभेनेतिहासवत् ॥ १८ ॥ पूरणं पारः “ पारं परतटे क्लीबमुत्तराशययोर्द्वयोः ” इति निरुक्तिः । हंसरूपेणागमनेभिप्रायमाह—यथेति । स ब्रह्मा । तस्य ब्रह्मणः । सकाशं समीपम् । तदा चिंतनावसरे ॥ * ॥ ० ॥ १९ ॥ ते सनकादयः ॥ * ॥ ० ॥ २० ॥ ० ॥ * ॥ कृतपादाभिवंदनान्नाज्ञानजोऽयं प्रश्नः किंतु प्रश्नेनैव हंसाभिप्रायज्ञानेन पूर्वप्रश्नोद्धारणार्थः । अत एवाह—तत्त्वजिज्ञासुभिरिति ॥ २१ ॥ तन्निष्ठस्यात्मज्ञाननिष्ठस्य । विषयप्रवृत्तिहेतो रागादेः । आदिना संकल्पादिग्रहः । तदुपाधेरात्मोपाधेः । भूतसंघस्य देहस्य । परमार्थरूपस्य सन्यस्यात्मनः । अविशेषे विशेषातीते, एकस्मिन्नित्यर्थः । इत्यर्थ इति—नियोक्तृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचात्मकेषु भूतेषु समानेषु च वस्तुतः ॥ को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः ॥ २३ ॥ मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपींद्रियैः ॥ अह मेव न मत्तोऽन्यदिति बुध्यध्वमंजसा ॥ २४ ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः ॥ २५ ॥

वक्तुं प्रश्नखंडनमिषेणैव तावदात्मानात्मविवेकमाह वस्तुन इति त्रिभिः । किमात्मनोऽयं प्रश्नस्तदुपाधेर्भूतसंघातस्य वा । यद्यात्मनस्तर्हि तस्य वस्तुतः परमार्थरूपस्य नानात्वे सति हे विप्रा वो युष्माभिः कृतः प्रश्न ईदृशो बहुषु निर्धारणरूपः कथं घटेत । वक्तुरुत्तरदातुर्वा मे मम क आश्रयः । अविशेषे आत्मनि कं जातिगुणादिविशेषमाश्रित्योत्तरं वक्ष्यामीत्यर्थः ॥ २२ ॥ भूतसंघविषयत्वेऽप्ययं वः प्रश्नो वाचारंभो वाङ्मात्रेणारब्धः । यतोऽनर्थकः । कुतः । भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेष्वतः समानेष्वभिन्नेषु । पुनश्च वस्तुतः परमकारणात्मना अभिन्नेषु "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतेः ॥ २३ ॥ तत्र पंचात्मकत्वं प्रत्यक्षादिसिद्धमेवेति परमकारणाभेदमेवोपपादयति । मनसेति । मनआदिभिर्यद्यद्गृह्यते तत्तदहमेवेत्यर्थः । अंजसा तत्त्वविचारेण । एतेनैव सर्वात्मकोऽहमित्यंजसाऽप्युत्तरमुक्तं भवति ॥ २४ ॥ एवं प्रश्नखंडनमिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोपि दुष्परिहरं यत्पृष्टं तत्रोत्तरमाह गुणेष्वित्यादिना यावदध्यायसमाप्ति । अयमभिप्रायः । यदि

प्रतिवक्त्रोरैक्ये प्रश्नोत्तरद्वयमेव न संभवतीति भावः । आत्मनो नानात्वस्वीकारेपि अनेकस्मिन्बहुत्वसंख्याविशिष्टे वस्तुन्येकत्वसंख्याविशिष्टत्वेन प्रष्टुं प्रतिवक्तुश्चानुपपन्नत्वादिति भावः ॥ * ॥ किं मां जीवं ज्ञात्वायं को भवानिति प्रश्नः क्रियते भौतिकदेहं ज्ञात्वा वा किंवेश्वरं ज्ञात्वेति विकल्प्य जीवपक्षं दूषयति—आत्मनो जीवरूपस्य वस्तुनो यद्यनानात्वं सर्वस्यापि तस्य चिदेकरूपतया विशेषांशनिर्देशायोग्यत्वं तर्हीदृशः प्रश्नः कथं घटेत । यदीति निश्चये । तस्माद्विप्रा वो युष्माकं प्रष्टॄणां वक्तुर्वा मम क आश्रयः । युष्माभिः किं जात्यादिविशेषमाश्रित्य क इति प्रयुक्तं मया चोत्तरयितव्यमित्यर्थः ॥ २२ ॥ भूतसंघविषयत्वेपि देहविषयत्वेपि । आदिना पितृगंधर्वासुरादिग्रहः । अतः पंचभूतात्मकत्वात् । वस्तुत इति पदं परब्रह्मपरम् । वाङ्मात्रेणारब्धस्यासत्यत्वे प्रमाणमाह—"वाचारंभणम्" इत्यादिः ॥ * ॥ **संदर्भः**—देहपक्षं दूषयति—पञ्चेति । वस्तुतो वस्तुविचारे सति देहस्थानां भूतानां पंचात्मकत्वात्को भवानित्येकत्वेन प्रश्नो नार्थवान् न घटते तस्मात्के यूयं पञ्चेत्युच्यतामिति भावः । यदि च देहरूपाणां तेषां मिलितत्वेनैकत्वं मन्यध्वे तथाप्यात्मवत्समानत्वात्प्रश्नोयं नार्थवान् । ननु विदुषामपि प्रश्नोत्तरेष्वेवमेव व्यवहारो दृश्यते यतो भवतापि विप्रा इति व इति चोक्तमित्याशंक्याह—वाचारंभ इति । मम त्वयं व्यवहारो ह्यनर्थक एव मया तु वाङ्मात्रेणारभ्यते युष्मद्वचनानुवादरीत्या युष्मत्प्रश्नवदघटमानत्वादनर्थकमेव प्रत्युक्तमित्यर्थः । तथैवास्माभिरपीति चेद्ब्रूध्वे तर्हि यूयमज्ञानिन एव कथं तत्त्वं जिज्ञासध्वे किमत्र न लज्जध्व इति भावः, भवद्भिश्च मद्विधवदिति चेद् ज्ञातमेव तं किं पृच्छतेति भावो वा ॥ २३ ॥ तत्र तयोः पंचात्मकत्वपरमकारणाभिन्नत्वयोर्मध्ये । इत्यर्थ इति—"सर्वं खल्विदं ब्रह्म" "ब्रह्मैवेदं सर्वम्" इत्यादिश्रुतेः, 'इदं हि विश्वं भगवानिवेतरः' इत्याद्युक्तेश्चेति भावः । एतेन सर्वेन्द्रियग्राह्यवस्तुनः स्वाभिन्नत्वकथनेन ॥ * ॥ ईश्वरपक्षं दूषयति—मनसेति । परमेश्वरस्य मे सजातीयभेदो नास्ति परमेश्वरांतराभावात् । मनआदिभिर्यद्गृह्यते तदहमेव न त्वन्यत् मच्छक्तिकार्यत्वादिति विजातीयभेदोऽपि नास्त्यतः को भवानिति प्रश्नो न घटत इति भावः । ग्राह्यस्याधिष्ठानमंतरा प्रतीत्यनुपपत्तेः । कल्पितस्याधिष्ठानाभेद एव प्रसिद्धः ॥ २४ ॥ एवमुक्तरीत्या । सामान्यतः सर्वात्मकोऽहमित्येवंरूपेण । दुष्परिहरम् अज्ञातोत्तरम् । तत्र प्रश्ने । अत्राशयं विशदयति—अयमभिप्राय इति । ततस्तदा । तद्वियोगो विषयचित्तवियोगः । तस्य तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥ २६ ॥
जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥ २७ ॥

कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुद्ध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेच्चत्तस्तद्वियोगो न घटेत तस्य तु स्वरूपमहं ब्रह्मैव । चित्ताध्यासेन तु तत्स्वभावतया विषयैः संग्रथितम् । अतः स्वस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो निर्विद्य भगवंतं भजतो भवत्येव परिपूर्णस्वरूपावस्थानमिति । हे प्रजाः पुत्रकाः । सत्यं गुणेषु चेत आविशति गुणाश्च चेतसि एवं गुणाश्चेतश्चोभयं ग्रथितं मदात्मनो ब्रह्मरूपस्य जीवस्य देहोऽध्यस्त उपाधिर्न तु स्वरूपम् ॥ २५ ॥ तस्मादभीक्ष्णं पुनःपुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं ते च पुनर्वासनारूपेण चित्ते प्रकर्षेण भवंति संतीति तथा ते गुणाश्चेतश्च एवं यदुभयं तन्मद्रूपः संस्त्यजेत ॥ २६ ॥ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थत्वरूपता तत्राह । जाग्रज्जागरः स्वप्नः सुषुप्तं चेति बुद्धेरेता वृत्तयो न तु जीवस्य ताश्च न स्वाभाविक्यः । किंतु । "सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततम् ॥" इति वक्ष्यमाणक्रमेण गुणत एव । जीवस्तु विलक्षणस्तदवस्थारहित एव विनिश्चितः ।

जीवस्य तु स्वरूपं वस्तुतः "तत्त्वमसि" इत्यादिवाक्यैरहं वासुदेवस्वरूपो ब्रह्मैव । तत्स्वभावतया चित्तस्य विषयचिंतनस्वभावतया । यतो जीवो मत्स्वरूपं ब्रह्मैव अतो हेतोः । ब्रह्मत्वभावनया ब्रह्मैवाहं न संसारीति चिंतनेन । मिथ्यावस्तुचिन्तनाच्चिंतकोपि मिथ्या भवतीत्यतस्तच्चिन्तनं परित्यज्य । सत्यमित्यर्द्धांगीकारेऽव्ययम् । देहशब्द उपाधिपरः, उपाधिश्चाध्यस्त एव न स्वरूपतस्तत्त्यागो भवत्येवेत्यर्थः ॥ * ॥ नन्वेवं सति गुणाश्चेतश्च मिथः प्रसज्यैव स्थितानि भवंत्यपि प्रसज्जंति किमुत जीव इत्यस्माकं द्विगुणीभूयैव प्रश्नो जात इत्याशंक्य जीवे तेषामस्वाविकसंबन्धं कथयन्स्वस्मिंश्च तत्कैमुत्यं दर्शयति—गुणेष्विति । गुणेष्वित्यादिकं सत्यमेव किंतु जीवस्य तदुभयमपि देह उपाधिमात्रेणैव जीवे संबद्धमित्यर्थः । यतो मदात्मनः । अहमेवात्मा परमांशिरूपो यस्य तस्य मदंशस्य मयि तु तत्संबन्धः सुतरामेव नास्तीत्यर्थः । अयं भावः—यथा सूर्यांशानां रश्मीनां सूर्यकार्यभूतेन मेघेन स्वाभाविकसबन्धो नास्ति सूर्यस्य तु दूरत एव तद्वार्ता, तथा जीवानां मम च संबंध इति **दीपिका** ॥ * ॥ चित्ताध्यासेन चित्तमेवाहमित्यभिमानेन तत्स्वभावतया चित्तस्वभावत्वात् चित्तस्य संग्रथितत्वे जीवस्वरूपमपि संग्रथितमित्येवार्थः । अतो जीवस्य ब्रह्मस्वरूपत्वात् ॥ २५ ॥ यतो न स्वरूपं तस्मादित्यर्थः । तथाहि—गुणाश्च न संतः किन्तु चित्तप्रभवाः स्वाप्नवदविद्याकल्पितास्तदधिष्ठानमद्रूपः सन्नुभयं त्यजेन्मिथ्यात्वदृष्ट्या बाधयेदित्यर्थः ॥ * ॥ तस्मादध्यस्तोपाधित्वात् । जीवस्तु स्वशक्त्या तान्वियोजयितुं न शक्नोति किंतु मदभेदोपासनादिलब्धमच्छक्त्यंशेनैवेत्याह—गुणेषु चेति । मद्रूपो मदभेदभावनाविष्ट इति ज्ञानानुसारेणोक्तम् । भक्तिरूपोपासना चेन्मम रूपं यत्र स ध्यातेति ज्ञेयमिति **दीपिका** ॥ * ॥ चित्ते सदा गुणास्तिष्ठन्ति तच्च कथं तांस्त्यक्तुं प्रभवेदिति भावः । प्रकर्षेण भवन्तीति—सदा तत्र वर्तन्त इति । ते गुणाश्च कथं वा तत्त्यक्तुं प्रभवंत्विति भावः । ज्ञानिनां कष्टेन परस्परतदुभयत्याजना च निष्प्रयोजनैव । तैरुभयैरपि प्रायः प्रयोजनं नास्ति तेषामित्याह—मद्रूपो मदभेदभावनावेशान्मन्मयः सन् ज्ञानी उभयं त्यजेत् । भक्तानां तु मत्सेवामेव परमपुरुषार्थत्वेन निश्चितवतां मद्रूपगुणलीलानिमग्नचेतसः सकाशात्स्वत एव गुणा अपयान्तीति न तेषां चेतोगुणयोः परस्परत्यागो दुर्घटः । मन्मयीभावस्तु तेषां नेष्ट इति **विश्वनाथः** ॥ २६ ॥ जाग्रदाद्यवतस्त्वद्रूपत्वं नः संभवतीत्याक्षिपति—नन्विति । विनिश्चितः शास्त्रेणेति शेषः । अत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यर्हि संसृतिबंधोऽयमात्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसाम् ॥ २८ ॥ अहंकारकृतं बंधमात्मनोऽर्थविपर्ययम् ॥ विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितस्त्यजेत् ॥२९॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥ ३० ॥ असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा ॥ गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ॥ ३१ ॥

कुतः । तासां साक्षित्वेन ॥ २७ ॥ ननु तर्हि कथमहं जागर्मीत्यादिप्रतीतिस्तत्राह । यर्हीति । यर्हि यस्मात्सम्यक् सृतिः सरणमनयेति संसृतिर्बुद्धिस्तया बंधोऽयमात्मनो गुणवृत्तीर्ददाति तस्मान्मयि तुर्ये अवस्थात्रयसाक्षिणि स्थितः सन्निमं संसृतिबंधं जह्यात् । तत्तदा गुणचेतसां गुणानां चेतसश्चान्योन्यं त्यागो भवति ॥ २८ ॥ कथं संसृत्या बंधः कथं च तं जह्यात्तदाह । अहंकारेण कृतं बंधमात्मनोर्थविपर्ययमानंदाद्यावरणेनानर्थहेतुं विद्वान् जानन्सन्निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंतां संसारो बुद्धिस्तस्मिंश्चिंतामभिमानं तत्कृतां भोगचिंतां च त्यजेदिति ॥ २९ ॥ यावदेव न त्यजेत्तावत्तस्य कर्म ज्ञानादि सर्वं व्यर्थमित्याह । यावदिति । यद्यपि जागर्ति कर्मादिषु तथापि स्वपन्स्वप्नान्पश्यन्निव भवति । यतोऽज्ञः असम्यग्दर्शी । अज्ञजागरस्य स्वप्नत्वे दृष्टांतः । स्वप्न इति ॥ ३० ॥ ननु कथं वेदप्रमितवर्णाश्रमकर्मादिनानार्थधीर्निवर्तेत तत्राह । असत्त्वादिति । भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा । अवि

हेतुमनुयुंक्ते—कुत इति । तासां जाग्रदादीनाम् ॥ * ॥ वस्तुतस्तु निर्लेपस्य जीवस्य गुणैश्चित्तादिभिः संबंध एव नास्ति मिथ्याध्यासत्याग एव तत्त्याग उच्यत इत्याह—जाग्रदिति । 'सत्त्वाज्जागरणम्' इत्यादिवक्ष्यमाणगुणाद्धेतोर्बुद्धेर्वृत्तयः, जीवस्तु विलक्षणस्तत्तदवस्थारहित एव । कुत इति तैः ॥ २७ ॥ अहमाकारेण प्रतीतिविरोधमाशंकते—नन्विति । यदि साक्षी तर्हीति । तत्र प्रतीतौ । यर्हीति पंचम्यर्थे र्हिल् । आत्मनो जीवात्मनः । गुणवृत्तीर्जाग्रदाद्याः । संसृतिबंधं बुद्धिसंबंधम् । तदा स्वरूपावस्थितिसमये । बुद्धिसंबंधाभावेन ग्राहकाभावे ग्राह्याभावस्स्वयमेव भवति न तत्र यत्नांतरापेक्षेति भावः ॥ * ॥ यद्यपि गुणाः सर्वथैव जीवस्य न भवन्ति तदपि देहाध्यासप्रसादाद्गुणवृत्तीः स प्राप्नोति । ततश्च देहाध्यासभंगे सत्येव स तास्त्यजतीत्याह—यर्हि आत्मनो जीवस्यायं देहाध्यासरूपः संसारबंधोभूत्तर्ह्येव स गुणवृत्तिदः जीवाय तस्मै गुणवृत्तिप्रदोभूत्, यर्हि च मयि तुर्ये स्थितः सन् जह्यात् इमं संसृतिबंधं त्यजेत् तदा गुणानां चेतसश्च स्वत एव त्यागो भवति ॥ २८ ॥ बंधतत्त्यागप्रकारं पृच्छति—कथमिति । तत्कृतां बुद्ध्यभिमानकृताम् ॥ * ॥ ० ॥ २९ ॥ एवं बुद्ध्यभिमानकृतभोगत्यागप्रकारेण त्यागं न कुर्यात् । युक्तिभिर्वक्ष्यमाणाभिः । जागरणं जागरत्वबुद्धिः ॥ * ॥ एवं निर्वेदप्रकारेण यावदभिमानकृतं नानात्वं न त्यजेत् । युक्तिभिः 'यो जागरे' इत्यत्र वक्ष्यमाणाभिः । तावज्जागर्त्यपि संसारबंधान्मुक्तोपि स्वप्नसंसारबद्ध एव अज्ञः स अज्ञान्युच्यते । स्वप्नमध्य एव स्वप्नाद्यथा जागरणं तथैव तस्याज्ञानमध्य एव ज्ञानमित्यर्थः ॥ ३० ॥ वेदबोधितकर्मणां त्याग एव दुःशक इत्याशङ्क्ते—नन्विति । तत्कृता देहादिकृता । अविद्या देहाद्यात्मबुद्धिः सा विद्यतेऽस्येत्यविद्यावान्स विषयो यस्य स तथा । इति भाव इति—ज्ञानिनो विधिनिषेधातीतत्वेनाज्ञ एव विधिनिषेधकिंकर इति तात्पर्यम् ॥ * ॥ **दीपिका**—वेदप्रमिता वेदप्रमाणज्ञापिताः । ननु " अष्टवर्षं ब्राह्मणमुपनयीत " " स्वाराज्यकामो राजा राजसूयेन यजेत " इत्यादिभेदप्रतिपादकवेदस्य का गतिरिति चेत्तत्राह—अविद्यावद्विषय इति । अविद्या स्वरूपाज्ञानं तद्वंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान्॥स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः॥३२॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः॥ संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माऽखिलसंशयाधिम् ॥ ॥३३॥ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रम्॥विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः॥३४॥

यावद्विषयो वेद इति भावः ॥ ३१ ॥ युक्तिभिरित्युक्तं ता एव युक्तीराह । य इति । अर्थान्स्थूलान्देहादीन्समस्तकरणैश्चक्षुरादिभिर्भुंक्ते । कथंभूतान् । अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः । यश्च स्वप्ने हृदि जागरदृष्टसदृशान्वासनामयान्भुंक्ते यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः । कुतः । त्रिगुणवृत्तिदृगवस्थात्रयद्रष्टा । ननु जाग्रदवस्थां सर्वेंद्रियाणि पश्यंति । स्वप्नं मनः । सुषुप्तिं तत्संस्कारशेषा बुद्धिः । कथमात्मा तद्द्रष्टा तत्राह । इंद्रियेशः । ननु इंद्रियेशा अपि विश्वतैजसप्राज्ञा भिन्नाः । न । कुतः । स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात् । यः स्वप्नमद्राक्षं यश्च तदनंतरं न किंचिदवेदिषं स एवेतर्हि जागर्मीत्युपाधिभेदेन विश्वादिव्यवहार इति भावः । एतेन बाल्युवाद्यवस्थास्वपि प्रतिसंधानेनात्मैक्यं द्रष्टव्यम् ॥ ३२ ॥ ततः किमत आह । एवमिति । गुणतो या एता मनसस्त्र्यवस्थास्ता मदविद्यया मयि कृता न तत्त्वतः संतीति निश्चित आत्मरूपोऽर्थो यैस्ते यूयमखिलसंशयानामाधिम् आधीयंतेऽस्मिन्नित्याधिरहंकारस्तं संछिद्य हार्दं हृदि स्थितं मा मां भजत । केन छित्त्वा तदाह । अनुमानैः सदुक्तिभिः सतामुपदेशैः श्रुतिभिश्च । तीक्ष्णेन ज्ञानखड्गेन ॥ ३३ ॥ अनुमानादि दर्शयति । ईक्षेतेति । इदं जगद्विभ्रममीक्षेत । तत्र हेतवः । मनोविजृंभितत्वात् दृष्टत्वाद्विनाशित्वाच्च स्वप्नवत् । अतिचंचलत्वाच्चालातचक्रवत् । ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह । विज्ञानमिति । विज्ञानमिति निगमनम् । तस्मात्त्रिधा योऽयं

एव विषया अधिकारिणो यस्य तादृशो वेदः । तथा च–"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन" इतिवदात्मानुभविनो न तत्राधिकार इत्यर्थः ॥ ३१ ॥ पूर्वोक्तं साधयति–युक्तिभिरिति । एकत्वे हेतुं पृच्छति–कुत इति । आत्मनो द्रष्टृत्वमाक्षिपति–नन्विति । इंद्रियेशः सर्वबाह्याभ्यंतरेंद्रियप्रवर्तकत्वेनात्मैव द्रष्टेत्यर्थः । पुनराक्षिपति–नन्विति । भिन्ना बहवः, नेत्याह–तदनंतरं सुषुप्तौ, उपाधिभेदेन जाग्रदाद्युपाधिभेदेन । इति भाव इति–औपाधिकभेदस्यावास्तवत्वादात्मैक्यमेवेत्याशयः । एतेन जाग्रदादिष्वात्मैक्यसाधनेन ॥ * ॥ बाल्युवाद्यवस्थास्विति–योऽहं बालः क्रीडासक्तो यश्च तारुण्ये तरुणीरक्तः स एवेदानीं वृद्धो यष्ट्यालंबनो स्मीति स्मृत्वैक्यं द्रष्टव्यमित्यर्थः ॥३२॥ तत आत्मैक्यसाधनात् । एवमुक्तरीत्यात्मैकत्वं विचार्य । आधिस्थानीभूतः । मामात्मत्वेन भजत । मय्यधिष्ठाने । कृताः कल्पिताः । अनुमानं तु–अहंकारो मिथ्या ज्ञाननाश्यत्वात्, दिङ्मोहवदिति । सदुक्तिस्तु–'मिथ्याहंकारसंसृतिः' इत्येवंरूपा । श्रुतिस्तु–"अतोऽन्यदार्तम्" इत्यादिका ॥ * ॥ ततः सर्वावस्थात्मन ऐक्यज्ञानानंतरमेवं विमृश्य मननं कृत्वा यूयं भजत ध्यायत हार्दं हृदुद्भवमवस्थात्रयं संछिद्य मामखिलसंशयानामाधिं पीडकं नाशकम् ॥ ३३ ॥ विशेषेण भ्रमो यत्र विभ्रमं जगद्विशेषणत्वाच्छठत्वम् । तत्र विभ्रमत्वे । मनसो विजृंभितं विलासस्तद्रूपत्वात् । अलातचक्रं काष्ठाद्यग्नौ प्रज्वाल्य चक्राकारेण तद्भ्रामणमुल्मुकभ्रामणमित्यर्थः । भ्रमोपि सविषय एव भवतीत्याशंकते–नन्विति । अबाधितत्वात्सत्प्रतिपक्षत्वतात्पर्यकं वाक्यं निगमनम् । यथा–तस्माद्वह्निमानिति । तथा चायमित्युपनयस्य तस्मात्तथेति

१ विकारः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः ॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात् ॥ ३५ ॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपम् ॥ दैवादपेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरामदांधः ॥ ३६ ॥

गुणपरिणामकृतो विकल्पो भेदः स मायेति ॥ ३४ ॥ तस्मात्ततो दृश्याद्दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत् । तन्नैश्चल्यार्थं च निवृत्ततृष्णस्तूष्णीं निरीहश्च भवेत् । मनोवाक्कायव्यापाररहित इत्यर्थः । ननु देहवतः सर्वथा द्वैतदृष्टिप्रतिनिवर्तनायोगात्पुनः संसारः स्यादेव तत्राह । संदृश्यत इति । क्वचिदावश्यकाहारादिषु यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत् त्यक्तं तत्पुनर्मोहाय न भवेदेव । किंतु देहपातपर्यंतं स्मृतिरिव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ॥ ३५ ॥ एतदेवोपपादयति । देहमिति । आसनादुत्थितमुत्थाय तत्रैव स्थितं ततः क्वचिदपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुतोऽन्यत् । यतो येन देहेन स्वरूपमध्यगमज्ज्ञातवांस्तं

निगमनस्य च शरीरमिति प्राञ्चः । तस्माद्विनाशित्वादिरूपत्वाद्विज्ञानं बुद्धिर्यथैकमेवोपाधिभेदाद्बहुधा घटपटाद्याकारेण प्रतीयते, तद्वदिदमपि विभातीत्याह—योयमिति ॥ * ॥ अनुमानानि ज्ञानोत्पत्तौ सहकारीणि । तत्र विभ्रमत्वे । निर्विषयः निराश्रयः । निगमनमिति—अयं भावः—पदार्थानुमाने पञ्चावयववाक्यं जगद्विभ्रममीक्षेतेति प्रतिज्ञा । दृष्टत्वादिति यद्यद्दृष्टत्वाद्यवच्छिन्नं तत्तद्भ्रममात्रम् । यथा स्वप्नादि इत्युदाहरणम् । भ्रमत्वव्याप्यदृष्टत्वादिमान् यथा स्वप्नादिस्तथा चेदं जगदित्युपनयः । तस्मात्त्रिधा योयं गुणपरिणामकृतो विकल्पः स माया मिथ्येति साध्योपसंहारलक्षणं निगमनमिति ॥ * ॥ **विश्वनाथस्तु**—एवमवस्थात्रयान्निःसंबंधस्यात्मनः पार्थक्यमनुभूय पूर्वं यदहंतास्पदममतास्पदीभूतं वस्तु तदिदं जगद्विभ्रमं विशिष्टो भ्रमो यत्र तथाभूतमीक्षेत । कोटिकोटिजन्मसु तत्र भ्रमादेवाहन्ता ममतयोरारोपितचरत्वात् । मनसो विलासं कौतुकास्पदम्, मनसो विशिष्टो लासो नृत्यं यत्र स तदिति वा । अन्यत्तैः । नन्वेवंभूतद्वैतदर्शनान्निर्भेदब्रह्मानुभवो नोपपद्यते तत्राह—विज्ञानमेकं यद् ब्रूध्वे तदेव उरुधेव विभाति न तु परमार्थत उरुधा यतो माया, माययैव त्रिधा गुणविसर्गकृतो विकल्पः, स्वप्नः स्वप्नवदचिरस्थायीति **दीपिका** ॥ ३४ ॥ यतो माययैव तस्माद्धेतोः । दृष्टिं सत्यत्वभ्रांतिम् । निजसुखं स्वरूपानंदस्तमनुभवतीति तथा । तन्नैश्चल्यार्थं निजानंदानुभवस्थैर्यार्थम् । इत्यर्थ इति—' सर्वेहोपरतिस्तनुः ' इत्युक्तेस्सर्वव्यापारशून्यस्यैव स्वानंदावाप्तिर्भवतीति भावः । निरीहत्वमशक्यमित्याशंकते—नन्विति । इदं द्वैतम् । मोहाय न भवेद्भ्रांतिकरं न स्यात्सकृत्सर्पभ्रमापोहेन ज्ञाता रज्जुर्यथा पुनः सर्पादिभ्रांतिजनिका न भवति तद्वदित्याह—किंत्विति । इत्यर्थ इति—दग्धशुक्लपरावर्तप्रतीतिवत्प्रतीतिर्मिथ्यैवेति निश्चयात्पुनर्भ्रमो न भवतीति भावः ॥ * ॥ तन्नैश्चल्यार्थं सुखानुभवस्य स्थिरत्वार्थं निवृत्ततृष्ण इत्यादिपदत्रयं यथासंख्यं मनोवाक्कायव्यापाररहित इत्यर्थः । संस्कारेति—प्रारब्धजसंस्कारमात्रेण जीवन्मुक्तस्य दग्धपटवत् द्विदलादिवदवभासो बाधितानुवृत्तिमात्रं भवेदित्यर्थः ॥ ३५ ॥ एतदेव सत्यत्वेनानुसंधानमेव । तत्रैवासने । तत आसनात् । तत्रैवासन एव । नानुसंधत्ते न सत्यत्वेन पश्यति । अन्यद्देहाति रिक्तं गृहादि तु कुत इत्यर्थः । देहेन साधनेन स्वरूपं परमानंदलक्षणम् । यद्यप्यात्मज्ञानसाधनेषु देहं मुख्यसाधनमस्ति तथापि साधनेषु तदगणनादाह—यतः कारणादिति वेति । यतो हेतोः स्वरूपमध्यगमदतो हेतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ॥ ३७ ॥ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥ जानीत माऽऽगतं यज्ञं युष्मद्धर्मविवक्षया ॥ ३८ ॥ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ॥ ३९ ॥ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकम् ॥ सुहृदं प्रियमात्मानं साम्यासंगादयोऽगुणाः ॥ ४० ॥

देहम् । यतः कारणादिति वा । परिकृतं परिहितं वासो गतं स्थितं वा यथा न वेत्ति तद्वत् ॥ ३६ ॥ ननु च यः परिपाल्यमानोऽपि मुमूर्षति तं चेन्न पश्यति तर्हि पतेदेव नेत्याह । देहोऽपीति । देहो दैववशेन गच्छन्स्वारंभकं कर्म यावदस्ति तावत्पर्यंतं प्रतिसमीक्षत एव जीवत्येव । सासुः प्राणेंद्रियसहितः । ननु तर्हि तस्मिन्कदाचिदासज्जेतापि नेत्याह । तमिति । स्वाप्नं स्वप्नतुल्यम् । अधिरूढः प्राप्तः समाधिपर्यन्तो योगो येनात एव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः । तथाच श्रुतिः । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये" इति ॥ ३७ ॥ उक्तार्थे तेषां विश्वासार्थं स्वस्वरूपमाह । मयेति । सांख्यमात्मानात्मविवेको योगोऽष्टांगस्तयोर्गुह्यं रहस्यम् । यज्ञं विष्णुम् । "यज्ञो वै विष्णुः" इति श्रुतेः । युष्मद्धर्मविवक्षयेत्यनेन धर्मा अप्युपदिष्टा इति ज्ञेयम् । अत एव यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधवेत्यनुवादो भविष्यति ॥ ॥ ३८ ॥ ऋतं प्रमीयमाणो धर्मः । सत्यमनुष्ठीयमानो धर्मः । तेजः प्रभावः एतेषां परमयनम् ॥ ३९ ॥ किंच । मामिति । कथंभूताः । अगुणाः गुणपरिणामरूपा

देहं न पश्यतीत्यर्थः । मदिरामदांधः मद्यपानजातमदविस्मृतात्मज्ञानः ॥ * ॥ एतदेव संस्कारमात्रेणावभासनमेव ॥ ३६ ॥ देहादर्शनेऽनर्थमाशंकते—नन्विति । यो देहः दैववशेन दिष्टवशेन स्वारंभकं स्वोत्पादकं कर्मादिष्टलक्षणं प्रतीक्षत एव प्रतीक्ष्यावतिष्ठत एव । अत्राक्षिपति—नन्विति । तस्मिन्देहे । आसज्जेतैवमभिमानं कुर्यादेव । अत एवाधिरूढसमाधियोगत्वादेव । शरीरपाते जीवन्मुक्तो विदेहमुक्तिं लभत इत्यत्र प्रमाणमाह—तथाचेति । तस्य जीवन्मुक्तस्य तावदेव चिरं विलम्बो यावत् न विमोक्ष्ये देहो न पतेत्, अथ देहपातोत्तरं संपत्स्ये ब्रह्मसायुज्यमेतीति श्रुतिपदार्थः ॥ * ॥ स्वारंभकं देहजनकं प्रारब्धं कर्म । अत एवारूढसमाधियोगत्वादेव । जीवन्मुक्तौ श्रुतिः—तस्य जीवन्मुक्तस्य तावदेव चिरं विलंबो यावत्प्रारब्धदेहान्न विमोक्ष्येत, अथ देहपातोत्तरं संपद्यते विदेहमुक्तो भवतीत्यर्थः ॥ ३७ ॥ तेषां सनकादीनाम् । "यज्ञो वै विष्णुः" इति श्रुतेः । अत एव युष्मद्धर्मविवक्षयेत्युक्तेरेव ॥ * ॥ **संदर्भः**—निजोक्तमादरयति—मयेत्यर्द्धेन । आदरकारणविशेषत्वेन स्वपरिचयविशेषं करोति—जानीतेति । यज्ञं विष्णुं न त्वीश्वरत्वेन । ज्ञापितमपि शिवादिकम् ॥ ३८ ॥ प्रमीयमाणो वेदप्रमाणविहितः । श्रियः सम्पदः । दमस्य बाह्येन्द्रियनिग्रहस्य । अयनं स्थानम् ॥ * ॥ स्वज्ञानांतर्भूतत्वं सर्वज्ञानस्य दर्शयन्सर्वोत्कृष्टत्वं दर्शयति—अहमिति ॥ * ॥ **विश्वनाथस्तु**—अहो अद्भुतं ज्ञानमश्रौष्मेत्यतिचमत्कारवतस्तानालक्ष्याह—अहमिति । "ऋतं च सूनृता वाणी सत्यञ्च समदर्शनम्" इति । वक्ष्यमाणे वर्तसत्ये ध्येये ॥ ३९ ॥ निर्गुणं मायिकगुणातीतम् । निरपेक्षकं मायिकगुणापेक्षाशून्यम् । सुहृदं स्वभक्तजनहितकारिणं, यतः प्रियं तेषां प्रेमविषयीभूतम् । आत्मानं तेषु प्रीतिकर्तारं च । के ते गुणाः—साम्यं सर्वत्र प्राकृतवस्तुष्वौदासीन्यं, समत्वं च अप्राकृतेषु स्वभक्तेष्वासंग आसक्तिः । आदिपदात्प्रथमस्कन्धे पृथिव्युक्ताः सत्यशौचादयो ग्राह्याः । इत्यर्थ इति—प्राकृता एव गुणपरिणामकृताः स्वाम्यादयो न त्वप्राकृता भगवन्निष्ठा इति भावः ॥ * ॥ नन्वहं परायणमिति त्वद्वाक्यादेव तवास्मिञ्छरीरेऽभिमानो दृश्यतेऽतः कथमस्मानशिक्षयद्भवानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. ए.
श्री. टी.
॥ ८४ ॥

इति मे छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयित्वा परया भक्त्याऽगृणत संस्तवैः ॥ ४१ ॥ तैरहं पूजितः सम्यक्संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥ ४२ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे हंसेतिहासनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ उद्धव उवाच ॥ वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ॥ तेषां विकल्पप्राधान्यमुताहो एकमुख्यता ॥ १ ॥ भवतोदाहृतः स्वामिन्भक्तियोगोऽनपेक्षितः ॥ निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः ॥ २ ॥

न भवंति । किंतु नित्या इत्यर्थः ॥ ४० ॥ मे मया । अगृणत मां तुष्टुवुः ॥ ४१ ॥ प्रत्येयाय प्रत्यागतोऽस्मि ॥ ४२ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां त्रयोदशोऽध्यायः ॥ १३ ॥ चतुर्दशे परं श्रेयो भक्तिरेव न चेतरत् ॥ इत्येतद्वर्ण्यते ध्यानयोगश्च सह साधनैः ॥ १ ॥ एवं तावद्भगवतो भक्त्या मोक्ष इत्युक्तं मन्ये त्वन्यानि साधनानि वदंति तत्र विशेषनिर्धारणाय पृच्छति । वदंतीति । श्रेयांसि श्रेयःसाधनानि । किं विकल्पेन प्राधान्यमुताहो किंवा एकस्यैव मुख्यता ॥ १ ॥ एक मुख्यतापक्षोत्थाने कारणम् । भवतेति । अनपेक्षितः न अपेक्षितमपेक्षा यस्मिन्सोऽहेतुकः । अयमर्थः । भवता यो भक्तियोग उक्तोऽन्ये च यानि श्रेयःसाधनानि वदंति

त्याशंकथ्वे चेत्—सत्यम, नेदं मदीयं शरीरं जीवस्येव स्वस्माद्भिन्नं भौतिकं नाप्यत्राहंकारादिकमपि प्राधानिकं किंतु मत्स्वरूपभूतं सच्चिदानंदमयमेवेत्याह—मां निर्गुणं मायिकगुणातीतम् । सर्वे गुणाः प्रथमस्कन्धे पृथिव्युक्ताः 'सत्यं शौचम्' इत्यादिना बहुधोक्ताः । साम्यासंगादयोऽनन्तगुणाश्च सर्वे मां भजन्ति। तत्र हेतुः—आत्मानं सर्वेषामाश्रयभूतम्। अत एवोत्कृष्टस्वरूपास्ते सर्वोत्कृष्टरूपं मां भजान्ति मां विना कथं चान्यं भजंत्विति भावः। तादृशात्मत्वादेव निर्गुणं न तु जीववदविद्यया गुणसंबद्धं निरपेक्षकं स्वेच्छयापि तदसंबद्धम् । यद्वा—निरपेक्षं मायिकगुणापेक्षाशून्यं सुहृदं निरुपाधिसर्वजनहितकारिणं प्रियनिरुपाधिसर्वप्रेमास्पदं तेषु साम्यं सर्वत्र प्राकृतवस्तुष्वौदासीन्यात्, ममत्वं चाप्राकृतेषु स्वभक्तेष्वासंग आसक्तिश्च तदाद्याः।अतः स्वरूपभूता एव गुणा आत्मानं स्वरूपमेव भजंति । "न तस्य कार्यं करणं च विद्यते" इत्यादौ "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः। अतः सर्वोत्कृष्टे प्रेमभक्तिरेव साध्येति पर्यवसानवाक्यार्थः ॥ ४० ॥ सभाजयित्वा पूजयित्वा ॥ * ॥ ततश्च संदेहं त्यक्त्वा मयि तां भक्तिं प्राप्तवंत इत्याह—इतीति । परया प्रेमलक्षणया ॥ ४१ ॥ तैः सनकादिभिः । प्रत्येयाय प्रत्याङ्पूर्वकादेतेः कर्तरि लिट् ॥ * ॥ धाम वैकुंठम् ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥ परं श्रेयः सर्वोत्कृष्टकल्याणसाधनम् । इतरत् तपोदानादि (१) । सर्वतो विरज्य मां भजतः स्वरूपावस्थानलक्षणो मोक्षो भवतीति भक्तिरेव परं श्रेयस्साधनमिति भगवतो मतम् । अन्ये त्वाचार्याः अन्यानि धर्मादीनि । तत्र तेषु साधनेषु । विकल्पेन यवाग्वा पयसा वेतिवत् । एकस्यैव कस्यचित्तेषां मध्ये ॥ * ॥ श्रुतानां श्रोतव्यानाञ्च साधनानां तारतम्यं पृच्छति—वदंतीति ॥ १ ॥ अपेक्षा साधनांतरापेक्षा । यस्मिन्भक्तियोगे । अहेतुकः फलेच्छारहितो वा । स्वाशयं प्रकाशयत्युद्धवः—अयमर्थ इति । तेषां साधनानाम् ॥ * ॥ ननु निरपेक्षो भक्तियोगो मयोक्तश्चेदलमन्यसाधनप्रश्नैरिति चेदत्रोच्यते—अयमर्थ इति । तेषां धर्मादिसाधनानां साक्षात्फलसाधनत्वेनाव्यवहितमुक्तिफलोपधायत्वेन उत किं वा अंगांगित्वं यथा दर्शपौर्णमासादीनां परमापूर्वे प्रत्यंगत्वेपि प्रयाजाद्यपेक्षयांगित्वं तथा केषामंगित्वं केषां चांगत्वमित्यर्थः । कश्चिदस्ति विशेष इति

भा. दी. प्र.
टीका.
अ० १४
॥ ८४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ ३ ॥ तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ॥ ततो भृग्वादयोऽगृह्णन्सप्त ब्रह्ममहर्षयः ॥ ४॥ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ॥ मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः॥५॥ किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः ॥ बह्वयस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥ ६ ॥

तेषां किं साक्षात्फलसाधनत्वेन प्राधान्यमेव सर्वेषामुतांगांगित्वम् । प्राधान्येऽपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति ॥ २ ॥ तत्र भक्तिरेव महाफलत्वेन मुख्या । अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि क्षुल्लकफलानीति विवेक्तुं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्तिमाह कालेनेति सप्तभिः । मदात्मकः मय्येवात्मा चित्तं येन सः ॥ ३ ॥ भृग्वादयः । भृगुश्च मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुरित्येते च सप्त ब्रह्माणः प्रजापतयस्ते च ते महर्षयश्च ॥ ४ ॥ ५ ॥ किंदेवाः क्रमस्वेददौर्गंध्यादिराहित्येन किं देवा मनुष्या वेति संदेहास्पदभूता द्वीपांतरमनुष्याः । एवं किन्नराः किंचिन्नरा इव मुखतः शरीरतो वा । किंपुरुषाः किंचित्पुरुषा इव वानरादयः । प्रकृतयो वासना बह्वयः । कुतः । रजःसत्त्वतमांसि भुवः जन्मस्थानानि यासां ताः ॥६॥

प्राधान्येपि ' क्लेशोधिकतरस्तेषाम् ' ' कृच्छ्रो महानिह भवार्णवमप्लवेशम् ' इत्यादिन्यायेन क्लेशाक्लेशलक्षणो विशेषः कश्चिदस्ति वेत्यर्थः ॥ २ ॥ तत्र तेषु पुष्पस्थानीयेषु स्वर्गादिषु फलमिदमेवेति बुद्धिर्येषां तैः । क्षुल्लकं तुच्छं फलं येषां तानि तथा । वेदार्थप्रतिपत्तिं श्रुत्यर्थप्रतिपादनम् । यस्यां वेदवाचि ॥ * ॥ **दीपिका**—तत्र साधनेष्वन्यानि धर्मादीनि । क्षुल्लकं तुच्छम् । कालेनेति सार्द्धकम् । कालेन नष्टा तत्रापि प्रलये कल्पांते बहुनष्टेत्यर्थः । इयमिति—भवतेत्यादिना।यथा भवतानूद्यते तथा निरूपिकेत्यर्थः । एतेन ज्ञानादिकं ज्ञानादिमिश्रत्वं मदावेशान्यफलत्वं च न मन्मतमिति बोधितम् । आदौ ब्रह्मकल्पादौ। भो उद्धव सर्वमतानि वेदादेवोत्थितानि तस्यतस्य वेदस्य तु मद्भक्तियोग एव तात्पर्यमित्याह—कालेनेति । मदात्मको मत्स्वरूपभूतः भक्तियोगस्य ह्लादिनीसारभूतत्वात् । यद्वा—मय्येवात्मा चित्तं यतश्चित्तस्य मदाविष्टता मद्भक्त्यैव भवेत् 'भक्त्याहमेकया ग्राह्यः' इति मद्वचनाद्भक्त्यैवाहमिंद्रियैर्ग्रहीतुं शक्यो नान्यथेति तत्रार्थो द्रष्टव्यः । ब्रह्मवादिभिरुक्तानां मद्भक्तियोगादन्येषां श्रेयसां मत्प्रापकत्वाभावात् । श्रेयस्त्वमेव वस्तुतो नास्तीत्यतस्तेषां विकल्पतः प्राधान्येनैकस्य मुख्यत्वेन वा जिज्ञास्ये न तव किं प्रयोजनमिति भावः ॥ ३ ॥ तेन ब्रह्मणा । मनवे स्वायंभुवाय । अत्र मनोः पूर्वजत्वं रुद्रेंद्रकुमारान्विनेति ज्ञेयम् " रुद्रमिंद्रं कुमारञ्च विनैवान्याग्रजो मनुः । ब्रह्मपुत्रेष्वादिसृष्टौ " इति तीर्थोक्तेः । ततः स्वायंभुवान्मनोः ॥ * ॥ कथं ततो नानामतान्युद्भूतानि तत्राह—तेनेति सार्द्धैरष्टभिः ॥ ४ ॥ तेभ्यो भृग्वादिभ्यः । स्वस्वपितृभ्यस्तत्पुत्राः । तानाह—' देवदानव— । ' इत्यादि ॥ * ॥ ० ॥ ५ ॥ एवं किं देववत् । आदिना भल्लुकादिग्रहः । तेषां देवादीनाम् । 'प्रकृतिर्मूलकारणम्' इत्युक्तेर्मुख्यकारणत्वं सर्वत्र वासनास्वेव पर्यवस्यतीत्यभिप्रेत्योक्तं स्वामिचरणैः—प्रकृतयो वासना इति । तासां बहुत्वे हेतुं पृच्छति—कुत इति ॥ * ॥०॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याभिर्भूतानि भिद्यंते भूतानां मतयस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्त्रवंति हि ॥ ७ ॥ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणाम् ॥ पारंपर्येण केषांचित्पाखंडमतयोऽपरे ॥ ८ ॥ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ ॥ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ॥ ९ ॥ धर्ममेके यशश्चान्ये कामं सत्यं दमं शमम् ॥ अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनम् ॥ केचिद्यज्ञतपोदानं व्रतानि नियमान्यमान् ॥ १० ॥

भूतानि देवासुरमनुष्यादीनि । चित्रा वाचो वेदार्थव्याख्यानविषयाः ॥ ७ ॥ एवमित्युक्तोपसंहारः । केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण । अपरे पाखंडमतयो वेदविरुद्धार्थमतयः ॥ ८ ॥ तत्प्रकृतीनां मायागुणमूलत्वान्मन्मायामोहितधियः । अनेकांतं नानाविधम् ॥ ९ ॥ तदेवाह धर्ममिति सार्धेन । धर्मं कर्ममीमांसकाः । यदुक्तम् । “ मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ॥ नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया ॥ ” इत्यादि । यशः काव्यालंकारकृतः । यथाहुः । “ यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ” इति । कामं वात्स्यायनादयः । सत्यं दमं शमं च योगशास्त्रकृतः । अन्ये दृष्टार्थवा

याभिर्वासनाभिः । भिद्यन्तेऽनेकरूपा भवन्ति । सर्वेषां देवादीनां यथाप्रकृति सात्त्विक्यादिप्रकृत्यनतिक्रमेण चित्रा धर्माद्यनेकपुरुषार्थप्रतिपादिकाः स्त्रवन्ति स्वस्वबुद्धौ प्रमाणवत्प्रतिभांतीत्यर्थः । अत्र दृष्टान्तः श्रीमहाभारताश्वमेधपर्वणि—“ देवर्षयश्च नागाश्चाप्यसुराश्च प्रजापतिम् । पर्यपृच्छन्नुपासीनाः श्रेयो नः प्रोच्यतामिति ॥ तेषां प्रोवाच भगवाञ्छ्रेयः समनुपृच्छताम् । ओमित्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन्दिशः ॥ तेषां प्रद्रवमाणानामुपदेशार्थमात्मनः । सर्पाणां दंशने भावः प्रवृत्तः पूर्वमेव तु ॥ असुराणां प्रवृत्तस्तु दंभभावः स्वभावजः । दानं देवा व्यवसिता दममेव महर्षयः ॥ एकं शास्तारमासाद्य शब्देनैकेन संस्कृताः । नाना व्यवसिताः सर्वे सर्वदेवर्षिमानवाः ॥ ” इति । प्राद्रवन्प्रतिपेदिरे । दिशो मार्गान् । आत्मनः स्वस्य । उपदेश ओमित्येकाक्षरं वाक्यं तस्यार्थम् । प्रदवमाणानां तात्पर्येणानुसरतां तेषां मध्ये सर्पाणां प्रणवोच्चारणे मुखस्योन्मीलनयोरेव दृष्टिं कृत्वा स्वीयस्वभावानुकूलं मुखोन्मीलननिमीलनसाध्यं दंशनमेव श्रेय इति मन्वानानाम् । एवमसुराणामोष्ठचालनमात्रे दत्तदृष्टीनाम् । दंभे जपाद्यभिनयप्रदर्शनरूपे । भावो निश्चयः प्रवृत्तः । देवास्तु लोके प्रार्थितमोमित्यनुजानंतीति बुद्ध्वा दानं श्रेय इति निश्चिताः । महर्षयस्तु ओमित्यस्योच्चारणे ओष्ठप्रवृत्त्युपसंहाररूपं दमं श्रेयो मेनिर इति ॥ * ॥ चित्राः व्याख्यानेन विविधप्रकारावच्छिन्नाः । स्त्रवन्ति निःसरंतीति ॥ ७ ॥ अपरे श्रुतिमनादृत्यातितामसाः । वेदविरुद्धार्थमतयो वामशैवादयः ॥ * ॥ पाषंडमतयोऽतितमःप्रकृतित्वाद्वेदविरुद्धार्थमतयः । तेन भागीरथ्या जलं शुद्धं मधुरमपि तत्तटवर्त्यैरंडनिंबचिञ्चाकपित्थविषवृक्षादिभिः स्वस्वमूलद्वारा गृहीतं विषमं विरुद्धं च यथा भवेत्तथैव तेषांतेषां व्याख्यातॄणां मुखं प्राप्य वेदार्थो विरसो विरुद्धफलप्रदश्च भवेदिति भावः ॥ ८ ॥ यथा प्राचीनकर्मानुसारेण । यथारुचि स्वस्वरुच्यनुसारेण ॥ * ॥ श्रेयः श्रेयःसाधनम् ॥ ९ ॥ तदेव यथारुचित्वाद्येव । कर्ममीमांसका जैमिन्यादयः । काव्यालंकारकृतो भारतादयः । अत्र वृद्धोक्तिमाहुः—यथाहुरिति । दंडनीतिकृतः कामंदकादयः । यत ऐश्वर्यमेव श्रेयोस्त्यतो हेतोः । भोजनम्—‘ ऋणं कृत्वा घृतं पिबेत् ’ इत्यादितदुक्तेः । लोकायतिकाश्चार्वाकाः । त्यागं चाभिमानस्येत्यपि तेषां मतम् । केचित्पौराणिकाः ॥ * ॥ तदेव नानाविधमतवदनमेव । तत्र चतुर्विधकर्मसु मध्ये । काम्यमाग्निहोत्रादि, निषिद्धं कलंजभक्षणादि, नित्यं संध्यावंदनादि, नैमित्तिकं पुत्रेष्ट्यादि, प्रत्यवायस्तदकरणे निषिद्धकरणे च यो दोषस्तस्य जिहासया त्यागेच्छयेति **दीपिका** ॥ * ॥ **संदर्भः**—धर्ममिति—ईश्वरामननाज्जैमिन्यादीनामपि तत्तत्प्रवर्तकत्वमेवेति भावः । एके निवृत्तिकर्मनिष्ठाः । सत्यादित्रयमद्वैता योगिनश्च । केचित्कर्मनिष्ठाः । स्वार्थमिति स्थानभेदेन साधनं साध्यं चोच्यते, उभयोरपि स्वेनार्थमानत्वात् । तत्र कामभोगैश्वर्याणि साध्यानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आद्यंतवंत एवैषां लोकाः कर्मविनिर्मिताः ॥ दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः ॥ ११ ॥ मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः ॥ मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनाम् ॥१२॥ अकिंचनस्य दांतस्य शांतस्य समचेतसः ॥ मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥१३॥ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम् ॥ न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् ॥ १४ ॥

दिनो दंडनीतिकृतो वै प्रसिद्धम् ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति । अतः सामाद्युपाया एव श्रेयःसाधनमिति तेषां मतम् । तथैव त्यागं भोजनं च लोकायतिकाः । यज्ञतपो दानं यज्ञो देवतानां पूजनं तपश्च दानं च ॥ १० ॥ तेषां तुच्छफलत्वमाह । आद्यंतवंत इति । एषां लोका एतैः साध्यानि फलानि । तमोनिष्ठा मोहावसानाः । भोगकालेऽप्यसूयादिभिः शुचार्पिता व्याप्ताः ॥ ११ ॥ भक्तेर्मुख्यत्वमाह मयीति यावत्समाप्ति । हे सभ्य । मया परमानंदरूपेणात्मना स्वरूपत्वेन स्फुरता ॥ १२ ॥ किंच अन्येषां तत्तल्लोकादिपरिच्छिन्नं सुखं भक्तस्य तु परिपूर्णमित्याह । अकिंचनस्येति ॥ १३ ॥ परिपूर्णतामेवाह । न पारमेष्ठ्यमिति । रसाधिपत्यं पातालादिस्वा

अन्यानि तु साधनानि ॥ १० ॥ तेषां पूर्वोक्तानां सर्वेषां तुच्छफलत्वं विनाशिफलत्वम् । मोहावसाना अज्ञानदार्ढ्यहेतवः । “ मद्भक्तिवर्जितं श्रेयो ये मन्यन्ते दुराशयाः । तेषामन्ते तमोघोरमनंतं प्राप्यते ध्रुवम् ॥ ” इति तीर्थोदाहृतवचनात् ॥ * ॥ एषां मध्ये ये वा कर्मणा वेदविधिना विनिर्मिता लोकाः सुखदफला भवंति तेप्याद्यंतवदादिरूपा एव, वेदविमुखत्वे नारका एवेति भावः ॥ ११ ॥ सुखं पूर्णानंदः । ‘ समूहे सदसि सभा ’ इति कोशात्सभायां समूहे श्रेष्ठः सभ्यो विवेकिजनमुख्यत्वात्त्वमेतमर्थं ज्ञातुं योग्योऽसीति संबुद्ध्यभिप्रायः । सर्वत ऐहिकपारात्रिकविषयेभ्यः ॥ * ॥ तस्माद्भक्तावेव तात्पर्यं, सैव सर्वश्रेष्ठेति निर्द्धार्य तयैव मां प्राप्नोतीत्याह—मयीत्यादिनोद्धवप्रश्नपर्यंतेन ग्रंथेन । मया रूपगुणसमुद्रेण सर्वाश्चर्यरूपगुणादिविशिष्टमद्रूपेण स्फुरतेत्यर्थ इति संदर्भः ॥ * ॥ तत्राप्यात्मना पूर्णसच्चिदानंदलक्षणपरमतया परमप्रेष्ठरूपेण हेतुना विषयेषु मायिकेषु शमदमज्ञानादिष्वपि मनो येषां तेषां ज्ञानादीनामपि सात्त्विकत्वेन मायिकत्वात्, मदतिरिक्तपुरुषार्थिनस्सर्व एव विषयात्मान इति भावः । न च शमादिप्राप्यं ब्रह्मैवेत्यपि वाच्यम् “ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥ ” इति नारदोक्तेः ॥ १२ ॥ स्वभक्तस्य सुखाधिक्यमाह—किंचेति । अकिंचनत्वादिष्वेकैकोऽपि सुखित्वहेतुः किमुत समुदिता इत्याशयेनाह—सर्वा इति । सुखमया मदानंदैकरूपत्वात् ॥ * ॥ भक्तस्य सुखं सुखस्यानुभावं च विवृणोति—अकिंचनस्येति द्वाभ्याम् । मया ध्यानप्राप्तेनैवालौकिकशब्दस्पर्शरूपरसगंधलीलाकृपादिमहामाधुर्यवता संतुष्टानि मनःप्रभृतिसर्वेंद्रियाणि यस्य तस्य सर्वा इति । स च या दिशो याति ता एव सुखमयाः यथा ग्रंथिनिबद्धाः । नश्वरमहाधनो ना यं देशं याति तत्रैव तस्य भोगैश्वर्यसुखानीत्यर्थः । अत एवाकिञ्चनस्य मल्लक्षणसंपूर्णानश्वरमहाधनप्राप्त्यैव । किञ्च—न शब्दवाच्यपरिमितनश्वरप्राकृतधनजनादिग्रहणविमुखस्य बाह्याभ्यंतरविषयेष्विंद्रियाणां स्वयमरोचकत्वेनैव निवृत्तेः । दांतस्य शांतस्य मदेकनिष्ठबुद्धेः ‘ शमो मन्निष्ठता बुद्धेः ’ इति वक्ष्यमाणत्वात् । अत एव समचेतसः स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ १३ ॥ योगसिद्धीरणिमाद्याः । मद्विनान्यदपुनर्भवं कपिलकणादजैमिन्यादिसंमतं नेच्छति, किंतु मत्स्वरूपात्मकं मोक्षमिच्छतीत्यर्थः ॥ * ॥ तस्य किञ्चनशब्दवाच्यपदार्थेषु स्पृहाराहित्यमाह—नेति । सार्वभौमं श्रीप्रियव्रतादीनामिव महाराज्यम् । अप्यर्थे वाशब्दः । अपुनर्भवं सायुज्यसुखञ्च । मय्यर्पितात्मेति—“ ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ” इति मत्कृतनियमादहमपि तस्मिन्नर्पितात्मा भवामीत्यत आह—मद्विनेति । अहमेव तस्य सर्वेंद्रियग्राह्यतया सदैव वर्त एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तथा मे प्रियतम आत्मयोनिर्न शंकरः ॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥ १५ ॥ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनम् ॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः ॥ १६ ॥ निष्किंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः ॥ कामैरनालब्धधियो जुषंति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम ॥ १७ ॥

म्यम् । अपुनर्भवं मोक्षमपि । मद्विना मां हित्वाऽन्यन्नेच्छति । अहमेव तस्य श्रेष्ठ इत्यर्थः ॥ १४ ॥ ममापि स एव श्रेष्ठ इत्याह न तथेति द्वाभ्याम् । आत्मयोनिर्ब्रह्मा पुत्रोऽपि । शंकरो मत्स्वरूपभूतोऽपि । संकर्षणो भ्राताऽपि । श्रीर्भार्याऽपि । आत्मा मूर्तिरपि । तथा भक्त इति वक्तव्येऽतिहर्षेणाह । भवानिति ॥ १५ ॥ पूयेय मदंतर्वर्तिब्रह्मांडानि पवित्रीकुर्यामिति भावेनेत्यर्थः ॥ १६ ॥ किंच मद्भक्तानां सुखमेतावदेवंभूतमिति वा को वक्तुं समर्थो यतस्तत्स्वसंवेद्यं निरुपममित्याह । निष्किंचना इति ।

न हि निरन्तरदिव्यामृतरसास्वादिने जनाय मृत्तिका रोचत इति भावः । पारमेष्ठ्यादिचतुष्टयस्यानुक्रमश्चाबोधो विवक्षया न्यूनत्वविवक्षया च ततश्चोत्तरोत्तरं कैमुत्यमपि योगसिद्ध्यादिद्वयं तु सार्वत्रिकत्वात्पश्चाद्विन्यस्तम्, अपुनर्भवस्तूत्तरत्र श्रेष्ठ्यात् ॥ १४ ॥ स एव निरपेक्ष भक्त एव । यद्वा—यथा भवान्भक्तस्ते चापि मत्प्रियास्तद्भक्तत्वेनैव नात्मजत्वादिसम्बन्धैश्वर्यादिनेति भावः ॥ * ॥ स च भक्तस्तव कीदृक् प्रिय इत्यत आह—न तथेति । अत्र ब्रह्मादीनां भक्तत्वेपि तेषु भक्तत्वांशादपि पुत्रत्वाद्यंशा अधिका वर्ततेऽतः 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन ते पुत्रादित्वेनैव व्यपदिश्यन्ते न तु भक्तत्वेन, नंदयशोदादिषु तु महाप्रेमवत्त्वात्पितृत्वाद्यंशेभ्योपि भक्तत्वलक्षणोंशोधिकतर इति तेषु भक्तत्वमेवेति ते कृष्णस्यातिप्रियतमा एव । तदुक्तम्—"दर्शयंस्तद्विदां लोक आत्मनो भक्तवश्यताम्" इति तेषां भक्तशब्दवाच्यत्वे स्वातिवशीकारकत्वं च "नेमं विरिञ्चो न भवो न श्रीरप्यंगसंश्रया । प्रसादं लेभिरे गोपीः" इति सर्वोत्कर्षश्च । यद्वा—तादृशभक्तेष्वपि भवान्मे यथा प्रियतमस्तथा मन्मुखादेव शृण्वित्याह—तथेति । तेन सर्वभक्तेभ्य उद्धवः श्रेष्ठस्ततोपि गोप्यः श्रेष्ठास्तेनापि तासां चरणधूलिप्रार्थनादिति वैष्णवसिद्धान्तः ॥ १५ ॥ इत्यर्थ इति—एतेन तदंघ्रिपावनत्वबोधन एव तात्पर्यं नियशुद्धस्य स्वप्रयोजनाभावादिति भावः ॥ * ॥ तदेवं प्रेमविशेषपात्रत्वेन तादृशं भक्तं स्तुत्वा गौरवविशेषपात्रत्वेन भक्तविशेषं स्तौति—निरपेक्षं निष्कामभक्तम्, अतो भोगरहितं मात्सर्यादिरहितमन्यत्र हेयोपादेयभावनारहितं च । मुनिं श्रीनारदादिम् । अनुव्रजामि यतस्तादृशभक्तिमयसाधुत्वदर्शनेन ममापि भक्तिविशेषो जायते कथं गोपनीय इत्याह—पूयेयेति । तद्भक्त्यनिष्कृतिदोषात् पवित्रितः स्यामिति भावेनेत्यर्थः ॥ * ॥ **विश्वनाथः**—किं बहुना भक्तो यथा सदा मामनुचरति तथाहमपि भक्तः परोक्षः सन्भक्तमनुचरामि 'भगवान्भक्तभक्तिमान्' इति मदीयशुकोक्तेरित्याह—निरपेक्षमिति । मुनिं मद्रूपगुणलीलापरिकरादिमननपरम् । पूयेयेति तैः । वस्तुतस्तु भक्तचरणधूलिग्रहणं विना भक्तिर्न स्याद्भक्त्या विना मन्माधुर्यरसानुभवो न स्यादिति मयैव मर्यादा स्थापिताऽतोहमपि भक्त इव भक्त्या पूर्णमन्माधुर्यसरोनिमग्नो भवेयमिति भावः । 'विस्मापनं स्वस्य च सौभगर्द्धेः परं पदम्' इत्युक्तेः ॥ १६ ॥ पुनर्भक्ताधिक्यमाह—किञ्चेति । यथेष्टं निष्किञ्चनत्वे मदनुरक्तचेतस्त्वं तत्र च निष्किञ्चनत्वम् । एवमन्येपि ज्ञेयाः । एवंभूता निष्किञ्चनत्वादिसंपन्नाः । अन्येषामज्ञाने हेतुं पृच्छति—कुत इति । इत्यर्थ इति—भक्तिसुखमत्यलौकिकं निरपेक्षावाप्यमिति भावः । कारणमंतरा कार्योत्पत्तिर्न भवतीति कथं त्वत्सेवां विना नैरपेक्ष्यसुखावाप्तिरिति चेदाह—यद्वेति । षष्ठी द्वितीयार्थे बोध्या इत्याह—मामित्यर्थ इति । प्रीणनस्य स्मरणपूर्वकत्वात्स्मरणमप्यत्र प्रीणनेन लक्ष्यते, तेन स्मृत्यर्थयोगे कर्मणि षष्ठी विभाषया भवत्येवेति भावः । तत्सुखं स्वरूपत्वेन विदुरित्यर्थः ॥ * ॥ यतो मन्माधुर्यगुणरूपादिसुखं मद्भक्त्यैव लभ्यं नान्यथेत्याह—निष्किञ्चना इति । निष्किञ्चना ज्ञानिनोपि भवंतीति केचिदाहुस्तद्व्यावृत्त्यर्थमाह—मय्यनुरक्तचेतस इति । अखिलजीववत्सलाः अखिलेभ्योऽपि जीवेभ्यो भक्तिरसादित्सावंतः। अत एव महांतस्तत्संज्ञयैव लोकैरुच्यमानाः कामैर्दैवादापतितैरपि भोगैर्न आलब्धा छिन्ना धीर्येषां ते यन्मम सुखं जुषंति अस्वादयंति तत्सुखं त एव विदुर्नान्ये। कुतः—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाध्यमानोऽपि मद्भक्तो विषयैरजितेंद्रियः ॥ प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते ॥ १८ ॥ यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् ॥
तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः ॥ १९ ॥ न साधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥
॥ २० ॥ भक्त्याऽहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ॥ भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् ॥ २१ ॥

महांतो निरभिमानाः । अनालब्धधियोऽस्पृष्टचित्ताः । निष्किंचनत्वादीनां यथेष्टं हेतुहेतुमद्भावः । एवंभूता मम मदीया यत्सुखं जुषंति सेवंते तत्सुखं त एव विदुर्लभंते नान्ये । कुतः । नैरपेक्ष्यं नास्त्यपेक्षणीयं येषां ते निरपेक्ष्यास्तैरेव लभ्यं न तु मोक्षापेक्षैरपीत्यर्थः । यद्वा एवंभूताः संतो ये मम मामित्यर्थः । जुषंति प्रीणंति त एव यन्नैरपेक्ष्यं सुखं तद्विदुर्नान्य इत्यन्वयः ॥ १७ ॥ अपि च आस्तां तावदुत्तमभक्तकथा । यतः प्राकृतोऽपि भक्तः कृतार्थ एवेत्याह बाध्यमान इति द्वाभ्याम् । विषयैराकृष्यमाणोऽपि प्रगल्भया समर्थया ॥ १८ ॥ पाकाद्यर्थं प्रज्वालितोऽग्निर्यथा काष्ठानि भस्मीकरोति तथा रागादिनाऽपि कथंचिन्मद्विषया सती भक्तिः समस्तपापनाशिनीति । भगवानपि स्वभक्तिमहिमाश्चर्येण संबोधयति । अहो उद्धव विस्मयं शृण्विति ॥ १९ ॥ अत एवंभूतं श्रेयो नान्यदस्तीत्याह न साधयतीति द्वाभ्याम् ॥ २० ॥ श्रद्धया

नैरपेक्ष्यं नास्ति अपेक्ष्यं मोक्षादिकं येषां ते नैरपेक्ष्यास्तेष्वेव जातम् । एतावत् एवंभूतमेवंजातीयं तत्सुखं स्वसंवेद्यमेव । मय्यनुरक्तचेतस इत्यनेनैव मदीयत्वमागतं पुनर्ममेत्यधिकमतो—यद्वेति । प्रीणंयति प्रसन्नीकुर्वंति ॥ १७ ॥ अन्यदाह—अपि चेति । प्राकृतः साधारणः । नाभिभूयते विषयसेवाप्राप्तदोषेणाधो न पततीत्यर्थः । प्रायो विषयैः ॥ * ॥ अपि चास्तां तावदुत्पन्नभावभक्तकथा यतो भक्तौ प्रथमवर्तमानोऽपि भक्तः कृतार्थ एवेत्याह—बाध्यमान इति । प्रायः प्रगल्भया प्रायेणैव प्रबलीभवंति किं पुनः प्रगल्भया ॥ * ॥ **संदर्भस्तु**—प्रगल्भया समर्थप्रभावया शरणागतिमात्रात्मिकयेत्याह । यद्वा—ज्ञानप्रकरणे, यथा दुराचारो ज्ञानी निंद्यते ज्ञानित्वं च तस्य निषिध्यते ‘ यस्त्वसंयतषड्वर्गः ’ इत्यादिना, तथात्र भक्तप्रकरणे दुराचारो भक्तो न निंद्यो भक्तत्वं च तस्य नो निषिद्धमित्याह—बाध्यमान इति । यदुक्तम्—“ अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ” इति । किंचात्र विषयैर्बाध्यमानो विषयैर्नाभिभूयत इत्युभयत्रापि वर्तमाननिर्देशाद्विषयबाध्यत्वदशायामपि विषयाबाध्यत्वं भक्तिसद्भावात् । यथा—वैरिकृतकिंचिच्छस्त्राघातं प्राप्तस्यापि न पराभविष्णुता शौर्यसद्भावात्, यथा वा—शीतज्वरघ्नमहौषधस्य तद्दिवस आगतोऽपि ज्वरो बाधकोऽप्यबाधक एव विनश्यद्वस्थत्वात्, दिनांतरे सम्यङ्नष्टीभावित्वाच्च ॥ १८ ॥ “ घटायोन्मीलितं चक्षुः पटं किं नहि पश्यति ” इति न्यायमाश्रित्याह—पाकाद्यर्थमिति ॥ * ॥ तस्याजितेंद्रियताजन्यपापस्य भक्तिरेव नाशिकास्तीत्यत्र दृष्टान्तो—यथाग्निरिति । हे उद्धवेति—त्वमत्रोद्धवमेव लभस्वेति भावः ॥ * ॥ **संदर्भस्तु**—सर्वानेव भक्तिभेदान्प्रशंसति—यथेत्यष्टभिः । यथा मद्विषया यथाकथंचिच्छ्रवणादिलक्षणा ॥ १९ ॥ यतो यथाकथंचित्कृतापि भक्तिः सर्वपापहराऽतो हेतोः । एवंभूतं भक्तिसदृशं भक्त्यनुपहितधिया नुष्ठितयोगादयो मदपरोक्षं न जनयंतीत्यर्थः । ऊर्जिता फलाभिसंध्यादिरहिता ॥ * ॥ ननु भक्तिर्यथा त्वत्प्राप्तिसाधनं तथा ज्ञानयोगादिकमपीति केनांशेन भक्तेरुत्कर्ष इत्यत आह—नेति द्वाभ्याम् । न साधयति मत्प्राप्तिसाधनं न भवति । ऊर्जिता ज्ञानकर्माद्यनावृतत्वेन तीव्रा प्रबलेत्यर्थः ॥ * ॥ **संदर्भस्तु**—ज्ञानयोगादिस्तत्साधनार्थं प्रयुक्तोऽपि तथा मां न साधयति वशयत्युन्मुखं न करोति यथोर्जिता साधनात्मिका भक्तिरित्याह ॥ २० ॥ इत्यर्थ इति—“ किरातहूणांध्रपुलिंदपुक्कसा आभीरकंका यवनाः खसादयः । येऽन्ये च पापा यदुपाश्रयाश्रयाच्छुध्यन्ति तस्मै प्रभविष्णवे नमः ॥ ” इति श्रीबादरायण्युक्तेः,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ॥ मद्भक्त्यापेतमात्मानं न सम्यक्प्रपुनाति हि ॥ २२ ॥ कथं विना रोमहर्षं द्रवता चेतसा विना ॥ विनानंदाश्रुकलया शुध्येद्भक्त्या विनाऽऽशयः ॥ २३ ॥ वाग्गद्गदा द्रवते यस्य चित्तं रोदित्यभीक्ष्णं हसति क्वचिच्च ॥ विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥ २४ ॥

या भक्तिस्तया । संभवाज्जातिदोषादपीत्यर्थः ॥ २१ ॥ भक्त्यभावेऽन्यत्साधनं व्यर्थमित्याह द्वाभ्यां धर्म इति ॥ २२ ॥ रोमहर्षादिकं विना कथं भक्तिर्गम्यते । भक्त्या विना च कथमाशयः शुध्येदिति ॥ २३ ॥ किंच भक्तिः स्वाश्रयं शोधयतीति किं वक्तव्यं यतो गद्गदवागादिलक्षणो मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह । वागिति ॥ २४ ॥

'स्त्रीशूद्रहूणशबरा अपि पापजीवाः' इति ब्रह्मोक्तेश्चेति भावः । अहं सतां विदुषां प्रिय आत्मा, सर्वात्माप्यविदुषां भेदभ्रमेण तदात्मास्वीकारात् । श्रद्धया शास्त्रोक्ताभेदविश्वासेन या एकसत्स्वरूपा भक्तिस्तयैव ग्राह्यो ज्ञातुं साक्षात्कर्तुं च शक्यः "ज्ञानकारणसामग्र्यां भक्तिरेव गरीयसी । स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते ॥ " इति भगवत्पूज्यपादोक्तेः ॥ * ॥ श्रद्धया भक्त्या श्रद्धापूर्विकया केवलया भक्त्या त्वहमेव ग्राह्यः क्रमाद्दर्शीकार्यः सैव मन्निष्ठा मयि दाढर्यं गता सती ॥ * ॥ **विश्वनाथस्तु**—एकया न त्वन्येन योगादिना । तेन यदन्यत्र ज्ञानादीनामपि ब्रह्मप्राप्तिसाधनत्वं श्रूयते तत्रापि गुणीभूता भक्तिरेव तत्प्रापिकेति ज्ञेयम् । तदेवं ज्ञानसत्कर्मादिकं भगवन्तं साधयितुमसमर्थं केवलं पापनाशकतयैव सार्थकमभूदिति स्थितम् । तत्रापि भक्तेर्यथा पापनाशकता न तथा ज्ञानादीनामित्याह—भक्तिरिति सार्द्धेन । तेन प्रारब्धपापनाशकता भक्तेर्बुध्यते ॥ २१ ॥ साधनांतरवैयर्थ्यमाह—भक्त्यभाव इति । अपेतं हीनम् ॥ * ॥ किञ्च—ज्ञानादिकं पापनाशकत्वमपि भक्तिसाहित्येनैव भक्तिराहित्येन तु किञ्चिन्मात्रमेवेत्याह—धर्म इति । विद्या ज्ञानम् ॥ २२ ॥ यद्यपि सुज्ञा वैष्णवसिद्धांताचलनत्वादिव्रतेनास्य भक्तिरस्तीति जानते तथाप्यज्ञजनबोधाय भक्तेः प्रत्यक्षज्ञापकमाह—कथमिति ॥ * ॥ अंतःकरणं तु सम्यक्तया भक्तिरेव शोधयति नान्यत्साधनं, सा च भक्ती रोमाञ्चाद्यनुभवगम्येत्याह—कथमिति । भक्त्या हेतुना यद्द्रवच्चेतस्तेन विना कथं साधनांतरेण रोमहर्षः, कथं वानंदाश्रुकला रोमहर्षं विना, आनंदाश्रुकलया च विना कथमाशयः शुध्येदित्यन्वयः । तदुक्तं कलियुगपावनावतारेण भगवता—"श्रुतमप्यौपनिषदं दूरे हरिकथामृतात् । यन्न संति द्रवच्चित्तकंपाश्रुपुलकादयः ॥ " इति । तेन निष्कामकर्मयोगादयो बहुप्रमाणसिद्धा अंतःकरणस्य शोधकास्तावद्भवंतु, किंतु तस्य येन कषायेण भगवदपरोक्षानुभवो न भवति तं कषायं तु प्रेमभक्तिरेव ज्वालयति न तु ज्ञानाग्निरपीति भावः । तदेव व्यतिरेकेणाह—कथमिति । रोमहर्षस्तावद्यत्किञ्चिच्चेतोद्रवस्य चिह्नम्, आनंदाश्रुकला तु विशिष्टस्य तस्य चिह्नम्, चेतोद्रवस्तु भक्तेरंतरंगस्वभाव इति । तथातथोक्तम्—रोमहर्षेणानंदाश्रुकलया च विना कथं तारतम्येन चेतोद्रवोऽवगम्यते, द्रवता चेतसा च विना कथं भक्तिराविर्भवति, भक्त्या च विना कथमाशयः शुद्ध्येदिति ॥ २३ ॥ कैमुत्येन भक्तेर्वैभवांतरमाह—किञ्चेति । गद्गदा त्रुट्यंतीव प्रतीताऽस्पष्टाक्षरा । "चित्तद्रवस्तथा धैर्यं प्रसादो भक्तिलक्षणम् । आधिक्येन च तत्रापि स्थैर्यमेव विशेषतः ॥ " इति । एतेन समीचीनभक्तोऽपि भुवनं पुनाति किं पुनर्भक्तिरिति भावः ॥*॥ मद्भक्तियुक्तो मत्प्रेमाशयपात्रश्चेद्भुवनमपि पुनाति किमुताशयं संगिनो ग्रामं देशं मंडलं वर्षं द्वीपादिकं चेत्यर्थः । गद्गदाऽस्पष्टाक्षरा ॥२४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथाऽग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते स्वरूपम् ॥ आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो माम् ॥२५॥ यथायथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ॥ तथातथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तम् ॥ २६ ॥ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते ॥ मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥२७॥ तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितम् ॥ ॥ २८ ॥ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिं तयेन्मामतंद्रितः ॥२९॥ न तथाऽस्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ ३० ॥

अपि च भक्त्यैवात्मशुद्धिर्नान्यत इति सदृष्टांतमाह । यथेति । यथाऽग्निना ध्मातं तापितमेव हेम सुवर्णमंतर्मलं जहाति न क्षालनादिभिः । स्वं निजं रूपं च भजते । कर्मानुशयं कर्मवासनाम् । मां भजते मद्रूपतामापद्यते ॥ २५ ॥ ननु "ब्रह्मविदाप्नोति परम् । तमेव विदित्वाऽतिमृत्युमेति" इत्यादिश्रुतिभ्यो ज्ञानादेवा विद्यानिवृत्त्या त्वत्प्राप्तिरवगम्यते । कुतो भक्तियोगेनेत्युच्यते तत्राह । यथायथेति । आत्मा चित्तं परिमृज्यते शोध्यते मत्पुण्यकथानां श्रवणैरभिधानैश्च । भक्तेरेवावांतर व्यापारो ज्ञानं न पृथगित्यर्थः ॥ २६ ॥ किंच ज्ञानं नाम चित्तस्य मदाकारपरिणामः स च मां भजतः स्वभावत एव भवति न च यत्नांतरमपेक्षत इति सदृष्टांत माह । विषयानिति ॥ २७ ॥ यस्मादन्यसाधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति । तस्मा दिति । मद्भावभावितं मद्भावेन मद्भजनेनैव शोधितम् ॥ २८ ॥ विशेषतो वात्स्यायनाद्युक्तकाममार्गाः परित्याज्या इत्याह । स्त्रीणामिति । आत्मवान् धीरः सन् । क्षेमे निर्भये देशे । विविक्ते विजने ॥ २९ ॥ एतदुपपादयति । न तथेति । अस्य पुंसो यथा तत्संगिसंगतः क्लेशो भवेत् । यथा च बंधो योषित्संगतस्तथाऽन्यप्रसंगतो न भवे

अग्निना मुखवायुसंयोगोज्ज्वलितेन । मलमष्टादशदोषलक्षणम् । स्वरूपं निर्दोषभास्वरलक्षणं वा । आदिना घर्षणादिग्रहः ॥ * ॥ अथो कात्स्न्येंन भजति पूर्णां सेवापद्धतिमाप्नोति ॥ २५ ॥ श्रुत्यवष्टं भेनाक्षिपति—नन्विति । तमात्मानं ज्ञात्वा मृत्युं संसारमत्येति तरतीत्यर्थः । आदिना "ज्ञानादेव हि कैवल्यम्" इत्यादिश्रुतिग्रहः । इत्यर्थ इति—ज्ञानस्य भक्त्यविनाभूतत्वेनासिद्धेर्भक्त्यवस्थांतरमेव ज्ञानमिति भावः । तत्त्वसूक्ष्मं दुर्ज्ञेयब्रह्मतत्त्वम् ॥ * ॥ आदिभजनमारभ्य केवलया भक्त्यैवात्मशोधनतारतम्येन श्रवणकीर्तनस्मरणादितारतम्यात्तन्माधुर्यानुभवतारतम्यं प्राप्नोतीत्याह—यथेति । 'तत्त्वसूक्ष्मम्' इति पाठे तु तत्त्वं मद्रूपलीलादिस्वरूपं सूक्ष्मं तन्माधुर्यानुभवविशेषं, द्वंद्वैक्यम् । यद्वा—पूर्वनिपातभाव आर्षः ॥ २६ ॥ तदेवाह—किंच । विषज्जते विलीयते ॥ * ॥ तादृशश्रवणादिनिष्ठानां त्वद्भक्तानां चित्तं त्वयि कीदृशं स्यादित्यत आह—विषयानिति । विषय ध्यानासक्तं चित्तं यथा विषयमाधुर्यनिमग्नं दृष्टं तथैव मदीयध्यानासक्तं चित्तं मन्माधुर्यमात्रनिमग्नं स्यात् ॥ २७ ॥ फलितमाह—यस्मादिति ॥ * ॥ यस्मादन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्त द्विहाय केवलया भक्त्यैव मयि मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति—मद्भावेन मद्भावनयैव भावितं भावयुक्तीकृतम् ॥ २८ ॥ भक्तिविरोधित्यागमाह—विशेषत इति । आदिना भरतादिग्रहः । अतंद्रितो निरालसः ॥ * ॥ विशेषतो वात्स्यायनाद्युक्ताः काममार्गास्त्याज्या इत्याह—स्त्रीणामिति । यत आत्मवान्धृतियुक्तः । तत्संगे सति धृतिर्न तिष्ठतीति भावः ॥ २९ ॥ एतदसदभिध्यानम् । तासां संगस्तत्संगस्सोस्यास्तीति सत्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धव उवाच ॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकम् ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि॥३१॥श्रीभगवानुवाच ॥ सम आसन आसीनः समकायो यथासुखम् ॥ हस्तावुत्संग आधाय स्वनासाग्रकृतेक्षणः ॥ ३२ ॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रियः ॥ ३३ ॥

दिति ॥ ३० ॥ मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति । यथेति ध्यानांगप्रश्नः । यादृशमिति ध्येयविशेषणप्रश्नः । यदात्मकमिति यस्य तानि विशेषणानि तत्स्वरूपप्रश्नः । एतन्मे ध्यानं मे वक्तुमर्हसीति पाठः । तत्रायमर्थः । मुमुक्षुस्त्वां यथा ध्यायेत् तन्मे वक्तुमर्हसीति जिज्ञासोः कथनाय । मे पुनरेतत्त्वद्दास्यमेव पुरुषार्थो न तु ध्यानेन कृत्यमस्तीति । तदुक्तम् । त्वयोपभुक्तस्रग्गंधेत्यादि । त्वं वक्तुमर्हसीति पाठः सुगमः ॥ ३१ ॥ तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह सम इति चतुर्भिः । समे नात्युच्छ्रिते नातिनीचे आसने कंबलादौ समकायः सन् यथासुखमासीन इति । नास्ति स्वस्तिकादिनियम इत्युक्तम् । नासाग्रनिरीक्षणं च चित्तस्थैर्याय । "अंतर्लक्ष्यो बहिर्दृष्टिः स्थिरचित्तः सुसंयतः" इति योगशास्त्रोक्तेः ॥ ३२ ॥ विपर्ययेण रेचकपूरककुंभकक्रमेणापि । यद्वा वामनाड्या पूरितं दक्षिणया त्यजेत्तया वा पूरितं वामयेत्येवं विपर्ययेण । यथोक्तं योगे । "इडया पूरयेद्वायुं त्यजेत्पिंगलया ततः॥पिंगलापूरितं वायुमिडया च परित्यजेत्॥" इति । निर्जितेंद्रिय इति प्रत्याहार उक्तः॥३३॥

गी तस्य संगात्, अग्निस्तथा न दहति यथा तत्संगिलोहमिति भावः ॥ * ॥ यथा तत्संगिसंगत इति—योषित्संगिसंगत्यागे भूयानेव यत्नः कार्यः, यतः योषित्संगे स्वीया लज्जा प्रतिष्ठा च बाधिकास्ति तत्संगिसंगे तु प्रायस्ते अपि न बाधिके । एवं च योषित्संगी यथा तत्कथाभिस्तस्यामासंजयति लज्जाभयादिकमपि त्याजयति न तथा योषिदपि । अत्र तप्तायःपिंडाग्निदृष्टान्तोनुकूलः । यद्यपि क्लेशो बंधश्चोभयत्र तुल्यौ तथापि ह्यन्वेषणादिक्लेशस्य तत्संगिसंगः कारणं, बंधस्य स्त्रीकारणम् ॥ ३० ॥ तत्र पाठे । मम ध्यानप्रश्नो जिज्ञासुर्यदिमां पृच्छेत्कीदृग्ध्यानं कुर्यात्तत्कथनायैवेति भावः । एतत्पदस्य त्वद्दास्यमित्यर्थस्तु प्रथमांतमुमुक्षुपदस्य पृथगुच्चारणसामर्थ्यात् । अन्यथा—'ध्यायेन्मुमुक्षवे ह्येतद्ध्यानं मे' इति पाठः स्यादिति प्रतीयते । यद्वा—मे ध्यानं मदिष्टं ध्यानं मन्मनोलग्नतार्हं वा । सुगमः सुबोधः ॥ * ॥ भक्तिं विना किमपि साध्यं न सिध्यतीति भगवद्वाक्यान्निश्चित्य सर्वेषां मार्गाणां प्रकारज्ञानं विना स्वमार्गोत्कर्षज्ञानमतिसुखदं न भवतीति भावेन मोक्षाकांक्षिणो ध्यानभक्तेः प्रकारादीन्पृच्छति—यथेति । ननु मुमुक्षोर्ध्यानेन पृष्टेन तवैकांतिकस्य किं तस्मात्, तस्माद्यथा त्वामहं ध्यायामि तद्वदेत्येवं पृच्छयतामित्यत आह—मे मम तु । एतद्ध्यानमिति संहतपाणिद्वयेन तस्य चरणद्वयं दर्शयति । 'ध्यानं त्वं वक्तुमर्हसि' इति पाठः सुगमः ॥ ३१ ॥ तत्रादौ "नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्" "समं कायशिरोग्रीवं धारयन्नचलं स्थिरः" इत्यादिश्रीगीतोक्तेः । अंतश्चेतस्येव लक्ष्यो यस्य स तथा ॥ * ॥ ० ॥ ३२ ॥ विपर्ययेण मत्प्रोक्तपूरककुंभकरेचकाख्यक्रमवैपरीत्येन । योगशास्त्रे तु वैपरीत्यमन्यथोक्तमित्याह—यद्वेति । पूरकादिस्वरूपं तु—"बाह्यस्थितं नासपुटेन वायुमाकृष्यते नैव शनैः समस्तम् । नाडीषु सर्वासु च पूरयेद्यः स पूरको नाम महान्निरोधः ॥ न रेचको नैव तु पूरको वा नासाग्रचारी स्थित एव वायुः । सुनिश्चलं धारयति क्रमेण कुंभाख्यमेनं प्रवदंति तज्ज्ञाः ॥ निष्क्रम्य नासाविवरादशेषं प्राणं बहिः शून्यमिवानलेन । निरुच्छ्वसंस्तिष्ठति चोर्ध्ववायुः स रेचको नाम महान्निरोधः ॥" इति । प्रत्याहारस्तु—"शब्दादिभ्यः प्रपन्नानि यदक्षाणि यतात्मभिः । प्रत्याह्रियन्ते योगेन प्रत्याहारस्ततः स्मृतः ॥" इति ॥ * ॥ द्वादशांगुलपर्यंतमनाहतचक्रं प्रति नत्वाऽत एव 'हृदि संतम्'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् ॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरम् ॥ ३४ ॥ एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् ॥
दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ॥ ३५ ॥ हृत्पुंडरीकमंतःस्थमूर्ध्वनालमधोमुखम् ॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ॥ ३६ ॥

प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति । तत्र श्रेष्ठत्वात्प्रणवगर्भमाह हृदीति द्वाभ्याम् । मूलाधारादारभ्याविच्छिन्नं संततं घंटानादतुल्यमोंकारं हृदि संस्थितं प्राणेनोदीर्योर्ध्वं द्वादशांतपर्यंतं नीत्वा । कथम् । बिसोर्णवत्कमलनालतंतुवत् । तत्र मात्रातीते स्वरं पंचदशं बिंदुं संवेशयेत् । अथ पुनरित्यस्य तं च बिंदुशिरस्कं कुर्यादित्यर्थः । यद्वा मूलाधारादारभ्य मूर्धांतपर्यंतं बिसतंतुवत्सूक्ष्ममविच्छिन्नं संततं हृदि मनसि प्राणेनोदीर्याभिव्यज्याथ पुनस्तत्रोंकारे घंटानादतुल्यं स्वरमुदात्तं नादं स्थिरीकुर्यादिति ॥ ३४ ॥ मासादर्वाक् जितानिलो भवति ॥ ३५ ॥ एवं ध्यानांगमुक्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह हृत्पुंडरीकमिति सार्धेन । अंतःस्थं देहांत

इत्युक्तम् ‘ हृदये स्यादनाहतम् ’ इत्युक्तत्वात् ॥ ३३ ॥ तत्र सगर्भागर्भयोर्मध्ये । मूलाधारात्तन्नामकगुदेंद्रियस्थचक्रात् । द्वादशांतपर्यंतं द्वादशमात्रापर्यंतम् । तल्लक्षणं योगशास्त्रे–“ चक्षुःस्पंदनमात्रस्य यावद्द्वादशसंज्ञकाः । तावन्निरुध्यते प्राणः प्राणायामः स एव हि ॥ ” । यद्वा–“ स्वजानुतः करावर्तं यावद्द्वादशछोटिकाः । तावन्निरुध्यते प्राणः प्राणायामः स कीर्तितः ॥ प्राणायामो लघुस्त्वेको द्विगुणो मध्यमः स्मृतः । उत्तमस्त्रिगुणो ज्ञेय इत्येषा वैदिकी स्थितिः ॥ ” इति । बिंदूपनिषदि तु–“ घोषिणी प्रथमा मात्रा विद्युन्माली तथा परा । पतंगी च तृतीया स्याच्चतुर्थी वायुवेगिनी ॥ पंचमी नामदेया च षष्ठी चैन्द्री विधीयते । सप्तमी वैष्णवी नाम शांकरी च तथाष्टमी ॥ नवमी महती नाम ध्रुवेति दशमी स्मृता । एकादशी भवेन्मौनी ब्राह्मीति द्वादशी मता ॥ ” इति मात्रानामान्युक्तानि । फलं चासां प्राणवियोगकाले तत्रैवोक्तम्–“ प्रथमायां तु मात्रायां यदि प्राणैर्वियुज्यते । स राजा भारते वर्षे सार्वभौमः प्रजायते ॥ द्वितीयायां समुत्क्रांतो भवेद्यक्षो महात्मवान् । विद्याधरस्तृतीयायां गंधर्वश्च चतुर्थिकाम् ॥ पंचम्यामथ मात्रायां यदि प्राणैर्वियुज्यते । उषितः सह देवैस्तु सोमलोके महीयते ॥ षष्ठ्यामिंद्रस्य सायुज्यं सप्तम्यां वैष्णवं पदम् । अष्टम्यां व्रजते रुद्रं पशूनाञ्च पतिं तथा ॥ नवम्यां च महर्लोकं दशम्यां च ध्रुवं व्रजेत् । एकादश्यां तपोलोकं द्वादश्यां ब्रह्म शाश्वतम् ॥ ” इति । तत्रोंकारे मात्रातीते द्वादशमात्रामतिक्रम्य भाविते पंचदशं मातृकायामकारादारभ्य गणनायां पंचदशममिति बिंदुरूपमनुस्वारसंज्ञम् । अथ पुनरित्यक्षरचतुष्कस्येत्यर्थ इदं विवरणम् । तमोकाररूपं प्रथममुच्चारयन्द्वादशमात्रातीते सबिन्दुमुच्चारयन्ध्यायेदित्यर्थः । पूर्वव्याख्याने बिन्दुशिरस्कस्य पुनर्बिन्दुशिरस्ककरणं प्राकृतजनबुद्ध्यारूढं न भवति, ओकाररूपेणोच्चारणे तु प्रणवसाकल्यं न स्यादित्यतोऽर्थांतरमाह–यद्वेति । विशेषस्त्वजपाप्रसंगेनोक्त एव प्राक् ॥ * ॥ मात्रातीत इति–यथा घंटानादे मात्रा नास्ति तथा मात्राशून्य इत्यर्थः । तं चोंकारबिंदुः शिरसि यस्य तथाभूतं कुर्यात् । वस्तुतस्तु नादशिरस्कमित्येव वाच्यम्, नादस्य तदंगत्वेनावश्यं वाच्यत्वात् । प्राणेन प्राणायामेन मनसि भावनयाभिव्यक्तं कृत्वेति दीपिका ॥ ३४ ॥ प्राणं प्राणायामम् । प्रतिदिनं त्रिषवणं त्रिकालं दशकृत्वोऽभ्यस्यतो मासादर्वाक् मासात्प्रागेव जितानिलः प्राणप्रसादं प्राप्तो भवतीत्यर्थः ॥ * ॥ प्राणं प्राणायामम् ॥ ३५ ॥ नालं दंडाकारम् उर्द्ध्वभागे । पुष्पभागस्त्वधोमुखोऽस्तीत्यर्थः ॥ * ॥ ध्येयस्य भगवतः पीठं सिंहासनं हृत्पुंडरीकमिति । उन्निद्रप्रतियोगित्वेन मुकुलितमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरम् ॥ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलम् ॥ ३७ ॥ समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजम् ॥ सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितम् ॥ ३८ ॥ समानकर्णविन्यस्तस्फुरन्मकरकुंडलम् ॥ हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनम् ॥ ३९ ॥ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतम् ॥ ४० ॥ द्युमत्किरीटकटककटिसूत्रांगदायुतम् ॥ सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणम्॥४१॥सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् ॥ इंद्रियाणींद्रियार्थेभ्यो मनसाऽऽकृष्य तन्मनः॥बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ॥४२॥ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् ॥ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखम् ॥ ४३ ॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् ॥ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ॥ ४४ ॥

र्वर्ति ऊर्ध्वनालमधोमुखं मुकुलितं च कदलीपुष्पसंकाशं यदस्ति तद्विपरीतं ध्यात्वेत्यर्थः ॥ ३६ ॥ न्यसेच्चिंतयेत् । सविशेषणं ध्यानमाह वह्निमध्य इति षड्भिः । ध्यानमंगलं ध्यानस्य शुभं विषयम् ॥ ३७ ॥ सममनुरूपावयवम् । दीर्घाश्चारवश्चत्वारो भुजा यस्मिंस्तत् । सुचारु अतिरम्यम् ॥ ३८ ॥ समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मिंस्तत् । श्रीवत्सश्रियोर्निकेतनं वक्षसि दक्षिणवामतः ताभ्यां युक्तमित्यर्थः ॥ ३९ ॥ ४० ॥ द्युमद्भिः किरीटादिभिरासमंतायुतमलंकृतम् । प्रसादेन शोभनं मुखमीक्षणं च यस्मिंस्तत् ॥ ४१ ॥ सुकुमारमतिकोमलम् । सविशेषणं ध्यानमुपसंहरति । इंद्रियाणीति । प्रकर्षेण नयेत् । सर्वतः सर्वांगयुक्ते ॥ ४२ ॥ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरतया शनैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः । एकत्रांगे । अन्यान्यंगानि न चिंतयेत् । एकत्रेति यदुक्तं तदेवांगं दर्शयति । सुस्मितमिति ॥ ४३ ॥ व्योम्नि सर्वकारणरूपे । तच्च कारणत्वमपि त्यक्त्वा मदारोहो मयि शुद्धे ब्रह्मण्यारूढः सन् किंचिद्ध्यातृध्ये

त्यध्याहृतम् । सूर्यादिमंडलानि ध्यायेत् ॥ ३६ ॥ उत्तरोत्तरं क्रमानतिक्रमेण । एतद्वक्ष्यमाणम् ॥ * ॥ उत्तरोत्तरं क्रमेणांतरंतःक्रमेण ॥ ३७ ॥ ० ॥ * ॥ अनुरूपावयवम्—अन्यूनाधिका अवयवा यस्मिन्रूपे ॥ ३८ ॥ इत्यर्थ इति—वामे श्रीर्दक्षिणे च भागे श्रीवत्समिति भावः ॥*॥ श्रीवत्सो वक्षसो दक्षभागे रोम्णां दक्षिणावर्तो भृगुलतासंज्ञकः, श्रीश्च वामभागरोम्णामावर्तो हेमरेखा रूपा वा, ते निकेतने असाधारणाचिह्ने यस्य तम् ॥३९॥ ० ॥ * ॥ आयुतं समंतादलंकृतम् । शंखेति सार्द्धयुग्मम् ॥ ४० ॥ ० ॥ * ॥ ० ॥४१॥ सर्वस्मिन्निति सर्वतः, सप्तम्यर्थे तसिः । सर्वांगेषु इत्यर्थः ॥ * ॥ इन्द्रियाणि चक्षुरादीनि । इन्द्रियार्थेभ्यः विषयेभ्यो रूपादिभ्यः । सारथिना सहायरूपया 'सहाये सारथिः सूते मित्रे' इति कोशात् ॥ ४२ ॥ ० ॥ * ॥ ० ॥ ४३ ॥ तत्र मुखे ॥ * ॥ तत्र लब्धपदमित्यादिकं मुमुक्षुध्यानत्वात् । यद्वा—तदनंतरं ब्रह्मानुसंधानं मायावृत्तिलेशावशेषलोपेच्छया, तल्लोपे च स्वतः श्रीभगवत्स्फूर्तिर्भवतीति 'ब्रह्मभूतः प्रसन्नात्मा' इतिवत् ॥ * ॥ **विश्वनाथस्तु**—लब्धपदं ततोऽन्यत्रागत्य तत्रैव स्थिरीभूतमित्यर्थः । अतश्चात्र मुखध्यान एव लब्धं मुखध्यानमजहदेवेत्यर्थः । ''भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत्'' इति श्रीकपिलोक्तेः । कर्मज्ञानादित्यागवद्भक्तिध्यानत्यागेच्छाया निषिद्धत्वात् । आकृष्य देहेंद्रियादिभ्यः पृथक्कृत्य, न तु ध्यानभक्तेरपि पृथक्कृत्वेत्यर्थः । न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं समाहितमतिर्मामेवात्मानमात्मनि ॥ विचष्टे मयि सर्वात्मञ्ज्योतिर्ज्योतिषि संयुतम् ॥ ४५ ॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः ॥ संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवादे भक्तियोगनिरूपणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ श्रीभगवानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठंति सिद्धयः ॥ १ ॥ उद्धव उवाच ॥ कया धारणया कास्वित्कथंस्वित्सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् ॥ २ ॥ श्रीभगवानुवाच ॥ सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः ॥ तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ॥ ३ ॥

यंविभागमपि न चिंतयेत् ॥ ४४ ॥ मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे । ज्योतिर्ज्योतिषि संयुक्तमिवेत्यन्वयः ॥ ४५ ॥ एवंभूतसमाधिपर्यंत ध्यानस्य फलमाह । ध्यानेनेति । मनो युंजतः समादधतः द्रव्यज्ञानक्रियाभ्रमोऽधिभूताधिदैवाध्यात्मरूपो दृश्यद्रष्टृदर्शनरूपो वा भ्रमो निर्वाणं शांतिं सम्यग्यास्यतीति ॥ ॥ ४६ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः ॥ श्रीविष्णुपदसंप्राप्तावंतराय तया मताः ॥ १ ॥ एवं मनो युंजतो योगिनोंतराविर्भवंत्यः सिद्धयोऽप्यंतरायप्राया एवातस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं सिद्धीराह । जितेंद्रियस्येति । युक्तस्य स्थिरचित्तस्य ॥ १ ॥ स्विदिति वितर्के । कास्वित्किंनामा कथंस्वित्कीदृशी वा । धारणाश्च कतीति प्रश्नांतरे वाशब्दः । त्वमेवैतज्जानासि नान्य इत्याशयेनाह । योगिनामिति ॥ २ ॥ धारणाश्चाष्टादशेत्यनुषंगः । योगपारगैरिति । त्रिकालज्ञत्वादिक्षुद्रसिद्धीरन्येऽपि जानंतीति भावः । अहमेव प्रधानं मुख्यः स्वभावत आश्रयो

किंञ्चिदपि चिन्तयेत् किन्तु भक्तिकणिकायुक्तो जीवो ब्रह्मप्रविष्टो ब्रह्मैवानुभवेदिति भावः । श्रीहंसदेवेन गुणचेतसोस्त्यागो य उक्तस्तस्यायमेव प्रकार इति ज्ञेयम् ॥ ४४ ॥ सर्वात्मन्निति 'परमे व्योमन्' इतिवत् । यद्वा—सम्यग्युतं संयुतमभिन्नमित्यर्थः ॥ * ॥ किंतु ध्यानमयी भवेदित्याह—मामेव ब्रह्म आत्मनि जीवात्मनि विचष्टे, आत्मानञ्च सर्वात्मनि मयि संयतः विचष्टे, ज्योतिर्ज्योतिषि संयुतमिति ब्रह्मजीवयोरप्राकृतस्वीयपूर्णज्योतिर्ज्योतिःकणत्वं ज्ञापितम् । यद्वा—मां तत्पदार्थमेव चिद्रूपत्वेनानुगतमात्मनि त्वंपदार्थे विचष्टे, आत्मानं त्वंपदार्थं ज्योतिःकिरणमिव ज्योतिषि किरणमालिनि संयुतमित्याश्रितं विचष्टे ॥ ४५ ॥ एवंभूतसमाधिर्निर्विकल्पसमाधिस्तत्पर्यंतस्य ध्यानस्य संभवत्वादपरोप्यर्थ इत्याह—दृश्येत्यादि । संयास्यति संयातीत्यर्थः ॥ * ॥ ० ॥ ४६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥ ततो ध्यानवर्णनोत्तरम् । धारणानुगा धारणानुरूपाः । अंतरायतया विघ्नरूपतया (१) । यतोंतरायप्राया अतो हेतोः । ताः सिद्धीः । परिहृत्य त्यक्त्वा । 'नापृष्टः कस्याचिद् ब्रूयात्' इत्युक्तेः । प्रश्नबीजमुत्थापयति—उपतिष्ठंतीति ॥ * ॥ अन्तराय तया विघ्नतया अन्तरायप्राया एव कर्दमादिविधानां तु "तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात्" इत्यनुसारेण सिद्धिसत्त्वेपि नान्तराया इति प्रायग्रहणम् ॥ १ ॥ ० ॥ * ॥ ० ॥ २ ॥ तत्तदधिष्ठानगततत्तद्भगवद्रूपविशेषानुस्मरणं धारणेत्युच्यते । वस्तुतः सिद्धीनां ज्ञानफलत्वेपि धारणाफलत्वकथनं तूपचारत एवान्यथानुत्पन्नज्ञानस्यापि धारणामात्रेण तत्तत्सिद्धिप्रसंग इति । असुरादीनां तु भगवत्क्लृप्तमायाहेतुका एव सिद्धयो नान्यथेति । इति भाव इति—क्षुद्रसिद्धयः क्षुद्रदेवाराधनादिनापि जायंत इति तात्पर्यम् । इति भाव इति—मत्सारूप्येषु मत्पार्षदेष्वपि मत्सदृशा अणिमाद्या न भवन्तीति तात्पर्यम् । सत्त्वस्योत्कर्ष आधिक्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः ॥ प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ॥ ४ ॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति ॥ एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः ॥ ५ ॥ अनूर्मिमत्त्वं देहेऽस्मिन्दूरश्रवणदर्शनम् ॥ मनोजवः कामरूपं परकायप्रवेशनम् ॥ ६ ॥ स्वच्छंदमृत्यु र्देवानां सहक्रीडानुदर्शनम् ॥ यथासंकल्पसंसिद्धिराज्ञाऽप्रतिहताऽऽगतिः ॥ ७ ॥

यासां ताः मत्सारूप्यं प्राप्तेषु किंचिन्न्यूना भवंतीति भावः । गुणहेतवः सत्त्वोत्कर्षहेतुकाः ॥ ३॥ ताः स्वरूपेणोपदिशति अणिमेति सार्धैः पंचभिः । अणिमा महिमा लघिमा च मूर्तेर्देहस्य तिस्रः सिद्धयः । प्राप्तिर्नाम सिद्धिः सर्वप्राणिनामिंद्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः । श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाश्यं भोगदर्शनसामर्थ्यं सिद्धिः । शक्तीनां मायातदंशभूतानां प्रेरणम् । तत्रेश्वरे मायाया अन्येषु तदंशानां प्रेरणमीशिता नाम सिद्धिः ॥ ४ ॥ विषयभोगेष्वसंगो वशितासिद्धिः । यत्कामो यद्यत्सुखं कामयते तत्तदवस्यति तस्यतस्य सीमानं प्राप्नोतीति सिद्धिः । औत्पत्तिकाः स्वाभाविक्यो निरतिशयाश्चेत्यर्थः ॥ ॥ ५ ॥ गुणहेतुसिद्धीराह । अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यम् । दूरे श्रवणं दर्शनं चेति द्वे सिद्धी । मनोजवः मनोवेगेन देहस्य गतिः । कामितरूपप्राप्तिः । परकाये प्रवेशः ॥ ६ ॥ स्वेच्छामृत्युः । अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः । संकल्पानुरूपप्राप्तिः । अप्रतिहता आसमंताद्गतिर्यस्याः सा आज्ञा चेत्येता

हेतुर्यासां तास्तथा ॥ * ॥ मत्प्रधाना इति–स्वरूपशक्तिवृत्तिविशिष्टत्वेनोपास्यमानान्मत्त एव मत्पार्षदवत्स्वरूपशक्त्येशानां तेषामाविर्भावात्, अन्यत्र तु तदाभासानामेवेति ज्ञेयम् । गुणहेतव इति–मदुपहितत्वेनोपास्यमानेभ्योऽपि तत्कार्येभ्य एव तदंशानां तेषां प्रापंचिकजनेष्वाविर्भावात् ॥ * ॥ **संदर्भः**–मत्प्रधानाः प्रधानलक्षणाविशेषणेन विशेष्याश्रयोपस्थितिः, मुख्याश्रयत्वं भगवत एव, योगिषु तदाभासः, तेषां सम्यग्भगवत्परत्वाभावात् ॥ ३ ॥ ताः सिद्धीः । इत्यर्थ इति–सर्वेषामिंद्रियदेवानामैक्यादन्यानुभूतविषयप्राप्तिरिति भावः । पारलौकिकेषु इंद्रादिविषयेषु दर्शनयोग्येष्वैहिकेषु देशांतरीयेष्वपि प्राकाश्यं सिद्धिर्नाम । तत्र द्वयोर्मध्ये । अन्येषु ईश्वरेतरेषु देवादिनरादिषु । तदंशानां मायांशानामविद्यादीनाम् ॥ * ॥ अणिमेति युग्मकम् । अणिम्ना भवति अणुः यतः शिलामपि प्रविशति । महिम्ना महान्भवति यतः सर्वं व्याप्नोति । लघिम्ना लघुर्भवति यतः सूर्यमरीचिमवलंब्य सूर्यलोकं याति । प्राप्त्यांगुल्यग्रेण स्पृशति चन्द्रमसम् । प्राकाम्यमिच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति च यथोदके । ईशित्वं यतो भूतभौतिकानां प्रभवस्थितिव्ययानामीष्टे व्यूहे मिलनम् । वशित्वम् उपस्थितेषु दृष्टानुश्रविकादिषु यतमानादिसंज्ञात्रयं वैराग्याणां कामावसायित्वं सत्यसंकल्पता ‘ यथास्य संकल्पो भवति तथैव भूतानि भवन्ति ’ इति सांख्यकौमुद्यां वाचस्पतिमिश्राः । अत्र ‘प्राकाम्यमिच्छाभिघातः’ इत्येव वाचस्पतिमिश्रादिभिर्व्याख्यातत्वात् । प्राकाश्यमिति पाठः ‘ तस्माद्दर्शनसामर्थ्यम् ’ इति व्याख्यातस्य हृदयमबुद्ध्वा केनचित्कल्पितः प्रतिभाति ॥ ४ ॥ तस्यतस्य सुखस्य अस्याः सिद्धेर्ग्रंथांतरे प्रकाम्यमिति । इत्यर्थ इति–“स्वाभाविकाधिक्ययोश्च शब्द औत्पत्तिको मतः ” इति निरुक्त्युक्तेः । “ सर्वाधिका अणिमाद्या विष्णोर्नान्यस्य कस्यचित् ” इति विजयध्वजोक्तेरिति व्याख्येति ॥ * ॥ ० ॥ ५ ॥ गुणहेतुसिद्धीः सत्त्वोत्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता ॥ अग्न्यर्कांबुविषादीनां प्रतिष्टंभोऽपराजयः ॥ ८ ॥ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः ॥ यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥ ९ ॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः ॥ अणिमानमवाप्नोति तन्मात्रोपासको मम ॥ १० ॥ महत्यात्मन्मयिपरे यथासंस्थं मनो दधत् ॥ महिमानमवाप्नोति भूतानां च पृथक्पृथक् ॥ ११ ॥ परमाणुमये चित्तं भूतानां मयि रंजयन् ॥ कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् ॥ १२ ॥

दश ॥ ७ ॥ क्षुद्रसिद्धीश्च पंचाह । त्रिकालज्ञत्वमिति । अद्वंद्वं शीतोष्णाद्यनभिभवः । अग्न्यादीनां संस्तंभनम् ॥ ८ ॥ तत्तद्धारणाभिः सह विशेषतो निरूपयति ययेति यावत्समाप्ति ॥ ९ ॥ भूतसूक्ष्मोपाधौ मयि तन्मात्रं भूतसूक्ष्माकारम् । स तन्मात्रोपासकः । मम मदीयमणिमानम् ॥ १० ॥ ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि । यथासंस्थं महत्तत्त्वाकारम् । भूतानां चेति । आकाशादिभूतोपाधौ च मयि मनो धारयंस्तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ॥ ११ ॥ वाय्वादिभूतानां ये परमाणवस्तन्मये तदुपाधौ मयि चित्तं रंजयन् योगी कालसूक्ष्मार्थतां कालपरमाणूपाधिरूपतामिति लघुत्वविवरणम् । तदुक्तम् । "स कालः परमाणुर्वै यो भुंक्ते

षैक्रताः ॥ * ॥ ० ॥ ६ ॥ ७ ॥ अष्टादशभ्योऽन्याः क्षुद्रसिद्धीः पंच । संस्तंभनं वेगनिरोधः । आदिशब्देन शस्त्रास्त्रादिग्रहः । अथासामंतर्भावभेदेनाष्टादश सिद्धयः, अष्ट सिद्धय इति केषांचित्पक्षः । तथाहि–अनूर्मिमत्त्वस्य प्राकाम्यांतर्गतत्वेन ते उभे एका, दूरश्रवणदर्शनत्रिकालत्वपरचित्ताद्यभिज्ञतानां प्राकाश्यांतर्भावेन चतस्र एका, कामरूपत्वस्याणिमलघिमांतर्भावेनैका, अग्निस्तंभार्कस्तंभजलस्तंभविषस्तंभशस्त्रास्त्रशापादिस्तंभानामीशित्वांतर्भावेन पंच, अपराजयोपीशित्वांतर्गत इति षट् । मनोजवकामरूपपरकायप्रवेशस्वच्छंदमृत्युतानां देवैः सह तत्क्रीडानुदर्शनाज्ञाप्रतिहतीनां प्राप्त्यंतर्भावेन षट् । अत्र कामरूपत्वस्य द्विरुक्तिस्तु रूपभेदेन न विरुध्यते । तथाहि–"मूलभूतास्तु सिद्धीनां दैवानामष्टसिद्धयः । सर्वसिद्धिप्रधानास्तास्तज्जा अष्टादश स्मृताः ॥ अष्टस्वंतर्गतास्तास्तु तदपेक्षतयाल्पकाः । अनूर्मिमत्त्वसिद्धिस्तु प्राकाम्यांतर्गता स्मृता ॥ दूरश्रुतिर्दूरदृष्टिस्त्रिकालज्ञत्वमेव च । परचित्ताद्यभिज्ञानं प्राकाश्यांतर्गतानि च ॥ अणिमादित्रयांतश्च कामरूत्वमिष्यते । अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोवशित्वगः ॥ मनोजवः कामरूपं परकायप्रवेशनम् । स्वच्छंदमृत्युता देवैः सह क्रीडेष्टसाधनम् ॥ प्राप्तावंतर्गतान्याहुराज्ञाप्रतिहतिस्तथा ! अग्निष्टंभो रविष्टंभ उदकस्तंभ एव च ॥ विषस्तंभस्तथा शस्त्रशापादिस्तंभ एव च । ईशित्वांतर्गतान्याहुरपराजय एव च ॥ एवमष्टादशाष्टभ्यो जायंते सिद्धयः क्रमात् । अष्टादशभ्यश्चान्यास्तु जायन्ते सिद्धयोऽमिताः ॥ " इत्यलं प्रपञ्चेन, किं बहुना । "सिद्धयः परिपूर्णास्तु विष्णोरेकस्य नान्यगाः" इति तीर्थः ॥ * ॥ ० ॥ ८ ॥ ० ॥ * ॥ ० ॥ ९ ॥ तत्र प्रथमोद्दिष्टाणिमादिसिद्धिप्रापकध्यानप्रकारमाह–भूतेति । भूतसूक्ष्माणां पार्थिवादिपरमाणूनामात्मनि नियामके परमाणुषु स्थिते मयि तन्मात्रपरिमितत्वेन मनो धारयन् ध्यायन्नणिमानमवाप्नोति । अनेन यद्यद्वस्तु नियतं रूपं स्वयमपि तत्तत्परिमितो भवतीत्युक्तं भवति । यद्वा–मम तन्मात्रोपासकः तस्याकाशादिगुणस्य शब्दादेर्यत्सूक्ष्ममात्रं परिमाणं तत्परिमाणस्य मम स्वरूपस्योपासकोपि तत्परिमितो भवतीत्यर्थः ॥ * ॥ भूतसूक्ष्माद्यो वैकुंठादिगताः स्वरूपशक्तिविलासा ज्ञेयाः । तासामष्टाविंशत्यादावुभयेषां भेदेनावश्यव्यवस्थाप्यमानत्वात् । तन्मात्रोपासको ममेति पुनरुक्तेस्तदवधारणार्थत्वाच्च । अणिमानमित्यत्रापि ममेत्यन्वयः । किन्त्वणिमादिकमिदमदंशेनैव ज्ञेयम् 'जगद्व्यापारवर्जम्' इति न्यायेन सर्वथा तद्धर्मप्राप्त्यसंभवात् ॥ १० ॥ तत्तद्भूतमहिमानमाकाशादिमहाभूतसादृश्यं गच्छति । इत्यर्थ इति–पृथिव्युपाधिकमद्रूपचिंतनात्पृथिवीवद्विस्तृतो निश्चलो गुरुश्च भवति एवमन्यत्रापीति भावः ॥ * ॥ महिमानं तत्तच्छक्त्यलंकृतमूर्तित्वमित्यर्थः । भूतानां वेति महत्तत्त्वधारणायामेतदपीच्छावांतरं फलं भवतीत्यभिप्रायात् ॥ ११ ॥ रंजयन्ननुरक्तं कुर्वंस्तदेकनिष्ठमिति यावत् ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिलम् ॥ सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः ॥ १३ ॥ महत्यात्मनि यः सूत्रे धारयेन्मयि मानसम् ॥ प्राकाश्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः ॥ १४ ॥ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे ॥ स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनाम् ॥ १५ ॥ नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ॥ मनोमय्यदधद्योगी मद्धर्मा वशितामियात् ॥ १६ ॥ निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः ॥ परमानंदमाप्नोति यत्र कामोऽवसीयते ॥ १७ ॥

परमाणुताम् ” इति ॥ १२ ॥ वैकारिकाहंकारोपाधौ मयि । अखिलमेकाग्रम् । आत्मत्वमधिष्ठातृत्वम् । अत्र हेतुः । मन्मनाः । मयि मनोधारणप्रभावादेवं भवति नात्रातीव हेतुरनुसंधेय इति भावः । ‘एवं मद्धारणानुभावेन मद्योगबलमाश्रय’ इत्यादिषु द्रष्टव्यम् ॥ १३ ॥ क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि समे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाश्यं विंदते । कूंभतस्य । अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य । तदुपाधेर्ममेत्यर्थः ॥ १४ ॥ त्र्यधीश्वरे त्रिगुणमायानियंतरि अत एव कालविग्रहे आकलयितृरूपेंतर्यामिणि । ईशित्वं विशिनष्टि । क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनां प्रेरणं न तु विश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः ॥ १५ ॥ तुरीयाख्ये “विराड् हिरण्यगर्भश्च कारणं चेत्युपाधयः । ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुः ॥” इत्येवंलक्षणे । “ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ ” तद्वति भगवच्छब्दशब्दिते ॥ १६ ॥ यत्र परमानंदरूपे सर्वोऽपि कामस्तदंशभूतोऽ

भूतानां मध्ये यः परमाणुर्भारशून्याकाशपरमसूक्ष्मांशस्तदुपाधिके मयि चित्तं रञ्जयन्योगी लघिमानं भारशून्यत्वमवाप्नोति तमेव दर्शयति—कालस्य सूक्ष्मांशो यः परमाणुस्तस्यार्थः । उपाधिः परमसूक्ष्मदेशावच्छिन्न आकाशस्तद्रूपतां तद्वदतिलघुतामित्यर्थः ॥ १२ ॥ वैकारिकः सात्त्विकः । अत्र सर्वेंद्रियाधिष्ठातृत्वे । इति भाव इति—अचिंत्यशक्तेर्मम चिन्तनान्न किंचिदसाध्यं भवतीत्याशयः । एतदन्यत्राप्यतिदिशति—एवमित्यादिना ॥ ॥ * ॥ अत्रेंद्रियाधिष्ठातृत्वाप्तौ । एवं भवतींद्रियाष्ठातृत्वं भवति । अस्यां सिद्धौ मद्धारणादन्यो हेतुर्न विचार्यः, किन्तु मद्धारणैवात्र हेतुः ॥ १३ ॥ प्राकाश्यं तन्नामिकां सिद्धिम् । इत्यर्थ इति—सूत्रोपाधेर्मम ध्यानात्प्राकाश्यसिद्धिलाभो भवतीति भावः ॥ * ॥ अव्यक्तमिंद्रियागम्यं जन्म यस्य तस्य मम प्राकाम्यं दृष्टादृष्टभोगसामर्थ्यम् ॥ १४ ॥ अत एव मायानियंतृत्वादेव । तदुपाधीनां जीवोपाधीनां देहादीनाम् । इत्यर्थ इति—विश्वसृष्ट्यादिसामर्थ्यं तु भगवत एव नान्यत्र परं तु यस्य देहस्य जीवस्य यत्र कर्मणि प्रेरणा स तदेव कुर्यादिति भावः ॥ * ॥ तदुपाधीनां देहानाम् । प्रेरणं तत्रतत्र स्वशक्तिसंचारणम् । जगद्व्यापारवर्जमिति सृष्ट्यादिकर्तृत्वरूपं प्रेरणं न ज्ञेयम् ॥ १५ ॥ वशितां विषयभोगेष्यसंगताम् ॥ * ॥ वशितां वशित्वं वशीकारवैराग्यम् । तदुक्तं पातञ्जले—“ दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ” इति । विराट् समष्टिस्थूलोपाधिर्विराट्, हिरण्यगर्भः समष्टिसूक्ष्मोपाधिः कारणम् । ऐश्वर्यस्येति समग्रस्येति षड्भिरन्वेति । त्रिपाद्विभूत्यधिष्ठातृत्वमैश्वर्यम्, वीर्यं पराक्रमः । धर्मस्येति भक्तिहेतुभूतस्य ‘ धर्मो मद्भक्तिकृत्प्रोक्तः ’ इति वक्ष्यमाणत्वात् । यशः सत्कीर्तिः, श्रीः संपत्तिः सौंदर्यं वा । ज्ञानं स्वपरविषयं वैराग्यं प्राकृतभोगसंबंधाभावः । इंगना ईरणा वा संज्ञा । यस्य स्थूलसूक्ष्मकारणानि नोपाधयः किंतु तुरीयं सच्चिदानंद आख्या आख्यागम्य आकारो यस्य तस्मिन्नारायणे । स च केन शब्देनोच्यते तत्राह—भगवच्छब्देन शब्दितः कथितस्तस्मिन् ॥ १६ ॥ तदंशभूतः काम्यमानो विषयः । “ अन्यानि भूतानि मात्रामुपजीवंति ” इति श्रुतेः ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि ॥ धारयञ्छ्वेततां याति षडूर्मिरहितो नरः ॥ १८ ॥ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् ॥ तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ ॥ १९ ॥ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि ॥ मां तत्र मनसा ध्यायन्विश्वं पश्यति सूक्ष्मदृक् ॥ २० ॥ मनो मयि सुसंयोज्य देहं तदनुवायुना ॥ मद्धारणाऽनुभावेन तत्रात्मा यत्र वै मनः ॥ २१ ॥ यदा मन उपादाय यद्यद्रूपं बुभूषति ॥ तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः ॥ २२ ॥ परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् ॥ पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् ॥ २३ ॥

वसीयते समाप्यते तम् ॥ १७॥ अतः परं गुणहेतुकाः सिद्धीराह । शुद्धे सत्त्वात्मके । श्वेततां शुद्धरूपताम् ॥ १८॥ आकाशात्मा यः प्राणः समष्टिरूपस्तद्रूपे मयि मनसा घोषं नादं चिंतयन्नसौ हंसो जीवस्तत्राकाशे उपलब्धा ज्ञाता संस्तत्रस्था विचित्रा वाचः शृणोति । यद्वा तत्राकाशे उपलब्धा अभिव्यक्ता या वाचस्ताः दूरतः शृणोतीति ॥ १९ ॥ त्वष्टा आदित्यस्तस्मिन्नपरिच्छिन्ने चक्षुः संयोज्य तं च चक्षुषिः संयोज्य तत्रोभयसंयोगे मां ध्यायन् विश्वं दूरतः पश्यति ॥ २० ॥ मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते तस्याः प्रभावेण यत्र मनो याति तत्रात्मा देहो यातीत्यर्थः । यद्वा मनः कर्तृ । आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तदनु तत्र देहो यातीति ॥ २१ ॥ मन उपादाय उपादानकारणं कृत्वा यद्यद्देवादिरूपं भवितुमिच्छति तत्तन्मनोरूपं मनसोऽभीष्टरूपं योगी भवेत् । कुतः । यतो मद्योगबलम् । योऽहमचिंत्यशक्तिर्नानाकारस्तस्मिन्मयि मनसो योगो धारणा तस्य बलं प्रभावः स एवाश्रयः कारणम् ॥ २२ ॥ यत्र प्रविविक्षति तत्रात्मानं चिंतयेत् ।

निर्गुणे निर्विशेषे ब्रह्मणि । परमानन्दं ब्रह्मसायुज्यम् । तदंशभूतो ब्रह्मानन्दांशभूतः " एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति " इति श्रुतेः । एवं च ब्रह्मसायुज्यमपि सिद्धिमध्ये गणितम् ॥ १७ ॥ अतः परमष्टसिद्धेः कथनात्परम् । शुद्धे निर्दुःखे वा श्वेततां निर्दुःखत्वं वेति तीर्थः ॥ * ॥ अतः परं प्राकृतधर्मोपाधितयोपास्यमानत्वाद्गुणहेतुका इत्युक्तम् । धर्ममये प्राकृतसत्त्वजधर्माधिष्ठातारि स्वतः शुद्धे शुद्धरूपतां रजस्तमोहीनसत्त्वात्मतामित्यनूर्मिमत्त्वनाम्नी सिद्धिरिति संदर्भः ॥ १८ ॥ " त्यागात्पूर्वशरीराणां नवानां संचयेन च । जीवं हंस इति प्राहुः " इति । तत्रस्था आकाशस्थाः । अत्र सन्निति तत्र स्था इति पदयोरध्याहारे गौरवं मत्वाह—यद्वेति ॥ * ॥ प्रथमार्थे आकाशे ज्ञातृत्वं तद्गुणशब्दज्ञानेनैव प्राप्तं तत्रोपलब्धेत्यधिकमपुष्टार्थत्वादतो—यद्वेति । दूरत इति प्रकरणबलादध्याहृतम् ॥ १९ ॥ तं च त्वष्टारम् । तत्र तस्मिन्नुभयसंयोगे त्वष्टृचक्षुःसंयोगे । अत्राशयमाह—अध्यात्माधिदैवभावेनैकं संभाव्य तत्रैकं मां मनसा एकत्वेन ध्यायन् " यश्चासावादित्ये यश्चायं पुरुषे स एकः " इत्यादिश्रुतेः ॥ * ॥ अपरिच्छिन्ने नेत्रगोलकदेशपरिच्छेदशून्ये । उभयसंयोगे चक्षुस्त्वष्टृसंयोगे । तन्नियंतारं मां ध्यायन् स्वध्यानप्रभाव एव तत्र हेतुत्वेनोक्त इति ज्ञेयम् ॥ २० ॥ तदनुवर्तिना मनोनुवर्तिना । इत्यर्थ इति—मनस्तुल्यगतिर्देहो भवतीति भावः । या मद्धारणा । क्रियत इत्यादिपदाध्याहारे गौरवादाह—यद्वेति । तदनु मनोनु ॥ * ॥ तदनुवर्तिना मनोऽनुकूलेन । मयि मनआद्यधिष्ठातारि । मद्धारणा योगिकर्तृकं मद्धारणम् । एवमेवमभिप्रेत्य मद्धारणा क्रियत इति व्याख्यातम् । तथा च क्त्वाप्रत्ययस्य समानकर्तृकत्वं निर्वहति तथापि मद्धारणा क्रियत इति कष्टकल्पनैवायाति अतो—यद्वेति । आत्मानं मन एव कर्तृभूतम् । मनोजवसिद्धिरियम् ॥ २१ ॥ यदा धारणाकाले । अभीष्टरूपभवने हेतुं पृच्छति—कुत इति । कारणं मनश्चिंतितरूपधारण इत्यर्थः ॥ * ॥ यद्यद्देवादिरूपमिति कामरूपसिद्धिः ॥ २२ ॥ यत्र देहे । तत आत्मचिंतनोत्तरम् । वायौ बाह्यवायौ भूतः प्रविष्टो वायुभूतः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाष्ण्र्याऽऽपीड्य गुदं प्राणं हृदुरःकंठमूर्धसु ॥ आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुम् ॥ २४ ॥ विहरिष्यन्सुराक्रीडे मत्स्थं सत्त्वं विभावयेत् ॥ विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः ॥ २५ ॥ यथा संकल्पयेद् बुद्ध्या यदा वा मत्परः पुमान् ॥ मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते॥ ॥ २६ ॥ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ॥ कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम ॥ २७ ॥ मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः ॥ तस्य त्रैकालिकी बुद्धिर्जन्म मृत्यूपबृंहिता ॥ २८ ॥ [उदासीने मयि परे प्रकृतेर्गुणवृत्तिषु ॥ चिंतयेद्धारयेच्चेतो द्वंद्वैर्नैवाभिभूयते ॥१॥ सर्वभूतहृदिस्थं मामात्मानं सर्वसाक्षिणम् ॥ धारयेदात्मनश्चित्तं परेषां परिपश्यति ॥ २ ॥] अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ॥ मद्योगश्रांतचित्तस्य यादसामुदकं यथा ॥ २९ ॥

ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिर्वायुभूतो बाह्यवायौ भूतः प्रविष्टस्तेन मार्गेणेत्यर्थः । षडंघ्रिवत् । भृंगो यथा पुष्पात्पुष्पांतरमनायासेन प्रविशति तद्वत् ॥ २३ ॥ पिंडं हित्वेत्युक्तं तत्प्रकारं कथयन्स्वच्छंदमृत्युमाह । पाष्ण्र्या पार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्धद्वारेण । ब्रह्मेत्युपलक्षणम् । ब्रह्म वा अन्यद्वा अपेक्षितं स्थानं मनसा नीत्वा ॥ २४ ॥ मत्स्थं मन्मूर्तिरूपं शुद्धं सत्त्वं चिंतयेत् । तदा सत्त्ववृत्तयः सत्त्वांशभूताः ॥ २५ ॥ यदा वा अकालेऽपि । यथा वेति पाठे यथा वा येन केनापि प्रकारेण । बुद्ध्या संकल्पयेत्तत्तथा यथावत्प्राप्नोतीत्यर्थः । यद्वा यथा संकल्पयेद्यथा वा मत्परो मयि विश्वासवान् भवति तथा तदनुरूपं सर्वमाप्नोतीत्यर्थः । किं कुर्वन् । सत्ये सत्यसंकल्पे मयि मनो युंजन् ॥ २६ ॥ मदिति पृथक् पदम् । ममेत्यर्थः । ईशितुः सर्वनियंतुर्वशितुः स्वतंत्रस्य मम भावं स्वभावं प्राप्तः । एता गुणहेतवः ॥ २७ ॥ अतः परं क्षुद्रा धारणाविद इति त्रिकालज्ञेश्वरधारणा सूचिता । त्रैकालिकी त्रिकालवस्तुविषया । स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता । अनयैव परचित्ताद्यभिज्ञताऽपि व्याख्याता ॥ २८ ॥ अग्न्यादिसर्वोपघातशून्यो भगवानित्येवंभूतयोगमयं मुनेर्वपुः तैर्नाभिभूयेत । अत्र हेतुः । मद्योगेति । मद्यो

इत्यर्थ इति—बाह्यवायुद्वारा प्राणप्रधानलिंगदेहं देहांतरं प्रविशतीति भावः ॥ * ॥ ० ॥ २३ ॥ पार्ष्णिः पादस्य गुल्फाधस्तनदेशः ॥ * ॥ गुदं निरुध्येति—' संपीड्य सीवनीं सूक्ष्माम्' इत्याद्युक्तेर्मुक्तासनं सूचितम् । स्वच्छन्दमृत्युसिद्धिः ॥२४॥ विहरिष्यन् विहर्तुकामो योगी । उपतिष्ठंति समीपमाप्नुवंतीति ॥*॥ सत्त्वं स्वीयान्तःकरणं मत्स्थं मद्गतं चिंतयेत् । देवक्रीडासिद्धिः ॥२५॥ इत्यर्थ इति—असमयेऽपि यथा कथंचित्संकल्पितोऽपि मत्परेण प्राप्यत इतिभावः । एवं चेद्धारणासाधनवैयर्थ्यं स्यादत आह—यद्वेति । इत्यर्थ इति—धारणानुरूपं फलमाप्नोतीति भावः ॥ * ॥ यथा वेत्यत्र द्वितीययथाशब्दस्य यथावदित्यर्थः । तत्संकल्पितं वस्तु तथाप्नोतीत्युक्त्यैव यथावत्त्वमागतमतो—यद्वेति ॥ २६ ॥ तस्येशितृवशितृत्वोपाधिविशिष्टमद्रूपध्यातुः । मदिति पंचमी षष्ठ्यर्थे । एता दश गुणहेतवः सत्त्वोत्कर्षजन्याः ॥ * ॥ स्वभावं नियंतृत्वस्वातंत्र्यलक्षणं ध्येयत्वेन प्राप्तः ॥२७॥ अतो गुणहेतुसिद्धिकथनानंतरम् । क्षुद्रास्तुच्छफलत्वात् । तस्येति तच्छब्दः 'सर्वे सर्वार्थवाचकाः' इति न्यायमाश्रित्य स्वार्थे, स्वस्येत्यर्थः । अत एव स्वाम्याह—स्वजन्ममृत्युभ्यामिति । अनयैव त्रिकालज्ञेश्वरधारणयैवोपलक्षणभूतया, तेन सर्वभूतहृदयस्थाद्युपाधिविशिष्टध्यानात्सर्वभूतचित्ताद्यभिज्ञता भवतीत्यर्थः ॥ * ॥ ० ॥ २८ ॥ इत्येवंभूतयोगोऽग्न्यादिप्रतिघातशून्यो हरेर्ध्याननयोगः प्रधानं यत्र तत्तथा । तैरग्न्यादिभिः । अत्राग्न्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मद्विभूतीरभिध्यायञ्छ्रीवत्सास्त्रविभूषिताः ॥ ध्वजातपत्रव्यजनैः स भवेदपराजितः ॥ ३० ॥ उपासकस्य मामेवं योगधारणया मुनेः ॥ सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः ॥ ३१ ॥ जितेंद्रियस्य दांतस्य जितश्वासात्मनो मुनेः ॥ मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ॥ ३२ ॥ अंतरायान्वदंत्येता युंजतो योगमुत्तमम् ॥ मया संपद्यमानस्य कालक्षपणहेतवः ॥ ३३ ॥ जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः ॥ योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ॥ ३४ ॥

गेन यादसामुदकं यथा विघातकं न भवति । तथा तस्य वपुषोऽग्न्यादय इत्यर्थः । अनयैवाद्वंद्वताऽपि व्याख्याता ॥ २९ ॥ मद्विभूतीर्ममावतारान् । ध्वजादिभिः सह ॥ ॥ ३० ॥ उपसंहरति । उपासकस्येति । एवं पृथग्धारणाभिः ॥ ३१ ॥ यद्वा किं नानाधारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवंतीत्याह । जितेंद्रियस्येति । मद्धारणां 'नारायणे तुरीयाख्ये' इत्यत्रोक्ताम् । या सुदुर्लभा स्यात्सा का । न काचिदित्यर्थः ॥ ३२ ॥ यद्यप्येवं तथापि न प्रार्थ्या इत्याह । अंतरायानिति ॥ ३३ ॥ तस्माद हैतुकीयमेव धारणा कार्या नान्याः काम्या इत्याह । जन्मेति । जन्मनैव काश्चित्सिद्धयो भवंति । यथा देवानां यथा च यादसामुदकस्तंभः पक्ष्यादीनां खेचरत्वादि । तदुक्तं

द्यनभिभवे मद्योगेनाग्न्याद्यौष्णत्वादिशक्तिप्रतिबंधकमद्रूपध्यानेन शांतमग्न्यादिव्याघातशून्यं चित्तं यस्य तस्य । अत्र दृष्टान्तः—यादसां जलजंतूनां मत्स्यादीनाम् 'यादांसि जलजन्तवः' इत्यमरः । अभिघातकं सर्वजलसंयोगेपि गालकं न भवति । इत्यर्थ इति—अचिंत्यशक्तिमद्धारणाप्रभावादग्न्यादिशक्तिप्रतिबंधो भवतीति भावः । अनयैवोपलक्षणभूतया वह्न्यादीनां सुखदुःखहेतूनां शक्तिप्रतिबन्धे स्वत एव द्वंद्वाभावो निष्पद्यत इत्याशयः । उदकयादसी अत्रोपलक्षणे, तेन सर्पादीनां विषाद्यपि प्रतिघातकं नेति ज्ञेयम् ॥ * ॥ ० ॥ २९ ॥ साम्राज्यविभूतिविशिष्टमद्रूपाणां ध्यानं पराजयविघातकमित्याह—ध्वजातपत्रेत्यादि ॥ * ॥ ० ॥ ३० ॥ उपासकस्योपासनयाऽपरोक्षीकृततत्तद्रूपमत्तत्त्वस्य ॥ * ॥ ० ॥ ३१ ॥ बहुधारणाकर्णनाकुलमानसमाश्वासयति—यद्वेति । इत्यर्थ इति—मच्छुद्धस्वरूपध्याने सर्वमभिलषितं सिध्यतीति भावः ॥ * ॥ ० ॥ ३२ ॥ यद्यप्येवं शुद्धस्वरूपं तव धारणातः सर्वाः सिद्धयः प्राप्यन्ते तथा ता न प्रार्थ्या नेष्टव्या इति । उत्तमं मोक्षोपयोगिनं योगं भक्तियोगं मया संपद्यमानस्य मत्प्रसादं प्राप्तुकामस्य कालक्षपणस्य हेतवो व्यर्थायुःक्षयंकरा इत्यर्थः ॥ * ॥ मया संपद्यमानस्य मत्प्राप्त्या संपद्यमानस्य संपत्तिमतः अंतरायानिति । अतो ब्रह्मसायुज्यमप्यंतरायः स्यादिति युक्तमेव तत्र गणितम् उत्तमं निष्कामं भक्तियोगम् । कालक्षपणहेतव इति—दिनेदिने तस्य मत्प्राप्तिलक्षणसंपत्तिर्ह्रसत्येव तस्माद्योगेनैव कालं यापयेत् । न तत्फलभूताभिः सिद्धिभिरिति भावः ॥ ३३ ॥ यस्मात्सिद्धिहेतुका धारणा मत्प्राप्तौ विघ्नरूपास्तस्माद्धेतोः । अहैतुकी फलेच्छारहिता । इयमेव शुद्धसत्त्वस्वरूपध्यानरूपैव । देवानामणिमाद्या अन्याश्च यथा सिद्धयः । जन्मादिनापि सिद्धयो भवंतीत्यत्र योगसूत्रं प्रमाणयति—तदुक्तमिति । पातंजले पतंजलिमुनिप्रणीते योगशास्त्रे । अस्यार्थः—जन्मना पक्ष्यादीनामाकाशगमनादिसिद्धिः । कपिलादीनां च सांसिद्धिकीत्युच्यते । औषधिविशेषसेवया मांडव्यादीनाम् । मंत्रजपेन केषांचिदणिमादिसिद्धिः । तपसा विश्वामित्रादीनां सिद्धिः । एताश्चतस्रः सिद्धयः पूर्वाभ्यस्तयोगजा एव जन्मादिनिमित्तेन व्यज्यंते, अत एव योगाभ्यासे दृढविश्वासेन प्रवृत्तिः कार्या इह सिद्धदर्शनेपि साफल्यात् । समाधिजाः सिद्धयस्तु—"परिणामत्रयसंयमादतीतानागतज्ञानम्" इत्यादिसूत्रैः प्रतिपादिता इति योगमणिप्रभाकारः ॥ * ॥ पातञ्जलसूत्रार्थः—जन्मनिमित्ताः पक्ष्यादीनामाकाशगमनादयः । यथा कपिलादीनां जन्मत एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः ॥ अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनाम् ॥ ३५ ॥ अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनाम् ॥ यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ॥ ३६ ॥ इति श्रीमद्भा० म० एकादशस्कंधे भगवदुद्धवसंवादे सिद्धिकथनं नाम पंचदशोऽध्यायः ॥ १५ ॥

पातंजले । 'जन्मौषधितपोमंत्रयोगजाः सिद्धयः' इति । योगेन मद्धारणामित्युक्तेन । योगगतिं मत्सालोक्यादिरूपाम् ॥ ३४ ॥ कुत इत्यत आह सर्वासामित्यर्द्धेन । प्रभुत्वोपपादनं हेतुः कारणं पतिः पालयिता चेति । किंच न केवलं सिद्धीनामेव प्रभुरपि तु मोक्षादीनामपीत्याह । अहमिति । योगो मोक्षः सांख्यं तत्साधनं ज्ञानम् । तत्साधनं धर्मः तस्य धर्मस्य तदुपदेष्टृणां ब्रह्मवादिनां च ॥ ३५ ॥ कुतस्तत्राह । अहमिति । सर्वदेहिनां जीवानामात्मा । यत आंतरोंतर्यामी । "एष त आत्मांतर्याम्यमृतः" इति श्रुतेः । तर्हि किमंतर्वर्तित्वात्परिच्छिन्नः । न । बाह्यश्च व्यापक इत्यर्थः । तत्र हेतुः । अनावृतः । एतत्सदृष्टांतमाह । भूतेषु चतुर्विधेषु भौतिकेषु महाभूतानि यथा बहिश्चांतश्च भवंति स्वयमहमपि तथेत्यर्थः ॥ ३६ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां सिद्धिकथनं नाम पंचदशोऽध्यायः ॥ १५ ॥

ज्ञानादयः । यथौषधिसिद्ध्या पातालादौ रसायनाद्युपयोगः, मंत्रसिद्ध्याप्याकाशगमनादिः, तपःसिद्ध्या विश्वामित्रादीनां प्रभावः, समाधिरेव जन्मांतराभ्यस्तः कारणं भवति मंत्रादीनि तु निमित्तमात्राणि । अन्यै जन्मादिसिद्धिरूपैः । योगगतिं सालोक्यादिमुक्तिम् ॥ ३४ ॥ इतोऽप्युत्कर्षं स्वस्याह–किंचेति । तत् योगेन सर्वसिद्धिप्रापणम् । धर्मस्य भक्तिलक्षणस्य ॥ * ॥ मयि विश्वस्तैस्तु तत्तत्सिद्धिकामनया नान्यत्, न च सोपाधिमद्धारणं कर्तव्यं । स्वतः सर्वाश्रयत्वेन ममेत्याह–सर्वासामिति द्वाभ्याम् । यतो मम ध्यानेनैव सर्वाः सिद्धयस्तस्मादहमेव तासां हेतुः । न केवलं हेतुरेव पतिः पालयिता च, प्रभुः स्वामी च । न केवलं सिद्धीनामेव हेतुप्रभृतयोहं यतो योगस्य ध्यानयोगस्याप्यहमेव । न केवलं योगस्य ज्ञानस्य सांख्यस्य । ज्ञानसाधनधर्मस्य निष्कामकर्मणोपि ॥ ३५ ॥ त्वमेव सर्वेश इत्यत्र हेतुमाशंकते–कुत इति । आत्मापि कुत इति चेदाह–यत इति । अंतर्यामित्वे प्रमाणमाह–'एष ते' इत्यादि । श्रुतिश्चेयं व्याख्यातचरा । अत्राप्याक्षिपति–तर्हीति । नेत्याह–इत्यर्थ इति । अंतर्बहिर्व्याप्य स्थितः "अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेरिति भावः । तत्र व्यापकत्वे । अनावृतत्वाद्व्यापकत्वम् । एतद्व्यापकत्वं चतुर्विधेषु जरायुजांडजस्वेदजोद्भिज्जेषु । महाभूतान्याकाशादीनि । इत्यर्थ इति–महाभूतवद्बाह्याभ्यंतरव्यापक इति भावः ॥ * ॥ योगिनां ज्ञानिनां च ध्यानमालंबनोऽप्यहमेवेत्याह–अहमांतर आत्मांतर्यामी, तर्हि किमंतर्वर्तित्वात्परिच्छिन्नः, न, बाह्यश्च व्यापक इत्यर्थः । तत्र हेतुरनावृत एतत्सदृष्टांत इति तैः ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे पंचदशोऽध्यायः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धव उवाच ॥ त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतम् ॥ सर्वेषामपि भावनां प्राणास्थित्यप्ययोद्भवः ॥ १ ॥

षोडशे तु हरेराविर्भावयुक्ता विभूतयः ॥ ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः ॥ १ ॥ अंतश्चित्तेन यद्ध्यानमशक्यमकृतात्मनाम् ॥ अतस्तद्योग्यतापत्त्यै विभूत्यादि निरूपणम् ॥ २ ॥ एवं तावन्नवाध्याय्यामष्टप्रश्ना निरूपिताः ॥ ब्रह्मत्वसंभवे तावत्सप्तमादिचतुष्टये ॥ ३ ॥ बंधमुक्त्योस्तु निर्धारे सद्भक्त्योश्च ततः परे ॥ द्वादशेऽनंतरं कर्मकृतित्यागव्यवस्थितौ ॥ ४ ॥ हंसेतिहासतो योगनिष्ठायां च त्रयोदशे ॥ श्रेयःसाधननिर्धारे ध्याने चैव चतुर्दशे ॥ ५ ॥ धारणासिद्धिभेदे च प्रसंगेन निरंतरे। उद्धवप्रश्नतो दत्तमुत्तरं हरिणोचितम् ॥ ६ ॥ षोडशे भूतिविस्तारे द्वयोर्वर्णाश्रमव्रते ॥ ज्ञानादिनिर्णये चातो यमादीनां च निर्णये ॥ ७ ॥ योगत्रयाधिकारे तु विंशे च तदनंतरे ॥ सत्त्वसंख्याविवादे च पुंप्रकृत्योर्विवेचने ॥ ८ ॥ जन्ममृत्युप्रकारे च द्वाविंशे दत्तमुत्तरम् ॥ परापराधसहने चतुर्भिस्तदनंतरैः ॥ ९ ॥ सप्तविंशे क्रियायोगप्रश्ने तदुपवर्णनम् ॥ अष्टाविंशे ततः प्रोक्ता ज्ञानयोगोपसंहृतिः ॥ १० ॥ संसारासंभवप्रश्ने तन्मध्ये दत्तमुत्तरम् ॥ तदशक्त्या पुनः प्रश्ने भक्तियोगोपसंहृतिः ॥ ११ ॥ एवं प्रश्नोत्तराण्यत्र क्रमेणैतानि विंशतिः ॥ १२ ॥ " अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनाम् ॥ यथा भूतानि भूतेषु बतिरंतः स्वयं तथा ॥" इत्युक्तं तत्र भूतानि यथा क्वचित्केनचिद्गुणविशेषेणोद्रिक्तानि वर्तंते क्वचित्सामान्यरूपेणैव तथा त्वमपि क्व कथं वर्तस इति विभूतीः प्रष्टुं प्रथमं तावदुक्तमेव सर्वात्मकत्वमनुवदति। त्वं ब्रह्मेति। अपावृतं निरावरणं

ज्ञानविशेषेण वीर्यविशेषेण प्रभावविशेषेण।आदिना वैराग्यादिग्रहः (१)। यतो हेतोः चित्तेन यदंतर्मनासि ध्यानं तत्। अकृतात्मनाम् अस्थिरचेतसाम्।अतो हेतोस्तस्यांतर्ध्यानस्य योग्यताया आपत्त्यै प्राप्तये।आदिना वागादिनिरोधग्रहः (२)। एवमुक्त रीत्या । नवानामध्यायानां समाहारो नवाध्यायी तस्याम्। नवेति सप्तमतः पंचदशांता ग्राह्याः । पूर्वेषु प्रथमादिपंचमान्तेषु मौसलवसुदेवनारदाख्यानस्य, षष्ठे भगवतो यानार्थे देवप्रार्थनोद्धवप्रार्थनायाश्च वर्णितत्वात्तेषामत्रानुपयोगात्। सप्तमादिचतुष्टयेऽध्यायचतुष्के तावदादौ ब्रह्मत्वस्य जीवभावपरित्यागस्य संभवो यथा भवेदिति उद्धवप्रश्नतो हरिणोचितं न्याय्यमुत्तरं दत्तमिति चतुर्थेनान्वयः (३)। ततो दशमात्परे एकादशे बंधमुक्त्योः सद्भक्त्योश्च निर्द्धारे उद्धवप्रश्नत इति पूर्ववद्योज्यम्। अनंतरम् एकादशतः परे कर्मकरणतत्त्यागव्यवस्थायामुद्धवप्रश्नत इत्यादि सर्वत्र सप्तम्यन्तेन योज्यम् (४)। (५)। निरंतरे पंचदशे। उक्तमर्थं स्फुटयति–सप्तमादिदशमांताध्यायचतुष्के ब्रह्मत्वसंभवप्रश्नोत्तरम्, १, एकादशे बंधमुक्तिनिर्द्धारप्रश्नोत्तरम् २, संतः कीदृशा इति प्रश्नस्योत्तरम् ३, भक्तिः कीदृशीति प्रश्नस्य चोत्तरम् ४, इत्येवं प्रश्नोत्तरत्रयम्। द्वादशे कर्मकृतितत्त्यागव्यवस्थाप्रश्नोत्तरम् ५, त्रयोदशे हंसेतिहासतो योगनिष्ठाप्रश्नोत्तरम् ६, चतुर्दशे श्रेयःसाधननिर्द्धारप्रश्नोत्तरम् ७, पंचदशे धारणाभेदतः सिद्धिभेदप्रश्नोत्तरम् ८, एवमष्टप्रश्नोत्तराणि नवाध्यायेषु संतीति (६)। भूतिविस्तारे प्रश्ने हरिणोत्तरं दत्तमिति तृतीयेनान्वयः। हरिणेत्यध्याहार्यम्। द्वयोः सप्तदशाष्टादशयोः। वर्णाश्रमाणां व्रते धर्मे पृष्टे सति उत्तरं दत्तमिति पूर्ववत्। अतः अनन्तरम् ऊनविंशे (७)। योगत्रयाणां कर्मोपास्तिज्ञानरूपाणामधिकारे पृष्टे तदनंतरे एकविंशे चाध्यायद्वये उत्तरं दत्तम्। तत्त्वसंख्याविवादादिप्रश्नत्रयाणां द्वाविंशे (८)। तदनंतरैर्द्वाविंशतितः परैस्त्रयोविंशचतुर्विंशपंचविंशषड्विंशैः (९)। तदुपवर्णनं क्रियायोगोपवर्णनम्। ततः क्रियायोगोपवर्णनानंतरम् (१०)। तन्मध्येऽष्टाविंशाध्यायमध्ये। तदशक्त्या ज्ञानयोगाशक्त्या। पुनः प्रश्ने एकोनत्रिंशे भक्तियोगेनोपसंहृतिरुपसंहारः (११)। एतानि पूर्वोक्ताष्टप्रश्नसहितानि विंशतिसंख्याकानि (१२)। अहमित्यादिश्लोकोऽध्यायांत उक्तस्तत्रोक्तं सर्वात्मकत्वं तावदादौ । यथा–सर्पे आकाशोऽधिकशब्दग्रहणगुणेन वर्तते, गृध्रे च तेजोऽधिकरूपग्रहणेन, पिपीलिकायां पृथ्वी चाधिकगंधग्रहण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उच्चावचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः ॥ उपासते त्वां भगवन्याथातथ्येन ब्राह्मणाः ॥ २ ॥ येषुयेषु च भावेषु भक्त्या त्वां परमर्षयः ॥ उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे ॥ ३ ॥ गूढश्चरसि भूतात्मा भूतानां भूतभावनः ॥ न त्वां पश्यंति भूतानि पश्यंतं मोहितानि ते ॥ ४ ॥ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते ॥ ता मह्यमाख्याह्यनुभावितास्ते नमामि ते तीर्थपदांघ्रिपद्मम् ॥ ५ ॥

स्वतंत्रं वा । अत एव सर्वेषामपि त्राणं रक्षणम् । स्थितिर्जीवनम् । त्राणस्थितिसहितावप्ययोद्भवौ यस्मात् । सत्त्वमुपादानकारणमित्यर्थः ॥ १ ॥ अत्र सदाचारं प्रमाणमाह । याथातथ्येन यथार्थत्वेन । सर्वभूतकारणं त्वाम् । ब्राह्मणा वेदतात्पर्यविदः ॥ २॥ एवं कारणत्वेन सर्वात्मत्वमनूद्य विभूतीः पृच्छति । येष्विति । उपासीनाः सेवमानाः संतः ॥ ३ ॥ दुर्ज्ञेयत्वमेवाह । गूढः अस्फुटः । भूतानां प्राणिनां मध्ये । अत्र हेतुः । भूतानामात्मा अंतर्यामी । अत्रापि हेतुः । हे भूतभावनेति । ते त्वया ॥ ४ ॥ ता एव साकल्येन पृच्छति । हे महाविभूते याः कश्चिद्भूम्यादिषु ते विभूतयः । रसायां रसातले । अनुभावितास्त्वयैव केनचिच्छक्तिविशेषेण संयोजिताः । तीर्थानां पदं च

गुणेनेत्येवमन्यत्राप्यूह्यम् । पुरुषे च समान्यरूपेण सर्वाणि । अपावृतत्वं कालादेरप्यस्तीत्यत आह--स्वतंत्रं वेति । अत एव स्वतंत्रत्वादेव । इत्यर्थ इति—यतो जायते यस्मिंस्तिष्ठति यत्र च लयं याति तदुपादानमित्युपादानलक्षणस्य " यतो वा इमानि भूतानि जायंते " इत्यादिश्रुत्या त्वयि बोधनादिति भावः ॥ * ॥ टीकायां नवाध्याय्यामिति सप्ताध्याय्या इति ज्ञेयमादिषण्णामुक्ततात्पर्यत्वात् । अष्टप्रश्नान्निरूपयति—ब्रह्मेति । सप्तमादि चतुष्टये दशपर्यंते (३) । ततः परे एकादशे (४) । निरंतरे पंचदशे (५) । द्वयोः सप्तदशाष्टादशयोः (६) । अत ऊनविंशे (७) । तदनंतरे एकविंशे (८) । चतुर्भिः षड्विंशपर्यन्तैः (९) । तत्र ब्रह्मत्वेति १, बद्धमुक्ताविति २, सदिति ३, कर्मेति४, हंसेति ५, श्रेय इति ६, ध्यान इति ७, धारणेति ८, इत्यष्टौ प्रश्नाः । भूतेति ९, वर्णेति १०, ज्ञानेति ११, यमेति १२, योगेति १३, तत्त्वेति १४, जन्मेति १५, परेति १६, क्रियेति१७, ज्ञानेति १८, संसारेति १९, भक्तीति २०, इति विंशतिः ॥ सर्वेषां सर्ववैभवं तत्र एवेति सर्वासामित्यादिना पूर्वमुक्तं तच्छ्रुत्वा प्राकृताप्राकृततद्वैभवास्पदानि प्रश्नेन ज्ञातुं तस्य सर्वाश्रयत्वमनुवदति—त्वं ब्रह्मेति । ब्रह्म बृहत्सर्वकारणत्वात्, तत्रापि परमं भगवद्रूपत्वात्, तत्राऽपि साक्षात्स्वयं भगवत्त्वात् । तत्राप्राकृतानंतवैभवाश्रयत्वमाह—अनाद्यन्तं न तु पुरुषादिवत्परिच्छिन्नवैभवम् । अपावृतं न तु तद्वन्मायासंवलितम् ॥ * ॥ **विश्वनाथस्तु**—अपावृतं परिच्छिन्नमनुष्याकारत्वेपि सर्वकालदेशव्यापकमित्याह । प्राकृतवैभवाश्रयत्वमाह—सर्वेषां भावानां महदादीनां त्राणस्थित्युद्भवो यः पुरुषः सोऽपि त्वमिति " यस्यांशांशांशभागेन विश्वस्थित्यप्ययोद्भवः " इत्यादेस्तस्यापि त्वमंशीत्यर्थः ॥ १ ॥ अत्र श्रीकृष्णस्य ब्रह्मत्वे ॥ * ॥ तत्र प्राकृतीर्विभूतीः पृच्छति तावत्—उच्चावचेति । भूतेषु प्रधानकार्येषु त्वां गुणसाम्यादिरूपमिति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—यस्त्वं विष्णुरूपेण सर्वेषां कारणम् अत एव सर्वेषु भूतेषु तत्कार्येषु उच्चावचेषु उत्कृष्टनिकृष्टेषु सन्तं त्वाम् । अकृतात्मभिस्त्वय्यकृतमनस्कैः याथातथ्येन यत्रयत्र यथायथा वर्तसे तत्रतत्र तथातथैव त्वां तारतम्येनोपासत इत्यर्थः ॥ २ ॥ संसिद्धिम्मुक्तिलक्षणाम् । मे मह्यम् । हे स्व आत्मस्वरूप । तदुपासनम् । यद्वा—" भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः " इत्युपमंत्रणे आत्मनेपदम् ॥ ॥ * ॥ अप्राकृतीस्ताः पृच्छति—येष्विति । भावेषु भूतेषु परमार्थसत्येषु भगवदादिषु " अस्य महतो भूतस्य " इत्यादिश्रुतेः । त्वां वासुदेवादिरूपम् । प्रपद्यन्ते संसिद्धिं प्राप्नुवन्ति ॥ ३ ॥ बहुश्रवणतोऽपि मम तव ज्ञानं दुःशकमित्याह—गूढ इति । अत्र गूढत्वे । अत्राप्यंतर्यामित्वेपि । ते त्वयेति, आदेशश्चार्षः ॥ * ॥ चरसि क्वचित्साक्षाद्रूपेण क्वचिच्छक्त्यावेशरूपेणेति ज्ञेयम् । अत्र गूढत्वे । अत्रापि अंतर्यामित्वेपीति **दीपिका** ॥ ४ ॥ ताः विभूतीः । हे महाविभूते ब्रह्माद्यचिंत्यैश्वर्य । अनुभाविता निश्चिता महद्भिरुपासिता वेति तीर्थः । हे तीर्थपदेति पृथक्संबोधनं वा ॥ * ॥ भूमावित्यादित्रयेण मध्योर्ध्वतल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर ॥ युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥ ६ ॥ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकम् ॥ ततो निवृत्तो हंताहं हतोऽयमिति लौकिकः ॥७॥ स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः ॥ अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि॥८॥ अहमात्मो द्धवामीषां भूतानां सुहृदीश्वरः ॥ अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ९ ॥ अहं गतिर्गतिमतां कालः कलयतामहम् ॥ गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः ॥ १० ॥

तदंघ्रिपद्मं च ॥ ५ ॥ नरावतारभूतार्जुनप्रश्नसंवादित्वात्तवायं प्रश्नः साधीयानिति तावदनुमोदते एवमिति त्रिभिः । प्रश्नं प्रष्टव्यम् । सपत्नैर्योद्धुमिच्छता । विनशने कुरुक्षेत्रे ॥ ६ ॥ युयुत्सोर्विभूतिप्रश्ने कः प्रसंगस्तत्राह । ज्ञात्वेति । अहं हंता अयं हत इति लौकिकः प्राकृतमतिः सन् ॥ ७ ॥ स च यदा ततो ज्ञातिवधान्निवृत्तस्तदा मया प्रतिबोधितः सन् यथा त्वमभिभाषस एवं संग्राममुखे मामभ्यभाषत । तद्वदेव तवापि कथयिष्यामीति भावः ॥ ८ ॥ ता विभूतीः कथयति । अहमिति । अस्मच्छब्दसमानाधिकरणाः प्रथमांता द्वितीयांताश्च सर्वा विभूतयस्तास्ताश्चोपासनार्थं कथ्यंते । षष्ठी च क्वचिन्निर्धारणे संबंधे च क्वचिद्यथायोग्यं द्रष्टव्या । ततश्चामीषां भूतानामात्मेति ते सुहृदिति ईश्वर इति च सामान्येनाहमुपास्य इत्यर्थः । एवं सर्वत्र । तेषां स्थित्युद्भवाप्ययः । तत्तद्धेतुरित्यर्थः ॥ ९ ॥ विशेषतो विभूतीराह । कलयतां वशीकुर्वताम् ।

लोकाः प्राकृताश्चाप्राकृताश्च सर्व एव गृहीताः । ते त्वयैकेन स्वयं भगवताऽनुभावितास्तत्तन्माहात्म्यं प्रापिता अनुभवगोचरीकारिता वा । ता आख्याहि ब्रूह्यनुभावय चेत्यर्थः । चिन्मयस्य भगवतश्चिन्मया विलासा अंशा उच्यन्ते, मायामयास्तु विभूतय इति सर्वत्र व्यवहारः । अत्र विभूतिशब्देनैश्वर्यं प्राकृताप्राकृतवस्तुमात्रमेव तथा प्राकृताप्राकृतवस्तुसारश्चाग्रिमग्रंथदृष्ट्योच्यत इति विवेचनीयम् । हे महाविभूते इति—अनंतविभूतेस्तव सर्वविभूतिज्ञानं तवैव यथाकथंचिदस्ति नान्यस्येति भावः । तीर्थानां सर्वासां गुरुपरंपराणां पदमाश्रयोंघ्रिपद्मं यस्य तम् ॥ ५ ॥ संवादित्वात् तुल्यत्वात् । साधीयान् प्रशस्ततरः । एवं त्वद्वत् । एतदेतं प्रश्नं कृत्वेति शेषः ॥ * ॥ अर्जुनप्रश्नसंवादित्वादर्जुनप्रश्नेन तुल्यार्थत्वात् । अहो[1] आश्चर्यं मन्मित्रद्वयस्य प्रश्नसंवादितेत्याश्चर्यं प्रष्टव्यं विभूतिरूपार्थं प्रति अहं पृष्टः ॥ ६ ॥ प्रश्ने कोऽभिप्राय इत्याह—युयुत्सोरिति । प्राकृतमतिर्बहिर्जनस्वभावः ॥ * ॥ अस्य हंताऽहम्, अयं मया हत इत्येवं लौकिकं प्राकृतलोकभवं चेष्टितं यस्य सः ॥ ७ ॥ स चार्जुनः । इति भाव इति—यथार्जुनो ममातिप्रियस्तया त्वमप्यतस्तुभ्यमपि कथयिष्याम्येवेति तात्पर्यम् ॥ * ॥ तद्वदेवार्जुनस्येव ॥ ८ ॥ या अर्जुनायोक्तास्ता इत्यर्थः । अस्मच्छब्देन समानमधिकरणं येषां ते तथा । यथायोग्यं प्रसंगानुरूपम् । यतोऽस्मच्छब्दसमानाधिकरणविभूतयस्ततो हेतोः । इत्यर्थ इति—सुहृदात्मा च सर्वेषामुपास्य एवेति प्रसिद्धमिति भावः । उक्तमर्थमन्यत्राप्यतिदिशति—एवं सर्वत्रेति । सर्वत्राहमेवोपास्यस्सर्वासु विभूतिष्वित्यर्थः । तेषां भूतानाम् । इत्यर्थ इति—स्थित्युद्भवाप्ययानां कारणमहमेव 'जन्माद्यस्य यतः' इति न्यायादिति भावः ॥ * ॥ आत्मांतर्यामी सर्वेश्वरांतर्यामित्वलक्षणेन सामान्यधर्मेणाहं सर्वैरुपास्यः । इत्यर्थः अंतर्यामित्वलक्षणाऽप्राकृतविभूतिवर्णनम् । भूतानि व्यवहारसंपादकानि सर्वाण्यहमेव सद्वैभवविशेषानुभावितैरेव तैर्व्यवहारासिद्धेः । इति प्राकृतविभूतिवर्णनं तद्धेतुः सर्वकारणमिति । महत्स्रष्टृपुरुषरूपा प्राकृतविभूतिः । एवमन्यत्रापि विवेचनीयम् ॥ ९ ॥ यद्वा—गतिमतां ज्ञानवतां गतिर्ज्ञानम् 'ज्ञानं

१ अहो पृष्ट इति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणिनामप्यहं सूत्रं महतां च महानहम् ॥ सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥ ११ ॥ हिरण्यगर्भो वेदानां मंत्राणां प्रणवस्त्रिवृत् ॥ अक्षराणा
मकारोऽस्मि पदानि च्छंदसामहम् ॥ १२ ॥ इंद्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट्॥आदित्यानामहं विष्णू रुद्राणां नीललोहितः ॥ १३ ॥

गुणानां मध्ये साम्यं सर्वत्र समत्वम् । गुणानां सत्त्वादीनां साम्यमव्याकृतं वा । गुणिनि धर्मिणि औत्पत्तिकः स्वाभाविको यो गुणः सोऽहम् ॥ १० ॥ सूत्रं प्रथमकार्य
म् । महान्महत्तत्त्वम् । सूक्ष्मोपाधित्वाद्दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वम् । "बुद्धेर्गुणेनात्मगुणेन चैव वालाग्रमात्रो ह्यवरोऽपि दृष्टः" इति श्रुतेः ॥ ११ ॥ वेदानां संबंधी

ज्ञानवतामहम्' इति श्रीगीतोक्तेः । तद्वत्सु नित्यं सन्निहित इत्यर्थः । गुणिनि आकाशादौ स्वाभाविकः शब्दादिः ॥ * ॥ गतिः फलं शरणागतिर्वा । धर्मिण्याकाशादौ स्वाभाविकः शब्दादिः ॥ १० ॥
प्रथमं कार्यं प्रधानस्येति शेषः । सूक्ष्मोपाधित्वात्सूक्ष्मशब्दापरपर्यायलिंगशरीरोपाधित्वात्, "वालाग्रशतभागस्य" इत्यादिश्रुतेर्दुर्ज्ञेयत्वाच्च । बुद्धेर्गुणेन व्यवसायेनात्मगुणेन विचारेणाराग्रमात्रोतीवसूक्ष्मोऽवर ईश्वरा
पेक्षया दृष्टो योगिभिरिति श्रुत्यंतरपदार्थः ॥ * ॥ सूत्रं प्राण इत्यर्थः । महतां महत्त्ववतामंतःकरणानां मध्ये महांश्चित्तमित्यर्थः । जीव इति—"एषोणुरात्मा चेतसा वेदितव्यः । यस्मिन्प्राणाः पंचधा संविवेश"
इति "बालाग्रशतभाग्यस्य" इति "आराग्रमात्रो ह्यवरोऽपि दृष्टः" इत्यादिश्रुतेः । अत्र जीवस्य परमाणुपरिमाणत्वेपि संपूर्णदेहव्यापिशक्तिमत्त्वं जतुजटितस्य महामणेर्महौषधिखंडस्य च शिरसि धृतस्य
पूर्णदेहपुष्टिकरिष्णुत्वशक्तित्वमविरुद्धम् ॥ * ॥ **दीपिका**—गुणिनां कार्याणां मध्ये अद्वयवादे हि वस्तुतो जीवानां ब्रह्मत्वेन विभुत्वादणुत्वं न संगच्छत इति तन्मतानुसारेण गौण्या वृत्त्या व्याचष्टे—सूक्ष्मोपाधित्वादिति ।
सूक्ष्मं लिंगशरीरमुपाधिर्यस्य तस्य भावस्तत्त्वं तस्मात् । उपाधेर्लिंगस्य सूक्ष्मत्वेनोपहितस्यापि सूक्ष्मत्वव्यपदेशः, सूक्ष्मो हि दुर्ज्ञेयत्वगुणो भवति तस्माद् दुर्ज्ञेयत्वाच्च सूक्ष्मत्वम् ॥ * ॥ **संदर्भस्तु**—सूक्ष्माणामिति—सूक्ष्मतापरा
काष्ठां प्राप्तो जीव इत्यर्थः । दुर्ज्ञेयत्वात्सूक्ष्मत्वं तदत्र न विवक्षितं महतां चेति सूक्ष्माणामपीति परस्परप्रतियोगित्वेन वाक्यद्वयस्यानंतर्योक्तौ क्रियास्वारस्यभंगापत्तेः । प्रपंचमध्ये सर्वकारणत्वान्महत्तत्त्वस्य महत्त्वं नाम व्याप
कत्वं न तु पृथिव्याद्यपेक्षया सुज्ञेयत्वं यथा तद्वत् प्रपंचे जीवानामपि सूक्ष्मत्वं परमाणुत्वमेवेति स्वारस्यम् । ११ ॥ त्रिवृत् अकारोकारमकारात्मकः "नादबिंदू त्वर्द्धमात्रा सानुच्चार्या त्वयोगिभिः" इति त्रिवृत्पदं सार्द्धत्रिवृ
त्परं प्रणवस्य सार्द्धत्रिमात्रत्वमेवेति निश्चयात् । छंदसां नियताक्षरपादत्वरूपच्छंदोविशिष्टानामृचां मध्ये द्विजातेर्द्वितीयजन्महेतुत्वेन प्रातःसवनादिसवनत्रयव्यापित्वेन त्रिष्टुब्जगतीभ्यां सोमाहरणार्थं गताभ्यां सोमो न लब्धोऽ
क्षराणि च हारितानि जगत्या त्रीणि त्रिष्टुभैकमिति चत्वारि तैरक्षरैः सह "सोमस्याहरणेन च सर्वश्रेष्ठा गायत्री ऋगहं चतुरक्षराणि हवा अग्रे छंदांस्यासुस्ततो जगती सोममच्छापतत त्र्यण्यक्षराणि हि त्वां जगाम, ततस्त्रि
ष्टुप् सोममव्यापतत्सैकमक्षरं हित्वा जगाम, ततो गायत्री सोममच्छापतत्सा तानि चाक्षराणि हरंत्यागच्छत्सोमञ्च ततोष्टाक्षरा गायत्रीत्युपक्रम्य तदाहुर्गायत्राणि वै सर्वाणि सवनानि गायत्री ह्येवैतदुपसृजमानैः" इति शतपथ
श्रुतेः गायत्री वा । "इदं सर्वं भूतम्" इत्यादिच्छांदोग्यश्रुतेश्च । त्रयः पादा अष्टाक्षरात्मका यस्याश्चतुर्विंशत्यक्षरात्मिकायाः सा । त्रिपदा पादस्य पदादेशः समासांतप्रत्ययानां तद्धितांतर्भूतत्वात् । इत्यर्थ इति—
'यायत्री छंदसामहम्' इति श्रीगीतोक्तेरिति भावः ॥ * ॥ ० ॥ १२ ॥ हव्यं वहतीति हव्यवाट् वह्निनाम ॥ * ॥ विष्णुर्वामनोऽदितिपुत्राणां मध्येऽहमिति अप्राकृतविभूतिनिर्देशः । नीललोहितः

१ "वालाग्रं स्यादष्टकेन त्र्यणुकानां मुनीश्वराः" इति शैवोक्तेः । २ वालाग्रमात्र इत्यत्र आराग्रमात्र इतिपाठे 'आरा चर्मप्रभेदिनी' इति कोशः प्रमाणम् । ३ व्यापकत्वेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः ॥ देवर्षीणां नारदोऽहं हविर्धान्यस्मि धनुषु ॥ १४ ॥ सिद्धेश्वराणां कपिलः सुपर्णोऽहं पतत्रिणाम् ॥
प्रजापतीनां दक्षोऽहं पितॄणामहमर्यमा ॥ १५ ॥ मां विद्धयुद्भव दैत्यानां प्रह्लादमसुरेश्वरम् ॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसाम् ॥ १६ ॥
ऐरावतं गजेंद्राणां यादसां वरुणं प्रभुम् ॥ तपतां द्युमतां सूर्यं मनुष्याणां च भूपतिम् ॥१७॥ उच्चैःश्रवास्तुरंगाणां धातूनामस्मि कांचनम्॥यमः संयमतां
चाहं सर्पाणामस्मि वासुकिः ॥१८॥नागेंद्राणामनंतोऽहं मृगेंद्रः शृंगिदंष्ट्रिणाम्॥ आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ॥१९॥तीर्थानां स्रोतसां गंगा
समुद्रः सरसामहम्॥आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मताम्॥२०॥धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमालयः॥वनस्पतीनामश्वत्थ ओषधीनामहं यवः
॥२१॥पुरोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां बृहस्पतिः॥स्कंदोऽहं सर्वसेनान्यामग्रण्यां भगवानजः॥२२॥यज्ञानां ब्रह्मयज्ञोऽहं व्रतानामविहिंसनम्॥वाय्वग्न्यर्कां
बुवागात्मा शुचीनामप्यहं शुचिः ॥ २३ ॥ योगानामात्मसंरोधो मंत्रोऽस्मि विजिगीषताम् ॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनाम्॥२४॥

तेषामध्यापकः । पदानि त्रिपदा गायत्रीत्यर्थः ॥ १२ ॥ १३ ॥ हविर्धानी कामधेनुः ॥ १४ ॥ १५ ॥ नक्षत्रौषधीनां प्रभुं सोमम् । यक्षरक्षसां प्रभुम् ॥ १६ ॥
यादसां प्रभुम् । तपतां तापयताम् । द्युमताम् दीप्तिमतां च मध्ये ॥ १७ ॥ संयमतां दंडयतामित्यर्थः ॥ १८ ॥ शृंगिणां दंष्ट्रिणां च मध्ये तेषां प्रभुर्वा । तुर्यः संन्यासः ।
प्रथमो ब्राह्मणः ॥ १९ ॥ स्रोतसां प्रवाहाणां च सरसां स्थिरोदकाशयानाम् ॥ २० ॥ धिष्ण्यानां निवासस्थानानाम् । गहनानां दुर्गमानाम् ॥ २१ ॥ ब्रह्मनिष्ठानां
वेदार्थनिष्ठानाम् । सेनान्यां चमूपतीनाम् । अग्रण्यां सन्मार्गप्रवर्तकानाम् । अजो ब्रह्मा ॥ २२ ॥ शुचीनां शोधकानामपि मार्जनतक्षणघर्षणादीनां मध्ये वाय्वादिरूपः
शोधकोऽहम् ॥ ॥ २३ ॥ योगानां योगांगानामष्टानां मध्ये आत्मसंरोधः समाधिरहम् । मंत्रो नीतिः । कौशलानां विवेकादिनैपुणानां मध्ये आन्वीक्षिकी आत्मा

सदाशिवः ॥ १३ ॥ ० ॥ * ॥ ० ॥ १४ ॥ ० ॥ * ॥ ० ॥ १५ ॥ प्रभुं स्वामिनम् ॥ * ॥ ० ॥ १६ ॥ ० ॥ * ॥ ० ॥ १७ ॥ ‘ धातूनामस्मि काञ्चनम् ’ इह काञ्चनस्य विष्णुरिव रक्षःपिशाचादिबाधकत्वा
त्सर्वदेवानामादिबलत्वाद्विभूतित्वं तदुक्तमथर्वषष्ठानुवाके–“ नैनं रक्षांसि न पिशाचाः सहंते देवानामोजः प्रथमे ह्येतत् । यो बिभार्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः ॥ ” इति ॥ * ॥ ० ॥ १८ ॥
अनंतः शेषः ॥ * ॥ शृंगिणां मध्ये मृगेन्द्रः कृष्णसारः । दंष्ट्रिणां मृगेंद्रः सिंहः “ वाराहे कृष्णसारे च मृगेन्द्रो गजवैरिणि ” इति निरुक्तेः ॥ १९ ॥ त्रिपुरघ्न इति रूपांतरविवक्षयैकस्य द्विरावृत्त्या विभूतित्वम् ॥ * ॥
॥ ० ॥ २० ॥ ० ॥*॥ ०॥२१॥ ० ॥ * ॥ ० ॥२२॥ ब्रह्मयज्ञः स्वाध्याययज्ञः । व्रतानां नियमानाम् । मार्जनादीनां शोधकत्वमग्रे वक्ष्यामः ॥*॥ यज्ञानां पंचयज्ञानां ब्रह्मयज्ञो वेदाध्ययनाध्यापनलक्षणः । वाद्यादिपठि
तावाक् ब्राह्मणस्यैव शुद्धमिदमित्येवंरूपा ज्ञेया ॥ २३ ॥ अष्टानां यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीनाम् । विजिगीषतां शत्रुजयमीप्सताम् । मिथो विचारो वा मंत्रः । अथ ख्यातयः–वेदान्तिनां मतेऽ
निर्वचनीयख्यातिः, शुक्तावनिर्वचनीयरजतमुत्पद्यते । नैयायिकानां मतेऽन्यथाख्यातिः, अन्यत्र शुक्त्यादौ देशांतरस्थरूप्यादेरध्यासः । विज्ञानवादिमते आत्मख्यातिः, बाह्ये शुक्त्यादौ बुद्धिरूपात्मधर्मस्य रजतस्याध्यासः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीणां तु शतरूपाऽहं पुंसां स्वायंभुवो मनुः ॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणाम् ॥ २५ ॥ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः ॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहम् ॥ २६ ॥

त्मविवेकविद्या । आख्यात्यन्यथाख्यातिशून्यख्यात्यसत्ख्यात्यनिर्वचनीयख्यातिवादिनामेवमिदमेवं वेति यो दुरंतो विकल्पः सोऽहम् ॥ २४ ॥ कुमारः सनत्कुमारः ॥ २५ ॥ संन्यासो भूताभयदानम् । क्षेमाणामभयस्थानानां मध्ये अबहिर्मतिरंतर्निष्ठा । सूनृतं प्रियवचनं मौनं च । न हि प्रियभाषणे मौने च पुरुषस्याभिप्रायो ज्ञायते ।

आंतरस्य रजतस्य बहिर्वदवभास इति वदंति । मीमांसकमतेऽख्यातिर्नाम यत्र यस्याध्यासो लोकसिद्धस्तयोरर्थयोस्तद्धियोश्च भेदाग्रहे सति तन्मूलो भ्रम इदं रूप्यमिति विशिष्टव्यवहार इति वदंति । शून्यवादिमतेऽसत्ख्यातिः, शुक्त्यादौ रजतादेरत्यंतासतः कल्पनं शुक्त्यावपरोक्षस्य रजतस्य देशांतरे बुद्ध्यादौ वा सत्त्वायोगात्, शून्यत्वे प्रत्यक्षत्वायोगाच्छुक्तौ सत्त्वे बाधायोगान्मिथ्यात्वमेवेति भावः । एतदेव स्फुटयति पुनः—"आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा । तथाऽनिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम् ॥ विज्ञानशून्यमीमांसातर्काद्वैतविदां मतम्॥" इति । तत्र प्रवृत्तिरूपपरंपरैव तत्तद्विषयाकारतया बहिर्भासते स्वाप्निकविषयवदिति विज्ञानवादिनः, ते च शुक्तिरजतादावात्मख्यातिं मन्यन्ते।आत्मैव विषयाकारतया भासत इत्यात्मख्यातिरिति १ । अथ शून्यादेव सर्वमविद्यया जायत इति शून्यवादिनः, ते च शुक्तिरजतादावप्यसत्ख्यातिं मन्यंते, अलीकपदार्थतया भासमानत्वमसत्ख्यातिरिति २ । शुक्त्यादिपरंपरारूपरजतादिपरंपरारूपमपि वस्तुजातमस्तीति मीमांसकाः,ते च शुक्तिरजतादावख्यातिं मन्यंते, परस्परसंश्लेषेण यद्ज्ञानद्वयं तदख्यातिरिति ३। अथ द्व्यणुकाद्यारंभेण तत्तद्द्रव्यं जायत इति तार्किकाः, अतद्वति तत्संसर्गोऽन्यथाख्यातिरिति ४।अथ सर्वमेवाद्वैतमनिर्वचनीयमित्यद्वैतवादिनः, ते च तस्य दृष्टान्ते शुक्तिरजतादावनिर्वचनीयख्यातिं मन्यन्ते, सदसद्भिन्नत्वे सति सदसदात्मकं ज्ञानमनिर्वचनीयमिति ५। वैष्णवास्तु—"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा।परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्॥"इति सर्वस्य भगवच्छक्तिरूपत्वाभिधानात् "सदेव सोम्येदमग्रआसीत्" इति सर्वस्य सत्यत्वांगीकारात्सर्वत्र सत्ख्यातिरेव 'सद्धेतुका सत्ख्यातिः' इति लक्षणादिति मन्यंते ॥*॥"आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा । तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम् ॥ विज्ञानशून्यमीमांसातर्काद्वैतविदां मतम् ।" इति । तत्रांतर्वृत्तिरूपविज्ञानपरंपरैव तत्तद्विषयाकारतया बहिर्भासते स्वाप्निकविषयवदिति विज्ञानवादिनः, ते च शुक्तिरजतादावात्मख्यातिं मन्यन्ते, तस्याश्च लक्षणं विषयाकारे सत्यन्ते वैशिष्ट्यासंसर्ग आत्मख्यातिरिति । विषयो रजतादिवस्त्वेवाकारो यस्य तस्मिन्विज्ञाने सति स्वप्नवदेवावस्तुतो रजतापादकवैशिष्ट्याग्रहणमात्मख्यातिरित्यर्थः।अथ शून्यादेव सर्वमविद्यया जायत इति शून्यवादिनः, ते च शुक्तिरजतादावप्यसत्ख्यातिं मन्यन्ते, तस्याश्च लक्षणम्—अलीकपदार्थतया भासमानत्वमसत्ख्यातिरिति । यथाऽसदाख्यं शून्यमेव शुक्त्यात्मना भासते तथा रजतात्मनापि भासते, किन्तु यत्र रजतादिकमर्थकारि न स्यात्तत्रालीकपदार्थतया व्यवह्रियते । अथ शुक्त्यादिपरंपरारूपं रजतादिपरंपरारूपमपि वस्तुजातमस्तीति मीमांसकाः, ते च शुक्तिरजतादावख्यातिं मन्यंते, तस्या लक्षणम्—परस्परसंश्लेषेण यत्प्रत्यक्षात्मकं स्मरणात्मकं ज्ञानद्वयं तदख्यातिरिति, विज्ञानानां विज्ञेयानां च विवेकाग्रहणमिति वा, इदं तद्रजतं तत्रेदंतापरामर्शेन शुक्त्यादिकं प्रत्यक्षतो गृह्यते तत्तापरामर्शेन तु रजतं स्मर्यते तथा च ज्ञानद्वयमपि सत्यमेव अभेदेन ग्रहणं तु मानसदोषादित्यर्थः । अथ द्व्यणुकाद्यारंभेण तत्तद्द्रव्यं जायत इति तार्किकाः, ते च शुक्तिरजतादावन्यथाख्यातिं मन्यन्ते, तस्या लक्षणं तु—अतद्वति तत्संसर्गोन्यथाख्यातिरित्यर्थः । विरुद्धप्रकारकं ज्ञानमेकवृत्त्यन्यथाख्यातिरिति प्राचीनतार्किकाः । अथ सर्वमेव द्वैतमनिर्वचनीयमित्यद्वैतवादिनः, ते च तस्य दृष्टान्ते शुक्तिरजतादावनिर्वचनयिख्यातिं मन्यंते, तल्लक्षणं तु—सदसद्भिन्नत्वे सति सदसदात्मकं ज्ञानिर्वचनीयख्यातिरिति । ज्ञानमाधितत्वावात्सतो भिन्नत्वं तथाप्यापातत उपलभ्यमानत्वादसतो भिन्नं तथात्वे सति सदसदात्मकं ज्ञानमनिर्वचनीयख्यातिरित्यर्थः । स्वमते तु—विकल्पः ख्यातिवादिनामित्युक्त्या ते च विकल्पा मम शक्तिमया एवेति न परस्परमद्यापि व्युच्छिद्यते, ततस्तत्प्रतिपाद्यस्य शक्तेश्चाचिंत्यत्वं विज्ञाप्य तन्मयत्वात्सर्वत्राचिन्त्यशक्तित्वमेव प्रतिपादितम् ॥ २४ ॥ नारायणो नरभ्राता धर्मात्मजः ॥ * ॥ ० ॥ २९ ॥ अंतर्निष्ठा प्रत्यगात्मज्ञानम् ॥ * ॥ संन्यासस्त्यागो दानमिति यावत् । पूर्वं वेदाध्यापकत्वावच्छेदेन हिरण्यगर्भो विभूतित्वेनोक्त इह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संवत्सरोऽस्म्यनिमिषामृतूनां मधुमाधवौ ॥ मासानां मार्गशीर्षोऽहं नक्षत्राणां तथाऽभिजित् ॥ २७ ॥ अहं युगानां च कृतं धीराणां देवलोऽसितः ॥
द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् ॥२८॥ वासुदेवो भगवतां त्वं तु भागवतेष्वहम् ॥ किंपूरुषाणां हनुमान्विद्याध्राणां सुदर्शनः ॥
॥ २९ ॥ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसाम् ॥ कुशोस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहम् ॥ ३० ॥

अजः प्रजापतिः । यस्य देहार्धाभ्यां मिथुनमभूत्स एव मुख्यं मिथुनम् । "अर्धो ह वा एष आत्मनो यत्पत्नी" इति श्रुतेः ॥ २६ ॥ अनिमिषामनिमिषाणामप्रमत्ता
नाम् । मधुमाधवौ वसंत इत्यर्थः । अभिजिदुत्तराषाढाचतुर्थपादः श्रवणप्रथमपादश्च । तथाच श्रुतिः "अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामधस्ताच्छ्रोणायाः" इत्यादिः
॥ २७ ॥ कृतं कृतयुगम् । देवलोऽसितश्च । व्यासानां वेदविभागकर्तृणाम् । कवीनां विदुषां काव्यः शुक्र आत्मवाञ्ज्ञानी ॥ २८ ॥ भगवताम् "उत्पत्तिं प्रलयं चैव
भूतानामागतिं गतिम् ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥" इत्येवंलक्षणानाम् ॥ २९ ॥ पद्मरागो लोहितमणिः । सुपेशसां सुंदराणाम् । दर्भजातीनां

तु मिथुनोत्पादकत्वावच्छेदेन मुख्यमिथुनत्वेनेति विशेषणभेदेन विशेष्यभेदावगमात् ॥ २६ ॥ अनिमिषामिति क्विबन्तात्षष्ठी । इत्यर्थ इति–" मुखं वा एतदृतूनां यद्वसन्तः" इति श्रुतेस्सर्वर्तुमुख्यत्वान्मद्रूप इति भावः ।
मार्गशीर्षोभिनवशालिवास्तूकयज्ञियान्नागमकालः, शीतातपशून्यत्वेन सुखहेतुश्च । उत्तराषाढचतुर्थपादत्वे प्रमाणमाह–तथा चेति । श्रोणायाः श्रवणात्, श्रीपतिना तन्मानमप्युक्तं रत्नमालायाम्–" वैश्वदैवतचतुर्लवः
श्रवः पञ्चभूलव १९ इहाभिजिन्मितिः" इति । वैश्वदैवतस्योत्तराषाढर्क्षस्य चतुर्थांशः पञ्चदश घट्यः, श्रवणस्य पञ्चदशांशश्चतुर्घट्यस्तथा चैकोनविंशतिघटिकामानमभिजिन्नक्षत्रम् उत्तराषाढाधिक्याच्छ्रवणांशयोगः
स्वामिचरणैरुपेक्षितः । शरीरपार्थिवाद्युक्तिवदत उक्तमुत्तराषाढचतुर्थपाद इति ॥ * ॥ श्रोणायाः श्रवणस्य । तदुक्तं ज्योतिषे–" उषायाश्चांत्यपादश्च श्रुतेराद्यब्धिनाडिकाः । अभिजिद्भमितिर्ज्ञेया ह्यष्टाविंशति
भेषु च ॥" इति ॥ २७ ॥ व्यासानामिति–" अष्टाविंशतिकृत्वो वै वेदा व्यस्ता महर्षिभिः । वैवस्वतेंतरे तस्मिन्द्वापरेषु पुनःपुनः ॥ वेदव्यासा व्यतीता ये अष्टाविंशतिसत्तमाः । चतुर्द्धा यैः कृतो वेदो द्वापरेषु
पुनःपुनः ॥ द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयंभुवा । द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ॥ तृतीये चोशना व्यासश्चतुर्थे च बृहस्पतिः । सविता पंचमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ॥ सप्तमे च तथै
वेन्द्रो वसिष्ठश्चाष्टमे स्मृतः । सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ॥ एकादशे तु त्रिवृषा भारद्वाजस्ततः परम् । त्रयोदशे त्वांतरिक्षो वप्रीवापि चतुर्दशे । त्रय्यारुणिः पंचदशे षोडशे तु धनं
जयः ॥ कृतंजयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः । ततो व्यासो भरद्वाजो गौतमस्तु ततः परम् ॥ उत्तमस्तु ततो राजश्रवा व्यासस्ततो मुने । तृणबिंदुश्च वाल्मीकिस्ततः शक्तिस्ततो ह्यहम् ॥
जातूकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः । अष्टाविंशतिरित्येते वेदव्यासाः प्रकीर्तिताः ॥ भविष्ये द्वापरे द्रौणिर्वेदव्यासो भविष्यति ।" इति विष्णुपुराणोक्तेः ॥ * ॥ आत्मवान् आत्मानात्मविवेकज्ञः
॥ २८ ॥ आगतिं लोकांतरात्, गतिं लोकांतरगमनम् । विद्यां मोक्षहेतुमविद्यां संसारहेतुम् । त्वमुद्धवः ॥ * ॥ भगवतां षड्गुणयुक्तभगवदाविर्भावानां मध्ये वासुदेवश्चतुर्व्यूहस्यादिव्यूहः । अनेन स्वस्य ततोपि
परत्वं दर्शितम् । उत्पत्त्यादिज्ञानयुक्तानामिति व्याख्यायां मुन्यादित्वे प्राप्ते विजातीयत्वेन निर्द्धारणानुपपत्तेस्तथापि उत्पत्त्यादिज्ञानयुक्तत्वमेव जातिं कल्पयित्वा तथा व्याख्यातमिति स्थितस्य गतिश्चिन्तनीया
॥ २९ ॥ दर्भजातीनाम "कुशाः काशास्तथा दूर्वा यवा व्रीहय एव च । बल्वजाः पुंडरीकाणि सप्तधा बर्हिरुच्यते ॥" इति यमः । गव्यमिति महिष्यादिघृतानां श्राद्धाद्यनर्हत्वात् । अज्यते स्निह्यतेऽनेनेत्याज्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः ॥ तितिक्षाऽस्मि तितिक्षूणां सत्त्वं सत्त्ववतामहम् ॥ ३१ ॥ ओजः सहो बलवतां कर्माहं विद्धि सात्वताम् ॥ सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ॥ ३२ ॥ विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहम् ॥ भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ॥३३॥ अपां रसश्च परमस्तेजिष्ठानां विभावसुः ॥ प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः ॥ ३४ ॥ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः ॥ भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥ ३५ ॥ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणम् ॥ आस्वादश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियम् ॥३६॥ पृथिवीवायुराकाश आपो ज्योतिरहं महान् ॥ विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परम् ॥ अहमेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ॥ ३७ ॥

काशदूर्वादीनाम् । हविःषु चरुपुरोडाशादिषु घृतेषु वा ॥ ३० ॥ लक्ष्मीर्धनादिसंपत् । छलग्रहो द्यूतम् ॥ ३१ ॥ बलवतामोजश्च सहश्च । सात्वतां भागवतानां भक्त्या कृतं कर्माहमित्यर्थः । तेषामेव नवव्यूहार्चने वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति या नवमूर्तयस्तासां मध्ये वासुदेवाख्याहम् ॥ ३२ ॥ गंधर्वाणां विश्वावसुः । अप्सरसां पूर्वचित्तिः । गंधमात्रमविकृतम् ॥ ३३ ॥ परमो मधुरः । परः पराख्यः शब्दः ॥ ३४ ॥ अर्जुनः पार्थः । भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ॥ ३५ ॥ गत्यादयः पंचकर्मेंद्रियव्यापाराः । स्पर्शादयो ज्ञानेंद्रियव्यापाराः । तत्र लक्षणं दर्शनम् । सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरप्यहम् ॥ ३६ ॥ तदेवं तत्रतत्र निर्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति पृथिवीति सार्धद्वयेन । पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि । अहमहंकारः महान्महत्तत्त्वम् । एताः सप्त प्रकृतिविकृतयः । विकारः पंचमहाभूतानि एकादशेंद्रियाणि चेत्येवं षोडश

'अंजू—व्यक्तिम्रक्षण—' इत्याद्यर्थकधातोः "अंजेः संज्ञायाम्" इति क्यप् । न त्वजाया इदमाज्यमिति व्युत्पत्त्या छाग्या घृतमपि यज्ञादौ ग्राह्यमिति भ्रमितव्यम् । अनामिषत्वात्तस्य भक्षणे तु न दोष इत्यलमप्रकृतेन ॥ * ॥ रत्नानां पद्मरागोस्मि इत्यनेन कौस्तुभस्य तज्जातीयत्वं व्यंजितम् । अत एव क्रमदीपिकायाम्—' कौस्तुभं भानुमंतम ' इति तद्ध्यानं दार्शितम् । इन्द्रनीलजातीयत्वं तु यन्नारायणस्तवे तदन्यत्र ज्ञेयम् ॥ ३० ॥ व्यवसायिनां व्यवहर्तॄणामुद्यमवतां वा । कितवानां दीव्यताम् । छलस्य वञ्चनस्य ग्रहो ग्लहो यत्र स तथा द्यूतमित्यर्थः । 'द्यूतं छलयतामस्मि' इति श्रीगीतोक्तेः । सत्ववतां प्राणिनां सत्वम् "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जंतुषु ॥" इति मेदिनी । बुद्धिमतां बुद्धिनिर्वाहम् ॥ * ॥ व्यवसायिनामुद्यमवतामिति संबंधे षष्ठी । कितवानां कापट्यवताम् । छलग्रहो द्यूतम् । सत्त्वं धैर्यम ॥ ३१ ॥ इत्यर्थ इति—न तु स्वाभाविकं स्नानपानादिरूपमपि मद्विभूतिरिति भावः । तेषामेव सात्वतामेव । नवव्यूहार्चनप्रकारः पंचरात्रतोऽवसेयः ॥ * ॥ नवसु ब्रह्मायं साक्षाद्भगवद्रूपः । यः खलु तादृशजीवासद्भावे तत्कर्मार्थं स्वयमाविर्भवति यज्ञरूपेणेंद्रवत् । क्वचित्कल्पे विष्णुरेव ब्रह्मा भवति ॥ ३२ ॥ भूधराणां पर्वतानाम् । अविकृतं सुरभ्यादिभेदहीनम् ॥ * ॥ गन्धमात्रमहं भुव इति मात्रपदोपादानात् 'पुण्यो गंधः पृथिव्यां च' इति गीतोक्तेर्दुर्गन्धो व्यावृत्तः । 'अपां रसश्च परमः' इत्युत्तरवाक्यस्वारस्यात् ॥ ३३ ॥ तेजिष्ठानामर्चिष्मताम् । पराख्यः परापश्यंतीमध्यमावैखरीरूपेषु प्रथमः ॥ * ॥ ० ॥ ३४ ॥ वीराणां शूराणाम् ॥ * ॥ ० ॥ ॥ ३९ ॥ आनंद उपस्थस्य "सर्वेषामानंदानामुपस्थः परमानन्दः" इति श्रुतेः । तत्र तेषु । लक्ष्यत इति लक्षणम् 'लक्ष—दर्शनाङ्कनयोः' इत्यतो भावे ल्युट् ॥ * ॥ इन्द्रियं तत्तच्छक्तिहेतुरित्यर्थः । "चक्षुषश्चक्षुः" इत्यादिश्रुतेः ॥ ३६ ॥ तदेवम् इत्यम् । तत्त्वानां पञ्चविंशत्वे प्रमाणमाह—तदुक्तमिति । उक्तामेव विभूतिं भंग्यंतरेणाह—किंचेति । न केवलं तत्त्वान्येव मद्विभूतयोपि तु तद्गणनादिकमपीत्याह—किञ्चेति ॥ * ॥ पृथिवीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयेश्वरेण जीवेन गुणेन गुणिना विना ॥ सर्वात्मनाऽपि सर्वेण न भावो विद्यते क्वचित् ॥ ३८ ॥
संख्यानं परमाणूनां कालेन क्रियते मया ॥ न तथा मे विभूतीनां सृजतोऽडानि कोटिशः ॥ ३९ ॥

संख्याकः । पुरुषो जीवः । अव्यक्तं प्रकृतिः एवं पंचविंशतितत्त्वानि । तदुक्तम् । " मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ॥ षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ " इति । किंच रजः सत्त्वं तम इति प्रकृतेर्गुणाश्च परं ब्रह्म च तदेतत्सर्वमहमेव । किंचैतत्प्रसंख्यानमेतेषां परिगणनमेतेषां लक्षणतो ज्ञानं च तत्फलं तत्त्वनिश्चयश्चाहमेव ॥ ३७ ॥ एतदेव संक्षिप्याह । मयेति जीवेश्वररूपो द्विविधो यो भावो यश्च गुणिगुणरूपो यश्च क्षेत्रज्ञक्षेत्ररूपः स सर्वोऽपि अहमेव मया विना मद्व्यतिरेकेण नास्ति । अहमेव सर्वमित्यर्थः ॥ ३८ ॥ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्ववन्निर्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत्तत्राह ।

सार्द्धकम् । तत्त्वानां पञ्चविंशतिकत्वं सांख्यतत्त्वकौमुद्यामुक्तम्—मूलेति । प्रकर्षेण करोतीति प्रकृतिः प्रधानं सत्त्वरजसां साम्यावस्था मूलं चासौ प्रकृतिश्चेति अजहल्लिंगत्वात्क्लीबेनापि सामानाधिकरण्यम् । यावत्कार्यमूलत्वा न्नास्या मूलांतरापेक्षाऽनवस्थाप्रसंगात् । महदाद्याः सप्त प्रकृतयो विकृतयश्च । तत्र तत्त्वांतरोपादानत्वं प्रकृतित्वं कार्यत्वं च विकृतित्वम् । तथाहि—महत्तत्त्वमहंकारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः । एवमहंकारस्तन्मात्रेंद्रि याणां प्रकृतिर्विकृतिश्च महतः । एवं पञ्च तन्मात्राणि भूतानामाकाशादीनां प्रकृतयो विकृतयोहंकारस्य । एकादशेंद्रियपञ्चमहाभूतलक्षणः षोडशको गणः कार्यमेव न कस्यापि कारणं घटादिजनकत्वेऽपि तत्त्वांतराणाम जनकत्वान्न प्रकृतित्वमिति **दीपिका** ॥ * ॥ **संदर्भस्तु**—परं ब्रह्म चेति ब्रह्मणोपि स्वविभूतित्वमुक्तम् । युक्तं चैतत्, विशिष्टतयाविर्भावाच्छ्रीभगवतो धर्मिरूपत्वम् अविशिष्टतयाविर्भावाद्ब्रह्मणो धर्मरूपत्वं ततः पूर्वस्य मंडल स्थानीयत्वमिति भावः । तत्र श्रीविष्णुपुराणमपि संप्रवदते—"शुभाश्रयः सचित्तस्य सर्वज्ञस्य तथात्मनः" इति व्याख्यातञ्च स्वामिभिः । सर्वज्ञस्यात्मनः परब्रह्मणोप्याश्रयः प्रतिष्ठा श्रीभगवताप्युक्तम्—'ब्रह्मणो हि प्रतिष्ठा हम्' इति । अत्र च तैर्व्याख्यातम्—ब्रह्मणो हि प्रतिष्ठा घनीभूतं ब्रह्मैवाहम्—यथा घनीभूतः प्रकाश एव सूर्यमंडलस्तद्वदित्यर्थः । श्रीमत्स्यदेवेनापि तथैवोक्तम्—"मदीयं महिमानं च परं ब्रह्मेति शब्दितम्" इति । ब्रह्मसं हितायाञ्च—"यस्य प्रभा प्रभवतो जगदंडकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नम् । तद्ब्रह्म निष्कलमनंतमशेषभूतं गोविंदमादिपुरुषं तमहं भजामि ॥" इति । यामुनाचार्यैरप्युक्तम्—"यदंडमंडांतरगोचरं च यद्दशोत्तराण्याव रणानि यानि च । गुणाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः ॥" इति । अत एवाह श्रीध्रुवः—"या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किंत्वंतकासिलुलितात्पततां विमानात् ॥" इति । अत एव भगवद्गुणेनात्मारामाणामप्याकर्षणं भवति । यथा—'आत्मारामाश्च मुनयः' इत्यादौ 'स्वसुखनिभृतचेताः' इत्यादौ दृष्टश्च तथैव श्रीव्यासनारदसंवादे प्रथमे । अत्र विशेषो भगवत्संदर्भे दृश्यः । एतत्प्रसंख्यानमेतत्परिगणनम् । एतेषां लक्षणतोऽसाधारणधर्मतो ज्ञानं तत्फलं तत्त्वज्ञानफलञ्च तत्त्वनिश्चयश्चाहमेवेति तैः ॥ ३७ ॥ एतदेव सर्वात्मत्वमेव । इत्यर्थ इति—'सर्वं समाप्नोषि ततोसि सर्वः' इति स्मृतेः । सर्वेण सर्वं व्याप्य तिष्ठता बहिर्व्याप्तिं वारयति—सर्वात्मनेति । "यच्च किंचिज्जगद्वस्तु दृश्यते श्रूयतेऽपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेरिति भावः ॥ * ॥ मया विना भावः पदार्थमात्रं क्वचिन्न विद्यते, सर्वकारणं मां विना तस्य शशशृंगादिगणनांतःपातात् । ननु महत्स्रष्टृपुरुषादिलक्षणेश्वरादयः कारणानि सन्ति ततस्तैरेव तत्सेत्स्यति तत्राह—मयैवेश्वरादिरूपेणेत्यर्थः । कारणव्यतिरेकेण कार्यव्यतिरेकादिति भावः । अनेनानंतकोटिब्रह्माण्डेश्वरावस्थातोपि यस्य परत्वं दर्शितम् । तदुक्तं श्रीगीतासु—'ईश्वरः सर्वभूतानां हृद्देशे' इत्या दिभिः ॥ ३८ ॥ अत्राक्षिपति—नन्विति । इत्यर्थ इति—असंख्यब्रह्मांडनिर्मातुर्विभूतिगणनं त्वीश्वरेणापि कर्तुं न शक्यते " यो ह्यात्ममायाविभवं स्म पर्यगात् " इत्याद्युक्तेरिति भावः ॥ * ॥ कालेन सर्वांतर्यामिणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः ॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ॥ ४० ॥
एतास्ते कीर्तिताः सर्वाः संक्षेपेण विभूतयः ॥ मनोविकारा एवैते यथा वाचाभिधीयते ॥ ४१ ॥

संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियते कृत्वा च वक्तुं शक्यते तथा मे विभूतीनां संख्यानं कर्तुं न शक्यते । कुत इत्यत आह । सृजतोण्डानीति । यदा मया सृज्यमानानां ब्रह्मांडानामेव तावत्संख्या नास्ति तदा कुतस्तद्गतानां विभूतीनां संख्येत्यर्थः ॥ ३९ ॥ तथापि विशेषत एव सर्वा अपि संक्षेपतः कथयामीत्याह । तेजः प्रभावः । श्रीः संपत् । सौभगं मनोनयनाह्लादकत्वम् । भगो भाग्यम् । वीर्यं बलम् । अंशको विभूतिः ॥ ४० ॥ उपसंहरति । एता इति । एते च विभूतिभेदा मयि चित्तावताराय कल्पिता अतो नात्रातीवाभिनिवेशः कर्तव्य इत्याह । मनोविकारा एव न तु परमार्थाः।यथा किंचित् खपुष्पादि वाङ्मात्रेणाभिधीयते तत्तुल्याः ॥ ४१ ॥

मया पृथिव्यादिपरमाणूनां संख्यानं क्रियते ज्ञायत इति भावः, सर्वज्ञत्वाद्यव्यभिचारादित्यर्थः । तथापि मे विभूतीनां संख्यानं न तथेति । तासामनंतत्वादिति भावः । कृधातोः सर्वधात्वर्थानुगतत्वात्तथा व्याख्यातम्, ‘ शिष्टकृत् ’ इति सहस्रनामभाष्यवत् । तत्रास्तु तावन्महावैकुंठेश्वररूपस्य मम ब्रह्मांडकोटिस्रष्टृत्वस्यापि न ज्ञायत इत्याह–सृजत इति ॥ ३९ ॥ यद्यपि वक्तुमशक्यास्तथापीति । ऐश्वर्यं प्रभुत्वम्, ह्रीरकार्यकृतौ संकोचः, त्याग औदार्यम्, विज्ञानं ज्ञानाधिक्यम् ॥ * ॥ एवंरीत्या विशेषतोऽपि सर्वा विभूतयो वक्तुं शक्या इत्याह–तेज इति ॥ ४० ॥ अभिनिवेशोयमेवेश्वरोऽतोन्यत्र नेति हठः । परमार्थाभावे दृष्टान्तमाह–यथेति । यथाऽसदेव खपुष्पम् । आदिपदाच्छशविषाणादिग्रहः । वाङ्मात्रेण वचनमात्रेण । एतत्कथनं परमार्थस्वरूपमेव ध्येयमिति बोधनायेति भावः ॥ * ॥ एता इति–छत्रिन्यायेन परमात्मादीनां मनोविकारत्वाभावात् । यद्वा–एता विभूतयः संक्षेपेण कीर्तिता अपि सामान्यविशेषाभ्यां सर्वा एव कीर्तिताः । तत्र ते पौरुषे प्रमाणातीतान्परमात्मवासुदेवनारायणपरब्रह्मरूपा अपि कीर्तिताः, किंतु एते पौरुषेयप्रमाणगोचराः, सर्वभूतादयस्तु मनोविकारा एव मच्छक्तिलेशाभासावेशित्वेन मनसैव मन्यमानाः यथा राजाश्रिते राजत्वं वाचा गौण्या वृत्त्याभिधीयते तत्तुल्या न तु परमात्मवद्यथावद्रूपा इत्यर्थः । यद्वा–मनो विकारयंतीति मनोविकाराः । तर्हि कथं स्वविभूतित्वेन निःश्रेयसहेतुत्वमुपदिश्यते तत्राह–यथेति । यथा येन मद्गुणांशाभिव्यक्तिप्रकारेण वाचा मन्निगमलक्षणयाभिधीयते प्रतिपाद्यते तथा तत्प्रकारेणैव ते मान्या न बहिर्दृष्टयेति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**–उपसंहरति–एता इति । सर्वाः सामान्यतो विशेषतश्च कीर्तिता एव, किन्तु एते प्रसिद्धा लोकेषु दृश्यमाना मनसो विकाराः स्नेहद्वेषाभिमानादयो यथा येन प्रकारेण वर्तंते तथा तेन प्रकारेणाभिधीयंते तत्रतत्र लोकैरभिधीयन्ते न तु मद्विभूतिरूपेणेत्यर्थः । यथा सर्ववस्तुमात्राणामेव सामान्यतो मद्विभूतित्वेऽपि यत्र यस्य मनसः स्नेहमयो विकारस्तत्र तेनायं मे पुत्र इति, अयं मे पितेति, अयं मे भर्तेति, अयं मे पितृव्य इति, अयं मे मित्रमित्येवमेवाभिधीयते न त्वयं भगवद्विभूतिरिति। तथा यत्र द्वेषमयो मनोविकारस्तत्रायं ममापकर्ता, अयं,ममापकार्यः,अयं द्वेष्टा,अयं द्वेष्य इति,अयं हंता अयं वध्य इत्येवमभिधीयते न त्वयं भगवद्विभूतिरिति। एवमिंद्रो विशेषतो मद्विभूतिरपि शच्या मद्भर्तेति,अदित्या मत्पुत्र इति,जयन्तेन मत्पितेति,बृहस्पतिना मच्छिष्य इति, असुरैरयमस्यद्वेष्टेत्येवमेवाभिधीयते न त्वयं भगवद्विभूतिरिति।निस्स्पृहैर्मद्भक्तैस्तु सर्वत्रैवायं भगवद्विभूतिरित्येवाभिधीयते । अप्राकृतविभूतिस्तु–विभूतित्वेन पुत्रभ्रात्रादित्वेन अवध्यायतां सर्वथैव कृतार्थतैव तत्तदवतारतत्तत्परिकराणां तथा दृष्टत्वात्।विभूतय इत्यनूद्य मनोविकारा इति न व्याख्येयम्, विभूतिमध्य एव वासुदेवादीनां तथा निर्विशेषब्रह्मणश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचंयच्छ मनो यच्छ प्राणान्यच्छेंद्रियाणि च ॥ आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ॥ ४२ ॥ यो वै वाङ्मनसे सम्यगसंयच्छन्धिया
यतिः ॥ तस्य व्रतं तपो ज्ञानं स्रवत्यामघटांबुवत् ॥ ४३ ॥ तस्मान्मनोवचःप्राणान्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते
॥ ४४ ॥ इति श्रीमद्भा० एकादशस्कन्धे भगवदुद्धवसंवादे विभूतिनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥ उद्धव उवाच ॥ यस्त्वयाभिहितः पूर्वं
धर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १॥ यथाऽनुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् ॥ स्वधर्मेणारविंदाक्ष तत्समाख्यातुमर्हसि ॥ २॥ पुरा किल महाबाहो धर्मं परमकं प्रभो ॥ यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ॥ ३ ॥

तस्माद्वागादीन्नियच्छ । आत्मानं बुद्धिमात्मना सत्त्वसंपन्नया तयैव नियच्छ । अध्वने संसारमार्गाय ॥ ४२ ॥ असंयमने दोषमाह । य इति । असंयच्छन्न संयच्छति ॥ ४३ ॥ परिसमाप्यते कृतकृत्यो भवतीत्यर्थः ॥ ४४ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां षोडशोऽध्यायः ॥ १६ ॥ ॥
ततः सप्तदशे पृष्टे स्वधर्मे भक्तिलक्षणे॥हंसोक्तं धर्ममन्वाह ब्रह्मचारिगृहस्थयोः॥१॥'कर्माहं विद्धि सात्वताम्'इत्यत्र भक्त्या कृतं कर्म मोक्षसाधनं मद्विभूतिरित्युक्तं भक्तिसाधनत्वं च कर्मणां 'मयोदितेष्ववहितः स्वधर्मेषु' इत्यादिना तत्रतत्रोक्तम् । न च कर्मानुष्ठातॄणां नियमेन भक्तिर्दृश्यतेऽतः पृच्छति यस्त्वयेति सप्तभिः । पूर्वं कल्पादौ त्वद्भक्तिलक्षणस्तत्प्रापकस्तत्साधनमित्यर्थः । वर्णाश्रमहीनानामपि द्विपदां नराणाम् ॥ १ ॥ यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण ॥ २ ॥ ननु संप्रदायादेव

परिपठितत्वात्, तेषामपि खपुष्पायमाणत्वे सति शून्यवादप्रसक्तेः, श्लोकेऽप्यत्रैते इत्यस्य वैयर्थ्याच्च ॥४१॥ यतो मनोविकारा एव तस्माद्धेतोः । तया बुद्ध्या कल्पसे योग्यो भवसि ॥*॥ यतः सर्व एव पदार्था मद्विभूतयस्ततः सर्व एव मनसा वाचा कायेनापि संमाननीया एव न तु तिरस्करणीयाः केऽपि इत्याह–वाचमिति । मनोविकारमयवागादिकं नियच्छ निरुंधीत्यर्थः ॥ ४२ ॥ ० ॥ * ॥ व्यतिरेके दोषमाह–य इति ॥ ४३ ॥ यतो वागादेरसंयमनमनर्थहेतुस्तस्मादित्यर्थः । ततो भक्तिसहितवागादिसंयमनात् ॥ * ॥ " अतिवादांस्तितिक्षेत नावमन्येत कंचन । न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ " इत्युक्तेः । स्वयमेवोपसंहरति–तस्मान्मनोविकारमयवागाद्यनियमेन सर्वं सत्कर्म वृथा तस्मान्मयि स्वयं भगवति परमात्मादिरूपे वा या भक्तिः श्रद्धा तद्युक्तया बुद्ध्याऽहमेव वचोमनआदीनां परमुत्कृष्टं केवलमयनमाश्रयो यस्य तथाभूतः सन्प्राकृतवचआदीन्नियच्छेत् । ततः न किञ्चिज्ज्ञानादिभिः कृत्यमस्तीत्यर्थः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे षोडशोऽध्यायः ॥ १६ ॥ ॥ ततो विभूतिकथनोत्तरम् । भक्तिं लक्षयतीति तथा तस्मिन् । हंसेन हंसावतारेण । ब्रह्मणे यदुक्तं धर्मम् (१) । न च दृश्यते यतोऽतो हेतोः । इत्यर्थ इति–भक्तिसाधनमिति भावः ॥ * ॥ ज्ञानयोगं भक्तियोगमष्टांगयोगञ्च श्रुत्वा कर्मयोगं विजिज्ञासमानः पृच्छति–यस्त्वयेति । " कालेन प्रलये नष्टा वाणीयं वेदसंज्ञिता । मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ॥ " इति । स च भक्तिलक्षणो धर्मस्त्रिविधः–केवलः, प्रधानभूतो, गुणभूतश्च । तत्र यः केवलः सर्ववर्णाश्रमवतां वर्णाश्रमहीनानामपि द्विपदां नराणां यदृच्छयैव तादृशसाधुसंगादेव भवति न तु धर्मादिभ्यः । यदुक्तं त्वया–" यं न सांख्येन योगेन प्राप्नुयाद्यत्नवानपि " इति । यस्मिंश्च वर्णाश्रमवत्सु जनेषु यदृच्छयैवाविर्भूते सति ते जना वर्णाश्रमाचारं परित्यज्यैव तमनुतिष्ठंति । तदुक्तम्–" सर्वान्धर्मान्परित्यज्य मां भजेद्यः स सत्तमः " इति । प्रधानभूतगुणभूतौ तु तौ यथायोगं तादृशसत्प्रसंगात्स्वधर्माच्च भवत एव ॥ १ ॥ तद्धर्मम् । रेवरन्योऽरविः प्रकाशाभावस्वरूपोऽज्ञानस्य समूहस्तं द्यति खंडयतीत्यरविंदं ज्ञानम्, खशूप्रत्यये मुम् । तदेवाक्षि यस्येति समासांतः षच् । हे अज्ञानतिमिरनाशकेत्यर्थः ॥ * ॥ येन भक्तिर्गुणभूता प्रधानभूता वा तत्त्वदन्यो न जानातीति भावः ॥ २ ॥ आक्षिप्य समाधत्ते–नन्विति । माधव मायानाशक ॥ * ॥ ब्रह्मणेऽभ्यात्थेति विष्णुधर्मोत्तरे तथैवोक्तत्वात् । माधवेति स्वीयत्वं बोधयन्दयामुत्पादयतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स इदानीं सुमहता कालेनामित्रकर्शन ॥ न प्रायो भविता मर्त्यलोके प्रागनुशासितः ॥४॥ वक्ता कर्ताऽविता नान्यो धर्मस्याच्युत ते भुवि ॥ सभायामपि वैरिंच्यां यत्र मूर्तिधराः कलाः ॥ ५ ॥ कर्त्राऽवित्रा प्रवक्त्रा च भवता मधुसूदन ॥ त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ॥६॥ तत्त्वं नः सर्वधर्मज्ञधर्मस्त्वद्भक्तिलक्षणः ॥ यथा यस्य विधीयेत तथा वर्णय मे प्रभो ॥७॥ श्रीशुक उवाच ॥ इत्थं स्वभृत्यमुख्येन पृष्टः स भगवान् हरिः ॥ प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान् ॥ ८ ॥ श्रीभगवानुवाच ॥ धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणाम् ॥ वर्णाश्रमाचारवतां तमुद्धव निबोध मे ॥ ९ ॥ आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः ॥ कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ॥ १० ॥

ज्ञास्यते किं पुनर्वर्णनेन तत्राह । पुरेति । परमकं परमश्चासौ कं सुखरूपश्च तम् । यत् । यम् । हंसरूपेण धर्मोऽप्युक्त एव न तु योगमात्रम् । "जानीत माऽऽगतं यज्ञं युष्मद्धर्मविवक्षया" इत्युक्तत्वात् ॥ ३ ॥ प्रागनुशासितोऽपि न भविता न भविष्यति ॥ ४ ॥ अत्र हेतुमाह वक्तेति द्वाभ्याम् । ये वदंति ब्राह्मणाः ये च कर्तारो ये च पालयंति नृपास्तेषां मध्ये ते त्वत्तोऽन्यः । कला वेदाद्याः ॥ ५ ॥ ६ ॥ तत्तस्मान्नोऽस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते ॥ ७ ॥ ८ ॥ धर्म्यो धर्मादनपेतः । कुतो नैःश्रेयसकरो भक्तिजनकः । अतो मे मत्तस्तं धर्मं निबोध ॥ ९ ॥ तत्रादौ मदुपासनालक्षण एव मुख्यो धर्म आसीत् आचारलक्षणस्तु पश्चात्प्रवृत्तः स चैवमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह । आदाविति । कल्पादौ यत्कृतयुगं तस्मिन् । ते च तदा मामुपासत एव केवलं नान्यत्कुर्वंतीति वक्तुं कृतयुगनामनिरुक्तिमाह ।

भावः ॥ ३ ॥ स धर्मः । न भविष्यति तिरोहितो भविष्यति ॥ * ॥ अमित्रकर्षण हे अविद्यानिवर्तक । अत्र त्वमेव सर्वज्ञशिरोमणित्वेन ममाविद्यां नाशयितुं समर्थ इति भावः ॥ ४ ॥ अत्र तिरोधाने । वैरिंच्यां ब्रह्मसंबंधिन्याम् । यत्र ब्रह्मसभायाम् । "पुराणं धर्ममीमांसा वेदा उपपदाश्च ते । अंगानि सेतिहासानि कथ्यंते श्रीहरेः कलाः ॥ देवा ब्रह्मर्षयश्चैव क्षत्रिया रक्षणोत्सुकाः । कलाः सर्वे हरेरेव सप्रजापतयोऽपरे ॥ " इति पुराणांतरात् ॥ * ॥ हे अच्युत तव ज्ञानं सदैकरसमेव न प्रलयेऽपि नश्यतीति भावः । कला वेदाद्या अष्टादशविद्याः " ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार एव च । पुराणन्यायमीमांसाधर्मशास्त्राणि चेत्यपि ॥ शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा । छंदश्चेति षडित्येवं विद्याः प्रोक्ताश्चतुर्दश ॥ आयुर्धनुर्गांनार्थैश्च शास्त्रैरष्टादशापि ताः । " इति ॥ ५ ॥ तत्त्वज्ञानं तेऽहमुपदिशामि धर्मं त्वन्यस्मात्प्रष्टव्यामिति चेदाह—कर्त्रेत्यादि । कः प्रवक्ष्यति त्वदन्यो धर्मस्य वक्ता न भविष्यतीत्यर्थः । 'धर्मस्य तत्त्वं दुर्ज्ञेयम्' इत्युक्तेः ॥ * ॥ हे मधुसूदन—वेदहर्तृमधुहंतृत्वेन वेदसारभक्तियोगस्य त्वमेव बोद्धासीति भावः । हे देव—वेदादिषु प्रकाशमानस्त्वमेवाधुना वक्तुमर्हसीति भावः ॥ ६ ॥ यतस्त्वदन्यो वक्ता नास्ति तत्तस्मात् । यस्य वर्णादेः । मे मह्यम् ॥ * ॥ तस्मादन्यवक्तृत्वाभावात् । हे सर्वधर्मज्ञेति—त्वमेव सर्वधर्मवेत्तासि नान्यस्त्वत्सदृश इति भावः । हे प्रभो—मत्स्वामित्वेनाप्यहं त्वदनुग्राह्य एवेति भावः ॥ ७ ॥ स्वभृत्यमुख्येन सर्वभक्तोत्तमेन । सनातनः सर्वकारणः ॥ * ॥ ० ॥ ८ ॥ धर्म्यत्वे हेतुमाशंकते—कुत इति । यतो नैःश्रेयस्करोऽतो हेतोः । निबोध जानीहि ॥ * ॥ दीपिका—अतो नैःश्रेयसकरत्वात् ॥ ९ ॥ तत्र धर्मेषु । स चाचारलक्षण एवमनुष्ठितोऽनया रीत्या कृतः । ते च नरास्तदादिकृतयुगे । हंसो हंसाभिधानः ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक् ॥ उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः ॥ ११ ॥ त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी ॥ विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ॥ १२ ॥ विप्रक्षत्रियविट्छूद्रा मुखबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः ॥ १३ ॥ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ॥ वक्षःस्थानाद्वने वासो न्यासः शीर्षणि संस्थितः ॥ १४ ॥ वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः ॥ आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमाः ॥ १५ ॥

कृतकृत्या इति जात्या जन्मनैव ॥ १० ॥ किंच विधायकाभावादपि तदानीं नान्यत्कर्मास्तीत्याह । वेद इति । धर्मश्च मनोविषयोऽहमेव वृषरूपधृक् चतुष्पान्न क्रिया विशेषो यज्ञादिः अतस्तपोनिष्ठाः । " मनसश्चेंद्रियाणां च स्वैकाग्र्यं परमं तपः " इति वचनादेकाग्रतया हंसं शुद्धं मां ध्यायंतीत्यर्थः ॥ ११ ॥ पश्चात्त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राणान्निमित्तात् । हृदयात्सकाशात् । तस्यास्त्रय्याः सकाशात् हौत्राध्वर्यवौद्गात्रैस्त्रिवृत्त्रिरूपः । " यज्ञो वै विष्णुः " इति श्रुतेः ॥ १२ ॥ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषामुत्पत्तिमाह विप्रेति द्वाभ्याम् । आत्माचारः स्वधर्म एव लक्षणं ज्ञापको येषां ते ॥ १३ ॥ मम वैराजरूपस्य हृदो वक्षसोऽधस्तात् । ब्रह्मचर्यमिति नैष्ठिकाभिप्रायम् ॥ १४ ॥ तेषामधिकारिविशेषेण स्वभावानाह वर्णानामिति पंचभिः । जन्मस्थानानुसारिण्यः । नीचैरित्यव्ययम् । अतोऽयमर्थः । मंदाभिर्जन्मभूमिभिर्मंदाः ।

एष त्वत्पृष्टो वर्णाश्रमाचारलक्षणो धर्मो यत आरभ्य प्रवृत्तस्तं समयमपि शृण्वित्याह—आदौ द्विपरार्धादौ । ब्राह्मे कल्पे । या तु सृष्ट्यादित एव चातुर्वर्ण्यादिप्रवृत्तिर्वर्णिता सैव कल्पांतरेष्वपीति ज्ञेयम् ॥ १० ॥ तत्रत्यमन्यदप्याह—किंचेति । प्रकर्षेण नूयते स्तूयते हरिरनेनेति प्रणव ओंकारस्तद्व्याख्यानरूपो वेद एक एवासीदग्रे प्रथमे कृतयुगे न त्वृगादिभेदेन विभक्तः । " ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूत भवद्भविष्यदिति सर्वमोंकार एव " इति श्रुतेः । चतुष्पात्संपूर्णो न विकलांगः । यतो यज्ञादिरूपक्रियाभावोऽतो हेतोः । इत्यर्थ इति—अवतारविशेषाणां तदाभावाच्छुद्धं निर्विकल्पं वेदांतैकवेद्यमेव ध्यायंतीति भावः ॥ * ॥ विधायकाभावाद्वेदानाविर्भावात् । तदानीं कृतयुगेऽन्यत्तपोऽतिरिक्तम् ॥ ११ ॥ महाभागत्वात्त्वामहमिदं वच्मीति संबुद्ध्यभिप्रायः ॥ * ॥ क्रमेण तेषां मुक्तौ सत्यां तानन्यान्वेदान्प्रवर्त्यान्याधिकारिणः प्रवर्तिता इत्याह—त्रेतेति । वैराजाख्यब्रह्मरूपस्य व्यष्टिसृष्टेस्तत्कारणकत्वात् । अत एव ' नीचैर्नीचोत्तमोत्तमैः ' इति नीचत्वेनापि व्यपदेक्ष्यते, श्रीनारायणे तथोक्तेरनुचितत्वात् ॥ १२ ॥ तेषां वर्णाश्रमाणाम् । कस्माद्रूपाद्विप्रादयो जाता इति चेदाह—वैराजाद्ब्रह्मांतर्यामिणः । स्वधर्मो वक्ष्यमाणः 'शमो दमः' इत्याद्युक्तः ॥ * ॥ ० ॥ १३ ॥ आश्रमोत्पत्तिमाह—जघनतः ऊरुदेशतः । यद्यपि " पश्चान्नितंबः स्त्रीकट्याः क्लीबे तु जघनं पुरः " इति कोशात्त्व्यवयव एव नितंबजघनशब्दौ वर्तेते, तथाप्यनयैव भगवदुक्त्या पुरुषावयवेऽपि प्रयुज्येते क्वचिदिति ध्येयं सुमतिभिः । नैष्ठिकाभिप्रायमिति व्यत्ययनिर्देश एवात्र मानमिति । वने वासो वानप्रस्थः ॥ * ॥ ० ॥ १४ ॥ तेषां वर्णाश्रमाणामधिकारिणां विशेषेण भेदेन । प्रथमार्थे द्वितीया । नीचा इत्यत्र विसर्गलोपे संधिरार्षः । यद्वा—नीचैर्नीचाभिर्नीचा नीचैर्नीचा उत्तमाभिरुत्तमा उत्तमोत्तमाः, ताश्च ताश्च नीचैर्नीचोत्तमोत्तमा इति यतोऽव्ययमतोऽयमर्थः । तृतीयाविभक्तित्वाभावाद्वक्ष्यमाणोऽर्थो विधेयस्तमाह—मंदाभिरित्यादिना ॥ * ॥ मुखस्य शीर्ष्णश्च सर्वोत्तमत्वाद्विप्रस्य संन्यासस्य च सर्वोत्तमा प्रकृतिः । पादस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवम् ॥ मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः ॥ १६ ॥ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ॥ स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः ॥ १७ ॥ आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनम् ॥ अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः ॥ १८ ॥ शुश्रूषणं द्विजगवां देवानां चाप्यमायया ॥ तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः ॥ १९ ॥ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः ॥ कामः क्रोधश्च तर्षश्च स्वभावोंतेवसायिनाम् ॥ २० ॥ अहिंसा सत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥ २१ ॥ द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः ॥ वसन्गुरुकुले दांतो ब्रह्माधीयीत चाऽऽहुतः ॥ २२ ॥

उत्तमाभिरुत्तमाश्चेति । नीचैर्नीचाश्चोत्तमैरुत्तमाश्च । स्वभावस्यान्यथा प्रतीतिस्त्वौपाधिकी । यथा जलस्य वह्न्यातपयोगादौष्ण्यम् ॥१५॥ तप आलोचनम् ॥१६॥ तेजः प्रतापः ॥ १७ ॥ १८ ॥ एतैरेवाश्रमस्वभावा अपि ज्ञेयाः ॥ १९ ॥ तद्बाह्यानां स्वभावानाह । अशौचमिति । शुष्कविग्रहो निर्मूलकलहः । तर्षस्तृष्णा ॥२० ॥ तत्र तावत्सर्वसाधारणं धर्ममाह । अहिंसेति । वर्णग्रहणमुपलक्षणार्थम् । वर्णधर्मान् गृहस्थप्रकरणे वक्ष्यति ॥ २१ ॥ प्रथमं तावदाश्रमेषु ब्रह्मचारिणो धर्मा वर्ण्यंते । स द्विविधः ।

जघनस्य च नीचत्वाच्छूद्रस्य गृहाश्रमस्य च नीचा प्रकृतिः ॥ १५ ॥ प्रकृतयः स्वभावाः ॥ * ॥ मद्भक्तिर्गुणभूता ॥ १६ ॥ अर्थहानौ च बंधूनां वियोगेष्वपि संपदि तयोः प्राप्तौ च सर्वस्य चित्तस्थापनं धृतिः । ऐश्वर्यमीश्वरता । स्थैर्यमनाकुलता ॥ * ॥ ० ॥ १७ ॥ धर्माधर्मेषु विश्वासो यस्तदास्तिक्यमुच्यते । न्यायार्जितद्रव्यस्य श्रद्धया त्यागो दानम् । अदंभः पाखंडासेवा । अतुष्टिरलंबुद्ध्यभावः ॥ * ॥ ० ॥ १८ ॥ तत्र सेवनेपि । एतैरेव शमादिभिरेव । यथाकथंचिदाश्रमधर्मा अप्यनुसंधेयाः । यथा—गुरुशुश्रूषादि ब्रह्मचारिधर्मः, दानादि गृहस्थधर्मः, तपश्चर्यादि वनस्थधर्मः, शमादिः संन्यासधर्म इति । तद्वक्ष्यति—"भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः । गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ॥" इति ॥ * ॥ ० ॥ १९ ॥ तद्बाह्यानां वर्णाश्रमबाह्यानाम् । "शौचं तु द्विविधं प्रोक्तं बाह्यमभ्यन्तरं तथा । मृज्जलाभ्यां तथा बाह्यं मनःशुद्धिरथापरम् ॥" इत्येतद्विपरीतमशौचम् । कर्मणा मनसा वाचा च परद्रव्यानपहरणमस्तेयं तद्विरुद्धं स्तेयम् । शुष्कविग्रहो निर्निमित्तकलहः । कामो निषिद्धविषयाभिलाषः । क्रोधस्तत्त्वोक्तावसहिष्णुता । तृष्णा अनलंबुद्धिः । अन्तेऽवसायिनश्चण्डालादयः । ते च—"चंडालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा । मागधायोगवौ चैव सप्तैतेंत्यावसायिनः ॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः ॥ क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च । शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥ शूद्रायां क्षत्रियज्जाता कन्योग्रा कीर्त्यते बुधैः । उग्रायां क्षत्तृतो जातः श्वपचः परिकीर्तितः ॥" इति धर्मशास्त्रात् ॥ * ॥ अंत्येऽवसायिनामंत्यजानाम् ॥ २० ॥ तत्र प्रकृतधर्मवर्णने । उपलक्षणार्थमित्युक्तेर्वर्णेतराणामप्ययं धर्मः श्रेयस्कर इति ज्ञेयम् । "कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा । अक्लेशजननं प्रोक्ता ह्यहिंसा योगवित्तमैः ॥" कामादित्रयाणामभावः । लोभोऽकार्येणापि धनेच्छा । भूतानां प्रियहितयोरीहा वांछा "सर्वे भवंतु सुखिनः सर्वे हि निरुपद्रवाः" इत्येवंलक्षणा ॥ * ॥ सार्ववर्णिक इत्युपलक्षणम्—सर्ववर्णैः सार्वश्रमैर्वर्णबाह्यैश्च कर्तुमर्ह इत्यर्थः ॥ २१ ॥ तावत्साकल्येन । स च ब्रह्मचारी । सावधिकब्रह्मचर्यवानुपकुर्वाणको यावज्जीवं ब्रह्मचर्यवान्नैष्ठिकः । तत्र तयोर्मध्ये । आद्यस्योपकुर्वाणकस्य । त्रैवर्णिको विप्रक्षत्रविट्स्वन्यतमः । विप्रादित्रयाणामुपनयनव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून् ॥ जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत् ॥ २३ ॥ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः ॥ न
च्छिंद्यान्नखरोमाणि कक्षोपस्थगतान्यपि ॥ २४ ॥ रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयम् ॥ अवकीर्णेऽवगाह्याऽप्सु यतासुस्त्रिपदीं जपेत् ॥ २५ ॥
अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुराञ्छुचिः ॥ समाहित उपासीत संध्ये च यतवाग्जपन् ॥ २६ ॥

उपकुर्वाणो नैष्ठिकश्च । तत्राद्यस्य धर्मानाह द्वितीयमिति नवभिः । द्विजस्त्रैवर्णिकः । आनुपूर्व्याद्गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्याचार्येणाहूतो ब्रह्म वेदमधीयीत । चकारात्तदर्थं च विचारयेत् ॥ २२ ॥ किंच मेखलादीन्कुशांश्च दधत् । तत्राक्षशब्देनाक्षमाला । कथंभूतः । जटिलः अनभ्यंगादिना जातजटः । तथा अधौतदद्वासोऽरक्तपीठः दंताश्च वासश्च दद्वासांसि न धौतानि तानि यस्य सः अधौतदद्वासाः स चासावरक्तपीठश्च न तु कौतुकादिना रक्तं पीठमासनं यस्य सः ॥ २३ ॥ जपश्चोच्चारो मूत्रपुरीषोत्सर्गो जपोच्चारं तस्मिन्वाग्यतो मौनी भवेत् ॥ २४ ॥ रेतो बुद्धिपूर्वं नावकिरेन्नोत्सृजेत् । ब्रह्मव्रतधरो गृहस्थः । स्वयमेव कथंचिदवकीर्णे अवगाह्य स्नात्वा यतासुः कृतप्राणायामस्त्रिपदीं गायत्रीं जपेत् ॥ २५ ॥ संध्ये च द्वे यतवाग् जपन्नुपासीतं । मध्याह्ने संध्यानिमित्तं मौनं नास्तीति द्विवचनम् ॥ २६ ॥

त्वाद्विजत्वम् । गर्भाधानादिसंस्कारास्तु सप्तमे स्कंधे व्याख्याताः । तदर्थं वेदार्थम् । विनार्थज्ञानं वेदाध्ययनं प्रोक्तफलदं न भवतीति “ यथा पशुर्भारवाही न तस्य भजते फलम् । द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते ॥ पाठमत्ररतान्नित्यं द्विजातींश्चार्थवर्जितान् । पशूनिव च तान्प्राज्ञो वाङ्मात्रेणापि नार्चयेत् ॥ तस्मादर्थपरिज्ञाने यत्नः कार्यो विजानता । ” इति व्यासोक्तेः ॥ * ॥ ० ॥ २२ ॥ अन्यदाह–किंचेति । तत्र मेखला दिषु । अक्षमाला “ आदिक्षांतगतैर्वर्णैर्जपमालाक्षमालिका ” इति तांत्रिकाः । अनभ्यंगादिना “ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषं मधु । स्रग्गंधलेपालंकारांस्त्यजेयुर्ये धृतव्रताः ॥ ” इति नारदोक्तेरभ्यंगा दिपरित्यागेन जातजटोऽत्यंताश्लिष्टकेशसमूहः । कौतुकादिना जनसमाजे महत्त्वं ज्ञापयितुं रक्तोर्णादिमयमासनं न स्वीकुर्यादित्यर्थः । कौतुकं कुतूहलम् । आदिना शोभादिग्रहः ॥ * ॥ ० ॥ २३ ॥ जपो वेदाध्ययनं मंत्रां तरजपश्च “ अधीत्य वेदसूत्रे च सेतिहासपुराणके । पुनःपुनस्तदभ्यासो जप इत्युच्यते बुधैः ॥ विधिनोक्तेन मार्गेण मंत्राभ्यासोथवा जपः । ” । मंत्रजपश्च त्रिविधः–“ जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः । निज कर्णागोचरो यो मानसः स प्रकीर्तितः ॥ उपांशुर्निजकर्णस्य गोचरः परिकीर्तितः । वाचिकस्तु जनैर्वेद्यस्त्रिविधो जप ईरितः ॥ यावंतः कर्मयज्ञाः स्युः प्रदिष्टानि तपांसि च । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड शीम् ॥ माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्तितम् । तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥” इति । जपप्रसंगान्मालानिर्णयमाह–“रुद्राक्षशंखपद्माक्षपुत्रजीविकमौक्तिकैः । स्फटिकैर्मणिरत्नैश्च सौवर्णै राजतैस्तथा ॥ विद्रुमैः कुशमूलैश्च गृहस्थस्याक्षमालिका । अंगुलीगणनादेकं पर्वण्यष्टगुणं भवेत् ॥ पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकम् । प्रवालैर्मणिरत्नैश्च दशसाहस्रिकं स्मृतम् ॥ तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या कोटिशतं रुद्राक्षैः स्यादनंतकम् । सर्वैर्विरचिता माला नृणां मुक्तिफलप्रदा ॥ ” इति तंत्रसारात् । कक्षो भुजमूलाधो देशः ॥ * ॥ ० ॥ २४ ॥ जपेत् ‘संख्यानुक्तौ शतं जपेत’ इत्यात्रोक्तेः । “स्वप्नेपि रेतः स्खलतो प्रायश्चित्तं विधीयते” इति स्मृतेः ॥ * ॥ ० ॥ २५ ॥ आचार्यो हि उपनीय वेदाध्यापकः । तदुक्तं मनुना–“उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ ” इति । गुरुरपि–“ निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ ”

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् ॥ न मर्त्यबुद्ध्याऽसूयेत सर्वदेवमयो गुरुः ॥ २७ ॥ सायं प्रातरुपानीय भैक्ष्यं तस्मै निवेदयेत् ॥ यच्चान्यदप्यनुज्ञातमुपयुंजीत संयतः ॥ २८ ॥ शुश्रूषमाण आचार्यं सदोपासीत नीचवत् ॥ यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः ॥ २९ ॥ एवंवृत्तो गुरुकुले वसेद्भोगविवर्जितः ॥ विद्यासमाप्यते यावद्बिभ्रद्व्रतमखंडितम् ॥ ३० ॥ यद्यसौ छंदसां लोकमारोक्ष्यन्ब्रह्मविष्टपम् ॥ गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः ॥ ३१ ॥

॥२७॥अन्यदपि यत्संप्राप्तं तच्च निवेदयेत् । तेनानुज्ञातं तु संयतः सन्नुपयुंजीतेत्यर्थः॥ २८॥यानशय्यासनस्थानैः यांतं पृष्ठतो यानेन निद्रितमप्रमत्ततया समीपशयनेन विश्रांतं पादसंवाहनादिभिः समीपासनेन आसीनं कृतांजलिः । नियोगप्रतीक्षया नातिदूरेऽवस्थानेनेत्यर्थः ॥ २९ ॥ एवंभूतं वृत्तं यस्य सः ॥ ३० ॥ एवमुपकुर्वाणकस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यदीति षड्भिः । असौ ब्रह्मचारी यदि छंदसां लोकं महर्लोकं ततो ब्रह्मलोकं चारोक्ष्यन्नारोढुमिच्छतीत्यर्थः । यद्वा छंदसां लोकमिति ब्रह्मलोक

इत्यनेन पितुरेव गुरुत्वमुक्तं तस्यैव निषेकादिकर्तृत्वं शास्त्रे विहितमिति । वृद्धान्स्वकुलगुरुकुलवृद्धान्विद्यावृद्धान्वा । सुरान्गणेशादीन् । संध्ये चेति कथनेन मध्याह्नसंध्यायां वाङ्नियमाभावो ज्ञाप्यते, न तु द्वे एव संध्ये कुर्यादिति । " संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । उभे संध्ये च कर्तव्ये ब्राह्मणैस्तु गृहे सदा ॥ " इत्यत्रिस्मृत्युक्तेः । अत्र विशेषस्तु सप्तमस्कन्धे श्रीदशमस्कन्धे चोक्त एवेत्युपरम्यते ॥ * ॥ ० ॥ २६ ॥ आचार्यं गुरुम् । " विद्यामंत्रोपदेष्टा हि विप्र आचार्य उच्यते " इत्युक्तेर्ब्राह्मणेतरस्याचार्यत्वं न स्यात्तदुक्तं श्रीवाराहेणापि—"आचार्यत्वमाद्यवर्णे मया संस्थापितं धरे " इति । कर्हिचिदित्युक्तेरत्यापद्यपीति भावः । मर्त्यबुद्ध्या यथान्ये नरास्तथायमपीति धिया नासूयेतेश्वरबुद्धिं न त्यजेत् " कामिनं कृष्णरूपं हि गुरुं मन्येत मानवः । सत्यव्रतं रामचन्द्रं नृसिंहं क्रोधिनं तथा ॥ कपटं वामनं विद्यादोषैस्तं न नरं स्मरेत् । " इत्यादिपुराणात् सर्वदेवमयो हरिरित्यर्थः ॥ * ॥ ० ॥ २७ ॥ तस्मै गुरवे । अन्यदपि वस्तु । तेन गुरुणा । इत्यर्थ इति—गुर्वाज्ञयैव प्राप्तं वस्त्राद्यपि स्वीकुर्यादिति भावः । संयतश्चापल्यरहितः ॥ * ॥ ० ॥ २८ ॥ नीचवन्निकृष्टवत् । इत्यर्थ इति—" निकटेऽतिविनाशाय ह्यतिदुरे च निष्फलाः । सेव्या हि मध्यभागेन राजवह्निगुरुस्त्रियः ॥ " इत्युक्तेरिति भावः ॥ * ॥ ० ॥ २९ ॥ वृत्तं चरितम् । कियंतं कालमेवं वास इति चेदाह—विद्येति । अखण्डितं च्युतिवर्जितम् ॥ * ॥ ० ॥ ३० ॥ ' विद्यातपोयोगसमाधिभाजाम् ' इति द्वितीयस्कन्धे महरादीनां चतुर्णां लोकानां विद्यादिफलत्वश्रवणाद्विद्यापदं वेदादिशास्त्रपरम्, तेन वेदाद्यभ्यासेन महर्लोकप्राप्तिरस्तीति सिद्धम् । तथा च छंदसां छंदोविदां वेदविदामित्यर्थः । " छंदः पद्ये च वेदे स्वैरेच्छयोश्छंदसा सह " इति धरणिः । 'विप्रोऽयं निगमः साक्षात्' इत्यादिषु वेदवेदविदोरभेदोपचारात् । ततो महर्लोकात् क्रमेण । इत्यर्थ इति—आरोक्ष्यन्निति । आङ्पूर्वाद्रोहतेर्भविष्यति " लृटः सद्वा " इति शतारि । आरोहणस्य भावित्वेन तत्रेच्छायाः संभवादित्यभिप्रेत्याह—आरोढुमिच्छतीति । ' ऋजुमार्गेण सिद्ध्यतोर्थस्य ' इति न्यायमाश्रित्याह—यद्वेति । अधीतनिष्क्रयो दक्षिणा तदर्थं गुरुसेवामेव कुर्यादिति भावः ॥ * ॥ अधीतनिष्क्रयार्थं वा । पिष्टपशब्दोपि विष्टपशब्दवद्भुवनवाची दृष्टः ॥ ३१ ॥

---

१ पादिपाठमनुसृत्यैतत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नौ गुरावात्मनि च सर्वभूतेषु मां परम् ॥ अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ॥ ३२ ॥ स्त्रीणां निरीक्षणस्पर्शसंलापक्ष्वेलनादिकम् ॥ प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ॥३३॥ शौचमाचमनं स्नानं संध्योपासनमार्जवम्॥ तीर्थसेवा जपोऽस्पृश्याऽभक्ष्यासंभाष्यवर्जनम् ॥३४॥ सर्वाश्रम प्रयुक्तोऽयं नियमः कुलनंदन ॥ मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ॥ ३५ ॥ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् ॥ मद्भक्तस्तीव्रतपसा दग्धक र्माशयोऽमलः ॥ ३६ ॥ अथानंतरमावेक्ष्यन्यथाजिज्ञासितागमः ॥ गुरवे दक्षिणां दत्त्वा स्नायाद्गुर्वनुमोदितः ॥ ३७ ॥ गृहं वनं वोपविशेत्प्रव्रजेद्वा द्विजोत्तमः ॥ आश्रमादाश्रमं गच्छेन्नान्यथा मत्परश्चरेत् ॥ ३८ ॥

विशेषणम् । 'यत्र मूर्तिधराः कलाः' इत्युक्तत्वात् । तर्हि बृहद्व्रतः सन्बृहन्नैष्ठिकं व्रतं यस्य सः । विन्यसेत्समर्पयेदधिकस्वाध्यायार्थमधीतनिष्क्रयार्थं च ॥ ३१ ॥ ब्रह्मवर्चो वेदाभ्यासजं तेजस्तद्वान् ॥ ३२ ॥ तस्यैव वनस्थयतिसाधारणधर्मानाह । स्त्रीणामिति । निरीक्षणं भावगर्भम् । क्ष्वेलनं परिहासः । एवमादिकं त्यजेत् । मिथुनीभूतानग्रतस्त्यजेत् । न पश्येदित्यर्थः ॥ ३३ ॥ तस्यैव सर्वाश्रमसाधारणं धर्ममाह शौचमिति द्वाभ्याम् ॥ ३४ ॥ ३५ ॥ निष्कामनैष्ठिकस्य तु मोक्षं फलमाह । एवमिति । अमलो निष्कामश्चेद्दग्धः कर्माशयोंतःकरणं यस्य तथाभूतः सन्मद्भक्तो भवति ॥ ३६ ॥ उपकुर्वाणस्य समावर्तनप्रकारमाह । अथेति । अनंतरं द्वितीयाश्रममावेक्ष्यन्प्रवेष्टुमिच्छन्यथा यथावद्विचारितवेदार्थः स्नायात् । अभ्यंगादिकं कृत्वा समावर्तेतेत्यर्थः ॥ ३७ ॥ तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह । गृहमिति । सकामश्चेद्गृहमंतःकरणशुद्ध्यादिकामश्चेद्वनं प्रविशेत् । शुद्धांतःकरणः स च द्विजोत्तमो ब्राह्मणश्चेत्प्रव्रजेदित्यर्थः । द्विजोत्तम इत्युक्तेः क्षत्रियवैश्ययोर्न प्रव्रज्या

उपासनस्य दृष्टफलं—ब्रह्मवर्चस्वीति । ततश्चाकल्मषो निष्पापः ॥ * ॥ ० ॥ ३२ ॥ तस्यैव नैष्ठिकस्यैव । भावगर्भं साभिप्रायम् । आदिना स्मरणादिग्रहः । इत्यर्थ इति—गृहस्थेषु यावदर्थं गच्छेदिति भावः ॥ * ॥ अग्रतः प्रथमत एव मिथुनीभूतान् पशुकीटादीन् प्राणिनस्त्यजेत् ॥ ३३ ॥ तस्यैव नैष्ठिकस्यैव । तीर्थसेवा गंगादिसेवा गुरुसेवा वा । अस्पृश्यादित्रयवर्जनम् अस्पृश्या म्लेच्छादयः, अभक्ष्याणि मांसादीनि, असंभाष्याः महापातक्यादयः ॥ * ॥ ० ॥ ३४ ॥ ० ॥ * ॥ ० ॥ ३५ ॥ ० ॥ * ॥ एवमिति । मद्भक्तश्चेत्तेन मद्भक्तेनैव तीव्रेण सता तपसा स्वधर्मेणामलः शुद्धान्तःकरणो भवति, दग्धकर्माशयो मुक्तश्च भवतीत्यर्थः ॥ ३६ ॥ अथ ब्रह्मचर्यानंतरम् । इत्यर्थ इति—ब्रह्मचर्यं त्यक्त्वा स्नातको भवेदिति भावः॥*॥०॥३७॥तस्योपकुर्वाणस्य । अधिकारानुरूपम् अधिकारानुसारेण । इत्यर्थ इति—ब्राह्मणस्य शुद्धान्तःकरणस्यैव प्रव्रज्या नान्यथेति भावः । ननु तर्हि शुद्धान्तःकरणो ब्राह्मणः प्रव्रजेत् क्षत्रियवैश्यौ तु विनाप्यन्तःकरणशुद्धिं प्रव्रजेतामित्यागतमिति चेदाह—यद्वेति । "मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणम् । बाहुजातोरुजातानां नायं धर्मो विधीयते ॥" इति देवलोक्तेर्ब्राह्मणस्यैव संन्यासः । विष्णोर्लिंगं दंडः । "पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदण्डः" इतींद्रोक्तेः, "मामैश्वर्यश्रीमदांधो दण्डपाणिं न पश्यति" इति श्रीमुखोक्तेश्च । दण्डोऽपि विष्णुलिंगमिति श्रीदशमे । यद्यपि कलौ संन्यासो निषिद्धः "अश्वालंभं गवालंभं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पंच विवर्जयेत् ॥" इति कमलाकरप्रबंधोक्तेस्तथापि—"यावद्वर्णविभागोऽस्ति यावद्गंगा महीतले । अग्निहोत्रं च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सिताम् ॥ यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ॥ ३९ ॥ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनाम् ॥ प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनम् ॥ ४० ॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम् ॥ अन्याभ्यामेवं जीवेत शिलैर्वा दोषदृक्तयोः ॥ ४१ ॥ ब्राह्मणस्य हि देहोऽयं क्षुद्रकामाय नेष्यते ॥ कृच्छ्राय तपसे चेह प्रेत्यानंतसुखाय च ॥ ४२ ॥

धिकार इति सूचयति । यद्वा आश्रमादाश्रमांतरं गच्छेत् । अन्यथा अनाश्रमी प्रतिलोमं च नाचरेदित्यर्थः । अमत्पर इति वा छेदः । स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ॥ ३८ ॥ विवाहनियमपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह । गृहार्थीति । सदृशीं सवर्णाम् । अजुगुप्सितां कुलतो लक्षणतश्चानिंदिताम् । कामतस्तु यामन्यामुद्वहेत्तां सवर्णामनु तस्या अनंतरम् । तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः । "तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ॥ ब्राह्मणक्षत्रियविशां भार्याः स्वाः शूद्रजन्मनः ॥" इति स्मृतेः ॥ ३९ ॥ इज्यादयस्त्रैवर्णिकानामावश्यका धर्माः । प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्राह्मणस्यैव ॥ ४० ॥ तत्रापि मुख्यां मुख्यतमां चान्यां वृत्तिमाह प्रतिग्रहमिति । तयोर्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन् शिलैः स्वामित्यक्तैः क्षेत्रपतितैः कणिशैः ॥ ४१ ॥ एवं च वृत्तिकार्श्यं ब्राह्मणेन सोढव्यमित्याह । ब्राह्म

संन्यासं तावत्कुर्यात्कलौ युगे ॥" इति स्मृतेः पञ्चसहस्रवर्षकलिभुक्तेः परं संन्यासाभावः कलावस्तीति ज्ञेयम् । एतच्चाद्यपद्यव्याख्याशतके प्रपञ्चितमत उपरम्यत इति । इत्यर्थ इति—"अनाश्रमी न तिष्ठेद्वै क्षणमात्रमपि द्विजः । पराश्रमं परित्यज्य न च पूर्वाश्रमं विशेत् ॥" इत्यादिपुराणादिति भावः । एतत्तु मद्भक्तिहीनस्यैवास्तीत्याह—अमत्पर इति वेति । "मद्भक्तो वानपेक्षकः । सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" इति वक्ष्यमाणत्वात् ॥ * ॥ अमत्पर इति छेदः । तेन भगवद्भक्तस्य व्युत्क्रमेणाश्रमितयानाश्रमितया वा स्थितौ न कोपि दोष इति भावः ॥ ३८ ॥ लक्षणानि तु रुक्मिण्युपाख्यान उक्तानि । अन्यामसवर्णाम् । तत्रापि असवर्णास्वीकारेपि । इत्यर्थ इति—'तिस्रः' इत्यादिमनुस्मृतेरिति भावः । वर्णानुपूर्व्येण—ब्राह्मणीविवाहोत्तरं ब्राह्मणेन तिस्रः क्षत्रिया वैश्या शूद्रा भार्या विवाह्याः, क्षत्रियेण क्षत्रियाविवाहोत्तरं द्वे वैश्या शूद्रा च, वैश्येन वैश्याविवाहोत्तरमेका शूद्रा, शूद्रेण तु शूद्रैवैका विवाह्या नान्येति स्मृत्यर्थः ॥ * ॥ तिस्रइत्यादिसजातीयास्त्यक्त्वेति बोध्यम् ॥ ३९ ॥ सर्वेषां विप्रक्षत्रविशां त्रयाणाम् । "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥" इति स्मृतेः । विशुद्धाज्जातिशुद्धात्कर्मशुद्धाच्चेत्यर्थः ॥ * ॥ ० ॥ ४० ॥ तत्रापि त्रिविधवृत्तावपि ॥ * ॥ ० ॥ ४१ ॥ शिलोञ्छवृत्तेः क्लेशरूपत्वात्किमिति सा प्रशस्तेति चेदाह—एवं चेति । क्षुद्रकामाय तुच्छविषयभोगाय नेष्यते न योग्यः । किंयोग्य इति चेदाह—कृच्छ्राय कष्टाय कुशेध्माद्याहरणक्लेशाय । तपसे मनइंद्रियादिनिग्रहाय "मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः" इति स्मृतेः । यद्वा—कृच्छ्रायेति तपोविशेषणम् । चः पादपूरणे । अतिक्लिष्टतीर्थयात्रोपवासाध्ययनाध्यापनादिरूपाय तपस इत्यर्थः । अनंतसुखाय मोक्षाय ॥ * ॥ कृच्छ्राय जीविकाजनितं कृच्छ्रं भोक्तुमिति **विश्वनाथः** ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषाणः ॥ मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिम् ॥ ४३ ॥ समुद्ध
रंति ये विप्रं सीदंतं मत्परायणम् ॥ तानुद्धरिष्ये न चिरादापद्भ्यो नौरिवार्णवात् ॥ ४४ ॥ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः ॥ आत्मानमात्मना
धीरो यथा गजपतिर्गजान् ॥ ४५ ॥ एवंविधो नरपतिर्विमानेनार्कवर्चसा ॥ विधूयेहाशुभं कृत्स्नमिंद्रेण सह मोदते ॥ ४६ ॥ सीदन्विप्रो वणिग्वृत्त्या
पण्यैरेवापदं तरेत् ॥ खड्गेन वाऽऽपदाक्रांतो न श्ववृत्त्या कथंचन ॥ ४७ ॥ वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययाऽऽपदि ॥ चरेद्वा विप्ररूपेण न श्व
वृत्त्या कथंचन ॥ ४८ ॥ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियाम् ॥ कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ॥ ४९ ॥

णस्येति ॥ ४२ ॥ उञ्छवृत्तिर्नाम विपण्यादिपतितकणोपादानं तां शिलवृत्त्यैकीकृत्य तया तुष्टचित्तस्य मोक्षं फलमाह । शिलोंछेति । महांतं मासतिथ्यादिलक्षणम् ॥
॥ ४३ ॥ एवमधनस्य महत्फलमुक्त्वा सधनानामप्याह त्रिभिः । समुद्धरंति दारिद्र्यादुत्तारयंति । विप्रमित्युपलक्षणम् । मत्परायणं यं कमपि ॥ ४४ ॥ राज्ञस्त्वावश्य
कमेतदित्याह । सर्वा इति ॥ ४५ ॥ ४६ ॥ सर्वेषामापद्वृत्तीराह सीदन्निति त्रिभिः । पण्यैर्विक्रयार्हैर्न तु सुरालवणाद्यैः । तत्राप्यापदाक्रांतश्चेत्खड्गेन क्षत्रियवृत्त्या वा ।
यद्यपि गौतमः " अनंतरां पापीयसीं वृत्तिमातिष्ठेत् " इति स्मरन्खड्गधारणं पण्यविक्रयाच्छ्रेष्ठं मन्यते तथापि हिंसातो वणिग्वृत्तिरेव श्रेष्ठेति भगवतो मतम् । न तु श्ववृत्त्या
नीचसेवया ॥ ४७ ॥ तत्राप्यापदि मृगयया । विप्ररूपेण वा अध्यापनादिना ॥ ४८ ॥ कारवः प्रतिलोमजविशेषा बुरुडादयस्तेषां वृत्तिं कटादिक्रियाम् । आपदुत्तीर्ण

मद्भक्तस्य गृहत्यागो नावश्यक एवेत्याह–मय्यर्पितेत्यादि । नातिप्रसक्तः गृहकृत्ये पुत्रादौ नातीवप्रेमवानित्यर्थः । शांतिं मुक्तिम् । ''मद्वार्तायातयामानां न बंधाय गृहा मताः '' इत्याद्युक्तेः ॥ * ॥ ० ॥ ४३ ॥ एवमित्थम् ।
उत्तारयंति धनं दत्त्वा दारिद्र्यं नाशयन्ति संकल्पजले दारिद्र्यं मज्जयंतीति यावत् । संकल्पजले दारिद्र्यमज्जनमुक्तं केनचिद्विप्रेण कंचिन्नृपं प्रति–''यो गंगामतरत्तथैव यमुनां यो नर्मदां शर्मदां का वार्ता सरसां तु मज्जन
विधौ यस्तीर्णवानर्णवम् । सोऽस्माकं नृपतेद्भुतं सहचरो दारिद्र्यनामा सखा त्वद्दानाम्बुचलत्प्रवाहलहरीमग्नो न संभाव्यते ॥'' इति । तान् विप्रोद्धर्तॄन् । नौः पोतः । 'नौः पोते नावि च स्त्रियाम्' इति धरणिः ॥ * ॥
सधनानां ब्राह्मणेतरेषामिति ज्ञेयं टीकायाम् ॥ * ॥ **विश्वनाथस्तु**–तादृशं विप्रसेवमानानां फलमाह–समुद्धरन्तीति । विप्रमित्युपलक्षणं मत्परायणं मद्भक्तं यं कमपि ॥ ४४ ॥ धीरो विवेकी । आत्मना भक्तिज्ञानाभ्यां
संस्कृतचेतसा॥*॥०॥४५॥०॥*॥०॥४६॥पण्यैर्विक्रयार्हैः शुष्ककाष्ठतृणतूलश्वेतवस्त्राद्यैः । न तु सुरालवणाद्यैरित्यत्रोक्तेनादिपदेन पक्वान्नादिग्रहः । तथा चोक्तं पैठीनसिना–''ब्राह्मणस्य लवणं पक्वान्नं मधु क्षीरं दधि घृतमुदकं
सर्वगंधास्तिला रक्तं वासो गुडतैलग्राम्यपश्वेकशफकेशाः सर्वे चारण्याः पशवो विद्या गावः शंखश्चोर्णाश्चेति विक्रयणेनैकैकस्मिन्प्राजापत्यं चरेत् '' । गोविक्रये विशेषमाह यमः–''गवां विक्रयकारी तु गवां रोमाणि यानि
तु । तावद्वर्षसहस्राणि गवां गोष्ठे कृमिर्भवेत्॥'' इति । सर्वं प्रायश्चित्तमापदि वैश्यवृत्त्या जीवतो ब्राह्मणस्यैवेतरेषां त्वापदि न दोषः । वैश्यवृत्त्या जीवतापि विप्रेण नैतानि विक्रेयाण्यापदि किं पुनरनापदीति भावः । अनंतरां
क्षत्रियविहितां पापीयसीं हिंसाबहुलाम् । गोरक्षवाणिज्यरूपैव स्वाम्युक्ता भगवतोभिमता । ननु कृषिरपि–''वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा । हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥ कृषिं साध्विति
मन्यन्ते सा वृत्तिः सद्विगर्हिता । भूमिं भूमिशयांश्चैव हंति काष्ठमयोमुखम् ॥'' इति मनूक्तेः ॥*॥ ० ॥ ४७ ॥ वैश्यवृत्त्या कृषिवाणिज्यादिरूपया । तत्राप्यापदि वैश्यवृत्त्यसंभवेऽपि । आदिना याजनग्रहः । 'षडन्यस्याप्र
तिग्रहः ' इति सप्तमस्कन्धोक्तेः प्रतिग्रहस्तु क्षत्रियेणापद्यपि न कार्य इति भावः ॥ * ॥ ० ॥ ४८ ॥ शूद्रवृत्तिं द्विजसेवारूपामुच्छिष्टभक्षणं विना । 'अनाचरन्नकार्याणि' इति मनूक्तेः । आदिना क्षत्रादयो ग्राह्याः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयम् ॥ देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ॥ ५० ॥ यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा ॥ धनेनाऽपीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ॥ ५१ ॥ कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि ॥ विपाश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ ५२ ॥ पुत्रदाराप्तबंधूनां संगमः पांथसंगमः ॥ अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ॥ ५३ ॥ इत्थं परिमृशन्मुक्तो गृहेष्वातिथिवद्वसन् ॥ न गृहैरनुबध्येत निर्ममो निरहंकृतः ॥ ५४ ॥ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् ॥ तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ॥ ५५ ॥

स्तु नानुकल्पेन वर्तेतेत्याह । कृच्छ्रादिति ॥ ४९ ॥ तदेवं वृत्तिव्यवस्थामुक्त्वा पुनर्गृहस्थस्यावश्यकान्पंचयज्ञानाह । वेदाध्ययनं ब्रह्मयज्ञस्तेन ऋषीन्स्वधाकारेण पितॄन्स्वाहाकारेण देवान्बलिहरणेन भूतानि अन्नाद्यैरन्नोदकादिभिर्मनुष्यानिति ज्ञातव्यम् । यथोदयं विभवानुसारतः । तेष्वीश्वरदृष्टिं विधत्ते । मद्रूपाणीति ॥ ५० ॥ आवश्यकं धर्ममुक्त्वा शक्त्यनुसारं धर्ममाह । यदृच्छया उद्यमं विना । उपार्जितेन वा शुक्लेन स्ववृत्त्या लब्धेन शुद्धेन वा धनेन । भृत्यान्पोष्यान् ॥ ५१ ॥ गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुंबेष्विति त्रिभिः । न प्रमाद्येदीश्वरनिष्ठायां प्रमत्तो न भवेत् । ननु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमादो विचारेणेत्याह । विपश्चिदिति ॥ ५२ ॥ तत्रापि दृष्टेष्वासक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति । पुत्रादीनामेकत्र संगमः पांथानां प्रपायां संगम इव । तत्र हेतुः । अनुदेहं प्रतिदेहमेते वियंति नश्यंति । निद्रानुवर्ती स्वप्नो निद्रापाये यथेति ॥ ५३ ॥ अतिथिवदुदासीनः ॥ ५४ ॥ अस्याप्याश्रमविकल्पमाह । कर्मभिरिति । गृहाश्रम एव तिष्ठेत् । यदि प्रजावांस्तर्हि प्रव्रजेद्वा ॥ ५५ ॥

कटादीत्यादिना शूर्पादिग्रहः । अनुकल्पेन विपद्विहितवृत्त्या ॥*॥०॥४९॥ तदेवमित्थम् । तेन ब्रह्मयज्ञेन । तेषु देवर्ष्यादिषु ॥ * ॥ ० ॥ ५० ॥ पोष्यान् ते च—"माता पिता गुरुर्भार्या प्रजाहीनः समाश्रितः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥" इति स्मृत्युक्ता ग्राह्याः ॥ * ॥ ० ॥ ५१ ॥ अप्रमादमाक्षिपति—नन्विति । अदृष्टं स्वर्गाद्यपि दृष्टवद्देहादिनाशवत् । "तद्यथेह कर्मचितो लोकः क्षीयते तथामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः ॥ * ॥ ० ॥ ५२ ॥ तत्रापि दृष्टादृष्टयोर्द्वयोर्मध्ये । दृष्टेषु पुत्रादिषु । तेषां दृष्टानाम् । प्रपायां जलशालायाम् । 'प्रपा तु जलशालिका' इत्यमरः । इवेति लुप्तोपमा । तत्र पांथसंगमसादृश्ये । यद्वा—अनुदेहं स्वदेहे नष्टे एते तदपेक्षया नष्टा एवेत्यर्थः ॥ * ॥ ० ॥ ५३ ॥ उदासीनो लाभालाभयोर्हर्षविषादशून्यो निरभिमान इति यावत् । गृहैर्गृहकृत्यैस्तत्रत्यैर्वा नानुबध्येत तेष्वत्यासक्तिं न कुर्यादित्यर्थः ॥ * ॥ ० ॥ ५४ ॥ अस्यापि गृहस्थस्यापि । गृहमेधीयैः पञ्चयज्ञादिभिः । तिष्ठेदित्यस्य गृह इति शेषः प्रजावानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः ॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ॥ ५६ ॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजाऽऽत्मजाः ॥ अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ॥ ५७ ॥ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयम् ॥ अतृप्तस्ताननुध्यायन्मृतोंधं विशते तमः ॥ ५८ ॥ इति श्रीमद्भागवत महापुराण एकादशस्कन्धे भगवदुद्धवसंवादे ब्रह्मचर्यगृहस्थाश्रमविभागो नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ श्रीभगवानुवाच ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा ॥ वन एव वसेच्छांतस्तृतीयं भागमायुषः ॥ १ ॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् ॥ वसीत वल्कलं वासस्तृणपर्णाजिनानि च ॥ २ ॥ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः ॥ न धावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ॥ ३ ॥ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड् जले ॥ आकंठमग्नः शिशिर एवंवृत्तस्तपश्चरेत् ॥ ४ ॥

गृहाद्यासंगे दोषमाह यस्त्विति त्रिभिः ॥ ५६ ॥ बंधमेवाभिनयेन दर्शयति अहो इति । बाला आत्मजा यस्याः सा । आत्मजाश्च मां विना अनाथाः संतः कथं जीविष्यंतीति ॥ ५७ ॥ गृहे य आश्रयो वासना तेन आ सर्वतः क्षिप्तं हृदयं यस्य सः । अंधं तमोतितामसीं योनिम् ॥ ५८ ॥ इति श्रीम० एका० श्री० टी० सप्तदशोऽध्यायः ॥ १७ ॥ ॥ अष्टादशेऽवदद्धर्मं वनस्थयतिगोचरम् ॥ अधिकारविशेषेण विशेषं चापि तद्गतम् ॥ १ ॥ क्रमप्राप्तान्वनस्थधर्मानाह । वनमिति । आयुषस्तृतीयं भागं पंचसप्ततिवर्षपर्यंतम् । ततः परं क्षीणेंद्रियस्येषद्विरागेऽपि संन्यासाधिकारः स्यादिति भावः ॥ १ ॥ वसीत परिदधीत ॥ २ ॥ दतो दंतान्न धावेन्न शोधयेत् । त्रिकालमप्सु मज्जेत मुसलवत्स्नायात् । स्थंडिलेशयो भूमिशायी ॥ ३ ॥ तप्येत पंचाग्नीन्सूर्येण सह चतुर्दिशमग्नीन्निधायात्मानं तापयेदित्यर्थः । आसारषाट् आसारं धारासंपातं

त्युक्तेः । संततिहीनस्य प्रव्रज्यानधिकार इति ज्ञायते ॥ * ॥ ० ॥ ९९ ॥ ‘ एकसंबंधिज्ञानमपरसंबंधिस्मारकम् ’ इति न्यायाल्लोकैषणाप्युक्ताऽप्यत्र बोध्या । स्त्रैणस्त्र्यनुरागी । ममाहमिति कृपणधीः कातरचित्तः । अत एव मूढः स बध्यत इति ॥ * ॥ ० ॥ ९६ ॥ अभिनयेन स्फुटतया ॥ * ॥ ० ॥ ९७ ॥ एवमुक्तरीत्या । अतितामसीं श्वशृगालादिलक्षणाम् ॥ * ॥ ० ॥ ९८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥ वनस्थयती गोचरौ विषयौ यस्य तं तथा । तद्गतं वनस्थयतिगोचरधर्मगतम् (१) । तृतीयं भागं पञ्चाशद्वर्षतः परं पंचसप्ततिवर्षपर्यंतम् । इति भाव इति—पञ्चसप्ततिवर्षमितायुष्यतीते स्वभावत एव विषयप्रीत्यभावेन विरक्तप्रायत्वात्संन्यासयोग्यता भवेदित्याशयः । पुत्रेषु भार्यां न्यस्य—वृद्धेयं भवतां माताऽतोऽस्याः सेवा भवद्भिः कार्येत्युक्त्वा तां त्यक्त्वा, यदि सापि विषयविरक्ता भवेत्तर्हि तां सहैव नयेदित्यर्थः ॥ * ॥ ० ॥ १ ॥ वन्यैरपि मेध्यैरेव । कंदमूलयोः किञ्चिदेव भेदः—यस्य फलं मूलमपि भक्ष्यते तत् मूलकादि मूलम्, यस्य मूलमेव भक्ष्यते तत् सूरणादि कंद इत्युच्यते । वल्कलं वृक्षादित्वक् भूर्जपत्रादिरूपम् । तृणपत्रधारणं तद्राशौ प्रवेशः ॥ * ॥ ० ॥ २ ॥ केशा मूर्द्धजाः, रोमाणि शारीरकाणि, श्मश्रु पुंचिह्नम् ‘ तद्वृद्धौ श्मश्रु पुंमुखे ’ इत्यमरः । तेषां रोम्णां वृद्धावित्यर्थः । एतद्रूपाणि मलानि ॥ * ॥ ० ॥ ३ ॥ इत्यर्थ इति—न तु पञ्चाग्नीन्स्थापयित्वा तपेदिति भावः । “ धारासंपातसहनं वर्षर्तौ नियतं तु यत् । अभ्रावकाशं नामैतद्व्रतं वनचरश्चरेत् ॥ ” इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्निपक्कं समश्नीयात्कालपक्कमथापि वा ॥ उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ॥ ५ ॥ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणम् ॥ देशकालबलाभिज्ञो नाददीतान्यदाऽऽहृतम् ॥ ६ ॥ वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् ॥ न तु श्रौतेन पशुना मां यजेत वनाश्रमी ॥ ७ ॥ अग्निहोत्रं च दर्शश्च पूर्णमासश्च पूर्ववत् ॥ चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः ॥ ८ ॥ एवं चीर्णेन तपसा मुनिर्धमनिसंततः ॥ मां तपोमयमाराध्य ऋषिलोकादुपैति माम् ॥ ९ ॥ यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत् ॥ कामायाल्पीयसे युंज्याद्बालिशः कोऽपरस्ततः ॥ १० ॥ यदाऽसौ नियमेऽकल्पो जरया जातवेपथुः ॥ आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत् ॥ ११ ॥

सहत इति तथा अभ्रावकाशं नाम व्रतं चरेत् । जले आकंठमग्नः उदकवासं नाम व्रतं चरेत् ॥ ४ ॥ उलूखलेन वाऽश्मना वा कुट्यति कंडयतीति तथा । दंता एवोलूखलं यस्य स तथा ॥ ५ ॥ संचिनुयादाहरेत् । अन्यदा कालांतरे आहृतं कालांतरे नाददीत । "लब्धे नवेनवेऽन्नाद्ये पुराणं तु परित्यजेत्" इति नारदोक्तेः ॥ ६ ॥ कालचोदितानाग्रयणादीन् ॥ ७ ॥ किंचाग्निहोत्रमिति । मुनेश्च । नैगमैर्वेदवादिभिः ॥ ८ ॥ अस्य निष्कामस्य फलमाह । एवमिति । धमनीभिः शिराभिः संतता व्याप्तः । यावज्जीवं कृतेन तपसा शुष्कमांस इत्यर्थः । ऋषिलोकान्महर्लोकादिक्रमेण । अयं भावः । अंतःकरणशुद्धिभक्तिद्वाराऽत्रैव तावन्मुच्येत । प्रतिबंधकबाहुल्ये त्वनेन क्रमेण मुच्यत इति ॥ ९ ॥ तं सकामं निंदति । यस्त्विति । निःश्रेयसं मोक्षफलम् । अल्पीयसे आविरिंच्यादत्यल्प एव तस्मै ॥ १० ॥ एवं यावज्जीवं वर्तमानस्य मोक्षः । तृतीयभागावसाने तु मंदविरागेऽपि संन्यासाधिकारः । यदि तु ततोर्वागेव स्वधर्माशक्तो भवेत्तदापि सम्यगविरक्तो विरक्तो वा । तत्राविरक्तस्य कृत्यमाह । यदेति । जातो

" आकंठमग्नं शिशिर उदके वसनं हि यत् । उदवासव्रतं नाम वनस्थानामिदं सदा ॥ " इति । एवं पंचाग्नितपआदिना वृत्तं वर्तनं यस्य स तथा ॥ * ॥ ० ॥ ४ ॥ कालेन पक्कं कदलीफलादि । उलूखलादिभावेऽश्मकुट्टः सति दंतसामर्थ्ये दन्तोलूखलः स्यात् ॥ * ॥ ० ॥ ५ ॥ अन्येनाहृतमानीतमन्यदाहृतमिति वा । देशकालेत्याद्युक्त रोगाद्यवस्थायामन्यानीतमपि स्वीकुर्यादित्यर्थः ॥ * ॥ ० ॥ ६ ॥ आग्रयणादीन्—इष्टादिना पंचयज्ञानुष्ठानाष्टकापार्वणश्रावणीचैत्र्याश्वयुजीनां ग्रहः । पशुना पशुयागेन ॥ * ॥ ० ॥ ७ ॥ अन्यदाह—किंचेति । मुनेः वैखानसस्य ॥ * ॥ ० ॥ ८ ॥ अस्य वानप्रस्थस्य । " धमनी तु शिरा हृद्विलासिन्योश्च योषिति " इत्यमरः । इत्यर्थ इति—सर्वभोगत्यागादतीवकृश इति भावः । अत्राशयमाह—अयंभाव इति ॥ * ॥ **दीपिका**—अस्य वानप्रस्थस्य निष्कामस्य भगवदाराधनमात्रकामस्य । ननु क्रमोपादाने किं बीजमित्यपेक्षायामाह—अयं भाव इति । भगवत्तोषकेण तपसा यद्यंतःकरणशुद्धिभक्ती स्यातां तदा तु तद्वारात्रैव वानप्रस्थत्व एवमुच्यते प्रतिबंधकबाहुल्ये त्वंतःकरणशुद्धिभक्त्यभावो हेतुः ॥ ९ ॥ तं वानप्रस्थम् । " आब्रह्मभुनाल्लोकाः पुनरावर्तिनोर्जुन " इत्युक्तेरत्यल्पत्वमेव । एतत्पश्चाद्गग्याद्रिरूपम् । चीर्णं संपादितम् । ततः सकामतापसात् ॥ * ॥ ० ॥ १० ॥ ततस्तृतीयभागतोऽर्वागेव प्रागेव । आत्मनि स्वस्मिन् । अग्नीन् गार्हपत्यादीन् । वैखानसशास्त्रविधानेन अग्निं समाविशेत् । मानसाग्निहोत्रं कुर्यात् स्वयं स्वशरीरदाहे त्वात्मघातित्वप्रतीतेः । विहितत्वाद्यथाश्रुत एव वार्थः ॥ * ॥ कामानां प्रतिबंधं विना तपसा यावज्जीवं वर्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा कर्मविपाकेषु लोकेषु निरयात्मसु ॥ विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत्ततः ॥ १२ ॥ इष्ट्वा यथोपदेशं मां दत्त्वा सर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् ॥ १३ ॥ विप्रस्य वै संन्यसतो देवा दारादिरूपिणः ॥ विघ्नान्कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परम् ॥ १४ ॥ बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परम् ॥ त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि ॥ १५ ॥ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् ॥ सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥ १६ ॥

वेपथुः कंपो देहे यस्य सः ॥ ११ ॥ विरक्तं प्रत्याह । यदेति ॥ १२ ॥ तत्रादौ कृत्यमाह । इष्ट्वेति । यथोपदेशं श्राद्धाष्टकपूर्वकं प्राजापत्येष्ट्या मामिष्ट्वा स्वे प्राणे आत्मनि ॥ १३ ॥ संन्यासे विघ्ना भवंति तानविगणय्य संन्यसेदेवेत्याशयेनाह । विप्रस्येति । केनाभिप्रायेण कुर्वंति तमाह । अयमिति । परं परब्रह्म ॥ १४ ॥ एवं प्रव्रजितस्य धर्मानाह । बिभृयाच्चेदिति । परं कौपीनादन्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छाद्यते यावता कटिवेष्टनेन तावन्मात्रं धारयेदित्यर्थः । त्यक्तं प्रेषोच्चारात्पूर्वमेव । अतोऽन्यत्किंचिदपि न बिभृयात् । दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणम् ॥ १५ ॥ मनःपूतं मनसा सम्यग्विचार्य यच्छुद्धं तदाचरेत् ॥ १६ ॥

मानस्य मोक्षः । ततस्तृतीयभागादर्वाक्पूर्वम् । तत्र विरक्ताविरक्तयोर्मध्ये । अग्नीनग्निसाध्यकर्माणि ॥ ११ ॥ कर्मणां यज्ञादीनां विपाकेषु फलभूतेषु स्वर्गादिषु । निरयात्मसु भोगांते दुःखहेतुत्वान्नरकतुल्येषु । "अमूनि यानि स्थानानि देवानां परमात्मनाम् । नानासंस्थानवर्णानि नानारूपफलानि च ॥ दिव्यानि कामचारीणि विमानानि सभास्तथा । आक्रीडा विविधा राजन् पद्मिन्यश्चैव कांचनाः ॥ चतुर्णां लोकपालानां शुक्रस्याथ बृहस्पतेः । मरुतां विश्वेदेवानां साध्यानामश्विनोरपि ॥ रुद्रादित्यवसूनां च तथान्येषां दिवौकसाम् । एते वै निरयास्तात स्थानस्य परमात्मनः ॥" इति शांतिपर्वांतर्गतमोक्षधर्मेषु जापकाख्यानोक्तेः परमात्मनस्स्थानस्यापेक्ष्यैतेषां निरयत्वमेवोक्तं श्रीभीष्मेण युधिष्ठिरं प्रति, निर्गतोऽयः शुभावहविधिरत्यंतसुखलक्षणो येभ्यस्ते निरया इत्यन्वर्थसंज्ञाप्रतिपत्तेः । न्यस्ताग्निस्त्यक्ताग्निसाध्यकर्मा सन् । ततः तदनु ॥ * ॥ ० ॥ १२ ॥ तत्र संन्यसने । आवेश्य प्रव्रज्याशास्त्रोक्तक्रमेण संधार्य । निरपेक्ष ऐहिकामुष्मिकाभिलाषशून्यः ॥ * ॥ श्राद्धानामष्टकं श्राद्धाष्टकं तत्तु संन्यासपद्धत्यादिभ्योऽवसेयम् । केचित्तु मार्गशीर्षादिमासचतुष्टयकृष्णाष्टमीसंभवं श्राद्धं श्राद्धाष्टकं, तत्पूर्वकं यथा स्यात्तथेति दीपिका ॥ १३ ॥ तान् विघ्नान् । विप्रस्येति नोपलक्षणम्, किन्तु विप्रेतरस्य प्रव्रज्यानधिकारसूचनमन्यथा द्विजस्य नरस्य वेत्यन्यतरं ब्रूयादिति भावः । तम् अभिप्रायम् । अयं संन्यसिता । आक्रम्योल्लंघ्य ॥ * ॥ परं ब्रह्मलोकं ब्रह्म वा ॥ १४ ॥ एवम् इत्थम् । प्रव्रजितस्य कृतसंन्यासस्य । इत्यर्थ इति—ततोऽधिकधारणे पातित्यं स्यादिति भावः । प्रैष इति मंत्रनाम । ते च त्रयस्तेषामनुक्रमेणोच्चारणं गृहस्थैर्न कार्यं किंचिदंतरोच्चारणे तु न दोषः । प्रैषानाह—"ॐ भूः संन्यस्तं मया । ॐ भुवः संन्यस्तं मया । ॐ स्वः संन्यस्तं मया स्वाहेति प्रथमप्रैषः । ॐ पुत्रैषणाया वित्तैषणाया लोकैषणायाश्च व्युत्थितोऽहं स्वाहेति द्वितीयप्रैषः । ओमभयं सर्वभूतेभ्यो मत्तः स्वाहेति तृतीयः प्रैषः । अतः त्यक्तादन्यत् । आदिना जलशोधनवस्त्रादिग्रहः ॥ * ॥ ० ॥ १५ ॥ दृष्टिपूतं सूक्ष्मजीवादिराहित्येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मौनानीहानिलायामा दंडा वाग्देहचेतसाम् ॥ न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः ॥ १७ ॥ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् ॥ सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता ॥ १८ ॥ बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः ॥ विभज्य पावितं शेषं भुंजीताऽशेषमाहृतम् ॥ १९ ॥ एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः ॥ आत्मक्रीड आत्मरत आत्मवान्समदर्शनः ॥ २० ॥

मौनं वाचो दंडः । अनीहा काम्यकर्मत्यागो देहस्य । प्राणायामश्चेतसः । एते अंतर्धृतास्त्रयो दंडा यस्य न संति । अंग हे उद्धव । अंगे धृतैर्वेणुभिर्न स यतिरिति वा ॥ १७ ॥ चतुर्ष्विति । ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु । पूर्वपूर्वासंभवे वा । विगर्ह्यानभिशस्तपतितान् । असंक्लृप्तान् अत्रायं लाभो भविष्यतीति पूर्वमनुद्दिष्टान् ॥ १८ ॥ बहिर्ग्रामात् । पावितं प्रोक्षणादिभिः शोधितम् । विभज्य विष्णुब्रह्मार्कभूतेभ्यः । अशेषमित्यधिकाहरणं निरस्तम् । याचितमिति पाठे माधुकरेण याचितमन्नं चेत्तर्हि विभज्य भुंजीत । न त्वयाचितादिभैक्ष्यचतुष्टयमित्यर्थः । " माधूकरे तु नैवेद्यं भैक्ष्ये नान्येषु विद्यते ॥ नैवेद्यकं क्षिपेदप्सु त्रितयं भौतिकं बहिः ॥ " इति स्मृतेः । यद्वा तदानीं केनापि याचितं चेत्तन्मध्ये तस्मै किंचिद्विभज्य दत्त्वेत्यर्थः ॥१९॥ किंच एकश्चरेदिति । आत्मन्येव क्रीडा कौतुकं यस्य

शुद्धम् ॥ * ॥ ० ॥ १६ ॥ वेणुधारणेन यतित्वे वेणुविक्रेत्रादीनामपि तत्स्यादत आह—अंगे शरीरे । उक्तविधिना धृते गृहीते । बहुत्वेन मौनादिहीनस्य वेणुदंडभारधारणेपि यतित्वं न स्यादेकदंडस्य तु [illegible] कथेति सूचितम् ॥ * ॥ ० ॥ १७ ॥ वृत्तिभेदेन चातुर्विध्यमाह—" वेदशास्त्रार्थतत्त्वज्ञः संतुष्टोऽध्यापको वशी । विद्यावृत्तिर्जपपरो दयालुर्निरहंकृतिः ॥ कुर्वाणोहरहः श्राद्धं ब्राह्मणो ब्राह्मणः स्मृतः (१) पशुवाहनतत्त्वज्ञो रणे चाप्यपलायवान् । आरंभे नीतिमाञ्छूरः स विप्रः क्षत्रियः स्मृतः (२) वैश्यकर्मण्यभिरतः पशुपालनतत्परः । वाणिज्यकृषिकर्ता च स वैश्यो विप्र उच्यते (३) स्नेहलाक्षातिलान्नीलीं क्षीरं क्षारं घृतं मधु । महीं विक्रयते चैव स विप्रः शूद्र उच्यते (४) " इति । सर्वथा ग्रामे विप्राभावे किं कार्यमित्याह—पूर्वपूर्वेति । "सता वा ह्यसता वापि ब्रह्महत्यादिना तु यः । अभियुक्तो हि लोकेषु सोभिशस्तः प्रकीर्तितः॥कर्मणा योनितश्चैव देहदोषैश्च कुत्सिताः । पतितांस्तान्विजानीयान्महापातकिनस्तथा ॥ " इति यमोक्तेः । बहुवचनेनायाज्ययाजनादिग्रहः " शूद्रान्यः पतितांश्चापि याजयेदर्थकारणात् । सोऽयाज्ययाजको विप्रस्त्यजेत्तं हव्यकव्ययोः ॥ " इति देवलोक्तेः । अत्र सप्तपदं मध्य एवोदरपूर्तिक्षमान्नाप्तौ न तु सप्तावश्यकत्वं किंत्वधिकं न लिप्सेतात्पान्नाप्तावपि तावतैव तुष्येदित्यर्थपरम् ॥ * ॥ वृत्तिभेदेन प्रतिग्रहाध्यापनयाजनशिलोंछरूपेण चतुर्विधेष्विति संदर्भविश्वनाथौ ॥ इह वृत्तावेव वर्णत्वमारोपितम् ॥ १८ ॥ इत्यर्थ इति—मधुकरवदानीतान्न एव नैवेद्यादि न त्वसंक्लृप्तादावपीति भावः । त्रितयं ब्रह्मविष्णवर्कत्रयसंबंधिजले । भौतिकं भूतेभ्यः पिपीलिकादिभ्यः बहिर्जलात् क्षिपेदित्यर्थः । " माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम् । तात्कालिकोपपन्नं च भैक्ष्यं पंचविधं स्मृतम् ॥ " इति स्मृतेः । माधूकरं प्रसिद्धम् । असंक्लृप्तं पूर्वमनुद्दिष्टम् । प्राक्प्रणीतं केनचिदुक्तमद्य मद्गेहे भिक्षा कार्येति संकेतेनोक्तम् । अयाचितं प्रसिद्धम् । भिक्षार्थमुद्यताय तदैव प्राप्तं तात्कालिकम् । याचितपदस्य माधुकरयाचिते लक्षणायां गौरवं मत्वाह—यद्वेति । इत्यर्थ इति—यदि भिक्षितान्नमल्पमपि तदापि विभजनीयमेवेति भावः ॥ * ॥ ० ॥ १९ ॥ अन्यदपि यतिमधिकृत्याह—किंचेति ॥ * ॥ आत्मनि परमात्मनि अनुभवगोचरीकृते रतस्तुष्टः तेनैव क्रीडायुक्तः ॥ २० ॥

१ कुसीदग्रहणे । २ समर्घं क्रीत्वा महर्घविक्रयो वाणिज्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विविक्तक्षेमशरणो मद्भावविमलाशयः ॥ आत्मानं चिंतयेदेकमभेदेन मया मुनिः ॥ २१ ॥ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया ॥ बंध इंद्रिय
विक्षेपो मोक्ष एषां च संयमः ॥ २२ ॥ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः ॥ विरक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥ २३ ॥
पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतीं महीम् ॥ २४ ॥ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ॥ संसि
ध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलांधसा ॥ २५ ॥ नैतद्वस्तुतया पश्येद्दृश्यमानं विनश्यति ॥ असक्तचित्तो विरमेदिहामुत्र चिकीर्षितात् ॥ २६ ॥
यदेतदात्मनि जगन्मनोवाक्प्राणसंहतम् ॥ सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥ २७ ॥

सः । आत्मन्येव च रतस्तुष्टः । आत्मवान् धीरः ॥ २० ॥ विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः । मयि भावेन विमल आशयो यस्य सः ॥ २१ ॥ बंधं मोक्षं च । केन बंधः केन वा मोक्ष इति तावाह । बंध इति ॥ २२ ॥ २३ ॥ पुराणि हट्टादिमंति । ग्रामास्तद्रहिताः । व्रजा गोष्ठानि तान् । सार्थान् यात्रिकजनसमूहान् ॥ २४ ॥ यतः शिलवृत्त्या प्राप्तेन तदीयेनांधसाऽन्नेन शुद्धसत्त्वः सन्निवृत्तमोहः संसिध्यति मुच्यते ॥ २५ ॥ ननु मिष्टान्नं विहाय कथं शिलान्ने प्रवृत्तिः स्यादत आह । नैतदिति । एतत् दृश्यमानं मिष्टान्नादि वस्तुतया न पश्येत । यतो विनश्यति । अत इहामुत्र च लोके असक्तचित्तः संश्चिकीर्षितात्तदर्थं कृत्याद्विरमेत् ॥ २६ ॥ ननु तथापि यावद्विनाशं सुखहेतुत्वात्तच्चिंतावतः कुतो विरागः स्यात्तत्राह । यदेतदिति । एतज्जगन्ममतास्पदं मनोवाक्प्राणैः संहतं सहितमहं

भावेन भक्त्या ॥ * ॥ अभदेने 'तत्त्वमसि' इत्युक्तचिदंशैक्येन । यद्वा—आद्वासुदेवाद्भक्तिभावेन भेदेन एकं केवलमात्मानं चिंतयेत् ॥ २१ ॥ इन्द्रियाणां विषयेषु विक्षेपः प्रसरणम् । एषाम् इन्द्रियाणां विषयेभ्य आहृत्य मयि स्थापनं संयमो मोक्षः मोक्षहेतुः "देवानां गुणलिंगानामानुश्राविककर्मणाम् । सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥ अनिमित्ता भगवति भक्तिः सिद्धेर्गरीयसी" इति कपिलोक्तेः ॥ * ॥ अन्वीक्षेत पुनःपुनर्विचारयेत् ॥ २२ ॥ यत इन्द्रियविक्षेपो बंधहेतुस्तस्माद्धेतोः । समनसामिन्द्रियाणां वर्गं समूहम् । मद्भावेन मद्भक्त्या । क्षुल्लकामेभ्यस्तुच्छविषयेभ्यो विरक्तः सन् । आत्मनि चेतसि । महत्सुखं भक्तिसुखम् । "या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्" इत्याद्युक्तेः ॥ * ॥ ० ॥ २३ ॥ पुण्यदेशाः कुरुक्षेत्रादयः, पुण्यसारितो गंगाद्याः, पुण्य शैलाः श्रीगोवर्धनाद्याः, पुण्यवनानि वृंदावनादीनि, पुण्याश्रमाः वासिष्ठाद्याश्रमाः, तैर्युक्तां भूमिं चरेत् ॥ * ॥ ० ॥ २४ ॥ यतो हेतोः । पदं स्थानम् । असंमोहो मिथ्याज्ञानरहितः । मुच्यतेऽपरोक्षज्ञानवान्भवति ॥ * ॥ तदीयेन व्रतस्थसंबंध्यन्नेन ॥ २५ ॥ अत्राक्षिपति—नन्विति । यतो हेतोर्विनश्यति तुल्यमलरूपेण मिष्टमसिष्टं च परिणमते, भक्षणकालेऽपि क्षणिकमेव मिष्टामिष्टसुखादि क्षणोत्तरं तदनुभवसुखस्यापि नाशा दित्यर्थः । यतः सर्वं विनाशि अतो हेतोः । तदर्थकृत्यादैहिकामुष्मिककार्यात् ॥ * ॥ एतत्स्वाद्वन्नादि । वस्तुतया न पश्येद्यतो विनश्यति उदरगतं सर्वं मलरूपेण परिणतं सन्नश्यत्येव । अत ऐहिकामुष्मिकलोकेऽसक्त चित्तः संश्चिकीर्षितात्तदर्थकृत्याद्विरमेत् ॥ २६ ॥ पुनराशंकते—नन्विति । यद्यपि सर्वं विनाशि तथापीति । तच्चिंतावतः विषयस्मरणशीलस्य । तत् विषयसुखम् ॥ * ॥ माया मायागुणकार्यं तर्केण कार्याणां करणात्मकत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः ॥ सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥ २८ ॥ बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् ॥ वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगमश्चरेत् ॥ २९ ॥ वेदवादरतो न स्यान्न पाखंडी न हैतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ॥ ३० ॥

कारास्पदं शरीरं च सर्वं तज्जन्यं सुखं चात्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टांतेन त्यक्त्वा स्वस्य आत्मनिष्ठः संस्तन्न पुनःपुनः स्मरेन्न चिंतयेत् ॥ २७ ॥ एवं बहूदकादिधर्मानुक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति सार्धैर्दशभिः । बहिर्विरक्तो मुमुक्षुः सन् ज्ञाननिष्ठो वा मोक्षेऽप्यनपेक्षो मद्भक्तो वा सलिंगांस्त्रिदंडादिसहितानाश्रमां स्तद्धर्मांस्त्यक्त्वा तदासक्तिं त्यक्त्वा यथोचितं धर्मं चरेदित्यर्थः । न पुनरत्यंतत्याग एव विवक्षितः पुनर्धर्मविधानात् । अक्रियत्वस्योत्तराध्याये वक्ष्यमाणत्वाच्च । तर्हि पूर्वस्मात्को विशेषस्तमाह । अविधिगोचरो विधिकिंकरो न स्यादिति । एतदेव स्फुटीकरिष्यति । "शौचमाचमनं स्नानं न तु चोदनया चरेत" इत्यादिना ॥ २८ ॥ कथं चरेत्तदाह । बुधो विवेकवानपि बालकवन्मानावमानविवेकशून्यः । कुशलो निपुणोऽपि जडवत्फलानुसंधानाभावेन । विद्वान् पंडितोऽप्युन्मत्तवल्लोकरंजनाभावेन । नैगमो वेदार्थनिष्ठोऽपि गोचर्यामनियताचारमिव ॥ २९ ॥ वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः । पाखंडी श्रुतिस्मृतिविरुद्धधर्मानुष्ठानवान् । हैतुकः केवलतर्कनिष्ठः ।

त्परमात्मैक्यमेवैतस्येति न्यायेन इदंकारास्पदं न स्मरेत ॥२७॥ बहूदकादयस्तृतीयस्कन्धे उक्ता अपि पुनः सौगम्यायाह—"चतुर्विधो भिक्षुकः स्यात्कुटीचकबहूदकौ । हंसः परमहंसश्च योयः पश्चात्स उत्तमः॥" इति । तत्राद्ययोर्द्वयोः शिखासूत्रधारणं पुत्रदत्तान्नभोजनं भवति परं तु सर्वव्यासंगान्विहायाध्यात्मविद्याभ्यासः । हंसस्तु पुत्रादीनां त्यागं कृत्वा वनादौ वसेत् शिखासूत्रे तस्य वैकल्पिके । परमहंसो मुण्डः सूत्ररहितश्च । सर्वेषां ब्रह्मविद्याभ्यासस्तुल्य एवेति । परमहंसस्यैक एव दण्डस्त्रिदण्डादिकं हंसादीनामिति संक्षेपः । अथ प्रकृतमनुसरामः । बहिर्विरक्तो बाह्यविषयेभ्य उपरतः । इत्यर्थ इति—यथा शास्त्रे प्रणवजपशमदमादिकं विहितं तदतिक्रम्य न वर्तेतेति भावः । अत्र हेतुद्वयमाह—पुनरित्यादिना । पुनराक्षिपति—तर्हीति । पूर्वस्माद्बहूदकादेः । तं विशेषम् । विधिकिंकरत्वं चातीवहठेन तदुक्तकर्तृत्वं तादृशो न भवेत्किंतु यथादेशकालं कुर्यादित्यर्थः । एतदेव विधिकिंकराभावत्वमेव ॥ * ॥ परिपक्वज्ञानिनो निष्कामभक्तस्य वर्णाश्रमनियमाभावमाह—ज्ञाननिष्ठः परिपक्वज्ञानवान् । अनपेक्षकः प्रतिष्ठापर्यंतापेक्षारहितः । अत्र सर्वथा नैरपेक्ष्यमजातप्रेम्णो भक्तस्य न संभवेदत उत्पन्नप्रेमैव भक्तः सलिंगानाश्रमांस्त्यजेत्, अनुत्पन्नप्रेमा तु निर्लिंगाश्रमधर्मांस्त्यजेदित्यर्थो लभ्यते । स्वधर्मत्यागस्तु 'तावत्कर्माणि कुर्वीत' इति वाक्याद्भक्तानामारंभत एवावगम्यते, तयोः शुद्धान्तःकरणत्वादेव पापे प्रवृत्त्यभावाद् दुराचारत्वं नाशंक्यमतो नाविधिगोचरः ॥ २८ ॥ तदाचरणं पृच्छति—कथमिति । इवपदेन न तु सर्वथाचारपरित्यागी भवेदित्युक्तम् ॥ * ॥ लोकप्रतिष्ठोत्थविक्षेपभयात्क्वापि स्वं न प्रकाशयेदित्याह—बुध इति ॥ २९ ॥ निष्प्रयोजनगोष्ठ्याम् "काकस्य कति दंताश्च कति रोमाणि गर्दभे" इत्यादिनिष्फलवादकर्तृसमाजे । पाखण्डी बौद्धादिमताश्रयी ॥ * ॥ पाखण्डी न स्यादिति—पूर्वपक्षज्ञानार्थमपि बौद्धादिशास्त्रं नाभ्यसेदित्यर्थः । शुष्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित् ॥ ३१ ॥ एक एव परो
ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च ॥ ३२ ॥ अलब्ध्वा न विषीदेत कालेकालेऽशनं क्वचित् ॥ लब्ध्वा न हृष्येद्धृ
तिमानुभयं दैवतंत्रितम् ॥३३॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणम् ॥ तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ॥ ३४ ॥ यदृच्छयोपपन्नान्नमद्याच्छ्रे
ष्ठमुतापरम् ॥ तथा वासस्तथा शय्यां प्राप्तंप्राप्तं भजेन्मुनिः ॥ ३५ ॥

शुष्कवादे निष्प्रयोजनगोष्ठ्यां यो विवादस्तस्मिन् ॥ ३० ॥ अतिवादान् दुरुक्तानि ॥ ३१ ॥ आत्मदृष्ट्या तावद्वैरकारणं नास्तीत्युक्तमेक एवेति देहदृष्ट्यापि नास्ती
त्याह । भूतानि च देहा अपि कारणरूपेणैकात्मकानि ॥ ३२ ॥ दैवतंत्रितं दैवाधीनं यतः ॥ ३३ ॥ अलं तर्हि भिक्षाप्रयत्नेनापि तत्राह । आहारमात्रार्थं समीहेतैव ।
यतः तस्य प्राणधारणं युक्तं सम्यगुपपन्नम् । कथम् । तेन प्राणधारणेन तत्त्वं विचार्यते । किं तेनापि तदाह । तद्विज्ञायेति ॥ ३४ ॥ तर्हि किं मिष्टान्नादिकमग्राह्यमेव के

वादो विवर्तादिलक्षणः । तत्र विवादे सति कश्चित्पक्षं विष्णुभक्तिकारकेतरं नाश्रयेत् ॥ ३० ॥ उद्विजेत भीतो भवेत् । उद्वेजयेत्किंचिदुक्त्वा भीतं न कुर्यादित्यर्थः । पशुवत् यथा पशवो देहताडनादिनैव वैरं कुर्वन्ति तादृशो न भवेदित्यर्थः ॥ * ॥ अतिवादान् 'त्वं मूर्खोऽसि मूर्खसभायां निजपाण्डित्यप्रकाशकत्वात्' इत्येवंरूपाणि दुर्वचनानि । तुशब्दाज्जनं संसारादुद्वेजयेदेव तन्निःसारत्वज्ञापनेन 'त्रस्तोऽस्म्यहं कृपणवत्सलदुःसहोग्रसंसारचक्रकदनात्' इत्युक्तन्यायेन । भक्तिहीनाज्जनात्स्वयमपि तत उद्विजेत्तत्संसर्गस्य संसारचक्रपातकत्वात् ॥३१॥ भूतेषु ब्रह्मादिस्थावरांतेषु । "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतेः । कारणरूपेण महाभूतादिरूपेण ॥ * ॥ आत्मा परमात्मा । भूतेष्वन्येषु । आत्मनि स्वस्मिन् जीवे । यथेन्दुरित्येकस्यैव बैभवमात्रे दृष्टान्तः न तु प्रतिबिम्बत्वे । "अंबुवदग्रहणात्तु न तथात्वम्" "वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामञ्जस्यादेवम्" इति पूर्वोत्तरन्यायाभ्यां तथा निर्णीतत्वात् ॥ * ॥ **विश्वनाथस्तु**—यथोदपात्रेषु प्रतिबिम्बत्वेन प्रतीतेषु स्वकिरणेषु इन्दुः स्वकार्येषु कारणस्य सत्त्वादित्वादृष्ट्या वैरकारणाभावः, देहदृष्ट्या तु 'भूतान्येकात्मकानि' इति क्व वैरं कार्यमिति भावः ॥ ३२ ॥ अशनं भोजनम् । उभयं लाभालाभौ । यतो देवाधीनमतो हर्षविषादौ न कार्यावित्यर्थः ॥ * ॥ अत्र जले चन्द्रसूर्ययोः किरणा एव प्रतिबिम्बत्वेन प्रतीयन्ते, न तु वस्तुतः प्रतिबिम्बास्तेषां तापशमकत्वतापकत्वयोः प्रत्यक्षत एवानुभूतत्वेनावस्तुत्वासंभवात् । यतो हेतोरुभयं लाभालाभम् ॥ ३३ ॥ अत्राक्षिपति—अलमिति । यतो हेतोः । तस्य यतेः । योग्यतां पृच्छति—कथमिति । तेनापि तत्त्वविचारेणापि । किं किंप्रयोजनम् । तत् तत्प्रयोजनम् । तत् तत्त्वम् । यत्तु—'नाहारं चिन्तयेत्प्राज्ञः' इति निषेधश्रवणं तदाहारगुणचिन्तनपरमिति तत्त्वविचारहेतुप्राणधारणार्थान्नमात्रप्रयत्ने न दोष इति भावः ॥ * ॥ समीहेतैव यत्नं कुर्यादेव । सत्यधैर्ये कुतोप्यतस्तस्य प्राणानां मनआदींद्रियाणां धारणं स्थिरीकरणं युक्तमन्यथात्वपरिपक्वत्वाद्विक्षेपः स्यादेवेत्यर्थः । तद्धारणे किं स्यात्तत्राह—तत्त्वमिति । तेनापि तत्त्वविचारेणापि । किं तत्राह—तद्विज्ञाय संसारान्मुक्तो भवतीत्यर्थः ॥ ३४ ॥ पुनरत्राशङ्कते—तर्हीति । केनैवमुक्तं मिष्टान्नादिग्रहणाभावः केनोक्त इत्यर्थः । यदृच्छया दैवेच्छया । श्रेष्ठं षड्रसवत् । अपरं रसहीनम् । यथान्नसेवनं तथैव वस्त्राद्यपीति ॥ * ॥ यत्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौचमाचमनं स्नानं न तु चोदनया चरेत् ॥ अन्यांश्च नियमाञ्ज्ञानी यथाऽहं लीलयेश्वरः ॥ ३६ ॥ न हि तस्य विकल्पाख्या या च मद्वीक्षया हता ॥ आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मया ॥ ३७ ॥ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् ॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत ॥ ३८ ॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥ ३९ ॥

नैवमुक्तमित्याह । यदृच्छयेति ॥ ३५ ॥ यथाहमीश्वरो लीलया चरामि तथा ज्ञानी ज्ञाननिष्ठोऽनासक्तः कुर्यान्न तु विधिकिंकरत्वेन । तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ॥ ३६ ॥ कुतो विधिकिंकरत्वाभावस्तस्य तत्राह । न हि तस्य विकल्पाख्या भेदप्रतीतिः । नन्वस्ति सा । सत्यम् । या चासीत्साऽपि मद्वीक्षया ज्ञानेन हता । ननु न हता पुनर्दृश्यमानत्वात्तत्राह । आदेहांतात्क्वचित्कदाचिद्बाधितैव ख्यातिर्भवति ॥ ३७ ॥ तदेवं विरक्तस्यापरोक्षज्ञानवतः संन्यासं तद्धर्मांश्चोक्त्वा केवलं वैराग्यवंतं विविदिषुं प्रत्याह । दुःखोदर्केष्विति । न जिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः ॥ ३८ ॥ मामेव मद्दृष्ट्यैव गुरुं परिचरेत् । ततः परमेकश्चरेदित्यादिधर्मैर्वर्तेतेति भावः ॥ ३९ ॥

विनैवोपस्थितं श्रेष्ठं स्वादु अपरं विरसं वा । मुनिरिति–तत्रतत्र वचनेनाभिनंदनं प्रत्याख्यानं वा न कुर्यादिति भावः ॥ ३९ ॥ तस्य विधिकिंकरत्वस्य । इत्यर्थ इति–“ कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् ” इति श्रीगीतोक्तेरासक्त्या कर्माचरणेन ज्ञाननिष्ठातो भ्रश्यतीति भावः ॥ * ॥ यथाहं लीलया स्वेच्छया न तु कर्मवशत्वेन चरामीति स्वशक्तिलेशप्राप्तिस्तस्य दर्शिता । तत्र हेतुः–ज्ञानी मत्स्फूर्तिमान् ॥ ३६ ॥ विधिकिंकराभावत्वे हेतुं पृच्छति–कुत इति । तस्य ज्ञानिनः । भेदप्रतीत्यभावमाक्षिपति–नन्विति । सा भेदप्रतीतिर्देहेन्द्रियादिलक्षणाऽस्त्येवेति चेत्सत्यम्, अंगीकृत्य परिहरति–येति । हतस्य दर्शनासंभवान्न हतेत्याक्षिपति–नन्विति । ख्यातिः प्रतीतिः । “संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात् ” इत्युक्तेः । ततो देहपातोत्तरम् । मया संपद्यते विदेहमुक्तो भवति “तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये” इति श्रुतेः ॥ * ॥ ननु तस्य प्रापंचिकशुभाशुभस्फूर्तेरनुगतत्वाद्विधिवशतापि स्यात्तत्राह–न हीति । विकल्पाख्या मत्तोन्यस्फूर्तिः । ततो मया संपद्यते साष्टर्याख्यां मत्तुल्यसंपत्तिं प्राप्नोतीति संदर्भः ॥ * ॥ **दीपिका**–बाधितैव स्वकार्यं कर्तुमसमर्थैव प्रतीतिर्भवति दग्धरज्जुवत् ॥ * ॥ **विश्वनाथस्तु**–तस्य ज्ञानपरिपाक एव विधिकैङ्कर्याभावे कारणमित्याह–न हीति । विकल्पस्य भेदस्याख्या प्रख्यानं तस्य नास्ति । नन्वात्मैवेदं सर्वमिति ब्रुवाणस्य तस्य वाचैव नास्ति मनसा त्वस्त्येव, या चास्ति सापि मद्वीक्षया मदपरोक्षानुभवेन हता हतप्राया । ननु हतप्राया तत्राह–क्वचिदिति तैः ॥ ३७ ॥ तदेवम् तदित्थम् । तद्धर्मान्संन्यासधर्मान् । जिज्ञासितः ज्ञातः।मत्प्राप्तिसाधनं भक्तिरित्यर्थः।‘गुणः प्रकृत्यर्थोऽन्यत्र सात्’ इत्यनुशासनात्सन्नंतप्रयोगे प्रकृत्यर्थस्यैव मुख्यत्वेन जिज्ञासित इत्यस्य ज्ञात इत्यर्थः । दुःखमुदर्क उत्तरफलं येषां तेषु । “उदर्क एष्यत्कालीनफले मदनकण्टके” इति मेदिनी । मुनिं वेदार्थावगंतारम्, श्रोत्रियमित्यर्थः ॥ * ॥ सम्यग्विदुषः कृत्यमुक्त्वा विविदिषोः कृत्यमाह–केवलवैराग्यवन्तं ज्ञानशून्यविषयारुचिमन्तम् । अतो विविदिषुं शास्त्रद्वारा ज्ञानेच्छुम् । न जिज्ञासितो न विचारितः मद्धर्मः परमात्मतत्त्वं येन सः । जिज्ञासापदस्य स्वाश्रयसमवायसंबन्धेन विचारे लक्षणा, इच्छाविरहे गुरूपसत्तेर्निरर्थकत्वात् ॥ ३८ ॥ मद्दृष्ट्या गुरुरेव परं ब्रह्मेति धिया । ततः परं ज्ञानप्राप्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ॥ ज्ञानं वैराग्यरहितास्त्रिदंडमुपजीवति ॥ ४० ॥
सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ॥ अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ॥ ४१ ॥

अनधिकारिणः संन्यासं निंदति द्वाभ्याम् । यस्त्विति । प्रचंडोऽत्यासक्त इंद्रियसारथिर्बुद्धिर्यस्य सः ॥ ४० ॥ सुरान्यष्टव्यान् देवानात्मानं च स्वात्मानमात्मस्थं मां च निह्नुते प्रतारयति । निह्नवफलमाह । अस्मादिति ॥ ४१ ॥

रनंतरम् । इति भाव इति—यावज्ज्ञानोदयं गुरुं संसेव्य तत्प्रसादादवाप्तात्मज्ञानो जितेन्द्रियत्वादिधर्मयुत एक एव चरेदिति तात्पर्यम् ॥ * ॥ ततः परं ब्रह्मज्ञानानंतरम् ॥ ३९ ॥ त्रिदण्डमिति संन्यासोपलक्षणम् । उपजीवति सेवते धारयति ॥ * ॥ अनधिकारिणोऽविरक्तस्य । यस्त्विति युग्मम् । त्रिदण्डमुपजीवतीति त्रिदण्डोपलक्षितदांभिकसंन्यासं प्रदर्श्य जीविकां करोतीत्यर्थः ॥४०॥ प्रतारयति संन्यासमिषेण न भजति । धर्महा नित्यनैमित्तिकादिकर्मत्यागी । अविपक्वाः कषाया मलानि यस्य स तथाऽविशुद्धान्तःकरणः । अमुष्मात्स्वर्गादेः । विहीयते अधःपततीत्यर्थः । "यदि न समुद्धरन्ति यतयो हृदि कामजटा दुरधिगमोऽसतां हृदिगतोऽस्मृतकंठमणिः । असुतृपयोगिनामुभयतोऽप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥" इति वेदस्तुत्युक्तेः । अथ चतुर्थाश्रमविचारः । तत्र त्रैवर्णिकेषु कस्तदधिकारी—"त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः" इतिच्छंदोगसूत्रकारः । अपरार्केपि—"ऋणत्रयमपाकृत्य निर्ममो निरहंकृतः । ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात् ॥" इति । तथा धर्मविवृतावपि—"ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं कृती । संन्यसेद्वाऽघनाशाय सर्वभूतदयापरः ॥" एतानि वाक्यानि त्रैवर्णिकाधिकारं विदधति, ततोस्त्यधिकारः । "तुर्याश्रमे त्रैवर्ण्या ब्राह्मणाः प्रव्रजन्ति" इति जाबालश्रुतेरियं गतिः । ब्राह्मणपदमिहोपलक्षणं क्षत्रियवैश्ययोरपि । बहुत्वमप्येनमर्थमाहान्यथा ब्राह्मणः प्रव्रजतीत्येवं कथं नावादीदिति । यद्वा—ब्रह्म वेदस्तन्निष्ठस्तदध्ययनवान्ब्राह्मण इति व्युत्पत्त्या त्रिवर्णपरो ब्राह्मणशब्दः । एतेन "आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्" इत्यादीनि मन्वादिवचनान्यपि व्याख्यातानीति न विरोधः । यच्च देवलदत्तात्रेयवचनम्—"मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् । बाहुजातोरुजातानां नायं धर्मो विधीयते ॥" तथा—"गतिस्तुर्याश्रमे नास्ति बाहुजोरुजयोः क्वचित् । तुर्याश्रमे गतिः प्रोक्ता स्वयंभुवे" तदपि न वस्तुतो विरुद्धं यतो लिंगधारणस्यैव क्षत्रविशोर्निषेधो न त्वाश्रमस्य । लिंगं चिह्नं त्रिदण्डैकदण्डरूपम् । तथा च दक्षः—"मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते । गृहस्थोपीष्टवेदाद्यैर्नखरोमैर्वनाश्रितः ॥ त्रिदंडेन यतिश्चैव लक्षणानि पृथक्पृथक् ।" इति । 'गतिस्तुर्याश्रमे नास्ति' इहापि गतिर्ज्ञानं गत्यर्थानां ज्ञानार्थतानियमात् । ज्ञानञ्च ज्ञापकनिष्पाद्यमतस्तत्कार्यं तु तेन ज्ञानरूपेण कार्येण कारणं ज्ञापकं दंडधारणं लक्ष्यते । तथा चैतदुक्तं भवति—क्षत्रियवैश्ययोर्ज्ञापकं दण्डधारणं नास्तीति लिंगस्यैव निषेधो न त्वाश्रमस्येति । किञ्च—दंडधारणं बहिरंगमन्तरङ्गन्तु विषयविराग एव तदभावेविकाराभावात् "सर्वं दुःखमिति ज्ञात्वा येन संत्यज्यते गृहम् । स च त्यागफले भागी विपरीतस्तु दुःखभुक् । विषयाविष्टचेताश्चेत्त्यजेज्ज्ञेयः स वञ्चकः ॥ यस्त्यक्त्वा विषयान्मूढः पुनस्तानेव सेवते । स वान्ताशी परिज्ञेयः सारमेयो नराधमः ॥" इत्यादिकौशिकोक्तेः । यच्च धर्मविवृतावेव वचनान्तरम्—"संन्यसेद्ब्राह्मणः सम्यग्वानप्रस्थो भवेन्नृपः । गृहस्थश्च भवेद्वैश्य एवं वर्णक्रमः स्मृतः ॥" इति । अत्र सम्यङ् न्यसेदिति सम्यक्पदोपादानाद्ब्राह्मणस्य बहिरङ्गभूतदण्डधारणोपेत एव संन्यासो न तु तद्रहित इति गम्यते । तथा च क्षत्रियवैश्ययोस्तद्रहित आश्रमो भवतीत्यर्थादुक्तं भवति, अन्यथा छन्दोगसूत्रकारादिवचनविरोधापत्तेः । तत्र तात्पर्यमिदम्—'अबाधेनोपपत्तौ बाधो न न्याय्यः' इति न्यायेन श्रुतिस्मृतिविरोधपरिहाराय विधिवाक्यानामाश्रमस्वरूपविधौ तात्पर्यम् । निषेधवाक्यानां तु दण्डग्रहणमात्रनिषेधे तात्पर्यम् । ततः क्षत्रियवैश्ययोर्दण्डग्रहणनिषेधो न त्वाश्रमनिषेध इति । एवं प्राप्तेऽभिधीयते—"श्रुतिस्मृतिविरोधे तु श्रुतिरेव बलीयसी" ततश्च श्रुत्यनुसारेण व्यवस्थाभिधीयते—"ब्राह्मणाः प्रव्रजन्ति" इति श्रुतौ ब्राह्मणशब्दस्य ब्राह्मणत्वजातिर्वाच्योर्थः, ब्राह्मणोद्देशेन च प्रव्रज्या विधीयते उद्देश्यविशेषणमेवाविवक्षितं हविरुभयत्ववत् न तूद्देश्यमविवक्षितम्, तस्मादस्य ब्राह्मणोद्देशेन संन्यासविधानादुद्देश्यस्य ब्राह्मणत्वस्य हविर्वद्विवक्षितत्वात्तस्यैव प्रव्रज्याधिकारो नान्यस्य।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि भवेद्ब्राह्मणशब्दस्य ब्राह्मणत्वजातिर्वाच्योर्थस्तर्हि तस्योदेश्यत्वेनं विवक्षितत्वात् क्षत्रियवैश्ययोः प्रव्रज्यायां मा भूदधिकारः । न च तथा ब्राह्मणत्वजातिरर्थः, अपि तु ब्रह्मवेदस्तन्निष्ठास्तदध्ययनवन्तो ब्राह्मणा इति वेदाध्ययनवत्त्वमेकोनुगतो धर्मः स च ब्राह्मणशब्दस्यार्थः । तथा च–वेदाध्ययनवत्त्वरूपेणैकेनोपाधिना ब्राह्मणक्षत्रियवैश्यास्त्रयोपि क्रोडीकृताः स्युः । एवं च ब्राह्मणोद्देशेन प्रव्रज्याविधानात्त्रयाणामपि वर्णानां प्रव्रज्याधिकारो स्त्विति चेन्मैवम्, यथा क्षत्रियशब्दस्य क्षत्रियत्वं वैश्यशब्दस्य वैश्यत्वं गोशब्दस्य गोत्वं तथा ब्राह्मणशब्दस्यापि ब्राह्मणत्वमेवार्थ इति शेषजैमिनिबादरायणादिभिरंगीकृतं, तद्व्याहन्येत, तथा चोक्तव्याघातभयाद्ब्राह्मणशब्दस्य ब्राह्मणत्वं वेदाध्ययनवत्त्वं चोभयमपि वाच्यत्वेन परिकल्प्येत तदा " अन्यायश्चानेकार्थत्वम् " इति तांत्रिकैरेकस्यानेकार्थत्वं विरुद्धं तेन न्यायेन सह विरोधः स्यात् । अथैवं ब्रूषे–" अन्यायश्चाने कार्यत्वम् " इति न्याये जाग्रत्यपि गवादिशब्दानां यथानेकार्थत्वं तथा ब्राह्मणशब्दस्याप्यनेकार्थत्वमस्त्विति, न चैतदुचितम्, अगतिका हीयं गतिर्यदनेकशक्तिकल्पनयाप्यनेकार्थत्वस्वीकरणम् । शब्दार्थज्ञाने वृद्धव्यवहारः प्रमाणम्–वृद्धा हि गवादिशब्दानामनेकशक्तिकल्पनयानेकार्थत्वमंगीकुर्वते न ब्राह्मणशब्दस्य, अत एवाभिधानकारैरपि गवादिशब्दा अनेकार्थवर्गे पठितास्तेषामपि व्यवहारः शब्दश्लेषादिष्वेव न शास्त्रार्थनिर्णये । शास्त्रार्थपरिज्ञाने तु प्रसिद्धार्थस्यैव ग्रहणं नेतरस्य, इतरस्यापि ग्रहणे गोपशुविधायकवाक्ये प्रतिग्रहनिवृत्तये गां दद्यादित्येवंरूपे सास्नाद्युपेतगोपिण्डव्यतिरिक्तस्यापि दिग्दृष्ट्यादेरपि ग्रहणं स्यान्न च गृह्यते, तस्माच्छास्त्रार्थनिर्णयेषु प्रसिद्धार्थस्यैव ग्रहणं युक्तं विपरीतार्थद्योतकवाक्यशेषाद्यभावे, अतोऽनेकशक्तिकल्पनाभयाद् ब्राह्मणशब्दस्य ब्राह्मणत्वजातिरेवार्थः । " ननु वै जायमानो ब्राह्मणस्त्रिभिर्ऋणवाञ्जायते " इत्यत्र यथा ब्राह्मणशब्दो वर्णत्रयपरस्तथात्राप्यस्त्विति चेन्मैवम्, दृष्टान्तदार्ष्टांतिकयोर्वैषम्यात् । तथाहि–ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति वाक्यशेषे ब्रह्मचर्यादिभिर्ऋष्याद्यृणत्रयापकरणप्रतीतेर्ब्रह्मचर्यादिषु च त्रैवर्णिकस्याधिकारात्फलचमसवत् । यथा सोमपाने स्थाने ब्राह्मणेतरयोः क्षत्रियवैश्ययोः फलचमसयोर्विहितत्वेनाधिकारस्तथात्राप्यस्त्वित्यर्थः । शाखांतरे–" जायमानो वै ब्राह्मणः" इत्यत्रापि त्रैवर्णिकानुप्रवेशाद्युज्यते तत्र त्रैवर्णिकपरत्वं, प्रकृते तु वाक्यशेषाद्यभावान्न त्रैवर्णिकपरत्वम् । किञ्च–यावता कालेनावयवव्युत्पत्त्या लक्षणया वा क्षत्रियवैश्यौ ब्राह्मणशब्देन प्रत्यायेते ततः प्रागेव 'रूढिर्योगमपहरति, इति न्यायाल्लब्धात्मिकाया रूढेः प्राबल्यादनुपपत्त्यभावाच्च रूढया ब्राह्मणत्वमेव प्रत्याय्यते । अतः प्रथमप्रतीतब्राह्मणोद्देशेन प्रव्रज्याविधेश्चरितार्थत्वान्न चरमप्रतीतयौगिकार्थस्वीकरणमुचितम् । ततश्च "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति श्रुत्या विरुद्धम् " औदुंबरी सर्वा वेष्टयितव्या " इति स्मृतिवचनं यथा विरोधाधिकरणेऽप्रमाणमित्युक्तम्, तथा " ब्राह्मणाः प्रव्रजंति " इति जाबालश्रुतिविरुद्धम् " त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः " इत्यादिकं स्मार्तवचनजातमप्रमाणमेव । यद्वा–श्रुतिविरुद्धस्यापि स्मार्तवचननिचयस्य सर्वथाऽप्रामाण्यपरिजिहीर्षया श्रुत्यनुकूल एवार्थः परिकल्पनीयः । तत्र " त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमाः " इति छंदोगसूत्रस्यायमर्थः–त्रयाणां वर्णानां यथोदितं चत्वार आश्रमा इति औचित्यं श्रुत्यविरोधाय ब्राह्मणस्यैव तुर्याश्रमाधिकारविधौ नान्यत्रैवर्णिकानां संन्यासो विद्यते, नात्र संशयः " शिखायज्ञोपवीतानां त्यागपूर्वैकदण्डयुक् " इति ब्रह्माण्डपुराणमपि छन्दोगसूत्रसमानार्थम् । यच्च ब्रह्मवैवर्तवचनम्–" वैराग्योत्पत्तिमानेव संन्यासे परियुज्यते । रागवान्न तु विप्रोपि वेदवेदांगवित्तमः ॥ " इति वेदवेदांगवित्तमोपि विप्रो रागवांश्चेत्तर्हि संन्यासे न युज्यत इत्यन्वयः । एवञ्च–विरक्तस्य विप्रस्यैवाधिकारोऽभिहितो न क्षत्रियादेः । यच्च स्मृत्यन्तरम्–" ऋणत्रयमपाकृत्य निर्ममो निरहंकृतः । ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात् ॥ " इति, तस्यायमभिप्रायः–गृहात्प्रव्रजेद्वानप्रस्थाश्रमं गच्छेत् । प्रव्रज्याशब्दो यद्यपि संन्यासे रूढस्तथाप्यत्र श्रुतिविरोधपरिहाराय तृतीयाश्रमपरस्तस्याऽपि वैराग्यहेतुकत्वात् । यद्वा–यदा ब्राह्मणः स्ववृत्त्यावजीवन्क्षत्रियवृत्तिमाश्रितस्तत्राप्यजीवन्वैश्यवृत्तिं ततस्तामापदं निस्तीर्यापि न वर्णांतरवृत्तिं परित्यजति किन्तु तत्रैवावस्थितस्तदा तत्तत्क्षत्रियादिवृत्तिजीवनेन स एव ब्राह्मणः क्षत्रिय इति वैश्य इति च व्यपदिश्यते शास्त्राननुज्ञातकालेपि क्षत्रादिवृत्तिनिरतत्वात्तस्यापि प्रव्रजेदिति प्रव्रज्याधिकारं दर्शयति। अत एव–"ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात् " इत्यत्राथशब्द उपात्तः, ब्राह्मण एवाथानंतरं क्षत्रियवृत्त्याश्रयणात् क्षत्रियः, अथ वैश्य इत्यानंतर्यप्रतिपादनादयमर्थो गम्यत इत्यर्थः । एतेन " ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं गृही । संन्यसेद्वाथ वा शान्तः " इत्येतदपि व्याख्यातम् । एवं च मनुदत्तात्रेयादिवचनान्यप्यनुकूलानि भवेयुः । तस्माच्छ्रुतिविरोधपरिहारायान्यान्यपि विरुद्धवचनानि ज्ञेयानि । यश्च जडभरतं प्रत्युपदेशो योगिरहस्ये–' यदि मृत्योः परं शांतमनामयं शाश्वतं पदमिच्छुरसि तत्परमहंसो भव' इति । अत्रेदं चिन्त्यं–किं जडभरतं प्रत्ययमुपदेश उत लक्षणया क्षत्रियमात्रं प्रति । आद्ये–जडभरतस्यैव नेतरक्षत्रियप्राप्तिः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः ॥ गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ॥ ४२ ॥ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदम् ॥ गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनम् ॥ ४३ ॥ इति मां यः स्वधर्मेण भजन्नित्यमनन्यभाक् ॥ सर्वभूतेषु मद्भावो मद्भक्तिं विंदतेऽचिरात् ॥ ४४ ॥ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् ॥ सर्वोत्पत्त्यप्ययं ब्रह्मकारणं मोपयाति सः ॥ ४५ ॥

चतुर्णां प्रधानधर्मानाह । भिक्षोरिति ॥ ४२ ॥ अन्यधर्मान्कांश्चिद्गृहस्थस्याप्यतिदि शति । ब्रह्मचर्यमिति । शौचं रागादिराहित्यं च । तस्य ब्रह्मचर्यप्रकारमाह । ऋतौ गंतुरिति ॥ ४३ ॥ एवंभूतवर्णाश्रमधर्मफलमाह । इति मामिति । दृढां मद्भक्तिं विंदते ॥ ४४ ॥ ततः किमत आह । भक्त्येति । महेश्वरत्वे हेतुः । सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् अत एव तत्कारणं मा मां ब्रह्मरूपं वैकुंठनिवासिनम् । यद्वा ब्रह्मणो वेदस्य कारणं मामुपयाति

किंच–जडभरतोपि प्रैषोच्चारणपूर्वकमाश्रमं गृहीतवानिति न क्वापि श्रूयते:। अतः–" ब्राह्मणाः प्रव्रजन्ति " इत्यनुरोधात्परमहंसो भवेत्यस्यायमर्थः–परमहंसो भव निर्ममो भवेति । न द्वितीयः। तत्र हि लक्षणा,सा च न युक्ता " न विधौ लक्षणा " इति भट्टगुरुप्रभृतिभिर्विधौ लक्षणानिषेधात् । किञ्च–लक्षणां वदन्वादी प्रष्टव्यः । किं विशिष्टविधिरुत प्राप्ते कर्मण्यधिकारविधिरिति । पक्षद्वयेपि लक्षणा दुर्वारा । ननूद्देश्ये लक्षणा न विध्यंशेऽतो न दोष इति चेत्तर्ह्युद्देश्येपि न युक्तेति ब्रूमः । तथाहि–संबंधानुपपत्तिभ्यां हि लक्षणा, न चानुपपत्तिः पूर्वोक्तरीत्या वाक्यस्यार्थांतरपरत्वेनाप्युपपत्तेः । या च जाबालश्रुतिर्जनकयाज्ञवल्क्यसंवादे तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वासऋभुनिदाघजडभरतरैवतप्रभृतय इति । तत्रापि विधायकप्रत्ययाभावात्परमहंससदृशधर्मवन्त इति अहन्ताममतयोरभावात्परमहंसा इति व्यपदिश्यंत इति । किञ्च–"ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यां चरन्ति " इति संन्यासविधायकमुख्यश्रुतौ ब्राह्मणत्वस्य विवक्षितत्वात् " स्वाराज्यकामो राजा राजसूयेन यजेत " इत्यत्र क्षत्रियत्ववत् क्षत्रियत्वजातिमात्राजा यथा राजसूयेऽधिकृतस्तथा ब्राह्मणत्वजातिमत एव विरक्तस्य संन्यासाधिकारः, साधितं चैतद्भगवद्भाष्यकारैः–' कर्मणैव हि संसिद्धिमास्थिताः ' इत्यत्र । वार्तिककृता तु प्रौढिवादमात्रेण क्षत्रियवैश्ययोः संन्यासोस्तीत्युक्तम्–"दार्ढ्येन यन्नहि प्रोक्तं कर्तव्यत्वेन कोविदैः । कंचित्तद्धेतुमादाय तत्साधनमिहोच्यते ॥ सर्वसाधनहीनत्वात्प्रौढिवादो बुधोज्झितः । " इति । किञ्च–कलौ स न कार्यः " अश्वालंभं गवालंभं संन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् ॥ " इति बृहन्नारदोक्तेः । " कलौ पतति संन्यासात्तद्धर्माणामसंभवात् । कलौ नैव त्रयो ग्राह्या गृहस्थाश्रमतो विना । असंभाव्या हि तद्धर्मास्तद्ग्रहीता ततः पतेत् ॥ " इति कौशिकोक्तेः । तेषामाश्रमाणां ग्रहीता तद्ग्रहीता ततस्तद्धर्माणामसंभवात् । पतेत् नरक इति शेषः । इत्यत्र बहु वक्तव्यमस्तीति वंशीधरः । भोगवैभवप्राकट्यभयादस्माल्लोकात्तथा विद्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमादमुत्र निरयप्राप्तेः परस्माच्च विहीयते ॥ ४१ ॥ चतुर्णाम् आश्रमाणाम् । ईक्षा विचारः । भूतरक्षाऽन्नादिना प्राणिरक्षा । इज्या यागः । द्विजस्य ब्रह्मचारिणः ॥*॥ ईक्षा आत्मानात्मविवेकः । इज्या यज्ञानुष्ठानम् । द्विजस्य द्विजत्वहेतुकब्रह्मचर्यव्रतवतः ॥ ४२ ॥ अन्यधर्मान् ब्रह्मचार्यादिधर्मान् । तप इति वनस्थस्य । संतोषशौचमिति साधारणः । भूतसौहृदं जीवाभयप्रदानमिति भिक्षोः । तस्य गृहस्थस्य । " यो द्विज ऋतुगामी स्याद्ब्रह्मचारी स ईरितः " इत्युक्तेः । सर्वसाधारणमुख्यधर्ममाह–सर्वेषामिति ॥ * ॥ अन्यधर्मान् ब्रह्मचर्यादिधर्मान् । उपादिष्टस्यान्यत्र नयनमतिदेशः । किञ्च–मदुपासनं सर्वेषां वर्णाश्रमधर्माणां प्राणप्रदत्वादावश्यकम्, येन विना ते सर्वे विफलाः स्युः । तदुक्तम्–' मुखबाहूरुपादेभ्यः ' इत्यत्र ' स्थानाद् भ्रष्टाः पतंत्यधः ' इति ॥ ४३ ॥ अनन्यभाक् त्यक्तान्योपासनः अचिरात् ॥ * ॥ मां स्वधर्मेण भजन्मत्प्रीत्यर्थं स्वधर्ममाचरन् । अनन्यभाक् न त्वन्यार्थः । ननु स्वधर्मेण देवादीनां यजनात्कथं मत्प्रीतिस्स्यात्तत्राह–सर्वभूतेषु ममैवांतर्यामित्वेन स्थितस्य भावो भावना यस्य सः । दृढां प्रेमलक्षणाम् ॥ ४४ ॥ ततस्तव भक्तेः । अत एव सर्वोत्पत्त्यप्ययहेतुत्वादेव । तद्ब्रह्म कारणं कारणरूपम् । विगतः कुंठो वैकल्यं यस्मात्तद्विकुंठं शुद्धचेतस्तदेव वैकुंठं तत्र वासिनम् । सर्वोत्पत्त्यप्ययमित्युक्तेरेव कारणत्वमायातं पुनस्तत्कथनं पुनरुक्तमिवेत्यरुच्याह–यद्वेति ॥ * ॥ दीपिका–ततस्तादृशभक्तिप्राप्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो न चिरात्समुपैति माम् ॥ ४६ ॥ वर्णाश्रमवतां धर्म एष आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥ ४७ ॥ एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च माम् ॥ यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परम् ॥ ४८ ॥ इति श्रीमद्भा० महापुराण एकादशस्कन्धे भगवदुद्धवसंवादे वनस्थसंन्यासिधर्मनिरूपणं नामाऽष्टादशोऽध्यायः ॥ १८ ॥ श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥ १ ॥

सामीप्येन प्राप्नोति ॥ ४५ ॥ ततश्चासौ मुक्त एवेत्याह । इतीति । इति एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं सत्त्वं चित्तं यस्य सः । अत एव निर्ज्ञाता मम गतिरैश्वर्यं येन ॥ ४६ ॥ उक्तमर्थं संक्षिप्याह । य एष आचारलक्षणः पितृलोकप्राप्तिफलः स एव मद्भक्तियुतो मदर्पणेन कृतः ॥ ४७ ॥ प्रकरणार्थमुपसंहरति । एतच्च तेऽभिहितम् । यथा भक्तो भूत्वा मां परं संप्राप्नुयादिति ॥ ४८ ॥ इति श्रीमद्भागवत एकादशस्कन्धे श्री० टीकायामष्टादशोऽध्यायः ॥ १८ ॥ ज्ञानादेर्निर्णयः पूर्वं कृतो ह्याश्रमधर्मतः ॥ अत्रोनविंशतितमे ज्ञानादेस्त्याग उच्यते ॥ १ ॥ तदेवं तर्कतो बाधितोऽपि देहादिप्रपंचो यावदपरोक्षानुभवेन दिङ्मोहादिरिव न लीयते तावज्ज्ञानाभ्यासस्ततो मुक्तिरित्युक्तम् "आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मया" इत्यादिना। यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीत्याह । य इति । विद्या अनुभवस्तत्पर्यंतेन श्रुतेन संपन्नोऽत एवात्मवान्प्राप्तात्मतत्त्वो नानुमानिकः केवलपरोक्षज्ञानवान्न भवति । अनकारपाठे प्राक् श्रुत्यनुकूलतर्कतो निर्णीतार्थ इत्यर्थः ।

अत एव सर्वोत्पत्त्यप्ययत्वात्तेषु तत्कारणं सर्वकारणं पूर्वार्थे कारणशब्दात्तत्पदाध्याहारः, ब्रह्मशब्दस्य सविशेषे लक्षणा चातो—यद्वेति ॥ * ॥ **विश्वनाथस्तु**—ततश्च तया भक्त्या कश्चित्सर्वलोकमहेश्वरं मां प्राप्नोति स्वतुल्यैश्वर्यप्रदोहं तस्मै सार्ष्टिरूपां मुक्तिं ददामीति भावः । कश्चित्सर्वोत्पत्त्यप्ययं मां प्राप्नोति तदभिप्रेतयोगसिद्धिं ज्ञानानंदाद्युत्पत्तिं संसाराप्ययं च तस्मै तावदहं ददामीति भावः । कश्चिन्मां ब्रह्मेति तस्मै निर्वाणमुक्तिं ददामीति भावः ॥४९॥ ततः सामीप्यप्राप्तेरनंतरम् । असौ मद्भक्तः । अत एव शुद्धान्तःकरणत्वादेव । ज्ञानं तत्त्वम् । पदार्थद्वयशोधनं विज्ञानं वाक्यार्थभेदबाधस्ताभ्यां संपन्नो न चिराद्देहावसानकाल एव सम्यगभेदेन ॥*॥ सा च मत्प्राप्तिर्मद्भक्त्युदयानुरूपेण मज्ज्ञानपूर्विकैव भवतीत्युपसंहरति—इतीति । इति स्वधर्मे गम्यते ज्ञायतेऽनया गतिर्भक्तिः, निःशेषेण ज्ञाता तत्त्वतोऽनुभूता मम गतिर्येन । अत एव ज्ञानविज्ञानसंपन्नः मत्स्वरूपरूपगुणलीलादीनां परोक्षापरोक्षज्ञानसमृद्धः । यद्वा—ब्रह्मसायुज्येच्छुश्चेत्तदा त्वेष क्रममाह इति निर्ज्ञातमद्गतिः सम्यगधीतमदुपदिष्टज्ञानशास्त्रः । मां निर्विशेषं ब्रह्माख्यम् ॥ ४६ ॥ पितृलोकप्राप्तिः फलं यस्य स तथा । "कर्मणा पितृलोकः" इति श्रुतेः । परः सर्वोत्कृष्टः स्यात् । परत्वमाह—निःश्रेयसकरो मोक्षदः । 'श्रेयो निःश्रेयसामृतम्' इत्यमरः ॥ * ॥ ० ॥ ४७ ॥ अभिहितम् कथितम् ॥ * ॥ साधो इति—त्वं तु पूर्वमपि सदाचारोऽसि मया त्वामुद्दिश्य लोकहितार्थमेवोक्तमिति भावः ॥ ४८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धेऽष्टादशोऽध्यायः ॥ १८ ॥ पूर्वम् अनंतरोक्ताध्याये । 'नैतद्वस्तुतया पश्येत्' इत्यादिना । ज्ञानादेः, इहादिना भक्तिबंधमोक्षादिग्रहः । यद्वा—अत्रोनविंशतितमे । पूर्वं ज्ञानादेर्निर्णयः कृतः पश्चात्त्यागो विधीयत इति (१) । तर्कतो विचारतः । दिङ्मोहोंधकारस्थस्य यथा प्रकाशं विना न निवर्तते तद्वत् । श्रुतेन श्रवणेन । अत एवानुभवावसानकश्रुतवत्त्वादेव । अनुमानं करोत्यानुमानिकः । "यतो वा इमानि" इत्यादिश्रुत्युक्तेश्वरानुमातृवत्परोक्षज्ञानवान्न, किंतु "अहं ब्रह्मास्मि" इत्यपरोक्षीकृतस्वात्मतत्त्वः । अनकारपाठे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः ॥ स्वर्गश्चैवापवर्गश्च नान्योऽर्थो मदृते प्रियः ॥ २ ॥

स इदं द्वैतं तन्निवृत्तिसाधनं च मयि मायामात्रमिति ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् । अयमेव विद्वत्संन्यासो नाम ॥ १ ॥ अत्र हेतुमाह । ज्ञानिनस्त्विति । यस्मादह मेव तस्येष्टोऽपेक्षितः । स्वार्थः फलम् । हेतुस्तत्साधनं च संमतः । स्वर्गोऽभ्युदयश्च । अपवर्गः संसारनिवृत्तिश्च । अतस्तस्य न प्राप्यं कृत्यं वा किंचिदस्तीत्यर्थः ॥ २ ॥

'आत्मवानानुमानिकः' इति पाठे । प्राक् पूर्वम् । मयि मत्स्वरूपे । मायामात्रं कल्पितमिति निश्चित्य । यद्वा—मयि मन्निमित्तं स्वरूपभूतमत्प्राप्त्यर्थमिति यावत् । अयमेव ज्ञानतत्साधनयोर्मायामात्रत्वज्ञानेन तयोस्त्यागरूप एव गृहस्थाश्रमादौ कृतश्रवणादिभिरुत्पन्नब्रह्मसाक्षात्कारेण गृहस्थादिना विक्षिप्तचित्तस्य चित्तविश्रान्तिलक्षणजीवन्मुक्तिमुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यासः । तत्रैतमेव विदित्वा मुनिर्भवति । अथ योगिनां परमहंसाना मित्यादिपरमहंसोपनिषदादीनि बहूनि प्रमाणानि । विविदिषासंन्यासस्तु—साधनसंपन्नेन तत्त्वज्ञानमुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः । "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजंति" इति श्रुतिस्तत्र प्रमाणम् । स च द्विविधः—जन्मापादककर्मत्यागात्मकः, प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपश्च । " न कर्मणा न प्रजया धनेन त्यागेनैके नामृतत्वमानशुः " इति श्रुतिराद्ये मानम्, विरक्तस्य गृहस्थादेः प्रबलनिमित्तवशेन संन्यासप्रतिबन्धे आद्यसंन्यासेऽधिकारः । अत्र स्त्रीणां विप्रेतरगृहस्थानां चाप्यधिकारः । जनकादीनां मैत्रेयीप्रभृतीनां च तत्त्वविदां श्रुतिस्मृतीतिहासपुराणेषूपलंभात् । प्रतिपादितं चैतद्विशेषतो विद्यारण्यैर्जीवन्मुक्तिविवेके॥*॥

दीपिका—आश्रमधर्मतः आश्रमधर्मं पुरस्कृत्य (१) । तर्कतः शास्त्रविचारेण बाधितोपि मिथ्यात्वेन ज्ञातोपि । तावदपरोक्षानुभवादर्वाक् । ततः परोक्षानुभवे सति प्रागनुभवात् पूर्वं श्रद्धानुकूलतर्कतः मन्तव्य इति मननविधानाच्छ्रुत्यनुकूला मुख्यत्वेन निश्चिता । तथाहि—विमतमभिन्ननिमित्तोपादानकं कार्यत्वात्सुखादिवत् । तदुक्तं शंकरशारीरके—सत्सु तु वेदन्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानु मानमपि वेदांतवाक्याविरोधि प्रमाणं भवन्न निवार्यते, श्रुत्यैव च सहायतया तर्कस्योपेतत्वात् । तथाहि—" श्रोतव्यो मंतव्यः " इति श्रुतिरिति । द्वैतं जगत् तन्निवृत्तिसाधनञ्च, वाक्यजन्यं ज्ञानं मयि शुद्धे ब्रह्मणि मायामात्रं प्रतीतिमात्रं माययैवात्मन्यध्यस्तं न वास्तवम् ' अज्ञानसंज्ञौ भवबंधमोक्षौ ' इति, ' अतो न बन्धस्तव नैव मोक्षः ' इत्याद्युक्तेः । तत्साधनं ज्ञानसाधनम् । ' शमादि मयि संन्यसेत् ' इति । विजयार्थं दत्त मस्त्रमिव विजयानंतरं राज्ञि समर्प्य पुनस्तमिव मामेवोपासीतेत्यर्थः । अयमेव विद्वत्संन्यास इति ॥ * ॥ **विश्वनाथस्तु**—तदेवमनाद्यविद्यादूरीकरणार्थमेव निष्कर्मज्ञानयोगवैराग्यादीनि जीवस्य कर्तव्यत्वेनोक्तानि, तैः साधनैर्दूरीभूतायामविद्यायां विद्यायां चोत्पन्नायां न तैः साधनैः कोप्युपयोगः । यथा—सर्पव्याघ्रभूताद्याविष्टः पुरुषः स्वं विस्मृत्य सर्पोहं भूतोहं व्याघ्रोहमित्येवं यावन्मन्यते तावदेव मणिमंत्रमहौषधादीनां प्रयोग उपयुज्यते तत्तदावेशे तैस्तैरुपायैरुपशांते सति अमुकोहममुकस्य पुत्र इति स्वस्वभावे प्राप्ते न पुनस्तैर्मंत्रौषधादिभिः कृत्यमित्याह—य इति । विद्या सांख्ययोगतपोवैराग्यमयं, ज्ञानमविद्यानिवर्तकम् , श्रुतानि तत्तत्प्रतिपादकशास्त्राणि तैः संपन्नः । अत एव तत्तत्साधनवशादात्मवान्प्राप्तात्मतत्त्वः, नानुमानिक इति तैः । किन्त्वपरोक्षानुभवसहित एव इदं देहदैहिकसर्ववस्तुषु स्वाभिमननं मायामात्रं मायिकमेव ज्ञात्वा । यद्वा—इदं इदंकारास्पदं जगन्मायिकं मायिकत्वादस्थिरमेवेति ज्ञात्वा ज्ञानं तत्साधनञ्च मयि संन्यसेन्मत्प्राप्त्यर्थं त्यजेत् ॥ १ ॥ अत्र ज्ञानतत्साधनत्यागे । यस्माद्धेतोस्तस्य ज्ञानिनः । तत्साधनं फलसाधनम् । अभ्युदय ऐश्वर्यम् । अतो हेतोः । स्तस्य ज्ञानिनः । इत्यर्थ इति—आनंदकंदस्वरूपभूतमदज्ञानादज्ञानामेव यत्किंचिदानन्दोपेतस्वर्गाद्यभिलाषो भवतीति भावः ॥ * ॥ **दीपिका**—अत्र ज्ञानसमर्पणे । तुशब्दः शुष्कज्ञानिनिरासाय । फलं परमसाध्यम् । तत्साधनं फलसाधनम् । अभ्युदयः परलोकवैभवम् । अतो ममैव सर्वस्वात् । तस्य विद्वत्संन्यासिनः ॥ * ॥ **संदर्भस्तु**—यतः सम्यगनुभवे सति ज्ञानिनः परमसाधनसाध्यरूपोप्यहमेव विस्फुरामि न तु ब्रह्मकैवल्यादिरित्याह—ज्ञानिनस्त्विति । तुशब्दः पक्षान्तरनिरासार्थः ॥ * ॥ **विश्वनाथस्तु**—ननु ज्ञानमिव किं भक्तिमपि संन्यसेत्तत्र नहिनहीत्याह—ज्ञानिन इति । अहमेवेष्टो यजनविषयीभूतः कथं मद्यजनं त्यजेत् । स्वार्थः स्वापेक्षितं फलमहमेव हेतुस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोऽतो मे ज्ञानेनासौ बिभर्ति माम् ॥ ३ ॥ तपस्तीर्थं जपो दानं पवित्राणीतराणि च ॥ नाऽलं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ॥ ४ ॥ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ॥ ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ॥ ५ ॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन् ॥ ६ ॥

अत्र विद्वदनुभवं प्रमाणयति। ज्ञानेति। यथोक्तं ज्ञानिनमभिनंदति। ज्ञानीति। यतोऽसौ ज्ञानेन मां धारयति॥ ३ ॥ तस्य ज्ञानं स्तौति। तप इति। अलमत्यर्थम्। ज्ञानस्य कलया लेशेन॥ ४ ॥ ज्ञानेन सहितं तत्पर्यंतं यथा भवति तथा ज्ञात्वा तत्संपन्नः सन्मामेव भज। अन्यत्सर्वं त्यजेत्यर्थः ॥ ५ ॥ तस्य प्रत्ययार्थं पूर्वेषां वृत्तमाह। ज्ञानेति। मामेव संसिद्धिं प्राप्तः ॥ ६ ॥

त्साधनं चेति कथं मद्भक्तिं त्यजेत्। संमत इत्येतत्प्रमाणमेव। तदुक्तं मयैव—'ब्रह्मभूतः प्रसन्नात्मा' इत्यनंतरम् ''भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरम् ॥'' इति। वक्ष्यते चात्रापि—'भज मां भक्तिभावितः' इति। स्वर्गः सुखहेतुः। अपवर्गो दुःखाभावहेतुश्चाहमेवेति ॥ २ ॥ अत्र ज्ञानिनोऽहमेव सर्वमित्यस्मिन्नर्थे। यतो हेतोरसौ ज्ञानी अतो मे प्रियतम इत्यन्वयः। यद्वा—ज्ञानविज्ञानसंसिद्धाः पदार्थवाक्यार्थविचारकुशलाः। श्रेष्ठमुपाधिद्वयविभक्तं मम पदं मत्स्वरूपं विदुः। ज्ञानी यतोऽनावृततयाऽसंतमिवाज्ञानां ज्ञानेनावरकाज्ञानबाधेन मामात्मतया बिभर्ति धारयति अतोऽसौ मम प्रियतमः ॥ * ॥ अत्र स्वस्यैव परमसाध्यसाधनत्वे प्राचीनज्ञानिनामनुभवं प्रमाणयति—ज्ञानेति। ज्ञानविज्ञानसंपन्नाः श्रीसनकादयः श्रीशुकादयश्च मम पदं चरणारविंदमेव परं श्रेष्ठं विदुर्जानंति न तु ब्रह्मतत्त्वम् 'तस्यारविंदनयनस्य पदारविंदे' इत्यादेः, 'स्वसुखनिभृतचेताः' इत्यादेः। यस्मादेवं विदुरत एव ज्ञानी प्रियतमः। अत एव ज्ञानेन मां बिभर्ति पुष्णाति सुखयतीत्यर्थः। तथा च गीतं मयैव—''तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते'': इति। 'ज्ञानी त्वात्मैव मे मतम्' इति। ''प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः'' इति भावः ॥ ३ ॥ तस्य मानिनः। तपः कृच्छ्रादि, तीर्थं कुरुक्षेत्रादि, जपोष्टाक्षरादेः, दानं त्वपुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनम्, एवं च कन्यादाने स्वत्वत्यागाभावात्तद्दानं न स्यादिति चेत्, अत्रेदमवधेयम्—स्वस्य भावः स्वत्वम् आत्मीयत्वात्मत्वधनत्वज्ञातित्वभेदात्तच्चतुर्द्धेति। यद्यप्यत्रात्मत्वात्मीयत्वयोस्त्यागो नास्ति तथापि ज्ञातित्वधनत्वयोस्तत्र त्यागोऽस्त्येव। परगोत्रप्रवेशाज्ज्ञातित्वत्यागो विवाहोत्तरं दातुं विक्रेतुं चाशक्यत्वाद्धनत्वत्यागोऽपीत्यतोत्र परस्वत्वापादनरूपं मुख्यं दानत्वमस्त्येवेत्यलम्। इतराणि सत्सेवनादीनि। पवित्राणि पावित्र्यापादकानि। तीर्थस्तु—'शुद्धिम्' इति पपाठ। सिद्धिः श्रेयःप्राप्तिः ॥ * ॥ अत एव तप इति तां सिद्धिं भक्तिरूपां नालंकुर्वन्ति न विशेषयन्ति। शुद्धिमिति पाठे भक्तौ योग्यताम्। ज्ञानमत्र भगवज्ज्ञानम्। तां प्रेमलक्षणाम्। न वर्धयन्ति किन्तु ज्ञानमेव वर्द्धयंतीति भावः ॥४॥ यतः सर्वश्रेयःप्राप्तौ ज्ञानस्योत्तमत्वं तस्मादित्यर्थः। स्वात्मानं परमात्मानं माम् ''तं वा एतमभिवदन्ति स्वात्मा'' इति श्रुतेः। भक्तिभावितः भक्त्या युक्तः शोधितो वा। तत्संपन्नो ज्ञानविज्ञानसंपन्नः। इत्यर्थ इति—मद्भजने सर्वश्रेयसामंतर्गतत्वादिति भावः। भजनं चात्र स्वरूपानुसंधानमेव। ''यावानार्थ उदपाने सर्वतः संप्लुतोदके। तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥'' इति श्रीगीतोक्तेः ॥ * ॥ तस्माद्भक्त्यविरुद्धज्ञानस्य वैशिष्ट्यात्। अनुभवपर्यंतं शास्त्रेणानिश्चित्य। अन्यत्सर्वं मोक्षपर्यन्तमिति ॥ ५ ॥ तस्य उद्धवस्य। प्रत्ययार्थं विश्वासार्थम्। संसिद्धिं परं श्रेयः ॥ * ॥ **दीपिका**—ज्ञानविज्ञानसंपन्न एव कस्तत्राह—ज्ञानविज्ञानयज्ञेन परोक्षज्ञानरूपयज्ञेन सर्वे यजन्ति मामात्मानं परमात्मानं परमात्मानमात्मन्येवेष्ट्वा मुनयः संसिद्धिमन्वगमन्। एवंभूताः संसिद्धिं गताः प्राचीना मुनय एव ज्ञानविज्ञानाभ्यां संपन्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतराऽऽपतति नाद्यपवर्गयोर्यत् ॥ जन्मादयोऽस्य यदमी तव यस्य किं स्युराद्यंतयोर्यदसतोऽस्ति तदेव मध्ये ॥ ७ ॥ उद्धव उवाच ॥ ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणम् ॥ आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यम् ॥ ८ ॥

तदेव ज्ञानं संक्षेपत उपदिशति । त्वयीति । त्रिविध आध्यात्मिकादिर्विकारो देहादिः स माया न तु परमार्थः । यद्यस्मादंतरा मध्य एवापतति । रज्जौ सर्पमालादिवत् । नाद्यपवर्गयोर्न त्वादावंते चास्ति । अतो यद्यदा अस्य विकारस्यामी जन्मादयः स्युस्तदा तस्य तवाधिष्ठानभूतस्य किम् । न किंचिदित्यर्थः । ननु तस्यापि वस्तुतो न संति तस्मात्सत्त्वादित्याह । आद्यंतयोरिति । असतः सर्पादेराद्यंतयोर्यदस्ति रज्ज्वादि तदेव मध्येऽपि न तु सर्पादि तद्वदयं विकारो नास्तीत्यर्थः । यद्वा आद्यंतयोर्यदस्ति तन्मध्येऽप्यस्त्येव । न तस्य जन्मादयः संत्यतस्त्वं निर्विकारं ब्रह्मेति ॥ ७ ॥ ज्ञानादेर्विशेषं जिज्ञासुः पृच्छति । ज्ञानमिति । विशुद्धमेतज्ज्ञानं विपुलं निश्चितं यथा भवति उच्यन्त इत्यर्थः ॥ ६ ॥ येन ज्ञानेन मुनयो ब्रह्म प्राप्तास्तदेवेत्यर्थः । त्रिविधस्त्रिगुणात्मकः संसारो वा । माया असत् इदं माया, आद्यंतयोरविद्यमानत्वे सति मध्ये प्रतीयमानत्वात्, रज्जुसर्पादिवत् । आदिना जलरेखाभूसूक्ष्मविवरग्रहः । यतो नाद्यंतयोरत इत्यर्थः । इत्यर्थ इति—न हि घटोत्पत्त्यादिना मृद उत्पत्त्यादिरस्तीति भावः । तस्यापि विकारस्यापि । “विकारो नामधेयम्” इति श्रुतेः । तस्य विकारस्य । सर्पादेरित्यादिना शुक्तिरजतग्रहः । रज्ज्वादि इत्यत्रादिना शुक्तिग्रहः । तद्वत् रज्जुसर्पादिवत् । अयं देहादिः । इत्यर्थ इति—विकारस्यासत्यत्वावश्यंभावादिति भावः । प्रातीतिककारणरज्ज्वादिदृष्टान्तापेक्षया परमकारणमेव दृष्टांतीकरोतीत्याह—यद्वेति । यद्ब्रह्मास्ति तद्ब्रह्म । तस्य ब्रह्मणः “न जायते म्रियते वा कदाचित्” इत्यादिश्रुतेः । यतो जन्मादयो न सन्त्यतो हेतोः । यद्वा—ननु त्रिविधस्य मायात्वे कथं सत्यत्वप्रत्ययस्तत्राह—असतः स्वप्नस्याद्यंतयोर्यदस्ति साक्षिचैतन्यमधिष्ठानमेव यथा मध्येप्यास्ति नान्यद्दृश्यजातं तथाऽसतः प्रपंचस्याद्यंतयोः सदात्मचैतन्यमेव मध्ये सन्नान्यत् । “एतदात्म्यमिदं सर्वम्” “नारायण एवेदं सर्वम्” “नेह नानास्ति किंचन” इत्यादिश्रुतेः ॥ * ॥ एवमुक्तलक्षणो ज्ञानविज्ञानसंपन्नो मां भजन् ज्ञानी परां काष्ठां प्राप्तो ह्यतिदूरे वर्तताम्, त्वं तु त्वंपदार्थं ज्ञात्वैवाविद्योत्तीर्णो भवेत्युद्धवं लक्ष्यीकृत्य सर्वलोकमाह—त्वयीति । हे उद्धव त्वयि जीवात्मनि यस्त्रिविधस्त्रिगुणमयो विकारो देहाध्यास आश्रयति त्वामाश्रितोयमध्यासो यो वर्तत इत्यर्थः, स मायाऽविद्यैव अविद्याकार्य इत्यर्थः । अन्तरा मध्य एवाऽऽपतति प्राप्तो भवतीति नायं तवौत्पत्तिको धर्म इति भावः । यतो नाद्यपवर्गयोरादावंते च स नास्तीत्यर्थः । तव चिद्रूपत्वात्तस्य जडरूपत्वादिति भावः । यदमी देहस्य जन्मादयस्ते तस्य चिदात्मनस्तव किं स्युर्न स्युरेव कथं त्वं जातोहं मृतोहमहं सुखी दुःखीत्यात्मानं मन्यस इति भावः । ननु यदा देहसंबंधो नासीद्यदा च ज्ञानेनापयास्यति तदैवाहं देहातिरिक्तो भवितुं शक्नुयामधुना तु देह एवाहमित्यत आह—असतो भ्रमप्रतीतत्वादसत्यस्य वस्तुन आद्यंतयोर्यत्सत्यं मध्येपि तदेव, यथा व्याघ्राविष्टस्य पुरुषस्य प्रतीतिकालेऽपि पुरुषत्वमेव सत्यं न तु व्याघ्रत्वम् । अत्र जीवस्याविद्यासंबंधमयाज्ञानादेवानाद्यविद्यासम्बन्ध इति सर्वलोकप्रसिद्धिरन्यथाऽविद्यासम्बन्धस्य सर्वथैवानादित्वे सति स्वरूपत्वप्रसक्तौ ज्ञानेनापि तदपगमो न स्यात् । मुक्तिर्नाम जीवस्य स्वरूपहानिरिति मतं तु सद्भिर्नादृतमिति **विश्वनाथः** ॥ * ॥ **दीपिका**—तदेवानुभवात्मकमेव । आदौ अध्यासात्पूर्वम्, अंते ज्ञानेनाध्यासे नष्टे देहादिविकारो नास्त्येव । अतः अज्ञानेनारोपितत्वात् । अस्यात्मनोत्यंतभिन्नस्य तस्यापि विकारस्यापि पूर्वार्धेनाद्यपवर्गयोरित्यनेनैव कल्पितस्यासत्त्वमुक्तं पुनस्तद्वर्णने पौनरुक्त्यमतो—यद्वेति । यदस्ति यत्प्रतीत्यधिष्ठानं ब्रह्मास्ति तस्याधिष्ठानस्य त्वं निर्विकारं ब्रह्मेति चिदंशेनैव तत्त्वमस्यादिवत् । एवं चाधिष्ठानस्यैव सत्यत्वनिरूपणान्न पौनरुक्त्यम् ॥ ७ ॥ विशेषं विज्ञानादिरूपम् । विश्वेश्वरत्वाद्विश्वमूर्तित्वाच्च तव विश्वांतर्गतस्य ममोद्धारायैतत्कथनमुचितमेवेति द्योतयन्संबोधयत्युद्धवः । यद्यन्ये महान्तो बहवः संति तांस्त्वमेतत्पृच्छेत्थं ब्रूयास्तत्राह—महद्भिरिति । तैरपि विमृग्यमन्वेष्यमेव न तु ज्ञातमतस्त्वमेव कृपया ब्रूहीति भावः ॥ * ॥ त्वयीत्यनेनापातबोधार्थत्वं त्वंपदार्थज्ञानमेवोक्तमित्यपरितुष्य तत्पदार्थज्ञानविज्ञाने सवैराग्ये पृच्छंस्तन्मात्रेणापरितुष्य तत्तत्फलं भक्तियोगमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश ॥ पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ॥ ९ ॥ दष्टं जनं संपतितं बिलेऽस्मिन्कालाहिना क्षुद्रसुखोरुतर्षम् ॥ समुद्धरैनं कृपयाऽऽपवर्ग्यैर्वचोभिरासिंच महानुभाव ॥ १० ॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरम् ॥ अजातशत्रुः पप्रच्छ सर्वेषां नोऽनुशृण्वताम् ॥ ११ ॥ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः ॥ श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥ १२ ॥

तथा कथयेति । महद्भिर्ब्रह्मादिभिर्विमृग्यम् ॥ ८ ॥ महद्विमृग्यत्वमभिनयेनाह । तापत्रयेणेति । तापत्रयेणाभितो हतस्य अतः संतप्यमानस्य । अंघ्रिद्वंद्वमेवातपत्रं तस्मात् । न केवलमातपात्त्रातुः किंत्वमृतमप्यभितो वर्षति यत्तस्मात् ॥ ९ ॥ अतिकृपामुत्पादयन्नाह । दष्टमिति । अस्मिन्बिले संसारकूपे पतितं तत्र च कालाहिना दष्टमेवमपि क्षुद्रसुखेष्वेव उरुस्तर्षस्तृष्णा यस्य तम् । दह्यमानः कथं समुद्धरणीय इति चेत्तत्राह । आपवर्ग्यैरपवर्गबोधकैर्वागमृतैरासिंचेति ॥ १० ॥ तद्विश्वासार्थं विद्वत्सभायां निर्णीतमर्थं

पृच्छति–ज्ञानमिति । ननु भक्तिपूर्वकमपि विशुद्धज्ञानमुक्तं तत्राह–विपुलं तत्पदार्थविषयत्वादतिमहत्तरं यत्तदपीत्यर्थः । तत्कथं विवर्तवादानुरूपं नेत्याह–पुराणम् “ श्रुतेस्तु शब्दमूलत्वात् ” इत्यनुसारेणानादिसिद्धं यत्तदेव तदनुसारेणैवाह–विज्ञानानंतरं त्वद्भक्तियोगं सर्वदुर्लभञ्च । विवर्तवादस्तु भक्तियोगनाशक इति भावः । विज्ञानानंतरभावित्वं प्रमाणयति–महद्भिर्ब्रह्मसनकादिभिरपि विशेषतो मृग्यम् ‘ परमहंसमहामुनीनामन्वेषणीयचरणौ ’ इत्याद्युक्तेः ॥ * ॥ **विश्वनाथस्तु**–पुराणं प्राचीनज्ञानिसंमतम् । तथैव संबोधयति–हे विश्वेश्वर विश्वमूर्ते । इति विश्वस्य मिथ्यात्वे तवैश्वर्यं तन्मूर्तित्वं च वृथैवेति भावः । शुद्धं ज्ञानाद्यमिश्रमित्याह ॥ ८ ॥ अभिनयेन व्यंजकेन । तापत्रयाभिहतत्वादेवं यस्मात्तस्मान्महद्विमृग्यमिति भावः । अमृतमत्रामृतकारणीभूतं ज्ञानं ग्राह्यं, तदभिवर्षतीति तस्मात् । “ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिहता न शर्म । आत्मल्लँभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम ॥ ” इति सृष्ट्युपक्रमदेवस्तुत्युक्तेः ॥ * ॥ ननु ज्ञानेनैव कृतार्थी भव, किं शुद्धभक्तियोगप्रश्नेनेत्यत आह–तापत्रयेणेति । अमृतं ब्रह्मानन्दादप्यधिकं सुखप्रदं माधुर्यमभितो वर्षतीति तस्मात् । तदुक्तम्–“ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् । सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् ” इति । तेन ज्ञानं विनापि संसारक्षयस्य ज्ञानसाध्यब्रह्मानन्दादप्यधिकानंदस्य च लोभाद्भक्तिः पृच्छयत इति भावः ॥ ९ ॥ तत्र च कूरे च । दष्टं देहाध्यासेनैव कालदंशसंभवात्तद्वृत्तम् । एवमपि कालाहिदष्टत्वेपि । स्वयमाक्षिप्य परिहरति–दह्यमान इत्यादिना । अपवर्गबोधकैः ब्रह्मात्मैकत्वबोधकैः । सर्पदष्टस्य मंत्ररूपवागमृतसेकादेव शुभं भवति नान्यथेति भावः । महानुभावेति संबोधयन्सामर्थ्यं द्योतयति ॥ * ॥ ननु तर्हि शुद्धभक्तियोगेनैव कृतार्थी भव किं ज्ञानयोगप्रश्नेन तत्राह–दष्टमिति । अयमर्थः–शुद्धभक्तियोगस्य यादृच्छिकमहत्कृपैकलभ्यत्वान्न पुरुषप्रयत्नमूलकत्वम् । ज्ञानयोगस्तु निष्कामकर्मजन्यज्ञानेन ज्ञातत्वंपदार्थैः स्वत एवं सुलभ इत्ययं पुरुषप्रयत्नसाध्यस्तस्मादप्राप्तशुद्धभक्तियोगा अप्येवं निस्तरेयुरित्यतो ज्ञानं पृच्छयत इति । आपवर्ग्यैरपवर्गार्हैर्वचनामृतैर्वा । सिंञ्चेति–त्वन्मुखचन्द्रोदितं ज्ञानामृतमेव ममापवर्गजनकं भवतीति भावः । यद्वा–आपवर्ग्यैर्भक्तियोगतात्पर्यकैः । ‘ यथावर्णविधानमपवर्गश्च भवति ’ इत्यादिपंचमस्कन्धगद्ये भक्तियोग एवापवर्गशब्दस्य प्रयुक्तत्वात् । हे महानुभाव तवाचिन्त्यैश्वर्यचिंतनमप्यपवर्गं जनयतीति भावः ॥ १० ॥ यथा त्वया पृष्टमित्थमिति ॥ * ॥ ० ॥ ११ ॥ बहून् राज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान् ॥ ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् ॥ १३ ॥ नवैकादश पंच त्रीन्भावान्भूतेषु येन वै ॥ ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम् ॥ १४ ॥ एतदेव हि विज्ञानं न तथैकेन येन यत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनाम् ॥ १५ ॥

महं वक्ष्यामीत्याशयेनाह । इत्थमिति ॥ ११ ॥ १२ ॥ ज्ञानादिभिरुपबृंहितान् । तत्सहितानित्यर्थः ॥ १३ ॥ तत्र ज्ञानं कथयति । नवेति । प्रकृतिपुरुषमहदहंकार पंचतन्मात्राण्येकादशेंद्रियाणि पंच महाभूतानि त्रयो गुणाः एतान्भवानष्टाविंशतितत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येष्वनुगतानि येन ज्ञानेनेक्षेत । अथ एष्वपि भावेष्वेकं परमात्मतत्त्वमनुगतं येनेक्षेत । कार्यकारणात्मकं जगत्पश्यन्परमकारणात्मकमेवैतन्न तु ततः पृथगिति येन पश्येत्तज्ज्ञानमित्यर्थः ॥ १४ ॥ विज्ञानमाह एतदेवेति श्लोकार्धेन । यग्दा येनैकेनानुगतानेकात्मकान् भावान् पूर्वमैक्षत तांस्तथा पूर्ववन्नेक्षेत । किंतु तदेकं परमकारणं ब्रह्मैव । तदा एतदेव विज्ञानमुच्यते । एतदुक्तं भवति । परोक्षज्ञानेनापरो क्षभ्रमस्य दिङ्मोहादिष्विव निवृत्त्यभावात्तदात्मकं जगत्पश्यन्नप्यात्मनः पृथक सदिति मन्यते । अपरोक्षज्ञाने तु बाधितमेव दग्धपटवज्जीवन्मुक्तः संस्कारशेषं पश्यति । ततः परं न पश्यति चातः परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्येते इति । एकेन सर्वकार्याणामनुगतिं कार्याणां कारणात् पृथगसत्त्वं चोपपादयति सार्धेन । तत्र च यदि ' न कदाचिदनीदृशं जगत् ' इत्यादिमतेनैतेषां भावानामुत्पत्त्यादयो न स्युस्ताह कारणस्यैकस्याभावादेकात्मकता मिथ्यात्वं च न स्यादतस्तेषामुत्पत्त्यादीन्साधयति ।

धर्मादीन् । तैः शोकानिवृत्तेः " तरति शोकमात्मवित् " इति श्रुतेः । पश्चाद्राजधर्मादिश्रवणमनु ॥ * ॥ ० ॥ १२ ॥ देवानामिव दृढव्रतं निश्चितं यस्य स देवव्रतो भीष्मः । इत्यर्थ इति—उपबृंहितपदमुपसर्गवशा त्स्वार्थं विहाय साहित्यपरमत्रेति भावः ॥ * ॥ देवव्रतो भीष्मः ॥ १३ ॥ तत्र तेष्वादौ । अथ एष्वप्यष्टाविंशतितत्त्वेषु । अनुगतं सच्चिदात्मना सत्तास्फूर्तिप्रदम् । येन ज्ञानेन । इत्यर्थ इति—सर्वं परमकारणात्मक मेव सकलमिदमहं च वासुदेव इत्येवंरूपो बोधो ज्ञानमिति भावः ॥ * ॥ **दीपिका**—अनुगतानि कारणतया व्याप्तानि । अतः कारणस्य व्यापकत्वज्ञानात् । तेष्वष्टाविंशतितत्त्वेष्वनुगतमनुस्यूतं व्यापकं कार्यं देहादि कारणं महदादि तद्रूपं परमकारणं ब्रह्म तदात्मकमेव । ततः परमकारणात् ॥ १४ ॥ द्वितीयमाह—ब्रह्मैवास्ति न ततोऽन्यत्किंचिदस्तीति " नेह नानास्ति किंचन " इति श्रुतेः । बाधितमेव दग्धपटवत् । ततः परं विदेहमुक्तौ संस्कारशेषमपि न पश्यतीत्यर्थः । यतोऽबाधितबाधितप्रपंचप्रतीतिद्वयमस्ति अतो हेतोस्तद्धेतुनी ज्ञाने अपि द्वे एव । तयोः पर्यायान्तरमाह—परोक्षापरोक्षेत्यादिना । पूर्वोक्तं स्फुटयति—एकेनेति । तत्रेति वाक्या लंकारे । इत्यादिमतेन मीमांसकमतेन । यत इत्थं नास्ति अतो हेतोः । तेषां भावानाम् । इत्यर्थ इति—गुणत्रयावयवत्वेनानित्या इति भावः । अत्र प्रयोगः विमता इत्यादि ॥ * ॥ तदा पूर्वोक्तं यज्ज्ञानं तदेव विज्ञानमुच्यते । कंदत्यपेक्षायामाह—न तथेति । अयं भावः—शब्देन परोक्षज्ञाने हि आधाराधेयत्वेन कार्यकारणत्वेन वा द्वयोरप्यवधानं भवत्येवेति तस्य ज्ञानत्वं निदिध्यासनेन शब्दमात्रेणैव वा । परमात्मनोऽपरोक्षस्फुरणे तु नान्यत्स्फुरेदित्यस्य विज्ञानत्वमिति **संदर्भः** ॥ * ॥ **विश्वनाथोपि**—ज्ञानदशायां परोक्षीभूतेन परमात्मानुगताः सर्वे परोक्षाः परोक्षभूता भावा दृष्टाः, विज्ञानदशायां तु एकः परमात्मैवापरोक्षीभूत ईक्षिता भवति तदनुभवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आदावंते च मध्ये च सृज्यात्सृज्यं यदन्वियात् ॥ पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् ॥ १६ ॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥१७॥ कर्मणां परिणामित्वादाविरिंचादमंगलम् ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १८ ॥

स्थितीति । त्रिगुणात्मनां सावयवानामित्यर्थः । विमता भावा उत्पत्त्यादिमंतः सावयवत्वाद्घटादिवदिति पश्येत् ॥ १५ ॥ तत आदावुत्पत्तौ अंते परिणामांतरापत्तौ च कारणत्वेन मध्ये चाश्रयत्वेन कारणं सृज्यात्सृज्यं कार्यात्कार्यांतरं प्रति यदन्वियादनुगच्छेत्तत्प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव सदिति पश्येदित्यर्थः ॥ १६ ॥ वैराग्यमाह श्रुतिरिति द्वाभ्याम् । श्रुतिः "नेह नानास्ति किंचन" इत्यादिः । प्रत्यक्षं पटादिकार्यं तंत्वादिव्यतिरेकेण न दृश्यते । ऐतिह्यं महाजनप्रसिद्धिः । अनुमानं विमतं मिथ्या दृश्यत्वाच्छुक्तिरजतादिवदित्यादि । एवं प्रमाणचतुष्टयम् । एतेष्वनवस्थानादेतैर्बाधितत्वात् । स एवं सर्वानुगतं सत्यमात्मतत्त्वं पश्यन्विकल्पस्य च मिथ्यात्वात्ततो विरज्यते विरक्तो भवतीत्यर्थः॥ १७॥ ननु वेदोक्तस्वर्गादिसुखाशया न विरज्येतेत्याह।कर्मणामिति।आविरिंचाद्ब्रह्मलोकपर्यंतमदृष्टमपि सुखममंगलं दुःखरूपं नश्वरं च पश्येत्॥ १८॥

नंदादेव तत्कार्याणां भावानामीक्षणेऽवकाशो न भवेदित्यद्वितीयात्मानुभवः ॥ १९ ॥ अनुगच्छेत्सत्तास्फूर्त्यात्मना । इत्यर्थ इति–त्रिकालावस्थायिन एव सत्त्वमिति भावः । कथं सत् स्वप्नबाधे तत्साक्षीवेति ज्ञेयम् ॥ * ॥ सृज्यात्सृज्यमिति–" श्रुतेश्च शब्दमूलत्वात् " इति न्यायेन परिणाम एव स्वीकृतो न विवर्तः कल्प्यात्कल्प्यमित्यनुक्तेः ॥ * ॥ विश्वनाथस्तु–ज्ञानदशायामेकेन परमात्मनैवानुगतानां कार्याणां सर्वेषां परमकारणात्मकत्वात्परमात्मैक्यमेव यदुक्तं तदुपपादयति–स्थितीति सार्द्धेन । त्रिगुणात्मनां भावानां कार्याणाम् ' स्थित्युत्पत्त्यप्ययान्पश्येत् ' इत्युत्पत्तिस्थितिप्रलयवत्त्वात्तेषामनित्यत्वं पश्येदित्यर्थः । अनित्यत्वादेव सार्वकालिकसत्यत्वाभावादसत्यत्वं ज्ञानिनो मन्येरन्निति भावः । सत्यः पुनरेकः परमात्मैवेत्याह–आदावुत्पत्तावंते परिणामांतरापत्तौ च कारणत्वेन मध्ये चाश्रयत्वेनेत्यादि तैः । यथा महदादीनां स्वस्वकार्ये प्रति कारणत्वेपि सर्वकारणत्वाभावान्न कारणत्वम्, किंत्वेकः परमात्मैव कारणम्, तथैव तेषां सत्यत्वेपि सार्वकालिकसत्यत्वाभावान्न सत्यत्वम्, किंतु परमात्मैव सत्य इति ज्ञानदशायामपि तस्याद्वयत्वं पश्येदिति भावः ॥ १६ ॥ महाजना विद्वांसः । एतैः श्रुत्यादिभिः । स द्रष्टा । विकल्पात् द्वैतात् । इत्यर्थ इति–मिथ्यात्वानुसंधानमेव वैराग्यहेतुरिति भावः ॥ * ॥ विकल्पात्संशयात् । संशयमनादृत्येत्यर्थः । यद्वा–तेषु प्रमाणेषु अनवस्थानात्तैः प्रमाणैः संबंधानवगमाद्वेतोर्विकल्पाद्विशेषेणात्मीयत्वेन कल्पत इति । प्रपंचाद्विरज्यते विरक्तो भवति । तत्र श्रुतिः–' असंगो ह्ययं पुरुषः ' इत्यादि । प्रत्यक्षं प्रकाश्यप्रकाशकत्वलक्षणवैलक्षण्येन सर्वानुभवात् । ऐतिह्यं तत्तच्छास्त्रसंप्रदायकप्रवर्तकमहाजनप्रसिद्धिः । अनुमानम् " यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः " इत्यादिलक्षणं तथानुमानं विमतं प्रपंचत्वं, प्रपंचसमवायश्चात्मनि मिथ्या कदाचिदेव दृश्यमानत्वाच्छुक्तौ रजतत्ववत् तत्समवायवदिति च सुषुप्तादौ न दृश्यत इति कदाचिद्ग्रहणम् । तदुक्तमादावंते च मध्ये चेति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**–श्रुतिः–" यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्ति " इति । प्रत्यक्षं घटादीनां मृदुद्भवत्वं मृदवसानत्वं च दृष्टमेव । ऐतिह्यमिति तैः । न कदाचिदनीदृशं जगदिति वदतां तु न महाजनत्वम् । अनुमानं–जगदिदमसार्वकालिकमाद्यन्तवत्त्वादिति । अतश्चतुर्षु प्रमाणेषु सत्सु अनवस्थानात्सार्वकालिकस्थित्यभावाद्धेतोर्विकल्पात्स्वर्गादिभोगमयाद्वैतप्रपंचाद्विरक्तो भवेत् ॥ १७ ॥ अत्राक्षिपति–नन्विति । परिणामत्वात्फलरूपत्वात् । दृष्टवदैहिकगृहादिसुखवत् ॥ * ॥ ननु स्वर्गादीनां सार्वकालिकसुखदत्वाभावेपि कंचित्कालिकसुखदत्वमस्त्येवेत्यत आह–कर्मणां परिणामित्वात् कर्मपरिणामवत्त्वात्कर्मपरिणतत्वादिति यावत् । ब्रह्मलोकपर्यन्तमदृष्टं स्वर्गादि दृष्टवत्, दृष्टं राजादिकमिव स्पर्द्धासूयादिमत्त्वेन सकंटकत्वादमंगलं नश्वरं च ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम् ॥ १९ ॥ श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्तनम् ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ २० ॥ आदरः परिचर्यायां सर्वांगैरभिवंदनम् ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥ २१ ॥ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणम् ॥ मय्यर्पणं च मनसः सर्वकामविवर्जनम् ॥ २२ ॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥ २३ ॥

भक्तियोगं सकारणमाह । भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन्प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि ॥ १९ ॥ श्रद्धा श्रवणादरः । शश्वदिति सर्वत्रानुषज्यते । मदनुकीर्तनं श्रवणानंतरं मत्कथाव्याख्यानमित्यर्थः ॥ २० ॥ २१ ॥ अंगचेष्टा लौकिकी क्रिया । वचसा लौकिकेनापि मद्गुणानामीरणं कथनम् ॥ २२ ॥ मदर्थे मद्भजनार्थम् । तद्विरोधिनोऽर्थस्य परित्यागः । भोगस्य तत्साधनस्य चंदनादेः । सुखस्य पुत्रोपलालनादेः । इष्टादि वैदिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः ॥ २३ ॥

कारणं मत्कथाश्रद्धादि तेन युतं सकारणम् ॥ * ॥ यत्पृष्टम्—'त्वद्भक्तियोगश्च महद्भिमृग्यमाख्याहि' इति तत्राह—भक्तियोग इति । पुरैवोक्तस्तमपि श्रुत्वापि त्वं तत्र तृप्त्यभावादेव पुनः पृच्छसीति भावः । पुनरपि कथयिष्यामि यतः प्रीयमाणाय तस्मिन्नेव प्रीतिं प्राप्नुवते । तत्रापि हेतुः—हे अनघेति । अपराधे सत्येव तत्र प्रीतिर्ह्रसति नान्यथेति भावः । कारणं परं श्रेष्ठमंगम् ॥ १९ ॥ अमृतवज्जरामरणहारिण्यां कथायां श्रद्धा, अत्यापद्यपि तच्छ्रवणापरित्यागः । यद्वा—अमृतकथा श्रीमद्भागवतमेव तस्यैव । काश्मीरमण्डले पार्वतीं प्रति 'अमृतकथां श्रावय प्रभो' इति तस्याः प्रश्ने श्रीभागवतस्यैव श्रावणात् । यच्छ्रवणेन गलितशुकांडमप्यमरतामापेति प्रसिद्धं कौशिकसंहितायाम्, तत्रत्यवाक्यानि तु विस्तरभियेह नो लिखितानीति ज्ञेयम् । इत्यर्थ इति—श्रवणोत्तरं कथानुकीर्तनाभावे तद्विस्मृतिः स्यादतोऽनुकीर्तनस्यावश्यकत्वमिति भावः । परिनिष्ठाश्रद्धापदयोरेक एवार्थ इति । स्तुतिभिः श्रौतैः पौराणिकैर्वा स्तोत्रादिभिरधिकारानुरूपेण ॥ * ॥ श्रद्धेति चतुष्कम् । अभ्यधिका मत्पूजातोऽपि तत्र मम संतोषविशेषात् । सर्वभूतेष्वपि दृश्या ममैव मतिस्तत्रतत्र स्फुरणम् । सर्वकामेत्यादिकं कथानिष्ठासंपादनद्वारा कारणम् । अमृतरूपेति—सत्कथायास्सर्वस्यामृतत्वेप्यतिमाधुर्यवती रासादिसंबन्धिनीत्यर्थः । श्रद्धातिश्रद्धा ॥२०॥ परिचर्यायां पूजासामग्रीसंपादने प्रदक्षिणायां वा "सामग्र्यामर्चने चैव परिचर्या प्रदक्षिणे" इति निरुक्तिः । सर्वांगैर्न्यासध्यानार्चनजपादिरूपैः । परिचर्यायामर्चने । आदरः सर्वप्रकारेण मदर्चने उत्साह इति वार्थः । यद्वा—सर्वांगैः 'दोर्भ्यां पदाभ्यां जानुभ्याम्' इत्याद्युक्तैरभिवंदनं न तु केवलं करसंपुटादिनैवेत्यर्थः । मद्भक्तानामधिकार्चनेऽप्यन्यत्र मन्मतिः कार्येत्याह—सर्वभूतेष्विति ॥ * ॥ अभ्यधिका मत्संतोषविशेषं ज्ञात्वा मत्पूजातोपीत्यर्थः ॥ २१ ॥ लौकिकी क्रिया स्नानाहारविहाररूपा सापि मदर्थेषु मत्पूजनाद्यर्थमेव कार्या न तु मलाद्यपकर्षणाद्यर्थम् । यद्वा—अंगचेष्टा गीतनृत्यादिरूपा मदर्थेषु मन्निमित्तं कार्या । अहमर्थो धनं येषां ते मदर्था अकिंचनभक्तास्तेषु, तत्सेवार्थं वांगचेष्टा—आसनास्तरणजलपाकाद्यानयनरूपा कार्येति लौकिकेन वचसा प्राकृतादिभाषयापि । मयीति सर्वकामविवर्जनमित्यत्राप्यन्वेति । मयि मन्निमित्तं सर्वभोगत्यागः ॥ * ॥ अंगचेष्टा दंतधावनादिदैहिकी क्रियापि मदर्थे मत्सेवार्थम् । वचसा अपभ्रंशवाक्येनापि गीतबंधेन मद्गुणकथनम् ॥ २२ ॥ यद्वा—मदर्थे मत्प्रीत्यर्थमर्थस्य धनस्य त्यागो दानं न तु कामनान्तरार्थम् । इत्यर्थ इति—मदर्पणबुद्ध्या कृतं कर्म मत्प्रीतिजनकं भवतीति भावः ॥ * ॥ मदर्थे मदीययात्रोत्सवाद्यर्थे अर्थपरित्यागः श्रीगुरुविप्रवैष्णवादिसंप्रदानकः । यद्वा—भजनविरोधिनोर्थस्योपेक्षा । भोगस्य स्त्रीसंभोगादेरित्यादि तैः । दत्तं दानम् । हुतं ब्राह्मणवैष्णवमुखे घृतपक्वान्नप्रक्षेपः, विष्णवे स्वाहेति संस्कृतवह्निमुखे तिलाज्यनिःक्षेपो वा । जप्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ॥ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥ २४ ॥ यदात्मन्यर्पितं चित्तं शांतं सत्त्वोपबृंहितम् ॥ धर्मज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ २५ ॥ यदर्पितं तद्विकल्पे इंद्रियैः परिधावति ॥ रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययम् ॥ २६ ॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनम् ॥ गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः ॥ २७ ॥ उद्धव उवाच ॥ यमः कतिविधः प्रोक्तो नियमो वाऽरिकर्शन ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो ॥ २८ ॥

भक्तिः प्रेमलक्षणा संजायते । अस्य भक्तस्यान्यः कोऽर्थः साधनरूपः साध्यरूपो वावशिष्यते । सर्वोऽपि स्वत एव भवतीत्यर्थः ॥ २४ ॥ तत्र किं बहुना चित्तमेवांतर्बहिर्निष्ठमर्थानर्थयोः कारणमित्याह यदात्मनीति द्वाभ्याम् । यदा आत्मनि मयि ईश्वरे चित्तमर्पितं तदा पुमान् धर्मादीन्प्राप्नोत्येव ॥ २५ ॥ एतदेव व्यतिरेकेण द्रढयति । यद्यदा तच्चित्तं विकल्पे देहगृहादावर्पितं सद्विषयेषु परिधावति तदाधिकं रजस्वलमसन्निष्ठं च भवति । ततश्च विपर्ययमधर्मादिकं विद्धि ॥२६॥ स्वाभिप्रेतान्धर्मादीन् व्याचष्टे । धर्मो मद्भक्तिकृत् । यतः स एव प्राक्तः प्रकृष्ट उक्तः शास्त्रेषु ॥ २७ ॥ धर्मादीनां महाजनप्रसिद्धानामन्यथा व्याख्यातत्वाद्यमादिष्वपि संख्यातः स्वरूपतो वा किंचिद्वैलक्षण्यं स्यादि

सहस्रलक्षादिभगवन्नाममंत्रजपः । एतत्त्रितयमेवेष्टं भक्तानां यागः । मदर्थं मत्प्राप्त्यर्थम् । व्रतमेकादश्युपवासादिकं यत्तदेव भक्तानां तपः ॥ २३ ॥ इत्यर्थ इति–मद्भक्तस्य नार्थाय कश्चिद्व्यपाश्रयणीयो भवतीति भावः । आत्मनिवेदिनां देहादौ मदीयत्वात्मीयत्वाध्यासमकुर्वताम्, आत्मनि चेतसि वेदिनां मां जानतां वा, आत्मानं बुद्धिं निवेदितुं मय्यर्पयितुं शीलं येषां तेषां वा । भक्तेरधिको न कोऽप्यर्थोऽस्ति यत्रास्य कामो जायेत निधौ लब्धे काणवराटिकायां न कस्यापि प्रीतिर्भवतीत्याशयः ॥ * ॥ अस्य भक्तस्य कोन्योर्थोऽवशिष्यते परमपुरुषार्थशिरोमणौ तत्र सर्वसुखान्तर्भावादिति संदर्भः ॥ * ॥ विश्वनाथस्तु–अस्य निष्कामभक्तस्य कोन्योर्थोऽतःपरं किं फलमवशिष्टं भवति । किन्तु तदेव पुनःपुनरमुत्र कथाश्रवणादिकमेव फलम् । तेन ज्ञानिनो यथासाध्यप्राप्तौ सत्यां साधनस्य त्याग उक्तस्तथा भक्तस्य साध्यभक्तिप्राप्तौ सत्यां साधनभक्तेः श्रवणकीर्तनादिकाया नैव त्यागः, प्रत्युत प्रेमप्रसररूपायाः साध्यभक्तेरनुभावरूपा श्रवणकीर्तनादिभक्तिः पूर्वतोपि सहस्रगुणिता भवतीति ॥ २४ ॥ चित्तमेव शुभाशुभहेतुरित्याह–किं बहुनेत्यादिना ॥ * ॥ अस्यां तटस्थलक्षणं दर्शयन् धर्मादयश्च तदनुगता भवंतीत्याह–यदेति । 'यस्यास्ति भक्तिर्भगवत्यकिञ्चना' इत्यादेरिति संदर्भः ॥ * ॥ विश्वनाथस्तु–कोन्योर्थोस्यावशिष्यत इत्याक्षेपमय्या भगवदुक्त्यैरियमुक्तलक्षणा केवला निर्गुणा भक्तिर्ज्ञानांगत्वेन न व्याख्येया ज्ञानाद्यंगभूता भक्तिस्त्वतोऽन्या सात्त्विकी वर्तत एव तयैव सकामभक्तः स्वापेक्षितं धर्मज्ञानादिकं प्राप्नोत्येवेत्याह–यदिति । यच्छान्तं चित्तमात्मनि परमात्मनि मय्यर्पितं सात्त्विक्या भक्त्या मद्विषयीकृतं भवति तद्धर्मादियुक्तमित्यर्थः ॥ २५ ॥ एतदेव ईश्वरार्पितचेतसा धर्मादिप्रापणमेव । व्यतिरेकेण तद्भावेन ॥ * ॥ व्यतिरेकमाह–असन्निष्ठं निषिद्धविषयासक्तं च भवति तच्चित्तं विपर्ययं मत्प्रेमरहितं विद्धि । अधर्ममज्ञानमवैराग्यमनैश्वर्यं चाप्नोतीत्यर्थः ॥ २६ ॥ ऐकात्म्यम्–'एको देवः सर्वभूतेषु गूढः' इत्यादिश्रुत्युक्तसर्वत्रेश्वरदर्शनम् । गुणेष्वसंगः गुणतत्कार्यदेहादावनध्यासो न तु कुटुंबादित्यागमात्रम् । योगसाध्यमणिमादिरूपमेवैश्वर्यं न तु युद्धादिसाध्यराज्यादि ॥ * ॥ मद्भक्तिकृदेव धर्मः प्रकर्षेणोक्तो नान्यः । ततः स एव मुख्यवृत्त्या धर्मशब्दवाच्य इत्यर्थः । एवमेव भक्तावपि धर्मशब्दः । एवं धर्मैरितीति भावः । ऐकात्म्यं सर्वेषां परमस्वरूपं मद्रूपेणैकरूपत्वम् । यद्वा–एक एव सर्वेषामात्मा योहं स्वयं भगवान्स एकात्मा, स्वार्थे ष्यञ् । तद्दर्शनमेव ज्ञानं प्रोक्तमिति पूर्ववत् । "मन्निमित्तं कृतं पापमपि धर्माय जायते । मामनादृत्य धर्मोपि पापं स्यान्मत्प्रभावतः ॥" 'यत्करोषि,' 'कुर्वाणा यत्र कर्माणि' इत्यादिवचनजातेभ्यः ॥२७॥ लोकविलक्षणपदार्थश्रवणोत्सुकः पुनरन्यपदार्थान्पृच्छतीत्याह–धर्मादीनामिति । तद्विशेषं यमादिनिष्ठविशेषं ज्ञातुमिच्छुः ॥ * ॥ ० ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा॥२९॥पुंसः किंस्विद्बलं श्रीमन्भगो लाभश्च केशव॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च॥३०॥कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहम् ॥ ३१ ॥ क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥ ३२ ॥ श्रीभगवानुवाच ॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाऽभयम् ॥ ३३ ॥ शौचं जपस्तपो होमः श्रद्धाऽऽतिथ्यं मदर्चनम् ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनम् ॥ ३४ ॥ एते यमाः सनियमा उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ॥ ३५ ॥ शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः ॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥ ३६ ॥

त्येवं संभावनया तद्विशेषं जिज्ञासुः पृच्छति यम इति पंचभिः ॥ २८ ॥ इष्टमभ्यर्हितं धनं च किम् ॥ २९ ॥ परेति विद्यादीनां विशेषणम् । श्रीर्मंडनम् ॥ ३० ॥ ३१ ॥ प्रश्नान्पृष्टानर्थान् । विपरीतानशमादीन् ॥ ३२ ॥ यमनियमानाह अहिंसेति त्रिभिः । अस्तेयं मनसाऽपि परस्वाग्रहणम् । असंचयो विषयासंकल्पः । आस्तिक्यं धर्मे विश्वासः ॥ ३३ ॥ शौचं बाह्यमाभ्यंतरं चेति द्वयम् । अतो द्वादश नियमाः । श्रद्धा धर्मादरः ॥ ३४ ॥ उभयोः श्लोकयोर्ये स्मृतास्ते यमा नियमाश्च । यद्वा उभयोः प्रवृत्तनिवृत्तयोः । मुमुक्षोर्यमा मुख्याः सकामस्य नियमा मुख्याः स्मृता इत्यर्थः । अत्र हेतुमाह । हि यस्मादुपासिताः सेविताः संतः पुंसां प्रवृत्तानां निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहंतीति॥ ३५॥ मुमुक्षोरुपादेयान् शमादीन्हेयांश्च दुःखादीन्महाजनप्रसिद्धेभ्यो विलक्षणानाह शम इत्यादिना यावत्समाप्ति । एतेनैव तद्विपरीता अशमादयोऽप्युन्नेयाः । शमो मन्निष्ठता बुद्धेर्न तु शांतिमात्रम् । दम इंद्रियसंयमो न चौरादिदमनम्।तितिक्षा विहितदुःखस्य संमर्षः सहनं न भारादेः। जिह्वोपस्थयोर्जयो वेगधारणं

अभ्यर्हितं पूजितम् ॥*॥०॥२९॥परा उत्कृष्टा । विद्यादीनां विद्याह्रीश्रीणाम् । मंडनं भूषणम् ॥*॥०॥३०॥ पंथाः सरलः । उत्पथो वक्रः ॥*॥०॥३१॥०॥*॥ प्रश्नोत्तरैरेवैतद्विपरीतास्स्वत एवोक्ता मया ज्ञाताश्च भविष्यंतीति भावः । प्रश्नानित्यस्य कर्मसाधनत्वात् पृष्टार्थानिति व्याख्यातम्, प्रष्टव्यानिति क्वचित् ॥ ३२ ॥ ० ॥*॥ अहिंसेति त्रिकम् । "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" इति पतंजलिसूत्रे पंचैवोक्ता अत्र संख्यातो वैलक्षण्यं द्वादशेति ॥ ३३ ॥ आतिथ्यमातिथिसेवा । परार्थेहा परोपकारार्थं देहव्यापारः ॥ * ॥ एवम् " शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः " इत्यत्रापि संख्यावैलक्षण्यम् ॥ ३४ ॥ श्लोकस्य प्राकृतत्वादुभयोरित्यनेन तदर्थतेति चेदाह—यद्वेति । मुमुक्षोरिति—" यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् " इत्युक्तेः स्मृता विहिताः । इत्यर्थ इति व्याख्येयम् । अत्र विहितत्वे । अभ्युदयं धर्मं ज्ञानं भक्तिं चेत्यर्थः ॥ * ॥ ० ॥ ॥ ३५ ॥ एतेनैव शमादिव्याख्यानेनैव । तद्विपरीताः शमादिविपरीताः । आदिना जारादिग्रहः । विदितदुःखस्य कर्मोपस्थापितक्लेशस्य । आदिना श्यालिकादिगालिग्रहः । अनुद्वेगो भयाभावः ॥ * ॥ अन्तःकरणस्य स्वनिष्ठत्वमेव शममुक्त्वा अन्तःकरणाधीनानामिंद्रियादीनां च स्वस्वसंबंधेनैव यमादिकं मेने मन्निष्ठबुद्धिं विना केवला शांतिर्विगीतैव । इन्द्रियसंयम इति । स्वेन्द्रियदमनं विना स्वशिष्यादिदमनं हासास्पदमेव । दुःखसंमर्षः परावमानोत्थदुःखस्य शास्त्रविहितस्य ब्रह्मचर्यादिधर्मसेवनादेस्तस्यापि क्लेशदत्वेन दुःखत्वमेव, स्वेच्छयैव दुःखसहनं त्वार्हतानामिव मौढ्यमेव तत्प्रणीतशास्त्राणां वेदविरुद्धत्वादशास्त्रत्वमेवेति । जिह्वोपस्थजयं विना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंडन्यासः परं दानं कामत्यागस्तपः स्मृतम् ॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनम् ॥ ३७ ॥ ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ॥
कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ॥ ३८ ॥ धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः ॥ दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलम् ॥ ३९ ॥
भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः ॥ विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ॥ ४० ॥

धृतिर्न त्वनुद्वेगमात्रम् ॥ ३६ ॥ दंडो भूतद्रोहस्तस्य त्यागो दानं न धनार्पणम् । कामत्यागो भोगोपेक्षा तपो न कृच्छ्रादिः । स्वभावो वासना तस्य विजयः प्रतिबंधः शौर्यं न विक्रांतिः । समं ब्रह्म तस्य दर्शनमालोचनं सत्यविषयत्वात्सत्यं न यथार्थभाषणमात्रम् ॥ ३७ ॥ अन्यच्च । ऋतं सूनृता सत्या प्रिया च वाक् । एवं च ऋत सत्ययोः स्फुट एव विवेकः । क्रमप्राप्तं त्यागं व्याख्यातुमादौ ततोऽर्थभेदेन शौचं व्याचष्टे । तस्यापि मलत्यागरूपत्वे त्यागाभेदप्रतीतेः । कर्मस्वसंगमोऽनासक्तिः शौचं त्यागस्तु संन्यास इति तयोर्भेद इत्यर्थः ॥ ३८ ॥ नृणामिष्टं धनं धर्मो न पश्वादिसाधारणम् । भगवत्तमः परमेश्वरोऽहमेव यज्ञः मद्बुद्ध्या यज्ञोनुष्ठेयो न क्रियाबुद्ध्येत्यर्थः । यज्ञार्थं दानं दक्षिणा सा च ज्ञानोपदेशो न हिरण्यादिदानम् । तेन हि यज्ञरूपो विष्णुः प्राप्यते । दुर्दमनं बलं तच्च मनोदमनहेतुत्वात्प्राणायाम इति ॥ ३९ ॥ लाभं व्याचिख्यासुः प्रथमं भगं ततो भेदेन व्याचष्टे । लोके तयोरभेदप्रसिद्धेः । भगो भाग्यं तच्च मे ऐश्वरो भावो मदीयमैश्वर्यादिषाड्गुण्यमित्यर्थः । उत्तमो लाभस्तु मद्भक्तिर्न

न्यत्र धीरता व्यर्थैव ॥ ३६ ॥ द्रोहो जिघांसा । आदिना चान्द्रायणपराकादिग्रहः । यद्वा—अशास्त्रीयप्रवृत्तिनिरोधेन शास्त्रीये प्रवृत्तिः स्वभावविजयः ॥ * ॥ समदर्शनम् 'नारायणपराः सर्वे' इत्याद्युक्तरीत्या भोगानपेक्षा । एकादशी कार्तिकव्रतादौ या विहिता सैव तपः । स्वभावः स्वीयपाण्डित्यादिप्रकाशनं तस्य स्वाभाविकयोः कामक्रोधाद्यो राजसतामसयोर्भावयोश्च विजयः । प्रतिबन्धे शौर्यम् । समदर्शनम् ईर्ष्यासूयादिवैषम्यपरित्यागेन सर्वत्र स्वसुखदुःखालोचनम् । "आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखम्" इति श्रीगीतोक्तेः ॥ ३७ ॥ वाग्विषयमन्यदप्याह—अन्यच्चेति । "सूनृतं मंगलेपि स्यात्प्रियसत्ये वचस्यपि" इति मेदिनी । तयोः शौचत्यागयोः । इत्यर्थ इति—न तु त्यागरूपत्वेनोभयोरैक्यमिति भावः ॥ * ॥ केवलसत्यभाषणे तु दोषवतां दोषकीर्तनमपि प्रसज्येत तस्मिंश्च सति निन्दा स्यात् सा च श्रोतॄणां सतामप्रियेति तस्याः सूनृतवाणीत्वाभावः स्यात् । पूर्वाचार्यास्तु सत्यं यथार्थाचरणम् 'ऋतं यथार्थभाषणम्' इत्यनयोर्लक्षणं चक्रुः । पूर्वमपृष्टस्य त्रेतायुगधर्मस्य शौचस्य कर्मस्वनासक्तिः शौचमिदं लक्षणम् "अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः" इति न्यायात् । एवं भगो ममैश्वरो भाव इत्यत्रापि ज्ञेयम् । त्यागः पुत्रकलत्रादिषु ममतात्यागः, न तु भोगमात्रत्यागः ॥ ३८ ॥ इष्टं इष्टसाधनम् । आदिना स्वर्णादिग्रहः । इत्यर्थ इति—"यज्ञो वै विष्णुः" इति श्रुतेर्विष्ण्वाराधनमेव यज्ञ इति भावः । आदिना गवादिग्रहः । "प्राणस्पंदनिरोधश्चेत्युपाया मनसो जये"; इत्युक्तेः ॥ * ॥ टीकायां सा च ज्ञानोपदेश इति—ज्ञानोपदेशो यस्मात्सः । ज्ञानोपदेशप्राप्तिहेतुराचार्ये भक्तिविशेष इत्येवार्थः । न हि यजमानो ज्ञानोपदेशं करोति यथा हिरण्यादिदक्षिणामिति । यद्वा भगवत्तमः स्वयं भगवद्रूपः श्रीकृष्णोऽहमेव यज्ञः यज्ञज्ञानेनैव सर्वयज्ञफलप्राप्तेः । "सर्वे वेदाः सर्वविद्याः सशास्त्राः सर्वे यज्ञाः सर्व इज्यश्च कृष्णः । विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन्सर्वयज्ञाः समाप्ताः ॥" इति महाभारतोक्तेः । तस्मिंश्च ज्ञाने यः सन्देशः संवादः आचार्यानुकूलं वचः तदाज्ञानुष्ठानं वा स एव दक्षिणा तत्संतोषकरत्वाज्ज्ञानपर्यायकत्वाच्चेति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—अहं भगवत्तमो वसुदेवनंदन एव यज्ञः मज्जन्मयात्राद्युत्सव एव यज्ञबुद्ध्यानुष्ठेय इत्यर्थः, न तु नश्वरफलोऽश्वमेधादिः । ज्ञानस्योत्सवान्ते मत्कीर्तनादिस्सानुभवस्य सन्देशः स्वेष्टमित्रेषु ज्ञापनैव दक्षिणा न तु धनवस्त्राद्यर्पणम् । निर्हेतुकपरदुःखप्रहाणेच्छा दयेति लोकप्रसिद्धलक्षणत्वान्न विलक्षणलक्षणं कृतम् ॥ ३९ ॥ ततो लाभात् । तयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीर्गुणा नैरपेक्ष्याद्या सुखं दुःखसुखात्ययः ॥ दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ॥ ४१ ॥ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः ॥ उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणोदयः ॥ ४२ ॥ नरकस्तमउन्नाहो बंधुर्गुरुरहं सखे ॥ गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ॥ ४३ ॥ दरिद्रो यस्त्वसंतुष्टः कृपणो योऽजितेंद्रियः ॥ गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः ॥ ४४ ॥

पुत्रादिः । विद्या चात्मनि प्रतीतस्य भेदस्य बाधो न ज्ञानमात्रम् । अकर्मसु जुगुप्सा हेयत्वदर्शनं ह्रीर्न लज्जामात्रम्॥ ४० ॥ गुणा एव श्रीर्मंडनं न किरीटादि । दुःखसुखयोरत्ययोऽतिक्रमोऽननुसंधानं सुखं न भोगः । विषयभोगापेक्षैव दुःखं नाग्निदाहादि । बंधान्मोक्षं द्वयं वा यो वेत्ति स पंडितो न विद्वन्मात्रम् ॥ ४१ ॥ अहंबुद्धिरित्युपलक्षणम् । देहगेहादिष्वहं ममेत्यभिमानवान्मूर्ख इत्यर्थः । मन्निगमो मां नितरां गमयति प्रापयति यो निवृत्तिमार्गः स तु पंथाः सन्मार्गो न कंटकादिशून्यः । चित्तविक्षेपः प्रवृत्तिमार्गः । स उत्पथः कुमार्गो न तु चौराद्याकुलः । सत्त्वगुणस्योदय उद्रेकः स्वर्गो नेंद्रादिलोकः ॥ ४२ ॥ तमस उन्नाह उद्रेकः स नरको न तामिस्रादिः । गुरुरेव बंधुर्न भ्रात्रादिः । स चाहमेव यथाहं जगद्गुरुः । "एक एव परो बंधुर्विषमे समुपस्थिते ॥ गुरुः सकलधर्मात्मा यत्राकिंचनगो हरिः ॥" इति । ससाधनं भोगायतनं गृहं तच्च मानुष्यं मानुषरूपं शरीरमेव न हर्म्यादि । गुणैः संपन्न आढ्य उच्यते न धनी ॥ ४३ ॥ असंतुष्टो यः स दरिद्रो न निःस्वः । योऽजितेंद्रियः स कृपणः शोच्यो न दीनः । विषयेष्वनासक्तधीर्यः सः ईशः स्वतंत्रो न राजादिः । गुणसंगो गुणेषु संगो यस्य स विपर्ययोऽनीशः । एतच्च शमादिविपर्ययोपलक्षणार्थम् ॥ ४४ ॥

र्भगलाभयोः । इत्यर्थ इति—विषयाद्यर्थाधीनतेति भावः । आदिना स्त्रीस्वर्णादिग्रहः ॥*॥ मम ऐश्वरो भावो ममैवेश्वरत्वं भगः न तु जीवानां ब्रह्मेन्द्रादीनामीश्वरत्वमित्यर्थः । अपृष्टस्य भगस्य व्याख्याने हेतुमाह—लोके तयोर्लाभभगयोः । भावोत्र प्रकृतिजन्यबोधे प्रकारीभूतो धर्मविशेषः, स चैश्वर्यादिषाड्गुण्यमेवेति तथा व्याख्यातम् भेदो मर्त्योहं देवोहं बालोहं युवाहमित्यादिभेदस्तस्य बाधः । 'त्रिगुणमयः पुमानिति भिदा यदबोधकृता' इति न त्वधीता व्याकरणाद्या । अकर्मसु पापेषु जुगुप्सा लोकनिन्दोत्थैव । तत्राप्रवृत्तिहेतुर्ह्रीः ॥ ४० ॥ आद्यपदेनादैन्यादिग्रहः । आदिना कटककुंडलादिग्रहः । आदिना शस्त्रपातादिग्रहः । बंधस्वरूपज्ञानं विना ततो मोक्षानुपपत्तेराह—द्वयं वेति, बंधं मोक्षं च ॥ * ॥ ० ॥ ४१ ॥ आदिना स्त्रीपुत्रादिग्रहः । इत्यर्थ इति—न तु शास्त्रानभिज्ञ एव मूर्ख इति भावः । सन्मार्गः वेदोक्ताचार इत्यर्थः । आदिना शर्करादिग्रहः । आदिना व्याघ्रादिग्रहः । उद्रेकोऽभिवृद्धिः । आदिना ब्रह्मादिग्रहः ॥ * ॥ ० ॥ ४२ ॥ आदिना कुंभीपाकादिग्रहः । आदिना तत्पुत्रादिग्रहः । विषमे संकटे । सकलधर्मात्मा सर्वधर्मज्ञः । अनेन संकटानुरूपधर्मोपदेशेन तत्तारकः । यत्र यस्मिन्गुरौ सति हरिरप्याप्यते किमन्यदित्यर्थः । सर्वार्थसाधकत्वान्मानुषं गृहम् । आदिनोपकार्यादिग्रहः । गुणैः सत्यशौचादिभिः ॥ * ॥ **दीपिका**—विषमे संसारलक्षणे कष्टे समुपस्थिते प्राप्ते सति । सकलधर्मात्मा सर्वधर्मोपदेष्टा । यत्र यस्मिन् गुरौ तुष्टेऽकिंचनलभ्यो हरिर्लभ्यत इति । तुष्ट इति च शेषः ॥ ४३ ॥ निःस्वो निर्धनः । "दरिद्रस्य परा मूर्तिर्याच्ञा न द्रविणाल्पता । अकौपीनधरश्शंभुस्तथापि परमेश्वरः ॥" इत्युक्तेः । दीनो रंकः । आदिना धनिकादिग्रहः । गुणेषु विषयेषु संग आसक्तिः । एतच्चानीशलक्षणकथनं च ॥ * ॥ एतच्चेशविपर्ययकथनम् ॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एत उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥ ४९ ॥ इति श्रीमद्भा० म० एकादशस्कंधे भगवदुद्धवसंवादे यमादिनिरूपणं नामैकोनविंशोऽध्यायः ॥ १९ ॥ उद्धव उवाच ॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेऽरविंदाक्ष गुणं दोषं च कर्मणाम् ॥ १ ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजम् ॥ द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च ॥ २ ॥

उपसंहरति । एत इति । साधु मोक्षोपयोगितया । एतच्च सर्वं गुणदोषयोर्विवेकायोद्धवेन पृष्टमिति तयोः संक्षेपतो लक्षणमाह । किं बहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेव तदाह । गुणदोषयोर्दृशिर्दर्शनं दोषः । गुणस्तु तदुभयदर्शनविवर्जितः स्वभाव इति ॥ ४५ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायामेकोनविंशोऽध्यायः ॥ १९ ॥ विंशे योगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकम् ॥ गुणदोषव्यवस्थार्थमधिकारिविभागतः ॥ १ ॥ "गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः" इत्युक्तं तदाक्षिपति विधिश्चेति पंचभिः । विधिश्च प्रतिषेधश्चेश्वरस्य तव निगम आज्ञारूपो वेदः । स च विधेयानां प्रतिषेध्यानां च कर्मणां गुणं दोषं च पुण्यपापफलरूपमवेक्षते ॥ १ ॥ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां च विकल्पं भेदं च गुणदोषरूपमवेक्षते । प्रतिलोमानुलोमजं च गुणं दोषं च तथैवावेक्षते प्रतिलोमजा उत्तमवर्णासु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः । अनुलोमजास्तूत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णासु स्त्रीषु जाता मूर्धावसिक्तांबष्ठादयस्तेषां च । "असत्संतस्तु विज्ञेयाः प्रतिलोमानुलो

एतत्पूर्वोक्तम् । दोषो भेदभानापादकत्वात् । उभयोर्मिथ्यात्वानुसन्धानेन वर्जनं गुणः । उभयदर्शनं गुणदोषदर्शनम् ॥ * ॥ मोक्षोपयोगितया मोक्षसाधनत्वेन एवं तत्प्रश्नमनुसृत्यैव प्रपञ्चितम् । एतच्च प्रायो मम नातिसुहृद्यमिति व्यंजयन्परमस्वहृद्यं पूर्वोक्तयमादिफलभूतं गुणं लक्षयन्व्यतिरेकज्ञाय दोषमपि लक्षयति—किमिति । बहुना व्यवहारमयत्वादसारप्रचुरेण परमार्थप्रचुरमयत्वान्मुख्यमेव गुणदोषयोर्लक्षणमित्याह—गुणेति । गुणो विहितत्वं दोषो निषिद्धत्वं तत्तयोर्दशिर्विवेको दोषः । किंतूभयवर्जितो यः स्वभावविशेषः स गुणः तत्तद्दृष्टिमतिक्रम्य स्वभावत एव परमश्रेयसी प्रवृत्तिर्गुण इत्यर्थः । एतदपेक्षयोभयोरप्यपकृष्टत्वात् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्ध एकोनविंशोऽध्यायः ॥ १९ ॥ अधिकारिणां विभागतः पार्थक्येन (१) । स च वेदः । विधेयानां अग्निहोत्रादीनां प्रतिषेध्यानां कलंजभक्षणादीनां च अवेक्षते । विहितस्य पुण्यजनकत्वेन तत्करणे गुणं निषिद्धस्य पापजनकत्वेन तत्करणे दोषं च वक्तीत्यर्थः ॥ * ॥ 'गुणदोषदृशिः' इत्यादि यदुक्तं तस्य भगवदभिप्रेतमर्थं जानन्नपि तन्मुखेनैव तस्य विवरणं नानार्थविशेषसहितं श्रोतुकामस्तत्र विप्रतिपद्यमान इवाह—विधिश्चेति पंचभिः । विधिर्निषेधश्चेश्वरस्य तवाज्ञारूपो वेद एव । विधिर्विधेयानामग्निहोत्रादीनां कर्मणां गुणमवेक्षते प्रतिपादयति । प्रतिषेधश्च निषेध्यानां कलंजभक्षणादीनां दोषं प्रतिपादयति । गुणदोषमिति समस्तपाठे चोऽनर्थकः । हे अरविंदाक्ष त्वमेव मे बुद्धिदोषं वारय शीतलदृष्टित्वादिति भावः ॥ १ ॥ तदधिकारिणां कर्माधिकारिणाम् । गुणदोषरूपं श्रेष्ठाश्रेष्ठत्वरूपम् । आदिना चण्डालक्षत्रादयो ग्राह्याः । आदिनोग्रादिग्रहः । पूर्वमुक्ता अप्यत्र सौगम्यार्थमाह पुनः—" शूद्राविशोस्तु करणोंबष्ठो वैश्याद्विजन्मनोः । शूद्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः ॥ माहिष्योर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः । ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः ॥ स्याच्चांडालस्तु जनितो ब्राह्मण्यां वृषलेन यः । क्षत्रायां ब्राह्मणाज्जातो नाम्ना मूर्द्धावसिक्तकः ॥ " इत्यमरादेः । तेषां प्रतिलोमानुलोमजानां मध्ये प्रतिलोमजा असंतः श्रौतकर्मानधिकारित्वात् । अनुलोमजाः सन्तः श्रेष्ठास्तेषां किञ्चित्कर्माधिकारित्वात् । यथा—" निषादस्थपतिं याजयेत् " इत्यादिश्रुतेः । निषादस्तु—" ब्राह्मणाच्छूद्रकन्यायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणदोषभिदादृष्टिमंतरेण वचस्तव ॥ निःश्रेयसं कथं नृणां निषेधविधिलक्षणम् ॥ ३ ॥
पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥ ४ ॥

मजाः " इति गुणदोषौ । द्रव्यादीन्कर्मार्हतानर्हताभ्याम् । स्वर्गं नरकं च तत्फलतया गुणदोषरूपमेवावेक्षते । एतच्चोत्तराध्याये प्रपंचयिष्यते ॥ २ ॥ तथापि प्रस्तुते किमायातमत आह । गुणदोषेति 'गुणदोषदृशिर्दोषः' इति निराकृतत्वाद्गुणदोषभिदादृष्टिमंतरेण तां विना निषेधविधिलक्षणं कर्मकांडगतं तव वचः कथम् । तच्च वचोंतरेण नृणां निःश्रेयसं कथं स्यात्तत्रापि "श्रोतव्यो मंतव्यः" इति साधनविधेः "नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्" इत्यादिनिषेधस्य चावश्यकत्वादिति भावः । यद्वा गुणदोषभिदादृष्टिरूपं निषेधविधिलक्षणं तव वचो विनेति सामानाधिकरण्यमेवास्तु । यद्वा । गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणमपि वचः कथं नु तत्त्वमस्यादिवाक्यवन्निःश्रेयसपरं स्यात् । सर्वस्य वेदस्य तत्परत्वांगीकारादित्यर्थः ॥ ३ ॥ ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो दृष्ट्वा मनुष्येभ्यः कथयिष्यंति नेत्याह ।

निषादो नाम जायते" इत्युक्तेः । द्रव्यं धर्मार्जितं गुणरूपम्, तद्विपरीतं दोषरूपं देशः कुरुक्षेत्रादिरपरः कीकटादिः, वयो यथा "जातपुत्रः कृष्णकेशः" इत्यादि श्रुत्युक्तमपरं च बाल्यादि, कालो वसंतादिरपरो निशीथादिः, गुणदोषावत्र क्रमतो ज्ञेयौ । एतत् गुणरूपनिरूपणम् । उत्तराध्याये वक्ष्यमाणाध्याये ॥ * ॥ तदधिकारिणां कर्माधिकारिणां वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां भेदमपि वेद । उत्तमाधमरूपतया गुणदोषरूपत्वेन अयमुत्तमोऽयमधम इति प्रतिपादयन्ति ॥ २ ॥ यद्यपि गुणदोषं विध्यादिरपेक्षते तथापीति निराकृतत्वादपास्तत्वात् । तां विना गुणदोषदृष्टिं विना । काण्डं वेदभागः । कथम्, गुणदोषदृष्टिं विना विधिनिषेधकथनस्यैवानुपपत्तेः । तच्च विधिनिषेधलक्षणमपि । वचोंतरेण कथनं विना निश्श्रेयसं कल्याणापादकं कथं भवेन्न कथमपीत्यर्थः । तत्रापि वचस्यपि । इति भाव इति—वाक्यस्य श्रवणादिविधिनिषेधाभ्यां गुणदोषयोर्निश्चितत्वादित्याशयः । एतेन विचारोपयोगिवाक्यश्रवणादिर्गुणस्तदनुपयोगितच्छ्रवणादिर्दोष इत्यायातम् । क्लिष्टान्वयापेक्षया सरलान्वयस्य न्याय्यत्वादाह—यद्वेति । इहापि विना शब्दावृत्तिदर्शनादस्वारस्यं मत्वाह—यद्वेति । गुणदोषदृष्टिमादायैव वचसा श्रेयस्त्वमन्यथा विधिनिषेधयोर्निर्विषयत्वं स्यादिति भावः । यथा तत्त्वमस्यादीनां साक्षान्निःश्रेयसपरत्वं तथा विधिनिषेधादिवाक्यानामपि विहितकारणनिषिद्धत्यागद्वारांतःकरणशोधकत्वेन निःश्रेयसपरत्वमेवेति । इत्यर्थ इति—" वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया इमे " इत्युक्तेरिति भावः ॥ * ॥ तथापि गुणदोषावेक्षणेपि । प्रस्तुते गुणदोषदृशिर्दोष इति सिद्धान्ते । निराकृतत्वाद्गुणदोषदर्शनस्य निषिद्धत्वात् । गुणदोषदर्शनं विना विधिनिषेधरूपं तव वचः कथमिति गुणदर्शनं विना विधौ प्रवृत्त्यसंभवात्, निषेधदर्शनं विना निषिद्धनिवृत्त्यसंभवाच्चेत्यर्थः । ननु ज्ञानकाण्डे मया गुणदोषदर्शनं निषिद्धं न तु कर्मकाण्डे इत्याशंक्याह—तत्रापि ज्ञानकाण्डेपि । साधनविधेः श्रवणादिसाधनस्य । हि यतः । तत् बहुशब्दध्यानं वाचो विग्लानिकरं नानामतोपपादनेन समाधिच्यावकमित्यर्थः । पूर्वार्धे वाक्यभेदमाशंक्याह—यद्वेति । अंतरेणैवेत्यस्य योजनां विनेति व्याख्यातं तां तच्च विना निःश्रेयसं कथं स्यादित्यर्थः । अत एकप्रतिपादकत्वात् । वाक्यभेदाभावेन सामानाधिकरण्येन न तु वैयधिकरण्येन । तच्च वच इत्यादिकं पुनरावर्तत इत्येवकारार्थः । उद्धवस्य शिष्यस्य जिज्ञासैव युक्ता न तु प्रतिवादित्वं निरुक्तार्थे च प्रतिवादित्वप्रतीतिरतः पुनः—यद्वेति । तत्परत्वान्मोक्षपरत्वात् । अन्तःकरणशुद्ध्या विधिनिषेधलक्षणस्यापि ज्ञानद्वारत्वादिति भाव इति **दीपिका** ॥ ३ ॥ पितृदेवानां त्रिकालत्वात्त एव निःश्रेयसमुपदेक्ष्यंति किं मद्वचोरूपवेदेनेत्याक्षिपति—नन्विति । प्रमापकं बोधकम् । तेषामपि वेदत एव ज्ञानं न त्वन्यथा क्व कस्मिन्विषये पित्रादीनां वेदाधीनं ज्ञानमिति चेदाह—अनुप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणदोषभिदादृष्टिर्निगमात्ते न हि स्वतः ॥ निगमे नापवादश्च भिदाया इति ह भ्रमः ॥ ५ ॥
श्रीभगवानुवाच ॥ योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ॥ ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ॥ ६ ॥

पित्रादीनां सर्वेषां तव त्वद्वाक्यरूपो वेद एव तु श्रेयः श्रेष्ठं चक्षुः प्रमापकम् । क । अनुपलब्धेर्थे मोक्षे स्वर्गादौ च । तथा साध्यसाधनयोरिदमस्य साध्यमिदमस्य साधनमित्यत्रापि । तदेवं गुणदोषदृष्ट्यभावे निःश्रेयसं न घटेत ॥ ४ ॥ किंच शास्त्रेणैव विहितां भेददृष्टिं तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्याह । ते निगमात्त्वदाज्ञारूपाद्वेदादेव नहि स्वतः । यस्मादर्थप्राप्तत्वेन निवर्तेत । ह स्फुटम् । भ्रमो भवति तं निवर्तयेति शेषः ॥ ५ ॥ विषयाभेदेऽप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह । योगा इति । योगा उपाया ब्रह्मकर्मदेवताकांडैः प्रोक्ताः । कर्म च निष्कामम् । श्रेयोविधित्सया मोक्षसाधनेच्छया । अन्य उपायो नास्तीति काम्यकर्मादिकं व्यावर्तयति

लब्धे प्रत्यक्षाविषये । तथैव अस्य यागादेः श्रवणादेर्वा । इदं स्वर्लोकावाप्तिरूपं मोक्षावाप्तिरूपं वा साध्यं फलम् । अस्य स्वर्गस्य मोक्षस्य वा इदं यागादि श्रवणादि वा साधनमित्यत्रापि वेद एव बोधक इति । फलितमाह—तदेवमिति । गुणबुद्ध्या विहितकरणेन दोषबुद्ध्या निषिद्धत्यागेन च निःश्रेयसो भवतीति सिद्धम् ॥ * ॥ अनुपलब्धेर्थे भगवत्स्वरूपविग्रहवैभवादाविति **संदर्भः** ॥ * ॥ न केवलं मनुष्याणामेव वेदो निःश्रेयसकरोपि तु देवपित्रादीनामपीत्याह—पित्रिति । तव वेद एव श्रेयः श्रेष्ठं चक्षुर्ज्ञानहेतुः । अन्यत्तैः । हे ईश्वर सर्वाऽज्ञाननाशे समर्थ ममापि तन्नाशयेति भावः ॥ ४ ॥ शंकांतरमाह—किञ्चेति । भेददृष्टिं गुणदोषरूपाम् । तस्मिन्नेव विषये विहित एव । गुणदोषलक्षणे विषये यस्मादर्थात्प्राप्तत्वेन प्राप्ततया निवर्तेत निषिध्येत ततो भ्रमो भवति । अत्रायमाशयः—अर्थप्राप्तस्य निषेधो नोचितः, यथा “ कर्मणा पितृलोकः ” इति श्रुतेः पितृलोकप्राप्तिरूपार्थात्प्राप्तः कर्मयोगस्तं यदि कर्म न कुर्यादिति निषिध्येत तदा “ यावज्जीवमग्निहोत्रं जुहुयात् ” इत्यादिश्रुतिभिस्तद्विधानं व्यर्थं स्यादतोर्थप्राप्तस्य करणौचित्ये यन्निषेधः स भ्रमावहो भवतीति । तथा च—“ श्रोतव्यो मन्तव्यः ” इत्यादिना विधाय पुनः “ नानुध्यायेत् ” इत्यादिना निषेधोनुपपन्न इव प्रतीयत इति प्रश्नाशयः ॥ * ॥ परं त्विदानीमुभयविधसंकटमुपस्थितमित्याह—गुणेति । निगमाद्विधिनिषेधात्मकात् विहिताभूत्, न हि स्वतो रागतस्तथात्वे ‘ तर्केणापि निवर्तेत ’ यतः रागप्राप्त्यभावात् । किंतु वेदेनैव प्राप्तत्वाद्वेदार्थप्राप्तत्वेनैव निवर्तते तस्माद्वेदवाचा त्वमेव तं भ्रमं निवर्तयेत्यर्थः ॥ ५ ॥ कुत्रचिच्छ्रुतिस्मृत्यादौ । यथान्य उपायो नास्ति तथा च तथैव ॥ * ॥ विषयाभेदेपि पूर्वोक्तपुण्यपापादिरूपाणां विषयाणामभेदेपि अधिकारिभेदेनेति कर्मादिसाधकान्प्रति बहवो गुणदोषा वर्णिताः । परमसिद्धान्प्रति ‘ गुणदोषदृशिर्दोषः ’ इत्यनेनैक एवेति भावः । यद्वा—अकिंचनाख्याया एव भक्तेः सर्वोर्द्ध्वभूमिकावस्थितत्वमधिकारिविशेषनिष्ठत्वं च दर्शयितुं प्रक्रियान्तरम् । तत्र परतत्त्वस्य वैमुख्यपरिहाराय यथाकथंचित्साम्मुख्यमात्रं कर्तव्यत्वेन लभ्यते । तच्च त्रिधा—निर्विशेषरूपस्य तदीयब्रह्माख्याविर्भावस्य ज्ञानरूपम्, सविशेषरूपस्य च तदीयभगवदाख्याविर्भावस्य भक्तिरूपमिति द्वयं, तृतीयं च—तस्य द्वयस्यैव द्वारं कर्मार्पणरूपमिति । तदेतत्त्रयं पुरुषयोग्यताभेदेन व्यवस्थापयितुं लोके सामान्यतो ज्ञानकर्मभक्तीनामेवोपायत्वं नान्येषामित्यनुवदति—योगास्त्रय इति । योगा उपायाः । शास्त्रयोनिना श्रेयांसि मुक्तित्रिवर्गप्रमाणि । अनेन

१ शुद्धान्तःकरणान् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु ॥ तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनाम् ॥७॥ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ॥ न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥८॥ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥९॥

तथा चोत्तराध्याये स्फुटीकरिष्यति य एतानित्यादिना ॥ ६ ॥ तेष्वधिकारिभेदमाह निर्विण्णानामिति द्वाभ्याम् । इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानामत एव तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः । अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानाम् । अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ॥ ७ ॥ यदृच्छया केनापि भाग्योदयेन तत्र काम्यकर्मसु प्रवर्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति । निष्कामकर्मयोगाधिकारिणस्तु यथाशक्ति स च ज्ञानभक्तियोगाधिकारात्प्रागेव । तदधिकृतयोस्तु स्वल्पः ताभ्यां सिद्धानां तु न किंचिदिति ॥ ८ ॥ सावधिं कर्मयोगमाह तावदिति नवभिः । कर्माणि

भक्तेः कर्मत्वं व्यावृत्तम् । त्रयं विना न्यस्तपोयोगादिरूपः । तपोष्टांगयोगादेर्यथासंभवं ज्ञानभक्त्योरेवांतर्भावदर्शनादिति भावः ॥ ६ ॥ तेषु योगत्रयेषु । तत्फलेषु कर्मफलेषु स्वर्गादिषु । अत एव विरक्तत्वादेव । तत्साधनभूतकर्मन्यासिनां स्वर्गादिसाधनभूतयागादिकर्मत्यागिनाम् । सिद्धिदोऽभीष्टदः । अतो दुःखबुद्धिशून्यत्वात् । इत्यर्थ इति—कर्मफलेच्छावंत एव कामिनो भवंतीति भावः ॥ * ॥ तत्र के कुत्राधिकारिण इत्यपेक्षायामाह—निर्विण्णेति द्वाभ्याम् । निर्विण्णानामैहिकपारलौकिकविषयप्रतिष्ठासुखेषु विरक्तचित्तानां गृहकुटुंबादिष्वनासक्तानामत एव कर्मसु गृहाश्रमप्राप्तेषु लौकिकवैदिककर्मसंन्यासिनां तानि त्यक्तवतामित्यर्थः । पदद्वयेन दृढजातमुमुक्षाणामित्यभिप्रेतम् । कामो विषयासक्तिस्तदतिशयवताम्, भूम्नि मत्वर्थीयः । देहकलत्रादिष्वत्यासक्तिमतामित्यर्थः । तानि त्यक्तुमसमर्थानां सिद्धिदस्तत्संकल्पानुकूलफलप्रदः ॥ ७ ॥ यदृच्छया स्वादृष्टोद्बोधितभगवदिच्छया वा । तत्र कर्मयोगेपि । स च यथाशक्त्यधिकारः । तदधिकृतयोर्ज्ञानभक्तियोगाधिकारिणोस्तु स्वल्पो विधिनिषेधाधिकारो लोकसंग्रहमात्र इत्यर्थः । ताभ्यां ज्ञानभक्तिभ्याम । सिद्धानां कृतार्थानां न किञ्चिद्विधिनिषेधाधिकारः । एतच्चावगमम् 'तत्र मे दिश माधव' इत्यादिना "त्वदवगमी न वेत्ति" इत्यादिश्रुत्यर्थे प्रतिपादितं स्वामिचरणैः ॥ * ॥ अथ 'ते वै विदंत्यतितरंति च देवमायाम्' इत्यादौ 'तिर्यग्जना अपि' इत्यनेन भक्त्यधिकारे कर्मादिवज्जात्यादिकृतनियमातिक्रमाच्छ्रद्धामात्रं हेतुरित्याह—यदृच्छया केनापि परमस्वतंत्रभगवद्भक्तसंगतत्कृपाजातमंगलोदयेन । तदुक्तम्—'शुश्रूषोः श्रद्दधानस्य' इत्यादि **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—यदृच्छया प्रथमस्कन्धव्याख्यानयुक्त्या यादृच्छिकमहत्संगेन सत्संगिनस्तत्कथादौ जातश्रद्धस्त इति । अत एव 'श्रद्धामृतकथायां मे' इति 'श्रद्धालुर्मे कथाः शृण्वन्' इति । तत्रतत्र भक्तियोगे कथाश्रद्धालुरेवाधिकारी दर्शितः । अत्र तुर्भिन्नोपक्रमे । इत्यस्य ज्ञानिभ्यः कर्मिभ्यश्च वैशिष्ट्यमेकवचनेन विरलप्रचारत्वं च ध्वनितम । नातिसक्तः देहगेहकलत्रादिष्वत्यासक्तिरहितः । अथ न निर्विण्ग इति । तेषु निर्विण्णत्वे ज्ञानेऽधिकारः । अत्यासक्तत्वे कर्मण्यधिकारः । अत्यासक्तिराहित्ये भक्तावधिकार इत्यधिकारत्रयविवेकः । निर्वेदस्य कारणं निष्कामकर्महेतुकान्तःकरणशुद्धिरेव, अत्यासक्तेः कारणमनाद्यविद्यैव, अत्यासक्तिराहित्यस्य कारणं यादृच्छिकमहत्संग एवेति, तत्रतत्र कारणं दृश्यम् । किंचैतदुत्कृष्टाधिकारिण एव लक्षणम्, किंतु—"को नु राजन्निन्द्रियवान्मुकुन्दचरणांबुजम् । न भजेत्सर्वतो मृत्युः" इत्युक्तेर्यादृच्छिकभक्तसंगे सतींद्रियवानेव भक्त्यधिकारी ज्ञेयः ॥ ८ ॥ यावता कालेन । पक्षान्तरमाह—मत्कथेति । "तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात्" इत्युक्तेः ॥ * ॥ तावदिति तैः । तत्र स्वल्पः यदृच्छया ज्ञानभक्त्यनुकूलः न किञ्चिदिति । अनुपयोगादन्तरायरूपत्वाच्चेति भावः । वाक्यार्थे तु तस्मादनयोः कर्मजगुणदोषाभ्यां न गुणदोषत्वमिति भावः । यद्वा—नन्वेवं केवलानां कर्मज्ञानभक्तीनां व्यवस्थोक्ता नित्यनैमित्तिकं कर्म तु सर्वेष्वावश्यकम् तर्हि सांकर्ये कथं शुद्धे ज्ञानभक्ती प्रवर्त्तयेतां तदेतदाशंक्य तयोः कर्माधिकारितां वारयति—तावदिति । कर्माणि नित्यनैमित्तिकानीति टीका च—। "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते । आज्ञाच्छेदी ममद्रोही भक्तोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव ॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥ १० ॥
अस्मिँल्लोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः ॥ ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥ ११ ॥

नित्यनैमित्तिकानि । यावता यावत् ॥ ९ ॥ कर्मयोगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह । स्वधर्मस्थ इति । अनाशीःकामोऽफलकामः । अन्यन्निषिद्धं काम्यं च । नरकयानं हि द्वेधैव विहितातिक्रमाद्वा निषिद्धाचरणाद्वा । अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति । अफलकामत्वान्न स्वर्गमपीत्यर्थः ॥ १० ॥ किंतु अस्मिँल्लोकेऽस्मिन्नेव देहे । अनघो निषिद्धत्यागी । स्वधर्मस्थो विहितकारी । अतः शुचिर्निर्वृत्तरागादिमलः । यदृच्छयेति । केवलज्ञानादपि भक्तेर्दुर्लभतां द्योतयति ॥ ११ ॥

न स वैष्णवः ॥'' इत्युक्तदोषोप्यत्र नास्ति । आज्ञाकरणात् प्रत्युत जातयोरपि निर्वेदश्रद्धयोस्तत्करणे एवाज्ञाभंगः स्यात् । यथा च–व्याख्यातम् 'अज्ञायैवं गुणान् दोषान्' इत्यस्य टीकायां भक्तिदार्ढ्येन निवृत्ताधिकारितया संत्यज्येति निवृत्ताधिकारत्वं चोक्तं करभाजनेन–'देवर्षिभूताप्तनृणाम्' इत्यादिना । तेषां न किंकरः किन्तु भगवत एवेत्यनधिकारित्वम् । अत्र कर्मपरित्यागहेतुत्वेनाभिधानाच्छ्रद्धाशरणापत्त्योरैक्यार्थं लभ्यते तच्च युक्तं श्रद्धा हि शास्त्रार्थविश्वासः, शास्त्रं च तदशरणस्य भयं तच्छरणस्याभयं वदति अतो जातायाः श्रद्धायाः शरणापत्तिरेव लिंगमिति । अत्र विशेषजिज्ञासा चेद्भक्तिसंदर्भो दृश्यः ॥ * ॥ **विश्वनाथस्तु**–तदेवं जात्यैवासक्तस्य जीवस्य कर्माधिकारः स्वाभाविक एव स च किंपर्यंतस्तथा ज्ञानाधिकारो भक्त्यधिकारश्च कदा स्यादित्यपेक्षायामाह–तावदिति । कर्माणि नित्यनैमित्तिकानि । यावता यावन्न निर्विद्येत कर्मगैर्वांतः करणशुद्धौ सत्यां यावन्निर्वेदो न जायत इत्यर्थः । निर्वेदे तु जाते निर्विण्णानां ज्ञानयोग इति मदुक्तेर्ज्ञान एवाधिकारो न कर्मणीति भावः । तथाकस्मिकमहत्कृपाजनिता श्रद्धा वा यावदिति श्रद्धातः पूर्वमेव कर्माधिकारः, श्रद्धायां जातायां तु 'जातश्रद्धस्तु यः पुमान्' इति मदुक्तेर्भक्तावेव केवलायामधिकारो न कर्मणीति भावः । श्रद्धा चेयमात्यंतिक्येव ज्ञेया । सा च भगवत्कथादिभिरेव कृतार्थीभविष्यामीति न तु कर्मज्ञानादिभिरिति दृढैरास्तिक्यलक्षणैव तादृशशुद्धभक्तसंगोद्भूतैव ज्ञेया । अत एव 'श्रुतिस्मृती ममैवाज्ञे' इत्याद्युक्तदोषोऽप्यत्र नास्ति आज्ञाकरणादित्यादिपूर्ववत् । किंत्वप्राप्तमहत्कृपत्वाद जाततादृशश्रद्धमपि वैष्णवांतरोत्कर्षं दृष्ट्वैव तद्वदेव कर्म त्यक्त्वा भगवन्तं भजनमेव तद्वचनं विषयींकरोतीति केचिदाहुः । अन्ये तु श्रुतिस्मृती भक्तिप्रतिपादिके एव न तु वर्णाश्रमधर्मप्रतिपादिके "मया दिष्टानपि स्वकान् । धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः" इति भगवदुक्तिविरोधात् । अनन्यभक्तानामस्माकं श्रुतिस्मृत्युक्तविधिनिषेधाभ्यां न किमपि प्रयोजनमिति मत्वा यदेकादश्यादिव्रतानामाचरणं ताम्रपात्रस्थदधिदुग्धादेः कांस्यपात्रस्थनारिकेलोदकस्य च भगवतेऽर्पणं तस्य च भगवदर्पितस्य यद्भक्षणमिति निषिद्धाचरणं च । तथैव च–'श्रुतिस्मृती ममैवाज्ञे' इति भगवदुक्तिर्विषयीकरोतीत्याचक्षते–"न चलति निजवर्णधर्मतः" इति । न चलति न करोत इति तत्रार्थः । अत्र प्राच्यादिभक्तानामनन्यानामपि कर्मिकुलसंघट्टगतत्वेनैव तदनुरोधवशात् यदीषत्कर्मकरणं तत्कर्माकरणमेव तत्र श्रद्धाराहित्यात् । "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥" इति भगवदुक्तेः ॥ ९ ॥ यतो द्विधाऽतो हेतोः । इत्यर्थ इति–कामितस्यैव स्वर्गादेर्नियोज्यविशेषत्वादकामितं फलं न भवतीति भावः ॥ * ॥ तदेवं योगत्रयं तदधिकारहेतूंश्चोक्त्वा कर्मार्पणेऽपि यया भगवत्सांमुख्यरूपत्वं स्यात्तथाह–स्वधर्मस्थ इति । टीकायां स्वर्गमपीति–पुण्यफलयोगस्योपलक्षणमेवेदम् । अफलकामत्वं केवलेश्वराराधनबुद्ध्या कुर्वाणत्वं, तत्र ज्ञानिसंगे सति तन्मात्रत्वमेव भगवदर्पणं भवेत्, भक्तसंगे तु तत्सन्तोषमयत्वम् ॥ १० ॥ विशेषमाह–किन्त्विति । यद्वा–अनघः शुचिर्वर्तमानो यदृच्छया मद्भक्तिं ततो विशुद्धं जीवेशोपाधिविविक्तं ज्ञानं चाप्नोति । वा समुच्चये, विकल्पार्थत्वे तु अज्ञत्वाभक्तत्वयोरन्यतरापत्तेः ॥ * ॥ तर्ह्ययं कर्मी किं प्राप्नोतीत्यत आह–स्वधर्मस्थ इति । निष्कामकर्मकरणात्–अनघ इति । निष्पापत्वाच्च शुचिः शुद्धान्तःकरणः सन्विशुद्धं ज्ञानमाप्नोति ज्ञानान्मोक्षं च । यदृच्छयेति–यदि च यादृच्छिकशुद्धभक्तसंगलाभस्तदा मद्भक्तिं च केवलां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्गिणोप्येतमिच्छंति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकम् ॥ १२ ॥ न नरः स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणः ॥ नेमं लोकं च कांक्षेत देहाऽऽवेशात्प्रमाद्यति ॥ १३ ॥ एतद्विद्वान्पुरा मृत्योरभवाय घटेत सः ॥ अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदम् ॥ १४ ॥ छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिम् ॥ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः ॥ १५ ॥ अहोरात्रैश्छिद्यमानं बुद्ध्वाऽऽयुर्भयवेपथुः ॥ मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति ॥ १६ ॥

अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौति । स्वर्गिणोऽपीति । निरयिण इति दृष्टांतत्वेनोक्तम् । निरयिणो यथेत्यर्थः । ज्ञानभक्तिभ्यां ज्ञानभक्त्योः । तदुभयं स्वर्गिनारकिशरीरम् ॥ १२ ॥ अतो नरः स्वर्गतिं न कांक्षेत् । नारकीमिति दृष्टांतः । यद्वा स्वर्गनरकसाधनकर्माणि न कुर्यादित्यर्थः । अस्यातिश्रेष्ठत्वात्पुनरपि मनुष्यो भवेयमित्यपि न कांक्षेत । यतो देहावेशाद्देहासक्त्या प्रमाद्यति स्वार्थेऽवधानशून्यो भवति ॥ १३ ॥ अपि त्वेतद्देहसाधकमिति विद्वांस्तच्चार्थसिद्धिदमपि मर्त्यं ज्ञात्वाऽप्रमत्तोऽनलसः सन् मृत्योः पूर्वमेव मोक्षाय घटेत प्रयत्नं कुर्यात् ॥ १४ ॥ अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टांतः । छिद्यमानमिति । यमैर्यमवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिंस्तम् । स्वकेतं स्वस्याश्रयम् । अलंपटोऽनासक्तः ॥ १५ ॥ दार्ष्टांतिकमाह । अहोरात्रैश्छिद्यमानमायुर्बुद्ध्वा । भयेन वेपथुः कंपो यस्य सः ॥ १६ ॥

तया च प्रेमाणं प्राप्नोति । यदि च कर्ममिश्रज्ञानमिश्रभक्तिमत्साधुसंगलाभस्तदा ततः प्राप्तया कर्ममिश्रया ज्ञानमिश्रया च प्रधानीभूतया भक्त्या ततः शांतिरतिं प्राप्नोति ॥ ११ ॥ अनेन पूर्वोक्तेन 'तावत्कर्माणि' इत्याद्युक्तेन दृष्टान्तत्वेन यथा निरयिणो नरकस्था यदि वयं मनुष्या भविष्यामस्तर्हि पुनरत्र कदापि नागमनं भवेत्तादृग्यत्नं करिष्याम इति यथा वाञ्छन्ति, तथा स्वर्गिणोपीच्छन्ति यदत्र न स्वर्गसुखावशेषितम्' इत्याद्युक्तेः । मनुष्यदेहस्यैव ज्ञानभक्तिद्वारा मोक्षसाधनत्वादिति भावः ॥ * ॥ **दीपिका**—अनेन निष्कामकर्मानुष्ठाननिषिद्धवर्जनरूपेण प्रकारेण । उभयं स्वार्गिनारकिदेहम् । स्वर्गिणो महाविषयावेशात्, नारकिणो महापीडावेशात् । ननु तत्तत्साधनाभावात्सर्वथा " तदुपर्यपि बादरायणः संभवात् " इति न्यायात् ॥ १२ ॥ यतो नरदेहो मोक्षसाधनमतो हेतोः । वाशब्द इवार्थे, नारकीमिवेत्यर्थः । स्वर्गादीच्छाभावेपि तत्साधनकर्मकरणात्तद्भवत्येवेत्यत आह—यद्वेति । इत्यर्थ इति—कारणाभावात्कार्यं स्वयमेव न संभवतीति भावः । अवधानं विचारः । स चात्मानात्मविवेकस्तेन शून्यो हीनः ॥ * ॥ तस्मान्नरदेहं सर्वोत्कृष्टंगातिं प्राप्य ततो निकृष्टं स्वर्गतिं नरकगतिं च पुण्यपापाभ्यां न कामयेदित्याह—नेति । इमं नृदेहमपि न कांक्षेत मनुष्यत्वसाधनकर्माणि न कुर्यात् ॥ १३ ॥ देहाद्ध्यमाह—अपि त्विति । साधकं मुक्तेरिति शेषः । तच्च देहम् । मृत्योः पूर्वं स्वस्थावस्थायामेव । यत्नं भक्तिविचारादिरूपम् ॥ * ॥ एतत् मर्त्यशरीरम् ॥ १४ ॥ रेतैः पुरुषैः, रियंति जानंति गच्छन्ति छेदनार्थमिति वा रेताः 'रि—गतौ' अतस्तप्रत्यय औणादिकः । " रेतोहर्निशनरयोर्वार्द्धिकौ रेतासि तथा " इति निरुक्तिः । यद्वा—अलंपटः उत्पतनसमर्थः । 'पट—गतौ' खैरिन्द्रियैर्गच्छति विषयानिति खगो जीवः । अलंपटो विरक्तो ज्ञानी वा । स्वकेतं देहम् । क्षेमं मोक्षम् ॥ * ॥ देहावेशत्यागे दृष्टान्तमाह—छिद्यमानमिति ॥ १५ ॥ एतमेवार्थं दार्ष्टांतिकेन स्फुटयति—मुक्तसंगो देहादौ त्यक्ताध्यासः । परं परात्मानम् ॥ * ॥ दृष्टान्तोपपाद्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ॥ मयाऽनुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा ॥ १७ ॥ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः ॥ अभ्यासेनात्मनो योगी धारयेदचलं मनः ॥ १८ ॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितम् ॥ अतंद्रितोऽनुरोधेन मार्गेणात्मवशं नयेत् ॥ १९ ॥ मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः ॥ सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् ॥ २० ॥

एवमप्रयतमानं प्रमत्तं निंदति । नृदेहं प्लवं नावं प्राप्येत्यध्याहारः । यो भवाब्धिं न तरेत्स आत्महा । तत्र हेतवः । आद्यं सर्वफलानां मूलम् । एतदुपार्जितकर्मभिः सर्वप्राप्तेः । किंच सुदुर्लभमुद्यमकोटिभिरपि प्राप्तुमशक्यम् । तथापि तु सुलभम् । यदृच्छया लब्धत्वात् । तं च सुकल्पं पटुतरम् । किंच गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तम् । मया च स्मृतमात्रेणानुकूलमारुतेन प्रेरितम् ॥ १७ ॥ एवं तावदविरक्तस्य वैराग्यद्वारा ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं वर्जनीयं चाह सार्धैर्नवभिः । यदा त्वारंभेषु कर्मसु निर्विण्णो दुःखदर्शनेनोद्विग्नस्तत्फलेषु विरक्तश्च तदा संयतेंद्रियः सन्नात्मनोऽभ्यासेनात्मविषयवृत्तिसंतत्या अचलं यथा भवति तथा मनो धारयेत् ॥ १८ ॥ तत्र प्रथममेवात्यंतधारणासंभवात्तत्स्वभावानुसारेण वशीकरणमेवाह । यर्हि आशु भ्राम्यत्परिभ्रमदनवस्थितं भवति तदानुरोधेन किंचिदपेक्षापूरणद्वारेण ॥ १९ ॥ ननु तर्हि यथापूर्वमेव स्यात्तत्राह । मनोगतिं तु न विसृजेन्नोपेक्षेत । किंत्वप्रमत्तः सन्

दार्ष्टान्तिकं छिद्यमानत्वम् ॥ १६ ॥ एवम् उत्तरीत्या । 'प्लवस्तरणसाधने' इति धरणिः । नयति पारमिति नौस्तां पोतमित्यर्थः स्वामिचरणाभिप्रेतोऽन्यथा नौकार्थस्वीकारे तयाब्धितरणासंभवात् । आत्महात्मवञ्चकः । "मानुष्यं यः समासाद्य स्वर्गमोक्षप्रदायकम् । द्वयोर्न साधयत्येकं तेनात्मा वञ्चितो ध्रुवम् ॥" इति गारुडोक्तेः । स्वर्गोऽत्र ब्रह्मपदम् । तत्रात्मवञ्चकत्वे । एतच्छब्देन नृदेहो ग्राह्यः । न केवलं सर्वफलमूलमेवेत्याह–किञ्चेति । यद्यपि दुर्लभं तथाप्यधुनोद्यमं विनैव प्राप्तत्वात्सुलभम् । ननु प्राप्ततरणसाधनोऽपि तारकं विना न तरतीति चेदाह–किञ्चेति । संश्रितमात्र इत्यनेन सेवनमात्रेणैव न धनाद्यर्पणेनेत्युक्तम् । 'कर्णधारस्तु नाविकः' इत्यमरः । न हि प्रसिद्धपोतो वायुस्मरणाच्चलति नाविकश्च सेवनमात्राच्चालयति न च तमिति ततो वैलक्षण्यमुक्तम् ॥ * ॥ यदृच्छया केनापि भाग्योदयेन । तत्राप्यतिभाग्योदयेन । सुकल्पं सर्वांगविकृतिरहितम् ॥ १७ ॥ एवमुक्तग्रंथेन । तस्य सम्यग्विरक्तस्य । तत्फलेषु कर्मफलेषु । आत्मविषयवृत्तिसंतत्या तच्चिन्तनम् तत्कथनमन्योन्यं तत्प्रबोधनम् । "एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः" इत्युक्तलक्षणया धारयेत् स्वीकुर्यात ॥ * ॥ दीपिका–तस्य च सम्यग्विरक्तस्य कृत्यं मनोधारणादि वर्जनीयं निरुद्धस्य मनस उपेक्षणादि आत्मविषयवृत्तिसंतत्या सजातीयप्रत्ययप्रवाहेण ॥ १८ ॥ तत्रेति वाक्यालंकारे, तत्र तस्येत्यर्थो वा । किंचिदपेक्षापूरणे कांचित्तदनुकृत्य पुनर्निरोधेन अतन्द्रितः । अहो बुहुकालो यातोऽधुनापि न स्थितोऽतस्त्यक्तव्योऽत्र यत्न इति संकल्पशून्य इत्यर्थः ॥*॥ यर्हि तु यत्नेन धार्यमाणमपि आशु प्रथममनवस्थितं द्विगुणितं चाञ्चल्यं भवेद्बलवतः कामादिवेगस्यात्यन्तधारणेन वेगो द्विगुणितो भवेदेवेति भावः । किञ्चिदपेक्षापूरणेन द्वित्रिदिनं मिष्टान्नादिरुचौ सेवित्वेति भावः ॥ १९ ॥ मनोऽनुसरणे तु तन्निरोधो दुर्घट इत्याक्षिपति–नन्विति । यथापूर्वमनिरुद्धमेव । यद्वा–मनसोऽगतिं विरुद्धगतिं न विसृजेद्विरुद्धविषयात्तन्निरुंध्यादेवेत्यर्थः । इत्यर्थ इति–मनसो वशीकरणमात्मदर्शनार्थमेव 'सत्त्वसंपन्नया' इत्युक्तेः । 'दृश्यते त्वग्र्यया बुद्ध्या' इति श्रुत्यर्थो लक्षितः ॥ * ॥ यथा पूर्वं विषयाविष्टं तर्हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष वै परमो योगो मनसः संग्रहः स्मृतः ॥ हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतो मुहुः ॥ २१ ॥ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति ॥ २२ ॥ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः ॥ मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया ॥ २३ ॥ यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः ॥ २४ ॥ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितम् ॥ योगेनैव दहेदंहो नान्यत्तत्र कदाचन ॥ २५ ॥

लक्षयेदित्यर्थः ॥ २० ॥ अनुरोधमार्गं सदृष्टांतं स्तौति । एषः अनुवृत्तिमार्गेण मनसः संग्रहः परमो योगः । तत्साधनत्वादुपचारेण स्तुतिः । यथा अदांतस्य दमनीयस्यार्वतोऽश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गतिमन्विच्छन्नपेक्षमाणोऽश्वधारकः प्रथमं किंचित्तद्गतिमनुवर्तते तदा च रश्मिना तं धृत्वैव गच्छति न तूपेक्षते तद्वदित्यर्थः ॥ २१ ॥ एवमीषद्वशीकृतस्य मनसोऽत्यंतनैश्चल्योपायानाह सांख्येनेति त्रिभिः । सांख्येन तत्त्वविवेकेन सर्वभावानां महदादिदेहांतानामनुलोमतः प्रकृत्यादिक्रमेण भवं प्रतिलोमतः पृथिव्यादिक्रमेणाप्ययं चान्वनुध्यायेत् । प्रसीदति निश्चलं भवति ॥ २२ ॥ ननूपायसहस्रेणापि मनो विषयाकारतां न त्यजति किं भूयोभूय उपदेशेनेति चेत्तत्राह । निर्विण्णस्येति । ततश्चागमापायिषु तेष्ववधिभूतात्मदर्शनात्तदविवेकापन्नसंसारे निर्विण्णस्यातो विरक्तस्य ततश्चोक्तवेदिनो गुरूपदिष्टार्थालोचकस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनःपुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति ॥ २३ ॥ किंच यमादिभिर्योगमार्गैरान्वीक्षिक्या पदार्थद्वयशोधनेन ममार्चनध्यानादिभिर्वा । वाशब्देनास्य पक्षस्य स्वातंत्र्यं दर्शयति । एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेन्नान्यैरतोऽन्यन्न कुर्यादित्यर्थः ॥ २४ ॥ ननु पापापत्तौ प्रायश्चित्तं कार्यमेव तत्राह । यदीति ।

तद्गतिं स्तम्भयेदेवेत्यर्थः ॥ २० ॥ तत्साधनत्वाद्योगसाधनत्वात् । उपचारेणाविद्यमानस्यारोपेण । "अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिङ्गकः" इति मेदिनी । इत्यर्थ इति—सर्वथा रश्मित्यागे पृष्ठगमेव पातयेदेवं सर्वथा निरोधे देहपातो भवेदिति भावः ॥ * ॥ अनुवृत्तिमार्गेण किञ्चिदवेक्षापूरणद्वारेण । संग्रहः स्ववशीकारः ॥ २१ ॥ अनुलोमतः सिद्धक्रमेण । भवमुत्पत्तिम् । प्रतिलोमत उत्क्रमेण ॥ * ॥०॥२२॥ तत उत्पत्त्यप्ययध्यानात् । तेषु भावेषु । अवधिभूतस्य परमाश्रयीभूतस्यात्मनो दर्शनाज्ज्ञानात् । तस्यात्मनोऽविवेकेन देहादिभ्यः पृथक्त्वेनाज्ञानेनापन्नः प्राप्तो यः संसारस्तस्मिन् । निर्विण्णस्याकुलस्य । अतः आकुलत्वात् । ततो विरक्तत्वात् । "विरक्ते दुःखिते चाथ निर्विण्णो वेदनेऽपि च" इति निरुक्तिः । "विरक्तो योग्यतामेति गुरूक्तार्थावधारणः" इत्युक्तेः । ततो गुरूपदिष्टार्थालोचकत्वात् ॥ * ॥ निर्विण्णस्य संसारादुद्विग्नस्यात एव विरक्तस्य ॥ २३ ॥ अन्यदाह—किञ्चेति । पदार्थद्वयशोधनमात्मानात्मविवेचनम् । अर्च्या प्रतिमा वार्चनम् । अस्यार्चोपासनादेः । योग्यं योगगम्यम् । इत्यर्थ इति—यमादीन्विहाय काम्ययागादिकं योगी न कुर्यादिति भावः ॥ * ॥ अस्य ज्ञानाधिकारिणः ॥ २४ ॥ योगिनोऽपि प्रामादिकपापपरिहारः कार्य एवेत्याशंकते—नन्विति । गर्हितं व्यभिचारादि । एतच्च प्रायश्चित्तम् । कृच्छ्रादीनां योगविक्षेपकत्वात्तन्न कार्यमित्यर्थः । तत्र गर्हितकृतिजपापपरिहारार्थमित्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ (विपर्ययस्तु दोषः स्यादुभयोरेष निर्णयः ॥) कर्मणां जात्यशुद्धानामनेन नियमः कृतः ॥ गुणदोषविधानेन संगानां त्याजनेच्छया ॥ २६ ॥

योगेन ज्ञानाभ्यासेनैव । एतच्च भक्तस्यापि नामकीर्तनाद्युपलक्षणार्थम् । नान्यत्कृच्छ्रादि ॥ २५ ॥ ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणो हिंसादिकं त्वशुद्धिहेतुत्वाद्दोषः । तत्र च तन्निवर्तकत्वात्कृच्छ्रादिप्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात्प्रायश्चित्तं विना योगेनैव कथं पापं दहेत्तत्राह स्वेस्व इति सार्धेन । स एव गुणो नेतरः । तदुपपादयति । यस्माद्विधिप्रतिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः । कुत इत्यत आह । जात्या उत्पत्त्यैवाशुद्धानाम् । स च प्राप्तानां संगानां त्याजनेच्छया कृतः । अयं भावः । पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् । न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते । अत

॥ * ॥ कर्मजगुणदोषास्पर्शमाह—यदीति सार्द्धद्वयेन । यद्यस्य निर्विण्णस्य कर्मणि नाधिकारस्तदा पापे दैवात्कृते सति प्रायश्चित्तं विना कथं तदुपशमस्तत्राहेति **विश्वनाथः** ॥ * ॥ भक्तस्येति—“केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वन्ति कार्त्स्न्येन नीहारमिव भास्करः ॥” इति, ‘स्वपादमूलम्’ इत्यत्र “ विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि सन्निविष्टः ” इति च । योगीति ज्ञानयोगभक्तियोगवान्व्याख्येयः । योगेन भक्त्या ज्ञानेन वेति ॥ २५ ॥ ज्ञानादीनां प्रायश्चित्तप्रकरणानुक्तेस्तत्त्वं न संभवतीत्याशङ्कते—नन्विति । सत्त्वमन्तःकरणम् । तत्र च तयोर्नित्यादिकर्महिंसादिकर्मणोर्मध्ये च । तन्निवर्तकत्वात् पापनिवर्तकत्वात् । विधिनिषेधाभ्याम् “अहरहः संध्यामुपासीत” “ब्राह्मणं न हन्यात्” इत्येवंरूपाभ्यामुक्तत्वाद्गुणदोषयोर्विहितत्वात् । तत्राक्षेपे । तत् स्वाधिकारनिष्ठाया गुणत्वम् । यस्मादित्यस्य त इत्यनेन संबंधः । संकोचे हेतुं पृच्छति—कुत इति । स च संकोचः । अत्राशयं प्रकाशयंति स्वामिचरणाः—अयं भाव इत्यादिना । स्वाभाविकी प्रवृत्तिर्व्यवायामिषमद्यसेवादिष्वादरः । तस्य पुरुषस्य । सहसा झटिति । निवृत्तिविधानफलमाह—तथा चेति । यतस्स्वाभाविकप्रवृत्तिमतामेव प्रायश्चित्तविधानमतो हेतोः । निर्गलितार्थस्तु—सर्वकर्मणा जात्या जन्मनैव देहाद्यध्यासफलतया । अनेन गुणदोषविधानेन । क्रमेण संगत्यागेच्छयैव नियमः संकोचः कृतः । आदौ पापकर्मपरित्यागस्ततो लौकिककर्मत्यागस्ततः काम्यकर्मत्यागस्ततस्तदाग्रहत्यागस्ततस्तत्फलत्यागश्च, ततः सति बोधे सर्वकर्मपरित्याग इति ॥ * ॥ तदेवं कर्मार्पणकेवलज्ञानकेवलभक्तयोऽधिकारिभेदेन व्यवस्थापिताः, अतः स्वाधिकारानुरूपेणैव स्थातव्यमित्याह—स्व इति । विपर्ययस्तु दोषः स्यादिति भावः । तस्मात्साधूक्तं योगेनैव न तु कर्मणेति । कर्मणामिति तैः । तत्रानेनेति पूर्वसूचितेन कर्मशास्त्रोक्तेनेत्यर्थः । यद्वा—ननु कथं योगस्य तादृशं सामर्थ्यं कथं वा कर्मणैवांहोदाहः स्यादिति कर्मशास्त्राग्रहः संगमितः स्यात् , तत्र कर्मणां वस्तुतोदोषत्वेऽपि तेष्वेव किञ्चिद्गुणत्वेन गुणतया संमितत्वं दर्शयन् योगस्य स्वभावगुणत्वं व्यंजयति—कर्मणामिति । कश्चित्कश्चिदतीव विरक्तो निंबोऽस्तीति लोके मिष्टतिक्तजातिव्यपदेश इव जात्यैवाशुद्धानां कर्मणां यद्गुणदोषत्वविधानं तेनानेन संकोच एव कृतः, कथं संगानामिति सहसा सर्वत्याजनाशक्तेस्तत्र क्रम एव कृत इत्यर्थः ॥ * ॥ **विश्वनाथस्तु**—नान्यत्कथं ब्रवीषि तदप्यस्तु कस्तत्र दोषस्तत्राह—स्वेस्व इति । वीप्सया ज्ञानिनो भक्तस्य च प्राप्तिर्गम्यते । अयं भावः—ज्ञानिनो ज्ञानेन भक्तस्य भक्त्या च यदि पापं न नश्येत्तदा तेनतेन पापनाशनार्थं कृच्छ्रादिकमनुष्ठीयते ज्ञानभक्त्योः पापनाशकत्वस्य बहुशः श्रुतत्वात्, पापनाशे सिद्धे कथं पराधिकारगतं तेनतेन कृच्छ्रादिकमनुष्ठेयं तस्मिन्ननुष्ठिते सति स्वधर्मनिष्ठात्यागः परधर्मप्रसक्तिश्चेति दोषद्वयं स्यात् । वस्तुतस्तु—ज्ञानिभक्त्योः पापे प्रवृत्तिरेव न स्याद्यदि दैवात्स्यात्तदपि ज्ञानभक्तियोगयोर्जात्यैव शोधकत्वात्ताभ्यामेव स्वत एव पापक्षय इत्यतो गुणदोषम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु ॥ वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः ॥ २७ ॥

इदं न कर्तव्यमिदमेव कर्तव्यमित्येवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते । यथा च न प्रवृत्तिपरो वेदस्तथोत्तराध्याये वक्ष्यामः । 'उपत्त्यैव हि कामेषु' इत्या
दिना । अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगोचरतेति ॥ २६ ॥ भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः । मत्कथासु जातश्रद्धोऽत

यविधिप्रतिषेधाधिकारमध्यपांतित्वं ज्ञानिभक्तयोः प्रायेणोक्तं वेदेन । किन्तु तयोरपि मध्ये भक्त एव पापप्रवृत्तेऽपि दोषदर्शनं सर्वत्र निषिद्धं प्राकृतगुणदर्शनं च तस्य निर्गुणत्वेन व्याख्यास्यमानत्वात् । ज्ञानिनस्तु सात्त्विक
त्वात्तास्मिन् शमदमादिगुणदर्शनस्य " यस्त्वसंयतषड्वर्गः प्रचंडेन्द्रियसारथिः " इत्यादेर्दोषदर्शनस्य च व्यक्तत्वात्तेषु गुणदोषद्दशिर्दोष इति न शक्यते वक्तुम् । कर्मिणां तु स्वाभाविकावेव गुणदोषावित्याह—कर्मणां जात्यैवाशुद्धा
नामनेन विधिप्रतिषेधरूपगुणदोषविधानेन नियमः, देहगेहासक्तानां कर्मिणामुत्पत्त्यैव पापरतानां स्वाभाविकप्रवृत्तिसंकोचः कृत एवाभीक्ष्णशो वेदेन । किमर्थम्—संगानां विषयासक्तीनां त्याजनेच्छया । अयं भाव इत्यादि
तैः ॥ २६ ॥ अथान्यदाह—भक्त्यधिकारिण इति । अत एव सर्वथा मत्कथाश्रद्धावत्त्वादेव । अन्येषु काम्येषु उद्विग्नस्त्रस्तः तत्फलत्यागेन तु विरक्तः किंतु फलाभिलाषुकः । तत्फलाभिलाषुकत्वम् । कामान्
विषयान् । तत्परित्यागे विषयपरित्यागे ॥ *॥ अथ भक्तिमार्गं विवृणोति—जातेत्यादिना एवमित्यतः प्राक् । तत्र जातश्रद्ध इति युग्मकेन । कथेत्युपलक्षणम् । मत्कथादिषु एतदेव केवलं परमं श्रेय इति जातविश्वासः ।
अत एवान्येषु कर्मसूद्विग्नः किंतु वर्तमानेषु प्राचीनपुण्यकर्मफलभोगेषु एवंभूत इत्याह—वेदेति । ततस्तां वेदेत्यादि व्याख्यातम् । ' न निर्विण्णो नातिसक्तः ' इत्येवंलक्षणमारभ्यैवेत्यर्थः । मां भजेत मदीयानन्यताख्य
भक्तावधिकारी स्यात्, न तु ज्ञानवज्ज्ञाते सम्यग्वैराग्य एव तस्याः स्वतः सर्वशक्तिमत्त्वेनान्यनिरपेक्षत्वादित्यर्थः । अनंतरं च वक्ष्यते—'तस्मान्मद्भक्तियुक्तस्य' इत्यादिना ' यत्कर्मभिः ' इत्यादिना च । न च कर्मनिर्वेदसापेक्ष
त्वमापतितं स तु भक्तेः सर्वोत्तमत्वविश्वासेन स्वत एव प्रवर्तते । अतो निर्विण्ण इत्यनुवादमात्रम् । अत एव यद्यपि ज्ञानकर्मणोरपि श्रद्धापेक्षास्त्येव तां विना बहिरंतः सम्यक्प्रवृत्त्यनुपपत्तेः, तथाप्यत्र श्रद्धामात्रस्य कार
णत्वेन विशेषतस्तदंगीकारः, तत्रापि च तदपेक्षा पूर्ववत् सम्यक्प्रवृत्त्यर्थैव, तां विनाऽनन्यताख्यभक्तिस्तथा न प्रवर्तते, कदाचित्किञ्चित्प्रवृत्ता च नश्यति । अत एव ' न निर्विण्णो नातिसक्तः ' इत्यस्यानंतरमपि ' मत्कथा
श्रवणादौ च ' इत्यत्र श्रद्धायां जातायामेव कर्मपरित्यागो विहितः, भक्तिमात्रं तु तां विनापि सिध्यति 'सकृदपि परिगीतं श्रद्धया हेलया वा ' इत्यादौ ' सतां प्रसंगात् ' इत्यादौ च तत्र तत्पूर्वतोऽपि तस्याः फल
दातृत्वश्रवणाच्च " म्रियमाणो हरेर्नाम गृणन्पुत्रोपचारितम् " इत्यादौ तस्याः फलदातृत्वसौष्ठवश्रवणाच्च । सा च श्रद्धा शास्त्राभिधेयावधारणस्यैवांगं तद्विश्वासरूपत्वात् । ततो नानुष्ठानांगत्वे प्रविशति भक्तिश्च फलोत्पादने
विधिसापेक्षापि न स्यात् दाहादिकर्मणि वह्न्यादिवत् । भगवच्छ्रवणकीर्तनादीनां स्वरूपस्य तादृशशक्तित्वात् । ततस्तस्याः श्रद्धाद्यपेक्षा कुतः स्यात् । तस्माच्छ्रद्धा न भक्त्यंगं किंतु कर्मण्यर्थिसमर्थविद्वत्तादिवदन
न्यताख्यायां भक्तावधिकारिविशेषणमेवेत्यत एव तद्विशेषणत्वेनैवोक्तम् ' यदृच्छया मत्कथादौ जातश्रद्धः ' इति जातश्रद्धो मत्कथास्विति च, " श्रद्धामात्रस्य तद्भक्तावधिकारित्वहेतुता । अंगत्वमस्य विश्वासविशेषस्य तु
केशवे ॥ " इति भक्तिरसामृतसिंधावुक्तत्वात् । अतस्तामारभ्येत्यर्थेन ल्यब्लोपे पंचम्यंतेन तत इति पदेनानवधिकनिर्देशेनात्मारामतावस्थायामपि सा केषांचित्प्रवर्तत इति तस्याः साम्राज्यमभिप्रेतम् । वक्ष्यते चानन्तरम्—' न
किञ्चित्साधवो धीराः ' इति । अतः साम्राज्यज्ञापनाय तां विना कर्मज्ञाने अपि न सिध्यत इति च ज्ञापितम् । तदेवमनन्यभक्त्याधिकारे हेतुं श्रद्धामात्रमुक्त्वा स यथा भजेत तथा शिक्षयति—श्रद्धालुर्विश्वासवान्, प्रीतः
प्रजातायां रुचावासक्तः, दृढनिश्चयः साधनाध्यवसायभंगरहितश्च सन् सहसा त्यक्तुमसमर्थत्वात्कामाञ्जुषमाणश्च गर्हयंश्च । गर्हणे हेतुः—दुःखोदर्कान् शोकादिकृदुत्तरकालानिति ॥ * ॥ **विश्वनाथस्तु**—अथ भक्त्यधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः ॥ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २८ ॥ प्रोक्तेन भक्तियोगेन भजतो माऽसकृन्मुनेः ॥ कामा हृदय्या नश्यंति सर्वे मयि हृदि स्थिते ॥२९॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चाऽस्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥३०॥

एवान्येषु कर्मसूद्विग्नो न तु तत्फलेषु विरक्तः । तदाह । वेदेति । यद्यपि वेद तथापि तत्परित्यागेऽनीश्वरोऽशक्तः ॥ २७ ॥ एवंभूतो यः श्रद्धालुर्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः संस्ततस्तदनंतरं मां प्रीत्या भजेत विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह । गर्हयन्निति ॥ २८ ॥ कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्याम् । "श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनम्" इत्यादिना तत्रतत्रोक्तेन मा मामसकृन्नित्यं भजतो हृदय्या हृद्गताः कामा नश्यंति ॥ २९ ॥ हृदयमेव ग्रंथिरहं

कारिणः प्राथमिकं स्वभावं दर्शयन्भक्तिमाह—जातश्रद्ध इति द्वाभ्याम् । सर्वकर्मसु लौकिकवैदिकेषु तत्फलेषु च दुःखबुद्ध्योद्विग्नः । नातिसक्त इति यदुक्तं तद्विवृणोति—कामान्स्त्रीपुत्रादिसंगाख्यान् दुःखात्मकान् वेद । अथ च तत्परित्यागेप्यसमर्थः ॥ २७ ॥ एवंभूतः मत्कथाश्रद्धावत्त्वेपि विषयत्यागासमर्थः । तदनंतरं दृढनिश्चयानंतरम् । तान्कर्मफलभूतान् दुःखावसानकान् गर्हयन्—अहो कदा मामेते विषयास्त्यक्ष्यंतीति निंदन् ॥ * ॥ ततस्तामवस्थामारभ्यैव दृढनिश्चय इति । गृहाद्यासक्तिर्मे नश्यतु वर्धतां वा, तथा भजनेऽपि मे विघ्नकोटिर्भवतु नश्यतु वा, अपराधे नरकं चेद्भवतु काममंगीकुर्वे तदपि भक्तिं न विजहामि, ज्ञानकर्मादिकं नैव जिघृक्षामि, यदि स्वयं ब्रह्माप्यागत्य वदेदित्येवं दृढो निश्चयो यस्य सः । आरब्धभजनस्य तस्य भक्तौ यथा प्रीतिः, न तथा तत्प्रतिकूलवस्तुनीत्याह—जुषमाणश्चेति । कलत्रादिसंगोत्थान्कामान्दुःखोदर्कान्गर्हयन्नेव जुषमाणः । अहो अमी विषयभोगा एव ममानर्थकारिणो भगवत्प्राप्तिप्रतिकूला एवैधन्ते बहुशो नामग्राहमपि सशपथमपि त्यक्ता अपि समये भोक्तव्या एव भवन्तीति 'निंदामि च पिबामि च' इति न्यायेन भुंजानः ॥ २८ ॥ भजनप्रकारं तत्फलं च पृच्छतीत्याह—कथं भजेतेति । ततो भजनात् । तत्रतत्र प्रकरणे नश्यंति विवेकेन त्यक्ता अपि बोधेन कारणबाधेन बाध्यन्त एव । हृदिस्थिते बोधेन गतावरणतया स्फुरति सति ॥ * ॥ ततश्च सैव भक्तिस्तस्य तान्कामान्दहेदित्याह । यद्वा—ननु किं त्वद्भक्त एवं विषयबाधित एव तिष्ठत्यत्र नहिनहीत्याह—प्रोक्तेनेति द्वाभ्याम् । 'श्रद्धामृतकथायां मे' इत्यादिना मया प्रोक्तेन सकृन्नित्यं पुनःपुनर्मां भजतः हृद्गता मयि हृदि स्थिते इति न ह्येकस्मिन्नेव हृदि मम स्थितिस्तेषां च स्थितिः संभवेत्, न हि सूर्यान्धकारयोरेकाधिकरण्यं घटेतेति भावः॥२९॥अहंकारोऽन्तःकरणदृढाध्यासः।तत्पूर्वका अहंकारपूर्वकाः । आदिना विपरीतभावनादयो ग्राह्याः । अनारब्धफलानीति "प्रारब्धकर्मणां भोगादेव क्षयः" इति श्रुतेः ॥ * ॥ सर्वसंशयास्तद्दर्शनासंभावनापर्यन्तास्छिद्यन्ते समाप्यन्ते क्षीयंत इति "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ" इति न्यायेनेति **संदर्भः** । ॥*॥ **विश्वनाथस्तु**—निष्ठारुच्यादिभूमिकारूढस्य भक्तस्य हृदयग्रंथिरहंकारो भिद्यते स्वयमेवेति न तत्र भक्तस्येच्छाप्रयत्नाविति भावः । तदुक्तम्—"जरयत्याशु या कोशं निगीर्णमनलो यथा" इति । संशया असंभावनादयः । कर्माणि प्रारब्धपर्यंतानि । तथा च श्रुतिर्गोपालतापनी—या भक्तिरस्य भजनं तदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यम् । नैष्कर्म्यकरमिति तस्यार्थः ॥ * ॥ **दीपिका**—असंभावना तद्दर्शने संदेहः । आदिना विपरीतभावना तत्कार्यभूता रागादयश्च गृह्यन्ते । अनारब्धफलानि संचितागाम्यादीनि । प्रारब्धस्य भक्तोत्कंठावर्धनार्थं भगवतैव रक्षणमिति ज्ञेयम् । तत्र पारमर्षं सूत्रम् 'तदधिगमे' इत्याद्युक्तमेव । श्रुतिश्च—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ३१ ॥
यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ ३२ ॥

कारस्तत्पूर्वकाश्च सर्वे संशया असंभावनादयः । कर्माण्यनारब्धफलानि संसारहेतुभूतानि च ॥ ३० ॥ तदेवं व्यवस्थयाऽधिकारत्रयमुक्तम् । तत्र च भक्तेरन्यन्निरपेक्षत्वादन्यस्य च तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः । मदात्मनो मय्यात्मा चित्तं यस्य तस्य । श्रेयः श्रेयःसाधनम् ॥ ३१ ॥ तत्र हेतुः यत्कर्मभिरित्यादि । इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भाव्यं सत्त्वशुद्ध्यादि तत्सर्वमंजसा अनायासेनैव । स्वर्गमपवर्गं मद्धाम वैकुंठं लभत एव । वांछा तु नास्तीत्युक्तं यदि

" सुकृतदुष्कृते विधुनुते एवं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवम् " इति ॥ ३० ॥ तदेवम् इत्थम् । तत्र योगत्रयेषु । अन्यनिरपेक्षत्वाज्ज्ञानयोगादेर्निरपेक्षत्वात् । अन्यस्य ज्ञानयोगादेस्तत्सापेक्षत्वाद्भक्तियोगापेक्षत्वात् । यस्माद्भक्तियोगः श्रेष्ठस्तस्माद्धेतोः । श्रेयःपदं लक्षणया श्रेयःसाधनं वक्तीति । यद्वा—तस्मान्मद्भक्तियुक्तस्य किं वैराग्यं न भवेत्तत्साध्यं ज्ञानं वा तत्साध्यं श्रेयो मोक्षो वा न भवेदपि तु इहैव परवैराग्यज्ञानाभ्यां जीवन्मुक्तो भवेदेव । " वासुदेवे भगवति भक्तियोगः प्रयोजितः । जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनम् ॥ " इत्युक्तेः ॥ * ॥ अस्य भक्त्यधिकारिणः कर्मज्ञानयोरपि स्पर्शो न संमत इति वदन्नुतरां तत्कारणगुणदोषास्पर्शमाह—तस्मादिति । यस्मात् ' भिद्यते ' इत्यादेर्ज्ञानम् ' प्रोक्तेन ' इत्यादेर्वैराग्यं स्वत एव स्यात् । मद्भक्तियुक्तस्य ज्ञानं तत्साधनाभ्यासवैराग्यं च वैराग्याभ्यासः प्रायः श्रेयो न भवेत्किमुत कर्मयोग इत्यर्थः । व्यर्थादिकप्रयासात्तादृशभक्त्यंतरायाच्च । नन्द्वयमत्यन्ततन्निराकरणार्थम् । प्रायो वितर्के ॥ * ॥ **विश्वनाथस्तु**—यतो हेत्वन्तरनिरपेक्षया भक्त्यैव हृदयग्रंथिभेदाद्याः स्वत एव स्युस्तस्माद्भक्त्यर्थं वा हृदयग्रंथिभेदार्थं वा मद्भक्तेन ज्ञानवैराग्ये नैवोपादेये स्वस्मिंस्तयोः श्रेयस्करत्वादर्शनादित्याह—तस्मादिति । मदात्मनो मन्मनसः देहाद्यतिरिक्तत्वानुसंधानलक्षणं ज्ञानं विषयाग्रहलक्षणं वैराग्यं च न श्रेयस्तयोः सात्त्विकत्वात्तस्यास्तु गुणातीतत्वात्तस्यां सत्यां तयोः स्वस्मिन्नानिनीषैव दोष इति भावः । प्रत्युत अविद्यावृत्तीनां रागद्वेषादीनामिव विद्यावृत्तिरूपयोरपि ज्ञानवैराग्ययोर्भक्तेः स्वत एव वर्तमानयोरपि भक्त्यैव निर्जय एवाग्रे पंचविंशाध्याये वक्ष्यते । किञ्च—भगवदनुभवरूपं ज्ञानं विषयारोचकत्वलक्षणं वैराग्यं भक्त्युत्थत्वाद्गुणातीतं तस्य स्वत एव स्यात् । यदुक्तम्—" भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः । प्रपद्यमानस्य " इति प्रायोग्रहणेन क्वचिच्छांतभक्तेः प्रथमदशायां तयोर्ग्रहोऽपि नाश्रेयस्करः । ' भक्तिर्भुवो निर्विघ्नेत्यंतयुक्तविरक्तता ' इति तन्मतमुक्तं भक्तिरसामृतसिंधौ ॥ ३१ ॥ तत्र भक्तस्य ज्ञानादीनां श्रेयस्साधनत्वाभावे । कर्मभिर्नित्यादिभिः । तपसा मनइन्द्रियनिरोधरूपेण । " मनसश्चेंद्रियाणाञ्च ह्यैकाग्र्यं परमं तपः " इत्युक्तेः । ज्ञानेन परात्मैक्यलक्षणेन । वैराग्येणाब्रह्मलोकजिहासारूपेण । योगेनाष्टांगेन । दानं जीवाभयप्रदानं तदेव धर्मो यत्र तेन संन्यासेन । यद्वा—दानेन वसुनः पात्रसमर्पणरूपेण धर्मेणातिथ्यादिना । सत्त्वशुद्ध्यादीत्यत्रादिनोपशांत्यादिग्रहः ॥ * ॥ ननु यदि कश्चित्त्वत्कथादावेव श्रद्धालुः कर्मज्ञानादिषु तदरोचकत्वादथ च तत्फलेषु स्वर्गापवर्गादिषु स्पृहावांश्च स्यात्तदा किं भवेदत आह—यदिति द्वाभ्याम् । इतरैरिति तैः । यद्भाव्यं तत्सर्वं भक्तियोगेन मद्भक्तो लभते तत्राप्यंजसाऽनायासेनैव । किं तत्सर्वं तदाह—स्वर्गापवर्गमिति । स्वर्गः प्रापञ्चिकसुखं सत्त्वशुद्ध्यादिक्रमेणापवर्गो मोक्षसुखं च तदतिक्रमसुखं च भवतीत्याह—मद्धाम वैकुंठं चेति । कथंचिद्भक्त्युपकरणत्वेनैव यदि वाञ्छति कश्चित् । तत्र श्रीचित्रकेत्वादिवत्स्वर्गवांछा तस्य भक्त्युपकरणत्वं चोक्तम्—" रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरम् " इति । श्रीशुकादिवदपवर्गवांछा तत्प्रार्थनया श्रीकृष्णेन दूरीकृतायां मायायां सत्यां मातुर्गर्भान्निश्चक्रामेति ब्रह्मवैवर्तीयकथा । तत्र च भक्त्युपकरणत्वम्—' ब्रह्मभूतः प्रसन्नात्मा '

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥ ३३ ॥ न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥ ३४ ॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकम् ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ ३५ ॥ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां समचित्तानां बुद्धेः परमुपेयुषाम् ॥ ३६ ॥ एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ३७ ॥ इति श्रीमद्भागवते महापुराण एकाशस्कंधे भगवदुद्धवसंवादे विंशतितमोऽध्यायः ॥ २० ॥

वांछतीति ॥ ३२ ॥ ३३ ॥ तत्र हेतुमाह । न किंचिदिति । धीरा धीमंतो यतो मम एकांतिनो मय्येव प्रीतियुक्ता अतो मया दत्तमपि न गृह्णंति । किं वक्तव्यं न वांछंतीत्यर्थः । अपुनर्भवमात्यंतिकमपि कैवल्यम् ॥ ३४ ॥ तदुपपादयति । नैरपेक्ष्यमेव परमुत्कृष्टमनल्पकं महन्निःश्रेयसं फलं तत्साधनं च प्राहुः । मे भक्तिर्निराशिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकारणभूतापेक्षारहितस्य पुंसो भवेत् । यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः ॥ ३५ ॥ अनेन प्रकारेण सिद्धानां न गुणदोषा इति विरोधपरिहारमुपसंहरति । न मयीति । गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः साधूनां निरस्तरागादीनामतः समचित्तानामत एव बुद्धेः परमीश्वरं प्राप्तानाम् ॥ ३६ ॥ काम्यकर्मनिष्ठां निंदिष्यन्नेतान्मुक्तिमार्गानुपसंहरति एवमिति । मे पथो मत्प्राप्त्युपायान् येऽनुतिष्ठंति ते क्षेमं कालमायादिरहितं मम लोकं विंदंति । यत्परमं ब्रह्म तच्च विदुः ॥ ३७ ॥ इति श्रीमद्भागवत एकाशस्कंधे श्री० टीकायां विंशतितमोध्यायः ॥ २० ॥

इत्यांदिगीतावचनम् । यथा प्राप्तभगवत्पदतदीयवृन्दविशेषवद्वैकुंठेच्छा ते हि प्रेम्णा साक्षाच्छ्रीमद्भगवच्चरणारविन्दसेवेच्छयैव तत्प्रार्थ्य प्राप्तवन्तः । 'यच्च व्रजंत्यनिमिषामृषभानुवृत्त्या ' इत्यादिवत् ॥ ३२ ॥ ० ॥ * ॥ ० । ॥ ३३ ॥ तत्र वांछाभावे । इत्यर्थ इति—दीयमानास्वीकारिणां वांछाभावः परवैराग्यं बोधयतीति भावः ॥ * ॥ **दीपिका**—तत्र वांछाभावे । एकस्मिन्मय्येवांतो निष्ठा येषां ते एकान्तिनः । अत एकान्तित्वात् ॥ ३४ ॥ तत् नैरपेक्ष्यम् । निराशिष इत्युक्तेरेव निरपेक्षतापि ज्ञायत एवेति पुनर्विशेषणस्याचमत्कृतिहेतुत्वादाह—यद्वेति । इत्यर्थ इति—निरपेक्षाणामेव भक्तिर्भवति सकामानां तु मद्वार्तापि न रोचत इति भावः ॥ * ॥ नैरपेक्ष्यं साधनांतरफलान्तरापेक्षाराहित्यम् । हि परं जात्या श्रेष्ठम् । अनल्पकं प्रमाणेनात्यधिकं निःश्रेयसं भवति । निराशिषः फलान्तरकामनाशून्यस्य । निरपेक्षस्य ज्ञानवैराग्यादावपेक्षाशून्यस्य ॥ ३५ ॥ अनेन च भक्तिरूपेण । अतो निरस्तरागत्वात् । अत एव समचित्तत्वादेव । ' यो बुद्धेः परतस्तु सः ' इति श्रीगीतोक्तेः ॥ * ॥ यन्मयोक्तम्—" गुणदोषंदशिर्दोषो गुणस्तूभयवर्जितः " इति, तदेतादृशेषु भक्तेष्वित्याह—नेति । गुणदोषयोरुद्भवो येभ्यः सत्त्वरजस्तमोभ्यस्ते गुणा एकान्तभक्तानां न सन्ति किन्त्वप्राकृता एव गुणाः । यतो बुद्धेः प्रकृतेः परं सच्चिदानंदमेव वस्तु उपेयुषां न गुणमयं किञ्चिदपि मनइन्द्रियादिकम् ' निर्गुणो मदुपाश्रयः ' इत्यग्रिमोक्तेः । यद्वा—गुणदोषोद्भवा विधिप्रतिषेधनिबंधना गुणा न भवन्तीति नैषां शिष्टाचारे कोऽपि गुणो भवति नापि निषिद्धाचरणे कोऽपि दोष इत्यर्थः । समचित्तानामिति—भक्तानां समचित्तानामुक्तं चित्रकेतूपाख्याने शंभुना—" नारायणपराः सर्वे न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ॥ " इति । भक्त्या सिद्धेष्वेतेषु दोषदृष्टिर्न कर्तव्येति किं व्यक्तव्यं साधकेषु दुराचारेष्वपि सा न कार्या । एतच्च गीतं स्वयं भगवता—" अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ " इति ॥ ३६ ॥ एतान्पूर्वोक्तान्भक्तिज्ञानक्रियारूपान् ॥ * ॥ श्रेयोमार्गानुपसंहरति—एवमिति । येऽनुतिष्ठंति ते यथायोगं निष्कामकर्मिणः क्षेमं विंदन्ति भक्ताः मत्स्थानं वैकुण्ठं विंदन्ति ज्ञानिनो ब्रह्म विदुः साक्षात्कुर्वन्ति ॥ ३७ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे विंशोध्यायः ॥ २० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् ॥ क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरंति ते ॥ १ ॥
स्वेस्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ २ ॥

जयति स्वपरानंदः परानंदनृकेसरी ॥ यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती ॥१॥ ईक्षंतामिच्छया संतः क्षमंतां मम साहसम् ॥ मया हि स्वीयबोधाय कृतमेतन्न सर्वतः ॥२॥ एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणाम् ॥ कामिनां द्रव्यदेशादिगुणदोषाः प्रपंचिताः ॥३॥ तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तं तत्र ज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ। साधकानां तु प्रथमतो निवृत्तिकर्मनिष्ठानां यथाशक्तिनित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः तदकरणं निषिद्धकरणं च तन्मलीमसकरणत्वाद्दोषः । तन्निवर्तकत्वाच्च प्रायश्चित्तं गुणः । विशुद्धसत्त्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वाद्गुणः । भक्तिनिष्ठानां पुनः श्रवणकीर्तनादिभक्तिरेव गुणः । तद्विरुद्धं सर्वमुभयेषां दोष इत्युक्तम् । इदानीं ये तु न सिद्धा नापि साधकाः किंतु केवलं काम्यकर्मप्रधानास्तेषां सकलगुणदोषान्प्रपंचयिष्यान्नादौ तानतिबहिर्मुखान्निंदति । य एतानिति । मत्पथो मदुक्तमार्गान् क्षुद्रांस्तुच्छांश्चलैरस्थिरैः प्राणैर्देहवायुभिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति। निखिलगुणदोषभाक्त्वे नानायोनीः प्राप्नुवंतीत्यर्थः ॥१॥ ननु तैरेव कर्मभिः

स्वान्परांश्चानंदयति । यद्वा—स्वस्मिन्परास्तत्पराः स्वपरा भक्तास्तानानंदयतीति स्वपरानंदः । परानंदः परमानंदश्चासौ नृकेसरीति तथा । लवस्य लेशस्य लेशस्तेन। श्रीधरः कृती विद्वान् । सती श्रेष्ठा कृतिर्व्याकृतिर्यस्य स तथा जातः ‘ लब्धवर्णः कृती सूरिः ’ इति कोशात । इहार्णवप्रविष्टैरावर्तलंघनायेश्वरार्थनवत्स्वामिचरणैरपि क्रियायोगस्यावर्ततुल्यतां दुस्तीर्यतां लोकस्यालक्ष्य नृसिंहप्रार्थना कृतेति ध्येयम् (१)। तदेवाह—ईक्षंतामिति । इच्छया कृपया ‘ इच्छा वाञ्छानुकम्पयोः ’ इति धरणिः । साहसं चापलम् । स्वीयबोधाय स्वस्य विचाराय न सर्वतो न सर्वेषाम् अन्येषां मत्तोऽतीव संज्ञत्वात् । एतद्व्याख्यानम् (२)। कामिनां काम्यकर्मप्रधानानाम् (३)। तत्र एषु ज्ञानादियोगाधिकारेषु । तदकरणं नित्यनैमित्तिकाकरणं तन्मलीमसकरणत्वादन्तःकरणमालिन्यापादकत्वात् । तन्निवर्तकत्वान्मालिन्यनिवर्तकत्वात् । सिद्धिर्मोक्षस्तद्धेतुत्वात् । तद्विरुद्धं श्रवणकीर्तनादिविरुद्धं विचारविरुद्धं च । उभयेषां भक्तिनिष्ठानां ज्ञानाभ्यासिनाञ्च । तान्काम्यकर्मप्रधानान् । मत्प्रापकाः पन्थानो मत्पंथानस्तान् । यद्यपि प्राणसंबन्ध एव विषयसेवने हेतुस्तथापि मुख्यत्वं तत्रेन्द्रियाणामेवेत्याह—इन्द्रियैर्वेति । इत्यर्थ इति—विषयसेविनः संसरन्तीति भावः ॥ * ॥ सकामकर्मिणो निन्दन्ति—य इति । मत्पथः समासान्ताभावस्त्वार्षः । मत्प्रापकमार्गान् । भक्तिः साक्षान्मत्प्रापिका, ज्ञानं मम निर्विशेषरूपब्रह्मप्रापकं, क्रिया निष्कामकर्मपरंपरा तत्प्रापकम् ॥ १ ॥ न ह्येकस्य वस्तुनो विरुद्धक्रियाकारित्वमुचितमित्याक्षिपति—नन्विति । वस्तुनिष्ठौ वास्तवौ । इति भाव इति—गुणदोषयोर्वास्तवत्वे व्यवहारनिरोधः स्यादिति तात्पर्यम् । ननु किमिति कामिनामेव गुणदोषौ न भक्तिज्ञानादिमतां तत्राह—वस्तुयाथात्म्यवेदिनां कल्पितगुणदोषयोर्दृष्टावधिकार एव नास्तीत्युक्तम्—स्वेस्वेधिकार इति ॥ * ॥ ननु मया को गुणः को दोष इति त्वं पृष्टस्त्वया च मद्भक्तेषु ‘गुणदोषदृशिर्दोषः’ इति प्रत्युक्तं तत्राहमिदमाशंके यदि कश्चित्त्वत्कथादौ श्रद्धालुः शुद्धभक्त्यधिकारी प्रतिष्ठितैः कर्मिभिर्ज्ञानिभिर्वा युक्त्या दैवाद्वशीकृतस्तदनुगत एव सन् औषधपानन्यायेना रोचकमपि कर्म करोति ज्ञानं वाभ्यस्यति तदा तस्मिन्भक्ते किं गुणदोषदृशिर्दोषः किं तदभाव एव गुणः । किंच—यदि कश्चिदप्राप्तमहत्कृपत्वाद्भक्तावजातसम्यक्श्रद्धः गर्वी ज्ञानी वा भक्तोत्कर्षं दृष्ट्वा तादृशनिजोत्कर्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु॥ द्रव्यस्य विचिकित्साऽर्थं गुणदोषौ शुभाशुभौ ॥ ३ ॥

केचिद्गुणदोषभाजः केचिन्नेति कुतो वैषम्यं न ह्यग्निना केचित्तप्यंते केचिन्नेति संभवति तत्राह । स्वेस्व इति । अधिकारभेदेन कल्पितौ गुणदोषौ न वस्तुनिष्ठाविति भावः ॥ २ ॥ तदेवाह । शुद्ध्यशुद्धी इति । विचिकित्सार्थें संशयार्थें योग्यमयोग्यं वेति संदेहद्वारा स्वाभाविकप्रवृत्तिप्रतिबंधार्थमित्यर्थः । तत्र शुद्ध्यशुद्धी यो

कामनयैव स्वाधिकारप्राप्तानि कृत्यानि त्यक्त्वा तद्ददेव भगवन्तं भजन्नात्मानं वैष्णवत्वेन ख्यापयति तदा तस्मिंस्तस्मिन्दंभिनि जगद्वंचके किं गुणदृष्टिः कर्तव्या न वेति चेत्सत्यम्, शृणु तर्हि गुणदोषयोर्लक्षणमित्याह—स्वेस्व इति । ज्ञानिनो ज्ञान एव कर्मिणः कर्मण्येवाधिकारस्तत्रैव निष्ठानिष्ठितत्वं गुणः किंतु तयोः स्वतः फलदानासमर्थयोर्भक्तिमिश्रत्वेनैवानुष्ठेयत्वम् ‘ नैष्कर्म्यमप्यच्युतभाववर्जितम् ’ इत्यादेरन्यथा तु वैफल्यमेव, शुद्धभक्तस्य तु भक्तावेव निष्ठा गुणः । तस्यास्तु स्वत एव फलदानसामर्थ्यात् । कर्मज्ञानाद्यमिश्रत्वेनैवानुष्ठेयत्वम् ‘ धर्मान्संत्यज्य यः सर्वान्मां भजेत् ’ इति । ‘ न ज्ञानं न च वैराग्यम् ’ इत्यादेर्ज्ञानादेर्मिश्रत्वे सति तस्याः शुद्धभक्तित्वापगमः स्यात् । विपर्ययः पराधिकारनिष्ठत्वम् । उभयोः गुणदोषयोः ॥ * ॥ **संदर्भस्तु**—तत्र व्यावहारिकयोर्गुणदोषयोर्विधानार्थमधिकारमात्रस्य पूर्वानुवादेनैव गुणदोषौ लक्षयति—स्वेस्व इति । अधिकारे कामित्वनिष्कामत्ववैराग्यश्रद्धाभिर्यथायोग्यतयाऽधिक्रियमाणे योगविशेषे । उभयोर्व्यावहारिकपारमार्थिकाधिकारिणोः । किंतु—पूर्वत्र गुणत्वं कल्पितमुत्तरत्र तु सिद्धमेवेति भावः । अत्र ज्ञानकर्मणोर्भक्त्यंशं विना सिद्ध्यभावेन तन्मिश्रतयैव विहितत्वान्न तेन तत्रतत्र निष्ठाच्युतिः । किंतु—सर्वनिरपेक्षतया सर्वसाधिकायां भक्तावेव तत्तदंशमिश्रत्वे कृते निष्ठाच्युतिः स्यादिति गम्यते । तदेवं भक्त्यंशसहाया कर्मनिष्ठा कर्मठे गुणः, तथा तत्सहाया ज्ञाननिष्ठा ज्ञानिनि ततोऽपि गुणः, निष्किंचनभक्तिनिष्ठा तु भक्तेः सर्वोत्कृष्टो गुणः किमुत तत्साध्यप्रेमलक्षणा भक्तिरिति पूर्ववदेव प्राप्तः । एवमेतद्विपर्ययो न्यूनेधिके वाधिकारे प्रवेशो दोषः । न्यूने पूर्वहानेः, अधिके परासिद्धेश्चेत्यर्थः ॥ २ ॥ तत्कल्पितत्वम् । इत्यर्थ इति—योग्यायोग्यविचारं विना प्रतिहता प्रवृत्तिर्भवेदिति भावः । तत्र शुद्ध्यादिषु । ते योग्यत्वायोग्यत्वे निमित्ते कारणे ययोस्ते चोपादेयत्वानुपादेयत्वे । योग्यतावान्पदार्थो गुणत्वेनोपादेयस्तद्विपरीतोऽनुपादेयः । ते उपादेयत्वानुपादेयत्वे निमित्ते ययोस्तौ तथा । उपादेयत्वविशिष्टोऽर्थस्तद्विपरीतोऽनर्थ इत्यर्थः । यद्वा—तन्निमित्तेत्यस्य गुणदोषनिमित्तेत्यर्थः । तन्निमित्तौ शुभाशुभनिमित्ताविति समानेषु सच्चित्स्वरूपे मयि मायाकल्पितपंचभूतात्मकत्वेन तुल्येषु ॥ * ॥ अत्र व्यावहारिकेष्वपि स्वेस्व इत्यनुसारेणैव गुणदोषौ विवृणोति—शुद्ध्यशुद्धी इत्यादिना । तत्र शुद्धीति सार्धकम् । टीकायां धर्मार्थमिति प्रायिकमेव । विचिकित्साप्रस्थापनादिलक्षणव्यवहारार्थमपि तदुपयुक्तद्रव्यादीनां तत्तच्छास्त्रे शुद्ध्यशुद्धित्वशुभत्वाशुभत्वविधानदर्शनात् । एवमुत्तरत्रापि गुणदोषौ व्यवहारार्थमिति विनापि शुद्ध्यशुद्धिव्यवस्थां केवलं व्यवहारार्थमपि गुणदोषौ विधीयेते इत्यर्थः । शुभाशुभौ धर्मार्थमिति विनापि गुणदोषव्यवस्थां केवलवृत्त्यर्थमपि तौ विधीयेते इत्यर्थः । तस्माद्गुणदोषावित्यादिलक्षणे तूपलक्षणे एवेति भावः । अतः शुद्ध्यशुद्ध्यादियुग्मत्रिकेण धर्मार्थत्वादीनां योजना न यथासंख्यं सर्वत्र सर्वविधानदर्शनात् । व्यवहारोत्र परमार्थशास्त्रमात्रानुगतो न तु पूर्ववत्परमार्थेतरपद्धतिः, धर्मयात्रयोस्तादितरयोः पृथगुपादानात् ॥ * ॥ **दीपिका**—तदेवाह—गुणदोषयोः कल्पितत्वमेवाह । शुद्धीति सार्धकम् । विचिकित्साशब्दस्य विचिकित्साकार्ये प्रवृत्तिप्रतिबन्धं लक्षणाऽत इत्यर्थ इत्युक्तम् । तन्निमित्ते ते योग्यत्वायोग्यत्वे निमित्ते कारणे ययोस्तथाभूते, उपादेयत्वानुपादेयत्वे पुनस्तन्निमित्ते ते उपादेयत्वानुपादेयत्वे निमित्ते ययोस्तावर्थानर्थौ । तत्र शुद्ध्यशुद्ध्यादिमध्ये शुद्धेन देशकालादिषट्पदार्थेन व्यवहारार्थमिति विनापि शुद्ध्यशुद्धी व्यवस्थां केवलव्यवहारार्थमपि गुणदोषावुपादेयत्वानुपादेयत्वे विधीयेते । अत एवाशुद्धावपीति व्याख्यातम् । नान्यदिति प्रतिग्रहादिकं नोपादेयं यात्रार्थमिति । विनापि गुणदोषव्यवस्थां केवलवृत्त्यर्थमपि तौ शुभाशुभौ विधीयेते,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मार्थं व्यवहारार्थं यात्रार्थमिति चाऽनघ ॥ दर्शितोऽयं मयाऽऽचारो धर्ममुद्वहतां धुरम् ॥ ४ ॥ भूम्यंब्वग्न्यनिलाकाशा भूतानां पंच धातवः ॥ आब्र
ह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥ ५ ॥ वेदेन नामरूपाणि विषमाणि समेष्वपि ॥ धातुषूद्धव कल्प्यंत एतेषां स्वार्थसिद्धये ॥ ६ ॥

ग्यत्वायोग्यत्वे । गुणदोषौ तन्निमित्तोपादेयत्वानुपादेयत्वे । शुभाशुभौ तन्निमित्तावर्थानर्थौ ॥ ३ ॥ तत्र शुद्ध्यशुद्धी धर्मार्थम् । शुद्धेन धर्मः अशुद्धेनाधर्म इति । गुण
दोषौ व्यवहारार्थम् । अशुद्धावपि राजादीनां व्यवहारदर्शनाद्युपादेयं नान्यदिति । शुभाशुभौ यात्रार्थे दोषत्वेऽप्यापत्सु शरीरनिर्वाहमात्रोपादाने न पापमधिकोपादाने तु
पापमिति । मया मन्वादिरूपेण । धर्मरूपां धुरं भारमुद्वहताम् । कर्मजडानामित्यर्थः ॥ ४ ॥ शुद्ध्यशुद्धी प्रपंचयिष्यन्वेदोक्तत्वेन तदभिनिवेशो मा भूदिति समानेष्वपि
वस्तुष्विति यदुक्तं तत्प्रपंचयति भूमेति त्रिभिः । भूतानां प्राणिनाम् । धारयंतीति धातवः कारणानि । शारीराः शरीरारंभकाः । देहतः साम्यमुक्तं जीवतोऽप्याह । आत्म
संयुता इति ॥ ५ ॥ धातुषु देहेषु । नामरूपाणि वर्णाश्रमादीनि । कल्पनायाः प्रयोजनमाह । एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिपुरुषार्थसिद्धये ॥ ६ ॥

अत एव दोषत्वेऽपीति व्याख्यातम् ॥ ३ ॥ तदेव स्फुटयति—तत्रेति । तत्र शुद्ध्यादिषु । शुद्धेन शुद्धपदार्थस्वीकारेण धर्मः सिध्यति । व्यवहारार्थे व्यवहारसिद्धये गुणदोषावुभावपि ग्राह्यावेव । यथाऽशुद्धावपि
सूतकाद्यशौचेऽपि राजादीनां व्यवहारस्यर्णदानाद्यष्टादशविषयस्य दर्शनादि । प्रथमादिना ब्राह्मणानामपि यज्ञार्थमृत्विक्त्वेन वृतानामार्त्विज्यं कार्यमेव । द्वितीयादिना शांतिहोमादिग्रहः । नान्यदिति संध्यावंदनं विहायान्य
च्छ्रौतस्मार्तकर्मादि न कार्यमित्यर्थः । यत्तु छंदोगपरिशिष्टे—“ मृतके कर्मणां त्यागः सन्ध्यादीनां विधीयते ” इत्युक्तं तत् मानससन्ध्येतरपरमिति ज्ञेयम् । “ सूतके मृतके चैव संध्याकर्म न संत्यजेत् । जपेच्च
मानसीं सन्ध्यां प्राणायाममृते द्विजः॥ ” इति स्मृतेः । व्यवहारलक्षणमपि कात्यायनेनोक्तम्—“ विर्नानार्थेऽव संदेहे हरणं हार उच्यते । नानासंदेहहरणाद्व्यवहार इति स्मृतः ॥ ” इति । विरुद्धार्थिप्रत्यर्थिवाक्यजनितसंदेह
हारी विचार एव व्यवहार इति निर्गलितोऽर्थः । राजादीनामशौचाभावो मनुनोक्तः—“ न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम । ऐन्द्रं स्थानं समासीना ब्रह्मभूता हि ते सदा ॥ ” इति । राज्ञामभिषिक्तक्ष
त्रियाणाम् । ऐन्द्रस्थानं राज्याभिषेकाख्यम् । व्रतिनां ब्रह्मचारिणां चान्द्रादिव्रतकारिणां वा । सत्रिणां यागप्रवृत्तानां यतस्ते ब्रह्मेव निष्पापाः । अशौचाभावश्च कर्मविशेष एव न सर्वथेति । तदाह विष्णुः—
“ अशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे ” इति । राजकर्म च व्यवहारदर्शनशांतिहोमादिकर्माणीत्यलं प्रसक्तानुप्रसक्तेन । यात्रार्थे देहनिर्वाहार्थम् । इत्यर्थ इति—न त्विहामुत्र विरक्तानां
मदेकपराणामिति भावः ॥ * ॥ दर्शित इत्यर्धकम् । धर्ममुद्वहतां धुरमिति मद्भक्तिमुद्वहतामाचारः सुखमय एवेत्यर्थः । सुखस्वरूपया भक्त्यैव प्रवृत्तत्वादिति ॥ ४ ॥ तस्यां
शुद्धावशुद्धौ चाभिनिवेशो हठेन संपादनमत्यासक्तिरिति यावत् । आत्मसंयुताः अनुगतसच्चिदात्मना देहादिषु संघातेषु स्फुरता संयुताः ॥ * ॥ वेदप्रोक्तत्वेन हेतुना भक्तस्य तदभिनिवेशः । शुद्ध्य
शुद्ध्यासक्तिर्मा भून्न भवत्विति हेतोः । तत्समानत्वम् । कारणानि शरीरेभ्यः पूर्ववर्तीनि । अत एव शरीरारंभकाः शरीरजनकाः । औत्पत्तिकत्वेन सर्वदेहानां समत्वाज्जीवानां देहतः साम्यमुक्तम् ॥ ५ ॥ उद्ध
वेति संबोधयन्नुद्धवादिनामवत्कल्प्यंत इति सूचितवान् ॥ * ॥ वर्णाश्रमादीनि ब्राह्मणब्रह्मचर्यादीनि नामानि, रूपाणि द्विपदत्वानि उत्तममध्यमाधमत्वानि च । व्याख्येयं प्रवृत्तिनियमद्वारा प्रवृत्तिसंकोचक्रमेणं ।
आदिना मोक्षपर्यन्तानां परिग्रहः ॥ * ॥ **विश्वनाथस्तु**—धातुषु देहेषु । समेष्वपि नामरूपाणि वाचकवाच्यानि ब्राह्मणोऽयमिति, ब्रह्मचार्ययमिति, तांबूलिकतैलिकादिरयमिति वर्णाश्रमादिनिबंधनानि कल्पनाय।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देशकालादिभावानां वस्तूनां मम सत्तम ॥ गुणदोषौ विधीयेते नियमार्थं हि कर्मणाम् ॥ ७ ॥
अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोप्यसौ वीरकीकटासंस्कृतेरिणम् ॥ ८ ॥

न केवलं देहेष्वेवापि तु देशकालादिभावानामपि । आदिशब्देनानुपादेयानां फलनिमित्ताधिकारिणां ग्रहणम् । वस्तूनामुपादेयानां व्रीह्यादीनामपि । मम मया । नियमार्थं प्रवृत्तिसंकोचार्थमित्यर्थः ॥ ७ ॥ एवं गुणदोषविषयं परिशोध्य तयोः शुद्ध्यशुद्धिमूलत्वाच्छुद्ध्यशुद्धी प्रपंचयति अकृष्णसार इत्यष्टभिः । देशानां मध्ये कृष्णहरिणरहितोऽशुचिः । तत्राप्यब्रह्मण्यो ब्राह्मणभक्तिशून्योऽत्यंतमशुचिः । कृष्णसारोऽपि कृष्णेन मृगेण सारः श्रेष्ठो यः सोऽप्यसौ वीरकीकटः सुवीराः सत्पुरुषास्तद्वान्सौवीरः तादृशो न भवति स कीकटतुल्यः अर्थात् सौवीरः कीकटोपि शुचिः । तदुक्तम् । "स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते" इति । तद्वर्जितो यः कीकटोंगवंगकलिं

हेतुः । एतेषां प्राणिनामिति तैः ॥ * ॥ संदर्भस्तु—समेषु सर्वेषामात्मसंयतत्वाद्गुणाधिक्याभाववत्सु भौतिकत्वाद्दोषत्वाविशेषेष्वपि नामानि ब्राह्मणादीनि, रूपाणि उत्तमादित्वेन भिन्नानि, निंबभेदस्वादुवद्गुणदोषतया कल्प्यन्ते केवलमुपचर्य्यंते । किमर्थम्—स्वाधिकारानुरूपायामेव प्रवृत्तौ जीवानां स्वार्थो धर्मादिः सिद्ध्यति तेन प्रवृत्तिसंकोचात् क्रमेण मोक्षश्च सिद्ध्यतीत्येतदर्थमित्यर्थः ॥ ६ ॥ उक्तार्थमन्यत्रातिदिशति—न केवलमिति । अनुपादेयानामस्वीकार्याणाम्, हस्तादिना ग्रहीतुमशक्यानाम् । यद्यपि फलनिमित्तयोरमूर्तत्वेन ग्रहणमशक्यमधिकारिणस्तु मूर्तत्वेनोपादानं सुकरमिति चेदत्र शुद्धं चित्तमेवाधिकारि न तु तन्मूर्तमिति । आदिनाऽन्यधान्यग्रहः । विधीयेते अनूद्येते । इत्यर्थ इति—स्वाभाविकप्रवृत्तकर्मणां संकोचार्थमेव गुणदोषविधानमिति भावः ॥ * ॥ दीपिका—फलनिमित्ताधिकारिणां कामिनां, कीदृशानाम्—अनुपादेयानाम् 'वेदा ब्रह्मात्मविषयाः' इति वक्ष्यमाणत्वाच्चित्तशुद्ध्यर्थमेव कर्माणि विहितानि न काम्यफलार्थमतः फलमुद्दिश्य कर्तारो हि अयोग्या एवात एवानुपादेया इति तेषां निखिलगुणदोषौ विधीयेते इत्यर्थः । उपादेयानां यागादिकर्मणि योग्यत्वेन ग्राह्याणामित्यर्थः । नियमशब्दस्य व्यवस्थार्थत्वाद्व्यवस्थायाश्च संकोचे पर्यवसानादित्यर्थ इत्युक्तं संदर्भे नियमार्थे व्यवस्थार्थे संकोचार्थे च । तदेतच्च श्रीभगवत्संबंधं विनैव, तत्संबंधे तु 'निर्गुणो मदपाश्रयः' 'मन्निकेतं तु निर्गुणम्' इत्यादिवक्ष्यमाणत्वात् प्राकृतगुणातीतगुणाश्रयस्य ममेति वेदात्मकेन मयेत्यर्थः ॥ ७ ॥ परिशोध्य दर्शयित्वा । तयोर्गुणदोषयोः । शुद्ध्यशुद्धी मूलं कारणं ययोस्ते तथा तयोर्भावस्तथा तस्मात् "कृष्णसारो मृगो यत्र धर्मदेशः स उच्यते" इति गारुडोक्तेः । तत्रापि कृष्णहरिणसंचारसत्त्वेपि । सत्पुरुषाः हरिभक्ताः श्रोत्रियाः । तद्विवर्जितः सत्पात्ररहितः । आदिना सौराष्ट्रादिग्रहः । तदुक्तम्—"अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च । तीर्थयोगं विना गत्वा पुनः संस्कारमर्हति ॥" इति । आदिना लेपनग्रहः । संमार्जनादिशून्यत्वेनाशुचित्वे तीर्थोपान्त्यदेशस्याशुचित्वं स्यादत आह—म्लेच्छबहुलो वेति । "गोमांसभक्षको यस्तु लोकबाह्यञ्च भाषते । सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते॥" । अमरेण तु—"भेदाः किरातशबरपुलिंदा म्लेच्छजातयः" इति । एकवद्भावः कीकटादीनां समाहारद्वन्द्वात् । तत् सः । तदन्यः कीकटाद्यन्यः ॥ * ॥ गुणदोषविषयं देशकालादिषट्कं विविच्य तयोर्गुणदोषयोः । तत्राप्यकृष्णसारत्वेपि । कीकटः कलिंगादिः । सत्पुरुषवर्जितोऽशुचिः । कीकटश्चासंस्कृतश्चेरिणं चेति समाहारद्वन्द्वत्वादेकवद्भावः । तदन्यः असौवीरादन्यो भक्तवान् कीकटादिरपि शुचिरित्यर्थात्तात्पर्यवशादुक्तम् ॥ * ॥ संदर्भः—कृष्णमृगेण श्रेष्ठोऽपि सुवीरैर्ब्राह्मणैः हीनश्चेदकीकटोप्यशुचिः, तद्युक्तश्चेत्कीकटोऽपि शुचिरिति । अब्रह्मण्या ब्राह्मणभक्तिशून्या यत्र संति स त्वत्यंतमशुचिः । 'भगवत्कलावीरकुलं कदर्थीकृत्य' इत्यत्र पञ्चमस्कन्धे वीरशब्दो विप्रपरत्वेन प्रयुक्तः, सुष्ठुवीरः सुवीरः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा ॥ यतो निवर्तते कर्म स दोषोऽकर्मकः स्मृतः ॥ ९ ॥ द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च ॥ संस्कारेणाथ कालेन महत्त्वाल्पतयाऽथ वा ॥ १० ॥ शक्त्याऽशक्त्याऽथ वा बुद्ध्या समृद्ध्या च यदात्मने ॥ अघं कुर्वंति हि यथा देशावस्थानुसारतः ॥ ११ ॥

गादिः असंस्कृतः संमार्जनादिशून्यो म्लेच्छबहुलो वा । ईरिणमूषरम् । एकवद्भावः । तदशुचि । तदन्यः शुचिरित्यर्थादुक्तं भवति ॥ ८ ॥ कालस्य शुद्ध्यशुद्धी दर्शयति । कर्मण्य इति । द्रव्यतो द्रव्यसंपत्त्या स्वतो वा पूर्वाह्णादिर्यः कर्मण्यः कर्मार्हः स कालस्तस्मिन्कर्माणि गुणवाञ्छुद्ध इत्यर्थः । यतो यस्मिन्द्रव्यालाभेन वा राष्ट्रविप्लवादिना वा कर्म निवर्तते । यश्च सूतकादौ दशाहादिलक्षणोऽकर्मकः कर्मानर्हः स्मृतः स कालो दोषः । अशुद्ध इत्यर्थः ॥ ९ ॥ वस्तुशब्दोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति द्रव्यस्येति चतुर्भिः । द्रव्येण तोयादिना शुद्धिर्मूत्रादिना त्वशुद्धिः । वचनेन शुद्धमशुद्धं वेति संदेहे शुद्धमित्येवंरूपेण ब्राह्मणवचनेन शुद्धिर्विपरीतेनाशुद्धिः । संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिरवघ्राणादिना त्वशुद्धिः । कालेन दशाहादिना नवोदकादेः शुद्धिः । "काले मेघोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि । अकाले दशरात्रं स्यात्ततः शुद्धिर्विधीयते ॥" विपरीतेनाशुद्धिः पर्युषितान्नादेरशुद्धिः । अंत्यजाद्युपहतानां तडागाद्युदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी ॥ १० ॥ शक्त्याऽशक्त्या सूर्योपरागादिसूतकान्नादेः शक्तान्प्रत्यशुद्धिरशक्तान्प्रति शुद्धिः । बुद्ध्या पुत्रजननादौ दशाहाद्बहिर्ज्ञानेन शुद्धिरंतर्ज्ञानेनाशुद्धिः । समृद्ध्या जीर्णमलवद्वस्त्रादेः समृद्धं प्रत्यशुद्धिर्दरिद्रं

सुपदं भगवत्कलार्थबोधकम् । तेन हि वेदशास्त्रवित्त्वमुक्तं, वेदविद्ब्राह्मणनिवासशून्योऽसौवीर इति सिद्धम्॥८॥आदिना मृतकादिग्रहः।इत्यर्थ इति—"यस्मिन्काले शुभं कर्म स कालः शुद्ध ईरित" इत्युक्तेरिति भावः॥०॥*॥९॥ द्रव्यस्य ताम्रादेः । आदिनाम्लादिग्रहः । पुनरादिना श्लेष्मादिग्रहः । वचनेनार्षवाक्येन । यथालाब्वादिपात्रं यतेः शुद्धं तदितरेषामशुद्धम् । तथाहि—"अलाबूर्दारुपात्रं वा मृन्मयं वैणवं तथा । एतानि यतिपात्राणि नेतरेषां कदाचन ॥" इत्यादिस्मृतिवचनेन शुद्धिरशुद्धिश्च । एवं मृगचर्मशंखादेर्वचनेन शुद्धिस्तदितरचर्मास्थ्यादेर्वचनेनैषाशुद्धिः । आदिना गलितपत्रापाकरणादिग्रहः । द्वितीयादिना पत्रादिग्रहः । यस्मात्कस्माद्गृहीतं पुष्पादि प्रोक्षयित्वा तेनार्चनादि कुर्यात् । बिल्वपत्रतुलसीकुशपत्राणि च द्विजेतरानीतानि न गृह्णीयात् । "तुलसीबिल्वपत्राणि कुशपत्राणि वा द्विजः । द्विजानीतानि गृह्णीयाद्दैवे पित्र्ये च कर्मणि ॥" इत्युक्तेः । अवघ्राणं गंधोपादानम् । आदिनांगोपरिस्थापनादिग्रहः । काले वर्षर्तौ । अकाले वर्षर्तुभिन्नकाले । आदिना त्र्यहादिग्रहः । द्वितीयादिना सूतकादिग्रहः । "विप्रः शुद्ध्येद्दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥" । एवम्—"दशाहेन सपिण्डास्तु शुध्यंति प्रेतसूतके । त्रिरात्रेण सकुल्यास्तु स्नानमात्रेण गोत्रजाः ॥" इत्यादि । विपरीतेन उक्तविपर्ययेण । पर्युषितमत्र रात्र्यंतरितम् । आदिना जलादिग्रहः । "वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् । अवर्ज्यं जाह्नवीतोयं तुलसीबिल्वपद्मकम् ॥" इत्याद्युक्तेः । आदिना वाप्यादिग्रहः । अल्पत्वं च सहस्रघटपूर्तिन्यूनत्वं तडागाद्येकदेशस्थत्वं वा "तत्राक्षोभ्यतडागानि नदी वाप्यः सरांसि च । कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत् ॥" इति देवलोक्तेः ॥ * ॥ ० ॥ १० ॥ सूर्योपरागादीनां यत्सूतकं तत्रस्थं यत्पक्वान्नादि । अत्राद्यादिपदेन चन्द्रोपरागग्रहः । द्वितीयेन तोयादिग्रहः । "सर्वेषामेव वर्णानां सूतकं राहुदर्शने । स्नात्वा कर्माणि कुर्वीत श्रृतमन्नं परित्यजेत् ॥" इति मेधातिथिः । तत्रापि शुद्ध्यशुद्धिविचारेऽपि । अघं दोषम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धान्यदार्वस्थितंतूनां रसतैजसचर्मणाम् ॥ कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः ॥ १२ ॥

प्रति शुद्धिः । तत्रापि विशेषमाह । यदिति । एते च द्रव्यवचनादयो द्रव्याशुद्धिद्वारा आत्मने यदघं कुर्वंति तद्देशावस्थानुसारत एव यथा यथावत्कुर्वंति न सर्वतः । तथाहि निर्भय एव देशे कुर्वंति न तु चौराद्याकुले । तथा रोगादिव्यतिरिक्तयुवाद्यवस्थायामेव कुर्वंति न बाल्यरोगाद्यवस्थायामिति । तथाच स्मृतिः "देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत ॥" इति ॥ ११ ॥ द्रव्यादिभिर्द्रव्यस्य शुद्धिरित्युक्तं तत्र वचनादिशुद्धिरेकरूपैव । द्रव्यतस्तु शुद्धिर्बहुरूपेति तां प्रपंचयति । धान्येति । दारु लौकिकं ग्रहचमसादि च । अस्थि गजदंतादि । रसास्तैलघृतादयः । तैजसाः सुवर्णादयः । तेषां पार्थिवानां च रथ्याकर्दमघटे

देशावस्थानुरोधेन शौचं कार्यमित्यत्र स्मृतिं प्रमाणयति—तथा चेति । आत्मानं शरीरं, द्रव्यं मृत्तोयादि, तत्प्रयोजनं तदुत्पादितां शुद्धिम् । एतावतेयती शुद्धिः स्यादित्यतोऽधिकं न ग्राह्यम् । उपपत्तिं यदि तुलसीमूलदेशस्थमृदेव पुनाति तर्हि तुलसीपत्रादि कथं न पुनाति पुनात्येवेत्येवंरूपां युक्तिं च । अवस्थां बालरोगादिरूपाम् "बालानां प्रोक्षणाच्छुद्धिरार्तानामच्युतस्मृतेः" इत्यादिस्मरणान्नह्यशुचिबालार्तवृद्धानां पावित्र्यार्थं शीततोयस्नानादावाग्रहः कार्य इति बोधायनोक्तस्मृतिपदार्थः । यद्वा—द्रव्यं तत्तद्देशीयमृज्जलादि तेनैव शौचादिकार्यं । न तु गिरिष्ठस्तदधोदेशांतरीयमृज्जलाद्यपेक्षेतेत्यर्थः । तदुक्तं मरीचिना—" येषु देशेषु यच्छौचं धर्माचारश्च यादृशः । तत्रत्यं नावमन्येत धर्मस्तत्रैव तादृशः ॥ यत्र देशेषु ये देवा येषु देशेषु ये द्विजाः । येषु स्थानेषु यत्तोयं या च तत्रैव मृत्तिका ॥ तत्र तान्येव गृह्णीयात्तत्रत्यैरेव मानवैः ।" इति ॥ * ॥ दीपिका—स्मृत्यर्थस्तु—देशं निर्भयदेशं, कालं महर्घादिदोषशून्यम्, आत्मानं ब्राह्मणादिरूपं, द्रव्यमल्पबहुधान्यादिरूपं, द्रव्यप्रयोजनं च, यदि पक्वान्नादि विवाहादौ भोजनादिप्रयोजनं सद्य उपस्थितं तर्हि "तन्मात्रद्रव्यमुद्धृत्य शेषं संस्कारमर्हति" इत्युक्तेः । उपपत्तिं युक्तिम् । यथा—प्रोक्षणमात्रेण पुस्तकशुद्धिर्न तु प्रक्षालनतापनादिना मूलनाशापत्तेः, इति शौचान्यथानुपपत्त्या प्रोक्षणमात्रमेव तच्छोधकं कल्प्यते । अवस्थां बालाद्यवस्थाम् । यथा—"अहस्तदत्तकन्यासु बालेषु च विशोधनम्" अदत्ता अपरिणीता याः कन्यास्तासु कृतचूडासु वाग्दानात्प्राक् अहोरात्रं विशोधनं सपिंडानां सापिंड्यं च कन्यानां त्रिपुरुषपर्यन्तमेव । "अप्रत्तानां तु स्त्रीणां त्रिपुरुषीं विज्ञाय" इति वसिष्ठवचनात् । बालेषु चानुत्पन्नदन्तेषु अग्निसंस्कारे सत्येवाहोरात्रं विशोधनम् । एवम् 'वृद्धबालातुरान्विना' इत्युक्तेः सूतकादौ तेषां शुद्धिर्विज्ञेया ॥ ११ ॥ तत्र तासु शुद्धिषु । वचनादीहादिना कालादिग्रहः । लौकिकं पाकाद्यर्थानीतम् । ग्रहचमसादीनि यज्ञपात्राणि । आदिना प्राशित्रादिग्रहः । आदिना शंखादिग्रहः । यथायथं स्मृत्युक्त्यनुसारेण । तत्रापि कालादिना शोधनेपि । यावत्स्थलकालादिभिरशोधितं तावदेव शोधयेदित्यर्थः । एतैः कालादिभिः । अन्यैः फेनिलादिभिः । तथाहि मनुः—" मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि । चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन च ॥ चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा । स्याच्छूर्पशकटानां च मुसलोलूखलस्य च । अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् । प्रक्षालनेन स्वल्पानामद्भिरेव विधीयते ॥ चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च । शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते ॥ प्रोक्षणात्तृणकाष्ठानि पलालञ्च विशुद्ध्यति । मार्जनोपाञ्जनैर्वेश्म पुनःपाकेन मृन्मयम् ॥" उपांजनं लेपनम् । वायुः—" मणिवज्रप्रवालानां मुक्ताशंखोपलस्य च । सिद्धार्थानां तु कल्केन तिलकल्केन वा पुनः ॥" बोधायनः—" आसनं शयनं यानं नावः पंथास्तृणानि च । मारुतार्केण शुद्ध्यन्ति पक्वेष्टिकचितानि च ॥ आत्मशय्यासनं वस्त्रं जायापत्यं कमण्डलुः । शुचीन्यात्मन एतानि परेषामशुचीनि च ॥" इति । "सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानि च । कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥ निर्लेपानि च शुद्ध्यन्ति केवलेनोदकेन च ।" । हारीतस्तु—' अद्भिः कांचनरत्नानाम्'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमेध्यलिप्तं यद्येन गंधं लेपं व्यपोहति ॥ भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते ॥ १३ ॥

ष्टकादीनां यथायथं कालादिभिः शुद्धिः । तत्रापि काकांत्यजाद्युपघाततारतम्येन देशकालावस्थाद्यनुसारेणैव एतैरन्यैर्वा युतायुतैर्मीलितैः केवलैश्च । कालस्य पुनर्ग्रहणं युतत्वप्रदर्शनार्थम् ॥ १२ ॥ अस्पृश्यस्पर्शे शुद्धिमुक्त्वा लेपविषयेऽप्याह । यत्पीठपात्रवस्त्रादि येन तक्षणक्षाराम्लोदकादिना गंधं लेपं च व्यपोहति त्यजति स्वगतं च मलं त्यक्त्व प्रकृतिं स्वमेव रूपं भजते तस्य तच्छौचं शोधकम् । यावता च तक्षणादिना व्यपोहति तावत्प्रमाणं स्वरूपत आवृत्तितो वा तत्कर्तव्यमिष्यते ॥ १३ ॥

तद्गुणवर्णयोगात् । स्नेहवैवर्ण्योपहतानां यवगोधूमकलायमाषगोमयचूर्णैर्गोरोचनाद्भिः प्रक्षालनम् । अम्ललवणाभ्यां ताम्राणां, भस्मना कांस्यानां, शाणघर्षणैः शैलानां, शिलावघर्षणमार्जनैर्मणिमयानां, निर्लेखनैर्दारुमयानां, पुनःपाकेन मृन्मयानां, गोमयगोमूत्रैर्वेणुदलानां, गोवालरज्ज्वा सोदकया फलपात्राणां, मार्जनं कमण्डलूनां यतिपात्राणां च, क्षारोदकाभ्यां कार्पासशणमयानां, पुत्रजीवारिष्टकैः क्षौमदुकूलानां, पुत्रजीवोदश्विद्भिश्चीनानां, श्रीफलयुतश्वेतसर्षपैः कौशेयानाम्, उदश्विद्वल्मीकमृत्तिकया सर्षपैरूर्णानां, स्नेहसक्तुकुल्माषोद्वर्तनैर्गुरूणाम् । " पक्वान्नं तु गवाघ्रातं मक्षिकाकेशदूषितम् । छागाघ्रातं च तत्कृत्वा शोध्यं रत्नांबुभि. सह ॥ " मनुः–" देवद्रोण्यां विवाहे च यज्ञेषु प्रकृतेषु च । काकैः श्वभिश्च यत्स्पृष्टं तदन्नं नैव दुष्यति ॥ तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति । धन्यानां प्रोक्षणाच्छुद्धिर्द्रव्याणामग्नितापनात् ॥ " शातातपः–" गोकुले कन्दुशालायां तैलयंत्रेक्षुयंत्रयोः । अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च ॥ " देवलः–" दहनं खननं भूमेरुपलेपनवापनम् । पर्जन्यवर्षणं चैव शौचं पंचविधं स्मृतम् ॥ सूर्येन्दुरश्मिपातेन मारुतस्पर्शनेन च । गवां मूत्रपुरीषेण शुध्यंत्याप इति स्मृतिः ॥ " इति गुरुः । विष्णुः–" वेदमंत्राः कुशाश्चैव ब्राह्मणाश्च हुताशनः । नैते निर्म्माल्यतां यांति क्रियमाणाः पुनःपुनः ॥ " अस्यापवादमाह स एव–" मंत्राः शूद्रेषु निर्माल्या ब्राह्मणाः प्रेतभोजने । कुशाः पिंडेषु निर्माल्याश्चितायां च हुताशनः ॥ " इत्यलमतिप्रपञ्चेन ॥ * ॥ **दीपिका**–तत्र द्रव्यशुद्धौ । तां द्रव्यतः शुद्धिम् । यथायथं धर्मशास्त्रानुसारेण । तत्र धान्यानां शुद्धिः प्रोक्षणात् । यथाह बोधायनः–" व्रीहयः प्रोक्षणादद्भिः शाकमूलफलानि च । तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन वा ॥ " इति । लौकिक काष्ठस्य तक्षणादिना " काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि " इति यावज्ञवल्क्योक्तेः । गजदंतादेस्तु गोमूत्रादिभिः " गोमूत्रेणास्थिदंतानां क्षौमाणां गौरसर्षपैः " इति यमोक्तेः, " सिद्धार्थकानां कल्केन दंतशृंगमयस्य च । गोबालैः फलपात्राणामस्थ्नां स्याच्छृंगवत्तथा ॥ " इति शंखोक्तेश्च । तैलघृतादीनां तु श्रपणादिना " श्रपणं घृततैलानां प्लावनं गोरसस्य च । भांडानि क्षालयेदद्भिः शाकमूलफलानि च ॥ " इति शंखोक्तेः । अत्र चाद् घृततैलयोरपि प्लावनम् । प्लावनं वस्त्रांतरितपात्रे प्रक्षेपः । तस्मिन्नेव पात्रे यथा तद्बहिर्निःसरति तथा तज्जातीयद्रव्येण पूरणं वा । सुवर्णादीनां च जलादिना " सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानि च । कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥ निर्लेपाणि च शुद्ध्यन्ति केवलेन जलेन च । शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः ॥ " इति ब्राह्मादित्यपुराणोक्तेः । रथ्या राजमार्गस्तस्या मारुतार्कादिना शुद्धिः । " आसनं शयनं यानं नावः पंथास्तृणानि च । मारुतार्केण शुद्ध्यन्ति पक्वेष्टकचितानि च ॥ " इति बोधायनः । एवं कर्दमस्यापि । घटादेस्तु–" मृन्मयानां तु पात्राणां दहनाच्छुद्धिरिष्यते " इति देवलः । ' पुनःपाकेन मृन्मयम् ' इति मनुयाज्ञवल्क्यौ । चर्मणां तु ' कृष्णाजिनानां वातैश्च ' इति यमोक्तेः । तत्रापि पूर्वोक्तशुद्धावपि । एतैः कालादिभिरन्यैश्च गौरसर्षपादिभिः कार्पासिकवस्त्रादीनां शुद्धिः । युतैः यथा–तैजसानां मृत्तोयादिभिः । अयुतैरेकेनैव यथोर्णातन्तूनां केवलवायुनेति ॥ १२ ॥ अमेध्येन असृगादिना लिप्तम् । मलमूत्रासृक्पूयरेतोवसामज्जादीनि मुनिभिरमेध्यान्युक्तानीति । आदिना भूषादिग्रहः । द्वितीयादिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नानदानतपोऽवस्थावीर्यसंस्कारकर्मभिः ॥ मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद्द्विजः ॥ १४ ॥ मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणम् ॥ धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः ॥ १५ ॥ क्वचिद्गुणोपि दोषः स्याद्दोषोपि विधिना गुणः ॥ गुणदोषार्थनियमस्तद्भिदामेव बाधते ॥ १६ ॥

एवं तावद्द्रव्यशुद्धिरुक्ता इदानीं कर्तृशुद्धिमाह। स्नानेति। तपः कृच्छ्रादि। अवस्था कौमारादिः।वीर्यं शक्तिः।संस्कार उपनयनादिः।कर्म संध्योपासनदीक्षादिलक्षणम्। आत्मनः साहंकारस्य कर्तुरेतैः स्नानादिभिर्यथायथं तत्कार्यानुसारिणी शुद्धिः। इयं च शुद्धिर्न व्यवहारार्था किंतु विहितकर्मार्थेत्याह।शुद्ध इति।द्विज इत्युपलक्षणं शूद्रादेरपि॥ १४॥ मंत्र शुद्धिमाह। सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः।कर्मशुद्धिमाह। ईश्वरार्पणं कर्मणः शुद्धिः। धर्माद्यर्थं शुद्ध्यशुद्धी प्रपंचतः प्रदर्श्योपसंहरति। धर्म इति। देशकाल द्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते। एतेषां यो विपर्ययः सोऽधर्मस्तद्धेतुरित्यर्थः ॥ १५ ॥ अयं च गुणदोषविभागो न वास्तव इत्याह। क्वचिदिति। आपदि प्रतिग्रहो गुणोऽप्यनापदि निषिद्धत्वाद्दोषः। परधर्मश्च परस्य गुणोऽपि स्वस्य दोषः। दोषोऽपि कुटुंबत्यागादिर्विरक्तादेर्न दोषोऽपि तु विधिबलेन गुणः। एवं योऽयं गुणदोष

मार्जनादिग्रहः । तस्य पीठपात्रादेः। स्वरूपतः सकृत् ‘ सकृत्स्वरूपेऽनावृत्तौ च’ इति कोशान्तरे । सकृत्तक्षणादिना शुद्ध्यभावे पुनरावृत्तिरिति ॥ * ॥ यावतेति–तक्षणादिना यद्येकावृत्त्या तद्गतगंधलेपादि र्नापगमेत्तदा वारंवारं तत्कर्तव्यम् “ यावन्नापैत्यमेध्याक्ताद्गंधो लेपश्च तद्गतः। तावन्मृद्वारि वा देयं सर्वासु द्रव्यशुद्धिषु ॥ ” मृद्वारि इत्युपलक्षणं कल्कादेरपि ॥ १३ ॥ यथायथं यथोचितं, शौचं कृत्वेति शेषः। अवस्थयापि शुद्धिरस्ति, यथा कुमारादेः । शक्त्यापि शुद्धिरस्ति, यथा राजादेः ॥ * ॥ स्नानेति–तत्र स्नानेन देहशुद्धिस्तया देवार्चनादिसिद्धिः । दानेन मनःशुद्धिस्तया विषयभोगेपि पापाभावसिद्धिः । यथाह गार्ग्यः–‘ अकार्यकारिणां दानम् ’ इति। एवं ग्रहनिमित्तदानेन ग्रहशांतिलक्षणकार्यसिद्धिर्ज्ञेया। तपसा कृच्छ्रचान्द्रायणादिना पापप्रायश्चित्तसिद्धिः । अवस्था कौमारादिस्तया च शुद्धिः। यथा हरिहरभाष्ये–“ शिशो रभ्युक्षणं कार्यं बालस्याचमनं स्मृतम्। रजस्वलादिसंस्पर्शे स्नातव्यं च कुमारकैः ॥ ” इति। बालादयोऽपि तत्रैव लक्षिताः–“ प्राक्क्रीडाकरणाद्बालः प्रागन्नप्रशानाच्छिशुः। कुमारस्तु स विज्ञेयो यावन्मौंजीनिबं धनम् ॥ ” इति । तया च शुद्ध्या शिशुस्पर्शादिकार्यसिद्धिः । शक्त्या च ग्रहणादौ व्रतादिकार्यसिद्धिः। उपनयनादिसंस्कारेण यज्ञयोग्यतालक्षणकार्यसिद्धिः। सन्ध्योपासनादिकर्मणा पापापनोदकार्यसिद्धिरिति तत्तत्का र्यानुसारिणी शुद्धिर्वा ज्ञेया। आत्मनः शौचं शुद्धिमाचरेत्ततः शुद्धः सन्वेदविहितं कर्माचरेदिति । मत्स्मृत्येति स्वातंत्र्योक्तेः । ‘ अपवित्रः पवित्रो वा ’ इत्यादेः । अतोऽप्रतिकार्याशुद्धिशोधनायेयं प्रोक्ता मत्स्मृ तिलक्षणा न व्यावहारिकी मंतव्या, किंतु परमस्वतंत्रा सर्वत्राव्यभिचारत्वात्। “ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ” इत्याद्युक्तेः ॥ १४ ॥ यथावत् देवर्षिच्छंदोविनियोगपूर्वकम्। “ ऋषिच्छंदोऽपरिज्ञानान्न मंत्र फलभाग्भवेत्। दौर्बल्यं यांति मन्त्राश्च विनियोगमजानताम् ॥ ” इति तंत्रसारात्। याज्ञवल्क्योऽपि–“ आर्षं छंदश्च दैवत्यं विनियोगस्तथैव च। वेदितव्यः प्रयत्नेन ब्राह्मणेन विपश्चिता ॥ अविदित्वा तु यः कुर्याद्या जनाध्यापनं जपम्। होममंतर्जलादीनि तेभ्योऽल्पाल्पफलं भवेत् ॥ ” इति। कर्मणामीश्वरार्पणेनैव शुद्धिः। “ यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्। न्यूनं पूर्णमशुद्धं तु शुद्धं स्यादन्यथान्यथा ॥ ” इति स्मृतेः। एतेषां देशकालादीनाम्। इत्यर्थ इति–देशकालादिविपर्ययेण कृतं कर्माधर्महेतुर्जायत इति भावः ॥ * ॥ एतेषां देशादिषण्णाम् । विपर्ययोऽशुद्धत्वम्। सोऽधर्म इति । अत्राशुद्धत्वस्य देशादिनिष्ठत्वादधर्मस्य पुन्निष्ठत्वा दभेदानुपपत्तिः। किंतु–जन्यजनकयोगमाश्रित्यायुर्घृतमितिवल्लक्षणाप्रयोजनं देशाद्यशुद्धिरधर्मं न व्यभिचरतीति ॥ १५ ॥ “ आपन्नः प्रतिगृह्णीयादनापन्नो न कर्हिचित् ” इत्युक्तेः । परधर्मो यथा–भैक्ष्यं ब्राह्मणस्य स्वं क्षत्रियादेः विधिबलेन ‘ यदहरेव विरजेत् ’ इत्यादिविधिविधानबलेन स तच्छास्त्रं तयोर्गुणदोषयोः बाधते। सर्ववस्तूनां परमार्थाभेदमेव बोधयति–“ ऐतदात्म्यम् ” इति श्रुतेः ॥ * ॥ क्वचिदिति–प्रतिग्रहस्य गुणत्वं तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समानकर्माचरणं पतितानां न पातकम् ॥ औत्पत्तिको गुणः संगो न शयानः पतत्यधः ॥ १७ ॥ यतोयतो निवर्तेत विमुच्येत ततस्ततः ॥ एष धर्मो नृणां क्षेमः शोकमोहभयापहः ॥ १८ ॥ विषयेषु गुणाध्यासात्पुंसः संगस्ततो भवेत् ॥ संगात्तत्र भवेत्कामः कामादेव कलिर्नृणाम् ॥१९॥

योरेकस्मिन्नर्थे नियमो गुणदोषार्थं वा यो नियमो नियामकं शास्त्रं स तयोर्भेदमेव बाधते ॥ १६ ॥ दोषस्य क्वचिद्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति । समानस्य तस्यैव कर्मणः सुरापानादेराचरणमपतितानां पतनहेतुरपि जात्या कर्मणा वा पतितानां पुनः पातकमधिकारभ्रंशकं न भवति पूर्वमेव पतितत्वात् । अतोऽत्र दोषस्यापि दोषता नास्तीत्यर्थः । तथा संगोऽपि यो यतेर्दोषः स गृहस्थस्यौत्पत्तिकः पूर्वस्वीकृतो न दोषोऽपि तु गुणः "ऋतौ भार्यामुपेयात्" इत्यादिविधानात् । उभयत्र दृष्टांतः । पूर्वमेवाधःशयानो यथा न पततीति ॥ १७ ॥ अतो गुणदोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमित्यभिप्रेत्याह । यतोयत इति । यतोयतो देशकालादेरशुद्धादेष शुद्धैर्देशकालादिभिः संपन्नः क्षेमः अभीष्टकृत् शोकमोहरूपं यद्भयमनिष्टं तदपहंति च ॥१८॥ यथाश्रुतप्रवृत्तिपरतां वेदस्य निराकर्तुं प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति

'आहारार्थं समीहेत' इति प्राणधारणस्यावश्यकत्वात् । निषिद्धत्वं च "प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम्" इत्यादेः । कुटुंबत्यागादेर्दोषत्वम् "पुंसस्त्रिवर्गो विहितः सुहृदां ह्यनुभावितः । न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते॥' इत्युक्तेः । विरक्तादेरित्यादिना नैष्ठिकपरिग्रहः । न दोष इति—"यदहरेव विरजेत्तदहरेव प्रव्रजेत्" इति श्रुतिरूपविधिबलेन गुणः श्रेष्ठ एव, एकस्मिन्नेवार्थे प्रतिग्रहादौ योयं प्रसिद्धो नियमः नियामकं शास्त्रमापदि प्रतिग्रहस्य गुणत्वप्रतिपादकमनापदि तु दोषत्वप्रतिपादकं गुणदोषौ न वस्तुनिष्ठौ किंत्वधिकारिभेदेन कल्पितावेवेति तयोर्भेदमेव वारयतीत्यर्थः । अतो गुणदोषौ न सामान्यतो नियतौ किंतु स्थलविशेष एव नियतौ ज्ञेयाविति भावः ॥ १६ ॥ समानस्य तुल्यस्य । अपतितानां ब्राह्मणादीनाम् । जात्या पतिता अन्त्यजादयः । कर्मणा सुरापानादिना पतिता ब्राह्मणादयः । अधिकारस्य स्वजातिविहितकर्माधिकारस्य । यतः पूर्वमेव पतिता अतो हेतोः । अत्र सुरापानादौ । इत्यर्थ इति—अपतितं प्रति सुरापानादिर्दोषो न पतितं प्रतीति भावः । यथा सुरापानादि पतितं प्रति न दोषस्तथेति । स संगः । औत्पत्तिकः स्वाभाविकः । "प्राकट्ये च स्वभावे च जनावुत्पत्तिरीरिता" इति निरुक्तिः । उभयत्र पतितानां समानकर्माचरणस्य गृहस्थानां संगस्य च दोषत्वाभावे । अधःशयानो भूमौ शयानः ॥ *॥ ० ॥ १७ ॥ यतो गुणस्यानैयत्यमतो हेतोः । निवर्तेत भेदबुद्धिः । यतोयतो वर्णाश्रमादेः । एष भेदबाधनरूपः । क्षेमः सर्वदुःखाभावरूपः शोकमोहभयापहः । तत्र "को मोहः कः शोक एकत्वमनुपश्यतः" इति श्रुतेः । यद्वा—यतोयतः कर्मणो नाहं कर्तेति निवर्तेत अहंकारराहित्येन यद्यत्कर्म परमेश्वरबुद्ध्या करोति ततस्ततः कर्मणो विमुच्येत तत्तत्कर्मबंधकं न स्यात् "एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः । त एवमात्मविनाशाय कल्प्यंते कल्पिताः परे ॥" इत्युक्तेः । एष परमेश्वरार्पणलक्षणो धर्मः । क्षेमः संसारमुक्तिहेतुः । "मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा" "शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः" इति श्रीगीतोक्तेः ॥ * ॥ यतो गुणदोषविभागो न वास्तवोऽतः । एष निवृत्तिलक्षणः ॥ १८ ॥ विपक्षे बाधकमाह—भगवदर्पणबुद्धिराहित्येन क्रियमाणं कर्म शब्दादिविषयेषु गुणबुद्धिं जनयति मृगतृष्णिकापयःपूरमतिवत् । तदनु निरंकुशस्य पुंसो विषयेषु गुणध्यानात्सुखसाधनत्वध्यानात् । तेषु स्नेहलक्षणः संगः स्यात्तस्तेषु काम इच्छा स्यात् । ततः कलिश्चेतनधर्मज्ञानद्रावणहेतुरधर्मो भवति । 'कल—द्रावणे' धातुः । स्वामिनां तु स्फुट एवार्थः ॥ * ॥ यथाश्रुतामिति वाच्यार्थमनतिक्रम्य या प्रवृत्तिपरता "स्वर्गकामो यजेत" इत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्तते ॥ तमसा ग्रस्यते पुंसश्चेतना व्यापिनी द्रुतम् ॥ २० ॥ तया विरहितः साधो जंतुः शून्याय कल्पते ॥ ततोऽस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च ॥ २१ ॥ विषयाभिनिवेशेन नात्मानं वेद नापरम् ॥ वृक्षजीविकया जीवन्व्यर्थं भस्त्रेव यः श्वसन् ॥ २२ ॥ फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् ॥ श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनम् ॥ २३ ॥ उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च ॥ आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु ॥ २४ ॥

विषयेष्विति चतुर्भिः । संग आसक्तिः । तत्र तेषु विषयेषु । येन प्रतिहन्यते कामस्तेन सह कामादेव कलिः कलहो विवादः ॥ १९ ॥ दुर्विषहस्तीव्रः । तमः संमोहः । तं क्रोधम् । चेतना कार्याकार्यस्मृतिः । द्रुतं शीघ्रम् ॥ २० ॥ शून्याय कल्पते असत्तुल्यो भवतीत्यर्थः । स्वार्थविभ्रंशः पुरुषार्थहानिः । मूर्छितस्य मृततुल्यस्य ॥ २१ ॥ तत्तुल्यत्वं प्रपंचयति । विषयेति । व्यर्थं वृक्षजीविकयैव जीवन्वर्तते स मूर्छिततुल्यः । अत एव यो भस्त्रेव श्वसन्वर्तते स मृततुल्यः अतः स्वार्थनाश इत्यर्थः ॥ २२ ॥ ननु प्रवृत्तस्य स्वर्गादिफलश्रवणात्कतः स्वार्थविभ्रंशस्तत्राह । फलश्रुतिरिति । इयं फलश्रुतिर्न श्रेयः । परमपुरुषार्थपरा न भवतीत्यर्थः । किंतु बहिर्मुखानां नृणां मोक्षविवक्षयाऽवांतरफलैः कर्मसु रुच्युत्पादनमात्रम् । यथा भैषज्ये औषधे रोचनं रुच्युत्पादनं गुडशर्करादि । तथाहि । "पिब निंबं प्रदास्यामि खलु ते खंडलड्डुकान् ॥ पित्रैवमुक्तः पिबति न फलं तावदेव तु ॥" तथा च "शिखा ते वर्द्धते वत्स गुडूचीं श्रद्धया पिब" इति ॥ २३ ॥ ननु कर्मकांडे मोक्षस्य नामापि न श्रूयते कुत एवं व्या

दिरूपा तां निराकर्तुं तात्पर्यानुपपत्त्या तिरस्कर्तुम् ॥ १९ ॥ तीव्रः निरोद्धुमशक्यः ॥ * ॥ व्यापिनी पूर्वं व्याप्य स्थिता । तमसा क्रोधेन । ग्रस्यते नाश्यते ॥ २० ॥ तया चेतनया । इत्यर्थ इति–कार्याकार्यविचारेणैव पुरुषसत्त्वमनुमीयते तदभावे वस्तुतो नाशाभावादसन्निव भवतीति भावः । ततश्शून्यत्वानन्तरम् । अस्य पुरुषस्य । मूर्च्छितस्य मृतसदृशस्य । मुग्धेऽर्धसंपत्तिरिति न्यायात् । अत्र मृतस्य च परत्र । यद्वा–मूर्च्छितस्य निःसंज्ञस्य मृतस्य मृततुल्यस्य पुरुषार्थहानिः स्यात्प्रज्ञानाभावः । "नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः । यदध्वन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ॥" इति पृथुं प्रति सनत्कुमारोक्तेः ॥ * ॥ **दीपिका**–तया स्मृत्या । अतोऽसत्तुल्यत्वात् ॥ २१ ॥ तत्तुल्यत्वं मूर्छिततुल्यत्वं मृततुल्यत्वं च । यथा वृक्षा जलाद्याहारं कुर्वतो ज्ञानरहिता वर्तंते तद्वदित्यर्थः । अत एव मूर्च्छिततुल्यत्वादेव । अतो मृततुल्यत्वात् । इत्यर्थ इति–ज्ञानरहितत्वेन मृततुल्यस्य स्वार्थनाशो भवत्येवेति भावः ॥ * ॥ तत्तुल्यत्वं मूर्छितमृततुल्यत्वम् । वृक्षजीविकया यथाऽनुद्यमेनैव यादृच्छिकी जलोपलब्धिरूपा वृक्षस्य जीविका, तथा विषयाविष्टस्यापि यादृच्छिकाहारादिरूपा तया जीवन्स्वस्थितिं कुर्वन् यो वर्तेत । अत एव मूर्च्छिततुल्यत्वादेव । अतो मृततुल्यत्वाच्चतुर्विधपुरुषार्थहानिरित्यर्थः ॥२२॥ अत्राक्षिपति–नन्विति । इत्यर्थ इति–स्वर्गादीनां विनाशित्वान्न श्रेयस्त्वमिति भावः । तर्हि तत्साधने कर्मणि प्रवृत्तिः कथमिति चेदाह–किंत्विति । बहिर्मुखाणां विषयतृष्णावताम् । अवांतरफलैः गौणफलैः । तावदेव हि खण्डलड्डुकप्राप्तिमात्रमेव हि । वर्णितं चैतदधस्तादित्युपरम्यते ॥ * ॥ इयम् "पशुकामः" इत्यादिरूपा । "न श्रेयो दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते" इति नारदेन कर्मफलस्य श्रयस्त्वखण्डनात् । तर्हि कथमप्सरोभिर्विहरिष्याम इत्यादि श्रूयते तत्राह–बहिर्मुखाणां स्वर्गादिविषयेच्छूनाम् । अवांतरफलैर्गौणफलैः । तावदेव खण्डलड्डुकमात्रमेव फलं न, किंतु रुच्युत्पादनार्थं गौणफलाभास एवेत्यर्थः । पूर्वमैहिकविषयकविषयेच्छूनां निन्दाऽत्र तु पारलौकिकतदिच्छूनामिति ज्ञेयम् ॥ २३ ॥ पुनराक्षिपति–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि ॥ कथं युंज्यात्पुनस्तेषु तांस्तमो विशतो बुधः ॥ २५ ॥ एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः ॥ फलश्रुतिं कुसुमितां न वेदज्ञा वदंति हि॥ २६ ॥ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः ॥ अग्निमुग्धा धूमतांताः स्वं लोकं न विदंति ते ॥२७॥

ख्यायते यथाश्रुतस्याघटनादित्याह । उत्पत्त्येति द्वाभ्याम् । उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेष्वायुरिंद्रियबलवीर्यादिषु । स्वजनेषु पुत्रादिषु । अनर्थहेतुषु परिपाकतो दुःखहेतुषु ॥ २४ ॥ अतस्तान्स्वार्थं परमसुखमविदुषः अतो न तान् श्रद्धीभूतान् । वेदो यद्बोधयिष्यति तदेव श्रेय इति विश्वसितानित्यर्थः । तानेवंभूतान्वृजिनाध्वनि कामवर्त्मनि देवादियोनिषु भ्राम्यतः । ततः पुनस्तमोवृक्षादियोनिं विशतः । पशुकाम इति आयुरिंद्रियादिकाम इति पुत्रादिकाम इति च । कथं पुनस्तेष्वेव कामेषु स्वयं बुधो वेदो युंज्यात्प्रवर्तयेत् । तथा सत्यनाप्तः स्यादिति भावः ॥ २५ ॥ कथं तर्हि कर्ममीमांसकाः वेदस्य फलपरतां वदंति तत्राह । एवमिति । व्यवसितं वेदस्याभिप्रायम् । कुसुमितामवांतरफलप्ररोचनया रमणीयां फलश्रुतिं परमफलश्रुतिं वदंति । कतस्ते कुबुद्धयस्तदाह । हि यस्माद्वेदज्ञा व्यासादयस्तथा न वदंतीति ॥ २६ ॥ कुबुद्धितां प्रपंचयति कामिन इत्यष्टभिः । कामित्वात्कृपणा दीनास्ततो लुब्धास्तृष्णाकुला अतः पुष्पेष्ववांतरफलेषु परमफलबुद्धयोऽत एवाग्निमुग्धा अग्निसाध्यकर्माभिनिवेशेन लुप्तविवेकास्ततश्च धूमतांता धूमता धूममार्गोऽन्ते येषां ते । स्वं लोकमात्मतत्त्वम् । तथाच श्रुतिः । "कश्चिद्ध वा अस्माल्लोकात्प्रेत्य आत्मानं वेद अयमहमस्मीति" ...

नन्विति । एवं मोक्षपरत्वम् । अघटनादसंभवात् । पश्वादिषु गवाश्वादिषु कामनाविषयेषु । आदिना स्वर्णादिग्रहः । "प्राणो वीर्येऽनिले जीवे बलायुरिन्द्रियासुषु" इति कोशात् ॥ * ॥ एवं निवृत्तिपरत्वेन यथाश्रुतस्य प्रवृत्तिपरत्वस्य पश्वादिषु "पशुकामो यजेत" "दध्नेन्द्रियकामस्य जुहुयात्" "खादिरं वीर्यकामस्य यूपं कुर्वीत" इत्यादिवाक्यान्यादिपदबोध्यानि परिपाकतः ॥ २४ ॥ यतोऽनर्थासक्तमनसोऽतो हेतोः । अतः परमसुखावेदितृत्वात् । इत्यर्थ इति—वेदोक्तमात्रविश्वस्ता न तु तत्तात्पर्यज्ञा इति भावः । एवंभूतान् वेदोक्तिकृतविश्वासान् । ततः देवादियोनिप्राप्त्युत्तरम् । "पशुकामः" इत्यादि यदि वेदः पुरुषान्पशुकाम इत्थं कुर्यादायुरिन्द्रियादिकामश्चेत्थं यजेत्पुत्रादिकामश्चेत्थमिति तत्तत्कर्मसु नियोजयेत्तर्हि वेदोऽप्यवेद एव परमार्थाबोधनादित्याह—कथमिति । इति भाव इति—न हि परमाप्तो वेदः पुरुषान्परमार्थतश्च्यावयतीति तात्पर्यम् ॥ * ॥ अतः स्वभावतो विषयाविष्टत्वात् । अतः परमसुखाज्ञानात् । ततो देवादियोनिभ्रमणोत्तरम् । तथा सति स्वभावतो विषयप्रवृत्तस्य पुनस्तत्रैव प्रवर्तने सति वेदोऽनाप्तोऽविश्वसनीयः स्यादित्यर्थः ॥ २५ ॥ अत्राक्षिपति—कथं तर्हीति । एवमुक्तरीत्या वेदस्याप्रवृत्तिपरत्वरूपमाभिप्रायम् , तथा प्रवृत्तिपरत्वम् ॥ * ॥ यर्हि वेदस्य निवृत्तिपरत्वं तर्हि एवं रुच्युत्पादनमात्रेण चित्तशुद्ध्यर्थं कर्मसंकोचार्थं च कर्मणि प्रवर्तनरूपमभिप्रायं रमणीयां विषलतावदापाततः सुंदरीं फलश्रुतिं परमफलश्रुतिं वदंतीत्यायोज्यम्, वस्तुतस्तु—कुसुमान्येव संजातानि न तु फलानि यस्यास्तां, फलश्रवणं न फलयुक्तं किंतु कुसुमयुक्तमेव कुसुमस्यैवाज्ञानेन फलत्वभानादित्यर्थः । अतस्ते कुबुद्धयो वेदतात्पर्यानभिज्ञाः । हि यस्माद्वेदज्ञा व्यासादयस्तथा न वदंति फलतया न वदंति किंतु निवृत्तिपरतयैवेत्यर्थः ॥ २६ ॥ कृपणा मंदाः । "कृपणस्तु क्रमौ पुंसि मंदकुत्सितयोरपि" इति मेदिनी । ततः कृपणत्वात् । अतः पुष्पेषु पुष्पवदापातरमणीयेषु । अवांतरफलेषु स्वर्गादिषु । अत एवावांतरफलेषु परमफलबुद्धित्वादेव । ततश्चाग्निसाध्यकर्माभिनिवेशात् कर्मिणामात्मज्ञानं न भवतीत्यत्र प्रमाणमाह—तथा चेति । कश्चित्साधनदेशीयः । ह स्फुटम् । वै निश्चितम् । लोकात्प्रेत्य देहान्तरेऽग्रिमजन्मनि स्वं लोकमात्मतत्वम् । अग्निना तत्साध्यकर्मणा । मुग्धो लुप्तज्ञानः । धूमतांतः धूममार्गयायी "ते धूममभिसंभवंति" इति श्रुतेः ॥ * ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न ते मामंग जानंति हृदिस्थं य इदं यतः ॥ उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः ॥२८॥
ते मे मतमविज्ञाय परोक्षं विषयात्मकाः ॥ हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना ॥ २९ ॥

स्मीति ॥ कश्चित्स्वं लोकं न प्रतिजानाति ॥ अग्निमुग्धो हैव धूमतांतः " इति ॥ २७ ॥ कोऽसौ स्वलोकस्तमाह । हृदिस्थमात्मानं मां स्वलोकम् । ननु हृदिस्थमहंकारास्पदं जानंत्येव । सत्यम् । परमात्मानं तु न जानंतीत्याह । य इदं यद्व्यतिरिक्तं जगन्नास्ति । कुतः । यत इदं जगज्जातम् । तं कुतो न जानंति । हि यस्मात् । उक्थं कर्मैव शस्त्रं शंस्यं कथनीयं पशुहिंसासाधनं वा येषां ते । अतः केवलमसुतृपः प्राणतर्पणपराः । नीहारं तमस्तेन व्याप्तानि चक्षूंषि येषां ते यथा सन्निहितमपि न जानंति तद्वत् । तथा च श्रुतिः " न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥ " इति ॥ २८ ॥ वेदतात्पर्याज्ञानाच्चान्यान्यजंतीत्याह । ते परोक्षमस्फुटं मे मतमविज्ञाय देवतादीन्यजंत इत्युत्तरेणान्वयः । स्वमतमेवाह । हिंसायां मांसभक्षणार्थं तत्फलार्थं च यदि रागः स्यात्तर्हि यज्ञ एवेत्यभ्यनुज्ञाद्वारा परिसंख्येयं न त्वावश्यकत्वेन चोदनेत्येवंरूपम् । यद्यपि नित्यनैमित्तिकयोः कामविशेषानुबंधो नास्ति तथापि " कर्मणा पितृलोकः " इति श्रुतेः । सामान्यतः पितृलोककामनास्त्येव । अंतःकरणशुद्धिकामना चेति भावः । तदुक्तम् " नाकामस्य क्रिया काचिद्दृश्यते चेह कर्हिचित् । यद्यद्धि कुरुते जंतुस्त

अवांतरफलेषु स्वर्गादिषु । स्वं लोकं स्वाश्रयम् । आत्मतत्त्वं परमात्मतत्त्वम् ॥ २७ ॥ स्वलोकं पृच्छति—कोसाविति । तत्कुतो न जानंति तत्राह—हीति । कर्मिणां स्वरूपाज्ञाने हेतुरूपां श्रुतिमाह—तथा चेति । उक्तार्थेयं श्रुतिः ॥ * ॥ तथा च कर्मजडस्य कुबुद्धित्वे श्रुतिः—"न तं जजान" इत्यादिव्याख्यातैव पूर्वम् ॥ २८ ॥ 'वेदैश्च सर्वैरहमेव वेद्यः' इति स्मृतेः । " सर्वे वेदा यत्पदमामनंति " इति श्रुतेश्चार्थमपर्यालोच्य देवतांतरं यजंत इत्याह—वेदेति । तत्फलार्थं मांसभक्षणफलं पुष्ट्यादि तदर्थम् । रागोऽत्यंताभिनिवेशः । तद्द्वाराऽभ्यनुज्ञाद्वारा । न तु हिंसायाः क्वचिच्चोदनास्ति रागतो नित्यप्राप्तत्वात् । अपूर्वत्वाप्राप्तांशयोरपूर्वविधिनियमविधिप्रयोजकयोरभावात् । किंतु यदि रागः स्यात्तर्हि यज्ञ एवेति तन्निवृत्तौ तात्पर्यम् । अन्यदाह—यद्यपीति । इति भाव इति—न हि निष्कामा प्रवृत्तिर्भवतीति तात्पर्यम् । अत्र प्रमाणमाह—तदुक्तमिति । अकामस्य निष्कामस्य । कर्हिचित्कदाचिदपि । स्पष्टमन्यत् ॥ * ॥ त इति युग्मकम् । तत्फलार्थं च यागोपयुक्तहिंसाफलार्थम् । तर्हि योग्यैव देवतामुद्दिश्य हिंसा कार्या न स्वार्थमिति योजना । तद्द्वारा " आग्नीषोमीयं पशुमालभेत " इत्यभ्यनुज्ञाद्वारा । परिसंख्येति—उभयप्राप्तावितरव्यावर्तको विधिः परिसंख्या । रागेणाग्नीषोमीयतद्भिन्नोप्यालभ्यत एवेत्युभयप्राप्तावितरस्याग्नीषोमीयातिरिक्तस्य व्यावृत्तिः । आग्नीषोमीयव्यतिरिक्तं पशुं नालभेतेति चोदना तु नैव । अपूर्वविधिस्तु नास्त्येव अप्राप्तविधायको हि अपूर्वविधिः, स च न संभवति, रागतो नित्यप्राप्तत्वात् । ननु प्रयोजनवदर्थविधानेनार्थवान् विधिरित्यपि न तल्लक्षणं, तथा च—" अहरहः सन्ध्यामुपासीत " इत्यादौ फलाश्रवणाद्विधित्वमेव न स्यादित्याशंक्याह—यद्यपीति । नित्यमग्निहोत्रादि नैमित्तिकं ज्योतिष्टोमादि तयोः सामान्यतः विशेषतः कामनाभावेपि सास्त्येव, पितृलोकान्तःकरणशुद्धिप्रयोजनसद्भावाद्विधित्वमस्त्येवेत्यर्थः । अकामस्येत्याद्यभियुक्तवाक्यस्याप्यत्र प्रमाणत्वादिति ॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंसाविहारा ह्यालब्धैः पशुभिः स्वसुखेच्छया ॥ यजंते देवता यज्ञैः पितृभूतपतीन्खलाः ॥ ३० ॥ स्वप्नोपममसुं लोकमसंतं श्रवणाप्रियम् ॥
आशिषो हृदि संकल्प्य त्यजन्त्यर्थान्यथा वणिक् ॥ ३१ ॥ रजःसत्त्वतमोनिष्ठा रजःसत्त्वतमोजुषः ॥ उपासते इंद्रमुख्यान्देवादीन्न तथैव माम् ॥
॥ ३२ ॥ इष्ट्वेह देवता यज्ञैर्गत्वा रंस्यामहे दिवि ॥ तस्यांत इह भूयास्म महाशाला महाकुलाः ॥३३॥ एवं पुष्पितया वाचा व्याक्षिप्तमनसां नृणाम् ॥
मानिनां चातिस्तब्धानां मद्वार्तापि न रोचते ॥ ३४ ॥ वेदा ब्रह्मात्मविषयास्त्रिकांडविषया इमे ॥ परोक्षवादा ऋषयः परोक्षं मम च प्रियम् ॥ ३५ ॥

त्तत्कामस्य चेष्टितम् ॥ " इति ॥ २९ ॥ अज्ञत्वादेव हिंसया विहारः क्रीडा येषां ते ॥ ३० ॥ किंच तेऽतिमंदबुद्धय इत्याह । स्वप्नोपममिति । अमुं परलोकम् । आशिषश्चास्मिँल्लोके संकल्प्य न तु निश्चित्य विघ्नबाहुल्यात् । त्यजंति कर्मसु विनियोजयंति । यथा कश्चिद्वणिक् दुस्तरसमुद्रादिलंघनेन बहुधनार्जनेच्छया सिद्धं धनं त्यजन्नुभयभ्रष्टो भवति तद्वदित्यर्थः ॥ ३१ ॥ अतो रजःसत्त्वतमोजुषः स्वानुरूपानिंद्रादीनेवोपासते न तु मां गुणातीतम् । यद्यपींद्रादीनामपि मदंशत्वान्मदुपासनमेव तत्तथापि यथा वन्नोपासते भेददर्शित्वादित्यर्थः ॥ ३२ ॥ हृदि संकल्प्येत्युक्तं तमेव संकल्पं दर्शयति । इष्ट्वेति । तस्य भोगस्यांते महाशाला महागृहस्थाः संपन्ना इत्यर्थः ॥ ३३ ॥ ततः किमत आह । एवमिति । अतो मत्प्रवणत्वाभावान्नित्यं संसारिणो भवंतीति भावः ॥ ३४ ॥ तदेवं वेदानां प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्वमेवोपसंहरति । वेदा इति । कर्मब्रह्मदेवताकांडविषया इमे वेदा ब्रह्मात्मविषयाः " ब्रह्मैवात्मा न संसारी " इत्येतत्पराः । तत्परत्वाप्रतीतौ च । " फलश्रुतिरियं नृणां न श्रेयोरोचनं परम् ॥

आलब्धैर्हिंसितैः ॥ * ॥ ० ॥ ३० ॥ तेषां निर्बुद्धितामाह—किंचेति । आशिषः कामनाः । इत्यर्थ इति—तेषां हानिरेव न त्वभीष्टाप्तिरिति भावः ॥ * ॥ तेऽतिमंदधिय इत्याह—स्वप्नोपम इति । विनियोजयंति व्ययं कुर्वंति ॥ ३१ ॥ इन्द्रादयः किन्त्वद्भिन्ना इति चेदाह—यद्यपीति । इत्यर्थ इति—" येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः । तेपि मामेव कौन्तेय यजंत्यविधिपूर्वकम् ॥ " इति श्रीगीतोक्तेरिति भावः ॥ * ॥ उपपादितं चैतच्छ्रीदशमचत्वारिंशाऽध्याये विस्तरतः । रजःसत्त्वतमांसि जुषंते सेवंते ते तथा तान् इन्द्रादीन् । यथावदुपासनाभावाद्भ्रश्यंति " न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते " इति मदुक्तेः । भेददर्शित्वात्तेषु स्वातन्त्र्यबुद्धित्वात् ॥ ३२ ॥ पूर्वोक्तं स्मारयति—हृदि संकल्प्येति । रंस्यामहे क्रीडिष्यामः । इह भूमौ । महती शाला येषां ते तथा । ' शाला द्रुस्कंधशाखायां गृहगेहैकदेशयोः ' इति कोशाच्छालापदं गृहपरमपि ' तात्स्थ्यात्ताच्छब्द्यम् ' इति न्यायेन गृहस्थमाहेत्याह—महागृहस्था इति ॥ * ॥ इह भुवि । रंस्यामहे अप्सरोभिर्विहरिष्यामः ॥ ३३ ॥ फलितं पृच्छति—तत इति । ततो महागृहस्थत्वादेः किं फलम् । एवमुक्तरीत्याऽयथोपासनेन पुष्पितया स्वर्गादिषु परमफलबुद्ध्युत्पादकया व्याक्षिप्तमिदमेव परं फलमन्यद्वेति भ्रमापन्नं मनो येषां तेषाम् । अपिना मनःसम्यक्त्वापादकतत्त्वज्ञगुर्वादिसेवाद्यभावो दर्शितः । यतो मद्वार्तारुचिरपि तेषां नास्ति अतो हेतोः । मत्प्रवणत्वं मत्परत्वम् । इति भाव इति—भगवद्विमुखानामेव संसार इति तात्पर्यम् ॥ * ॥ ० ॥ ३४ ॥ प्रकृतमुपसंहरति—इत्येतत्परा इत्येतत्तात्पर्यिकाः । तत्परत्वाप्रतीतौ ब्रह्मात्मपरत्वाप्रतीतौ । इत्युक्तं पूर्वोक्तमेव । ' ऋषिर्मन्त्रे तथा मुनौ ' इति कोशात् । मंत्राणामुच्चारयितारमंतरेण वादोऽदृष्टचर इवेत्याह—तद्द्रष्टारो वेति । तत्परोक्षत्वेन कथनं किमिति किमर्थमिति चेदाह—यत इति । यतो हेतोः । अत्राशयमाह—अयं भाव इति । एतद्वेदानां ब्रह्मपरत्वम् । अन्यैः काम्यकर्मादिपरैः । वृथाकर्मत्यागेन स्वात्मबोधं विना कर्मत्यागेन भ्रंश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयम् ॥ अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ॥ ३६ ॥

श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनम् ॥ " इत्युक्तमेव कारणमनुस्मारयति । परोक्षेति । ऋषयो मंत्राः 'तदुक्तमृषिणा' इति प्रयोगात् । तद्द्रष्टारो वा । तत्किमिति । यतः परोक्षमेव मम च प्रियम् । अयं भावः । शुद्धांतःकरणैरेवैतद्बोद्धव्यं नान्यैरनधिकारिभिर्वृथाकर्मत्यागेन भ्रंशप्रसंगादिति ॥ ३५ ॥ ननु वेदज्ञा अपि जैमिन्यादयः किमिति तथा न वर्णयंति मां विना तत्त्वतो वेदं तदर्थं वा न कोऽपि वेदेत्याशयेनाह शब्दब्रह्मेति यावत्समाप्ति । स्वरूपतोऽर्थतश्च दुर्विज्ञेयम् । तच्च सूक्ष्मं स्थूलं चेति द्विविधम् । तत्र सूक्ष्मं तावत्स्वरूपतोऽपि दुर्ज्ञेयमित्याह । प्राणेंद्रियमनोमयम् । प्रथमं प्राणमयं पराख्यं ततो मनोमयं पश्यंत्याख्यं तत इंद्रियमयं मध्यमाख्यम् । तस्य वाग्व्यंजकत्वेन वागिंद्रियप्रधानत्वात् । किंच अनंतपारं समष्टिप्राणादिमयस्य निर्विशेषस्य च तस्य कालतो देशतश्चापरिच्छेदात् । अर्थतोऽपि दुर्ज्ञेयत्वमाह । गंभीरं निगूढार्थम् । अतो दुर्विगाह्यं मतिप्रवेशानर्हम् । तथाच श्रुतिः । "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं

प्रसंगात् । " ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति । सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा । अविपक्वकषायोस्मादमुष्माच्च विहीयते ॥ " इत्युक्तेः ॥ * ॥ ब्रह्मात्मविषयाः सर्वतो बृहत्तमो य आत्मा परममूलस्वरूपो भगवानहं तत्पर एवेत्यर्थः । मत्प्रियाचरणत्वेन वक्ष्यमाणत्वात् । तथा सर्वेषामप्रतीतौ कारणमाह—परोक्षेति । 'परोक्षं मम च प्रियम्' इति तु—" त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय । अथ तानि वितथ्यानि दर्शयस्व महाभुज ॥ प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु । " इत्यन्यत्र व्यक्तत्वात् । एतच्चास्माभिराद्यपद्यव्याख्याशतके बहुधा वर्णितं साभिप्रायम् " इदं ते गुह्यमाख्यातं गुह्याद्गुह्यतरं मया " इत्यादौ तदभिप्रायप्रकाशात् । तच्च तत्र सर्वेषामधिकाराभावात् । यत एव " मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् " इत्याद्युक्तमिति **संदर्भः** ॥ * ॥ अत एव परोक्षाभिधानस्य मत्प्रीतिकरत्वेन मन्त्रद्रष्टारोऽपि यथा वदंतीति **विश्वनाथः**॥*॥**दीपिका**—एतद्वेदानां तात्पर्येण निवृत्तिपरत्वं स्फुटं, निवृत्तिपरत्वाऽभिधानेऽशुद्धान्तःकरणैर्विषयास्त्यक्तुं न शक्यंते किंतु तेषां विहितकर्मत्यागेनोभयतो भ्रंशप्रसंगो भवेदित्यर्थः ॥३५॥ इत्थं चेत्तर्हि वेदज्ञैः कथं कर्मादिपरत्वेन वेदो वर्णित इत्याशंकते—नन्विति । वेदार्थस्य दुर्ज्ञेयतामाह—मां विनेति । तदर्थं वेदार्थम् । तच्च शब्दब्रह्म । तत्र तयोर्मध्ये । तस्य मध्यमाख्यशब्दब्रह्मणः । वाग्व्यंजकत्वेन वाचां प्राकट्यहेतुत्वेन । न केवलं सूक्ष्मत्वेनैव दुर्ज्ञेयं किंत्वनंतत्वादिनापीत्याह—किंचेति । निर्विशेषस्य केनापि विशेषेण वक्तुमशक्यस्य । अतो निगूढार्थत्वात् । वेदस्य प्राणादिमयत्वेन सूक्ष्यत्वे प्रमाणमाह—तथा चेति । पूर्वं व्याख्यातापि सौगम्याय पुनः स्वामिचरणैर्व्याख्यायते श्रुतिः ॥ * ॥ शब्दब्रह्मेति युग्मकम् । प्राणेन्द्रियमनोमयं लौकिकवाग्वत् पराख्यादिरूपेण तथाविर्भूतमपि दुर्बोधम् । यतः शब्दतोऽनंतपारम् । अर्थतश्च गंभीरं दुर्विगाह्यञ्च । प्रवेष्टुं तावदशक्यं कथंचित्प्रवेशे सति गंभीरं दुर्गमार्थपर्यवसानमित्यर्थः ॥ * ॥ **विश्वनाथस्तु**—ननु वेदस्याप्तत्वान्यथानुपपत्त्यैव भैषज्यरोचनन्यायेनैव तस्य स्वर्गादिपरत्वमिति भवान्व्याचष्टे. तथैव जैमिन्यादयोऽपि व्याचक्षता, मैवम्, यदि ते जानीयुस्तर्हि व्याचक्षीरन्, मा विना मद्भक्तांश्च व्यासनारदादींश्च तत्त्वतो वेदार्थं न कोऽपि जानातीत्याह—शब्दब्रह्मेति यावत्समाप्ति । प्राणेन्द्रियमनोमयं प्रथमं प्राणमयं पराख्यमाधारचक्रस्थम् । ततो मनोमयं पश्यंताख्यं नाभावनाहतचक्रस्थमुपलक्षणमेतत् । बुद्धिमयं मध्यमाख्यं हृदये च मणिपूरकचक्रस्थम् । तत इन्द्रियमयं वैखर्याख्यं तस्य वागात्मकत्वेन वागिन्द्रियप्रधानत्वात् । किंच—अनंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयोपबृंहितं भूम्ना ब्रह्मणाऽनंतशक्तिना ॥ भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ॥ ३७ ॥
यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ॥ आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ॥ ३८ ॥

वाचो मनुष्या वदंति ॥ " इति । अयमर्थः । वाचः शब्दब्रह्मणः परिमितानि गणितानि पद्यते ज्ञायते परं तत्त्वमेभिरिति पदानि रूपाणि चत्वारि तानि चत्वार्यपि ये मनीषिणोंतर्दृष्टयस्त एव विदुर्नान्ये । यतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयंति स्वरूपं न प्रकाशयंत्यतः केवलं वाचस्तुरीयं चतुर्थं भागं वैखरीरूपं स्थानप्रयत्नाभ्यां स्पष्टं मनुष्याः प्राणिनो वदंति । तदपि वदंत्येव न तत्त्वतो जानंति ॥ ३६ ॥ तत्र मनीषिभिरेव ज्ञेयं सूक्ष्मं तत्त्वरूपं दर्शयति । मयेति । मयांतर्यामिणोपबृंहितमधिष्ठितम् । अंतस्थत्वेऽप्यपरिच्छेदमाह । भूम्नेति । अधिष्ठातृत्वेऽप्यविकारित्वमाह । ब्रह्मणेति । अविकृतस्यापि नियंतृत्वं घटयति । अनंतशक्तिनेति । भूतेषु सर्वप्राणिषु घोषरूपेण नादरूपेण लक्ष्यते मनीषिभिः । अंतःसूक्ष्मत्वेन दर्शने दृष्टांतो बिसेषूर्णातंतुरिवेति ॥ ३७ ॥ ततो वैखर्याख्याया बृहत्या वाच उत्पत्तिप्रकारं सदृष्टांतमाह यथेति त्रिभिः । हृदयात्सकाशात् । मुखात् द्वारात् ऊर्णां तंतुम् उद्वमते बहिः प्रकटयति । दार्ष्टांतिके योजयति आकाशादिति । प्राणस्तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवान् तेन

पारं प्राकृताप्राकृतप्राणमयस्य कालतो देशतश्चात्परिच्छेदादित्यादि तैः ॥ ३६ ॥ तत्र द्वयोर्मध्ये । मनीषिभिर्विद्वद्भिः । अंतर्यामित्वे तत्र परिच्छिन्नता स्यादित्याह–अंतस्थेति । भूम्ना परिच्छेदराहितेन अंतर्यामित्वेन अधिष्ठातृत्वे राज्ञादिवद्विकारित्वप्रसंगः स्यात्तत्राह–अधिष्ठातृत्वेपीति । एकरसत्वाच्छुद्धब्रह्मणो न विकारित्वमिति भावः । तथात्वेप्यनंतशक्तित्वान्नियंतृत्वं संगच्छत एवेत्याह–अविकृतस्येत्यादि । बिसेषु मृणालेषु यथातीव सूक्ष्मोपि तंतुर्लक्ष्यते तद्वदित्यर्थः ॥ * ॥ नन्वेवंभूतं चेत्कथं प्राणादिष्वाविर्भवति तत्राह–मयोपबृंहितं तत्रतत्रोद्भावितम् । नन्वनंते वैकुण्ठेऽनंतप्राये च वैकुण्ठे ब्रह्माण्डगणेऽनंतसंख्ययाविर्भूतं तत्कथं भवत्तैकेनोद्भावितं स्यात्तत्राह–ब्राह्मणा स्वरूपतः परमबृहत्तमेन शक्तितश्चानंतशक्तिनेति । ननु यत्सर्वव्यापकं स्यादनंतपारं च तदेव भवति न तु तथेदं लक्ष्यते तत्राह–भूतेष्विति । नादरूपेणाव्यक्तप्रणवाकारेण लक्ष्यते योगिभिः । तदुक्तम्–" अनंतोऽनंतमात्रश्च द्वैतस्योपशमः शिवः । ओंकारो विदितो येन स योगी नेतरो जनः ॥ " इति ॥ ३७ ॥ तत ईश्वरात् । तदुपाधिः प्राणोपाधिः । तेन रूपेण हिरण्यगर्भरूपेण । नादस्योपादानं प्राणस्तद्वान् । तदुपाधिः उपलक्षणमंतस्थादीनाम् । आकाशा हृदयाकाशात् । सहस्रशब्दो बह्वर्थकः । " शब्दः शतसहस्रादिर्भेदानंत्यवाचकः " इत्युक्तेः । अतः स्वामिचरणैर्बहुमार्गामित्युक्तम् । तदेव बहुमार्गत्वमेव । हृद्गतः सूक्ष्मः । " येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः " इति द्वादशे वक्ष्यति । " प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितम् । अमात्रोनंतमात्रश्च " इति मांण्डूकोक्तेश्च । हृद्गतः त्रिमात्राद्भिन्न एव तस्य त्रिमात्रस्य व्यंग्या व्यंजितुं योग्याकारादिरूपेण कोटिः स्वरूपं यस्य तस्य भावस्तस्मात् । " कोटिः प्रकर्षे धनुषोग्रेऽस्त्रौ संख्यास्त्ररूपयोः " इति कोशात् । तथा च–सूक्ष्मो हृद्गतो व्यंजकः, स्थूलस्त्रिमात्रो व्यंग्य इति तयोर्विशेषः । तत्र व्यंग्येषु । कादिपंचवर्गाः ' कादयो मावसानाः स्पर्शाः ' इत्युक्तेः कादीनां वर्गत्वम् । ' कु चु टु तु पु वर्गाः ' इति व्याकरणसूत्रसिद्धमस्ति । षोडशस्वरा मातृकोक्तरीत्या ज्ञेयाः ॥ * ॥ तस्यैव प्राणादिपराख्यादिरूपेण स्वस्मादुद्भवप्रकारमाह–यथोर्णेति त्रिकेण । यथोर्णनाभिर्लूतातंतुः कीटभेदः हृदयादूर्णामुद्गमति गिरति चेत्यर्थः, तथा प्रभुरीश्वरो मदंशो हिरण्यगर्भः स्वरूपतोऽमृतमयः परमानंदरूपः स्वशक्त्यैव छंदोमयः सर्वज्ञानादिसंपन्नवेदमयः सन् आकाशादाकाशमालम्ब्य हिरण्यगर्भस्याधारचक्रे चाविर्भूय ' प्राणेन घोषेण गुहां प्रविष्टः '

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छंदोमयोऽमृतमयः सहस्रपदवीं प्रभुः ॥ ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम् ॥ ३९ ॥ विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः ॥ अनंतपारां बृहतीं सृजत्याक्षिपते स्वयम् ॥ ४० ॥ गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ त्रिष्टुब्जगत्यतिच्छंदो ह्यत्यष्ट्यतिजगद्विराट् ॥ ४१ ॥ किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत् ॥ इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ॥ ४२ ॥

रूपेण छंदोमयो वेदमूर्तिः । स्वतस्त्वमृतमयः । घोषवान्नादोपादानवान् । मनसा निमित्तभूतेन । निमित्ततामेव दर्शयति । स्पर्शादीन्वर्णान् रूपयति संकल्पयतीति स्पर्श रूपि तेन । स्पर्शग्रहणं स्वरादीनामुपलक्षणम् । आकाशात् हृदयाकाशाद्बृहतीं सृजतीति तृतीयश्लोकेनान्वयः । बृहतीशब्दार्थव्याख्यानाय विशेषणानि । सहस्रपदवीं बहुमार्गाम् । तदेवाह । ओंकारात् हृदयगतसूक्ष्मध्वनेः उरःकंठादिसंगेन व्यंजितैः स्पर्शादिभिर्भूषिताम् । ओंकारश्चात्र हृद्गतः सूक्ष्मोऽभिप्रेतो न त्वकारादिवर्णरूपः तस्य व्यंग्यकोटित्वात् । तत्र स्पर्शाः कादिपंचवर्गाः । स्वरा अकारादयः षोडश । ऊष्माणः शषसहाः । अंतस्था यरलवाः ॥ ३८ ॥ ३९ ॥ एवं विचित्राभिर्वै दिकलौकिकभाषाभिर्विंतताम् । यथोत्तरं चत्वारि चत्वार्यक्षराण्युत्तराण्यधिकानि येषां तैश्छंदोभिरुपलक्षिताम् । एवमनंतपारां वाचं सृजति स्वयमेवाक्षिपते उपसंहरति ॥ ४० ॥ तेषु कतिचिच्छंदांसि दर्शयति गायत्रीति । तत्र चतुर्विंशत्यक्षरा गायत्री । ततश्चतुरक्षरवृद्ध्योष्णिगादिच्छंदांसि । अत्यष्टिः अतिजगती अतिविराट् चेत्यर्थः । एतैश्छंदोभिरुपलक्षितामिति पूर्वेणान्वयः । अतो बृहत्यपि साकल्येन स्वरूपतो दुर्ज्ञेया इत्युक्तम् ॥ ४१ ॥ एवं वैखर्याः साकल्येन स्वरूपतो दुर्ज्ञेयत्वं दर्शितम् । अर्थ

इति पूर्वोक्तघोषो नादस्तद्वान्प्राणः स्वयं तदीयप्राणवांश्च सन् मनसा निमित्तेन बृहतीं वैखरीप्रधानां श्रुतिं प्रथमं पराख्यां सृजते । ततो घोषवान् किंचिद्व्यक्तनादवान्नाभिचक्रे मध्यमाख्यां सृजति । ततो हृदि प्राणात्मकः सन् ओंकारान्नादरूपतामापद्य स्पर्शरूपिणा तत्तद्वर्णभेदज्ञानस्पर्शिना मनसा पश्यंत्याख्यं सृजति । ततश्चोरःकंठादिसंगेन व्यंजितैः स्पर्शादिभिर्भूषिताम् । ओंकारश्चात्र हृद्गत एव ज्ञेयोऽकारादिवर्णरूपस्य तस्य व्यंग्यकोटित्वात् । व्यक्तवैखर्यंतःपातात् कालांतरे आक्षिपते, अंतः प्रवेशयति च । तत्र स्पर्शाः काद्या मांताः । स्वरा अकारादयः षोडश । ऊष्माणः शषसहाः । अंतस्था यरलवाः । स्वरा ये पृथक् प्लुता उदात्तादयस्तेषामपि स्वरान्तर्भावात् । क्षकारस्य स्पर्शोष्मस्वंतर्भावादेकोनपञ्चाशदेवात्र गणिताः ॥ ३८ ॥ ० ॥ * ॥ ० ॥ ३९ ॥ छंदोभिर्गायत्र्या दिभिः । चतुरक्षराधिक्यं गायत्रीतो ज्ञेयम् । यथा—गायत्रीछंदसि षडक्षराश्चत्वारः पादास्तेषां चतुर्विंशतिरक्षराणि, तथा उष्णिक्छंदसि चतुरक्षराधिक्यादष्टाविंशतिरक्षराणि, तथैवानुष्टुप्छंदसि द्वात्रिंशदक्षराणि, एवमग्रे बृहत्यादिष्वपि बोध्यम् ॥ * ॥ ० ॥ ४० ॥ तेषु छंदस्सु । दर्शयति नामतो निर्दिशति । तत्र तेषु छंदस्सु । ततस्तदनंतरम् । जगतीछंदतः पराणि छंदांस्यतिशब्दविशिष्टानि शुद्धानि च संति । यथा—जगत्यतिजगती च । एवं विराट् अतिविराट् च । विराट्पदमत्र शक्करीछंदःपरम् । तथा च—शक्वर्यतिशक्करी च । तथैवाष्टिरत्यष्टिरित्यादि । जगत्या सहितो विराट् जगद्विराट्, पुंवद्भावस्त्वार्षः । अतिना सहितं जगद्विराट् अतिजगद्विराट् । सर्वं संस्फोव्याह—गायत्री षडक्षरपादा, उष्णिक्सप्ताक्षरपादा, अनुष्टुबष्टाक्षरपादा, बृहती नवाक्षरपादा, पंक्तिर्दशाक्षरपादा, त्रिष्टुबेकादशाक्षरपादा, जगती द्वादशाक्षरपादा, अति जगती त्रयोदशाक्षरपादा, शक्करी चतुर्दशाक्षरपादा, अतिशक्करी पंचदशाक्षरपादा, अष्टिः षोडशाक्षरपादा अत्यष्टिस्सप्तदशाक्षरपादा, धृतिरष्टादशाक्षरपादा, अतिधृतिश्चैकोनविंशत्यक्षरपादेत्यलमतिप्रसंगेन । एतैरन्यैश्चा त्रानुक्तैः छंदोभिरुपलक्षितामिति ॥ * ॥ तेषु छंदस्सु मध्ये । अतोऽनंतपारत्वात् ॥ ४१ ॥ यतोऽनंतपाराऽतो हेतोः । किमनूद्य कस्यानुवादं कृत्वा । “ नेह नानास्ति किंचन ” इत्यादिनिषेधाय विकल्पये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम् ॥ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ॥ मायामात्रमनूद्यांते प्रतिषिध्य प्रसीदति ॥ ४३ ॥
इति श्रीमद्भा० म० एका० भगवदुद्धवसंवाद एकविंशोऽध्यायः ॥ २१ ॥

तोऽपि दुर्ज्ञेयत्वमाह । किमिति । कर्मकांडे विधिवाक्यैः किं विधत्ते । देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति । ज्ञानकांडे च किमनूद्य विकल्पयेन्निषेधार्थमित्येव मस्या हृदयं तात्पर्यम् मत् मत्तोऽन्यः कश्चिदपि जैमिन्यादिर्न वेद ॥ ४२ ॥ ननु तर्हि त्वं मत्कृपया कथय । ओमिति कथयति । मामिति मामेव यज्ञरूपं विधत्ते मामेव तत्तद्देवतारूपमभिधत्ते न मत्तः पृथक् । यच्चाकाशादिप्रपंचजातम् "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिना विकल्प्यापोह्यते निराक्रियते तदप्यह मेव न मत्तः पृथगस्ति । कुत इत्यपेक्षायां सर्ववेदार्थं संक्षेपतः कथयति । एतावानेव सर्वेषां वेदानामर्थः । तमेवाह । शब्दो वेदो मां परमार्थरूपमाश्रित्य भिदां मायामात्र मित्यनूद्य "नेह नानास्ति किंचन" इति प्रतिषिध्य प्रसीदति निवृत्तव्यापारो भवति । अयं भावः । यथा ह्यंकुरे यो रसः स एव तद्विस्तारभूतनानाकांडशाखास्वपि तथैव प्रणवस्य योऽर्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकांडशाखानामपि संगच्छते नान्य इति ॥ ४३ ॥ नित्यमुक्तः स्वतः सर्ववेदकृत्सर्ववेदवित् ॥ स्वपरज्ञानदाता

द्विकल्पं करोतीत्यर्थः ॥ * ॥ बृहती स्वरूपतो दुर्ज्ञेयेत्युक्तम् । अर्थतस्तदाह–तदेवं मदुद्भूतस्य वेदस्य तात्पर्यज्ञश्चाहमेवेत्याह–किं विधत्ते श्रुत्या कर्तव्यत्वेन किं विधीयते, स्वस्य हितार्थं जीवैरिदमेव कर्तव्यमिति, किं कर्तुमादिश्यत इत्यर्थः । किमाचष्टे किमभिधत्ते श्रुत्या किमभिधीयते, श्रुत्यर्थश्च तावत्क इत्यर्थः । किमनूद्य विकल्पयेत्–इदमेकं वस्तु इदमपरं वास्त्विदमन्यद्वास्त्विति द्वित्राणि वस्तूनि निर्दिश्य विकल्पयेत् । इदं वा कुर्यादिदं वा कुर्यादिति यद्विदधीत तत्किमित्यर्थः । ननु "अहरहः संध्यामुपासीत" "कर्मणा पितृलोकः" इति दर्शनात्कर्मैव श्रुतिर्विधत्ते 'चोदनालक्षणो धर्मः' इति व्याख्यानाद्धर्म एव श्रुत्यर्थः । "व्रीहिभिर्वा यजेत यवैर्वा यजेत" इति वैकल्पिको विधिरपि धर्मविषयक एव । यद्वा–भक्तियोगो निष्कामकर्मयोगश्चानूद्य विकल्पितो यथा–"भक्तियोगश्च योगश्च मया मानव्युदीरितः । तयोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ॥" इति । तत्र रे मूढा नहिनहीत्याह–अस्याः श्रुतेर्हृदयं हृद्गतमभिप्रायं मदन्यो नहि कश्चन वेद, प्रेयस्या अभिप्रेतमर्थं प्रेयांसं विना को वेदेति भावः ॥ ४२ ॥ अत्र ननुपदमेवं चेदित्यर्थे ज्ञेयम् । विधत्ते "यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिवाक्यैरग्निहोत्रादिरूपेण मामेव विदधाति, "वज्रहस्तः पुरंदरः" इत्यादिमंत्रवाक्यैर्मामेवेन्द्रादिरूपेण कथयति । अपोह्यते निषिध्यते । सर्वस्य त्वद्रूपत्वे को हेतुरिति पृच्छति–अत्राशयमाह । अयं भाव इति–प्रण वार्थ एव सर्ववेदार्थः । तथा च माण्डूक्योपनिषदि–"ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भव्यं भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एवेति", "प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः । अपूर्वोऽनंतरो बाह्यो न परः प्रणवोऽव्ययः । सर्वस्य प्रणवो ह्यादिर्मध्यमंतस्तथैव च । ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥" इति स्वस्यात्मनः परस्य ब्रह्मणो यदैक्यरूपं ज्ञानं तस्य दाता । ईश्वरमी श्वराभिन्नम् । 'गुरुरेव परं ब्रह्म' इति स्मृतेः ॥ * ॥ ननु तर्हि त्वमेव कृपया कथयेति तत्रोमित्याह–भक्तेर्मत्स्वरूपभूतत्वान्मद्भक्तिमेव कर्तव्यत्वेन विधत्त इत्यत आह–मां विधत्त इति । यागादिविधीनामपि मद्भक्तिवि धान एव तात्पर्यात् 'धर्मो यस्यां मदात्मकः' इति मदुक्तेः । अभिधत्ते मामिति । अहमेव सर्ववेदार्थ इत्यर्थः । विकल्प्यापोह्यते त्वहमिति 'योगास्त्रयो मया प्रोक्ताः' इत्युक्तेः । कांडत्रयेण भक्तिज्ञानं कर्म चानूद्य कर्म कुर्यात् ज्ञानं वाभ्यसेत् भक्तिं वा कुर्यादिति विकल्प्य पश्चादपोह्यते प्रथमं सकामकर्मापोहो निष्कामकर्मकरणम् । ततो ज्ञानारूढत्वे सति निष्कामकर्मणोऽप्यपोहः । ज्ञानसिद्धिदशायाम् 'ज्ञानं मयि संन्यसेत्' इत्युक्तेर्ज्ञानस्यापोहः, भक्तेरपोहस्तु न क्वापि समयेन केनापि शास्त्रवाक्येन प्रतिपादितो दृष्ट इत्यतः कर्मज्ञानापोहादेवाहमपोह्य इत्युक्तम् । प्रथमपुरुष आर्षः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धव उवाच ॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो ॥ नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम ॥ १ ॥
केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिम् ॥ सप्तैके नव षट् केचिच्चत्वार्येकादशापरे ॥ २ ॥

यस्तं वंदे गुरुमीश्वरम् ॥ १ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायामेकविंशोऽध्यायः ॥ २१ ॥ द्वाविंशे तत्त्वसंख्यानामविरोधविधोच्यते ॥ पुंप्रकृत्योर्विवेकश्च जन्ममृत्युविधादि च ॥ १ ॥ तदेवं वेदानां प्रवृत्तिपरत्वं निराकृत्य मोक्षपरत्वं निर्णीतम् । संति च मोक्षपरत्वेऽपि तदवांतरविवादाः । तथाहि । केचित्तत्त्वसंख्यासु विवदंते तत्रापि बाह्यार्थसदसत्त्वे आत्मत्वेऽप्येकत्वनानात्वादिषु तत्र किं सत्यमिति जिज्ञासया पृच्छति । कतीति । ऋषिभिरागमेषु बहुधा संख्यातानि तेषु कति युक्तानी त्यर्थः । भगवन्मतानुवादपूर्वकं बहुधा संख्यानं प्रपंचयति नवेति त्रिभिः । त्वं तावदष्टाविंशतितत्त्वान्यात्थ तानि च वयं शुश्रुम श्रुतवंतः ॥ १ ॥ २ ॥

कर्मज्ञानयोरपि स्वप्रापकमार्गत्वात्तत्रास्मच्छब्दः प्रयुक्तस्तस्य चिद्रूपत्वान्मायिकरूपत्वाच्च । तत्र मायिकरूपस्यैवापोहो युज्यते न चिद्रूपस्य ॥ * ॥ **संदर्भस्तु**—वेदपरमप्रतिपाद्यश्चाहं श्रीकृष्णस्वरूप एवेत्याह—मां विधत्त इत्यर्धकेन । मत्तात्पर्यकत्वेनैव तत्तद्विधानादिकं कृत्वा मय्येव पर्यवस्यतीत्यर्थः । तदेव दर्शयति—एतावानिति । यतः शब्दो वेदस्तदनुगतश्च स मायामात्रं जगन्निषिद्ध्य भिदां मदवतारादिभिदां चानूद्य तदंते मां श्रीकृष्णरूपमास्थायात्रलंब्य प्रसीदति कृतकृत्यो भवति "वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम्" इति श्रीगीताभ्यः ॥ * ॥ **विश्वनाथस्तु**—नन्वितोपि किंचित्स्पष्टीकृत्य व्याचक्ष्वेत्यत आह—एतावानिति । वेदात्मकः शब्दो मामास्थाय मद्भक्तियोगविधायकत्वेन मामेवाश्रित्य भिदां मत्तोपि भिन्नं कर्मयोगं ज्ञानयोगं च मायामात्रमनूद्य कर्मयोगस्य त्रिगुणमयत्वेन त्वंपदार्थज्ञानपर्यंतज्ञानयोगस्यापि विद्यामयस्य 'सात्त्विकं ज्ञानमात्मोत्थम्' इति वक्ष्यमाणत्वात्सात्त्विकत्वेन मायामात्रत्वमतोन्ते प्रतिषिद्ध्य क्रमेण तद्द्वयमपोह्य त्यक्त्वा प्रसीदति । निर्गुणाया मद्भक्त्यमृतवल्ल्याः फलस्य मन्माधुर्यानुभवरूपस्य रसेन मज्जनानानंदयन्स्वयं निर्वृणोतीत्यर्थः । ये त्वेवं व्याचक्षते—मामेव कर्मकांडे यज्ञरूपम् "यज्ञो वै विष्णुः" इति श्रुतेर्विधत्ते मंत्रवाक्यैर्देवताकांडेऽभिधत्ते ज्ञानकांडे मत्तः पृथगाकाशादिकं विकल्प्य यदपोह्यते तदप्यहमेव । तस्मादेतावानेव सर्ववेदार्थः शब्दो वेदो मां परमार्थरूपमाश्रित्य भिदा मायामात्रमित्यनूद्य "नेह नानास्ति किंचन" इति प्रसीदति निवृत्तव्यापारो भवति । एतद्व्याख्यानेपि मायामात्रस्यैव प्रतिषेधोक्तेर्भक्तानां भक्त्युपकरणानां भगवन्निकेतादीनां च मायामात्रत्वाभावान्न कापि क्षतिः ॥ ४३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्ध एकविंशोऽध्यायः ॥ २१ ॥ अविरोधस्य विरोधाभावस्य विधा प्रकारः । आदिनाऽसदतिक्रमसहनादिग्रहः (१) । तदेवम् इत्थम् । निर्णीतेऽप्यर्थे पुनः किमर्थं वाद इति पृच्छति—सन्तीति । तत्रापि तत्त्वसंख्याविवादेऽपि । बाह्यार्थानां प्रकृत्यादीनां सदसत्त्वे सत्त्वेऽसत्त्वे च आत्मा नानारूप एकरूपो वेत्यत्र च । तत्र बाह्यार्थानां सत्त्वमसत्त्वं वा आत्मन एकत्वं नानात्वं वेत्यत्र किं सत्यं यत्राहं विश्वसिमीत्याशयवान्पृच्छति । आगमेषु शास्त्रेषु । इत्यर्थ इति—मुख्यं पक्षं कथयेति भावः । परेप्सितसंपादनमेव प्रभुधर्म इत्याशयेनामन्त्रयति—प्रभो इति । "नवैकादश पञ्च त्रीन्भावान्भूतेषु येन वा" इत्यत्रैकोनविंशतितमाध्याये त्वमष्टाविंशतितत्त्वान्यात्थेति भवतो वयं शुश्रुम । केचिद्वदन्त्य आचार्या भवन्मतमुल्लंघ्यान्यथात्वं तत्त्वानां यद्वर्णयन्ति तच्छ्रेयो भवन्मतं वेति सन्देहः ॥ * ॥ तदेवं कर्मकाण्डतात्पर्यमभिज्ञाय स्पष्टतयैव ज्ञानकाण्डतात्पर्यं जिज्ञासमानस्तदवान्तरवादसमाधानाय पृच्छति—कतीति । ऋषिभिरिति तेषां बहुत्वान्मन्मते एतावन्तीति पृथक्पृथग्निश्चितानि तेषु कति युक्तानीत्यर्थः । तत्र कतिकति तत्त्वानि केके वदन्तीत्यपेक्षायामाह—नवेति त्रिभिः । ईश्वरो जीवो महदहंकारपञ्चभूतानीति नव । तन्मात्राणि पञ्च दशेन्द्रियाणि मनश्चैकादश । सत्त्वरजस्तमांसीति त्रीणीत्यष्टाविंशतितत्त्वानि त्वमात्थ तानि शुश्रुम श्रुतवन्तो वयम् । अत्र प्रकृतिस्थाने त्वया त्रयो गुणा एव गृहीतास्तेभ्यो गुणेभ्य एव क्रमेण द्विविधमहत्तत्त्वस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचित्सप्तदश प्राहुः षोडशैके त्रयोदश ॥ एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया ॥ गायंति पृथगायुष्मन्निदं नो वक्तुमर्हसि ॥ ३ ॥ श्रीभगवानुवाच ॥ युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा ॥ मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटम् ॥ ४ ॥ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा ॥ एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ॥ ५ ॥

एतावतीनां भाव एतावत्त्वं नानात्वमित्यर्थः । यद्विवक्षया यत्प्रयोजनमभिप्रेत्य च गायंति।हे आयुष्मन्नित्यमूर्ते॥ ३॥ विवक्षाभेदेन सर्वं युक्तमेव । मायया च किं नाम न युक्तमित्याह ।युक्तमिति । यथा ब्राह्मणा ऋषयो भाषंते तद्युक्तं युक्तितो ग्राह्यम् । न च वस्तुतः।यस्मात्संति सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि । किंच मायामिति असत्त्वेऽपि मायाश्रयत्वाद्घटत एवेत्यर्थः । उद्गृह्य स्वीकृत्य । न हि मरीचिजलपरिणामादिविवादे किंचिदघटितमिव भवति ॥ ४ ॥ ननु यदि सर्वमपि युक्तं तर्हि कुतो विवादो यदि च मायैवालंबनं तर्हि कुतो हेतुं प्रति विवादस्तत्राह नैतदेवमिति । हेतुं प्रति च विवदमानानां मदीया दुरतिक्रमाः शक्तयः सत्त्वाद्याः अंतःकरणवृत्तिविशेषरूपेण परिणता

ङ्कारस्य चोत्पत्तिदर्शनान्न तु गुणसाम्यरूपायाः प्रकृतेरिति त्वदभिप्रायो गम्यते ॥ १ ॥ • ॥ २ ॥ इत्यर्थ इति—नानात्वविवक्षायां को हेतुरिति प्रश्नाभिप्रायः । नित्यमूर्तित्वात्तव सर्वमुन्यभिप्रायज्ञानमस्तीत्यर्थः ॥ * ॥ हे आयुष्मन्निति नित्ययोगे मतुप् । नित्यमूर्तित्वेन हे सर्वकालव्यापिन्नित्यर्थः । तेन तेषामृषीणामाद्यतममध्यवर्तित्वात्त्वमेव सर्वमताभिप्रायज्ञः प्रष्टव्य इति भावः ॥ ३ ॥ सर्वत्राविरोधमाह—विवक्षाभेदेन कल्पनाभेदेन । अघटनघटनापटीयस्या मन्मायया किं न भवतीत्याशयेनाह—मायया चेति । युक्तं युक्तिमत् । युक्तिमत्त्वेऽपि तत्त्वनानात्वविवादो न वास्तव इत्याह—न वस्तुत इति । वास्तवत्वेऽद्वैतसिद्धान्तविघातः स्यादिति भावः । असत्यस्यापि स्वीकारो मायया सङ्घटीत्येवेत्याह—किञ्चेति । इत्यर्थ इति—"ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां यथा भासो यथा तमः ॥" इत्युक्तेरिति भावः । तदेवोदाहरणेन द्रढयति—न हीति । आदिना तच्छीतोष्णादिग्रहः । इवेन वस्तुतो घटनाभाव उक्तः ॥ * ॥ येषां विवादेऽपि वस्तुतो नैव विवाद इत्याह—तत्र सर्वेणापि मतेन स्वमतमनुवादयँस्तत्प्रशंसति—युक्तमिति । युक्तमेव भाषन्ते यतो ब्राह्मणा वेदतात्पर्यज्ञास्ते सर्वत्र यथावदेव भाषन्ते । ननु यदि सर्वमेव युक्तं तर्ह्यन्यमतानि परित्यज्य कथं स्वस्वमतं प्रवेशयेयुस्तत्राह—मायामिति । मरुमरीचिकादीनामपि तावद्देशपरिच्छिन्नत्वात् परिमाणतारतम्यमस्त्येवेति स्वीयाष्टाविंशतिपक्षस्य स्थापनीयत्वमस्त्येवेति भावः । मायात्राचिन्त्यशक्तिर्न त्वसद्व्यञ्जिकाविद्या तामुद्गृह्यालम्ब्य । तत्र मदीयामिति तेषां यत्किञ्चित्तादालम्बनात् । तस्याः पूर्णाया मदेकालम्बनत्वात्स्वं स्वैकवेद्या यत्किञ्चिद्युक्तिष्वप्यास्ति किंतु मदीया युक्तिरेव सर्वप्रकाशिकेति भावः । वस्तुतस्तु यथा मरीचिजलमेव नास्ति किमुत तत्परिमाणादिवादस्तथा ब्रह्मव्यतिरिक्तानि तत्त्वान्येव न सन्ति तत्संख्यायां कुतो विवाद इत्यर्थः ॥ ४ ॥ अत्र द्विधाऽऽक्षिपति—नन्विति । हेतुं प्रति विवादहेतुं प्रति । दुरतिक्रमा अतिक्रान्तुमशक्याः । सत्त्वाद्याः सत्त्वरजस्तमोरूपाः । इत्यर्थ इति—विकल्पाकारेण परिणतसत्त्वादिगुणवृत्तय एव वादहेतुरिति भावः ॥ * ॥ तथैवाह—नैतदिति । मम शक्तयो नानाऽतर्क्यरूपा एव हेतव इत्यर्थः ॥ * ॥ **विश्वनाथः**—विवदमानानां तेषां विवादे हेतुर्मच्छक्तयो मायाशक्तिवृत्तय एव तत्तर्करूपा अविद्या एवेत्यर्थः । तदुक्तं हंसगुह्ये—"यच्छक्तयो वदतां वादिनां वै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यासां व्यतिकरादासीद्विकल्पो वदतां पदम् ॥ प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यति ॥ ६ ॥ परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ ॥ पौर्वापर्य
प्रसंख्यानं यथा वक्तुर्विवक्षितम् ॥ ७ ॥ एकस्मिन्नपि दृश्यंते प्रविष्टानीतराणि च ॥ पूर्वस्मिन्वाऽपरस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ॥ ८ ॥ पौर्वा
पर्यमतोऽमीषां प्रसंख्यानमभीप्सताम् ॥ यथा विविक्तं यद्वक्रं गृह्णीमो युक्तिसंभवात् ॥ ९ ॥

एव हेतुरित्यर्थः ॥ ५ ॥ तासां विवादहेतुत्वमुपपादयति । यासामिति । यासां व्यतिकरात्क्षोभाद्वदतां पदं विषयो विकल्पो भेद आसीदंतःकरणवृत्तिविकल्पो वा तन्मूलभूतः । एतदेव व्यतिरेकेण द्रढयति । शमदमयोर्द्वंद्वैक्यम् । तस्मिन् प्राप्ते विकल्पोऽप्येति लीयते । तं च विकल्पनाशमनुवादः शाम्यतीति ॥ ६ ॥ संति सर्वत्रेति यदुक्तं तत्प्रपंचयति परस्परेति द्वाभ्याम् । अन्योऽन्यस्मिन्ननुप्रवेशाद्वक्तुर्यथा विवक्षितं तथा पूर्वं कारणमपरं कार्यम् तदभावस्तेन । कार्यकारणभावेन प्रसंख्यानं भवति । यद्वा पूर्वा अल्पसंख्या पराधिकसंख्या तयोर्भावः पौर्वापर्यं तेन प्रसंख्यानं गणनमिति ॥ ७ ॥ अनुप्रवेशं दर्शयति । एकस्मिन्नपीति । पूर्वस्मिन्कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि मृदि घटवत् । अपरस्मिन्कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि घटे मृद्वत् ॥ ८ ॥ अविरोधमुपसंहरति । अतोऽमीषां तत्त्वानां पौर्वापर्यं तत्तत्का

विवादसंवादभुवो भवन्ति । कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥" इति । समुदितानां हेतुत्वाद्धेतुरित्येकवचनं जात्यैव । यद्वा—हेतुं कारणं प्रतीत्यर्थः ॥ ९ ॥ तासां शक्तीनाम् । यासां सत्त्वादिशक्तीनाम् । वदतां वादं कुर्वताम् । भेदस्य विकल्पहेतुत्वाद्विकल्पपदेन कथं भेदबोध इति चेदाह—अन्तःकरणेति । अन्तःकरणवृत्तिरूपो विकल्पो वेति । तन्मूलभूतो वादमूलकारणम् । एतदेव विकल्पस्य वादहेतुत्वम् । व्यतिरेकेण यत्र विकल्पो न तत्र वादोऽपि नेत्येवंरूपेण । शाम्यति नश्यति ॥ * ॥ व्यतिकरादासंगाद्धेतोः सर्वोऽपि विकल्पो मतभेदो भेदमात्रं वा वदतां विषयो भवति । स तु विकल्पः शमदमे मन्निष्ठान्तःकरणविहित बाह्येन्द्रियनिग्रहे प्राप्ते सति लीयतेऽपगच्छति सर्वविलक्षणेश्वरतत्त्वमात्राग्रहात् । ततः स्वत एव तदनुवादकारणीभूतविकल्पनाशानन्तरं वादोऽप्यपगच्छति । एतदेव स्फुटयति—विकल्प एवं वा एवं वा, एवं न एवं नेत्येवं सहस्रविधः । वदतां पदं विवादास्पदं मच्छक्त्यावेशाद्भवति । "शमो मन्निष्ठता बुद्धेर्दम इन्द्रियसंयमः" इत्युक्तलक्षणे दैवान्मन्निष्टबुद्धित्वे सति इन्द्रियसंयमेऽहङ्कारोपरमे विकल्पोऽप्येति सर्वः संशयो नश्यति तत्पश्चाद्वादो विरुद्धवादश्च नश्यत्येवेति भावः ॥ ६ ॥ पूर्वोक्तं स्मारयति—सन्तीति । अनुप्रवेशात्कारणे क्वचित्कारणे कार्यानुप्रवेशात्क्वचिच्च कार्ये कारणानुप्रवेशादन्तर्भावात् । तत्त्वन्यूनाधिकभावस्य का गतिरिति चेदाह—यद्वेति । तेन न्यूनाधिकभावेन ॥ * ॥ परस्परस्मिंस्तत्त्वानामनुप्रवेशात्पौर्वापर्यं भवति मतभेदेषु मध्ये कस्मिंश्चिन्मते कार्यस्य कारणे प्रवेशात्पूर्वत्वम्, कस्मिंश्चिन्मते कारणस्य कार्ये प्रवेशादपरत्वं ततश्च प्रकृष्टं न्यूनमधिकं वा संख्यानं स्यात् । पौर्वापर्यं च प्रसंख्यानश्चेति द्वन्द्वैक्यम् । ननु तत्त्वानां कारणे कार्ये वा किं प्रवेशेन संख्याया न्यूनत्वे प्रकर्षेणाधिक्ये वा किं तत्राह—वक्तुर्वादिनो यथा विवक्षितं वक्तुमभीष्टं तथैव तत्तन्मतं पृथगभूदित्यर्थः । अत एव संदर्भेऽप्युक्तम्—'वक्तुर्यथा विवक्षितं तथा प्रसंख्यानम्' भवतीति शेषः ॥ * ॥ दीपिका—कार्यकारणयोरन्योऽन्यप्रवेश एव विवक्षितो न तु कार्यकारणभावेन प्रसंख्यानमतो यद्वेति । अल्पसंख्यायाः प्रथमोपस्थितेः पूर्वत्वं अधिकसंख्यायाः पश्चादुपस्थितेरपरत्वं तेन गणनम् ॥ ७ ॥ एतदेव विवृणोति—एकस्मिंस्तत्त्वे कारणतत्त्वे कार्यतत्त्वे वा ॥ * ॥ यदि सूक्ष्मरूपेण कारणे कार्यस्य स्थितिर्न स्यात्तदा तत्रासम्बद्धत्वादुपपत्त्यनुपपत्तिः स्यादित्यर्थः । अनुगतत्वेन व्यापकत्वेन ॥ ८ ॥ यतोऽनुप्रवेशरीत्या विरोधाभावोऽतो हेतोः । तत्र तत्त्वेषु । नन्विदमार्षं नानातत्त्ववादमतं तवानुमतं न वेति पृष्टे भगवानाह—गृह्णीम इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् ॥ स्वतो न संभवादन्यस्तत्त्वज्ञो ज्ञानदो भवेत् ॥ १० ॥
पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ॥ तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः ॥ ११ ॥

रणकार्यत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये यथाविवक्षया यद्वक्त्रं यस्य मुखं प्रवर्तते तत्सर्वं विविक्तं निश्चितं वयं गृह्णीमः । उक्तन्यायेन सर्वत्र युक्तेः संभवात् ॥ ९ ॥ ननु कार्यकारणतत्त्वानां पृथक्त्वापृथक्त्वविवक्षया भवतु नाम संख्याभेदः । जीवेश्वरयोस्तु कथं भेदाभेदविवक्षा यया षड्विंशतिपंचविंशतिपक्षौ प्रवृत्ता वत आह । अनादीति । स्वतो न संभवत्यन्यतस्तु संभवात्स्वतः सर्वज्ञः । परमेश्वरो ज्ञानदोऽन्यो भवितव्य इति षड्विंशतिपक्षाभिप्राय इत्यर्थः ॥ १० ॥ कथं तर्हि पंचविंशतिपक्षस्तत्राह । पुरुषेति । वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वादतस्तयोरत्यंतमन्यत्वकल्पना अपार्था व्यर्था । एवं पंचविंशतिपक्षः प्रवृत्त इत्यर्थः । नन्वेवमपीश्वरप्रसादलभ्यज्ञानस्य पृथक्त्वात्पक्षद्वयमपि न घटतेऽत आह । ज्ञानं चेति । सत्त्वगुणवृत्तित्वात्तदंतर्भूतमित्यर्थः । षड्विंशतिपक्षास्तु औपाधिकभेदविवक्षयेत्यर्थः । ननु

उक्तन्यायेन परस्पराऽनुप्रवेशन्यायेन । सर्वत्र मतेषु । युक्तेः पौर्वापर्यप्रसंख्यानरूपायाः । सम्भवात्संघटनात ॥ * ॥ पौर्वापर्यतत्तत्कारणकार्यगतत्वं प्रसंख्यानं न्यूनाधिकमभीप्सतां यथाविवक्षया यस्य मुखं प्रवर्तते तत्सर्वं वयं विविक्तं सविवेकमुक्तरीत्या स्वीकुर्म इत्यर्थः । सर्वत्राल्पसंख्यायामधिकसंख्यायां च कार्यकारणयोरन्योन्यप्रवेशयुक्तेः सत्त्वादिति भावः ॥ ९ ॥ किञ्चिदंगीकृत्य किञ्चिदाक्षिपति—नन्विति । यया विवक्षया । स्वतो नेति—"स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा" इति विदुरोक्तेः । अन्यतस्त्विति—'नैषा मतिस्तर्केणापनेयाऽन्येनैव प्रोक्ता सुज्ञानाय प्रेष्ठा" इति श्रुतेः "आचार्यवान्पुरुषो वेद" इति श्रुतेश्च । परमेशस्याप्यन्याधीनज्ञानत्वेऽनवस्थाभिया स स्वतःसिद्धज्ञान एव स्वीकार्य इत्याह—स्वत इति । इत्यर्थ इति—शुद्धसत्त्वप्रधानमायोपाधिको मायायाः स्वाश्रयानावरकत्वात्तत्त्वज्ञः, अविद्योपहितादन्य इति भावः ॥*॥ आत्मवेदनमपि न संभवति कुतः परमात्मवेदनमित्यर्थः । ततश्चानिर्मोक्षप्रसङ्गादीश्वराख्यपरमात्मपर्यन्तज्ञानाय जीवाख्यपुरुषादन्यस्तत्त्वज्ञो ज्ञानदो भवेत्सम्भाव्यते स तु स्वयंप्रकाशज्ञान ईश्वर इति भावः ॥ * ॥ **विश्वनाथस्तु**—आत्मवेदनमिति षष्ठ्यर्थे प्रथमा । आत्मवेदनस्य स्वतः स्वेनासम्भवाद्धेतोः । स्वतः सर्वतत्त्वज्ञः परमेश्वरोऽन्यो भवेदेवेति वैष्णवसिद्धान्तः ॥ १० ॥ पञ्चविंशतिपक्षं पृच्छति—कथमिति । तत्र प्रश्ने । द्वयोर्जीवेश्वरयोः । यतो द्वयोश्चिद्रूपत्वं समानमतो हेतोः । तयोर्जीवेश्वरयोः । इत्यर्थ इति—जीवेश्वराभेदमादाय पञ्चविंशतिपक्षः प्रवृत्त इति भावः । अत्र पुनराक्षिपति—नन्विति । तदन्तर्भूतं सत्त्वगुणान्तर्भूतम् । इत्यर्थ इति—"अयमात्मा ब्रह्म अहं ब्रह्म आत्मैव नृसिंहदेवो भवति तत्त्वमसि नान्योऽतोऽस्ति द्रष्टा" इत्यादि श्रुतिभिर्भेदबाधनादन्यकल्पना व्यर्थैव । यथा जीवगतमज्ञानं तथेशगतं ज्ञानं च मायाया एव गुणः । कार्यं नात्मनः अतस्तयोर्मिथ्यात्वान्नात्मभेदकत्वमिति निर्गलितोऽर्थः ॥ * ॥ अन्ये तु पूर्वोक्तवैशिष्ट्यमबुद्ध्वा किंतु चिन्मात्ररूपत्वेनावैशिष्ट्यं बुद्ध्वैवं वदन्तीत्याह—तर्हि तन्मते पुरुषस्य ज्ञानं कुतः स्यात्तत्र चैवं वदन्तीत्याह—ज्ञानं च प्रकृतेरेव गुणः, ततश्च तद्गुणप्रवाहेषु भ्रमतस्तस्य कदाचित्तेन सम्बन्धः स्यात्, नदीप्रवाहे भ्रमतस्तारककाष्ठादिनेवेति भावः ॥ * ॥ **विश्वनाथस्तु**—उक्तलक्षणे भेदे वर्तमानेऽपि न वैलक्षण्यमपि । अभेदोऽपि कीदृशम्—अणु अल्पमात्रं चिद्रूपत्वेन शक्तिमत्त्वेन वैश्यात् । तयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मना गुणाः ॥ सत्त्वं रजस्तम इति स्थित्युत्पत्त्यंतहेतवः ॥ १२ ॥
सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ॥ गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥ १३ ॥

ज्ञानकृतं वैलक्षण्यमिति चेन्न । ज्ञानं हि प्रकृतेर्गुणः ॥ ११ ॥ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यादत आह । प्रकृतिरिति । गुणसाम्यं हि प्रकृतिरतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य अकर्तृत्वात्तस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः ॥ १२ ॥ अतः सत्त्वं सत्त्वमयं ज्ञानं प्रकृतेर्गुण इति पूर्वेणैवान्वयः । ननु तन्निवर्त्यं कर्माज्ञानं च तत्त्वांतरं स्यात् । न । रजःकर्म रजसो वृत्तिः । अज्ञानं च तमसः अतः कर्माज्ञानयोरजस्तमोद्वारा प्रकृतावेवांतर्भाव इति भावः । तथापि

भेदेऽप्यल्पमात्रं खल्वभेदो वर्तत एवेति भावः । अतः परमेश्वरादन्योऽत्यन्तभिन्न एवेति कल्पना व्यर्था । नन्वेवमपीति तैः । सत्त्वगुणवृत्तित्वाज्ज्ञानं प्रकृतावन्तर्भूतमित्यर्थः ॥ ११ ॥ पुनराक्षिपति—नन्विति । यतो गुणानां साम्यावस्थैव प्रकृतिरतो हेतोः । तद्विशेषरूपाः प्रकृतिविशेषरूपाः । तस्याः प्रकृतेः । तस्यात्मनः । स्थित्यादेर्हेतुभूताः कर्तृभूता ये गुणाः सत्त्वादयस्तदाश्रयत्वं न सम्भवति तदकर्तृत्वहानादिति भावः ॥ * ॥ तर्हि भगवन्मताष्टाविंशतिपक्षोद्वलकः षड्विंशतिपक्षः कथं सिद्ध्यतीत्याशङ्क्य तन्निरस्यन् पुनः पूर्वमतं स्थापयति—प्रकृतिरिति सार्द्धेन । गुणानां सत्त्वादीनां साम्यमेव प्रकृतिः प्रकृतेर्गुणास्ते तु आत्मनो न भवन्तीति ये प्रकृतेर्गुणाः सत्त्वादयस्ते आत्मनः पुरुषस्य ये गुणा ज्ञानानन्दादयस्ते प्रकृतेर्नेति किमुतेश्वरगुणानां वार्तेत्यर्थः । प्रकृतेर्गुणाश्च केवलं प्रपञ्चस्थित्यादिहेतव इत्याह—तत्रैव सत्त्वं रज इत्यर्द्धेन । अन्तशब्देनात्र चात्यन्तिकप्रलयरूपो मोक्षोऽपि गृह्यते तमःकारणस्यैव प्रलयस्य क्रमप्राप्तत्वान्मोक्षस्य ज्ञानहेतुकत्वात् ॥ * ॥ **विश्वनाथस्तु**—ननु ज्ञानं जीवधर्म इति प्रसिद्धं कथं प्रकृतेर्गुण इति ब्रूषे, तथा कर्मापि जीवकृतमेव, अज्ञानमपि जीवस्यैव न प्रकृतेर्नापीश्वरस्येत्यत आह—एतानि तत्त्वानि जीव एवान्तर्भावनीयान्यन्यथा सर्वमत एव तत्त्ववृद्धिः स्यादत आह—प्रकृतिरिति सार्द्धेन । गुणानां साम्यं हि प्रकृतिरतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्याकर्तृत्वात् । स्थित्युत्पत्त्यन्तहेतव इति—जीवस्य स्थित्यादिहेतुभूतगुणाश्रयतानुपपत्तेरिति भावः । सत्यमेतेन किमायातमत आह—सत्त्वमिति । ज्ञानमिति यत्प्रसिद्धं तत् 'सत्त्वात्सञ्जायते ज्ञानम्' इत्युक्तेः सत्त्वकार्यत्वात्सत्त्वमेव । एवं कर्म रज एव अज्ञानं तु तम एवेत्येतानि प्रकृतेरेव धर्मा उपाध्यधीने जीवे प्रतीयन्त एवेत्यत एतानि प्रकृतावेवान्तर्भाव्यानि ॥ १२ ॥ यतो गुणाश्रयत्वमात्मनो न सम्भवति अतः कारणात् । सत्त्वमयं सत्त्वविकारः । पुनराशंकते—नन्विति । तन्निवर्त्यं ज्ञानपरिहार्यं नेत्याह । इति भाव इति—वृत्तिवृत्तिमतोरभेदोपचारात् रजस्तमो द्वारीकृत्य कर्माज्ञाने अपि न प्रकृतितो भिन्ने इति तात्पर्यम् । तथापि कर्माज्ञानयोः प्रकृत्यन्तर्भूतत्वेऽपि । नेत्याह—कालस्य " योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् " इति श्रीदशमोक्तेरीश्वरचेष्टारूपत्वान्न तेन तत्वान्तरता स्यात् । 'चेष्टाचेष्टावतोर्यो यद्व्यापारः स तदभिन्नः' इति न्यायात् । स्वस्माद्भावयत्युत्पादयति विश्वमिति स्वभावो महत्तत्त्वम् 'विश्वमात्मगतं व्यञ्जन्' इत्युक्तेः । 'सूते विश्वम्' इति सूत्रमित्येकार्थता । तस्य महत्तत्त्वस्य । सर्वशक्तिमत्त्वं तु क्रियाशक्तिप्रधानत्वेन सर्वोत्पादकत्वादेवेति ध्येयम् । यथायथं यथोचितम् । पक्षद्वयेऽपि षड्विंशतिपञ्चविंशत्यन्यतरपक्षद्वयेऽपि । उक्तन्यायमन्यत्रातिदिशति—एतच्चेति । एतदन्तर्भावनम् ॥ * ॥ यच्च 'सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानम्' इति । तदपीह प्रपञ्च एवोच्यते भेदेन व्यपदिश्यतेमात्रं न तु वस्तुविचारे सतीति भावः । तत्तत्समुदायस्य प्रकृतेरपि जडत्वात् प्रत्यक्चिदाभाससम्बन्धेनैव ज्ञानत्वव्यपदेशाच्च । स च न परोक्षस्य तज्ज्ञानस्य हेतुः तदा स्फुरत्यपि तस्मिंस्तदनुत्पत्तेः, नतराञ्चापरोक्षस्य, न हि गृहान्तर्गतस्वप्रकाशाभासेन सूर्यः प्रकाश्यते अपि तु स्वप्रकाशतयैवेति । ततः 'स यदजया त्वजाम्' इत्याद्युक्तदिशाऽनाद्यविद्यायुक्तत्वेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ १४ ॥ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥
वाक्पाण्युपस्थपाय्वंघ्रिकर्माण्यंगोभयं मनः ॥१५॥ शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥१६॥

कालस्वभावयोस्तत्त्वांतरता स्यात् । न । गुणव्यतिकर इति । गुणानां व्यतिकरो यस्मात्स ईश्वर एव कालो नाम । स्वभावो नाम सूत्रं महत्तत्त्वमेव । तस्य सर्वशक्तिमत्त्वात् । तदेवं ज्ञानादीनां यथायथमंतर्भावान्न पक्षद्वयेऽपि तत्त्ववृद्धिरेतच्च पक्षांतरेष्वपि ज्ञेयम् ॥ १३ ॥ स्वमते तु गुणानामागमापायित्वात्प्रकृतेर्भेदो विवक्षितोऽतो गुणास्त्रीणि तत्त्वान्यपराणि पंचविंशतितत्त्वानि पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति पुरुष इति सार्धद्वाभ्याम् । व्यक्तं महत्तत्त्वम् । नभआदीनि पंचतन्मात्राणि । मे मया ॥ १४ ॥ एकादश दर्शयति । श्रोत्रमिति । दर्शनं चक्षुः । ज्ञानशक्तयो ज्ञानेन्द्रियाणि पंच । वागादिपाय्वंतानि द्वंद्वैक्येनोक्तानि चत्वार्यंघ्रिश्चेति कर्माणि कर्मेंद्रियाणि पंच । उभयात्मकं मनः । उभयेंद्रियसाधारणमित्यर्थः । अंग हे उद्धव । एवमेतान्येकादश ॥ १५ ॥ पंच दर्शयति । शब्द इति । शब्दादीनि विषयतया परिणतानि पंच महाभूतानि । ननु गत्यादिभिस्तत्त्वाधिक्यं पक्षत्रयेऽपि स्यान्नेत्याह । गतीति । गतिश्च उक्तिश्च उत्सर्गौ च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि ।

पिहितज्ञानस्य पुरुषस्य मोक्षार्थमन्वेष्टव्यो ज्ञानदोऽन्य ईश्वर एवावसीयते । एवमेवानुवदिष्यते श्रोत्रापि 'त्वत्तो ज्ञानं हि जीवानाम्' इति पराभिध्यानात्तु तिरोहितम् । 'ततो ह्यस्य बन्धविपर्ययौ' इत्यत्र परेण्येतदंगीकृतम्, तद्देयं च ज्ञानं संविदारब्धस्वरूपशक्तेरंशत्वात्तदन्तःपात्येव । गुणत्रयं च त्रैगुण्यस्य प्रकृतेरङ्गत्रयमिति न त्वाधिक्यमपीति भावः । तदेवं षड्विंशतिपक्ष एव सुविविक्त इति दर्शितम् । एवं षड्विंशतिपक्षं स्थापयित्वा तत्र च प्रकृतेर्गुणा इत्युक्त्वा गुणत्रयस्याधिक्यं बाधमानो " नवैकादश पञ्च त्रीण्यात्थ त्वमिति शुश्रुम " इति तत्प्रश्नानुवादेन गणशः स्वमतं गणयति—गणेति त्रयेण । तत्र स्वमताधिकसङ्ख्याहेतूनि त्रीणि तत्त्वानि प्रथमतो दर्शयति अर्द्धेन । गुणेति—गुणानां व्यतिकरः क्षोभो यस्मात् एवंभूतः कालः कालाख्यस्वचेष्टात्मक ईश्वरस्तावदेकस्वभावस्तत्तद्वैशिष्ट्यप्राप्तिहेतुः कर्मवासना द्वितीयं वक्ष्यते च साङ्ख्यकथने—" मया कालात्मना धात्रा कर्मयुक्तमिदं जगत " इति सूत्रं क्रियाशक्त्यात्मकं मुख्यप्राणाख्यं तृतीयं महान् सूत्रेण संयुत इति ॥ * ॥ **विश्वनाथोऽपि**—ननु तदपि कालस्वभाववतिरिच्येते तौ कुत्रान्तर्भाव्यौ तत्राह—गुणानां व्यतिकरो यस्मात्स ईश्वर एव कालो नाम, स्वभावो नाम कर्मपरिणामः । स च सूत्रं महत्तत्त्वमेव तस्य सर्वशक्तिमत्त्वात्तौ तयोरन्तर्भाव्याविति सर्वमतेष्वपि ज्ञानादितत्त्ववृद्धिपरिहार उक्तः ॥ १३ ॥ स्वमतमाह भगवान्—स्वमते त्विति । अतो भेदविवक्षातः । पूर्वोक्तपक्षद्वयसाधारणानि षड्विंशतिपञ्चविंशतिपक्षोक्तानि, व्यज्यते विश्वमस्मादिति व्युत्पत्तेः । तन्मात्राणि तेषां नभआदीनां मात्राणि स्वल्परूपाणि शब्दादीनि तत्तन्नामकश्रोत्रादिविषयभिन्नानि । 'मात्रा क्लीबे भवेत्सूत्रे' इति धरणिः । म इति तृतीयार्थे षष्ठी ॥ * ॥ अथ नवैकादश पञ्च क्रमेण गणयति—पुरुष इति सार्द्धद्वयेन । पुरुषो जीवः व्यक्तं महत्तत्त्वं ज्ञानशक्त्यात्मकम् । नभआदीनि महाभूतानि । मे मया ॥ १४ ॥ दृश्यतेऽनेनेति व्युत्पत्तेः । उभयात्मकं सङ्कल्पविकल्पात्मकम् । एतानि श्रोत्रादीनि ॥ * ॥ उभयात्मकं ज्ञानकर्मात्मकम् ॥ १५ ॥ पुनस्तत्त्वाधिक्यं शङ्कते—नन्विति । पक्षत्रये पूर्वोक्ते । उत्सर्गौ मलोत्सर्गवीर्योत्सर्गौ । इत्यर्थ इति—तत्त्वान्तरत्वस्वीकारे कर्मेन्द्रियाणां निर्विषयत्वं स्यादिति भावः ॥ * ॥ शब्दादयो विषया भूतसूक्ष्माणि इतीश्वरादयोऽष्टाविंशतिरुक्ताः । तत्र गत्यादीनाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥ १७ ॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् ॥ १८ ॥ सप्तैव धातव इति तत्रार्थाः पंच खादयः ॥ ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः ॥ १९ ॥ षडित्यत्रापि भूतानि पंच षष्ठः परः पुमान् ॥ तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् ॥ २० ॥ चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्मनः ॥ जातानि तैरिदं जातं जन्मावयविनः खलु ॥ २१ ॥

तत्रोत्सर्गौ पायूपस्थफले । शिल्पं करस्य । अतो न तत्त्वांतराणीत्यर्थः ॥ १६ ॥ तदेवं मतत्रयेपि तत्त्वसंख्याभेदं निरूप्य यद्विवक्षया गायंतीति यत्पृष्टं तत्तन्मततात्पर्यं दर्शयति । सर्गादाविति । कार्याणि षोडश विकाराः कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिरस्य विश्वस्य सर्गादौ गुणैः सृज्यत्वाद्यवस्थां धत्ते उपादानकारण रूपत्वात् । पुरुषस्त्वव्यक्तोऽपरिणामी निमित्तभूतः केवलमीक्षते । अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति ॥ १७ ॥ तत्त्वैरारब्धकार्यस्य तदंतर्भावमभिप्रेत्याह । व्यक्तादय इति । व्यक्तादयो महदादयः प्रकृतेरुत्पन्ना ये धातवस्ते विकुर्वाणाः पुरुषेक्षणेन लब्धवीर्याः संहता अंडं सृजंति । तदा प्रकृतेर्बलात्तामाश्रित्येत्यर्थः ॥ १८ ॥ एवं स्वमतमुपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितां घटनां विशेषतः सतात्पर्यां दर्शयति । सप्तैवेति । ज्ञानं जानातीति द्रष्टा जीवः । उभयोर्द्रष्टृदृश्ययोराधार आत्मा चेति सप्त । तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः । उत्तरेषामंतर्भावार्थमाह । ततस्तेभ्यः सप्तभ्यो देहेंद्रियासवः सर्वकार्याणि जायंते ॥ १९ ॥ षडिति मतेऽपि भौतिकस्य भूतांतर्भावं जीवस्य च परमात्मांतर्भावमाह । तैर्युक्त इति ॥ २० ॥ अन्नं पृथ्वी आत्मनो जातानि आत्मना सह चत्वारि तत्त्वानि । अंतर्भावार्थमाह ।

धिक्यं निस्स्यति । फलानि कार्याणि ॥ १६ ॥ मतत्रये षड्विंशतिपञ्चविंशत्यष्टाविंशतितत्त्वलक्षणे सृज्यत्वाद्यवस्था इति शेषः । यतः केवलमीक्षिताऽतो हेतोः ॥ * ॥ सर्गादाविति सर्वेषां विवक्षितमुक्तम् ॥ १७ ॥ तदन्तर्भावं तत्त्वेष्वन्तर्भावम् । इत्यर्थ इति–परमकारणतया प्रकृतिमालम्ब्यैव ब्रह्माण्डसर्जनक्षमा भवन्ति तां विना तेषामनुद्भवादिति भावः ॥ * ॥ **दीपिका**–कार्यस्याण्डस्य तदन्तर्भावं तत्त्वान्तर्भावम् । धारयन्त्यण्डमिति धातवस्तत्त्वानि । संहता मिलिताः ॥ १८ ॥ तत्र सप्तपक्षे । खादिषु आकाशादिषु । उत्तरेषामिन्द्रियादीनाम् । धातवः तत्त्वानि ॥ * ॥ **दीपिका**–परस्परानुप्रवेशलक्षणां घटनां रचनाम् । आत्मा च परमात्मा । उत्तरेषां देहादिकार्याणाम् ॥ १९ ॥ आत्मनः सम्भूतैः । "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतेराकाशादिपञ्चभूतैः इदं समुपाविशत् "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः ॥ * ॥ आत्मसम्भूतैः स्वस्मात्सञ्जातैः । तैर्महाभूतैः । इदं देहादिकम् । समुपाविशदिति जीवस्याभेदो विवक्षितः । "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुतेः ॥ २० ॥ 'कार्येण कारणं कारणेन कार्यञ्च निर्दिश्यते' इति न्यायेनान्नेन कार्येण कारणस्य पृथिव्या ग्रह । तैस्तेजआदिभिः । "सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" इति श्रुतेर्भूतत्रयात्मिकापि सृष्टिः श्रूयते संज्ञामूर्तिक्लृप्तिस्तु "त्रिवृत्कुर्वत उपदेशात्" इति न्यायात् ॥ * ॥ चत्वारीति मते, आकाश इन्द्रियागोचरत्वात्तत्त्वेष्वमननम्, वायोश्च तैजसः सूक्ष्मावस्थत्वमेवेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संख्याने सप्तदशके भूतमात्रेंद्रियाणि च ॥ पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः ॥२२॥ तद्वत्षोडशसंख्याने आत्मैव मन उच्यते ॥ भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश ॥ २३ ॥ एकादशत्वमात्माऽसौ महाभूतेंद्रियाणि च ॥ अष्टौ प्रकृतयश्चैव पुरुषश्च नवेत्यथ ॥ २४ ॥ इति नानाप्रसंख्यानं तत्त्वानामृषिभिः कृतम् ॥ सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनम् ॥ २५ ॥ उद्धव उवाच ॥ प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ ॥ अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः ॥ २६ ॥ प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि ॥ एवं मे पुंडरीकाक्ष महांतं संशयं हृदि ॥ छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः ॥ २७ ॥

तौरिति । अवयविनः कार्यस्य ॥ २१ ॥ भूतानि च मात्राणि च इंद्रियाणि च पंचपंच एकेन मनसा सह आत्मा सप्तदशः ॥ २२ ॥ आत्मैव संकल्पयन्मन उच्यते । त्रयोदशपक्षे भूतानि तन्मात्रैरेकीकृतानि पंचैव । इंद्रियाणि तत्प्रकाशकानि पंचैव । मनश्चैकमिंद्रियाधिष्ठातृ । आत्मा च द्विविधः । एवं त्रयोदश ॥ २३ ॥ एकादशत्वपक्षे पंचमहाभूतानि पंचेंद्रियाणि जीवमनसोश्चात्मांतर्भावेनैतान्येवैकादश । नवपक्षे अष्टौ प्रकृतयः पुरुषश्च । विकाराणां तदंतर्भावः ॥ २४ ॥ उपसंहरति । इतीति । इति एभिः प्रकारैः । प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः ॥ २५ ॥ ननु गुणसाम्यं प्रकृतिस्तस्याः सत्त्वादयो गुणा न त्वात्मन इति तयोर्भेदाप्रतीतेः कथं ज्ञातुं शक्यत इत्युद्धवः पृच्छति । प्रकृतिरिति । आत्मना जडाजडस्वभावेन विलक्षणौ । अन्योन्यापाश्रयात्परस्परपरिहारेणाप्रतीतेरित्यर्थः ॥ २६ ॥ अन्योन्यापाश्रयत्वमेवाह । प्रकृता

त्रयाणामेव ग्रहः । जीवस्य परमात्मन्यन्तर्भावः विस्फुलिंगानां वह्नाविव ॥ २१ ॥ भूतानि च मात्राणि चेन्द्रियाणि चेति द्वन्द्वः । द्विरावृत्तोऽपि पञ्चशब्दोऽत्र त्रिरावृत्तो बोध्यः । कारणत्वेन महदादयस्तन्मात्रासु कर्मेन्द्रियाणि भूतेषु यथायथमन्तर्भाव्यान्यत्र ॥ * ॥ आत्मा परमात्मा ॥ २२ ॥ तद्वत् भूतमात्रेन्द्रियाणि च पञ्चपञ्चेत्युक्तवत् । तत्प्रकाशकानि तन्मात्रापदगृहीतशब्दादिविषयप्रकाशकानि ॥ * ॥ ० ॥ २३ ॥ विकाराणां भूतेन्द्रियमनसाम् । अथ नवेति अष्टौ प्रकृतय इत्यतः प्राग्योज्यम् ॥ * ॥ केचिदेकादशेति पद्यं प्रक्षिप्तमाहुः । अतः क्वचिन्नास्त्यपीदं पद्यम् ॥ २४ ॥ एभिः पूर्वोक्तैः प्रकारैस्तत्तत्त्वसङ्ख्याभेदैः । इत्यर्थ इति–प्रकृतिस्तत्कार्याणि च जडानि परिणामीनि च, पुरुषश्चेतनोऽपरिणामीति भेदविज्ञानं विना प्रकारदर्शनं न सम्भवतीति भावः । न्याय्यमुचितम् । अशोभनं दुष्करम् ॥ * ॥ उपसंहरति–इतीति ॥ २५ ॥ तदित्थं तत्त्वसङ्ख्यानुपपत्तिपरिहारश्रवणेन तत्र निःशंकोऽपीदानीं प्रकारान्तरेण शंकते उद्धवः–प्रकृतिरिति । विलक्षणौ भिन्नौ । परस्परपरिहारेण द्वयोरेकत्यागेन । इत्यर्थ इति–द्वयोः समुचितैव प्रतीतिरस्ति न पार्थक्येनेति भावः ॥ * ॥ तत्त्वविचारोत्थं संशयान्तरमाह–प्रकृतिर्माया पुरुष ईश्वरः । यद्यपि शास्त्रदृष्ट्यैव भेदो ज्ञायते तथापि देहेष्वनयोरन्योन्याश्रयात् परस्परपरित्यागेन भिन्नतयाऽज्ञानात् । हे कृष्ण हे संशयकर्षणशील त्वमेवैतं संशयमपाकर्तुं समर्थ इति भावः ॥ २६ ॥ तेन आत्मना । तस्याः प्रकृतेः । इत्यर्थ इति–"यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः । अपां रसस्य च तथा प्रकृतेः पुरुषस्य च ॥" इति देवहूत्युक्तेरिति भावः । मिथ्याप्रकृतावपि सच्चिद्रूपेणात्मा लक्ष्यतेऽतः प्रकृतिरस्ति भाति चेत्युच्यते । प्रकृतिश्च कर्तृत्वभोक्तृत्वादिविक्रियारूपेणात्मनि अहं कर्ता अहं भोक्ता च इत्यादिना लक्ष्यत इति वा भावार्थः । एवमुक्तरीत्या सर्वज्ञत्वात्त्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः ॥ त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः ॥ २८॥ श्रीभगवानुवाच ॥ प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ ॥ एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ॥ २९ ॥ ममांग माया गुणमय्यनेकधा विकल्पबुद्धिश्च गुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ॥ ३० ॥

विति । प्रकृतौ तत्कार्ये देहे । प्रकृतिश्चात्मनि । तेन विना तस्या अप्रतीतेः । अहमित्यभेदप्रतीतेर्न देहात्मनो भेदो लक्ष्यत इत्यर्थः । एवं हृदि वर्तमानं संशयम् । नये युक्तौ नैपुणं प्रावीण्यं येषां तैः ॥ २७ ॥ अर्हसीत्युक्तं तत्र हेतुमाह । त्वत्त इति । हि यस्मात् त्वत्तस्त्वत्प्रसादादेव । अत्र ज्ञाने प्रमोषो भ्रंशश्च ते शक्तितो मायातः । ननु स्वप्रकाशस्यात्मनः कथं ज्ञानप्रमोषः ज्ञानदाने तत्प्रमोषे वा मम किं प्रयोजनं तत्राह । त्वमेवेति ॥ २८ ॥ विकाराविकाराभ्यां नानात्वैकत्वाभ्यां सापेक्षनिरपेक्षत्वाभ्यां प्रकाशाप्रकाशाभ्यां चात्यंतं भेदं वक्तुमाह । प्रकृतिः पुरुषश्चेति । विकल्पोऽत्यंतभेद एव । कुत इत्यपेक्षायां प्रकृतिशब्दोक्तदेहादिसंघातस्य विकारित्वं तावद्दर्शयति एष इति द्वाभ्याम् । एष सर्गः सृज्यत इति सर्गो देहादिसंघातो वैकारिको विकारवान् । अत्र हेतुः । गुणव्यतिकरात्मको गुणक्षोभकृतः ॥ २९ ॥ नानात्वमाह । ममेति । विकल्पं भेदं तद्बुद्धीश्च । अनेकधात्वं प्रपंचयति । वैकारिकोऽनेकविकारवानपि स्थूलेन मार्गेण तावत्त्रिविधः । त्रैविध्यमाह । अध्यात्ममिति । एकं रूपम् ॥ ३० ॥

संशयच्छेदसामर्थ्यमस्तीति सम्बुद्ध्यभिप्रायः ॥ * ॥ तदेवं प्रकृतिपुरुषाभेददर्शनमेव । तेन विनेत्यादि यथासङ्ख्यं हेतुद्वयम् । तेनात्मना । तस्या देहावस्थलक्षणायाः प्रकृतेः । हे पुण्डरीकाक्षेति—शङ्कराराधने समर्पण प्रतिज्ञातसहस्रकमलपूर्त्यर्थं त्वया निजनेत्रमप्यर्पितमतो मदज्ञानापाकरणमपि त्वया प्रतिज्ञातं तदपि यथाकथञ्चित्कर्तव्यमेवेति भावः । युक्तौ अर्थापत्त्यनुमानोपमानान्यतमायाम् ॥ २७ ॥ तत्रार्हत्वे । द्वेधाऽऽक्षिपति—नन्विति । तत्राक्षेपोत्तरं त्वमेव जानासीत्याह—त्वमेवेति ॥ * ॥ एवमिति यदुक्तं तत्र श्रीभगवन्मतं जीवेश्वरभेदपक्षमेव हेतुत्वेन दर्शयति—त्वत्त इति । शक्तितो मायावृत्तित एवेति । तस्य तत्रानासक्तस्य नैर्घृण्यं निरस्तम् । ननु मायावृतानां मत्तः कथं ज्ञानं स्यात्कथं वा स्वप्रकाशस्यात्मनो मायया ज्ञानप्रमोषस्तत्राह—त्वमेवेति । पूर्वत्र मायादूरीकरणे तवैव शक्तिः उत्तरत्र मायायास्त्वदङ्गीकृतादन्यत्राभिभवसामर्थ्यमस्त्येवेति ध्वनितम् । तदेव मष्टाविंशतिसहायः षड्विंशतिपक्ष एवानेन दृढीकृतः ॥ * ॥ **विश्वनाथस्तु**—त्वत्तो ज्ञानं त्वयैव विद्याशक्त्या ज्ञानप्रदानमित्यर्थः । तेऽत्र शक्तितो मायावृत्तितोऽविद्यातः प्रमोषः, तयैव ज्ञानस्य चौर्यमित्यर्थः । ननु मच्छक्तेर्ज्ञानचौर्येण किं प्रयोजनं तत्राह—त्वमेवेति ॥ २८ ॥ बहुहेतुभिः प्रकृतिपुरुषयोर्भेदं वक्तुमाह—विकारेत्यादिना । भेदे हेतुं पृच्छति—अत्र विकारवत्त्वे । यद्वा—माया पुरुषश्चेति विकल्पः । प्रकृतेः पुरुषसत्तातिरिक्तसत्ताया असम्भवेन न पुरुषाद्भेदः, सदसतोरभेदासम्भवान्नाभेदः, भेदाभेदयोरेकत्र विरोधान्नोभयात्मकोऽतोऽनिर्वाच्य एवायमिति भावः । यश्चैष वैकारिको नानाविकारात्मकः सर्गः स च तस्या एव गुणानां व्यतिकरात्मकः क्षोभकल्पनारूपः ॥*॥ अत्यन्तं भिन्न एव प्रकृतिः पुरुषश्च विकारा विकारादिभिस्तदपि 'दृश्यते न भिदा तयोः' इति कथं ब्रवीषीति भावः । गुणक्षोभकृत इति प्रकृतौ विकारो दर्शितः । पुरुषस्तु केवलमीक्षमाणो निर्विकारः प्रसिद्ध एवेति भावः ॥२९॥ सर्गानेकविध्यमाह—ममेति । तद्बुद्धीर्भेदबुद्धीः । एकं प्रथमम् । अथ द्वितीयमधिदैवं रूपमन्यत्तृतीयमधिभूतम् ॥ * ॥ वैकारिक इत्यत्र सर्ग इति विशेष्यं पूर्वश्लोकादनुवर्त

१ अन्योन्या० इत्यत्र तदेवाहेत्येव पाठ एतत्सम्मतो भाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति यः स्वतः खे ॥ आत्मा यदेषामपरो य आद्यः स्वयाऽनुभूत्याऽखिलसिद्धसिद्धिः ॥ एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तम् ॥ ३१ ॥

तानि रूपाणिं दर्शयति । दृगध्यात्मम् । रूपमधिभूतम् । अत्र रंध्रे चक्षुर्गोलके प्रविष्टमार्कं वपुरंशोधिदैवमिति । सापेक्षप्रकाशतामाह । परस्परमिति चक्षुषा रूपं ज्ञायते । तदन्यथाऽनुपपत्त्या चक्षुः तत्प्रवृत्त्यन्यथानुपपत्त्या तदधिष्ठात्री देवता । ततश्च चक्षुषः प्रवृत्तिस्ततो रूपज्ञानमित्येवमेतत्त्रयं परस्परं सिध्यति । अत्र रंध्र इति विशेषणव्यावर्त्यमाह दृष्टांतोपयोगितया । यस्तु खे आकाशे अर्कों वर्तते मंडलात्मा स तु स्वतः सिध्यति । चक्षुर्विषयत्वेऽपि प्रतियोग्यपेक्षाभावमात्रेण स्वत इत्युक्तम् । इदानीमात्मनो विकारित्वाद्यभावेन भेदमाह । यद्यस्मादात्मा एषामध्यात्मादीनामाद्यः कारणमत एकरूपोऽभिन्नश्च तस्मादेतेभ्यः परो भिन्नः स्वप्रकाशत्वादपीत्याह । स्वयाऽनुभूत्या स्वतः सिद्धप्रकाशेनाखिलानां सिद्धानां सिद्धिः । परस्परप्रकाशकानामपि प्रकाशकः । सर्वेषामपि सामान्यतश्चित्प्रकाशविषयत्वात् । अत एव तस्य स्वप्रकाशत्वं सिद्धम् । चक्षुषि दर्शितं त्रैविध्यमिंद्रियांतरेष्वप्यतिदिशति । एवमिति यथा चक्षुरेवं त्वगाद्यपीत्यर्थः । त्वक् स्पर्शो वायुरिति । श्रवणं शब्दो दिश इति । जिह्वा रसो वरुण इति ।

नीयम् ॥ ३० ॥ तान्यध्यात्मादीनि आत्मानमहङ्कारमधिकृत्य भवतीति अध्यात्ममिन्द्रियवर्गः । तैजसाहङ्कारकार्यत्वादिन्द्रियाणामित्यभिप्रेत्याह—दृगध्यात्ममिति । आर्कमर्कसम्बन्धि 'वपुः स्यादंशदेहयोः' इति कोशात् । वपुरंशोऽपि परिच्छिन्नप्रकाशकत्वादंशोक्तिर्न विरुद्धा तदन्यथानुपपत्त्या चक्षुर्विना रूपज्ञानासम्भवाच्चक्षुः सिद्ध्यति । चक्षुषो जडत्वेन रूपज्ञाने तत्प्रवृत्तेश्चक्षुःप्रवृत्तेश्चेतनं देवं विनासम्भवेन तदधिष्ठात्री देवता सिद्ध्यति । तस्याश्चेतनत्वम् "योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः" इत्युक्तेरवसेयम् । ततो देवतातः । ततश्चक्षुःप्रवृत्तेः । एतत्त्रयं चक्षुरादित्रयम् । अत्र रन्ध्रे इति भूतले घट इतिवत्सप्तम्यन्तमपि विशेषणं भवति तार्किकनये दृष्टान्तोपयोगिता त्वत्रेत्थम् यथा—चक्षूरन्ध्रगो रविः सापेक्षसिद्धस्तथाऽऽकाशगो नेति ज्ञेया । यद्यप्याकाशगस्यापि रवेश्चक्षुरपेक्षास्ति ब्रह्मात्मज्ञाने वृत्तिव्याप्तिरिव तथापि प्रतियोगिनो निरूपकान्तररवेरपेक्षा न स्वतःप्रकाशरूपत्वाद्ब्रह्मणः फलव्याप्तिवत् । तदुक्तम्—"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता । स्वयं स्फुरणरूपत्वान्नाभासस्तत्र युज्यते ॥" इति । प्रकारान्तरेणात्मनो भेदं साधयति—इदानीमिति । अतः कारणत्वात् । सर्वेषां वस्तूनाम् । अत एव सर्वप्रकाशकत्वादेव । एतन्न्यायमन्यत्राप्यतिदिशति—चक्षुषीति । इत्यर्थ इति—चक्षुषि यथा त्रैविध्यमध्यात्मादिरूपमस्ति तथैव त्वगादिष्वपि ज्ञेयमिति भावः । तत्रान्तःकरणे । इत्येवमुक्तविधया । इत्यर्थ इति—अन्तःकरणचतुष्क एव त्रैविध्यं ध्येयमिति भावः ॥ * ॥ तस्य रूपज्ञानस्य चक्षुर्विनाऽनुपपत्त्याऽसिद्ध्याऽतीन्द्रियं चक्षुर्ज्ञायतेऽनुमीयते । अयं चक्षुष्मान् रूपज्ञानाद्यन्नैवं तन्नैवं यथान्ध इति । तस्य चक्षुषो रूपदर्शने या प्रवृत्तिस्तस्या अधिष्ठातृदेवतामन्तराऽसिद्ध्या चक्षुरधिष्ठात्री अर्करूपदेवताऽनुमीयते । इदं चक्षुः साधिष्ठातृकं जडत्वेऽपि प्रकाशकारित्वाद्दास्यादिवत् यन्नैवं तन्नैवं यथा घटादि । ततो देवतातः । ततश्चक्षुषः । इत्येवमेतत्त्रयं परस्परं सिद्ध्यति । अत्र रन्ध्र इति विशेषणं तु आर्कवपुषो ज्ञेयम् । यथा भूतले घटो नास्तीत्यत्र भूतलस्य विशेषणत्वमभावस्य विशेष्यत्वं भूतलानुयोगिको घटप्रतियोगिकोऽभाव इति । तथा कीदृगार्कं वपुरत्र रन्ध्रे एतद्रन्ध्राधारकमिति । तथा चैतद्विशेषणेन यद्व्यावर्त्यं भेद्यं तदाह । तत्र हेतुः—दृष्टान्तस्य या दार्ष्टान्तिके उपयोगिता उपकारकत्वं तया यथाऽऽकाशस्थरवेर्न चक्षुर्दोषोपरक्तत्वं किंतु चक्षुस्थस्यैव तथान्तःकरणावच्छिन्नस्यैव जीवस्य पुण्यपापाद्युपरक्तत्वं न परमात्मन इति भावः । ननु यदि स्वतः सिद्ध्यति तर्हि तमन्धः कथं न पश्यति, तत्राह—चक्षुर्विषयत्वेऽपीति । यथा चक्षुरवच्छिन्नाधिदैवतस्य प्रतियोगिनः सम्बन्धिनश्चक्षुरपेक्षा न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः ॥ अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामस ऐंद्रियश्च ॥ ३२ ॥
आत्मा परिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदाऽर्थनिष्ठः ॥ व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥ ३३ ॥

नासा गंधोश्विनाविति । चित्तेन युक्तमंतःकरणांतरमपि । तत्र चित्तं चेतयितव्यं वासुदेव इति । मनो मंतव्यं चंद्र इति । बुद्धिर्बोद्धव्यं ब्रह्मेति । अहंकारोऽहंकर्तव्यं रुद्र इत्येवं त्रिविधमित्यर्थः ॥ ३१ ॥ ननु पुनरपि वैलक्षण्यमात्रमेवोक्तं त्रिविधप्रपंचव्यतिरिक्तात्मप्राप्तिस्तु कुतः स्यात् । अहंकारनिवृत्त्या । तत्कुतः । त्रिविधविकल्पनिवृत्त्यैवे त्याशयेनाह । योऽसावहमहंकारः । तमेवाह । गुणक्षोभं करोति तथा ततः परमेश्वरात्कालाद्वा निमित्तात्प्रधानं मूलमुपादानं यस्य तस्मान्महतः प्रसूतो विकारः । स त्रिवृत् त्रिविधो मोहमयस्य विकल्पस्य हेतुः । त्रिवृत्त्वमेवाह । वैकारिक इति ॥ ३२ ॥ स कुतो निवर्तते आत्मा ज्ञानविलसितत्वात्तज्ज्ञानेनेत्याशयेनाह । आत्मा परिज्ञानमय इति । ननु कथं मोहमयत्वं विकल्पस्याहंकारस्य वा कैश्चित्सत्यत्वांगीकारात्तत्राह । विवाद इति । अयं भिदार्थनिष्ठो विवादोऽप्यात्मा परिज्ञानमय इत्यन्वयः ।

तथा गगनस्थरवेश्चक्षुरपेक्षास्तीत्येतावन्मात्रेण स्वत इत्युक्तं चक्षुर्विषयत्वमस्त्येवेत्यर्थः । वास्तवोऽर्थस्तु—यथा चक्षुःप्रकाशितपदार्थानां यथा चक्षुःस्थाधिष्ठातृरवेस्स्वप्रकाशनेऽपेक्षास्ति, तथा खस्थरवेः स्वप्रकाशने चक्षुःस्थरवेरपेक्षा न, तस्य स्वयंप्रकाशत्वाच्चक्षुस्स्थस्य तु खस्थं विना न प्रकाशकत्वमन्यथान्धकारेऽपि घटादिपदार्थप्रत्यक्षता स्यादिति । यथा दीपः स्वमपि प्रकाशयति पदार्थान्तराणि च । यथा दीपस्य स्वप्रकाशने दीपान्तरापेक्षा नास्ति तथा खस्थरवेरपीति तात्पर्यम् । अतः सर्वकारणत्वादेकरूपः विवर्तोऽधिष्ठानत्वेनाविकृतस्वरूपः कार्येणाभिन्नश्च, तस्माद्विकारित्वाद्यभावादेतेभ्योऽऽध्यात्म्यादिभ्यो भिन्नः । आत्मनः स्वप्रकाशत्वात्स्वव्यवहारे परानपेक्ष त्वादप्यात्मा भिन्न इत्याह । अत एव सर्वप्रकाशकत्वादेव । तस्यात्मनः, इति दीपिका ॥३१॥ पुनराक्षिपति—नन्विति । उत्तरमाह—अहङ्कारनिवृत्त्येति । तदहंकारनिवर्तनम् । तमेवाहंकारमेव । ततस्तस्मात् । परमेश्वरात् साधा रणात् । 'कालाद्गुणव्यतिकरः' इत्युक्तेरसाधारणात्कालाद्वेति । स विकारः । मोहमयस्य मोहप्रधानस्यासत इत्यर्थः ॥*॥०॥३२॥ सोऽहंकारः । तज्ज्ञानेन आत्मज्ञानेन । पुनराक्षिपति—नन्विति । भिदा भेदः सैवार्थस्तत्र निष्ठा स्थितिर्यस्य स तथा । एतादृशो योऽयं विवादोऽहंकारसत्यत्वासत्यत्वलक्षणः । अस्यैव विवादस्यात्मा परिज्ञानमयत्वेऽन्येषामात्मज्ञानमयत्वं स्यादत आह—यद्वेति । भिदया भेदेनोपलक्षितोऽर्थः प्रपञ्चस्तस्मिन्निष्ठा यस्य स तथा । वस्तु सत्यं मात्रास्वरूपं यस्य तद्वस्तु ब्रह्म तन्निष्ठो वस्तुमात्रनिष्ठः । यतोऽवस्तुमात्रनिष्ठो भेदोऽतो हेतोः । पुनराशंकते—नन्विति । अलं कृतम् तन्निवृत्तिप्रयासेन भेदनिवृत्तियत्नेन । प्रत्युत किञ्च । तत्कृतैर्भेदबुद्धिकृतैः । ते मद्विमुखाः ॥ * ॥ सोऽहंकारः केन निवर्तते, उच्यते—'भयं द्वितीयाभिनिवेशतः स्यात्' इत्यनुसारेण मद्बहिर्मुखतानिदानत्वेन मदन्तर्मुखतयैवेत्याह—आत्मा परिज्ञानमय इति । स्वलोकात्स्वाश्रयादपि मत्तः परावृत्तधियां पुंसां यदात्मापरिज्ञानं स्वरूपास्फूर्तिस्तन्मयो यो निजमतपरमतयोरस्तीति नास्तीति भिदार्थनिष्ठो विवादः सोऽर्थशून्योऽपि नैवोपरमेतेति मद्बहिर्मुखतायां सत्यां विवादमात्रं प्रसरेन्न तु ज्ञानमुदयते मदन्तर्मुखतायां ज्ञानमप्या नुषङ्गिकतयोदयते परमपुरुषार्थलक्षणमत्प्राप्तिस्तु मुख्यतयेत्यर्थः ॥ * ॥ **विश्वनाथस्तु**—संशयच्छेत्तारो विद्वांस एव तत्त्वनिश्चायका इति चैतेषामपि विवादो नोपशाम्यतीत्याह—आत्मेति । प्रपञ्चोयमस्तीति सत्य इति कश्चिदुपपत्त्या निश्चिनोति तन्मतं दूषयित्वा नास्तीति मिथ्येति कश्चिन्निश्चिनोतीति विवादो ह्यात्मनः परमात्मतत्त्वस्यापरिज्ञानसूचक इत्यर्थः । आत्मन्यनुभवगोचरीकृते विवादानुप पत्तेः । भिदार्थे मद्भिन्न एवार्थे प्रयोजने । ननु मयि निष्ठा नितरां स्थितिर्यस्मात्सः । यद्वा—भिदा विदारणं परमतखण्डनमेव, तत्रैव निष्ठा यस्य सः । किञ्च—व्यर्थो विफलः तस्मान्न पुण्यं न पापं न स्वर्गो न नरकश्चेत्येवं निष्प्रयोजनोऽपि नोपरमेतेति मन्मायाशक्तेरेव स स्वभाव इति भावः । तदुक्तम्—"यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति" इति । किञ्च—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्धव उवाच ॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो ॥ उच्चावचान्यथा देहान्गृह्णंति विसृजंति च ॥३४॥ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः ॥ न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः ॥ ३५ ॥ श्रीभगवानुवाच ॥ मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतम् ॥ लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ॥ ३६ ॥ ध्यायन्मनोनुविषयान्दृष्टान्वाऽनुश्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति ॥ ३७ ॥

यद्वा विवादः सर्वोपि भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः । अतः परस्परं युक्तिभिरेव भेदस्य निराकृतत्वान्मोहमयत्वं सिद्धमिति । ननु यद्यहंकारो विकल्पश्च नास्ति अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह । व्यर्थोऽपीति । व्यर्थोऽप्यर्थरहितोऽपि स्वरूपभूतान्मत्तो बहिर्मुखानां नैवोपरमेत् । प्रत्युत तत्कृतैः कर्मभिरुच्चनीचदेहेषु ते संसरंतीति॥ ३३॥ तत्र पृच्छति । त्वत्त इति । व्यापकस्यात्मनो देहाद्देहांतरगमनमकर्तुः कर्माणि नित्यस्य च जन्ममरणादीनि कथमिति भावः ॥ ३४ ॥ एतद्विद्वांसो न संति । हि यस्मान्मायया वंचिता मोहिताः ॥ ३५ ॥ लिंगशरीराध्यासेन सर्वं घटत इत्युत्तरमाह । मन इति । प्रधानत्वेन पंचभिरिति निर्देशोऽन्येषामप्युपलक्षणार्थम् । देहाद्देहांतरं प्रति याति । ततोऽन्य एवात्मा तन्मनोऽनुवर्तते अहंकारेणानुगच्छति ॥ ३६ ॥ ननु मनसोऽपि पूर्वदेहवियोगो देहांतरयोगश्च कथं भवतीति चेत्स्मृतिवियोगयोगाभ्यामिति

बहुसम्भवान्ते मत्प्रापकं मार्गं प्राप्यापि ते ततश्च्युता भवन्तीत्याह—मत्तः परावृत्तधियामिति । वेदशास्त्रार्थो मत्प्रापको मार्ग एव तं विद्वांसस्ते मां प्राप्तुं प्रवृत्तधियोऽपि मध्ये विवादमङ्गीकृत्य मत्तः सकाशात्परावृत्तधियो भवन्तीति भावः । मत्तः कीदृशात्—स्वलोकतः स्वान्भक्तानेव लोकते कृपया पश्यति नान्यानिति तथा तस्मात्, भक्ताश्च विवादानुत्पतिष्णव एव । तेन मच्चिन्तनादिनैव स्वायुःसफलयितव्यं न तु विवादास्पदस्य प्रपञ्चस्य तत्त्वानिश्चयजिज्ञासया तद्विफलयितव्यमिति सूचितम् ॥ * ॥ **दीपिका**—परस्परं युक्तिभिरिति—भेदो नाम वस्तु तत्स्वरूपं तद्धर्मो वा । आद्ये हस्तः कर इतिवत् घटाभेद इति पर्यायापत्तिः, द्वितीये भेदस्यापि भेदस्तद्धर्मत्वात् पुनस्तस्यापि पुनस्तस्यापीत्यनवस्थेत्यादियुक्तिभिः ॥ ३३ ॥ तत्र संसरणे । इति भाव इति—न हि व्यापकस्य देहान्तरगमनमकर्तुः कर्मकरणं नित्यस्य जनिमृतिवृद्ध्यादीनि सम्भवन्तीति तात्पर्यम् ॥ * ॥ त्वत्त इति युग्मकम् । तत्र बहिर्मुखानां संसरणे एतद्विद्वांसः व्यापकस्य निरीहस्याकर्तुः संसरणं कथमित्यत्र सिद्धान्तवेत्तारः ॥ * ॥ **विश्वनाथस्तु**—यदि बुद्धिस्त्वत्तः परावृत्ताभूत्तदैव तेषां कर्मभिर्बन्धः, ततश्चोच्चावचानुत्तमाधमान्देहान्स्थूलान्यथा गृह्णन्ति विसृजन्तीति त्वद्बहिर्मुखानां जन्ममरणयोः प्रकारं ब्रूहीत्यर्थः ॥ ३४ ॥ तत् देहग्रहणादि । मम मह्यम् । अनात्मभिर्बुद्धिबलविधुरैः । दुर्विभाव्यं दुर्ज्ञेयम् । त्वं तु गा वेदलक्षणा वाचो विन्दति सर्वथा जानातीति गोविन्दोऽसि, तवास्य प्रश्नस्योत्तरदाने सामर्थ्यमिति सम्बुद्ध्यभिप्रायः । त्वदन्य एतत्प्रश्नोत्तरविद्वांसो ज्ञातारो न सन्तीति तत्र हेतुः—वञ्चिता इति । तव माययेति शेषः ॥ * ॥ अनात्मभिरल्पबुद्धिभिर्दुर्विभाव्यं भावयितुमप्यशक्यं, किं पुनर्वक्तुमित्यर्थः । ननु लोके विज्ञा बहवः स्युस्त एतत्प्रष्टव्यास्तत्राह—न हीति । वञ्चितास्त्वन्मायया मोहिताः ॥ ३५ ॥ संसरणस्याध्यासमूलत्वमाह—लिंगशरीरेति । अध्यासो विपरीतज्ञानम्, तदत्र लिंगदेह आत्मबुद्धिरूपम्, तेन । सर्वं शरीरग्रहणादि । प्रधानत्वेन ज्ञानसाधनत्वेन ज्ञानेन्द्रियाणां प्राधान्येन पञ्चभिरिति । अन्येषां कर्मेन्द्रियाणाम् । लोक्यते सर्वैरिति लोको देहः "लोको भूरादिलोकेषु देहे ज्ञाने जने दृशि" इति निरुक्तिः । ततो मनःप्रधानलिंगात् । अहङ्कारेण मिथ्याध्यासेन । कर्ममयं कर्मजादृष्टाश्रयम् ॥ * ॥ मनः मनःप्रधानं सूक्ष्मशरीरमेव लोकाल्लोकान्तरं याति कर्ममयं कर्माधीनम् आत्मा जीवोऽन्यस्ततो भिन्नोऽपि तदुपहितत्वादेव तत्सूक्ष्मशरीरमनुवर्तते अनुगच्छति ॥ * ॥ **संदर्भस्तु**—तदनुवर्तते तदारूढश्चलति तदारूढत्वात्तच्चलनेनैव चलतीत्याह ॥ ३६ ॥ पुनराशङ्कते—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः ॥ जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ॥ ३८ ॥ जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ॥ ३९ ॥ स्वप्नं मनोरथं चेत्थं प्राक्तनं न स्मरत्यसौ ॥ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ॥ ४० ॥ इंद्रियायनसृष्टयेदं त्रैविध्यं भाति वस्तुनि ॥ बहिरंतर्भिदा हेतुर्जनोऽसज्जनकृद्यथा ॥ ४१ ॥

वक्तुं तयोः कारणमाह । ध्यायदिति । कर्मतंत्रत्वात्कर्मोपस्थापितान् दृष्टान्वा अनुश्रुतान्वेदोक्तान्विषयाननुध्यायेत् । अथानंतरं ध्यायमानेषूयदाविर्भवत्पूर्वविषयेषु च सीदल्लीयमानं भवति तदनंतरं तस्य स्मृतिः पूर्वापरानुसंधानं नश्यति ॥ ३७ ॥ ततः किमत आह । विषयेति । कर्मोपस्थापितदेवादिदेहात्यंताभिनिवेशेनात्मानं पूर्वदेहं पुनर्मनो न स्मरेदिति यत्सैव यातना देहाभिनिवेशेन भयशोकादेर्देवादिदेहाभिनिवेशेन वा हर्षतर्षादेर्हेतोः पूर्वदेहेत्यंतविस्मृतिरहंकारनिवृत्तिस्तदभिमानिनो जंतोर्जीवस्य मृत्युरुच्यते न तु देहवन्नाशः ॥ ३८ ॥ जन्म तु विषयस्य देहस्यात्मतया स्वीकृतिमभिमानं प्राहुर्न तु देहवदुत्पत्तिः । न च पुत्रादिदेहवत्प्रीत्यतिशयमात्रेण किंतु सर्वभावेनाभेदेन । अभिमानमात्रेणोत्पत्तिमरणयोर्दृष्टांतद्वयम् । यथा स्वप्नश्च मनोरथश्चेत्यर्थः ॥ ३९ ॥ दृष्टांतौ विवृणोति । स्वप्नमिति । तत्र वर्तमाने स्वप्नादौ पूर्वं चेति अपूर्वमिवेति चान्वयः । पूर्वसिद्धमप्यात्मानमपूर्वमिवाद्य जातमिव पश्यतीत्यर्थः ॥ ४० ॥ उपसंहरति । इंद्रियाणामयनं मनस्तस्य देहांतराभिनिवेशेन या सृष्टिरुत्पत्तिस्तया

नान्विति । तयोः जन्ममरणयोः । दृष्टान् ऐहिकान् । आविर्भवद्रूढाभिमानं लीयमानं त्यक्ताभिमानम् । तदनन्तरं मनोलयानन्तरम् ॥ * ॥ एवं सर्वदैव सूक्ष्मशरीरानुवर्तिनो जीवात्मनः स्थूलशरीरेण वियोग एव मृत्युः संयोग एव जन्मेति वस्तयोरपि स्थूलवियोगसंयोगयोः सर्वथा स्मृतिवियोगस्मृतिसंयोगावेव कारणमित्याह–ध्यायन्निति । कर्मतन्त्रं कर्माधीनं मनः । कर्मोपस्थापितान् दृष्टान् विषयान्मर्त्यलोकस्थान् परदारादीन् श्रुतान्देवलोकस्थान् तानेव ध्यायत्सत्, अथ क्षणान्तरं ध्येयेषु तेष्विव उद्यत् तदाकारीभवत्, सीदत् पूर्वध्यातेभ्यो विषयेभ्यः सर्वथा विच्युतीभूतं भवति तदनु तदनन्तरं तस्य स्मृतिः पूर्वपरानुसन्धानं नश्यति ॥ ३७ ॥ ततो मनोलयात् । तस्यैव मनसः । पूर्वादिना क्लेशादिग्रहः । द्वितीयेनेर्ष्यादिग्रहः । तदभिमानिनः पूर्वदेहाभिमानिनः । नित्यत्वाज्जीवस्य देहवन्नाशो नास्तीत्यर्थः ॥ * ॥ कस्यचिद्धेतोः प्रारब्धकर्मसमाप्तेः ॥ ३८ ॥ नित्यत्वाद्देहवज्जन्मापि नेत्याह–अभेदेन ब्राह्मणोऽस्मीत्याद्यभिनिवेशेन । इत्यर्थ इति व्याख्येयम् ॥ * ॥ स्वप्नमनोरथ इति–'सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवति' इति, पुंस्त्वमार्षम् ॥ ३९ ॥ स्वप्नं स्वप्नभवं मनोरथं मनोरथभवं चेत्थमात्मानं प्राक्तनमपीत्यन्वयः । आदिना मनोरथग्रहः । इत्यर्थ इति–स्वप्ने मनोरथे च प्राक्तनमप्यप्राक्तनं जानातीति भावः ॥ * ॥ वर्तमानदेहस्थो जीवो यथा प्राक्तनं स्थूलदेहं न स्मरति इत्थमेव वर्तमानस्वप्नस्थो मनोरथस्थो वा जीवः प्राक्तनं स्वप्नं मनोरथं वा न स्मरति । कश्चित्स्वप्ने कदाचित्पूर्वकं स्वप्नं स्मरतीति चेत्, कश्चित्कदाचिज्जातिस्मरश्च पूर्वदेहं स्मरतीति न सर्वथा नियमः । किञ्च–तत्र वर्तमानदेहस्थो जीवः पूर्वसिद्धमेवात्मानमपूर्वमिव पश्यति, अहं षाडार्षिक इति सातवार्षिक इति इतः पूर्वमहं नासमिति प्रतिक्षणमात्मानं जानातीत्यर्थः ॥ ४० ॥ तदभिमानेन देहान्तराभिमानेन असदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यदा ह्यंग भूतानि भवंति न भवंति च ॥ कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥ ४२ ॥ यथाऽर्चिषां स्रोतसां च फलानां वा वनस्पतेः ॥ तथैव सर्वभूतानां वयोऽवस्थादयः कृताः॥४३॥ सोयं दीपोऽर्चिषां यद्वत्स्रोतसां तदिदं जलम् ॥ सोऽयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषाम् ॥४४॥

वस्तुन्यात्मनि तदभिमानेनेदं त्रैविध्यमुत्तममध्यमनीचत्वमसदेव भातीत्यन्वयः । एवंभूत आत्मा बाह्याभ्यंतरभेदहेतुश्च भवति । बाह्यविषयानांतरान्सुखादींश्च पश्यतीत्यर्थः । यथा जनो जीवः स्वप्ने बहूनसतो जनान् देहान्कुर्वन्पश्यन् बहुरूपो भाति तद्वत् । यद्वा इदं त्रैविध्यमध्यात्मादिरूपं भाति । असज्जनकृदुष्टपुत्रोत्पादको जनः पिता स्वयं समोऽपि पुत्राभिमानतस्तदरिमित्रादिषु यथा भेदहेतुर्भवति तद्वदिति । अन्यत्समानम् ॥ ४१ ॥ तदेवं लोकप्रसिद्धौ जन्ममृत्यू निरूप्य सूक्ष्मावपृष्टावपि तौ वैराग्याय निरूपयति । नित्यदा प्रतिक्षणं भूतानि शरीराणि उत्पद्यंते नश्यंति च । कालस्यातिसूक्ष्मत्वात्तत्कृतं भवनमभवनं वाऽविवेकिभिर्न लक्ष्यते ॥ ४२ ॥ सतोर्जन्ममरणयोर्ज्ञाने कारणमेतद्भवेत् । सत्त्वमेव तयोः कुत इत्याशंक्यानुमानेन साधयति। यथेति । अर्चिषां परिणामादिभिः स्रोतसां गत्यादिभिः फलानां रूपादिभिर्यथाऽवस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः । आदिशब्देन तेजोबलकामकौशलादीनामुपादानम् । विमतं प्रतिक्षणोत्पत्तिविनाशवत् अवस्थाभेदवत्त्वाद्दीपज्वालादिवदित्यनुमानम् ॥ ४३ ॥ कथं तर्हि प्रत्यभिज्ञा तद्वदेव सादृश्यावलंबिनीत्याह । सोऽयमिति । सादृश्यादर्चिषामेव यथा सोऽयं दीप इति प्रत्यभिज्ञा यथा च स्रोतसां प्रवाहजलानामेव तदिदं जलमिति तथा सोऽयं पुमा

भाति देहधर्मानात्मन्यारोपयतीत्यर्थः । एवंभूतोऽसदुत्तममध्यमनीचत्वभानवानात्मा । इत्यर्थ इति—असद्देहाध्यासेनासद्विषयाननुभवतीत्यर्थः । दृष्टान्तमाह—यथेति । कुर्वन्स्वाप्निकाविद्यया कल्पयन् तद्वज्जागरणेऽपीति । न ह्येकस्य युगपदुत्तमत्वादित्रयभानं संगच्छत इत्यत आह—यद्वेति । तद्वद्देहाभिमानतोऽध्यात्मादित्रैविध्यं प्रतीयत इत्यर्थः । अन्यत् इन्द्रियाय नेत्यादिसमानं पूर्ववत् । अध्यात्मादित्रयभानन्त्वित्थम्—इन्द्रियोपलक्षितलिंगाधारस्य देहस्य कोशपञ्चकसंघातस्य सृष्ट्या कल्पनया त्रैविध्यं भाति । यत्कल्पितसंघातात्मैतदहन्ताध्यासगोचरत्वादध्यात्मं, यत्तन्नियामकं तदधिदैवं, यत्तद्बहिर्विषयतया कल्प्यं तदधिभूतमिति । यथाऽसज्जनकृत् अभद्रात्मकजगतः कल्पको जनः स्वप्नदृक् ज्ञानेन्द्रियायनसंवातकल्पनयैव स्वस्मिन्नेव बहिरन्तर्भिदा हेतुः त्रैविध्यं मनुते॥ * ॥ उपसंहरति—इन्द्रियायनस्येन्द्रियाश्रयस्य देहस्य सृष्टयैवेदं त्रैविध्यं विश्वतैजसप्राज्ञत्वं वस्तुनि जीवे भाति। त्रैविध्यं कीदृशम्—बहिर्भिदानां जागरे श्रोत्रादीन्द्रियगुणभेदानाम् अन्तर्भिदानां स्वप्नसुषुप्त्योर्मनोबुद्धिगुणभेदानां हेतुरुत्पादकम् । जनो यथाऽसज्जनकृत् अभद्रपुत्रोत्पादकः इन्द्रियमनोबुद्धिगुणभिदानां तिसृणामप्यभद्रत्वात्स कुत एव दृष्टान्तः । दीपिका—तदभिमानेन देहान्तराविष्टमनोभिमानेन । एवंभूतो देहाध्यासवान् । पूर्वेर्थे सच्छब्दस्य स्थानपतितत्वं स्वप्न इत्यध्याहारः । त्रैविध्यशब्देनाप्राकृतोत्तमादिग्रहश्चातो—यद्वेति ॥ ४१ ॥ तौ जन्ममृत्यू । अज्ञेति प्रियत्वात्तवापृष्टमपि वदामीति सम्बुद्ध्यभिप्रायः ॥ * ॥ ० ॥ ४२ ॥ सतोर्विद्यमानयोः । एतद्भवनमभवनम् तयोः सूक्ष्मयोर्जन्ममरणयोः । प्रथमेनादिना प्रकाशादिग्रहः, द्वितीयेनागत्यादिग्रहः, तृतीयेन वृद्ध्यादिग्रहः । विमतं देहादि । दृष्टान्तस्थादिना फलादिग्रहः ॥ * ॥ उत्पत्तिविनाशयोरलक्ष्यत्वेऽपि ताववस्थाभिरेवानुमीयेते अनुमानेन यन्नैवं तन्नैवं यथात्मेति व्यतिरेकव्याप्तिः । आदिना तेजोबलकामकौशलानां ग्रहः ॥ ४३ ॥ आक्षिपति—कथमिति । इदन्त्वावच्छिन्नसंस्कारजन्यं ज्ञानं प्रत्यभिज्ञा उत्तरसादृश्यावलम्बिनीति ॥ * ॥ अर्चिषां क्षणमात्र एव सहस्रश उद्भूयोद्भूय लयं गतानां ज्योतिःकिरणानां पुञ्ज एव क्षणान्तरे सोऽयं दीप इति, स्रोतसां स्रोतोयुक्तजलानां क्षण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा स्वस्य कर्मबीजेन जायते सोऽप्ययं पुमान् ॥ म्रियते वाऽमरो भ्रांत्या यथाऽग्निर्दारुसंयुतः ॥ ४५ ॥ निषेकगर्भजन्मानि बाल्यकौमारयौवनम् ॥ वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥ ४६ ॥ एता मनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः ॥ गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ॥ ४७ ॥

निति धीर्गीश्च मृषा नृणां बहूनां शरीरिणां मृषा व्यर्थमायुर्येषामविवेकिनां तेषां भवति ॥ ४४ ॥ ननु कथं देहाध्यासवतः पुंसः कर्मजन्ममरणानि संति नान्यस्येति व्यवस्था नहि घटते । घटस्य पुरुषभेदेन सत्त्वमसत्त्वं चेति न अज्ञस्यापि वस्तुतस्तदभावादित्याह । मा स्वस्य । नैवात्मनः कर्मणा बीजभूतेन । सोऽप्यज्ञोऽपि । पुमान् जायते म्रियते वा । किं त्वयं भ्रांत्या अजन्मापि जायत इवामरोऽपि म्रियत इव । यथा महाभूततेजोरूपोऽग्निराकल्पांतमवस्थितोऽपि दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोति तद्वत् ॥ ४५ ॥ सिद्धवत्कृत्योक्ता वयोवस्थाः प्रपंचयति । निषेको जठरे प्रवेशः । गर्भस्तन्मध्ये वृद्धिः । जन्म प्रसिद्धम् । बाल्यं शिशुत्वमापंचमाब्दात् । कौमारमाषोडशाद्वर्षात् । ततो यौवनमापंचाशत् । ततो वयोमध्यमाषष्टिवर्षात् । तदुपरि जरा । तदुपरि मृत्युः ॥ ४६ ॥ देहसंबंधाज्जन्ममरणादीनीत्युपपादितमर्थमुपसंहरति । एता इति । हि स्फुटम् । अन्यस्य देहस्य । तनूरवस्थाः । गुणसंगात्प्रकृत्यविवेकात् । कश्चित्परमेश्वरानुग्रहतः क्वचित्कथंचिज्जहाति । अवस्थावतो देहस्य द्रष्टा नासाववस्थावानिति विवेक

मात्र एव क्रमशो दूरगतत्वेऽपि क्षणान्तरेऽपि तरंगसाम्यात्तदिदं जलमिति, तथैव कौमारे दृष्टो यौवनेऽपि हस्तबाह्वादिसन्निवेशसाम्यात्सोऽयं पुमानिति धीर्ज्ञानं गीर्वाक्च मृषाऽज्ञानविजृम्भितेत्यर्थः । मृषेत्यावृत्त्या योज्यम् । मृषाऽविवेकव्याप्तमायुर्येषां तेषाम् ॥ ४४ ॥ अत्र पुनराशंकते—नन्विति । इयं व्यवस्था न घटत इत्याह—पुरुषभेदेन सन् घटः एकस्य प्रतीयते एकस्य न प्रतीयत इत्येवंरूपा व्यवस्था दृष्टचराऽस्तीति नेत्याह । तदभावात्कर्ममरणजन्मनामभावात् । मा इत्यस्य नैवेत्यर्थः । स्वस्येत्यस्यात्मन इत्यर्थः । बीजभूतेन देहादिजननादिकारणेन "कर्मणा जायते जीवो म्रियते कर्मणा पुनः" इति स्मृतेः । ननु ' न जायते म्रियते वा कदाचित् ' इत्यादिश्रुतिस्मृतिविरोधाज्जीवस्य जन्मादि न संगच्छतेऽतः कथमुक्तं जायत इत्यादीति चेदाह—किन्त्विति । अयमज्ञजीवः । भ्रान्त्या विवेकाभावेन । तद्वदग्निवत्काष्ठसंयोगवियोगाभ्यां यथाऽग्निभावाभावौ तथा देहसंयोगवियोगाभ्यामात्मनोऽपीति भावः ॥*॥ वस्तुतस्तूपाधिसंगेनैव जीवस्य जन्ममृत्यू स्त इत्याह—मेति । स्वस्य कर्मरूपेण बीजेनायं पुमान्मा जायते मा म्रियते किन्त्वयं भ्रान्त्याऽजन्मापि जायतेऽमरोऽपि म्रियतेऽग्रे समानमिति **विश्वनाथः** ॥ ४५ ॥ सिद्धवत्कृत्येह देहस्यासत्त्वात्तदवस्थानां सुतरामसत्त्वमिति वतिनोक्तम् 'एता मनोरथमयीः' इति वक्ष्यमाणत्वात् । वयोयुक्तस्य देहस्यावस्था वयोवस्थाः, मध्यमपदलोपी समासो ध्येयोऽन्यथा 'वयः पक्षिणि बाल्यादौ' इति कोशात्पौनरुक्त्यं स्यात् । शुक्रशोणितैकीभावेन स्थितिर्निषेको गर्भप्रवेश इति यावत् । तन्मध्ये गर्भमध्ये । ततः षोडशाब्दानन्तरं चत्वारिंशदब्दान्तं यौवनं, ततश्चत्वारिंशतः षष्टिपर्यन्तं वयोमध्यं, षष्टितः शतान्तं जरा, ततो मृत्युरिति तनोर्देहस्य नवसंख्याका अवस्थाः दशाः । 'अवस्था तु दशास्थित्योः' इति निरुक्तिः ॥ * ॥ ० ॥ ४६ ॥ उक्तावस्थासंयोगोऽज्ञस्यैव न तु ज्ञस्येत्याह—देहेति । एता निषेकाद्याः । मनोरथमयीरसत्याः । 'जीवे चन्द्रे च वितथे कल्पिते च मनोरथे' इति निरुक्तिः । प्रसंगादन्यपदमत्र देहपरम् । प्रकृत्यविवेकात् सत्त्वपुरुषान्यताख्यातिलक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ॥ ४८ ॥ तरोर्बीजविपाकाभ्यां यो विद्वाञ्जन्मसंयमौ ॥ तरोर्वि लक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥ ४९ ॥ प्रकृतेरेवमात्मानमविविच्याबुधः पुमान् ॥ तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥ ५० ॥ सत्त्वसं गादृषीन्देवान्रजसाऽसुरमानुषान् ॥ तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ॥ ५१ ॥ नृत्यतो गायतः पश्यन्यथैवानुकरोति तान् ॥ एवं बुद्धि गुणान्पश्यन्ननीहोऽप्यनुकार्यते ॥ ५२ ॥

ज्ञानेन ॥ ४७ ॥ ननु तदानीं मूर्छितत्वेन जन्ममरणवान्देहो न दृश्यते तत्राह । आत्मन इति । पितृदेहस्यौर्ध्वदेहिकं कुर्वताऽप्ययदर्शनात्पुत्रदेहस्य च जातकर्मणि जन्मदर्श नादात्मनः स्वस्य देहस्यापि भवाप्ययावनुमेयौ । एवं च दृश्यत्वे सति भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणो भवाप्ययधर्मको न भवति ॥ ४८ ॥ एतदेव दृष्टांतेन स्पष्टयति । तरोरिति । तरुशब्दो नोद्भिज्जमात्रस्योपलक्षणम् । किंतु फलपाकांतस्य व्रीह्यादेरित्यर्थः । यद्वा तरोरेवांत्यः परिणामो विपाकः बीजाज्जन्म उत्पत्तिं विपाकात्फलपाकात्संयमं नाशं च विद्वान् । स द्रष्टा तरुद्रष्टा ततः पृथक् । एवं तनोर्द्रष्टा ततः पृथक् अतस्तत्र वर्तमानोऽपि भवाप्ययाभ्यां न संबध्यते ॥ ४९ ॥ अविवेकिनः संसारं प्रपंचयति प्रकृतेरिति पंचभिः । तत्त्वेन तत्त्वतो विविच्य । तत्त्वदृष्ट्या स्पर्शेषु विषयेषु संमूढ इति वा ॥ ५० ॥ गुणभेदेन त्रिविधं तत्रापि च तत्तारतम्येनैकैकत्र द्विविधं संसारमाह । सत्त्वेति ॥ ५१ ॥ नन्वकर्तुरात्मनः कुतः कर्मभिर्भ्रमणं तत्राह । नृत्यतो गायतो जनान्पश्यंस्ताननुकरोति । तद्गतस्वरतालादिगतिं शृंगारकरुणादिरसं च मन

णविवेकाभावात् । कश्चित् सत्त्वपुरुषान्यताख्यातिलक्षणविवेकवान् । तदेवाह—अवस्थावत इति ॥ * ॥ ० ॥ ४७ ॥ जनिमृती आक्षिपति—नन्विति । तदानीं जनिमृतिसमये जातकर्माणि कुर्वतेत्यन्वयः । मम देहो जनिमृतिमान् मत्पितृपुत्रकृतकरिष्यमाणजातकर्मौर्द्ध्वदैहिककर्मवत्त्वात् मत्पितृपुत्रदेहवत्, इत्येवमनुमेयौ भवाप्ययौ । कश्चिदित्थमनुमिनोति—स्वदेहो मरणधर्मा देहत्वात्पितृदेहवत्, स्वदेहो जन्मवान् देहत्वात्पुत्रदेहवदिति ॥ * ॥ ननु देहस्य निषेकगर्भजन्ममरणानि विनाऽन्यावस्था देहिनो दृश्यन्त एव, न तु निषेकाद्यास्तत्राह—आत्मन इति । अत्र भवशब्दो निषेकगर्भयोरप्युपलक्षको ज्ञेयः ॥ ४८ ॥ एतदेव भवाप्ययद्रष्टुर्दृश्याभिन्नत्व मेव । उद्भिद्य भूमिं जायते यत्तदुद्भिज्जम् । फलपाकेनान्तो नाशो यस्य तस्य । आदिनौषधिमात्रग्रहः 'ओषध्यः 'फलपाकान्ताः' इत्यमरोक्तेः । उपलक्षितस्यानन्त्येन ज्ञातुमशक्यत्वादाह—यद्वेति । तरोरेव तरुत्वावच्छिन्नस्यै वेत्यर्थः । तरोर्द्रष्टा तरोर्विलक्षणो यथा तथा तनोर्द्रष्टापि तनोः पृथगेवेत्यर्थः ॥ * ॥ पूर्वार्थे लक्षणातो—यद्वेति ॥ ४९ ॥ फलितमाह—प्रकृतेरिति । तत्त्वतो यथावत् अविविच्येत्येव सिद्धेस्तत्त्वत इत्यनेन सम्बन्धोऽ धिक इत्यत आह—तत्त्वदृष्ट्या सत्यत्वबुद्ध्या । संमूढः संसक्तः ॥ * ॥ अविविच्य पृथक्त्वेनाज्ञात्वा ॥ ५० ॥ तत्रापि गुणभेदेऽपि । तत्तारतम्येन तत्तद्गुणन्यूनाधिक्येन । एकैकत्र गुणे सत्त्वसंगात्सात्विककर्माध्यासात् । रजसा राजसकर्माध्यासेन । एवमग्रेऽपि । कारणेन कार्यग्रहस्तु सूत्रशाटिकान्यायेन ज्ञेयः । कर्मभिरपार्थे स्वस्मिन्नध्यस्तकर्मभिः ॥ * ॥ **दीपिका**—तत्रापि त्रैविध्येऽपि । तत्तारतम्येन गुणानां न्यूनाधिकत्वेन । द्विविधमृषिदे वादियोन्यात्मकम् ॥ ५१ ॥ अत्राशंकते—नन्विति । तद्गता नृत्यद्गायद्गता या स्वराणां निषादादीनां तालानां ध्रुवमण्ठप्रतिमण्ठनिशारुकादुरासैकतादीनां गतिः स्वरूपं ताम् । आदिना शुद्धसूठादितालभेदग्रहः । द्विती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथांभसा प्रचलता तरवोऽपि चला इव ॥ चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ॥ ५३ ॥ यथा मनोरथधियो विषयानुभवो मृषा ॥ स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥ ५४ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ५५ ॥ तस्मादुद्धव मा भुंक्ष्व विषयानसदिंद्रियैः ॥ आत्माऽग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमम् ॥ ५६ ॥ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽथ वा ॥ ताडितः सन्निबद्धो वा वृत्त्या वा परिहापितः ॥ ५७ ॥

स्यनुवर्तयतीत्यर्थः । एवम् अनुकार्यते गुणैर्बलादित्यर्थः । अनेन दृष्टांतेन दृश्यधर्मो द्रष्टरि स्फुरतीति दर्शितम्॥५२॥उपाधिधर्माश्चोपहितेऽवभासंत इत्यत्र दृष्टांतमाह । यथांभसेति । तटस्थास्तरवो धावंत इव दृश्यंते जले प्रतिबिंबिता वा चंचला इवेति । विषयग्राहकेण मनसा परिकल्पिता एव तेषु लावण्यादयो गुणा न वस्तुतः संत्यतो मनोनिबंधन एव संसार इत्यभिप्रेत्य ग्राहकगुणाग्राह्येऽवभासंत इत्यत्र दृष्टांतमाह । चक्षुषेति॥५३॥ भोगस्यापि मिथ्यात्वे दृष्टांतद्वयमाह । यथेति । यथा एताः प्रसिद्धा मनोरथधियः स्वप्नदृष्टाश्च धियो मृषा एवमात्मनो विषयानुभवः संसारो मृषा ॥५४॥ ननु यदि मृषा तर्हि किं तन्निवृत्तिश्रमेणात आह । अर्थे हीति । अर्थे सत्यत्वे । अस्यात्मनः ॥५५॥ अतो भोगोद्यमो न कर्तव्य इत्याह तस्मादिति ॥५६॥ दुःखप्रतीकारोद्यममपि परित्यज्य परमेश्वरनिष्ठेनैव भाव्यमित्याह क्षिप्त इति द्वाभ्याम्। क्षिप्त आक्षिप्तो नुन्न इति वा ।

यादिनाऽद्भुतादिग्रहः । इत्यर्थ इति–यादृशं नृत्यादि पश्यति तादृशं स्वयमपि करोतीति भावः । अनीहोऽप्यनिच्छन्नपि । इत्यर्थ इति–“कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात्” इत्याद्युक्तेः । बुद्धिगुणान् सुखदुःखादीन् ‘दुःखशोकादयः सर्वे ज्ञेया बुद्धिगुणाः’ इति । अनेन नृत्यत इत्यादिना । यद्वा–एवमात्मा बुद्धिगुणान् कर्तव्यत्वादीन् व्यञ्जकस्यालोकादेर्व्यंग्यघटदण्डाद्याकारत्ववदनीहोऽप्यनुकार्यत इव स्वस्मिन्नध्यस्यति ॥ * ॥ गतिं परिपाटीम् । आदिना ग्राममूर्च्छादिग्रहः । द्वितीयादिना रौद्रवीरादिग्रहः । अनेन नर्तकदृष्टान्तेन । दृश्यधर्मो बुद्धिधर्मो दुःखसुखादिरूपो द्रष्टरि आत्मनि यथा दृश्यानां नर्तकगायकानां धर्माः स्वरतालादयः शृंगारादयश्च द्रष्टृषु सभ्येषु स्फुरन्ति तद्वत् ॥ ५२ ॥ दृष्टान्तान्तरमाह–न केवलं तीरस्थतरूणामेव चाञ्चल्यं पर्वताग्रगतवृक्षादीनामपि चलाम्बुनि चाञ्चल्यं प्रतीयत इत्यत आह–जल इत्यादि । उपाधिरत्र जलमुपहितं वृक्षादि । तेषु विषयेषु । आदिना माधुर्यग्रहः । यतः कल्पिता एव गुणा अतो हेतोः । ग्राहकं चक्षुः । ग्राह्यो भूम्यादिः ॥ * ॥ उपाधेर्बुद्धेर्धर्मा जाग्रदादयो दुःखादयश्चोपहिते उपाध्यनुरक्ते आत्मनि । ग्राहकस्य मनसो धर्मो लावण्यादयो ग्राह्ये विषये कलत्रादौ ॥५३॥ दाशार्हेति सम्बोधयन्नुद्धवस्यात्मज्ञाने योग्यतां द्योतयति स्ववंश्यत्वात् ॥ * ॥ ० ॥ ५४ ॥ पुनराशंकते–नन्विति ॥ * ॥ संसारबंधस्य मिथ्यात्वे तदुत्थं दुःखं न निवर्तत इत्याह–अर्थे उपाधिसंबंधेऽविद्यमानेऽवस्तुभूतेऽपि संसृतिः संसारसंबंधोत्थं दुःखं न निवर्तते, कस्य–भोगबुद्ध्या विषयान्ध्यायतोऽस्य जीवस्य । अवस्तुभूतस्यापि दुःखदत्वे दृष्टान्तः–स्वप्नेऽनर्थागमः सर्पादिदंशः ॥५५॥ यतो मृषाऽतो हेतोः।यस्मात्स्वप्नवन्मृषा विषयास्तदनुभावकानींद्रियाणि च तस्मादित्यर्थः।आत्माग्रहणेन स्वरूपाज्ञानेन रज्जुभुजंगवन्मृषा निर्भातं प्रतीतं वैकल्पिकं नानाविकल्पात्मकं प्रपञ्चं भ्रमरूपमयथाप्रतीतत्वात् पश्य विचारय । उद्धतो धवो वरो यतः स उद्धवस्तस्मात्पुरुषश्रेष्ठत्वात्त्वं समर्थोसि विचार इत्यभिप्रायः । “धवः पुमान्वरे धूर्ते पत्यौ वृक्षांतरेऽपि च” इति मेदिनी ॥*॥ तस्मादुद्धव मा भुंक्ष्वेति स्फुटमेव तमुपलक्ष्यान्यान्प्रत्युपदेशो व्यज्यते । “नोद्धवोण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः”इति श्रीभगवन्मनोवृत्तेः ॥*॥ **विश्वनाथस्तु**–यस्माद्भोगबुद्ध्या विषयध्यानमनर्थहेतुस्तस्मात्त्वं तत्त्यजेत्याह–तस्मादिति । विकल्पादेहाध्यासादुद्भूतं भ्रममज्ञानं पश्य । कीदृशम्–आत्मनो जीवस्याग्रहणमप्राप्तिस्तत्र निर्भातं विराजमानं तदतिसाधकमित्यर्थः । यद्वा–“आततत्वाच्च मातृत्वादात्मा हि परमो हरिः” इति तन्त्रोक्तेः श्रीहरिविस्मृतिजन्यं देहादिविषयकं विप्रोऽहं क्षत्रियोऽहमित्यादिभ्रमं पश्य, तेन तन्निवर्तकं तत्स्मरणं कुर्विति व्यज्यते ॥ ५६ ॥ अन्यदुपदिशति–दुःखेति । आक्षिप्तो भर्त्सितः । उपसर्गस्य प्रकृत्यर्थानुयायित्वे तु नुन्नः गलहस्तादिना पातितः । असूयितो गुणित्वेऽप्यगुणित्वेन वर्णितः । सन्निरुद्धः कोष्ठादिषु स्थापितः । परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्ठितो मूत्रितो वाऽज्ञैर्बहुधैवं प्रकंपितः ॥ श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ॥ ५८॥ उद्धव उवाच ॥ यथैवमनुबुध्येयं वद नो वदतां वर ॥ सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमम् ॥ ५९ ॥ विदुषामपि विश्वात्मन्प्रकृतिर्हि बलीयसी ॥ ऋते त्वद्धर्मनिरतान्छांतांस्ते चरणालयान् ॥ ६० ॥ इति श्रीमद्भा० म० एकादशस्कंधे भगवदुद्धवसंवादे सांख्यतत्त्वनिरूपणं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ बादरायणिरुवाच ॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः ॥ सभाजयन्भृत्यवचो मुकुंदस्तमाबभाषे श्रवणीयवीर्यः ॥ १ ॥

प्रलब्ध उपहसितः॥५७॥निष्ठितो निष्ठीवनाविषयीकृतः । मूत्रितो मूत्रेणार्द्रीकृतः। प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितोऽपि । कृच्छ्रगतः कृच्छ्रं प्राप्तोपि ॥५८॥एवं त्वदुक्तं यथा अनुबुध्येयं तथा नोऽस्मान्सर्वान्प्रति वद ॥ ५९ ॥ त्वद्धर्मनिरतान् ऋते विदुषामप्यसद्भिः कृतमतिक्रममपराधं सुदुःसहं मन्य इत्यन्वयः। प्रकृतिः स्वभावः ॥ ६० ॥ निरस्य सर्वसंदेहमेकीकृत्य सुदर्शनम् ॥ प्रकाशितरहस्यं तं भजस्व गुरुमीश्वरम् ॥ १ ॥ इति श्रीमद्भागवत एकादशस्कन्धे श्री० टीकायां द्वाविंशोऽध्यायः ॥ २२ ॥ त्रयोविंशे तिरस्कारसहनोपाय ईर्यते। भिक्षुगीतप्रकारेण मनसः संयमो धिया ॥ १॥ दुर्जनोपद्रवो नूनं दुःसहो हि महीयसाम् ॥ अतश्चतुर्भिरध्यायैः सहनोपायवर्णनम् ॥२॥ तत्र तावदस्मिन्नध्याये भिक्षुगीतया मनोविजय उत्तरस्मिन् प्रकृतिपुरुषविवेकस्तदुत्तरस्मिन्गुणवृत्तिविजयस्ततः परस्मिन्नैलगीतया विषयसंगत्यागेन सत्संग इति क्रमेणोपाया

हापितस्त्याजितः ॥ * ॥ विषयभोगरहितः कीदृशस्तिष्ठेयमित्यपेक्षायामाह–क्षिप्त आक्षिप्तो वाचा तिरस्कृतो बहिर्निःसारितो वा । अवमानितः प्रत्युत्थानाद्यभावेनानादृतः । प्रलब्ध इति तैः । असूयितः दोषारोपविषयी कृतः । वृत्त्या जीविकया रहितीकृतः ॥ ५७ ॥ निष्ठित इति उदित्वात्क्त्वे इडभावात् क्ते नेट् “ लोपो व्योर्वलि ” इति वलोपे ‘ ष्ठिवु–निरसने ’ धातो रूपम् । श्रेयस्कामो मोक्षमार्गेऽवस्थितमतिः सन् धैर्यमवलम्ब्यात्मना देहादिविविक्तात्मज्ञानेनात्मानमुद्धरेत् हरिं स्मरेत् “ भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत् ” इति कपिलोक्तेः ॥ * ॥ ० ॥ ५८ ॥ सर्वानिति बहुत्वेन व्याख्यानं सर्वलोकाभिप्रायम् । इत्यन्वयोऽग्रिमेणेत्यर्थः ॥ * ॥ यथाऽनुबुद्ध्येय तत्तत्सहने यथा विवेकं प्राप्नुयामेवं वद न इत्येकत्वे बहुवचनम् “ अस्मदो द्वयोश्च ” इति सूत्रात् । पूर्वं हि ‘ विविक्त उपसंगम्य ’ इत्यादिना निर्जन एव संवादोऽयमिति व्यज्यतेऽतोऽत्रापि च ‘ अनुबुद्ध्येयम् ’ इत्येकवचनान्त एव लिङ्प्रयोग इति ॥ ५९ ॥ विदुषां विविधतर्ककुशलानां स्वभावोऽहंममेत्यभिमानलक्षणः । बलीयसी दुर्निवार्या ‘ प्रकृतिं यान्ति भूतानि ’ इत्याद्युक्तेः (६०) सुष्ठु दृश्यते ज्ञायते परमात्मतत्त्वमनेनेति सुदर्शनं शास्त्रसमूहम् एकीकृत्य परस्परविरोधपरिहारेण प्रकाश्य प्रकाशितं रहस्यमात्मतत्त्वं येन तं परमानन्दमाधवम् (१) ॥ * ॥ ऋते त्वद्धर्मनिरतानिति–ये त्वच्छ्रवणकीर्तनादितत्परास्तेष्वस्माकं न विस्मयः, अतस्ते तु भवता नाऽत्रोदाहार्याः किन्त्वन्य एवेति भावः ॥ * ॥ **विश्वनाथस्तु**–विदुषामसदतिक्रमसहनोपायं जानतामपि प्रकृतिरमर्षात्मकः स्वभावः त्वद्धर्मनिरतांस्त्वद्भक्तान्विनेति तेषां त्वत्साधर्म्यप्राप्त्या प्रकृतिरकोपनैवेत्याह–शान्तान्, तत्र हेतुस्त्वच्चरणनिवासान् ॥ ६० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥ संयमो निरोधः (१) । यतो दुःसहोऽतो हेतोः । चतुर्भिस्त्रयोविंशात्षड्विंशान्तैः (२) । तत्र चतुर्षु मध्येऽस्मिंस्त्रयोविंशे । तावत्कार्त्स्न्येनादौ वा । उत्तरस्मिंश्चतुर्विंशे । तदुत्तरस्मिन्पञ्चविंशे । ततः पञ्चविंशात्परस्मिन्षड्विंशे । बादरं बदरीवृक्षसमूहं तदुपलक्षितं प्राक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ बार्हस्पत्य स वै नात्र साधुर्वै दुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः ॥ २ ॥ न तथा तप्यते विद्धः पुमान्बाणैः सुमर्मगैः ॥ यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ॥ ३ ॥ कथयंति महत्पुण्यमितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ॥ ४ ॥ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणाम् ॥ ५ ॥ अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ॥ ६ ॥

भगवता वर्ण्यते । आशंसितः प्रार्थितो भृत्यस्य वचः सत्कुर्वंस्तं भृत्यं प्रति आबभाषे ॥ १ ॥ तत्र तावदंगीकारस्तत्तद्वचः संपूजयति द्वाभ्याम् । हे बार्हस्पत्य बृहस्पतेः शिष्य । अत्र लोके स साधुर्नास्ति यो दुर्जनोक्तैर्भिन्नं क्षुभितं मनः शमयितुमीश्वरः स्यात् ॥ २ ॥ कुत इत्यत आह । नेति । यथा मर्मस्था मर्मस्वेव नित्यं स्थिताः परुषोक्तिरूपा इषवस्तुदंति व्यथयंति तथा इतरे बाणा न तुदंति । अतस्तैस्तथा न तप्यत इत्यर्थः ॥ ३ ॥ तथापि मया वक्ष्यमाणैरुपायैः सर्वं सोढुं शक्यमित्यभिप्रायेणेतिहासं प्रस्तौति । महद्यथा भवति तथा पुण्यमितिहासं गाथां कथयंति ॥ ४ ॥ ५ ॥ स भिक्षुः पूर्वं धनाढ्यः कृच्छ्रार्जितस्य धनस्य नाशेन संतप्यमानो निर्विण्णः सन्प्रव्रज्य भिक्षार्थमटन् दुर्जनैरुपद्रुतः प्रस्तुतोपयोगिनीं गाथामगायतेति वक्तुं तस्य पूर्वचरितमाह अवंतिष्वित्यादिना । अवंतिषु मालवेषु । वार्ता कृषिवाणिज्यादिरूपा वृत्तिर्यस्य । कदर्यस्तु स्मृतावुक्तः ।

तजनसञ्चारवार्जितमयनं तपश्चर्यास्थानं यस्य स बादरायणो व्यासः " तस्मिन्स्वे आश्रमे व्यासो बदरीखण्डमण्डिते " इत्युक्तेः, तदपत्यत्वात्त्रिकालज्ञो बादरायणिरित्युक्तवानित्यर्थः । यो भगवानुद्धवेनैवमसदतिक्रमसहनमतीव दुष्करमित्येव प्रार्थितः स इत्यर्थः । दशार्हेत्यत्र ह्रस्वत्वमार्षम् । छन्दस्तु–' शेषं गाथा ' इत्युक्तत्वाद्गाथा नाम । तं भृत्यम् । तत्पदेन भृत्यबोधस्तु–" दशैते राजमातंगास्तस्यैवामी तुरंगमाः " इतिवद्बोध्यः । श्रवणीयं श्रोतुमर्हं वीर्यं यशो यस्य स तथा ॥ * ॥ आशंसितः प्रीत्या प्रार्थितः ॥ १ ॥ तत्र प्रश्ने । अंगीकारतोंगीकारेण । तद्वच उद्धववचः । स साधुर्न दुर्लभ इति भावः ॥ * ॥ हे बार्हस्पत्य बृहस्पतेः शिष्येति सोपपत्तिकं त्वद्वाक्यमहममानयमेव किन्तु पारमार्थिकोऽयं मार्गस्त्वद्गुरुणा तेनाप्यगम्योत्तम एव त्वया शिक्षयितव्य इति भावः ॥ २ ॥ तदभावे हेतुं पृच्छति–कुत इति । यतः पुरुषोक्तिवन्न तुदन्ति अतो हेतोः । तैः प्रसिद्धैर्बाणैः । इत्यर्थ इति–परुषोक्तिवेधवदिषवो न तापका इति भावः ॥ * ॥ नित्यं स्थिताः प्रसिद्धबाणास्तु निःसरन्ति तत्क्षणमपि कालान्तरे शाम्यन्ति अत इतरे न तुदन्ति अतस्तथा तोदकर्तृत्वाभावात् ॥ ३ ॥ यद्यपि परुषोक्तिसहनमशक्यं तथापीति । तम् इतिहासम् ॥ * ॥ यद्यप्येवं सर्वत्र दृष्टं तदपि परुषेषु वैयर्थ्यकरमुपाख्यानं शृण्वित्याह–कथयन्तीति युग्मकम् । विपाकं फलम् ॥ ४ ॥ केनचिदनिर्दिष्टनाम्ना । विपाकं फलनिष्पत्तिम् ॥ * ॥ ० ॥ ९ ॥ मालवेषु उज्जयिनीप्रान्तदेशेषु । स्मृत्यर्थस्तु–आत्मपीडनं सत्यपि धने भोगाभावः, धर्मकृत्यपीडनं दानाद्यकरणम्, पुत्रादिपीडनं तदीप्सितवस्त्रभूषाद्यसमर्पणम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञातयोऽतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः॥शून्यावसथ आत्मापि काले कामैरनर्चितः॥७॥दुःशीलस्य कदर्यस्य गृह्यंते पुत्रबांधवाः॥दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियम् ॥८॥ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥ ९ ॥ तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद ॥ अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥ १० ॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव ॥ दैवतः कालतः किंचिद्ब्रह्मबंधो नृपार्थिवात् ॥ ११ ॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः ॥ उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययाम् ॥ १२ ॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः॥खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत्॥१३॥स चाहेदमहो कष्टं वृथात्मा मेऽनुतापितः॥न धर्माय न कामाय यस्यार्थायास ईदृशः॥१४॥

"आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् ॥ देवतातिथिभृत्यांश्च स कदर्य इति स्मृतः ॥ " इति ॥ ६ ॥ तस्य ये ज्ञातयो बांधवा अतिथयोऽध्वनीनाश्च तेन वाङ्मात्रेणापि नार्चिता इत्यर्थः । शून्यावसथे धर्मकर्महीने गृहे देहे वा ॥ ७ ॥ ८ ॥ यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य । पंचभागिनः पंचयज्ञदेवताः तस्मै चुक्रुधुः ॥ ९ ॥ तेषामवध्यानमनादरस्तेन विस्रस्तो विशीर्णः पुण्यस्य स्कंधोऽर्थलाभमात्रहेतुरंशो यस्य । बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन्सः ॥ १० ॥ कुतो निधनमगच्छत्तदाह । ज्ञातय इति । ज्ञातयो दायादाः । दस्यवश्चौराः । दैवतो गृहदाहादिना । कालतो निखातधान्यादि । नृणां पार्थिवानां च द्वंद्वैक्यम् । तस्मात् ॥ ११ ॥ ॥ १२ ॥ नष्टरायः नष्टो रा अर्थो यस्य तस्य । तपस्विनः संतप्तस्य ॥ १३ ॥ मे मया । आत्मा देहः । वृथा वृथैवानुतापितः । आत्माऽनुतापं प्रपंचयति न धर्मायेत्या

एवं देवाद्यर्चनाभावस्तेषां पीडनम् ॥ * ॥ दीपिका–प्रव्रज्य सन्न्यस्य । प्रस्तुतोपयोगिनीं सहनोपयुक्ताम् । तस्य कदर्यस्य ॥ ६ ॥ तस्य विप्रस्य । अपिना कुतोऽन्नादिनेति सूच्यते । इत्यर्थ इति–तेनेत्यध्याहृत्य योज्यमिति भावः । धर्मेण त्यक्तं देहादिशून्यमेव " भवेदावसथो देहे गेहे ग्रामे च नीवृति " इति निरुक्तेः । गृहस्थकर्तृत्वाभावादाह–देहे वेति । काले वसन्ताद्युत्सवसमये । कामैः काम्यैरशनादिभिः । अपिनाऽन्यार्चनाभाव एवोक्तः ॥ * ॥ तस्येति कर्तरि षष्ठी, तेनेत्यर्थः ॥ ७ ॥ दुःशीलस्य सदा वक्रदृष्ट्यादिमतः । पुत्रादयो विषण्णाः इप्सितानवाप्यातीवदुःखिताः । प्रियं नाचरन्नपि तु द्रुह्यन्ते तन्नाशमभीप्सव आसन्नित्यर्थः ॥ * ॥ दुःशीलस्य दुःशीलाय । द्रुह्यन्ते कदा मरिष्यतीति द्रोहं कुर्वन्ति ॥ ८ ॥ दानभोगाद्यभावेनोभयतो भ्रष्टस्य तस्य तदेवाह–धर्मकामाभ्यां विहीनस्य । पञ्चयज्ञदेवताः देवर्षिपितृभूतनराख्याः ॥ * ॥ ० ॥ ९ ॥ तेषां पञ्चयज्ञदेवानाम् । 'स्कन्धोंशे समूहेऽपि ' इति । यस्मिन्नर्थे ॥ * ॥ द्रव्यलाभमात्रहेतोरंशस्यापगमात् सद्वासनाहेतोर्भगवदर्पितत्वलक्षणविशेषस्याविस्रंस इति बोधयति–पुण्यस्कन्धस्येति ॥ १० ॥ दस्यवस्तस्कराः । वृद्ध्यर्थं दत्तमधमर्णमरणादिना नृभ्यो हेतुभ्यो नष्टं पुत्रादिकृतव्यभिचारादिना राज्ञो हेतोः किञ्चिद्दण्डेन किञ्चिन्नाशेन गतमित्यर्थः ॥ * ॥ नरश्च पार्थिवाश्च तेषां समाहारो नृपार्थिवं तस्मात् ॥ ११ ॥ स विप्रः । एवमुक्तरीत्या । उपेक्षितस्त्यक्तप्रायः । दुरत्ययां महतीम् ॥ * ॥ उपेक्षितस्त्यक्तः ॥ १२ ॥ तस्य दीर्घं ध्यायतः शोचमानस्य । एवं वक्ष्यमाणप्रकारेण निर्वेदोऽभूदित्यन्वयः । बाष्पमश्रु कण्ठे रुदतो नेत्राभ्यां पतत्कण्ठदेशं प्राप्तं यस्य तस्य अतीव रोदनं कुर्वतः, प्रायः कण्ठदेशमश्रूण्यायान्तीति । 'बाष्पं नेत्रजलोष्मणोः' इति कोशः ॥ * ॥ कदर्यस्यापि तस्यापराधः स्थगितः तद्भोगान्ते प्राचीनः संस्कारविशेषोऽयमुद्बुद्ध इत्याह–तस्येति । निर्वेदोऽर्थेऽलम्बुद्ध्या स्वावज्ञानम् ॥ १३ ॥ निर्वेदप्रकारमाह–स चेति । इदं वक्ष्यमाणम् । ईदृशो व्यर्थः । अर्थायासो धनसम्पादनपरिश्रमः ॥ * ॥ ईदृशः महानपि लोभातिशयादकिञ्चित्करः ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायेणार्थाः कदर्याणां न सुखाय कदाचन ॥ इह चात्मोपतापाय मृतस्य नरकाय च ॥ १५ ॥ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्वल्पोऽपि तान्हंति श्वित्रो रूपमिवेप्सितम् ॥ १६ ॥ अर्थस्य साधने सिद्ध उत्कर्षे रक्षणे व्यये ॥ नाशोपभोग आयासस्त्रास श्चिंता भ्रमो नृणाम् ॥ १७ ॥ स्तेयं हिंसाऽनृतं दंभः कामः क्रोधः स्मयो मदः ॥ भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥ १८ ॥ एते पंचदशानर्था ह्यर्थमूला मता नृणाम् ॥ तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ १९ ॥ भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा ॥ एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥ २० ॥ अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ॥ त्यजंत्याशुस्पृधो घ्नंति सहसोत्सृज्य सौहृदम् ॥ २१ ॥ लब्ध्वा जन्माऽमरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यताम् ॥ तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिम् ॥ २२ ॥

दिना । यस्य ईदृशोऽर्थायासस्तेन मया ॥ १४ ॥ नरकाय सत्यप्यर्थे धर्माननुष्ठानात् ॥ १५ ॥ श्वित्रः श्वेतकुष्ठम् ॥ १६ ॥ सिद्धेऽप्यर्थे तस्य उत्कर्षे संवर्धने । नाशोपभोगयोर्द्वंद्वैक्यम् । नाशे उपभोगे चेत्यर्थः । साधनोत्कर्षयोरायासस्तत्रासश्चिंता च नाशे भ्रम इति ॥ १७ ॥ किंच । अर्थप्राप्त्यर्थाः स्तेयादयः षडनर्थाः प्राप्तेऽर्थे स्मयादयो व्यसनैः सह नव । व्यसनानि स्त्रीद्यूतमद्यविषयाणि त्रीणि ॥ १८ ॥ १९ ॥ भेदवैरस्पर्धाः प्रपंचयति द्वाभ्याम् । भिद्यंते स्नेहं त्यजंति कथंभूताः एकास्निग्धाः एके एकप्राणास्ते च ते आस्निग्धा अतिप्रियाश्चेत्यर्थः । कुतः । काकिणिना । पुंस्त्वमार्षम् । विंशतिवराटिकाः काकिणी तया ॥ २० ॥ संरब्धाः क्षुभिताः । स्पृधः स्पर्धमानाः ॥ २१ ॥ इह तावदर्थनिष्ठानामेतेऽनर्थाः परलोकेऽप्यनर्था एवैतेषामप्याह लब्ध्वेति त्रिभिः । मानुष्यं जन्म तत्रापि द्विजाग्र्यतां ब्राह्मण्यम् । स्वार्थं घ्नंति आत्म

इहात्मनो देहस्य मनसो वा व्यर्थपरिश्रमाय दानभोगानिष्पत्तेः नरकाय 'वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैरिव परिवयन्ति' इत्युक्तेः ॥ * ॥ मृतस्य नरकाय धनव्ययभीत्या नित्यनैमित्तिकाननुष्ठानात् ॥ १५ ॥ श्लाघ्याः पाण्डित्यतपस्वित्यादयः । ईप्सितं रम्यम् ॥ * ॥ ० ॥ १६ ॥ इत्यर्थ इति–समाहारद्वन्द्वेन कार्थ इति । तत आयासात् । त्रास उद्वेगः । भ्रमो बुद्धिभ्रंशः ॥ * ॥ ० ॥ १७ ॥ अन्यदर्थस्य वैक्लव्यमाह–किञ्चेति । दम्भः परवञ्चनार्थं मिथ्यानुष्ठानम् । स्मयो गर्वः । सौभाग्यरूपतारुण्यगुणसर्वोत्तमाश्रयैः । "इष्टलाभादिना चान्यहेलनं गर्व इष्यते" इति । मदः परतिरस्कृतिः, स्वस्मिन्नाधिक्यबुद्धिर्वा । भेदो मिथोन्तःकल्युत्पादनम् । वैरं द्वेषः । संस्पर्धा परशुभासहिष्णुता ॥ * ॥ ० ॥ १८ ॥ एते स्तेयादयः । यतोऽर्थमूलास्तस्माद्धेतोः ॥ * ॥ तस्मादर्थस्यानर्थमूलत्वात् । संज्ञामात्रेणार्थाख्यं वस्तुतस्त्वनर्थहेतुत्वादनर्थमेव । यथा–स्नुहीवृक्षस्य संज्ञामात्रेण वृक्षत्वं वस्तुतोऽवृक्षत्वमेव वृक्षधर्माणां गृहाच्छादककाष्ठादिप्रदानादीनामसत्त्वात् ॥ १९ ॥ भेदे हेतुं पृच्छति–कुत इति ॥*॥ सद्यस्तत्क्षणमेव ॥ २० ॥ अल्पीयसाऽत्यल्पेन काकणिकादिरूपेण ॥ * ॥ ० ॥ २१ ॥ पारलौकिकानर्थमाह–तत् । तत्रापि मनुष्यत्वेऽपि । तद्ब्राह्मण्यम् । तत्फलभक्तिज्ञानासम्पादनेनानादृत्य स्वार्थं परिपूर्णानन्दात्मकं मोक्षं नित्यसिद्धमावरणाबाधेन घ्नन्ति तेऽशुभां नारकीम् । तदुक्तं महाभारते शुकानुशासने–" सम्पतन्मोहजालानि कदाचिदिह मानुषे । ब्राह्मण्यं लभते जन्तुस्तत्पुत्र परिपालय ॥ ब्राह्मणस्य तु देहोऽयं न कामार्थाय जायते । इह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् ॥ द्रविणे कोनुषज्जेत मर्त्योऽनर्थस्य धामनि ॥ २३ ॥ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भागिनः ॥ असं
विभज्य चात्मानं यक्षवित्तः पतत्यधः ॥ २४ ॥ व्यर्थयाऽर्थेहया वित्तं प्रमत्तस्य वयो बलम् ॥ कुशला येन सिध्यंति जरठः किं नु साधये ॥ २५ ॥
कस्मात्संक्लिश्यते विद्वान्व्यर्थयाऽर्थेहयाऽसकृत् ॥ कस्यचिन्मायया नूनं लोकोऽयं सुविमोहितः ॥ २६ ॥ किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत ॥
मृत्युना ग्रस्यमानस्य कर्मभिर्वोत जन्मदैः ॥ २७ ॥ नूनं मे भगवांस्तुष्टः सर्वदेवमयो हरिः ॥ येन नीतो दशामेतां निर्वेदश्चात्मनः प्लवः ॥ २८ ॥

हितं न कुर्वंति ये ते यांति ॥ २२ ॥ अमरप्रार्थ्यतां दर्शयन्नाह । स्वर्गेति । लोकं देहम् । अनुषज्जेत आसक्तिं कुर्यात् ॥ २३ ॥ ऋषयो मनुष्ययज्ञब्रह्मयज्ञयोर्देवताः । देव
पितृभूतानि इतरेषु । ज्ञातयः सगोत्राः । बंधवो विवाहादिना संबद्धास्तान् अन्यांश्च । भागिनो भागार्हान् । आत्मानं चासंविभज्यान्नादिभिरसंतर्प्य यक्षवित्तः यक्षस्य वित्तमिव
रक्षणीयमात्रं वित्तं यस्य सः ॥ २४ ॥ एवं विमृशन्ननुतप्यमान आह । व्यर्थयाऽर्थेहया प्रमत्तस्य मम वित्तादि व्यर्थं गतमिति शेषः । येन वित्तादिना कुशला विवेकिनः
सिध्यंति संस्कारान्मुच्यंते । जरठो वृद्धः ॥ २५ ॥ अन्यमपि स्वसदृशं शोचति । कस्मादेवमनर्थं विद्वानपि संक्लिश्यत इति । कारणं संभावयति । कस्यचिदिति ॥ २६ ॥
ननु नायं मोहितः क्लिश्यति किंतु धनादिभिर्भोगादिविधित्सयाऽत आह । किं धनैरिति । उत पुनरपि ॥ २७ ॥ इदानीं संपन्नविवेकः संहृष्यन्नाह नूनमिति त्रिभिः । येन

क्लेशाय तपसे प्रेत्य त्वनुपमं सुखम् ॥ ब्राह्मण्यं बहुभिरवाप्यते तपोभिस्तल्लब्ध्वा न रतिपरेण हेलितव्यम् । स्वाध्याये तपसि दमेन नित्ययुक्तः क्षेमार्थी कुशलपरः सदा यतस्व ॥" ॥*॥ आत्महितं श्रीकृष्णभक्तिम् 'ततो वक्ष्यामि ते हितम्' इति भक्तावेव हितत्वोक्तेः । अशुभां गतिं निरयम् "य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् । न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः" इति श्रीमैत्रेयोक्तेः ॥ २२ ॥ स्वर्गापवर्गयोर्द्वारम् "मानुष्यं यः समासाद्य स्वर्गमोक्षैकसाधनम् । द्वयोर्न साधयत्येकं तेनात्मा वञ्चितो ध्रुवम् ॥" इति गारुडोक्तेः । धामनि गृहे । 'धाम स्याद्गृहतेजसोः' इति धरणिः । द्रविणे वित्ते । "द्रविणं न द्वयोर्वित्ते काञ्चने च पराक्रमे" इति मेदिनी । कः कुत्सितोऽनुषज्जेत नान्य इत्यर्थः । 'को ब्रह्मा कश्च निन्दितः' इति सौभरिः ॥ * ॥ धामनि आश्रये । कारण इति यावत् ॥ २३ ॥ इतरेषु देवपितृभूतयज्ञेषु ॥ * ॥ यक्षवद्गुप्तमदेयमभोग्यं च वित्तं यस्य सः ॥ २४ ॥ व्यर्थया दानभोगशून्यया । आदिना वयोबलग्रहः । 'पाण्डौ वृद्धे च कठिने जरठः' इति कोशात् ॥ * ॥ येन वित्तादिना भगवदाराधनविनियुक्तीकृतेन विवेकिनः सिद्ध्यन्ति कृतकृत्या भवन्तीत्यर्थः ॥ २५ ॥ स्वसदृशं कृपणम् । एवमनर्थं महानर्थकरं दानभोगरहितं धनं विद्वानपि जानन्नपि । असकृत् पुनःपुनः । आत्मनेपदमुपसर्गवशात्, संक्लिश्यतीत्यर्थः । कस्यचिदिति—इदमित्थतया ज्ञातुं वक्तुं वाशक्यस्येशस्येत्यर्थः । लोको जनः । "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥" इति गीतोक्तेः ॥ * ॥ कस्मादिति स्वगतं पृच्छति । तत्र स्वयमेवोत्तरयति—कस्यचिदिति ॥ २६ ॥ मोहितत्वमाक्षिपति—नन्विति । प्रथमादिना स्र्यादिग्रहः । द्वितीयादिना दानादिग्रहः । अत इति चेदाह—कामैर्भोगैः । मृत्युना कालेन । न हि मृत्युग्रस्तस्य धनादयो मोचका अपि तु बन्धका एवेति भावः ॥ * ॥ किं, न किमपीत्यर्थः ॥ २७ ॥ स्वभाग्यमभिनन्दति—इदानीमिति । भगवत्प्रीतत्वे हेतुमाह—येनेति । प्लवरूपस्तारकरूपः । "न ह्यंगाजातनिर्वेदो देहबन्धं जिहासति" इत्युक्तेः ॥ * ॥ तस्य संस्कारस्य भगवत्सम्बन्धित्वं व्यञ्जयति—सम्पन्नविवेकः भगवत्सम्बन्धिसंस्कारेण संसिद्धप्रेमा सन्नाह—सर्वदेवमयः यज्ञादौ तन्मयत्वेन तदुपासनस्फूर्तेः । एतामर्थानर्थेक्षाम्, येन तुष्टेनाहं प्रापितः, येन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोऽहं कालावशेषेण शोषयिष्येंऽगमात्मनः ॥ अप्रमत्तोऽखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि ॥२९॥ तत्र मामनुमोदेरन्देवास्त्रिभुवनेश्वराः॥मुहूर्तेन ब्रह्मलोकं खट्वांगः समसाधयत् ॥३०॥ श्रीभगवानुवाच ॥ इत्यभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः ॥ उन्मुच्य हृदयग्रंथीञ्छांतो भिक्षुरभून्मुनिः॥३१॥ स चचार महीमेतां संयतात्मेंद्रियानिलः ॥ भिक्षार्थं नगरग्रामानसंगोऽलक्षितोऽविशत् ॥ ३२ ॥ तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः॥३३॥केचित्त्रिवेणुं जगृहुरेके पात्रं कमंडलुम् ॥ पीठं चैकेऽक्षसूत्रं च कंथां चीराणि केचन ॥३४॥ प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः॥ अन्नं च भैक्ष्यसंपन्नं भुंजानस्य सरित्तटे॥३५॥मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च मूर्धनि ॥ यतवाचं वाचयंति ताडयंति न वक्ति चेत् ॥३६ ॥ तर्जयंत्यपरे वाग्भिः स्तेनोऽयमितिवादिनः ॥ बध्नंति रज्ज्वा तं केचिद्बध्यतांबध्यतामिति ॥ ३७ ॥ क्षिपंत्येकेऽवजानंत एष धर्मध्वजः शठः ॥ क्षीणवित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ॥ ३८ ॥

प्रीतेनात्मनः प्लवरूपो निर्वेदश्च भवति स हरिर्मे नूनं प्रीत इति ॥ २८ ॥ अहं शोषयिष्ये तपसा यद्वा विद्यया लयं नेष्यामि । यदि स्यात्कालावशेषस्तर्ह्यात्मन्येव सिद्धस्तुष्टः सन् । अखिले स्वार्थे धर्मादिसाधनेऽप्रमत्तः सन् ॥ २९ ॥ अनुमोदेरन्ननुगृह्णंतु । ननु देवैरनुमोदितोऽपि जरठः स्वल्पेन कालेन किं साधयिष्यसि तत्राह । मूहूर्तेनेति ॥ ३० ॥ अभिप्रेत्य निश्चित्य आवंत्योऽवंतिदेशभवः । हृदयग्रंथीनहंकारममकारान् । भिक्षुर्यतिः ॥ ३१ ॥ असंग आसक्तिशून्यः अलक्षितः श्रेष्ठ्यमद्योतयन् ॥ ३२ ॥ प्रवयसं वृद्धम् । अवधूतं मलिनम् । पर्यभवन्नवमेनिरे । हे भद्र । परिभूतिभिस्तिरस्कारैः ॥ ३३ ॥ परिभवानेव दर्शयति केचिदिति सप्तभिः ॥ ३४ ॥ भो भगवन् गृहाणेति दर्शितानि संति प्रदाय पुनश्चाददुः ॥ ३५ ॥ अन्ये मूत्रयंति । मूर्धनि च ष्ठीवंति फूत्कारेण श्लेष्माणं प्रक्षिपंति ॥ ३६ ॥ ३७ ॥ क्षिपंति निंदंति । निंदामेवाह ।

तुष्टेन च हरिणा निर्वेदः संसारतरणप्लवरूपश्चाभूत् ॥ २८ ॥ अंगं देहम् । अंगशोषणेन सिद्धो यदि स्यात्तर्हि ज्वरादिपीडाशोषितांगस्यापि सिद्धिः स्यादिति चेदाह—यद्वेति । विद्यया ज्ञानेन लयं पुनरुत्पत्त्यभावरूपं मोक्षम् ‘ विद्ययाऽमृतमश्नुते ’ इति श्रुतेः । अप्रमत्तः सावधानः । आत्मनि चेतसि ॥ * ॥ यदि स्यात्कालावशेषस्तर्हि तेन कालावशेषेण तं व्याप्याखिलस्वार्थेऽखण्डपुरुषार्थस्वरूपे आत्मनि अप्रमत्तः अवहितान्तःकरणः सन् ततश्च जातसाक्षात्कारः सन् अंगं स्थूलसूक्ष्मात्मकं देहं लयं नेष्यामि । तत्र कालावशेषेणेति तृतीया “ अपवर्गे तृतीया ” इति ॥ २९ ॥ “ तद्देवानामप्रियं यन्मनुष्या विद्युः ” इति श्रुतेर्देवानुग्रहं प्रार्थयते । तत्र मुक्तिपथप्रवृत्तौ । देवानुग्रहेऽप्याक्षिपति—नन्विति । खट्वांगो राजा ॥ * ॥ अनुमोदेरन् विघ्नान्मा कुर्वन्त्वित्यर्थः । ब्रह्मलोकं ब्रह्मात्मकं वैकुण्ठम् ‘ गतवानभयं हरिम् ’ इति द्वितीयोक्तेः ॥ ३० ॥ इति इत्थम् । शान्तः शांतिमापन्नः । मुनिर्मननपरः ॥ * ॥ पूर्वं गर्हितमपि सद्व्यवसायं दृष्ट्वा भभवांस्तमभिनन्दति—द्विजसत्तम इति । शान्तो मन्निष्ठबुद्धिमान् । भिक्षुः सन्न्यासी ॥ ३१ ॥ स विप्रः । संयतेन्द्रियानलः शमदमाद्युपेतः ॥ * ॥ ० ॥ ३२ ॥ तं भिक्षुम् । त्वं तु मत्प्रियत्वाद्विनैव त्यागं भद्रोऽसीति सम्बुद्ध्यर्थः ॥ * ॥ हे भद्रेति—त्वमपि भद्रेच्छयैतादृशो भवेति भावः ॥ ३३ ॥ पीठम् आसनम् । अक्षसूत्रं जपमालाम् । चीराणि जीर्णवस्त्रखण्डानि । तानि त्रिवेण्वादीनि ॥ * ॥ अक्षसूत्रं कमलाक्षमालामिति **संदर्भः** ॥ ३४ ॥ ० ॥ * ॥ ० ॥ ३५ ॥ यतवाचं तूष्णींभूतम् । वाचयन्ति बलाद्वाग्व्यापारं कारयन्ति । तर्जयन्ति तर्जनीं चालयित्वा भर्त्सयंति ॥ * ॥ अस्य भिक्षोः । यतवाचं धृतमौनम् ॥ ३६ ॥ ० ॥ * ॥ ० ॥ ३७ ॥ ० ॥ * ॥ बको यथा मौनेनैव यादांसि भक्षयति तथायमपि जीविकाद्यर्थं दृढ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो एष महासारो धृतिमान्गिरिराडिव ॥ मौनेन साधयत्यर्थं बकवद्दृढनिश्चयः ॥३९॥ इत्यक विहसंत्येनमेके दुर्वातयंति च ॥ तं बबंधुर्निरुरुधुर्यथा क्रीडनकं द्विजम् ॥४०॥ एवं स भौतिकं दुःखं दैविकं दैहिकं च यत् ॥ भोक्तव्यमात्मनो दिष्टं प्राप्तंप्राप्तमबुध्यत ॥ ४१ ॥ परिभूत इमां गाथामगायत नराधमैः ॥ पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्त्विकीम् ॥ ४२ ॥ द्विज उवाच ॥ नायं जनो मे सुखदुःखहेतुर्न देवताऽऽत्मा ग्रहकर्मकालाः ॥ मनः परं कारणमामनंति संसारचक्रं परिवर्तयेद्यत् ॥ ४३ ॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि ॥ शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति ॥ ४४ ॥

एष धर्मध्वजस्त्रिदंडलिंगोपजीवी शठो लोकवंचकः । तदेवाहुः । क्षीणवित्त इति ॥ ३८ ॥ महासारोऽतिबली ॥ ३९ ॥ दुर्वातयंति तदुपर्यधोवायुं मुंचंति । बबंधुः शृंखलैः । निरुरुधुः कारागृहादिषु । द्विजं शुकसारिकादि यथा बध्नंति पंजरे तद्वत् ॥ ४० ॥ भौतिकं दुर्जनादि कृतम् । दैहिकं ज्वरादिनिमित्तम् । दैविकं शीतोष्णादि प्रभवम् । दिष्टं दैवप्राप्तम् ॥ ४१ ॥ धर्मात्पातयद्भिः परिभूतोऽपि सात्त्विकीं धृतिमास्थाय स्वधर्म एव स्थित इमां वक्ष्यमाणां गाथामगायत, सात्त्विकी धृतिश्च । "धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ " इति ॥ ४२ ॥ तामेवाष्टादशश्लोकीं गाथामाह नायमिति । न चात्मा नापि ग्रहादयः । मनःपरं केवलं सुखदुःखयोः कारणं वदंति "मनसा ह्येव पश्यति मनसा शृणोति" इत्यादिश्रुतयः ॥ ४३ ॥ परिवर्तनप्रकारमाह मन इत्यादिना । गुणान् गुणवृत्तीः सृजति । ततश्च तेभ्यो गुणेभ्यः शुक्लानि सात्त्विकानि कृष्णानि तामसानि।लोहितानि राजसानि । सवर्णास्तत्तत्कर्मानुरूपाः सृतयो देवतिर्यङ्नरादिगतयः ॥ ४४॥

निश्चयः ॥ ३८ ॥ ० ॥ * ॥ ० ॥ ३९ ॥ इति इत्थम् । आदिना मिश्रितरक्तपक्षचटकादिग्रहः ॥ * ॥ ० ॥ ४० ॥ ० ॥ * ॥ प्राप्तंप्राप्तं दुःखं दैवप्राप्तत्वाद्भोक्तव्यमेव न कस्यापि दोष इति ज्ञातवान् ॥ ४१ ॥ धर्मात् स्वधर्मात् । योगेन यमाद्यष्टांगोपेतेन । अव्यभिचारिण्या संयुतया ॥ * ॥ गाथां स्वपरोपदेशमयं वाक्यसमूहम् । सात्त्विकीम् "धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः । योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥" इत्युक्तलक्षणाम् ॥ ४२ ॥ तामेव भिक्षुगीतामेव । अयं परितो वर्तमानः । तर्हि देवादयः स्युरिति चेदाह—न देवतेत्यादि । तर्हि किं कारणमिति चेदाह—मन इति । आदिना "यन्म नास मनुते तद्वाचा वदति " इत्यादिश्रुतिग्रहः । स्पष्टार्थत्वान्न व्याख्याता । परिवर्तयेत् भ्रामयति । वर्तमाने लिङार्षः । यत् मनः ॥ * ॥ अहो दुःखमेतावत्कः खलु दत्त इति विमृशन्न तावदयं दुर्जनो दत्त इत्याह—नायमिति । ननु प्रत्यक्षमर्थं किमपलपसि स्वातन्त्र्येणायं जनो न दत्त इति चेत्केषाञ्चित्प्रेरणादत्त इत्युच्यतां, तत्र प्रेरकान्निषेधति—न देवता नाप्यात्मा नापि ग्रहादयः, किंतु मन एव परं कारणमित्यादि तैः । परिवर्तयेत्परिभ्रामयेत् ॥ ४३ ॥ गुणवृत्तीः शान्तघोरमूढलक्षणाः । सात्त्विकानि देवार्चनादीनि । तामसानि अभिचारादीनि । राजसानि नर्तनादीनि ॥ * ॥ परिवर्तनप्रकारमाह—मन एव दोषपूर्णेऽपि कनककामिन्यादिवस्तुनि गुणान्सृजति धनं विना कुतो धर्माः, स्रक्चंदनवनितादिभोगाश्च कुतः सिद्ध्यन्ति, तांश्च विनां कुतः सुखमतो धनमुपार्जनीयमिति प्रथमं धनार्जने दोषेऽपि मन एव प्रवर्तयतीत्यर्थः । बलीय इत्येव महानर्थकृद्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे ॥ मनः स्वलिंगं परिगृह्य कामाञ्जुषन्निबद्धो गुणसंगतोऽसौ ॥ ४५ ॥ दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि ॥ सर्वे मनोनिग्रहलक्षणांताः परो हि योगो मनसः समाधिः ॥ ४६ ॥समाहितं यस्य मनः प्रशांतं दानादिभिः किं वद तस्य कृत्यम् ॥ असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥ ४७ ॥

तर्हि मनस एव संसारः स्यान्नात्मन इत्याशंक्याह । अनीह इति । अयमर्थः । अविद्यया योऽध्यासस्तेनेयमात्मनः संसृतिर्न तु स्वतः । यतस्तद्रहितस्येश्वरस्य सा नास्ति । किंतु तद्वतो जीवस्यैवेति । तदेवाह । मनसा समीहमानेन सह नियंतृत्वेन वर्तमानोऽपि परमात्मा अनीहस्तत्क्रियासंगरहितः । यतो हिरण्मयो विद्याशक्तिप्रधानः । यतो मत्सखः मम जीवस्य सखा नियंता । अत उदुच्चैर्विचष्टे । अतिरोहितज्ञानेन केवलं पश्यतीत्यर्थः । असौ पुनरहं जीवः स्वलिंगं स्वस्मिन्नात्मनि लिंगयति द्योतयति संसारमिति तथा तन्मनः परिगृह्यात्मत्वेन स्वीकृत्य मनसो गुणैः कर्मभिः संगतः संबद्धो गुणसंगाद्वा कामान् जुषन्निबद्ध इति ॥ ४५ ॥ अतो मनोनिग्रहे कृते सर्वं कृतं स्यात्तं विना तु सर्वं व्यर्थमित्याह । दानमिति द्वाभ्याम् । स्वधर्मो नित्यनैमित्तिकः । सद्व्रतान्येकादश्युपवासादीनि । अन्यानि च यावंति कर्माणि सकामान्यपि । एते सर्वे उपाया मनोनिग्रहलक्षणोंतो निष्ठा फलं येषां ते तथा । ननु ज्ञानांगत्वं तेषां प्रसिद्धं तत्राह । मनसः समाधिर्निग्रह एव परो योगो ज्ञानम् ॥ ४६ ॥ अतो यस्य

नपुत्रकलत्रादिकमिति स्वतोऽन्यतो वा जातं विवेकमपि नैव गृह्णातीति भावः । कर्माणि मनःप्रवर्तितानि कानिचित्सात्त्विकानि शुक्लानि धर्मोपयोगीनि, कानिचित्तामसानि कृष्णानि नरकोपयोगीनि, कानिचिल्लोहितानि राजसानि प्रवृत्तिमयानि क्रमेण तेभ्यः सवर्णादेव तिर्यङ्नरादिजातयः सृतयः संसारा भवन्ति ॥ ४४ ॥ अत्राक्षिपति—तर्हीति । अत्राभीप्सितार्थमाह—अयमर्थ इति । मनोऽध्यासेन मनस्यात्मत्वबुद्ध्या इयं सुखदुःखादिसम्बन्धरूपा । तद्रहितस्य मनोध्यासरहितस्य नित्यज्ञानवतः । सा संसृतिः । तद्वतो मनोध्यासवतः । तत्क्रियासंगरहितः मनसः क्रिया सङ्कल्पादिरूपा तत्संगस्तत्राभिनिवेशस्तद्रहितः । मनःक्रियासंगराहित्ये हेतुमाह—यत इत्यादि । विद्याशक्तिप्रधानत्वे हेतुं पृच्छति—कुत इति । हेतुमाह—यत इत्यादि । अविद्यावृतजीवनियन्तृत्वं विद्याशक्तिमत ईशस्य भवत्येव । अतो विद्याशक्तिप्रधानत्वात् । इत्यर्थ इति—न हि बुद्धो द्रष्टा दृश्यधर्मानुयायी भवतीति भावः । तस्यान्तत्वे तु गुणसंगात्सत्त्वादिगुणसंगात्सुखादिषु निबद्धो भवति "सत्त्वं सुखे सञ्जयति रजः कर्माणि भारत । ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ " इति श्रीमुखोक्तेः ॥ * ॥ ननु तर्हि मनस एव संसारोऽस्तु नात्मनः । तत्र सत्यम् । आत्मा ह्यत्र शरीरे द्विविधः—एकः परमात्मा मनोलेपरहितः, अन्यो जीवात्मा तल्लेपसहित एव । तत्र प्रथमं तावच्छृण्वित्याह—अनीह इति । सर्वं तैः । द्वितीयो जीवात्मा तु मनसोऽध्यासात् मनोरूपलिंगमेवात्मत्वेन मत्वा संसरतीत्यर्थः । मनसो जडत्वात्सुखदुःखानुभवाभावात्स्वर्गनरकापवर्गेषु मध्ये न कोऽपीति भावः ॥ ४९ ॥ यतो मनोनिबन्धनः संसारोतो हेतोः । सर्वं दानादि शुभं कर्म । तं विना मनोनिग्रहं विना । आदिनोर्जोदिव्रतग्रहः । कर्माणि तीर्थस्नानगुरुसेवनादीनि । मनोनिग्रहफलत्वं दानादीनामाक्षिपति—नन्विति । तेषां दानादीनाम् । " तमेतं वेदानुवचनेन दानेन तपसा नाशकेन ब्राह्मणा विविदिषन्ति " इति श्रुतौ ज्ञानाङ्गत्वं युज्यते । समाधीयते चित्तमनेनेति । योगो ज्ञानम् । चित्तसमाधानं ज्ञानं विना न सम्भवतीति योगो ज्ञानमेव । 'योगो ज्ञानमितीरितम्' इत्युक्तेः ॥ * ॥ तस्मात्सर्वानर्थकारिमनसो निग्रह एव यतनीयमित्याह—दानमिति ॥ ४६ ॥ यतो मनोनिग्रह एव ज्ञानमतो हेतोः । तस्य समाहितमनसो ज्ञानिनः । किं कृत्यमस्ति न किमपीति 'ज्ञाने सर्वं समाप्यते' इत्युक्तेः । क्षुद्रसुखाभासफलैर्दा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोवशेऽन्ये ह्यभवन्स्म देवा मनश्च नान्यस्य वशं समेति ॥ भीष्मो हि देवः सहसः सहीयान्युञ्ज्याद्वशे तं स हि देवदेवः ॥ ४८ ॥ तं दुर्जयं शत्रुमसह्यवेगमरुंतुदं तन्न विचिन्त्य केचित् ॥ कुर्वंत्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ॥ ४९ ॥ देहं मनोमात्रमिमं गृहीत्वा ममाहमित्यंधाधियो मनुष्याः ॥ एषोऽहमन्योऽयमिति भ्रमेण दुरंतपारे तमसि भ्रमंति ॥ ५० ॥

मनः प्रशांतं कामक्रोधादिवृत्तिरहितम् अत एव समाहितं भवति तस्य किं कृत्यमस्ति वदेति परं प्रत्युपदिशन्निव स्वयमेवाह । असंयतं विक्षिप्तं चेत् । यद्वा विनश्यदालस्यादिना लीयमानं चेद्भवेत्तर्ह्येभिर्दानादिभिः किमपरं प्रयोजनं स्यान्न किंचिदित्यर्थः ॥ ४७ ॥ नन्वितरेंद्रियजयः प्रयोजनं स्यान्नेत्याह । मनोवश इति । देवा इंद्रियाणि तदधिष्ठातारो वा । भीष्मो योगिनामपि भयंकरो मनोलक्षणो देवः । कुतः । सहसो बलादपि बलिनोऽपि वा सहीयान्बलवान् । अतस्तं यो वशवर्तिनं कुर्यात्स एव देवदेवः सर्वेंद्रियजेता भविता नान्यः । तथा च श्रुतिः । "मनसो वशे सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय । भीष्मो हि देवः सहसः सहीयान्" इति ॥ ४८ ॥ अतोऽसह्या रागादयो वेगा यस्य तम् । अत एवारुंतुदम् अरुर्मर्म तत्तुदति व्यथयतीत्यरुंतुदस्तम् । तत् नेति च्छेदः। तं न विजित्याजित्वा तत् ततो ये केचिन्मर्त्यैः कैश्चिदसद्विग्रहं शुष्कवैरं कुर्वंति तत्र चानुकूलप्रतिकूलादीनन्यान्मित्रादीन्कुर्वंति मन्यंते ते मूढा इत्यर्थः ॥ ४९ ॥ ततश्च तेऽनेन प्रकारेण संसारे भ्रमंतीत्याह । देहमिति । मनोमात्रपारि

नादिभिः किं सर्वदानादिमुख्यफलभूतब्रह्मानंदलाभात् । यद्वाऽथवा स्वरूपानन्दविमुखत्वाद्विनश्यत् । तर्ह्येभिर्मृषाफलैर्दानादिभिः ॥ * ॥ सुधीभिरेको मनोनिग्रह एवापेक्षणीयो नान्य इत्याह—समाहितं वशीकृतं चेत् किं दानादिभिः । असंयतमवशीकृतम् । यतो विनश्यत् लययुक्तम् अपरमनुत्कृष्टं विक्षेपयुक्तं च चेत्तर्ह्यपि किमेभिर्दानादिभिः ॥ ४७ ॥ मनोजये तदितरेन्द्रियजय एव तत्प्रयोजनं भवेदित्याक्षिपति—नन्विति । देवा इन्द्रियाणि । देवानां गुणलिंगानामित्यत्र श्रीकपिलदेवेनेन्द्रियेषु देवशब्दस्य प्रयुक्तत्वात् । असार्वत्रिकत्वादेतत्प्रयोगस्य प्रसिद्धार्थमाददान आह—तदधिष्ठातारो वेति । भीष्मत्वे हेतुमाशङ्कते—कुत इति । 'सहः स्याद्बलवद्बले' इति धरणिः । बलवांश्च बलश्चेति समाहारद्वन्द्वः । यतोऽतिबलवान् अतो हेतोः । तं मनोदेवम् । यद्वा—देवदेवो विष्णुः "स ज्ञेयो भगवान्विष्णुर्मनो यस्य वशे स्थितम्" इत्यादिपुराणात् । मनसः सर्ववशित्वे प्रमाणमाह—तथा चेति । सर्वं जगत् । अन्यस्य सत्सङ्गादिरहितस्य । अन्यत्स्पष्टम् ॥ * ॥ नन्वितरेन्द्रियजयोऽप्यपेक्षणीय एव—नेत्याह । अन्यत्तैः ॥ ४८ ॥ यतः सहसः सहीयानतो हेतोः । अत एवासह्यवेगत्वादेव । ततो मनसोऽजयात् । असंश्चासौ विग्रहो हतः शत्रुमित्रादिरूपस्तम् । तत्रासद्विग्रहे । अन्यान्स्वेतरान् । अनुकूलं मित्रं, प्रतिकूलं रिपुं, प्रातिकूल्यानुकूल्यरहितमुदासीनं च कुर्वन्ति । इत्यर्थ इति—मूढानामेव भेददर्शित्वेन मित्रादिकरणं युज्यते ज्ञानिनस्तु सर्वत्रात्मदृष्ट्या तन्न युज्यत इति भावः । यद्वा—अरुस्तुदतीत्यरुन्तुद् तमरुन्तुदम्, शत्रन्तद्वितीयान्तरूपम्, मुमत्रार्षः संयोगान्तलोपश्च ॥ * ॥ ० ॥ ४९ ॥ ततश्चासद्विग्रहाच्च । अनेन वक्ष्यमाणेन । मनोमात्रकल्पितत्वं तु—'सदिव मनस्त्रिवृत्त्वयि विभात्यसदा मनुजात्' इत्यत्र वेदस्तुतौ देहादेर्वर्णितम् । अन्धधियो यथार्थज्ञानशून्याः । एष देहोऽहमन्यः पुत्रादिरयमिति भ्रमेण भ्रान्तिज्ञानेन । तमस्यज्ञानकार्ये

१ अर्शआद्यजन्तबलशब्दार्थोयम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् ॥ जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय कुप्येत् ॥ ५१ ॥ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् ॥ यदंगमंगेन निहन्यते क्वचित्क्रुध्येत कस्मै पुरुषः स्वदेहे ॥ ५२ ॥

कल्पितमिमं स्वदेहमहमिति पुत्रादिदेहं च ममेति स्वीकृत्य । तमसि संसारे ॥ ५० ॥ तदेवं मनस एव सुखदुःखकारणत्वमुपपाद्येदानीं जनादीनां षण्णामकारणत्वं प्रपंचयति । जनस्त्विति षड्भिः । अत्र चास्मिन्नपि पक्षे आत्मनः किं न किंचित् । सुखदुःखकर्मत्वं तत्कर्तृत्वं चेत्यर्थः । कुत इत्यत आह । ह निश्चितम् । भौमयोर्भूविकारयोर्देहयोस्तन्न त्वात्मनः । अमूर्तस्याक्रियस्य च हननादिषु कर्मत्वकर्तृत्वानुपपत्तेः । तथापि दुःखमात्मपर्यवसाय्येवेति चेदेवमपि परमात्मन उभयत्राप्येकत्वान्न कोपविषयोऽस्तीति स्वदृष्टांतेन दर्शयति । जिह्वामिति ॥ ५१ ॥ यदि देवता हेतुरस्तु नाम तत्रापि पक्षे आत्मनः किम् । यतो विकारयोर्विक्रियमाणयोर्देवयोस्तद्धस्तेन मुखेऽभिहते तेन वा हस्ते दष्टे तदभिमानिनोर्वह्नींद्रयोरेव तन्न त्वविक्रियस्यानहंकारस्य चात्मनः । देवतानां च सर्वदेहेष्वभेदान्न कोपविषयोऽस्तीति स्वदेहदृष्टांतमाह । यथदा अंग

संसारे ॥ * ॥ मनसो मात्रावृत्तय इन्द्रियादयो यस्मिंस्तं देहम् ॥ ५० ॥ अकारणत्वं सुखदुःखयोरिति योज्यम् । जनोऽन्यदेहः । अस्मिन्नपि पक्षे परदेहस्य सुखदुःखहेतुत्वपक्षे । आत्मनश्चेतनस्य जीवात्मनः । तत्कर्तृत्वं सुखदुःखकर्तृत्वम् । इत्यर्थ इति व्याख्येयम् । आत्मनः सुखदुःखकर्मकर्तृत्वाभावे हेतुं पृच्छति–कुत इति । देहयोस्ताडयताडकशरीरयोः । तत्सुखदुःखकर्तृत्वादिकम् । आत्मनः कुतस्तन्नेति चेदत्र हेतुमाह–अमूर्तस्येत्यादिना । मूर्तस्य सक्रियस्य । हननादिषु कर्तृत्वादिदर्शनादिति भावः । यद्यप्यमूर्तस्य कर्तृत्वादिकं न सम्भवति तथापीति । आत्मनि पर्यवसीयते निष्ठीयत इत्यात्मपर्यवसायि "भोक्तृत्वे सुखदुःखानां पुरुषं कारणं विदुः" इत्युक्तेः । एवमपि दुःखादेरात्मपर्यवसायित्वस्वीकारेऽपि । उभयत्र स्वदेहपरदेहयोः । स्वदद्भिः स्वजिह्वां समासान्तर्गतैकदेशोऽपि सम्बध्यते क्वचित् "विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च" इतिवत् । तद्वेदनायां तस्या जिह्वाया वेदनायां पीडायां सत्यां कतमाय दन्तसमूहाय जिह्वायै वा नैकतरायापि कोपो युज्यते उभयोरचेतनत्वेन तुल्यत्वादिति भावः ॥ * ॥ जन एव जनं दुःखयति, जन एव जनं सुखयतीति चेदत्र–चेदित्यादि तैः । कर्मकर्तृत्वकर्मत्वानुपपत्तेः "य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥" इति श्रीभगवदुक्तेः । तथापि कर्तृत्वकर्मत्वानुपपत्तावपि पीडा त्वात्मन एव प्रत्यक्षीभवतीत्यत आह–जिह्वामिति । तत्र वेदनायां पीडायामात्मगामिन्यां सत्यां कतमाय कुप्येत्–किं पीडाकरेभ्यो दन्तेभ्यः–किं वा पीड्यमानायै जिह्वायै तत्र तथा पीड्यमानायै जिह्वायै कोपस्यानौचित्यात्पीडाकरेभ्यो दन्तेभ्योऽपि कोपो न क्रियते तथैवात्रापि कोपो न कर्तव्य इति भावः । दुःखं त्वात्मनो लिंगाध्यासमूलकं सोढव्यमेव लिंगन्तु मन एवेति तद्वतेऽन्यस्मै दोषो न देय इत्यग्रिमश्लोकेषु सर्वत्रैवेदं ज्ञेयम् ॥ ५१ ॥ यदि देवता दुःखहेतुः । नामेति वाक्यालङ्कारे । तत्रापि देवताया दुःखहेतुत्वपक्षेऽपि । किं न किमपीति पूर्ववत् । यतो यस्मात् । विक्रियमाणयोः स्वमुख्यरूपमत्यक्त्वा नानात्वेन तत्तदिन्द्रियादिषु सूक्ष्मरूपतां प्राप्तयोः । यद्वा–विकारयोः सत्त्वपरिणामभूतयोः । "देवाः सत्त्वं पारिणतास्तमो दैत्या रजो नराः" इत्यादिपुराणात् । विकाराभिमानिनोर्वा । तत् दुःखम् । तेन मुखेन । तदभिमानिनोर्हस्तमुखाभिमानिनोरिन्द्राग्न्योरेव तद्दुःखम्, पूर्ववद्देवानामभेदादैक्यात्, 'प्रतिदृशमिव नैकधार्कमेकम्' इति गांगेयोक्तेः । अत्रार्कमित्युपलक्षणं सर्वेन्द्रियदेवानाम् । अत एव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजस्वभावः ॥ न ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखम् ॥ ५३ ॥
ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ॥ ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः ॥ ५४ ॥

देवताधिष्ठानं हस्तमुखादि अत एव पूर्वत्र देवतानधिष्ठानरूपभूविकारदंतोदाहरणम् ॥ ५२ ॥ आत्मनः सुखदुःखाद्याकारपरिणामोतः स एव यदि हेतुः स्यात्तत्र तस्मिन्पक्षे अन्यतः किं न किंचिदन्यतो भवति । यस्मै कुप्येदित्यर्थः । यतो निज एव स्वभावः सः न त्वन्यस्य । नन्वात्मनस्तथा परिणामोऽन्यनिमित्तो भवत्यतोऽस्ति कोपविषय इति चेत्तत्राह । न हीति । आत्मनोऽन्यत् आत्मव्यतिरिक्तं नास्त्येव । यदि स्यादस्तीति प्रतीयेत तर्हि तन्मृषैवातः कस्माद्धेतोः क्रुध्येत । यतो नास्ति निमित्तं न च सुखं दुःखं चेत्यर्थः ॥ ५३ ॥ ग्रहपक्षेऽप्यजस्यात्मनः किम् । यतो जन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षया द्वादशाष्टमादिराशिस्थास्ते सुखदुःखयोर्निमित्तं भवंति । किंच अंतरिक्षस्थैर्ग्रहैस्तत्रस्थस्य ग्रहस्यैव पादार्धादिदृष्ट्यादिभेदैः पीडां वदंति दैवज्ञा न तु ग्रहकोणादिषु स्थितस्य तद्दृष्ट्यगोचरस्य पुरुषस्य । ग्रहगतैव तु पीडा तल्लग्नो

हस्तमुखादीनां देवताधिष्ठानत्वादेव ॥ * ॥ तेन च मुखेन श्वित्रमस्त्विति हस्तेऽभिशप्ते । अन्यत्तैः ॥ ५२ ॥ यत आत्मपरिणामोऽवस्थान्तरमतो हेतोः । स एवात्मैव । अन्यत आत्मेतरात् । इत्यर्थ इति–स्वस्मिन्स्वकोपासम्भवादिति भावः । यतो हेतोः । निजः स्वीय एव । स सुखदुःखाद्याकारपरिणामः । तथा सुखदुःखाद्याकारः । अत्राशंकते–नन्विति । अन्यनिमित्ततोऽन्यस्मान्निमित्तात् । यत इत्थमतो हेतोः । तर्ह्यस्तीति योज्यम् । अतः प्रतीत्यभावात् । तदात्मव्यतिरिक्तं वस्तु मृषैवेति । इत्यर्थ इति–निमित्तं विना नैमित्तिकासत्त्वादिति भावः ॥ * ॥ आत्मा जीवात्मैवेति न हीष्टकालोष्टादिकं केनचिद्दुःखयितुं शक्यं ततो जीवात्मनश्चेतनत्वमेव दुःखानुभवहेतुरिति चेत्तर्हि किमन्यतः अन्यः कथं दूषणीय इत्यर्थः । तत्रात्मनि निजस्वभावचैतन्यमेव सुखदुःखहेतुरित्यर्थः । न हि तच्चैतन्यमात्मनः सकाशादन्यत्, यदि च ततोऽन्यदेव तदिति मतं तर्हि तन्मतं मृषा मिथ्यैवाज्ञानकल्पितमित्यर्थः । तथा सत्यात्मनो लोष्टादीनामिव न सुखं न च दुःखं स्यादित्यतः कस्माद्धेतोः क्रुध्यति, मृषेत्यात्मन्यविद्ययारोपितमेवेत्यर्थः ॥ ५३ ॥ तस्यैव देहस्यैव । ते ग्रहाः । आत्मनः सुखाद्यसम्बन्धे कारणान्तरमाह–किञ्चेति । तत्रस्थस्य अन्तारिक्षस्थस्य । पादार्द्धादिदृष्ट्यादीत्यत्रादिना संयोगग्रहः । तद्दृष्ट्यगोचरस्य ग्रहदृष्ट्यविषयस्य । तल्लग्नोत्पन्ने तत्तद्ग्रहाधिष्ठितलग्नोत्पन्ने । तस्य पुरुषस्याभिमानात्–मेषलग्नोत्पन्नोऽहं, मल्लग्नस्य भौमोऽधिष्ठाता, तद्दृष्टिश्च चतुर्थस्थे बुधेऽष्टमस्थे शनौ पूर्णाऽस्ति, सा च शत्रुदृष्टिस्ततो मे दुःखमस्तीति तत्राभिमानादज्ञत्वाद्देहात्मदृष्ट्या ग्रहगतं देहगतं च दुःखमात्मन्यारोपयतीत्यर्थः । यतो देहग्रहगतैव पीडाऽतो हेतोः । ततस्तस्माद्देहजन्मलग्नाधिष्ठितग्रहात्तस्माद्देहाच्च भिन्नः पुरुषः । कस्मै देहाय ग्रहाय वा । न ह्यन्यस्य दुःखेऽन्यः कोपमर्हतीति भावः । ग्रहाणां पादादिदृष्टिस्तु–“ तृतीयदशमे ग्रहो नवमपञ्चमेऽष्टाम्बुनी क्रमाच्चरणवृद्धितः स्मरगृहं ततः पश्यति । कुजः सितबुधौ शशी रविबुधौ सितक्ष्मासुतौ गुरुर्यमशनी गुरुर्भवनपा इमे मेषतः ॥ ” इति गणेशदैवज्ञैर्जातकालंकारे उक्ता । ‘तृतीयदशमे शनिर्नवमपञ्चमे गुरुः चतुर्थाष्टमेऽपि भौमः शेषाः पश्यन्ति सप्तमं पूर्णदृष्ट्या ’ इति जातकान्तरे पूर्णदृष्टिरप्युक्ता । तथा च यो ग्रहो यं ग्रहं पश्यति शत्रुमित्रसमदृष्ट्या तस्य ग्रहस्यैव तत्कृतं दुःखादि तच्चाज्ञानादज्ञैरात्मनि मन्यत इति सिद्धम् । शत्रुग्रहयोः परस्परं दृष्टिः शत्रुदृष्टिर्मित्रयोर्मित्रदृष्टिः समयोश्च समदृष्टिरिति । दृष्टीनां शत्रुत्वादिकं ग्रहाणां शत्रुमित्रसमत्वं च “ चन्द्रेज्यक्षितिजा रवीन्दुतनयौ गुर्विन्दुसूर्याः क्रमाच्छुक्रार्कौ रविचन्द्रभूमितनया ज्ञार्की सितज्ञौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्माऽस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्ताद्धि जडाजडत्वे ॥ देहस्त्वचित्पुरुषोऽयं सुपर्णः क्रुध्येत कस्मै न हि कर्म मूलम् ॥ ५५ ॥
कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोऽसौ ॥ नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुद्ध्येत कस्मै न परस्य द्वंद्वम् ॥५६॥

त्पन्ने देहे तस्याभिमानाद्भवति यतः पुरुषस्ततो ग्रहाद्देहाच्चान्यः अतः कस्मै क्रुध्येत ॥ ५४ ॥ कर्म हेतुश्चेदस्त्वित्यसूयोपगमं कर्मैव नास्ति कुतस्तस्य हेतुत्वमिति तदाह । हि यस्मात्कर्म एकस्य जडाजडत्वे सति स्यात । जडत्वाद्विकारित्वोपपत्तेः । अजडत्वाच्च हितानुसंधानतः प्रवृत्तिसंभवात् तत्तु न संभवति विरोधात् । अचिज्जडो देहोऽत स्तस्य प्रवृत्तिर्न संभवति । पुरुषस्तु सुपर्णः शुद्धज्ञानस्वरूपोऽतः कस्मै क्रुध्येत । यतः सुखदुःखयोर्मूलभूतं कर्मैव नास्तीति ॥ ५५ ॥ तत्र कालपक्षेऽप्यात्मनः किम् । यतोऽसौ कालात्मक एव ब्रह्मांशत्वात् । स्वांशस्य स्वतः पीडा नास्तीत्यत्र दृष्टांतः । नाग्नेर्हेतोस्तदंशस्य ज्वालादेस्तापो दाहतो नाशोऽस्ति तत्रोपाधिभूतकाष्ठांशदाहा न्नाशः स्यादिति दृष्टांतांतरमाह । हिमस्य तच्छैत्यं तदंशस्य तुषारकणस्य नाशकं न स्यादित्यर्थः । किंच आस्तामंशत्वं वस्तुतः पर एवायं न च परस्य द्वंद्वं सुखदुःखादि

मताः । सूर्यादेः सुहृदः समा अथ बुधः सर्वेऽथ शुक्रार्कजौ भौमाचार्ययमा यमः कुजगुरू पूज्यः परे वैरिणः ॥ " इति गणेशदैवज्ञैरेवोक्तम् । परे इति–यो यस्य मित्रं न समो न, स तस्य वैरीत्यर्थः । यथा रवेः शुक्रार्की एवमन्येषामपि ॥ * ॥ ० ॥ ५४ ॥ असूया गुणेषु दोषारोपणं तस्या उपगमोऽङ्गीकारः । गुणोऽत्र कर्म तत्र दोषारोपणं तदसिद्धिरेव " अजातस्य हि पुत्रस्य कथं नाम प्रवर्तते । अखाते हि तडागे च प्रविष्टो मकरः कथम् ॥ " इति न्यायेन कुतस्तस्य कर्मणः यस्य दुःखहेतुत्वमंगीक्रियते तत्कर्म । एकस्य पुरुषस्य देहस्य वा । जडाजडत्वे चिज्जडोभयरूपत्वे । तदेव न सम्भवतीत्याह–अचिज्जड इति । अतो देहस्य केवलं जडत्वात् । तस्य देहस्य शुद्धज्ञानस्वरूपस्य द्वैतदर्शनाभावात्तद्धेतुका प्रवृत्तिर्न संघटते यतोऽतो हेतोः । कस्मै देहायात्मने वाऽकोपविषयाय, देहस्य जडत्वादात्मनोऽद्वयत्वाच्च कोपगोचरता नास्तीति भावः । यतो हेतोः । येन सुखदुःखमुत्पद्यते तत्कर्मैव न सिद्ध्यतीत्यर्थः ॥ * ॥ **दीपिका**–असूयोपगमः मीमांसकमते दोषदृष्ट्यंगीकारः । असूयामभिनीय दर्शयति–कर्मैव नास्तीति । तस्यासतः कर्मणः । तदाह कर्मणोऽसत्त्वमाह । शुद्धज्ञानस्वरूपः अतस्तस्य विकारित्वं न सम्भवतीति पूरणीयम् । न च शुद्धचैतन्यस्य जडदेहेन शुद्धतेजसस्तमसेव साहित्यं स्यादतः कस्मै क्रुद्ध्येतेति ॥ ५५ ॥ असावात्मा कालात्मकः कालस्वरूपब्रह्मात्मक एव " काल आत्मागमो लोकः स्वभावो धर्म एव च । इति मां बहुधा प्राहुः " इत्युक्तेः । 'कालोऽस्मि लोकक्षयकृत्प्रवृद्धः' इति गीतोक्तेः । 'कालः कलयतामहम्' इति च । 'केचित्कालं वदन्त्यन्ये स्वभावम्' इत्याद्युक्तेश्च । यद्वा–असौ कालः तदात्मक आत्मस्वरूप एव उभयथाऽप्येक एवार्थ इति । तत्र अग्निदृष्टान्ते । तदंशस्य हिमांशस्य । 'तुषारः शीतलः शीतो हिमः' इत्यमरः । इत्यर्थ इति–न हि शीतस्य शीतं नाशकं स्यादिति भावः । अन्यदाह–किंचेति । पर एव साक्षाद्ब्रह्मैव । नातोऽन्यो जीवो नामास्ति "अयमात्मा ब्रह्म" इत्यादिश्रुतेः । देहाद्यध्यासत एवात्मनः सुखदुःखादि न स्वत इत्यर्थः ॥ * ॥ यतोऽसौ तदात्मकः[1] कालात्मक एव कालात्मनो ब्रह्मांशत्वात्कालब्रह्मणोश्चैक्यादिति भावः । न ह्यंशस्यांशिनः सकाशात्पीडास्ति इह दृष्टान्तः–अग्नेरित्यादि तैः । तदेवं परस्य स्वरूपतो

१ कालात्मक इत्यस्य स्थाने तदात्मक इति पाठाऽभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य ॥ यथाऽहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ॥ ५७ ॥ एतां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः ॥ अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव ॥ ५८ ॥ श्रीभगवानुवाच ॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थम् ॥ निराकृतोऽसद्भिरपि स्वधर्मादकंपितोऽमूं मुनिराह गाथाम् ॥ ५९ ॥

कमस्तीति ॥ ५६ ॥ तदेवं षडेते हेतवः प्रसिद्धा निरस्ताः यदि कश्चिद्धेत्वंतरमुद्भावयेत्तदपि वस्तुमहिमापेक्षया न संभवतीत्याह । न केनचिदिति । नन्वपरोक्षः कथम पह्नूयते तत्राह । यथेति । संसृतिमविद्यमानामेव रूपयति प्रकाशयतीति तथा तस्य अहमोऽहंकारस्य यथा द्वन्द्वसंबंधः स्यान्न तथा परतः प्रकृतेः परस्यात्मनः । अहंकारनिमित्तोऽसौ न वास्तव इत्यर्थः । एवं प्रबुद्धो विवेकी यः स भूतैः कृत्वा न बिभेति ॥ ५७ ॥ अतोऽहमपि तथैव परमात्मनिष्ठतया तरिष्यामीत्याह । एतामिति । सोऽहमित्यन्वयः । नन्वियं निष्ठैव कथं भवेत्तदाह । मुकुंदेति ॥ ५८ ॥ प्रस्तावेन सह गाथार्थं संक्षेपतो दर्शयति द्वाभ्याम् । इत्थं नष्टद्रविणो निर्विद्य गतक्लमः प्रव्रज्य गां पर्यटन्नस

मायातीतस्य जीवात्मनः द्वन्द्वं नास्तीति षडेते हेतवो निरस्ताः ॥ ५६ ॥ हेतवः सुखदुःखयोरिति योज्यम् । तदपि जनादिषडन्यदपि । वस्तुन आत्मनो महिमाऽसंगादिलक्षणस्तदपेक्षया । अत्राशङ्कते—नन्विति । अपह्नूयतेऽपलप्यते । इत्यर्थ इति—"अहंकारकृतं बन्धमात्मनोऽर्थविपर्ययम्" इत्युक्तेरिति भावः । एवं प्रबुद्धः अहंकारकृत एवात्मनो दुःखादिसम्बन्धो न वास्तव इति ज्ञानवान् । भूतैः नरव्याघ्रादिभिः ॥ * ॥ अपरोक्षः सर्वप्रत्यक्षः द्वन्द्वोपरागः । ननु तर्ह्यपरोक्षस्य दुःखानुभवस्य को हेतुस्तत्र पूर्वोक्तमनोध्यास एवेत्याह—यथाहम इति । मनःप्रधाने लिंगदेहे योऽहंकारस्तस्मादेव नान्यस्मात् । यथाशब्द एवार्थे । संसृतिं संसारबन्धं निरूपयितुं शीलं यस्य तस्मात् । अथ जीवात्मा हि स्वरूपतः शुद्ध एव न तस्य कालकर्मादयो दुःखहेतवः किन्त्वविद्यया देहेऽहंकाराद्देहस्याध्यास एव, स च देहो मनःप्रधानत्वान्मन एवेति तदेव दुःखहेतुरिति प्रकरणार्थः । देहाध्यासे सति तु जीवात्मनः शुद्धत्वेऽपगतेऽध्यासानुगाः षडपि हेतवो यथायोगमुद्भवन्तीति निर्गलितार्थः ॥ ५७ ॥ यतः परमात्मनिष्ठैव श्रेयसी अतो हेतोः । एतया मानस एव दुःखजाल आत्मा त्वसंगसुखरूप एवेत्येवमाकारिकया । एतामुक्तलक्षणां परात्मनिष्ठां स्वरूपस्थितिं मनःसंयमनरूपां वा । पूर्वतमैः सनकादिभिः । महर्षिभिः सर्वविरक्तमुख्यैः । अध्यासितां सम्यगनुष्ठिताम् । यो भूतैः क्रीडनकवत्कृतः सोऽहमित्यर्थः । एतन्निष्ठावाप्तिरेव दुर्घटेत्याशंकते—नन्विति । मुकुन्दसेवया किन्नावाप्यतेऽपि तु सर्वमेवेत्यर्थः । "धर्मार्थकाममोक्षेषु य इच्छेच्छ्रेय आत्मनः । एकमेव हरेस्तत्र कारणं पादसेवनम् ॥" इति नारदोक्तेः । तमोऽज्ञाननिमित्तकं संसारम् ॥ * ॥ **संदर्भः**—तदेषा च मम परमात्मनिष्ठा श्रीमुकुन्दाङ्घ्रिनिषेवणं विना सोपद्रवैव जाता, यदीदृशो नानाविचारोऽपि तन्निष्ठाया उपद्रव एवेत्यन्ते तन्निषेवामवलम्ब्यैव विविनक्ति—एतामिति । तस्माद्भवता साध्वेवोक्तम् ऋते त्वद्धर्मनिरतानिति भगवतो भावः ॥ * ॥ **विश्वनाथस्तु**—ततश्च तस्य विघ्नस्थगिता प्राग्भवीया शुद्धा मद्भक्तिर्मनसि प्रादुर्भूता प्रादुर्भूतायां च तस्यां स्वस्य सन्न्यासः । द्वन्द्वसहनोपायमुक्तलक्षणमेतावन्तं विचारं चावधारयन्मच्चरणनिषेवयाऽमृतसिंधुनिमग्न उच्चैर्नृत्यन्सहर्षाटोपमाह—एतामिति । सोऽहमित्यन्वयः । परात्मनिष्ठां देहदैहिकाभिमानेभ्यः परः शुद्धो य आत्मा जीवस्तस्य निष्ठां विचारितलक्षणं स्वरूपं केवलमास्थायेति परात्मनिष्ठायामेतस्यां मम आ ईषत् स्थितिमात्रमेव तमः संसारन्तु सेवयैव तरिष्यामि न त्वनयेत्यर्थ एवकाराल्लभ्यते । ननु तर्हि परात्मनिष्ठायां स्थितिमात्रमपि किं करोषि तत्राह—पूर्वतमैः प्राचीनैरध्यासितां सेविताम् ॥ ५८ ॥ प्रस्तावेन प्रसंगेन । गतक्लमो विगतग्लानिः । अकम्पितोऽचलितः । अमूम् 'नायं जनो मे' इत्यादिषोडशपद्यात्मिकां गेयां कथाम् । यद्वा—अमूं वक्ष्यमाणां गाथां श्लोकम् 'सुख

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुखदुःखप्रदो नान्यः पुरुषस्यात्म विभ्रमः ॥ मित्रोदासीनारिपवः संसारस्तमसः कृतः ॥ ६० ॥ तस्मात्सर्वात्मना तात निगृहाण मनो धिया ॥ मय्यावेशितया युक्त एतावान्योगसंग्रहः ॥ ६१ ॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः ॥ धारयञ्छ्रावयञ्छृण्वन्द्वंद्वैर्नैवाभिभूयते ॥ ६२ ॥ इति श्रीमद्भा० म० एकादशस्कंधे भगवदुद्धवसंवादे भिक्षुगीतानिरूपणं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥ श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितम् ॥ यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमम् ॥ १ ॥

द्भिर्निराकृतोऽपि स्वधर्मादकंपितः सन्मुनिरमूं गाथामाहागायतेत्यन्वयः ॥ ५९ ॥ सुखदुःखप्रदो न मनसोऽन्यः यतः मित्रोदासीनारिपवः सर्वोऽपि संसारस्तमसोऽज्ञानत आत्मनो मनसो विभ्रममात्रः कृतो न तात्त्विक इत्यर्थः ॥ ६० ॥ उक्तं द्वंद्वसहनोपायमुपसंहरति । तस्मादिति ॥ ६१ ॥ मनोनिग्रहाशक्तोऽप्येतच्छ्रवणादिनिष्ठस्तत्फलं प्राप्नोतीत्याह । य इति । द्वंद्वैः सुखदुःखादिभिः ॥ ६२ ॥ भिक्षुगीतं मिषं कृत्वा भक्तचित्तगतं हरिः ॥ मोहं निघ्नन्निहाभाति परमानंदरूपतः ॥ १ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायां त्रयोविंशोऽध्यायः ॥ २३ ॥ छ ॥ चतुर्विंशे तु सांख्येन मनोमोहो निवार्यते ॥ आत्मनः सर्वभावानामागमापायचिंतया ॥ १ ॥ स्वपदद्वंद्वभक्तानामद्वंद्वत्वाय संयमम् ॥ चित्तस्योक्त्वा पुनः कृष्णः सांख्यमत्राह तत्कृते ॥ २ ॥ अद्वितीयात्परमात्मनो मायया प्रकृतिपुरुषद्वारा सर्वं द्वैतमुदेति पुनस्तत्रैव लीयत इत्यनुसंदधानस्य द्वंद्वभ्रमो निवर्तत इति वक्तुं सांख्यं प्रस्तौति । अथेति । पूर्वैः कपिलादिभिर्विनिश्चितं वैकल्पिकं भेदनिमित्तम् । भ्रमं सुखदुःखादिरूपम् ॥ १ ॥

दुःखप्रदो नान्यः' इत्यादिम् "गाथा श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः" इति मेदिनी ॥ * ॥ कदर्योपाख्यानोत्थापनप्रयोजनञ्चाह श्लोकद्वयेन—निर्विंद्येति ॥ ५९ ॥ इत्यर्थ इति—मनोरथवदवास्तव इति भावः ॥ * ॥ आत्मविभ्रम इति पञ्चम्यर्थे प्रथमा । आत्मविभ्रमादन्यो न सुखादिप्रदः किंतु भ्रम एव ॥ अत एव तमसोऽज्ञानस्वरूपात् । मित्रादिरूपः संसारः ॥ *॥ सन्दर्भोऽपि—मित्रोदासीनारिपुरूपः सुखदुःखप्रदः पुरुषस्य सर्वोऽपि संसारोऽयं नान्योऽस्ति । किन्तु तमसस्तमसा स्वाज्ञानेन कृतो य आत्मनो मनसो विभ्रमस्तद्रूप एवेत्यर्थः ॥६०॥ यतो मनोविलासः संसारस्तस्माद्धेतोः । एतावान् मनःसंयमलक्षणः।योगसंग्रहः योगसंक्षेपः।"चित्तवृत्तिनिरोधो योगः" इति भगवता पतञ्जलिना सूत्रितत्वात् । धिया व्यवसायात्मिकया युक्तः ॥ * ॥ ० ॥६१॥ अशक्तं प्रत्याह—मन इत्यादिना । एतस्या गाथायाः श्रवणे निष्ठा यस्य स तथा । तत्फलं मनोनिग्रहफलं द्वन्द्वाऽनभिभवलक्षणम् । आदिना लाभालाभादिग्रहः ॥ * ॥ ० ॥ (६२) ॥ निजगुरुं हरिरूपतया स्तौति—भिक्ष्विति । भक्तस्य ममोद्धवस्य वा । इवशब्देन मोहस्यावास्तवतां सूचयति—परमानन्दरूपेण मद्गुरुरूपेण वासुदेवरूपेण वा (१) ॥ ६२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ आत्मनः स्वस्य । मनोमोहः द्वैतसत्यत्वधीः (१) । अद्वन्द्वत्वाय द्वन्द्वनिवृत्तये । अत्र चतुर्विंशे । तत्कृते चित्तसंयमार्थम् (२) । अध्यायतात्पर्यमाह—अद्वितीयादित्यादिना । तत्रैव परमात्मनि । अथ मनःसंयमनोक्त्यनन्तरम् । ते तुभ्यम् । यत्सांख्यम् । जह्यात्पुमांस्त्यजेत् । अनेन भेदभ्रमापादकाग्निवंशजकापिलोक्तानीश्वरसांख्यशास्त्रान्यत्वमस्योक्तम् ॥ * ॥ मनःप्रधाने लिंगदेहेऽहंबुद्धिरेवात्मनो दुःखकारणमिति भिक्षुगीतादवगतम् । सा चानात्मबुद्धिरात्मानात्मविवेके सति निवर्तते, स चात्मानात्मविवेकः सांख्यज्ञानमूलक इत्यतः सांख्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ॥ यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे ॥ २ ॥ तन्मायाफलरूपेण केवलं निर्विकल्पितम् ॥ वाङ्मनोऽगोचरं सत्यं द्विधा समभवद्बृहत् ॥ ३ ॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ॥ ४ ॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः ॥ मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ॥ ५ ॥

अथो शब्दः कार्त्स्न्यें । ज्ञानं द्रष्टा तेन दृश्यः कृत्स्नोऽप्यर्थश्चाविकल्पितं विकल्पशून्यमेकमेव । ब्रह्मण्येव लीनमासीदित्यर्थः । कदेत्यपेक्षायामाह । अयुगे युगेभ्यः पूर्वं प्रलय इत्यर्थः । तथा आदौ यत्कृतयुगं तस्मिंश्चान्यदाऽपि यदा विवेकनिपुणा जना भवंति तदाऽपि । तेषां च भेदास्फूर्तेः ॥ २ ॥ तद्बृहद्ब्रह्म वाङ्मनोगोचरं यथा भवति तथा । मायादृश्यं फलं तत्प्रकाशस्तद्रूपेण मायाविलासरूपेण वा द्विधाऽभूत् ॥ ३ ॥ तयोर्द्विधाभूतयोरंशयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी ॥ ४ ॥ अभवन्नभिव्यक्ता बभूवुः । मया परमेश्वरेण । जीवादृष्टप्रत्युक्तत्वात्सृष्टेः पुरुषानुमतत्वं युक्तम् । यद्वा । स्वस्यैव प्रकृतिलक्षणरूपा या पुरुषावस्था तदनुमतेन तद्द्वारे

मुपदिशन्नाह—अथेति । सांख्याधिकारे विकल्पो देहस्तदुद्भवमध्यासरूपं भ्रमं त्यजेत् ॥ १ ॥ द्रष्टा जीवः । इत्यर्थ इति—केवलं ब्रह्मैवासीत् "अहमेवासमेवाग्रे" इत्याद्युक्तेः । इत्यर्थ इति—प्रलये सर्वस्य लीनत्वाद्युगादि कल्पनापि तदा नासीदिति भावः । तथा प्रलयवत् । अन्यदापीत्युक्तेर्नात्र कालनियमः । तेषां विवेकिनाम् ॥ * ॥ तृतीयस्कन्धे—"भगवानेक आसेदमग्र आत्मात्मनां विभुः" इत्यादौ यद्भगवत्त्वेन शब्द्यते तदेव ब्रह्मत्वेन शब्द्यत इति वदन्तीत्यादेर्यदुभयत्रैकमेव वस्तु प्रतिपाद्यम्, अन्ते तु "एष सांख्यविधिः प्रोक्तः परावरदृशा मया" इत्यनेन भगवद्रूपेणावस्थितिः स्पष्टैव । कदेत्यपेक्षया तैः ॥ २॥ तत्प्रकाशः दृश्यप्रकाशः । तत्प्रकाशयतीति व्युत्पत्तेश्चेतनः मायायाः कार्यद्वारकं दृश्यत्वं यद्यप्यस्ति तथापि सा स्वरूपेणादृश्येत्यस्वारस्यादाह—मायाविलासरूपेण वेति । विलसत्यनेनेति विलासः पुरुषः । माया च विलासश्च मायाविलासौ तावेव रूपमिति सामानाधिकरण्याभावेऽपि कर्मधारयो विधायकसूत्रे विपरीतग्रहणात् । यद्वा—मायया सहितो विलासो मायाविलासः स एव रूपं तेन तथा ॥ * ॥ तदिति—तैस्तत्र मायादृश्यमिति फलं तत्प्रकाश इति छेदः । तेन ब्रह्मणा यद्दृश्यं वस्तु तन्माया तस्य ब्रह्मणो यः प्रकाशविशेषः स फलमित्यर्थः । यद्वा—'प्रकृतिर्ह्यस्योपादानम्' इत्यादौ 'ब्रह्म तत्त्रितयं त्वहम्' इति वक्ष्यमाणात् । तद् बृहत् मल्लक्षणं ब्रह्मस्वरूपेण स्थित्वैव मायाया निजशक्तिविशेषस्य यत्फलं व्यंग्यं वस्तु तद्रूपेण मायास्वरूपशक्तेराभासरूपा बहिरंगा निमित्तशक्तिस्तस्या विलासः प्रकृतिपुरुषाविर्भावकरूपक्रीडाविशेषस्तेन रूपेणेति टीकापक्षान्तरार्थः ॥३॥ एकतरोऽर्थो माया सा । अन्यतमो द्वितीयोऽर्थः प्रकृतेर्ज्ञाननाश्यत्वेन भावत्वं सदातनत्वं नास्तीति ततो विलक्षणो भावः भावयति सर्वं प्रकृत्येति व्युत्पत्तेः ॥ * ॥ **दीपिका**—अंशयोरिति—प्रकृतेस्तद्बहिरङ्गशक्तित्वादंशत्वं पुरुषस्य तटस्थशक्तित्वादंशत्वमिति ज्ञेयम् । कार्यमाकाशादि, कारणं महदादि तद्रूपिणी ॥ * ॥ **सन्दर्भस्तु**—प्रकृतिः प्रधानं पुरुषो जीवः । तदुक्तं वैष्णवे—" विष्णोः स्वरूपात्परतो हि तेऽन्ये रूपे प्रधानं पुरुषश्च विप्र " इत्यादौ । टीका च—परतो निरुपाधेर्विष्णोः स्वरूपात् ते प्रागुक्ते प्रधानं पुरुषश्चेति द्वे रूपे अन्ये मायाकृते इति ॥ ४ ॥ अभिव्यक्ता इति—साङ्ख्यस्य कार्यसत्यत्ववादित्वात् । तदुक्तम्—" असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥ " इति वाचस्पतिना व्याख्याता चेयं तृतीयस्कन्धे कारिका । पुरुषानुमतत्वे सृष्टेरनीश्वरवादापत्तेराह—यद्वेति । इत्यर्थ इति—प्रकृत्यवेक्षणावसरे ममैव पुरुषसंज्ञा भवतीति भावः ॥ * ॥ मया महत्स्रष्टृमहापुरुषस्वरूपेण पुरुषस्य जीवस्यानुमतेन अस्मद्विधस्य जीवस्य प्राक्तनकर्मज्ञानभक्तिसाधनानि सम्पद्यन्तामित्यात्मकेन जीवादृष्टप्रयुक्तत्वात्सृष्टेः ॥ * ॥ **सन्दर्भस्तु**—मया कलाख्यचेष्टात्मकेन महत्स्रष्ट्रा महापुरुषरूपेण लीलासाधकजीववृन्दार्थकृतयेक्षया प्रक्षोभ्यमाणायास्तत उद्बुद्धेन पुरुषेषु सर्वेषु जीवेष्वनुगतेन मतेन ज्ञानेन वासनारूपेण पूर्वोक्तस्वभावाख्येन विशेषतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः ॥ ततो विकुर्वतो जातोऽहंकारो यो विमोहनः ॥ ६ ॥
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् ॥ तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः ॥ ७ ॥

णेत्यर्थः ॥ ५ ॥ सूत्रं क्रियाशक्तिमान् प्रथमविकारः । ततो महान् ज्ञानशक्तिः । नन्वयं महानेव प्रथमो विकारः प्रसिद्धस्तत्राह । स च ज्ञानक्रियागर्भत्वात्सूत्रेण संयुतो न पृथक् । एकमेव तत्त्वं क्रियाज्ञानशक्तिभ्यां द्विधोच्यत इत्यर्थः । विमोहनो जीवस्य भ्रमहेतुः संजातः ॥ ६ ॥ यतस्तन्मात्रादीनां कारणम् । मनःशब्देन देवानामप्युपलक्षणम् । चिदाचिन्मयः चिदाभासव्याप्तत्वादुभयग्रंथिरूप इति जीवोपाधित्वं दर्शितम् । यद्यपि " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " इत्यादिश्रुतेः " अन्नमयं हि सौम्य मनः " इत्यादिश्रुतेश्च प्रथमं भूतानि जायंते । तेभ्यश्चापंचीकृतेभ्यः प्राणादिक्रमेण समष्टयात्मकं लिंगशरीरम् । पंचीकृतेभ्यश्च ब्रह्मांडम् । तस्मिन्वैराजस्तदंतर्यामी लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणस्तन्नाभिपद्मे च वैराजस्य भोगविग्रहश्चतुराननस्ततो यथावसरमन्येषां जीवानामाविर्भाव इति प्रक्रिया । तथापि चित्ताभिव्यक्तिपूर्वकोऽहंकारस्ततो भूतेंद्रियादिव्यवहार इत्येतावता महदादिक्रमेण सृष्टिरुच्यते । तथा चोक्तम् । " मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदिताऽन्यथा ॥ उपायः

प्रक्षोभ्यमाणायाः प्रकृतेः सम्बन्धिनस्तमआदयो गुणा अभवन्, व्यक्तीभूता इत्यर्थः । वेति पाठोऽपि समुच्चयार्थः ॥ ९ ॥ महतो द्वितीयत्वमाक्षिपति—नन्विति । स च महान् । ज्ञानक्रिये गर्भे यस्य तस्य भावस्तत्त्वं तस्मात् । इत्यर्थ इति—शक्तिभेदेन मायाविद्यावद्भेदो न वास्तव इति भावः । ततो महतः । सोऽहङ्कारः । विमोहकत्वं तु तस्य ' अहंकारविमूढात्मा ' इति श्रीगीतोक्तेः । ' मत्सूत्रेण च संयुतम् ' इति विजय० पाठे मम सर्वाधारेण संयुतं सर्वजगदाधारवायुतत्त्वमुत्पन्नमित्यर्थः ॥ * ॥ ततस्तेभ्यो महान्सूत्रेण संयुतः समभवज्जात इत्यनयोर्भेद एव दर्शितः । तदेवमीश्वरजीवप्रकृतिस्वभावसूत्रमहदाख्यानि षडेव तत्त्वानि । महापुरुषस्य मायायाश्च बृहदाख्यसर्वेश्वरगुणत्रयस्य प्रकृतावन्तर्भावात्, देवतानां चान्तर्भावात् अहंकारादयो द्वाविंशतिरित्यष्टाविंशतिः ॥ * ॥ **विश्वनाथस्तु**—सूत्रं प्रथमो विकारः । ननु प्रथमो विकारो ज्ञानशक्तिर्महानिति प्रसिद्धस्तत्राह—महान्यः प्रसिद्धः स हि सूत्रेण संयुतः । तत्रतत्र सूत्रसहित एव स ज्ञेय इत्यर्थः । भ्रमहेतुर्देहाध्यासहेतुः ॥ ६ ॥ यतस्तन्मात्रादीनां कारणमतस्त्रिवृत्त्रिप्रकारः, त्रिभिर्भेदैर्वर्तत इति व्युत्पत्तेः । उभययोः चिदचितोर्ग्रन्थिरूपः । ईश्वरस्य निरहंकारत्वं कर्तृत्वाद्यभिमानाभावाज्जीवस्य कर्तृत्वाद्यभिमानादहंकारोपाधित्वम् । सर्वसृष्टिप्रकारैक्यमाह—यद्यपीत्यादिना । तेभ्यो भूतेभ्यः । तस्मिन्ब्रह्माण्डे । तदन्तर्यामी वैराजान्तर्यामी । ततो ब्रह्मणः । तथापि न किञ्चिद्भेदः । अत्र पूर्वाचार्यसंमतिमाह—तथा चोक्तमिति । मृदो यथा घटादयो लोहात्सुवर्णाद्यथा कटकादयोऽग्नेर्यथा विस्फुलिंगादयः । आदिना दुग्धाद्यथा दध्यादय इति ग्रहः । एवमीश्वरात्सृष्टिरित्येवं दाष्टान्तैरुदिता कथिता स श्रोतुश्चित्तस्य सृष्टाववताराय प्रवेशायोपायः, सृष्टेस्तु कथञ्चनापि भेदो नास्तीत्यर्थः । विवाहाद्युत्सवे प्रज्वालनाय निर्मितगन्धकाक्तशणपत्रगजादिपुच्छस्य ह्रस्ववक्रदीर्घर्जुभवने न कोऽपि व्याघातस्तथापवादार्थोक्ताध्यारोपरूपसृष्टेर्यथाकथञ्चिद्वर्णनेऽपि न कोऽपि दोष इति ध्येयं विज्ञैः । एकमेवाद्वितीयं ब्रह्मासीत्तत्स्वमायासमावेशाद्बीजमव्याकृतात्मकमभवत् तस्मादाकाशः शब्दस्तन्मात्रोऽभूत्ततः स्पर्शात्मको वायुस्ततो रसात्मिका आपस्ताभ्यां गन्धात्मिका भूरेवमपञ्चीकृतानि पञ्च भूतानि तेभ्यः समष्टिव्यष्ट्यात्मकं लिंगशरीरं तद्यथाकाशादिसात्त्विकांशेभ्यः श्रोत्रादि ज्ञानेन्द्रियाणि तेषां समष्टिसात्त्विकांशादन्तःकरणं तथा तेषां राजसांशेभ्यः वागादिकर्मेन्द्रियाणि तत्समष्ट्या प्राणः दिग्वातार्काम्बुपृथिव्यो ज्ञानेन्द्रियदेवता अग्नीन्द्रोपेन्द्रमृत्युप्रजापतयः, कर्मेन्द्रियदेवताश्चन्द्रधिषणरुद्रक्षेत्रज्ञाः, अन्तःकरणचतुष्कदेवता आदित्यपृथिवीबाह्यवायुसामान्यतेजोबाह्यवायवः प्राणदेवताः शब्दादयो विषया इति । ततो व्यवहारार्थं पञ्चीकृतभूतेभ्यः समष्टिव्यष्ट्यात्मकं स्थूलशरीरं भागवते त्वद्वितीयाद्ब्रह्मणः साभासं त्रिगुणात्मकं प्रधानं तत्र प्रतिबिम्बितचैतन्यं पुरुष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रियाणि च ॥ तैजसाद्देवता आसन्नेकादश च वैकृतात् ॥ ८ ॥
मया संचोदिता भावाः सर्वे संहत्यकारिणः ॥ अंडमुत्पादयामासुर्ममायतनमुत्तमम् ॥ ९ ॥

सोऽवताराय नास्ति भेदः कथंचन ॥ " इति ॥ ७ ॥ तस्मात्रिविधात्रिविधप्रपंचोत्पत्तिं दर्शयति । अर्थ इति । तन्मात्रिकाच्छब्दादितन्मात्रकारणात्तामसात्त द्वारा अर्थो महाभूतरूपो जज्ञे बभूव । भूतानामावरणस्वभावत्वात् । इंद्रियाणि दश तैजसाद्राजसात् । तेषां प्रवृत्तिस्वभावत्वात् । वैकृतात्सात्त्विकाद्देवताः दिग्वातार्क प्रचेतोऽश्विवह्नींद्रोपेंद्रमित्रकाः चंद्रश्चेत्येकादश । चशब्दान्मनश्च । तेषां प्रकाशस्वभावत्वात् ॥ ८ ॥ मम वैराजांतर्यामिणः ॥ ९ ॥

इत्युक्तम् । गुणसाम्यावस्थं प्रधानम् । तस्मान्महत्ततोऽहङ्कारः । स च सात्त्विकादिभेदात्त्रिधा—तत्र सात्त्विकाहंकारान्मनइन्द्रियदेवाः, राजसात्ततो बुद्धिरिन्द्रियाणि च, तामसात्पञ्च तन्मात्राणि शब्दादीनि, तेभ्योऽप्याका शादीनि । तत्र निरीश्वरसाङ्ख्यमते विरोध एव ' ईक्षतेर्नाशब्दम् ' इत्यादिनापाकृतः । वेदान्तमते तु—मायैव प्रधानं समष्टिबुद्धिर्महत्तत्त्वम् " तदैक्षत " इत्यादिभिरीक्षणं वा " एकोऽहम् " इत्यादिभिरहंकारः । वेदान्ते इन्द्रियाणां भौतिकत्वं भागवतेऽहंकारजन्यत्वम्, तत्त्ववान्तरकार्ये विप्रतिपत्तिः मुख्यकारणं तु ब्रह्मेति सर्वत्रोक्तम् । श्रीधरस्वामिना तु—प्रथमं चित्ताभिव्यक्तिस्ततोऽहमस्मीत्याकारस्ततो भूतेन्द्रियादिस्फूर्तिरिति लोकप्रती त्यभिप्रायेणोक्तमतो भागवतेन विरोध इत्युक्तम् । "भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ " इति श्लोके मधुसूदनस्वामिना व्याख्यातम् । स्वसिद्धान्ते तु—ईक्षणसंकल्पात्मकौ माया परिणामावेव बुद्ध्यहंकारौ पञ्च तन्मात्राणीति।अपञ्चीकृतमहाभूतानीत्यादि—भाष्यकारोऽप्येवं भूमिरिति पृथिवी तन्मात्रमुच्यते न स्थूला,तथाऽबादयोऽपि तन्मात्राण्येव।मन इति मनसः कारणमहंकारो गृह्यते बुद्धिरित्यहंकारकारणं महत्तत्त्वम्।अहंकार इत्यविद्यासंयुतमव्यक्तमित्यादि।एवमेव यत्र विरोधस्तत्रैवं समाधानं युक्तम् । वार्तिके तु—"यथायथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।सासैव प्रक्रियेह स्यात्साध्वी सा चानवस्थिता॥" इति मुख्यसमाधानन्तु सर्वेषां वेदान्तानामद्वैते तात्पर्यात्सृष्ट्याद्यर्थवादे तात्पर्याभावादस्तु यथाकथञ्चित्समाधानम्। द्वैते तु न कश्चिद्विरोध इत्युक्तं श्रीधरस्वामिना—मृल्लोहेति ॥*॥ **दीपिका**—त्रिवृत्त्वे हेतुः—यत इति।तन्मात्रहेतुत्वात्तामसः,इन्द्रियहेतुत्वात्तैजसः, मनोदेवहेतुत्वाद्वैकारिकः, विगतः कारोविक्षेपो यस्मात्स विकारः सत्त्वं तत्प्रधानत्वात्सात्त्विक इत्यर्थः । जीवोपाधित्वं जीवस्य सुखदुःखादिहेतुत्वं वेदान्तसाङ्ख्ययोः सृष्टिप्रक्रियायां विरोधमाशङ्क्य समाधत्ते—यद्यपीति। अन्नमयं पृथिवीकार्यम् अपञ्चीकृतभूतेभ्यः पञ्चीकरणावस्थामप्राप्तेभ्यः । पञ्चीकरणञ्च वृद्धैरुक्तम्—" द्विधा विधाय चैकैकं चतुर्द्धा पञ्चमं पुनः । स्वस्वेतरद्वितीयांशैर्योजनात्पञ्चपञ्च ते ॥ " इति । लिंगशरीरं सप्तदशतत्त्वात्मकम् । "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥ " इति श्रीभगवत्पूज्यपादोक्तेः । तस्मिन्ब्रह्माण्डे । क्षीरोदशायीत्यत्र गर्भोदशायीति वाच्यम् "प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्" इत्यत्र तथोपगमात् । वैराजस्य स्थूलब्रह्मणो भोगार्थं विग्रहः सूक्ष्मो हिरण्यगर्भः । ततो ब्रह्मणश्चित्ताभिव्यक्तिर्महत्तत्त्वापरपर्यायचित्तस्य ज्ञानरूपपरिणामः । एतावता व्यवहारमात्रप्रदर्शनेन । तथा चोक्तं वार्तिककृद्भिः— मृल्लोहेति । मृदादिभिर्दृष्टान्तरूपैर्या वेदान्ते सृष्टिस्ततोऽन्यथा या साङ्ख्ये सृष्टिरुक्ता सा चित्तस्यावताराय तत्र प्रवेशाय, भेदस्तु कथञ्चन नास्ति, यथैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृन्मयं विज्ञातम् । एवमग्रेऽपि ॥ * ॥ संदर्भस्तु—वैकारिक इति तैः । तत्र यद्यपीत्यादौ पुराणैकनिश्चितश्रुत्यर्थानां त्विदं तत्त्वम्—अहङ्कारोपाधेरात्मन आकाशः सम्भूतः मनसोऽन्नमयत्वं चाभिव्यक्तिविशेषापेक्षयेत्यादि ज्ञेयमिति । स्मार्ताश्चैवं तमेवार्थं मन्यन्ते युक्तं च तत् । यथोक्तम्—" वेदार्थादधिकं मन्ये पुराणार्थं वरानने । वेदाः प्रतिष्ठिता देवि पुराणे नात्र संशयः ॥ पुराणमन्यथा कृत्वा तिर्यग्योनिमवाप्नुयात् । सुदान्तोऽपि सुशान्तोऽपि न गतिं प्राप्नुयात्क्वचित् ॥ यो वेद चतुरो वेदान्साङ्गोपनिषदो द्विजः । पुराणं नैव जानाति न च स स्याद्विचक्षणः॥" इत्यादि, "भारतव्यपदेशेन ह्याम्नायार्थः प्रदर्शितः " इत्यादि च । ' क्षीराब्धिशायी ' इत्यत्र ' गर्भोदशायी ' इति वाच्यम् । चित्तं महत्तत्त्वम् ॥ ७ ॥ तस्मादहंकारात्त्रिविधात् । तेषामिन्द्रियाणाम् । तेषां देवानां मनसश्च ॥ * ॥ तद्द्वारा तन्मात्रद्वारा ॥ ८ ॥ मया चिद्रूपेण संचोदिता आविष्टाः " परेण विशता स्वस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मिन्नहं समभवमंडे सलिलसंस्थितौ ॥ मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः ॥ १० ॥ सोऽसृजत्तपसा युक्तो रजसा मदनुग्रहात् ॥
लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा ॥ ११ ॥ देवानामोक आसीत्स्वर्भूतानां च भुवः पदम् ॥ मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितया
त्परम् ॥ १२ ॥ अधोऽसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः ॥ त्रिलोक्यां गतयः सर्वाः कर्मणां त्रिगुणात्मनाम् ॥ १३ ॥ योगस्य तपसश्चैव न्यासस्य
गतयोऽमलाः ॥ महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः ॥ १४ ॥

सलिले संस्थितिर्यस्य तत्सलिलसंस्थिति तस्मिन्सलिलसंस्थितावंडे श्रीनारायणरूपो लीलाविग्रहेण समभवं स्थित इत्यर्थः । विश्वाख्यं लोककारणभूतम् । तत्र चात्मभूश्चतुरान नरूपभोगविग्रहेण पुनर्वैराज एव तस्मिन्नाविर्भूत इत्यर्थः ॥ १० ॥ रजसा युक्तो मदनुग्रहात्तपसा कृत्वाऽसृजत् । भूरतलादिसहिता । भुवः अंतरिक्ष लोकः । स्वः स्वर्लोकः । महर्लोकादेरप्युपलक्षणम् ॥ ११ ॥ लोकसृष्टिप्रयोजनमाह देवानामिति सार्धेन । ओको निवासः पदं स्थानम् । त्रितयात्परं महर्लोकादि ॥ १२ ॥ भूमेरधः अतलादि । एवं व्यवस्थायां कारणमाह सार्धेन । त्रिलोक्यां पातालादिसहितायाम् ॥ १३ ॥ योगादितारतम्येन यथोत्तरं महर्लोकादयो गतयः । मद्गतिर्वैकुण्ठ

आयतनमुपाविस्तत्रोत्तमत्वं व्यष्ट्यपेक्षया ॥ ९ ॥ न्मात्रया विश्वसृग्गणः '' इत्याद्युक्तेः । उत्तमत्वं तस्य ममायतनत्वादेव ॥ * ॥ स्वयं भगवतस्तदासनासंभवाद्वैराजान्तर्यामिणेति व्याख्यातम् । भावाः सूत्रादयः । (सलिलसंस्थिताविह नुमभावस्त्वार्षः) । लीलार्थं लीलया वा विग्रहो लीलाविग्रहः । इत्यर्थ इति—उपसर्गवशात्स्थित्यर्थोऽत्र भवतिरिति भावः । तत्र कमले । भोगाय सृष्टिव्यवहाराय विग्रहो भोगविग्रहः । ' लीला केलि विलासयोः ' इति । " भोगः सुखे धने चाहेः शरीरफणयोरपि । पालने व्यवहारे च योषिदादिभृतावपि ॥ " इति मेदिनी । इत्यर्थ इति—श्रीनारायण एव चतुराननरूपेण कमलादुद्भूतः " तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् । तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदन्ति सोऽभूत् ॥ " इत्युक्तेरिति भावः ॥ * ॥ सलिलस्य गर्भोदकरूपस्य संस्थितिर्यत्र तस्मिन्नण्डेऽहं गर्भोदशायिरूपो द्वितीयः पुरुषः समभवं स्थित इत्यर्थः । तत्र लोककारणभूते पद्मे ब्रह्मा वैराज एव भोगविग्रहः, पुनश्चतुराननोऽभूदित्यर्थः । सलिलसंस्थिताविति तन्त्रेणोक्तम् ॥ १० ॥ स आत्मभूः । भूरादित्रयमव्ययम् ॥ * ॥ लोकान्भुवनानि ' इत्युपलक्षणम् ' त्रितयात्परम् इत्युक्तेः ॥ ११ ॥ आदिना पश्वादीनां ग्रहः । " धरां रजःस्वभावेन पणयो ये च तानु " इत्युक्तेः । सिद्धानां तपोयोगादि नेति शेषः ॥ * ॥ सिद्धानां योगादिभिः ॥ १२ ॥ आदिना सुतलवितलादिग्रहः । एवं व्यवस्थायाम् । मनुष्यादीनां भूलोकादिस्थितिरूपमर्यादायाम् । सर्वा उच्चावचाः ॥ * ॥ अध इत्यर्द्धकम् । एवं व्यवस्थायां देवादीनां तत्तत्स्थाननियमलक्षणायाम् । त्रिलोक्यामिति सार्द्धकम् । पातालादिकभूर्भुवःस्वश्चेति । कर्मणां गार्हस्थ्यधर्माणाम् । तपो वानप्रस्थत्वं ब्रह्मचर्यञ्च । तत्र ब्रह्मचर्ये णोपकुर्वाणनैष्ठिकत्वभेदेन क्रमान्महर्जनश्च, वानप्रस्थत्वेन तपः, न्यासेन सत्त्वं, योगतारतम्येन तु सर्वमिति ज्ञेयम् । मद्गतिरिति तैः । भक्तियोगप्राप्यत्वेन वक्ष्यमाणम् ' यत्र व्रजन्ति ' इत्यादिवाक्यसाहाय्यात्, लोकप्रकर णाच्च । उक्तं च तृतीये देवान्प्रति ब्रह्मणैव—'तत्सङ्कुलं हरिपदानतिमात्रदृष्टैः ' इत्यादि । टीका च—तावन्मात्रेण दृष्टैर्भक्तानां विमानैर्न तु कर्मादिप्राप्यैरित्येषा । एवमेव श्रुतिश्च—" परीक्ष्य लोकान्कर्मचितान् आब्रह्मणो निर्वेद मायान्नास्त्यकृतः कृतेन " इति । तत्राप्यकृत इत्यस्य विशेष्यं लोक इत्येव तत्प्रसक्तेः । 'ईश्वरः सर्वभूतानाम् ' इत्यादौ "तमेव शरणं गच्छ सर्वभावेन भारत । तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ " इति श्रीभगवद्गीतोपनिषत्सु ॥ १३ ॥ योगादितारतम्येन धारणादिन्यूनाधिक्यभावेन ॥ * ॥ कर्मणां तद्वतां योगस्याष्टांगस्य न्यासस्य ज्ञानस्येति एतत्त्रितयवतां महारादयश्चत्वारो लोका गतयः प्राप्याः । मद्गतिर्वैकुण्ठलोकः । भक्तियोगस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मया कालात्मना धात्रा कर्मयुक्तमिदं जगत् ॥ गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति ॥ १५ ॥ अणुर्बृहत्कृशः स्थूलो योयो भावः प्रसिध्यति ॥ सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च ॥ १६ ॥ यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य सन् ॥ विकारो व्यवहारार्थो यथा तैजसपार्थिवाः॥१७॥ यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरम् ॥ आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥ १८ ॥

लोकः ॥ १४ ॥ तत्र तु मद्भक्तिव्यतिरेकेणेतरा गतयश्चंचला इत्याह वैराग्यार्थम् । मया कालशक्तिना धात्रा परमेश्वरेण कर्मफलप्रदेन हेतुभूतेन गुणप्रवाहे संसारे उन्मज्जत्याऽऽसत्यलोकमुत्तमा गतीः प्राप्नोति पुनर्निमज्जत्यास्थावरं नीचा गतीः प्राप्नोति ॥ १५ ॥ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात्तत्प्रतिपादनाय कारणेन कार्यस्य व्याप्तिमाह । अणुरिति । उभयेन संयुक्तो व्याप्तः । तदेवाह । प्रकृत्येति ॥ १६ ॥ इदानीं कार्यस्य कारणात्मतां दर्शयति । यस्य कार्यस्य आदिः कारणमंतो लयस्थानं च तस्य मध्यं मध्यावस्थापि स एव । वै प्रसिद्धं मृत्सुवर्णादिषु । अत एवाव्यभिचारित्वात्स एव सन् सत्यः नेतरः । अलं तर्हि मिथ्याभूतकार्यसृष्ट्या तत्राह । विकार इति । तैजसाः कटककुंडलादयः । पार्थिवा घटशरावादयश्च यथेति ॥ १७ ॥ नन्वेवं स्वकार्यं प्रति महदादीनामप्याद्यंतरूपत्वात्सत्यत्वं स्यात्तत्राह । यदिति । यद्रूपमुपादायोपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः अपरमहंकारादिकं भावं विकुरुते सृजति । यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत् ।

निर्गुणस्य तद्वत्तां निर्गुणानां प्राप्योऽपि वैकुण्ठलोको निर्गुण एवेति भावः॥१४॥ तत्र तासु गतिषु । इतरा महर्लोकादिगतयः । "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इति श्रीगीतोक्तेः चञ्चला अस्थिरा कर्मभिर्युक्तम् ॥*॥ मया कर्त्रा इदं जगत् कर्मयुक्तं कर्मफलेन योजितमित्यर्थः । 'फलमत उपपत्तेः' इति न्यायात् ॥१५॥ तत्प्रतिपादनायाद्वितीयात्मनिरूपणाय । अतीतानागतवर्तमानत्वेन योयो भावः पदार्थः प्रसिद्धः।तदेवोभयम्। जडदेहात्मना प्रकृत्या अनुगतसच्चिदात्मना क्षेत्रज्ञतया च पुरुषेणेति विवेकः ॥*॥ **दीपिका**—अद्वितीयेति अभिन्नात्मज्ञानप्रयोजनकत्वात् । तस्याद्वितीयात्मनः । प्रतिपादनाय निरूपणाय ॥ १६ ॥ कार्यकारणयोरभेदमाह—इदानीमिति।आदिना लेहादिग्रहः। अत एवादिमध्यावसानवर्तित्वादेव।स एव कारणपदार्थ एव । इतरः कार्यपदार्थो न सन्निति । अत्राक्षिपति—अलमिति । तत्तस्मात्।विकारो घटकुण्डलादिः।व्यवहारो जगन्निर्वाहस्तदर्थः।अत्र दृष्टान्तः—यथेति । कटकुण्डलादिविकारभेदं विना व्यवहारसांकर्यापत्तेः । भेदं विना कुण्डलोक्तौ कटकग्रहणमपि स्यादित्यर्थः ॥*॥ ० ॥ १७ ॥ प्रतिबन्द्याशंकते—नन्विति । स्वकार्यमहंकारादि । तद्वत् मृत्पिण्डवत् । स एव कारणरूपभाव एव । पुनराशंकते—कथं तर्हीति । इत्यर्थ इति—मृदादीनां सत्यत्वं स्वकार्यापेक्षं, वस्तुतः सत्यत्वम् "यतो वा इमानि भूतानि" इत्यादिश्रुतेर्ब्रह्मण एवेति भावः ॥ * ॥ **दीपिका**—यद्याद्यन्तरूपस्य सत्यत्वं तर्हि स्वकार्यमहंकारादिकं प्रति स एव सर्वोपादानरूपः परमात्मैव सन्सत्यः घटादिकं नामधेयमात्रं ह्येतदनृतम्, "मृत्तिकेत्येव सत्यम्" नाममात्रं विकारो न कारणात्पृथगस्तीत्येवकारार्थ इति श्रुतिपदार्थः । परमकारणस्य सत्यत्वविवक्षा चेत्थम्—यदा पृथिव्या आदिरन्तश्च विवक्ष्यते तदा तत्कारणं जलमेव सत्यम्, यदा तस्य सा विवक्षा तदा तेज एव सत्यम्, एवं तस्यापि सा चेत्तदा वायुरेव सत्यः, तस्यापि सा चेत्तदाकाश एव सत्यः, तस्यापि सा चेत्तर्हि अहंकार एव, तस्यापि सा चेत्तर्हि महानेव, तस्यापि सा चेत्तर्हि प्रधानमेव, तस्यापि चेत्तर्हि काल एव, तस्यापि सा चेत्तर्हि महापुरुष एव, तस्यापि

१ टीकायाम् 'तदाह विकार' इति पाठमभिप्रेत्यैतदिति प्रतिभाति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोभिव्यंजकः कालो ब्रह्म तत्त्रियं त्वहम् ॥ १९ ॥ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः ॥ महान्गुण विसर्गाऽर्थः स्थित्यंतो यावदीक्षणम् ॥ २० ॥ विराण्मयाऽसाद्यमानो लोककल्पविकल्पकः ॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह ॥ २१ ॥

स एव सन्निति पूर्वस्यानुषंगः । कथं तर्हि "मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतिस्तत्राह । आदिरिति । यदा यस्यादिरंतश्च विवक्ष्यते तदा तत्सत्यमित्यभिधीयते श्रुत्या । परम कारणात्मनः सत्यत्वविवक्षयेत्यर्थः ॥ १८ ॥ ननु तथापि प्रकृतिपुरुषकालानामकार्यभूतानां भिन्नत्वात्कथमद्वितीयता तत्राह । प्रकृतिरिति । अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा यश्च तस्या आधारोऽधिष्ठाता परः पुरुषो यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मरूपोऽहमेव न तु पृथक् । प्रकृतेः शक्तित्वात्पुरुषकालयोरवस्थारूपत्वात् ॥ १९ ॥ एवं तावत्कालत्रयेऽप्यव्यभिचारित्वाद्ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्टिकारणत्वेनादौ सत्त्वमुक्त्वा मध्येऽपि तस्यैव सत्त्वमुपपादयितेऽप्यवधित्वेन सत्त्वं दर्शयिष्यन्सर्गप्रवाहरूपायाः स्थितेरवधिमाह । सर्ग इति । महान्बहुलः । पौर्वापर्येण पितृपुत्रादिरूपेण । नित्यशः अविच्छेदेन प्रवर्तते । किमर्थं प्रवर्तते तदाह । गुणेषु देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवस्तदर्थस्तद्भोगप्रयोजनः । किंपर्यंतं प्रवर्तते तदाह । यावत्स्थितेरंतः । सोऽपि किमवधिकस्तत्राह । यावदीक्षणं परमेश्वरस्येक्षणं यावत् तावत् ॥ २० ॥ प्रलयं निरूपयति । विराट् ब्रह्मांडं मया कालात्मना आसाद्यमानो व्याप्यमानो लोकानामहरहः । कल्पाः सृष्टिप्रलया

सा चेत्तर्हि श्रीकृष्ण एवेति श्रीकृष्णस्यैव परमकारणत्वं श्रुत्यभिप्रेतम् । तथैवाग्रे स्वयमेव व्याख्यास्यति । किञ्च—मृदादीनामापेक्षिकं सत्यत्वं प्रकृतेस्तु परमकारणत्वलक्षणमात्यंतिकं सत्यत्वमायातम् । अत्र करणस्यैव कार्यरूपत्वेन प्रतिपादनादुभयोरपि कार्यकारणयोर्वस्तुतः सत्यत्वेऽपि 'तत्सत्यमभिधीयते' इत्युक्तेः कारणस्य सत्यं नामैव भगवता कृतमित्यवसीयते " मृत्तिकेत्येव सत्यम्" इति श्रुतेः । सत्कार्यवादेऽपि व्याख्यानार्थमत एव तत्सत्यं भवतीत्यप्रयुज्य सत्सत्यमभिधीयत इत्युक्तम् । व्याख्यानान्तरेऽध्यायेऽस्मिन्मायावादस्याप्रसंगात् कार्यकारणयोर्लक्षणस्य सर्वैरेव ज्ञातत्वाद्वाक्यस्यास्य वैयर्थ्यमेवापद्येतेत्यवधेयम् ॥ १८ ॥ अद्वितीयत्वन्त्वेवमपि ब्रह्मणो न सेत्स्यतीत्याक्षिपति—नन्विति । यद्यपि कार्याणां कारणाभिन्नत्वं तथापीति । दृश्यतया मिथ्याभूतस्यापि सतोऽधिष्ठानस्य सत्तया प्रतीयमानस्य माययैवोपादानं कल्पितोरगस्य रज्जुवद्यद्यपि ब्रह्मण उपादानत्वमायातीति चेत्तत्राप्यज्ञानमेवोपादानं न तु ब्रह्मेति । अधिष्ठाता सत्तास्फूर्तिप्रदमधिष्ठानं प्रकृतिकालयोरपि मदधिष्ठानकत्वेन मदतिरिक्तसत्ताभावात् ॥ * ॥ ननु तर्हि परमेश्वरस्य तव कथं परमकारणत्वलक्षणमात्यन्तिकसत्यत्वं तत्राह—प्रकृतिरिति तैः । एवं च प्रकृतेर्जगदुपादानत्वादेव मम जगदुपादानत्वं तस्याविकारित्वेऽपि न मे विकारित्वं तस्या मच्छक्तित्वेऽपि मत्स्वरूपशक्तित्वाभावात् । किन्तु बहिरंगशक्तित्वमेव मत्स्वरूपस्य मायातीतत्वेन सर्वशास्त्रप्रसिद्धेः ॥ १९ ॥ सर्गावधिमाह—एवमिति । स्थितेः प्रवाहरूपायाः । सोऽपि स्थित्यन्तोऽपि । तत् स्थित्यवधित्वम् ॥ * ॥ ननु जगत्सर्गोऽयं कियत्कालावधिरिति चेत्स्थितिकालपर्यन्त इत्याह—सर्ग इति । महानतिबहुलः । स्थितेः पालनस्यान्तः समाप्तिः । स चान्त एव किमवधिकस्तत्राह—यावदीक्षणम् । पालनेच्छानुकूलमिति **विश्वनाथः** ॥ २० ॥ तान् लोककल्पादीन् । स्वस्मिन्स्वरूपे । तेषां पञ्चभूतानाम् । इत्यर्थ इति—पञ्चीकरणरीत्या पञ्चभूतैक्येनैव ब्रह्माण्डोत्पत्तिरस्ति " पञ्ची करोति भगवान्प्रत्येकं वियदादिकम् । द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वेतरद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते ॥ धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते ॥ २२ ॥ अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे ॥ लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते ॥ २३ ॥ रूपं वायौ स च स्पर्शे लीयते सोऽपि चांबरे ॥ अंबरं शब्दतन्मात्र इंद्रियाणि स्वयोनिषु ॥ २४ ॥ योनिर्वैकारिके सौम्य लीयते मनसीश्वरे ॥ शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ॥ २५ ॥

विविधाः कल्पंते यस्मिंस्तान्वा स्वस्मिन्विकल्पयतीति स तथाभूतोऽपि पंचत्वरूपाय विशेषाय विभागाय कल्पते योग्यो भवति । पंचानां भूतानामैक्यरूपस्तेषां पृथग्भावापत्त्या नश्यतीत्यर्थः ॥ २१ ॥ तत्र "तस्माद्वा एतस्मादात्मन आकाशः संभूतः ॥ आकाशाद्वायुः ॥ वायोरग्निः ॥ अग्नेरापः ॥ अद्भ्यः पृथ्वी ॥ पृथिव्या औषधयः ॥ ओषधीभ्योऽन्नम् ॥ अन्नाद्रेतः ॥ रेतसः पुरुषः ॥ " इति श्रुत्युक्तसृष्टिक्रमप्रातिलोम्येन लयमाह । अन्न इति । मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्टौ क्षीणे सति तत्रैव लीयत इत्यर्थः । अन्नं धानासु । बीजमात्रावशेषं भवतीत्यर्थः । धाना भूमौ उप्ता न प्ररोहंतीत्यर्थः । भूमिर्गंधे संवर्तकादित्यशोषिता संकर्षणमुखाग्निना दग्धा च सती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति ॥ २२ ॥ गंधः शतवार्षिक्या वृष्ट्या प्लाव्यमानोऽप्सु लीयते । एवमेवापो ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति । ततो रसोऽपि तस्मिञ्ज्योतिषि लीयते । ज्योतिश्च वायुनाऽभिभिभूयमानं रूपमात्रं सत्तस्मिन् लीयते ॥ २३ ॥ वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः संस्तस्मिन् । अंबरं च भूतादिनाऽहंकारेण ग्रस्यमानं शब्दतन्मात्रे लीयते । तदेवं तामसाहंकारकार्यस्य शब्दपर्यंतं लयमुक्त्वा राजसाहंकारकार्यस्याप्याह । इंद्रियाणि स्वयोनिष्विति । स्वप्रवर्तकदेवतासु इंद्रियाणां लयः तेषां प्रवृत्तिस्वभावत्वात्प्रवृत्तेश्च देवताधीनत्वात्तासु लय इति वाचोयुक्तिः । वस्तुतस्तु स्वकारणे राजसाहंकार एव लयोऽभिप्रेतः ॥ २४ ॥ योनिरित्युद्देश्यगतत्वादेकत्वमविवक्षितम् । योनयो देवतास्तु

तीयांशैर्योजनात्पञ्च पञ्चधा । तैरण्डस्तत्र भुवनम् " इति विद्यारण्योक्तेस्तेषां पञ्चभूतानां पृथग्भावापत्त्या ब्रह्माण्डनाशो भवतीति भावः ॥ * ॥ तदनन्तरं किं भविष्यतीति चेत्प्रलय एवेति तं निरूपयति—लोकानां भूरादीनां मनुष्यतिर्यगादीनां वा कल्पः सामान्यतः कल्पनाविकल्पो विशेषतश्च कल्पना यत्र सः । पञ्चत्वरूपो यो विशेषो विभागस्तस्मै तं प्राप्तुं कल्पते पञ्चत्वं मृत्युः ॥ २१ ॥ तत्र पञ्चत्वे । इत्यर्थ इति—अन्नाप्राप्त्या देहा नश्यन्त्येवेति भावः । इत्यर्थ इति—वृष्ट्यभावाद्यत्रकुत्रचिदत्यल्पं बीजमात्रमवशिष्यत इति भावः । " धाना धान्याकबीजयोः । नव्यांकुरे भृष्टयवे स्वशालायां स्त्रियामपि । " इति कोशात् । इत्यर्थ इति—जलासम्बन्धादेवोत्तोत्पत्त्यभावोऽपि धरणिधानासलिलसंयोगस्यैवांकुरोत्पादकत्वदर्शनादिति भावः । संवर्तकादित्यशोषिता प्रलयकालीनसूर्याततप्ता ॥ * ॥ तत्र पञ्चत्वरूपपृथग्भावापत्तौ । तस्मादिति " ब्रह्मविदाप्नोति परं तदेष भोक्ता सत्यं ज्ञानमनन्तं ब्रह्म " इति तैत्तिरीयके प्रकृतात् । एतस्मादुपहिताद्ब्रह्मणः पुरुषोपाधित्वात् । पुरुषोऽन्नरसमयः स्थूलदेहः । तत्रैवान्नेऽन्नोत्पादकपृथिव्यंश इत्यर्थः । शतवर्षव्यापिन्यनावृष्टिर्या भवेत्तन्मध्य एव प्रथमं शरीरस्य तदनन्तरमेवान्नस्य कार्त्स्न्येन नाशात् ॥ २२ ॥ ततो रसमात्रावशेषत्वोत्तरम् । तस्मिञ्ज्योतिष्येव । तस्मिन्वायौ ॥ * ॥ ० ॥ २३ ॥ तस्मिन्नाकाशे । तेषामिन्द्रियाणाम् । रजश्चलमित्युक्ते राजसत्वेन प्रवृत्तिस्वभावत्वं प्रवृत्तिस्वभावत्वेऽपि जडानां स्वतः प्रवृत्तिर्नास्तीति तस्या देवताधीनत्वोक्तिः । तासु देवतासु । प्रवृत्तिरहितानां लयप्रायत्वं स्वकार्यासमर्थत्वादिति वाचोयुक्तिरेव । लयस्तु स्वकारण एवेत्याह—वस्तुतस्त्विति ॥ * ॥ स्वयोनिषु स्वयोनौ तैजसाहङ्कारे ॥ २४ ॥ योनिमुद्दिश्य लयविधानाद्योनिरुद्देश्यो लयो विधेयोऽत्रेति । अविवक्षितं विवक्षावन्न ' गृहं संमार्ष्टि ' इतिवत् । यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स लीयते महान्स्वेषु गुणेषु गुणवत्तमः ॥ तेऽव्यक्ते संप्रलीयंते तत्काले लीयतेऽव्यये ॥ २६ ॥

मनसि । कुतः । ईश्वरे नियंतरि । 'मनोवशेऽन्ये ह्यभवन्स्म देवाः' इत्युक्तत्वात् । इंद्रियलयोक्त एवात्राप्यभिप्रायः । मनश्च देवताभिः सह वैकारिकेऽहंकार इत्यर्थः । तामसाहंकारकार्यावशेषितस्य शब्दस्य लयमाह । शब्दो भतादितामसाहंकारमप्येति तस्मिन् लीयत इत्यर्थः । भूतादिरित्युपलक्षणम् । त्रिविधोऽप्यहंकारो महति जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति । कथंभूतः । प्रभुः समर्थः सर्वजगन्मोहकत्वात् ॥ २५ ॥ स च महान्स्वकारणेषु गुणेषु । ज्ञानक्रियाशक्तिमत्त्वाद्गुणवत्तमस्ताद्ग्भावं विहाय गुणमात्ररूपो भवति । तेऽव्यक्ते प्रकृतौ साम्यावस्थां गच्छंतीत्यर्थः । तदव्यक्तं काले कालाधीनत्वात्तेनैकीभूयावतिष्ठते । अव्यये उपरतवृत्तौ ॥ २६ ॥

गृहमुद्दिश्य संमार्गस्य तत्र विधेयत्वात् । उद्देश्यविधेयभावे ह्युद्देश्यगता सङ्ख्याया विवक्षा न भवति विधेयस्य सा विवक्ष्यते " विशेष्यस्यानुसारेण लिंगाद्या हि विशेषणे । यत्रोद्देश्यविधेयत्वं तत्रायं नियमो न हि ॥ स्यात्तत्तदजहल्लिंगमजहद्वचनं च तत् । रामदाराश्च सीतेयं करुणाभाजनं हरिः ॥ " इत्याद्युक्तम् । अन्यदेतत् । अत्रापि देवलयेऽपि । इन्द्रियलयो यथा प्रवर्तकाधीनतयोक्तस्तथा मनसोऽपि ' मनोवशेऽन्ये ' इत्युक्तदिशा देवप्रवर्तकत्वात्तत्र देवलयोऽपीत्यभिप्रायस्तात्पर्यम् । इत्यर्थ इति—यद्यप्यत्र मनोलयो नोक्तस्तथापि तस्य वैकारिकत्वात्तत्रैव लय इत्यनुक्तोऽपि ज्ञेय इति भावः । सिंहावलोकनेन पुनराह—तामसेत्यादि । इत्यर्थ इति—स्वकारणे प्रविशतीति भावः ॥ * ॥ योनिस्तैजसाऽहंकारो वैकारिकाहंकार्ये मनसि कुत ईश्वरे तैजसाहंकारस्य ज्ञानकर्ममयत्वाज्ज्ञानकर्मणोश्च ज्ञानेन्द्रियकर्मेन्द्रियरूपत्वात् । ज्ञानेन्द्रियकर्मेन्द्रियाणां च मनस एवेशितव्यत्वान्मन एव तेषामीश्वर इति युक्तेः । अम्बरं शब्दतन्मात्र इत्युक्तम् । तस्य शब्दतन्मात्रस्य लयमाह—भूतादिं शब्दोऽप्येति तत्र लीयत इत्यर्थः ॥ * ॥ संदर्भस्तु—योनिः सर्वेन्द्रियप्रवृत्तिहेतुर्मनः वैकारिके सात्त्विकाहंकारे तस्मिन्कथंभूते मनसीश्वरे व्यधिकरणसप्तम्यौ मनसः सप्तमी च " स्वामीश्वराधिपति–" इत्यादिना । मनःकारणत्वान्मनोधिष्ठातरीश्वर इत्यर्थः । उपलक्षणं चैतद्देवतालयस्य महति सूत्रसंयुत इति ज्ञेयम् ' महांश्च सूत्रसंयुतः ' इति ज्ञापितत्वात् ॥ * ॥ **दीपिका**—उद्देश्यगतत्वादनुवाद्यप्राप्तत्वात् । स्वयोनिषु इति—यत्पूर्वमुक्तं तस्यैव योनिरित्यनुवादः । तथा च—बहुवचनस्य योनिशब्दस्य बहुवचनतयैवानुवादितुमौचित्यादेकत्वं विवक्षितं गृहं संमार्ष्टीतिवत् । अत्रापि मनसि देवतालयेऽपि । अभिप्राय इति—देवतानां मनोधीनत्वान्मनसि लय इति वाचोयुक्तिः । वस्तुतस्तु—स्वकारणे सात्त्विकाहंकार एव लयोऽभिप्रेत इत्यर्थः । रिक्तमर्थात्पूरयति—मनश्चेति । " वैकारिकान्मनो जज्ञे देवा वैकारिका दश " इत्युक्तेस्तत्कार्याणां तेषां तत्र लयस्याभिप्रेतत्वात् ॥ २५ ॥ तादृग्भावं ज्ञानक्रियाशक्तिभावम् । इत्यर्थ इति—गुणसाम्यावस्थैव प्रकृतिस्तद्भाव एव तेषां लय इति भावः । कालाधीनत्वात्प्रकृतिव्यापारस्य ' कालाद्गुणव्यतिकरः ' इत्याद्युक्तेः । तेन कालेन ॥ * ॥ **दीपिका**—तादृग्भावं गुणवत्तमत्वं जडांशमित्यर्थः । गुणमात्ररूपम् अहंकारवज्ज्ञानक्रियाशक्तिमात्ररूपः । मायावस्थायाः कालकृतत्वात् तेन कालेन सहाभिन्नीभूय । उपरतवृत्तौ निमेषाद्यवस्थाहीने ॥ * ॥ **विश्वनाथस्तु**—गुणानां वैषम्यत्याग एव लयो विवक्षितः प्रकृतेर्गुणसाम्यरूपत्वात् । ततः अव्यक्तं काले लीयत इति प्रकृतेर्लयो व्याख्यातुमशक्यः । " न तस्य कालावयवैः परिणामादयो गुणाः । अनाद्यनन्तमव्यक्तं नित्यं कारणमव्ययम् ॥ " इति द्वादशोक्तौ प्रकृतेर्नित्यत्वश्रवणात् । जायन्तेयोपाख्यानेऽप्यन्तरिक्षेण प्रलयवर्णने प्रकृतेर्लयो नोक्तः । अत एवाव्यक्तम् । " लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा । शक्तयः सम्प्रलीयन्ते विवशाः कालविद्रुताः ॥ " इति । तस्मादेवं व्याख्येयम्—तत्काले तस्मिन्काले ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालो मायामये जीवे जीव आत्मनि मय्यजे ॥ आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ २७ ॥
एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ॥ २८ ॥

मायामये मायाप्रवर्तके ज्ञानमये वा अत एव जीवयतीति जीवस्तस्मिन्महापुरुषे। अयं भावः । विश्वस्रष्टुर्महापुरुषस्योपकरणरूपः कालो वृत्त्यंशेन सृज्यश्चातस्तदात्मनाऽवतिष्ठत इति । तदुक्तं सप्तमे । "कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेवसत्यकृत्" इति । दशमे च "योऽयं कालस्तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वम् ॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये" इति जीव आत्मनि प्रकृतेर्लीनत्वेन प्रतियोग्यभावात्परिपूर्णत्वेन सद्रूपेणावतिष्ठते आत्मा चात्मस्थ एव नान्यत्र लीयते । यतः केवलो निरुपाधिः । तत्र हेतुः । विकल्पापायाभ्यां विश्वोत्पत्तिप्रलयाभ्यां लक्ष्यतेऽधिष्ठानत्वेनावधित्वेन वेति तथा सः ॥ २७ ॥ अस्य कथनस्य प्रस्तुतोपयोगमाह ।

गुणाः अव्यक्ते सम्प्रलीयन्ते ततश्च कालो लौकिकः सृज्यः ॥ * ॥ **सन्दर्भस्तु**—काले तच्छक्त्यात्मक ईश्वरेऽत एवाव्यये ॥ २६ ॥ मायाप्रवर्तकत्वं जीवस्यापीन्द्रजालादौ दृश्यतेऽत आह—अज्ञानमये मायोपाधिके । जीवस्याविद्योपाधिकत्वान्मायोपाधिकत्वं नास्ति "मायाकारणमज्ञानमविद्याकार्यमुच्यते । कार्योपाधिर्भवेज्जीवः कारणोपाधिरीश्वरः ॥" इत्युक्तेः । यद्वा—मीयतेऽनयेति माया बुद्धिर्ज्ञानमिति यावत् । तन्मये ज्ञानप्रधाने । अत एव मायाप्रवर्तकत्वाज्ज्ञानप्रधानत्वाद्वा । अत्राशयमाह—अयं भाव इति । यतो वृत्त्यंशेन सृज्योऽतो हेतोः । तदात्मना महापुरुषात्मना । कालस्य सृज्यत्वे प्रमाणमाह—तदुक्तमिति । मयि सर्वाधारे । प्रकृतिनिरूपितमेवेशजीवभेदो न वास्तवः "माया जीवेशावाभासेन करोति" इति श्रुतेस्तल्लये जीवेशत्वादिनिरूपकाभावात्परिपूर्णस्वरूपेणावस्थानमाह—प्रकृतेरिति । अत्र निरुपाधित्वे ॥ * ॥ **दीपिका**—अत एव कालः क्रियाणां क्रमानुसन्धानात्मकः । महापुरुषे कारणार्णवशायिनि पुरुषावतारे । ननु कालस्य नित्यत्वं श्रूयते कथं लय इत्यत्राह—अयं भाव इति । उपकरणरूपचेष्टात्मकः वृत्त्यंशेन क्रियाणां क्रमानुसन्धानात्मकत्वेन । तत् चेष्टारूपत्वं सृज्यत्वं च तत्र सप्तमे चेष्टारूपत्वं च दशमे इति योजनीयं प्रतियोग्यभावात् । प्रकृतीक्षणावस्थाया एव महापुरुषत्वात् । यस्या ईक्षणं क्रियते तस्या ईक्षणकर्मत्वेन प्रनियोगिन्याः सम्बन्धिन्याः प्रकृतेरभावादित्यर्थः । परिपूर्णपुरुषस्याप्यंशी सदित्युपलक्षणं सदानन्दरूपो योऽहं तद्रूपेणेत्यर्थः । तथैव व्याख्यातं स्वामिभिरेव । अंशभागेनेत्यत्र अंशेन पुरुषरूपेण मायाया भागो भजनमीक्षणं यस्येति । अत्र निरुपाधित्वे ॥ * ॥ **संदर्भस्तु**—यस्तु क्रियाणां क्रमानुसन्धानात्मकस्तत्कार्यरूपलौकिकः कालः स तु मायामये तदनुसन्धातरि जीवे लीयते । मायाशब्देन तैर्ज्ञानं व्याख्यातम् 'माया वयुनं ज्ञानम्' इति निघण्टुः । स जीव आत्मनि परमात्मरूपे मयि तस्य तु लयाभावमाह—अज इति । किंतु स परमात्मा परमपुरुषः केवले शुद्धे आत्मनि भगवद्रूपे स्वस्वरूपे स्थितो भवति । कीदृशः सन्—विकल्पानां सृष्टिस्थितिप्रलयानामप्ययोऽनंगीकारो यत्र तादृशस्वरूपः सन्निति ॥ * ॥ **विश्वनाथस्तु**—मायामये मायोपाधौ जीवे लीयत इति पूर्वेणान्वयः । न व्येतीत्यव्ययस्तस्मिन्निति जीवस्यापि तटस्थशक्तित्वान्नित्यत्वेन तत्त्वान्तराणामिव स्वरूपलयानौचित्यात्, स च जीव आत्मनि परमात्मनि मयि लीयतेऽव्ययत्वादप्रच्युतस्वरूप एव संश्लिष्टस्तिष्ठतीत्यर्थः । आत्मात्मस्थ एव विराजते केवलो निरुपाधिः यतो विकल्पाप्ययाभ्यां विश्वोत्पत्तिप्रलयाभ्यां लक्ष्यते ॥ २७ ॥ किमर्थं सांख्यनिरूपणं कृतमित्युत्सुकमाह—अस्येति । एवमुक्तरीत्या विमृशतः ॥ * ॥ **दीपिका**—अस्य सांख्यकथनस्य । प्रस्तुते द्वन्द्वसहने उपयोगमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः ॥ प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ २९ ॥ इति श्रीमद्भा० महापुराण एका० भगवदुद्धवसंवादे सांख्यतत्त्वनिरूपणं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीभगवानुवाच ॥ गुणानामसमिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदमुपधारय शंसतः ॥ १ ॥ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः स्वनिर्वृतिः ॥ २ ॥ काम ईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखम् ॥ मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः ॥ ३ ॥

एवमिति । मनसः कथं भेदनिमित्तो भ्रमः स्यात् । जातो वा कथं हृदि तिष्ठेदिति ॥ २८ ॥ उपसंहरति । एष इति ॥ २९ ॥ प्रत्यक्षमिव येनेदं दर्शितं तत्त्वमात्मनः ॥ सांख्यप्रख्यानतस्तस्मै हरये गुरुवे नमः ॥ १ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे श्री० टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ पंचविंशे स्वनैर्गुण्यप्रतिपत्त्यै निरूप्यते ॥ चित्तप्रभवसत्त्वादिगुणवृत्तिरनेकधा ॥ १ ॥ प्रकृतिपुरुषविवेकज्ञानवतोऽपि यावत्प्रयत्नविशेषेण गुणत्रयवृत्तिजयो न स्यान्न तावद्द्वंद्वोपरमोऽतस्तज्जयोपायकथनाय गुणवृत्तिनिरूपणार्थमाह गुणानामिति । सह मिश्रीभूय वर्तमानाः समिश्रा न समिश्रा असमिश्रास्तेषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत्तदिदं कथयतो मत्तो निबोधेत्यर्थः ॥ १ ॥ तत्र सत्त्ववृत्तीराह । शम इति । शमो मनोनिग्रहः । दमो बाह्येंद्रियनिग्रहः । तितिक्षा सहिष्णुत्वम् । ईक्षा विवेकः । तपः स्वधर्मवर्तित्वम् । स्मृतिः पूर्वापरानुसंधानम् । तुष्टिर्यथालाभसंतोषः । त्यागो व्ययशीलता । अस्पृहा विषयेषु वैराग्यम् । श्रद्धा आस्तिक्यं गुर्वादिषु । ह्रीरनुचिते कर्मणि लज्जा । तेषामनवलोकनम् । दया दानम् दय–दानगतिरक्षणेष्विति स्मरणात् । आदिशब्देनार्जवविनयादि । स्वनिर्वृतिरात्मरतिः ॥ २ ॥ रजसो वृत्तीराह । कामोऽभिलाषः । ईहा व्यापारः । मदो दर्पः । तृष्णा लाभे सत्यप्यसंतोषः । स्तंभो गर्वः । आशीर्धनाद्यभिलाषेण देवतादिप्रार्थनम् । भिदा अहमन्य इति भेदबुद्धिः । सुखं विषयभोगः । मदोत्साहो मदेन युद्धाद्यभिपकारताम् ।

अन्वीक्षमाणस्य विचारयतः वैकल्पिको देहोऽहमिति मनसो भ्रमः कथं हृदि तिष्ठेतेति उक्तलक्षणेन सांख्येनात्मानात्मविवेके सति देहस्यानात्मत्वनिर्धारणादिति भावः ॥ २८ ॥ संशयानामसम्भावनादीन् ग्रन्थेश्चानाद्यध्यासरूपविपर्ययस्य भेदनः । अगोचरतत्त्वे साक्षाद्वागप्रवेशेन प्रतिलोमानुलोमाभ्यामध्यारोपापवादाभ्यामुपाधिबाधेन । परावरदृशा सर्वज्ञेन (२९) येन गुरुरूपेण हरिणा । इवशब्दो वस्तुत आत्मनो गोचरतामाह (१) ॥ * ॥ परावरदृशा मयेति–सर्वादित्वं सर्वशेषत्वं स्वयंभगवद्रूपस्य स्वस्यैव स्थापितम् ॥ * ॥ **दीपिका**–सर्वावतारावतारिमूलरूपत्वमित्यात्मतत्त्वपदार्थः ॥ २९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे एकादशस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ स्वस्य स्वरूपभूतं यन्नैर्गुण्यं तस्य प्रतिपत्त्यै ज्ञापनाय । चित्ते प्रभवो यस्याः सा चासौ गुणानां वृत्तिरिति (१) । निरूपणफलमाह–प्रकृतिपुरुषेति । यतो द्वन्द्वोपरमो गुणत्रयवृत्तिजयाधीनोऽतो हेतोः । तासां गुणवृत्तीनां जयोपायस्य कथनाय गुणवृत्तिनिरूपणमेवार्थस्तम् । 'न हि शत्रुमविज्ञाय तज्जयः कर्तुं शक्यः' इति न्यायात् । येन गुणेन । तदिदं गुणिनां पार्थक्येन कथनम् । इत्यर्थ इति–धातूनामनेकार्थत्वात्सोपसर्गत्वाद्वा धरतिरत्र श्रवण इति भावः ॥ * ॥ हे पुरुषवर्येति–एतादृशमदुक्तिधारणादेव पुरुषेषु श्रैष्ठ्यं लभ्यत इति भावः ॥ १ ॥ तत्रादौ ॥ * ॥ ० ॥ २ ॥ ० ॥ * ॥ ० ॥ ३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोधो लोभोऽनृतं हिंसा याच्ञा दंभः क्लमः कलिः ॥ शोकमोहौ विषादार्ती निद्राऽशा भीरनुद्यमः ॥ ४ ॥ सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः ॥
वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ॥ ५ ॥ सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः ॥ व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः ॥ ६ ॥
धर्मे चार्थे च कामे च यदाऽसौ परिनिष्ठितः ॥ गुणानां सन्निकर्षोऽयं श्रद्धारतिधनावहः ॥ ७ ॥

निवेशः । यशःप्रीतिः स्तुतिप्रियता । हास्यमुपहासः । वीर्यं प्रभावाविष्कारः । बलेनोद्यमो न्यायेनोद्यमः सात्त्विक एव ॥ ३ ॥ तमोवृत्तीराह क्रोध इति । क्रोधोऽसहिष्णुता । लोभो व्ययपराङ्मुखता । अनृतमशास्त्रीयं प्रमाणमिति भाषणम् । हिंसा द्रोहः । याच्ञा प्रार्थना । दंभो धर्मध्वजित्वम् । क्लमः श्रमः । कलिः कलहः । शोकमोहौ अनुशोचनं भ्रमश्च । विषादार्ती दुःखं दैन्यं च । निद्रा तंद्रा । आशा मे इदं भविष्यतीत्यन्वीक्षा । भीर्भयम् । अनुद्यमो जाड्यम् ॥ ४ ॥ अनुपूर्वशः क्रमेणैताः श्लोकत्रयोक्ता वर्णितप्रायाः । अन्या अप्यूह्या इति भावः ॥ ५ ॥ विभक्तानां गुणानां वृत्तयो वर्णिताः मिश्राणामाह सन्निपात इति त्रिभिः । अहं ममेति ममतानुषक्तसर्ववृत्तिसामानाधिकरण्यदर्शनात्सन्निपातजत्वम् । अहं शांतः कामी क्रोधीत्यादि । तथा मम पुत्रः शांतः कामी क्रोधीत्यादि । तथा मम शांतिरस्ति कामः क्रोध इत्यादि द्रष्टव्यम् । तत्पूर्वकः सर्वो व्यवहारश्च सन्निपातकार्यमित्याह । व्यवहार इति । अत्र हेतुः । मनश्च मात्राणि शब्दादीनि चेंद्रियाणि चासवश्च तैः । मनआदीनां सात्त्विकतामसराजसत्वात्तैर्व्यवहारः सन्निपातज इति भावः ॥ ६ ॥ असौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदाऽयं त्रिषु धर्मादिषु निष्ठारूपः सन्निकर्षः सन्निपातकार्यम् । धर्मादीनां

क्रोधः प्रज्वलनात्मता । दम्भोऽविद्यमानमहिमप्रकटनम् ॥ * ॥ ० ॥ ४ ॥ इति भाव इति—न तूक्ता एव गुणवृत्तयोऽपि तु सौशील्यकृत्रिमप्रभावपरोत्कर्षासहनादिरूपा अन्या अपि प्रायपदसूचिताः सन्तीति भावः । अथो गुणवृत्तिपार्थक्यकथनोत्तरम् । सन्निपातं मिश्रीभावम् "मिश्रीभावे सन्निपातो वृन्दे रोगेऽपि दुर्जये" इति निरुक्तिः ॥ * ॥ वर्णितप्रायाः स्पष्टीकृत्यावर्णिता अपि वर्णिता एवेत्यर्थः ॥ ५ ॥ अहमिति शान्तादित्रिभिर्युज्यते । आदिनाऽहं दान्तः स्पृही लोभीत्यादिग्रहः । द्वितीयादिना मम तितिक्षा तृष्णा हिंसाऽस्तीत्यादिग्रहः । तत्पूर्वकोऽहंकारपूर्वकः । अत्राहंव्यवहारस्य सन्निपातकार्यत्वे । इति भाव इति—व्यवहारस्य त्रिगुणात्मकत्वात्सन्निपातत्वमेवेति तात्पर्यम् ॥ * ॥ **दीपिका**—शमादीनां सामानाधिकरण्यमेकाधिकरणवृत्तित्वं तस्याहंममेति वृत्तौ दर्शनात् । यत्राहंममकारौ स्तस्तत्रैव शांतिक्रोधादीनामुदयो न तु ब्रह्मविदि निरहंकार इत्यर्थः । तत्पूर्वकोहंकारममकारपूर्वकः । अत्र सन्निपातकार्यत्वे । सन्निपातजं मिश्रगुणवृत्तिकार्यम् ॥ * ॥ **विश्वनाथस्तु**—अहमिति ममेति या मतिः स सन्निपातः । ततश्च मनआदिभिः सर्वोऽपि व्यवहारः सन्निपात इत्यन्वयः । यदि कदाचिच्छमादिकामादिक्रोधादीनामत्युद्रेको भवेत्तदायं पुरुषो मूर्तः शम इति मूर्तः काम इति मूर्तः क्रोध इत्युच्यते, तेन पुरुषेण व्यावहारिकाणामहंकारममकारमूलको लौकिकः कोऽपि व्यवहारो न सिद्ध्यति अतिशान्तस्याहंकारममकारयोः स्वत एवाभावात् । कामान्धस्य क्रोधान्धस्य च अहममुकस्य प्रतिष्ठितस्य पुत्रो ममेदमुचितमिदमनुचितमिति विवेकगन्धस्याप्यभावादेव सतोरपि तयोरभावात् । व्यवहारासिद्धिस्तु मनआदिभिः सत्त्वादिमेलनरूपेण समुचितेनेति ॥ ६ ॥ तथात्वं सत्त्वादिगुणमिश्रकार्यत्वम् । आवहति करोति ॥ * ॥ धर्मनिष्ठितो धर्मविषयकश्रद्धाप्रापकः फलतो धर्मप्रापक इत्यर्थः । कामनिष्ठितो रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवृत्तिलक्षणे निष्ठा पुमान्यर्हि गृहाश्रमे ॥ स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ॥ ८ ॥ पुरुषं सत्त्वसंयुक्तमनुमीयाच्छमादिभिः ॥ कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतम् ॥ ९ ॥ यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः ॥ तं सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा ॥ १० ॥ यदा आशिष आशास्य मां भजेत स्वकर्मभिः ॥ तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसम् ॥ ११ ॥ सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे ॥ चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते ॥ १२ ॥

सत्त्वतमोरजःकार्यत्वाद्विषयतः सन्निपातजत्वमुक्तम् । फलतश्च तथात्वमाह । श्रद्धारतिधनानि सत्त्वरजस्तमोमयान्यावहतीति तथा ॥ ७ ॥ धर्मनिष्ठायामेव सन्निपातं दर्शयति । प्रवृत्तिलक्षणे काम्यधर्मे यदा पुंसो निष्ठा भवति तथा पुमान्यदा गृहाश्रम एवासक्तस्तिष्ठेत् अनु पश्चात्स्वधर्मे च नित्यनैमित्तिके तिष्ठेत्साऽपि समितिः सन्निपातः । हि यस्मात्काम्यधर्मगृहासक्तिस्वधर्मा रजस्तमःसत्त्वमया इत्यर्थः ॥ ८ ॥ तदेवं मिश्राभिश्रगुणवृत्तीः प्रदर्श्यैदानीं 'पुमान्येन यथा भवेत्' इति यदुक्तं तद्दर्शयति पुरुषमिति त्रिभिः ॥ ९ ॥ १० ॥ हिंसां शत्रुमरणादिकमाशास्य यो भजेत्तं तामसं विद्यात् । एतैर्गुणैरेवंभूतो भवतीति तात्पर्यार्थः ॥ ११ ॥ ननु तवापि गुणवशेन कर्तृत्वाविशेषात्केन विशेषेण त्वं सेव्यो जीवस्तु सेवक इति नियमो यतो मां भजेतेति वारंवारमुच्यते तत्राह । सत्त्वमिति । जीवस्यैव न मे । कुतः । यतश्चित्तजाः जीवोपाधौ चित्तेऽभिव्यज्यंतेऽतो यैः स एव बध्यते । कीदृशः । भूतानां देहरूपाणामन्येषां च मध्ये सज्जमानो निबध्यते । अहं त्वसज्जमानो गुणनियंतृत्वेन सृष्ट्यादिकर्ताऽपि

प्रापकः। अर्थनिष्ठितो धनप्रापको भवतीति **विश्वनाथः** ॥*॥ **दीपिका**—निष्ठाया विषयो धर्मादिस्तस्य सत्त्वादिकार्यत्वात्तन्निष्ठाया अपि सन्निपातजत्वमुक्तमित्यर्थः । फलतश्च तथात्वमिति तत्र धर्मनिष्ठायाः सात्त्विक्याः फलं श्रद्धापि सात्त्विक्येव 'सात्त्विक्याध्यात्मिकी श्रद्धा' इत्युक्तेः।तथा कामनिष्ठाया राजस्याः फलं विषयरतिः सा राजस्येव।एवमर्थनिष्ठायास्तामस्याः फलं व्ययाभावविशिष्टं धनं तामसमेवेति फलतोऽपि सन्निपातजत्वम् ॥ ७ ॥ एकत्र सन्निपातं दर्शयति—धर्मनिष्ठेति । इत्यर्थ इति—क्रमात्काम्यादयो धर्मास्त्रिगुणात्मका इति भावः ॥ * ॥ काम्ये धर्मे स्वर्गार्थकयागादौ ॥ ८ ॥ पूर्वोक्तं विशदयति—तदेवमिति । शमादिभिर्द्वितीयश्लोकोक्तैः, कामादिभिस्तृतीयश्लोकोक्तैः, क्रोधादिभिश्चतुर्थश्लोकोक्तैर्लिंगैः । अयं सात्त्विकः शमादियुक्तत्वादेवमग्रेऽपि ॥ * ॥ अनुमीयादित्यत्रेत्थं प्रयोगः—अयं सात्त्विकः शमादिमत्त्वात् , अयं राजसः कामादिमत्त्वात्, अयं तामसः क्रोधादिमत्त्वादिति ॥ ९ ॥ स्वकर्मभिर्वर्णाश्रमविहितैः ॥ * ॥ स्वरूपतो भक्तेर्निर्गुणत्वेऽपि सात्त्विकस्वधर्ममिश्रत्वात्सत्त्वप्रकृतिमित्युक्तम् । एवं परत्रापि ज्ञेयम् ॥ १० ॥ आशास्य सङ्कल्प्य । एतैः सत्त्वादिभिः । एवंभूतो निरपेक्षः । साभिलाषो हिंसादियुतश्च ॥ * ॥ आशिषो राज्यादिभोगान् । आशास्य सङ्कल्प्य ॥ ११ ॥ भगवत्याक्षिपति—नन्विति । गुणानां जीवसम्बन्धित्वे हेतुः—चित्तजा इति । यतश्चित्तजा अतो हेतोः । यैः गुणैः । स एव जीव एव । अन्येषां पशुपक्ष्यादीनाम् । यतोऽनासक्तोऽतो हेतोः । इति भाव इति—आसक्तिमत्त्वादेव सेवकत्वं जीवस्य तद्रहितत्वात्सेव्यत्वं ममेति तात्पर्यम् । ननु तवापि शान्तत्वादिदर्शनात्कथं जीवस्यैवेति हठ इति चेदुपाधिधर्मा उपहितस्यैवेत्याह—यद्वेति । भूतानां चित्तजा इति योजना । अन्नशब्देन पृथ्वी 'कार्येण कारणं लक्ष्यते' इति न्यायात् । तच्चाबादीनामप्युपलक्षकं सर्वभूतकार्यं मन इत्यर्थः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवम् ॥ तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् ॥ १३ ॥ यदा जयेत्तमः सत्त्वं रजः संगं भिदा बलम् ॥ तदा
दुःखेन युज्येत कर्मणा यशसा श्रिया ॥ १४ ॥ यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडम् ॥ युज्येत शोकमोहाभ्यां निद्रया हिंसयाऽऽशया ॥ १५॥
यदा चित्तं प्रसीदेत इंद्रियाणां च निर्वृतिः ॥ देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मत्पदम् ॥ १६ ॥

नित्यमुक्तोऽतो महान्विशेष इति भावः । यद्वा भूतानामपंचीकृतानां यत्कार्यभूतं चित्तम् । "अन्नमयं हि सौम्य मनः" इति श्रुतेः । तत्प्रभवाः अतो भूतोपहितस्य जीवस्यै
वेति । अन्यत्समानम् ॥ १२ ॥ तदेवं मिश्रामिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणोद्रेककार्याणि दर्शयति यदेति सप्तदशभिः । यदेतरौ गुणौ जयेदभिभवेत् । भास्वरं
प्रकाशकम् । विशदं स्वच्छम् । शिवं शांतम् । शिवत्वविशदत्वभास्वरत्वानां यथाक्रमं सुखधर्मज्ञानहेतुत्वात्तदा तैर्युज्येत । आदिशब्दाच्छमदमादिभिश्च ॥ १३ ॥ तमः
सत्त्वं च कर्मभूतम् । रजः कर्तृ । संगं संगहेतुः । भिदा भेदहेतुः । बलं प्रवृत्तिस्वभावम् । यत एतादृशं रजः । अतः संगहेतुत्वाद्यशसा श्रिया युज्येत । तत्कामः पुमान्भ
वतीत्यर्थः । भिदाहेतुत्वाद्दुःखेन युज्येत । "द्वितीयाद्वै भयं भवति" इति श्रुतेः । बलहेतुत्वात्कर्मणा युज्येत ॥ १४ ॥ यदा रजः सत्त्वं च कर्मभूतं तमः कर्तृ जयेत् ।
मूढं विवेकभ्रंशकम् । लयमावरणात्मकम् । जडमनुद्यमात्मकम् । अतो मूढत्वाच्छोकमोहहिंसाभिर्लयत्वान्निद्रया जडत्वादुद्यमाभावेन केवलमाशया युज्येतेति द्रष्टव्यम् । जन
इति पाठे लयात्मकत्वमेव निद्राशयोर्हेतुः ॥ १५ ॥ किंच यदा चित्तं प्रसीदेत स्वच्छं भवेत् । निर्वृतिरुपरतिः । तत्तदा मत्पदं मदुपलब्धिस्थानं सत्त्वमुद्रिक्तं विद्धि ॥ १६ ॥

आकाशादीनां सर्वेषां सात्त्विकांशेभ्योऽन्तःकरणमुत्पद्यते 'तैरन्तःकरणं सर्वैः' इति विद्यारण्योक्तेः । यतो भूतकार्योद्भवा अतो हेतोः । मम तु भूतानुपहितत्वात्ते[1] नेत्यर्थः । अन्यत् उक्तेतरत्सत्त्वमित्यादि ॥
॥ * ॥ भूतानामिति सप्तम्यर्थे षष्ठी । अन्येषां शब्दादिरूपेण परिणतानां मध्ये तेष्वित्यर्थः । मध्य इत्याध्याहृतं न तु निर्धारसूचकं चेतनाचेतनयोः साजात्यायोगात् गुणनियन्तृत्वेन चिच्छक्त्या मायाव्युदासादित्यर्थः ।
"मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति श्रीमदर्जुनोक्तेः । अतः चिच्छक्तिवैशिष्ट्याज्जीवादीश्वरस्य महान्भेद इत्यर्थः । पूर्वार्थे सज्जमान इत्यनेनैव चरितार्थत्वे भूतानामित्याधिक्याद्–यद्वेति । अन्नमयं
पृथिवीप्रधानं तत्प्रभवा भूतकार्यचित्तप्रजाताः । अतो भूतकार्यचित्तजत्वात् ॥ १२ ॥ किञ्च–यदेति । इतरौ रजस्तमोगुणौ ॥ * ॥ किञ्च–गुणमये जीवे गुणाः परस्परं बाध्यबाधकभावेनैव तिष्ठन्ति तथा सति जीवस्य
यादृशी दशा स्यात्तामाह–यदेति त्रिभिः । सत्त्वं कर्तृ यदेतरौ रजस्तमोगुणौ जयेत् ॥ १३ ॥ यतः सत्त्वाद्यभिभावकम् अतो हेतोः । इत्यर्थ इति–सङ्गित्वाद्यशःश्रीकामुको भवतीति भावः । भेदस्य दुःखहेतुत्वे
श्रुतिं प्रमाणयति–द्वितीयादिति ॥ * ॥ चलत्वात् कर्मणासंगहेतुत्वात् यशसा श्रिया च युज्यते । तत्तत्कामो यशःश्रीकामः । यस्य देहगेहाद्यासक्तिस्तस्यैव यशआदिकामना नान्यस्येत्यर्थः ॥ १४ ॥ अत इत्युक्तार्थः ।
आशाप्यज्ञानावृतस्यैवेत्युभयहेतुत्वम् ॥ * ॥ अत्रोत्तरग्रन्थव्याख्यामनुसृत्य तत्तत्कालेऽपि तत्तद्गुणात्मको ज्ञेयः । तथा यदा केवलभक्त्या गुणत्रिकं जितं स्यात्तदा निर्गुणेन प्रेमानन्देन युज्येतेत्येवमग्रेऽपि व्याख्यानशेष
उपन्यसनीयः ॥ १५ ॥ अन्यदाह–किञ्चेति ॥ * ॥ एवञ्च वर्द्धमानो गुणो बाधको यदा भवति तदा क्षीणौ बाध्यावित्यवगतम् । इदानीं केनकेन लक्षणेन कस्को गुणो वर्तमानो ज्ञेय इत्यत आह–यदेति त्रिभिः ।

[1] गुणाः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विकुर्वन्क्रियया चाऽऽधीरनिर्वृत्तिश्च चेतसाम् ॥ गात्रास्वास्थ्यं मनो भ्रांतं रज एतैर्निशामय ॥ १७ ॥ सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमम् ॥ मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय ॥ १८ ॥ एधमाने गुणे सत्त्वे देवानां बलमेधते ॥ असुराणां च रजसि तमस्युद्धव रक्षसाम् ॥ १९ ॥ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततम् ॥ २० ॥ उपर्युपरि गच्छंति सत्त्वेन ब्राह्मणा जनाः ॥ तमसाऽधोऽध आमुख्याद्रजसांतरचारिणः ॥ २१ ॥

यदा पुनः क्रियया विकुर्वन्विकारं प्राप्नुवन् आधीर्भवति । आसमंताद्विक्षिप्ता धीर्यस्य सः । चेतसां बुद्धींद्रियाणामनिर्वृत्तिरनुपरतिः । गात्राणि कर्मेंद्रियाणि तेषामस्वास्थ्यं विकाराधिक्यं मनो भ्रांतं चंचलं तदा एतैः रज उत्कटं निशामय जानीहीति ॥ १७ ॥ यदा सीदत्तिरोभवच्चेतसो ग्रहणे चिदाकारपरिणामेऽक्षमं सच्चित्तं विलीयेत । मनोपि संकल्पात्मकं नष्टं लीनं भवेद् । तमोऽज्ञानं ग्लानिर्विषादश्च भवति । तत्तदा तम उत्कटमुपधारय विद्धि ॥ १८ ॥ किंच एधमान इति । इंद्रियाण्येव निवृत्तिप्रवृत्तिमोहस्वभावानि देवासुररक्षांसि । यद्वा प्रसंगादाधिदैविकानां गुणानामुत्कर्षकार्याण्युक्तानीति ज्ञेयम् ॥ १९ ॥ गुणोत्कर्षतोऽवस्थाभेदं दर्शयति । सत्त्वादिति । प्रसंगान्निर्गुणावस्थामाह । तुरीयं चतुर्थमवस्थांतरं नाम त्रिषु जागरणादिषु संततमेकरूपमात्मतत्त्वमेवेत्यर्थः ॥ २० ॥ गुणोत्कर्षद्वारेण तत्तत्कर्मफलनिष्ठां दर्शयति । उपर्युपरीति । ब्राह्मणा वेदानुष्ठानयुक्ताः । आब्रह्मण इति पाठे ब्रह्मलोकमभिव्याप्य । आमुख्यात्स्थावरानभिव्याप्य अंतरचारिणो मनुष्या

निर्वृतिर्वैतृष्ण्यलक्षणमवैय्यग्र्यम् । मनः संगरहितमनासक्तं स्यात्तदा सत्त्वमुद्रिक्तमधिकं विद्धि । मयि मत्प्राप्तौ पदं व्यवसायो यस्मात्तत् “ पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु ” इत्यमरः ॥ १६ ॥ क्रियया कुर्वद्रूपया ॥ * ॥ आ समन्तान्नानापदार्थगतत्वाद्विक्षिप्ता धीर्बुद्धिर्यस्य तथाभूतो भवति । अनिर्वृत्तिः सतृष्णता ॥ १७ ॥ विलीयेत शिथिलीभवेत् । विषादश्चेतसो भङ्गः ॥ * ॥ चेतसो ज्ञानस्य ग्रहणे लीयते जडीभवति यदा तु केवलया भक्त्या गुणत्रयपराभवस्तदा नैर्गुण्यमवधारयेति शेषः ॥ १८ ॥ पुनरन्यदाह—किञ्चेति । ‘ प्रसिद्धार्थं परित्यज्याप्रसिद्धार्थकल्पनमहेतुकम् ’ इति न्यायादाह—यद्वेति । आधिदैविकानां गुणाधिष्ठातृदेवानां गुणपरिणामभूतानामिति यावत् । “ सत्त्वं रजस्तम इति तिस्रः सुरनृनारकाः ” इत्युक्तेः नारका नरकहेतुकर्मकर्तारः ॥ * ॥ देवासुररक्षःसु इन्द्रियाणां लक्षितलक्षणा, सा च सति मुख्यार्थे नोचिताऽतो—यद्वेति । यदा भक्तिहेतुकं नैर्गुण्यं वर्द्धते तदा भक्तानां बलमेधत इति शेषः ॥ १९ ॥ इत्यर्थ इति—तत्तदवस्थासाक्षित्वेन चतुर्थस्य चेतनस्यावश्यमंगीकार्यत्वादिति भावः ॥ * ॥ कस्माद्गुणात्काऽवस्थाऽत आह—सत्त्वादिति । अवस्थाप्रसंगादप्रस्तुतापि तुरीयावस्था तामाहेत्यर्थः ॥ २० ॥ आमुख्यादिति—आङ्योगे पञ्चमीति भावः । “ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ” इत्युक्तेः । अन्तरे तलाद्यन्तारिक्षाद्यन्तरस्मिन्मध्ये चरितुं शीलं येषां ते तथा । सत्त्वेनेत्यादित्रयाणां युक्ता इति शेषः ॥ * ॥ नैर्गुण्येन भक्त्या भगवत्पदं यान्तीति शेषः । वेदार्थो वेदप्रतिपाद्यप्रयोजनवदर्थो यागादिस्तदनुष्ठानेऽभियुक्ता निपुणाः रजसा राजसकर्मणा मनुष्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः ॥ तमोलयास्तु निरयं यांति मामेव निर्गुणाः ॥ २२ ॥ मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत् ॥
राजसं फलसंकल्पं हिंसाप्रायादि तामसम् ॥२३॥ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत् ॥ प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम्॥२४॥

एव भवंति ॥ २१ ॥ देहादुत्क्रांतिकालीनगुणोत्कर्षफलमाह । सत्त्वे वृद्धे सति प्रलीना मृताः । रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते । एवं तमोलया इत्यपि । निर्गुणा इत्यत्र तु लयशब्दानुपादानाज्जीवंतोपि निर्गुणा एकांतभक्तियोगेन मन्निष्ठाश्चेन्मामेव यांतीत्यर्थः ॥ २२ ॥ इदानीं गुणोत्कर्षकृतमेव तत्तत्फलसाधनकर्मत्रैविध्यमाह । मदर्पणं मत्प्रीत्युद्देशेन कृतं निष्फलं केवलं दासभावेनैव कृतं यन्निजं कर्म नित्यादि तत्सात्त्विकम् । फलं संकल्प्यतेऽस्मिंस्तत् । हिंसाप्रायं हिंसोद्देशेन कृतं हिंसाबहुलं च । आदिशब्दाद्दंभमात्सर्यादिकृतम् ॥ २३ ॥ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह । कैवल्यं देहादिव्यतिरिक्तात्मविषयम् । वैकल्पिकं

एव भवन्तीति मूले योजनीयं टीकानुरोधेन ॥ २१ ॥ इत्यर्थ इति–मरणावसरे निर्गुणत्वं ब्राह्मी निष्ठा " स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति " इति गीतोक्तेः । अत्रापिना जीवतो ग्रहणमेव । तथा च जीवनावस्थायां निर्गुणब्रह्मपरा ये तेऽपि मामेवाप्नुवन्तीति भावः ॥ * ॥ देहोत्क्रमणकालिकगुणोत्कर्षफलमाह–सत्त्व इति ॥ २२ ॥ निष्फलं फलाभिसन्धिहीनम् । आदिना नैमित्तिकादिग्रहः ॥ * ॥ दासभावेन दासोऽस्मीत्यभिमानेन मयि अर्पणं यस्य तन्मदर्पितमिति । " कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् " इति नारदोक्तेर्धर्मशास्त्रविहितस्य धर्ममात्रस्यैव भगवदनर्पितत्वे वैयर्थ्यश्रवणान्मदर्पणमित्युत्तरत्रापि योजनीयम् । ततश्च मदर्पणं नित्यं कर्म तथा निष्फलं फलाभिसन्धिरहितं काम्यं वा कर्म मदर्पितं सात्त्विकं स्यात् । फलं सङ्कल्प्यते यस्मिंस्तत्फलाभिसन्धिसहितं काम्यं कर्म मदर्पितं राजसं स्यात् तथाऽधर्मशास्त्रोक्तं हिंसाप्रायं हिंसोद्देशेन कृतं तामसं स्यात् । आदिना दम्भमात्सर्यादिकृतं च । श्रवणकीर्तनादि शुद्धभजनं तु निर्गुणमिति शेषः ॥ * ॥ सन्दर्भस्तु–मदर्पणमुत्तमत्वाय मय्यर्पितमित्यर्थः । निष्फलं सत्त्वशुद्ध्यर्थं निष्कामत्वेनैव कृतं निजकर्म स्ववर्णाश्रमादिधर्मः ॥ २३ ॥ आदिना वासकर्तृश्रद्धादिग्रहः । मन्निष्ठं मय्यभेदनिष्ठात्मकम् । निर्गुणत्वापादकत्वान्निर्गुणत्वं ज्ञानादीनामिति ॥ * ॥ केवलस्य निर्विशेषस्य ब्रह्मणः शुद्धजीवभेदेन ज्ञानं कैवल्यं त्वंपदार्थमात्रज्ञानस्य कैवल्यानुपपत्तिस्तत्पदार्थज्ञानसापेक्षत्वात् । सत्त्वयुक्ते हि चित्ते प्रथमतः शुद्धं सूक्ष्मं जीवचैतन्यं प्रकाशते ततश्चिदेकाकारत्वाभेदेन तस्मिन् शुद्धं पूर्णं ब्रह्मचैतन्यमप्यनुभूयते । ततः सगुणस्यैव तत्र कारणताप्राचुर्यात्सात्त्विकत्वम् । तथा च श्रीगीतोपनिषदः–' सत्त्वात्सञ्जायते ज्ञानम् ' इति भगवज्ज्ञानस्य तु ' देवानां शुद्धसत्त्वानाम् ' इत्यादि ' मुक्तानामपि सिद्धानाम् ' इत्याद्युक्त्वा सत्त्वादिसद्भावेऽप्यभावात् ' रजस्तमःस्वभावस्य' इत्याद्युक्त्या वा तदभावेऽपि वृत्रासुरस्य सद्भावात् न तत्कारणकत्वं किंतु तदुत्तरत्वेन तस्य पूर्वजन्मनि श्रीनारदादिसंगवर्णनया ' नैषां मतिस्तावदुरुक्रमांघ्रिम् ' इत्याद्युक्त्या च भगवत्कृपापरिमलपात्रभूतस्य श्रीमतो महतः संग एव कारणं, तत्संगश्च–' तुलयाम लवेनापि ' इत्याद्युक्त्या निर्गुणावस्थातोऽप्यधिकत्वात्परमनिर्गुण एव । सप्तमे च–' समः प्रियः सुहृद्ब्रह्मन् ' इत्यादौ सत्त्वगुणे देवादौ तस्य कृपा वास्तवी न भवति किंतु श्रीमत्प्रह्लादादिष्वेवेति प्रतिपादनात् । महतां निर्गुणाभिव्यक्त्या तत्संगस्यापि निर्गुणत्वं व्यक्तं, तथा भक्तेरपि गुणसंगनिर्धूननानन्तरं चानुवृत्तिः श्रूयते ' तस्माद्देहमिमं लब्ध्वा ' इत्यादौ परमेश्वरज्ञानस्यापि नैर्गुण्यहेतुत्वेन निर्गुणोक्तिस्तु लक्षणामयक्लिष्टकल्पना । तथा कैवल्यज्ञानस्यापि नैर्गुण्यहेतुत्वादवैशिष्ट्येनोदाहरणभेदावृत्तिश्च स्यात्तस्मात्स्वत एव निर्गुणं भगवज्ज्ञानम् । अत्र विशेषो भक्तिसन्दर्भे दृश्यः ॥ * ॥ दीपिका–देहादिव्यतिरिक्तो य आत्मा त्वंपदार्थस्तद्विषयकं वस्तुतस्तु त्वंपदार्थज्ञानस्य तत्पदार्थज्ञानसापेक्षत्वात्केवलत्वासम्भव इति निर्विशेषज्ञानमेव तच्छब्देन व्याख्येयमिति वैष्णवमतम् । अद्वैतमते तु–परमेश्वरविषयज्ञानस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वने तु सात्त्विको वासो ग्रामे राजस उच्यते ॥ तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥ २५ ॥ सात्त्विकः कारकोऽसंगी रागांधो राजसः स्मृतः ॥ तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ २६ ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ॥ तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥ २७ ॥ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतम् ॥ राजसं चेंद्रियप्रेष्ठं तामसं चार्तिदाऽशुचि ॥ २८ ॥

देहादिव्यतिरिक्तात्मविषयं यत्तद्रजो राजसम् । प्राकृतं बालमूकादिज्ञानतुल्यम् । मन्निष्ठं परमेश्वरविषयम् ॥ २४ ॥ वनं विविक्तत्वात्सात्त्विको वासः । भगवन्निकेतनं तु साक्षात्तदाविर्भावान्निर्गुणं स्थानम् ॥ २५ ॥ कारकः कर्ता । असंगी अनासक्तः । रागांधोऽत्यभिनिवेशवान् । स्मृतिविभ्रष्टोऽनुसंधानशून्यः । मदपाश्रयो मदेकशरणः । स हि निरहंकारत्वान्निर्गुणः ॥ २६ ॥ अधर्मे धर्म इति या श्रद्धा ॥ २७ ॥ पथ्यं हितम् । पूतं शुद्धम् । अनायस्तमनायासतः प्राप्तम् । आहार्यं भक्ष्यभोज्यादि ।

नैर्गुण्यहेतुत्वेन नैर्गुण्यमिति लक्षणामयक्लिष्टकल्पनैव । प्रत्युत 'भक्षितलशुनन्यायेन' त्वंपदार्थविषयज्ञानस्यापि नैर्गुण्यहेतुत्वाद्विशेषाभावादुदाहरणभेदवैयर्थ्यमेव स्यादिति चिन्त्यमेव तत् । पुनष्टीकाकृतां तथा व्याख्यानं तु तन्मतानुयायिनां स्वमतप्रवेशनायैव ज्ञेयम् । एवमन्यत्रापि ॥ * ॥ **विश्वनाथस्तु**—कण्ठोक्त्यैव सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह । कैवल्यं देहादिव्यतिरिक्तत्वेन केवलजीवात्मविषयकं यत्तत्सात्त्विकं, वैकल्पिकं द्वैतमिदं सत्यमसत्यं वा जीवा नित्या जन्या वेत्यादिविकल्पभवं यज्ज्ञानं तद्राजसं, प्राकृतमाहारविहारादिज्ञानं तामसम् । मन्निष्ठं मद्विषयकम् ॥ २४ ॥ तपोयोगाद्युपयोगित्वाद्वनस्य, व्यापारवत्त्वाद्ग्रामस्य, स्मृतिनाशकत्वाद्द्यूतगृहस्य । मन्निकेतं देवालयादि ॥*॥ **दीपिका**—वृक्षखण्डस्वरूपस्य वनस्य रजस्तमःप्रधानत्वाद्विविक्तत्वलक्षणसात्त्विकगुणमादाय सात्त्विक इत्युक्तम् ॥ * ॥ **सन्दर्भस्तु**—तदेवं ज्ञानस्वरूपाया भक्तेर्निर्गुणत्वमुक्त्वा क्रियारूपाया व्याचष्टे । तत्राप्यस्तु तावच्छ्रवणकीर्तनादिरूपायाः, भगवत्सम्बन्धेन वासमात्ररूपाया आह—वनमिति । वनं वास इति । तत्सम्बन्धिनी वसनक्रियेत्यर्थः । वानप्रस्थानामिति ज्ञेयम् । एवं ग्राम्य इति गृहस्थानां, तामस इति दुराचाराणां, द्यूतसदनमित्युपलक्षणम् । मन्निकेतमिति मत्सेवापराणामिति च वनादीनां वासेन सह 'आयुर्घृतम्' इतिवदेकाधिकरणत्वं, वनस्य वृक्षखण्डस्वरूपस्य रजस्तमःप्राधान्यात् । अत एव विविक्तत्वलक्षणं त्वदीयसात्त्विकगुणस्यापि तद्युगलमिश्रत्वेन गौणत्वम् । वासक्रियायास्तु सत्त्वोत्पन्नत्वात्तद्वर्द्धनत्वाच्च सात्त्विके मुख्यत्वमिति । अत एव ग्राम्य[1] इति तद्धितान्त एव पठितः । एवं द्यूतसदनमित्यत्र च वासक्रियैव विवक्षिता मन्निकेतमित्यत्रापि । किंतु भगवत्सम्बन्धमाहात्म्येन निकेतस्यापि निर्गुणत्वं भवेत् स्पर्शमणिन्यायेन तादृशत्वं तादृशभक्तिचक्षुर्भिरेवोपलब्धव्यम् "दिविष्ठा यत्र पश्यन्ति सर्वानेव चतुर्भुजान्" इतिवत् । अत एव तैर्व्याख्यातं भगवन्निकेतं—त्विति । "शिलाबुद्धिः कृता किं वा प्रतिमायां हरेर्मया" इति । तत्र शिलाबुद्धिनिषेधात्साक्षात्तदाविर्भावत्वत्त्वं तत्स्थानान्निकेतस्यापि नैर्गुण्यमेवेति भावः ॥ २५ ॥ करोतीति कारकः । अनासक्तो निष्कामकर्मकर्ता । रागान्धः फलरागेणान्धस्तन्नश्वरत्वाद्यपश्यन् ॥ * ॥ एवं वासमात्रस्य तादृशत्वमुक्त्वा सर्वासां तत्क्रियाणामाह—सात्त्विकः कारक इत्यत्र तद्विशेषणीभूतक्रियायामेव तात्पर्यं न तदाश्रये द्रव्ये सात्त्विककारकशरीरस्यापि गुणत्रयपरिणामत्वात् । सविशेषणविधिनिषेधौ 'सति विशेष्यबाधे विशेषणमुपसंक्रामति' इति न्यायात् ॥ २६ ॥ आत्मानात्मविवेचिका सात्त्विकी । अधर्मे पाखण्डादौ मत्सेवाया बुद्धिशोधबोधद्वारा गुणबाधकत्वात् ॥ * ॥ क्रियाप्रवृत्तिभूतायाः श्रद्धाया अप्याह—सात्त्विकीति । आध्यात्मिकी वेदान्तशास्त्रविषयिणी । अधर्मोऽत्र परधर्मः ॥ २७ ॥ आदिना लेह्यादिग्रहः । आदिना मिष्टादि

१ ग्राम्यो राजस इति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ॥ तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥ २९ ॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः ॥ श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ ३० ॥ सर्वे गुणमया भावाः पुरुषा व्यक्तधिष्ठिताः ॥ दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ ३१ ॥ एताः संसृतयः पुंसो गुणकर्मनिबंधनाः ॥ येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः ॥ ३२ ॥

इंद्रियाणां प्रेष्ठं भोगकाले सुखदं कट्वम्ललवणादि । आर्तिदाशुचि दैन्यकरमशुद्धं च । चशब्दान्मन्निवेदितं निर्गुणमित्यभिप्रेतम् ॥ २८ ॥ आत्मोत्थं सुखम् । आत्मोत्थमिति त्वंपदार्थविषयत्वेन मदपाश्रयमित्यपि तत्पदार्थविषयत्वेन सुखं ज्ञानवदेव द्रष्टव्यम् ॥ २९ ॥ तदुक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्याम् । द्रव्यं पथ्यपूतादि । देशो वनग्रामादिः । फलं 'सात्त्विकं सुखम्' इत्यादि । कालो 'यदा भजेत मां भक्त्या, यदेतरौ जयेत्' इत्यादिना योर्थादुक्तः । ज्ञानम् 'कैवल्यं सात्त्विकं ज्ञानम्' इत्यादि । कर्म 'मदर्पणम्' इत्यादि । कारकः 'सात्त्विकः कारकोऽसंगी' इत्यादि । श्रद्धा 'सात्त्विक्याध्यात्मिकी' इत्यादिः । अवस्था 'सत्त्वाज्जागरणम्' इत्यादिः । आकृतिः 'उपर्युपरि गच्छंति' इत्यादिनोक्ता देवत्वादिरूपा । निष्ठा 'सत्त्वे प्रलीनाः स्वर्यांति' इत्यादिनोक्ता स्वर्गादिः । एवं सर्वोऽप्ययं भावस्त्रैगुण्यस्त्रिगुणात्मकः ॥ ३० ॥ न केवलमेष एव किंतु यावंतः पुरुषा व्यक्तधिष्ठितास्ते सर्वे भावा गुणमया एव । तत्प्रपंचः दृष्टमिति ॥ ३१ ॥ इदानीमुक्तं त्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्ष इत्याह । एता इति सार्धेन । येन निर्जिताः स पश्चादविक्षिप्तेन भक्तियोगेन मन्निष्ठः सन् मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ॥ ३२ ॥

ग्रहः ॥ * ॥ मन्निवेदितं मत्प्रसादीभूतम् ॥ २८ ॥ त्वंपदार्थो देहाद्यतिरिक्तात्मज्ञानम् । तत्पदार्थो ब्रह्म तदनुभवजं निर्गुणम् ॥ * ॥ **दीपिका**—ज्ञानवदेवेति—यथा त्वंपदार्थविषयं ज्ञानं सात्त्विकं परमेश्वरविषयं तु निर्गुणम् । तथा त्वंपदार्थानुभवोत्थं सुखं सात्त्विकं तत्पदार्थानुभवोत्थं तु सुखं निर्गुणमित्यर्थः । अहमेव तत्पदार्थः अतो मदपाश्रयं मत्कीर्तनाद्युत्थम् । एवं शुश्रूषोः श्रद्दधानस्येत्याद्युक्त्या महन्निदानत्वेन श्रवणादिलक्षणक्रियाया अपि भक्तेर्निर्गुणत्वं ज्ञेयम् ॥ २९ ॥ अर्थादुक्तो यदेत्यव्ययस्य कालबोधकत्वात् । भावः पदार्थः ॥ * ॥ उपसंहरन्नुक्तेषु त्रिगुणमयेषु गुणातीतेषु च पदार्थेषु मध्ये ये गुणमया भावास्ते जीवस्य संसारहेतव इत्याह—सार्द्धद्वयेन । द्रव्यमित्यादि तैः । सर्वोऽप्ययं त्रैगुण्य एव । हीति:मंदीयं विनेति ज्ञेयं तथा दर्शितत्वात् । स्वार्थे ष्यञ् ॥ ३० ॥ उक्तमर्थमन्यत्राप्यतिदिशति—न केवलमिति । तत्प्रपञ्चः गुणमयत्वप्रपञ्चः । तथाहि—दृष्टमिति । धिष्ठिताः स्थिताः । उपसर्गाकारलोपस्त्वार्षः । यद्वा—पुरुषाधिष्ठितं च तदव्यक्तं पुरुषाव्यक्तम् । मध्यमपदलोपी समासः । तेनाधिष्ठिताः कल्पिताः "प्रकृतिः पुरुषाध्यक्षा सूयते सचराचरम्" इत्युक्तेः ॥ * ॥ न केवलमित्यादि तैः । एष एव द्रव्याद्येकादशपदार्थ एव । भावाः पदार्थाः । तत्प्रपञ्चः सर्वशब्दार्थप्रपञ्चः ॥ ३१ ॥ तन्निर्जयान्नैर्गुण्यनिर्जयात् । चित्तजाः चित्तभवाः । मम तु 'निर्गुणत्वाद्धियो गुणैः' इति श्रीमत्स्यचरितोक्तेर्गुणा धिय एव न तु मे 'गुणा बुद्धेर्न चात्मनः' इति श्रीकृष्णदेवेनाप्युद्धवं प्रत्युक्तेश्च । चित्तबुद्ध्योरुभयोरन्तःकरणत्वेनैक्येऽपि वृत्तिभेदादेव भेदः । स च न वास्तव इति बुद्धिस्थचिदाभास एव जीवस्तस्यैव गुणसमानाधिकरणत्वाज्जीवत्वं मम तु 'यो बुद्धेः परतस्तु सः' इत्युक्तेः 'बुद्धेरात्मा महान्परः' इत्युक्तेश्च निर्गुणत्वमेवात एवोक्तम्—'गुणा जीवस्य नैव मे' इति स्वयं भगवता ॥*॥ एता इति सार्द्धकम् । एताः शमकामक्रोधादिरूपा गुणकर्मनिबन्धना गुणकर्मकारणकाः । सन्तीति शेषः । मोक्षाय सप्रेमपार्षदत्वाय "विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः" इति पाद्मोक्तेरिति **दीपिका** ॥*॥ **विश्वनाथस्तु**—किंतु येन जीवेन कर्त्रा भक्तियोगेन करणेन इमे गुणा निर्जि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवम् ॥ ३३ ॥ गुणसंगं विनिर्धूय मां भजंतु विचक्षणाः ॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः ॥ रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः ॥ ३४ ॥ सत्त्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः ॥ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय माम् ॥ ३५ ॥ जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः ॥ मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् ॥ ॥ ३६ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवादे पंचविंशोऽध्यायः ॥ २५ ॥

तस्माद्विवेकिनामिदमेव युक्तमित्याह । तस्मादिति । ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहम् ॥ ३३ ॥ भजनप्रकारमाह निःसंग इति सार्धेन ॥ ३४ ॥ सत्त्वसंसेवया 'सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये' इति प्रागुक्तया । नैरपेक्ष्येणोपशमात्मकेन सत्त्वेनैव ॥ ३५ ॥ एवं च सति मां प्राप्नोतीत्याह । संपद्यत इति । जीवं जीवत्वकारणं लिंगशरीरम् । मां प्राप्तस्य न पुनः संसार इत्याह । जीव इति । बहिर्विषयभोगेन नांतरस्तत्स्मरणेन ॥ ३६ ॥ गुणकृतामनुसंसरणप्रथामजितपुण्यकथाकथनादिभिः ॥ धुनुत भक्तिरसेन विवेकिनो न हि पुनः सुलभं जनुरीदृशम् ॥ १ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्रीधरीयटीकायां पंचविंशोऽध्यायः ॥ २५॥

ताः स मन्निष्ठो मद्भक्तः मद्भावाय मत्सारूप्याय । यद्वा—मद्दास्यसख्यादिभावार्थं प्रपद्यते । अत्र 'यान्ति मामेव निर्गुणाः' इति 'निर्गुणो मदपाश्रयः' इति मद्भक्तस्य निर्गुणत्वम् ''लक्षणं भक्तियोगस्य निर्गुणस्येत्युदाहृतम्'' इति कपिलदेवोक्तेरत्रापि भक्तियोगेन गुणा निर्जिता इत्युक्त्या भक्तियोगस्य निर्गुणत्वं, स च भक्तियोगोऽर्चनादिगन्धपुष्पधूपदीपच्छत्रचामरादिघटित इति तत्तद्द्रव्याणामपि निर्गुणत्वं, तदीयश्रद्धादीनां तु निर्गुणत्वमुक्तमेवेत्यतो भक्त्युपकरणमात्रस्यैव निर्गुणत्वमवगमितं भगवता ॥ ३२ ॥ यतस्त्रैगुण्यजयो मोक्षहेतुस्तस्माद्धेतोः । इदमेव त्रैगुण्यविजयनमेव ॥ * ॥ तस्माद्भक्त्यैव गुणत्रयजयात् । इदमेव भजनमेव । भक्त्या गुणसम्बन्धं दूरीकृत्य भजंतु भक्तिमेव कुर्वन्त्विति भक्तेः साध्यत्वं साधनत्वञ्च व्यक्तीकृतम् । 'तस्मात्त्वमुद्धवोत्सृज्य' इत्यादिभिरभ्यस्तमपि भजनस्य सर्वोपरितनता प्रकटिता नरदेह इति भावः । ज्ञानविज्ञाने अप्यत्र भक्त्युत्थे एव ज्ञेये ॥ ३३ ॥ विनिर्धूय त्यक्त्वा ॥ * ॥ शुद्धभजनप्रकारं शिक्षयति—निःसंगः अन्यकामनाज्ञानकर्मादिसंगरहितः । अप्रमत्तः सेवानामापराधानवधानशून्यः । यतो जितेन्द्रियः विद्वान् भक्तिरेव परमपुमर्थ इति जानन् मां भजेत श्रवणादिभिरनुशीलयेदिति तत्रेतिकर्तव्यताऽभिहिता ॥ * ॥ **विश्वनाथस्तु**—ननु च यस्य त्वत्सेवायां श्रद्धा निर्गुणास्ति अथ च सात्त्विक्याध्यात्मिकी श्रद्धाऽप्यस्ति राजसी कर्मश्रद्धा तामस्यधर्मश्रद्धाऽप्यस्ति एवं त्वद्भक्त्युत्थं निर्गुणं सुखं तथाऽऽत्मोत्थं विषयोत्थं मोहोत्थं च त्रिगुणमयसुखमप्यस्ति एवमेवोक्तलक्षणं नैर्गुण्यं त्रैगुण्यञ्चास्ति तेनारब्धत्वद्भजनेन किं कर्तव्यमिति चेच्छ्रूयताम्—स यदि केवलं भक्तिमान्स्यात्तदा भक्त्यैव त्रैगुण्यं निर्जयेदित्युक्तमेव ''येनेमा निर्जिताः सौम्य गुणा जीवेन'' इत्यादिना ॥ ३४ ॥ ० ॥ * ॥ यदि च प्रधानीभूतभक्तिमान्स्यात्तत्पुनरुपायान्तरमपि त्रैगुण्यजयेऽस्तीत्याह—रज इति । नैरपेक्ष्येण भक्त्युत्थवैतृष्ण्येन । उपशमात्मकेनान्तःकरणनियमनेन । सर्वत्र हेतुः शान्तधीः भगवन्निष्ठबुद्धिः ॥ ३५ ॥ एवं च सति त्रैगुण्यजये सति । जीवत्वहेतुर्लिंगदेहसम्बन्ध एव तदभावे मोक्षश्रवणात् । तत्स्मरणेन विषयस्मरणेन । न चरेत् न स्यात् ॥ उरुसंसरणप्रथां बहुतरसंसारप्रसिद्धिं रोगं वा । आदिना श्रवणादिग्रहः । धुनुत अपाकुरुत । भक्तिरसेन तद्रूपरसायनेन । पुनरीदृशावसरो न लभ्य इत्याह—न हीति । 'जनुर्जन्मप्रथारोगे प्रसिद्धौ च' इति कोशात् (१) । ॥ * ॥ सम्पद्यत इत्यर्द्धकम् । एवं च लिंगदेहेन अन्तःकरणोत्थैर्गुणैश्च रहितः बहिः प्राकृतशब्दादिविषयान् आन्तरं शोकमोहादिकञ्च न चरेन्न प्राप्नुयात् ॥ (३६) ॥ * ॥ **दीपिका**—'तनुसंसरणव्यथाम्' इति पाठे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः ॥ आनंदं परमात्मानमात्मस्थं समुपैति माम् ॥ १॥ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया ॥ गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः ॥ वर्तमानोऽपि न पुमान्युज्यते वस्तुभिर्गुणैः ॥ २ ॥ संगं न कुर्यादसतां शिश्नोदरतृपां क्वचित् ॥ तस्यानुगस्तमस्यंधे पतत्यंधानुगोऽन्धवत् ॥ ३ ॥

षड्विंशे योगनिष्ठाया विघातो दुष्टसंगतः ॥ साधुसंगेन तन्निष्ठापराकाष्ठेति वर्ण्यते ॥ १ ॥ योगिनो योगविभ्रंशः संगतः संभवेदिति ॥ सर्वथा तन्निवृत्त्यर्थं मैलगीतं वितन्यते ॥ २ ॥ ' निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः ' इत्युक्तं तत्र विपक्षेऽनर्थं कथयिष्यन् जीवन्मुक्तस्यापि तर्हि संगो दुर्वार इत्यनर्थः स्यादित्याशंक्योक्तानुवादपूर्वकं परिहरति सार्धाभ्याम् । मल्लक्षणं मत्स्वरूपं लक्ष्यते येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्षणे आस्थितः सन्नात्मस्थमात्मन्येव नियंतृत्वेन स्थितं परमानंदरूपमात्मानं मां समुपैति सम्यक्प्राप्नोति ॥ १ ॥ न चैवंभूतस्य विषयसंगो नामास्तीत्याह गुणमय्येति । गुणमयी या जीवयोनिर्जीवोपाधिस्तया विमुक्तो गुणेषु वर्तमानोऽपि तैर्न युज्यते संगं न प्राप्नोति । अत्र हेतुः । अवस्तुभिः । नन्ववस्तुभिरप्यन्ये युज्यमाना दृश्यंते तत्राह । अवस्तुत्वेन दृश्यमानेषु ॥ २ ॥ तथापि संगं वर्जयेदित्याह । संगमिति । असतां लक्षणमाह । शिश्नोदरे तर्पयंतीति शिश्नोदरतृपस्तेषां क्वचित्कदाचिदपि आस्तां तावद्बहूनां संगं किंतु तस्यैकस्याप्यनुगोऽनुवर्ती

देहोपाधिकां ससारपीडामित्यर्थः । 'उरुसंसरणप्रथाम्' इति पाठे तु उर्वी महती चासौ संसाराख्या प्रथा ख्यातिरर्थान्महान्संसार इत्यर्थः । हे विवेकिनः अजितस्य कथाकथनादिभिर्धुनुत नाशयत पुनरीदृशं सर्वांगपूर्णं ब्राह्मणादिजन्म नहि सुलभं सर्वथा दुर्लभम्, एतेन हरिकथैव संसारनाशिनीति हरिकथायाः संसारापाकरणे मुख्योपायत्वमुक्तम् । आदिना श्रवणाध्ययनादिग्रहः (१) ॥ ३६ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे एकादशस्कन्धे पञ्चविंशोऽध्यायः ॥ २९ ॥ तन्निष्ठाया योगनिष्ठायाः । परा काष्ठा परोऽवधिः (१) । तन्निवृत्त्यर्थं संगनिवृत्त्यर्थम् (२) । तत्राधुना । विपक्षे निःसंगभजनाभावे । अनर्थं निष्ठाभ्रंशरूपम् । तर्हि संगस्य भ्रंशहेतुत्वे जीवन्मुक्तस्यापि यथाकथञ्चित्संगो भवत्येव तथा च तस्याऽपि पुनः संसारः स्यादिति चेत्, उक्तस्य 'निःसंगो मां भजेत्' इत्यस्यानुवादः 'गुणमय्या जीवयोन्या' इत्याद्युक्तलक्षणस्तत्पूर्वकं परिहरति । 'न युज्यतेऽवस्तुभिः' इत्यादिनाऽनर्थमपाकरोति ॥ * ॥ **दीपिका**—तन्निष्ठा योगनिष्ठा तस्याः परा काष्ठा परमोऽवधिः (१) । तन्निवृत्त्यर्थं संगपरिहारार्थम् (२) । तत्रेत्युक्तौ विपक्षे संगकरणे । परिहरति शंकामिति शेषः । मद्भक्तिलक्षणे श्रवणकीर्तनादौ । आत्मन्येव जीवस्वरूप एव ॥ १ ॥ एवंभूतस्य भक्तिधर्मे स्थितस्य । न चास्तीति योज्यम् । जीवोपाधिर्लिंगमविद्या वा । तैर्गुणैः । अत्र गुणसंगाभावे । अवस्तुभिः अवस्तुत्वेन परिज्ञातैः । अत्राशंकते—नन्विति । अवस्तुत्वे ज्ञातेऽपि दृश्यमानत्वात्तेषु संग ऐन्द्रजालिकलीलावदज्ञानामेवेति भावः ॥ * ॥ निःसंगो मां भजेदित्युक्तम् । तत्र च "उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत्" इति न्यायेन स्त्रीसंगः खलु तत्र महानन्तरायस्तस्माच्च जीवन्मुक्तेनापि भेतव्यमिति वक्तुं पूर्वप्रक्रान्तं जीवन्मुक्तत्वमाह सार्द्धद्वाभ्याम् । एवंभूतस्य परमानन्दं प्राप्तस्य । जीवोपाधिर्लिंगदेहः । गुणेषु गुणकार्येषु देहेन्द्रियादिषु । संगं सुखदुःखादिसम्बन्धम् । तत्र गुणसंगाप्राप्तौ ॥ * ॥ **विश्वनाथस्तु**—स च गुणेषु विषयेषु प्राकृतेषु भगवत्सम्बन्धगन्धरहितेष्वित्यर्थः । वर्तमानोऽपि तैर्गुणैरवस्तुभिरसत्तुल्यैर्न युज्यते बद्धजीव इव नासक्तो भवति । कुतः—न वस्तुतो दृश्यमानेषु दृष्टिस्तस्य मयि कामात्मन्येवेति भावः ॥ २ ॥ यद्यपि गुणा अवास्तवास्तथापीति । एकस्यापि शिश्नोदरतृपः ॥ * ॥ **दीपिका**—तथापि विषयसंगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ॥ ४ ॥ त्यक्त्वाऽऽत्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः ॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ॥ ५ ॥ कामानतृप्तोऽनुजुषन्क्षुल्लकान्वर्षयामिनीः ॥ न वेद यांतीर्नायांतीरुर्वश्याऽऽकृष्टचेतनः ॥ ६ ॥ ऐल उवाच॥अहो मे मोहविस्तारः कामकश्मलचेतसः ॥ देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ॥ ७ ॥

अंधमनुगच्छति योंधस्तद्वत् ॥ ३ ॥ अत्रेतिहासमाह । ऐलः पुरूरवाः । सम्राट् चक्रवर्ती । बृहच्छ्रवः कीर्तिर्यस्य सः । उर्वशीविरहात्प्रथमं मुह्यन्पश्चात्कुरुक्षेत्रे तां समागम्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकसंयमे शोकापगमे सति ततो निर्विण्णः सन्निमां गाथामगायतेति नवमस्कंधानुसारेण द्रष्टव्यम् ॥ ४ ॥ प्राक्तनीं मोहावस्थामाह । त्यक्त्वेति । आत्मानं राजानं त्यक्त्वा । अथवा शय्यायामात्मानं त्यक्त्वा व्रजंतीम् घोरे तिष्ठेति । “ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ॥ न नौ मंत्रा अनुदितास एते मयस्करन्परतरे च नाहन् ” इत्येवं मंत्रैर्विलपन् ॥ ५ ॥ वैक्लव्ये कारणमाह । कामानिति वर्षाणां यामिनी रात्रीर्यान्तीरपयांतीर्न वेद । नाप्यायांतीरागामिनीः । उर्वश्या आकृष्टा चेतना यस्य सः ॥ ६ ॥ तस्य गंधर्वलोकप्राप्तस्य बहुकालमुर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाह अष्टा

सम्भवेऽपि । तच्छब्दस्य पूर्वप्रक्रान्तानुवादकत्वात् एकवचनानुपपत्तिमाशंक्य व्याचष्टे–आस्तामिति । एवंभूतोऽप्यसत्संगं न कुर्यात्किं पुनरेवंभूत इत्याह–संगमिति ॥ ३ ॥ अत्र असत्संगस्य पात हेतुत्वे । इमां वक्ष्यमाणाम् ‘अहो मे मोहविस्तारः’ इत्यादिकाम् ॥ * ॥ अत्र संगवर्जने । तत उर्वशीलोकात् ॥ ४ ॥ श्रुत्यर्थमाह–हये अहो जाये मनसा तिष्ठ मनःपूर्वकं पूर्ववत्तिष्ठ । मां त्यक्तुं नार्हसीति शेषः । हे घोरे सुरतशौण्डे ये परतरे अहन् अहनि उत्तरोत्तरदिवसे मयः सुखं करन् अकुर्वत । एते नौ आवयोः सुरतमन्त्राः करुणोक्तिपूर्वका नु अद्याप्यनुदितासोऽनिवृत्ता अपरिसमाप्ता इति यस्मादतो नैतदुचितमतो मिश्रा मिश्राणि सल्लाँपलक्षणानि वचांसि कृणवावहै करवावहै इत्येवमुक्तरीत्या मन्त्रैराम्नातोक्तसूक्तेनेत्यर्थः ॥ घोरे भयंकरे । तव वियोगो मम भयहेतुरिति सम्बुद्ध्यर्थः । “ यदस्यां जायते ह्यात्मा तस्माज्जायेति कीर्तिता ” इति स्मृत्यर्थोऽपि नोपपन्न इत्यभिप्रेत्याह–हे जाय इति ॥ * ॥ तस्य पुरूरवसः । अये इति कोमलामन्त्रणे । मनसा भावेन । घोरे क्रूरचित्ते, मत्प्राणहरणात् । आवां मिश्रामिश्रौ भूत्वा वचांसि प्रेमालापान् कृणवावहै करवाव । नु अहो नौ आवयोर्मन्त्रा एते अनुदितासः अव्यक्ता न सन्ति । हे मयस्करन् प्रीतिमतिपरतरे पूर्वकृताश्च मन्त्रा नाऽहन् न नष्टा बभूवुरिति श्रुतिपदार्थः ॥ ५ ॥ क्षुल्लकान् तुच्छान् “ क्षुल्लकस्त्रिषु नीचेऽल्पे ह्रस्वशीर्ष्यल्पशान्तिके ” इति निरुक्तिः ॥ * ॥ ० ॥ ६ ॥ तस्य पुरूरवसः । तत्र अष्टादशसु श्लोकेषु । अनुतापः पश्चात्तापः । कश्मलमाकुलम् । देव्या अप्सर

१ तस्य प्राक्तनीमिति पाठान्तरे । २ ‘अये जाये’ इति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहं वेदाभिनिर्मुक्तः सूर्यो वाऽभ्युदितोऽमुया ॥ मुषितो वर्षपूगानां बताहानि गतान्युत ॥ ८ ॥ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः ॥ क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ॥ ९ ॥ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरम् ॥ यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् ॥ १० ॥ कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा ॥ योऽन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः ॥११॥ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ॥ किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतम् ॥ १२ ॥ स्वार्थस्याकोविदं धिङ् मां मूर्खं पंडितमानिनम् ॥ योहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः॥१३॥

दशभिः । तत्राष्टभिरनुतापः प्रपंच्यते । अहो इति । यतो मया इमे अहोरात्ररूपा आयुःखंडा न स्मृताः ॥ ७ ॥ तदेवाह । नाहमिति । अभिनिर्मुक्तो मयि रममाणेऽस्तं गतोऽभ्युदितो वा सूर्य इति । अमुया उर्वश्या वंचितः । बत खेदे । उतापि । वर्षपूगानामपि गतान्यहानि न वेदेति ॥ ८ ॥ येन संमोहेन । आत्मा देहः । क्रीडामृगवदधीनः ॥ ९ ॥ ननु प्रणयकुपिताया अनुनयार्थमधीनता युक्तैव । सत्यं न त्वत्र तदस्तीत्याह । सपरिच्छदं राज्यादिसहितमीश्वरं चक्रवर्तिनम् आत्मानं तृणमिव त्यक्त्वा यांतीमप्यन्वगममनुगतोऽस्मि ॥ १० ॥ किंच मम प्रभावाद्यभिमानो वृथैवेत्याह । कुतस्तस्य मे तेजो बलम् । खरो यथा पादताडितोऽपि खरीमनुगच्छति तद्वत् ॥ ११ ॥ एवंभूतस्य सर्वं साधनं व्यर्थमित्याह । किमिति । त्यागेन संन्यासेन । विविक्तेन एकांतसेवया । मौनेन वाङ्नियमेन ॥ १२ ॥ अनुतप्तः सन्नात्मानं

सा । आयुःखण्डा वयोभागाः ॥ * ॥ ० ॥ ७ ॥ तदेव आयुःखण्डविस्मरणम् । "सुते यस्मिन्नस्तमेति सुते यस्मिन्नुदेति च । अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ॥" इत्यमरः ॥ * ॥ अस्मरणमेवाह–नाहमिति । सूर्येऽस्ते सति स्वपन्नभिनिर्मुक्तः, सूर्येऽभ्युदिते सति स्वपन्नभ्युदितः । अहं सूर्यासूर्यं न वेद नाज्ञासिषम् । सूर्य इति द्वितीयार्थे प्रथमा । वेदेति भूतेऽपि लट् "सुते यस्मिन्नस्तमेति सुते यस्मिन्नुदेति च । अंशुमानभिनिर्मुक्ताभ्युदितौ च यथाक्रमम् ॥" इत्यमरः । कुतो नाज्ञासीरत आह–अमुया उर्वश्या मुषितश्चोरितविवेकसर्वस्व इत्यर्थः । बत खेदे ॥ ८ ॥ आत्मनो मनसः संमोहो ज्ञानाभावः । नरदेवेषु शिखामणिरुत्कृष्टः ॥ * ॥ ० ॥ ९ ॥ अत्रानौचित्यं परिहरन्नाक्षिपति–नन्विति । प्रणयः स्नेहः । अनुनयः आनुकूल्यम् । अत्र अप्सरसि । तत्प्रणयकुपितत्वम् । आत्मानं माम् ॥ * ॥ अत्रोर्वश्याम् । तत् प्रणयकुपितत्वम् ॥ १० ॥ स्वात्मनिन्दामभिनयति–किञ्चेति । अनुभावस्तत्त्वनिश्चयः । ईशित्वं योगशक्तिविशेषः । दृष्टान्तेन निर्लज्जस्य सर्वे गुणा अगुणा भवन्तीत्युक्तम् ॥ * ॥ ननु त्वं महातेजःप्रभावैश्वर्यः कथमेवं दैन्यमालम्बसे तत्राह–कुत इति । तस्य मम ईशित्वं नियन्तृत्वम् ॥ ११ ॥ एवंभूतस्य स्त्रीजितस्य । साधनं योगादि । विद्यया शास्त्राभ्यासेनाध्यात्मविचारेण वा । तपसा कृच्छ्रादिना । श्रुतेन शास्त्रश्रवणेन । विविक्तेन एकान्तसेवनेन ॥ * ॥ एवंभूतस्य स्त्रैणस्य विद्यया शास्त्रार्थज्ञानेन, तपसा स्वधर्मेण, श्रुतेन शास्त्रश्रवणेन ॥ १२ ॥ स्वार्थस्य आत्मतत्त्वस्य । गौर्वृषभः स यथा धावन्तीमपि गामनुधावति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेवतो वर्षपूगान्मे उर्वश्या अधरासवम् ॥ न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा ॥ १४ ॥ पुंश्चल्याऽपहृतं चित्तं को न्वन्यो मोचितुं प्रभुः ॥ आत्मारामेश्वरमृते भगवंतमधोक्षजम् ॥ १५ ॥ बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः ॥ मनोगतो महामोहो नापयात्यजितात्मनः ॥ १६ ॥ किमेतया नोऽपकृतं रज्ज्वा वा सर्पचेतसः ॥ रज्जुस्वरूपाविदुषो योऽहं यदजितेंद्रियः ॥ १७ ॥ क्वायं मलीमसः कायो दौर्गंध्याद्यात्मकोऽशुचिः ॥ क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः ॥ १८ ॥

निंदति द्वाभ्याम् । स्वार्थस्येति । अकोविदमज्ञातारम् । गोखरवत् गौरिव खर इवेति ॥ १३ ॥ अधरासवं सेवमानस्यात्मभूर्मनसिजः पुनःपुनरुद्भवन् ॥ १४ ॥ एवमष्टभिर्निर्वेदो निरूपित इदानीं तस्य विवेकमाह दशभिः । पुंश्चल्येति । अयं भावः । कर्मभिर्देवानिष्ठा दुःखमेव प्राप्तोऽस्म्यतः परमेश्वरमेव भजेयमिति ॥ १५ ॥ परमेश्वरप्रसादं विना देवैरुपदिष्टादपि वेदवाक्यान्मोहो न निवर्तते इत्याह । बोधितस्यापीति । देव्या उर्वश्या सूक्तवाक्येन यथार्थवचनेन "पुरूरवो मा मृथा मा प्रतप्तो मा त्वा वृकासो अशिवास उक्षन् ॥ न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येताः ॥" इत्यनेन ॥ १६ ॥ पूर्वं 'पुंश्चल्याऽपहृतं चित्तम्' इत्यादिना तस्या अपकारोऽनुस्मृत इदानीं ममैवायमपराध इत्याह । किमेतयेति । नोऽस्माकं कामिनामेतया किमपकृतं न किंचिदपि । यथा रज्जुस्वरूपाविदुषो रज्जुद्रष्टुः पुंसस्तस्यां सर्पकल्पनया खिद्यतोऽपि रज्ज्वा किमपि नापकृतं तद्वत् । यद्यस्माद्योऽहमेवंभूतः स एवाजितेंद्रियत्वादपराधीत्यर्थः ॥ १७ ॥ ननु तथापि सैव सौगंध्यप्रेमादिगुणैः संमोहमूलमित्याशंक्य तेऽपि स्वमतिपरि

जितो वशीकृतः ॥ * ॥ स्वार्थस्य मुक्तिहेतुविचारस्य । ईश्वरतां राजराजताम् ॥ १३ ॥ अधरासवम् अधरमधु ॥ * ॥ ० ॥ १४ ॥ तस्य पुरूरवसः । कः प्रभुर्न कोऽपीति तात्पर्यमाह—अयं भाव इति । अतो दुःखनिवृत्तये ॥ * ॥ नन्विदानीं तस्मादधरासवात्केन मोचितः प्राप्तदशवैतृष्ण्योऽसि तत्राह—पुंश्चल्येति । मोचितुं मोचयितुम् । आत्मारामेश्वरमृत इति आत्मारामोऽपि मादृशस्य देहारामस्य चित्तं प्रायो न शक्नोति किंत्वात्मारामेश्वरः परमेश्वर एव शक्नोतीति भावः । तत्र हेतुः निरतिशयैश्वर्यमेवेत्याह—भगवन्तं मन्मोचने परमसमर्थम् अधोक्षजम् अधः कृतं तिरस्कृतमक्षजमैन्द्रियकं ज्ञानं यस्मात्तम् ॥ * ॥ दीपिका तु—भगवन्तमृते इति—भगवानेव भक्तस्य चित्तं मोचयितुं प्रभुर्नान्ये देवा इत्यर्थः । अत एव परमेश्वरमेव भजेयमिति भावार्थोल्लेखः ॥ १५ ॥ श्रुत्यर्थमाह—हे पुरूरवस्त्वं मा मृथा मरणं न याहि । मा प्रपप्तः कामपारवश्येन भृशं पतितो मा भूरित्यर्थः । प्रपप्त इति पततेर्यङ्लुगंतरूपम् । अभ्यासदीर्घाभावादिश्छान्दसः । इमे अशिवासोऽशुद्धिहेतवो वृकासो वृकास्त्वा त्वां मा उक्षन् मा स्माद्युः न लालाजलेन प्रोक्ष्य भक्षयेयुरित्यर्थः । स्त्रीसम्बन्धीनि सख्यानि "ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति । भुंक्ते भोजयते चैव षड्विधं सख्यलक्षणम् ॥" इत्युक्तलक्षणमित्युक्तानि सदातनानि न सन्ति यथा शालावृकाणां हृदयानि स्त्रीणामेता एतानि हृदयानि तथा छान्दसत्वाच्छ्यादिलोपः । लुप्तोपमात्र बोध्येति । अजितात्मनोऽवशीकृतचित्तस्य ॥ * ॥ तथैवोपदिष्टाद्वैराग्यात्तव मोहोऽपगतस्तत्राह—बोधितस्यापि मम नापयाति नापययौ । मन्त्रार्थस्तु—मा प्रतप्तः मद्विरहेण मा प्रतप्तो भव हे पुरूरवस्त्वं मृथा मा म्रियस्व । अशिवासः अमंगलाः । वृकास इन्द्रियलक्षणा वृकास्त्वा त्वां मा अद्युर्भक्षयेयुः । इन्द्रियवशो मा भवेत्यर्थः । स्त्रैणानि स्त्रीसम्बन्धीनि सख्यानि विश्वासा न सन्ति तासु विश्वासो न कर्तव्य इत्यर्थः । यत एता एतासां स्त्रीणां हृदयानि शालावृकाणां शुनामिव नवनवाकांक्षीणीति ॥ १६ ॥ स्वापराधं स्मृत्वाह—एतया उर्वश्या । एवंभूतोऽन्यस्मिन्नन्यबुद्धियुतः । इत्यर्थ इति—रज्जुसर्पदर्शनभीत्या पाते रज्ज्वा अपराधो नास्तीति भावः ॥ * ॥ ० ॥ १७ ॥ अत्राक्षिपति—नन्विति । सैवाप्सरा एव । तेऽपि सौगन्ध्यप्रेमादिगुणा अपि । अतिमलिनः "वहद्रुहलदूषिकं तुलितमुत्पलेनेक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः ॥ किमात्मनः किं सुहृदामिति यो नावसीयते ॥१९॥ तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते॥
अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः ॥ २० ॥ त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूये रमतां कृमीणां कियदंतरम् ॥ २१ ॥

कल्पिता एवेत्याह चतुर्भिः । कार्यमिति । मलीमसोऽतिमलिनः । सुमनसां कुसुमानामिव गंधसौकुमार्यादिसौमनस्यं शोभनमनोभावो वा ॥ १८ ॥ ममत्वमपि तस्मिन्प रिकल्पितमेवेत्याह । पित्रोः किं स्वं कायः जनकत्वात् । नु वितर्के । भार्याया वा भोगप्रदत्वात् । अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वादुक्तम् । स्वामिनो वाऽधीनत्वात् । अग्नेर्वा अंत्येष्ट्यां तदाहुतित्वात् । श्वगृध्रयोर्वा भक्ष्यत्वात् । किं वात्मनः तत्कृतशुभाशुभभागित्वात् । सुहृदां वा उपकारित्वात् । एवं यो न निश्चीयते ॥ १९ ॥ तुच्छा कृमिविड्भस्मलक्षणा निष्ठा अंतो यस्य तस्मिन् काये कलेवरे प्रियत्वेन गृहीते । विषंगमेवाह । अहो इति । सुनसं शोभननासिकम् ॥ २० ॥ अतो गुणारोपेण रममाणा

मुखं च बहुथूत्कमप्युपमितं सुधारश्मिना । स्तनौ पिशितपूरितौ कनककुम्भवद्वर्णितौ बुधैरहह रागिभिः किमिह युक्तमुक्तं वचः ॥ ” इति विश्वम्भरात्रिपाठयुक्तेः । अध्यासोऽन्यस्मिन्नन्यत्वकल्पनमतस्मिंस्तद्बुद्धिरिति यावत् ॥ * ॥ ० ॥ १८ ॥ अन्यदाह–ममत्वमपीति । अत्र स्त्रीवर्णनप्रकृते । एतत् पुरुषवर्णनमनुपयुक्तं प्रकृतानुपयोग्यपि । न्यायोऽत्र स्वत्ववर्णनरूपः स च स्त्रीवत्पुरुषशरीरेऽपि तुल्य एवात उक्तं भार्याया इति । अन्त्येष्ट्यां चरमसंस्कारे तदाहुतित्वात् तस्याग्नेराहुतिरूपत्वात् । आत्मनः स्वस्यैव । तत्कृतयोः शरीरकृतयोः शुभाशुभयोः पुण्यपापयोर्भागित्वात् । एवमित्थम् । यः कायः ॥ * ॥ ० ॥ १९ ॥ तस्मिन्काये । कले शुक्रेऽव्यक्तमधुरध्वनौ वा । वरं श्रेष्ठमिति व्युत्पत्तेः प्रियपर्यायत्वाद्वरशब्दस्य प्रियत्वेन गृहीत इत्यर्थः । तुच्छाऽसती निष्ठा स्थितिः ‘ स्यादल्पासत्ययोस्तुच्छे ’ इति धरणिः । ‘ निष्ठा याच्ञास्थितिसिद्धिव्यव स्थानशनेषु च ’ इति निरुक्तिः । विषंगमासक्तिम् ॥ * ॥ ० ॥ २० ॥ स्नायुर्नाडी । मेदः शुद्धमांसस्नेहः । मज्जाऽस्थ्यन्तर्गतस्नेहः । पूयमामासृक् । रमतां नृणां कियदन्तरं कियानवकाशो न कियदपीत्यर्थः । साक्षान्नरकमेतन्नारीशरीरम् । तदुक्तम्–“दुर्गन्धयोनिकृमिकीर्णगभीरकुण्डं दन्तक्षतक्रकचदारुणयातनाढ्यम् । निर्मज्जनाय किल नारकिणां नराणां नारीमयं निरयमेतदकारि धात्रा ॥ ” । किञ्च–“ त्वग्यत्र स्याद्व्यवधा यिका यदि तदा ज्ञातुः कथं कस्य वासृग्लिप्तामिषपिण्डके परिचयो नारेऽथवा कौक्कुरे । मृद्वंगीति च सुन्दरीति च तडिद्वल्लीति मूढात्मनां दीव्यद्दीपशिखेति का मतिरियं त्वङ्मात्रगुप्तामिषे ॥ लालाश्लेष्मधरे विगन्धविवरे पूर्णेन्दुबिम्बीयता पिण्डीभूतनिरास्थिमांसरुधिरे सौवर्णकुम्भीयता । मूत्रोद्गारिणि पायुवायुविरसे रन्ध्रे रतिं कुर्वता मोहान्धेन विदग्धतां प्रथयता नायुःक्षयो गण्यते ॥ ” किञ्च–“ अनर्थानां मूलं परमलघुतातूलमशुचि स्वभावानां धाम प्रभवनवधाम स्फुटतरम् । समाधीनां व्याधिः शिवचरणयोर्विस्मृतिविधावपस्मारः कोऽयं रुचिर इव नारीति निरयः ॥ ” इत्यादिवाक्यैः कामार्तानां नारी निरयोपमापि सुष्ठु प्रतीयतेऽतः कामत्याग पुरःसरं हरिभक्तिरेव विधेया । तदुक्तम्–“ यो धर्मद्रुमकर्तनाय कठिनः स्फीतः कुठारः कृतो यश्चार्थोच्चयशुष्कदारुदहने विश्रान्तवैश्वानरः । योऽयं मुक्तिमृगीविहिंसनविधौ शार्दूलवत्क्रीडितस्तेनालं मदनेन वै कुरुत रे कृष्णे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् ॥ विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यथा ॥ २२ ॥ अदृष्टादश्रुताद्भावान्न भाव उपजायते ॥ असंप्रयुंजतः प्राणाञ्छाम्यति स्तिमितं मनः ॥ २३ ॥ तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः ॥ विदुषां चाप्यविश्रब्धः षड्वर्गः किमु मादृशाम् ॥ २४ ॥ श्रीभगवानुवाच ॥ एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय ॥ आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः ॥ २५ ॥ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ॥ संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः ॥ २६ ॥ संतोऽनपेक्षा मच्चिताः प्रशांताः समदर्शिनः ॥ निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः ॥ २७ ॥

मादृशाः कृमितुल्या इत्याह । त्वगादिसंहतौ तत्संघाते देहे । विण्मूत्रादिसंहतौ रमतां कृमीणाम् अस्माकं वा ॥ २१ ॥ यद्यप्येवं बीभत्सिता एव स्त्रियोऽथापि नोपसज्जेताव लोकनादिनापि संगं न कुर्यात् । अर्थविद्विवेकी । अत्र हेतुः । विषयेति ॥ २२ ॥ ननु क्वचिन्निमीलितनयनादेरपि मनःक्षोभो दृश्यते । सत्यम् । सोऽपि पूर्वदर्शनादिकं विना न भवतीत्याह । अदृष्टादिति । भावात्पदार्थात् । भावो मनःक्षोभः । अतः प्राणानिंद्रियाण्यसंप्रयुंजतोऽनियच्छतः । विषयेन्द्रियसंयोगमकुर्वत इत्यर्थः । स्तिमितं निश्चलं सत् ॥ २३ ॥ इंद्रियैः कृत्वा । अविस्रब्ध अविश्वसनीयः । मादृशामविवेकिनाम् ॥ २४ ॥ फलितमाह द्वाभ्याम् । एवमिति । नृपेषु देवेषु च दीव्यतीति तथा ॥ २५ ॥ उक्तिभिर्हितोपदेशैरिति ॥ २६ ॥ तीर्थदेवादिसंगादपि सत्संगः श्रेयानिति दर्शयति । तत्र सतां लक्षणमाह । संत इति । अत्र विशेषणाष्टकस्य यथेष्टं हेतुहेतुमद्भावः ॥ २७ ॥

सतृष्णं मनः ॥ '' इत्यलं प्रसक्तानुप्रसक्तेन ॥ * ॥ ० ॥ २१ ॥ बीभत्सिता निन्दिताः । अत्र संगाभावे । अन्यदा विषयेन्द्रियसंयोगाभावे मनःक्षोभो नास्तीत्यर्थः ॥ * ॥ ० ॥ २२ ॥ अत्राक्षिपति—नन्विति । सत्यमित्यर्द्धाङ्गीकारे । सोऽपि निमीलितनयनादिमनःक्षोभोऽपि । आदिना श्रवणस्पर्शादिग्रहः । यतो विषयेन्द्रियसंयोगान्मनः क्षुभ्यति अतो हेतोः । नियच्छतः विषयेभ्य आकृष्य स्ववशं कुर्वतः पुंसः शाम्यति भगवदेकनिष्ठं भवतीत्यर्थः ॥ * ॥ असंप्रयुञ्जतः स्त्रीविषये न सम्यक्प्रकारेण युञ्जानस्य ॥ २३ ॥ उक्तं निगमयति—तस्मादिति । यस्मात्सङ्ग एव दोषहेतुस्तस्मादित्यर्थः । स्त्रैणेषु स्त्र्यनुरागिषु । षण्णां मनःषष्ठानां पञ्चेन्द्रियाणां वर्गः समूहः किमु कथं विश्वसनीयः स्यादित्यर्थः ॥ * ॥ षड्वर्गः षडिन्द्रियवर्गः ॥ २४ ॥ स पुरूरवाः । अथो अतः । आत्मनि चेतसि । ज्ञानेन मदवगत्या विधूतो नष्टो मोहः स्त्र्याद्यनुरागो यस्य स तथा ॥*॥ आत्मनि मनस्यात्मानं प्रेमास्पदं मामवगम्य भक्त्याऽनुभूय उपारमद्भक्त्येष्टदेवस्य मम स्मरणपरो बभूवेत्यर्थः । ननु मोहलक्षणप्रतिबन्धके सति कथमुपरामः संगच्छेत तत्राह—ज्ञानेति । ज्ञानमत्र भगवज्ज्ञानमेव ग्राह्यं न तु निर्विशेषब्रह्मानुसन्धानम् । "आत्मारामेश्वरमृते भगवन्तमधोक्षजम्" इति तद्वाक्यात् । अतो दुःसङ्गमुत्सृज्येत्युत्तरग्रन्थस्वारस्याच्च ॥ २५ ॥ जन्मप्रभृत्यभ्यस्तो दुःसङ्गस्त्यक्तुमशक्य इति न मन्तव्यं सत्सङ्गेन शिथिलीभूतस्य त्यागः सुलभ एवेत्याशयेनाह—तत इति । यतस्तृणगूढावलम्बरहितकूपपातवद्दुःसंगोऽनर्थहेतुस्ततस्तस्माद्धेतोः । तेऽस्य किं कुर्वन्तीति चेदाह—सन्त एतस्य मनोवाक्कायकर्मभिः सम्यक् शरणं गतस्य पुंसो मनसो व्यासंगं दुष्टेषु सङ्गं पदार्थासक्तिं वा उक्तिभिरित्युक्त्या देवादिषूक्तेरभावात्संशयच्छेदासमर्थत्वात्सतां तद्वत्त्वेन तच्छेदसमर्थत्वात्तत्सङ्ग एव वरीयानिति भावः । आदिना मूढतपस्व्यादिग्रहः ॥ * ॥ व्यासंगं विरुद्धामासक्तिं सन्त एवेत्येवकारेण सुकृततीर्थदेवशास्त्रज्ञादीनां न तादृशं सामर्थ्यमिति ज्ञापितमिति **विश्वनाथः** ॥ * ॥ असत्सङ्गत्यागेऽपि न किञ्चित्किन्तु सत्संगेनैवेत्याह—तत इति । यतः संगत्यागेन पुरूरवाः कृतार्थोऽभूत्ततो हेतोः ॥ ॥ २६ ॥ के ते सन्त इति चेत्सतां लक्षणं स्वरूपमाह—अनपेक्षा निर्लोभाः । विविधनामरूपबाधेन समानुगतमद्रूपसाक्षिद्दर्शिनोऽतः प्रशान्ता देहगेहादिनामरूपबाधेन निर्ममा निरहङ्काराश्च अहंममाद्यभावान्निर्द्वन्द्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषु नित्यं महाभाग महाभागेषु मत्कथाः ॥ संभवंति हिता नृणां जुषतां प्रपुनंत्यघम् ॥ २८ ॥ ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः ॥ मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि ॥ २९ ॥ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ॥ मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि ॥ ३० ॥ यथोपश्रयमाणस्य भगवंतं विभावसुम् ॥ शीतं भयं तमोऽप्येति साधून्संसेवतस्तथा ॥ ३१ ॥ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायनम् ॥ संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जताम् ॥ ३२ ॥

न च तेषूपदेशापेक्षाऽपितु केवलं तत्सन्निधिरेव तारयतीत्याह तेष्विति सप्तभिः ॥२८॥ ताः कथाः श्रवणादिभिरेव मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंति ॥ २९॥३०॥ विभावसुमग्निं सेवमानस्य । अप्येति नश्यति । तथा कर्मजाड्यमागामिसंसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः॥ ३१ ॥निमज्ज्योन्मज्जतामुच्चावचयोनीर्गच्छताम् ।परमायनं निष्परिग्रहाश्च । यद्वा—यथेष्टमेव स्वाम्युक्तपन्था एव श्रेयान् ॥ * ॥ सन्त एव के ते ये स्वसंगिशुभप्रदास्तेषामुक्तयश्च का इत्यपेक्षायामाह—सन्त इति द्वाभ्याम् । मच्चित्ता इति विशेष्यम् । तस्य चानपेक्षत्वादिकं स्वरूपगुणानुवादमात्रम् । 'विषयान्ध्यायतश्चित्तम्' इत्यादेरिति **संदर्भः** ॥ * ॥ अनपेक्षाः कर्मज्ञानादीन्स्वार्थं देवमनुष्यादींश्च नापेक्षन्त इति ते तथा । तर्हि त्वामपि नापेक्षन्ते तत्राह—मच्चित्ताः । त्वच्चित्ताः कंसादयोऽप्य भूवंस्तत्राह—प्रशान्ता अक्रोधनाः । यदि तान्केचिद्विषन्ति तर्हि तेषु ते कथमक्रोधनास्तत्राह—समदर्शिनः स्वबन्धुशत्रुतटस्थादिषु तुल्यदृष्टयः । तत्र हेतुः अहङ्कारजय एवेत्याह—निर्ममा निरहङ्कारा इति । अत एव माना पमानयोस्तुल्यत्वान्निर्द्वन्द्वाः । न पुत्रकलत्रादिमत्त्वेनैतादृशत्वं संभवेत्तत्राह—निष्परिग्रहाः त्यक्तपरिग्रहास्त्यक्ततदासक्तयो वा ये मद्भक्तास्ते सन्तः ॥ २७ ॥ सत्संगे सत्यप्युपदेशं विना कथं मनोव्यासंगनिवृत्तिरिति चेदाह—न चेति । तेषु सत्सु पूर्वपुण्यवतामेव सत्संगो भवतीति सूचयन्नाह—महाभागेति । हि यतस्ता मत्कथाः जुषतां शृण्वतां पुनन्ति नाशयन्ति ॥ * ॥ तेषामुक्तयो हि मत्कथा एवेत्याह—तेष्विति । प्रपुनन्ति प्रशब्देन तेषां संगमात्रस्यैव पावनत्वं तदुत्थकथायास्तु किमुतेति व्यञ्जितम् ॥ २८ ॥ ताः कथाः । अनुमोदन्ति तच्छ्रवणं श्लाघन्ते । ननु 'भक्तिः पुनाति मन्निष्ठान्' इत्याद्युक्तेः किं कथाभिरिति भक्तिहेतुत्वमपि कथानामेव 'विबुद्धय भक्त्यैव कथोपनीतया' इति ब्रह्मस्तुत्युक्तेः । ''कैवल्यसंमतपथस्त्वथ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात्'' इति द्वितीयस्कन्धोक्तेश्च । अत उक्तम्—'भक्तिं विन्दन्ति ते मयि' इति ॥ * ॥ **दीपिका**—कथाविषयकमादरणमादृतिः सा विद्यते येषां ते आदृताः । अर्शआदित्वान्मत्वर्थीयोऽच् । भक्तिं प्रेमलक्षणाम् ॥ २९ ॥ भक्तिरेव परमपुरुषार्थ इत्याह—भक्तिमिति । किमवशिष्यते न किमपि 'सर्वे पदा हस्तिपदे निमग्नाः' इति न्यायेन सर्वपुरुषार्थस्य भक्त्यन्तर्भूतत्वादिति भावः । यद्वा—मय्यनन्तगुणे ब्रह्मणि यो निरतिशयप्रेमास्पदत्वेनानन्दः सर्वावस्थासु भास्यद्वैतानुभवरूपः क्षेत्रज्ञस्तदात्मनि प्रत्यगभिन्ने भक्तिं स्वरूपानुसन्धानं लब्धवतः किमन्यदवशिष्यते ''अतोऽन्यदार्त्तम्'' ''नेह नानास्ति'' इत्यात्मातिरिक्तसर्वबाधेन न किञ्चित्प्राप्यं कृत्यं वाऽवशिष्यत इत्यर्थः ॥ * ॥ भक्तेस्तु भक्तिरेव फलमित्याह—भक्तिमिति । तत्र हेतुः—मयीति । ब्रह्मणि सर्वतो बृहत्तमे तदेवाह—आनन्देति । ''आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'' इत्यादेः ''को ह्येवान्यात्कः प्राण्यात्'' इत्यादेश्च श्रुतेरानन्दस्यैव परमबृहत्तमत्वम्, तत्राप्यनन्तगुणे मधुरानन्तगुणवैचित्रीमति । ततश्च परमाति परमबृहत्तमत्वमित्यर्थः । सर्वांशेन पूर्णत्वात् । एवंभूते च या भक्तिः सैव परमपुरुषार्थतयोपयुज्यते तादृशानन्दात्मकत्वादिति भावः ॥ * ॥ **विश्वनाथस्तु**—किमप्यन्यत्फलमवशिष्यते न किमपि भक्तेरेव सर्वफलरूपत्वादिति भावः । तत्राप्यनन्तगुणे अनन्तसच्चिदानन्दात्मकाहङ्कारममकारादिगुणे इति प्रेमा ब्रह्मणीति मुक्तिः । आनन्दानुभवेति ब्रह्मसुखानुभवोऽपि तस्यानुषंगिकः स्यादिति भावः ॥ ३० ॥ इत्यर्थ इति—' सत्संगतिः कथय किं न करोति पुंसाम्' इत्याद्युक्तेः सर्वथा कल्याणावाप्तये सत्संगो विधेय इति भावः ॥ * ॥ तस्याश्च सत्संगैकजीवातुत्वात् पूर्वोद्दिष्टानां सतां स्वरूपगुणमाह—यथेति चतुर्भिः । उपश्रयमाणस्य फलविशेषकामनया यज्ञार्थं सेवमानस्य । यद्वा—स्वीयौदनसिद्ध्यर्थं सेवमानस्य अप्येति नश्यति । तथैव भजनसिद्ध्यर्थं साधून्संसेवमानस्य तन्मूलं भयकारणं तमःशब्देन भजनविघ्नो वा ॥ ३१ ॥ ० ॥ * ॥ शान्ता मन्निष्ठबुद्धयः । अत एव ब्रह्मविदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहम् ॥ धर्मो वित्तं नृणां प्रेत्य संतोऽर्वाग्बिभ्यतोऽरणम् ॥ ३३ ॥ संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः ॥ देवता बांधवाः संत संत आत्माऽहमेव च ॥ ३४ ॥ वैतसेनस्ततोऽप्येवमुर्वश्यालोकनिःस्पृहः ॥ मुक्तसंगो महीमेतामात्मारामश्चचार ह ॥ ३५ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवाद ऐलगीतं नाम षड्विंशोध्यायः ॥ २६ ॥ उद्धव उवाच ॥ क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो ॥ यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ ॥ १ ॥

परमाश्रयः ॥ ३२ ॥ किंच यथा प्राणिनामन्नमेव प्राणो जीवनम् । अहमेव यथा शरणम् । धर्म एव यथा प्रेत्य परलोके वित्तम् । तथा संत एवार्वाक् संसारपाताद्बिभ्यतः पुंसः अरणं शरणम् ॥३३॥ किंच संतश्चक्षूंषि सगुणनिर्गुणज्ञानानि । अर्कः पुनः सम्यगुत्थितोऽपि बहिस्तदप्येकमेव चक्षुरित्यर्थः॥ ३४॥ अध्यायार्थमुपसंहरति । वैतसेन इति । सुद्युम्नभावेनोमावनं प्रविष्टस्य वीता सेना स्त्रीभावं प्राप्ता यस्य तस्य स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः पुरूरवाः। एवमुक्तप्रकारेणोर्वश्या लोकात्स्थानादवलोकनाद्वा निःस्पृहस्ततोऽपि सत्संगादपि हेतोर्मुक्तसंगः सन्नात्मारामो भूत्वा यथेष्टं चचारेति॥ ३५॥इति श्रीमद्भागवत एकादशस्कन्धे श्री०टीकायां पुरूरवोगीतं नाम षड्विंशोऽध्यायः ॥२६॥ सप्तविंशे क्रियायोगः सद्यश्चित्तप्रसादकः ॥ सर्वकामाप्तिहेतुश्च सांगः प्रोक्तः समासतः ॥ १ ॥ रागाद्याकुलचित्तानां कुतोऽसंगादिसंभवः ॥ इति कृष्णार्चनं भद्रमनुस्मृत्यानुपृच्छति ॥ २ ॥ क्रियायोगमिति । भवदाराधनं भवतस्तवाराधनरूपम् । यस्मादिति कारणाधिष्ठानादिप्रश्नः । सर्वकारकाणां निमित्तत्वस्याविशिष्टत्वात् ।

मद्विभूतिरूपाः सम्यगाविर्भावं ब्रह्मापि जानन्तः "मदीयं महिमानं च परं ब्रह्मेति शब्दितम्" इति ॥ ३२ ॥ दृष्टान्तपूर्वकं सन्माहात्म्यमाह–किञ्चेति । 'अरणं शरणे गतौ' इति निरुक्तिः ॥ * ॥ यथा प्राणिनामन्नार्थिनामन्नमेव प्राणाः अन्नं विना प्राणा न सिद्ध्यन्ति तथैव भक्तीच्छूनां सन्त एव भक्तिः तान्विना भक्तिर्न सिद्ध्यति, यथैवार्तानामनाथानामहमेव शरणं रक्षकस्तथैव भक्तीच्छूनां सन्त एव रक्षकाः, यथैव नृणां प्रेत्य मृत्वा कालपाशाद्बिभ्यतां धर्म एव वित्तं शरणं तथैव नरस्य भजनमार्गं प्राप्य वर्तमानस्य अर्वाक् इतस्ततः कामक्रोधादिवर्त्मपाशाद्बिभ्यतः सन्त एव भक्तिमार्गरक्षकाः शरणम् । यथा तथा शब्दौ गम्यावेवात्र ॥ ३३ ॥ अन्यदाधिक्यमाह–किञ्चेति । "चक्षुर्ज्ञाने दृशौ वाचि स्फुटायामिन्द्रियेऽपि च" इति निरुक्तिः । तदपि बहिरपि । इत्यर्थ इति–सतामनेकचक्षुःप्रदत्वादर्कादाधिक्यमस्तीति भावः ॥ * ॥ ननु भवानेवार्तानां शरणं चेत्किं सद्भिरित्याशङ्क्याह–किं बहुना, सतां मार्गे प्रतिष्ठासूनां नृणां सन्त एव सर्वनिर्वाहका इत्याह–सन्त एव मां साक्षाद्दर्शयितुं चक्षूंषि नवविधभजनानि दिशन्ति ददति । किञ्च–सूर्यं विना चक्षुर्भिरपि न कार्यसिद्धिरिति चेत् सन्त एव बहिःस्थितः सम्यगुत्थितोऽर्कः भजनचक्षुःप्रकाशक इति भावः । तस्माद्भक्तिवर्त्मचारिणां सन्त एव देवतास्तद्वत्पूज्या न त्विन्द्राद्याः, सन्त एव बान्धवा हितकारिणः न तु पितृपितृव्यमातुलादयः । "एक एव परो बन्धुर्विषमे समुपस्थिते । गुरुः सकलधर्मात्मा यत्राकिञ्चनगो हरिः॥" इत्युक्तेः सन्त एवात्मा प्रेमास्पदं न तु देहो जीवात्मा वा । एवं व्यस्ततया तत्तद्गुणवत्तामुक्त्वा सामस्त्येन सर्वगुणवत्तामाह–अहमेव चेति । अहमिष्टदेवो न तु तांस्त्यक्त्वा प्रतिमारूपोऽहमस्मीति भावः ॥ ३४ ॥ ० ॥ * ॥ एवमभीष्टमुक्त्वा प्रकरणमुपसंहरति–न केवलं प्राचीनसंस्कार एव विरागे हेतुः किन्तु अर्वाचीनसत्संगोऽपीत्यपेरर्थः । एवमस्मिन्प्रकरणे सत्संगलक्षणा भक्तिरेवाभिधेयेति ज्ञेयम् ॥ ३५ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे षड्विंशोऽध्यायः ॥ २६ ॥ क्रियायोगोऽर्चनप्रकारः । सांगः सोपकरणः (१) । असंगः त्यागः । भद्रं भद्रकरम् (२) । क्रियानिर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणाम् ॥ नारदो भगवान्व्यास आचार्योंगिरसः सुतः ॥ २ ॥ निःसृतं ते मुखांभोजाद्यदाह भगवानजः ॥ पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ॥ ३ ॥ एतद्वै सर्ववर्णानामाश्रमाणां च संमतम् ॥ श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥ ४ ॥ एतत्कमलपत्राक्ष कर्मबंधविमोचनम् ॥ भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरेश्वर ॥ ५ ॥ श्रीभगवानुवाच ॥ न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव ॥ संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ॥ ६ ॥ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः ॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ॥ ७ ॥

यथेति कस्मिन्नधिष्ठानादौ केन प्रकारेणेति प्रश्नः । ये अधिकारिणः सात्वता भक्ताः ॥ १ ॥ अस्य पुनर्विशेषतः प्रश्ने कारणमाह चतुर्भिः । एतत्त्वदर्चनं निःश्रेयसकरं वदंति । अंगिरसः सुतो बृहस्पतिः ॥ २ ॥ निःसृतं त्वयोपदिष्टमित्यर्थः । देव्यै पार्वत्यै ॥ ३ ॥ सर्ववर्णानां त्रैवर्णिकानाम् ॥ ४ ॥ विश्वेश्वरा ये तेषामीश्वर ॥ ५ ॥ कर्मकांडस्य पूजाविधानस्य । नास्त्यंतो ग्रंथतः पारं वाऽनुष्ठानतो यस्य तस्य ॥ ६ ॥ वैदिक एव मंत्रो वैदिकान्येवांगानि च यस्मिन् पुरुषसूक्तादौ स वैदिकः । एवं तांत्रि

र्तकत्वं हि कारकत्वं सर्वेषां कारकाणां कर्त्रादीनां निमित्तत्वं क्रियां प्रति साक्षात्साधकत्वस्याविशिष्टत्वात्तुल्यत्वात् । तथाहि—"कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट् ॥" तत्र च कर्ता साक्षात्क्रियाजनकत्वेन, कर्म तु फलाश्रयत्वेन, करणं तु साधनत्वेन, सम्प्रदानं हि दानस्वीकर्तृत्वेन, अपादानं च विभागाश्रयत्वेन, अधिकरणमाधारत्वेन तत्तत्क्रियाहेतुरिति सर्वेषां यथायथं क्रियान्वयित्वमित्थं बोध्यम् । सात्वता भक्ताः । भक्तप्रियस्य तवैतत्कथनमुचितमित्यभिप्रेत्याह—सात्वतर्षभेति ॥ * ॥ उक्तलक्षणसत्संगसहिता भक्तिः पुत्रकलत्राद्यासक्तैर्दुर्लभाऽतस्तेषामपि निस्तारिकामागमोक्तार्चनभक्तिमनुसृत्य पृच्छति—क्रियायोगमिति । हे प्रभो इति केवलया सत्संगादिहीनयाऽप्यर्चनरूपया भक्त्या मोचयितुं समर्थोऽसीति भावः । हे सात्वतर्षभेति—सात्वतपदोदिताऽर्चकभक्ता एव ते ऋषभाः प्रिया अतस्तमर्चनप्रकारमेव मे ब्रूहीति भावः ॥ १ ॥ अस्य क्रियायोगस्य । मुनयः 'श्रेयो निःश्रेयसामृतम्' इत्यमरोक्तेर्मोक्षहेतुं वदन्ति; तान्कांश्चिन्नामतो निर्दिशति—नारद इति ॥ * ॥ प्रमाणयति—एतदिति द्वाभ्याम् । अंगिरसः सुत इति—तस्य भगवद्धर्मोपदेशे स्वगुरुत्वं व्यञ्जयति । युक्तञ्च तत्, श्रीभागवते तस्य संकर्षणसम्प्रदायित्वात् ॥ २ ॥ न केवलमृषिभिरेवोपदिष्टमपि तु भवतापीत्याह—निःसृतमिति । इत्यर्थ इति—'सूर्योऽग्निर्ब्राह्मणो गावः' इत्यारभ्य 'धिष्ण्येष्वेतेषु मद्रूपम्' इत्यादिनोक्तमिति भावः ॥ * ॥ न च वीतसंगानां स्मरणादिकं नरमात्राणामेव स्यात्तत्पुनरेतादिति वाच्यम्, यत एतदिति तेषामेव संमतत्वादिति भावः । मुखस्याम्भोजरूपकेणार्चनस्य मधुत्वमारोप्यते । तेन मादकत्वात्स्वयमेव रागादिविस्मरणमिति भावः । यत् अर्चनम् ॥ ३ ॥ • ॥ * ॥ अत्र सर्वाधिकारमाह—एतदिति । मानदेति—एतत्कथनेन सर्वेषां मानप्रदानं स्यात्सर्वहितकारित्वादस्येति भावः ॥ ४ ॥ एतत्कर्मत्वेऽपि कर्मबन्धमोचकमिति चित्रम् । कमलपत्राक्षेति कारुण्योत्पादनाय । विश्वेश्वरा ब्रह्मादयः ॥ * ॥ हे कमलपत्राक्षेति—त्वयैवार्चनमार्गस्याधिक्यं स्वनेत्रस्य कमलस्थाने समर्पणात्प्रकटितमिति भावः । हे विश्वेश्वराणां महापुरुषादीनामपीश्वरस्त्वमसि स्वयंभगवत्त्वात्तथापि पूजनमार्गस्योत्कर्ष एवासूचि स्वस्वरूपभूतस्यैव हरस्यार्चनादिति भावः । ननु त्वं मद्भक्तः परमानुरागी भवसि किं तवानेन तत्राह—भक्तायाऽप्यनुरक्तायाऽपि ब्रूहि ॥ ५ ॥ यथावदित्यव्ययं यथोचिते । अनुपूर्वशः ब्राह्मणादिक्रमेण अङ्गोपांगादिक्रमेण वा ॥ * ॥ परमप्रीतो भगवांस्तन्नाम्नैवामन्त्रयति—हे उद्धवेति । त्वमुत्कृष्टानामपि धवः स्वामी भविष्यसि मदर्चनप्रभावादिति भावः ॥ ६ ॥ एवं तान्त्रिक एव मन्त्रस्तान्त्रिकान्येवांगानि यस्मिन्नंगन्यासादिविधानबहुलपद्धतिग्रन्थे स तान्त्रिकः पौराणिकतान्त्रिकवैदिकमन्त्रैर्मिश्रः । आदिना षडक्षरद्वादशाक्षरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः ॥ यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ॥ ८ ॥ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाऽप्सु हृदि द्विजे ॥ द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममायया ॥ ९ ॥ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये ॥ उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना ॥ १० ॥

कोऽपि । मिश्रोऽष्टाक्षरादिः । मखः पूजा ॥ ७ ॥ यदा त्रैवर्णिको यजेत तदा विशेषमाह । यदा गर्भाष्टमैकादशद्वादशाब्दादिकाले स्वनिगमेन स्वाधिकारप्रवृत्तेन वेदेनोक्तं द्विजत्वमुपनयनम् ॥ ८ ॥ अर्चायां प्रतिमादौ ॥ ९ ॥ स्नाने विशेषमाह । उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः ॥ १० ॥

दिग्रहः । ईप्सितेन यथोचितेन । द्विजैर्वैदिकेन, स्त्रीशूद्राभ्यां पौराणिकेन, भ्रष्टविप्राणां कुण्डगोलकादिरूपाणां तान्त्रिकेण विधिना यथोचिता शालग्राममूर्त्याद्यन्यतमानां पूजा कार्या । "शालग्रामशिलास्पर्शाच्छूद्रश्चाण्डालतां व्रजेत्" इत्याद्युक्तेः । "स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम" इति पुराणान्तरे श्रीमुखोक्तेश्च । "शूद्रो वाऽनुपनीतो वा स्त्रियो वा पतितोऽथ वा । केशवं वा शिवं स्पृष्ट्वा नरकं प्राप्नुयाद्ध्रुवम् ॥ मूर्तिपूजा तु विहिता सदा स्त्रीशूद्रयोर्विभो । सति प्रेम्णि वर्जयित्वा शालग्रामं च नार्मदम् ॥" इत्यादि बहु निर्णयसुधाकरे प्रपञ्चितमस्माभिरिति । पाद्मे तु– "दीक्षायुक्तैः सदा शूद्रैर्मद्यपानविवर्जितैः । कर्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥" इति ॥ * ॥ इप्सितेनैवेति–स्वस्वाधिकारप्राप्ततया तत्रापि स्वश्रद्धानुसारेणेत्यर्थः । ततः स्त्रीशूद्राणां केवलस्तान्त्रिकः अन्येषां त्वन्यतरो मिश्रो वेति विवेक इति सन्दर्भः ॥ ७ ॥ वेदेन श्रुत्या स्मृत्या वोक्तम् । तथाह्याश्वलायनः– "गर्भाष्टमेऽष्टमे वाब्दे पञ्चमे सप्तमेऽपि वा । द्विजत्वं प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः ॥ द्वादशेऽब्दे वैश्यजातश्चतुर्थो न कदाचन ॥" इति । "वसन्ते ब्राह्मणं ग्रीष्मे राजन्यं शरदि वैश्यम्" इति आपस्तम्बः । वृद्धवसिष्ठोऽपि– "विप्रस्य क्षत्रियस्यापि मौञ्जी स्यादुत्तरायणे । दक्षिणे तु विशां कुर्यान्नानध्याये न संक्रमे ॥" इति । मनुस्तु– "ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे ॥" । गौणकालं मनुराह– "आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते । आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥" इति ॥ * ॥ मुख्यतया द्विजमेवाधिकृत्योपदिशन्नन्यानपि यथास्वमुपदिशति–यदेति ॥ ८ ॥ स्थण्डिलं संस्कृता भूमिः । वाशब्दश्चार्थे । स्वगुरुमित्युक्तेरादौ गुरुं संपूज्य मत्पूजनमिति प्रतीयते ॥ * ॥ तत्रापि शक्त्यनुसारेण पूजाधिष्ठानं विकल्पयति–प्रथमं त्वर्चायामेव विधिरशक्त्यैवोत्तरत्रेति भावः ॥ ९ ॥ धौतदन्तः कृतदन्तधावनः । "दन्तान्प्रक्षाल्य स्नायात्" इति छन्दोगपरिशिष्टात् । "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इतिवत्स्नानाधिकारसिद्ध्यर्थं दन्तधावनम् । व्यासस्तु– "प्रतिपद्दर्शषष्ठीषु नवम्यां श्राद्धसूर्ययोः । उपवासे जन्मदिने पर्वैः स्याद्दन्तधावनम् ॥ जिह्वाशुद्धिः सदा कार्या निषिद्धेऽपि दिने सदा । अलाभे दन्तकाष्ठानां निषिद्धे च तथा दिने ॥ अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥" । विष्णुः– "द्वादशांगुलिकं विप्रे काष्ठमाहुर्मनीषिणः । शूद्रविट्क्षत्रजातीनां नवषट्चतुरंगुलम् ॥" । नारसिंहे– "तिन्तिणी वेणुपृष्ठं च आम्रनिम्बौ तथैव च । अपामार्गश्च बिल्वश्च ह्यर्कश्चोदुम्बरस्तथा ॥ बदरीतिन्दुकास्त्वेते प्रशस्ता दन्तधावने । सर्वे कण्टकिनः पुण्या विना सरलकंटकम् ॥" इत्यलम् । शातातपः– "दन्तधावनमंगुल्या प्रत्यक्षं लवणं तथा । मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणम् ॥" मृत्तिका स्वयंमृतपशुमांसम् । विष्णुः– "प्राङ्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च । दक्षिणेन तथा कष्टं पश्चिमेन पराजयः ॥ उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च । पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात् ॥" दन्तधावनमन्त्रः– "अन्नाद्याय व्यूहध्वं सोमो एषामामिह भगवत् स मे मुखं प्रमार्ज्यते यशस्य च भगेन च" इति । शाखाभिमन्त्रणं तु– "आयुर्बलं यशो वर्चः प्रजापशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥" इत्यनेन कुर्यात् । तदकरणे वाराहे– "अकृत्वा दन्तशौचं हि यो हि मामुपसर्पति । सर्वकालकृतं कर्म तेन चैकेन नश्यति ॥" इति भगवदुक्तिः । स्नानमाह वैदिकमन्त्रैः– "इमं मे गंगे यमुने सरस्वति शतद्रु स्तोमं॰ स च ता परुष्ण्या आशिक्त्या मरुद्वृधे वितस्तया जिकीये शृणु ह्याशिषो मया" इत्याद्यैः । अस्यार्थः–हे गंगे हे यमुने हे सरस्वति हे शतद्रु हे मरुद्वृधे हे जिकीये मया ममाशिष आशंसाः शृणु हि शृणु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संध्योपास्त्यादिकर्माणि वेदेनाऽऽचोदितानि मे ॥ पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीम् ॥ ११ ॥
शैली दारुमयी लौही लेप्या लेख्या च सैकती ॥ मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता ॥ १२ ॥

किंच संध्योपासनादीनि कर्माणि आचोदितानि साकल्येन विहितानि यस्य यानि तैः सह मे पूजां कुर्यात् । नतु तानि परित्यजेदित्यर्थः । सम्यक् परमेश्वरविषय एव संकल्पो यस्य स सम्यक्संकल्पः तथाभूतः सन् कर्मपावनीं कर्मबन्धनिर्हारिणीम् ॥ ११ ॥ अर्चाभेदानाह सार्धेन । शैली शिलामयी । लौही सुवर्णादिमयी । लेप्या मृच्चंदनादिमयी । हृदि पूजायां मनोमयी ॥ १२ ॥

तेत्यर्थः । आशंसामाह—मे मदर्थे मदीयस्नानार्थं परुष्ण्या आशिक्त्या वितस्तया सह इमं स्तोमं स च ता अस्मिन्पुरोवर्तिस्नानजलस्तोमे समवेता भवतेत्यर्थः । अनेन जलमभिमन्त्र्य ततः "आपोहिष्ठा–" इत्यादिभिर्मार्जयेत् । ततः "समुद्रे ते हृदयमप्स्वन्तः सन्त्वाविशंत्वोषधीरुतापः यज्ञस्यत्वा यज्ञपते सूक्तोक्तौ नमो वाके विधेम स्वाहा" इत्याचामेत् । ततो जले निमज्याघमर्षणं जपेत् । तान्त्रिकमन्त्रास्तु–"अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत् । तीर्थं प्रकल्पयेद्विद्वान्मूलमन्त्रेण मन्त्रवित् ॥ ॐ नमो नारायणायेति मूलमन्त्रउदाहृतः ॥" । किञ्च–"विष्णोः पादप्रसूतासि वैष्णवी विष्णुपूजिता।पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात्॥ विष्णुपादार्घसम्भूते गंगे त्रिपथगामिनि । धर्मद्रवीति विख्याते पापं मे हर जाह्नवि ॥ तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत् । दिवि भुव्यन्तरिक्षे च तानि ते सन्ति जाह्नवि ॥ नन्दिनीत्येव ते नाम देवेषु नलिनीति च ॥ वृन्दा पृथिवी च विहगा विश्वकाया शिवा शिता।विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी॥क्षेम्या च जाह्नवी चैव शान्ता शांतिप्रदायिनी । एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् ॥ भवेत्सन्निहिता तत्र गंगा त्रिपथगामिनी ॥" ततो मृत्तिकालम्भनम्–"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपांसुरे" इति मन्त्रेण । मृद्ग्रहणादिनेत्यादिना गोमयग्रहः । तत्र मंत्रः–"ॐ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥" इति । यद्वा–"अघमर्षणमन्त्रेण त्रिरावृत्तेन नित्यशः । स्नानाचरणमित्येतत्समुदिष्टं महात्मभिः ॥" इति । "कालदोषादसामर्थ्यान्न शक्नोति यदा ह्यसौ । तदा ज्ञात्वा ऋषिभ्यस्तु मन्त्रैर्दृष्टन्तु मार्जनम् ॥' कालदोषाच्छैत्यादेः । असामर्थ्याद्रोगादिना परिश्रमेण वा । मार्जनं मन्त्रस्नानम् । तच्च–"शन्न आपस्तद्द्रुपदा आपो हिष्ठावमर्षणम् । एतैश्चतुर्भिर्मन्त्रैश्च मार्जनं समुदाहृतम् ॥" यद्वा–"सर्वेषु स्नानकल्पेषु गायत्रं स्नानमाचरेत् । गायत्र्या जलमादाय दशकृत्वोभिमन्त्र्य च ॥ शिरश्चांगानि सर्वाणि प्रोक्षयेत्तेन वारिणा । स्नानं गायत्रकं नाम सर्वपापप्रणाशनम् ॥" इत्यलं प्रसक्तानुप्रसक्तेन ॥ * ॥ मन्त्रैः 'अश्वक्रान्ते' इत्यादिमन्त्रैस्तथा गोमयमन्त्रैः "गन्धद्वाराम्" इत्याद्यैस्तीर्थावाहनगंगास्मरणादिभिश्च ॥१०॥ "सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यत्किञ्चित्कुरुते कर्म न तस्य फलभाग्भवेत् ॥" इति दक्षोक्तेः सन्ध्यानन्तरमेव कर्माधिकारो न ततः प्रागिति । इत्यर्थ इति–तत्त्यागे पूजावैयर्थ्यापत्तेरिति भावः । तैः सन्ध्यादिकर्मभिः सम्यक् पूजादौ संकल्पो देशकालादिकीर्तनलक्षणो यस्य स तथा । "संकल्पं च सदा कुर्यात्स्नानदानव्रतादिषु । अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति वा ॥" इति मार्कण्डेयोक्तेः । "तोयं पात्रेऽथवा हस्ते युक्तं दर्भतिलादिभिः । आदाय प्रयतो भूत्वा उपविश्यासने वरे ॥ ॐ तत्सदद्येत्युक्त्वादौ देशकालादिकीर्तनम् । कृत्वा स्वनामगोत्रोक्तिं प्रवरोक्तिं विधाय च ॥ देयनामाधिपावुक्त्वा स्वेहितोच्चारणं तथा । यत्र वाक्ये स विज्ञेयः संकल्पः पुण्यवृद्धिकृत् ॥" इति निर्णयसुधाकरे संकल्पस्वरूपमुक्तम् । कर्मबन्धनिर्हारिणीं मोक्षकरीम् । आदिनोर्द्ध्वपुण्ड्रादिग्रहः । तच्च "पुण्ड्रं हरिपदाकृति" इत्याथर्वणिकश्रुतेः नासिकार्द्धभागतः केशान्तं कार्यं सान्तरालं मध्यलेपरहितमधोनासिकाभागे पार्ष्ण्यधोभागसदृशमूर्द्ध्वपुण्ड्रमित्युच्यते । एतन्मुख्यमूर्द्ध्वपुण्ड्रमत्र विशेषस्त्वाधुनिकैः कल्पित एव । तच्च गोपीचन्दनसितचन्दनादिभिः सर्वाभावे जलेन वा । "ऊर्द्ध्वपुण्ड्रं विना सर्वं जपपूजादिकं वृथा" इत्युक्तेः ॥ * ॥ "सन्ध्याहीनेन विप्रेण कृतं कर्म निरर्थकम्" इति सन्ध्याया आवश्यकत्वम् । विप्रेणेत्युपलक्षणं द्विजातेः । कर्मापि सुकृतमेव न तु व्यभिचारादि । "सन्ध्योपासनमाद्यंग पित्र्यदैवतकर्मणाम्" इति वारतान्तव्युक्तेः ॥ ११ ॥ आदिना रजतादिग्रहः । "सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरम् ॥ उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ॥ १३ ॥
अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयम् ॥ स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनम् ॥ १४ ॥

प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा प्रतिमैव द्विविधा जीवस्य भगवतो मंदिरम् । यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति । प्रतिमाभेदेन विशेषमाह सार्धेन । उद्वासो विसर्जनम् ॥१३॥ अस्थिरायामर्चने विकल्पः । शालग्रामे न कुर्यात्सैकत्यां कुर्यादन्यत्र कुर्याद्वा न वेति । अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायाम् । अन्यत्र विलेप्यायां

सीसं कालायसं चैवमष्टौ लोहाः प्रकीर्तिताः ॥'' इति क्षीरस्वामी । 'स्यात्सर्वं तैजसं लोहम्' इत्यमरव्याख्यायां जगाद । भविष्ये—''सौवर्णी राजती ताम्री मृन्मयी च तथा भवेत् । पाषाणी धातुसंयुक्ता रीतिकांस्यमयी तथा ॥ शुद्धदारुमयी चापि देवतार्चा प्रशस्यते । अंगुष्ठपर्वादारभ्य वितस्तिं यावदेव तु । गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥'' इति । ''तत्र काष्ठेषु माधूकमानीय च वसुन्धरे । कृत्वा तत्प्रतिमां चैव प्रतिष्ठाविधिनार्चयेत् ॥'' इति वाराहे । लेप्या लेपननिवृत्ता औषधरससंलिप्ता शिलादिषु तत्कालरचितेत्यर्थः । लेख्या पट्टादिलिखितचित्रलक्षणा । सैकती तत्तत्कालोचितासिकताकृता मृन्मयीत्यर्थः । चित्तप्रतिबिम्बिता कृतिर्मनोमयी मानसपूजोपयोगिनी । मणिमयी स्फटिकसूर्यकान्तादिरचिता ॥ * ॥ प्राधान्यादर्चाया एव भेदानाह—शैलीति । सैकती तु सकामानामेव न तु प्रीतीच्छूनां तद्रक्षणारक्षणयोः प्रीतिविरोधात् ॥ १२ ॥ 'अप्रसिद्धकल्पनातः प्रसिद्धकल्पना न्याय्या' इत्याह—यद्वेति । कलास्तु—शशिनी, अभयदा, ब्रह्मेष्टदा, मरीची, ज्वालिनी, शांतिः, विद्या, प्रतिष्ठा, धृतिः, तमा, मोहा, रक्षा, निद्रा, सर्वव्याधिः, मृत्युः, क्षुधा, तृषा, रजा, स्वाहा, रतिः, कल्याणी, कामा, संविनी, क्रिया, वृद्धिः, छाया, धात्री, भ्रामणी, शोषिणी, ज्वरा, सिद्धिः, ऋद्धिः, दितिः, लक्ष्मीः, मेधा, कांतिः, स्वधा, प्रभा इत्यष्टात्रिंशत्सन्ति । एषां न्यासानां प्रयोगस्तु प्रतिष्ठापद्धतितोऽवसेयः । ''कलान्यासमृते देवो नैव सान्निध्यमृच्छति'' इति पूर्तकमलाकरोक्तेः । स्थिरायां मन्दिरादिषु मन्त्रैरचलविधिना स्थापितायाम् । उद्वासो विसर्जनम् । ''यावच्चन्द्रावनीसूर्यास्तिष्ठन्त्यप्रतिघातिनः । तावत्त्वयात्र देवेश स्थेयं भक्तानुकम्पया ॥'' इत्यादिमन्त्रैराकल्पवासस्य प्रतिज्ञातत्वात् ॥ * ॥ चलेत्यर्द्धकम् । द्विविधा प्रतिष्ठा प्रतिमा । जीवमन्दिरं यः सर्वेषां जीवानामाश्रयोऽहं तद्रूपमेव भावयेदित्यर्थः । वक्ष्यते च—'व्यस्तांगं मां प्रपूजयेत्' इति । ''अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितम्'' इति । 'शिरो मत्पादयोः कृत्वा' इति च संदर्भः ॥ * ॥ अचला श्रीजगन्नाथादिः । चला बालमुकुन्दादिः । उद्वासो विसर्जनमावाहनं च ते स्थिरायामचलायां चलायाञ्च न स्त इति प्रतिष्ठासमय एव नित्यस्थायित्वेनावाहनात् ॥ १३ ॥ अस्थिरायां शालग्रामादिरूपायाम् । '' शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते । शालग्रामार्चने नैवमावाहनविसर्जने ॥ '' इति स्कान्दोक्तेः । स्थण्डिले भूम्यादिलिखितयन्त्रादिरूपपीठपूजायां सैकतायां च द्वयमावाहनविसर्जने स्तः । अन्यत्र दारुमयीमणिमय्यादिषु कुर्याद्वा न कुर्यात्स्वेच्छैव तत्र प्रमाणम् । अविलेप्यायामंगेषु रंगविलेपरहितायां स्नानं विलेपवत्यां तु परिमार्जनमागन्तुकरजआदेरुत्तारणम् ''शिलायां स्नपनं कुर्यादन्यत्र परिमार्जनम्'' इति वचनात्तु शालग्राम एव स्नानावश्यकता नान्यत्र । वस्तुतस्तु '' प्रतिमायां त्वलंकारः प्रियो मे रघुनन्दन'' इति वचनाद्यथालंकारविरोधो न स्यात्तथा कर्तव्यम् । यत्र दर्पणे संमुखं भावनया स्नानं कारयेत् । किञ्च—''प्रतिमापट्टयन्त्राणां स्नानं नैव प्रकारयेत् । कारयेत्पर्वदिवसे यदा वा मलधारणम् ॥'' इति । ''शालग्रामे मणौ यन्त्रे स्थण्डिले प्रतिमायां वा देवमावाहयेत्'' इति गौतमगृह्यचतुर्दशाध्यायसूत्राच्छालग्रामाद्यन्यतमाधिकरणे देवं विष्णुमावाहयेत्पूजयेदित्यर्थः । यथाश्रुतार्थस्वीकारे ''शालग्रामशिलायां तु नावाहनविसर्जने । प्रतिष्ठिते तथा यन्त्रे प्रतिमायां च तादृशि ॥'' इति शास्त्रव्याकोपापत्तेः । एतेन ये वदन्ति 'शालग्रामार्चने न वेदः प्रमाणम्' इति ते निरस्ताः । सूत्राणामष्टधा [1]ब्राह्मणे गणितत्वात्

[1] ''प्रतिमापूजनाद्ब्रह्मत्वं च गत्वाऽमृतत्वं च गच्छति'' इति सामवेदीयप्रतिमोपनिषच्छ्रुतेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः ॥ भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि ॥ १९ ॥

लेख्यायां च परिमार्जनमेव ॥ १४ ॥ इदानीं सकामनिष्कामभेदेन विशेषमाह । द्रव्यैरिति । प्रकर्षेण सिद्धैः सुशोभनैः । अमायिनो निष्कामस्य भक्तस्य तु यथालब्धैः ।

'मंत्रब्राह्मणयोर्वेदः' इति वेदलक्षणस्य सूत्रेषु सत्त्वात् इति तत्त्वम् ॥*॥ अस्थिरायामस्थैर्यस्वभावायाम् । सैकत्यां लेप्यायां च विकल्पः, सा यदि कतिचिद्दिनानि स्थिरीकृता स्यात्तदा भक्तविश्वासभेदवशात्कश्चिन्न कुरुतेऽन्यथा तु कुरुते च । शालग्रामे तु नैव कुर्यात् । स्थण्डिले उपलिप्तस्थले वित्युपलक्षणं सैकत्यामपि कुर्यादेवेत्यर्थ इति **विश्वनाथः** ॥ * ॥ अविलेप्यायामिति लेख्याया दारुमय्याश्चोपलक्षणम् उपलक्षणत्वान्न सर्वदारुमयी ॥ १४ ॥ द्रव्यैः पुष्पचन्दनधूपदीपनैवेद्यादिभिः । तत्र जलं शङ्खेर्पितं सर्वमेव गंगोदकादप्यधिकं भवेत् । तदुक्तं स्कान्दे–" शङ्खस्थितेन तोयेन यः स्नापयति माधवम् । कपिलाशतसहस्रस्य फलं प्राप्नोति मानवः ॥ नार्द्यं तडागजं वापि वापीकूपसमुद्भवम् । गांगेयादधिकं शङ्खे एवमाह जनार्दनः ॥ कृत्वा गंगोदकं शङ्खे यः स्नापयति केशवम् । नमो नारायणेत्युक्त्वा मुच्यते योनिसङ्कटात् ॥ शङ्खे तीर्थोदकं कृत्वा यः स्नापयति केशवम् । बिन्दुमात्रेण द्वादश्यां कुलानां तारयेच्छतम् ॥ " इति । विष्णुधर्मोत्तरे–" कलौ यच्छन्ति ये विष्णोस्तुलसीकाष्ठचन्दनम् । विष्णुप्रीतिकरं मर्त्या उत्तमां यान्ति ते गतिम् ॥ तुलसीदारुजातेन चन्दनेन कलौ नरः । विलिप्य भक्तितो विष्णुं रमते सन्निधौ हरेः ॥ " नारदीयेऽपि–" यथा विष्णोः सदाऽभीष्टं नैवेद्यं शालिसंभवम् । शुकेनोक्तं पुराणं च तथा तुलसिचन्दनम् ॥ " अथ पत्राणि–" अपामार्गस्य प्रथमं भृंगराजमतः परम् । तस्माच्च खादिरं श्रेष्ठं शमीपत्रं ततः परम् ॥ दूर्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम् । तस्माद्दमनकं श्रेष्ठं ततो बिल्वस्य पत्रकम् ॥ बिल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम् । एतेषां तु यथालाभं पत्रैर्यश्चार्चयेद्धरिम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।"। धात्र्यश्वत्थादिपत्रफलमप्युक्तं ध्रुवचरिते नारसिंहे–" कृष्णमूर्द्धनि विन्यस्ता तुलसीपत्रमञ्जरी । सुवर्णकोटिपुण्यानां पुण्यं यच्छत्यतोऽधिकम् ॥"। पुष्पाणि–" मल्लिकामालतीजातीकेतकाऽशोकचम्पकैः । पुन्नागनागबकुलैः पद्मैरुत्पलजातिभिः ॥ एतैरन्यैश्च कुसुमैः प्रशस्तैरर्चयेद्धरिम् । न शुष्कैरर्चयेद्विष्णुं न पुष्पैर्धरणीं गतैः ॥ न विशीर्णदलैस्त्विष्टैर्नाशुभैर्नाविकासिभिः । पूतिगन्धीन्यगन्धीनि ह्यम्बुगन्धीनि वर्जयेत् ॥ न गृहे करवीरोत्थैः कुसुमैरर्चयेद्धरिम् । पतितैर्मुकुलैर्म्लानैः श्वासजन्तुविदूषितैः ॥ आघ्रातैरंगसंस्पृष्टैर्याचितैरपि नार्चयेत् । " । उपवनस्थकरवीरेण तु पूजयेत् । " करवीरैर्महादेवि यः पूजयति केशवम् । दशसौवर्णिकैः पुष्पैर्यत्फलं तदवाप्नुयात् ॥ दमनेन तु देवेशं सम्प्राप्ते मधुमाधवे । गोशतस्य मुनिश्रेष्ठ पूजनाल्लभते फलम् ॥ मञ्जरीं सहकारस्य केशवोपरि नारद । यच्छन्ति ते महात्मानो गोकोटिफलभागिनः ॥ पुष्पमूर्द्ध्वमुखं योज्यं पत्रं योज्यं त्वधोमुखम् । फलं तु सम्मुखं योज्यं यथोत्पन्नं तथार्पयेत् ॥ वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् । अवर्ज्यं जाह्नवीतोयं तुलसीबिल्वपद्मकम् ॥" । स्कान्दे–" बकपुष्पं बिल्वपत्रं कुसपत्रं कुशेशयम् । वर्णपुष्पं कुसुम्भञ्च तथा कुंकुमकेशरम् ॥ लवंगं दमनं चैव नलकोशोद्भवं तथा । सौवर्णं राजतं पुष्पं नैव पर्युषितं भवेत् ॥ तथैवामर्दकीपत्रं तुलसीपत्रमेव च । नैव पर्युषितं भूयादपि वर्षान्तरे गते ॥ वर्ज्यं पर्युषितं तोयं पत्राणि कुसुमानि च । तुलस्यगस्तिबिल्वानि गंगावारि न दुष्यति ॥ तुलस्यां बिल्वपत्रे च जलजेषु च सर्वशः । न पर्युषितदोषोऽस्ति मालाकारगृहे तथा ॥" इति । " देहोपरि धृतं यच्च वामहस्ते धृतं च यत् । अधोवस्त्रधृतं यच्च जलेन क्षालितं च यत् ॥ देवतास्तन्न गृह्णन्ति पुष्पं निर्माल्यतां गतम् ।" इति । "मणिमुक्तासुवर्णानि देवि दत्तानि यानि च । न निर्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च ॥ पटी शाटी च षण्मासं नैवेद्यं दत्तमात्रतः । पट्टसूत्रं त्रिमासञ्च यज्ञसूत्रं त्र्यहः स्मृतम् ॥" इति योगिनीतन्त्रे । तत्त्वसागरे तु–"वस्त्रोपवीते शुद्ध्येतां प्रोक्षणात्प्रत्यहं शिवे । यावत्सूर्यश्च चन्द्रश्च यावत्तिष्ठंति देवताः ॥ न निर्माल्यं भवेत्तावत्स्वर्णरूप्यविभूषणम् । " । वामने–"हिरुका कंकणं दारु सिह्लिकागुरुवासिता । शंखं जातीफलं श्रीमात्प्रिया धूपा हरेरिमे ॥ " इति । हिरुका मांसी । कंकणं गुग्गुलु । दारु देवदारु । सिह्लिका शंखम् । किञ्च–" हैरण्यं राजतं कांस्यं ताम्रं मृन्मयमेव च । पालाशं पद्मपत्रं च पात्रं विष्णोरतिप्रियम् ॥ हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम् । नैवेद्यं देवदेवाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव ॥ स्थंडिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः ॥ १६ ॥
सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः ॥ श्रद्धयोपाहृतं प्रेष्ठं भक्तेन मम वार्यपि ॥ १७ ॥

यत्र चंदनादि सर्वथा न लभ्यते तत्र हृदि भावेन भावनया । यद्वा हृदि चेन्मद्यागस्तदा भावेन मनोमयैर्द्रव्यैरित्यर्थः ॥ १५ ॥ अधिष्ठानभेदेन प्रधानोपचारमाह सार्धेन । स्नानेति । तत्त्वविन्यासो यथास्थानमंगप्रधानदेवतानां तत्तन्मंत्रैः स्थानम् ॥ १६ ॥ अभ्यर्हणमुपस्थानार्घादि । सलिलादिभिस्तर्पणादिना यजनम् । सर्वसाधारणमाह ।

याबकं पायसं तथा ॥ नैवेद्यबस्त्वलाभे तु फलानि विनिवेदयेत् । फलानामप्यलाभे तु तृणगुल्मलतौषधीः ॥ ओषधीनामलाभे तु तोयान्यपि निवेदयेत् । याचितैः पत्रपुष्पाद्यैर्यः करोति सुरार्चनम् ॥ वृथा भवति सा पूजा ह्यपराधी भवेन्नरः । " इत्यलं प्रसक्तानुप्रसक्तेन । सर्वथा सर्वानुपलब्धिः कदापि न संभवतीत्याह—यद्वेति । इत्यर्थ इति—मानसयागे मानसद्रव्याणामेव योग्यतेति भावः । यद्वा—शास्त्रप्रसिद्धैः षोडशोपचारोपयोगिभिः प्रतिमादिषु अमायिनो वित्तशाठ्यकापट्यरहितस्य मद्यागः स्यात् । अशक्तस्य तु यथालब्धैरुपचारैः हृदि तु सर्वस्य भावनयैवेत्यर्थः ॥ * ॥ प्रकर्षेण धनादिव्ययेन सिद्धैः खण्डघृतचन्दनकुंकुमादिभिः यथालब्धैर्यदृच्छया प्राप्तैः भावनया च मनसैवोपस्थापितैर्दुर्लभैरपि सुरभिपयःपरमान्नसितानवनीतादिभिरर्चयेत् । मूले आदिना स्थण्डिलादिग्रहः । टीकायां पूर्वार्धे यत्र चन्दनादीत्यादिप्रतिपत्तिगौरवं मत्वाह—यद्वेति ॥ १५ ॥ प्रधानोपचारमाह—सार्द्धेन । तुशब्देन शालग्रामेऽपि यथाकथञ्चित्तत्कार्यमेव प्रकर्षेणेष्टमभिमतम् । तत्त्वानां पुरुषतत्त्वादीनां न्यासस्तत्तदंगकल्पनया न्यासः । ॐ पुरुषतत्त्वाय नमः, ॐ प्राणतत्त्वाय नमः, शिरसि । ॐ प्रकृतितत्त्वाय नमः, ॐ बुद्धितत्त्वाय नमः, ॐ अहंकारतत्त्वाय नमः ॐ मनस्तत्त्वाय नमः हृदि । ॐ शब्दतत्त्वाय नमः शिरसि । ॐ स्पर्शतत्त्वाय नमः त्वचि । ॐ रूपतत्त्वाय नमः चक्षुषि । ॐ गन्धतत्त्वाय नमः घ्राणे । ॐ रसतत्त्वाय नमः जिह्वायाम् । यद्वा—ॐ आत्मतत्त्वाय नमः, ॐ आत्मतत्त्वाधिपतये ब्रह्मणे नमः, ॐ विद्यातत्त्वात्मने नमः ॐ विद्यातत्त्वाधिपतये विष्णवे नमः हृदि । ॐ शिवतत्त्वाय नमः, ॐ शिवतत्त्वाधिपतये रुद्राय नमः मूर्ध्नि । यद्वा—तत्त्वानां चतुर्विंशतिसंख्याकानां प्राणप्रतिष्ठोक्तप्रकरेण देवस्य तत्त्वानीत्यागत्य तिष्ठन्त्वित्येवं न्यासस्तत्त्वन्यासः । यद्वा—तत्त्वस्य हरेर्न्यासः प्राणप्रतिष्ठोक्तरीत्या सन्निधापनम् । आज्यप्लुतं च्योतद्घृतप्लुतम् ॥ * ॥ प्रेष्ठं मम सेवकस्य चेत्यर्थः । संबुद्धिस्त्वादरादेवेति भावः । तत्त्वानामंगप्रधानदेवतानां विशेषतो यथास्थानं न्यासस्तत्तन्मंत्रैः स्थापनमात्रं न त्वलंकारादिघृतसिक्तं हविस्तिलादि यज्ञियं वस्तु । केचित्तु अंगं मुखादि तदधिष्ठातृदेवतानां शब्दतत्त्वादीनां तत्तदंगेषु पराय शब्दतत्त्वात्मने नम इत्यादिमन्त्रैः स्थापनं प्रधानदेवतानां जीवतत्त्वादीनां सर्वशरीरादौ पराय जीवतत्त्वात्मने नम इत्यादिमन्त्रैः स्थापनमित्याहुः ॥ १६ ॥ उपस्थानम् " हं ९ सः शुचिषद्वसुषत् " इत्यादिमन्त्रैः स्तवनम् । अर्घ्यं तिलतण्डुलसंयुक्तसकेसरपद्मकरवीररक्तचन्दनादि ताम्रपात्रे कृतं सजलं सकुशमित्यर्थः । तदुक्तम्—" सकेसराणि पद्मानि करवीराणि चार्जुन । तिलतण्डुलसंयुक्तकुशगन्धोदकेन च ॥ रक्तचन्दनमिश्राणि कृत्वा वै ताम्रभाजने ॥ धृत्वा शिरसि तत्पात्रं जानुभ्यां धरणीं गतः । मन्त्रपूतं गुडाकेश अर्घ्यं दद्याद्गभस्तये ॥ इति । मन्त्रास्तु—"उद्यन्नद्य" इत्यादिका वैदिकाः " एहि सूर्य सहस्रांशो तेजोराशे जगत्पते । अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोऽस्तु ते ॥ " इत्यादिकाः पौराणिकाश्च यथाधिकारं ज्ञेयाः । आदिना नमस्कारादिग्रहः । सलिले जलाधिकरणे मदर्चनं सलिलादिना जलेनैव सर्वोपचारकल्पनम् । आदिना गन्धपुष्पादिना वा । सर्वत्र सर्वेष्वधिष्ठानेषु । प्रेष्ठमतिशयितप्रीतिजनकम् । अपिना किमन्यदित्युक्तम् ॥ (१७) ॥ अभक्तेन श्रद्धाहीनेनोपहृतं दत्तम् । गन्धः काश्मीरादियुतः पटीररसः । दीपो गोघृतसम्पादितो दीपकः । 'दीपे देयं च गोघृतम्' इत्युक्तेः । अन्नाद्यं भक्ष्यभोज्यचोष्यलेह्यरूपम् । किं पुनः किमधिककथनेन । श्रद्धैव मे तोषहेतुर्नान्यदित्यर्थः ॥ * ॥ अर्घादीत्यादिना पाद्यादिग्रहः । तर्पणादिनेहादिना पुष्पादिग्रहः ॥ * ॥ **दीपिका**—सर्वत्र सर्वस्मिन्नर्चाद्यधिष्ठाने साधारणं समानमुपचारमाह—श्रद्धयेति सार्द्धकेन । गन्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ गंधो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः ॥ १८ ॥ शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः ॥ आसीनः प्रागुदग्वार्चेदर्चायामथ संमुखः ॥ १९ ॥ कृतन्यासः कृतन्यासां मदर्चां पाणिना मृजेत् ॥ कलशं प्रोक्षणीयं च यथावदुपसादयेत् ॥ २० ॥

श्रद्धयेति ॥ १७ ॥ १८ ॥ एवमधिकारादिव्यवस्थामुक्त्वा इदानीं पूजाप्रकारमाह । शुचिरिति । संभृताः संभाराः पूजासाधनानि येन सः । प्रागग्रैर्दर्भैः यद्वा प्रागेव संभृतसंभारः सन्नासीनः न त्वासीनः सन् पश्चात्तत्संभारार्थं वारंवारमुत्तिष्ठेदित्यर्थः । प्राङ्मुख उदङ्मुखो वा आसीनः । अर्चायां तु स्थिरायां संमुखोऽर्चाभिमुख उपविष्टः सन् ॥ १९ ॥ अनंतरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन्कृतन्यासः कृतो मूलमंत्रन्यसो यस्यां तां ममार्चामामृजेन्निर्माल्यापकर्षणादिना शोधयेत् । कलशं पूर्णकुंभम् ।

इत्यर्द्धस्य श्रद्धयेत्यर्द्धेनान्वयः । तस्य भक्तस्य निष्किञ्चनत्वेऽपि मम सेवायामाग्रहश्चेत्तदा गन्धादिकं प्रेष्ठमिति पुनः किं वक्तव्यमित्यर्थः ॥ १७ ॥ १८ ॥ एवं यदा स्वनिगमेनोक्तमित्याद्युक्तरीत्या । आदिनाऽधिष्ठानादिग्रहः । शुचिः स्नानादिना कृतदेहसंस्कारः । संभृताः सम्पादिताः ‘ सम्भारः संघसामग्र्योः ’ इति निरुक्तिः । प्राक्पदस्याग्रे लक्षणाश्रयणे गौरवं मत्वाह–यद्वेति । इत्यर्थ इति–‘ पूजयेन्नियतो भूत्वा ’ इति स्मृतेर्धूपदीपाद्यर्थमग्न्यादिकं प्रागेव सम्पादयेदिति भावः । “प्राङ्मुखो वैदिकं[1] कर्म कुर्याच्चोदङ्मुखस्तथा” इत्युक्तेः । अर्चापूजने तु “ पूज्यपूजकयोर्मध्ये यद्वा प्राची दिगीरिता ॥ ” इति तत्सांमुख्यमेव प्राक्त्वमिति ज्ञेयम् । आसनोपवेशसमये ‘ पृथ्वि त्वया ’ इति मन्त्रेणासनशुद्धिं विधाय ‘ अपसर्पन्तु ते भूताः ’ इत्यनेन भूताद्युत्सादनं च कृत्वा “ एवापित्र० ” इति मनुष्यगन्धं वारयित्वा घण्टानादं कृत्वा भूतशुद्धिं कृत्वा कर्मारभेत ॥ * ॥ अधिकारादिव्यवस्थामिति सकामस्य विहितसर्वद्रव्यैरेवाधिकारो न तु हीनद्रव्यैरपि निष्कामस्य तु यथालब्धैरेवेति व्यवस्था । आदिनाधिष्ठानभेदेनोपचारव्यवस्था सर्वसाधारणोपचारव्यवस्था च गृह्यते । पूर्वार्धे मध्यपदलोपाभ्युपगमेऽपि । सम्भाराः पूजाकाले तत्पूर्वं वा सम्पादनीया इति संशये–यद्वेति दीपिका ॥ १९ ॥ अनन्तरम् उपवेशोत्तरम् । गुरवे नमः, परमगुरवे नमः, परमेष्ठगुरवे नम इति गुर्वादीन्नत्वा “ ब्रह्मस्थानसरोजमध्यविलसच्छीतांशुपीठस्थितं स्फूर्जत्सूर्यरुचिं वराभयकरं कर्पूरकुन्दोज्ज्वलम् । श्वेतस्रग्वसनानुलेपनयुतं विद्युत्प्रभाकान्तया संश्लिष्टार्द्धतनुं प्रसन्नवदनं वन्दे गुरुं सादरम् ॥ ” इति ध्यात्वार्चयेत् । यथोपदेशं यथा पराशराद्यैरुक्तं तथा । स्वस्मिन्कृतन्यासः तथार्चामपि कृतन्यासां मूलमन्त्रेणाष्टाक्षरमन्त्रेण कृतन्यासां वा । आग्नेये– “ अर्चनं संप्रवक्ष्यामि विष्णोरमिततेजसः । यत्कृत्वा मुनयः सर्वे परं निर्वाणमाययुः ॥ अनुष्टुभस्य सूक्तस्य त्रिष्टुबन्त्यस्य देवता । पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे । तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत् ॥ पञ्चमीं वामजानौ च षष्ठीं वै दक्षिणे न्यसेत् । सप्तमीं वामकट्यां तु ह्यष्टमीं दक्षिणे तथा ॥ नवमीं नाभिमध्ये तु दशमीं हृदये तथा । एकादशीं कंठमध्ये द्वादशीं वामबाहुके ॥ त्रयोदशीं दक्षिणे तु तथैवास्ये चतुर्दशीम् । अक्ष्णोः पंचदशीं चैव विन्यसेन्मूर्ध्नि षोडशीम् ॥ यथा देहे तथा देवे न्यासं कृत्वा यथाविधि । न्यासेन तु भवेत्सोपि स्वयमेव जनार्दनः ॥ एवं न्यासविधिं कृत्वा पंचांगानि समाचरेत् । ब्राह्मणोस्येत्यादिपंचऋग्भिः पंचांगकल्पना ॥ हृदयं च शिरः शिखा कवचं चास्त्रमेव च । आद्ययावाहयेद्देवमृचानु पुरुषोत्तमम् ॥ द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया । अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनीयकम् ॥ षष्ठ्या स्नानं प्रदेयं तु सप्तम्या वस्त्रमेव च । यज्ञोपवीतमष्टम्या नवम्या चंदनं स्मृतम् ॥ पुष्पं दशम्या दातव्यमेकादश्या तु धूपकम् । द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनम् ॥ चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षि

---

१ दैविकमिति वा पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च ॥ प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् ॥ २१ ॥ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि दैशिकः ॥ हृदा शीर्ष्णाऽथ शिखया गायत्र्या चाभिमंत्रयेत्॥२२॥पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम॥अण्वीं जीवकलां ध्यायेन्नादांते सिद्धभाविताम्॥२३॥

प्रोक्षणीयं प्रोक्षणार्थोदकपात्रमुपसाधयेच्चंदनपुष्पादिभिः संस्कुर्यात् ॥ २० ॥ तदद्भिः प्रोक्षणीयाद्भिर्देवयजनं देवपूजास्थानम् । पाद्याद्यर्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् । तत्र पाद्यादिद्रव्याणि । "पाद्ये श्यामाकदूर्वाब्जविष्णुक्रांतादिरिष्यते ॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ॥ दूर्वा चेति क्रमादर्घद्रव्याष्टकमुदीरितम् ॥ जातीलवंगकंकोलैर्मतमाचमनीयकम् ॥" इति ॥ २१ ॥ तानि च त्रीणि पात्राणि यथाक्रमं हृदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत् ॥ २२ ॥ तदनंतरं पिंडे देहे । वाय्वग्निसंशुद्ध इति । कोष्ठगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलामृतप्लावनेनामृतमये जाते तस्मिन्हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् । कथंभूताम् । नादांते सिद्धैर्भाविताम् । प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशास्तत्र नादांते सिद्धैर्ध्याताम् । तथाच श्रुतिः । "यो वेदादौ

णम् । उद्वासनं तु षोडश्या उपचारास्तु षोडश ॥ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् । हुत्वा षोडशभिर्मंत्रैर्दद्यात्पुष्पाणि षोडश ॥ तच्च सर्वं जपेद्भूयः पौरुषं सूक्तमेव च । षण्मासेन समाप्नोति ह्येवमेव समर्चनात् ॥"। अत्र यद्यप्यावाहनं विसर्जनं चोक्तं तत्प्रत्यहं प्राणप्रतिष्ठापूर्वकप्रतिमादिपूजनविषयम् । अन्यत्र तु—"आदावंते च मंत्राभ्यां पुष्पांजलिसमर्पणम्" इति नारदीयात् । कौर्मे—"न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् । तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥ तद्विष्णोरिति मंत्रेण सूक्तेन पौरुषेण वा । नैवाभ्यां सदृशो मंत्रो वेदेषूक्तश्च पावनः ॥" इति । मूलमंत्रन्यासस्तु—ॐ पादयोः । न जानुनोः । मो ऊर्वोः । ना उदरे । रा हृदि । य उरसि । णा मुखे । य शिरसीति । निर्माल्यापनोदफलं तु—"यः प्रातरुत्थाय विधाय नित्यं निर्माल्यमीशस्य निराकरोति । न तस्य दुःखं न दरिद्रता च नाकालमृत्युर्न च रोगमात्रम् ॥ अरुणोदयवेलायां निर्माल्यं शल्यतां व्रजेत् । प्रातस्तु स्यान्महाशल्यं घटिकामात्रयोगतः ॥ अतिशल्यं विजानीयात्ततो वज्रप्रहारवत् । अरुणोदयवेलायां शल्यं तत्क्षमते हरिः ॥ घटिकाया अतिक्रांतौ क्षुद्रं पातकमावहेत् । मुहूर्ते समतिक्रांते पूर्णे पातकमुच्यते ॥ अतिपातकमेव स्याद् घटीनाञ्च चतुष्टये । मुहूर्तत्रितये पूर्णे महापातकमुच्यते ॥ ततः परं ब्रह्मवधो महापातकपञ्चकम् । प्रहरे पूर्णतां याते प्रायश्चित्तं ततो न हि ॥" इति । प्रायश्चित्तं तु मुहूर्तार्द्धे गायत्र्याः सहस्रजपः । पूर्णे मुहूर्ते सार्धसहस्रम् । मुहूर्तद्वये सहस्रद्वयम् । मुहूर्तत्रयेऽयुतम् । प्रहरे पुरश्चरणम् । तदनंतरं प्रायश्चित्तं नास्तीति संस्कुर्यात् । तत्पात्रं चंदनाक्षतपुष्पैरर्चयेदित्यर्थः ॥ * ॥ कृतन्यास इति—केशवादिन्यासादीनां यत्त्वधमांगविषयत्वं तत्तन्मूर्तीर्ध्यात्वा तत्तन्मंत्रांश्च जपित्वै तत्तदंगस्पर्शमात्रं कुर्यात् । न तु तत्तन्मंत्रदेवतास्तत्रतत्र न्यस्ता ध्यायेत्, भक्तानां तदनौचित्यात् । भूतशुद्ध्यादिकं त्वेवं ज्ञेयम् । तत्र भूतशुद्धिर्निजाभिलषितभगवत्सेवौपयिकतत्पार्षददेहभावनापर्यंतैव तत्सेवकपुरुषार्थिभिः कार्या निजानुकूल्यात् । एवं यत्रात्मनो निजाभीष्टरूपत्वेन चिंतनं विधीयते तत्रतत्रैव पार्षदविग्रहत्वं भाव्यम् । अहंग्रहोपासनायाः शुद्धभक्तैर्द्विष्टत्वात् । ऐक्यं च तत्र साधारण्यप्रायमेव मदीयचिच्छक्तिवृत्तिशुद्धसत्त्वांशविग्रहत्वात्पार्षदानामिति । अन्यत्तैः ॥ २० ॥ द्रव्याणि पुष्पादीनि । आत्मानं अर्चकदेहं प्रोक्ष्य पात्राणि च प्रोक्ष्य सिक्त्वा । तत्र द्रव्येषु । आदिनार्घाचमनीयकग्रहः । श्यामाकं नीवारम् । अब्जम् कमलफलं तन्मज्जा वा । आदिना तुलसीपत्रगंधादिग्रहः । सर्षपः पतिः । जात्यादित्रयस्य फलं पुष्पं वा ॥ * ॥ ० ॥ ॥ २१ ॥ दैशिकोऽर्चकः । ॐ हृदयाय नम इति पाद्यस्य, ॐ शिरसे स्वाहेत्यर्घ्यस्य, ॐ शिखायै वषडित्याचमनीयस्य, गायत्र्या च सर्वेषां हस्तस्पर्शेनाभिमंत्रणं कुर्यात ॥ * ॥ दैशिकोऽर्चकः ॥ २२ ॥ जीवः कला अंशो यस्याः सा तथा "ममैवांशो जीवलोके जीवभूतः सनातनः" इति श्रीगीतोक्तेः । तत्र पञ्चांशेषु । अस्या मूर्तेः परत्वे प्रमाणमाह—तथा चेति । यः स्वरो नादलक्षणः वेदस्यादौ तदुत्पादकत्वेनोक्तः, तद्ब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः ॥ आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजयेत् ॥ २४ ॥
पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत् ॥ धर्मादिभिश्च नवभिः कल्पयित्वाऽऽसनं मम ॥ २५ ॥

स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥" इति ॥ २३ ॥ तयाऽऽत्मभूतया स्वेनैव भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेवादौ मानसैरुपचारैः संपूज्य तन्मयः सन्नर्चादिष्वावाह्य स्थापनमुद्रया स्थापयित्वा ॥ २४ ॥ कथं पूजयेत्तत्राह । पाद्येति–द्वाभ्याम् । धर्मादिभिर्नवभिर्ममासनं कल्पयित्वा तत्र पद्मं च कल्पयित्वोभाभ्यां वेदतंत्राभ्यामुभयसिद्धये मह्यं पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः । उपस्पर्श आचमनमर्हणमर्घ्यम् । उभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये । अयमर्थः । धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचतुष्कोणेषु पादाः । अधर्मादीनि पूर्वादिदिक्षु क्रमेण चत्वारि गात्राणि । त्रयो

क्ष्यति द्वादशस्कन्धे–" समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः । हृदाकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ यदुपासनया ब्रह्मन्योगिनो मलमात्मनः । द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवम् ॥ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् । ततोऽक्षरसमाम्नायमसृजद्भगवानजः ॥ अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् । तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया ।" इत्युक्तिक्रमेण नादाद्वेदाविर्भावः श्रूयते, यश्च नादो वेदस्यान्ते प्रतिष्ठितः स्थितः । तथाहि–सप्तमे इन्द्रियादिलयप्रकरणे–" वाचि वैकारिकं मनः । वाचं वर्णसमाम्नाये, तमोंकारे स्वरे न्यसेत् ॥ ओंकारं बिंदौ नादे तं तं तु प्राणे महत्यमुम् " इत्युक्तं वेदानां प्रणवस्वरूपत्वेन बिंदौ लयाभिधानपूर्वकं नादे लयः प्रोक्तस्तस्य नादस्य प्रकृतौ स्वकारणे प्राणे लीनस्य यः परो लयाधिकरणत्वेनोक्तः स महान्महेश्वरः परमात्मेत्यर्थः श्रुतेः पदानाम् ॥ * ॥ भूतशुद्धिं स्फोटयति–कोष्ठगतेनेति । अत्रायमर्थः–पापपुरुषरूपे पिण्डे वायुना शोषिते इति धूम्रवर्णेन परमशोषकेण पूर्वं वामनासापुटे चिंतितेन षोडशवारं जपितेन पश्चान्मनसा नाभिमण्डलं नीतेन पुनः चतुःषष्टिवारं जपितेन वं बीजेन कुंभकं कृत्वोत्थापितो यो वायुस्तेन शोषिते पश्चाद्रमिति वह्निबीजेन मूलाधारगतवत् ह्युत्थापकेन वायुसंबद्धतया दक्षिणनासापुटे चिंतितेन षोडशवारं जपितेन पुनर्मूलाधारं नीत्वा चतुष्षष्टिवारं जपितेन कुंभकं कृत्वोत्थापितो यो वह्निस्तेन दग्धे इति पश्चाद्वमिति चन्द्रबीजेन वामनासापुटे चिंतितेन षोडशवारं जपितेन पुनर्ललाटे चंद्रमंडलं प्रति नीत्वा चतुःषष्टिवारं जपितेन कुंभकं कृत्वोत्थापितं यच्चन्द्रमण्डलस्थममृतं तत्प्लावेनामृतमये जाते तत्पूजोपयोगिदेहे नारायणमूर्तिं ध्यायेत् । तथा च प्रमाणं श्रुतिः–स्वरः प्रणवान्तनादरूपः वेदस्यादावन्ते च स इति तदुच्चारणानंतरमेव वेदस्योच्चारणात्समापनाच्च प्रकृतिलीनस्य स्वरूपलीनस्य सतः यः परोधिष्ठाता स महेश्वरः श्रीनारायणः ॥ २३ ॥ तया जीवकलयाऽऽत्मना स्वेनैव भावेन भूतया चिंतितया 'भू–मिश्रीकरणचिंतनयोः' अतः क्तः । तस्मिन्नेवामृतमये पिंड एव तन्मय एवं ध्यानेन तत्स्वरूपस्तत्प्रधानो वा । आवाहनमुद्रया बाह्यमुद्रया " हस्ताभ्यामंजलिं कृत्वानामिकामूलपर्वणि । संग्रथ्य निक्षिपेत्सेयं मुद्रा चावाहनी स्मृता ॥" इति । तंत्रसारे–स्थापनमुद्रया च स्थापयित्वा । सापि तत्रैव–"अधोमुखी स्यादियं चेत्स्थापिनी मुद्रिका स्मृता" इति । इयमावाहनी मुद्रैव । न्यस्तांगं पुरुषसूक्तविधानोक्तं तंत्रोक्तं वांगन्यासं कृत्वा ॥ * ॥ **दीपिका**–स्वेनैव भावेनेति–स्वस्य तदंशत्वात्तद्व्याप्यत्वात्तदायत्तवृत्तिकत्वात् 'कामुकाः कामिनीमयम्' इतिवत्तदाविष्टत्वाच्च स्वस्वरूपेण सहाभेदेन चिंतितयेत्यर्थः । भेदस्यौपाधिकत्वे ध्यातृध्येयभावस्य पूज्यपूजकभावस्य च कंठोक्तस्य व्याकोपाद्व्याख्यान्तरमुपेक्षितम् । तस्मिन्नेव पिण्डे एव । तन्मयः स्त्रीमयोयं जाल्म इतिवत्तदाविष्टः । मामिति अर्चायां सर्वत्रास्मच्छब्दसामानाधिकरण्येनाभेदोक्त्या शिलाबुद्ध्यादिकं सर्वथा परिहृतम् "शिलाबुद्धिः कृता किं वा प्रतिमायां हरेर्मया" इत्यादिना तन्निषेधात् । न्यस्तांगं मां मदंगे न्यासान्कृत्वेत्यर्थः ॥ २४ ॥ पूजेति कर्तव्यतां पृच्छति–कथमिति । उपस्पर्श आचमनीयम् । अर्हणमर्घ्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलम् ॥ उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये ॥ २६ ॥ सुदर्शनं पांचजन्यं गदासीषुधनुर्हलान् ॥ मुसलं कौस्तुभं मालां श्रीवत्सं चानु पूजयेत् ॥ २७ ॥ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च ॥ महाबलं बलं चैव कुमुदं कुमुदेक्षणम् ॥ २८॥ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान् ॥ स्वेस्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः ॥ २९ ॥

गुणाः पट्टिकाः । तत्र पूर्वादिक्रमेण मध्ये च विमला उत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्येशानाऽनुग्रहेति नव शक्तयः । एवं यथोपदेशं धर्मादिभिर्नवभिः शक्तिभिश्चासनं कल्पयित्वेति । कर्णिकया केसरैस्तत्रस्थसूर्यादिमंडलैश्चोज्ज्वलमित्यर्थः ॥२५॥२६॥ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः । तत्र न्यस्तांगमित्यंगावरणपूजा सूचिता । आसनेनैव शक्त्यावरणमित्युक्तम् । ततः सुदर्शनादिमुसलांतान्यायुधान्यष्टदिक्षु । कौस्तुभमालाश्रीवत्सानुरसि॥ २७॥नंदादीन्पार्षदानष्टदिक्षु।गरुडं पुरतः ॥२८॥ दुर्गादीनि

आदिना गंधादिग्रहः । अत्र स्फुटार्थमाह—अयमर्थ इति । आग्नेयनैर्ऋतवायव्यैशानेषु । अधर्मादीनि अधर्माज्ञानावैराग्यानैश्वर्याणि । गात्राणि पाददत्तलंबायमानकाष्ठचतुष्काणि । पट्टिका उपवेशस्थानानि । तत्र पर्यंके पूर्वादिस्वष्टनवमीमध्ये । तत्रस्थैः कर्णिकास्थैः । इत्यर्थ इति—"कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरम्" इत्युक्तेरिति भावः ॥ * ॥ कथं भावाकांक्षायामिति कर्तव्यतामाहेत्यर्थः । तत्रासने । आग्नेयादीत्यादिना नैर्ऋतवायव्यैशानपरिग्रहः । अधर्मादीनीति अधर्माज्ञानावैराग्यानैश्वर्याण्यधार्मिकादिषु तत्तदंतर्यामिशक्तिरूपाणि पूर्वादिदिक्षु गात्राणि । तदुक्तं नारदपञ्चरात्रे—" अधर्मादिचतुष्कं तु अश्रेयसि नियोजनम् " इति । अन्यथाऽप्राकृतासने तेषां सन्निवेशानुपपत्तेः । "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः" इत्युक्तेरप्राकृता अपि न सन्त्येवेति गम्यते । विशेषणानां व्यावर्तकत्वनियमादिति त्रयो गुणा अप्राकृता एव व्याख्येयाः । पूर्वहेतोरेव अत्रासनस्थे पद्मे । पूर्वादिक्रमेणेति—पूर्वाद्यष्टदिक्षु यथासंख्यं विमलामारभ्येशानांता अष्टौ शक्तयः, मध्ये उपवेशस्थानेऽनुग्रहेत्यर्थः । तत्र विमला कीर्त्याख्या, उत्कर्षिणी उत्कर्षहेतुर्जयापरपर्याया, ज्ञाना ज्ञानशक्तिः संविदपरपर्याया, विशुद्धसत्त्वाख्या क्रिया ह्लादिनी, योगा योगमाया, प्रह्वी विचित्रानंतसामर्थ्यहेतुः, सत्या संधिन्यपरपर्याया, यया सद्रूपोपि भगवान्सत्तां दधाति धारयति च सर्वदेशकाले द्रव्यादिव्याप्तिकरीति यावत् । ईशान्त सर्वाधिकारिताशक्तिहेतुः, अनुग्रहा भक्तविषयकापारकृपाशक्तिहेतुरिति भगवत्सन्दर्भात्तल्लक्षणानि ज्ञेयानि । 'कर्णिकायां न्यसेत्सूर्यम्' इत्याद्युक्तेः केशरशब्दस्य तत्रस्थसूर्यादिमण्डले लक्षणात इत्यर्थ इत्युक्तम् ॥ २९ ॥ ० ॥ ॥ * ॥ • ॥ २६ ॥ आदिना भूषणादिग्रहः । गदा कौमोदकी, असिः नंदकः, धनुः शार्ङ्गम् । मुसलं सुनन्दम् । मालाम् वैजयंतीं वनमालां वा । श्रीवत्सम् उक्तार्थम् । तत्र पूजायाम् । ततः शक्त्यावरणार्चनोत्तरम् । भगवतोऽष्टदिक्षु ॥ * ॥ ० ॥ २७ ॥ पुरतः अग्रे ॥ * ॥ ० ॥ २८ ॥ कोणेषु आग्नेयादिचतुर्षु । "इंद्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा । कुबेरमीशं क्रमतो लोकपालान्बुधा जगुः ॥" देवस्य भगवतोऽभिमुखान् भगवति कृतमुखान् । आदिना गंधपुष्पादिग्रहः ॥ * ॥ दुर्गां वह्निकोणे, गणेशं नैर्ऋते, व्यासं वायव्ये, विष्वक्सेनमैशाने, किन्तु तेऽप्राकृता व्याख्येया विष्वक्सेनसाहचर्यात्, 'न यत्र माया' इत्यादिना प्रकृतिकार्यमात्रस्य तत्र निषेधाच्च । स्थानविभागस्य मूलेऽनुक्तेरित्यर्थ इत्युक्तम् ॥ * ॥ **सन्दर्भस्तु**—नंदमिति युग्मकम् । तत्र दुर्गाद्या विष्वक्सेनादिवद्भगवतो नित्यवैकुण्ठसेवकाः । ततश्च ते गणेशदुर्गाद्या ये परे मायाशक्त्यात्मका गणेशदुर्गाद्यास्ते तु न भवन्ति "न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः" इति द्वितीयोक्तेः । ततो भगवत्स्वरूपभूतशक्त्यात्मिका एव ते यत एव श्रीकृष्णस्वरूपभूते श्रीमदष्टादशाक्षरादिमंत्रगणेऽपि दुर्गानाम्नो भगवद्भक्त्यात्मकस्य स्वरूपभूतवृत्तिविशेषस्याधिष्ठातृत्वं श्रुतितंत्रादिषूपदिश्यते । यथा नारदपञ्चरात्रे श्रुतिविद्यासंवादे—"भक्तिर्भजनसंपत्तिर्भजते प्रकृतिः प्रियम् । जायतेऽत्यंतदुःखेन सेयं प्रकृतिरात्मनः ॥ दुर्गेति गीयते सद्भिरखंडरसवल्लभा । अस्या आवरिका शक्तिर्महामायेति कथ्यते । यया मुग्धं जगत्सर्वं सर्वदेहाभिमानिनः ॥" इति । अत एव श्रीभगवदभेदेनैवोक्तं गौतमीयकल्पे—"यः कृष्णः सैव दुर्गा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः ॥ सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति ॥ ३० ॥ स्वर्णघर्मानुवाकेन महापुरुषविद्यया ॥ पौरुषेणापि सूक्तेन सामभी राजनादिभिः ॥ ३१ ॥ वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः ॥ अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितम् ॥ ३२ ॥

कोणेषु गुरून्वामतः । सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षु । एवमेतान्देवस्याभिमुखान्प्रोक्षणादिभिरर्घादिभिः पूजयेदित्यर्थः ॥ २९ ॥ पाद्यादीनुपचारान्प्रकल्पये दित्युक्तं तानेव गुणविधिभिः प्रपंचयति चंदनेति षड्भिः ॥ ३० ॥ मंत्रानाह । स्वर्णघर्मानुवाकः " सुवर्णं घर्मं परिवेदवेनम् " इत्यादिः । महापुरुषविद्या " जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ सुब्रह्मण्य नमस्तेऽस्तु महापुरुषपूर्वज" इति । पौरुषं सूक्तं "सहस्रशीर्षा" इत्यादि । राजनादीनि सामानि । "इंद्रं नरो नेमधिताहवंते" इत्यस्या मृचि गीतानि । आदिशब्देन रौहिणादीनि ॥ ३१ ॥ वस्त्राद्युपचारेष्वलंकारलक्षणं गुणं विधत्ते । वस्त्रेति । पत्राणि कपोलवक्षःस्थलादिषु लिखिताः पत्रभंग्यः । मद्भक्तश्चे

स्याद्या दुर्गा कृष्ण एव सः " इति । "त्वमेव परमेशानि अस्याधिष्ठातृदेवता " इत्यादिकं विराट्पुरुषमहापुरुषयोरिव केषांचिदभेदोपासनाविवक्षयैवोक्तं, सा हि मायांशरूपा तदधीने प्राकृतेऽस्मिँल्लोके मंत्ररक्षालक्षणसेवार्थं नियुक्ता चिच्छक्त्यात्मकदुर्गा या दासीयते न तदधिष्ठात्री । मायातीतवैकुण्ठावरणकथने यथोक्तं पाद्मोत्तरखण्डे–"सत्याच्युतानंतदुर्गाविष्वक्सेनगजाननाः" इत्याद्युक्त्वा "नित्यास्सर्वे परे धाम्नि ये चान्ये च दिवौकसः । ते वै प्राकृतलोकेऽस्मिन्ननित्यास्त्रिदिवेश्वराः ॥" "ते ह नाकं महिमानः सचंते" इति श्रुतिरिति । भगवदंशरूपत्वं च तेषामुक्तं त्रैलोक्यसंमोहनतंत्रे–"सर्वत्र देवदेवोऽसौ गोपवेषधरो हरिः । केवलं रूपभेदेन नाम भेदः प्रकीर्तितः ॥" इति । अतो नाममात्रसाधारण्येनानन्यभक्तैर्नातिभेतव्यम्, किन्तु भागवतनित्यवैकुण्ठसेवकत्वाद्विष्वक्सेनादिवत्सत्कार्या एव ते "अर्चयित्वा तु गोविंदं तदीयान्नार्चयेत्तु यः" इत्यादिवचने तदसत्कारे दोषश्रवणात् । अत्र विशेषो भक्तिसंदर्भे दृश्यः । अथ श्रीभगवद्धामे श्रीगुरुपादुकापूजनमेव संगच्छते । यथा य एव भगवानत्र व्यष्टिरूपतया भक्तावतारत्वेन श्रीकृष्णरूपो वर्तते स एव समष्टिरूपतया स्ववामप्रदेशे साक्षादवतारत्वेनापि तद्रूपो वर्तत इति ॥ २९ ॥ गुणविधिभिः गुणविधानेन 'गुणस्त्वाधिक्यकथनम्' इति कोशः । गुणानाह–चन्दनेत्यादि । उशीरं सुगंधितृणम् 'खस' इति प्रसिद्धम् । कुंकुमं केशरम्, वासितैः सुगंधितैः । विभवे धनिकत्वे सति नित्यदाऽन्यथा पर्वोत्सवादिदिने 'अर्थरैविभवा अपि' इत्यमरः ॥ * ॥ **दीपिका**–तानेवोपचारानेव । गुणविधिरिति–तल्लक्षणं यथा–अग्निहोत्रं जुहोतीत्युत्पत्तिविधिना विहितं होममुद्दिश्य, यथा दध्ना जुहोतीत्यादिगुणविधिभिर्दध्यादिलक्षणगुणमात्रविधानम् । तथात्र पूर्वप्रोक्तस्नानजलादीनुद्दिश्य चंदनादिगुणमात्रविधानमन्यथोभयविधाने वाक्यभेदः स्यात् । तदुक्तं भट्टैः–"सर्वत्राख्यातसंबंधे श्रूयमाणे पदान्तरे । विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादता॥" इति ॥३०॥ स्वर्णघर्मानुवाकस्सूक्तविशेषः । महापुरुषविद्या नारदपञ्चरात्रोक्तजितंतस्तोत्रमध्यायपञ्चात्मकम् । तच्च 'जितं ते पुण्डरीकाक्ष' इत्यादि । रौहिणादीन्यपि सामान्येव तानि च वेदैकलभ्यानि ॥ * ॥ मंत्रान्पाद्याद्युपचारेष्वंगरूपान् । स्वर्णघर्मानुवाको वैदिकं सूक्तम् । सुवर्णं कुंकुमादिवासितत्वेन सुवर्णतुल्यजलादि भवतो घर्मपरिवेदनं प्रस्वेदविनाशकमिति मंत्रखंडार्थः । मेधिता इति वक्तव्ये मे माधितेत्यार्षम् । अतिशयज्ञानवान्नरः इन्द्रं परमेश्वरमुद्दिश्य हवंते होमोपलक्षितयागं कुर्यादित्यर्थः । अत्र मेधातिर्ज्ञानार्थः ॥ ३१ ॥ पत्रभंग्यस्तिलकविशेषाः ॥ * ॥ वस्त्राद्युपचारेष्विति पूर्वोक्तवस्त्राद्युपचारानुवादेनालंकारलक्षणगुणमात्रं विधत्त इत्यर्थः । यथोचितं सौन्दर्यानुरूपम् । श्रीगोपालपूजायामपि यज्ञोपवीतार्पणमपि विहितमस्ति । यथोक्तं गौतमीये–"यज्ञसूत्रं ततो दद्यादथ वा स्वर्णनिर्मितम्" इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाद्यमाचमनीयं च गंधं सुमनसोऽक्षतान् ॥ धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ॥ ३३ ॥ गुडपायससर्पींषि शष्कुल्यापूपमोदकान् ॥ संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् ॥ ३४ ॥ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनम् ॥ अन्नाद्यं गीतनृत्यानि पर्वणि स्युरुतान्वहम् ॥ ३५ ॥

सप्रेम यथा भवति तथा ॥ ३२ ॥ यथोचितमलंकुर्वीतेत्युक्तार्थम् । सर्वसाधारणं श्रद्धालक्षणं गुणं विधत्ते । पाद्यमिति ॥ ३३ ॥ नैवेद्यवैभवलक्षणं गुणं विधत्ते । गुड पायसेति । शष्कुल्यस्तैलपक्वविशेषाः । अपूपाः अपूपानां मंडकादीनां समूहाः । सूपा व्यंजनानि । सति विभव इति शेषः ॥ ३४ ॥ कालभेदेन गुणं विधत्ते । अभ्यं

नारसिंहे–"त्रिवृत्सूत्रं च पीतं च पट्टसूत्रादिनिर्मितम् । यज्ञोपवीतं गोविंदे दत्त्वा वेदांतगो भवेत् ॥" इति । पत्रस्रक् तुलसीमाला ॥ ३२ ॥ उक्तार्थम् "स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव" इत्यत्र वर्णितम् । सर्वसाधारणं सर्वपूजाधिष्ठानसाधारणम् । अक्षतान् शालग्रामेतरे । उपहार्यं नैवेद्यम् ॥ * ॥ उक्ता येये पाद्याद्यास्तेषु साधारणं तुल्यं श्रद्धालक्षणमादरविश्वासात्मकं गुणमंगं विधत्त इति दीपिका ॥ ३३ ॥ गुडादीनि पृथक्पृथग्निवेद्यानि त्रीणि । गुडघृतश्रितपायसस्य कैश्चिन्निषिद्धत्वाल्लोकविरुद्धत्वाच्च । सर्पिरत्र नवनीतं तच्च सितोपलयुतम् "ससितं नवनीतं तु सदा श्रीकृष्णवल्लभम्" इत्युक्तेः । बहुच्छिद्रसगुडगोधूमचूर्णनिर्मितो मंडकाकारो घृतपक्वविशेषोऽपूपः तेषामाधिक्यं येषु पाकेषु त आपूपाः । मोदकश्च वितुषचणकचूर्णनिर्मितमुक्तोपमघृतपक्वसितापाकं मिश्रितकरद्वयपिंडितपाकविशेषो ज्ञेयः । संयावः मुद्गराकारकाष्ठपरिवर्तितसमभागघृतसितागोधूमसाररचितद्राक्षादंडीरैलाबीजाढ्यकटाहपाकः । 'सूपो व्यंजनसूदयोः' इति मेदिनी । व्यंजनं स्वादीकरणं शाकक्वथितौदनपाकादीत्यर्थः । चात्पर्पटमाषादिवटकादीनां ग्रहः । तथा च विभवे सति भक्ष्यभोज्यलेह्यचोष्यपेयं प्रत्यहमर्पणीयमित्यर्थः ॥ * ॥ गुडविकारान् मत्स्यंडीफाणितादीन् । सर्पिःशब्देन नवनीतं तदुत्थं घृतं वा । शष्कुल्यः कर्णाकारा घृतपक्वाः–पराकडीति भाषायाम् । तैलेति दरिद्रपरम् । मंडका गौडदेशे आमिक्षाविकारविशेषत्वेन प्रसिद्धाः । आपूपिकमिति वक्तव्ये आपूपमित्यार्षम् । नैवेद्ये विशेषश्च गौतमीये–"निवेदयेदुत्तमान्नं न कदन्नं कदाचन । उत्तमं विधिना प्राप्तमथवा यदयाचितम् ॥" विधिना प्राप्तं शिलोञ्छम् । "स्ववित्तोपचितं वाथ कृष्णाय परिकल्पयेत् । शूद्राल्लब्धं छलाल्लब्धमथ वार्द्धुषिकाचितम् ॥ इत्याद्यन्नं कदन्नं तु दानान्नरकमावहेत् ।"। कदन्ने विशेषमाह–"मसूरान्नमकुष्ठान्नं वर्जुरं चरहीभवम् । चीणकं कोद्रवं चाथ माण्डूकान्नं च वर्जयेत् ॥ एतत्कदन्नं हरये दत्त्वा नरकभाग्भवेत् । इभ्यस्यैव दोषकरं दारिद्रस्य न वै क्वचित् ॥" इत्यपि संहितादौ । "नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वप्याज्यमाहिषं क्षीरं पञ्चनखमत्स्यांश्च" इति हारीतः । विष्णुधर्मोत्तरे–"अभक्ष्यं चाप्यहृद्यं च नैवेद्यं न निवेदयेत् । केशकीटोपपन्नं च तथा चाविहितञ्च यत् ॥" अभक्ष्यनियमश्च श्रीहरिविलासे द्रष्टव्यः ॥ ३४ ॥ अभ्यंगो गंधद्रव्येणार्चासंस्कारः, उन्मर्दनं चणकचूर्णादिनार्चासंस्कारः । पूर्वोक्तं स्मारयति–अन्नाद्येति । गीतादि स्वयं कुर्यात्कारयेद्वा । ननु "शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा । एकजातेरयं धर्मो न जातु स्याद्विजन्मनः ॥" इति बृहन्नारदीयोक्तेः । कथमुक्तं गीतनृत्यानीति तत्राह–"गीतनृत्यादि कुर्वीत द्विजदेवाग्नितुष्टये । न जीवनार्थं युंजीत विप्रः पापभिया क्वचित् ॥ ब्राह्मणो वासुदेवार्थं गायमानोऽनिशं परम् । नववर्षसहस्राणि कुबेरभवने वसेत् ॥" इति वाराहोक्तेर्जीवनार्थमेव तद्दोष इति भावः ॥ * ॥ अभ्यंगेति–प्रथमं दंतधावनम्, ततः सुगन्धितैलाभ्यंगः, ततः कुंकुमकर्पूरचूर्णादिभिरुद्वर्तनं, ततः पञ्चामृताद्यैः सुगन्धिजलेन च स्नपनं, ततोऽत्रानुक्तमपि अनर्घ्यकौशेयवस्त्ररत्नालंकारचंदनालेपस्रगादिकं, ततः आदर्शो दर्पणं, ततो गन्धपुष्पधूपदीपाचमनीयानि–अन्नाद्येति–चतुर्विधस्वाद्वन्नसुगं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिना विहिते कुंडे मेखलागर्तवेदिभिः ॥ अग्निमाधाय परितः समूहेत्पाणिनोदितम् ॥ ३६ ॥
परिस्तीर्याथ पर्युक्षेदन्वाधाय यथाविधि ॥ प्रोक्षण्याऽऽसाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत माम् ॥ ३७॥

गेति । अभिषेचनं पंचामृतादिस्नपनम् । अन्नाद्येति । अन्नं भोज्यमाद्यं भक्ष्यम् । पर्वण्येकादश्यादौ । अन्वहं प्रत्यहं वा विभवे सति ॥ ३५ ॥ फलभूयस्त्वार्थिनोग्न्यावपि पूजाप्रकारमाह । विधिना स्वगृह्योक्तप्रकारेण । मेखलादिभिरुपलक्षिते । विहिते निर्मिते । तदुक्तम् । "विस्तारोच्छ्रायतास्तिस्रो मेखलाश्चतुरंगुलाः ॥ हस्तमात्रो भवेद्गर्तः सयोनिर्वेदिका तथा" इत्यादि । उदितं प्रज्वलितमग्निं परितः समूहेदेकत्र मेलयेत् ॥ ३६ ॥ दर्भैः परिस्तीर्य परितः प्रोक्षयेत् । अन्वाधायान्वाधानसंज्ञकं व्याहृतिभिः समि

धजलतांबूलमालारात्रिकपुष्पशय्याव्यजनादिकम्, ततो वाद्यगीतनृत्यादि च विभवे सति सदैव तदभावे पर्वण्युत्सवेऽवश्यमेवेति ॥ ३५ ॥ फलभूयस्त्वं फलाधिक्यम् । स्वगृह्यं स्वशाखा । सामान्यकुण्डस्वरूपमाह—तदुक्तमिति । विस्तारोच्छ्रायत उत्सेधायामप्रमाणेन तमनुलक्ष्येत्यर्थः । तथा च विस्तारमायाममुच्छ्रायमुत्सेधं चैकीकृत्य यावत्प्रामाणं स्यात्तावत्प्रमाणदेशे तिस्रो मेखलाः चतुरंगुलाश्चतुरंगुलप्रमाणाः कार्या इति भावः । " कुण्डानां मेखलास्तिस्रो मुष्टिमात्रे ततः क्रमात् । उत्सेधायामतो ज्ञेया द्व्येकार्द्धांगुलसन्निभाः ॥ अरत्निमात्रकुंडेषु त्रिषडेकात्मकांगुलाः । एकहस्तमिते कुंडे वेदाग्निनयनांगुलाः ॥ कुंडे द्विहस्ते ता ज्ञेया रसवेदगुणांगुलाः । चतुर्हस्ते तु ता ज्ञेया वसुतर्कयुगांगुलाः ॥ कुंडे रसकरे तास्तु पंक्त्यष्टत्र्यंगुलाः क्रमात् । वसुहस्तमिते कुंडे भानुपंक्त्यष्टकांगुलाः ॥ दशहस्तामिते कुंडे मनुभानुदशांगुलाः । होतुरग्रे योनि रासामुपर्यश्वत्थपत्रवत् ॥ मुष्ट्यरत्न्येकहस्तानां कुंडानां योनिरीरिता । षट्चतुर्द्व्यंगुलायामा विस्तारोन्नतिशालिनी ॥ एकांगुलं तु योन्यग्रं कुर्यादीषदधोमुखम् । एकैकांगुलिभिर्यो योनिं कुंडेष्वन्येषु वर्द्धयेत् ॥ यवद्वय प्रमाणेन योन्यग्रमपि वर्द्धयेत् । मुष्टिमानमितं कुंडं शतार्द्धे च प्रचक्षते ॥ शते होमेऽरत्निमात्रं हस्तमात्रं सहस्रके । द्विहस्तमयुते लक्षे चतुर्हस्तमुदाहृतम् ॥ दशलक्षे च षड्ढस्तं कोटयामष्टकरं स्मृतम् । दशहस्तमितं कोटयां विंशलक्षेऽष्टहस्तकम् ॥" इति केचित् । " दशहस्तात्परं कुंडं नास्ति होमे महीतले । एवमेव स्थंडिलेऽपि कुर्यान्मानञ्च मेखलाम् ॥ खाताधिक्ये भवेद्रोगो हीने धेनुधनक्षयः । वक्रकुण्डे तु संतापो मरणं छिन्नमेखले॥मेखलारहिते शोको ह्यधिके वित्तसंक्षयः । भार्याविनाशनं प्रोक्तं कुंडं न्यायविवार्जितम् ॥ अनेकदोषदं कुंडं दिङ्मूढे कुलनाशनम् । कुंडमेवं:विधं कष्टं तस्मात्स्थंडिलमाचरेत् ॥" अत्र बहुवक्तव्यमस्ति तच्च राघवभट्टीयादौ स्पष्टमित्युपरम्यते । स्वाम्युक्तकारिकापादार्थमाह—यथा कुंडं समेखलं भवति तथा वेदिकास्थंडिलमपि समेखलं कुंडोक्तन्यायेन तत्रापि मेखला एव कार्या न तु योन्यादिरित्यर्थः । प्रकृतमनुसरामः । आधाय भूमि समूहनगोमयोदकोपलेपनप्रादेशमितस्रुवादिरेखामृदुद्धरणसेचनपूर्वकं संस्थाप्य कांस्यपात्रेण तमितस्ततः प्रसृतं समूहेत् ॥ * ॥ स्वगृह्येति स्ववेदस्वशाखासूत्रोक्तविधिना ॥ ३६ ॥ दर्भैः षोडशकुशैः । परिस्तीर्याग्नेरीशानांतमित्याद्युक्तरीत्या परिस्तरणं कृत्वा । ब्रह्मणा कुशादिनान्वारभ्य क्रियमाणत्वादन्वाधानसंज्ञकं तच्च व्याहृतिहोमादि । एतदग्रे किंचिद्वक्ष्यति ' ध्यायन्नभ्यर्चेद्दारुणी ' इत्यादिना पर्युक्षणं च प्रोक्षणीपात्रजलेन पवित्राभ्यां कुर्यादित्यर्थः । होमोपयोगीनि पवित्रच्छेदनकुशकुशपत्रद्वयप्रोक्षणीपात्राज्यस्थालीसंमार्जनकुशत्रेणीरूपोपयमनकुशसामित्त्रयस्रुक्स्रुवाज्यपूर्णपात्ररूपाणि ॥ * ॥ ० ॥ ३७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तप्तजांबूनदप्रख्यं शंखचक्रगदांबुजैः ॥ लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससम् ॥ ३८ ॥ स्फुरत्किरीटकटककटिसूत्रवरांगदम् ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनम् ॥३९॥ ध्यायन्नभ्यर्च्य दारूणि हविषाऽभिघृतानि च ॥ प्रास्याऽऽज्यभागावाऽऽघारौ दत्त्वा चाज्यप्लुतं हविः ॥ ४० ॥ जुहुयान्मूलमंत्रेण षोडशर्चाऽवदानतः ॥ धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः ॥ ४१ ॥ अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् ॥ मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकम् ॥ ४२ ॥

त्क्षेपादिरूपं कर्म कृत्वा अग्नेरुत्तरतो द्रव्याणि होमोपयोगीन्यासाद्य निधाय प्रोक्षण्या प्रोक्षणीपात्रोदकेन प्रोक्ष्याग्नौ मां ध्यायेत् ॥ ३७ ॥ शंखादिभिरुल्लसंतः शोभमानाश्चत्वारो भुजा यस्य तम् ॥ ३८ ॥ स्फुरंति किरीटादीनि यस्य तम् ॥ ३९ ॥ हविषा घृतेनाभिघृतानि संसिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य । आघारौ तत्संज्ञकौ भागौ । एवमाज्यभागौ च दत्त्वा तदर्थाहुतीर्हुत्वेत्यर्थः । तत्राघारौ प्रजापतये स्वाहेंद्राय स्वाहेति चोत्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्यादापरिध्यंतं घृतक्षारणरूपौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ॥ ४० ॥ मूलमंत्रेणाष्टाक्षरेण । तथा षोडश ऋचो यस्मिंस्तेन पुरुषसूक्तेन चावदानतः प्रत्यृचमाहुतिग्रहणेनेत्यर्थः । पुरुषसूक्तेनाराधनपक्षे स एव मूलमंत्रस्तेनैव प्रत्यृचमवदानतो होम इति । मंत्रैः स्वाहांतैर्नाममंत्रैः । यथान्यायं पूजाक्रमेणैव । अग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं च जुहुयात ॥४१॥ ततो वह्निस्थं भगवंतमंतर्यामिणमभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो नंदादिभ्योऽष्टदिक्षु बलिं हरेत् । ततः पूजास्थानमागत्य देवस्याग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत् ॥ ४२ ॥

ध्येयस्वरूपमाह–तप्तं जांबूनदं स्वर्णं तद्वत्प्रख्या दीप्तिर्यस्य तम् । 'कृष्णवर्णं त्विषाऽकृष्णम्' इति कान्तेरकृष्णत्वोक्तेः स्वर्णालंकारबहलं वा । "प्रख्यं नामसदक्षयोः । स्त्रियां दीप्तौ प्रकीर्तौ च कथने तु नपुंसकम् ।" इति निरुक्तिः ॥ * ॥ ० ॥ ३८ ॥ कटकं वलयम् । कटीसूत्रं मेखला । अंगदं बाहुभूषणम् ॥ * ॥ ० ॥ ३९ ॥ शुष्कसमिधस्तूष्णीं ब्रह्मध्याननिक्षेप्यास्त्रयः पालाश्यस्तदभावेऽन्या अपि । तदुक्तं ब्राह्मे–"पलाशाश्वत्थन्यग्रोधप्लक्षवैकंकतोद्भवाः । वेतसोदुंबरौ बिल्वश्चन्दनं सरलस्तथा ॥ शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः ।" । मरीचिस्तु–विशीर्णा विरजा ह्रस्वा वक्राः ससुषिराः कृशाः । दीर्घा स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशकाः ॥" । गृह्यसंग्रहेऽपि–"प्रागग्राः समिधो देयास्ताश्च काम्येष्वपाटिताः । शांत्यर्थेषु सवल्काऽऽर्द्रा विपरीता जिघांसया ॥ नांगुष्ठादधिका कार्या समित्स्थूलतया क्वचित् । प्रादेशान्नाधिकन्यूना न तथा स्याद्विशाखिका ॥ न सपर्णा न निर्वीर्या होमेषु च विजानता ॥" इत्यलमधिकेन । तदर्थाहुतीः आघाराज्यभागार्थाहुतीः । इत्यर्थ इति–एतदाहुतिवियुक्तहोमस्य विगुणत्वादिति भावः । तत्राहुतिचतुष्कमध्ये होमकुंडे स्थंडिले च परिधिरस्ति रेखात्रयात्मको वैकरेखात्मकः, प्रथमाहुतिमुत्तरत आरभ्य संततदीर्घां दक्षिणपरिधिपर्यंतां द्वितीयां दक्षिणत आरभ्योत्तरपरिधिपर्यंतां संततदीर्घां च जुहुयात् । संततघृतक्षरणवत्त्वादाघारत्वमेतयोरित्यर्थः । द्रव्यांतरहोमेप्याज्येनैव हूयमानत्वादाज्यभागत्वमिति ॥ * ॥ ० ॥ ४० ॥ मूलस्यादिकारणस्य नारायणस्य जलशायिनो मंत्रो मूलमंत्र इत्यर्थः । इत्यर्थ इति–अवदीयतेऽवखंड्यत इत्यवदानं भेदस्तेन । तसिरत्र तृतीयार्थे । 'अवदानं खंडने स्यात्' इति मेदिन्युक्तेरयमर्थः । नाममंत्रैर्धर्माय स्वाहेत्यादिरूपैः ॥ * ॥ ० ॥ ४१ ॥ ततस्स्विष्टकृद्धोमोत्तरम् । पार्षदेषु गरुडस्य बलिं पुरतः । ततो बलिदानोत्तरम् । नारायणात्मकं मूलमंत्रं ब्रह्म स्मरन्परमात्मानं मां ध्यायन् जपसमये मन्मूर्तिध्यानं कुर्यादित्यर्थः । यद्वा–मंत्रविशेषणं ब्रह्मेति । ब्रह्मस्वरूपम् 'मंत्रमूर्तिकम्' इत्युक्तेः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दत्त्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् ॥ मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ॥ ४३ ॥
उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम ॥ मत्कथाः श्रावयञ्छृण्वन्मुहूर्तं क्षणिको भवेत् ॥ ४४ ॥

तत्र उभयत्र भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं दत्त्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा तदनुज्ञया पश्चात्स्वयं भुंजीत । ततः सुरभिमत्सुगंधवत्तांबूलाद्यं मुखवासं दत्त्वाऽथ पुनरप्यर्हयेत्पुष्पांजलिना पूजयेत् ॥ ४३ ॥ अभिनयन्स्वस्मिन्नाविष्कुर्वन् । क्षणिको वैयग्र्यं परित्यज्य लब्धावसरो भवेत् ॥ ४४ ॥

यद्वा—ब्रह्म वेदम् उत्तरनारायणादिसूक्तं जपेत् । किं कुर्वन्—नारायणात्मकं स्मरन् " वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम" इत्युक्तेः । किं भूतं ब्रह्म—मंत्राणां सर्वेषां मूलमादिकारणं मूलमंत्रम् । राजदंतादिवत्समासः॥*॥ नारायणात्मकं ब्रह्मेत्युक्त्या निर्विशेषस्मरणं व्यावर्त्यते ॥ ४२ ॥ ततो जपानंतरम् । उभयत्र वह्निस्थे शालग्रामादिस्थे च कल्पयित्वा मनसा समर्प्य । उपलक्षणमेतत्पदामृतस्यापीति । तदपि दत्त्वैव स्वयं गृह्णीयात् । तदुक्तम्—"बलिर्विभीषणो भीष्मः प्रह्लादो नारदोऽर्जुनः । षडेते वैष्णवा नित्यं गृह्णन्तु चरणोदकम् ॥" इति स्मृतिसंग्रहोक्तेः । तच्च स्वयमपि हस्तेन न पिबेत् । तदुक्तं भविष्ये—"समभ्यर्च्य पिबेद्देवान्यः पादसलिलं हरेः । स याति परमं स्थानं तद्विष्णोः परमं पदम् ॥ विष्णुपादाभिषिक्तं यः पात्रेणैव पिबेज्जलम् । सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ यः पादसलिलं विष्णोः करेण पिबते यदि । स मूढो नरकं याति यावदिन्द्राश्चतुर्दश ॥ " इति । पुलस्त्यः—" शालग्रामशिलावारि सोमपानं दिनेदिने । पात्रांतरेण तद्ग्राह्यं करेण सुरया समम् ॥" इति । तत्स्वरूपं रामाश्वमेधीये—" उदकं चंदनं चक्रं शंखश्च तुलसीदलम् । घंटा ताम्रं शिला विप्रा विष्णोः सूक्तं पदामृतम्॥" इति । "एकांगस्यापि न्यूनत्वे न स्यात्ताद्धि पदामृतम् " इति ध्येयं सुधीभिः । तदनुज्ञया मनसा विष्वक्सेनाज्ञां गृहीत्वा सुगंधवदेलालवंगादियुक्तं मुखं वासयति सुगंधयतीति सुखवासम् ॥ * ॥ तांबूलाद्यमिहाद्यपदेन कर्पूरखदिरैलादंडीरपूगानां ग्रहः । पंचरात्रे विशेषोप्युक्तः—" पुनराचमनं दद्यात्करोद्वर्तनमेव च । सकर्पूरं च तांबूलं चंदनैः करमार्जनम् ॥ पुष्पावलिं ततः कृत्वा भक्त्याऽऽदर्शं प्रदर्शयेत् । नीराजनं पुनः कार्यं कार्पूरं विभवे सति ॥" अगस्त्यसंहितायां तु—"स्नेहसंयुक्तविपुलवर्तिकाभिरनेकधा।आरात्रिभिरनेकाभिः स्थापिताभिः प्रयत्नतः ॥ पयस्स्वस्तिकरूपेण हंसाकारेण चानघ ॥ पुरस्ताद्रघुनाथस्य भ्रामयेत्प्रयतोन्वहम्॥" । अत्र विशेषः श्रीहरिभक्तिविलासे द्रष्टव्यः॥४३॥आविष्कुर्वन् तत्तल्लीला अनुकुर्वन्नित्यर्थः । ननु'न देवचरितं चरेत्' इति निषेधात्कथमुक्तं कर्माण्यभिनयन्ममेति चेदत्र 'समान्यशास्त्रतो विशेषशास्त्रं बलवत्' इति न्यायेन समाधेयम् । तथाहि—यथा " न हिंस्यात्सर्वा भूतानि " इति समान्यशास्त्रं "वायव्यं श्वेतमालभेत" इति विशेषशास्त्रेण बाध्यते इत्यर्थः । तथा 'न देवचरितं चरेत्' इति सामान्यशास्त्रं ' कर्माण्यभिनयेन्मम ' इति वाक्यकल्प्येन विष्णुलीला अभिनयेत् । इत्येवंरूपेण विशेषशास्त्रेण बाध्यत इत्यर्थः । मुहूर्तं घटिकाद्वयम् । विशेषकाले कथाश्रवणे श्रावणे तु चित्तमालस्यादिना खिन्नतामृच्छतीति भावः । वैयग्र्यं कार्यान्तरासक्तिम् । क्षणिक इत्यस्यार्थो वैयग्र्यमित्यादि । सा च कथा श्रीमद्भागवतस्यैव ज्ञेया, तया च पूजापि सांगा भवतीत्यभिप्रेत्यैव पूजांते श्रीकृष्णेनोक्तम्—' मत्कथाः श्रावयञ्श्रृण्वन् ' इति । तथा चोक्तं संहितायाम्—" पूजानिश्छिद्रतावाप्त्यै विष्णोर्भागवतं मुने । पुराणं श्रीशुकेनोक्तं गंगायां यत्परीक्षिते ॥ तन्नित्यं वाचयेत्किंचित्तेन प्रीतो जनार्दनः । द्वात्रिंशदपराधांश्च क्षमते नात्र संशयः ॥ श्रीकृष्णपूजासंपूर्तिर्विना भागवतं न हि । विनापि श्रीहरेः पूजां श्रीभागवतपाठतः ॥ सांगपूजाफलं नित्यं जायते नात्र संशयः ॥ कृष्णस्य वाङ्मयी मूर्तिः श्रीमद्भागवतं मुने । पाठोऽस्य पूजनं सांगं देवदेवस्य शार्ङ्गिणः ॥ " इति ॥ * ॥ क्षणिको गानादिमयोत्सवाविष्टो भवेत् । परं तु श्रीहरिकथानंतरमेव " पूजासमाप्तिर्नैव स्याच्छ्रीमद्भागवतीं कथाम् । विना भार्गव विप्रेन्द्र श्रीगोपालपतेर्विभोः ॥ न्यूनापि पूर्तिमाप्नोति श्रीमद्भाग वतध्वनेः । पूर्णापि

१ टीकायां तत उभयत्रेति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि ॥ स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ॥ ४५ ॥ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परम् ॥ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥ ४६ ॥ इति शेषां मया दत्तां शिरस्याधाय सादरम् ॥ उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ॥ ४७ ॥ अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् ॥ सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥ ४८ ॥

स्तवस्तोत्राणां भेदं दर्शयति । पौराणैः प्राकृतैरपीति॥४५॥ कथं प्रणमेदित्यपेक्षायामाह । शिर इति । बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृहीत्वा । यद्वा पृष्ठतः परस्परं निबद्धाभ्यां बाहुभ्यां कृतापराध इव प्रपन्नमित्यादिविज्ञप्त्या च प्रणमेत्॥४६॥ततः शेषाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह।इतीति। अनयैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा शिरस्याधाय धृत्वा यद्युद्वासयेत्तर्हि प्रतिमायां यदन्यस्तं ज्योतिस्तत्पुनरपि हृत्पद्मस्थज्योतिष्येवोद्वास्यमुद्वासनीयम् ॥ ४७ ॥ एतेष्वधिष्ठानेषु

पूजा हीना स्याद्विना पारीक्षितीं कथाम् ॥" इति संहितोक्तेः ॥ ४४ ॥ उच्चावचैः उच्चैः पौराणिकैः स्तवैः, अवचैः प्राकृतैर्मनुष्यादिवाग्रचितैर्निकृष्टैस्तोत्रैः "प्राकृतं तज्जतत्तुल्यदेश्यादिकमनेकधा" इति वाग्भटोक्तेः । अस्यार्थः—प्राकृतमनेकधा—एकं तज्जं तस्मात्संस्कृताज्जायत इति तज्जं शुद्धं प्राकृतं, यथा—मातर्गृहोपकरणामित्यत्र—मारा घरोव अरणमिति । अपरं तत्तुल्यं तेन संस्कृतेन तुल्यं समं, यथा—'धरणिधरचारुदेहं देववरं नमामि बलवंतम्" इति । तृतीयं देश्यं, यथा—डलमहौ शब्दौ देश्यप्राकृतौ । आदिशब्दात् शूरसेनीमागध्यावपि प्राकृते इति । स्तवानां व्यासप्रोक्तत्वेन 'व्यासो नारायणः स्वयम्' इत्युक्तेर्वेदरूपत्वादुच्चत्वं स्तोत्राणां मनुष्यप्रणीतत्वादवचत्वमिति । द्विजातीनां वक्तुमर्हा वचास्तद्भिन्ना अवचाः । एतेन द्विजातिभिः प्राकृतं न पठनीयमिति । तदुक्तं संग्रहे—"द्विजो न प्राकृतं शास्त्रमापद्यपि कदाचन । शृणुयाच्छृणुयादार्षं विप्रादेव न चान्यतः ॥ यावद्विप्रमुखे शास्त्रं शास्त्रत्वं तावदेव हि । विप्रेतरगतं शास्त्रमशास्त्रत्वं प्रपद्यते । यथा पतिरता साध्वी परगा व्यभिचारिणी ॥" । किञ्च—"प्राकृतश्रवणं व्यर्थं न पुण्यं तेन जायते । प्रत्यवायावहं किन्तु केवलं स्याद्द्विजन्मनाम् ॥" इति । यद्वा—प्रकर्षेणाकृतैर्वैदिकैः पुरुषसूक्ताद्यैः ॥ * ॥ स्तवैः स्वनिर्मितैः क्रियात्वेन निर्देशात् कर्तृजन्यत्वापत्तेः । उच्चावचैः नानाप्रकारैः । स्तूयते एभिरिति स्तोत्रैरिति करणतया निर्देशेन पूर्वसिद्धत्वापत्तेः ।·पौराणैरित्युपलक्षणं तांत्रिकश्रौतयोः । प्राकृतैरधुनान्येन निर्मितैः । तदुक्तं कालिकापुराणे—"या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः । क्रियते भक्तियुक्तेन वाचिकस्तूत्तमस्तु सः ॥" इति । स्तवस्तोत्रयोरार्षपौरुषेयत्वेन भेदः कल्प्य इति **चक्रवर्तिकारः** ॥ ४५ ॥ प्रणतिरीतिं पृच्छति—कथमिति । प्रपन्नं शरणं प्राप्तम् । निबद्धाभ्यामौपर्याधस्तनीकृताभ्याम् ॥ * ॥ दूरतो नमस्कारमुक्त्वा किंचिद्दूरत आह—शिर इति । अतिनिकटे गर्भमंदिरे च निषेधात् । टीकायां द्वितीयपक्षमाह—यद्वेति । "अग्रे पृष्ठे वामभागे समीपे गर्भमंदिरे । जपहोमनमस्कारान्न कुर्यात्केशवालये ॥" इति । गौतमीये तु विशेषः—'पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा' इत्यादिनाष्टांग उक्तः । आगमे "जानुभ्यां चैव पाणिभ्यां शिरसा वचसा धिया । पंचांगकः प्रणामः स्यात्पूजासु प्रवराविमौ ॥" इति । इमावित्यष्टांगापेक्षं द्वित्वम् ॥ * ॥ **विश्वनाथस्तु**—अग्रपृष्ठादौ प्रणतिनिषेधान्मत्पादयोर्दक्षिणपार्श्वे किञ्चिद्दूरे शिरः कृत्वा वंदेत । बाहुभ्यां परस्परं संमुखीभूततर्कमुद्राभ्यां सहितमिति शेषः । किं ब्रुवाण इत्यपेक्षायामाह—प्रपन्नमित्यर्द्धम् ॥ ४६ ॥ ततः प्रणत्युत्तरम् । "प्रसादान्निजनिर्माल्यदाने शेषा प्रकीर्तिता" इति विश्वोक्तेर्माल्यादिदानम् । "शेषोऽनंते पुमान्स्त्री चाक्षतमाल्यादिदेशने" इति यादवः । अनयैव 'प्रपन्नं पाहि माम्' इत्यादिकया उद्वास्यं प्रासादप्रतिष्ठितार्चाशालग्रामेतरस्थण्डिलाद्यानीतमेव ॥ * ॥ इति वंदनानंतरं शेषां निर्माल्यं मया कृपया दत्तां ध्यात्वा शिरस्याधाय ज्योतिर्मदीयं सैकतप्रतिमादिस्थमुद्वास्यं चेत्पुनरपि स्वहृदयस्थज्योतिषि एवोत्कर्षेण वासयेत् ॥ ४७ ॥ सर्वाधिष्ठानसाम्यमाहाक्षेपपूर्वकम् । एतेषु सूर्यादिषु । अधिष्ठानसाम्ये हेतुमाशंक्य समाधत्ते—कुत इति । यतोऽहं सर्वात्माऽतोऽधिष्ठानतारतम्यं नास्तीत्यर्थः ॥ * ॥ यद्यप्यर्चायामेव प्राधान्यमुक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सिताम् ॥ ४९ ॥

किं मुख्यमित्यपेक्षायामाह । अर्चादिष्विति । यदा यत्र श्रद्धा तदा तत्र न त्वधिष्ठाने मुख्यामुख्यत्वम् । कुतः । यतः सर्वभूतेष्विति ॥ ४८ ॥ उभयतः इहामुत्र च ॥ ४९ ॥

तथापि श्रद्धैव ममाविर्भावकारणं,यां विना साक्षाद्भूतस्याप्यस्य ममोपलब्धिः ‘ बिराडविदुषाम् ’ इत्यादिवन्न स्यादित्याभिप्रेत्य श्रद्धांयां आवश्यकत्वं दर्शयितुमाह—अर्चादिष्विति । अधिष्ठानेषु प्राधान्यमेव दर्शयितुमर्चाद्या उक्ताः । किंच—श्रद्धाधिक्ये सति सर्ववस्त्वेव ममाधिष्ठानं प्रह्लादादिश्रद्धया हिरण्यकशिपुस्तम्भादावपि मत्सुलभत्वदर्शनादित्याह—सर्वभूतेष्विति ॥ ४८ ॥ एवमुक्तरीत्या क्रियायोगस्य पथैर्मार्गैः यथाधिकारविहितैः ‘वाटः पथश्च मार्गश्च ’ इति सुभूतिः । अथ वेदतन्त्राधिकारानधिकारनिरूपणं प्रसंगादाह—“ प्रत्यक्षवेदसिद्धोऽर्थः संग्राह्यः सर्वचेतनैः । अप्रत्यक्षश्रुतेरर्थं स्मरंति मुनिसत्तमाः ॥ स्मृतयश्च पुराणानि भारतप्रमुखान्यपि । क्वचित्कदाचित्तंत्रार्थं कटाक्षेण मुनीश्वराः ॥ अधिकारिविशेषाणां प्रवदंत्यर्थमास्तिकम् । ब्राह्मणः क्षत्रियोऽन्यो वा निःशंकं तत्परित्यजेत् ॥ वर्णाश्रमपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः । वेदेतरागमं पीत्वा पापी तद्धर्ममाचरेत् ॥ वेदवादेतरासक्ता बहवो नरकं गताः ॥ ” इति पराशरपुराणे । सूतसंहितायामपि—“ तथापि योंशो मार्गाणां वेदेन न विरुद्ध्यते । सोंशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम् ॥ अत्यंतमलिनानां तु प्राणिनां वेदमार्गतः । ” सार्वविभक्तिकस्तसिः । वेदमार्गेणेत्यर्थः । हीनानामिति शेषः । “ पांचरात्रादयो मार्गा कालेनैवोपकारकाः ” इति । कौर्मेऽपि ब्राह्मणानां गौतमशापेन वेदबाह्यत्वे जातेः स्तुतौ शिवकेशवौ—“ चकार मोहशास्त्राणि केशवः सशिवस्तदा । कापालं नाकुलं वामं भैरवं पूर्वपश्चिमम् ॥ पांचरात्रं पाशुपतं तथाऽन्यानि सहस्रशः । क्वचित्क्वचित्पुराणादौ वेदमूलेऽपि सर्वथा ॥ संति निर्मूलतंत्रांशास्ते तु ग्राह्या न वैदिकैः । ” इति । मोहशास्त्रत्वं चैहिकफलदर्शनेन तत्तंत्रोक्तपारलौकिकफलेष्वपि विश्वस्य वसिष्ठाद्युपासितत्वादितत्तदर्थवादेषु च विश्वस्य वैदिकमार्गत्यागजनकमोहजनकत्वात् । तंत्रांशानां निर्मूलत्वं च वेदामूलकत्वात् । पाद्मे पार्वतीश्वरसंवादे—“ शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् । तेषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि ॥ प्रथमं हि मया प्रोक्तं शैवं पाशुपतादिकम् । मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् ॥ कणादेन च संप्रोक्तं शास्त्रं वैशेषिकं महत् । गौतमेन तथा न्यायं सांख्यं तु कपिलेन वै ॥ द्विजन्मना जैमिनिना पूर्ववेदप्रकाशकम् । निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥ विशेषेण तथा प्रोक्तं चार्वाकमतिगर्हितम् । दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ॥ वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् । मयैव कथितं देवि जगतां नाशकारणात् ॥ ” इति । अस्य पूर्वं द्विजानाश्रित्येति शेषः । न्यायवैशेषिकयोः सुखदुःखादिमत्त्वमात्मनः श्रुतिविरुद्धं, निरीश्वरता सांख्यमीमांसयोः श्रुतिविरुद्धेति तदंशे तेषामप्रामाण्यं मायावादो नास्तिकानां वासिष्ठलैंगे वेदमार्गं परित्यज्य तंत्रमार्गेण विष्णुपूजकं शांडिल्यं प्रति विष्णुवचः—“ धिग्धिक् शांडिल्य दुर्बुद्धे साहसी त्वमतो भृशम् । को वा वर्णाश्रमाचारं श्रौतं त्यक्तुं त्वया विना ॥ शक्तः पापबलात्त्यक्तुर्नास्ति ते निष्कृतिः श्रुतौ । कुमार्गेणापि शांडिल्य कृता पूजा मम त्वया ॥ अतः कालेन महता वेदमार्गं गमिष्यसि । ” इति । अत्र पापबलात्त्यक्तुरित्युक्त्या पूर्वजन्मपापमेव तत्त्यागे तंत्रमार्गप्रवेशे च कारणमिति सूचितम् । अनेन स्पष्टमेव भ्रष्टाधिकारिकत्वं तेषां सूचितं तत्रैव स्थलान्तरे—“पाञ्चरात्रं भागवतं बौद्धं दैगंबरं तथा । लोकायतं च कापालं सोमं पाशुपतं तथा ॥ नाकुलं भैरवं वामं शाक्तं शांभवयामले । एवंविधानि शास्त्राणि मनसापि च न स्मरेत् ॥ ” इति । पाञ्चरात्रं चात्र नारदसूर्यचित्रशिखंडिप्रणीतं प्राक्तनं न निन्दितम् । “ कृतं शतसहस्रं हि श्लोकानामिदमुत्तमम् । यजुर्ऋक्सामभिर्जुष्टमथर्वांगिरसैस्तथा ॥” इत्युक्तेस्तस्य वेदरूपत्वात् । किन्तु सात्वतप्रणीतं, नारदप्रणीतस्य कलौ लुप्तत्वात्तदुक्तं मोक्षधर्मे महाभारते उपरिचरवसुसंज्ञकं राजानमुपक्रम्य—“स च राजा श्रिया युक्तो भविष्यति महान्वसुः । संस्थिते तु नृपे तस्मिञ्छास्त्रमेतत्सनातनम् ॥ अंतर्द्धास्यति तत्सर्वमेतद्वः कथितं मया ।” इति । यच्चेदानीमुपलभ्यते तस्यैव निंदापि । यथा कौर्मे—“सात्वतो नाम परमो विष्णुभक्तः प्रतापवान् । महात्मा दाननिरतो धनुर्वेदविदां वरः ॥ स नारदस्य वचनाद्वासुदेवार्चने रतः । शास्त्रं प्रवर्तयामास कुंडगोलादिभिः श्रितम् ॥” अत एव वाक्यादभिनवोऽपि कश्चित्पञ्चरात्रागमः सात्वतप्रणीतत्वात्सात्वततंत्रनाम्नैव प्रसिद्धोस्तीति । किञ्च—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

"सर्वं वेदाविरोधेन प्रमाणं नान्यथा भवेत् । तस्मात्सर्वप्रयत्नेत ब्रह्मन्वेदविदां वर ॥ त्यक्त्वा वेदविरुद्धानि वेदमेकं समाश्रये । " इति च सर्वं स्मृतिपुराणदेशकुलजातिधर्मादिकम् । ब्राह्मे—"स्वागमैः कल्पितैस्तैस्तु जनान्मद्विमुखान्कुरु । मां च गोपय येन स्यात्सृष्टिरेषोत्तरोत्तरा ॥" इति । वाराहे—"अभावे वेदमंत्राणां पञ्चरात्रोदितो विधिः" इति । सांबपुराणे—"श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्तोभयं गतः । क्रमेण श्रुतिसिद्ध्यर्थं ब्राह्मणस्तन्त्रमाश्रयेत् ॥ पाञ्चरात्रं भागवतं तंत्रं वैखानसाभिधम् । वेदभ्रष्टान्समुद्दिश्य कमलापतिरुक्तवान् ॥" इति चेन्न, "श्रौतार्चनं तु विप्राणां विशेषेण सदा भवेत् । श्रौतागमार्चनं क्षत्रे वैश्ये केवलमागमम् ॥ " इति । मंत्रराजानुष्टुब्विधाने उक्तेस्तयोस्तत्राधिकारात् । श्रौतागमं वैदिकैरेव मंत्रैरागमशास्त्रोक्तन्यासाधारपीठपूजाद्यंगकलापेन पूजनं, केवलमागममागमोक्तैनैव मंत्रेणागमस्थबीजप्रक्षेपयुतवैदिकेन वागमोक्तांगकलापेन पूजनं, यत्र नागमोक्तबीजक्षेपो नास्ति तत्रत्यन्यासादिरूपमंगं तण्छुद्धश्रौतं, न्यासस्य तांत्रिकत्वं त्वाश्वलायनगृह्यपरिशिष्टे संध्याप्रकरणे । तदुक्तम्—सावित्र्या ऋषिदैवतच्छंदांस्यनुसृत्य दैवतमेव वानुस्मृत्य तामेतां चतुरक्षरशो विभक्तामंतर्योजितैः षड्भिश्चांगमंत्रैर्यथांगमात्मानि विन्यस्यात्मानं तद्रूपं भावयेत् । यथा—तत्सवितुर्हृदयाय नम इति हृदये । वरेण्यं शिरसे स्वाहेति शिरसि । भर्गो देवस्य शिखायै वषडिति शिखायाम् । धीमहि कवचायहुमिति कवचमुरसि । धियो यो नो नेत्रत्रयाय वौषडिति नेत्रललाटेषु विन्यस्याथ प्रचोदयादस्त्राय फडिति करतलेनास्त्रं प्राच्यादिदशसु दिक्षु न्यसेदेषोंगन्यासः । एवमप्येके नेच्छन्ति स हि विधिरवैदिक इति । अथ मंत्रदेवतां ध्यायेदिति अत्रैनमपीत्यपि न न्यासांतराणां तांत्रिकमन्त्रेष्वप्यनावश्यकता । एके मुख्या ब्राह्मणा इत्यर्थः । अनेन तेषां तन्त्रे नाधिकार उक्तः । हि यतः स विधिर्न्यासविधिरवैदिक इति तं नेच्छन्ति, विप्राः । अनेन तंत्राणां वेदमूलकत्वं निराकृतं तेन क्षत्रियादिविषयता च स्पष्टमुक्ता विप्राणां च वैदिकमात्र एवाधिकार इति सूचितम् । तथा च—वैदिकानां वेद एव प्रमाणं भ्रष्टानां तंत्राणि भ्रष्टतराणां शाक्ताद्यागमाश्च प्रमाणमिति व्यवस्था बोध्या । भ्रष्टविप्रोऽपि मिश्रपूजाधिकारी तंत्रोपात्तवैदिकेषु तस्याधिकारात् । किञ्च—ब्रह्मघ्नादीनां प्रायश्चित्तकरणकालेषु सन्ध्यावन्दनगायत्रीजपाधिकारवत् । "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति श्रुतिबलाद्ब्रह्मघ्नस्यानेकमंत्रसाध्याश्वमेधाधिकारवच्च तस्य वैदिकेऽप्यधिकारात् । यत्तु तत्तत्तंत्रेषु तंत्रमार्गाणां वैदिकमार्गादाधिक्यकथनं तत्तु भ्रष्टादिरूपतत्तदधिकारिणः प्ररोचनार्थं मोहनार्थं च, तादृशमोहे पूर्वजन्मकृतपापमेव कारणम् "पाञ्चरात्रे च कापाले पाखण्डेष्वपरेषु च । दीक्षिताश्च भविष्यन्ति मनुष्याः पापकर्मिणः ॥ " इत्युक्तेः । किञ्च—यत्पुराणेषु दुर्गापूजने रात्रिपूजाप्राधान्यं तदनुसारेण तत्तिथिनिर्णयश्चोक्तस्तत्तंत्रानुसार्येव "पूर्वाह्णो देवानाम् " इति प्रत्यक्षश्रुतिविरोधात् । " वामाचारो महादेवि नक्तेनोद्धरते नरान् " इत्युक्ते रात्रिपूजा वामाचारांतर्गतैव, वामाचारे ब्राह्मणस्य तु तंत्रभ्रष्टस्यापि नाधिकारः " यो दाक्षिण्यं विना विप्रो महामायां प्रपूजयेत् । स पापः स्वर्गलोकात्तु च्युतो भवति रोगधृक् ॥ " इति कालिकापुराणोक्तेः । दाक्षिण्यं दक्षिणमार्गः । कथंचित्पापातिशयात्तत्र प्रवेशेऽपि मद्यमांसादौ तस्य नाधिकारः । "वामागमोऽपि विप्रस्तु मद्यं मांसं न भक्षयेत् । स्वकीयां परकीयां वा नाकृष्य ब्राह्मणो यजेत् ॥" इति तंत्रसारात् । आकृष्य धनादिना वशीकृत्य "आवां तु पिशितै रक्तैः सुरयापि सुरेश्वरि।वर्णाश्रमोचितं धर्ममविचार्य यजन्ति ये ॥ भूतप्रेतपिशाचास्ते भवन्ति ब्रह्मराक्षसाः ।" इति । गौरीं प्रति शिवेनोक्तमगस्त्यसंहितायाम् । "पीत्वापीत्वा पुनः पीत्वा पतित्वा धरणीतले।उत्थाय च पुनः पीत्वा पुनर्जन्म न विंदति॥" इत्यादि तु शूद्रपरं, व्यवहारे मद्यादितो निवृत्तस्यापि शूद्रस्य सौत्रामण्यादिन्यायेन पूजायां तत्स्वीकारो बोध्यः । मद्ये ब्रह्मशापकृष्णशापशुक्रशापविमोचनप्रकारोऽपि शूद्रस्यैव तद्विना शूद्रस्य सिद्धिप्रतिबंधात् । तदुक्तं देवीपुराणे—" वेश्यासु गोपबालासु डौड्डूणखसेषु च । शूद्रस्त्रीषु विशेषेण पुलिंदशबरेषु च ॥ लोकोत्तरेण मार्गेण वामाचारेण सिद्धिदः " इति शूद्रादीनामेव तत्राधिकार उक्तः । लोकोत्तरेण तदनंगीकृतेन । स्त्रीपदमतिभ्रष्टस्त्रीपरम् । ब्राह्मणेन तु सात्त्विको बलिर्देयः । " ब्राह्मणस्य बलिर्यत्र तत्रायं विहितः क्रमः । कृत्वा घृतमयं सिंहं नरं व्याघ्रं च भैरवम् ॥ अथवा पूपविकृतं यवक्षोदमयं च वा ॥ घातयेच्चंद्रहासेन " इति कालिकापुराणात् । एतच्च कूष्मांडश्रीफलेक्षुदंडादेरप्युपलक्षणम् । किं बहुना, तंत्रमार्गे विप्रस्य नाधिकारो वामाचारप्रवृत्तो ब्राह्मणस्तु वेदाध्ययनप्रवृत्तशूद्रवन्नारक्येव । तंत्रमार्गे यत्र कुत्रचिद्ब्राह्मणपदं कुंडगोलविप्रपरम् । " प्रवृत्ते योगिनीतंत्रे सर्वे वर्णा द्विजातयः । निवृत्ते योगिनीतंत्रे सर्वे वर्णाः पृथक्पृथक् ॥ " इत्यादिवचांसि कुंडादिपराणि तेषामप्युपनयनविधानेन द्विजातित्वात् । तत्तद्वर्णजातस्य गौणतत्तद्वर्णत्वाच्च । एतदभिप्रायकमेव " सौत्रामण्यां कुलाचारे विप्रे मद्यं न दुष्यति " इति पठन्त्याधुनिकाः । तथा तप्तमुद्राधारणाद्यपि शूद्रकुंडगोलकादीनामेव । लिंगचक्रादिधारिणमुपक्रम्य " विप्रस्यैतद्विगर्ह्यत्वात्प्रायश्चित्तमुदी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढम् ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाऽऽश्रितान् ॥ ५० ॥ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहम् ॥ क्षेत्रापणपुरग्रामान्दत्त्वा मत्सार्ष्टितामियात् ॥ ५१ ॥ प्रतिष्ठया सार्वभौमं दानेन भुवनत्रयम् ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥ ५२ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति ॥ भक्तियोगं स लभत एवं यः पूजयेत माम् ॥ ५३ ॥

समर्थं प्रत्याह यदर्चामिति त्रिभिः । पुष्पोद्यानानि च कारयेत् । पूजायात्रोत्सवाश्रितान् । पूजा प्रत्यहम् । यात्रा विशिष्टे पर्वणि बहुजनसमागमः । उत्सवो वसंतादिमहोत्सवः । तदाश्रितान् क्षेत्रादीन् दत्त्वा ॥ ५० ॥ पूजायात्रोत्सवाश्रितानित्यस्य विवरणं पूजादीनामिति । प्रवाहार्थं संततानुवृत्त्यर्थं क्षेत्रादीन्दत्त्वा । मत्सार्ष्टितां मत्समानैश्वर्यम् ॥ ५१ ॥ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह । प्रतिष्ठयेति । मत्साम्यतां मया साम्यमित्यर्थः ॥ ५२ ॥ सकामं प्रत्युक्तमहैतुकभक्तं प्रत्याह । मामेवेति ।

रितम् । शूद्रधर्मरतानां हि लिंगं चक्रादिधारणम् ॥ " इति यामलोक्तेः । एतदर्थकश्रुतयस्तु परैः कल्पिता एव, वेदेऽनुपलंभात् । याश्चोपलभ्यन्ते ताश्च वेदभाष्यकारादिभिरन्यथा व्याख्याता न तत्तात्पर्यिकाः । त्रिपुंड्रादिधारणमपि शैवागमदीक्षितस्यैव, स्पष्टमेतत्सूतसंहितायाम् । भस्मधारणं तु होमांते वैदिकैः कार्यमेवेत्यलं प्रसक्तानुप्रसक्त्या । प्रकृतमनुसरामः—इहामुत्र ऐहिकीमामुष्मिकीं च । सिद्धिर्भोगो मोक्षश्च ॥ * ॥ क्रियायोगपथैर्मदर्चनोपायप्रकारैः ॥ ४९ ॥ मदर्चां मन्मूर्तिं मंदिरञ्च । दृढं चिरकालस्थितिक्षमं लिंगव्यत्ययेन मूर्तिमपि दृढां कारयेत्तां च तत्र संप्रतिष्ठाप्य वैदिकप्रकारेण सम्यक्स्थापयित्वा पुष्पोद्यानानि च कारयेत् । मदर्चापदं क्रियापदं चावृत्त्या योज्यम् । रम्याणीति—दुर्गन्धादिरहितरम्यपुष्पपत्रमयानि । पूजादिराश्रितो येषु ते तदाश्रितास्तान् । यावता क्षेत्रादिसमर्पणेन पूजादिसिद्धिर्भवेत्तत्कारयेदित्यर्थः ॥ * ॥ समर्थं प्रत्याह—ते पूजादय आश्रिता अधीना येषां तान् क्षेत्रादीन्दत्त्वेति परेणान्वयः । मंदिरं कारयित्वा मदर्चां संप्रतिष्ठापयेदिति वाच्ये विपरीतोक्तिर्मंदिरेऽवश्यार्चाप्रतिष्ठापनायैव " भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युतसत्समागमः " इतिवत् । यद्वा—' पाठक्रमादर्थक्रमो बलीयान् ' इति न्यायेन " अग्निहोत्रं जुहोति यावगूं पचाति " इतिवत् ॥ ५० ॥ विवरणं व्याख्या । महापर्वाणि च—" जयंत्यः श्रीपंचमी च होलिका कार्तिकी तथा । शयनोत्थानरासाश्च द्वादश्यो रथयात्रिका ॥ चातुर्मास्योत्सवाश्चान्ये महापर्वाणि सन्ति वै । " इत्युक्तेः ॥ * ॥ ० ॥ ५१ ॥ व्यस्तसमस्तानां पृथग्मिलितानाम् । इत्यर्थ इति—मत्सायुज्यं वा चतुर्भुजरूपादिमान्भवतीति भावः । सार्वभौमं चक्रवर्तित्वम् । प्रतिष्ठापदं तत्करणपरम् । सद्मना मंदिरनिर्माणेन । आदिनोत्सवादिग्रहः । ननु मंदिरादिकर्तारो भुव्यनन्ताः सन्ति ते यदि सार्वभौमादयः स्युस्तर्हि कथमेकस्यां भूमौ सार्वभौमबहुत्वमेकस्मिन्भुवनत्रये बहूनामाधिपत्यं च, तत्र सायुज्यं तु बहूनामपि संगच्छत एवेति चेन्मात्राशंकनीयम्, ममैकस्मिन्रोमगर्तेऽनेके ब्रह्माण्डाः सन्ति तेषुतेषु च सार्वभौमादिसंभवादिति गृहाण ' ईदृग्विधा विगणितांडपराणुचर्या वाताध्वरोमविवरस्य ' इत्याद्युक्तेरनंतब्रह्माण्डाश्रयत्वं ममेति ॥ * ॥ साम्यतामिति स्वार्थे तलार्षः ॥ ५२ ॥ तत्राहैतुकभक्तियोगप्रश्ने आह—उत्तरमिति । तच्च एवमिति । किञ्च—पूजायां बहुविधवाद्याभावे घण्टाया आवश्यकत्वमुक्तं स्कान्दे—"यस्तु वादयते घण्टां वैनतेयेन चिह्निताम् । स्नाने धूपे च नैवेद्ये दीपनीराजनादिषु ॥ स गोदानफलं याति सर्ववाद्यफलं तथा । अभावे सर्ववाद्यानां घण्टां वै वादयेत्सदा ॥ सर्ववाद्यमयी घण्टा ह्यतस्तां वादयेत्सुधीः । " इति । नीराजनप्रकारस्तु—"आदौ चतुः पादतले प्रदेयं द्विर्नाभिदेशे मुखमण्डलैकम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः ॥ वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतम् ॥ ५४ ॥ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च ॥ कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलम् ॥ ५५ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवादे पूजाविधिनिरूपणं नाम सप्तविंशोऽध्यायः ॥ ॥ २७ ॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् ॥ विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च ॥ १ ॥

अहैतुको भक्तियोग एव कथं भवति तत्राह । भक्तियोगमिति ॥ ५३ ॥ दातुः फलमुक्तमपहर्तारं निंदति । य इति । विड्भुक् विष्ठाभोजी कृमिः ॥ ५४ ॥ कर्तुर्यत्फलं तदेवान्येषामपीत्याह । कर्तुरिति । सारथेः सहकारिणो हेतोः प्रयोजकस्यानुमोदितुश्च प्रेत्यैतत्फलमित्यन्वयः । कुतः । यतः कर्मणामेते भागिनो भागार्हाः । तत्रापि विशेषमाह । भूयसि कर्मणि सारथ्यादौ च भूयोऽधिकं फलमिति ॥ ५५ ॥ पयःपत्रादिमात्रेण पूजितो यः परं पदम् ॥ प्रागेव दिशति प्रीतः स कृष्णः शरणं मम ॥ १ ॥ इति श्रीमद्भागवते म० एकादशस्कंधे श्री० टीकायां सप्तविंशोऽध्यायः ॥ २७ ॥ ॥अष्टाविंशे तु यः पूर्वं विस्तरेणोपवर्णितः ॥ ज्ञानयोगः पुनश्चासौ समाहृत्य निरूप्यते ॥ १ ॥ इदानीमतिविस्तरेणोक्तं

सर्वांगदेशेषु च सप्तवारं नीराजनेऽयं विधिरीश्वरस्य ॥'' इति विष्णुधर्मे । पाकोऽपि भगवते वैष्णवकृत एव समर्प्यः । स चात्र ब्राह्मण एव । तदुक्तम्—''पाकं मे वैष्णवकृतं नित्यं दद्यात्पवित्रकम् । अवैष्णवकृतं पाकं नाहं गृह्णामि शोभनम् ॥ विप्रोऽत्र वैष्णवो ज्ञेयो यतो विष्णुमुखोद्भवः । अंगेषु देवताः सर्वा मुखे वेदाश्च यस्य हि ॥ स मे पाकं सदा कुर्यादर्चनश्च द्विजोत्तमः । विप्रः शूद्रोऽपि पतति परपाकाशनाद् ध्रुवम् ॥ पतितः शुद्धिमाप्नोति विप्रपाकाशनात्परः ।'' इत्यपि तत्रैव । पाकविधिस्तु—आद्यपद्यव्याख्याशतके दृश्यः । एतच्च पूजोपयोगित्वादत्रोक्तम् । किंच—''देवद्रव्यं देवपूजां कुर्याच्चेः शूद्रसोन्नरः । स पितृपंक्तिसहितो नरकानेकविंशतिम् ॥ यावद्ब्रह्मादिनं तावद्भुंक्ते नैवात्र संशयः । यस्याशनं पादचरं प्रादुर्वेदाश्च पादजम् ॥ पाकार्चनाधिपत्येषु तस्माच्छूद्रं परित्यजेत् । त्रिषु विप्रं नियुंजीत विष्णुर्विप्रप्रियो यतः ॥ न हि जातिपरावृत्तिस्तत्तल्लिंगस्य धारणात् । न नापितो ब्राह्मणतां यांति सूत्रादिसंग्रहात् ॥'' इति कौशिकसंहितोक्तेश्च ॥ * ॥ ० ॥ ५३ ॥ दातुः पूजोपयोगिवृत्तिदातुः । '' क्षेत्रापणपुरग्रामान्दत्त्वामत्सार्ष्टितामियात् '' इत्येवंलक्षणं फलमुक्तं पूर्वमधुना तदपहर्तुस्तदाह—स्वदत्तां स्वीयैः स्वेन वा दत्ताम् । 'स्वः स्व आत्मनि स्वकीये च ' इति कोशः । अयुतायुतं दशकोटीर्यावदित्यर्थः ॥ * ॥ ० ॥ ५४ ॥ अनुमोदितुः श्लाघयितुः । एतत्पूर्वोक्तम् ' प्रतिष्ठया ' इत्यादिश्लोकस्थितम् । एतेषामेतत्फलं कुत इति हेतुमाशंक्य समाधत्ते—यत इति । तत्रापि कर्मभागित्वेपि । भूयसि महति । तत् कर्मादिफलम् (५५) आदिना पुष्पादिग्रहः । प्रागेव शरीरपातात्पूर्वमपि मैथिलादिषु तथा दर्शनात् । परं सर्वोत्कृष्टं भक्तिरूपम् ॥ * ॥ ० ॥ ५५ ॥ इति श्रीमद्भागवते महापुराण एकादशस्कन्धे सप्तविंशोऽध्यायः ॥ २७ ॥ विस्तरेणाध्यायविंशत्या । समाहृत्य संक्षिप्य (१) । परेषां स्वेतरेषाम् । आदिना मूढग्रहः । कर्माणि हरिस्मरणगृहादिकरणयाचनादीनि । तत्र स्तुतिनिन्दाऽकरणे ॥ * ॥ अद्वैतदर्शिनो ज्ञानिनो हि द्विविधा भवन्ति विश्वस्यास्य परब्रह्मोपादानकत्वेऽवश्यत्र्याख्येये परिणामवादे ब्रह्मणो विकारप्रसक्तेस्तमनंगीकृत्य विवर्तवादमेवांगीकुर्वाणा ब्रह्मणो निर्विकारत्वं विश्वस्यास्य तु मिथ्यात्वमाचक्षते खल्वेके । अन्ये तु प्रकृतेः स्वशक्तित्वात्तद्वारैव परब्रह्मणो जगदुपादानत्वमतस्तस्याः किल विकारित्वेऽपि स्वरूपतस्तदतीतस्य परब्रह्मणो निर्विकारत्वमेवेति परिणामवादे किल न कापि क्षतिः । तथा चोक्तं भगवता—'' प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥ '' इत्यतः सत्यपि द्वैते प्रकृतिकार्याणां तदन्यत्वात्प्रकृतेश्च परमेश्वरादन

१ त्रिष्णुसद्मनिर्मायकः । २ शूद्राधीनं शूद्रसात् ''तदधीनवचने'' इति सातिः । ३ पञ्चमस्कन्धोक्तान् । ४ शूद्रम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्वभावकर्माणि यः प्रशंसति निंदति ॥ स आशु भ्रश्यते स्वार्थादसत्यऽभिनिवेशतः ॥ २ ॥ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः ॥ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक्पुमान् ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् ॥ वाचोदितं तदनृतं मनसा ध्यातमेव च ॥ ४ ॥

ज्ञानयोगं संक्षेपेण वक्तुमाह । परेषां स्वभावान् शांतघोरादीन् कर्माणि च । तत्र हेतुः । विश्वमिति ॥ १ ॥ विपक्षे दोषमाह । परेति । स्वार्थात् ज्ञाननिष्ठालक्षणात् असति मिथ्याभूते द्वैतेऽभिनिवेशात् ॥ २ ॥ भ्रंशमेव दृष्टांततो दर्शयति। तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रया आपन्नेऽभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति ततो मनसि लीने सति नष्टचेतनः सन्मृत्युं वा मृत्युतुल्यां सुषुप्तिं वा प्राप्नोति यथा तद्वदेव नानार्थदृक् द्वैताभिनिवेशी विक्षेपं लयं च प्राप्नोति । यथा प्राज्ञसंपर्काद्विश्वस्य भोगक्षयलक्षणो भ्रंश एवमनात्मसंपर्कादात्मनोऽपि स्वरूपभ्रंश इति भावः ॥ ३ ॥ द्वैतासत्यतया स्तुतिनिंदयोर्निर्विषयत्वं प्रपंचयति सार्धैः षड्भिः । किं भद्रमिति । अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वाऽभद्रं कियद्भद्रं कियद्वाऽभद्रमित्यर्थः । अवस्तुत्वमेवाह । वाचेति बाह्येन्द्रियोपलक्षणम् । वाचा उदितमुक्तं चक्षुरादिभिश्च यद्दृश्यं तदनृतमिति ॥ ४ ॥

न्यत्वात्, परमेश्वरस्य तु बहुमूर्तित्वेप्यैक्याददद्वैतमेव ब्रह्मेत्याहुः । उभयेषामेव ज्ञानित्वेऽप्युत्तरे एव श्रीभागवतमतसंमताः । पूर्वेषामपि मध्ये ये भगवद्विग्रहभक्तधामनामाद्यतिरिक्तपदार्थानामेव मिथ्यात्वमाचक्षते तेषां मतमादि भरतचरितादौ क्वचित्क्वचिदुट्टंकितमिति तन्मतमपि सर्वमतजिज्ञासुमुद्दिश्याह–परस्वभावेति पंचभिः । ततः परमध्यायसमाप्तिपर्यन्तं विवर्तवादिनां परिणामवादिनां च मते व्याख्यानं तुल्यमेव । किन्तु असदादिशब्दै र्विवर्तवादिनां मतेऽवस्त्वेवोच्यते, परिणामवादिनां मते तु असर्वकालसत्ताकं वस्तूच्यत इत्येतावानेव भेदो द्रष्टव्यः । कार्याणां सत्त्वेप्यचिरस्थायित्वमसत्त्वमेवेति परिणामवादिनः । कार्याणां मिथ्यात्वमेवासत्त्वमिति विवर्तवादिन आहुरिति तत्र विवेचनीयम् ॥ १ ॥ विपक्षे स्तुतिनिन्दाकरणे । पुरुषेषु स्वात्मानातिरिक्तेषु परत्वभ्रांत्येत्यर्थः । स स्तुतिनिन्दाकर्ता । ज्ञाननिष्ठालक्षणात् स्वरूपानंदात् । अभिनिवेशात्सत्यत्वभ्रमदार्ढ्यात् ॥ ॥ * ॥ स्वार्थात्परमात्माभिनिवेशात् । असति ततोन्यस्मिन्कल्पितेनानावयविनीति संदर्भः ॥ * ॥ विपक्षे प्रशंसागर्हणरूपे विरुद्धपक्षे मिथ्याभूते परमात्मसत्तां विनेति शेषः ॥ २ ॥ पिण्डस्थो देहस्थः " पिण्डो बोले बले सान्द्रे देहागारैकदेशयोः । देहमात्रे निवापे च गोळसिह्लकयोरपि ॥ ओंड्रपुष्पे च पुंसि स्यात्क्लीबमाजीवनायसोः । " इति मेदिनी । ततः स्वप्नोत्तरम् । नष्टा चेतना बुद्धिर्यस्य स तथा । प्रारब्धसमाप्तौ तदभावे मृत्युतुल्यां मृतवद्देहेन्द्रियाभिमानाभावात् । तद्वदेव यथा प्राज्ञसंपर्काद्विश्वस्य भोगक्षयलक्षणे भ्रंश एवमनात्मसंपर्कादात्मनोऽपि स्वरूपभ्रंश इति भावः । स्वप्ने यथा विक्षेपं सुषुप्तौ लयं च तथेति ॥ * ॥ किंच तैजस इति परमात्मैकदृश्यभावेन नानार्थदृक् पुमान् कदाचिद्बहिर्नष्टचेतनः सन् मायां लौकिकमायामयतुल्यां मायाख्यां भगवदचिन्त्यशक्तिमयं स्वप्नं यद्वत् प्राप्नोति कदाचिद्बहिरन्तरपि नष्टचेतनः सन् मृत्युं तत्तुल्यां सुषुप्तिं यद्वत्प्राप्नोति तद्वदेव मायां तादृशं जन्मादिरूपदेहाद्यभिनिवेशं मृत्युं देहपरित्यागं च प्राप्नुवन्भ्रमति ॥ ३ ॥ किञ्च–अवस्तुतोऽसतः । इत्यर्थ इति–आर्षत्वान्मतुब्लोप इति भावः । दृश्यं ज्ञेयम् ॥ * ॥ दीपिका–आगमापायिधर्मेषु यदनपायि तद्धर्मीति रीत्या परमात्मानमंतरा स्वतंत्रावयवितया मतस्य द्वैतस्यावस्तुतो मध्ये इत्यादि योज्यम् । 'अबाधितोऽपि ह्याभास' इति सप्तमोक्तरीत्यैव पृथगवयविलक्षणद्वैतस्यावस्तुतया स्तुतिनिंद्ययोर्निर्विषयत्वं प्रपञ्चयति सार्द्धैः षड्भिः–किं भद्रमिति । अवस्तुन इति मद्विग्रहधामनामभक्तादिकं किञ्चिद्रूपत्वाद्ब्रह्मवस्त्वेव तद्भिन्नस्य द्वैतस्य संबंधि यद्वाचा उदितं मनसा यद्ध्यातं तत्सर्वमनृतं किं भद्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छायाप्रत्याह्वयाभासा ह्यसंतोऽप्यर्थकारिणः ॥ एवं देहादयो भावा यच्छंत्यामृत्युतो भयम् ॥५॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥ ६ ॥ तस्मान्न ह्यात्मनोन्यस्मादन्यो भावो निरूपितः ॥ निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतम् ॥ ७ ॥

नन्वेवं सति देहादिभावानामप्यसत्त्वात्कथं भयहेतुत्वं तत्र सदृष्टांतमाह । छाया प्रतिबिंबः । प्रत्याह्वयः प्रतिध्वनिः । आभासः शुक्तिरजतादिः । एते यथाऽसंतोऽप्यर्थकारिणो भवंति । आमृत्युतो मृत्युमभिव्याप्य । यद्वा मृत्युर्लयः । यावन्नैव लीयंते तावत्पर्यंतमित्यर्थः ॥ ५ ॥ ननु सृष्ट्यादिश्रुतिभिरेव द्वैतं निरूपितं कथमसत्यं स्यात्त्राह आत्मैवेति सार्धद्वाभ्याम् । त्रायते पाल्यते । त्राति पालयति ॥ ६ ॥ अन्यस्मात्सृज्यादिव्यतिरिक्तात् । त्रिविधा आध्यात्मिकादिरूपा । भातिः प्रतीतिः ।

किं वाभद्रं कियद्वेति संबंधः । यतः स्तुतिनिन्दे स्यातामिति भावः । एवमग्रेप्यसच्छब्देन चिद्भिन्नमेव ज्ञेयं, व्याख्यान्तरे "सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः" इति । "तासां मध्ये साक्षाद्ब्रह्मगोपालपुरीहि" इति । "अस्य जानंतो नाम चिद्विविक्तन" इति । "प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्" इति । 'मन्निकेतं तु निर्गुणम्' इति । 'निर्गुणो मदपाश्रयः' इत्यादिवचनेभ्यो गुणातीतत्वेनावगमितेष्वपि वस्तुष्वनृतत्वप्रसिद्धिः स्यादतस्तन्नोपादेयम् ॥ ४ ॥ अत्राक्षिपति—नन्विति । न ह्यजातसर्पादेः कस्यचिद्भयमस्तीत्याह—कथमिति । तत्राक्षेपे । ननु विमतं छायादि सत् अर्थक्रियाकारित्वाद्व्यतिरेके शुक्तिरूप्यवदिति चेदाह—छायादयोऽसंतोपि साध्यसत्यत्वाभाववन्तोऽपि बाधात्पूर्वमर्थकारिण इति दृष्टांते हेतुवृत्त्या व्यतिरेकव्याप्त्यसिद्धिः साध्याभाववति वर्तनेन व्यभिचारः । एवमित्थम् । देहादय आदिनेन्द्रियादिग्रहः । असन्तोपि, ननु मृतानामपि नरकादिभयश्रुतेः कथमामृत्युत इति तत्राह—यद्वेति । इत्यर्थ इति—लयः सुषुप्तिरात्यन्तिको वा, सुषुप्तौ क्षणिकभयनिवृत्तेरान्त्यन्तिके सर्वथा भयनिवृत्तेरिति भावः ॥ * ॥ तत्र शङ्कायां सदृष्टान्तमाह—अर्थकारिणो भ्रमेण व्यवहारप्रयोजका भवन्ति, पूर्वार्थे मृत्योरनन्तरमपि संसारप्रतिभासादरुचेः—यद्वेति **दीपिका** ॥ * ॥ **सन्दर्भस्तु**—ननु यदि परमात्मैव सर्वत्रावयवी ततोन्यन्नास्त्येव तर्हि कथं शशविषाणतुल्ये तस्मिन्नभिनिवेशस्तेन वा कथं भ्रंशस्स्यात्तत्राह—छायेति ॥ * ॥ **विश्वनाथस्तु**—ननु यदि द्वैतमसदेव कथं तर्हि घटपटादिमयस्य तस्यार्थक्रियाकारित्वं तत्राह—छायेति । एते यथाऽसन्तोपि खल्वर्थकारिणस्तथाऽसदपि द्वैतमर्थक्रियाकारीत्यर्थः । एवमेव देहादयो भावा मिथ्याभूता अपि आमृत्युतो लयपर्यंतमेव भयं संसारदुःखं जीवेभ्यो ददतीत्यर्थः ॥ ५ ॥ न ह्यमो वेदोऽसद्वदतीति पुनराक्षिपति—नन्विति । सृष्ट्यादीत्यादिना स्थित्यादिग्रहः । श्रुतयस्तु—"यतो वा इमानि भूतानि जायन्ते" इत्याद्याः । तत्राक्षेपे । अत्र स्फुटमर्थमाह—"यत्सृजति ब्रह्मा यत्त्राति विष्णुर्यश्च हरति रुद्रः यच्च सृज्यते त्रायते ह्रियते च विश्वं तत्सर्वमात्मैवाहमेव" स्वप्ने विश्वस्रष्टृहंतृत्रातॄणां स्वप्नसाक्ष्यात्माव्यतिरेकवत् । अतो मत्सत्तयैव सत्त्वप्रतीतिर्न मदतिरिक्तं किंचिदस्तीति भावः ॥ * ॥ विश्वस्यैकात्मकत्वं मनसि कृत्वा शंकते—नन्विति । निरूपितं स्वतंत्रसत्ताकत्वेनैव वर्णितम् । सिद्धान्ते तु प्रकृतेस्तद्बहिरंगशक्तित्वेन पुरुषस्य तटस्थशक्तित्वेन तदभेदात्मकस्य विश्वस्यापि तद्रूपत्वात्तद्द्वारात्मन एव सृज्यत्वादिकं द्वारत्वेपि साक्षान्निर्देशः । श्रुतौ श्रूयत एव यथा पूर्वमीमांसायाम्—"पशुना यजेत" "व्रीहिभिर्यजेत" इत्यादौ पश्वादीनां हृदयादिरूपहविर्द्वारैव करणत्वं सिद्धान्तितम् । तथोत्तरमीमांसायामपि तत्तद्द्वारैव सृष्ट्यादिक्रियायां कर्तृत्वं कर्मत्वं चेत्यर्थः । अत एव **विश्वनाथेनापि** कर्तापि कर्माप्यात्मैव न ततोऽन्यद्द्वैतमिति भाव इति सिद्धान्तितम् ॥ ६ ॥ यत आत्मैव सर्वस्वरूपस्तस्माद्धेतोः । प्रमातृप्रमाणप्रमेयरूपा वा त्रिविधा । अत्राक्षिपति—नन्विति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणम् ॥ न निंदति न च स्तौति लोके चरति सूर्यवत् ॥ ८ ॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ॥ आद्यं तवदसज्ज्ञात्वा निःसंगो विचरेदिह ॥९॥ उद्धव उवाच ॥ नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते॥१०॥

ननु कथं निर्मूलं प्रतीयते तत्राह इदमिति ॥ ७ ॥ ज्ञानविज्ञानयोर्नैपुणं निष्ठाम् । सूर्यवत्समो भूत्वा ॥ ८ ॥ एतन्निष्ठाप्राप्त्युपायमाह । प्रत्यक्षेणेति । यदाद्यंतवत् द्वैतं तदसदिति ज्ञात्वा निःसंगो विचरेत् । आद्यंतवत्त्वे प्रमाणानि प्रत्यक्षादीनि । तत्र प्रत्यक्षेण घटादि । अनुमानेन सावयवत्वेन दृश्यं पृथिव्यादि । निगमेनाप्रत्यक्षमाकाशादि । आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यंतवदसच्चेति ज्ञात्वा । निःसङ्गस्तदासक्तिशून्यः ॥ ९ ॥ ननु यद्यात्मसंविदा सर्वं दृश्यमसदित्युच्यते तर्ह्यात्मा स्वप्रकाशो देहादिद्वैतं च जडमित्युक्तं स्यात्तथा च संसारप्रतिभासो न घटेतेति चोदयति । नैवेति । अनात्मस्वदृशोर्जडाजडयोः । अत्र हेतुः । द्रष्टृदृश्ययोरिति । नात्मनः संसारः

मायामयत्वमनुमानेन साधयति–विमतं मायामयं गुणमयत्वात्, व्यतिरेक आत्मवदिति ॥ * ॥ आत्मनः परमात्मनः सकाशादन्यो भावः पदार्थो न, कीदृशादात्मनः–अन्यस्मात् सृज्यादिवस्तुव्यतिरिक्तात् । त्रिविधाध्यात्मिकादिरूपा भातिः प्रतीतिर्निर्मूलेति । यदि परमात्मैव विश्वमभूत्तदा परमात्मनस्त्रैविध्याभावात्कुत आयातमेतत्त्रैविध्यमिति निर्मूलत्वम् ॥ * ॥ संदर्भस्तु–तस्माद्विश्वस्मिन्यः कश्चिदपि भावः स परमात्मनो नान्यो निरूपितः कारणं विना कार्यस्यासिद्धत्वादिति भावः । तर्हि तस्यैव विकारित्वं स्यादत आह–अन्यस्मादिति । तथा चाचिन्त्यशक्त्या निर्विकारत्वेन स्वत एव तत्तद्भावात् तस्यान्यत्वमिति भावः । या त्वाध्यात्मिकादिरूपा प्रतीतिस्ततोऽन्यत्वेनाविवेकिभिर्निरूपिता साप्यात्मनि शुद्धे निर्मूलैव । वस्तुतस्तत्संबन्धाभावादिति भावः । अयं भावः–इदमाध्यात्मिकादिरूपं भगवतो बहिरंगशक्त्या माययैव, वस्तुतस्तत्सम्बन्धाभावेऽपि तत्संबद्धत्वेन प्रत्यायिता "सेयं भगवतो माया यन्न येन विरुध्यते" इति तृतीये श्रीमैत्रेयोक्तेः । मायया दुस्तर्क्यशक्त्येति पारिणामवादिनः । माययाऽज्ञानेनेति विवर्तवादिनः ॥ ७ ॥ ज्ञानं शास्त्रोत्थं विज्ञानमनुभवस्तयोः पदार्थविवेचनवाक्यार्थतदभेदकौशलं विद्वान् निंद्योपाधीनां मिथ्यात्वादात्मनश्चैक्यान्न निन्दति न च स्तौति किन्तु सूर्यवदसंगः, यथा सूर्यः शुच्यशुचिस्थानं प्रकाशयञ्छुचिरशुचिश्च न भवति तद्वदित्यर्थः ॥ * ॥ फलितमाह–अत एतन्मदुदितं मत्प्रोक्तं ज्ञानविज्ञानयोर्नैपुण्यं जानन्सूर्यवत्समश्चरति ॥ ८ ॥ एतन्निष्ठा ज्ञानविज्ञाननिष्ठा । पृथिव्यादि असत् सावयवत्वात्, घटादिवत् । निगमेन वेदेन । "नेह नानास्ति किञ्चन" इति, "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुतेराकाशादीनां जन्यत्वेनानित्यत्वाद्यज्जन्यं तद्विनाशीति व्याप्तेः । स्वानुभवेनापि सर्वमसद्दृश्यत एवेति ॥ * ॥ आद्यंतवज्जन्मनाशवत् । असदिति–स्वतंत्रसत्त्वानभ्युपगमे तु मिथ्याभूतमेवेति ज्ञात्वा, सावयवत्वेनेति–पृथिव्यादि आद्यंतवत्सावयवत्वात्, घटादिवत्, यन्नैवं तन्नैवं यथात्मेति । निगमेन "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिवेदेन ॥ ९ ॥ अत्र संसारासंभवमाक्षिपति–नन्विति । भवत्विति चेदाह–तथा चेति । संसारस्य प्रतिभासः प्रतीतिः । अत्र जडाजडत्वे । द्वयोर्देहात्मनोरपि इष्टापत्तिमाह–मा भूदिति । इष्टापत्तिं परिहरति–उपलभ्यत इति ॥ * ॥ नन्वाद्यन्तयोरसत्त्वेऽपि मध्ये यावत्सत्त्वं प्रतीयते तावत्कस्य संसारस्स्यात् द्रष्टुर्दृश्यस्य वेत्याह–नैवेति । द्रष्टृदृश्ययोर्द्रष्टा जीवो दृश्यो देहस्तयोर्द्वयोरपि संसृतिर्न संभवेत्, त्कुतः–अनात्मस्वदृशोः, देहो ह्यनात्मा जडस्तस्य संसारदुःखानुभवस्यासंभवात् , जीवो हि स्वदृक् स्वतःसिद्धज्ञानः तस्य ज्ञानलोपासं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्माऽव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ॥ ११ ॥ श्रीभगवानुवाच ॥ यावद्देहेंद्रियप्राणै रात्मनः सन्निकर्षणम् ॥ संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः ॥ १२ ॥ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ॥ ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ १३ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥ १४ ॥

स्वप्रकाशत्वात् । नापि दृश्यस्य जडत्वादित्यर्थः । तर्हि मा भूद्द्वयोरपि तत्राह । उपलभ्यत इति ॥ १० ॥ एतत्प्रपंचयति । अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिपुण्यापुण्याज्ञानपरिच्छेदानामसंभवं दर्शयति । हेतुहेतुमत्त्वं तु यथेष्टम् । अचिज्जडः । अयं भावः । यथैवाग्निदारुणोर्भेदेनानुपलंभेऽपि दारु प्रकाश्यमेवाग्निश्च प्रकाशकः तथा देहात्मनोरपीति न संसृतिस्तयोरन्यतरस्यापि घटत इति ॥ ११ ॥ सत्यं तथाप्युभयोरेवमविवेक एव संसारालंबनमित्याह पंचभिः । यावदिति । संनिकर्षणं संबंधः । नन्वसंगस्य कुतः संबंधस्तत्राह । अविवेकिनः अज्ञानकृत इत्यर्थः । ननु स्वप्रकाशस्य कथमज्ञानकृतः संसारस्तत्राह । अपार्थोऽपि मिथ्याभूतोपि । केवलं फलवान् फलं स्फूर्तिर्न तु सत्त्वतोऽस्तीत्यर्थः ॥ १२ ॥ नन्वसतो देहादेः कुतः संसारस्फूर्तिहेतुत्वमपि तत्राह । अर्थे हीति । अस्यात्मनः ॥ १३ ॥ ननु कथंचिज्ज्ञानतो विषयस्फू

भवात् । भीऽस्तु द्वयोरपि तत्राह—उपलभ्यतेऽनुभवसिद्धस्यापलापायोग्यत्वादित्यर्थः ॥ १० ॥ एतत् संसृत्यसंभवम् । यथेष्टम् अव्ययत्वेऽगुणत्वमगुणत्वेऽव्ययत्वमित्येवं स्वेच्छया । अत्राशयमाह—अयं भाव इति । तयोर्देहात्मनोः । अन्यतरस्य द्वयोरेकस्यापि ॥ * ॥ एतत्संसारघटनम् । पञ्चविशेषणैरिति अव्ययत्वान्नाशाद्यसंभवः । अगुणत्वाद्रागाद्यसंभवः । शुद्धत्वात्पुण्यपापासंभवः । स्वयंज्योतिष्ट्वादज्ञानासंभवः । अनावृतो न केनाप्यावृतः वस्तुतो न बद्ध इति बंधाभावः । अपरिच्छिन्न इत्यर्थः । देहः प्रकाश्य एव जीवात्मा प्रकाशकः । किन्तु—स्वपरमात्मप्रकाशित एव प्रकाशक इति ॥ ११ ॥ अंगीकृत्य परिहरति—सत्यमिति । यद्यपि संसृतेराश्रयो नोपलभ्यते तथापीति । उभयोर्देहात्मनोः । एवं चिज्जडत्वेन अविवेकोऽज्ञानमेव । संबंधमाक्षिपति—नन्विति । इत्यर्थ इति—अज्ञानिन एव संसारः "ऋते ज्ञानान्न मुक्तिः" इति श्रुतेरिति भावः । क्वचित्तु 'अविवेकितः' इति पाठोस्ति । तत्राविवेकेनेतः प्राप्त इति शकन्ध्वादित्वात्पररूपेण रूपसिद्धिः । पुनराशंकते—नन्विति । इत्यर्थ इति—स्वप्नवदतात्त्विक एव प्रतीयतेऽविद्ययेति भावः । सुषुप्तौ देहेन्द्रियादिसंबन्धासत्त्वेपि पुनः कथं संसार इत्याशंका तु संसारबीजाज्ञानस्य तत्र संभवात्परिहार्या ॥ * ॥ सत्यमित्यर्द्धांगीकारे । तथापि द्वयोरन्यतरस्य संसाराघटनेपि द्वयोर्देहात्मनोरज्ञानकृत इति अज्ञानम् "भयं द्वितीयाभिनिवेशतः स्यात्" इति न्यायेन भगवद्बहिर्मुखत्वलब्धमायाकृत आत्मज्ञानलोपो देहात्मबुद्धिश्च तत्कृत इत्यर्थः । अविवेकोजातोत्रेत्यविवेकितः ॥ १२ ॥ सतः कारणत्वं दृष्टचरं न त्वसत इत्याशंकते—नन्विति । श्लोकोऽयं व्याख्यातचरः ॥ * ॥ ननु देहादीनामसत्त्वात्कुतस्तैः सम्बन्धो यैः संसारः स्यात्तत्राह—अर्थे वस्तुनि अविद्यमानेऽसत्यपि संसृतिः स्यादेव, यथा स्वप्ने मिथ्याभूतेपि विषयध्यायिनो जनस्यानर्थागमः व्याघ्रसर्पादिभयानुभवः ॥ १३ ॥ पुनराक्षिपति—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शोकहर्षभयक्रोधलोभमोहस्पृहादयः ॥ अहंकारस्य दृश्यंते जन्म मृत्युश्च नात्मनः ॥ १५ ॥ देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्म मूर्तिः ॥ सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः ॥ ॥ १६ ॥

र्तिर्जीवन्मुक्तस्यापि दुर्वारेत्यनिर्मोक्षप्रसंगः स्यात्तत्राह । यथा हीति । प्रस्वापः स्वप्नः बहूननर्थान् बिभर्ति पुष्णातीति तथा ॥ १४ ॥ अहंकारलक्षणो देहादिसंनिकर्ष एव संसारालंबनमित्यन्वयव्यतिरेकाभ्यां दर्शयति । शोकेति । सुषुप्त्यादौ तेषामदर्शनादहं सुखीतिवच्चैतन्यं सुखीतिप्रतीत्यभावाच्च दृश्यत्वाच्च सुखादीनां कृशत्वादिवद्द्रष्टृधर्मत्वानुपपत्तेरिति भावः । उक्तं च "सुप्तेऽहमि न दृश्यंते सुखदोषप्रवृत्तयः ॥ अतस्तस्यैव संसारो न मे संसृतिसाक्षिणः" इति ॥ १५ ॥ ननु यद्यहंकारस्य संसारस्तर्हि मुक्तिरपि तस्यैवेति । मुक्तावहंकारावशेषः प्रसज्जेत तत्राह । देहेति । देहादिष्वभिमानो यस्य सः । आत्मैव तेषामंतर्हितो जीवः अत एव गुणकर्ममयी मूर्तिर्यस्य सः ।

नन्विति । कथंचिज्जानतः रागाभावेन जानतः । अनर्थान् स्वप्नव्याघ्रभयकंपादीन् । स एव प्रस्वापः योऽप्रतिबुद्धस्येति सम्बन्धः । मोहाय क्लेशाय ॥ * ॥ प्रतिबुद्धस्य प्राप्तजागरस्य ॥ १४ ॥ संसारालंबनं स्फुटयति—अहंकारेत्यादि । अहंकारसत्त्वे शोकादिसत्त्वमन्वयः, सुषुप्त्यादावहंकाराभावे शोकादीनामभावो व्यतिरेकः । अहं सुखीति प्रतीतेरहंकारेणैव सुखादिसंबन्धः । चैतन्यं सुखीति प्रतीतेरभावान्नात्मनेति । सुखादीनां मानसप्रत्यक्षत्वेन दृश्यत्वात्कृशत्वादिवन्नात्मधर्मत्वम् । इति भाव इति—यथा देहधर्माः कृशत्वादयो नात्मधर्मास्तथा सुखादयोप्यहंकारधर्मा नात्मधर्मा इत्याशयः ॥ * ॥ वस्तुविवेके सत्यहंकारस्यैवैते धर्मा न त्वात्मन इत्याह—अहंकारोऽत्र देहद्वयाभिमानः यावत्खल्वसौ स्फुरति तावदेव शोकादेर्दर्शनात्तस्यैव धर्मा न तु शुद्धस्यैवं जन्म मृत्युश्चेत्यर्थः ॥ * ॥ **विश्वनाथस्तु**—यद्यप्यहंकारस्यैव शोकादयस्तदपि तस्य जडत्वादेव तत्तदनुभव इति नास्ति तस्य संसार इति भावः । अहंकारसत्त्वे संसारसत्त्वमन्वयस्तदभावे तदभावो व्यतिरेकस्ताभ्यां नात्मन इत्यस्याभिप्रायं व्यंजयति—सुषुप्त्यादाविति । तेषां शोकादीनां दृश्यत्वाच्च प्रत्यक्षादिभिर्ज्ञातत्वाच्च यथा कृशत्वादि दृश्यते तस्माद्दृश्यात्मधर्मत्वं न तेषामुपपद्यत इत्यर्थः ॥ १५ ॥ प्रतिबध्याशंकते—नन्विति । अहंकारावशेषाभावे स्वरूपहानिर्मोक्षपदार्थः स्यादित्यर्थः । तेषां देहादीनामन्तर्हितस्तैराच्छादितः । अत एव देहाद्यंतर्हितत्वादेव । गुणाः कर्माणि च प्रधानं यस्यां सा गुणकर्ममयी सा मूर्तिर्यस्येति गुणकर्मारब्धमूर्तित्वाज्जीवस्य तत्त्यागेऽमूर्तब्रह्मतां प्राप्नोतीत्यर्थः । एवं च गुणकर्ममूर्तित्वे च । गुणकर्मकार्यभूतैः सूक्ष्मोपाधिभिः क्रियाशक्त्याद्युपाधिभिः । इवेन बहुप्रकारो द्योतितः । कालयति चालयति सर्वमिति कालः परमेश्वरः । यतः साहंकारो जीव एव संसारे धावति अतो हेतोरयमहंकारावशेषप्रसक्तिरूपो दोषो न भवति । इति भावइति—अविद्याजन्याहंकारनिवृत्तेरेव मोक्षत्वं तदवशेषे मोक्ष एव न संभवतीत्याशयः । "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति । भ्रामयन्सर्वभूतानि" इत्याद्युक्तेरीश्वराधीनत्वमेव जीवस्येत्युक्तं कालतंत्र इति ॥ * ॥ ननु यदि शोकहर्षादयोऽहंकारस्यैव धर्मा न त्वात्मनस्तर्हि कथमात्मा तान्धर्मान्स्वीकृत्य संसारदुःखमनुभवति, न हि कश्चित्स्वदुःखार्थं परधर्ममुपादत्त इत्यत आह—देहेति । अभिमानोऽहंकार एव जीवो जीवोपाधिः गुणकर्मभ्यां मूर्तिर्यस्य तथाभूतः सन्संसारे निमित्ते आधावति जीवात्मानं स्वधर्मान्ग्राहयितुं प्राप्तो भवति । कालयतीति काल ईश्वरस्तदधीनः कीदृशः देहादिशब्दैरुरुधैव ज्ञानशास्त्रेण गीतः अंतरात्मा बुद्धिः तेन बलादेवाहंकारलक्षणयाऽविद्यया निबध्य जीवः संसारदुःखे पात्यत इति भावः ॥ * ॥ **दीपिका**—तस्यैवाहंकारस्यैव । स देहाभिमानवानात्मैव । तेषां देहादीनामंतः स्थित्वा, जीव इत्युक्त्या स्वरूपभूतास्मदर्थत्वं जीवस्य व्यंजितम् । अत एवाभिमन्तुर्जीवत्वादेव । अतः अहंकारादीनां कल्पितत्वादेव । अयं प्राकृताहंकारावशेषलक्षणः । तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमूलमेतद्बहुरूपरूपितं मनो वचः प्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेनच्छित्त्वा मुनिर्गां विचरत्यतृष्णः ॥ १७ ॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानम् ॥ आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तेदव मध्ये ॥ १८ ॥ यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानाऽपदेशैरहमस्य तद्वत् ॥ १९ ॥

एवं च सूक्ष्मोपाधिभिर्बहुधेव सूत्रादिशब्दैर्गीतः संसारे परमेश्वराधीनः सर्वतो धावत्यतो नायं दोष इति भावः ॥ १६ ॥ तदेवमहंकारकृतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह । अमूलमिति । वस्तुतो मूलशून्यमज्ञानतस्तु बहुभी रूपैर्देवादिशरीरै रूपितं प्रकाशितमैंद्रजालिकतुल्यमिति वा । किं तत्तदाह । मन इति । मन आदीनां द्वंद्वः । यद्वा मनआदिषु क्रियत इति कर्म अहंकरणं गुरोरुपासनया निशितेन तीक्ष्णेन ज्ञानखड्गेन छित्त्वा ॥ १७ ॥ तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति । ज्ञानमिति । विवेको ज्ञानम् । साधनान्याह । निगमो वेदः । तपः स्वधर्मः । प्रत्यक्षं स्वानुभवः । ऐतिह्यमुपदेशः । अनुमानं तर्कः । फलमाह । आद्यंतयोर्यदस्य जगतो मध्येऽपि तदेवं केवलं न तु जगदिति । किं तत्कालः कलयति प्रकाशयति यस्तथा हेतुः कारणं च यत् तदेव । एतदुक्तं भवति । यदस्य विश्वस्य उपादानं कारणं निमित्तं प्रकाशकं च ब्रह्म तदात्मकमेवैतन्न ततः पृथगित्येवं निश्चयफलो निगमादिसाधनैर्जायते यो विवेकस्तज्ज्ञानमिति ॥ १८ ॥ तत्र नानाभेदव्यवहारालंबनस्यापि विश्वस्य कारणमात्रात्मकत्वं सदृष्टांतमाह । यथेति । स्वकृतं सुष्ठु कुंडलादिरूपेणाविरचितं यद्धिरण्यम् । कीदृशम् । हिरण्मयस्य कुंडलादेरुत्पत्तेः पुरस्तान्नाशाच्च पश्चा

च–जीवस्यैव ब्रह्मत्वेन मुक्तौ स्थितिर्नाहंकारादीनामित्यर्थः ॥ १६ ॥ तदेवाह–तदेवमिति । तन्निवृत्तावहंकारनिवृत्तौ । एतदहंकरणम् । अमूलस्य त्वेकरूपताप्यसंभवा कुतो बहुरूपतेति चेदाह–ऐन्द्रजालिकतुल्यमिति वेति । वस्तुत ऐन्द्रजालिकं वस्तूनामसत्त्वेपि यथा प्रातीतिकमुखतोनेकाल्पशस्त्रानिष्कातिस्तद्वदाहंकारिकवस्तुजातमपीति तत्पृच्छति–किं तदिति । तद्बहुरूपत्वमाह–मन इति । आहंकारिकत्वं मनआदीनां व्यक्तमेव । इहैतच्छब्देनाहंकारग्रहो न संभवति पूर्वं जीवस्य प्रक्रांतत्वादत आह–यद्वेति । मनआदिषु तत्करणं त्वहं संकल्पयामि वच्मीत्यादिप्रतीतेः । गां भूमिम् । सप्तम्यर्थे द्वितीया । विचरति विचरेत् । अतृष्णोऽसक्तः ॥ * ॥ उपपाद्य अन्वयव्यतिरेकाभ्यां संसाद्य तन्निवृत्तौ अहंकारनाशे पूर्वार्थेऽहंकारविषयाणां मनआदीनां नाशेन तन्नाशोप्याक्षिप्त एव न त्वभिधालभ्य इत्यरुचेः–यद्वेति ॥ १७ ॥ येन ज्ञानेनाहंकारच्छेदस्तदेवेत्यर्थः । तर्कस्य स्वप्नप्रपंचस्य तत्साक्षिवन्मृदादेर्घटवदित्यनुमानं मननरूपमेव । विचारपूर्वकोपासनमेव निदिध्यासनमिति न पृथगुपन्यासः । निर्गलितार्थमाह–एतदुक्तमिति । एतज्जगत् । ततो ब्रह्मणः ॥ * ॥ तत्र पञ्चभिर्ज्ञानमेवोपदिशन् परमात्मज्ञानं तावत्साक्षादाह–ज्ञानमिति द्वाभ्याम् । यदेव परमात्मलक्षणं वस्तु ज्ञानादिरूपं कालः हेतुरुपादानञ्च तदेवाद्यन्तयोः । किन्तु केवलं निजांशिनि श्रीभगवति प्रविशति तिरोहितसर्वशक्तिकं भवतीत्यर्थः । तत्र ज्ञानं विवेकस्य कारणम् । विवेको विचारः । कालो निमित्तहेतुरुपादानं च पुरुष इति ज्ञेयम् ॥ * ॥ **दीपिकायाम्**–तर्कः जीवो ब्रह्माभिन्नस्तदंशत्वात्, यो यदंशः स तदभिन्नः, यथा वह्न्यंशो विस्फुलिंगो वह्न्यभिन्न इति विशेषणद्वयाभिप्रायं स्फोटयति–एतदुक्तमिति । एतत्कार्यप्रकाशात्मकं जगत्तदात्मकमेव कारणप्रकाशात्मकमेव । तत्र जगद्ब्रह्मणोः प्रकाश्यप्रकाशकत्वेनाभेदे "यस्य भासा सर्वमिदं विभाति" "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥" इत्यादिश्रुतिस्मृतयः प्रमाणत्वेन बोध्याः । तथा च–तार्किकाद्यभिमतत्वं तच्छक्त्यात्मकमेव जगन्मिथ्या न तु तदात्मकमपीति सिद्धम् श्रुतौ भासेति तृतीया प्रकृत्यादिभिरूप इतिवत् ॥१८॥ तत्र कार्यस्य कारणरूपत्वे । न तु मत्तः पृथगिति–"नारायण एवेद सर्वम्" "ब्रह्मैवेद सर्वम्" "सर्वं खल्विदं ब्रह्म" "तज्जलान्" इत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञानमेतत्त्रियवस्थमंग गुणत्रयं कारणकार्यकर्तृ ॥ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम् ॥ २० ॥ न यत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रम् ॥ भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा ॥ २१ ॥

न्मध्ये च कटकं कुंडलमित्यादिनानाव्यपदेशैर्व्यवहारं प्राप्यमाणमपि तदेव यथा तद्वदस्य विश्वस्य कारणभूतोहमेव नानाव्यवहारालंबनं न तु मत्तः पृथग्विश्वमिति ॥ ॥ १९ ॥ तदेवं कार्यस्य कारणमात्रात्मकतामुक्त्वा प्रकाशस्य प्रकाशकात्मकतामाह । विज्ञानमिति । त्रियवस्थम् । यकारस्य पृथक् पाठश्छंदोनुरोधेन । जाग्रदादि त्र्यवस्थं यद्विज्ञानं मनस्तदवस्थाकारणरूपं च यद्गुणत्रयम् । यच्च कारणकार्यकर्तृ । कारणमध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवम् । एवं गुणत्रयकार्यभूतं त्रिविधं जगत् । एतद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति । येनानुगतं प्रकाशत इत्यर्थः । "तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति । तथा "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः" इत्यादिश्रुतेश्च । ननु विशेषविज्ञानव्यतिरेकेण न तुर्यं नामोपलभामहे तत्राह । व्यतिरेकतश्च समाध्यादौ यदस्ति तदेव सत्यमिति ॥ २० ॥ एवं कालत्रयेऽप्यव्यभिचारिणः सत्यत्वमुक्त्वं व्यभिचारिणस्त्वसत्यतामाह । न यदिति । मध्ये च तत्पृथङ् नास्ति । किंतु व्यपदेशमात्रम् । कुतः । यतो यद्यत्परेणान्येन भूतं जातं प्रसिद्धं प्रकाशितं च तत्तदेव कारणप्रकाशकतावन्मात्रं स्यान्न पृथगिति मे मनीषा बुद्धिः । "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतेः । कारणप्रकाशकव्यतिरेकेण कार्यस्य प्रकाश्यस्य चानुपलंभादिति भावः ॥ २१ ॥

दिश्रुतेः ॥ * ॥ अत्र **सन्दर्भः**—यथेति—अत एव स एव परमार्थतः सर्वावयवीति भावः । किञ्च—जीवचैतन्यस्य तत्रतत्रान्वयात्सुषुप्तौ तद्व्यतिरेकोऽपि स्वतोऽवस्थानात्तस्मिन्व्यष्ट्युपाधीनां रज्जौ सर्पावयवानामिवारोपितत्वमेव तस्य तु रज्जुवत्सत्यत्वं सिध्यति ॥ १९ ॥ इत्यर्थ इति—समन्वयो व्याप्तिः चिद्व्याप्तिं विना जडप्रतीतेरभावादिति भावः । अत्र प्रमाणमाह—तमेवेति । श्रुतयो व्याख्यातचराः । अत्राक्षिपति—नन्विति । विशेषज्ञानमध्यात्मादिज्ञानं तद्विना सामान्यज्ञानरूपं तुरीयं नोपलभ्यत इत्यत आह—समाध्यादौ विशेषज्ञानाभावेऽपि सामान्यज्ञानमस्ति एतावन्तं कालमहं समाभूवमित्युत्थितस्य स्मृतेरन्यथानुपपत्तेः । आदिना सौषुप्तग्रहः ॥ ॥ * ॥ परमचैतन्यसमष्ट्युपाधावप्येवं ज्ञेयमित्याह द्वाभ्याम् । "यो विज्ञाने तिष्ठन्" इत्यादिश्रुतेः विज्ञानजीवचैतन्यमेव गुणत्रयोपाधिकं सत् त्र्यवस्थं भवति, तदेवाह—कारणकार्यकर्त्रिति, तत्तद्रूपायमाणमित्यर्थः । किन्तु समन्वयेनेत्याह, तत्र त्र्यवस्थमिति वक्तव्ये त्रियवस्थमिति व्याडिगालवयोर्मते 'नैके यणा व्यवधीयन्ते' इति शब्दस्मृतेः । गुणानां त्रयं यस्मिन्निति बहुव्रीहिः ॥ * ॥ **दीपिका** तु—सामान्यज्ञानमात्रेण निरुपाधिप्रकाशमात्रेण कर्त्रा यः समन्वयः सम्यग्व्याप्तिस्तेन विशिष्टं भवति । तथा च—येन परमात्मनानुगतं व्याप्तं सद्विश्वं प्रकाशत इति फलितम् । तमेव परमात्मानमेव भांतं स्वतः प्रकाशमानमनुलक्ष्यीकृत्य सर्वं विश्वं भाति प्रकाशत इति स्वतंत्रसत्त्वैव निषिद्धा, चक्षुषश्चक्षुः रूपादिप्रकाशनशक्तः परमात्मन एव न चक्षुरादीनामिहापि सैव निषिद्धा । समाध्यादावित्यादिना वैकुंठादिग्रहस्तथा च तदुपलंभे विद्वदनुभव एव दृढतरं मानमिति सूचितम् ॥२०॥ एवं कालत्रये जाग्रदादिकालत्रये । कारणप्रकाशकं च तावन्मात्रं, चेति कारणप्रकाशकतावन्मात्रं कारणरूपं प्रकाशकरूपमित्यर्थः । मे परमसर्वज्ञस्य मनीषा।इति इत्थम्।अतस्तद्विरुद्धापादकं शास्त्रमप्रमाणमिति भावः । अत्र प्रमाणमाह—वाचारंभणमिति । इति भाव इति—तंतुतो भेदेन पटादर्शनात्तंतुरूपत्वं पटस्येव तमसि पदार्थानुपलब्धेः प्रकाशकरूपत्वं पदार्थस्येत्याशयः ॥ * ॥ **दीपिका**—अव्यभिचारिणः परमात्मनः । व्यभिचारिणः पृथक्सत्तया वैशेषिकादिभिरभ्युपेतया । विश्वस्य तु मिथ्यात्वं विकारो घटशरावाद्यवस्था वाचा व्यवहारेणारभ्यते रलयोरविशेषात् स्पृश्यते संबध्यत, इति यावत् । तन्नामधेयं नाममात्रं सर्वं मृत्तिकालक्षणमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ॥ ब्रह्म स्वयं ज्योतिरतो विभाति ब्रह्मेंद्रियार्थात्मविकारचित्रम् ॥ २२ ॥ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन ॥ छित्त्वाऽऽत्मसंदेहमुपारमेत स्वानंदतुष्टोऽखिलकामुकेभ्यः ॥ २३ ॥ नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः ॥ मनोऽन्नमात्रं धिषणा च सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यम् ॥ २४ ॥

एवं सामान्यतः कार्यप्रकाश्ययोः कारणप्रकाशकाभ्यामभेदमुपपाद्य प्रस्तुते तदुभयविवेकपूर्वकं प्रपंचस्य ब्रह्माभेदमाह । अविद्यमान इति । योऽयं वैकारिको विकारसमूहः स एव प्रागविद्यमानो राजससर्गः । रजोद्वारेण ब्रह्मकार्यभूत इत्यर्थः । अवभासतेऽपि ब्रह्म प्रकाश्यश्चेत्यर्थः । ब्रह्म तु स्वयं स्वतःसिद्धं न तु कार्यमित्यर्थः । ज्योतिश्च प्रकाशकमित्यर्थः। अतः कारणादिंद्रियाणि च अर्थास्तन्मात्राणि चात्मा मनश्च । देवानामप्युपलक्षणम् । विकाराः पंचभूतानि एवं चित्रं विचित्रः प्रपंचो ब्रह्मैव भातीति ॥ २२॥ उपसंहरति । एवं निगमतपःप्रत्यक्षैतिह्यानुमानैः स्फुटं यथा भवति तथा ब्रह्मविवेकहेतुभिस्तथा परस्य देहादेरपवादेनात्मत्वनिरासेन च । कीदृशेन । विशारदेन निपुणेन । गुरुणा निमित्तभूतेनेति वा । आत्मविषयं संदेहं छित्त्वा स्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्य इंद्रियादिभ्य उपारमेत निःसंगो भवेत् ॥ २३ ॥ परापवादं प्रपंचयति ।

कमेव द्रव्यं न तु पृथक्सत्ताकं किञ्चिदप्यस्तीत्येवं सत्यम् ‘ आलंभः स्पर्शहिंसयोः ’ इति निघंटुकारः । वाचेति—कर्मणि ल्युट् “ सर्वं खल्विदं ब्रह्म ” इति बाधितसामानाधिकरण्यम् । वैष्णवमते सर्वस्य तच्छक्तित्वात्तच्छरीरत्वात्तद्व्याप्यत्वात्तदायत्तवृत्तिकत्वाच्च तच्छब्दानां तावत्पर्यन्तधावनशीलत्वेन मुख्यमेव सामानाधिकरण्यमन्यथाध्यस्तज्ञानं नाधिष्ठानज्ञानेनेति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा परिणामदृष्टान्तश्च न संगच्छेतेति ज्ञेयम् । भावार्थस्तु सर्वसिद्धान्तानुयायी पृथक्सत्तयोरुभयैरनभ्युपेतत्वात् ॥ २१ ॥ प्रकृते प्रस्तुते । तदुभयविवेकपूर्वकं कारणप्रकाशकविवेचनपुरःसरम् । ब्रह्मणाऽभेदो ब्रह्माभेदस्तम् । इत्यर्थ इति—अविकृतस्य ब्रह्मणो विवर्ताधिष्ठानत्वे नायस्कान्तवत्सान्निधिमात्रेण च कारणत्वमिति भावः । इत्यर्थ इति—जडे स्वतः प्रकाशासंभवाद्ब्रह्मणैव प्रकाश्यत इति भावः । इत्यर्थ इति—स्वतः सिद्धस्य कार्यत्वायोगादिति भावः । इत्यर्थ इति—ज्योतिषः प्रकाशकत्वस्वभावान्न तु प्रकाश्यत्वं संभवतीति भावः । यतो ब्रह्मैव कारणं प्रकाशकश्चातो हेतोः । इन्द्रियादिरूपेण चित्रं बहुविधम् ॥ * ॥ **दीपिका**—सामान्यतः प्रकृतेऽप्रकृते चेत्यर्थः । तत्र लोके कार्यस्य घटादेः कारणेन मृदा, तथा प्रकाश्यस्य प्रभादेः प्रकाशकेन दीपादिनाऽभेदः प्रसिद्ध एव । प्रस्तुते प्रकृते विश्वब्रह्मणोः कार्यकारणादिभावे । तदुभयेति—कार्यकारणप्रकाश्यप्रकाशकोभयपृथक्त्वज्ञानपूर्वकम् । एतच्छब्दबलादयमित्यध्याहृतं यच्छब्दबलात्स इत्यपि, किन्त्वध्याहृततच्छब्दसान्निध्यादेतच्छब्दस्य प्रसिद्धार्थत्वमित्यालंकारिकाः । विकारसमूहो महदादिकार्यप्रपञ्चः । प्रागविद्यमान इत्यादिपदद्वयस्य मेलयित्वा व्याख्यानादित्यर्थ इत्युक्तम् । एवं परत्रापिशब्दस्य दूरान्वयाद्ब्रह्मपदाध्याहाराच्च तथोक्तम् । एवं प्रपञ्चस्य कार्यत्वप्रकाश्यत्वेऽभिधाय ब्रह्मणः कारणत्वप्रकाशकत्वे योजयितुं तुशब्दाध्याहारः भिन्नोपक्रमत्वात् न तु कार्यमिति, किंतु कारणमित्यर्थः । अतः विश्वब्रह्मणोः कार्यत्वप्रकाश्यत्वकारणत्वप्रकाशकत्वाद्धेतोः । इन्द्रियादिविकारपर्यन्ताः पदार्था एव चित्रं नानाविधं विश्वं स्वाभाविकाचिन्त्यशक्त्या ब्रह्मैव भाति उपाधिकल्पने मानाभावात् । अद्वयवादिनां मते तु बाधितसामानाधिकरण्यमेव । टीकाकृतां व्याख्यानं तु यथामूलं सर्वोन्मुखं यथारुचि ग्राह्यमिति ताटस्थ्येन सुधीभिर्विभाव्यम ॥ * ॥ **संदर्भस्तु**—अतः शुद्धे ब्रह्मणि अविद्यमान एव प्रपञ्चः । तत्कारणस्य शक्तिशबलतयाभिप्रेते तु विद्यत एव तद्वैचित्रीत्याह—अविद्यमान इति । अस्यैवार्थमाह—ब्रह्मप्रकाश्यश्चेत्यर्थ इति टीकायाम ॥ २२ ॥ एवमुक्तरीत्या । ब्रह्मणो विवेको देहादिभ्यो भिन्नत्वेन ज्ञानम् । तद्धेतुभिर्निगमादिभिस्तथैव परापवादादिभिः । निपुणेन स्थिरेण । ‘ निपुणः स्थिरविज्ञयोः ’ इति । गुरुं विना ज्ञानस्थिरत्वासंभवमालोच्याह—यद्वेति । विशिष्टा शारदा बुद्धिर्यस्य तेन । यद्वा—विवेकहेतुभिर्ब्रह्म स्फुटं भवतीति योज्यम् ॥ * ॥ निगमादयः पूर्वपद्यस्था अत्र विशेष्यत्वेनाहृताः मूले तदभावात् । ‘ अयमुदयति मुद्राभंजनः पद्मिनीनाम ’ इतिवत् ॥ २३ ॥ इन्द्रियादीनामन्नोपष्टभ्यत्वं स्फुटमेव, तदनशने तदाकुलत्वदर्शनादिति । योगिनामनशनेप्यनाकुलतादर्शनादाह—यद्वेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः ॥ विक्षिप्यमाणैरुत किन्नु दूषणं घनैरुपेतैर्विगतै रवेः किम् ॥२५॥ यथा नभो वाय्वनलां बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते ॥ तथाऽक्षरं सत्त्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परम् ॥ २६ ॥ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् ॥ मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः ॥ २७ ॥ यथाऽऽमयोऽसाधु चिकित्सितो नृणां पुनःपुनः संतुदति प्ररोहन् ॥ एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगम् ॥ २८ ॥

नेति । वपुरात्मा न भवति पार्थिवत्वाद्घटवत् । तथा इंद्रियाणि तदधिष्ठातारो वा देवा असुः प्राणो धिषणा बुद्धिः सत्त्वं चित्तमहंकृतिरित्येते आत्मा न भवंति । कुतः । अन्नमात्रम् । अन्नोपष्टभ्यत्वाच्छरीरवत् । वायुर्जलं च हुताशस्तेजः खं क्षितिरिति पंचभूतानि । अर्थाः शब्दादयः साम्यं प्रकृतिर्नात्मा जडत्वात् घटवदिति । यद्वा हिशब्दे नानुमानांतराणि सूचितानि । तद्यथा इंद्रियाण्यात्मा न भवंति । करणत्वाद्दास्यादिवत् । देवाश्च वैकारिकत्वान्मनोवत् । प्राणश्च वायुत्वाद्बाह्यवायुवदित्यादि ॥ २४ ॥ एवं विवेकज्ञानवतो मुक्तस्य नेंद्रियादिकृतगुणदोषसंबंध इत्याह । समाहितैरिति । मत्सुविविक्तधाम्नः मम सुष्ठु विविक्तं धाम स्वरूपं येन तस्य प्रकाशकस्य प्रकाश्यगुणदोषा न भवंतीति रविदृष्टांतेनोक्तम् ॥ २५ ॥ असंगब्रह्मत्वेनावस्थितस्य न केऽपि गुणदोषा इत्याकाशदृष्टांतेनाप्याह । यथेति । वाय्वादीनां शोषणदहनक्लेदनरजोधूसरत्वादिभिर्गतागतैरागमापायिभिर्ऋतुगुणैः शीतोष्णादिभिर्वा: अहंमतेरहंकारात्परमक्षरं संसृतिहेतुभिर्न युज्यते। यद्वा अहंकारस्य संसृतिहेतुभिरिति ॥ २६ ॥ मुक्तवदसम्यग्ज्ञानी न यथेष्टमाचरेदित्याह द्वाभ्याम् । तथाऽपीति । गुणेषु विषयेषु रजो रागः मनसः कषाय इति उपायांतरेण दुर्निरासतामाह ॥ २७ ॥ तदेव दृष्टांतेनोपपादयति । यथेति । नृणामामयो रोगः असाध्वसम्यक्

॥ * ॥ रश्मिस्थानीयं जीवात्मानं विवेकं परस्य देहादेरपवादमात्मत्वनिरासं विस्तारयति । अन्नोपष्टभ्यत्वात् अन्नोपजीव्यत्वात् । पूर्वार्धे इन्द्रियादीनां बहुवचनांतानामन्नमात्रमित्येकवचनेन सामानाधिकरण्यायोगात्—यद्वेति । आदिना देवा आत्मा न भवन्ति जडसात्त्विकाहंकारकार्यत्वात् । वायुर्नात्मा स्पर्शवत्त्वात् घटवत् । जलं नात्मा शीतस्पर्शवत्त्वात् शीतलशिलावत् । हुताशो नात्मा उष्णस्पर्शवत्त्वात् आतपवत् । धिषणा बुद्धिर्नात्मा करणत्वात् इन्द्रियवत् । चित्तं नात्मा करणत्वात् बुद्धिवत् । अहंकृतिर्नात्मा जडत्वाकरणत्वाद्वा इन्द्रियवत् । इत्यनुमानानि बोध्यानि ॥ २४ ॥ ज्ञानिनामसंगतामाह—समाहितैः सुस्थितैः । करणैरिन्द्रियैः । गुणेषु विहिताचरणेष्वात्मा स्थितिर्येषां तानि गुणात्मानि तैः । " गुणः स्याद्विहिताचारे स्थितिरात्मापि कथ्यते " इति कामधेनुः । विक्षिप्यमाणैर्विषयासक्तैः । उपेतैः समीपगैः । विगतैर्दूरगैः ॥ * ॥ **संदर्भः**—यस्तु मत्स्वरूपनिष्ठस्तस्य त्वंपदार्थशोधनापेक्षापि नास्तीत्याह—समाहितैरिति । समाहितैर्निश्चलैर्विक्षिप्यमाणैश्चंचलैर्वा कौ गुणदोषौ, न कावपीत्यर्थः । अन्यकृतविक्षेपादिस्तं न स्पृशतीति भावः ॥ २५ ॥ आदिना चालनतापनपिंडीकरणकाठिन्यादिग्रहः । आदिनाऽनुष्णाशीतत्वादिग्रहः । तथा नभोवत् । ' बुद्धेरात्मा महान्परः ' इत्याद्युक्तेर्बुद्धिपदेनाहंकारग्रहणं त्वायाससाध्यमिति मत्वाह—यद्वेति ॥ * ॥ मण्डलस्थानीये तत्पदार्थे तु सर्वथैव तत्संबंधो नास्तीति दर्शयति—यथेति । अहंमतेर्देहाद्युपाध्यहंकारमयस्य जीवस्य परं केवलं संसृतिहेतुभिः न त्वक्षरस्य अविचलितज्ञानादिशक्तेस्तस्येत्यर्थः ॥ * ॥ **दीपिका**—प्रकाशकस्य शुद्धत्वंपदार्थस्य प्रकाश्यानामिन्द्रियादीनामुपरतिविक्षेपोदयो गुणदोषो न भवति । पूर्वार्धे अहंमतेरिति पदस्यास्थानपतितत्वं कस्य संसृतिहेतुभिरित्यपेक्षा चातो—यद्वेति ॥ २६ ॥ असम्यग्ज्ञानी मूर्खः । यद्यपि ज्ञानिनो विषयसंबंधे गुणदोषौ न तथापीति । "कषायोऽवार्यरागे च रसभेदे विलेपने । निर्यासे सुरभौ रक्ते ह्यंगरागे च कीर्तितः ॥" इति धरणिः । अवार्यरागोत्र कषायार्थः ॥ * ॥ असम्यग्ज्ञानिनं संकोचयन् भक्तियोगोपदेशेन कृतार्थयति—तथापीति द्वाभ्याम् ॥ * ॥ **दीपिका**—तथापि सम्यग्ज्ञानिनो गुणदोषाभावेपि । रागोऽत्र विषयप्रीतिः । यथा कषायो गैरिकादिरागो दुर्निवर्त्यस्तथा रागोपीत्यर्थः ॥ २७ ॥ एतदेवावार्यसंगत्वमेव । प्ररोहन्नपथ्याश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुयोगिनो ये विहतांतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ॥ ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रम् ॥ २९ ॥ करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् ॥ न तत्र विद्वान्प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या ॥ ३० ॥ तिष्ठन्तमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नम् ॥ स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद ॥ ३१ ॥ यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत् ॥ न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानम् ॥ ३२ ॥

यथा भवति तथा अपक्वकषायकर्म अदग्धाः कषाया रागादयस्तन्मूलानि कर्माणि यस्मिंस्तत । अत एव सर्वसंगं सर्वेषु पुत्रादिषु सज्जमानं मनः कुयोगिनमसम्यग्ज्ञानिनं विध्यति भ्रंशयति ॥ २८ ॥ ननु कथंचिद्विषयसंगे यदि योगभ्रंशः स्यादलं तर्हि सापायेन योगमार्गेण तत्राह । कुयोगिन इति । मनुष्यभूतैर्बंधुशिष्यादिरूपैस्त्रिदशैरुपसृष्टैः प्रेरितैः । तथा च श्रुतिः "यस्मात्तदेषां न प्रियं यदेतन्मनुष्या विद्युः" इति । भूयो जन्मांतरे । न तु कर्मतंत्रं कर्मविस्तारम् ॥ २९ ॥ ननु विदुषामपि सर्वथा कर्म दुष्परिहरमिति पुनः संसारः स्यादत आह । करोतीति । विदुषोऽन्योऽसौ जंतुर्देह एव भोजनादिकर्म करोति क्रियते विक्रियते च तेन कर्मणा पुष्ट्याद्यपि प्राप्नोतीत्यर्थः । केनापि संस्कारादिना चोदित आनिपातान्मरणपर्यंतं करोति । विद्वांस्तु प्रकृतौ देहे स्थितोऽपि कर्मणि न विक्रियते निरहंकारित्वात् । हर्षविषादादिभिः संसारं न प्राप्नोति ॥ ३० ॥ किंच आस्तां तावद्दैहिककर्मभिर्विकारशंका यतो देहमप्यसौ न पश्यतीत्याह । तिष्ठंतमिति । उक्षंतं मूत्रयंतम् । स्वभावप्राप्तमन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वंतमात्मानं देहम् ॥ ३१ ॥ नन्विंद्रियवतः सर्वथा कथमदर्शनं संभवति तत्राह । यदि स्मेति । यद्यप्यसतां बहिर्मुखानामिंद्रियाणामर्थं पश्यति

नादिनाऽऽविर्भवन् । अत एवाऽपक्वकषायत्वादेव ॥ * ॥ तदेव मनःकषायस्य दुर्निवार्यत्वमेव । अत एवापक्वकषायत्वादेव ॥ २८ ॥ योगाभ्यासमाक्षिपति—नन्विति । त्रिदशा योगे विघ्नं कुर्वन्तीत्यत्र हेतुभूतां श्रुतिं प्रमाणयति—तथा चेति । एषां देवानां यन्मनुष्या विद्युः ब्रह्म जानीयुः तत् ब्रह्मज्ञानं न प्रियं यस्माद्धेतोस्तस्मात्ते देवा विघ्नान्कुर्वन्तीत्यर्थः । "विघ्नान्कुर्वन्त्ययं ह्यस्मानाक्रम्य समियात्परम्" इत्युक्तेः ॥ * ॥ ततश्चान्तरायेपि न नश्यतीत्याह—कुयोगिन इति । वक्ष्यते च—"योगचर्यामिमां योगी विचरन्मदपाश्रयः । नान्तरायैर्विहन्येत" इति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—देवप्रेरितमनुष्यादिरूपैर्न तु स्वीयभोगाभिनिवेशैः । अत एव 'यदि न समुद्धरन्ति यतयो हृदि कामजटाः' इत्यत्रोक्ता यतय एतेभ्यो भिद्यंत इति ज्ञेयम् । श्रुतिर्व्याख्यातचरी ॥ २९ ॥ सर्वथा कर्मत्यागस्तु न कस्यापि संभवतीत्याक्षिपति—नन्विति । जायत इति जन्तुः । इत्यर्थ इति—धातूनामनेकार्थत्वाद्विकारेपि कृत्रस्ति । अर्थवशात्कर्मपदं विपरिणमय्यावृत्त्या योज्यमिति भावः । आदिनाऽदृष्टादिग्रहः । इत्यर्थ इति—तथात्वे विद्वत्तैव न स्यादिति भावः ॥ * ॥ सिद्धानां न कदापि हानिरिति विवृणोति—कर्मीव ज्ञानी पुनर्न बंधनं प्राप्नोतीत्याह—करोतीति । असौ जीवः केनाप्यन्तर्यामिणा चोदितः प्रेरितः कर्म करोति तथा क्रियमाणेन कर्मणा तेनासौ जन्तुः सूकरश्वादियोनिगतोपि क्रियते । निपातो लयस्तत्पर्यन्तम् । तत्र तन्मध्ये विद्वान् ज्ञानी तु प्रकृतौ देहे स्थितोपि कर्म न करोति नापि कर्मणा तथाभूतः क्रियते ॥ ३० ॥ आरूढावस्थामाह—किंचेति । आत्मस्थमतिर्निवृत्तद्वैतदर्शनः ॥ * ॥ ज्ञानी देहस्थोऽपि देहं नानुसंधत्त इत्याह—तिष्ठंतमिति । आत्मस्थमतिः परमात्मस्थितधीः ॥ ३१ ॥ द्वैतादर्शनमाक्षिपति—नन्विति । अर्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग ॥ निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ ३३ ॥
यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते ॥ एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ॥ ३४ ॥

तथापि नानात्वान्मिथ्यास्वप्नवदित्यनुमानेन विरुद्धं बाधितं तदन्यदात्मव्यतिरिक्तं मनीषी वस्तुतया न मन्यते । स्वप्नादुत्थाय प्रबुध्य संस्कारमात्रेण स्वाप्नं विषयं स्फुरंतमत एव स्वयमेव तिरोभवंतं यथा तद्वत् ॥ ३२ ॥ तदेवमात्मा न विक्रियेत इत्युक्तम् । नन्वेतदनुपपन्नं बद्धावस्थायां त्यज्यमानत्वान्मुक्तावस्थायां च गृह्यमाणत्वात् । न हि व्रीहयोऽवघातेन व्रीहिभावत्यागतस्तंडुलीभावेन गृह्यमाणा न विक्रियंते तत्राह । पूर्वमिति । बद्धावस्थायां गुणैः कर्मभिश्च चित्रमज्ञानकार्यं देहेंद्रियादिलक्षणमात्मन्यध्यासेनाविविक्तं गृहीतमासीत्तदेव पुनर्ज्ञानेन निवर्तते । आत्मा तु न केनापि रूपेण गृह्यते नापि त्यज्यते । अयं भावः । मुक्तेः क्रियाफलत्वे भवेदेतावदात्मनो विकारः तस्यास्त्वारोपिताज्ञानमात्रनिवृत्तिरूपत्वान्नात्मसंस्पर्शित्वं बंधमोक्षयोः अतो न विकार इति ॥ ३३ ॥ एतदेव दृष्टांतेन स्पष्टयति । यथेति । न तु सत् पूर्वमेव विद्यमानं

विषयम् । अत एव संस्कारमात्रत्वादेव । तद्वत् स्वप्नोत्थितवत् ॥ * ॥ किञ्च—यदि कदाचित्समाधिभंगे सति नानाभूतमसदिन्द्रियार्थं पश्यति तदपि कार्यं कारणाभिन्नं तन्त्वभिन्नपटवदित्यनुमानेन विरुद्धं बाधितं सत्, अन्यत् आत्मव्यातिरिक्तमित्यादि तैः । नानानुमानेन नानात्वेन हेतुना यन्मिथ्या न तन्नाना न यथा ब्रह्मेति व्यतिरेकव्याप्तिः । अत एव संस्कारमात्रेण स्फुरद्रूपत्वादेवेति **दीपिका** ॥ ३२ ॥ आत्माविक्रियामधुनाऽऽक्षिपति—नन्विति । एतदात्माविक्रियत्वम् । पूर्वावस्थापरित्यागपूर्वकमवस्थांतरप्राप्तिरूपविकारलक्षणस्य सद्भावात् । तथाहि—नहीति । गुणैरुपादानैः कर्मभिश्च निमित्तैः । अविविक्तमभिन्नम् । तदेव देहेन्द्रियाद्यात्माध्यसनमेव । न गृह्यते नित्यस्वप्रकाशत्वात्, नापि त्यज्यते आत्मत्वात् । अत्राशयमाह—अयं भाव इति । क्रियाफलत्वे कर्मजन्यत्वे स्वीकृते । तावत्तदा । तस्या मुक्तेः । यतो नात्मस्पार्शित्वं बंधमोक्षयोरतो हेतोः ॥ ॥ * ॥ **दीपिका**—तत्राविक्रियत्वे । गुणैः सत्त्वादिभिः । कर्मभिस्तज्जन्यपुण्यपापैः । आत्मनि जीवस्वरूपे । अध्यासेन परत्र परावभासरूपेण । अविविक्तं काणोऽहं बधिरोहमित्यभिन्नं गृहीतं जातं तदेवाध्यासेनाभिन्नत्वेन जातमेव देहादिज्ञानेन स्वरूपज्ञानेन केनापि रूपेण मुक्त्यवस्थात्मकेन च रूपेण न गृह्यते बद्धावस्थात्मकेन च रूपेण न त्यज्यते नित्यमुक्ते तस्मिन् द्वयोरपि प्रातीतिकत्वात् । "गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्" इत्यत्र पूर्वं तथा निर्णीतत्वादित्यर्थः । शंकाभाससमार्धिन स्फुट इत्यतोऽयं भाव इति । यथा तण्डुलीभावस्यावघातक्रियाफलत्वाद्व्रीहीणां विकारः, तथा मुक्तेः कस्या अपि क्रियाफलत्वे सत्येवात्मनो विकारः शंक्येत । तस्यास्तु मुक्तेस्तु आरोपितं यदधिष्ठानस्याज्ञानं देहात्मभावनापादकं तस्याज्ञानस्य याधिष्ठानज्ञानेन निवृत्तिर्निरासस्तद्रूपत्वान्न क्रियाफलत्वमिति । न बंधमोक्षयोरात्मस्पार्शित्वमतो बन्धमोक्षयोर्वास्तवत्वाभावान्नात्मनो विकार इत्यर्थः ॥ ३३ ॥ तमश्चक्षुरावरणम् । एवं सूर्यवत् । निपुणा कुशलगुरुप्राप्ता सती श्रुतिसत्प्रमाणजन्या समीक्षा परोक्षात्मविद्यापि पुरुषस्य बुद्धेर्मे मद्विषयकमावरणमेव हन्यान्मत्स्वरूपं तु स्वप्रकाशतयैव स्फुरति । यद्वा—मे समीक्षा मद्विषयज्ञानं मे मदंशस्य पुरुषस्य वा ॥ * ॥ **सन्दर्भः**—तस्य च मदंशस्य प्रकाशो मदनुग्रहेणाज्ञानलोपात्स्वत एव भवतीति दृष्टान्तेनाह—यथा हीति । न तु पूर्ववत् । यत्तेजोंशलक्षणं सद्वस्तु तत्पुनर्विधत्त इत्यर्थः । मे समीक्षा कृपादृष्टिः ॥ * ॥ अत्र **विश्वनाथः**—सदा वर्तमान एवात्मा ज्ञाने सति स्वत एवोपलभ्यते तास्मिन्साति नोपलभ्यते सूर्यप्रकाशे सति असति च घटपटादिरिवेत्याह—यथा हीति । चक्षुषस्तम आवरणमेव हन्यान्न तु चक्षुस्तद्विधत्ते यतः मच्चक्षुस्तु सदैव वर्तमानमेकरसमेवेति भावः । एवं निपुणा मे समीक्षा दृढं ज्ञानं मदीया विद्याशक्तिरित्यर्थः । पुरुषस्य त्वंपदार्थस्य बुद्धे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः ॥ एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरंति ॥ ३५ ॥

घटादि पुनर्विधत्ते करोति । मे या समीक्षा आत्मविद्या ॥ ३४ ॥ आत्मनो निर्विकारतां प्रपंचयति । एष इत्यनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति । स्वयंज्योतिरित्यनेनाज्ञानमलापाकरणलक्षणां विकृतिं वारयति । अज इत्युत्पत्तिं वारयति । अप्रमेय इति ज्ञानलक्षणातिशयाधानेन संस्कारम् । महानुभूतिरिति देशकालपरिच्छेदाभावेनास्तित्ववृद्धिविपरिणामापक्षयनाशान् स्वयंज्योतिष्ट्वादौ हेतुः । सकलानुभूतिरिति । एकोऽद्वितीय इति विकारहेतोरन्यस्याभावान्न कोपि विकार इति दर्शयति । ननु श्रुतिविषयस्य कथं स्वयंज्योतिष्ट्वादि तत्राह । वचसां विरामेऽगोचरत्वेन निवृत्ता सत्याम् । तथाच श्रुतिः । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति । तत्र हेतुः । येनेषिताः प्रेषिताः । तथा च श्रुतिः । "केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ॥ केनेषितां वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ श्रोत्रस्य श्रोत्रं

बुद्ध्युपहितस्य तामिस्रं ज्ञानावरणमेव हन्यात् ॥ ३४ ॥ स्वयंज्योतिष्ट्वादिकमात्मन आक्षिपति—नन्विति । मनआद्यगोचरत्वे प्रमाणमाह—तथा चेति । श्रुतिरुक्तार्था । तत्र स्वयंज्योतिष्ट्वादौ । प्राणादीनामात्मनः प्रेरकत्वे प्रमाणमाह—तथा चेति । इषितमभिमतं विषयं प्रति केन प्रेषितं प्रेरितं मनः पतति याति केन प्रयुक्तः प्रेरितः प्रथमः प्राण एति आदावेव विशेषतः प्रेरकापेक्षाऽस्ति पुनस्तु कुलालचक्रवत्संस्कारेणापि चलनं भवत्येव । वदन्ति जीवाः । उ वितर्के । अस्योत्तरम्—श्रोत्रस्येत्यादि स्पष्टार्थम् ॥ * ॥ **विश्वनाथः**—शुद्धेन त्वंपदार्थेनात्मना परमात्मानं सूर्यस्थानीयं भक्त्या किं स्वयं पश्येत् स तु जीवात्मविलक्षण एवेत्याह—एष इति । स्वयंज्योतिः स्वप्रकाशः, जीवस्तु तत्प्रकाश्यः । अजः जीवस्तूपाधिद्वारा जन्यः । अप्रमेयस्सर्वव्यापकत्वात् प्रमातुमशक्यः, जीवस्तु न तथाभूतः । महानुभूतिश्चित्पुंजः, जीवस्तु चित्कणः । सकलानुभूतिः सर्वज्ञः, जीवस्त्वल्पज्ञः । एकः परमेश्वरान्तराभावात्सजातीभेदरहितः, जीवस्त्वनेकः । अद्वितीयः जीवमाययोस्तच्छक्तित्वेनैक्याद्वितीयभेदरहितः, जीवस्तु नैवंभूतः । न च जीववद्वाङ्मनसगोचर इत्याह—वचसां विरामेऽगोचरत्वेन निवृत्तौ सत्याम् । तथा च श्रुतिः—" यतो वाचः " इत्याद्याः । तर्हि कथं स प्रत्येतव्यस्तत्राह—येनेषिता यत्प्रेरिता वागसवश्चरन्ति । तदुक्तम्—' गुणप्रकाशैरनुमीयते भावान् ' इति । **दीपिका** तु—प्रपञ्चयति चतुर्विधक्रियाफलाभावेन विवृणोति । एतच्छब्दस्यापरोक्षार्थत्वे ' समीपतरवर्ति चैतदो रूपम् ' इति मानम् । अतिशयः शक्तिविशेषः । महाभूतिरिति—महती देशकालपरिच्छेदरहितानुभूतिः स्वरूपज्ञानं यस्य स तथा । कालपरिच्छेद एव जन्मान्तरास्तित्वविपरिणामापक्षयनाशाः संभवन्ति न तु तदभावे, तथा देशपरिच्छेद एव वृद्धिः न तु तदभावे इति तथा व्याख्यातम् । एकः सजातीयभेदरहितः, अद्वितीयो विजातीयभेदशून्य इति पदद्वयं कर्तृपदद्वयेन वा भगवान् विकारनिमित्तसामान्यस्य सजातीयविजातीयस्याभावान्न कोपि विकार उत्पत्त्यादिरस्तीति दर्शयति । श्रुतिविषयस्य श्रुतिप्रकाश्यस्य । अगोचरत्वेनानंतत्वादविषयत्वेन । तथा चानन्तत्वेनाविषयत्वे प्रमाणं श्रुतिः—अप्राप्यावधिमनुपलभ्य श्रांता वाच उपनिषदो मनसा सह यतो ब्रह्मणः सकाशान्निवर्तन्त इति वागाद्यविषयं तदित्यर्थः । तत्राविषयत्वे वागादीनां तत्प्रेरित्वे प्रमाणं श्रुतिः तवल्कारोपनिषत्—कश्चित्प्रतिपन्नो ब्रह्मजिज्ञासुः जडानां मनआदीनां प्रवृत्त्यन्यथानुपपत्त्या तत्प्रवर्तकपरमात्मबुभुत्सया पृच्छति—केनेति । मनःकर्तृकेन देवेन प्रेषितं सत् इषितामिष्टं साध्वसाधुविषयं प्रति पतति गच्छति, मनसः कारणत्वादवश्यं तत्प्रेरकेण केनचिज्जीवभिन्नेन कर्त्रा भाव्यम्, निगृह्णाति जीवेन निग्रहीतुमशक्यत्वात् ' मनोवशेन्ये ह्यभवन्स्म देवाः ' इत्युक्तेः । इषितमितीडागमश्छान्दसः । प्रथमं पंचानां मध्ये मुख्यः प्राणः केन कर्त्रा युक्तः प्रयुक्तः प्रेरितः सन्प्रैति याति स्वव्यापारं करोतीत्यर्थः । इमां लौकिकीं वैदिकीं च वाचं केनेषितां प्रेरितां वदंति जीवा इति शेषः । चक्षुःश्रोत्रमिति प्राण्यंगत्वादेकवद्भावः । संबुद्धौ भो देशिक को देवो युनक्ति प्रयुंक्ते प्रेरयतीत्यर्थः । इदमुपलक्षणं शेषकरणानाम् । एवं शिष्येणानुयुक्त आचार्य उवाचेति गम्यम् । श्रोत्रस्येति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतावानात्मसंमोहो यद्विकल्पस्तु केवले ॥ आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ॥ ३६ ॥

यन्मनसो मनो यद्वाचो ह वाचं प्राणस्य प्राणमुत चक्षुषश्चक्षुः" इति ॥ ३५ ॥ अद्वितीयत्वमुपपादयितुं भेदस्यावास्तवत्वमाह । एतावानिति । केवलेऽभिन्ने आत्मन्नात्मनि विकल्प इति यदेतावान्सर्वोऽप्यात्मनो मनसः संमोहो भ्रमः । यतः स्वमात्मानमृते विना यस्य विकल्पस्यावलंब आश्रयो नास्ति । रजतभ्रमस्येव शुक्तिं विना । "नेह नाना

"अतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति" इति आचार्यश्रुतिशेषोज्ञेयः । यत् यः श्रोत्रस्य श्रोत्रं शब्दावभासकत्वशक्तिप्रदः, मनसो मनः मनने शक्तिप्रदः, वाचो वागिन्द्रियस्य वाक् शब्दोच्चारणशक्तिप्रदः, 'वाचम्' इति पाठेपि स एवार्थः, प्राणस्य प्राणः प्राणनशक्तिप्रदः, चक्षुषः चक्षुः दर्शनशक्तिप्रदः, स एव श्रोत्रादेर्नियन्ता देवस्त्वया पृष्ट इत्यन्वयः । धीरा धीमन्तः श्रोत्रादिप्रेरकत्वेन परमात्मानं जानंत एतस्माल्लोकाद्भौतिक दहात् प्रेत्योत्क्रमणं विधाय अतिमुच्य लिंगदेहञ्च हित्वा अमृता मुक्ता भवंतीत्यर्थः ॥ ३६ ॥ इंद्र आत्मा । मायाभिरिति बहुत्वं शक्त्यभिप्रायेण । पुरुरूपो बहुरूप ईयते वस्तुत एक एवेत्यर्थः । "युक्ता ह्यस्य हरयः शता दश" इत्येवेति । अस्यार्थः—अस्य परमात्मनः ह्रियन्त इति हरयो विभूतयः शता दश अनंता मायया ताश्च युक्ताः । 'अयं वै हरयोऽयं वै दश च सहस्राणि प्रयुतान्यर्बुदानि' इति वाक्यशेषादित्यर्थः ॥ * ॥ ननु भ्रम एव ब्रह्माख्यं शुद्धं तत्पदार्थमाश्रित्य द्वैतं कल्पयति, यथोक्तम्—"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला" इति, तर्हि कथं भ्रममयोपाधिकस्येश्वराख्यस्य ब्रह्मण एव तवानुग्रहेणान्यस्य भ्रमोपया त्विति कश्चिद्विप्रतिपद्यते तत्र किमुच्यते तत्राह—एतावानिति । विविधं कल्प्यते येन स विकल्पो भ्रमः, यतः स्वमात्मानं जीवमृते यस्य भ्रमस्य केवले इतरसंबन्धसंभावनारहिते ह्यालम्बो न विद्यते । तदुक्तं वैष्णवे—"ह्लादिनी संधिनी संवित्त्वय्येका सर्वसंस्थितौ । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिता ॥" इति । सर्वज्ञसूक्ते च—"ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः । स्वाविद्यासंवृतो जीवः सक्लेशस्तु निरीश्वरः" इति ॥ * ॥ **विश्वनाथस्तु**—ननु विश्वस्य पृथक् प्रत्यक्षत्वात्कथमद्वितीयत्वं तत्राह—एतावानिति । केवले एकस्मिन्नप्यात्मन् आत्मनि सति विकल्प इति यत् एतावानेव आत्मसंमोहः स्वीयसम्यगविवेकः । यस्यात्मसंमोहस्य स्वमात्मानमृते स्वीयं जीवात्मानं विनाऽवलम्बो नास्ति जीवात्मन एवाज्ञानेन द्वैतं पृथक् प्रतीतं तस्य द्वैतस्य परमात्मकार्यत्वेन परमात्मैक्यात् "नेह नानास्ति किञ्चन" इत्यादिश्रुतेः । पार्थक्यं नास्तीत्यर्थः ॥ * ॥ **दीपिका** तु—अद्वितीयत्वं ज्ञानिनां भेदस्फूर्तिराहित्यम् उपपादयितुमुपपत्त्य युक्त्या साधयितुं विकल्पो भेदः आश्रयो नास्तीति आत्मन एवाश्रयत्वविषयत्वे अभ्युपेते । यथोक्तम्—"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला" इति । इह ब्रह्मणि किञ्चन नानाभेदो नास्ति अपवादार्थं कल्पिताकारपरां श्रुतिमाह—इन्द्रः परमेश्वरः मायाभिः कल्पितोपाधिभिः पुरुरूपो देवनरादिबहुरूप ईयते, वस्तुत एकमेवाद्वैतमित्यर्थः । अस्येन्द्रस्य दशसंख्या इन्द्रियलक्षणा विषया हरणाद्धरयः प्राणिभेदात् शता शतसंख्याश्च युक्ताः संयुक्ता प्रेरिता जडत्वेन स्वतः प्रवृत्त्यसंभवात् अधीनाः संतीत्यर्थः । यथोक्तं शंकरशारीरके—"ये हि परविद्याधिकारे केचित्प्रपञ्चा उच्यन्ते यथा युक्ता ह्यस्य हरयः शता दश" इत्ययं वै हरयोयं वै दश च शतानि सहस्राणि बहूनि चानंतानि च इत्येवमादयस्ते भवंतु प्रविलयार्थास्तदेतद्ब्रह्मा पूर्वमनपरमनंतरमबाह्यमित्युपसंहारादिति । तट्टीका च रत्नप्रभा—अस्य जीवभावं प्राप्तस्येश्वरस्य दश हरयो विषया हरणाद्दशेन्द्रियाणि प्राणिभेदापेक्षया शतानि सहस्राणि च तेषामीश्वराद्भेदमाशंक्याह—अयमिति । ईश्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितम् ॥ व्यर्थेनाऽप्यर्थवादोऽयं द्वयं पंडितमानिनाम् ॥ ३७ ॥

स्ति किंचन" "इंद्रो मायाभिः पुरुरूप ईयते" "युक्ता ह्यस्य हरयः शता दश" इत्यादिश्रुतेरित्यर्थः ॥ ३६ ॥ केचित्तुनः प्रत्यक्षादिप्रतीतस्य प्रपंचस्य बाधायोगाद्वेदांतार्थानां च क्रत्वर्थकर्तृप्रतिपादनपरत्वेनार्थवादत्वाद्वैतं सत्यमिति मन्यंते । तन्मतमनूद्य दूषयति । यदिति । नामाकृतिभिर्ग्राह्यं नामरूपोपलक्षितं पंचवर्णं पंचभूतात्मकं द्वयम् द्वैतं यत्तदबाधितमिति पंडितमानिनामत्र वयमेव पंडिता इत्यभिमानवतां वेदांतेष्वयमर्थवाद इति प्रतीतिर्न तत्त्वविदाम् । यतो व्यर्थेनापि विनाऽप्यर्थेन सा प्रतीतिः । तथाहि

एव हरयः । इत्यर्थ इति—इत्थमेवाभिप्रेत्येयं श्रुतिः भेदस्यावास्तवत्वे उदाहृतेति ज्ञेयम् ॥ ३६ ॥ अथ मीमांसकमतं निराकरोति—केचिदिति । केचिन्मीमांसकाः । तन्मतमनूद्य प्रथमं वर्णयित्वा । अत्र जगति । वेदान्तेषूपनिषत्सु । आत्मा भेदप्रतिपादनं यत् । अयमिति पुंस्त्वं विधेयापेक्षम् । तत्त्वविदां ज्ञानिनां त्वात्माभेद एवाभिमतो न तु पण्डितमानिनां मूर्खाणां यतो हेतोः सा प्रतीतिर्व्यर्थेति । व्यर्थतामाह—तथाहीति । येषां वाक्यानां विधिवाक्यैनैकवाक्यता संभवति यथा—" अक्षय्यं ह वै चातुर्मास्ययाजिनां सुकृतम् " इत्यस्य चातुर्मास्ययागः प्रशस्तस्तेन यजेदिति विधिवाक्येनैक्यम् । एवं तेषां तत्त्वमस्यादिवाक्यानां न केनापि विधिवाक्येनैक्यमस्ति ततो नास्ति तेषामर्थवादत्वमिति । अन्यदाह—न चेति । न ह्यकर्तुरभोक्तुश्च परमानंदरूपस्य स्वर्गाद्यर्थं यागादौ प्रवृत्तिरुपपद्यते । स्वर्गाद्यानन्दस्य तदानन्दकोट्यंशेनापि तुल्यत्वाभावात् । प्रपञ्चासत्त्वमनुमानेन साधयति—न चेति । आदिना " नेह नानास्ति किञ्चन " इत्यादिग्रहः ॥ * ॥ दीपिका—केचिन्मीमांसकाः । बाधायोगान्मिथ्यात्वासंभवात् । वेदान्तार्थानाम् "तत्त्वमसि" "ब्रह्माहमस्मि" इत्यादिवेदान्तार्थानां क्रतुर्यज्ञस्तदंगभूतः कर्ता यजमानस्तत्प्रतिपादनपरत्वेन तच्छ्लाघापरत्वेनार्थवादत्वात् गुणवादरूपार्थवादत्वात्, यथादित्यो यूप इत्यत्र यूपस्यादित्यत्वं प्रत्यक्षबाधितं तदुज्ज्वलत्वयज्ञनिर्वाहकत्वादिगुणमादाय प्रशंसामात्रं यूपस्य क्रियते, तथा जीवस्यापीश्वरत्वं प्रत्यक्षबाधितं कर्मवशत्वात्, किन्तु—यज्ञादिज्ञातृत्वगुणमादाय तस्येश्वरत्वेन प्रशंसामात्रं क्रियत इत्यर्थः । तन्मतं मीमांसकमतम् । नाम ब्राह्मणादि, रूपं द्विपदत्वादि । अत्र द्वैतस्य सत्यत्वप्रतिपादने । अयं ब्रह्मात्मवादः । अर्थवादः यजमानस्तुतिमात्रं तादृशप्रतीतिः । पंडितमानिप्रतियोगित्वे हेतुमाह—यत इति । विनाप्यर्थेन विध्येकवाक्यत्वप्रयोजनासंभवादित्यर्थः । तथाहि—वेदान्तार्थानामर्थवादत्वप्रतीतेर्व्यर्थत्वं दर्शयति—न तावदिति । यथा—"वायुर्वै क्षेपिष्ठा देवता वायुरेवैनं भूतिं गमयति" इत्याद्यर्थवादानां यतो वायुः प्रशस्तोऽतः " वायव्यं श्वेतमालभेत " इत्यनेन प्रकारेण विध्येकवाक्यत्वं न तथा वेदान्तवाक्यानां विध्येकवाक्यत्वं संभवति तादृशविध्यभावात् । यतो विध्येकवाक्यत्वादर्थवादत्वं स्यात्संगच्छेतेति तथा प्रतीतेर्व्यर्थत्वं दर्शितम् । न चाग्नेयोऽष्टाकपालो भवतीत्यत्रेव विधिः कल्प्यः परमानंदप्रतिपादनस्य तुच्छकर्मविध्यंगत्वानौचित्यादित्याह—न चेति । बाधितत्वान्मिथ्यात्वात् ॥ * ॥ अत्र संदर्भः—ननु यदि स्वरूपे आरोपितं स्यात्तदैवेश्वरानुग्रहेण तज्ज्ञाने सति तत्र मिथ्या ज्ञायते न त्वेवं किन्तु तण्डुलपाकवत्संयुक्तमेव । ततः कथं ज्ञानमात्रेणापगच्छेदित्येक आक्षिपन्ति, तथा जीवेनाज्ञानारोपितत्वेऽपि वणिग्वीथिस्थरजतवद्वैतं नाम वस्तु पृथग्नास्ति किन्त्वनादितएव । पूर्वपूर्वभ्रम उत्तरत्रारोप्यते तदा को वा तस्यानुग्रह इत्यन्ये चाक्षिपन्तीत्याशंक्याह—यन्नामेति । यन्नामाकृतिभिर्ग्राह्यं पञ्चभूतात्मकरूपमबाधितं नास्तीति भावनया बाधितमशक्यं ग्राहकादित्वेन संयोगस्यैव सिद्धिरिति मन्यन्ते । यच्च व्यर्थेन पदार्थं विनाप्यर्थस्य वादमात्रं मन्यन्ते द्वयमप्येतत्पंडितमानिनामेव न तु पण्डितानाम् । पूर्वत्र ग्राहकग्राह्ययोरपि रूपयोश्च चिज्जडयोस्तेजस्तिमिरयोरिव संयोगासंभवादज्ञानेनैव तत्प्रतीतिरिति । अथोत्तरत्र न ह्यत्यन्तासन् षष्ठभूतादिः कुत्राप्यारोपितो दृश्यते, समुच्छ्रितकर्णे शशे शृंगमिवेति भावः ॥ * ॥ विश्वनाथस्तु—तस्मात्कार्यकारणवस्त्वैक्यदर्शनं पटतन्तुवदिति न्यायेन कार्यस्य पृथक्त्वं बाधितमेव तदप्यबाधितमिति ये मन्यन्ते ते पंडितमानिन एव न तु पण्डिता इत्याह—यत् नामभिराकृतिभी रूपैश्च सहितमिन्द्रियैर्ग्राह्यं च पञ्चवर्णं पञ्चभूतात्मकं तत् द्वयं द्वैतमबाधितमेवेति पण्डितमानिनामेव मतं न तु पण्डिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगिनोऽपक्कयोगस्य युंजतः काय उत्थितैः ॥ उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ॥ ३८ ॥ योगधारणया कांश्चिदासनैर्धारणान्वितैः ॥ तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत् ॥ ३९ ॥ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः ॥ योगेश्वरानुवृत्त्या वा हन्यादशुभदाञ्छनैः ॥ ४० ॥ केचिदेहमिमं धीराः सुकल्पं वयसि स्थिरम् ॥ विधाय विविधोपायैरथ युंजंति सिद्धये ॥४१ ॥ न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः ॥ अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ॥ ४२ ॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् ॥ तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः ॥ ४३ ॥

न तावद्विध्येकवाक्यत्वं तेषामस्ति यतोऽर्थवादत्वं स्यात् । न चाकर्तृभोक्तृपरमानंदरूपात्मप्रतिपादनं कर्मविशेषतां भजते । न चाबाधितत्वं द्वैतस्य नामरूपात्मकत्वात् ग्राह्यत्वात् पंचवर्णात्मकत्वात् स्वप्नवदित्याद्यनुमानैर्वाचारम्भणादिश्रुतिभिश्च बाधितत्वादिति ॥ ३७ ॥ तदेवं ज्ञानयोगं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह योगिन इति त्रिभिः । योगं युंजतः कायो यद्यंतरेवोत्पन्नैरुपसर्गै रोगाद्युपद्रवैरभिभूयेत । तत्रायं विधिः प्रतीकारः ॥ ३८ ॥ योगधारणया सोमसूर्यादिधारणया कांश्चित् संतापशैत्यादीन् । आसनैर्वायुधारणान्वितैर्वातादिरोगान् तपोमंत्रौषधैः पापग्रहसर्पादिकृतान्॥ ३९ ॥ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन् हन्यात्॥ ४० ॥ अन्ये तु देहसिद्ध्यर्थमेवैतत्सर्वं कुर्वंति तद्दूषयति केचित्पुनरेतैरन्यैश्चोपायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं च कृत्वा अद्वंद्वपरकायप्रवेशादिसिद्धये तत्तद्धारणारूपं योगं युंजंति न तु ज्ञाननिष्ठारूपम् ॥ ४१ ॥ कुशलैः प्राज्ञैरादरणीयं न भवति । वनस्पतिवदात्मैव स्थायी शरीरं न फलवन्नश्वरमित्यर्थः ॥ ४२ ॥ ननु क्वचित्समाध्यंगत्वेनापि प्राणायामादियोगे क्रियमाणे जरारोगाद्यभावो दृश्यते सत्यम्, तथापि समाधिमुत्सृज्य न तत्र सज्जेतेत्याह । योगमिति । तत् तां देहसिद्धिं न श्रद्दध्यान्न

नाम् । यतो व्यर्थेन विनाप्यर्थेन अर्थ इति वादोयं न ह्याद्यंतवानर्थः सत्यो भवेत् " प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा । आद्यन्तवदसज्ज्ञात्वा निःसंगो विचरेदिह ॥ " इति मदुक्तेः ॥ ३७ ॥ तन्निष्ठस्य ज्ञाननिष्ठस्य । अंतरा मध्ये । तत्रोपसर्गेषु । " उपसर्गः पुमान्रोगभेदोपप्लवयोरपि " इति मेदिनी । प्रतीकारो निवृत्त्युपायः ॥ * ॥ **दीपिका**—परिकरोऽत्र बाधकस्य निरासः साधकस्य कथनम् । तन्निष्ठस्य ज्ञानयोगस्थितस्य । अंतरा ज्ञाननिर्वाहमध्य एव । तत्र तेषूपसर्गेषु । प्रतीकारो दूरीकरणोपायः ॥ ३८ ॥ आदिना तयोर्वैषम्यग्रहः । आसनैस्स्वस्तिकाद्यासनैः । आदिना पित्तश्लेष्मग्रहः । आदिना वृश्चिकादिग्रहः ॥ * ॥ **दीपिका**—सोमसूर्यादीत्यादिनाऽग्न्यादिधारणादिग्रहः । संतापशैत्यादीनीत्यादिना वनाग्न्यादीनां स्तंभनग्रहः । तदुक्तम् "अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः" इति ॥ ३९ ॥ आदिना श्रवणग्रहः। कामादीत्यादिना क्रोधादिग्रहः। आदिना नैष्ठुर्यादिग्रहः ॥*॥ योगेश्वरा हरिभक्तास्तेषामनुवृत्त्या सेवया तदनुगमनेन वा ॥४०॥ मतान्तरमाह—अन्ये त्विति । केचित्प्राकृताः । अथ कायकल्पोत्तरम् ॥*॥ अन्ये सकामा एतत्सोमसूर्यादिधारणं तद्देहसिद्धिप्रयोजनं दूषयति, द्वाभ्यामिति शेषः ॥ ४१ ॥ तन्मतं निराकरोति । तदायासः शरीररक्षणायासः । अपार्थकोऽसत्यः । हेतुमाह—अन्तेत्यादि । दृष्टान्तमाह—फलस्येति । इत्यर्थ इति—महता यत्नेनापि रक्षितं फलवत् कालान्तरे गलनादिना नश्यत्येवेति भावः ॥*॥ मूले तदिति देहसिद्धिकरणम्॥४२॥उक्तमर्थमाक्षिप्य समाधत्ते—नन्विति । यद्यपि दृश्यते तथापीति । तत्र कायकल्पे न विश्वसेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगचर्यामिमां योगी विचरन्मद्व्यपाश्रयः ॥ नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ॥४४॥ इति श्रीमद्भा० म० एकादशस्कंधे भगवदुद्धवसंवादे ज्ञानयोगनिरूपणं नामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ उद्धव उवाच ॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः ॥ यथांजसा पुमान्सिद्ध्येत्तन्मे ब्रूह्यं जसाऽच्युत ॥ १ ॥ प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः ॥ विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः ॥ २ ॥ अथात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन ॥ सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययाऽमी विहता न मानिनः ॥ ३ ॥

विश्वसेत् ॥ ४३॥ तदेवं विघ्नप्रतीकारैर्योगं कुर्यादित्युक्तं मच्छरणस्य तु न विघ्नशंकाऽपीत्याह । योगचर्यामिति । विचरन्नाचरन्स्वसुखे अनुभूरनुभूतिर्यस्य सः । स्पृहामूला हि विघ्नाः सा च मदपाश्रयस्य निवर्ततेऽतोंतरायैरविहतः स्वानंदपूर्णो भवतीति ॥ ४४ ॥ समाहृत्य स्वयोगं तु समस्तोपनिषद्रसम् ॥ सख्ये मुख्यतमां भक्तिं मुक्तौ पुनरुपादिशत् ॥ १ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायामष्टाविंशतितमोऽध्यायः ॥ २८ ॥ ऊनत्रिंशे तु यः पूर्वं विस्तरेण निरूपितः ॥ भक्तियोगस्तमेवाह स्वभक्ताय समासतः ॥ १ ॥ अतिक्लेशमिवालक्ष्य योगे संगैकसंपदि ॥ सुखोपायं पुनः कृष्णमुद्धवः परिपृच्छति ॥ २ ॥ अनात्मनोऽवशीकृतमनसः अंजसा अप्रयासतो यथा सिध्येत्तत्तथा अंजसा सुबोधं यथा तथा मे ब्रूहि ॥ १ ॥ सुदुष्करतां प्रपंचयति । प्रायश इति । मनो युंजंतो निगृह्णन्तो विषीदंति क्लिश्यंति । कुतः । असमाधानादनिग्रहात् । कथंचिन्मनसो निग्रहे च कर्शिताः श्रांताः संतः ॥ २ ॥ यस्मादेवं केवलं विषीदंति अथातः अत एव ये हंसाः सारासारविवेकचतुरास्ते त्वानंददुघं समस्तानन्दपरि

सर्वथा देहस्य विनाशित्वात् ॥ * ॥ तत्र देहसिद्धौ । कल्पतां जरारोगादिराहित्यम् ॥ ४३ ॥ मद्भक्तानां तु योगे विघ्नाशंकैव नेत्याह—तदेवमित्यादिना । इमामुक्तलक्षणाम् (४४) सर्वोपनिषत्सारैः स्वयोगं ज्ञानयोगं समाहृत्य संक्षेपेणोक्त्वा । सख्ये उद्धवाय । मुख्यतमां ज्ञानस्य तदवांतरव्यापारत्वेन सर्वथा प्रधानाम् । मुक्तौ तन्निमित्तम् ॥*॥ मच्छरणस्य मद्भक्त्येकबलस्य । सा च स्पृहा । अतः स्पृहाराहित्यात् । समाहृत्य संक्षिप्तं वर्णयित्वा ॥४४॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धेऽष्टाविंशोऽध्यायः ॥ २८ ॥ तमेव पूर्वोक्तमेव (१) । असंगो वैराग्यमेवैका मुख्या संपत्संपादिका यस्य तस्मिन् ज्ञानयोगे । इवेति वस्तुतः क्लेशभावमाह (२) । सुदुष्करामतिशयेन कर्तुमशक्याम् । सिध्येत् मोक्षं प्राप्नुयात् । भक्तमनोरथसेचनेन साधकस्त्वमसीति सम्बुद्ध्यभिप्रायः॥*॥ **संदर्भः**—ज्ञानयोगचर्यामंशतोऽप्यनंगीकुर्वता परमैकान्तिना श्रीमदुद्धवेन सुदुष्करामिमामित्यादिपद्यद्वये स्ववाक्ये तस्या दुष्करत्वेन फलपर्यवसायित्वाभावेन चोक्तत्वाच्छुश्रूष्यमाणाया भक्तेस्तु सुकरत्वेन फलपर्यवसायित्वेन चाभिप्रेतत्वाद्भक्तिरेव कर्तव्येति स्वाभिप्रायो दर्शितः॥*॥**विश्वनाथस्तु**—"कृष्णो यत्सुदृढं ज्ञानं यत्नादुपदिदेश तत् । नाग्रहीदुद्धवस्त्वेतज्ज्ञापकं श्लोकपंचकम् ॥ " । अनात्मनो देहाध्यासरहितस्य योगिनो योगचर्या उक्ता इमामन्यैः सुदुष्करां मन्ये अंजसा शीघ्रं यथा सिध्येत्तथा त्वं कथय । शीघ्रमंजसेत्यस्य क्रियाभेदादपौनरुक्त्यम् । हे अच्युत अच्युतस्य तव भक्तिरेवाच्युता सति वैगुण्ये ध्वंसरहितत्वात् । तदुक्तम्—" स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् " इति त्वयैवेति ॥ १ ॥ ० ॥ * ॥ युंजंतो ब्रह्मणि मनो निवेशयन्तः । हे पुंडरीकाक्षेति संबुद्धिर्व्याख्यातचर्यापि पुनर्हे प्रफुल्लाक्ष मामपि संशयनिराकरणेन प्रफुल्लाक्षं कुर्विति भावः । प्रायश इति—भक्तिप्रधानतया न क्लिश्यन्तीति भावः ॥ २ ॥ अथात इति हेत्ववधारणे । के ये इत्यादिपदाध्याहारे गौरवं मत्वाह—यद्वेति । अमी त्वत्पदाम्बुजाश्रयाः । अत एव माययाऽविहतत्वादेव । इत्यर्थ इति—' अभिमानं सुरापानम् ' इत्युक्तेरभिमानस्य सुरापानतुल्यत्वेन नरकप्रदत्वादभिमानवतां मोक्षो न भवतीति भावः । अरविंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वम् ॥ योऽरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥ ४ ॥

पूरकं तव पदांबुजमेव सुखं यथा भवति तथा तु निश्चितं श्रयेरन् सेवंते । अमी तु त्वन्मायया विहिताः । के । ये योगकर्मभिर्मानिनः संतो न श्रयंते । यद्वा अमी त्वद्भक्ता स्त्वन्मायया न विहिता अत एव योगकर्मभिः कृत्वा मानिनो न भवंति । अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञा वयं कर्मकुशला इति केवलं गर्विता भवंति न तु मुच्यंत इत्यर्थः ॥ ३ ॥ त्वद्भक्तास्तु त्वत्प्रसादेन कृतार्था भवंतीति नातिचित्रमित्याह । किमिति । अनन्यशरणेषु दासेषु तवात्मसात्त्वं त्वदधीनत्वं यद्यथा नंदगोपीबलिप्रभृतिष्वेतत्किं चित्रं नाश्चर्यमित्यर्थः । यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः सह साहित्यं सख्यमिति यावत् । अरोचयत् प्रीत्या कृतवान् । कथंभूतः । ईश्वराणां ब्रह्मा

लोचनत्वेन सुखसेव्यत्वं, विश्वेश्वरत्वेनाभीष्टपूरकत्वं चोक्तम् ॥ * ॥ तदेवं तां ज्ञानयोगचर्यामनादृत्य भक्तिमेवांगीकुर्वाणास्तत्र श्रीकृष्णस्यैव भक्तिं तादृशस्तु ज्ञानयोगादिफलानादरेणैव कुर्वंतीत्याह चतुर्भिः । अथेति तैः । पादाम्बुजस्य संबंधिपदानुक्तिः साक्षाद्दृश्यमानतदीयपादाम्बुजाभिव्यंजनार्था । अमी च शुद्धभक्ता योगकर्मभिस्त्वन्मायया च विहताः कृतभक्त्यनुष्ठानांतराया न भवन्ति यतो न च मानिनस्ते मानिनोऽपि न भवन्ति पुरुषार्थसाधने भगवतो निरुपाधिदीनजनकृपाया एव साधकतमत्वं मन्यन्ते न तु योगिप्रभृतिवत्स्वप्रयत्नस्येत्यर्थः ॥ * ॥ **विश्वनाथस्तु**—सुखमिति क्रियाविशेषणम् । यत्तु वयं योगिनो वयं ज्ञानिनो वयं कर्मिण इत्यभिमानवन्तो ये ते त्वन्मायया विहता नाश्रयेरन् अत एव विषीदन्ति ॥ * ॥ **दीपिका** तु—पूर्वार्थे नकारस्यास्थानपतितत्वं श्रूयेरन्नित्यावृत्तिगौरवं, तुकाराध्याहारः, भक्तानामनुत्कर्षकथनञ्चेत्यरुचेः—यद्वेति । अत एव मायया विहतत्वादेव । अन्ये त्वद्भक्ता इत्यार्थिकार्थतया व्याख्यानादित्यर्थ इत्युक्तम् । हे अरविंदलोचनेति—कस्त्वां भक्तजनकृपाकारिनेत्रमतिसुंदरमूर्तिं विहायामूर्तमगोचरं बुद्धिमान्सेवितुमिच्छेदिति भावः ॥ ३ ॥ इत्यर्थ इति—अशेषबन्धुत्वान्नाश्चर्यं भक्ताभिमतपूरणमिति भावः । वानराणां शाखामृगत्वात्तत्रापि मृगपदप्रयोगो नायुक्त इत्यभिप्रायेणाह—मृगैर्वानरैरिति । सहपदेन लक्षितलक्षणया सख्यं बोध्यते द्विरेफमधुपवत् । अव्ययत्वाद्विभक्तिलोपः । तथाभूतोऽपीश्वरेश्वरोऽपि । भक्तवत्सलत्वात्तव न किञ्चिदकार्यमिति भावः ॥ * ॥ **दीपिका**—अनन्यशरणेषु योगज्ञानकर्माद्याश्रयांतररहितेषु । रामरूपेणेत्यत्र साक्षाद्रूपेणापि वृन्दावनचारिभिर्वानरैः सख्यं व्याख्येयम्, "एवं विहारैः कौमारैः—मर्कटोत्प्लवनादिभिः" इत्युक्तेः । तस्माद्भक्तेरेव मुख्यत्वं प्रतिभातीति तामेव ब्रूहीति भावः ॥ * ॥ **संदर्भस्तु**—एवभूतस्य च भक्तस्य भक्तेर्यत्फलं तन्मात्रं च महदेवेत्याह—किमिति । हे अशेषबंधो अशेषाणाम् असुरपर्यन्तानां यो बन्धुः मोक्षादिदानैर्निरुपाधिहितकारी हे तथाभूत तवैतत्किं चित्रं यदनन्यशरणेषु ज्ञानयोगकर्माप्यनुष्ठानविमुखेषु शुद्धभक्तेषु बलिप्रभृतिषु आत्मसात्त्वं तेषां य आत्मा तदधीनत्वमित्यर्थः । 'न साधयति मां योगः' इत्यादौ 'यथा भक्तिर्ममोर्जिता' इत्यादेः । यस्य तत्र तथाभूतेषु न जातिगुणाद्यपेक्षा चेत्यन्तरंगलीलायामपि दृश्यत इत्याह—य इति । सहेति सहभावः सख्यमित्यर्थः । मृगैर्वृन्दावनचारिभिः । स्वयं तु कथंभूतोऽपि ईश्वराणामित्यादिलक्षणोऽपि । ज्ञानयोगादिपरमफलरूपापि या भक्तिस्तां दैत्येभ्यो ददासि पांडवादिषु सौत्यदौत्यवीरासनादिस्थितिवद्दासानां तु स्वयमधीनो भवसि । अत एवंभूतस्य श्रीकृष्णरूपस्यैव तव भक्तिर्मुख्येति भावः ॥ * ॥ **विश्वनाथस्तु**—त्वां केवलं भजन्तस्तु त्वद्वात्सल्यपात्रीभवंतीति न चित्रमित्याह—किमिति । अनन्यशरणेष्विति पूर्ववत् । राज्ञा स्वपुरं विप्रसात्कृतं विप्राधीनं कृतमितिवद्दासैस्त्वमात्मसात्कृत इति तवात्मसात्त्वमात्मसात्कृतत्वमित्यर्थः । तदेवाह—यो भवान् श्रीरामरूपेण मृगैः सख्यमरोचयत्स्वस्मै रोचितमकरोत् । यद्वा—मृगैर्वृन्दावनीयमृगैर्गाश्चारयन्नरोचयत् । तथा मृगैर्वानरैश्च साहित्यं नवनीतं चोरयन्नरोचयत् । तेन त्वदुक्तलक्षणामिमं ज्ञानयोगं किं तैरभ्यस्तं जानीमः, यस्तेषां त्वमधीन एव वर्तसे कथं वाऽद्वैतवादिनां ज्ञानिनां त्वं न कस्याप्यधीनः क्वापि श्रुतोऽतो दासा वयं न ज्ञानयोगमिमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं त्वाऽखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु॥ को वा भजेत्किमपि विस्मृतयेनुभूत्यै किं वा भवेन्न तव पादरजोजुषां नः ॥९॥

दीनां यानि श्रीमंति किरीटानि तेषां तटान्यग्राणि तैः पीडितं विलुठितं पादपीठं यस्य स्वयं तथाभूतोऽपि सन् ॥ ४ ॥ अतस्त्वां परित्यज्य को नामान्यत्संश्रयेदित्याह। तं त्वेति। तमेवंभूतं त्वां को नु विसृजेन्न भजेत्। कथंभूतः। स्वकृतवित् बलिप्रह्लादादिषु त्वया कृतमनुग्रहं जानन्। यद्वा स्वस्मिन्नेवांतर्यामितया कृतमुपकारं विद्वान्। तदेवाह। अखिलात्मदयितेश्वरम् अखिलस्य जगतः आत्मानं चेतयितारमात्मत्वादेव दयितं प्रेष्ठं सुसेव्यमीश्वरत्वादवश्यं भजनीयम्। किंच आश्रितानां सर्वार्थदम्। तर्हि किं फलोद्देशेनाहं सेव्यः नहिनहि। किमप्यनिरुक्तं त्वद्व्यतिरिक्तं स्वर्गादि त्वया दत्तमपि को वा भजेत्सेवेत। कथंभूतं तत्। यत्केवलं भूत्यै इंद्रियभोगाय। अनु अनंतरमेव त्वद्विस्मृतये भवति। यद्वा त्वद्व्यतिरिक्तं किमपि देवतांतरं धर्मज्ञानादिसाधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को भजेन्न कोऽपि। ननु तत्तत्साधनं विना

स्वीकुर्म इति व्यञ्जितम्। पीडितं संघट्टविलुलितम् ॥ ४ ॥ यतस्त्वं दीनदयालुरतो हेतोः। अन्यत् देवादि। एवंभूतं भक्तवत्सलम्। यद्यपि स्वशब्देन लक्षितलक्षणया भगवद्ग्रहणं भवति तथापि प्रसिद्धार्थमाह—यद्वेति। उपकारं सर्वविषयावबोधसामर्थ्यरूपम्। तदेव स्वकृतमेव। चेतयितारं ज्ञानदम्। न केवलमीश्वरत्वेनैव सेव्यमित्याह—किंचेति। सकामसेव्यत्वमाशंक्य समाधत्ते—तर्हीत्यादि। न कोऽपीति देवभजनप्रस्तुते स्वर्गादीनां भजनीयत्वकथनमयुक्तमिव मत्वाह—यद्वेति। देवतान्तराभजने साधनाभावे च कथं धर्मादिप्राप्तिः स्यादित्याशंकते—नन्विति। तत्तत्साधनं धर्मादिपृथक्साधनं किं वा न भवेदपि तु सर्वमेव भवेदित्यर्थः। साधनसम्पत्तिं विना साध्यप्राप्तौ प्रमाणमाह—तदुक्तमिति। "तया साधनसम्पत्त्या तत्पुरुषार्थचतुष्टयम्" इति वैष्णवे ॥ * ॥ **दीपिका**—अतो भक्तानामात्मसात्करणात्। अन्यत् स्वर्गादिकं धर्मज्ञानादिसाधनं च। पूर्वार्थे स्वेषु स्वीयेषु त्वदीयेषु बल्यादिषु इति व्याख्याने स्वशब्देन वाक्ये यः कर्ता तस्यैव परामर्शकत्वमिति नियमव्याघाताद्—यद्वेति। तदेवोपकारित्वमेव। यदि सर्वार्थदोऽसि तर्हि अनिरुक्तं सदसद्भ्यामनिर्वचनीयम् 'अविस्मितं तं परिपूर्णकामम्' इत्यादौ देवतान्तरभजनादेरेकान्तिनां निषिद्धत्वादर्थान्तरमाह—यद्वेति। तया साधनसंपत्त्या ॥ * ॥ **सन्दर्भस्तु**—फलितमाह—तमिति। तमेवंभूतं त्वां स्वकृतवित् "प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्" इत्यादिश्रीकपिलदेवोपदेशतः स्वसौन्दर्यादिस्फूर्तिलक्षणं स्वस्मिन्कृतं त्वदीयोपकारं यो वेत्ति स कोऽनु विसृजेत् "तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते" इति तदुपदिष्टाधिकारिविशेषवत् परित्यजेत्, न कोऽपीत्यर्थः। तस्माद्यस्त्यजति स कृतघ्न एवेति भावः। कथंभूतं त्वां—स्वरूपत एवाखिलानामात्मनां दयितं प्राणकोटिप्रेष्ठमीश्वरं चेत्यादि। तथा नु वितर्के। तद्व्यतिरिक्तं किमपि देवतान्तरं धर्मज्ञानादिसाधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये इत्यादिटीका च समा। अस्माकं तु तत्तत्फलमपि तद्भक्तेरेवान्तर्भूतमित्याह—किं वेति। वाशब्देन तत्राप्यनादरः सूचितः। तदुक्तम्—'यत्कर्मभिर्यत्तपसा' इत्यादि ॥ * ॥ **विश्वनाथस्तु**—त्वा त्वामखिलात्मनां सर्वजीवानां नारदादिरूपेण भक्त्युपदेष्टृत्वाद्दयितं प्रति स्वकर्मफलप्रदत्वादीश्वरं स्वाश्रितानां तु सर्वपुरुषार्थप्रदम्। स्वकृतेति तैः। केवलमरसज्ञो निकृष्टयोगिजन एव कृतघ्नो विसृजेत्। किञ्च—भजन्नपि को वा मुक्तिकामो भजेदित्याह—को वेति। विस्मृतये त्वद्विस्मृतिरूपाय राज्याद्यर्थं तथानुभूत्यै केवलानुभवाय मोक्षार्थं वा को भजेन्न कोऽपि। किमपीति क्रियाविशेषणम्। किञ्चनापि भजनं कः कुर्यादित्यर्थः। ननु तर्हि निष्कामाणामपि प्रह्लादादीनां भुक्तिमुक्ती कथं दृश्येते तत्राह—किञ्चेति। तथा चोक्तं मोक्षधर्मे नारायणीये—'या वै साधनसंपत्तिः' इत्यादि। भोगमोक्षादिकमानुषंगिकं फलं भक्तानभीप्सितमपि त्वया दीयत एवेति भावः ॥ ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः ॥ योंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ॥ ६ ॥
श्रीशुक उवाच ॥ इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ॥ गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः ॥ ७ ॥

भोगमोक्षादिफलं कथं स्यात्तत्राह । किंवेति । तदुक्तम् । "या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये ॥ तया विना तदाप्नोति नरो नारायणाश्रयः" इति ॥ ५ ॥ आस्तामन्यभजनवार्ता त्वत्कृतोपकारस्य त्वय्यात्मनि वेदनेनैव निष्कृतिर्नान्यथेत्याह । नैवेति । अपचितिं प्रत्युपकारमानृण्यमिति यावत् । कवयो ब्रह्मविदोऽपि नैव प्राप्नुवंति । यतः तत्कृतमुपकारं स्मरंत ऋद्धमुदः उपाचितपरमानन्दाः । उपकारमेवाह । यो भवान् बहिराचार्यवपुषा गुरुरूपेणांतश्च चैत्यवपुषांतर्यामिरूपेणाशुभं विषयवासनां विधुन्वान्निरस्यन्स्वगतिं निजं रूपं प्रकटयति तस्य तव ॥ ६ ॥ ईश्वरेश्वरत्वे हेतुः । जगत्क्रीडनकं क्रीडोपकरणं यस्य सः । ननु जगत्सृष्ट्यादिना ब्रह्मेशादयः क्रीडंति तत्राह । स्वशक्तिभिः सत्त्वादिभिर्गृहीतं

अनिमित्तबन्धुत्वं भगवत आह—आस्तामिति । चित्ते स्थितश्चैत्यः । स्वगतिं स्वरूपतयैव नित्यसिद्धाम् ॥ * ॥ **दीपिका**—निष्कृतिमानृण्यम् । यावदिति—नातः परं पदार्थविवरणमित्यर्थः, एवं सर्वत्र । विषयवासनां त्वद्भक्तिप्रतियोगिनीम् निजं रूपं स्वस्वरूपाऽनुभवम् ॥ * ॥ अत्र **संदर्भः**—ननु कथं तत्तत्फलमपि विसृजति न तु मां किं वा मम कृतं तत्राह—नैवेति । हे ईश कवयः सर्वज्ञा ब्रह्मतुल्यायुषोऽपि तत्कालपर्यन्तं भजन्तोऽपीत्यर्थः । तव कृतमुपकारमृद्धमुद उपचितभक्तिपरमानंदाः सन्तः स्मरन्तः अपचितिं न पश्यन्ति तस्मान्न विसृजेदित्युक्तम् । कृतमाह—यो भवान् तनुभृतां त्वत्कृपाभाजनत्वेन केषांचित्सफलतनुधारिणां बहिराचार्यवपुषा अंतश्चैतन्यवपुषा चित्तस्फूर्तिध्येयाकारेण अशुभं त्वद्भक्तिप्रतियोगि सर्वं विधुन्वन् स्वगतिं स्वानुभवं व्यनक्तीति ॥ * ॥ **विश्वनाथस्तु**—ननु मां भजद्भ्य एव जनेभ्यो वाञ्छितसमस्तपुरुषार्थप्रदत्वान्मम तत्तद्दानं न निरुपाधिकम् । किन्तु सोपाधिकमेवेति चेन्मैवम्, तच्च तैः क्रियमाणं त्वद्भजनमपि त्वद्दत्तमेवेत्यतो निरुपाधिपरमहितकारिणस्तव सहस्रमहाकल्पमभिव्याप्यापि परिचर्याया जना नैव निर्ऋणीभवितुं शक्नुवन्तीत्याह—नैवेति । अपचितिरिति तैः । आचार्यो मन्त्रोपदेष्टा भक्तिमार्गोपदेष्टा च स्वमन्त्रस्वभक्त्युपदेशेनानुगृह्णन् । अन्तश्चान्तर्यामिरूपेण " ददामि बुद्धियोगं तं येन मामुपयांति ते " इति त्वदुक्तेः । स्वप्रापकबुद्धिवृत्तीः प्रेर्य स्वभजनं कारयन् स्वगतिं प्रेमवत्पार्षदत्वलक्षणां गतिं व्यनक्ति ददातीत्यर्थः ॥ ६ ॥ ईश्वरास्तु ब्रह्मादयो जगत्क्रीडनकाः संतीत्याशंकते—नन्विति । ईश्वराणां ब्रह्मादीनामपीश्वरः सर्वेश्वरः " एष सर्वेश्वरः " इति श्रुतेः । मनोहरत्वेनैव गतार्थत्वात्सप्रेमेत्याधिकं स्मितस्येत्याह—सप्रेम यथेति ॥ * ॥ ईश्वरस्य प्रकृतिप्रवर्तकस्य महापुरुषस्यापीश्वर इति स्वयं भगवत्त्वं व्यंजितमिति **दीपिका** ॥ * ॥ **संदर्भः**—ईश्वरेश्वरत्वेन निरपेक्षोऽपि तं प्रति सप्रेमेति । सप्रेमेत्यादिरूपो जगाद । तत्रेश्वरेश्वरत्वं त्रिधा यथाक्रमं श्रैष्ठ्येनाह—जगदिति । ततस्तच्चच्छक्तिभिर्निजांशावेशविभूतिमिताभिरिति कनिष्ठेन प्रकटितमूर्तित्रय इति मध्यमेन ईश्वरस्य प्रकृतिप्रवर्त्तकस्य महापुरुषस्यापीश्वर इत्युत्तमेनेति ज्ञेयम् ॥ * ॥ **विश्वनाथस्तु**—स्वशक्तिभिरंतरंगातटस्थाबहिरंगाभिः । अंतर्यामिरूपेण जीवरूपेण देहरूपेण जगदेव क्रीडनं क्रीडासाधनं यस्य सः । तेनांतर्यामिरूपेणोद्धवं तथा प्रेरयामास यथा भाविकलियुगवर्तिभक्तजनानन्दहेतुमेव स प्रपच्छेति भावः । क्रीडनमपि तस्य स्वभक्तिरसवितरणमयमेवेत्याह—गृहीतेति । उद्धवरूपेण प्रश्नकर्ता श्रीकृष्णरूपेणोत्तरकर्ता देशकालांतरवर्तिशुकपरीक्षिदादिभक्तरूपेण प्रश्नोत्तरामृतसंप्रदानं चेति मूर्तित्रयं गृहीतं येन सः । ईदृशं कृपाचातुर्यं नान्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ हंत ते कथयिष्यामि मम धर्मान्सुमंगलान् ॥ यान्श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्जयम् ॥ ८ ॥ कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ॥ मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ॥ ९ ॥ देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥ १० ॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ॥ कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥ ११ ॥ मामेव सर्वभूतेषु बहिरंतरपावृतम् ॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १२ ॥

मूर्तित्रयं येन सः । सप्रेम प्रेमसहितं मनोहरं स्मितं यस्य सः । सप्रेम यथा तथा जगादेति वा ॥ ७ ॥ हंतेति सहर्षं सम्बोधनम् । सुमंगलान्सुखरूपान् । मृत्युं संसारम् । दुर्जयमन्यैरुपायैः ॥ ८॥ धर्मानेवाह कुर्यादिति त्रयोदशभिः । मां स्मरन् शनकैरसंरंभतः कुर्यात् । तदाह । मयीति । मय्यर्पिते मनश्चित्ते संकल्पविकल्पानुसंधानात्मके येन अत एव मद्धर्मेष्वेवात्ममनसो रतिर्यस्य सः ॥९॥ पुण्यदेशलक्षणं मद्भक्तैरिति । देवादिषु ये मद्भक्ता नारदप्रह्लादादयस्तेषामाचरितानि कर्माणि चाश्रयेत ॥१०॥ सत्रेण संभूय वा ॥११॥ अन्तरंगां भक्तिमाह मामिति त्रिभिः । सर्वभूतेष्वात्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत । ननु कथमेकस्य सर्वेषु वृत्तिस्तत्राह । बहिरंतः पूर्णमित्यर्थः । तत्कुतः । संभवेदित्याह—ईश्वराणामपीश्वरः । सप्रेम प्रेमसहितं मनोहरं स्मितं यस्य सः ॥ ७ ॥ यद्यप्यत्र सम्बोधनपदं नास्ति तथापि हन्तेत्युक्त्या तदत्र हे प्रियोद्धवेति ज्ञेयम् ॥ * ॥ हंतेति हर्षेऽनुकम्पायां वा । मम धर्मान् भक्तिज्ञानलक्षणान् सुकरत्वेन प्रदर्श्यमानत्वात्सुमंगलान् ॥ ८ ॥ सर्वाणि नित्यनैमित्तिकानि । असंरंभतः वेगाभावेन । तत् स्मरणम् । अत एव मदर्पितमनश्चित्तत्वादेव । मद्धर्मेषु भागवतधर्मेषु । रतिः प्रीतिः ॥ * ॥ तत्र केवलां प्रधानीभूताञ्च भक्तिं तंत्रेणैवोपदिशति—कुर्यादिति । तत्र प्रथमे पक्षे—सर्वाणि व्यावहारिकाणि कर्माणि दंतधावनादीनि पारमार्थिकानि श्रवणकीर्तनादीनि च । द्वितीयपक्षे—कर्माणि वर्णाश्रमविहितान्यपीति शेषः । मय्येवार्पितं मनो यैस्तेष्वेव चित्तं यस्य सः, कृतमद्भक्तासक्तिक इत्यर्थः । मद्धर्मे भक्तावेव स्वमनसो रतिर्यस्य सः ॥ * ॥ **दीपिका**—असंरंभतश्चित्तानुद्वेगतया । तदाह—असंरंभत्वमेवाह । अत एव अर्पितचित्तमनस्त्वादेव । आत्ममनसः स्वमनसः, उपलक्षणमिदं स्वचित्तादेः ॥ ९ ॥ ० ॥ * ॥ केवलामपि वैधीं रागानुगाञ्च तंत्रेणाह—देशान् द्वारकादीन् । आश्रयेदावसेत् । देवादिषु ये मद्भक्ता नारदप्रह्लादांबारीषादयस्तेषामाचरितान्याचारानाश्रयेदनुसरेदिति वैधी भक्तिः । देशान् गोकुलवृंदावनगोवर्द्धनादीन् । चन्द्रकांतिवृंदागोपिकादीनामाचाराननुसरेदिति रागानुगा च दर्शिता । साधुभिः सदाचारैर्मद्भक्तैराश्रितानेव देशानाश्रयेत न तु दुराचारैराश्रितान्मद्रादिदेशानित्यर्थः । साधुलक्षणं तु वारतांतविनोक्तम्—"सदाचारो हरिगुरुभक्त आस्तिक्यबुद्धियुक् । जातिशुद्धः परश्लाघी शास्त्रसेव्यनहंकृतिः ॥ परोपकरणे नित्यमुद्युक्तश्च दयालुकः । अनसूयश्च जितवाङ्निजश्लाघाविवर्जितः ॥ परोत्कर्षे सुखी विद्वान्साधुरित्यभिधीयते ।" इति । यद्वा—साधुस्ते उत्तमश्लोक इति प्रश्नोत्तरत्वेन स्वयं भगवता वर्णितः स च श्रीकपिलदेवोक्तो ग्राह्यः ॥ १० ॥ "सत्रं यज्ञे सदादाने संभूयत्वे वने छले" इति कोशः । सामर्थ्ये सति पृथक् अन्यथा मिलित्वेत्यर्थः । महाराजविभूतयः छत्रचामरसिंहासनाद्याः ॥ * ॥ पर्व एकादश्यादि, यात्रा विशिष्टजनसमागमः, महोत्सवो होलिकादिः । शक्तिसत्त्वे पृथक् तदभावे सत्रेण मिलित्वा बहुजनैः॥११॥इत्यर्थ इति—व्यापकत्वेन सर्वत्र पूर्णमिति भावः।तद् व्यापकत्वम् । परिच्छिन्नं वस्त्वाव्रियते न त्वपरिच्छिन्नमतः पूर्णमिति।अनावृतत्वे हेतुं पृच्छति—तदपि अनावृतत्वमपि कुत इति।इत्यर्थ इति—आवरणं ससंगिनो भवति न त्वसंगिन इति भावः॥*॥कथंभूतमीश्वरं—बहिरिति।अत्र मामेवेति श्रीकृष्णरूपमेवेक्षेत न तु केवलांतर्यामिरूपमित्यभिप्रायेणैवांतरंगां भक्तिमाहेति व्याख्यातम् । अनावृतं पूर्णम्। ज्ञानमाश्रित.इत्युत्तरपद्यस्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति सर्वाणि भूतानि मद्भावेन महाद्युते ॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥१३॥ ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके ॥ अक्रूरे क्रूरके चैव समदृक्पंडितो मतः ॥१४॥ नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् ॥ स्पर्धासूयातिरस्काराः साहंकारा वियंति हि ॥ १५ ॥ विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीम् ॥ प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरम्॥ १६ ॥

अपावृतमनावरणम् । तदपि कुतः । यथा खमसंगत्वादित्यर्थः॥ १२॥हे महाद्युते अतिप्राज्ञ इत्यनेन प्रकारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः सन्सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयन्पंडितो मत इत्युत्तरेणान्वयः॥ १३॥ ननु उत्तमाधममध्यमेष्वेकरूपेण सभाजनमपाण्डित्यमेव स्यात्।पूज्यपूजादिव्यतिक्रमादिदोषापत्तेरित्याशंक्य तामेव ज्ञानदृष्टिं प्रपंचयति। ब्राह्मण इति।विषमेष्वपि समदृक् समं मामेव पश्यन्।वैषम्यमेव चतुर्धा दर्शयति।ब्राह्मणे पुल्कसे इति।जातितो वैषम्यम्।पुल्कसोंत्यजजातिविशेषः।स्तेने ब्रह्मस्वहारिणि ब्रह्मण्ये ब्राह्मणेभ्यो दातरि इति कर्मतः। अर्के विस्फुलिंग इति गुणतः। अक्रूरे शांते क्रूरे चेति स्वभावतः॥ १४॥नरेष्वीश्वरदृष्टिं कुर्वतः सद्यः फलविशेषमाह । नरेष्विति । समोत्तमहीनेषु स्पर्धादयः । स्वस्मिन्नहंकारश्च । हि निश्चितम् । वियंति नश्यंति ॥ १५ ॥ अतोंतर्यामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह । विसृज्येति । स्मयमानान्हसतः स्वान्सखीन् ।

कर्तृपदस्यानुषंगः। अंतर्यामिसत्त्वेऽपि कृष्णस्य स्वयं भगवत्त्वेन प्राबल्यात् । तदुपासकानामंतर्यामिस्थानेऽपि स एव सर्वत्र स्फुरतीति भावः ॥ १२ ॥ 'द्युतिः कान्तिधियोरपि' इति निरुक्तिः । महती द्वैतवर्जिता द्युतिर्धीरस्येति तथा । केवलमुपाधिविविक्तप्रत्यक्चैतन्यविषयम् ॥ * ॥ मद्भावेन ब्रह्मैवेति भावनया । सभाजयन् संमानयन् । मन्यमानः मननं कुर्वन् । ज्ञानमाश्रितः ज्ञानीत्यर्थः । पंडितो मत इत्युत्तरेणान्वयः । अत्र केवलमित्याश्रयणक्रियाविशेषणं न तु ज्ञानस्येति केवलस्य भक्तिरहितस्य ज्ञानस्य 'नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानम्' इत्युक्त्या विगीतत्वात् । यद्वा—केवलं ज्ञानमद्वितीयं ब्रह्माश्रितः । हे महाद्युते इति—त्वं तु भक्त्यैव केवलया सर्वतोऽप्याधिक्येन द्योतयसे आत्मानमिति महाद्युतिस्तत्संबुद्धौ तथा ॥ * ॥ सन्दर्भस्तु—केवलं ज्ञानमंतर्यामिदृष्टिमाश्रितोऽपि । इति पूर्वोक्तप्रकारेण सर्वाणि भूतानि मद्भावेन तेषु मम श्रीकृष्णरूपस्य यो भावोऽस्तित्वं तद्विशिष्टतया मन्यमानः पंडितो मतः ॥ १३ ॥ अत्र 'समासमाभ्यां विषमसमे पूज्येते' इति स्मृतिबलेनाक्षिपति—नन्विति । गुणतः प्रकाशरूपगुणतः । स्मृत्यर्थस्तु—समाय पूज्याय विषमे प्रकारे कृते सति विषमाय च समे प्रकारे कृते सति स पूजक इतो लोकात्परलोकाच्च हीयत इत्यर्थः ॥ * ॥ दीपिका—पूज्यपूजादीति । सर्वपूजायामपूज्यस्य श्वपचादेरपि पूजनं तदभावे विप्रस्याप्यपूजनमिति व्यतिक्रमादपराधादित्यर्थः । एवं च " सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः " इत्यादिन्यायेन तस्य बहिर्दृष्ट्यभावान्न व्यतिक्रमत्वं प्रत्युतोत्तमभागवतत्वमित्यर्थः । कर्मतश्चौर्यदानलक्षणतः उत्तमाधमस्वभावतः ॥ * ॥ संदर्भस्तु—सर्वत्र समं ब्रह्म मामेव पश्यन् ज्ञानी पंडितः, जात्यादितो वैषम्यं पश्यंस्त्वज्ञान्यपंडित इत्यर्थः ॥ १४ ॥ समे स्पर्द्धा, उत्तमेऽसूया, हीने तिरस्कारः । स्पर्द्धा पराऽभिभवेच्छा, असूया गुणेषु दोषारोपणम्, तिरस्कारो धिक्कृतिः, अहंकारः स्वस्मिन्पूज्यत्वधीरिति भेदः ॥ * ॥ स्पर्द्धादिदोषपरिहारायापि सर्वत्र मद्दृष्टिः कार्येत्याह—नरेष्विति । स्वतुल्ये स्पर्द्धा, स्वतोऽधिकेऽसूया, स्वतो न्यूने तिरस्कारः खलु स्यात् । यदि सर्वत्रैव मां पश्येत्तदा मया सह कथं स्पर्द्धादयः संभवेयुरिति भावः । साहंकारा इति—स्वस्मिन्नपि ब्रह्मदर्शनात्कुत्राहंकारः प्रसज्जत्विति भावः । वियन्ति नष्टा भवंति ॥ १५ ॥ यतः सर्वत्रेश्वरस्तिष्ठति अतो हेतोः । ब्राह्मणं दंडवत्कुर्यात्, अन्येषां चाण्डालादीनां समानमेवेश्वराधिष्ठानधिया दण्डवत्प्रणामः, खरादीनां यवसादिदानमेव, " संमानं पुष्कसादीनां गोविप्रे दण्डवन्नतिः । खरादेर्यवसादानं प्रणतिर्दण्डवद्भवेत् ॥ " इति तीर्थोक्तेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावत्सर्वेषु भूतेषु मद्भावो नोपजायते ॥ तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥१७॥ सर्वं ब्रह्मात्मकं तस्य विद्ययाऽऽत्ममनीषया ॥ परिपश्यन्नुपरमे त्सर्वतो मुक्तसंशयः ॥ १८ ॥ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम ॥ मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः ॥ १९ ॥ न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि ॥ मया व्यवसितः सम्यङ् निर्गुणत्वादनाशिषः ॥ २० ॥

तथा देहिकीं दृशमहमुत्तमः स तु नीच इति दृष्टिम् । तया दृशा या व्रीडा लज्जा तां च विसृज्य श्वचांडालादीनभिव्याप्य प्रणमेत् ॥ १६ ॥ एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह द्वाभ्याम् । यावदिति ॥ १७ ॥ तस्य एवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति । कुतः । आत्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया । अतः परितो ब्रह्मैव पश्यन्सर्वतः क्रियामात्रादुपरमेत् ॥ १८ ॥ किमयमेवोपायोऽस्ति वाऽन्योपीत्यपेक्षायां संति बहवः समीचीनस्त्वयमेवेत्याह । अयं हीति ॥ १९ ॥ भगवद्धर्मलक्षणो

॥ * ॥ सर्वत्रैव मद्भावः । स्वाभाविक एव यो भवेदेतस्य साधनमाह—स्मयमानान् । अहो महानप्ययमतिनींचे प्रणमतीति हसतः स्वान्सखींस्तथा दैहिकीं दृशम् अहमुत्तमोऽयं तु नीचः कथं मे नमस्य इति दृष्टिं तया दृशा या व्रीडा तां त्यक्त्वा श्वचाण्डालादीनभिव्याप्यांतर्यामीश्वरदृष्ट्या प्रणमेत् ॥ १६ ॥ मद्भावः मदेकस्वरूपत्वरूपाद्वैतयिबोधः । एवं प्रणामादिना पूर्वोक्तं स्फुटयति मनआदिव्यापारैः । यद्वा—वाचाऽऽदरेण, मनसा शुभचिन्तनेन, कायेन दण्डवत्प्रणिपातादिना, वृत्त्या जीविकाप्रदानेन, यथोचितं पूजयेदिति भावः ॥ * ॥ एषा दण्डवत्प्रणामयंत्रणा कियत्कालपर्यंतमित्यपेक्षायामाह—यावदिति । न उपाधिक्येन जायते स्वाभाविको न भवेत्तावदेव परमात्मने नम इति वाचा तथैव मनसा कायकर्मभिर्देहव्यापारैश्चैवमुपासीत दंडवत्प्रणतिं कुर्यात् ॥ १७ ॥ एवं प्रणामादि कुर्वतः ब्रह्मात्मकत्वे हेतुमाह—आत्मेति । अतः सर्वत्रात्मदृष्टित्वे ज्ञानित्वात्कर्मानधिकारात् । मुक्तसंशयो निवृत्तासंभावनादिरूपसंदेहः ॥ * ॥ विद्या उपासना ॥ १८ ॥ मुख्यमुपायं पृच्छति—किमिति । सर्वेषां कल्पानां विधीनाम् । “ कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने ” इति मेदिनी । अयं कः—मनआदीनां व्यापारैस्सर्वभूतेषु यो मद्भावो मद्विषयं ज्ञानमिति यः ॥ * ॥ ततश्च ‘ नरेष्वभीक्ष्णम् ’ इत्यादिना तादृशस्वोपासनाविशेषस्य झटिति स्पर्द्धादिक्षयलक्षणफलमुक्त्वा, ‘ विसृजेत् ’ इत्यादिना तथा दृष्टिसाधनं सर्वनमस्कारमुद्दिश्य ‘ यावत् ’ इत्यादिना तादृशस्वोपासनाया अवधिं च सर्वत्र स्वतः स्वस्फूर्तिमुक्त्वा ‘ सर्वम् ’ इत्यादिना “ नव्यवद्धृदये यज्ञो ब्रह्मैतद्ब्रह्मवादिभिः । न मुह्यन्ति न शोचंति न हृष्यंति यतो गताः ॥” इति प्रचेतसः प्रति श्रीभगवद्वाक्ये । तट्टीका च—तस्य भगवतः प्रतिपदनव्यस्फूर्तिरेव ब्रह्मेति यदुक्तं तदेव तत्फलमित्युक्त्वा । यद्वा—कथमस्यावतारस्य ब्रह्मता भवतीति गोपालतापनीश्रुतिप्रसिद्धब्रह्मताभिधाननराकृतिपरब्रह्मरूपस्फूर्तिस्तत्फलमित्युक्त्वा तेनैव तादृशोपासनं सर्वोर्द्धमभिप्रशंसति—अयं हीति । सर्वकल्पानां सर्वोपासनानां सध्रीचीनः समीचीनः । मद्भावो मम श्रीकृष्णरूपस्य भावना । एतच्च श्रीकृष्णभजनस्यांतर्यामिभजनादप्याधिक्यं श्रीगीतोपसंहारानुसारेणैवोक्तम् । तथाहि—‘ ईश्वरः सर्वभूतानाम् ’ इत्यादि, ‘ इति ते ’ इत्यादि, ‘ सर्वगुह्यतमम् ’ इत्यादि, ‘ मन्मनाः’ इत्यादि, ‘ सर्वधर्मान् ’ इत्यादि । अत्र च गुह्यं पूर्वाध्यायोक्तं ज्ञानं गुह्यतरमंतर्यामिज्ञानं सर्वगुह्यतमं मन्मनस्त्वादिलक्षणं, तदेकशरणत्वलक्षणञ्च तदुपासनमिति समानम् । अथवा पूर्वोक्तभगवद्धर्माणामेव कैमुत्येन माहात्म्यं दर्शयितुं ज्ञानं ततो निहनिष्यन्त्नुवदति मामित्यादिना, सर्वं ब्रह्मेत्याद्यंतेन । तदेव स्तौति—अयं हीति । सर्वकल्पानां ज्ञानकर्मयोगानां सहायः “सहस्य सध्रिः” इत्यंचतौ सध्र्यादेशात्सहांचतीति निरुक्तेः ॥ * ॥ ज्ञानिनां ब्रह्म प्राप्तावतः परः सुगमोपायो नास्तीत्याह **विश्वनाथः** । “ न युज्यमानया भक्त्या भगवत्यखिलात्मनि । सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥ ” इति श्रीकपिलदेवोक्तेः । “ कल्पो योग्ये समर्थे च प्रलये ग्रंथभिद्यपि । उपायोपासनासंभावनासु च रसायने ॥” इति वारतांतविः ॥ १९ ॥ उपक्रमे प्रारंभे सति समाप्त्यभावेपीत्यर्थः “ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ” अत एव निष्कामत्वादेव । यद्वा—

१ टीकायां नास्त्येवेत्यत्र नास्त्यत एवेति पाठाभिप्रायेणैवैतत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

योयो मयि परे धर्मः कल्प्यते निष्फलाय चेत् ॥ तदायासो निरर्थः स्याद्भयादेरिव सत्तम ॥ २१ ॥

पायस्य समीचीनत्वमेवोपपादयति द्वाभ्याम् । नहीति । अंग हे उद्धव । अनाशिषो निष्कामस्य मद्धर्मस्योपक्रमे सत्यण्वपीषदपि वैगुण्यादिभिर्नाशो नास्त्येव यतो मयैव निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः, न तु मन्वादिमुखेन कथंचित ॥ २० ॥ किंच यो य इति । अयमर्थः । किं वक्तव्यं मद्धर्मस्य न ध्वंस इति यतो लौकिकोऽपि योयो निरर्थो व्यर्थ आयासः सोऽपि मयि परे निष्फलाय चेत्कल्पते निष्कामतयार्पितश्चेत्तर्हि धर्म एव स्यात् । निरर्थायासे दृष्टांतः । यथा भयशोकादेर्हेतोः पलायनाक्रं

अत एवेत्यस्य यत इत्यनेन संबंधस्तथैव स्वामिचरणैर्व्युत्पादितम् । निर्गुणत्वान्निष्कामत्वेन मोक्षहेतुत्वात् । अयं भागवतो धर्मः । नन्वेवं न केनापि कुत्रचिदुक्तः सर्वैराचार्यैः सांगोपांगधर्मस्यैव फलदानसमर्थत्वोक्तेरत आह—मयैव न तु मन्वादिमुखेन, भागवतधर्मस्य सुज्ञेयत्वेऽप्यंतःप्रेमाणं विना विज्ञैरपि दुर्ज्ञेयत्वात्, “ प्रायेणं वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत माययालम् । त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥” इत्युक्तेः, “ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः ” इत्याद्युक्तेश्च ॥ * ॥ मद्धर्मस्य तु विघ्न एव नास्ति कुतः सहायचिन्तनमित्याशयेनाह—नहीति ॥ * ॥ **संदर्भः**—“ भक्तिसारं त्रिभिः श्लोकैर्ज्ञानसारमथाष्टभिः । प्रोच्यांते पुनरप्याह भक्तिसारोत्तमं त्रिभिः ॥ ” । धर्मांतरस्य खल्वारब्धस्य परिसमाप्तिपर्यन्तं नैर्विघ्न्येन सांगोपांगत्वे वृत्ते एव फलजनकत्वमन्यथा तु वैयर्थ्यमेव न तथा भक्तिलक्षणस्य मद्धर्मस्य नियमः अस्य पुनरारंभमात्र एव परिसमाप्त्यभावेप्यंगहीनत्वेऽपि न वैयर्थ्यमित्याह—नहीति । अंग हे उद्धव । मद्धर्मस्य भक्तिलक्षणस्योपक्रमे आरंभे सति । यद्वा—अंगस्याप्युपक्रमे सति समाप्त्यभावेऽपि अण्वपि ईषदपि ध्वंसो वैगुण्यादिभिर्नाशो नास्ति यतो भक्तिलक्षणोऽयं मद्धर्मो निर्गुणः, न हि गुणातीतस्य वस्तुनो ध्वंसः संभवेत्, यस्मादयमनाशिषो निष्कामभक्तस्य धर्मो मया सम्यग्व्यवसितो निर्णीतः । अणुमात्रोऽप्ययं धर्मस्सम्यक् पूर्ण एव निश्चितः नात्र कारणं द्रष्टव्यमियं मम परमेश्वरतैवेति भावः । “ नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥” इति श्रीगीतोपनिषदुक्तेः । अत्र धर्मपदेन ज्ञानलक्षणो धर्मो न व्याख्येयस्तस्य निर्गुणत्वाभावात् । ‘ कैवल्यं सात्त्विकं ज्ञानम् ’ इति भगवदुक्तेः ॥ २० ॥ अन्यदाधिक्यमाह—किञ्चेति । अत्राशयमाह कैमुत्येन—अयमर्थ इति । आदिना निर्निमित्ताक्षक्रीडादिग्रहः । भयशोकादिनाक्रंदादौ भयशोकाद्यनिवृत्तेस्तद्व्यर्थतैवेति । उभयत्रादिपदाभ्यां चिन्तावैमनस्ये गृह्येते । तथा च भयादिजन्यक्लेशादिरपीश्वरेऽर्पितो धर्मश्चेत्तर्हि किमु वक्तव्यं शुभकर्मणोऽर्पणे इति । “ नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः । कल्पते पुरुषस्यैष—” इत्युक्तेः ॥ * ॥ **दीपिका**—निष्फलाय लौकिकवैदिकफलाभावाय । धर्म एवारोपितभगवद्धर्म एव स्यात्तदेति भयशोकादेरिति यथा मृत्युभयात् पलायनं व्यर्थं तस्याऽवश्यंभावित्वात् । यथा च बन्धुमृतिशोकादाक्रन्दनं व्यर्थं मृतस्य पुनर्जीवनासंभवात् । आदिना द्रव्यनाशात्तत्स्मृतिक्लेशग्रहः ॥ * ॥ आस्तां तावत्सम्यग्धर्माणां वार्ता आरोपितरूपाणां माहात्म्यं श्रूयतामित्याह—योय इति । मयि मदर्पितत्वेन कृतो योयो धर्मो वेदविहितः स यदि निष्फलाय फलाभावाय कल्प्यते फलकामनया नार्प्यत इत्यर्थः । तदा तत्रतत्रायासः श्रांतिः अनिरर्थः स्यात् । व्यर्थो न भवति । निष्फलायेति विशेषणं फलभोगादिरूपतद्भक्त्यंतरायाभावेनानिरर्थतातिशयतात्पर्यम् । तत्रानिरर्थत्वे कैमुत्येन श्रीकृष्णलक्षणस्य स्वस्यासाधारणभजनीयताव्यंजको दृष्टांतः—भयादेरिवेति । यथा कंसादौ मत्संबंधमात्रेण भयादेरप्यायासो निरर्थो न भवति मोक्षसंपादकत्वादित्यर्थ इति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—भक्तिर्यदि सर्वथैव निष्कपटा तदा सा विनापि प्रयत्नेन प्रतिक्षणं स्वयमेव संपद्यते इत्याह—योय इति । योयो धर्मः श्रवणकीर्तनादिर्मयि विषये निष्फलाय ऐहिकप्रतिष्ठादिसुखपारत्रिकस्वर्गमोक्षादिसुखकामनाराहित्याय स्यात् तस्यायासस्तत्सिद्ध्यर्थं प्रयत्नो निरर्थो व्यर्थः समर्थः स्वयमेवानायासेनैव भवति किं तदर्थं प्रयत्नेनेत्यर्थः । “ भोजनाच्छादने चिन्तां वृथा कुर्वंति वैष्णवाः । योऽसौ विश्वंभरो देवः कथं भक्तानुपेक्षते ॥ ” इतिवत् । यथा भयशोकादेर्हेतोरायासो व्यर्थ एव स्वस्वविषयं प्राप्य स्वयमेव भवेत्, यथा तथैव मां स्वविषयं प्राप्य भजनमपि स्वयमेव भवेदित्यर्थः । तदपि निष्कपटोऽपि भक्तो यद्भक्त्यर्थं सततं प्रयतते स च प्रयत्नस्तस्य भक्तौ रागातिशयमेव व्यनक्तीति यत्नो महान् गुण एव ज्ञेयः । हे सत्तमेति—‘ सन्सुधीः पण्डितः कृती ’ इति कोशात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् ॥ यत्सत्यमनृतेनेह मर्त्येनाप्नोति माऽमृतम् ॥ २२ ॥
एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः ॥ समासव्यासविधिना देवानामपि दुर्गमः ॥ २३ ॥

दनादिक्लेशस्तद्वत् ॥ २१ ॥ अतो मद्भजनमेव बुद्धेर्विवेकस्य मनीषायाश्चातुर्यस्य च फलमित्याह । एषेति । तामेव दर्शयति । सत्यममृतं च मा मामनृतेनासत्येन मर्त्येन विनाशिना मनुष्यदेहेन इहास्मिन्नेव जन्मनि प्राप्नोतीति यत्सैव बुद्धिर्मनीषा चेति । बुद्धिर्विवेकः । मनीषा चातुर्यम् ॥ २२ ॥ महाप्रकरणार्थमुपसंहरति द्वाभ्याम् एष इति ॥

त्वमतिशयेन पंडितोसि सर्वत्र मद्दर्शितत्वात् । यद्वा–'स पण्डितो यः करणैरखण्डितः' इत्युक्तेस्त्वमेवैतादृशः "नोद्धवोऽण्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः" इति मदुक्तेः ॥ २१ ॥ यतो निरर्थकमपि कर्म मदर्पितं सद्धर्मो भवत्यतो हेतोः । "बुद्धिर्धैर्ये विवेके च मनीषा बुद्धिदाक्ष्ययोः" इति निरुक्तिः । लोके तु क्रयविक्रयादौ किमप्यधिकसंपादको बुद्धिमानुच्यते नात्र तथेति भावः ॥ * ॥ मत्प्राप्तिकाया भक्तेश्च युक्तमेव खल्वेतादृशं माहात्म्यमित्याह–एषेति । सत्यं सर्वसत्ताहेतुममृतं सर्वानंदहेतुञ्च मां श्रीकृष्णाख्यं स्वयं भगवंतमिति संदर्भः ॥ * ॥ **विश्वनाथस्तु**–ननु कथं तदपि त्वद्भक्तौ जनाः प्रतिष्ठादिसापेक्षा एव भवन्ति तत्र तादृशबुद्धिविवेकाद्यभाव एव हेतुरित्याह–एषेति । बुद्धिमतामेषैव बुद्धिर्नत्वतिकठिनशास्त्रेऽपि संचरिष्णुर्बुद्धिरिति भावः । मनीषिणां चातुर्यवतामेषैव मनीषा नत्वेकेनापि कपर्दकेन स्वर्णमुद्रोपार्जनचातुर्यमिति भावः । सैव का खल्वित्यत आह–यदिति । इह भारतभूमौ मा माममृतं मृतिरहितं नित्यस्वरूपं मर्त्येन मरणधर्मणा शरीरेणानित्येनाप्नोति भक्तिमात्रादेव वशीकरोति तथा मर्त्येन मृतकतुल्यत्वादतिबीभत्सेन प्राकृतेन मा माममृतप्राकृतं सुधास्वरूपं तथाऽनृतेन जीवस्य वस्तुतत्संबन्धाभावादसत्येन सत्यं सर्वकालसत्ताकं मां प्राप्नोति । अयं भावः–लोके हि कपर्दकं दत्त्वा सहस्रकपर्दकमूल्यं वस्तु यो ग्रहीतुं शक्नोति एष एव परमबुद्धिमानतिचतुर इत्युच्यते, यस्तु तेन स्वर्णमुद्रोपार्जनं करोति स ततोपि, यस्तु हीरकादि रत्नं स ततोपि, तत्राप्यभ्रांतादतिचतुरादेव पुरुषात्स ततोपि, यस्तु चिंतामणिकामधेन्वादिकं तच्चातुर्यं तु वक्तुमशक्यम् । भारतभूवासी मर्त्यः पुनरपि दुर्जातिरपि स्फुटितैककपर्दकमूल्यत्वेनाप्यसंभावितं कौरूप्यजरारोगादिपूर्णमपि स्वशरीरं मह्यं दत्त्वाऽप्राकृतमाधुर्यसिंधुं मामेव गृह्णाति मया पुनरपि चतुरशिरोमणिनापि तद्दत्तं तदेव प्राप्य कौस्तुभकिरीटादिकटकाद्यनर्घरत्नलंकारभूषितमपि स्वं तस्मै हर्षादेव दीयते इत्यहो बुद्धिमत्त्वमहो चातुर्यवत्त्वं भारतभूवासिनः कस्यचिदिति तत्र श्रवणकीर्तनस्मरणपरिचर्याद्यर्थं श्रोत्रादीनां विनियोग एव भगवते शरीरदानं ज्ञेयम् । किंच–एका रसनैव तत्कीर्तननिरता, कर्णौ वा श्रवणनिरतौ, करौ वा परिचर्यानिरतौ चेत्तदापि स आत्मानं ददातीति शरीरैकदेशदानेनापि स लभ्यत इति कः खलु बुद्धिचातुर्यवानेवं न कुर्यादिति "सर्वोपदेशसारोऽयं श्लोकचिन्तामणिः प्रभोः । हृदये यस्य राजेत स राजेद्भक्तसंसदि ॥" इति ॥ २२ ॥ संसारमोचकब्रह्मज्ञानं ब्रह्मवादस्तस्य संग्रहः संक्षेपः "संग्रहो बृहदुद्वेगे ग्रहसंक्षेपयोरपि" इति मेदिनी ॥ * ॥ एष पूर्वोक्तलक्षणो भक्तियोगस्तत्प्राप्यरूप एव समासविधिना 'एषा बुद्धिमतां बुद्धिः' इत्यादिरूपेण व्यासविधिना 'त्वं तु सर्वं परित्यज्य' इत्यादिमहाप्रकरणे देवानां सत्त्वप्रकृतीनामपीत्यर्थः । यदुक्तं षष्ठे–"देवानां शुद्धसत्त्वानामृषीणां चामलात्मनाम् । भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥" इति ज्ञानमिति यदुक्तं तस्य तु–'नाहं साक्षात्फलं किंतु मुक्तिमात्रम्' इत्यादि अभीक्ष्णश इति संदर्भः ॥ * ॥ महाप्रकरणमुपसंहरति–एष इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् ॥ एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः ॥ २४ ॥ सुविविक्तं तव प्रश्नं मयैतदपि धारयेत् ॥ सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति ॥ २५ ॥ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलम् ॥ तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना ॥ २६ ॥ य एतत्समधीयीत पवित्रं परमं शुचि ॥ स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् ॥ २७ ॥ य एतच्छ्रद्धया नित्यमव्यग्रः शृणुयान्नरः ॥ मयि भक्तिं परां कुर्वन्कर्मभिर्न स बध्यते ॥ २८ ॥ अप्युद्धव त्वया ब्रह्म सखे समवधारितम् ॥ अपि ते विगतो मोहः शोकश्चासौ मनोभवः ॥ २९ ॥ नैतत्त्वया दांभिकाय नास्तिकाय शठाय च ॥ अशुश्रूषोरभक्ताय दुर्विनीताय दीयताम् ॥ ३० ॥

॥ २३ ॥ २४ ॥ आस्तां तावज्ज्ञानमेतदनुसंधानकथनपठनश्रवणपराणामप्येतदेव फलं भवतीत्याह चतुर्भिः।सुविविक्तमिति। मया सुविविक्तं दत्तोत्तरम् एतदाख्यानमपि यो धारयेदनुसंदध्यात्सब्रह्मगुह्यं वेदेऽपि रहस्यम् ॥ २५ ॥ सुपुष्कलं यथा भवति तथा ब्रह्मदायस्य ब्रह्म ददातीति तथा तस्य ज्ञानोपदेष्टुः ॥ २६ ॥ समधीयीत उच्चैः पठेत् । परमं शुचि अन्येषामपि शोधकम्।पूयेत शुध्येत्॥ २७ ॥ २८ ॥सम्यग्ज्ञानानुत्पत्तौ पुनरुपदेक्ष्यामीत्याशयेन पृच्छति। अपीति । अपि किम्॥ २९ ॥उपधारितमाकलय्याह । नैतदिति।शठाय

द्वाभ्याम् ॥ २३ ॥ अभीक्ष्णशः पौनःपुन्येन । एतत् ज्ञानम् । नष्टसंशयो विच्छिन्नसंसारापादकद्वैतभ्रमः सन्मुच्यते जीवन्मुक्तो भवतीति भावः ॥ * ॥ ० ॥ २४ ॥ अस्य ज्ञानस्य महत्त्वमाह—किञ्चेति । अनुसंधानं विचारः । एतदेव जीवन्मोक्षलक्षणमेव । अधिगच्छति आत्मतया जानाति "ब्रह्मविद्ब्रह्मैव भवति" इति श्रुतेः ॥ * ॥ **दीपिका**—तव प्रश्नो यत्र मया दत्तान्युत्तराणि यत्रेत्येतद्द्वयमाख्यानस्य विशेषणं धारणादनुसंधानं कुर्यात् ॥ * ॥ **संदर्भस्तु**—समुदायस्य पौर्वापर्यानुसंधाने फलं तु मल्लक्षणं साधनसिद्धभक्तेन सार्द्धमविशेषं स्यान्मम तु त्वत्पक्षपातादित्याह—सुविविक्तमिति । ब्रह्म गुह्यं परं ब्रह्मेति मामित्यर्थः । 'गूढं परं ब्रह्म मनुष्यलिंगम्' इति नारदोक्तेः ॥ २५ ॥ सुपुष्कलं यथापेक्षितं तावत् । ब्रह्मैव दायः पितृधनमिव भागो :यस्य स तथा । यद्वा—ब्रह्मदो ज्ञानद आयो लाभो यस्येति स्वस्वरूपतयात्मानं ददामि व्यञ्जयामि ॥ * ॥ मद्भक्तसात्करणे तावदेवेति किं वक्तव्यं यतः य एतदिति । ददामि वशीकरोमि आत्मानमात्मना तस्य ॥ २६ ॥ दर्शयन्पश्यन् । चुरादिणिजन्तः ॥ * ॥ अर्थमबुद्ध्वापि केवलं पठतः फलमाह—य एतदिति । परमं शुचि दोषमात्ररहितं परमं पवित्रं वक्तृश्रोतॄणां सर्वदोषनिराकरणञ्च । अतः स स्वयं पूयेतैव नात्राश्चर्यमिति भावः । न केवलमेतावत् व्युत्पन्नान्प्रति मां ज्ञानदीपेन दर्शयंश्च भवति ॥ २७ ॥ अव्यग्रः अनाकुलः, एकचित्त इति यावत् । कर्मकृतबंधाभावो मोक्ष एव ॥ * ॥ श्रद्धापूर्वकं नित्यश्रोतॄणां फलविशेषमाह—य इति ॥ २८ ॥ अपीति संभावनायाम् । समवधारितं सम्यग्ज्ञातम् । मोहोऽज्ञानम्, शोको मद्वियोगलक्षणः । "नाहं तवांघ्रिकमलं क्षणार्धमपि केशव । त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥" इत्युक्तेरसौ प्रत्यक्षं श्रावितः । पूर्वमज्ञानित्वेन मनोभवस्तव मनसि जातोऽधुना ज्ञातात्मतत्त्वत्वाद्विगतः "तरति शोकमात्मवित्" इति श्रुतेः ॥ * ॥ अथ करुणाव्यग्रः सान्त्वयति—अपीति । मोहो मदीयानामेषामन्यथाभावजातः मायिकलीलादर्शनजो भ्रमः शोकः पुनर्ममाप्राप्तिभावेन जातः । अयं भावः—भगवता सह मम योऽयं संवादस्तच्छ्रवणादितोऽपि यदि तद्रूपं फलं तव कः सन्देहः को वान्येषां मत्परिकराणामिति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**—नित्यसिद्धस्य निस्त्रैगुणस्याप्युद्धवस्य ज्ञानादिग्रहणार्थं स्वशक्त्यैव मोहमुत्पाद्य ज्ञानाद्युपदेशेन पुनस्तं निराकृत्य लीलया पृच्छति—अपीति ॥ २९ ॥ ज्ञाततत्त्वं विचार्य वदति एतदुपदेष्टुर्महाफलभागित्वेऽपि योग्यायैव देयमिति चाह—नैतदिति । दांभिको

१ टीकायामादौ किञ्चेति पाठः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च ॥ साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषिताम् ॥ ३१ ॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते ॥ पीत्वा पीयूषममृतं पातव्यं नावशिष्यते ॥ ३२ ॥ ज्ञाने कर्मणि योगे च वार्तायां दंडधारणे ॥ यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः ॥ ३३ ॥ मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ॥ तदाऽमृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥ ३४ ॥

वंचकाय॥ ३०॥ शूद्राणां योषितां च यदि भक्तिः स्यात्तर्हि ब्रूयात्॥ ३१॥ एतज्ज्ञानेन पुमान्कृतार्थो भवतीत्याह । नैतदिति । अत्र दृष्टांतमाह । पीत्वेति । पीयूषं स्वादु॥ ३२॥ ननु संति बहूनि ज्ञेयानि तत्तत्फलसाधनानि, सत्यम्, सत्यभक्तानां भक्तस्य तु सर्वमहमेवातो मदेकशरणो भवेत्याह । ज्ञान इति । ज्ञानादौ यावान्धर्मादिलक्षणश्चतुर्विधो ऽर्थस्तावान्सर्वोपि तेऽहमेव । तत्र ज्ञाने मोक्षः। कर्मणि विहिते धर्मः । कर्मण्येव स्वाभाविके तु कामः । योगे त्वणिमादिसिद्धयः । वार्तायां कृष्यादावर्थः । दंडनीतावैश्वर्यमिति सिद्ध्यैश्वर्ययोरपि कामांतर्गतत्वाच्चातुर्विध्यम् ॥ ३३ ॥ कुत इत्यत आह । मर्त्य इति । यदा त्यक्तसमस्तकर्मा सन्मे निवेदितात्मा भवति तदाऽसौ मे विचिकीर्षितो विशिष्टः

मिथ्यानुष्ठानरतः । नास्तिको वेदानंगीकर्ता । शठो वंचकः । अशुश्रूषोरिति चतुर्थ्यर्थे षष्ठी, अशुश्रूषवे । विशिष्टा नीतिर्विनीतिः दुर्गता विनीतिर्विचारसामर्थ्यं यस्य स तथा तस्मै । नकारः सर्वत्रान्वेति ॥ * ॥ उप धारितं सम्यक् ज्ञातम् । अशुश्रूषोरिति चतुर्थ्यर्थे षष्ठी । तत्र सुप्रतीकमालोक्य व्यतिरेकान्वयाभ्यामुपदेश्यानुपदिशति—नैतदिति द्वाभ्याम् ॥ ३० ॥ एतैर्दांभिकत्वादिभिः । प्रियाय गुरुभक्ताय ‘ प्रीणातीति प्रियः ’ इति निरुक्तेः । साधवे सदाचाराय । शुचये निष्कपटाय । यद्यपि ‘ न शूद्राय मतिं दद्यात् ’ इत्याद्युक्तेस्ते नोपदेशार्हास्तथापि मद्भक्तियुक्तानां कथंचित्पुराणश्रवणादिना ज्ञानेप्यधिकारोस्त्येवान्यथेयमेव भगवदुक्तिर्व्याकुप्ये तेति भावः । एवं स्त्रीणामपि संस्कारहीनत्वेन शूद्रतुल्यत्वेनानुसंधेयम् ॥ * ॥ एतैर्दांभिकत्वादिभिः । शूद्रयोषिद्भ्योपीत्यर्थः । इति चातुर्वर्ण्याधिकारो दर्शितः ॥ ३१ ॥ एतज्ज्ञाने सभक्तिज्ञाने सति । पीयूषम् “ पीयूषं सप्तदिवसावधि क्षीरेऽमृतेऽपि च । स्वादुनि तीर्थपयसि सनिंबुलवणार्द्रके ॥ ” इति कोशात् ॥ * ॥ एतज्ज्ञाने भक्तितात्पर्यकाख्यानज्ञाने । अत्र ज्ञातव्यावशेषाभावे **दीपिका** ॥ * ॥ इति **विश्वनाथस्तु**—यद्यपि भक्त्यैव कृतार्थस्य मद्भक्तस्य ज्ञाने नास्ति प्रयोजनं तदपि ज्ञानं नाम कीदृशमिति कदाचिद्भक्तस्य यदि जिज्ञासा स्यात्तदा तेनेदमेव द्रष्टव्यमत्र ज्ञानस्यापि सत्त्वादित्याह—नैतदिति । पीयूषं सुधां पीत्वा पातव्यं पेयममृतान्तरं नावशिष्यते ॥ ३२ ॥ अत्राक्षिपति—नन्विति । तत्र चतुर्विधेषु सर्वसुखानां ब्रह्मानंदांशत्वात् तव तु भक्तस्याहमेव मोक्षादिरूप इति ॥ * ॥ ननु यदि कस्यचिद्भक्तस्य ज्ञानकर्मादिफलेपि लिप्सा स्यात्तदा तेन ज्ञानादि कमभ्यसनीयमेवेति तत्रोद्धवं लक्ष्यीकृत्य नैवेत्याह—ज्ञाने इति । ज्ञानादौ यावानर्थः फलं मोक्षादिचतुर्विधस्तावान्सर्वोऽपि तव मद्भक्तस्याहमेव भवामि तंतमर्थं सर्वमहमेव ददामीत्यर्थः । “ या वै साधनसंपत्तिः पुरुषार्थचतु ष्टये । तया विना तदाप्नोति नरो नारायणाश्रयः ॥ ३३ ॥ यद्वा—यदा कृपया मे विचिकीर्षितस्तथा त्यक्तसमस्तकर्मा विविच्य बाधितसर्वकार्योपाधिरूपावरणबाधेन तत्कृतभेदभ्रमाऽपनयनेन मय्येव निवेदितात्मस्वरूपोऽ नन्योऽमृतत्वं प्रतिपद्यमानो मया सहात्मभूयाय कल्पत इति । “ यावद्यावन्निरस्यायं देहादीन्प्रत्यगंचति । तावत्तावत्तदर्थोऽपि त्वमर्थं प्रविविक्षति ॥ ” इति स्मृत्युक्तन्यायेन यदाऽयं जीवो ब्रह्माभिमुखो भवति तदा ब्रह्मापि जीवोन्मुखो भवतीत्यर्थः । “ यमेवैष वृणुते तेन लभ्यः ” इति श्रुतेः ॥ * ॥ ननु मया सर्वमतान्यवगतानि किं तु त्वद्भक्तानां किं मतं तत्त्वं ब्रूहीत्यपेक्षायामाह—भोः उद्धव प्रणयिन् चतुर्विंशाध्याये सत्कार्यवादिनाम् अष्टाविंशाऽध्याये तथैवाऽसत्कार्यवादिनाञ्च मतमुक्तं मद्भक्तास्त्वविवादिनः सत्यवादिनः सन्तो वस्तुतस्तु तदुभयमतमध्यतो नैव भवन्तीत्याह—मर्त्य इति । मनुष्यो यदा यादृच्छिकमद्भक्तकृपाप्रसादात्त्यक्तानि समस्तानि नित्य नैमित्तिककाम्यानि कर्माणि येन सः । निवेदितात्मा मत्स्वरूपभूताय मन्मंत्रोपदेशकाय गुरवे “ योऽहं ममास्ति यत्किंचिदिह लोके परत्र च । तत्सर्वं भवतो नाथ चरणेषु समर्पितम ॥ ” इति वचसा मनसा च समर्पिताहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य ॥ बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेऽश्रुपरिप्लुताक्षः ॥३५॥ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः ॥ कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदम् ॥ ३६ ॥ उद्धव उवाच ॥ विद्रावितो मोहमहांधकारो य आश्रितो मे तव सन्निधानात् ॥ विभावसोः किं नु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य ॥३७॥ प्रत्यर्पितो मे भवताऽनुकंपिना भृत्याय विज्ञानमयः प्रदीपः ॥ हित्वा कृतज्ञस्तव पादमूलं कोऽन्यत्समीयाच्छरणं त्वदीयम् ॥ ३८ ॥

कर्तुमिष्टो भवति ततश्चामृतत्वं मोक्षं प्रतिपद्यमानो मयाऽऽत्मभूयाय मदैक्याय मत्समानैश्वर्यायेति यावत् । कल्पते योग्यो भवति । वै ध्रुवम् ॥ ३४ ॥ आदर्शितो योगमार्गो यस्मै सः ॥ ३५ ॥ प्रणयेनावघूर्णं क्षुभितं चित्तं धैर्येण विष्टभ्य बहु मन्यमान आत्मानं कृतार्थं मन्यमानः ॥ ३६ ॥ मे मया य आश्रित आसीत्स तव सन्निधानेनैव विद्रावितः । प्रभवंति किं नु बाधाय समर्था भवंति । हे अजाद्य ब्रह्मणोऽपि जनक ॥ ३७ ॥ किंच यद्यपि तव सन्निधानादवगतस्तथाऽप्यनुकंपिना भवता विज्ञानमयः प्रदीपश्च प्रत्यर्पितः स्वमाययाऽपहृतः पुनः समर्पितोऽतस्तव कृतज्ञो यस्त्वया कृतमनुग्रहं जानाति स को नाम त्वदीयं पादमूलं हित्वाऽन्यच्छरणं समीयादाश्रयेत् ॥ ३८ ॥

तास्पदममतास्पदो भवति तदा तत्क्षणमारभ्यैव स मर्त्यो मे मया चिकीर्षितः विशिष्टः कर्तुमिष्टः । मत्प्रतिपाद्यमानेन मद्भक्त्याभासेन योगिज्ञानिप्रभृतितोऽपि विलक्षण एव कर्तुमीप्सितः स्यादिति । तेन मया कार्यः सत्यभूत एव नाप्यविद्याकार्यो मिथ्याभूत एव मत्कार्यो गुणातीत एव सन् अमृतत्वं मृतं नाशस्तदभाववत्त्वं प्रतिपद्यमानः मया सहैवात्मभूयाय स्वभूत्यै कल्पते योग्यो भवति चकारेणैतत्फलमननुसंहितं फलं तु प्रेमवत्पार्षदत्वमिति ॥ ३४ ॥ स उद्धवस्तदा भगवद्वचनोत्तरकाले । आनंदमग्नत्वात्किञ्चिदपि वक्तुं न समर्थोऽभूदिति भावः ॥ * ॥ संदर्भस्तु—एवमा सम्यग्दर्शितो योगस्य स्वेन संयोगस्य मार्गो यस्मै सः ॥ ३९ ॥ विष्टभ्य निरुध्य ॥ * ॥ प्रणयेनावघूर्णमवगतघूर्णाकं महाव्यग्रं चित्तं धैर्येण तद्दत्तशक्त्यैव बहु मन्यमान इति मुहुरुच्छलद्वियोगदुःखावरणाय तादृशतदुपदेशप्रसादलाभमयस्वभाग्यसम्भावनया आत्मानमुल्लासयितुमिच्छन्नित्यर्थः ॥ ॥ ३६ ॥ विभा ज्योतिरेव वसु धनं यस्य तस्याग्नेः सूर्यस्य वा सत इति शेषः । " विभावसुः पुमान्सूर्ये हारभेदे च पावके " इति मेदिनी । किंन्विति वितर्के, नेत्यर्थः । ' किं नु प्रश्नवितर्कयोः ' इति मेदिनी । भीर्भयम् ॥ * ॥ मोहः पुनस्तत्प्राप्यसम्भावनादिरूपः मया कर्त्राऽऽश्रितः स्वीकृतः स तव सान्निध्येनैव कृपावलोकनाद्यमृतवर्षिसांनिध्याभावेनैव विद्रावितोऽभूत्किमुत तादृशोपदेशादित्यर्थः ॥ * ॥ विश्वनाथस्तु—यो मे मया मोहमहांधकार आश्रितः सर्वयादवविराजितमत्प्रभुसहिता द्वारकेयं परिच्छिन्नैव संप्रति नश्वरेति विचारमयः स त्वया विद्रावित इति तृतीयस्कंधदर्शितोद्धवप्रश्नानन्तरमनन्यज्ञेयस्वीयसिद्धान्तरहस्यप्रदीपम् " आदिदेशारविंदाक्ष आत्मनः परमां स्थितिम् " इति च न व्यंजितमुद्धवायादात्तत्कथा एतदुत्तराप्यत्रैवोक्ता ज्ञेया । अतः कालद्वयोद्भूतं श्रीवाराहचेष्टितमेकत्रैवाह मैत्रेय इतिवत् ॥ ३७ ॥ यतो भवानतीव दयालुरतो हेतोः । अन्यद्देवतांतरम् । न कोऽपि किमपीत्यर्थः ॥ * ॥ प्रत्यर्पित इति—मया तुभ्यमात्मबुद्धीन्द्रियादिसहितं शरीरमर्पितं त्वया तु विज्ञानमयः स्वानुभवमयः प्रदीपः प्रत्यर्पितः, अतोऽहं प्रतिक्षणमेव सर्वदेशकालवर्तिनः स्वपरिकरविशिष्टस्य तव माधुर्यानुभवेन त्वया पुष्टीकृत एव संप्रति वर्ते मच्छरीरेणानेन यत्त्वं चिकीर्षसि तत्कुरु यत्र क्वापि प्रस्थापयितुमिच्छसि तत्र प्रस्थापय अत्रैव वा स्थापयेति भावः । यतः कृतज्ञस्तव भृत्यस्तव पादमूलं हित्वाऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु ॥ प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ॥ ३९ ॥ नमोऽस्तु ते महायोगिन्प्रपन्नमनुशाधि माम् ॥ यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी ॥ ४० ॥ श्रीभगवानुवाच ॥ गच्छोद्धव मयाऽऽदिष्टो बदर्याख्यं ममाश्रमम् ॥ तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ॥ ४१ ॥

किंच दाशार्हादिषु त्वया यः स्वमायया स्नेहपाशः प्रसारितः स त्वयैवात्मतत्त्वज्ञानशस्त्रेण वृक्णश्छिन्नः॥ ३९॥ एवं यद्यपि त्वया बहूपकृतं तथाऽप्येतावत्प्रार्थये इत्याह । नमोऽस्त्विति । अनुशाध्यनुशिक्षय । अनुशासनीयमाह । यथेति । मुक्तावप्यनपायिनी ॥ ४० ॥ तदुक्तमोमित्यंगीकृत्य तथापि मयाऽऽदिष्टो लोकसंग्रहार्थमेतावत्कुर्वित्याह ।

न्यत्तदीयमपि स्थलं शरणं स्वगृहमपि को नाम समीयात् गच्छेत् । यदि च तत्रापि वर्तमानस्य साक्षादनुभवः स्यात्तदा गच्छेदपि न काप्यत्र हानिः प्रत्युत तन्निदेशपालनञ्चेति भावः ॥ ३८ ॥ अन्यदाह—किञ्चेति ॥ * ॥ किञ्च—सृष्टिवृद्धये स्वमायया यः स्नेहपाशस्त्वया प्रसारितः स मया त्वदुक्तेनात्मसुबोधहेतिना वृक्णः किन्तु भवत्संबंधेनैव स मया तेषु स्वीकृत इत्यर्थः । यद्वा—मे मया दासार्हादिषु त्वन्मिलनात्पूर्वं स्नेहपाशो वृक्णश्च छिन्नोऽपि कंसवधानन्तरं स्वयमेव स्वमायया भक्तविषयकृपया सृष्टिविवृद्धये जगतः स्वस्मिंस्तादृशस्नेहप्रवृद्धये प्रसारितः। कीदृश्या मायया—आत्मसुबोधस्य ब्रह्मानुभवस्यापि हेतिना छेदकरूपयेत्यर्थः । ततः स कथं मया त्यज्यतामिति भावः ॥*॥ अत्र **विश्वनाथः**—ननु तर्हि यादवादिषु स्नेहं छित्त्वा कथं गन्तुं प्रभविष्यसि तत्राह—वृक्णश्छिन्नः । अयमर्थः—दासार्हादिषु मे द्विविधः स्नेहपाशः, तत्र यः स्वमायया त्वया सृष्टिविवृद्धये प्रसारितः दासार्हादयः स्वपुत्रपौत्रादिरूपेण पुनरभीक्ष्णं वर्धतां ततश्चास्मत्समृद्धिः सदैवाकल्पं सर्वदिग्देशव्यापिनी सर्वविजयिनी भूयादित्याभिमानिकः स्नेहपाशः स्वमायया आत्मसुबोधास्त्रेण वृक्ण एव । यस्तु त्वद्रूपगुणकथापरिचर्या माधुर्यास्वादनिबन्धनस्तेषु स्नेहपाशः स तु मे भूषणभूतो वर्तत एव, त्वया ज्ञानदीपार्पणात् यत्रैव यास्यामि तत्रैव वृष्ण्यादिसहितस्त्वद्विशिष्टामेव द्वारकां साक्षाद्द्रक्ष्यामि तत्र कृतकार्यस्त्वयाऽऽनेष्यमाण एष्यामीति ॥ ३९ ॥ प्रार्थनांतरं द्योतयति—एवमिति । मुक्तौ जीवन्मुक्तावस्थायामपि शुकसनकादिवदनिवर्त्या ॥ * ॥ **संदर्भः**—तथापि परमाभीष्टं तव कृपयैव संपत्स्यत इति पुनः सकाकु प्रणमन्प्रार्थयते—नम इति । मां प्रपन्नमनुशाधि संपादयेत्यर्थः । तस्याश्च प्रपत्तेर्वैशिष्ट्याय स्पृहयन्नाह—हे महायोगिन् महायोगबलेन सर्वत्रैव मां स्वानुभावनयाऽऽनंदयितुं प्रवृत्त इति **विश्वनाथः** ॥ * ॥ **दीपिका**—मुक्तावप्यनपायिनीत्युक्त्या तादृश्यै क्यमुक्तिर्न स्याद्यस्यां विषयाश्रयादिविवेकाभावाद्रतिर्न स्यात् किंतु प्रेमसेवोपयोगिनी स्यात् । "विष्णोरनुचरत्वं हि मोक्षमाहुर्मनीषिणः" इति पाद्मोक्तेरित्यभिप्रेतम् ॥ ४० ॥ यद्यपि मयि परप्रेमवतां किंचित्कृत्यं नास्ति तथापीति । तत्र बदर्याख्ये । मत्पादाच्च्युतं यत्तीर्थं गंगारूपं तस्य उदके । उपस्पर्शनमाचमनम् ॥ * ॥ यद्यपि तव प्रार्थिता मच्चरणरतिः सिद्धैव सा च मद्विरहेण स्वत एव वृद्धिमुपैति ततो न तदर्थं साधनान्तरमपेक्ष्यते तथापि मद्विरहेण यस्त्वमवश्यं कष्टं करिष्यसि तल्लोकशिक्षार्थं साधनानुसारेणैव कुरु न तु हठादुपतापादिना । ततश्च लोकशिक्षालक्षणमदभीष्टसंपादने कृते त्वदभीष्टमपि सेत्स्यतीत्याशयेनाह—गच्छेति सार्धचतुष्केण । तत्र गच्छेत्येवाज्ञापनमन्यत्तु तत्र गतत्वेन स्वभावेन च स्वतः सेत्स्यतीत्यनुवादमात्रम् । तत्र मत्पादेत्यादिचतुष्टयं गतत्वेन सुखनिस्स्पृहत्वादिकं स्वभावेनैवेति ज्ञेयम् । बदर्याख्यमिति—हरेः प्रस्थापनमत्र । मम मुहुर्लीलामयभूमावस्य वियोगातुरस्य स्थितौ कृच्छ्रातिशय एव स्यादित्यभिप्रायात् । ईक्षया[1] हेतुनाऽलकनंदया विधूतमशेषकल्मषं दुष्टस्पर्शनादिजं दुःखं येनेति वास्तवोर्थः । विविक्तं सुविचारितम् 'यथा त्वच्चरणम्भोजे' एत्य तत्पर्यवसानं यत्तदेवेत्यर्थः । तिस्रः कनिष्ठमध्यमोत्तमत्वेन प्रसिद्धास्तास्ता गतीरतिक्रम्य ततस्ताभ्यः प्रसिद्धाभ्योऽपि परामुत्कृष्टामेष्यसि । तां कामिति शंकिष्यतेऽ

१ अत्रान्वयानुरोधादग्रिमसार्द्धत्रयपद्यपदानामप्याशयाऽऽविष्कारो बोध्यः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईक्षयाऽलकनंदाया विधूताशेषकल्मषः॥वसानो वल्कलान्यंग वन्यभुक्सुखनिःस्पृहः॥४२॥तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः॥शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ॥४३॥ मत्तोऽनुशिक्षितं यत्ते विविक्तमनुभावयन्॥मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव॥अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परम्॥४४॥श्रीशुक उवाच॥स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः॥शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोऽप्यपक्रमे॥४५॥

गच्छेति । आदिष्टो नियुक्तः ॥ ४१ ॥ स्नानादेः पूर्वमेव मत्पादतीर्थोदकभूताया अलकनंदाया गंगाया ईक्षया । वसानः परिदधानः ॥४२॥ द्वंद्वमात्राणां शीतोष्णादिविषयाणाम् । सुशील आर्जवादिस्वभावः ॥ ४३ ॥ ते त्वया विविक्तं सुविचारितम् । तिस्रस्त्रिगुणात्मिका गतीरतिक्रम्य ॥ ४४ ॥ हरिमेधसा संसारं हरति तादृशी मेधा यस्य तेन

साविति कृपया स्वयमेवाह—मामिति । यथैवोक्तं श्रीमदर्जुनं प्रति–' सर्वगुह्यतमम् ' इत्यादौ ' मामेवैष्यसि सत्यं ते ' इति ॥ * ॥ **विश्वनाथस्तु**— भो उद्धव सर्वयादवेषु मत्पारिकरेषु मध्ये मत्तुल्यत्वात्त्वमेव मत्प्रतिमूर्तिरसि " नोद्धवोण्वपि मन्यूनो यद्गुणैर्नार्दितः प्रभुः । अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ॥ " इति मदुक्तेर्यत्कृत्यमहं स्वेन साधयामि तत्त्वया साधयितुं शक्नोम्यत एव पुरा व्रजभूमिं प्रति त्वमेव स्थापितो यथा तथैव संप्रति त्वां बदरिकाश्रमं प्रस्थापयितुमिच्छामि । तत्र हि मदंशश्रीनरनारायणादिमहामुनीन्द्रा मां दिदृक्षंते मिथिलादिभूतलप्रदेशतलवैकुंठादीन्पूर्वं गतवता मया तत्रतत्रत्याः श्रुतदेवबहुलाश्वबलिवैकुण्ठनाथाद्या मां दिदृक्षवः स्वदर्शनदानेन स्वीयज्ञानाद्युपदेशेन च ते कृतार्थीकृतास्तथाऽधुना बदरिकाश्रमो गन्तुं न शक्यते । सपादशतवर्षरूपस्वावतारमर्यादामयस्य समाप्तीभूतत्वादतोऽधुना ' प्रपन्नमनुशाधि माम् ' इति यदि मां प्रार्थयसे तर्हि संप्रतीयमेव ममाज्ञेति मनसैव संलप्य प्रकटमाह—गच्छेति । हे उद्धवेति—त्वमन्वर्थसंज्ञत्वात्सदैव सर्वजनोत्सवप्रदो भवस्येवाधुना तु स्वनिष्ठज्ञानवैराग्यादिस्वशक्तिप्रदानेनापि त्वं तत्र जनोत्सवविशेषप्रदोपि मया कृत इति भावः ॥ ४१ ॥ स्नानादेरिहादिनोपस्पर्शग्रहः । विधूताशेषकल्मषो निरस्ताखिलपापः । ईक्षया दर्शनेन । ' दृष्ट्वा जन्मशतं पापम ' इत्युक्तेः ॥ * ॥ ईक्षया स्वकर्तृकावलोकनेनैवालकनन्दाया विधूतं खण्डितमशेषकल्मषं येन सः ' तेष्वास्ते ह्यवभिद्धरिः ' इति नत्रमोक्तेरुद्धवस्य सर्वे वैष्णवाग्रगण्यत्वादत्राशेषमिति पदमुपन्यस्तम् ॥ ४२ ॥ ० ॥ * ॥ द्वन्द्वाः सुखदुःखादयः ॥ ॥ ४३ ॥ यच्छास्त्रसारलक्षणं ज्ञानं तत् । अनुभावयन् मुहुश्चिन्तयन् । मद्धर्मोऽसंगत्वलक्षणस्तत्र निरतः । ततस्ताभ्यो गतिभ्यः । यद्वा—मत्तोऽनुशिक्षितं श्रवणसंपादितं विविक्तं युक्तिभिर्मननेन संभावितं तन्मय्यावेशितवाक्चित्तोऽनुभावयन्निदिध्यासनं कुर्वन् भव ततोऽपरोक्षाप्रतिबद्धबोधेन तिस्रो गतीस्त्रिगुणोपाधीनतिव्रज्याऽपबाध्य तेभ्यः परं मामेष्यसीति ॥ * ॥ मत्तः सकाशाद्यद्भक्तिज्ञानवैराग्यादिकमनुशिक्षितं तत एव विविक्तं विवेकविशेषमनुभावयन् तत्रत्यश्रीनरनारायणादींस्त्वां पृच्छत इति शेषः । अनुवर्णनेनानुभवविषयं कारयन् मय्यावेशितवाक्चित्तत्वादेव मद्धर्मा मन्निष्ठा ये बुद्धिप्रतिभासर्वज्ञत्वसर्वशक्तित्वादयस्तन्निरतस्तत्तद्युक्तो भवेति । तत्तत्समाधानयोग्यं तीर्थमाशीर्वादः कृतः । ततश्च तिस्रस्त्रिगुणात्मिका भूतिप्रकटलीलायाः प्रपंचाप्रपंचमिश्रत्वात गतीस्तत्र प्रसिद्धस्थानानि तुच्छतया परित्यज्येति लोकोक्तिः । तत्रत्यान्मुनीन् गुणत्रयगतीरतिक्रान्तान्कृत्वेत्यर्थः । निष्पादितमदादेशो मामेष्यसि योगबलेन मयैवान्विष्यमाणस्त्वमत्रैव मत्समीपमागमिष्यसीत्यर्थः । यद्वा—ततः श्रीबदरिकाश्रमवासतपसोऽनंतरं मां नित्यविहारिणं श्रीगोवर्धनोपकण्ठे श्रीकुसुमसरोवरे एष्यसि मन्नित्यलीलायां प्रवेक्ष्यसीति तत्त्वम् । तच्च स्कान्दीयश्रीमद्भागवतीयमाहात्म्ये वर्णितमस्ति–" साधनभूमिर्बदरी व्रजता कृष्णेन मंत्रिणे प्रोक्ता । तत्रास्ते स तु साक्षात्तद्वयुनं ग्राहयँल्लोकान् ॥ फलभूमिर्व्रजभूमिर्दत्ता तस्मै पुरैव सरहस्या । फलमिह तिरोहितं सदा तदिहैव स उद्धवो लक्ष्यः ॥ गोवर्धनगिरिनिकटे सखीस्थले यद्रजःकामः । तत्रत्याऽङ्कुरवल्लीरूपेणास्ते स उद्धवो नूनम् ॥ आत्मोत्सवरूपत्वं हरिणा तस्मै समर्पितं नियतम् । तस्मात्तत्र स्थित्वा कुसुमसरःपरिसरे सवज्राभिः ॥ " इति कालिंद्या श्रीकृष्णपट्टराज्ञीभ्यस्सवज्रनामभ्य उक्तम् ॥ ४४ ॥ प्राप्तात्मतत्त्वेनाद्वन्द्वपरः ॥ * ॥ हरिमेधसा प्रेम्णा मनो हरंती मेधा यस्य तेन अपक्रमे ततोऽपसृतिसमयेऽद्वन्द्वपरोऽपि प्रेममूलकशोकमोहादिद्वन्द्वविशिष्टोऽभूदित्यर्थः ॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः ॥ कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनःपुनः ॥ ४६ ॥ ततस्तमंतर्हृदि संनिवेश्य गतो महाभागवतो विशालाम् ॥ यथोपदिष्टां जगदेकबंधुना ततः समास्थाय हरेरगाद्गतिम् ॥ ४७ ॥ य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितम् ॥ कृष्णेन योगेश्वरसेवितांघ्रिणा सच्छ्रद्धयाऽऽसेव्य जगद्विमुच्यते ॥ ४८ ॥

श्रीकृष्णेन । अद्वंद्वपरोऽपि सुखदुःखविनिर्मुक्तोऽपि । अपक्रमे निर्गमनसमये ॥ ४५ ॥ किंच सुदुस्त्यजः स्नेहो यस्मिंस्तेन वियोगात्कातरो भीतोऽत एव तं परिहातुमशक्नुवन्नातुरोऽतिविह्वलः सन्कृच्छ्रं कष्टं ययौ प्राप । ततश्च भर्तृपादुके तेनैव कृपया दत्ते मूर्ध्नि बिभ्रदतिनिर्बंधरूपया तदाज्ञया तं पुनःपुनर्नमस्कृत्य ययौ । अत्र च । "पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः" इत्यादितृतीयस्कंधोपक्रमोक्तानुसारेण बदरिकाश्रमं गच्छन्भगवतः प्रभासयात्रामुपश्रुत्य शनैः पृष्ठतो गतः सन्नुपसंहतनिजकुलं भगवंतमेकांते दृष्ट्वा तत्कालप्राप्तेन मैत्रेयेण सह पुनः कृपया भगवतोपदिष्टं तत्त्वमाकलय्य तदाज्ञातो ययाविति द्रष्टव्यम् ॥ ४६ ॥ विशालां बदरिकाश्रमं गतः सन्हरेर्गतिमगात् । कथंभूताम् । तेनैव जगदेकबंधुना यथोपदिष्टाम् "तदाऽमृतत्वं प्रतिपद्यमानो मयाऽऽत्मभूयाय च कल्पते वै ॥ अतिव्रज्य गतीस्तिस्रो मामेष्यति ततः परम्" इत्येवमुक्तप्रकाराम् ॥ ॥ ४७ ॥ आनन्दसमुद्रो भगवद्भक्तिमार्गस्तस्मिन्संभृतमेकीकृतमेतद्यः सच्छ्रद्धया आसेव्य ईषदपि सेवित्वा वर्तते स विमुच्यत इति किं वक्तव्यम् । तत्संगाज्जगदपि विमुच्यत

प्रेमाधिक्यमाह–किंचेति । अत एव वियोगकातरत्वादेव । तं श्रीकृष्णम् । तेनैव श्रीकृष्णेनैव । अतिनिर्बन्धोऽतिहठः । तदाज्ञया श्रीकृष्णाज्ञया । तं श्रीकृष्णम् । इह पूर्वोक्तविरोधपरिहारमाह–अत्र चेति । इहापि तृतीयस्कन्धानुसरणेनैव व्याख्येयमन्यथा विरोधो दुष्परिहरः स्यादिति ॥ * ॥ ततश्च भर्तृपादुके तेनैव कृपया दत्ते मूर्ध्नि बिभ्रत् अतिनिर्बंधरूपया तदाज्ञया तं पुनःपुनर्नमस्कृत्य ययौ । तत्र गच्छन्नपि तृतीयस्कन्धोपक्रमोक्तकथानुसारेण पुनरपि परावृत्य भगवंतमेकान्ते दृष्ट्वा संदिग्धार्थान्पृष्ट्वा तदुत्तराधिगतसमस्तभगवल्लीलातत्त्वासिद्धान्तः 'विद्रावितो मोहमहांधकारः' इत्याद्युक्त्वा पुनरपि तदाज्ञया ययाविति द्रष्टव्यम् ॥ ॥ ४६ ॥ ततो गमनोत्तरम् । तं श्रीकृष्णम् । स्वयं भगवतोऽवाप्तभगवत्तत्त्वत्वान्महाभागवत उद्धवः । तपो निदिध्यासनम् 'तप–आलोचने' धातुः । गतिं स्वरूपस्थितिम् । अगात्प्राप ॥ * ॥ हरेर्गतिं तदीयनित्यप्रकटप्रकाशद्वारकाख्यं श्रीव्रजं वा धामागात् ॥ ४७ ॥ न केवलमेतज्ज्ञानमुद्धवस्यैव फलप्रदं किन्त्वन्येषामपि तत्सेविनामित्याह–य इति । सच्छ्रद्धया भक्तियुक्तश्रद्धया । इत्यर्थ इति–तत्संगेनैतज्ज्ञानानवरतास्थित्या सर्वो जनः संसारं तरतीति भावः ॥ * ॥ आनंदसमुद्रो भगवद्भक्तियोगस्तेन संभूतं सम्यग्धृतम् एतद्यः सच्छ्रद्धया आसेव्य ईषदपि सेवित्वा वर्तते स विमुच्यत इति किं वक्तव्यम्, तत्संगेन जगदपि विमुच्यत इति भावः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारम् ॥ अमृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि ॥४९॥ इति श्रीमद्भागवते महापुराण एकादशस्कंध उद्धवबदरीप्रवेशो नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ राजोवाच ॥ ततो महाभागवत उद्धवे निर्गते वनम् ॥ द्वारवत्यां किमकरोद्भगवान्भूतभावनः ॥ १ ॥ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः ॥ प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् ॥ २ ॥

इत्यर्थः ॥ ४८ ॥ एवं कृतोपदेशं जगद्गुरुं प्रणमति । भवभयमिति । भवः संसारो भयं च जरारोगादिनिमित्तं तदुभयं निवृत्तानां प्रवृत्तानां च भृत्यवर्गाणां यथायोग्यमपहंतुं योऽमृतद्वयमुपजह्रे उद्धृतवान् । तदेवाह । वेदसारमेकम् । किं तत् । ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं च । भृंगवत् भृंगो यथा पुष्पमकोपयन्नेवामृतमुपहरति तथा स्वयं स्वकृतवेदानुसारेणैवोदधितश्चैकं तच्चोभयं यथायथं भृत्यवर्गानपाययत्तं नतोऽस्मीति ॥ ४९ ॥ येनानुकंपितं विश्वमुद्धवप्रश्ननिर्णयैः ॥ तं वंदे परमानन्दं नंदनंदनरूपिणम् ॥ १ ॥ इति श्रीमद्भागवत एकादशस्कंधे श्री० टीकायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥छ॥ त्रिंशे तु प्रागुपक्षिप्तमौसलच्छलतो हरिः ॥ स्वधाम गंतुमन्विच्छन्संजहार निजं कुलम् ॥ ॥ १ ॥ विरागाय पुरा घोरमुपक्षिप्तं हि मौसलम् । कथावसाने तत्रैव विशेषं परिपृच्छति ॥ २ ॥ तत इति त्रिभिः ॥ १ ॥ ब्रह्मशापोपसंसृष्टे कले सति । अयं भावः ।

भक्तिमार्गे ज्ञानामृतस्यैकीकृतत्वं सर्वत्र कृष्णैकस्फूर्त्या तद्भावभावितत्वम् ॥ ४८ ॥ कृत उपदेशो येन तम् । जगतां गुरुं श्रीकृष्णं मुनिः श्रीशुकः प्रणमति । रोगादीहादिना मरणग्रहः । निवृत्तानां संसारं, प्रवृत्तानां रोगादि । तदेवामृतद्वयमेव । निगमकृद्वेदविभागकर्ता । यथाश्रुतार्थस्वीकारे तु " अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा " इति श्रुतिव्याकोपः स्यादिति ॥ * ॥ **दीपिका**–भवभयमित्यर्द्धेन कृष्णावतारचरितमुद्दिश्यते, अमृतमित्यर्द्धेन त्वजितावतारचरितम् । एवं यद्यप्युभयमपि नमनीयं तथापि कृष्णसंज्ञं नतोऽस्मीत्युक्त्या तस्यैव स्वयं भगवत्त्वेन स्वोपास्यत्वं व्यंजितम् । तदेवामृतद्वयमेव । आद्यं सर्वावतारावतारिमूलरूपम् । श्रीस्वामिपादा अपि तस्यैव स्वोपास्यत्वं दर्शयितुं तथैव मंगलमासज्जयंति–येनेति । नंदनंदनरूपिणमित्येव सार्वत्रिकः पाठः । 'श्रीकृष्णं नररूपिणम्' इति तु मत्सरकल्पितः । " येनानुकम्पितं विश्वं कीर्तनामृतसंप्लवैः । तं वन्दे कृष्णचैतन्यं पामरोद्धारकारिणम्॥"॥*॥**सन्दर्भस्तु**–एकोवतारस्तावद्भवभयमित्यादिलक्षणः अन्यस्त्वमृतादिलक्षणः, यद्यप्येवमेव गुणत्वेन द्वयमपि नमनीयं तथाप्याद्यं प्रथमं कृष्णसंज्ञं नतोस्मीति तदा तस्यादरो दर्शितः। युक्तमेव च तस्यतस्य तदिति तं विशिनष्टि–पुरुषं सर्वादिमित्यर्थः " पूर्वमेवाहमिहासम् " इति, " तत्पुरुषस्य पुरुषत्वम् " इति श्रुतेः । ऋषभं श्रेष्ठं चेति ॥ * ॥ **विश्वनाथस्तु**–सर्वांते जगद्गुरुं प्रणमति–भवभयमिति । वेदेभ्यः सारमुपजह्रे उद्धृतवान् । नन्वन्ये मुनयो दर्शनकर्तारः वेदसारमुपजह्रुरेव, सत्यं, ते दुर्गमस्य वेदस्य तात्पर्यं न सम्यगभिजानंतीति न तद्वाक्यं विश्वस्यते, अयं भगवांस्तु न तथेत्याह–निगमकृदिति । यो हि यच्छास्त्रस्य कर्ता स एव खल्वतिदुर्गमस्यापि तस्यार्थं जानात्येवेति भावः । भृंगवदिति–वेदपुष्पोद्यानस्य मकरंदमित्यर्थः । भृत्यवर्गान् अपाययत् अभक्तानसुरांश्च वंचयामासेत्यर्थः । दृष्टान्ताभिप्रायेणाह–अमृतमुदधितश्चोदधिसारमित्यर्थः । मोहिनीरूपेण देवानेवापाययत् असुरान् वंचयामासैव तं नतोस्मि ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्ध एकोनत्रिंशोऽध्यायः ॥ २९ ॥ प्रागुपक्षिप्तं प्रथमाध्यायकथितं यत् मुसलसंभववृत्तं तस्य छलेन व्याजेन (१) । विरागाय मुसलजनाशभयेन वैराग्यं कर्तुं तत्रैव मुसलजनाशशाप एव । विशेषं कथं भगवान्स्वकुलं संहृत्य स्वधाम गत इत्येवंरूपं संशयम् (२) । ततो भगवदुपदेशानन्तरम् । भूतभावनः सर्वपालकः ॥ * ॥ ० ॥ १ ॥ प्रश्नाशयमाह–अयं भाव इति । यद्यपि नहीति तथापि यादवत्वेत्यादि । सोऽपि शापोऽपि । यतो मान्योऽतो हेतोः । तत्ततश्शापस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्याकृष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नम्॥यच्छ्रीर्वाचां जनयति रतिं किं नु मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ॥३॥ ऋषिरुवाच ॥ दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान् ॥ दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदम् ॥ ४ ॥

भगवति न हि शापः प्रभवति । यादवत्वानुकरणाच्च सोऽपि कथंचिन्मान्यः अतः किमकरोदिति । तदेतदुक्तं कथमत्यजदिति । सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणम् ॥ २ ॥ तत्प्रपंचयति । प्रत्याकृष्टुमिति । यस्मिन् रूपे लग्नं नयनं प्रत्याकृष्टुं परावर्तयितुमबला न शेकुः । यच्च कर्णाविष्टं कर्णरंध्रेण प्रविष्टं सत्सतामात्मनि लग्नं लिखितमिव तिष्ठति ततो न सरति न निर्गच्छति । यस्य श्रीः शोभा संकीर्त्यमाना कवीनां वाचां रतिमुल्लासविशेषं जनयति । तेषां मानं जगत्पूज्यतां जनयतीति किं नु वक्तव्यम् । यच्च विष्णो रूपं जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा युधि मृतास्तत्साम्यं सारूप्यमीयुः प्राप्तास्तत्केन रूपेणात्यजादित्यन्वयः ॥ ३ ॥ दिवि सूर्यपरिवेषादीन् भुवि भूकंपादीनंतरिक्षे दिग्दा

मान्यत्वादेव कथमत्यजदित्येतदुक्तम् । उपलक्षणत्वादेव सर्वेंद्रियप्रियमित्यर्थः । अत्यजदंतरधात् ॥ * ॥ कथमत्यजत् नात्यजदेवेत्यर्थः । इति स्वहार्दमपि स्पष्टीकृतम् । तत्र हेतुः–सर्वप्रेमास्पदत्वेन परमानन्दरूपत्वात् । सर्वपदेनात्मारामादयोपि गृह्यंत इति **संदर्भः** ॥ * ॥ **विश्वनाथस्तु**–ब्रह्मशापेनोपसंसृष्टे उपसंहृते साति सर्वेषां नेत्राणां प्रेयसीमतिप्रियां तनूं कथमत्यजत् ॥ * ॥ केषांचिन्मुनीनां मते यत्तस्य तनुत्यागः श्रूयते स कथं संभवेन्नैव संभवेदित्यर्थः । तत्तनोः सच्चिदानन्दरूपत्वेन तत्त्यागासंभवात्, विप्रः खलु विप्रत्वं स्वीयं कथं त्यजेदित्युक्ते विप्रत्वं नैव त्यजेदिति लभ्यते । यद्वा–सविशेषणे हि विधिनिषेधौ ‘ सति विशेष्ये बाधे विशेषणमुपक्रमते ’ इति न्यायेन तनूमिति विशेष्यपदे बाधात् प्रेयसीमिति विशेषणपद एवान्वितस्त्यागोऽयं ज्ञेयः । सजलकलशं पांथस्त्यजतीत्युक्ते भारवहनश्रमान्निर्जलीकृतस्य कलशस्य ग्रहणं यथा प्रतीयत इति **दीपिका** ॥ * ॥ कथमत्यजत् लौकिकदृष्ट्या मायिकचारित्रं किमप्यकरोदेव तद् ब्रूहीत्यर्थः ॥ २ ॥ तत् सर्वेन्द्रियप्रियत्वम् । परावर्तयितुं व्यावर्तयितुम् । यत्तद् वपुः । आत्मनि मनसि । ततो मनसः । युधि महाभारते । मृता भीष्मादयः । तद् वपुः ॥ * ॥ **दीपिका**–तत् तनोः सर्वेन्द्रियप्रेष्ठत्वं प्रपञ्चयति–त्यागाऽसंभवे हेत्वभिधानेन विस्तारयति । अबला अत्र गोप्यः “ गोपीनां परमानंद आसीद्गोविन्ददर्शने । क्षणं युगशतमिव यासां येन विनाऽभवत् ॥ ” इत्यादिभिस्तासामेव तथा प्रसिद्धेः । ‘ प्रणयरशनया धृतांघ्रिपद्मः ’ इति विरोधात्तद्रूपं कथमन्यथा कर्तुं शक्यत इत्येको हेतुः । सतामात्मारामगुरूणामात्मनि ब्रह्मानन्दनिमग्नेपि मनसि तत्त्यागे संभवति “ चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ” इति न्यायेन तत उत्थाय चित्तं न लग्नं स्यादिति द्वितीयो हेतुः । संकीर्त्यमाना इत्यर्थादध्याहृतम् । ‘ किन्तु मानम् ’ इत्येव पाठः अग्रे तथा व्याख्यानात् । कवीनां व्यासादीनामित्यन्यथा तेषां नश्वरकीर्तनेऽकवित्वं प्रसज्जेतेति तृतीयो हेतुः । सर्वतोपि गारिष्ठं तुरीयं हेतुमाह–यच्च जिष्णोरथमित्यादिना तत्साम्यम् । “ मत्सेवया प्रतीतं ते सालोक्यादिचतुष्टयम् । नेच्छंति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतम् ॥ ” इत्यादिनाऽकालविप्लुतत्वाभिधानात्तद्रूपस्य तथात्वं कथं संभाव्येतेति कथमत्यजदिति तत्त्वविचारे तदसंभवात्केनापि रहस्येन भाव्यमिति भावः ॥ * ॥ **विश्वनाथोपि**–तनोः त्यागेऽनुपपत्तीर्दर्शयति–अबला नित्यप्रेयस्यो रुक्मिण्याद्याः । सतां भवद्विधानामात्मारामाणामात्मनि लग्नं लिखितमिव तिष्ठति ततो न सरति । साम्यं सायुज्यं प्राप्ता अतस्तद्वपुर्गुणातीतं साक्षाद्ब्रह्मैव भवेत् । न हि गुणमयवस्तुदर्शनेन सायुज्यं भवेत् । अत एव श्रुतिभिरुक्तम्–“ निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोऽपि ययुः स्मरणात् ” इति । नापि गुणमयं सतामात्मलग्नं तिष्ठेत्, नापि नित्यप्रेयस्यो लक्ष्म्याद्याह्लादिनीशक्तयः प्राकृते खल्वासज्जन्ति तस्मात्तद्वपुस्त्यागं वर्णयन्तो मुनयस्त्वन्मायामोहिता एवेति ॥ ३ ॥ आदिना धूमकेत्वादीनाम्, द्वितीयेन कूपादिशब्दानाम्, तृतीयेन संध्याविकृत्यादीनां च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः ॥ मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ॥ ६ ॥

हादीन्महोत्पातान् स्वयमेवोत्पादितत्वादन्यैर्दुष्प्रतीकारान् ॥ ४ ॥ यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः । नोऽस्माभिः ॥ ५ ॥

ग्रहः । अन्यैः स्वेतरैः । दुष्प्रतीकारान्व्यावर्तयितुमशक्यान् । इदं वक्ष्यमाणम् ॥ * ॥ ० ॥ ४ ॥ घोरा दुःखप्रदाः । इत्यर्थ इति—यथा ध्वजदर्शनेन नृपत्याद्यागमनं ज्ञायते तद्वदेतैरुत्पातैर्मृत्योरागमनं ज्ञायत इति भावः । अत्र द्वारकायाम् । अपिना किमधिकमित्युच्यते ॥ * ॥ अत्रांतरे भगवान् किञ्चित्पराममर्श—कुरुक्षेत्रयात्रायां नानादिग्देशतो मां मेलितुमागतानां लोकानां मध्य एवालक्षित आगत्य कलिर्मां प्रावोचत्—प्रभो भुवि मदधिकारो हि कदा भविष्यतीति, मयोक्तम्—मल्लीलासमाप्त्यनंतरमेवातो मदंतर्द्धानलक्षणानंतरमेव मया दत्ताधिकारः कलिः पृथिव्यामधिकरिष्यति । किञ्च—मदवतारे संप्रति धर्मोऽयं कृतयुगतोप्याधिक्येन चतुष्पादेव वर्तते धर्मस्यास्यैतादृशप्राबल्ये सति कलिः कथमधिकर्तुं शक्नुयात्, तस्य हि पादैकशेषधर्मे सत्येवाधिकारयोग्यतेति नियमः । न च ‘ निमित्तापाये नैमित्तिकस्याप्यपायः ’ इति न्यायेन मत्प्राकट्याभावे सति तादृशधर्मस्याप्यपाय इति वाच्यम्, सर्वजगत्पाविन्या महाकीर्तिर्द्वेव्यास्सर्वत्रैव जागरूकत्वेनैव स्थितत्वात् । किञ्च—मदनुकूलप्रतिकूलतटस्थलोकानां मध्ये प्रतिकूला मया संहृता एव सांप्रतं रामावतारेणेव सर्वलोकसमक्षमेव स्वधामवासिभिः सार्द्धं वैकुण्ठारोहणे सति अनुकूला द्विगुणितभक्तयो भविष्यन्ति । अत्यनुकूलास्तु परमौत्कण्ठयवन्तः शतगुणितप्रेमाणस्तटस्था अपि परमाश्चर्यदर्शनेन भक्ता भविष्यन्तीति धर्मः प्रत्युत वार्द्धिष्यत एव । कथं कलेः प्रभुतालेशोऽपि संभाव्यस्तस्माद्धर्मसंकोचनार्थमधर्ममतं केनापि प्रकारेणोत्थापयिष्यामि । तत्रायं प्रकारः—स्वीयलीलापरिकरैर्यदुभिः सह द्वारवत्यामेव यथास्थितमेव विराजिष्ये, किन्तु प्रापञ्चिकसर्वलोकचक्षुर्भ्यस्तिरोभूयैव तथा प्रद्युम्नसाम्बादिषु मन्नित्यपरिकरेषु तत्तद्विभूतयो ये देवाः कंदर्पकार्तिकेयादयः प्रवेशिता वर्तंते तानेव योगबलेन तत्तद्देहतोऽलक्षितमेव निष्कास्य प्रद्युम्नादित्वेनैवाभिमन्यमानान्सर्वलोकलोचनेष्वपि तथैव भातान्कृत्वा तैरन्यैश्च द्वारकावासिभिः सार्द्धं प्रभासं गत्वा दानध्यानमधुपानादिकं कारयित्वा तानधिकारिकभक्तान्स्वस्वाधिकारेषु स्वर्ग एव प्रस्थाप्य तदन्यैर्द्वारकावासिजनैः सह दाशरथिस्वरूप इव वैकुंठं प्रस्थास्ये । किन्तु—लोकलोचनेषु मायादोषं प्रवेश्यैव येन लोका एवं मंस्यन्ते—द्वारावत्याः सकाशान्निष्क्रम्य सर्वे यदुवंश्याः प्रभासं गत्वा ब्रह्मशापग्रस्ता मधु पीत्वा मत्ताः परस्परप्रहता देहांस्तत्यजुः, परमेश्वरोपि सरामस्त्यक्तमानुषदेह एव स्वधामारुरोह, तस्मान्मानुषशरीरमिदमनित्यं मायिकमित्येके वदिष्यन्ति । मन्मानुषशरीरावज्ञा हि महापराध एव । तदुक्तं मयैव—“ अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ” इति । तत्फलञ्चोक्तम्—“ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः । राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिताः ॥ ” इति । यदि ते भक्तास्तदा मोघाशाः स्युर्मत्प्राप्त्याशास्तेषां मोघा यदि ते कर्मिणस्तदा मोघकर्माणस्तेषां स्वर्गो न भवेत्, यदि ते ज्ञानिनस्तदा मोघज्ञानास्तेषां मोक्षो न भवेदिति यतस्ते राक्षसीमिति । अन्ये तु परमेश्वरेणापि गृहीतस्य सर्वस्यापि शरीरस्य दृश्यत्वादनित्यमेव दिव्यमानुषदेहयोश्चिरंतनत्वाचिरंतनत्वाभ्यामेव भेद इति । अपरे तु यथैव कुरुवंशो निपातितस्तथैव सस्ववंश एव कृष्णः प्रभासे निपपातेत्येवमधमविज्ञमानिदुर्जनकुमतश्रवणजल्पनानुमोदनप्रचारणैर्धर्मः सद्य एव पादैकशेषो भविष्यति, यथा धवलोज्ज्वलमपि शंखं पित्तादिदोषोपहतचक्षुषो मलिनपीतमेव पश्यंति तथैव सच्चिदानंदमयीमपि मन्निर्याणलीलां मायादोषोपहतचित्तचक्षुषः प्रद्युम्नादिसर्वपरिकरसहितमद्देहत्यागरुक्मिण्यादिमहिषीवह्निप्रवेशादिदुरवस्थामयीं प्राकृतीमेव द्रक्ष्यन्ति निश्चेष्यन्ति च, न केवलं प्राकृताः किन्तु मदंशा अर्जुनादयोपि तथैव । वैशंपायनपराशरादयो मुनयोऽपि स्वस्वसंहितासु वर्णयेयुरपि कलिप्राबल्यपरंपरासिद्ध्यर्थं कलौ जनिष्यमाणेन शंकरेण मद्भक्तेनापि वेदान्तभाष्यं तथा प्रपंचयिष्यते यथा तच्छास्त्रमधीत्याधीत्य सूक्ष्मो यः कारणोपाधिर्मायाख्यानेकशक्तिमान्स एव भगवद्देह इति भाष्यकृतां मतमिति हतबुद्धयो व्याख्यास्यन्त इति विभाव्य महोत्पातानुत्पाद्य सशंकससंभ्रममाह—एते घोरा इति । न चात्र भगवतो नैर्घृण्यमाशंकनीयं तद्भक्तेतराणां लोकानां प्राचीनदुरदृष्टविपाकसमय एव तत्तत्कुमतपथप्रादुर्भावको भवेत् । भगवदिच्छा तु सदसत्कर्मबोधेपि निमित्तमस्त्येवान्यथा बुद्धाद्यवतारस्यापि नैर्घृण्यं प्रसज्जेत । भगवता तु स्वभक्तजनसंशयदूरीकरणार्थं स्वलीलातत्त्वसिद्धान्त उद्धवं प्रत्युक्त एव । तदुक्तमुद्धवेनैव—“ इत्यावेदितहार्दाय मह्यं स भगव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्परः । आदिदेशारविन्दाक्ष आत्मनः परमां स्थितिम् ॥ ” इति । आत्मनः स्वस्य स्थितिं व्यवसितिं लीलापरिपाटीश्च द्वारकादिधामनित्यानिवासश्चेति तत्रार्थः । अत एवांतर्द्धानलीलातत्त्वञ्चोक्तम्–“ प्रदर्श्यातप्ततपसाम वितृप्तदृशां नृणाम् । आदावांतरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥ ” इति । लोकानां लोचनानि निमग्नानि यत्र तादृशं बिम्बं स्वदेहमादायैवांतरधादिति तत्रार्थः । न च बिम्बपदस्यार्थान्तरं कल्प्यं यतस्तदुत्तर पद्येषु ‘ यन्मर्त्यलीलौपयिकम् ’ इति ‘ यद्धर्मसूनोर्बत राजसूये ’ इत्यादिषु वपुरित्येवार्थो दृष्टः । अत एव ‘ कृष्णद्युमणिनिम्लोचे ’ इति कृष्णांतर्द्धानस्य सूर्यास्तमयेनोपमा । मायादोषोपहतचक्षुषः कुमतमालंबिर इत्यादि तेनैवोक्तम्–“ देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः । भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ॥ ” इति । ये मायादोषोपहतचक्षुषो ये च बहिर्मुखा अन्यदसत्कर्मवादकुमतमाश्रितास्तेषां वाक्यैः कृष्णो देहं तत्याजेति कृष्णः स्वकृतमधर्मफलं प्रापेति भाषणैर्धीर्न भ्राम्यति, कस्य आत्मनि हरौ भगवति उप्तं निक्षिप्तं चित्तं येन तस्य भक्तजनस्येति तत्राथः । अथ भगवतो विग्रहनामधामलीलापरिकराणां नित्यत्वे प्रमाणानि–“ गोविन्दं सच्चिदानंदविग्रहं वृन्दावनसुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि ” इति गोपालतापनी श्रुतिः । “ वासुदेवः संकर्षणः प्रद्युम्नोऽनिरुद्धोहं मत्स्यः कूर्मो वराहो नरसिंहो वामनो रामो रामो रामः कृष्णो बुद्धः कल्किरहं सहस्रधाहममितोहमनंतोऽहं नैव ते जायंते म्रियन्ते नैषामज्ञानबंधो न मुक्तिः सर्व एव ह्येते पूर्णा अजरा अमृताः परमाः परमानंदाः ” इति माध्वभाष्यधृतश्रुतिः । “निर्दो षपूर्णगुणविग्रह आत्मतंत्रो निश्चेतनात्मकशरीरगुणैश्च हीनः । आनंदमात्रमुखपादसरोरुहादिः ” इति ध्यानविदुपनिषत् “ सद्रूपमद्वयं ब्रह्म मध्याद्यन्तविवार्जितम् । स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् ॥ ” इति वासुदेवोपनिषत् । “ नंदव्रजजनानन्दी सच्चिदानंदविग्रहः ” इति ब्रह्मांडपुराणम् । “ सर्वे नित्याश्शाश्वताश्च देहास्तस्य परात्मनः । हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥ ” इति महावाराहम् । “ युगेयुगे विष्णुरनादिमूर्तिमानास्थाय शिष्टं परिपाति दुष्टहा” इति नारसिंहम् । “यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्वस्माद्बहिष्कार्यः श्रौतस्मार्तविधानतः ॥ मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत् । ” इति बृहद्वैष्ण वम् । “न भूतसंघसंस्थानो देहोऽस्य परमात्मनः ” इति, ‘ अमृतांशोऽमृतवपुः ’ इति महाभारतम् । अमृतं मरणवर्जितं वपुर्यस्येति श्रीशंकराचार्यव्याख्या च प्रसिद्धा । ‘ शाब्दं ब्रह्म दधद्वपुः ’ इति, “ यत्तद्वपु र्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्वपुः ” इति, ‘ बबंध प्राकृतं यथा ’ इति, “ सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः ” इति, ‘ स्वेच्छामयस्य न तु भूतमयस्य ’ इति, ‘ त्वय्येव नित्यसुखबोधतनौ ’ इति, “ श्रीभा गवतं च नाम्नां नित्यत्वे ओमस्य जानन्तो नाम चिद्विविक्तना ” इति श्रौतमंत्रः । “ बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ” इति वर्तमाननिर्देशश्च । यत्तु–“ अनामरूप एवायं भगवान्हारिरीश्वरः । अक र्तीति च यो वेदैः स्मृतिभिश्चाभिधीयते ॥ ” इति पाद्मादिवचनं तत्र वासुदेवाध्यात्मवाक्यमेव समाधायकन् । “ अप्रसिद्धेस्तद्गुणानामनामाऽसौ प्रकीर्तितः । अप्राकृतत्वाद्रूपस्याप्यरूपोऽसावुदीर्यते ॥ ” इति संबंधेन प्रधानस्य हरेर्नास्त्येव कर्तृता, “ अकर्तारमतः प्राहुः पुराणं तं पुराविदः ” इति । एवम्–“ उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना ” इत्यत्र रूपं मूर्तिः शैली दारुमयी लोहमयी वा, तस्य कल्पना रामकृष्णाद्याकार त्वेन निर्माणमिति तत्रार्थो ज्ञेयः । धाम्नां नित्यत्वे–“ तासां मध्ये साक्षाद्ब्रह्मगोपालपुरी हि ” इति गोपालतापनी श्रुतिः । “ नित्यां मे मथुरां विद्धि पुरीं द्वारवतीं तथा ” इति पाद्मम् । ‘ वनं वृंदावनं तथा ’ क्वचिदित्यपि पाठः । गुणानां नित्यत्वे–“ इमे चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥ ” इति । लीलानां नित्यत्वे–“ एको देवो नित्यलीलानुरक्तो भक्त व्यापी भक्तहृद्यान्तरात्मा ” इति पिप्पलादशाखायां पुरुषबोधनी श्रुतिः । ‘ जयति जननिवासः ’ इत्यस्य ‘ दोर्भिरस्यन्न धर्मम् ’ इति । ‘ व्रजपुरवनितानां वर्धयन्कामदेवम् ’ इति वर्तमानप्रयोगश्च, “ कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेवच । नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥ ” इति च । लीलापरिकराणां नित्यत्वे–“ यथा सौमित्रिभरतौ यथा संकर्षणादयः । तथा तेनैव जायन्ते निजलोकाद्यदृच्छया ॥ एते हि यादवाः सर्वे मद्गुणा एव भामिनि । सर्वथा मत्प्रिया देवि मत्तुल्यगुणशीलिनः ॥ ” इति पाद्मम् । अत एव “ नित्यावतारो भगवान्नित्यमूर्तिर्जगत्पतिः । नित्यरूपो नित्यगन्धो नित्यैश्वर्यसुखानुभूः ॥ ” इति सर्वमनवद्यम् ॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः ॥ वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ॥ ६ ॥ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः ॥ देवताः पूजयिष्यामः स्नापनालेपनार्हणैः ॥ ७ ॥ ब्राह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयम् ॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८ ॥ विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमम् ॥ देवद्विजगवां पूजा भूतेषु परमो भवः ॥ ९ ॥ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥ १० ॥ तस्मिन्भगवता दिष्टं यदुदेवेन यादवाः ॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितम् ॥ ११ ॥ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः ॥ १२ ॥

प्रत्यक् पश्चिमवाहिनी ॥ ६ ॥ अभिषिच्य स्नात्वा ॥ ७ ॥ ब्राह्मणांश्च तैः कृतशांतिकाः संतो वयं गवादिभिः पूजयिष्यामः ॥८॥ विधिः प्रकारः मंगलायनं च । किंच देवद्विजगवां पूजा।भव उद्भवहेतुः । देवलोके परम उद्भवो भविष्यतीति भावः ॥ ९ ॥ मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनंद्य । उत्तीर्य समुद्रम् ॥ १०॥ सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः। भगवतानुक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः॥ ११ ॥पीयत इति पानम् । महच्च तत्पानं च।मैरेयकं मदिराविशेषम्।मधु सुरसम्। दिष्टेन दैवेन विभ्रंशितधियः। न ह्य

शंखोद्धारं तीर्थविशेषम् । द्वारकाक्षेत्रसमीपे त्रितमुनिशापाच्छङ्खरूपतां प्राप्तं कक्षीवन्तं मुनिं यत्र कृष्ण उद्धार तमिति कथा संहितातोऽवसेया । इतो द्वारकातः । यत्र प्रभासे ॥ * ॥ अत्रामंगलानुकरणमपि नोचितमिति तद्योगव्यानमाह—स्त्रिय इति ॥ ६ ॥ तत्र प्रत्यक्सरस्वत्याम् । अर्ह्यते पूज्यते देवा एभिरित्यर्हणानि उपचाराः । तथा चात्रस्नानानुलेपनयोरुक्तत्वात्तदितरोपचारा अर्हणपदेन ज्ञेयाः ॥ * ॥ ॥ ० ॥ ७ ॥ मह्यते पूज्यते सर्वैरिति महो विष्णुर्वेदो वा तस्याऽऽसमन्ताद्भजनमाभागो येषां ते महाभागाः वैदिकाचारेण विष्ण्वाराधनपरास्तान् । वेश्म गृहम् ॥ * ॥ ० ॥ ८ ॥ एष ब्राह्मणार्चनरूपः । अरिष्टघ्नोऽशुभनाशकः " अरिष्टमशुभे तक्रे सूतिकागार आसवे । शुभे मरणचिह्ने च दैत्यभेदे च फेनिले ॥ " इति धरणिः । फलांतरमाह—किंचेति । भूतेषु लोकेषु " भूतोऽतीते देवयोनौ लोके खादौ च जीवके " इति च । ' भवः क्षेमेशसंसारे ' इति कोशादुद्भवहेतुः क्षेमहेतुः । इति भाव इति—देवादिपूजनमैहिकामुष्मिकशुभदं, तथा च यादवानां देवलोकादिहागतानां तेषां पुनर्ब्राह्मणादिपूजनेन प्रतिबंधनिवृत्त्या तत्र गमने च परमः क्षेमो भविष्यतीति तात्पर्यम् ॥ * ॥ उद्भवहेतुः कल्याणकारणम् । देवस्य मम लोकेऽप्रकटप्रकाश इति वास्तवोऽर्थः परोक्षत्वाद्दत्वात् ॥ ९ ॥ इत्युक्तम् । मधुद्विषो मधुसूदनस्य ॥ * ॥ ॥ ० ॥ १० ॥ तस्मिन्प्रभासे । भगवता श्रीकृष्णेन तु स्नानदानदेवब्राह्मणार्चनान्येवोक्तानि पूर्वश्लोकेषु, न तावन्त्येव श्रेयांसि तेषां बहुविधत्वात् " श्रेयो वदंत्यनेकान्तं यथाकर्म यथारुचि " इत्याद्युक्तेः । " दानं यज्ञो तपो होमः स्वाध्यायो देवतार्चनम् । तीर्थयात्रा विप्रसेवा व्रतानि नियमा यमाः ॥ सेवा पितृगुरूणां च शास्त्राणां श्रवणं तथा । दंभत्यागस्त्वार्यता च सारल्यं सत्यभाषणम् ॥ दीनोपकारः पूर्तादेः करणं संगमः सताम् । इत्येवं बहुधोक्तानि नृणां श्रेयांसि नैगमैः ॥ " इति संहितायाम् । अत उक्तं भगवताऽनुक्तैरपीति ॥ * ॥ ० ॥ ११ ॥ ततः श्रेयःसंपादनोत्तरम् । तस्मिन्प्रभासे । " कदंबरससंभूता मदिरा सुरसा भवेत् । सैव मैरेयकं प्रोक्तं यत्पानाद्भ्रश्यते मतिः ॥ " इति तीर्थः । 'दैवं दिष्टं भागधेयम्' इत्यमरः । इति भाव इति—दैवप्रातिकूल्यं विना न कस्यापि तीर्थे मद्यपानादिरुचिरुत्पद्यत इति तात्पर्यम् । यस्य मै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महापानाभिमत्तानां वीराणां दृप्तचेतसाम् ॥ कृष्णमायाविमूढानां संघर्षः सुमहानभूत् ॥१३॥
युयुधुः क्रोधसंरब्धा वेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥ १४ ॥

न्यथा तस्मिन्स्थाने तदुचितमिति भावः । यद्द्रवैर्यस्य द्रवै रसैः ॥ १२ ॥ कृष्णमायाविमूढानामिति मुख्यो हेतुः । संघर्षः कलहः ॥ १३ ॥ ततो युयुधुश्च ॥ १४ ॥

यकस्य । भ्रश्यते अधः पतति निर्विचारा भवतीत्यर्थः ॥ * ॥ अतः परम् ' दिष्टविभ्रंशितधियः ' (१२) इत्यादि ' संयोज्यात्मानमात्मनि ' (२६) इत्यन्तम् । परमतमवस्तुभूतम् । वस्तुतस्तु—ततस्ते देवाः " वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवम् " इति भगवदुक्तिप्रभावाद्दानादिभिर्ब्रह्मशापं तीर्त्वा मधु पीत्वांतर्द्धाय दिवमारुरुहुः । ' संकर्षणश्च स्वस्थानं ययौ ' इत्येतावन्मात्रमेव स्वमतं भगवदुक्त्या पूर्वमेवाह स्म सा च—" मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानाम् । नैषां वधोपाय इयानतोऽन्योमय्युद्यतेन्तर्दधते स्वयं स्म ॥ " इति । अस्यार्थः—यदा विवादो भविता तदा नैषां वधोपायः स विवाद एषां वधहेतुर्न भवेत् इयान् एतावानपि एरकामुष्टिग्रहणताडनपर्यंतोपि अतस्तदा तावान् विवादो वधश्च लोकैर्द्रष्टव्योऽवस्तुभूत एव । ननु तर्ह्येषामुपसंहारे को हेतुस्तत्राह—अतो वधादन्य एवोपायोस्ति । स एव कः—मयि उद्यते सति मदिच्छायां सत्यामित्यर्थः । स्वयमेवान्तर्दधते इमेऽन्तर्धास्यन्ते । स्मेति निश्चये ॥ * ॥ **संदर्भस्तु**—तत इति । दिष्टं भगवदिच्छा । वक्ष्यते हि—कृष्णमायेति । अनेन सर्वं मायाकृतमेवेदमिति पुरोऽपि स्थापयिष्यते । तदेतदनुसारेण विरुद्धानि पुराणांतरवाक्यानि च मायाकृतानुवादत्वेनैव योजनीयानि ॥ १२ ॥ " महापानं मद्यपानं महामांसं गवां पलम् । यममार्गो महामार्गो महावैद्यस्तु धर्मराट् ॥ महासंज्ञां च मरणं महाशंखोऽस्थि वै गवाम् । महास्नेहो भवेन्मज्जा यमराजो महागुरुः ॥ प्रेतान्नभुग्महाविप्रो महादानं गवादिकम् । अंतस्नानं महास्नानं महादेवो मृडः स्मृतः ॥ एते शब्दा महापूर्वा अन्येऽपि बहवो मताः ॥ " इति शब्दचिंतामणौ । सुमहान् अवार्यः ॥ * ॥ कृष्णस्य मायया विमूढानां के वयं किमिदं कुर्म इत्यजानताम् ॥ * ॥ **दीपिका**—दृप्तचेतसां नित्यसंयोगानुभवेन गर्वितचेतसाम् । संघर्षः नित्यलीलया वियोगात्मकप्रकटलीलायाः पराभवोऽभवत् कृष्णस्यापि माया वियोगदर्शिकेच्छा विमूढा तिरोहिता येभ्यस्तेषाम् ॥ १३ ॥ वेलायां समुद्रतीरे ॥ * ॥ इदानीं तेषां साधकानां नित्यप्रवेशदर्शनाय साधनानुक्रममाह—युयुधुरिति । वियोगदुःखं ध्वंसयितुं क्रोधाविष्टाः सन्तः वेलायामप्रकटप्रकाशधामगमनसमये आततायिशब्देन शस्त्रपाणित्वमभिधीयते, तेन च वियोगदुःखहंतृत्वं लक्ष्यते । युयुधुः तत्प्रतिबंधकसंसृतिहेतुभूताविद्यादिभिः सह संग्राममिव चक्रुरित्यर्थः । तादृशयुद्धे साधनान्याह—धनुर्भिरित्यादिना । धनुर्भिर्धनूरूपितप्रणवार्थविचारैरित्यर्थः । ' धनुर्हि तस्य प्रणवं पठन्ति ' इति सप्तमोक्तेः । असिभिस्तत्तुल्यैर्निर्वेदैः । " निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः " इत्येकादशोक्तेः । भल्लैः शरतया रूपितैः । स्वस्वशुद्धत्वं पदार्थविचारैः ' शरं तु जीवम् ' इत्युक्तेः । गदाभिः गे गीतोपलक्षिते नृत्ये दीयंत इति गदाः करतालिकास्ताभिः पातकैः सह युयुधुः । भगवदग्रे नृत्यां गतालिकाभिः पातकनाशं दर्शयन्ति स्मेत्यर्थः । तदुक्तं पाद्मे—" नृत्यतः श्रीपतेरग्रे तालिकावादनैर्भृशम् । उड्डीयन्ते शरीरस्थाः सर्वे पातकपक्षिणः ॥ " इति । ' गीतं स्याद्गश्च गातारि ' इत्यनेकार्थध्वनिमंजरी । तौति स्वरूपज्ञानावरणाय गच्छतीति तौः, गत्वा च स्वरूपज्ञानं म्रियते मारयतीति मरः, तौश्चासौ मरश्चेति तोमरोऽबोधस्तं रिशंति नाशयंतीति तोमरर्ष्टयः षड्विधप्रपत्तयस्ताभिरज्ञानेन युयुधुरज्ञाननाशनार्थं ता दर्शयान्ति स्मेत्यर्थः । " अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः " इति । " मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते " इति च गीतोक्तेः । ' तु—(सौत्रो) गतौ ' विच् प्रत्ययः । ' रिश—हिंसायाम् ' कर्तरि क्तिच् । ' मृङ्—प्राणत्यागे ' अंतर्भावितण्यर्थः, अच् प्रत्ययः कर्तरि, साधुत्वमेवं ध्येयम् ॥ १४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैः सुदुर्मदा न्यहञ्छरैर्दद्भिरिव द्विपा वने ॥ १५ ॥ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः ॥ १६ ॥ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योऽन्यमासाद्य मदांधकारिता जग्मुर्मुकुंदेन विमोहिता भृशम् ॥ १७ ॥ दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः ॥ विसर्जनाः कुकुराः कुंतयश्च मिथस्ततस्तेऽथ विसृज्य सौहृदम् ॥ १८ ॥ पुत्रा अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहञ्ज्ञातय एव मूढाः ॥ १९ ॥

पतंत्य इतस्ततश्चलंत्यः पताका येषु तै रथादिभिर्मिथः समेत्य न्यहन्नघ्नन्नित्यर्थः।दद्भिर्दंतैरिव॥ १५॥ मिथः समेत्येत्यस्य प्रपंचः प्रद्युम्नेत्यादिचतुर्भिः । गदौ श्रीकृष्णस्य भ्राता एकः पुत्रश्चापरस्तौ सुमित्रश्च सुरथश्च सुमित्रासुरथाविति दैर्घ्यमार्षम् । असुरथनामा वा कश्चित् ॥ १६ ॥ मदांधेन मदतमसा बलात्कारिताः ॥ १७ ॥ दाशार्हादयो नव तत्तद्वंश्याः । अर्बुदा माथुराः शूरसेनाश्च तत्तद्देशीयाः ॥ १८ ॥ भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगिवाचित्वाद्भ्रातरो मातुला इत्यादि ज्ञेयम् । मित्रैश्च मित्राणि च ।

अश्वतरैर्गर्दभात्तुरंग्यां जातैः । आदिनाऽश्वादिग्रहः । इत्यर्थ इति—एकत्वमत्र बहुत्वेऽस्त्यार्षत्वादिति भावः ॥ * ॥ रथेति—रथानां भक्त्यवयवानां श्रवणकीर्तनादीनां कुंजरः कोशस्तत्तुल्यं यच्छ्रीमद्भागवतं तदादिभिर्वैष्णवशास्त्रैरास्वाद्यत्वेन मिथः समेत्य तानि मिथ आस्वाद्येत्यर्थः । कलिकालात्मकमविद्यादिकं न्यहन् तदास्वादनैः कलिकालादिजयं दर्शयन्ति स्मेत्यर्थः । कथंभूतै रथकुंजरादिभिः पतन्त्यो निस्सरन्त्यः पताकाः श्रीकृष्णप्रसादलक्षणानि सौभाग्यानि येभ्यस्तैः । “ रथः पुमानवयवे स्यंदने वेतसेऽपि च ” इति मेदिनी । ‘ कुंजरोऽनेकपे कोशे ’ इति हेमचन्द्रः । “ पताका वैजयंत्यां च सौभाग्यनाटकांगयोः ” इति मेदिनी । “ वैष्णवानि च शास्त्राणि ये शृण्वन्ति पठंति च । धन्यास्ते मानवा लोके तेषां कृष्णः प्रसीदति ॥ ” इति पाद्मादिपुराणम् । तदास्वादविशिष्टा एव सन्तः खरादितुल्यैरपि नरैः समेत्य तेषामपि तदादिकं खरोष्ट्रादिसमस्वभावं विषयपारतंत्र्यादिकं न्यहन् तानपि तारयामासुरित्यर्थः । कीदृशैस्तैः शरैर्भागवतादिश्रावणैर्जलवद्द्रवीकृतैरिति तेषां प्रेमदातृत्वमभिव्यंजितम् । “ शरस्तु तेजने बाणे दध्यग्रे ना शरं जले ” इति विश्वमेदिन्यौ । परस्परस्पर्द्धयास्वादने दृष्टान्तः—वने द्विपा यथा दद्भिः कंदहननपूर्वकं खेलंति तद्वत् ॥ १५ ॥ रूढः प्राप्तो मत्सरो याभ्यां तौ गदाविव्येकशेषः । आर्षत्वकल्पनस्यागतिकत्वादाह—असुरथनामा वेति ॥ * ॥ इदानीं द्वयोर्द्वयोः परस्परं विचारमाह—प्रद्युम्नसांबाविति । संसारेण वियोगेन च सह युधि परमार्थविचारार्थं परस्परं मिलितवन्ताविति सर्वत्र योज्यम् ॥ १६ ॥ ० ॥ * ॥ मु कोर्थः मुक्तिसुखं, कु कोर्थः कुत्सितं यस्मात्स मुकुः प्रेमानंदस्तं ददातीति तथा तेन भृशं विमोहिता नित्यसंगप्रकाशेन प्रकटलीलावियोगाच्च्याविताः । अत एव तत्सुखानुभवजन्यमदेनान्धीकृताः सन्तः अन्योन्यं मिलित्वा जग्मुर्नित्यलीलारहस्यं ज्ञातवन्तः, हन्तेर्गत्यर्थत्वाज्ज्ञानार्थतापि । उत्तानपक्षेंधकारमिताः अंधकारः संजातो वा येषां ते तारकादित्वादितच् ॥ १७ ॥ तत्तद्वंश्या दाशार्हादिवंश्याः । तत्तद्देशीया अर्बुदादिदेशादागताः सुहृदः । ततो मुकुंदमायामोहितत्वात् । ते सर्वे ॥ * ॥ दाशार्हादयः प्रपंचं सुविसृज्य संत्यज्य मिथो नित्यलीलायां सौहृदं जघ्नुर्ज्ञातवन्तः ॥ १८ ॥ समानः प्रतियोगी सप्रतियोगी तं वक्तुं शीलं येषां ते सप्रतियोगिवाचिनस्तेषां भावस्तत्त्वं तस्मात्तथा मूढा माययेति शेषः ॥ * ॥ पुत्राः स्वप्रतियोगिभिः पित्रादिभिः सहायुध्यन् । वियोगाविनाशनार्थं युद्धमिवाप्रकटलीलानुसंधानमकुर्वन् । एवं च विमूढाः प्रकटवियोगानुसन्धानशून्याः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. ए.

श्री. टी.

॥१८७॥

शरेषु क्षीयमाणेषु भज्यमानेषु धन्वसु॥शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः॥२०॥ता वज्रकल्पा ह्यभवन्परिघा मुष्टिना भृताः॥ जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते॥२१॥प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः॥ हंतुं कृतधियो राजन्नापन्ना आततायिनः॥२२॥ अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन॥ एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि॥२३॥ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनाम्॥ स्पर्द्धा क्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वने॥२४॥

अहन्हतवंतः ॥ १९ ॥ धन्वसु धनुःषु जह्रुर्जगृहुः ॥ २० ॥ परिघा लोहदंडाः भृताः धृताः । तं च श्रीकृष्णमपि ॥ २१ ॥ प्रत्यनीकं प्रतिपक्षम् ॥ २२ ॥ एरका मुष्टिरूपौ परिघावुद्यम्य ॥ २३ ॥ स्पर्धानिमित्तः क्रोधः कुलं क्षयं निन्ये वेणुसंघर्षजो वह्निर्वेणुवनमेव यथा ॥ २४ ॥

सन्तः ज्ञातीन् ज्ञातयः श्रीकृष्णनित्यपरिकरत्वेनैवाहन् ज्ञातवन्तः । तथा स्फूर्तिमापुरित्यर्थः । तथैव सत्यभामां प्रति श्रीकृष्णवाक्यम्—“ एते हि यादवाः सर्वे मद्गणा एव भामिनि । सर्वदा मत्प्रिया देवि मत्तुल्या चारशीलिनः ॥” इति । ननु हंतेर्गत्यर्थत्वं न युक्तमप्रयुक्तत्वादिति चेदुच्यते—काव्यकूपवर्तिनामेवेदं मतं न तु वेदादिमहोदधिवर्तिनाम् । यथोक्तं महाभाष्ये—“ सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्या बहुधाभिन्ना एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृच्यं नवधाथर्वाणो वेदा वाको वाक्यमितिहासः पुराणं वैद्यकमित्येतावंतं शब्दप्रयोगमननुनिशम्य सन्ति अप्रयुक्ताः शब्दा इति वचनं केवलं साहसमात्रमेव”इत्यादि ॥ १९ ॥ शस्त्रेषु खड्गादिषु । एरका सूचीमुखोऽतिदीर्घस्तृणविशेषः ॥ * ॥ साध्यलोके साधनोपरमः सिद्ध एवेति ‘निपानखनित्रमिन्द्रः’ इति न्यायेनाह—शरेष्विति । शरेषु ‘ शरं तु जीवम् ’ इत्युक्तेः शरत्वरूपितत्वंपदार्थविवेकेषु त्यज्यमानेषु सत्सु एवं धन्वसु धनुष्ट्वेन रूपितप्रणवार्थविचारेष्वपि भज्यमानेषु शास्त्रेषु चतुर्विधवैराग्येषु साधनेष्वपि क्षीयमाणेषु उपेक्ष्यमाणेषु “ छिन्द्यादसंगशस्त्रेण स्पृहां देहार्थयोर्बुधः ” इत्यत्र तथा रूपणात् । मुष्टिभिर्मोषणैर्वंचनैः प्रपंचात्तिरोधानैरित्यर्थः । आ सर्वत ईर्ते गच्छति जानातीत्येरः सर्वज्ञो भगवांस्तस्यापि कं सुखं याभ्यस्ता एरका नित्या लीलावसतीर्जगृहुरप्रकटप्रकाशानन्वभवन्नित्यर्थः ॥ २० ॥ ता एरकाः । वज्रतुल्या लोहदण्डतुल्याश्चाभवन् । ते दाशार्हाद्याः ॥ * ॥ ता इति युग्मकम् । ता वसत्यश्च । वज्रैश्चिन्मयहीरकादिभिः कल्पन्ते प्रकाशंत इति तथा । पुनः कीदृश्यः—मुष्टिना वंचनेन प्रपंचात्तिरोधानेन धृताः सदाऽवस्थिताः ‘ धृङ्—अवस्थाने ’ इत्यस्मात् क्तः कर्तरि । “ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ” इतिवत् । ‘ भृताः ’ इति पाठेऽपि भृञो धारणार्थत्वात्स एवार्थः । अभवन् प्रापुः, यदूनिति शेषः । भवतेर्गत्यर्थे परस्मैपदाभावेऽप्यार्षं तत् । पुनः कीदृश्यः—परिघाः परितो घाः घंटा घंटादिध्वनयो यासु तास्तथा । ‘ घो घंटायां घर्घरे च ’ इति मेदिनी । वियोगमय्याः प्रकटलीलाया द्विषन्तो द्वेषं कुर्वंतः कृष्णेन वार्यमाणाः प्रकटलीलावेशेन नित्यलीलास्वादने निवार्यमाणा इव । अतः प्रगयरोषेण वियोगापादकत्वाच्छत्रुमिव मन्यमाना मोहिता नित्यलीलानुभवसुखेन वियोगानुसंधानशून्याः संतस्ते कृष्णं च बलभद्रं च जघ्नुर्नित्यसंयुक्तत्वेन ज्ञातवंतः । हंतेर्गत्यर्थत्वाज्ज्ञानार्थता । यतस्ते पूर्वमत्र वैराग्यादिशस्त्रपाणयः सन्तः वियोगदुःखप्रचुरप्रकटप्रकाशं हन्तुं तस्मात्तिरोभवितुमापन्ना उद्युक्ताः ॥ २१ ॥ आपन्नाः प्राप्ताः ॥ * ॥ ० ॥ २२ ॥ अथ स्वहननार्थागतेरनन्तरम् । तौ कृष्णरामौ ॥ * ॥ अथ तेषां नित्यलीलाप्राप्त्यनंतरं तावपि कृष्णबलभद्रौ तद्वियोगदुःखं स्वस्यापनेतुं संक्रुद्धौ सन्तौ उद्यम्य प्रपञ्चलोकप्रतारणार्थं ध्यानाद्युद्यमं कृत्वा वियोगेन युधि युद्धार्थमिव चरन्तौ मुष्टेर्वंचनायाः परिघौ घातकौ सन्तौ एरका नित्यवसतीर्जघ्नतुर्ज्ञातवन्तौ प्रकाशद्वयस्यैकं प्रकाशं स्फूर्तिविषयं चक्रतुरित्यर्थः ॥ २३ ॥०॥*॥ ब्रह्मशापोपसृष्टानामिति ब्रह्मशापोपि उपसृष्टो रुग्णो येभ्यस्तेषाम्।यद्वा—उपसृष्ट उपप्लवं प्रापितो नाशितो यैस्तेषाम् । “ उपसर्गः पुमान्रोगे भेदोपप्लवयोरपि ” इति मेदिनी।कृष्णस्य मायावियोगदर्शिकेच्छाप्यावृता येन तादृश आत्मा तन्नित्यसंयुक्तं स्वरूपं येषां तेषां स्पर्द्धया सहितः क्रोधः क्षयं नित्यप्रकाशात्मकं स्थानं प्रति तान्निन्ये प्रापयामास । तत्रानुरूपो दृष्टांतः—यथा वेणुसंघर्षणजो वह्निः अवनं तद्वनोत्पन्नातिरिक्तमागन्तुकं मनुष्यादिकं विद्राव्य तन्निवास

भा. दी. प्र.

टीका.

अ० ३०

॥१८७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवता रितो भुवो भार इति मेनेऽवशेषितः ॥ २५ ॥ रामः समुद्रवेलायां योगमास्थाय पौरुषम् ॥ तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥ २६ ॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः ॥ निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलम् ॥ २७ ॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन्विधूम इव पावकः ॥ २८ ॥ श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसम् ॥ कौशेयांबरयुग्मेन परिवीतं सुमंगलम् ॥ २९ ॥ सुंदर स्मितवक्त्राब्जं नीलकुंतलमंडितम् ॥ पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलम् ॥ ३० ॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः ॥ हारनूपुरमुद्राभिः कौस्तुभेन विराजितम् ॥ ३१ ॥ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणम् ॥ ३२ ॥ मुशलावशेषायःखण्डकृतेषुर्लुब्धको जरा ॥ मृगास्यकारं तच्चरणं विव्याध मृगशंकया ॥ ३३ ॥

॥ २५ ॥ पौरुषं योगं परमपुरुषध्यानलक्षणम् । तमे वाह । संयोज्येति । मानुष्यं लोकं भूर्लोकं मनुष्यरूपतां वा ॥ २६ ॥ धरोपस्थे भूतले ॥ २७ ॥ भ्राजिष्णुरूपं बिभ्रदिति ॥ २८ ॥ तदेवानुवर्णयति श्रीवत्सांकमिति चतुर्भिः ॥ २९ ॥ सुंदरस्मितं वक्त्राब्जं यस्मिंस्तत् । पुण्डरीकवदभिरामे सुंदरे अक्षिणी यस्मिंस्तत् ॥ ३० ॥ ३१ ॥ वनमालापरीतान्यंगानि यस्मिंस्तत् । निजायुधैश्च परीतांगम् । पंकजारुणं वामं पादं दक्षिण ऊरौ कृत्वा आसीनं रूपं बिभ्रदिति पूर्वेणान्वयः ॥ ३२ ॥ जरा नाम कश्चिल्लुब्धको मृगयुः । मृगास्यमिवाकारो यस्य तं चरणम् ॥ ३३ ॥

मेव प्रापयति तथा प्रपञ्चोत्पन्नातिरिक्तांस्तान् विद्राव्य नित्यं धाम निन्य इत्यर्थः ॥ २४ ॥ ० ॥ * ॥ नष्टेषु प्रपञ्चस्थजनैरदृष्टेषु सत्सु । मेने इत्यनेनैदुक्तं भवति–भारो हि व्यक्तिबाहुल्ये न भवति, अधर्मेण वा । आद्ये गुरुत्वातिशयवद्भिरनन्तैः पर्वतादिभिरपि स किन्न स्यात् । द्वितीये, " ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् " ' वृष्णयः कृष्णचेतसः ' इत्यादिभिस्तत्र तन्निषेधात् । तस्मादन्यथाऽनुपपत्त्या विरहोन्मत्तैर्विलुठद्भिस्तैरसंख्यैः पृथिवी चूर्णिता भविष्यतीति तदेव भारत्वेनोत्प्रेक्षत इति ॥ २५ ॥ मानुष्यं जीवानां मानुष्यविभ्रमं तत्याजाबाधत ॥ * ॥ पौरुषं पुरुषस्य नराकारस्य श्रीकृष्णस्य योगं नित्यसंयोगमास्थाय निर्द्धार्य आत्मानं प्रकटलीलास्थं प्रकाशमात्मन्यप्रकटलीलास्थे प्रकाशे संयोज्याभिन्नत्वेन संचिन्त्य मानुषं लोकं भूर्लोकं तत्याज: ततोन्तर्हितवानित्यर्थः ॥ २६ ॥ धरोपस्थे निरासनदेशे । पिप्पलमश्वत्थवृक्षम् " पिप्पलं विषयास्वादे जले बोधिद्रुमे शुके " इति कोशात् ॥ * ॥ रामनिर्याणमिति षट्कम् । स्वमतमेव रामस्य निर्याणं स्वरूपेण महावैकुंठं प्रतिगमनं स्वांशरूपेण पातालतलगमनं च ॥ २७ ॥ ० ॥ * ॥ ० ॥ २८ ॥ तदेव रूपम् ॥ * ॥ तप्तहाटकानां तन्मयानां भूषणानां वर्चो यस्मिंस्तत् ॥ २९ ॥ सुंदरस्मितं वक्त्राब्जं मुखांबुजम् ॥ * ॥ ० ॥ ३० ॥ कटिसूत्रं मेखला । ब्रह्मसूत्रमुपवीतम् । हारोऽत्र मौक्तिकानां गुच्छादिः " हारो मुक्तावली देवच्छंदोऽसौ शतयष्टिकः । हारभेदा यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः ॥ अर्धहारो माणवक एकावल्येकयष्टिका । सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ द्वात्रिंशल्लतिको गुच्छो गुच्छार्द्धस्तत्त्वयष्टिकः । चतुस्त्रिंशल्लतो हारो गोस्तनो वा चतुर्लतः ॥ " इति कोशांतरोक्तेः ॥ * ॥ कटिसूत्रमत्र हैममेव ग्राह्यं कार्पासादिमयस्य निषेधात् । " कर्णे पुष्पं कटौ सूत्रं वेणीं शिरसि धारयेत् । यो ना तद्दर्शनात्पुंसः शुद्धिर्गंगाम्बुसेवनात् ॥ " इति स्मृतिसमुच्चयोक्तेः । मुद्रा अंगुलीयभूषा ॥ ३१ ॥ निजायुधैश्चक्रादिभिः । अवतारकार्यानवशेषादानंदरूपम् ॥ * ॥ ० ॥ ३२ ॥ मुसलावशेषायसः खण्डेन कृत इषुर्येन स तथा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः ॥ भीतः पपात शिरसा पादयोरसुरद्विषः ॥ ३४ ॥ अजानता कृतमिदं पापेन मधुसूदन ॥ क्षंतुमर्हसि पापस्य उत्तमश्लोक मेऽनघ ॥ ३५ ॥ यस्यानुस्मरणं नृणामज्ञानध्वांतनाशनम् ॥ वदंति तस्य ते विष्णो मयाऽसाधुकृतं प्रभो ॥ ३६ ॥ तन्माशु जहि वैकुंठ पाप्मानं मृगलुब्धकम् ॥ यथा पुनरहं त्वेनं न कुर्यां सदतिक्रमम् ॥३७॥ यस्याऽऽत्मयोगरचितं न विदुर्विरिंचो रुद्रादयोऽस्य तनयाः पतयो गिरां ये ॥ त्वन्मायया पिहितदृष्टय एतदंजः किं तस्य ते वयमसद्गतयो गृणीमः ॥ ३८ ॥

॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ब्रह्मशापकृतमेतत्तव नापराध इति चेदत आह । यस्य तवात्मयोगराचितं स्वाधीनमायया रचितं विरिंचः अस्य तनया रुद्रा

जरेति टाबंतस्य स्त्रीत्वेऽपि नाम्नि पुंस्त्वादिनियमो नेति बोधितमनेन, वसिष्ठात्मजशक्तिवत् । तस्य कृष्णस्य चरणम् ॥ * ॥ जरेति टाबंत एतन्नामा विव्याधेति :मृगो मया विद्ध इति लुब्धकस्याभिमानदृष्ट्यैव प्रयुक्तं, वस्तुतस्तदीयः शरश्चरणं पस्पर्शमात्रं, न तु विव्याध तदंगस्य सच्चिदानंदरूपत्वात् । अन्यथा ' भीतः पपात शिरसा पादयोः ' इत्यत्र पादाच्छरं निष्क्रामयामासेत्युक्तं स्यात् ॥ ३३ ॥ स लुब्धकः ॥ * ॥ कृतकिल्बिष इति तं प्रति शरनिक्षेपात् ॥ ३४ ॥ पापेन मया । मधुसूदनेति दुष्टदलनत्वं बोधयन्स्वस्य मारणे सामर्थ्यमाह । उत्तमश्लोकेति निजापराधक्षमार्थमाह । अनघेति निरपराधतां चाह । एतादृशस्य तवापराधकार्यहमवश्यं दंड्योऽस्मीत्यतः क्षमापयति नरकार्तिभीतः ॥ * ॥ हे अनघेति—यद्यपि तव चरणेऽघं कष्टं तु नाभूत्तथापि मम क्षमापणयोग्यतैवेति भावः । हे उत्तमश्लोकेति—दीनेषु मादृगज्ञानिषु कृपयैव तव यशस उत्कर्षोऽपि भवेदिति भावः ॥ ३५ ॥ अन्यदाह—यस्य तस्य ते असाधुप्रहारेण पादभेदनरूपमनुचितं कर्म । विष्णो इति व्यापकस्य तव ममाप्यंतर्यामित्वेन त्वदिच्छैवात्र हेतुः प्रतीयते, एतदेव संबुद्ध्यन्तरेण दृढीकुर्वन्नाह—प्रभो इति । मत्कृतबाणपातनिवर्तनेऽपि क्षमेण यन्नाहं निवर्तित इति ॥ * ॥ ० ॥ ३६ ॥ यतो मया लोकदृष्ट्याऽसाधुकृतं तत्तस्मात्तत्प्रायश्चित्तार्थहेतोर्मां माम् । वैकुण्ठेति तव दर्शनादहमपि मुक्त्यधिकारी जातोऽत एतद्देहपातनेन मामपुनरावृत्तिपदं प्रेषयेत्यभिप्रायेणाह—यथा पुनरिति । सत्येव जन्मनि सदतिक्रमोऽस्ति तन्निवृत्तौ तन्निवृत्तिर्भविष्यत्येवेति भावः ॥ * ॥ दैवादेव चरणे व्यथा मा भूत्त्वया तु हिंसनबुद्ध्यैव शरो निक्षिप्त एवेति चेत्तत्राह—तत्तस्मान्मा माम् आशु जहि । अत्र " निम्लोचति रवावासीद्वेणूनामिव मर्दनम् । भगवानात्ममायाया गतिं तामवलोक्य सः ॥ सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् । " इति तृतीयोक्तेः सूर्यास्तसमये यदूनां यदैव पारस्परिकसांग्रामिकवधोऽभूत्तदैव भगवांस्तत्रैव सरस्वतीतीर उपविवेश, तदैव लुब्धको मृगयार्थमागत इति लभ्यते । एतच्च नोपपद्यते षट्पञ्चाशत्कोट्यधिकानां यदूनां सद्य एव महासांग्रामिकवधे सति तत्प्रदेशे रुधिरनदीप्लाविते महाकोलाहलव्याप्ते च सति तदैव लुब्धकस्य मृगमारणार्थमागमनं कथं संभवेत्, कथं वा भीतजातीनां मृगाणां तत्र स्थितिसंभावनेत्यतो यदूनां तात्कालिको वधो मिथ्याभूतोऽपि भगवतार्जुनादीन्प्रति प्रत्यायितो युधिष्ठिरादीनां स्वभक्तानां करुणारसमयप्रेमविवर्द्धनार्थं वैराग्यार्थं च तदन्यान्प्रति तु धर्मसंकोचककुमतोत्थापनार्थम् । वस्तुतस्तु—मधूनि पीत्वा देवेष्वन्तर्हितेषु तत्र निःशब्दे निर्जने प्रदेशे लुब्धक आगत इति तत्त्वम् । अत्र वैकुण्ठेति तव हस्ततो मृतस्य मम वैकुंठगतिः स्यादिति भावः । " येये हताश्चक्रधरेण विष्णुना त्रैलोक्यनाथेन जनार्दनेन । तेते गता विष्णुपुरीम् " इत्युक्तेः ॥ ३७ ॥ भगवत्सान्त्वनेऽपि पुनराक्षिपति—ब्रह्मशापेत्यादि । एतन्मम पादभेदनम् । अस्य विरिंचस्य । आदिना मरीच्यादिग्रहः । वेदद्रष्टारो बृहस्पत्यादयः । यतस्तव लीला दुर्ज्ञेयाऽतो हेतोः । तत् शापादि । आदिना मुसलचूर्णनादिग्रहः । इति भाव इति—मम तु त्वत्संगत्या मुक्तिरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीभगवानुवाच ॥ मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे ॥ याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदम् ॥ ३९ ॥ श्रीशुक उवाच ॥ इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा ॥ त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥ ४० ॥ दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य ताम् ॥ वायुं तुलसिकामोदमाघ्रायाभिमुखं ययौ ॥ ४१ ॥ तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिम् ॥ स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य सबाष्पलोचनः ॥ ४२ ॥ अपश्यतस्त्वच्चरणांबुजं प्रभो दृष्टिः प्रनष्टा तमसि प्रविष्टा ॥ दिशो न जाने न लभे च शांतिं यथा निशायामुडुपे प्रनष्टे ॥ ॥४३॥ इति ब्रुवति सूते वै रथो गरुडलांछनः ॥ खमुत्पपात राजेंद्र साश्वध्वज उदीक्षतः ॥ ४४ ॥ तमन्वगच्छन्दिव्यानि विष्णुप्रहरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥ ४५ ॥

दयश्च ये चान्ये गिरां पतयो वेदद्रष्टारस्तेऽपि न विदुस्तस्य तेऽचिंत्यमायस्य एतद्ब्रह्मशापादि अंजसा असद्गतयः पापयोनयो वयं किं गृणीमः कथं वर्णयामः। अतस्तदास्ता माशु मा जहीति भावः ॥ ३८ ॥ ३९ ॥ इच्छाशरीरिणेत्यस्यायं भावः। शुद्धसत्त्वमयीं निजां मूर्तिमंतर्धाय तत्प्रतिकृत्यैवं विडंबनमात्रमिति। एतदेव स्फुटीकरिष्यति 'देवादयो ब्रह्ममुख्या' इत्यादिना ॥ ४० ॥ ४१ ॥ तं पतिं तत्र दृष्ट्वा तस्य पादयोर्निपपात ॥ ४२ ॥ ४३ ॥ उदीक्षतः उदीक्षमाणस्य सूतस्य सतः ॥ ४४ ॥ ४५ ॥

वाभीप्सितेति तात्पर्यम् ॥*॥ एतम् आत्मयोगचरितमिति **विश्वनाथः** ॥३८॥ तं सान्त्वयति–मा भैरिति। एष बाणपातरूपः। मद्दर्शनादतीव पापकर्मापि त्वं बहुयत्नसाध्ययज्ञादिफलं स्वर्गमेव गच्छ लुब्धकदेहस्य मोक्षानधिकृतत्वाज्जन्मांतरे सोऽपि भविष्यतीत्याशयः ॥*॥ एष मे काम एव ब्रह्मशापो मयांगीकर्तव्य इति मदिच्छेत्यर्थः। स्वर्गमप्राकृतं सुकृतिनां प्रशस्तसुकृतवतां मद्भक्तानाम्। अत्र प्रशंसायां मत्वर्थीयः। पदं वैकुण्ठं याहि ॥ ३९ ॥ अत्राशयमाह–अयं भाव इति। तत्प्रतिकृत्या तस्याः शुद्धसत्त्वमयमूर्तेः प्रतिकृत्या तत्तुल्यकृत्रिममूर्त्या। एवं पादभेदादि। एतदेव विडंबनमात्रत्वमेव। त्रिर्नत्वा तं कृष्णम् ॥ * ॥ इच्छाशरीरेणेति–इच्छाधीनं शरीरं यस्य तेन तदिच्छयैव तदाविर्भावो जायत इति तत्र नान्यत्कारणं भाव्यमिति भाव इति **संदर्भः** ॥ * ॥ इच्छयैव प्रशस्तशरीरधारी भवेद्यतस्तेनेति **विश्वनाथः** ॥ * ॥ **दीपिका** तु–एवं परिकरेषु परोक्षवादं व्याख्याय स्वस्मिन्कस्यापि संदेहाभावादिच्छाशरीराभिप्रायेण मायिकचरितं प्रत्यायितं तच्चाग्रे स्वामिभिरेव व्याख्यास्यमानत्वान्न व्याख्यातमिति ज्ञेयम्। असुरस्वभावानां साक्षात्तद्दर्शनासंभवात् 'विराडविदुषाम्' इत्युक्तेश्चायं भाव इत्यादि व्याख्यातम्। एतदेवान्तर्द्धानमेव ॥ ४० ॥ प्रस्तुतमंगीकरोति–दारुक इति। अन्विच्छन् मृगयन्। तां कृष्णपदवीम्। तदेवाह–वायुमिति। तुलसिकाया वनमालांतर्गताया आमोदं शोभनगन्धम् ॥ * ॥ ० ॥ ४१ ॥ तं श्रीकृष्णम्। तत्र प्रभासक्षेत्रे ॥ * ॥ तत्राश्वमूले, दृष्ट्वेत्यध्याहृतम् ॥ ४२ ॥ कथं नष्टेति प्रश्ने–तमसीत्याह। किं तेनेत्यत आह–दिश इति। तेनापि किमिति चेदाह शांतिं मंगलं स्वस्थ्यं वा। उडुपे चन्द्रे अत्रोडुभिः सह चंद्राऽदर्शनं विवक्षितमन्यथा नक्षत्रप्रेक्षणेनापि दिगादिज्ञानोपपत्तेरिति ॥ * ॥ ० ॥ ४३ ॥ ० ॥*॥ इति ब्रुवतीति–यद्यपि दशमे "रथावुपस्थितौ सद्यः ससूतौ सपरिच्छदौ" इत्यनेन दारुकस्यापि रथादिवदेवागमनमुक्तं तथाप्यत्र तस्य स्तंभनं तदेकनिर्वाह्योत्तरकर्मसंपादनाभिप्रायेणैवेति गम्यते ॥ ४४ ॥ तमनु रथगमनोत्तरम्। तेन रथाद्युत्पतनेन। एतेन भगवद्रथशस्त्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः ॥ संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशाम् ॥ ४६ ॥ द्वारकायां च न स्थेयं भवद्भिः स्वस्वबंधुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥ ४७ ॥ स्वंस्वं परिग्रहं सर्वं आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ॥ ४८ ॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥ ४९ ॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनःपुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीम् ॥ ५० ॥ इति श्रीमद्भागवते महापुराण एकादशस्कंधे मौशलो० यदुकुलसंक्षयो नाम त्रिंशोऽध्यायः ॥ ३० ॥

निर्याणं योगमार्गेण । मद्दशामितीच्छाशरीराभिप्रायेण ॥४६॥४७॥ अविता रक्ष्यमाणा इंद्रप्रस्थं गमिष्यथेति ब्रूहीति पूर्वेणान्वयः ॥ ४८ ॥ मन्मायारचनामेतां विज्ञायेति निजश्रीमूर्तेरंतर्हितत्वाद्वृथा शोकं मा कुर्वित्यर्थः॥४९॥कुलस्य विनष्टत्वाद्दुर्मनाः॥५०॥इति श्रीमद्भागवत एकादशकंधे श्री०टीकायां मौशलो० त्रिंशोऽध्यायः ॥३०॥

दीनां चेतनत्वमेव भगवच्छक्त्येत्यन्येभ्योऽपि दर्शितम् ॥ * ॥ ० ॥ ४५ ॥ मद्दशां ममापि देहान्तर्धानम् ॥ * ॥ निधनमिति—वास्तवार्थे नितरां धनम् अप्रकटलीलासंपत्प्राप्तिः । दशां तदनुगतलक्षणाम् ॥ * ॥ विश्वनाथस्तु—गच्छेति रथस्य वैकुण्ठप्रस्थापनेपि सारथेस्तस्य वैकुंठाप्रस्थापनं सर्वत्र तात्कालिकस्ववृत्तज्ञापनार्थम्, तथा वैकुंठादागतस्य तस्येह नित्यस्वपार्षदानामुद्धवादीनां संगतः प्रेम्णोतिवृद्धिं दृष्ट्वा द्वारकाया अप्रकटप्रकाशगतलीलायामेव प्रवेशनार्थं चेति गम्यते । मद्दशामिति ब्रुवन्भाविनीमवस्तुभूतां लीलां सूचयति ॥ ४६ ॥ ० ॥ * ॥ समुद्रः प्लावयिष्यतीति—परितः प्लावनमपि तेषां त्याजनार्थमेव प्लावनमात्रमुक्तम् ॥ ॥ ४७ ॥ ० ॥*॥०॥४८ ॥ यद्वा—एतां देहादिस्वीकारत्यागरूपां संसाररचनाम् । इत्यर्थ इति—मया जगद्धिताय शुद्धसत्त्वमूर्तिरंगीकृता तत्कृत्वा च स्वेच्छाकृततत्सदृशमूर्तित्यागेन सांतर्हिता मायिकमूर्तेरनित्यतां बोधयितुं तत्त्यागे प्रवृत्तं मां दृष्ट्वा शोको न कार्यः शुद्धसत्ताया विद्यमानत्वादिति भावः । उपेक्षकः पुत्रादिषूदासीनः ॥ * ॥ अथ दारुकसान्त्वनाय मौसलाद्यर्जुनपराभवपर्यन्ताया लीलाया माययेन्द्रजालवद्रचितत्वमुपदिशति—त्वं त्विति । त्वं तु दारुको ज्ञाननिष्ठो मदीयलीलातत्त्वज्ञः मद्धर्मं मम स्वभक्तपालयितृत्वरूपं स्वतुल्यं परिकरसंगित्वरूपं च स्वभावमास्थाय विस्रभ्य एतामधुना प्रकाशितां सर्वामेव मौसलादिलीलां मम माययैवेंद्रजालवद्रचितां विज्ञाय उपेक्षको बहिर्दृष्ट्या जातं शोकमुपेक्षमाण उपशमं चित्तक्षोभानिवृत्तिं व्रज प्राप्नुहि । तुशब्देनान्ये तावन्मुह्यन्तु नाम भवतस्तथा मोहो न युक्त एवेति ध्वनितम् । अत्र श्रीदारुकस्य स्वयं वैकुंठादवतीर्णत्वेन सिद्धत्वादेतामित्यत्रातिसन्निहितार्थलाभाचान्यथा व्याख्यानमेव प्रथमप्रतीत्यविषय इति विवेक्तव्यम् । दृश्यते चेयं परिपाटी स्वर्गपर्वणि प्रतीतिः श्रीभीमादिनरके श्रीयुधिष्ठिरं प्रति धर्मराजवचनम्—" न च ते भ्रातरः पार्थ नरकस्था विशांपते । मायैषा देवराजेन महेन्द्रेण प्रयोजिता ॥ " इति ॥*॥ अत्र **विश्वनाथः**—ननु सच्चिदानंदात्मकस्य स्वविग्रहस्य रामादिविग्रहस्य चैतादृशः प्रकारोयं क इति कृपया मामाचक्ष्वेत्यत आह—मन्मायेति । एतां प्रत्याय्यमानां लीलाम् ॥४९॥ तं कृष्णम् । पुनःपुनरिति वियोगमसहमानः । तत्पादौ पादुके ध्यानेन चरणौ वा । यद्वा—हस्ताभ्यां श्रीकृष्णचरणौ गृहीत्वा शिरसि संस्थाप्य दुःखितांतःकरणः।पुरीं द्वारकाम्॥*॥ यद्यप्यन्तरानंदयुतस्तथापि बहिर्दृष्ट्या दुर्मना इति ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्धे त्रिंशोऽध्यायः ॥ ३० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः ॥ महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥ १ ॥ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः ॥ २ ॥ द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः ॥ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ॥ ३ ॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः ॥ कुर्वंतः संकुलं राजन्भक्त्या परमया युताः ॥ ४ ॥ भगवान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः ॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ॥ ५ ॥ लोकाभिरामां स्वतनुं धारणाध्यानमंगलम् ॥ योगधारणयाऽऽग्नेय्याऽदग्ध्वा धामाविशत्स्वकम् ॥ ६ ॥

एकत्रिंशे स्वकं धाम जगाम भगवानितः ॥ तमेवानुययुः प्रीत्या वसुदेवादयस्ततः ॥ १ ॥ देवान्यदून्विधायादौ भूयो देवान्विधाय च ॥ श्रीकृष्णः स्वेच्छया धाम स्वतन्वैव समाविशत् ॥ २ ॥ मुनयः सनकादयः । प्रजेश्वरा मरीच्यादयः ॥ १ ॥ द्विजा गरुडलोकनिवासिनः पक्षिणः मैत्रेयादयो वा ॥ २ ॥ भगवतो निर्याणं द्रष्टुकामाः सन्तः परमोत्सुकास्तत्रागमन्।तेषामौत्सुक्यकृतं महोत्सवमाह सार्धेन । गायंतश्चेति ॥ ३ ॥ ४ ॥ विभूतीरिंद्रादींश्च । पद्मनेत्रे न्यमीलयदित्यत्रायं भावः । पूर्वं ब्रह्मादिभिः'सलोकाल्लोँकपालान्नः पाहि वैकुंठ किंकरान्' इति प्रार्थितत्वादिदानीं च स्वंस्वं लोकं प्रति नेतुमागतत्वाद्बहुषु च तेषु दाक्षिण्यात्तान्वंचयितुं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति॥५॥योगिनामिव स्वच्छंदमृत्युभ्रमं वारयति । लोकाभिरामामिति । अयमर्थः । योगिनो हि स्वच्छन्दमृत्यवः स्वां तनुमाग्नेय्या योगधारणया दग्ध्वा लोकां

इतो मनुष्यलोकात् । तं भगवन्तम् । ततस्तस्मान्नरलोकात् (१) । आदौ निजावतारतः पूर्वमेव । देवान् 'भवद्भिरंशैर्यदुषूपजन्यताम्' इत्युक्तेर्यदून् यदुकुलेऽवतार्य पुनस्तांस्तत्रैव प्रस्थाप्य।स्वतन्वा शुद्धसत्त्वमयतन्वा (२)। अथ दारुकप्रेषणानंतरम् । तत्र प्रभासक्षेत्र एव । समं सह ॥*॥ इतः प्रकटप्रकाशात् । तमेवानु कृष्णस्य पश्चादेव वसुदेवादयोपि ततः प्रपञ्चप्रकाशात्तदेव धाम ययुर्निरंतरवसुदेवादीनां मद्धामगमनोक्तेः (१) । देवान् यदून्विधाय पूर्वं तांस्तदंशांस्तेषु प्रवेश्येत्यर्थः । पुनस्तेभ्यो निस्सार्य देवान्कृत्वा स्वतन्वैव सह (२) । अथोति सार्धत्रिकम् । तत्र प्रभासे ॥१॥ गरुडागमनस्य सामंजस्येऽप्यन्यपक्ष्यागमनस्याद्भुतवद्वानादाह—मैत्रेयादयो वेति॥*॥०॥२॥ परमोत्सुका अत्युत्कंठिताः । तत्र क्षेत्रे । तेषां ब्रह्मादीनाम् ॥ * ॥ ० ॥ ३ ॥ संकुलमाच्छन्नम् ॥*॥०॥ ४ ॥ इत्यत्र नेत्रनिमीलने तात्पर्यमाह—अयं भाव इति । दाक्षिण्याच्चातुर्यबलात् । तान्ब्रह्मादीन् । वंचयितुं मोहयितुम् । इत्वेन समाधिव्याज एवोक्तः। आत्मनि स्वरूपे एवात्मानं संयोज्य भावयित्वा ॥*॥ **संदर्भस्तु**—भगवान् पितामहं वीक्ष्य तदाद्याश्चात्मनो विभूतीर्देवादिरूपा वीक्ष्य ततश्च तत आकृष्य पद्मनेत्रे न्यमीलयत् । किं कृत्व—आत्मनि स्वस्वरूप एवात्मानं मनः संयोज्येति । एवं तत्र योगिनो योगविभूतौ वैराग्यपूर्वकं देहत्यागं शिक्षयितुं तेषु स्वविग्रहतत्त्वमावरीतुं च तत्तद्दर्शितमिति ज्ञेयम् ॥ ५ ॥ श्लोकाभिप्रायं स्फुटयति—अयमर्थ इति । तत्र तनुसहगमने । इत्यर्थ इति—अनेकब्रह्मांडाश्रयस्य वपुषो दाहोऽन्याय्य इति विमृश्य सहैव नीतवानिति भावः । कारणांतरमाह—किञ्चेति । इतरथा तद्दाहे । तयोर्धारणाध्यानयोः। निर्विषयत्वमनाश्रयत्वम् । तन्न संभवतीत्याह—दृश्यते चेति । तथैव यथोक्तमेव । फलप्राप्तिर्दर्शनफलम् । इति भाव इति—अन्यथा स्वरूपदर्शनतत्फलीभूतमुक्त्यादिर्न स्यादिति भावः । चित्तस्य देशसंबन्धो धारणा, प्रत्ययैकतानता ध्यानमिति तयोर्भेदः । शुद्धसत्त्वमयस्य विद्यमानत्वेऽपि तत्प्रतिकृत्यभिप्रायेण यथाश्रुतार्थस्वीकारेऽपि न दोष इत्याह—इच्छाशरीरेत्यादि । तत्रापि यथाश्रुतार्थाङ्गीकारेऽपि । तदपि तत्प्रतिकृतिरूपमपि । सांप्रतमुचितम् । भारते यदुक्तं मौसले—" ततः शरीरे रामस्य वासुदेवस्य चोभयोः । अन्विष्य दाहयामास पुरुषैराप्तकारिभिः ॥ " इति, तदासुरजनमोहार्थमेव । तदुक्तं ब्रह्माण्डे—" स्त्रीपुंमलानुषंगात्मा देहो नास्य विजायते । किन्तु निर्दोषचैतन्यं सुखनित्यां स्वकां तनुम् ॥ प्रकाश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरं प्रविशंति भगवांस्तु न तथा किंत्वदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुण्ठाख्यमविशत् । तत्र हेतुः । लोकाभिरामां लोकानामभिरामोऽभितो रमणं स्थितिर्यस्यां ताम् । जगदाश्रयत्वेन जगतोऽपि दाहप्रसंगादित्यर्थः । किंच धारणाया ध्यानस्य च मंगलं शोभनं । विषयमितरथा तयोर्निर्विषयत्वं स्यात् । दृश्यते चाद्यापि तदुपासकानां तथैव तद्रूपसाक्षात्कारः फलप्राप्तिश्चेति भावः । इच्छाशरीराभिप्रायेण वा यथाश्रुतमेवास्तु तत्रापि तु लोकाभिरामामित्यादीनां विशेषणानामानर्थक्यप्रसंगात् । वस्तुतस्तु तदप्य

यति सैवेयं जनिर्विष्णोर्न चापरा । तथाप्यसुरमोहार्थं परेषाञ्च कचित्कचित् ॥ दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः । क व्रणादि क चाज्ञानं स्वतंत्राचिन्त्यसद्गुणे ॥ मोक्षाभावाय तेषां तु दर्शयेत्तानजो हरिः । कृष्णो ह्यत्यक्तदेहोऽपि त्यक्तदेहस्य देहवत् ॥ लोकानां दर्शयामास स्वरूपसदृशाकृतिम् । " इति । एतेन " ययाऽहरद्भुवो भारं तां तनुं विजहावजः " इति प्रथमस्कन्धोक्तिरपि समंजसा स्यादिति: सर्वमनवद्यम् ॥ * ॥ तथै वाह–लोकाभिरामामिति । तत्र टीकायामेतदुक्तं भवति–वाक्ये खलु कस्यचित्पदस्यान्यार्थप्रतीतौ सत्यामुपदेशपदैरेवार्थो निर्णीयते " आकाशस्तल्लिंगात् " इत्यादिन्यायात् । ततो लोकेत्यादिपदानि दग्ध्वेत्यादिप्रतीतिमुप मर्द्यादग्ध्वेत्येव निश्चिन्वन्ति । तथाहि–लोकाभिरामामित्यनेनोक्तं जगदाश्रयत्वमेव तावत् । तथा तत्प्रतिपादयति–यदि त्वसंकुचितया वृत्त्या लोका ये महावैकुण्ठनित्यपार्षदादयो भक्ता ये चात्मारामादयो ज्ञानिनस्तदाद्याः स्था वरांताः सर्व एवोच्यन्ते, तदा तेषां रमणहेतुना तत्प्रतिपादयतीति किं वक्तव्यमित्यर्थः । तथास्तु तावत् महापार्षदाद्यभिरामत्वविचारः साधकजीवाश्रयत्वविचारोपि तत्तथैव साधयति । यतो धारणाध्यानमंगलमित्युक्तं, तत्र तयोः शोभनविषयत्वरूपार्थोपि तत्संपादयति । यदि च धारणाध्यानमात्राभ्यां तत्तत्कर्तॄणामपि या मंगलरूपा भवति तस्या वा कथमन्यथात्वमित्यर्थः । किंच–धाम्नस्तनोश्च तदपेक्षितत्वव्यंजनाय स्वस्वरूपत्वदर्शनाय वा विशेष णत्वेन पृथक्पृथगेव स्वशब्दौ दत्तौ, तन्वपेक्षया न्यूनत्वसूचकेन कप्रत्येन तु स्वतनोरेव मुख्यत्वं गमितं, स्वतनूमित्यत्र समासोक्त्या च नीलोत्पलादौ नीलत्ववत् तनौ स्वत्वाव्यभिचारो नितरां निश्चितः, तत्र यदि धाम्नस्तेन विशेषेण श्रीभगवदपेक्षितत्वादिकं व्यंजितं तर्हि तनोर्वा कथं न व्यज्येतेति । अथ यद्येवं तर्हि तया धारणया तामदग्ध्वेत्येव किमर्थमकंडूकंडूतिः क्रियते, उच्यते–योगिप्रभृतीनां भ्रमहेतुद्वारा भ्रममनूद्य प्रत्याख्यातमिति तदेतदाह–योगिनो हीति । तदानीं तेनाग्नेयी धारणा कृतेति सत्यमेव किन्तु तया स्वतनूमदग्ध्वैव स्वकं धामाविशत्, ततो योगिनां देहत्यागशिक्षणार्थमेव धारणामनु तदंतर्द्धापनमित्येव ज्ञेयं–नान्यथेति बोधितं तादृशानां चमत्कारिणी लीलैव चैका खल्वसाविति । किंवा–यदि च " इत्यंगोपदिशंत्येके विस्मृत्य प्रागुदाहृतम् । मुनिवासनिवासे किं घटेतारिष्टदर्शनम् ॥ " इत्यनेन " एवं वदंति राजर्षे ऋषयः केचनान्विताः । यत्स्ववाचो विरुध्येत न नूनं ते स्मरन्त्युत ॥ " इत्यनेन च श्रीभगवतस्तादृशत्वमपि मुन्यन्तरमतं श्रीमुनीन्द्रेण न सोढं तदा किमुतेदृशम् । तत्रापि हि मुनिवासनिवास इत्यादिवत्तत्खण्डनाय लोकाभिरामामित्यादिविशे षणानि दत्तानि, तदेव श्रीभगवता स्वतत्त्वगोपनार्थमेव यानि मायया दर्शितानि तदनुवादीन्येव तत्तन्मुनिवचनानि ज्ञेयानि । तदेतदेव दर्शयिष्यते–देवादय इत्यादिभिः । तेष्वपि केषुचित्पूर्वमपि स्वविग्रहो न प्रकटितः किन्तु " नाहं प्रकाशस्सर्वस्य योगमायासमावृतः " इति ' विराडविदुषाम् ' इति च न्यायेनान्य एव कल्पयित्वा दर्शितः । तस्यैव कैश्चित्तन्माययान्यथाकृतदृग्भिर्विसदृशत्वं प्रतीतं, तस्यैव च मानुषदेहतामनूद्य मुनि भिरपि कैश्चिद्वर्णितं, स्वतनूमदग्ध्वेत्येवं हि स्वेच्छामयमायाकल्पितां तनूमेव दग्ध्वेत्यायाति । तदेतदाह–स्वेच्छाशरीराभिप्रायेण वेति । तदप्यसहमान आह–तत्रापि त्विति । स्वेच्छया कल्पितत्वे सति स्वेच्छयैव तिरो धापनं लभ्यते–तथा चाग्नेयधारणापि तथैव कल्पनामयीति भावः । श्रीकृष्णसंदर्भेपि इच्छाशरीरिणेति स्वेच्छाप्रकाशेनेति व्याख्यातम् । यद्वा–इच्छापि शरीरं तद्वत्क्रियासाधकं यस्य तेनेति व्याख्येयम् । तत्रापि तदि च्छाया मायायाः प्रेरकत्वमेवात्र गम्यमिति साध्वेव तद्व्याख्यातं, तमिममर्थं श्रीभगवानिव यन्मुनिजनः परोक्षतया दर्शयति तत्तु युक्तमेव भगवदनुसारित्वात् । तथोक्तम्–" परोक्षवादा ऋषयः परोक्षं मम च प्रियम् " इति **सन्दर्भः** ॥ * ॥ **विश्वनाथस्तु**–धारणाध्यानमंगलं यथा स्यात्तथा शुद्धं जांबूनदमिव स्वतनुं दग्ध्वेतिवत्तदाहोत्तीर्णं जांबूनदमिव स्वतनूमादायैव धामाविशत्, संदिहानान्वादिनस्तु वह्निना स्वतनोर्दाहासामर्थ्यं दर्शया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिवि दुन्दुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ॥ ७ ॥ देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ ८ ॥ सौदामन्या यथाकाशे यांत्या हित्वाऽऽभ्रमंडलम् ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥ ॥ ९ ॥ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः ॥ विस्मितास्तां प्रशंसंतः स्वंस्वं लोकं ययुस्तदा ॥ १० ॥ राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य ॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य चांते संहृत्य चात्ममहिनोपरतः स आस्ते ॥ ११ ॥

दग्ध्वा तिरोधाय निर्गत इत्येव सांप्रतम् ॥ ६ ॥ तदा स्वंस्वमेव लोकमागमिष्यतीति संभ्रमेण देवादिकृतः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवोऽभवदित्याह । दिवीति । भूमेः सकाशात् । श्रीकृष्णमनुययुः ॥ ७ ॥ तदा श्रीकृष्णेंतर्हिते सति कुतो गत इति वितर्कयंतोऽपि ब्रह्ममुख्या देवादयः स्वधामनि विशंतं श्रीकृष्णं न ददृशुः । तत्र हेतुः । अविज्ञातगतिमिति । क्वचित्क्वचिद्ददृशुश्च ततोऽतिविस्मिता बभूवुरित्यर्थः ॥ ८ ॥ अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति । सौदामन्या गतिर्यथा मर्त्यैर्न लक्ष्यते देवैस्तु लक्ष्यते तथा भूमंडलं हित्वा गच्छतः श्रीकृष्णस्य गतिर्देवैरपि न लक्ष्यते । किंतु तत्पार्षदैरेवेत्यर्थः ॥ ९ ॥ १० ॥ अभिप्रायापरिज्ञानात्प्रथमं परिक्लिष्टं ततश्च दृष्टांतेन स्पष्टमुक्तं हृष्टं

मासेति तात्पर्यम् । “ बर्हिमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलम् ” इति तदुक्तेर्व्याचक्षते केचिदित्याह ॥ ६ ॥ तदा भगवन्निर्याणावसरे । संभ्रमेण वेगेन । सुमनसः पुष्पाणि । ‘ भूम्नि स्त्रियां सुमनसः ’ इति रत्नकोशात् । “ स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम् ” इत्यमरः । श्रीः समृद्धिः । एतत्कालिकसत्यादीनामाभासत्वमेव, परमार्थानां श्रीकृष्णानुगतत्वादिति तत्त्वम् ॥ * ॥ सत्यधर्मादयो ययुरिति तत्पराभावकनानाकुपथानां तदैवोत्थापनादिति भावः । श्रीकृष्णभयादेव पृथुयज्ञेंद्रदार्शितनानापाखण्डमतानि तिरोभूया स्थितानि श्रीकृष्णेंतर्हिते तदैवाविरासन्निति यावत् ॥ ७ ॥ कुतो गतो भगवानिति । तत्राऽदर्शने । इत्यर्थ इति—क्वचित्तेजोमंडलं पश्यंतोऽपि वस्तुतस्तन्न ददृशुरिति भावः ॥ * ॥ सर्वज्ञा अपि ब्रह्मादयो न ददृशुरित्यर्थः ॥ ८ ॥ इत्यर्थ इति—पार्षदानां सर्वदा पादसरोजगंधप्रेमातिभरसेवानिरतत्वात्तत्सहचारित्वेन तेषामेव तद्दर्शनमन्येषां तन्मायावृतदृष्टित्वात्तद्दर्शनं दुर्घटमेवेति भावः । “ स एव धातुः पदवीं परस्य दुरन्तवीर्यस्य रथांगपाणेः । यो मायया संततयाऽनुवृत्त्या भजेत तत्पादसरोजगंधम् ॥ ” इत्युक्तेः ॥ * ॥ अविज्ञातगतित्वं दृष्टान्तेन स्पष्टयति—सौदामिन्या इत्यादि । स्वपार्षदैरेवेत्यन्तं तैः । तैश्च पार्षदैर्महावैकुण्ठकारणार्णवक्षीरोदादिभ्य आगत्य भगवद्योगमाययैव हेतुना परस्परालक्षितैः स्वप्रभुं वयं स्वधाम नयाम इत्युल्लसद्भिः सहैव ययौ । तथाविर्भावकाले तत्तद्धामनाथैस्सह पार्षदास्तत आगत्य यदुष्वजनिषत येये ते पुनर्निर्याणकालेपि स्वस्वनाथैः सह तत्रतत्रैव ययुरिति ज्ञेयम् ॥ ९ ॥ योगगतिं योगमायावैभवम् । तां योगगतिम् । तदा भगवन्निर्याणोत्तरावसरे ॥ * ॥ विस्मिता इति—वयं योगेश्वरा इत्यभिमन्यामहे किं त्विमां योगगतिं न विद्म एवेति भावः । प्रशंसन्त इति—कः खल्वेवं कर्तुं प्रभवेद्यः सर्वज्ञैरप्यस्माभिरज्ञाततत्त्वो योगेश्वरैरदृष्टयोगगतिकः, किंतु स्वान्तरभक्तैर्ज्ञात एव दृष्टयोगगतिक एव सन्स्वधाम प्राविशदिति भावः ॥ १० ॥ अभिप्रायो देवमोहनलक्षणः । क्लिष्टमाकुलं परीक्षितं तमेव पूर्वोक्तं दुर्विज्ञेयगतित्वरूपम् । आदिना मत्स्यादिग्रहः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः । परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहाः आविर्भावतिरोभावरूपाश्चेष्टा मायया अनुकरणमात्रमवेहि । नटो
यथाऽविकृत एव नानारूपैर्जन्मादीन्विडंबयति तद्वत् । आस्तां तावद्यादवादिषु जन्मादिशंका यावद्विश्वसर्गनिरोधादिष्वप्यसावविकृत एवास्त इत्याह । सृष्ट्वेति । आत्मना

नटो यथेति–" यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः " इत्युक्तेर्न केवलं लीलाविग्रहेष्वेवेयं लीला किन्तु गुणविग्रहेष्वपीत्याह–आस्तामित्यादि । " तत्सृष्ट्वा तदेवानुप्राविशत् " इति श्रुतेः ॥ * ॥ भगवत
स्तत्परिकराणां च तादृशत्वं सर्वलोकदृष्टम् । खिद्यमानं राजानं लीलातत्त्वसिद्धान्तेनाश्वासयति–राजन्निति । मुनिभिरपि दुर्ज्ञेयतत्त्वो राज्ञा त्वदन्येन कथं ज्ञेयस्स इति, त्वं तु "न्यस्तक्रीडनको बालः कृष्णक्रीडां य आददे"
इति वचनाद्बाल्यमारभ्य तद्भक्तोऽस्यतस्तत्तत्त्वं जानास्येव विना सेव्यज्ञानं सेवानुपपत्तेरिति भावः । परस्य परमेश्वरस्य । तनुभृतां जीवानामिव जननेहा जन्मचेष्टा, अप्ययेहा मरणचेष्टा
च मायया विडंबनमनुकरणमेव जानीहि न तु तत्त्वतः । जीवानां शुक्रशोणितविकृततनुभृतां जन्माप्ययौ दुःखमयौ, परमेश्वरस्य तु चिन्मयविग्रहस्याविर्भावतिरोभावौ सुखमयावेव ।
तदुक्तम्–" देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः । आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥ " इति, ' अजोऽपि जातो भगवान् यथाग्निः ' इति, ' कृष्णद्युमणिनिम्लोचे ' इति, " आदायांतरधाद्यस्तु
स्वबिम्बं लोकलोचनम् " इति, " अनादेयमहेयञ्च रूपं भगवतो हरेः । आविर्भावतिरोभावावस्योक्ते ग्रह ोचने ॥ " इति ब्रह्माण्डोक्तेः । तदपि यत् क्वचिज्जीवस्य जन्माप्ययौ दृश्येते तन्मायया विडंबनमित्यर्थः । यथा
नटस्येति–ऐन्द्रजालिको नटो यथा मिथ्याभूते अपि जन्ममरणे स्वपरेषां दर्शयति तथा तत्र मरणं कश्चिद्दर्शयामास।तत्कथोच्यते–कस्यचिदैन्द्रजालिकस्य महाराजाग्रत एव तद्दत्तेषु वस्त्रालंकारमुद्रादिषु मध्ये रत्नमालामहं गृह्णा
मिन त्वं स्वर्णमुद्रा अहमेव गृह्णामि न त्वं सप्तसाहस्त्रिकोयमश्वो मयैव ग्राह्यो न त्वयेत्येवं तत्पुत्रपौत्रादीनां कलहे पारस्परिकास्त्रघातेन प्रायः सर्वेषामेव मरणमभूत्, तद्दृष्ट्वा महासभोपविष्टं नृपतिं प्रत्यैन्द्रजालिक ऊचे–भो
राजन्नलमतः परं मे जीवितेन इन्द्रजालविद्या यथा शिक्षिता तथैव गुरुचरणप्रसादाद्योगधारणापि साधु शिक्षिता वर्तते तयैव देहत्यागस्तीर्थे कर्तव्योपि सांप्रतं पुण्यकीर्तितीर्थस्य तवैवाग्रे क्रियत इत्युक्त्वा स्वस्तिकासन उप
विश्य प्राणायामप्रत्याहारधारणाध्यानसमाधिनिरतस्तूष्णीमभूत् । मुहूर्तानन्तरं तद्देहतः समाधिजोऽग्निरतिप्रचंड उद्भूय तद्देहं भस्मीचकार । ततस्तत्पत्न्यः शोकार्तास्तमग्निमेव विविशुरथ त्रिचतुर्दिवसानंतरं तेनैवेन्द्रजालिकेन
स्वदेशं गत्वा राजानं प्रति पत्रिका प्रहिता भो राजंस्त्वत्समीपात्स्वस्तिमानेव सकलपुत्रपौत्रभ्रातृकस्त्वद्दत्तानि बहुरत्नान्यादाय त्वद्देशस्थजनैरलक्षित एव स्वभवनमागतोऽहमत्र वर्ते तस्मात्त्वदग्रे प्रकाशिताया इन्द्रजालविद्यायाः
पारितोषिकं यदुचितं तन्मह्यं दातव्यमिति दृष्टान्तविवृतिः । दार्ष्टान्तिकं विवृणोति–आत्मना स्वेनैवेदं मुनिशापनिबंधनमहोत्पातपारस्परिककलहशस्त्रास्त्रप्रहारघातादिकं वैकल्यं सृष्ट्वाऽनुप्रविश्य तन्मध्ये स्वयमपि प्रविश्य
विकृत्य तैर्मर्त्यैः सह स्वयमप्येरकास्त्रग्रहणेन क्षणं खेलित्वांते संहृत्य चात्ममहिम्ना मायात उपरतः सन्नास्त इति **विश्वनाथः** ॥ * ॥ **संदर्भस्तु**–तत्र यादवानां नान्यथात्वं संभवति किमुत श्रीरामस्य श्रीकृष्णस्य चेति सिद्धा
न्तयन्नाह–राजन्निति । परस्य श्रीकृष्णस्य ये तनुभृतः " प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनूम् " इति नारदोक्त्यनुसारेण तदीयां तनुमेव धारयंतस्तत्पार्षदा यादवादयस्तेषां जननाप्ययरूपा ईहा चेष्टा केवलं पर
स्यैव मायाविडंबनमवेहि । यथेंद्रजालवेत्ता नटः कश्चिज्जीवत एव मारयित्वेव दग्ध्वेव पुनश्च तद्देहं जनयित्वेव दर्शयति तस्येव विश्वसर्गादिहेत्वचिंत्यशक्तेस्तस्य तादृशशक्तित्वं न चित्रमित्याह–सृष्ट्वेति । एवं सति श्रीसंक
र्षणादौ मुग्धानामन्यथाभानहेतूदाहरणाभासः सुतरामेव मायिकलीलावर्णने प्रवेशितो भवति । अत एव जरासंधवाक्ये ' तव राम यदि श्रद्धा ' इत्यत्र श्रीस्वामिपादैरपीत्थं वास्तवोऽर्थो व्यंजितः । अच्छेद्यदेहोसाविति
स्वयमेव मत्वाऽपरितोषात्पक्षान्तरमाह–यद्वा मां जहीति । तदेवं चानेन व्याख्यानेन ' लोकाभिरामाम् ' इत्यादिपद्येषु योगिजनशक्तिविलक्षणभगवच्छक्तिव्यंजकं श्रीस्वामिचरणानामदग्ध्वेत्यादिपदच्छेदादिमयव्याख्यासौष्ठवं कैमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धम् ॥ जिग्येंतकांतकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहम् ॥ ॥ १२ ॥ तथाऽप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्रशेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥ १३ ॥

स्वयमेवेदं जगत्सृष्ट्वांतर्यामित्वेनानुविश्य आत्ममहिना स्वमहिम्ना उपरत आस्ते ॥ ११ ॥ न पुनरन्यथा मंतव्यं यतोऽस्मिन्नेवावतारे तत्प्रभावो निरतिशयो दृष्ट इत्याह । मर्त्येनेति । यमेन स्वलोकं प्रति नीतं गुरुसुतं मर्त्येन तेनैव शरीरेण य आनयदानीतवान् । शरणदः शरणागतरक्षकस्त्वां च ब्रह्मास्त्रदग्धं यो रक्षितवान् । यश्चांतकानामंतकमपि ईशं श्रीरुद्रं बाणसंग्रामे जितवान् । मृगयुं लुब्धकं सदेहं यः स्वः स्वर्गमनयन्निन्ये । असौ स्वावने स्वरक्षणे अनीशोऽसमर्थः किम् ॥ १२ ॥ ननु यदि समर्थस्तर्हि किंचित्कालमत्रैव तेनैव वपुषा किं नातिष्ठत्तत्राह । तथापीति । यद्यप्युक्तप्रकारेणाशेषस्य जगतश्चराचरस्य स्थित्यादिष्वनन्यहेतुर्निरपेक्ष एव कारणं स्वयं यद्यस्मादशेषशक्तिधृक् तथापि यादवान् संहृत्य निजं वपुरत्र शेषितमवशेषितं प्रणेतुं कर्तुं नैच्छत् किंतु स्वमेव लोकमनयत् । तत्र हेतुः । मर्त्येन देहेन किं न किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्यां गतिमेव प्रकृष्टां दर्शयन् । अन्यथा तेऽपि दिव्यां गतिमनादृत्य योगबलेन देहसिद्धिं विधायात्रैव रंतुं यतेरंस्तन्मा भूदित्येतदर्थमिति भावः ॥ १३ ॥

त्यातिशयेन सुष्ठ्वेव स्थापितम् । यत एव च दृश्यतेऽद्याप्युपासकानामित्यादिपंचकं तदुक्तं सुसंगतं भवति तत्तत्परिकरेणैव सार्द्धं तेषु तत्साक्षात्कार इति ॥ ११ ॥ एतन्नाघटितमित्याह—न पुनरित्यादि ।*निरतिशयः सर्वाधिकः । तेनैव यच्छरीरं यमो नीतवांस्तेनैवेत्यर्थः । रक्षितवान् पुनरजीवयत् । तेनैव येन बाणप्रहारः कृत इत्यर्थः । किमत्र वितर्के । किन्तु समर्थ एव प्रयोजनाभावान्न रक्षितवानित्यर्थः ॥ *:॥ अप्राकृतदेहानां तेषां तन्न संभवतीत्यास्तां श्रीकृष्णपाल्यत्वेनैव न संभवतीत्याह—मर्त्येनेति । यः श्रीकृष्णः यमलोकगतमपि गुरुसुतं गुरोर्जातेन पञ्चजनभक्षितेन मर्त्येन देहेनैवानयत् । न च ब्रह्मतेजसो बलवत्त्वं मन्तव्यम्, त्वां च ब्रह्मास्त्रदग्धं यद्यस्माद्ब्रह्मास्त्रादानयत् रक्षितवानित्यर्थः । किमन्यद्वक्तव्यं, यश्चान्तकानामंतकारिणां त्रिपुरादीनां महारोगादीनामप्यंतकारिणं श्रीरुद्रमीशं सर्वनियन्तारं बाणासुरयुद्धे जितवानिति, यश्च जराह्वं मृगयुं स्ववैकुण्ठविशेषं सदेहं प्रापितवान् स कथं स्वानां यदूनामवने ईशो न भवति, तस्मात्तेष्वन्यथात्वदर्शनं न तात्त्विकलीलानुगतं, सशरीरं तु तेषां स्वलोकगमनमतीव युक्तमित्यर्थः ॥*॥ **विश्वनाथस्तु—**तदवने शक्तोपि स स्वपार्षदैः सह सदापि प्रपञ्चगोचरीभूतोपि विराजितुं शक्नोत्येवेति भावः ॥ १२ ॥ पुनरत्राक्षिपति—नन्विति । येन भूभारो हृतस्तेनेत्यर्थः । निरपेक्ष एवेति दुरवबोध इवायं:तत्र विहारयोगो यदशरणोऽशरीर इदमनपेक्षितास्मत्समवाय आत्मनैवाविक्रियमाणेन ' सगुणमगुणः सृजसि पासि हरसि ' इति वृत्रोपाख्याने देवगणोक्तेः । तत्र स्वलोकनयने । "भूभारः क्षपितो येन जहौ तच्च कलेवरम् । कंटकं कंटकेनैव द्वयं चापीशितुस्समम् ॥" इत्युक्तेः प्रयोजनाभावादत उक्तम्—मर्त्येन किमिति । किंचित्प्रयोजनमपि तन्नयने सूचयति—स्वस्थानामिति । अन्यथा मया मर्त्यापरित्यागे । तेऽपि आत्मनिष्ठा अपि । इति भाव इति—"योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् । तच्छ्रद्दध्यान्न मतिमान् " इत्युक्तेः । " न हि तत्कुशलादृत्यं तदायासो निरर्थकः । अंतवत्त्वाच्छरीरस्य" इत्युक्तेश्चेत्याशयः ॥ * ॥ तथापि यद्यप्येवं निरंकुशैश्वर्यस्तदापीत्यर्थः । तत्र निरंकुशैश्वर्यमाह—अशेषाणामेव लोकानां स्थित्यादिष्वनन्यहेतुनिरपेक्षः स एवैकः कारणं यतोऽशेषाश्शक्तीर्धत्त इति सः । तथापि देवान्स्वर्गे प्रस्थाप्य वपुः सपार्षदस्य स्वस्य शरीरं शेषितुमवशेषितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एतां प्रातरुत्थाय कृष्णस्य पदवीं पराम् ॥ प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमाम् ॥ १४ ॥ दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः ॥ पति
त्वा चरणावस्रैर्न्यषिञ्चत्कृष्णविच्युतः ॥ १५ ॥ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप ॥ तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्च्छिताः ॥ १६ ॥
तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः ॥ व्यसवः शेरते यत्र ज्ञातयो घ्नंत आननम् ॥ १७ ॥

य एतामुक्तप्रकाराम् । पदवीं गतिम् ॥ १४ ॥ तदैव भगवता स्वलोकं गच्छता वसुदेवादीनामपि तत्प्राप्तये य उपायश्चिंतित आसीत्तमाह दारुक इत्यादिना ॥ १५ ॥
॥ १६ ॥ १७ ॥

प्रणेतुं मर्त्यलोके प्रकटीभूतं कर्तुं नैच्छत् किंत्वंतर्द्धापयितुमैच्छत् । कुतः—मर्त्येन मर्त्यलोकेन किं भगवता मर्त्यलोकापेक्षा न कृता किन्तु स्वर्गलोकापेक्षा कृतैव स्वर्गस्थानां ब्रह्मादीनां प्रार्थनयैव मर्त्यलोके प्रादुर्भावात् । तेषामेव प्रार्थनया वैकुंठं च जगामेति व्यंजयन् विशिनष्टि—स्वस्थान्स्वर्गस्थान्ब्रह्मादीन्प्रति गतिं वैकुण्ठगमनं प्रदर्शयन् ज्ञापयन्सन् । व्याख्यान्तरं तु—“ आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ” इत्याद्युद्धववाक्य विरोधादसुरसंमतत्वाच्च भक्तैरग्राह्यम् । तस्यासुरसंमतत्वं भक्ताग्राह्यत्वञ्चोद्धवेनैवोक्तम् । यथा—“ देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः । भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ ॥ ” इति ॥ * ॥ सन्दर्भस्तु—नन्तु गच्छन्तु ते सशरीरा एव तत्रापि स्वयं भगवान्विराजत एवेति न तेषां तद्विरहदुःखमपि श्रीभगवांस्तु तथा समर्थश्चेत्तर्हि कथमन्यांस्तादृशानाविर्भाव्य तैः सह मर्त्यलोकानुग्रहार्थमपरमपि कियन्तं कालं मर्त्यलोकेऽपि प्रकटो नासीदित्यत्र सिद्धान्तयंस्तेषां श्रीभगवतश्च सौहार्दभरेणापि परस्परमव्यभिचारित्वमाह—तथापीति । यद्यप्युक्तप्रकारेणाशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदस्मात्तद्दूर्द्ध्वमप्यनंततादृशशक्तिधृक् तथापि यादवानंतर्धाप्य निजं वपुरत्र शेषितं प्रणेतुं किञ्चित्कालं स्थापयितुं नैच्छत्किन्तु स्वयमेव लोकमनयत् । तत्र हेतुः—तान्विना मर्त्येन लोकेन किं मम प्रयोजनमिति स्वस्थानां तद्धामगतानां तेषां गतिमेव स्वस्याभिरुचितत्वेन प्रकृष्टं दर्शयन्निति ॥ * ॥ **दीपिका** तु—अत्रैव भूर्लोक एव । यादवांश्च विहारोपयुक्तत्वेन त्यक्तुमशक्यान् संहृत्य प्रकटधाम्नि संगमय्य । अत्र भूलोकेऽवस्थातुमिच्छाविरहे । अन्यथा मर्यादामतिक्रम्य बहुकालावस्थाने । तेऽपि योगिनोपि । अत्रैव मर्त्यलोक एव । तन्मर्त्यलोके विषयावेशेन रमणमिति वैराग्यदर्शनं बाह्यं प्रयोजनमांतरिकं तु नित्यपरिकरवियोगासहनमेव ज्ञेयम् ॥ १३ ॥ एतामतर्क्याम् । तामेव श्रीकृष्णगतिमेव । तं प्राप्नोति आत्मत्वेन श्रीकृष्णं साक्षात्करोतीति भावः ॥ * ॥ पदवीं निर्याणमार्गम् । अत्र परामिति अनुत्तमामिति पदाभ्यां भगवतो निर्याणलीलेयं सच्चिदानन्दात्मिकैव सर्वथा ज्ञेया, लोकदृष्ट्या मायिकत्वप्रतीतिस्त्वकिञ्चित्करा सुधियामिति द्योतितम् ॥ १४ ॥ तत्प्राप्तये स्वलोकावाप्तये । उपायो निजवृत्तकीर्तनपूर्वकदारुकप्रेषणलक्षणः ॥ * ॥ अत्र **दीपिका**—दारुक इति सार्द्धकम् । तत्प्राप्तये स्वलोकप्राप्तये ॥ १५ ॥ तद् वृष्णिनिधनम् ॥ * ॥ निधनं वस्तुतस्तु नितरां धनं निजलोकगमनम् । तच्छ्रुत्वेति सार्धकम् । अत्र वियोगवर्णनान्नार्थांतरापेक्षेति ज्ञेयम् ॥ १६ ॥ तत्र प्रभासक्षेत्रे । घ्नंतः कराभ्यां ताडयन्तः ॥ * ॥ ० ॥ १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्णरामावपश्यंतः शोकार्ता विजहुः स्मृतिम् ॥ १८ ॥ प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥ कृष्णपत्न्योऽविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ २० ॥ अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः ॥ आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः ॥ २१ ॥ बंधूनां नष्टगोत्राणामर्जुनः सांपरायिकम् ॥ हतानां कारयामास यथावदनुपूर्वशः ॥ २२ ॥

कृष्णरामौ सुतावपश्यंतः ॥ १८ ॥ १९ ॥ २० ॥ सदुक्तिभिः सत्योऽवितथा उक्तयो येषु तैः । "नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोयं नाभिजानाति लोको मामजमव्ययम्" इत्यादिभिर्भगवद्गीतादिप्रसिद्धैश्च ॥ २१ ॥ नष्टगोत्राणां नष्टसंततीनाम् । सांपरायिकं पिंडोदकादिकार्यम् ॥ २२ ॥

स्मृतिं देहानुसंधानलक्षणां विस्मृतिं प्रापुरित्यर्थः॥*॥देवकीति सार्द्धकम् । पूर्वं यथा भगवन्नित्यपरिकरप्रद्युम्नानिरुद्धाद्यंशा एव द्वारकातः प्रभासमाजग्मुस्तथैव देवकीरोहिण्याद्यंशा एव प्रभासमागमन्, मूलभूतास्तु देवक्याद्या द्वारकायां प्रापंचिकलोकदृष्ट्या व्यराजंतैवेति ज्ञेयम् ॥ १८ ॥ तत्र तदा । तास्तौ[1] यादवस्त्रियः ॥ * ॥ प्राणांश्च जहुरिति तत्त्यागे उद्यमं चक्रुरित्यर्थः । दशमीदशाया उपस्थितत्वात् । "अशिवत्वान्न घटते भक्ते कुत्राप्यसौ मृतिः" इति भक्तिरसामृतोक्तेः । उपगुह्येति सार्द्धकम् । स्त्रियो यदुस्त्रियः पतीन् श्रीकृष्णनित्यगणानन्तर्हितान्मनसाऽऽलिंग्य चितां संहतिं नित्यसिद्धानां समुदायस्थानं तन्नित्यधामारुरुहुः प्रापुः ॥ १९ ॥ रामपत्न्य इति बहुत्वाद्रेवतीप्रधाना अन्या अपि बलदेवभार्यास्सन्ति स्मेति । तद्देहं रामदेहम् । तद्गात्रं वसुदेवगात्रम् । हरेः स्नुषा रत्याद्याः अग्निमविशन् । तदात्मिकाः कृष्णार्पितचित्ताः । श्रीकृष्णप्रतिकृतेरंतर्हितत्वात्तद्ध्याने नैवाग्निप्रवेशं चक्रुरित्यर्थः ॥ * ॥ रामपत्न्यश्च तद्देहं स राम एव देहो यस्य तं रामं देहदेहिभेदशून्यामित्यर्थः । "देहदेहिभिदा चात्र नेश्वरे विद्यते क्वचित्" इति ब्रह्मतर्कोक्तेः । उपगुह्य ध्यानेन मनसालिंग्याग्निं प्रकाशांतरेण भुक्तं तद्धामाविशन् । "त्रिषु चिता चितायां संहतौ स्त्रियाम्" इति "अग्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधे पुमान् । अन्नभक्ते च भुक्ते स्यात्" इति च मेदिनी । एवं वसुदेवपत्न्योपि तद्गात्रं स एव गात्रं कलेवरं यस्य स तं वसुदेवमित्यर्थः । तस्य 'सत्त्वं विशुद्धं वसुदेवशब्दितम्' इत्यत्र संदर्भे ह्लादिनीसंवित्स्वरूपशक्तिसारत्वेन निर्णीतत्वेन जीवत्वासंभवेन देहदेहिभेदशून्यत्वात् । शेषं पूर्ववत् । कृष्णपत्न्य इत्यर्धकम् । तदात्मिकाः स एव कृष्ण आत्मा स्वरूपं यासां ताः स्वरूपशक्तयः । अग्निभुक्तं नित्यानुभूतं नित्यधामाविशन् ॥ २० ॥ सदुक्तिभिर्भीष्मपर्वस्थगीतोक्तिभिः । आदिना "यदायदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥" इत्यादिग्रहः ॥ * ॥ **संदर्भः**—सदुक्तिभिः "मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" इत्यादिपर्यवसानाभिः । यथाह स्वर्गपर्वणि—"ददर्श तत्र गोविन्दं ब्राह्मेण वपुषान्वितम् । तेनैव दृष्टपूर्वेण सादृश्येनोपसूचितम् ॥ दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्थितम् । चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्रहैः ॥ उपास्यमानं वीरेण फाल्गुनेन सुवर्चसा । यथास्वरूपं कौन्तेय तथैव मधुसूदनम् ॥ तावुभौ पुरुषव्याघ्रौ समुद्वीक्ष्य युधिष्ठिरम् । यथार्हं प्रतिपद्येते पूजया देवपूजितौ ॥" इति ॥ २१ ॥ संपराये परलोके हितं सांपरायिकम् । "संपरायः सतीके स्यादापदुत्तरकालयोः । परलोके श्रेष्ठधने शुभप्रा

[1] तातेत्यत्र तास्ता इति पाठाऽभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वा महाराज श्रीमद्भगवदालयम् ॥ २३ ॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याऽशेषाशुभहरं सर्वमंगलमंगलम् ॥ २४ ॥ स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः ॥ इंद्रप्रस्थं समावेश्य वज्रं तत्राऽभ्यषेचयत् ॥ २५ ॥ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथम् ॥ २६ ॥

॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

तावपष्यिते ॥" इति निरुक्तिः । अनुपूर्वशः पितामहस्य कृत्वा पितुस्तदनंतरं तत्पुत्रस्य तदनु तत्पौत्रस्येति क्रमेण ॥ * ॥ वस्तुतस्तु—अदृष्टवशानां हतानां श्रीकृष्णनित्यपरिकरत्वेनावगतानाम् । योऽनु
पूर्वशः क्रमशः यथावत्सत्यतया संपरायो नित्यधामप्राप्त्युत्तरकालस्तत्रोचितं नामकीर्तनादिकं वैष्णवैः कारयामास " संपरायस्समीपे स्यादापदुत्तरकालयोः " इति मेदिनी ॥ २२ ॥ हरिणा त्यक्तामंतर्द्धापिताम् । तत्रापि
भगवदालयं द्वारकास्थं भगवन्मन्दिरमधुनापि समुद्रे यथारचनं स्थितं भगवदनुग्रहं विना चर्मदृष्टिभिर्न दृश्यत इति ध्येयम् ॥*॥ परोक्षार्थस्य पुरंजनादिकथावन्मूले शुकेनाव्याख्यातत्वाद्द्वारकालीलाया अनित्यत्वमाशंक्य दुःखितं
राजानं तन्नित्यत्वेन सांत्वयति—द्वारकामिति युग्मकेन । हरिणा त्यक्तामिति लोकदृष्ट्यैव । वस्तुतस्तु—अत्यक्तामिति पदच्छेदः । आप्लावयत्परितो जलेन परिखावदावृणोत्, जलप्लावनं तु समुद्रेण स्वदत्तस्य भूमिलक्षणस्य
हस्तिनापुरप्रस्थापितेतरजनगृहाद्यधिष्ठानबहिरावरणस्यैव तस्यैव विश्वकर्मणा निर्मितत्वात् । द्वारकाया दिव्यातिदिव्यसंस्थानवत्तया नित्यसिद्धत्वात् । अत एव ' वर्जयित्वा ' इत्युक्तम् । श्रीमान् यादवादिगृहवृन्दशोभोपशोभावान्
यो भगवदालयस्तं वर्जयित्वा । तदुक्तं श्रीहरिवंशे यादवान्प्रति श्रीनारदेन—"कृष्णो भोगवतीं रम्यामृषिकांतां महायशाः । द्वारकामात्मसात्कृत्य समुद्रं गमयिष्यति॥" इति तत्र भगवदालये भगवान्नित्यं सन्निहित इति। अर्थात्तत्रत्याना
मिति शेषः॥*॥संदर्भस्तु—भगवदालयं वर्जयित्वा तस्याद्यापि कदाचिद्दूरतो दर्शनादिति तत्रत्यानां महती प्रसिद्धिः।तत्र महाराजेति संबोधनं दृष्टांतगर्भम्।यद्वा—महांतो राजानो यादवलक्षणा यत्र तथाभूतं तदालयं श्रीकृष्णनित्यधाम
रूपं द्वारकापुरम् ॥२३॥ तदेवाह—नित्यमव्यवहितं तत्राब्धिगमन्दिरे सन्निहितः स्थितः । तन्मंदिरज्ञापकं चिह्नं संहितायामुक्तम्—"अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः । अद्यापि श्रूयते नित्यं द्वारकायामहर्निशम् ॥"
इति । तत्र समुद्रजलांतर्गतभगवन्निक्षिप्तद्वारकास्थमंदिराज्जलद्वारा नित्यमयं श्लोको विज्ञैः श्रूयतेऽतस्तत्र सदैव मधुसूदनावास इति ज्ञायते ॥ * ॥ स्मृत्येति द्वयं वर्जनहेतुरूपमालयविशेषणं न केवलं पुरमात्रास्तित्वं तत्र
च श्रीमति भगवदालये मधुसूदनः श्रीकृष्णो नित्यमेव सन्निहितोऽर्थात्तत्रत्यानां भगवान् यादवादिलक्षणाखिलनिजैश्वर्यवानेव । किंभूतं तदालयम्—स्मृत्येति । साक्षादधुना व्यक्ततद्दर्शनाभावात्स्मृत्येति या स्वयमेवं भूतस्तस्य
त्वन्यथासंभावितत्वमपि नास्तीति भावः । एवमेव विष्णुपुराणे—" प्लावयामास तां शून्यां द्वारकां च महोदधिः । यदुदेवगृहं त्वेकं नाप्लावयत सागरः ॥ नात्यक्रामत्ततो ब्रह्मंस्तदद्यापि महोदधिः । नित्यं सन्निहित
स्तत्र भगवान्केशवो यतः ॥ तदतीव महत्पुण्यं सर्वपापप्रणाशनम् । विष्णुक्रीडान्वितं स्थानं दृष्ट्वा पापात्प्रमुच्यते ॥ " इति । तत्र हरिवंशवाक्ये द्वारकामात्मसात्कृत्वेत्यत्र न तु त्यक्त्वेत्यर्थो गम्यः ॥ २४ ॥
वज्रं तन्नामानं श्रीकृष्णप्रपौत्रमनिरुद्धात्मजं तत्रेंद्रप्रस्थसमीपे सामीपिकाधारसप्तम्यर्थे त्रल् । मथुरायामित्यर्थः । ब्राह्मणद्वारा राजानमभ्यषिञ्चत् । " मथुरायां तथा वज्रं शूरसेनपतिं ततः " इत्युक्तेः ॥ * ॥ वस्तुतस्तु हत
शेषान् ज्ञातावशिष्टान् । तत्र स्त्रीबालवृद्धेषु ॥ २५ ॥ पितामहा युधिष्ठिरादयः । वंशधरं वंशकृत्यधारकम् । तच्च राज्यमेव । महापथं हिमालयम् ॥ * ॥ सुहृदां वं सान्त्वनं दधातीति सुहृद्वधो नित्यलीलास्थानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥ २७ ॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि ॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥ २८ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यामेकादशस्कन्धे मौशलकथनभगवदंतर्धाननिरूपणं नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

समाप्तोऽयमेकादशः स्कंधः ॥ ११ ॥ श्रीकृष्णार्पणमस्तु ॥

आदित आरभ्य श्रीकृष्णचरितकीर्तनस्य फलमाह य एतदिति द्वाभ्याम् ॥ २७ ॥ शंतमानि परममंगलानि । परमहंसगतौ श्रीकृष्णे ॥ २८ ॥ एवमेकादशस्कंधभावार्थस्य प्रदीपिका ॥ स्वाज्ञानध्वांतभीतेन श्रीधरेण प्रकाशिता ॥ १ ॥ इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यामेकादशस्कंधे श्रीधरस्वामिविरचितायां श्रीभावार्थदीपिकायां टीकायामेकत्रिंशोऽध्यायः ॥ ३१ ॥

समाप्तोऽयमेकादशः स्कन्धः ॥ ११ ॥ श्रीकृष्णार्पणमस्तु ॥

श्रुत्वा तत्रैव गमनाय सत्वराः सन्तो महापथं तद्ध्यानोपयुक्तं स्थानं जग्मुरिति वास्तवोऽर्थः । ‘ वः सान्त्वने च वाते च ’ इति मेदिनी ॥ २६ ॥ एतत्पूर्वोक्तं । श्रीदशमस्कंधोक्तजन्मलीलामारभ्य निर्याणांतम् । तदेवाह—कर्माणि जन्म चेति । सर्वपापैः कायवाङ्मनःसंचितैः । तानि च भारते—“ अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥ पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः । असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिंतनम् । वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥ ” इति ॥ * ॥ ० ॥ २७ ॥ इहान्यत्र च शंतमानि । रुचिरा मनोहरलीलावत्त्वेनानंदजनका अवतारा मत्स्यादयो यस्य श्रीकृष्णस्य स रुचिरावतारस्तस्य वीर्याणि गोवर्धनोद्धरणादीनि । एतेन लीलोपसंहारेपि श्रीकृष्णोऽवतार्यैवेति परब्रह्मस्वरूप इति तद्ध्यानादेर्मोक्षप्रदत्वमित्याह । परमहंसानां दत्तात्रेयादीनां गतौ आत्मत्वेन प्राप्ये । यद्वा—परमं श्रीहरिं घ्नन्ति जानन्ति परमहंसा भक्तास्तेषां गतावाश्रये ॥ * ॥ बालचरितानि ‘ आषोडशाच्च बालः स्यात् ’ इति प्रसिद्धेर्वृंदावनीयचरितानि त्वतीवसुखदतमानीत्यर्थः । अन्यत्र पुराणादौ । इह श्रीभागवते च श्रुतानि । परां प्रेमलक्षणाम् । यद्वा—अन्यत्र परलोके इह च लोके परममंगलानीति योज्यम् । सर्वस्य श्रीकृष्णचरितस्य फलं परमभक्तिपूर्विका तत्प्राप्तिरेवेत्याह—परमहंसगतौ । तेषामपि तद्गुणाकृष्टानां स एव गतिः किमुत मूलत एव तद्भक्तानामिति भावः । अत एव श्रीकुंतीदेव्याप्युक्तम्—“ तथा परमहंसानां मुनीनां चाखिलात्मनाम् । भक्तियोगविधानार्थम् ” इति । ज्ञानिनामपि भक्तियोगविधानं ज्ञानेन केवलेनं स्वप्राप्तौ क्लेशं संभाव्यैवेति भावः। “क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्” इत्युक्तेः॥ (२८) ॥०॥*॥ **दीपिका—**स्वाज्ञानेति—स्वेषां यदज्ञानलक्षणं ध्वान्तं तस्माद्भीतेनेति। वस्तुतः श्रीवाग्देव्या तस्य परोपकारकत्वमुक्तम् ॥ श्रीमद्भागवतैकादशस्कधस्य प्रकाशकः ॥ भावार्थदीपिकाया वै श्रीवंशीधरशर्मणा ॥ १ ॥ संदब्धोऽनेकटीकानां सारमादाय तुष्टये ॥ श्रीनंदसूनोर्युक्तस्य वृषभास्करजातया ॥ २ ॥ २८ ॥ यं वक्तुं न शशाक सर्वधरणीधर्ता सहस्राननो नित्यं संयतमानसोऽपि प्रवदन्प्रज्ञातसर्वागमः ॥ कालिंदीतटवल्लवीगणयुतं श्रीराधिकावल्लभं वन्दे भक्तजनेप्सितप्रदमहं तं नंदसूनुं सदा ॥ १ ॥ बालिश्याद्यन्मया ह्यत्र व्याख्यातमयथा बुधैः ॥ तच्छोध्यं कृपया शिष्यं मां ज्ञात्वा दीनवत्सलैः ॥ २ ॥ इति श्रीखरडपत्तनवास्तव्यपण्डितवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाश एकादशस्कन्ध एकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

॥ समाप्तश्चायमेकादशः स्कन्धः ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवतैकादशस्कन्धो
मुम्बय्यां श्रीकृष्णदासात्मज–क्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"–
(स्टीम्) मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया
चोपेते श्रीमद्भागवत एकादशस्कन्धः समाप्तः ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ श्रीधरीयटीकया वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया चोपेते श्रीमद्भागवते द्वादशस्कन्धप्रारंभः ॥ १२ ॥

२३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशस्कंधः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ राजोवाच ॥ ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥ कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥

॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ जयंति श्रीपरानन्दकृपापांगलसद्दृशः ॥ या नित्यमनुवर्तंते संपदो विगता दृशः ॥ १ ॥ उक्तस्त्रयोदशाध्यायैर्द्वादशे त्वाश्रयः सतः ॥ अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरः सतः ॥ २ ॥ उक्तो लयावधित्वेन प्राकृतात्यंतिके लये ॥ अधिष्ठानतया चोक्तो महापुरुषवर्णने ॥ ३ ॥ तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षिते ॥ शेषैस्तत्राखिलान्याह सूतः पृष्टोऽथ सत्त्रिभिः ॥ ४ ॥ स्वाश्रयश्रवणे कार्यो न विलंबो मनीषिणा ॥ इत्येतत्कालवैषम्यं चतुर्भिस्तावदुच्यते ॥ ५ ॥ तत्र तु प्रथमे भाविमागधान्वयभूमिपान् ॥ कलिप्रभावतः प्राह संकरादिमलीमसान् ॥ ६ ॥ एवंभूते सोमवंशे मुकुंदस्वैरक्रीडा वर्णिताऽथो स एव ॥ वंशो भावी वर्ण्यते कृष्णभक्तिं मुक्त्वा मुक्त्यै वर्त्म नास्तीति वक्तुम् ॥ ७ ॥ तदेवं वैवस्वतमनुवंशे सोमवंशप्रस्तावेन श्रीकृष्णावतारचरितानि सप्रपंचमनुवर्णितानि । अथेदानीं भावी सोमवंशः कलौ विजातीयसंकरादिमलीमसो वैराग्यद्वारा श्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते । तत्र तु सोमवंशशाखासु चिरकालानुवर्तितया मागधवंशोऽनुक्रम्यते । तत्र पूरोर्वंशे उपरिचरो वसुस्तस्य बृहद्रथस्तस्य जरासंधस्तस्य सहदेवः पुत्रोऽभूदित्युक्तं नवमस्कंधे । तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवा इत्यादयो रिपुंजयांता विंशतिर्भाविनो राजानो निरूपिताः

ॐ स्वस्ति श्रीगणेशाय नमः ॥ वंदेऽहं गोपिकानाथं यशोदानंदनन्दनम ॥ वृन्दारकगणाधीशं वृन्दावननिकुञ्जगम् ॥ १ ॥ नमस्कृत्य गुरून्सर्वानखिलाभीप्सितप्रदान् ॥ द्वादशस्कंधविवृतिं प्रारभे विदुषां मुदे ॥ २ ॥ श्रीगुरुं परमानंदं वन्द आनंदविग्रहम् ॥ यस्य संनातिमात्रेण चिदानंदायते वपुः ॥ १ ॥ श्लोकोऽयमधिकः केषुचित्पुस्तकेषु दृश्यते मंगलरूपत्वान्मयाप्यत्रालेखीति । जयंति श्रीपरानंदेत्यादिपद्यमेकादशे व्याख्यातमपि पुनरपि किञ्चिद्व्याख्यास्यामः—श्रीः राधा तया सहितः परानंदः श्रीकृष्णः । यद्वा—श्रियां परस्तत्परः श्रीपरः 'श्रीः कैटभारिहृदयैककृताधिवासा ' इति मार्कंडेयोक्तेः । स चासावानंदश्चेति श्रीपरानंदः । यद्वा—श्रीः परोत्कृष्टा यासु ताः श्रीपरा गोप्यस्ता आनंदयतीति श्रीपरानन्दः । कृपया युक्ता अपांगाः कटाक्षाः कृपापांगास्तैर्लसंत्यो देदीप्यमाना या दृशः दृक्पातास्ताः कृपापांगलसद्दृशः, श्रीपरानंदस्य कृपापांगलसद्दृशः श्रीपरानंदकृपापांगलसद्दृशो जयंति सर्वोत्कर्षेण वर्तंते । या अनु नित्यं संपदो वर्तंते । किंभूता दृशः—विगताश्चक्षुरगोचरा इत्यर्थः । यद्वा—विगताऽदृगज्ञानं याभिस्ता इत्यर्थः । भक्त्यादिरूपा इत्यर्थः । यद्वा—यादृशोऽनुसंपदोऽविगताः सदा वर्तंत इत्यर्थः (१) । सतः सद्रूपतया प्रतीयमानस्य प्रपंचस्याश्रयस्त्रयोदशाध्यायैरुक्तं इत्यन्वयः । तमेवाह—सत ईश्वर आश्रयः । काभ्यामित्यत आह—अधिष्ठानेति । (२) । प्राकृतः सर्वप्रकृतिलयात्मकः आत्यंतिको मोक्षः, एतल्लयद्वयेऽवधित्वेन सर्वावसानभूमित्वेनेश्वरः उक्तः । महापुरुषो विराट् तद्वर्णने चाधिष्ठानतया सर्वाधारतयोक्तश्च सर्वलोकानां तदवयकल्पनया तदाधारोऽवयवी विराड्रूपीश उक्त इत्यर्थः (३) । तत्र त्रयोदशाध्यायेषु । शेषैः सप्तभिः । खिलान्याकांक्षितार्थपूरकाण्याख्यानानि । सत्त्रिभिः शौनकादिभिः (४) । इत्येतदिति कालविलंबपरित्यागार्थम् । कालवैषम्यं कालकृतबुद्धिवैषम्यम् । तावदादौ (५) । तत्र चतुर्ष्वपि । संकरो वर्णसंकरत्वम्, तदादिभिरसत्यसंभाषणादिदोषैर्मलीमसान्मलिनान् (६) । एवंभूते पूर्वोक्तपावनत्वादिविशेषणविशिष्टे । ' वंशः सोमस्य पावनः ' इत्यादिनवमोक्तेः । बुद्धौ सन्निहितत्वादेवंभूत इत्युक्तम् । मुकुन्दस्य हरेः । स्वैरक्रीडा स्वेन वेदरूपेणात्मना वर्णिता पूतनादिवधरासादिरूपा क्रीडा । पूतनावधादिरूपा क्रीडापि वेदेनोक्ता, तत्र प्रमाणीभूताः काश्चिच्छ्रुतयोऽपि तत्रतत्र सभाष्या उक्ता एव । स्वैरक्रीडा वेदाविहिता क्रीडेति व्याख्यानमत्र न शोभनम् ' यदायदा हि धर्मस्य ' इत्यादिश्रीगीताविरोधात् । स एव चंद्रवंश एव । मुक्त्वा त्यक्त्वा । मुक्त्यै मोक्षाय । अन्यद्वर्त्मान्यो मार्गो नास्तीति कथयितुम् । कलौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ योंत्यः पुरंजयो नाम भाव्यो बार्हद्रथो नृपः ॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम् ॥ २ ॥ प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः ॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ ३ ॥ नंदिवर्धनस्तत्पुत्रः पंच प्रद्योतना इमे ॥ अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः॥४॥शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः ॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥५॥ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥ ६ ॥ नंदिवर्धन आजेयो महानंदिः सुतस्ततः ॥ शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयम् ॥ ॥ ७ ॥ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः ॥ महानंदिसुतो राजन्छूद्रीगर्भोद्भवो बली ॥८॥ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत् ॥ ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः ॥ ९ ॥ स एकच्छत्रां पृथिवीमनुल्लंघितशासनः ॥ शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥ १० ॥

(तत्र राजा पृच्छति । स्वधामेति ॥ १ ॥) इदानीं तदुपरितनं वंशं संकरादिदोषैः प्रपंचयति । योंत्य इति । रिपुंजय एव पुरंजयः । स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतसंज्ञं राजानं करिष्यति यस्य पालको नाम सुतो भविष्यति ॥ २ ॥ ३ ॥ प्रद्योतनाः प्रद्योतसंज्ञाः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ नंदो नाम कश्चिन्महापद्मसंख्यायाः सेनाया धनस्य वा पतिर्भविष्यति अत एव महापद्म इत्यपि तस्य नाम ॥ ९ ॥ एकमेव छत्रं यस्यां तां पृथिवीं शासिष्यति पालयिष्यति । क्षत्रोत्सादने दृष्टांतः । भार्गवः

नित्यनैमित्तिकादिकर्माऽकरणादंतःकरणशुद्धेरनुदयाज्ज्ञानयोगाद्यसंभवाद्भक्तिरेव मुख्यो मुक्तिमार्गः “ कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः ” इत्यादिपाद्मोक्तेः (७) । स्वधामेत्यादिप्रश्नश्लोकश्च न स्वामिसंमत इति भाति । तैश्च तदेवमित्यारभ्य रिपुंजयांता विंशतिर्भाविनो राजानो निरूपिता इत्यंतेन पूर्वसंबंधमनूद्य तदुपरितनं वंशं संकरादिदोषैः प्रपंचयति—योन्त्य इति श्लोकावतरणं दत्तवद्भिः प्रश्नस्य काप्यनुल्लेखात्, वंशकथनप्रस्तावस्य नवमस्कंधतः प्रवृत्तत्वाद्भगवन्निर्याणानंतरं स्ववंशस्य मागधवंशस्य च विद्यमानत्वेन तादृशप्रश्नासंभावाच्च । अत एवायं प्रश्नश्लोको विजयध्वजविश्वनाथाभ्यां परित्यक्तः ॥ १ ॥ अंत्यो वंशावसानभवः । ‘ भाव्यो वार्हद्रथो नृपः ’ इति प्रचुरः पाठः । वारहद्रथ इह रेफेऽकारागमस्त्वार्ष एव ध्येयः । तस्य पुरंजयस्य । अमात्यो मन्त्री ‘ अमात्यः सचिवो मंत्री ’ इत्यभिधानात् ॥ २ ॥ तत्पुत्रः पालकपुत्रः । ततो विशाखयूपात् ॥ ३ ॥ तत्पुत्रो राजकपुत्रः । इमे प्रद्योतनेन सह पंचसंख्याका अष्टात्रिंशदुत्तरवर्षशतकं १३८ पृथ्वीं भोक्ष्यंति पालयिष्यंति “ भुजोऽन वने ” इत्यतः परस्मैपदम् ॥ ४ ॥ ततः प्रद्योतनेभ्यः पश्चात् । भाव्यो भविष्यति । तत्सुतः शिशुनागःसुतः । तस्य काकवर्णस्य ॥ ५ ॥ तस्य क्षेत्रज्ञस्य, तस्य अजातशत्रुः, तस्येत्युभयान्वयि । तत्सुतोऽजातशत्रुसुतः ॥ ६ ॥ आजेयोऽजयपुत्रः । अत्रैकारमध्यत्वमार्षम् । ततो नंदिवर्द्धनस्य । षष्ट्युत्तरशतत्रयं ३६० राज्यभोगवर्षसंख्येयम् ॥ ७ ॥ समा वर्षाणि ‘ हायनोऽस्त्री शरत्समाः ’ इत्यमरः । हे कुरुश्रेष्ठेति—त्वं त्वतीव पवित्रेऽपि कुरुवंशे श्रेष्ठोऽसि येन श्रीकृष्णलीलामृतमंते पीतमिति भावः । हे राजन्निति—त्वं तु धर्मेणैव राजसे न तु गणितनृपसदृशोऽसीति भावः ॥ ८ ॥ अत एव महापद्मसेनादिपतित्वादेव । मत्वर्थीयाजंताश्रयणे तस्यापि तन्नाम संभवति, महापद्माः संत्यस्येति निरुक्तेः । स्वेन सह भोजनसंबंधादिकमकुर्वतां क्षत्रियाणां विनाशकः, तत्त्रासभयाच्छुद्धाः क्षत्रियास्ततः पलायित्वा यवनादिदेशं गता वैश्यवृत्त्यादिजीविनो भविष्यंति, ततःप्रभृति नृपाः शूद्रप्राया भविष्यंति । प्रायःशब्देन शूद्रराज्यबाहुल्ये क्वचित्क्षत्रियावशेषो बोध्यते, क्षत्रवंशविरोधे च द्वितीयभार्गव इव । तथा च भार्गवेणैकविंशतिवारं पृथिव्यां क्षत्रहनने यत्कार्त्तवीर्यद्वेषेण हननं तस्यैव पञ्चपुत्रावशेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः ॥ य इमां भोक्ष्यंति महीं राजानः स्म शतं समाः ॥ ११ ॥ नव नंदान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ ॥ १२ ॥ स एव चंद्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥ तत्पुत्रो वारिसारस्तु ततश्चाशोकवर्धनः ॥ ॥ १३ ॥ सुयशा भविता तस्य संगतः सुयशःसुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १४ ॥ शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरम् ॥ १५ ॥ समा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह ॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोऽथ भविष्यति ॥१६॥

परशुराम इव ॥ १० ॥ समाः संवत्सरान् ॥११ ॥ नव नन्दान्नन्दं तत्पुत्रांश्चेत्येवं नव । प्रपन्नान्विश्वस्तान्विख्यातान्वा । द्विजः कौटिल्यवात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यत्युन्मूलयिष्यति । मौर्याः मौर्यसंज्ञाः ॥ १२ ॥ कथं भोक्ष्यंति तदाह । स एवेति । चंद्रगुप्तं मौर्यप्रथमम् ॥ १३ ॥ १४ ॥ तेषां पंचमो दशरथः पराशरादिभिरुक्तोऽ

श्रवणात्, किमु वाच्यं क्षत्रियांतरवंश्यानाम्, तथापि बहवो हता बहवो देशांतरं गता इति ज्ञेयम् ॥ ९ ॥ १० ॥ तस्य महापद्माख्यनंदस्य ॥ ११ ॥ विश्वस्तहननस्य महापापत्वादाह—विख्यातान्वेति । विश्वस्तघातस्य महापापत्वे भोजीयकपिसिंहकथानुसंधेया दृष्टांतत्वेन । तथाहि—कदाचिद्भोजनृपतये तदाज्ञया तद्भार्याया भानुमत्या मूर्तिं लिखित्वा कालिदासो दर्शयामास । स च तां जघनदेशे तिलकालकांकितां दृष्ट्वाऽनेन मद्भार्या रमितेति शंकितो भूत्वा तं देशान्निष्कासयामास । तदनु कदाचिन्मृगयां गतो नृपो विषमवने भयार्त्तः क्वचिदारूढवानरवृक्षमारुरोह, वानरोऽपि तेन मैत्रीं कृतवान्, स च तत्रैव विश्वस्य शिश्ये । तदा च कश्चित्कपिविरोधी सिंहस्तत्रागत्येमं मे देहीति वैरनिर्यातनार्थमुवाच । स च शरणापन्नत्यागे दोषं दृष्ट्वा न ददौ । ततश्च कपिरपि सिंहायाहं न प्रक्षेप्यस्त्वयेत्युक्त्वा शिश्ये । स एव सिंहः पुनरागत्य राजानमुवाच देहि म इमं कपिन्नो चेत्त्वां भक्षयिष्यामीतोऽवतीर्णमिति, तच्छ्रुत्वा कपिं राजा प्रक्षिप्तवान्, स च पतन्कांचित्तद्वृक्षशाखामालंब्य तत्रैवागत्य राजानं कुष्ठी भवेति शशाप । पुना राज्ञा प्रसादितः 'वि–से–मि–रा' इति वर्णचतुष्कार्थश्रवणेनोल्लाघो[1] भविष्यसीत्युवाच । ततो नृपो गृहमागत्य वन्यवृत्तं मंत्रिभ्य उक्त्वा विद्वत्समाजमक्षरचतुष्कार्थश्रवणार्थं चकार । तत्र च राजनिष्कासितः कालिदासः स्त्रीवेषेण कस्याचिद्विदुषो गृहे धारानगर्यामेवासीत् । स ततस्तद्राजवृत्तमाकर्ण्य। पित्रीकृतं पंडितमित्थमुवाच—मदीया पुत्री त्वदभिलषितवर्णचतुष्कार्थं जानाति तामिहाहूय पृच्छेति नृपाय कथयेति।स च तथा कृत्वा स्त्रीवेषिणं तं नृपसदसि निनाय।स च स्त्रीवेषी कालिदासः:पृथगर्थं प्रत्येकवर्णस्योक्तवान्। तथाहि—" विश्वासप्रतिपन्नेषु ये च विश्वासघातकाः ॥ ते यांति नरकं घोरं ताडिता यमकिंकरैः ॥ (१) ॥ सेतुबंधे समुद्रे च गंगासागरसंगमे ॥ स्नात्वा पापविमुक्तः स्यान्मित्रद्रोहकरं विना ॥ (२) ॥ मेरुतुल्यान्महापापान्कृत्वा संगं सतां नरः ॥ मुच्यते न हि संदेहो मित्रद्रोही न मुच्यते ॥ (३)॥ राजन्भोः शृणु मद्वाक्यं यदि कल्याणमिच्छसि ॥ देहि दानं सुविप्रेभ्यस्ततः श्रेयो भविष्यति ॥ (४)" ॥ इत्याकर्ण्य भोजः स्वस्थो भूत्वा तामुवाच—" गृहे वससि भो देवि वनं क्वापि न गच्छसि ॥ पञ्चास्यकपिमद्वृत्तं कथं जानासि सुंदरि ॥ (५) ॥"। स चोवाच—"देवाद्विजप्रसादेन कंठे वसति शारदा ॥ सर्वं जानामि भो राजन्भानुमत्यास्तिलं यथा ॥ (६) ॥"। ततो नृपस्तं कालिदासं ज्ञात्वा प्रसाद्यानयामासेति बृहद्भोजप्रबंधे ॥ १२ ॥ स एव कुटिलो द्विज एव । तत्पुत्रश्चन्द्रगुप्तपुत्रः । ततो वारिसारात् ॥ १३ ॥ तस्याऽशोकवर्द्धनस्य । ततः सुयशसः । तस्य शालिशूकस्य ॥ १४ ॥:ततस्तदनंतरम् । तस्य सोमशर्मणः । तत्तस्मात् शतधन्वनः । मौर्या मुरवंशजाः हीनजातयः कैवर्त्ताः " मुरो दैत्यविशेषे च कैवर्त्ते चौषधे स्त्रियाम् " इति कोशात् । सप्तत्रिंशच्छतोत्तरम् १३७ राज्याब्दाः ॥ १५ ॥ हे कुरुकुलमुदूर्द्ध्वमाधिक्यं प्रापयतीति तथा, भवता तु कुरुकुलकीर्त्तिराधिक्यं नीताऽतस्त्वादृशामेव राज्ञां भवनमुचितमिति भावः । अत्र टीका[2]ऽनुसारेण "हत्वा बृहद्रथं सौर्यं तस्य सेनापतिः कलौ।

१ 'उल्लाघो निर्गतो गदात्' इत्यमरोक्त्या नीरोग इत्यर्थः । २ अष्टादशश्लोकटीकानुसारेणेत्याशयः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुमित्रो भद्रकश्च पुलिंदो भविता सुतः ॥ ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ १७ ॥ ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः ॥ शुंगा दशैते भोक्ष्यंति भूमिं वर्षशताधिकम् ॥१८॥ततः कण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ॥ शुंगं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ॥१९॥ स्वयं करिष्यते राज्यं वसुदेवो महामतिः ॥ तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ नारायणस्य भविता सुशर्मा नाम विश्रुतः ॥ २० ॥ काण्वायना इमे भूमिं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ युगे ॥ २१ ॥ हत्वा कण्वं सुशर्माणं तद्भृत्यो वृषलो बली ॥ गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः ॥ २२ ॥ कृष्णनामाऽथ तद्भ्राता भविता पृथिवीपतिः ॥ श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥ ॥ २३ ॥ लंबोदरस्तु तत्पुत्रस्तस्माद्धि विकलो नृपः ॥ मेघस्वातिश्च विकलादटमानस्तु तस्य च ॥ २४ ॥ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः ॥ पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनंदनः ॥२५॥ चकोरो बहवो यत्र शिवस्वातिररिंदम ॥ तस्यापि गोमती पुत्रः पुरीमान् भविता ततः॥२६॥

त्राप्यनुसंधेयः तेन सह मौर्या दश । सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतं समाः ॥ १५ ॥ १६ ॥ १७ ॥ बृहद्रथस्य सेनापतिः । पुष्पमित्रो नाम स्वामिनं बृहद्रथं हत्वा राज्यं कारिष्यति स च शुंगानां प्रथमः । ततोऽग्निमित्रादयो नवेत्येवं शुंगा दशवर्षशताधिकं द्वादशाधिकं वर्षशतम् ॥ १८ ॥ कथं कण्वान्यास्यति तदाह । शुंगमिति । परस्त्री कामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेवनामा कण्वो राज्यं करिष्यति ॥ १९ ॥ कण्वानां चतुर्थः सुशर्मा ज्ञेयः ॥ २० ॥ इमे वसुदेवादयः काण्वायना वर्षाणां त्रीणि शतानि पंचचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यंति ॥ २१ ॥ कण्वानामंतिमं सुशर्माणं हत्वा बली नामा तद्भृत्यो गां भोक्ष्यति ॥ २२ ॥ २३ ॥ २४ ॥२५॥ यत्र

पुष्पमित्रस्तु शुंगाह्वः स्वयं राज्यं कारिष्यति " इति श्लोकोपि क्वचित्पुस्तकेषु दृश्यते । तस्मादग्निमित्रात् । अथ सुज्येष्ठात्[१] ॥ १६ ॥ वसुमित्रस्ततो, भद्रकस्ततः पुलिंदः । ततः पुलिंदात् । तस्माद्घोषात् ॥ १७ ॥ ततः पुष्पमित्रात् । ततो वज्रमित्रात् । तस्माद्भागवतात् । एते शुंगा दशवर्षशतानि द्वादशाधिकानि १०१२ भोक्ष्यंतीत्यमपि केचिद्व्याख्यांति ॥ १८ ॥ १९ ॥ तस्य वसुदेवस्य । तस्य भूमित्रस्य । अर्थं[२] ततो नारायणादनन्तरम् ॥ २० ॥ पञ्चचत्वारिंशदुत्तरशतत्रयं ३४५ राज्याब्दाः ॥ २१ ॥ २२ ॥ तद्भ्राता बलिभ्राता । तत्पुत्रः कृष्णपुत्रः । तत्सुतः श्रीशांतकर्णसुतः ॥ २३ ॥ तत्पुत्रः पौर्णमासपुत्रः । तस्माल्लंबोदरात् । तस्य मेघस्वातेः ॥ २४ ॥ तस्य चेति चकारात्तस्याटमानस्यानिष्टकर्मा, तस्य च हालेयः, तस्य हालेयस्य । तत्पुत्रस्तलकपुत्रः । ततः पुरीषभीरोः ॥ २५ ॥ बहवो बहुसंज्ञाः । अष्टसु चरमोऽष्टम एव । तस्य शिवस्वातेः ।

१ इदमुत्तरान्वयि मूले । "२ सुशर्माख्योऽथ नृपतिः कण्वानां भविता ततः" इतिपाठाभिप्रायेणैतत् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेदशिराः शिवस्कंदो यज्ञश्रीस्तत्सुतस्ततः ॥ विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः स लोमधिः ॥ २७ ॥ एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च ॥ षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन ॥ २८ ॥ सप्ताभीरा आवभृत्या दश गर्दभिनो नृपाः ॥ कंकाः षोडश भूपाला भविष्यंति च लोलुपाः ॥ ॥ २९ ॥ ततोऽष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः ॥ भूयो दश गुरुंडाश्च मौना एकादशैव तु ॥ ३० ॥ एते भोक्ष्यंति पृथिवीं दशवर्षशतानि च ॥ नवाधिकां च नवतिं मौना एकादश क्षितिम् ॥ ३१ ॥ भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः ॥ किलिकिलायां नृपतयो भूतनंदोऽथ वंगिरिः ॥ ३२ ॥ शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः ॥ इत्येते वै वर्षशतं भविष्यंत्यधिकानि षट् ॥ ३३ ॥ तेषां त्रयोदश सुता भवितारश्च बाह्लिकाः ॥ पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥ ३४ ॥ एककाला इमे भूपाः सप्तांध्राः सप्त कोशलाः ॥ वैदूरपतयो भाव्या नैषधास्तत एव हि ॥ ३५ ॥

येषु बहुसंज्ञेष्वष्टसु चरमः शिवस्वातिनामा भविता ॥ २६ ॥ २७ ॥ २८ ॥ आवभृत्या अवभृतिर्नगरी तद्राजानः ॥ २९ ॥ ३० ॥ एते आभीरादयो मौनव्यतिरिक्ताः पंचषष्टिनृपा एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति । ततः पूर्वोक्ता एवैकादश मौनास्त्रीण्यब्दशतानि क्षितिं भोक्ष्यंति ॥ ३१ ॥ तैः संस्थिते तेषु मृतेषु किलकिलायां पुर्यां नृपतयो भविष्यंतीत्युत्तरेणान्वयः ॥ ३२ ॥ अधिकानि च षड्वर्षाणि ॥ ३३ ॥ तेषां भूतनंदादीनां यथायथं बाह्लिकनामानस्त्रयोदश सुता भविष्यंति । अथ पुष्पमित्रो नामान्यो राजन्यः अस्य च दुर्मित्रो नाम पुत्रः ॥ ३४ ॥ तथा अंध्राः कोशला विदूरपतयो निषधाश्च एते च तत्तद्देशनामभिः प्रख्यातास्तुल्यकालाः ।

ततो गोमतिनः ॥ २६ ॥ ततः पुरीमतो मेदशिराः, ततः शिवस्कंधः । तत्सुतः शिवस्कंधसुतः । ततो यज्ञश्रियः । तत्सुतो विजयसुतः । भाव्यो भविष्यति । ततश्चंद्रविज्ञात्स प्रसिद्धो लोमधिः, सकारसहितो वा नाम ॥ २७ ॥ हे कुरुनंदनेति—त्वं तु भगवद्भक्तत्वात्कुरुकुलमेव नन्दयसि गणितनृपास्तु स्वात्मनंदका अपि नेति भावः । षट्पंचाशदुत्तरचतुश्शतं ४५६ राज्याब्दाः ॥ २८ ॥ गर्दभिनो गर्दभिसंज्ञकाः । कंकाः कंकसंज्ञाः । लोलुपा लंपटाः ॥ २९ ॥ ततः कंकेभ्यः पश्चात् । यवना म्लेच्छाः । पुंष्कसा निषादाच्छूद्रयुद्भूताः । गुरुण्डा गुरुंडसंज्ञाः, गुरुगुरुरित्येवं डुवंति भाषंत इति गुरुंडाः ' डू—भाषणे ' तुदादिर्व्याकरणांतरज्ञेयः, तत औणादिको डख् प्रत्ययः 'औणादिका अपरिमिताः प्रयोगमनुसृत्य प्रयोक्तव्याः' इत्युक्तेः " धातूनामप्यनंतत्वान्नानार्थत्वाच्च सर्वथा " इत्यनुभूत्युक्तेर्डूरप्यूदंतो धातुः कल्पनीयः ॥ ३० ॥ किञ्च—दुर्योधनजन्मन्येव कलेरारंभः, तद्वर्षोत्तरं कृष्णाविर्भावः, ततो नवतिवर्षोत्तरं परीक्षिज्जन्म, ततो नंदाभिषेकावधि पंचदशशतं दश च, तन्मिलित्वैकाधिकषोडशशतम् । ततो नवनंदानां शतम्, मौर्याणां सप्तत्रिंशदुत्तरशतं च, शुंगानां द्वादशाधिकं दशवर्षशतम्, काण्वायनानां त्रीणि शतानि पञ्चचत्वारिंशच्च, बल्यादित्रिंशद्राज्ञां चत्वारि शतानि, सप्ताभीरादीनां षट्पञ्चाशत्त्रीणि शतानि च, ततो यवनादिगुरुंडांतानां सहस्रं नवनवत्यधिकं च, एवं पञ्चाशदधिकपञ्चसहस्र ५०५० वर्षाणि जातानि । तत्रैतट्टीकाप्रणयनकालिकविक्रमार्कशरनिगमनंदेन्दु १९४५ :मिताब्दपर्यंतं कलेश्चतुःसहस्रनवशतैकोननवतिसंख्यानि वर्षाण्यतीतानीति टीकांतरानुरोधादनुसंधेयम् ॥ ३१ ॥ तत एतदुक्तराज्योत्तरम् । तैरिति सप्तम्यर्थे तृतीया, तेष्वित्यर्थः । संस्थिते इत्येकत्वमपि बहुत्वे, संस्थितेष्वित्यर्थः ॥ ३२ ॥ तद्भ्राता यशोनंदिभ्राता ॥ ३३ ॥ अथ वाह्लिकराज्यानं

१ ' चतुर्दश तु पुष्कसाः ' इति पा० । २ एतट्टीकामुद्रणसमये तु वैक्रमेब्दे १९६५, गतकलिः ५००९ । ३ शिशुनन्दिभ्रातेति शोभनः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. द्वा. श्री. टी. ॥ ४ ॥

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरो वर्णान्पुलिंदयदुमद्रकान् ॥ ३६ ॥ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगंगामाप्रयागं गुप्तां भोक्ष्यति मेदिनीम् ॥ ३७ ॥ सौराष्ट्रावंत्यभीराश्च शूद्रा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यंति शूद्रप्रायजनाधिपाः ॥३८॥ सिंधोस्तटं चंद्रभागां कौन्तीं काश्मीरमंडलम् ॥ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥३९॥ तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ॥ एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ४० ॥ स्त्रीबालगोद्विजघ्नाश्च परदारधनाहृताः ॥ उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः॥४१॥ असंस्कृताः क्रियाहीना रजसा तमसाऽऽवृताः॥प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ॥ ४२ ॥

खंडमंडलेषु भूपास्तत एव तेभ्यो बाह्लिकेभ्य एव भाव्या भविष्यंति ॥ ३५ ॥ ततश्च मागधानां तु राजा विस्फूर्जिर्नाम भविता । स च पूर्वोक्तात्पुरंजयादपरः पुरंजय इति प्रसिद्धः सन्वर्णान्ब्राह्मणादीन्पुलिंदयदुमद्रकसंज्ञान्म्लेच्छप्रायान्करिष्यति । अपरानिति पाठे अन्यान्पुलिंदादिसंज्ञान्वर्णान्करिष्यतीत्यर्थः ॥ ३६ ॥ किंचैवं कृत्वाऽब्रह्मभूयिष्ठा अत्रैवर्ण्यप्रचुराः सतीः प्रजाः स्थापयिष्यति पालयिष्यति । स च पद्मवत्यां पुरि वसन् अनुगंगां गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ॥ ३७ ॥ तदनंतरं च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्या उपनयनरहिता भविष्यंति ॥ ३८ ॥ अब्रह्मवर्चसा वेदाचारशून्याः ॥ ३९ ॥ इमे च म्लेच्छप्राया भूभृतस्तुल्यकाला भविष्यंति । किंच एते सर्वेऽधर्मानृतपरा अधर्मेऽनृते च परिनिष्ठिताः फल्गुदा अल्पदातारः ॥४०॥ उदितास्तमितप्राया हर्षशोकादिबहुलाः॥४१॥ असंस्कृता

तरम् ॥ ३४ ॥ ३५ ॥ इत्यर्थ इति–पुलिंदादीन्हीनजातीनेव ब्राह्मणादिस्थाने स्थापयिष्यति, ब्राह्मणादिकर्म तैः कारयिष्यतीति भावः ॥ ३६ ॥ स पुरंजयः । क्षत्रं क्षत्रियजातिमुत्साद्य नाशयित्वा यत्र कुत्र स्थितं गुप्तमपि क्षत्रं यथाकथंचिन्नाशयिष्यतीत्यर्थः ॥ ३७ ॥ 'व्रात्यः संस्कारहीनः स्यात्' इत्यमरः । प्रायपदेन क्वचित्क्षत्रपरा अपि भविष्यंतीत्यसूचि ॥ ३८ ॥ सिंधुनाम्नी नदी, समुद्रश्च । कौंतीं पुरम् । अब्रह्मवर्चसः ब्राह्मणभक्तिहीनाः 'वर्चस्तेजसि सेवने' इति निरुक्तिः ॥ ३९ ॥ इमे आंध्राद्याः । म्लेच्छप्रायाः शास्त्राऽस्वीकारात् ॥ ४० ॥ उदितास्तामितप्राया अल्पकालस्थितिमंतः ॥ ४१ ॥ शास्त्राऽविहितकर्तृत्वे सति

भा. दी. प्र. टीका. अ० १

॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति पीडिताः ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे प्रथमोऽध्यायः ॥ १ ॥

गर्भाधानादिसंस्काररहिताः । प्रजा भक्षयिष्यंति धनाद्यपहारादिना पीडयिष्यंति ॥ ४२ ॥ किंच तन्नाथाः ते नाथा येषां ते जनपदा देशवर्तिनो मनुष्यास्तच्छी
लाचारवादिनस्तेषामिव शीलमाचारो वादश्च तद्वंतः ॥ ४३ ॥ इति श्रीमद्भागवते म० द्वादशस्कंधे भावार्थदीपिकायां टीकायां प्रथमोऽध्यायः ॥ १ ॥

गोहिंसादिपरत्वं म्लेच्छत्वम् , तद्वंतो म्लेच्छाः ॥ ४२ ॥ अन्यत्तत्संगकृतानर्थमाह—तन्नाथा इति ॥ (४३) ॥ किञ्चिद्वैलक्षण्येनैतदध्यायार्थो भविष्येऽपि ब्रह्मणा कार्त्तिकेयं प्रति वर्णितः । तथाहि—“ कलौ के वै
भविष्यंति नृपचिह्नयुता नराः ॥ ज्ञातुमिच्छामि तेषां तु नामानीह जगद्गुरो ॥ १ ॥ ते वै राज्यं करिष्यंति कति वर्षाणि तत्र हि ॥ ब्रह्मन्नेतत्समाचक्ष्व परं कौतूहलं हि मे ॥ २ ॥ ब्रह्मोवाच ॥ सत्यादिकेषु बहुशः
श्रुता भूपास्त्वया गुह ॥ शृणु वक्ष्ये कलियुगे संक्षेपेण सुरोत्तम ॥ ३ ॥ पांडवानां कुलोत्पन्ना विष्णुरातादिका नृपाः ॥ इक्ष्वाकुवंशजा भूपास्तथा मागधवंशजाः ॥ ४ ॥ कलौ राज्यं करिष्यंति वर्षाणां वै सहस्र
कम् ॥ कलिसंध्यां समारभ्य राज्यमेतत्त्रयं स्मृतम् ॥ ५ ॥ ततो नृपा भविष्यंति पञ्च प्रद्योतसंज्ञकाः । अष्टत्रिंशोत्तरशतं कलौ ते राज्यकारकाः ॥ ६ ॥ शिशुनागा दश नृपाः षष्ट्युत्तरशतत्रयम् ॥ कलौ भोक्ष्यंति
पृथिवीं राजानो धर्मतत्पराः ॥ ७ ॥ अतः परं नृपा लोके शूद्रप्रायास्त्वधार्मिकाः ॥ शिशुनागात्परे राज्ये शूद्रीगर्भोद्भवो बली ॥ ८ ॥ महापद्मधरः कश्चिन्नंदो राज्यं करिष्यति ॥ नंदस्य चाष्ट पुत्राश्च भविष्यंति च
भूमिपाः ॥ तेषां तु वशगा भूमिर्भविष्यति शतं समाः ॥ ९ ॥ अब्रह्मण्यान्द्विजः कश्चिद्दुष्टान्नंदसुतानथ ॥ अयोग्या इति मत्वा तु राज्यात्तानुद्धरिष्यति ॥ १० ॥ अराजके तु जगतीं विप्रदत्तां कलौ युगे ॥ भोक्ष्यंति
दश मौर्याश्च सप्तत्रिंशोत्तरं शतम् ॥ ११ ॥ ततः शुंगा दश नृपा दशवर्षशताधिकम् ॥ कलौ राज्यं करिष्यंति विख्याताः सर्वतो दिशि ॥ १२ ॥ कण्वो हत्वा नृपं शुंगं राज्यलोभेन स्वामिनम् ॥ स्वयं करिष्यते राज्यं
वसुदेवेति विश्रुतः ॥ १३ ॥ तत्पुत्रपौत्राः पृथिवीं चत्वारिंशच्च पंच च ॥ शतानि त्रीणि वर्षाणां भोक्ष्यंति च कलौ युगे ॥ १४ ॥ तद्भृत्यस्त्वंध्रजातीयः कंचित्कालमुशत्तम ॥ चकार राज्यं हत्वा वै काण्वं तु वृषलो
बली ॥ १५ ॥ तस्य वंशोद्भवास्त्रिंशद्भविष्यंति कलौ नृपाः ॥ भोक्ष्यंत्यांध्रास्तु पृथिवीं चत्वार्यब्दशतानि च ॥ १६ ॥ षट्पंचाशोत्तरं कालं परं तस्मान्निबोध मे ॥ सप्ताभीराश्च पृथिवीं भोक्ष्यंत्यब्दशतं कलौ ॥ १७ ॥
ततो नृपा भविष्यंति दश गर्दभिसंज्ञकाः ॥ अष्टाधिकाञ्च नवतिं तेषां राज्यं भविष्यति ॥ १८ ॥ कंका षोडश भूपाला भविष्यंति कलौ गुह ॥ पालयिष्यंति गां ते वै वर्षाणाञ्च शतद्वयम् ॥ १९ ॥ ततो वै विक्रमो
नाम भवितोज्जयिनीपतिः ॥ यो वै म्लेच्छान्सुसंपन्नान्कोटिशो निहनिष्यति ॥ २० ॥ तस्य राज्यं कलौ स्कंद पञ्चत्रिंशोत्तरं शतम् ॥ भविष्यति परे काले शालिवाहस्ततो नृपः ॥ २१ ॥ शतं वर्षाणि पृथिवीं
भोक्ष्यत्यवितथोद्यमः ॥ ततोऽष्टौ यवना भाव्यास्तुरुष्का वै चतुर्दश ॥ वर्षाणि चैव पृथिवीं भोक्ष्यंति शिवनंदन ॥ २२ ॥ भूयः कलौ भविष्यंति मौना एकादशैव तु ॥ ते वै भोक्ष्यंति पृथिवीं वर्षाणां च शतत्रयम् ॥ २३ ॥
किलकिलायां ततो जाता भूतनंदादयो नृपाः ॥ कलौ राज्यं करिष्यंति पंचाधिकशतं समाः ॥ २४ ॥ एते कलौ सार्वभौमाः खंडराज्यमतः परम् । तेषां त्रयोदश सुता भविष्यंति च वाह्लिकाः ॥ २५ ॥ तत ।
परं सप्तसप्त कौशलांध्राश्च कीर्त्तिताः ॥ वैदूरपतयो भाव्या नैषधास्तदनंतरम् ॥ २६ ॥ विश्वस्फूर्तिश्च भविता करिष्यत्यन्यथा जनान् ॥ तीव्रमन्युः सर्ववर्णान्म्लेच्छप्रायान्करिष्यति ॥ २७ ॥ तस्मिन्काले सिंधु
तीरं कौंतीं कार्श्मीरमंडलम् ॥ भोक्ष्यंति ब्राह्मणाः शूद्रा म्लेच्छाश्चाब्रह्मवर्चसः ॥ २८ ॥ म्लेच्छप्राया इमे भूपाः फल्गुदास्तीव्रमन्यवः ॥ अल्पायुषोऽल्पसत्त्वाश्च भविष्यंति कलौ युगे ॥ २९ ॥ प्रजास्ते भक्षयि
ष्यंति म्लेच्छा राजन्यरूपिणः ॥ अन्योन्यतो राजभिश्च क्षयं यास्यंति वै प्रजाः ॥ ३० ॥ एते भोक्ष्यंति पृथिवीं द्वादशोर्द्ध्वचतुष्टयम् ॥ एवं वै धर्मप्राधर्ष्ये भविष्यति कलौ यदा ॥ ३१ ॥ भविष्यति तदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच॥ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया॥कालेन बलिना राजन्नंक्ष्यंत्यायुर्बलं स्मृतिः॥ १॥वित्तमेव कलौ नृणां जन्माचारगुणादयः॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥ दांपत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥ ३ ॥

द्वितीये तु कलेर्दोषवृद्धौ कल्क्यवतारतः ॥ अधर्मिष्ठे जने नष्टे पुनः कृतयुगागमः ॥ १ ॥ कलिधर्मान्प्रपंचयति ततश्चेत्यादिना ॥ १ ॥ धर्मन्याययोर्व्यवस्थायां बलमेव ॥ २ ॥ दांपत्ये भार्यापतिभावेऽभिरुचिरेव हेतुर्न कुलगोत्रादिः । व्यावहारिके क्रयविक्रयादौ । स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठ्ये रतिकौशलमेव हेतुर्न कुलमाचारो वा ॥ ३ ॥

स्कंद ब्रह्मज्ञानैकमानसः ॥ तस्योपदिष्टं मार्गं वै ग्रहीष्यंति च ये जनाः ॥ ३२ ॥ ते वै राज्यं करिष्यंति तस्य शिक्षानुसारतः ॥ धर्मेण राज्यवृद्धिश्च कलौ तेषां भविष्यति ॥ ३३ ॥ यदा वेदे च विप्रे च वैष्णवे च पराङ्मुखाः ॥ तदा तेषां क्षयः स्कंद भविष्यत्यचिरेण हि ॥ ३४ ॥ तेषां राज्यात्परे काले म्लेच्छा गौरमुखा नृपाः ॥ प्रबलाः संभविष्यंति प्रजापालनतत्पराः ॥ ३५ ॥ अल्पकालेन तेषां वै राज्यवृद्धिर्भविष्यति ॥ नृपा बलिं हरिष्यंति गौरवर्णानुगाखिलाः ॥ ३६ ॥ अशीतिशतवर्षे ते राज्यं नीत्यनुसारतः ॥ कृत्वा पश्चिमदेशीयैर्नृपैर्यास्यंत्यदर्शनम् ॥ ३७ ॥ यदा वेदेषु विप्रेषु वैष्णवेषु च शुद्धधीः ॥ तदा नृपा विजेष्यंति म्लेच्छान्धर्मपराङ्मुखान् ॥ ३८ ॥ तस्मिन्काले खंडनार्थे शतशश्च सहस्रशः ॥ भविष्यंति कलौ स्कंद राज्यपालनतत्पराः ॥ ३९ ॥ धर्मश्चैव कलौ स्कंद ततः संस्थां गमिष्यति ॥ किञ्चित्कालांतरे भूयो भविता विजयो नृपः ॥ ४० ॥ तेषां कुले समुत्पन्नो धर्मज्ञानैकतत्परः ॥ तस्य वंशोद्भवा भूपाः कलौ पंचशतानि ते ॥ वर्षाणि वै करिष्यंति राज्यं पंचाशदुत्तरम् ॥ ४१ ॥ अतः परं रोहितके पत्तने संभविष्यति ॥ कलौ नागार्जुनो नाम नृपचिह्नयुतस्तदा ॥ ४२ ॥ तद्वंशे राज्यभोगस्तु वर्षाणां वै सहस्रकम् ॥ तस्मात्परं बलिर्नाम नृपो वै संभविष्यति ॥ ४३ ॥ तस्य वंशोद्भवा भूपाः सहस्राणि शताधिकम् ॥ वर्षाणि ते कलौ स्कंद नृपा राज्यकराः स्मृताः ॥ ४४ ॥ अतः परं कलियुगे नृपाः शूद्रादयः स्मृताः ॥ म्लेच्छप्राया जनपदा भविष्यंति कलौ गुह ॥ ४५ ॥ एकीभूतं जगत्सर्वं म्लेच्छज्ञानैकसंस्थितम् ॥ दृष्ट्वा चाधर्मबाहुल्यं विष्णुः कल्किर्भविष्यति ॥ ४६ ॥ आशुगं हयमारुह्य म्लेच्छान्वै स वधिष्यति ॥ ततः कृतयुगं भूयो भविष्यति शिवात्मज ॥४७॥ एवं कलौ मया प्रोक्ता नृपचिह्नयुता नराः ॥ समासेनैव ते स्कंद किं भूयः श्रोतुमिच्छसि ॥४८॥ इति भविष्ये चतुर्थकल्पे ॥४३॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे प्रथमोऽध्यायः ॥ १ ॥ ॥ सत्ययुगागमः ॥ कृतयुगागमः (१) । ततः कलिकृतप्रजाक्षयप्राप्तेः । अनुदिनं प्रत्यहम् । हे राजन्निति–‘ यथा राजा तथा प्रजा ’ इति न्यायेन यथा त्वदीयराज्ये धर्मादीनां वृद्धिस्तथा कलिराज्ये धर्मादिह्रासश्चेति भावः ॥१॥ जन्माद्युत्कर्षहेतुर्न तु ब्राह्मणत्वादिरिति भावः। “यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुतवान् गुणज्ञः । स एव वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयंति॥ ” इति भर्तृहर्युक्तेः । धर्मन्याययोर्व्यवस्थायामयं धर्मोऽयं न्याय इति निर्णये कर्तव्ये यो धनादिना बली तस्यैव वाक्यं धर्मो न्यायश्चेति लोका मंस्यंतीत्यर्थः ॥ २ ॥ दंपतिभावे विवाहे, “कुशविप्रांबुपित्रग्निवेदभूकालदिक्सुराः । साक्ष्ये यत्र विवाहे तु तद्दांपत्यमुदीरितम् ॥” इति नारदीयोक्तम् । कुशविप्रादीन्विनैव विवाहा भविष्यंतीत्यर्थः । मायैव कपटमेव । सूत्रं तंतुमात्रमेव न तु नित्यनैमित्तिकानुष्ठानस्वाध्यायादि, ब्राह्मणोऽहं दृश्यतां मत्कंठे सूत्रमित्येवं स्वीयविप्रत्वं सूचयिष्यंति न तु वेदोच्चारणादिनेति भावः । यज्ञसूत्रमिति वक्तव्ये सूत्रमित्युक्त्या तस्य मंत्रनिर्मितत्वाद्यभावेन केवलं कर्तनयंत्रादिगतसूत्रतुल्यतैव ध्वनिता । तदुक्तम्–“ अनध्यायकृतं यच्च तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंगमेवाश्रमख्यातावन्योऽन्यापत्तिकारणम्॥अवृत्त्या न्यायदौर्बल्यं पांडित्ये चापलं वचः॥४॥अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु॥स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम् ॥ ५ ॥ दूरे वार्ययनं तीर्थं लावण्ये केशधारणम् ॥ उदरंभरिता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥ ६ ॥ दाक्ष्यं कुटुंबभरणं यशोर्थे धर्मसेवनम् ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ॥ ७ ॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥८॥आच्छिन्नदारद्रविणा यास्यंति गिरिकाननम् ॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥९॥ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः ॥ १० ॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतापेन च चिंतया ॥ त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम् ॥ ११ ॥ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणाम् ॥ १२ ॥ पाखंडप्रचुरे धर्मे दस्युप्रायेषु राजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥ १३ ॥ शूद्रप्रायेषु वर्णेषुच्छागप्रायासु धेनुषु ॥ गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बंधुषु ॥ १४ ॥

आश्रमाणां ख्यातौ ज्ञाने लिंगमेव दंडाजिनादिकं हेतुर्नत्वाचारविशेषः । अन्योन्यापत्तिकारणं चाश्रमादाश्रमांतरप्राप्तौ च कारणम् । यद्वा बहूदकहंसादीनामन्योन्यापत्तौ नमस्कारादिव्यवहारे कारणम् । अवृत्त्या मुद्रार्पणादिदानासामर्थ्येन न्याये दौर्बल्यं पराजयः । चापलं वचो बहुभाषणम् ॥ ४ ॥ असाधुत्वे चौर्याद्यभियोगे । प्रसाधनमलंकारः ॥ ५ ॥ दूरे वर्तमानं वार्ययनं जलाशयस्तीर्थं न तु गुर्वादि । स्वार्थः पुरुषार्थः ॥ ६ ॥ ७ ॥ ८ ॥ आच्छिन्ना अपहृता दारा द्रविणानि च यासां ताः । अष्टिर्बीजम् ॥ ९ ॥ १० ॥ ११ ॥ क्षीयमाणेष्वित्यादीनामित्थं कलौ गतप्राय इति पंचमेनान्वयः । क्षीयमाणेष्वल्पप्रायेषु ॥ १२ ॥ दस्युप्रायेषु चौरतुल्येषु चौर्यानृतवृथाहिंसाद्या नानावृत्तयो येषां तेषु ॥ १३ ॥ छागप्रायासु प्रमाणतः क्षीरतश्चाजातुल्यासु ॥ १४ ॥

मंत्रविवर्जितम् । अत्रिप्रपत्नीसूत्रोत्थमवरिासूत्रनिर्मितम् ॥ ग्राममध्ये कृतं यच्च मुक्त्वा चैव कृतं तु यत् । अब्राह्मणकृतं यच्चाशुचिना निर्मितं तु यत् !! तत्सूत्रं विबुधैर्ज्ञेयं पशुबंधनरज्जुवत् ॥ ” इति निर्णयसुधाकरे ॥ ३ ॥ ‘ अन्योन्यं विप्रा नमंते ’ इत्याद्युक्त्या सजातीयेष्वेवान्योन्यादिप्रयोगदर्शनाद्विजातीयब्रह्मचर्यसंन्यासादौ तत्कथं प्रयुक्तं तत्राह—यद्वेति ॥ ४ ॥ अभियोगः प्रापणम्, दुष्टत्व इत्यर्थः । त्वं मे भार्येति स्वीकारहेतुः । प्रसाधनं शरीरशुद्धिरलंकारो वेति तीर्थः । उद्वाहे विवाहस्थाने स्वीकारस्त्वं मे भार्येत्यंगीकरणमेव न तु पित्रादिकर्तृकार्पणम् । अलंकारस्थाने केवलं स्नानमेव न तु स्वर्णादि, घोरे कलौ स्वर्णाद्यप्राप्तेर्ग्रंथांतरोक्तेः ॥ ५ ॥ “ तीर्थं मुख्यं पिता माता गुरुः शास्त्रं तथा हरिः । गौणं तीर्थं त्वम्मयं स्यादित्युक्तं तीर्थवेदिभिः ॥ ” इति । लावण्ये शरीरसौंदर्यद्योतनाय केशानामितस्ततः प्रसाधनमात्रमेव भविष्यति वस्त्रभूषाद्यनाप्तेः । उदरभरणमेव पुरुषार्थं मंस्यंते न तु हरिस्मरणादिकमित्यर्थः । धार्ष्ट्यं वृथा हठः यो वृथा हठं करिष्यति तं सत्यवादिनं मंस्यंत इत्यर्थः ॥ ६ ॥ दाक्ष्यं नैपुण्यम् । यशोर्थ इति—कल्याणबुद्ध्या न कोपि धर्मं करिष्यतीत्यर्थः ॥ ७ ॥ निर्घृणैर्निर्दयैः ॥ ८ ॥ आमिषं मांसम्, क्षौद्रं मधु ॥ ९ ॥ १० ॥ क्षुधादिभिश्च नंक्ष्यंति । यद्वा—त्रिंशता सहिता विंशतिस्त्रिंशद्विंशतिः, पंचाशादित्यर्थः । परमायुः अहोपुण्यवानयमनेन बहु जीवनं प्राप्तमित्यर्थः ॥ ११ ॥ कलेर्दोषा असत्यसंभाषणादयस्तेभ्य इत्यर्थः ॥ १२ ॥ प्रायशब्दार्थस्त्वत्र तुल्यतैव । वृथा हिंसा पित्राद्यनुद्दिश्य पशुहननम् ॥ १३ ॥ आश्रमेषु संन्यासादिषु परिग्रहादिना गृहस्थतुल्येषु । योनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ॥ विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥ १५ ॥ इत्थं कलौ गतप्राये जने तु खरधर्मिणि ॥ धर्मत्राणाय
सत्त्वेन भगवानवतरिष्यति ॥ १६ ॥ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्मकर्मापनुत्तये ॥ १७ ॥ शंभलग्राममुख्य
स्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥ १८ ॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ॥ असिनाऽसाधुदमनमष्टै
श्वर्यगुणान्वितः ॥ १९ ॥ विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिंगच्छदो दस्यून्कोटिशो निहनिष्यति ॥ २० ॥ अथ तेषां भविष्यंति
मनांसि विशदानि वै ॥ वासुदेवांगरागातिपुण्यगन्धानिलस्पृशाम् ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ २१ ॥

अणुप्रायासु श्यामाकतुल्यासु।स्थास्नुषु वृक्षेषु।विद्युत्प्रायेषु तडिद्बहुलेषु।शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु॥ १५॥ जने तु खरधर्मिणि दुःसहचेष्टिते कलौ गतप्राये समाप्तप्राये ॥ १६॥ एतत्प्रपंचयति चतुर्भिः । चराचरगुरोरीश्वरस्येति च धर्मत्राणे हेतुः गुरुत्वेश्वरत्वयोरुपपादनमखिलस्य विश्वस्यात्मनः कारणस्येति । एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय।धर्मत्राणप्रयोजनमाह कर्मापनुत्तये मोक्षाय॥ १७॥ शंभलग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे॥ १८ ॥धर्मत्राणप्रकारमाह अश्वमिति । असाधवो दम्यन्ते येन तमश्वमारुह्यासिना दस्यून्कोटिशो निहनिष्यतीत्युत्तरेणान्वयः । असाधुदमन इति पाठे कल्किविशेषणम् । अणिमाद्यष्टैश्वर्याणि गुणाश्च सत्यसंकल्प त्वादयः॥ १९॥ तत्प्रपंचः आशुना शीघ्रगामिना तेन हयेनाश्वेन क्षोण्यां पृथिव्यां विचरन्।नृपलिंगच्छदो राजवेषच्छन्नान्।।२०।।ततश्च पुनः कृतयुग प्रवृत्तिं वक्तुमाह।अथेति सार्द्धाभ्याम् । तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति । तत्र हेतुः । वासुदेवस्यांगरागेण चंदनादिनाऽतिपुण्यगंधो योऽनिलस्तं स्पृशंतीति तथा तेषाम् ॥ २१ ॥

संबंधेन संबंधिनो यौनाः श्वशुरश्यालादयस्तत्प्रायेषु, प्रायशब्दोऽत्र प्रधाने श्वसुरादिप्रधानेषु कर्तव्यार्थानुसंधानार्थं श्यालश्यालीपत्यादीनाश्रयिष्यंतीति भावः ॥ १४ ॥ ओषध्यो यवगोधूमव्रीह्याद्याः । अण्णुप्रायासु श्यामाकतुल्यासु । यद्वा–ओषधीषु हरीतक्यादिषु, अणुप्रायासु निष्फलासु तृणप्रायासु “ ओषध्यो यवव्रीह्याद्याः शिवाद्या अपि कीर्तिताः । अणुर्व्रीहिविशेषे ना तृणसूक्ष्माफलेषु च ॥ तुच्छे मानाविशेषे च ” इति कोशात् । शमी सक्तुफला, सा चाल्पवृक्षजातिः, यत्काष्ठे यज्ञेऽग्निमथनं क्रियते याज्ञिकैः । वृक्षेषु वटाश्वत्थादिषु छायाद्यभावेन शमीतुल्येष्वित्यर्थः ॥ १५ ॥ क्वचित् ‘ जने तु ’ इति पाठस्तत्र खरधर्मिणीति तद्विशेषणम् । खरो रासभस्तद्धर्मो निर्लज्जमैथुनकश्मलाशनादिलक्षणस्तद्वति सतीत्यर्थः । क्वचित् तेषु खरधर्मिषु इति पाठः ॥ १६ ॥ साधूनां वेदानुगामिनाम् । धर्मो यज्ञादिरूपस्तस्य रक्षणाय । धर्म एवानुष्ठितोंतःकरणशुद्धिद्वारा मोक्षहेतुरित्यत उक्तं मोक्षायेति ॥ १७ ॥ कलिं कृषति विलिखति भिनत्तीति कल्किः । पृषोदरादिरयम् । कृषतेर्डिप्रत्यये टिलोपे कलेरिकारलोपे च रूपसिद्धेः । यद्वा–कं सुखं लाति ददातीति कलो धर्मः, तं कायत्युपदिशतीति कल्किः ‘ वासुदेवानुशिक्षया ’ इत्युक्तेः ॥ १८ ॥ देवैरिंद्रादिभिर्दत्तमानीतम् ॥ १९ ॥ अप्रतिमद्युतिः सर्वोत्कृष्टदीप्तियुतः ॥ २० ॥ ततो दस्युहननोत्तरम् । अयमेव मूलोक्तार्थशब्दार्थः । तेषां कलियुगसमाप्त्युत्तरका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्त्वमूर्तौ हृदि स्थिते ॥ २२ ॥ यदाऽवतीर्णो भगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी ॥ २३ ॥ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती ॥ एकराशौ समेष्यंति तदा भवति तत्कृतम् ॥ २४ ॥ येऽतीता वर्तमाना ये भविष्यंति च पार्थिवाः ॥ तेत उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥ २५ ॥ आरभ्य भवतो जन्म यावन्नंदाऽभिषेचनम् ॥ एतद्वर्षसहस्रं तु शतं पंचदशोत्तरम् ॥ २६ ॥ सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २७ ॥

स्थविष्ठः स्थूलः ॥ २२ ॥ कृतयुगप्रवृत्तिमाह । यदावतीर्ण इति । प्रजानां सूतिः प्रसूतिः ॥ २३ ॥ तदवतारकालोपलक्षणमाह । यदा चंद्रश्चेति । तिष्यः पुष्यः । अयमर्थः । चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगस्तदा तत्कृतयुगं भविष्यति । यद्यपि च प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने द्वित्रास्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति तथाऽपि तेषां सहप्रवेशोऽत्र विवक्षितः । समेष्यंतीति वचनात् । अतो नातिप्रसंगः ॥ २४ ॥ एवं नवमस्कंधमारभ्यानुक्रांतं वैवस्वतमनोर्वंशद्वयं निगमयति । येऽतीता इति । उद्देशतः संक्षेपतः ॥ २५ ॥ कलियुगावांतरविशेषं वक्तुमाह आरभ्येत्यादिना । वर्षसहस्रं पंचदशोत्तरं शतं चेति कयापि विवक्षयाऽवांतरसंख्येयम् । वस्तुतस्तु परीक्षिन्नंदयोरंतरं द्वाभ्यां न्यूनं वर्षाणां सार्धसहस्रं भवति । यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुंजयांता विंशतिराजानः सहस्रसंवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे "ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरम्" इति । ततः परं पंचप्रद्योतना अष्टत्रिंशोत्तरं शतम् । शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यंति पृथिवीमित्यत्रैवोक्तत्वात् ॥ २६ ॥ कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह । सप्तर्षीणां त्विति । अयमर्थः । प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमंडलम् । तत्र किंचिदुन्नतेषाऽग्रस्थानीयो मरीचिः । ततः पश्चादानम्रयुगकंधराकारो वसिष्ठः सभार्यः । ततः पश्चादीषदुन्नतेषामूलस्थानीयोंगिराः । ततः पश्चाच्चतुरस्रताराचतुष्के ईशान्यामत्रिः । ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहस्तत उत्तरतः क्रतुः । एवंस्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ दृश्येते पुलहक्रतुसंज्ञौ तयोस्तु मध्ये तयोस्तु पूर्वयोस्तु मध्ये यत्समं दक्षिणोत्तररेखायां समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते तेन तथैव युक्ता नृणामब्दशतं

लिकानां पौरजानपदानां तत्तत्पुरदेशवासिनां जनानाम् । तत्र मनोविशदत्वे ॥ २१ ॥ तेषामेव स्थूलोऽधिकः ॥ २२ ॥ २३ ॥ अत्राशयमाह—अयमर्थ इति । अतस्समकालिकतत्त्रयपुष्यप्रवेशविवक्षणात् ॥ २४ ॥ "समासोद्देशसंक्षेपास्त्रय एकार्थवाचकाः" इति शब्दरत्नसंग्रहोक्तेः ॥ २५ ॥ अत्र स्वामिचरणैरेव सुव्याख्यातत्वादस्माभिरुपरम्यते ॥ २६ ॥ अत्राशयमाह—अयमर्थ इति । तत्र शकटाकारे । ईषा रेखा सीरदंडः शकटांगविशेषश्च तदग्रस्थानीयस्तत्स्थानापन्नः । युगः शकटाग्रबद्धः वृषयोजनार्थकः शकटांगभेद एव, तद्ग्रीवा च तन्मध्यभाग उच्चाकार एव बोध्यः ॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनैव ऋषयो युक्तास्तिष्ठंत्यब्दशतं नृणाम् ॥ ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः ॥ २८ ॥ विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं
गतः ॥ तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः ॥ २९ ॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत्
॥ ३० ॥ यदा देवर्षयः सप्त मघासु विचरंतिहि ॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३१ ॥ यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः ॥
तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३२ ॥ यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाऽहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥३३ ॥
दिव्याब्दानां सहस्रांते चतुर्थे तु पुनः कृतम् ॥ भविष्यति यदा नृणां मन आत्मप्रकाशकम् ॥ ३४ ॥ इत्येष मानवो वंशो यथा संख्यायते भुवि ॥
तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगेयुगे ॥ ३५ ॥

तिष्ठंति ते च द्विजास्त्वदीये कालेऽधुना मघा आश्रिता वर्तन्ते ॥ २७ ॥ २८ ॥ तेषु मघासु वर्तमानेषु सत्सु यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्त्वात्मको देहो दिवं वैकुंठं गतस्तदा कलियुगमविशत् । यद्यस्मिन्युगे जनः पापे रमत इति कलियुगस्य लक्षणम् ॥ २९ ॥ ननु श्रीकृष्णे पृथिव्यां वर्तमानेऽपि संध्यारूपेण कलिः प्रविष्ट एवासीत् । सत्यम् । तथापि तावत्तस्य पराक्रमो नाभवदित्याह । यावदिति । पराक्रांतुमभिभवितुम् ॥ ३० ॥ अतो यथोक्त एव कलिप्रवेशकाल इत्याह । यदा देवर्षय इति द्वादशाब्दशतात्मक इति । दिव्येन मानेन संध्यासंध्यांशाभ्यां सह यो द्वादशाब्दशतात्मकः स कलिस्तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ॥ ३१ ॥ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह । यदेति । तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छन्नंदात्प्रभृत्यतिवृद्धिं गमिष्यतीत्यर्थः॥ ३२॥ ननु यदा कलेर्लिंगमुपलब्धं तदैव प्रविष्ट इति युक्तं ततः पूर्वमेव प्रवेशस्ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह । यस्मिन्निति । प्रतिपन्नं प्रविष्टमिति ज्ञातम् । पुराविदः पूर्वज्ञातारः ॥ ३३ ॥ कलेरनंतरं कृतयुग प्रवेशमाह । दिव्याब्दानामिति । चतुर्थे कलौ प्रवेशनाब्दपरिमितेनांशेनाऽपि सहांतीते सतीत्यर्थः । कृतयुगप्रवेशचिह्नमाह । यदा नृणां मन आत्मप्रकाशकं भविष्यति तदेति ॥ ३४ ॥ राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वप्यीतिदिशति । इत्येष इति । यथा याभिरुच्चनीचावस्थाभिः । तास्ता अवस्थाः । वंशा इति वा पाठः ॥ ३५ ॥

तेन पुलहक्रतुमध्यगतनक्षत्रेण ॥ २८ ॥ २९ ॥ अत्राक्षिपति–नन्विति । अभिभवितुं स्वसामर्थ्यं दर्शयितुम् ॥ ३० ॥ अतः पराक्रमाभावात् । इत्यर्थ इति–श्रीकृष्णकाले स्वसंध्यां विहाय स्वेन रूपेणैव प्रविष्ट इति भावः ॥ ३१ ॥ इत्यर्थ इति–परीक्षित्काले कसर्षिमंडलगतमघानक्षत्रतः पूर्वाषाढर्क्षं दशममस्ति, तत्रैकैकर्क्षस्य शतवर्षं तत्र स्थायित्वान्नंदकाले कलेर्वर्षसहस्रभुक्तिरायाति । अत एवोक्तम्–" आरम्य भवतो जन्म यावन्नंदाभिषेचनम् । एतद्वर्षसहस्रम् " इति तच्च पूर्वं पराक्रांतमेवेति भावः ॥ ३२ ॥ पुनराक्षिपति–नन्विति । तस्मिन्नेवाहनि । तदा तस्मिन्नेव क्षणे ॥ ३३ ॥ इत्यर्थ इति–दिव्याब्दानां सहस्रस्यांतःस्थितिर्यस्मिन्संध्यांशे स सहस्रांतस्तस्मिंस्तथा तद्गुणसंविज्ञानबहुव्रीहित्वाद्द्वादशशताब्दात्मके संध्यांशसहिते कृतयुगापेक्षया चतुर्थे कलावितीत इतिशेषेणायं भावः । दिव्याब्दानां सहस्रांत इत्यलुक्समासः ' अंतो नाशे स्थितावपि ' इत्यभिधानात् । यद्वा–दिव्याब्दानां सहस्रेणांतो नाशो यस्य तस्मिंश्चतुर्थेऽतीते सति सहस्रपदं संध्यांशरूपशतद्वयस्याप्युपलक्षणम् ॥ ३४ ॥ तास्ता इत्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतेषां नामलिंगानां पुरुषाणां महात्मनाम् ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥ ३६ ॥ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ॥ कलापग्राम आसाते महायोगबलान्वितौ ॥ ३७ ॥ ताविहेत्य कलेरंते वासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ॥ ३८ ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ अनेन क्रमयोगेन भुवि प्राणिषु वर्तते ॥ ३९ ॥ राजन्नेते मया प्रोक्ता नरदेवास्तथाऽपरे ॥ भूमौ ममत्वं कृत्वान्ते हित्वेमां निधनं गताः ॥ ४० ॥ कृमिविड्भस्मसंज्ञाऽन्ते राजनाम्नोऽपि यस्य च॥भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥ ४१ ॥ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य च ॥ ४२ ॥ तेजोऽबन्नमयं कायं गृहीत्वात्मतयाऽबुधाः ॥ महीं ममतया चोभौ हित्वांतेऽदर्शनं गताः ॥ ४३ ॥ येये भूपतयो राजन्भुंजते भुवमोजसा ॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥४४॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे द्वितीयोऽध्यायः ॥ २ ॥

एतत्कीर्तनस्य वैराग्योपयोगितामाह । एतेषामिति । नामैव लिंगं ज्ञापकं यषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रादयो वा ॥ ३६ ॥ कलावुत्सन्नानां राजवंशानां पुनः प्रवृत्तिप्रकारमाह । देवापिः सोमवंशजः । मरुस्तु सूर्यवंशजः । कलापग्रामो नाम योगिनामावासः प्रसिद्धः ॥ ३७ ॥ ३८ ॥ इममेव प्रकारं प्रतिचतुर्युगं दर्शयति । कृतमिति ॥ ३९ ॥ " एतेषां नामलिंगानाम् " इत्यादि यदुक्तं तत्प्रपंचयति राजन्निति पंचभिः ॥ ४० ॥ ममत्वं कृत्वेत्यनेन सूचितां भूतद्रोहप्रवृत्तिं निंदति । कृमीति । राजनाम्नो राजेति नाम यस्य तस्यापि देहस्यांते कृमयो विष्ठा भस्मेति वा संज्ञा भविष्यति । तत्कृते तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद किंतु न वेदैव । कुत इत्यपेक्षायां हेतुत्वेन भूतद्रोहं विशिनष्टि । यतो भूतद्रोहान्निरयो भवति ॥ ४१ ॥ ममत्वप्रकारं प्रपंचयति । कथमिति । सेयमखंडा भूर्मे पूर्वजैर्धृता सती इदानीं मत्पूर्वा च सती मत्पुत्रादेः कथं स्यादित्येवम् ॥ ४२ ॥ उभौ महीं कायं च अदर्शनं मृत्युम् ॥ ४३ ॥ उपसंहरति । येये इति । ते सर्वे च कथासु क्रियमाणासु । कथामात्राः कालेन कृताः ॥ ४४॥ इति श्रीमद्भागवते द्वादशस्कंधे श्री०टीकायां द्वितीयोऽध्यायः ॥ २ ॥

स्थाने वंशा इति वा पाठः ॥ ३९ ॥ ३६ ॥ बदरिकाश्रमे कलापग्रामोऽस्ति । महायोगबलान्विताविणिमाद्यैश्वर्ययुक्तौ ॥ ३७ ॥ तौ मरुदेवापिसंज्ञौ । इहार्यावर्ते । एत्य प्राप्य । वासुदेवेन कल्किरूपेण हरिणा अनुशिक्षितौ बोधितौ । पूर्ववद्गतकृतयुगवत् ॥ ३८ ॥ ३९ ॥ हेराजन्निति–राजमात्राणामियमेव दशेति भावः । अंते देहांते । इमां भुवम् ॥ ४० ॥ स्वार्थं स्वकर्त्तव्यं किं वेद किन्तु न वेदेत्यर्थः ॥ ॥ ४१ ॥ ४२ ॥ तेजोबन्नमयमिति त्रिवृत्करणश्रुत्यभिप्रायेणोक्तम् ॥ ४३ ॥ कथामात्रा इति–कथैव तेषामवशिष्टा न स्वरूपमिति भावः ॥ (४४) ॥ यदि कल्क्यवतारान्तरराजकथाविशेषजिज्ञासा चेत्तर्हि भविष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियम् ॥ अहो मां विजिगीषंति मृत्योः क्रीडनका नृपाः ॥१॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि ॥ येन फेनोपमे पिंडे येऽतिविश्रंभिता नृपाः ॥२॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ॥ ततः सचिवपौराप्तकरींद्रानस्य कंटकान्॥ ॥ ३ ॥ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलाम् ॥ इत्याशाबद्धहृदया न पश्यंत्यंतिकेंऽतकम् ॥ ४ ॥ समुद्रावरणां जित्वा मां विशंत्यब्धिमोजसा॥ कियदात्मजयस्यैतन्मुक्तिरात्मजये फलम् ॥ ५ ॥ यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह ॥ गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः ॥६॥ मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः ॥ जायते ह्यसतां राज्ये ममताबद्धचेतसाम् ॥ ७ ॥ ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः ॥ स्पर्धमाना मिथो घ्नंति म्रियंते मत्कृते नृपाः ॥ ८ ॥

तृतीये भूमिगीतैश्च राज्यदोषादि वर्ण्यते॥कलौ च दोषभूयिष्ठे दोषहंत्री हरेर्नतिः॥ १ ॥देहेऽहंतां भूमौ च ममतां कुर्वंत्यतोऽबुधा इत्युक्तं तदेव भूमिगीतैःप्रपंचयति दृष्ट्वेत्यादिना। आत्मनि पृथिव्या जये व्यग्रानुद्युक्तान् । हासप्रकारमेवाह । अहो इति। मा माम्॥ १ ॥येन कामेन फेनोपमे पिंडे देहेऽतिविश्रंभिता विश्वासं नीता ये तेषां नरेंद्राणामेष कामो मोघ एव स्यात् ॥ २ ॥ काममेव दर्शयति द्वाभ्याम् । पूर्वमिति । इंद्रियार्थलंपटस्य न राज्यप्राप्तिः स्यादिति प्रथममिंद्रियषड्वर्गं निर्जित्य राजमंत्रिणो जेष्यामो वशीकरिष्यामः । सचिवा अमात्याः करींद्रा हस्तिपास्तांश्च जेष्यामः । कंटकान्प्रतिपक्षान् । अस्य अपास्य । अथ कंटकानिति वा पाठः ॥ ३ ॥ ४ ॥ एवं केचिदाशाबद्धा एव केचिन्मां पुनर्जित्वाऽप्यतितृष्णयाऽब्धिं विशंति तदेवमिंद्रियजयेन ये राज्यं साधयितुमिच्छंति तेऽतिमंदा इत्याह । कियदिति ॥ ५ ॥ अंतकं न पश्यंतीत्युक्तं तदेवाह । यामिति । कुरूद्वहेति भूमिगीतं कथयन् शुकः संबोधयति । कुलोद्वहा इति तु पाठः सुगमः ॥ ६ ॥ अबुद्धय इत्युक्तं तत्प्रपंचयति । मत्कृत इति ॥ ७ ॥ ८ ॥

संहितादिग्रन्था मत्संगृहीतचतुर्युगीयराजचरितग्रन्थश्चावलोकनीयः ॥ ४४ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ नतिर्नमस्कारः । 'कृष्णप्रणामी न पुनर्भवाय' इत्युक्तेः (१) आत्मनि स्वस्यां पृथिव्यामित्यर्थः ॥ १ ॥ विदुषां नीतिविदाम् । फेनोपमे डिंडीरपिण्डतुल्ये नश्वरे ॥ २ ॥ करींद्रानित्युपलक्षणं सेनामात्रस्य । अमात्याः कर्मसचिवाः । 'मंत्री बुद्धिसहायः स्यात्' इत्यमरः । आप्ता विश्वस्ताः । कंटकाः क्षुद्रशत्रवः ॥ ३ ॥ एवंक्रमेण पूर्वोक्तक्रमेण ॥ ४ ॥ अब्धिं विशंतीत्युक्त्या द्वीपजयो ध्वनितः । भूजयादिना किमपि न प्रयोजनमपित्वनर्थ एवावशिष्यते मनोजयापेक्षयेत्यभिप्रायेणाह—कियदिति । मनोजये किं स्यात्तत्राह—मुक्तिरिति " बंध इंद्रियविक्षेपो मोक्ष एषाञ्च संयमः " इत्येकादशोनविंशाध्याये भगवदुक्तेर्न्यायनये मनसोप्यन्तरिन्द्रियत्वे सिद्धेऽपीह तु षड्वर्गपदोक्तेरेव तद्गृहीत इति ध्येयं सुज्ञैः ॥ ५ ॥ हे कुरूद्वहेति—त्वमपि यत्कुरुवंशं वहसि स वंशोऽप्यधुना भवच्छेष एवेति भावः । यथागतमिति—आगतमनतिक्रम्य यथा तेत्रागता निरुपस्कारास्तथैव गता इत्यर्थः ॥ ६ ॥ न केवलमितरेषामेव मदर्थे विरोधो भवत्यपि तु पित्रादिदेहसंबंधिनामपीत्याह—मत्कृत इति । मत्कृते मदर्थे विग्रहः संयुगः " विग्रहस्तु समासार्थवाक्ये भागे रणेंगके " इत्यभिधानात् । अयमपि प्रायिक इत्याह—असतामप्रशस्तकर्मणाम् ॥ ७ ॥ किंप्रकारो विग्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथुः पुरूरवा गाधिर्नहुषो भरतोऽर्जुनः ॥ मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः ॥ ९ ॥ तृणबिंदुर्ययातिश्च शर्यातिः शंतनुर्गयः ॥ भगीरथः कुवल
याश्वः ककुत्स्थो नैषधो नृगः ॥ १० ॥ हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः ॥ नमुचिः शंबरो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ ॥ अन्ये च
बहवो दैत्या राजानो ये महेश्वराः ॥ सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः ॥ १२ ॥ ममतां मय्यवर्तंत कृत्वोच्चैर्मर्त्यधर्मिणः ॥ कथावशेषाः
कालेन ह्यकृतार्थाः कृता विभो ॥ १३ ॥ कथा इमास्ते कथिता महीयसां विताय लोकेषु यशः परेयुषाम् ॥ विज्ञानवैराग्यविवक्षया विभो वचोविभूती
र्न तु पारमार्थ्यम् ॥१४॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेऽभीक्ष्णममंगलघ्नः ॥ तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः॥१५॥

रामो नाम कश्चिद्राजा । यद्वा लोकदृष्ट्या दाशरथिरेव निर्दिष्टः ॥ ९ ॥ १० ॥ लोकं रावयति रोदयतीति लोकरावणः ॥ ११ ॥ १२ ॥ मयि उच्चैर्ममतां कृत्वा
येऽवर्तंत ते कालेन कथावशेषाः कृताः । विभो इति संबोधनं कुरूद्वहेतिवत् ॥ १३ ॥ राजवंशानुकथनस्य तात्पर्यमाह । कथा इमा इति । विज्ञानं विषयासारताज्ञानं
ततो वैराग्यं तयोर्विवक्षया परेयुषां मृतानां वचोविभूतीर्वाग्विलासमात्ररूपा न तु पारमार्थ्यं परमार्थे युक्तं कथनं न भवतीत्यर्थः ॥ १४ ॥ कस्तर्हि पुरुषाणामुपादेयः पर

हस्तत्राह–ममैवेति ॥ ८ ॥ कांश्चिन्नामतोऽप्याह–पृथुरिति । श्रीरामचन्द्रस्यापि मायया तथात्वांगीकारे न दोष इत्याह–यद्वेति ॥ ९ ॥ अक्षराधिक्यं तृतीयपाद आर्षम् । नैषधो नलः ॥ १० ॥ मनुष्योक्तन्यायं दैत्यादि
ष्वप्यतिदिशति–हिरण्यकशिपुरिति ॥ ११ ॥ अजिता अन्यैः स्वयमजिता इत्यर्थः ॥ १२ ॥ विभो इति श्रीशुकस्यैव राजानं प्रति संबुद्धिरित्याह–कुरूद्वहेति । वदिति–विशेषेण बुद्धिवैभवेन भातीति तथा, त्वं तु
बुद्धिबलेन सर्वं जानास्येवेति भावः । अत्र चक्रवर्तिकारः–किंतु तेन अकृतार्था अपि तु कृतार्था एव प्राप्तस्वाभीष्टा एव कृताः पर्याप्ताः पूर्णा एव गुणरूपादिभिस्तदपि कथावशेषा एवाभूवन्, अर्वाचीनास्तु–अकृतार्थ
धनादिभिरप्यपूर्णा इति भावः ॥ १३ ॥ इत्यर्थ इति–तेषां नष्टत्वादधुना कथामात्रत्वमेवावशिष्टं न तु तेऽपीति भावः । महतां प्रियव्रतादीनाम् । परं श्रीहरिमीयुषां प्राप्तानाम् । किमर्थम्–विज्ञानं भगवदनुभवः । श्रोतृजना
न्प्रत्यपि तादृशाः स्युरिति भावः । तदुक्तम्–“ पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग । निवर्त्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते ।
एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ॥ ” इत्युद्धवं प्रति श्रीकृष्णेन । वितायेत्यार्षः । यद्वा–किमर्थं कथिता इति तत्राह–विज्ञानेति । वचोविभूतीर्वचसां विभूतयो विविधभवनविषयाः विज्ञानवैराग्य
विवक्षया योग्यस्य पुंसो विज्ञानवैराग्ये स्यातामित्यभिप्रेत्य विवृता न तु पारमार्थ्ये परमार्थ उत्तमार्थो वेदमुख्यार्थो भगवांस्तमुद्दिश्य तस्य स्वस्वरूपभूतत्वेन विधिनिषेधाविषयत्वात् । यद्वा–किंभूताः कथाः वचसां भक्ति
ज्ञानक्रियात्मकानां विभूतिर्विशेषेण प्रतिपादनं यासु ताः । पारमार्थ्यमुद्दिश्योपदेशे तु केवलं भक्तिमात्रमेवोपदेष्टव्या स्यात्तस्या एवांतकाल उचितत्वात् “ जन्मलाभः परं पुंसामंते नारायणस्मृतिः ” इत्युक्तेः । यद्वा–ते
कथिता इमाः कथाः पारमार्थ्यमेव परमार्थफलका एव न तु वचोविभूतयः पुरुषार्थायोगिन्य इति मंतव्यम् । द्वितीया प्रथमार्थे । ‘ श्रुतयः प्रमाणम् ’ इतिवत्संबंधः । यद्वा–इमाः बुद्धिसन्निहितत्वाद्देवासुरसंग्रामादिरूपाः
कथा वचोविभूतयः । पारमार्थ्यं परमात्मलीलावर्णनं तु न वचोविभूतयस्तस्य तत्प्रापकत्वात् । “ पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतम् । पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांति
कम् ॥” इत्युक्तेः । यद्वा–इमाः कथा वचोविभूतयो न तु किंतु पारमार्थ्यमेव सर्वासां परमार्थे भगवति तात्पर्यकत्वादित्यर्थः ॥ १४ ॥ परमार्थमेव पृच्छति–कस्तर्हीति । तत्रापि प्रत्यहमपि । तमेवोत्तमश्लोकगुणानुवादमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ राजोवाच ॥ ॥ केनोपायेन भगवन् कलेर्दोषान्कलौ जनाः ॥ विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने ॥ १६ ॥ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः ॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥ १७ ॥ श्रीशुक उवाच ॥ कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दया तपो दान मिति पादा विभोर्नृप ॥ १८ ॥ संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा जनाः ॥ १९ ॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसाऽसंतोषविग्रहैः ॥ २० ॥ तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः ॥ त्रैवर्गिकास्त्रयी वृद्धा वर्णा ब्रह्मोत्तरा नृप ॥ २१ ॥ तपःसत्यदयादानेष्वर्धं ह्रसति द्वापरे ॥ हिंसातुष्टयनृतद्वेषैर्धर्मस्याधर्मलक्षणैः ॥ २२ ॥ यशस्विनो महाशालाः स्वाध्यायाध्ययने रताः॥आढ्याः कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तराः॥२३॥कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः॥एधमानैः क्षीयमाणो ह्यंते सोपि विनंक्ष्यति ॥२४॥ तस्मिंल्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः ॥ दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥ २५॥ सत्त्वं रजस्तम इति दृश्यंते पुरुषे गुणाः ॥ कालसंचोदितास्ते वै परिवर्तंत आत्मनि ॥२६॥ प्रभवंति यदा सत्त्वे मनोबुद्धींद्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः॥२७॥

मार्थस्तमाह । यस्त्विति । नित्यं प्रत्यहम् । तत्राप्यभीक्ष्णम् ॥ १५ ॥ कलिदोषोपचये सति भक्तेरसंभवं मन्यमानः पृच्छति । केनोपायेनेति । विधमिष्यंति नाशयिष्यंति । यथा यथावत् ॥ १६ ॥ कलियुगे कः परो धर्म इति बुभुत्सया पृच्छति । युगानीति । ब्रूहीत्यनुषंगः आत्यंतिकप्रलयजिज्ञासया पुनः पृच्छति । प्रलयकल्पयोः संहारस्थितिकालयोः । न चायं बहिर्मुखः प्रश्न इत्याह । कालस्येति ॥ १७ ॥ तत्र युगधर्मांस्तावदाह । कृत इति । तज्जनैस्तत्कालीनैर्जनैः । दानमरागद्वेषतयाऽभयदानम् । तदेव प्रथमस्कन्धे शौचशब्देनोक्तम् । विभोः संपूर्णस्य धर्मस्य ॥ १८ ॥ तदानींतनजनानाह । संतुष्टा इति । मैत्रा भूतमैत्रीयुक्ताः । श्रमणा आत्माभ्यासवंतः ॥ १९ ॥ अनृतेन सत्यं हिंसया दया असंतोषेण तपः विग्रहेण दानमिति यथासंख्यं योज्यम् ॥२०॥ ब्रह्मोत्तरा ब्राह्मणादिकाः ॥२१॥ हिंसाऽतुष्टयनृतद्वेषैरित्ययं क्रमो न विवक्षितः । धर्मस्यार्धं ह्रसति क्षीयते । अधर्मस्य लक्षणैश्चिह्नैः पादैरित्यर्थः ॥ २२ ॥ यशस्विनः कीर्तिप्रियाः । क्षत्रद्विजोत्तराः क्षत्रियब्राह्मणप्रधानाः ॥ २३ ॥ कलौ धर्मपादानां तुर्यांशश्चतुर्थांशोऽवशिष्यते ॥२४॥ शूद्रदासोत्तराः शूद्रकैवर्तादिप्रधानाः ॥ २५ ॥ युगानामेवंभूतवैषम्ये कारणमाह सत्त्वमिति पंचभिः ॥ २६ ॥ मनश्च बुद्धिश्चेंद्रियाणि च सत्त्वे

हरिभक्त्युत्पादकत्वात् " अन्या वाचो विमुंचथ " इति श्रुतेः ॥ १९ ॥ ज्ञातकलिदोषपरिहारोऽपि लोकहिताय पृच्छति—केनेति वाऽवतरणिका । भगवन्मुने इति संबुद्धिद्वयेन सर्वकथनसामर्थ्यं द्योतयतीति भावः । ॥ १६ ॥ गतिं गमनप्रकारम् ॥ १७ ॥ तत्र पृष्टार्थेषु मध्ये । तावदादौ । नृपेति—धर्मज्ञानं विना नृपालनं दुर्घटमिति भावः ॥ १८ ॥ १९ ॥ तुर्यांशो दानलक्षणः पादो हीयते ह्रसति । पादहानौ प्रतिपक्षमाह—अधर्मेति ॥ २० ॥ तदा त्रेतायाम् । क्रिया:यज्ञादिरूपा । लंपटा विषयरागिणः । त्रैवर्गिकास्त्रिवर्गप्रधानाः । 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः । त्रयीवृद्धा वेदविद्याविशारदाः ॥ २१ ॥ २२ ॥ महाशाला यज्ञादिकर्तारः । आढ्या धनिनः ॥ २३ ॥ तुर्यांशः सत्यलक्षणः ॥ २४ ॥ तस्मिन्कलौ । शुष्कवैरिणो निर्निमित्तवैरिणः । दुराचारा मांसाशनाद्याचारपरायणाः ॥ २५ ॥ एवंभूतवैषम्ये पूर्वोक्तसंतुष्टा इत्यादिनोक्तवैषम्ये ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा कर्मसु काम्येषु भक्तिर्भवति देहिनाम् ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥ २८ ॥ यदा लोभस्त्वसंतोषो मानो दंभोऽथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥ यदा मायानृतं तंद्रा निद्रा हिंसा विषादनम् ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ॥ ३० ॥ यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥ ३१ ॥ दस्यूत्कृष्टा जनपदा वेदाः पाखंडदूषिताः ॥ राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥ ३२ ॥ अव्रता बटवोऽशौचा भिक्षवश्च कुटुंबिनः ॥ तपस्विनो ग्रामवासा न्यासिनोत्यर्थलोलुपाः ॥ ३३ ॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ॥ ३४ ॥ पणयिष्यंति वै क्षुद्राः किराटाः कूटकारिणः ॥ अनापद्यपि मंस्यंते वार्तां साधुजुगुप्सिताम् ॥ ३५ ॥ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ॥ भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३६ ॥ पितृभ्रातृसुहृज्ज्ञातीन्हित्वा सौरतसौहृदाः ॥ ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥ शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ ३८ ॥

यदा प्रभवंत्यतिशयेन वर्तंते ॥ २७ ॥ यदा कर्मादिषु भक्तिः प्रीतिस्तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि ॥ २८ ॥ काम्यानां कर्मणां विषये यदा प्रीतिस्तत्तदा रजस्तमःप्रधानं द्वापरं जानीहीति पूर्वेणानुषंगः ॥ २९ ॥ विषादनं दुःखम् ॥ ३० ॥ कलिदोषान्प्रपंचयति यस्मादित्यादिना । यस्मात्कलेर्हेतोः क्षुद्रदृशो मंदमतयः । क्षुद्रभाग्या अल्पभाग्याः । महाशना बह्वाहाराः । वित्तहीना अपि कामिनश्च । स्वैरिण्यः पुंश्चल्यः असतीरसत्यः ॥ ३१ ॥ दस्यव उत्कृष्टाः प्रचुरा येषु ते ॥ ३२ ॥ अव्रता विहिताचारशून्याः आशौचाः शौचशून्याश्च बटवो ब्रह्मचारिणो भविष्यंति । कुटुंबिनश्च गृहस्थाः स्वयं भिक्षाटनपरा भविष्यंति न तु भिक्षां दास्यंति । तपस्विनो वनस्था वनं हित्वा ग्रामवासा भविष्यंति । न्यासिनो यतयोऽतीवार्थलोलुपा भविष्यंति ॥ ३३ ॥ पुनरपि स्त्रीणां स्वभावमाह । ह्रस्वकाया इति । कटुकभाषिण्योऽप्रियवादिन्यः । चौर्यं च माया कपटमुरु च साहसं यासां ताः ॥ ३४ ॥ किंच । किराटा वणिजः । पणयिष्यंति क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यंति । किंच सर्वे जना अनापद्यपि जुगुप्सितां निंदितां वार्तां वृत्तिं साधु मंस्यंते ॥ ३५ ॥ सर्वोत्तममपि पतिं द्रव्यहीनं भृत्यास्त्यक्ष्यंति । पतयश्च विपन्नं रोगादिभिर्व्यापाराक्षमं कौलं कुलपरंपरायातं त्यक्ष्यंति । अपयस्विनीर्दुग्धदोहाः ॥ ३६ ॥ सौरतं सुरतनिमित्तं सौहृदं येषां ते । त एव ननान्दरोऽत्र भार्याभगिन्यः श्यालाः भार्याभ्रातरस्तैः संवादो मन्त्रालोचनं येषां ते ।

परिवर्तंते पर्यायेण वर्तंते यथैकस्यापि ग्रहमहादशायामंतर्दशा वर्तंते तथा कलावपि चत्वारो युगा इति भावः । आत्मनि मनसि ॥ २६ ॥ २७ ॥ हे बुद्धिमन्निति—बुद्ध्यैवैतान्निश्चेयमिति भावः ॥ २८ ॥ २९ ॥ तामसः केवलतमोगुणप्रधानः ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ अन्यदाह—किञ्चेति । 'किराटो हिंसके वैश्ये' इति निरुक्तिः । कूटं मानकूटं तुलाकूटं लिपिकूटं च कर्तुं शीलं येषां ते तथा "कूटं पूर्द्वारय न्त्रयोः । मायादम्भाद्रिशृंगेषु सीराङ्गेऽनृततुच्छयोः ॥" इति हेमचन्द्रकोशात् ॥ ३५ ॥ ३६ ॥ अत एव सौरतसौहृदत्वादेव । स्त्रैणाः स्त्रीवशाः ॥ ३७ ॥ शूद्रलक्षणं तु "द्विजेतरोऽमंत्रयागी म्लेच्छभिन्नो विवाहवान्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥ वासोन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यंति कलौ प्रजाः ॥ ४० ॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ॥ त्यक्ष्यंति च प्रियान् प्राणान् हनिष्यंति स्वकानपि ॥ ४१ ॥ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वार्थकुशलान् क्षुद्राः शिश्नोदरंभराः ॥ ४२ ॥ कलौ न राजञ्जगतां परं गुरुं त्रिलोकनाथानतपादपंकजम् ॥ प्रायेण मर्त्या भगवंतमच्युतं यक्ष्यंति पाखंडविभिन्नचेतसः ॥ ४३ ॥

ननन्द इति वा पाठः ॥ ३७ ॥ ३८ ॥ ३९ ॥ पिशाचसंदर्शाः पिशाचसदृशाः ॥ ४० ॥ काकिणिके विंशतिवराटकामात्रेऽप्यर्थे विषयभूते । विगृह्य वैरं कृत्वा ॥ ४१ ॥ ४२ ॥ महांतमनर्थमाह द्वाभ्याम् । कलाविति । त्रिलोकनाथैरानतं नमस्कृतं पादपंकजं यस्य तम् । न यक्ष्यंति न पूजयिष्यंति । पाखंडैर्विभिन्नमन्यथाकृ

द्विजभक्तो भवेच्छूद्रस्तदन्यस्त्वंत्यजादिकः ॥'' इति संहितायाम् । तेन त्रिवर्णेतरे सर्वे शूद्रा एव । यत्तु कैश्चित् ''न शूद्रा भगवद्भक्ता विप्रा भागवता मताः । चतुर्वर्णेषु ते शूद्रा ये न भक्ता जनार्दने ॥ '' इति सर्वपुराणादृष्टं पुराणीयत्वेनोक्तं तस्य चायमर्थः—हरिभक्तेषु शूद्रेष्वपि जातिबुद्ध्या तदवमानो न कार्यः किन्तु ब्राह्मणवत्सत्कारः कार्य इति, तेषां वस्तुतो विप्रत्वे विदुरधर्मव्याधादीनां भारतादौ शूद्रत्वेन व्यपदेशोऽनर्थकः स्यादिति।वस्तुतस्तु श्लोकोऽयं वैष्णवाभासकल्पित एव । तपोवेषेण ब्रह्मचारिवनस्थयतिवेषेणोपजीवनं वृत्तिर्येषां ते तथा । तपःशब्दोऽत्र तपस्विपरतया नेयः, क्वचिद्वृत्तिविषये तद्धितप्रत्ययानां लोपस्वीकारात्।कलौ शूद्रा एव ब्रह्मचारिणः संन्यासिनश्च भविष्यंति ते चान्याधिकारप्रवृत्तत्वान्नरके पतिष्यंति '' हीनो भूत्वोत्तमाद्वर्णात्कृत्वा वेषं तपस्विनाम् । आत्मानं पूजयेद्यस्तु स पतेन्नरके ध्रुवम् ॥ '' इति संहितोक्तेः । उत्तमासनं व्यासासनम् । वक्ष्यंत्युपदेक्ष्यंति । अधर्मज्ञास्संतः तेऽपि शास्त्रानुगामिनां राज्ञां दंड्या एव '' ये शूद्रमुखतः शास्त्रं शृण्वंतीह नराधमाः । तेषां कर्णे त्रपु सिक्त्वा वक्तुर्जिह्वां प्रकर्त्तयेत् ॥ अन्यथा क्ष्मापतिर्याति नरकान्भृशदारुणान् ॥ '' इत्याद्युक्तेः । प्रतिग्रहीष्यंति दानं स्वीकरिष्यंति तेपि नारका भविष्यंति '' दानं गृह्णाति यः शूद्रो महत्यामपि चापदि । यश्च तस्मै संप्रदद्यात्तावुभौ नारकौ ध्रुवम् ॥ '' इति संहितोक्तेः ॥ ३८ ॥ उद्विग्नमनसस्त्रस्तमनसः । दुर्भिक्षमन्नाल्पत्वम्, करो राजभागस्ताभ्यां कर्शिता दुर्बलाः ॥ ३९ ॥ पिशाचो विकृतो भूतविशेषः ॥ ४० ॥ स्वकान् स्वीयान्भ्रातृपुत्रादीन् । अपिना किं परकीयानित्यसूचि ॥ ४१ ॥ क्वचित् ' पुत्रान्भार्यां च कुलजाम् ' इति वा पाठः । क्षुद्राः क्रूराः '' क्षुद्रः स्यादधमे क्रूरकृपणाल्पेषु वाच्यवत् '' इति मेदिनी ॥ ४२ ॥ हे राजन्निति—त्वं तु धर्मेणैव राजसि त्वद्राज्यतः परमेवेदं भविष्यतीति भावः । प्रायेणेति पाठात् ''क्वचित्क्वचिन्महाराज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन्वा विवशो गृणन्पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ॥ ४४ ॥ पुंसां कलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥ ४५ ॥ श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा ॥ नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम् ॥ ४६ ॥ यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजम् ॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयम् ॥ ४७ ॥ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते ॥ ४८ ॥ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवम् ॥ म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ॥ ४९ ॥ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः ॥ आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः ॥ ५० ॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ॥ कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् ॥५१॥ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ॥ द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ ५२ ॥ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे तृतीयोऽध्यायः ॥ ३ ॥

तं चेतो येषां ते ॥ ४३ ॥ विवशो गृणन्सन् । विमुक्ताः कर्मरूपा अर्गलाः प्रतिबंधा यस्य सः ॥ ४४ ॥ तदेवं कलिदोषान्प्रपंच्य प्रस्तुतं तन्निस्तारोपायमाह पुंसामिति षड्भिः । द्रव्यदेशात्मभिः संभवो येषां तान् । चित्तस्थश्चित्ते स्फुरितः ॥ ४५ ॥ ४६ ॥ अयमेवोपायो नान्य इति सदृष्टांतमाह । यथेति । धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हंति हरति न तु तोयादि एवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः ॥ ४७ ॥ एतदेव विवृणोति । विद्येति विद्या देवतोपासना ॥ ४८ ॥ ४९ ॥ आत्मभावं स्वस्वरूपम् ॥ ५० ॥ इदानीं कलिं स्तौति द्वाभ्याम् । कलेर्दोषनिधे राजन्निति ॥ ५१ ॥ तत्सर्वं हरिकीर्तनादेव कलौ

द्राविडेषु च भूरिशः । कलौ खलु भविष्यंति नारायणपरायणाः॥" इत्यादि ज्ञेयम् ॥ ४३॥ "कपाटमररं तुल्ये तद्विष्कंभेऽर्गलं न ना" इत्यमरः । ' यन्नामधेयं म्रियमाणः ' इति, "गुणकर्मविडंबनानि, नामानि येऽसुविगमे विवशा गृणंति । तेऽनेकजन्मशमलं सहसैव हित्वा संयांत्यपावृतमृतं तमजं प्रपद्ये ॥" इति तृतीये ब्रह्मस्तुत्युक्तेः ॥ ४४ ॥ द्रव्यमन्नादि, देशः कीकटादिः, आत्मान इंद्रियाणि तैः ॥ ४५ ॥ ४६ ॥ मंदाधिकारिणां क्षिप्रप्रवृत्त्यर्थं सदृष्टांतमाह । दुर्वर्णमित्यनेन रत्नशास्त्रोक्ता अष्टादश दोषा उक्तास्ते च धात्वंतरसंगकृताः संति तान्हंतीत्यर्थः । यद्वा—धातुजं गैरिकसमुद्भूतमित्यर्थः । 'विशेषाद्गैरिकेऽश्मि च' इति मेदिन्यां धातुर्गैरिकमुक्तम् । आत्मा मनः ॥ ४७ ॥ ४८ ॥ यतो विद्यादिभ्यो हरेर्हृदि करणं श्रेष्ठं तस्मादित्यर्थः । अवहितः सावधानः । ततो हृदि केशवकरणात् । परां तद्रूपावाप्तिरूपाम् ॥ ४९ ॥ तामेवाह—आत्मभावमिति । तत्र हेतुः—सर्वमादत्त इति सर्वात्मा । तत्रापि हेतुः—सर्वसंश्रयः सर्वाधारः ॥ ५० ॥ कलिः केवलं दोषाकर एव न किन्तु गुणापादकोप्यौषधोपचितद्रव्यवदित्याह—कलेरिति । दोषनिधेर्दोषसमुद्रस्य गुणमाह—कीर्तनादेवेति, यथैको नृपोऽसंख्यान् दंड्यान्हंति तथैको गुणः सर्वान् दोषानिति भावः ॥ ५१ ॥ तत्सर्वं कृतादियुगप्राप्यम् । कलावेव नान्यस्मिन्युगे । तदुक्तम्—' ध्यायन्कृते ' इति पुराणांतरे ॥ ५२ ॥ इति श्रीमद्भागवतभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप ॥ कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥ चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते ॥ स कल्पो यत्र मनवश्चतुर्दश विशांपते ॥ २ ॥ तदंते प्रलयस्तावान्ब्राह्मी रात्रिरुदाहृता ॥ त्रयो लोका इमे तत्र कल्पंते प्रलयाय हि ॥ ३ ॥ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥ शेतेऽनंतासनो विश्वमात्मसात्कृत्य चात्मभूः ॥४॥ द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः ॥ तदा प्रकृतयः सप्त कल्पंते प्रलयाय वै ॥ ५ ॥ एष प्राकृतिको राजन् प्रलयो यत्र लीयते ॥ आंडकोशस्तु संघातो विघात उपसादिते ॥ ६ ॥ पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ॥ तदा निरन्ने ह्यन्योन्यं भक्षमाणाः क्षुधार्दिताः ॥ ७ ॥

भवति नान्यस्मिन्युगे । उक्तं च । "ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्" इति ॥५२॥ इति श्रीमद्भागवते म० द्वादशस्कन्धे श्री० टीकायां तृतीयोऽध्यायः॥ ३॥ चतुर्थे तु चतुर्धोक्ता लया नैमित्तिकादयः॥ तत्र संसारनिस्तारो हरिकीर्त्यैव वर्ण्यते ॥ १॥ कलिदोषनिवर्तकं हरिनामसंकीर्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नद्वयस्योत्तरमुक्तम्। यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तदिदानीं तृतीयस्कंधोक्तकालमानानुवादपूर्वकं निरूपयति । काल इति। "स कालः परमाणुर्वै यो भुंक्ते परमाणुताम्" इत्यादिना कालः कथितः। "चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्। संख्यातानि सहस्राणि द्विगुणानि शतानि च।" इति युगमानं कथितम् १॥ तत्र कल्पमानमाह । चतुर्युगेति । यत्र चतुर्दशमनवः क्रमेण भवंति ॥ २ ॥ प्रलयस्तु चतुर्विधः नैमित्तिकः प्राकृतिक आत्यंतिको नित्यश्चेति । तत्र नैमित्तिकं प्रलयं मानसहितमाह तदंत इति द्वाभ्याम् । तावान् चतुर्युगसहस्रप्रमाणः । सैव ब्राह्मी रात्रिः ॥ ३ ॥ नैमित्तिकत्वं दर्शयति । यत्र यदा विश्वसृक् श्रीनारायणो विश्वमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते । आत्मभूर्ब्रह्मा च तस्मिन् शेते । तयोरभेदविवक्षया वा ब्रह्मण एवानंतासनत्वमुक्तम् । ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ॥ ४ ॥ प्राकृतिकं प्रलयमाह द्वाभ्याम् । द्विपरार्धे तु ब्रह्मण आयुषि । सप्त प्रकृतयो महदहंकारपंचतन्मात्राणि ॥ ५ ॥ संघातो महदादिकार्यभूतः । प्रकृतीनां तत्कार्यब्रह्मांडस्य च प्रलयात्प्राकृतिक इत्यर्थः । विघाते विघातकारणे उपसादिते सति ॥ ६ ॥ तदेवाह । पर्जन्य इत्यादिना बुद्धींद्रियार्थरूपेणेत्यतः प्राक्तनेन ग्रंथेन ॥७॥

वार्थदीपिकाप्रकाशे द्वादशस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ एवकारेण " कलौ नामैव नामैव कलौ नामैव केवलम्" इति स्मृतिराकृष्यते । तत्र नैमित्तिकादिमध्ये (१) नृपेति–कालज्ञानं विना नृपालनं न संभवतीति भावः ॥ १ ॥ यत्र दिने । विशांपते इति–प्रजापालनासक्तत्वात्त्वं कालं नाकलयसीति भावः ॥ २ ॥ तदंते दिनांते । यत्र रात्रौ ॥ ३ ॥ इत्यर्थ इति–अत्र प्रवर्तमानेऽर्थे ठक् प्रत्ययः ॥ ४ ॥ ५ ॥ हे राजन्निति–धैर्येण मृत्युकालेऽपि तव दीप्तिर्न नष्टेति भावः । विघातकारणेऽकाले उपसादिते प्राप्ते सति ॥ ६ ॥ तदेव विघातकारणमेवाह । तदा वर्षणाभावेन निरन्नेऽन्नाभावे सति ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षयं यास्यंति शनकैः कालेनोपद्रुताः प्रजाः ॥ सामुद्रं दैहिकं भौमं रसं सांवतको रविः ॥ ८ ॥ रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति ॥ ततः संवर्तको वह्निः संकर्षणमुखोत्थितः ॥ ९ ॥ दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ॥ उपर्यधः समंताच्च शिखाभिर्वह्निसूर्ययोः ॥ १० ॥ दह्यमानं विभात्यंडं दग्धं गोमयपिंडवत्॥ततः प्रचंडपवनो वर्षाणामधिकं शतम्॥११॥परः सांवर्तको वाति धूम्रं खं रजसा वृतम् ॥ ततो मेघकुलान्यंग चित्रवर्णान्यनेकशः ॥ १२ ॥ शतं वर्षाणि वर्षंति नदंति रभसस्वनैः ॥ तत एकोदकं विश्वं ब्रह्माण्डविवरान्तरम् ॥ १३ ॥ तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लवे ॥ ग्रस्तगंधा तु पृथिवी प्रलयत्वाय कल्पते ॥ १४ ॥ अपां रसमथो तेजस्ता लीयंतेऽथ नीरसाः ॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥ ॥१५॥लीयते चानिले तेजो वायोः खं ग्रसते गुणम् ॥ स वै विशति खं राजंस्ततश्च नभसो गुणम्॥१६॥शब्दं ग्रसति भूतादिर्नभस्तमनु लीयते॥तैजसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः ॥ १७ ॥ महान्ग्रसत्यहंकारं गुणाः सत्त्वादयश्च तम् ॥ ग्रसतेऽव्याकृतं राजन् गुणान् कालेन चोदितम् ॥ १८ ॥

सामुद्रादिकं सर्वं रसं रविः पिबते आकर्षति ॥ ८ ॥ ९ ॥ अनिलवेगोत्थो वायुवेगोद्भूतः । अनिलवेगो वा इति पाठे अनिलेन वेगो यस्य सः । वाः रविणा रश्मिभिः पीतमुदकं च दहतीत्यर्थः । अनिलवेगो वै इति तु पाठः सुगमः । भूविवरान्पातालादीन् शून्यात्रविणा दैहिकरसाकर्षणात्प्राणिरहितान् । शिखाभिर्ज्वालाभिः ॥ १० ॥ किंचिदधिकं वर्षाणां शतम् । सांवर्तकः प्रलयहेतुः परो वायुर्वाति तदा रजसाऽऽवृतं खं धूम्रं भवति ॥ ११ ॥ १२ ॥ रभसस्वनैस्तीव्रगर्जितैः । ब्रह्मांडविवरमध्यगतं विश्वमेकोदकमेकार्णवोदकव्याप्तं भवति॥१३॥उदप्लवे उदकेनाप्लवे सति । प्रलयत्वायाभावाय॥१४॥१५॥१६॥भूतादिस्तामसोऽहंकारः । गुणैर्वृत्तिभिः सह॥१७॥ अव्याकृतं

सांवर्तकः प्रलयकालिकः । रसं रसनीयमार्द्रत्वमिति यावत्,रसं जलमित्यर्थः।यद्यपि 'मेघपुष्पं घनरसः'इत्यमरोक्तेर्न केवलरसशब्दो जलवाची तथाप्येकदेशन्यायेन तथास्त्येवेति ज्ञेयम्॥८॥ततो रसशोषानंतरम्॥९॥इत्यर्थ इति—मेवांतर्गतमपि जलं शोषयतीति भावः । सूर्यपक्षे शिखाभी रश्मिभिः ॥१०॥ ततो ब्रह्मांडदाहोत्तरम् । प्रचंडपवनः सशब्दो वायुः । अधिकं किञ्चिदधिकम् ॥११॥ परो बलवत्तरः । ततो रजःकृताकाशधूम्रत्वानंतरम् ॥ ॥ १२ ॥ अंतरे तिष्ठतीत्यान्तरं ब्रह्मांडविवरस्यांतरं ब्रह्मांडविवरांतरम् । एकमुदकमेव यत्र प्रतीयते नान्यत्तदेकोदकम् ॥ १३ ॥ भूमेर्गंधगुणमापो ग्रसंति भूलयाय तस्यामभिभावयंति । एवमग्रेऽप्यूह्यम् । अन्यगुणस्यान्यत्र लयासंभवात् तन्मात्राणां कारणत्वकल्पने पूर्वं लयासंभवात्तन्मात्रकार्यत्वे भूतानां भूतांतरे लयासंभवाच्च ग्रस्तभेदकगुणाप्रलयत्वाय कल्पते योग्यो भवति ॥ १४ ॥ ता आपः । अनीरसा रसहीनाः संतः । तद्हितं रूपरहितम् ॥ १५ ॥ वायोर्गुणं स्पर्शम् । खमाकाशः । स वायुः ॥ १६ ॥ हे अंग राजन् ॥ १७ ॥ महान् ईक्षणम् । अहंकारं बहुभवनसंकल्पम् । महदहंकारयोर्भगवदीक्षणसंकल्परूपयोस्तज्जन्यत्वे सति तज्जन्यजनको व्यापार इति लक्षणसद्भावेन मायोपहितेश्वरव्यापारत्वेन निमित्तत्वेऽप्युपादानत्वासंभवात्कालेन स्वोपहितेनेश्वरेण नोदितमव्यक्तं तदुपाधिमायात्मकाज्ञानम् । गुणान्स्वकार्यभूतान् ॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनंतमव्यक्तं नित्यं कारणमव्ययम् ॥ १९ ॥ न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ॥ न प्राणबुद्धींद्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥ २० ॥ न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ॥ संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनंति ॥ २१ ॥ लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयः संप्रलीयंते विवशाः कालविद्रुताः ॥ २२ ॥ बुद्धींद्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत् ॥ २३ ॥ दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ॥ एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥ २४ ॥

प्रधानम् ॥ १८ ॥ तस्य तु लयो नास्तीत्याह । न तस्येति । कालावयवैरहोरात्रादिभिः । गुणा भावविकाराः । परिणामो विपरिणामः । अव्यक्तमस्तित्वविकारशून्यम् । नित्यं सर्वदैकरूपं ह्रासवृद्धिरहितमित्यर्थः । अव्ययमपक्षयशून्यम् । सर्वत्र हेतुः कारणमिति ॥ १९ ॥ किंच । वागादिगोचरस्य सविशेषस्य विकारा भवंतीदं तु न तथेत्याह न यत्रेति द्वाभ्याम् । लोककल्पो लोकरूपः सन्निवेशो रचनाविशेषो नास्ति॥ २०॥ स्वप्नजाग्रत्स्वप्नजागरावस्थायुक्तम् । संसुप्तवदिंद्रियाभावात् । शून्यसादृश्ये हेतुः । अप्रतर्क्यम् । न पुनः शून्यमेवेत्याह तदिति ॥२१॥ उपसंहरति लयं इति । शक्तयः सत्त्वादयः ॥ २२ ॥ आत्यंतिकं लयमाह बुद्धींद्रियेति द्वादशभिः । आत्यंतिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलयात्मकः । न च प्रपंचस्यात्मवत्सत्यत्वे लयः संभवतीति ज्ञानरूपाद्ब्रह्मणः पृथग्भूतस्य तस्यासत्त्वमुपपादयति । बुद्धिश्चेंद्रियाणि चार्थाश्चेत्येवं ग्राहककरणग्राह्यरूपेण तेषामाश्रयभूतं ज्ञानमेव भाति न पृथक् । तत्र हेतुमाह । दृश्यत्वाव्यतिरेकाभ्यामिति । अतो यदाद्यंतवत्तदवस्तु । अत्रैवं प्रयोगः विमतं सन्न भवति । दृश्यत्वात्कारणाव्यतिरेकादाद्यंतवत्त्वाच्च रज्जुसर्पादिवदिति ॥ २३ ॥ तत्राव्यतिरेकं दृष्टांतेन प्रपंचयति । दीप इति । दीपचक्षूरूपाणां तेजोविशेषाणां

तस्याव्याकृतस्य तदवयवविभागस्य पश्चाद्भावितया तद्धेतुत्वानुपपत्तेः । गुणा धर्माः बोधात्पूर्वमबाधीन्नित्यत्वाव्ययत्वे तस्येति केचित् ॥१९॥अन्यंदाह–किञ्चेति । इदमव्यक्तं तु न तथा वागादिगोचरो नेत्यर्थः । गुणानां तद्रूपेण सत्त्वेऽपि साम्ये विभागाभावेनाभावोक्तिः ॥ २० ॥ सुषुप्तं व्यष्टिसुषुप्तिर्नेति ज्ञेयम् । सुषुप्तवत् कार्यादर्शनात् ॥ २१ ॥ संप्रलीयंते साम्येनाक्षुब्धास्तिष्ठंति । शक्तयः पृथिव्यादय इति तीर्थः । लयः । कथित इति शेषः । कालेन विद्रुता अभिभूता अत एव विवशाः ॥ २२ ॥ बुद्धिरूपेणेंद्रियरूपेण विषयरूपेण च तेषां बुद्ध्यादीनामाश्रयमात्मस्वरूपं ज्ञानमेव । तत्रात्मस्वरूपज्ञानत्वे । अतो दृश्यत्वाव्यतिरेकाभ्याम्, अत्र बुद्ध्यादीनामात्मस्वरूपज्ञानत्वे निश्चेतव्ये । एवं वक्ष्यमाणरीत्या । प्रयोगोऽनुमानम् । विमतं विवादास्पदीभूतं बुद्ध्यादि । कारणाव्यतिरेकात् कारणाभिन्नत्वात् । आदिना स्वप्नदृश्यवद्घटादिवदिति गृह्यते ॥ २३ ॥ तत्र द्वयोर्हेत्वोः । अत्राक्षिपति–नन्विति । इत्यर्थ इति–कारणसत्तातः कार्यसत्ता न पृथक्, कार्यसत्तातः कारणसत्ता तु पृथगस्ति, तच्च मृद्घटादौ स्फुटतरमिति भावः । यद्वा–अन्यतमात्सुषुप्तिसमाध्यादौ बुद्ध्यादिबाधेऽपि

१ संसुप्तवदित्यत्र सुषुप्तवदिति पाठाभिप्रायेण ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ॥ मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि ॥ २५ ॥ यथा जलधरा व्योम्नि भवन्ति न भवंति च ॥ ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २६ ॥ सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह ॥ विनार्थेन प्रतीयेरन्पटस्येवांग तंतवः ॥ २७ ॥ यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् ॥ २८ ॥

तेजसो यथा न व्यतिरेकस्तथा धीः कर्त्री खानि करणानि मात्रा विषयाः ऋताद्ब्रह्मणः पृथङ् न स्युर्ब्रह्मकार्यत्वात् । नन्वेवं कार्यकारणयोरभेदे कार्यासत्त्वे कारणस्याप्यसत्त्वं प्रसज्जेत तत्राह । अन्यतमादिति । कार्यादत्यंतव्यतिरिक्ताद्ब्रह्मणः प्रपंचाद्ब्रह्मणोऽस्ति व्यतिरेकः प्रपंचस्य तु ततो नास्ति व्यतिरेक इत्यर्थः ॥ २४ ॥ यदा तु बुद्धेरसत्त्वं तदा तदवस्थानां सुतरामसत्त्वमित्याशयेनाह । बुद्धेरिति । ननु विश्वतैजसप्राज्ञानामेता अवस्था न बुद्धेरित्याशंक्याह । मायामात्रमिति । इदं विश्वतैजसप्राज्ञरूपम् ॥ ॥ २५ ॥ आद्यंतवत्त्वादित्यस्य हेतोरसिद्धिमाशंक्य सावयवत्वेन साधयति । यथेति । अवयवीति । यत्सावयवं तदाद्यंतवद्घटादिवदित्यर्थः । अत उदयाप्ययादाद्यंतवत्त्वाद्विश्वं सद्ब्रह्म भवतीत्यर्थः । यद्वा पृथगेवागमापायित्वाद्विश्वं मिथ्या । ब्रह्म तु तदवधित्वात्सत्यमित्यनेन साध्यते । दृष्टांतस्तु पूर्वोक्त एव । यथा जलधरा व्योम्नीति दृष्टांतस्त्वागमापायि तदवधित्वमात्रे न तु मिथ्यात्वे ॥ २६ ॥ अन्यतमादृतादिति प्रतिज्ञातं कारणस्य सत्यत्वमुपपादयति । सत्यमिति । अवयवः कारणं प्रोक्तम् "वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इत्यादिश्रुतिभिः । अत्र युक्तिमपि दर्शयति । विनेति । अंग हे राजन् हि यस्मादर्थेनावयविना पृथगेवावयवाः प्रतीयेरन् । यथा पटस्यावयवास्तंतवः पटात्पृथक्प्रतीयंते तद्वदिति ॥ २७ ॥ ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत । सत्यम् । तदपि नातीव सत्यमित्याह । यदिति । सामान्यं कारणं विशेषः कार्यं तद्रूपेणान्योन्यापाश्रयात्परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थः । अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि यत्परापेक्षत्वादाद्यंतवत्तत्सर्वमवस्त्वित्यर्थः । यद्वा तत्रैव हेत्वंतरमेतत् ।

परिशिष्यमाणत्वाद्व्यतिरिक्तत्वम् ॥ २४ ॥ अत्राक्षिपति—नन्विति । यद्वा—जागरणं स्वप्नः सुषुप्तिश्च प्रत्यगात्मन्यधिष्ठाने बुद्धेरेव परिणामस्तस्याश्च मायाकार्यत्वादिदं नानात्वं मायामात्रं नानात्वात्स्वप्ननानात्ववत् ॥ २५ ॥ न कदाचिदनीदृशं जगदिति मीमांसकमतेन विश्वस्याद्यंतवत्त्वं नास्तीत्यभिप्रेत्याह—आद्यंतवत्त्वादिति । असिद्धिं स्वरूपासिद्धिम् । इत्यर्थ इति—यथा घटादयः सावयवत्वादाद्यंतवंतस्तथेदमपीति भावः । अतः सावयवत्वात् । इत्यर्थ इति—आद्यंतवद्रज्जुसर्पादेर्यथा सत्त्वं नास्ति तथास्यापीति भावः । ननु विश्वस्य ब्रह्मानन्यत्वे ब्रह्मणो नित्यत्वेन तस्यापि नित्यत्वं स्यादिति चेत्तत्राह—यद्वेति । ब्रह्मणः पृथगिदं विश्वं मिथ्यैव, आगमापायित्वात् । तदवधित्वात् तदाश्रयत्वात् । पूर्वोक्त एव रज्जुसर्पवदित्येव । ननु यथा जलधरा इति दृष्टांतसत्त्वे पूर्वोक्तदृष्टांताश्रयणं किमर्थं कृतं तत्राह—यथा जलधरो व्योम्नीत्यादि ॥ २६ ॥ अत्रावयवसत्यत्वे । उक्तार्थग्रहण उत्साहवृद्धये संबोधयति—हे अंगेति । गुरुप्रीतिवाक्यश्रुतेः स्वयमेवार्थः स्फुरतीति भावः । पटं विना पृथक्प्रतीतेः सत्त्वमेव तंतूनां, तंतून्विना पटस्य पृथगप्रतीतेरसत्त्वमिति भावः ॥ २७ ॥ अत्राक्षिपति—न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विकारः ख्यायमानोपि प्रत्यगात्मानमंतरा ॥ न निरूप्योऽस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥ २९ ॥ न हि सत्यस्य नानात्वमविद्वान्यदि मन्यते ॥ नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव ॥ ३० ॥ यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु ॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैः ॥ ३१ ॥

यदुपलभ्येत स भ्रमः सामान्यविशेषरूपत्वात्स्वप्नवत् । अन्योऽन्यापाश्रयादितीदमपि हेत्वंतरं गुणगुणिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धित्वात् । तथा त स्वप्नवदिति निगमनम् । अतो यदाद्यंतवत्तत्सर्वमवस्त्विति ॥ २८ ॥ तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्त्वं साधितम् । तत्र शंका । ननु प्रपंचस्यापि प्रकाशमानत्वादात्मवत्सत्त्वं किं न स्यादिति तत्राह । विकार इति । ख्यायमानः प्रकाशमानोऽपि विकारः प्रपंचः प्रत्यगात्मप्रकाशं विनाऽणुमात्रोऽपि न निरूप्योऽस्ति । तं विना निरूप्यः स्याच्चेत्तर्हि सोऽपि चित्समः स्याच्चिद्रूपेणात्मना समः स्वप्रकाशो भवेत् । तथा च सति सोप्यात्मवत्स्यात् । एकरूपः स्यादित्यर्थः ॥ २९ ॥ कुत इत्यत आह । न हीति । ननु सत्यस्याप्यात्मनो जीवब्रह्मरूपं नानात्वमस्त्येव तत्राह । यद्येवं नानात्वं मन्यते तर्ह्यविद्वान् । कथं तर्हि तयोर्भेदव्यवहारः उपाधिकृत इत्याह । नानात्वमिति । तत्र छिद्रयोर्घटाकाशमहाकाशयोरिवेति परिच्छेदापरिच्छेदे दृष्टांतः । ज्योतिषोराकाशजलस्थयोः सूर्ययोरिवेत्युपाधिकृतविकारसदसद्भावे । वातयोर्बाह्यशरीरस्थवाय्वोरिवेति क्रियाभेदे ॥ ३० ॥ ब्रह्मण एव प्रपंचव्यवहारालंबनत्वं दृष्टांतेन स्पष्टयति । यथेति । क्रियाभिस्तत्तद्रचनाभेदैर्बहुधा कटककुंडलादिरूपेण । लौकिकवैदिकैर्वचोभिः । जनैरहंकारोपहितैः ॥ ३१ ॥

न्विति । इत्यर्थ इति—अन्योन्यसिद्धावन्योन्यापेक्षणमन्योन्याश्रयः, स च दोष एव । तथाहि—कारणत्वं हि कार्यत्वानिरूप्यं, कस्य कारणमित्यनुयोगविषयत्वात्, एवं कार्यत्वमपि कारणत्वानिरूप्यं, कस्य कार्यमित्यनुयोगगोचरत्वादतोऽनयोः पौर्वापर्यनिर्णयाभावाद्दोषत्वमेवेति भावः । उक्तमर्थमन्यत्राप्यतिदिशति—अतः कारणत्वमित्यादि । इत्यर्थ इति—परस्य कार्यावधेयव्याप्यस्यापेक्षावत्त्वात्कारणत्वादीनामपि पूर्वोक्तदोषवत्त्वमिति भावः । आदिना प्रकाशकत्वादिग्रहः । अस्तु कार्यत्वादिभावोपि मिथ्याकारणत्वादिभावस्य मिथ्यात्वे ब्रह्मणोऽपि मिथ्यात्वं प्रसज्येत तत्राह—यद्वेति । तत्रैव विश्वमिथ्यात्व एव । तथाभूतस्वप्नवत् निद्रानिरूपितस्वप्नवत् । यथा स्वप्ननिरूप्या निद्रा, निद्रानिरूप्यः स्वप्नः, उभावेतावसत्यौ तथेदमपीति निगमनं दृष्टांतः । उपसंहरति—अत इति,—उक्तहेतुसमूहात् ॥ २८ ॥ तत्र प्रपंचासत्यत्वे । शंकाऽऽक्षेपः । तामाह—नन्विति । ख्यायत इति ख्यायमानः, ख्यातेः कर्मणि शानच् । इत्यर्थ इति—न ह्यचितः प्रकाशश्चितं विहाय कदापि भवत्यतश्चिदेव तत्तदाकारेण प्रकाशतेऽचितः पृथक्सत्तानंगीकारात् "सर्वं खल्विदं ब्रह्म" "नेह नानास्ति किंचन" इत्यादिश्रुतेरिति भावः ॥ २९ ॥ अत्र हेतुमाशंक्याह—कुत इति । अत्राक्षिपति—नन्विति । तयोर्जीवब्रह्मणोः । तत्र छिद्रादिदृष्टांतेषु । परिच्छेदापरिच्छेदेऽल्पानल्पत्वे ॥ ३० ॥ क्रियाभिस्तत्तद्रचनाभेदैः । भगवान् बहुधाका ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः ॥ एवं त्वहं ब्रह्मगुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः ॥ ३२ ॥ घनो यदाऽर्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥३३॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनम् ॥ छित्त्वाऽच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यंतिकमंग संप्लवम् ॥ ३४ ॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ॥ ३५ ॥ कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा ॥ परिणामिनामवस्थास्ता जन्मप्रलयहेतवः ॥ ३६ ॥ अनाद्यंतवताऽनेन कालेनेश्वरमूर्तिना ॥ अवस्था नैव दृश्यंते वियति ज्योतिषामिव ॥ ३७ ॥

नन्वहंकारस्य कथं ब्रह्मस्वरूपावरणेन भेदव्यवहारहेतुत्वम् । तस्य स्वकारणभूतब्रह्मावरकत्वासंभवादावरणे वा स्वस्यापि प्रकाशासंभवादित्याशंक्य सदृष्टांतमाह । यथेति । अर्करश्मय एव मेघरूपेण परिणता वर्षंति । "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इत्यादिवचनात्तस्मादर्कप्रभवः । अर्केणैव दर्शितः प्रकाशितश्च । तमः स्वरूपभूतार्कदर्शनप्रतिबंधको भवति अहमहंकारो ब्रह्मगुणो ब्रह्मकार्यभूतस्तदीक्षितस्तेनैव प्रकाशितश्चात्मनो जीवस्यात्मबंधनो ब्रह्मस्वरूपदर्शनप्रतिबंधको भवति ॥ ३२ ॥ अत एवाहंकारनाशे स्वरूपदर्शनं भवतीति तेनैव दृष्टांतेनाह । घन इति । आत्मन उपाधिः । जिज्ञासया विचारेण । तर्हि तदाऽनुस्मरेत् । ब्रह्माहमिति पश्यतीत्यर्थः ॥ ३३ ॥ सोऽयमात्यंतिकः प्रलय इत्युपसंहरति । यदैवमिति । विवेकहेतिना ज्ञानशस्त्रेण । अहंकरणमेवात्मबंधनम् । अच्युतं परिपूर्णमात्मानमनुभवतीति तथा ॥ ३४ ॥ नित्यप्रलयमाह । नित्यदेति ॥ ३५ ॥ कुत इत्यत आह । कालेति । परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां या उच्चनीचावस्थास्ताः कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य देहादेर्दृश्यमानास्ता एव नित्यदा जन्मप्रलयहेतवो भवंति । देहः प्रतिक्षणं प्रध्वंसी प्रतिक्षणमवस्थाभेदास्पदत्वात्प्रदीपादिवदित्यनुमानम् ॥ ३६ ॥ ननु यदि प्रतिक्षणमवस्था भवंति तर्हि किं न दृश्यंतेऽतो हेतुरसिद्ध इत्याशंक्याह । अनाद्यंतवता कालेन जायमाना अवस्था नैव लक्ष्यंते । आकाशे गच्छतां

शादिरूपेण ब्रह्मादिरूपेण च व्याख्यायते प्रकाश्यते—एष ब्रह्मा एष शिव इत्यादिना वैदिकैश्च शास्त्रधिया लौकिकैश्च शास्त्रज्ञानाभावात् घटोऽयं पटोयमित्यादिना स एव प्रकाश्यत इति भावः ॥ ३१ ॥ अत्राक्षिपति—नन्विति । ब्रह्मस्वरूपदर्शनप्रतिबंधकः स्वाध्यासेन बंधभ्रमापादको भवति ॥ ३२ ॥ यतोऽहंकार एव प्रतिबंधकोस्ति अतो हेतोरेव । इत्यर्थ इति—प्रतिबंधकनाशे स्वत एव स्वरूपज्ञानं भवतीति भावः ॥ ३३ ॥ जिज्ञासयाहंकारबाधप्रकारमाह—यदैवं गुरोर्महावाक्यश्रवणोत्तरं श्रूयमाणेशजीवाभेदस्य विरोधादनुपपत्तेरेतेन मायाऽविद्याद्युपाधिविवेकरूपहेतिना भागत्यागलक्षणतद्बाधकरूपखड्गेनं तयोर्मायाहंकरणोपाधिरूपमात्मबंधनं छित्त्वाऽच्युतो हरिरेवात्मा मत्स्वरूपमित्यनुभवोऽपरोक्षबोधो यस्य तथाभूतः शुद्धनिरुपहितस्वरूपेणावतिष्ठते, तमात्यंतिकमंगसंप्लवं स्थूलसूक्ष्मकारणांगत्रयप्रलयमाहुः । अंगेति संबोधनम् अंहकरणमात्मावरकमहंकारम् । अंगेति संबुद्धिः पूर्ववदिति विश्व० ॥ ३४ ॥ हे परन्तपेति—शत्रुतापकस्य तवाज्ञानतापकताप्यस्त्येवेति भावः ॥ ३५ ॥ ३६ ॥ अत्राक्षिपति—नन्विति । अतो दर्शनाभावात् । हेतुः प्रतिक्षणमवस्थाभेदास्पदत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः ॥ आत्यंतिकश्च कथितः कालस्य गतिरीदृशी ॥ ३८ ॥ एताः कुरुश्रेष्ठ जगद्विधातुर्नारायणस्या
खिलसत्त्वधाम्नः ॥ लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभिधातुमीशः ॥ ३९ ॥ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो
भगवतः पुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमंतरेण पुंसां भवेद्विविधदुःखदवार्दितस्य ॥ ४० ॥ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ॥ नारदाय
पुरा प्राह कृष्णद्वैपायनाय सः ॥ ४१ ॥ स वै मह्यं महाराज भगवान्बादरायणः ॥ इमां भागवतीं प्रीतः संहितां वेदसंमिताम् ॥४२॥ एतां वक्ष्यत्यसौ
सूत ऋषिभ्यो नैमिषालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः शौनकादिभिः ॥४३॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

ज्योतिषां चंद्रादीनां गमनावस्थाविशेषा यथा नैव लक्ष्यंते तद्वत् । अतो यथा तेषां प्रदेशांतरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्यंते तद्वदत्रापि बाल्यतारुण्यादिदर्शनेन मध्यवर्तिन्योऽवस्थाः कल्प्यंत इति न हेतुरसिद्ध इत्यर्थः ॥ ३७ ॥ उपसंहरति । नित्य इति ॥ ३८ ॥ पुराणार्थमुपसंहरति । एता इति । लीलाविषयाः कथा अजो ब्रह्माऽपि कार्त्स्न्येनाभिधातुं नेशः ॥ ३९ ॥ ननु यदि साकल्येनाभिधातुं न शक्यंते तर्हि किं तदभिधानेन तत्राह । संसारेति । विविधं दुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्यात उत्तितीर्षोः पुंसो भगवतो या लीलास्तासां कथास्तासां रसस्तन्निषेवणमंतरेणान्यः प्लवस्तरणसाधनं न भवेत् । उपायांतरासंभवात्तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ॥ ४० ॥ श्रोतुरादरदार्ढ्याय संप्रदायप्रवृत्तिमाह पुराणसंहितामिति त्रिभिः ॥४१॥ स वै बादरायणः प्रीतः सन्मह्यमिमां संहितां प्राहेति पूर्वेणान्वयः ॥४२॥ असौ सूत इति पुरतः स्थितमंगुल्या निर्दिश्याह । नैमिषालये नैमिषारण्यस्थाने ॥ ४३ ॥ ॥ इति श्रीमद्भागवते म० द्वादशस्कंधे श्री० टीकायां चतुर्थोऽध्यायः ॥ ४ ॥

दिति हेतुः । अतो दर्शनाभावात् । तेषां ज्योतिषाम् । इत्यर्थ इति—हेतुः पक्षेऽस्त्येवेति भावः ॥ ३७ ॥ कालस्य च गतिं ब्रूहीति प्रश्नस्योत्तरमुपसंहरन्नाह—कालस्येति ॥ ३८ ॥ हे कुरुश्रेष्ठेति—अंतावस्थायां श्रीभागवतश्रवणात्त्वं सर्वेभ्यः स्वकुलमुख्येभ्यः श्रेष्ठोसीति भावः । किञ्च—भगवल्लीला अस्मदादिलीलावद्रागपूर्विका न किन्तु योगमायैव । तथा च श्रुतिः—“ यदचरस्तन्वा वावृधानो बलानींद्र प्रब्रुवाणो जनेषु मायेत्सा ते या नियुद्धान्याहुर्नाद्यशत्रुं ननु पुरा विवित्से ” इति । अस्या अर्थः—हे इंद्र परमेश्वर यत् तन्वा मत्स्यकूर्मादिशरीरेणाचरः चरणं कृतवानसि वावृधानः ववृत्ते दैत्यादीन्हत्वा महत्त्वं च प्राप्तवानसि लोके बलानि भूमेरुद्धरणादीनि जनेषु प्रब्रुवाणः ख्यापितवानभूः सा सर्वा ते तव मायेत् मायैव सा का या नियुद्धान्याहुः देवासुरसंग्रामाः सर्वे मायैव । कुत एतत्—यतस्त्वं ननु निश्चितम् अद्य वर्तमानकाले पुरा वा शत्रुं नाशनीयं न विवित्से लभसे, सर्वस्यांतरात्मकत्वात्कालत्रयेपि तव शत्रुर्नास्तीति तस्मात्स्वाप्तानुवादवदेतत्पुराणं भगवल्लीलामनुवदतीति मंत्रार्थः ॥ ३९ ॥ पुनराक्षिपति—नन्विति । इत्यर्थ इति—यथा महदनेकान्नराशितो यत्किञ्चित्तदन्नैकदेशाशनेन क्षुन्निवृत्तिर्भवति तथा लीलाकथैकदेशोऽपि संसारदुःखनिवर्तकोऽतस्सोऽवश्यं सेव्य इति भावः।विश्वनाथस्तु—यत्प्रथमस्कन्धपृष्टं‘म्रियमाणस्य किं कृत्यं’ तदुत्तरमाह—संसारेति । दुःसहक्षुधायां भोजनमंतरेण नोपशम इतिवन्नान्ये, ज्ञानादिकः प्लव उत्तरणसाधनं दुःसहक्षुधायाः स्रक्चंदनादिरिव, तेनैतदुत्तराध्याये मयाप्युपदेष्टव्यः। महारहस्यभक्तिरत्नच्छादनार्थं यज्ज्ञानं तत्त्वयाऽप्यदेयत्वेन न प्रत्येतव्यमिति भावः । रसशब्देन लीलाकथानाममृतत्वमारोपितम् । अत एव विविधदुःखमहारोगाणां दवमहाज्वालास्तत्पीडितस्य सद्य एवैकममृतं विना नान्यदौषधं प्रयोक्तव्यमिति भावः॥४०॥अव्ययः सर्वदैकरसः नारायण ऋषिः सर्वज्ञः ब्रह्मद्वारा पुरा नारदाय प्राह।स नारदः॥४१॥स कृष्णद्वैपायनः। हेमहाराजेति—महेन भगवत्प्राप्त्युत्सवेनाधुना समंतात्त्वं राजसीति भावः । तत्त्वज्ञापकत्वेन सर्ववेदतुल्याम्॥४२॥हे कुरुश्रेष्ठेति संबुद्धिर्व्याख्यातचरी॥४३॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कंधे चतुर्थोऽध्यायः॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीशुक उवाच ॥ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः ॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ १ ॥

पंचमे तु समासेन परब्रह्मोपदेशतः ॥ राज्ञस्तक्षकसंदंशान्मृत्युभीतिनिवारणम् ॥ १ ॥ एतत्पुराणं शृण्वन्नभयं प्राप्नोतीत्यभिप्रेत्य पुराणार्थमनुस्मारयति । अत्रेति । अयं भावः । जगतः कर्ता ब्रह्माऽपि यस्य प्रसादजः । प्रसादोऽत्र रजोवृत्तिर्हर्षः । ततो जातत्वात्परतंत्रः । सर्वसंहर्ता रुद्रश्च यस्य क्रोधसंभवो न तु स्वतंत्रः । स विश्वस्य

समासेन संक्षेपेण (१) । अत्र ग्रन्थे । अत्र तात्पर्यं स्वामिचरणा आहुः—अयं भाव इत्यादिना ॥ [1]* ॥ शास्त्रार्थमुपसंहृत्य श्रीशुकः किंचिदात्मनैव परामर्श—अहो असाध्वनुष्ठितं यन्महारहस्यमसमाधिकं स्वहृदय संपुटात्समुद्धाव्य सर्वलोकदृग्गोचरीकृतम् । यः खलु मत्प्रभुणा ‘ राजविद्या राजगुह्यम्’ इत्यनेन विद्यानां राजेति, गुह्यानां राजेत्युक्तः, पुनश्च ‘ सर्वगुह्यतमं भूयः शृणु मे ’ इत्यनेन गुह्यतमशब्देनोक्तः, स खलु भक्ति योगो मया परीक्षिति कृपावशतया प्रायः प्रकटीकृत्यैवोक्तः । तथाहि—“ अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम् ॥ ” इत्यादिना “ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ” इत्यत्र “ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् । न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः ॥ ” इत्यादिना चान्वयव्यतिरेकाभ्यां भक्तिरेव सर्वफलसाधनत्वेनोपपादिता । स्वर्गादिसाधनानि कर्माणि दूरे तावदासताम्, मोक्षसाधनस्यातिप्रसिद्धस्यापि ज्ञानस्य मोक्षकारणत्वं परास्तीकृतमेव । “ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् ” इति, चतुर्थाश्रमिणो ज्ञानिनोऽपि ‘ स्थानाद्भ्रष्टाः पतन्त्यधः ’ इति, “ आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधो नादृतयुष्मदंघ्रयः” इत्याद्युक्तेर्ज्ञानासत्त्वेऽपि भक्त्या विना मोक्षासिद्धेः । “ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् । सर्वं मद्भक्तियोगेन पुरुषो लभतेंजसा ॥” इति ज्ञानव्यतिरेकेपि भक्त्यैव मोक्षसिद्धेरुक्तत्वात् । मोक्षं प्रति ज्ञानं नैवान्वयव्यतिरेकीति तदपि ज्ञानान्मोक्ष इति या प्रसिद्धिस्तत्र ज्ञानगता गुणीभूता भक्तिरेव मोक्षं जनयति, ज्ञानस्य तु नाममात्रेण कारणता ‘ भक्त्याहमेकया ग्राह्यः ’ इति, ‘ न तपो नात्ममीमांसा ’ इति, “ किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि । श्रेयोभिरितरैश्चैव न यत्रात्मप्रदो हरिः ॥ ” इत्यादिवाक्यैर्ब्रह्मानुभवं प्रति ज्ञानस्य सहकारितापि वस्तुतो न प्रतिपादिता, भक्तेरेवोपक्रमोपसंहाराभ्यासेषु प्रपंचितम्, तदपि यदंतरांतरा योगज्ञानादिकमुपन्यस्तं तत्खलु भक्तेरुत्कर्षं तत्तन्मतानि च भक्तान्प्रति ज्ञापयितुमेवेति । किञ्च—“ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् ” इति, “ अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम्” इति, “ यन्नाम सकृच्छ्रवणात्पुष्कसोपि विमुच्यते ” इत्यादिभ्यः । किञ्च—‘ न मात्रयापि भक्त्या मोक्षः ’ इति, तथा—“ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीह । पश्यामि नान्यच्छरणं तवांघ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ॥ ” इत्युद्धववाक्येन, ‘ संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवः ’ इत्युपसंहारे मद्वाक्ये न च तां विना तु नान्येनोपायेन संसारान्मोक्ष इत्यपि निर्धारितम् । किञ्च—भक्त्या तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भवदीयत्वेनैव परिसमाप्तसर्वार्था इति, “ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ” इति, ‘न परिलषन्ति केचिदपवर्गमपि’ इति, ‘सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्’ इति, “स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः” इत्यादिवाक्येभ्यश्चतुर्थं पुरुषार्थमपि तिरस्कृत्य भक्तेरेव पुरुषार्थशिरोमणित्वं मया स्थापितम् । किञ्च—मुन्यन्तरवाक्यस्य प्रामाण्यमापेक्षिकमेव, मद्वाक्यस्य तु प्रामाण्यमात्यन्तिकमेवेति सर्वत्र वैकुण्ठेऽपि प्रसिद्धिर्भूयसी । “ परोक्षवादा ऋषयः परोक्षं च मम प्रियम् ” इति भगवदुक्तेर्महारहस्योद्घाटनपटिष्ठो भूत्वा भगवदप्रियं करोऽप्यभूवम् । तदधुना किं करिष्ये पुराणार्थश्च समाप्तीकृत एव, भवत्वधुनापि भक्तेर्महामहिमानं संवरीतुं यतिष्ये, यथा कश्चिन्महारत्नमतिगोप्यमपि रभसवशेन सर्वलोकान्प्रदर्श्यापि पुनः किंचित्परामृश्य तदलक्षितं संपुटितं कृत्वा महाकोशाभ्यन्तरे संस्थाप्य रत्नान्तरं बहिः प्रकाश्यानेनैवास्माकं सर्वार्थसिद्धिरिति ब्रूते, तथैव राजानमहं ज्ञानमुपदिशामि यथा गमनसमये तु शुकः परीक्षिते ज्ञानमेवोपदिष्टवानिति भगवन्मायाप्रभावाज्ज्ञानमेवोत्कृष्टं, भक्तिस्तु तत्साधनमिति मंस्यन्ते । किञ्च—भक्तिसिद्धाञ्जनान्प्रति प्रादुर्भूय भगवांस्तान्परीक्षमाणो मोक्षं गृहाण यथा ब्रूते, तथैवानेन ज्ञानोपदेशेनास्य मच्छिष्यस्य परीक्षितो भक्तिमद्व्युत्पत्तिञ्च परीक्षिष्ये । परीक्षा चेयं सर्वज्ञेनापि

---

१ एतदध्यायसमाप्तिपर्यंतमेत * चिह्नतोऽग्रे विश्वनाथाद्यनुसृतं व्याख्यानं बोध्यम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोऽद्य देहवत्त्वं न नंक्ष्यसि ॥ २ ॥

त्मा नियंता भगवानत्रानुवर्ण्यते । अत एवंभूतं भगवंतं शृण्वतः कूतोऽन्यस्माद्भयशंकेति ॥ १ ॥ त्वं पुनः कृतार्थ एवेत्यनुस्मारयति । त्वं त्विति । पशुबुद्धिमविवेकम् । यस्मान्न नंक्ष्यसि । कुत इत्यत आह । न जात इति । यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति । न चैवं त्वं पूर्वं नाभूर्न चाद्य जातोऽस्यतो न नंक्ष्यसि ॥ २ ॥

जगत्यस्मिन्परीक्षितो भक्तिनिष्ठाज्ञापनार्था ज्ञेया । किञ्च–भक्तिज्ञानयोः फलमंततो मुक्तिरेव केवलमित्यनभिज्ञव्याख्यानं नैव मदभिप्रायसंबद्धं ज्ञेयम्, यतः "राजन् पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः । अस्त्येवमंग भगवान्भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥" इत्युक्तवता मया मुक्तेः सकाशादपि भक्तेरुत्कृष्टफलत्वं प्रतिपादितत्वात् । न चोपदेष्टव्येनानेन ज्ञानेन परीक्षितो निर्वाणमुक्तिप्राप्तिरेवेति ज्ञेयम्, "स वै महाभागवतः परीक्षियेनापवर्गाख्यमदभ्रबुद्धिः । ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम् ॥" इति मदभिप्रायाभिज्ञेनानेन मच्छिष्येण सूतेनाग्रे वक्ष्यमाणत्वात् । 'राजन्पतिर्गुरुरलम्' इत्यत्र भजद्भ्यस्तु भक्तियोगं ददाति इति परीक्षितः प्रेमभक्तिप्राप्तिरेव व्यंजिता, न चोपदिश्यमानेनानेनैव देहादिव्यतिरिक्तात्मज्ञानेन ब्रह्मानुभवः सिध्येत्, किन्त्वस्यापि ज्ञानस्य भक्त्या निर्जयेनैव यदुक्तं भगवता– "द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः । श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्ये सर्व एव हि ॥ सर्वे गुणमया भावाः पुरुषा व्यक्त्यधिष्ठिताः । दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः । येनेमा निर्जिताः सौम्य गुणा जीवेन चित्तजाः ॥ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ।" इति । किञ्च–भगवद्भक्तस्य मोक्षकामत्वेऽपि नास्ति ज्ञानेन प्रयोजनम् । यदुक्तं स्वयं भगवता–"ज्ञाने कर्मणि योगे च वार्तायां दंडधारणे । यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः ॥" इति । तस्मादनेन सर्वान्ते ज्ञानोपदेशेनास्य शास्त्रस्य स्पष्टतयैव मोहिनीसाधर्म्यं प्रतिपादयिष्ये । यथा ह्यसुराः प्रेमसुधया वंचिता एव भवेयुरिति । अपि च–ज्ञानोपदेशात्प्रागेकं वाक्यं व्यंजनया वृत्त्या भक्तान् प्रीणयितुं भक्तिरसम्रक्षितमेव करिष्ये, तदनंतरं ज्ञानोपदेशवाक्यान्यपि यानि भक्तिप्रतिकूलानि वक्ष्ये तान्यप्यन्तर्भूतभक्त्यनुकूलार्थान्येव करिष्य इत्यादिकं विचार्याह–अत्रेति । अत्र समाप्तीकृतेऽस्मिन्पुराणशास्त्र इत्यर्थः । यस्य हरेः प्रसादजो ब्रह्मेति–प्रसादस्य सत्त्वगुणत्वाद्ब्रह्मणस्तु रजःसंभवत्वादेतन्न संगच्छते, तथा रुद्रः क्रोधसमुद्भव इति भगवतो निर्गुणत्वात्स्वरूपेण तामसः क्रोधोऽपि न संभवेद्यदुद्भवो रुद्रः स्यात्तस्माद्वाक्यमिदमतिशयोक्त्याऽर्थान्तरतात्पर्यकं ज्ञेयम् । तच्चैवम्–निर्गुणस्य भगवतः स्वभक्तसेविनि जने प्रसादः स्वभक्तद्रोहिणि क्रोधश्च दृष्टस्तौ च भक्तवत्सलस्य शुद्धसत्त्वस्वरूपावेवेत्यत एवं व्याख्येयम्–यस्य प्रसादजो यस्य प्रसादाख्यो भाग्यविशेषो ब्रह्मैवोक्तसमस्तसाध्यसाधनोत्पत्तिहेतुरतस्तदर्थमेव भक्तैर्यतनीयं, तथैवोक्तसाध्यसाधनविनाशहेतुर्भगवत्कोप एवेत्यतस्तदनुद्भव एव यतनीयमित्येतावत्पुराणतात्पर्यमवधेयमिति भावः । ननु यदि श्रीशुकदेवेन भागवतपुराणमिदमत्रैव समाप्तीकृतं कथं तर्हि प्रथमस्कंधस्यावशिष्टद्वादशस्य च श्रीभागवतत्वमुच्यते, यज्ञस्य प्रागुत्तरक्रिययोरपि यागत्वमेव, नाटकशास्त्रस्य यथा प्राक्पश्चाद्भूतयोः प्रस्तावनाशीर्वादयोरपि नाटकत्वमेव तथैव प्रथमद्वादशार्द्धयोरपि भागवतत्वम्, यथा च–"गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः । या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥" इत्यष्टादशाध्याऽयाः श्रीगीतायाः सर्वस्या भगवत्प्रोक्तत्वाभावेऽपि भगवत्प्रोक्तत्वमुच्यते, तथैव सप्रथमद्वादशस्य श्रीभागवतत्वं श्रीशुकदेवप्रोक्तत्वाभावेपि श्रीशुकप्रोक्तत्वञ्चेति समाधिः ॥ १ ॥ मरिष्य इति छेदः, संधिरार्षः । हे राजन्निति–मद्दत्तज्ञानेन राजस्वेति भावः ॥ * ॥ अथ ज्ञानोपदेशः–त्वं त्विति । तुर्भिन्नोपक्रमे । मरिष्येतीति सन्धिरार्षः । पशूनामिव बुद्धिं जहि विवेकेन नाशयेति । "तमोपयातं प्रतियन्तु विप्रा गंगा च देवी धृतचित्तमीशे ॥ द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः ॥" इति भागवतश्रवणात्प्रागेव प्रतिज्ञातवतस्तस्य पशुबुद्धेः प्रसक्तिरेव नास्तीत्यतस्तन्निवर्तको ज्ञानोपदेशो न राजानं प्रति संभवेत्किंतु ये पशुबुद्धयस्तानेव प्रति, तदपि राजन्निति संबोधनं तु तमेव लक्ष्यीकृत्यान्यविषयकस्याप्युपदेशस्य वक्तुमौचित्यात्तस्यैव तच्छिष्यत्वात् यथा सर्वविषयकोप्युपदेशः श्रीगीतायामर्जुनं लक्ष्यीकृत्यैवोक्तः । विवेकमेवाह–न जात इति । यथा देहः प्रागभूत एवेदानीं जातो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ॥ ३ ॥ स्वप्ने यथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयम् ॥
यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ॥४॥ घटे भिन्ने यथाऽऽकाश आकाशः स्याद्यथा पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥५॥

ननु बीजादंकुरवत्त्वस्मात्पुत्ररूपेणापि स्वयमेव भवति । यथाऽऽह श्रुतिः । "अंगादंगात्संभवसि हृदयादभिजायसे ॥ आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम्" इति ततः पुनरंकुराद्बीजमिव पौत्रादिरूपेणापि स्वयमेव भवति । "पिता पुत्रेण पितृमान्योनियोनौ" इति श्रुतेः । अतस्तेषु नश्यत्सु कथं न नंक्ष्यामीति चेत्तत्राह । न भविष्यसीति । भूत्वा पुत्रपौत्रादिरूपवान्बीजांकुरवन्न भविष्यसि यस्माद्देहादेर्व्यतिरिक्तस्त्वं यथाऽनलः काष्ठात् । देहाद्देहो जायते नात्मेति भावः ॥ ३ ॥ जन्मादीनां देहधर्मत्वं दृष्टांतेन प्रपंचयति । स्वप्ने यथाऽऽत्मनः शिरश्छेदं स्वयं पश्यति एवं जागरणेऽपि । यस्माद्देहस्य पंचत्वादिकं पश्यति ततस्तद्द्रष्टृत्वादात्मन इदं भ्रममात्रम् । वस्तुतश्चात्माऽजोऽमरश्चेत्यर्थः । तदुक्तम् । "आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ न भवाप्ययवस्तूनामभिज्ञोऽद्वयलक्षणः" इत्यादि ॥ ४ ॥ यस्माद्देहोपाधिकोऽयमात्मनो जन्मादिसंसारभ्रमस्तस्मादुपाधिनिवृत्तौ मुच्यत इति सदृष्टांतमाह । घट इति । यथा पुरा घटोपाधेः पूर्वमिव पुनर्घटे भिन्ने तदंतर्वर्त्यवकाश आकाश एव स्याद्यथा । एवं देहे मृते तत्त्वज्ञानेन

नंक्ष्यति, न तथा त्वं जातः नापि प्रागभूतो नाप्यद्य नंक्ष्यसि, त्वं जीवात्मा जडाद्युपाधेः पृथगेवासीति नायं भक्तिप्रतिकूलोर्थः ॥ २ ॥ अत्राक्षिपति—नन्विति । अंगादंगात्प्रत्येकं भिन्नाद्भिन्नादंगाद्भिन्नंभिन्नमंगं भवतीत्यभिप्रायः । स त्वं शरदः वर्षाणां शतं जीवेत्यर्थः । ततः पुत्रात् । योनियोनौ पौत्रप्रपौत्रादिजन्मनि पिता तत्तत्पुत्रेण पितृमान् पितृपंक्तिभाग्भवतीत्यर्थः । यतः पुत्रादयोऽपि तद्रूपा एवातो हेतोः । तेषु पुत्रादिषु । इति भाव इति—" अजो नित्यः शाश्वतोऽयं पुराणः " इत्यादिश्रुतेरित्याशयः ॥ * ॥ ० ॥ ३ ॥ तद्वदेव स्वप्नवदेव । आत्मन इदं पंचत्वादि । इत्यर्थ इति—यज्जन्यं तद्विनाशीति व्याप्तेर्देहस्यैव जन्यत्वान्मृत्युजन्मादि, आत्मनस्त्वजन्यत्वात्तन्नेति भावः । तद्देहस्य मरणादि । उक्तम् एकादशस्कन्धे । आत्मन इति श्लोकस्तु व्याख्यातचर एव ॥ * ॥ जन्माद्यवस्थावतो देहात्मनः पार्थक्यं दृष्टान्तेनाह—स्वप्न इति । न हि स्वशिरश्छेदं स्वयं पश्यति, अत आत्मा ततः पृथगेव तद्द्रष्टा, तथैव जागरेपि तस्मात्पृथग्भूत एवात्मनो देहस्य पंचत्वादि पश्यति, अतो हेतोरात्माऽजोऽमरो जन्ममृत्युहीन इति ॥ ४ ॥ यथा पुरा तन्नाशात्पूर्वमप्याकाश एव, एवं जीवो देहे मृते निरुपाधिर्यथा पुनर्ब्रह्म संपद्यते, तथा पुरापि " ब्रह्मैव सन्ब्रह्माप्येति " इति श्रुतेः ॥ * ॥ तदप्यात्मनो लिंगशरीराध्यासो दुर्जरो यः सोऽयं ज्ञाने सति निवर्तते, इहैक्यात्मवादिनां दृष्टान्तमाह—घट इति । भिन्ने विदीर्णे । यथा पुरेति—घटोत्पत्तेः पूर्वं यथा महानाकाशस्तथा घटे भग्नेपीत्यर्थः । एवं देहे मृते तत्त्वज्ञानेन लीने सति । अप्रकटार्थमाह—यथेति । ननु देहात्पृथग्भूतो यथा जीवात्मा तथा परमात्मापि, तावुभावपि देहावृतौ दृश्येते, लिङ्गे भग्ने सत्युभावपि मुक्तौ स्यातामिति कथं नोच्यते । अत्र परमात्मन आवरणं कालत्रयेऽपि नास्तीति सदृष्टान्तमाह—घट इति, यथा पुरेति । घटे वर्तमानेऽपि आकाशः आकाश एवानावृतस्तथा घटे भग्नेपीत्यर्थः । आकाशस्य घटान्तर्बहिर्मध्येपि वर्तमानत्वादाकाशं घटः कथमावृणोत्विति भावः । एवं देहेऽमृते वर्तमानेपि अजीवो जीवभिन्नः परमात्मा ब्रह्म सर्वव्यापकः सन्नेव संपद्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनः सृजति वै देहान्गुणान्कर्माणि चात्मनः ॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥ ६ ॥ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ॥ ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥ रजःसत्त्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ ७ ॥ न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ॥ आकाश इव चाधारो ध्रुवोऽनंतोपमस्ततः ॥ ८ ॥ एवमात्मानमात्मस्थमात्मनैवामृश प्रभो ॥ बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिंतया ॥ ९ ॥

लीने सति ॥ ५ ॥ ज्ञानेन लयं भावयितुं मायाकृतमात्मनो देहाद्युपाधिसंबंधप्रकारमाह । मन इति । मन आत्मनो देहादीन्सृजति । तच्च मनो माया सृजति । ततो मायाद्युपाधिसमुदायाज्जीवस्य संसृतिर्न स्वतः ॥ ६ ॥ यस्मादुपाधिनिबंधनो जीवस्य संसारोऽतस्तन्नाशे जीवत्वं गच्छतीत्येतदेव सदृष्टांतमाह सार्धेन । स्नेहेति । दीपस्य ज्योतिषो दीपत्वं ज्वालारूपः परिणामः । तत्र तैलस्थानीयं कर्म । तदधिष्ठानस्थानीयं मनः । वर्तिस्थानीयो देहः । अग्निसंयोगस्थानीयश्चैतन्याध्यासः । दीपस्थानीयः संसार इति योज्यम् । देहकृतो देहनिबंधनः । यद्वा देहकृतो मनसो न त्वात्मनः ॥७॥ अतो दीपवत्संसार एव नश्यति न त्वात्मा ज्योतिर्वदित्याह । नेति । ननु तत्र प्रतीयमान आत्मा कुत इत्यत आह । य इति । व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परोऽन्यः । यतः स्वयंज्योतिः । परत्वं प्रपंचयति । आकाश इवेति । आधारो देहादेः प्रपंचस्य । ध्रुवो निर्विकारः । नास्त्यंत उपमा च यस्य सोऽनंतोपमः । ततो विभुः ॥८॥ अतस्त्वमेवं चिंतयेत्याह । एवमिति । आत्मस्थं देहाद्युपाधिस्थितम् । आमृश विचारय । अनुमानगर्भिण्या

विराजते ॥ ९ ॥ स्वाप्नदेहवज्जागरेऽप्यात्मनो नानादेहान् गुणान्कर्माणि च मन एव संकल्पात्मकं सृजति कल्पयति । तन्मनः स्वाप्नसंकल्पादिवन्माया सृजति, ततो जीवस्य संसृतिर्मायैवेत्यर्थः । यद्वा—मनः पूर्वकर्मप्रेरितं सद्गुणान्सत्त्वादीन्सृजति पर्यायेण विभावयति, ततो गुणमयानि विविधानि कर्माणि सृजति, ततः कर्मानुरूपान् देहान्सृजतीति भावः ॥ * ॥ ज्ञानेन लयं संभावयितुं मायाकृतमात्मनो देहाद्युपाधिसम्बन्धप्रकारमाह—मन आत्मनो देहादीन्सृजति । तदुक्तम्—"यतोयतो धावति दैवचोदितं मनो विकारात्मकम्" इत्यादि । ततो मनो माया सृजति । ततो मायाद्युपाधिसमुदायात् ॥ ६ ॥ यस्मादुपाधिनिबंधनो जीवस्य संसारोऽतस्तन्नाशे नश्यतीति सदृष्टान्तमाह—ततस्तावदित्यर्थः । तत्र दार्ष्टान्तिके । तदधिष्ठानस्थानीयं तैलाधिष्ठानशरावस्थानीयम् । देहनिबन्धनो देहाध्यासहेतुकः । देहाध्यासोऽपि मनस्तादात्म्येनैवेत्याह—यद्वेति ॥*॥ देहकृतो देहसंबन्धकृतः । भवः संसारः ॥७॥ यतो दीपस्थानीयः संसारोऽतो हेतोः। तत्र देहे । अतो देहद्वयभिन्नत्वात् । आत्माऽनाशे हेतुः—य इति । य आत्मा । यद्वा—अनंतेनाकाशेनोपमीयत इत्यनन्तोपमः, आकाशो यथाऽसंगस्तथेत्यर्थः । 'अनन्तं सुरवर्त्म खम्' इत्यमरः । ततो व्यापकः, तनोतेः क्तः ॥ * ॥ ० ॥ ८ ॥ यत आत्मा देहादेः पृथगतो हेतोः । द्रष्टृदृश्ययोरात्मदेहयोरन्वयव्यतिरेकाभ्यां युक्त्या । तथाहि—जीवश्चेतनो द्रष्टृत्वात्, परमात्मवत्, यश्चेतनो न भवति स द्रष्टापि न भवति, यथा घटः । एवं देहो जडो दृश्यत्वात्, घटवत्, यो दृश्यो न भवति स जडोऽपि न भवति, यथात्मेति । किञ्च—आत्मा स्थायी, अवस्थात्रयसाक्षित्वात्, परमात्मवत् । देहो विनाशी आद्यन्तयोरविद्यमानत्वात्, शुक्तिरजतवत्, इत्याद्यन्वयव्यतिरेकानुमानसहकृतया बुद्ध्या । एवं वक्ष्यमाणरीत्या । वासुदेवस्यानुचिन्ता तात्पर्येणावगतिर्यस्यां बुद्ध्यां तया । यद्वा—बुद्ध्या श्रवणजबोधेनानुमानगर्भिण्या मननसहकृतेन वसन्त्यस्मिन्निति वासु अधिष्ठानं परं ब्रह्म, देवयतीति देवः सर्वावभासकः साक्षिचिदात्मा एव तदनुचिन्तया निदिध्यासनेनावगतस्वरूपं त्वां विप्रवाक्येन चोदितस्तक्षको न धक्ष्यति न भस्मीकरिष्यति । न केवलं तक्षक एव त्वां न धक्ष्यत्यपि तु मृत्युहेतवोऽन्येऽपि सिंहव्याघ्ररोगादयो नोपधक्ष्यन्ति । तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ॥ मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरम् ॥१०॥ अहं ब्रह्म परं ब्रह्म ब्रह्माहं परमं पदम् ॥ एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥ ११ ॥ दशंतं तक्षकं पादे लेलिहानं विषाननैः ॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ १२ ॥ एतत्ते कथितं तात यथात्मा पृष्टवान्नृप ॥ हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥ १३ ॥ इति श्रीम० महा० द्वादशस्कंधे ब्रह्मोपदेशो नाम पंचमोऽध्यायः ॥ ५ ॥

द्रष्टृदृश्यान्वयव्यतिरेकयुक्त्या ॥९॥ एवं च सति त्वां तक्षको न दहेदित्याह । चोदित इति । तत्र हेतवः । मृत्यव इति मृत्युहेतवः ॥ १० ॥ विमर्शप्रकारं दर्शयंस्तक्षकादर्शनं दर्शयति द्वाभ्याम्।योऽहं स ब्रह्मैव यद् ब्रह्म तदहमेवेति समीक्षन्।तत्राहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः ब्रह्माहमिति भावनया च ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यतिहारो दर्शितः । निष्कले निरुपाधौ । आत्मनि ब्रह्मणि ॥ ११ ॥ विषयुक्तैराननैर्दशंतं ग्रसंतं तक्षकम् । लेलिहानं सर्पम् । यद्वा लेलिहानं जिह्वाभिरोष्ठप्रांतान्सनिष्पेषमास्वादयंतम् । आत्मनः पृथक् ॥ १२ ॥ हरेश्चेष्टामात्मा त्वं यत्पृष्टवांस्तदेतत्ते कथितम् । शिष्यस्य कृतार्थतापरीक्षणाय पृच्छति । किंमिति ॥ १३ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे श्रीधरीयटीकायां पंचमोऽध्यायः ॥ ५ ॥

हेतुः—मृत्यूनामपि तेषामपि मृत्युम् ‘ मारयन्मृत्युनांतकम् ’ इत्युक्तेः । तत्रापि हेतुः—ईश्वरं ज्ञानबलेनावाप्तेश्वरभावम् । अत्र हेतुगर्भितविशेषणद्वयं प्रतीयते । स्वामिचरणैरत्र हेतव इति बहुत्वं तु मृत्यवस्त्वां यतो नोपधक्ष्यन्ति इत्यपि हेतुत्वेनैवाभिप्रेतं देहभिन्नत्वात् ॥ * ॥ बुद्ध्यादिप्रवर्तकत्वेन यदात्मनोऽनुमानं तदेव गर्भे यस्य तद्युक्त्या तद्व्यवसायवत्या, यथा बुद्ध्यादीनि करणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति कर्ता चात्मैव स च वासुदेव एव, स एव सर्वत्र लक्ष्यः । सकलमिदमहञ्च वासुदेव इत्येवानुचिन्ता यस्यां तादृशया ॥ ९ ॥ ० ॥ * ॥ त्वामात्मानं देहात्पृथग्भूतम् । तक्षकस्य का वार्ता स्वयं मृत्यवोऽपि मूर्तिमन्तः नहि वासुदेवरूपं त्वां देहं तक्षकं च धक्ष्यन्ति स्वस्य स्वयं हननायोगात्, ब्रह्मशापादीनां व्यर्थप्रायत्वादिति भावः ॥ १० ॥ परं धाम सर्वावभासकत्वेन देहेन्द्रियादिधर्मैरस्पृष्टं ज्योतिःस्वरूपम् । परमं सर्वबाधावधित्वेन परमार्थं पदं पदनीयम् । तत्र विमर्शे । आदिना भयादिग्रहः । पारोक्ष्यनिवृत्तिः साक्षात्कारः । परस्परीकरणं व्यतिहारः ॥ * ॥ ० ॥ ११ ॥ “ ओष्ठप्रान्तास्वादने च लेलिहानो भुजंगमे ” इत्यभिधानादर्थान्तरमाह—यद्वेति । “ निष्पेषः पेषणाभावाभीक्ष्ण्यापेषणकेषु च ” इत्यभिधानात्सनिष्पेषं पौनःपुन्येन सहितम् ॥ * ॥ ० ॥ १२ ॥ हे नृपेति—नृभ्यो भयजनकत्वेन विक्षेपकेभ्यः कालजन्मजरादिभ्यः पायते रक्ष्यत इति नृपः, तथा च मया तत्त्वोपदेशेनान्वर्थनामा कृतोऽसीति भावः । अतः परं श्रोतव्यं नास्तीत्याह—किं भूय इति ॥ * ॥ अत्र **संदर्भः**—लीलाकथारसिकस्य तस्य पूर्वोक्तेनातिरुचिमालक्ष्योपसंहरति—एतत्त इति । ते तुभ्यम् । ‘ त्वं तु राजन्मरिष्येति ’ इत्यादिना कथितम् । ननु ममानभीष्टमनुपक्रान्तञ्च तत्कथं कथितं तत्राह—आत्मा कस्यचिदात्मनिष्ठस्य मनो यत्पृष्टवान् परीक्षितोऽस्यात्मज्ञानं जातं न वेति संदिह्य स्वगतमेवमपि यज्ज्ञातुमिष्टवानित्यर्थः । अहम् ‘तत्रानुवर्ण्यते’ इत्यादिनोपक्रान्तं भगवन्महिमानमेव पुनरपि वर्णयिष्यामीत्याह—हरेरिति । विश्वात्मन इति—किं व्यष्ट्यात्मनः स्वरूपवर्णनेनेति भावः । नन्वस्मिन्प्रकरणे श्रीशुकदेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादपद्ममुपसृत्य नतेन मूर्ध्ना बद्धांजलिस्तमिदमाह स विष्णुरातः ॥ १ ॥

षष्ठे परीक्षितो मोक्षः सर्पहोमादि तत्सुतात् ॥ वेदशाखविभागोक्तौ त्रिवेदीव्यासवर्णनम् ॥ १ ॥ एतत्पुराणं निशम्य निखिलात्मा हरिस्तं पश्यति निखिलं स्योपदेशे भक्तावेव तात्पर्यं ज्ञाने वेति संदिहानं प्रति पुनर्विचार्यते । तत्र 'अत्रानुवर्ण्यतेऽभीक्ष्णम्' इत्याद्युपक्रमे 'एतत्ते कथितं तात' इत्याद्युपसंहारेपि तादृशमहिमत्वेन पुनर्लीलाकथाश्रवणस्यैव प्राधान्यात्, तत उपक्रमोपसंहारनिर्दिष्टत्वाच्छ्रवणोपलक्षितभक्तेरेवात्रापि प्राधान्यम् । यस्तु तन्मध्ये 'त्वं तु राजन्मरिष्येति' इत्यादिना ज्ञानोपदेशः, स च तस्य प्रागेव गता या भक्तिनिष्ठा तस्याः संप्रत्यपि स्थैर्यप्रकटनार्थ एव, एकान्त भक्तेषु भगवता मोक्षवरच्छंदनवत् पूर्वमपि भक्तिनिष्ठा मरणभयत्यागात् । अनन्तरं च श्रुत्वापि तज्ज्ञानोपदेशं स्वस्य भक्तिनिष्ठाया एव दर्शयिष्यमाणत्वात् । तत्र प्राचीना तन्निष्ठा यथा प्रथमे–'[१]कृष्णांघ्रिसेवामधि मन्यमानः' इति, 'दध्यौ मुकुन्दांघ्रिमनन्यभावः' इति च । तन्निष्ठयैव तद्भयपरित्यागो यथा तद्वाक्ये–"द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं, गायत विष्णुगाथाः" इति तज्ज्ञानश्रवणानन्तरमपि तादृश निष्ठायाः स्थैर्यदर्शनं यथा तत्र तावत्पद्यत्रयेण तज्ज्ञानोपदेशं बहु मत्वा श्रवणलक्षणया भक्त्यैव स्वकृतार्थत्वमुक्तं षष्ठाध्यायारंभे–'सिद्धोऽस्म्यनुगृहीतोऽस्मि' इत्यादिना । 'अत्यद्भुतमिदं मन्ये' इत्यादि, 'पुराणसंहिताम्' इत्यादिना च । पुनश्चैकेन पद्येन तद्वाक्यगौरवमात्रेणांगीकृतस्य ब्रह्मज्ञानस्य तक्षकादिभयनिवृत्तिहेतुत्वमुक्त्वाप्यन्येन तदूर्द्ध्वमेव वाक्चेतसोस्तन्नामकीर्तनध्यानावेशानुज्ञा प्रार्थिता 'भगवंस्तक्षकादिभ्यः' इत्यादिना, 'अनुजानीहि मां ब्रह्मन्' इत्यादिना च । अथ पुनरन्येन पद्येनाज्ञाननिरासो ज्ञानवृद्धिश्च भगवत्पदारविन्ददर्शनसुखान्तर्भूतैव मम स्फुरतीति ज्ञापितम् । "अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया । भवता दर्शितं क्षेमं परं भगवतः पदम् ॥" इति । अत्र पदशब्दस्य चरणारविन्दाभिधायकत्वे "ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्" इत्येवास्ति प्रथमे साधकम् । एतत्प्रकरणार्थस्तु श्रीसूतेनैव स्पष्टीकृतः–"ब्रह्मकोपोत्थितायस्तु तक्षकात्प्राणविप्लवात् । न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतम् । स्यात्संभ्रमोऽन्तकालेऽपि स्मरतां तत्पदांबुजम् ॥" इति । तथा पूर्वं द्वादशस्य तृतीये प्रथमस्कन्धां तस्थस्य "अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् । पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥" इत्यस्य राजप्रश्नस्योत्तरत्वेन भगवद्ध्यानकीर्तने एव स्वयं श्रीशुकदेवेनाप्युपदिष्टे "तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवम् । म्रियमाणो ह्यवहितस्ततो यासि परां गतिम् ॥ म्रियमाणैरभिध्येयो भगवान्परमेश्वरः । आत्मभावं नयत्यंग सर्वात्मा सर्वसंभवः ॥ कलेर्दोषनिधे राजन्" इत्यादिना । ततस्तत्र केशवे ह्यवहितः कृतावधानः । आत्मभावमात्मनो भक्तिम् । अस्तु तावदायाससाध्यं ध्यानं हि यस्मादनायाससाध्यात्कीर्तनादेवेत्यर्थः । द्वितीयस्कन्धेपि–'न ह्यतोऽन्यः शिवः पंथाः' इत्यादिना 'एवमेतन्निगदितम्' इत्यन्तेन ग्रंथेन नानाङ्गवाञ्छुद्धभक्तियोग एवात्रोत्तरत्वेन पर्यवसितः । तत्र 'पिबन्ति ये भगवतः' इत्यादिना लीलाकथाश्रवण एव पर्यवसानं दृश्यते तस्मात्साधूक्तम्–'त्वन्तु राजन्मरिष्येति' इत्यादिकं भगवद्भक्तिनिष्ठाप्रकटनार्थमेवेति । अतो भक्तावेव तदुपदेशस्य तात्पर्यमत एव द्वितीयाष्टमे राजप्रार्थनान्वर्था स्यात्–"कृष्णे निवेश्य निस्संगं मनस्त्यक्ष्ये कलेवरम्" इति ॥ १३ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥ तत्सुतात्परीक्षित्पुत्राज्जनमेजयात् । आदिना तक्षकरक्षणादिग्रहः । त्रयाणां वेदानां समाहारस्त्रिवेदी तस्या व्यासो विस्तरस्तस्य वर्णनम् (१) । अतो निखिलात्मदर्शित्वात् । इत्यर्थ इति–शिरसि पादस्थापनं विना पाद

१ 'सर्वात्मा' इति पा० ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजोवाच ॥ सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ २ ॥ नात्यद्भुतमहं मन्ये महतामच्युतात्मनाम् ॥ अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्म भवतो वयम् ॥ यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ॥ ४ ॥ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहम् ॥ प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया ॥ ५ ॥ अनुजानीहि मां ब्रह्मन्वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥६॥ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदम्॥७॥

वाऽत्मनि पश्यतीति तथा तेन अतः समेन। नतेनावनतेन मूर्ध्ना तत्पादतलमुपसृत्य तत्पादौ शिरसि निधायेत्यर्थः ॥ १ ॥ सिद्धः कृतार्थोऽस्मि । यतोऽनुगृहीतोऽस्मि अनुग्रहमेवाह। यद्यस्माच्छ्रावितः चशब्दात्प्रातिसाधनं च श्रावितम् ॥ २ ॥ करुणात्मतामभिनंदति द्वाभ्याम् । नात्यद्भुतमिति ॥ ३ ॥ अश्रौष्म श्रुतवंतः । भवतः सकाशात् ॥ ४ ॥ सिद्धोऽस्मीत्युक्तं तदेवाविष्करोति । भगवन्निति । यतस्त्वया दर्शितं ब्रह्म प्रविष्टः । कथंभूतम् । अभयम् । यतो निर्वाणं कैवल्यरूपम् ॥ ५ ॥ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्र सिद्धोऽहं न किंचिच्छ्रोतुमिच्छामि केवलमनुज्ञां देहीत्याह। अनुजानीहीति । वाचमित्युपलक्षणं सर्वेन्द्रियाणाम् । वाच नियम्य किं करिष्यसि तदाह । मुक्ताः कामाशयास्तद्वासना येन तच्चेतोऽधोक्षजे प्रवेश्यासून्विसृजामि ॥ ६ ॥ ननु किं प्राणत्यागेन किंचित्कालं ज्ञाननिष्ठो भवेति चेत्तत्राह । अज्ञा

तलस्पर्शो न भवतीति भावः । यद्वा—निखिलानामात्मानं मनः पश्यतीति तेन, तात्कालिकज्ञानोपदेशे तत्रत्यानां केषांचिज्ज्ञानिनामपि मन आनंदितमिति भावः ॥ १ ॥ साक्षाद्गर्भे बाल्ये च । यः साक्षाद्दृष्टः स एव श्रावित इति साक्षात्पदार्थः ॥ २ ॥ महतां भवादृशानाम् । अज्ञेषु मादृशेषु ॥ ३ ॥ संहितामित्युक्त्या वेदतुल्यत्वमस्य पुराणस्य सूचयति । अनुवर्ण्यते अभीक्ष्णशस्तत्तत्कथाप्रसंगेन प्रतिपाद्यते ॥ ४ ॥ हे भगवन्निति—श्रीशुकं साक्षाद्भगवाञ्श्रीकृष्णस्तद्रूपेणामंत्रयतीति भावः । यथा श्रीकृष्णेन जगतोऽभयं दुष्टदैत्यहननादि दर्शितं तथा मम त्वयापि तद्दर्शितमिति तत्साम्यमुक्तम् । यद्वा—‘ नान्यत्त्वदभयं पश्ये ’ इति श्रीकुंत्युक्तेः अभयः श्रीकृष्ण एव । क्लीबत्त्वमार्षम् । श्रीभागवतश्रावणेनापि साक्षाच्छ्रीकृष्ण एव दर्शितो भवतीति भावः । यद्वा—ब्रह्मनिर्वाणरूपमभयं दर्शितम् । “ अधोक्षजालंबमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् । तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ” इति सर्वभक्तशिरोमणिना श्रीकायाधवेन मनसा श्रीकृष्णचिंतनस्यैव संसारनिरासकत्वमुक्तमिति ॥ ५ ॥ हे ब्रह्मन्निति—साक्षात्परब्रह्ममूर्तिस्त्वमतो मामाज्ञापयेति भावः । अधोक्षजे परब्रह्मणि श्रीकृष्ण एव “ कृष्णे मनः संमावेश्य संत्यक्ष्येऽहं कलेवरम् ” इति द्वितीयोक्तेः । असून्प्राणान् ॥ ६ ॥ अत्राक्षिपति—नन्विति । ज्ञानं श्रीकृष्णानुभवो, विज्ञानं तदैश्वर्यानुभवस्तत्र निष्ठा स्थितिस्तया ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥ ८ ॥ परीक्षिदपि राजर्षिरात्म
न्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः ॥ ९ ॥ प्राक्कूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसंगश्छि
न्नसंशयः ॥ १० ॥ तक्षकः प्रहितो विप्राः क्रुद्धेन निजसूनुना ॥ हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपम् ॥ ११ ॥ तं तर्पयित्वा द्रविणैर्निवर्त्य
विषहारिणम् ॥ द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपम् ॥ १२ ॥ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहि
नाम् ॥ १३ ॥ हाहाकारो महनासीद्भुवि खे दिक्षु सर्वतः ॥ विस्मिता ह्यभवन् सर्वे देवासुरनरादयः ॥ १४ ॥ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो
जगुः ॥ ववर्षुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥ १५ ॥ जनमेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ॥ यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः
॥ १६ ॥ सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान् ॥ दृष्ट्वेंद्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥ १७ ॥ अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् ॥
उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥ १८ ॥ तं गोपायति राजेंद्र शक्रः शरणमागतम् ॥ तेन संस्तंभितः सर्पस्तस्मान्नाग्नौ पतत्यसौ ॥ १९ ॥

नं चेति । चकारात्तत्संस्कारश्च । तच्च त्वत्कृपयैवेत्याह । भवेति ॥ ७ ॥ ८ ॥ आत्मना बुद्ध्या आत्मानं मन आत्मनि प्रत्यक्प्रकाशे समाधाय परमात्मानं दध्यौ ।
अस्पंदासुर्लीनप्राणः । यथा तरुः स्थाणुः ॥ ९ ॥ तमेव विशिनष्टि । प्राक्कूले प्रागग्रे । बर्हिषि दर्भे ॥ १० ॥ तदेवं ब्रह्मभूते तस्मिंस्तक्षकागमनादिकं पिष्टपेषणमिवाभव
दिति दर्शयति तक्षक इति त्रिभिः । हे विप्राः ॥ ११ ॥ तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनायागच्छंतम् । तत्र स्वालीढवटवृक्षस्य भस्मीभूतस्य पुनरंकुरादिक्रमे
णोत्थापनाद्विषहारिणं तदपेक्षितद्रविणैः संतर्प्य ततो निवर्त्य द्विजरूपेण तिरोहितः सन्नदशत् ॥ १२ ॥ तच्च पुत्रकृत्यमिव जातमित्याह । ब्रह्मभूतस्येति ॥ १३ ॥ तत्र
क्षणं सर्वेषां दुःखं च ततः परमुत्सवं चाह द्वाभ्याम् । हाहाकार इति ॥ १४ ॥ १५ ॥ प्रासंगिकमाह जनमेजय इत्यादि । सर्पाभिचारसत्रे द्विजैः सह वर्तमानो यथावदा
जुहाव जुहावेति वा । सर्वसर्पाह्वाने कारणमाह । संक्रुद्ध इति॥ १६॥ १७॥ १८॥ कस्मात्तक्षको न दह्येतेत्युक्ताः संतो द्विजा ऊचुः । तमिति । तेनेंद्रेण । असौ सर्पः॥ १९॥

भिक्षुभिस्तत्रत्यैः कथाश्रवणार्थमागतैर्दुर्वासःप्रभृतिभिः संन्यासिभिः । नरदेवेन परीक्षिता । पूजितोऽभ्युत्थानपुष्पाद्यैरर्चितः ॥ ८ ॥ ९ ॥ १० ॥ अहो ब्राह्मणानां तपोबलं महदित्यभिप्रेत्याह–हे विप्रा इति ॥ ११ ॥ तत्र
मार्गे । स्वालीढः स्वदष्टो यो वटवृक्षस्तस्य । कामरूपो देवत्वात् ॥ १२ ॥ तच्च दंशनम् । पुत्रेण यथा पितुर्देहो दह्यते तद्वज्जातम् । अहिगरलमेवाग्निस्तेन । ब्रह्मभूतस्य विचारेण ताद्रूप्यं प्राप्तस्य ॥ १३ ॥ तत्र तदा ।
क्षणं क्षणमात्रम् । ततः क्षणोत्तरम् । अहो ब्राह्मणरूपेण फलानि दातुमागतेन किं कृतमित्येवं विस्मिता अभवन् ॥ १४ ॥ देवलोकेऽपि तद्गमन उत्सवोऽभूदित्याह–देवदुंदुभय इति ॥ १५ ॥ प्रासंगिकं प्रकृतम् ।
तक्षकेण भक्षितं दष्टम्, भक्षणवद्दंष्ट्राव्यापारसाम्याद्दंशोऽपि भक्षणशब्देनोच्यते । आह्वाने प्रयोजनाभावादाकारप्रश्लेषं त्यक्त्वाह–जुहावेति वेति ॥ १६ ॥ भयेन संविग्नस्त्रस्तः ॥ १७ ॥ तत्र यज्ञकुंडाग्नौ ॥ १८ ॥ १९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ॥ सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥ २० ॥ तच्छ्रुत्वा जुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे ॥ तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता ॥ २१ ॥ इति ब्रह्मोदिताक्षेपैः स्थानादिंद्रः प्रचालितः ॥ बभूव संभ्रांतमतिः सविमानः सतक्षकः॥२२॥ तं पतंतं विमानेन सह तक्षकमंबरात् ॥ विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः ॥ २३ ॥ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट् ॥ अनेन पीतममृतमथं वा अजरामरः ॥ २४ ॥ जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा ॥ राजंस्ततोऽन्यो नान्यस्य प्रदाता सुखदुःखयोः ॥ २५ ॥ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छते जंतुर्भुंक्त आरब्धकर्म तत् ॥ २६ ॥ तस्मात्सत्रमिदं राजन् संस्थीयेताभिचारिकम् ॥ सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥ २७ ॥

ऋत्विजः प्रत्याह सहेंद्र इंद्रसहितः किमिति न पात्यते ॥ २० ॥ तद्राज्ञो वचः श्रुत्वा आजुहुवुः । साक्षेपमाह्वानं दर्शयति । तक्षकेति । इहाग्नावाशु पतस्व । मरुत्वता मरुद्गणवतेन्द्रेण सह ॥२१॥ ब्राह्मणैरुच्चैराक्षेपैः परुषवाक्यैः ॥ २२ ॥ तं तक्षकम् । अंगिरसः पुत्रो बृहस्पतिः प्राह ॥२३॥२४॥ भवतु नामाजरामरस्तथाऽपि पितृमारकं धक्ष्यामीति चेत्तत्राह । जीवितमिति । गतिः परलोकः । अतो दुर्मरणनिमित्ता पितुर्दुर्गतिरनेन कृतेत्यपि न शंकनीयमित्यर्थः ॥ २५ ॥ कथमन्यः सुखदुःखप्रदाता नास्ति सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह । सर्पादिना जंतुः पंचत्वं मृत्युमृच्छति प्राप्नोतीति यत्तदारब्धं कर्मैव भुंक्ते । स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः ॥ २६ ॥ संस्थीयेत समाप्यताम् । आभिचारिकं हिंसाफलम् । दिष्टं प्राचीनं कर्म । अतः सर्पादष्टप्रयुक्तस्य तवाप्ययं नापराध इति भावः ॥ २७ ॥

हे विप्रा इति—यूयमर्थिमनोरथमवश्यं पूरयंति विशेषेण प्रांति पूरयंत्यर्थिजनाभिलषितामिति विप्रा इत्यन्वर्थसंज्ञावन्निरुक्तेरिति भावः । किमिति न कुतो न ॥ २० ॥ २१ ॥ इतीत्थम् ॥ २२ ॥ २३ ॥ हे मनुष्येन्द्रेति—मनुष्येष्वेव तव प्रभावो न तु देवेष्वपीति भावः । अनेन तक्षकेण । अथातः । वै निश्चितम् । अपमजरामरो जात इत्यर्थः । यद्वा—सर्पेण तक्षकेण सह राजत इति सर्पराडिंद्रविशेषणम् । अथवा—अत एव अजरामर इति विश्वनाथः ॥ २४ ॥ इत्यर्थ इति—" निमित्तमात्रं सर्वेषां कृतकर्मानुसारतः " इत्युक्तेर्नास्यापराध इति भावः । हे राजन् पितृशोकादेवं यद्व्यवस्यसि तत्र तत्त्वं शृण्वित्याह—जीवितामिति । गतिः स्वर्गादिः । जंतोरिति—निकृष्टजीवस्यैवेयं व्यवस्था तव पितुस्तु जीवितमरणभगवद्धामप्राप्तयो भगवत्कृता एव। तथाहि—स्वहस्तेनैव द्रौण्यस्त्रतो रक्षणं, मुनिशापद्वारा निधनप्रापणं, स्वप्रष्ठेशुकोपदेशद्वारा निजपदप्रापणमिति तस्यैव कर्माणि तक्षकस्तु निमित्तमात्रमिति विश्वनाथः ॥ २५ ॥ इति भाव इति—" सुखस्य दुःखस्य न कोऽपि दाता परो ददादीति कुबुद्धिरेषा " इत्यादिपुराणांतरात् " आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः " इति श्रीमुखवाक्याच्च स्वकर्मानुसारेण स्वस्यैव स्वदुःखादिहेतुत्वमित्याशयः प्राकृत एव लोकस्स्वकर्मवशात्सर्पादिभिर्मृतिं याति न तु त्वत्पितामहो भक्तराज इत्याह—सर्पेति । जंतुरतिनिकृष्टजीव इति विश्वनाथः ॥ २६ ॥ यतः प्रारब्धकर्मत एव सर्वं भवति तस्माद्धेतोः । इदं सर्पसत्रम् । ननु तज्जातित्वात्तक्षकापराध एवैषामपराधः " एकः पापानि कुरुते फलं भुंक्ते महाजनः " इत्युक्तेस्तत्राह—तक्षकस्याप्यपराधो नास्ति दैवेन तद्दंशनेन स्वकृतपूर्वकर्मणा परीक्षितो मरणस्य कृतत्वादित्याशयेनाह—जनैर्दिष्टमिति । यतो दिष्टमेव फलदमतो हेतोः । इति भाव इति—तव चेतस्यपि मातृकृतसर्पदाहरूपशापादृष्टवशेनैव सर्पसत्रकृतिस्फूर्तिर्जातेति तात्पर्यम् । अत्र महाभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः ॥ सर्पसत्रादुपरतः पूजयामास वाक्पतिम् ॥२८॥ सैषा विष्णोर्महामायाऽबाध्ययाऽलक्षणा यया ॥ मुह्यंत्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः ॥ २९ ॥ न यत्र दंभीत्यभया विराजिता मायात्मवादेऽसकृदात्मवादिभिः ॥ न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति यत् ॥ ३० ॥

वाक्पतिं बृहस्पतिम् ॥ २८ ॥ ननु कथं विदुषामप्येवं संमोहो यतो ब्रह्मकोपात्परीक्षितो मृत्युर्जनमेजयकोपात्सर्पाणामित्यादि तत्राह । सैषेति । तस्या महत्त्वं दर्शयति । अलक्षणा न लक्ष्यत इत्यलक्षणा अप्रतर्क्येत्यर्थः । काऽसावित्यत आह । ययाऽस्य विष्णोरेवात्मभूता आत्मांशभूताः प्राणिनो गुणवृत्तिभिः क्रोधादिभिः सह भूतेषु देहेषु मुह्यंति बाध्यबाधकतां व्रजंतीत्यर्थः । ननु श्रवणादिना बाधितया तया कुतो मोहः स्यात्तत्राह । अबाध्यया बाधितुमशक्यया ॥ २९ ॥ कथं तर्हि मायातत्कार्यनिवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात्सर्वानर्थनिवृत्तिरिति शास्त्रार्थमुपसंहरति न यत्रेति पंचभिः । दंभीति । माया कपटवानयं पुमानित्येवंभूतायां बुद्धावसकृदुल्लिख्यमाना

रतीया कथाऽनुसंधेया—कदाचिदुच्चैःश्रवसोऽश्वस्य वर्णनिर्णयार्थं कद्रूविनतयोर्विवादः प्रवृत्तः । विनतयोक्तं श्वेतवर्णोऽयं, कद्र्वा चोक्तं कृष्णवर्ण इति । ततः श्वो निर्णयार्थं गमिष्यावो यदुक्तिर्मृषा सा दासी भवतु, तदा च नागमात्रा स्वपुत्रान्प्रत्युक्तं यूयं कृष्णरोमाकारा भूत्वाऽश्वपुच्छे लग्ना भवत, ये न करिष्यंति मद्वाक्यं ते सर्वे जनमेजययज्ञे दग्धा भविष्यंतीति । आभिचारिकं निंद्यम् । अभिचारस्य "शत्रुमरणकामः श्येनेनाभिचरेत्" इति विहितत्वेऽपि प्रायश्चित्तश्रवणान्निंद्यत्वमिति तत्रापि तव नापराध इत्याह—जनैरिति विश्वनाथः ॥ २७ ॥ महर्षेर्बृहस्पतेः । "वाग्वै बृहती" इति श्रुतिमेव बृहच्छब्दस्य वागर्थे मानं मत्वाह—बृहस्पतिम् ॥२८॥ अत्राक्षिपति—नन्विति । इत्यर्थ इति—लक्षित एव वस्तुनि तर्को भवतीति भावः । इत्यर्थ इति—अन्यथाभावस्यैव मोहत्वादिति भावः । पुनराक्षिपति—नन्विति । अबाध्यया ब्रह्मात्मबोधं विना बाधितुमशक्यया ॥ २९ ॥ विष्णुस्तर्हि दंभी येन तस्य मायेत्युच्यते तत्राह—न यत्रेति । यत्र विष्णौ यस्य विष्णोस्संनिधाने निमित्ते आ ईषत् विराजिता यत्किंचिल्लब्धसामर्थ्यापि दंभी दंभवानयमित्यभया न भवति किन्तु तस्मिन्दं भादर्शनात्सभयैव भवतीत्यर्थः । माया हि सदंभ एव निर्भया भवतीति । तदुक्तम्—" विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया । विमोहिता विकत्थन्ते ममाहमिति दुर्धियः ॥ " इति विष्णौ महाभागवते च मायाधिकारो नास्तीत्यर्थः । कीदशी—दंभिनि दंभवति पुरुषे इतौ गमने आक्रमे इत्यर्थः । अभया निर्भयैव विराजिता । 'इण्—गतौ' क्त्यंतः । विष्णुतद्भक्तयोस्तु शून्यैव भवतीति भावः । तथात्मवादिभिरपि बहुधात्मवादे प्रवर्तिते विष्णुस्वरूपे स्फुरिते सति विविधो वादो नास्ति यतस्तदाश्रयो मायाश्रय एव सः " यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति " इत्युक्तेः । तथा संकल्पादिरूपा मायावृत्तयो यत्र तन्मनोपि नास्तीत्यर्थ इति विश्वनाथः । इत्यर्थ इति—अत्र मायाशब्दः कपटपर एव न तु भगवच्छक्तिरूपयोगमायापर इति भावः । इत्यर्थ इति—इत्थं प्रतिपादिता या माया सा यत्रात्मस्वरूपे नास्तीति भावः । अत्र प्रमाणमाह—तदुक्तमिति । श्लोकौ तु व्याख्यातचरावेव । अन्यदाह—किञ्चेति । यद्यस्मिन्नात्मस्वरूपे । इति भाव इति—" नेह नानास्ति किञ्चन " इत्यादिश्रुतेस्तस्यात्मस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहम् ॥ तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः ॥ ३१ ॥
परं पदं वैष्णवमामनंति तद् यन्नेतिनेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ॥ ३२ ॥

या मायेत्यर्थः । साऽऽत्मवादे क्रियमाणे आत्मवादिभिर्यत्राभया न विराजिता न प्रकाशिता किंतु भीतेव स्वकार्यं मोहादिकमकुर्वती कथंचिद्वर्तत इति प्रतिपादितेत्यर्थः । तदुक्तम् । "तस्मै नमो भगवते वासुदेवाय धीमहि । यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुम् । विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया । विमोहिता विकत्थंते ममाहमिति दुर्धियः॥" इति । किंच यद्यस्मिंस्तदाश्रयो मायाश्रयो विविधो विवादोऽपि नास्ति । विशेषविषयत्वाद्विवादानां तस्य च विशेषातीतत्वादिति भावः । संकल्पविकल्पा वृत्तयो यस्य तन्मनोऽपि यत्र नास्ति । संकल्पविकल्पानामपि विशेषविषयत्वात् ॥ ३० ॥ किंच । सृज्यं कर्म सृजता कारकवर्गेण सहोभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयः फलमपि । अतस्त्रिभिः सृज्यस्रष्टृफलैरन्वितो जीवश्चाहंकारात्मको यत्र नास्ति । अत एवोत्सादितौ निरस्तौ बाध्यबाधकौ यस्मिंस्तदेतत्स्वयमात्मस्वरूपमित्यर्थः । तत्तस्मिन्नूर्मीनहंकारादीन्निषिध्य मुनिः विरमेत् । विशेषेण क्रीडेदित्यर्थः ॥ ३१ ॥ यतस्तद्वैष्णवं पदमामनंतीत्याह । परमिति । यदेतत्तदेव परं वैष्णवं पदं स्वरूपमामनंति । के । अतत् आत्मव्यतिरिक्तमुत्सिसृक्षवस्त्यक्तुमिच्छवः । यतोऽनन्यसौहृदाः नास्त्यन्यस्मिन्सौहृदं येषां ते । कुतः दौरात्म्यं देहाद्यहंभावं विसृज्य । देहेऽहंकाराभावादन्यत्र सौहृदं नास्त्यतस्त्यक्तुमिच्छव इत्यर्थः । कथम् । नेति नेतीत्येवम् । अत्र विद्वदनुभवमपि प्रमाणयति । हृदोपगुह्य ध्यानादिना ततः समाहितैरवसितं निश्चितम् । यद्वा अवसितमवबद्धमात्मतया

रूपस्य सर्वविशेषरहितत्वस्य निश्चयादिति तात्पर्यम् । विशेषविषयत्वाद्भेदविषयत्वात् ॥ ३० ॥ अन्यदप्याधिक्यमाह—किञ्चेति । कारकवर्गेणेंद्रियसमूहेन । अतः सृज्यादित्रयाभावात् । अत एवाहंकाराभावादेव । बाध्यं द्वैतं, बाधकं वृत्तिरूपं ज्ञानञ्च । इत्यर्थ इति—सर्वबाधावधित्वेन ज्ञेयमिति भावः । केचित्त्वात्मस्वरूपमिहावगत्येति शेषं कृत्वा योजयंस्तदशोभनमिव भातीति । ऊर्मिशब्देनात्राहंकारादयो लक्ष्यंते जले तरंगवत्तेषामपि चित्ते उत्थानदर्शनात् । इत्यर्थ इति—'कश्चित्तमनुवर्तते' इति वेरुपसर्गस्य धात्वर्थानुगतत्वादयं भावः । यत्र स्फुरिते सति सृज्यादिर्न यत् उभयोः स्रष्टृसृज्ययोः परं पृथग्भूतं तत्स्वयं तथा श्रेयः स्वर्गादिफलमपि यत्र न स्फुरति तथा त्रिभिर्गुणैर्जागरादिभिर्वा युक्तोऽहंकारात्मको जीवोऽपि न स्फुरति तस्मादेतद्विष्णुस्वरूपम् । उत्सादिता निरस्ता बाध्या जीवा बाधका गुणाश्च यस्मात्तथाभूतम् । ननु तर्ह्येतत्कः प्रकाशयेत्तत्राह—निषिध्येति । स्वभक्तहृद्गतानमून्कामक्रोधादीन्स्वयमेव । तत्र विशेषतो रमते तत्प्रसिद्धमिति विश्वनाथः ॥ ३१ ॥ किमर्थं तत्र क्रीडेदिति तत्राह—यतस्तद्वैष्णवमिति । "तदिति ब्रह्मणो नाम" इति श्रुतेस्तद्व्यतिरिक्तं प्रपंचम् । तत्र हेतुः—यत इति । अनन्यसौहृदत्वे हेतुमाशंकते—कुत इति । इत्यर्थ इति पूर्वोक्तं यत इति पदमत्र योज्यमिति भावः । केन प्रकारेण त्यक्तुमिच्छवस्तत्राह—नेतीति । देहोऽप्यात्मा न, जडत्वात्, घटवत् । इंद्रियाण्यप्यात्मा न, तैजसत्वात्, दीपादिवदित्येवं प्रकारेणेत्यर्थः । अत्रात्मस्वरूपस्य वैष्णवपदत्वे । आदिना धारणाग्रहः । ततो ध्यानानंतरम् । समाहितैः कृतसमाधिभिः । धात्वर्थप्रसिद्धिमादायाह—यद्वेति । इत्यर्थ इति—आत्मरूपतया ग्रहणस्यैवार्थकरत्वादिति भावः । यद्वा—नान्यस्मिन्सौहृदं ममत्वं येषां ते, अन्यत्र त्यक्तममत्वाद्विरक्ता विवेकिनोऽन्वयव्यतिरेकादियुक्त्या च दौरात्म्यं देहादिकोशपंचके आत्मत्वाध्यासं विसृज्य ब्रह्मणि यत् अतत् आत्मस्वरूपातिरिक्तं मायोपाधिं तत्प्रयुक्तसृष्टिकर्तृत्वादि च तदुत्सिसृक्षवः, एवं भागत्यागलक्षणया तत्त्वंपदार्थयोर्विरुद्धभागत्यागेन लक्षितं हृदौपनिषदबोधेन समाहितैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त एतदधिगच्छंति विष्णोर्यत्परमं पदम्॥अहं ममेति दौर्जन्यं न येषां देहगेहजम् ॥३३॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन॥न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ३४ ॥ नमो भगवते तस्मै कृष्णायाकुंठमेधसे ॥ यत्पादांबुरुहध्यानात्संहितामध्यगामिमाम् ॥ ३५॥ शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ॥ वेदाश्च कतिधा व्यस्ता एतत्सौम्याभिधेहि नः ॥३६॥ सूत उवाच ॥ समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥३७॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः ॥ द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवम् ॥ ३८ ॥ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥

गृहीतमित्यर्थः ॥ ३२ ॥ एतत्प्राप्तावधिकारिणो दर्शयति । त एतदिति । देहजमहमिति । गेहजं ममेति ॥ ३३ ॥ तत्र प्राप्त्युपायमाह । अतिवादानिति ॥ ३४ ॥ शास्त्रसमाप्तौ गुरुं प्रणमति । नम इति । कृष्णाय व्यासाय । अध्यगामधिगतवानस्मि ॥ ३५ ॥ इमां संहितामध्यगामित्युक्तं तत्र पुराणसंहिताविभागं विशेषतो बुभुत्सुर्वेदविभागमपि प्रसंगात्पृथक् पृच्छति । पैलादिभिरिति । हे सौम्य ॥ ३६ ॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह समाहितात्मन इत्यष्टभिः । ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् । यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते ॥ ३७ ॥ प्रसंगान्नादोपासकानां मोक्षफलमाह । यस्य नादस्योपासनयाऽऽत्मनो मलं धूत्वाऽपोह्य । कथंभूतं मलं तमाह । द्रव्यमधिभूतं क्रियाऽध्यात्मं कारकमधिदैवं एवं त्रिधाभूता आख्या यस्येति तथा तम् ॥ ३८ ॥ त्रिवृत् त्रिमात्रः कंठोष्ठादिभिरुच्चार्यमाणस्योंकारस्याक्षरसमाम्नायांतर्भावात्सूक्ष्मतया तं विशिनष्टि । अव्यक्तः प्रभवो यस्य सः । तदेवाह । स्वराट् स्वत एव हृदि प्रकाशमानः । तमेव कार्येण लक्षयति । यत्त

प्रत्ययैरुपगुह्य निदिध्यास्य यदवसितं साक्षात्कृतं प्रत्यगभिन्नं ब्रह्म तदेव विष्णोः परं पदं स्वरूपमामनंति वेदप्रतिपाद्यमध्यवस्यंतीत्यर्थः । तद्वैष्णवं पदं विष्णोः स्वरूपमामनंति पुनःपुनः स्मरणेनाभ्यस्यंति । कीदृशाः—दौरात्म्यमहंममेति दौर्जन्यं विसृज्य नेतिनेति नैतदनुकूलं नैतदनुकूलमिति कृत्वा तत् तद्व्यतिरिक्तदेहगेहपुत्रादिकमहंममतास्पदं यद्वस्तु तत्क्रमेण त्यक्तुमिच्छवः, यतोऽनन्येष्वैकांतिकभक्तेष्वेव सौहृदं प्रीतिर्येषां तेऽतः समाहितैरेकाग्रचित्तैस्तैरेव भक्तैर्हृदा मनसा उपगुह्य ज्ञात्वाऽवसितं तद्वैष्णवं पदं निश्चितं नान्यैरिति विश्वनाथः ॥ ३२ ॥ एतत् प्रत्युक्तया नित्यापरोक्षं परमं पदमुपाधिविमुक्तं शुद्धस्वरूपम् । दौर्जन्यं दुर्जनतालक्षकम् ॥ ३३ ॥ एतद्वैष्णवपदमपराधे सति तिरोहितं भवेदतोऽपराधानुद्भवविधिमाह—अतिवादान् कटूक्तीः सहेतैव न तु तादृशमुत्तरं दद्यात् ॥ ३४ ॥ गुरुं श्रीव्यासम् । यद्यपि श्रीशुक एव तदुपदेष्टा तथापि श्रीकृष्णद्वैपायननतिसदुपदेशस्यापि तत्प्रसादमननादेवेति ध्येयम् । यद्वा—शास्त्रं समाप्य स्वेष्टदेवं भगवंतं नमति—नम इति । अध्यगां श्रीशुकादधिगतवानस्मीति ॥ ३५ ॥ हे सौम्येति—सोमवच्चित्तसंतापहरत्वेन प्रकाशस इति भावः । तत्र वेदविभागपुराणसंहिताविभागयोर्मध्ये ॥ ३६ ॥ तत्रेत्युक्तार्थमेव । हे ब्रह्मन्निति—त्वं तु जानास्येव लोकहितार्थमेवायं प्रश्न इति भावः । वेदकल्पतरोः फलं निरूप्य शाखा अपि संक्षेपत आह—समेति परमेष्ठिनो ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् यत्रनादे वृत्तिरोधादेकाग्रया बुद्ध्या ब्रह्म विभाव्यते चिंत्यते योगिभिरित्यप्यर्थः ॥ ३७ ॥ यद्ब्रह्मोपासनया स्वात्मतत्त्वानुसंधानेनात्मनो मलं मायाविद्यादीशजीवोपाधितत्कार्यं च द्रव्यं समष्टिव्यष्टिदेहं क्रिया इंद्रियाणि कारकं कर्तृ अंतःकरणाख्यं धूत्वा तद्विविक्तं प्रत्यगभिन्नं ब्रह्मावगत्यापुनर्भवं मोक्षं यांतीति वार्थः ॥ ३८ ॥ अव्यक्तोऽस्फुटः, प्रभव उद्भवः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ॥ येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ ४० ॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनम् ॥ ४१ ॥ तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ॥ धार्यंते यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥४२॥ ततोऽक्षरस मान्नायमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ ४३ ॥

दिति । नपुंसकत्वं लिंगशब्दविशेषणत्वात् । लिंगं गमकम् ॥ ३९ ॥ कोऽसौ परमात्मा तमाह । शृणोतीति । इमं स्फोटमव्यक्तमोंकारम् । ननु जीव एव तं शृणोतु नेत्याह । सुप्तश्रोत्रे कर्णपिधानादिनाऽवृत्तिकेऽपि श्रोत्रे सति । जीवस्तु करणाधीनज्ञानत्वान्न तदा श्रोता । तदुपलब्धिस्तु तस्य परमात्मद्वारिकैवेति भावः । ईश्वरस्तु नैवम् । यतः शून्यदृक् । शून्येऽपींद्रियवर्गे दृग् ज्ञानं यस्य । तथाहि सुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता लीनेंद्रियत्वात् । अतो यस्तदा शब्दं श्रुत्वा जीवं प्रबोधयति स यथा परमात्मैव तद्वत् । कोऽसावोंकारस्तं विशिनष्टि सार्धेन । येन वाग्बृहती व्यज्यते । यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिरभिव्यक्तिः ॥ ४० ॥ किंच स्वधाम्नः स्वस्याश्रयः कारणं यद्ब्रह्म तस्य किंच परमात्मांशभूतसमस्तदेवतावाचकोऽपीत्याशयेनाह । स इति । सर्वमंत्राणामुपनिषद्रहस्यं सूक्ष्मरूपमित्यर्थः । तत्र हेतुः । वेदानां बीजं कारणम् । बीजत्वेऽप्यविकारितामाह । सनातनं सदैकरूपम् । तस्य ब्रह्मरूपत्वात् ॥ ४१ ॥ इदानीं ततः सर्वप्रपंचोत्पत्तिप्रकारमाह । तस्य हीति । त्रयस्त्रिसंख्यायुक्ताभावा यैरकारोकारमकारैर्धार्यंते तत्कारणत्वात् । तानेवाह । गुणाः सत्त्वादयः नामानि ऋग्यजुःसामानि । अर्था भूर्भुवःस्वर्लोकाः । वृत्तयो जाग्रदाद्याः॥ ४२॥ ततस्तेभ्यो वर्णेभ्यः

तदेवाऽव्यक्तोत्पत्तिकत्वमेव । तमेव प्रणवमेव । गमकं ज्ञापकम् । ततो नादात् घंटानादतुल्यनादात् । त्रिभिरकाराद्यैर्वर्तते त्रीनकारादीन् वृणोत्यादत्ते वेति त्रिवृत् । त्रिवृदकारोकारमकारात्मक ओंकारो योऽव्यक्तस्य प्रमाणांतरागम्यस्य ब्रह्मणः प्रभवोऽपरोक्षो यस्मात्स स्वराट् स्वतः प्रमाणभूतः भगवतो ब्रह्मणः प्रत्यगात्मनश्च परलिंगम् । अकारोकारमकारवाच्यविश्वतैजसप्राज्ञविलापनेनानुच्चार्यार्द्धमात्रावबोध्यवागगोचरब्रह्मज्ञापकम् ॥ ३९ ॥ अत्राक्षिपति—नन्विति । इति भाव इति—न हि जीव इंद्रियं विनैन्द्रियिकमधिगच्छत्यन्यथांधादे रूपादिज्ञानं स्यादिति तात्पर्यम् । नैवं जीवसदृशो नेत्यर्थः । यद्वा—यः पुरुष इमं स्फुट्यतेऽनेनेति स्फोटं सुप्तश्रोत्रे मुद्रितकर्णे शृणोति स शून्यदृक् सूक्ष्मदर्शी स्यात् । तमेव विशेषयति—यतः स्फोटात्सर्वा वाग्व्यज्यते प्रकटीभवति यन्निमित्तिका हृदयाकाशे आत्मनो व्यक्तिः । प्रणवरूपस्फोटोपासनयैव ह्यात्माविर्भावो भवतीत्यर्थः ॥ ४० ॥ अन्यदाधिक्यमाह—किंचेति । न केवलं ब्रह्मवाचक एवापि त्वन्येषामपीत्याह—किंचेति । इत्यर्थ इति—तत्तद्देवबोधकाखिलमंत्रसूक्ष्मरूपमिदमेवाक्षरमिति भावः । तत्र सूक्ष्मरूपत्वे । यद्वा—स्वधाम्नः स्वप्रकाशस्यापि ब्रह्मणः परमात्मनोऽपि साक्षादावरणबाधेन वाचको बोधकः । स एव सर्वधर्मागमंत्राणां ब्रह्मव्यंजकोपनिषदां च सनातनं बीजम्, स्वस्य धामाश्रयो यद्ब्रह्म तस्य परमात्मनोऽपि भगवतश्च वाचकः " ॐमित्येतद्ब्रह्मणो दिष्टं नाम " इति श्रुतेः ॥ ४१ ॥ ततः प्रणवात् । तस्य प्रणवस्य । तत्कारणत्वात् तेषां भावानां कारणत्वात् । धार्यंते स्वेभ्य उत्पाद्यंते । तानेव भावान्पदार्थान् । एतच्चोपपादितमधस्तात् । यैस्त्रिभिर्वर्णैस्त्रयो भावा वेदा धार्यंते, यैश्च त्रिभिर्वेदैर्गुणाः ओजःप्रसादादयो नामानि शब्दा अर्था वाच्यलिंगा वृत्तयोऽभिधालक्षणा व्यंजनाः यथा वटबीजेनैव वटवृक्षो धार्यते तेन च स्कंधशाखापत्रपुष्पफलादयश्च ॥ ४२ ॥ तेभ्योऽकारादिभ्यः । अक्षराणां समाम्नायम् " अ इ उ ण् " इत्यादिसूत्रचतुर्दशरूपम् । " येनाक्षरसमाम्नायमधिगम्य महेश्वरात् " इत्यत्र चतुर्दशसूत्र्यामेवाक्षरसमाम्नायपदस्य प्रयुक्तत्वात् । यद्वा—मातृकारूपम् । तत्प्रकारश्चास्मत्प्रणीतमातृकाविलासे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृतिकान्सौंकारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥ ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ४६ ॥ क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतनोदिताः ॥ ४७ ॥ अस्मिन्नप्यंतरे ब्रह्मन् भगवाँल्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥ पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ४९ ॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे मंत्रैर्मणिगणा इव ॥ ५० ॥ तासां स चतुरः शिष्यानुपाहूय महामतिः ॥ एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ५१ ॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपायनसंज्ञाय निगमाख्यं यजुर्गणम् ॥ ५२ ॥

अक्षराणां समाम्नायं समाहारम् । तमेवाह । अंतस्था यरलवाः । ऊष्माणः शषसहाः । स्वरा अकाराद्याः । स्पर्शाः कादयः । ह्रस्वदीर्घाश्च आदिशब्दाज्जिह्वामूलीयादयः त एव लक्षणं स्वरूपं यस्य तम् ॥ ४३ ॥ विभुश्चतुर्मुखस्वरूपो भगवान् । असृजदिति पूर्वस्य वानुषंगः । चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ॥ ४४ ॥ पुत्रान्मरीच्यादीन् तान् वेदान् ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान् ॥ ४५ ॥ एवं चतुर्योगेषु प्राप्ताः । द्वापरादौ द्वापरमादिर्यस्य तदंत्यांशलक्षणस्य कालस्य तस्मिन् । द्वापरांतवेदविभागप्रसिद्धेः शंतनुसमकालं व्यासावतारप्रसिद्धेश्च । व्यस्ता विभक्ताः ॥ ४६ ॥ तत्र हेतुः । क्षीणायुषो जनान् तर्हि पुरुषबुद्धिप्रभवत्वादनादरणीयत्वं स्यादित्याशंक्याह । हृदिस्थेति ॥ ४७ ॥ एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वंतरे विशेषतो निरूपयितुमाह । अस्मिन्नपीति ॥ ४८ ॥ अंशो माया तस्या अंशः सत्त्वं तस्य कलयांशेनावतीर्णः सन् ॥ ४९ ॥ चातुर्विध्यमेवाह । ऋगिति । ऋगादिमंत्राणां राशीन्वर्गशस्तत्तत्प्रकरणभेदैरुद्धृत्य यथानेकविधमणिराशेर्मणिगणाः पद्मरागादयो विविच्योद्ध्रियंते तद्वदुद्धृत्य तैर्मंत्रैश्चतस्र ऋगादिसंहिताश्चक्रे ॥ ५० ॥ तासां संहितानां मध्ये एकैकाम् ॥ ५१ ॥ ऋक्समुदायरूपत्वाद्बह्वृचाख्याम् ॥ ५२ ॥

द्रष्टव्यः ॥ ४३ ॥ तेनाक्षरसमाम्नायेन । असौ ब्रह्मा । व्याहृतयो भूर्भुवःस्वरिति व्यस्तास्समस्ताश्च । तत्सहितान् व्यक्तोंकारसहितान् । सोंकारानित्युक्तेरोंकारसहितानामेव सर्वेषां यज्ञादौ प्रयोगं सूचयति ॥ ४४ ॥ ते तु मरीच्यादयस्तु । स्वपुत्रेभ्यः कश्यपादिभ्यः ॥ ४५ ॥ ते वेदाः ॥ ४६ ॥ तत्र वेदविभागे । अत्राक्षिपति–तर्हीति । न तेषां स्वातंत्र्यमिति ध्वनितं–हृदिस्थेत्यादिना ॥ ४७ ॥ अस्मिन्नपि श्राद्धदेवमन्वंतरेपि ॥ ४८ ॥ अंशेषु स्वांशेषु जीवेषु स्वांशेन बोधेन यत्कं सुखं तत्स्वरूपाविर्भावेन लाति तया कृपयावतीर्ण इति वार्थः ॥ ४९ ॥ ननु ब्रह्मणैव चतुर्भिर्मुखैश्चत्वारो वेदा आदावेव कृतास्तत्कथमुच्यते 'वेदं चक्रे चतुर्विधम्' इति तत्राह–ऋगिति । राशीन् कृत्वा तत्तत्प्रकरणभेदैर्मणिगणा इव, यथा मणिक्षेत्रेपि पद्मरागहीरकादयः पृथक्पृथगुद्धृत्य कूटं क्रियंते तद्वदिति भावः ॥ ५० ॥ विशेषेण भातीति विभुः सर्वज्ञः ॥ ५१ ॥ ५२ ॥

१ ब्रह्मा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साम्नां जैमिनये प्राह तथा छंदोगसंहिताम् ॥ अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे ॥५३॥ पैलः स्वां संहितामूच इंद्रप्रमितये मुनिः ॥ बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ५४ ॥ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान् ॥ ५५ ॥ अध्यापयत्संहितां स्वां मांडूकेयमृषिं कविम् ॥ तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥ ५६ ॥ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहिताम् ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥ ५७ ॥ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ॥ बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥ बाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहिताम् ॥ चक्रे बालायनिर्भज्य काशारश्चैव तां दधुः ॥ ५९ ॥ बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६० ॥ वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतम् ॥ ६१ ॥ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्कियत् ॥ चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥ ६२ ॥

ह्वृचाख्याम् । नितरां प्रश्लेषेण गद्यमानत्वान्निगदाख्यम् ॥ ५२ ॥ छंदस्सु गीयमानत्वाच्छंदोगाख्यां संहिताम् ॥ ५३ ॥ तत्र ऋग्वेदशाखाविभागमाह । पैल इति । स्वसंहिता द्विधा विभज्य इंद्रप्रमितये बाष्कलाय च ऊचे । स बाष्कलोऽपि स्वकां संहितां चतुर्धा व्यस्य बोध्यादिभ्यः शिष्येभ्य आह । हे भार्गव इंद्रप्रमितिरपि स्वां संहितां स्वसुतं मांडूकेयमध्यापयामास । तस्य मांडूकेयस्य शिष्यो देवमित्रः ॥ ५४ ॥ ५५ ॥ ५६ ॥ तत्सुतो मांडूकेयसुतः । शाकल्यो वात्स्यादिषु पंचस्वधात् । तानध्यापयामासेत्यर्थः ॥ ५७ ॥ तच्छिष्यः शाकल्यशिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ॥ ५८ ॥ बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः । प्रतिशाखाभ्य उक्तसर्वशाखाभ्यः । बालायन्यादस्तामादधुरधीतवंतः ॥ ५९ ॥ ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह बह्वृचां इति । एतच्छंदसामेतेषां छंदसाम् ॥ ६० ॥ यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या इत्यादिना । चरकनामनिरुक्तिमाह । यच्चेरुरिति । यद्यस्माद्ब्रह्महत्यारूपमंहः क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ॥६१॥ तच्छिष्यो वैशंपायनशिष्यः । अल्पसाराणामेतेषां चरितेन कियत् । सुदुश्चरमहं चरिष्यामीति ॥६२॥

साम्नां सम्बंधिनीम्॥५३॥ तत्र चतुर्षु॥५४॥हे भार्गवेति—भृगुवंशजत्वात्त्वमप्येतं विभागं जानास्येवेति भावः । अग्निमित्र इति चतुर्थ्यर्थे सप्तमी । यद्वा—अग्निं मिमीते प्रामाण्येन स्थापयतीत्यग्निमिता तस्मै॥५५॥५६॥ इत्यर्थ इति—अध्यापनमेवात्र धारणपदार्थ इति भावः॥५७॥५८॥५९॥व्यासं विभागम् ॥६०॥ ब्रह्महत्याकारणमुक्तं विष्णुपुराणे—"ऋषिर्योऽद्य महामेरौ समाजे नागमिष्यति । तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति॥पूर्वमेवं मुनिगणैः समयोऽभूत्कृतो द्विज ! वैशंपायन एकस्तु तं व्यतिक्रांतवांस्तदा ॥ स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघातयत् । शिष्यानाह च भो शिष्या ब्रह्महत्यापहं व्रतम् ॥ चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा । " इति ॥ ६१ ॥ ६२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ॥ ६३ ॥ देवरातसुतः सोपि छर्दित्वा यजुषां गणम् ॥ ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ६४ ॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ॥ तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ॥ ६५ ॥ याज्ञवल्क्यस्ततो ब्रह्मन्छंदांस्यधिगवेषयन् ॥ गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥ ६६ ॥ याज्ञवल्क्य उवाच ॥ ॐ नमो भगवते आदित्यायाखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ ६७ ॥

विप्राणामवमंत्राऽवज्ञाकर्त्रा । मत्तोऽधीतमाशु त्यजेति ॥ ६३ ॥ देवरातसुतो याज्ञवल्क्यः ॥ ६४ ॥ छर्दितस्यादानं विप्ररूपेणानुचितमिति तित्तिराः पक्षिविशेषा भूत्वाऽऽददुः ततश्च तैत्तिरीया इति प्रसिद्धाः । सुपेशला अतिरम्याः । बहुवचनमवांतरभेदविवक्षया ॥ ६५ ॥ काण्वमाध्यंदिनादिशाखाप्रसंगमाह याज्ञवल्क्य इत्यादिना । गुरोर्वैशंपायनस्य व्यासेन विभज्यानुक्तत्वादविद्यमानान्यधिकानि गवेषयन्मृगयन्सूपतस्थे सम्यक् तुष्टाव । ईश्वरमृगादिवेदानाम् । तथाच श्रुतिः "ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः ॥ सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः" इति ॥ ६६ ॥ नमो भगवते तुभ्यमादित्याय । यो भगवानेक एवेमां लोकयात्रामनुवहतीत्यन्वयः । तदेव दर्शयति । अखिलजगतामात्मस्वरूपेणांतर्हृदयेषु कालस्वरूपेण च बहिरपि वर्तमान इति । अखिलजगतामित्यस्य प्रपंचः । चतुर्विधेति । हृदयांतर्वर्तित्वेऽपि जीववत्तेनोपाधिनाऽव्यवधीयमानोऽनाच्छाद्यमानः । कालस्वरूपेण चेत्यस्य प्रपंचः क्षणेति । क्षणलवादयो येऽवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन प्रत्य

॥ ६३ ॥ ततो गुरुकुलात् ॥ ६४ ॥ तेषु यजुष्षु लोलुपतया लालसया मुनयोऽन्ये वैशंपायनशिष्या आददुर्जगृहुः । "न हि चेतः सुकृतिनामकार्ये गच्छाति क्वचित्" इति न्यायेन छर्दिता अपि मंत्रा अशुचितां न गता इति तद्ग्रहणे मुनिगणेच्छोत्पत्तेर्ज्ञायते । अत एवोक्तम्–सुपेशला इति शाखाविशेषणम् । "सुरम्ये पेशलः प्रोक्तः शुद्धे मृदुतरे तथा" इत्यभिधानचिंतामणोक्तेः सुष्ठु पेशला अतीवशोधकज्ञानोपयोगिपञ्चकोशादिनिर्णायकत्वेनातिशुद्धाः । न हि कदाचिद्भक्षितहेमगुलिका पुरीषमार्गनिर्गतोद्गीर्णा वाऽशुचितामेति किन्तु यावन्मलयोगं ततः क्षालनाद्यथा शुद्धा तथैव तित्तिरिरूपेण तदुपादानसमये एवान्नरूपेण छर्दितत्वात्तेष्वशुचित्वभ्रांत्यैव मुनिभिर्न ब्राह्मणरूपेण ते स्वीकृतास्तद्रूपत्यागोत्तरं सर्वे मुनयस्तान् जगृहुस्ते च मंत्राः कृष्णयजुष्ट्वेन प्रसिद्धा यज्ञादिषूपयुज्यंते, न ह्यशुचिमंत्रैर्यज्ञः प्रतायत इति वेदस्य साक्षान्नारायणरूपत्वादुच्चावचता न भवति "नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः" इत्यष्टमे मत्स्यचरितोक्तेः 'वांते यातयामः' इति निघंटूक्तेस्तद्भिन्नोऽयातयामस्तत्कामनया श्रीयाज्ञवल्क्योक्तं सर्वं देवपूज्यम् "ब्रह्मेन्द्रनारायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः" इत्युक्तेस्तुष्टावेति वैष्णवादौ ॥ ६५ ॥ सूर्यो देवः ईयते प्रतीयते महीयते पूज्यते । ततो वैशंपायनात् ॥ ६६ ॥ चतुर्विधेति–जरायुजांडजस्वेदजोद्भिद्भेदाज्जीवाश्चतुर्विधाः । यथा घटाद्युपाधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदु ह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जन भगवतः समभिधीमहि तपनमंडलम् ॥ ६८ ॥ य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइंद्रियासुगणाननात्मनः स्वयमात्मांतर्यामी प्रचोदयति ॥ ६९ ॥ य एवेमं लोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतनमवलोक्यानुकंपया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति ॥ ७० ॥ परित आशापालैस्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हणः ॥७१॥ अथ ह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितमहमयातयामयजुःकाम उपसरामीति ॥ ७२ ॥

ब्दमपामादानं शोषणं विसर्गो वृष्टिस्ताभ्याम् । अनेन गायत्रीप्रथमपादोक्तवरेण्यताऽनुवर्णिता ॥ ६७ ॥ द्वितीयपादार्थानुवर्णनेन स्तौति यदुहेति । हे विबुधर्षभ हे सवितः यदप्यदो भगवतस्तव मंडलं तपति तत्समभिधीमहीति सम्यगाभिमुख्येन ध्यायेम । पुनस्तस्यैव संबोधनम् । प्रत्यहं त्रिषवणं वैदिककर्ममार्गेण स्तुवतां भक्तानां यान्याखिलानि दुरितानि तत्फलानि च वृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषामवभर्जन विनाशक हे तपनेति ॥ ६८ ॥ तृतीयपादेन स्तौति । य इहेति । भवान्स्थावरजंगमसमूहानां स्वाश्रयाणां जीवानां मनइन्द्रियप्राणगणाननात्मनो जडान्स्वयमात्मैवांतर्यामी सन्प्रचोदयति प्रवर्तयति ॥ ६९ ॥ तृतीयपादमेव मंडलस्थपरतया व्याचक्षाणः स्तौति । य एवेति । य एक एव भगवानतिकरालवदनो योंधकारसंज्ञोऽजगरग्रहस्तेन गिलितमत एव मृतकमिव विचेतनं स्वधर्माख्यं यदात्मावस्थानं प्रत्यक्प्रवणत्वं तदेव श्रेयस्तस्मिन्प्रवर्तयति । किंच यो भवानवनिपतिरिवाटति गच्छति ॥ ७० ॥ आशापालैरिंद्रादिभिः । कमलकोशयुक्तैस्तत्तुल्यैर्वांजलिभिरुपहृतार्हणो दत्तार्घः ॥ ७१ ॥ यत एवं

नाकाश इव परिच्छिन्न इव प्रतीयते इति वा ॥ ६७ ॥ आदरेण प्रीत्युत्पादनार्थमामंत्रयति—हे विबुधर्षभेति । सर्वदेवश्रेष्ठत्वात्त्वामहं स्तौमीति भावः । सवितरिति—सर्वविश्वोत्पादकस्य तव मम सर्ववेदज्ञानोत्पादनं न दुर्घटमिति भावः । ज्ञानोत्पादनं ह्यज्ञाननाशं विना न संभवतीति चेत्तत्राह—अनुसवनमित्यादि । अत आरभ्यावभर्जनांतां संबुद्धिमाह—सेवकाज्ञाननाशद्योतिकाम् । अज्ञानस्य तमोरूपत्वात्तद्धननं प्रकाशेन भवतीति चेत्तद्द्योतिकां संबुद्धिं पुनराह—तपनेति । ‘ तप—ऐश्वर्ये ’ धातुः । ऐश्वर्यं चात्र प्रकाशलक्षणमेव सर्वविलक्षणं तवैवातः सर्वदेवाधिकस्त्वमेवासीति भावः ॥ ६८ ॥ ६९ ॥ अत एवांधकाराजगरगिलितत्वादेव । प्रत्यक्प्रवणत्वं तदेकपरत्वम् । अन्यदाधिक्यमाह—किञ्चेति ॥ ७० ॥ ७१ ॥ हे भगवन्निति—त्वमेव साक्षाद्भगवानिति भावः । तत्र हेतुः—त्रिभुवनगुरुभिरिति । “ ब्रह्मेंद्रनारायणरुद्रवंदितः स नस्सदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूत उवाच ॥ एवं स्तुतःस भगवान् वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥७३॥ यजुर्भिरकरोच्छाखा दशपंच शतैर्विभुः॥ जगृहुर्वाजसंन्यस्ताःकाण्वमाध्यंदिनादयः॥७४॥जैमिनेः सामगस्यासीत्सुमंतुस्तनयो मुनिः ॥ सुन्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ॥७५॥ सुकर्माचापि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विजः ॥७६॥ हिरण्यनाभः कौशल्यः पौष्यंजिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तमः ॥ ७७ ॥ उदीच्याः सामगाः शिष्या आसन्पंचशतानि वै ॥ पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान् प्रचक्षते ॥ ७८ ॥ लौगाक्षिर्मांगलिः कुल्यः कुशीदः कुक्षिरेव च ॥ पौष्यंजिशिष्या जगृहुः संहितास्ते शतंशतम् ॥ ७९ ॥

भूतस्त्वमथातः ह स्फुटमयातयामान्यन्यैर्यथावदविज्ञातानि यजूंषि तत्कामोऽहमुपसरामि भजामि ॥ ७२ ॥ एवं स्तुतः प्रसादितश्च ॥ ७३ ॥ पंचदशशाखाः याः शतैरपरिमितैर्यजुर्भिरकरोत् । स तैरिति पाठे स एष याज्ञवल्क्यस्तैर्यजुर्भिरकरोदिति । जगृहुरधीतवंतः । रविणाऽश्वरूपेण वाजेभ्यः केसरेभ्यो वाजेन वेगेन वा संन्यस्तास्त्यक्ताः शाखा वाजसनीसंज्ञास्ता शाखा इति वा ॥७४॥ सामशाखाविभागमाह । जैमिनेरिति तत्सुतः सुमंतसुतः । ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥७५॥ तच्छिष्यो जैमिनेः शिष्यः । महानतिमेधावी । सहस्रसंहितारूपं भेदं चक्रे । साम्नां तं संहिताभेदम् । ततस्तदनंतरम् । सुकर्मणः शिष्य एकः कौशल्यो हिरण्यनाभः पौष्यंजिर्नामैकस्तौ जगृहतुः । आवंत्यश्चान्यस्तस्यैव शिष्यः सोऽपि जग्राह ॥ ७६ ॥ ७७ ॥ पौष्यंज्यावंत्ययोरपि चकाराद्धिरण्यनाभस्यापि पंचशतानि शिष्या आसन् । ते तावतीः शाखा यथायथं जगृहुः।तानुदीच्यान्सतः कालतः कांश्चित्प्राच्यांश्च प्रचक्षत इत्यर्थः । यथैवोक्तं वैष्णवे ।"उदीच्यसामगाः शिष्यास्तस्य पंचशतं स्मृताः॥ हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तमैः॥गृहीतास्तेऽपि चोच्यंते पंडितैः प्राच्यसामगाः" इति॥ ७८॥ पुनरप्येतेषां त्रयाणां सुकर्मणः शिष्याणां शिष्यांतरैः शाखाबाहुल्यं दर्शयति । लौगाक्षिरिति

यच्छतु मंगलं रविः " इति भविष्योक्तेः ॥ ७२ ॥ वाजी तुरंगस्तद्रूपधरो हारिः सूर्यः " हरिरिंद्रो हरिर्भानुर्हरिर्विष्णुर्हरिर्मरुत् " इत्यभिधानात् ॥ ७३ ॥ अननुस्वारसकारे तु प्रथमा द्वितीयार्थे ॥ ७४ ॥ ७५ ॥ ॥ ७६ ॥ कौशल्यः कोशलावासी । आवंत्योऽवंतीभवः ॥७७॥ इत्यर्थ इति–वक्ष्यमाणवैष्णववाक्यप्रामाण्यादिति भावः । तदेवाह–यथैवोक्तमिति । तस्य हिरण्यनाभस्य । तावंत्यः पंचशतसंख्याकाः ॥ ७८ ॥'शतमृतम्'

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः ॥ शिष्य ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्मवान् ॥ ८० ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे वेदशाखाप्रणयनं नाम षष्ठोऽध्यायः ॥६॥ सूत उवाच॥अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकाम्॥संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान्॥१॥ शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ कुमुदः शुनको ब्रह्मञ्जाजलिश्चाप्यथर्ववित् ॥ २ ॥ बभ्रुः शिष्योऽथांगिरसः सैंधवायन एव च ॥ अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथाऽपरे ॥३ ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादयः ॥ एते आथर्वणा चार्याः शृणु पौराणिकान्मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ वैशंपायनहारीतौ षड् वै पौराणिका इमे ॥ ५ ॥ अधीयंत व्यास शिष्यात्संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥ ६ ॥

द्वाभ्याम्॥ ७९ ॥कृतो नाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्य ऊचे । शेषा अन्या अपि याः प्रसिद्धाः शाखास्ता आवन्त्यः स्वशिष्येभ्य ऊच इति॥ ८० ॥इति श्रीमद्भागवते म० द्वादशस्कंधे टीकायां षष्ठोऽध्यायः ॥६॥ सप्तमेऽथर्वविस्तारः पुराणव्यसनं ततः ॥ पुराणलक्षणादीनि फलं भागवतश्रुतेः ॥ १ ॥ क्रमप्राप्तमथर्ववेदविभागमाह । अथर्ववि दिति । शिष्यं कबंधनामानम् । स्वकां स्वकीयां संहिताम् । सोऽपि शिष्योऽपि तां द्विधा विभज्य । तदुक्तं वैष्णवे ।"अथर्ववेदं स मुनिः सुमंतुरमितद्युतिः ॥ शिष्यमध्यापयामास कबंधं सोऽपि च द्विधा ॥ कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान् " इति ॥ १ ॥ तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास । पथ्यश्च त्रिधा विभज्य त्रीनित्याह सार्धेन । शौक्लायनिरिति ॥ २ ॥ अंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च । तदुक्तम् "शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे।द्वितीयां संहितां प्रादात्सैंधवायनसंज्ञिने " इति सावर्ण्याद्याः सैंधवायनादीनां शिष्याः ॥ ३ ॥ नक्षत्रकल्पः शांतिकल्पश्चेति द्वौ । तदुक्तम् " नक्षत्रकल्पो वेदानां संहितानां तथैव च ॥ चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचमः " इति । नक्षत्रकल्पादीनां कर्तारस्तन्नामभिरुच्यंते ॥ ४ ॥ ५ ॥ मत्पितुर्मुखादिति । प्रथमं व्यासः षट् संहिताः कृत्वा

इति पाठे ऋतं सत्यम्, स्वतः प्रमाणमित्यर्थः ॥ ७९ ॥ आत्मवान् ज्ञानी ॥ ८० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥ पुराणानां व्यसनं विभागः । भागवतश्रुतेरिति भगवान्व्यासस्तस्येमे शिष्या भागवताः पैलाद्यास्तेषां श्रुतिः श्रवणं तस्याः फलम् । यद्वा–' वेदो नारायणः साक्षात् ' इत्युक्तेर्भगवतो वेदस्यायं विभागो भागवतस्तस्य श्रुतेः फलं, तच्चाध्यायांतिमश्लोकेन ' ब्रह्मतेजोवि वर्द्धनम् ' इति वक्ष्यत्येव (१) । वैष्णवे विष्णुपुराणे । तदेतच्छ्लोकोक्तं वृत्तमुक्तम् ॥ १ ॥ तत्र द्वयोर्मध्ये । हे ब्रह्मन्निति संबुद्धिरुक्ताभिप्राया ॥ २ ॥ ३ ॥ तदुक्तमित्यादि वाक्यं विष्णुपुराणीयमेव । कल्पशब्दस्य प्रत्येकं सम्बंधः । वेदकल्पः, संहिताकल्पः, आंगिरसकल्प इति । नक्षत्रकल्पो नक्षत्रादिपूजाविधिः, वेदकल्पो वैतानिकब्रह्मत्वादिविधिः, संहिताकल्पः संहिताविधिः, आंगिरसकल्पोऽभिचारादिविधिः, शांतिकल्पोऽश्वगजाद्यष्टा दशमहाशान्त्यादिविधिरिति तट्टीका च ॥ ४ ॥ इमे इति बुद्धिसन्निहितत्वात् ॥ ५ ॥ एकैकामिति–त्रिभिस्त्रिभिर्मिलित्वैकत्वम् । ' त्रिषट् ' इति वक्ष्यमाणात् । तच्च–' ब्राह्मं पाद्मं वैष्णवम् ' इति मिलित्वैकादिरूपाम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कश्यपोहं च सावर्णी रामशिष्योऽकृतव्रणः ॥ अधीमहि व्यासशिष्याच्चतस्रो मूलसंहिताः ॥ ७ ॥ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम् ॥ शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥ ८ ॥ सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षांतराणि च ॥ वंशो वंश्यानुचरितं संस्थाहेतुरपाश्रयः ॥ ९ ॥ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ॥ केचित्पंचविधं ब्रह्मन्महदल्पव्यवस्थया ॥ १० ॥ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेंद्रियार्थानां संभवः सर्ग उच्यते ॥ ११ ॥

मत्पित्रे रोमहर्षणाय प्रादात् । तस्य च मुखादेते त्र्य्यारुण्यादय एकैकां संहितामधीयंत । एतेषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् ॥ ६ ॥ रामशिष्यो योऽकृतव्रणः एवं चत्वारो वयम् । मूलसंहिता इत्यनेन ततः संहिताबाहुल्यं सूचितम् ॥ ७ ॥ शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्भेदकथनाय दर्शयति । पुराणेति ॥ ८ ॥ अस्य विश्वस्य । "अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः" इत्यत्रोक्ते स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते । अंतराणि मन्वंतराणि वंशो वंश्यानुचरितमितीशानुकथाः।संस्था निरोधः । अनेनैवात्यंतिकलयरूपा मुक्तिरप्युक्ता । हेतुशब्देन जीवाश्रयवासनाशब्दवाच्या ऊतयो गृहीताः ॥९॥ दशभिरेतैर्लक्षणैरर्थैर्युक्तं महापुराणं विदुः । केचित्पंचविधम् । "सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च । वंश्यानुचरितं चेति पुराणं पंचलक्षणम्॥" इति महत्पुराणमल्पं चेति व्यवस्थया । यत्र दशापि लक्षणानि पृथक्पृथङ् निरूप्यन्ते तन्महापुराणम् । यत्र त्वन्येषां पंचस्वेवांतर्भावस्य विवक्षा तदल्पमिति व्यवस्थयेत्यर्थः ॥ १० ॥ सर्गादिलक्षणानि व्याचष्टे अव्याकृतेत्यादिना । अव्याकृतस्य प्रधानस्य गुणानां क्षोभाद्यो महांस्तस्मात्त्रिवृदहंकारस्तस्माद्भूतमात्राणां सूक्ष्माणामिंद्रियाणां च तदर्थानां च

अवांतरसंहिता तु क्वचिदेका, यथा श्रीभागवतस्य परमहंससंहितात्वम्, क्वचिदेकैकस्यैव विभागशः । यथा—स्कांदस्य सनत्कुमारप्रोक्तसंहितानामादिका, श्रीभागवतस्य श्रीशुकात्तु पश्चाद्व्यक्तिः सूर्यादेव यजुर्भागस्य वाजसनेयस्यादौ व्यक्तत्वात् ॥ ६ ॥ कश्यपोऽहमुग्रश्रवाः सावर्णिरकृतव्रणश्चतुर्थ एते चत्वारो वयमित्यर्थः । मूलत्वमेषामितिहासापेक्षया ज्ञेयम् " अष्टादश पुराणानि कृत्वा सत्यवतीसुतः । भारतं कृतवान्पश्चात् " इति मात्स्यात् । " ब्राह्मी भागवती शैवी वैष्णवी च प्रकीर्तिताः । चतस्रः संहिताः पुण्या धर्मकामार्थमोक्षदाः ॥" इति । क्वचित्पञ्चोक्ताः ।" ब्रह्मणः स्युः शिवस्यापि प्रह्लादस्यापि संहिताः । गौतमस्य कुमारस्य संहिताः पञ्च वर्णिताः ॥ " । क्वचित् षडुक्ताः—" आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता । तृतीया शांकरी विप्राश्चतुर्थी वैष्णवी तथा ॥ तत्परा संहिता ब्राह्मी सौरांत्या परिकीर्तिता । " "अन्या अपि संहितास्तु विज्ञेया मुनिनिर्मिताः । कौशिकी संहिता मुख्या वासिष्ठी मानवी तथा ॥ गर्गादिमा च सा पाराशरी वैयासकी तथा । हनुमत्संहिता ज्ञेया तथा सौदर्शनी मता ॥" इति सर्वार्थचिंतामण्युक्तेः । व्यासशिष्यान्मत्पितू रोमहर्षणात् ॥ ७ ॥ वेद एव शास्त्रं तदनुसारतो यथा वेदे पुराणलक्षणमुक्तं तदनतिलंघ्यैवेह वर्णयामीत्यर्थः ॥ ८ ॥ 'पोषणं तदनुग्रहः' इति पूर्वलक्षितं पोषणमेवात्र रक्षाशब्देनोच्यते, तां व्याचष्टे ॥ ९ ॥ इत्यर्थ इति—अंतर्भावस्तु स्वबुद्ध्यैव सर्गे रक्षायाः, प्रतिसर्गे संस्थाया इत्येवं रीत्या यथायथमनुसंधेयमिति वंशवंशानुचरितयोरीशकथायामन्तर्भावमिति भावः ॥ १० ॥ इत्यर्थ इति—विसर्गस्य पृथगुपादानात्सर्गपदेन कारणसृष्टिरेवात्र ज्ञेयेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषानुगृहीतानामेतेषां वासनामयः ॥ विसर्गोऽयं समाहारो बीजाद्बीजं चराचरम् ॥ १२ ॥ वृत्तिर्भूतानि भूतानां चराणामचराणि च ॥ कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥ १३ ॥ रक्षाऽच्युतावतारेहा विश्वस्यानु युगेयुगे ॥ तिर्यङ्मर्त्यर्षिदेवेषु हन्यंते यैस्त्रयीद्विषः ॥ १४ ॥ मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ॥ ऋषयोंशावतारश्च हरेः षड्विधमुच्यते ॥१५॥ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः॥ वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १६॥ नैमित्तिकः प्राकृतिको नित्य आत्यंतिको लयः ॥ संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः ॥१७॥ हेतुर्जीवोस्य सर्गादेरविद्याकर्मकारकः ॥ यं वानुशयिनं प्राहुरव्याकृतमुतापरे ॥ १८ ॥

स्थूलानां देवतानां च संभवः सर्गः कारणसृष्टिसर्ग इत्यर्थः । उच्यत इति यथाऽपेक्षमुत्तरत्राप्यनुषंगः ॥ ११ ॥ विसर्गं व्याचष्टे । पुरुषेणेश्वरेणानुगृहीतानामेतेषां महदादीनां पूर्वकर्मवासनाप्रधानोऽयं समाहारः । कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः ॥ १२ ॥ चराणां भूतानां सामान्यतोऽचराणि । चकाराच्चराणि च वृत्तिः । तत्र नृणां स्वेन स्वभावेन कामाच्चोदनयाऽपि वा या नियता वृत्तिर्जीविका कृता सा वृत्तिरुच्यत इत्यर्थः ॥ १३ ॥ तिर्यङ्मर्त्यर्षिदेवेषु येऽच्युतावतारास्तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः । यैरवतारैरिति समासान्निष्कृष्य कथंचित्संबंधः । त्रयीद्विषो दैत्याः ॥ १४ ॥ षड्विधं मन्वंतरमुच्यते । षड्विधत्वमेवाह । मनुरिति । मन्वादयः षडेते वर्गाः स्वस्वाधिकारेण यदा प्रवर्तंते तन्मन्वंतरमित्यर्थः ॥ १५ ॥ वंशमाह । राज्ञामिति । ब्रह्मणः सकाशात्प्रसूतिर्येषां शुद्धानामित्यर्थः । तेषामन्वयो वंशः तेषां वृत्तम् । ये च तद्वंशधरास्तेषां च वृत्तं वंशानुचरितमुच्यते ॥ १६ ॥ अस्य विश्वस्य । स्वभावतो मायातो निष्पन्नस्य । यद्वा मायातो यश्चतुर्विधो लय इति॥१७॥ अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः । सोऽत्र हेतुरुच्यत इत्यर्थः । तस्य निमित्ततामाह । अविद्यया कर्मकारकः कर्मकर्ता । जीवादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः स तु तत्र हेतुरित्यर्थः । नन्वनुशयी निमित्तमिति केचित् । अव्याकृतमित्यपरे । तत्राह । यमिति । चैतन्यप्राधान्येनानुशयिनमुपाधिप्राधान्यविवक्षयाऽव्याकृतम् ॥ १८ ॥

भावः ॥ ११ ॥ इत्यर्थ इति–विशिष्टः सर्गो विसर्ग इति भावः ॥ १२ ॥ तत्र सर्वजीवेषु । स्वभावेन व्रीह्यादीनि कामनया, फलादीनि चोदनया, विधिना पुरोडाशादीनि । इत्यर्थ इति–न तु सामान्यतोऽभक्ष्यभक्षणमपीति भावः । तत्र काम्या वृत्तिर्गर्ह्या, मांसाशनलशुनपलांड्वादिष्वपि तद्गुणश्रवणेन कामनोत्पत्तेः ॥ १३ ॥ इत्यर्थ इति–न तु गवाश्वादिरक्षणमात्रमेव रक्षापदार्थ इति भावः । अवतारेहाऽवतारकारणं सैव रक्षा । कुत इत्यत आह–यैरिति । समासान्निष्कृष्य कथंचिदगत्या । यथा–" भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् " इत्यत्र प्रमुखत इत्यस्य विवक्षावशान्महीक्षितामित्यनेन संबंधस्तद्वदत्रापि । यद्वा–" यस्यैते राजमातंगास्तस्यैवैते तुरंगमाः " इति बुद्धिस्थग्राहकत्वमपि त्यदादीनामिति ज्ञेयम् । हन्यन्त इति–दुष्टनिग्रहात्स्वभक्तरक्षणमेव रक्षेत्यागतम् । उपलक्षणमेतदन्यदापि महाभयात्स्वभक्तरक्षणं रक्षोच्यतेऽत एव षष्ठेऽजामिलादिभक्तानां रक्षोक्ता ॥ १४ ॥ इत्यर्थ इति–एषां प्रवृत्तिकाल एव मन्वंतरमिति भावः ॥ १५ ॥ इत्यर्थ इति–इदं चकारेण ज्ञेयमिति भावः । वृत्तं शीलम् । तद्वंशधराः प्रियव्रतध्रुवपृथ्वादयः ॥ १६ ॥ स्वस्यैव शक्तिरूपेण भवनं स्वभावो माया न केवलं मायातो लय एव किन्तु प्रलयोऽपीत्याह–यद्वेति । " अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव " इति श्रीमुखोक्तेः ॥ १७ ॥ इत्यर्थ इति–जीव एव स्वकर्मद्वारा सृष्टि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १९ ॥ पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु ॥ बीजादिपं चतांतासु ह्यवस्थासु युतायुतम् ॥ २० ॥ विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयम् ॥ योगेन वा तदात्मानं वेदेहाया निवर्तते ॥ २१ ॥ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ॥ मुनयोऽष्टादश प्राहुः क्षुल्लकानि महांति च ॥ २२ ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडम् ॥ नारदीयं भागवतमाग्नेयं स्कांदसंज्ञितम् ॥ २३ ॥ भविष्यं ब्रह्मवैवर्तं मार्कंडेयं सवामनम् ॥ वाराहं मात्स्यं कौर्मं च ब्रह्मांडाख्यमिति त्रिषट् ॥ २४ ॥

अपाश्रयमाह । व्यतिरेकेति । जाग्रदादिष्ववस्थासु जीवतया वर्तत इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षितयाऽन्वयः समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः ॥ १९ ॥ एतदेव सदृष्टांतं प्रपंचयति । पदार्थेषु घटादिषु द्रव्यं मृदादि यथा युतमन्वितमयुतं च बहिरप्य वस्थानात् । रूपनामसु च सन्मात्रं सत्तामात्रं यथा । एवं बीजं गर्भाधानमादिर्यासां पंचतांतो यासां तासु देहावस्थासु नवस्वप्यधिष्ठानत्वेन साक्षित्वेन च युतमयुतं च यत्तदपाश्रय इति ॥ २० ॥ एवं दशापि लक्षणानि व्याख्याय "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् । वर्णयंति महात्मानः" इति यदुक्तं तदाह । विरमेतेति । यदा सर्गादीनां मायामयत्वानुसंधानेन वामदेवादेरिव स्वयमेव चित्तं विरमेत । इहैवानुष्ठितेन योगेन वा देवहूत्यादिवत् । तदा विक्षेपाभावादात्मानं वेद । तदा चाविद्यानि वृत्तेरीहायाः संसाररूपाया निवर्तत इत्यर्थः ॥ २१ ॥ पुराणविभागप्रस्तावेन तल्लक्षणादिप्रासंगिकमुक्त्वा प्रस्तुतमाह । एवंविधैर्लक्षणैर्लक्ष्याणि ॥ २२ ॥ २३ ॥ त्रिषड

कारणमिति भावः । तस्य जीवस्य । इत्यर्थ इति—जीवसमुदायसुखदुःखप्राप्तये तं हेतुं कृत्वा जगतः सृष्ट्यादिकमस्तीति भावः । अत्राशंकते—नन्विति । यं जीवम् । उपाधिः प्रकृतिः।चक्रवर्तिकारस्तु—अस्य सर्गादेर्जीवः कारणं स चाविद्यया कर्म कर्ता जीवार्थमेव भगवता विश्वस्य कृतत्वाज्जीवो निमित्तमिति भावः । अत एव यमनुशायिनं मायिकोपाधिमनुशयानं मायिकशरीरवरमेवैके प्राहुः । अपरभक्तास्तु—आविद्यककर्मकर्तारं जीवं साधुसंगवशाद्भक्तिमार्गस्थत्वे सति अव्याकृतमप्राकृतं चिन्मयपार्षदशरीरवन्तमप्याहुः । अप्यर्थे उत् शब्दः । तदुक्तं नारदेन—"शुद्धां भागवतीं तनुम् । आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः" इति।वेदस्तवारंभेपि—"बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत्प्रभुः । मात्रार्थं च भवार्थञ्च आत्मने कल्पनाय च ॥" इति । आत्मनेऽकल्पनाय बुद्धीन्द्रियमनःप्राणान्संप्रापयितुमिति तत्रार्थः । एतन्मत एव नवमं लक्षणं पूर्वत्रोक्तम् । "मुक्तिर्हित्वाऽन्यथा रूपं स्वरूपेण व्यवस्थितिः" इति विशेषेण चिद्घनशरीरत्वेनावस्थितिरिति तत्र व्याख्येति विश्वनाथः ॥ १८ ॥ समाध्यादाविहादिना मूर्च्छाग्रहः । समाधौ स्वरूपावस्थानेन मूर्च्छायां प्रतीत्यभावेन च व्यतिरेकः ॥ १९ ॥ एतदेवाऽन्वयव्यतिरेकत्वमेव । रूपनामस्विति—समीपस्थेन मेरुरयमित्युक्ते मेरुरूपे सत्तान्वयः, दूरस्थेन मेरुरित्युक्ते तु मेरुदर्शनाभावान्मेरुनाम्न्येव सत्तान्वयः । यद्वा—रूपनामयुक्तेषु पदार्थेष्विति योज्यम् । नवावस्थास्तु—"निषेकगर्भजन्मानि बाल्यकैशोरयौवनम् । वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ॥" इत्येकादशस्कंधे स्वयं भगवतैवोक्ताः । अधिष्ठानत्वेन युतं साक्षित्वेनायुतम् ॥ २० ॥ वृत्तित्रयं जाग्रदादित्रयम् । वामदेव ऋषिविशेषः । आदिना दत्तात्रेयादिग्रहः । द्वितीयादिनाऽऽसुर्यादिग्रहः । इत्यर्थ इति—ईहानिवृत्तेरेव मोक्षत्वात् "यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतोऽभवत्यत्र ब्रह्म समश्नुते ॥" इति श्रुतेरयं भावः ॥ २१ ॥ पुराविदः अतीतानागतविदो व्यासादयो मुनयः । क्षुल्लकानि श्लोकसंख्यया परिमितानि न त्वर्थतः, कानिचिदर्थतः शब्दतः फलतश्च महांति ॥ २२ ॥ २३ ॥ त्रिरावृत्ताः षट् त्रिषट् । शैवे तु—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः ॥ शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्धनम् ॥ २९ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे सप्तमो ऽध्यायः ॥ ७ ॥ शौनक उवाच ॥ सूत जीव चिरं साधो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥ १ ॥ आहुश्चिरायुषमृषिं मृकंडतनयं जनाः ॥ यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥ २ ॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन् भार्गवर्षभः ॥ न वाऽधुनापि भूतानां संप्लवः कोऽपि जायते ॥ ३ ॥ एक एवार्णवे भ्राम्य ददर्श पुरुषं किल ॥ वटपत्रपुटे तोकं शयानं त्वेकमद्भुतम् ॥ ४ ॥

ष्टादश ॥ २४ ॥ उपसंहरति । ब्रह्मन्निति । मुनेर्व्यासस्य शिष्यादीनां च । ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्धनम् । श्रोतृणामिति शेषः ॥ २५ ॥ इति श्रीमद्भागवते द्वादशस्कंधे टीकायां सप्तमोऽध्यायः ॥ ७ ॥ अष्टमे तु तपश्चर्या मार्कंडेयस्य मोहकैः ॥ कामादिभिरसंमोहो नरनारायणस्तुतिः ॥ १ ॥ पुराणविभागप्रसंगेन पुराणकर्तुर्मार्कंडेयस्य चरितप्रश्नमाह । सूतेति । त्वमेव वक्तुं योग्य इत्याह । तमसि संसारे भ्रमतां पारदर्शनस्तन्निवर्तकः ॥ १ ॥ वक्तव्यमाह । आहुरिति । उर्वरितोऽवशिष्टः । येन कल्पांतेन । एतत्कथं घटत इत्येकः प्रश्नः ॥ २ ॥ प्रलयाभावादप्येतन्न घटत इत्याह । स वा इति । यतो भार्गवर्षभः । कोऽपि प्राकृतिको नैमित्तिको वा ॥ ३ ॥ अन्यदप्यघटित

"ब्राह्मं पुराणं तत्राद्यं संहितायां विभूषितम् । श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ॥ पाद्मं द्वितीयं कथितं तृतीयं वैष्णवं स्मृतम् । चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतम् ॥ ततो भागवतं प्रोक्तं भागद्वयविभूषितम् । चतुर्भिः पर्वभिः प्रोक्तं भविष्यं तदनंतरम् ॥ मार्कंडेयमथाग्नेयं नारदीयं ततः परम् । दशमं ब्रह्मवैवर्तं लिंगमेकादशं स्मृतम ॥ भागद्वयेन लिंगं च ततो वाराहमुत्तमम् । संयुक्तमष्टभिः खंडैः स्कांदं चैवातिविस्तरम् ॥ ततस्तु वामनं कौर्मं भागद्वयविराजितम् । मात्स्यं च गारुडं प्रोक्तं ब्रह्मांडं च ततः परम् ॥ भागद्वयेन कथितं ब्रह्मांडमपि शब्दितम् । इदं ब्रह्मपुराणस्य खिलं सौरमनुत्तमम् ॥ संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम् । आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता॥" इति । कौर्मे तु–"अन्यान्युपपुराणानि मुनिभिः कथितान्यपि" । मात्स्ये तु–"अष्टादशभ्यस्तु पृथक्पुराणं यत्प्रदश्यते । विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम् ॥ पंचांगवत्पुराणं स्यादाख्यानमितरत्स्मृतम् । पाद्मे पुराणे या प्रोक्ता नारसिंहोपवर्णना ॥ तदष्टादशसाहस्रं नारसिंहमिहोच्यते । यत्र सांबं पुरस्कृत्य भविष्येपि कथानकम् ॥ प्रोच्यते तत्पुनर्लोके सांबमेव मुनीश्वरैः । एवमादित्यसंज्ञं च तत्रैव परिभाषितम् ॥" इति संदर्भः ॥२४॥ ब्रह्मन्निति–व्याख्यातचरी संबुद्धिः । ब्रह्मवर्चसं यद्यपि ब्राह्मण एवास्ति तथापीतरेषामपि वेदोक्तकर्मकारित्वेन यथाकथंचित्तदस्त्येव,तत्तत्कर्मफलाधिक्यं भवतीति भावः ॥२९॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥ जगतो मोहकैरपि (१) । 'मार्कंडेयं सवामनम्' इति श्रुतत्वेनाद्भुतनामत्वेन स्मृतिपथमारूढस्य मार्कंडेयस्य चरितं पृच्छति । वक्तुः कथनोत्साहवर्द्धनार्थं संबुद्धित्रयम् । सूतेति सामान्यत उक्ते प्रातिलोम्यभ्रांतिवारणाय–साधो इति, तत्समर्थनाय–वदतां वरेति ॥ १ ॥ आहुः पौराणिकाः । कल्पांतत्वं दुर्घटमेव ॥ २ ॥ ननु 'काश्यः कुशो गृत्समदः' इति सुहोत्रनृपस्यात्मजाद्गृत्समदाच्छुनकस्तस्माच्छौनकोत्पत्तिश्रुतेः कथमुक्तं श्रीशौनकेन–स वा अस्मत्कुलोत्पन्न इति, तत्रेदं बोध्यम्–गृत्समदोऽरिनृपभीतो भार्गवाश्रममित्वा तं नत्वा च भगवन्मां पाहि रिपोरिति प्रोवाच, स च तं मा भैरित्याश्वास्याश्रमाद्बहिरागत्य तद्वैरिणमिह सर्वे ब्राह्मणाः संति न कोपि क्षत्रिय इत्युवाच । तदाकर्ण्य जितं मयेत्युक्त्वा स गतस्तदा भार्गववचनाद्गृत्समदो भार्गवोऽभूदिति महाभारते । सति प्रलयेऽस्मत्कुलं कथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष नः संशयो भूयान् सूत कौतूहलं यतः ॥ तं नश्छिधि महायोगिन् पुराणेष्वपि संमतः ॥ ५ ॥ सूत उवाच ॥ प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥ प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात् ॥ छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ ७ ॥ बृहद्व्रतधरः शांतो जटिलो वल्कलांबरः ॥ बिभ्रत्कमंडलुं दंडमुपवीतं समेखलम् ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च नियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन् संध्ययोर्हरिम् ॥ ९ ॥

मेवेत्याह । एक एवेति । तोकं बालकम् ॥ ४ ॥ कौतूहलमौत्सुक्यम् । तं संशयम् । न केवलं त्वं महायोगी किंतु पुराणेष्वपि ज्ञातृत्वेन संमतः ॥ ५ ॥ प्रश्नमभिनंदति हे महर्षे अयं प्रश्नः । तत्र हेतुः । नारायणेति । यत्र प्रश्नविषये ॥ ६ ॥ तत्र मार्कंडेयस्तपसा भगवंतमाराध्य मायाप्रदर्शनं वव्रे ततश्च तेनैव भगवन्मायया सप्तकल्पा दृष्टा नान्यैरित्युत्तरं वक्तुमादित आरभ्य तस्य चरितमाह । प्राप्त इत्यादिना । मार्कंडेयो मृत्युं जिग्ये इति पंचमश्लोकेनान्वयः । मध्यमग्रंथेन तस्य धर्मः कथ्यते । प्राप्तो द्विजातिसंस्कार उपनयनाख्यो येन सः । पितुः सकाशाद्गर्भाधानादिक्रमात् छंदांसि वेदान् ॥ ७ ॥ बृहद्व्रतधरो नैष्ठिको ब्रह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये ।

मवशिष्टमिति प्रश्नांतरम् ॥ ३ ॥ ४ ॥ पुराणेषु प्राचीनवृत्तप्रतिपादकेषु श्रीव्यासर्षिप्रणीतशास्त्रेषु । " अनागतमतीतं च वर्तमानमतीन्द्रियम् । सन्निकृष्टं व्यवहितं सम्यक्पश्यंति योगिनः ॥ " इत्युक्तेर्योगिनामेतत्कथनसामर्थ्यमस्ति किं पुनर्महायोगिनस्तवेति संबुद्ध्यभिप्रायः ॥ ५ ॥ हे महर्षे इति संबुद्ध्या तत्तादृशज्ञानवत्त्वं सूचयति । ऋषय एव त्रिकालज्ञा भवंति किं पुनर्महर्षिर्भवानिति भावः । " ऋषिस्त्रैकालिकज्ञानी विप्रो वेदस्तथा ऋषिः " इति संहितोक्तेः । तत्र लोकभ्रमापहत्वे । लोकभ्रमः संसारे भ्रमणं तमपहंतीति तथा ॥ ६ ॥ तत्रोपस्थितप्रकृते । अथ प्रसंगागतमाह—विदुषां मुदे । पितुरित्युक्तेर्नात्र पितैवोपनयेत्पुत्रमिति नियमः, किन्तु पितेत्युपलक्षणं पितामहादेः । तदुक्तं गर्गेण—" पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः । उपनायेऽधिकारी स्यात्पूर्वाभावे परः परः ॥ " इति । उक्ताधिकार्यभावे व्यासः—"वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम् । स्वशाखीयमनालस्यं विप्रमाचार्यमाश्रयेत् ॥ " इति । " आचार्ये हि क्षत्रवैश्यौ वृणुयातां पुरोहितम् । तदभावेऽन्यविप्रं हि गृहस्थं वेदपारगम् ॥ त्यक्तगोत्राभिमानं तु यो विप्रमपि धारयेत् । वेदकर्मण्यथाचार्यं पतितः सोऽभिधीयते ॥ तत्कारितं तत्कृतञ्च शुभं कर्माखिलं वृथा । प्रायश्चित्तं ततः कृत्वा तत्कर्म पुनराचरेत् ॥ " । प्रायश्चित्तं तूक्तं वारतांतविना—" विप्रेभ्यो दश गा दद्याद्वा कृच्छ्राणि दशाऽऽचरेत् । कारयेत्संहितापाठं गायत्र्या वा दशायुतम् ॥ ततस्तूपनयेद्विप्रो विप्रक्षत्रविशः सुधीः । " इति । क्रमादिति—गर्भाधानाद्याः षोडशसंस्काराः पूर्वमुक्ताः ॥ ७ ॥ मेखला मौञ्जी तत्सहितम् ॥ ८ ॥ अक्षसूत्रमक्षमाला " आदिक्षान्तगतैर्वर्णैर्जपमालाऽक्षमालिका " इति तंत्रोक्तेः । गौतमीये च—"पञ्चाशन्मणिभिर्माला विहिता सर्वकर्मसु । अकारादिक्षकारांता ह्यक्षमाला प्रकीर्तिता ॥" इति । " रुद्राक्षशंखपद्माक्षपुत्रजीवकमौक्तिकैः । स्फाटिकैर्मणिरत्नैश्च सौवर्णैर्विद्रुमैस्तथा ॥ राजतैः कुशमूलैश्च गृहस्थस्याक्षमालिका । अंगुलीगणनादेकं पर्वण्यष्टगुणं भवेत् ॥ पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकम् । प्रवालैर्मणिरत्नैश्च दशसाहस्रिकं फलम् ॥ तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते ॥ कुशग्रंथ्या कोटिशतं रुद्राक्षैः स्यादनन्तकम् ॥ " इति । कुशांश्चेत्युक्तेः कुशत्रयपवित्रादि ज्ञेयम् । विप्रोऽत्र गुरुभिन्नो ज्ञेयः । अत्र विप्रपदस्य पृथगुक्तेर्विप्रेतरस्य गुरुत्वं न शंकनीयम्, 'जन्मना ब्राह्मणो गुरुः' इति श्रीगर्गं प्रति नंदोक्तेः " वर्णानामाश्रमाणाञ्च मुख्योऽभूद्ब्राह्मणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सायं प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः ॥ बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥१०॥ एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतम् ॥ आराधय न्हृषीकेशं जिग्ये मृत्युं सुदुर्जयम् ॥ ११ ॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे ।। नृदेवपितृभूतानि तेनासन्नतिविस्मिताः ॥ १२ ॥ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्मना ॥१३॥ तस्यैवं युंजतश्चित्तं महायोगेन योगिनः ॥ व्यतीयाय महान् कालो मन्वंतरषडात्मकः ॥ १४ ॥ एतत्पुरंदरो ज्ञात्वा सप्तमेऽस्मिन्किलांतरे ॥ तपोविशंकितो ब्रह्मन्नारेभे तद्विघातनम् ॥ १५ ॥ गंधर्वाप्सरसः कामं वसंतमलयानिलौ ॥ मुनये प्रेषयामास रजस्तोकमदौ तदा ॥ १६ ॥ ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे ॥ पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो ॥ १७ ॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलतांचितम् ।। पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयम् ॥१८॥ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितम् ॥ मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलम् ॥१९॥ वायुः प्रविष्ट आदाय हिमनिर्झरसीकरान् ॥ सुमनोभिःपरिष्वक्तो ववावुत्तंभयन्स्मरम्॥ ॥ २० ॥ उद्यच्चंद्रनिशावक्त्रः प्रवालस्तबकालिभिः ॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः ॥ २१ ॥

अग्न्यादिषु पंचसु हरिमर्चयन् ॥ ९ ॥ भैक्ष्यं गुर्वर्थमाहृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे नोचेत्सकृत्कदाचिदुपोषितो भवति ॥ १०॥ ११ ॥ तेन मृत्युजयेन ॥ १२ ॥ ध्वस्ताः क्लेशा रागादयो यस्य तेनांतरात्मना प्रत्याहृतमनसा ॥ १३ ॥ १४ ॥ तस्य तपोनिष्ठामितिहासेन वर्णयति एतदित्यादिना । अस्मिन्सप्तमे मन्वंतरे । तपसा मत्पदं ग्रहीष्यतीति विशंकितः ॥ १५ ॥ मुनये मुनिं भ्रंशयितुम् । रजसस्तोकमतिप्रियमपत्यं लोभो मदश्च तौ ॥ १६ ॥ १७ ॥ तदाश्रमपदं प्रविष्टो वायुर्ववाविति तृतीयेनान्वयः । पुण्यैर्द्रुमैर्लताभिश्चांचितं पूजितम् । पुण्यद्विजानामृषीणां कुलैराकीर्णम् । पुण्या अमला जलाशया यस्मिन् ॥ १८ ॥ मत्तभ्रमराणां संगीतं यस्मिन् । मत्तकोकिलानां कूजितं यस्मिन् । मत्ता बर्हिण एव नटास्तेषामाटोपो नृत्यसंभ्रमो यस्मिन् । मत्तानां द्विजानां पक्षिणां कुलैराकुलं व्याप्तम् ॥ १९ ॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन्वायुर्मलयानिलो ववौ प्रससार । उत्तंभयन्नुद्दीपयन् । तत्र वृक्षेषु प्रवेशान्मांद्यं हिमनिर्झरकणानामादानाच्छैत्य पुष्पपरिष्वंगात्सौगंध्यं चोक्तम् ॥ २० ॥ किंच ।

गुरुः ” इति मैत्रेयोक्तेश्च ॥ ९ ॥ नो चेत् कदाचिद्गुर्वनुज्ञाभावे उपोषितः कृतोपवास एव भवतीत्यर्थः ॥ १० ॥ स्वाध्यायो वेदाभ्यासः । अयुतायुतं कोटिः, असंख्यातान्येव वर्षाणि जग्मुरित्यर्थः ॥ ११ ॥ तेन मृत्युञ्जयरूपकर्मणा ॥ १२ ॥ आदिना द्वेषादिग्रहः । “ अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः ” इति पतञ्जलिसूत्रात् ॥ १३ ॥ षडित्यस्य पूर्वनिपाताभावो विशेषणविशेष्यभावव्यत्यासात् ॥ १४ ॥ अस्मिन्वैवस्वताख्ये । एतन्मार्कंडेयतपस आधिक्यम् । तद्विघातनं तपोनाशनम् । हे ब्रह्मन्निति वर्णिताभिप्रायम् ॥ १५ ॥ १६ ॥ ते गंधर्वाद्याः । तदाश्रमं मार्कंडेयाश्रमम् ॥ १७ ॥ पुण्यद्रुमा अश्वत्थादयः, पुण्यलता विष्णुक्रांताद्याः, पुण्यद्विजाः शुकसारसादयः । जलाशयाः सरोवराः ॥ १८ ॥ आटोपो नृत्यसंभ्रमः ॥ १९ ॥ तत्र वायौ ॥ २० ॥ अन्यदाह—किञ्चेति । कुसुमाकरो वसंतः । गां पृथ्वीं फलपुष्पाद्यैः पांति तर्पयंतीति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्वीयमानो गंधर्वैर्गीतवादित्रयूथकैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ २२ ॥ हुत्वाग्निं समुपासीनं ददृशुः शक्रकिंकराः ॥ मीलिताक्षं दुराधर्षं मूर्तिमंतमिवानलम् ॥ २३ ॥ ननृतुस्तस्य पुरतः स्त्रियोऽथो गायका जगुः ॥ मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमम् ॥ २४ ॥ संदधेऽस्त्रं स्वधनुषि कामः पंचमुखं तदा ॥ मधुर्मनो रजस्तोकं इंद्रभृत्या व्यकंपयन् ॥ २५ ॥ क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ २६ ॥ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनु कंदुकम् ॥ वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम् ॥ २७ ॥ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघमनीशस्य यथोद्यमः ॥ २८ ॥ त इत्थमपकुर्वंतो मुनेस्तत्तेजसा मुने ॥ दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः ॥ २९ ॥ इतींद्रानुचरैर्ब्रह्मन्धर्षितोऽपि महामुनिः ॥ यन्नागादहमो भावं न तच्चित्रं महत्सु हि ॥ ३० ॥

उदयंश्चंद्रो यस्मिंस्तन्निशावक्त्रं रजनीमुखं यस्मिन्सः । प्रवालस्तबकानामालयः श्रेणयो येषु तैः । गुप्यंति विटपैः संश्लिष्यंतीति गोपा द्रुमा लताश्च तेषां जालैः समूहैरुपलक्षित आविर्बभूव ॥ २१ ॥ किंच । तदा गीतवादित्रयूथकैर्गायकादिसमुदायिभिर्गंधर्वैरन्वीयमानः । तथा स्वःस्त्रियोऽप्सरसस्तासां यूथस्य पतिः । आत्तं चापमिषुश्च येन स स्मरश्च तत्रादृश्यत ॥ २२ ॥ दुराधर्षमभिभवितुमशक्यम् ॥ २३ ॥ २४ ॥ शोषणदीपनसंमोहनतापनोन्मादनाख्यानि पंचमुखानि यस्य तदस्त्रं संदधे । तदैव मधुर्वसंतः । रजस्तोकश्च । पुंस्त्वमार्षम् । अन्ये चेंद्रभृत्यास्तस्य मनो व्यकंपयन् ॥ २५ ॥ २६ ॥ किंच । वायुर्मलयानिलः पुंजिकस्थल्यास्तत्सूक्ष्मं वासो जहार ॥ २७ ॥ सर्वे तेषां कर्म । तत्र तस्मिन् । मोघं व्यर्थम् । अनीशस्य निर्दैवस्य ॥ २८ ॥ मुनेरपकुर्वंतः प्रतिकूलमाचरंतः । हे मुने ॥ २९ ॥ अहमोऽहंकारस्य । भावं विकारम् ॥ ३० ॥

गोपा आम्रादयः । यद्वा—गाः किरणानि पान्ति रक्षंति पत्रादिषु प्रकटयंतीति गोपा अश्वत्थादयस्ते च ते द्रुमाश्चेति गोपद्रुमाः ॥ २१ ॥ अन्यदाह—किंचेति । स्मरः कामः । तत्राऽऽश्रमे ॥ २२ ॥ अनलमग्निम् ॥ २३ ॥ तस्य मुनेः ॥ २४ ॥ २५ ॥ केशेभ्यो विस्रंसिता अधः पतिता स्रक् पुष्पमाला यस्यास्तस्याः ॥ २६ ॥ २७ ॥ तत्र मुनौ । अनीशो भाग्यरहितः ॥ २८ ॥ हे मुने इति—मननशीला हि कोमलस्वभावत्वात्प्रतीकारं न कुर्वंतीति भावः । प्रबोध्याहिमिति—न जानीमहेऽद्य किं भावीति भीताः । अत्राहिदृष्टांतेन प्रथमं कामं प्रति किंचित्क्रोधोऽपि जातः पश्चाद्विवेकेन कामक्रोधयोर्द्वयोरेवोपरामः कृत इत्यवसीयते ॥ २९ ॥ धर्षितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा निस्तेजसं कामं सगणं भगवान्स्वराट् ॥ श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परम् ॥ ३१ ॥ तस्यैवं युंजतश्चित्तं तपःस्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥३२॥ तौ शुक्लकृष्णौ नवकंजलोचनौ चतुर्भुजौ रौरववल्कलांबरौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवम् ॥३३॥ पद्माक्षमालामुत जंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ॥३४॥ ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥ ३५ ॥ स तत्संदर्शनानंदनिवृत्तात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुम् ॥ ३६ ॥ उत्थाय प्रांजलिः प्रह्व औत्सुक्यादाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ ३७ ॥ तयोरासनमादाय पादयोरवनिज्य च ॥ अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥ सुखमासनमासीनौ प्रसादाभिमुखौ मुनिः ॥ पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ॥ ३९ ॥ मार्कंडेय उवाच ॥ किं वर्णये तव विभो यदुदीरितोऽसुः संस्पंदते तमनु वाङ्मनइंद्रियाणि ॥ स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ॥ ४० ॥

निस्तेजसं म्लानवदनम् । स्वराडिंद्रः ॥ ३१ ॥ नरनारायणरूपो हरिः ॥ ३२ ॥ तावनुवर्णयति द्वाभ्याम् । ताविति । रौरवं कृष्णाजिनं वल्कलं चांबरं ययोस्तौ । पवित्रे पाण्योर्ययोस्तौ । त्रिवृत्त्रिगुणं नवतंतुकमिति वा त्रिवृद्बहिःपवमानमित्यादौ नवके प्रयोगात् । उपवीतकादीन्दधानौ ॥ ३३ ॥ वेदं दर्भमुष्टिम् । किंच साक्षात्तप एव तौ । तत्र हेतुः । तपत्तडिद्वर्णं देदीप्यमानविद्युत्संकाशं यत्पिशंगं रोचिस्तेन रूपेणौ मूर्तिमंतौ । तादृक् तेजोयुक्तमूर्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः । प्रांशू उन्नतौ ॥ ३४ ॥ उच्चैर्महताऽऽदरेण ॥ ३५ ॥ तयोः संदर्शनेन य आनंदस्तेन निर्वृता उपशांता आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य सः । न सेहे नाशक्नोत् ॥ ३६ ॥ आश्लिषन्नालिंगन्निव ॥ ३७ ॥ पादयोरवनिज्य पादौ प्रक्षाल्य । अर्हणेनार्घ्येण ॥ ३८ ॥ पादाभ्यां पादावानम्य गरिष्ठौ पूज्यतमौ तौ प्रति ॥ ३९ ॥ अंतर्यामिणस्तस्यैव प्राणादिप्रवर्तकत्वादात्मनस्तत्स्तुतावस्वातंत्र्यं पश्यन्नाह। किमिति। तव त्वां किमहं वर्णये कथं स्तौमि । यद्येन त्वयैवोदीरितः प्रेरितोऽसुः प्राणः संस्पंदते प्रवर्तते

विप्रकृतः ॥ ३० ॥ ३१ ॥ ३२ ॥ त्रिगुणमिति–"यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ॥" इति हेमाद्र्युक्तेस्त्र्युपवीतामित्यर्थः । यद्वा–त्रिवृदिति यज्ञोपवीतस्वरूपकथनमेवेत्याह–नवतंतुकमिति । अत्र प्रमाणमाह–त्रिवृद्बहिरिति । पवित्रे द्वित्रिकुशनिर्मिते पाण्योर्दक्षवामकरानामिकयोर्ययोस्तौ । यद्वा–सौवर्णे पवित्रे ग्राह्ये । तदुक्तमथर्वषष्ठानुवाके–"नैनं रक्षांसि न पिशाचाः सहंते देवानामोजः प्रथमं ह्येतत् । यो बिभर्ति दाक्षायणं हिरण्यं स जीवेषु कृणुते दीर्घमायुः" इति । कृणुते प्राप्नोति । 'कृवि–गतौ' तङार्षः ॥३३॥ पद्मानामक्षमालेति वैष्णवमालात्वबोधनायैव । जंतुमार्जनं सूक्ष्मकीटपिपीलिकादिमार्जनम्, तच्च नानातन्तुखण्डनिर्मितश्चामरविशेष इति केचित् । अपरे तु वस्त्रखंडमिति । अन्ये तु जंतूनां मार्जनं येन तथाविधं वेदं चेति वेदविशेषणतया व्याचख्युः । पिशंगं पीतम् । इत्यर्थ इति–तेजोविशेषेण मूर्तिधारि तप एवेमाविति प्रतीयमानाविति भावः ॥ ३४ ॥ दंडवत् साष्टांगम् ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ हे विभो इति–वर्णनं हि परिच्छिन्नवस्तुनो भवति विभोस्तु तद्वास्यायैवेति भावः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूर्ती इमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै ॥ नाना बिभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ॥ ॥ ४१ ॥ तस्यावितुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरजः स्पृशंति ॥ यद्वै स्तुवंति निनमंति यजंत्यभीक्ष्णं ध्यायंति वेदहृदया मुनयस्तदाप्त्यै ॥ ४२ ॥

तमनु च वागादयः स्पंदंति । अत्र हेतुः । वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादि श्रुतिभिश्चैतत्प्रसिद्धमित्यर्थः। न केवलं प्राकृतानां तनुभृतां किंत्वजशर्वयोश्चातः स्वस्य ममापि तथैव । एवं यद्यपि न कस्यापि स्वातंत्र्यमथापि दारुयंत्रवत्त्वत्प्रवर्तितैरपि वागादिभिर्भजतां पुंसां भावबंधुरात्मबंधुरसि न तु पित्रादिवद्देहमात्रबंधुः । अहो कृपालुता तवेत्यर्थः ॥ ४० ॥ ननु कथमावां प्राणादिप्रवर्तकौ धर्मपुत्रत्वादावयोरिति चेत्तत्राह । मूर्ती इति । हे भगवन् भगवतस्तव इमे मूर्ती त्रिलोक्याः क्षेमाय पालनाय तापविरमाय च दुःखनिवृत्त्यै मृत्युजित्यै मोक्षाय । न तु त्वं कस्यापि पुत्र इत्यर्थः । अत्र दृष्टांतः । यथेदं विश्वमवितुमन्यास्तनूर्मत्स्यकूर्मादिलक्षणा नाना अनेकप्रकारा बिभर्षि तद्वत् । न केवलं पालनमात्रं तव कर्म किंतु सृष्टिलयावपीत्याह । सृष्ट्वेति । तत्राप्यन्यनिरपेक्षत्वे दृष्टांतः । ऊर्णनाभिरिवेति ॥ ४१ ॥ यस्मादेवंभूतस्त्वं तस्मात्त्वांघ्रिमूलं भजामीत्याह । तस्येति । तस्यावितुः पालकस्य स्थावरजंगमानामीश्वरस्यांघ्रिमूलं भजामीति तृतीयश्लोकस्थस्यानुषंगः । कथंभूतमंघ्रिमूलम् । यत्स्थं यत्र स्थितम् । कर्मगुणकालानां रजो मलम् । अन्ये च पूर्वोक्तास्तापादयो न स्पृशंति । रुज इति वा पाठः । यतो वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयो यदेव स्तुवंति नितरां नमंति तदा

अत्र वागादिस्पंदकत्वे । अन्वयव्यतिरेकौ च यत्र श्रोत्रादिमत्त्वं तत्र तत्प्रवर्तकत्वं यथाऽस्मदादिषु, यत्र तन्न तत्र न तत्प्रवर्तकत्वं यथा घटादाविति ज्ञेयौ । इत्यर्थ इति–श्रुतिभिरयमर्थः स्फुटतया प्रतिपादित इति भावः । इत्यर्थ इति–अहो निर्निमित्तकृपालुता तवैवास्ति न देहबंधूनामिति भावः । विश्वनाथस्तु–यद्यप्येवं त्वं सर्वेषां बंधुरसि तथापि भजतां जनानां भावेन प्रेम्णा बंधुर्बंधुरिव वश्योसि प्राणेंद्रियादिभिस्त्वमेव स्वभजनं कारयसि पुनस्तादृशभजनस्य प्रत्युपकारासमर्थ ऋणीव भूत्वा प्रेमवश्यो भवसीत्यद्भुतं तव कृपावैभवमिति भावः ॥ ४० ॥ न केवलं स्वभजनं कारयितुं भक्तिपरिपाके च तद्वश्यो भवितुं तवावतारः किन्तु जगत्पालनार्थमपीत्याह–मूर्ती इति । अत्राक्षिपति–नन्विति । हे भगवन्निति–त्वं तु साक्षाद्भगवानेव लोकहिताय प्रादुष्कृतमूर्तीरिति भावः । इत्यर्थ इति–भक्ताभीष्टसंपादनायैव पुत्रादिभावेन प्रतीयसे न त्वं साक्षात्पुत्रादिरिति भावः । ‘ न माता न पिता तस्य ’ इत्यादिश्रीदशमोक्तेः । अत्र जगद्धिताय धृतमूर्तित्वे । तत्रापि सृष्ट्यादावपि । ऊर्णनाभिर्लूतातंतुर्यथाऽन्यमनपेक्ष्यैव स्वेनैव तंतुवितानं कृत्वा तत्र विहृत्य च पुनः संहरति तथा त्वमपीत्यर्थः ॥ ४१ ॥ अन्ये चेति बहुवचनोपपत्तये पूरितमिति । ‘ रुजः ’ इति पाठस्तु सुगम । एव कर्मादयो रुजः क्लेशाः यत्स्थं यदंघ्रितलस्थं भक्तजनं रजः दुराचारादिभवं मालिन्यञ्च न स्पृशन्तीत्यद्भुतं तव भक्तिवैभवमिति । कर्मेति–दुष्कृतं सुकृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नान्यं तवांघ्र्युपनयादपवर्गमूर्तेः क्षेमं जनस्य परितो भिय ईश विद्मः ॥ ब्रह्मा बिभेत्यलमतो द्विपरार्ध्यधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानाम् ॥ ४३ ॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य ॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थम् ॥ ४४ ॥ सत्त्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोऽस्य ॥ लीला धृता यदपि सत्त्वमयी प्रशांत्यै नान्ये नृणां व्यसनमोहभियश्च याभ्याम् ॥ ४५ ॥

ध्यै तत्प्राप्तये एव स्तवनादि कुर्वंति ॥ ४२ ॥ यतोऽन्यः पुरुषार्थो नास्तीत्याह नान्यमिति । अंघ्र्युपनयाच्छ्रीमच्चरणप्राप्तेरन्यं क्षेमं न विद्मः । परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य । तदेवाह । द्विपरार्धं धिष्ण्यं स्थानं यस्य स ब्रह्माऽपि ते कालस्य त्वद्भ्रूविजृंभरूपात्कालादलं बिभेति । अतः किमुत वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥ ४३ ॥ यस्मादेवं तत्तस्मात्तव पादमूलं भजामि । कथंभूतस्य । ऋतधियः सत्यज्ञानस्वरूपस्य । यद्वा सत्या धीर्यस्य यस्मिन्वा तस्यात्मगुरोर्जीवनियंतुरतः कारणात्परस्य । किं कृत्वा । आत्मच्छदि स्वात्मावरकमपार्थं च निष्फलमसच्च तुच्छमंत्यं च नश्वरमिदं देहादि हित्वा देहादिभजनं त्यक्त्वा । असच्चेत्कथं प्रतीयेत तत्राह । अभिज्ञमात्रम् । न ह्यत्यंतमसत्किंत्वात्ममात्रम् । न ततः पृथगस्तीत्यर्थः । नन्वपवर्गाय भवतु मद्भजनं फलांतरार्थं त्वन्यभजनं कार्यमेव तत्राह । तर्हीति । यदि त्वां भजति पुरुषस्तर्हि ते त्वत्त एव सर्वं मनीषितमर्थं विंदेतेति ॥ ४४ ॥ ननु ब्रह्मरुद्रावपि ममैव मूर्ती अतो मामेव किमत्यंतमाद्रियसे तत्राह । सत्त्वमिति । यदपि यद्यपि तवैव मायया कृता एता लीलास्त्वयैव धृतास्तथापि या सत्त्वमयी सैव प्रशांत्यै मोक्षाय न केवलमस्य प्रशांत्यभावमात्रमन्यभजने किंत्वनिष्टं च भवेदित्याह ।

प्राचीनमप्राचीनं वा कृतं न स्पृशाति पुष्करपलाशं जलमिवेति भावः । बहुत्वमार्षमिति विश्वनाथः ॥ ४२ ॥ यतोंघ्रिभजनात् । तदेव सर्वलोकभयत्वमेव । यतो ब्रह्मापि बिभेत्यतो हंतोः ॥ ४३ ॥ ज्ञानरूपस्य पादकल्पनमयुक्तं मत्वाह—यद्वेति । इत्यर्थ इति—न हि चेतनाधिष्ठानं विनाऽचितः प्रतीतिरुपपद्यत इति भावः । अत्राक्षिपति—नन्विति । “ अकामः सर्वकामो वा मोक्षकाम उदारधीः ” इत्युक्तेस्त्वत्त एव सर्वाभीष्टाप्तिर्भवतीति भावः ॥ ४४ ॥ पुनराक्षिपति—नन्विति । हे ईशेति—हे आत्मबंधो इति सम्बुद्धिद्वयेन हरेरेव भजनीयत्वमाह । यद्यप्युभयविधत्वं ब्रह्मरुद्रयोरप्यस्ति तथापि शुद्धसत्त्वप्रधानस्य तवैव कल्याणहेतुत्वं संगच्छते “ श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ” इत्याद्युक्तेरिति संबुद्ध्यभिप्रायः । एता ब्रह्मरुद्रादिलक्षणाः । अन्ये रजस्तमोमय्यौ लीले प्रशांत्यै नेत्यर्थः । अस्य रजस्तमोमय्यौ लीले भजतः पुंसः किन्त्वन्यस्य शुद्धसत्त्वेतरस्य भजनेऽनिष्टं च स्यात्, किं तदनिष्टं भवेत्त्राह—व्यसनेति । व्यसनं विपत्, मोहोऽज्ञानम्, भीः संसारभयञ्च याभ्यां रजस्तमोमयीलीलाभ्यां स्युरित्यर्थः । यद्वा—अन्ये सत्त्वादन्ये रजस्तमसी प्रशांत्यै न स्यातां, याभ्यां रजस्तमोभ्यां व्यसनादयः स्युः । च एवार्थे । विश्वनाथस्तु—सकामत्वे सति देवांतरमपि भजन्तु तद्भजनमपि मद्भजनमेव यतो देवा मन्मूर्तय एवेत्यत आह—सत्त्वमिति । हे आत्मबंधो प्राणनाथ अस्येंद्रचंद्रदेवमनुष्यादिमयस्य जगतः स्थित्यादिहेतवः सत्त्वादयो ये गुणास्तेऽपि मायामया एव किं पुनस्तत्कार्या इंद्राद्या नश्वराः । तेषां भजने मायातीतं त्वां कथं विंदेतेति भावः । यद्यप्यासु लीलासु मध्ये सत्त्वमयी लीला प्रशांत्यै धृता न त्वन्ये रजस्तमोमय्यौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्त्वेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजंति ॥ यत्सात्वताः पुरुषरूपमुशंति सत्त्वं लोको यतोऽभयमुतात्मसुखं न चाऽन्यत् ॥ ४६ ॥ तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे परदैवताय ॥ नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्मायायाऽऽवृतमतिः स उ एव साक्षादाद्यस्तेऽखिलगुरोरुपसाद्य वेदम् ॥ ४८ ॥

व्यसनेति ॥ ४५ ॥ तदेव सदाचारेण द्रढयति । तस्मादिति । हे भगवन् तव शुक्लां तनुं श्रीनारायणाख्याम् । अथ तावकानां च शुक्लां तनुं नराख्याम् । यद्यस्मात्सात्वताः सत्त्वमेव पुरुषस्येश्वरस्य रूपमुशंति मन्यंते न त्वन्यद्रजस्तमश्चेति । अत्र हेतुः । यतः सत्त्वाल्लोको वैकुंठाख्यः लोकत्वे सत्यप्यभयं च भोगे सत्यप्यात्मसुखं च ॥ ४६ ॥ अतस्त्वं प्रणमति । तस्मै नम इति । हंसाय शुद्धाय । संयतगिरे नियतवाचे । अथ च निगमेश्वराय वेदमार्गप्रवर्तकाय ॥ ४७ ॥ वेदार्थसंप्रदायप्रवर्तने हेतुत्वं वदन्स्तौति । यमिति । वितथाक्षपथैः कपटेंद्रियमार्गैर्भ्रमद्धीर्विक्षिप्तबुद्धिः पुमान्स्वेंद्रियादिषु नियंतृत्वेन संतमपि यं त्वां न वेद । दृक्पथेषु विषयेषु । बुद्धिविक्षेपे हेतुः । तन्मायया तस्य तवैव मायया

याम्यां व्यसनादयः संति तदप्येतास्तिस्रोऽपि लीला मायामय्य एवेति ॥ ४९ ॥ तदेव सत्त्वमयभजनमेव । यतः सत्त्वमेव प्रशांतिहेतुस्तस्माद्धेतोः । हे भगवन्निति भजनार्हतामाह । अत्र सत्त्वस्य पुरुषरूपत्वे । अतस्तव मायामयीमिंद्रादिमूर्तिमशुद्धां विहाय शुद्धसत्त्वरूपा एव तव त्वद्भक्तानां च मूर्तीरभिज्ञा उपासत इत्याह—तस्मादिति । यद्यतः सात्वता नारदाद्याः पुरुषरूपं विष्णुरूपं सत्वमुशंति । ननु कीदृशं सत्त्वं तत्राह—यतो लोकः स्वर्गादिकः न, यत्राभयं पातहेतुकभयाभावः, आत्मसुखमात्मभूतं सुखं च न तु कर्मफलं स लोको वैकुंठः । यतस्तत् शुद्धसत्त्वं न चान्यत्प्राकृतं सत्त्वम् ॥ ४६ ॥ अतः सात्वतोपास्यत्वात् । विश्वाय विश्वनाम्ने 'विश्वं विष्णुर्वषट्कारः' इति सहस्रनामसूक्तेः । सर्वनामसंज्ञा त्वत्राभिधात्वादेव । न नियता वेदलक्षणा वाग्यस्य तस्मै, तदेवाह—अथ चेति । अत एव विश्वगुरवे सर्वहितोपदेष्ट्रे । परा सर्वोत्कृष्टा चासौ देवता च परमात्मैव तद्रूपाय । नारायणाय सर्वप्रेरकाय । ऋषये सर्वज्ञाय । नराज्जीवाज्जीवादर्थोत्क्षराक्षरादुत्तमाय पुरुषोत्तमायेत्यर्थः । "यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" इति गीतासूक्तेः । "नरो जीवे शरीरे च घोटके च कपिध्वजे । धर्मात्मजे" इत्यभिधानात् पुरुषाय पुरुषाकारत्वेपि भूम्ने सर्वव्यापकाय, तदपि विश्वाय देवमनुष्यतिर्यगादिसर्वरूपाय । आविर्भावप्रयोजनमाह—विश्वगुरवे भक्तिज्ञानवैराग्याणामुपदेष्ट्रे । न केवलमुपदेष्टैवापि तु भजनीयश्चेत्याह—परदेवतायै इष्टदेवाय । द्वाभ्यामेकाकारत्वमाह—ऋषये ऋषिरूपनारायणाय ऋषिरूपनरोत्तमाय च। त्यक्तपरिग्रहत्वमाह—हंसाय। मौनशालित्वमाह—संयतगिरे, तदपि निगमाय वेदप्रवर्तकाय ॥ ४७ ॥ जगदपेक्षयाऽऽदिभवत्वादाद्यो ब्रह्मा त्वत्तः सर्वगुरोर्वेदं प्राप्यापि न वेद, अन्येषां का वार्त्तेति भावः । स उ सोऽपि, उरप्यर्थे । पूर्वं वेदप्राप्तेः पूर्वावस्थायामविद्वान् तव सकाशाद्वेदमुपसाद्यैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा यतंतः ॥ तं सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधम् ॥ ४९ ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे मार्कंडेयोपाख्याने नारायणस्तवो नामाष्टमोऽध्यायः ॥ ८ ॥ सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कंडेयेन
धीमता ॥ नारायणो नरसखः प्रीत आह भृगूद्वहम् ॥ १ ॥ श्रीभगवानुवाच ॥ भो भो ब्रह्मर्षिवर्योऽसि सिद्ध आत्मसमाधिना ॥ मयि भक्त्यानपा
यिन्या तपःस्वाध्यायसंयमैः ॥ २ ॥ वयं ते परितुष्टाः स्म त्वद्बृहद्व्रतचर्यया ॥ वरं प्रतीच्छ भद्रं ते वरदेशादभीप्सितम् ॥ ३ ॥ ऋषिरुवाच ॥ जितं
ते देवदेवेश प्रपन्नार्तिहराच्युत ॥ वरेणैतावताऽलं नो यद्भवान्समदृश्यत ॥ ४ ॥

आवृता आत्मनिष्ठा मतिर्यस्य स उ सोऽपि आद्य एव पूर्वमविद्वानेवाखिलगुरोस्तव त्वत्प्रवर्तितं वेदमुपसाद्य प्राप्य तं त्वां साक्षाद्वेद ॥४८॥ वेदेनैव त्वज्ज्ञानमित्युपपादयन्प्रण मति । यस्य तव दर्शनं निगमे भवति । कथंभूतम् । आत्मनस्तव रहो रहस्यं तस्य प्रकाशकम् । अन्यथा दुर्ज्ञेयतामाह । अजपरा ब्रह्ममुख्याः कवयोऽपि सांख्ययोगादि भिर्यतमाना यत्र त्वयि मुह्यन्ति । कुत इत्यत आह । सर्वेषां सांख्यादिवादिनां ये वादास्तेषां विषया भेदादयस्तेषां प्रतिरूपं तत्तदनुसारि शीलं स्वभावो यस्य तम् । कुतः। आत्मना देहादिसंघातेन निगूढो बोधो यस्य तम् । एवंभूतं महापुरुषं त्वां वंदे ॥ ४९ ॥ इति श्रीमद्भागवते म० द्वादशस्कंधे टीकायामष्टमोऽध्यायः ॥ ८ ॥
नवमे भगवन्मायादिदृक्षोर्दर्शने मुहुः ॥ मायाशिशोर्लयाब्धौ च मुनेर्निर्वेशनिर्गमैः ॥ १ ॥ भगवतः परितोषपूर्वकं तदपेक्षितवरदानं कथयितुमाह संस्तुत इत्यादिना ॥ १ ॥ आत्मसमाधिना चित्तैकाग्र्येण ॥ २ ॥ वयं ते परितुष्टाः स्मेति बहुवचनं सर्वदेवाभिप्रायेण । वरदेशादित्येकवचनं द्वयोरैक्याभिप्रायेण । प्रतीच्छ गृहाण ॥ ३ ॥ वरेण

यमिंद्रियविक्षिप्तधीर्न वेद तं वेदेत्यन्वयः । स्वामिचरणैराद्य एव, अविद्वानेवेति योर्थो गृहीतस्तत्र ब्रह्माक्षेपलब्ध इति ध्येयम् ॥ ४८ ॥ निगमो वेदः । "निगमो वाणिजे पुर्यां कटे वेदे वणिक्पथे" इति मेदिनी । अजो ब्रह्मा पर उत्कृष्टो येषु ते तथा । कुतो मुह्यंति—वादाः सिद्धांताः "सिद्धांते च विवादे च वादस्तोमे च वादिनाम्" इति निरुक्तिः । सर्ववादानुसारिशीलत्वे हेतुं पृच्छति—कुत इति । देहाद्यात्मवादनि रासेन यज्ज्ञानं जायते तं वंदे । बोधोऽत्र प्रत्यक्स्वरूपमेव देहाद्यात्मवादनिरासश्चाद्यपद्यव्याख्याशतके निरूपित एव । वेदशास्त्रज्ञेयत्वेऽपि दुर्ज्ञेयत्वमाह—यस्य तव दर्शनं ज्ञानं निगमं वेदशास्त्र एव।कीदृशम्—आत्मनस्तवरह स्यस्य प्रकाशकम् । तर्हि वेदज्ञा एव मां जानन्तु तत्र नेत्याह—मुह्यंतीति । यत्र वेदे ब्रह्ममुख्या अपि मुनयो यतंतोऽपि भवत्तत्त्वाज्ञानान्मुह्यंति वेदस्य परोक्षवादित्वाद्गुरुमात्रज्ञेयत्वमिति भावः । अत एव हेतुगर्भं विशिनष्टि— सर्वे वादा विवर्तादयो निगमोक्तास्तेषां विषयाश्च ये तेषां प्रतिरूपमेव न त्वनुरूपं शीलं चरित्रं यस्य तमत एव गूढो गुप्तीकृतो बोधस्स्वतत्त्वं येन तम् ॥ ४९ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धेऽष्टमोऽ ध्यायः ॥ ८ ॥ मुनेर्लयाब्धौ प्रलयकालिकसमुद्रे, मायया कृपया, शिशोः शिशुरूपस्य । निर्वेशः प्रवेशः, निर्गमो बहिरागमनम् (१) । भृगूद्वहं मार्कंडेयम् ॥ १ ॥ भोभो इति वीप्साऽऽदरे । हे ब्रह्मर्षिवर्येति—ब्रह्मर्षयो मद्दर्शनार्थं यतंत्येव न तु प्राप्नुवंति त्वया तत्प्राप्तमतस्तेषु त्वमेव श्रेष्ठोऽसीति भावः ॥ २ ॥ ३ ॥ ते जितं :तवोत्कर्षोऽस्त्येव स्वोत्कर्षेणैव ममाज्ञानमपहृतम् । देवा इंद्राद्यास्तेषां देवो ब्रह्मा तस्यापि त्वमेवेशोसीति भावः । प्रपन्नानां मादृशानामार्तिं संसृतिदुःखं हरतीति तादृशोऽपि त्वमेव । च्युतिर्नाशस्तद्रहितोऽपि त्वमेव, अहो एतादृशस्य तव दर्शने किमहं तुच्छं वरं याच इति भावः । एतावता एतत्प्रमाणकेन । एतावता कियतेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहीत्वाऽजादयो यस्य श्रीमत्पादाब्जदर्शनम् ॥ मनसा योगपक्केन स भवान्मेऽक्षगोचरः॥५॥ अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखामणे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदाम् ॥६॥ सूत उवाच ॥ इतीडितोऽर्चितः काममृषिणा भगवान् मुने ॥ तथेति स स्मयन्प्रागाद्बदर्याश्रममीश्वरः ॥७॥ तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव सः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥ ८ ॥ ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् ॥ क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः॥९॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः ॥ उपासीनस्य संध्यायां ब्रह्मन् वायुरभून्महान् ॥१०॥ तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्करालाः ॥ अक्षस्थविष्ठा मुमुचुस्तडिद्भिः स्वनंत उच्चैरभिवर्षधाराः ॥ ११ ॥ ततो व्यदृश्यंत चतुःसमुद्राः समंततः क्ष्मातलमाग्रसंतः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥ १२ ॥ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत् ॥ चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत्॥१३॥तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः॥आपूर्यमाणो वरषद्भिरंबुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समम्॥१४॥सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतम्॥स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जटा जडांधवत्॥१५॥

च्छंदयता त्वया जितमुत्कर्षो दर्शितः । मम तु वराकांक्षा नास्तीत्याह । वरणेति ॥ ४ ॥ यस्य तव श्रीमत्पादाब्जदर्शनं मनसाऽपि गृहीत्वा प्राप्य कृतार्था अजादयो भवंति स भवान्मेऽक्षगोचरो जातोऽस्ति किमतः परं वरेणेत्यर्थः ॥ ५ ॥ द्रक्ष्ये द्रष्टुमिच्छामि । लोकपालैर्ब्रह्मादिभिः सहितोऽयं लोको जनो यया सद्भिदां सति वस्तुनि भेदम् ॥ ६ ॥ तथेति द्रक्ष्यसीति । स ईश्वरः स्मयन्प्रागात् । पाठांतरे क्रियाविशेषणम् ॥ ७ ॥ तमेवार्थं मायादर्शनरूपम् । अग्न्यादिमूर्तिषु ॥ ८ ॥ भावद्रव्यैर्मनोमयैर्द्रव्यैः । क्वचित्कदाचित्प्रेमप्रसरसंप्लुतः प्रेमोद्रेकं प्राप्तः ॥ ९ ॥ मायादर्शनमाह तस्येत्यादिना ॥ १० ॥ तं वायुमनु बलाहका मेघा अभवन्नाविर्बभूवुः । ते च तडिद्भिः सहिता उच्चैः स्वनंतो गर्जंतः । अक्षो रथांगं तद्वत्स्थविष्ठा अभितो वर्षधारा मुमुचुः ॥ ११ ॥ चतुर्दिक्षु वर्तमानाः समुद्राः समीरवेगेनोर्मयस्तैर्भूतलं ग्रसंतः । उग्रा नक्रा येषु महाभया आवर्ता येषु गभीरो घोषो येषु ते च ते च ते च ॥ १२ ॥ आत्मना सह जरायुजादिचतुर्विधं जगदंतर्बहिश्चोपतापितं वीक्ष्य क्ष्मां जलाप्लुतां वीक्ष्य मुनिः समत्रसद्भयं प्राप । केनोपतापितम् । अद्भिः । कथंभूताभिः । अतिद्युभिरतिक्रांता द्यौर्याभिः खरैश्च सूर्यरश्मिभिर्वायुभिर्वेति शेषः । शतह्रदाभिश्च विद्युद्भिः । दीर्घत्वमार्षं छंदोऽनुसारेण ॥ १३ ॥ प्रभंजनेनाघूर्णितं प्रकंपितं वाः उदकं यस्मिन् सः । अप्यधाच्छादयामास । समं सह ॥ १४ ॥ सक्ष्मांतरिक्षं भूम्यंतरिक्षस्थप्राणिसहितम् । सदिवं

चेत्तत्राह–यदिति ॥ ४ ॥ इत्यर्थ इति–तव दर्शनात्परो न कोपि वरोऽधिकोऽस्तीति भावः ॥ ५ ॥ हे अंबुजपत्राक्षेति–तव स्वाभाविकतापहरदृष्टेर्न किंचिद्वक्तव्यमस्तीति भावः । पुण्यश्लोका अपि स्वयशोरक्षणाय विनैवान्यप्रेरणां परकार्यं कुर्वंति त्वं तु तेषां शिखामणिः परममुख्य इति भावः ॥ ६ ॥ पाठांतरे 'सस्मयम्' इति पाठे ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ अक्षो रथांगं चक्रम् । स्थविष्ठाः स्थूलाः ॥ ११ ॥ ततो महावृष्ट्यनंतरम् ॥ १२ ॥ "शंपाशतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा । तडित्सौदामनी विद्युत्" इत्यमरः ॥ १३ ॥ प्रभंजनो वायुः । वरषद्भिरिति वर्णविभागश्छांदसः ॥ १४ ॥ उर्वरितः अवशिष्टः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वता हतः ॥ तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमेषितः ॥ १६॥ क्वचिद्गतो महावर्ते तरलैस्ताडितः क्वचित् ॥ यादोभिर्भक्ष्यते क्वापि स्वयमन्योऽन्यघातिभिः ॥१७॥ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयम् ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥ १८ ॥ अयुतायुतवर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः ॥ १९ ॥ स कदाचिद्भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितम् ॥ २० ॥ प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम् ॥ शयानं पर्णपुटके ग्रसंतं प्रभया तमः ॥ २१ ॥ महामरकतश्यामं श्रीमद्वदनपंकजम् ॥ कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवम् ॥ २२ ॥ श्वासैजदलकाभातं कंबुश्रीकर्णदाडिमम् ॥ विद्रुमाधरभासैषच्छोणायितसुधास्मितम् ॥ २३ ॥

स्वर्गस्थदेवसहितम् । भागणा ज्योतिर्गणास्तैः सहितम् । जटां विक्षिप्य विकीर्य ॥ १५ ॥ परिश्रमेण इषितो गतः प्राप्त इत्यर्थः । 'इषु—सर्पणे' इत्यस्मात् ॥ १६ ॥ अन्योन्यघातिभिस्तद्भक्षणाय परस्परं युध्यद्भिः ॥ १७ ॥ १८ ॥ विष्णुमायावृतात्मन इति । स तथा दृष्टवानित्यर्थः ॥१९॥ ककुदुन्नतप्रदेशे न्यग्रोधपोतं कोमलवटम् ॥ २० ॥ तस्येशानदिक्शाखायां शिशुमपि ॥ २१ ॥ श्रीमद्रम्यं वदनपंकजं यस्य तम् । कंबुवत्त्रिरेखावृता ग्रीवा यस्य तम् । महोरस्कं विशालवक्षसम् । सुनासं शोभना नासा यस्य तम् । सुंदरे भ्रुवौ यस्य तम् ॥ २२ ॥ श्वासैरेजंतः कंपमाना अलकास्तैराभातं शोभितम् । कंबुवदंतर्वलयेन श्रीर्ययोस्तौ कंबुश्रियौ तयोः कर्णयोर्दाडिमपुष्पे यस्य

क्षुत्तृड्भ्यां परीतो व्याप्तः । मकरतिमिंगिलौ यादोभेदौ ' तिमिश्शतयोजनो मत्स्यः ' इति कोशात् । इत्यर्थ इति—धातोः सर्पणार्थत्वात्सर्पणं प्रसरणमिति व्याख्येयम् ॥१६॥ 'यादांसि जलजंतवः' इत्यमरः॥१७॥आदिनाऽऽधिग्रहः । अर्दित उपद्रुतः ॥ १८ ॥ इत्यर्थ इति—क्षणिकेऽपि कालेऽघटनघटनापटीयस्या विष्णुमायया तस्यानंताब्दप्रतीतिरभूदिति भावः । एतच्च ज्योतिःशास्त्रे प्रतिदिनं चंद्रादिगतौ मेषादिलग्नभोगे चावगम्यते । तथाहि—'खखाभ्राष्टवेदा ४८००० भभोगेन भक्ताः' इहोक्तघव्यात्मिका षष्टिगुणिता २८८०००० चंद्रगतिर्हि प्रत्येकं विभिन्नभभोगभक्ता ७९६।३९पञ्चत्रिंशत्पलाधिकषण्णवत्युत्तरसप्तशतघव्यात्मिकायाति । सा च षष्टिघव्यात्मकेऽहोरात्रे कथं मायां विना संगच्छेत । एवं प्रत्येकं मेषादिलग्नं किञ्चित्पलाधिकत्र्यादिघव्यात्मकं भवति तत्र प्रत्येकं षष्टिघव्यात्मकैस्त्रिंशांशाः कथं संगच्छेरन्, त्रिंशांशानां ह्यष्टादशशत १८०० घव्यः संति विनाऽघटनघटनापटीयसीं मायामेतत्कदाचिदपि न संगतं स्यादित्यलमप्रकृतचिंतया ॥ १९ ॥ " ककुदस्त्री ककुदोऽपि वृषांगे राजलक्ष्माणि । उच्चे वरे प्रधाने च " इति कोशात् । " पोतः शिशौ वहित्रे च गृहे वाससि कोमले " इत्यभिधानात् ॥ २० ॥ प्रागुत्तरयोर्मध्ये या दिक् सा प्रागुत्तरा तस्याम् । तस्य न्यग्रोधपोतस्य । " पुटः संपुटिते पत्रपात्रे च करनिर्मिते " इति निरुक्तिः ॥ २१ ॥ भ्रुवौ नेत्रोर्ध्वभागौ ॥ २२ ॥ कर्णयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मगर्भारुणापांगं हृद्यहासावलोकनम् ॥ श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरम् ॥ २४ ॥ चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजम् ॥
मुखे निधाय विप्रेंद्रो धयंतं वीक्ष्य विस्मितः ॥ २५ ॥ तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥ प्रहृष्टरोमाद्भुत
भावशंकितः प्रष्टुं पुरस्तं प्रससार बालकम् ॥ २६ ॥ तावच्छिशोर्वै श्वसितेन भार्गवः सोंतःशरीरं मशको यथाऽविशत् ॥ तत्राप्यदो न्यस्तमचष्ट
कृत्स्नशो यथा पुराऽमुह्यदतीव विस्मितः ॥ २७ ॥ खं रोदसी भगणानद्रिसागरान् द्वीपान्सवर्षान्ककुभः सुरासुरान् ॥ वनानि देशान्त्सरितः
पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः॥२८॥महांति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनम् ॥ यत्किंचिदन्यद्व्यवहारकारणं ददर्श
विश्वं स दिवावभासितम्॥२९॥हिमालयं पुष्पवहां च तां नदीं निजाश्रमं तत्र ऋषीनपश्यत् ॥ विश्वं विपश्यञ्छ्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्ल
याब्धौ ॥ ३० ॥ तस्मिन् पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानम् ॥ तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपांगनिरीक्षणेन ॥ ३१ ॥

तम् । विद्रुमतुल्याधरभासा ईषच्छोणायितं सुधातुल्यं स्मितं यस्य तम् ॥ २३ ॥ पद्मगर्भवत् आ ईषदरुणावपांगौ नेत्रप्रान्तौ यस्य तम् । हृद्यो हासो यस्मिंस्तदवलोकनं
यस्य तम् । श्वासैरेजंत्यश्चलन्त्यो वलयस्तिर्यङ्निम्नरेखास्ताभिः संविग्ना चंचला निम्ना गंभीरा नाभिर्यस्मिंस्तद्दलवदश्वत्थपत्रसंकाशमुदरं यस्य तम् ॥ २४ ॥ चारवोंगुलयो
ययोस्ताभ्यामुन्नीयाकृष्य धयंतं पिबंतम् ॥ २५ ॥ हृत्पद्मं च विलोचनांबुजे च प्रोत्फुल्लानि तानि यस्य सः । अद्भुतभावोऽत्याश्चर्यरूपं तेन शंकितः सन्नपि तं प्रष्टुं पुरा
प्रससार समीपं गतः ॥ २६ ॥ अदः इदं जगद्यथा पुरा प्रलयात्पूर्वं न्यस्तं विन्यस्तं दृष्ट्वा चातीव विस्मितः सन्नमुह्यत् ॥ २७ ॥ कृत्स्नशो दर्शनं प्रपंचयति खमित्यादिना ।
ककुभो दिशः । पुराण्याकरांश्च । खेटान्कर्षकग्रामान् । व्रजान्गोकुलानि । आश्रमांश्च वर्णांश्च तेषां वृत्तीश्चेत्यर्थः ॥ २८ ॥ नानायुगानि कल्पांश्च कल्पयति तैर्वा
कल्प्यत इति तथा तं कालं च । सदिव परमार्थ इवावभासितं तेनैव ॥ २९ ॥ ३० ॥ वटं च तोकं च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितयुक्तेनापांगनिरीक्षणेन निरीक्षितः

दाडिमपुष्पे तदाकारे भूषणे इति व्याख्येयम्, अन्यथा " कर्णे पुष्पं कटौ सूत्रं वेणीं शिरसि धारयन् । तावद्भवति चांडालो यावद्गंगां न मज्जति ॥ " इति स्मृतिविरोधः स्यात् ॥ २३ ॥ २४ ॥ चार्विति–" करार
विंदेन पदारविंदं मुखारविंदे विनिवेशयंतम् । वटस्य पत्रस्य पुटे शयानं बालं मुकुंदं प्रणतोऽस्मि नित्यम् ॥ " इति ग्रन्थांतरोक्तध्यानमन्त्राऽसूचि । मच्चरणारविन्दं कीदृशं–मधु यतो बहवो मद्भक्ता एतदास्वादाय यतंतेऽतोऽह
मप्येतदास्वादयिष्यामीतीव पिबंतम् ॥ २५ ॥ भाव्यते चिंत्यतेऽनेनेति भावो रूपम् ॥ २६ ॥ यावत्तत्समीपं गतस्तावदेव । श्वसितेनोच्छ्वासेन । भार्गवो मार्कंडेयः । मशकोऽतिसूक्ष्मो रक्तपजीवविशेषः । तत्राप्यंतश्शरीरे
ऽपि ॥ २७ ॥ सवर्षान् स खंडान् । इत्यर्थ इति–वर्णाश्रमवृत्तीर्भिक्षाकृष्यादिरूपा इति भावः ॥ २८ ॥ तेनैव भगवतैवावभासितं विश्वं स मार्कंडेयो दिवा दिवस इवावभासितं प्रकाशयुक्तं ददर्शेति वार्थः । दिवा
तेजसा वा " यद्भासा सर्वमिदं विभाति " इति श्रुतेः ॥ २९ ॥ तत्र निजाश्रमे । शिशोर्मायाशिशोः । श्वसिताच्छ्वसितेन बहिर्निरस्तो नुन्नः लयाब्धौ दर्शितप्रलयाब्धौ न्यपतत् ॥ ३० ॥ तस्मिन् पूर्वदर्शित एव ॥ ३१ ॥

१ पश्यतीति पाठान्तरम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजम् ॥ ३२ ॥ तावत्स भगवान् साक्षाद्योगाधीशो गुहाशयः ॥ अंतर्दध ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३३ ॥ तमन्वथ वटो ब्रह्मन् सलिलं लोकसंप्लवः ॥ तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंधे भगवन्मायादर्शनं नाम नवमोऽध्यायः ॥९॥ सूत उवाच ॥ स एवमनुभूयेदं नारायणविनिर्मितम् ॥ वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥ मार्कंडेय उवाच ॥ प्रपन्नोऽस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे ॥ यन्माययाऽपि विबुधा मुह्यंति ज्ञानकाशया ॥२॥ सूत उवाच ॥ तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् ॥ रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ॥ पश्येमं भगवन् विप्रं निभृतात्मेंद्रियाशयम् ॥ ४ ॥ निभृतोदझषव्रातं वातापाये यथार्णवम् ॥ कुर्वस्य तपसः साक्षात् संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥

सन् ॥ ३१ ॥ अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति । द्वयोरन्वयः । कथंभूतम् । नेत्राभ्यां हृदि धिष्ठितमधिष्ठितम् ॥ ३२ ॥ तावत्परिष्वंगलाभात्पूर्वमेव ऋषेस्तस्यांतर्हितो बभूव । तदुद्यमवैफल्ये दृष्टांतः । अनीशो निर्दैवस्तेन निर्मिता ईहा क्रीडा यथेति॥ ३३॥ अंतर्हितं भगवंतमनु वटः सलिलं लोकसंप्लवश्च तिरोधाय्यंतर्हितः । स च स्वाश्रम एव यथापूर्वं स्थित इति ॥ ३४ ॥ इति श्रीमद्भागवते द्वादशस्कंधे श्री० टीकायां नवमोऽध्यायः ॥९॥ दशमे शिव आगत्य मुनेस्तुष्टो वरानदात् ॥ तेन साकमतिप्रीत्या समाभाष्य सभाजयन् ॥ १ ॥ १ ॥ ज्ञानकाशया ज्ञानवत्प्रकाशमानया त्वद्भजनं विना विद्वांसोऽपि यस्य तव मायया ज्ञानिनो वयमित्यहंकारेण विमुह्यंतीत्यर्थः ॥ २ ॥ श्रीनारायण एव स्वमायादर्शनश्रांतं शिवरूपेण सांत्वयामास । तदाह तमेवमित्यादिना । निभृतात्मानं समाहितचित्तम् । रुद्राण्या भवान्या ॥ ३ ॥ निभृता निश्चला आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य तम् ॥ ४ ॥ निभृतं निश्चलमुदकं झषव्रातश्च यस्मिंस्तम् । संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु । यतो भवान्सि

अथातोऽनंतरम्।धिष्ठितं स्थापितम्।अभ्यकारलोपस्त्वार्षः।नेत्राभ्यां नेत्रद्वारा॥३२॥ "अनीशो भाग्यरहिते सर्वेशे दुर्बलेऽपि च" इति निरुक्तिः॥३३॥३४॥इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कंधे नवमोऽध्यायः ॥९॥ तेन मुनिना । सभाजयन्सत्कुर्वन् (१)। स मार्कंडेयः । वैभवमुत्कर्षं प्रभावं वा । तमेव नारायणमेव । "यस्यैते राजमातंगास्तस्यैवामी तुरंगमाः" इतिवत्समासांतर्गतस्यापि त्यदादिभिरामर्श इति ध्वनन्नारायणविनिर्मितमित्यत्र समासांतर्गतोपि नारायणशब्दस्तमेवेति तच्छब्देन परामृश्यत इति ॥ १ ॥ हे हरे इति–मायातत्कार्यहर्ता त्वमेव "मामेव ये प्रपद्यंते मायामेतां तरंति ते" इति गीतोक्तेरिति सम्बुद्ध्यभिप्रायः । इत्यर्थ इति–पुंसाहंकारनिवृत्त्यै सर्वत्र भगवद्दृष्टिरेव कार्या "सर्वभूतेषु मद्भावं पुंसो भावयतोऽचिरात् । स्पर्द्धाऽसूयातिरस्काराः साहंकारा वियंति हि ॥" इति श्रीमुखोक्तेरयं भावः । ज्ञानकाशया ज्ञाने वर्तमानेपि काशया प्रकाशितुं समर्थया, तत्राहमेव प्रमाणमभूवमिति भावः ॥ २ ॥ तं मुनिम् ॥ ३ ॥ अथ रुद्रकर्तृकदर्शनानंतरम् । हे भगवन्निति–सर्वमनोरथसंपादनसमर्थोसीति भावः ॥ ४ ॥ यद्यपि प्रथमांतपाठः प्राचुर्येण दृश्यते बहु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीभगवानुवाच ॥ नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥ ६ ॥ अथाऽपि संवदिष्यामो भवान्येतेन साधुना ॥ अयं हि परमो लाभो नृणां साधुसमागमः ॥७॥ सूत उवाच ॥ इत्युक्त्वा तमुपेयाय भगवान् सात्वतां गतिः ॥ ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ॥ ८ ॥ तयोरागमनं साक्षादीशयोर्जगदात्मनोः ॥ न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च॥९॥ भगवांस्तदभिज्ञाय गिरीशो योगमायया ॥ आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः ॥ १० ॥ आत्मन्यपि शिवं प्राप्तं तडित्पिंगजटाधरम् ॥ त्र्यक्षं दशभुजं प्रांशुमुद्यंतमिव भास्करम् ॥ ११ ॥ व्याघ्रचर्मांबरं शूलधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरुककपालपरशुं सह ॥ १२ ॥ बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः ॥ किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ १३ ॥ नेत्रे उन्मील्य ददृशे सगणं सोमयाऽऽगतम् ॥ रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ १४ ॥ तस्मै सपर्यां व्यदधात् सगणाय सहोमया ॥ स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः ॥ १५ ॥ आह चात्मानुभावेन पूर्णकामस्य ते विभो ॥ करवाम किमीशान येनेदं निर्वृतं जगत् ॥ १६ ॥

च्छिदः ॥ ५ ॥ आशिषोऽभ्युदयलक्षणाः । उत निश्चितम् । अत्र हेतुः । भक्तिमिति ॥ ६ ॥ संवदिष्यामः संवादं करिष्यामः ॥ ७ ॥ सात्वतां सताम् । गतित्वे हेतुः । ईशानं इति ॥ ८ ॥ रुद्धा धियोंतःकरणस्य वृत्तयो येन सः ॥ ९ ॥ १० ॥ न केवलं बहिरेवात्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः । कथं प्राप्तम् । सहसाऽकस्मादेव हृदि भातम् । कथंभूतम् । तडिद्वत्पिंगा जटा धारयतीति तथा तम् । त्रीण्यक्षीणि यस्य तम् । शूलादिभिः सहाक्षमालादीन्बिभ्राणमित्यन्वयः । अक्षमालादीनां द्वंद्वैक्यम् ॥ ११ ॥ १२ ॥ विस्मयपूर्वकं बहिर्दर्शनमाह । किमिदमिति ॥ १३ ॥ सोमया उमया सहागतं रुद्रं ददृशे । ततो ननाम ॥ १४ ॥ १५ ॥ पूर्णकामत्वं

पुस्तकेषु तथापि स उपमानोपमेययोर्विरुद्धविभक्तिकत्वाद्विरुद्ध इव भाति ‘ पश्येमम् ’ इत्युपमेये द्वितीयादर्शनात् । क्वचित्तु निभृतोदझषव्रातामिति द्वितीयांत एव पाठो दृश्यते । संसिद्धिः फलम् ‘ संसिद्धिः प्रकृतौ फले ’ इति कोशात् ॥ ५ ॥ अत्राऽनिच्छायाम् । आशिषोऽणिमाद्याः सिद्धीः । तर्हि मोक्षं देहीति तत्राह—मोक्षमपीति । तर्हि भक्तिं देहीति तत्राह—भक्तिमिति विश्वनाथः ॥ ६ ॥ यद्यप्ययं न किञ्चिदिच्छति अथापि तथापि ॥ ७ ॥ सात्वतां वैष्णवानां गतिर्गम्यः सर्ववैष्णवमुख्यत्वात् ‘ वैष्णवानां यथा शंभुः ’ इत्यग्रे वक्ष्यमाणत्वात् ‘ स सतां गतिः ’ इति पाठे तु सतामभीप्सितगतिप्रदायित्वाद्भक्तिर्न केवलं सतामेव गतिरपि तु सकामानामपीत्याह—ईशान इति।नात्र चित्रमित्याह—ईश्वर इति॥८॥९॥तत् तद्धीवृत्तिरोधनम् । तस्य गुहाकाशं हृदयाकाशम् । भगवांस्तदिति—स्वनिष्ठाभिव्यक्त्यर्थं स्वयं श्रीविष्णावंतर्हिते सतीति गिरिशस्य तद्व्युदासायोगात् । यद्वा—श्रीभगवाञ्शिवाभिप्रायं विज्ञाय योगमायया गिरिशः सन् मार्कंडेयहृदाऽऽकाशमाविशत्तत्र हेतुः—ईश्वर इति । इदमेवोक्तं स्वामिचरणैः—श्रीनारायण एव स्वमायादर्शनश्रांतं शिवरूपेण सांत्वयामासेति ॥ १० ॥ ११ ॥ अत्र द्वंद्वैक्ये पुंस्त्वमार्षम् ॥ १२ ॥ १३ ॥ स उमयेति छेदः । “ सोऽचि लोपे चेत् ” इति सलोपः ॥ १४ ॥ १५ ॥ विभो इति—विभुत्वादेव पूर्णकामोऽसीति भावः । ईशानेति—सर्वेश्वरस्य तव वयं किमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवणाद्दर्शनाद्वापि महापातकिनोपि वः ॥ शुध्येरन्नंत्यजाश्चापि किमु संभाषणादिभिः ॥ २५ ॥ सूत उवाच ॥ इति चंद्रललामस्य धर्मगुह्योपबृंहितम् ॥ वचोऽमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् ॥ २६ ॥ स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशम् ॥ शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् ॥ २७ ॥ ऋषिरुवाच ॥ अहो ईश्वरचर्येयं दुर्विभाव्या शरीरिणाम् ॥ यन्नमंतीशितव्यानि स्तुवंति जगदीश्वराः ॥ २८ ॥ धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ॥ आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च ॥ २९ ॥ नैतावता भगवतः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥ ३० ॥

णान् । आत्मसमाधानं चित्तैकाग्र्यम् । तप आलोचनम् । स्वाध्यायोऽध्ययनम् । संयमो वागादिनियमस्तैः ॥ २४ ॥ किंच श्रवणादित्यादि ॥ २५ ॥ चंद्रो ललामो भूषणं यस्य तस्य धर्मरहस्ययुक्तममृतास्पदं वचः कर्णाभ्यां पिबन्नातृप्यदलमिति नामन्यत । कर्णयोरमृतायनमिति वाऽन्वयः ॥ २६ ॥ शिवस्य वागेवामृतं तेन ध्वस्तः क्लेशपुंजो यस्य सः ॥ २७ ॥ इयं लीला दुर्विभाव्याऽवितर्क्या । यद्यया ईशितव्यानि स्वनियम्यानि यानि भूतानि तानि जगदीश्वराः स्वयं नमंति स्तुवंति चेति ॥ ॥ २८ ॥ अथवा लोकसंग्रहमात्रमेतादित्याह । धर्ममिति । प्रवक्तारोऽपि यत्स्वयं देहिनां धर्मं ग्राहयितुमाचरंति ॥ २९ ॥ नन्वेतत्स्वप्रभावतिरस्कारकं कथं मया क्रियते तत्राह । नैतावतेति । एतावता लोकसंग्रहमात्रेण । तैर्नमनादिभिः । कथंभूतैः । स्वमायामयी वृत्तिर्येषु तैर्भगवतो मायिनस्तवानुभावो न दुष्येत । यतः प्रसिद्धस्य मायिनः कुहकं कपटं यथा तथा एतानि नमनादीनि । अतस्तस्य तथा कुहकैरात्मानुभावो न दुष्यति तद्वत् । प्रदुष्येतानुभाव इति पाठे नकारस्य दृष्टांतेऽप्यनुषंगः ॥ ३० ॥

तथा च क्षत्रियवैश्यौ न ग्राह्यौ किन्तु केवलं विप्र एव ब्राह्मण इति । ब्राह्मणताविवरणन्तु ‘ जन्माद्यस्य ’ इति व्याख्याशत्यां विशेषतः कृतमस्तीत्युपरम्यते ॥ २४ ॥ अन्यदाधिक्यमाह—किञ्चेति । महापातकिनो ब्रह्मघ्नादयः पञ्च, किं पुनरन्य इत्यपिशब्दार्थः । अंत्यजाः कैवर्तादयः, किं पुनः क्षत्रियादयः । संभाषणादेः का वार्तेत्याह—किम्विति । आदिना स्पर्शनस्तवनादिग्रहः । वा युष्माकं ब्राह्मणानामित्यर्थः । यत्र कुत्रचिन्महत्त्वं तत्र सर्वत्र ब्राह्मणप्रसादावाप्तमेवेति ‘ विप्रप्रसादाद्धरणीधरोऽहं विप्रप्रसादात्कमलाकरोहम् ’ इत्यादिभगवदुक्तेः ॥ २५ ॥ इतीत्थम् । पिबन्नादरेण शृण्वन् ॥ तं शिवम् ॥ धर्मस्य प्रवक्तारोऽपि अनुमोदन्तेऽन्यांस्तत्र प्रवर्तयन्ति—क्रियमाणं स्तुवन्ति—धन्योऽयं धर्मो यश्चैतादृशैर्महद्भिरपि क्रियत इति धर्मस्तुतिर्धर्मकर्तृष्वेव पर्यवस्यति । धर्मः—‘ एकान्तभक्तः ’ इत्यारभ्य ‘ नात्मनश्च जनस्य ’ इत्यादि, गुह्यम्—‘ तद्युष्मान्वयमीमहि ’ इत्यादि, ताभ्यामुपबृंहितम् । नातृप्यदिति—नायं स्वस्तुत्योत्थ आनन्दः किन्तु स्तुतिमिषेणाऽस्मान्धर्ममेवाशिक्षयत्तस्मादेतादृशधर्मवता मया भवितव्यमित्युपदेशप्राप्त्युत्थ एव ज्ञेयः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ अत्राक्षिपति—नन्विति । यत इति अत इत्यनेनान्वेति । मायिन ऐन्द्रजालिकादेः । अनुभावो निश्चयः । अन्येभ्यो धनादिग्रहणलक्षणः । अत्र सन्दर्भः—तेषु मुख्यं भगवन्तमवलम्ब्य तत्र दोषान्तरं निरस्यति—नैतेति त्रिभिः । दोषाऽभावे हेतुः—स्वेषु भक्तेषु या माया कृपा तन्मयवृत्तिरिति मम भक्तपरम्परास्वेषा रीतिः प्रवर्तितेति कृपया प्रीतिविवशतयेत्यर्थः । अत्र व्यतिरेकेण दृष्टान्तः—मायिनः कुहकिनः कपटं यथा प्रदुष्यते तथा न दुष्यत इति । ॥ ३३ ॥
विश्वनाथस्तु—केनचिदैन्द्रजालिकेन स्वमुखात्कश्चिद्वानर उद्भाव्य स स्तूयते नमस्क्रियते च तेन तस्यानुभावो यथा न दुष्यते तथेति‘न दुष्यते’इति पाठे दृष्टान्ते नकारस्यानुषङ्गः।यद्यपि श्रीरुद्रेण तदीयस्तुत्यादयो न मायया कृतास्तद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः शिवाय शांताय सत्त्वाय प्रमृडाय च ॥ रजोजुषेऽप्यघोराय नमस्तुभ्यं तमोजुषे ॥ १७ ॥ सूत उवाच ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः ॥ परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥ १८ ॥ श्रीभगवानुवाच ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं दर्शनं येषां मर्त्यो यद्विंदतेऽमृतम् ॥१९॥ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः ॥ एकांतभक्ता अस्मासु निर्वैराः समदर्शिनः ॥२०॥ सलोका लोकपालास्तान् वंदंत्यर्चंत्युपासते ॥ अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः ॥ २१ ॥ न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ॥ नात्मनश्च जनस्यापि तद्युष्मान् वयमीमहि[१]॥ २२ ॥ न ह्यम्मयानि तीर्थानि न देवाश्चेतनोज्झिताः ॥ ते पुनंत्युरुकालेन यूयं दर्शनमात्रतः ॥ २३ ॥ ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम् ॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः ॥ २४ ॥

व्यनक्ति। येन त्वया जगन्निर्वृतं भवतीति ॥ १६ ॥ निर्गुणत्वेन त्रिगुणत्वेन च नमस्करोति। नमः शिवाय निर्गुणाय । सत्त्वाय सत्त्वाधिष्ठात्रे । अत एव प्रमृडयति सुखयतीति तथा तस्मै ॥ १७ ॥ १८ ॥ नोऽस्मत्तः। त्रयो ब्रह्मविष्णुमहेश्वराः। यद्येभ्यः। ते वयम् ॥ १९ ॥ वरदानादिना भवत्सेवैवास्माभिः क्रियते न त्वनुग्रहो जगद्वंद्यत्वाद्भवतामिति ब्राह्मणान्स्तौति ब्राह्मणा इत्यादि। ये साधवः सदाचाराः। शांता मत्सरादिरहिताः। निःसंगा निष्कामाः ॥ २० ॥ न केवलं त एव किंत्वहं चेत्यादि ॥ २१ ॥ पूज्यतमत्वे हेत्वंतरमाह। नेति। अण्वप्यणुमात्रमपि न चक्षते न पश्यंति तत्तस्मादेवंभूतान्युष्मान् ईमहि भजेम ॥ २२ ॥ २३ ॥ ब्राह्मणेभ्यो ब्राह्म

कर्तुं न शक्ता इति भावः। निर्वृतं प्राप्तानंदम् ॥ १६ ॥ अत एव सत्त्वाधिष्ठातृत्वादेव। मृडयति सुखयति 'मृड—सुखने' इति धातुः। अपिशब्दात्तमोजुषेऽप्यमूढायेत्यर्थः ॥ १७ ॥ १८ ॥ वरदानामिंद्रादिदेवानामीशाः स्वामिनः। अमोघं फलवत् ॥ १९ ॥ भूतवत्सला दयालवः, अत एव निर्वैराः। अस्मासु त्रिषु। समदर्शिनः अभेदबुद्धयः। क्रमसंदर्भस्तु—यतस्ते समदर्शिनस्तस्मान्मदादिषु या भिदा वर्तते तामण्वपि यथा स्यात्तथा नाचक्षत इति सत्यम्, तत्तेभ्योपि हर्य्येकांतभक्तान्युष्मान्वयमीमहि प्रियत्वेन जानीम इत्यर्थः। तदुक्तं तेनैव चतुर्थे—"अथ भागवता यूयं प्रियाः स्थ भगवान्यथा। न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित् ॥" इति। अभेदश्चेत्तर्हि मार्कंडेयस्य समाधिविरतिर्न स्यात्तत्राभेददृष्टेरुट्टंकनेपि 'स्वयञ्च हरीरीश्वरः' इत्यनेन हरेरेव प्राधान्यमुक्तं, तस्यैव स्वयमीश्वरत्वोक्तेः। प्रथमेऽपि—'पार्थिवाद्दारुणो धूमः' इत्यादिना। ब्राह्मेऽपि शिवेन तथैवोक्तम्—"यो हि मां द्रष्टुमिच्छेत ब्रह्मणं वा पितामहम्। द्रष्टव्यस्तेन भगवान्वासुदेवः प्रतापवान् ॥" परब्रह्मस्वरूपस्य तस्य ज्ञानेन सर्वज्ञानसंभवादिति ॥ २० ॥ त एव लोकलोकपाला एव। वंदंतीत्यार्षं परस्मैपदम् ॥ २१ ॥ एवम्भूतान् अभेददर्शिनः ॥ २२ ॥ अम्मयानि जलस्वरूपाणि तीर्थानि पुष्करादीनि किं न पुनंति किन्तु पुनन्त्येव, चेतनोज्झिता मृत्पाषाणमया देवा न पुनंति किन्तु पुनंत्येव, तदाह—ते तीर्थदेवा उरुकालेन बहुसेवनेन । यूयं ब्राह्मणाः। क्वचित् 'दर्शनादेव साधवः' इति पाठोऽपि स्थानांतरे पठ्यते, तत्र साधुशब्देन भगवन्निष्ठावन्तो वेदानुयायिन एव ज्ञेया न तु त्रिवर्णेतरा अपीति ॥ २३ ॥ ब्राह्मणशब्देन पारिभाषिकब्राह्मणशब्दो—ब्रह्माधीते वेद वा ब्राह्मण इत्येवंरूपो न ग्राह्य इत्याह—येऽस्मद्रूपं मुख्यमस्माकं रूपं वेदत्रयीरूपमात्मसमाधानादिभिर्बिभ्रति। संयम इंद्रियजयः। स्वाध्यायपदेनाध्यापनमपि गृह्यते।

---

१ चित्तैकाग्र्यादिभिः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ॥ गुणैः कुर्वद्भिराभाति कर्तृवत्स्वप्नदृग्यथा ॥ ३१ ॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलाया द्वितीयाय गुरवे ब्रह्ममूर्तये ॥ ३२ ॥ कं वृणे नु परं भूमन् वरं त्वद्वरदर्शनात् ॥ यद्दर्शनात् पूर्णकामः सत्यकामः पुमान् भवेत् ॥ ३३ ॥ वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ ३४ ॥ सूत उवाच ॥ इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा ॥ तमाह भगवाञ्शर्वः शर्वया चाभिनंदितः ॥ ३५ ॥

मायाचेष्टितं प्रपंचयति । सृष्ट्वेति । स्वप्नदृग्यथेत्यविद्याचेष्टिते दृष्टांतः ॥ ३१ ॥ त्रिगुणत्वेऽपि न जीववत्तदभिभूताय किंतु गुणानामात्मने नियंत्रे ॥ ३२ ॥ वरं वृणीष्वेति यदुक्तं तत्राह । कमिति । वरं दर्शनं यस्य तस्मात् । त्वत्तः परं कं नु वरं वृणे । यस्य तव दर्शनादवलोकनात्पूर्णकामः सर्वानंदसंदोहरूपः सत्यकामो यथेच्छं प्राप्तसर्वानंदः ॥ ३३ ॥ ३४ ॥ वरदानाय स्वयमेव प्रवृत्तः शर्वयोमया चाभिनंदितोऽनुमोदितः सन्नाह ॥ ३५ ॥

पि स्वस्तुत्या लज्जितेन मुनिना प्रयुक्तोऽयं दृष्टान्तो नानुपपन्नः॥३०॥अविद्यया स्वप्नं सृजतो जीवस्यापि वस्तुतस्तत्सम्बन्धो नास्ति किमुतेश्वरस्येति तात्पर्यत्राह—स्वप्नदृग्यथेति।दोषास्पर्शमेवाह युग्मेन।इदं विश्वं मनसा सङ्कल्पेनैव निमित्तेन गुणैरुपादानैः सृष्ट्वापि ततश्चात्मना स्वयं तदनुप्रविश्य प्रवेशेन स्थापयित्वापि तत्तदुपलक्षणत्वेन संहृत्यापि कर्तृवदेवाभाति न तु कर्तैवेति।तत्र हेतुत्वेन गुणान विशिनष्टि—कुर्वद्भिरिति।तत्सान्निध्यप्रभावेण चेतना इव गुणा एव सर्वं कुर्वन्ति न तु स्वयमिति सङ्कल्पस्याभासमात्रेण तदसम्भवात्।तत्राविद्यया स्वप्नं सृजतस्तदीयतटस्थांशस्य जीवस्यापि वस्तुतस्तत्सम्बन्धोनास्ति किमुत तस्येति दर्शयन्दृष्टान्तयाति—स्वप्नदृग्यथेति ॥३१॥ गुरवे,किम्भूताय—ब्रह्ममूर्तये ब्राह्मणरूपाय । " त्वं देवेषु ब्रह्मणोऽहं मनुष्येषु " इति जाबालश्रुतेः । एतेन ब्राह्मणस्यैव गुरुत्वं सूचितम् । केवलाय मुख्याय । अद्वितीयाय एकरूपाय । त्रयोऽमृताभयक्षेमरूपा गुणा यस्य तस्मै । गुणा ऐश्वर्यादयोऽप्यात्मानः स्वरूपभूता यस्य तस्मै । केवलाय प्रकृतिसङ्गशून्याय । अद्वितीयायातुल्यायातो गुरवे सर्वोपदेष्ट्रेऽतो वेदरूपायेति सन्दर्भः ॥ ३२ ॥ हे भूमन्निति—अनन्तफलदातुः सर्वेश्वरात्क—कं वरं वृणोमि न कमपीति भावः । यद्वा—वरः सर्वोत्कृष्टवरो दर्शनं यस्य तस्मात्त्वत्तः किं परमपरं वरं वृणे । तत्र हेतुः—यद्दर्शनादिति ॥ ३३ ॥ यदि वरदानेऽतीव हठस्तर्ह्येकं वरमपि वृणोमीति योज्यम् । भगवति श्रीहरौ त्वयि, तद्रूपे हरे च । यद्वा—मद्भक्तशिरोमणौ त्वयि परमतत्परे उपदेशगुरौ भक्तिं च वृणे, तत्परत्वं च स्वेनैव तेन षष्ठे चित्रकेतूपाख्यान उक्तम्—" अयं तस्य महाभागश्चित्रकेतुः प्रियोऽनुगः । सर्वत्र समदृक् शान्तो ह्यहञ्चैवाच्युतप्रियः ॥ " इति । स्वयं मार्कण्डेयेनाप्युक्तम्—" किं वर्णये तव विभो यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मनइन्द्रियाणि । स्पन्दन्ति वै तनुभृतामजशर्वयोश्च—" इत्यनेन नारायणर्षिं प्रति । किञ्च—' मुख्योऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामस्तेऽयं महर्षेऽस्तु भक्तिमांस्त्वमधोक्षजे॥आकल्पांताद्यशःपुण्यमजरामरता तथा॥३६॥ज्ञानं त्रैकालिकं ब्रह्मन् विज्ञानं च विरक्तिमत्॥ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यताऽस्तु ते ॥३७॥ सूत उवाच ॥ एवं वरान्स मुनये दत्त्वाऽगात्त्र्यक्ष ईश्वरः ॥ देव्यै तत्कर्म कथयन्ननुभूतं पुरा मुनेः ॥३८॥ सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः ॥ विचरत्यधुनाप्यद्धा हरावेकांततां गतः ॥ ३९ ॥ अनुवर्णितमेतत्ते मार्कंडेयस्य धीमतः ॥ अनुभूतं भगवतो मायावैभवमद्भुतम् ॥ ४० ॥ एतत्केचिदविद्वांसो मायासंसृतिमात्मनः ॥ अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ॥ ४१ ॥ य एवमेतद्भृगुवर्य वर्णितं रथांगपाणेरनुभावभावितम् ॥ संश्रावयेत्संशृणुयादुतावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ४२ ॥ इति श्रीभागवते महापुराणे द्वादशस्कन्धे दशमोऽध्यायः ॥ १० ॥

कामोऽयं सर्वोऽप्यन्यच्च यत्पुण्यं यश इत्यादि ब्रह्मवर्चस्विनस्ते भूयादित्युत्तरेणान्वयः । यतस्त्वमधोक्षजे भक्तिमान् ॥ ३६ ॥ ३७ ॥ तस्य कर्म तपआदि । मुनेः पुराऽनुभूतं यद्भगवन्मायावैभवं तच्च कथयन् ॥ ३८ ॥ अवाप्तो महायोगमहिमा येन सः ॥ ३९ ॥ एतन्मार्कंडेयस्य चरितं तेनानुभूतं च भगवन्मायावैभवं तेऽनुवर्णितम् ॥ ४० ॥ नन्वेवमप्यस्मत्कुलोत्पन्नस्यास्य सप्तकल्पायुष्ट्वं वृद्धैरुच्यमानं विरुद्धमेव तत्राह।एतन्मार्कंडेयेनानुभूतं भगवन्मायावैभवं नानाकल्परूपं कादाचित्कमीश्वरेच्छया तस्यैवाकस्मिकं न तु सर्वसाधारणम् । एतत्केचिदनादिबहुकालमावर्तितं दैवयुगसहस्रद्वयमानेन पुनःपुनः परिवर्तितं प्रचक्षते । के ते । नृणां संसृतिं सर्गप्रलयादिलक्षणामात्मनो भगवतो मायेत्येवमविद्वांसः विद्वांसस्तु मायाशिशोः श्वासोच्छ्वासाभ्यां सप्तकृत्वस्तदुदरप्रवेशनिर्गमतः सप्तकल्पत्वं तत्क्षणमात्रेणेति वदंत्यतो न विरोध इत्यर्थः ॥ ४१ ॥ संशृणुयात् । उ इति हर्षे। संश्रावयेद्वा । यौ तावुभौ तयोः कर्मवासनाकृता संसृतिर्न भवेदिति ॥ ४२ ॥ इति श्रीमद्भागवते द्वादशस्कंधे श्रीध०टीकायां दशमोऽध्यायः ॥ १० ॥

भूद्ब्राह्मणो गुरुः ' इति तृतीयस्कन्धे मैत्रेयेण विदुरं प्रत्युक्तम् । ' जन्मना ब्राह्मणो गुरुः ' इति श्रीदशमे नन्दराजेनापि श्रीगर्गं प्रत्युक्तमिति ॥ ३४ ॥ ३५ ॥ अयं हरिहराभेदभक्तितद्भक्तभक्तिरूपो मनोरथः । हे महर्षे इति–महर्षित्वात्तुभ्यं वरदानं सिद्धसाधनमेवेति भावः । यद्वा–अहमधोक्षजे भक्तिमान्स्यामित्ययं ते कामोऽस्त्विति योज्यम् ॥ ३६ ॥ ब्रह्मन्निति–वेदविद्ब्राह्मणत्वाद्बहुवरदानयोग्य एव त्वमिति भावः ॥ ३७ ॥ त्र्यक्षस्त्र्यंबकः ॥ ३८ ॥ महायोगस्य भक्तियोगस्य महिमाऽणिमादिसिद्धिपूर्वकं भगवत्साक्षात्कारलक्षणः । एकांततां नित्यभक्तिताम् ॥ ३९ ॥ ४० ॥ अत्राक्षिपति–नन्विति ॥ ४१ ॥ तावुभौ श्रोतृवक्तारौ तुल्यफलभागिनाविति शेषः । तदेवाह–तयोरिति । हे भृगुवर्येति–अहो स एवैकोऽस्माकं कुलश्रेष्ठ आसीदहं तु न तादृगंशभागपीति विमृशंतं शौनकं सूतस्तमपि प्रोत्साहयति–त्वं तु बहुजन्मसुकृतलभ्यसर्वपुराणेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनक उवाच ॥ अथेममर्थं पृच्छामो भवंतं बहुवित्तमम् ॥ समस्ततंत्रराद्धांते भवान्भागवततत्त्ववित् ॥ १ ॥ तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः ॥ अंगोपांगायुधाकल्पं कल्पयंति यथैव यैः ॥२॥ तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सताम् ॥ येन क्रियानैपुणेन मर्त्यो यायादमर्त्यताम् ॥३॥ सूत उवाच ॥ नमस्कृत्या गुरून्वक्ष्ये विभूतीर्वैष्णवीरपि ॥ याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ॥ ४ ॥ मायाद्यैर्नवभिस्तत्त्वैः स विकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयम् ॥ ५ ॥ एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥

एकादशे तु पूजार्थं महापुरुषवर्णनम् ॥ रवेर्व्यूहस्य चाख्यानं प्रतिमासं पृथक् पृथक् ॥ १ ॥ येनामर्त्यत्वमापन्नो मर्त्योऽसौ भार्गवोत्तमः ॥ तं पृच्छति क्रियायोगं सांगोपांगादिकल्पितम् ॥ २ ॥ अथेति हे भागवत यतो भवान्समस्ततंत्रराद्धांते तत्त्वविद्रहस्यज्ञः ॥ १ ॥ प्रष्टव्यमाह तांत्रिका इति । परिचर्यायामुपासनायां विषये । केवलस्य चैतन्यघनस्य । अंगानि पादादीन्युपांगानि गरुडादीन्यायुधानि सुदर्शनादीन्याकल्पाः कौस्तुभादयस्तेषां द्वंद्वैक्यम् । तद्यथा कल्पयंति यैश्च तत्त्वैः कल्पयंति तन्नो वर्णयेति ॥ २ ॥ ॥ ३ ॥ गुरूपदेशगम्यत्वादस्यार्थस्य तन्नमस्कारपूर्वकमाह । नमस्कृत्येति । विभूतीर्विराड्विग्रहाद्याः ॥ ४ ॥ अंगादिकल्पनां भूरादिभिर्दर्शयितुं प्रथमं तावद्यथा कल्पयंतीति प्रश्नस्य वैराजरूपेणेत्युत्तरं वक्तुं विराड्विग्रहमाह । मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्त्वैः । विकारा एकादशेंद्रियाणि पंचमहाभूतानीति षोडश । तन्मयो विराट् स प्रसिद्धो निर्मितः । यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते । अनेनांगादिकल्पनासौलभ्यं दर्शितम् ॥ ५ ॥ एतद्वै पौरुषम् । पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात्तदभेदविवक्षया तस्य रूपमुच्यते । अंगकल्पनामाह भूः पादावित्यादित्रिभिः । भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ॥ ६ ॥

हासश्रोतृत्वाद्भृगुवंशे वर्य एवेति भावः ॥ ४२ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे दशमोऽध्यायः ॥ १० ॥ महापुरुषो विराट् । व्यूहो रचनाविशेषः (१)। येन क्रियायोगेन । असौ बुद्धिसंनिहितो मार्कंडेयः । अमृतत्वं चिरजीवित्वम् । "आभूतसंप्लवत्वं च ह्यमृतत्वं प्रभाषते" इति स्मृतेः (२) । अथ सर्वशास्त्रश्रवणोत्तरम् । इमं बुद्धिस्थं क्रियायोगम् । हे भागवतेति—भागवता एवैतत्तत्त्वं जानंतीति भावः ॥ १ ॥ तांत्रिकाः पञ्चरात्राद्यागमनिपुणाः । केवलस्य पञ्चायतनपूजायां मुख्यस्य ॥ २ ॥ तदंगोपांगादिकल्पनम् । बुभुत्सतां बोद्धुमिच्छताम् ॥ ३ ॥ आदिना शंकरनारदादिग्रहः ॥ ४ ॥ अनेन विराड्विग्रहत्वकथनेन ॥ ५ ॥ एतत्प्रत्यक्षसिद्धम् । पुरुषस्य भगवतो मायिकं रूपं न तु स्वरूपमित्यर्थः । किमंगं कया विभूत्या कल्पितमिति चेत्तत्राह—भूरिति । सच्चिदानंदरूपस्य भगवतः पादयोर्या विभूतिर्भूस्तयास्य पादौ कल्पिताविति तदभेदनिर्देशाद्भूरेव पादावेवं सर्वत्र ज्ञेयम् । एवं च विराट्पुरुषस्य पादादिभावनया सच्चिदानंदपुरुषस्य पादादीनि स्मर्तव्यानि । यथा मत्प्रभुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजापतिः प्रजननमपानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः ॥ ७ ॥ लज्जोत्तरोऽधरो लोभो दंता ज्योत्स्ना स्मयो भ्रमः ॥ रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥ ८ ॥ यावानयं वै पुरुषो यावत्या संस्थया मितः ॥ तावानसावपि महापुरुषो लोकसंस्थया ॥ ९ ॥ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभाव्यापिनी साक्षाच्छ्रीवत्समुरसा विभुः ॥ १० ॥ स्वमायां वनमालाख्यां नानागुणमयीं दधत् ॥ वासश्छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरम् ॥ ११ ॥ बिभर्ति सांख्यं योगं च देवो मकरकुंडले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरम् ॥ ॥ १२ ॥ अव्याकृतमनंताख्यमासनं यदधिष्ठितः ॥ धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥ १३ ॥ ओजःसहोबलयुतं मुख्यतत्त्वं गदां दधत्॥ अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम् ॥ १४ ॥ नभोनिभं नभस्तत्त्वमसिं चर्म तमोमयम् ॥ कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिम् ॥ १५ ॥ इंद्रियाणि शरानाहुराकूतीरस्य स्यंदनम् ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मताम् ॥ १६ ॥

प्रजननं मेढ्रम् । अपानः पायुः ॥ ७ ॥ ८ ॥ अनुक्तमन्यदप्येवमूह्यमित्याह । यावानयं व्यष्टिः पुरुषः स्वमानतः सप्तवितस्तिः संस्थयाऽवयवसन्निवेशेन मितः परिमितः ॥ ९ ॥ भूषणादीन्याह कौस्तुभेत्यादिना । स्वात्मज्योतिः शुद्धं जीवचैतन्यम् । या तस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं बिभर्ति ॥ १० ॥ त्रिवृत्स्वरं त्रिमात्रं प्रणवम् ॥ ॥ ११ ॥ पारमेष्ठ्यं पदं ब्रह्मलोकम् ॥ १२ ॥ अव्याकृतं प्रधानम् । यदधिष्ठितोऽधिष्ठाय स्थितः । तदासनभूतं पद्मं सत्त्वं सत्त्वगुणः ॥ १३ ॥ मुख्यतत्त्वं प्राणतत्त्वम् । "प्राणो वै मुख्यः" इति श्रुतेः । दरवरं शंखम् ॥ १४ ॥ १५ ॥ आकूतीः क्रियाशक्तियुक्तं मनः । अस्य रथस्याभिव्यक्तिं बहिरभिव्यक्तं रूपम् ।

स्वपादाभ्यां पृथिवीं बिभर्ति शिरसा दिवं तथान्यानि भगवदंगानि सर्ववस्तूनि, एवं सर्वभावनापि भगवद्भावनैवेति ज्ञेयम् ॥ ६ ॥ प्रजन्यतेऽनेनेति प्रजननम् ॥ ७ ॥ उत्तर उपरितनः । स्मयो हासः । भ्रमो भ्रमहेतुर्माया ॥ ८ ॥ ९ ॥ व्यपदेशो मिषः "व्यपदेशो मिषेऽस्थाने स्वरूपे पक्षिवर्जिते" इति निरुक्तिः । अंगान्युक्त्वा भूषणान्याह—कौस्तुभस्वरूपेण शुद्धजीवचैतन्यं कौस्तुभस्यैव विभूतिं धत्ते । तथाहि—"अकारेणोच्यते विष्णुः श्रीरुकारेण कथ्यते । मकारस्तु तयोर्दासः पञ्चविंशः प्रकीर्तितः ॥" इति भक्तिविवेकोक्तेः । स्वदासं भगवान् हृदि धत्ते इत्यभिप्रेत्यैव "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्" 'भगवान्भक्तभक्तिमान्' इत्याद्युक्तम् । कौस्तुभस्यैव प्रभा व्यापिनी दक्षिणस्तनोर्द्ध्वपर्यंतगामिनी या तामेव श्रीवत्सं दक्षिणावर्त्तमृणालतंतुसूक्ष्मरोमावल्याकारं बिभर्ति, यस्य विभूतिर्धर्मः, तथैव वामस्तनोर्द्ध्वलक्ष्मीरेखानिकषाश्मनि कानकी रखेवानुक्तापि ज्ञेया, यस्या विभूतिश्च राजादिसंपत् ॥ १० ॥ त्रिगुणात्मिका माया वनमालाया विभूतिः, छंदांसि पीतांबरस्योपवीतस्य प्रणवस्त्रिमात्रश्च विभूतिरेवमेव सर्वत्र स्वविभूत्या सामानाधिकरण्यम् ॥ ११ ॥ सांख्यं ज्ञानम् । योगं कर्म ॥ १२ ॥ अव्याकृतं प्रधानमनंतस्यैव विभूतिस्तस्यैव विश्वहेतुत्वम् "यमाहुरस्य स्थितिसर्गसंयमं त्रिभिर्विहीनं यमनंतमद्वयम्" इति; "उत्पत्तिस्थितिलयहेतवोस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयाऽऽसन्" इति पंचमोक्तेः । वनमालाविभूतिर्माया तु ततोपि मूलभूता ज्ञेया ॥ १३ ॥ १४ ॥ नभोनिभं नभोवन्निर्मलम् । असिं नंदकम् । तमोमयं तमोगुणवदाच्छादकम् । पुण्यकर्मस्वरूपे इषुधी ॥ १५ ॥ इत्यर्थ इति—वरदमुद्रया वरदत्वमभयदमुद्रयाऽभयदत्वं च भावयेदिति भावः । बाहुप्रसारणपूर्वकं दक्षहस्तस्य विस्तृतस्योत्तानीकरणेनाश्वासनं वरदमुद्रा भवति, तस्य तथैव न्युब्जीकरणेनाश्वासनमभयदमुद्रा भवतीति विवेकः। एवमन्या अपि ज्ञेयाः॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंडलं देवयजनं दीक्षा संस्कार आत्मनः ॥ परिचर्या भगवत आत्मनो दुरितक्षयः ॥ १७ ॥ भगवान्भगशब्दार्थं लीलाकमलमुद्वहन् ॥ धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् ॥ १८ ॥ आतपत्रं तु वैकुंठं द्विजा धामाकुतोऽभयम् ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषम् ॥ १९ ॥

मुद्रया धृतयाऽर्थक्रियात्मतां वरदाभयदादिरूपत्वं बिभर्ति । तत्तन्मुद्रया तथातथा भावयेदित्यर्थः॥ १६ ॥ मंडलं देवयजनं देवपूजाभूमिं सूर्यमंडलत्वेन भावयेदित्यर्थः । अंतर्वह्निमंडलं वा । दीक्षासंस्कार आत्मनो गुरुकृतां मंत्रदीक्षामेवात्मनस्तत्पूजायोग्यतां भावयेदित्यर्थः । परिचर्येति भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयायेत्येवं भावयेदित्यर्थः ॥ १७ ॥ पूर्वमासनपद्ममुक्तमिदानीं करस्थं पद्ममाह । भगवानिति । भगशब्दार्थमैश्वर्यादिषाड्गुण्यम् ॥ १८ ॥ हे द्विजाः एकवचनांतो वा पाठः । अकुतोभयं

इत्यर्थ इति—सूर्यमंडलं यथा—" ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः " इत्याद्युक्तेर्भगवद्ध्यानाधिष्ठानं, तथेदं क्षेत्रमपि मत्पूजाधिष्ठानमिति चिंतयेदिति भावः । यद्वा—एकादशस्कन्धोक्तरीत्या हृत्कंजकर्णिकामध्ये सोमसूर्याग्नीनामुत्तरोत्तरचिंतया ' वह्निमध्ये स्मरेद्रूपम् ' इत्युक्तेस्तदेव वह्निमंडलं देवपूजाभूमिं चिंतयेदित्यर्थः । इत्यर्थ इति—अदीक्षितस्य पूजानर्हत्वादिति भावः । तदुक्तम्—" दिव्यं ज्ञानं यतो दद्यात्कुर्यात्पापस्य संक्षयम् । तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तंत्रवेदिभिः ॥ " इति । किञ्च—सर्वाश्रमेषु दीक्षाया आवश्यकत्वमपि—" दीक्षामूलो जपः सर्वो दीक्षामूलं परं तपः । दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन् ॥ अदीक्षिता ये कुर्वंति जपपूजादिकाः क्रियाः । न भवंति श्रियस्तेषां शिलायामुप्तबीजवत् ॥ देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः । तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥ गुरोरभावे मंत्राणां पुस्तकं गुरुमाचरेत् । न चायोग्याद्गुरोर्दीक्षा ग्रहीतव्या कदाचन ॥ दक्षिणामूर्तितो यद्वा दीक्षा ग्राह्या तथा घटात् ॥ " इति । " अदीक्षितो हि मरणे रौरवं नरकं व्रजेत् " इति च । यत्तूक्तम् " कल्पे दृष्ट्वा तु यो मंत्रं गृह्णाति हि नराधमः । मन्वंतरसहस्रेषु निष्कृतिर्नैव विद्यते ॥ " इति तत्सद्गुरुसत्त्वे पुस्तकाद्दीक्षा न ग्राह्येतिपरमिति तंत्रसारे । सद्गुरुनिर्णयस्तु ब्रह्मवैवर्तीयकृष्णखंडत्र्यशीतितमाध्याये—" तेजीयांसं गुरुं कुर्यात्सर्वतो रक्षितुं क्षमम् । वयोयुक्तं च विद्वांसं विप्रं भार्यासमन्वितम् ॥ वैष्णवं च कुलीनं च स्वाचारं बोधने क्षमम् ॥ " इति । विपक्षे दोषोऽपि तत्रैवोक्तः—"विद्याहीनाद्भवेन्मूढो मंत्रग्राही ह्यपंडितात् । जातिहीनात्क्षयः प्रोक्तो व्याधिनो व्याधियुक् तथा ॥ वंशहीनाद्वंशहीनो भार्याहीनः स्त्रिया रहात् । तस्मात्सर्वप्रयत्नेन विचार्य गुरुमाचरेत् ॥ " इति । किञ्च—" प्रमादाद्यदि जायेत पुंसोऽयोग्यो गुरुर्मुने । तं त्यक्त्वाऽपचितिं कृत्वा कुर्याद्योग्यं गुरुं पुनः ॥ " । प्रायश्चित्तं तु—" विप्रस्य क्षत्रियगुरौ गायत्र्या लक्षमीरितम् । वैश्ये तु द्विगुणं शूद्रे दशलक्षं प्रकीर्तितम् ॥ क्षत्रस्य तु गुरौ वैश्ये लक्षमेव प्रकीर्तितम् । शूद्रे तु दशलक्षं तद्वैश्यस्य शृणु भो मुने ॥ शूद्रे गुरौ रुद्रलक्षं गायत्र्याः परिकीर्तितम् ॥ " इति वारतांतविः । इत्यर्थ इति—हरिपूजयैव सकलपापक्षयो भवत्यतः सैव कार्येति भावः । " पापौघानां प्रशमनं पूजनं सर्वदा हरेः " इत्याद्युक्तेः परिचर्याया दुरितक्षय एव विभूतिरिति भावः ॥ १७ ॥ " ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतींगना " इति स्मृत्युक्तमैश्वर्यादिषाड्गुण्यमित्यर्थः । उद्वहन्, भवतीति शेषः । एवं सति भिन्नवाक्यत्वेन भगवच्छब्दपौनरुक्त्यं न भवतीति भगशब्दस्यार्थचतुष्कम् । लीलाकमलं दधदिति—ऐश्वर्यश्रीज्ञानवैराग्याणि प्राकृतानि लीलाकमलस्य विभूतयः, धर्मं यशश्च प्राकृतं चामरव्यजनयोर्विभूती, परंतु प्राकृताप्राकृतयोरभेदमेव भावयेदिति तात्पर्यम् ॥ १८ ॥ हे द्विजा इति—गणापेक्षं बहुत्वं पूजायां वा । एकवचनांतपाठे तु गणमुख्यशौनकविषयैव संबुद्धिरिति मदुक्तपूजायां मुख्याधिकारो द्विजस्यैवेत्यभिप्रायः । ' ब्रह्मलोकः सनाऽतनः ' इत्युक्तिमाश्रित्याह—यद्वेति । यद्यपि मंत्रे ' त्रिवृत्ते शिरः ' इत्युक्तेस्त्रिवृतो वेदस्य गरुत्मच्छिरस्त्वमुक्तं तथापि " मुखमर्द्धं शरीरस्य सर्वं वा मुखमुच्यते " इति न्यायेन शिरसोऽपि सर्वशरीरत्वमायातीति । एतेन वेदोक्तयागादिर्गरुडस्यैव विभूतिरित्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तंत्रमूर्तिर्विदितः पार्षदाधिपः ॥ २० ॥ नंदादयोऽष्टौ द्वास्थाश्च तेऽणिमाद्या हरेर्गुणाः ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयम् ॥ अनिरुद्ध इति ब्रह्मन्मूर्तिव्यूहोऽभिधीयते ॥ २१ ॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः ॥ अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते ॥२२॥ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयम् ॥ बिभर्ति स्म चतुर्मूर्तिर्भगवान्हरिरीश्वरः॥२३॥ द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक्स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति पातीत्याख्ययाऽनावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलक्ष्यः ॥ २४ ॥

कैवल्यं धाम गृहमभजत् । यद्वा वैकुंठस्य विशेषणमकुतोभयं यद्धामेति । त्रिवृत् ऋग्यजुःसामरूपो वेदः । “ सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिरः ” इत्यादिमंत्रलिंगात् । यज्ञं यज्ञरूपं पुरुषम् । “ यज्ञो वै विष्णुः ” इति श्रुतेः ॥ १९ ॥ अनपायिनी हरेः शक्तिः । तत्र हेतुः साक्षादात्मनः स्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः । तंत्रमूर्तिः पंचरात्राद्यागमरूपः । येऽणिमादयोऽष्टौ गुणास्ते हरेर्द्वारपाला नंदादयः ॥ २० ॥ तस्यैव चतुर्व्यूहोपासनामाह । वासुदेवादिशब्दो पुरुषः श्रीनारायण एव स्वयं मूर्तिभेदे रुपास्य इत्यभिधीयते ॥ २१ ॥ तस्यैवाध्यात्मनि चतुर्धोपासनामाह । स एव भगवान्विश्वादिशब्दैर्वृत्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते । तद्वृत्त्युपाधीनाह अर्था बाह्या इंद्रियं मनः आशयस्तदुभयसंस्कारयुक्तमज्ञानं ज्ञानं त्रितयसाक्षि तैः ॥ २२ ॥ उक्तचतुर्व्यूहद्वयोपासनेऽपि पूर्वोक्तमंगाद्युपासनमाह । अंगेति । अंगादिभिरुपलक्षितो भगवान्हरिर्वासुदेवादिचतुर्मूर्तिः सन्विश्वादिचतुष्टयं बिभर्ति स्म । विश्वादिभावेऽपि तन्नियंतुस्तस्य न जीवत्वमित्याह । विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥ २३ ॥ तस्यैव ब्रह्मादित्रिमूर्तितामाह । द्विजऋषभेति । स एष एक एव भगवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादि हेतुत्रयम् । वस्तुतो भेदाभावेऽप्येतज्जगत्स्वगतमायया सृजति हरति पातीति कृत्वाऽऽख्यया ब्रह्मादिरूपयानावृताक्षोऽनाच्छन्नज्ञानोऽपि विवृत इव भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्नः। अत्र विद्वदनुभवं प्रमाणयति । यतस्तत्परैरात्मत्वेनैव लभ्यत

अकुतोभयं वैकुंठं छत्रं, लोके यन्निर्भयत्वं प्रतीयते तत्खलु छत्रस्यैव विभूतिरिति । छत्रवत्संसारतापवारकत्वाद्वैकुंठस्येत्यर्थः ॥ १९ ॥ विष्वक्सेन इति पंचरात्राद्यागमो विष्वक्सेनस्य विभूतिः। अनपायिनी नित्ययोगिनी साक्षात्स्वरूपभूता शक्तिः आह्लादिनीशक्तेर्विभूतिर्लौकिकः स्वर्गाद्यानंद उद्यः । तत्राऽनपायिनीत्वे । इत्यर्थ इति–शक्तिशक्तिमतोरभेदोपचारादिति भावः ॥ २० ॥ यस्यांगोपांगान्युक्तानि तस्यैवेत्यर्थः । वासुदेव इत्यादिदिक्चतुष्टयगतश्चतुर्व्यूहः । स्वयं पुरुषो भगवानेवेत्यर्थः ॥ २१ ॥ अध्यात्मनि चक्षुरादिकरणाभिमानिनि जीवे । परिभाव्यते परिचिंत्यते । तद्वृत्त्युपाधीन् जाग्रदादिवृत्त्युपाधीन् । तथा चेन्द्रियैरर्थावभासकजाग्रदवस्थायां विश्व इति, मनोमात्रावभास्यस्वप्नावस्थायां तैजस इति, अज्ञानोपलक्षितसुषुप्त्यवस्थायां प्राज्ञ इति त्रितयस्य जाग्रदादित्रयस्य साक्षि यज्ज्ञानं तच्च चैतन्यं, स एव तुरीय इति एतैरित्यर्थः । चतुर्णां व्यूहानां विभूतीराह–उभयसंस्कारयुक्तम् । ‘ सुखमहमस्वाप्सम् ’ इति ‘सुखम् न किञ्चिदवेदिषम्’इत्याकारकं ज्ञानञ्चेत्युभयं तैर्विश्व इत्याद्या वृत्तयस्ताभिर्भगवानेव परिचिन्त्यन्ते चतुर्णां व्यूहानामेव विश्वाद्याश्चतस्रो वृत्तयो नियम्या विभूतय इति भावः । तत्र वासुदेवस्य विश्वः, संकर्षणस्य तैजसः, प्रद्युम्नस्य प्राज्ञः, अनिरुद्धस्य तुरीयो ज्ञानमिति भेदः ॥२२॥ तन्नियंतुर्विश्वादिनियंतुः। अंगोपांगादिसहितस्य वासुदेवस्य विश्व इत्येव विभूतिः । संकर्षणादीनां तैजसाद्या विभूतयः। हरिभक्तावहंता । ईश्वरो विश्वादिनियंता ॥ २३ ॥ हे द्विजऋषभेति–“ ऋत्यकः ” इति ह्रस्वे प्रकृतिभावः । भगवदुपासकत्वेन त्वं ब्राह्मणश्रेष्ठोऽसि “ ब्राह्मणो जन्मना श्रेयान्किमु मत्कलया पुनः ” इति श्रीमुखोक्तेरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥ २९ ॥
य इदं कल्य उत्थाय महापुरुषलक्षणम् ॥ तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम् ॥ २६ ॥

इति ॥ २४ ॥ यस्येदमुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते । कृष्णसख अर्जुनस्य सखे वृष्णिश्रेष्ठ । अवनिद्रुहो ये राजन्यास्तेषां वंशस्य दहनः अनपवर्गमक्षीणं वीर्यं यस्य । गोपवनितानां व्रजाः समूहा भृत्या नारदादयस्तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य । श्रवणमेव मंगलं यस्य ॥ २५ ॥ एतज्जपमात्रस्यापि ब्रह्मज्ञानं फलमित्याह । य इति ।

संबुद्धेर्भावः । स्वशक्तिरूपेण स्वस्मिन्प्राप्तया मायया । त्वत्प्रसादलब्धज्ञानेन त्वत्परायणैः ' भक्त्याहमेकया लभ्यः ' इत्याद्युक्तेरात्मरूपेणैव त्वं प्राप्यस इत्याशयः । चैतुर्व्यूहमुक्त्वा त्रिमूर्तितामाह—योनिः प्रकाशकः । न चास्य कोऽपि प्रकाशक इत्याह—स्वयंदृक् स्वयंप्रकाशकः । न चास्य राज्ञश्चैश्वर्यार्थं प्रकृत्यपेक्षेत्याह—स्वमहिमपरिपूर्णः, किन्तु क्रीडार्थमेव स्वया शक्त्या मायया ब्रह्मादिनाम्ना सृजतीत्यादि, इत्येवमनावृताक्षोऽपि अपरिच्छिन्नज्ञानोपि विवृत इव कृतविवरण इव निरुक्त इव । वस्तुतस्तु—निर्वक्तुं विवारितुं ब्रह्मादिभिरशक्य एव इति भावः । तर्हि किमर्थमेतावानायासः कृतस्तत्राह—तत्परैस्तद्भक्तैरेवात्मना मनसा लभ्य एतादृशध्यानेनेति भावः । तत्र तत्पादानां विभूतिभिः पृथिव्याद्यैर्दृष्टस्मृतादिभिरेव तत्पादादिस्मरणं सुखेन भवेत् । तथाहि—सदाध्येयस्य मत्प्रभोश्चरणस्यैव विभूतिरियं पृथ्वी सदा श्रयतेऽतः पृथ्व्याश्रिताः स्थिरजंगमा मत्प्रभोश्चरणाश्रिता एव, ते मया संमान्या एव न तु द्वेष्यास्तथा तद्वक्षस्थकौस्तुभस्य सर्वेऽपि जीवा विभूतयोऽतस्तेषामेकोऽपि मया द्वेष्टुं न युज्यत इत्येवंभावनैवात्र फलं दृश्यमिति विश्वनाथः ॥२४॥ गोपवनितांगीतं तु—'जयति तेऽधिकं जन्मना व्रजः' इत्यादिना, 'वामबाहुकृतवामकपोलः'इत्यादिना, 'बर्हापीडं नटवरवपुः' इत्यादिना।नारदगीतं सप्तमस्कन्धादिषु प्रसिद्धम्।आदिना सनकादिग्रहः।संबुद्ध्यभिप्रायाः कुंतीस्तुतौ प्रथमस्कन्धे वर्णिता अपि पुनरपि किञ्चिद्वर्ण्यन्तेः—कृष्यते निजसमीपं प्राप्यते भक्तजनोऽनेनेति कृष्णः,श्रीः राधा तया सहितः श्रीकृष्णः।अहो स्वामिन् श्रीराधया सह त्वया विहारः केवलं मु(भु)क्तगोपीजनानां निजसमीपाकर्षणार्थमेव यथा कृतस्तथाऽधुना ममाऽप्याकर्षणं कुर्वीति भावः। अत्र हेतुत्वेन संबुद्ध्यंतरमाह—यतस्त्वं कृष्णसखोसीति—कृष्यते विषयैरिति कृष्णो जीवस्तस्य सखा हितैषी अतो मां जीवमप्युद्धरेति भावः । तत्रैव हेत्वंतरम्—वृष्ण्यृषभेति । वर्षति निजाभिलषितामिति वृष्णयो वदान्या देवास्तेषु श्रेष्ठोसीति विश्वाभिलषितपूरकस्य तव ममाभिलषितपूरणं न दुर्घटमिति भावः । अत्र हेतुत्वेन संबुद्ध्यंतरमाह—अवनिध्रुग्राजन्यवंशः । कंसनरकासुरादिसमूहस्तस्य दहनेऽक्षीणप्रभावोऽसीति सर्वलोकहितार्थं यथा त्वया दुष्टा नाशितास्तथा मदज्ञानमपि नाशयेति भावः । शास्त्रप्रतिपाद्यं कमप्यन्यमाश्रयाहं तु वसुदेवनंदनोऽस्मीति चेत्तत्राह—गोविंदेति । गोभिर्गीर्भिर्वेदलक्षणाभिर्विद्यते विचार्यत इति गोविन्दः । " सर्वे वेदा यत्पदमामनंति " इति श्रुतेस्त्वमेव सर्वशास्त्रप्रतिपाद्योऽसीति भावः । यद्यप्यन्ये देवा अपि " होतारमिंद्रमवितारमिंद्रम् " इति, " अग्निमीळे पुरोहितम् " इत्यादिना वेदेन प्रतिपाद्यंते तथापि ते श्रवणमंगला न किन्तु स्मरणादिमंगलाः संति त्वन्तु श्रवणेनैव मंमलं करोषीति भावः । भृत्यान् भरितुं योग्यान् । विश्वंभरस्य ते सर्वे एव भृत्यास्तदंतर्गतोऽहमप्यतो मामपि पाहीति भावः । यदंशस्य " विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " इति गीतोक्तेरुपासनमुक्तम् । तं श्रीकृष्णं स्वेष्टदेवं परिचाययन्प्रार्थयते—श्रीकृष्णेति । कृष्णस्यार्जुनस्य सखेति पांडवेषु स्नेहः स्ववशीकारकः, वृष्ण्यृषभेति यादवेषु च, तत्र किं द्योतकं तत्राह—अवनिद्रुहो ये राजन्यास्तेषां वंशस्य दहनम् । यद्वा—त एव वंशास्तत्परस्परसंमर्दोत्थवह्नि, तेन पांडवानां यादवानां च वैरिणः संहृत्य तेषां पालक इति । अनपवर्गमक्षीणं वीर्यं पराक्रमो यस्मादिति पांडवान्यादवांश्च यो भवान्सर्वजयिनश्चकारेति भावः । गोविंदेति व्रजस्थलोकेषु ततोऽप्यतिस्नेहस्तत्र किं द्योतकं तत्राह—गोपवनितानां व्रजस्य समूहस्य यो भृत्यः ' आसामहो चरणरेणुजुषामहं स्याम् ' इत्युक्त्यैवाभीप्सितभृत्यभाव उद्धवस्तेन गीतम् । ' ता नमस्यन्निदं जगौ ' इति श्रीशुकोक्तेर्यद्गीतं तीर्थं जगत्पावनं श्रवो यशस्तदेव श्रवणमङ्गलं कर्णसुखदं यस्य हे तथाभूत ॥ २९ ॥ ' प्रत्यूषोऽहर्मुखं कल्यम् ' इत्यमरः । अंतस्थवदिदं पदं न पवर्गवदिति । महापुरुषो विराट् तत्र लक्ष्यतेंतर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनक उवाच ॥ शुको यदाह भगवान्विष्णुराताय शृण्वते ॥ सौरो गणो मासिमासि नाना वसति सप्तकः ॥ २७ ॥ तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥ २८ ॥ सूत उवाच ॥ अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनाम् ॥ निर्मितो लोकतंत्रोयं लोकेषु परिवर्तते ॥ २९ ॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥ ३० ॥ कालो देशः क्रिया कर्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरिः ॥ ३१ ॥

कल्ये उषःकाले यस्तच्चित्तः प्रयतः शुचिश्च स जपित्वा गुहाशयं हृदिस्थं ब्रह्म पश्यति ॥ २६ ॥ मंडलं देवयजनमित्युक्त्या बुद्धिमागतो मूर्तिव्यूहप्रसंगे रविव्यूहोऽत्र पृच्छ्यते । शुक इति । पंचमे यदाह तथाऽन्ये च ऋषयो गंधर्वा अप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्तेत्यादिना । सौरः सूर्यसंबंधी । सप्तकः सप्तानां गणः ॥ २७ ॥ तेषां सप्तानामधीश्वरैस्तत्तत्पतिभिस्तत्तन्मासाधिकृतसूर्यैर्वा । व्यूहं विभागम् ॥ २८ ॥ तत्र तावद्व्यूहं निरूपयितुं प्रथमं सूर्यस्वरूपमाह । अनाद्यविद्यया मायया । अयं सूर्यः । लोकतंत्रो लोकयात्राप्रवर्तकः ॥ २९ ॥ अतस्तस्य क्रियाभेदोपाधिकमेव नानात्वं न स्वत इत्याह । एक एवेति । " सूर्य आत्मा जगतस्तस्थुषश्च " इति श्रुतेः । जगदात्मा आदिकृत्सृष्टिकर्ता हारिरेव सूर्यः स च सर्वासां वेदोक्तक्रियाणां मूलं संस्तेनोपाधिना बहुधोक्तः ॥ ३० ॥ कालरूपधारिणो हरेर्द्वादशादित्यरूपं भेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधा भेदमाह । काल इति । कालः प्रातरादिः १ । देशः समादिः २ । क्रिया अनुष्ठानम् ३ । कर्ता ब्राह्

मितयेति तथा । गुहायां हृदये शेते तिष्ठतीति गुहाशयम् " यो वेद निहितं गुहायाम् " इति श्रुतेः । प्रयतः पवित्रः सन् ' पवित्रः प्रयतः पूतः ' इत्यमरः ॥ २६ ॥ सप्तानां संबंधी सप्तकः । अत्र संबंधे कः । हंतानेन शुकपरीक्षित्संवादमयं श्रीभागवतशास्त्रमस्मत्पूर्वपुरुषमार्कंडेयं तदनुष्ठितभगवत्पूजनतत्त्वं च मत्प्रश्नानुरोधादुक्तमिदानीमस्य श्रीभागवतस्य तद्विषयस्य भगवतश्च दृष्टांतः सूर्यः कृतः " कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह । कलौ नष्टदृशामेषः पुराणार्कोऽधुनोदितः॥" इति तदुक्त्या 'कृष्णद्युमणिनिम्लोचे' इत्युद्धवोक्त्या चावगतस्तं द्वादशात्मकं ग्रहराजमधुना द्वादशस्कन्धात्मकं पुराणराजसमाप्त्यवसरे प्रस्तावयितुमर्हामीति परामृश्याह शुक इति सर्वमन्यत्समम् ॥ २७ ॥ अधीश्वरैः संयुक्तानामित्यनेन तेषां प्रत्येकं स्वस्वपतिसाहित्येन द्वंद्वं ज्ञेयम्, । अत एव ' द्वंद्वशः सप्त पृथक् चतुर्दश ' इति पञ्चमस्कंधोक्तिः संगच्छते । सूर्यस्यापि स्वनियंत्रंतर्यामिसाहित्येन द्वंद्वं ज्ञेयमिति बालबोधिन्याम् । "यश्चासौ पुरुषे यश्चादित्ये" इत्यादिश्रुतेः । अधीश्वराप्रसिद्धिमालक्ष्याह–तत्तन्मासाधिकृतसूर्येर्वेति । "व्यूहस्स्याद्बलविन्यासे निर्माणे तर्कवृंदयोः। विभागे निर्वितर्के च "इति कोशात्॥ ॥ २८ ॥ अनाद्यविद्यया मायाकार्यत्वादविद्याया अपि मायात्वम् । ' विद्याऽविद्ये मम तनू ' इत्यारभ्य ' मायया मे विनिर्मिते ' इत्युक्तेः । लोकं तंत्रयति धारयतीति तथा । निर्मितः पृथक्त्वेन प्रकाशितः ॥ २९ ॥ यतः सूर्यो वस्तुत एको हारिरूपत्वादतो हेतोस्तस्य सूर्यस्य क्रियाभेदो नानावैदिकक्रियाभेदस्तदुपाधिकमेव नानात्वम् । जगतो जंगमस्य तस्थुषः स्थावरस्यात्मेति श्रुतिपदार्थः । अजहल्लिंगत्वान्मूलशब्दस्य तत्पुरुषस्य परवल्लिंगत्वात्क्लीबत्वम् ॥ ३० ॥ आदिपदग्राह्यान् क्रमत आह–मध्याह्नादि १, शुच्यादि २, क्षत्रियादि ४, स्रुवप्रणीतादि ५, इष्टिसत्रादि ६, ब्राह्मणादि–क्रमादि ७, गोधूमादि ८, चित्तशुद्ध्यादीति ९, ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्वादिषु द्वादशसु भगवान्कालरूपधृक् ॥ लोकतंत्राय चरति पृथग्द्वादशभिर्गणैः ॥ ३२ ॥ धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ॥ ३३ ॥ अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली ॥ नारदः कच्छनीरश्च नयंत्येते स्म माधवम् ॥ ३४ ॥ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः ॥ रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ॥ ३५ ॥ वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः ॥ शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी ॥ ३६ ॥ इंद्रो विश्वावसुः श्रोता एलापत्रस्तथांगिराः ॥ प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ॥ ३७ ॥ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ॥ अनुम्लोचा शंखपालो नभस्याख्यं नयंत्यमी ॥ ३८ ॥ पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा ॥ घृताची गौतमश्चेति तपोमासं नयंत्यमी ॥ ३९ ॥ ऋतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा ॥ विश्व ऐरावतश्चैव तपस्याख्यं नयंत्यमी ॥ ४० ॥ अथांशुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी ॥ ४१ ॥

णादिः ४ । करणं स्रुगादि ५ । कार्यं यागादि ६ । आगमो मंत्रादिः ७ । द्रव्यं व्रीह्यादि ८ । फलं स्वर्गादि ९ ॥ ३१ ॥ तत्र च कालस्वरूपधारी भगवान्पृथक्चरति । मध्वादिषु चैत्रादिषु । लोकतंत्राय लोकयात्रानिर्वाहाय ॥ ३२ ॥ तानेव गणानाह धातेति द्वादशभिः । धाता सूर्यः । कृतस्थली अप्सराः । हेती राक्षसः । वासुकिर्नागः । रथकृद्यक्षः । पुलस्त्य ऋषिः । तुंबुरुर्गंधर्वः । मधुमासं चैत्रम् । नयंत्यनुवर्तयंति ॥ ३३ ॥ अथौजा यक्षः । प्रहेती राक्षसः । नारदो गंधर्वः । कच्छनीरो नागः । माधवं वैशाखम् ॥ ३४ ॥ मित्रः सूर्यः । पौरुषेयो राक्षसः । रथस्वनो यक्षः । शुक्रमासं ज्येष्ठम् ॥ ३५ ॥ वरुणः सूर्यः । सहजन्यो यक्षः । शुक्रो नागः । चित्रस्वनो राक्षसः । शुचिमासमाषाढम् ॥ ३६ ॥ इंद्रः सूर्यः । विश्वावसुर्गंधर्वः । श्रोता यक्षः । एलापत्रो नागः । वर्यो राक्षस इति स्वयमेव व्याख्यातम् । नभोमासं श्रावणम् ॥ ३७ ॥ विवस्वान्सूर्यः । उग्रसेनो गंधर्वः । व्याघ्रो राक्षसः । आसारणो यक्षः । शंखपालो नागः । नभस्याख्यं भाद्रपदम् ॥ ३८ ॥ धनंजयो नागः । वातो राक्षसः । सुषेणो गंधर्वः । सुरुचिर्यक्षः । तपोमासं माघम् । मासक्रमातिलंघनं कौर्मोक्तादित्यनुक्रमानुसारेण । वैष्णवे तु मासक्रमेणोक्तिः । क्वचिन्नामव्यत्ययस्तु कल्पभेदेनेति ज्ञेयम् ॥ ३९ ॥ क्रतुर्यक्षः । वर्चा राक्षसः । पर्जन्यः सूर्यः । सेनजिदप्सराः । विश्वो गंधर्वः । ऐरावतो नागः । तपस्याख्यं फाल्गुनम् ॥ ४० ॥ अंशुः सूर्यः । अंश

तत्र नवसु । भगवान्सूर्यः ॥ ३२ ॥ ‘ स्याच्चैत्रे चैत्रिको मधुः ’ इत्यमरः ॥ ३३ ॥ ‘ वैशाखे माधवो राधः ’ इत्यमरः ॥ ३४ ॥ ‘ ज्येष्ठे शुक्रः ’ इत्यमरः ॥ ३५ ॥ ‘ शुचिस्त्वयम् । आषाढे ’ इत्यमरः ॥ ३६ ॥ ‘ श्रावणे तु स्यान्नभाः ’ इत्यमरः ॥ ३७ ॥ ‘ स्युर्नभस्ये प्रौष्ठपदभाद्रभाद्रपदाः ’ ॥ ३८ ॥ ‘ तपा माघे ’ इत्यमरः ॥ ३९ ॥ ‘ स्यात्तपस्यः फाल्गुनिकः ’ इत्यमरः ॥ ४० ॥ ‘ मार्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगः स्फूर्जोरिष्टनेमिरूर्ण आयुश्च पंचमः ॥ कर्कोटकः पूर्वचित्तिः पुष्यमासं नयंत्यमी ॥ ४२ ॥ त्वष्टा ऋचीकतनयः कंबलश्च तिलोत्तमा ॥ ब्रह्मापेतोथ शतजिद्धृतराष्ट्र इषंभराः ॥ ४३ ॥ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् ॥ विश्वामित्रो मखापेत ऊर्जमासं नयंत्यमी ॥ ४४ ॥ एता भगवतो विष्णोरादित्यस्य विभूतयः ॥ स्मरतां संध्ययोर्नॄणां हरंत्यंहो दिनेदिने ॥ ४५ ॥ द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ॥ चरन्समंतात्तनुते परत्रेह च सन्मतिम् ॥ ४६ ॥

इति वा पाठः । तार्क्ष्यो यक्षः । ऋतसेनो गंधर्वः । विद्युच्छत्रू राक्षसः । महाशंखो नागः । सहोमासं मार्गशीर्षम् ॥ ४१ ॥ भगः सूर्यः । स्फूर्जो राक्षसः । अरिष्टनेमिर्गंधर्वः । ऊर्णो यक्षः । आयुर्ऋषिः । कर्कोटको नागः ॥ ४२ ॥ त्वष्टा सूर्यः । ऋचीकतनयो जमदग्निः । कंबलो नागः । ब्रह्मापेतो राक्षसः । शतजिद्यक्षः । धृतराष्ट्रो गंधर्वः । इषंभरा आश्विनपालकाः ॥ ४३ ॥ विष्णुरादित्यः । अश्वतरो नागः । सूर्यवर्चा गंधर्वः । सत्यजिद्यक्षः । मखापेतो राक्षसः । ऊर्जमासं कार्तिकमासम् । एते चादित्यादयः कौर्मे विभज्योक्ताः “ धाताऽर्यमा च मित्रश्च वरुणश्चेंद्र एव च । विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च । भगस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः ॥ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोऽथांगिरा भृगुः । गौतमोऽथ भरद्वाजः कश्यपः क्रतुरेव च ॥ जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः । रथकृच्चोऽरिष्टनेमिर्ग्रामणीश्च रथस्वनः ॥ रथचित्रस्वनः श्रोता अरुणः सेनजित्तथा । तार्क्ष्यश्चारिष्टनेमिश्च रुतजित्सत्यजित्तथा । एते यक्षाः ॥ अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा । वर्यो व्याघ्रस्तथापश्च वायुर्विद्युद्दिवाकरः । ब्रह्मापेतश्च विप्रेंद्रा यज्ञापेतश्च राक्षसाः ॥ वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः । एलापत्रः शंखपालस्तथैरावतसंज्ञितः ॥ धनंजयो महापद्मस्तथा कर्कोटको द्विजाः । कंबलोऽश्वतरश्चैव वहंत्येनं यथाक्रमम् ॥ तुंबुरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा । उग्रसेनो वसुरुचिर्विश्वावसुरथापरः ॥ चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः । सूर्यवर्चा द्वादशेति गंधर्वा गायतां वराः ॥ कृतस्थल्यप्सरोवर्या तथाऽन्या पुंजिकस्थली । मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः ॥ अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा । अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा । रंभा चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृताः ॥ ” इति ॥ ४४ ॥ ४५ ॥ एतेषां पृथक्कर्माणि निरूपयति द्वादशस्वपीति त्रिभिः । असौ देवः सूर्यः षड्भिर्गंधर्वादिभिरस्य जनस्य समंताच्चरन् शुभां मतिं तनुते । गायत्र्यर्थोऽनेन

शीर्षे सहा मार्गः ’ इत्यमरः ॥ ४१ ॥ पुष्यमासं पुष्यनक्षत्रोपलक्षितपूर्णिमायुतमासं, पौषमित्यर्थः ॥ ४२ ॥ ‘ स्यादाश्विन इषोऽप्याश्वयुजोऽपि ’ इत्यमरः ॥ ४३ ॥ ‘ बाहुलोर्जौ कार्त्तिकिकः ’ इत्यमरः । इह मासव्युत्क्रमो हि कौर्मोक्तसूर्यार्षियज्ञादिक्रमापेक्षयैव ज्ञेयः ॥ ४४ ॥ आदित्यस्यादित्यरूपस्य विष्णोः । अंहः पापम् ॥ ४५ ॥ समंतात्सप्तसु द्वीपेषु । इह सन्मतितननं तु सूर्योदये चौरजारादयोऽपि स्वकर्म त्यजंति साधव इव तिष्ठंतीति प्रसिद्धमेव । परत्र परलोकनिमित्तं सन्मतितननमपि सूर्यादेव, सूर्योदय एव श्रौतस्मार्तपारलौकिककर्मप्रवृत्तेः प्रायो दर्शनात् । इह परत्रेति सप्तम्यौ निमित्तेर्थे एवात्र ज्ञेये । तदुक्तम्—“ यस्योदयेनेह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामर्ग्यजुर्भिस्तल्लिंगैर्ऋषयः संस्तुवंत्यमुम् ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोऽग्रतः ॥ ४७ ॥ उन्नह्यंति रथं नागा ग्रामण्यो रथयोजकाः ॥ नोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः ॥ ४८ ॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ॥ पुरतोभिमुखं यांति स्तुवंति स्तुतिभिर्विभुम् ॥ ४९ ॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः ॥ कल्पेकल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ॥ ५० ॥ इति श्रीमद्भागवते महापुराणे द्वादशस्कंध आदित्यव्यूहविवरणं नामैकादशोऽध्यायः ॥ ११ ॥ सूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् ॥ १ ॥

सूचितः ॥ ४६ ॥ तल्लिंगैः सूर्यप्रकाशकैः ॥ ४७ ॥ उन्नह्यंति दृढं बध्नंति । ग्रामण्यो यक्षाः । नैर्ऋता राक्षसाः ॥ ४८ ॥ किंच वालखिल्या इति । एवं प्रतिमासं त एव स्तुवंति । विभुं सूर्यम् ॥ ४९ ॥ व्यूह्य विभज्य ॥ ५० ॥ इति श्रीमद्भागवते द्वादशस्कन्धे टीकायामेकादशोध्यायः ॥ ११ ॥ द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः ॥ प्रथमस्कंधमारभ्य प्राधान्येन समासतः ॥ १ ॥ तदेवमस्मिन्पुराणे विस्तरेणोक्तानर्थान्संक्षेपतो वर्णयिष्यन्धर्मादीन्प्रणमति । नम इति । महते हरिभक्तिलक्षणाय ।

जगत्प्रबुध्यते प्रवर्तते चाखिलकर्मसिद्धये " इति भविष्योत्तरे परत्रेह च सन्मतितननोत्त्या धियः प्रेरकतारूपो गायत्र्यर्थोऽत्र ध्वनितस्तथा च गायत्र्या समाप्तिरसूचीति ज्ञेयम् ॥ ४६ ॥ ४७ ॥ "ग्रामणीः प्रधानेऽधिपतौ यक्षनापितयोरपि" इति कोशात् । 'नैर्ऋतो यातुरक्षसी' इत्यमरः ॥ ४८ ॥ स्तावकर्षिषु पुनराधिक्यमाह–किंचेति । स्तुतिभिः स्तुतिप्रकाशकैः "उदुत्यं जातवेदसम्" इत्यादिमंत्रैः । विशेषेण भाति भापयति वेति विभुस्तम् ॥ ४९ ॥ कल्पेकल्पे प्रतिकल्पं हरिरेव स्वमात्मानमादित्यरूपेण द्वादशधा विभज्य लोकानवति दुःखजालाद्रक्षतीत्यर्थः ॥ ५० ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्ध एकादशोऽध्यायः ॥ ११ ॥ अनुक्रमो गणना । समासतः संक्षेपतः, संक्षेपकथनेऽपि प्राधान्येन मुख्यार्थस्यैव कथनं नतु सर्वत इत्यर्थः (१) । धर्मस्यैव हरिप्रियत्वेन संसारतारकत्वादादौ नमति–नम इति । हरिप्रियत्वं धर्मस्य 'यदायदा हि धर्मस्य' इति श्रीगीतावाक्यादवसीयते । धर्मांतरव्यावृत्तये–महत इति । महत्त्वमपि हरिभक्तिलक्षणधर्मस्य तदुक्त्यैवावसीयते । तथाहि–"सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज" इति । ब्राह्मणेभ्य इति द्वितीयार्थे चतुर्थी । सनातनाञ्छ्रीमद्व्यासकथनादपि प्राक्तनान्नतु व्यासप्रणीतांस्तथा च वेदवत्सनातनत्वमस्य पुराणस्य श्रीसूतेन ध्वनितम् । वेधसेऽवतारादिसर्वविधात्रे । स्वदैन्यं ज्ञापयन्नमति–ब्राह्मणेभ्यो व्यासादिभ्यस्तत्प्रकाशकेभ्यः । सनातनम् 'कालेन प्रलये नष्टा वाणीयम्' इत्यादिप्रमाणेन प्रसिद्धान् धर्मान् भागवतान्वक्ष्ये तत्तत्प्रसंगानुक्रमेण तानेव सूचयिष्यामि 'पतितः स्खलितः' इत्यादिना च साक्षाद्रक्ष्यामीत्यर्थः । श्रवणकीर्तनादिविषयत्वे सति तच्चरितान्येव परमसनातनधर्मा भवन्तीति भावः । यद्वा–भगवतो भक्तियोगस्य तच्चरितानाञ्च निर्गुणत्वात्सनातनत्वमेव, सगुणस्यैव वस्तुनः सनातनत्वाभावादित्यर्थः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतम् ॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितम् ॥ २ ॥ अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः ॥ नारायणो हृषीकेशो भगवान्त्सात्वतां पतिः ॥ ३ ॥ अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययम् ॥ ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतम् ॥४॥ भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयम् ॥ पारीक्षितमुपाख्यानं नारदाख्यानमेव च ॥ ५ ॥

ब्राह्मणेभ्यो ब्राह्मणान् । सनातनान् अनादीन् । धर्मानित्युपलक्षणं पुराणोक्तार्थानाम् ॥ १ ॥ पुरुषत्वे उचितं श्रवणादियोग्यम् ॥ २ ॥ एतत्प्रपंचयति । अत्रेति । भगवानैश्वर्यादिषड्गुणः साक्षात्संकीर्तित इति देवताकांडार्थः ॥ ३ ॥ ब्रह्मकांडार्थमाह । अत्र ब्रह्मेति । गुह्यं निर्गुणम् । प्रभवाप्ययं प्रभवत्यस्मादिति प्रभवम् , अप्येत्यस्मिन्नित्यप्ययं तच्च तच्च । अनेनाश्रयशब्दार्थौ दर्शितः । विज्ञानसंयुतमपरोक्षज्ञानपर्यंतं ज्ञानम् । तदुपाख्यानं तज्ज्ञानमुपाख्यायते प्रकाश्यते येन तज्ज्ञानसाधनमित्यर्थः ॥ ४ ॥ कर्मकांडार्थमाह । भक्तियोगश्च साध्यसाधनरूपः । तदाश्रयं भक्तियोगेन निष्पादितम् । एवं सामान्यतो निरूप्येदानीं द्वादशस्कन्धप्रकरणार्थाननुक्रामति । पारीक्षितमुपाख्यानं परीक्षि

यद्भवद्भिर्नराणां संबंधि "पुंसामेकांततः श्रेयस्तन्नश्शंसितुमर्हसि" इत्यहं पृष्टस्तदेतद्वो विष्णोरद्भुतचरितं मया कथितमिति संबंधः।हे विप्रा इति–विगतः प्राप्नूरयिता स्वीयबोधेन येषां ते विप्राः सर्वज्ञा इति। सर्वज्ञानामग्रे मया यथाश्रुतमेवोक्तमिति भावः । तत्र भगवच्चरितश्रवणमेव मुख्यमित्यभिप्रेत्योपसंहरन्ननुक्रमितुमुपक्रमते–नराणां मध्ये ये पुरुषास्तेषामेवोचितं न तु तद्विमुखानां पशूनामिति तेषां गालिप्रदानम् । तदुक्तम्–" श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः । न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥ " इति । यद्वा–नराणां पुरुषे भगवति यदुचितम् ॥ २ ॥ एतत्पुरुषस्य श्रवणादियोग्यमेतदित्यर्थः । अत्र श्रीभागवते । साक्षाद्धरिः श्रीकृष्णः " एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् " इत्युक्तेः । सर्वपापहर इत्यादिविशेषणानां तत्रैव सामंजस्यात् । अत्र द्वादशस्कंधेषु हरिर्भगवदाद्याख्ययानंताविर्भावः परमेश्वरस्तावन्मुख्यत्वेन कीर्त्यते । तत्रापि गुणरूपलीलात्वेन मुख्यत्वेन कीर्त्यते । तस्य च प्राधान्येन भेदद्वयं दर्शितमित्याह–नारायणः सर्वजीवाश्रयः । हृषीकेशस्तदीयसर्वेन्द्रियप्रवर्तकश्च परमात्मेत्यर्थ इत्येको भेदः । द्वितीयमाह–भगवानिति । स एव कः–सात्वतामुद्धवादीनां पतिः स्वयं भगवानित्यर्थः ॥ ३ ॥ सगुणमुक्त्वा निर्गुणमाह–ब्रह्मेति । इत्यर्थ इति–श्रवणादिसाधनमंतरेण ज्ञानानुत्पत्तेस्तदप्युक्तमिति भावः । तदीयनिर्विशेषप्रकाशरूपं यद्ब्रह्म तदपि प्रोक्तं वागाद्यग्राह्यत्वाद्गुह्यम् । तर्हि कथं प्रोक्तं तत्राह–जगत उत्पत्तिलयौ यतस्तदित्येवंरीत्योक्तं न तु साक्षादित्यर्थः ॥ ४ ॥ तत्प्रस्तावाय परीक्षिज्जन्मादिप्रसंगाय प्रथमस्कंधत उपक्रमते–पारीक्षितमिति । इहानुक्रमणिकाध्याये । यत्प्रसिद्धमपि किंचित्किंचिदुल्लंघ्यते तन्नानिष्टमिति । अनुक्रमणिका हि नोक्तसमस्तार्थव्यापिनी भवेत् यत्प्रथमत एव जन्मगुह्याध्यायकथातिप्रसिद्धाप्युल्लंघिता । तथा द्रौणिदंडभीष्मनिर्याणादिकथाचित्रकेतुत्रिपुरवधांबरीषादिकथा धासुरब्रह्ममोहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्य ब्रह्मर्षभस्य संवादश्च परीक्षितः ॥६॥ योगधारणयोत्क्रांतिः संवादो नारदाजयोः ॥ अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः ॥ ७॥ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ॥ ८ ॥ ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ॥ ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ॥ ९ ॥ कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुव उद्धरणेंभोधेर्हिरण्याक्षवधो यथा ॥ १० ॥ ऊर्ध्वतिर्यगवाक्सर्गो रुद्रसर्गस्तथैव च ॥ अर्धनारीनरस्याथ यतः स्वायंभुवो मनुः ॥ ११ ॥ शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥ १२ ॥ अवतारो भगवतः कपिलस्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन च धीमता ॥ ॥ १३ ॥ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ १४ ॥ नारदस्य च संवादस्ततः प्रैयव्रतं द्विजाः ॥ नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च ॥ १५ ॥

जन्मादि तत्प्रस्तावाय नारदाख्यानं च ॥ ५ ॥ ब्रह्मर्षभस्य ब्राह्मणोत्तमस्य इति प्रथमस्कंधार्थः ॥ ६ ॥ उत्क्रांतिरर्चिरादिगतिः । प्राधानिकः प्राधानकार्यविराड्रूपः सर्गः । अग्रत आदितो महदादिक्रमेणेत्यर्थः । इति द्वितीयार्थः ॥ ७ ॥ महापुरुषस्य संस्थितिः प्रळये तूष्णीमवस्थानम् ॥ ८ ॥ प्राकृतिकः प्रकृतिभवो गुणक्षोभरूपः । वैकृतिका महदादयश्चकाराद्विकाराश्च ये तेषां सर्गः ॥ ९ ॥ गतिः स्वरूपम् । उद्धरणे उद्धारणे ॥ १० ॥ अर्धाभ्यां नारी च नरश्च तस्य सर्गः ॥ ११ ॥ संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानंतरं द्रष्टव्यम् ॥ १२ ॥ १३ ॥ इति तृतीयार्थः ॥ चतुर्थस्कन्धार्थमाह । नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः संतानः ॥ १४ ॥ पंचमस्कंधार्थमाह

दिकथा च बहुश उल्लंघ्य क्वचित्क्रमेणाप्युक्तेति ॥ ५ ॥ विप्रशापाच्छृंगिशापात् । ब्रह्मसु ब्राह्मणेषु ऋषिषु उत्तमो ब्रह्मर्षिस्तस्य " वेदास्ये बृहति विप्रे ब्रह्म वेदे परात्मनि । तपोयज्ञप्रधानेषु " इति कोशात् । " ऋषिः श्रेष्ठ च सर्वज्ञे ब्राह्मणे च मनौ तथा" इति ॥६॥ अर्चिरादिगतिः "तेऽर्चिरभिसंभवंति" इति श्रुत्युक्तगतिः ॥७॥८॥ यतो यत्र ब्रह्मांडे वैराजो विराडंतर्यामी पुरुषोऽस्तीति ॥९॥ उद्धारणे निमित्ते यथा हिरण्याक्षवधः कृतस्तथोक्त इत्यर्थः ॥ १० ॥ ऊर्ध्वसर्गो देवसर्गः, तिर्यक्सर्गः पश्वादिसर्गः, अवाक्सर्गोऽधःसर्गोऽसुरादिलक्षणः । यद्वा—ऊर्ध्वसर्ग ऊर्ध्वसंचारसर्गः वृक्षादिसर्गः । तिर्यक्सर्गोऽष्टाविंशतिधा । अवाक्सर्गः नृसर्गः "अवाक्स्रोतास्तु नवमः क्षत्तरेकविधो नृणाम्" इत्युक्तेः । नारीनरयोः समाहारद्वंद्वे तस्य तृतीयाद्विवचनांतार्द्धशब्देन पुनस्समासः । तथाहि—अर्द्धाभ्यां नारीनरं यस्य तस्य ब्रह्मणः सकाशादथ सर्गोऽभूत् । यतो यत्र सर्गे स्वायंभुवो मनुः शतरूपा चाभूत् ॥ ११ ॥ या स्त्रीणामाद्या प्रकृतिर्मूलकारणं, तत एव स्त्रीसर्गप्रवृत्तेः । धर्मपत्नीनां कीर्त्यादीनाम्, कर्दमस्य च यथा संतानस्तथा वर्णितः ॥ १२ ॥ १३ ॥ १४ ॥ हे द्विज इति—द्विजत्वात्कथितमपि पुनः स्मारयामीति भावः ॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो द्वीपसमुद्राद्रिवर्षनद्युपवर्णनम् ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥ १६ ॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च संततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥ १७ ॥ त्वाष्ट्रस्य जन्म निधनं पुत्रयोश्च दितेर्द्विजाः ॥ दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ ॥ १८ ॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणम् ॥ मन्वंतरावताराश्च विष्णोर्हयशिरादयः ॥ १९ ॥ कौर्मं मात्स्यं नारसिंहं वामनं च जगत्पतेः ॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसाम्॥२०॥देवासुरमहायुद्धं राजवंशानुकीर्तनम् ॥ इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः॥२१॥इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च ॥ सूर्यवंशानुकथनं शशादाद्या नृगादयः ॥ २२॥ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः ॥ खट्वांगस्य च मांधातुः सौभरेः सगरस्य च ॥ २३ ॥ रामस्य कोशलेंद्रस्य चरितं किल्बिषापहम् ॥ निमेरंगपरित्यागो जनकानां च संभवः ॥ २४॥ रामस्य भार्गवेंद्रस्य निःक्षत्रकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥ २५ ॥ दौष्यंतेर्भरतस्यापि शंतनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोनुकीर्तितः ॥ २६ ॥ यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥ २७ ॥ तस्य कर्माण्यपाराणि कीर्तितान्यसुरद्विषः ॥ पूतनाऽसुपयःपानं शकटोच्चाटनं शिशोः ॥ २८ ॥

ततः प्रैयव्रतं प्रियव्रतस्य चरितम् ॥ १५ ॥ द्वीपाद्युपवर्णनं प्रथमं संक्षेपतस्ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनम् । पातालानां नरकाणां च संस्थितिः । अनेनैव नरकनिवर्तकमजामिलोपाख्यानं गृहीतं ततः पराचीनम् ॥ १६ ॥ षष्ठार्थमाह । दक्षजन्मेति ॥ १७ ॥ सप्तमार्थमाह पुत्रयोश्चेति ॥ १८ ॥ अष्टमार्थमाह । मन्वंतरानुकथनमिति । क्वचित्कस्यचिदनुक्तिर्व्युत्क्रमोक्तिश्च भक्तिरसाकुलत्वेनेति द्रष्टव्यम् ॥ १९ ॥ २० ॥ नवमार्थमाह राजवंशेति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ सोमवंशादिभूतस्यैलस्य चरितम् ॥ २५ ॥ तत्सुतस्य भीष्मस्य ॥ २६ ॥ २७ ॥ दशमार्थमाह । तस्य कर्माणीति । पूतनाया असुसहितस्य स्तन्यपयसः पानम् ॥२८॥ अनेन नरकस्थितिवर्णनप्रसंगेन ॥ १६ ॥ तत्पुत्रीणां दक्षपुत्रीणाम् । यतो यत्र संतत्यां देवादयो जाताः ॥ १७ ॥ त्वाष्ट्रस्य वृत्रस्य । दितेः पुत्रयोः । संबुद्धिस्तु पूर्ववत् ॥ १८ ॥ आदिनाऽजितादिग्रहः । अत्राऽवतारक्रमो न विवक्षितो वर्णितचरितकथने तात्पर्यात् । अत एव स्वामिचरणैरप्युक्तम्–क्वचित्कस्यचिदनुक्तिरित्यादि । भक्तिरसमग्नत्वाच्छ्रीसूतस्य यथाक्रमकथनविस्मृतिरभूदिति भावः ॥ १९ ॥ दिवौकसाममृतार्थेऽमृतनिमित्तं तद्वत्कथितमित्यर्थः ॥ २० ॥ सुद्युम्नस्य वंशश्च कीर्तितः । अत्र तदिति पदं भिन्नं ज्ञेयं षष्ठ्यर्थे, वंश इत्युभयत्रान्वेति । मह उत्सवस्तं करोतीति महकरस्तादृश आत्मा देहो यस्य स महात्मा, तस्मिन्पूर्वं पुत्रीरूपेण जाते मनोर्महो न जातः, पुनर्गुरुकृपया तस्याः पुरुषत्वे सत्यतीवोत्सवोऽभूदित्यत उक्तं–महात्मन इति । अत्र मध्यमपदलोपी समासो ज्ञेयः ॥ २१ ॥ अत्रैव सुद्युम्नप्रकृते । 'सर्वं वाक्यं सावधारणम्' इति न्यायेनैवकारोऽत्र बोध्यः । आदिना यैः कव्यादिभी राज्यं न गृहीतं तेऽपि कथिता इति 'कविः कनीयान्विषयेषु निःस्पृहो विसृज्य राज्यम्' इत्युक्तेः ॥ २२ ॥ सुकन्याया इदं सौकन्यं, चरितमिति शेषः ॥ २३ ॥ कोशलाऽयोध्या देशो वा कोशलः ॥ २४ ॥ भार्गवं भृगुवंशामिंदयाति समर्द्धयतीति भार्गवेन्द्रस्तस्य सकाशाद्भुवो निःक्षत्रकरणं यथाऽऽसीत्तथा वर्णितम् ॥ २५ ॥ २६ ॥ यत्र यदुवंशे । ततो जन्मानंतरम् ॥ २७ ॥ तस्य कृष्णाख्यस्य । शिशोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः ॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः ॥ २९ ॥ गोपानां च परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं कालियस्याहेर्महाऽहेर्नंदमोक्षणम् ॥ ३० ॥ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ॥ प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनम् ॥ ३१ ॥ गोवर्द्धनोद्धारणं च शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥३२॥ शंखचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ ३३ ॥ व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥ ३४ ॥ मृतस्यानयनं सूनोः पुनः सांदीपनेर्गुरोः ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियम् ॥ ३५ ॥ कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ॥ जरासंधसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेंद्रस्य कुशस्थल्या निवेशनम् ॥ ३६ ॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ ३७ ॥ हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनम् ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ ३८ ॥ चैद्यपौंड्रकशाल्वानां दंतवक्रस्य दुर्मतेः ॥ शंबरो द्विविदः पीठो मुरः पंचजनादयः ॥ ३९ ॥ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनम् ॥ भारावतरणं भूमेर्निमित्ती कृत्य पांडवान् ॥ ४० ॥ विप्रशापापदेशेन संहारः स्वकुलस्य च ॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ॥४१॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः ॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥

सहभ्रातुः ससखस्य ॥ २९ ॥ ३० ॥ ३१ ॥ यज्ञाभिषेकं यज्ञः पूजा अभिषेकश्च तयोर्द्वंद्वैक्यम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ द्विषत् शत्रून्प्रमथ्य ॥ ३७ ॥ ३८ ॥ ये च शंबरादयस्तेषां माहात्म्यं प्रभावो वधश्च ॥ ३९ ॥ ४० ॥ एकादशार्थमाह । विप्रशापेति ॥ ४१ ॥ धर्मविनिर्णयो वर्णाश्रमधर्म

शिशुरूपात् । शकटस्योच्चाटनं भेदनम् ‘ चट–भेदने ’ ॥ २८ ॥ निष्पेषश्चूर्णनम्, हननमिति यावत् । तथैव निष्पेषः ॥ २९ ॥ परिसर्पतः सर्वतः प्रवृत्तस्य ॥ ३० ॥ यत्र व्रतचर्यायाम् । यज्ञगानां पत्न्यो यज्ञपत्न्यः ॥ ३१ ॥ शक्रेण कृता पूजा, सुरभ्या कृतोऽभिषेक इति विवेकः ॥ ३२ ॥ स्त्रीहरणप्रवृत्तेर्दुर्बुद्धित्वम् । अरिष्टो वृषासुरः ॥ ३३ ॥ आदिना कंसभ्रात्रादिग्रहः ॥ ३४ ॥ आनयनं, संयमिन्या इति शेषः ॥ ३५ ॥ हे द्विजा इति संबुद्धिबहुत्वमादरार्थम् । कुशस्थल्या द्वारकाया निवेशनं रचना ॥ ३६ ॥ सुरालयादिंद्रलोकात् । सुधर्मा देवसभा ‘ स्यात्सुधर्मा देवसभा ’ इत्यमरः ॥ ३७ ॥ प्राग्ज्योतिषपतिर्नरकासुरः ॥ ३८ ॥ पीठो हि नरकासुरचमूपतिः । ‘ पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगम् ’ इत्युक्तेः । आदिना तत्पुत्रादयः ॥ ३९ ॥ ४० ॥ अपदेशो व्याजः ॥ ४१ ॥ यत्र भगवदुद्धवसंवादे ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः ॥ चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥४३॥ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः॥ शाखाप्रणयनमृषेर्मार्कंडेयस्य सत्कथा॥महापुरुषविन्यासः सूर्यस्य जगदात्मनः॥४४॥इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः॥लीलावतारकर्माणि कीर्तितानीह सर्वशः ॥४५॥पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रुवन् ॥ हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥४६॥ संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसाम् ॥ प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥ ४७ ॥ मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः ॥ तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ४८ ॥

विनिश्चयः । मर्त्यपरित्यागो मनुष्यत्वस्यांतर्धानम् ॥ ४२ ॥ द्वादशार्थमाह । युगेति । युगलक्षणं तदनुरूपा वृत्तिश्चेत्यर्थः । त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ॥ ४३ ॥ ऋषेर्व्यासस्य । सूर्यस्य च विन्यास इत्यर्थः ॥ ४४ ॥ इति चोक्तमिति चकारादन्यदपि वो युष्माभिरिह यत्पृष्टोऽस्मि तदुक्तमिति । किमेवं नानार्थकथनेन तत्राह । लीलेति । सर्वशः तत्तदर्थकीर्तनद्वारेणेत्यर्थः॥ ४५॥तत्कीर्तनेनापि किमित्यपेक्षायां तत्फलमाह द्वाभ्याम् । पतितः कपादिषु । स्खलितः सोपानादिषु । आर्तो दुःखितः । क्षुत्वा क्षुतं कृत्वा विवशोऽपि ॥ ४६ ॥ संकीर्त्यमानो यद्वा श्रुतोऽनुभावो यस्य स पुंसां चित्तं प्रविश्य निःशेषं दुःखं विधुनोति । हीति सतामनुभवं प्रमाणयति । अर्को गिरिगुहादिध्वांतं न धुनोतीत्यपरितोषाद्दृष्टांतांतरमाह । अतिवातोऽभ्रमिवेति ॥ ४७ ॥ हरिसंकीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपंचयति मृषागिर इति चतुर्भिः । मृषागिरो मिथ्यावाचः । असतीरसत्यः । असतां कथा यासु ताः यद्यासु उत्तमश्लोकस्य यशोऽनुगीयत इति यत्तदेव सत्यं तदेव हि

इत्यर्थ इति—यस्मिन्यस्मिन्युगे याया वृत्तिः साऽप्युक्तेति भावः । उपप्लवो नाशः,धर्मादेरिति शेषः। प्राकृतिकी प्रकृतिमधिकृत्य प्रवृत्ता महदादिप्रादुर्भावेण सृष्टिलक्षणा । नैमित्तिकी निमित्तं शुभाशुभं कर्म, तदधिकृत्य प्रवृत्ता देवमानुषादिलक्षणा । नित्या हि प्रतिक्षणं शरीरनाशोत्पत्तिस्वीकारेणातीवसूक्ष्मा बाल्यनाशयौवनोत्पत्त्यनुमेयेति ध्येयं सुधीभिः ॥ ४३ ॥ धीमतः श्रीशुकप्रसादावाप्तज्ञानस्य । इत्यर्थ इति—समासांतर्गतमपि विन्यासपदमत्र "विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च" इतिवत्संबध्यत इति भावः ॥ ४४ ॥ अत्राक्षिपति—किमेवमिति । इत्यर्थ इति—तेषांतेषां लीलादीनामर्थप्रयोजनं तत्कीर्तनद्वारेणेति भावः । द्विजश्रेष्ठत्वादेतत्सर्वं भवद्भ्यो मयोदीरितमिति संबुद्ध्यभिप्रायः ॥ ४५ ॥ सर्वाणि पातकानि यस्मिंस्तत्सर्वपातकं कर्मजालं तस्मात् ॥ ४६ ॥ व्यसनं दुःखम् ॥ ४७ ॥ अस्य शास्त्रस्य कृष्णकीर्तन एव तात्पर्यात्तदन्यकीर्तनमविगीतमपि न कुर्यात्, तत्कीर्तनं यत्पशुभिर्विगीतत्वेनोक्तं तदपि कुर्यादित्याह—मृषेति । ताः सत्या अपि गिरो मिथ्या एव,प्रिया अपि गिरोऽसतीरसत्याः कटूक्तय एव, तथा सतां विदुषामपि कथा असत्कथा एव। कुतः—यद्यतो भगवान्न कथ्यत इति। अतः स सत्यवादी अपि मिथ्यावादी, प्रियंवदोऽपि कटुवादी, सत्कथकोऽप्यसत्कथक उच्यत इति भावः।.स्वकल्पितत्वादसत्यमपि भगवद्यशश्चेत्तदेव सत्यं संसृतिध्वंसकत्वात्, अमंगलमपि तदेव मंगलं नान्यत्, भगवतः परदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेव रम्यं रुचिरं नवंनवं तदेव शश्वन्मनसो महोत्सवम् ॥ तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ४९ ॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद् ध्वांक्षतीर्थं न तु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५० ॥ स वाग्विसर्गो जनताऽघसंप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायंति गृणंति साधवः ॥ ५१ ॥ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् ॥ कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म यदप्यनुत्तमम् ॥ ५२ ॥ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ॥ ५३ ॥

मंगलम् । उह इति हर्षे । भगवद्गुणानामभ्युदयो यस्मात्तत् ॥ ४८ ॥ नवंनवं यथा भवति तथा रुचिरं रुचिप्रदम् । महानुत्सवो यस्मात् ॥ ४९ ॥ चित्राणि पदानि यस्मिन् । तदपि जगत्पवित्रयतीति तथा तद्धरेर्यशो न प्रगृणीत न वर्णयेत्तद्वचो ध्वांक्षतीर्थं काकतुल्यनराणां रतिस्थानं न तु हंसैर्ज्ञानिभिः सेवितम् । तत्र हेतुः यत्रेति ॥ ५० ॥ स वाग्विसर्गः स एव वाचः प्रयोगो जनताघसंप्लवो जनसमूहाघनाशकः । यद्यस्मात्तान्येवान्यैः कीर्त्यमानानि शृण्वंति श्रोतारि सति गायंति नोचेत्स्वयमेव गृणंति ॥ ५१ ॥ इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिष्वेवादरः कर्तव्य इत्याह त्रिभिः । नैष्कर्म्यं ब्रह्म तत्प्रकाशकं यज्ज्ञानं यतो निरंजनमुपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेन्न शोभते नापरोक्षपर्यंतं भवतीत्यर्थः । ईश्वरे न चेदर्पितं तर्हि यदनुत्तमं सर्वोत्तममपि कर्म तदपि पुनः कुतः शोभते यतः शश्वत्साधनकाले फलकाले चाभद्रं दुःखात्मकम् ॥ ५२ ॥ किंच । वर्णाश्रमाचारादिषु यः परो महान् परिश्रमः स यशोयुक्तायां श्रियामेव । कीर्तिः संपत्तिश्च केवलं परः पुरुषार्थ इत्यर्थः । गुणानु

रमणादिकमधमैरपुण्यत्वेनोक्तमपि तदेव पुण्यं, यतो भगवतो गुणस्यैव न तु दोषस्योदयो यस्मात्तत् ॥ ४८ ॥ अरम्यमपि प्रसेनमार्गानुगमनभल्लुकबिलप्रवेशादि, रम्यमेव । रुचिरमिति—भक्तानामरोचकमपि श्रीजानकीत्यागादि रुचिरमेवेति । पुरातनमपि भगवच्चारितं नवंनवमेव।मारीचानुगमनोत्तरं श्रीजानकीहरणं रावणकृतं मनसो महोत्सवनाशकमपि महोत्सवकरमेव । पतिपुत्रादिवैराग्योत्पादकत्वेन शोकार्णवमपि तच्छोकार्णवतारकमेव॥४९॥ तत्र हंसाऽसेवने। पद्यानीमानि व्याख्यातचराण्येव। न यद्वच इत्यादि पद्यत्रयं भक्तेरुत्कर्षाऽख्यापनार्थमेव महापुराणस्यास्य प्रथमेऽपि शेषेऽपि स्थापितम्।यथा महामंत्रः कश्चिदाद्यंतवर्तिना बीजद्वयेन त्रयेण च पुटितः स्यात्॥५०॥५१॥ इत्यर्थ इति—' श्रेयःसृतिं भक्तिमुदस्य ' इत्याद्युक्तेरयं भावः॥५२॥ननु वर्णाश्रमाचारादिना निःश्रेयसं स्यादेव "वर्णाश्रमाचारयुतो गृहस्थोपि विमुच्यते " इति स्मृतेरतोऽच्युतभावेन किमित्यत आह—किंचेति । इत्यर्थ इति—कीर्तिसंपत्त्योः सत्योरपि हरिस्मृतिं विनाऽऽत्यंतिकश्रेयो न सिद्ध्यतीति भावः । सापि कथं स्यात्तत्राह—हरेर्गुणानुवादेति । आदिना स्मरणादिग्रहः । वर्णाऽऽश्रमधर्मादिषु यः परमो महान्परिश्रमः स यशोयुक्तायां श्रियामेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति ॥ सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥५४॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ॥ नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥५५॥ अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥ ५६ ॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥ ५७ ॥ य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ॥ श्रद्धावान्योऽनुशृणुयात्पुनात्यात्मानमेव सः ॥ ५८ ॥ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ॥ ५९ ॥

वादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ ५३ ॥ ततः किमत आह अविस्मृतिरिति । क्षिणोति नाशयति ॥ ५४ ॥ अथेदानीं श्रोतॄनात्मानं चाभिनंदन्नाह यूयमिति द्वाभ्याम् हे द्विजाग्र्याः। यद्यस्मादात्मन्यंतःकरणे श्रीनारायणमाविवेश्य शश्वद्भजत । संभावनायां लोट् । अतो भूरिभागाः बहुपुण्याः। कथंभूतम् । अखिलात्मभूतं सर्वांतर्यामिणम्। अत एव देवं सर्वोपास्यम् । अदेवं न देवोऽन्यो यस्य तम् । कुतः। ईशम्। यद्वा । यस्माद्यूयं भूरिभागाः तपआदिसंपन्नाः ततो नारायणं भजतेति विधिः ॥५५॥ मे मया श्रुतम् ॥ ५६ ॥ एतत्पुराणकीर्तनादिफलं प्रपंचयितुमाह एतदित्यष्टभिः ॥ ५७ ॥ यामक्षणं यामं क्षणं चेत्यर्थः। आत्मानमेव साक्षात्पुनाति न तु स्नानादिव

पर्याप्तः प्रायो भवेन्न भगवद्भक्तिसाधकः, हरेर्गुणानुवादश्रवणादिभिस्तु यः परिश्रमः स तु न विस्मृतिः श्रीधरपादपद्मयोर्यस्मात्तादृश इत्यर्थः ॥ ५३ ॥ ततः कृष्णपदारविंदास्मृतेः । सत्त्वस्यांतःकरणस्य "सत्त्वं द्रव्ये गुणे जीवे धैर्यांतःकरणे तथा" इति निरुक्तिः । विज्ञानमनुभवः । ज्ञानं परोक्षम् ॥ ५४ ॥ हरिभजनमेव द्विजाग्र्यापादकमित्यभिप्रेत्याह–द्विजाग्र्या इति । अत एव सर्वांतर्यामित्वादेव । अदेवत्वे हेतुः–ईशामिति । विध्यर्थेऽपि लोटो विधानादाह–यद्वेति । 'अवश्यभावाः' इति पाठे तु न वश्यस्ततो निवर्तयितुमशक्यो भाव आत्मा बुद्धिरिति यावत्, येषां त इत्यर्थः ॥ ५५ ॥ आत्मनस्तत्त्वं स्वरूपम् ॥ ५६ ॥ हे विप्रा इति–यूयं तु विप्रा मत्तोऽप्यधिकतरं जानीथेति भावः । सर्वेषामशुभानां दुष्कर्मफलानां विनाशनं येन तत्तथा "न वासुदेवभक्तानामशुभं विद्यते क्वचित्" इत्युक्तेः ॥ ५७ ॥ एतेच्छ्रीमद्भागवतरूपं वासुदेवमाहात्म्यम् । यामश्च क्षणश्चानयोः समाहारो यामक्षणम् । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । बह्ववकाशे याममात्रं शृणुयादल्पावकाशे तु क्षणमात्रं च शृणुयात् । एतेनास्यावश्यश्रोतव्यता ध्वनिताऽन्यथा कालद्वयविधानानुपपत्तेः । अत एवांबरीषं प्रति श्रीगौतमेनोक्तम्–"अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु । पठस्व स्वमुखेनापि यदीच्छसि भवक्षयम् ॥" इति । अनन्यधीः स्थिरचित्तः । आत्मपावनं जीवभावपरित्यागपूर्वकं ब्रह्मभावेन स्थितिः, अज्ञानमलनिवृत्त्यै तत्संगच्छत एवेति ॥ ५८ ॥ सर्वदा श्रवणाऽनवकाशे तु द्वादश्यामवश्यं शृणुयात्, व्रतवैगुण्यापनुत्तये त्वेकादश्यामप्यवश्यं शृणुयादेवेति वा शब्द एवार्थे । आयुर्वर्द्धतेऽनेनेत्यायुष्यो धर्मः 'धर्मेण वर्द्धते चायुः' इत्युक्तेस्तद्वान्भवति सर्वधर्मफलभाग्भवतीति भावः । अकालमृत्युहीनो वा भवेदित्यर्थः । ग्रहाद्यरिष्टजन्यायुर्नाशो न भवतीति भावः । प्रयतः पूतः उपवासं कुर्वन्यः पठति स ततः सोपवासपाठात् अपातकी महापातकोपपातकादिभ्यो हीनो भवतीत्यर्थः । महापातकान्याह मनुः–"ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः । महांति पातकान्याहुः संयोगं चैव तैः सह ॥" इति । उपपातकानि तु याज्ञवल्क्यः–"गोवधो व्रात्यता

१ 'य एतच्छ्रावयेत्' इति पाठाभिप्रायेणेदम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥६०॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ यच्छंति कामान्गृणतः शृण्वतो यत्र कीर्तनात् ॥ ६१ ॥ ऋचो यजूंषि सामानि द्विजोधीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलम् ॥६२॥

देहमात्रम् ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फलमेतां पठित्वा अनुविंदत इति ॥६२॥

स्तेयमृणानां चानपक्रिया॥अनाहिताग्निताऽपण्यविक्रयः परिवेदनम् ॥ (१) ॥ भृतादध्ययनादानं भृतकाध्यापनं तथा॥पारदार्यं पारिवित्त्यं वार्द्धुष्यं लवणक्रिया ॥ (२) ॥ स्त्रीशूद्रविट्क्षत्रवधो निंदितार्थोपजीवनम् ॥ नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः ॥ (३) ॥ धान्यकुप्यपशुस्तेयमयाज्यानाञ्च याजनम् ॥ पितृमातृसुतत्यागस्तडागारामविक्रयः ॥ (४) ॥ कन्यासंदूषणं चैव परिविंदकयाजनम् ॥ कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम् ॥ ॥ (५) ॥ आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणम् ॥ स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च ॥ (६) ॥ इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीवनम् ॥ हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः ॥ (७) ॥ शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम् ॥ तथैवाऽनाश्रमे वासः परान्नपरिपुष्टता ॥ (८) ॥ असच्छास्त्राधिगमनमाकरेष्वधिकारिता ॥ भार्याया विक्रयश्चैषामेकैकमुपपातकम् ॥ (९) ॥ " इति । अथैषामर्थः—गोवधो गोपिंडव्यापादनम्, कालेऽनुपनीतत्वं व्रात्यता, ब्राह्मणसुवर्णतत्समव्यतिरिक्तपरद्रव्यापहरणं स्तेयम्, गृहीतस्य सुवर्णादेरप्रदानमृणानामपाकरणं, तथा देवर्षिपितृसंबंध्यृणस्यापाकरणञ्च, सत्यधिकारेऽनाहिताग्नित्वम्, तथाऽपण्यस्य लवणादेर्विक्रयः, सहोदरस्य ज्येष्ठस्य तिष्ठतः कनीयसो भ्रातुर्दाराग्निसंयोगः परिवेदनम् ॥ (१) ॥ पणपूर्वमध्यापकादध्ययनग्रहणम्, पणपूर्वाध्यापनम्, परदारसेवनम्, पारिवित्त्यं कनीयसि कृतविवाहे ज्येष्ठस्य विवाहराहित्यम्, वार्धुष्यं प्रतिषिद्धवृद्ध्युपजीवनम्, लवणस्योत्पादनमूषरादितः ॥ (२) ॥ स्त्रीत्यादि स्पष्टम्, निंदितार्थोपजीवनमराजस्थापितार्थोपजीवनम्, नास्ति परलोक इत्याद्यभिनिवेशो नास्तिक्यम्, व्रतलोपो ब्रह्मचारिणः स्त्रीप्रसंगः, सुतानामपत्यानां विक्रयः ॥ (३) ॥ धान्यं व्रीह्यादि, कुप्यमसारं त्रपुसीसादि, पशवो गवादयस्तेषामपहरणम्, ' गोवधो व्रात्यता स्तेयम् ' इत्यनेनैव सिद्धे पुनर्धान्यादिग्रहणं प्रायश्चित्तविशेषार्थमेवमेव बांधवत्यागग्रहणेनैव सिद्धे पुनः पित्रादित्यागो विज्ञेयः, अयाज्यानां जातिकर्मदुष्टानां शूद्रव्रात्यादीनां याजनम्, पितृमातृसुतानामपतितानां परित्यागो गृहान्निष्कासनम्, तडागादिविक्रयः ॥ (४) ॥ कन्यादूषणमंगुल्यादिना योनिविदारणं न तु भोगः, तस्य 'सखिभार्याकुमारीषु' इति गुरुतल्पसमत्वोक्तेः । परिविंदकस्य परिवेत्तुर्याजनम्, तस्यैव कन्याप्रदानं च, कौटिल्यं गुरोरन्यत्र, गुरुविषयस्य तु कौटिल्यस्य सुरापानसमत्वोक्तेः । पुनर्व्रतलोपग्रहणं शिष्टप्रसिद्धेष्वपि श्रीहरिचरणेक्षणं विना तांबूलं न भक्षयामीत्येवंरूपेषु व्रतेषु प्राप्त्यर्थम् ॥ (५) ॥ क्रियारंभः पाकारंभः " अघं स केवलं भुंक्ते यः पचत्यात्मकारणात् " इति तस्यैव प्रतिषिद्धत्वात्क्रियामात्रविषये त्वतिप्रसंगः स्यात् । मद्यपाया जायाया भोगः, स्वाध्यायत्यागो वेदाभ्यासादिराहित्यम्, अग्नीनां श्रौतस्मार्तानां त्यागः, सुतत्यागस्तत्संस्काराकरणम्, बांधवानां पितृव्यमातुलादीनां त्यागः सति विभवेऽपरिरक्षणम् ॥ (६) ॥ पाकादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमच्छेदो न त्वाहवनीयादिरक्षणार्थमपि, स्त्रिया, हिंसया, औषधेन च जीवनम् । तत्र स्त्रीजीवनम्—भार्यां पण्यभावेन पुरुषांतरभोगार्थं प्रयोज्य तल्लब्धोपजीवनं, स्त्रीधनेनोपजीवनं वा, हिंसया प्राणिवधेन जीवनम्, औषधजीवनं वशीकरणादिना, हिंस्रयंत्रस्य तिलेक्ष्वादिपीडनादिरूपस्य प्रवर्तनम्, व्यसनानि मृगयादीनि, आत्मविक्रयो द्रव्यग्रहणेन परदास्यकरणम् ॥ (७) ॥ शूद्रस्य प्रेष्यं सेवनम्, हीनजातिषु मैत्रीकरणम्, अनूढसवर्णदारस्य केवलं हीनवर्णदारोपसेवनम्, साधारणस्त्रीसंभोगश्च, अगृहीताश्रमत्वं सत्यधिकारे, परपाकरतित्वम् ॥ (८) ॥ चार्वाकादिग्रंथावगमः, आकरेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाऽधिकारित्वम्, भार्याया विक्रयः, चान्मन्वाद्युक्ताभिचारमतिपूर्वलशुनादिभक्षणादेर्ग्रहणम् ॥ (९) ॥ मातृगमनदुहितृगमनस्नुषागमनान्यतिपातकानि, स्वसृसखीसगोत्रोत्तमवर्णारजस्वलाशरणागताप्रव्रजितानिक्षिप्तानां गमनमनुपातकानि, अनुपातकानामेव विष्णुना पातकसंज्ञोक्ता " महापापं चातिपापं तथा पातकमेव च । प्रासंगिकं चोपपापमित्येषां पञ्चको गणः ॥ " इति कृतं प्रसक्तानुप्रसक्त्या ॥ ५९ ॥ यतः संयतश्चासावात्मा बुद्धिर्यतात्मा सोऽस्यास्तीति यतात्मवान् । उपोष्य स्थित्वा उपवासार्थकत्वे तु निरन्नस्य यतात्मत्वाऽसंभवात्पाठस्यापि दुष्करतैवेति प्रतीयते । भयात्संसारात् ॥ ६० ॥ अत्र ये देवादयः कीर्तितास्तेऽपि कीर्तनात् यत्र यद्भागवतं गृणतः शृण्वतश्च नॄन्कामान्यच्छन्ति ददति यत्रेति द्वितीयार्थे त्रल् ॥ ६१ ॥ गृह्यसूत्रोक्तं फलमाह—ऋच इति । तथाहि—" यदृचोऽधीते पयसः कुल्या अस्य पितॄन्स्वधा उपक्षरंति यद्यजूंषि घृतस्य कुल्या यत्सामानि मध्वः कुल्या योऽथर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुराणसंहितामेतामधीत्य प्रयतो द्विजः ॥ प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ॥ ६३ ॥ विप्रोऽधीत्याऽऽप्नुयात्प्रज्ञां राजन्योदधिमेखलाम् ॥ वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात् ॥ ६४ ॥ कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम् ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसंगैः ॥ ६५ ॥ तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिम् ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मि ॥६६॥ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय ॥ भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय॥६७॥

किंच प्रोक्तमिति॥६३॥राजन्य उदधिमेखलां पृथ्वीम्।संधिरार्षः॥६४॥अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह।कलिमलानां संहतिं समूहं कालयति विनाशयतीति तथा इतरत्र वाङ्मांतरे॥६५॥शास्त्रप्रतिपादितं भगवंतं नमस्करोति तमिति द्वाभ्याम्। जगदुदयस्थितिसंयमात्मनो रजआदयः शक्तयो यस्य तम्।द्युपतिभिर्देवैरपि दुरवसितः अज्ञातः स्तवः स्तोत्रं यस्य तम् ॥ ६६ ॥ उपचिताभिः उद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितं स्थिरं जंगमं च आलयो यस्य तस्मै

गिरसः सोमस्य कुल्या यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः" इति ॥ ६२ ॥ जीवन्मुक्तिफलकत्वमस्याह–किंचेति । "मनसा वचसा दृष्ट्या गृह्यतेन्यैरपींद्रियैः। अहमेव न मत्तोऽन्यदिति बुद्ध्यध्वमंजसा ॥" इतिरीत्या यत्सर्वात्मकत्वरूपं भगवतः पदं स्वरूपं भगवतैवर्षिभ्यः प्रोक्तमर्थादद्वैतनिष्ठारूपं तद्व्रजेल्लभेदित्यर्थः ॥ ६३ ॥ प्रज्ञां प्रकृष्टज्ञानं सर्वपुराणेतिहासाध्ययनाध्यापनसामर्थ्यलक्षणं प्राप्नुयात् । उदधिर्मेखलेव परितो व्याप्तो यस्याः सोदधिमेखला भूमेर्नामेदम्। "समुद्रमेखले देवि पर्वतस्तनमंडले" इति मंत्रात्, तथा च भूमिं प्राप्नुयान्न तु समुद्रांतर्गतां सर्वामिति नरेन्द्रादिपदवद्यत्किंचिन्नराणां पत्यावपि यथा नरेंद्रपदं प्रयुज्यते, तथा यत्किंचिद्भूपतिरप्युदधिमेखलापतिरुच्यत इति । अत्र संधिरार्षः। यद्वा–अदधिः, आप अधि कोर्थोऽधिका यस्मिन्नित्यदधिः। अत्रार्षत्वाद्वर्णविकारो मयूरादिवत् । अवस्थांतरप्राप्तिर्विकारस्तस्मात्पस्य दः । एवं निधिपतिरपि ज्ञेयः । "निधिः पद्मादिनवके वस्वब्धिस्थापनेषु च" इति धरणिः । धनपतिः स्यादित्यर्थः । शूद्रः शृण्वन्नेव तस्य पाठानधिकारात् । तदुक्तं पुराणाधिकारप्रस्तावे भविष्ये–" अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च । श्रोतव्यमेव शूद्राणां नाध्येतव्यं कदाचन ॥ श्रौतं स्मार्तं च वै धर्मं प्रोक्तमस्मिन्नृपोत्तम । तस्माच्छूद्रैर्विना विप्रं न श्रोतव्यं कदाचन ॥" इति ॥ ६४ ॥ एवं प्रभावातिरेके पूर्वोक्तरीत्या प्रभावाधिक्ये । इह श्रीभागवते । अशेषमूर्तिरनंतमूर्तिः । अनुपदं प्रतिश्लोकम् । पदानि संत्यत्रेति पदः । अजत्र मत्वर्थीयः । पद्यम्। पदं पदमनुपदं वीप्सार्थकानुपदयोगे द्वितीया । तत्तत्कथाप्रसंगैर्भगवानेवात्र कीर्तित इति । अत्र कर्म ब्रह्मादिप्रतिपादकशास्त्रेऽखिलेशो विराडंतर्यामी तत्पालको विष्णुर्वापि न गीयते, क्वचिद्गीयते वा तत्र त्वभीक्ष्णं नैव गीयते । तुरवधारणे । इह भागवते भगवानेवाभीक्ष्णं गीयते नारायणादयो येऽत्र वर्णितास्तेप्यशेषा एव मूर्तयोऽवतारा यस्य स तथाभूत एव गीयते न त्वितरत्रेव तद्विवेकेनेत्यर्थः। अत एव तत्तत्कथाप्रसंगैरपि भगवानेव पारि सर्वतोभावेन पठितो व्यक्तमेवोक्त इत्यर्थः ॥ ६५ ॥ आदिनाऽनंतादिग्रहः । सर्वज्ञैरपि देवैरज्ञातगुणगणत्वाद् दुर्ज्ञेयं तं नतोऽस्मीति । तमजं नतोऽस्मि, किं ब्रह्माणं नमसि? न, अनंतम्। किं प्रधानं? न, आत्मतत्त्वं चेतनस्वरूपम्। किं शुद्धजीवं? न,जगदुदयाद्य आत्मशक्तितो यस्य तम्। किं दुर्गापतिं शंभुम्? "विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् " इति मार्कंडेयोक्तेः 'शिवार्द्धांगहरा दुर्गा' इति पुराणांतराच्च, न, द्युपतिभिरजाद्यैरप्यज्ञातस्तुतिकमच्युतं श्रीकृष्णम्, "को वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोक्तीर्भवतस्त्रिलोक्याम्" इति ब्रह्मोक्तेः। 'नाहं वेदापरेऽपि च' इत्युक्तेः, "यतो वाचो निवर्तंते अप्राप्य मनसा सह" इति श्रुतेश्च ॥ ६६ ॥ स्वे स्वीये । आत्मनि स्वरूपे । उपरचितमाविर्भावितं यत्स्थिरं स्थावरं जंगमं च तदेवालयो निवासस्थानं यस्य तस्मै स्वप्रकाशितजग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि॥६८॥इति श्रीभाग॰ महा॰ द्वाद॰ द्वादशस्कन्धार्थनिरूपणं नाम द्वादशोऽध्यायः॥१२॥सूत उवाच॥यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः॥ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुःसुरासुरगणा देवाय तस्मै नमः॥१॥

भगवते ॥ ६७ ॥ श्रीगुरुं नमस्करोति । स्वसुखेनैव निभृतं पूर्णं चेतो यस्य । तेनैव व्युदस्तोऽन्यस्मिन् भावो यस्य तथाभूतोऽपि अजितस्य रुचिराभिर्लीलाभिः आकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः । तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोऽस्मीति ॥६८॥ इति श्रीमद्भागवते द्वादशस्कंधे टीकायां द्वादशोऽध्यायः॥१२॥ त्रयोदशे पुराणानां संख्यामाह यथाक्रमम् ॥ दानं दानस्य माहात्म्यं श्रीमद्भागवतस्य च ॥ १ ॥ सर्वपुराणसंख्यादीनुपवर्णयिष्यंस्तत्प्रतिपाद्यं देवं प्रणमति । यमिति । स्तवैर्वेदैश्च स्तुन्वंति स्तुवंति । उपनिषच्छब्दस्याकारांतत्वं छंदोऽनुरोधेन । ध्यानेनावस्थितं निश्चलं तद्गतं यन्मनस्तेन यस्यांतं न विदुः सुरासुरगणाः ॥ १ ॥

ति जीवरूपेणांतर्यामिरूपेण च स्थिताय । उपलब्धिमात्रधाम्ने सर्वज्ञानस्वरूपाय ज्ञानमात्राधिष्ठानाय वा । सुरऋषभाय सर्वदेवोत्तमाय श्रीकृष्णाय । सनातनाय सर्वावस्थासु विद्यमानाय । एतच्च श्रीकृष्ण एव संपद्यते । “ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ” इति, “ मया ततमिदं सर्वं जगत्स्थावरजंगमम् ” इति च तदुक्तेः । यद्वा–उपलब्धिमात्रं परं ब्रह्म तस्य धाम्ने स्थानाय ‘ ज्ञानमात्रं परं ब्रह्म ’ इत्युक्तेः, ‘ ब्रह्मणो हि प्रतिष्ठाहम् ’ इति श्रीमुखोक्तेः, ‘ सनातनस्त्वं पुरुषो मतो मे ’ इत्यर्जुनोक्तेश्च सनातनत्वमपि तत्रैव संगच्छते ‘ देवानामच्युतो यथा ’ इत्यग्रे वक्ष्यमाणत्वात्सर्वदेवश्रेष्ठोऽपि स एवेति ॥ ६७ ॥ स्वसुखेन परमानन्दावाप्त्या । तेनैव स्वसुखपूर्णचेतस्त्वेनैव । अन्यस्मिन्परमानंदस्वरूपादितरत्र, भावः स्नेहो यस्य । तथाभूतोपि परमानंदतृप्तोपि । अजितस्य श्रीकृष्णस्य । रुचिराभिर्मनोहराभिर्बाल्यादिचारितैराकृष्ट आकर्षणविषयीकृतः । “ तदिति ब्रह्मणो नाम” इति श्रुतेस्तद्ब्रह्म तस्य भावस्तत्त्वं श्रीकृष्णः “ अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् । यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनम् ॥ ” इति ब्रह्मोक्तेस्तस्य प्रकाशकम् । अखिलानि वृजिनानि पापानि हंति दर्शन स्मरणादिनेत्यखिलवृजिनघ्नः ‘कलुषं वृजिनैनोघम् ’ इत्यमरः । ब्रह्मरूपत्वात्तस्य सर्वाघनिवर्तकत्वम् । ‘शुकाय ब्रह्मरूपिणे ’ इत्यग्रिमाध्यायोक्तेः स्वेष्टदेवं शास्त्रप्रतिपाद्यं नत्वा स्वगुरुं प्रणमति–स्वसुखेन ब्रह्मानंदेन निभृतं परिपूर्णं चेतो यस्य तम् । तेन तथात्वेन व्युदस्तो दूरीभूतोऽन्यस्मिन्भावो मनोव्यापारो यस्य तम् । तथाभूतोऽप्यजितस्य श्रीकृष्णस्य रुचिरलीलया कर्त्र्याऽतिबलवत्याकृष्टस्तस्माद्ब्रह्मानंदात्सकाशात्स्वास्मिन्नानतिः सारो रसानुभवसामर्थ्यं यस्य सः, ब्रह्मरसास्वादादपि लीलारसास्वादे माधुर्याधिक्यमनुभूय तत्रैव यः प्राप्तनिष्ठोऽभूदिति भावः । तेन लीलारसोऽयं तस्य न समाधिभंजकः प्रत्यूहस्तथात्वे तेन तत्रैव पुनः समाध्यर्थमेवायातिष्यत न तु तथाकृतं प्रत्युत कृपयान्येभ्योऽपि लीलारसास्वाददित्सया तत्त्वदीपं लीलारसतत्त्वप्रकाशकं व्यतनुत । अत एवोक्तम्–“ हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ” इति, ‘ परिनिष्ठितोऽपि नैर्गुण्ये ’ इत्यादि पुराणं श्रीभागवतं व्यतनुत विस्तरपूर्वं व्याख्यातवान् ॥ ६८ ॥ इति श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥ यथाक्रमं सप्तमाध्यायोक्तपुराणगणनाक्रममनतिक्रम्य । तत्र हि–‘ ब्राह्मं पाद्मं वैष्णवं हि ’ इत्यादिना पुराणाष्टादशकमुक्तमिति (१) । तत्प्रतिपाद्यमष्टादशपुराणप्रतिपाद्यम् । दिव्यैरलौकिकैः । अंगादिपाठचतुष्केण अंगपाठपदपाठक्रमपाठोपनिषत्पाठैर्गायंति । अंगादिपाठज्ञानञ्च वेदाध्ययनसाध्यमिति । यद्वा–अंतिमेऽ–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृष्ठे भ्राम्यदमंदमंदरगिरिग्रीवाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः ॥ यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ २ ॥ पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥ ब्राह्मं दशसहस्राणि पाद्मं पंचोनषष्टि च ॥ श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम् ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः ॥ मार्कंडं नव वाह्नं तु दशपंच चतुःशतम् ॥ ५ ॥

क्षीरोदमथनादौ दुर्ज्ञेयत्वमेव प्रदर्शयितुं कूर्मावतारमनुस्मारयन्नाशिषः प्रार्थयते । पृष्ठे भ्राम्यत् अमंदो मंदरगिरिः गरिष्ठो मंदराचलस्तस्य ग्रावाणस्तेषामग्राणि तैः कंडूयनाच्चेन सुखेन निद्रालोः निद्राशीलस्य येषां श्वासानिलानां संस्कारास्तेषां कलाश्च लेशाः तदनुवर्तनवशाज्जलनिधेरंभसां यातायातं न विश्राम्यति । ननु समुद्रक्षोभादेव तत् न संस्कारवशात्तत्राह । वेलाक्षोभस्तस्य निभेन मिषेण ॥ २ ॥ पुराणसंख्यास्तासां संभूतिं समाहारं चास्य तु श्रीभागवतस्य वाचम् विषयाः प्रयोजनं च दानं च तस्य पाठादेश्च माहात्म्यं निबोधत ॥ ३ ॥ त्रयोविंशत्त्रयोविंशतिसहस्राणि । चतुर्विंशति चतुर्विंशतिः । शैवकं शिवपुराणम् ॥ ४ ॥ वाह्नं तु अग्निपुराणं तु दशपंचसहस्राणि

ध्याये पुनरपि मंगलं नत्यात्मकमाचरति । उपनिषच्छब्दोऽदंत आर्षः, तेनैतत्पुराणपाठेन भगवतस्तस्य स्तुतिसंकीर्तनमेव मम यथाकथंचिदभून्न तु सम्यगवगम इति भावः ॥ १ ॥ सुरासुरगणदुर्ज्ञेयाऽनंतता भगवता कूर्मावतार एव दर्शिताऽतस्तत्स्मरणपूर्वकं श्रीभागवतं समापयञ्श्रीभागवतस्यापि दुर्ज्ञेयार्थतां ध्वनयति । श्वासानिलाः प्राणवायवः वो युस्मानध्येत्रध्यापकवक्तृश्रोतॄन् पांतु बलौजआदिदानेन रक्षन्तु । श्रीभगवत एव श्वसनतः सर्वेषां बलाद्युत्पत्तिश्रवणात् । तदुक्तमेकादशे–" यस्येंद्रियैस्तनुभृतामुभयेन्द्रियाणि ज्ञानं स्वतः श्वसनतो बलमोज ईहा " इत्यादीति । अत्राक्षिपति–नन्विति । किञ्च–समुद्रमथनं भगवतैव कूर्मरूपेण कृतं देवानां तु तत्र नाममात्रेणैव निमित्तता तथेदमप्यपारवेदमहासमुद्रमथनं मन्नाम्ना श्रीभगवतैव कृतमित्यर्थव्यञ्जकं व्यासोक्तमनुवदति–पृष्ट इति । येनैव समुद्रो मथितस्तेनैव भगवता मोहिनीरूपेणासुरान्वंचयित्वा तदुत्थममृतं स्वभक्तेभ्यो देवेभ्यो दत्तं, तथैव वेदसमुद्रमथनोत्थमिदं भक्त्यमृतं श्रीभागवतरूपेणाभक्तानसुरान्वञ्चयित्वा युष्मभ्यं ददाविति भक्तान्प्रत्याशीर्वादः ॥ २ ॥ यथाखंडमण्डलपतेस्तत्र मंडलेशा एतावंत इति गण्यते तथैव महापुराणचक्रवर्तिनः श्रीभागवतस्य संन्निधौ पुराणान्यवश्यं गणयामीत्यतः पुराणानां संख्यायास्संभूतिं सम्भवम् ॥ ३ ॥ ब्राह्मं ब्रह्मपुराणम् । दशसहस्राणि अयुतश्लोकपरिमितमित्यर्थः । पाद्मं पद्मपुराणम् । पञ्चभिरूना षष्टिः श्लोकसहस्राणां यत्र तत्तथा । उत्तरपदलोपी समासः । एवमग्रेऽपि ज्ञेयम् । त्रिभिरधिका विंशतिस्त्रयोविंशतिः; छांदसत्वाद्विंशते विंशदादेशः ॥ ४ ॥ दशसहस्राण्यष्टौ सहस्राणि च यत्र श्लोकास्तच्छ्रीभागवतमित्यर्थः । मार्कण्डं मार्कण्डेयम्, पृषोदरादिः । वह्नेरिदं वाह्नम्, चतुःशतमित्युक्तेर्दशपंचसहस्राणीति लभ्यते, चतुर्णां शतानां समाहारश्चतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्दश भविष्यं स्यात्तथा पंचशतानि च ॥ दशाष्टौ ब्रह्मवैवर्तं लिंगमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ॥ स्कांदं शतं तथा चैकं वामनं दश कीर्तितम् ॥ ७ ॥ कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौपर्णं ब्रह्मांडं द्वादशैव तु ॥ ८ ॥ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥९॥ इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे ॥ स्थिताय भवभीताय कारुण्यात्सं प्रकाशितम् ॥ १० ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ॥ हरिलीलाकथाव्रातामृतानंदितसत्सुरम् ॥ ११ ॥

चत्वारि शतानि ॥ ५ ॥ ६ ॥ स्कांदं शताधिकैकाशीतिसहस्रम् ॥ ७ ॥ सौपर्णं गरुडपुराणमेकोनविंशदेकोनविंशतिः ॥ ८ ॥ महाभारतं त्वितिहासः । रामायणं च ऋषिप्रोक्तं काव्यम् । अतः पुराणानां संदोहः समूहश्चतुर्लक्षसंख्याक एव । इदानीमस्य वाच्यप्रयोजनादीन् दर्शयितुमाह तत्रेत्यादिना ॥ ९ ॥ १० ॥ हरिलीलाकथानां

शतम् । यद्वा–दशभिः सहिताः पञ्च यत्र तत्तथा । पुनश्चत्वारि शतानि यत्र तत्तथा । एवमग्रेपि ॥ ५ ॥ ६ ॥ ७ ॥ तत्तु पुराणं तु ॥ ८ ॥ महाभारतादीनां पुराणत्वशंकां निरस्यति स्वामी–महाभारतं त्विति । ऋषिप्रोक्तं वाल्मीकिप्रोक्तम् । अतो महाभारतरामायणयोः पुराणत्वाभावात् । तत्राऽष्टादशसु पुराणेषु । तत्रेति–यथैवाऽवतारत्वादवतारमध्ये कृष्णं गणयित्वा पुनः “ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम् ” इति कृष्णस्य पृथग्गणना, तथैव पुराणत्वात्पुराणमध्ये श्रीभागवतं गणयित्वा “ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ” इति पुनर्गणना पुराणचक्रवर्तित्वव्यञ्जिका । यथा च तत्र स्वयं पदं सर्वोत्कर्षव्यञ्जकं, तथात्रापि श्रीमदिति पदमिति प्रक्रान्तं सम्पूर्णमेव ॥ ९ ॥ तदेव व्यनक्ति–कारुण्यात्कृपापारवश्यात् । भगवता श्रीकृष्णेन । गर्भोदशायिने नाभिपंकजे स्थिताय ब्रह्मणे ॥ १० ॥ यत् सर्वेषां वेदान्तानामुपनिषदां सारं ब्रह्मात्मनोर्ब्रह्मजीवयोरेकत्वलक्षणमभेदरूपमद्वितीयं वस्तु तदेव निष्ठाविषयो वाच्यं यस्य तत्तन्निष्ठं ब्रह्मैकज्ञानमस्य विषय इत्यर्थः । कैवल्यं स्वरूपावाप्तिरेवैकं मुख्यं प्रयोजनं यस्य तत्तथा प्रसंगादस्य सम्बन्धस्तु वाच्यवाचकभावरूपो ज्ञेयः । अधिकारी त्वेतज्जिज्ञासुरेवेत्येतदनुबन्धचतुष्टयम्–‘ धर्मः प्रोज्झितकैतवः ’ इत्यत्रोक्तमप्यत्र स्मृतिलाभाय ध्वनितमिति । वाच्यं प्रयोजनञ्चाह–हरेर्लीलाकथानां व्रातः समूह एवाऽमृतं तेनानंदिताः सन्तो भक्ता एव सुरा येन तदिति लीलाकथाव्रातशब्देन भक्तिरूपं वाच्यं व्यञ्जितं तदेवामृतमिति प्रेमरूपं प्रयोजनं च प्रेम्णैव भक्तेरमृतवदास्वाद्यत्वप्रसिद्धेः, तेन सतामानन्द इति प्रेम्णोऽनुभावः । तत्र कथायाममृतत्वारोपेण तत्सम्प्रदानानां सतां सुरत्वारोपेण च तत्सम्प्रदातुः शास्त्रस्यास्य मोहिनीत्वारोपो लभ्यते, मोहिन्यैव सुरेभ्योऽमृतदानत्वप्रसिद्धेः । ततश्च सुरान्स्वभक्तान्स्वं विदुषः प्रति भ्रूविभंगेनैवान्यजनाज्ञातं यथा ब्रूते स्म मदनुभावस्यास्य युष्मदानुकूल्यमेव कर्तव्यं प्रयोजनं चासुरान्वंचयित्वा युष्मभ्यममृतदानम् । यथा चासुरान्स्वतत्त्वमविदुषः प्रति अपि भ्रूचालनेनैतत्स्पष्टमेव ब्रूते स्म तदाविर्भावस्य युष्माकं विजयप्रापणमेव कर्तव्यं,प्रयोजनं च युष्मभ्यममृतदानमितीदं गौणमेव । मुख्यप्रयोजनं तु यद्युष्मान्नित्यमानन्दचमत्कारं प्रापयामि युष्मद्गृहस्थित्यैवातोऽतिदीनानेतान्देवान्प्रथमं किञ्चित्परिवेषयामीति तथैवेदं भागवतशास्त्रमपि स्वतत्त्वज्ञान्स्वभक्तान् ‘ हरिलीला ’ इत्यर्धपद्येन स्ववाच्यम् “परोक्षवादा ऋषयः परोक्षं मम च प्रियम्” इति भगवदुक्तेर्व्यञ्जनावृत्त्यैव सर्वलोकालक्षितमुक्त्वा स्वतत्त्वमविदुषः शास्त्रज्ञमानिनः प्रकटमेव स्ववाच्यप्रयोजने अन्ये एवाह–सर्ववेदान्तानां सारं यद्ब्रह्मणा सहात्मैक्यमद्वितीयं वस्तु तस्मिन्वाचकत्वेन निष्ठा यस्य तत् । कैवल्यमेकं मुख्यं प्रयोजनं यस्य तत् । केचित्पुनरेवं व्याचक्षते–शास्त्रेऽस्मिन्द्वयोरेव भक्तिज्ञानयोरुक्तत्वाद्भक्तिप्रेमणी वाच्यप्रयोजने उक्त्वा ज्ञानकैवल्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वलक्षणम् ॥ वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥ १२ ॥ प्रोष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितम् ॥ ददाति यो भागवतं स याति परमां गतिम् ॥ १३ ॥ राजंते तावदन्यानि पुराणानि सतां गणे ॥ यावद्भागवतं नैव श्रूयतेऽमृतसागरम् ॥ १४ ॥ सर्ववेदांतसारं हि श्रीभागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ १५ ॥ निम्नगानां यथा गंगा देवानामच्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥ १६ ॥

व्रातः समूहः स एवामृतं तेनानंदिताः संतः सुराश्च येन तत् ॥ ११ ॥ तन्निष्ठं तद्विषयम् ॥ १२ ॥ प्रौष्ठपद्यां भाद्रपद्याम् । हेमसिंहसमन्वितं सुवर्णसिंहासनारूढम् ॥ १३ ॥ ॥ १४ ॥ तद्रस एवामृतं तेन तृप्तस्य निर्वृतस्य ॥ १५ ॥ १६ ॥

अपि वाच्यप्रयोजने आह–सर्वेति । अपरे त्वेवमाहुः–शास्त्रेऽस्मिन्प्रक्रमे एव 'धर्मः प्रोज्झितकैतवोऽत्र परमः' इत्यनेन परमधर्मस्य भक्तेरेव वाच्यत्वावगमात् 'ईश्वरः। सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः' इत्यनेन प्रेम्ण एव प्रयोजनत्वावगमाच्च । तथा सर्वस्कन्धेषु ज्ञानात्तत्साध्यमुक्तेश्च सकाशाद्भक्तेरेव प्राधान्यदर्शनात् 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायाद्भक्तिप्रेम्णोरेव वाच्यत्वप्रयोजनत्वे व्यज्येते, तस्मान्मोहिनिसाधर्म्यप्रापकप्रकटार्थमेतत्पद्यमाभ्यन्तरेणाप्यर्थान्तरेण योजनीयम् । तद्यथा–ब्रह्मात्मैक्यलक्षणं यद्वस्तु तन्निष्ठं ततोऽपि निःसृत्य तिष्ठतीति तन्निष्ठं ज्ञानकर्माद्यभिलाषरहिता केवला अनन्यभक्तास्तेषां भावः कैवल्यं तदेव प्रयोजनं यस्य तदिति ॥ ११ ॥ १२ ॥ नामैकदेशोच्चारणन्यायेन सिंहपदं सिहासनं वक्तीत्याह–सुवर्णसिंहासनेति । दानपात्रं तु 'जन्माद्यस्य' इति व्याख्याशतके प्रोक्तमपि प्रसंगात्पुनरत्रोच्यते–"सुवृत्ताय गृहस्थाय कृष्णभक्ताय सन्ततम् । सर्वशास्त्रविदेऽध्यायाऽध्यापने निरताय च ॥ विप्राय देयमेतत्तु श्रीमद्भागवतं मुने । अस्य पाठादिनिरतो विरक्तोऽपि यदा द्विजः ॥ तस्मा अपि देयमेतन्न बद्ध्वा स्थापिने क्वचित् ।" इति संहितोक्तेः । प्रौष्ठपद्या भाद्रसम्बन्धिन्याम् । तस्मिन्नेव दिने श्रीमुनीन्द्रेणैतत्पुराणं समाप्तीकृतमिति पाद्मोत्तरखण्डमाहात्म्ये दृष्टम् । हेमसिंहेति–सर्वशास्त्रमहाराजस्यास्य पुराणसूर्यस्य साम्राज्यार्थं सिंहासनौचित्यात् । सर्वग्रहराजस्य सूर्यस्याऽपि सिंहराशिगस्य सिंहासनारूढता दृष्टैव । परमां परमस्य भगवतः सन्निधिरूपाम् । "ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्" इत्युक्तेः ॥ १३ ॥ श्रूयत इत्यत्र 'दृश्यते' इति पाठश्चक्रवर्त्यादिसम्मतोऽस्ति । अस्य सर्वशास्त्रराजत्वमेवाह–राजन्त इति । अन्यानि पुराणानि तावच्छास्त्रराजत्ववन्ति, यावन्नेति भागवतं तु सम्राडेवातः शास्त्रमहाराजत्वमत्रैवेति भावः । यद्वा–अस्य पुराणसूर्यत्वमाह–राजन्ते दीप्यन्ते रात्रौ नक्षत्राणीवेति भावः यावद्राजन्ते, यावन्नेति सति सूर्ये न दृश्यंते इति भावः ॥ १४ ॥ तद्रसः श्रीभागवतरसः 'पिबत भागवतं रसमालयम्' इत्युक्तेः । स च श्रीकृष्णलीलामाधुर्यादिलक्षण एव । अमृतं पीयूषम् ॥ १५ ॥ निम्नं गच्छन्तीति निम्नगा नद्यस्तासां गंगा भागीरथी, अग्रिमश्लोके 'यथा–काशी ह्यनुत्तमा' इत्युक्तेरच्युतादिपदैरपि तल्लिंगव्यत्यासेनोत्तमपदं योज्यम् । न उत्तम उत्कृष्टो यस्माद्यस्या वेति यथोचितं समसनीयम् । किञ्च–सर्ववैष्णवशिरोमणेः श्रीशिवस्य त्रिपुण्ड्रभस्मरुद्राक्षधृतिदर्शनादेतत्कालिकैस्तत्कथं न धार्यत इति न शङ्कनीयम्

१ सर्वपापनाशकत्वेन ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ॥ तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ॥ १७ ॥ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते ॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन्विपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥ ॥ १८ ॥ कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥ योगींद्राय तदात्मनाऽथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥ १९ ॥

॥ १७ ॥ पारमहंस्यं परमहंसैः प्राप्यम् । नैष्कर्म्यं सर्वकर्मोपरमः।भक्त्या तच्छ्रवणादिपरो विमुच्येत् ॥ १८ ॥ श्रीभागवतसंप्रदायप्रवर्तकरूपेण भगवद्ध्यानलक्षणं मंगलमाचरति । कस्मै ब्रह्मणे । अतुलोऽसमः । अयं श्रीभागवतरूपः । पुरा कल्पादौ । तद्रूपेण ब्रह्मरूपेण नारदाय । (तद्रूपिणा नारदरूपिणा । कृष्णाय व्यासाय । तद्रूपिणा) योगींद्राय शुकाय । तदात्मना शुकरूपेण । तत्परं सत्यं श्रीनारायणाख्यं तत्त्वं धीमहि । इति गायत्र्यैव यथोपक्रम

' न देवचरितं चरेत्' इति स्मृतेः । यच्चैतद्धारणे वैष्णवैः, तुलस्यादिधारणे शैवैश्च निन्दोच्यते, तत्परमार्थाऽज्ञानविजृम्भितैव । यानि तु तत्तन्निन्दावाक्यान्युदाह्रियन्ते, तानि निर्मूलान्येवेति । न हि रुद्राक्षादिधृत्या वैष्णवत्वं नश्यति किन्तु वर्द्धत एव, तथैव तुलस्यादिधृत्या शैवत्वं न नश्यति किन्तु वर्द्धत एव, तथापि ' महाजनो येन गतः स पन्थाः ' इति न्यायमाश्रित्य वर्तितव्यमिति तत्त्वम् । इदं श्रीभागवतम् ॥ १६ ॥ काश्या महत्त्वं हि शतपथब्राह्मणे वर्णितम् । तथाहि-" अविमुक्तं ह वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमत्र हि जन्तोः प्राणेषु ऋममाणेषु रुद्रस्तारकं चष्टे येनासावमृती भूत्वा मोक्षी भवति" इति श्रुतेः । यद्वा-कं सर्वपुरीविलक्षणं मोक्षसुखं यत्र सा काशी मथुरा । तदुक्तं वाराहे- " काश्यादयो यद्यपि सन्ति पुर्यस्तासां तु मध्ये मथुरैव धन्या । या जन्ममौञ्जीव्रतमृत्युदाहैर्नृणां चतुर्द्धा विदधाति मुक्तिम्॥ " इति । यद्वा- कं ब्रह्माश्नुते सर्वदा तिष्ठत्यत्रेति काशी " पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः " इति नारदोक्तेः, " मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः " इति श्रीदशमोक्तेश्च । "मथुरेति त्रिवर्णीयं त्रयीतोऽपि गरीयसी । त्रयी तु धावति ब्रह्म तदेनामनुधावति ॥ " इत्यभियुक्तोक्तेश्च । 'कं ब्रह्मणि सुखेऽम्बुनि ' इति विश्वः । क्षेत्राणां पुण्यक्षेत्राणाम् । " क्षीयन्ते यत्र पापानि त्रायते यन्महाभयात् । तत्क्षेत्रमुच्यते प्राज्ञैः " इति स्कान्दोक्तेः ॥ १७ ॥ अमलं सर्वशुद्धिकरम् । अमलं शुद्धाद्वैतविषयम् । विपठन् विशेषेण पठन् । विचारणपरः सातत्येनैतच्चिन्तनपरः । सर्वोत्कर्षमेवाह-भागवतं पुराणमेव श्रीमत् शोभायुक्तम् । न भवन्ति मलास्त्रिगुणोत्था यस्मात्तत् । यद्यतो वैष्णवानां प्रियं भक्त्युत्कर्षप्रतिपादकत्वादिति भक्त्युत्थज्ञानप्राप्तिलोमिभिर्ज्ञानिसिद्धैरप्येतदाश्रयणीयमेवेत्याह-यस्मिन्निति । परमहंसेभ्यो हितं पारमहंस्यम् । परं भक्त्युत्थत्वाच्छ्रेष्ठम्। ज्ञानसाधकैरप्येतत्सेव्यमित्याह-यत्रेति । नैष्कर्म्यं सर्वकर्मोपरमम् ॥ १८ ॥ ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते मङ्गलमाचरणीयमिति शिष्टाचारात् "मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते" इत्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ॥ य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ २० ॥ योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ॥ संसारसर्पदष्टं यो विष्णुरातममूमुचत ॥ २१ ॥

मुपसंहरन्गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति ॥ १९ ॥ तमेव देवतारूपेण गुरुरूपेण च प्रणमंति । न इति द्वाभ्याम् । व्याचचक्षे व्याख्यातवान् ॥ २० ॥ २१ ॥

भाष्याच्च शास्त्रसमाप्तौ तदाचरतीत्याह—श्रीभागवतसम्प्रदायेत्यादि । कस्मै—असर्वनाम्नोपि सर्वनामकार्यमार्षत्वात् । येन परब्रह्मणा । ज्ञानं परोक्षापरोक्षरूपं प्रकर्षेण दीपयतीति तथा । अयं श्रीमद्भागवतलक्षणा । कृष्णाय व्यासाय । अथेति—तदात्मनेत्यस्य द्विर्योजनायोक्तम् । शुद्धं सर्वोपाधिविनिर्मुक्तम् । विमलमज्ञानतत्कार्यानिवर्तकम् । "तरति शोकमात्मवित्" इति श्रुतेः । शोकोपलक्षितस्संसारः, विगतः शोको येन तद्विशोकं संसारतरणसाधनम् । अमृतं मृतिनिवर्तकम् । विमलविशोकामृतपदानां तात्पर्यत एकार्थत्वेपि पुनरुक्तिः सर्वथा संसारभयनाशकमित्यर्थेति ज्ञेयम् । सत्यं त्रैकालिकाबाध्यम् । ज्ञानान्तरेण विषयासत्यप्रतीतिर्बाधस्तदयोग्य मत एव परं सर्वतः परं सर्वावधीभूतम् । "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" इति श्रुतेः । धीमहीति साक्षाद्गायत्रीपदयोगेन गायत्र्येवेति पूर्वम् 'वस्त्वद्वितीयं तन्निष्ठम्' इति सामान्यतस्तात्पर्यं दर्शयित्वा 'जन्माद्यस्य' इत्याद्युपक्रमपोषकं श्रीभगवत्येव तस्य पर्यवसानं दर्शयन्नुपसंहरति—कस्मायिति । महावैकुण्ठं दर्शयता येन भगवता ब्रह्मणे विभासितं प्रकाशितम्, न तु विरचितमिदं भागवतम् । पुरा पूर्वपरार्द्धादौ । तदात्मनेत्यस्योत्तरोत्तरेणाप्यन्वयः । तत्र तदात्मना श्रीशुकरूपेणेति न केवलं चतुःश्लोक्येव तेन प्रकाशिता, अपि तु तत्रतत्राविष्टेनाखण्डमेवेदं पुराणमिति द्योतितम् । श्रीसङ्कर्षणसम्प्रदायप्रवृत्तिस्तु श्रीद्वैपायनकर्तृकप्रकाशानन्तर्गतत्वा पृथङ्नोक्ता । तत्परं सत्यं भगवदाख्यं तत्त्वं धीमहि 'यत्तत्पदमनुत्तमम्' इति सहस्रनामसु तच्छब्दस्य तन्नामत्वेन गणितत्वात् । परशब्देन श्रीभगवानेवोच्यते 'आद्योऽवतारः पुरुषः परस्य' इति द्वितीयोक्तेः । ब्रह्मादीनां बुद्धिवृत्तिप्रवर्तकत्वेनाभिधानात् । गायत्र्यर्थोपलक्षितेन धीमहीति गायत्रीपदेनोपसंहाराद्गायत्र्याख्यब्रह्मविद्यैवेयं श्रीभागवतपुराणम ॥ १९ ॥ कस्मै ब्रह्मणे । इदं भागवतम् । मुमुक्षवे सृष्टिप्रतिबन्धकाज्ञानं त्यक्तुकामाय । शास्त्रसमाप्तौ स्वाभीष्टदेवं प्रणमति—वासुदेवाय वसुदेवनन्दनाय । साक्षिण इति—अहं तस्य भक्तोऽभक्तो वा, शिष्टो दुष्टो वा, तदभिप्रेतं व्याख्यातुं वेद्मि न वेद्मि वेति स एव साक्षात्पश्यति तत्कृपैव मे शरणमिति भावः । अहं तावत्को वराको ब्रह्मापि तत्कृपां विना श्रीभागवतार्थं न वेत्तीत्याह—य इदमिति । मुमुक्षवे कृपया व्याचचक्षे उपदिदेशेत्येतदुपदेशात्पूर्वमेव तस्य मुमुक्षाऽऽसीत्तदुपदेशानन्तरं तु प्रेम्ण्यैवाऽकांक्षा, मोक्षे तूपेक्षैवाजनिष्टेति भावः ॥ २० ॥ ब्रह्म श्रीभागवतम् 'पुराणं ब्रह्मसंमितम्' इत्युक्तेः, रूपयति परीक्षिते वर्णयतीति ब्रह्मरूपी तस्मै । अमूमुचत् मोचयामास (२१) इतोऽग्रे 'भवे भवे' इत्यादिपद्यद्वयं प्राक्षितम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(भवेभवे यथा भक्तिः पादयोस्तव जायते ॥ तथा कुरुष्व देवेश नाथस्त्वं नो यतः प्रभो ॥ २२ ॥ नामसंकीर्तनं यस्य सर्वपापप्रणाशनम् ॥ प्रणामो दुःखशमनस्तं नमामि हरिं परम् ॥२३॥) इति श्रीमद्भागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां द्वादशस्कंधे त्रयोदशोऽध्यायः ॥१३॥

॥ संपूर्णोऽयं ग्रंथः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥

(॥ २२ ॥ २३ ॥) भावार्थदीपिकामेतां भगवद्भक्तवत्सलाम् ॥ परमानंदपादाब्जभृंगश्रीः श्रीधरोऽकरोत् ॥ १ ॥ स्वबालचपलालापैः स्वलीलापरिनर्तितैः ॥ प्रीयतां परमानंदनृहरिः सद्गुरुः स्वयम् ॥ २ ॥ श्रीपरानंदसंप्रीत्यै गुह्यं भागवतं मया ॥ तन्मतेनेदमाख्यातं न तु मन्मतिवैभवात् ॥ ३ ॥ क्वेदं नानानिगूढार्थं श्रीमद्भागवतं क नु ॥ मंदबुद्धिरहं कृष्णप्रेम किंकिं न कारयेत् ॥ ४ ॥ ॥ इति श्रीमद्भागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वादशस्कंधे त्रयोदशोऽध्यायः ॥ १३ ॥

॥ संपूर्णोऽयं ग्रन्थः ॥ ॥ श्रीमद्वेंकटेशार्पणमस्तु ॥

भगवद्भक्तानां वत्सला प्रिया ताम् (१)। स्वबालस्य मम चपलालापैर्बाल्यमतिप्रयुक्तैः शब्दैः स्वेनैव लीलया परिनर्तितैर्मन्मुखात्पाठितैः (२) तदेवाह–तन्मतेन श्रीपरानन्दनृसिंहमतेन । तत्प्रसादावाप्तज्ञानेनेत्यर्थः । श्रीशुकदेवं प्रणमति–योगीन्द्राय भक्तिज्ञानकर्माष्टांगात्मकयोगचतुष्कविदां महामुख्याय । ब्रह्मरूपिणे परब्रह्मस्वरूपाय । संसारसपर्दष्टं विष्णुरातमिति–यथार्जुनोद्भवमोहं गीतैकादशोपदेशेन भगवान्निवर्तयामास, तथैव परीक्षित्संसारं शुक इति प्राकृतलोकप्रतीत्यैवोक्तिः । वस्तुतस्तु त्रयाणामेव भगवन्नित्यपार्षदत्वान्न संसारशङ्कागन्धोऽपि किन्तु जीवहितग्राहणचातुर्यधुरंधराणां महतां कमप्येकं महाप्रसिद्धं जनमवलम्ब्यैव हितोपदेशसन्ततिरिति नीतिर्दृष्टाऽत एवेह–विष्णुरातमिति प्रयुक्तम् । युधिष्ठिराय कृपया रातं दत्तं स्वयं गृहीतो वा यस्तस्य संसारः कः खलु मन्दबुद्धिराशङ्केतेति भावः । किञ्च–सर्पविषहरा मंत्रा यथा लोकेऽर्थज्ञानमपि नापेक्षन्ते, तथैवार्थं जानातु न जानातु वा श्रीभागवतीयाः शब्दा एव संसारविषं निर्मूलयन्तीत्याचार्याभिप्रायो द्रष्टव्योऽत्रेति ॥ २१ ॥ (२२) (२३) ॥ इति श्रीखरडपत्तनवास्तव्यपण्डितवंशीधरशर्मविरचिते श्रीमद्भागवतभावार्थदीपिकाप्रकाशे द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाऽस्य श्रवणमाहात्म्यम् ॥ विष्णुरुवाच ॥ द्वादशस्कन्धश्रवणपुण्यसंख्या न विद्यते ॥ यतोऽयमात्मा मे ब्रह्मञ्जगद्भर्तुर्जगद्गुरोः ॥ १ ॥ इहेतिहासं वक्ष्यामि भृगुक्षेत्रे नृपोऽभवत् ॥ सूर्यरश्मिरिति ख्यातः सूर्य
तुल्यपराक्रमः ॥२॥ यज्ञानां च शतं तेन कृतं दत्तं गवां शतम् ॥ विप्रकन्यासहस्राणां विवाहास्तेन कारिताः ॥३॥ नित्यं शृणोति स कथां व्यासं कृत्वा द्विजोत्तमम् ॥ देवदत्त इति ख्यातं शान्तं दक्षः प्रतापवान् ॥ ४ ॥
॥ ब्रह्मोवाच ॥ व्यासस्य लक्षणं ब्रूहि कथं श्राव्या कथा प्रभो ॥ ५ ॥ हरिरुवाच ॥ रागद्वेषविनिर्मुक्तः शास्त्रज्ञो विष्णुपूजकः ॥ अंगैरविकलो धीरो ब्राह्मणः सत्यभाषणः ॥ ६ ॥ गृहस्थोऽध्यापनरत ऊर्ध्वपुंड्रधर
स्तथा ॥ व्यासः प्रोक्तः श्रोतृजनाह्लादकृत्प्रियदर्शनः ॥ ७ ॥ तन्मुखेन श्रुता गाथा सर्वसिद्धिप्रदा भवेत् ॥ अवैष्णवमुखाद्गाथा न श्रोतव्या कदाचन ॥ ८ ॥ शुकशास्त्रं विशेषेण न श्रोतव्यमवैष्णवात् ॥
ब्राह्मणा वैष्णवा मुख्या यतो विष्णुमुखोद्भवाः ॥ विप्रैः कृता वैष्णवास्तु त्रयो वर्णा भवंति हि ॥ ९ ॥ विप्रोऽत्र वैष्णवो ग्राह्यो यश्च विष्णोरुपासकः ॥ वैदिकेन विधानेन दयालुः समदर्शनः ॥ १० ॥ भेदं न कुरुते
यस्तु दुर्गाविष्णुशिवादिषु ॥ ब्रह्मत्वेनैव जानाति वैष्णवः स परो मतः ॥ ११ ॥ विप्रेतरमुखाच्छास्त्रं श्रुतं हि नरकप्रदम् ॥ राष्ट्रे यस्य तु शृण्वंति गाथां विप्रेतरेरिताम् ॥ तस्य राज्ञो भवेद्धानिरतः संश्रृणुयाद्द्विजात् ॥
॥ १२ ॥ ये शूद्रमुखतः शास्त्रं शृण्वंति हि नराधमाः ॥ तेषां कर्णे त्रपु सिक्त्वा वक्तुर्जिह्वां प्रकर्तयेत् ॥ १३ ॥ पराशराद्या मुनय इत्थमेय वदंति हि ॥ यावद्विप्रमुखे शास्त्रं शास्त्रत्वं तावदेव हि ॥ विप्रेतरगतं शास्त्रम
शास्त्रत्वं प्रपद्यते ॥ १४ ॥ यथा पतिरता साध्वी स्वैरिणी स्यात्ततोऽन्यथा ॥ तथा विप्रकृता गाथा तदन्या स्यात्प्रहेलिका ॥ १५ ॥ वक्तारं तोषयेन्नित्यं वस्त्रान्नाभरणादिभिः ॥ दुर्वाक्यं न वदेत्क्वापि व्यासं
विष्णुस्वरूपिणम् ॥ १६ ॥ ये तु व्यासासनं मोहादाक्रामंति द्विजेतराः ॥ पच्यंते ते महामूढा निरये बहुवत्सरम् ॥ १७ ॥ व्यासासनोपवेशाच्च शालग्रामशिलार्चनात् ॥ कपिलाक्षीरपानाच्च ब्राह्मणीगमनात्तथा ॥
॥ १८ ॥ वेदाक्षरोच्चारणाच्च शूद्रश्चांडालतां व्रजेत् ॥ विप्रस्यैवाधिकारोस्ति व्यासासनसमाक्रमे ॥ १९ ॥ वक्त्रा समं न चैवोच्चं श्रोतॄणामिष्टमासनम् ॥ समासनात्पुण्यहानिरुच्चाच्च निरयं व्रजेत् ॥ २० ॥ श्रोतव्यं
मौनमाश्रित्य नरैर्नियतमानसैः ॥ वाग्वादकरणाद्गाथा नीरसा जायते स्फुटम् ॥ २१ ॥ गाथारसविघातेन पशुत्वं लभते पुमान् ॥ पौराणिक्यां कथायां च न कार्याः कथता सह ॥ २२ ॥ पूर्वपक्षाश्च सिद्धांताः पर
स्पराजिगीषया ॥ नाम्ना शुकोदरो विप्रस्तेन जातो विहंगमः ॥ २३ ॥ वामदेवस्य शिष्योऽपि पूर्वकल्पे वसुंधरे ॥ इत्येवं कथितं ब्रह्मन्वाराहे हरिणा मया ॥ २४ ॥ कथायां सम्प्रवृत्तायामितिहासपुराणयोः ॥ योऽन्यः
किञ्चिदपि ब्रूते विना वक्तारमत्र हि ॥ २५ ॥ स वाग्वाद इति प्रोक्तः कथारसविघातकः ॥ वाग्वादात्स्यात्कथभंगो ब्रह्महत्यासमो हि सः ॥ २६ ॥ पृच्छेत्कथान्ते सन्देहं न कथायां कदाचन ॥ श्रोता जनः
कथाभङ्गभयान्मौनं समाश्रयेत् ॥ २७ ॥ पाद्मे पुराणे संप्रोक्तं शङ्करेण स्वयं द्विजाः ॥ श्रीमते रामचन्द्राय परब्रह्मस्वरूपिणे ॥ २८ ॥ वाग्देवता भवेत्क्रुद्धा कथाया भंगमात्रतः ॥ तेन जन्मान्तरे मूकः पुनर्मूढस्त्रिज
न्मसु ॥ वायसो वा भवेदन्यो वक्तुर्वक्ता तथा वदेत् ॥ २९ ॥ पुराणानां पूजकस्तु हेमान्नवसनादिभिः ॥ वैष्णवं पदमाप्नोति कर्तव्यो नात्र संशयः ॥ ३० ॥ श्रोतुर्दानमनंत्याय वक्तुर्नैव प्रतिग्रहः ॥ श्लोकैकश्रवणे
यस्य रत्नकोटिर्न निष्क्रिया ॥ ३१ ॥ सर्वस्व तस्य यो वक्ता प्रतिग्राही कथं हि सः ॥ गृहीतेऽनुपकर्ता यो ज्ञेयः स च प्रतिग्रही ॥ ३२ ॥ विधातरित्थं प्रोवाच यथा प्रोक्तं मया तव ॥ देवदत्तः सूर्यरश्मिं ब्राह्मणानां विशेष
ताम् ॥ ३३ ॥ स सूर्यरश्मिनृपतिः श्रुत्वा प्रोवाच तं द्विजम् ॥ असदुक्तं त्वया गर्वाद्यच्छ्रैष्ठ्यं हि द्विजन्मनाम् ॥ ३४ ॥ त्वत्तोपि शोभनां गाथां करिष्यामि न संशयः ॥ त्वमुत्तिष्ठासनादस्मादित्थं व्यासं तिरोऽ

१ वृद्व्यभाव आर्षः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करोत् ॥३५॥ आशीर्दत्त्वा च राजानं गतो गेहं द्विजोत्तमः ॥ न च राज्ञा समाहूतो न च विप्रः स्वयं गतः ॥ ३६ ॥ मासद्वयांते राज्ञा हि कृतो वक्ताऽपरो विधे ॥ व्यासावज्ञानदोषेण स राजा नरकं गतः ॥ ३७ ॥ तद्भुक्त्वा वर्षनियुतं तदंते स मृगोऽभवत् ॥ जातिस्मरः पूर्वपुण्यैः स्वजातौ न मिलत्यसौ ॥ ३८ ॥ नित्यं स्नात्वा तीर्थजले भानुं नत्वा पुनःपुनः ॥ तपोधनाश्रमं प्राप्य निःश्वसंश्च स्थितोऽभवत् ॥ ३९ ॥ प्रातः स्नातुं मुनिवरो विश्वेश्वर इति श्रुतः ॥ एकदा गतवांस्तीरे नद्यास्तत्र समागतः ॥ ४० ॥ तदैव मृग आगत्य स्नात्वा सूर्यं ननाम सः ॥ तदद्भुतमृषिर्दृष्ट्वा प्रोवाच हरिणं तदा ॥ ४१ ॥ को भवान्मृगरूपेण श्रुत्वा जातिस्मरो मृगः ॥ प्रोवाच नरवाचा तु त्यजन्नश्रुगणं मुहुः ॥ ४२ ॥ मृग उवाच ॥ भृगुक्षेत्राधिपोऽभूवं नाम्नाहं सूर्यरश्मिकः ॥ धर्मात्मा मुनिशार्दूल कुर्वे व्यासद्विजं तिरः ॥ ४३ ॥ तदंहसः प्रभावेण नरकान्गतवानहम् ॥ तदन्ते मृगयोनौ च प्राप्तोऽहं शृणु मे वचः ॥ ४४ ॥ इति श्रुत्वा मुनिवरः प्रोक्तवान्मृगसत्तमम् ॥ अन्येषां पापसंघानां निष्कृतिर्विहिता बुधैः ॥ ४५ ॥ न च व्यासतिरस्कर्तुर्निष्कृतिर्विद्यते भुवि ॥ परन्त्वेक उपायोऽस्ति शृणु मृगकुलसत्तम ॥ ४६ ॥ द्वादशस्कन्धश्रवणं कुरु भागवतस्य हि ॥ तेन स्यात्तव मानुष्यमिति सत्यं ब्रवीम्यहम् ॥ ४७ ॥ इति श्रुत्वा मृगस्तस्य पादयोः पतितस्तदा ॥ विश्वेश्वरो मुनिस्तस्य शिरसि प्रददौ करम् ॥ ४८ ॥ द्वादशश्रवणाच्चैव मुनिहस्तस्य संगमात् ॥ क्रोशंतो दग्धपक्षाश्च तद्देहान्निःसृतास्तदा ॥ ४९ ॥ काका मह्यां तत्र पेतुः स निष्पापोऽभवत्तदा ॥ आगामिजन्मनि भवान्वैश्यतामाप्स्यति ध्रुवम् ॥ ५० ॥ धनी भागवतं दत्त्वा विप्राय प्राप्स्यसे परम् ॥ इति प्रोवाच स मुनिर्देहांते सोऽभवत्तथा ॥ ५१ ॥ अथ दानप्रकारं ते वक्ष्ये ब्रह्मन्यथाविधि ॥ लिखित्वा लेखयित्वा वा दद्याद्विप्राय पुस्तकम् ॥ ५२ ॥ द्वादशस्कंधसंयुक्तं श्रीमद्भागवतस्य च ॥ रौप्यपट्टकसंयुक्तं कौशेयाच्छादितं शुभम् ॥ ५३ ॥ हेमसिंहासने स्थाप्य चतुर्विंशतिकर्षके ॥ विष्णुभक्ताय दातव्यं पुत्रपौत्रयुताय वै ॥ वस्त्रालंकारसहितं शास्त्रज्ञाय द्विजाय च ॥ ५४ ॥ अश्वमेधायुतोत्पन्नं पुण्यं तेन समं नहि ॥ यदेकश्लोकदानेन श्रीमद्भागवतस्य हि ॥ ५५ ॥ नित्यं गोदानलक्षैश्च यत्फलं प्राप्यते नरैः ॥ तदेकश्लोकदानेन दुर्लभं नहि पद्मज ॥ ५६ ॥ सर्वं भागवतं येन दत्तं लोके महात्मना ॥ तस्य पुण्यस्य या संख्या तां वक्तुं कोऽपि न क्षमः ॥ ५७ ॥ इति ज्ञात्वा नरैर्देयं श्रीमद्भागवतं कलौ ॥ सर्वयागविहीनेऽस्मिन्यागोऽयं सुलभः खलु ॥ ५८ ॥ शेषवृत्तं शृणु विधे स्थिरो भूत्वाऽद्भुतं पुनः ॥ वैश्यदेहं मृगो लब्ध्वा जातिस्मरणमागतः ॥ ५९ ॥ विप्रं श्रीरंगशर्माणं व्यासं कृत्वा महादरात् ॥ श्रुत्वा भागवतं तस्माद्दत्तवान्पुस्तकं विधे ॥ तस्मा एव तदा वैश्यस्ततो मत्साम्यमाप सः ॥ ६० ॥ ब्रह्मोवाच ॥ इत्थं श्रुतं मया विष्णोः श्रीमद्भागवते फलम् ॥ त्वत्प्रीत्या कथितं तुभ्यं वत्सैतद्दुर्लभं भुवि ॥ ६१ ॥ श्रीमद्भागवते शास्त्रे श्रीकृष्णे परमात्मनि ॥ अंतरं ये प्रपश्यंति ते नरा ब्रह्मघातिनः ॥ ६२ ॥ इति श्रीमत्पाद्ममहापुराणीयं श्रीमद्भागवतद्वादशस्कन्धमाहात्म्यं सम्पूर्णम् ॥ ॥

अथ टीकाकृद्वंशवर्णनम् ॥ भुवनपालनतत्परमानसाद्विरिवराजलपस्य दिशि स्थितम् ॥ हरविलोचनयोजनभूमिके रघुसुतस्य नृपस्य सरोवरम् ॥१॥ निखिलपापहरं प्लवनादिना तदुपकंठगतं शुभपत्तनम् ॥ खरडनामकमस्ति जनैर्युतं श्रुतिविधानपरायणमानसैः ॥ २ ॥ तस्मिन्पुरे विप्रगणाग्रगण्य उवास विप्रो **बलराम**शर्मा ॥ तदात्मजो **भूधर**नामधेयः स्वाचारनिष्ठोऽखिलशास्त्रवेत्ता ॥ ३ ॥ गौरीशपादांबुजदत्तचेता **गौरीप्रसाद**स्तु ततो बभूव ॥ तत्सूनुरौदार्यगुणेन युक्तो जातः सुकर्मा **सुखदेव**शर्मा ॥ ४ ॥ तद्देहजो निगमविद्व**जराज**शर्मा यो ह्यन्ववायशुभदीपक आविरासीद् ॥ धर्मात्मकं मधुरिपोरनुगं स **निक्काराम**ं ह्यवाप तनयं विनयोपपन्नम् ॥ ५ ॥ तस्माद्**वंशीधरो** जातो गोत्रे कौशिकसंज्ञके ॥ गौडवंशे नंदसूनुपादध्यानपरायणः ॥ ६ ॥ तेनायं ग्रथितः कृष्णकृपया ग्रंथसागरः ॥ श्रीधरस्वामिभावार्थदीपिकायाः प्रकाशकः ॥ ७ ॥ व्याख्यापुष्पमयी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माला श्रीवंशीधरशर्मणा ॥ समर्पिता कृष्णकंठे प्रीत्योपादेहि ते मया ॥ ८ ॥ श्रीकृष्णनाथ परिपूरय चिंतितं श्रीराधापते न कठिनं तव किंचिदस्तिं ॥ त्वद्ध्याननिष्ठमनसो मम यातु कालो वृन्दावनेश व्रजमंडल गस्य नित्यम् ॥ ९ ॥ श्रीवृन्दावनचंद्रस्य वृषार्कतनयापतेः ॥ प्रीत्यर्थं च कृतं ग्रंथं शृणोतु श्रीहरिः स्वयम् ॥ १० ॥ वृषभानुसुतानाथ मामाहूय कृतिं मम ॥ वृंदावने शृणु विभो हृदयेश निजप्रिय ॥ ११ ॥ यदत्र सौष्ठवं ग्रन्थे तद्गुरोरेव मे नहि ॥ यदत्रासौष्ठवं किंचित्तन्ममैव गुरोर्नहि ॥ १२ ॥ सर्वाणि प्राक्तनान्येत्र पदवाक्याक्षराणि वै ॥ कर्तृत्वं मेऽस्ति ग्रंथेस्मिंस्तेषां योजनमात्रतः ॥ १३ ॥ प्रमाणीभूतवाक्यानि पूर्वाचार्यकृतान्यपि ॥ निजग्रंथप्रकाशेन पूर्वाचार्या मतिप्रदाः ॥ १४ ॥ संति मे गुरवः सर्वे गुरवः पितरो मताः ॥ पित्रर्जितस्वे पुत्रस्य यथा स्वत्वं तथैव मे ॥ १५ ॥ तेषां कृतौ स्वकर्तृत्वाभिमानो विदुषां वराः ॥ अन्यथा पितुरर्थेषु पुत्रस्यापि न तद्भवेत् ॥ १६ ॥ श्रीकृष्णकृपया चेयं प्रसृतास्त्वखिलेषु च ॥ विज्ञेषु ते हि चात्रत्यन्यूनतां पूरयंतु वै ॥ १७ ॥ मय्यल्पज्ञे कृपां कृत्वा निजसौष्ठवभावतः ॥ भवन्त्येवर्जुतत्त्वज्ञे पण्डिताः सुदयोदयाः ॥ १८ ॥ इति श्रीमन्महाराजनाभानरेशहीरासिंहमालवेन्द्रबहादुराश्रितश्रीखरडनगरवास्तव्यकौशिकगोत्रोद्भूतगौडवंशीधरशर्मसंदृब्ध–श्रीमद्भागवतश्रीधरस्वामिविरचितभावार्थदीपिकाप्रकाशः समाप्तः ॥ शराम्नायाङ्कशीतांशुमिते संवत्सरोर्जके ॥ सिते विष्णुतिथौ पूर्णो वृन्दारकगुरोर्दिने ॥ १ ॥ मंगलं भगवान्विष्णुर्मंगलं गरुडध्वजः ॥ मंगलं पुंडरीकाक्षो मंगलायतनो हरिः ॥ २ ॥ प्रीयतामनेन श्रीकृष्णः ॥ समाप्तश्चायं ग्रन्थः ॥

अयं श्रीभावार्थदीपिकाप्रकाशसमलंकृतभावार्थदीपिकासमेतश्रीमद्भागवतद्वादशस्कन्धो मुम्बय्यां श्रीकृष्णदासात्मज–क्षेमराजश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर"–(स्टीम्) मुद्रणालये मुद्रयित्वा प्राकाश्यमानीयत।

संवत् १९६५, शाके १८३०, भाद्रे ३०।

अस्य पुनर्मुद्रणादिसर्वाधिकाराः "श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालयाध्यक्षेण खेमराज–श्रीकृष्णदास–इत्येतेन श्रेष्ठिना राजकीयनियमानुसारेण स्वाधीनीकृताः सन्ति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जाहिरात ।

शुक्रनीति भाषाटीका ।

यह राजनीत्युपयोगी ग्रंथ अत्युत्तम भाषानुवाद कराय स्वच्छतापूर्वक मुद्रितकी है, विशेषकर नीतिदर्शियोंको तो अवश्यही देखने योग्य है, मूल्य केवल २ रु० मात्र है ।

मनुस्मृति ।

पं० केशवप्रसाद प्रोफेसर आगरा कालेज कृत भाषाटीकासहित ।

इस उत्तम ग्रंथका सान्वय भाषा अत्युत्तम हुआहै यह पुस्तक प्राणीमात्रको परमोपयोगीहै, राजा महाराजा भी इसीके अनुसार धर्मपूर्वक शासन करते हैं यह ग्रंथ देखनेहीके योग्यहै भाषा अत्यन्त सुगम और रसीली है. कीमत ग्लेजकी २॥ रु०रफ की २ रु०

याज्ञवल्क्यस्मृति मिताक्षरा पं० मिहिरचंदकृत पद, योजना, भावार्थ और तात्पर्यार्थ और टिप्पणी तथा भाषाटीका सहित अत्युत्तम की० ५ रु०

रघुवंश भाषाटीकासहित ।

पदयोजना तात्पर्य्यार्थ सरलार्थ भाषानुवाद तथा गूढाशयोंमें टिप्पणी समन्वितकर अतीव स्वच्छता पूर्वक छापाहै ऐसा विद्यार्थियों के उपयोगी ग्रंथ आजतक अन्यत्र नहीं छपा मूल्य केवल ३॥ रु. हैं।

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास,

“श्रीवेङ्कटेश्वर” छापाखाना–मुंबई.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रय्यपुस्तकानि—(पुराणग्रन्थाः।)

ब्रह्मपुराण—संपूर्ण मूल संस्कृत .... ६)

पद्मपुराण—संपूर्ण ५५००० ग्रंथ छः खंडोंमें शुद्धतापूर्वक, कईएक व्रतादिमाहात्म्य, तीर्थमाहात्म्य, शिवविष्णु महिमा, रुद्राक्ष तुलसी माहात्म्यादि सृष्टिखंड, भूमिखंड, स्वर्गखंड, ब्रह्मखंड, पातालखंड उत्तरखंड क्रियायोगखंडमें सांगोपांग वर्णन है, यह ग्रंथ वैष्णवोंके अत्यन्त उपयागा है १५)

शिवपुराण—पं० ज्वालाप्रसाद मिश्रकृत भाषाटीकासमेत ... ... १५)

शिवपुराणमाहात्म्य—मूल ... . ≡)

अग्निपुराण—इसमें शास्त्रकलाओंका संक्षेप वर्णन सर्वदेवताओंकी प्रतिष्ठा लक्षकोटि आदि होम, शिल्पशास्त्र, राजधर्म, राजनीति, युद्धरचना, भारतसार, रामायणसार, ईश्वरावतार; सर्वतिथिवारनक्षत्रादि व्रत षट्प्रयोग, गन्धर्ववेद, भरतशास्त्र, काव्य नाटकभेद, स्त्रीशिक्षा, रत्नादिपरीक्षा, वेदशास्त्रादि बहुतसे विषयोंका अपूर्व वर्णन है ... . ४)

ब्रह्मवैवर्तपुराण—संपूर्ण चारोंखण्ड—इसमें श्रीकृष्णजीके अपूर्व चरित्र कथा स्तोत्रादि और नारदादिकी उत्पत्ति, गंगोपाख्यान, सावित्र्युपाख्यान, लक्ष्मीकी उत्पत्ति मनसादेवी उपाख्यान, गणपति उत्पत्ति और कथा। कृष्णजन्मखंडमें श्रीकृष्णलीला और रासोत्सवादि वर्णनहै .... ६)

मार्कंडेयपुराण—सप्तशती शान्तनवीटीकासह इसमें मार्कंडेय और जैमिनिका सत्संग और संवाद अप्सराओंपर दुर्वासामुनिका शाप कंकके मारे जानेपर विद्युत्रूप राक्षसका माराजाना। पक्षियोंके जन्म और चरित्र और देवीजीका माहात्म्य संयुक्त है .... ४)

वाराहपुराण—धर्म अर्थ काम मोक्षादि सिद्धहोनेके लिये इतिहास संयुक्त कथाओंका वर्णन है .... ४)

मत्स्यपुराण—जगत्की रचनाकेहेतु और मत्स्यावतार धारण करनेका कारण प्रलय होनेका कालपूर्वक वर्णन ब्रह्माके चारमुख होनेका कारण और दानवगंधर्वकी उत्पत्ति सूर्यवंश चंद्रवंशका वर्णन इत्यादि कथाहैं .... ६)

ब्रह्मांडपुराण—संपूर्ण .... ६)

वायुपुराण—इसमें अनेक विषय संयुक्त देवादि सृष्टिवर्णन मन्वन्तरादि चतुर्युगाख्यान पृथुवंशकीर्तन श्राद्धक्रिया वर्णन और गयामाहात्म्यादि बहुतसे विषयहैं .... ६)

श्रीमद्भागवत—श्रीधरीटीका और टिप्पणीसह, ग्लेज कागज .... १०)

पुस्तक मिलनेका ठिकाना—खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस—बंबई.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीमद्भागवतं श्रीधरीयटीकया पं० वंशीधरशर्मकृततद्भावार्थदीपिकाप्रकाशटीकया चोपेतम् ॥

महाराजनाभाधीशश्री १०८ श्रीहीरासिंहजीत्यस्य साहाय्येनेदं मुद्रितम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=07.10.19 12:50
,TRANSFERRED=2019/10/07 at 15:30:32
,PAGES=1015
,TYPE=STD
,NAME=S0001984
,Book Name=2
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF
,FILE440=00000440.TIF
,FILE441=00000441.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE467=00000467.TIF
,FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF
,FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,FILE478=00000478.TIF
,FILE479=00000479.TIF
,FILE480=00000480.TIF
,FILE481=00000481.TIF
,FILE482=00000482.TIF
,FILE483=00000483.TIF
,FILE484=00000484.TIF
,FILE485=00000485.TIF
,FILE486=00000486.TIF
,FILE487=00000487.TIF
,FILE488=00000488.TIF
,FILE489=00000489.TIF
,FILE490=00000490.TIF
,FILE491=00000491.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE492=00000492.TIF
,FILE493=00000493.TIF
,FILE494=00000494.TIF
,FILE495=00000495.TIF
,FILE496=00000496.TIF
,FILE497=00000497.TIF
,FILE498=00000498.TIF
,FILE499=00000499.TIF
,FILE500=00000500.TIF
,FILE501=00000501.TIF
,FILE502=00000502.TIF
,FILE503=00000503.TIF
,FILE504=00000504.TIF
,FILE505=00000505.TIF
,FILE506=00000506.TIF
,FILE507=00000507.TIF
,FILE508=00000508.TIF
,FILE509=00000509.TIF
,FILE510=00000510.TIF
,FILE511=00000511.TIF
,FILE512=00000512.TIF
,FILE513=00000513.TIF
,FILE514=00000514.TIF
,FILE515=00000515.TIF
,FILE516=00000516.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE517=00000517.TIF
,FILE518=00000518.TIF
,FILE519=00000519.TIF
,FILE520=00000520.TIF
,FILE521=00000521.TIF
,FILE522=00000522.TIF
,FILE523=00000523.TIF
,FILE524=00000524.TIF
,FILE525=00000525.TIF
,FILE526=00000526.TIF
,FILE527=00000527.TIF
,FILE528=00000528.TIF
,FILE529=00000529.TIF
,FILE530=00000530.TIF
,FILE531=00000531.TIF
,FILE532=00000532.TIF
,FILE533=00000533.TIF
,FILE534=00000534.TIF
,FILE535=00000535.TIF
,FILE536=00000536.TIF
,FILE537=00000537.TIF
,FILE538=00000538.TIF
,FILE539=00000539.TIF
,FILE540=00000540.TIF
,FILE541=00000541.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE542=00000542.TIF
,FILE543=00000543.TIF
,FILE544=00000544.TIF
,FILE545=00000545.TIF
,FILE546=00000546.TIF
,FILE547=00000547.TIF
,FILE548=00000548.TIF
,FILE549=00000549.TIF
,FILE550=00000550.TIF
,FILE551=00000551.TIF
,FILE552=00000552.TIF
,FILE553=00000553.TIF
,FILE554=00000554.TIF
,FILE555=00000555.TIF
,FILE556=00000556.TIF
,FILE557=00000557.TIF
,FILE558=00000558.TIF
,FILE559=00000559.TIF
,FILE560=00000560.TIF
,FILE561=00000561.TIF
,FILE562=00000562.TIF
,FILE563=00000563.TIF
,FILE564=00000564.TIF
,FILE565=00000565.TIF
,FILE566=00000566.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE567=00000567.TIF
,FILE568=00000568.TIF
,FILE569=00000569.TIF
,FILE570=00000570.TIF
,FILE571=00000571.TIF
,FILE572=00000572.TIF
,FILE573=00000573.TIF
,FILE574=00000574.TIF
,FILE575=00000575.TIF
,FILE576=00000576.TIF
,FILE577=00000577.TIF
,FILE578=00000578.TIF
,FILE579=00000579.TIF
,FILE580=00000580.TIF
,FILE581=00000581.TIF
,FILE582=00000582.TIF
,FILE583=00000583.TIF
,FILE584=00000584.TIF
,FILE585=00000585.TIF
,FILE586=00000586.TIF
,FILE587=00000587.TIF
,FILE588=00000588.TIF
,FILE589=00000589.TIF
,FILE590=00000590.TIF
,FILE591=00000591.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE592=00000592.TIF
,FILE593=00000593.TIF
,FILE594=00000594.TIF
,FILE595=00000595.TIF
,FILE596=00000596.TIF
,FILE597=00000597.TIF
,FILE598=00000598.TIF
,FILE599=00000599.TIF
,FILE600=00000600.TIF
,FILE601=00000601.TIF
,FILE602=00000602.TIF
,FILE603=00000603.TIF
,FILE604=00000604.TIF
,FILE605=00000605.TIF
,FILE606=00000606.TIF
,FILE607=00000607.TIF
,FILE608=00000608.TIF
,FILE609=00000609.TIF
,FILE610=00000610.TIF
,FILE611=00000611.TIF
,FILE612=00000612.TIF
,FILE613=00000613.TIF
,FILE614=00000614.TIF
,FILE615=00000615.TIF
,FILE616=00000616.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE617=00000617.TIF
,FILE618=00000618.TIF
,FILE619=00000619.TIF
,FILE620=00000620.TIF
,FILE621=00000621.TIF
,FILE622=00000622.TIF
,FILE623=00000623.TIF
,FILE624=00000624.TIF
,FILE625=00000625.TIF
,FILE626=00000626.TIF
,FILE627=00000627.TIF
,FILE628=00000628.TIF
,FILE629=00000629.TIF
,FILE630=00000630.TIF
,FILE631=00000631.TIF
,FILE632=00000632.TIF
,FILE633=00000633.TIF
,FILE634=00000634.TIF
,FILE635=00000635.TIF
,FILE636=00000636.TIF
,FILE637=00000637.TIF
,FILE638=00000638.TIF
,FILE639=00000639.TIF
,FILE640=00000640.TIF
,FILE641=00000641.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE642=00000642.TIF
,FILE643=00000643.TIF
,FILE644=00000644.TIF
,FILE645=00000645.TIF
,FILE646=00000646.TIF
,FILE647=00000647.TIF
,FILE648=00000648.TIF
,FILE649=00000649.TIF
,FILE650=00000650.TIF
,FILE651=00000651.TIF
,FILE652=00000652.TIF
,FILE653=00000653.TIF
,FILE654=00000654.TIF
,FILE655=00000655.TIF
,FILE656=00000656.TIF
,FILE657=00000657.TIF
,FILE658=00000658.TIF
,FILE659=00000659.TIF
,FILE660=00000660.TIF
,FILE661=00000661.TIF
,FILE662=00000662.TIF
,FILE663=00000663.TIF
,FILE664=00000664.TIF
,FILE665=00000665.TIF
,FILE666=00000666.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE667=00000667.TIF
,FILE668=00000668.TIF
,FILE669=00000669.TIF
,FILE670=00000670.TIF
,FILE671=00000671.TIF
,FILE672=00000672.TIF
,FILE673=00000673.TIF
,FILE674=00000674.TIF
,FILE675=00000675.TIF
,FILE676=00000676.TIF
,FILE677=00000677.TIF
,FILE678=00000678.TIF
,FILE679=00000679.TIF
,FILE680=00000680.TIF
,FILE681=00000681.TIF
,FILE682=00000682.TIF
,FILE683=00000683.TIF
,FILE684=00000684.TIF
,FILE685=00000685.TIF
,FILE686=00000686.TIF
,FILE687=00000687.TIF
,FILE688=00000688.TIF
,FILE689=00000689.TIF
,FILE690=00000690.TIF
,FILE691=00000691.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE692=00000692.TIF
,FILE693=00000693.TIF
,FILE694=00000694.TIF
,FILE695=00000695.TIF
,FILE696=00000696.TIF
,FILE697=00000697.TIF
,FILE698=00000698.TIF
,FILE699=00000699.TIF
,FILE700=00000700.TIF
,FILE701=00000701.TIF
,FILE702=00000702.TIF
,FILE703=00000703.TIF
,FILE704=00000704.TIF
,FILE705=00000705.TIF
,FILE706=00000706.TIF
,FILE707=00000707.TIF
,FILE708=00000708.TIF
,FILE709=00000709.TIF
,FILE710=00000710.TIF
,FILE711=00000711.TIF
,FILE712=00000712.TIF
,FILE713=00000713.TIF
,FILE714=00000714.TIF
,FILE715=00000715.TIF
,FILE716=00000716.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE717=00000717.TIF
,FILE718=00000718.TIF
,FILE719=00000719.TIF
,FILE720=00000720.TIF
,FILE721=00000721.TIF
,FILE722=00000722.TIF
,FILE723=00000723.TIF
,FILE724=00000724.TIF
,FILE725=00000725.TIF
,FILE726=00000726.TIF
,FILE727=00000727.TIF
,FILE728=00000728.TIF
,FILE729=00000729.TIF
,FILE730=00000730.TIF
,FILE731=00000731.TIF
,FILE732=00000732.TIF
,FILE733=00000733.TIF
,FILE734=00000734.TIF
,FILE735=00000735.TIF
,FILE736=00000736.TIF
,FILE737=00000737.TIF
,FILE738=00000738.TIF
,FILE739=00000739.TIF
,FILE740=00000740.TIF
,FILE741=00000741.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE742=00000742.TIF
,FILE743=00000743.TIF
,FILE744=00000744.TIF
,FILE745=00000745.TIF
,FILE746=00000746.TIF
,FILE747=00000747.TIF
,FILE748=00000748.TIF
,FILE749=00000749.TIF
,FILE750=00000750.TIF
,FILE751=00000751.TIF
,FILE752=00000752.TIF
,FILE753=00000753.TIF
,FILE754=00000754.TIF
,FILE755=00000755.TIF
,FILE756=00000756.TIF
,FILE757=00000757.TIF
,FILE758=00000758.TIF
,FILE759=00000759.TIF
,FILE760=00000760.TIF
,FILE761=00000761.TIF
,FILE762=00000762.TIF
,FILE763=00000763.TIF
,FILE764=00000764.TIF
,FILE765=00000765.TIF
,FILE766=00000766.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE767=00000767.TIF
,FILE768=00000768.TIF
,FILE769=00000769.TIF
,FILE770=00000770.TIF
,FILE771=00000771.TIF
,FILE772=00000772.TIF
,FILE773=00000773.TIF
,FILE774=00000774.TIF
,FILE775=00000775.TIF
,FILE776=00000776.TIF
,FILE777=00000777.TIF
,FILE778=00000778.TIF
,FILE779=00000779.TIF
,FILE780=00000780.TIF
,FILE781=00000781.TIF
,FILE782=00000782.TIF
,FILE783=00000783.TIF
,FILE784=00000784.TIF
,FILE785=00000785.TIF
,FILE786=00000786.TIF
,FILE787=00000787.TIF
,FILE788=00000788.TIF
,FILE789=00000789.TIF
,FILE790=00000790.TIF
,FILE791=00000791.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE792=00000792.TIF
,FILE793=00000793.TIF
,FILE794=00000794.TIF
,FILE795=00000795.TIF
,FILE796=00000796.TIF
,FILE797=00000797.TIF
,FILE798=00000798.TIF
,FILE799=00000799.TIF
,FILE800=00000800.TIF
,FILE801=00000801.TIF
,FILE802=00000802.TIF
,FILE803=00000803.TIF
,FILE804=00000804.TIF
,FILE805=00000805.TIF
,FILE806=00000806.TIF
,FILE807=00000807.TIF
,FILE808=00000808.TIF
,FILE809=00000809.TIF
,FILE810=00000810.TIF
,FILE811=00000811.TIF
,FILE812=00000812.TIF
,FILE813=00000813.TIF
,FILE814=00000814.TIF
,FILE815=00000815.TIF
,FILE816=00000816.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE817=00000817.TIF
,FILE818=00000818.TIF
,FILE819=00000819.TIF
,FILE820=00000820.TIF
,FILE821=00000821.TIF
,FILE822=00000822.TIF
,FILE823=00000823.TIF
,FILE824=00000824.TIF
,FILE825=00000825.TIF
,FILE826=00000826.TIF
,FILE827=00000827.TIF
,FILE828=00000828.TIF
,FILE829=00000829.TIF
,FILE830=00000830.TIF
,FILE831=00000831.TIF
,FILE832=00000832.TIF
,FILE833=00000833.TIF
,FILE834=00000834.TIF
,FILE835=00000835.TIF
,FILE836=00000836.TIF
,FILE837=00000837.TIF
,FILE838=00000838.TIF
,FILE839=00000839.TIF
,FILE840=00000840.TIF
,FILE841=00000841.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE842=00000842.TIF
,FILE843=00000843.TIF
,FILE844=00000844.TIF
,FILE845=00000845.TIF
,FILE846=00000846.TIF
,FILE847=00000847.TIF
,FILE848=00000848.TIF
,FILE849=00000849.TIF
,FILE850=00000850.TIF
,FILE851=00000851.TIF
,FILE852=00000852.TIF
,FILE853=00000853.TIF
,FILE854=00000854.TIF
,FILE855=00000855.TIF
,FILE856=00000856.TIF
,FILE857=00000857.TIF
,FILE858=00000858.TIF
,FILE859=00000859.TIF
,FILE860=00000860.TIF
,FILE861=00000861.TIF
,FILE862=00000862.TIF
,FILE863=00000863.TIF
,FILE864=00000864.TIF
,FILE865=00000865.TIF
,FILE866=00000866.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE867=00000867.TIF
,FILE868=00000868.TIF
,FILE869=00000869.TIF
,FILE870=00000870.TIF
,FILE871=00000871.TIF
,FILE872=00000872.TIF
,FILE873=00000873.TIF
,FILE874=00000874.TIF
,FILE875=00000875.TIF
,FILE876=00000876.TIF
,FILE877=00000877.TIF
,FILE878=00000878.TIF
,FILE879=00000879.TIF
,FILE880=00000880.TIF
,FILE881=00000881.TIF
,FILE882=00000882.TIF
,FILE883=00000883.TIF
,FILE884=00000884.TIF
,FILE885=00000885.TIF
,FILE886=00000886.TIF
,FILE887=00000887.TIF
,FILE888=00000888.TIF
,FILE889=00000889.TIF
,FILE890=00000890.TIF
,FILE891=00000891.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE892=00000892.TIF
,FILE893=00000893.TIF
,FILE894=00000894.TIF
,FILE895=00000895.TIF
,FILE896=00000896.TIF
,FILE897=00000897.TIF
,FILE898=00000898.TIF
,FILE899=00000899.TIF
,FILE900=00000900.TIF
,FILE901=00000901.TIF
,FILE902=00000902.TIF
,FILE903=00000903.TIF
,FILE904=00000904.TIF
,FILE905=00000905.TIF
,FILE906=00000906.TIF
,FILE907=00000907.TIF
,FILE908=00000908.TIF
,FILE909=00000909.TIF
,FILE910=00000910.TIF
,FILE911=00000911.TIF
,FILE912=00000912.TIF
,FILE913=00000913.TIF
,FILE914=00000914.TIF
,FILE915=00000915.TIF
,FILE916=00000916.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE917=00000917.TIF
,FILE918=00000918.TIF
,FILE919=00000919.TIF
,FILE920=00000920.TIF
,FILE921=00000921.TIF
,FILE922=00000922.TIF
,FILE923=00000923.TIF
,FILE924=00000924.TIF
,FILE925=00000925.TIF
,FILE926=00000926.TIF
,FILE927=00000927.TIF
,FILE928=00000928.TIF
,FILE929=00000929.TIF
,FILE930=00000930.TIF
,FILE931=00000931.TIF
,FILE932=00000932.TIF
,FILE933=00000933.TIF
,FILE934=00000934.TIF
,FILE935=00000935.TIF
,FILE936=00000936.TIF
,FILE937=00000937.TIF
,FILE938=00000938.TIF
,FILE939=00000939.TIF
,FILE940=00000940.TIF
,FILE941=00000941.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE942=00000942.TIF
,FILE943=00000943.TIF
,FILE944=00000944.TIF
,FILE945=00000945.TIF
,FILE946=00000946.TIF
,FILE947=00000947.TIF
,FILE948=00000948.TIF
,FILE949=00000949.TIF
,FILE950=00000950.TIF
,FILE951=00000951.TIF
,FILE952=00000952.TIF
,FILE953=00000953.TIF
,FILE954=00000954.TIF
,FILE955=00000955.TIF
,FILE956=00000956.TIF
,FILE957=00000957.TIF
,FILE958=00000958.TIF
,FILE959=00000959.TIF
,FILE960=00000960.TIF
,FILE961=00000961.TIF
,FILE962=00000962.TIF
,FILE963=00000963.TIF
,FILE964=00000964.TIF
,FILE965=00000965.TIF
,FILE966=00000966.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE967=00000967.TIF
,FILE968=00000968.TIF
,FILE969=00000969.TIF
,FILE970=00000970.TIF
,FILE971=00000971.TIF
,FILE972=00000972.TIF
,FILE973=00000973.TIF
,FILE974=00000974.TIF
,FILE975=00000975.TIF
,FILE976=00000976.TIF
,FILE977=00000977.TIF
,FILE978=00000978.TIF
,FILE979=00000979.TIF
,FILE980=00000980.TIF
,FILE981=00000981.TIF
,FILE982=00000982.TIF
,FILE983=00000983.TIF
,FILE984=00000984.TIF
,FILE985=00000985.TIF
,FILE986=00000986.TIF
,FILE987=00000987.TIF
,FILE988=00000988.TIF
,FILE989=00000989.TIF
,FILE990=00000990.TIF
,FILE991=00000991.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE992=00000992.TIF
,FILE993=00000993.TIF
,FILE994=00000994.TIF
,FILE995=00000995.TIF
,FILE996=00000996.TIF
,FILE997=00000997.TIF
,FILE998=00000998.TIF
,FILE999=00000999.TIF
,FILE1000=00001000.TIF
,FILE1001=00001001.TIF
,FILE1002=00001002.TIF
,FILE1003=00001003.TIF
,FILE1004=00001004.TIF
,FILE1005=00001005.TIF
,FILE1006=00001006.TIF
,FILE1007=00001007.TIF
,FILE1008=00001008.TIF
,FILE1009=00001009.TIF
,FILE1010=00001010.TIF
,FILE1011=00001011.TIF
,FILE1012=00001012.TIF
,FILE1013=00001013.TIF
,FILE1014=00001014.TIF
,FILE1015=00001015.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection